Table of Contents

Kashika

1.1

अथ प्रथामाध्याये प्रथमः पादः

<वृद्धिरादैच् ।। 1.1.1 ।।>

`वृद्धि'-शब्दः संज्ञात्वेन विधीयते प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानाम्, अतद्भावितानाञ्च । तपरकरणमैजर्थम्--`तादपि परस्तपरः'इति, खट्वैडकादिषु त्रिमात्रचतुर्मात्रप्रसङ्गनिवृत्तये । आश्वलायनः । ऐतिकायनः । औपगवः । औपमन्यवः । शालीयः, मालीयः। वृद्धिप्रदेशाः--"सिचि वृद्धिः परस्मैपदेषु"(7.2.1/2297) इत्येवमादयः ।।

<अदेङ्गुणः ।। 1.1.2 ।।>

`गुण' शब्दः संज्ञात्वेन विधीयते प्रत्येकमदेङां वर्णानां सामान्येन तद्भावितानाम्, अतद्भावितानां च । तपरकरणं त्विह सर्वार्थम् । तरिता । चेता । स्तोता । पचन्ति । जयन्ति । अहं पचे ।

गुणप्रदेशाः--"मिदेर्गुणः"(7.3.82/2346) इत्येवमादयः ।।

<इको गुणवृद्धी ।। 1.1.3।।>

परिभाषेयं स्थानिनियमार्था । अनियमप्रसङ्गे नियमो विधीयते । वृद्धिगुणौ स्वसंज्ञया शिष्यमाणाविक एव स्थाने वेदितव्यौ ।। वक्ष्यति "सार्वधातुकार्धधातुकयोः"(7.3.84/2168) अङ्गस्य गुण इति । स इक एव स्थाने वेदितव्यः । तरति । नयति । वृद्धिः खल्वपि--अकार्षीत् । अहार्षीत् । अचैषीत् । अनैषीत् । अलावीत् । अस्तावीत् । *गुणवृद्धी स्वसंज्ञया विधीयेते, तत्र `इकः' इति एतदुपस्थितं द्रष्टव्यम् । किं कृतं भवति ? द्वितीयया षष्ठी प्रादुर्भाव्यते । *(म.भा.1.46) * मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्वङ्गेन इग् विशेष्यते * (म.भा.1.44)जुसि सार्वधातुकादिगुणेष्विकाङ्गं विशेष्यते । मेद्यते । अबिभयुः ।

इक इति किम् ? आत्सन्ध्यक्षरव्यञ्जनानां मा भूत् । यानम् । ग्लायति । उम्भिता । पुनर्गुणवृद्धिग्रहणं स्वसंज्ञया विधाने नियमार्थम् । इह मा भूत्--द्यौः । पन्थाः । सः इममिति ।।

<न धातुलोप आर्धधातुके ।। 1.1.4 ।।>

धात्वेकदेशो धातुः, तस्य लोपो यस्मिन्नार्द्धधातुके तदार्धधातुकं धातुलोपं तत्र ये गुण वृद्धी प्राप्नुतस्ते न भवतः । लोलुवः पोपुवः,मरीमृजः । लोलूयादिभ्यो यङन्तेभ्यः पचाद्यचि(3.1.134/2896) विहिते "यङोऽचि च"(2.4.74/2650) इति यङो लुकि कृते तमेवाचमाश्रित्य ये गुणवृद्धी प्राप्ते तयोः प्रतिषेधः ।

धातुग्रहणं किम् ? लूञ्-लविता । रेडसि । पर्णं नयेः । अनुबन्धप्रत्ययलोपे मा भूत् । रिषेर्हिंसार्थस्य विच्प्रत्ययलोप उदाहरणं रेडिति ।

आर्धधातुक इति किम् ? त्रिधा बद्धो वृषभो रोरवीति । सार्वधातुके मा भूत् । इक इत्येव-अभाजि, रागः ।।

बहुव्रीहिसमाश्रयणं किम् ? क्नोपयति, प्रेद्धम् ।

<क्ङिति च ।। 1.1.5 ।।>

निमित्तसप्तम्येषा । क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः । चितः, चितवान् । स्तुतः, स्तुतवान् । भिन्नः, भिन्नवान् । मृष्टः, मृष्टवान् । ङिति खल्वपि--चिनुतः, चिन्वन्ति । मृष्टः,मृजन्ति । गकारोऽप्यत्र चर्त्वभूतो निर्दिश्यते । "ग्लाजिस्थश्च ग्स्नुः"(3.2.139/3119) जिष्णुः, भूष्णुः । इक इत्येव--कामयते, लैगवायनः ।

* मृजेरजादौ संक्रमेविभाषा वृद्धिरिष्यते * (म.भा.1.48) संक्रमो नाम गुणवृद्धिः प्रतिषेधविषयः । परिमृजन्ति, परिमार्जन्ति;परिमृजन्तु, परिमार्जन्तु । लघूपधगुणस्याप्यत्र प्रतिषेधः । अचिनवम्, असुनवमित्यादौ लकारस्य सत्यपि ङित्त्वे यासुटो ङिद्वचनं ज्ञापकम्--`ङिति यत्कार्य तल्लकारे ङिति न भवति' इति ।।

<दीधीवेवीटाम् ।। 1.1.6 ।।>

दीधीवेव्योरिटश्च ये गुणवृद्धी प्राप्नुतस्ते न भवतः । आदीध्यनम्,आदीध्यकः । आवेव्यनम्, आवेव्यकः । इटः खल्वपि--कणिता श्वः, रणिता श्वः । वृद्धिरिटो न संभवतीति लघूपधगुणस्यात्र प्रतिषेधः ।।

<हलोऽनन्तराः संयोगः ।। 1.1.7।।>

भिन्नजातीयैरज्भिरव्यवहिताः श्लिष्टोच्चारिता हलः संयोगसंज्ञा भवन्ति । समुदायः संज्ञी । जातौ चेदं बहुवचनम्, तेन द्वयोर्बहूनां च संयोगसंज्ञा सिद्धा भवति । अग्निरिति ग-नौ । अश्व इति श-वौ । कर्ण इति र-णौ । इन्द्रश्चन्द्रो मन्द्र इति न-द-राः । उष्ट्रो राष्ट्रं भ्राष्ट्रमिति ष-ट-राः । तिलान्स्त्र्यावपतीति न-स-त-र-याः, न-त-स-त-र-या वा ।

हल इति किम् `तितउच्छत्रम्'(नि.4.9.10) । "संयोगान्तस्य लोपः"(8.2.23/54) स्यात् । अनन्तरा इति किम् पचति पनसम् । "स्कोः संयोगाद्योरन्ते च"(8.2.29/380) इति लोपः स्यात् ।

संयोगप्रदेशाः--"संयोगान्तस्य लोपः"(8.2.23/54) इत्येवमादयः ।।

<मुखनासिकावचनोऽनुनासिकः ।। 1.1.8।।>

मुखसहिता नासिका मुखनासिका, तया य उच्चार्यते वर्णः सोऽनुनासिकसंज्ञो भवति । "आङोनुनासिकश्छन्दसि"(6.1.126/3525)अभ्रआँ अपः, गभीरआँ उग्रपुत्रे । चनआँ इन्द्रः ।

मुखग्रहणं किम् ? अनुस्वारस्यैव हि स्यात् । नासिकाग्रहणं किम् ? कचटतपानां मा भूत् । अनुनासिकप्रदेशाः-

"आङोऽनुनासिकश्छन्दसि"(6.1.126/3525) इत्येवमादयः ।

<तुल्यास्यप्रयत्नं सवर्णम् ।। 1.1.9 ।।>

`तुल्य' शब्दः सदृशपर्यायः, आस्ये भवमास्यं ताल्वादिस्थानम्,प्रयतनं प्रयत्नः-स्पृष्टतादिर्वर्णगुणः । तुल्य आस्ये प्रयत्नो यस्य वर्णस्य येन वर्णेन सह स समानजातीयं प्रति सवर्णसंज्ञो भवति ।

चत्वार आभ्यन्तराः प्रयत्नाः सवर्णसंज्ञायामाश्रीयन्ते-स्पृष्टता, ईषत्स्पृष्टता, संवृतता, विवृतता चेति । ` अ अ अ ' इति त्रयोऽकारा उदात्तानुदात्तस्वरिताः, प्रत्येकं सानुनासिका निरनुनासिकाश्च ह्रस्वदीर्घप्लुतभेदादष्टादशधा भिद्यन्ते । तथेवर्णः, तथोवर्णः, तथा ऋवर्णः । `लृवर्णस्य दीर्घा न सन्ति'(आपि.शि.6.4) तं द्वादशप्रभेदमाचक्षते । सन्ध्यक्षराणां ह्रस्वा न सन्ति, तान्यपि द्वादशप्रभेदानि । अन्तःस्था द्विप्रभेदाः, रेफवर्जिता यवलाः सानुनासिका निरनुनासिकाश्च । रेफोष्मणां सवर्णा न सन्ति ।

`वर्ग्यो वर्ग्येण सवर्णः'(आपि.शि.6.11/13) । दण्डाग्रम् । खट्वाग्रम् ।

आस्यग्रहणं किम् कचटतपानां भिन्नस्थानानां तुल्यप्रयत्नानां मा भूत् । किं च स्यात् ? तर्प्ता तर्प्तुमित्यत्र "झरो झरि सवर्णे"(8.4.65/71) इति पकारस्य तकारे लोपः स्यात् ।

प्रयत्नग्रहणं किम् ? इचुयशानां तुल्यस्थानानां भिन्नप्रयत्नानां मा भूत् । किं च स्यात् ? अरुश्च्योततीत्यत्र "झरो झरि सवर्णे"(8.4.65/71) इति शकारस्य चकारे लोपः स्यात् ।।

* ऋकारलृकारयोः सवर्णसंज्ञा वक्तव्या *(म.भा.1.62) । होत्लृकारः । होतृकारः । उभयोर्ऋवर्णस्य चान्तरतमः सवर्णो दीर्घो नास्तीति ऋकार एव दीर्घो भवति ।

सवर्णप्रदेशाः "अकः सवर्णे दीर्घः"(6.1.101/85) इत्येवमादयः ।।

<नाज्झलौ ।। 1.1.10 ।।>

अच्च हल् च अज्झलौ । तुल्यास्यप्रयत्नावपि अज्झलौ परस्परं सवर्णसंज्ञौ न भवतः । अवर्णहकारौ-दण्डहस्तः । इवर्णशकारौ-दधि शीतम्, सवर्णदीर्घत्वं न भवति । वैपाशो मत्स्यः, आनडुहं चर्मेति-"यस्येति च"(6.4.148/311) इति लोपो न भवति ।

<ईदूदेद्द्विवचनं प्रगृह्यम् ।। 1.1.11 ।।>

ईद्, ऊद्, एद्, इत्येवमन्तं द्विवचनं शब्दरूपं प्रगृह्यसंज्ञं भवति । अग्नी इति । माले इति । पचेते इति । यजेते इति ।

ईदूदेदिति किम् ? वृक्षावत्र । प्लक्षावत्र ।

द्विवचनमिति किम् ? कुमार्यत्र । किशोर्यत्र ।
तपरकरणमसन्देहार्थम् ।
प्रगृह्यप्रदेशाः--"प्लुतप्रगृह्या अचि नित्यम्"(6.1.125/90) इत्येवमादयः । ईदादीनां प्रगृह्यत्वे मणीवादीनां प्रतिषेधो वक्तव्यः ।
`मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम'महाभारते (12.172.12) ।
दम्पतीव, जम्पतीव, रोदसीव ।।
<अदसो मात् ।। 1.1.12 ।>
अदसः संबन्धी यो मकारस्तस्मात्परे ईदूदेतः प्रगृह्यसंज्ञा भवन्ति । अमी अत्र । अमी आसते । अमू अत्र । अमू आसाते ।
एकारस्य नास्त्युदाहरणम् ।
अदस इति किम् ? शम्यत्र । दाडिम्यत्र । मादिति किम् ? अमुकेऽत्र ।।
<शे ।। 1.1.13 ।>
`शे' इत्येतत्प्रगृह्यसंज्ञं भवति । किमिदं शे इति ? सुपामादेशश्छन्दसि । `न युष्मे वाजबन्धवः'(ऋ.8.68.19) । `अस्मे इन्द्राबृहस्पती'(ऋ.4.49.4) ।
युष्मे इति । अस्मे इति । `त्वे रायः'(तै.सं.3.2.5.2) । `मे रायः'(वा.सं.4.22) । त्वे इति । मे इति ।
छान्दसमेतदेवैकमुदाहरणम्-`अस्मे इन्द्राबृहस्पती'(ऋ.4.49.4) इति; तत्र तथा पाठात् । इतरत्तु लौकिकमनुकरणम्--युष्मे इति । अस्मे इति । त्वे इति । मे इति ।।
<निपात एकाजनाङ् ।। 1.1.14 ।>
एकश्चासावच्च एकाच्, निपातो य एकाच् आङ्वर्जितः स प्रगृह्यसंज्ञो भवति । अपेहि । इ इन्द्रं पश्य । उ उत्तिष्ठ । आ एवं नु मन्यसे । आ एवं किल तत् ।
निपात इति किम् ? चकारात्र । एकारात्र । एकाजिति किम् ? `प्राग्नये वाचमीरय'(ऋ.10.187.1) । अनाङिति किम् ? आ उदकान्तात् ओदकान्तात् ।
*ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ।।*
<ओत् ।। 1.1.15 ।>
`निपातः' इति वर्त्तते । तस्यौकारेण तदन्तविधिः । ओदन्तो यो निपातः स प्रगृह्यसंज्ञो भवति । आहो इति । `उताहो इति'(म.भा.1.71) ।।
<संबुद्धौ शाकल्यस्येतावनार्षे ।। 1.1.16 ।>
`ओत् ' इति वर्त्तते । संबुद्धिनिमित्तो य ओकारः स शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञो भवति, `इति' शब्देऽनार्षे = अवैदिके परतः । वायो इति, वायविति । भानो इति, भानविति ।
संबुद्धाविति किम् ? गवित्ययमाह । अत्रानुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात् । असत्यर्थवत्त्वे विभक्तिर्न भवति । शाकल्यग्रहणं विभाषार्थम् । इताविति किम् ? वायोऽत्र । अनार्ष इति किम् ? `एता गा ब्रह्मबन्धवित्यब्रवीत्'(का.सं.10.6) ।
<उञः ।। 1.1.17 ।>
`शाकल्यस्येतौ' इति वर्तते । उञः प्रगृह्यसंज्ञा भवति, इतौ शाकल्यस्याचार्यस्य मतेन । शाकल्यस्येति विभाषार्थम् । उ इति, विति ।।
<ऊँ ।। 1.1.18 ।>
`उञ' इति वर्त्तते । उञ इतावनार्षे ऊँ इत्ययमादेशो भवति दीर्घोऽनुनासिकः, शाकल्यस्य मतेन प्रगृह्यसंज्ञकश्च । शाकल्यस्य ग्रहणं विभाषार्थमिहाप्यनुवर्तते, तेन त्रीणि रूपाणि भवन्ति - उ इति, विति, ऊँ इति ।।
<ईदूतौ च सप्तम्यर्थे ।। 1.1.19।>
`शाकल्यस्येतावनार्षे ' इति निवृत्तम् । ईदन्तमूदन्तं च शब्दरूपं सप्तम्यर्थे वर्त्तमानं प्रगृह्यसंज्ञं भवति । `अध्यस्यां मामकी तनू'(पै.1.6.8) । मामक्यां तन्वामिति प्राप्ते । मामक्याम्, मामकी इति । तन्वाम्, तनू इति । `सोमो गौरी अधिश्रितः'(ऋ.9.12.3) ।
ईदूताविति किम् ? `प्रियः सूर्ये प्रियो अग्ना भवाति'(ऋ.5.37.5) । अग्निशब्दात्परस्याः सप्तम्या डादेशः ।
सप्तमीग्रहणं किम् ? धीती, मती, सुष्टुती । धीत्या, मत्या, सुष्टुत्या इति प्राप्ते ।
अर्थग्रहणं किम् ? वाप्यश्वः, नद्यातिः ।
तपरकरणमसन्देहार्थम् ।
*ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद्भवेत् ।
पूर्वस्य चेत्सवर्णोऽसावाडाम्भावः प्रसज्यते ।। 1 ।।
वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि ।

ज्ञापकं स्यात्तदन्तत्वे मा वा पूर्वपदस्य भूत् * ।। 2 ।।(म.भा.1.73)

<दाधा घ्वदाप् ।। 1.1.20 ।।>

दारूपाश्चत्वारो धातवो धारूपौ च द्वौ दाब्दैपौ वर्जयित्वा घुसंज्ञका भवन्ति । `डु दाञ्'(धा.पा.1091)-- प्रणिददाति । `दाण् दाने'(धा.पा.930)-प्रणिदाता । `दो'(धा.पा.1148)-प्रणिद्यते । `देङ्'(धा.पा.962)-प्रणिदयते । `डु धाञ्'(धा.पा.1092)- प्रणिदधाति । `धेट्'(धा.पा.902)-प्रणिधयति वत्सो मातरम् ।

अदाबिति किम् ? `दाप् लवने'(धा.पा.1059)-दातं बर्हिः । `दैप् शोधने'(धा.पा.924)-अवदातं मुखम् ।

घुप्रदेशाः "घुमास्थागापाजहातिसां हलि"(6.4.66/2462) इत्येवमादयः ।।

<आद्यन्तवदेकस्मिन् ।। 1.1. 21 ।।>

असहायस्य आद्यन्तोपदिष्टानि कार्याणि न सिद्ध्यन्तीत्ययमतिदेश आरभ्यते । सप्तम्यर्थे वतिः । आदाविव अन्त इव एकस्मिन्नपि कार्यं भवति । यथा कर्त्तव्यमित्यत्र प्रत्ययाद्युदात्तत्वं भवति,एवमौपगवमित्यत्रापि यथा स्यात् । यथा वृक्षाभ्यामित्यत्रातोऽङ्गस्य दीर्घत्वम्, एवम् `आभ्याम्' इत्यत्रापि यथा स्यात् ।

एकस्मिन्निति किम् ? सभासन्नयने भवः साभासन्नयनः, आकारमाश्रित्य वृद्धसंज्ञा न भवति ।।

<तरप्तमपौ घः ।। 1.1.22 ।।>

`तरप् तमप्'- इत्येतौ प्रत्ययौ घसंज्ञौ भवतः । कुमारितरा । कुमारितमा । ब्राह्मणितरा । ब्राह्मणितमा ।

घप्रदेशाः "घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः"(6.3.43/985) इत्येवमादयः ।।

<बहुगणवतुडति संख्या ।। 1.1. 23 ।।>

`बहुगणवतुडति'इत्येते संख्यासंज्ञा भवन्ति । बहुकृत्वः । बहुधा । बहुकः । बहुशः । गणकृत्वः । गणधा । गणकः । गणशः । तावत्कृत्वः । तावद्धा । तावत्कः । तावच्छः । कतिकृत्वः । कतिधा । कतिकः । कतिशः ।

बहुगणशब्दयोर्वैपुल्ये सङ्घे च वर्तमानयोरिह ग्रहणं नास्ति, संख्यावाचिनोरेव । भूर्यादीनां निवृत्त्यर्थं संख्या-संज्ञा विधीयते ।।

*अर्धपूर्वपदश्च पूरणप्रत्ययान्तः संख्यासंज्ञो भवतीति वक्तव्यं समासकन्विध्यर्थम् * (म.भा.1.82)।। अर्धपञ्चमशूर्पः । अर्धं पञ्चमं येषामिति बहुव्रीहौ कृतेऽर्धपञ्चमैः शूर्पैः क्रीतः । "तद्धितार्थोत्तरपदसमाहारे च"(2.1.51/728) इति समासः । तत्र "दिक्संख्ये संज्ञायाम्"(2.1.50/727) इत्यनुवृत्तेस्ततः संख्यापूर्वस्य द्विगुसंज्ञायां "शूर्पादञन्यतरस्याम्"(5.1.26/1691) इत्यञ्, ठञ्च । "अध्यर्धपूर्वद्विगोः"(5.1.28/1693) इति लुक् । अर्धपञ्चमकः । संख्याप्रदेशाः-"संख्या वंश्येन"(2.1.19/673) इत्येवमादयः ।।

<ष्णान्ता षट् ।। 1.1.24 ।।>

स्त्रीलिङ्गनिर्देशात् `संख्या' इति सम्बध्यते । षकारान्ता नकारान्ता च या संख्या सा षट्संज्ञा भवति । षकारान्तास्तावत्--षट् तिष्ठन्ति, षट् पश्य । नकारान्ताः--पञ्च, सप्त, नव, दश ।

अन्तग्रहणमौपदेशिकार्थम्, तेनेह न भवति--शतानि, सहस्राणि । अष्टानामित्यत्र नुड् भवति।

षट्प्रदेशाः-`"षड्भ्यो लुक्"(7.1.22/261)' इत्येवमादयः ।।

<डति च ।। 1.1.25 ।।>

डत्यन्ता च या संख्या सा षट्संज्ञा भवति । कति तिष्ठन्ति । कति पश्य ।।

<क्तक्तवतू निष्ठा ।। 1.1.26 ।।>

क्तश्च क्तवतुश्च = क्तक्तवतू प्रत्ययौ निष्ठासंज्ञौ भवतः । कृतः । कृतवान् । भुक्तः । भुक्तवान् । ककारः कित्कार्यार्थः । उकार उगित्कार्यार्थः ।

निष्ठाप्रदेशाः-"श्वीदितो निष्ठायाम्"(7.2.14/3039) इत्येवमादयः ।

<सर्वादीनि सर्वनामानि ।। 1.1.27 ।।>

सर्वशब्द आदिर्येषां तानीमानि सर्वादीनि सर्वनामसंज्ञानि भवन्ति । सर्वः, सर्वौ, सर्वे । सर्वस्मै । सर्वस्मात् । सर्वेषाम् । सर्वस्मिन् । सर्वकः । विश्वः, विश्वौ, विश्वे । विश्वस्मै । विश्वस्मात् । विश्वेषाम् । विश्वस्मिन् । विश्वकः ।

उभ । उभय । उभशब्दस्य सर्वनामत्वे प्रयोजनम्--"सर्वनाम्नस्तृतीया च"(2.3.27/608) इति । उभाभ्यां हेतुभ्यां वसति, उभयोः हेत्वोः वसति। उभये । उभयस्मै । उभयस्मात् । उभयेषाम् । उभयस्मिन् । डतर । डतम । कतर । कतम । कतरस्मै, कतमस्मै । इतर । अन्य । अन्यतर । इतरस्मै । अन्यस्मै । अन्यतरस्मै ।

त्वशब्दोऽन्यवाची, स्वरभेदाद् द्विः पठितः। एक उदात्तः, द्वितीयोऽनुदात्तः । केचित्तकारान्तमेकं पठन्ति । त्व-त्वदिति द्वावपि चानुदात्ताविति स्मरन्ति । नेम । नेमस्मै । वक्ष्यमाणेन जसि विभाषा भवति । नेमे, नेमा इति ।

सम। समस्मै । कथं "यथासंख्यमनुदेशः समानाम्"(1.3.10/128) समे देशे यजेतेति ? समस्य सर्वशब्दपर्यायस्य सर्वनामसंज्ञेष्यते, न सर्वत्र । सिम ।

सिमस्मै ।

"पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्"(1.1.34/218)(ग.सू.1) । "स्वमज्ञातिधनाख्यायाम्"(1.1.35)(ग.सू.2) । "अन्तरं बहिर्योगोपसंव्यानयोः"(1.1.36/220)(ग.सू.3) । त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि,युष्मद्, अस्मद्, भवतु किम् । सर्वादिः ।।

सर्वनामप्रदेशाः--"सर्वनाम्नः स्मै"(7.1.14/215) इत्येवमादयः ।।

<विभाषा दिक्समासे बहुव्रीहौ ।। 1.1.27 ।।>

"न बहुव्रीहौ"(1.1.29/222)इति प्रतिषेधं वक्ष्यति । तस्मिन्नित्ये प्रतिषेधे प्राप्ते विभाषेयमारभ्यते । दिशां समासो दिक्समासः, दिगुपदिष्टे समासे बहुव्रीहौ विभाषा सर्वादीनि सर्वनामसंज्ञानि भवन्ति । उत्तरपूर्वस्यै, उत्तरपूर्वायै । दक्षिणपूर्वस्यै, दक्षिणपूर्वायै ।

दिग्ग्रहणं किम् ? "न बहुव्रीहौ"(1.1.29/222) इति । प्रतिषेधं वक्ष्यति, तत्र न ज्ञायते- क्व विभाषा, क्व प्रतिषेध इति । दिग्ग्रहणे पुनः क्रियमाणे ज्ञायते-दिगुपदिष्टसमासे विभाषा, अन्यत्र प्रतिषेध इति ।

समासग्रहणं किम् ? समास एव यो बहुव्रीहिस्तत्र विभाषा यथा स्यात् ; बहुव्रीहिवद्भावेन यो बहुव्रीहिः, तत्र मा भूत् । दक्षिणदक्षिणस्यै देहि ।

बहुव्रीहाविति किम् ? द्वन्द्वे विभाषा मा भूत् । दक्षिणोत्तरपूर्वाणामिति । "द्वन्द्वे च"(1.1.31/224) इति नित्यं प्रतिषेधो भवति ।।

<न बहुव्रीहौ ।। 1.1.29 ।।>

सर्वनामसंज्ञायां तदन्तविधेरभ्युपगमाद्बहुव्रीहेरपि सर्वाद्यन्तस्य संज्ञा स्यादिति प्रतिषेध आरभ्यते । बहुव्रीहौ समासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति - प्रियविश्वाय, प्रियोभयाय, द्व्यन्याय, त्र्यन्याय । इह च त्वत्कपितृकः, मत्कपितृक इत्यकज्न भवति ।

बहुव्रीहाविति वर्त्तमाने पुनर्बहुव्रीहिग्रहणं भूतपूर्वमात्रेऽपि प्रतिषेधो यथा स्यात् । `वस्त्रान्तरवसनान्तरा' इति(म.भा.1.90) ।।

<तृतीयासमासे ।। 1.1.30 ।।>

तृतीयासमासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । मासपूर्वाय, संवत्सरपूर्वाय, द्व्यहपूर्वाय, त्र्यहपूर्वाय । `समासे' इति वर्त्तमाने पुनः समासग्रहणं तृतीयासमासार्थवाक्येऽपि प्रतिषेधो यथा स्यात् - मासेन पूर्वाय । "पूर्वसदृशसमोनार्थ"(2.1.31/693) इति तृतीयासमासं प्रतिपदं वक्ष्यति, तस्येदं ग्रहणम् ; न यस्य कस्यचित्तृतीयासमासस्य-"कर्तृकरणे कृता बहुलम्"(2.1.32/694) इति । त्वयका कृतम्, मयका कृतम् ।।

<द्वन्द्वे च ।। 1.1.31 ।।>

द्वन्द्वे च समासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । पूर्वापराणाम् । कतरकतमानाम् ।

<विभाषा जसि ।। 1.1.32 ।।>

पूर्वेण नित्ये प्रतिषेधे प्राप्ते जसि विभाषाऽऽरभ्यते । द्वन्द्वे समासे जसि विभाषा सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । कतरकतमे कतरकतमाः । जसः कार्यं प्रति विभाषाऽकज् हि न भवति-कतरकतमकाः ।।

<प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ।। 1.1.33 ।।>

"विभाषा जसि"(1.1.32/225) इति वर्त्तते । `द्वन्द्वे' इति निवृत्तम् । प्रथम, चरम, तय, अल्प, अर्ध, कतिपय, नेम - इत्येते जसि विभाषा सर्वनामसंज्ञा भवन्ति । प्रथमे, प्रथमाः । चरमे, चरमाः । द्वितये, द्वितयाः । अल्पे, अल्पाः । अर्धे, अर्धाः । कतिपये, कतिपयाः । नेमे, नेमाः ।

`तय'इति तयप्प्रत्ययः। शिष्टानि प्रातिपदिकानि ।

तत्र `नेम' इति सर्वादिषु पठ्यते; तस्य प्राप्ते विभाषा, अन्येषामप्राप्ते । उभयशब्दस्य तयप्प्रत्ययान्तस्य गणे पाठान्नित्या सर्वनामसंज्ञा इहापि जस्कार्यं प्रति विभाषा । काकचोर्यर्थायोगं वृत्तिः ।।

<पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ।। 1.1.34 ।।>

पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर-इत्येतेषां गणे पाठात्पूर्वेण नित्यायां प्राप्तायां जसि विभाषाऽऽरभ्यते । पूर्वादीनि विभाषा जसि सर्वनामसंज्ञानि भवन्ति व्यवस्थायामसंज्ञायाम् । स्वाभिधेयापेक्षावधिनियमो व्यवस्था । पूर्वे, पूर्वाः । परे, पराः । अवरे, अवराः । दक्षिणे, दक्षिणाः । उत्तरे, उत्तराः । अपरे, अपराः । अधरे, अधराः ।

व्यवस्थायामिति किम् ? दक्षिणा इमे गाथकाः । प्रवीणा इत्यर्थः । असंज्ञायामिति किम् ? उत्तराः कुरवः । सत्यामेव व्यवस्थायामियं तेषां संज्ञा ।

<स्वमज्ञातिधनाख्यायाम् ।। 1.1.35।।>

अत्रापि नित्या सर्वनामसंज्ञा प्राप्ता जसि विभाष्यते । स्वमित्येतच्छब्दरूपं जसि विभाषा सर्वनामसंज्ञं भवति, न चेज्ज्ञातिधनयोस्संज्ञारूपेण वर्तते । स्वे पुत्राः, स्वाः पुत्राः । स्वे गावः, स्वा गावः । आत्मीया इत्यर्थः ।

ज्ञातिप्रतिषेधः इति किम् ?

`धूमायन्त इवाश्लिष्टाः प्रज्वलन्तीव संहताः ।

उल्मुकानीव मेऽमी स्वा ज्ञातयो भरतर्षभ' ।।(महाभारते 5.36.38)

अधनाख्यायामिति किम् ? प्रभूताः स्वा न दीयन्ते, प्रभूताः स्वा न भुज्यन्ते । प्रभूतानि धनानीत्यर्थः ।।

<अन्तरं बहिर्योगोपसंव्यानयोः ।। 1.1.36 ।।>
अत्रापि पूर्वेण नित्या सर्वनामसंज्ञा प्राप्ता सा जसि विभाष्यते । अन्तरमित्येतच्छब्दरूपं विभाषा जसि सर्वनामसंज्ञं भवति बहिर्योगे उपसंव्याने च गम्यमाने । अन्तरे गृहाः, अन्तरा गृहाः । नगरबाह्याश्चण्डालादिगृहा उच्यन्ते । (उपसंव्याने) अन्तरे शाटकाः, अन्तराः शाटकाः । उपसंव्यानं परिधानीयमुच्यते, न प्रावरणीयम् । बहिर्योगोपसंव्यानयोरिति किम् ? अनयोर्ग्रामयोरन्तरे तापसः प्रतिवसति । तस्मिन्नन्तरे शीतान्युदकानि । मध्यप्रदेशवचनोऽन्तरशब्दः । गणसूत्रस्य चेदं प्रत्युदाहरणम् ।।
*अपुरीति च वक्तव्यम् *।।(म.भा.1.93) अन्तरायां पुरि वसति ।
विभाषाप्रकरणे तीयस्य वा ङित्सु सर्वनामसंज्ञेत्युपसंख्यानम्(म.भा.1.93)द्वितीयाय, द्वितीयस्मै । तृतीयाय, तृतीयस्मै ।।
<स्वरादिनिपातमव्ययम् ।। 1.1.37 ।।>
स्वरादीनि शब्दरूपाणि निपाताश्चाव्ययसंज्ञानि भवन्ति । स्वर्, अन्तर्, प्रातर्-एते अन्तोदात्ताः पठ्यन्ते । पुनर् आद्युदात्तः । सनुतर्, उच्चैस्, नीचैस्, शनैस्, ऋधक्, आरात्,ऋते, युगपत्,पृथक्-एतेऽपि सनुतर्प्रभृतयोऽन्तोदात्ताः पठ्यन्ते । ह्यस्, श्वस्, दिवा, रात्रौ, सायम्, चिरम्, मनाक्, ईषत्, जोषम्, तूष्णीम्, बहिस्, आविस्, अवस्, अधस्, समया, निकषा, स्वयम्, मृषा, नक्तम्, नञ्, हेतौ, अद्धा, इद्धा, सामि-एतेऽपि ह्यस्प्रभृतयोऽन्तोदात्ताः पठ्यन्ते । वत्, वदन्तमव्ययसंज्ञं भवति-ब्राह्मणवत्, क्षत्रियवत् । सन्, सनात्, सनत्, तिरस्-एते आद्युदात्ताः पठ्यन्ते । अन्तरा-अयमन्तोदात्तः । अन्तरेण, ज्योक्, कम्, शम्, सना, सहसा, विना, नाना, स्वस्ति, स्वधा, अलम्, वषट्, अन्यत्, अस्ति, उपांशु, क्षमा, विहायसा, दोषा, मुधा, मिथ्या । क्त्वातोसुन्कसुनः-कृन्मकारान्तः, सन्ध्यक्षरान्तोऽव्ययीभावश्च । पुरा, मिथो, मिथस्, प्रबाहुकम्, आर्यहलम्, अभीक्ष्णम्, साकम्, सार्द्धम्, समम्, नमस्, हिरुक् । तसिलादिस्तद्धित एधाच्पर्यन्तः, शस्तसी, कृत्वसुच्, सुच्, आस्थालौ, च्व्यर्थाश्च, अम्, आम्, प्रतान्, प्रशान् । स्वरादिः ।
निपाता वक्ष्यन्ते-"प्राग्रीश्वरान्निपाताः"(1.4.56/19) इति । च, वा ह,अह,एव, एवमित्यादयः ।
अव्ययप्रदेशाः "अव्ययादाप्सुपः"(2.4.82/452) इत्येवमादयः । `अव्ययम्' इत्यन्वर्थसंज्ञा ।
`सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्' ।।(गो.ब्रा.1.1.26)
<तद्धितश्चासर्वविभक्तिः ।। 1.1.38 ।।>
तद्धितान्तः शब्दोऽसर्वविभक्तिरव्ययसंज्ञो भवति । यस्मान्न सर्वविभक्तेरुत्पत्तिः, सोऽसर्वविभक्तिः । ततः, यतः, तत्र, यत्र, तदा, यदा, सर्वदा, सदा । तद्धित इति किम् ? एकः, द्वौ, बहवः । असर्वविभक्तिरिति किम् ? औपगवः, औपगवौ, औपगवाः ।।
<कृन्मेजन्तः ।। 1.1.39 ।।>
कृद्यो मकारान्त एजन्तश्च तदन्तं शब्दरूपमव्ययसंज्ञं भवति । स्वादुङ्कारं भुङ्क्ते, सम्पन्नङ्कारं भुङ्क्ते, लवणङ्कारं भुङ्क्ते । एजन्तः-वक्षे रायः । `ता वामेषे रथानाम्'(ऋ5.66.3) । `क्रत्वे दक्षाय जीवसे'(ऋ.5.57.4) । `ज्योक्च सूर्यं दृशे'(ऋ10.57.4) । `वक्षे' इति वचेः,"तुमर्थेसेसेन्"(3.4.9/3436) इति सेप्रत्यये कुत्वे षत्वे च कृते रूपम् । `एषे' इति इणः सेप्रत्यये गुणे षत्वे च कृते रूपम् । `जीवसे' इति जीवेरसे प्रत्यये रूपम् । `दृशे' इति दृशेः केन्प्रत्ययो निपात्यते--"दृशे विख्ये च"(3.4.11/3438) इति ।
अन्तग्रहणमौपदेशिकप्रतिपत्त्यर्थम् । इह मा भूत्--आधये, चिकीर्षवे, कुम्भकारेभ्य इति ।।
<क्त्वातोसुन्कसुनः ।। 1.1.40 ।।>
क्त्वा-तोसुन्-कसुन्-इत्येवमन्तं शब्दरूपमव्ययसंज्ञं भवति । कृत्वा, हृत्वा । तोसुन्-`पुरा सूर्यस्योदेतोराधेयः'(का.सं.8.3), `पुरा वत्सानामपाकर्त्तोः'(का.सं.31.15) । "भावलक्षणे स्थेण्कृञ्वदि"(3.4.16/3443) इति इणः, कृञश्च तोसुन्प्रत्ययः । कसुन्-"सृपितृदोः कसुन्"(3.4.17/3444) । `पुरा क्रूरस्य विसृपो विरप्शिन्'(तै.सं.1.1.9.3), `पुरा जर्तुभ्य आतृदः'(ऋ.8.1.12) ।।
<अव्ययीभावश्च ।। 1.1.41 ।।>
अव्ययीभावसमासोऽव्ययसंज्ञो भवति । किं प्रयोजनम् ? लुङ्मुखस्वरोपचाराः । लुक्--उपाग्नि, प्रत्यग्नि शलभाः पतन्ति । मुखस्वरः--उपाग्निमुखः, प्रत्यग्निमुखः । "मुखं स्वाङ्गम्"(6.2.167/3901) इत्युत्तरपदान्तोदात्तत्वं प्राप्तम् "नाव्ययदिक्छब्द"(6.2.168/3902) इति प्रतिषिध्यते । तस्मिन् प्रतिषिद्धे पूर्वपदप्रकृतिस्वर एव भवति । उपचारः--उपपयःकारः, उपपयःकामः । विसर्जनीयस्थानिकस्य सकारस्य `उपचार' इति संज्ञा, तत्राव्ययीभावस्याव्ययत्वे "अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य"(8.3.46/160) इति पर्युदासः सिद्धो भवति । सर्वमिदं काण्डं स्वरादावपि पठ्यते ।
पुनर्वचनमनित्यत्वज्ञापनार्थम् । तेनायं कार्यनियमः सिद्धो भवति । इह च--पुरा सूर्यस्योदेतोराधेयः, पुरा क्रूरस्य विसप इति "न लोकाव्ययनिष्ठा"(2.3.69/627) इति षष्ठीप्रतिषेधो न भवति ।।
<शि सर्वनामस्थानम् ।। 1.1.42 ।।>
`शि' इत्येतत्सर्वनामस्थानसंज्ञं भवति । किमिदं शि इति ? "जश्शसोः शिः"(7.1.20/312)आदेशः । कुण्डानि तिष्ठन्ति, कुण्डानि पश्य । दधीनि,

मधूनि । त्रपूणि, जतूनि ।

सर्वनामस्थानप्रदेशाः--"सर्वनामस्थाने चासंबुद्धौ"(6.4.8/250) इत्येवमादयः ।।

<सुडनपुंसकस्य ।। 1.1.43।।>

'सुट्' इति पञ्च वचनानि सर्वनामस्थानसंज्ञानि भवन्ति नपुंसकादन्यत्र । नपुंसके न विधिर्न प्रतिषेधः, तेन जसंशे सर्वनामस्थानसंज्ञा पूर्वेण भवत्येव । राजा, राजानौ, राजानः, राजानम्, राजानौ। सुडिति किम् ? राज्ञः पश्य । अनपुंसकस्येति किम् ? सामनी, वेमनी ।।

<न-वेति विभाषा ।। 1.1.44 ।।>

नेति प्रतिषेधः, वेति विकल्पः, तयोः प्रतिषेधविकल्पयोर्विभाषेति संज्ञा भवति । इतिकरणोऽर्थनिर्देशार्थः । विभाषाप्रदेशेषु प्रतिषेधविकल्पावुपतिष्ठेते । तत्र प्रतिषेधेन समीकृते विषये पश्चाद्विकल्पः प्रवर्तते । उभयत्रविभाषाः प्रयोजयन्ति । "विभाषा श्वेः"(6.1.30/2420)--शुशाव, शिश्वाय; शुशुवतुः, शिश्वियतुः ।

विभाषाप्रदेशाः--"विभाषा श्वेः"(6.1.30/2420) इत्येवमादयः ।।

<इग्यणः सम्प्रसारणम् ।। 1.1.45।।>

इग्यो यणः स्थाने भूतो भावी वा तस्य 'संप्रसारणम्' इत्येषा संज्ञा भवति । यज्-इष्टम् । वप्-उप्तम् । ग्रह-गृहीतम् ।

केचिदुभयथा सूत्रमिदं व्याचक्षते-वाक्यार्थः सञ्ज्ञी, वर्णश्चेति । इग्यण इति यो वाक्यार्थः स्थान्यादेशसंबन्धलक्षणः स संप्रसारणसंज्ञो भवति; यण्स्थानिक इग्वर्णः स संप्रसारणसंज्ञो भवतीति । तत्र विधौ वाक्यार्थ उपतिष्ठते-"ष्यङः संप्रसारणम्"(6.1.13/1003),"वसोः संप्रसारणम्"(6.4.131/435) इति । अनुवादे वर्णः-"संप्रसारणाच्च"(6.1.108/330) इति । संख्यातानुदेशादिह न भवति- अदुहितरामिति । द्युभ्यामित्यादौ "दिव उत्"(6.1.131/337) इति तपरकरणात् दीर्घो न भवति।

संप्रसारणप्रदेशाः--"वसोः संप्रसारणम्"(6.4.131/435) इत्येवमादयः ।।

<आद्यन्तौ टकितौ ।। 1.1.46।।>

आदिष्टिद्भवति, अन्तः किद्भवति षष्ठीनिर्दिष्टस्य । लविता, मुण्डो भीषयते । टित्प्रदेशाः--"आर्धधातुकस्येड्वलादेः"(7.2.35/2984) इत्येवमादयः । कित्प्रदेशाः-"भियो हेतुभये षुक्"(7.3.40/2595) इत्येवमादयः ।।

<मिदचोऽन्त्यात्परः ।। 1.1.47।।>

`अचः' इति निर्धारणे षष्ठी । जातौ चेदमेकवचनम् । अचां संनिविष्टानामन्त्यादचः परो मिद्भवति । स्थानेयोगप्रत्ययपरत्वस्यायमपवादः । विरुणद्धि, मुञ्चति, पयांसि ।

मित्प्रदेशाः-"रुधादिभ्यः श्नम्"(3.1.78/2543) इत्येवमादयः ।।

* मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गसंयोगादिलोपार्थम् * (म.भा.1.115)।।

मग्नः, मग्नवान् । मङ्क्ता, मङ्क्तुम् ।।

<एच इग्घ्रस्वादेशे ।। 1.1.48।।>

एचो ह्रस्वादेशे कर्त्तव्य इगेव ह्रस्वो भवति, नान्यः । रै-अतिरि । नौ--अतिनु । गो--उपगु ।

एच इति किम् ? अतिखट्वः, अतिमालः । ह्रस्वादेश इति किम् ? दे3वदत्त । देवद3त्त ।।

<षष्ठी स्थानेयोगा ।। 1.1.49 ।।>

परिभाषेयं योगनियमार्था । इह शास्त्रे या षष्ठी अनियतयोगा श्रूयते सा स्थानेयोगैव भवति, नान्ययोगा । स्थानेयोगस्य निमित्तभूते सति सा प्रतिपत्तव्या । स्थानशब्दश्च प्रसङ्गवाची, यथा--दर्भाणां स्थाने शरैः प्रस्तरितव्यमिति दर्भाणां प्रसङ्ग इति गम्यते; एवमिहापि अस्तेः स्थाने= प्रसङ्गे भूर्भवति--भविता, भवितुम्, भवितव्यम् । ब्रुवः प्रसङ्गे वचिर्भवति-वक्ता, वक्तुम्, वक्तव्यम् । प्रसङ्गे संबन्धस्य निमित्तभूते 'ब्रुवः' इति षष्ठी ।

बहवो हि षष्ठ्यर्थाः स्वस्वाम्यनन्तरसमीपसमूहविकारावयवाद्याः, तत्र यावन्तः शब्दे संभवन्ति तेषु सर्वेषु प्राप्तेषु नियमः क्रियते । षष्ठी स्थानेयोगेति-स्थाने योगोऽस्या इति व्यधिकरणो बहुव्रीहिः । अत एव निपातनाच्च सप्तम्या अलुक् ।।

<स्थानेऽन्तरतमः ।। 1.1.50 ।।>

स्थाने प्राप्यमाणानामन्तरतम आदेशो भवति सदृशतमः । कुतश्च शब्दस्यान्तर्यम् ? स्थानार्थगुणप्रमाणतः ।

स्थानतः--"अकः सवर्णे दीर्घः"(6.1.101/85) । दण्डाग्रम्, यूपाग्रम्। द्वयोरकारयोः कण्ठ्य एव दीर्घ आकारो भवति ।

अर्थतः--वतण्डी चासौ युवतिश्च वातण्ड्ययुवतिः । पुंवद्भावेनान्तरतमः पुंशब्दोऽतिदिश्यते । गुणतः--पाकः, त्याग, रागः । "चजोः कुघिण्ण्यतोः"(7.3.52/2863) इति चकारस्याल्पप्राणस्याघोषस्य तादृश एव ककारो भवति । जकारस्य घोषवतोऽल्पप्राणस्य तादृश एव गकारः ।

प्रमाणतः--अमुष्मै, अमूभ्याम् । "अदसोसेर्दादु दो मः"(8.2.80/419) इति ह्रसल्वस्य ह्रस्वः, दीर्घस्य दीर्घः ।

`स्थाने' इति वर्त्तमाने पुनः स्थानेग्रहणं किम् ? यत्रानेकमान्तर्यं संभवति तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात् । चेता, स्तोता । प्रमाणतोऽकारो गुणः

प्राप्तस्तत्र स्थानत आन्तर्यादैकारौकारौ भवतः ।
तमब्ग्रहणं किम् ? वाग्घसति, त्रिष्टुब्भसति । "झयो होऽन्यतरस्याम्"(8.4.62/119) इति हकारस्य पूर्वसवर्णे क्रियमाणे 'सोष्मणः सोष्माणः' इति द्वितीयाः प्रसक्ताः, 'नादवतो नादवन्त' इति तृतीयाः, तमब्ग्रहणाद्ये सोष्माणो नादवन्तश्च ते भवन्ति चतुर्थाः ।।
<उरण् रपरः ।। 1.1.51।।>
उः स्थानेऽण् प्रसज्यमान एव रपरो वेदितव्यः । कर्त्ता, हर्त्ता । किरति, गिरति । द्वैमातुरः, त्रैमातुरः ।
उरिति किम् ? खेयम्, गेयम् ।
अण्ग्रहणं किम् ? "सुधातुरकङ् च"(4.1.17/1017)--सौधातकिः ।।
<अलोऽन्त्यस्य ।। 1.1.52।।>
षष्ठीनिर्दिष्टस्य य उच्यते आदेशः सोऽन्त्यस्यालः स्थाने वेदितव्यः । "इद्गोण्याः"(1.2.50/1703)-- पञ्चगोणिः, दशगोणिः ।।
<ङिच्च ।। 1.1.53।।>
ङिच्च य आदेशः सोऽनेकालपि अलोऽन्त्यस्य भवति । "आनङृतो द्वन्द्वे"(6.3.25/921)-होतापोतारौ, मातापितरौ । तातङि ङित्करणस्य सावकाशत्वाद् गुणवृद्धिप्रतिषेधार्थत्वात् सर्वादेशस्तातङ् भवति--जीवताद्भवान् । जीवतात्त्वम् ।।
<आदेः परस्य ।। 1.1.54 ।।>
परस्य कार्यं शिष्यमाणमादेरलः प्रत्येतव्यम् । क्व च परस्य कार्य शिष्यते ? यत्र पञ्चमीनिर्देशः । तद्यथा--"ईदासः"(7.2.83/3104)आसीनो यजते । "द्व्यन्तरुपसर्गेभ्योऽप ईत्"(6.3.77/941), द्वीपम्, तअन्तरीपम्, समीपम् ।।
<अनेकाल्शित्सर्वस्य ।। 1.1.55 ।।>
अनेकाल् य आदेशः शिच्च स सर्वस्य षष्ठीनिर्द्दिष्टस्य स्थाने भवति । "अस्तेर्भूः"(2.4.52/2470)--भविता, भवितुम्, भवितव्यम् ।
शित्खल्वपि-"जश्शसोः शिः"(7.1.20/312) । कुण्डानि तिष्ठन्ति, कुण्डानि पश्य ।।
<स्थानिवदादेशोऽनल्विधौ ।। 1.1.56 ।।>
स्थान्यादेशयोः पृथक्त्वात् स्थान्याश्रयं कार्यमादेशे न प्राप्नोतीत्ययमतिदेश आरभ्यते । स्थानिना तुल्यं वर्त्तत इति स्थानिवत् । स्थानिवदादेशो भवति, स्थान्याश्रयेषु कार्येष्वनलाश्रयेषु, स्थान्यलाश्रयाणि कार्याणि वर्जयित्वा । न अल्विधिरनल्विधिरित्यर्थः । किमुदाहरणम् ?
धात्वङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः ।
धात्वादेशो धातुवद्भवति--"अस्तेर्भूः"(2.4.52/2470), "ब्रुवो वचिः"(2.4.53/2453), आर्धधातु-के विषये प्रागेवादेशेषु कृतेषु धातोरिति तव्यादयो भवन्ति-भविता, भवितुम्, भवितव्यम्; वक्ता, वक्तुम्, वक्तव्यम् ।
अङ्गादेशोऽङ्गवद्भवति--केन, काभ्याम्, कैः। किमः कादेशे कृतेऽङ्गाश्रया इनदीर्घत्वैस्भावा भवन्ति ।
कृदादेशः कृद्वद्भवति-प्रकृत्य, प्रहृत्य । ल्यबादेशे कृते "ह्रस्वस्य पिति कृति तुक्"(6.1.71/2858) इति तुग्भवति ।
तद्धितादेशस्तद्धितवद्भवति-दाधिकम्, अद्यतनम् । "'कृत्तद्धितसमासाश्च'"(1.2.46/179) इति प्रापतिपदिकसंज्ञा भवति ।
अव्ययादेशोऽव्ययवद्भवति--प्रस्तुत्य, प्रहृत्य, उपस्तुत्य । "अव्ययात्"(2.4.82/452) इति सुब्लुग् भवति ।
सुबादेशः सुब्वद्भवति-वृक्षाय, प्लक्षाय । "सुपि च"(7.3.102/202) इति दीर्घत्वं भवति ।
तिङादेशस्तिङ्वद्भवति-अकुरुताम्, अकुरुतम् । "सुप्तिङन्तं पदम्"(1.4.14/29) इति पदसंज्ञा भवति ।
पदादेशः पदवद्भवति--ग्रामो वः स्वम्, जनपदो नः स्वम् । "पदस्य"(8.1.16/401) इति रुत्वं भवति ।
वत्करणं किम् ? स्थाने आदेशस्य संज्ञा मा विज्ञायीति । स्वाश्रयमपि यथा स्यात् । "आङो यमहनः"(1.3.28/2695)--आहत, आवधिष्टेति । आत्मनेपदमुभयत्रापि भवति ।
आदेशग्रहणं किम् ? आनुमानिकस्याप्यादेशस्य स्थानिवद्भावो यथा स्यात्--पचतु । 'एरुः'।
अनल्विधाविति किम् ? द्युपथितदादेशा न स्थानिवद्भवन्ति द्यौः पन्थाः, स इति । "हल्ङ्याब्"(6.1.68/252) इति सुलोपो न भवति ।
<अचः परस्मिन्पूर्वविधौ ।। 1.1.57।।>
पूर्वेणानल्विधौ स्थानिवद्भाव उक्तः, अल्विध्यर्थमिदमारभ्यते । आदेशः स्थानिवदिति वर्तते । अच इति स्थानिनिर्देशः । परस्मिन्निति निमित्तसप्तमी । पूर्वविधाविति विषयसप्तमी । अजादेशः परनिमित्तकः पूर्वविधौ कर्तव्ये स्थानिवद्भवति । पटयति । अवधीत् । बहुखट्वकः । पटुमाचष्ट इति णिचि टिलोपे कृते तस्य स्थानिवद्भावाद् "अत उपधायाः"(7.2.116/2282) इति वृद्धिर्न भवति । अवधीत्--अतो लोपस्य स्थानिवद्भावाद् "अतो हलादेर्लघोः"(7.2.7/2284) इति हलन्तलक्षणा वृद्धिर्न भवति । बहुखट्वक इति--"आपोऽन्यतरस्याम्"(7.4.15) इति ह्रस्वस्य स्थानिवद्भावाद् "ह्रस्वान्तेऽन्त्यात्पूर्वम्"(6.2.174/3908) इति स्वरो न भवति । अच इति किम् ? प्रश्नः । आक्राष्टाम् । आगत्य । प्रश्न इति --प्रच्छेर्नङ्प्रत्यये "च्छ्वोः शूडनुनासिके च"(6.4.19/2561) इति छकारस्य शकारः परनिमित्तकस्तुकि कर्तव्ये न स्थानिवद्भवति । आक्राष्टामिति--"झलो

झलि"(8.2.26/2281) इति सिचो लोपः परनिमित्तकः कृषेः षकारस्य "षढोः कः सि"(8.2.41/295) इति ककारे कर्तव्ये न स्थानिवद्भवति ।
आगत्येति--"वा ल्यपि"(6.4.38/3334) इति अनुनासिकलोपः परनिमित्तकस्तुकि कर्तव्ये न स्थानिवद्भवति ।
परस्मिन्निति किम् ? युवजानिः । वधूटीजानिः । वैयाघ्रपद्यः । आदीध्ये । युवजानिरिति--"जायाया निङ्"(5.4.134/872) न परनिमित्तकः, तेन यलोपे न स्थानिवद्भवति । वैयाघ्रपद्य इति- न परनिमित्तकः पादस्यान्तलोपः पद्भावं न प्रतिबध्नाति । आदीध्ये इति-दीधीङ उत्तमपुरुषैकवचने टेरेत्वस्यापरनिमित्तकत्वाद् "यीवर्णयोर्दीधीवेव्योः"(7.4.53/2488) इति लोपो न भवति ।
पूर्वविधाविति किम् ? हे गौः । बाभ्रवीयाः । नैधेयः । हे गौरिति वृद्धिरजादेशः संबुद्धिलोपे कर्त्तव्ये न स्थानिवद्भवति । बाभ्रवीया इति-बाभ्रव्यस्यामी च्छात्रा इति "वृद्धाच्छः"(4.2.114/1337) इति छः, "हलस्तद्धितस्य"(6.4.150/472) इति यकारलोपे कर्त्तव्येऽवादेशो न स्थानिवद्भवति । नैधेयः-"आतो लोप इटि च "(6.4.64/2372) इत्याकारलोपः, "इतश्चानिञः"(4.1.122/1125) इति द्व्यज्लक्षणे प्रत्यविधौ न स्थानिवद्भवति ।।
<न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ।। 1.1.57 ।।>
पूर्वेणातिप्रसक्तः स्थानिवद्भाव एतेषु विधिषु प्रतिषिध्यते । पदान्तविधिं प्रत्यजादेशो न स्थानिवद्भवति-कौ स्तः, यौ स्तः । तानि सन्ति, यानि सन्ति । "श्नसोरल्लोपः"(6.4.111/2469) क्ङिति सार्वधातुके इति परनिमित्तकः, स पूर्वविधावावादेशे यणादेशे च कर्त्तव्ये स्थानिवत् स्यात्, अस्माद्वचनान्न भवति ।
द्विर्वचनविधिं प्रति न स्थानिवद्भवति-दद्ध्यत्र । मद्ध्वत्र । यणादेशः परनिमित्तकस्तस्य स्थानिवद्भावाद् "अनचि च"(8.4.47/48) इति धकारस्य द्विर्वचनं न स्यादस्माद्वचनाद्भवति ।
वरे योऽजादेशः स पूर्वविधिं प्रति न स्थानिवद्भवति-अप्सु यायावरः प्रवपेत पिण्डान् । यातेर्यङन्ताद् "यश्च यङः"(3.2.176/3156) इति वरचि कृते "अतो लोपः"(6.4.48/2308) परनिमित्तकः, तस्य स्थानिवत्त्वाद् "आतो लोप इटि च"(6.4.64/3156) इत्याकारलोपः स्यादस्माद्वचनान्न भवति ।
यलोप । यलोपविधिं प्रत्यजादेशो न स्थानिवद्भवति-कण्डूतिः । कण्डूयतेः क्तिनि कृते, अतो लोपः परनिमित्तकः, "लोपो व्योर्वलि"(6.1.66/873) इति यलोपे स्थानिवत् स्यादस्माद्वचनान्न भवति ।
स्वर । स्वरविधिं प्रति अजादेशो न स्थानिवद्भवति --चिकीर्षकः, जिहीर्षकः । ण्वुलि कृते "अतो लोपः"(6.4.48/2308) परनिमित्तको "लिति"(6.1.193/3676) प्रत्ययात्पूर्वमुदात्तमिति स्वरे कर्त्तव्ये न स्थानिवद् भवतीति ।
सवर्ण । सवर्णविधिं प्रति अजादेशो न स्थानिवद् भवति--शिण्ढि, पिण्ढि । शिषेः पिषेश्च लोण्मध्यमपुरुषैकवचने, "रुधादिभ्यः श्नम्"(3.1.78/3676) हित्वधित्वष्टुत्वजश्त्वेषु कृतेषु, "श्नसोरल्लोपः"(6.4.111/2469) क्ङिति सार्वधातुके परनिमित्तकोऽनुस्वारस्य ययि परसवर्णे कर्त्तव्ये न स्थानिवद् भवति ।
अनुस्वार । अनुस्वारविधिं प्रत्यजादेशो न स्थानिवद् भवति-शिंषन्ति, पिंषन्ति । "नश्चापदान्तस्य झलि"(8.3.24/123) इति अनुस्वारे कर्त्तव्ये श्नसोरल्लोपो न स्थानिवद् भवति।
दीर्घ । दीर्घविधिं प्रति अजादेशो न स्थानिवद् भवति- प्रतिदीव्ना, प्रतिदीव्ने । प्रतिदिवन्नित्येतस्य "भस्य"(6.4.129/233)इत्यधिकृत्य तृतीयैकवचने चतुर्थ्येकवचने च "अल्लोपोऽनः"(6.4.134/234) इति अकारलोपः परनिमित्तकः, तस्य स्थानिवद्भावाद् "हलि च"(8.2.77/354) इति दीर्घत्वं न स्यात्, न ह्ययं वकारो हल्पर इति, अस्माद्वचनाद् भवति ।
जश् । जश्विधिं प्रत्यजादेशो न स्थानिवद् भवति--सग्धिश्च मे,सपीतिश्च मे । बब्धान्ते हरी धानाः । अदेः क्तिनि "बहुलं छन्दसि"(8.4.39/3398) इति घस्लादेशः"घसिभसोर्हलि च"(6.4.100/3550) इति उपधालोपः, "झलो झलि"(8.2.26/2281) इति सलोपः, "झषस्तथोर्धोऽधः"(8.2.40/2280) इति धत्वम्, उपधालोपस्य स्थानिवत्त्वात् । "झलां जश् झशि"(8.4.53/52) इति धकारस्य जश्त्वं न स्यादस्माद्वचनाद् भवति । समाना ग्धिः, समानस्य सभावः--सग्धिः । बब्धामिति-भसेर्लोड्द्विवचने शपः श्लुः, द्विर्वचनम्, अभ्यासकार्यम्, "घसिभसोर्हलि च"(6.4.100/3550) इति उपधालोपः, "झलो झलि"(8.2.26/2281) इति सलोपः, "झषस्तथोर्धोऽध"(8.2.40/2280) इति धत्वम्, उपधालोपस्य स्थानिवत्त्वात् झलां जश् झशि जश्त्वं न स्यादस्माद्वचनाद् भवति ।
चर् । चर्विधिं प्रत्यजादेशो न स्थानिवद् भवति--जक्षतुः, जक्षुः । `अक्षन्नमीमदन्त पितरः'(वा.सं.19.36) । लिड्द्विवचनबहुवचनयोरदेर्घस्लादेशः, "गमहनजनखनघसाम्"(6.4.98/2363) इत्युपधालोपः, द्विर्वचनम्, अभ्यासकार्यम् । तत्रोपधालोपस्य स्थानिवत्त्वात् "खरि च"(8.4.55/121) इति घकारस्य चर्त्त्वं न स्यादस्माद्वचनाद् भवति । "शासिवसिघसीनां च"(8.3.60/2410) इति षत्वम् । अक्षन्नित्यदेर्लुङ्बहुवचने घस्लादेशश्च्लेरागतस्य "मन्त्रे घसह्वर"(2.4.80/3402) इति लुक्, "गमहनजनखनघसाम्"(6.498/2363) इत्युपधालोपः, तस्य स्थानिवत्त्वात् "खरि च"(8.4.55/121)इति चर्त्वं न स्यादस्माद्वचनाद् भवति । स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवद्भवति, अन्यत्र तु स्थानिवदेव । तेन बहुखट्वकः, किर्योः गिर्योः, वाय्वोरिति स्थानिवत्वात् स्वर-दीर्घ-यलोपा न भवन्ति ।।
<द्विर्वचनेऽचि ।। 1.1.59 ।।>
द्विर्वचननिमित्तेऽचि अजादेशः स्थानिवद्भवति द्विर्वचन एव कर्त्तव्ये । रूपातिदेशश्चायं नियतकालः, तेन कृते द्विर्वचने पुनरादेशरूपमेवावतिष्ठते ।

आल्लोपोपधालोपणिलोपयणवायावादेशाः प्रयोजनम् ।

आल्लोपः--पपतुः, पपुः । "आतो लोप इटि च"(6.4.64/2372) इत्याकारलोपे कृते तस्य स्थानिवद्भावाद् "एकाचः"(6.1.1/2175) इति द्विर्वचनं भवति ।

उपधालोपः-- जघ्नतुः। जघ्नुः। "गमहनजनखनघसां लोपः क्ङित्यनङि"(6.4.98/2363)इत्युपधालोपे कृते अनच्कत्वाद् द्विर्वचनं न स्यादस्माद्वचनाद्भवति। णिलोपः-- आटिटत् । अटतेर्णिचि लुङि चङि णिलोपे कृते तस्य स्थानिवत्त्वाद् "अजादेर्द्वितीयस्य"(6.1.2/2176) इति टिशब्दस्य द्विर्वचनं भवति ।

यण्--चक्रतुः, चक्रुः । करोतेरतुसि उसि च यणादेशे कृतेऽनच्कत्वाद् द्विर्वचनं न स्यात्, स्थानिवत्त्वाद्भवति ।

अयवायावादेशाः--निनय, निनाय। लुलव, लुलाव । नयतेर्लुनातेश्चोत्तमे णलि गुणे कृते वृद्धौ चायवायावादेशास्तेषां स्थानिवत्त्वान् नेनैलोलाविति द्विर्वचनं भवति ।

द्विर्वचन इति किम् ? जग्ले । मम्ले । श्रवणमाकारस्य न भवति ।

द्विर्वचननिमित्त इति किम् ? दुद्युषति । ऊठि यणादेशो न स्थानिवद्भवभति ।

अचीति किम् ? जेघ्रीयते, देध्मीयते । "ई घ्राध्मोः"(7.4.31/2648) "यङि च"(7.4.30/2633) इति ईकारादेशस्तस्य स्थानिवद्भावादाकारस्य द्विर्वचनं स्यात् । अज्ग्रहणान्न भवति ।।

<अदर्शनं लोपः ।। 1.1.60 ।।>

अदर्शनमश्रवणमनुच्चारणमुनपलब्धिरभावो वर्णविनाशः--इत्यनर्थान्तरम् । एतैः शब्दैर्योऽभिधीयते तस्य 'लोप' इतीयं संज्ञा भवति । अर्थस्येयं संज्ञा; न शब्दस्य । प्रसक्तस्यादर्शनं लोपसंज्ञं भवति ।

"गोधाया ढ्रक्"(4.1.129/1135)-गौधेरः । पचेरन् । "जीवेरदानुक्"(उणादि.1.163)-जीरदानुः । स्रिवेर्मनिन्-आस्रेमाणम् ।
यकारवकारयोरदर्शनमिहोदाहरणम् । अपरस्यानुबन्धादेः प्रसक्तस्य ।

लोपप्रदेशाः-"लोपो व्योर्वलि"(6.1.66/873) इत्येवमादयः ।।

<प्रत्ययस्य लुक्श्लुलुपः ।। 1.1. 61 ।।>

'अदर्शनम्' इति वर्त्तते । प्रत्ययादर्शनस्य लुक्-श्लु-लुप्-इत्येताः संज्ञा भवन्ति । अनेकसंज्ञाविधानाच्च तद्भावितग्रहणमिह विज्ञायते । लुक्संज्ञाभावितं प्रत्ययादर्शनं लुक्संज्ञं भवति, श्लुसंज्ञाभावितं श्लुसंज्ञं भवति, लुप्संज्ञाभावितं लुप्संज्ञं भवति । तेन संज्ञानां सङ्करो न भवति । विधिप्रदेशेषु च भाविनी संज्ञा विज्ञायते । अत्ति । जुहोति । वरणाः ।

प्रत्ययग्रहणं किम् ? अगस्तयः । कुण्डिनाः ।

लुक्श्लुलुप्प्रदेशाः--"लुक्तद्धितलुकि"(1.2.49/1408),"जुहोत्यादितभ्यः श्लुः"(2.4.75/2489),"जनपदे लुप्"(4.2.81/1293) इत्येवमादयः ।।

प्रत्ययलोपे प्रत्ययलक्षणम् ।। 1.1.62 ।।

प्रत्ययनिमित्तं कार्यमसत्यपि प्रत्यये कथं तु नाम स्यादिति सूत्रमिदमारभ्यते । प्रत्ययलोपे कृते प्रत्ययलक्षणं प्रत्ययहेतुकं कार्यं भवति । अग्निचित्, सोमसुत्, अधोगित्यत्र सुप्तिङोर्लुप्तयोः "सुप्तिङन्तं पदम्"(1.4.14/29) इति पदसंज्ञा भवति । अधोगिति दुहेर्लङि तिपि शब्लुकि तिलोपे घत्वभष्भावजश्त्वचर्त्वेषु कृतेषु रूपम् ।

'प्रत्यय' इति वर्त्तमाने पुनः प्रत्ययग्रहणं किम् ? कृत्स्नप्रत्ययलोपे यथा स्यात् । इह मा भूत्--आघ्नीय, सङ्ग्मीय । हनिगम्योर्लिङात्मनेपदे "लिङः सलोपोऽनन्त्यस्य"(7.2.79/2211) इति सीयुट्सकारलोपः प्रत्ययैकदेशलोपस्तत्र प्रत्ययलक्षणेन झलीत्यनुनासिकलोपो न भवति ।

प्रत्ययलक्षणमिति किम् ? रायः कुलं रैकुलम्, गवे हितं गोहितम्-आयवादेशौ न भवतः वर्णाश्रयत्वात् ।।

<न लुमताङ्गस्य ।। 1.1.63 ।।>

पूर्वेणातिप्रसक्तं प्रत्ययलक्षणमिति विशेषे प्रतिषेध उच्यते । लुमता शब्देन लुप्ते प्रत्यये यदङ्गं तस्य प्रत्ययलक्षणं कार्यं न भवति । गर्गाः । मृष्टः । जुहुतः । यञ्शपोर्लुमता लुप्तयोरङ्गस्य गुणवृद्धी न भवतः ।

लुमतेति किम् ? कार्यते । हार्यते । अङ्गस्येति किम् ? पञ्च । सप्त । पयः । साम।।

<अचोऽन्त्यादि टि ।। 1.1.64।।>

'अचः' इति निर्धारणे षष्ठी । जातावेकवचनम् । अचां संनिविष्टानां योऽन्त्योऽच् तदादि शब्दरूपं टिसंज्ञं भवति । अग्निचित्-इच्छब्दः । सोमसुत्-उच्छब्दः । आताम्, आथाम्--आम्शब्द । पचेते, पचेथे ।

टिप्रदेशाः--"टित आत्मनेपदानां टेरे"(3.4.79/2233) इत्येवमादयः ।

<अलोऽन्त्यात्पूर्व उपधा ।। 1.1.65।।>

धात्वादौ वर्णसमुदायेऽन्त्यादलः पूर्वो यो वर्णः सोऽलेवोपधासंज्ञो भवति । पच् पठ्--अकारः । भिद्, छिद्-इकारः । बुध्, युध्-उकारः । वृत्, वृध्-ऋकारः ।
अल इति किम् ? शिष्टः, शिष्टवान् । समुदायात्पूर्वस्य मा भूत् ।

उपधाप्रदेशाः-"अत उपधायाः"(7.2.115/2282) इत्येवमादयः ।।
<तस्मिन्निति निर्दिष्टे पूर्वस्य ।। 1.1.66 ।।>
'तस्मिन्' इति सप्तम्यर्थनिर्देशे पूर्वस्यैव कार्यं भवति, नोत्तरस्य । "इको यणचि"(6.1.77/47)--दध्युदकम्, मध्विदम्, पचत्योदनम् ।
निर्दिष्टग्रहणमानन्तर्यार्थम् । अग्निचिदत्रेति व्यवहितस्य मा भूत् ।।
<तस्मादित्युत्तरस्य ।। 1.1.67 ।।>
निर्दिष्टग्रहणमनुवर्त्तते । `तस्माद्' इति पञ्चम्यर्थनिर्देशः । उत्तरस्यैव कार्य भवति, न पूर्वस्य । "तिङ्ङतिङः"(8.1.28/3935)--ओदनं पचति । इह न भवति - पचत्योदनमिति ।
<स्वं रूपं शब्दस्याशब्दसंज्ञा ।। 1.1.68 ।।>
शास्त्रे स्वमेव रूपं शब्दस्य ग्राह्यं बोध्यं प्रत्याय्यं भवति, न बाह्योऽर्थः, शब्दसंज्ञं वर्जयित्वा । शब्देनार्थावगतेरर्थे कार्यस्यासम्भवात् तद्वाचिनां शब्दानां संप्रत्ययो मा भूदिति सूत्रमिदमारभ्यते । "अग्नेर्ढक्"(4.2.33/1236)-`आग्नेयमष्टाकपालं निर्वपेत्'(वै.श्रौ.सू.1.19) । अग्निशब्दोऽग्निशब्दस्यैव ग्राहको भवति, न ज्वलनः पावको धूमकेतुरिति; नातः प्रत्ययो भवति ।
"उदश्वितोऽन्यतरस्याम्"(4.2.19/1220)-औदश्वित्कम् । औदश्वितम् । तक्रम् = अरिष्टं कालशेपं दण्डाहतं मथितमिति, नातः प्रत्ययो भवति ।
अशब्दसंज्ञेति किम् ? "दाधा घ्वदाप्"(1.1.20/2373) ,"तरप्तमपौ घः"(1.1.23/2003)-घुग्रहणेषु घग्रहणेषु च संज्ञिनां ग्रहणम्, न संज्ञायाः ।।
* सित्तद्विशेषाणां वृक्षाद्यर्थम् * (म.भा.1.176)।। सिन्निर्देशः कर्तव्यः । ततो वक्तव्यम्-तद्विशेषाणां ग्रहणं भवतीति । किं प्रयोजनम् ? वृक्षाद्यर्थम् ।
"विभाषा वृक्षमृगतृण"(2.4.12/916) इति--प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः ।
*पित्पर्यायवचनस्य च स्वाद्यर्थम् * ।।(म.भा.1.177) पिन्निर्देशः कर्त्तव्यः । ततो वक्तव्यम्-पर्यायवचनस्य ग्रहणं भवति, चकारात् स्वस्य रूपस्य तद्विशेषाणां चेति । किं प्रयोजनम् ? स्वाद्यर्थम् । "स्वे पुषः"(3.4.40/3361)-स्वपोषं पुष्टः । रैपोषम् । धनपोषम् । अश्वपोषम् । गोपोषम् ।
* जित्पर्यायवचनस्यैव राजाद्यर्थम् * ।।(म.भा.1.177) जिन्निर्देशः कर्त्तव्यः । ततो वक्तव्यम्-पर्यायवचनस्यैव ग्रहणं भवतीति, न स्वरूपस्य, नापि तद्विशेषाणाम् । किं प्रयोजनम् ? राजाद्यर्थम् । "सभाराजाऽमनुष्यपूर्वा"(2.4.23/826)-इनसभम्; ईश्वरसभम् । तस्यैव न भवति-राजसभा ।
तद्विशेषाणां च न भवति-पुष्यमित्रसभा, चन्द्रगुप्तसभा ।
*झित्तद्विशेषाणां च मत्स्याद्यर्थम् * ।।(म.भा.1.177) झिन्निर्देशः कर्त्तव्यः । ततो वक्तव्यम्--तस्य च ग्रहणं भवति तद्विशेषाणां चेति । किं प्रयोजनम् मत्स्याद्यर्थम् ।"पक्षिमत्स्यमृगान् हन्ति"(4.4.35./1585) इति ठक् । पाक्षिकः, मात्स्यिकः । तद्विशेषाणाम्-शाकुनिकः । पर्यायाणां न भवति-अजिह्मान् हन्ति, अनिमिषान् हन्तीति । *अथैकस्येष्यते-मीनान् हन्तीति मैनिकः ।
<अणुदित्सवर्णस्य चाप्रत्ययः ।। 1.1.69 ।।>
परेण णकारेण प्रत्याहारग्रहणम् । अण् गृह्यमाण उदिच्च सवर्णानां ग्राहको भवति, स्वस्य च रूपस्य; प्रत्ययं वर्जयित्वा । "आद् गुणः"(6.1.87/69), "अस्य च्वौ"(7.4.32/2118),"यस्येति च"(6.4.148/34)। स्वरानुनासिक्यकालभिन्नस्य ग्रहणं भवति । उदित्खल्वपि-
"चुटू"(1.3.7/189),"लशक्वतद्धिते"(1.3.8/195) । चवर्गटवर्गयोः कवर्गस्य च ग्रहणं भवति ।
अप्रत्यय इति किम् ? "सनाशंसभिक्ष उः"(3.2.168/3148) , "अ सांप्रतिके"(4.3.9/1379)-दीर्घो न भवति ।।
<तपरस्तत्कालस्य ।। 1.1.70 ।।>
तः परो यस्मात्सोऽयं तपरः,तादपि परस्तपरः, तपरो वर्णस्तत्कालस्यात्मना तुल्यकालस्य गुणान्तरयुक्तस्य सवर्णस्य ग्राहको भवति, स्वस्य च रूपस्य ।
विध्यर्थमिदम् । 'अण्' इति नानुवर्त्तने । अणामन्येषां च तपराणाम् इदमेव ग्रहणकशास्त्रम् । "अतो भिस ऐस्"(7.1.9/203) इत्येवमादिषु पूर्वग्रहणकशास्त्रं न प्रवर्त्तत एव । अतपरा अणस्तस्यावकाशः ।
किमुदाहरणम् ?"अतो भिस ऐस्"(7.1.9/203)--वृक्षैः, प्लक्षैः । "विड्वनोरनुनासिकस्यात्"(6.4.41/2982)--अब्जाः, गोजाः ।
तत्कालस्येति किम् ? खट्वाभिः, मालाभिः ।।
<आदिरन्त्येन सहेता ।। 1.1.71।।>
आदिरन्त्यनेत्संज्ञकेन सह गृह्यमाणस्तन्मध्यपतितानां वर्णानां ग्राहको भवति, स्वस्य च रूपस्य । अण् । अक् । अच् । हल् । सुप् । तिङ् ।
अन्त्येनेति किम् ? सुडिति तृतीयैकवचनेन 'टा' इत्यनेन ग्रहणं मा भूत् ।।
<येन विधिस्तदन्तस्य ।। 1.1.72 ।।>
येन विशेषणेन विधिर्विधीयते स तदन्तस्यात्मान्तस्य समुदायस्य ग्राहको भवति, स्वस्य च रूपस्य । "एरच्"(3.3.56/3231)--इवर्णान्तादच्प्रत्ययो भवति--चयः,जयः, अयः । "ओरावश्यके"(3.1.125/2886) उवर्णान्ताद् ण्यद्भवति--अवश्यलाव्यम्, अवश्यपाव्यम् ।।
*समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधो वक्तव्यः *।।(म.भा.1.184) द्वितीयान्तं श्रितादिभिः सह समस्यते--कष्टश्रितः । इह मा भूत्-कष्टं परमश्रित इति । प्रत्ययविधौ-"नडादिभ्यः फक्"(4.1.99/1101), नडस्यापत्यं नाडायनः । इह मा भूत्--सूत्रनडस्यापत्यं सौत्रनाडिः ।

किमविशेषेण ? नेत्याह ।।
* उगिद्विर्णग्रहणवर्जमित वाच्यम् *।।(म.भा.1.185) "उगितश्च"(4.1.6/455) इति ङीप्रत्ययस्तदन्तादपि भवति । भवती, अतिभवती । वर्णग्रहणम्-"अत इञ्"(4.1.95/1095) । दाक्षिः, प्लाक्षिः।।
यस्मिन्विधिस्तदादावल्ग्रहणे।।(म.भा.1.188) अल्ग्रहणेषु यस्मिंन्विधिस्तदादाविति वक्तव्यम् । "अचि श्नुधातुभ्रवां य्वोरियङुवङौ"(6.4.77/271) इति--श्रियः, भ्रुवः ।।
<वृद्धिर्यस्याचामादिस्तद् वृद्धम् ।।1.1.73।।>
यस्येति समुदाय उच्यते । अचां मध्ये यस्य वृद्धिसंज्ञक आदिभूतस्तच्छब्दरूपं वृद्धसंज्ञं भवति । 'अचाम्' इति जातौ बहुवचनम् । शालीयः, मालीयः, औपगवीयः, कापटवीयः।
आदिरिति किम् ? सभासन्नयने भवः साभासन्नयनः ।
वा नामधेयस्य वृद्धसंज्ञा वक्तव्या। (म.भा.1.189)देवदत्तीयाः, दैवदत्ताः ।
*गोत्रान्तादसमस्तवत् प्रत्ययो भवतीति वक्तव्यम् *।(म.भा.1.190) घृतप्रधानो रौढिः = घृतरौढिः, तस्य छात्रा घृतरौढीयाः । ओदनप्रधानः पाणिनिः = ओदनपाणिनिः, तस्य छात्रा ओदनपाणिनीयाः, वृद्धाम्भीयाः, वृद्धकाश्यपीयाः ।
जिह्वाकात्यहरितकात्यवर्जम् ।(म.भा.1.190) जैह्वाकाताः, हारितकाताः ।।
<त्यदादीनि च ।। 1.1.74।।>
यस्याचामादिग्रहणमुत्तरार्थमनुवर्तते । इह तु न सम्बध्यते । त्यदादीनि शब्दरूपाणि वृद्धसंज्ञानि भवन्ति । त्यदीयम्, तदीयम्, एतदीयम्, इदमीयम्, अदसीयम्; त्वदीयम्, त्वादायनिः, मदीयम्, मादायनिः, भवदीयम्, किमीयम् ।।
<एङ् प्राचां देशे ।। 1.1.75।।>
यस्याचामादिग्रहणमनुवर्त्तते । एङ् यस्याचामादिस्तत्प्राचां देशाभिधाने वृद्धसंज्ञं भवति । एणीपचनीयः, भोजकटीयः, गोनर्दीयः ।
एङिति किम् ? आहिच्छत्रः, कान्यकुब्जः । प्राचामिति किम् ? देवदत्तो नाम वाहीकेषु ग्रामः, तत्र भवो दैवदत्तः ।
देश इति किम् ? गोमत्यां भवा मत्स्या गौमताः ।
प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा ।
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती ।।
*इति श्रीजयादित्यविरचितायां काशिकावृत्तौ प्रथमाध्यायस्य प्रथमः पादः *:
---* * *---

1.2

अथ प्रथमाध्याये द्वितीयः पादः
<गाङ्कुटादिभ्योऽञ्णिन्ङित् ।। 1.2.1 ।।>
अतिदेशोऽयम् । 'गाङ्' इति इङादेशो गृह्यते, न `गाङ् गातौ'(धा.पा.950) इति; ङकारस्यानन्यार्थत्वात् । कुटादायोऽपि--`कुट कौटिल्ये'(धा.पा.1367)इत्येतदारभ्य यावत् `कुङ् शब्दे'(धा.पा.1402) इति । एभ्यो गाङ्कुटादिभ्यः परेऽञ्णितः प्रत्ययाः ङितो भवन्ति । ङिद्वद्भवन्तीत्यर्थः । गाङः--अध्यगीष्ट, अध्यगीषाताम्, अध्यगीषत । कुटादीभ्यः--कुटिता, कुटितुम्, कुटितव्यम् । उत्पुटिता, उत्पुटितुम्, उत्पुटितव्यम् । अञ्णिदिति किम् ? उत्कोटयति, उच्चुकोट, उत्कोटकः, उत्कोटो वर्तते ।
*व्यचेः कुटादित्वमनसीति वक्तव्यम् *। विचिता, विचितुम्, विचितव्यम् । अनसीति किम् ? उरुव्यचाः ।
<विज इट् ।। 1.2.2 ।।>
`ओविजी भयचलनयोः'(धा.पा.1290),अस्मात्परः इडादिः प्रत्ययो ङिद्वद्भवति । उद्विजिता, उद्विजितुम्, उद्विजितव्यम् ।
इडिति किम् ? उद्वेजनम्, उद्वेजनीयम् ।
<विभाषोर्णोः ।। 1.2.3 ।।>
`इट्' इति वर्तते । `ऊर्णुञ् आच्छादने'(धा.पा.1039), अस्मात्पर इडादिः प्रत्ययो विभाषा ङिद्वद्भवति । प्रोर्णुविता, प्रोर्णविता । इडित्येव-प्रोर्णवनम्, प्रोर्णवनीयम् ।
<सार्वधातुकमपित् ।। 1.2.4 ।।>
सार्वधातुकं यदपित् तन्ङिद्वद्भवति । कुरुतः, कुर्वन्ति । चिनुतः, चिन्वन्ति ।

सार्वधातुकमिति किम् ? कर्ता, कर्तुम्, कर्तव्यम् । अपिदिति किम् ? करोति, करोषि, करोमि ।
<असंयोगाल्लिट् कित् ।। 1.2.5 ।।>
`अपित्' इति वर्तते । असंयोगान्ताद्धातोः परो लिट् प्रत्ययोऽपित् किद्भवति । बिभिदतुः, बिभिदुः । चिच्छिदतुः, चिच्छिदुः । ईजतुः, ईजुः ।
असंयोगादिति किम् ?सस्रंसे, दध्वंसे । अपिदित्येव--बिभेदिथ।
<इन्धिभवतिभ्यां च ।। 1.2.6 ।।>
`इन्धि-भवति' इत्येताभ्यां परो लिट्प्रत्ययः किद्भवति । `समीधे दस्युहन्तमम्'(ऋ.6.16.15), `पुत्र ईधे अथर्वणः'(ऋ.6.16.14) । भवतेः खल्वपि-बभूव। बभूविथ ।
इन्धेः संयोगार्थं ग्रहणम् । भवतेः पिदर्थम् । अत्रेष्टिः-* श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यम् * ।। श्रेथतुः, श्रेथुः । ग्रेथतुः, ग्रेथुः । देभतुः, देभुः । परिषस्वजे, परिषस्वजाते ।।
<मृडमृदगुधकुषक्लिशवदवसः क्त्वा ।। 1.2.7 ।।>
मृड,मृद, गुध, कुष, क्लिश, वद, वस्--इत्येतेभ्यः परः क्त्वाप्रत्ययः किद्भवति । "नक्त्वा सेट्"(1.2.18/3322) इति कित्त्वप्रतिषेधं वक्ष्यति, तस्यायं पुरस्तादपकर्षः । गुध-कुष-क्लिशीनां तु "रलो व्युपधाद्"(1.2.26/2617) इति विकल्पे प्राप्ते नित्यार्थ वचनम् । मृडित्वा । मृदित्वा । गुधित्वा । कुषित्वा । क्लिशित्वा । उदित्वा । उषित्वा ।।
<रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ।। 1.2.8।।>
रुद, विद, मुष, ग्रहि, स्वपि, प्रच्छ--इत्येतेभ्यः संश्च क्त्वा च कितौ भवतः । रुद-विद-मुषीणां "रलो व्युपधाद्"(1.2.26/2617) इति विकल्पे प्राप्ते नित्यार्थं ग्रहणम् । ग्रहेर्विध्यर्थमेव । स्वपिप्रच्छ्योः सन्नर्थं ग्रहणम् । किदेव हि क्त्वा । रुदित्वा, रुरुदिषति । विदित्वा, विविदिषति । मुषित्वा, मुमुषिषति । गृहीत्वा, जिघृक्षति । सुप्त्वा, सुषुप्सति । पृष्ट्वा, पिपृच्छिषति । ग्रहादीनां कित्त्वात्संप्रसारणं भवति । "किरश्च पञ्चभ्यः"(7.2.75/2611) इति प्रच्छेरिडागमः ।
<इको झल् ।। 1.2.9 ।।>
`सन्' इत्यनुवर्तते । `क्त्वा' इति निवृत्तम् । इगन्ताद्धातोः परो झलादिः सन् किद्भवति । चिचीषति । तुष्टूषति । चिकीर्षति ।
इक इति किम्? पिपासति । तिष्ठासति । झलिति किम् ? शिशयिषते ।
किमर्थमिदमुच्यते ? गुणो मा भूदिति । "अज्झनगमां सनि"(6.4.16/2614) इति दीर्घत्वं गुणस्य बाधकं भविष्यति ? यथैव तर्हि दीर्घत्वं गुणं बाधते तथा णिलोपमपि बाधेत । तस्माद्दीर्घत्वस्यावकाशदानाय कित्त्वमिदमारभ्यते । चिचीषतीत्यादिषु सावकाशं दीर्घत्वं परत्वाद् णिलोपेन बाध्यते-ज्ञीप्सति ।।
`इकः कित्वं गुणो मा भूद्दीर्घारम्भात्कृते भवेत् ।
अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते ।।
सामर्थ्याद्धि पुनर्भाव्यमृदित्वं दीर्घसंश्रयम् ।
दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनम् ।।'(म.भा.1.19)
<हलन्ताच्च ।। 1.2.10 ।।>
`इकः सन् झल्कित्' इति वर्तते । समीपवचनोऽन्तशब्दः । हल् चासावन्तश्च हलन्तः । इगन्तादिक्समीपाद्धलः परः सन् झलादिः किद्भवति । बिभित्सति । बुभुत्सते । इक इत्येव--यियक्षते । झलित्येव--विवर्त्तिषते ।
दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम् । धिप्सति । धीप्सति ।।
<लिङ्सिचावात्मनेपदेषु ।। 1.2.11 ।।>
`हलन्तादिको झल्कित्' इति वर्तते । `सन्' इति निवृत्तम् । इगन्तादिक्समीपाद्धलः परौ झलादी लिङ्सिचौ आत्मनेपदेषु परतः कितौ भवतः । भित्सीष्ट, भुत्सीष्ट । सिचि खल्वपि--अभित्त, अबुद्ध । इक इत्येव--यक्षीष्ट, अयष्ट । संप्रसारणं हि स्यात् ।
आत्मनेपदेष्विति किम् ? अस्राक्षीत्, अद्राक्षीत् । "सृजिदृशोझल्यमकिति"(6.1.58/2405) इत्यमागमो न स्यात् । हलन्तादित्येव--चेषीष्ट, अचेष्ट । गुणो न स्यात् । झलित्येव--वर्तिषीष्ट, अवर्त्तिष्ट । गुणो न स्यात् ।
लिङ्सिचाविति किम् ? द्वेष्टा, द्वेक्ष्यति ।।
<उश्च ।। 1.2.12 ।।>
'ऋवर्णान्ताद्धातोः परौ लिङ्सिचावात्मनेपदेषु झलादी कितौ भवतः । कृषीष्ट । हृषीष्ट । सिचः खल्वपि--अकृत । अहृत । झलित्येव--वरिषीष्ट । अवरिष्ट । "वृतो वा "(7.2.38/2391) । अवरीष्ट ।।
<वा गमः ।। 1.2.13 ।।>
"लिङ्सिचावात्मनेपदेषु" इति वर्तते । गमेर्धातोः परौ लिङ्सिचौ आत्मनेपदेषु झलादी वा कितौ भवतः । संगंसीष्ट, संगसीष्ट । सिचः खल्वपि--समगत,

समगंस्त । कित्त्वपक्षे अनुनासिकलोपो भवति "अनुदात्तोपदेशवनतितनोत्यादीनाम्"(6.4.37/2428) इति ।।
<हनः सिच् ।। 1.2.14 ।।>
हन्तेर्धातोः परः सिच् किद्भवति । आहत । आहसाताम् । आहसत । सिचः कित्त्वादनुनासिकलोपः ।
सिज्ग्रहणं लिङ्निवृत्त्यर्थम्, उत्तरत्रानुवृत्तिर्मा भूत् ।
आत्मनेपदग्रहणमुत्तरार्थमनुवर्तते । इह तु परस्मैपदे हन्तेर्वधभावस्य नित्यत्वात्कित्त्वस्य प्रयोजनं नास्ति ।।
<यमो गन्धने ।। 1.2.15 ।।>
`सिच्, आत्मनेपदेषु' इति वर्तते । यमेर्धातोर्गन्धने वर्तमानात्परः सिच् प्रत्ययः किद्भवति आत्मनेपदेषु परतः । गन्धनम् = सूचनम्, परेण प्रच्छाद्यमानस्यावद्यस्याविष्करणम् । अनेकार्थत्वाद्धातूनां यमिस्तत्र वर्तते । उदायत । उदायसाताम् । उदायसत । सूचितवानित्यर्थः । सिचः कित्त्वादनुनासिकलोपः । "आङो यमहनः"(1.3.28/2695) इत्यात्मनेपदम् ।
गन्धन इति किम् ? उदायंस्त पादम् । उदायंस्त कूपादुदकम् । उद्धृतवानित्यर्थः । सकर्मकत्वेऽपि "समुदाङ्भ्यो यमोऽग्रन्थे"(1.3.75/2742)इत्यात्मनेपदम् ।।
<विभाषोपयमने ।। 1.2.16 ।।>
`यमः सिच्, आत्मनेपदेषु' इति वर्तते । यमेर्धातोरुपयमने वर्तमानात् परः सिच्प्रत्ययो विभाषा किद्भवति, तआत्मनेपदेषु परतः । उपायत कन्याम्, उपायंस्त कन्याम् । उपायत भार्याम्, उपायंस्त भार्याम् ।
उपयमनम् = स्वीकरणम्, विवाहः, दारकर्म, पाणिग्रहणमित्यर्थः । "उपाद्यमः स्वकरणे"(1.3.56/2729)इत्यात्मनेपदम् ।।
<स्थाध्वोरिच्च ।। 1.2.17 ।।>
`सिच्'`आत्मनेपदेषु' इति वर्तते । तिष्ठतेर्धातोः घुसंज्ञकानां च इकारश्चान्तादेशः सिच्च किद्भवाति आत्मनेपदेषु परतः । उपास्थित, उपास्थिषाताम्, उपास्थिषत । घुसंज्ञकानाम्- अदित, अधित ।।
`इच्च कस्य तकारेत्त्वं दीर्घो मा भूदृतेऽपि सः ।
अनन्तरे प्लुतो मा भूत् प्लुतश्च विषये स्मृतः ।।'(म.भा.1.199)
<न क्त्वा सेट् ।। 1.2.18 ।।>
क्त्वाप्रत्ययः सेण्न किद्भवति । देवित्वा, वर्त्तित्वा ।
सेडिति किम् ? कृत्वा, हुत्वा । क्त्वाग्रहणं किम् ? निगृहीतिः । उपस्निहितिः । निकुचितिः ।।
`न सेडिति कृतेऽकित्त्वे निष्ठायामवधारणात् ।
ज्ञापकान्न परोक्षायां सनि झल्ग्रहणं विदुः ।।
इत्त्वं कित्संनियोगेन रेण तुल्यं सुधीवनि ।
वस्वर्थं किदतीदेशान्निगृहीतिः प्रयोजनम् ।।'
<निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः ।। 1.2.19।।>
`न सेट्' इति वर्तते । शीङ्-स्विदि-मिदि-क्ष्विदि-धृष्--इत्येतेभ्यः परो निष्ठाप्रत्ययः सेण्न किद्भवति । शयितः, शयितवान् । प्रस्वेदितः, प्रस्वेदितवान् । प्रमेदितः, प्रमेदितवान् । प्रक्ष्वेदितः, प्रक्ष्वेदितवान् । प्रधर्षितः, प्रधर्षितवान् । सेडित्येव-स्विन्नः, स्विन्नवान् । स्विदादीनाम् "आदितश्च"(7.2.16/3036) इति निष्ठायामिट् प्रतिषिध्यते । "विभाषा भावादि कर्मणोः"(7.2.17/3054) इति पक्षेऽभ्यनुज्ञायते, स विषयः कित्त्वप्रतिषेधस्य ।।
<मृषस्तितिक्षायाम् ।। 1.2.20 ।।>
मृषेर्धातोः तितिक्षायामर्थे निष्ठा सेण्न किद्भवति । तितिक्षा ।। क्षमा । मर्षितः, मर्षितवान् ।
तितिक्षायामिति किम् ? अपमृषितं वाक्यमाह ।।
<उदुपधाद्भावादिकर्मणोरन्यतरस्याम् ।। 1.2.21 ।।>
`निष्ठा, सेण्न, कित्' इति वर्तते । उदुपधाद्धातोः परो भावे आदिकर्मणि च वर्तमानो निष्ठाप्रत्ययः सेडन्यतरस्यां न किद्भवति । द्युतितमनेन, द्योतितमनेन । प्रद्योतितः, प्रद्युतितः । मुदितमनेन, मोदितमनेन । प्रमुदितः, प्रमोदितः ।
उदुपधादिति किम् ? लिखितमनेन । भावादिकर्मणोरिति किम् ? रुचितं कार्षापणं ददाति । सेडित्येव--प्रभुक्त ओदनः ।
व्यवस्थितविभाषा चेयम् । तेन शब्विकरणानामेव भवति । `गुध परिवेष्टने'(धा.पा.1120), गुधितमित्यत्र न भवति ।।
<पूङः क्त्वा च ।। 1.2.22 ।।>
`अन्यतरस्याम्' इति न स्वर्यते; उत्तरसूत्रे पुनर्वावचनात् । `न सेट्' इति वर्तते । पूङश्च इड्विहितः "क्लिशः क्त्वानिष्ठयोः"(7.2.50/3049),"पूङश्च"(7.2.51/3050) इति । पूङ परो निष्ठाप्रत्ययः क्त्वा च सेण्न किद्भवति । पवितः, पवितवान् ।

क्त्वाप्रत्ययस्य "नक्त्वा सेट्"(1.2.18/3322) इति सिद्ध एव प्रतिषेधः । तस्य ग्रहणमुत्तरार्थम् । तथा चोक्तम्--`नित्यमकित्त्वमिडाद्योः क्त्वानिष्ठयोः क्त्वाग्रहणमुत्तरार्थम्' इति ।(म.भा.1.201)।।

<नोपधात् थफान्ताद्वा ।। 1.2.23 ।।>

'निष्ठा' इति निवृत्तम् । नकारोपधाद्धातोस्थकारान्तात्फकारान्ताच्च परः क्त्वाप्रत्ययः सेड् वा न किद्भवति । ग्रथित्वा, ग्रन्थित्वा । श्रथित्वा, श्रन्थित्वा । गुफित्वा, गुम्फित्वा ।

नोपधादिति किम् । रेफित्वा । गोफित्वा । थफान्तादिति किम् ? सित्वा । ध्वंसित्वा ।।

<वञ्चिलुञ्च्यृतश्च ।। 1.2.24 ।।>

वञ्चि-लुञ्चि-ऋत्-इत्येतेभ्यः परः क्त्वाप्रत्ययः सेड् वा न किद्भवति । वचित्वा, वञ्चित्वा । लुचित्वा, लुञ्चित्वा । ऋतित्वा, अर्तित्वा ।

"ऋतेरीयङ्"(3.1.29/2422) आर्धधातुके विकल्पितः । स यत्र पक्षे नास्ति तत्रेदमुदाहरणम् । सेडित्येव--वक्त्वा ।।

<तृषिमृषिकृशेः काश्यपस्य ।। 1.2.25 ।।>

"न क्त्वा सेट्"(1.2.18/3322) इति प्रतिषेधे प्राप्ते विकल्प्यते । तृषि,मृषि,कृशि--इत्येतेभ्यः परः क्त्वाप्रत्ययः सेट् काश्यपस्याचार्यस्य मते वा न किद्भवति । तृषित्वा, तर्षित्वा । मृषित्वा, मर्षित्वा । कृशित्वा, कर्शित्वा । काश्यपग्रहणं पूजार्थम्, वेत्येव हि वर्तते ।।

<रलो व्युपधाद्धलादेः संश्च।। 1.2.26 ।।>

`वा' इति वर्तते, `सेट्' इति च । उश्च इश्च वी,वी उपधे यस्य स व्युपधः । उकारोपधादिकारोपधाच्च धातो रलन्ताद्धलादेः परः संश्च क्त्वा च सेटौ वा कितौ भवतः । द्युतित्वा, द्योतित्वा । दिद्युतिषते, दिद्योतिषते । लिखित्वा, लेखित्वा । लिलिखिषति, लिलेखिषति ।

रल इति किम् ? देवित्वा, दिदेविषति व्युपधादिति किम् ?वर्त्तित्वा, विवर्त्तिषते । हलादेरिति किम् ? एषित्वा, एषिषिषति । सेडित्येव--भुक्त्वा, बुभुक्षते ।।

<ऊकालोऽज्झ्रस्वदीर्घप्लुतः ।। 1.2.27 ।।>

`ऊ' इति त्रयाणामयं मात्रिकद्विमात्रिकत्रिमात्रिकाणां प्रश्लिष्टनिर्देशः । ह्रस्वदीर्घप्लुतः इति द्वन्द्वैकवद्भावे पुंल्लिङ्गनिर्देशः । उ ऊ ऊ3-इत्येवंकालोऽज् यथाक्रमं 'ह्रस्वदीर्घप्लुत'--इत्येवंसंज्ञो भवति । उकालो ह्रस्वः--दधि, मधु । ऊकालो दीर्घः--कुमारी, गौरी । ऊ3कालः प्लुतः--देवदत्ता 3 अत्र न्वसि । कालग्रहणं परिमाणार्थम् ; दीर्घप्लुतयोः ह्रस्वसंज्ञा मा भूत् ।

आलूय, प्रलूय--"ह्रस्वस्य पिति कृति तुक्"(6.1.71/2858) इति तुङ् न भवति ।

अज्ग्रहणं संयोगाच्समुदायनिवृत्त्यर्थम्--प्रतक्ष्य, प्ररक्ष्य । ह्रस्वाश्रयस्तुङ् मा भूत्-तितउच्छत्रम् । "दीर्घात्"(6.1.75/148) "पदान्ताद्वा"(6.1.76/149)इति वाभाषा तुङ् मा भूत् ।

ह्रस्वदीर्घप्लुतप्रदेशाः-"ह्रस्वोनपुंसके प्रातिपदिकस्य"(1.2.47/318),"अकृत्सार्वधातुकयोर्दीर्घः"(7.4.25/2298),"वाक्यस्य टेः प्लुत उदात्तः"(8.2.82/93) ।।

<अचश्च ।। 1.2.28।।>

परिभाषेयं स्थानिनियमार्था । ह्रस्वदीर्घप्लुताः स्वसंज्ञया शिष्यमाणा अच एव स्थाने वेदितव्याः । वक्ष्यति--"ह्रस्वो नपुंसके प्रातिपदिकस्य"(1.2.47/318) । रै-अतिरि । नौ-अतिनु । गो-उपगु ।

अच इति किम्? सुवाग् ब्राह्मणकुलम् । "अकृत्सार्वधातुकयोर्दीर्घः"(7.4.25/2298)--चीयते, श्रूयते । अच इति किम् ? भिद्यते । छिद्यते । "वाक्यस्य टेः प्लुत उदात्तः"(8.2.82/93) देवदत्ता3, यज्ञदत्ता3 । अच इति किम् ? अग्निची3त्, सोमसू3त्--तकारस्य मा भूत् ।

स्वसंज्ञया विधाने नियमः । अजिति वर्त्तते, तइह मा भूत्-- द्यौः, पन्थाः, सः । द्युभ्याम्, द्युभिः । अत्र नियमो नास्ति ।।

<उच्चैरुदात्तः ।। 1.2.29 ।।>

`अच्' इति वर्तते । उदात्तादिशब्दाः स्वरे वर्णधर्मे लोकवेदयोः प्रसिद्धा एव, त इह तद्गुणेऽचि परिभाष्यन्ते । उच्चैरुपलभ्यमानो योऽच् स उदात्तसंज्ञो भवति ।

उच्चैरिति च श्रुतिप्रकर्षो न गृह्यते--उच्चैर्भाषते, उच्चैः पठतीति; किं तर्हि? स्थानकृतमुच्चत्वं संज्ञिनो विशेषणम् । ताल्वादिषु हि भागवत्सु स्थानेषु वर्णा निष्पद्यन्ते, तत्र यः समाने स्थाने ऊर्ध्वभागनिष्पन्नोऽच् स उदात्तसंज्ञो भवति । यस्मिन्नुच्चार्यमाणे गात्राणामायामः = निग्रहो भवति, रूक्षता = अस्निग्धता स्वरस्य, संवृतता कण्ठविवरस्य । ये, ते,के ।

उदात्तप्रदेशाः--"आद्युदात्तश्च"(3.1.3/3708)इत्येवमादयः ।।

<नीचैरनुदात्तः ।। 1.2.30 ।।>

`अच्' इति वर्तते । नीचैरुपलभ्यमानो योऽच् सोऽनुदात्तसंज्ञो भवति । समाने स्थाने नीचभागे निष्पन्नोऽच् अनुदात्तः । यस्मिन्नुच्चार्यमाणे गात्राणामन्ववसर्गः = मार्दवम् भवति, स्वरस्य मृदुता = स्निग्धता, कण्ठविवरस्योरुता = महत्ता । त्व-सम-सिम-नेमेत्यनुच्चानि । नमस्ते रुद्र नीलकण्ठ सहस्राक्ष ।

अनुदात्तप्रदेशाः-"अनुदात्तौ सुप्पितौ"(3.1.4/3709) इत्येवमादयः ।।

<समाहारः स्वरितः ।। 1.2.31 ।।>

`अच्' इति वर्तते । उदात्तानुदात्तस्वरसमाहारो योऽच् स स्वरितसंज्ञो भवति । सामर्थ्याच्चात्र लोकवेदयोः प्रसिद्धौ गुणावेव वर्णधर्मावुदात्तानुदात्तौ गृह्येते, नाचौ । तौ समाह्रियेते यस्मिन्नचि तस्य 'स्वरितः'इत्येषा संज्ञा विधीयते । शिक्यम्, कन्या, सामन्यः, क्व ।

स्वरितप्रदेशाः-"तित्स्वरितम्"(6.1.185/3729)इत्येवमादयः ।।

<तस्यादित उदात्तमर्धह्रस्वम् ।। 1.2.32 ।।>

'उदात्तानुदात्तस्वरसमाहारः स्वरितिः' इत्युक्तम् । तत्र न ज्ञायते-कस्मिन्नंशे उदात्तः ? कस्मिन्नंशेऽनुदात्तः ? कियान्वा उदात्तः ? कियान्वा अनुदात्तः इति ? तदुभयमनेनाख्यायते । तस्य स्वरितस्य आदावर्धह्रस्वमुदात्तम्, परिशिष्टमनुदात्तम् । 'अर्धह्रस्वम्' इति चार्धमात्रोपलक्ष्यते ।

ह्रस्वग्रहणमतन्त्रम् । सर्वेषामेव ह्रस्वदीर्घप्लुतानां स्वरितानामेष स्वरविभागः । शिक्यमित्यत्रार्द्धमात्रा आदित उदात्ता, अपरार्धमात्रा अनुदात्ता, एकश्रुतिर्वा । कन्या इत्यत्रार्द्धमात्राऽऽदित उदात्ता,अध्यर्धमात्रा अनुदात्ता । माणवका3 माणवकेत्यत्रार्धमात्राऽऽदित उदात्ता, अर्धतृतीयमात्रा अनुदात्ता ।।

<एकश्रुति दूरात्संबुद्धौ ।। 1.2.33 ।।>

त्रैस्वर्ये पदानां प्राप्ते दूरात्संबुद्धावैकश्रुत्यं विधीयते । एका श्रुतिर्यस्य तदिदमेकश्रुति । एकश्रुति वाक्यं भवति । दूरात्संबोधयति येन वाक्येन तत्संबोधनं संबुद्धिः, नैकवचनं संबुद्धिः । स्वराणामुदात्तादीनामविभागो भेदतिरोधानमेकश्रुतिः । आगच्छ भो माणवक देवदत्ता3 ।

दूरादिति किम् ? आगच्छ भो माणवक देवदत्त।।

<यज्ञकर्मण्यजपन्यूङ्खसामसु ।। 1.2.34 ।।>

त्रैस्वर्येण वेदे मन्त्राः पठ्यन्त, तेषां यज्ञक्रियायामपि तथैव प्रयोगे प्राप्ते एकश्रुतिर्विधीयते, जपन्यूङ्खसामानि वर्जायित्वा । यज्ञकर्मणि मन्त्राणामैकश्रुत्यं भवति । अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् । `अपां रेतांसि जिन्वतो3म्'(ऋ.8.44.16) ।

यज्ञकर्मणीति किम् ? संपाठे मा भूत् । अजपेष्विति किम् ? `ममाग्ने वर्चो विहवेष्वस्तु'(ऋ.10.128.1) । जपः = अनुकरणमन्त्रः, उपांशुप्रयोगः ।

अन्यूङ्खेति किम् ? न्यूङ्खा ओकाराः षोडश;तेषु केचिदुदात्ताः, केचिदनुदात्ताः ।

असामस्विति किम् ? ए3 विश्वं समत्रिणं दहा3 । सामानि वाक्यविशेषस्था गीतय उच्यन्ते । तत्रैकश्रुतिर्न भवति ।।

<उच्चैस्तरां वा वषट्कारः ।। 1.2.35।।>

`यज्ञकर्मणि' इति वर्तते । यज्ञकर्मणि वषट्कारः उच्चैस्तरां वा भवति, एकश्रुतिर्वा । `वषट्' शब्देनात्र `वौषट्' शब्दो लक्ष्यते, `वौषट्'-इत्यस्यैवेदं स्वरविधानम् ।

यद्येवम्, वौषड्ग्रहणमेव कस्मान्न कृतम् ? वैचित्र्यार्थम् । विचित्रा हि सूत्रस्य कृतिः पाणिनेः ।

सोमस्याग्ने वीही3 वौ3षट् । सोमस्याग्ने वीही3 वौ3 षट् ।।(ऐ.ब्रा.3.5.4.6)

<विभाषा छन्दसि ।। 1.2.36 ।।>

छन्दसि विषये विभाषा एकश्रुतिर्भवति, पक्षान्तरे त्रैस्वर्यमेव भवति । वेति प्रकृते विभाषाग्रहणं `यज्ञकर्मणि' इत्यस्य निवृत्त्यर्थम् । तेनायं स्वाध्यायकालेऽपि पाक्षिक ऐकश्रुत्यविधिर्भवति । `इषे त्वोर्जे त्वा । इषे त्वोर्जेत्वा '(वा.सं.1.1.1)। `अग्न आयाहि वीतये । अग्न आयाहि वीतये'(ऋ.6.16.10) । `अग्निमीळे पुरोहितम् । अग्निमीळे पुरोहितम्'(ऋ.1.1.1) । `शन्नो देवीरभिष्टये । शन्नो देवोरभिष्टये'(ऋ10.9.4) । व्यवस्थितविकल्पोऽयमिति केचित् । व्यवस्था च वेदे मन्त्रदले नित्यं त्रेस्वर्यम्, ब्राह्मणदले नित्यमैकश्रुत्यमिति ।।

"इच्छासंहितयोरार्षे छन्दो वेदे च छन्दसि ।"

इति नानार्थकोशात् छन्दसि वर्णसंहितायामिति भट्टाचार्यचरणा इति । भाषायामप्येकश्रुतिर्विभाषा भवतीति सिद्धम् ।।

<न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ।। 1.2.37 ।।>

सुब्रह्मण्या नाम निगदः, तत्र `यज्ञकर्मणि' इति "विभाषा छन्दसि"(1.2.36/3665) इति च एकश्रुतिः प्राप्ता प्रतिषिध्यते । सुब्रह्मण्यायामेकश्रुतिर्न भवति । यस्तु लक्षणप्राप्तः स्वरितस्तस्योदात्त आदेशो भवति ।

सुब्रह्मण्यो3 मिन्द्रागच्छ हरिव आगच्छ मेधातिथेर्मेष वृषणश्वस्य मेने गौरावस्कन्दिन्नहल्यायै जार कौशिकब्राह्मण गौतमब्रुवाण श्वः सुत्यामागच्छ मघवन्'(श.ब्रा.3.3.1.19)।

अत्र सुब्रह्मण्योमित्योकारस्तित्स्वरेण स्वरितः, तस्योदात्तो विधीयते ।

इन्द्र आगच्छेत्यामन्त्रितमाद्युदात्तं द्वितीयो वर्णोऽनुदात्तः । "उदात्तादनुदात्तस्य स्वरितः"(8.4.66/3660) इति स्वरितः प्रसक्तः, तस्यानेनोदात्तः क्रियते; तेन द्वावप्युदात्तौ संपन्नौ । आगच्छेत्याकार उदात्तः । ततः परोऽनुदात्तः स्वरितः, तस्यानेनोदात्तः क्रियते । तदेवमिन्द्र आगच्छेति चत्वार उदात्ताः । पश्चिम एकोऽनुदात्तः ।

हरिव आगच्छेत्यनयैव प्रक्रियया चत्वार उदात्ताः, द्वावनुदात्तौ ।

मेधातिथेरिति षष्ठ्यन्ते परमामन्त्रितमनुप्रविशति "सुबामन्त्रिते पराङ्गवत्स्वरे"(2.1.2/3656) इति । ततः सकलस्यामन्त्रिताद्युदात्तत्वे कृते

द्वितीयमक्षरमनुदात्तम् । तस्य "उदात्तादनुदात्तस्य स्वरितः"(8.4.66/3660) इति स्वरितत्वे प्राप्ते इदमुदात्तत्वं विधीयते । तेन द्वावप्युदात्तौ भवतः । शेषमनुदात्तम् ।

`वृषणश्वस्य मेने ' इति समानं पूर्वेण । गौरावस्कन्दिन्निति तथैव द्वे आद्ये अक्षरे उदात्ते, शेषमनुदात्तम् । अहल्यायै जारेति सुबन्तस्यामन्त्रितानुप्रवेशात् तद्वदेव स्वरः । द्वावुदात्तौ । शेषमनुदात्तम् ।

कौशिकब्राह्मणेति समस्तमामन्त्रितमाद्युदात्तम् । तत्र पूर्ववद् द्वावुदात्तौ । शेषमनुदात्तम् ।

एवं गौतमब्रुवाणेति द्वावुदात्तौ । शेषमनुदात्तम् ।

श्वः सुत्यामागच्छ मघवन्निति श्वःशब्द उदात्तः, सुत्यामित्यन्तोदात्तः । "संज्ञायां समजनिपद"(3.3.99/3276) इति क्यपो विधाने `उदात्तः' इति वर्तते । आगच्छेति द्वावुदात्तौ । अन्त्योऽनुदात्तः । मघवन्निति पदात्परमामन्त्रितं निहन्यते ।।

<देवब्रह्मणोरनुदात्तः ।। 1.2.38 ।।>

सुब्रह्मण्यायामेव 'देवा ब्रह्माणः' इति पठ्यते, तत्र पूर्वेण स्वरितस्योदात्ते प्राप्तेऽनेनानुदात्तो विधीयते । देवब्रह्मणोः स्वरितस्यानुदात्त आदेशो भवति । देवा ब्रह्माण आगच्छत । द्वयोरपि पदयोरामन्त्रिताद्युदात्तत्वे शेषनिघाते चोदात्तादनुदात्तस्य स्वरितः कृतः, तस्यानुदात्तो भवति ।।

<स्वरितात्संहितायामनुदात्तानाम् ।। 1.2.39 ।।>

`एकश्रुतिः' इति वर्तते । संहितायां विषये स्वरितात्परेषामनुदात्तानामेकश्रुतिर्भवति । `इमं मे गङे यमुने सरस्वति शुतिद्रि'(ऋ.10.75.5) । माणवक जटचिलकाध्यापक क्व गमिष्यसि । इममित्यन्तोदात्तम्, मे इति अनुदात्तम्; विधिकाल एव निघातविधानात् । तत्पुनः "उदात्तादनुदात्तस्य स्वरितः"(8.4.66/3660) इति स्वरितं संपद्यते । तस्मात्स्वरितात्परेषामनुदात्तानां गङ्गेप्रभृतीनामेकश्रुतिर्भवति । सर्व एते आमन्त्रितनिघातेनानुदात्ताः । माणवक जटिलकेति प्रथममामन्त्रितमाद्युदात्तम्, तस्य द्वितीयमक्षरं स्वरितम्, ततः परेषामनुदात्तानामेकश्रुतिर्भवति ।

संहिताग्रहणं किम् ? अवग्रहे मा भूत् । इमं मे गङ्गे यमुने सरस्वति ।।

<उदात्तस्वरितपरस्य सन्नतरः ।। 1.2.40 ।।>

अनुदात्तग्रहणमनुवर्तते । उदात्तः परो यस्मात्स उदात्तपरः, स्वरितः परो यस्मात्स स्वरितपरः, उदात्तपरस्य स्वरितपरस्य चानुदात्तस्य सन्नतर आदेशो भवति । अनुदात्ततर इत्यर्थः । `देवा मरुतः पृश्निमातरोऽपः'(पै.3.31.1) । मातर इत्यनुदात्तः । अप इत्यन्तोदात्तः--"ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः"(6.1.171य3717)इति । तत्रानुदात्तयोरेकादेश ओकारोऽनुदात्तः । तस्योदात्ते परभूते सन्नतर आदेशो भवति । इमं मे गङ्गे यमुने सरस्वति शुतिद्रि । इकारोऽनुदात्तः । शुतुद्रि इत्येतदामन्त्रितं पादादौ तस्मान्न निहन्यते, '"अनुदात्तं सर्वमपादादौ"(8.1.18/403) 'इति । तस्य प्रथममक्षरमुदात्तम्, तस्मिन्परभूते पूर्वस्य सरस्वतीकारस्य सन्नतर आदेशो भवति । माणवक जटिलकाध्यापक क्व गमिष्यसि । क्व इति स्वरितः, तस्मिन्परभूते क इति अनुदात्तस्तस्य सन्नतर आदेशो भवति ।।

<अपृक्त एकाल्प्रत्ययः ।। 1.2.41 ।।>

`अपृक्त' इतीयं संज्ञा भवति, एकाल् यः प्रत्ययस्तस्य । असहायवाची एकशब्दः । "स्पृशोऽनुदके क्विन्"(3.2.58/432)-घृतस्पृक् । "भजो ण्विः"(3.2.62/2976)-अर्धभाक्, पादभाक् ।

एकालिति किम् ? दर्विः, जागृविः । प्रत्यय इति किम् ? सुराः ।

अपृक्तप्रदेशाः--"वेरपृक्तस्य"(6.1.67/375)इत्येवमादयः ।।

<तत्पुरुषः समानाधिकरणः कर्मधारयः ।। 1.2.42 ।।>

`तत्पुरुष' इति समासविशेषस्य संज्ञां वक्ष्यति । स तत्पुरुषः समानाधिकरणपदः कर्मधारयसंज्ञो भवति । अधिकरणशब्दोऽभिधेयवाची । समानाधिकरणः =समानाभिधेयः । परमराज्यम्, उत्तमराज्यम् । "अकर्मधारये राज्यम्"(6.2.130/3864)इत्युत्तरपदाद्युदात्तं न भवति । पाचकवृन्दारिका ।

तत्पुरुष इति किम् ? पाचिकाभार्यः । समानाधिकरण इति किम् ? ब्राह्मणराज्यम् ।

कर्मधारयप्रदेशाः--कर्मधारये निष्ठा"(6.2.46/3780)इत्येवमादयः ।।

<प्रथमानिर्दिष्टं समास उपसर्जनम् ।। 1.2.43 ।।>

प्रथमया विभक्त्या यन्निर्दिश्यते समासशास्त्रे तदुपसर्जनसंज्ञं भवति । 'समासे' इति समासविधायि शास्त्रं गृह्यते । वक्ष्यति --"द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः"(2.1.24/686) इति द्वितीयासमासे द्वितीयेत्येतत्प्रथमानिर्दिष्टम् । तृतीयासमासे तृतीयेति, चतुर्थीसमासे चतुर्थीति, पञ्चमीसमासे पञ्चमीति, षष्ठीसमासे, षष्ठीति, सप्तमीसमासे सप्तमीति । कष्टश्रितः । शङ्कुलाखण्डः । यूपदारु । वृकभयम् । राजपरुषः । अक्षशौण्डः ।

उपसर्जनप्रदेशाः "उपसर्जनं पूर्वम् "(2.2.30/654) इत्येवमादयः ।।

<एकविभक्ति चापूर्वनिपाते ।। 1.2.44 ।।>

एका विभक्तिर्यस्य तदिदमेकविभक्ति, समासे विधीयमाने यन्नियतविभक्तिकं द्वितीये सग्बन्धिनि बहुभिर्विभक्तभिर्युज्यमानेऽप्येकयैव विभक्त्या युज्यते तदुपसर्जनसंज्ञं भवति अपूर्वनिपाते । पूर्वनिपातं पूर्वनिपाताख्यमुपसर्जनकार्यं वर्जयित्वा ।

निरादयः क्रान्ताद्यर्थे पञ्चम्या । पूर्वपदे नानाविभक्तिकेऽप्युत्तरपदं पञ्चम्यन्तमेव भवति । निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः । निष्क्रान्तं कौशाम्ब्या निष्क्रौशाम्बिम् । निष्क्रान्तेन कौशाम्ब्या निष्कौशाम्बिना । निष्क्रान्ताय कौशाग्ब्या निष्कौशाम्बये । निष्क्रान्तात् कौशाम्ब्या निष्कौशाम्बेः । निष्क्रान्तस्य कौशाम्ब्याः निष्कौशाम्बेः । निष्क्रान्ते कौशाम्ब्या निष्कौशाम्बौ । एवं निर्वाराणसिः ।

एकविभक्तीति किम् ? राजकुमारी । अपूर्वनिपात इति किम् ? न हि भवति कौशाम्वीनिरिति ।।

<अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ।। 1.2.45 ।।>

अभिधेयवचनोऽर्थशब्दः । अर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं भवति धातुप्रत्ययौ वर्जयित्वा । डित्थः । कपित्थः । कुण्डम् । पीठम् ।

अर्थवदिति किम् ? वनम्, धनमिति नान्तस्यावधेर्मा भूत् । न-लोपो हि स्यात् । अधातुरिति किम् ? हन्तेर्लङ्, अहन्--नलोपो हि स्यात् । अप्रत्यय इति किम् ? काण्डे, कुड्ये--"ह्रस्वो नपुंसके प्रतिपदिकस्य"(1.2.47/318) इति ह्रस्वः स्यात् ।

*अनर्थकस्यापि निपातस्य प्रातिपदिकसंज्ञेष्यते * ।।(म.भा.1.220) अध्यागच्छति । प्रलम्बते ।

प्रातिपदिकप्रदेशाः--"ह्रस्वो नपुंसके प्रातिपदिकस्य"(1.2.47/318) इत्येवमादयः ।।

<कृत्तद्धितसमासाश्च ।। 1 2 46 ।।>

कृतस्तद्धिताः समासाश्च प्रातिपदिकसंज्ञा भवन्ति । `अप्रत्ययः' इति पूर्वसूत्रे पर्युदासात्कृदन्तस्य तद्धितान्तस्य चानेन प्रातिपदिकसंज्ञा विधीयते ।

अर्थवत्समुदायानां समासग्रहणं नियमार्थम् । कृत्-कारकः हारकः, कर्त्ता, हर्त्ता । तद्धितः-औपगवः, कापटवः । समासः-राजपुरुषः, ब्राह्मणकम्बलः । समासग्रहणस्य नियमार्थत्वाद्वाक्यस्यार्थवतः संज्ञा न भवति ।।

<ह्रस्वो नपुंसके प्रातिपदिकस्य ।।1.2.47 ।।>

नपुंसकलिङ्गेऽर्थे यत्प्रातिपदिकं वर्तते तस्य ह्रस्वो भवति आदेशोऽलोन्त्यस्याचः । अतिरि कुलम्, अतिनु कुलम् ।

नपुंसक इति किम् ? ग्रामणीः । सेनानीः । प्रातिपदिकस्येति किम् ? काण्डे तिष्ठतः । कुड्ये तिष्ठतः । प्रातिपदिकग्रहणसामर्थ्यादेकादेशः पूर्वस्यान्तवन्न भवति ।।

<गोस्त्रियोरुपसर्जनस्य ।। 1.2.48 ।।>

`प्रातिपदिकस्य' इति वर्तते । `गो' इति स्वरूपग्रहणम्, `स्त्री' इति प्रत्ययग्रहणम् ; स्वरितत्वात् । उपसर्जनग्रहणं तयोर्विशेषणम्--गोरुपसर्जनस्य, स्त्रीप्रत्ययान्तस्योपसर्जनस्येति । ताभ्यां प्रातिपदिकस्य तदन्तविधिः । उपसर्जनगोशब्दान्तस्य उपसर्जनस्त्रीप्रत्ययान्तस्य च प्रातिपदिकस्य ह्रस्वो भवति ।

चित्रगुः । शबलगुः । स्त्रियाः--निष्कौशाम्बिः । निर्वाराणसिः । अतिखट्वः । अतिमालः ।

उपसर्जनस्येति किम् ? राजकुमारी । स्वरितत्वं किम् ? अतितन्त्रीः । अतिलक्ष्मीः । अतिश्रीः ।

*ईयसो बहुव्रीहेः प्रतिषेधो वक्तव्यः * ।।(म.भा.2.124) बहुश्रेयसी । विद्यमानश्रेयसी ।।

<लुक्तद्धितलुकि ।। 1.2.49 ।।>

स्त्रीग्रहणमनुवर्त्तते,'उपसर्जनस्य' इति च । पूर्वेण ह्रस्वत्वे प्राप्ते लुग्विधीयते । तद्धितलुकि सति स्त्रीप्रत्ययस्य उपसर्जनस्य लुग्भवति । पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः । दशेन्द्रः । पञ्चभिः शष्कुलीभिः क्रीतः पञ्चशष्कुलिः । आमलक्याः फलमामलकम् । बदरम् । कुवलम् ।

तद्धितग्रहणं किम् ? गार्ग्याः कुलं गार्गीकुलम् । लुकीति किम् ? गार्गीत्वम् । उपसर्जनस्येत्येव-अवन्ती, कुन्ती, कुरूः ।।

<इद् गोण्याः ।। 1.2.50 ।।>

पूर्वेण लुकि प्राप्ते इकारो विधीयते । गोण्यास्तद्धितलुकि सति इकारादेशो भवति । पञ्चभिर्गोणीभिः क्रीतः पटढ पञ्चगोणिः । दशगोणिः ।
'इत्' इति योगविभागः । पञ्चभिः सूचीभिः क्रीतः पञ्चसूचिः । दशसूचिः । स च एवंविषय एव ।।

<लुपि युक्तवद्व्यक्तिवचने ।। 1.2.51 ।।>

`लुपि' इति लुप्संज्ञया लुप्तस्य प्रत्ययस्यार्थ उच्यते । तत्र लुपि युक्तवद्व्यक्तिवचने भवतः । 'युक्तवन्' इति निष्ठाप्रत्ययेन क्तवतुना प्रकृत्यर्थ उच्यते । स हि प्रत्ययार्थमात्मना युनक्ति, तस्य युक्तवतो व्यक्तिवचने लुबर्थे विधीयेते ।

अथ वा-युक्तः प्रकृत्यर्थः प्रत्ययार्थेन संबद्धः, तस्मिन्निव व्यक्तिवचने लुबर्थे भवतः । सप्तम्यर्थे वतिः । 'व्यक्तिवचने' इति च लिङ्ग संख्ययोः

पूर्वाचार्यनिर्देशः, तदीयमेवेदं सूत्रम् । तथा चास्य प्रत्याख्यानं भविष्यति--"तदशिष्यं संज्ञाप्रमाणत्वात्"(1.2.53/1295)इति ।

व्यक्तिः--स्त्रीपुंनपुंसकानि, वचनम्--एकत्व-द्वित्व-बहुत्वानि । पञ्चालाः क्षत्रियाः, पुंलिङ्गाः बहुवचनविषयाः । तेषां निवासो जनपदः । यथा तेषु क्षत्रियेषु व्यक्तिवचने, तद्वज्जनपदे भवतः-पञ्चालाः, मगधाः, मत्स्याः, अङ्गाः, सुह्माः, पुण्ड्राः ।

लुपीति किम् ? लुकि मा भूत् । लवणः सूपः, लवणा यवागूः, लवणं शाकम् । व्यक्तिवचने इति किम् ? शिरीषाणामदूरभवो ग्रामः शिरीषाः, तस्य वनं शिरीषवनम्--'"विभाषौषधिवनस्पतिभ्यः'"(8.4.6/1051)इति णत्वं न भवति ।

हरीतक्यादिषु व्यक्तिः।(म.भा.1.228) हरीतक्याः फलानि हरीतक्यः फलानि । *खलतिकादिषु वचनम् *।(म.भा.1.229) खलतिकस्य पर्वतस्यादूरभवानिवनानि खलतिकं वनानि ।।

<विशेषणानां चाजातेः ।। 1.2.52 ।।>

`लुपि' इति वर्तते । लुबर्थस्य यानि विशेषणानि तेषामपि व्यक्तिवचने भवतः,जातिं वर्जयित्वा । पञ्चालाः रमणीयाः, बह्वन्नाः,बहुक्षीरघृताः, बहुमाल्यफलाः । गोदौ रमणीयौ, बह्वन्नौ, बहुक्षीरघृतौ, बहुमाल्यफलौ ।

अजातेरिति किम् ?पञ्चलाः जनपदः । गौदौ ग्रामः ।

जात्यर्थस्य चायं युक्तवद्भावप्रतिषेधः । तेन जातिद्वारेण यानि विशेषणानि तेषामपि युक्तवद्भावो न भवति--पञ्चालाः जनपदो रमणीयो बह्वन्नः,गोदौ ग्रामो रमणीयो बह्वन्न इति ।

मनुष्यलुपि प्रतिषेधो वक्तव्यः (म.भा.1.229)। चञ्चाभिरूपः । वर्ध्रिकादर्शनीयः ।।

<तदशिष्यं संज्ञाप्रमाणत्वात् ।। 1.2.53 ।।>

तदिति प्रकृतं युक्तवद्भावलक्षणं निर्दिश्यते । तदशिष्यं न वक्तव्यम्, कस्मात् ? संज्ञाप्रमाणत्वात् । संज्ञाशब्दा हि नानालिङ्गसंख्याः प्रमाणम् । पञ्चाला वरणा इति च नैते योगशब्दाः, किं तर्हि ? जनपदादीनां संज्ञा एताः ।

तत्र लिङ्गं वचनं च स्वभावसिद्धमेव, न यत्नप्रतिपाद्यम्;यथा--आपः, दाराः, गृहाः, सिकताः, वर्षा इति ।।

<लुब्योगाप्रख्यानात् ।। 1.2.54 ।।>

लुबप्यशिष्यः । योऽयम् "जनपदे लुप्"(4.2.81/1293), "वरणादिभ्यश्च "(4.2.82/1301) इति लुबुच्यते, अयं न वक्तव्यः, किं कारणम् ? योगाप्रख्यानात् । न हि पञ्चाला वरणा इति योगः =संबन्धः प्रख्यायते । नैतदुपलभामहे--वृक्षयोगान्नगरे वरणा इति, किं तर्हि ? संज्ञा एताः । तस्मादत्र "तस्य निवासः"(4.2.69/1281),अदूरभवश्च"(4.2.70/1282) इति तद्धितो नैवोत्पद्यते, किं लुपो विधानेन ।।

<योगप्रमाणे च तदभावेऽदर्शनं स्यात् ।। 1.2.55 ।।>

`पञ्चालादयः संज्ञाशब्दाः, न योगनिमित्ताः' इत्युक्तम् । तच्चावश्यमेवाभ्युपगन्तव्यम्, योगप्रमाणे हि तदभावेऽदर्शनं स्यात् । यदि पञ्चालादिशब्दो योगस्य प्रमाणं योगस्य वाचकः स्यात्, ततस्तदभावेऽदर्शनम् =अप्रयोगः स्यात् । दृश्यते च संप्रति विनैव क्षत्रियसम्बन्धेन जनपदेषु पञ्चालादिशब्दः, ततोऽवसीयते-नायं योगनिमित्तकः, किं तर्हि ? रूढिरूपेणैव तत्र प्रवृत्त इति ।।

<प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् ।। 1.2.56 ।।>

`अशिष्यम् ' इति वर्तते । प्रधानं समासे किञ्चित्पदम्, प्रत्ययः तव्यदादिः, ताभ्यामर्थवचनम् = अर्थाभिधानमनेन प्रकारेण भवतीति पूर्वाचार्यैः परिभाषितम् । * प्रधानोपसर्जने च प्रधानार्थं सह ब्रूतः', *'प्रकृतिप्रत्ययो सहार्थं ब्रूतः' इति । तत्पाणिनिराचार्यः प्रत्याचष्टे--अशिष्यमेतत्, अर्थस्यान्यप्रमाणत्वादिति । अन्य इति शास्त्रापेक्षया लोको व्यपदिश्यते । शब्दैरर्थाभिधानं स्वाभाविकम्, न पारिभाषिकम्; अशक्यत्वात्, लोकत एवार्थावगतेः ।

यैरपि व्याकरणं न श्रुतम्, तेऽपि 'राजपुरुषमानय' इत्युक्ते राजविशिष्टं पुरुषमानयन्ति; न राजानम्, नापि पुरुषमात्रम् । 'औपगवमानय' इत्युक्ते उपगुविशिष्टमपत्यमानयन्ति; नोपगुम्, नाप्यपत्यमात्रम्, नोभौ । यश्च लोकतोऽर्थः सिद्धः, किं तत्र यत्नेन !।।

<कालोपसर्जने च तुल्यम् ।। 1.2.57 ।।>

`अशिष्यम्' इति वर्तते । कालोपसर्जने चाशिष्ये । कस्मात् ? अर्थस्यान्यप्रमाणत्वात् । तुल्यशब्दो हेत्वनुकर्षणार्थः । अशिष्यविशेषणं चैतत् । कालोपसर्जने च तुल्यमशिष्ये भवतः ।

इहान्ये वैयाकरणाः कालोपसर्जनयोः परिभाषां कुर्वन्ति । आन्याय्यादुत्थानादान्याय्याच्च संवेशनात्-एषोऽद्यतनः कालः । अपरे पुनराहुः-अहरुभयतोर्द्धरात्रम्-एषोऽद्यतनः काल इति । तथोपसर्जनपरिभाषां कुर्वन्ति-अप्रधानमुपसर्जनमिति ।

तत्पाणिनिराचार्यः प्रत्याचष्टे-लोकतोऽर्थावगतेः । यैरपि व्याकरणं न श्रुतं तेऽप्याहुः-इदमस्माभिरद्य कर्तव्यम्, इदं श्वः कर्तव्यम्, इदम् ह्यः कृतमिति; नैवं व्युत्पाद्यन्ते ! तथोपसर्जनम्-वयमत्र गृहे ग्रामे वा उपसर्जनमप्रधानमिति गम्यते । यश्च लोकतोऽर्थः सिद्धः, किं तत्र यत्नेन !

यद्येवम्, पूर्वसूत्र एव कालोपसर्जनग्रहणं कस्मान्न क्रियते, किमर्थो योगविभागः ? प्रदर्शनार्थः ।

अन्यदप्येवञ्जातीयकमशिष्यमिति । तथा च पूर्वाचार्याः परिभाषन्ते-'मत्वर्थे बहुव्रीहिः','पूर्वपदार्थप्रधानोऽव्ययीभावः', 'उभयपदार्थप्रधानो द्वन्द्वः' इत्येवमादि; तदशिष्यमिति ।।

<जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ।। 1.2.58।।>

`अशिष्यम्' इति निवृत्तम् । जातिर्नामायमेकोऽर्थः, तदभिधाने एकवचनमेव प्राप्तम्, अत इदमुच्यते । जातेराख्या जात्याख्या, जात्याख्यायामेकस्मिन्नर्थे बहुवचनमन्यतरस्यां भवति । जात्यर्थो बहुवद् भवतीति यावत् । तेन तद्विशेषणानामजातिशब्दानामपि संपन्नादीनां बहुवचनमुपपद्यते । संपन्नो यवः, संपन्ना यवाः । संपन्नो व्रीहिः, संपन्ना व्रीहयः । पूर्ववया ब्राह्मणः प्रत्युत्थेयः,पूर्ववयसो ब्राह्मणाः प्रत्युत्थेयाः ।

जातिग्रहणं किम् ? देवद्त्तः, यज्ञदत्तः । आख्यायामिति किम् ? काश्यपप्रतिकृतिः काश्यपः । भवत्ययं जातिशब्दः, न त्वनेन जातिराख्यायते, किं तर्हि ? प्रतिकृतिः । एकस्मिन्निति किम् ? व्रीहियवौ ।

*संख्याप्रयोगे प्रतिषेधो वक्तव्यः *(म.भा.1.230) ।। एको व्रीहिः संपन्नः सुभिक्षं करोति ।।

<अस्मदो द्वयोश्च ।। 1.2.59।।>

अस्मदो योऽर्थस्तस्यैकत्वे द्वित्वे च बहुवचनमन्यतरस्यां भवति । अहं ब्रवीमि, वयं ब्रूमः । आवां ब्रूवः, वयं ब्रूमः ।।
सविशेषणस्य प्रतिषेधो वक्तव्यः । अहं देवदेत्तो ब्रवीमि । अहं गार्ग्यो ब्रवीमि । अहं पटुर्ब्रवीमि ।
युष्मदि गुरावेकेषाम् । त्वं मे गुरुः, यूयं मे गुरवः ।।
<फल्गुनीप्रोष्ठपदानां च नक्षत्रे ।। 1.2.60 ।।>
चकारः 'द्वयोः' इत्यनुकर्षणार्थः । फल्गुन्योर्द्वयोः प्रोष्ठपदयोश्च द्वयोर्नक्षत्रयोर्बहुवचनमन्यतरस्यां भवति । कदा पूर्वे फल्गुन्यौ, कदा पूर्वाः फल्गुन्यः । कदा पूर्वे प्रोष्ठपदे, कदा पूर्वाः प्रोष्ठपदाः ।
नक्षत्र इति किम् ? फल्गुन्यौ माणविके ।।
<छन्दसि पुनर्वस्वोरेकवचनम् ।। 1.2.61 ।।>
`अन्यतरस्याम्'इत्युनुवर्त्तते । द्वयोर्द्विवचने प्राप्ते पुनर्वस्वोश्छनद्सि विषये एकवचनमन्यतरस्यां भवति । `पुनर्वसुर्नक्षत्रमदितिर्देवता'(मै.स.2.13.2) ।` पुनर्वसू नक्षत्रमदितिर्देवता'(तै.सं.4.4.10) । नक्षत्र इत्येव-पुनर्वसू माणवकौ ।
छन्दसीति किम् ? पुनर्वसू इति ।।

<विशाखयोश्च ।। 1.2.62 ।।>
`छन्दसि' इति वर्तते । द्विवचने प्राप्ते छन्दसि विषये विशाखयोरेकवचनमन्यतस्यां भवति । `विशाखं नक्षत्रमिन्द्राग्नी देवता'(मै.सं.2.13.20) । `विशाखं नक्षत्रमिन्द्राग्नी देवता'(तै.सं.4.4.10.2) ।
<तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ।। 1.2.63।।> 'छन्दसि' इति निवृत्तम्। तिष्य एकः पुनर्वसू द्वौ तेषां द्वन्द्वो बह्वर्थः । तत्र बहुवचने प्राप्ते द्विवचनं विधीयते । तिष्यपुनर्वस्वोर्नक्षत्रविषये द्वन्द्वे बहुवचनप्रसङ्गे नित्यं द्विवचनं भवति । उदितौ तिष्यपुनर्वसू दृश्यते ।
तिष्यपुनर्वस्वोरिति किम् ? विशाखानुराधाः ।
नक्षत्रेति किम् ? तिष्यश्च माणवकः पुनर्वसू माणवकौ = तिष्यपुनर्वसवो माणवकाः । ननु च प्रकृतमेव नक्षत्रग्रहणं किमर्थं पुनरुच्यते ? पर्यायाणामपि यथा स्यात्-तिष्यपुनर्वसू,पुष्यपुनर्वसू, सिद्ध्यपुनर्वसू ।
द्वन्द्व इति किम् ? यस्तिष्यस्तौ पुनर्वसू येषां त इमे `तिष्यपुनर्वसवः'(वा.सं.2.69), उन्मुग्धाः । तिष्यादय एव विपर्ययेण दृश्यमाना बहुव्रीहिणोच्यन्ते । तेन नक्षत्रसमास एवायम् ।
बहुवचनस्येति किम् ? एकवचनस्य मा भूत्-तिष्यपुनर्वसू इदमिति ।
`सर्वो द्वन्द्वो विभाषया एकवद्भवति'(व्या.प.91) इत्यस्यैतदेव ज्ञापकम् । नित्यग्रहणं विकल्पनिवृत्त्यर्थम् ।।
<सरूपाणामेकशेष एकविभक्तौ ।। 1.2.64 ।।>

समानं रूपमेषामिति सरूपाः । सरूपाणां शब्दानां एवविभक्तौ परत एकशेषो भवति । एकः शिष्यते, इतरे निवर्तन्ते । वृक्षश्च वृक्षश्च वृक्षौ । वृक्षश्च वृक्षश्च वृक्षश्च वृक्षाः ।

प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानम् । तत्रानेकार्थाभिधानेऽनेकशब्दत्वं प्राप्तम्, तस्मादेकशेषः ।
सरूपाणामिति किम् ? प्लक्षन्यग्रोधाः । रूपग्रहणं किम् ? भिन्नोऽप्यर्थे यथा स्यात्-अक्षाः, पादाः, माषा । एकग्रहणं किम् ? द्विबह्वोः शेषो मा भूत् ।
शेषग्रहणं किम् ? आदेशो मा भूत् ।
एकविभक्ताविति किम् ? पयः पयो जरयति । ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहि ।।
<वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ।। 1.2.65 ।।>
`शेष' इति वर्त्तते । `यूना'इति सहयोगे तृतीया । वृद्धो यूना सहवचने शिष्यते, युवा निवर्त्तते । वृद्धशब्दः पूर्वाचार्यसंज्ञा गोत्रस्य । अपत्यमन्तर्हितं वृद्धमिति । वृद्धयूनोः सहवचने वृद्धः शिष्यते तल्लक्षणश्चेदेव विशेषः । तदिति वृद्धियूनोर्निर्देशः, लक्षणशब्दो निमित्तपर्यायः, चेच्छब्दो यद्यर्थे, एवकारोऽवधारणे, विशेषो वैरूप्यम् । वृद्धयुवनिमित्तकमेव यदि वैरूप्यं भवति ततो वृद्धः शिष्यते, युवा निवर्तते । समानायामाकृतौ वृद्धयुवप्रत्ययौ भिद्येते । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वात्स्यश्च वात्स्यायनश्च वात्स्यौ ।
वृद्ध इति किम् ? गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ । यूनेति किम् ? गार्ग्यश्च गर्गश्च गार्ग्यगर्गौ । तल्लक्षण इति किम् ? गार्ग्यवात्स्यायनौ । एवकारः किमर्थः ? भागवित्तिश्च भागवित्तिकश्च भागवित्तिभागवित्तिकौ । कुत्सा सौवीरत्वं च भागवित्तिकस्यापरो विशेषो विद्यते ।।
<स्त्री पुंवच्च ।। 1.2.66 ।।>
'शेषः' इति वर्त्तते, 'वृद्धो यूना' इति च सर्वम् । स्त्री वृद्धा यूना सहवचने शिष्यते तल्लक्षणश्चेदेव विशेषो भवति । पुंस इवास्याः कार्यं भवति । स्त्र्यर्थः

पुमर्थवद्भवति । गार्गी च गार्ग्यायणश्च गार्ग्यौ । वात्सी च वात्स्यायनश्च वात्स्यौ । दाक्षी च दाक्षायणश्च दाक्षी ।।

<पुमान् स्त्रिया ।। 1.2.67 ।।>

'तल्लक्षणश्चेदेव विशेष' इति वर्त्तते । 'वृद्धो यूना' इति निवृत्तम् । स्त्रिया सहवचने पुमान् शिष्यते, स्त्री निवर्त्तते । स्त्रीपुंसलक्षणश्चेदेव विशेषो भवति । ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ । कुक्कुटश्च कुक्कुटी च कुक्कुटौ । तल्लक्षणश्चेदेव विशेष इत्येव-कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ । एवकारः किमर्थः ? इन्द्रश्च इन्द्राणी चेन्द्रेन्द्राण्यौ । "पुंयोगादाख्यायाम्"(4.1.48/5021) इत्यपरो विशेषः । पुमानिति किम् ? प्राक्च प्राची च प्राक्प्राच्यौ । `प्राक्' इत्यव्ययमलिङ्गम् ।।

<भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ।। 1.2.67 ।।>

यथासंख्यं भ्रातृपुत्रशब्दौ शिष्येते सहवचने स्वसृदुहितृभ्याम् । स्वस्रा सहवचने भ्रातृशब्दः शिष्यते-भ्राता च स्वसा च भ्रातरौ । दुहित्रा सहवचने पुत्रशब्दः शिष्यते-पुत्रश्च दुहिता च पुत्रौ ।।

<नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ।। 1.2.69 ।।>

`तल्लक्षणश्चेदेव विशेषः' इति वर्त्तते । नपुंसकानपुंसकमात्रकृते विशेषेऽनपुंसकेन सहवचने नपुंसकं शिष्यते, एकवच्चास्य कार्यं भवति अन्यतरस्याम् । शुक्लश्च कम्बलः शुक्ला च बृहतिका शुक्लं च वस्त्रं तदिदं शुक्लम्, तानीमानि शुक्लानि ।

अनपुंसकेनेति किम् ? शुल्कं च शुक्लं च शुक्लं च शुक्लानि । `एकवच्च' इति न भवति ।।

<पिता मात्रा ।। 1.2.70 ।।>

`अन्यतरस्याम्' इति वर्त्तते, न `एकवत्' इति । मात्रा सहवचने पितृशब्दः शिष्यते अन्यतरस्याम् । माता च पिता च पितरौ । मातापितराविति वा ।।

<श्वशुरः श्वश्र्वा ।। 1.2.71 ।।>

`अन्यतरस्याम्' इति वर्तते । श्वश्र्वा सहवचने श्वशुरशब्दः शिष्यते अन्यतरस्याम् । श्वशुरश्च श्वश्रूश्च श्वशुरौ । श्वश्रूश्वशुराविति वा ।।

<त्यदादीनि सर्वैर्नित्यम् ।। 1.2.72।।>

त्यदादीनि शब्दरूपाणि सर्वैः सहवचने नित्यं शिष्यन्ते त्यदादिभिरन्यैश्च । सर्वग्रहणं साकल्यार्थम् । नित्यग्रहणं विकल्पनिवृत्त्यर्थम् । स च देवदत्तश्च तौ । यश्च देवदत्तश्च यौ ।

त्यदादीनां मिथो यद्यत्परं तत्तच्छिष्यते। स च यश्च यौ । यश्च कश्च कौ ।।

<ग्राम्यपशुसंघेष्वतरुणेषु स्त्री ।। 1.2.73 ।।>

ग्राम्याणां पशूनां संघाः ग्राम्यपशुसंघाः, एतेषु सहविवक्षायां स्त्री शिष्यते । "पुमान् स्त्रिया"(1.2.67/933) इति पुंसः शेषे प्राप्ते स्त्रीशेषो विधीयते । अतरुणग्रहणं सामर्थ्यात्पशुत्पशुविशेषणम् । गाव इमाः । अजा इमाः ।

ग्राम्यग्रहणं किम् ? रुरव इमे । पृषता इमे । पशुष्विति किम् ? ब्राह्मणाः, क्षत्रियाः । संघेष्विति किम् ? एतौ गावौ चरतः । अतरुणेष्विति किम् ? वत्सा इमे । बर्करा इमे ।

* अनेकशफेष्विति वक्तव्यम् * (म.भा.1.252)। इह मा भूत्- अश्वा इमे ।।

इति श्रीजयादित्यविरचितायां काशिकावृत्तौ
प्रथमाध्यायस्य द्वितीयः पादः ।।

* * *

1.3

अथ प्रथमाध्याये तृतीयः पादः

<भूवादयो धातवः ।। 1.3.1 ।।>

`भू' इत्येवमादयः शब्दाः क्रियावचना धातुसंज्ञा भवन्ति । `भू'(धा.पा.1)-भवति । `एध'(धा.पा.2)-एधते । `स्पर्द्ध'(धा.पा.3)-स्पर्द्धते । `धातु' शब्दः पूर्वाचार्य संज्ञा । ते क्रियावचनानां संज्ञां कृतवन्तः । तदिहापि पूर्वाचार्यसंज्ञाश्रयणात् क्रियावाचिनामेव भूवादीनां धातुसंज्ञा विधीयते ।।

भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते ।
भुवो वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः ।।

धातुप्रदेशाः-"धातोः"(3.1.91/2829) इत्येवमादयः ।।

<उपदेशेऽजनुनासिक इत् ।। 1.3.2 ।।>

उपदिश्यतेऽनेनेत्युपदेशः = शास्त्रवाक्यानि ; सूत्रपाठः, खिलपाठश्च । तत्र योऽनुनासिकः स इत्संज्ञो भवति । एध । स्पर्द्ध । `प्रतिज्ञानुनासिक्याः पाणिनीयाः'(व्या.प.121) ।
उपदेश इति किम् ? `अभ्र आँ अपः'(ऋ.5.48.1) । अजिति किम् ? "आतो मनिन्क्वनिब्वनिपश्च"(3.2.74/3418) । अनुनासिक इति किम् ? सर्वस्याचो मा भूत् ।
इत्प्रदेशाः-"आदितश्च"(7.2.16/3036) इत्येवमादयः ।।
<हलन्त्यम् ।। 1.3.3 ।।>
`उपदेशे' इति वर्त्तते । अन्ते भवमन्त्यम् । धात्वादेः समुदायस्य यदन्त्यं हल् तदित्संज्ञं भवति । अ इ उ ण्-णकारः । ऋ लृ क् - ककारः । ए ओ ङ्-ङकारः । ऐ औ च् - चकारः ।
उपदेश इत्येव--अग्निचित् । सोमसुत् । हस्य ल् हलिति द्वितीयमत्र हल्ग्रहणं तन्त्रेणोपात्तं द्रष्टव्यम्, तेन प्रत्याहारपाठे 'हल् इत्यत्र लकारस्य इत्संज्ञा क्रियते । तथा च सति, `हलन्त्यम्' इत्यत्र प्रत्याहारे नेतरेतराश्रयदोषो भवति ।।
<न विभक्तौ तुस्माः ।। 1.3.4 ।।>
पूर्वेण प्राप्तायामित्संज्ञायां विभक्तौ वर्तमानानां तवर्गसकारमकाराणां प्रतिषेध उच्यते । तवर्गः, "टाङसिङसामिनात्स्याः(7.1.12/201)-वृक्षात्, प्लक्षात् । सकारः, जस्-ब्राह्मणाः । तस्, थस्-पचतः पचथः । मकारः-अपचताम्, अपचतम् ।
विभक्ताविति किम् ? "अचो यत्"(3.1.97/2842),"ऊर्णाया युस्"(5.2.123/1929), "रुधादिभ्यः श्नम्"(3.1.78/2543) ।
"किमोऽत्"(5.3.12/1959), "इटोऽत्"(3.4.106/2257) इत्यत्र प्रतिषेधो न भवति; अनित्यत्वादस्य प्रतिषेधस्य ।
"इदमस्थमुः"(5.3.24/1972) इत्युकारानुबन्धनिर्देशादनित्यत्वमुपलक्ष्यते ।।
<आदिर्ञिटुडवः ।। 1.3.5 ।।>
`इत्' इति वर्तते । आदिशब्दः प्रत्येकमभिसंबध्यते । `ञि, टु, डु' इत्येतेषां समुदायानामादितो वर्तमानानामित्संज्ञा भवति । `ञिमिदा'(धा.पा.743)-मिन्नः । `ञिधृषा'(धा.पा.1270)-धृष्टः । `ञिक्ष्विदा'(धा.पा.740)-क्ष्विण्णः । `ञि इन्धी'(धा.पा.1449)-इद्धः । `टुवेवृ'(धा.पा.367)-वेपथुः । `टुओश्वि'(धा.पा.1010)-श्वयथुः । `डुपचष्'(धा.पा.996)- पक्त्रिमम् । `डुवप्'(धा.पा.1003)-उप्त्रिमम् । `डुकृञ्'(धा.पा.1473)-कृत्रिमम् ।
आदिरिति किम् ? पटूयति, कण्डूयति । उपदेशे इत्येव-ञिकारीयति ।।
<षः प्रत्ययस्य ।। 1.3.6 ।।>
षकारः प्रत्ययस्यादिरित्संज्ञो भवति । "शिल्पिनि ष्वुन्"(3.1.145/2907)--नर्त्तकी, रजकी ।
प्रत्ययस्येति किम् ? षोडः । षण्डः । षडिकः । आदिरित्येव-`अविमह्योष्टिषच्'(उणादि.1.45)-अविषः, महिषः ।।
<चुटू ।। 1.3.7 ।।>
चवर्गटवर्गौ प्रत्ययस्यादी इत्संज्ञौ भवतः । "गोत्रे कुञ्जादिभ्यश्च्फञ्"(4.1.98/1099)-कौञ्चायन्यः । छस्य ईयादेशं वक्ष्यति । जस्-ब्राह्मणाः । झस्यान्तादेशं वक्ष्यति । "शण्डिकादिभ्यो ञ्यः"(4.3.92/1472)-शाण्डिक्यः । टवर्गः,"चरेष्टः"(3.2.16/2930)-कुरुचरी, मद्रचरी । ठस्य इकादेशं वक्ष्यति । "सप्तम्यां जनेर्डः"(3.2.97/3007)- उपसरजः, मन्दुरजः । ढस्यैयादेशं वक्ष्यति । "अन्नाण्णः"(4.4.85/1637)-आन्नः । पृथग्योगकरणमस्य विधेरनित्यत्वज्ञापनार्थम् । "तेन वित्तश्चुञ्चुप्चणपौ"(5.2.26/1827)-केशचुञ्चुः, केशचणः । "अवात्कुटारच्च"(5.2.30/1831) । "नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः"(5.2.31/1832)-अवटीटः । आदिरित्येव-"कर्मणि घटोऽठच्"(5.2.35/1836)-कर्मठः ।।
<लशक्वतद्धिते ।। 1.3.8 ।।>
तद्धितवर्जितस्य प्रत्ययस्यादितो वर्तमाना लकारशकारकवर्गा इत्संज्ञा भवन्ति । लकारः, "ल्युट् च"(3.3.115.3290)-चयनम्, जयनम् । शकारः-"कर्त्तरि शप्"(3.1.68/2167)-भवति, पचति । कवर्गः, "क्तक्तवतू निष्ठा"(1.1.26/3012)-भुक्तः, भुक्तवान् ।"प्रियवशे वदः खच्"(3.2.38/2953)-प्रियंवदः, वशंवदः । "ग्लाजिस्थश्चग्स्नुः"(3.2.139/3119)-ग्लास्नुः । जिष्णुः । भूष्णुः । "भञ्जभासमिदो घुरच्"(3.2.161/3141)-भङ्गुरम् ।"टाडसिङसामिनात्स्याः"(7.1.12/201)- वृक्षात् । वृक्षस्य ।
अतद्धित इति किम् ? चूडालः । लोमशः । कर्णिका ।।
<तस्य लोपः ।। 1.3.9 ।।>
तस्येत्संज्ञकस्य लोपो भवति । तथा चैवोदाहृतम् । तस्य ग्रहणं सर्वलोपार्थम् । अलोऽन्त्यस्य मा भूत्-"आदिर्ञिटुडवः "(1.3.5/2289) इति ।।
<यथासंख्यमनुदेशः समानाम् ।। 1.3.10 ।।>
संख्याशब्देनात्र क्रमो लक्ष्यते । यथासंख्यं यथाक्रममनुदेशो भवति । अनुदिश्यत इत्यनुदेशः । पश्चादुच्चार्यत इत्यर्थः । समानाम् = समसंख्यानां समं परिपठितानामुद्देशिनामनुदेशिनां च यथाक्रममुद्देशिभिरनुदेशिनः संबध्यन्ते । "तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः"(4.3.94/1474) । प्रथमात् प्रथमः, द्वितीयाद् द्वितीय इत्यादि । तौदेयः । शालातुरीयः । वार्मतेयः । कौचवार्यः ।

समानामिति किम् ? "लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः"(1.4.90/552) । लक्षणादयश्चत्वारोऽर्थाः, प्रत्यादयस्त्रयः;सर्वेषां सर्वत्र कर्मप्रवचनीयसंज्ञा भवति ।

इह कस्मान्न भवति-"वेशोयशआदेर्भगाद्यल् ख च"(4.4.131/3477) इति ? स्वरितेन लिङ्गेन यथासंख्यम् । यत्र नेष्यते, तत्र स्वरितत्वं न प्रतिज्ञायते । "स्वरितेनाधिकारः"(1.3.11/46) इति स्वरितग्रहणं पूर्वेणापि संबध्यते ।

<स्वरितेनाधिकारः ।। 1.3.11 ।।>

`स्वरितेन' इति इत्थम्भूतलक्षणे तृतीया । स्वरितो नाम स्वरविशेषो वर्णधर्मः, तेन चिह्नेनाधिकारो वेदितव्यः । अधिकारः = विनियोगः । स्वरितगुणयुक्तं शब्दरूपमधिकृतत्वादुत्तरत्रोपतिष्ठते ।

प्रतिज्ञास्वरिताः पाणिनीयाः-"प्रत्ययः"(3.1.1/180),"धातोः"(3.1.91/2829), "ङ्याप्प्रातिपदिकात्"(4.1.1/182),"अङ्गस्य"(6.4.1/200), "भस्य","पदस्य" ।।

<अनुदात्तङित आत्मनेपदम् ।। 1.3.12 ।।>

अविशेषेण धातोरात्मनेपदं परस्मैपदं च विधास्यते, तत्रायं नियमः क्रियते-अनुदात्तेतो ये धातवो ङितश्च तेभ्य एव आत्मनेपदं भवति, नान्येभ्यः ।

अनुदात्तेद्भ्यः-`आस'(धा.पा.1922), आस्ते । `वस'(धा.पा.1024), वस्ते । ङिद्भ्यः खल्वपि-`षूङ्'(धा.पा.1032), सूते । `शीङ्'(धा.पा.1033), शेते ।।

<भावकर्मणोः ।। 1.3.13 ।।>

"लः कर्मणि च भावे चाकर्मकेभ्यः"(3.4.69/2152)इति भावकर्मणोर्विहितस्य लस्य तिबादयः सामान्येन वक्ष्यन्ते, तत्रेदमुच्यते-भावे कर्मणि चात्मनेपदं भवति । भावे-ग्लायते भवता, सुप्यते भवता, आस्यते भवता । कर्मणि-क्रियते कटः, ह्रियते भारः । कर्मकर्त्तरि-लूयते केदारः स्वयमेवेति, परस्मैपदं न भवति । तस्य विधाने द्वितीयं कर्तृग्रहणमनुवर्तते, तेन कर्तैव यः कर्त्ता तत्र परस्मैपदं भवति ।।

<कर्त्तरि कर्मव्यतिहारे ।। 1.3.14 ।।>

कर्मशब्दः क्रियावाची, व्यतिहारो विनिमयः । यत्रान्यसंबन्धिनीं क्रियामन्यः करोति इतरसंबन्धिनीं चेतरः, स कर्मव्यतिहारः ।

तद्विशिष्टक्रियावचनाद्धातोरात्मनेपदं भवति । व्यतिलुनते, व्यतिपुनते ।

कर्मव्यतिहारे इति किम्? लुनन्ति ।

कर्तृग्रहणमुत्तरार्थम्-"शेषात्कर्त्तरि परस्मैपदम्"(1.3.78/2159) इति ।

<न गतिहिंसार्थेभ्यः ।। 1.3.15 ।।>

पूर्वेणात्मनेपदं प्राप्तं प्रतिषिध्यते । गत्यर्थेभ्यो हिंसार्थेभ्यश्च धातुभ्यः कर्मव्यतिहारे आत्मनेपदं न भवति । व्यतिगच्छन्ति, व्यतिसर्पन्ति । हिंसार्थेभ्यः-व्यतिहिंसन्ति, व्यतिघ्नन्ति ।

* प्रतिषेधे हसादीनाममुपसंख्यानम् *(म.भा.त1.278) व्यतिहसन्ति, व्यतिजल्पन्ति, व्यतिपठन्ति ।

* हरतेरप्रतिषेधः * ।(म.भा.1.279) सम्प्रहरन्ते राजानः ।

<इतरेतरान्योऽन्योपपदाच्च ।। 1.3.16 ।।>

इतरेतरः, अन्योऽन्यः-इत्येवमुपपदाद्धातोः कर्मव्यतिहारे आत्मनेपदं न भवति । इतरेतरस्य व्यतिलुनन्ति, अन्योऽन्यस्य व्यतिलुनन्ति ।

* परस्परोपपदाच्चेति वक्तव्यम् * (म.भा.1.279)। परस्परस्य व्यलुनन्ति ।।

<नेर्विशः ।। 1.3.17 ।।>

`शेषात्कर्तरि' इति परस्मैपदे प्राप्ते, निपूर्वाद्विश आत्मनेपदं विधीयते । नेः परस्माद्विश आत्मनेपदं भवति । निविशते, निविशन्ते ।

नेरिति किम् ? प्रविशति । `यदागमास्तद्ग्रहणेन गृह्यन्ते'(प.11), तेनाटा नास्ति व्यवधानम् । न्यविशत । नेरुपसर्गस्य ग्रहणम्-`अर्थवद्ग्रहणे नानर्थकस्य'(व्या.प.1) इति, तस्मादिह न भवति-मधुनि विशन्ति भ्रमराः ।।

<परिव्यवेभ्यः क्रियः ।। 1.3.18 ।।>

`डुक्रीञ् द्रव्यविनिमये'(धा.पा.1474) ञित्त्वात्कर्त्रभिप्राये क्रियाफले सिद्धमात्मनेपदम् । अकर्त्रभिप्रायार्थोऽयमारम्भः । परिव्यवेभ्य उत्तरस्मात् क्रीणातेरात्मनेपदं भवति । परिक्रीणीते, विक्रीणीते, अवक्रीणीते ।

पर्यादय उपसर्गा गृह्यन्ते, तेनेह न भवति-बहुविक्रीणाति वनम् ।।

<विपराभ्यां जेः ।। 1.3.19 ।।>

"शेषात्कर्त्तरि परस्मैपदम्"(1.3.78/2159) इत्यस्यापवादः । विपरापूर्वाज्जयतेर्धातोरात्मनेपदं भवति । विजयते, पराजयते । विपराशब्दावुपसर्गौ गृह्येते; साहचर्यात् । तेनेह न भवति- बहुवि जयति वनम् । परा जयति सेनेति ।।

<आङो दोऽनास्यविहरणे ।। 1.3.20 ।।>

अकर्त्रभिप्रायार्थोऽयमारम्भः । आङ्पूर्वाद्ददातेरनास्यविहरणे वर्तमानादात्मनेपदं भवति । विद्यामादत्ते ।
अनास्यविहरण इति किम् ? आस्यं व्याददाति ।।
* आस्यविहरणसमानक्रियादपि प्रतिषेधो वक्तव्यः * (म.भा.1.279)। विपादिकां व्याददाति । कूलं व्याददाति ।
* स्वाङ्गकर्मकाच्चेति * (म.भा.1.279)। इह मा भूत्-व्याददते पिपीलिकाः पतङ्गस्य मुखम् ।।
<क्रीडोऽनुसंपरिभ्यश्च ।। 1.3.21।।>
`क्रीड़ृ विहारे'(धा.पा.350)-एतस्माद् अनु, सम्, परि-इत्येवंपूर्वाद् आङ्पूर्वाच्च आत्मनेपदं भवति । अनुक्रीडते, संक्रीडते, परिक्रीडते । आङः खल्वपि-आक्रीडते ।
समा साहचर्यादन्वादिरुपसर्गो गृह्यते, तेनेह कर्मप्रवचनीयप्रयोगे न भवति-माणवकमनुक्रीडति ।
* समोऽकूजने इति वक्तव्यम् *(म.भा.1.280) । संक्रीडन्ति शकटानि ।
* आगमेः क्षमायामात्मनेपदं वक्तव्यम् *(म.भा.1.280) । क्षमा = उपेक्षा, कालहरणमिति यावत् । आगमयस्व तावन्माणवकम् ।
* शिक्षेर्जिज्ञासायाम् * (म.भा.1.280)। विद्यासु शिक्षते ।
* आशिषि नाथः * (म.भा.1.280)। सर्पिषो नाथते । मधुनो नाथते । आशिषीति किम् ? माणवकमनुनाथति ।
* हरतेर्गतिताच्छील्ये *(म.भा.1.280) । पैतृकमश्वा अनुहरन्ते, मातृकं गावोऽनुहरन्ते । गतिताच्छील्य इति किम् ? मातुरनुहरति, पितुरनुहरति ।
* किरतेर्हर्षजीविकाकुलायकरणेष्विति वक्तव्यम् * (म.भा.1.280)। अपस्किरते वृषभो हृष्टः । जीविकायाम्-अपस्किरते कुक्कुटो भक्षार्थी । कुलायकरणे-अपस्किरते श्वाऽऽश्रयार्थी । हर्षादिष्विति किम् ? अपकिरति कुसुमम् ।
* आङि नुप्रच्छ्योरुपसंख्यानम् * (म.भा.1.280)। आनुते श्रृगालः, आपृच्छते गुरुम् ।
* शप उपलम्भन इति वक्तव्यम् * (म.भा.1.280)। वाचा शरीरस्पर्शनम् = उपलम्भनम् । देवदत्ताय शपते, यज्ञदत्ताय शपते । उपलम्भन इति किम् ? शपति ।।
<समवप्रविभ्यः स्थः ।। 1.3.22 ।।>
सम्,अव, प्र,वि-इत्येवं पूर्वात् तिष्ठतेरात्मनेपदं भवति । संतिष्ठते, अवितिष्ठते,प्रतिष्ठते, वितिष्ठते ।।
*आङः स्थः प्रतिज्ञाने इति वक्तव्यम् * (म.भा.1.280)। अस्तिं सकारमात्रमातिष्ठते । आगमौ गुणवृद्धी आतिष्ठते ।।
<प्रकाशनस्थेयाख्ययोश्च।। 1.3.23 ।।>
स्वाभिप्रायकथनं प्रकाशनम् । स्थेयस्याख्या स्थेयाख्या । तिष्ठन्त्यस्मिन्निति स्थेयः, विवादपदनिर्णेता लोके स्थेय इति प्रसिद्धः, तस्य प्रतिपत्त्यर्थमाख्याग्रहणम् । प्रकाशने स्थेयाख्यायां च तिष्ठतेरात्मनेपदं भवति । प्रकाशने तावत्--तिष्ठते कन्या छात्रेभ्यः । तिष्ठते वृषली ग्रामपुत्रेभ्यः । प्रकाशयत्यात्मानमित्यर्थः । स्थेयाख्यायाम्-त्वयि तिष्ठते, मयि तिष्ठते, `संशय्य कर्णादिषु तिष्ठते यः'(कि.3.14) ।।
<उदोऽनूर्ध्वकर्मणि ।। 1.3.24 ।।>
उत्पूर्वात्तिष्ठतेरनूर्ध्वकर्मणि वर्तमानादात्मनेपदं भवति । कर्मशब्दः क्रियावाची । अनूर्ध्वकर्मविशिष्टाक्रियावचनात्तिष्ठतेरात्मनेपदं भवति । गेहे उत्तिष्ठते । कुटुम्बे उत्तिष्ठते । तदर्थं यतत इत्यर्थः ।
* उद ईहायामिति वक्तव्यम् *(म.भा.1.281) । इह मा भूत्-अस्माद् ग्रामात् शतमुत्तिष्ठति । शतमुत्पद्यते इत्यर्थः । ईहाग्रहणमनूर्ध्वकर्मण एव विशेषणम् , नापवादः ।
अनूर्ध्वकर्मणीति किम् ? आसनादुत्तिष्ठति ।।
<उपान्मन्त्रकरणे ।। 1.3.25।।>
उपपूर्वात्तिष्ठतेर्मन्त्रकरणेऽर्थे वर्त्तमानादात्मनेपदं भवति । ऐन्द्र्या गार्हपत्यमुपतिष्ठते । आग्नेय्या आग्नीर्घ्रमुपतिष्ठते ।
मन्त्रकरण इति किम् ? भर्तारमुपतिष्ठति यौवनेन ।
*उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यम् *(म.भा.1.281) । देवपूजायाम्--आदित्यमुपतिष्ठते । सङ्गतिकरणे-रथिकानुपतिष्ठते । मित्रकरणे-महामात्रानुपतिष्ठते । मित्रकरणसंगतिकरणयोः को विशेषः ? संगतिकरणमुपश्लेषः, तद्यथा-गङ्गा यमुनामुपतिष्ठते; मित्रकरणं तु--विनाप्युपश्लेषेण मैत्रीसंबन्धः । पथि-अयं पन्थाः स्रुघ्नमुपतिष्ठते ।
* वा लिप्सायामिति वक्तव्यम् * (म.भा.1.281)। भिक्षुको ब्राह्मणकुलमुपतिष्ठते, उपतिष्ठतीति वा ।
<अकर्मकाच्च ।। 1.3.26 ।।>
`उपात्' इति वर्तते । उपपूर्वात् तिष्ठतेरकर्मकक्रियावचनादात्मनेपदं भवति । यावद्भुक्तमुपतिष्ठते । भुक्तमिति इति भावे क्तप्रत्ययः। भोजने भोजने सन्निधीयत इत्यर्थः । भावे क्तप्रत्ययः ।
अकर्मकादिति किम् ? राजानमुपतिष्ठति ।।

<उद्विभ्यां तपः ।। 1.3.27 ।।>

`अकर्मकात्' इति वर्त्तते । उत्, वि-इत्येवम्पूर्वात् तपतेरकर्मकक्रियावचनादात्मनेपदं भवति । उत्तपते, वितपते । दीप्यत इत्यर्थः । अकर्मकादित्येव-उत्तपति सुवर्णं सुवर्णकारः । वितपति पृष्ठं सविता ।

स्वाङ्गकर्मकाच्चेति वक्तव्यम्(म.भा.1.281) । उत्तपते पाणिम्, उत्तपते पृष्ठम्; वितपते पाणिम्, वितपते पृष्ठम् । स्वाङ्गं चेह न पारिभाषिकं गृह्यते- `अद्रवं मूर्त्तिमत् स्वाङ्गम्' इति, किं तर्हि ? स्वमङ्गं स्वाङ्गम् । तेनेह न भवति--देवदत्तो यज्ञदत्तस्य पृष्ठमुत्तपतीति ।

उद्विभ्यामिति किम् ? निष्टपति ।।

<आङो यमहनः ।। 1.3.28 ।।>

`अकर्मकात्' इति वर्तते । `यम उपरमे'(धा.पा.984), `हन हिंसागत्योः'(धा.पा.1092) इति परस्मैपदिनौ ।

ताभ्यामकर्मकक्रियावचनाभ्यामाङ्पूर्वाभ्यामात्मनेपदं भवति । आयच्छते, आयच्छेते, आयच्छन्ते । हनः खल्वपि-आहते, आघ्नाते, आघ्नते । अकर्मकादित्येव-आयच्छति कूपाद्रज्जुम्, आहन्ति वृषलं पादेन (म.भा.1.282)।

*स्वाङ्गकर्मकाच्चेति वक्तव्यम् *(म.भा.1.282) । आयच्छते पाणिम् । आहते शिरः । स्वाङ्गं चेह न पारिभाषिकं गृह्यते, किं तर्हि ? स्वमङ्गं स्वाङ्गम्, तेनेह न भवति--आहन्ति शिरः परकीयमिति ।।

<समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः ।। 1.3.29 ।।>

`अकर्मकात्' इति वर्त्तते । शेषात् कर्त्तरि परस्मैपदे प्राप्ते, संपूर्वेभ्यो गमि -ऋच्छि-प्रच्छि-स्वरति-अर्ति-श्रु-विदि-इत्येतेभ्योऽकर्मकेभ्यो धातुभ्य आत्मनेपदं भवति । संगच्छते । संपृच्छते । संस्वरते । संकल्पा अस्य समरन्त ।

अर्तेर्लुङि च्लेः "सर्तिशास्त्यर्तिभ्यश्च"(3.1.56/2382) इत्यङादेशः । तत्र `परस्मैपदेषु' इत्येतन्नाश्रीयते, "बहुलं छन्दस्यमाङ्योगेऽपि"(6.4.75/3546) इत्याट् प्रतिषिध्यते । "ऋदृशोऽङि गुणः"(7.4.16/3406) इति गुणः । समरन्त । संश्रृणुते । संवित्ते । ऋच्छेरनादेशस्य ग्रहणम्-समृच्छिष्यते । अर्त्यादेशस्य त्वर्तीत्येव सिद्धमात्मनेपदम् । अर्तिरुभयत्र पठ्यते-`ऋ गतिप्रापणयो'(धा.पा.936) इति भ्वादौ,`ऋ सृ गतौ'(धा.पा.1098/1099) इति जुहोत्यादौ; विशेषाभावाद् द्वयोरपि ग्रहणम् ।

विदेर्ज्ञानार्थस्य ग्रहणम्, परस्मैपदिभिर्गमादिभिः साहचर्यान्न लाभार्थस्य । स्वरितेत्त्वादुभयतो भाषस्य ।

* दृशेश्चेति वक्तव्यम् *(म.भा.1.282) । संपश्यते । अकर्मकादित्येव-ग्रामं संपश्यति ।

<निसमुपविभ्यो ह्वः ।। 1.3.30 ।।>

`अकर्मकात्' इति निवृत्तम् । अतः परं सामान्येनात्मनेपदविधानं प्रतिपत्तव्यम् । नि, सम्, उप, वि-इत्येवम्पूर्वाद् ह्वयतेर्द्धातोरात्मनेपदं भवति । निह्वयते, संह्वयते, उपह्वयते, विह्वयते । अकर्त्रभिप्रायार्थोऽयमारम्भः । अन्यत्र हि ञित्वात्सिद्धमेवात्मनेपदम् ।।

* उपसर्गादस्यत्यूह्योर्वा वचनम्* (म.भा.1.282)। निरस्यति, निरस्यते । समूहति, समूहते ।।

<स्पर्धायामाङः ।। 1.3.31 ।।>

अकर्त्रभिप्रायार्थोऽयमारम्भः । स्पर्धायां विषये आङ्पूर्वाद् ह्वयतेरात्मनेपदं भवति । स्पर्धा=संघर्षः, पराभिभवेच्छा, स विषयो धात्वर्थस्य । धातुस्तु शब्दक्रिय एव । मल्लो मल्लमाह्वयते, छात्रश्छात्रमाह्वयते । स्पर्धमानस्तस्याह्वानं करोतीत्यर्थः ।

स्पर्धायामिति किम् ? गामाह्वयति गोपालः ।।

<गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ।। 1.3.32 ।।>

कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् । अकर्त्रभिप्रायार्थोऽयमारम्भः । गन्धनादिष्वर्थेषु वर्त्तमानात्करोतेरात्मनेपदं भवति । गन्धनम् = अपकारप्रयुक्तं हिंसात्मकं सूचनम् । तथा हि-`वस्त गन्ध अर्दने'(धा.पा.1684/1685),`अर्द हिसायाम्'(धा.पा.1829), इति चुरादौ पठ्यते । अवक्षेपणम् = भर्त्सनम् । सेवनम् = अनुवृत्तिः । साहसिक्यम् = साहसिकं कर्म । प्रतियत्नः = सतो गुणान्तराधानम् । प्रकथनम् = प्रकर्षेण कथनम् । उपयोगः = धर्मादिप्रयोजनो विनियोगः ।

गन्धने तावत्--उत्कुरुते । उदाकुरुते । सूचयतीत्यर्थः । अवक्षेपणे-श्येनो वर्त्तिकामुदाकुरुते । भर्त्सयतीत्यर्थः । सेवने-गणकानुपकुरुते, महामात्रानुपकुरुते । सेवत इत्यर्थः । साहसिक्ये-परदारान्प्रकुरुते । तेषु सहसा प्रवर्तत इत्यर्थः । प्रतियत्ने-एधो दकस्योपस्कुरुते । काण्डं गुडस्योपस्कुरुते । तस्य सतो गुणान्तराधानं करोतीत्यर्थः ।

*षष्ठीसुटौ करोतिः प्रतियत्न एव विधीयते * (2.3.53/614)। प्रकथने-गाथाः प्रकुरुते । जनापवादान्प्रकुरुते । प्रकर्षेण कथयतीत्यर्थः । उपयोगे-शतं प्रकुरुते, सहस्रं प्रकुरुते । धर्मार्थं शतं विनियुङ्क्त इत्यर्थः ।

एतेष्विति किम् ? कटं करोति ।

<अधेः प्रसहने ।। 1.3.33 ।।>

अकर्त्रभिप्रायार्थोऽयमारम्भः। अधिपूर्वात् करोतेः प्रसहने वर्तमानात् आत्मनेपदं भवति। प्रसहनमभिभवः अपराजयो वा। तमधिचक्रे। तमभिबभूव, न तेन

पराजित इत्यर्थः। प्रसहने इति किम् ? अर्थमधिकरोति। पृथग्योगकरणमुपसर्गविशेषणार्थम्।।

<वेः शब्दकर्मणः ।। 1.3.34 ।।>

`कृञः' इत्यनुवर्तते । विपूर्वात्करोतेरकर्त्रभिप्राये क्रियाफले शब्दकर्मण आत्मनेपदं भवति । कर्मशब्द इह कारकाभिधायी, न क्रियावचनः । क्रोष्टा विकुरुते स्वरान् । ध्वाङ्क्षो विकुरुते स्वरान् ।

शब्दकर्मण इति किम् ? विकरोति पयः ।।

<अकर्मकाच्च ।। 1.3.35 ।।>

`वेः कृञः' इत्यनुवर्त्तते । विपूर्वात्करोतेरकर्मकक्रियावचनादात्मनेपदं भवति । विकुर्वन्ते सैन्धवाः । साधु दान्ताः शोभनं वल्गन्तीत्यर्थः । ओदनस्य पूर्णाश्छात्रा विकुर्वते । निष्फलं चेष्टन्त इत्यर्थः ।।

<सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ।। 1.3.36 ।।>

`णीञ् प्रापणे'-अस्मात् कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् । अकर्त्रभिप्रायार्थोऽयमारम्भः । `णीञ् प्रापणे'- इत्येतस्माद्धातोरात्मनेपदं भवति सम्माननादिषु विशेषणेषु सत्सु ।

सम्माननम् = पूजनम् । नयते चार्वी लोकायते । चार्वी = बुद्धिः, तत्सम्बन्धादाचार्योऽपि चार्वी, स लोकायते शास्त्रे पदार्थान्नयते, उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रापयति, ते युक्तिभिः स्थाप्यमानाः सम्मानिताः पूजिता भवन्ति ।

उत्सञ्जनम् = उत्क्षेपणम् । माणवकमुपनयते । उत्क्षिपतीत्यर्थः ।

आचार्यकरणम् = आचार्यक्रिया । माणवकमीदृशेन विधिनाऽऽत्मसमीपं प्रापयति,यथा स उपनेता स्वयमाचार्यः संपद्यते माणवकमुपनयते । आत्मानमाचार्यीकुर्वन्माणवकमात्मसमीपं प्रापयतीत्यर्थः ।

ज्ञानम् = प्रमेयनिश्चयः । नयते चार्वी लोकायते । तत्र प्रमेयं निश्चिनोतीत्यर्थः ।

भृतिः = वेतनम् । कर्मकरानुपनयते । भृतिदानेन समीपं करोतीत्यर्थः ।

विगणनम् = ऋणादेर्निर्यातनम् । मद्राः करं विनयन्ते । निर्यातयन्तीत्यर्थः ।

व्ययः = धर्मादिषु विनियोगः । शतं विनयते, सहस्रं विनयते । धर्माद्यर्थं शतं विनियुङ्क्त इत्यर्थः ।

एतेष्विति किम् ? अजां नयति ग्रामम् ।।

<कर्तृस्थे चाशरीरे कर्मणि ।। 1.3.37 ।।>

नयतेः कर्त्ता देवदत्तादिर्लकारवाच्यः । कर्तृस्थे कर्मण्यशरीरे सति नयतेरात्मने पदं भवति । शरीरम् = प्राणिकायः, तदेकदेशोऽपि शरीरम् । क्रोधं विनयते, मन्युं विनयते ।

कर्तृस्थ इति किम् ? देवदत्तो यज्ञदत्तस्य क्रोधं विनयति । अशरीर इति किम् ? गडुं विनयति । घाटां विनयति । कर्मणीति किम् ? बुद्ध्या विनयति । प्रज्ञया विनयति ।।

<वृत्तिसर्गतायनेषु क्रमः ।। 1.3.38 ।।>

"शेषात्कर्त्तरि परस्मैपदे"(1.2.78/2159) प्राप्ते वृत्त्यादिष्वर्थेषु क्रमेर्धातोरात्मनेपदं भवति । वृत्तिः = अप्रतिबन्धः । सर्गः = उत्साहः । तायनम् = स्फीतता । वृत्तौ तावत्-ऋक्ष्वस्य क्रमते बुद्धिः । न प्रतिहन्यत इत्यर्थः । यजुःष्वस्य क्रमते बुद्धिः । सर्गे-व्याकरणाध्ययनाय क्रमते । उत्सहत इत्यर्थः । तायने-अस्मिन् शास्त्राणि क्रमन्ते । स्फीतीभवन्तीत्यर्थः ।

एतेष्विति किम् ? अपक्रामति ।।

<उपपराभ्याम् ।। 1.3.39 ।।>

`वृत्तिसर्गतायेनेषु' इति वर्त्तते । उपपरापूर्वात्क्रमतेर्वृत्त्यादिष्वर्थेषु वर्त्तमानादात्मनेपदं भवति । किमर्थं तर्हीदमुच्यते ? उपसर्गनियमार्थम् - सोपसर्गादुपपरापूर्वादेव, नान्यपूर्वादिति । उपक्रमते, पराक्रमते ।

उपपराभ्यामिति किम् ? संक्रामति । वृत्त्यादिष्वित्येव--उपक्रामति, पराक्रामति ।।

<आङ उद्गमने ।। 1.3.40 ।।>

आङ्पूर्वात् क्रमतेरुद्गमने वर्त्तमानादात्मनेपदं भवति । आक्रमते आदित्यः । आक्रमते चन्द्रमाः । आक्रमन्ते ज्योतींषि ।

उद्गमन इति किम् ? आक्रामति माणवकः कुतुपम् ।

*ज्योतिरुद्गमन इति वक्तव्यम् *(म.भा.1.282) । इह मा भूत्-आक्रामति धूमो हर्म्यतलात् ।।

<वेः पादविहरणे ।। 1.3.41 ।।>

विपूर्वात्क्रमतेः पादविहरणेऽर्थे वर्त्तमानादात्मनेपदं भवति । विहरणम् = विक्षेपः । सुष्ठु विक्रमते, साधु विक्रमते । अश्वादीनां गतिविशेषो विक्रमणमुच्यते । यद्यपि क्रमिः पादविहरण एव पठ्यते--`क्रमु पादविक्षेपे'(धा.पा.473)इति, तथाप्यनेकार्थत्वाद्धातूनामेवमुक्तम् ।

पादविहरण इति किम् ? विक्रामत्यजिनसन्धिः ।।

<प्रोपाभ्यां समर्थाभ्याम् ।। 1.3.42 ।।>

`प्र उप' इत्येताभ्यामुपसर्गाभ्यां परस्मात् क्रमतेरात्मनेपदं भवति, तौ चेत् प्रोपौ समर्थौ तुल्यार्थौ भवतः । क्व चानयोस्तुल्यार्थता ? आदिकर्मणि । प्रक्रमते भोक्तुम्, उपक्रमते भोक्तुम् ।

समर्थाभ्यामिति किम् ? पूर्वेद्युः प्रक्रामति । गच्छतीत्यर्थः । अपरेद्युरुपक्रामति । आगच्छतीत्यर्थः । अथ "उपपराभ्याम्"(1.3.39/2712) इत्यनेनात्मनेपदमत्र कस्मान्न भवति ? वृत्त्यादिग्रहणं तत्रानुवर्त्तते, ततोऽन्यत्रेदं प्रत्युदाहरणम् ।।

<अनुपसर्गाद्वा ।। 1.3.43 ।।>

`क्रम' इति वर्त्तते । अप्राप्तविभाषेयम् । उपसर्गवियुक्तात्क्रमतेरात्मनेपदं वा भवति । क्रमते । क्रमति ।

अनुपसर्गादिति किम् ? संक्रामति ।।

<अपह्नवे ज्ञः ।। 1.3.44 ।।>

शेषात्कर्त्तरि परस्मैपदे प्राप्ते जानातेरपह्नवे वर्त्तमानाद् आत्मनेपदं भवति । अपह्नवः = अपह्नुतिः अपलापः । सोपसर्गश्चायमपह्नवे वर्त्तते, न केवलः । शतमपजानीते, सहस्रमपजानीते । अपलपतीत्यर्थः ।

अपह्नव इति किम् ? न त्वं किञ्चिदपि जानासि ।।

<अकर्मकाच्च ।। 1.3.45 ।।>

अकर्त्रभिप्रायार्थमिदम्, कर्त्रभिप्राये हि "अनुपसर्गाज्ज्ञः"(1.3.76/2743) इति वक्ष्यति। जानातेरकर्मकादकर्मकक्रियावचनादात्मनेपदं भवति । सर्पिषो जानीते, मधुनो जानीते । कथं चायमकर्मकः ? नात्र सर्पिरादि ज्ञेयत्वेन विवक्षितम्, किं तर्हि ? ज्ञानपूर्विकायां प्रवृत्तौ करणत्वेन । तथा च -"ज्ञोऽविदर्थस्य करणे"(2.3.51/612) इति षष्ठी विधीयते । सर्पिषो जानीते, मधुनो जानीते । सर्पिषा उपायेन प्रवर्त्तत इत्यर्थः ।

अकर्मकादिति किम् ? स्वरेण पुत्रं जानाति ।।

<संप्रतिभ्यामनाध्याने ।। 1.3.46।।>

`ज्ञः' इति वर्त्तते । सकर्मकार्थमिदम् । `सं प्रति ' इत्येवं पूर्वात् जानातेरनाध्याने वर्त्तमानादात्मनेपदं भवति । आध्यानम् = उत्कण्ठास्मरणम् । शतं सञ्जानीते । सहस्रं सञ्जानीते । शतं प्रतिजानीते, सहस्रं प्रतिजानीते ।

अनाध्याने इति किम् ? मातुः सञ्जानाति, पितुः संजानाति । उत्कण्ठते इत्यर्थः।

<भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ।। 1.3.47।।>

"शेषात्कर्त्तरि परस्मैपदे"(1.3.78/2159) प्राप्ते भासनादिषु विशेषणेषु सत्सु वदतेरात्मनेपदं भवति । भासनम् = दीप्तिः । वदते चार्वी लोकायते । भासमानो दीप्यमानस्तत्र पदार्थान् व्यक्तीकरोतीत्यर्थः । उपसंभाषा = उपसान्त्वनम् । कर्मकरानुपवदते । उपसान्त्वयतीत्यर्थः । ज्ञानम् = सम्यगवबोधः । वदते चार्वी लोकायते । जानाति वदितुमित्यर्थः । यत्नः = उत्साहः । क्षेत्रे वदते, गेहे वदते । तद्विषयमुत्साहमाविष्करोतीत्यर्थः । विमतिः = नानामतिः । क्षेत्रे विवदन्ते, गेहे विवदन्ते । विमतिपतिता विचित्रं भाषन्त इत्यर्थ । उपमन्त्रणम् = रहस्युपच्छन्दनम् । कुलभार्यामुपवदते । परदारानुपवदते । उपच्छन्दयतीत्यर्थः ।

एतेष्विति किम् ? यत्किञ्चिद्वदति ।।

<व्यक्तवाचां समुच्चारणे ।। 1.3.48 ।।>

`वदः' इति वर्त्तते । व्यक्तवाचां समुच्चारणं सरोच्चारणम्, तत्र वर्त्तमानाद्वदतेरात्मनेपदं भवति । ननु `वद व्यक्तायां वाचि'(धा.पा.1009) इत्येव पठ्यते, तत्र किं व्यक्तवाचामिति विशेषणेन ? प्रसिद्ध्युपसङ्ग्रहार्थमेतत् । व्यक्तवाच इति हि मनुष्याः प्रसिद्धाः, तेषां समुच्चारणे यथा स्यात् । संप्रवदन्ते ब्राह्मणाः । संप्रवदन्ते क्षत्रियाः ।

व्यक्तवाचामिति किम् ? `संप्रवदन्ति कुक्कुटाः'(म.भा.1.283) । समुच्चारण इति किम् ? ब्राह्मणो वदति । क्षत्रियो वदति ।।

<अनोरकर्मकात् ।। 1.3.49 ।।>

`वदः' इति `व्यक्तवाचाम्' इति च वर्त्तते । अनुपूर्वाद्वदतेरकर्मकाद्व्यक्तवाग्विषयादात्मनेपदं भवति । अनुवदते कठः कलापस्य । अनुवदते मौद्गः पैप्पलादस्य । अनुः सादृश्ये । यथा कलापोऽधीयानो वदति तथा कठ इत्यर्थः ।

अकर्मकादिति किम् ? पूर्वमेव यजुरुदितमनुवदति । व्यक्तवाचामित्येव-अनुवदति वीणा ।।

<विभाषा विप्रलापे ।। 1.3.50 ।।>

`वद' इति वर्त्तते,`व्यक्तवाचां समुच्चारणे' इति च । विप्रलापात्मके व्यक्तवाचां समुच्चारणे वर्त्तमानाद्वदतेरात्मनेपदं भवति विभाषा । प्राप्तविभाषेयम् । विप्रवदन्ते सांवत्सराः, विप्रवदन्ति सांवत्सराः । विप्रवदन्ते मौहूर्त्ताः, विप्रवदन्ति मौहूर्त्ताः । युगपत्परस्परप्रतिषेधेन विरुद्धं वदन्तीत्यर्थः ।

विप्रलाप इति किम् ? संप्रवदन्ते ब्राह्मणाः । व्यक्तवाचामित्येव-विप्रवदन्ति शकुनयः । समुच्चारण इत्येव-क्रमेण मौहूर्त्ता मौहूर्त्तेन सह विप्रवदन्ति ।।

<अवाद् ग्रः ।। 1.3.51 ।।>

`गृ निगरणे'(धा.पा.1410) इति तुदादौ पठ्यते, तस्येदं ग्रहणम्; न तु `गृ शब्दे'(धा.पा.1498) इति क्र्यादिपठितस्य । तस्य ह्यवपूर्वस्य प्रयोग एव नास्ति । "शेषात्"(1.3.78/2159) इति परस्मैपदे प्राप्ते; अवपूर्वाद्गिरतेरात्मनेपदं भवति । अवगिरते, अवगिरेते, अवगिरन्ते ।

अवादिति किम् ? गिरति ।।

<समः प्रतिज्ञाने ।। 1.3.52 ।।>

`ग्रः' इति वर्त्तते । संपूर्वाद् गिरतेः प्रतिज्ञाने वर्त्तमानादात्मनेपदं भवति । प्रतिज्ञानम् = अभ्युपगमः । शतं संगिरते, नित्यं शब्दं संगिरते ।

प्रतिज्ञान इति किम् ? संगिरति ग्रासम् ।।

<उदश्चः सकर्मकात् ।। 1.3.53 ।।>

"शेषात्कर्तरि"(1.3.78य2159)इति परस्मैपदे प्राप्ते उत्पूर्वाच्चरतेः सकर्मकक्रियावचनादात्मनेपदं भवति। गेहमुच्चरते। कुटुम्बमुच्चरते।

गुरुवचनमुच्चरते। उत्क्रम्य गच्छति इत्यर्थः। सकर्मकात् इति किम् ? बाष्पमुच्चरति।

<समस्तृतीयायुक्तात्।। 1.3.53 ।।>

सम्पूर्वाच्चरतेस्तृतीयायुक्तादात्मनेपदं भवति । `तृतीया' इति तृतीयाविभक्तिर्गृह्यते, तया चरतेरर्थद्वारको योगः । अश्वेन संचरते ।

तृतीयायुक्तादिति किम् ? उभौ लोकौ संचरसि इमं चामुं च देवल (म.भा.1.283)। यद्यप्यत्र तदर्थयोगः संभवति, तृतीया तु न श्रूयत इति प्रत्युदाहरणं भवति ।।

<दाणश्च सा चेच्चतुर्थ्यर्थे ।। 1.3.55 ।।>

`दाण् दाने '(धा.पा.930) परस्मैपदी । ततः संपूर्वात्तृतीयायुक्तादात्मनेपदं भवति, सा चेत्तृतीया चतुर्थ्यर्थे भवति ।

कथं पुनस्तृतीया चतुर्थ्यर्थे स्यात् ? वक्तव्यमेवैतत्-* अशिष्टव्यवहारे तृतीया चतुर्थ्यर्थे भवतीति वक्तव्यम् * (म.भा.1.284)। दास्या मालां संप्रयच्छते । वृषल्या सम्प्रयच्छते। कामुकः सन् दास्यै ददातीत्यर्थः ।

चतुर्थ्यर्थे इति किम् ? पाणिना संप्रयच्छति । समः प्रशब्देन व्यवधाने कथमात्मनेपदं भवति ? `समः' इति विशेषणे षष्ठी, न पञ्चमी ।।

<उपाद्यमः स्वकरणे ।। 1.3.56 ।।>

"शेषात्कर्त्तरि परस्मैपदे"(1.2.78/2159) प्राप्ते उपपूर्वाद् यमः स्वकरणे वर्तमानादात्मनेपदं भवति । पाणिग्रहणविशिष्टमिह स्वकरणं गृह्यते, न स्वकरणमात्रम् । भार्यामुपयच्छते ।

स्वकरण इति किम् ? देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छति ।।

<ज्ञाश्रुस्मृदृशां सनः ।। 1.3.57 ।।>

ज्ञा, श्रु, स्मृ, दृश्-इत्येतेषां सन्नन्तानामात्मनेपदं भवति । तत्र जानातेः"अपह्नवे ज्ञः"(1.3.44/2717) इति त्रिभिः सूत्रैरात्मनेपदं विहितम्, श्रुदृशोरपि "समो गम्यृच्छि"(1.3.29/2699) इत्यत्र विहितम्; तस्मिन्विषये "पूर्ववत्सनः"(1.3.62/2734) इत्येव सिद्धमात्मनेपदम्। ततोऽन्यत्रानेन विधीयते । स्मरतेः पुनरप्राप्त एव विधानम् । धर्मं जिज्ञासते । गुरुं शुश्रूषते । नष्टं सुस्मूर्षते । नृपं दिदृक्षते ।

सन इति किम् ? जानाति, श्रृणोति, स्मरति, पश्यति ।

<नानोर्ज्ञः ।। 1.3.58 ।।>

पूर्वेण योगेन प्राप्तमात्मनेपदं प्रतिषिध्यते । अनुपूर्वाज्जानातेः सन्नन्तादात्मनेपदं न भवति । तथा च सति सकर्मकस्यैवायं प्रतिषेधः सम्पद्यते । पुत्रमनुजिज्ञासति ।

अनोरिति किम् ? धर्मं जिज्ञासते ।।

<प्रत्याङ्भ्यां श्रुवः ।। 1.3.59 ।।>

`प्रति, आङ्' इत्येवम्पूर्वाच्छृणोतेः सन्नन्तादात्मनेपदं न भवति । प्रतिशुश्रूषति । आशुश्रूषति । उपसर्गग्रहणं चेदम्, तस्मादिह प्रतिषेधो न भवति-देवदत्तं प्रति शुश्रूषते ।।

<शदेः शितः ।। 1.3.60 ।।>

`शद्लृ शातने'(धा.पा.1855) परस्मैपदी, तस्मादात्मनेपदं विधीयते । शदिर्यः शित्, शिद्भावी शितो वा सम्बन्धी तस्मादात्मनेपदं भवति । शीयते, शीयेते, शीयन्ते ।

शित इति किम् ? अशत्स्यत् । शत्स्यति । शिशत्सति ।।

<म्रियतेर्लुङ्लिङोश्च ।। 1.3.61 ।।>

`मृङ् प्राणत्यागे'(धा.पा.1404), ङित्त्वादात्मनेपदमत्र सिद्धमेवेति नियमार्थमिदं वचनम्-म्रियतेर्लुङ्लिङोः शितश्चात्मनेपदं भवति, अन्यत्र न भवति । अमृत । मृषीष्ट । शितः खल्वपि-म्रियते, म्रियेते, म्रियन्ते ।

नियमः किमर्थः ? मरिष्यति । अमरिष्यत् ।।

<पूर्ववत्सनः ।। 1.3.62 ।।>

सनः पूर्वा यो धातुः आत्मनेपदी तद्वत्सन्नन्तादात्मनेपदं भवति । येन निमित्तेन पूर्वस्मादात्मनेपदं विधीयते तेनैव सन्नन्तादपि भवति । "अनुदात्तङित आत्मनेपदम्"(1.3.12/2157)-आस्ते, शेते । सन्नन्तादपि तदेव निमित्तम्--आसिसिषते, शिशयिषते । "नेर्विशः"(1.3.17/2683)-निविशते, निविविक्षते । "आङ उद्गमने"(1.3.40/2713)--आक्रमते, आचिक्रंसते ।

इह न भवति-शिसत्सति । मुमूर्षति । न हि शदिम्रियतिमात्रमात्मनेपदनिमित्तम्, किं तर्हि ? शिदाद्यपि, तच्चेह नास्ति ।

यस्य च पूर्वत्रैव निमित्तभावः प्रतिषिध्यते, तत्सन्नन्तेऽप्यनिमित्तम्-अनुचिकीर्षति । पराचिकीर्षति ।

इह जुगुप्सते, मीमांसते इति ? "अनुदात्त ङित"(1.3.12/2157) इत्येव सिद्धमात्मनेपदम्। `अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति'(म.भा.1.289)इति ।।

<आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ।। 1.3.63 ।।>

अकर्त्रभिप्रायार्थोऽयमारम्भः । आम् प्रत्ययो यस्मात्सोऽयमाम्प्रत्ययः । आम्प्रत्ययस्यैव धातोः कृञोऽनुप्रयोगस्यात्मनेपदं भवति । ईक्षाञ्चक्रे, ईहाञ्चक्रे । यदि विध्यर्थमेतत्, तर्हि उदुब्जाञ्चकार, उदुम्भाञ्चकारेति कर्त्रभिप्राये क्रियाफले आत्मनेपदं प्राप्नोति ? नैष दोषः, उभयमनेन क्रियते-विधिः, नियमश्च । कथम् ? पूर्ववदिति वर्तते । स द्वितीयो यत्नो नियमार्थो भविष्यति ।

कृञ इति किम् ? ईक्षामास, ईक्षाम्बभूव । कथं पुनरस्यानुप्रयोगः, यावता"कृञ्चानुप्रयुज्यते लिटि"(3.1.40/2239) इत्युच्यते ? `कृञ्' इति प्रत्याहारग्रहणं तत्र विज्ञायते । क्व संनिविष्टानां प्रत्याहारः ? "अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः"(5.4.50/2129)इति कृशब्दादारभ्य यावत् "कृञो द्वितीयतृतीयशम्बबीजात्कृषौ"(5.4.58/2129) इति ञकारम् ।।

<प्रोपाभ्यां युजेरयज्ञपात्रेषु ।। 1.3.64 ।।>

`युजिर् योगे' स्वरितेत् । तस्य कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् । अकर्त्रभिप्रायार्थोऽयमारम्भः । प्र, उप-इत्येवम्पूर्वाद् युजेरयज्ञपात्रप्रयोगविषयादात्मनेपदं भवति । प्रयुङ्क्ते ।

अयज्ञपात्रेष्विति किम् ? `द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति' (आप.गृ.1.1.16)।

* स्वराद्यन्तोपसृष्टादिति वक्तव्यम् *(म.भा.1.290) । उद्युङ्क्ते, नियुङ्क्ते ।

स्वराद्यन्तोपसृष्टादिति किम् ? संयुनक्ति ।।

<समः क्ष्णुवः ।। 1.3.65 ।।>

`क्ष्णु तेजने'(धा.पा.1037) परस्मैपदी । ततः सम्पूर्वादात्मनेपदं भवति । "समो गम्यृच्छि"(1.3.29/2699) इत्यत्रैव कस्मान्न पठितः ? अकर्मकादिति तत्र वर्तते । संक्ष्णुते शस्त्रम्, संक्ष्णुवते ।

<भुजोऽनवने ।। 1.3.66 ।।>

`भुज पालनाभ्यवहारयोः'(धा.पा.1455) इति रुधादौ पठ्यते । तस्मादनवने = अपालने वर्त्तमानादात्मनेपदं भवति । भुङ्क्ते, भुञ्जाते ।

अनवन इति किम् ? भुनक्त्येनमग्निराहितः । अनवनप्रतिषेधेन रौधादिकस्यैव ग्रहणं विज्ञायते, न तौदादिकस्य-`भुजो कौटिल्ये'(धा.पा.1418) इत्यस्य । तेनेह न भवति--विभुजति पाणिम् ।।

<णेरणौ यत्कर्म णौ चेत्स कर्त्तानाध्याने ।। 1.3.67 ।।>

"णिचश्च"(1.3.74/2564)' इति कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् । अकर्त्रभिप्रायार्थोऽयमारम्भः । ण्यन्तादात्मनेपदं भवति, कथम् ? अणौ यत्कर्मणौ चेत्तदेव कर्म, स एव कर्त्ता भवति, अनाध्याने = आध्यानं वर्जयित्वा । आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयते हस्ती स्वयमेव । उपसिञ्चन्ति हस्तिनं हस्तिपकाः । उपसेचयते हस्ती स्वयमेव । पश्यन्ति भृत्या राजानम् । दर्शयते राजा स्वयमेव ।

णेरिति किम् ? आरोहन्ति हस्तिनं हस्तिपकाः, आरोहयमाणो हस्ती साध्वारोहति ।

अणाविति किम् ? गणयति गणं गोपालकः, गणयति गणः स्वयमेव । कर्मग्रहणं किम् ? लुनाति दात्रेण, लावयति दात्रं स्वयमेव ।

`णौ चेद्' ग्रहणं समानक्रियार्थम् । आरोहन्ति हस्तिनं हस्तिपकः, आरोहयमाणो हस्ती भीतान् सेचयति मूत्रेण ।

यत्सग्रहणमनन्यकर्मार्थम् । आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यान् ।

कर्त्तरि किम् ? आरोहन्ति हस्तिनं हस्तिपकाः, तानारोहयति महामात्रः । अनाध्यान इति किम् ? स्मरति वनगुल्मस्य कोकिलः, स्मरयत्येनं वनगुल्मः स्वयमेव ।

ननु चात्र कर्मकर्त्तरि मूलोदाहरणानि, तत्र कर्मवद्भावेनैव सिद्धमात्मनेपदम्, किमर्थमिदमुच्यते ? कर्मस्थभावकानां कर्मस्थक्रियाणां च क्रमवदतिदेशो विज्ञायते । कर्तृस्थार्थोऽयमारम्भः ।

तथा च रुहिः कर्तृस्थक्रियः, दृशिः कर्तृस्थभावक उदाहृतः ।

<भीस्म्योर्हेतुभये ।। 1.3.68 ।।>

`णेः' इति वर्त्तते । अकर्त्रभिप्रायार्थोऽयमारम्भः । बिभितेः स्मयतेश्च ण्यन्तादात्मनेपदं भवति हेतुभये । हेतुः प्रयोजकः कर्त्ता लकारवाच्यः, ततश्चेद्भयं भवति । भयग्रहणमुपलक्षणार्थम्, विस्मयोऽपि तत एव । जटिलो भीषयते । मुण्डो भीषयते । जटिलो विस्मापयते । मुण्डो विस्मापयति।
हेतुभय इति किम् ? कुञ्चिकयैनं भाययति । रूपेण विस्माययति । अत्र कुञ्चिका भयस्य करणम्, न हेतुः ।।
<गृधिवञ्च्योः प्रलम्भने ।। 1.3.69 ।।>
`णेः' इति वर्त्तते । अकर्त्रभिप्रायार्थोऽयमारम्भः । `गृधु अभिकाङ्क्षायाम्'(धा.पा.1247) `वञ्चु गतौ'(धा.पा.181) इत्येतयोर्ण्यन्तयोः प्रलम्भने वर्त्तमानयोरात्मनेपदं भवति । प्रलम्भनम् = विसंवादनम्, मिथ्याफलाख्यानम् । माणवकं गर्धयते । माणवकं वञ्चयते ।
प्रलम्भन इति किम् ? श्वानं गर्धयति । गर्धनमस्योत्पादयतीत्यर्थः । अहिं वञ्चयति । परिहरतीत्यर्थः।
<लियः सम्माननशालीनीकरणयोश्च ।। 1.3.70 ।।>
`णे' इति वर्त्तते । अकर्त्रभिप्रायार्थोऽयमारम्भः । `लीङ् श्लेषणे'(धा.पा.1139) इति दिवादौ पठ्यते, `ली श्लेषणे'(धा.पा.1501) इति च क्र्यादौ; विशेषाभावाद् द्वयोरपि ग्रहणम् । लियो ण्यन्तात्सम्मानने शालीनीकरणे च वर्त्तमानादात्मनेपदं भवति, `च' शब्दात् प्रलम्भने च । संमाननम् = पूजनम् । शालीनीकरणम् = न्यग्भावनम् । जटाभिरालापयते । पूजां समधिगच्छतीत्यर्थः । श्येनो वर्त्तिकामुल्लापयते । न्यक्करोतीत्यर्थः । प्रलम्भने-कस्त्वामुल्लापयते । विसंवादयतीत्यर्थः । "विभाषा लीयतेः"(6.1.51/2509) इति वाऽऽत्वं विधीयते । तदस्मिन्विषये नित्यमन्यत्र विकल्पः । व्यवस्थितविभाषा हि सा ।
सम्माननादिष्विति किम् ? बालकमुल्लापयति ।
<मिथ्योपपदात्कृञोऽभ्यासे ।। 1.3.71 ।।>
`णेः' इति वर्त्तते । अकर्त्रभिप्रायार्थोऽयमारम्भः । ण्यन्तात्करोतेर्मिथ्योपदादात्मनेपदं भवति अभ्यासे । अभ्यासः = पुनः पुनः करणम् , आवृत्तिः । पदं मिथ्या कारयते । सापचारं स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः ।
मिथ्योपपदादिति किम् ? पदं सुष्ठु कारयति । कृञ इति किम् ? पदं मिथ्या वाचयति । अभ्यास इति किम् ? पदं मिथ्या कारयति । सकृदुच्चारयति ।।
<स्वरितञितः कर्त्रभिप्राये क्रियाफले ।। 1.3.72 ।।>
`णेः' इति निवृत्तम् । "शेषात्कर्त्तरि परस्मैपदे"(1.3.78/2159) प्राप्ते स्वरितेतो ये धातवो ञितश्च तेभ्य आत्मनेपदं भवति, कर्त्तारं चेत्क्रियाफलमभिप्रैति । क्रियायाः फलं क्रियाफलं प्रधानभूतं यदर्थमसौ क्रिया आरभ्यते तच्चेत् कर्तुर्लकारवाच्यस्य भवति । यजते । पचते । ञितः खल्वपि--सुनुते । कुरुते । स्वर्गादि प्रधानफलमिह कर्त्तारमभिप्रैति ।
`कर्त्रभिप्राये' इति किम् ? यजन्ति याजकाः । पचन्ति पाचकाः । कुर्वन्ति कर्मकराः । यद्यपि दक्षिणा भृतिश्च कर्तुः फलमिहास्ति, तथापि न तदर्थः क्रियारम्भः ।।
<अपाद्वदः ।। 1.3.73 ।।>
`कर्त्रभिप्राये' इति वर्त्तते । अपपूर्वाद्वदतेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति । धनकामो न्यायमपवदते । `न्यायापवादेन धनमर्जयिष्यामि' इति मन्यते ।
`कर्त्रभिप्राये क्रियाफले' इत्येव-अपवदति ।।
<णिचश्च ।। 1.3.74।।>
`कर्त्रभिप्राये क्रियाफले' इति वर्त्तते । णिजन्तादात्मनेपदं भवति, कर्त्रभिप्राये क्रियाफले । कटं कारयते । ओदनं पाचयते ।
कर्त्रभिप्राय इत्येव-कटं कारयति परस्य ।।
<समुदाङ्भ्यो यमोऽग्रन्थे ।। 1.3.75 ।।>
`कर्त्रभिप्राये' इति वर्त्तते । सम्, उद्, आङ्-इत्येवम्पूर्वाद्यमेः कर्त्रभिप्रये क्रियाफले आत्मनेपदं भवति, ग्रन्थविषयश्चेत्प्रयोगो न भवति । व्रीहीन् संयच्छते । भारमुद्यच्छते । वस्त्रमायच्छते । आङ्पूर्वादकर्मकाद् "आङो यमहनः"(1.3.28/2695) इति सिद्धमेवात्मनेपदम्। सकर्मकार्थमिदं पुनर्ग्रहणम् ।
अग्रन्थ इति किम् ? उद्यच्छति चिकित्सां वैद्यः ।
कर्त्रभिप्राय इत्येव-संयच्छति, उद्यच्छति, आयच्छति ।।
<अनुपसर्गाज्ज्ञः ।। 1.3.76 ।।>
`कर्त्रभिप्राय' इति वर्त्तते । अनुपसर्गाज्जानातेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति । गां जानीते, अश्वं जानीते ।
अनुपसर्गादिति किम् ? स्वर्गं लोकं न प्रजानाति मूढः ।
`कर्त्रभिप्रायः' इत्येव-देवदत्तस्य गां जानाति ।।
<विभाषोपपदेन प्रतीयमाने ।। 1.3.77 ।।>
"स्वरितञितः"(1.3.72/2358) इति पञ्चभिः सूत्रैरात्मनेपदं कर्त्रभिप्राये क्रियाफले द्योतिते विहितम्, तदुपपदेन द्योतिते न प्राप्नोतीति वचनमारभ्यते ।

समीपे श्रूयमाणं शब्दान्तरम् = उपपदम्, तेन प्रतीयमाने कर्त्रभिप्राये क्रियाफले विभाषाऽऽत्मनेपदं भवति । स्वं यज्ञं यजति, स्वं यज्ञं यजते । स्वं कटं करोति, स्वं कटं कुरुते । स्वं पुत्रमपवदति, स्वं पुत्रमपवदते । एवं पञ्चसूत्र्यामुदाहार्यम् ।।

<शेषात्कर्तरि परस्मैपदम् ।। 1.3.78 ।।>

पूर्वेण प्रकरणेनात्मनेपदनियमः कृतः, न परस्मैपदनियमः, तत्सर्वतः प्राप्नोति, तदर्थमिदमुच्यते । येभ्यो धातुभ्यो येन विशेषणेनात्मनेपदमुक्तं ततो यदन्यत्स शेषः । शेषात्कर्तरि परस्मैपदं भवति शेषादेव नान्यस्मात् । "अनुदात्तङित आत्मनेपदम्"(1.3.12/2157) उक्तम्-आस्ते, शेते । ततोऽन्यत्र परस्मैपदं भवति-याति, वाति । "नेर्विशः"(1.3.17/2683) आत्मनेपदमुक्तम्-निविशते । ततोऽन्यत्र परस्मैपदम्-आविशति, प्रविशति ।

कर्तरीति किम् ? पच्यते, गम्यते ।

कर्मकर्तरि कस्मात्परस्मैपदं न भवति-पच्यते ओदनः स्वयमेव ? "कर्त्तरि कर्मव्यतिहारे"(1.3.14/2680) इति द्वितीयं कर्तृग्रहणमुनवर्त्तते; तेन कर्त्तैव यः कर्त्ता, तत्र परस्मैपदं कर्मकर्त्तरि न भवति ।।

<अनुपराभ्यां कृञः ।। 1.3.79 ।।>

कर्त्रभिप्राये क्रियाफले गन्धनादिषु च करोतेरात्मनेपदं विहितम्, तदपवादः परस्मैपदं विधीयते । अनु, परा-इत्येवम्पूर्वात्करोतेः परस्मैपदं भवति । अनुकरोति, पराकरोति ।।

<अभिप्रत्यतिभ्यः क्षिपः ।। 1.3.80 ।।>

`क्षिप प्रेरणे'(धा.पा.1286) स्वरितेत्, ततः कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते । अभि, प्रति,-इत्येवम्पूर्वात् क्षिपः परस्मैपदं भवति । अभिक्षिपति, प्रतिक्षिपति, अतिक्षिपति ।

अभिप्रत्यतिभ्य इति किम् ? आक्षिपते ।

द्वितीयमपि कर्तृग्रहणमनुवर्त्तते, तेनेह न भवति--अभिक्षिप्यते स्वयमेव ।।

<प्राद्वहः ।। 1.3.81 ।।>

`वह प्रापणे'(धा.पा.1004) स्वरितेत्, तत्र कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते । प्रवूर्वाद्वहतेः परस्मैपदं भवति । प्रवहति, प्रवहतः, प्रवहन्ति ।

प्रादिति किम् ? आवहते ।।

<परेर्मृषः ।। 1.3.82 ।।>

`मृष तितिक्षायाम्'(धा.पा.1165)स्वरितेत्, ततस्तथैवात्मनेपदे प्राप्ते परस्मैपदं विधीयते । परिपूर्वाद् मृष्यतेः परस्मैपदं भवति । परिमृष्यति, परिमृष्यतः,परिमृष्यन्ति ।

परेरिति किम् ? आमृष्यते ।

वहतिमपि केचिदत्रानुवर्त्तयन्ति-परिवहति ।।

<व्याङ्परिभ्यो रमः ।। 1.3.83 ।।>

`रमु क्रीडायाम्'(धा.पा.854), अनुदात्तेत्त्वादात्मनेपदे प्राप्ते परस्मैपदं विधीयते । वि, आङ्, परि--इत्येवम्पूर्वाद्रमतेः परस्मैपदं भवति । विरमति,आरमति, परिरमति ।

एतेभ्य इति किम् ? अभिरमते ।।

<उपाच्च ।। 1.3.84 ।।>

`रमः' इत्येव। उपपूर्वाद्रमतेः परस्मैपदं भवति । देवदत्तमुपरमति । यज्ञदत्तमुपरमति । उपरमयतीति यावत् । अन्तर्भावितण्यर्थोऽत्र रमिः । पृथग्योगकरणमुत्तरार्थम् । अकर्मकाद्विभाषां वक्ष्यति, सा उपपूर्वादेव यथा स्यात् ।।

<विभाषाऽकर्मकात् ।। 1.3.85 ।।>

`रम'`उपात्' इति च वर्त्तते । पूर्वेण नित्ये परस्मैपदे प्राप्ते विकल्प आरभ्यते । उपपूर्वाद्रमतेरकर्मकाद्विभाषा परस्मैपदं भवति । यावद्भुक्तमुपरमति, यावद्भुक्तमुपरमते । निवर्तत इत्यर्थः ।।

<बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ।। 1.3.86 ।।>

"णिचश्च"(1.3.74/2564)इति कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते । बुध, युध, नश, जन, इङ्, प्रु,द्रु,स्रु--इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं भवति । बोधयति । योधयति । नाशयति । जनयति । अध्यापयति । प्रावयति । द्रावयति । स्रावयति ।

येऽत्राकर्मकास्तेषाम् "अणावकर्मकाच्चित्तवत्कर्तृकात्"(1.3.88/2754) इत्येवं सिद्धे वचनमिदमचित्तवत्कर्तृकार्थम् । बोधयति पद्मम् । योधयन्ति काष्ठानि । नाशयति दुःखम् । जनयति सुखम् ।

येऽत्र चलनार्था अपि तेषां "निगरणचलनार्थेभ्यश्च"(1.3.87/2753) इति सिद्धे यदा न चलनार्थास्तदर्थं वचनम्-प्रवते । प्राप्नोतीति गम्यते । अयो

द्रवति । विलीयत इत्यर्थः । कुण्डिका स्रवति । स्यन्दत इत्यर्थः । तद्विषयाण्युदाहरणानि ।।
<निगरणचलनार्थेभ्यश्च ।। 1.3.87 ।।>
`णेः' इति वर्त्तते । कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विधीयते । निगरणम् = अव्यवहारः । चलनम् = कम्पनम् । निगरणार्थेभ्यश्च धातुभ्यो ण्यन्तेभ्यः परस्मैपदं भवति । निगारयति । आशयति । भोजयति । चलनार्थेभ्यः-चलयति, चोपयति, कम्पयति ।
अयमपि योगः सकर्मकार्थः, अचित्तवत्कर्तृकार्थश्च ।
*अदेः प्रतिषेधो वक्तव्यः * । अत्ति देवदत्तः । आदयते देवदत्तेन ।।
<अणावकर्मकाच्चित्तवत्कर्तृकात् ।। 1.3.88 ।।>
`णेः' इति वर्तते । कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विधीयते । अण्यन्तो यो धातुरकर्मकश्चित्तवत्कर्तृकश्च तस्माद् ण्यन्तात्परस्मैपदं भवति । आस्ते देवदत्तः, आसयति देवदत्तम् । शेते देवदत्तः शाययति देवदत्तम् ।
अणाविति किम् ? चेतयमानं प्रयोजयति चेतयते इति केचित्प्रत्युदाहरन्ति, तदयुक्तम्; हेतुमण्णिचो विधिः, प्रतिषेधोऽपि प्रत्यासत्तेस्तस्यैव न्याय्यः । तस्मादिह चेतयतीति परस्मैपदेनैव भवितव्यम् । इदं तु प्रत्युदाहरणम्-आरोहयमाणं प्रयुङ्क्ते, आरोहयते ।
अकर्मकादिति किम् ? कटं कुर्वाणं प्रयोजयति, कारयते । चित्तवत्कर्तृकादिति किम् ? शुष्यन्ति व्रीहयः, शोषयते व्रीहीनातपः ।
<न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ।। 1.3.89 ।।>
पूर्वेण योगद्वयेन कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विहितम्, तस्य प्रतिषेधोऽयमुच्यते । यत्कर्त्रभिप्रायविषयमात्मनेपदं तदवस्थितमेव न प्रतिषिध्यते । पा, दमि, आङ्यम्, आङ्यस, परिमुह, रुचि, नृति, वद, वस-इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं न भवति । "णिचश्च"(1.3.74/2564) इत्यात्मनेपदं भवति । तत्र पिबतिर्निगरणार्थः । दमिप्रभृतयश्चित्तवत्कर्तृकाः । नृतिश्चलनार्थोऽपि । एषां परस्मैपदं न भवति । पा-पाययते । दमि-दमयते । आङ्यम-आयामयते । `यमोऽपरिवेषणे'(ग.सू.193) इति मित्संज्ञा प्रतिषिध्यते । आङ्यस-आयासयते । परिमुह-परिमोहयते । रुचि-रोचयते । नृति-नर्त्तयते । वद-वादयते । वस-वासयते ।
*पादिषु धेट उपसंख्यानम् * (म.भा.1.295)। `धापयेते शिशुमेकं समीची'(ऋ.1.196.5) ।।
<वा क्यषः ।। 1.3.90 ।।>
"लोहितादिडाज्भ्यः क्यष्"(3.1.13/2668) इति वक्ष्यति, तदन्ताद्धातोर्वा परस्मैपदं भवति । लोहितायति, लोहितायते । पटपटायति, पटपटायते ।
अथात्र परस्मैपदेन मुक्ते कथमात्मनेपदं लभ्यते, यावता "अनुदात्तङितः"(1.3.12/2157) इत्येवमादिना प्रकरणेन तन्नियतम् ? एवं तर्हि आत्मनेपदमेवात्र विकल्पितं विधीयते,तच्चानन्तरं परस्मैपदप्रतिषेधेन सन्निधापितमिह संबध्यते । तेन मुक्ते शेषात्कर्त्तरि परस्मैपदं भवति ।।
<द्युद्भ्यो लुङि ।। 1.3.91 ।।>
वेत्येव । `द्युत दीप्तौ'(धा.पा.741),तत्साहचर्याद् लुठादयोऽपि `कृपू'(धा.पा.762)पर्यन्तास्तथैव व्यपदिश्यन्ते । बहुवचननिर्देशादाद्यर्थो भवति ।
अनुदात्तेत्त्वान्नित्यमेवात्मनेपदे प्राप्ते द्युतादिभ्यो लुङि वा परस्मैपदं भवति ।
व्यद्युतत्, व्यद्योतिष्ट । अलुठत्, अलोठिष्ट ।
लुङीति किम् ? द्योतते ।।
<वृद्भ्यः स्यसनोः ।। 1.3.92 ।।>
द्युतादिष्वेव वृतादयः पठ्यन्ते । `वृतु वर्तते'(धा.पा.758), `वृधु वृद्धौ'()धा.पा.759),`श्रृधु शब्दकुत्सायाम्'(धा.पा.760),`स्यन्दू प्रस्रवणे'(धा.पा.761), `कृपू सामर्थ्ये'(धा.पा.762)-- एतेभ्यो धातुभ्यः स्ये, सनि च परतो वा परस्मैपदं भवति । वृत्--वर्त्स्यति, अवर्त्स्यत्, विवृत्सति; वर्तिष्यते, अवर्तिष्यत, विवर्तिषते । वृध्--वर्त्स्यति, अवर्त्स्यत्, विवृत्सति; वर्द्धिष्यते,अवर्धिष्यत, विवर्धिषते ।
स्यसनोरिति किम् ? वर्तते ।।
<लुटि च क्लृपः ।। 1.3.93 ।।>
वृतादित्वादेव स्यनोर्विकल्पः सिद्धः, लुटि विधीयते । चकारस्तर्हि स्यसनोरनुकर्षणार्थो न वक्तव्यः । एवं तर्हीयं प्राप्तिः पूर्वां प्राप्तिं बाधेत, तस्माच्चकारः स्यसनोरनुकर्षणार्थः क्रियते । लुटि च स्यसनोश्च कृपेः परस्मैपदं वा भवति । कल्प्ता, कल्प्तारौ, कल्प्तारः । कल्प्स्यति, अकल्प्स्यत्, चिक्लृप्सति । कल्पिता, कल्पिष्यते, अकल्पिष्यत, चिकल्पिषते ।।
इति श्रीजयादित्यविरचितायां काशिकावृत्तौ
प्रथमस्याध्यायस्य तृतीयः पादः ।।
* * *

1.4

अथ प्रथमाध्याये चतुर्थः पादः

<आ कडारादेका संज्ञा ।। 1.4.1 ।>

"कडाराः कर्मधारये"(2.2.38/751) इति वक्ष्यति । आ एतस्मात्सूत्रावधेर्यदित ऊर्ध्वमनुक्रमिष्यामः, तत्र एका संज्ञा भवतीति वेदितव्यम् । का पुनरसौ ? या पराऽनवकाशा च । अन्यत्र संज्ञासमावेशान्नियमार्थं वचनमेकैव संज्ञा भवतीति । वक्ष्यति--ह्रस्वं लघु"(1.4.10/31), भिदि, छिदि-भेत्ता, छेत्ता । "संयोगे गुरु"(1.4.11/32), शिक्षा, भिक्षा-संयोगे परस्य ह्रस्वस्य लघुसंज्ञा प्राप्नोति, गुरुसंज्ञा च; `एका संज्ञा' इति वचनाद् गुरु संज्ञैव भवति-अततक्षत्, अररक्षत् । "सन्वल्लुघुनि"(7.4.93/2316) इत्येष विधिर्न भवति ।।

<विप्रतिषेधे परं कार्यम् ।। 1.4.2 ।>

(तुल्यबल) विरोधः = विप्रतिषेधः । `यत्र द्वौ प्रसङ्गावन्यार्थावेकस्मिन्युगपत्प्राप्नुतः, स तुल्यबलविरोधो विप्रतिषेधः'(म.भा.1.300) । तस्मिन्विप्रतिषेधे परं कार्यं भवति ।

उत्सर्गापवादनित्यानित्यान्तरङ्गबहिरङ्गेषु तुल्यबलता नास्तीति योगस्य विषयः, बलवतैव तत्र भवितव्यम् । अप्रवृत्तौ, पर्यायेण वा प्रवृत्तौ प्राप्तायां वचनमारभ्यते । "अतो दीर्घो यञि"(7.3.101/2170) "सुपि च "(7.3.102/202) इत्यस्यावकाशः--वृक्षाभ्याम्, प्लक्षाभ्याम् ; "बहुवचने झल्येत्"(7.3.103/205) इत्यस्यावकाशः-वृक्षेषु, प्लक्षेषु; इहोभयं प्राप्नोति-वृक्षेभ्यः, प्लक्षेभ्यः इति । परं भवति विप्रतिषेधेन ।।

<यू स्त्र्याख्यौ नदीं ।। 1.4.3।>

ई च ऊ च = यू । अविभक्तिको निर्देशः । स्त्रियमाचक्षाते स्त्र्याख्यौ । मूलविभुजादिदर्शनात्कप्रत्ययः । ईकारान्तमूकारान्तं च रत्र्याख्यं शब्दरूपं नदीसंज्ञं भवति । ईकारान्तम्--कुमारी, गौरी, लक्ष्मीः, शाङ्र्गरवी । ऊकारान्तम्--ब्रह्मबन्धूः, यवागूः ।

यू इति किम् । मात्रे, दुहित्रे । स्त्र्याख्याविति किम् ? ग्रामणीः, सेनानीः, खलपूः । आख्याग्रहणं किम् ? शब्दार्थे स्त्रीत्व एव यथा स्यात्, पदान्तराख्ये मा भूत्-ग्रामण्ये स्त्रियै, खलप्वे स्त्रियै ।

नदीप्रदेशाः--"आण्नद्याः"(7.3.112/268) इत्येवमादयः ।।

<नेयङुवङ्स्थानावस्त्री ।। 1.4.4 ।>

पूर्वेणातिप्रसक्ता नदीसंज्ञा प्रतिषिध्यते । स्थितिः = स्थानम् । इयङुवङोः स्थानमनयोरितीयङुवङ्स्थानौ यौ यू, तौ नदीसंज्ञौ न भवतः, स्त्रीशब्दं वर्जयित्वा । हे श्रीः । हे भ्रूः ।

अस्त्रीति किम् ? हे स्त्रि ।।

<वाऽऽमि ।। 1.4.5 ।>

पूर्वेण नित्ये प्रतिषेधे प्राप्ते आमि विकल्पः क्रियते । इयङुवङ्--स्थानौ यू आमि परतौ वा नदीसंज्ञौ न भवतः । श्रियाम्, श्रीणाम् । भ्रुवाम्, भ्रूणाम् । अस्त्रीत्येव-स्त्रीणाम् ।।

<ङिति ह्रस्वश्च ।। 1.4.6 ।>

दीर्घस्य नदीसंज्ञा विहिता ह्रस्वस्य न प्राप्नोति इयङुवङ्स्थानयोश्च प्रतिषिद्धा । तस्मान्ङिति वा विधीयते । ङिति परतो ह्रस्वश्च य्वोः सम्बन्धी यः स्त्राख्यः । स्त्र्याख्यौ इयङुवङस्थानौ च यू वा नदीसंज्ञौ भवतः । कृत्यै, कृतये । धेन्वै धेनवे । श्रियै, श्रिये । भ्रुवै, भ्रुवे ।

अस्त्रीत्येव--स्त्रियै । स्त्र्याख्यावित्येव-अग्नये, वायवे, भानवे ।।

<शेषो घ्यसखि ।। 1.4.7 ।>

`ह्रस्वः' इति वर्तते । शेषोऽत्र घिसंज्ञो भवति, सखिशब्दं वर्जयित्वा । कश्च शेषः ? ह्रस्वमिवर्णोवणान्तं यन्न स्त्र्याख्यम्, स्त्र्याख्यं च यन्न नदीसंज्ञकम्, स शेषः । अग्नये, वायवे, कृतये, धेनवे ।

असखीति किम् ? सख्या । सख्ये । सख्युः । सख्यौ ।

घिप्रदेशाः-"द्वन्द्वे घि"(2.2.32/903) इत्येवमादयः ।।

<पतिः समास एव ।। 1.4.8 ।>

पतिशब्दस्य घिसंज्ञायां सिद्धायामयं नियमः क्रियते-पतिशब्दः समास एव घिसंज्ञो भवति । प्रजापतिना । प्रजापतये ।

समास इति किम् ? पत्या । पत्ये ।

एवकार इष्टतोऽवधारणार्थः । दृढमुष्टिना । दृढमुष्टये ।।

<षष्ठीयुक्तश्छन्दसि वा ।। 1.4.9 ।>

`पतिः' इति वर्तते । पूर्वेण नियमेनासमासे न प्राप्नोतीति वचनमारभ्यते । षष्ठ्यन्तेन शब्देन युक्तः पतिशब्दः छन्दसि विषये वा घिसंज्ञो भवति ।

`कुलुञ्चानां पतये नमः'(तै.सं4.5.37), कुलुञ्चानां पत्ये नमः ।

षष्ठीग्रहणं किम् ? `मया पत्या जरदष्टिर्यथासः'(ऋ.10.86.36) । छन्दसीति किम् ? ग्रामस्य पत्ये ।।

<ह्रस्वं लघु ।। 1.4.10 ।।>

मात्रिकस्य ह्रस्वसंज्ञा कृता, तस्यानेन लघुसंज्ञा विधीयते । ह्रस्वमक्षरं लघुसंज्ञं भवति । भेत्ता, छेत्ता, अचीकरत्, अजीहरत् ।

लघुप्रदेशाः--"पुगन्तलघूपधस्य च"(7.3.86/2189) इत्येवमादयः ।।

<संयोगे गुरु ।। 1.4.11 ।।>

`ह्रस्वम्' इति वर्तते । पूर्वेण लघुसंज्ञायां प्राप्तायां गुरुसंज्ञा विधीयते । संयोगे परतो ह्रस्वमक्षरं गुरुसंज्ञं भवति । कुण्डा । हुण्डा । शिक्षा । भिक्षा ।

गुरुप्रदेशाः-"गुरोश्च हलः"(3.3.103/3280) इत्येवमादयः ।।

<दीर्घं च ।। 1.4.12 ।।>

`संयोगे' इति नानुवर्त्तते । सामान्येन संज्ञाविधानम् । दीर्घं चाक्षरं गुरुसंज्ञं भवति । ईहाञ्चक्रे । ईक्षाञ्चक्रे ।।

<यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ।। 1.4.13 ।।>

यस्मात्प्रत्ययो विधीयते धातोर्वा प्रातिपदिकाद्वा तदादिशब्दरूपं प्रत्यये परतोऽङ्गसंज्ञं भवति । कर्त्ता, हर्त्ता । करिष्यति, हरिष्यति । अकरिष्यत् । औपगवः, कापटवः । यस्मादिति संज्ञिनिर्देशार्थम्, तदादीतिसंबन्धात् ।

प्रत्ययग्रहणं किम् ? न्यविशत, व्यक्रीणीत । "नेर्विशः"(1.3.17/2683) इत्युपसर्गाद्विधिरस्ति, तदादेरङ्गसंज्ञा स्यात् ।

विधिग्रहणं किम् ? प्रत्ययपरत्वमात्रे मा भूत् । स्त्री इयती ।

* तदादिवचनं स्यादिनुमर्थम् *(म.भा.1.316) । करिष्यावः, करिष्यामः । कुण्डानि ।

पुनः प्रत्ययग्रहणं किमर्थम् ? लुप्तप्रत्यये मा भूत् । श्र्यर्थम् । भ्रव्यर्थम् ।

अङ्गप्रदेशाः--"अङ्गस्य"(6.4.1/200) इत्येवमादयः ।।

<सुप्तिङन्तं पदम् ।। 1.4.14 ।।>

`सुप्तिङ्' इति प्रत्याहारग्रहणम् । सुबन्तं तिङन्तं च शब्दरूपं पदसंज्ञं भवति । ब्राह्मणाः पचन्ति ।

पदसंज्ञायामन्तग्रहणमन्यत्र `संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेः'(म.भा.1.318) प्रतिषेधार्थम् । गौरीब्राह्मणितरा ।

प्रदप्रदेशाः-"पदस्य"(8.1.16/401),"पदात्"(8.1.17/402) इत्येवमादयः ।।

<नः क्ये ।। 1.4.15 ।।>

`क्ये' इति क्यच्क्यङ्क्यषां सामान्यग्रहणम् । नान्तं शब्दरूपं क्ये परतः पदसंज्ञं भवति । क्यच्-राजीयति । क्यङ्--राजायते । क्यष्-वर्मायति, वर्मायते ।

`सिद्धे सत्यारम्भो नियमार्थः'(का.प.59)-नान्तमेव क्ये परः पदसंज्ञं भवति, नान्यत् । वाच्यति । स्रुच्यति ।।

<सिति च ।। 1.4.16 ।।>

"यचि भम्"(1.4.18/231) इति वक्ष्यति, तस्यायं पुरस्तादपवादः । सिति प्रत्यये परः पूर्वं पदसंज्ञं भवति । "भवतष्ठक्छसौ"(4.2.115/1339)-भवदीयः । "ऊर्णाया युस्"(5.2.123/1929)-ऊर्णायुः ।"ऋतोरण्"(5.1.105/1769),"छन्दसि घस्"(5.1.106/3495)--ऋत्वियः ।।

<स्वादिष्वसर्वनामस्थाने ।। 1.4.17 ।।>

`स्वादिषु' इति सुशब्दादेकवचनादारभ्य आ कपः प्रत्यया गृह्यन्ते । स्वादिषु प्रत्ययेषु परतः सर्वनामस्थानवर्जितेषु पूर्वं पदसंज्ञं भवति । राजभ्याम्, राजभिः । राजत्वम्, राजता । राजतरः, राजतमः ।

असर्वनामस्थाने इति किम् ? राजानौ, राजानः ।।

<यचि भम् ।। 1.4.18 ।।>

`स्वादिष्वसर्वनामस्थाने' इति वर्तते । पूर्वेण पदसंज्ञायां प्राप्तायां तदपवादो भसंज्ञा विधीयते । यकारादावजादौ च स्वादौ सर्वनामस्थानवर्जिते प्रत्यये परतः पूर्वं भसंज्ञं भवति । यकारादौ--गार्ग्यः, वात्स्यः । अजादौ--दाक्षिः, प्लाक्षिः ।।

* नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् *(म.भा.1.320) । नभ इव नभस्वत् । अङ्गिरस्वत् । मनुरिव मनुष्वत् ।

* वृषण्वस्वश्वयोः*(म.भा.1य320) । वृषन्नित्येतत् वस्वश्वयोः परतो भसंज्ञं भवति छन्दसि विषये । `वृषण्वसुः'(ऋ.1.111.1) । `वृषणश्वस्य मेने'(मै.2.5.5) ।

भप्रदेशाः-"भस्य"(6.4.129/233) इत्येवमादयः ।।

<तसौ मत्वर्थे ।। 1.4.19 ।।>

`भम्' इति वर्त्तते । तकारान्तं सकारान्तं शब्दरूपं मत्वर्थे प्रत्यये परतो भसंज्ञं भवति । उदश्वित्वान् घोषः विद्युत्वान् बलाहकः । सकारान्तम्--पयस्वी, यशस्वी ।

तसाविति किम् ? तक्षवान् ग्रामः ।।

<अयस्मयादीनिच्छन्दसि ।। 1.4.20 ।।>

अयस्मयादीनि शब्दरूपाणि छन्दसि विषये साधूनि भवन्ति । भपदसंज्ञाधिकारे विधानात्तेन मुखेन साधुत्वमयस्मयादीनां विधीयते । `अयस्मयं वर्म'(पै.1.37.5) । `अयस्मयानि पात्त्राणि'(कौ.सू.8118) । क्वचिदुभयमपि भवति--स सुष्टुभा सऋक्वता गणेन । पदत्वात्कुत्वं भत्वाज्जश्त्वं न भवति ।

छन्दसीति किम् ? अयोमयं वर्म । आकृतिगणोऽयम् ।।

<बहुषु बहुवचनम् ।। 1.4.21 ।।>

ङ्याप्प्रातिपदिकात्स्वादयः, लस्य तिबादय इति सामान्येन बहुवचनं विहितम्, तस्यानेन बहुत्वसंख्या वाच्यत्वेन विधीयते । बहुषु बहुवचनं भवति । बहुत्वमस्य वाच्यं भवतीति यावत् ।

कर्मादयोऽप्यपरे विभक्तीनामर्था वाच्याः, तदीये बहुत्वे बहुवचनम्, कर्मादिषु बहुषु बहुवचनमित्यर्थः । ब्राह्मणाः पठन्ति ।

यत्र च संख्या सम्भवति, तत्रायमुपदेशः । अव्ययेभ्यस्तु निःसंख्येभ्यः सामान्यविहिताः स्वादयो विद्यन्त एव ।।

<द्व्येकयोर्द्विवचनैकवचने ।। 1.4.22 ।।>

द्वित्वैकत्वयोरर्थयोर्द्विवचनैकवचने भवतः । एतदपि सामान्यविहितयोर्द्विवचनैकवचनयोरर्थाभिधानम् । द्वित्वे द्विवचनं भवति, एकत्वे एकवचनं भवति । ब्राह्मणौ पचतः । ब्राह्मणः पचति ।।

<कारके ।। 1.4.23 ।।>

`कारके' इति विशेषणमपादानादिसंज्ञाविषयमधिक्रियते । `कारके' इत्यधिकारो वेदितव्यः-यदित ऊर्ध्वमनुक्रमिष्यामः 'कारके' इत्येवं तद्वेदितव्यम् ।

कारकशब्दश्च निमित्तपर्यायः । कारकम्, हेतुरित्यनर्थान्तरम् । कस्य हेतुः ? क्रियायाः । वक्ष्यति-"ध्रुवमपायेऽपादानम्"(1.4.24/586), ग्रामादागच्छति । पर्वतादवरोहति ।

कारक इति किम् ? वृक्षस्य पर्णं पतति । कुड्यस्य पिण्डः पतति ।

`अकथितं च'(1.4.51/539) । अकथितं च कारकं कर्मसंज्ञं भवति । माणवकं पन्थानं पृच्छति ।

कारक इति किम् ? माणवकं पन्थानं पृच्छति ।

कारक इति किम् ? माणवकस्य पितरं पन्थानं पृच्छति ।

कारकसंशब्दनेषु चानेनैव विशेषणेन व्यवहारो विज्ञायते ।।

<ध्रुवमपायेऽपादानम् ।। 1.4.24 ।।>

ध्रुवं यदपाययुक्तमपाये साध्ये यदवधिभूतं तत्कारकमपादानसंज्ञं भवति । ग्रामादागच्छति । पर्वतादवरोहति । सार्थाद्धीनः । रथात्पतितः ।

* जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् *(म.भा.1.326) । अधर्माज्जुगुप्सते । अधर्माद्विरमति । धर्मात्प्रमाद्यति ।

अपादानप्रदेशाः-"अपादाने पञ्चमी"(2.3.28/587) इत्येवमादयः ।।

<भीत्रार्थानां भयहेतुः ।। 1.4.25 ।।>

बिभेत्यर्थानां त्रायत्यर्थानां च धातूनां प्रयोगे भयहेतुर्यस्तत्कारकमपादानसंज्ञं भवति । चौरेभ्यो बिभेति । चौरेभ्य उद्विजते । त्रायत्यर्थानाम्--चौरेभ्यस्त्रायते । चौरेभ्यो रक्षति ।

भयहेतुरिति किम् ? अरण्ये बिभेति । अरण्ये त्रायते ।।

<पराजेरसोढः ।। 1.4.26 ।।>

परापूर्वस्य जयतेः प्रयोगेऽसोढो योऽर्थः-सोढुं न शक्यते, तत्कारकमपादानसंज्ञं भवति । अध्ययनात्पराजयते ।

असोढ इति किम् ? शत्रून्पराजयते ।।

<वारणार्थानामीप्सितः ।। 1.4.27 ।।>

वारणार्थानां धतूनां प्रयोगे य ईप्सितोऽर्थः तत्कारकमपादानसंज्ञं भवति । प्रवृत्तिविघातः = वारणम् । यवेभ्यो गां वारयति । यवेभ्यो गा निवर्त्तयति ।

ईप्सित इति किम् ? यवेभ्यो गां वारयति क्षेत्रे ।।

<अन्तर्द्धौ येनादर्शनमिच्छति ।। 1.4.28 ।।>

व्यवधानम् = अन्तर्द्धिः । अन्तर्द्धिनिमित्तं येनादर्शनमात्मन इच्छति तत्कारकमपादानसंज्ञं भवति । उपाध्यायादन्तर्द्धत्ते । उपाध्यायान्निलीयते । मा मामुपाध्यायो द्राक्षीदिति निलीयते ।

अन्तर्द्धाविति किम् ? चौरान्न दिदृक्षते । इच्छतिग्रहणं किम् ? अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात् ।।

<आख्यातोपयोगे ।। 1.4.29 ।।>

आख्याता = प्रतिपादयिता । उपयोगः = नियमपूर्वकं विद्याग्रहणम् । उपयोगे साध्ये य आख्याता तत्कारकमपादानसंज्ञं भवति । उपाध्यायादधीते । उपाध्यायादागमयति ।

उपयोग इति किम् ? नटस्य गाथां श्रृणोति ।।

<जनिकर्तुः प्रकृतिः ।। 1.4.30 ।।>

जनेः कर्त्ता जनिकर्त्ता । जन्यर्थस्य जन्मनः कर्त्ता जायमानः, तस्य या प्रकृतिः कारणम्, हेतुः, तत् कारकमपादानसंज्ञं भवति । श्रृङ्गाच्छरो जायते । गोमयाद् वृश्चिको जायते ।।

<भुवः प्रभवः ।। 1.4.31 ।।>

`कर्तुः' इति वर्तते । भवनं भूः । भवत्यस्मादिति प्रभवः । भूकर्तुः प्रभवो यस्तत्कारकमपादानसंज्ञं भवति । हिमवतो गङ्गा प्रभवति । काश्मीरेभ्यो वितस्ता प्रभवति । प्रथमत उपलभ्यत इत्यर्थः ।।

<कर्मणा यमभिप्रैति स संप्रदानम् ।। 1.4.32 ।।>

कर्मणा करणभूतेन कर्त्ता यमभिप्रैति तत्कारकं सम्प्रदानसंज्ञं भवति । अन्वर्थसंज्ञाविज्ञानाद्ददातिकर्मणेति विज्ञायते । उपाध्यायाय गां ददाति । माणवकाय भिक्षां ददाति ।

* क्रियाग्रहणमपि कर्तव्यम् *(म.भा.1.330) । क्रिययापि यमभिप्रैति स सम्प्रदानम् । श्राद्धाय निगल्हते । युद्धाय सन्नह्यते । पत्ये शेते ।

सम्प्रदानप्रदेशाः-"चतुर्थी सम्प्रदाने"(2.3.13/570) इत्येवमादयः ।।

* कर्मणः करणसंज्ञा वक्तव्या सम्प्रदानस्य च कर्मसंज्ञा *(म.भा.1.331) । पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः ।।

<रुच्यर्थानां प्रीयमाणः ।। 1.4.33 ।।>

रुचिना समानार्था रुच्यर्थाः । अन्यकर्तृकोऽभिलाषः = रुचिः । रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणो योऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति । देवदत्ताय रोचते मोदकः । यज्ञदत्ताय स्वदतेऽपूपः । देवदत्तस्थस्याभिलाषस्य मोदकः कर्त्ता ।

प्रीयमाण इति किम् ? देवदत्ताय रोचते मोदकः पथि ।।

<श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ।। 1.4.34 ।।>

श्लाघ-ह्नुङ्-स्था-शप--इत्येतेषां ज्ञीप्स्यमानो योऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति । ज्ञीप्स्यमानः - ज्ञपयितुमिष्यमाणः, बोधयितुमभिप्रेतः । देवदत्ताय श्लाघते । देवदत्तं श्लाघमानस्तां श्लाघां तमेव ज्ञपयितुमिच्छतीत्यर्थः । एवं देवदत्ताय ह्नुते । देवदत्ताय तिष्ठते, यज्ञदत्ताय तिष्ठते । देवदत्ताय शपते, यज्ञदत्ताय शपते ।

ज्ञीप्स्यमान इति किम् ? देवदत्तः श्लाघते ।।

<धारेरुत्तमर्णः ।। 1.4.35 ।।>

धारयतेः प्रयोगे उत्तमर्णो योऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति । उत्तममृणं यस्य स उत्तमर्णः । कस्य चोत्तममृणम् ? यदीयं धनम्। धनस्वामी प्रयोक्ता उत्तमर्णः, स संप्रदासंज्ञो भवति । देवदत्ताय शतं धारयति । यज्ञदत्ताय शतं धारयति ।

उत्तमर्ण इति किम् ? देवदत्ताय शतं धारयति ग्रामे ।।

<स्पृहेरीप्सितः ।। 1.4.36 ।।>

`स्पृह ईप्सायाम्'(धा.पा.1872) चुरादावदन्तः पठ्यते । तस्य ईप्सितो योऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति । `ईप्सितः' इत्यभिप्रेत उच्यते । पुष्पेभ्यः स्पृहयति । फलेभ्यः स्पृहयति ।

ईप्सित इति किम् ? पुष्पेभ्यो वने स्पृहयति ।।

<क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ।। 1.4.37 ।।>

अमर्षः = क्रोधः । अपकारः = द्रोहः । अक्षमा = ईर्ष्या । गुणेषु दोषाविष्करणम् = असूया । क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपस्तत्कारकं संप्रदानसंज्ञं भवति । क्रोधस्तावत्कोप एव, द्रोहादयोऽपि कोपप्रभावा एव गृह्यन्ते । तस्मात्सामन्येन विशेषणम्-यं प्रति कोप इति । देवदत्ताय क्रुद्ध्यति । देवदत्ताय द्रुह्यति । देवदत्तायेर्ष्यति । देवदत्तायासूयति ।

यं प्रति कोप इति किम् ? भार्यामीर्ष्यति-मैनामन्यो द्राक्षीदिति ।।

<क्रुधद्रुहोरुपसृष्टयोः कर्मः ।। 1.4.38 ।।>

पूर्वेण संप्रदानसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते । क्रुधद्रुहोरुपसृष्टयोरुपसर्गसम्बद्धयोर्यं प्रति कोपस्तत्कारकं कर्मसंज्ञं भवति । देवत्तमभिक्रुध्यति। देवदत्तमभिद्रुह्यति ।

उपसृष्टयोरिति किम् ? देवदत्ताय क्रुध्यति । यज्ञदत्ताय द्रुह्यति ।।

<राधीक्ष्योर्यस्य विप्रश्नः ।। 1.4.39 ।।>

राधेरीक्षेश्च कारकं संप्रदानसंज्ञं भवति । कीदृशम् ? यस्य विप्रश्नः । विविधः प्रश्नः = विप्रश्नः । स कस्य भवति ? यस्य शुभाशुभं पृच्छ्यते । देवदत्ताय राध्यति । देवदत्तायेक्षते । नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं पर्यालोचयतीत्यर्थः ।।

<प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता ।। 1.4.40 ।।>

प्रति-आङ्-इत्येवम्पूर्वस्य शृणोतेः कारकं संप्रदानसंज्ञं भवति, कीदृशम् ? पूर्वस्य कर्त्ता । प्रतिपूर्व आङ्पूर्वश्च शृणोतिरभ्युपगमे = प्रतिज्ञाने वर्त्तते । स चाभ्युपगमः परेण प्रयुक्तस्य सतो भवति । तत्र प्रयोक्ता पर्वस्याः क्रियायाः कर्त्ता सगंप्रदानसंज्ञो भवति । देवदत्ताय गां प्रतिशृणोति, देवदत्ताय गामाशृणोति । प्रतिजानीत इत्यर्थः ।।

<अनुप्रतिगृणश्च ।। 1.4.41 ।।>

`पूर्वस्य कर्ता' इति वर्त्तते । अनुपूर्वस्य प्रतिपूर्वस्य च गृणातेः कारकं पूर्वस्याः क्रियायाः कर्तृभूतं संप्रदानसंज्ञं भवति । होत्रेऽनुगृणाति । होता प्रथमं शंसति तमन्यः प्रोत्साहति । अनुगरः, प्रतिगरः इति हि शंसितुः प्रोत्साहने वर्त्ते । होतारं शंसन्तं प्रोत्साहयतीत्यर्थः ।।

<साधकतमं करणम् ।। 1.4.42 ।।>

क्रियासिद्धौ यत्प्रकृष्टोपकारकं विवक्षितं तत्साधकतमं कारकं करणसंज्ञं भवति । दात्रेण लुनाति । परशुना छिनत्ति ।

तमब्ग्रहणं किम् ? गङ्गायां घोषः । कूपे गर्गकुलम् ।

करणप्रदेषाः -"कर्तृकरणयोस्तृतीया"(2.3.18/561) इत्येवमादयः ।।

<दिवः कर्म च ।। 1.4.43 ।।>

पूर्वेण करणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते । दिवः साधकतमं यत्कारकं तत्कर्मसंज्ञं भवति, चकारात्करणसंज्ञं च । अक्षान्दीव्यति, अक्षैर्दीव्यति ।।

<परिक्रयणे संप्रदानमन्यतरस्याम् ।। 1.4.44 ।।>

`साधकतमम्' इति वर्तते । पूर्वेण करणसंज्ञायां प्राप्तायां संप्रदानसंज्ञा पक्षे विधीयते । परिक्रयणे साधकतमं कारकमन्यतरस्यां संप्रदानसंज्ञं भवति । परिक्रयणं नियतकालं वेतनादिना स्वीकरणम्, नात्यन्तिकः क्रय एव । शतेन परिक्रीतोऽनुब्रूहि । शताय परिक्रीतोऽनुब्रूहि । सहस्रेण परिक्रीतोऽनुब्रूहि । सहस्राय परिक्रीतोऽनुब्रूहि ।

<आधारोऽधिकरणम् ।। 1.4.45 ।।>

आध्रियन्तेऽस्मिन् क्रिया इत्याधारः । कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणक्रियां प्रति य आधारस्तत्कारकमधिकरणसंज्ञं भवति । कटे आस्ते । कटे शेते । स्थाल्यां पचति ।

अधिकरणप्रदेशाः-"सप्तम्यधिकरणे च"(2.3.36/633) इत्येवमादयः ।।

<अधिशीङ्स्थासां कर्म ।। 1.4.46 ।।>

पूर्वेणाधिकरणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते । अधिपूर्वाणां शीङ् स्था-आस्-इत्येतेषामाधारो यस्तत्कारकं कर्मसंज्ञं भवति । ग्राममधिशेते । ग्राममधितिष्ठति । पर्वतमध्यास्ते ।।

<अभिनिविशश्च ।। 1.4.47 ।।>

अभि-निपूर्वस्य विशतेराधारो यस्तत्कारकं कर्मसंज्ञं भवति । ग्राममभिनिविशते ।

कथं कल्याणेऽभिनिवेशः, पापेभिनिवेशः, या संज्ञा यस्मिन् यस्मिन् संज्ञिन्यभिनिविशत इति । `अन्यतरस्याम्' इति वर्त्तते, "परिक्रयणे सम्प्रदानमन्यतरस्याम्"(1.4.44/580) इत्यतः । सा च व्यस्थितविभाषा विज्ञायते ।।

<उपान्वध्याङ्वसः ।। 1.4.48 ।।>

उप-अनु-अधि-आङ्-इत्येवम्पूर्वस्य वसतेराधारो यस्तत्कारकं कर्मसंज्ञं भवति । ग्राममुपवसति सेना, पर्वतमुपवसति । ग्राममनुवसति सेना, ग्राममधिवसति, ग्राममावसति ।।

* वसेरश्यर्थस्य प्रतिषेधो वक्तव्य *(म.भा.1.332) । ग्रामे उपवसति । भोजननिवृत्तिं करोतीत्यर्थः ।।

<कर्तुरीप्सिततमं कर्म ।। 1.4.49 ।।>

कर्तुः क्रियया यदाप्तुमिष्टतमं तत्कारकं कर्मसंज्ञं भवति । कटं करोति । ग्रामं गच्छति ।

कर्तुरिति किम् ? माषेष्वश्वं बध्नाति । कर्मण ईप्सिता माषाः, न कर्तुः । तमब्ग्रहणं किम् ? पयसौदनं भुङ्क्ते ।

कर्मेत्यनुवर्तमाने पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम् । इतरथा आधारस्यैव हि स्यात्--गेहं प्रविशतीति; ओदनं पचति, सक्तून्पिबतीत्यादिषु न स्यात् । पुनः कर्मग्रहणात् सर्वत्र सिद्धं भवति ।

कर्मप्रदेशाः--"कर्मणि द्वितीया"(2.3.2/537) इत्येवमादयः ।।

<तथायुक्तं चानीप्सितम् ।। 1.4.50 ।।>

येन प्रकारेण कर्तुरीप्सिततमं क्रियया युज्यते तेनैव चेत्प्रकारेण यदनीप्सितं युक्तं भवति तस्य कर्मसंज्ञा विधीयते ।

ईप्सितादन्यत्सर्वमनीप्सितम्-द्वेष्यम्, इतरच्च । विषं भक्षयति । चौरान्पश्यति । ग्रामं गच्छन् वृक्षमूलान्युपसर्पति ।।

<अकथितं च ।। 1.4.51 ।।>
अकथितं च यत्कारकं तत्कर्मसंज्ञं भवति । केनाकथितम् ? अपादानादिविशेषकथाभिः । परिगणर्न कर्त्तव्यम्--
`दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ।
ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना ।।'(म.भा.1.334)
उपयुज्यत इत्युपयोगः = पयः प्रभृति, तस्य निमित्तं गवादि, तस्योपयुज्यमानपयः प्रभृतिनिमित्तस्य गवादेः कर्मसंज्ञा विधीयते । पाणिना कांस्यपात्र्यां गां दोग्धि पयः । पाण्यादिकमप्युपयोगनिमित्तं तस्य कस्मान्न भवति ? नैतदस्ति; विहिता हि तत्र करणादिसंज्ञा, तदर्थमाह--अपूर्वविधाविति ।
ब्रुविशासिगुणेन च यत्सचते । ब्रुविशास्योर्गुणः साधनं प्रधानं कर्म धर्मादिकम्, तेन यत्संबध्यते, तदकीर्तितमाचरितं कविना = तदकथितमुक्तं सूत्रकारेण । दुहि-गां दोग्धि पयः । याचि-पौरवं गां याचते । रुधि-गामवरुणद्धि व्रजम् । प्रच्छि-माणवकं पन्थानं पृच्छति । भिक्षि-पौरवं गां भिक्षते । चिञ्-वृक्षमवचिनोति फलानि । ब्रुवि - माणवकं धर्मं ब्रूते । शासि-माणवकं धर्ममनुशास्ति ।।
<गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्ता स णौ ।। 1.4.52 ।।>
अर्थशब्दः प्रत्येकमभिसम्बध्यते । गत्यर्थानां बुद्ध्यर्थानां प्रत्यवसानार्थानां च धातूनां तथा शब्दकर्मकाणामकर्मकाणां च अण्यन्तानां यः कर्त्ता स ण्यन्तानां कर्मसंज्ञो भवति । गच्छति माणवको ग्रामम्, गमयति माणवकं ग्रामम् । याति माणवको ग्रामम्, यापयति माणवकं ग्रामम् ।
* गत्यर्थेषु नीवह्योः प्रतिषेधो वक्तव्यः * (म.भा.1.335)। नयति भारं देवदत्तः । नाययति भारं देवदत्तेन । वहति भारं देवदत्तः, वाहयति भारं देदत्तेन ।।
* वहेरनियन्तृकर्तृकस्येति वक्तव्यम् *(म.भा.1.337) । इह प्रतिषेधो मा भूत्-वहन्ति यवान् बलीवर्दाः, वाहयति यवान् बलीवर्दानिति । बुद्धि--बुध्यते माणवको धर्मम्, बोधयति माणवकं धर्मम् । वेत्ति माणवको धर्मम्, वेदयति माणवको धर्मम् । प्रत्यवसानम् = अभ्यवहारः -भुङ्क्ते माणवक ओदनम्, भोजयति माणवकमोदनम् । अश्नाति माणवक ओदनम्, आशयति माणवकमोदनम् ।।
* आदिखाद्योः प्रतिषेधो वक्तव्यः *(म.भा.1.337) । अत्ति माणवक ओदनम्, आदयते माणवकेनौदनम् । खादति माणवकः, खादयति माणवकेन ।
* भिक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः *(म.भा.1.337) । भक्षयति पिण्डीं देवदत्तः, भक्षयति पिण्डीं देवदत्तेनेति ।
अहिंसार्थस्येति किम् ? भक्षयन्ति बलीवर्दाः सस्यम्, भक्षयन्ति बलीवर्दान्सस्यम् ।
शब्दकर्मणाम्--अधीते माणवको वेदम्, अध्यापयति माणवकं वेदम् । पठति माणवको वेदम्, पाठयति माणवकं वेदम् । अकर्मकाणाम्--आस्ते देवदत्तः, आसयति देवदत्तम् । शेते देवदत्तः, शाययति देवदत्तम् ।
एतेषामिति किम् ? पचत्योदनं देवदत्तः, पाचयत्योदनं देवदत्तेनेति । अण्यन्तानामिति किम् ? गमयति देवदत्तो यज्ञदत्तम्, तमपरः प्रयुङ्क्ते, गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः ।।
<हृक्रोरन्यतरस्याम् ।। 1.4.53 ।।>
`अणि कर्त्ता स णौ' इति वर्तते । हरतेः करोतेश्चाण्यन्तयोर्यः कर्त्ता स ण्यन्तयोरन्यतरस्यां कर्मसंज्ञो भवति । हरति भारं माणवकः, हारयति भारं माणवकं माणवकेनेति वा । करोति कटं देवदत्तः, कारयति कटं देवदत्तं देवदत्तेनेति वा ।
* अभिवादिदृशेरात्मनेपद उपसंख्यानम् *(म.भा.1.338) । अभिवदति गुरुं देवदत्तः, अभिवादयते गुरुं देवदत्तम्, देवदत्तेनेति वा । पश्यन्ति भृत्या राजानम्, दर्शयते भृत्यान् राजानम्, भृत्यैरिति वा ।
आत्मनेपद इति किम् ? दर्शयति चैत्रं मैत्रमपरः--प्राप्तविकल्पत्वाद् द्वितीयैव । अभिवादयति गुरुं माणवकेन पिता-अप्राप्तविकल्पत्वात्तृतीयैव ।।
<स्वतन्त्रः कर्ता ।। 1.4.54 ।।>
`स्वतन्त्रः' इति प्रधानभूत उच्यते । अगुणभूतो यः क्रियासिद्धौ स्वातन्त्र्येण विवक्ष्यते तत्कारकं कर्तृसंज्ञं भवति । देवदत्तः पचति । स्थाली पचति ।
कर्तृप्रदेशाः--"कर्तृकरणयोस्तृतीया"(2.3.18/561) इत्येवमादयः ।।
<तत्प्रयोजको हेतुश्च ।। 1.4.55 ।।>
तदिति अनन्तरः कर्ता परामृश्यते । तस्य प्रयोजकः = तत्प्रयोजकः निपातनात्समासः । स्वतन्त्रस्य प्रयोजको योऽर्थः तत्कारकं हेतुसंज्ञं भवति, चकारात्कर्तृसंज्ञं च ।
संज्ञासमावेशार्थश्चकारः । कुर्वाणं प्रयुङ्क्ते, कारयति । हारयति । हेतुत्वाद् णिचो निमित्तं कर्तृत्वाच्च कर्तृप्रत्ययेनोच्यते ।
हेतुप्रदेशाः-"हेतुमति च"(3.1.26/2576) इत्येवमादयः ।।
<प्रागीश्वरान्निपाताः ।। 1.4.56 ।।>
"अधिरीश्वरे"(1.4.97/644) इति वक्ष्यति । प्रागेतस्मादवधेर्यानित ऊर्ध्वमनुक्रमिष्यामः, निपातसंज्ञास्ते वेदितव्याः । वक्ष्यति--
चादयोऽसत्त्वे"(1.4.57/20) च, वा, ह, अह ।
प्राग्वचनं संज्ञासमावेशार्थम् । गत्युपसर्गकर्मप्रवचनीयसंज्ञाभिस्सह निपातसंज्ञा समाविशति । रेफोच्चारणम् "ईश्वरे तोसुन्कसुनौ"(3.4.13/3440)

इत्ययमवधिर्मा विज्ञायीति ।।

`रीश्वराद्वीश्वरान्मा भूत् कृन्मेजन्तः परोऽपि सः ।

समासेष्वव्ययीभावो लौकिकं चातिवर्तते ।।'(म.भा.1.340)

<चादयोऽसत्त्वे ।। 1.4.57 ।।>

चादयो निपातसंज्ञा भवन्ति, न चेत्सत्त्वे वर्तन्ते । प्रसज्यप्रतिषेधोऽयम् । `सत्त्वम्' इति द्रव्यमुच्यते ।

च । वा । ह । अह । एव । एवम् । नूनम् । शश्वत् । युगपत् । सूपत् । कूपत् । कुवित् । नेत् । चेत् । चण् । कच्चित् । यत्र । नह । हन्त । माकिम् । नकिम् । माङ् । माङो ङकारो विशेषणार्थः--"माङि लुङ्"(3.3.175/2219) इति, इह न भवति-मा भवतु, मा भविष्यति । नञ् । यावत् । तावत् । त्वा । त्वै । द्वै । रै । श्रौषट् । वौषट् । स्वाहा । वषट् । स्वधा । ओम् । किल । तथा । अथ । सु । स्म । अस्मि । अ । इ । उ । ऋ । लृ । ए । ए । ओ । औ । अम् । तक् । उञ् । उकञ् । वेलायाम् । मात्रायाम् । यथा । यत् । यम् । तत् । किम् । पुरा । अद्धा । धिक् । हाहा । हे । है । प्याट् । पाट् । थाट् । अहो । उताहो । हो । तुम् । तथाहि । खलु । आम् । आहो । अथो । ननु । मन्ये । मिथ्या । असि । ब्रूहि । तु । नु । इति । इव । वत् । चन । बत । इह । आम् । शम् । कम् । अनुकम् । नहिकम् । हिकम् । सुकम् । सत्यम् । ऋतम् । श्रद्धा । इद्धा । मुधा । नोचेत् । नचेत् । नहि । जातु । कथम् । कुतः । कुत्र । अव । अनु । हाहौ । हैहा । ईहा । आहोस्वित् । छम्बट् । खम् । दिष्ट्या । पशु । वट् । सह । आनुषक् । अङ्ग । फट् । ताजक् । अये । अरे । चटु । बाट् । कुम् । खुम् । घुम् । हुम् । आईम् । शीम् । सीम् । वै ।

उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः(ग.सू.16) । उपसर्गप्रतिरूपकाः-

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।

सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ।।

"अच उपसर्गात्तः"(7.4.48/3078) इति तत्वं न भवति । दुर्नीतम् । दुर्नयः । दुर्निर्णयः । "उपसर्गात्"(8.4.14/2287) इति णत्वं न भवति ।

असत्त्व इति किम् ? पशुर्वै पुरुषः । पशुः पुरोडाशः ।

निपातप्रदेशाः-"स्वरादिनिपातमव्ययम्"(1.137/447) इत्येवमादयः ।।

<प्रादयः ।। 1.4.58 ।।>

प्रादयोऽसत्त्वे निपातसंज्ञा भवन्ति ।

प्र । परा । अप । सम् । अनु । अव । निस् । निर् । दुस् । दुर् । वि । आङ् । नि । अधि । अपि । अति । सु । उत् । अभि । प्रति । परि । उप ।

पृथग्योगकरणमुत्तरसंज्ञाविशेषणार्थम् । "उपसर्गाः क्रियायोगे"(1.4.59/22) इति चादीनामुपसर्गसंज्ञा मा भूत् । असत्त्व इत्येव-परा जयन्ति सेनाः ।।

<उपसर्गाः क्रियायोगे ।। 1.4.59 ।।>

प्रादयः क्रियायोगे उपसर्गसंज्ञा भवन्ति । प्रणयति, परिणयति । प्रणायकः, परिणायकः ।

क्रियायोग इति किम् ? प्रगतो नायकोऽस्माद्देशात् प्रनायको देशः ।

* मरुच्छशब्दस्य चोपसंख्यानं कर्तव्यम् *(म.भा.1.341) । मरुद्भिर्दत्तो मरुत्तः । संज्ञाविधानसामर्थ्यादनजन्तत्वेऽपि "अच उपसर्गात्तः"(7.4.47/3078) इति तत्त्वं भवति ।

* श्रच्छब्दस्योपसंख्यानम् * (म.भा.1.341)। "आतश्चोपसर्गे"(3.3.106/3283) इत्यङ् भवति--श्रद्धा ।

उपसर्गप्रदेशाः--"उपसर्गे घोः किः"(3.3.93/3270) इत्येवमादयः ।।

<गतिश्च ।। 1.4.60 ।।>

गतिसंज्ञकाश्च प्रादयो भवन्ति क्रियायोगे । प्रकृत्य । प्रकृतम् । यत्प्रकरोति ।

योगविभाग उत्तरार्थः । उत्तरत्र गतिसंज्ञैव यथा स्यात्, उपसर्गसंज्ञा मा भूत् । ऊरीस्यादित्यत्र "उपसर्गप्रादुर्भ्यामस्तिर्यच्परः"(8.3.87/2472) इति षत्वं प्रसज्येत ।

चकारः संज्ञासमावेशार्थः । प्रणीतम् । अभिषिक्तम् । "गतिरनन्तरः"(6.2.49/3783) इति स्वरः, "उपसर्गात्"(8.4.14/2287)(8.3.65/2270) इति णत्वषत्वे च भवतः ।

* कारिकाशब्दस्योपसख्यानम् * ()। कारिकाकृत्य । कारिकाकृतम् । यत्कारिकाकरोति ।

* पनश्चनसौ छन्दसि गतिसंज्ञौ भवत इति वक्तव्यम् *(म.भा.1.342) । पनरुत्स्यूतं वासो देयम् (मै.1.7.2)। "गतिर्गतौ"(8.1.70/3977) इति निघातो भवति । `चनोहितः'(ऋ.3.11.2) । गतिरनन्तरः"(6.2.49/3783) इति स्वरः ।

गतिप्रदेशाः-"कुगतिप्रादयः"(2.2.18/761) इत्येवमादयः ।।

<ऊर्यादिच्विडाचश्च ।। 1.4.61 ।।>

ऊर्यादयः शब्दाः च्व्यन्ता डाजन्ताश्च क्रियायोगे गतिसंज्ञा भवन्ति । च्विडाचोः कृभ्वस्तियोगे विधानम्, तत्साहचर्यादूर्यादीनामपि तैरेव योगे गतिसंज्ञा विधीयते ।

ऊरीउररीशब्दावङ्गीकरणे विस्तारे च । ऊरीकृत्य, ऊरीकृतम्, यदूरीकरोति । उररीकृत्य, उररीकृतम्, यदुररीकरोति ।
पापी । ताली । आताली । वेताली । धूसी । शकला । संशकला । ध्वंसकला । भ्रंशकला । एते शकलादयो हिंसायाम् । शकलाकृत्य । संशकलाकृत्य । ध्वंसकलाकृत्य । भ्रंशकलाकृत्य ।
गुलुगुधा पीडार्थे । गुलुगुधाकृत्य ।
सजूः सहार्थे । सजूःकृत्य ।
फलू, फली, विक्ली, आक्ली-इति विकारे । फलूकृत्य । फलीकृत्य । विक्लीकृत्य । आक्लीकृत्य ।
आलोष्टी, कराली, केवाली, शेवाली, वर्षाली,मस्मसा, मसमसा-एते हिंसायाम् ।
वषट् । वौषट् । श्रौषट् । स्वाहा । स्वधा । बन्धा । प्रादुस् । श्रुत् । आविस् । च्व्यन्ताः खल्वपि--शुक्लीकृत्य । शुक्लीकृतम् । यच्छुक्लीकरोति ।
डाच्--पटपटाकृत्य । पटपटाकृतम् । यत्पटपटाकरोति ।।
<अनुकरणं चानितिपरम् ।। 1.4.62 ।।>
इतिः परो यस्मादिति बहुव्रीहिः । अनुकरणमनितिपरं क्रियायोगे गतिसंज्ञं भवति । खाट्कृत्य । खाट्कृतम् । यत्खाट्करोति ।
अनितिपरमिति किम् ? खाडिति कृत्वा निरष्ठीवत् ।।
<आदरानादरयोः सदसती ।। 1.4.63 ।।>
प्रीत्यतिशयः = आदरः । परिभवौदासीन्यम् = अनादरः । आदरा नादरयोर्यथाक्रमं सदसच्छब्दौ गतिसंज्ञौ भवतः । सत्कृत्य, सत्कृतम्, यत्सत्करोति ।
असत्कृत्य, असत्कृतम्, यदसत्करोति ।
आदरानादरयोरिति किम् ? सत्कृत्वा काण्डं गतः । असत्कृत्वा काण्डं गतः ।।
<भूषणेऽलम् ।। 1.4.64 ।।>
`अलम्' इति प्रतिषेधे सामर्थ्ये पर्याप्तौ भूषणे चेति विशेषण मुपादीयते । भूषणे योऽलंशब्दः स गतिसंज्ञो भवति । अलंकृत्य, अलंकृतम्, यदलंकरोति ।
भूषण इति किम् ? अलं भुक्त्वा ओदनं गतः ।।
<अन्तरपरिग्रहे ।। 1.4.65 ।।>
अन्तः शब्दोऽपरिग्रहेऽर्थे गतिसंज्ञो भवति । परिग्रहः = स्वीकरणम्, तदभावे गतिसंज्ञा विधीयते । अन्तर्हत्य, अन्तर्हतम्, यदन्तर्हन्ति ।
अपरिग्रहण इति किम् ? अन्तर्हत्वा मूषिकां श्येनो गतः । परिगृह्य गत इत्यर्थः ।
* अन्तः शब्दस्याङ्किविधिणत्वेषूपसर्गसंज्ञा वक्तव्या *(म.भा.1.344) । अन्तर्द्धा । अन्तर्द्धिः । अन्तर्णयति ।।
<कणेमनसी श्रद्धाप्रतीघाते ।। 1.4.66 ।।>
कणेशब्दो मनस्शब्दश्च श्रद्धाप्रतीघाते गतिसंज्ञौ भवतः । कणेहत्य पयः पिबति । मनोहत्य पयः पिबति । तावत्पिबति यावदस्याभिलाषो निवृत्तः । श्रद्धा प्रतिहतेत्यर्थः ।
श्रद्धाप्रतीघात इति किम् ? कणे हत्वा गतः । मनो हत्वा गतः ।।
<पुरोऽव्ययम् ।। 1.4.67 ।।>
असिप्रत्ययान्तः पुरः शब्दोऽव्ययम् । स गतिसंज्ञो भवति । समासस्वरोपचाराः प्रयोजनम् । पुरस्कृत्य, पुरस्कृतम्, यत्पुरस्करोति ।
अव्ययमिति किम् ? पूः पुरौ, पुरः कृत्वा काण्डं गतः ।।
<अस्तं च ।। 1.4.68 ।।>
अस्तंशब्दो मकारान्तोऽव्ययमनुपलब्धौ वर्त्तते । स गतिसंज्ञो भवति । अस्तंगत्य सविता पुनरुदेति । अस्तंगतानि धनानि । यदस्तं गच्छति ।
अव्ययमित्येव--अस्तं काण्डम् । क्षिप्तमित्यर्थः ।।
<अच्छ गत्यर्थवदेषु ।। 1.4.69 ।।>
अच्छशब्दोऽव्ययमभिशब्दस्यार्थे वर्त्तते । स गत्यर्थेषु धातुषु वदतौ च गतिसंज्ञो भवति । अच्छगत्य,अच्छगतम्, यदच्छगच्छति । वदतौ--अच्छोद्य,
अच्छोदितम्, यदच्छवदति । अव्ययमित्येव--उदकमच्छं गच्छति ।।
<अदोऽनुपदेशे ।। 1.4.70 ।।>
अदःशब्दस्त्यदादिषु पठ्यते, सोऽनुपदेशे गतिसंज्ञो भवति । उपदेशः = परार्थः प्रयोगः । स्वयमेव तु यदा बुद्ध्या परामृशति तदा नास्त्युपदेश इति सोऽस्य विषयः । अदःकृत्य, अदःकृतम्, यददःकरोति ।
अनुपदेश इति किम् ? अदः कृत्वा काण्डं गत इति परस्य कथयति ।।
<तिरोऽन्तर्धौ ।। 1.4.71 ।।>
अन्तर्धिः = व्यवधानम् । तत्र तिरः शब्दो गतिसंज्ञो भवति । तिरोभूय, तिरोभूतम्, यत् तिरोभवति ।
अन्तर्धाविति किम् ? तिरो भूत्वा स्थितः । पार्श्वतो भूत्वेत्यर्थः ।।

विभाषा कृञि ।। 1.4.72 ।।

`अन्तर्धौ' इति वर्तते । प्राप्तविभाषेयम् । तिरःशब्दः करोतौ परतो विभाषा गतिसंज्ञो भवति । तिरः कृत्य, तिरस्कृत्य । तिरस्कृतम् । यत्तिरस्करोति । तिरः कृत्वा, तिरस्कृत्वा । अन्तर्धावित्येव--तिरः कृत्वा काष्ठं तिष्ठति ।।

<उपाजेऽन्वाजे ।। 1.4.73 ।।>

`विभाषा कृञि' इति वर्तते । उपाजेऽन्वाजेशब्दौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्तेते । तौ कृञि विभाषा गतिसंज्ञौ भवतः । उपाजेकृत्य, उपाजे कृत्वा । अन्वाजेकृत्य, अन्वाजे कृत्वा ।।

<साक्षात्प्रभृतीनि च ।। 1.4.74 ।।>

`विभाषा कृञि' इति वर्त्तते । साक्षात्प्रभृतीनि शब्दरूपाणि कृञि विभाषा गतिसंज्ञानि भवन्ति ।

* साक्षात्प्रभृतिषु च्व्यर्थवचनम् * । साक्षात्कृत्य, साक्षात्कृत्वा । मिथ्याकृत्य, मिथ्या कृत्वा । साक्षात् । मिथ्या । चिन्ता । भद्रा । लोचना । विभाषा । संपत्का । आस्था । अमा । श्रद्धा । प्राजर्या । प्राजरुहा । वीजर्या । वीजरुहा । संसर्या । अर्थे । लवणम् । उष्णम् । शीतम् । उदकम् । आर्द्रम् । गतिसंज्ञासंनियोगेन लवणादीनां मकारान्तत्वं निपात्यते । अग्नौ । वशे । विकम्पने । विहसने । प्रहसने । प्रतपने । प्रादुस् । नमस् । आविस् ।।

<अनत्याधान उरसिमनसी ।। 1.4.75 ।।>

`विभाषा कृञि' इति वर्त्तते । अत्याधानम् = उपश्लेषणम्, तदभावेऽनत्याधाने उरसिमनसी शब्दौ विबाषा कृञि गतिसंज्ञौ भवतः । उरसिकृत्य, उरसि कृत्वा । मनसिकृत्य, मनसि कृत्वा ।

अनत्याधान इति किम् ? उरसि कृत्वा पाणिं शेते ।।

<मध्ये पदे निवचने च ।। 1.4.76 ।।>

`विभाषा कृञि' इति वर्त्तते । चकाराद् `अनत्याधाने' इति च । मध्ये, पदे, निवचने--इत्येते शब्दा अनत्याधाने विभाषा कृञि गतिसंज्ञा भवन्ति । मध्येकृत्य, मध्ये कृत्वा । पदेकृत्य, पदे कृत्वा । निवचनम् = वचनाभावः । निवचनेकृत्य, निवचने कृत्वा । वाचं नियम्येत्यर्थः । अनत्याधान इत्येव--हस्तिनः पदे कृत्वा शिरः शेते ।।

<नित्यं हस्ते पाणावुपयमने ।। 1.4.77 ।।>

`कृञि' इति वर्तते । `हस्ते'`पाणौ' इत्येतौ शब्दौ कृञि नित्यं गतिसंज्ञौ भवत उपयमने । उपयमनम् = दारकर्म। पाणौकृत्य । हस्तेकृत्य । दारकर्म कृत्वेत्यर्थः ।

उपयमने इति किम् ? हस्ते कृत्वा कार्षापणं गतः ।।

<प्राध्वं बन्धने ।। 1.4.78 ।।>

`कृञि' इति वर्तते । `प्राध्वम्' इति मकारान्तमव्ययमानुकूल्ये वर्तते, तदानुकूल्यं बन्धनहेतुकं यदा भवति तदा प्राध्वंशब्दः कृञि नित्यं गतिसंज्ञो भवति । प्राध्वंकृत्य ।

बन्धन इति किम् ? प्राध्वं कृत्वा शकटं गतः ।।

<जीविकोपनिषदावौपम्ये ।। 1.4.79 ।।>

`कृञि' इति वर्त्तते । जीविका, उपनिषत्--इत्येतौ शब्दौ औपम्ये विषये कृञि गतिसंज्ञौ भवतः । जीविकाकृत्य । उपनिषत्कृत्य ।

औपम्य इति किम् ? जीविकां कृत्वा गतः ।।

<ते प्राग्धातोः ।। 1.4.80 ।।>

ते गत्युपसर्गसंज्ञकाः धातोः प्राक् प्रयोक्तव्याः । तथा चैवोदाहृताः । `ते' ग्रहणमुपसर्गार्थम् । गतयो ह्यनन्तराः ।।

<छन्दसि परेऽपि ।। 1.4.81 ।।>

प्राक् प्रयोगे प्राप्ते छन्दसि परेऽभ्यनुज्ञायन्ते । छन्दसि विषये गत्युपसर्गसंज्ञकाः परेऽपि पूर्वेऽपि प्रयोक्तव्याः । न च परेषां प्रयुज्यमानानां संज्ञाकार्यं किञ्चिदस्ति । केवलं परप्रयोगेऽपि क्रियायोग एषामस्तीति ज्ञाप्यते । याति नि हस्तिना । नियाति हस्तिना । हन्ति नि मुष्टिना । निहन्ति मुष्टिना ।।

<व्यवहिताश्च ।। 1.4.82 ।।>

व्यवहिताश्च गत्युपसर्गसंज्ञकाः छन्दसि दृश्यन्ते । आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः (ऋ.3.45.1)। आ याहि (ऋ.6.16.10)।।

<कर्मप्रवचनीयाः ।। 1.4.83 ।।>

`कर्मप्रवचनीयाः' इत्यधिकारो वेदितव्याः । यानित ऊर्ध्वमनुक्रमिष्यामः कर्मप्रवचनीयसंज्ञास्ते वेदितव्याः । "अधिरीश्वरे"(1.4.97/644) इति यावद्वक्ष्यति ।

कर्मप्रवचनीयप्रदेशाः-"कर्मप्रवचनीययुक्ते द्वितीया"(2.3.8/548) इत्येवमादयः ।।

<अनुर्लक्षणे ।। 1.4.84 ।।>

अनुशब्दो लक्षणे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति । `शाकल्यस्य संहितामनु प्रावर्षत्'(म.भा.1.346) । अनडुद्यज्ञमन्वसिञ्चत् । अगस्त्यमन्वसिञ्चन्प्रजाः ।

किमर्थमिदमुच्यते, यावता "लक्षणेत्थम्भूताख्यान"(1.4.90/552) इति सिद्धैवानोः कर्मप्रवचनीयसंज्ञा ? हेत्वर्थं तु वचनम्, हेतुतृतीयां बाधित्वा द्वितीयैव यथा स्यात् ।।

<तृतीयार्थे ।। 1.4.85 ।।>

अनुशब्दस्तृतीयार्थे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति । नदीमन्ववसिता सेना । पर्वतमन्ववसिता सेना । पर्वतेन सम्बद्धेत्यर्थः ।।

<हीने ।। 1.4.86 ।।>

`हीनः' इति न्यून उच्यते, स चोत्कृष्टापेक्षः । तेनेयं हीनोत्कृष्टसम्बन्धे संज्ञा विज्ञायते । हीने द्योत्येऽयमनुः कर्मप्रवचनीयसंज्ञो भवति । अनुशाकटायनं वैयाकरणाः । अन्वर्जुनं योद्धारः ।।

<उपोऽधिके च ।। 1.4.87 ।।>

उपशब्दः अधिके हीने च द्योत्ये कर्मप्रवचनीयसंज्ञो भवति । उपखार्यां द्रोणः । उपनिष्के कार्षापणम् । हीने--उपशाकटायनं वैयाकरणाः ।।

<अपपरी वर्जने ।। 1.4.88 ।।>

अप-परी--शब्दौ वर्जने द्योत्ये कर्मप्रवचनीयसंज्ञौ भवतः । प्रकृतेन सम्बन्धिना कस्यचिदनभिसम्बन्धः = वर्जनम् । अप त्रिगर्त्तेभ्यो वृष्टो देवः । परि परि त्रिगर्त्तेभ्यो वृष्टो देवः ।

वर्जन इति किम् ? ओदनं परिषिञ्चति ।।

<आङ् मर्यादावचने ।। 1.4.89 ।।>

`आङ्' इत्येष शब्दो मर्यादावचने कर्मप्रवचनीयसंज्ञो भवति । अवधिः-- मर्यादा । वचनग्रहणादभिविधिरपि गृह्यते । आ पाटलिपुत्राद् वृष्टो देवः । आकुमारं यशः पाणिनेः । आ सांकाश्यात् । आ मथुरायाः ।

मर्यादावचने इति किम् ? ईषदर्थे क्रियायोगे च मा भूत् ।।

<लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः ।। 1.4.90 ।।>

लक्षणे, इत्थंभूताख्याने, भागे, वीप्सायां च विषयभूतायाम्-प्रति, परि, अनु-इत्येते कर्मप्रवचनीयसंज्ञा भवन्ति । लक्षणे तावत्-वृक्षं प्रति विद्योतते विद्युत् । वृक्षं परि । वृक्षमनु । इत्थम्भूताख्याने--साधुर्देवदत्तो मातरं प्रति । मातरं परि । मातरमनु । भागे--यदत्र मां प्रति स्यात् । मां परि स्यात् । मामनु स्यात् । वीप्सायाम्--वृक्षं वृक्षं प्रति सिञ्चति, परि सिञ्चति, अनु सिञ्चति ।

लक्षणादिष्विति किम् ? ओदनं परिषिञ्चति ।

अथ परिशब्दयोगे पञ्चमी कस्मान्न भवति--"पञ्चम्यपाङ्परिभिः"(2.3.10/598) इति ? वर्जनविषये सा विधीयते, अपशब्दसाहचर्यात् ।

<अभिरभागे ।। 1.4.91 ।।>

लक्षणादिष्वेव भागवर्जितेष्वभिः कर्मप्रवचनीयसंज्ञो भवति । वृक्षमभि विद्योतते । साधुर्देवदत्तो मातरमभि । वृक्षमभि सिञ्चति ।

अभागा इति किम् ? भागः स्वीक्रियमाणोंऽशः । यदत्र ममाभिष्यात् तद्दीयताम् । यदत्र मम भवति तद्दीयतामित्यर्थः ।।

<प्रतिः प्रतिनिधिप्रतिदानयोः ।। 1.4.92 ।।>

मुख्यसदृशः = प्रतिनिधिः । दत्तस्य प्रतिनिर्यातनम् = प्रतिदानम् । प्रतिनिधिविषये प्रतिदानविषये च प्रतिः कर्मप्रवचनीयसंज्ञो भवति । अभिमन्युरर्जुनतः प्रति । माषानस्मै तिलेभ्यः प्रति यच्छति ।।

<अधिपरी अनर्थकौ ।। 1.4.93 ।।>

अधिपरी शब्दौ अनर्थकौ अनर्थान्तरवाचिनौ कर्मप्रवचनीयसंज्ञौ भवतः । कुतोऽध्यागच्छति । कुतः पर्यागच्छति ।
गत्युपसर्गसंज्ञाबाधनार्था कर्मप्रवचनीयसंज्ञा विधीयते ।।

<सुः पूजायाम् ।। 1.4.94 ।।>

सुशब्दः पूजायामर्थे कर्मप्रवचनीयसंज्ञो भवति । सुसिक्तं भवता । सु स्तुतं भवता । धात्वर्थः स्तूयते । उपसर्गसंज्ञाश्रयं षत्वं न भवति ।

पूजायामिति किम् ? सुषिक्तं किं तवात्र ।।

<अतिरतिक्रमणे च ।। 1.4.95 ।।>

अतिशब्दः अतिक्रमणे चकारात्पूजायां च कर्मप्रवचनीयसंज्ञो भवति । निष्पन्नेऽपि वस्तुनि क्रियाप्रवृत्तिः = अतिक्रमणम् । अति सिक्तमेव भवता, अति स्तुतमेव भवता । पूजायाम्-अति सिक्तं भवता । अति स्तुतं भवता । शोभनं कृतमित्यर्थः ।

<अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु ।। 1.4.96 ।।>

पदार्थे, सम्भावने, अन्ववसर्गे, गर्हायाम्, समुच्चये च वर्तमानः अपिः कर्मप्रवचनीयसंज्ञो भवति । पदान्तरस्याप्रयुज्यमानस्यार्थः पदार्थः । सर्पिषोऽपि स्यात् । मधुनोऽपि स्यात् । मात्रा, बिन्दुः; स्तोकमित्यस्यार्थेऽपिशब्दो वर्त्तते । संभावनम् = अधिकार्थवचनेन शक्तेरप्रतिघाताविष्करणम् । अपि सिञ्चेन्मूलकसहस्रम् । अपि स्तुयाद्राजानम् । अन्ववसर्गः = कामचाराभ्यनुज्ञानम्-अपि सिञ्च, अपि स्तुहि । गर्हा = निन्दा-धिग्जाल्मं देवदत्तम्, अपि सिञ्चेत्पलाण्डुम्, अपि स्तुयाद् वृषलम् । समुच्चये--अपि सिञ्च । अपि स्तुहि । सिञ्च च स्तुहि च । उपसर्गसंज्ञाबाधनात् षत्वं न भवति ।।

<अधिरीश्वरे ।। 1.4.97 ।।>

ईश्वरः = स्वामी, स च स्वमपेक्षते । तदयं स्वस्वामिसम्बन्धे अधिः कर्मप्रवचनीयसंज्ञो भवति । तत्र कदाचित्स्वामिनः कर्मप्रवचनीयविभक्तिः सप्तमी भवति, कदाचित्स्वात् । अधि ब्रह्मदत्ते पञ्चालाः । अधि पञ्चालेषु ब्रह्मदत्तः ।।

<विभाषा कृञि ।। 1.4.98 ।।>

अधिः करोतौ विभाषा कर्मप्रवचनीयसंज्ञो भवति । यदत्र मामधिकरिष्यति । कर्मप्रवचनीयसंज्ञापक्षे गतिसंज्ञाबाधनात् "तिङि चोदात्तवति"(8.1.71/3978) इति निघातो न भवति ।।

<लः परस्मैपदम् ।। 1.4.99 ।।>

`लः' इति षष्ठी आदेशापेक्षा । लादेशाः परस्मैपदसंज्ञा भवन्ति । तिप्, तस्, झि । सिप्, थस्, थ । मिप्, वस्, मस् । शतृक्वसू च ।

परस्मैपदप्रदेशाः--"सिचि वृद्धिः परस्मैपदेषु"(7.2.1/2297) इत्येवमादयः ।।

<तङानावात्मनेपदम् ।। 1.4.100 ।।>

`तङ्' इति प्रत्याहारो नवानां वचनानाम् । `आन' इति शानच्कानचोर्ग्रहणम् । पूर्वेण परस्मैपदसंज्ञायां प्राप्तायां तङानयोरात्मनेपदसंज्ञा विधीयते । त, आताम्,झ । थास्, आथाम्, ध्वम् । इट्, वहि, महिङ् । आनः खल्वपि--शानच्कानचौ । `लः' इत्येव--कतीह निघ्नानाः ।

आत्मनेपदप्रदेशाः--"अनुदात्तङित आत्मनेपदम्"(1.3.12/2157) इत्येवमादयः ।।

<तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ।। 1.4.101 ।।>

तिङोऽष्टादश प्रत्ययाः-नव परस्मैपदसंज्ञकाः, नवात्मनेपदसंज्ञकाः । तत्र परस्मैपदेषु त्रयस्त्रिकाः यथाक्रमं प्रथममध्यमोत्तमसंज्ञा भवन्ति । आत्मनेपदेष्वपि त्रयस्त्रिकाः प्रथममध्यमोत्तमसंज्ञा भवन्ति ।

तिप्, तस्, झि--इति प्रथमः । सिप्, थस्, थ--इति मध्यमः । मिप्, वस्, मस्--इत्युत्तमः ।

आत्मनेपदेषु-त, आताम्, झ-इति प्रथमः । थास्, आथाम्, ध्वम्-इति मध्यमः । इट्, वहि, महिङ्--इत्युत्तमः ।

प्रथममध्यमोत्तमप्रदेशाः--"शेषे प्रथमः"(1.4.108/2165) इत्येवमादयः ।।

<तान्येकवचनद्विवचनबहुवचनान्येकशः ।। 1.4.102 ।।>

तान्येकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति । एकशः = एकैकं पदम् । `तिप्' इत्येकवचनम् । `तस्' इति द्विवचनम् । `झि' इति बहुवचनम् । एवं सर्वत्र ।

एकवचनद्विवचनबहुवचनप्रदेशाः-"बहुषु बहुवचन"(1.4.21/187)इत्येवमादयः ।।

<सुपः ।। 1.4.103 ।।>

तिङां त्रिकेष्वेकवचनादिसंज्ञा विहिताः, संप्रति सुपां त्रिकेषु विधीयन्ते । सुपश्च त्रीणि त्रीणि पदानि एकश एकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति ।

`सु' इत्येकवचनम् । `औ' इति द्विवचनम् । `जस्'इति बहुवचनम् । एवं सर्वत्र ।।

<विभक्तिश्च ।। 1.4.104 ।।>

`त्रीणि त्रीणि' इत्यनुवर्तते । त्रीणि त्रीणि विभक्तिसंज्ञाश्च भवन्ति, सुपस्तिङश्च ।

विभक्तिप्रदेशाः--"अष्टन आ विभक्तौ"(7.2.84/371) इत्येवमादयः ।।

<युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ।। 1.4.105 ।।>

"लस्य"(3.4.77/2153) इत्यधिकृत्य सामान्येन तिबादयो विहिताः, तेषामयं पुरुषनियमः क्रियते-युष्मद्युपपदे सति व्यवहिते चाव्यवहिते सति समानाधिकरणे समानाभिधेये तुल्यकारके स्थानिनि प्रयुज्यमानेऽप्यप्रयुज्यमानेऽपि मध्यमपुरुषो भवति । त्वं पचसि, युवां पचथः, यूयं पचथ ।

अप्रयुज्यमानेऽपि--पचसि, पचथः, पचथ ।।

<प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ।। 1.4.106 ।।>

प्रहासः = परिहासः, क्रीडा । प्रहासे गम्यमाने मन्योपपदे धातोर्मध्यमपुरुषो भवति, मन्यतेश्चोत्तमः, स चैकवद्भवति । एहि मन्ये ओदनं भोक्ष्यस इति, नहि भोक्ष्यसे, भुक्तः सोऽतिथिभिः । एहि मन्ये रथेन यास्यसि, न हि यास्यसि, यातस्तेन ते पिता । मध्यमोत्तमयोः प्राप्तयोः उत्तममध्यमौ विधीयेते ।

प्रहास इति किम् ? एहि मन्यसे ओदनं भोक्ष्य इति । सुष्ठु मन्यसे, साधु मन्यसे ।।

<अस्मद्युत्तमः ।। 1.4.107 ।।>

उत्तमपुरुषो नियम्यते । अस्मद्युपपदे समानाभिधेये प्रयुज्यमानेऽप्यप्रयुज्यमानेऽपि उत्तमपुरुषो भवति । अहं पचामि । आवां पचावः । वयं पचामः ।

अप्रयुज्यमानेऽपि--पचामि । पचावः पचामः ।।

<शेषे प्रथमः ।। 1.4.108 ।।>

`शेषे' इति मध्यमोत्तमविषयादन्य उच्यते । यत्र युष्मदस्मदी समानाधिकरणे उपपदे न स्तः, तत्र शेषे प्रथमपुरुषो भवति । पचति । पचतः । पचन्ति ।।

<परः संनिकर्षः संहिता ।। 1.4.109 ।।>
परशब्दोऽतिशये वर्त्तते । संनिकर्षः = प्रत्यासत्तिः । परो यः संनिकर्षः = वर्णानामर्धमात्राकालव्यवधानम्, स संहितासंज्ञो भवति । दध्यत्र । मध्वत्र । संहिताप्रदेशाः--"संहितायाम्"(6.1.72/145) इत्येवमादयः ।।
<विरामोऽवसानम् ।। 1.4.110 ।।>
विरतिः = विरामः, विरम्यतेऽनेनेति वा विरामः । सोऽवसानसंज्ञो भवति । दधिं । मधुँ । वृक्षः । प्लक्षः ।
अवसानप्रदेशाः--"खरवसानयोर्विसर्जनीयः"(8.3.15/76) इत्येवमादयः ।।
इति श्रीजयादित्यविरचितायां काशिकावृत्तौ
प्रथमाध्यायस्य चतुर्थः पादः ।।
* * *

2.1

काशिकावृतिः
अथ द्वितीयाध्याये प्रथम पादः
(1) <समर्थः पदविधिः ।2।1।1।>
परिभाषेयम्। यः कश्चिदिह शास्त्रे पदविधिः श्रूयते स सर्वः समर्थो वेदितव्यः। विधीयत इति विधिः, पदानां विधिः=पदविधिः। स पुनः समासादिः। समर्थः=शक्तः। विग्रहवाक्यार्थाभिधाने यः शक्तः स समर्थो वेदितव्यः। अथ वा समर्थपदाश्रयत्वात् समर्थः। समर्थानां पदानां सम्बद्धार्थानां संसृष्टार्थानां विधिर्वेदितव्यः। वक्ष्यति--"द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः"(2.1.24/686)--कष्टं श्रितः कष्टश्रितः। समर्थग्रहणं किम्? पश्य देवदत्त कष्टम्, श्रितो विष्णुमित्रो गुरुकुलम्। "तृतीया तत्कृतार्थेन गुणवचनेन"(2.1.30/692)--शङ्कुलया खण्डः शङ्कुलाखण्डः। समर्थग्रहणं किम्? किं त्वं करिष्यसि शङ्कुलया, खण्डो देवदत्त उपलेन। "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः"(2.1.36/698)--यूपायदारु यूपदारु। समर्थग्रहणं किम् ? गच्छ त्वं यूपाय, दारु देवदत्तस्य गेहे। "पञ्चमी भयेन"(2.1.37/699)--वृकेभ्यो भयं वृकभयम्। समर्थग्रहणं किम्? गच्छ त्वं मा वृकेभ्यः, भयं देवदत्तस्य यज्ञदत्तात्। "षष्ठी"(2.2.8/702)--राज्ञः पुरुषो राजपुरुषः। समर्थग्रहणं किम्? भार्या राज्ञः, पुरुषो देवेदत्तस्य। "सप्तमी शौण्डैः"(2.1.40/717)--अक्षेषु शौण्डः अक्षशौण्डः। समर्थग्रहणं किम्? शक्तस्त्वमक्षेषु, शौण्डः पिबति पानागारे। पदग्रहणं किम् ? वर्णविधौ समर्थपरिभाषा मा भूत्। तिष्ठतु दध्यशान त्वं शाकेन। तिष्ठतु कुमारीच्छत्रं हर देवदत्तात्। यणादेशो नित्यश्च तुग्भवति।।

(2) <सुबामन्त्रिते पराङ्गवत्स्वरे ।2।1।2।>
सुबन्तमामन्त्रिते परतः परस्याङ्गवद्भवति, स्वरे=स्वरलक्षणे कर्तव्ये। तादात्म्यातिदेशोऽयम्। सुबन्तमामन्त्रितमनुप्रविशति। वक्ष्यति--"आमन्त्रितस च"(6.1.198/3353), आमन्त्रितस्यादिरुदात्तो भवति। स ससुप्कस्यापि यथा स्यात्। कुण्डेनाटन्। परशुनावृश्चन्। मद्राणां पाजन्। कश्मीराणां राजन्। सुबिति किम् ? पीड्ये पीड्यमान। आमन्त्रित इति किम् ? गेहे गार्ग्यः। परग्रहणं किम् ? पूर्वस्य मा भूत्-देवदत्त कुण्डेनाटन्। अङ्गग्रहणं किम् ? यथा मृत्पिण्डीभूतः स्वरं लभेत। उभयोराद्युदात्तत्वं मा भूत्। वत्करणं किम् ? स्वाश्रयमपि कार्यं यथा स्यात्। आम् कुण्डेनाटन्। "आम एकान्तरमामन्त्रितमनन्तिके"(8.1.95/3962) इत्येकान्तरता भवति। स्वर इति किम् ? कूपे सिञ्चन्। चर्म नमन्। षत्वणत्वे प्रति पराङ्गवन्न भवति। *सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानमनन्तरत्वात् * । तीक्ष्णया सूच्या सीव्यन्। तीक्ष्णेन परशुना वृश्चन्।(म.भा.1.375) * अव्ययानां प्रतिषेधोवक्तव्यः *। उच्चैरधीयानः। नीचैरधीयानः(म.भा.1.376)।।

(3)< प्राक्कडारात्समासः ।2।1।3।>
कडारसंशब्दनात्प्राग् यानित ऊर्ध्वमनुक्रमिष्यामस्ते समाससंज्ञा वेदितव्याः। वक्ष्यति-"यथाऽसादृश्ये"(2.1.7/661), यथा वृद्धं ब्राह्मणानामन्त्रयस्व। प्राग्वचनं संज्ञासमावेशार्थम्। समासप्रदेशाः--"तृतीयासमासे"(1.1.30/223) इत्येवमादयः।।

(4)< सह सुपा ।2।1।4।>

`सुप्'इति वर्तते, `सह' इति `सुपा' इति च त्रयमप्यधिकृतं वेदितव्यम्। यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रेदमुपस्थितं द्रष्टव्यम्। वक्ष्यति--"द्वितीयाश्रित"((2.1.14/686) इति, द्वितीयान्तं श्रितादिभिः सह समस्यते; कष्टं श्रितः कष्टश्रितः। सहग्रहणं योगविभागार्थम्, तिङापि सह यथा स्यात्--अनुव्यचलत्, अनुप्रावर्षत्।।

(5) <अव्ययीभावः ।2।1।5।>

"अव्ययीभावः"(2.1.5/651) इत्यधिकारो वेदितव्यः। यानित ऊर्ध्वमनुक्रमिष्यामोऽव्ययीभावसंज्ञास्ते वेदितव्याः। वक्ष्यति--"यथाऽसादृश्यते"(2.1.7/661), यथावृध्दं ब्राह्मणानामन्त्रयस्व। अन्वर्थसंज्ञा चेयं महती पूर्वपदार्थप्राधान्यमव्ययीभावस्य दर्शयति। अव्ययीभावप्रदेशाः--"अव्ययीभावश्च" (2.4.18/659) इत्येवमादयः।।

< अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु ।2।1।6।>

`सुप्' `सुपा' इति च वर्तते। विभक्त्यादिष्वर्थेषु यदव्ययं वर्तते तत्समर्थेन सुबन्तेन सह समस्यते, अव्ययीभावश्च समासो भवति। वचनग्रहणं प्रत्येकमभिसम्बद्ध्यते। विभक्तिवचने तावत्--स्त्रीष्वधिकृत्य कथा प्रवर्तते अधिस्त्रि। अधिकुमारि। सप्तम्यर्थे यदव्ययं तद् विभक्तिवचनम्। समीपवचने--कुम्भस्य समीपम् उपकुम्भम्। उपमणिकम्। समृद्धिः=ऋध्देराधिक्यम्। समृद्धिर्मद्राणाम् सुमद्रम्, सुमगधं वर्तते। अर्थाभावः=वस्तुनोऽभावः। अभावो मक्षिकाणाम् निर्मक्षिकम्, निर्मशकं वर्तते। अत्ययः =अभूतत्वम्, अतिक्रमः। अतीतानि हिमानि निर्हिमम्, निःशीतं वर्तते। असंप्रति=उपभोगस्य वर्तमानकालप्रतिषेधः। अतितैसृकम्। तैसृकम्=आच्छादनम्, तस्यायमुपभोगकालो न भवतीत्यर्थः शब्दप्रादुर्भावः=प्रकाशता शब्दस्य। इतिपाणिनि। तत्पाणिनि। पाणिनिशब्दो लोके प्रकाशत इत्यर्थः। पश्चात्--अनुरथं पादातम्। रथानां पश्चात् इत्यर्थः। यथार्थे यदव्ययं वर्तते तत्समस्यते। योग्यता, वीप्सा, पदार्थानतिवृत्तिः, सादृश्यं चेति यथार्थः। योग्यतायाम्--अनुरूपम्। रूपयोग्यं भवतीत्यर्थः। वीप्सायाम्--अर्थमर्थं प्रति प्रत्यर्थम्। पदार्थानतिवृत्तौ--यथाशक्ति। आनुपूर्व्यम्=अनुक्रमः। अनुज्येष्ठं प्रविशन्तु भवन्तः। ज्येष्ठानुपूर्व्येण भवन्तः प्रविशन्त्वित्यर्थः। यौगपद्यम्=एककालता। सचक्रं धेहि। युगपञ्चकं धेहीत्यर्थः। सादृश्यम्=तुल्यता। किमर्थमिदमुच्यते, यथार्थ इत्येव सिद्धम् ? गुणभूतेऽषु सादृश्ये यथा स्यात्--सदृशः किख्या सकिखि। संपत्तिः=अनुरूप आत्मभावः, समृध्देरन्यः। सब्रह्म बाभ्रवाणाम्। सक्षत्रं शालङ्कायनानाम्। साकल्यम्=अशेषता। सतृणमभ्यवहरति, सबुसम्। न किञ्चिदभ्यवहार्यं परित्यजतीत्ययमर्थोऽधिकार्थवचनेन प्रतिपाद्यते। अन्तवचने--'अन्त' इति परिग्रहापेक्षया समाप्तिरुच्यते। साग्न्यधीते। सेष्टिपशुबन्धम्। पशुबन्धान्तमधीत इत्यर्थः। इयं समाप्तिरसकलेऽप्यध्ययने भवतीति साकल्यात्पृथगुच्यते।।

<यथाऽसादृश्ये ।2।1।7।>

`यथा' इत्येतदव्ययमसादृश्ये वर्तमानं सुपा सह समस्यते, अव्ययीभावश्च समासो भवति। यथावृध्दं ब्राह्मणानामन्त्रयस्व। ये ये वृद्धाः यथावृद्धम्। यथाध्यापकम्। असादृश्ये इति किम्? यथा देवदत्तस्तथा यज्ञदत्तः। यथार्थे यदव्ययमिति पूर्वेणैव सिध्दे समासे वचनमिदं सादृश्यप्रतिषेधार्थम्।।

<यावदवधारणे ।2।1।8। >

`यावत्' इत्येतदव्ययमवधारणे वर्तमानं सुपा सह समस्यते, अव्ययीभावश्च समासो भवति। अवधारणम्=इयत्तापरिच्छेदः। यावदमत्रं ब्राह्मणानामन्त्रयस्व। यावन्ति पात्राणि सम्भवन्ति, पञ्च षड् वा, तावत आमन्त्रयस्व। अवधारण इति किम् ? यावद्दत्तं तावद्भुक्तम्। नावधारयामि कियन्मया भुक्तमिति।।

<सुप्प्रतिना मात्रार्थे ।2।1।9।>

मात्रा, बिन्दुः, स्तोकम्, अल्पमिति पर्यायाः। मात्रार्थे वर्तमानेन प्रतिना सह सुबन्तं समस्यते, अव्ययीभावश्च समासो भवति। अस्त्यत्र किञ्चित् शाकं शाकप्रति। सूपप्रति। मात्रार्थ इति किम् ? वृक्षं प्रति विद्योतते विद्युत्। सुबिति वर्तमाने पुनः सुब्ग्रहणमव्ययनिवृत्त्यर्थम्।

<अक्षशलाकासङ्ख्याः परिणा ।2।1।10।>

अक्षशब्दः, शलाकाशब्दः, संख्याशब्दश्च परिणा सह समस्यन्ते, अव्ययीभावश्च समासो भवति। कितवव्यवहारे समासोऽयमिष्यते। पञ्चिका नाम द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा भवति। तत्र यदा सर्वे उत्तानाः पतन्ति, अवाञ्चो वा तदा पातयिता जयति, तस्यैवैतस्य विघातोऽन्यथा पाते सति जायते। अक्षेणेदं न तथा वृत्तं यथा पूर्वं जये--अक्षपरि, शलाकापरि, एकपरि, द्विपरि, त्रिपरि। परेण चतुष्परि।

`पञ्चसु त्वेकरूपासु जय एव भविष्यति
अक्षादयस्तृतीयान्ताः पूर्वोक्तस्य यथा न तत्।
कितवव्यवहारे च एकत्वेऽक्षशलाकयोः ।।'(म.भा.1.380)

<विभाषा ।2।1।11।>

`विभाषा' इत्ययमधिकारो वेदितव्यः। यदित ऊर्ध्वमनुक्रमिष्यामस्तद्विभाषा भवति। वक्ष्यति--"अपपरिबहिरञ्चवः पञ्चम्या"(2.1.12/666), अपत्रिगर्तं वृष्टो देवः, अप त्रिगर्तेभ्यः।।

<अपपरिबहिरञ्चवः पञ्चम्या ।2।1।12।>

अप, परि, बहिस्, अञ्चु-इत्येते सुबन्ताः पञ्चम्यन्तेन सह विभाषा समस्यन्ते, अव्ययीभावश्च समासो भवति। अपत्रिगर्तं वृष्टो देवः, अप त्रिगर्तेभ्यः। परित्रिगर्तम्, परि त्रिगर्तेभ्यः। बहिर्ग्रामम्, बहिर्ग्रामात्। प्राग्ग्रामम्, प्राग्ग्रामात्। बहिःशब्दयोगे पञ्चमीभावस्यैतदेव ज्ञापकम् ।।

<आङ् मर्यादाभिविध्योः ।2।1।13।>

`आङ्' इत्येतन्मर्यादायामभिविधौ च वर्तमानं पञ्चम्यन्तेन सह विभाषा समस्यते, अव्ययीभावश्च समासो भवति। आपाटलिपुत्रं वृष्टो देवः, आ पाटलीपुत्रात्। अभिविधौ-आकुमारं यशः पाणिनेः, आकुमारेभ्यः।।

<लक्षणेनाभिप्रती आभिमुख्ये ।2।1।14।>

लक्षणम् = चिह्नम्,तद्वाचिना सुबन्तेन सहाभिप्रती शब्दावाभिमुख्ये वर्तमानौ विभाषा समस्येते, अव्ययीभावश्च समासो भवति। अभ्यग्नि शलभाः पतन्ति, अग्निमभि। प्रत्यग्नि, अग्निं प्रति। अग्निं लक्ष्यीकृत्य अभिमुखं पतन्तीत्यर्थः। लक्षणेनेति किम् ? स्रुघ्नं प्रति गतः। प्रतिनिवृत्य स्रुघ्नमेवाभिसुखं गतः। अभिप्रती इति किम्? येनाग्निस्तेन गतः। आभिमुख्य इति किम्? अभ्यङ्का गावः, प्रत्यङ्का गावः। नवाङ्का इत्यर्थः।।

<अनुर्यत्समया ।2।1।15।>

समया = समीपम्। अनुर्यस्य समीपवाची तेन लक्षणभूतेन सह विभाषा समस्यते, अव्ययीभावश्च समासो भवति। अनुवनमशनिर्गतः। अनुरिति किम्? वनं समया। यत्समयेति किम्? वृक्षमनुविद्योतते विद्युत्। "अव्ययं विभक्तिसमीप"(2.1.6/652) इत्येव सिद्धे पुनर्वचनं विभाषार्थम्।।

<यस्य चायामः ।2।1।16।>

`लक्षणेन' इति वर्तते। आयामः = दैर्घ्यम्। अनुर्यस्यायामवाची तेन लक्षणभूतेन सह विभाषा समस्यते, अव्ययीभावश्च समासो भवति। अनुगङ्गं वाराणसी। अनुयमुनं मथुरा। यमुनाऽऽयामेन मथुराऽऽयामो लक्ष्यते। आयाम इति किम्? वृक्षमनु विद्योतते विद्युत् ।।

<तिष्ठद्गुप्रभृतीनि च ।2।1।17।>

तिष्ठद्ग्वादयः समुदाया एव निपात्यन्ते। तिष्ठद्गुप्रभृतीनि शब्दरूपाणि अव्ययीभावसंज्ञकानि भवन्ति। तिष्टद्गु = कालविशेषः। तिष्ठन्ति गावो यस्मिन्काले दोहनाय स तिष्ठद्गु कालः। खलेयवादीनि प्रथमान्तानि विभक्त्यन्तरेण न सम्बध्यन्ते, अन्यपदार्थे च काले वर्तन्ते। चकारोऽवधारणार्थः। अपरः समासो न भवति--परमतिष्ठद्ग्विति। तिष्ठद्गु। वहद्गु। आयतीगवम्। खलेयवम्। खलेबुसम्। लूनयवम्। लूयमानयवम्। पूतयवम्। पूयमानयवम्। संहृतयवम्। संह्रियमाणयवम्। संहृतबुसम्। संह्रियमाणबुसम्। एते कालशब्दाः। समभूमि। समपदाति। सुषमम्। विषमम्। निष्षमम्। दुष्षमम्। अपरसमम्। आयतीसमम्। प्राह्णम्। प्ररथम्। प्रमृगम्। प्रदक्षिणम्। अपरदक्षिणम्। सम्प्रति। असम्प्रति। पापसमम्। पुण्यसमम्। "इच् कर्मव्यतिहारे"(5.4.127/866) - दण्डादण्डि। मुसलामुसलि।।

<पारे मध्ये षष्ठ्या वा ।2।1।18।>

षष्ठीसमासे प्राप्ते तदपवादोऽव्ययीभाव आरभ्यते। वावचनात् षष्ठीसमासोऽपि पक्षेऽभ्यनुज्ञायते। पारमध्यशब्दौ षष्ठ्यन्तेन सह विभाषा समस्येते, अव्ययीभावश्च समासो भवति। तत्सन्नियोगेन चानयोरेकारान्तत्वं निपात्यते। पारं गङ्गायाः पारेगङ्गम्। मध्यं गङ्गयाः मध्येगङ्गम्। षष्ठीसमासपक्षे - गङ्गापारम्, गङ्गामध्यम्। मपाविभाषया वाक्यविकल्पः क्रियते।।

<संख्या वंश्येन ।2।1।19।>

विद्यया जन्मना वा प्राणिनामेकलक्षणसन्तानो वंश इत्यभिधीयते। तत्र भवो वंश्यः। तद्वाचिना सुबन्तेन सह संख्या समस्यते, अव्ययीभावश्च समासो भवति। द्वौ मुनी व्याकरणस्य वंश्यौ द्विमुनि व्याकरणस्य। त्रिमुनि व्याकरणस्य। यदा तु विद्यया तद्वतामभेदविवक्षा तदा सामानाधिकरण्यं भवति-द्विसुनि व्याकरणम्, त्रिमुनि व्याकरणमिति। जन्मना - एकविंशति भारद्वाजम्।।

<नदीभिश्च ।2।1।20।>

`संख्या' इत्यनुवर्तते। नदीवचनैः शब्दैः सह संख्या समस्यते, अव्ययीभावश्च समासो भवति। समाहारे चायमिष्यते। सप्तगङ्गम्। द्वियमुनम्। पञ्चनदम्। सप्तगोदावरम्।।

<अन्यपदार्थे च संज्ञायाम् ।2।1।21।>

`संख्या' इति निवृत्तम्, नदीग्रहणमनुवर्तते। नदीभिः सह सुबन्तमन्यपदार्थे वर्तमानं संज्ञायां विषये समस्यते, अव्ययीभावश्च समासो भवति। विभाषाधिकारेऽपि नित्यसमास एवायम्। न हि वाक्येन संज्ञा गम्यते। उन्मत्तगङ्गं नाम देशः। लोहितगङ्गम्। कृष्णवेण्णा। संज्ञायामिति किम्? शीघ्रगङ्गो देशः।।

<तत्पुरुषः ।2।1।22।>

`तत्पुरुषः' इति संज्ञाऽधिक्रियते प्राग्बहुव्रीहेः। यानित ऊर्ध्वमनुक्रमिष्यामस्तत्पुरुषसंज्ञास्ते वेदितव्याः। वक्ष्यति-"द्वितीयाश्रितातीतपतित"(2.1.24/686) इति, कष्टश्रितः। पूर्वाचार्यसंज्ञा चेयं महती, तदङ्गीकरणमुपाधेरपि तदीयस्य परिग्रहार्थम् - `उत्तरपदार्थप्रधानस्तत्पुरुषः'(म.भा.1.382) इति। तत्पुरुषप्रदेशाः -- "तत्पुरुषे कृति बहुलम्"(3.3.14/972) इत्येवमादयः।।

<द्विगुश्च ।2।1।23।>
द्विगुश्च समासस्तत्पुरुषसंज्ञो भवति। द्विगोस्तत्पुरुषत्वे समासान्ताः प्रयोजनम्(म.भा.1.382)। पञ्चराजी, दशराजी। द्व्यहः, त्र्यहः। पञ्चगवम्, दशगवम्।।
<द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ।2।1।24।>
`सुप्' `सुपा' इति वर्तते, तस्य विशेषणमेतद् द्वितीया। द्वितीयान्तं सुबन्तं श्रितादिभिः सह समस्यते, तत्पुरुषश्च समासो भवति। कष्टं श्रितः कष्टश्रितः। अतीत--कान्तारमतीतः कान्तारातीतः। पतित-नरकं पतितः नरकपतितः। गत-ग्रामं गतः ग्रामगतः। अत्यस्त--तरङ्गानत्यस्तः तरङ्गात्यस्तः। तुहिनात्यस्तः। प्रप्त-सुखं प्राप्तः सुखप्राप्तः। आपन्न--सुखमापन्नः सुखापन्नः। दुःखापन्नः।।
*श्रितादिषु गमिगाम्यादीनामुपसंख्यानम् *(म.भा.1.383)। ग्रामं गमी ग्रमगमी। ग्रामं गामी ग्रामगामी। ओदनं बुभुक्षुः ओदनबुभुक्षुः।।
<स्वयं क्तेन ।2।1।25।>
`स्वयम्' एतदव्ययमात्मनेत्यस्यार्थे वर्तते, तस्य द्वितीयया सह सम्बन्धो नोपपद्यत इति द्वितीयाग्रहणमुत्तरार्थमनुवर्तते। 'स्ययम्' इत्येतत्सुबन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। स्वयंधौतौ पादौ। स्वयंविलीनमाज्यम्। ऐकपद्यमैकस्वर्य च समासत्वाद्भवति।।
<खट्वा क्षेपे ।2।1।26।>
खट्वाशब्दो द्वितीयान्तः क्तान्तेन सह क्षेपे गम्यमाने समस्यते, तत्पुरुषश्च समासो भवति। क्षेपः = निन्दा, स च समासार्थ एव, तेन विभाषाधिकारेऽपि नित्यसमास एवायम्। न हि वाक्येन क्षेपो गम्यते। खट्वारोहणं चेह विमार्गप्रस्थानस्योपलक्षणम्। सर्व एवाविनीतः खट्वारूढ इत्युच्यते। खट्वारूढो जाल्मः। खट्वाप्लुतः। अपथप्रस्थित इत्यर्थः। क्षेप इति किम्? खट्वामारूढः।।
<सामि ।2।1।27।>
`सामि' इत्येतदव्ययमर्धशब्दपर्यायः,तस्यासत्त्ववाचित्वाद द्वितीयया नास्ति संबन्घः। तत् सुबन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। सामिकृतम्। सामिपीतम्। सामिभुक्तम्। ऐकपद्यमैकस्वर्यं च समासत्वाद्भवति।।
<कालाः ।2।1।28।>
`द्वितीया' `क्तेन' इति वर्तते। कालवाचिनः शब्दा द्वितीयान्ताः क्तान्तेन सह समस्यन्ते विभाषा, तत्पुरुषश्च समासो भवति। अनत्यन्तसंयोगार्थं वचनम्। `कालाः' इति न स्वरूपविधिः। षण्मुहूर्त्ताश्चराचराः, ते कदाचिदहर्गच्छन्ति, कदाचिद्रात्रिम्। अहरतिसृता मुहूर्ताः अहस्संक्रान्ताः। रात्र्यतिसृता मुहूर्त्ताः रात्रिसंक्रान्ताः। मासप्रमितश्चन्द्रमाः। मासं प्रमातुमारब्धः। प्रतिपच्चन्द्रमा इत्यर्थः।।
<अत्यन्तसंयोगे च ।2।1।29।>
`कालाः' इति वर्तते, `क्तेन' इति निवृत्तम्। अत्यन्तसंयोगः = कृत्स्नसयोगः, कालस्य स्वेन सम्बन्धिना व्याप्तिः। कालवाचिनः शब्दा द्वितीयान्ता अत्यन्तसंयोगे गम्यमाने सुपा सह समस्यन्ते विभाषा, तत्पुरुषश्च समासो भवति। मुहूर्तं सुखम् मुहूर्तसुखम्। सर्वरात्रकल्याणी। सर्वरात्रसोभना।।
<तृतीया तत्कृतार्थेन गुणवचनेन ।2।1।30।>
`सुप्' `सुपा' इति वर्तते, तस्य विशेषणमेतत्तृतीया। तृतीयान्तंसुबन्तं गुणवचनेनार्थशब्देन च सह समस्यते, तप्तुरुषश्च समासो भवति। कीदृशेन गुणवचनेन? तत्कृतेन = तदर्थकृतेन; तृतीयान्तार्थकृतेनेति यावत्। शङ्कुलया खण्डः शङ्कुलाखण्डः।किरिणा काणः किरिकाणः। अर्थशब्देन--धान्येनार्थः, धान्यार्थः। तत्कृतेनेति किम्? अक्ष्णा काणः। गुणवचनेनेति किम् ? गोभिर्वपावान्।।
<पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ।2।1।31।>
पूर्व, सदृश, सम,ऊनार्थ, कलह, निपुण, मिश्र, श्लक्ष्ण--एतैः. सह तृतीयान्तं समस्यते, तत्पुरुषश्च समासो भवति। अस्मादेव वचनात् पूर्वादिभिर्योगे तृतीया भवति, हेतौ वा द्रष्टव्या। पूर्व-मासेन पूर्वः मासपूर्वः, संवत्सरपूर्वः। सदृश--मातृसदृशः, पितृसदृशः। सम--मातृसमः। ऊनार्थ--माषोनम्, कार्षापणोनम्। माषविकलम्, कार्षापणविकलम्। कलह--असिकलहः, वाक्कलहः। निपुण--वाङ्निपुणः, आचारनिपुणः। मिश्र-गुडमिश्रः, तिलमिश्रः। श्लक्ष्ण--आचारश्लक्ष्णः।। * पूर्वादिष्ववरस्योपसंख्यानम् *(म.भा.1.385)। मासेनावरः मासावरः। संवत्सरावरः।।
<कर्तृकरणे कृता बहुलम् ।2।1।32।>
`तृतीया' इति वर्तते। कर्तरि करणे च या तृतीया तदन्तं कृदन्तेन सह समस्यते बहुलम्, तत्पुरुषश्च समासो भवति। सर्वोपाधिव्यभिचारार्थं बहुलग्रहणम्। कर्तरि--अहिना हतः अहिहतः। करणे-नखैर्निर्भिन्नो नखनिर्भिन्नः। परशुना छिन्नः परशुच्छिन्न्ः। कर्तृकरणे इति किम् ? भिक्षाभिरुषितः। बहुलग्रहणं किम् ? दात्रेण धान्यं लूनवान्, परशुना छिन्नवान्-इह समासो न भवति; पादहारकः, गलेचोपक इति च भवति।।
<कृत्यैरधिकार्थवचने ।2।1।33।>
स्तुतिनिन्दाप्रयुक्तमध्यारोपितार्थवचनमधिकार्थवचनम्। कर्तृकरणयोर्या तृतीया तदन्तं सुबन्तं कृत्यैः सह समस्यतेऽधिकार्थवचने गम्यमाने विभाषा, तत्पुरुषश्च समासो भवति। कर्त्ता--काकपेया नदी। श्वलेह्यः कूपः। करणम्--बाष्पच्छेद्यानि तृणानि। कण्टकसञ्चेय ओदनः। पूर्वस्यैवायं प्रपञ्चः। * कृत्यग्रहणे यण्ण्यतोर्ग्रहणं कर्त्तव्यम् *। इह मा भूत्-काकैः पातव्या इति।।

<अन्नेन व्यञ्जनम् ।2।1।34।>

`तृतीया' इति वर्तते। व्यञ्जनवाचि तृतीयान्तमन्नवाचिना सुबन्तेन सह समस्यते विभाषा, तत्पुरुषश्च समसो भवति। संस्कार्यमन्नम्, संस्कारकम्। दध्ना उपसिक्त ओदनः दध्योदनः। क्षीरौदनः। वृत्तौ क्रियया अन्तर्भावादन्नव्यञ्जनयोः सामर्थ्यम्।।

<भक्ष्येण मिश्रीकरणम् ।2।1।35।>

मिश्रीकरणवाचि तृतीयान्तं भक्ष्यवाचिना सुबन्तेन समस्यते, तत्पुरुषश्च समासो भवति। खरविशदमभ्यवहार्यं भक्ष्यम्, तस्य संस्कारकं मिश्रीकरणम्। गुडेन मिश्रा धानाः गुडधानाः। गुडपृथुकाः। वृत्तौ क्रियया अन्तर्भावात्पूर्वोत्तरपदयोः सामर्थ्यम्।।

<चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ।2।1।36।>

`सुप्' `सुपा' इति वर्तते, तस्य विशेषमेतत् चतुर्थी। `तत्' इति सर्वनाम्ना चतुर्थ्यन्तस्यार्थः परामृश्यते। तस्मै इदं तदर्थम्। तदर्थ, अर्थ, बलि हित, सुख, रक्षित-इत्येतैः सह चतुर्थ्यन्तं समस्यते, तत्पुरुषश्च समासो भवति। तदर्थेन प्रकृतिविकारभावे समासोऽयमिष्यते। यूपाय दारु यूपदारु। कुण्डलाय हिरण्यम्, कुण्डलहिरण्यम्। इह न भवति--रन्धनाय स्थाली, अवहननायोलूखलमिति। चतुर्थी चास्मादेव ज्ञापकात्तादर्थ्ये भवति।। * अर्थेन नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या *(म.भा.1.3880। ब्राह्मणार्थं पयः। ब्राह्मणार्था यवागूः। बलि--कुबेराय बलिः कुबेरबलिः। महाराजबलिः। हित--गोहितम्। अश्वहितम्। सुख--गोसुखम्। अश्वसुखम्। रक्षित--गोरक्षितम्। अश्वरक्षितम्।।

<पञ्चमी भयेन ।2।1।37।>

`सुप्' `सुपा' इति वर्तते, तस्य विशेषणमेतत्पञ्चमी। पञ्चम्यन्तं सुबन्तं भयशब्देन सुबन्तेन सह समस्यते विभाषा, तत्पुरुषश्च समासो भवति। वृकेभ्यो भयम्वृकभयम्। चौरभयम्। दस्युभयम्। * भयभीतभीतिभीभिरिति वक्तव्यम् *(म.भा.1.390)। वृकेभ्यो भीतः वृकभीतः। वृकभीतिः। वृकभीः। पूर्वस्यैवायं बहुलग्रहणस्य प्रपञ्चः। तथा च ग्रामनिर्गतः, अधर्मजुगुप्सुरित्येवमादि सिध्दं भवति।।

<अपेतापोढमुक्तपतितापत्रस्तैरल्पशः ।2।1।38।>

अपेत, अपोढ, मुक्त, पतित, अपत्रस्त--इत्येतैः सह पञ्चम्यन्तं समस्यते, तप्तुरुषश्च समासो भवति। अपेत--सुखापेतः। अपोढकल्पनापोढः। मुक्त--चक्रमुक्तः। पतित--स्वर्गपतितः। अपत्रस्त-तरङ्गापत्रस्तः।`अल्पशः' इति समासस्याल्पविषयतामाचष्टे। अल्पा पञ्चमी समस्यते, न सर्वा। प्रासादात्पतितः, भोजनादपत्रस्तः-इत्येवमादौ न भवति। "कर्तृकरणे कृता बहुलम्"(2.1.32/694) इत्यस्यैवायं प्रपञ्चः।।

<स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ।2।1।39।>

स्तोक, अन्तिक, दूर-इत्येवमर्थाः शब्दाः कृच्छ्रशब्दश्च पञ्चम्यन्ताः क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। स्तोक-स्तोकान्मुक्तः। अन्तिक-अन्तिकादागतः। अभ्याशादागतः। दूरदागतः। विप्रकृष्टादागतः। कृच्छ्रान्मुक्तः। कृच्छ्राल्लब्दः। "पञ्चम्याः स्तोकादिभ्यः"(6.3.2/959) इत्यलुक्।। * शतसहस्त्रौ परेणेति वक्तव्यम् *। शतात्परे परश्शताः। सहस्त्रात्परे परस्सहस्राः। "राजदन्तादित्वात्"(2.2.31/902)परनिपातः, निपातनात्सुडागमः।।

<सप्तमी शौण्डैः ।2।1।40।>

सप्तम्यन्तं शौण्डादिभिः सह समस्यते, तत्पुरुषश्च समासो भवति। अक्षेषु शौण्डः अक्षशौण्डः। अक्षधूर्त्तः। अक्षकितवः। शौण्ड। धूर्त्त। कितव। व्याह। प्रवीण। संवीत। अन्तर्। अन्तःशब्दस्त्वत्राधिकरणप्रधान एव पठ्यते। अधिपटु। पण्डित। कुशल। चपल। निपुण। वृत्तौ प्रसक्तिक्रियाया अन्तर्भावादक्षादिषु अधिकरणे सप्तमी।।

<सिध्दशुष्कपक्वबन्धैश्च ।2।1।41।>

`सप्तमी' इति वर्तते। सिद्ध, शुष्क, पक्व, बन्ध-इत्येतैः सह सप्तम्यन्तं समस्यते, तत्पुरुषश्च समासो भवति। सांकाश्यसिद्धः। काम्पिल्यसिद्धः। शुष्क--आतपशुष्कः। छायाशुष्कः। पक्व--स्थालीपक्वः। कुम्भीपक्वः। बन्ध--चक्रबन्धः। बहुलग्रहणस्यैवायमुदाहरणप्रपञ्चः।।

<ध्वाङ्क्षेण क्षेपे ।2।1।42।>

`ध्वाङ्क्षेण' इत्यर्थग्रहणम्। ध्वाङ्क्षवाचिना सह सप्तम्यन्तं सुबन्तं समस्यते, तत्पुरुषश्च समासो भवति, क्षेपे गम्यमाने। तीर्थे ध्वाङ्क्ष इव तीर्थध्वाङ्क्षः। अनवस्थित इत्यर्थः। तीर्थकाकः। तीर्थवायसः। क्षेप इति ? तीर्थे ध्वाङ्क्षस्तिष्ठाति।।

<कृत्यैर्ऋणे ।2।1।43।>

`सप्तमी' इति वर्तते। कृत्यप्रत्ययान्तैः सह सप्तम्यन्तं समस्यते, तत्परुषश्च समासो भवति, ऋणे गम्यमाने। यत्प्रत्ययेनैवेष्यते। मासे देयमृणं मासदेयम्। संवत्सरदेयम्। त्र्यहदेयम्। ऋणग्रहणं नियोगोपलक्षणार्थम्, तेनेहापि समासो भवति-- पूर्वाह्णगेयं साम। प्रातरध्येयोऽनुवाकः। ऋण इति किम्? मासे देया भिक्षा।।

<संज्ञायाम् ।2।1।44।>

संज्ञायां विषये सप्तम्यन्तं सुपा सह समस्यते, तत्पुरुषश्च समासो भवति। संज्ञा = समुदायोपाधिः। तेन नित्यसमास एवायम्, न हि वाक्येन संज्ञा गम्यते। अरण्येतिलकाः। अरण्ये माषाः। वने किमशुकाः। वने बिल्वकाः। कूपेपिशाचकाः। "हलदन्तात्सप्तम्याः संज्ञायाम्"(6.3.9/966) इत्यलुक्।।

<क्तेनाहोरात्रावयवाः ।2।1।45।>

अहरवयवाः, रात्र्यवयवाश्च सप्तम्यन्ताः क्तान्तेन सह समस्यन्ते, तत्पुरुषश्च समासो भवति। पूर्वाह्णकृतम्। अपराह्णकृतम्। पूर्वरात्रकृतम्। अपररात्रकृतम्। अवयवग्रहणं किम् ? एतत्तु ते दिवा वृत्तं रात्रौ वृत्तम्। "बहुल"(2.1.32/694)ग्रहणाद् रात्रिवृत्तम्, संध्यागर्जितमित्यादयः।।

< तत्र ।2।1।46।>

`तत्र' इत्येतत् सप्तम्यन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। तत्रभुक्तम्। तत्रकृतम्। तत्रपीतम्। ऐकपद्यमैकस्वर्यं च समासत्वाद्भवति।।

<क्षेपे ।2।1।47।>

क्षेपः = इत्येतत् सप्तम्यन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। `अवतप्तेनकुलस्थितं तवैतत्'(म.भा.1.391)। चापलमेतत्, अनवस्थितत्वं तवैतदित्यर्थः। उदकेविशीर्णम्। प्रवाहेमूत्रितम्। भस्मनिहुतम्। निष्फलं यत्क्रियते तदेवमुच्यते। "तत्पुरुषे कृति बहुलम्"(6.3.14/972) इत्यलुक्।।

<पात्रेसमितादयश्च ।2।1।48।>

समुदाया एव निपात्यन्ते। पात्रेसमितादयः शब्दास्तत्पुरुषसंज्ञा भवन्ति, क्षेपे गम्यमाने। ये चात्र क्तान्तेन सह समासास्तेषां पूर्वेणैव सिद्धे पुनः पाठो युक्तारोह्यादिपरिग्रहार्थः--पूर्वपदाद्युदात्तत्वं यथा स्यादिति। युक्तारोह्यादिषु हि पात्रेसमितादयश्चेति पठ्यन्ते। पात्रेसमिताः। पात्रेबहुलाः। अवधारणेन क्षेपो गम्यते-पात्र एव समिता न पुनः क्वचित्कार्य इति। उदुम्बरमशकादिषु उपमया क्षेपः। मातरिपुरुष इति प्रतिषिद्धसेवनेन। पिण्डीशूरादिषु निरीहतया। अव्यक्तत्वाच्चाकृतिगणोऽयम्। पात्रेसमिताः। पात्रेबहुलाः। उदरक्रिमिः। कूपकच्छपः। कूपचूर्णकः। अवटकच्छपः। कूपमण्डूकः। कुम्भमण्डूकः। उदपानमण्डूकः। नगरकाकः। नगरवायसः। मातरिपुरुषः। पिण्डीशूरः। गेहेशूरः। गेहेनर्दी। गेहेक्ष्वेडी। गेहेविजिती। गेहेव्याडः। गेहेदृप्तः। गेहेधृष्टः। गर्भेतृप्तः। आखनिकबकः। गोष्ठेशूरः। गोष्ठेविजिती। गोष्ठेक्ष्वेडी। गोष्ठेपटुः। गोष्ठेपण्डितः। गोष्ठेप्रगल्भः। कर्णेटिट्टिभः। कर्णेटिरिटिरा। कर्णेचुरचुरा। चकारोऽवधारणार्थः, तेन समासान्तरं न भवति--परमपात्रेसमिता इति।

<पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ।2।1।49।>

`सुप्' `सुपा' इति वर्त्तते, तस्य विशेषणमेतत्। पूर्वकाल, एक, सर्व, जरत्, पुराण, नव, केवल-इत्येते सुबन्ताः समानाधिकरणेन सुपा सह समस्यन्ते, तत्पुरुषश्च समासो भवति। भिन्नप्रवृत्तिनिमित्तस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः = सामानाधिकरण्यम्। `पूर्वकाल' इत्यर्थनिर्देशः, परिशिष्टानां स्वरूपग्रहणम्। पूर्वकालोऽपरकालेन समस्यते। स्नातानुलिप्तः। कृष्टसमीकृतम्। दग्धप्ररूढम्। एकशाटी। एकभिक्षा। सर्वदेवाः। सर्वमनुष्याः। जरद्धस्ती। जरद्गृष्टिः। जरद्वृत्तिः। पुराणान्नम्। पुराणावसथम्। नवान्नम्। नवावसथम्। केवलान्नम्। समानाधिकरणेनेति किम् ? शाटी।

<दिक्संख्ये संज्ञायाम् ।2।1।50।>

`समानाधिकरणेन' इत्यापादसमाप्तेरनुवर्तते। दिग्वाचिनः शब्दाः संख्या च समानाधिकरणेन सुबन्तेन सह समस्यन्ते, तत्पुरुषश्च समासो भवति, संज्ञायां विषये।पूर्वेषुकामशमी। अपरेषुकामशमी। संख्या-पञ्चाम्राः। सप्तर्षयः। संज्ञायामिति किम् ? उत्तरा वृक्षाः। पञ्च ब्राह्मणाः।।

<तध्दितार्थोत्तरपदसमाहारे च ।2।1।51।>

`दिक्संख्ये' इत्यनुवर्त्तते। तध्दितार्थे विषये उत्तरपदे च परतः समाहारे चाभिधेये दिक्संख्ये समानाधिकरणेन सुपा सह समस्यते, तत्पुरुषश्च समासो भवति।तद्धितार्थे तावत्-पूर्वस्यां शालायां भवः। "दिक्पूर्वपदादसंज्ञायां ञः"(4.2.107/1328), पौर्वशालः, आपरशालः। उत्तरपदे-पूर्वशालाप्रियः, अपरशालाप्रियः। समाहारे दिक्शब्दो न सम्भवति। सङ्ख्या, तद्धितार्थे-पाञ्चनापितिः। पञ्चकपालः। उत्तरपदे-पञ्चगवधनः, दशगवधनः। समाहारे-पञ्चपूली, दशपूली। पञ्चकुमारि, दशकुमारि। "स नपुंसकम्"(2.4.17/821) इति नपुंसकत्वम्, "ह्रस्वो नपुंसके प्रातिपदिकस्य"(1.2.47/318) इति ह्रस्वत्वम्।।

<सङ्ख्यापूर्वो द्विगुः ।2।1।52।>

"तध्दितार्थोत्तरपदसमाहारे च"(2.1.51/728) इत्यत्र यः सङ्ख्यापूर्वः समासः स द्विगुसंज्ञो भवति। तद्धितार्थे तावत्-पञ्चसु कपालेषु संस्कृतः पञ्चकपालः, दशकपालः। "संस्कृतं भक्षाः"(4.2.16/1217) इतहाण्, तस्य "द्विगोर्लुगनपत्ये"(4.1.88/1080) इति लुक्। उत्तरपदे-पञ्चनावप्रियः। "नावो द्विगोः"(5.4.99/801) इति समासान्तो भवति। समाहारे-पञ्चमूली। "द्विगोः"(4.1.21/479) इति ङीब् भवति। द्विगुप्रदेशाः - "द्विगोः"(4.1.21/479) इत्येवमादयः ।।

<कुत्सितानि कुत्सनैः ।2।1।53।>

कुत्सितवाचीनि सुबन्तानि कुत्सनवचनैः सुबन्तैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति। शब्दप्रवृत्तिनिमित्तकुत्सायामयं समास इष्यते। "विशेषणं विशेष्येण"(2.1.57/736) इति परनिपाते प्राप्ते विशेष्यस्य पूर्वनिपातार्थ आरम्भः। वैयाकरणखसूचिः। निष्प्रतिभ इत्यर्थः। याज्ञिककितवः। अयाज्ययाजनतृष्णापर उच्यते। मीमांसकदुर्दुरुढः। नास्तिकः। कुत्सितानीति किम् ? वैयाकरणश्चौरः। न ह्यत्र वैयाकरणत्वं कुत्स्यते। कुत्सनैरिति किम् ? कुत्सितो ब्राह्मणः।

<पापाणके कुत्सितैः ।2।1।54।>

पापाणकशब्दौ कुत्सनाभिधायिनौ, तयोः पूर्वेण समासे परनिपातः प्राप्तः, पूर्वनिपातार्थमिदमारभ्यते। पाप, अणक-एते सुबन्ते कुत्सितवचनैः सह समस्येते, तत्पुरुषश्च समासो भवति। पापनापितः, पापकुलालः। अणकनापितः, अणककुलालः।।

<उपमानानि सामान्यवचनैः ।2।1।55।>

उपमीयतेऽनेनेत्युपमानम्। उपमानवाचीनि सुबन्तानि सामान्यवचनैः सुबन्तैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति। उपमानोपमेययोः साधारणो धर्मः = सामान्यम्, तद्विशिष्टोपमेयवचनैरयं समासः। शस्त्रीव श्यामा शस्त्रीश्यामा देवदत्ता(म.भा.1.392)। कुमुदश्येनी। हंसगद्गदा। न्यग्रोधपरिमण्डला। उपमानानीति किम् ? देवदत्ता श्यामा। सामान्यवचनैरिति किम् ? फाला इव तण्डुलाः। पर्वता इव बलाहकाः।।

<उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ।2।1।56।>

उपमेयम् = उपमितम्, तद्वाचि सुबन्तं व्याघ्रादिभिः सामर्थ्यादुपमानवचनैः सह समस्यते, तत्पुरुषश्च समासो भवति, न चेत्सामान्यवचनः शब्दः प्रयुज्यते। "विशेषणं विशेष्येण"(2.1.57/736) इति परनिपाते प्राप्ते विशेष्यस्य पूर्वनिपातार्थ आरम्भः। पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः। पुरुषसिंहः। सामान्याप्रयोग इति किम्? पुरुषोऽयं व्याघ्र इव शूरः। व्याघ्र। सिंह। ऋक्ष। ऋषभ। चन्दन। वृक्ष। वृष। वराह। हस्तिन्। कुञ्जर। रुरु। पृषत। पुण्डरीक। बलाहक। आकृतिगणश्चायम्। तेनेदमपि भवति-मुखपद्मम्, मुखकमलम्, करकिसलयम्, पार्थिवचन्द्रः इत्येवमादि।।

<विशेषणं विशेष्येण बहुलम् ।2।1।57। >

भेदकम् = विशेषणम्,भेद्यम् = विशेष्यम्। विशेषणवाचि सुबन्तं विशेष्यवाचिना समानाधिकरणेन सुबन्तेन सह बहुलं समस्यते, तत्पुरुषश्च समासो भवति। नीलोत्पलम्। रक्तोत्पलम्। बहुलवचनं व्यवस्थार्थम्। क्वचिन्नित्यसमास एव-कृष्णसर्पः, लोहितशालिः। क्वचिन्न भवत्येव-रामो जामदग्न्यः, अर्जुनः कार्तवीर्यः। क्वचिद्विकल्पः-नीलमुत्पलम्। विशेषणमिति किम् ? तक्षकः सर्पः। विशेष्येणेति किम् ? लोहितस्तक्षकः।।

<पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ।2।1।58।>

पूर्व, अपर, प्रथम, चरम, जघन्य, समान, मध्य, मध्यम, वीर इत्येते सुबन्ताः समानाधिकरणेन सुपा सह समस्यन्ते, तत्पुरुषश्च समासो भवति। पूर्वपुरुषः। अपरपुरुषः। प्रथमपुरुषः। चरमपुरुषः। जघन्यपुरुषः। समानपुरुषः। मध्यमपुरुषः। वीरपुरुषः। पूर्वस्यैवायं प्रपञ्चः।

<श्रेण्यादयः कृतादिभिः ।2।1।59।>

श्रेण्यादयः सुबन्ताः कृतादिभिः समानाधिकरणैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति। * श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यम् *(म.भा.1.400)। अश्रेणयः श्रेणयः कृताः श्रेणिकृताः। एककृताः। श्रेण्यादयः पठ्यन्ते। कृतादिराकृतिगणः। च्व्यन्तानां तु "कुगतिप्रादयः"(2.2.18/761) इत्यनेन नित्यसमासः। श्रेणीकृताः। श्रेणि। एक। पूग। कुण्ड। राशि। विशिक। निचय। निधान। इन्द्र। देव। मुण्ड। भूत। श्रवण। वदान्य। अध्यापक। ब्राह्मण। क्षत्रिय। पटु। पण्डित। कुशल। चपल। निपुण। कृपण। इति श्रेण्यादिः।। कृत। मित। मत। भूत। उक्त। समाज्ञात। समाम्नात। समाख्यात। सम्भावित। अवधारित। निराकृत। अवकल्पित। उपकृत। उपाकृत। इति कृतादिः।।

<क्तेन नञ्विशिष्टेनानञ् ।2।1।60।>

नञैव विशेषे यस्य सर्वमन्यत्प्रकृत्यादिकं तुल्यं तन्नञ्विशिष्टम्, तेन नञ्विशिष्टेन क्तान्तेन समानाधिकरणेन सह अनञ् क्तान्तं समस्यते, तत्पुरुषश्च समासो भवति। कृतं च तदकृतं च कृताकृतम्। भुक्ताभुक्तम्। पीतापीतम्। उदितानुदितम्। नुडिटौ तद्भक्तत्वान्नैव भेदकौ। अशितानशितेन जीवति। क्लिष्टाक्लिशितेन वर्त्तते। * कृतापकृतादीनामुपसंख्यानम् *(म.भा.1.401)। कृतापकृतम्। भुक्तविभुक्तम्। पीतविपीतम्। गतप्रत्यागतम्। यातानुयातम्। क्रयाक्रयिका। पुटापुटिका। फलाफलिका। मानोन्मानिका।। * समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसङ्ख्यानमुत्तरपदलोपश्च * । शाकप्रधानः पार्थिवः शाकपार्थिवः। कुतपसौश्रुतः। अजातौल्वलिः।।

<सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ।2।1।61।>

सत्, महत्, परम, उत्तम, उत्कृष्ट-इत्येते पूज्यमानैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति। `पुज्यमानैः' इति वचनात् पूजावचनाः सदादयो विज्ञायन्ते। सत्पुरुषः। महापुरुषः। परमपुरुषः। उत्तमपुरुषः। ऊत्कृष्टपुरुषः। पुज्यमानैरिति किम् ? उत्कृष्टा गौः कर्दमात्।।

<वृन्दारकनागकुञ्जरैः पुज्यमानम् ।2।1।62।>

वृन्दारक, नाग, कुञ्जर-इत्येतैः सह पूज्यमानवाचि सुबन्तं समस्यते, तत्पुरुषश्च समासो भवति। `पूज्यमानम्' इति वचनाद् वृन्दारकादयः पूजावचना गृह्यन्ते।गोवृन्दारकः, अश्ववृन्दारकः। गोनागः, अश्वनागः। गोकुञ्जरः, अश्वकुञ्जरः। पूज्यमानमिति किम् ? सुषीमो नागः।।

<कतरकतमौ जातिपरिप्रश्ने ।2।1।63।>

कतरकतमौ जातिपरिप्रश्ने वर्तमानौ समर्थेन सुपा सह समस्येते, तत्पुरुषश्च समासो भवति। कतरकठः। कतरकालापः। कतमकठः। कतमकालापः। ननु कतमशब्दस्तावज्जातिपरिप्रश्न एव व्युत्पादितः, कतरशब्दोऽपि साहचर्यात्तदर्थवृत्तिरेव ग्रहीष्यते, किं जातिपरिप्रश्नग्रहणेन ? एवं तर्ह्येतज्ज्ञापयति-कतमशब्दोऽन्यत्रापि वर्त्तत इति। तथा च प्रत्युदाहरणम्-कतरो भवतोर्दवदत्तः। कतमो भवतां देवदत्तः।।

<किं क्षेपे ।2।1।64।>

`किम्' इत्येतत् क्षेपे गम्यमाने सुपा सह समस्यते, तत्पुरुषश्च समासो भवति। किंराजा, यो न रक्षति। किंसखा, योऽभिद्रुह्यति। किंगौः, यो न वहति। "किमःक्षेपे"(5.4.70/955) इति समासान्तो न भवति। क्षेपे इति किम् ? को राजा पाटलिपुत्रे।।

<पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ।2।1।65।>

उभयव्यञ्जना `पोटा' इत्यभिधीयते। गृष्टिः = एकवारप्रसूता। धेनुः =प्रत्यग्रप्रसूता। वशा, वन्ध्या। वेहद् = गर्भपातिनी। बष्कयणी = तरुणवत्सा। पोटादिभिः सह जातिवाचि सुबन्तं समस्यते, तत्पुरुषश्च समासो भवति। इभपोटा। इभयुवतिः। अग्निस्तोकः। उदश्वित्कतिपयम्। गोगृष्टिः। गोधेनुः। गोवशा। गोवेहत्। गोबष्कयणी। कठप्रवक्ता। कठश्रोत्रियः। कठाध्यापकः। कठधूर्त्तः। जातिरिति किम् ? देवदत्तः प्रवक्ता। धूर्त्तग्रहणमकुत्सार्थम्।।

<प्रशंसावचनैश्च ।2।1।66।>

`जातिः' इति वर्त्तते। जातिवाचि सुबन्तं प्रशंसावचनैः सह समस्यते, तत्परुषश्च समासो भवति। रूढिशब्दाः प्रशंसावचना गृह्यन्ते मतल्लिकादयः, ते चाविष्टलिङ्गत्वादन्यलिङ्गेऽपि जातिशब्दे स्वलिङ्गोपादाना एव समानाधिकरणा भवन्ति। गोप्रकाण्डम्। अश्वप्रकाण्डम्। गोमतल्लिका। अश्वमतल्लिका। गोमचर्चिका। अश्वमचर्चिका। जातिरिति किम् ? कुमारी मतल्लिका।।

<युवा खलतिपलितवलिनजरतीभिः ।2।1।67।>

खलत्यादिभिः समानाधिकरणैः सह युवशब्दः समस्यते, तत्पुरुषश्च समासो भवति। `जरतीभिः' इति स्त्रीलिङ्गेन निर्देशः `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'(व्या.प.25) इति ज्ञापनार्थः। युवा खलतिः युवखलतिः। युवतिः खलती युवखलती। युवा पलितः युवपलितः। युवतिः पलिता युवपलिता। युवा वलिनः युववलिनः। युवतिर्वलिना युववलिना। युवा जरन् युवजरन्। युवतिर्जरती युवजरती।।

<कृत्यतुल्याख्या अजात्या ।2।1।68।>

कृत्यप्रत्ययान्तास्तुल्यपर्यायाश्च सुबन्ता अजातिवचनेन समस्यन्ते,तत्पुरुषश्च समासो भवति। भोज्योष्णम्। भोज्यलवणम्। पानीयशीतम्। तुल्याख्याः -- तुल्यश्वेतः तुल्यमहान्। सदृशश्वेतः। सदृशमहान्। अजात्येति किम् ? भोज्य ओदनः।।

<वर्णो वर्णेन ।2।1।69। >

वर्णविशेषवाचि सुबन्तं वर्णविशेषवाचिना सुबन्तेन समानाधिकरणेन सह समस्यते, तत्पुरुषश्च समासो भवति। कृष्णसारङ्गः। लोहितसारङ्गः। कृष्णशबलः। लोहितशबलः। अवयवद्वारेण कृष्णशब्दः समुदाये वर्त्तमानः समानाधिकरणो भवति।।

<कुमारः श्रमणादिभिः ।2।1।70।>

कुमारशब्दः श्रमणादिभिः सह समस्यते, तत्पुरुषश्च समासो भवति। येऽत्र स्त्रीलिङ्गाः पठ्यन्ते-श्रमणा प्रव्रजिता कुलटेत्येवमादयस्तैः सह स्त्रीलिङ्ग एव कुमारशब्दः समस्यते। ये तु पुँल्लिङ्गा अध्यापकोऽभिरूपकः पण्डितः इति, तैरुभयथा;`प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'(व्या.प.25)इति। कुमारी श्रमणा कुमारश्रमणा। श्रमणा। प्रव्रजिता। कुलटा। गर्भिणी। तापसी। दासी। बन्धकी। अध्यापक। अभिरूपक। पण्डित। पटु। मृदु। कुशल। चपल। निपुण।।

<चतुष्पादो गर्भिण्या ।2।1।71।>

चतुष्पाद्वाचिनः सुबन्ता गर्भिणीशब्देन समस्यन्ते, तत्पुरुषश्च समासो भवति। गोगर्भिणी। अजागर्भणी।। * चतुष्पाज्जतिरिति वक्तव्यम् *(म.भा.1.406)। इह मा भूत्-कालाक्षी गर्भिणी। स्वस्तिमती गर्भिणी। चतुष्पाद इति किम् ? ब्राह्मणी गर्भिणी।।

<मयूरव्यंसकादश्च ।2।1।72।>

समुदाया एव निपात्यन्ते। मयूरव्यंसकादयः शब्दास्तत्पुरुषसंज्ञा भवन्ति। चकारोऽवधारणार्थः, परममयूरव्यंसक इति समासान्तरं न भवति। मयूरव्यंसकः। छात्रव्यंसकः। काम्बोजमुण्डः। यवनमुण्डः। छन्दसि-हस्तेगृह्य। पादेगृह्य। लाङ्गलेगृह्य। पुनर्दाय।। `एहीडादयोऽन्यपदार्थे'(ग.सू.18)। एहीडम्, एहियवं वर्त्तते। एहिवाणिजा क्रिया। अपेहिवाणिजा, प्रेहिवाणिजा। एहिस्वागता, अपेहिस्वागता, प्रेहिस्वागता। एहिद्वितीया, अपेहिद्वितीया। इहवितर्का। प्रोहकटा, अपोहकटा। प्रोहकर्दमा, अपोहकर्दमा। उद्धरचूडा। आहरचेला। आहरवसना। आहरवनिता। कृन्तविक्षणा। उद्धरोत्सृजा। उद्धमविधमा। उत्पचविपचा। उत्पतनिपता। उच्चावचम्। उञ्चनीचम्। अचितोपचितम्। अवचितपराचितम्। निश्चप्रचम्। अकिञ्चनम्। स्नात्वाकालकः। पीत्वास्थिरकः। भुक्त्वासुहितः। प्रोष्यपापीयान्। उत्पत्यपाकला। निपत्यरोहिणी। निषण्णश्यामा। अपेहिप्रसवा। इहपञ्चमी। इहद्वितीया। `जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाति'(ग.सू.19)। जहिजोडः। उज्जहिजोडः। जहिस्तम्बः। उज्जहिस्तम्बः। `आख्यातमाख्यातेन क्रियासातत्ये'(ग.सू.20)। अश्नीतपिवता। पचतभृज्जता। खादतमोदता। खादतचमता। आहरनिवपा। आवपनिष्किरा। उत्पचविपचा। भिन्धिलवणा। छिन्धिविचक्षणा। पचलवणा। पचप्रकूटा। अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः।

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ द्वितीयाध्यायस्य प्रथमः पादः।।

2.2

अथ द्वितीयाध्याये द्वितीयः पादः

<पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ।। 2-2-1 ।। >

एकदेशोऽस्यास्तीत्येकदेशी = अवयवी, तद्वाचिना सुबन्तेन सह पूर्व, अपर, अधर, उत्तरशब्दाः सामर्थ्यादेकदेशवचनाः समस्यन्ते, तत्पुरुषश्च समासो भवति। एकाधिकरणग्रहणमेकदेशिनो विशेषणम्। एकं चेदधिकरणमेकद्रव्यमेकदेशि भवति। षष्ठीसमासापवादोऽयं योगः। पूर्वं कायस्य पूर्वकायः। अपरकायः। अधरकायः। उत्तरकायः। एकदेशिनेति किम् ? पूर्वं नाभेः कायस्य। एकाधिकरण इति किम् ? पूर्वं छात्राणामामन्त्रय। कथं मध्याह्नः, सायाह्न इति? "संख्याविसायपूर्वस्याह्नस्य"(6.3.110/238) इति ज्ञापकात्सर्वैणैकदेशशब्देनाह्नः समासो भवति।

<अर्द्धं नपुंसकम् ।। 2-2-2 ।।>

\`एकदेशिनैकाधिकरणे' इति वर्त्तते। समप्रविभागेऽर्धशब्दो नपुंसकमाविष्टलिङ्गः, तस्येदं ग्रहणम्। \`अर्द्धम्' इत्येतद् नपुंसकमेकदेशिनैकाधिकरणेन समस्यते, तत्पुरुषश्च समासो भवति। षष्ठीसमासापवादोऽयं योगः। अर्द्धं पिप्पल्याः अर्द्धपिप्पली। अर्द्धकोशातकी। नपुंसकमिति किम् ? ग्रामार्द्धः। नगरार्द्धः। एकदेशिनेत्येव-अर्द्धं पशोर्देवदत्तस्य। देवदत्तेन सह समासो न भवति। \`एकाधिकरणे' इत्येव--अर्द्धं पिप्पलीनाम्।।

<द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् ।। 2-2-3 ।।>

\`एकदेशिनैकाधिकरणे'इति वर्तते। षष्ठीसमासापवादोऽयं योगः। अन्यतरस्याङ्ग्रहणात् सोऽपि षष्ठीसमासो भवति। \`पूरणगूण' इति प्रतिषेधश्चात एवान्यतरस्याङ्ग्रहणसामर्थ्यान्न प्रवर्त्तते। द्वितीयादीनि शब्दरूपाणि एकदेशिनैकाधिकरणेन सहान्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति। द्वितीयं भिक्षायाः द्वितीयभिक्षा। षष्ठीसमासपक्षेभिक्षाद्वितीयं वा। तृतीयं भिक्षायाः तृतीयभिक्षा। भिक्षातृतीयं वा। चतुर्थं भिक्षायाः चतिर्थभिक्षा। भिक्षाचतुर्थं वा। तुर्यं भिक्षायाः तुर्यभिक्षा। भिक्षातुर्यं वा। * तुरीयशब्दस्यापीष्यते *। तुरीयं भिक्षायाः तुरीयभिक्षा। भिक्षातुरीयं वा। एकदेशिनेत्येव--द्वितीयं भिक्षाया भिक्षुकस्य। एकाधिकरण इत्येव--द्वितीयं भिक्षाया भिक्षुकस्य। एकाधिकरण इत्येव--द्वितीयं भिक्षाणाम्।

<प्राप्तापन्ने च द्वितीयया ।। 2-2-4 ।।>

\`एकदेशिनैकाधिकरणे' इति निवृत्तम्। द्वितीयासमासे प्राप्ते वचनमिदम्। समासविधानात्सोऽपि भवति। प्राप्त, आपन्न-इत्येतौ द्वितीयान्तेन सह समस्येते, तत्पुरुषश्च समासो भवति। प्राप्तो जीविकाम् प्राप्तजीविकः, जीविकाप्राप्त इति वा। आपन्नो जीविकाम् आपन्नजीविकः, जीविकापन्न इति वा।

<कालाः परिमाणिना ।। 2-2-5 ।।>

परिमाणमस्यास्तीति परिमाणी, तद्वाचिना सुबन्तेन सह सामर्थ्यात्परिमाणवचनाः कालशब्दाः समस्यन्ते, तत्पुरुषश्च समासो भवति। षष्ठीसमासविषये योगारम्भः। मासो जातस्य मासजातः। संवत्सरजातः। द्व्यहजातः। त्र्यहजातः।।

<नञ् ।। 2-2-6 ।।>

नञ् समर्थेन सुबन्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। न ब्राह्मणः अब्राह्मणः। अवृषलः। * नञो नलोपस्तिङि क्षेपे *। अपचसि त्वं जाल्म।।

<ईषदकृता ।। 2-2-7 ।। >

\`ईषत्' इत्ययं शब्दोऽकृदन्तेन सुपा सह समस्यते, तत्पुरुषश्च समसो भवति। * ईषद् गुणवचनेनेति वक्तव्यम् *(म.भा.1.412)। ईषत्कडारः। ईषत्पिङ्गलः। ईषद्विकटः। ईषदुन्नतः। ईषत्पीतम्। ईषद्रक्तम्। गुणवचनेनेति किम् ? इह न भवति--ईषद् गार्ग्यः।।

<षष्ठी ।। 2-2-8 ।।>

षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। राज्ञः पुरषो राजपुरुषः। ब्राह्मणकम्बलः। * कृद्योगा च षष्ठी समस्यत इति वक्तव्यम् *(म.भा.1.412)। इध्मप्रव्रश्चनः। पलाशशातनः। किमर्थमिदमुच्यते ? \`प्रतिपदविधाना च षष्ठी न समस्यते' इति वक्ष्यति, तस्यायं पुरस्तादपकर्षः।।

<याजकादिभिश्च ।। 2-2-9 ।।>

पूर्वेण समासः सिद्ध एव तस्य "कर्तरि च"(2.2.16/710) इति प्रतिषेधे प्राप्ते वचनमिदमारभ्यते प्रतिप्रसवार्थम्। याजकादिभिः सह षष्ठी समस्यते, तत्पुरुषश्च समासो भवति। ब्राह्मणयाजकः। क्षत्रिययाजकः। यायक। पूजक। परिचारक। परिषेचक। स्नातक। अध्यापक। उत्सादक। उद्वर्त्तक। होतृ। पोतृ। भर्तृ। रथगणक। पत्तिगणक। * तत्स्थैश्च गुणैः षष्ठी समस्यत इति वक्तव्यम् *(म.भा.1.413)। चन्दनगन्धः। कपित्थरसः। * गुणात्तरेण

तरलोपश्चति वक्तव्यम् *। सर्वेषां श्वेततरः सर्वश्वेतः, सर्वेषां महत्तरः सर्वमहान्, "न निर्धारणे"(2.2.10/704) इति प्रतिषेधे प्राप्ते वचनमिदम्। सर्वशुक्ला गौः।।

<न निर्धारणे ।। 2-2-10 ।।>

पूर्वेण समासे प्राप्ते प्रतिषेध आरभ्यते। निर्धारणे या षष्ठी सा न समस्यते। जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम्। क्षत्रियो मनुष्याणां शूरतमः। कृष्णा गवां सम्पन्नक्षीरतमा। धावन्नध्वगानां शीघ्रतमः। * प्रतिपदविधाना च
षष्ठी न समस्यत इति वक्तव्यम् *(म.भा.1.413)। सर्पिषो ज्ञानम्। मधुनो ज्ञानम्।।

<पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन ।। 2-2-11 ।।>

पूरण, गुण, सुहितार्थ, सद्, अव्यय, तव्य, समानाधिकरण--इत्येतैः सह षष्ठी न समस्यते। अर्थशब्दः प्रत्येकमभिसम्बध्यते, तेन स्वरूपविधिर्न भवति। पूरणार्थे-छात्राणां पञ्चमः। छात्राणां दशमः। गुण-बलाकायाः शौक्ल्यम्। काकस्य कार्ष्ण्यम्। सुहितार्थः = तृप्त्यर्थः। फलानां सुहितः। फलानां तृप्तः। सत्-ब्राह्मणस्य कुर्वन्। ब्राह्मणस्य कुर्वाणः। अव्यय--ब्राह्मणस्य कृत्वा। ब्राह्मणस्य हृत्वा। तव्य - ब्राह्मणस्य कर्तव्यम्। तव्यता सानुबन्धकेन समासो भवत्येव--ब्राह्मणकर्त्तव्यम्। समानाधिकरण--शुकस्य माराविदस्य, राज्ञः पाटलिपुत्रकस्य, पाणिनेः सूत्रकारस्य। किं च स्यात् ? पूर्वनिपातस्यानियमः स्यात्। अनन्तरायां तु प्राप्तौ प्रतिषिद्धायां "विशेषणं विशेष्येण"(2.1.57/736) इति भवत्येव समासः। पूर्वनिपातश्च तदा नियोगतो विशेषणस्यैव।।

<क्तेन च पूजायाम् ।। 2-2-12 ।। >

"मतिबुद्धिपूजार्थेभ्यश्च"(3.2.188/3089) इति वक्ष्यति, तस्येदं ग्रहणम्। पूजाग्रहणमुपलक्षणार्थम्। क्तो यः पूजायां विहितस्तेन षष्ठी न समस्ते। राज्ञां मतः। राज्ञां बुद्धः। राज्ञां पूजितः। पूजायामिति किम् ? छात्रस्य हसितं छात्रहसितम्।।

<अधिकरणवाचिना च ।। 2-2-13 ।।>

"क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः"(3.4.76/3087) इति वक्ष्यति, तस्येदं ग्रहणम्। अधिकरणवाचिना क्तेन षष्ठी न समस्यते।
इदमेषामासितम्। इदमेषां यातम्। इदमेषां भुक्तम्।।

<कर्मणि च ।। 2-2-14 ।। >

`क्तेन' इति निवृत्तम्। कर्मग्रहणं षष्ठीविशेषणम्। कर्मणि च या षष्ठी सा न समस्यते। "उभयप्राप्तौ कर्मणि"(2.3.66/624) इति षष्ठ्या इदं ग्रहणम्। आश्चर्यो गवां दोहोऽगोपालकेन। रोचते ओदनस्य भोजनं देवदत्तेन। साधु खलु पयसः पानं देवदत्तेन। विचित्रा सूत्रस्य कृतिः पाणिनिना।।

<तृजकारभ्यां कर्तरि ।। 2-2-15 ।।>

कर्तृग्रहणं षष्ठीविशेषणम्। कर्त्तरि या षष्ठी सा तृचा अकेन च सह न समस्यते। भवतः शायिका। भवत आसिका। भवतोऽग्रगामिका। तृच् कर्त्तर्येव
विधीयते तत्प्रयोगे कर्तरि षष्ठी नास्ति। तस्मात्तृज्ग्रहणमुत्तरार्थम्। कर्तरीति किम् ? इक्षुभक्षिकां मे धारयसि।।

<कर्त्तरि च।। 2-2-16 ।।>

कर्त्तरि च यौ तृजकौ ताभ्यां सह षष्ठी न समस्यते। सामर्थ्यादकस्य विशेषणार्थं कर्तृग्रहणमितरत्र व्यभिचाराभावात्। अपां स्रष्टा। पुरां भेत्ता। वज्रस्य भर्त्ता। ननु च भर्तृशब्दो ह्ययं याजकादिषु पठ्यते ? संबन्धिशब्दस्य पतिपर्यायस्य तत्र ग्रहणम्। अकः खल्वपि ओदनस्य भोजकः। सक्तूनां पायकः।।

<नित्यं क्रीडाजीविकयोः ।। 2-2-17 ।।>

`न' इति निवृत्तम्, न तृजकौ। नित्यं समासो विधीयते। क्रीडायां जीविकायां च नित्यं षष्ठी समस्यते, तत्पुरुषश्च समसो भवति। तृच्
क्रीडाजीविकयोर्नास्तीत्यक एवोदाह्रियते--उद्दालकपुष्पभञ्जिका। वारणपुष्पचायिका। जीविकायाम्- दन्तलेखकः, नखलेखकः। क्रीडाजीविकयोरिति किम् ? ओदनस्य भजकः।।

<कुगतिप्रादयः ।। 2-2-18 ।।>

`नित्यम्' इति वर्त्तते। कुशब्दोऽव्ययं परिगृह्यते, गत्यादिभिः साहचर्यात्, न द्रव्यवचनः। कुगतिप्रादयः समर्थेन शब्दान्तरेण सह नित्यं समस्यन्ते, तत्पुरुषश्च समासो भवति। कुः पापार्थे-कुपुरुषः। गति-उररीकृतम्, यदूरीकरोति। प्रादयः--दुर्निन्दायाम्, दुष्पुरुषः। स्वती पूजायाम्, सुपुरुषः, अतिपुरुषः, आपिङ्गलः। प्रायिकं चैतदुपाधिवचनम्। अन्यत्रापि हि समासो दृश्यते। कोष्णम्, कवोष्णम्, कदुष्णम्, दुष्कृतम्। अतिस्तुतम्। आबद्धम् इति। * प्रदयो गताद्यर्थे प्रथमया *(म.भा.1.416)। प्रगत आचार्यः प्रायार्यः। प्रान्तेवासी। * अत्यादयः क्रान्ताद्यर्थे द्वितीयया *(म.भा.1.416)। अतिक्रान्तः खट्वाम् अतिखट्वः। अतिमालः। * अवादयः क्रुष्टाद्यर्थे तृतीयया *(म.भा.1.416)। अवक्रुष्टः कोकिलया अवकोकिलः। * पर्यादयोग्लानाद्यर्थे चतुर्थ्या *(म.भा.1.416)। परिग्लानोऽध्ययनाय पर्यध्ययनः। अलं कुमार्यै अलंकुमारिः। * निरादयः क्रान्ताद्यर्थे पञ्चम्या *()। निष्क्रान्तः कौशाम्ब्याः, निष्कौशाम्बिः। निर्वाराणसिः। * इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्*(म.भा.1.416)। वाससी इव। * प्रादिप्रसङ्गे कर्मप्रवचनीयानांं प्रतिषेधो वक्तव्यः *(म.भा.1.416)। वृक्षं प्रति विद्योतते विद्युत्। साधुर्देवदत्तो मातरं प्रति।।

<उपपदमतिङ् ।। 2-2-19 ।।>

`नित्यम्' इति वर्तते। उपपदमतिङन्तं समर्थेन शब्दान्तरेण सह समस्यते नित्यम्, तत्पुरुषश्च समासो भवति। कुम्भकारः। नगरकारः। अतिङिति किम् ?

एधानाहारको व्रजति। ननु च `सुप् सुपा' इति वर्त्तते, तत्र कुतस्तिङन्तेन सह समासप्रसङ्गः ? एतज्ज्ञापयति--`एतयोर्योगयोः सुप् सुपेति न संबध्यते'इति। तेन `गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः'(व्या.प.138) इत्येतदुपपन्नं भवति। अश्वक्रीती। धनक्रीती।।

<अमैवाव्ययेन ।। 2-2-20 ।।>

पूर्वेणैव समासे सिद्धे नियमार्थं वचनम्। अव्ययेनोपपदस्य यः समासः सोऽमैव भवति, नान्येन। स्वादुङ्कारं भुङ्क्ते। संपन्नङ्कारं भुङ्क्ते। लवणङ्कारं भुङ्क्ते। अमैवेति किम् ? "कालसमयवेलासु तुमुन्"(3.3.167/3179)- कालो भोक्तुम्। एवकारकरणमुपपदविशेषणार्थम्--अमैव यत्तुल्यविधानमुपपदं तस्य समासो यथा स्यात्, अमा चान्येन च यत्तुल्यविधानं तस्य मा भूत्-अग्रे भुक्त्वा, अग्रे भोजम्।।

<तृतीयाप्रभृतीन्यन्यतरस्याम् ।। 2-2-21 ।।>

`अमैव' इत्यनुवर्त्तते। "उपदंशस्तृतीयायाम्"(3.4.47/3368) इत्यतः प्रभृति यान्युपपदानि तान्यमैवाव्ययेन सहान्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति। उभयत्रविभाषेयम्। यदमैव तुल्यविधानमुपपदं तस्य प्राप्ते, यथा--"उपदंशस्तृतीयायाम्"(3.4.47/3368) इति। यत्पुनरमा चान्येन च तुल्यविधानं तस्याप्राप्ते, यथा--"अव्ययेऽ यथाभिप्रेताख्याने कृञः क्त्वाणमुलौ"(3.4.59/3381) इति, मूलकोपदंशं भुङ्क्ते, मूलकेनोपदंशं भुङ्क्ते। उच्चैः कारमाचष्टे। उच्चैः कारम्। अमैवेत्येव--"पर्याप्तिवचनेष्वलमर्थेषु"(3.4.66/3345), पर्याप्तो भोक्तुम्। प्रभुर्भोक्तुम्।।

<क्त्वा च ।। 2-2-22 ।।>

`अमैव' इति पूर्वयोगेऽनुवृत्तम्, तेनान्यत्र प्राप्नोतीति वचनमारभ्यते। क्त्वाप्रत्ययेन सह तृतीयाप्रभृतीन्युपपदानि अन्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति। उच्चैःकृत्य। उच्चैः कृत्वा। "अव्ययेऽयथाभिप्रेताख्याने"(3.4.59/3381) इति क्त्वाप्रत्ययः। समासपक्षे ल्यबेव। तृतीयाप्रभृतीनीत्येव--अलं कृत्वा। खलु कृत्वा।।

<शेषो बहुव्रीहिः ।। 2-2-23 ।। >

उपयुक्तादन्यः शेषः। शेषः समासो बहुव्रीहिसञ्ज्ञो भवति। कश्च शेषः ? यत्रान्यः समासो नोक्तः। वक्ष्यति--"अनेकमन्यपदार्थे"(2.2.24/830)। चित्रगुः। शबलगुः। कृष्णोत्तरासङ्गः। शेष इति किम् ? उन्मत्तगङ्गम्, लोहितगङ्गम्। बहुव्रीहिप्रदेशाः--"न बहुव्रीहौ"(1.1.29/222) इत्येवमादः।।

<अनेकमन्यपदार्थे ।। 2-2-24 ।।>

अनेकं सुबन्तमन्यपदार्थे वर्तमानं सुपा सह समस्यते, बहुव्रीहिश्चसमासो भवति। प्रथमार्थमेकं वर्जयित्वा सर्वेषु विभक्त्यर्थेषु बहुव्रीहिर्भवति। प्राप्तमुदकं यं ग्रामं प्राप्तोदको ग्रामः। ऊढरथोऽनड्वान्। उपहृतपशू रुद्रः। उद्धृतौदना स्थाली। चित्रगुर्देवदत्तः। वीरपुरुषको ग्रामः। प्रथमार्थे तु न भवति। वृष्टे देवे गतः। अनेकग्रहणं किम् ? बहूनामपि यथा स्यात्,

सुसूक्ष्मजटकेशेन सुगजाजिनवाससा।

समन्तशितिरन्ध्रेण द्वयोर्वृत्तौ न सिध्यति।।(म.भा.1.422)

* बहुव्रीहिः समानाधिकरणानामिति वक्तव्यम् *(म.भा.1.423)। व्यधिकरणानां मा भूत्--पञ्चभिर्भुक्तमस्य। * अव्ययानां च बहुव्रीहिर्वक्तव्यः *(म.भा.1.423)। उच्चैर्मुखः। नीचैर्मुखः। * सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः *(म.भा.1.423)। कण्ठे स्थितः कालोऽस्य कण्ठेकालः। उरसिलोमा। उष्ट्रस्य मुखमिव मुखं यस्य स उष्ट्रमुखः। खरमुखः। * समुदायविकारषष्ठ्याश्च बहुव्रीहिरुत्तरपदलोपश्चेति वक्तव्यम् *(म.भा.1.425)। केशानां सङ्घातः, केशसङ्घातः, केशसङ्घातः = चूडाऽस्य केशचूडः। सुवर्णस्य विकारोऽलंकारोऽस्य सुवर्णालंकारः। * प्रादिभ्यो धातुजस्योत्तरपदस्य लोपश्च वा बहुव्रीहिर्वक्तव्यः *(म.भा.1.424)। प्रपतितं पर्णमस्य प्रपर्णः, प्रपतितपर्णः। प्रपतितं पलाशमस्य प्रपलाशः। * नञोऽस्त्यर्थानां बहुव्रीहिर्वा चोत्तरपदलोपश्च वक्तव्यः *(म.भा.1.424)। अविद्यमानः पुत्रो यस्य अपुत्रः। अविद्यमानभार्यः अभार्यः। * सुबधिकारेऽस्तिक्षीरादीनां बहुव्रीहिर्वक्तव्यः *(म.भा.1.424)। अस्तिक्षीरा ब्राह्मणी। अस्त्यादयो निपाताः ।।

<संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये ।। 2-2-25 ।।>

संख्येये या संख्या वर्त्तते तया सहाव्ययासन्नादूराधिकसंख्याः समस्यन्ते, बहुव्रीहिश्च समासो भवति। अव्यय--उपदशाः। उपविंशाः। आसन्नदशाः। आसन्नविंशाः। अदूरदशाः। अदूरविंशाः। अधिकदशाः। अधिकविंशाः। संख्या--द्वित्राः। त्रिचतुराः। द्विदशाः। संख्ययेति किम् ? पञ्च ब्राह्मणाः। अव्ययासन्नादूराधिकसंख्या इति किम् ? ब्राह्मणाः पञ्च। संख्येये इति किम् ? अधिका विंशतिर्गवाम्।।

<दिङ्नामान्यन्तराले ।। 2-2-26 ।। >

दिशां नामानि = दिङ्नामानि। दिङ्नामानि सुबन्तानि अन्तराले वाच्ये समस्यन्ते, बहुव्रीहिश्च समासो भवति। दक्षिणस्याश्च पूर्वस्याश्य दिशोर्यदन्तरालम् दक्षिणपूर्वा दिक्। पूर्वोत्तरा। उत्तरपश्चिमा। पश्चिमदक्षिणा।। * सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः *(म.भा.1.429)। नामग्रहणं रूढ्यर्थम्, इह मा भूत्-ऐन्द्र्याश्च कौबेर्याश्च दिशोर्यदन्तरालमिति।।

<तत्र तेनेदमिति सरूपे ।। 2-2-27 ।। >

`तत्र' इति सप्तम्यन्तं गृह्यते। `तेन' इति तृतीयान्तम्। सरूपग्रहणं प्रत्येकमभिसम्बध्यते। तत्रेति सप्तम्यन्ते सरूपे पदे तेनेति च तृतीयान्ते

इदमित्येतस्मिन्नर्थे समस्येते, बहुव्रीहिश्च समासो भवति। इतिकरणश्चेह विवक्षार्थो लौकिककार्थमनुसारयति। ततो ग्रहणं, प्रहरणं, कर्मव्यतीहारो, युद्धं च समासार्थ इति सर्वमितिकरणाल्लभ्यते। यत्तत्रेति निर्दिष्टं ग्रहणं चेद्भवति, यत्तेनेति निर्दिष्टं प्रहरणं चेत्तद्भवति, यदिदमिति निर्दिष्टं युद्धं चेत्तद्भवति। केशेषु केशेषु च गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि। कचाकचि। दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं प्रवृत्तं दण्डादण्डि। मुसलामुसलि। "इच् कर्मव्यतीहारे"(5.4.127/866) इति समासान्तः, स चाव्ययम्। "अन्येषामपि दृश्यते"(6.3.137/3539) पूर्वपदस्य दीर्घत्वम्। सरूपग्रहणं किम्? हलैश्च मुसलैश्च प्रहृत्य इदं युध्दं वृत्तम्।।

<तेन सहेति तुल्ययोगे ।। 2-2-28 ।। >

`सह' इत्येतच्छब्दरूपं तुल्ययोगे वर्तमानं 'तेन' इति तृतीयान्तेन सह समस्यते, बहुव्रीहिश्च समासो भवति। सह पुत्रेणागतः सपुत्रः। सच्छात्रः। सकर्मकरः। तुल्ययोग इति किम्? सहैव दशभिः पुत्रैर्भारं वहति गर्दभी। विद्यमानैरेव दशभिः पुत्रैर्भारं वहतीत्यर्थः। कथं सकर्मकः, सलोमकः, सपक्षक इति? न ह्यत्र तुल्ययोगो गम्यते, किं तर्हि? विद्यमानता। प्रायिकं `तुल्ययोगे' इति विशेषणम्, अन्यत्रापि समासो दृश्यते।।

<चार्थे द्वन्द्वः ।। 2-2-29।।>

`अनेकम्' इति वर्तते। अनेकं सुबन्तं चार्थे वर्त्तमानं समस्यते, द्वन्द्वसंज्ञश्च समासो भवति। समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। तत्र समुच्चयान्वाचययोरसामर्थ्यान्नास्ति समासः। इतरेतरयोगे समाहारे च समासो विधीयते। प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ। धवश्च खदिरश्च पलाशश्च धवखदिरपलाशाः। वाक्च त्वक्च वाक्त्वचम्। वाग्दृषम्। द्वन्द्वप्रदेशाः-"द्वन्द्वे च"(1.1.31/224) इत्येवमादयः।।

<उपसर्जनं पूर्वम् ।। 2-2-30 ।। >

`समासे' इति वर्त्तते। उपसर्जनसंज्ञकं समासे पूर्वं प्रयोक्तव्यम्। पूर्ववचनं परमप्रयोगनिवृत्त्यर्थम्। अनियमो हि स्यात्। द्वितीया-कष्टश्रितः। तृतीया--शङ्कुलाखण्डः। चतुर्थी--यूपदारु। पञ्चमी--वृकभयम्। षष्ठी--राजपुरुषः। सप्तमी--अक्षशौण्डः।।

<राजदन्तादिषु परम् ।। 2-2-31 ।। >

पूर्वनिपाते प्राप्ते परप्रयोगार्थं वचनम्। राजदन्तादिषु परमुपसर्जनं प्रयोक्तव्यम्। न केवलमुपसर्जनस्य, अन्यस्यापि यथालक्षणं विहितस्य पूर्वनिपातस्यापवादः परनिपातो विधीयते। दन्तानां राजा राजदन्तः। वनस्याग्रे अग्रेवणम्। निपातनादलुक्। राजदन्तः। अग्रेवणम्। लिप्तवासितम्। नग्नमुषितम्। सिक्तसंमृष्टम्। मृष्टलुञ्चितम्। अवक्लिन्नपक्वम्। अर्पितोप्तम्। उप्तगाढम्। पूर्वकालस्य परनिपातः--उलूखलमुसलम्। तण्डुलकिण्वम्। दृषदुपलम्। आरग्वायनबन्धकी। चित्ररथबाह्लीकम्। आवन्त्यश्मकम्। शूद्रार्यम्। स्नातकराजानौ। विष्वक्सेनार्जुनौ। अक्षिभ्रुवम्। दारगवम्। शब्दार्थौ। धर्मार्थौ। कामार्थौ। अनियमश्चात्रेष्यते। अर्थशब्दौ। अर्थधर्मौ। तत्कथम् ? वक्तव्यमिदम्-धर्मादिषूभयमिति। वैकारिमतम्। गजवाजम्। गोपालधानीपूलासम्। पूलासककरण्डम्। स्थूलपूलासम्। उशीरबीजम्। सिञ्जास्थम्। चित्रास्वाती। भार्यापती। जायापती। जम्पती। दम्पती। जायाशब्दस्य जम्भावो दम्भावश्च निपात्यते। पुत्रपती। पुत्रपशू। केशश्मश्रू। श्मश्रुकेशौ। शिरोबीजम्। सर्पिर्मधुनी। मधुसर्पिषी। आद्यन्तौ। अन्तादी। गूणवृध्दी। वृद्धिगुणौ।।

<द्वन्द्वे घि ।। 2-2-32 ।।>

`पूर्वम्' इति वर्त्तते। द्वन्द्वे समासे घ्यन्तं पूर्वं प्रयोक्तव्यम्। पटुगुप्तौ। मृदुगुप्तौ। अनेकप्राप्तावेकस्य नियमः, शेषे त्वनियमः। पटुमृदुशुक्लाः। पटुशुक्लमृदवः। द्वन्द्व इति किम् ? विस्पष्टपटुः।।

<अजाद्यदन्तम् ।। 2-2-33 ।।>

`द्वन्द्वे' इति वर्त्तते। अजाद्यदन्तं शब्दरूपं द्वन्द्वे समासे पूर्वं प्रयोक्तव्यम्। उष्ट्रखरम्। उष्ट्रशकम्। * बहुष्वनियमः *(म.भा.1.436) अश्वरथेन्द्राः। इन्द्ररथाश्वाः। द्वन्द्वे घ्यन्तादजाद्यदन्तं विप्रतिषेधेन *(म.भा.1.438)। इन्द्राग्नी। इन्द्रवायू। तपरकरणां किम् ? अश्वावृषौ, वृषाश्वे इति वा ।।

<अल्पाच्तरम् ।। 2-2-34 ।।>

`द्वन्द्वे' इति वर्त्तते। अल्पाच्तरं शब्दरूपं द्वन्द्वे समासे पूर्वं प्रयोक्तव्यम्। प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ। धवखदिरपलाशाः। बहुष्वनियमः--शङ्कदुन्दुभिवीणाः। वीणाशङ्खदुन्दुभयः। * ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणां पूर्वनिपातो वक्तव्यः *(म.भा.1.436)। हेमन्तशिशिरवसन्ताः। चित्रास्वाती। कृत्तिकारोहिण्यौ। समानाक्षराणामिति किम् ? ग्रीष्मवसन्तौ। * लध्वक्षरं पूर्वं निपततीति वक्तव्यम् *(म.भा.1.436)। कुशकाशम्। शरशादम्। * अभ्यर्हितं च पूर्वं निपततीति वक्तव्यम् *(म.भा.1.436)। मातापितरौ। श्रध्दामेधे। दीक्षातपसी। * वर्णानामानुपूर्व्येण पूर्वनिपातः *(म.भा.1.436)। ब्राह्मणक्षत्रियविट्शूद्राः। समानाक्षराणामित्यत्र नास्ति। * भ्रातुश्च ज्यायसः पूर्वनिपातो वक्तव्यः *(म.भा.1.437)। युधिष्ठिरार्जुनौ। * संख्याया अल्पीूयस्याः पूर्वनिपातो वक्तव्यः। *(म.भा.1.437) द्वित्राः। त्रिचतुराः। नवतिशतम्।।

<सप्तमीविशेषणे बहुव्रीहौ ।। 2-2-35 ।।>

सर्वोपसर्जनत्वाद्बहुव्रीहेरनियमे प्राप्ते नियमार्थं वचनम्। सप्तम्यन्तं विशेषणं च बहुव्रीहिसमासे पूर्वं प्रयोक्तव्यम्। कण्ठेकालः। उरसिलोमा। विशेषणम्-चित्रगुः। शबलगुः। * सर्वनामसंख्ययोरुपसंख्यानम् *(म.भा.1.437)। सर्वश्वेतः। सर्वकृष्णः। द्विशुक्लः। द्विकृष्णः। अनयोरेव मिथः सम्प्रधारणायां परत्वात्संख्यायाः पूर्वनिपातः। द्व्यन्यः। * वाप्रियस्य पूर्वनिपातः *(म.भा.1.437)। गुडप्रियः। प्रियगुडः। * सप्तम्याः पूर्वनिपाते प्राप्ते गड्वादिभ्यः सप्तम्यन्तं परम् *(म.भा.1.437)। गडुकण्ठः। गडुशिराः। कथं वहेगडुः ? प्राप्तस्य चाबाधा व्याख्येया।।

<निष्ठा ।। 2-2-36 ।।>

निष्ठान्तं च बहुव्रीहिसमासे पूर्वं प्रयोक्तव्यम्। कृतकटः। भिक्षितभिक्षिः। अवमुक्तोपानत्कः। आहूतसुब्रह्मण्यः। ननु विशेषणमेवात्र निष्ठा? नैष नियमः, विशेषणविशेष्यभावस्य विवक्षानिबन्धत्वात्। कटे कटेन कृतमिति वा विग्रहीतव्यम्। * निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनम् *(म.भा.1.437)। शाङ्र्गजग्धी। पलाण्डुभक्षिती। मासजातः। संवत्सरजातः। सुखजातः। दुःखजातः। कथं कृतकटः, भुक्तौदनः? प्राप्तस्य चाबाधा व्याख्येया।। * प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ भवत इति वक्तव्यम् *। अस्युद्यतः। दण्डपाणिः। कथमुद्यतगदः,उद्यतासिः ? प्रप्तस्य चाबाधा व्याख्येया।।

<वाऽऽरहिताग्न्यादिषु ।। 2-2-37 ।। >

`निष्ठा' इति पूर्वनिपाते प्राप्ते विकल्प उच्यते। आहिताग्न्यादिषु निष्ठान्तं पूर्वं वा प्रयोज्यम्। अग्न्याहितः। आहिताग्निः। जातपुत्रः। पुत्रजातः। जातदन्तः। जातश्मश्रुः। तैलपीतः। घृतपीतः। ऊढभार्यः। गतार्थः। आकृतिगणश्चायम्। तेन गडुकण्
ठप्रभृतय इहैव द्रष्टव्याः।।

<कडाराः कर्मधारये ।। 2-2-38 ।।>

गुणशब्दानां विशेषणत्वात्पूर्वनिपाते प्राप्ते विकल्प उच्यते। क़डारादयः शब्दाः कर्मधारये समासे वा पूर्वं प्रयोक्तव्याः। कडारजैमिनिः। जैमिनिकडारः। कडार। गडुल। काण। खञ्ज। कुण्ठ। खञ्जर। खलति। गौर। वृद्ध। भिक्षुक। पिङ्गल। तनु। वटर। कर्मधारय इति किम् ? कडारपुरुषो ग्रामः।।

इति श्रीजयादित्यरचितायां काशिकायां वृत्तौ द्वितीयाध्यायस्य द्वितीयः पादः।।

2.3

अथ द्वितीयाध्याये तृतीयः पादः

<अनभिहिते ।। 2-3-1 ।।>

`अनभिहिते' इत्यधिकारोऽयं वेदितव्यः। यदित ऊर्ध्वमनुक्रमिष्यामः, `अनभिहित' इत्येवं तद्वेदितव्यम्। अनभिहिते = अनुक्ते, अनिर्दिष्टे कर्मादौ विभक्तिर्भवति। केनानभिहिते। तिङ्कृत्तद्धितसमासैः, परिसंख्यानम्। वक्ष्यति--"कर्मणि द्वितीया"(2.3.2/537), कटं करोति। ग्रामं गच्छति। अनभिहित इति किम् ? तिङ्-क्रियते कटः। कृत्-कृतः कटः। तद्धित-शत्यः,शतिकः। समास-प्राप्तमुदकं यं ग्रामं प्राप्तोदको ग्रामः। परिसंख्यानं किम् ? कटं करोति भीष्ममुदारं दर्शनीयम्।(म.भा.1.440) "बहुषु बहुवचनम्"(म.भा.1.4.21य187) इत्येवमादिना संख्या वाच्यत्वेन विभक्तीनामुपदिष्टाः, तत्र विशेषणार्थमिदमारभ्यते-अनभिहितकर्माद्याश्रयेष्वेकत्वादिषु द्वितीयादयो वेदितव्या इति।(म.भा.1.440)

<कर्मणि द्वितीया ।। 2-3-2 ।।>

द्वितीयादयः शब्दाः पूर्वाचार्यैः सुपां त्रिकेषु स्मर्यन्ते, तैरेवात्र व्यवहारः। कर्मणि कारके या संख्या तत्र द्वितीया विभक्तिर्भवति। कटं करोति। ग्रामं गच्छति। * उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्त्रापि दृश्यते *।।(म.भा.1.444)उभयतो ग्रमम्। सर्वतो ग्रामम्। धिग्देवदत्तम्। उपर्युपरि। अध्यधि ग्रामम्। अधोऽधो ग्रामम्।। * अभितः-परितः-समया-निकषा-हा-प्रतियोगेषु च दृश्यते *(म.भा.1.443)। अभितो ग्रामम्। परितो ग्रामम्। निकषा ग्रामम्। हा देवदत्तम्। बुभुक्षितं न प्रतिभाति किञ्चित्।।

<तृतीया च होश्छन्दसि ।। 2-3-3 ।।>

`कर्मणि' इति वर्त्तते। द्वितीयायां प्राप्तायां तृतीया विधीयते, चशब्दात्सा च भवति। छन्दसि विषये जुहोतेः कर्मणि कारके तृतीया विभक्तिर्भवति, द्वितीया च । यवाग्वाऽग्निहोत्रं जुहोति। यवागूमग्निहोत्रं जुहोति।।

<अन्तरान्तरेण युक्ते ।। 2-3-4 ।। >

द्वितीया स्वर्यते, न तृतीया। अन्तराऽन्तरेणशब्दौ निपातौ साहचर्याद् गृह्येते। आभ्यां योगे द्वितीया विभक्तिर्भवति। षष्ठ्यपवादोऽयं योगः। तत्रान्तराशब्दो मध्यमाधेयप्रधानमाचष्टे। अन्तरेणशब्दस्तु तच्च विनार्थं च । अन्तरा त्वां च मां च कमण्डलुः। अन्तरेण त्वां च मां च कमण्डलुः। अन्तरेण पुरुषकारं न किञ्चिल्लभ्यते। युक्तग्रहणं किम् ? अन्तरा तक्षशिलां च पाटलिपुत्रं स्त्रुघ्नस्य प्राकारः।।

<कालाध्वनोरत्यन्तसंयोगे ।। 2-3-5 ।। >

कालशब्देभ्योऽध्वशब्देभ्यश्च द्वितीया विभक्तिर्भवति अत्यन्तसंयोगे गम्यमाने। क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः संबन्धः = अत्यन्तसंयोगः। मासमधीते। संवत्सरमधीते। मासं कल्याणी। संवत्सरं कल्याणी। मासं गुडधानाः। अध्वनः खल्वपि-क्रोशमधीते। योजनमधीते। क्रोशं कुटिला नदी। क्रोशं पर्वतः। योजनं पर्वतः। अत्यन्तसंयोग इति किम् ? मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः। योजनस्यैकदेशे पर्वतः।।

<अपवर्गे तृतीया ।। 2-3-6 ।। >

`कालाध्वनोरत्यन्तसंयोगे' इति वर्त्तते। अपवर्गः = फलप्राप्तौ सत्यां क्रियापरिसमाप्तिः। अपवर्गे गम्यमाने कालाध्वनोरत्यन्तसंयोगे तृतीया विभक्तिर्भवति। मासेनानुवाकोऽधीतः। संवत्सरेणानुवाकोऽधीतः। अध्वनः--क्रोशेनानुवाकोऽधीतः। योजनेनानुवाकोऽधीतः। अपवर्ग इति किम् ? क्रोशमधीतोऽनुवाकः। मासमधीतः। कर्तव्यावृत्तौ फलसिध्देरभवात्तृतीया न भवति। मासमधीतोऽनुवाको न चानेन गृहीतः।।(म.भा.1.446)

<सप्तमीपञ्चम्यौ कारकमध्ये ।। 2-3-7 ।। >

`कालाध्वनोः' इति वर्त्तते। कारकयोर्मध्ये यौ कालाध्वानौ ताभ्यां सप्तमीपञ्चम्यौ विभक्ती भवतः। अद्य भुक्त्वा देवदत्तो द्व्यहे भोक्ता, द्व्यहाद्वा भोक्ता। त्र्यहे त्रयहाद्वा भोक्ता। कर्तृशक्त्योर्मध्ये कालः। इहस्थोऽयमिष्वासः क्रोशे लक्ष्यं विध्यति। क्रोशाल्लक्ष्यं विध्यति।(म.भा.1.446) कर्तृकर्मणोः कारकयोः कर्मापादानयोः कर्माधिकरणयोर्वा मध्ये क्रोशः। संख्यातानदेशो न भवति; अस्वरितत्वात्।।

<कर्मप्रवचनीययुक्ते द्वतीया ।। 2-3-8 ।।>

कर्मप्रवचनीयैर्युक्ते द्वितीया विभक्तिर्भवति। "अनुर्लक्षणे"(1.4.84/547)। शाकल्यस्य संहितामनु प्रावर्षत्। आगस्त्यमन्वसिञ्चत्प्रजाः।।

<यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ।। 2-3-9 ।। >

`कर्मप्रवचनीययुक्ते' इति वर्त्तते। यस्मादधिकं यस्य चेश्वरवचनं कर्मप्रवचनीयैर्युक्ते तत्र सप्तमी विभक्तिर्भवति। उपखार्यां द्रोणः। उपनिष्के कार्षापणम्। `यस्य चेश्वरवचनम्' इति स्वस्वामिनोर्द्वयोरपि पर्यायेण सप्तमी विभक्तिर्भवति। अधि ब्रह्मदत्तेपाञ्चालाः, अधि पाञ्चालेषु ब्रह्मदत्त इति। द्वितीयापवादो योगः।।

<पञ्चम्यपाङ्परिभिः ।। 2-3-10 ।।>

अप, आङ्, परि-इत्येतैः कर्मप्रवचनीयैर्योगे पञ्चमी विभक्तिर्भवति। अप त्रिगर्तेभ्यो वृष्टो देवः। आ पाटलिपुत्राद् वृष्टो देवः। परि परि त्रिगर्तेभ्यो वृष्टो देवः। अपेन साहचर्यात्परेर्वर्जनार्थस्य ग्रहणम्, तेनेह न भवति--वृक्षं परि विद्योतते विद्युत्।।

<प्रतिनिधिप्रतिदाने च यस्मात् ।। 2-3-11 ।।>

मुख्यसदृशः = प्रतिनिधिः। दत्तस्य प्रतिनिर्यातनम् = प्रतिदानम्। यस्मात्प्रतिनिधिर्यतश्च प्रतिदानं तत्र कर्मप्रवचनीययुक्ते पञ्चमी विभक्तिर्भवति। अभिमन्युरर्जुनतः प्रति। प्रद्युम्नो वासुदेवतः प्रति। माषानस्मै तिलेभ्यः प्रतियच्छति। ननु च प्रतिनिधिप्रतिदाने कर्मप्रवचनीययुक्ते, न तु यतः प्रतिनिधिप्रतिदाने ? नैष दोषः, सम्बन्धसम्बन्धात्तस्यापि योगोऽस्त्येव।।

<गत्यर्थक्रमणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ।। 2-3-12 ।। >

गत्यर्थनां धातूनां चेष्टाक्रियाणां परिस्पन्दक्रियाणां कर्मणि कारकेऽध्ववर्जिते द्वितीयाचतुर्थ्यौ भवतः। ग्रामं गच्छति,ग्रामाय गच्छति। ग्रामं व्रजति,ग्रामाय व्रजति। गत्यर्थग्रहणं किम् ? ओदनं पचति। कर्मणि इति किम् ? अश्वेन व्रजति। चेष्टायामिति किम् ? मनसा पाटलिपुत्रं गच्छति। अनध्वनि इति किम् ? अध्वानं गच्छति। अध्वनीत्यर्थग्रहणम्(म.भा.1.448) पन्थानं गच्छति। मार्गं गच्छति। आस्थितप्रतिषेधश्चायं विज्ञेयः(म.भा.1.448)। आस्थितः सम्प्राप्तः, आक्रान्त उच्यते। यत्र तु उत्पथेन पन्थानं गच्छति, तत्र भवितव्यमेव चतुर्थ्या, पथे गच्छति इति(म.भा.1.448)। द्वितीयाग्रहणं किम् ? न चतुर्थ्येव विकल्प्येत, अपवादविषयेऽपि यथा स्यात्। ग्रामं गन्ता। ग्रामाय गन्ता। कृद्योगलक्षणा षष्ठी न भवति।।

<चतुर्थी संप्रदाने ।। 2-3-13 ।। >

सम्प्रदांने कारके चतिर्थी विभक्तिर्भवति। उपाध्यायाय गां ददाति, माणवकाय भिक्षां ददाति, देवदत्ताय रोचते, पुष्पेभ्यः स्पृहयति इत्यादि।। * चतुर्थीविधाने तादर्थ्य उपसङ्ख्यानम् *।(म.भा.1.449) यूपाय दारु। कुण्डलाय हिरण्यम्। रन्धनाय स्थाली। अवहननायोलूखलम्। * क्लृपि सम्पद्यमाने चतुर्थी वक्तव्या *(म.भा.1.449)। मूत्राय कल्पते यवागूः। मूत्राय जायते यवागूः। * उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या *(म.भा.1.449)।

`वाताय कपिला विद्युदातपायातिलोहिनी।

पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्।।'(म.भा.1.449)

* हितयोगे चतुर्थी वक्तव्या *(म.भा.1.450)। गोभ्यो हितम्। अरोचकिने हितम्।।

<क्रियार्थोपपदस्य च कर्मणि स्थानिनः ।। 2-3-14 ।। >

क्रियार्था क्रिया उपपदं यस्य सोऽयं क्रियार्थोपपदः। "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्"(3.3.10/3175) इत्येष विषयो लक्ष्यते। क्रियार्थोपपदस्य च स्थानिनोऽप्रयुज्यमानस्य धातोः कर्मणि कारके चतुर्थी विभक्तिर्भवति। द्वितीयापवादो योगः। एधेभ्यो व्रजति। पुष्पेभ्यो व्रजति। क्तियार्थोपपदस्येति किम् ? प्रविश पिण्डीम्। प्रविश तर्पणम्। भक्षिरत्र स्थानी, न तु क्रियार्थोपपदः। कर्मणीति किम् ? एधेभ्यो व्रजति शकटेन। स्थानिन इति किम् ? एधानाहर्तुं व्रजति।

<तुमर्थाच्च भाववचनात् ।। 2-3-15 ।। >

तुमुना समानार्थस्तुमर्थः। तुमर्थभाववचनप्रत्ययान्तात् प्रातिपदिकाच्चतुर्थी विभक्तिर्भवति। "भाववचनाश्च"(3.3.11/3180) इति वक्ष्यति, तस्येदं ग्रहणम्। पाकाय व्रजति। त्यागाय व्रजति। भूतये व्रजति। सम्पत्तये व्रजति। तुमर्थादिति किम् ? पाकः, त्यागः, रागः। भाववचनादिति किम् ? कारको व्रजति।।

<नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च ।। 2-3-16 ।। >

नमः, स्वस्ति, स्वाहा, स्वधा, अलम्, वषट्-इत्येतैर्योगे चतुर्थी विभक्तिर्भवति। नमो देवेभ्यः(मै.1.2.13)। स्वस्ति प्रजाभ्यः। स्वाहाऽग्नये(तै.1.8.13.1)

स्वधा पितृभ्यः(मै.1.2.13)। अलं मल्लो मल्लाय। अलमिति पर्याप्त्यर्थग्रहणम्। प्रभुर्मल्लो मल्लाय, शक्तो मल्लो मल्लाय। वषडग्नये। वषडिन्द्राय। चकारः पुनरस्यैव समुच्चयार्थः, तेनाशीर्विवक्षायामपि षष्ठीं बाधित्वा चतुर्थ्येव भवति--स्वस्ति गोभ्यो भूयात्। स्वस्ति ब्राह्मणेभ्यः।।

<मन्यकर्मण्यनादरे विभाषाऽप्राणिषु ।। 2-3-17 ।। >

मन्यतेः कर्मणि = मन्यकर्मणि। मन्यकर्मणि प्राणिवर्जिते विभाषा चतुर्थी विभक्तिर्भवति अनादरे गम्यमाने। अनादरः = तिरस्कारः। न त्वा तृणं मन्ये, न त्वा तृणाय मन्ये। नत्वा बुसं मन्ये। न त्वा बुसाय मन्ये। मन्यतिग्रहणं किम् ? न त्वा तृणं चिन्तयामि। विकरणनिर्देशः किमर्थः ? न त्वा तृणं मन्वे। अनादर इति किम् ?

अश्मानं दृषदं मन्ये मन्ये काष्ठमुलूखलम्।

अन्धायास्तं सुतं मन्ये यस्य माता न पश्यति।।

अप्राणिष्विति किम् ? न त्वा श्रृगालं मन्ये। * यदेतदप्राणिष्विति तदनावादिष्विति वक्तव्यम् *(म.भा.1.450)। व्यवस्थितविभाषा च ज्ञेया। न त्वा नावं मन्ये यावदुत्तीर्णं न नाव्यम्। नत्वाऽन्नं मन्ये। यावन्न भुक्तं श्राद्धम्। प्राणिषु तूभयम्--न त्वा काकं मन्ये। नत्वा श्रृगालं मन्ये। इह चतुर्थी द्वितीया च भवति। न त्वा श्वानं मन्ये। न त्वा शुने मन्ये। युष्मदः कस्मान्न भवति चतुर्थी, एतदपि हि मन्यतेः कर्म ? व्यवस्थितविभाषाविज्ञानादेव न भवति।।

<कर्तृकरणयोस्तृतीया ।। 2-3-18 ।। >

कर्त्तरि करणे च कारके तृतीया विभक्तिर्भवति। देवदत्तेन कृतम्। यज्ञदत्तेन भुक्तम्। करणे-- दात्रेण लुनाति। परशुना छिनत्ति। * तृतीयाविधाने प्रकृत्यादीनामुपसङ्ख्यानम् *(म.भा1.452)। प्रकृत्याऽभिरूपः। प्रकृत्या दर्शनीयः। प्रायेण याज्ञिकः। प्रायेण वैयाकरणः। गार्ग्योऽस्मि गोत्रेण। समेन धावति। विषमेण धावति। द्विद्रोणेन धान्यं क्रीणाति। पञ्चकेन पशून् क्रीणाति। साहस्रेणाश्वान् क्रीणाति।।

<सहयुक्तेऽप्रधाने ।। 2-3-19 ।। >

सहार्थेन युक्ते अप्रधाने तृतीया विभक्तिर्भवति। पुत्रेण सहागतः पिता। पुत्रेण सह गोमान्। पितुरत्र क्रियादिसम्वन्धः। शब्देनोच्यते, पुत्रस्य तु प्रतीयमान इति तस्याप्राधान्यम्। सहार्थेन योगे तृतीयाविधानात्पर्यायप्रयोगेऽपि भवति--पुत्रेण सार्धमिति। विनापि सहशब्देन भवति, "वृद्धो यूना"(1.2.65/931) इति निपातनात्। अप्रधान इति किम् ? शिष्येण सहोपाध्यायस्य गौः।।

<येनाङ्गविकारः ।। 2-3-20 ।। >

अङ्गशब्दोऽत्राङ्गसमुदाये शरीरे वर्तते, `येन' इति च तदवयवो हेतुत्वेन निर्दिश्यते। येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया विभक्तिर्भवति। अक्ष्णा काणः। पादेन खञ्जः। पाणिना कुणिः। अवयवधर्मेण समुदायो व्यपदिश्यते। अङ्गविकार इति किम् ? अक्षि काणमस्य।।

<इत्थम्भूतलक्षणे ।। 2-3-21 ।।>

कञ्चित्प्रकारं प्राप्तः = इत्थम्भूतः, तस्य लक्षणमित्थम्भूतलक्षणम्, ततस्तृतीया विभक्तिर्भवति। अपि भवान् कमण्डलुना छात्रमद्राक्षीत् ?(म.भा.1.453) छात्रेणोपाध्यायम्। शिखया परिव्राजकम्। इह न भवति--कमण्डलुपाणिश्छात्र इति; लक्षणस्य समासेऽन्तर्भूतत्वात्। इत्थम्भूत इति किम् ? वृक्षं प्रति विद्योतनम्।।

<संज्ञौऽन्यतरस्यां कर्मणि ।। 2-3-22 ।।>

सम्पूर्वस्य जानातेः कर्मणि कारके द्वितीयायां प्राप्तायामन्यतरस्यां तृतीया विभक्तिर्भवति। पित्रा सञ्जानीते। पितरं सञ्जानीते। मात्रा सञ्जानीते। मातरं सञ्जानीते।।

<हेतौ ।। 2-3-23 ।। >

फलसाधनयोग्यः पदार्थो लोके हेतुरुच्यते। तद्वाचिनस्तृतीयाविभक्तिर्भवति। धनेन कुलम्। कन्यया शोकः। विद्यया यशः।।

<अकर्तर्यृणे पञ्चमी ।। 2-3-24 ।।>

`हेतौ' इति वर्त्तते। कर्तृवर्जितं यदृणं हेतुस्ततः पञ्चमी विभक्तिर्भवति। तृतीयापवादो योगः। शताद्बद्धः। सहस्राद्बद्धः। अकर्त्तरीति किम् ? शतेन बन्धितः। शतमृणं च भवति, प्रयोजकत्वाच्च कर्तृसंज्ञकम्।।

<विभाषा गुणेऽस्त्रियाम् ।। 2-3-25 ।।>

`हेतौ' इति वर्त्तते। गुणे हेतावस्त्रीलिङ्गे विभाषा पञ्चमी विभक्तिर्भवति। जाड्याद्बद्धः, जाड्येन बद्धः। पाण्डित्यान् मुक्तः, पाण्डित्येन मुक्तः। गुणग्रहणं किम् ? धनेन कुलम्। अस्त्रियामिति किम् ? बुद्ध्या मुक्तः। प्रज्ञया मुक्तः।।

<षष्ठी हेतुप्रयोगे ।। 2-3-26 ।।>

हेतोः प्रयोगः = हेतुप्रयोगः। हेतुशब्दस्य प्रयोगे = हेतौ द्यौत्ये षष्ठी विभक्तिर्भवति। अन्नस्य हेतोर्वसति।।

<सर्वनाम्नस्तृतीया च ।। 2-3-27 ।। >

सर्वनाम्नो हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये तृतीया विभक्तिर्भवति षष्ठी च। पूर्वेण षष्ठ्यामेव प्राप्तायामिदमुच्यते। कस्य हेतोर्वसति। केन हेतुना वसति। यस्य हेतोर्वसति। येन हेतुना वसति। * निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् *(म.भा1.454)।। किं निमित्तं वसति। केन निमित्तेन वसति। कस्मै निमित्ताय वसति। कस्मान्निमित्ताद्वमति। कस्य निमित्तस्य वसति। कस्मिन्नमित्ते वसति। एवं कारणहेत्वोरप्युदाहार्यम्। अर्थग्रहणं चैतत्। पर्यायोपादानं तु स्वरूपविधिर्मा

विज्ञायीति। तेनेहापि भवति--किं प्रजोजनं वसति। केन प्रयोजनेन वसति। कस्मै प्रयोजनाय वसति। कस्मात्प्रयोजनाद् वसति। कस्य प्रयोजनस्य वसति। कस्मिन् प्रयोजने वसति।।

<अपादाने पञ्चमी ।। 2-3-28 ।।>

अपादाने कारके पञ्चमी विभक्तिर्भवति। ग्रामादागच्छति। पर्वतादवरोहति। वृकेभ्यो बिभेति। अध्ययनात्पराजयते। * पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानम् *(म.भा.1.455)। प्रासादमारुह्य प्रेक्षते, प्रासादात्प्रेक्षते। * अधिकरणे चोपसङ्ख्यानम् *(म.भा.1.455) आसने उपविश्य प्रेक्षते, आसनात्प्रेक्षते। शयनात्प्रेक्षते। * प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या *(म.भा.1.455)। कुतो भवान्, पाटलिपुत्रात्। * यतश्चाध्वकालनिर्माणं तत्र पञ्चमी वक्तव्या *(म.भा.1.455)। गवीधुमतः साङ्काश्यं चत्वारि योजनानि। कार्तिक्या आग्रहायणी मासे। * तद्युक्तात्काले सप्तमी वक्तव्या *(म.भा.1.455) कार्तिक्या आग्रहायणी मासे। * अध्वनः प्रथमा सप्तमी च वक्तव्या *(म.भा.1.455)। गवीधुमतः साङ्काश्यं चत्वारि योजनानि, चतुर्षु योजनेषु वा।।

<अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ।। 2-3-29 ।।>

अन्य, आरात्, इतर, ऋते, दिक्शब्द, अञ्चूत्तरपद, आच् आहि-इत्येतैर्योगे पञ्चमी विभक्तिर्भवति। अन्य इत्यर्थग्रहणम्। तेन पर्यायप्रयोगेऽपि भवति। अन्यो देवदत्तात्। भिन्नो देवदत्तात्। अर्थान्तरं देवदत्तात्। विलक्षणो देवदत्तात्। आराच्छब्दो दूरान्तिकार्थे वर्त्तते। तत्र "दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्"(2.3.34/611) इति प्राप्ते पञ्चमी विधीयते। आराद्देवदत्तात्। आराद्यज्ञदत्तात्। `इतर' इति निर्दिश्यमानस्य प्रतियोगी पदार्थ उच्यते। इतरे देवदत्तात्। `ऋते' इति अव्ययं वर्जनार्थे। ऋते देवदत्तात्। ऋते यज्ञदत्तात्। दिक्शब्दः - पूर्वो ग्रामात्पर्वतः)। उत्तरो ग्रामात्। पूर्वो ग्रीष्माद्वसन्तः। उत्तरो ग्रीष्मो वसन्तात्। `दिक्शब्द' इत्यत्र शब्दग्रहणं देशकालवृत्तिनापि दिक्शब्देन योगे यथा स्यात्; इतरथा हि दिग्वृत्तिनैव स्यात्--इयमस्याः पूर्वेति। इहतु न स्यात्--अयमस्मात्पूर्वः काल इति। अञ्चूत्तरपद-प्राग् ग्रामात्। प्रत्यग् ग्रमात्।(म.भा.1.456) ननु चायमपि दिक्शब्द एव ? "षष्ठ्यतसर्थप्रत्ययेन"(2.3.30/609) इति वक्ष्यति, तस्यायं पुरस्तादपकर्षः। आच्-दक्षिणा ग्रामात्। उत्तरा ग्रामात्। आहि-दक्षिणाहि ग्रामात्। उत्तराहि ग्रामात्।।

<षष्ठ्यतसर्थप्रत्ययेन ।। 2-3-30 ।।>

"दक्षिणोत्तराभ्यामतसुच्"(5.3.28/1978) इति वक्ष्यति, तस्येदं ग्रहणम्। अतसर्थेन प्रत्ययेन युक्ते षष्ठी विभक्तिर्भवति। दक्षिणतो ग्रामस्य। उत्तरतो ग्रामस्य। पुरस्ताद् ग्रामस्य। उपरि ग्रामस्य। उपरिष्टाद् ग्रामस्य।।

<एनपा द्वितीया ।। 2-3-31।।>

"एनबन्यतरस्यामदूरे पञ्चम्या"(5.3.35/1984)इति वक्ष्यति। तेन युक्ते द्वितीया विभक्तिर्भवति। पूर्वेण षष्ठ्यां प्राप्तायामिदं वचनम्। दक्षिणेन ग्रामम्। उत्तरेण ग्रामम्। षष्ठ्यपीष्यते--दक्षिणेन ग्रमस्य। उत्तरेण ग्रामस्य। तदर्थं योगविभागः कर्तव्यः।।

<पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् ।। 2-3-32।।>

पञ्चमीग्रहणमनुवर्त्तते। पृथक्, विना, नाना--इत्येतैर्योगे तृतीया विभक्तिर्भवति, अन्यतरस्यां पञ्चमी च । पृथग् देवदत्तेन, पृथग् देवदत्तात्। विना देवदत्तेन, विना देवदत्तात्। नाना देवदत्तेन, नाना देवदत्तात्। "पृथग्विनानानाभिः" इति योगविभागो द्वितीयार्थः।।

विना वातं विना वर्षं विद्युत्प्रपतनं विना।
विना हस्तिकृतान्दोषान्केनेमौ पातितौ द्रुमौ।।

<करणे च स्तेकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य ।। 2-3-33 ।।>

स्तोक, अल्प, कृच्छ्र, कतिपय--इत्येतेभ्योऽसत्त्ववचनेभ्यः करणे कारकेऽन्यतरस्यां तृतीया भवति। पञ्चम्यत्र पक्षे विधीयते, तृतीया तु करण इत्येव सिध्दा। यदा तु धर्ममात्रं करणतया विवक्ष्यते न द्रव्यम्, तदा स्तोकादीनामसत्त्ववचनता। स्तोकान्मुक्तः, स्तोकेनमुक्तः। अल्पान्मुक्तः, अल्पेन मुक्तः, कृच्छ्रान्मुक्तः, कृच्छ्रेण मुक्तः। कतिपयान्मुक्तः, कतिपयेनमुक्तः। असत्त्ववचनस्येति किम् ? स्तोकेन विषेण हतः। अल्पेन मधुना मत्तः। करण इति किम् ? क्रियाविशेषणे कर्मणि मा भूत्--स्तोकं मुञ्चति।।

<दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ।। 2-3-34 ।।>

पञ्चम्यनुवर्त्तते। दूरान्तिकार्थैः शब्दैर्योगे षष्ठी विभक्तिर्भवत्यन्यतरस्यां पञ्चमी च । दूरं ग्रामात्, दूरं ग्रामस्य। विप्रकृष्टं ग्रामात्, विप्रकृष्टं ग्रामस्य। अन्तिकं ग्रामात्, अन्तिकं ग्रामस्य। अभ्याशं ग्रामात्, अभ्याशं ग्रामस्य, अभ्याशं ग्रामस्य। अन्यतरस्याङ्ग्रहणं पञ्चम्यर्थम्, इतरथा हि तृतीया पक्षे स्यात्।।

<दूरान्तिकार्थेभ्यो द्वितीया च ।। 2-3-35 ।। >

पञ्चम्यनुवर्त्तते। दूरान्तिकार्थेभ्यः शब्देभ्यो द्वितीया विभक्तिर्भवति, चकारात्पञ्चमी तृतीयापि समुच्चीयते। दूरं ग्रामस्य, दूराद् ग्रामस्य, दूरेण ग्रामस्य। अन्तिकं ग्रामस्य, अन्तिकाद् ग्रामस्य, अन्तिकेन ग्रामस्य। प्रातिपदिकार्थे विधानम्। असत्त्ववचनग्रहणं चानुवर्त्तते। सत्त्वशब्देभ्यो यथायथं विभक्तयो भवन्ति- दूरः पन्थाः, दूराय पथे देहि, दूरस्य पथः स्वम्।।

<सप्तम्यधिकरणे च ।। 2-3-36 ।। >

सप्तमी विभक्तिर्भवत्यधिकरणे कारके, चकाराद् दूरान्तिकार्थेभ्यश्च। कटे आस्ते। शकटेआस्ते। स्थाल्यां पचति। दूरान्तिकार्थेभ्यः खल्वपि-दूरे ग्रामस्य, अन्तिके ग्रामस्य, अभ्याशे ग्रामस्य। दूरान्तिकार्थेभ्यश्चतस्रो विभक्तयो भवन्ति, द्वितीयातृतीयापञ्चमीसप्तम्यः। * सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् *(म.भा.1.458)। अधीती व्याकरणे। परिगणिती याज्ञिके। आम्नाती छन्दसि। * साध्वसाधुप्रयोगे च सप्तमी वक्तव्या *(म.भा.1.458)। साधुर्देवदत्तो मातरि। असाधुः पतरि। * कारकार्हाणां च कारकत्वे सप्तमी वक्तव्या *(म.भा.1.458)। ऋध्देषु भुञ्जानेषु दरिद्रा आसते। ब्राह्मणेषु तरत्सु वृषला आसते। * अकारकार्हाणां चाकारकत्वे सप्तमी वक्तव्या *(म.भा.1.458)। दरिद्रेष्वासीनेषु ऋध्दा भुञ्जते। वृषलेष्वासीनेषु ब्राह्मणास्तरन्ति।* तद्विपर्यासे च सप्तमी वक्तव्या *(म.भा.1.458)। ऋध्देष्वासीनेषु दरिद्रा भुञ्जते। ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति। * निमित्तात्कर्मसंयोगे सप्तमी वक्तव्या *(म.भा.1.458)। `चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः।।' (म.भा.1.458)

<यस्य च भावेन भावलक्षणम् ।। 2-3-37 ।।>

`सप्तमी' इति वर्तते। भावः = क्रिया। यस्य च भावेन = यस्य च क्रियया क्रियान्तरं लक्ष्यते ततो भाववतः सप्तमीविभक्तिर्भवति। प्रसिद्धा च क्रिया क्रियान्तरं लक्षयति। गोषु दुह्यमानासु गतः। दुग्धास्वागतः। अग्निषु हूयमानेषु गतः। हुतेष्वागतः। भावेनेति किम् ? यो जटाभिः स भुङ्क्ते। पुनर्भावग्रहणं किम् ? यो भुङ्क्ते स देवदत्तः।।

<षष्ठी चानादरे ।। 2-3-38 ।।>

पूर्वेण सप्तम्यां प्राप्तायां षष्ठी विधीयते, चकारात्सापि भवति। अनादराधिके भावलक्षणे भाववतः षष्ठीसप्तम्यौ विभक्ती भवतः। रुदतः प्राव्राजीत्, रुदति प्राव्राजीत्। क्रोशतः प्राव्राजीत्, क्रोशति प्राव्राजीत्। क्रोशन्तमनादृत्य प्रव्रजित इत्यर्थः।।

<स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ।। 2-3-39 ।। >

षष्ठीसप्तम्यौ वर्तेते। स्वामिन्, ईश्वर, अधिपति, दायाद, साक्षिन्, प्रतिभू, प्रसूत-इत्येतैर्योगे षष्ठीसप्तम्यौ विभक्ती भवतः। गवां स्वामी, गोषु स्वामी। गवामीश्वरः, गोष्वीश्वरः। गवामधिपतिः, गोष्वधिपतिः। गवां दायदः, गोषु दायादः। गवां साक्षी, गोषु साक्षी। गवां प्रतिभूः। गवां प्रसूतः, गोषु प्रसूतः। षष्ठ्यामेव प्राप्तायां पक्षे सप्तमीविधानार्थं वचनम्।।

<आयुक्तकुशलाभ्यां चासेवायाम् ।। 2-3-40 ।। >

षष्ठीसप्तम्यौ वर्तेते। आयुक्तः = व्यापारितः, कुशलः = निपुणः ताभ्यां योगे आसेवायां गम्यमानायां षष्ठीसप्तम्यौ विभक्ती भवतः। आसेवा = तात्पर्यम्। आयुक्तः कटकरणस्य। आयुक्तः कटकरणे। कुशलः कटकरणस्य। कुशलः कटकरणे। आसेवायामिति किम् ? आयुक्तो गौः शकटे। तत्र सप्तम्येवाधिकरणे भवति।।

<यतश्च निर्धारणम् ।। 2-3-41 ।। >

षष्ठीसप्तम्यौ वर्तेते। जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणम् = निर्धारणम्। यतो निर्धारणं ततः षष्ठीसप्तम्यौ विभक्ती भवतः। मनुष्याणां क्षत्त्रियः शूरतमः। गवां कृष्णा सम्पन्नक्षीरतमा। गोषु कृष्णा सम्पन्नक्षीरतमा। अध्वगानां धावन्तः शीघ्रतमाः। अध्वगेषु धावन्तः शीघ्रतमाः।।

<पञ्चमी विभक्ते ।। 2-3-42 ।।>

`यतश्च निर्धारणम्' इति वर्तते। षष्ठीसप्तम्यपवादो योगः। विभागः = विभक्तम्। यस्मिन्निर्धारणाश्रये विभक्तमस्यास्ति ततः पञ्चमी विभक्तिर्भवति। माथुराः पाटलिपुत्रकेभ्यः सुकुमारतराः। आढ्यतराः।।

<साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ।। 2-3-43 ।। >

साधु, निपुण-इत्येताभ्यां योगेऽर्चायां गम्यमानायां सप्तमी विभक्तिर्भवति, न चेत् प्रतिः प्रयुज्यते। मातरि साधुः। पितरि साधुः। मातरि निपुणः। पितरि निपुणः। अर्चायामिति किम् ? साधुर्भृत्यो राज्ञः। तत्त्वकथने न भवति। अप्रतेरिति किम् ? साधुर्देवदत्तो मातरं प्रति। * अप्रत्यादिभिरिति वक्तव्यम् *(म.भा.1.459)। साधुर्देवदत्तो मातरं परि। मातरमनु।।

<प्रसितोत्सुकाभ्यां तृतीया च ।। 2-3-44 ।। >

प्रसित, उत्सुक-इत्येताभ्यां योगे तृतीया विभक्तिर्भवति, चकारात्सप्तमी च । प्रसितः=प्रसक्तः, यस्तत्र नित्यमेवावबद्धः स प्रसितशब्देनोच्यते। केशैः प्रसितः, केशेषु प्रसितः। केशैरुत्सुकः।।

<नक्षत्रे च लुपि ।। 2-3-45 ।। >

तृतीयासप्तम्यावनुवर्तेते। लुबन्तान्नक्षत्रशब्दात् तृतीयासप्तम्यौ विभक्ती भवतः। पुष्येण पायसमश्नीयात्। पुष्ये पायसमश्नीयात्। मघाभिः पललौदनम्। मघासु पललौदनम्। नक्षत्र इति किम् ? पञ्चालेषु वसति। लुपीति किम् ? मघासु ग्रहः। इह कस्मान्न भवति-अद्य पुष्यः, अद्य कृत्तिका ? `अधिकरणे' इति वर्तते। वचनं तु पक्षे तृतीयाविधानार्थम्।।

<प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ।। 2-3-46 ।। >

प्रातिपदिकार्थः = सत्ता। लिङ्गम् = स्त्रीलिङ्गपुंल्लिङ्गनपुंसकानि। परिमाणम् - द्रोणः, खारी, आढकम्। वचनम् = एकत्वद्वित्वबहुत्वानि। मात्रशब्दः

प्रत्येकमभिसम्बध्यते। प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे वचनमात्रे प्रथमा विभक्तिर्भवति। प्रातिपदिकार्थमात्रे--उच्चैः। नीचैः। लिङ्गग्रहणं किम् ? कुमारी, वृक्षः, कुण्डम् इत्यत्रापि यथा स्यात्। परिमाणग्रहणं किम् ? द्रोणः, खारी, आढकम्-इत्यत्रापि यथा स्यात्। वचनग्रहणं किम् ? एकत्वादिषूक्तेष्वपि यथा स्यात्-एकः द्वौ, बहवः। प्रातिपदिकग्रहणं किम् ? निपातस्यानर्थकस्य प्रातिपदिकत्वमुक्तम्, ततोऽपि यथा स्यात्-प्रलम्बते। अध्यागच्छति।।

<सम्बोधने च ।। 2-3-47 ।। >

आभिमुख्यकरणम् = सम्बोधनम्, तदधिके प्रातिपदिकार्थे प्रथमा न प्राप्नोतीति वचनमारभ्यते। सम्बोधने च प्रथमा विभक्तिर्भवति। हे देवदत्त। हे देवदत्तौ। हे देवदत्ताः।।

<साऽऽमन्त्रितम् ।। 2-3-48 ।।>

सम्बोधने या प्रथमा तदन्तं शब्दरूपमामन्त्रितसंज्ञं भवति। तथा चैवोदाहृतम्। आमन्त्रितप्रदेशाः-"आमन्त्रितं पर्वमविद्यमानवत्"(8.1.72/412) इत्येवमादयः।।

<एकवचनं सम्बुद्धिः ।। 2-3-49 ।। >

आमन्त्रितप्रथमाया यदेकवचनं तत्सम्बुद्धिसंज्ञं भवति। हे पटो! हे देवदत्त! सम्बुद्धिप्रदेशाः - "एङ्ह्रस्वात्सम्बुद्धेः"(6.1.69/193) इत्येवमादयः।।

<षष्ठी शेषे ।। 2-3-50 ।। >

कर्मादिभ्यो योऽन्यः प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिसम्बन्धादिः शेषस्तत्र षष्ठीविभक्तिर्भवति। राज्ञः पुरुषस्य गृहम्। पशोः पादः। पितुः पुत्रः।।

<ज्ञोऽविदर्थस्य करणे ।। 2-3-51 ।। >

जानातेरविदर्थस्याज्ञानार्थस्य करणे कारके षष्ठीविभक्तिर्भवति। सर्पिषो जानीते। मधुनो जानीते। सर्पिषा करणेन प्रवर्तत इत्यर्थः। प्रवृत्तिवचनो जनातिरविदर्थः। अथ वा-मिथ्याज्ञानवचनः। सर्पिषि रक्तः प्रतिहतो वा। चित्तभ्रान्त्या तदात्मना सर्वमेव ग्राह्यं प्रतिपद्यते। मिथ्याज्ञानमज्ञानमेव। अविदर्थस्येति किम् ? स्वरेण पुत्रं जानाति।।

<अधीगर्थदयेशां कर्मणि ।। 2-3-52 ।। >

`शेषे' इति वर्तते। अधीगर्थाः = स्मरणार्थाः, `दय दानगतिरक्षणेषु'(धा.पा.481), `ईश ऐश्वर्ये'(धा.पा.1021) -- एतेषां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठीविभक्तिर्भवति। मातुरध्येति। मातुः स्मरति। सर्पिषो दयते। सर्पिष ईष्टे। मधुन ईष्टे। कर्मणीति किम् ? मातुर्गुणैः स्मरति। शेष इति किम् ? मातरं स्मरति।।

<कृञः प्रतियत्ने ।। 2-3-53 ।। >

सतो गुणान्तराधानम् = प्रतियत्नः। करोतेः कर्मणि कारके शेषत्वेन विवक्षिते प्रतियत्ने गम्यमाने षष्ठी विभक्तिर्भवति। एधोदकस्योपस्कुरुते। शस्त्रपत्रस्योपस्कुरुते। प्रतियत्न इति किम् ? कटं करोति। कर्मणीति किम् ? एधोदकस्योपस्कुरुते प्रज्ञया। शेषे इत्येव--एधोदकमुपस्कुरुते।।

<रुजार्थानां भाववचनानामज्वरेः ।। 2-3-54 ।। >

रुजार्थानां धातूनां भाववचनानां भावकर्तृकाणां ज्वरिवर्जितानां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठीविभक्तिर्भवति। चौरस्य रुजति रोगः। चौरस्यामयत्यामयः। रुजार्थानामिति किम् ?

एति जीवन्तमानन्दो नरं वर्षशतादपि।

जीव पुत्रक मामैवं तपः साहसमाचर।।

भाववचनानामिति किम् ? नदी कूलानि रुजति। अज्वरेरिति किम् ? चौरं ज्वरयति ज्वरः। * अज्वरिसन्ताप्योरिति वक्तव्यम् *(म.भा.1.465)। चौरं सन्तापयति तापः। शेष इत्येव--चौरं रुजति रोगः।।

<आशिषि नाथः ।। 2-3-55 ।। >

`नाधृ नाथृ याच्ञोपतापैश्वर्याशीःषु'(धा.पा.6,7) पठ्यते, तस्याशीः-क्रियस्य कर्मणि कारके शेषत्वेन विवक्षिते षष्ठीविभक्तिर्भवति। सर्पिषो नाथते। मधुनो नाथते। आशिषीति किम् ? माणवकमुपनाथति, अङ्ग पुत्रकाधीष्व।।

<जासिनिप्रहणनाटक्राथपिषां हिंसायाम् ।। 2-3-56 ।। >

जासि, निप्रहण, नाट, क्राथ, पिष्-इत्येतेषां धातूनां हिंसाक्रियाणां कर्मणि कारके षष्ठीविभक्तिर्भवति। `जसु हिंसायाम्'(धा.पा.1669) `जसुताडने'(धा.पा.1719) इति च चुरादौ पठ्यते तस्येदं ग्रहणम्, न दैवादिकस्य-`जसु मोक्षणे'(धा.पा.1212) इत्यस्य। चौरस्योज्जासयति। वृषलस्योज्जासयति। `निप्रहण' इति सङ्घातविगृहीतविपर्यस्तस्य ग्रहणम्। चौरस्य निप्रहन्ति। चौरस्य निहन्ति। चौरस्य प्रहन्ति। चौरस्य प्रणिहन्ति। चौरस्योन्नाटयति। वृषलस्योन्नाटयति। चौरस्योत्क्राथयति। वृषलस्य क्राथयति। निपातनाद् वृद्धिः। अयं हि घटादौ पठ्यते-`श्रथ क्नथ क्रथ क्लथ हिंसार्थाः'(धा.पा.799-802) इति, तत्र `घटादयो मितः'(धा.पा.763-822) इति मित्संज्ञायाम् "मितां ह्रस्वः"(6.4.92/2568) इति ह्रस्वत्वं स्यात्। चौरस्य पिनष्टि। वृषलस्य पिनष्टि। हिंसायामिति किम् ? धानाः पिनष्टि। शेष इत्येव-चौरमुज्जासयति। एषामिति किम् ? चौरं हिनस्ति। निप्रहण इति किम् ? चौरं विहन्ति।।

<व्यवहृपणोः समर्थयोः ।। 2-3-57 ।। >

व्यवहृ, पण-इत्येतयोः समर्थयोः = समानार्थयोः कर्मणि कारके षष्ठीविभक्तिर्भवति। द्यूते क्रयविक्रयव्यवहारे च समानार्थत्वमनयोः। शतस्य व्यवहरति। सहस्रस्य व्यवहरति। शतस्य पणते। सहस्रस्य पणते। आयप्रत्ययः कस्मान्न भवति ? स्तुत्यर्थस्य पणतेरायप्रत्यय इष्यते। समर्थयोरिति किम् ? शलाकां व्यवहरति। गणयतीत्यर्थः। ब्राह्मणान् पणायते।स्तौतीत्यर्थः। शेष इत्येव-शतं पणते।

<दिवस्तदर्थस्य ।। 2-3-58 ।।>

व्यवहृपणिसमानार्थस्य दीव्यतेः कर्मणि षष्ठीविभक्तिर्भवति। शतस्य दीव्यति। सहस्रस्य दीव्यति। तदर्थस्येति किम् ? ब्राह्मणं दीव्यति। योगविभाग उत्तरार्थः।

<विभाषोपसर्गे ।। 2-3-59 ।। >

`दिवस्तदर्थस्य' इति नित्यं षष्ठ्यां प्राप्तायां सोपसर्गस्य विकल्प उच्यते। उपसर्गे सति दिवस्तदर्थस्य कर्मणि कारके विभाषा षष्ठीविभक्तिर्भवति। शतस्य प्रतिदीव्यति। सहस्रस्य प्रतिदीव्यति। शतं प्रतिदीव्यति। सहस्रं प्रतिदीव्यति। उपसर्गस्येति किम् ? शतस्य दीव्यति। तदर्थस्येत्येव-शलाकां प्रतिदीव्यति।

<द्वितीया ब्राह्मणे ।। 2-3-60 ।। >

ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि कारके द्वितीया विभक्तिर्भवति। गामस्य तदहः सभायां दीव्येयुः(मै.सं.1.6.11/56)। अनुपसर्गस्य षष्ठ्यां प्राप्तायामिदं वचनम्। सोपसर्गस्य तु छन्दसि व्यवस्थितविभाषायापि सिध्यति।

<प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने ।। 2-3-61 ।। >

`प्रेष्य' इति इष्यतेर्दैवादिकस्य लोण्मध्यमपुरुषस्यैकवचनम्, तत्साहचर्याद् ब्रुविरपि तद्विषय एव गृह्यते। प्रेष्यब्रुवोर्हविषः कर्मणः षष्ठीविभक्तिर्भवति देवतासम्प्रदाने सति। `अग्नये छागस्य हविषो वपाया मेदसः प्रे3ष्य'(का.श्रौ.6.6.26) `अग्नये छागस्य हविषो वपाया मेदसोऽनुब्रूहि'(का.श्रौ.6.6.20)। प्रेष्यब्रुवोरिति किम्? `अग्नये छागं हविर्वपां मेदो जुहुधि'(का.श्रौ.6.6.23)। हविष इति किम् ? `अग्नये गोमयानि प्रेष्य'(श.ब्रा.12.5.2.3)। देवतासम्प्रदान इति किम् ? माणवकाय पुरोडाशं प्रेष्य।। * हवुषः प्रस्थितस्य प्रतिषेधो वक्तव्यः *(म.भा.1.466) इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य3'(का.श्रौ.6.6.23)

<चतुर्थ्यर्थे बहुलं छन्दसि ।। 2-3-62 ।। >

छन्दसि विषये चतुर्थ्यर्थे षष्ठीविभक्तिर्भवति बहुलम्। पुरुषमृगश्चन्द्रमसः(वा.सं.24.35)। पुरुषमृगश्चन्द्रमसे। गोधा कालका दार्वाघाटस्ते वनस्पतीनाम्। ते वनस्पतिभ्यः(वा.सं.24.35)। बहुलग्रहणं किम् ? कृष्णो रात्र्यै(का.सं.68.40)। हिमवते हस्ती(वा.सं.24.30)। षष्ठ्यर्थे चतुर्थी वक्तव्या *(म.भा.1.466)। या खर्वेण पिबति तस्यै खर्वो जायते। या दतो धावति तस्यै श्यावदन्। या नखानि कृन्तति तस्यै कुनखः। याऽऽङ्क्ते तस्यै काणः। याऽभ्यङ्क्ते तस्यै दुश्चर्मा। या केशात् प्रलिखते। तस्यै खलतिः। अहल्यायै जारः(3.3.1.19)।।

<यजेश्च करणे ।। 2-3-63 ।।>

यजेर्धातोः करणे कारके छन्दसि बहुलं षष्ठीविभक्तिर्भवति। घृतस्य यजते। घृतेन यजते। सोमस्य यजते। सोमेन यजते।।

<कृत्वोऽर्थप्रयोगे कालेऽधिकरणे ।। 2-3-64 ।। >

`छन्दसि बहुलम्' इति निवृत्तम्। कृत्वोऽर्थानां प्रत्ययानां प्रयोगे कालेऽधिकरणे षष्ठीविभक्तिर्भवति। पञ्चकृत्वोऽह्नो भुङ्क्ते। द्विरह्नोऽधीते। कृत्वोऽर्थग्रहणं किम् ? अह्नि शेते। रात्रौ शेते। प्रयोगग्रहणां किम् ? अहनि भुक्तम्। गम्यते हि द्विस्त्रिश्चतुर्वेति, न त्वप्रयुज्यमाने भवति। कालग्रहणं किम् ? द्विः कांस्यपात्र्यां भुङ्क्ते। अधिकरण इति किम्। द्विरह्नो भुङ्क्ते। शेष इत्येव-द्विरहन्यधीते।।

<कर्तृकर्मणोः कृति ।। 2-3-65 ।। >

कृत्प्रयोगे कर्तरि कर्मणि च षष्ठीविभक्तिर्भवति। भवतः शायिका। भवत आसिका। कर्मणि-अपां स्रष्टा। पुरां भेत्ता। वज्रस्य भर्ता। कर्तृकर्मणोरिति किम् ? शस्त्रेण भेत्ता। कृतीति किम् ? तद्धितप्रयोगे मा भूत्--कृतपूर्वी कटम्। भुक्तपूर्वी ओदनम्। शेष इति निवृत्तम्, पुनः कर्मग्रहणात्; इतरथा हि `कर्तरि च कृति' इत्येवं ब्रूयात्।।

<उभयप्राप्तौ कर्मणि ।। 2-3-66 ।। >

पूर्वेण षष्ठी प्राप्ता नियम्यते। `उभयप्राप्तौ' इति बहुव्रीहिः उभयोः प्राप्तिर्यस्मिन्कृति सोऽयमुभयप्राप्तिः। तत्र कर्मण्येव षष्ठी विभक्तिर्भवति, न कर्तरि। आश्चर्यो गवां दोहोऽगोपालकेन। रोचते मे ओदनस्य भोजनं देवदत्तेन। साधु खलु पयसः पानं यज्ञदत्तेन। बहुव्रीहिविज्ञानादिह नियमो न भवति - आश्चर्यमिदमोदनस्य नाम पाको ब्राह्मणानां च प्रादुर्भाव इति।। * अकाकारयोः स्त्रीप्रत्यययोः प्रयोगे नेति वक्तव्यम् *(म.भा.1.468)। भेदिका देवदत्तस्य काष्ठानाम्। चिकीर्षा देवदत्तस्य कटस्य।। * शेषे विभाषा *(म.भा.1.468)। अकाकारयोः स्त्रीप्रत्यययोर्ग्रहणात् तदपेक्षया शेषः स्त्रीप्रत्यय एव गृह्यते। विचित्रा हि सूत्रस्य कृतिः पाणिनेः, पाणिनिना वा।। केचिदविशेषेणैव विभाषामिच्छन्ति - शब्दानामनुशासनमाचार्येण, आचार्यस्येति वा।।

<क्तस्य च वर्तमाने ।। 2-3-67 ।। >

"न लोकाव्ययनिष्ठा"(2.3.69/627) इति प्रतिषेधे प्राप्ते पुनः षष्ठी विधीयते। क्तस्य वर्तमानकालविहितस्य प्रयोगे षष्ठीविभक्तिर्भवति। राज्ञां मतः। राज्ञां बुद्धः। राज्ञां पूजितः। क्तस्येति किम् ? ओदनं पचमानः। वर्तमान इति किम् ? ग्रामं गतः। * नपुंसके भाव उपसंख्यानम् *(म.भा.1.468)। छात्रस्य

हसितम्। मयूरस्य नृत्तम्। कोकिलस्य व्याहृतम्। * शेषविज्ञानात् सिद्धम् *(म.भा.1.468)। तथा च कर्तृविवक्षायां तृतीयापि भवति--छात्रेण हसितमिति।।

<अधिकरणवाचिनश्च ।। 2-3-68 ।। >

"क्तोऽधिकरणे च"(3.4.76/3087) इति वक्ष्यति, तस्य प्रयोगे षष्ठीविभक्तिर्भवति। अयमपि प्रतिषेधापवादो योगः। इदमेषामासितम्। इदमेषां शयितम्। इदमहेः सृप्तम्। इदं वनकपेर्यातम्। इदमेषां भुक्तम्। इदमेषामशितम्। द्विकर्मकाणां प्रयोगे कर्तरि कृति द्वयोरपि षष्ठीद्वितीयावत्। नेताऽश्वस्य ग्रामस्य चैत्रः। अन्ये प्रधाने कर्मण्याहुः, तदा-नेताश्वस्य ग्रामं चैत्रः।।

<न लोकाव्ययनिष्ठाखलर्थतृनाम् ।। 2-3-69 ।। >

"कर्तृकर्मणोः कृति"(2.3.65/623) इति षष्ठी प्राप्ता प्रतिषिध्यते। ल, उ, उक, अव्यय, निष्ठा,खलर्थ, तृन्-इत्येतेषां प्रयोगे षष्ठी विभक्तिर्न भवति। `ल' इति शतृशानचौ कानच्क्वसू किकिनौ च गृह्यन्ते-ओदनं पचन्। ओदनं पचमानः। ओदनं पेचानः। ओदनं पेचिवान्। पपिः सोमम्। ददिर्गाः(ऋ.6.23.4)। उ-कटं चिकीर्षुः। ओदनं बुभुक्षुः। कन्यामलंकरिष्णुः। इष्णुचोऽपि प्रयोगे निषेधः। उक--आगामुकं वाराणसीं रक्ष आहुः। * उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः *(म.भा.1.469)। दास्याः कामुकः। अव्यय-कटं कृत्वा। ओदनं भुक्त्वा। * अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः *(म.भा.1.469)। व्युष्टायां पुरा सूर्यस्योदेतोराधेयः(3.4.16/3443)(का.स.8.3)। पुरा क्रूरस्य विसृपो विरप्शिन्।(3.1.17/3444)(तै.सं.1.1.9.3) निष्ठा-ओदनं भुक्तवान्। देवदत्तेन कृतम्। खलर्थ-ईषत्कारः कटो भवता। ईषत्पानः सोमो भवता। तृन्निति प्रत्याहारग्रहणम्, "लटः शतृशानचौ"(3.2.135/3115) इत्यारभ्य आतृनो नकारात्। तेन शानन्-चानश्-शतृ-तृनामपि प्रतिषेधो भवति। सोमं पवमानः। नडमाघ्नानः। अधीयन् पारायणम्। कर्ता कटान्। वदिता जनापवादान्। * द्विषः शतुर्वा वचनम् *(म.भा.1.470)। चौरं द्विषन्। चौरस्य द्विषन्।।

<अकेनोर्भविष्यदाधमर्ण्ययोः ।। 2-3-70 ।। >

अकस्य भविष्यति काले विहितस्य,इनस्तु भविष्यति चाधमर्ण्ये विहितस्य प्रयोगे षष्ठीविभक्तिर्न भवति। कटं कारको व्रजति। ओदनं भोजको व्रजति। इनः खल्वपि-ग्रामं गमी(म.भा.1.470)। ग्रामं गामी(3.3.3/3171)। आधमर्ण्य-शतं दायी। सहस्रं दायी। भविष्यदाधमर्ण्ययोरिति किम् ? यवानां लावकः। सक्तूनां पायकः। अवश्यं कारी कटस्य। इह कस्मान्न भवति-वर्षशतस्य पूरकः पुत्रपौत्राणां दर्शक इति ? भविष्यदधिकारे विहितस्याकस्येदं ग्रहणम्।

<कृत्यानां कर्तरि वा ।। 2-3-71 ।। >

"कर्तृकर्मणोः कृति"(2.3.65/623) इति नित्यं षष्ठी प्राप्ता कर्त्तरि विकल्प्यते। कृत्यानां प्रयोगे कर्तरि वा षष्ठी विभक्तिर्भवति, न कर्मणि। भवता कटः कर्तव्यः। भवतः कटः कर्तव्यः। कर्त्तरीति किम् ? गेयो माणवकः साम्नाम्। * उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधो वक्तव्यः *(म.भा.1.470)। क्रष्टव्या ग्रामं शाखा देवदत्तेन। नेतव्या ग्राममजा देवदत्तेन।।

<तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् ।। 2-3-72 ।। >

तुल्यार्थैः शब्दैर्योगे तृतीया विभक्तिर्भवत्यन्यतरस्याम्, पक्षे षष्ठी च, तुलोपमाशब्दौ वर्जयित्वा। शेषे विषये तृतीयाविधानात् तया मुक्ते षष्ठ्येव भवति। तुल्यो देवदत्तेन, तुल्यो देवदत्तस्य। सदृशो देवदत्तेन, सदृशो देवदत्तस्य। अतुलोपमाभ्यामिति किम् ? तुला देवदत्तस्य नास्ति। उपमा कृष्णस्य न विद्यते। वेति वर्तमानेऽन्यतरास्याङ्ग्रहणमुत्तरसूत्रे तस्य चकारेणानुकर्षणार्थम्; इतरथा हि तृतीयानुकृष्येत।।

<चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ।। 2-3-73 ।। >

आशिषि गम्यमानायाम् आयुष्य, मद्र, भद्र, कुशल, सुख, अर्थ, हित-इत्येतैर्योगे चतुर्थी विभक्तिर्भवति। चकारो विकल्पानुकर्षणार्थः। शेषे चतुर्थीविधानात्तया मुक्ते षष्ठीविभक्तिर्भवति। * अत्रायुष्यादीनां पर्यायग्रहणं कर्त्तव्यम् *। आयुष्यं देवदत्ताय देवदत्तस्य वा भूयात्। चिरं जीवितं देवदत्ताय देवदत्तस्य वा भूयात्। मद्रं देवदत्ताय देवदत्तस्य वा भूयात्। भद्रं देवदत्ताय। भद्रं देवदतस्य। कुशलं देवदत्ताय। कुशलं देवदत्तस्य। निरामयं देवदत्ताय। निरामयं देवदत्तस्य। सुखं देवदत्ताय। सुखं देवदत्तस्य। शं देवदत्ताय। शं देवदत्तस्य। अर्थो देवदत्ताय। अर्थो देतवत्तस्य। प्रयोजनं देवदत्ताय। प्रयोजनं देवदत्तस्य। हितं देवदत्ताय। हितं देवदत्तस्य। पथ्यं देवदत्ताय। पथ्यं देवदत्तस्य। आशिषीति किम् ? आयुष्यं देवदत्तस्य तपः।।

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ द्वितीयाध्यायस्य तृतीयः पादः।।

2.4

अथ द्वितीयाध्याये चतुर्थः पादः

<द्विगुरेकवचनम् ।। 2-4-1 ।। >

द्विगुः समासः एकवचनं भवति। एकस्य वचनम् = एकवचनम्। एकस्यार्थस्य वाचको भवतीत्यर्थः। तदनेन प्रकारेण द्विग्वर्थस्यैकवद्भावो विधीयते, द्विग्वर्थ एकवद्भवतीति। समाहारद्विगोश्चेदं ग्रहणम्, नान्यस्य। पञ्चपूलाः समाहृताः पञ्चपूली। दशपूली। द्विग्वर्थस्यैकत्वादनुप्रयोगेऽप्येकवचनं भवति--पञ्चपूलीयं शोभनेति।।

<द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् ।। 2-4-2 ।। >

`एकवचनम्' इति वर्त्तते। अङ्गशब्दस्य प्रत्येकं वाक्यपरिसमाप्त्या त्रीणि वाक्यानि संपद्यन्ते। प्राण्यङ्गानां द्वन्द्व एकवद्भवति, तथा तूर्याङ्गानां सेनाङ्गानां च । प्राण्यङ्गानां तावत्--पाणिपादम्। शिरोग्रीवम्। तूर्याङ्गानाम्--मार्दङ्गिकपाणविकम्। वीणावादकपरिवादकम्। सेनाङ्गानाम्-रथिकाश्वारोहम्। रथिकपादातम्। हस्त्यश्वादिषु परत्वात्पशुद्वन्द्वे विभाषयैकवद् भवति। इतरेतरयोगे समाहारे च द्वन्द्वो विहितः, तत्र समाहारस्यैकत्वात्सिद्धमेवैकवचनम्? इदं तु प्रकारणं विषयविभागार्थम्-प्राण्यङ्गादीनां समाहार एव द्वन्द्वः, दधिपयआदीनामितरेतरयोग एव, वृक्षमृगादीनामुभयत्रेति।।

< अनुवादे चरणानाम् ।। 2-4-3 ।।>

चरणशब्दः शाखानिमित्तकः पुरुषेषु वर्तते। चरणानां द्वन्द्व एकवद्भवति, अनुवादे गम्यमाने। प्रमाणान्तरावगतस्यार्थस्य शब्देन संकीर्त्तनम् = अनुवादः। उदगात्कठकालापम्। प्रत्यष्ठात्कठकौथुमम्। कठकालापादीनामुदयप्रतिष्ठे प्रमाणान्तरावगते यदा पुनः शब्देनानूद्यते तदैवमुदाहरणम्। यदा तु प्रथमत एवोपदेशस्तदा प्रत्युदाहरणम्। अनुवादे इति किम्?उदगुः कठकालापाः। प्रत्यष्ठुः कठकौथुमाः।। * स्थेणोरद्यतन्यां चेति वक्तव्यम् *(म.भा.1.474)। स्थेणोरिति किम् ? अनन्दिषुः कठकालापाः। अद्यतन्यामिति किम्? उद्यन्ति कठकालापाः।।

<अध्वर्युक्रतुरनपुंसकम् ।। 2-4-4 ।। >

अध्वर्युवेदे यस्य क्रतोर्विधानं सोऽध्वर्युक्रतुः। अध्वर्युक्रतुवाचिनां शब्दानामनपुंसकलिङ्गानां द्वन्द्व एकद्भवति। अध्वर्युक्रतुरनपुंसकं द्वन्द्व इति गौणो निर्देशः। अर्काश्वमेधम्। सायाह्नातिरात्रम्। अध्वर्युक्रतुरिति किम्? इषुवज्रौ। उद्भिद्बलभिदौ। अनपुंसकमिति किम्? राजसूयवाजपेये। इह कस्मान्न भवति-दर्शपौर्णमासौ? क्रतुशब्दः सोमयागेषु रूढः।।

<अध्ययनतोऽविप्रकृष्टाख्यानाम् ।। 2-4-5 ।। >

अध्ययनेन निमित्तेन येषामविप्रकृष्टा = प्रत्यासन्ना आख्या तेषां द्वन्द्व एकवद्भवति। पदकक्रमकम्। क्रमकवार्तिकम्। सम्पाठः = पदानां क्रमस्य च प्रत्यासन्नः। अध्ययनत इति किम्? पितापुत्रौ। अविप्रकृष्टाख्यानामिति किम्? याज्ञिकवैयाकरणौ।।

<जातिरप्राणिनाम् ।। 2-4-6 ।। >

जातिवाचिनां शब्दानां द्वन्द्व एकवद्भवति, प्राणिनो वर्जयित्वा। आराशस्त्रि।धानाशष्कुलि। जातिरिति किम्? नन्दकपाञ्चजन्यौ। अप्राणिनामिति किम् ? ब्राह्मणक्षत्रियविट्शूद्राः। `नञिवयुक्तन्यायेन'(व्या.प.65) द्रव्यजातीनामयमेकवद्भावः, न गुणक्रियाजातीनाम्। रूपरसगन्धस्पर्शाः। गमनाकुञ्चनप्रसारणानि। जातिपरत्वे च जातिशब्दानामयमेकवद्भावो विधीयते, न नियतद्रव्यविवक्षायाम्--इह कुण्डे बदरामलकानि तिष्ठन्तीति।।

<विशिष्टलिङ्गो नदी देशोऽग्रामाः ।। 2-4-7 ।। >

विशिष्टलिङ्गानाम् = भिन्नलिङ्गानां नदीवाचिनां शब्दानां देशवाचिनां च ग्रामवर्जितानां द्वन्द्व एकवद्भवति। नद्यवयवो द्वन्द्वो नदीत्युच्यते। देशावयवश्च देशः। नदी देश इत्यसमासनिर्देश एवायम्। उद्ध्यश्च इरावती च उद्ध्येरावति। गङ्गाशोणम्। देशः खल्वपि कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम्। कुरुकुरुजाङ्गलम्। विशिष्टलिङ्ग इति किम्? कुक्कुटमयूर्यौ। अग्रामा इति किम् ? जाम्बवश्च शालूकिनी च जाम्बवशालूकिन्यौ। नदीग्रहणमदेशत्वात्। जनपदो हि देशः, तथा च पर्वतानां ग्रहणं न भवति-कैलासश्च गन्धमादनं च कैलासगन्धमादने। * अग्रामा इत्यत्र नगराणां प्रतिषेधो वक्तव्यः *(म.भा.1.474)। इह मा भूत्--मथुरा च पाटलिपुत्रं च मथुरापाटलिपुत्रम्। * उभयतश्च ग्रामाणां प्रतिषेधो वक्तव्यः *(म.भा.1.474)। सौर्यं च नगरम्, केतवतं च ग्रामः = सौर्यकेतवते।।

<क्षुद्रजन्तवः ।। 2-4-8 ।। >

अपचितपरिमाणः क्षुद्रः। क्षुद्रजन्तुवाचिनां द्वन्द्व एकवद्भवति। दंशमशकम्। यूकालिक्षम्। क्षुद्रजन्तव इति किम् ? ब्राह्मणक्षत्त्रियौ।।
क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्र एव यः।
शतं वा प्रसृतौ येषां केचिदानकुलादपि।।
`आ नकुलादपि' इतीयमेव स्मृतिः प्रमाणम्; इतरासां तद्विरोधात्।।

<येषां च विरोधः शाश्वतिकः ।। 2-4-9 ।। >

विरोधः = वैरम्। शाश्वतिकः = नित्यः। येषां शाश्वतिको विरोधस्तद्वाचिनां शब्दानां द्वन्द्व एकवद्भवति। मार्जारमूषकम् अहिनकुलम्। शाश्वतिक इति किम् ? गौपालिशालङ्कायनाः कलहायन्ते। चकारः पुनरस्यैव समुच्चयार्थः। तेन पशुशकुनिद्वन्द्वे विरोधिनामनेन नित्यमेकवद्भावो भवति-अश्वमहिषम्, श्वश्रृगालम्, काकोलूकम्।।

<शूद्राणामनिरवसितानाम् ।। 2-4-10 ।। >

निरवसानम् = बहिष्करणम्। कुतो बहिष्करणम् ? पात्रात्। यैर्भुक्ते पात्रं संस्कारेणापि न शुध्यति ते निरवसिताः, न निरवसिताः अनिरवसिताः। अनिरवसितशूद्रवाचिनां शब्दानां द्वन्द्व एकवद्भवति। तक्षायस्कारम्। रजकतन्तुवायम्। अनिरवसितानामिति किम्? चण्डालमृतपाः।।

<गवाश्वप्रभृतीनि च ।। 2-4-11 ।। >

गवाश्वप्रभृतीनि कृतैकवद्भावानि द्वन्द्वरूपानि साधूनि भवन्ति। गवाश्वम्, गवाविकम्,गवैडकम्, अजाविकम्, अजैडकम्। कुब्जवामनम्, कुब्जकैरातकम्, पुत्रपौत्रम्, श्वचण्डालम्। स्त्रीकुमारम्, दासीमाणवकम्। शाटीपिच्छकम्। उष्ट्रखरम्, उष्ट्रशशम्। मूत्रशकृत्,मूत्रपुरीषम्, यकृन्मेदः, मांसशोणितम्। दर्भशरम्,

दर्भपूतीकम्, अर्जुनशिरीषम्, तृणोलपम्। दासीदासम्, कुटीकुटम्, भागवतीभागवतम्। गवाश्वप्रभृतिषु यथोच्चरितं द्वन्द्ववृत्तम्। रूपान्तरे तु नायं विधिर्भवति-गोऽश्वम्, गोऽश्वौ। पशुद्वन्द्वविभाषैव भवति।।

<विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् ।। 2-4-12।।>

वृक्ष, मृग, तृण, धान्य, व्यञ्जन, पशु, शकुनि, अश्ववडव, पूर्वापर, अधरोत्तर-इत्येतेषां द्वन्द्वो विभाषैकवद्भवति। प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः। रुरुपृषतम्, रुरुपृषताः। कुशकाशम्, कुशकाशाः। व्रीहियवम्, व्रीहियवाः। दधिघृतम्, दधिघृते। गोमहिषम्, गोमहिषाः। तित्तिरिकपिञ्जलम्, तित्तिरिकपिञ्जलाः। अश्ववडवम्, अश्ववडवौ। पूर्वापरम्, पूर्वापरे। अधरोत्तरम्, अधरोत्तरे। * बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानाम् *(म.भा.1.475)। एषां बहुप्रकृतिरेव द्वन्द्व एकवद्भवति, न द्विप्रकृतिः। बदरामलके। रथिकाश्वारोहौ। प्लक्षन्यग्रोधौ। रुरुपृषतौ। हंसचक्रवाकौ। यूकालिक्षे। व्रीहियवौ। कुशकाशौ।।

<विप्रतिषिध्दं चानधिकरणवाचि ।। 2-4-13 ।। >

परस्परविरुध्दम् =विप्रतिषिध्दम्। विप्रतिषिध्दर्थानां शब्दानामनधिकरणवाचिनामद्रव्यवाचिनां द्वन्द्व एकवद्भवति। विभाषानुकर्षणार्थश्चकारः। शीतोष्णम्, शीतोष्णे। सुखदुःखम्, सुखदुःखे। जीवितमरणम्, जीवितमरणे। विप्रतिषिद्धमिति किम् ? कामक्रोधौ। अनधिकरणवाचीति किम् ? शीतोष्णे उदके।।

<न दधिपयआदीनि ।। 2-4-14 ।। >

यथायथमेकवद्भावे प्राप्ते प्रतिषेध आरभ्यते। दधिपयआदीनि शब्दरूपाणि नैकवद्भवन्ति। दधिपयसी। सर्पिर्मधुनी। मधुसर्पिषी। ब्रह्मप्रजापती। शिववैश्रवणौ। स्कन्दविशाखौ। परिव्राट्कौशिकौ। प्रवर्ग्योपसदौ। शुक्लकृष्णौ। इध्माबर्हिषी। निपातनाद्दीर्घः। दीक्षातपसी। श्रध्दातपसी। मेधातपसी। अद्ययनतपसी। उलूखलमुसले। आद्यावसाने। श्रद्धामेधे। ऋक्सामे। वाङ्मनसे।।

<अधिकरणैतावत्त्वे च ।। 2-4-15 ।।>

`न' इति वर्त्तते। अधिकरणं वर्त्तिपदार्थः, स हि समासस्यार्थस्याधारः, तस्यैतावत्त्वे परिमाणे गम्यमाने द्वन्द्वो नैकवद्भवति। यथायथमेकवद्भावः प्राप्तः प्रतिषिध्यते। दश दन्तोष्ठाः। दश मार्दङ्गिकपाणविकाः।।

<विभाषा समीपे ।। 2-4-16 ।।>

अधिकरणैतावत्त्वस्य समीपे विभाषा द्वन्द्व एकवद्भवति। उपदशं दन्तोष्ठम्, उपदशा दन्तोष्ठाः। उपदशं मार्दङ्गिकपाणविकम्, उपदशा मार्दङ्गिकपाणविकाः। अव्ययस्य सङ्ख्ययाऽव्ययीभावोऽपि विहितः, बहुव्रीहिरपि। तत्रैकवद्भावपक्षेऽव्ययीभावोऽनुप्रयुज्यते, इतरत्र बहुव्रीहिः।।

<स नपुंसकम् ।। 2-4-17 ।। >

यस्यायमेकवद्भावो विहितः स नपुंसकलिङ्गो भवति द्विगुर्द्वन्द्वश्च। पञ्चगवम्। दशगवम्। द्वन्द्वः खल्वपि--पाणिपादम्। शिरोग्रीवम्। परलिङ्गतापवादो योगः। * अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते*। पञ्चपूली। दशरथी। * वाऽऽबन्तः स्त्रियामिष्टः *। पञ्चखट्वम्, पञ्चखट्वी। * अनो नलोपश्च वा च द्विगुः स्त्रियाम् *। पञ्चतक्षम्, पञ्चतक्षी। * पात्रादिभ्यः प्रतिषेधो वक्तव्यः *। पञ्चपात्रम्। चतुर्युगम्। त्रिभुवनम्।।

<अव्ययीभावश्च ।। 2-4-18 ।। >

अव्ययीभावश्च समासो नपुंसकलिङ्गो भवति। अधिस्त्रि। उपकुमारि। उन्मत्तगङ्गम्। लोहितगङ्गम्। पूर्वपदार्थप्रधानस्यालिङ्गतैव प्राप्ता, अन्यपदार्थप्रधानस्याभिधेयलिङ्गता,अत इदमुच्यते। अनुक्तसमुच्चयार्थश्चकारः। * पुण्यसुदिनाभ्यामह्नः क्लीबतेष्यते *। पुण्याहम्। सुदिनाहम्। * पथः संख्याव्ययादेः क्लीबतेष्यते *। त्रिपथम्। चतुष्पथम्। विपथम्। सुपथम्। क्रियाविशेषणानां च क्लीबतेष्यते *। मृदु पचति। शोभनं पचति।।

<तत्पुरुषोऽनञ्कर्मधारयः ।। 2-4-19 ।। >

अधिकारोऽयमुत्तरसूत्रेषूपतिष्ठते। नञ्समासं कर्मधारयं च वर्जयित्वाऽन्यस्तत्पुरुषो नपुंसकलिङ्गो भवतीत्येतदधिकृतं वेदितव्यम्,यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र। वक्ष्यति-"विभाषा सेनासुरा"(2.4.25/828) इति। ब्राह्मणसेनम्। ब्राह्मणसेना। तत्पुरुष इति किम् ? दृढसेनो राजा। अनञिति किम्? असेना। अकर्मधारय किम्? परमसेना।।(म.भा.1.478)

<संज्ञायां कन्थोशीनरेषु ।। 2-4-20 ।। >

संज्ञायां विषये कन्थान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति, सा चेत् कन्था उशीनरेषु भवति। सौशमिकन्थम्। आह्वरकन्थम्।। संज्ञायामिति किम् ? वीरणकन्था। उशीनरेष्विति किम् ? दाक्षिकन्था। परवल्लिङ्गतापवाद इदं प्रकरणम्।।

<उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ।। 2-4-21 ।। >

उपज्ञायते इत्युपज्ञा, उपक्रम्यते इत्युपक्रमः। उपज्ञा च उपक्रमश्च उपज्ञोपक्रमम्। तदन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति तदाद्याचिख्यासायाम् = तयोरुपज्ञोपक्रमयोरादेराचिख्यासायां गम्यमानायाम्। आख्यातुमिच्छा = आचिख्यासा, यद्युपज्ञेयस्योपक्रम्यस्य चार्थस्यादिराख्यातुमिष्यते तत एतद्भवति। पाणिन्युपज्ञमकालकं व्याकरणम्। पाणिनेरुपज्ञानेन प्रथमतः प्रणीतमकालकं व्याकरणम्। व्याड्युपज्ञं दशहुष्करणम्। आद्योपक्रमं प्रासादः। नन्दोपक्रमाणि मानानि। दर्शनीयोपक्रमं सुकुमारम्। उपज्ञोपक्रममिति किम् ? वाल्मीकिश्लोकाः। तदाद्याचिख्यासायामिति किम् ? देवदत्तोपज्ञो रथः। यज्ञदत्तोपक्रमो रथः।।

<छाया बाहुल्ये ।। 2-4-22 ।। >

"विभषा सेनासुराच्छाया"(2.4.25/828) इति विभाषां वक्ष्यति, नित्यार्थमिदं वचनम्। छायान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति बाहुल्ये गम्यमाने। पूर्वपदार्थधर्मः = बाहुल्यम्। शलभादीनां हि बहुत्वं गम्यते। शलभच्छायम्। इक्षुच्छायम्। बाहुल्य इति किम् ? कुड्यच्छाया।।

<सभा राजाऽमनुष्यपूर्वा ।। 2-4-23 ।। >

सभान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति सा चेत्सभाराजपूर्वा, अमनुष्यपूर्वा च भवति। इनसभम्। ईश्वरसभम्। इह कस्मान्न भवति--राजसभा ? पर्यायवचनस्यैवेष्येते। तदुक्तम्--`जित्पर्यायस्यैव राजाद्यर्थम्'(वा.10) इति। अमनुष्यपूर्वा--रक्षः सभम्। पिशाचसभम्। इह कस्मान्न भवति--काष्ठसभा ? अमनुष्यशब्दो रूढिरूपेण रक्षःपिशाचादिष्वेव वर्त्तते। राजाऽमनुष्यपूर्वेति किम् ? देवदत्तसभा।।

<अशाला च ।। 2-4-24 ।। >

अशाला च या सभा तदन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति। सङ्घातवचनोऽत्र सभाशब्दो गृह्यते। सत्रीसभम्। दासीसभम्। दासीसङ्घात इत्यर्थः। अशालेति किम् ? अनाथसभा। अनाथकुटीत्यर्थः।। <विभाषा सेनासुराच्छायाशालानिशानाम् ।। 2-4-25 ।।>

सेना, सुरा, छाया, शाला, निशा-इत्येवमन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति विभाषा। ब्राह्मणसेनम्, ब्राह्मणसेना। यवसुरम्, यवसुरा। कुड्यच्छायम्, कुड्यच्छाया। गोशालम्, गोशाला। श्वनिशम्, श्वनिशा।।

<परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ।। 2-4-26 ।। >

समाहारद्वन्द्वे नपुंसकलिङ्गस्य विहितत्वाद् इतरेतरयोगद्वन्द्वस्येदं ग्रहणम्। परस्य यल्लिङ्गं तद्भवति द्वन्द्वस्य तत्पुरुषस्य च । उत्तरपदलिङ्गं द्वन्द्वतत्पुरुषयोर्वधीयते। कुक्कुटमयूर्याविमे, मयूरीकुक्कुटाविमौ। तत्पुरुषस्य-अर्ध पिप्पल्याः अर्धपिप्पल्ली। अर्धकोशातकी। अर्धनखरञ्जनी। * द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः *(म.भा.1.478)। द्विगुः-पञ्चसु कपालेषु संस्कृतः पुरोडाशः पञ्चकपालः। प्राप्तो जीविकां प्राप्तजीविकः। आपन्नो जीविकाम् आपन्नजीविकः। अलं जीविकायै अलञ्जीविकः। गतिसमासः-निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः।।

<पूर्ववदश्ववडवौ ।। 2-4-27 ।।>

अश्ववडवयोर्विभाषैकवद्भाव उक्तः, तत्रैकवद्भावादन्यत्र परवल्लिङ्गतायां प्राप्तायामिदमारभ्यते। अश्ववडवयोः पूर्ववल्लिङ्गं भवति। अश्वश्च वडवा चाश्ववडवौ। अर्थातिदेशश्चायम्, न निपातनम्। तत्र द्विवचनमतन्त्रम्। वचनान्तरेऽपि पूर्ववल्लिङ्गता भवति-अश्ववडवान्, अश्ववडवैरिति।।

<हेमन्तशिशिरावहोरात्रे च च्छन्दसि ।। 2-4-28 ।। >

`पूर्ववत्' इति वर्तते। हेमन्तशिशिरौ, अहोरात्रे-इत्येतयोश्छन्दसि विषये पूर्ववल्लिङ्गं भवति। हेमन्तशिशिरावृतूनां प्रीणामि(तै.सं.1.6.2.3)। अहोरात्रे इदं ब्रूमः(अ.वे.116.5)। परवल्लिङ्गतापवादो योगः। अर्थातिदेशश्चायं न निपातनम्, तेन द्विवचनमतन्त्रम्। वचनान्तरेऽपि पूर्ववल्लिङ्गता भवति। पूर्वपक्षाश्चितयः, अपरपक्षाः पुरीषम्, अहोरात्राणीष्टकाः(तै.ब्रा.3.11.4.1)। छन्दसीति किम् ? दुःखे हेमन्तशिशिरे। अहोरात्राविमौ पुण्यौ। छन्दसि लिङ्गव्यत्यय उक्तः, तस्यैवायं प्रपञ्चः।।

<रात्राह्नाहाः पुंसि ।। 2-4-29 ।। >

कृतसमासान्तानां निर्देशः। रात्र, अह्न, अह--इत्येते पुंसि भाष्यन्ते। परवल्लिङ्गतया स्त्रीनपुंसकयोः प्राप्तयोरिदं वचनम्। द्विरात्रः। त्रिरात्रः। चतूरात्रः। पूर्वाह्णः। अपराह्णः। मध्याह्नः। द्व्यहः। त्र्यहः। * अनुवाकादयः पुंसीति वक्तव्यम् *(म.बा.1.479)। अनुवाकः। शंयुवाकः(आश्व.श्रौ.1.10.11)। सूक्तवाकः(ऋ.10.88.7)।।

<अपथं नपुंसकम् ।। 2-4-30 ।। >

अपथशब्दो नपुंसकलिङ्गो भवति। अपथमिदम्। अपथानि गाहते मूढः। इह कस्मान्न भवति--अपथो देशः, अपथा नगरी ? तत्पुरुष इति वर्त्तते।।

<अर्धर्चाः पुंसि च ।। 2-4-31 ।। >

अर्धर्चादयः शब्दाः पुंसि नपुंसके च भाष्यन्ते। अर्धर्चः, अर्धर्चम्। गोमयः, गोमयम्। शब्दरूपाश्रया चेयं द्विलिङ्गता क्वचिदर्थभेदेनापि व्यवतिष्ठते-पद्मशङ्खशब्दौ निधिवचनौ पुंल्लिङ्गौ, जलजे उभयलिङ्गौ। भूतशब्दः पिशाचे उभयलिङ्गः, क्रियाशब्दस्याभिधेयवल्लिङ्गम्। सैन्धवशब्दो लवणे उभयलिङ्गः, यौगिकस्याभिधेयवल्लिङ्गम्। सारशब्द उत्कर्षे पुंल्लिङ्गः, न्यायादनपेते नपुंसकम्- नैतत्सारमिति। धर्म इत्यपूर्वे पुंल्लिङ्गः, तत्साधने नपुंसकम्-`तानि धर्माणि प्रथमान्यासन्'(ऋ.1.164.43)। अर्धर्च। गोमय। कषाय। कार्षापण। कुतप। कपाट। शङ्ख। चक्र। गूथ। यूथ। ध्वज। कबन्ध। पद्म। गृह। सरक। कंस। दिवस। यूष। अन्धकार। दण्ड। कमण्डलु। मण्ड। भूत। द्वीप। द्यूत। चक्र। धर्म। कर्मन्। मोदक। शतमान। यान। नख। नखर। चरण। पुच्छ। दाडिम। हिम। रजत। सक्तु। पिधान। सार। पात्र। घृत। सैन्धव। औषध। आढक। चषक। द्रोण। खलीन। पात्रीव। षष्टिक। वार। बाण। प्रोथ। कपित्थ। शुष्क। शील। शुल्ब। सीधु। कवच। रेणु। कपट। सीकर। मुसल। सुवर्ण। यूप। चमस। वर्ण। क्षीर। कर्ष। आकाश। अष्टापद। मङ्गल। निधन। निर्यास। जृम्भ। वृत्त। पुस्त। क्ष्वेडित। शृङ्ग। शृङ्खल। मधु। मूल। मूलक। शराव। शाल। वप्र। विमान। मुख। प्रग्रीव। शूल। वज्र। कर्पट। शिखर। कल्क। नाट। मस्तक। वलय। कुसुम। तृण। पङ्क। कुण्डल। किरीट। अर्बुद। अङ्कुश। तिमिर। आश्रम। भूषण। इल्वस। मुकुल। वसन्त। तडाग। पिटक। विटङ्क। माष। कोश। फलक। दिन। दैवत। पिनाक। समर। स्थाणु। अनीक। उपवास। शाक। कर्पास। चषाल। खण्ड। दर। विटप। रण। बल। मल। मृणाल। हस्त। सूत्र। ताण्डव। गाण्डीव। मण्डप। पटह। सौध। पार्श्व। शरीर। फल। छल। पुर। राष्ट्र। विश्व। अम्बर। कुट्टिम। मण्डल। ककुद। तोमर। तोरण। मञ्चक। पुङ्ख। मध्य। बाल। वल्मीक। वर्ष। वस्त्र। देह। उद्यान। उद्योग। स्नेह। स्वर। सङ्गम। निष्क।

क्षेम। शूक। छत्त्र। पवित्र। यौवन। पानक। मूषिक। वल्कल। कुञ्ज। विहार। लोहित। विषाण। भवन। अरण्य। पुलिन। दृढ। आसन। ऐरावत। शूर्प। तीर्थ। लोमश। तमाल। लोह। दण्डक। शपथ। प्रतिसर। दारु। धनुष्। मान। तङ्क। वितङ्क। मव। सहस्र। ओदन। प्रवाल। शकट। अपराह्ण। नीड। शकल। इति अर्धर्चादिः।।

<इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ।। 2-4-32 ।। >

आदेशः = कथनम्, अन्वादेशः = अनुकथनम्। इदमोऽन्वादेशविषयस्याशादेशो भवत्यनुदात्तस्तृतीयादौ विभक्तौ परतः। आभ्यां छात्राभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतम्। अस्मै छात्राय कम्बलं देहि, अथो अस्मै शाटकमपि देहि। अस्य छात्रस्य शोभनं शीलम्, अथो अस्य प्रभूतं स्वम्। अशादेशवचनं साकच्कार्थम्। इमकाभ्यां छात्त्राभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतम्। नेह पश्चादुच्चारणमात्रमन्वादेशः, किं तर्हि ? एकस्यैवाभिधेयस्य पूर्वशब्देन प्रतिपादितस्य द्वितीयं प्रतिपादनमन्वादेशः। तेनेह न भवति- देवदत्तं भोजय, इमं च यज्ञदत्तमिति।।

<एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ।। 2-4-33 ।। >

`अन्वदेशे'`अनुदात्तः' इति वर्तते। एतदोऽन्वादेशविषयस्य अशादेशो भवति अनुदात्तस्त्रतसोः परतः। तौ चापि त्रतसावनुदात्तौ भवतः। एतस्मिन् ग्रामे सुखं वसामः, अथो अत्र युक्ता अधीमहे। एतस्माच्छात्राच्छन्दोऽधीष्व, अथो अतो व्याकरणमप्यधीष्व। सर्वानुदात्तं पदं भवति। `एतदोऽश्' इत्यशादेशे लब्धे पुनर्वचनमनुदात्तार्थम्।

<द्वतीयाटौस्स्वेनः ।। 2-4-34 ।। >

`अन्वादेशे', `अनुदात्तः' इति वर्त्तते। द्वितीया, टा, ओस् इत्येतेषु परत इदमेतदोरन्वादेशविषययोरेनशब्द आदेशो भवति अनुदात्तः। इदमो मण्डूकप्लुतिन्यायेनानुवृत्तिः। इमं छात्रं छन्दोऽध्यापय, अथो एनं व्याकरणमध्यापय। अनेन छात्रेण रात्रिरधीता, अथो अनेनाहरप्यधीतम्। अनयोश्छात्रयोः शोभनं शीलम्, अथो एनयोः प्रभूतं स्वम्। एतदः खल्वपि-एतं-छात्रं छन्दोऽध्यापय, अथो एनं व्याकरणमप्यध्यापय। एतेन छात्रेण रात्रिरधीता, अथो एनेनाहरप्यधीतम्। एतयोश्छात्रयोः शोभनं शीलम्, अथो एनयोः प्रभूतं स्वम्।* एनदिति नपुंसकैकवचने वक्तव्यम् *(म.भा.1.482)। प्रक्षालयैनत्। परिवर्त्तयैनत्। इह कस्मान्न भवति--अयं दण्डो हरानेन, एतमातं ङितं विद्यादिति ? यत्र किञ्चिद् विधाय वाक्यान्तरेण पुनरन्यदुपदिश्यते सोऽन्वादेशः। इह तु वस्तुनिर्देशमात्रं कृत्वा एकमेव विधानम्।।

<आर्धधातुके ।। 2-4-35 ।। >

आर्धधातुके इत्यधिकारोऽयम्, "ण्यक्षत्त्रियार्षञितः"(2.4.58/1276) इति यावत्। यदित ऊर्ध्वमनुक्रमिष्यामस्तदार्धधातुके वेदितव्यम्। वक्ष्यति "हनो वध लिङि"(2.4.42/2433), वध्यात्। आर्धधातुक इति किम् ? हन्यात्। विषयसप्तमी चेयं न परसप्तमी। तेनार्धधातुकविवक्षायामादेशेषु कृतेषु पश्चाद्यथाप्राप्तं प्रत्यया भवन्ति--भव्यम्, प्रवेयम्, आख्येयम्।।

<अदो जग्धिर्ल्यप्ति किति ।। 2-4-36 ।। >

अदो जग्धिरादेशो भवति ल्यपि परतः, तकारादौ च किति प्रत्यये। प्रजग्ध्य। विजग्ध्य। जग्धः। जग्धवान्। इकार उच्चारणार्थः, नानुबन्धः, तेन नुम्न भवति। एवं वच्यादीनामपि। इह कस्मान्न भवति-अन्नम् ? "अन्नाण्णः"(4.4.85/1637) इति निपातनात्।

`जग्धौ सिद्धेऽन्तरङ्गत्वागत्ति कितीति ल्यबुच्यते।

ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम्'।।(म.भा.1.484)

तीति किम् ? अद्यते। कितीति किम् ? अत्तव्यम्।।

<लुङ्सनोर्घस्लृ।। 2-4-37 ।। >

लुङि सनि च परतोऽदो घस्लृ आदेशो भवति। लृदित्करणमङर्थम्। लुङि-अघसत्। अघसताम्। अघसन्। सनि-जिघत्सति। जिघत्सतः। जिघत्सन्ति। * घस्लृभावेऽच्युपसंख्यानम् *(म.भा.1.484) प्रात्तीति प्रघसः।।

<घञपोश्च ।। 2-4-38 ।। >

घञि अपि च परतोऽदो घस्लृ आदेशो भवति। घासः। प्रघसः। "उपसर्गेऽदः"(3.3.59/3235) इत्यप्।।

<बहुलं छन्दसि ।। 2-4-39 ।। >

छन्दसि विषये बहुलमदो घस्लृ आदेशो भवति। घस्तां नूनम्(वा.सं.21.43)। सग्धिश्च मे(वा.सं.18.9)। न च भवति-- आत्तामद्य मध्यतो मेद उद्भृतम्(वा.सं.21.43)। अन्यतरस्याङ्ग्रहणमेव कस्मान्न क्रियते, तदेवोत्तरार्थमपि भविष्यति ? कार्यान्तरार्थं बहुलग्रहणम्। घस्तामित्यत्रोपधालोपो न भवति।।

<लिट्यन्यतरस्याम् ।। 2-4-40 ।। >

लिटि परतोऽदोऽन्यतरस्यां घस्लादेशो भवति। जघास, जक्षतुः,जक्षुः। आद, आदतु, आदुः।।

<वेञो वयिः ।। 2-4-41 ।। >

`लिट्यन्यतरस्याम्' इति वर्त्तते। वेञो वयिरादेशो भवति अन्यतरस्यां लिटि परतः। इकार उञ्चारणार्थः। उवाय, ऊयतु। ऊयुः। पक्षे-ऊवतुः, ऊवुः। "लिटि

वयो यः"(6.1.38/2413) इति यकारस्य सम्प्रसारणं प्रतिषिध्यते। "वश्चास्यान्यतरस्यां किति"(6.1.39/2414) इति वकारो विधीयते। ववौ, ववतुः, ववुः। "वेञः"(6.1.40/2415) इति सम्प्रसारणं न भवति।।

<हनो वध लिङि ।। 2-4-42 ।। >

हन्तेर्धातोर्वध इत्ययमादेशो भवति लिङि परत आर्धधातुके। वध्यात्, वध्यास्ताम्, वध्यासुः। अकारान्तश्चायमादेशः, तत्राकारस्य लोपो भवति। तस्य स्थानिवद्भावात् अवधीदिति हलन्तलक्षणा वृद्धिर्न भवति।।

<लुङि च ।। 2-4-43 ।। >

लुङि च परतः हनो वध इत्ययमादेशो भवति। अवधीत्, अवधिष्टाम्, अवधिषुः। योगविभाग उत्तरार्थः। आत्मनेपदेषु लुङि विकल्पो यथा स्याल्लिङि मा भूत्।।

<आत्मनेपदेष्वन्यतरस्याम् ।। 2-4-44 ।। >

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। आत्मनेपदेषु परतो हनो लुङ्यन्यतरस्यां वध इत्ययमादेशो भवति। आवधिष्ट। आवधिषाताम्। आवधिषत। न च भवति--आहत। आहसाताम्। आहसत।।

<इणो गा लुङि ।। 2-4-45 ।। >

इणः `गा' इत्ययमादेशो भवति लुङि परतः। अगात्, अगाताम्, अगु। `लुङि' इति वर्त्तमाने पुनर्लुङ्ग्रहणम् "आत्मनेपदेष्वन्यतरस्याम्"(2.4.44/2696) इत्येतन्मा भूत्। इह त्वविशेषेण नित्यं च भवति। अगात्। अगायि भवता। * इण्वदिक इति वक्तव्तम् *(म.भा.1.485)। अध्यगात्। अध्यगाताम्। अध्यगुः।।

<णौ गमिरबोधने ।। 2-4-46 ।। >

णौ परत इणोऽबोधनार्थस्य गमिरादेशो भवति। इकार उच्चारणार्थः। गमयति, गमयतः, गमयन्ति। अबोधने इति किम् ? प्रत्याययति। इण्वदिक इत्येव--अधिगमयति।।

<सनि च ।। 2-4-47।।>

सनि परत इणोऽबोधनार्थस्य गमिरादेशो भवति। जिगमिषति, जिगमिषतः, जिगमिषन्ति। अबोधन इत्येव-अर्थान्प्रतीषिषति। इण्वदिक इत्येव-अधिजिगमिषति। योगविभाग उत्तरार्थः-"इङश्च"(2.4.48/2616) इति सन्येव यथा स्यात्।।

<इङश्च ।। 2-4-48 ।। >

इङश्च सनि परतो गमिरादेशो भवति। अधिजिगांसते, अधिजिगांसेते, अधिजिगांसन्ते।।

<गाङ् लिटि ।। 2-4-49 ।। >

गाङादेशो भवतीङो लिटि परतः। अधिजगे, अधिजगाते, अधिजगिरे। गाङोऽनुबन्धकरणं विशेषणार्थम्, "गाङ्कुटादिभ्यः"(1.2.1/2461) इत्यत्रास्य ग्रहणं यथा स्यात्। न हि स्थानिवद्भावेन `गाङ्' इति रूपं लभ्यते।।

<विभाषा लुङ्लृङोः ।। 2-4-50 ।। >

लुङि लृङि च परत इङो विभाषा गाङादेशो भवति। आदेशपक्षे "गाङ्कुटादिभ्यः"(1.2.1/2461) इति ङित्वम्, "घुमास्थागापाजहातिसां हलि"(6.4.66/2462) इतीत्वम्। अध्यगीष्ट, अध्यगीषाताम्, अध्यगीषत। न च भवति अध्यैष्ट, अध्यैषाताम्, अध्यैषत। लृङि खल्वपि--अध्यगीष्यत, अध्यगीष्येताम्, अध्यगीष्यन्त। न च भवति-अध्यैष्यत, अध्यैष्येताम्, अध्यैष्यन्त।।

<णौ च संश्चङोः ।। 2-4-51 ।। >

`इङो गाङ् विभाषा' इति वर्त्तते। `णौ' इतीङपेक्षया परसप्तमी, `संश्चङोः' इति च ण्यपेक्षया। णौ सन्परे चङ्परे च परत इङो विभाषा गाङादेशो भवति। अधिजिगापयिषति। न च भवति-अध्यापिपयिषति। चङि खल्वपि--अध्यजीगपत, न च भवति - अध्यापिपत्।।

<अस्तेर्भूः ।। 2-4-52 ।। >

अस्तेर्धातोर्भू इत्ययमादेशो भवति आर्धधातुके। भविता। भवितम्। भवितव्यम्। इह कस्मान्न भवति-ईहामास, ईहामासतुः, ईहामासुः ? "कृञ्चानुप्रयुज्यते लिटि"(3.1.40/2239) इति प्रत्याहारग्रहणेनास्तेर्ग्रहणसामर्थ्यत्। तथा चोच्यते- `अनुप्रयोगे तु भुवाऽस्त्यबाधनं स्मरन्ति कर्त्तुर्वचनान्मनीषिणः'।। इति।

<ब्रुवो वचिः ।। 2-4-53 ।। >

ब्रुवो वचिरादेशो भवति आर्धधातुकविषये। इकार उच्चारणार्थः। वक्ता। वक्तुम्। वक्तव्यम्। स्थानिवद्भावेन कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदं भवति। ऊचे। वक्ष्यति।।

<चक्षिङः ख्याञ् ।। 2-4-54 ।। >

चक्षिङः ख्याञादेशो भवत्यार्धधातुके। आख्याता। आख्यातुम्। आख्यातव्तम्। स्थानिवद्भावेन नित्यमात्मनेपदं न भवति; ञकारानुबन्धकरणसामर्थ्यात्। आख्यास्यति। आख्यास्यते। * क्शादिरप्ययमादेश इष्यते *। आक्शाता। आक्शातुम्। आक्शातव्यम्। * वर्जने प्रतिषेधो वक्तव्याः *(म.भा.1.487)।

दुर्जनाः संचक्ष्याः। वर्जनीया इत्यर्थः। * असनयोश्च प्रतिषेधो वक्तव्यः *(म.भा.1.487) नृचक्षा राक्षसाः। हिंसार्थोऽत्र धातुः। अने खल्वपि-विचक्षणः पण्डितः। * बहुलं सञ्ज्ञाछन्दसोरिति वक्तव्यम् *(म.भा.1.488)।* अन्नवधकगात्रविचक्षणाजिराद्यर्थम्*(म.भा.1.488)।।

<वा लिटि ।। 2-4-55 ।। >

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। लिटि परतश्चक्षिङः ख्याञादेशो वा भवति। आचख्यौ, आचख्यतुः, आचख्युः। न च भवति-आचचक्षे, आचचक्षाते, आचचक्षिरे।

<अजेर्व्यघञपोः ।। 2-4-56 ।। >

अजेर्धातेः `वी' इत्ययमादेशो भवत्यार्धधात्के परतो घञपौ वर्जयित्वा। प्रवयणीयः। प्रवायकः। अघञपोरिति किम् ? समाजः। उदाजः। अपि तु-समजः। उदजः। "समुदोरजःपशुषु"(3.3.69/3246) इत्यप्। दीर्घोच्चारणं किम् ? प्रवीताः।। * घञपोः प्रतिषेधे क्यप उपसङ्ख्यानं कर्तव्यम् *(म.भा.1.488)। समज्या।। * वलादावार्धधातुके विकल्प इष्यते *(म.भा.1.488)। प्रवेता, प्राजिता। प्रवेतुम्, प्राजितुम्।।

<वायौ ।। 2-4-57 ।। >

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। `यु' इति ल्युटो ग्रहणम्। यौ परभूते अजेर्वा `वी' इत्ययमादेशो भवति। प्रवयणो दण्डः, प्राजनो दण्डः। प्रवयणमानय, प्राजनमानय।।

<ण्यक्षित्त्रियार्षञितो यूनि लुगणिञोः ।। 2-4-58 ।। >

ण्यादयो गोत्रप्रत्ययाः। ण्यन्तात् क्षत्त्रियगोत्राद् आर्षाद् ञितश्च परयोरणिञोर्यूनि लुग्भवति। ण्यन्तात्तावत्--"कुर्वादिभ्यो ण्यः"(4.1.151/1175), तस्माद्यूनि इञ्, तस्य लुक्। कौरव्यः पिता। कौरव्यः पुत्रः। ननु च कौरव्यशब्दस्तिकादिषु पठ्यते, ततः फिञा भवितव्यम्-कौरव्यायणिरिति ? क्षत्त्रियगोत्रस्य तत्र ग्रहणम्, "कुरुनादिभ्यो ण्यः"(4.1.1172/1190) इत्यनेन विहितस्य; इदं तु ब्राह्मणगोत्रम्, "कुर्वादिदभ्यो ण्यः"(4.1.151/1175) इति ण्यः। क्षत्त्रिय-"ऋष्यन्धकवृष्णिकुरुभ्यश्च"(4.1.114/1117) इत्यण्, तस्माद्यूनि इञ्, तस्य लुक्। श्वाफल्कः पिता। श्वाफल्कः पुत्रः। आर्ष-ऋष्यम्, तस्माद्यूनि इञ्, तस्य लुक्। वासिष्ठः पिता। वासिष्ठः पुत्रः। ञित्--"अनृष्यानन्तर्ये बिदादिभ्योऽञ्"(4.1.104/1190), तस्माद्यूनि इञ्, तस्य लुक्। बैदः पिता। बैदः पुत्रः। अणः खल्वपि--"तिकादिभ्यः फिञ्"(4.1.154/1178), तस्माद्यूनि "प्राग्दीव्यतोऽण्"(4.1.83/1073) तस्य लुक्। तैकायनिः पिता। तैकायनिः पुत्रः। एतेभ्यः पुत्रः। एतेभ्य इति किम् ? "शिवादिभ्योऽण्"(4.1.112/1115) तस्माद् यूनि "अत इञ्"(4.1.95/1095), तस्य न लुग्भवति। कौहडः पिता। कौहडिः पुत्रः। यूनीति किम् ? वामरथ्यस्य छात्राः वामरथाः। "कुर्वादिभ्यो ण्यः"(4.1.151/1175) इति ण्यः, तस्मात् "कण्वादिभ्यो गोत्रे"(4.2.111/1332) इति शैषिकोऽण्, तस्य लुग्न भवति। अणिञोरिति किम् ? दाक्षेरपत्यं युवा दाक्षायणः। * अब्राह्मणगोत्राद्युवप्रत्ययस्योपसंख्यानम् *(म.भा.1.489)। बौधिः पिता। बौधिः पुत्रः। जाबालिः पिता। जाबालिः पुत्रः। औदुम्बरिः पिता। औदुम्बरिः पुत्रः। भाण्डीजङ्घिः पिता। भाण्डीजङ्घिः पुत्रः। साल्वावयवलक्षण इञ्, तस्मात्फक्, तस्य लुक्। पैलादिदर्शनात् सिद्धम्।।

<पैलादिभ्यश्च ।। 2-4-59 ।। >

`फैल' इत्येवमादिभ्यश्च युवप्रत्ययस्य लुग्भवति। "पीलाया वा"(4.1.118/1121) इत्यण्। तस्माद् "अणो द्व्यचः"(4.1.156/1180) इति फिञ्, तस्य लुक्। पैलः पिता। पैलः पुत्रः। अन्ये पैलादय इञन्ताः, तेभ्यः 'इञः प्रचाम्' इति लुकि सिध्देऽप्रागर्थः पाठः। पैल। शालङ्कि। सात्यकि। सात्यकामि। दैवि। औदमज्जि। औदव्रजि। औदमेघि। औदबुद्धि। दैवस्थानि। पैङ्गलायनि। राणायनि। रौहक्षति। भौलिङ्गि। औद्गाहमानि। औज्जिहानि।। तद्राजाच्चाणः(ग.सू.21)। आकृतिगणोऽयम्।।

<इञः प्राचाम् ।। 2-4-60 ।। >

गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुग्भवति। गोत्रविशेषणं प्राग्ग्रहणम्, न विकल्पार्थम्। पान्नागारेरपत्यं युवा। "यञिञोश्च"(4.1.101/1103) इति फक्, तस्य लुक्। पान्नागारिः पिता। पान्नागारिः पुत्रः। मान्थरैषणिः पिता। मान्थरैषणिः पुत्रः। प्राचामिति किम् ? दाक्षिः पिता। दाक्षायणः पुत्रः।।

<न तौल्वलिभ्यः ।। 2-4-61 ।। >

अनन्तरेण प्राप्तौ लुक् प्रतिषिध्यते। तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य न लुग्भवति। तौल्वलिः पिता। तौल्वलायनः पुत्रः। तौल्वलि। धारणि। रावणि। पारणि। दैलीपि। दैवलि। दैवमति। दैवयज्ञि। प्रावाहणि। मान्धातकि। आनुहारति। श्वाफल्कि। आनुमति। आहिंसि। आसुरि। आयुधि। नैमिषि। आसिबन्धकि। बैकि। आन्तरहाति। पौष्करसादि। वैरकि। वैलकि। वैहति। वैकर्णि। कारेणुपालि। कामालि।।

<तद्राजस्य बहुषु तेनैवास्त्रियाम् ।। 2-4-62 ।। >

"ते तद्राजाः"(4.1.172/1192) "ञ्यादयस्तद्राजाः"(5.3.119/2072) इति वक्ष्यति, तस्य तद्राजसंज्ञस्य प्रत्ययस्य बहुषु वर्त्तमानस्यास्त्रीलिङ्गस्य लुग्भवति, तेनैव चेत्तद्राजेन कृतं बहुत्वं भवति। अङ्गाः। वङ्गाः। पुण्डाः। सुह्माः। मगधाः। लोहध्वजाः। व्रीहिमन्तः। तद्राजस्येति किम् ? औपगवाः। बहुष्विति किम् ? आङ्गः। `तेनैव' ग्रहणं किम् ? प्रियो वाङ्गो येषां त इमे प्रियवाङ्गाः। अस्त्रियामिति किम् ? आङ्ग्यः स्त्रियः।।

<यस्कादिभ्यो गोत्रे ।। 2-4-63 ।। >

`बहुषु तेनैवास्त्रियाम्' इति सर्वमनुवर्तते। `यस्क' इत्येवमादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु वर्त्तमानस्यास्त्रीलिङ्गस्य लुग्भवति, तेनैव चेद् गोत्रप्रत्ययेन कृतं बहुत्वं भवति। प्रत्ययविधेश्चान्यत्र लौकिकस्य गोत्रस्य ग्रहणमित्यनन्तरापत्येऽपि लुग्भवत्येव-यस्काः। लभ्याः। बहुष्वित्येव-यास्कः। तेनैवेत्येव--प्रिययास्काः। अस्त्रियामित्येव-यास्क्यः स्त्रियः। गोत्रे इति किम् ? यास्काश्छात्राः। यस्क। लभ्य। दुह्य। अयःस्थूण। तृणकर्ण। एते पञ्च शिवादिषु पठ्यन्ते। ततः परेभ्यः षड्भ्य इञ्। सदामत्त। कम्बलभार। बहिर्योग। कर्णाटक। पिण्डीजङ्घ। बकसक्थ। ततः परेभ्यश्चतुर्भ्यः "गृष्ट्यादिभ्यश्च"(4.1.136/1143) इति ढञ्। बस्ति। कुद्रि। अजबस्ति। मित्रयु। ततः परेभ्यो द्वादशभ्य इञ्। रक्षोमुख। जङ्घारथ। उत्कास। कटुकमन्थक। पुष्करसत्। विषपुट। उपरिमेखल। क्रोष्टुमान। क्रोष्टुपाद। क्रोष्टुमाय। शीर्षमाय। पुष्करसच्छब्दाद् बाह्वादिपाठादिञ्। खरपशब्दो नडादिषु पठ्यते, ततः फक्। पदक, वर्मक-एताभ्याम् "अत इञ्"(4.1.95/1095)। भलन्दनशब्दात् "शिवादिभ्योऽण्"(4.1.112/1115) भडिल। भडित। भण्डित-एतेभ्यश्चतुर्भ्यः "अश्वादिभ्यः फञ्"(4.1.110/1113)।।

<यञञोश्च ।। 2-4-64 ।। >

"बहुषु तेनैवास्त्रियाम्"(2.4.63/1193) `गोत्रे' इति चानुवर्तते। यञोऽञश्च गोत्रप्रत्ययस्य बहुषु वर्तमानस्यास्त्रीलिङ्गस्य लुग्भवति। "गर्गादिभ्यो यञ्"(4.1.105/1107), गर्गाः। वत्साः। अञः खल्वपि-"अनृष्यानन्तर्ये बिदादिभ्योऽञ्"(4.1.104/1106)। बिदाः, उर्वाः। बहुष्वित्येव-गार्ग्यः। बैदः। तेनैवेत्येव-प्रियगार्ग्याः। प्रियबैदाः। अस्त्रियामित्येव-गार्ग्यः स्त्रियः। बैद्यः स्त्रियः। गोत्र इत्येव-"द्वीपादनुसमुद्रं यञ्"(4.3.10/1380), द्वैप्याः। "उत्सादिभ्योऽञ्"(4.1.86/1078) औत्साश्छात्राः। * यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसङ्ख्यानम् *। गार्ग्यस्यकुलं गार्ग्यकुलम्, गर्गकुलं वा। गार्ग्ययोः कुलं गार्ग्यकुलम्, गर्गकुलं वा। एवं बैदस्य कुलं बैदकुलम्, बिदकुलं वा। बैदयोः कुलं बैदकुलं बिदकुलं वा। यञादीनामिति किम् ? आङ्गकुलम्। एकद्वयोरिति किम् ? गर्गाणां कुलं गर्गकुलम्। तत्पुरुष इति किम् ? गार्ग्यस्य समीपमुपगार्ग्यम्। षष्ठ्या इति किम् ? परमगार्ग्यः।।

<अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ।। 2-4-65 ।। >

अत्र्यादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु लुग्भवति। अत्रिशब्दात् "इतश्चानिञः"(4.1.122/1125) इति ढक्। इतरेभ्य ऋष्यण्। अत्त्रयः। भृगवः। कुत्साः। वसिष्ठाः। गोतमाः। अङ्गिरसः। बहुष्वित्येव--आत्रेयः, भार्गवः। तेनैवेत्येव--प्रियात्त्रेयाः। प्रियभार्गवाः। अस्त्रियामिति किम् ? आत्त्रेय्यः स्त्रियः।।

<बह्वच इञः प्राच्यभरतेषु ।। 2-4-66 ।। >

बह्वचः प्रातिपदिकात् य इञ् विहितः प्राच्यगोत्रे भरतगोत्रे च वर्तते, तस्य बहुषु लुग्भवति। पन्नागाराः। मन्थरैषणाः। भरतेषु खल्वपि-युधिष्ठिराः। अर्जुनाः। बह्वच इति किम् ? बैकयः। पौष्पयः। प्राच्यभरतेष्विति किम् ? बालाकयः। हास्तिदासयः। भरताः प्राच्या एव, तेषां पुनर्ग्रहणं ज्ञापनार्थम्-अन्यत्र प्राग्ग्रहणे भरतग्रहणं न भवतीति, तेन"इञः प्राचाम्"(2.4.60/1085) इति भरतानां युवप्रत्ययस्य लुग्न भवति। आर्जुनिः पिता। आर्जुनायनः पुत्रः।।

<न गोपवनादिभ्यः ।। 2-4-67 ।। >

गोपवनादिभ्यः परस्य लुग्न भवति। बिदाद्यन्तर्गणोऽयम्। ततोऽञो गोत्रप्रत्ययस्य "यञञोश्च"(2.4.64/1108) इति लुक् प्राप्तः प्रतिषिध्यते। गौपवनाः। शैग्रवाः। गौपवन। शिग्रु। बिन्दु। भाजन। अश्व। अवतान। श्यामाक। श्वापर्ण। एतावन्त एवाष्टौ गोपवनादयः। परिशिष्टानां हरितादीनां प्रमादपाठः। ते हि चतुर्थे बिदादिषु पठ्यन्ते। तेभ्यश्च बहुषु लुग्भवत्येव-हरिताः, किंदासा इति।।

<तिककितवादिभ्यो द्वन्द्वे ।। 2-4-68 ।।>

तिकादिभ्यः कितावादिभ्यश्च द्वन्द्वे गोत्रप्रत्ययस्य बहुषु लुग्भवति। तैकायनयश्च कैतवायनयश्च - "तिकादिभ्यः फिञ्"(4.1.154/1178), तस्य लुक्, तिककितवाः। वाङ्खरयश्च भाण्डीरथयश्च--"अत इञ्"(4.1.95/1095), तस्य लुक्, वङ्खरभण्डीरथाः। औपकायनाश्च लामकायनाश्च-"नडादिभ्यः फक्"(4.1.99/1101), तस्य लुक्, उपकलमकाः। पाफकयश्च नारकयश्च--"अत इञ्"(4.1.95/1095), तस्य लुक्, पफकनरकाः। बाकनखयश्च श्वागुदपरिणद्धयश्च "अत इञ्"(4.1.95/1095), तस्य लुक्, बकनखश्वगुदपरिणद्धाः। उब्जशब्दादत इञ्, ककुभशब्दात्"शिवाद्यण्"(4.1.112/1115), तयोर्लुक्, औब्जयश्च काकुभाश्च उब्जककुभाः। लाङ्कयश्च शान्तमुखयश्च-"अत इञ्"(4.1.95/1095), तस्य लुक्, लङ्कशान्तमुखाः। उरसशब्दस्तिकादिषु पठ्यते, ततः फिञ्,लङ्टशब्दादिञ्, तयोर्लुक्, औरसायनश्च लाङ्कटयश्च उरसलङ्कटाः। भ्राष्टकयश्च कापिष्ठलयश्च--"अत इञ्"(4.1.95/1095), तस्य लुक्, भ्रष्टककपिष्ठ्लाः। कार्ष्णाजिनयश्च कार्ष्णसुन्दरयश्च--"अत इञ्"(4.1.95/1095) तस्य लुक्, कृष्णाजिनकृष्णसुन्दराः। आग्निवेश्यश्च दासेरकयश्च--अग्निवेशशब्दाद् "गर्गादिभ्यो यञ्"(4.1.105/1107),दासेरकशब्दाद्"अत इञ्"(4.1.95/1095), तयोर्लुक्, अग्निवेशदासेरकाः।।

<उपकादिभ्योऽन्यतरस्यामद्वन्द्वे ।। 2-4-69 ।।>

`उपक' इत्यैवमादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु लुग्भवति, अन्यतरस्यां द्वन्द्वेचाद्वन्द्वे च । अद्वन्द्वग्रहणं द्वन्द्वाधिकारनिवृत्त्यर्थम्। एतेषां च मध्ये त्रयो द्वन्द्वास्तिककितवादिषु पठ्यन्ते--उपकलमकाः, भ्रष्टककपिष्ठलाः, कृष्णाजिनकृष्णसुन्दरा इति। तेषां पूर्वेणैव नित्यमेव लुग्भवति। अद्वन्द्वेत्वनेन विकल्पः--उपकाः, औपकायनाः। लमकाः, लामकायनाः। कृष्णसुन्दराः, कार्ष्णसुन्दरय इति। परिशिष्टानां च द्वन्द्वेऽद्वन्द्वे च विकल्प इति। पण्डारक। अण्डारक। गडुक। सुपर्यक। सुपिष्ठ। मयूरकर्ण। खारीजङ्घ। शलावल। पतञ्जल। कठेरणि। कुषीतक। काशकृत्स्न। निदाघ। कलशीकण्ठ। दामकण्ठ। कृष्णपिङ्गल। कर्णक। पर्णक। जटिलक। वधिरक। जन्तुक। अनुलोम। अर्धपिङ्गलक। प्रतिलोम। प्रतान। अनभिहित।।

<आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ।। 2-4-70 ।।>

आगस्त्यकौण्डिन्ययोर्गोत्रप्रत्यययोरणो यञश्च बहुषु लुग्भवति, परिशिष्टस्य च प्रकृतिभागस्य यथासङ्ख्यमगस्ति, कुण्डिनच्-इत्येतावादेशौ भवतः। अगस्तयः। कुण्डिनाः। चकारः स्वरार्थः। मध्योदात्तो हि कुण्डिनीशब्दस्तदादेशोऽपि तथा स्यात्। अगस्त्यशब्दादृष्यण्, कुण्डिनशब्दाद् गर्गादित्वाद्यञ्, तयोः "गोत्रेऽलुगचि"(4.1.89/1081)इति लुकि प्रतिषिद्धे आगस्तीयाश्छात्त्रा इति वृद्धलक्षणश्छो भवति। कौण्डिन्ये त्वणैव भवितव्यम्-"कण्वादिभ्यो गोत्रे"(4.2.111/1332) इति, तत्र विशेषो नास्ति--कौण्डिनाश्छात्त्राः।।

<सुपो धातुप्रातिपदिकयोः ।। 2-4-71 ।। >

सुपो विभक्तेर्धातुसंज्ञायाः प्रातिपदिकसंज्ञायाश्च लुग्भवति। तदन्तर्गतास्तद्ग्रहणेन गृह्यन्ते। धातोस्तावत्--पुत्रीयति। घटीयति। प्रातिपदिकस्य-कष्टश्रितः। राजपुरुषः। धातुप्रातिपदिकयोरिति किम् ? वृक्षः। प्लक्षः।।

<अदिप्रभृतिभ्यः शपः ।। 2-4-72 ।। >

अदिप्रभृतिभ्य उत्तरस्य शपो लुग्भवति। अत्ति। हन्ति। द्वेष्टि।।

<बहुलं छन्दसि ।। 2-4-73 ।। >

छन्दसि विषये शपो बहुलं लुग्भवति। अदिप्रभृतिभ्य उक्तस्ततो न भवत्यपि-`वृत्रं हनति'(ऋ.8.89.3), `अहिः शयसे'(ऋ.1.32.5)। अन्येभ्यश्च भवति-`त्राध्वं नो देवाः'(ऋ.2.29.6)।।

<यङोऽचि च ।। 2-4-74 ।। >

यङो लुग्भवति अचि प्रत्यये परतः। चकारेण बहुलग्रहणमनुकृष्यते, न तु छन्दसीति, तेन छन्दसि भषायां च यङो लुग्भवति। लोलुवः। पोपुवः। सनीस्रंसः। दनीध्वसः। बहुलग्रहणादनच्यपि भवति-शाकुनिको लालपीति। दुन्दुभिर्वावदीति।।

<जुहोत्यादिभ्यः श्लुः ।। 2-4-75 ।। >

शबनुवर्तते, न यङ्। जुहोत्यादिभ्य उत्तरस्य शपः श्लुर्भवति। लुकि प्रकृते श्लुविधानं द्विर्वचनार्थम्। जुहोति। बिभर्ति। नेनेक्ति।।

<बहुलं छन्दसि ।। 2-4-76 ।। >

छन्दसि विषये बहुलं शपः श्लुर्भवति। यत्रोक्तं तत्र न भवति, अन्यत्रापि भवति। जुहोत्यादिभ्यस्तावन्न भवति-`दाति प्रियाणि'(ऋ.4.8.3), `धाति देवम्'(ऋ.7.90.3)। अन्येभ्यश्च भवति-`पूर्णां विवष्टि'(ऋ.7.16.11)। `जनिमा विवक्ति'(ऋ.9.97.7)।।

<गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ।। 2-4-77 ।। >

लुगनुवर्त्तते, न श्लुः। गाति, स्था, घु, पा, भू-इत्येतेभ्यः परस्य सिचो लुग्भवति परस्मैपदेषु परतः। अगात्। अस्थात्। घु-अदात्, अधात्, अपात्। अभूत्।। * गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम् *(म.भा.1.495)। गायतेः पातेश्च न भवति अगासीन्नटः। अपासीन्नृपः। परस्मैपदेष्विति किम् ? अगासातां ग्रामौ देवकदत्तेन।।

<विभाषा घ्राधेट्शाच्छासः ।। 2-4-78 ।। >

घ्रा, धेट्, शा, छा, सा-इत्येतेभ्य उत्तरस्य सिचः परस्मैपदेषु विभाषा लुग्भवति। धेटः पूर्वेण प्राप्ते विभाषार्थं वचनम्, परिशिष्टानामप्राप्ते। अघ्रात्, अघ्रासीत्। अधात्। अधासीत्। अशात्, अशासीत्। अच्छात्, अच्छासीत्। असात्। असासीत्। परस्मैपदेष्वित्येव-अघ्रासातां सुमनसौ देवदत्तेन।।

<तनादिभ्यस्तथासोः ।। 2-4-79 ।। >

तनादिभ्य उत्तरस्य सिचस्तथासोः परतो विभाषा लुग्भवति। अतत, अतथाः। अतनिष्ट, अतनिष्ठाः। असात, असाथाः। असनिष्ट, असनिष्ठाः। "जनसनखनाम्"(6.4.42/2504) इत्यात्वम्। थासा साहचर्यादात्मनेपदस्य तशब्दस्य ग्रहणम्, परस्मैपदे न भवति-अतनिष्ट यूयम्।।

<मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः ।। >

मन्त्रविषये घस, ह्वर, णश, वृ, दह, आत्, वृच्, कृ, गमि, जनि-इत्येतेभ्य उत्तरस्य लेर्लुग्भवति। घस-`अक्षन्नमीमदन्त पितरः'(तै.सं.1.8.5.3)। ह्वरेति `ह्वृकौटिल्ये'(धा.पा.931)-`मा ह्वार्मित्रस्य त्वा'(तै.सं.1.1.4.1)। णश-`धूर्तिः प्राणङ्मर्त्यस्य'(ऋ.1.18.3)। `वृ' इति वृङ्वृञोः(धा.पा.1510/1255) सामान्येन ग्रहणम्--`सुरुचो वेन आवः'(वा.सं.13.3)। दह-`मान आधक्'(ऋ.6.61.14)। आदिति आकारान्तग्रहणम्-`प्रा पूरणे'(धा.पा.1061)। `आप्राद् द्यावापृथिवी अन्तरिक्षम्'(ऋ.1.115.1)। वृच्-`मा नो अस्मिन्महाधने परावर्ग् भारभृद्यथा'(ऋ.8.75.12)। कृ-`अक्रन् कर्म कर्मकृतः'(तै.सं.1.8.3.3)। कमि-`अग्मन्'(ऋ.1.132.7)। जनि-`अज्ञत वा अस्य दन्ताः'(ऐ.ब्रा.7.14.2)। ब्राह्मणे प्रयोगोऽयम्। मन्त्रग्रहणं तु छन्दस उपलक्षणार्थम्।।

<आमः ।। 2-4-81 ।। >

आमः परस्य लेर्लुग् भवति। ईहाञ्चक्रे। ऊहाञ्चक्रे। ईक्षाञ्चक्रे।।

<अव्ययादाप्सुपः ।। 2-4-82 ।। >

अव्ययादुत्तरस्यापः सुपश्च लुग्भवति। तत्र शालायाम्। यत्र शालायाम्। सुपः खल्वपि-कृत्वा। हृत्वा।।

<नाव्ययीभावादतोऽम्त्वपञ्चम्याः ।। 2-4-83 ।। >
पूर्वेण लुक् प्राप्तः प्रतिषिध्यते। अदन्तादव्ययीभावादुत्तरस्य सुपो न लुग्भवति, अमादेशस्तु तस्य सुपो भवत्यपञ्चम्याः। एतस्मिन् प्रतिषिद्धे पञ्चम्याः श्रवणमेव भवति। उपकुम्भं तिष्ठति। उपकुम्भं पश्य। उपमणिकं तिष्ठति। उपमणिकं पश्य। अत इति किम् ? अधिस्त्रि। अधिकुमारि। अपञ्चम्या इति किम् ? उपकुम्भादानय।।
<तृतीयासप्तम्योर्बहुलम् ।। 2-4-84 ।। >
पूर्वेण नित्यमम्भावे प्राप्ते वचनमिदम्। तृतीयासप्तम्योर्विभक्त्योर्बहुलमम्भावो भवति, अव्ययीभावे। उपकुम्भेन कृतम्, उपकुम्भं कृतम्। उपकुम्भे निधेहि, उपकुम्भं निधेहि। * सप्तम्या ऋद्धिनदीसमाससङ्ख्यावयवेभ्यो नित्यममिति वक्तव्यम् *(म.भा.1.499)। सुमद्रम्। सुमगधम्। उन्मत्तगङ्गम्। लोहितगङ्गम्। एकविंशतिभारद्वाजम्। बहुलवचनात्सिद्धम्।।
<लुटः प्रथमस्य डारौरसः ।। 2-4-85 ।। >
लुडादेशस्य प्रथमपुरुषस्य परस्मैपदस्यात्मनेपदस्य च यथाक्रमं डा, रौ, रस्-इत्येते आदेशा भवन्ति। कर्त्ता। कर्त्तारौ। कर्त्तारः। आत्मनेपदस्य-अध्येता। अध्येतारौ। अध्येतारः। प्रथमस्येति किम् ? श्वः कर्त्तासि, श्वोऽध्येतासे।।

इति श्रीजयादित्यविरचितायां काशिकावृत्तौ द्वितीयाध्यायस्य चतुर्थः पादः।।
* समाप्तोऽयं द्वितीयोऽध्यायः *

3.1

काशिकावृत्तिः
अथ तृतीयाध्याये प्रथमः पादः
<प्रत्ययः ।। 3-1-1 ।। >
अधिकारोऽयम्। प्रत्ययशब्दः संज्ञात्वेनाधिक्रियते। आ पञ्चमाध्यायपरिसमाप्तेर्यानितऊर्ध्वमनुक्रमिष्यामः प्रत्ययसंज्ञास्ते वेदितव्याः, प्रकृत्युपपदोपाधिविकारागमान्वर्जयित्वा। वक्ष्यति-"तव्यत्तव्यानीयरः"(3.1.96/2834) कर्त्तव्यम्। करणीयम्। प्रत्ययप्रदेशाः-"प्रत्यलोपे प्रत्ययलक्षणम्"(1.1.62/262) इत्येवमादयः।।
<परश्च ।। 3-1-2 ।। >
अयमप्यधिकारो योगे योगे उपतिष्ठते, परिभाषा वा। परश्च स भवति धातोर्वा प्रातिपदिकाद्वा यः प्रत्ययसंज्ञः। कर्तव्यम्। तैत्तिरीयम्। चकारः पनरस्यैव समुच्चयार्थः, तेनोणादिषु परत्वं न विकल्प्यते।।
<आद्युदात्तश्च ।। 3-1-3 ।। >
अयमप्यधिकारः,परिभाषा वा। आद्युदात्तश्च स भवति यः प्रत्ययसंज्ञः। अनियतस्वरप्रत्ययप्रसङ्गेऽनेकाक्षु च प्रत्ययेषु देशस्यानियमे सति वचनमिदमादेरुदात्तार्थम्। कर्तव्यम्। तैत्तिरीयम्।
<अनुदात्तौ सुप्पितौ ।। 3-1-4 ।। >
पूर्वस्यायमपवादः। सुपः पितश्च प्रत्यया अनुदात्ता भवन्ति। दृषदौ, दृषदः। पितः खल्वपि-पचति, पठति।।
<गुप्तिज्किद्भ्यः सन् ।। 3-1-5 ।।>
`गुप गोपने'(धा.पा.971), `तिज निशाने'(धा.पा.972), `कित निवासे'(धा.पा.994)-एतेभ्यो धातुभ्यः सन्प्रत्ययो भवति। प्रत्ययसंज्ञा चाधिकृतैव। जुगुप्सते। तितिक्षते। चिकित्सति। * निन्दाक्षमाव्याधिप्रतीकारेषु सनिष्यते, अन्यत्र यथाप्राप्तं प्रत्यया भवन्ति *। गोपयति। तेजयति। सङ्केतयति। गुपादिष्वनुबन्धकरणमात्मनेपदार्थम्।।(म.भा.2.10)
<मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ।। 3-1-6 ।। >
`मान पूजायाम्'(धा.पा.973), `बध बन्धने'(धा.पा.974), `दान अवखण्डने'(धा.पा.995), `शान अवतेजने'(धा.पा.996)-इत्येतेभ्यो धातुभ्यः सन्प्रत्यो भवति, अभ्यासस्य चेकारस्य दीर्घादेशो भवति। मीमांसते। बीभत्सते। दीदांसते। शीशांसते। उत्तरसूत्रे वाग्रहणं सर्वस्य शेषो विज्ञायते, तेन क्वचिन्न भवत्यपि। मानयति। बाधयति। दानयति। निशानयति। * अत्रापि सन्नर्थविशेष इष्यते *। मानेर्जिज्ञासायाम्, बधेर्वैरूप्ये, दानेरार्जवे, शानेर्निशाने।
<धातोः कर्मणः समानकर्तृकादिच्छायां वा ।। 3-1-7 ।। >
इषिकर्म यो धातुरिषिणैव समानकर्तृकः, तस्मादिच्छायामर्थे वा सन्प्रत्ययो भवति। कर्मत्वं च धातोरर्थद्वारकम्। कर्तुमिच्छति चिकीर्षति। जिहीर्षति। धातुग्रहणं

किम् ? सोपसर्गादुत्पत्तिर्मा भूत्-प्रकर्तुमैच्छत् प्राचिकीर्षत्। कर्मण इति किम्? करणान्मा भूत्-गमनेनेच्छति। समानकर्तृकादिति किम् ? देवदत्तस्य भोजनमिच्छति यज्ञदत्तः। इच्छायामिति किम् ? कर्तुं जानाति। वावचनाद्वाक्यमपि भवति। `धातोः' इति विधानादत्र सन आर्धधातुकसंज्ञा भवति, न पूर्वत्र। * आशङ्कायामुपसङ्ख्यानम् *(म.भा.2.14)। आशङ्के पतिष्यति कूलम्। पिपतिषति नदीकूलम्। श्वा मुमूर्षति। * इच्छासन्नन्तात्प्रतिषेधो वक्तव्यः *। चिकीर्षितुमिच्छति। विशेषणं किम् ? जुगुप्सिषते। मीमांसिषते।।

`शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः।

सरूपः प्रत्ययो नेष्टः सनन्तान्न सनिष्यते।।'(म.भा.2.15)

<सुप आत्मनः क्यच् ।। 3-1-8 ।। >

`कर्मणः' `इच्छायां वा' इत्यनुवर्त्तते। इषिकर्मण एषितुरात्मसम्बन्धिनः सुबन्तादिच्छायामर्थे वा क्यच्प्रत्ययो भवति। आत्मनः पुत्रमिच्छति पुत्रीयति। सुब्ग्रहणं किम् ?वाक्यान्मा भूत्-महान्तं पुत्रमिच्छति। आत्मन इति किम् ? राज्ञः पुत्रमिच्छति। ककारः"नः क्ये"(1.4.15/2659) इति सामान्यग्रहणार्थः। चकारस्तदविघातार्थः। * क्यचि मान्ताव्ययप्रतिषेधो वक्तव्यः *(म.भा.2.19)। इदमिच्छति। उच्चैरिच्छति। नीचैरिच्छति। * छन्दसि परेच्छायामिति वक्तव्यम् *(म.भा.2.16)। `मा त्वा वृका अघायवो विदन्।'(वा.स.4.34)।

<काम्यच्च ।। 3-1-9 ।। >

सुबन्तात्कर्मण आत्मेच्छायां काम्यच् प्रत्ययो भवति। आत्मनः पुत्रमिच्छति पुत्रकाम्यति। वस्त्रकाम्यति। योगविभाग उत्तरत्र क्यचोऽनुवृत्यर्थः। ककारस्येत्संज्ञा प्रयोजनाभावान्न भवति। चकारादित्वाद्वा काम्यचः-उपयट्काम्यति।।(म.भा.2.20)

<उपमानादाचारे ।। 3-1-10 ।। >

क्यजनुवर्त्तते, न काम्यच्। उपमानात्कर्मणः सुबन्तादाचारेऽर्थे वा क्यच्प्रत्ययो भवति। आचारक्रियायाः प्रत्ययार्थत्वात्तदपेक्षयैवोपमानस्य कर्मता। पुत्रमिवाचरति पुत्रीयति छात्रम्। प्रवारीयति कम्बलम्। * अधिकरणाच्चेति वक्तव्यम् *(म.भा.2.20)। प्रासादीयति कुड्ये। पर्यङ्कीयति मञ्चके।।

<कर्त्तुः क्यङ् सलोपश्च ।। 3-1-11 ।। >

`आचारे' इत्यनुवर्त्तते। उपमानात्कर्तुः सुबन्तादाचारेऽर्थे वा क्यङ् प्रत्ययो भवति, सकारस्य च लोपो भवति। अन्वाचयशिष्टः सलोपः, तदभावेऽपि क्यङ् भवत्येव। श्येन इवाचरति काकः श्येनायते। कुमुदं पुष्करायते। सलोपविधावपि वाग्रहणं सम्बध्यते, सा च व्यवस्थितविभाषा भवति। ओजसोऽप्सरसो नित्यं पयसस्तु विभाषया।

(सकारस्येष्यते लोपः शब्दशास्त्रविचक्षणैः)(जै.सू.2.1.91)

`ओजायमानं यो अहिं जघान'(ऋ.2.12.11)ओजायते। अप्सरायते। पयायते। पयस्यते। सलोपविधौ च `कर्तुः' इति स्थानषष्ठी सम्पद्यते, तत्रालोऽन्त्यनियमे सति, `हंसायते' `सारसायते' इति सलोपो न भवति। * आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा वक्तव्यः *(म.भा.2.21)। अवगल्भते, अवगल्भायते। क्लीबते, क्लीबायते। होडते, होडायते। * सर्वप्रातिपदिकेभ्य इत्येके *(म.भा.2.21)। अश्व इवाचरति अश्वायते। गर्दभायते। अश्वति। गर्दभति।।

<भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ।। 3-1-12 ।। >

`भृश' इत्येवमादिभ्यः प्रातिपदिकेभ्योऽच्व्यन्तेभ्यो भुवि भवत्यर्थे क्यङ् प्रत्यययो भवति, हलन्तानां च लोपः। `अच्वेः' इति प्रत्येकमभिसम्बध्यते। किमर्थं पुनरिदमुच्यते, यावता भवतियोगे च्विर्विधीयते तेनोक्तार्थत्वाच्च्व्यन्तेभ्यो न क्यङ् भविष्यति ? तत्सदृशप्रतिपत्त्यर्थं तर्हि च्विप्रतिषेधः क्रियते। अभूततद्भावविषयेभ्यो भृशादिभ्यः क्यङ्प्रत्ययः। अभृशो भृशो भवति भृशायते। शीघ्रायते। भृश। शीघ्र। मन्द। चपल। पण्डित। उत्सुक। उन्मनस्। अभिमनस्। सुमनस्। दुर्मनस्। रहस्। रेहस्। शश्वत्। बृहत्। वेहत्। नृषत्। शुधि। अधर। ओजस्। वर्चस्। भृशादिः।

अच्वेरिति किम् ? भृशीभवति।।

<लोहितादिडाज्भ्यः क्यष् ।। 3-1-13 ।। >

लोहितादिभ्यो डाजन्तेभ्यश्च भवत्यर्थे क्यष् प्रत्ययो भवति। लोहितायति, लोहितायते। डाजन्तेभ्यः--पटपटायति, पटपटायते। * लोहितडाज्भ्यः क्यष्वचनम्, भृशादिष्वितराणि *(म.भा.2.24) यानि लोहितादिषु पठ्यन्ते तेभ्यः क्यङेव, अपरिपठितेभ्यस्तु क्यषेव भवति। वर्मायति, वर्मायते। निद्रायति, विद्रायते। करुणायति। करुणायते। कृपायति, कृपायते। आकृतिगणोऽयम्। तथा च ककारः सामान्यग्रहणार्थोऽनुबध्यते-"नः क्ये"(1.4.15/2659) इति। न हि पठितानां मध्ये नकारान्तः शब्दोऽस्ति। कृभ्वस्तिभिरिव क्यषापि योगे डाज् भवतीत्येतदेव वचनं ज्ञापकम्। `अच्वेः' इत्यनुवृत्तेरभूततद्भावे क्यष् विज्ञायते। लोहित। नील। हरित। पीत। मद्र। फेन। मन्द। लोहितादिः।।

<कष्टाय क्रमणे ।। 3-1-14 ।। >

क्यङनुवर्त्तते न क्यष्। कष्टशब्दाच्चतुर्थीसमर्थात्क्रमणेऽर्थेऽनार्जवे क्यङ् प्रत्यतो भवति। कष्टाय क्रमणे क्रामति कष्टयते। अत्यल्पमिदमुच्यते। * सत्त्रकष्टकक्षकृच्छ्रगहनेभ्यः कण्वचिकीर्षामिति वक्तव्यम् *(म.भा.2.25)। कण्वचिकीर्षा = पापचिकीर्षा, तस्यामेतेभ्यः क्यङ् प्रत्ययो भवति। सत्त्रायते। कष्टायते। कक्षायते। कृच्छ्रायते। गहनायते। कण्वचिकीर्षायामिति किम् ? अजः कष्टं क्रामति।।

<कर्मणो रोमन्थतपोभ्यां वर्त्तिचरोः ।। 3-1-15 ।। >
रोमन्थशब्दात्तपःशब्दाच्च कर्मणो यथाक्रमं वर्त्तिचरोरर्थयोः क्यङ् प्रत्ययो भवति। रोमन्थं वर्त्तयति रोमन्थायते गौः। * हनुचलन इति वक्तव्यम् *(म.भा.2.25)। इह मा भत्-कीटो रोमन्थं वर्त्तयति। * तपसः परस्मैपदं च *(म.भा.2.25)। तपश्चरति तपस्यति।।
<बाष्पोष्मभ्यामुद्वमने ।। 3-1-16 ।। >
`कर्मणः' इति वर्त्तते। बाष्पशब्दादूष्मशब्दाच्च कर्मण उद्वमनेऽर्थे क्यङ् प्रत्ययो भवति। बाष्पमुद्वमति बाष्पायते। ऊष्मायते। * फेनाच्चेति वक्तव्यम् *(म.भा.2.25)। फेनमुद्वमति फेनायते।।
<शब्दवैरकलहाभ्रकण्वमेधेभ्यः करणे ।। 3-1-17 ।। >
शब्द, वैर, कलह, अभ्र, कण्व, मेघ-इत्येतेभ्यः करणे करोत्यर्थे क्यङ् प्रत्ययो भवति। शब्दं करोति शब्दायते। वैरायते। कलहायते। अभ्रायते। कण्वायते। मेघायते। * सुदिनदुर्दिननीहारेभ्यश्चेति वक्तव्यम् *(म.भा.2.26)। सुदिनायते। दुर्दिनायते। नीहारायते। अटाट्टाशीकाकोटापोटासोटाप्रुष्टाप्लुष्टाग्रहणं कर्त्तव्यम् *(म.भा.2.26)। अटायते। अट्टायते। शीकायते। कोटायते। पोटायते। सोटायते। कष्टायते।
<सुखादिभ्यः कर्तृवेदनायाम् ।। 3-1-18 ।। >
कर्मग्रहणमनुवर्त्तते। `सुख'-इत्येवमादिभ्यः कर्मभ्यो वेदनायामर्थेऽनुभवे क्यङ् प्रत्ययो भवति, वेदयितुश्चोत्कर्तुः सम्बन्धीनि सुखादीनि भवन्ति। सुखं वेदयते सुखायते। दुःखायते। कर्तृग्रहणं किम् ? सुखं वेदयते प्रसाधको देवदत्तस्य। सुख। दुःख। तृप्त। गहन। कृच्छ्र। अस्त्र। अलीक। प्रतीप। करुण। सोढ। सुखादिः।।
<नमोवरिवश्चित्रङः क्यच् ।। 3-1-19 ।। >
`करणे' इति वर्त्तते। नमस्, वरिवस्, चित्रङ्-इत्येतेभ्यो वा क्यच्प्रत्ययो भवति, करणविशेषे पूजादौ। `नमसः पूजायाम्' नमस्यति देवान्। `वरिवसः परिचर्यायाम्'-वरिवस्यति गूरून्। `चित्रङ आश्चर्ये'-चित्रीयते। ङकार आत्मनेपदार्थः।।
<पुच्छभाण्डचीवराण्णिङ् ।। 3-1-20 ।। >
`करणे' इति वर्तते। पुच्छ, भाण्ड, चीवर-इत्येतेभ्यो णिङ् प्रत्ययो भवति, करणविशेषे। * पुच्छादुदसने पर्यसने वा *(म.भा.2.27)। उत्पुच्छयते। परिपुच्छयते। * भाण्डात्समाचयने *(म.भा.2.27)। सम्भाण्डयते। * चीवरादर्जने परिधाने वा *(म.भा.2.27)। सञ्चीवरयते भिक्षुः। ङकार आत्मनेपदार्थः। णकारः सामान्यग्रहणार्थः-"णेरनिटि"(6.4.51/2313) इति।।
<मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ।। 3-1-21 ।। >
मुण्ड, मिश्र, श्लक्ष्ण, लवण, व्रत, वस्त्र, हल,कल, कृत, तूस्त इत्येतेभ्यः करणे णिच् प्रत्ययो भवति। मुण्डं करोति मुण्डयति। मिश्रयति। श्लक्ष्णयति। लवणयति। व्रताद्भोजने तन्निवृत्तौ च पयो व्रतयति। वृषलान्नं व्रतयति। वस्त्रात्समाच्छादने--संवस्त्रयति। हलिं गृह्णाति हलयति। कलिं गृह्णाति कलयति। हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थम्-अजहलत्, अचकरत्। कृतं गृह्णाति कतृतयति। तूस्तानि विहन्ति वितूस्तयति केशान्। विशदीकरोतीत्यर्थः।।
<धातोरोकाचो हलादेः क्रियासमभिहारे यङ् ।। 3-1-22 ।। >
एकाज् यो धातुर्हलादिः क्रियासमभिहारे वर्तते तस्माद्यङ् प्रत्ययो भवति। पौनःपुन्यं भृशार्थो वा = क्रियासमभिहारः। पुनः पुनः पचति पापच्यते। यायज्यते। भृशं ज्वलति जाज्वल्यते। देदीप्यते। धातोरिति किम् ? सोपसर्गादुत्पत्तिर्मा भूत्-भृशं प्राटति। एकाच इति किम् ? भृशं जागर्ति। हलादेरिति किम् ? भृशमीक्षते। * सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनां ग्रहणं यङ्विधावनेकाजहलाद्यर्थम् *(म.भा.2.29)। सोसूच्यते। सोसूत्र्यते। मोमूत्र्यते। अटाट्यते। अरार्यते। अशाश्यते। प्रोर्णोनूयते। भृशं शोभते, भृशं रोचते इत्यत्र नेष्यते; अनभिधानात्।।
<नित्यं कौटिल्ये गतौ ।। 3-1-23 ।। >
गतिवचनाद्धातोः कौटिल्ये गम्यमाने नित्यं यङ् प्रत्ययो भवति। कुटिलं क्रामति चङ्क्रम्यते। दन्द्रम्यते। नित्यग्रहणं विषयनियमार्थम्-गतिवचनान्नित्यं कौटिल्य एव भवति, न तु क्रियासमभिहारे। भृशं क्रामति।।
<लुपसदचरजपजभदहदशगृभ्यो भावगर्हायम् ।। 3-1-24 ।। >
लुप, सद, चर, जप, जभ, दह, दश, गृ,-इत्येतेभ्यो भावगर्हायाम् = धात्वर्थगर्हायां यङ्प्रत्ययो भवति। गर्हितं लुम्पति लोलुप्यते। एवम्--सासद्यते। चञ्चूर्यते। जञ्जप्यते। जञ्जभ्यते। दन्दह्यते। दन्दश्यते। निजेगिल्यते। भावर्हायामिति किम् ? साधु जपति। भावग्रहणं किम् ? साधनगर्हायां मा भूत्-मन्त्रं जपति वृषलः। नित्यग्रहणं विषयनियमार्थमनुवर्त्तते--एतेभ्यो नित्यं भावगर्हायामेव भवति, न तु क्रियासमभिहारे। भृशं लुम्पति।।
<सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ।। 3-1-25 ।। >
सत्यादिभ्यश्चूर्णपर्यन्तेभ्यः, चुरादिभ्यश्च णिच् प्रत्ययो भवति। सत्यमाचष्टे सत्यापयति। * अर्थवेदसत्यानामापुग्वक्तव्यः *(म.भा.2.30)। अर्थमाचष्टे अर्थापयति। वेदापयति। आपुग्वचनसामर्थ्याट्टिलोपो न भवति। पाशाद्विमोचने-विपाशयति। रूपाद्दर्शने-रूपयति। वीणयोपगायति उपवीणयति। तूलेनानुकुष्णाति, अनुतूलयति। श्लोकैरुपस्तौति उपश्लोकयति। सेनयाऽभियाति अभषेणयति। लोमान्यनुमार्ष्टि अनुलोमयति। त्वचं गृह्णाति त्वचयति।

अकारान्तस्त्वचशब्दः। वर्मणा संनह्यति संवर्मयति। वर्णं गृह्णाति वर्णयति। चूर्णैरवध्वंसयति अवचूर्णयति। चुरादिभ्यः स्वार्थे-चोरयति। चिन्तयति। स्वाभाविकत्वादर्थाभिधानस्य यथास्वम् = यथायथं प्रत्ययार्था निर्दिश्यन्ते।।

<हेतुमति च ।। 3-1-26 ।। >

हेतुः स्वतन्त्रस्य (कर्तुः) प्रयोजकः, तदीयो व्यापारः प्रेषणादिलक्षणो हेतुमान्, तस्मिन्नभिधेये धातोर्णिच् प्रत्ययो भवति। कटं कारयति। ओदनं पाचयति। * तत्करोतीत्युपसङ्ख्यानं सूत्रयतीत्याद्यर्थम् *(म.भा.2.34)। सूत्रं करोति सूत्रयति। * आख्यानात्कृतस्तदाचष्टे इति णिच् कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम् *(म.भा.2.34)। आख्यानात्कृदन्ताण्णिज्वक्तव्यः, तदाचष्टे इत्येस्मिन्नर्थे, कृल्लुक्, प्रकृतिप्रत्यापत्तिः, प्रकृतिवच्च कारकं भवति। कंसवधमाचष्टे कंसं घातयति। बलिबन्धमाचष्टे बलिं बन्धयति। राजागमनमाचष्टे राजानमागमयति। * आङ्लोपश्च कालात्यन्तसंयोगे मर्यादायाम् *(म.भा.2.35)। आरात्रिविवासमाचष्टे रात्रिं विवासयति। * चित्रीकरणे प्रापि *(म.भा.2.35)। उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योद्गमनं सम्भावयते सूर्यमुद्गमयति। *नक्षत्रेयोगे ज्ञि *(म.भा.2.35)। पुष्ययोगं जानाति पुष्येण योजयति। मघाभिर्योजयति।।

<कण्ड्वादिभ्यो यक् ।। 3-1-27 ।। >

`कण्डूञ्' इत्येवमादिभ्यो यक् प्रत्ययो भवति। द्विविधाः कण्ड्वादयः-धातवः, प्रातिपदिकानि च। तत्र धात्वधिकाराद्धातुभ्य एव प्रत्ययो विधीयते, न तु प्रातिपदिकेभ्यः। तथा च-गुणप्रतिषेधार्थः ककारोऽनुबध्यते।

`धातुप्रकरणाद्धातुः कस्य चासञ्जनादपि।

आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः।।'(म.भा.2.38)

कण्डूञ्-कण्डूयति, कण्डूयते। ञित्त्वात् "कर्त्रभिप्राये क्रियाफले"(1.3.72/2158) इत्यात्मनेपदम्। कण्डूञ्। मन्तु। हृणीङ्। वल्गु। अस्मनस्। महीङ्। लेट्। लोट्। इरस्। इरज्। इरञ्। द्रवस्। मेधा। कुषुभ। मगध। तन्तस्। पम्पस्। सुख। दुःख। सपर। अरर। भिषज्। भिष्णज्। इषुध। चरण। भुरण। चुरण। तुरण। भुरण। गद्गद। एला। केला। खेला। लिट्। लोट्।

<गुपूधूपविच्छिपणिपनिभ्यः आयः ।। 3-1-28 ।। >

`गुपू रक्षणे'(धा.पा.395), `धूप सेतापे'(धा.पा.396), `विच्छ गतौ'(धा.पा.1424), `पण व्यवहारे स्तुतौ च'(धा.पा.439), `पन च'(धा.पा.440)-इत्यतेभ्यो धातुभ्य आयप्रत्यो भवति। गोपायति। दूपायति। विच्छायति। पणायति। पनायति। स्तुत्यर्थेन पनिना साहचर्यात्तदर्थः पणिः प्रत्ययमुत्पादयति, न व्यवहारार्थः। शतस्य पणते। सहस्रस्य पणते। अनुबन्धश्च केवले चरितार्थः, तेनायप्रत्ययान्तान्नात्मनेपदं भवति।।

<ऋतेरीयङ् ।। 3-1-29 ।। >

ऋतिः सौत्रो धातुर्घृणायां वर्त्तते, तत ईयङ् प्रत्ययो भवति। ङकार आत्मनेपदार्थः। ऋतीयते, ऋतीयेते, ऋतीयन्ते। `ऋतेश्छङ्' इति सिद्धे ईयङ्वचनं ज्ञापनार्थम्-धातुविहितानां प्रत्ययानामायन्नादयो न भवन्तीति।।

<कमेर्णिङ् ।। 3-1-30 ।। >

कमेर्धातोर्णिङ् प्रत्ययो भवति। णकारो वृद्ध्यर्थः। ङकार आत्मनेपदार्थः। कामयते, कामयेते, कामयन्ते।।

<आयादय आर्धधातुके वा ।। 3-1-31 ।। >

आर्धधातुकविषये = आर्धधातुकविवक्षायामायादयः प्रत्यया वा भवन्ति। गोप्ता, गोपायिता। अर्तिता, ऋतीयिता। कमिता, कामयिता। नित्यप्रत्ययप्रसङ्गे तदुत्पत्तिरार्ध्दधातुकविषये विकल्प्यते, तत्र यथायथं प्रत्यया भवन्ति-गुप्तिः। गोपाया।।

<सनाद्यन्ता धातवः ।। 3-1-32 ।। >

सन् आदिर्येषां ते सनादयः, सनादयोऽन्ते येषां ते सनाद्यन्ताः। सनाद्यन्ताः समुदाया धातुसंज्ञा भवन्ति। प्रत्ययग्रहणपरिभाषैव पदसंज्ञायामन्तवचनेन लिङ्गेन प्रतिषिद्धा सती पुनरिहान्तवचनेन प्रतिप्रसूयते। चिकीर्षति। पुत्रीयति। पुत्रकाम्यति।।

<स्यतासी लृलुटोः ।। 3-1-33 ।। >

लृरूपमुत्सृष्टानुबन्धं सामान्यमेकमेव, तस्मिन् लुटि च परतो धातोर्यथासङ्ख्यं स्यतासी प्रत्ययौ भवतः। करिष्यति। अकरिष्यत्। श्वः कर्ता। इदित्करणमनुनासिकलोपप्रतिबन्धार्थम्। मन्ता। सङ्गन्ता।।

<सिब्बहुलं लेटि ।। 3-1-34 ।। >

धातोः सिप् प्रत्ययो भवति बहुलं लेटि परतः। `जोषिषत्'(ऋ.1.35.1)। `तारिषत्'(ऋ.1.25.12)। मन्दिषत्। न च भवति-`पदाति विद्युत्'(ऋ.7.25.1)। `उदधिं च्यावयाति।।'(तै.सं.3.5.5.5)

<कास्प्रत्ययादाममन्त्रे लिटि ।। 3-1-35 ।>

`कासृ शब्दकुत्सायाम्'(धा.पा.623) ततः प्रत्ययान्तेभ्यश्च धातुभ्य आम् प्रत्ययो भवति लिटि परतोऽमन्त्रविष्ये। कासाञ्चक्रे। प्रत्ययान्तेभ्यः - लोलूयाञ्चक्रे। अमन्त्र इति किम् ? `कृष्णो नोनाव'(ऋ.1.79.2)।। * कास्यनेकाच इति वक्तव्यम् चुलुम्पाद्यर्थम् *(म.भा.2.44) । चकासाञ्चकार। चुलुम्पाञ्चकार। दरिद्राञ्चकार।।

आमोऽमित्त्वमदन्तत्वादगुणत्वं विदेस्तथा।
आस्कासोरां विधानाच्च पररूपं कतन्तवत्।।

<इजादेश्च गुरुमतोऽनृच्छः ।। 3-1-36 ।। >
इजादिर्यो धातुर्गुरुमान् ऋच्छतिवर्जितस्तस्माच्च लिटि परत आम्प्रत्ययो भवति। `ईह चेष्टायाम्'(धा.पा.632), `ऊह वितर्के'(धा.पा.648)। ईहाञ्चक्रे, ऊहाञ्चक्रे। इजादेरिति किम् ? ततक्ष, ररक्ष। गुरुमत इति किम् ? इयज, उवप। अनृच्छ इति किम् ? आनर्च्छ, आनर्च्छतुः, आनर्च्छुः। * ऊर्णोतेश्च प्रतिषेधो वक्तव्यः *(म.भा.2.46)। प्रोर्णुनाव। अथ वा
*वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम्।
आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात्।।*(म.भा.2.46)
<दयायासश्च ।। 3-1-37 ।। >
`दय दानगतिरक्षणेषु'(धा.पा.481), `अय गतौ'(धा.पा.474), `आम उपवेशने'(धा.पा.1022)-इत्येतेभ्यश्च लिटि परत आम्प्रत्ययो भवति। दयाञ्चक्रे। पलायाञ्चके। आसाञ्चक्रे।
<उषविदजागृभ्योऽन्यतरस्याम् ।। 3-1-38 ।। >
`उष दाहे'(धा.पा.696), `विद ज्ञाने'(धा.पा.1065), `जागृ निद्राक्षये'(धा.पा.1073)-एतेभ्यो लिटि परतोऽन्यतरस्यामाम् प्रत्ययो भवति। ओषाञ्चकार, उवोष। विदाञ्चकार, विवेद। जागराञ्चकार, जजागार। विदेरदन्तत्वप्रतिज्ञानादामि गुणो न भवति।।
<भीह्रीभृहुवां श्लुवच्च ।। 3-1-39 ।। >
`ञिभी भये'(धा.पा.1085), `ह्री लज्जायाम्'(धा.पा.1086), `डुभृञ् धारणपोषणयोः'(धा.पा.1088), `हु दानादनयोः'(धा.पा.1084)-इत्येतेभ्यो लिटि परत आम्प्रत्ययो भवत्यन्यतरस्याम्, श्लाविव चास्मिन्कार्यं भवति। किं पुनस्तद् ? द्वित्वमित्त्वं च । बिभयाञ्चकार, बिभाय। जिह्रयाञ्चकार, जिह्राय। बिभराञ्चकार, बभार। जुहवाञ्चकार, जुहाव।।
<कृञ्चानुप्रयुज्यते लिटि ।। 3-1-40 ।। >
आम्प्रत्ययस्य पश्चात्कृञनुप्रयुज्यते लिटि परतः। `कृञ्' इति प्रत्याहारेण कृभ्वस्तयो गृह्यन्ते, तत्सामर्थ्यादस्तेर्भूभावो न भवति। पाचयाञ्चकार। पाचयाम्बभूव। पाचयामास।।
<विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ।। 3-1-41 ।। >
`विदाङ्कुर्वन्तु' इत्येतदन्यतरस्यां निपात्यते। किं पुनरिह निपात्यते ? विदेर्लोट्याम्प्रत्ययः, गुणाभावः, लोटो लुक्, कृञश्च लोट् परस्यानुप्रयोगः। अत्र भवन्तो विदांकुर्वन्तु, विदन्तु। इतिकरणः प्रदर्शनार्थः। न केवलं प्रथमपुरुषबहुवचनम्, किं तर्हि ? सर्वाण्येव लोड्वचनान्यनुप्रयुज्यन्ते-विदाङ्करोतु, विदाङ्कुरुतात्, विदाङ्कुरुताम्, विदाङ्कुरु, विदाङ्कुरुतमित्यादि।।
<अभ्युत्सादयाम्प्रजनयाञ्चिकयांरमयामकःपावयाङ्क्रियाद्विदामक्रन्निितिच्छन्दसि ।। 3-1-42 ।। >
`अभ्युत्सादयाम्' इत्येवमादयश्छन्दसि विषयेऽन्यतरस्यां निपात्यन्ते। सदिजनिरमीणां ण्यन्तानां लुङ्याम्प्रत्ययो निपात्यते। चिनोतेरपि तत्रैवाम्प्रत्ययो द्विर्वचनं कुत्वं च। अकरिति चतुर्भिरपि प्रत्येकमनुप्रयोगः सम्बध्यते। पावयाङ्क्रियादिति-पवतेः पुनातेर्वा ण्यन्तस्य लिङ्याम् निपात्यते, क्रियादिति चास्यानुप्रयोगः। विदामक्रन्निति-विदेर्लुङ्याम् निपात्यते, गाणाभावश्च, अक्रन्निति चास्यानुप्रयोगः। `अभ्युत्सादयामकः'(मै.1.6.5)। अभ्युदसीषददिति भाषायाम्। `प्रजनयामकः'(मै.1.6.10)। प्रजीजनदिति भाषायाम्। `चिकयामकः'। अचैषीदिति भाषायाम्। `रमयामकः'(काठकसं.7.7)। अरीरमदिति भाषायाम्। पावयाङ्क्रियात्'(मै.2.1.3)। पाव्यादिति भाषायाम्। `विदामक्रन्'(मै.1.4.7,तै.ब्रा.1.3.10.3) अवेदिषुरिति भाषायाम्। इतिकरणः प्रयोगदर्शनार्थः।।

<च्लि लुङि ।। 3-1-43 ।। >
धातोश्च्लिः प्रत्ययो भवति लुङि परतः। इकार उच्चारणार्थः, चकारः स्वरार्थः। अस्य सिजादीनादेशान्वक्ष्यति, तत्रैवोदाहरिष्यामः।।
<च्लेः सिच् ।। 3-1-44 ।.>
च्लेः सिजादेशो भवति। इकार उच्चारणार्थः, चकारः स्वरार्थः। अकार्षीत्। अहार्षीत्। आगमानुदात्तत्वं हि प्रत्ययस्वरमिव चित्स्वरमपि बाधेतेति स्थानिन्यादेशे च द्विश्चकारोऽनुबध्यते। * स्पृशमृशकृषतृपदृपां सिज्वा वक्तव्यः *। अस्प्राक्षीत्, अस्पार्क्षीत्, अस्पृक्षत्। अम्रक्षीत्, अमार्क्षीत्, अमृक्षत्। अक्राक्षीत्, अकार्क्षीत्,अकृक्षत्। अत्राप्सीत्, अतार्प्सीत्, अतृपत्। अद्राप्सीत्, अदार्प्सीत्, अदृपत्।।
<शल इगुपधादनिटः क्सः ।। 3-1-45 ।। >
शलन्तो यो धातुरिगुपधस्तस्मात्परस्य च्लेरनिटः क्स आदेशो भवति। दुह--अधुक्षत्। लिह--अलिक्षत्। शल इति किम् ? अभैत्सीत्। अच्छैत्सीति। इगुपधादिति किम् ? अधाक्षीत्। अनिटइति किम् ? अकोषीत्। अमोषीत्।।

<श्लिष आलिङ्गने ।। 3-1-46 ।।>

श्लिषेर्धातोरालिङ्गनक्रियावचनात्परस्य च्लेः क्स आदेशो भवति। आलिङ्गनम् = उपगूहनम्परिष्वङ्गः। अत्र नियमार्थमेतत्। आश्लिक्षत्कन्यां देवदत्तः। आलिङ्गन इति किम् ? समाश्लिषज्जतु काष्ठम्(म.भा.2.54)।।

<न दृशः ।। 3-1-47 ।। >

पूर्वेण क्सः प्राप्तः प्रतिषिध्यते। दृशेर्धातोः परस्य च्लेः क्सादेशो न भवति। अस्मिन्प्रतिषिद्धे "इरितो वा"(3.1.57/2269) इत्यङ्सिचौ भवतः। अदर्शत्, अद्राक्षीत्।।

<णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ।। 3-1-48 ।। >

सिजपवादश्चङ् विधीयते। ण्यन्तेभ्यो धातुभ्यः, श्रि, द्रु, स्रु-इत्येतेभ्यश्च परस्य च्लेश्चङादेशो भवति कर्तृवाचिनि लुङि परतः। ङकारो गुणवृद्धिप्रतिषेदार्थः, चकारः`चङि' इति विशेषणार्थः। अचीकरत्। अजीहरत्। अशिश्रयत्। अदुद्रुवत्। असुस्रुवत्। कर्तरीति किम् ? अकारयिषातां कटौ देवदत्तेन। * कमेरुपसङ्ख्यानम् *। "आयादय आर्धधातुके वा"(3.1.31/2305) इति यदा णिङ् नास्ति तदैतदुपसङ्ख्यानम्। अचकमत। णिङ्पक्षे सन्वद्भावः अचीकमत।

`नाकमिष्टं सुखं यान्ति सुयुक्तैर्वडवारथैः।

अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः।।'(म.भा.2.55)

<विभाषा धेट्श्व्योः ।। 3-1-49 ।। >

`धेट् पाने'(धा.पा.903), `टुओश्वि गतिवृद्ध्योः'(धा.पा.1011)--एताभ्यामुत्तरस्य च्लेर्विभाषा चङादेशो भवति। धेटस्तावत्-अदधत्। सिच्पक्षे "विभाषा घ्राधेट्"(2.4.78/2376) इति लुक्। अधात्, अधासीत्। श्वयतेः खल्वपि-अशिश्वियत्। अङप्यत्र विकल्प्यते--अश्वत्, अश्वयीत्। कर्तरीत्येव अधिषातां गावौ वत्सेन।।

<गुपेश्छन्सि ।। 3-1-50 ।।>

गुपेः परस्य च्लेश्छन्दसि विषये विभाषा चङादेशो भवति। यत्र आयप्रत्ययो नास्ति तत्रायं विधिः। `इमान्नो मित्रावरुणौ गृहानजुगुपतम् युवम्'(मै.1.5.14);अगोप्तम्, अगोपिष्टम्, अगोपायिष्टमिति वा। भाषायां तु चङन्तं वर्जयित्वा शिष्टं रूपत्रयं भवति।।

<नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः ।। 3-1-51 ।। >

`ऊन परिहाणे'(धा.पा.1889), `ध्वन शब्दे'(धा.पा.817), `इल प्रेरणे'(धा.पा.1358), `अर्द गतौ याचने च'(धा.पा.55)-इत्येतेभ्यो धातुभ्यो ण्यन्तेभ्यः पूर्वेण च्लेश्चङि प्राप्ते छन्दसि विषये न भवति। `काममूनयीः'(ऋ.1.53.3)। औनिनः इति भाषायाम्। `मा त्वाग्निर्ध्वनयीत्'(ऋ.1.161.15)। अदिध्वनदिति भाषायाम्। काममैलयीत्। ऐलिलदिति भाषायाम्। मैनमर्दयीदिति भाषायाम्।।

<अस्यतिवक्तिख्यातिभ्योऽङ् ।। 3-1-52 ।। >

`असु क्षेपणे'(धा.पा.1210), `वच परिभाषणे'(धा.पा.1064),ब्रूञादेशो वा; `ख्या प्रकथने'(धा.पा.1061), चक्षिङादेशो वा-इत्येभ्यः परस्य च्लेरङादेशो भवति कर्तृवाचिनि लुङि परतः। अस्यतेः पुषादिपाठादेवाङि सिद्धे पुनर्ग्रहणमात्मनेपदार्थम्। पर्यास्थत, पर्यास्थेताम्, पर्यास्थन्त। वक्ति--अवोचत्, अवोचताम्, अवोचन्। ख्याति--आख्यत्। आख्यताम्, आख्यन्। कर्त्तरीति किम् ? पर्यासिषातां गावौ वत्सेन।।

<लिपिसिचिह्वश्च ।। 3-1-53 ।। >

`लिप उपदेहे'(धा.पा.1434), `षिच क्षरणे'(धा.पा.1435), `ह्वेञ् स्पर्द्धायाम्'(धा.पा.1009)--इत्येतेभ्यश्च परस्य च्लेरङादेशो भवति। अलिपत्। असिचत्। आह्वत्। पृथग्योग उत्तरार्थः।।

<आत्मनेपदेष्वन्यतरस्याम् ।। 3-1-54 ।। >

पूर्वेण प्राप्ते विभाषा आरभ्यते। लिपि-सिचि-ह्व आत्मनेपदेषु परतश्च्लेरङादेशो भवति अन्यतरस्याम्। "स्वरितञितः"(1.3.72/2158) इत्यात्मनेपदम्। अलिपत, अलिप्त। असिचत, असिक्त। अह्वत,अह्वास्त।।

<पुषादिद्युताद्य्लृदितः परस्मैपदेषु ।। 3-1-55 ।। >

पुषादिभ्यः, द्युतादिभ्यः, लृदिद्भ्यश्च धातुभ्यः परस्य च्लेः परस्मैपदेषु परतोऽङादेशो भवति। पुषादिर्दिवाद्यन्तर्गणो गृह्यते, न भ्वादिक्र्याद्यन्तर्गणो वा। पुष-अपुषत्। द्युतादि-अद्युतत्, अश्वितत्। लृदिद्भ्यः-गम्लृ-अगमत्। शक्लृ-अशकत्। परस्मैपदेष्विति किम् ? व्यद्योतिष्ट। अलोटिष्ट।।

<सर्त्तिशास्त्यर्तिभ्यश्च ।। 3-1-56 ।। >

`सृ गतौ'(धा.पा.936), `शासु अनुशिष्टौ'(धा.पा.1076), `ऋ गतौ'(धा.पा.937)-इत्येतेभ्यः परस्य च्लेरङादेशो भवति। सर्त्ति-असरत्। शास्ति-अशिषत्। अर्त्ति आरत्। पृथग्योगकरणमात्मनेपदार्थम्। समरन्। चकारः परस्मैपदेष्वित्यनुकर्षणार्थः। तच्चोत्तरत्रोपयोगं यास्यति।।

<इरितो वा ।। 3-1-57 ।। >

इरितो धातोः परस्य च्लेरङादेशो वा भवति। भिदिर्-अभिदत्, अभैत्सीत्। छिदिर्-अच्छदत् अच्छैत्सीत्। परस्मैपदेष्वित्येव- अभित्त। अच्छित्त।।

<जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ।। 3-1-58 ।। >
`वा' इति वर्त्तते। `जॄष् वयोहानौ'(धा.पा.1131), `स्तम्भुः' सौत्रो धातुः, `म्रुचु म्लुचु गत्यर्थौ'(धा.पा.195/196) `ग्रुचु ग्लुचु स्तेयकरणे'(धा.पा.197/198), `ग्लुञ्चु षस्ज गतौ'(धा.पा.201/202), `टुओश्वि गतिवृध्द्योः'(धा.पा.1011)-इत्येतेभ्यो धातुभ्यः परस्य च्लेर्वाऽङादेशो भवति। अजरत्, अजारीत्। अस्तभत्, अस्तम्भीत्। अम्रुचत्, अम्रोचीत्। अम्लुचत्, अम्लोचीत्। अग्रुचत्, अग्रोचीत्। अग्लुचत्, अग्लोचीत्। अग्लुञ्चत्। अग्लुञ्चीत्। अश्वत्, अश्वयीत्, अशिश्वियत्। ग्लुचुग्लुञ्च्वोरन्यतरोपादानेऽपि रूपत्रयं सिद्ध्यति, अर्थभेदात्तु द्वयोरुपादानं कृतम्। केचितु वर्णयन्ति--द्वयोरुपादानसामर्थ्याद् ग्लुञ्चेरनुनासिकलोपो न भवति-अग्लुञ्चदिति।।
<कृमृदृरुहिभ्यश्छन्दसि ।। 3-1-59 ।। >
कृ,मृ,दृ,रुहि-इत्येतेभ्यः परस्य च्लेश्छन्दसि विषयेऽङादेशो भवति। शकलाङ्गुष्ठकोऽकरत्। अथोऽमरत्। अदरदर्थान्। पर्वतमारुहत्। `अन्तरिक्षाद्दिवमारुहम्'(अ.4.14.3)। छन्दसीति किम् ?अकार्षीत्। अमृत। अदारीत्। अरुक्षत्।।
<चिण् ते पदः ।। 3-1-60 ।। >
`पद गतौ'(धा.पा.1170)-अस्माद्धातोः परस्य च्लेश्चिणादेशो भवति तशब्दे परतः। सामर्थ्यादात्मनेपदैकवचनं गृह्यते--उदपादि सस्यम्। समपादि भैक्षम्। ते इति किम् ? उदपत्साताम्। उदपत्सत।।
<दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् ।। 3-1-61 ।। >
`चिण् ते' इति वर्तते। `दीपी दीप्तौ'(धा.पा.1151), `जनी प्रादुर्भावे'(धा.पा.1150) `बुध अवगमने'(धा.पा.1173), `पूरी आप्यायने'(धा.पा.1152), `तायृ संतानपालनयोः'(धा.पा.489), `ओप्यायी वृद्धौ'(धा.पा.488) इत्येतेभ्यः परस्य च्लेस्तशब्दे परतोऽन्यतरस्यां चिणादेशो भवति। अदीपि, अदीपिष्ट। अजनि, अजनिष्ट। अबोधि, अबुद्ध। अपूरि, अपूरिष्ट। अतायि, अतायिष्ट। अप्यायि, अप्यायिष्ट।।
<अचः कर्मकर्त्तरि ।। 3-1-62 ।। >
अजन्ताद्धातोः परस्य च्लेः कर्मकर्तरि तशब्दे परतश्चिणादेशो भवति। प्राप्तविभाषेयम्। अकारि कटः स्वयमेव, अकृत कटः स्वयमेव। अलावि केदारः स्वयमेव, अलविष्ट केदारः स्वयमेव। अच इति किम् ? अभेदि काष्ठं स्वयमेव। कर्मकर्त्तरि किम् ? अकारि कटो देवदत्तेन।।
<दुहश्च ।। 3-1-63 ।। >
`दुह प्रपूरणे'(धा.पा.1015) अस्मात्परस्य च्लेश्चिणादेशो भवत्यन्यतरस्याम्। अदोहि गौः स्वयमेव, अदुग्ध गौः स्वयमेव। कर्मकर्त्तरीत्येव -अदोहि गौर्गोपालकेन।।
< न रुधः ।। 3-1-64 ।। >
`रुधिर् आवरणे'(धा.पा.1439) अस्मात्परस्य च्लेः कर्मकर्त्तरि चिणादेशो न भवति। अन्ववारुद्ध गौः स्वयमेव। कर्मकर्त्तरीत्येव--अन्ववारोधि गौर्गोपालकेन।।
<तपोऽनुतापे च ।। 3-1-65 ।। >
`न' इति वर्त्तते। `तप संतापे'(धा.पा.986)-अस्मात्परस्य च्लेश्चिणादेशो न भवति कर्म कर्त्तर्यनुतापे च। अनुतापः = पश्चात्तापः, तस्य ग्रहणमकर्मकर्त्रर्थम्, तत्र हि भावकर्मणोरपि प्रतिषेधो भवति। अतप्त तपस्तापसः। अन्ववातप्त पापेन कर्मणा।।
<चिण् भावकर्मणोः ।। 3-1-66 ।। >
धातोः परस्य च्लेश्चिणादेशो भवति भावे कर्मणि तशब्दे परतः। भावे तावत्--अशायि भवता। कर्मणि खल्वपि--अकारि कटो देवदत्तेन। अहारि भारो यज्ञदत्तेन। चिण्ग्रहणं विस्पष्टार्थम्।।
<सार्वधातुके यक् ।। 3-1-67 ।। >
भावकर्मवाचिनि सार्वधातुके परतो धातोर्यक् प्रत्ययो भवति। आस्यते भवता। शय्यते भवता। कर्मणि--क्रियते कटः। गम्यते ग्रामः। ककारो गुणवृद्धिप्रतिषेधार्थः। यग्विधाने कर्मकर्त्तर्युपसङ्ख्यानम्। विप्रतिषेधाद्धि यकः शपो बलीयस्त्वम्। क्रियते कटः स्वयमेव। पच्यते ओदनः स्वयमेव।।
<कर्त्तरि शप् ।। 3-1-68 ।। >
कर्त्तवाचिनि सार्वधातुके परतो धातोः शप्प्रत्ययो भवति। पकारः स्वरार्थः, शकारः सार्वधातुकसंज्ञार्थः। भवति। पचति।।
<दिवादिभ्यः श्यन् ।। 3-1-69 ।। >
`दिव्'-इत्येवमादिभ्यो धातुभ्यः श्यन्प्रत्ययो भवति। शपोऽपवादः। नकारः स्वरार्थः, शकारः सार्वधातुकार्थः। दीव्यति। सीव्यति।।
<वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ।। 3-1-70 ।। >
उभयत्रविभाषेयम्। `टुभ्राशृ टुभ्लाशृ दीप्तौ'(धा.पा.825/826); `भ्रामु अनवस्थाने'(धा.पा.1206), `भ्रमु चलने'(धा.पा.851)-द्वयोरपि ग्रहणम्, `क्रमु पादविक्षेपे'(धा.पा.473), `क्लमु ग्लानौ'(धा.पा.1208), `त्रसी उद्वेगे'(धा.पा.1118), `त्रुटी छेदने'(धा.पा.1376), `लष कान्तौ'(धा.पा.889)-इत्येतेभ्यो वा श्यन् प्रत्ययो भवति। भ्राशते, भ्राश्यते। भ्लाशते, भ्लाश्यते। भ्रमति, भ्राम्यति। क्रामति, क्राम्यति। क्लामति, क्लाम्यति। त्रसति,त्रस्यति।

त्रुटति, त्रुट्यति। लषति, लष्यति।।
<यसोऽनुपसर्गात् ।। 3-1-71 ।। >
`यसु प्रयत्ने'(धा.पा.1211) दैवादिकः, तस्मान्नित्यं श्यनि प्राप्तेऽनुपसर्गाद्विकल्प उच्यते। यसोऽनुपसर्गाद्वा श्यन्प्रत्ययो भवति। यस्यति, यसति।
अनुपसर्गादिति किम् ? आयस्यति। प्रयस्यति।।
<संयसश्च ।। 3-1-72 ।। >
सोपसर्गार्थ आरम्भः। सम्पूर्वाच्च यसेर्वा श्यन्प्रत्ययो भवति। संयस्यति, संयसति।।
<स्वादिभ्यः श्नुः ।। 3-1-73 ।। >
`षुञ् अभिषवे'(धा.पा.1248) इत्येवमादिभ्यो धातुभ्यः श्नुप्रत्ययो भवति। शपोऽपवादः। सुनोति। सिनोति।।
<श्रुवः शृ च ।। 3-1-74 ।। >
श्रुवः श्नुप्रत्ययो भवति, तत्संनियोगेन श्रुवः `शृ' इत्ययमादेशो भवति। शृणोति,शृण्वन्ति।।
<अक्षोऽन्यतरस्याम् ।। 3-1-75 ।। >
`अक्षू व्याप्तौ'(धा.पा.654) भौवादिकः, अस्मादन्यतरस्यां श्नुप्रत्ययो भवति। अक्ष्णोति, अक्षति।।
<तनूकरणे तक्षः ।। 3-1-76 ।। >
`तक्षू त्वक्षू तनूकरणे'(धा.पा.655/656)--अस्मात्तनूकरणे वर्तमानादन्यतरस्यां श्नुप्रत्ययो भवति। अनेकार्थत्वाद्धातूनां विशेषेणोपादानम्। तक्षति काष्ठम्, तक्ष्णोति काष्ठम्। तनूकरण इति किम् ? सन्तक्षति वाग्भिः।।
<तुदादिभ्यः शः ।। 3-1-77 ।। >
`तुद व्यथने'(धा.पा.1282)-इत्येवमादिभ्यो धातुभ्यः शप्रत्ययो भवति। शपोऽपवादः। शकारः सार्वधातुकसंज्ञार्थः। तुदति। नुदति।।
<रुधादिभ्यः श्नम् ।। 3-1-78 ।। >
`रुधिर् आवरणे'(धा.पा.1439)-इत्येवमादिभ्यो धातुभ्यः शप्रत्ययो भवति। शपोऽपवादः। मकारो देशविध्यर्थः। शकारः "श्नान्नलोपः"(6.4.23/2544) इति विशेषणार्थः। रुणद्धि। भिनत्ति।।
<तनादिकृञ्भ्य उः ।। 3-1-79 ।। >
`तनु विस्तारे'(धा.पा.1464) --इत्येवमादिभ्यो धातुभ्यः कृञश्च उप्रत्ययो भवति। शपोऽपवादः। तनोति। सनोति। क्षणोति। कृञः खल्वपि - करोति। तनादिपाठादेव उप्रत्यये सिद्धे करोतेरुपादानं नियमार्थम्, अन्यत्तनादिकार्यं मा भूदिति। "तनादिभ्यस्तथासोः"(2.4.79/2547) इति विभाषा सिचो लुग् न भवति-अकृत, अकृथाः।।
<धिन्विकृण्व्योर च ।। 3-1-80 ।। >
`हिवि धिवि जिवि प्रीणनार्थाः'(धा.पा.591/593/594), `कृवि हिंसाकरणयोः'(धा.पा.598)-इत्येतयोर्धात्वोरुप्रत्ययो भवत्यकारश्चान्तादेशः। धिनोति। कृणोति। अतो लोपस्य स्थानिवद्भावाद् गुणो न भवति।।
<क्र्यादिभ्यः श्ना ।। 3-1-81 ।।>
`डुक्रीञ् द्रव्यविनिमये'(धा.पा.1474)-इत्येवमादिभ्यो धातुभ्यः श्नाप्रत्ययो भवति। शपोऽपवादः। शकारः सार्वधातुकसंज्ञार्थः। क्रीणाति। प्रीणाति।।
<स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च ।। 3-1-82 ।। >
आद्याश्चत्वारो धातवः सौत्राः `स्कुञ् आप्रवणे'(धा.पा.1479)--इत्येतेभ्यः श्नाप्रत्ययो भवति श्नुश्च। स्तभ्नाति, स्तभ्नोति। स्तुभ्नाति, स्तुभ्नोति। स्कभ्नाति, स्कभ्नोति। स्कुभ्नाति, स्कुभ्नोति। स्कुनाति, स्कुनोति। उदित्त्वप्रतिज्ञानात्सौत्राणामपि धातूनां सर्वार्थत्वं विज्ञायते, नैतद्विकरणविषयत्वमेव।।
<हलः श्नः शानज्झौ ।। 3-1-83 ।। >
हल उत्तरस्य श्नाप्रत्ययस्य शानजादेशो भवति हौ परतः। मुषाण। पुषाण। हल इति किम् ? क्रीणीहि। हौ इति किम् ? मुष्णाति। `श्नः' इति स्थानिनिर्देश आदेशसम्प्रत्ययार्थः। इतरथा हि प्रत्ययान्तरमेव सर्वविषयं विज्ञायेत।।
<छन्दसि शायजपि ।। 3-1-84 ।। >
छन्दसि विषये श्नः शायजादेशो भवति, शानजपि। `गृभाय जिह्वया मधु'(ऋ.8.17.5)। शानचः खल्वपि-`बधान देव सवितः'(शु.य.1.25)।।
<व्यत्ययो बहुलम् ।। 3-1-85 ।। >
यथायथं विकरणाः शबादयो विहिताः, तेषां छन्दसि विषये बहुलं व्यत्ययो भवति। व्यतिगमनं व्यत्ययः = व्यतिहारः, विषयान्तरे विधानम्-क्वचिद् द्विविकरणता, क्वचित् त्रिविकरणता च। `आण्डा शुष्मस्य भेदति'(ऋ.8.40.11)। भिनत्तीति प्राप्ते। `ताश्चिन्न्नु न मरन्ति'(ऋ.1.191.12)। न म्रियत इति प्राप्ते। द्विकरणता-इन्द्रो वस्तेन नेषतु। नयत्विति प्राप्ते। त्रिविकरणता--`इन्द्रेण युजा तरुषेम वृत्रम्'(ऋ.7.48.2)। तीर्यास्म इति प्राप्ते। बहुलग्रहणं सर्वविधिव्यभिचारार्थम्।

`सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिद्ध्यति बाहुलकेन।।'(म.भा.2.65)
<लिङ्याशिष्यङ् ।। 3-1-86 ।। >
आशिषि विषये यो लिङ् तस्मिन्परतश्छन्दमि विषयेऽङ्प्रत्ययो भवति। शपोऽपवादः। "छन्दस्युभयथा"(3.4.117/3435) इति लिङः सार्वधातुकसंज्ञाप्यस्ति। स्थागागमिवचिविदशकिरुहयः प्रयोजनम्। स्था--`उपस्थेयं वृषभं तुग्रियाणाम्'(म.भा.2.65)। गा- `सत्यमुपगेषम्'(तै.सं.1.2.10.2)। गमि-ग`गमेम जानतो गृहान्'(ऋ.10.40.11)। वचि-`मन्त्रं वोचेमाग्नये'(ऋ.1.74.1)। विद-`विदेयमेनां मनसि प्रविष्टाम्'(अ.19.4.2)। शकि-`व्रतं चरष्यामि तच्छकेयम्'(आ.श्रौ.8.14.1)। रुहि-स्वर्गं लोकमारुहेयम्। * दृशेरग्वक्तव्यः *(म.भा.2.65)। `पितरं च दृशेयं मातरं च'(ऋ.1.24.1) ।।
<कर्मवत्कर्मणा तुल्यक्रियः ।। 3-1-87 ।। >
कर्मणि क्रिया = कर्म, कर्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्मवद्भवति। यस्मिन्कर्मणि तद्वत्क्रिया लक्ष्यते, यथा कर्मणि, स कर्ता कर्मवद्भवति = कर्माश्रयाणि कार्याणि प्रतिपद्यते। "कर्तरि शप्"(3.1.68/2167) इति कर्तृग्रहणमिहानुवृत्तं प्रथमया विपरिणम्यते। यगात्मनेपदचिण्चिण्वद्भावाः प्रयोजनम्। भिद्यते काष्ठं स्वयमेव। अभेदि काष्ठं स्वयमेव। कारिष्यते कटः स्वयमेव। वत्करणं स्वाश्रयमपि यथा स्यात्-भिद्यते कुसूलेनेति। अकर्मकाणां भावे लः सिद्धो भवति। "लिङ्याशिष्यङ्"(3.1.86/3434) इति द्विलकारको निर्देशः, तत्र लानुवृत्तेर्लान्तस्य कर्त्ता कर्मवद्भवतीति कुसूलाद् द्विताया न भवति। कर्मणेति किम् ? करणाधिकरणाभ्यां तुल्यक्रियस्य मा भूत् साध्वसिश्छिनत्ति। साधु स्थाली पचति। धात्वधिकारात्समाने धातौ कर्मवद्भावः(म.भा.2.66)। इह न भवति--पचत्योदनं देवदत्तः, राध्यत्योदनं स्वयमेवेति। कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्ता कर्मवद्भवति, न कर्तृस्थभावकानाम्, न वा कर्तृस्थक्रियाणाम्।
`कर्मस्थः पचतेर्भावः कर्मस्था च भिदेः क्रिया।
मासासिभावः कर्तृस्थः कर्तृस्था च गमेः क्रिया।।'
<तपस्तपःकर्मकस्यैव ।। 3-1-88 ।। >
`तप संतापे'(धा.पा.986)- अस्य कर्ता कर्मवद्भवति, स च तपःकर्मकस्यैव, नान्यकर्मकस्य। क्रियाभेदाद्विध्यर्थमेतत्। उपवासादीनि तपांसि तापसं तपन्ति। दुःखयन्तीत्यर्थः। स तापसस्त्वगस्थिभूतः स्वर्गाय तपस्तप्यते। अर्जयतीत्यर्थः। पूर्वेणाप्राप्तः कर्मवद्भावो विधीयते तप्यते तपस्तापसः। अतप्त तपस्तापसः। तपःकर्मकस्यैवेति किम् ? उत्तपति सुवर्णं सुवर्णकारः।।
<न दुहस्नुनमां यक्चिणौ ।। 3-1-89 ।।> `दुह'`स्नु' `नम्'--इत्येषां कर्मकर्तरि यक्चिणौ कर्मवद्भावापदिष्टौ न भवतः। दुहेरनेन यक् प्रतिषिध्यते, चिण् तु "दुहश्च"(3.1.63/2769) इति पूर्वमेव विभाषितः। दुग्धे गौः स्वयमेव। अदुग्ध गौः स्वयमेव, अदोहि गौः स्वयमेव। प्रस्नुते गौः स्वयमेव। प्रास्नोष्ट गौः स्वयमेव। नमते दण्डः स्वयमेव। अनंस्त दण्डः स्वयमेव। * यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूआत्मनेपदाकर्मकाणामुपसङ्ख्यानम् *(म.भा.2.70)। कारयति कटं देवदत्तः। कारयते कटः स्वयमेव। अचीकरत्कटं देवदत्तः। अचीकरत कटः स्वयमेव। उत्पुच्छयते गां गोपः। उत्पुच्छयते गौः स्वयमेव। उदपुपुच्छत गौः स्वयमेव। श्रथ्नाति ग्रन्थं देवदत्तः। श्रथ्नीते ग्रन्थः स्वयमेव। अश्रन्थिष्ट ग्रन्थः स्वयमेव। ग्रथ्नाति श्लोकं देवदत्तः। ग्रथ्नीते श्लोकः स्वयमेव। अग्रन्थिष्ट श्लोकः स्वयमेव। ब्रवीति श्लोकं देवदत्तः। ब्रूते श्लोकः स्वयमेव। अवोचच्छ्लोकं देवदत्तः। अवोचत श्लोकः स्वयमेव। आत्मनेपदाकर्मकाणाम् - आहन्ति माणवकं देवदत्तः। आहते माणवकः स्वयमेव। आवधिष्ट माणवकः स्वयमेव। आहतेति वा। विकुर्वते सैन्धवाः स्वयमेव। व्यकृषत सैन्धवाः स्वयमेव।
<कुषिरजोः प्राचां श्यन्परस्मैपदञ्च ।। 3-1-90 ।। >
`कुष निष्कर्षे'(धा.पा.1519), `रञ्ज रागे'(धा.पा.1168)--अनयोर्धात्वोः कर्मकर्तरि प्राचामाचार्याणां मतेन श्यन्प्रत्ययो भवति, परस्मैपदं च । यगात्मनेपदयोरपवादौ। कुष्यति पादः स्वयमेव। रज्यतिवस्त्रं स्वयमेव। प्राचाङ्ग्रहणं विकल्पार्थम्। कुष्यते। रज्यते। व्यवस्थितविभाषा चेयम्। तेन लिट्लिङोः स्यादिविषये च न भवतः। चुकुषे पादः स्वयमेव। ररञ्जे वस्त्रं स्वयमेव। कोषिषीष्ट पादः स्वयमेव। रङ्क्षीष्ट वस्त्रं स्वयमेव। कोषिष्यते पादः स्वयमेव। रङ्क्ष्यते वस्त्रं स्वयमेव। अकोषि पादः स्वयमेव। अरञ्जि वस्त्रं स्वयमेव।।
<धातोः ।। 3-1-91 ।। >
`धातोः' इत्ययमधिकारो वेदितव्यः। आतृतीयाध्यायपरिसमाप्तेर्यदित ऊर्ध्वमनुक्रमिष्यामो धातोरित्येवं तद्वेदितव्यम्। वक्ष्यति "तव्यत्तव्यानीयरः"(3.1.96/2834) इति। कर्त्तव्यम्, करणीयम्। धातुग्रहणमनर्थकम्, यङ्विधौ `धातोः' इत्यधिकारात् ? कृदुपपदसंज्ञार्थं तर्हि- अस्मिन्धात्वधिकारे ते यथा स्याताम्, पूर्वत्र मा भूतामिति। आर्धधातुकसंज्ञार्थं च द्वितीयं धातुग्रहणं कर्तव्यम्--धातोरित्येवं विहितस्य यथा स्यात्; इह मा भूत्-लूभ्याम्, लूभिरिति।।
<तत्रोपपदं सप्तमीस्थम् ।। 3-1-92 ।।>
तत्रैतस्मिन् धात्वधिकारे तृतीये यत्सप्तम्या निर्दिष्टं तदुपपदसंज्ञं भवति। वक्ष्यति--"कर्मण्यण्"(3.2.1/2913), कुम्भकारः। स्थगहणं सूत्रेषु सप्तमीनिर्देशप्रतिपत्त्यर्थम्; इतरथा हि सप्तमी श्रूयते यत्र, तत्रैव स्यात्-स्तम्बेरमः, कर्णेजप इति। यत्र वा सप्तमीश्रुतिरस्ति "सप्तम्यां

जनेर्डः"(3.2.97/3007) इति-उपसरजः, मन्दुरज इति। स्थगहणात्तु सर्वत्र भवति। गुरुसंज्ञाकरणमन्वर्थसंज्ञाविज्ञाने सति समर्थपरिभाषाव्यापारार्थम्- पश्य कुम्भं करोति कटमिति(म.भा.2.75) प्रत्ययो न भवति। उपपदप्रदेशाः-"उपपदमतिङ्"(2.2.19/782) इत्येवमादयः।।

<कृदतिङ् ।। 3-1-93 ।। >

अस्मिन्धात्वधिकारे तिङ्वर्जितः प्रत्ययः कृत्संज्ञको भवति। कर्तव्यम्। करणीयम्। अतिङिति किम् ? चीयात्। स्तूयात्। कृत्प्रदेशाः-- "कृत्तद्धितसमासाश्च"(1.2.46/179) इत्येवमादयः।

<वाऽसरूपोऽस्त्रियाम् ।। 3-1-94 ।। >

अस्मिन्धात्वधिकारेऽसमानरूपोऽपवादप्रत्ययो वा बाधको भवति स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वा। "ण्वुल्तृचौ"(3.1.133/2895) इत्युत्सर्गौ, "इगुपधज्ञाप्रीकिरः कः"(3.1.135/2897) इत्यपवादः, तद्विषये ण्वुल्तृचावपि भवतः। विक्षेपकः, विक्षेप्ता, विक्षिपः। असरूप इति किम् ? "कर्मण्यण्"(3.2.1/2913) इत्युत्सर्गः, "आतोऽनुपसर्गे कः"(3.2.3/2915) इत्यपवादः, स नित्यं बाधको भवति। गोदः। कम्बलदः। `नानुबन्धकृतमसारूप्यम्'(व्या.प.15)। अस्त्रियामिति किम् ? "स्त्रियां क्तिन्"(3.3.94/3272) इत्युत्सर्गः, "अप्रत्यात्"(3.3.102/3279) इत्यपवादः, स बाधक एव भवति। चिकीर्षा। जिहीर्षा।।

<कृत्याः प्राङ् ण्वुलः ।। 3-1-95 ।।> "ण्वुल्तृचौ"(3.1.135/2895) इति वक्ष्यति, प्रागेतस्माण्ण्वुल्संशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामः कृत्यसंज्ञकास्ते वेदितव्याः। तत्रैवोदाहरिष्यामः। कृत्यप्रदेशाः-"कृत्यैरधिकार्थवचने"(2.1.33/695) "कृत्यानां कर्तरि वा"(2.3.71/629) इत्येवमादयः।।

<तव्यत्तव्यानीयरः ।। 3-1-96 ।।>

"धातोः"(3.1.91/2829) इति वर्त्तते। धातोस्तव्यत्, तव्य, अनीयर्-इत्येते प्रत्यया भवन्ति। तकाररेफौ स्वरार्थौ। कर्तव्यम्। कर्तव्यम्। करणीयम्। * वसेस्तव्यत् कर्तरि णिच्च *(म.भा.2.81)। वास्तव्यः। * केलिमर उपसङ्ख्यानाम् *(म.भा.2.81)। पचेलिमा माषाः। भिदेलिमानि काष्ठानि। कर्मकर्तरि चायमिष्यते।

<अचो चत् ।। 3-1-97 ।। >

अजन्ताद्धातोर्यत्प्रत्ययो भवति। तकारः "यतोऽनावः"(6.1.213/3701) इति स्वरार्थः। गेयम्। पेयम्। चेयम्। जेयम्। अज्ग्रहणं किम्, यावता हलन्ताण्ण्यतं वक्ष्यति ? अजन्तभूतपूर्वाददपि यथा स्यात्--दित्स्यम्, धित्स्यम्। * तकिशसिचतियतिजनीनामुपसङ्ख्यानम् *(म.भा.2.82)। तकि-- तक्यम्। शसि--शस्यम्। चति--चत्यम्। यति--यत्यम्। जनि--जन्यम्। *हनो वा वध च *(म.भा.2.82)। वध्यम्। घात्यम्।।

<पोरदुपधात् ।। 3-1-98 ।। >

पवर्गान्ताद्धातोरकारोपधाद्यत्प्रत्ययो भवति। ण्यतोऽपवादः। पोरिति किम् ? पाक्यम्। वाक्यम्। अदुपधादिति किम् ? किम् ? कोप्यम्। गोप्यम्। तपरकरणं तत्कालार्थम्। आप्यम्।।

<शकिसहोश्च ।। 3-1-99 >

`शुक्लृ शक्तौ'(धा.पा.1262), `षह सर्षणे'(धा.पा.853)-अनयोर्धात्वोर्यत्प्रत्ययो भवति शक्यम्। सह्यम्।।

<गदमदचरयमश्चानुपसर्गे ।। 3-1-100 ।। >

`गद व्यक्तायां वाचि'(धा.पा.52), `मदी हर्षे'(धा.पा.1209), `चर गतिभक्षणयोः'(धा.पा.559), `यम उपरमे'(धा.पा.985)-इत्येतेभ्यश्चानुपसर्गेभ्यो यत्प्रत्ययो भवति। गद्यम्। मद्यम्। चर्यम्। यम्यम्। अनुपसर्ग इति किम् ? प्रगाद्यम्। प्रमाद्यम्। यमेः पूर्वेणैव सिद्धेऽनुपसर्गनियमार्थं वचनम्। * चरेराङिचागुरौ *(म.भा.2.83)। आचर्यो देशः। अगुराविति किम् ? आचार्य उपनेता।।

<अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु ।। 3-1-101 ।। >

अवद्य, पण्य, वर्या-इत्येते शब्दा निपात्यन्ते; गर्ह्या। पणितव्य, अनिरोध-इत्येतेष्वर्थेषु यथासङ्ख्यम्। अवद्यमिति निपात्यते, गर्ह्यं चेत्तद्भवति। अवद्यं पापम्। अनुद्यमन्यत्। "वदः सुपि क्यप् च"(3.1.106/2854) । पण्यमिति निपात्यते, पणितव्यं चेत्तद्भवति। पण्यः कम्बलः। पण्या गौः। पाण्यमन्यत्। वर्येति स्त्रियां निपात्यते, अनिरोधश्चेत्तद्भवति। अनिरोधः = अप्रतिबन्धः। शतेन वर्या। सहस्रेण वर्या। वृत्याऽन्या। स्त्रीलिङ्गनिर्देशः किमर्थः ? वार्या ऋत्विजः।।

< वह्यं करणम् ।। 3-1-102 ।। >

वहेर्धातोः करणे यत्प्रत्ययो निपात्यते। वहत्यनेनेति वह्यं शकटम्। करण इति किम् ? वाह्यमन्यत्।।

< अर्यः स्वामिवैश्ययोः ।। 3-1-103 ।। >

`ऋ गतौ'(धा.पा.1099)-अस्माण्ण्यति प्राप्ते स्वामिवैश्ययोरभिधेययोर्यत् प्रत्ययो निपात्यते। अर्य स्वामी। अर्यो वैश्यः। "यतोऽनावः"(6.1.213/3701) इत्याद्युदात्तत्वे प्राप्ते--*स्वामिन्यन्तोदात्तत्वं च वक्तव्यम् *(म.भा.2.83)। स्वामिवैश्ययोरिति किम् ? आर्यो ब्राह्मणः।।

< उपसर्या काल्या प्रजने ।। 3-1-104 ।। >

`उपसर्या' इति निपात्यते, काल्या चेत्प्रजने भवति। उपपूर्वात्सर्तेर्यत्प्रत्ययः। प्राप्तकाला = काल्या। प्रजनः = प्रजननम्, प्रथमगर्भग्रहणम्। गर्भग्रहणे

प्राप्तकाला-उपसर्या गौः, उपसर्या वडवा। काल्या प्रजन इति किम् ? उपसार्या शरदि मधुरा।।

< अजर्यं सङ्गतम् ।। 3-1-105 ।। >

अजर्यमिति निपात्यते, सङ्गतं चेद्भवति। जीर्यतेर्नञ्पूर्वात्सङ्गते = सङ्गमने कर्तरि यत्प्रत्ययो निपात्यते। न जीर्यतीत्यजर्यम्। अजर्यमार्यसङ्गतम्। अजर्यं नोऽस्तु सङ्गतम्। सङ्गतमिति किम् ? अजरिता कम्बलः।।

< वदः सुपि क्यप् च ।। 3-1-106 ।। >

`अनुपसर्गे' इति वर्तते। वदेर्धातोः सुबन्ते उपपदे अनुपसर्गे क्यप् प्रत्ययो भवति, चकाराद्यच्च। ब्रह्मोद्यम्, ब्रह्मवद्यम्। सत्योद्यम्, सत्यवद्यम्। सुपीति किम् ? वाद्यम्। अनुपसर्ग इत्येव-प्रवाद्यम्।।

< भुवो भावे ।। 3-1-107 ।। >

`सुपि' `अनुपसर्गे' इत्यनुवर्त्तते। भवतेर्धातेः सुबन्त उपपदेऽनुपसर्गे भावे क्यप् प्रत्ययो भवति। यत्तु नानुवर्त्तते। ब्रह्मभूयं गतः, ब्रह्मत्वं गतः। देवभूयं गतः, देवत्वं गतः। भावग्रहणमुत्तरार्थम्। सुपीत्येव-भव्यम्। अनुपसर्ग इत्येव - प्रभव्यम्।।

< हनस्त च ।। 3-1-108 ।। >

`सुपि' `अनुसपर्गे' इति वर्तते, `भावे' इति च । हन्तेर्धातोः सुबन्त उपपदेऽनुपसर्गे भावे क्यप्, प्रत्ययो भवति, तकारश्चान्तादेशः। ब्रह्महत्या। अश्वहत्या। सुपीत्येव-घातः। ण्यत्तु भावे न भवति; अनभिधानात्। अनुपसर्ग इत्येव-प्रघातो वर्त्तते।।

< एतिस्तुशास्वृदृजुषः क्यप् ।। 3-1-109 ।। >

`सुपि' `अनुपसर्गे' `भावे' इति निवृत्तम्। सामान्येन विधानमेतत्। एति, स्तु, शास्, वृ, दृ, जुष्-इत्येतेभ्यः क्यप् प्रत्ययो भवति। इत्यः। स्तुत्यः। शिष्यः। वृत्यः आदृत्यः। जुष्यः। क्यबिति वर्त्तमाने पुनः क्यब्ग्रहणं बाधकबाधनार्थम्। "ओरावश्यके"(3.1.125/2886) इति ण्यतं बाधित्वा क्यबेव भवति। अवश्यस्तुत्यः। वृग्रहणे वृञो ग्रहणमिष्यते, न वृङः। वार्या ऋत्विजः। * शंसिदुहिगुहिभ्यो वेति वक्तव्यम् *। शस्यम्, शंस्यम्। दुह्यम्, दोह्यम्। गुह्यम्, गोह्यम्। * आङ्पूर्वादञ्जेः संज्ञायामुपसङ्ख्यानम् *(म.भा.2.85)। आज्यं घृतम्। कथमुपेयम् ? एरेतद्रूपम् न इणः।।

< ऋदुपधाच्चाक्लृपिचृतेः ।। 3-1-110 ।। >

ऋकारोपधाच्च धातोः क्यप्प्रत्ययो भवति कृपिचृती वर्जयित्वा। वृतु-वृत्यम्। वृधु-वृद्ध्यम्। अक्लृपिचृतेरिति किम् ? कल्प्यम्। चर्त्यम्। तपरकरणं किम् ? `कॄत संशब्दने'(धा.पा.1654) ण्यदेव भवति-कीर्त्यम्। * पाणौ सृजेर्ण्यद्वक्तव्यः *। पाणिसर्ग्या रज्युः। * समवपूर्वाच्च *। समवसर्ग्या।।

< ई च खनः ।। 3-1-111 ।। >

खनेर्धातोः क्यप् प्रत्ययो भवति ईकारश्चान्तादेशः। खेयम्। दीर्घनिर्देशः प्रश्लेषार्थः। तत्र द्वितीय इकारः "ये विभाषा"(6.4.43/2319) इत्यात्वबाधनार्थः।।

< भृञोऽसंज्ञायाम् ।। 3-1-112 ।। >

भृञो धातोरसंज्ञायां विषये क्यप् प्रत्ययो भवति। भृत्याः कर्मकराः। भर्तव्या इत्यर्थः। असंज्ञायामिति किम् ? भार्यो नाम क्षत्रियः। * सम्पूर्वाद् विभाषा *(म.भा.2.85)सम्भृत्याः,सम्भार्याः।

`संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिद्ध्यति

स्त्रियां भावाधिकारोऽस्ति तेन भार्या प्रसिद्ध्यति।।'(म.भा.2.86)

< मृजेर्विभाषा ।। 3-1-113 ।। >

मृजेर्धातोर्विभाषा क्यप् प्रत्ययो भवति। ऋदुपधत्वात् प्राप्तविभाषेयम्। परिमृज्यः, परिमार्ग्यः।।

<राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ।। 3-1-114 ।। >

राजसूय, सूर्य, मृषोद्य, रुच्य, कुप्य, कृष्टपच्य, अव्यथ्य-इत्येते शब्दाः क्यपि निपात्यन्ते। राज्ञा सोतव्यः, राजा वा इह सूयते राजसूयः क्रतुः। सूसर्त्तिभ्यां क्यप्, सर्त्तेरुत्वम्, सुवतेर्वा रुडागमः। सरति सुवति वा सूर्यः। मृषापूर्वस्य वदतेः पक्षे यति प्राप्ते नित्यं क्यब् निपात्यते। मृषोद्यम्। रोचतेऽसौ रुच्यः। कर्त्तरि क्यप्। गुपेरादेः कत्वं च संज्ञायाम्। कुप्यम्। गोप्यमन्यत्। कृष्टे पच्यन्ते कृष्टपच्याः। कर्मकर्त्तरि निपातनम्। न व्यथते अव्यथ्यः।।

< भिद्योद्ध्यौ नदे ।। 3-1-115 ।। >

भिदेरुज्झेश्च क्यब् निपात्यते नदेऽभिधेये। उज्झेर्धत्वं च । भिनत्ति कूलं भिद्यः। उज्झत्युदकम् उद्ध्यः। नद इति किम् ? भेत्ता। उज्झिता।।

< पुष्यसिद्ध्यौ नक्षत्रे ।। 3-1-116 ।। >

पुषेः सिधेश्चाधिकरणे क्यब् निपात्यते नक्षत्रेऽभिधेये। पुष्यन्त्यस्मिन्नर्था इति पुष्यः। सिद्ध्यन्त्यस्मिन्निति सिद्ध्यः। नक्षत्र इति किम् ? पोषणम्, सेधनम्।।

< विपूयविनीयजित्या मुञ्जकल्कहलिषु ।। 3-1-117 ।। >

विपूय, विनीय, जित्य-इत्येते शब्दा निपात्यन्ते यथासङ्ख्यं मुञ्ज, कल्क, हलि-इत्येतेष्वर्थेषु बोध्येषु। विपूर्वात्पवतेर्नयतेश्च तथा जयतेर्यति प्राप्ते कर्मणि क्यब्निपात्यते। विपूयो मुञ्जः, विपाव्यमन्यत्। विनीयः कल्कः, विनेयमन्यत्, जित्यो हलिः, जेयमन्यत्।।

< प्रत्यपिभ्यां ग्रहेश्छन्दसि ।। 3-1-118 ।। >
प्रति, अपि-इत्येवम्पूर्वाद् ग्रहेः क्यप् प्रत्ययो भवति छन्दसि विषये। `मत्तस्य न प्रतिगृह्यम्'(का.सं.14.5)। `तस्मान्नापि गृह्यम्'(का.सं.27.3)। छन्दसीति किम्ग ? प्रतिग्राह्यम्। अपिग्राह्यम्।
< पदास्वैरिबाह्यापक्ष्येषु च ।। 3-1-119 ।। >
पदेऽस्वैरिणि बाह्यायां पक्ष्ये चार्थे ग्रहेर्धातोः क्यप् प्रत्ययो भवति। पदे तावत्-प्रगृह्यं पदम्, यस्य प्रगृह्यसंज्ञा विहिता। अवगृह्यं पदम्, यस्यावग्रहः क्रियते। अस्वैरी = परतन्त्रः। गृह्यका इमे। गृहीतका इत्यर्थः। बाह्यायाम्-ग्रामगृह्या सेना। नगरगृह्या सेना। ग्रामनगराभ्यां बहिर्भूतेत्यर्थः। स्त्रीलिङ्गनिर्देशादन्यत्र न भवति। पक्षे भवः पक्ष्यः। वासुदेवगृह्याः। अर्जुनगृह्याः। तत्पक्षाश्रिता इत्यर्थः।।
< विभाषा कृवृषोः ।। 3-1-120 ।। >
करो वृषेश्च विभाषा क्यप् प्रत्ययो भवति। करोतेर्ण्यति प्राप्ते वर्षतेऋदुपधत्वान्नित्ये क्यपि प्राप्ते विभाषाऽऽरभ्यते। कृत्यम्, कार्यम्। वृष्यम्, वर्ष्यम्।।
< युग्यं च पत्त्रे ।। 3-1-121 ।। >
`युग्यम्' इति निपात्यते, पत्त्रं चेत्तद्भवति। पतत्यनेनेति पत्त्रम्, वाहनमुच्यते। युग्यो गौः। युग्योऽश्वः। युग्यो हस्ती। युजेः क्यप् कुत्वं च निपात्यते। पत्त्र इति किम् ? योगमन्यत्।।
< अमावस्यदन्यतरस्याम् ।। 3-1-122 ।। >
अमाशब्दः सहार्थे वर्त्तते। तस्मिन्नुपपदे वसेर्धातोः कालेऽधिकरणे ण्यत्प्रत्ययो भवति, तत्रान्यतरस्यां वृद्ध्यभावो निपात्यते। सह वसतेऽस्मिन्काले सूर्याचन्द्रमसाविति अमावस्या, अमावास्या। एकदेशविकृतस्यानन्यत्वाद् "अमावास्याया वा"(4.3.30/1403) इत्यत्रामावस्याशब्दस्यापि ग्रहणं भवति।
`अमावसोरहं ण्यतोर्निपातयाम्यवृद्धिताम्।
तथैकवृत्तिता तयोः स्वरश्च मे प्रसिध्यति।।'(म.भा.2.87)
< छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि ।। 3-1-123 ।। >
निष्टर्क्यादयः शब्दाश्छन्दसि विषये निपात्यन्ते। यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धम्। निष्टर्क्य इति - `कृती छेदने'(धा.पा.1436) इत्यस्मान्निस्पूर्वात्क्यपि प्राप्ते ण्यत्, आद्यन्तविपर्ययश्च, निसश्च षत्वं निपात्यते। `निष्टर्क्यं चिन्वीत पशुकामः'(ऐ.आ.5.1.3)। देवशब्दे उपपदे ह्वयतेर्जुहोतेर्वा क्यप्, दीर्घः, तुगभावश्च-`देवहूयः'(श.ब्रा.2.1.3.2)। प्रपूर्वादुत्पूर्वाच्च नयतेः क्यप्-`प्रणीयः'(श.ब्रा.3.1.3.1), `उन्नीयः'(श.ब्रा.3.5.16.12)। उत्पूर्वाच्छिषेः क्यप्-`उच्छष्यः'(मै.सं.3.9.2)। `मृङ् प्राणत्यागे'(धा.पा.1404), `स्तृञ् आच्छादने'(धा.पा.1253)-आभ्यां यत्प्रत्ययः। मर्यः(तै.आ.1.3.2)। स्तर्या(श.ब्रा,.2.1.2.10)। स्त्रियामेव निपातनम्। `ध्वृ हूर्छने'(धा.पा.940) ध्वर्यः। खनेर्यत्-खन्या(तै.सं.7.4.13.1)। एस्मादेव ण्यत्--खान्यः। देवश्ब उपपदे यजेर्यत्-देवयज्या(ऋ.10.30.21)। स्त्रीलिङ्गनिपातनम्। आङ्पूर्वात्पृच्छेः क्यप्-आपृच्छ्यः(ऋ.1.60.2)। प्रतिपूर्वात्सीव्यतेः। क्यप् षत्वं च-प्रतिषीव्यः(मा.श्रौ.2.2.2.35)। ब्रह्मण्युपपदे वदेर्ण्यद्-ब्रह्मवाद्यम्(तै.सं.2.5.8.3)। भवतेः स्तौतेश्च ण्यत् आवादेशश्च भवति--भाव्यम्(अ.वे.13.1.54)। स्ताव्यः(म.भा.2.88)। उपपूर्वस्य चिनोतेर्ण्यदायादेशौ--उपचाय्यपृडम्(हिरण्यदक्षिणा)(का.सं.11.1)। पृडे चोत्तरपदे निपातनमेतत्। * हिरण्य इति वक्तव्यम् *(म.भा.2.88)। हिरण्याद्न्यत्र उपचेयपृडमेव।
` निष्टर्क्ये व्यत्ययं विद्यान्निसः षत्वं निपातनात्। ण्यदायादेश इत्येतावुपचाय्ये निपातितौ।।
ण्यदेकस्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः।
ण्यदेकस्माद्यशब्दश्च द्वौ क्यपौ ण्यद्विधिश्चतुः।।'(म.भा.2.89)
< ऋहलोर्ण्यत् ।। 3-1-124 ।। >
पञ्चम्यर्थे षष्ठी, ऋवर्णान्ताद्धातोर्हलन्ताच्च ण्यप्रत्ययो भवति। कार्यम्। हार्यम्। धार्यम्। वाक्यम्। पाक्यम्।।
< ओरावश्यके ।। 3-1-125 ।। >
अवश्यम्भावः = आवश्यकम्। उवर्णान्ताद्धातोर्ण्यत् प्रत्ययो भवत्यावश्यके द्योत्ये। यतोऽपवादः। लाव्यम्। पाव्यम्। आवश्यके इति किम् ? लव्यम्। आवश्यके द्योत्ये इति चेत्स्वरसमासानुपपत्तिः-अवश्यलाव्यम्, अवश्यपाव्यमिति ? नैष दोषः, मयूरव्यंसकादित्वात्समासः, उत्तरपदप्रकृतिस्वरे च यत्नः करिष्यते।।
< आसुयुवपिरपिलपित्रपिचमश्च ।। 3-1-126 ।। >
आङ्पूर्वात्सुनोतेः यु, वपि, रपि, लपि, त्रपि, चम्-इत्येतेभ्यश्च ण्यत् प्रत्ययो भवति। यतोऽपवादः। आसाव्यम्। याव्यम्। वाप्यम्। राप्यम्। लाप्यम्। त्राप्यम्। आचाम्यम्। अनुक्तसमुच्चयार्थश्चकारः। दभि-दाभ्यम्।।
< आनाय्योऽनित्ये ।। 3-1-127 ।। >
`आनाय्यः' इति निपात्यते, अनित्येऽभिधेये। नयतेराङ्पूर्वाण्ण्यदायादेशौ निपात्येते। आनाय्यो दिक्षिणाग्निः। रूढिरेषा। तस्मादनित्यविशेषे दक्षिणाग्नावेवावतिष्ठते। तस्य चानित्यत्वं नित्यमजागरणात्। यश्च गार्हपत्यादानीयते दक्षिणाग्निराहवनीयेन सहैकयोनिस्तत्र एतन्निपातनम्, न दक्षिणाग्निमात्रे; तस्य हि योनिर्विकल्प्यते-- `वैश्यकुलाद्वित्तवतो भ्राष्ट्राद्वा गार्हपत्याद्वेति।।'(पार.गृ.1.2.3)

`आनाय्योऽनित्य इति चेद्दक्षिणाग्नौ कृतं भवेत्।
एकयोनौ च तं विद्यादानेयो ह्यन्यथा भवेत्।।i'(म.भा.2.89)
< प्रणाय्योऽसम्मतौ ।। 3-1-128 ।। >
अविद्यमाना सम्मतिरस्मिन्नित्यसम्मतिः। सम्मननं समतिः = सम्मतता, पूजा। `प्रणाय्यः' इति निपात्यतेऽसम्मतावभिधेये। प्रणाय्यश्चोरः। असम्माताविति किम् ? प्रणेयोऽन्यः। यद्येवम्, कथमेतत्-`ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्यान्तेवासिने, नान्यस्मै कस्मैचन'(छां.3.10.5.6) इति ? सम्मतिरभिलाषोऽप्युच्यते, तदभावेन निष्कामतया असम्मतिरन्तेवासी भवति। तस्मै निष्कामाय मोक्षार्थं यतमानायान्तेवासिने प्रणाय्याय ब्रह्म प्रब्रूयादिति युज्यते।।
< पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु ।। 3-1-129 ।। >
पाय्यादयः शब्दा निपात्यन्ते यथासङ्ख्यम्; माने, हविषि, निवासे, सामिधेन्यां चाभिधेयायाम्। पाय्य इति-माङो ण्यत्प्रत्ययः, आदेः पत्वं च निपात्यते माने। पाय्यं मानम्। मेययन्यत्। सम्पूर्वान्नयतेर्ण्यदायादेशावुपसर्गदीर्घत्वं च निपात्यते-`सान्नाय्यं हविः'(तै.सं.7.5.103)। सन्नेयमन्यत्। रूढित्वाच्च हविर्विशेषेष्ववतिष्ठते। निपूर्वाच्चिनोतेर्ण्यदायादेशावादिकुत्वं च निपात्यते--निकाय्यो निवासः। निचेयमन्यत्। धाय्येति धाञो ण्यत्प्रत्ययो निपात्यते सामिधेनी चेत्सा भवति-धाय्या सामिधेनी। धेयमन्यत्। सामिधेनीशब्द ऋग्विशेषस्य वाचकः, तत्र च धाय्येति न सर्वा सामिधेन्युच्यते, किं तर्हि ? काचिदेव । रूढिशब्दो ह्ययम्। तथा चासामिधेन्यामपि दृश्यते-`धाय्याः शंसत्यग्निर्नेता त्वं सोमक्रतुभिः'(ऐ.ब्रा.12.7) इति।।
< क्रतौ कुण्डपाय्यसञ्चाय्यौ ।। 3-1-130 ।। >
कुण्डपाय्य, संचाय्य-इत्येतौ शब्दौ निपात्येते क्रतावभिधेये। कुण्डशब्दे तृतीयान्त उपपदे पिबतेर्धातोरधिकरणे यत्प्रत्ययो निपात्यते, युक्च। कुण्डेन पीयतेऽस्मिन्सोम इति कुण्डपाय्यः क्रतुः। "यतोऽनावः"(6.1.213/3701) इति स्वरः। सम्पूर्वाच्चिनोतेर्ण्यदायादेशौ निपात्येते। सञ्चीयतेऽस्मिन् सोम इति सञ्चाय्यः क्रतुः। क्रताविति किम् ? कुण्डपानम्। सञ्चेयः।।
< अग्नौ परिचाय्योपचाय्यसमूह्याः ।। 3-1-131 ।। >
परिचाय्य, उपचाय्य, समूह्य-इत्येते शब्दा निपात्यन्ते अग्नावभिधेये। परिपूर्वाच्चिनोतेर्ण्यदायादेशौ निपात्येते। परिचाय्यः(तै.सं.5.4.11)। उपचाय्यःग(मै.3.4.7)। सम्पूर्वाद्वहेः सम्प्रसारणं, दीर्घत्वं च निपात्यते। `समूह्यं चिन्वीत पुशुकामः'(तै.सं.5.4.11)। अग्नाविति किम् ? परिचेयम्। उपचेयम्। संवाह्यम्।।
< चित्याग्निचित्ये च ।। 3-1-132 ।। >
चित्यशब्दोऽग्निचित्याशब्दश्च निपात्येते। चीयतेऽसौ चित्योऽग्निः। अग्निचयनमेवाग्निचित्या। भावे यकारप्रत्ययस्तुक् च, तेनान्तोदात्तत्वं भवति। अग्नावित्येव। चेयमन्यत्।
< ण्वुल्तृचौ ।। 3-1-133 ।। >
`धातेः' इति वर्तते। सर्वधातुभ्यो ण्वुल्तृचौ प्रत्ययौ भवतः। कारकः, कर्त्ता। हारकः, हर्त्ता। चकारः सामान्यग्रहणाविघातार्थः "तुश्छन्दसि"(5.3.59/2007), "तुरिष्ठेमेयस्सु"(6.4.154/2008) इति।।
< नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।। 3-1-134 ।। >
प्रत्येकमादिशब्दः सम्बध्यते। त्रिभ्यो गणेभ्यस्त्रय प्रत्यया यथासङ्ख्यं भवन्ति-नन्द्यादिभ्यो ल्युः, ग्रहादिभ्यो णिनिः, पचादिभ्योऽच्। नन्दिग्रहिपचादयश्च न धातुपाठतः संनिविष्टा गृह्यते, किं तर्हि ? नन्दन रमणेत्येवमादिषु प्रातिपदिकगणेषु अपोद्धृत्य ये पठ्यन्ते ते निर्दिश्यन्ते। * नन्दिवासिमदिदूषिसाधिवर्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम् *। नन्दनः। वासनः। मदनः। दूषणः। साधनः। वर्धनः। शोभनः। रोचनः। * सहितपिदमेः संज्ञायाम् *(ग.सू.3)। सहनः। तपनः। दमनः। जल्पनः। रमणः। दर्पणः। सङ्क्रन्दनः। सङ्कर्षणः। सम्पर्षणः। जनार्दनः। यवनः। मधुसूदनः। विभीषणः। लवणः। निपातनाण्णत्वम्। वित्तविनाशनः। कुलदमनः। शत्रुदमनः। इति नन्द्यादिः।
ग्रह। उत्सह। उद्वस। उद्भास। स्था। मन्त्र। सम्मर्द। ग्राही। उत्साही। उद्वासी। उद्भासी। स्थायी। मन्त्री। सम्मर्दी। * रक्षश्रुवसवपशां नौ *(ग.सू.24)। निरक्षी। निश्रावी। निवासी। निवापी। निशायी। * याचिव्याहृसंव्याहृव्रजवदवसां प्रतिषिद्धानाम् *(ग.सू.25)। अयाची। अव्याहारी। असंव्याहारी। अव्राजी। अवादी। अवासी। * अचामचित्तकर्तृकाणाम् *(ग.सू.26)। प्रतिषिद्धानामित्येव। अकारी। अहारी। अविनायी। अविशायी। * विशयी विषयी देशे *(ग.सू.27)। विशयी, विषयी देशः। * अभिभावी भूते *(ग.सू.28)। अभिभावी। अपराधी। उपरोधी। परिभावी। परिभवी। इति ग्रह्यादिः।
पच। वच। वप। वद। चल। शल। तप। पत। नदट्। भषट्। वस। गरट्। प्लवट्। चरट्। तरट्। चोरट्। ग्राहट्। जर। मर। क्षर। क्षम। सूदट्। देवट्। सेव। मेष। कोप। मेधा। नर्त्त। व्रण। दश। दंश। दम्भ। जारभरा। श्वपच। पचादिराकृतिगणः।
`अज्विधिः सर्वधातुभ्यः पठ्यन्ते च पचादयः।
अण्बाधनार्थमेव स्यात्सिध्यन्ति श्वपचादयः।।i'(म.भा.2.91)
< इगुपधज्ञाप्रीकिरः कः ।। 3-1-135 ।। >

इगुपधेभ्यो जानातेः प्रीणातेः किरतेश्च कप्रत्ययो भवति। विक्षिपः। विलिखः। बुधः। कृशः। जानातीति ज्ञः। प्रीणातीति। प्रियः। किरतीति किरः। देवसेवमेषादयः पचादौ पठितव्याः।।

< आतश्चोपसर्गे ।। 3-1-136 ।। >

आकारान्तेभ्यो धातुभ्य उपसर्ग उपपदे कप्रत्ययो भवति। णस्यापवादः। प्रस्थः। सुग्लः। सुम्लः।।

< पाघ्राध्माधेट्दृशः ।। 3-1-137 ।। >

पादिभ्यो धातुभ्य उपसर्ग उपपदे शप्रत्ययो भवति। उत्पिबः। विपिबः। उज्जिघ्र। विजिघ्रः। उध्दमः। धेट्-उध्दयः, विधयः। उत्पश्यः। विपश्यः। `उपसर्गे' इति केचिन्नानुवर्तयन्ति-पश्यतीति पश्यः। * जिघ्रतेः संज्ञायां प्रतिषेधो वक्तव्यः *(म.भा.2.92)। व्याघ्रः।।

< अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च ।। 3-1-138 ।। >

अनुपसर्गेभ्यो लिम्पादिभ्यः शप्रत्ययो भवति। लिम्पतीति लिम्पः। विन्दतीति विन्दः। धारयतिति धारयः। पारयतीति पारयः। वेदयतीति वेदयः। उदेजयतीत्युदेजयः। चेतयतीति चेतयः। सातिः सौत्रो धातुः-सातयः। साहयः। अनुपसर्गादिति किम् ? प्रलिपः। * नौ लिम्पेरिति वक्तव्यम् *(म.भा.2.92)। निलिम्पा नाम देवाः। * गवादिषु विन्देः संज्ञायाम् *(म.भा.2.92)। गोविन्दः। अरविन्दः।।

< ददातिदधात्योर्विभाषा ।। 3-1-139 ।। >

दाञो धाञश्च विभाषा शप्रत्ययो भवति। णस्यापवादः। ददः, दायः। दधः, धायः। अनुपसर्गादित्येव--प्रधः। प्रदः।।

<ज्वलितिकसन्तेभ्यो णः ।। 3-1-140 ।। >

इतिशब्दः आद्यर्थः। `ज्वल दीप्तौ'(धा.पा.805)--इत्येवमादिभ्यो धातुभ्यः `कसगतौ'(धा.पा.861) इत्येवमन्तेभ्यो विभाषा णप्रत्ययो भवति। अचोऽपवादः। ज्वालः, ज्वलः। चालः, चलः। अनुपसर्गादित्येव-प्रज्वलः। * तनोतेर्णस्योपसङ्ख्यानं कर्तव्यम् *(म.भा.2.92)। अवतनोतीत्यवतानः।।

< श्याऽऽद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च ।। 3-1-141 ।। >

`अनुपसर्गात्' इति `विभाषा' इति च निवृत्तम्। श्यैङः, आकारान्तेभ्यश्च धातुभ्यः, व्यध, आस्रु, संस्रु, अतीण्, अवसा, अवहृ, लिह, श्लिष, श्वस--इत्येतेभ्यश्च णप्रत्ययो भवति। आकारान्तत्वादेव श्यायतेः प्रत्यये सिद्धे पुनर्वचनं बाधकबाधनार्थम्। उपसर्गे कं बाधित्वाऽयमेव भवति। अवश्यायः। प्रतिश्यायः। दायः। धायः। व्याधः। आस्रावः। संस्रावः। अत्यायः। अवसायः। अवहारः । लेहः। श्लेषः। श्वासः।।

< दुन्योरनुपसर्गे ।। 3-1-142 ।। >

दुनोतेः, नयतेश्चानुपसर्गे णप्रत्ययो भवति। दुनोतीति दावः। नयतीति नायः। अनुपसर्ग इति किम् ? प्रदवः। प्रणयः।।

< विभाषा ग्रहः ।। 3-1-143 ।। >

विभाषा ग्रहेर्धातोर्णप्रत्ययो भवति। अचोऽपवादः। ग्राहः, ग्रहः। व्यवस्थितविभाषा चेयम्। जलचरे नित्यम्-ग्राहः। ज्योतिषि नेष्यते, तत्र ग्रह एव। * भवतेश्चेति वक्तव्यम् *। भवतीति भावः, भवः।।

< गेहे कः ।। 3-1-144 ।। >

ग्रहेर्धातोः कप्रत्ययो भवति। गेहे कर्त्तरि। गृहं वेश्म। तात्स्थ्याद्दाराश्च। गृह्णन्तीति गृहा दाराः। गृहाणि = वेश्मानि।।

< शिल्पिनि ष्वुन् ।। 3-1-145 ।। >

धातोः ष्वुन्प्रत्ययो भवति शिल्पिनि कर्त्तरि। * नृतिखनिरञ्जिभ्यः परिगणनं कर्त्तव्यम् *। नर्त्तकः। खनकः। रजकः। नर्त्तकी। खनकी। रजकी। रञ्जेरनुनासिकलोपश्च।

< गस्थकन् ।। 3-1-146 ।। >

गायतेस्थकन्प्रत्ययो भवति शिल्पिनि कर्त्तरि। गाथकः। गाथिका।

<ण्युट् च ।। 3-1-147 ।। >

चकारेण `ग' इत्यनुकृष्यते। गायतेर्ण्युट् प्रत्ययो भवति शिल्पिनि कर्त्तरि। गायनः। गायनी। योगविभाग उत्तरार्थः।।

< हश्च व्रीहिकालयोः ।। 3-1-148 ।। >

चकारेण ण्युडनुकृष्यते। जहातेर्जिहातेश्च धातोर्ण्युट् प्रत्ययो भवति, व्रीहौ काले च कर्त्तरि। हायना नाम व्रीहयः-जहत्युदकमिति कृत्वा। काले-हायनः संवत्सरः, जिहीते भवानिति कृत्वा।।

< प्रुसृल्वः समभिहारे वुन् ।। 3-1-149 ।। >

प्रु-सृ-लू--इत्येतेभ्यो धातुभ्यः समभिहारे वुन्प्रत्ययो भवति। प्रवकः। सरकः। लवकः। समभिहारग्रहणेनात्र साधुकारित्वं लक्ष्यते। साधुकारिणि वुन्विधानात्सकृदपि यः सुष्ठु करोति तत्र भवति। बहुशो यो दुष्टं करोति तत्र न भवति।।

< आशिषि च 3-1-150 ।। >

आशिषि गम्यमानायां धातुमात्राद् वुन्प्रत्ययो भवति। जीवतात् जीवकः। नन्दतात् नन्दकः। आशीः = प्रार्थनाविशेषः। स चेह क्रियाविषयः। अमुष्याः क्रियाया कर्त्ता भवेत् इत्येवमाशास्यते।।

इति श्रीजयादित्यविरचितायां काशिकावृत्तौ तृतीयाध्यायस्य प्रथमः पादः।

3.2

अथ तृतीयाध्याये द्वतीयः पादः

< कर्मण्यण् ।। 3-2-1 ।।>

त्रिविधं कर्म--निर्वर्त्यम्, विकार्यम्, प्राप्यं चेति। सर्वत्र कर्मण्युपपदे धोतोरण्प्रत्ययो भवति। निर्वर्त्यं तावत्--कुम्भकारः, नगरकारः। विकार्यम्-काण्डलावः। शरलावः। प्राप्यम्-वेदाध्यायः। चर्चापारः। ग्रामं गच्छति, आदित्यं पश्यति, हिमवन्तं शृणोतीत्यत्र न भवति; अनभिधानात्। * शीलिकामिभक्ष्याचरिभ्यो णः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् *(म.भा.2.94)। मांसशीलः, मांसशीला। मांसकामः, मांसकामा। मांसभक्षः, मांसभक्षा। कल्याणाचारः। कल्याणाचारा। * ईक्षिक्षमिम्यां चेति वक्तव्यम् *(म.भा.2.95)। सुखप्रतीक्षः, सुखप्रतीक्षा। बहुक्षमः, बहुक्षमा।।

<ह्वावामश्च ।। 3-2-2 ।। >

`ह्वेञ् स्पर्धायां शब्दे च'(धा.पा.1009), `वेञ् तन्तुसन्ताने'(धा.पा.1007), `माङ् माने'(धा.पा.1089) इत्येतेभ्यश्च कर्मण्युपपदेऽण् प्रत्ययो भवति। कप्रत्ययापवादः। स्वर्गह्वायः। तन्तुवायः। धान्यवायः।।

< आतोऽनुपसर्गे कः ।। 3-2-3 ।। >

आकारान्तेभ्योऽनुपसर्गेभ्यः कर्मण्युपपदे कप्रत्ययो भवति। अणोऽपवादः। गोदः। कम्बलदः। पार्ष्णित्रम्। अङ्गुलित्रम्। अनुपसर्ग इति किम् ? गोसन्दायः। वडवासन्दायः।

< सुपि स्थः ।। 3-2-4 ।। >

सुबन्त उपपदे तिष्ठतेः कप्रत्ययो भवति। समस्थः। विषमस्थः। अत्र योगविभागः कर्त्तव्यः-सुपीति। सुप्याकारान्तेभ्यः कप्रत्ययो भवति। द्वाभ्यां पिबतीति द्विपः। पादपः। कच्छपः। ततः स्थ इति। स्थश्च सुपि कप्रत्ययो भवति। किमर्थमिदम् ? कर्तरि पूर्वयोगः, अनेन भावेऽपि यथा स्यात् आखूनामुत्थानम् आखूत्थः। शलभोत्थः। इत उत्तरं कर्मणि इति च सुपीति च द्वयमप्यनुवर्तते। तत्र सकर्मकेषु धातुषु कर्मणीत्येतदुपतिष्ठते, अन्यत्र सुपीति।।

< तुन्दशोकयोः परिमृजापनुदोः ।। 3-2-5 ।। >

तुन्दशोकयोः कर्मणोरुपपदयोः परिमृजापनुदोर्धात्वोः कप्रत्ययो भवति। तुन्दपरिमृज आस्ते। शोकापनुदः पुत्रो जातः। * आलस्यसुखाहरणयोरिति वक्तव्यम् *(म.भा.2.98)। अलसस्तुन्दपरिमृज उच्यते। तुन्दपरिमार्ज एवान्यः। सुखस्याहर्ता शोकापनुदः। शोकापनोद एवान्यः।

* कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् *(म.भा.298)। मूलानि विभुजतीति मूलविभुजो रथः। नखमुचानि धनूंषि। काकगुहास्तिलाः। कौ मोदते कुमुदम्।।

< प्रे दाज्ञः ।। 3-2-6 ।। >

सोपसर्गार्थ आरम्भः। ददातेर्जानातेश्च धातोः प्रेणोपसृष्टात्कर्मण्युपपदे कप्रत्ययो भवति। अणोऽपवादः। सर्वप्रदः। पथिप्रज्ञः। प्र इति किम् ? गोसन्दायः।।

< समि ख्यः ।। 3-2-7 ।। >

सोपसर्गार्थ आरम्भः। सम्पूर्वात् `ख्या'-इत्येतस्माद्धातोः कर्मण्युपपदे कप्रत्ययो भवति। अणोऽपवादः। गां सञ्चष्टे गोसङ्ख्यः।।

< गापोष्टक् ।। 3-2-8 ।। >

`कर्मण्यनुपसर्गे' इति वर्त्तते। गायतेः पिबतेश्च धातोः कर्मण्युपपदेऽनुपसर्गे टक् प्रत्ययो भवति। कस्यापवादः। शक्रं गायति शक्रगः। सामगः। शक्रगी। सामगी। * सुराशीध्वोः पिबतेरिति वक्तव्यम् *(म.भा.2.99)। सुरापः। सुरापी। शीधुपः। शीधुपी। सुराशीध्वोरिति किम् ? सुरां पातीति सुरापा। अनुपसर्ग इत्येव-शक्रसङ्गायः। सामसङ्गायः। * बहुलं छन्दसीति वक्तव्यम् *(म.भा.2.99)। या ब्राह्मणी सुरापा भवति नैनां देवाः पतिलोकं नयन्ति।।(म.भा.2.99)

< हरतेरनुद्यमनेऽच् ।। 3-2-9 ।। >

हरतेर्धातोरनुद्यमने वर्तमानात्कर्मण्युपपदेऽच् प्रत्ययो भवति अणोऽपवादः। उद्यमनम् = उत्क्षेपणम्। अंशं हरतीत्यंशहरः। रिक्थहरः। अनुद्यमन इति किम् ? भारहारः। * अच्प्रकरणे शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुष्षु ग्रहेरुपसङ्ख्यानम् *। श्क्तिग्रहः। लाङ्गलग्रहः। अङ्कुशग्रहः। यष्टिग्रहः। तोमरग्रहः। घटग्रहः। घटीग्रहः। धनुर्ग्रहः। * सूत्रे च धार्यर्थे *। सूत्रग्रहः। सूत्रं धारयतीत्यर्थः। सूत्रग्राह एवान्यः।।

< वयसि च ।। 3-2-10 ।। >

वयसि गम्यमाने हरतेः कर्मण्युपपदेऽच्प्रत्ययो भवति। उद्यमनार्थोऽयमारम्भः। कालकृता शरीरावस्था यौवनादिः = वयः। यदुद्यमनं क्रियमाणं सम्भाव्यमानं वा वयो गमयति तत्रायं विधिः। अस्थिहरः श्वा। कवचहरः क्षत्रियकुमारः।।

< आङि ताच्छील्ये ।। 3-2-11 ।। >

आङ्पूर्वाद्धरतेः कर्मण्युपपदेऽच्प्रत्ययो भवति ताच्छील्ये गम्यमाने। ताच्छील्यम् = तत्स्वभावता। पुष्पाहरः। फलाहरः। पुष्पाद्याहरणे स्वाभाविकी फलानपेक्षा

प्रवृत्तिरस्येत्यर्थः। ताच्छील्य इति किम् ? भारमाहरतीति भाराहारः।।

< अर्हः ।। 3-2-12 ।। >

`अर्ह पूजायाम्'(धा.पा.740)-अस्माद्धातोः कर्मण्युपपदेऽच् प्रत्ययो भवति। अणोऽपवादः। स्त्रीलिङ्गे विशेषः। पूजार्हा। गन्धार्हा। मालार्हा।।

< स्तम्बकर्णयो रमिजपोः ।। 3-2-13 ।। >

स्तम्ब, कर्ण-इत्येतयोः सुबन्तयोरुपपदयोर्यथासङ्ख्यं रमिजपोर्धात्वोरच्प्रत्ययो भवति। रमेरकर्मकत्वात्, जपेः शब्दकर्मकत्वात्कर्म न सम्भवतीति `सुपि' इत्येतदिहाभिसम्बध्यते। * हस्तिसूचकयोरिति वक्तव्यम् *(म.भा.2.99)। स्तम्बे रमते इति स्तम्बेरमः हस्ती। कर्णे जपतीति कर्णेजपः सूचकः। हस्तिसूचकयोरिति किम् ? स्तम्बे रन्ता। कर्णे जपिता मशकः।।

< शमि धातोः संज्ञायाम् ।। 3-2-14 ।। >

शम्युपपदे धातुमात्रात्संज्ञायां विषयेऽच्प्रत्ययो भवति। शङ्करः। शम्भवः। शंवदः। धातुग्रहणं किम्, यावता धातोरिति वर्त्तत एव ? `शमि संज्ञायाम्' इति सिद्धे धातुग्रहणं कृञो हेत्वादिषु टप्रतिषेधार्थम्(म.भा.2.100)। शङ्करा नाम परिव्राजिका। शङ्करा नाम शकुनिका। तच्छीला च ।।

< अधिकरणे शेतेः ।। 3-2-15 ।। >

`सुपि' इति सम्बध्यते। शेतेर्धातोरधिकरणे सुबन्त उपपदेऽच्प्रत्ययो भवति। खे शेते खशयः। गर्तशयः। * पार्श्वादिषूपसङ्ख्यानम् *(म.भा.2.100)। पार्श्वाभ्यां शेते पार्श्वशयः। उदरशयः। पृष्ठशयः। * दिग्धसहपूर्वाच्च *(म.भा.2.100)। दिग्धेन सह शेते दिग्धसहशयः। * उत्तानादिषु कर्तृषु *(म.भा.2.100)। उत्तानः शेते उत्तानशयः। अवमूर्द्धा शेते अवमूर्द्धशयः। * गिरौ डश्छन्दसि *(म.भाय2.100)। गिरौ शेते गिरिशः।।

< चरेष्टः ।। 3-2-16 ।। >

`अधिकरणे' इति वर्त्तते। चरेर्धातोरधिकरणे सुबन्त उपपदे टप्रत्ययो भवति। कुरुषु चरतीति कुरुचरः। मद्रचरः। कुरुचरी। मद्रचरी। प्रत्ययान्तरकरणं ङीबर्थम्।।

< भिक्षासेनादायेषु च ।। 3-2-17 ।। >

अनधिकरणार्थ आरम्भः। भिक्षा, सेना, आदाय-इत्येतेषूपपदेषु चरेर्धातोष्टप्रत्ययो भवति। भिक्षाचरः। सेनाचरः। आदायचरः।।

< पुरोऽग्रतोऽग्रेषु सर्त्तेः ।। 3-2-18 ।। >

पुरस्, अग्रतस्, अग्रे-इत्येतेषूपदेषु सर्तेर्धातोष्टप्रत्ययो भवति। पुरः सरति पुरःसरः। अग्रतःसरः। अग्रेसरः।।

< पूर्वे कर्त्तरि ।। 3-2-19 ।। >

पूर्वशब्दे कर्तृवाचिन्युपपदे सर्त्तेर्धातोष्टप्रत्ययो भवति। पूर्वः सरतीति पूर्वसरः। कर्त्तरीति किम् ? पूर्वं देशं सरतीति पूर्वसारः।।

< कृञो हेतुताच्छील्यानुलोम्येषु ।। 3-2-20 ।। >

कर्मण्युपपदे करोतेर्धातोष्टप्रत्ययो भवति हेतौ ताच्छील्ये आनुलोम्ये च गम्यमाने। हेतुः = ऐकान्तिकं कारणम्। ताच्छील्यम् = तत्स्वभावता। आनुलोम्यम् = अनुकूलता। हेतौ तावत्-शोककरी कन्या। यशस्करी विद्या। कुलकरं धनम्। ताच्छील्ये-श्राद्धकरः। अर्थकरः। आनुलोम्ये-प्रैषकरः। वचनकरः। एतेष्विति किम् ? कुम्भकारः। नगरकारः।।

< दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसङ्ख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु ।। 3-2-21 ।।>

`कर्मणि' `सुपि' इति च द्वयमप्यनुवर्त्तते। तत्र यथायोगं सम्बन्धः। दिवादिषूपपदेषु करोतेर्धातोष्टप्रत्ययो भवति। अहेत्वाद्यर्थ आरम्भः। दिवाशब्दोऽधिकरणवचनः `सुपि' इत्यस्य विशेषणम्। दिवा करोति प्राणिनश्चेष्टायुक्तानिति दिवाकरः। विभां करोतीति विभाकरः। निशाकरः। प्रभाकरः। भास्करः। सकारस्य निपातनाद्विसर्जनीयजिह्वामूलीयौ न भवतः। कारकरः। अन्तकरः। अनन्तकरः। आदिकरः। बहुकरः। नान्दीकरः। किङ्करः। लिपिकरः। लिबिकरः। बलिकरः। भक्तिकरः। कर्तृकरः। चित्रकरः। क्षेत्रकरः। सङ्ख्या-एककरः, द्विकरः, त्रिकरः। जङ्घाकरः। बाहुकरः। अहस्करः। यत्करः। तत्करः। धनुष्करः। अरुष्करः। * किंयत्तद्बहुषु कृञोऽज्विधानम् *(म.भा.2.101)। किङ्करा। यत्करा। तत्करा। बहुकरा। अथ वा-अजादिषु पाठः करिष्यते।।

< कर्मणि भृतौ ।। 3-2-22 ।। >

`कर्मणि' इति स्वरूपग्रहणम्। कर्मवाचिनि कर्मशब्द उपपदे करोतेष्टप्रत्ययो भवति भृतौ गम्यमानायाम्। भृतिः = वेतनम्, कर्मनिर्वेशः। कर्म करोतीति कर्मकरः। भृतक इत्यर्थः। भूताविति किम् ? कर्मकारः।

< न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु ।। 3-2-23 ।। >

शब्दादिषूपपदेषु करोतेष्टप्रत्ययो न भवति। हेत्वादिषु प्राप्तः प्रतिषिध्यते। शब्दकारः। श्लोककारः। कलहकारः। गाथाकारः। वैरकारः। चाटुकारः। सूत्रकारः। मन्त्रकारः। पदकारः।।

< स्तम्बशकृतोरिन् ।। 3-2-24 ।। >

स्तम्ब, शकृत्-इत्येतयोः कर्मणोरुपपदयोरिन्प्रत्ययो भवति * व्रीहिवत्सयोरिति किम् *(म.भा.2.101)। स्तम्बकरिः व्रीहिः। शकृत्करिः वत्सः।

व्रीहिवत्सयोरिति किम्? स्तम्बकारः। शकृत्कारः।।

< हरतेर्दृतिनाथयोः पशौ ।। 3-2-25 ।। >

दृति, नाथ-इत्येतयोः कर्मणोरुपपदयोः हरतेर्धातोः पशौ कर्तरि इन्प्रत्ययो भवति। दृतिं हरति दृतिहरिः पशुः। नाथहरिः पशुः। पशाविति किम् ? दृतिहारः। नाथहारः।।

< फलेग्रहिरात्मम्भरिश्च ।। 3-2-26 ।। >

फलेग्रहिः, आत्मम्भरिः-इत्येतौ शब्दौ निपात्येते। फलशब्दस्योपपदस्य एकारान्तत्वमिन्प्रत्ययश्च ग्रहेर्निपात्यते। फलानि गृह्णातीति फलेग्रहिर्वृक्षः। आत्मशब्दस्य उपपदस्य मुमागम इन्प्रत्ययश्च भृञो निपात्यते। आत्मानं बिभर्ति आत्मम्भरिः। अनुक्तसमुच्चयार्थश्चकारः। कुक्षिम्भरिः। उदरम्भरिः।।

< छन्दसि वनसनरक्षिमथाम् ।। 3-2-27 ।। >

`वन षण सम्भक्तौ'(धा.पा.463/464), `रक्ष पालने'(धा.पा.658), `मथे विलोडने'i(धा.पा.42)-इत्येतेभ्यः कर्मण्युपपदे छन्दसि विषये इन्प्रत्ययो भवति। `ब्रह्मवनिं त्वा क्षत्रवनिम् सुप्रजावनिं रायस्पोषवनिं पर्यूहामि'(तै.सं.1.3.1.2)। `गोसनिं वाचमुदेयम्।'(अ.वे.3.20.10) `यौ पथिरक्षी श्वानौ'(अ.वे.8,1,9)। `हविर्मथीनामभ्या3 विवासताम्।।'(ऋ.7.104.20)

< एजेः खश् ।। 3-2-28 ।। >

`एजृ कम्पने'(धा.पा.234)-इत्यस्माद् ण्यन्तात्कर्मण्युपपदे खश्प्रत्ययो भवति। खकारोऽयं मुमर्थः। शकारः सार्वधातुकसंज्ञार्थ। अङ्गमेजयति अङ्गमेजयः। जनमेजयः। * खश्प्रकरणे वातशुनीतिलशर्धेष्वजधेट्तुदजहातीनामुपसङ्ख्यानम् *(म.भा.2.102)। वातमजा मृगाः। शुनिन्धयः। तिलन्तुदः। शर्धञ्जहा माषाः।।

< नासिकास्तनयोर्ध्माधेटोः ।। 3-2-29 ।। >

नासिकास्तनयोः कर्मणोरुपपदयोर्ध्माधेटोर्धात्वोः खश्प्रत्ययो भवति। यथासङ्ख्यमत्र नेष्यते। * स्तने धेटः *(म.भा.2.102)। स्तनन्धयः। * नासिकायां तु ध्मश्च धेटश्च *(म.भा.2.102)। नासिकन्धमः। नासिकन्धयः। तच्चैतन्नासिकास्तनयोरिति लक्षणव्यभिचारचिह्नादल्पाच्तरस्यापूर्वनिपातनाल्लभ्यते। धेटष्टित्वात् स्त्रियां ङीप् प्रत्ययो भवति स्तनन्धयी।।

< नाडीमुष्ट्योश्च ।। 3-2-30 ।। >

नाडी, मुष्टि-इत्येतयोः कर्मणोरुपपदयोर्ध्माधेटोः खश् प्रत्ययो भवति। अत्रापि घ्यन्तस्यापूर्वनिपातो लक्षणव्यभिचारचिह्नम्, तेन सङ्ख्यातानुदेशो न भवति। नाडिन्धमः। मुष्टिन्धमः। नाडिन्धयः। मुष्टिन्धयः। अनुक्तसमुच्चयार्थश्चकारः। घटिन्धमः। घटिन्धयः। खरिन्धमः। खरिन्धयः। वातन्धमः पर्वतः। वातन्धयः।।

< उदि कूले रुजिवहोः ।। 3-2-31 ।। >

`रुजो भङ्गे'(धा.पा.1417), `वह प्रापणे'(धा.पा.1005)-इत्येताभ्यामुत्पूर्वाभ्यां कूले कर्मण्युपपदे खश् प्रत्ययो भवति। कूलमुद्रुजतीति कूलमुद्रुजो रथः। कूलमुद्वहः।।

< वहाभ्रे लिहः ।। 3-2-32 ।। >

वह, अभ्र-इत्येतयोः कर्मणोरुपपदयोः लिहेर्धातोः खश्प्रत्ययो भवति। वहं लेढीति वहंलिहो वायुः।।

< परिमाणे पचः ।। 3-2-33 ।। >

परिमाणं प्रस्थादि, तस्मिन्कर्मण्युपपदे पचेः खश्प्रत्ययो भवति। प्रस्थं पचति प्रस्थम्पचा स्थाली। द्रोणम्पचः, खारिम्पचः कटाहः।।

< मितनखे च ।। 3-2-34 ।। >

मित, नख-इत्येतयोः कर्मणोरुपपदयोः पचेः खश्प्रत्ययो भवति। अपरिमाणार्थ आरम्भः। मितं पचति मितम्पचा ब्राह्मणी। नखम्पचा यवागूः।।

< विध्वरुषोस्तुदः ।। 3-2-35 ।। >

विधु, अरुस्-इत्येतयोः कर्मणोरुपपदयोः तुदेर्धातोः खश्प्रत्ययो भवति। विधुन्तुदः राहुः। अरुन्तुदः।।

< असूर्यललाटयोर्दृशितपोः ।। 3-2-36 ।। >

असुर्य, ललाट--इत्येतयोः कर्मणोरुपपदयोः दृशितपोर्धात्वोः खश्प्रत्ययो भवति। असूर्यम्पश्या राजदाराः। ललाटन्तप आदित्यः। `असूर्य' इति चासमर्थसमासोऽयम्; दृशिना नञः सम्बन्धात् सूर्यं न पश्यन्तीति। गुप्तिपरं चैतत्--एवं नाम गुप्ता यदपरिहार्यदर्शनं सूर्यमपि न पश्यन्तीति।।

< उग्रम्पश्येरम्मदपाणिन्धमाश्च ।। 3-2-37 ।। >

उग्रम्पश्य, इरम्मद, पाणिन्धम-इत्येते शब्दा निपात्यन्ते। उग्रं पश्यतीत्युग्रम्पश्यः। इरया माद्यतीति इरम्मदः। पाणयो ध्मायन्ते एष्विति पाणिन्धमाः पन्थानः।।

< प्रियवशे वदः खच् ।। 3-2-38 ।। >

प्रिय, वश-इत्येतयोः कर्मणोरुपपदयोर्वदेर्धातोः खच् प्रत्ययो भवति। प्रियं वदतीति प्रियंवदः। वशंवदः। चकारः "खचि ह्रस्वः"(6.4.94/2955) इति विशेषणार्थः। खकारो मुमर्थः। प्रत्ययान्तकरणमुत्तरार्थम्। * खच्प्रकरणे गमेः सुप्युपसङ्ख्यानम् *(म.भा.2.102)। मितम्गमो हस्ती। मितम्गमा हस्तिनी। * विहायसो विह च *(म.भा.2.102)। विहायसा गच्छति विहम्गमः। * खच्च डिद्वा वक्तव्यः *(म.भा.2.103)। विहङ्गः। विहङ्गमः। * डे च

विहायसो विहादेशो वक्तव्यः *(म.भा.2.103)। विहगः।।

< द्विषत्परयोस्तापेः ।। 3-2-39 ।। >

द्विषत्परयोः कर्मणोरुपपदयोस्तापेर्धातोः खच्प्रत्ययो भवति। `तप दाहे'(धा.पा.1819) चुरादिः, `तप सन्तापे'(धा.पा.986) भ्वादिः--द्वयोरपि ग्रहणम्। द्विषन्तं तापयति द्विषन्तपः। परन्तपः। `द्विषत्परयोः' इति द्वितकारको निर्देशः। तेन स्त्रियां न भवति--द्विषतीं तापयति द्विषतीतापः।।

< वाचि यमो व्रते ।। 3-2-40 ।। >

वाक्शब्दे कर्मण्युपपदे यमेर्धातोः खच्प्रत्ययो भवति व्रते गम्यमाने। `व्रते' इति शस्त्रितो नियम उच्यते। वाचंयम आस्ते। व्रत इति किम् ? वाग्यामः।।

< पूःसर्वयोर्दारिसहोः ।। 3-2-41 ।। >

पुर्, सर्व-इत्येतयोः कर्मणोरुपपदयोर्यथासङ्ख्यं दारिसहोर्धात्वोः खच्प्रत्ययो भवति। पुरं दारयति पुरन्दरः। सर्वंसहो राजा। * भगे च दारेरिति वक्तव्यम् *। भगन्दरः।।

< सर्वकूलाभ्रकरीषेषु कषः ।। 3-2-42 ।। >

सर्व, कूल, अभ्र, करीष-इत्येतेषु कर्मसूपपदेषु कषेर्धातोः खच् प्रत्ययो भवति। सर्वं कषति सर्वङ्कषः खलः। कूलङ्कषा नदी। अभ्रङ्कषो गिरिः। करीषङ्कषा वात्या।।

< मेघर्त्तिभयेषु कृञः ।। 3-2-43 ।। >

मेघ, ऋति, भय-इत्येतेषु कर्मसूपपदेषु कृञः खच्प्रत्ययो भवति। मेघकरः। ऋतिकरः। भयङ्करः। * उपपदविधौ भयादिग्रहणं तदन्तविधिं प्रयोजयति *। अभयङ्करः।।

< क्षेमप्रियमद्रेऽण् च ।। 3-2-44 ।। >

क्षेम, प्रिय, मद्र-इत्येतेषु कर्मसूपपदेषु करोतेरण्प्रत्ययो भवति, चकारात्खच्च। क्षेमकारः, क्षेमङ्करः। प्रियकारः, प्रियङ्करः। मद्रकारः, मद्रङ्करः। `वा' इति वक्तव्ये पुनरण्ग्रहणं हेत्वादिषु टप्रतिषेधार्थम्।।

< आशिते भुवः करणभावयोः ।। 3-2-45 ।। >

अत्र `सुपि' इत्युपतिष्ठते। आशितशब्दे सुबन्ते उपपदे भवतेर्धातोः करणे भावे चार्थे खच् प्रत्ययो भवति। आशितो भवत्यनेन आशितम्भव ओदनः। भावे-आशितस्य भवनम् आशितम्भवं वर्तते।।

< संज्ञायां भृतृवृजिधारिसहितपिदमः ।। 3-2-46 ।। >

`कर्मणि' इति `सुपि' इति च प्रकृतं संज्ञावशाद्यथासम्भवं सम्बध्यते। भृ, तृ, वृ, जि, धारि, सहि, तपि, दम-इत्येतेभ्यो धातुभ्यः संज्ञायां विषये खच्प्रत्ययो भवति। विश्वम्भरा, वसुन्धरा। रथन्तरं साम। पतिंवरा कन्या। शत्रुञ्जयो हस्ती। युगन्धरः पर्वतः। शत्रुंसहः। शत्र तपः। अरिन्दमः। संज्ञायामिति किम् ? कुटुम्बं बिभर्त्तीति कुटुम्बभारः।।

< गमश्च ।। 3-2-47 ।। >

गमेर्धातोः सुप्युपपदे संज्ञायां विषये खच्प्रत्ययो भवति। सुतङ्गमो नाम यस्य सौतङ्गमिः पुत्रः। योगविभाग उत्तरार्थः।।

< अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः ।। 3-2-48 ।। >

`संज्ञायाम्' इति नानुवर्तते। अन्त, अत्यन्त, अध्वन्, दूर, पार, सर्व, अनन्त-इत्येतेषु कर्मसूपपदेषु गमेर्डप्रत्ययो भवति। अन्तगः। अत्यन्तगः। अध्वगः। दूरगः। पारगः। सर्वगः। अनन्तगः। डकारष्टिलोपार्थः; डित्यभस्याप्यनुबन्धकरणसामर्थ्यादिति। * डप्रकरणे सर्वत्रपन्नयोरुपसङ्ख्यानम् *(म.भा.2.103)। सर्वत्रगः। पन्नगः। * उरसो लोपश्च *(म.भा.2.103)। उरसा गच्छतीत्युरगः। * सुदुरोरधिकरणे *(म.भा.2.103)। सुखेन गच्छत्यस्मिन्निति सुगः। दुर्गः। * निरो देशे *। निर्गो देशः। अपर आह--* डप्रकरणेऽन्येष्वपि दृश्चत इति *(म.भा.2.103)। स्त्र्यगारगः। ग्रामगः। गुरुतल्पगः।।

< आशिषि हनः ।। 3-2-49 ।। >

`ड' इति वर्तते। आशिषि गम्यमानायां हन्तेर्धातोः कर्मण्युपपदे डप्रत्ययो भवति। तिमिं वध्यात्तिमिहः। शत्रुहः। आशिषीति किम् ? शत्रुघातः। * दारावाहनोऽणन्तस्य च टः संज्ञायाम् *(म.भा.2.103)। दारावुपपदे आङ्पूर्वाद्धन्तेरण् प्रत्ययो भवति, अन्तस्य च टकारादेशो भवति, संज्ञायां विषये। दारु आहन्ति दार्वाघाटः। * चारौ वा *(म.भा.2.103)। आङ्पूर्वाद्धन्तेश्चारावुपपदेऽण्, अन्तस्य च वा टकारादेशः। वर्णान्सहन्ति वर्णसङ्घाटः, वर्णसङ्घातः। पदानि संहन्ति पदसङ्घाटः, पदसङ्घातः।।

< अपे क्लेशतमसोः ।। 3-2-50 ।। >

अपपूर्वाद्धन्तेः क्लेशतमसोः कर्मणोरुपपदयोर्डप्रत्ययो भवति। क्लेशापहः पुत्रः। तमोऽपहः सूर्यः। अनाशीरर्थ आरम्भः ।।

< कुमारशीर्षयोर्णिनिः ।। 3-2-51 ।। >

`हनः' इति वर्तते। कुमार, शीर्ष-इत्येतयोरुपपदयोः हन्तेर्णिनिः प्रत्ययो भवति। कुमारघाती। शीर्षघाती। निपातनाच्छिरसः शीर्षभावः।।

< लक्षणे जायापत्योष्टक् ।। 3-2-52 ।। >

हन्तेर्जायापत्योः कर्मणोरुपपदयोर्लक्षणवति कर्तरि टक् प्रत्ययो भवति। जायाघ्नो ब्राह्मणः। पतिघ्नी वृषली। अथ वा-लक्षणे द्योत्ये टक्प्रत्ययः।।

< अमनुष्यकर्तृके च ।। 3-2-53 ।। >

अमनुष्यकर्तृके वर्तमानाद्धन्तेर्धातोः कर्मण्युपपदे टक् प्रत्ययो भवति। जायाघ्नस्तिलकालकः। पतिघ्नी पाणिरेखा। श्लेष्मघ्नं मधु। पित्तघ्नं घृतम्। अमनुष्यकर्तृके इति किम् ? आखुघातः शूद्रः। इह कस्मान्न भवति- चौरघातो हस्ती ? "कृत्यल्युटो बहुलम्"(3.3.113/2841) इति बहुलवचनादण् भवति।।

< शक्तौ हस्तिकपाटयोः ।। 3-2-54 ।। >

शक्तौ गम्यमानायां हस्तिकपाटयोः कर्मणोरुपपदयोर्हन्तेष्टक्प्रत्ययो भवति। मनुष्यकर्तृकार्थ आरम्भः। हस्तिनं हन्तुं शक्तः हस्तिघ्नो मनुष्यः। कं पाटयति प्रविशत इति कपाटघ्नश्चौरः। शक्ताविति किम् ? विषेण हस्तिनं हन्ति हस्तिघातः।।

< पाणिघताडघौ शिल्पिनि ।। 3-2-55 ।। >

पाणिघ, ताडघ-इत्येतौ शब्दौ निपात्येते शिल्पिनि कर्तरि। पाणि, ताड-इत्येतयोः कर्मणोरुपपदयोर्हन्तेर्धातोः कः प्रत्ययो भवति, तस्मिंश्च परतो हन्तेष्टिलोपः, घत्वं च निपात्यते। पाणिघः। ताडघः। शिल्पिनीति किम् ? पाणिघातः। ताडघातः। * राजघ उपसङ्ख्यानम् *(म.भा.2.104)। राजानं हन्ति राजघः।।

< आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ।। 3-2-56 ।। >

आढ्यादिषु कर्मसूपपदेषु च्व्यर्थेष्वच्व्यन्तेषु करोतेर्धातोः करणे कारके ख्युन्प्रत्ययो भवति। च्वेर्विकल्पेन विधानाद् द्विविधाश्च्व्यर्थाः च्व्यन्ताः, अच्व्यन्ताश्च। तत्र च्व्यन्ताः पर्युदस्यन्ते-अनाढ्यमाढ्यं कुर्वन्त्यनेन आढ्यङ्करणम्। सुभगङ्करणम्। पलितङ्करणम्। नग्नङ्करणम्। अन्धङ्करणम्। प्रियङ्करणम्। च्व्यर्थेष्विति किम् ? आढ्यं तैलेन कुर्वन्ति, अभ्यञ्जन्तीत्यर्थः। प्रकृतेरविवक्षायामभूतप्रादुर्भावेऽपि प्रत्युदाहरणं भवति। अच्वाविति किम् ? आढ्यीकुर्वन्त्यनेन। ननु च ख्युना मुक्ते ल्युटा भवितव्यम्, न च ल्युटः ख्युनश्च विशेषोऽस्ति, तत्र किं प्रतिषेधेन? एवं तर्हि प्रतिषेधसामर्थ्यात्ख्युन्यसति ल्युडपि न भवति। तेन ल्युटोऽप्ययमर्थतः प्रतिषेधः। उत्तरार्थश्च च्विप्रतिषेधः क्रियते।।

< कर्तरि भुवः खिष्णुच्खुकञौ ।। 3-2-57 ।। >

आढ्यादिषु सुबन्तेषूपपदेषु च्व्यर्थेष्वच्व्यन्तेषु भवतेर्धातोः कर्तरि कारके खिष्णुच्, खुकञ्-इत्येतौ प्रत्ययौ भवतः। अनाढ्य आढ्यो भवति आढ्यम्भविष्णुः, आढ्यम्भावुकः। सुभगम्भविष्णुः, सुभगम्भावुकः। स्थूलम्भविष्णुः, स्थूलम्भावुकः। पलितम्भविष्णुः, पलितम्भावुकः। नग्नम्भविष्णुः, नग्नम्भावुकः। अन्धम्भविष्णुः, अन्धम्भावुकः। प्रियम्भविष्णुः, प्रियम्भावुकः। कर्तरीति किम् ? करणे मा भूत्। च्व्यर्थेष्वित्येव--आढ्यो भविता। अच्वावित्येव-आढ्यीभविता।।

`उदात्तत्वाद्भुवः सिद्धम्कारादित्वमिष्णुचः।

नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्यते।।'(म.भा.2.106)

< स्पृशोऽनुदके क्विन् ।। 3-2-58 ।।

स्पृशेर्धातोरनुदके सुबन्त उपपदे क्विन्प्रत्ययो भवति। ननु च सकर्मकत्वात्स्पृशेः कर्मैवोपपदं प्राप्नोति ? नैष दोषः;कर्तरीति पूर्वसूत्रादनुवर्तते, तत्कर्तृप्रचयार्थं विज्ञायते। सुबन्तमात्रे चोपपदे कर्तृप्रचयो लभ्यते। घृतं स्पृशति घृतस्पृक्। मन्त्रेण स्पृशति मन्त्रस्पृक्। जलेन स्पृशति जलस्पृक्। अनुदक इति किम् ? उदकस्पर्शः। नकारः "क्विन्प्रत्ययस्य कुः"(8.2.62/377) इति विशेषणार्थः।।

< ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ।। 3-2-59 ।। >

ऋत्विगादयः पञ्च शब्दाः क्विन्प्रत्ययान्ता निपात्यन्ते, अपरे त्रयो धातवो निर्दिश्यन्ते। ऋतुशब्दे उपपदे यजेर्धातोः क्विन् प्रत्ययो निपात्यते-ऋतौ यजति, ऋतुं वा यजति, ऋतुप्रयुक्तो वा यजति ऋत्विक्। रूढिरेषा यथाकथञ्चिदनुगन्तव्या। धृषेः क्विन्प्रत्ययः, द्विर्वचनम्, अन्तोदात्तत्वं च निपात्यते-धृष्णोतीति दधृक्। सृजेः कर्मणि क्विन्निपात्यते-दिशन्ति तामिति दिक्। उत्पूर्वात्स्निहेः क्विन्, उपसर्गान्तलोपः, षत्वं च निपात्यते-उष्णिक्। अञ्चु, युजि, क्रुञ्च-इत्येतेषां धातूनां क्विन्प्रत्ययो भवति। निपातनैः सह निर्देशादत्रापि किञ्चिदलाक्षणिकं कार्यमस्ति। अञ्चतेः सुबन्तमात्र उपपदे क्विन्प्रत्ययो भवति-प्राङ्, प्रत्यङ्, उदङ्। युजेः क्रुञ्चेश्च केवलादेव-युङ्, युञ्जौ, युञ्जः। सोपपदात्तु "सत्सूद्विष"(3.2.61/2975) इत्यादिना क्विप् भवति। अश्वयुक्, अश्वयुजौ, अश्वयुजः। क्रुङ्, क्रुञ्चौ, क्रुञ्चः। नलोपः कस्मान्न भवति ? निपातनसाहचर्यात्।।

< त्यदादिषु दृशोऽनालोचने कञ्य ।। 3-2-60 ।। >

त्यदादिषूपपदेषु दृशेर्धातोरनालोचनेऽर्थे वर्तमानात्कञ् प्रत्ययो भवति, चकारात्क्विन् च । त्यादृक्, त्यादृशः। तादृक्, तादृशः। यादृक्, यादृशः। कञो ञकारो विशेषणार्थः-ठक्, ठञ्, अञिति। अनालोचन इति किम् ? तं पश्यति तद्दर्शः। तादृगादयो हि रूढिशब्दप्रकाराः, नैवात्र दर्शनक्रिया विद्यते। * समानान्ययोश्चेति वक्तव्यम् *(म.भा.2.107)। सदृक्, सदृशः। अन्यादृक्, अन्यादृशः। * दृशेः क्सश्च वक्तव्यः *(म.भा.2.107)। यादृक्षः, तादृक्षः, अन्यादृक्षः, कीदृक्षः।।

< सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजीनीराजामुपसर्गेऽपि क्विप् ।। 3-2-61 ।। >

`सुपि' इत्यनुवर्तते। कर्मग्रहणं तु "स्पृशोऽनुदके क्विन्"(3.2.58/432) इत्यतः प्रभृति न व्याप्रियते। सदादिभ्यो धातुभ्यः सुबन्ते उपपदे उपसर्गेऽपि,

अनुपसर्गेऽपि क्विप्रत्ययो भवति। उपसर्गग्रहणं ज्ञापनार्थम्-अन्यत्र सुबग्रहणे उपसर्गग्रहणं न भवतीति, "वदः सुपि क्यप् च"(3.1.106/2854) इति। `सू' इति द्विषा(धा.पा.1014) साहचर्यात् सूतेरादादिकस्यग(धा.पा.1032) ग्रहणम्, न सुवतेस्तौदादिकस्य(धा.पा.1409)। `युजिर् योगे'(धा.पा.1445), `युज् समाधौ'(धा.पा.1178)-द्वयोरपि ग्रहणम्। `विद ज्ञाने'(धा.पा.1065), `विद सत्तायाम्'()धा.पा.1172, `विद विचारणो(धा.पा.1451)-त्रयाणामपि ग्रहणम्, न लाभार्थस्य विदेः(धा.पा.1433); अकारस्य विवक्षितत्वात्। सत्-`शुचिषत्'(ऋ.4.40.5)। `अन्तरिक्षसत्'(ऋ.4.40.5)। `उपसत्'(तै.सं.6.2.3.2)। सूः-अण्डसूः। शतसूः। `प्रसूः'(तै.सं.4.7.3.2)। द्विष-मित्रद्विट्। प्रद्विट्। द्रुह-`मित्रध्रुक्'(मै.सं.4.3.4)। प्रध्रुक्। दुह-गोधुक्। प्रधुक्। युज्-अश्वयुक्। प्रयुक्। विद-वेदवित्। प्रवित्। ब्रह्मवित्। भिद-काष्ठभित्। प्रभित्। छिद-रज्जुच्छिद्। प्रच्छद्। जि-शत्रुजित्। प्रजित्। नी-सेनानीः। प्रणीः। ग्रामणीः। अग्रणीः। कथमत्र णत्वम् ? "स एषां ग्रामणीः"(5.2.78/1878) इति निपातनात्। नयतेः "पूर्वपदात् संज्ञायामगः"(8.4.3/857) इति णत्वम्। राज-राट्। विराट्। सम्राट्-"मो राजि समः क्वौ"(8.2.35/126) इति णत्वम्। "अन्योभ्योऽपि दृश्यते"(3.2.178/3158), "क्विप् च"(3.2.76/2983) इति सामान्येन वक्ष्यति, तस्यैवायं प्रपञ्चः।।

< भजो ण्विः ।। 3-2-62 ।। >

`उपसर्गे' `सुपि' इति वर्तते। भजेर्धातोः सुबन्त उपपदे उपसर्गेऽपि, अनुपसर्गेऽपि ण्विप्रत्ययो भवति। अर्धं भजते अर्धभाक्। उपसर्गेऽपि-प्रभाक्।।

< छन्दसि सहः ।। 3-2-63 ।। >

`उपसर्गे' `सुपि' इत्येव। छन्दसि विषये सहेर्धातोः सुबन्त उपपदे ण्विप्रत्ययो भवति। तुराषाट्-"सहेः साडः सः"(8.3.56/335) इति षत्वम्, "अन्येषामपि दृश्यते"(6.3.137/3539) इति दीर्घत्वम्।।

< वहश्च ।। 3-2-64 ।। >

वहेर्धातोश्छन्दसि विषये सुबन्त उपपदे ण्विप्रत्ययो भवति। प्रष्ठवाट्। दित्यवाट्। योगविभाग उत्तरार्थः।।

< कव्यपुरीषपुरीष्येषु ञ्युट् ।। 3-2-65 ।। >

कव्य, पुरीष, पुरीष्य-इत्येतेषु उपपदेषु छन्दसि विषये वहेर्धातोर्ञ्युट् प्रत्ययो भवति। `कव्यवाहनः पितृणाम्'(तै.सं.2.5.8.6)। `पुरीषवाहनः'(वा.सं.11.44)। `पुरीष्यवाहनः'(मै.सं.2.7.4)।।

< हव्येऽनन्तः पादम् ।। 3-2-66 ।। >

हव्यशब्दे उपपदे छन्दसि विषये वहेर्धातोर्ञ्युट् प्रत्ययो भवति, अनन्तः पादं चेद्बहिर्वर्तते। `अग्निश्च हव्यवाहनः'(अ.वे.7.20.1)। अनन्तः पादमिति किम् ? `हव्यवाडग्निरजरः पिता नः'(ऋ.5.4.2)।।

< जनसनखनक्रमगमो विट् ।। 3-2-67 ।। >

`छन्दसि', `उपसर्गे', `सुपि' इत्यनुवर्तेते। `जन जनने'(धा.पा.1106), `जनी प्रादुर्भावे'(धा.पा.1150) -द्वयोरपि ग्रहणम्। तथा `षणु दाने'(धा.पा.1465), `वन षण संभक्तौ'(धा.पा.463/464) द्वयोरपि ग्रहणम्। जनादिभ्यो धातुभ्यः सुबन्त उपपदे छन्दसि विषये विट् प्रत्ययो भवति। टकारः सामान्यग्रहणाविघातार्थः-"वेरपृक्तस्य"(6.1.67/375) इति; विशेषणार्थश्च-"विड्वनोरनुनासिकस्यात्"(6.4.41/2982) इति। `अब्जाः गोजाः'(ऋ.4.40.5)। सन-`गोषा इन्द्रो नृषा असि'(ऋ.9.2.10)। खन-`बिसखाः'(ऋ.6.1.2)। कूपखाः। क्रम-`दधिक्राः'(ऋ.4.38.10)। गम-`अग्रेगा उन्नेतृणाम्'(तै.सं.1.3.6.1)।।

< अदोऽनन्ने ।। 3-2-68 ।। >

`छन्दसि' इति निवृत्तम्। अदेर्धातोरनन्ने सुप्युपपदे विट् प्रत्ययो भवति। आममत्ति आमात्। सस्यात्। अनन्न इति किम् ? अन्नादः।।

< क्रव्ये च ।। 3-2-69 ।। >

क्रव्यशब्दे उपपदे अदेर्धातोर्विट् प्रत्ययो भवति। क्रव्यमत्ति क्रव्यात्। पूर्वेणैव सिद्धे वचनमसरूपबाधनार्थम्। तेनाण्न भवति। कथं तर्हि क्रव्यादः ? कृत्तविकृत्तशब्दे उपपदेऽण्, तस्य च पृषोदरादिपाठात्क्रव्यभावः। कृत्तविकृत्तपक्वमांसभक्षः क्रव्याद उच्यते, आममांसभक्षः क्रव्यादिति।।

<दुहः कब् घश्च ।। 3-2-70 ।। >

दुहेर्धातोः सुप्युपपदे कप्रत्ययो भवति, धकारश्चान्तादेशः। कामदुघा धेनुः। अर्घदुघा। धर्मदुघा।।

< मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ।। 3-2-71 ।। >

श्वेतवह, उक्थशस्, पुरोडाश-इत्यतेभ्यो ण्विन् प्रत्ययो भवति मन्त्रे विषये। धातूपपदसमुदाया निपात्यन्ते अलाक्षणिककार्यसिद्ध्यर्थम्। प्रत्ययस्तु विधीयत एव। श्वेतशब्दे कर्तृवाचिन्युपपदे वहेर्धातो कर्मणि कारके ण्विन्प्रत्ययो भवति। श्वेता एनं वहन्ति, श्वेतवा इन्द्रः। उक्थशब्दे कर्मणि करणे वा उपपदे शंसतेर्धातोर्ण्विन्प्रत्ययो भवति, नलोपश्च निपात्यते। उक्थानि शंसति, उक्थैर्वा शंसति `उक्थशा'(ऋ.4.2.16) यजमानः। `दाशृ दाने'(धा.पा.882) इत्येतस्य पुरःपूर्वस्य डत्वम्, कर्मणि च प्रत्ययः। `पुरो दाशन्त एनं पुरोडाः'(ऋ.3.28.2)। * श्वेतवहादीनां डस्पदस्येति वक्तव्यम् *(म.भा.2.108)। श्वेतवोभ्याम्। श्वेतवोभिः। पदस्येति किम् ? श्वेतवाहौ। श्वेतवाहः।।

< अवे यजः ।। 3-2-72 ।। >

अवे उपपदे यजेर्धातेर्ण्विन् प्रत्ययो भवति, मन्त्रे विषये। `त्वं यज्ञे वरुणस्यावया असि'(काठ.सं.35.65)। योगविभाग उत्तरार्थः।।

< विजुपे छन्दसि ।। 3-2-73 ।। >

`उप' उपपदे यजेश्छन्दसि विषये विच्प्रत्ययो भवति। उपयड्भिरूर्ध्वं वहन्ति। उपयट्त्वम्। छन्दोग्रहणं ब्राह्मणार्थम्। विचश्चित्करणं सामान्यग्रहणाविघातार्थम्-"वेरपृक्तस्य"(6.1.67/375) इति। किमर्थमिदमुच्यते, यावता "अन्येभ्योऽपि दृश्यते"(3.2.75/2980) इति यजेरपि विच् सिद्ध एव ? यजेर्नियमार्थमेतत्-उपयजेश्छन्दस्येव, न भाषायामिति।।

< आतो मनिन्क्वनिब्वनिपश्च ।। 3-2-74 ।। >

`छन्दसि' इति वर्तते। `सुपि', `उपसर्गेऽपि' इति च। आकारान्तेभ्यो धातुभ्यः सुप्युपपदे छन्दसि विषये मनिन्, क्वनिप्, वनिप्-इत्येते प्रत्यया भवन्ति। चकाराद्विच् भवति। `सुदामा'(ऋ.6.20.7)। अश्वत्थामा। क्वनिप्-सुधीवा। सुपीवा। वनिप्-`भूरिदावा'(ऋ.9.87.4)। `घृतपावा'(ऋ.अतर्व.13.1.24)। विच् खल्वपि--`कीलालपाः'(ऋ.10.91.14)। `शुभंयाः'(ऋ.4.3.6)। रामस्योपदाः।।

< अन्येभ्योऽपि दृश्यन्ते ।। 3-2-75 ।। >

`छन्दसि' इति निवृत्तम्। अन्येभ्योऽपि धातुभ्योऽनाकारान्तेभ्यो मनिन्, क्वनिप्, वनिप्-इत्येते प्रत्यया दृश्यन्ते, विच्च। सुशर्मा। क्वनिप्-`प्रातरित्वा'(ऋ.1.125.1), `प्रातरित्वानौ'(काठ.30.1)। वनिप्-`विजावा'(ऋ.3.1.23)। `अग्रेगावा'(मै.सं.4.14.9)। विच् खल्वपि-`रेडसि पर्णं नयेः'(वा.सं.6.18)। अपिशब्दः सर्वोपाधिव्यभिचारार्थः। निरुपपदादपि भवति-`धीवा'(अथर्व.3.5.6), `पीवा'(मै.सं.2.51)। दृशिग्रहणं प्रयोगानुसरणार्थम्।।

< क्विप् च ।। 3-2-76 ।। >

सर्वधातुभ्यः सोपपदेभ्यो निरुपपदेभ्यश्च छन्दसि भाषायां च क्विप् प्रत्ययो भवति। उखायाः स्रंसते उखास्रत्। पर्णध्वत्। वाहाद् भ्रश्यति वाहाभ्रट्- "अन्येषामपि दृश्यते"(6.3.137/3539) इति दीर्घः।।

< स्थः क च ।। 3-2-77 ।। >

`सुपि' `उपसर्गेऽपि' इति च वर्तते। `स्था'-इत्येतस्माद्धातोः सुप्युपपदे कप्रत्ययो भवति, क्विप् च । किमर्थमिदमुच्यते, यावता "सुपि स्थः"(3.2.4/2916) इति कः सिद्ध एव, "अन्येभ्योऽपि दृश्यते"(3.2.178/3158) इति क्विप् ? बाधकबाधनार्थं पुनर्वचनम्। "शमि धातोः संज्ञायाम्"(3.2.14/2928) अचं बाधते शंस्थः। शंस्थाः।।

< सुप्यजातौ णिनिस्ताच्छील्ये ।। 3-2-78 ।। >

अजातिवाचिनि सुबन्त उपपदे ताच्छील्ये गम्यमाने धातेर्णिनिप्रत्ययो भवति। उष्णभोजी। शीतभोजी। अजाताविति किम् ? ब्राह्मणानामन्त्रयिता। ताच्छील्य इति किम् ? उष्णं भुङ्क्ते कदाचित्। सुपीति वर्तमाने पुनः सुब्ग्रहणमुपसर्गनिवृत्त्यर्थम्। * उत्प्रतिभ्यामाङि सर्त्तेरुपसङ्ख्यानम् *(म.भा.2.109)। उदासारिण्यः। प्रत्यासारिण्यः। * साधुकारिणि च *(म.भा.2.109)। साधुकारी। साधुदायी। * ब्रह्मणि वदः *(म.भा.2.109)। `ब्रह्मवादिनो वदन्ति'(तै.सं.2.5.4.1)।।

< कर्तर्युपमाने ।। 3-2-79 ।। >

कर्तृवाचिनि उपमान उपपदे धातोर्णिनिप्रत्ययो भवति। उपपदकर्त्ता प्रत्ययार्थस्य कर्तुरुपमानम्। उष्ट्र इव क्रोशति उष्ट्रक्रोशी। ध्वाङ्क्षरावी। अताच्छील्यार्थ आरम्भः, जात्यर्थो वा। कर्तरीति किम् ? अपूपानिव भक्षयति माषान्। उपमान इति किम् ? उष्ट्रः क्रोशति।।

< व्रते ।। 3-2-80 ।। >

व्रत इति शास्त्रतो नियम उच्यते। व्रते गम्यमाने सुबन्त उपपदे धातोर्णिनिः प्रत्ययो भवति। समुदायोपाधिश्चायम्, धातूपपदप्रत्ययसमुदायेन व्रतं गम्यते। स्थण्डिलशायी। अश्राद्धभोजी। कामचारप्राप्तौ नियमः-सति शयने स्थण्डिल एव शेते नान्यत्र, सति भोजनेऽश्राद्धमेव भुङ्क्ते न श्राद्धमिति। व्रते इति किम् ? स्थण्डिले शेते देवदत्तः। अताच्छील्यार्थ आरम्भः, जात्यर्थो वा।।

< बहुलमाभीक्ष्ण्ये ।। 3-2-81 ।। >

आभीक्ष्ण्ये गम्यमाने धातोर्बहुलं णिनिप्रत्ययो भवति। आभीक्ष्ण्यम् = पौनःपुन्यम्। तात्पर्यम् = आसेवैव, ताच्छील्यादन्यत्। कषायपायिणो गान्धाराः। क्षीरपायिण उशीनराः। सौवीरपायिणो बाह्लीकाः। बहुलग्रहणात् कुल्माषखाद इत्यत्र न भवति।।

< मनः ।। 3-2-82 ।। >

`सुपि' इति वर्तते। मन्यतेः सुबन्त उपपदे णिनिप्रत्ययो भवति। दर्शनीयमानी। शोभनमानी। बहुलग्रहणानुवृत्तेर्मन्यतेर्ग्रहणम्, न मनुतेः। उत्तरसूत्रे हि खश्प्रत्यये विकरणकृतो विशेषः स्यात्।।

< आत्ममाने खश्च ।। 3-2-83 ।। >

आत्मनो मननम् = आत्ममानः। आत्ममाने वर्तमानान्मन्यतेः सुप्युपपदे खश्प्रत्ययो भवति। चकाराण्णिनिश्च। यदा प्रत्ययार्थः कर्ताऽऽत्मानमेव दर्शनीयत्वादिना धर्मेण युक्तं मन्यते, तदायं विधिः। दर्शनीयमात्मानं मन्यते दर्शनीयम्मन्यः, दर्शनीयमानी। पण्डितम्मन्यः, पण्डितमानी। आत्ममान इति किम्

? दर्शनीयमानी देवदत्तो यज्ञदत्तस्य। अतः सार्वकालिका विधयो वेदितव्याः।।

< भूते ।। 3-2-84 ।। >

`भूते' इत्यधिकारः "वर्त्तमाने लट्"(3.2.123/2151) इति यावत्। यदित ऊर्ध्वमनुक्रमिष्यामः `भूते' इत्येवं तद्वेदितव्यम्। धात्वधिकाराच्च धात्वर्थे भूते इति विज्ञायते। वक्ष्यति-"करणे यजः"(3.2.85/2996), अग्निष्टोमेनेष्टवान् अग्निष्टोमयाजी। भूत इति किम् ? अग्निष्टोमेन यजते।।

< करणे यजः ।। 3-2-85 ।। >

णिनिरनुवर्त्तते, न खश्। यजतेर्धातोः करण उपपदे णिनिप्रत्ययो भवति भूते। अग्निष्टोमयाजी। अग्निष्टोमः फलभावनायां करणं भवति।।

< कर्मणि हनः ।। 3-2-86 ।। >

कर्मणि उपपदे हन्तेर्धातोर्णिनिप्रत्ययो भतवि भूते काले। पितृव्यघाती। मातुलघाती। * कुत्सितग्रहणं कर्तव्यम् *। इह मा भूत्-चौरं हतवान्।।

< ब्रह्मभ्रूणवृत्रेषु क्विप् ।। 3-2-87 ।। >

`कर्मणि' इति वर्तते। ब्रह्मादिषु कर्मसूपपदेषु हन्तेर्धातोः क्विप् प्रत्ययो भवति भूते। ब्रह्महा। भ्रूणहा। वृत्रहा। किमर्थमिदमुच्यते, यावता सर्वधातुभ्यः क्विब्विहित एव ? ब्रह्मादिषु हन्तेः क्विब्वचनं नियमार्थम्। चतुर्विधश्चात्र नियम इष्यते। ब्रह्मादिष्वेव हन्तेर्नान्यस्मिन्नुपपदे, पुरुषं हतवानिति, ब्रह्मादिषु हन्तेरेव नान्यस्मात्स्यात्, ब्रह्माधीतवानिति; ब्रह्मादिषु हन्तेर्भूतकाले क्विबेव, नान्यः प्रत्ययः; तथा भूतकाल एव, नान्यस्मिन्; ब्रह्माणं हन्ति हनिष्यति वेति। तदेतद्वक्ष्यमाणबहुलग्रहणस्य पुरस्तादपकर्षणाल्लभ्यते।।

< बहुलं छन्दसि ।। 3-2-88 ।। >

पूर्वेण नियमादप्राप्तः क्विब्विधीयते। छन्दसि विषये उपपदान्तरेष्वपि हन्तेर्बहुलं क्विप्रत्ययो भवति। मातृहा सप्तमं नरकं प्रविशेत्। पितृहा(छां.7.152)। न च भवति-मातृघातः, पितृघातः।।

< सुकर्मपापमन्त्रपुण्येषु कृञः ।। 3-2-89 ।। >

`कर्मणि' इति वर्तते, तदसम्भवात्सुशब्दं वर्जयित्वा परिशिष्टानां विशेषणं भवति। स्वादिषु, कर्मसूपपदेषु करोतेर्धातोः क्विप्रत्ययो भवति। सुकृत्। कर्मकृत्। पापकृत्। मन्त्रकृत्। पुण्यकृत्। अयमपि नियमार्थ आरम्भः। त्रिविधश्चात्र नियम इष्यते धातुनियमं वर्जयित्वा कालोपपदप्रत्ययनियमः।
धातोरनियतत्वादन्यस्मिन्नप्युपपदे भवति-शास्त्रकृत्, भाष्यकृत्।।

< सोमे सुञः ।। 3-2-90 ।। >

`कर्मणि' इति वर्तते। सोमे कर्मण्युपपदे सुनोतेर्धातोः क्विप् प्रत्ययो भवति। सोमसुत्, सोमसुतौ, सोमसुतः। अयमपि नियमार्थ आरम्भ। चतुर्विधश्चात्र नियम इष्यते-धातुकालोपपदप्रत्ययविषयः।।

< अग्नौ चेः ।। 3-2-91 ।। >

`कर्मणि' इत्येव। अग्नौ कर्मण्युपपदे चिनोतेर्धातोः क्विप्रत्ययो भवति। अग्निचित्, अग्निचितौ, अग्निचितः। अत्रापि पूर्ववच्चतुर्विधो नियम इष्यते।।

<कर्मण्यग्न्याख्यायाम्।। 3.2.92 ।।>

`चेः कर्मणि' इति वर्तते। कर्मण्युपपदे चिनोतेः कर्मण्येव कारके क्विप् प्रत्ययो भवति अग्न्याख्यायाम्, धातूपपदप्रत्ययसमुदायेन चेदग्न्याख्या गम्यते। श्येन इव चीयते श्येनचित्। कङ्कचित्।
आख्याग्रहणं रूढिसम्प्रत्ययार्थम्। अग्न्यर्थो हीष्टकाचय उच्यते श्येनचिदिति।।

<कर्मणीनिर्विक्रियः।। 3.2.93 ।।>

कर्मण्युपपदे विपूर्वात्क्रीणातेर्धातोरिनिप्रत्ययो भवति। `कर्मणि' इति वर्तमाने पुनः कर्मग्रहणं कर्तुः कुत्सानिमित्ते कर्मणि यथा स्यात्, कर्ममात्रे मा भूत्।
सोमविक्रयी। रसविक्रयी। इह न भवति----धान्यविक्रायः।।

<दृशेः क्वनिप्।। 3.2.94 ।।>

`कर्मणि' इत्येव। दृशेर्धातोः कर्मण्युपपदे क्वनिप् प्रत्ययो भवति। मेरुदृश्वा। परलोकदृश्वा। "अन्येभ्योऽपि दृश्यन्ते"(3.2.75/2980) इति क्वनिपि सिद्धे पुनर्वचनं प्रत्ययान्तरनिवृत्त्यर्थम्।।

<राजनि युधिकृञः।। 3.2.95 ।।>

`कर्मणि' इत्येव। राजन्शब्दे कर्मण्युपपदे युध्यतेः करोतेश्च क्वनिप्प्रत्ययो भवति। ननु च युधिरकर्मकः ? अन्तर्भावितण्यर्थः सकर्मको भवति। राजयुध्वा। राजानं योधितवानित्यर्थः। राजकृत्वा।।

<सहे च।। 3.2.96 ।।>

सहशब्दे चोपपदे युधिकृञोर्धात्वोः क्वनिप्प्रत्ययो भवति। असत्त्ववाचित्वान्नोपपदं कर्मणा विशेष्यते। सहयुध्वा। सहकृत्वा।।

<सप्तम्यां जनेर्डः।। 3.2.97 ।।>

सप्तम्यन्ते उपपदे जनेधातोः डप्रत्ययो भवति। उपसरे जातः उपसरजः। मन्दुरजः।।

<पञ्चम्यामजातौ।। 3.2.98 ।।>

पञ्चम्यन्ते उपपदे जातिवर्जिते जनेर्डः प्रत्ययो भवति। बुद्धिजः। संस्कारजः। दुःखजः।
अजाताविति किम् ? हस्तिनो जातः। अश्वाज्जातः।
<उपसर्गे च संज्ञायाम्।। 3.2.99 ।।>
उपसर्गे चोपपदे जनेर्डः प्रत्ययो भवति संज्ञायां विषये। समुदायोपाधिः संज्ञा। अथेमा मानवीः प्रजाः।।
<अनौ कर्मणि।। 3.2.100 ।।>
अनुपूर्वाद् जनेः कर्मण्युपपदे डः प्रत्ययो भवति। पुमांसमनुजातः पुमनुजः। स्त्र्यनुजः।।
<अन्येष्वपि दृश्यते।। 3.2.101 ।।>
अन्येष्वप्युपपदेषु कारकेषु जनेर्डप्रत्ययो दृश्यते। सप्तम्यामित्युक्तम्, असप्तम्यामपि दृश्यते। न जायते इत्यजः। द्विर्जाताः द्विजाः।
"पञ्चम्यामजातौ"(3.2.18/3008)इत्युक्तम्, जातावपि दृश्यते----ब्राह्मणजो धर्मः। क्षत्रियजं युद्धम्।
"उपसर्गे संज्ञायाम्"(3.2.99/3009)इत्युक्तम्, असंज्ञायामपि दृश्यते। अभिजाः, परिजाः केशाः।
"अनौ कर्मणि"(3.2.100/3010) इत्युक्तम्, अकर्मण्यपि दृश्यते---अनुजातः अनुजः।
अपिशब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वन्तरादपि भवति कारकान्तरेऽपि। परितः खाता परिखा। आखा।।
<निष्ठा।। 3.2.102 ।।>
"क्तक्तवतू निष्ठा"(1.1.26/3012) इत्युक्तम्, स निष्ठासंज्ञकः प्रत्ययो भूते भवति। कृतम्, कृतवान्। भुक्तम्, भुक्तवान्।
निष्ठायामितरेतराश्रयत्वादप्रसिद्धिः(म.भा.2.113)। संज्ञायां क्तक्तवतू भाव्येते, सतोश्चानयोः संज्ञया भाव्यम् ? नैष दोषः; भाविनी संज्ञा विज्ञायते। स भूते भवति यस्योत्पन्नस्य निष्ठेत्येषा संज्ञा भवति। सामर्थ्यात् क्तक्तवत्वोर्विधानमेतत्।
आदिकर्मणि निष्ठा वक्तव्या(म.भा.2.113)। प्रकृतः कटं देवदत्तः। प्रकृतवान् कटं देवदत्तः।।
<सुयजोर्ङ्वनिप्।। 3.2.103 ।।>
सुनोतेर्यजतेश्च ङ्वनिप् प्रत्ययो भवति। सुत्वा। यज्वा।।
<जीर्यतेरतृन्।। 3.2.104 ।।>
"भूते"(3.2.84/2995) इति वर्तते। जीर्यतेरतृन् प्रत्ययो भवति भूते। जरन्। जरन्तौ। जरन्तः। वाऽसरूपेण निष्ठा - जीर्णः, जीर्णवानिति।।
<छन्दसि लिट्।। 3.2.105 ।।>
`भूते' इत्येव। छन्दसि विषये धातोर्लिट् प्रत्ययो भवति। `अहं सूर्यमुभयतो ददर्श'(वा.सं.8.9)। `अहं द्यावापृथिवी आततान'(तै.ब्रा.1.2.1.33)।
ननु च "छन्दसि लुङ्लङ्लिटः"(3.4.6/3423) इति सामान्येन लिङ् विहित एव ? धातुसम्बन्धे स विधिः, अयं त्वविशेषेण।।
<लिटः कानज्वा।। 3.2.106 ।।>
छन्दसि लिटः कानजादेशो भवति वा। `अग्निं चिक्यानः'(मै.सं.3.3.9)। `सोमं सुषुवाणः'(मै.सं.4.4.10)। `वरुणं सुषुवाणः'(तै.सं.2.1.9.1)। न च भवति--`अहं सूर्यमुभयतो ददर्श'(वा.सं.8.9)। `अहं द्यावापृथिवी आततान'(तै.ब्रा.1.2.1.33)।
लिड्ग्रहणं किम्, न पूर्वस्यैव प्रकृतस्यादेशविधाने विभक्तिविपरिणामो भविष्यति ? लिण्मात्रस्य यथा स्यात्। योऽपि परोक्षे विहितस्तस्याप्ययमादेशो भवति।।
<क्वसुश्च।। 3.2.107 ।।>
छन्दसि लिटः क्वसुरादेशो भवति। `जक्षिवान्'(अ.4.7.3)। `पपिवान्'(ऋ.1.61.7) । न च भवति--`अहं सूर्यमुभयतो ददर्श'(वा.सं.8.9)। योगविभाग उत्तरार्थः।।
<भाषायां सदवसश्रुवः।। 3.2.108 ।।>
सद, वस, श्रु इत्येतेभ्यः परस्य लिटो भाषायां विषये वा क्वसुरादेशो भवति। आदेशविधानादेव लिडपि तद्विषयोऽनुमीयते। `उपसेदिवान् कौत्सः पाणिनिम्'(म.भा.2.115)। तेन मुक्ते यथा प्राप्तं प्रत्यया भवन्ति---उपासदत्, उपासीदत्, उपससाद। अनूषिवान्कौत्सः पाणिनिम्; अन्ववात्सीत्, अन्ववसत्, अनूवास। उपशुश्रुवान्कौत्सः पाणिनिम्, उपाश्रौषीत्, उपाशृणोत्, उपशुश्राव।
लुङ्लङ्विषये परस्तादनुवृत्तेः क्वसुर्भवति।।
<उपेयिवाननाश्वाननूचानश्च।। 3.2.109 ।।>
उपेयिवान् अनाश्वान्, अनूचान् इत्येते शब्दा निपात्यन्ते। उपपूर्वादिणः क्वसुः, द्विर्वचनमभ्यासदीर्घत्वम्, तत्सामर्थ्यादेकादेशप्रतिबन्धः, तत्र "वस्वेकाजाद्घसाम्"(7.2.67/3096) इत्यनेकाच्त्वादिण्न प्राप्नोति, स निपात्यते। अभ्यासस्य श्रवणं धातुरूपस्य यणादेशः। उपेयिवान्।
क्रादिनियमात्प्राप्तश्च "वस्वेकाजाद्घसाम्"(7.2.67/3096) इति प्रतिषिद्धः, स पुनरिट् प्रतिप्रसूयते, तेनाजादौ न भवति---उपेयुषः, उपेयुषा।
न चात्रोपसर्गस्तन्त्रम्, अन्योपसर्गपूर्वान्निरुपसर्गाच्च भवत्येव--समीयिवान्, ईयिवान्।
वावचनानुवृत्तेश्च पूर्ववल्लङादयोऽपि भवन्ति। उपागात्। उपैत्। उपेयाय।
अश्नातेर्नञ्पूर्वात् क्वसुर्निपात्यते, इडभावश्च। अनाश्वान्। नाशीत्। नाश्नात्। नाश।

वचेरनुपूर्वात्कर्त्तरि कानज्निपात्यते। अनूचानः। अन्ववोचत्। अन्वब्रवीत्। अनूवाच।।

<लुङ्।। 3.2.110 ।।>

`भूते' इत्येव। भूतेऽर्थे वर्त्तमानाद् धातोर्लुङ् प्रत्ययो भवति। अकार्षीत्। अहार्षीत्।

वसतेर्लुङ् रात्रिविशेषे जागरणसन्ततौ वक्तव्यः(म.भा.2.118)। क्व भवानुषितः ? अहमत्रावात्सम्।।

<अनद्यतने लङ्।। 3.2.111 ।।>

`भूते' इत्येव। `अनद्यतने' इति बहुव्रीहिनिर्देशः। अविद्यमानाद्यतने भूतेऽर्थे वर्त्तमानाद्धातोर्लङ् प्रत्ययो भवति। अकरोत्। अहरत्। बहुव्रीहिनिर्देशः किमर्थः ? अद्य ह्यो वा अभुक्ष्महीति व्यामिश्रे मा भूत्(म.भा.2.118)।

परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ् वक्तव्यः(म.भा.2.119)। अरुणद्यवनः साकेतम्। अरुणद्यवनो माध्यमिकानिति।।

<अभिज्ञावचने लृट्।। 3.2.112 ।।>

अभिज्ञा=स्मृतिः, तद्वचने उपपदे भूतानद्यतने लृट् प्रत्ययो भवति। लङोऽपवादः। अभिजानासि देवदत्त कश्मीरेषु वत्स्यामः।

वचनग्रहणं पर्यायार्थम्--अभिजानासि स्मरसि बुध्यसे चेतयसे इति।

<न यदि।। 3.2.113 ।।>

यच्छब्दसहितेऽभिज्ञावचन उपपदे लृट् प्रत्ययो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते। अभिजानासि देवदत्त यत्कश्मीरेष्ववसाम। वासमात्रं स्मर्यते, न त्वपरं किञ्चिल्लक्ष्यते। तेनोत्तरसूत्रस्य नायं विषयः।।

<विभाषा साकाङ्क्षे।। 3.2.114 ।।>

`यदि' इति नानुवर्त्तते। उभयत्रविभाषेयम्, अभिज्ञावचने उपपदे यच्छब्दसहिते केवले च विभाषा लृट् प्रत्ययो भवति, साकाङ्क्षश्चेत्प्रयोक्ता। लक्ष्यलक्षणयोः सम्बन्धे प्रयोक्तुराकाङ्क्षा भवति। अभिजानासि देवदत्त कश्मीरेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे। अभिजानासि देवदत्त मगधेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे। यदि खल्वपि--अभिजानासि देवदत्त यत्कश्मीरेषु वत्स्यामः, यत्तत्रौदनं भोक्ष्यामहे। अभिजानासि देवदत्त यत्कश्मीरेष्ववसाम, यत्तत्रौदनमभुञ्ज्महि। वासो लक्षणम्, भोजनं तु लक्ष्यम्।।

<परोक्षे लिट्।। 3.2.115 ।।>

`भूतानद्यतने' इति वर्त्तते। तस्य विशेषणं परोक्षग्रहणम्। भूतानद्यतनपरोक्षेऽर्थे वर्तमानाद्धातोर्लिट् प्रत्ययो भवति।

ननु च धात्वर्थः सर्वः परोक्ष एव ? सत्यमेतत्। अस्ति तु लोके धात्वर्थेनाऽपि कारकेषु प्रत्यक्षाभिमानः। स यत्र नास्ति तत्परोक्षमित्युच्यते। चकार। जहार। उत्तमविषयेऽपि चित्तव्याक्षेपात् परोक्षता सम्भवत्येव, तद्यथा--सुप्तोऽहं किल विललाप।

अत्यन्तापह्नवे च लिड् वक्तव्यः(म.भा.2.120)। कलिङ्गेषु स्थितोऽसि ? नाहं कलिङ्गान् जगाम। दक्षिणापथं प्रविष्टोसि ? नाहं दक्षिणापथं प्रविवेश।।

<हशश्वतोर्लङ् च।। 3.2.116 ।।>

भूतानद्यतनपरोक्षेऽर्थे लिटि प्राप्ते हशश्वतोरुपपदयोर्लङ् प्रत्ययो भवति,चकाराल्लिट् च। इति हाकरोत्। इति ह चकार। शश्वदकरोत्। शश्वच्चकार।।

<प्रश्ने चासन्नकाले।। 3.2.117 ।।>

`भूतानद्यतनपरोक्षे' इति वर्त्तते। तस्य विशेषणमेतत्। प्रष्टव्यः=प्रश्नः। आसन्नकाले पृच्छ्यमाने भूतानद्यतनपरोक्षेऽर्थे वर्त्तमानाद्धातोर्लङ्लिटौ प्रत्ययौ भवतः। कश्चित्कञ्चित्पृच्छति - अगच्छद्देवदत्तः ? जगाम देवदत्तः ? अयजद् देवदत्तः? इयाज देवदत्तः ?

प्रश्ने इति किम् ? जगाम देवदत्तः। आसन्नकाल इति किम् ? भवन्तं पृच्छामि। जघान कंसं किल वासुदेवः।।

<लट् स्मे।। 3.2.118 ।।>

`भूतानद्यतनपरोक्षे' इति वर्त्तते। स्मशब्द उपपदे भूतानद्यतनपरोक्षे लट् प्रत्ययो भवति। लिटोऽपवादः। नडेन स्म पुराधीयते। ऊर्णया स्म पुराधीयते।।

<अपरोक्षे च।। 3.2.119 ।।>

अपरोक्षे च भूतानद्यतनेऽर्थे वर्तमानाद्धातोः स्म उपपदे लट् प्रत्ययो भवति। एवं स्म पिता ब्रवीति। इति स्मोपाध्यायः कथयति।।

<ननौ पृष्टप्रतिवचने।। 3.2.120 ।।>

`अनद्यतने परोक्षे' इति निवृत्तम्। भूतसामान्ये विधिरयम्। ननुशब्द उपपदे प्रश्नपूर्वके प्रतिवचने भूतेऽर्थे लट् प्रत्ययो भवति। लुङोऽपवादः। अकार्षीः कटं देवदत्त ? ननु करोमि भोः। अवोचस्तत्र किञ्चिद्देवदत्त ? ननु ब्रवीमि भोः।

पृष्टप्रतिवचन इति किम् ? नन्वकार्षीन्माणवकः।।

<नन्वोर्विभाषा।। 3.2.121 ।।>

`भूते' इत्येव। नशब्दे नुशब्दे चोपपदे पृष्टप्रतिवचने विभाषा लट् प्रत्ययो भवति भूते। अकार्षीः कटं देवदत्त ? न करोमि भोः। नाकार्षम्। अहं नु करोमि। अहं न्वकार्षम्।।

<पुरि लुङ् चास्मे।। 3.2.122 ।।>
अनद्यतनग्रहणमिह मण्डूकप्लुत्यानुवर्त्तते। पुराशब्द उपपदे स्मशब्दवर्जिते भूतानद्यतनेऽर्थे विभाषा लुङ् प्रत्ययो भवति लट् च। ताभ्यां मुक्ते पक्षे यथाविषयमन्येऽपि प्रत्यया भवन्ति। वसन्तीह पुरा छात्राः। अवात्सुः पुरा छात्राः। अवसन्निह पुरा छात्राः। ऊषुरिह पुरा छात्राः।
अस्म इति किम् ? नडेन स्म पुराधीयते।।
<वर्त्तमाने लट्।। 3.2.123 ।।>
प्रारब्धोऽपरिसमाप्तश्च वर्तमानः, तस्मिन्वर्त्तमानेऽर्थे वर्त्तमानाद्धातोः लट् प्रत्ययो भवति। पचति। पठति।।
<लटः शतृशानचावप्रथमासमानाधिकरणे।। 3.2.124 ।।>
लटः शतृशानचावित्येतावादेशौ भवतः, अप्रथमान्तेन चेत्तस्य सामानाधिकरण्यं भवति। पचन्तं देवदत्तं पश्य। पचमानं देवदत्तं पश्य। पचता कृतम्। पचमानेन कृतम्।
अप्रथमासमानाधिकरणे इति किम् ? देवदत्तः पचति।
`लट्' इति वर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थम् - क्वचित् प्रथमासमानाधिरणेऽपि भवति। सन्ब्राह्मणः। अस्ति ब्राह्मणः। विद्यते ब्राह्मणः। विद्यमानो ब्राह्मणः। जुह्वन्। जुहोति। अधीयानः। अधीते।
माङ्याक्रोशे। मा पचन्। मा पचमानः।
केचिद्विभाषाग्रहणमनुवर्त्तयन्ति -"नन्वोर्विभाषा"(3.2.121) इति। सा च व्यवस्थिता। तत्र यथादर्शनं प्रयोगा नेतव्याः।।
<सम्बोधने च।। 3.2.125 ।।>
प्रथमासमानाधिकरणार्थ आरम्भः। सम्बोधने च विषये लटः शतृशानचौ प्रत्ययौ भवतः। हे पचन्। हे पचमान।।
<लक्षणहेत्वोः क्रियायाः।। 3.2.126 ।।>
लक्ष्यते चिह्न्यते येन तल्लक्षणम्। जनकः=हेतुः। धात्वर्थविशेषणं चैतत्। लक्षणे हेतौ चार्थे वर्त्तमानाद्धातोः परस्य लटः शतृशानचावादेशौ भवतः, तौ चेल्लक्षणहेतू क्रियाविषयौ भवतः। लक्षणे - शयाना भुञ्जते यवनाः। तिष्ठन्तोऽनुशासति गणकाः। हेतौ - अर्जयन्वसति। अधीयानो वसति।
लक्षणहेत्वोरिति किम् ? पचति। पठति। क्रियाया इति किम् ? द्रव्यगुणयोर्मा भूत् - यः कम्पते सोऽश्वत्थः। यदुत्प्लवते तल्लघु। यन्निषीदति तद्गुरु। लक्षणहेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारलिङ्गम्।।
<तौ सत्।। 3.2.127 ।।>
तौ शतृशानचौ सत्संज्ञौ भवतः। `तौ' ग्रहणमुपाध्यसंसर्गार्थम्। शतृशानज्मात्रस्य संज्ञा भवति। ब्राह्मणस्य कुर्वन्। ब्राह्मणस्य कुर्वाणः। ब्राह्मणस्य करिष्यन्। ब्राह्मणस्य करिष्यमाणः।
सत्प्रदेशाः--"पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन"(2.2.11/705) इत्येवमादयः।।
<पूङ्यजोः शानन्।। 3.2.128 ।।>
पूङो यजेश्च धातोः शानन् प्रत्ययो भवति। पवमानः। यजमानः।
यदि प्रत्ययाः शानन्नादयो न लादेशाः, कथं सोमं पवमानो नडमाघ्नान इति षष्ठीप्रतिषेधः ? तृन्निति प्रत्याहारनिर्देशात्। क्व संनिविष्टानां प्रत्याहारः ? "लटः शतृ"(3.2.124/3100) इत्यतः प्रभृति आ `तृनो'(3.2.135/3115) नकारात्।
द्विषः शतुर्वा वचनम्। चौरस्य द्विषन्। चौरं द्विषन्।।
<ताच्छील्यवयोवचनशक्तिषु चानश्।। 3.2.129 ।।>
ताच्छील्यम्=तत्स्वभावता। वयः=शरीरावस्था, यौवनादिः। शक्तिः=सामर्थ्यम्। ताच्छील्यादिषु धातोश्चानश् प्रत्ययो भवति। ताच्छील्ये तावत् - कतीह मुण्डयमानाः। कतीह भूषयमाणाः। वयोवचने - कतीह कवचं पर्यस्यमानाः। कतीह शिखण्डं वहमानाः। शक्तौ - कतीह निघ्नानाः। कतीह पचमानाः।।
<इङ्धार्योः शत्रकृच्छ्रिणि।। 3.2.130 ।।>
इङो धारेश्च धात्वोः शतृप्रत्ययो भवति अकृच्छ्रिणि कर्त्तरि। अकृच्छ्रः=सुखसाध्यो यस्य कर्तुर्धात्वर्थः सोऽकृच्छ्री। अधीयन् पारायणम्। धारयन्नुपनिषदम्।
अकृच्छ्रिणीति किम् ? कृच्छ्रेणाधीते। कृच्छ्रेण धारयति।।
<द्विषोऽमित्रे।। 3.2.131 ।।>
अमित्रः=शत्रुः, अमित्रे कर्त्तरि द्विषेर्धातोः शतृप्रत्ययो भवति। द्विषन्, द्विषन्तौ, द्विषन्तः।
अमित्रे इति किम्। द्वेष्टि भार्या पतिम्।।
<सुञो यज्ञसंयोगे।। 3.2.132 ।।>
यज्ञेन संयोगो यज्ञसंयोगः। यज्ञसंयुक्तेऽभिषवे वर्त्तमानात्सुनोतेर्धातोः शतृप्रत्ययो भवति। सुन्वन्तः। सर्वे यजमानाः सत्त्रिण उच्यन्ते। संयोगग्रहणं प्रधानकर्तृप्रतिपत्त्यर्थम्, याजकेषु मा भूत्।
यज्ञसंयोग इति किम् ? सुनोति सुराम्।।

<अर्हः प्रशंसायाम्।। 3.2.133 ।।>

प्रशंसा=स्तुतिः। अर्हतेर्द्धातोः प्रशंसायां शतृप्रत्ययो भवति। अर्हन्निह भवान्विद्याम्। अर्हन्निह भवान्पूजाम्।

प्रशंसायामिति किम् ? अर्हति चौरो वधम्।।

<आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु।। 3.2.134 ।।>

"भ्राजभासभाषदीपजीवमीलपाडामन्यतरस्याम्"(3.2.177/3157) इति क्विपं वक्ष्यति। आ एतस्मात् क्विप्संशब्दाद्यानित ऊर्ध्वमनुक्रमिष्यामस्तच्छीलादिषु कर्तृषु ते वेदितव्याः। अभिविधौ चायमाङ्, तेन क्विपोऽप्ययमर्थनिर्देशः।

तदिति धात्वर्थः शीलादिविशेषणत्वेन निर्दिश्यते। तच्छीलः= यः स्वभावतः फलनिरपेक्षस्तत्र प्रवर्त्तते। तद्धर्मा=तदाचारः, यः स्वधर्मे ममायमिति प्रवर्त्तते विनापि शीलेन। तत्साधुकारी=यो धात्वर्थं साधु करोति। उत्तरत्रैवोदाहरिष्यामः।।

<तृन्।। 3.2.135 ।।>

सर्वधातुभ्यस्तृन्प्रत्ययो भवति तच्छीलादिषु कर्तृषु। तकारः स्वरार्थः। तच्छीले तावत् - कर्ता कटान्। वदिता जनापवादान्। तद्धर्मणि - मुण्डयितारः श्राविष्ठायना भवन्ति वधूमूढाम्। अन्नमपहर्त्तार आह्वरका भवन्ति श्राद्धे सिद्धे। उन्नेतारस्तौल्वलायना भवन्ति पुत्रे जाते। तत्साधुकारिणि - कर्ता कटम्। गन्ता खेटम्।

तृन्विधावृत्विक्षु चानुपसर्गस्य(म.भा.2.130)। होता। पोता। अनुपसर्गस्येति किम् ? उद्गाता। प्रतिहर्ता। तृजेव भवति। स्वरे विशेषः।

* नयतेः षुक् च*(म.भा.2.130)। नेष्टा।

* त्विषेर्देवतानामकारश्चोपधाया अनिट्त्वं च*(म.भा.2.131)। त्वष्टा।

* क्षदेश्च नियुक्ते*(म.भा.2.131)। क्षत्ता। क्वचिदधिकृत उच्यते।

* छन्दसि तृच्च*(म.भा.2.131)। `क्षत्तृभ्यः संग्रहीतृभ्यः'(वा.सं.16.26) स्वरे विशेषः।।

<अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्।। 3.2.136 ।।>

अलङ्कृञादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु इष्णुच् प्रत्ययो भवति। अलङ्करिष्णुः। निराकरिष्णुः। प्रजनिष्णुः। उत्पचिष्णुः। उत्पतिष्णुः। उन्मदिष्णुः। रोचिष्णुः। अपत्रपिष्णुः। वर्तिष्णुः। वर्धिष्णुः। सहिष्णुः। चरिष्णुः।

अलंकृञो मण्डनार्थाद्युचः पूर्वविप्रतिषेधेनेष्णुज्वक्तव्यः।।

<णेश्छन्दसि।। 3.2.137 ।।>

ण्यन्ताद्धातोश्छन्दसि विषये तच्छीलादिषु कर्तृषु इष्णुच् प्रत्ययो भवति। `दृषदं धारयिष्णवः'(शां.आ.12.2)। `वीरुधः पारयिष्णवः'(ऋ.1.97.3)।।

<भुवश्च।। 3.2.138 ।।>

भवतोर्धातोश्छन्दसि विषये तच्छीलादिष्विष्णुच् प्रत्ययो भवति। `भविष्णुः'(मै.सं.1.8.1)। योगविभाग उत्तरार्थः। चकारोऽनुक्तसमुच्चयार्थः। भ्राजिष्णुना लोहितचन्दनेन।।

<ग्लाजिस्थश्च ग्स्नुः।। 3.2.139 ।।>

`छन्दसि' इति निवृत्तम्। ग्ला, जि, स्था---इत्येतेभ्यो धातुभ्यश्चकाराद्भुवश्च तच्छीलादिषु ग्स्नुः प्रत्ययो भवति। ग्लास्नुः। जिष्णुः। स्थास्नुः। भूष्णुः। गिच्चायं प्रत्ययो न कित्। तेन स्थ ईकारो न भवति। "क्ङिति च"(1.1.5/2217) इत्यत्र गकारोऽपि चर्त्वभूतो निर्दिश्यते, तेन गुणो न भवति। "श्र्युकः किति"(7.2.11/2381) इत्यत्रापि गकारो निर्दिश्यते, तेन भुव इड् न भवति।।

`क्स्नोर्गित्त्वान्न स्थ ईकारः कङितोरीत्वशासनात्।

गुणाभावस्त्रिषु स्मार्यः श्र्युकोऽनिट्त्वं गकोरितोः।।'(म.भा.2.132)

दंशेश्छन्दस्युपसङ्ख्यानम्। `दङ्क्षणवः पशवः'(वा.सं.15.15.3)।।

<त्रसिगृधिधृषिक्षिपेः क्नुः।। 3.2.140 ।।>

त्रसादिभ्यो धातुभ्यस्तच्छीलादिषु क्नुः प्रत्ययो भवति। त्रस्नुः। गृध्नुः। धृष्णुः। क्षिप्नुः।।

<शमित्यष्टाभ्यो घिनुण्।। 3.2.141 ।।>

`इति' शब्द आद्यर्थे। शमादिभ्यो धातुभ्योऽष्टाभ्यस्तच्छीलादिषु घिनुण् प्रत्ययो भवति। `शम उपशमे'(धा.पा.1202) इत्यतः प्रभृति `मदी हर्षे'(धा.पा.1209) इत्येवमन्तः शमादिर्दिवाद्यन्तर्गणः। घकार उत्तरत्र कुत्वार्थः। उकार उच्चारणार्थः। णकारो वृद्ध्यर्थः।

शमी। तमी। दमी। श्रमी। भ्रमी। क्लमी। प्रमादी। उन्मादी। अष्टाभ्य इति किम् ? असिता।।

<सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च ।। 3.2.142 ।।>

घिनुणनु वर्तते। सम्पृचादिभ्यो धातुभ्यो घिनुण् भवति तच्छीलादिषु। `पृची सम्पर्के'(धा.पा.1463) इति रुधादिर्गृह्यते, न त्वदादिर्लुग्विकरणत्वात्।

परिदेविर्भ्वादिर्गृह्यते - `देवृ देवने'(धा.पा.500) इति। `क्षिप प्रेरणे'(धा.पा.1122/1286) दिवादिस्तुदादिश्च सामान्येन गृह्यते। `युज समाधौ'(धा.पा.1178) दिवादिः, `युजिर् योगे'(धा.पा.1445) रुधादिः,द्वयोरपि ग्रहणम्। `रञ्ज रागे'(धा.पा.1168) इत्यस्य निपातनादनुनासिकलोपः। सम्पर्की। अनुरोधी। आयामी। आयासी। परिसारी। संसर्गी। परिदेवी। संज्वारी। परिक्षेपी। परिराटी। परिवादी। परिदाही। परिमोही। दोषी। द्वेषी। द्रोही। दोही। योगी। आक्रीडी। विवेकी। त्यागी। रागी। भागी। अतिचारी। अपचारी। आमोषी। अभ्याघाती।।

<वौ कषलसकत्थस्रम्भः।। 3.2.143 ।।>

`कष हिंसार्थः'(धा.पा.685) `लस श्लेषणक्रीडनयोः'(धा.पा.714),`कत्थ श्लाघायाम्'(धा.पा.37),`स्रम्भु विश्वासे'(धा.पा.757)इत्येतेभ्यो धातुभ्यो विशब्द उपपदे घिनुण् प्रत्ययो भवति। विकाषी। विलासी। विकत्थी। विस्रम्भी।।

<अपे च लषः।। 3.2.144 ।।>

`लष कान्तौ'(धा.पा.889)अस्माद्धातोरप उपपदे, चकाराद्वौ च घिनुण् भवति। अपलाषी। विलाषी।।

<प्रे लपसृद्रुमथवदवसः।। 3.2.145 ।।>

`प्र' उपपदे लपादीभ्यो घिनुण् भवति। प्रलापी। प्रसारी। प्रद्रावी। प्रमाथी। प्रवादी। प्रवासी। वस इति `वस निवासे'(धा.पा.1006) इत्यस्य ग्रहणम्, नाच्छादनार्थस्य; लुग्विकरणत्वात्।।

<निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ्।। 3.2.146 ।।>

निन्दादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु वुञ् प्रत्ययो भवति। पञ्चम्यर्थे प्रथमा। `क्लिश उपतापे'(धा.पा.1162),`क्लिशू विबाधने'(धा.पा.1523)-द्वयोरपि ग्रहणम्। निन्दकः। हिंसकः। क्लेशकः। खादकः। विनाशकः। परिक्षेपकः। परिराटकः। परिवादकः। व्याभाषकः। असूयकः।

ण्वुलैव सिद्धे वुञ्विधानं ज्ञापनार्थम्--ताच्छीलिकेषु वाऽसरूपन्यायेन तृजादयो न भवन्तीति(म.भा.2.133)।।

<देविक्रुशोश्चोपसर्गे।। 3.2.147 ।।>

देवयतेः क्रुशेश्चोपसर्गे उपपदे वुञ् प्रत्ययो भवति। आदेवकः, परिदेवकः। आक्रोशकः, परिक्रोशकः।

उपसर्ग इति किम् ? देवयिता। क्रोष्टा।।

<चलनशब्दार्थादकर्मकाद्युच्।। 3.2.148 ।।>

चलनार्थेभ्यः शब्दार्थेभ्यश्चाकर्मकेभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु युच्प्रत्ययो भवति। चलनः। चोपनः। शब्दार्थेभ्यः - शब्दनः। रवणः।

अकर्मकादिति किम् ? पठिता विद्याम्।।

<अनुदात्तेतश्च हलादेः।। 3.2.149 ।।>

अनुदात्तेद्यो धातुः हलादिरकर्मकः ततश्च युच् प्रत्ययो भवति। वर्त्तनः। वर्द्धनः।

अनुदात्तेत इति किम् ? भविता। हलादेरिति किम् ? प्रधिता। आदिग्रहणं किम् ? जुगुप्सनः। मीमांसनः। अकर्मकादित्येव - वसिता वस्त्रम्।।

<जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः।। 3.2.150 ।।>

जुप्रभृतिभ्यो धातुभ्यो युच् प्रत्ययो भवति तच्छीलादिषु कर्तृषु। `जु' इति सौत्रो धातुः। जवनः। चङ्क्रमणः। दन्द्रमणः। सरणः। गर्द्धनः। ज्वलनः। शोचनः। लषणः। पतनः। पदनः।

चलनार्थानां पदेश्च ग्रहणं सकर्मकार्थमिह। ज्ञापनार्थं च पदिग्रहणमन्ये वर्णयन्ति - ताच्छीलिकेषु मिथो वाऽसरूपविधिर्नास्तीति। तेनालङ्कृञस्तृन्न भवति - अलङ्कर्त्तेति। तथा हि - पदेरुकञा विशेषविहितेन सामान्यविहितस्य युचोऽसरूपत्वात्समावेशो भवेदेव, किमनेन विधानेन! ज्ञापनार्थं पुनर्विधीयते। प्रायिकं चैतद् ज्ञापनम्। क्वचित्समावेश इष्यत एव - गन्ता खेटं विकत्थनः।।

<क्रुधमण्डार्थेभ्यश्च।। 3.2.151 ।।>

`क्रुध कोपे'(धा.पा.1190),`मडि भूषायाम्'(धा.पा.1588)इत्येतदर्थेभ्यश्च धातुभ्यो युच् प्रत्ययो भवति। क्रोधनः। रोषणः। मण्डनः। भूषणः।।

<न यः।। 3.2.152 ।।>

यकारान्ताद्धातोर्युच् प्रत्ययो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते। क्नूयिता। क्ष्मायिता।।

<सूददीपदीक्षश्च।। 3.2.153 ।।>

सूद्, दीप, दीक्ष इत्येतेभ्यश्च युच् प्रत्ययो न भवति। अनुदात्तेत्वात् प्राप्तः प्रतिषिध्यते। सूदिता। दीपिता। दीक्षिता।

ननु च दीपेर्विशेषविहितो रप्रत्ययो दृश्यते "नमिकम्पिस्म्यजसकमहिंसदीपो रः"(3.2.167/3147) इति, स एव बाधको भविष्यति, किं प्रतिषेधेन ? वाऽसरूपेण युजपि प्राप्नोति। ताच्छीलिकेषु च वाऽसरूपविधिर्नास्तीति प्रायिकमेतदित्युक्तम्। तथा च समावेशो दृश्यते। कम्रा युवतिः। कमना युवतिः। कम्प्रा शाखा। कम्पना शाखेति।

सूदेर्युचि प्रतिषिद्धे कथं मधुसूदनः, रिपुसूदन इति ? अनित्योऽयं प्रतिषेध इति योगविभागाद्विज्ञायते।

अथ वा - नन्द्यादिषु मधुसूदनादयो द्रक्ष्यन्ते। "कृत्यल्युटो बहुलम्"(3.3.113/2841) इति ल्युडन्तो वा।।

<लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्।। 3.2.154 ।।>

लषादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु उकञ् प्रत्ययो भवति। अपलाषुकं वृषलसङ्गतम्। प्रपातुका गर्भा भवन्ति। उपपादुकं सत्त्वम्। उपस्थायुका एनं पशवो भवन्ति। प्रभावुकमन्नं भवति। प्रवर्षुकाः पर्जन्याः। आघातुकं पाकलिकस्य मूत्रम्। कामुका एनं स्त्रियो भवन्ति। आगामुकं वाराणसीं रक्ष आहुः। किंशारुकं तीक्ष्णमाहुः।।

<जल्पभिक्षकुट्टलुण्टवृङः षाकन्।। 3.2.155 ।।>

जल्पादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु षाकन् प्रत्ययो भवति। षकारो ङीषर्थः। जल्पाकः। भिक्षाकः। कुट्टाकः। लुण्टाकः। वराकः। वराकी।।

<प्रजोरिनिः।। 3.2.156 ।।>

प्रपूर्वाज्जवतेः तच्छीलादिषु कर्तृषु इनिः प्रत्ययो भवति। प्रजवी। प्रजविनौ।।

<जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च।। 3.2.157 ।।>

`जि जये'(धा.पा.561),`दृङ् आदरे'(धा.पा.1412); `क्षि क्षये'(धा.पा.236),`क्षि निवासगत्योः'(धा.पा.1408)-इति द्वयोरपि ग्रहणम्। प्रसू इति `षू प्रेरणे'(धा.पा.1409) इत्यस्य ग्रहणम्। जिप्रभृतिभ्यो धातुभ्य इनिः प्रत्ययो भवति तच्छीलादिषु कर्तृषु। जयी। दरी। क्षयी। विश्रयी। अत्ययी। वमी। अव्यथी। अभ्यमी। परिभवी। प्रसवी।।

<स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्।। 3.2.158 ।।>

`स्पृह ईप्सायाम्'(धा.पा.1872),`ग्रह ग्रहणे'(धा.पा.1900),`पत गतौ'(धा.पा.1862) चुरादावदन्ताः पठ्यन्ते; `दय दानगतिरक्षणेषु'(धा.पा.481),`द्रा कुत्सायां गतौ'(धा.पा.1055) निपूर्वस्तत्पूर्वश्च, तदो नकारान्तता च निपात्यते; `डुधाञ्'(धा.पा.1093) श्रत्पूर्वः इत्येतेभ्यस्तच्छीलादिषु कर्तृषु आलुच् प्रत्ययो भवति। स्पृहयालुः। गृहयालुः। पतयालुः। दयालुः। निद्रालुः। तन्द्रालुः। श्रद्धालुः।

आलुचि शीङो ग्रहणं कर्तव्यम्(म.भा.2.134)। शयालुः।।

<दाधेट्सिशदसदो रुः।। 3.2.159 ।।>

दा, धेट्, सि, शद्, सद इत्येतेभ्यो रुः प्रत्ययो भवति। दारुः। धारुर्वत्सो मातरम्। "न लोकाव्ययनिष्ठा खलर्थतृनाम्"(2.3.69/627) इत्युकारप्रश्लेषात् षष्ठी न भवति। सेरुः। शद्रुः। सद्रुः।।

<सृघस्यदः क्मरच्।। 3.2.160 ।।>

सृ, घसि, अद् इत्येतेभ्यो धातुभ्यः तच्छीलादिषु कर्तृषु क्मरच् प्रत्ययो भवति। सृमरः। घस्मरः। अद्मरः।।

<भञ्जभासमिदो घुरच्।। 3.2.161 ।।>

भञ्ज,भास, मिद इत्येतेभ्यो घुरच् प्रत्ययो भवति तच्छीलादिषु कर्तृषु। भङ्गुरं काष्ठम्। घित्वात्कुत्वम्। भासुरं ज्योतिः। मेदुरः पशुः। भञ्जेः कर्मकर्त्तरि प्रत्ययः, स्वभावात्।।

<विदिभिदिच्छिदेः कुरच्।। 3.2.162 ।।>

ज्ञानार्थस्य विदेर्ग्रहणम्, न लाभाद्यर्थस्य(धा.पा.1433); स्वभावात्। विदादिभ्यो धातुभ्यः तच्छीलादिषु कर्तृषु कुरच् प्रत्ययो भवति। विदुरः पण्डितः। भिदुरं काष्ठम्। छिदुरा रज्जुः। भिदिच्छिदयोः कर्मकर्तरि प्रयोगः।

व्यधेः सम्प्रसारणं कुरच्च वक्तव्यः विधुरः।।

<इण्नश्जिसर्त्तिभ्यः क्वरप्।। 3.2.163 ।।>

इण्, नश,जि, सर्त्ति इत्येतेभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु क्वरप् प्रत्ययो भवति। पकारस्तुगर्थः। इत्वरः, इत्वरी। नश्वरः, नश्वरी। जित्वरः, जित्वरी। सृत्वरः, सृत्वरी। "नेड् वशि कृति"(7.2.8/2981) इतीट्प्रतिषेधः।।

<गत्वरश्च।। 3.2.164 ।।>

`गत्वर' इति निपात्यते। गमेरनुनासिकलोपः क्वरप्प्रत्ययश्च। गत्वरः। गत्वरी।।

<जागुरूकः।। 3.2.165 ।।>

जागर्त्तेरूकः प्रत्ययो भवति तच्छीलादिषु कर्तृषु। जागरूकः।।

<यजजपदशां यङः।। 3.2.166 ।।>

यजादीनां यङन्तानामूकः प्रत्ययो भवति तच्छीलादिषु कर्तृषु। यायजूकः। जञ्जपूकः। दन्दशूकः।।

<नमिकम्पिस्म्यजसकमहिंसदीपो रः।। 3.2.167 ।।>

नम्यादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु रः प्रत्ययो भवति। नम्रं काष्ठम्। कम्प्रा शाखा। स्मेरं मुखम्। अजस्रं जुहोति। कम्रा युवतिः। हिंस्रं रक्षः। दीप्रं काष्ठम्। अजस्रमिति`जसु मोक्षणे'(धा.पा.1212) नञ्पूर्वो रप्रत्ययान्तः क्रियासातत्ये वर्तते।।

<सनाशंसभिक्ष उः।। 3.2.168 ।।>

सन्निति सन्प्रत्ययान्तो गृह्यते, न सनिर्धातुः; अनभिधानात्, व्याप्तिन्यायाद्वा। सन्नन्तेभ्यो धातुभ्य आशंसेर्भिक्षेश्च तच्छीलादिषु कर्तृषु उः प्रत्ययो भवति। चिकीर्षुः। जिहीर्षुः। आशंसुः। भिक्षुः। `आङः शसि इच्छयाम्'(धा.पा.629) इत्यस्य ग्रहणम्, न शंसेः स्तुत्यर्थस्य(धा.पा.728)।।

<विन्दुरिच्छुः।। 3.2.169 ।।>
विदेर्नुमागम इषेश्छत्वमुकारश्च प्रत्ययो निपात्यते तच्छीलादिषु कर्तृषु। वेदनशीलो विन्दुः। एषणशील इच्छुः।।
<क्याच्छन्दसि।। 3.2.170 ।।>
`क्य' इति क्यच्क्यष्क्यङां सामान्येन निर्देशः। क्यप्रत्यान्ताद्धातोश्छन्दसि विषये तच्छीलादिषु कर्तृषु उकारप्रत्ययो भवति। `मित्रयुः'(मै.सं.2.6.12)। "न छन्दस्यपुत्रस्य"(7.4.35/3588)इति प्रतिषेधान्न दीर्घः।`संस्वेदयुः'(मै.सं.4.12.2.44)। `सुम्नयुः'(ऋ.1.79.10)।
छन्दसीति किम् ? मित्रीयिता।
<आदृगमहनजनः किकिनौ लिट् च।। 3.2.171 ।।>
आकारान्तेभ्यः ऋवर्णान्तेभ्यः गम हन जन इत्येतेभ्यश्च छन्दसि तच्छीलादिषु किकिनौ प्रत्ययौ भवतः। लिड्वच्च तौ भवतः। आत् इति तकारो मुखसुखार्थः,न त्वयं तपरः मा भूत्तादपि परः तपरः इति ऋकारे तत्कालग्रहणम्। `पपिः सोमं ददिर्गाः'(ऋ.6.23.4)। `ददथुः मित्रावरुणा ततुरिम्'(ऋ.4.39.2)मित्रावरुणौ ततुरिः। `दूरे ह्यध्वा जगुरिः'(ऋ.10.108.1)`जग्मिर्युवा'(ऋ.7.20.1)`ज्घ्निर्वृत्रम्'(ऋ.9.61.20)`जज्ञिबीजम्'(तै.सं.7.5.20.1) अथ किमर्थं कित्वम्, यावता "असंयोगाल्लिट् कित्"(1.2.5/2242) इति कित्त्वं सिद्धमेव ? "ऋच्छत्यृताम्"(7.4.11/2383) इति लिटि गुणः प्रतिषेधविषय आरभ्यते, तस्यापि बाधनार्थं कित्त्वम्।
किकिनवुत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्(म.भा.2.135)।` सेदः'(तै.आ.4.22.1)।` नेमिः'(ऋ.2.5.3)
भाषायां धाञ्कृञ्सृजनिगमिनमिभ्यः किकिनौ वक्तव्यौ(म.भा.2.135)। दधिः। चक्रिः। सस्रिः। जज्ञिः। जग्मिः। नेमिः।
सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्यौ।"दीर्घोऽकितः"(7.4.83/2632)। सासहिः। वावहिः। चाचलिः। पापतिः।।
<स्वपितृषोर्नजिङ्।। 3.2.172 ।।>
`छन्दसि' इति निवृत्तम्। स्वपेस्तृषेश्च तच्छीलादिषु कर्तृषु नजिङ् प्रत्ययो भवति। स्वप्नक्। तृष्णक्।
धृषेश्चेति वक्तव्यम्। घृष्णक्।।
<शृवन्द्योरारुः।। 3.2.173 ।।>
`शृ हिसायाम्'(धा.पा.1489),`वदि अभिवादनस्तुत्योः'(धा.पा.11)इत्येताभ्यां धातुभ्यां तच्छीलादिषु कर्तृष्वारुः प्रत्ययो भवति। शरारुः। वन्दारुः।।
<भियः क्रुक्लुकनौ।। 3.2.174 ।।>
`ञिभी भये'(धा.पा.1085)इत्यस्माद्धातोः तच्छीलादिषु कर्तृषु क्रुक्लुकनौ प्रत्ययौ भवतः। भीरुः। भीलुकः।
क्रुकन्नपि वक्तव्यः(म.भा.2.135)। भीरुकः।।
<स्थेशभासपिसकसो वरच्।। 3.2.175 ।।>
`ष्ठा गतिनिवृत्तौ'(धा.पा.929),`ईश ऐश्वर्ये'(धा.पा.1021),`भासृ दीप्तौ'(धा.पा.624),`पिसृ पेसृ गतौ'(धा.पा.719/720),`कस गतौ'(धा.पा.861) इत्येतेभ्यस्तच्छीलादिषु कर्तृषु वरच् प्रत्ययो भवति। स्थावरः। ईश्वरः। भास्वरः। पेस्वरः। विकस्वरः।।
<यश्च यङः।। 3.2.176 ।। >
`या प्रापणे'(धा.पा.1050)इत्यस्माद्यङन्तात्तच्छीलादिषु कर्तृषु वरच् प्रत्ययो भवति। यायावरः।
<भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्।। 3.2.177 ।।>
भ्राजादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु क्विप् प्रत्ययो भवति। विभ्राट्, विभ्राजौ, विभ्राजः। भाः, भासौ, भासः। धूः धुरौ, धुरः। विद्युत्, विद्युतौ, विद्युतः। ऊर्क्, ऊर्जौः ऊर्जः। पूः पुरौ, पुरः।
जवतेर्दीर्घश्च निपात्यते। जूः जुवौ, जुवः। ग्रावस्तुत्, ग्रावस्तुतौ, ग्रावस्तुतः।
किमर्थमिदमुच्यते, यावता "अन्येभ्योऽपि दृश्यते"(3.2.75/2980)"क्विप् च"(3.2.76/2983) इति क्विप्सिद्ध एव ? ताच्छीलिकैर्बाध्यते। वाऽसरूपविधिर्नास्तीत्युक्तम्। अथ तु प्रायिकमेतत् ? ततस्तस्यैवायं प्रपञ्चः।।
<अन्येभ्योऽपि दृश्यते।। 3.2.178 ।।>
अन्येभ्योऽपि धातुभ्यस्ताच्छीलिकेषु क्विप् प्रत्ययो दृश्यते। युक्। छित्। भित्। दृशिग्रहणं विध्यन्तरोपसङ्ग्रहार्थम्। क्वचिद्दीर्घः, क्वचिद्द्विर्वचनम्, क्वचित्सम्प्रसारणम्, क्वचिदसम्प्रसारणम्। तथा चाह -
क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च(म.भा.2.136)।
वचि - वाक्। प्रच्छि - शब्दप्राट्। आयतस्तूः। कटप्रूः। जूः। श्रीः। जुग्रहणेनात्र नार्थः; भ्राजादिसूत्र एव गृहीतत्वात्।
द्युतिगमिजुहोतीनां द्वे च(म.भा.2.136)। दिद्युत्। जगत्।
जुहोतेर्दीर्घश्च(म.भा.2.136)। जुहूः।

`दृ भये'(धा.पा.809) इत्यस्य ह्रस्वश्च द्वे च(म.भा.2.136)। ददृत्।

ध्यायतेः सम्प्रसारणं च(म.भा.2.136)। धीः।।

<भुवः संज्ञान्तरयोः।। 3.2.179 ।।>

भवतेर्धातोः संज्ञायामन्तरे च गम्यमाने क्विप् प्रत्ययो भवति। विभूर्नाम कश्चित्। अन्तरे - प्रतिभूः। धनिकाधमर्णयोरन्तरे यस्तिष्ठति स प्रतिभूरुच्यते।

<विप्रसम्भ्यो ड्वसंज्ञायाम्।। 3.2.180 ।।>

`भुवः' इति वर्त्तते। वि, प्र, सम् इत्येवम्पूर्वाद् भवतेर्धातोः डुप्रत्ययो भवति, न चेत्संज्ञा गम्यते। विभुः सर्वगतः। प्रभुः स्वामी। सम्भुर्जनिता।

असंज्ञायामिति किम् ? विभूर्नाम कश्चित्।

डुप्रकरणे मितद्रवादिभ्य उपसङ्ख्यानम्(म.भा.2.136)। मितं द्रवति मितद्रुः। शम्भुः।

<धः कर्मणि ष्ट्रन्।। 3.2.181 ।।>

धयतेर्दधातेश्च कर्मणि कारके ष्ट्रन्प्रत्ययो भवति। षकारो ङीषर्थः। धयन्ति तां दधति वा भैषज्यार्थमिति धात्री। स्तनदायिनी आमलकी चोच्यते।।

<दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे।। 3.2.182 ।।>

`दाप् लवने'(धा.पा.1060),`णीञ् प्रापणे'(धा.पा.902),`शसु हिंसायाम्'(धा.पा.727),`यु मिश्रणे',`युजिर् योगे'(धा.पा.1445),`ष्टुञ् स्तुतौ'(धा.पा.727),`तुद व्यथने'(धा.पा.1034),षिञ् बन्धने'(धा.पा.1249),`षिचिर् क्षरणे'(धा.पा.1435),`मिह सेचने'(धा.पा.993),`पत्लृ गतौ'(धा.पा.846),`दंश दशने'(धा.पा.990),`णह बन्धने'(धा.पा.1167) इत्येतेभ्यो धातुभ्यः करणे कारके ष्ट्रन्प्रत्ययो भवति। दात्यनेनेति दात्रम्। नेत्रम्। शस्त्रम्। योत्रम्। योक्त्रम्। स्तोत्रम्। तोत्रम्। सेत्रम्। सेक्त्रम्। मेढ्रम्। पत्त्रम्। दंष्ट्रा। आजादित्वात् टाप्, न ङीप्।

दंशेरनुनासिकलोपेन निर्देशो ज्ञापनार्थः, क्ङितोऽन्यस्मिन्नपि प्रत्यये नलोपः क्वचिद्भवतीति; तेन ल्युट्यपि भवति - दशनम्। नद्ध्री।

<हलसूकरयोः पुवः।। 3.2.183 ।।>

`पू' इति पूङ्पूञोस्सामान्येन ग्रहणम्। अस्माद्धातोः करणे कारके ष्ट्रन् प्रत्ययो भवति। तच्चेत्करणं हलसूकरयोरवयवो भवति। हलस्य पोत्रम्। सूकरस्य पोत्रम्। मुखमुच्यते।।

<अर्त्तिलूधूसूखनसहचर इत्रः।। 3.2.184 ।।>

`ऋ गतौ'(धा.पा.1099),`लूञ् छेदने'(धा.पा.1484),`धू विधूनने'(धा.पा.1399),`षू प्रेरणे'(धा.पा.1409), `खनु अवदारणे'(धा.पा.879),`षह मर्षणे'(धा.पा.853)

,`चर गतिभक्षणयोः'(धा.पा.559) इत्येतेभ्यो धातुभ्यः करणे कारके इत्र प्रत्ययो भवति। अरित्रम्। लवित्रम्। धवित्रम्। सवित्रम्। खनित्रम्। सहित्रम्। चरित्रम्।।

<पुवः संज्ञायाम्।। 3.2.185 ।।>

पूङ्पूञोः सामान्येन ग्रहणम्। पवतेर्धातोः करणे कारके इत्रप्रत्ययो भवति, समुदायेन चेत्संज्ञा गम्यते। दर्भः पवित्रम्। बर्हिष्पवित्रम्।

<कर्त्तरि चर्षिदेवतयोः।। 3.2.186 ।।>

`पुवः' इति वर्त्तते। पुवः करणे कर्त्तरि च इत्रप्रत्ययो भवति। ऋषिदेवतयोर्यथासङ्ख्यं सम्बन्धः। ऋषौ करणे देवतायां कर्त्तरि। पूयतेऽनेनेति पवित्रोऽयमृषिः। देवतायाम् - `अग्निः पवित्रं स मा पुनातु। वायुः सोमः सूर्य इन्द्रः पवित्रं ते मा पुनन्तु'(नि.5.5)।।

<ञीतः क्तः।। 3.2.187 ।।>

`ञि' इद्यस्यासौ ञीत्। ञीतो धातोर्वर्तमानेऽर्थे क्तप्रत्ययो भवति। भूते निष्ठा विहिता, वर्तमाने न प्राप्नोतीति विधीयते। `ञिमिदा स्नेहने'(धा.पा.1244) मिन्नः। ञिक्ष्विदा - क्ष्विण्णः। ञिधृषा - धृष्टः।

<मतिबुद्धिपूजार्थेभ्यश्च।। 3.2.188 ।।>

मतिः = इच्छा। बुद्धिः = ज्ञानम्। पूजा=सत्कारः, इत्येतदर्थेभ्यश्च धातुभ्यो वर्त्तमानार्थे क्तप्रत्ययो भवति। राज्ञां मतः। राज्ञामिष्टः। राज्ञां बुद्धः। राज्ञां ज्ञातः। राज्ञां पूजितः। राज्ञामर्चितः। अनुक्तसमुच्चयार्थश्चकारः।

`शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि।

रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि।।1।।

हृष्टतुष्टौ तथा कान्तस्तथोभौ संयतोद्यतौ।

कष्टं भविष्यतीत्याहुरमृतः पूर्ववत्स्मृतः'।।2।।(म.भा.2.137)

कष्ट इति भविष्यति काले। अमृत इति पूर्ववत्। वर्त्तमान इत्यर्थः।

तथा सुप्तः, शयितः, आशितः, लिप्तः, तृप्तः इत्येवमादयोऽपि वर्त्तमाने द्रष्टव्याः।।

इति श्रीजयादित्यविरचितायां काशिकावृतौ

तृतीयाध्यायस्य द्वितीयः पादः।।

-------******------

3.3

काशिकावृत्तिः
अथ तृतीयाध्याये तृतीयः पादः
<उणादयो बहुलम् ।। 3-3-1 ।।>
`वर्त्तमाने' इत्येव, `संज्ञायाम्' इति च । उणादयः प्रत्यया वर्त्तमानेऽर्थे संज्ञायां विषये बहुलं भवन्ति । यतो विहितास्ततोऽन्यत्रापि भवन्ति । केचिदविहिता एव प्रयोगत उन्नीयन्ते । `कृवापाजिमिस्वदिसाध्यशूभ्य उण्'(उ.सू.1)। कारुः, वायुः, पायुः, जायुः, मायुः, स्वादुः, साधुः, आशुः ।
`बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम् ।
कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु ।।
नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम् ।
यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् ।।
संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ।।'(म.भा.2.138)

<भूतेऽपि दृश्यन्ते ।। 3-3-2 ।।>
पूर्वत्र वर्त्तमानाधिकाराद् भूतार्थमिदं वचनम् । भूते काले उणादयः प्रत्यया दृश्यन्ते । वृत्तमिदं वर्त्म । चरितं तदिति चर्म । भसितं तदिति भस्म ।
दृशिग्रहणं प्रयोगानुसारार्थम् ।।
<भविष्यति गम्यादयः ।। 3-3-3 ।।>
भविष्यति काले गम्यादयः शब्दाः साधवो भवन्ति । प्रत्ययस्यैव भविष्यत्कालता विधीयते, न प्रकृतेः । गमी ग्रामम् । आगामी । प्रस्थायी । प्रतिरोधी । प्रतिबोधी । प्रतियोधी । प्रतियोगी । प्रतियायी । आयावी । भावी ।।
* अनद्यतन उपसङ्ख्यानम् * (म.भा.2.139)। श्वो गमी ग्रामम् ।।
</भविष्यति गम्यादयः।। 3-3-3।।>

<यावत्पुरानिपातयोर्लट् ।। 3-3-4 ।।>
`भविष्यति' इत्येव । यावत्पुराशब्दयोर्निपातयोरुपपदयोर्भविष्यति काले धातोर्लट् प्रत्ययो भवति । यावद् भुङ्क्ते । पुरा भुङ्क्ते ।
निपातयोरिति किम् ? यावद्दास्यति तावद्भोक्ष्यते । करणभूतया पुरा व्रजिष्यति ।।
™ttṅti{tÔēútÊxt{ttit™ttGH±tl̄]ghõ** 3-3-4**>

<विभाषा कदाकर्ह्योः ।। 3-3-5 ।।>
कदा, कर्हि-इत्येतयोरुपपदयोर्विभाषा भविष्यति काले धातोर्लट् प्रत्ययो भवति । कदा भुङ्क्ते, कदा भोक्ष्यते, कदा भोक्ता । कर्हि भुङ्क्ते, कर्हि भोक्ष्यते। कर्हि भोक्ता ।।
<किंवृत्ते लिप्सायाम् ।। 3-3-6 ।।>
`विभाषा' इति वर्त्तते । किमो वृत्तं किंवृत्तम् । वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात् । डतरडतमौ चेति परिस9ङ्ख्यानं स्मर्यते । किंवृत्त उपपदे लिप्सायां भविष्यति काले धातोर्विभाषा लट् प्रत्ययो भवति । लिप्सा=लब्धुमिच्छा, प्रार्थनाभिलाषः । कं भवन्तो भोजयन्ति । कं भवन्तो भोजयितारः । लब्धुकामः पृच्छति - कतरो भिक्षां दास्यति, ददाति, दाता वा । कतमो भिक्षां दास्यति, ददाति, दाता वा ।
लिप्सायामिति किम् ? कः पाटलिपुत्त्रं गमिष्यति ।।
<लिप्स्यमानसिद्धौ च ।। 3-3-7 ।।>
`विभाषा' इत्येव । लिप्स्यमानात्सिद्धि=लिप्स्यमानसिद्धिः, लिप्स्यमानसिद्धौ गम्यमानायां भविष्यति काले धातोर्विभाषा लट् प्रत्ययो भवति ।
अकिंवृत्तार्थोऽयमारम्भः । यो भक्तं ददाति स स्वर्गं गच्छति, यो भक्तं दास्यति स स्वर्गं गमिष्यति, यो भक्तं दाता स स्वर्गं गन्ता ।
लिप्स्यमानाद्भक्तात्स्वर्गसिद्धिमाचक्षाणो दातारं प्रोत्साहयति ।।

<लोडर्थलक्षणे च ।। 3-3-8 ।।>

लोडर्थः प्रेषादिर्लक्ष्यते येन स लोडर्थलक्षणो धात्वर्थः, तत्र वर्त्तमानाद्धातोर्भविष्यति काले विभाषा लट् प्रत्ययो भवति । उपाध्यायश्चेदागच्छति, उपाध्यायश्चेदागमिष्यति, उपाध्यायश्चेदागन्ता, अथ त्वं छन्दोऽधीष्व, अथ त्वं व्याकरणमधीष्व । उपाध्यायागमनमध्ययनप्रैषस्य लक्षणम् ।।

<लिङ् चोर्ध्वमौहूर्त्तिके ।। 3-3-9 ।।>

`भविष्यति' `विभाषा' `लोडर्थलक्षणे' इति सर्वमनुवर्त्तते । ऊर्ध्वमौहूर्त्तिके भविष्यति काले लोडर्थलक्षणार्थे वर्तमानाद्धातोर्विभाषा लिङ् प्रत्ययो भवति, चकाराल्लट् च । ऊर्ध्वमुहूर्त्ताद्भव ऊर्ध्वमौहूर्त्तिकः । निपातनात्समासः, उत्तरपदवृद्धिश्च । भविष्यतश्चैतद्विशेषणम् । ऊर्ध्वं मुहूर्त्ताद्=उपरिमुहूर्तस्य, उपाध्यायश्चेदागच्छेत् उपाध्यायश्चेदागच्छति उपाध्यायश्चेदागमिष्यति उपाध्यायश्चेदागन्ता, अथ त्वं छन्दोऽधीष्व, अथ त्वं व्याकरणमधीष्व ।।

<तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ।। 3-3-10 ।।>

`भविष्यति' इत्येव । क्रियार्थायां क्रियायामुपपदे धातोर्भविष्यति काले तुमुन्ण्वुलौ प्रत्ययौ भवतः । भोक्तुं व्रजति भोजको व्रजति । भुजिक्रियार्थो व्रजिरत्रोपपदम् ।

क्रियायामिति क्रिम् ? भिक्षिष्य इत्यस्य जटाः । क्रियार्थायामिति किम् ? धावतस्ते पतिष्यति दण्डः ।

अथ किमर्थं ण्वुल् विधीयते, यावता "ण्वुल्तृचौ"(3.1.133/2895) इति सामान्येन विहित एव, सोऽस्मिन्नपि विषये भविष्यति ? लृटा क्रियार्थोपपदेन बाध्यते । वासरूपविधिना सोऽपि भविष्यति ? एवं तर्ह्येतज्ज्ञाप्यते,क्रियायामुपपदे क्रियार्थायां वासरूपेण तृजादयो न भवन्तीति । तेन कर्त्ता व्रजति, विक्षिपो व्रजतीत्येवमादि निवर्त्त्यंते ।।

<भाववचनाश्च ।। 3-3-11 ।।>

`भविष्यति' इत्येव । "भावे"(3.3.18/3184) इति प्रकृत्य ये घञादयो विहितास्ते च भाववचना भविष्यति काले क्रियायामुपपदे क्रियार्थायां भवन्ति । किमर्थमिदम्, यावता विहिता एव ते ? क्रियार्थोपपदे विहितेनास्मिन्विषये तुमुना बाध्येरन् । वासरूपविधिश्चात्र नास्तीत्युक्तम् ।

अथ वचनग्रहणं किमर्थम् ? वाचका यथा स्युः । कथं च वाचका भवन्ति ? याभ्यः प्रकृतिभ्यो येन विशेषणेन विहिता यदि ताभ्यस्तथैव भवन्ति, नासामञ्जस्येनेति । पाकाय व्रजति । भूतये व्रजति । पुष्टये व्रजति ।।

<अण् कर्मणि च ।। 3-3-12 ।।>

`भविष्यति' इत्येव । चकारः सन्नियोगार्थः । धातोरण्प्रत्ययो भवति भविष्यति काले' कर्मण्युपपदे क्रियायां च क्रियार्थायाम् । "कर्मण्यण्"(3.2.1/2913) इति सामान्येन विहितो वासरूपविधेरभावाद् ण्वुला बाधितः पुनरण्विधीयते, सोऽपवादत्वाद् ण्वुलं बाधते, परत्वाच्च कादीन् । तेनापवादविषयेऽपि भवत्येव - काण्डलावो व्रजति, अश्वदायो व्रजति, गोदायो व्रजति । कम्बलदायो व्रजति ।।

<लृट् शेषे च ।। 3-3-13 ।।>

`भविष्यति' इत्येव । शेषः क्रियार्थोपपदादन्यः । शेषे शुद्धे भविष्यति काले चकारात् क्रियायां चोपपदे क्रियार्थायां धातोर्लृट् प्रत्ययो भवति । करिष्यामीति व्रजति । हरिष्यामीति व्रजति । शेषे खल्वपि करिष्यति, हरिष्यति ।

<लृटः सद्वा ।। 3-3-14 ।।>

लृटः स्थाने सत्संज्ञौ शतृशानचौ वा भवतः । व्यवस्थितविभाषेयम् । तेन यथा लटः शतृशानचौ, तथाऽस्यापि भवतः । अप्रथमासमानाधिकरणादिषु नित्यम् । अन्यत्र विकल्पः - करिष्यन्तं देवदत्तं पश्य, करिष्यमाणं देवदत्तं पश्य । हे करिष्यन्, हे करिष्यमाण । अर्जयिष्यमाणो वसति ।

प्रथमासमानाधिकरणे विकल्पः - करिष्यन्देवदत्तः, करिष्यमाणो देवदत्तः । करिष्यते, करिष्यति ।।

<अनद्यतने लुट् ।। 3-3-15 ।।>

`भविष्यति' इत्येव । भविष्यदनद्यतनेऽर्थे वर्त्तमानाद् धातोर्लुट् प्रत्ययो भवति । लृटोऽपवादः । श्वः कर्ता । श्वो भोक्ता । `अनद्यतने' इति बहुव्रीहिनिर्देशः, तेन व्यामिश्रे न भवति - अद्य श्वो वा ममिष्यतीति ।

*परिदेवने श्वस्तनी भविष्यदर्थे वक्तव्या *(म.भा.2.143) । इयं नु कदा गन्ता, यैवं पादौ निदधाति । अयं कदाऽध्येता, य एवमनभियुक्तः ।।

<पदरुजविशस्पृशो घञ् ।। 3-3-16 ।।>

`भविष्यति' इति निवृत्तम् । इत उत्तरं त्रिष्वपि कालेषु प्रत्ययाः । पदादिभ्यो धातुभ्यो घञ् प्रत्ययो भवति । पद्यतेऽसौ पादः । रुजत्यसौ रोगः । विशत्यसौ वेशः ।

*स्पृश उपताप इति वक्तव्यम् *(म.भा.2.144) । स्पृशतीति स्पर्श उपतापः । ततोऽन्यत्र पचाद्यच् भवति - स्पर्शो देवदत्तः । स्वरे विशेषः ।।

<सृस्थिरे ।। 3-3-17 ।।>

सर्त्तेर्धातोः स्थिरे कर्त्तरि घञ् प्रत्ययो भवति । स्थिर इति कालान्तरस्थायी पदार्थ उच्यते, स चिरं तिष्ठन् कालान्तरं सरतीति धात्वर्थस्य कर्त्ता युज्यते । चन्दनसारः । खदिरसारः ।

स्थिरे इति किम् ? सर्त्ता, सारकः ।

* व्याधिमत्स्यबलेष्विति वक्तव्यम् *(म.भा.2.144) । अतीसारो व्याधिः । विसारो मत्स्यः । सारो बलम् ।।

<भावे ।। 3-3-18 ।।>

भावे वाच्ये धातोर्घञ् प्रत्ययो भवति । पाकः । त्यागः । रागः । क्रियासामान्यवाची भवतिः, तेनार्थनिर्देशः क्रियमाणः सर्वधातुविषयः कृतो भवति ।

धात्वर्थश्च धातुनैवोच्यते । यस्तस्य सिद्धता नाम धर्मः, तत्र घञादयः प्रत्यया विधीयन्ते ।

पुंल्लिङ्गैकवचनं चात्र न तन्त्रम् । लिङ्गान्तरे वचनान्तरेऽपि चात्र प्रत्यया भवन्त्येव - पक्तिः, पक्वम्, पचनम् । पाकौ, पाका इति ।।

<अकर्तरि च कारके संज्ञायाम् ।। 3-3-19 ।।>

कर्तृवर्जिते कारके संज्ञायां विषये धातोर्घञ् भवति । प्रास्यन्ति तं प्रासः । प्रसीव्यन्ति तं प्रसेवः । आहरन्ति तस्माद्रसमित्याहारः । मधुराहारः । तक्षशिलाहारः ।

अकर्त्तरीति किम् ? मिषत्यसौ मेषः । संज्ञायामिति किम् ? कर्त्तव्यः कटः ।

चकारः संज्ञाव्यभिचारार्थः । को भवता दायो दत्तः । को भवता लाभो लब्धः । कारकग्रहणं पर्युदासे न कर्त्तव्यम् ? तत्क्रियते प्रसज्यप्रतिषेधेऽपि समासोऽस्तीति ज्ञापनार्थम् - "आदेच उपदेशेऽशिति"(6.1.45/2370) इति । इत उत्तरम् `भावे' `अकर्त्तरि च कारके' इति च द्वयमनुवर्त्तते ।।

<परिमाणाख्याया सर्वेभ्यः ।। 3-3-20 ।।.

परिमाणाख्यायां गम्यमानायां सर्वेभ्यो धातुभ्यो घञ् प्रत्ययो भवति । एकस्तण्डुलनिश्चायः । द्वौ शूर्पनिष्पावौ । `कृ विक्षेपे'(धा.पा.1410) द्वौ कारौ । त्रयः काराः । सर्वग्रहणमपोऽपि बाधनार्थम् । पुरस्तादपवादन्यायेन(व्या.प.9) ह्यचमेव बाधेत, नापम् ।

परिमाणाख्यायामिति किम् ? निश्चायः । आख्याग्रहणं रूढिनिरासार्थम् । तेन सङ्ख्यापि गृह्यते, न प्रस्थाद्येव । घञनुक्रमणमजपोर्विषये, स्त्रीप्रत्ययास्तु न बाध्यन्ते - एका तिलोच्छित्तिः, द्वे प्रसूती ।

*दारजारौ कर्तरि णिलुक् च *(म.भा.2.147) दारयन्तीति दाराः । जरयन्तीति जाराः ।।

<इङश्च ।। 3-3-21 ।।>

इङो धातोर्घञ् प्रत्ययो भवति । अचोऽपवादः । अध्यायः । उपेत्यास्मादधीते उपाध्यायः ।

* अपादाने स्त्रियामुपसङ्ख्यानं तदन्ताच्च वा ङीष् * (म.भा.2.147)। उपाध्याया, उपाध्यायी ।

* शृ वायुवर्णनिवृतेषु *(म.भा.2.147) । शारो वायुः । शारो वर्णः । शारो निवृतम् ।।

`गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः'(म.भा.2.147) ।

<उपसर्गे रुवः ।। 3-3-22 ।।>

उपसर्गे उपपदे रौतेर्धातोर्घञ्, प्रत्ययो भवति । अपोऽपवादः संरावः । उपरावः ।

उपसर्ग इति किम् ? रवः ।।

<समि युद्रुदुवः ।। 3-3-23 ।।>

समि उपपदे यु, द्रु, दु इत्येतेभ्यो धातुभ्यो घञ् प्रत्ययो भवति । संयावः । संद्रावः । संदावः ।

समीति किम् ? प्रयवः ।।

<श्रिणीभुवोऽनुपसर्गे ।। 3-3-24 ।।>

श्रि, णी, भू इत्येतेभ्यो धातुभ्योऽनुपसर्गेभ्यो घञ् प्रत्ययो भवति । अजपोरपवादः । श्रायः । नायः । भावः ।

अनुपसर्ग इति किम् ? प्रश्रयः । प्रणयः । प्रभवः । कथं प्रभावो राज्ञः ? प्रकृष्टो भाव इति प्रादिसमासो भविष्यति । कथं च नयो राज्ञः ? "कृत्यल्युटो बहुलम्"(3.3.113/2841) इत्यज् भविष्यति ।।

<वौ क्षुश्रुवः ।। 3-3-25 ।।>

वावुपपदे क्षु, श्रु इत्येताभ्यां धातुभ्यां घञ् प्रत्ययो भवति । अपोऽपवादः । विक्षावः । विश्रावः ।

वाविति किम् ? क्षवः । श्रवः ।।

<अवोदोर्नियः ।। 3-3-26 ।।>

अव, उत् इत्येतयोरुपपदयोर्नयतेर्धातोर्घञ् प्रत्ययो भवति । अवनायः । उन्नायः ।

कथमुन्नयः पदार्थानाम् ?"कृत्यल्युटो बहुलम्"(3.3.113/2841) इत्यज् भविष्यति ।।

<प्रे द्रुस्तुस्रुवः ।। 3-3-27 ।।>

प्रशब्द उपपदे द्रु, स्तु, स्रु इत्येतेभ्यो धातुभ्यो घञ् प्रत्ययो भवति । प्रद्रावः । प्रस्तावः । प्रस्रावः ।

प्र इति किम् ? द्रवः । स्तवः स्रवः ।।

<निरभ्योः पूल्वोः ।। 3-3-28 ।।>

`पू' इति पूङ्पूञोः सामान्येन ग्रहणम् । `लूञ् छेदने'(धा.पा.1484) । यथासङ्ख्यमुपसर्गसम्बन्धः । निरभिपूर्वयोः पूल्वोर्धात्वोर्घञ् प्रत्ययो भवति । निष्पावः । अभिलावः ।

निरभ्योरिति किम् ? पवः । लवः ।।

<उन्न्योर्ग्रः ।। 3-3-29 ।।>

`गॄ शब्दे'(धा.पा.1499), `गॄ निगरणे'(धा.पा.1411) द्वयोरपि ग्रहणम् । उन्न्योरुपपदयोः `गॄ' इत्येतस्माद्धातोर्घञ् प्रत्ययो भवति । उद्गारः समुद्रस्य । निगारो देवदत्तस्य ।

उन्न्योरिति किम् ? गरः ।।

<कॄ धान्ये ।। 3-3-30 ।।>

`उन्न्योः' इति वर्त्तते । `कॄ' इत्येतस्माद्धातोरुन्न्योरुपपदयोर्घञ् प्रत्ययो भवति, धान्यविषयश्चेद्धात्वर्थो भवति । विक्षेपार्थस्य किरतेर्ग्रहणम्, न हिंसार्थस्यः, अनभिधानात् । उत्कारो धान्यस्य । निकारो धान्यस्य ।

धान्य इति किम् ? भैक्ष्योत्करः । पुष्पनिकरः ।।

<यज्ञे समि स्तुवः ।। 3-3-31 ।।>

यज्ञविषये प्रयोगे सम्पूर्वात्स्तौतेर्घञ् प्रत्ययो भवति । संस्तावश्छन्दोगानाम् । समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगाः स देशः `संस्तावः' इत्युच्यते ।

यज्ञ इति किम् ? संस्तवश्छात्रयोः ।।

<प्रेस्त्रोऽयज्ञे ।। 3-3-32 ।।>

`स्तृञ् आच्छादने'(धा.पा.1253) अस्माद्धातोः प्रशब्दे उपपदे घञ् प्रत्ययो भवति, न चेद्यज्ञविषयः प्रयोगो भवति । शङ्खप्रस्तारः ।

अयज्ञ इति किम् ? बर्हिष्प्रस्तरः ।।

<प्रथने वावशब्दे ।। 3-3-33 ।।>

`स्तृञ् आच्छादने'(धा.पा.1253) अस्माद्धातोर्विशब्द उपपदे घञ् प्रत्ययो भवति प्रथने गम्यमाने, तच्चेत्प्रथनं शब्दविषयं न भवति । प्रथनम् = विस्तीर्णता । पटस्य विस्तारः ।

प्रथन इति किम् ? तृणविस्तरः । । अशब्द इति किम् ? विस्तरो वचसाम् ।।

<छन्दोनाम्नि च ।। 3-3-34 ।।>

`वौ' `स्त्र' इति वर्त्तते । विपूर्वात्स्तृणातेश्छन्दोनाम्नि घञ् प्रत्ययो भवति । वृत्तमत्र छन्दो गृह्यते, यस्य गायत्र्यादयो विशेषाः, न मन्त्रब्राह्मणम्; नामग्रहणात् । विष्टारपङ्क्तिश्छन्दः । विष्टारबृहती छन्दः । विष्टारपङ्क्तिशब्दोऽत्र छन्दोनाम, न घञन्तं शब्दरूपम् । तत्र त्ववयवत्वेन वर्त्तते । `छन्दोनाम्नि' इत्यधिकरणसप्तम्येषा ।।

<उदि ग्रहः ।। 3-3-35 ।।>

उद्युपपदे ग्रहेर्धातोर्घञ् प्रत्ययो भवति । अपोऽपवादः । उद्ग्राहः ।।

छन्दसि निपूर्वादपीष्यते स्रुगुद्यमननिपातनयोः(म.भा.2.148) । हकारस्य भकारः । `उदग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्'(वा.सं.17.64) ।।

<समि मुष्टौ ।। 3-3-36 ।।>

`ग्रहः' इत्येव । सम्युपपदे ग्रहेर्धातोर्घञ् भवति मुष्टिविषयश्चेद्धात्वर्थो भवति । मुष्टिः = अङ्गुलिसंनिवेशः । अहो मल्लस्य सङ्ग्राहः । अहो मुष्टिकस्य सङ्ग्राहः । दृढमुष्टिताऽऽख्यायते ।

मुष्टाविति किम् ? सङ्ग्रहो धान्यस्य ।।

<परिन्योर्नीणोर्द्यूताभ्रेषयोः ।। 3-3-37 ।।>

परिशब्दे निशब्दे चोपपदे यथासङ्ख्यं निय इणश्च धातोर्घञ् प्रत्ययो भवति । अचोऽपवादः । द्यूताभ्रेषयोः - अत्रापि यथासङ्ख्यमेव सम्बन्धः,

द्यूतविषयश्चेन्नयतेरर्थः, अभ्रेषविषयश्चेदिणर्थः । पदार्थानामनपचारो यथाप्राप्तकरणम् = अभ्रेषः । द्यूते तावत् - परिणायेन शारान् हन्ति । समन्तान्नयनेन ।

अभ्रेषे - एषोऽत्र न्यायः ।

द्यूताभ्रेषयोरिति किम् ? परिणयः । न्ययं गतः पापः ।।

<परावनुपात्यय इणः ।। 3-3-38 ।।>

परिशब्द उपपदे इणो धातोर्घञ्प्रत्ययो भवति, अनुपात्यये गम्यमाने । क्रमप्राप्तस्यानतिपातोऽनुपात्ययः = परिपाटी । तव पर्यायः । मम पर्यायः ।

अनुपात्यय इति क्रिम् ? कालस्य पर्ययः । अतिपात इत्यर्थः ।।

<व्युपयोः शेतेः पर्याये ।। 3-3-39 ।।>

वि, उप इत्येतयोरुपपदयोः शेतेर्धातोर्घञ् भवति, पर्याये गम्यमाने । तव विशायः । मम विशायः । तव राजोपशायः । तव राजानमुपशयितुं पर्याय इत्यर्थः ।

पर्याय इति किम् ? विशयः । उपशयः ।।

<हस्तादाने चेरस्तेये ।। 3-3-40 ।।>

हस्तादाने गम्यमाने चिनोतेर्धातोर्घञ् प्रत्ययो भवति, न चेत्स्तेयं चौर्यं भवति । हस्तादानग्रहणेन प्रत्यासत्तिरादेयस्य लक्ष्यते । पुष्पप्रचायः । फलप्रचायः ।

हस्तादान इति किम् ? वृक्षशिखरे फलप्रचयं करोति । अस्तेय इति किम् ? पुष्पप्रचयश्चौर्येण ।

* उच्चस्य प्रतिषेधो वक्तव्यः * । (उच्चयः) ।।

<निवासचितिशरीरोपसमाधानेष्वादेश्च कः ।। 3-3-41 ।।>

`चेः' इत्येव । निवसन्त्यस्मिन्निति निवासः, चीयतेऽसौ चितिः, पाण्यादिसमुदायः = शरीरम्, राशीकरणम् = उपसमाधानम् एतेष्वर्थेषु चिनोतेर्घञ् प्रत्ययो भवति, धातोरादेश्च ककार आदेशः । निवासे तावत् - चिखल्लिनिकायः । चितौ - आकायमग्निं चिन्वीत । शरीरे-अनित्यकायः । उपसमाधाने - महान्गोमयनिकायः ।

एतेष्विति किम् ? चयः । इह कस्मान्न भवति - महान् काष्ठनिचयः ? बहुत्वमत्र गम्यते, नोपसमाधानम् ।।

<सङ्घे चानौत्तराधर्ये ।। 3-3-42 ।।>

`चेः' इत्येव । प्राणिनां समुदायः = सङ्घः, स च द्वाभ्यां प्रकाराभ्यां भवति - एकधर्मनिवेशेन, औत्तराधर्येण वा; तत्र औत्तराधर्यपर्युदासादितरो गृह्यते ।

सङ्घे वाच्ये चिनोतेर्धातोर्घञ् प्रत्ययो भवति, आदेश्च कः । भिक्षुकनिकायः । ब्राह्मणनिकायः । वैयाकरणनिकायः ।

औत्तराधर्ये इति किम् ? सूकरनिचयः । प्राणिविषयत्वात्सङ्घस्येह न भवति - कृताकृतसमुच्चयः, प्रमाणसमुच्चयः ।।

<कर्मव्यतिहारे णच् स्त्रियाम् ।। 3-3-43 ।।>

कर्म = क्रिया । व्यतिहारः = परस्परं करणम् । कर्मव्यतिहारे गम्यमाने धातोर्णच्प्रत्ययो भवति स्त्रीलिङ्गे वाच्ये, तच्च भावे । चकारो विशेषणार्थः,"णचः स्त्रियामञ्"(5.4.14/3216)इति । व्यावक्रोशी । व्यावलेखी । व्यावहासी वर्त्तते ।

स्त्रियामिति किम् ? व्यतिपाको वर्त्तते ।

बाधकविषयेऽपि क्वचिदिष्यते - व्यावचोरी, व्यावचर्ची । इह न भवति - व्यतीक्षा, व्यतीहा वर्त्तते, व्यात्युक्षी भवति । तदेतद्वैचित्र्यं कथं लभ्यते ? "कृत्यल्युटो बहुलम्"(3.3.113/2841) इति भवति ।।

<अभिविधौ भाव इनुण् ।। 3-3-44 ।।>

अभिविधिः अभिव्याप्तिः, क्रियागुणाभ्यां कार्त्स्न्येन सम्बन्धः । अभिविधौ गम्यमाने धातोर्भावे इनुण् भवति । साङ्कूटिनम् । सांराविणम् । सान्द्राविणं वर्त्तते ।

अभिविधाविति किम् ? सङ्कोटः । संरावः । सन्द्रावः ।

भाव इति वर्तमाने पुनर्भावग्रहणं वासरूपनिरासार्थम्, तेन घञ् न भवति । ल्युटा तु समावेश इष्यते - सङ्कूटनं वर्त्तते । तत्कथम् ? "कृत्यल्युटो बहुलम्"(3.3.113/2841) इति ।।

<आक्रोशेऽवन्योर्ग्रहः ।। 3-3-45 ।।>

दृष्टानुवृत्तिसामर्थ्याद् घञनुवर्त्तते, नानन्तर इनुण् । `अव', नि' इत्येतयोरुपपदयोर्ग्रहेर्धातोर्घञ् प्रत्ययो भवति, आक्रोशे गम्यमाने । आक्रोशः = शपनम् । अवग्राहो हन्त ते वृषल भूयात् । निग्राहो हन्त ते वृषल भूयात् ।

आक्रोश इति किम् ? अवग्रहः पदस्य । निग्रहश्चोरस्य ।।

<प्रे लिप्सायाम् ।। 3-3-46 ।।>

`ग्रहः' इत्येव । प्रशब्द उपपदे ग्रहेर्धातोर्घञ् प्रत्ययो भवति लिप्सायां गम्यमानायाम् । पात्रप्रग्राहेण चरति भिक्षुः पिण्डार्थी । स्रुवग्राहेण चरति द्विजो दक्षिणार्थी ।

लिप्सायामिति किम् ? प्रग्रहो देवदत्तस्य ।।

<परौ यज्ञे ।। 3-3-47 ।।.

परिशब्द उपपदे ग्रहेर्घञ् प्रत्ययो भवति । यज्ञविषयश्चेत्प्रत्ययान्ताभिधेयः स्यात् । उत्तरपरिग्राहः, अधरपरिग्राहः ।

यज्ञ इति किम् ? परिग्रहो देवदत्तस्य ।।

<नौ वृ धान्ये ।। 3-3-48 ।।>

`वृ' इति वृङ्वृञोः सामान्येन ग्रहणम् । निशब्दे उपपदे `वृ' इत्येतस्माद्धातोर्धान्यविशेषेऽभिधेये घञ् प्रत्ययो भवति । अपोऽपवादः । नीवारा नाम व्रीहयो भवन्ति ।

धान्य इति किम् ? निवरा कन्या ।।

<उदि श्रयतियौतिपूद्रुवः ।। 3-3-49 ।।>

उच्छब्द उपपदे श्रयत्यादिभ्यो घञ् प्रत्ययो भवति । अजपोरपवादः । उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः ।
कथं `पतनान्ताः समुच्छ्रयाः ? वक्ष्यमाणं विभाषाग्रहणमिह सिंहावलोकितन्यायेन सम्बध्यते ।।
<विभाषाऽऽङि रुप्लुवोः ।। 3-3-50 ।।.
आङि उपपदे रौतेः प्लवतेश्च विभाषा घञ् प्रत्ययो भवति । आरावः, आरवः । आप्लावः, आप्लवः ।
<अवे ग्रहो वर्षप्रतिबन्धे ।। 3-3-51 ।।>
`विभाषा' इति वर्त्तते । अव उपपदे ग्रहेर्धातोर्घञ् प्रत्ययो भवति विभाषा वर्षप्रतिबन्धेऽभिधेये ।। प्राप्तकालस्य वर्षस्य कुतश्चिन्निमित्तादभावः = वर्षप्रतिबन्धः । अवग्राहो देवस्य । अवग्रहो देवस्य ।
वर्षप्रतिबन्ध इति किम् ? अवग्रहः पदस्य ।।
<प्रे वणिजाम् ।। 3-3-52 ।।>
`ग्रहः' इति वर्त्तते । `विभाषा' इत्येव । प्रशब्द उपपदे ग्रहेर्धातोर्विभाषा घञ् प्रत्ययो भवति । प्रत्ययान्तवाच्यश्चेद्वणिजां सम्बन्धी भवति । वणिक्सम्बन्धेन च तुलासूत्रं लक्ष्यते, न तु वणिजस्तन्त्रम् । तुला प्रगृह्यते येन सूत्रेण स शब्दार्थः । तुलाप्रग्राहेण चरति, तुलाप्रग्रहेण चरति वणिगन्यो वा ।
वणिजामिति किम् ? प्रग्रहो देवदत्तस्य ।।
<रश्मौ च ।। 3-3-53 ।।>
`ग्रहः', `विभाषा', `प्र' इति वर्त्तते । प्रशब्द उपपदे ग्रहेर्धातोर्विभाषा घञ् प्रत्ययो भवति, रश्मिश्चेत् प्रत्ययान्तेनाभिधीयते । रथादियुक्तानामश्वादीनां संयमनार्था रज्जुः, सा रश्मिरिह गृह्यते । प्रग्रहः, प्रग्राहः ।।
<वृणोतेराच्छादने ।। 3-3-54 ।।>
`विभाषा' `प्र' इति वर्त्तते । प्रशब्द उपपदे वृणोतेर्धातोर्विभाषा घञ् प्रत्ययो भवति, प्रत्ययान्तेन चेदाच्छादनविशेष उच्यते । प्रावारः, प्रवरः ।
आच्छादन इति किम् ? प्रवरा गौः ।।
<परौ भुवोऽवज्ञाने ।। 3-3-55 ।।>
विभाषा इत्येव । परिशब्द उपपपदे भवतेर्धातोर्विभाषा घञ् प्रत्ययो भवति, अवज्ञाने गम्यमाने । अवज्ञानम् = असत्कारः । परिभावः,परिभवः ।
अवज्ञान इति किम् ? सर्वतो भवनं परिभवः ।।
<एरच् ।। 3-3-56 ।।>
`भावे' `अकर्त्तरि च कारके' इति प्रकृतमनुवर्त्तते, यावत् "कृत्यल्युटो बहुलम्"(3.3.113/2841) इति । इवर्णान्ताद्धातोः "भावे"(3.3.18/3184) "अकर्त्तरि च कारके संज्ञायाम्"(3.3.19/3188)अच् प्रत्ययो भवति । घञोऽपवादः । चकारो विशेषणार्थः "अन्तः"(6.2.143/3877) "थाथघञ्क्ताजबित्रकाणाम्"(6.2.144/3878) इति । चयः । अयः । जयः । क्षयः ।
* अज्विधौ भयादीनामुपसङ्ख्यानम् *(म.भा.2.149) । नपुंसके क्तादिनिवृत्त्यर्थम् । भयम् । वर्षम् ।
* जवसवौ छन्दसि वक्तव्यौ *(म.भा.2.150) । `ऊर्वोरस्तु मे जवः'(पै.20.36.7) । `पञ्चौदनसवः'(पै.8.19.3) ।।
<ॠदोरप् ।। 3-3-57 ।।>
ॠकारान्तेभ्य उवर्णान्तेभ्यश्च अप् प्रत्ययो भवति । घञोऽपवादः । पित्करणं स्वरार्थम् । करः । गरः । शरः । उवर्णान्तेभ्यः - यवः । स्तवः । लवः । पवः ।
दकारो मुखसुखार्थः । मा भूत्तादपि परस्तपरः ।।
<ग्रहवृदृनिश्चिगमश्च ।। 3-3-58 ।।>
ग्रहादिभ्यो धातुभ्योऽप् प्रत्ययो भवति । घञोऽपवादः । निश्चिनोतेस्त्वचोऽपवादः । ग्रहः । वरः । दरः । निश्चयः । गमः । निश्चिग्रहणं स्वरार्थम् ।
* वशिरण्योरुपसङ्ख्यानम् *(म.भा.2.150) । वशः । रणः ।
* घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम् *(म.भा.2.150) । प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः पर्वतस्य । प्रस्नात्यस्मिन्प्रस्नः । प्रपिबत्यस्यामिति प्रपा । आविध्यन्ति तेनेत्याविधः । विहन्यन्तेऽस्मिन्निति विघ्नः । आयुध्यते अनेन इति आयुधम्।।
<उपसर्गेऽदः ।। 3-3-59 ।।>
`अप्' इत्येव । उपसर्ग उपपदेऽदेर्धातोरप् प्रत्ययो भवति । विघसः । प्रघसः ।
उपसर्ग इति किम् ? घासः ।।
<नौ ण च ।। 3-3-60 ।।>
निशब्द उपपदे अदेर्धातोर्णः प्रत्ययो भवति, चकारादप् च । न्यादः । निघसः ।।
<व्यधजुपोरनुपसर्गे ।। 3-3-61 ।।>

`व्यध', `जप' इत्येतयोरनुपसर्गयोरप् प्रत्ययो भवति । घञोऽपवादः । व्यधः । जपः ।

अनुपसर्ग इति किम् ? आव्याधा । उपजापः ।।

<स्वनहसोर्वा ।। 3-3-62 ।।>

`अनुपसर्गे' इत्येव । स्वनहसोरनुपसर्गयोर्वा अप् प्रत्ययो भवति । स्वनः, स्वानः । हसः, हासः ।

अनुपसर्ग इति किम् ? प्रस्वानः प्रहासः ।

<यमः समुपनिविषु च ।। 3-3-63 ।।>

`अनुपसर्गे, `वा' इति वर्त्तते । सम्, उप्, नि, वि इत्येतेषूपपदेषु अनुपसर्गेऽपि यमेर्वा अप् प्रत्ययो भवति । घञोऽपवादः । संयमः, संयामः । उपयमः, उपयामः । नियमः, नियामः । वियमः, वियामः ।

अनुपसर्गात्खल्वपि - यमः, यामः ।।

<नौ गदनदपठस्वनः ।। 3-3-64 ।।>

`अप्' इत्येव । निशब्द उपपदे गद, नद, पठ, स्वन इत्येतेभ्यो धातुभ्यो वा अप् प्रत्ययो भवति । घञोऽपवादः । निगदः, निगादः । निनदः, निनादः । निपठः, निपाठः । निस्वनः, निस्वानः ।।

<क्वणो वीणायां च ।। 3-3-65 ।।>

`नौ' `वा' `अनुपसर्गे' इति वर्त्तते । क्वणतेर्धातोर्निपूर्वादनुपसर्गाच्च वीणायां वा अप् प्रत्ययो भवति । घञोऽपवादः । सोपसर्गार्थं वीणाया ग्रहणम् । निक्वणः, निक्वाणः । अनुपसर्गात् - क्वणः, क्वाणः । वीणायां खल्वपि - कल्याणप्रक्वणा वीणा ।

एतेष्विति किम् ? अतिक्वाणो वर्त्तते ।।

<नित्यं पणः परिमाणे ।। 3-3-66 ।।>

`पण व्यवहारे स्तुतौ च'(धा.पा.439)अस्माद्धातोर्नित्यमप् प्रत्ययो भवति परिमाणे गम्यमाने । नित्यग्रहणं विकल्पनिवृत्त्यर्थम् । मूलकपणः । शाकपणः । संव्यवहाराय मूलकादीनां यः परिमितो मुष्टिर्बध्यते तस्येदमभिधानम् ।

परिमाण इति किम् ? पाणः ।।

<मदोऽनुपसर्गे ।। 3-3-67 ।।>

मदेर्धातोरनुपसर्गादप् प्रत्ययो भवति । घञोऽपवादः । विद्यामदः । धनमदः । कुलमदः ।

अनुपसर्ग इति किम् ? उन्मादः । प्रमादः ।।

<प्रमदसंमदौ हर्षे ।। 3-3-68 ।।>

`प्रमद' `संमद' इत्येतौ शब्दौ निपात्येते हर्षेऽभिधेये । कन्यानां प्रमदः । कोकिलानां संमदः ।

हर्ष इति किम् ? प्रमादः । संमादः ।

प्रसम्भ्यामिति नोक्तम्, निपातनं रूढ्यर्थम् ।।

<समुदोरजः पशुषु ।। 3-3-69 ।।>

समुदोरुपपदयोरजतेर्धातोः पशुविषये धात्वर्थे अप् प्रत्ययो भवति । घञोऽपवादः । `अज गतिक्षेपणयोः'(धा.पा.230) इति पठ्यते, स सम्पूर्वः समुदाये वर्तते, उत्पूर्वश्च प्रेरणे । समजः पशूनाम् । समुदाय इत्यर्थः । उदजः पशनाम् । प्रेरणमित्यर्थः ।

पशुष्विति किम् ? समाजो ब्राह्मणानाम् । उदाजः क्षत्रियाणाम् ।।

<अक्षेषु ग्लहः ।। 3-3-70 ।।>

`ग्लहः' इति निपात्यते अक्षविषयश्चेद्धात्वर्थो भवति । ग्रहेरप् सिद्ध एव, लत्वार्थं निपातनम् । अक्षस्य ग्लहः ।

अक्षेष्विति किम् ? ग्रहः पादस्य ।

अन्ये ग्लहिं प्रकृत्यन्तरमाहुः, ते घञं प्रत्युदाहरन्ति - ग्लाह इति ।।

<प्रजने सर्त्तेः ।। 3-3-71 ।।>

सर्तेर्धातोः प्रजने विषये अप् प्रत्ययो भवति । घञोऽपवादः । प्रजनम् = प्रथमं गर्भग्रहणम् । गवामुपसरः । पशूनामुपसरः । स्त्रीगवीषु पुङ्गवानां गर्भाधानाय प्रथममुपसरणमुच्यते ।।

<ह्वः सम्प्रसारणं च न्यभ्युपविषु ।। 3-3-72 ।।>

नि, अभि, उप, वि इत्येतेषु उपपदेषु ह्वयतेर्धातोः सम्प्रसारणम्, अप् प्रत्ययश्च भवति। घञोऽपवादः निहवः । अभिहवः । उपहवः । विहवः ।

एतेष्विति किम् ? प्रह्वायः ।।

<आङि युद्धे ।। 3-3-73 ।।>

आङि उपपदे ह्वयतेर्द्धातोः सम्प्रसारणम्, अप् प्रत्ययश्च भवति, युद्धेऽभिधेये । आहूयन्तेऽस्मिन्नित्याहवः ।
युद्ध इति किम् ? आह्वायः ।।
<निपानमाहावः ।। 3-3-74 ।।>
आङ् पूर्वस्य ह्वयतेर्धातोः सम्प्रसारणम्, अप् प्रत्ययः, वृद्धिश्च निपात्यते, निपानं चेदभिधेयं भवति । निपिबन्त्यस्मिन्निति निपानमुदकाधार उच्यते । आहावः पशूनाम्, कूपोपसरेषु य उदकाधारस्तत्र हि पानाय पशव आहूयन्ते ।
निपानमिति किम् ? आह्वायः ।।
<भावेऽनुपसर्गस्य ।। 3-3-75 ।।>
अनुपर्गस्य ह्वयतेः सम्प्रसारणम्, अप् प्रत्ययश्च भवित, भावेऽभिधेये । हवः । `हवे हवे सुहवं शूरमिन्द्रम्'(ऋ.6.7.11) ।
अनुपसर्गस्येति किम् ? आह्वायः । भावग्रहणम् "अकर्तरि च कारके संज्ञायाम्"(3.3.19/3188) इत्यस्य निरासार्थम् ।।
<हनश्च वधः ।। 3-3-76 ।।>
`भावे', `अनुपसर्गस्य' इति वर्तते । हन्तेर्धातोरनुपसर्गे भावे अप् प्रत्ययो भवति, तत्संनियोगेन च वधादेशः, स चान्तोदात्तः । तत्रोदात्तनिवृत्तिस्वरेणाप उदात्तत्वं भवति । वधश्चोराणाम् । वधो दस्यूनाम् । `भावे' इत्येव - घातः ।`अनुपसर्गस्य' इत्येव - प्रघातः, विघातः ।
चकारो भिन्नक्रमत्वान्नादेशेन सम्बध्यते, किं तर्हि ? प्रकृतेन प्रत्ययेन । अप् च, यश्चापरः प्राप्नोति । तेन घञपि भवति। घातो वर्त्तते ।।
<मूर्तौ घनः ।। 3-3-77 ।।>
`हनः' इत्येव । मूर्तिः = काठिन्यम् । मूर्तावभिधेयायां हन्तेरप् प्रत्ययो भवति, घनश्चादेशः । अभ्रघनः । दधिघनः ।
कथं घनं दधीति ? धर्मशब्देन धर्मी भण्यते ।।
<अन्तर्घनो देशे ।। 3-3-78 ।।>
अन्तः पूर्वाद्धन्तेरप् प्रत्ययो भवति, घनादेशश्च भवति, देशेऽभिधेये । अन्तर्घनः, संज्ञीभूतो वाहीकेषु देशविशेष उच्यते ।
अन्ये णकारं पठन्ति - अन्तर्घणो देश इति, तदपि ग्राह्यमेव ।
देश इति किम् ? अन्तर्घातोऽन्यः ।।
<अगारैकदेशे प्रघणः प्रघाणश्च ।। 3-3-79 ।।>
प्रपूर्वस्य हन्तेः प्रघण, प्रघाण इत्येतौ शब्दौ निपात्येते, अगारैकदेशे वाच्ये । प्रघणः । प्रघाणः । द्वारप्रकोष्ठो बाह्य उच्यते ।
अगारैकदेश इति किम् ? प्रघातोऽन्यः ।।
<उद्घनोऽत्याधानम् ।। 3-3-80 ।।>
उत्पूर्वस्य हन्तेरुद्घन इति निपात्यते, अत्याधानं चेद्भवति । उद्घनः, यस्मिन्काष्ठे स्थापयित्वा अन्यानि काष्ठानि तक्ष्यन्ते तदभिधीयते। उद्घातोऽन्यः ।।
<अपघनोऽङ्गम् ।। 3-3-81 ।।>
अपपूर्वस्य हन्तेरपघन इति निपात्यते, अङ्गं चेत्तद्भवति । अपघनः, अङ्गम् । (अत्र) अवयवो न सर्व एकदेशः, किं तर्हि ? पाणिः पादश्चाभिधीयते ।
अपघातोऽन्यः ।।
<करणेऽयोविद्रुषु ।। 3-3-82 ।।>
`हनः' इति वर्त्तते । अयस्, वि, द्रु इत्येतेषूपपदेषु हन्तेर्धातोः करणे कारकेऽप् प्रत्ययो भवति, घनादेशश्च । अयो हन्यतेऽनेनेत्ययोघनः । विघनः । द्रुघनः । द्रुघण इति केचिदुदाहरन्ति । कथं णत्वम् ? अरीहणादिषु पाठात् । "पूर्वपदात्संज्ञायामगः"(8.4.3/857) इति वा ।।
<स्तम्बे क च ।। 3-3-83 ।।>
`करणे' `हनः' इति वर्त्तते । स्तम्बशब्द उपपदे करणे कारके हन्तेः कः प्रत्ययो भवति । चकारादप्, तत्र घनादेशः । स्तम्बघ्नः । स्तम्बघनः ।
* स्त्रियां स्तम्बघ्ना स्तम्बघना इति इष्यते * । करण इत्येव, स्तम्बघातः ।।
<परौ घः ।। 3-3-84 ।।>
`करणे' `हनः' इत्येव । परिशब्द उपपदे हन्तेर्धातोरप् प्रत्ययो भवति, करणे कारके घशब्दश्चादेशः । परिहन्यतेऽनेनेति परिघः । पलिघः ।।
<उपघ्न आश्रये ।। 3-3-85 ।।>
उपपूर्वस्य हन्तेरप् प्रत्यय उपधालोपश्च निपात्यते । आश्रयशब्दः सामीप्यं प्रत्यासत्तिं लक्षयति । पर्वतोपघ्नः । ग्रामोपघ्नः ।
आश्रय इति किम् ? पर्वतोपघात एवान्यः ।।
<सङ्घोद्घौ गणप्रसंशयोः ।। 3-3-86 ।।>
समुदोरुपपदयोर्हन्तेर्द्धातोरप् प्रत्ययो भवति, टिलोपो घत्वं च निपात्यते, यथासङ्ख्यं गणेऽभिधेये प्रशंसायां गम्यमानायाम् । सङ्घः पशूनाम् । उद्घो मनुष्याणाम् ।।

गणप्रशंसयोरिति किम् ? सङ्घातः ।।
<निघो निमितम् ।। 3-3-87 ।।>
`निघ' इति निपूर्वाद्धन्तेरप् प्रत्ययष्टिलोपो घत्वं च निपात्यते, निमितं चेदभिधेयं भवति । समन्तान्मितम् = निमितम्, समारोहपरिणाहम् । निघा वृक्षाः । निघाः शालयः ।
निमितमिति किम् ? निघातः ।
<ड्वितः क्त्रिः ।। 3-3-88 ।।>
`भावे' `अकर्तरि च कारके' इति वर्तते । `डु' इद्यस्य तस्माड्ड्वितो धातोः क्त्रिः प्रत्ययो भवति । "क्त्रेर्मम्नित्यम्"(4.4.20/1570) इति वचनात् केवलो न प्रयुज्यते । `डुपचष् पाके'(धा.पा.997) पक्त्रिमम् । `डुवप्'(धा.पा.1004) उप्त्रिमम् ।
<ट्वितोऽथुच् ।। 3-3-89 ।।>
`टु' इद्यस्य तस्मात् ट्वितो धातोरथुच् प्रत्ययो भवति भावादौ । `टुवेपृ'(धा.पा.367)-वेपथुः । `टुओश्वि'(धा.पा.1011)-श्वयथुः । `टुक्षु'(धा.पा.1037)-क्षवथुः ।।
<यजयाचयतविच्छप्रच्छरक्षो नङ् ।। 3-3-90 ।।>
`भावे' `अकर्त्तरि च कारके' इति वर्तते । यजादिभ्यो धातुभ्यो नङ् प्रत्ययो भवति । ङकारो गुणवृद्धिप्रतिषेधार्थः । यज्ञः । याच्ञा यत्नः । विश्नः । प्रश्नः । रक्ष्णः ।
प्रच्छेरसम्प्रसारणं ज्ञापकात् -"प्रश्ने चासन्नकाले"(3.2.117/2777) इति ।।
<स्वपो नन् ।। 3-3-91 ।।>
स्वपेर्धातोर्नन् प्रत्ययो भवति । नकारः स्वरार्थः (6.1.197/3686)। स्वप्नः ।।
<उपसर्गे घोः किः ।। 3-3-92 ।।>
`भावे' `अकर्तरि च कारके' इति वर्तते । उपसर्गे उपपदे घुसंज्ञकेभ्यो धातुभ्यः किः प्रत्ययो भवति । कित्करणमातो लोपार्थम्(64.64/2372) । प्रदिः । प्रधिः । अन्तर्द्धिः ।।
<कर्मण्यधिकरणे च ।। 3-3-93 ।।>
`घोः' इत्येव । कर्मण्युपपदे घुसंज्ञकेभ्यो धातुभ्यः किः प्रत्ययो भवति, अधिकरणे कारके । जलं धीयतेऽस्मिन्निति जलधिः । शरधिः । अधिकरणग्रहणमर्थान्तरनिरासार्थम् । चकारः प्रत्ययानुकर्षणार्थः ।।
<स्त्रियां क्तिन् ।। 3-3-94 ।।>
`भावे' `अकर्तरि च कारके' इति वर्तते । स्त्रीलिङ्गे भावादौ धातोः क्तिन्प्रत्ययो भवति । घञजपामपवादः । कृतिः । चितिः। मतिः ।
* क्तिन्नाबादिभ्यश्च वक्तव्यः *(म.भा.2.151) । आबादयः प्रयोगतोऽनुसर्तव्याः ।
आप्तिः । राद्धिः । दीप्तिः । ध्वस्तिः । आस्तिः । लब्धिः ।
* श्रुयजिस्तुभ्य करणे *(म.भा.2.151) श्रूयतेऽनयेति श्रुतिः । इष्टिः । स्तुतिः ।
* ग्लाम्लाज्याहाभ्यो निः *(म.भा.2.152) । ग्लानिः । म्लानिः । ज्यानिः । हानिः ।
*ॠकारल्वादिभ्यः क्तिन्निष्ठावद्भवति इति वक्तव्यम् *(म.भा.2.152) । कीर्ण्णिः । गीर्ण्णिः । जीर्ण्णिः । शीर्ण्णिः । लूनिः । पूनिः ।
* सम्पदादिभ्यः क्विप् *(म.भा.2.152) । सम्पत् । विपत् । प्रतिपत् ।
* क्तिन्नपीष्यते * सम्पत्तिः । विपत्तिः ।।
<स्थागापापचो भावे ।। 3-3-95 ।।>
`स्त्रियाम्' इति वर्त्तते । स्थादिभ्यो धातुभ्यः स्त्रीलिङ्गे भावे क्तिन् प्रत्ययो भवति । अङोऽपवादस्य बाधकः । प्रस्थितिः । उद्गीतिः । सङ्गीतिः । प्रपीतिः । सम्पीति । पक्तिः । भावग्रहणमर्थान्तरनिरासार्थम् ।
कथमवस्था, संस्थेति ? "व्यवस्थायामसंज्ञयाम्"(1.1.34/218) इति ज्ञापकात् नात्यन्ताय बाधा भवतीति ।।
<मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ।। 3-3-96 ।।>
`भावे' `स्त्रियाम्' इति वर्तते । मन्त्रे विषये वृषादिभ्यो धातुभ्यः क्तिन् प्रत्ययो भवति, उदात्तः । प्रकृतिप्रत्यययोर्विभक्तिविपरिणमेन सम्बन्धः । कस्मादेवं कृतम् ? वैचित्र्यार्थम् । `वृष्टिः'(ऋ.1.38.8) । `इष्टिः'(ऋ.44.7) । `पक्तिः'(ऋ.4.24.5) । `मतिः'(ऋ.1.141.1) । `वित्तिः'(वा.सं.1814) । `भूतिः',(वा.सं.18.14) । `वीतिः'(अ.वे.20.69.3) । `रातिः'(ऋ.1.34.1) ।
सर्वत्र सर्वधातुभ्यः सामान्येन विहित एव क्तिन् । उदात्तार्थं वचनम् । इषेस्तु इच्छेति निपातनं वक्ष्यति, ततः क्तिन्नपि विधीयते । मन्त्रादन्यत्रादिरुदात्तः ।।
<ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च ।। 3-3-97 ।।>

`मन्त्रे' इति नानुवर्त्तते । ऊत्यादयः शब्दा निपात्यन्ते । `उदात्तः' इति वर्त्तते । अवतेः "ज्वरत्वरस्रिव्यविमवामुपधायाश्च"(6.4.20/2654) इति ऊठ्। ऊतिः । स्वरार्थं वचनम् । यौतेर्जवतेश्च - यूतिः । जूतिः । दीर्घत्वं च निपात्यते । सातिः - स्यतेः इत्वाभावोऽपि निपात्यते । सनोतेर्वा "जनसनखनां सञ्झलोः"(6.4.42/2504) इत्यात्वे कृते स्वरार्थं निपातनम् । हन्तेर्हिनोतेर्वा हेतिः । कीर्त्तयतेः - कीर्त्तिः ।।

<व्रजयजोर्भावे क्यप् ।। 3-3-98 ।।>

`उदात्त' इत्येव । व्रजयजोर्धात्वोः स्त्रीलिङ्गे भावे क्यप् प्रत्ययो भवति, उदात्तः । क्तिनोऽपवादः । व्रज्या । इज्या । पित्करणमुत्तरत्र तुगर्थम् ।।

<संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ।। 3-3-99 ।।>

`भावे' इति न स्वर्यते । पूर्व एवात्रार्थाधिकारः । समजादिभ्यो धातुभ्यः स्त्रियां क्यप् प्रत्ययो भवति उदात्तः, संज्ञायां विषये । समजन्त्यस्यामिति समज्या । निषद्या । निपत्या । मत्या । विद्या । सुत्या । शय्या । मृत्या । इत्या । कथं तदुक्तम् --

`स्त्रियां भावाधिकारोऽस्ति तेन भार्या प्रसिध्यति' इति ?

भावाधिकारः = भावव्यापारः वाच्यत्वेन विवक्षितः, न तु शास्त्रीयोऽधिकारः ।।

<कृञः श च ।। 3-3-100 ।।>

करोतेर्धातोः स्त्रियां श प्रत्ययो भवति । चकारात् क्यप् च । योगविभागोऽत्र कर्त्तव्यः क्तिन्नपि यथा स्यात् । क्रिया । कृत्या । कृतिः ।।

<इच्छा ।। 3-3-101 ।।>

इषेर्धातोः शः प्रत्ययो यगभावश्च निपात्यते । इच्छा ।

* परिचर्यापरिसर्यामृगयाटाट्यानामुपसङ्ख्यानम् *(म.भा.2.153) । परिचर्या । परिसर्या । मृगया । अटाट्या ।

* जागर्तेरकारो वा *(म.भा.2.153) । जागरा, जागर्या ।।

<अ प्रत्ययात् ।। 3-3-102 ।।>

प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारः प्रत्ययो भवति । क्तिनोऽपवादः । चिकीर्षा । जिहीर्षा । पुत्त्रीया । पुत्त्रकाम्या । लोलूया। कण्डूया ।।

<गुरोश्च हलः ।। 3-3-103 ।।>

हलन्तो यो धातुर्गुरुमान् ततः स्त्रियामकारः प्रत्ययो भवति । क्तिनोऽपवादः । कुण्डा । हुण्डा । ईहा । ऊहा ।

गुरोरिति किम् ? भक्तिः । हल इति किम् ? नीतिः ।।

<षिद्भिदादिभ्योऽङ् ।। 3-3-104 ।।>

षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ् प्रत्ययो भवति । गणपठितेषु भिदादिषु निष्कृष्य प्रकृतयो गृह्यन्ते ।

जृष्--जरा । त्रपूष्--त्रपा ।

भिदादिभ्यः खल्वपि--भिदा । छिदा । विदा । क्षिपा । * गुहा गिर्योषध्योः * । श्रद्धा । मेधा । गोधा । आरा । हारा । कारा । क्षिया । तारा । धारा । लेखा। रेखा । चूडा । पीडा । वपा । वसा । सृजा । * क्रपेः सम्प्रसारणं च *(ग.सू.36) । कृपा । * भिधा विदारणे *(ग.सू.29) । भित्तिरन्या । * छिदा द्वैधिकरणे *(ग.सू.30)। छित्तिः अन्या । * आरा शस्त्र्याम् *(ग.सू.32)। आर्तिरन्या * धारा प्रपाते * धृतिरन्या ।।

<चिन्तिपूजिकथिकुम्बिचर्चश्च ।। 3-3-105 ।।>

`चिति स्मृत्याम्'(धा.पा.1536), `पूज पूजायाम्'(धा.पा.1643), `कथ वाक्यप्रबन्धे'(धा.पा.1852), `कुबि आच्छादने'(धा.पा.1656), `चर्च अध्ययने'(धा.पा.1713) चुरादिः, इत्येतेभ्यो धातुभ्यो युचि प्राप्ते स्त्रियामङ् प्रत्ययो भवति । चिन्ता । पूजा । कथा । कुम्बा । चर्चा । चकाराद्युजपि भवति - चिन्तना ।।

<आतश्चोपसर्गे ।। 3-3-106 ।।>

आकारान्तेभ्यो धातुभ्य उपसर्गे उपपदे स्त्रियामङ् प्रत्ययो भवति । क्तिनोऽपवादः । प्रदा । उपदा । प्रधा । उपधा ।

* श्रदन्तरोरुपसर्गवद् वृत्तिः * श्रद्धा । अन्तर्द्धा ।।

<ण्यासश्रन्थो युच् ।। 3-3-107 ।।>

ण्यन्तेभ्यो धातुभ्यः, आस, श्रन्थ इत्येताभ्यां च स्त्रियां युच्प्रत्ययो भवति । अकारस्यपवादः । कारणा । हारणा । आसना । श्रन्थना ।।

कथमास्या ? "ऋहलोर्ण्यत्"(3.1.124/2872) भविष्यति । वासरूपप्रतिषेधश्च स्त्रीप्रकरणविषयस्यैवोत्सर्गापवादस्य ।

श्रन्थिः क्र्यादिर्गृह्यते--`श्रन्थ विमोचनप्रतिहर्षयोः'(धा.पा.1511) इति, न चुरादिः-`श्रन्थ ग्रन्थ सम्दर्भे'(धा.पा.1839/1840) इति; ण्यन्तत्वेनैव सिद्धत्वात् ।।

* घट्टिवन्दिविधिभ्य उपसङ्ख्यानम् *(म.भा.2.154) । घट्टना । वन्दना । वेदना ।

घट्टेस्तौदादिकस्य ग्रहणम् -`घट्ट चलने'(धा.पा.259) इति, न चौरादिकस्य--`घट्ट संवरणे'(धा.पा.259) इत्यस्य ग्रहणम्; तस्य णेरित्येव सिद्धत्वात् ।

* इषेरनिच्छार्थस्य युज्वक्तव्यः *(म.भा.2.154) । अध्येषणा । अन्वेषणा ।।

* परेर्वा *(म.भा.2.154) । पर्येषणा, परीष्टिः ।।
<रोगाख्यायां ण्वुल्बहुलम् ।। 3-3-108 ।।>
रोगाख्यायां गम्यमानायां धातोर्बहुलं ण्वुल् प्रत्ययो भवति । क्तिन्नादीनामपवादः । आख्याग्रहणं रोगस्य चेत्प्रत्ययान्तेन संज्ञा भवति । बहुलग्रहणं व्यभिचारार्थम् । प्रच्छर्द्दिका । प्रवाहिका । विचर्चिका । न च भवति--शिरोऽर्त्तिः ।
* धात्वर्थनिर्द्देशे ण्वुल्वक्तव्यः *(म.भा.2.154) । आशिका । शायिका वर्त्तते ।।
* इक्श्तिपौ धातुनिर्देशे इति वक्तव्यम् *(म.भा.2.154) । भिदिः । छिदिः । पचतिः । पठतिः ।
* वर्णात्कारः *(म.भा.2.154) । निर्देश इति प्रकृतम् । अकारः । इकारः ।।
* रादिफः *(म.भा.2.154) । रेफः ।
* मत्वर्थाच्छः *(म.भा.2.155) । (अकारलोपश्च ।) मत्वर्थीयः ।
* इणजादिभ्यः *(म.भा.2.155) । आजिः । आतिः । आदिः ।।
* इक् कृष्यादिभ्यः *(म.भा.2.155) । कृषिः । किरिः ।।
<संज्ञायाम् ।। 3-3-109 ।।>
संज्ञायां विषये धातोर्ण्वुल् प्रत्ययो भवति । उद्दालकपुष्पभञ्जिका । वरणपुष्पप्रचायिका । अभ्यूषखादिका । आचोषखादिका । शालभञ्जिका । तालभञ्जिका ।।
<विभाषाख्यानपरिप्रश्नयोरिञ् च ।। 3-3-110 ।।>
पूर्वं परिप्रश्नः, पश्चादाख्यानम् ; सूत्रेऽल्पाच्तरस्य पूर्वनिपातः । परिप्रश्ने आख्याने च गम्यमाने धातोरिञ् प्रत्ययो भवति, चकाराद् ण्वुलपि । विभाषाग्रहणात्परोऽपि यः प्राप्नोति सोऽपि भवति । कां त्वं कारिमकार्षीः, कां कारिकामकार्षीः, कां क्रियामकार्षीः, कां कृत्यामकार्षीः, कां कृतिमकार्षीः ? सर्वां कारिमकार्षम्, सर्वां कारिकामकार्षम्, सर्वां कृतिमकार्षम्, सर्वां कृत्यामकार्षम्, सर्वां कृतिमकार्षम् । कां गणिमजीगणः ? कां गणनामजीगणः ?कां गणिकामजीगणः ? सर्वां गणिमजीगणम्, सर्वां गणिकाम्, सर्वां गणनाम् । एवं कां याजिम्, कां याजिकाम् ? कां याचितम्, कां याचिकाम् ? कां पाचिम्, कां पाचिकाम्, कां पचाम्, कां पक्तिम् ? कां पाठिम्, कां पाठिकाम्, कां पठितिम् ? इति द्रष्टव्यम् ।
आख्यानपरिप्रश्नयोरिति किम् ? कृतिः । हृतिः ।।
<पर्यायार्हणोत्पत्तिषु ण्वुच् ।। 3-3-111 ।।>
पर्यायः = परिपाटीक्रमः । अर्हणमर्हः = तद्योग्यता । ऋणं तद्यत् परस्य धार्यतेः, उत्पत्तिः = जन्म एतेष्वर्थेषु धातोर्ण्वुच् प्रत्ययो भवति । क्तिन्नादीनामपवादः । पर्याये तावत्--भवतः शायिका । भवतोऽग्रग्रासिका । अर्हे--अर्हति भवानिक्षुभक्षिकाम् । ऋणे--इक्षुभक्षिकां मे धारयसि । ओदनभोजिकाम् । पयः पायिकाम् । उत्पत्तौइक्षुभक्षिका मे उदपादि । ओदनभोजिका । पयः पायिका ।
विभाषेत्येव--चिकीर्षोत्पद्यते । ण्वुलि प्रकृते प्रत्ययान्तरकरणं स्वरार्थम् ।।
<आक्रोशे नञ्यनिः ।। 3-3-112 ।।>
`विभाषा' इति निवृत्तम् । आक्रोशः = शपनम् । आक्रोशे गम्यमाने नञ्युपपदे धातोरनिः प्रत्ययो भवति । क्तिन्नादीनामपवादः । अकरणिस्ते वृषल भूयात् । आक्रोश इति किम् ? अकृतिस्तस्य कटस्य । नञीति किम् ? मृतिस्ते वृषल भूयात् ।।
<कृत्यल्युचो बहुलम् ।। 3-3-113 ।।>
`भावे' `अकर्त्तरि च कारके' इति निवृत्तम् । कृत्यसंज्ञकाः प्रत्यया ल्युट् च बहुलमर्थेषु भवन्ति । यत्र विहितास्ततोऽन्यत्रापि भवन्ति । भावकर्मणोः कृत्या विहिताः कारकान्तरेऽपि भवन्ति--स्नानीयं चूर्णम्, दानीयो ब्राह्मणः । करणाधिकरणयोर्भावे च ल्युट् ।
अन्यत्रापि भवति--अपसेचनम्, अवस्रावणम् । राजभोजनाः शालयः । राजाच्छादनानि वासांसि । प्रस्कन्दनम् । प्रपतनम् ।
बहुलग्रहणादन्येऽपि कृतो यथाप्राप्तमभिधेयं व्यभिचरन्ति। पादाभ्यां ह्रियते पादहारकः । गले चोप्यते गलेचोपकः ।।
<नपुंसके भावे क्तः ।। 3-3-114 ।।>
नपुंसकलिङ्गे भावे धातोः क्तः प्रत्ययो भवति । हसितम् । सहितम् । जल्पितम् ।।
<ल्युट् च ।। 3-3-115 ।।>
नपुंसकलिङ्गे भावे धातोर्ल्युट् प्रत्ययो भवति । हसनं छात्रस्य । शोभनम् । जल्पनम् । शयनम् । आसनम् । योगविभाग उत्तरार्थः ।।
<कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम् ।। 3-3-116 ।।>
येन कर्मणा संस्पृश्यमानस्य कर्तुः शरीरसुखमुत्पद्यते तस्मिन्कर्मण्युपपदे धातोर्नपुंसकलिङ्गे भावे ल्युट् प्रत्ययो भवति । पूर्वेणैव सिद्धे प्रत्यये नित्यसमासार्थं वचनम् । उपपदसमासो हि नित्यः समासः । पयः पानं सुखम् । ओदनभोजनं सुखम् ।
कर्मणीति किम् ? तूलिकाया उत्थानं सुखम् । संस्पर्शादिति किम् ? अग्निकुण्डस्योपासनं सुखम् । कर्तुरिति किम् ? गुरोः स्नापनं सुखम् । स्नापयतेर्न गुरुः कर्त्ता, किं तर्हि ? कर्म । शरीरग्रहणं किम् ? पुत्त्रस्य परिष्वञ्जनं सुखम् । सुखम् = मानसी प्रीतिः । सुखमिति किम् ? कण्टकानां मर्दनं दुःखम् ।

सर्वत्रासमासः प्रत्युदाह्रियते ।।

<करणाधिकरणयोश्च ।। 3-3-117 ।।>

करणेऽधिकरणे च कारके धातोर्ल्युट् प्रत्ययो भवति । इध्मप्रव्रश्चनः । पलाशशातनः । अधिकरणे--गोदोहनी । सक्तुधानी ।।

<पुंसि संज्ञायां घः प्रायेण ।। 3-3-118 ।।>

`करणाधिकरणयोः' इत्येव । पुंल्लिङ्गयोः करणाधिकरणयोरभिधेययोर्धातोर्घः प्रत्ययो भवति, समुदायेन चेत्संज्ञा गम्यते । प्रायग्रहणमकार्त्स्न्यार्थम् । दन्तच्छदः पटः । अधिकरणे खल्वपि--एत्य तस्मिन्कुर्वन्ति इत्याकरः । आलयः ।

पुंसीति किम् ? प्रसाधनम् । संज्ञायामिति किम् ? प्रहरणो दण्डः । घकारः "छादेर्घेऽद्व्युपसर्गस्य"(6.4.96/3297) इति विशेषणार्थः ।।

<गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च ।। 3-3-119 ।।>

गोचरादयः शब्दा घप्रत्ययान्ता निपात्यन्ते पूर्वस्मिन्नेवार्थे । "हलश्च"(3.3.121/3300) इति घञं वक्ष्यति, तस्यायमपवादः । गावश्चरन्त्यस्मिन्निति गोचरः । सञ्चरन्तेऽनेनेति सञ्चरः । वहन्ति तेन वहः । व्रजन्ति तेन व्रजः। व्यजन्ति तेन व्यजः । निपातनाद् "अजेर्व्यघञपोः"(2.4.56/2292) इति वीभावो न भवति । एत्य तस्मिन्नापणन्ते इत्यापणः । निगच्छन्ति तस्मिन्निति निगमः । चकारोऽनुक्तसमुच्चयार्थः । कषः । निकषः ।।

<अवेतस्त्रोर्घञ् ।। 3-3-120 ।।>

`अव' उपपदे तरतेस्स्तृणातेश्च धातोः करणाधिकरणयोः संज्ञायां घञ् प्रत्ययो भवति । घस्यापवादः । ञकारो वृद्ध्यर्थः, स्वरार्थश्च । घकार उत्तरत्र कुत्वार्थः । अवतारः । अवस्तारः ।

कथमवतारो नद्याः ? न हीयं संज्ञा । प्रायानुवृत्तेरसंज्ञायामपि भवति ।।

<हलश्च ।। 3-3-121 ।।>

`पुंसि संज्ञायाम्', `करणाधिकरणयोश्च' इति सर्वमनुवर्त्तते । हलन्ताद्धातोः करणाधिकरणयोर्घञ् प्रत्ययो भवति । घस्यापवादः । लेखः । वेदः । वेष्टः । बन्धः । मार्गः । अपामार्गः । वीमार्गः ।।

<अध्यायन्यायोद्यावसंहाराधारावायाश्च ।। 3-3-122 ।।>

अध्यायादयः शब्दा घञन्ता निपात्यन्ते । पुंसि संज्ञायां घे प्राप्ते घञ्विधीयते । अहलन्तार्थ आरम्भः । अधीयतेऽस्मिन्नित्यध्यायः । नीयतेऽनेनेति न्यायः । उद्युवन्ति अस्मिन्नित्युद्यावः । संह्रियन्तेऽनेनेति संहारः । आध्रियतेऽस्मिन्नित्याधारः । आवयन्त्यस्मिन्नित्यावायः । चकारोऽनुक्तसमुच्चयार्थः--अवहारः ।।

<उदङ्कोऽनुदके ।। 3-3-123 ।।>

`उदङ्कः' इति निपात्यते, अनुदकविषयश्चेद्धात्वर्थो भवति । उत्पूर्वादञ्चतेर्घञ्निपात्यते, ननु च "हलश्च"(3.3.121/3300) इति सिद्ध एव घञ् ? उदके प्रतिषेधार्थमिदं वचनम् । तैलोदङ्कः ।

अनुदक इति किम् ? उदकोदञ्चनः । घः कस्मान्न प्रत्युदाह्रियते ? विशेषाभावात् । घञ्यपि थाथादिस्वरेणान्तोदात्त एव ।।

<जालमानायः ।। 3-3-124 ।।>

`आनायः' इति निपात्यते, जालं चेत्तद्भवति । आङ् पूर्वान्नयतेः करणे घञ् निपात्यते । आनायो मत्स्यानाम् । आनायो मृगाणाम् ।।

<खनो घ च ।। 3-3-125 ।।>

खनतेर्धातोः करणाधिकरणयोर्घः प्रत्ययो भवति । चकाराद् घञ्च । आखनः, आखानः ।

* डो वक्तव्यः *(म.भा.2.156) । आखः ।

* डरो वक्तव्यः *(म.भा.2.156) । आखरः ।

* इको वक्तव्यः *(म.भा.2.156) । आखनिकः ।

* इकवको वक्तव्यः *(म.भा.2.156) । आखनिकवकः ।।

<ईषद्दुः सुषु कृच्छ्राकृच्छ्रार्थेषु खल् ।। 3-3-126 ।।>

`करणाधिकरणयोः' इति निवृत्तम् । ईषत्, दुस्, सु इत्येतेषूपपदेसु कृच्छ्राकृच्छ्रार्थेषु धातोः खल् प्रत्ययो भवति । कृच्छ्रं दुःखम्, तद् दुरो विशेषणम् । अकृच्छ्रं सुखम् , तदितरयोर्विशेषणम्; सम्भवात् । ईषत्करो भवता कटः । दुष्करः । सुकरः । ईषद्भोजः । दुर्भोजः । सुभोजः ।

ईषदादिष्विति किम् ? कृच्छ्रेण कार्यः कटः । कृच्छ्राकृच्छ्रार्थेष्विति किम् ? ईषत्कार्यः ।

लकारः स्वरार्थः । खित्करणमुत्तरत्र मुमर्थम् ।।

<कर्तृकर्मणोश्च भूकृञोः ।। 3-3-127 ।।>

भवतेः करोतेश्च धातोर्यथासङ्ख्यं कर्त्तरि कर्मणि चोपपदे, चकारादीषदादिषु च खल् प्रत्ययो भवति । ईषदाढ्यम्भवं भवता । दुराढ्यम्भवम् । ईषदाढ्यङ्करः, स्वाढ्यङ्करो देवदत्तो भवता ।।

* कर्तृकर्मणोश्च्व्यर्थयोरिति वक्तव्यम् *(म.भा.2.157) । इह मा भूत्--स्वाढ्येन भूयते ।।

<आतो युच् ।। 3-3-128 ।।>

ईषदादयोऽनुवर्त्तन्ते । `कर्तृकर्मणोः' इति न स्वर्यते । कृच्छ्राकृच्छ्रार्थेषु ईषदादिषूपपदेषु आकारान्तेभ्यो धातुभ्यो युच् प्रत्ययो भवति । खलोऽपवादः । ईषत्पानः सोमो भवता । दुष्पानः । सुपानः । ईषद्दानो गौर्भवता । दुर्दानः। सुदानः ।।

<छन्दसि गत्यर्थेभ्यः ।। 3-3-129 ।।>

ईषदादिषु कृच्छ्राकृच्छ्रार्थेषूपपदेषु गत्यर्थेभ्यो धातुभ्यश्छन्दसि विषये युच्प्रत्ययो भवति । खलोऽपवादः । `सूपसदनोऽग्निः'(तै.सं.7.5.20.1) । सूपसदनमन्तरिक्षम् ।।

<अन्येभ्योऽपि दृश्यते ।। 3-3-130 ।।.

अन्येभ्योऽपि धातुभ्यो गत्यर्थेभ्यश्छन्दसि विषये युच्प्रत्ययो दृश्यते । `सुदोहनामकृणोद् ब्रह्मणे गाम्'(नि.11.43) । `सुवेदनामकृणोद् ब्रह्मणे गाम्'(ऋ.10.112.8) ।।

* भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज् वक्तव्यः *(म.भा.2.157) । दुःशासनः । दुर्योधनः । दुर्दर्शनः । दुर्द्धर्षणः । दुर्मर्षणः ।।

<वर्त्तमानसामीप्ये वर्त्तमानवद्वा ।। 3-3-131 ।।>

समीपमेव सामीप्यम् । ष्यञः स्वार्थिकत्वं ज्ञाप्यते चातुर्वर्ण्यादिसिद्ध्यर्थम् । वर्त्तमानसमीपे भूते भविष्यति च वर्त्तमानाद् धातोर्वर्त्तमानवत्प्रत्यया वा भवन्ति । "वर्तमाने लट्"(3.2.123/2151) इत्यारभ्य यावद् "उणादयो बहुलम्"(3.3.1/3169) इति वर्त्तमाने प्रत्यया उक्तास्ते भूतभविष्यतोर्विधीयन्ते । कदा देवदत्त आगतोऽसि ? अयमागच्छामि, आगच्छन्तमेव मां विद्धि, अयमागमम्, एषोऽस्म्यागतः । कदा देवदत्त गमिष्यसि ? एष गच्छामि, गच्छन्तमेव मां विद्धि, एष गमिष्यामि, गान्तास्मि ।

वत्करणं सर्वसादृश्यार्थम् । येन विशेषेण वर्त्तमाने प्रत्यया विहिताः प्रकृत्योपपदोपाधिना तथैवात्र भवन्ति । पवमानः । यजमानः । अलङ्करिष्णुः । सामीप्यग्रहणं किम् ? विप्रकर्षविवक्षायां मा भूत् । परुदगच्छत् पाटलिपुत्त्रम् । वर्षेण गमिष्यति ।

यो मन्यते - "गच्छामीति पदं वर्त्तमाने काल एव वर्त्तते, कालान्तरगतिस्तु वाक्याद्भवति । न च वाक्यगम्यः कालः पदसंस्कारवेलायामुपयुज्यते" इति, तादृशं वाक्यार्थप्रतिपत्तारं प्रति प्रकरणमिदं नारभ्यते, तथा च - श्वः करिष्यति, वर्षेण गमिष्यतीति सर्वमुपपद्यते ।।

<आशंसायां भूतवच्च ।। 3-3-132 ।।>

`वा' इत्येव । `वर्त्तमानसामीप्ये' इति नानुवर्त्तते । आशंसनमाशंसा = अप्राप्तस्य प्रियार्थस्य प्राप्तुमिच्छा, तस्याश्च भविष्यत्कालो विषयः । तत्र भविष्यति काले आशंसायां गम्यमानायां धातोर्वा भूतवत्प्रत्यया भवन्ति, चकाराद्वर्त्तमानवच्च । उपाध्यायश्चेदागमत्, आगतः, आगच्छति, आगमिष्यति, एते व्याकरणमध्यगीष्महि, एते व्याकरणमधीतवन्तः, अधीमहे, अध्येष्यामहे ।

सामान्यातिदेशे विशेषानतिदेशाल्लङ् लिटौ न भवतः ।

आशंसायामिति किम् ? आगमिष्यति ।।

<क्षिप्रवचने लृट् ।। 3-3-133 ।।>

`आशंसायाम्' इत्येव । क्षिप्रवचन उपपदे आशंसायां गम्यमानायां धातोर्लृट् प्रत्ययो भवति । `भूतवच्च' इत्यस्यायमपवादः ।

उपाध्यायश्चेत्क्षिप्रमागमिष्यति, क्षिप्रं व्याकरणमध्येष्यामहे ।

वचनग्रहणं पर्यायार्थम् । क्षिप्रम्, शीघ्रम्, आशु, त्वरितम् अध्येष्यामहे । `न' इति वक्तव्ये लृड्ग्रहणं लुटोऽपि विषये यथा स्यात् श्वः क्षिप्रमध्येष्यामहे ।।

<आशंसावचने लिङ् ।। 3-3-134 ।।>

आशंसा येनोच्यते तदाशंसावचनम्, तस्मिन्नुपपदे धातोर्लिङ् प्रत्ययो भवति । `भूतवच्च' इत्यस्यायमपवादः । उपाध्यायश्चेदागच्छेत् आशंसे युक्तोऽधीयीय । आशंसेऽवकल्पये युक्तोऽधीयीय । आशंसे क्षिप्रमधीयीय ।।

<नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः ।। 3-3-135 ।।>

भूतानद्यतने भविष्यदनद्यतने च लङ् लुटौ विहितौ, तयोरयं प्रतिषेधः । अनद्यतनवत्प्रत्ययविधिर्न भवति, क्रियाप्रबन्धे सामीप्ये च गम्यमाने । क्रियाणां प्रबन्धः = सातत्येनानुष्ठानम् । कालानां सामीप्यम् = तुल्यजातीयेनाव्यवधानम् । यावज्जीवं भृशमन्नमदात् । भृशमन्नं दास्यति । यावज्जीवं पुत्त्रोऽध्यापिपत् ।। यावज्जीवमध्यापयिष्यति।

सामीप्ये खल्वपि - येयं पौर्णमास्यतिक्रान्ता, एतस्यामुपाध्यायोऽग्नीनाधित, सोमेनायष्ट, गामदित । येयममावास्याऽऽगामिनी, एतस्यामुपाध्यायोऽग्नीनाधास्यते, सोमेन यक्ष्यते । स गां दास्यते ।

द्वौ प्रतिषेधौ यथाप्राप्तस्याभ्यनुज्ञापनाय ।।

<भविष्यति मर्यादावचनेऽवरस्मिन् ।। 3-3-136 ।।>

`नानद्यतनवत्' इति वर्त्तते । अक्रियाप्रबन्धार्थमसामीप्यार्थञ्च वचनम् । भविष्यति काले मर्यादावचने सत्यवरस्मिन्प्रविभागेऽनद्यतनवत्प्रत्ययविधिर्न भवति । योऽयमध्वा गन्तव्य आपाटलिपुत्त्रात् तस्य यदवरं कौशाम्ब्यास्तत्र द्विरोदनं भोक्ष्यामहे । तत्र सक्तून्पास्यामः ।

भविष्यतीति किम् ? योऽयमध्वा गत आपाटलिपुत्त्रात् तस्य यदवरं कौशाम्ब्यास्तत्र द्विरोदनं भोक्ष्यामहे । तत्र सक्तून्पास्यामः ।

भविष्यतीति किम् ? योऽयमध्वा गत आपाटलिपुत्त्रात् तस्य यदवरं कौशाम्ब्यास्तत्र युक्ता अध्यैमहि, तत्र द्विरोदनम् अभुञ्ज्महि, तत्र सक्तूनपिबाम ।
मर्यादावचन इति किम् ? योऽयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं कौशाम्ब्यास्तत्र द्विरोदनं भोक्तास्महे, सक्तून् पातास्मः । अवरस्मिन्निति किम् ?
योऽयमध्वा गन्तव्य आपाटलिपुत्त्रात् तस्य यत्परं कौशाम्ब्यास्तत्र द्विरोदनं भोक्तास्महे, तत्र सक्तून्पातास्मः ।
इह सूत्रे देशकृता मर्यादा, उत्तरत्र कालकृताः, तत्र च विशेषं वक्ष्यति ।।
<कालविभागे चानहोरात्राणाम् ।। 3-3-137 ।।>
`भविष्यति' मर्यादावचनेऽवरस्मिन्' इति वर्त्तते । कालमर्यादाविभागे सत्यवरस्मिन्प्रविभागे भविष्यति कालेऽनद्यतनवत्प्रत्ययविधिर्न भवति, न चेदहोरात्रसम्बन्धी विभागः, तैस्तेषां च विभागे प्रतिषेधः । पूर्वेणैव सिद्धे वचनमिदमहोरात्रनिषेधार्थम् । योगविभाग उत्तरार्थः । योऽयं संवत्सर आगामी तत्र यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे, तत्रौदनं भोक्ष्यामहे।`भविष्यति' इत्येव - योऽयं वत्सरोऽतीतस्तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्यैमहि, तत्रौदनमभुञ्ज्महि ।
`मर्यादावचने' इत्येव - योऽयं निरवधिकः काल आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येतास्महे, तत्रौदनं भोक्तास्महे ।`अवरस्मिन्' इत्येव । परस्मिन्विभाषां(3.3.138/2796) वक्ष्यति। अनहोरात्राणामिति किम् ? त्रिविधमुदाहरणम् - योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रः, योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरोऽर्द्धमासः, योऽयं त्रिंशदहोरात्र आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे, तत्र सक्तून्पातास्मः । सर्वथा अहोरात्रस्पर्शे प्रतिषेधः ।।
<परस्मिन्विभाषा ।। 3-3-138 ।।>
`भविष्यति मर्यादावचने' `कालविभागे चानहोरात्राणाम्' इति सर्वमनुवर्त्तते । कालमर्यादाविभागे सति भविष्यति काले परस्मिन्प्रविभागे विभाषाऽनद्यतनवत्प्रत्ययविधिर्न भवति, न चेदहोरात्रसम्बन्धी प्रविभागः । अवरस्मिन्वर्जं पूर्वमनुवर्त्तते । अवरस्मिन्पूर्वेण प्रतिषेध उक्तः, सम्प्रति परस्मिन्नप्राप्त एव विकल्प उच्यते । योऽयं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे, अध्येतास्महे, तत्र सक्तून् पास्यामः, तत्र सक्तून्पातास्मः ।
`अनहोरात्राणाम्' इत्येव - योऽयं त्रिंशद्रात्र आगामी तस्य यः परः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे, तत्र सक्तून् पातास्मः ।
`भविष्यति' इत्येव - योऽयं संवत्सरोऽतीतस्तस्य यत्परमाग्रहायण्यास्तत्र युक्ता अध्यैमहि, तत्रौदनमभुञ्ज्महि ।
`मर्यादावचने' इत्येव - योऽयं संवत्सरो निरवधिकः काल आगामी तस्य यत्परमाग्रहायण्यास्तत्र युक्ता अध्येतास्महे, तत्र सक्तून्पातस्मः ।
`कालविभागे' इत्येव - योऽयमध्वा गन्तव्य आपाटलिपुत्त्रात् तस्य यत्परं कौशाम्ब्यास्तत्र युक्ता अध्येतास्महे, ओदनं भोक्तास्महे । इति सर्वत्रानद्यतनवत्प्रत्यया उदाहार्याः ।।
<लिङ्निमित्ते लृङ् क्रियातिपत्तौ ।। 3-3-139 ।।>
`भविष्यति' इत्यनुवर्त्तते । "हेतुहेतुमतोर्लिङ्"(3.3.156/2813) इत्येवमादिकं लिङो निमित्तम् । तत्र लिङ्निमित्ते भविष्यति काले लृङ् प्रत्ययो भवति क्रियातिपत्तौ सत्याम् । कुतश्चिद्वैगुण्यादनभिनिर्वृत्तिः क्रियायाः = क्रियातिपत्तिः । दक्षिणेन चेदायास्यन्न शकटं पर्याभविष्यत् । यदि कमलकमाह्वास्यद्दक्षिणेन मार्गेणन्न शकटं पर्याभविष्यत् ।। अभोक्ष्यत भवान्घृतेन यदि मत्समीपमागमिष्यत् ।।
भविष्यत्कालविषयमेतद्वचनम्, भविष्यदपर्याभवनं च हेतुमत्, तत्र हेतुभूतं च कमलकाह्वानम् । लिङ्गिलिङ्गे बुध्वा तदतिपत्तिं च प्रमाणान्तरादगम्य वक्ता वाक्यं प्रयुङ्क्ते,यदि कमलकमाह्वास्यन्न शकटं पर्याभविष्यदिति, हेतुहेतुमतोराह्वानापर्याभवनयोर्भविष्यत्कालविषययोरतिपत्तिरितो वाक्यादवगम्यते ।।
<भूते च ।। 3-3-140 ।।>
`लिङ् निमित्ते लृङ् क्रियातिपत्तौ' इति सर्वमनुवर्त्तते । पूर्वेण भविष्यति विहितः सम्प्रति भूते विधीयते । भूते च काले लिङ् निमित्ते क्रियातिपत्तौ सत्यां लृङ् प्रत्ययो भवति । "उताप्योः समर्थयोर्लिङ्"(3.3.152/2809) इत्यारभ्य लिङ् निमित्तेषु विधानमेतत् । प्राक् ततो विकल्पं वक्ष्यति । दृष्टो मया भवत्पुत्त्रोऽन्नार्थी चङ्क्रम्यमाणः, अपरश्च द्विजो ब्राह्मणार्थी, यदि स तेन दृष्टोऽभविष्यत् तदाऽभोक्ष्यत, न तु भुक्तवान्, अन्येन पथा स गतः ।।
<वोताप्योः ।। 3-3-141 ।।>
`भूते' `लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सर्वमनुवर्त्तते । वा + आ + उताप्योः = वोताप्योः । मर्यादायामयमाङ्, नाभिविधौ । "उताप्योः समर्थयोर्लिङ्"(3.3.152/2809) इति वक्ष्यति, प्रागेतस्मात् सूत्रावधेर्यदित ऊर्ध्वमनुक्रमिष्यामः, तत्र भूते लिङ्निमित्ते क्रियातिपत्तौ लृङ् वा भवतीत्येतदधिकृतं वेदितव्यम् । वक्ष्यति - "विभाषा कथमि लिङ् च"(3.3.143/2800), कथं नाम तत्र भवान्वृषलमयाजयिष्यत् । यथाप्राप्तं च - याजयेत् ।।
<गर्हायां लडपिजात्वोः ।। 3-3-142 ।।>
गर्हा, कुत्सेत्यनर्थान्तरम् । गर्हायां गम्यमानायाम् अपिजात्वोरुपपदयोर्धातोर्लट् प्रत्ययो भवति । "वर्त्तमाने लट्"(3.2.123/2151)उक्तः कालसामान्ये न प्राप्नोतीति विधीयते । कालविशेषविहितांश्चापि प्रत्ययानयं परत्वाद् अस्मिन्विषये बाधते । अपि तत्र भवान्वृषलं याजयति, जातु तत्र भवान्वृषलं याजयति । गर्हामहे, अहो अन्याय्यमेतत् ।। लिङ्निमित्ताभावादिह क्रियातिपत्तौ लृङ् न भवति ।।
<विभाषा कथमि लिङ् च ।। 3-3-143 ।।>

`गर्हायाम्' इति वर्त्तते । कथंशब्दे उपपदे गर्हायां गम्यमानायां धातोर्लिङ्प्रत्ययो भवति, चकाराल्लट् च । विभाषाग्रहणं यथास्वं कालविषये विहितानामबाधनार्थम् । कथं नाम तत्र भवान्वृषलं याजयेत्, कथं नाम तत्र भवान्वृषलं याजयति, कथं नाम तत्र भवान्वृषलं याजयिष्यति । कथं नाम तत्र भवान्वृषलं याजयिता । कथं नाम तत्र भवान्वृषलं याजयेत् । कथं नाम तत्र भवान्वृषलमयीयजत् । अयाजयत् । कथं नाम तत्र भवान्वृषलं याजयाञ्चकार । अत्र लिङ्निमित्तमस्तीति भूतविवक्षायां क्रियातिपत्तौ वा लृङ् । भविष्यद्विवक्षायां सर्वत्र नित्येनैव लृङा भवितव्यम् ।

<किंवृत्ते लिङ् लृटौ ।। 3-3-144 ।।>

`गर्हायाम्' इत्येव । विभाषा न स्वर्यते । किंवृत्त उपपदे गर्हायां गम्यमानायां धातोर्लिङ्लृटौ प्रत्ययौ भवतः । सर्वलकाराणामपवादः । लिङ्ग्रहणं लटोऽपरिग्रहार्थम् । को नाम वृषलो यं तत्र भवान् याजयेत् । यं तत्र भवान्वृषलं याजयिष्यति । कतरो नाम, कतमो नाम यं तत्र भवान्वृषलं याजयेत् । याजयिष्यति । भूते क्रियातिपत्तौ वा लृङ् । भविष्यति तु नित्यम् - को नाम वृषलो यं तत्र भवानयाजयिष्यत् ।।

<अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ।। 3-3-145 ।।>

`गर्हायाम्' इति निवृत्तम् । अनवक्लृप्तिः= असम्भावना । अमर्षः = अक्षमा । किंवृत्तेऽकिंवृत्ते चोपपदेऽनवक्लृप्त्यमर्षयोर्धातोर्लिङ्लृटौ प्रत्ययौ भवतः । सर्वलकाराणामपवादः । बह्वचः पूर्वनिपातो लक्षणव्यभिचारचिह्नम्, तेन यथासङ्ख्यं न भवति । अनवक्लृप्तौ तावत् नावकल्पयामि, न सम्भावयामि, न श्रद्दधे तत्र भवान्नाम वृषलं याजयेत् । तत्र भवान्नाम वृषलं याजयिष्यति । को नाम वृषलो यं तत्र भवान् वृषलं याजयेत् । को नाम तत्र भवान्वृषलं याजयिष्यति । अमर्षे - न मर्षयामि तत्र भवान्वृषलं याजयेत् । याजयिष्यति । को नाम वृषलो यं तत्र भवान्याजयेत्, याजयिष्यति । भूतविवक्षायां तु क्रियातिपत्तौ वा लृङ् भवति भविष्यति नित्यम् - नावकल्पयामि तत्र भवान्नाम वृषलमयाजयिष्यत् ।।

<किंकिलास्त्यर्थेषु लृट् ।। 3-3-146 ।।>

`अनवक्लृप्त्यमर्षयोः' इति वर्त्तते । किंकिलशब्दः समुदाय एवोपपदम् । अस्त्यर्थाः = अस्तिभवतिविद्यतयः । किंकिलास्त्यर्थेषूपपदेषु अनवक्लृप्त्यमर्षयोर्धातोर्लृट्प्रत्ययो भवति । लिङोऽपवादः । किंकिल नाम तत्र भवान्वृषलं याजयिष्यति । अस्ति नाम तत्र भवान्वृषलं याजयिष्यति । भवति नाम तत्र भवान्वृषलं याजयिष्यति । विद्यते नाम तत्र भवान्वृषलं याजयिष्यति, न श्रद्दधे, न मर्षयामि । लिङ्निमित्तमिह नास्ति, तेन लृङ् न भवति ।।

<जातुयदोर्लिङ् ।। 3-3-147 ।।>

`अनवक्लृप्त्यमर्षयोः' इत्येव । जातु, यदा इत्येतयोरुपपदयोरनवक्लृप्त्यमर्षयोर्गम्यमानयोर्धातोर्लिङ्प्रत्ययो भवति । लृटोऽपवादः । जातु तत्र भवान्वृषलं याजयेत् , यन्नाम तत्र भवान्वृषलं याजयेत् न श्रद्दधे, न मर्षयामि ।।

* जातुयदोर्लिङ् विधाने यदायद्योरुपसङ्ख्यानम् *(म.भा.2.164) यदा भवद्विधः क्षत्त्रियं याजयेत्, यदि भवद्विधः क्षत्त्रियं याजयेत्, न श्रद्दधे न मर्षयामि । क्रियातिपत्तौ भूते वा लृङ्। भविष्यति नित्यम् ।।

<यच्चयत्रयोः ।। 3-3-148 ।।>

`अनवक्लृप्त्यमर्षयोः' इत्येव । यच्च, यत्र इत्येतयोरुपपदयोरनवक्लृप्त्यमर्षयोर्गम्यमानयोर्धातोर्लिङ् प्रत्ययो भवति । लृटोऽपवादः । योगविभाग उत्तरार्थः । यथासङ्ख्यं नेष्यते । यच्च तत्रभवान् वृषलं याजयेत् । यत्र तत्रभवान् वृषलं याजयेत् । क्रियातिपत्तौ यथायथं लृङ् भवति ।

<गर्हायां च ।। 3-3-149 ।।>

`अनवक्लृप्त्यमर्षयोः' इति निवृत्तम् । गर्हा, निन्दा, कुत्सा इत्यनर्थान्तरम् । यच्च, यत्र इत्येतयोरुपपदयोर्धातोर्लिङ् प्रत्ययो भवति गर्हायां गम्यमानायाम् । सर्वलकाराणामपवादः । यच्च तत्रभवान् वृषलं याजयेत्, यत्र तत्रभवान् वृषलं याजयेद् ऋद्धो वृद्धः सन् ब्राह्मणः, गर्हामहे, अहो अन्याय्यमेतत् । क्रियातिपत्तौ यथायथं लृङ् भवति ।।

<चित्रीकरणे च ।। 3-3-150 ।।>

`यच्चयत्रयोः' इत्येव । चित्रीकरणम् = आश्चर्यम्, अद्भुतम्, विस्मयनीयम् । यच्च-यत्रयोरुपपदयोश्चित्रीकरणे गम्यमाने धातोर्लिङ्प्रत्ययो भवति । सर्वलकाराणामपवादः । यच्च तत्र भवान्वृषलं याजयेत्, यत्र तत्र भवान्वृषलं याजयेत्, आश्चर्यमेतत् । क्रियातिपत्तौ यथायथं लृङ् भवति ।।

<शेषे लृडयदौ ।। 3-3-151 ।।>

यच्चयत्राभ्यामन्यत्र चित्रीकरणं शेषः । शेषे उपपदे चित्रीकरणे गम्यमाने धातोलृट् प्रत्ययो भवति, यदिशब्दश्चेन्न प्रयुज्यते । सर्वलकाराणामपवादः । आश्चर्यम्, चित्रम्, अद्भुतम्, अन्धो नाम पर्वतमारोक्ष्यति । बधिरो नाम व्याकरणमध्येष्यते ।

अयदाविति किम् ? आश्चर्यं यदि स भुञ्जीत । यदि सोऽधीयीत । लिङ्निमित्ताभावादिह लृङ् न भवति ।।

<उताप्योः समर्थलोर्लिङ् ।। 3-3-152 ।।>

उत, अपि इत्येतयोः समर्थयोर्धातोर्लिङ् प्रत्ययो भवति । सर्वलकाराणामपवादः । बाढमित्यस्मिन्नर्थे समानार्थत्वमनयोः । उत कुर्यात् । अपि कुर्यात् । उताधीयीत । अप्यधीयीत । बाढमध्येष्यत इत्यर्थः ।

समर्थयोरिति किम् ? उत दण्डः पतिष्यति । अपि द्वारं धास्यति । प्रश्नः प्रच्छादनं च गम्यते । "वोताप्योः"(3.3.141/2798) इति विकल्पो निवृत्तः । इतः प्रभृति भूतेऽपि लिङ् निमित्ते क्रियातिपत्तौ नित्यं लृङ् ।। भविष्यति तु सर्वत्रैव नित्यः ।।

<कामप्रवेदनेऽकच्चिति ।। 3-3-153 ।।>

स्वाभिप्रायाविष्करणम् = कामप्रवेदनम् । कामः, इच्छा, अभिलाष इत्यनर्थान्तरम्, तस्य प्रवेदनम् = प्रकाशनम् । तस्मिन् गम्यमानेऽकच्चित्युपपदे धातोर्लिङ्प्रत्ययो भवति । सर्वलकाराणामपवादः । कामो मे भुञ्जीत भवान् । अभिलाषो मे भुञ्जीत भवान् ।

अकच्चितीति किम् ?

कच्चिज्जीवति ते मता कच्चिज्जीवति ते पिता ।

माराविद त्वां पृच्छामि कच्चिज्जीवति पार्वती ।।

<संभावनेऽलमिति चेत्सिद्धाप्रयोगे ।। 3-3-154 ।।>

`लिङ्' इत्येव । सम्भावनम् = क्रियासु योग्यताध्यवसानम्, शक्तिश्रद्धानम् । तदिदानीमलमर्थेन विशेष्यते । तच्चेत्सम्भावनं पर्याप्तमवितथं भवति । सिद्धाप्रयोग इत्यलमो विशेषणम् - सिद्धश्चेदलमोऽप्रयोगः । क्व चासौ सिद्धः ? यत्र गम्यते चार्थो न चासौ प्रयुज्यते । तदीदृशसम्भावनोपाधिकेऽर्थे वर्त्तमानाद्धातोर्लिङ् प्रत्ययो भवति । सर्वलकाराणामपवादः । अपि पर्वतं शिरसा भिन्द्यात् । अपि द्रोणपाकं भुञ्जीत ।

अलमिति किम् ? विदेशस्थायी देवदत्तः प्रायेण गमिष्यति ग्रामम् । सिद्धाप्रयोग इति किम् ? अलं देवदत्तो हस्तिनं हनिष्यति । क्रियातिपत्तौ भूते भविष्यति च नित्यं लृङ् भवति ।।

<विभाषा धातौ सम्भावनवचनेऽयदि ।। 3-3-155 ।।>

"सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे"(3.3.154/2811) इति सर्वमनुवर्त्तते । सम्भावनमुच्यते येन स सम्भावनवचनः । सम्भावनवचने धातावुपपदे यच्छब्दवर्जिते धातोर्विभाषा लिङ् भवति । पूर्वेण नित्यप्राप्तौ विकल्पार्थं वचनम् । सम्भावयामि भुञ्जीत भवान् । सम्भावयामि भोक्ष्यते भवान् ।

अवकल्पयामि भुञ्जीत भवान्, भोक्ष्यते भवान् । श्रद्दधे भुञ्जीत भवान्, भोक्ष्यते भवान् ।

अयदीति किम् ? सम्भावयामि यद्भुञ्जीत भवान् ।।

<हेतुहेतुमतोर्लिङ् ।। 3-3-156 ।।>

हेतुः = कारणम्, हेतुमत्फलम् । हेतुभूते हेतुमति चार्थे वर्त्तमानाद् धातोर्लिङ् प्रत्ययो भवति । सर्वलकाराणामपवादः । दक्षिणेन चेद्यायान्न शकटं पर्याभवेत् । यदि कमलकमाह्वयेन्न शकटं पर्याभवेत् । दक्षिणेन यानं हेतुः, अपर्याभवनं हेतुमत् । विभाषा चायमिष्यते, भविष्यति च काले, तेन लृडपिभवति - दक्षिणेन चेद्यास्यति न शकटं पर्याभविष्यति । तत्र विभाषाग्रहणं तावदनन्तरमेवानुवर्तते ।

लिङिति वर्तमाने पुनर्लिङ्ग्रहणं कालविशेषप्रतिपत्यर्थम् । तेनेह न भवति - हन्तीति पलायते, वर्षतीति धावति । क्रियातिपत्तौ लृङ् भवति ।।

<इच्छार्थेषु लिङ् लोटौ ।। 3-3-157 ।।>

इच्छार्थेषु धातुषूपपदेषु धातोर्लिङ्लोटौ प्रत्ययौ भवतः । सर्वलकाराणामपवादः । इच्छामि भुञ्जीत भवान् । इच्छामि भुङ्क्तां भवान् । कामये । प्रार्थये ।।

* कामप्रवेदन इति वक्तव्यम् *(म.भा.2.165) ।। इह मा भूत् - इच्छन् करोति ।।

<समानकर्तृकेषु तुमुन् ।। 3-3-158 ।।>

इच्छार्थेषु धातुषु समानकर्तृकेषूपपदेषु धातोस्तुमुन् प्रत्ययो भवति । तुमुन्प्रकृत्यपेक्षमेव समानकर्तृकत्वम् । इच्छति भोक्तुम् । कामयते भोक्तुम् । वष्टि भोक्तुम् । वाञ्छति भोक्तुम् ।

समानकर्तृकेष्विति - किम् ? देवदत्तं भुञ्जानमिच्छति यज्ञदत्तः । इह कस्मान्न भवति - इच्छन्करोति ? अनभिधानात् ।।

<लिङ् च ।। 3-3-159 ।।>

इच्छार्थेषु समानकर्तृकेषु धातुषूपपदेषु धातोर्लिङ् प्रत्ययो भवति । भुञ्जीयेतीच्छति । अधीयीयेतीच्छति । क्रियातिपत्तौ लृङ् भवति । योगविभाग उत्तरार्थः ।।

<इच्छार्थेभ्यो विभाषा वर्तमाने ।। 3-3-160 ।।>

इच्छार्थेभ्यो धातुभ्यो वर्तमाने काले विभाषा लिङ्प्रत्ययो भवति । लटि प्राप्ते वचनम् । इच्छति, इच्छेत् । वष्टि, उश्यात् । कामयते, कामयेत ।।

<विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् ।। 3-3-161 ।।>

विधिः = प्रेरणम् । निमन्त्रणम् = नियोगकरणम् । आमन्त्रणम् = कामचारकरणम् । अधीष्टः= सत्कारपूर्वको व्यापारः । सम्प्रश्नः = सम्प्रधारणम् । प्रार्थनम् = याच्ञा । विध्याद्यर्थेषु प्रत्ययो भवति । सर्वलकाराणामपवादः । विध्यादयश्च प्रत्ययार्थविशेषणम् । विध्यादिविशिष्टेषु कर्त्रादिषु लिङ् प्रत्ययो भवति । विधौ तावत् - कटं कुर्यात् । ग्रामं भवानागच्छेत् । निमन्त्रणे इह भवान्भुञ्जीत । इह भवानासीत । आमन्त्रणे - इह भवानासीत । इह भवान्भुञ्जीत । अधीष्टे - अधीच्छामो भवन्तं माणवकं भवानुपनयेत् । सम्प्रश्ने - किं नु खलु भो व्याकरणमधीयीय । प्रार्थने - भवति मे प्रार्थना व्याकरणमधीयीय ।

<लोट् च ।। 3-3-162 ।।>

लोट्प्रत्ययो भवति धातोर्विध्यादिष्वर्थेषु । योगविभाग उत्तरार्थः । विधौ तावत् - कटं तावद् भवान्करोतु । ग्रामं भवानागच्छतु । निमन्त्रणे - अमुत्र भवानास्ताम् । अमुत्र भवान्भुङ्क्ताम् । आमन्त्रणे इह भवान् भुङ्क्ताम् । अधीष्टे - अधीच्छामो भवन्तं माणवकं भवानध्यापयतु । माणवकं भवानुपनयताम् । सम्प्रश्ने - किं न खलु भो व्याकरणमध्ययै । प्रार्थने - भवति मे प्रार्थना व्याकरणमध्ययै, छन्दोऽध्ययै ।।

<प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ।। 3-3-163 ।।>

प्रेषणम् = प्रैषः, कामचाराभ्यनुज्ञानम् = अतिसर्गः, निमित्तभूतस्य कालस्यावसरः = प्राप्तकालता एतेष्वर्थेषु धातोः कृत्यसंज्ञकाः प्रत्यया भवन्ति । चकाराल्लोट् च । भवता कटः करणीयः, कर्त्तव्यः, कृत्यः, कार्यः । लोट् खल्वपि - करोतु कटं भवानिह प्रेषितः । भवानतिसृष्टः । भवतः प्राप्तकालः कटकरणे ।।

किमर्थं प्रैषादिषु कृत्या विधीयन्ते न सामान्येन, भावकर्मणोर्विहिता एव ते प्रैषादिष्वन्यत्र च भविष्यन्ति ? विशेषविहितेनानेन लोटा बाध्यन्ते । वासरूपविधिना भविष्यन्ति ? एवं तर्हि ज्ञापयति`स्त्र्यधिकारात्परेण वासरूपविधिर्नावश्यं भवति' इति ।

विधिप्रैषयोः को विशेषः ? केचिदाहुः--अज्ञातज्ञापनं विधिः, प्रेषणं प्रैष इति ।।

<लिङ् चोर्ध्वमौहूर्तिके ।। 3-3-164 ।।>

प्रैषादयो वर्त्तन्ते । प्रैषादिषु गम्यमानेषु ऊर्ध्वमौहूर्त्तिकेऽर्थे वर्तमानाद्धातोर्लिङ् प्रत्ययो भवति । चकाराद्यथाप्राप्तं च । ऊर्ध्वं मुहूर्त्तात् = उपरिमुहूर्तस्य भवता खलु कटः कर्त्तव्यः, करणीयः, कार्यः । भवान्खलु कटं कुर्यात्, भवान्खलु करोतु । भवानिह प्रेषितः । भवानतिसृष्टः । भवान्प्राप्तकालः ।।

<स्मे लोट् ।। 3-3-165 ।।>

`प्रैषादिषु' `ऊर्ध्वमौहूर्तिके' इति वर्तते । स्मशब्द उपपदे प्रैषादिषु गम्यमानेषूर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद्धातोर्लोट् प्रत्ययो भवति । लिङ्कृत्यानामपवादः । ऊर्ध्वं मुहूर्ताद् भवान्कटं करोतु स्म । ग्रामं गच्छतुस्म । माणवकमध्यापयतु स्म ।।

<अधीष्टेच ।। 3-3-166 ।।>

`स्मे' इति वर्तते । अधीष्टं व्याख्यातम् । स्मशब्द उपपदेऽधीष्टे गम्यमाने धातोर्लोट् प्रत्ययो भवति । लिङोऽपवादः । अङ्ग स्म राजन्माणवकमध्यापय । अङ्ग स्म राजन्नग्निहोत्रं जुहुधि ।।

<कालसमयवेलासु तुमुन् ।। 3-3-167 ।।>

कालादिषूपपदेषु धातोस्तुमुन्प्रत्ययो भवति । कालो भोक्तुम् । वेला भोक्तुम् ।। इह कस्मान्न भवति - `कालः पचति भूतानि'(मै.उ.6.15) इति ? प्रैषादिग्रहणमिहाभिसम्बध्यते ।।

इह कस्मान्न भवति - कालो भोजनस्य ? वासरूपेण ल्युडपि भवति । उक्तमिदम् - `स्त्र्यधिकरात्परत्र वासरूपविधिरनित्यः' इति ।।

<लिङ् यदि ।। 3-3-168 ।।>

कालादयोऽनुवर्त्तन्ते । यच्छब्दे उपपदे कालादिषु धातोर्लिङ् प्रत्ययो भवति । तुमुनोऽपवादः । कालो यद् भुञ्जीत भवान् । समयो यद् भुञ्जीत भवान् । वेला यद्भुञ्जीत भवान् ।।

<अर्हे कृत्यतृचश्च ।। 3-3-169 ।।>

अर्हतीत्यर्हः = तद्योग्यः । अर्हे कर्तरि वाच्ये गम्यमाने वा धातोः कृत्यतृचः प्रत्यया भवन्ति । चकाराल्लिङ् च । भवता खलु कन्या वोढव्या, वाह्या, वहनीया । भवान् खलु कन्याया वोढा । भवान् खलु कन्यां वहेत् । भवानेतदर्हेदिति ।

अथ कस्मादर्हे कृत्यतृचो विधीयन्ते, यावता सामान्येन विहितत्वादर्हेऽपि भविष्यन्ति ? योऽयमिह लिङ् विधीयते, तेन बाधा मा भूदिति । वासरूपविधिश्चानित्यः ।।

<आवश्यकाधमर्ण्ययोर्णिनिः ।। 3-3-170 ।।>

अवश्यं भावः = आवश्यकम् । उपाधिरयम्, नोपपदम् । अवश्यम्भावविशिष्टे आधमर्ण्यविशिष्टे च कर्तरि वाच्ये धातोर्णिनिः प्रत्ययो भवति । अवश्यङ्कारी । मयूरव्यंसकादित्वात्समासः ।

आधमर्ण्ये खल्वपि - शतं दायी । सहस्रं दायी । निष्कं दायी ।।

<कृत्याश्च ।। 3-3-171 ।।>

`आवश्यकाधमर्ण्ययोः' इति वर्तते । कृत्यसंज्ञकाश्च प्रत्यया आवश्यकाधमर्ण्ययोरुपाधिभूतयोर्धातोर्भवन्ति । भवता खलु अवश्यं कटः कर्त्तव्यः, अवश्यं करणीयः, अवश्यं कार्यः, अवश्यं कृत्यः । आधमर्ण्ये - भवता शतं दातव्यम् । सहस्रं देयम् ।।

किमर्थमिदम्, यावता सामान्येन विहिता अस्मिन्नपि विषये भविष्यन्ति ? विशेषविहितेन णिनिना बाध्येरन् ।।

कर्त्तरि णिनिः, भावकर्मणोः कृत्याः, तत्र कुतो बाधप्रसङ्गः ? तत्र केचिदाहुः - भव्यगेयादयः कर्तृवाचिनः कृत्याः, त इहोदाहरणमिति ।।

<शकि लिङ् च ।। 3-3-172 ।।>

`शकि' इति प्रकृत्यर्थविशेषणम् । शक्नोत्यर्थोपाधिके धात्वर्थे लिङ् प्रत्ययो भवति । चकारात्कृत्याश्च । भवता खलु भारो वोढव्यः, वहनीयः, वाह्यः । भवान् खलु भारं वहेत् । भवानिह शक्तः ।

सामान्यविहितानां पुनर्वचनम् - लिङा बाधा मा भूदिति ।

<आशिषि लिङ् लोटौ ।। 3-3-173 ।।>

आशंसनमाशीः = अप्राप्तस्येष्टस्यार्थस्य प्राप्तुमिच्छा । प्रकृत्यर्थविशेषणं चैतत् । आशीर्विशिष्टेऽर्थे वर्त्तमानाद्धातोर्लिङ्लोटौ प्रत्ययौ भवतः । चिरं जीव्याद्

भवान् । चिरं जीवतु भवान् ।
आशिषीति किम् ? चिरं जीवति देवदत्तः ।।
<क्तिच्क्तौ च संज्ञायाम् ।। 3-3-174 ।।>
`आशिषि' इत्येव । आशिषि विषये धातोः क्तिच्क्तौ प्रत्ययौ भवतः, समुदायेन चेत्संज्ञा गम्यते । तनुतात् तन्तिः । सनुतात् सातिः । भवतात् भूतिः । मनुतात् मन्तिः । क्तः खल्वपि - देवा एनं देयासुर्देवदत्तः ।
सामान्येन विहितः क्तः पुनरुच्यते - क्तिचा बाधा मा भूदिति । चकारो विशेषणार्थः - "न क्तिचि दीर्घश्च"(6.4.39/3314) इति ।।
<माङि लुङ् ।। 3-3-175 ।।>
माङ्युपपदे धातोर्लुङ् प्रत्ययो भवति । सर्वलकाराणामपवादः । मा कार्षीत् । मा हार्षीत् । कथं मा भवतु तस्य पापम्, मा भविष्यतीति ? असाधुरेवायम् । केचिदाहुः - अङिदपरो माशब्दो विद्यते, तस्यायं प्रयोगः ।।
<स्मोत्तरे लङ् च ।। 3-3-176 ।।>
स्मशब्दोत्तरे माङ्युपदे धातोर्लङ् प्रत्ययो भवति । चकाराल्लुङ्च । मा स्म करोत्, मा स्म कार्षीत् । मा स्म हरत्, मा स्म हार्षीत् ।।
इति श्रीजयादित्यविरचितायां काशिकावृत्तौ
तृतीयाध्याये तृतीयः पादः ।।
---------------******************--------------

3.4

अथ तृतीयाध्याये चतुर्थः पादः
<धातुसम्बन्धे प्रत्ययाः ।। 3-4-1 ।।>
धात्वर्थे धातुशब्दः । धात्वर्थानां सम्बन्धो धातुसम्बन्धः = विशेषणविशेष्यभावः । तस्मिन्सति अयथाकालोक्ता अपि प्रत्ययाः साधवो भवन्ति । अग्निष्टोमयाज्यस्य पुत्त्रो जनिता । कृतः कटः श्वो भविता । भावि कृत्यमासीत् । अग्निष्टोमयाजीति भूतकालः, जनितेति भविष्यत्कालः, तत्र भूतः कालो भविष्यत्कालेनाभिसम्बध्यमानः साधुर्भवति । विशेषणं गुणत्वाद्विशेष्यकालमनुरुध्यते, तेन विपर्ययो न भवति ।
प्रत्ययाधिकारे पुनः प्रत्ययग्रहणम्-अधात्वधिकारविहिता अपि प्रत्ययास्तद्धिता धातुसम्बन्धे सति कालभेदे साधवो यथा स्युरिति । गोमानासीत् । गोमान्भविता । गावो विद्यन्तेऽस्येति वर्तमानविहितो मतुप् आसीद् भवितेति सम्बन्धादतीते भविष्यति च साधुर्भवति ।।
<क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ।। 3-4-2 ।।>
`धातुसम्बन्धे' इति वर्तते । पौनः पुन्यं भृशार्थो वा क्रियासमभिहारः । प्रकृत्यर्थविशेषणं चैतत् । समभिहारविशिष्टक्रियावचनाद्धातोर्लोट् प्रत्ययो भवति, सर्वेषु कालेषु । सर्वलकाराणामपवादः । तस्य च लोटो हि, स्व इत्येतावादेशौ भवतः, तध्वंभाविनस्तु वा भवतः ।
योगविभागोऽत्र कर्तव्यः, क्रियासमभिहारे लोड् भवति, ततो लोटो हिस्वौ । लोडित्येव, लोड्धर्माणौ हिस्वौ भवत इत्यर्थः । तेनात्मनेपदपरस्मैपदत्वं भेदेनावतिष्ठते, तिङ्त्वं च द्वयोरपि भवति ।। लुनीहि लुनीहीत्येवायं लुनाति, इमौ लुनीतः, इमे लुनन्ति । लुनीहि लुनीहीत्येव त्वं लुनासि, युवां लुनीथः, यूयं लुनीथ । अथ वा लुनीत लुनीतेत्येव यूयं लुनीथ । लुनीहि लुनीहीत्येवाहं लुनामि, आवां लुनीवः, वयं लुनीमः ।।
भूते - लुनीहि लुनीहीत्येवायमलावीत् ,अलाविष्टाम्, अलाविषुः । एवं मध्यमोत्तमयोरुदाहार्यम् ।।
भविष्यति - लुनीहि लुनीहीत्येवायं लविष्यति, लविष्यतः, लविष्यन्ति । एवं मध्यमोत्तमयोरुदाहार्यम् ।।
अधीष्वादीष्वेत्येवायमधीते, इमावधीयाते, इमेऽधीयते । अधीष्वाधीष्वेत्येव त्वमधीषे, युवामधीयाथे, यूयमधीध्वे । अथवा,अधीध्वमधीध्वमित्येव यूयमधीध्वे । अधीष्वाधीष्वेत्येवाहमधीये, आवामधीवहे, वयमधीमहे । एवं सर्वेष्वेव लकारेषूदाहार्यम् ।।
क्रियासमभिहाराभिव्यक्तौ द्विर्वचनमयं लोडपेक्षते - क्रियासमभिहारे द्वे भवत इति । यङ्प्रत्ययः पुनरस्मिन्नेवार्थे विधीयमानः स्वयमेव शक्तत्वान्नापेक्षते द्विर्वचनम् ।।
<समुच्चयेऽन्यतरस्याम् ।। 3-4-3 ।।>
अनेकक्रियाध्याहारः = समुच्चयः । समुच्चीयमानक्रियावचनाद्धातोरन्यतरस्यां लोट् प्रत्ययो भवति, तस्य लोटो हिस्वावादेशौ भवतः । तध्वंभाविनस्तु वा भवतः ।
भ्राष्ट्रमट मठमट खदूरमट स्थाल्यपिधानमटेत्येवायमटति, इमावटतः, इमेऽटन्ति । भ्राष्ट्रमट मठमट खदूरमट स्थाल्यपिधानमटेत्येव त्वमटसि, युवामटथः, यूयमटथ । अथ वा - भ्राष्ट्रमटत मठमटत खदूरमटत स्थाल्यपिधानमटतेत्येव यूयमटथ । भ्राष्ट्रमट मठमट खदूरमट स्थाल्यपिधानमटेत्येवाहमटामि,

आवामटावः, वयमटामः ।

अथ वा-भ्राष्ट्रमटति मठमटति खदूरमटति स्थाल्यपिधानमटति इत्येवायमटति, इमावटतः, इमेऽटन्ति । भ्राष्ट्रमटसि मठमटसि खदूरमटसि स्थाल्यपिधानमटसि इत्येव त्वमटसि, युवामटथः, यूयमटथ । भ्राष्ट्रमटामि मठमटामि खदूरमटामि स्थाल्यपिधानमटामीत्येवाहमटामि, आवामटावः, वयमठामः ।

छन्दोऽधीष्व व्याकरणमधीष्व निरुक्तमधीष्वेत्येवायमधीते, इमावधीयाते, इमेऽधीयते । छन्दोऽधीष्व व्याकरणमधीष्व निरुक्तमधीष्वेत्येव त्वमधीषे, युवामधीयाथे, यूयमधीध्वे । अथ वा - छन्दोऽधीध्वं व्याकरणमधीध्वं निरुक्तमधीध्वमित्येव यूयमधीध्वे । छन्दोऽधीष्व व्याकरणमधीष्व निरुक्तमधीष्वेत्येवाहमधीये, आवामधीवहे, वयमधीमहे ।।

अथ वा - छन्दोऽधीते व्याकरणमधीते निरुक्तमधीते इत्येवायमधीते इमावधीयाते, इमेऽधीयते । छन्दोऽधीषे व्याकरणमधीषे निरुक्तमधीषे इत्येव त्वमधीषे, युवामधीयाथे, यूयमधीध्वे । छन्दोऽधीये व्याकरणमधीये निरुक्तमधीय इत्येवाहमधीये, आवामधीवहे, वयमधीमहे ।।

<यथाविध्यनुप्रयोगः पूर्वस्मिन् ।। 3-4-4 ।।>

पूर्वस्मिन् लोड्विधाने यथाविध्यनुप्रयोगो भवति । यस्माद्धातोर्लोड्विहितस्स एव धातुरनुप्रयोक्तव्यः । धातुसम्बन्धे प्रत्ययविधानादनुप्रयोगः सिद्ध एव, यथाविध्यर्थं तु वचनम् । तथा चैवोदाहृतम् लुनीहि लुनीहीत्येवायं लुनातीति । छिनत्तीति नानुप्रयुज्यते । अधीष्वाधीष्वेत्येवायमधीते । पठतीति नानुप्रयुज्यते ।।

<समुच्चये सामान्यवचनस्य ।। 3-4-5 ।।>

द्वितीये लोड्विधाने समुच्चये सामान्यवचनस्य धातोरनुप्रयोगः कर्तव्यः । ओदनं भुङ्क्ष्व, सक्तून्पिब, धानाः खादेत्येवायमभ्यवहरति । सर्वविशेषानुप्रयोगनिवृत्त्यर्थं वचनम् । लाघवं च लौकिके शब्दव्यवहारे नाद्रियते । भ्राष्ट्रमट मठमट खदूरमट स्थाल्यपिधानमटेत्येवायमटतीत्यत्रापि कारकभेदात् क्रियाभेदे सति सामान्यवचनता सम्भवत्येव ।।

<छन्दसि लुङ् लङ्लिटः ।। 3-4-6 ।।>

`धातुसम्बन्धे' इत्येव । छन्दसि विषये धातुसम्बन्धे सर्वेषु लुङ्लङ् लिटः प्रत्यया भवन्ति । `अन्यतरस्याम्' इति वर्त्तते । तेनान्येऽपि लकारा यथायथं भवन्ति । लुङ् - शकलाङ्गुष्ठकोऽकरत् । `अहं तेभ्योऽकरं नमः'(वा.सं.16.8) । लङ् - `अग्निमद्य होतारमवृणीतायं यजमानः'(शां.श्रौ.5.20.5) । लिट् - `अद्या ममार'(ऋ.10.55.5) । अद्य म्रियते ।।

<लिङर्थे लेट् ।। 3-4-7 ।।>

`छन्दसि' `अन्यतरस्याम्' इति वर्त्तते । लिङर्थे - यत्र लिङ् विधीयते विध्यादिः "हेतुहेतुमतोर्लिङ्"(3.3.156/2813) इत्येवमादिः, तत्र छन्दसि विषयेऽन्यतरस्यां लेट् प्रत्ययो भवति । `जोषिषत्'(ऋ.2.35.1) । `तारिषत्'(ऋ.1.25.12) । `मन्दिषत् । `नेता इन्द्रो नेषत्'(श.श्रौ.7.9.1) । तक्षिषत् । `पताति विद्युत्'(ऋ.7.25.1) । `प्रजापतिरुदधिं च्यावयाति'(तै.3.5.5.2) ।।

<उपसंवादाशङ्कयोश्च ।। 3-4-8 ।।>

उपसंवादः = परिभाषणम्, कर्त्तव्ये पणबन्धः - `यदि मे भवानिदं कुर्याद् अहमपि भवते इदं दास्यामि' इति । कारणतः कार्यानुसरणं तर्कः, उत्प्रेक्षा = आशङ्का । उपसंवादे आशङ्कायां च गम्यमानायां छन्दसि विषये लेट् प्रत्ययो भवति । उपसंवादे - `अहमेव पशूनामीशै'(काठक.सं.25.1) । `मदग्रा एव वो ग्रहा गृह्यान्तै'(मै.4.5.8) इति । `मद्देवतान्येव वः पात्राण्युच्यान्तै'(तै.सं.6.4.7.1) । आशाङ्कायां च - `नेज्जिह्मायन्तो नरकं पताम'(ऋ.खि.10.106.1) । जिह्माचरणेन नरकपात आशङ्क्यते ।

लिङर्थ एवायम्, नित्यार्थं तु वचनम् । पूर्वसूत्रे `अन्यतरस्याम्' इति वर्त्तते ।।

<तुमर्थे सेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ् तवेनः ।। 3-4-9 ।।>

`छन्दसि' इत्येव । तुमुनोऽर्थस्तुमर्थः । तत्र छन्दसि विषये धातोः सयादयः प्रत्यया भवन्ति । तुमर्थो भावः । कथं ज्ञायते ? वचनसामर्थ्यात् । तावदयं कर्तुरपकृष्यते । न चान्यस्मिन्नर्थे तुमुन्नादिश्यते । `अनिर्दिष्टार्थाश्च प्रत्ययाः स्वार्थे भवन्ति'(प.122) । स्वार्थश्च धातूनां भाव एव । से--वक्षे रायः । सेन्--`ता वामेषे रथानाम्'(ऋ.5.56.3) । असे, असेन्--`क्रत्वे दक्षाय जीवसे'(अ.6.19.2) । स्वरे विशेषः । क्से--`प्रेषे भगाय'(तै.सं.1.2.11.1),कसेन्-`श्रियसे'(ऋ.5.59.3) । अध्यै, अध्यैन् - `काममुपाचरध्यै'(तै.सं.1.2.11.1) । स्वरे विशेषः । कध्यै--`इन्द्राग्नी आहुवध्यै'(वा.सं.3.13) । कध्यैन्--श्रियध्यै । शध्यै, शध्यैन् - `वायवे पिबध्यै'(ऋ.7.92.2) । `राधसः सह मादयध्यै'(वा.सं.3.13) । तवैग-`सोममिन्द्राय पातवै'(ऋ.8.69.10) । तवेङ् - `दशमे मासि सूतवे'(ऋ.10.184.3) । तवेन् -`स्वर्देवेषु गन्तवे'(अ.9.5.17) । `कर्त्तवे'(ऋ.9.86.20) । हर्त्तवे ।

<प्रयै रोहिष्यै अव्यथिष्यै ।। 3-4-10 ।।>

`तुमर्थे छन्दसि' इत्येव । प्रयै, रोहिष्यै, अव्यथिष्यै इत्येते शब्दा निपात्यन्ते छन्दसि विषये । प्रपूर्वस्य यातेः कैप्रत्ययः - `प्रयै देवेभ्यः'(ऋ.1.142.6), प्रयातुम् । रुहेः इष्यैप्रययः - `अपामोषधीनां रोहिष्यै'(तै.सं.1.3.10.2), रोहणाय । व्यथेर्नञ्पूर्वस्य इष्यैप्रत्ययः - `अव्यथिष्यै'(काठ.सं.3.7), अव्यथनाय ।।

<दृशे विख्ये च ।। 3-4-11 ।।>
`तुमर्थे', `छन्दसि' इत्येव । दृशे, विख्ये इत्येतौ छन्दसि विषये निपात्येते । दृशेः के प्रत्ययः - `दृशे विश्वाय सूर्यम्'(ऋ.1.50.1), द्रष्टुम् । विख्ये त्वा हरामि, विख्यातुम् ।।
<शकि णमुल्कमुलौ ।। 3-4-12 ।।>
`छन्दसि' इत्येव । शक्नोतौ धातावुपपदे छन्दसि विषये तुमर्थे णमुल्, कमुल् इत्येतौ प्रत्ययौ भवतः । णकारो वृद्ध्यर्थः । ककारो गुणवृद्धिप्रतिषेधार्थः । लकारः स्वरार्थः । `अग्निं देवा विभाजं नाशक्नुवन्'(मै.सं.1.6.4) । विभक्तुमित्यर्थः । `अपलुम्पं नाशक्नुवन्'(मै.सं.1.6.5) । अपलोप्तुमित्यर्थः ।।
<ईश्वरे तोसुन्कसुनौ ।। 3-4-13 ।।>
`तुमर्थे', `छन्दसि' इत्येव । ईश्वरशब्द उपपदे छन्दसि विषये तुमर्थे धातोस्तोसुन्कसुन्प्रत्ययौ भवतः । ईश्वरोऽभिचरितोः । अभिचरितुमित्यर्थः । ईश्वरो विलिखः । विलिखितुमित्यर्थः । ईश्वरो वितृदः । वितर्दितुमित्यर्थः ।।
<कृत्यार्थे तवैकेन्केन्यत्वनः ।। 3-4-14 ।।>
`छन्दसि' इत्येव । कृत्यानामर्थो भावकर्मणी । तस्मिन् कृत्यार्थे छन्दसि विषये तवै, केन्, केन्य, त्वन् इत्येते प्रत्यया भवन्ति । तवै-
`अन्वेतवै'(ऋ.7.44.5), अन्वेतव्यम् । `परिधातवै'(अ.2.13.2), परिधातव्यम् । `परिस्तरितवै'(काठ.सं.32.7), परिस्तरितव्यम् । केन् - नावगाहे, नावगाहितव्यम् । केन्य - `दिदृक्षेण्यः'(ऋ.1.1.46.5), `शुश्रूषेण्यः'(तै.आ.4.1.1), दिदृक्षितव्यम्, शुश्रूषितव्यम् । त्वन् - `कर्त्वं हविः'(अ.वे.1.4.3), कर्त्तव्यम् ।
`तुमर्थे छन्दसि'(3.4.9/3436) इति सयादिसूत्रेऽपि तवै विहितः, तस्य तुमर्थादन्यत्र कारके विधिर्द्रष्टव्यः ।।
<अवचक्षे च ।। 3-4-15 ।।>
`कृत्यार्थे छन्दसि' इत्येव । अवपूर्वाच्चक्षिङ एश्प्रत्ययो निपात्यते । `रिपुणा नावचक्षे'(वा.सं.17.93) । नावख्यातव्यमित्यर्थः ।।
<भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् ।। 3-4-16 ।।>
`कृत्यार्थे' इति निवृत्तम् । `तुमर्थे' इति वर्त्तते । प्रकृत्यर्थविशेषणं भावलक्षणग्रहणम् । भावो लक्ष्यते येन तस्मिन्नर्थे वर्त्तमानेभ्यः स्थादिभ्यो धातुभ्यश्छन्दसि विषये तुमर्थे तोसुन्प्रत्ययो भवति । `आसंस्थातोर्वेद्यां सीदन्ति'(काठ.सं.11.6) । आ समाप्तेः सीदन्तीत्यर्थः । इण् - `पुरा
सूर्यस्योदेतोराधेयः'(काठ.सं.8.3) । कृञ् - `पुरा वत्सानामपाकर्त्तोः'(काठ.सं.31.15) । वदि - `पुरा प्रवदितोरग्नौ प्रहोतव्यम्' । चरि - `पुरा प्रचरितोराग्नीध्रे होतव्यम्'(गो.ब्रा.2.2.10) । हु- `आ होतोरप्रमत्तस्तिष्ठति'(तै.ब्रा.1.4.9.5) । तमि - `आ तमितोरासीत'(तै.ब्रा.1.6.9.5) । जनि - `आ विजनितोः सम्भवामेति'(तै.सं.2.5.1.5) ।।
<सृपितृदोः कसुन् ।। 3-4-17 ।।>
`भावलक्षणे' `छन्दसि' इति वर्त्तते । सृपितृदोर्धात्वोर्भावलक्षणेऽर्थे वर्तमानयोश्छन्दसि विषये तुमर्थे कसुन्प्रत्ययो भवति । `पुरा क्रूरस्य विसृपो विरप्शिन्'(तै.सं.1.1.9.3) । `पुरा जर्तृभ्य आतृदः'(ऋ.8.1.12) ।
<अलंखल्वोः प्रतिषेधयोः प्राचा क्त्वा ।। 3-4-18 ।।>
`छन्दसि' `भावलक्षणे' इति सर्वं निमित्तम् । अलं, खलु इत्येतयोः प्रतिषेधवाचिनोरुपपदयोर्धातोः क्त्वा प्रत्ययो भवति प्राचामाचार्याणां मतेन । अलं कृत्वा । खलु कृत्वा । अलं बाले रुदित्वा ।
अलङ्खल्वोरिति किम् ? मा कार्षीः । प्रतिषेधयोरिति किम् ? पूजार्थम् ।।
<उदीचां माङो व्यतीहारे ।। 3-4-19 ।।>
`क्त्वा' तु वर्त्तते । माङो धातोर्व्यतीहारे वर्तमानादुदीचामाचार्याणां मतेन क्त्वा प्रत्ययो भवति । अपमित्य याचते । अपमित्य हरति । अपूर्वकालत्वादप्राप्तः क्त्वा विधीयते । उदीचाङ्ग्रहणात्तु यथाप्राप्तमपि भवति - याचित्वाऽपमयते, हृत्वाऽपमयते ।
मेङः कृतात्वस्यायं निर्देशः कृतो ज्ञापनार्थः -`नानुबन्धकृतमनेजन्तत्वम्'(शा.प.15) इति, तेन "दाधा घ्वदाप्"(1.1.20/2373) इति दैपोऽपि प्रतिषेधो भवति ।।
<परावरयोगे च ।। 3-4-20 ।।>
परावराभ्यां योगः परावरयोगः । परेण पूर्वस्य योगे गम्यमाने अवरेण च परस्य धातोः क्त्वा प्रत्ययो भवति । परेण तावत्--अप्राप्य नदीं पर्वतः स्थितः । परनदीयोगेन पर्वतो विशिष्यते । अवरयोगे--अतिक्रम्य तु पर्वतं नदी स्थिता । अवरपर्वतयोगेन नदी विशिष्यते ।
<समानकर्तृकयोः पूर्वकाले ।। 3-4-21 ।।>
समानः कर्त्ता ययोर्धात्वर्थयोस्तत्र पूर्वकाले धात्वर्थे वर्तमानाद्धातोः क्त्वा प्रत्ययो भवति । शक्तिशक्तिमतोर्भेदस्याविवक्षितत्वात् समानकर्तृकता । भुक्त्वा व्रजति । पीत्वा व्रजति। द्विवचनमतन्त्रम् । स्नात्वा पीत्वा भुक्त्वा दत्त्वा व्रजति ।
समानकर्तृकयोरिति किम् ? भुक्तवति ब्राह्मणे गच्छति देवदत्तः । पूर्वकाले इति किम् ? व्रजति च जल्पति च ।

* आस्यं व्यादाय स्वपिति चक्षुः संमील्य हसतीत्युपसङ्ख्यानमपूर्वकालत्वात् *(म.भा.2.173) ।।

<आभीक्ष्ण्ये णमुल् च ।। 3-4-22 ।।>

`समानकर्तृकयोः पूर्वकाले' इत्येव । आभीक्ष्ण्यम् = पौनः पुन्यम् । प्रकृत्यर्थविशेषणं चैतत् । आभीक्ष्ण्यविशिष्टेऽर्थे वर्तमानाद्धातोर्णमुल् प्रत्ययो भवति, चकारात् क्त्वा च । द्विर्वचनसहितौ क्त्वाणमुलावाभीक्ष्ण्यं द्योतयतः, न केवलौ । `अभिक्ष्ण्ये द्वे भवतः'(8.1.12/2447.वा.) इत्युपसङ्ख्यानाद् द्विर्वचनम् । भोजंभोजं व्रजति, भुक्त्वा भुक्त्वा व्रजति । पायंपायं व्रजति, पीत्वा पीत्वा व्रजति ।।

<न यद्यनाकाङ्क्षे ।। 3-4-23 ।।>

यच्छब्द उपपदे धातोः क्त्वाणमुलौ प्रत्ययौ न भवतोऽनाकाङ्क्षे वाच्ये । यत्र पूर्वोत्तरे क्रिये स्तस्तच्चेद्वाक्यं न परं किञ्चदाकाङ्क्षत इति । णमुलनन्तरः, क्त्वा तु पूर्वसूत्रविहितोऽपि प्रतिषिध्यते । यदयं भुङ्क्ते ततः पचति । यदयमधीते ततः शेते ।

अनाकाङ्क्ष इति किम् ? यदयं भुक्त्वा व्रजति अधीत एव ततः परम् ।।

<विभाषाग्रेप्रथमपूर्वेषु ।। 3-4-24 ।।>

अप्राप्तविभाषेयम् । `आभीक्ष्ण्ये' इति नानुवर्त्तते । अग्रे, प्रथम, पूर्व इत्येतेषूपपदेषु समानकर्तृकयोः पूर्वकाले धातोः क्त्वाणमुलौ प्रत्ययौ विभाषा भवतः । अग्रे भोजं व्रजति, अग्रे भुक्त्वा व्रजति । प्रथमं भोजं व्रजति, प्रथमं भुक्त्वा व्रजति । पूर्वं भोजं व्रजति, पूर्वं भुक्त्वा व्रजति ।

विभाषाग्रहणम् - एताभ्यां मुक्ते लडादयोऽपि यथा स्युः । अग्रे भुङ्क्ते ततो व्रजति ।

ननु च वासरूप इति भविष्यति ? क्त्वाणमुलौ यत्र सह विधीयेते तत्र वासरूपविधिर्नास्तीत्येतदनेन ज्ञाप्यते, तेनाभीक्ष्ण्ये लडादयो न भवन्ति ।

उपपदसमासः कस्मान्न क्रियते ? उक्तं तत्रैवकारस्य प्रयोजनम्, `अमैव यत्तुल्यविधानमुपपदं तत्समस्यते, नान्यत्' इति ।।

<कर्मण्याक्रोशे कृञः खमुञ् ।। 3-4-25 ।।>

कर्मण्युपपदे कृञो धातोः खमुञ् प्रत्ययो भवति, आक्रोशे गम्यमाने । चोरङ्कारमाक्रोशति । चोरोऽसि दस्युरसि इत्याक्रोशति ।

चोरकरणमाक्रोशसम्पादनार्थमेव, न त्वसौ चोरः क्रियते ।।

<स्वादुमि णमुल् ।। 3-4-26 ।।>

`समानकर्तृकयोः पूर्वकाले', `कृञः' इति चानुवर्त्तते । `स्वादुमि' इत्यर्थग्रहणम् । स्वाद्वर्थेषूपपदेषु कृञो णमुल् प्रत्ययो भवति । स्वादुङ्कारं भुङ्क्ते । सम्पन्नङ्कारं भुङ्क्ते । लवणङ्कारम् । स्वादुमीति मकारान्तनिपातनमीकाराभावार्थम्, च्व्यन्तस्यापि मकारार्थं दीर्घाभावार्थं च । अस्वाद्वीं स्वाद्वीं कृत्वा भुङ्क्ते स्वादुङ्कारं भुङ्क्ते । वासरूपेण क्त्वापि भवति - स्वादुं कृत्वा भुङ्क्ते ।

तुमर्थाधिकाराच्च सर्व एते भावे प्रत्ययाः । यद्येवम्, स्वादुङ्कारं भुङ्क्ते देवदत्त इति णमुला कर्तुरनभिहितत्वात्कर्त्तरि कस्मात्तृतीया न भवति ? भुजिप्रत्ययेनाभिहितः कर्त्ता, न चास्मिन्प्रकरणे शक्तिशक्तिमतोर्भेदो विवक्ष्यते, समानकर्तृत्वं हि विरुध्यते । प्रधानशक्त्यभिधाने वा गुणशक्तिरभिहितवत्प्रकाशते ।।

<अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् ।। 3-4-27 ।।>

`कृञः' इत्येव । अन्यथादिषूपपदेषु कृञो णमुल् प्रत्ययो भवति, सिद्धाप्रयोगश्चेत्करोतेर्भवति ।

कथं पुनरसौ सिद्धाप्रयोगः ? निरर्थकत्वान्न प्रयोगमर्हतीति एवमेव प्रयुज्यते । अन्यथा भुङ्क्ते इति यावानर्थस्तावानेव अन्यथा कारं भुङ्क्ते इति गम्यते । अन्यथाकारं भुङ्क्ते । एवङ्कारं भुङ्क्ते । कथङ्कारं भुङ्क्ते । इत्थङ्कारं भुङ्क्ते ।।

सिद्धाप्रयोग इति किम् ? अन्यथा कृत्वा शिरो भुङ्क्ते ।।

<यथातथयोरसूयाप्रतिवचने ।। 3-4-28 ।।>

`कृञः' `सिद्धाप्रयोगे' इति वर्त्तते । यथातथाशब्दयोरुपपदयोः कृञो णमुल् प्रत्ययो भवति, असूयाप्रतिवचने गम्यमाने । यद्यसूयन् पृच्छति प्रतिवचनम् - यथाकारमहं भोक्ष्ये तथाकारमहम्, किं तवानेन ?

असूयाप्रतिवचन इति किम् ? यथा कृत्वाऽहं भोक्ष्ये तथा त्वं द्रक्ष्यसि ।

सिद्धाप्रयोग इत्येव - यथा कृत्वाऽहं शिरो भोक्ष्ये किं तवानेन ?

<कर्मणि दृशिविदोः साकल्ये ।। 3-4-29 ।।>

कर्मण्युपपदे साकल्यविशिष्टेऽर्थे दृशिविदोर्धात्वोर्णमुल् प्रत्ययो भवति । कन्यादर्शं वरयति । या याः कन्याः पश्यति तास्ता वरयतीत्यर्थः । ब्राह्मणवेदं भोजयति । यं यं ब्राह्मणं जानाति लभते विचारयति वा तान्सर्वान् भोजयतीत्यर्थः ।।

साकल्ये इति किम् ? ब्राह्मणं दृष्ट्वा भोजयति ।।

<यावति विन्दजीवोः ।। 3-4-30 ।।>

यावच्छब्द उपपदे विन्दतेर्जीवतेश्च णमुल् प्रत्ययो भवति । यावद्वेदं भुङ्क्ते । यावल्लभते तावद् भुङ्क्त इत्यर्थः । यावज्जीवमधीते । यावज्जीवति तावदधीत इत्यर्थः ।।

<चर्मोदरयोः पूरेः ।। 3-4-31 ।।>

`कर्मणि' इत्येव । चर्मोदरयोः कर्मणोरुपपदयोः पूरयतेर्णमुल् प्रत्ययो भवति । चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते ।।

<वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ।। 3-4-32 ।।>

`कर्मणि' इत्येव । पूरयतेर्धातोर्णमुल् प्रत्ययो भवति, ऊलोपश्चास्य पूरयतेरन्यतरस्यां भवति, समुदायेन चेद्वर्षस्य प्रमाणम् = इयत्ता गम्यते । गोष्पदपूरं वृष्टो देवः, गोष्पदप्रं वृष्टो देवः । सीतापूरं वृष्टो देवः, सीताप्रं वृष्टो देवः ।।

अस्यग्रहणं किमर्थम् ? उपपदस्य मा भूत् - मूषिकाबिलपूरं वृष्टो देवः, मूषिकाबिलप्रम् ।।

<चेले क्नोपेः ।। 3-4-33 ।।>

`कर्मणि' इत्येव । `क्नूयी शब्दे उन्दने च'(धा.पा.485)- अस्माण्ण्यन्ताद्धातोश्चेलार्थेषु कर्मसु उपपदेषु णमुल् प्रत्ययो भवति, वर्षप्रमाणे गम्ययाने । चेलक्नोपं वृष्टो देवः । वस्त्रक्नोपम् । वसनक्नोपम् ।।

<निमूलसमूलयोः कषः ।। 3-4-34 ।।>

`कर्मणि' इत्येव । निमूलसमूलशब्दयोः कर्मवाचिनोरुपपदयोः कर्षधातोर्णमुल्प्रत्ययो भवति । निमूलकाषं कषति । समूलकाषं कषति । निमूलं समूलं कषतीत्यर्थः । इतः प्रभृति कषादीन्यान्वक्ष्यति, तत्र "कषादिषु यथाविध्यनुप्रयोगः"(3.4.46/3367) इति ।।

<शुष्कचूर्णरूक्षेषु पिषः ।। 3-4-35 ।।>

`कर्मणि' इत्येव । शुष्कादिषु कर्मवाचिषूपपदेषु पिषेर्धातोर्णमुल् प्रत्ययो भवति । शुष्कपेषं पिनष्टि । शुष्कं पिनष्टीत्यर्थः । चूर्णपेषं पिनष्टि । चूर्णं पिनष्टीत्यर्थः । रूक्षपेषं पिनष्टि । रूक्षं पिनष्टीत्यर्थः ।।

<समूलाकृतजीवेषु हन्कृञ्ग्रहः ।। 3-4-36 ।।>

`कर्मणि' इत्येव । समूल, अकृत, जीव इत्येतेषु शब्देषु कर्मसूपपदेषु यथासङ्ख्यं हन्, कृञ्, ग्रह इत्येतेभ्यो धातुभ्यो णमुल् प्रत्ययो भवति । समूलघातं हन्ति । समूलं हन्तीत्यर्थः । अकृतकारं करोति । जीवग्राहं गृह्णाति ।।

<करणे हनः ।। 3-4-37 ।।>

करणे उपपदे हन्तेर्धातोर्णमुल् प्रत्ययो भवति । पाणिघातं वेदिं हन्ति । पादघातं भूमिं हन्ति ।

"हिंसार्थानां च समानकर्मकाणाम्"(3.4.48/3369) इति णमुलं वक्ष्यति, अहिंसार्थोऽयमारम्भः । नित्यसमासार्थो वा यथाविध्यनुप्रयोगार्थश्च ।

पूर्वविप्रतिषेधेन - हन्तेर्हिंसार्थस्यापि प्रत्ययोऽनेनैवेष्यते - असिघातं हन्ति, शरघातं हन्ति ।।

<स्नेहने पिषः ।। 3-4-38 ।।>

`करणे' इत्येव । स्निह्यते येन तत् स्नेहनम् । स्नेहनवाचिनि करणे उपपदे पिषेर्धातोर्णमुल् प्रत्ययो भवति । उदपेषं पिनष्टि । तैलपेषं पिनष्टि । तैलेन पिनष्टीत्यर्थः ।।

<हस्ते वर्त्तिग्रहोः ।। 3-4-39 ।।>

`करणे' इत्येव । `हस्ते' इत्यर्थग्रहणम् । वर्त्तिर्ण्यन्तः । हस्तवाचिनि करण उपपदे वर्त्तयतेर्गृह्णातेश्च णमुल् प्रत्ययो भवति । हस्तेन वर्त्तयति, हस्तवर्त्तं वर्त्तयति । करवर्त्तम् । पाणिवर्त्तम् । ग्रहेः खल्वपि - हस्तेन गृह्णाति, हस्तग्राहं गृह्णाति । करग्राहम् । पाणिग्राहम् ।

<स्वे पुषः ।। 3-4-40 ।।>

`करणे' इत्येव । `स्वे' इत्यर्थग्रहणम् । स्ववाचिनि करणे उपपदे पुषेर्धातोर्णमुल्प्रत्ययो भवति । आत्मीयज्ञातिधनवचनः स्वशब्दः । स्वपोषं पुष्णाति । आत्मपोषम् । गोपोषम् । पितृपोषम् । धनपोषम् । रैपोषम् ।।

<अधिकरणे बन्धः ।। 3-4-41 ।।>

अधिकरणवाचिन्युपपदे बध्नातेर्धातोर्णमुल्प्रत्ययो भवति । चक्रबन्धं बध्नाति । कूटबन्धं बध्नाति । मुष्टिबन्धं बध्नाति। चोरकबन्धं बध्नाति । चोरके बध्नातीत्यर्थः ।।

<संज्ञायाम् ।। 3-4-42 ।।>

संज्ञायां विषये बध्नातेर्धातोर्णमुल् प्रत्ययो भवति । क्रौञ्चबन्धं बध्नाति। मयूरिकाबन्धं बध्नाति । मयूरिकाबन्धम् , अट्टालिकाबन्धं बद्धः । बन्धविशेषाणां नामधेयान्येतानि ।।

<कर्त्रोर्जीवपुरुषयोर्नशिवहोः ।। 3-4-43 ।।>

जीवपुरुषयोः कर्तृवाचिनोरुपपदयोर्यथासङ्ख्यं नशिवहोर्धात्वोर्णमुल् प्रत्ययो भवति । जीवनाशं नश्यति । जीवो नश्यतीत्यर्थः । पुरुषवाहं वहति । परुषः प्रेष्यो भूत्वा वहतीत्यर्थः ।।

कर्त्तरीति किम् ? जीवेन नष्टः । पुरुषेणोढः ।।

<ऊर्ध्वे शुषिपूरोः ।। 3-4-44 ।।>

कर्तृग्रहणमनुवर्त्तते । ऊर्ध्वशब्दे कर्तृवाचिन्युपपदे शुषिपूरोर्धात्वोर्णमुल् प्रत्ययो भवति । ऊर्ध्वशोषं शुष्यति । ऊर्ध्वं शुष्यतीत्यर्थः । ऊर्ध्वपूरं पूर्यते । ऊर्ध्वं

पूर्यते इत्यर्थः ।।
<उपमाने कर्मणि च ।। 3-4-45 ।।>
उपमीयतेऽनेनेत्युपमानम् । उपमाने कर्मण्युपपदे चकारात्कर्त्तरि धातोर्णमुल् प्रत्ययो भवति । घृतनिधायं निहितः । घृतमिव निहित इत्यर्थः । सुवर्णनिधायं निहितः । सुवर्णमिव निहित इत्यर्थः । कर्त्तरि खल्वपि - अजकनाशं नष्टः । अजक इव नष्टः । चूडकनाशम् । दन्तनाशम् ।।
<कषादिषु यथाविध्यनुप्रयोगः ।। 3-4-46 ।।>
"निमूलसमूलयोः"(3.4.34/3355) इत्येतदारभ्य कषादयः, एतेषु यथाविध्यनुप्रयोगो भवति । यस्माद्धातोर्णमुल् प्रत्ययो भवति स एवानुप्रयोक्तव्यः ।।
ननु धातुसम्बन्धे प्रत्ययविधानादनुप्रयोगः सिद्ध एव ? `यथाविधि' इति नियमार्थं वचनम्, तथा चैवोदाहृतम् ।
<उपदंशस्तृतीयायाम् ।। 3-4-47 ।।>
`दशं दशने'(धा.पा.990)अस्माद्धातोरुपपूर्वात्तृतीयान्त उपपदे णमुल्प्रत्ययो भवति । मूलकोपदंशं भुङ्क्ते, मूलकेनोपदंशम् । आर्द्रकोपदंशम्, आर्द्रकेणोपदंशम् । अत्र विकल्पेनोपपदसमासः "तृतीयाप्रभृतीन्यन्यतरस्याम्"(2.2.21/784) इति । मूलकादि चोपदंशेः कर्म । भुजेः करणम् ।।
सर्वस्मिन्नेवात्र णमुल्प्रकरणे क्रियाभेदे सति वासरूपविधिना क्त्वापि भवति - मूलकेनोपदश्य भुङ्क्ते ।।
<हिंसार्थानां च समानकर्मकाणाम् ।। 3-4-48 ।।>
`तृतीयायाम्' इत्येव । हिंसा = प्राण्युपघातः । तदर्थानां धातूनामनुप्रयोगधातुना समानकर्मकाणां तृतीयान्त उपपदे णमुल् प्रत्ययो भवति । दण्डोपघातं गाः कालयति, दण्डेनोपघातम् । दण्डताडम्, दण्डेन ताडम् ।
समानकर्मकाणामिति किम् ? चोरं दण्डेनोपहत्य गोपालको गाः कालयति ।
<सप्तम्यां चोपपीडरुधकर्षः ।। 3-4-49 ।।>
उपशब्दः प्रत्येकमभिसम्बध्ये । उपपूर्वेभ्यः पीडरुधकर्षेभ्यः सप्तम्यन्त उपपदे चकारात्तृतीयान्त उपपदे णमुल्प्रत्ययो भवति । पार्श्वोपपीडं शेते, पार्श्वयोरुपीडम्, पार्श्वाभ्यामुपपीडम् । व्रजोपरोधं गाः स्थापयति, व्रजे उपरोधम्, व्रजेनोपरोधम् । पाण्युपकर्षं धानाः सङ्गृह्णाति, पाणावुपकर्षम्, पाणिनोपकर्षम् । कर्षतेरिदं ग्रहणं न कृषतेः ।।
<समासत्तौ ।। 3-4-50 ।।>
`सप्तम्याम्', `तृतीयायाम्' इति वर्त्तते । समासत्तिः = सन्निकर्षः । समासत्तौ गम्यमानायां तृतीयासप्तम्योरुपपदयोर्धातोर्णमुल् प्रत्ययो भवति । केशग्राहं युद्ध्यन्ते, केशेषु ग्राहम्, केशैर्ग्राहम् । हस्तग्राहम्, हस्तेषु ग्राहम्, हस्तैर्ग्राहम् । युद्धसंरम्भादत्यन्तं सन्निकृष्यन्ते इत्यर्थः ।।
<प्रमाणे च ।। 3-4-51 ।।>
`तृतीयासप्तम्योः' इत्येव । प्रमाणम् = आयामः, दैर्घ्यम् । प्रमाणे गम्यमाने तृतीयासप्तम्योरुपपदयोर्धातोर्णमुल् प्रत्ययो भवति । द्व्यङ्गुलोत्कर्षं खण्डिकां छिनत्ति, द्व्यङ्गुले उत्कर्षम्, द्व्यङ्गुलेनोत्कर्षम् । त्र्यङ्गुलोत्कर्षम् ।।
<अपादाने परीप्सायाम् ।। 3-4-52 ।।>
परीप्सा = त्वरा । परीप्सायां गम्यमानायामपादान उपपदे धातोर्णमुल् प्रत्ययो भवति । शय्योत्थायं धावति, शय्याया उत्थाय । एवं नाम त्वरते यदवश्यंकर्त्तव्यमपि नापेक्षते । शय्योत्थानमात्रमाद्रियते । रन्ध्रापकर्षं पयः पिबति । भ्राष्ट्रापकर्षमपूपान् भक्षयति ।
परीप्सायामिति किम् ? आसनादुत्थाय गच्छति ।।
<द्वितीयायां च ।। 3-4-53 ।।>
`परीप्सायाम्' इत्येव । द्वितीयान्त उपपदे परीप्सायां गम्यमानायां धातोर्णमुल् प्रत्ययो भवति । यष्टिग्राहं युध्यन्ते; यष्टिं ग्राहम्, लोष्टग्राहम्, लोष्टं ग्राहम्। एवं नाम त्वरते यदायुधग्रहणमपि नाद्रियते । लोष्टादिकं यत्किञ्चिदासन्नं तद् गृह्णाति ।।
<स्वाङ्गेऽध्रुवे ।। 3-4-54 ।।>
`द्वितीयायाम्' इत्येव । अध्रुवे स्वाङ्गवाचिनि द्वितीयान्त उपपदे धातोर्णमुल् प्रत्ययो भवति । अक्षिनिकाणं जल्पति । भ्रूविक्षेपं कथयति ।
अध्रुव इति किम् ? उत्क्षिप्य शिरः कथयति ।
यस्मिन्नङ्गे छिन्नेऽपि प्राणी न म्रियते तद्ध्रुवम् -`अद्रवं मूर्त्तिमत्स्वाङ्गम्'(काशिका.4.1.54) ।।
<परिक्लिश्यमाने च ।। 3-4-55 ।।>
`स्वाङ्गे', `द्वितीयायाम्' इत्येव । परिक्लिश्यमाने स्वाङ्गवाचिनि द्वितीयान्त उपपदे धातोर्णमुल् प्रत्ययो भवति । परिक्लेशः = सर्वतो विबाधनम्, दुःखनम् । उरःपेषं युद्ध्यन्ते, उरः प्रतिपेषं युद्ध्यन्ते । शिरः पेषम्, शिरः प्रतिपेषम् । कृत्स्नमुरः पीडयन्तो युध्यन्ते । ध्रुवार्थोऽयमारम्भः ।।
<विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ।। 3-4-56 ।।>
`द्वितीयायाम्' इत्येव । द्वितीयान्ते उपपदे विश्यादिभ्यो धातुभ्यो णमुल् प्रत्ययो भवति, व्याप्यमाने आसेव्यमाने चार्थे गम्यमाने । विश्यादिभिः क्रियाभिरनवयवेन पदार्थानां सम्बन्धो व्याप्तिः । तात्पर्यम् = आसेवा । द्रव्ये व्याप्तिः, क्रियायामासेवा । गेहानुप्रवेशमास्ते । समासेन व्याप्त्यासेवयोरुक्तत्वात्

"नित्यवीप्सयोः"(8.1.4/2140) इति द्विर्वचनं न भवति । असमासपक्षे तु व्याप्यमानतायां द्रव्यवचनस्य द्विर्वचनम्, आसेव्यमानतायां तु क्रियावचनस्य । तथा च वक्ष्यति -`सुप्सु वीप्सा, तिङ्क्षु नित्यता' इति ।

गेहं गेहमनुप्रवेशमास्ते । आसेवायाम् - गेहमनुप्रवेशमनुप्रवेशमास्ते । पति - गेहानुप्रपातमास्ते, गेहं गेहमनुप्रपातमास्ते, गेहमनुप्रपातमनुप्रपातमास्ते । पदि - गेहानुप्रपादमास्ते, गेहं गेहमनुप्रपादम्, गेहमनुप्रपादमनुप्रपादम् । स्कन्दि - गेहावस्कन्दमास्ते, गेहं गेहमवस्कन्दम्, गेहमवस्कन्दमवस्कन्दम् ।।

व्याप्यमानासेव्यामानयोरिति किम् ? गेहमनुप्रविश्य भुङ्क्ते ।

ननु चाभीक्ष्ण्ये णमुल्विहित एव, आसेवा चाभीक्ष्ण्यमेव, किमर्थं पुनरासेवायां णमुलुच्यते ? क्त्वानिवृत्त्यर्थमिति चेत्, न; इष्टत्वात्तस्य । द्वितीयोपपदार्थं तर्हि वचनम् - उपपदसमासः पक्षे यथा स्यात् । तेन हि सत्युपपदाभावः ।।

<अस्यतितृषोः क्रियान्तरे कालेषु ।। 3-4-57 ।।>

`द्वितीयायाम्' इत्येव । क्रियामन्तरयति क्रियान्तरः = क्रियाव्यवधायकः । क्रियान्तरे धात्वर्थे वर्तमानाभ्यामस्यतितृषिभ्यां द्वितीयान्तेषु कालवाचिषूपपदेषु णमुल्प्रत्ययो भवति । द्व्यहात्यासं गाः पाययति, द्व्यहमत्यासं गाः पाययति । त्र्यहात्यासं गाः पाययति, त्र्यहमत्यासं गाः पाययति । द्व्यहतर्षं गाः पाययति, द्व्यहं तर्षं गाः पाययति । अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते = विच्छिद्यते । अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः । अस्यतितृषोरिति किम् ? द्व्यहमुपोष्य भुङ्क्ते । क्रियान्तर इति किम् ? अहरत्यस्येषून् गतः । न गतिर्व्यवधीयते । कालेष्वितिकिम् ? योजनमत्यस्य गाः पाययति । अध्वकर्मकमत्यसनं व्यवधायकम्, न कालकर्मकम् ।।

<नाम्न्यादिशिग्रहोः ।। 3-4-58 ।।>

`द्वितीयायाम्' इत्येव । नामशब्दे द्वितीयान्त उपपदे आदिशेर्ग्रहेश्च धातोर्णमुल्प्रत्ययो भवति । नामादेशमाचष्टे । नामग्राहमाचष्टे ।।

<अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ ।। 3-4-59 >

अव्यय उपपदेऽयथाभिप्रेताख्याने गम्यमाने करोतेः क्त्वाणमुलौ भवतः । ब्राह्मण, पुत्त्रस्ते जातः, किं तर्हि वृषल, नीचैः कृत्याचक्षे । नीचैः कृत्वा, नीचैः कारम् । उच्चैर्नाम प्रियमाख्येयम् । ब्राह्मण, कन्या ते गर्भिणी, कि तर्हि वृषल, उच्चैः कृत्याचक्षे, उच्चैः कृत्वा, उच्चैः कारम् । नीचैर्नामाप्रियमाख्येयम् । अयथाभिप्रेताख्यान इति किम् ? उच्चैः कृत्वाऽऽचष्टे पुत्त्रस्ते जात इति । क्त्वाग्रहणं किम्, यावता सर्वस्मिन्नेवात्र प्रकरणे वासरूपेण क्त्वा भवतीत्युक्तम् ? समासार्थं वचनम् । तथा च "क्त्वा च"(2.2.22/785) इत्यस्मिन्सूत्रे "तृतीयाप्रभृतीन्यन्यतरस्याम्"(2.2.21/784) इति वर्त्तते । णमुलधिकारे पुनर्णमुल्ग्रहणं तुल्यकक्षत्वज्ञापनार्थम्, तेनोत्तरत्र द्वयोरप्यनुवृत्तिर्भविष्यति ।।

<तिर्यच्यपवर्गे ।। 3-4-60 ।।>

तिर्यक्शब्दे उपपदे कृञः क्त्वाणमुलौ प्रत्ययौ भवतः, अपवर्गे गम्यमाने । अपवर्गः = समाप्तिः । तिर्यक्कृत्य गतः, तिर्यक्कृत्वा गतः, तिर्यक्कारं गतः । समाप्य गत इत्यर्थः ।

अपवर्ग इति किम् ? तिर्यक्कृत्वा काष्ठं गतः ।

`तिर्यचि' इति शब्दानुकरणम् । न च प्रकृतिवदनुकरणेन भवितव्यम्; अनुक्रियमाणरूपविनाशप्रसङ्गात् -"एतदोऽश्"(2.4.33/1962), "अदसो मात्"(1.1.12/101) इति ।।

<स्वाङ्गे तस्प्रत्यये कृभ्वोः ।। 3-4-61 ।।>

तस्प्रत्ययो यतः स्वाङ्गात्तदेवमुच्यते । तस्प्रत्यये स्वाङ्गवाचिन्युपपदे करोतेर्भवतेश्च धात्वोः क्त्वाणमुलौ प्रत्ययौ भवतः । यथासङ्ख्यमत्र नेष्यते; अस्वरितत्वात् । मुखतःकृत्य गतः, मुखतः कृत्वा गतः, मुखतः कारं गतः । मुखतोभूय तिष्ठति, मुखतो भूत्वा तिष्ठति, मुखतोभावं तिष्ठति । पृष्ठतःकृत्य गतः, पृष्ठतः कृत्वा गतः, पृष्ठतःकारं गतः । पृष्ठतोभूय गतः, पृष्ठतो भूत्वा, पृष्ठतोभावम् ।

स्वाङ्ग इति किम् ? सर्वतः कृत्वा गतः । तस्ग्रहणं किम् ? मुखीकृत्य गतः । मुखीभूय गतः । प्रत्ययग्रहणं किम् ? मुखे तस्यतीति मुखतः, मुखतः कृत्वा गतः ।।

<नाधार्थप्रत्यये च्व्यर्थे ।। 3-4-62 ।।>

नार्थो धार्थश्च प्रत्ययो यस्मात्स एवमुच्यते । नाधार्थप्रत्यये शब्दे च्व्यर्थ उपपदे कृभ्वोर्धात्वोः क्त्वाणमुलौ प्रत्ययौ भवतः । अनाना नाना कृत्वा गतः नानाकृत्यगतः, नाना कृत्वा गतः, नानाकारं गतः । विनाकृत्यगतः, विना कृत्वा गतः, विनाकारं गतः । नानाभूय गतः, नाना भूत्वा गतः, नानाभावं गतः । विनाभूय गतः, विना भूत्वा गतः, विनाभावं गतः । द्विधाकृत्य गतः, द्विधाकारं गतः, द्विधा कृत्वा गतः । द्विधाभूय गतः, द्विधा भूत्वा गतः, द्विधाभावं गतः । द्वैधङ्कृत्य गतः, द्वैधं कृत्वा गतः, द्वैधङ्कारं गतः . द्वैधम्भूय गतः, द्वैधं भूत्वा गतः, द्वैधम्भावं गतः ।

प्रत्ययग्रहणं किम् ? हिरुक् कृत्वा । पृथक् कृत्वा ।

च्व्यर्थ इति किम् ? नाना कृत्वा काष्ठानि गतः ।

धार्थमर्थग्रहणम्, ना पुनरेक एव -"विनञ्भ्यां नानाञौ"(5.2.27/1828) इति ।।

<तूष्णीमि भुवः ।। 3-4-63 ।।>

तूष्णींशब्द उपपदे भवतेर्धातोः क्त्वाणमुलौ प्रत्ययौ भवतः । तूष्णींभूय, तूष्णीं भूत्वा, तूष्णींभावम् । भूग्रहणं कृञो निवृत्त्यर्थम् ।।
<अन्वच्यानुलोम्ये ।। 3-4-64 ।।>
अन्वक्शब्द उपपदे भवतेर्धातोरानुलोम्ये क्त्वाणमुलौ भवतः । आनुलोम्यम् = अनुलोमता, अनुकूलत्वम्, परिचित्तानुविधानम् । अन्वग्भूयास्ते । अन्वग्भूत्वाऽऽस्ते । अन्वग्भावमास्ते ।
आनुलोम्य इति किम् ? अन्वग्भूत्वा तिष्ठति ।।
<शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ।। 3-4-65 ।।>
शकादिषूपपदेषु अस्त्यर्थेषु वा धातुमात्रात्तुमुन् प्रत्ययो भवति । अक्रियार्थोपपदार्थोऽयमारम्भः । शक्नोति भोक्तुम् । धृष्णोति भोक्तुम् । जानाति भोक्तुम् । ग्लायति भोक्तुम् । घटते भोक्तुम् । आरभते भोक्तुम् । लभते भोक्तुम् । प्रक्रमते भोक्तुम् । सहते भोक्तुम् । अर्हति भोक्तुम् । अस्त्यर्थेषु खल्वपि - अस्ति भोक्तुम् । भवति भोक्तुम् । विद्यते भोक्तुम् ।।
<पर्याप्तिवचनेष्वलमर्थेषु ।। 3-4-66 ।।>
पर्याप्तिः = अन्यूनता । पर्याप्तिवचनेष्वलमर्थेषूपपदेषु धातोस्तुमुन् प्रत्ययो भवति । पर्याप्तो भोक्तुम् । अलं भोक्तुम् । भोक्तुं पारयति ।
पर्याप्तिवचनेष्विति किम् ? अलं कृत्वा । अलमर्थेष्विति किम् ? पर्याप्तं भुङ्क्ते । पूर्वसूत्रे शकिग्रहणमनलमर्थम् - शक्यमेवं कर्तुमिति ।।
<कर्त्तरि कृत् ।। 3-4-67 ।।>
कृत्संज्ञकाः प्रत्ययाः कर्तरि कारके भवन्ति । कृदुत्पत्तिवाक्यानामयं शेषः । तत्र येष्वर्थनिर्देशो नास्ति तत्रेदमुपतिष्ठते, अर्थाकाङ्क्षत्वात् । न ख्युन्नादिवाक्येषु, साक्षादर्थनिर्देशे सति तेषां निराकाङ्क्षत्वात् । कारकः । कर्त्ता । नन्दनः । ग्राही । पचः ।।
<भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा ।। 3-4-68 ।।>
भव्यादयः शब्दाः कर्त्तरि वा निपात्यन्ते । "तयोरेव कृत्यक्तखलर्थाः"(3.4.70/2833) इति भावकर्मणोः प्राप्तयोः कर्त्ता च वाच्यः पक्षे उच्यते । भवत्यसौ भव्यः, भव्यमनेनेति वा । गेयो माणवकः साम्नाम्, गेयानि माणवकेन सामानीति वा । प्रवचनीयो गुरुः स्वाध्यायस्य, प्रवचनीयो गुरुणा स्वाध्याय इति वा । उपस्थानीयोऽन्तेवासी गुरोः, अपस्थानीयः शिष्येण वा गुरुः । जायतेऽसौ जन्यः, जन्यमनेनेति वा । आप्लवतेऽसावाप्लाव्यः, आप्लाव्यमनेनेति वा । आपतत्यसावापात्यः । आपात्यमनेनेति वा ।।
<लः कर्मणि च भावे चाकर्मकेभ्यः ।। 3-4-69 ।।>
`लः' इत्युत्सृष्टानुबन्धं सामान्यं गृह्यते, प्रथमाबहुवचनान्तं चैतत् । लकाराः कर्मणि कारके भवन्ति, चकारात्कर्तरि च । अकर्मकेभ्यो धातुभ्यो भावे भवन्ति, पुनश्चकारात्कर्तरि च । गम्यते ग्रामो देवदत्तेन । गच्छति ग्रामं देवदत्तः । अकर्मकेभ्यः - आस्यते देवदत्तेन । आस्ते देवदत्तः । सकर्मकेभ्यो भावे न भवन्ति ।।
<तयोरेव कृत्यक्तखलर्थाः ।। 3-4-70 ।।>
तयोरेव भावकर्मणोः कृत्यसंज्ञकाः क्तखलर्थाश्च प्रत्यया भवन्ति । एवकारः कर्तुरपकर्षणार्थः ।
कृत्याः कर्मणि - कर्तव्यः कटो भवता । भोक्तव्य ओदनो भवता । भावे - आशितव्यं भवता । शयितव्यं भवता ।
क्तः कर्मणि - कृतः कटो भवता । भुक्त ओदनो भवता । भावे - आसितं भवता । शयितं भवता ।।
खलर्थाः कर्मणि - ईषत्करः कटो भवता । सुकरः । दुष्करः । भावे - ईषदाढ्यम्भवं भवता । स्वाढ्यम्भवं भवता । "भावे चाकर्मकेभ्यः"(3.4.69/2151) इत्यनुवृत्तेस्सकर्मकेभ्यो भावे न भवन्ति ।।
<आदिकर्मणि क्तः कर्तरि च ।। 3-4-71 ।।>
आदिकर्मणि यः क्तो विहितः स कर्तरि भवति । चकाराद्यथाप्राप्तं भावकर्मणोः । आदिभूतः क्रियाक्षण आदिकर्म, तस्मिन्नादिकर्मणि भूतत्वेन विवक्षिते यः क्तो विहितस्तस्यायमर्थनिर्देशः । प्रकृतः कटं देवदत्तः, प्रकृतः कटो देवदत्तेन, प्रकृतं देवदत्तेन । प्रभुक्त ओदनं देवदत्तः, प्रभुक्त ओदनो देवदत्तेन, प्रभुक्तं देवदत्तेन ।।
<गत्यर्थाकर्मकश्लिशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ।। 3-4-72 ।।>
गत्यर्थेभ्यो धातुभ्योऽकर्मकेभ्यः श्लिषादिभ्यश्च यः क्तः स कर्तरि भवति । चकाराद्यथाप्राप्तं च भावकर्मणोः । गतो देवदत्तो ग्रामम्, गतो देवदत्तेन ग्रामः, गतं देवदत्तेन । अकर्मकेभ्यः - ग्लानो भवान् । ग्लानं भवता । आसितो भवान् । आसितं भवता । श्लिष - उपश्लिष्टो गुरुं भवान्, उपश्लिष्टो गुरुर्भवता, उपश्लिष्टं भवता । शीङ् - उपशयितो गुरुं भवान्, उपशयितो गुरुर्भवता, उपशयितं भवता । स्था - उपस्थितो गुरुं भवान्, उपस्थितो गुरुर्भवता, उपस्थितं भवता । आस - उपासितो गुरुं भवान्, उपासितो गुरुर्भवता, उपासितं भवता । वस - अनूषितो गुरुं भवान्, अनूषितो गुरुर्भवता, अनूषितं भवता । जन - अनुजातो माणवको माणविकाम्, अनुजाता माणवकेन माणविका, अनुजातं माणवकेन । रुह - आरूढो वृक्षं भवान्, आरूढो वृक्षो भवता, आरूढं भवता । जीर्यति - अनुजीर्णो वृषलीं देवदत्तः, अनुजीर्णा वृषली देवदत्तेन, अनुजीर्णं देवदत्तेन ।।
श्लिषादयस्सोपसर्गास्सकर्मका भवन्ति, तदर्थमेषामुपादानम् ।।

<दाशगोघ्नौ सम्प्रदाने ।। 3-4-73 ।।>

दाशगोघ्नौ शब्दौ सम्प्रदाने कारके निपात्येते । `दाशृ दाने'(धा.पा.883), ततः पचाद्यच् । स कृत्संज्ञकत्वात्कर्तरि प्राप्तः, सम्प्रदाने निपात्यते । दाशन्ति तस्मै इति दाशः । आगताय तस्मै दातुं गां हन्तीति गोघ्नः, अर्घार्होऽतिथिः । टगत्र निपात्यते । निपातनसामर्थ्यादेव गोघ्न ऋत्विगादिरुच्यते, न तु चण्डालादिः । असत्यपि च गोहनने तस्य योग्यतया गोघ्न इत्यभिधीयते ।।

<भीमादयोऽपादाने ।। 3-4-74 ।।>

भीमादयः शब्दा अपादाने निपात्यन्ते । उणादिप्रत्ययान्ता एते, "इषुधीन्धिदसिश्याधूसूभ्यो मक्"(उ.1.144) "भियष्षुक् ह्रस्वश्च"(उ.147) इत्येवमादयः । "ताभ्यामन्यत्रोणादयः"(3.4.75/3174) इति पर्युदासे प्राप्ते निपातनमारभ्यते । भीमः । भीष्मः । भयानकः । वरुः । चरुः । भूमिः । रजः । संस्कारः । सङ्क्रन्दनः । प्रपतनः । समुद्रः । स्रुचः । स्रुक् । खलतिः ।

<ताभ्यामन्यत्रोणादयः ।। 3-4-75 ।।>

उणादयः शब्दाः ताभ्यामपादानसम्प्रदानाभ्यामन्यत्र कारके भवन्ति । कृत्त्वात् कर्तयेव प्राप्ताः कर्मादिषु कथ्यन्ते । `ताभ्याम्' इति सम्प्रदानार्थः प्रत्यवमर्शः, अन्यथा ह्यपादानमेव पर्युदस्येत; अनन्तरत्वात् । कृषितोऽसौ कृषिः । तनित इति तन्तुः । वृत्तमिति वर्त्म । चरितं चर्म ।।

<क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः ।। 3-4-76 ।।>

ध्रौव्यार्थाः = अकर्मकाः, प्रत्यवसानार्थाः = अभ्यवहारार्था इति स्वनिकायप्रसिद्धिः । ध्रौव्यगतिप्रत्यवसानार्थेभ्यो यः क्तो विहितः सोऽधिकरणे भवति । चकाराद्यथाप्राप्तं च। ध्रौव्यार्थेभ्यः कर्तृभावाधिकरणेषु, गत्यर्थेभ्यः कर्तृकर्मभावाधिकरणेषु, प्रत्यवसानार्थेभ्यः कर्मभावाधिकरणेषु । ध्रौव्यार्थेभ्यस्तावत् - आसितो देवदत्तः, आसितं तेन, इदमेषामासितम् । गत्यर्थेभ्यः - यातो देवदत्तो ग्रामम्, यातो देवत्तेन ग्रामः, यातं देवदत्तेन, इदमेषां यातम् । प्रत्यवसानार्थेभ्यः - भुक्त ओदनो देवदत्तेन, देवदत्तेन भुक्तम्, इदमेषां भुक्तम् ।।

कथं भुक्ता ब्राह्मणाः, पीता गाव इति ? अकारो मत्वर्थीयः - भुक्तमेषामस्ति, पीतमेषामस्तीति ।

<लस्य ।। 3-4-77 ।।>

`लस्य' इत्ययमधिकारः । अकार उच्चारणार्थः । लकारमात्रं स्थानित्वेनाधिक्रियते । यदित ऊर्ध्वमनुक्रमिष्यामो लस्येत्येवं तद्वेदितव्यम् । किं चेदं लस्येति ? दश लकारा अनुबन्धविशिष्टा विहिता अर्थविशेषे कालविशेषे च, तेषां विशेषकराननुबन्धानुत्सृज्य यत्सामान्यं तद् गृह्यते । षट्टितः, चत्वारो ङितः । अक्षरसमाम्नायवदानुपूर्व्या कथ्यन्ते । लट् । लिट् । लुट् । लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् । इति ।।

अथ लकारमात्रस्य ग्रहणं कस्मान्न भवति - लुनाति, चूडाल इति ? धात्वधिकारोऽनुवर्तते, कर्त्रादयश्च विशेषकाः ।।

<तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ।। 3-4-78 ।।>

लस्य तिबादय आदेशा भवन्ति । तिप्सिप्मिपां पकारः स्वरार्थः । इटष्टकारः "इटोऽत्"(3.4.106/2257) इति विशेषणार्थः, तिबादिभिरादेशैस्तुल्यत्वान्न देशविध्यर्थः । महिङो ङकारस्तिङिति प्रत्याहारग्रहणार्थः । पचति । पचतः । पचन्ति । पचसि । पचथः । पचथ । पचामि । पचावः । पचामः । पचते । पचेते । पचन्ते । पचसे । पचेथे । पचध्वे । पचे । पचावहे । पचामहे । एवमन्येष्वपि लकारेषूदाहार्यम् ।।

<टित आत्मनेपादानां टेरे ।। 3-4-79 ।।>

टितो लकारस्य स्थाने यान्यात्मनेपदानि तेषां टेरेकारादेशो भवति । तथा चैवोदाहृतम् ।।

इह कस्मान्न भवति - पचमानः, यजमानः ? प्रकृतैस्तिबादिभिरात्मनेपदानि विशेष्यन्ते ।।

<थासः से ।। 3-4-80 ।।>

`टितः' इत्येव । टितो लकारस्य यस्थास्तस्य सेशब्द आदेशो भवति । पचसे । पेचिषे । पक्तासे । पक्ष्यसे ।।

<लिटस्तझयोरेशिरेच् ।। 3-4-81 ।।>

लिडादेशयोस्तझयोर्यथासङ्ख्यम् एश्, इरेच् इत्येतावादेशौ भवतः । शकारः सर्वादेशार्थः । चकारः स्वरार्थः । पेचे, पेचाते, पेचिरे । लेभे, लेभाते, लेभिरे ।।

<परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ।। 3-4-82 ।।>

`लिटः' इत्येव । लिडादेशानां परस्मैपदसंज्ञकानां यथासङ्ख्यं तिबादीनां णलादयो नवादेशा भवन्ति । लकारः स्वरार्थः । णकारो वृद्ध्यर्थः । पपाच । पेचतुः । पेचुः । पेचिथ, पपक्थ । पेचथुः । पेच । पपाच, पपच । पेचिव । पेचिम ।।

<विदो लटो वा ।। 3-4-83 ।।>

`परस्मैपदानाम्' इत्येव । `विद ज्ञाने'(धा.पा.1065) अस्माद्धातोः परेषां लडादेशानां परस्मैपदानां णलादयो नव विकल्पेनादेशा भवन्ति । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म ।।

न च भवति - वेत्ति । वित्तः । विदन्ति । वेत्सि । वित्थः । वित्थ । वेद्मि । विद्वः । विद्मः ।।

<ब्रुवः पञ्चानामादित आहो ब्रुवः ।। 3-4-84 ।।>

`परस्मैपदानाम्' इत्येव । `लटो वा' इति च । ब्रुवः परस्य लटः परस्मैपदानां पञ्चानामादिभूतानां पञ्चैव णलादय आदेशा भवन्ति, तत्सन्नियोगेन च ब्रुव आहशब्द आदेशो भवति । आह । आहतुः । आहुः । आत्थ । आहथुः ।

न च भवति - ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रवीषि । ब्रूथः ।
पञ्चानामिति किम् ? ब्रूथ । ब्रवीमि । ब्रूवः । ब्रूमः । आदित इति किम् ? परेषां मा भूत् ।
`ब्रुवः' इति पुनर्वचनं स्थान्यर्थम्, परस्मैपदानामेव हि स्यात् ।।
<लोटो लङ्वत् ।। 3-4-85 ।।>
अतिदेशोऽयम् । लोटो लङ्वत्कार्यं भवति । तामादयः, सलोपश्च । पचताम् । पचतम् । पचत । पचाव । पचाम ।
अडाटौ कस्मान्न भवतः, तथा झेर्जुसादेशः(3.4.108/2213) "लङः शाकटायनस्यैव"(3.4.111/2463) इति - वान्तु, यान्तु ? "विदो लटो वा"(3.4.83/2464) इत्यतो वाग्रहणमनुवर्तते, सा च व्यवस्थितविभाषा भविष्यति ।।
<एरुः ।। 3-4-86 ।।>
`लोटः' इत्येव । लोडादेशानामिकारस्य उकारादेशो भवति । पचतु । पचन्तु ।
* हिन्योरुत्वप्रतिषेधो वक्तव्यः *(म.भा.2.185) । न वा, उच्चारणसामर्थ्यात् । अथवा `वा' इति वर्तते, सा च व्यवस्थितविभाषा ।।
<सेर्ह्यपिच्च ।। 3-4-87 ।।>
`लोटः' इत्येव । लोडादेशस्य सेः `हि' इत्ययमादेशो भवति, अपिच्च भवति । स्थानिवद्भावात्पित्त्वं प्राप्तं प्रतिषिध्यते । लुनीहि । पुनीहि । राध्नुहि । तक्ष्णुहि ।।
<वाच्छन्दसि ।। 3-4-88 ।।>
अपित्त्वं विकल्प्यते । लादेशश्छन्दसि विषये हिशब्दो वाऽपिद् भवति । `युयोध्यस्मज्जुहुराणमेनः'(ऋ.1.189.1), प्रीणाहि, प्रीणीहि ।।
<मेर्निः ।। 3-4-89 ।।>
`लोटः' इत्येव । लोडादेशस्य मेर्निरादेशो भवति । उत्वलोपयोरपवादः । पचानि । पठानि ।।
<आमेतः ।। 3-4-90 ।।>
`लोटः' इत्येव । लोट्सम्बन्धिन एकारस्य आमित्ययमादेशो भवति । पचताम् । पचेताम् । पचन्ताम् ।।
<सवाभ्यां वामौ ।। 3-4-91 ।।>
`लोटः' इत्येव । सकारवकाराभ्यामुत्तरस्य लोट्सम्बन्धिन एकारस्य यथासङ्ख्यं व, अम् इत्येतावादेशौ भवत । आमोऽपवादः । पचस्व । पचध्वम् ।।
<आडुत्तमस्य पिच्च ।। 3-4-92 ।।>
`लोटः' इत्येव । लोट्सम्बन्धिन उत्तमपुरुषस्याऽऽडागमो भवति, स चोत्तमपुरुषः पिद्भवति । करवाणि, करवाव, करवाम । करवै, करवावहै, करवामहै ।।
<एत ऐ ।। 3-4-93 ।।>
`लोट्' `उत्तमस्य' इति वर्तते । लोडुत्तमसम्बन्धिन एकारस्य ऐकारादेशो भवति । आमोऽपवादः । करवै, करवावहै, करवामहै ।।
इह कस्मान्न भवति - पचावेदम्, यजावेदम् ? बहिरङ्गलक्षणत्वाद् गुणस्य ।।
<लेटोऽडाटौ ।। 3-4-94 ।।>
लोटोऽडाटागमौ भवतः पर्यायेण । `जोषिषत्'(ऋ.2.35.1) । `तारिषत्'(वा.सं.23.32) । मन्दिषत् । `पताति विद्युत्'(ऋ.4.16.17) । `प्रजापतिरुदधिं च्यावयाति'(तै.सं.3.5.5.2) ।।
<आत ऐ ।। 3-4-95 ।।>
`लेटः' इत्येव । लेट्सम्बन्धिन आकारस्य ऐकारादेशो भवति । प्रथमपुरुषमध्यमपुरुषात्मनेपदद्विवचनयोः । मन्त्रयैते, मन्त्रयैथे । करवैते, करवैथे ।
आटः कस्मान्न भवति ? विधानसामर्थ्यात् ।।
<वैतोऽन्यत्र ।। 3-4-96 ।।>
`लेटः' इत्येव । लेट्सम्बन्धिन एकारस्य वा ऐकारादेशो भवति । अन्यत्रेत्यनन्तरो विधिरपेक्ष्यते - "आत ऐ"(3.4.95/3429) इत्येतद्विषयं वर्जयित्वा एत ऐ भवति । सप्ताहानि शासै । `अहमेव पशूनामीशै'(काठ.सं.25.1) । `मदग्रा एव वो ग्रहा गृह्यान्तै'(तै.सं.6.4.7.1) । `मद्देवत्यान्येव वः पात्राण्युच्यान्तै'(तै.6.4.7.2) ।
न च भवति--`यत्र क्व च ते मनो दक्षं दधस उत्तरम्'(ऋ.6.16.17) ।
अन्यत्रेति किम् ? मन्त्रयैते । मन्त्रयैथे ।
<इतश्च लोपः परस्मैपदेषु ।। 3-4-97 ।।>
`लेटः' इत्येव । लेट्सम्बन्धिन इकारस्य परस्मैपदविषयस्य लोपो भवति । वानुवृत्तेः पक्षे श्रवणमपि भवति । `जोषिषत्'(ऋ.2.3.5.1) ।
`तारिषत्'(वा.सं.23.32) । मन्दिषत् ।
न च भवति - `पताति दिद्युत्'(ऋ.4.16.17) । `प्रजापतिरुदधिं च्यावयाति'(तै.सं.3.5.5.2) ।

परस्मैपदग्रहणम् - इड्वहिमहिङां मा भूत् ।।
<स उत्तमस्य ।। 3-4-98 ।।>
`लेटः' इति, `वा' इति च वर्तते । लेट्सम्बन्धिन उत्तमपुरुषस्य सकारस्य वा लोपो भवति । करवाव, करवाम ।
न च भवति - करवावः, करवामः ।
उत्तमग्रहणम् - पुरुषान्तरे मा भूत् ।।
<नित्यं ङितः ।। 3-4-99 ।।>
`लेटः' इति निवृतम् । ङितो लकारस्य य उत्तमस्तस्य नित्यं सकारस्य लोपो भवति । अपचाव । अपचाम ।
नित्यग्रहणं विकल्पनिवृत्यर्थम् ।।
<इतश्च ।। 3-4-100 ।।>
`ङितः' इत्येव । ङिल्लकारसम्बन्धिन इकारस्य नित्यं लोपो भवति । अपचत् । अपाक्षीत् ।
परस्मैपदेष्वित्येव - अपचावहि, अपचामहि ।।
<तस्थस्थमिपां तान्तन्तामः ।। 3-4-101 ।।>
`ङितः' इत्येव । ङिल्लकारसम्बन्धिनां चतुर्णां यथासङ्ख्यं तामादय आदेशा भवन्ति । अपचताम्, अपचतम्, अपचत, अपचम् । अपाक्ताम्, अपाक्तम्, अपाक्त, अपाक्षम् ।।
<लिङः सीयुट् ।। 3-4-102 ।।>
लिङादेशानां सीयुडागमो भवति । टकारो देशविध्यर्थः । उकार उच्चारणार्थः । पचेत, पचेयाताम्, पचेरन् । पक्षीष्ट, पक्षीयास्ताम्, पक्षीरन् ।
<यासुट् परस्मैपदेषूदात्तो ङिच्च ।। 3-4-103 ।।>
`लिङः' इत्येव । परस्मैपदविषयस्य लिङो यासुडागमो भवति, स चोदात्तो भवति, ङिच्च । सीयुटोऽपवादः । आगमानुदात्तत्वे प्राप्ते, ङित्त्वं तु लिङ एव विधीयते; तत्र तत्कार्याणां सम्भवाद्, नागमस्य । कुर्यात्। कुर्याताम् । कुर्युः ।
स्थानिवद्भावादेव लिङादेशस्य ङित्त्वे सिद्धे यासुटो ङिद्वचनं ज्ञापनार्थम् - लकाराश्रयङित्त्वमादेशानां न भवतीति । अचिनवम् । अकरवम् ।
<किदाशिषि ।। 3-4-104 ।।>
आशिषि यो लिङ् तस्य यासुडागमो भवति, स चोदात्तः किद्वद्भवति । प्रत्ययस्यैवेदं कित्वम्, नागमस्य; प्रयोजनाभावात् । ङित्त्वे प्राप्ते कित्त्वं विधीयते । गुणवृद्धिप्रतिषेधस्तुल्यः, सम्प्रसारणम्, जागर्तेर्गुणे च विशेषः । इष्यात्, इष्याताम्, इष्यासुः । जागर्यात्, जागर्यास्ताम्, जागर्यासुः ।
आशिषीति किम् ? वच्यात् । जागृयात् ।।
<झस्य रन् ।। 3-4-105 ।।>
`लिङः' इत्येव । झस्य लिङादेशस्य रन् - इत्ययमादेशो भवति । झोऽन्तापवादः । पचेरन् । यजेरन् । कृषीरन् ।।
<इटोऽत् ।। 3-4-106 ।।>
लिङादेशस्य इटः `अत्' इत्ययमादेशो भवति । पचेय । यजेय । कृषीय । ह्रषीय ।
तकारस्येत्संज्ञाप्रतिषेधः प्राप्नोति - "न विभक्तौ तुस्माः"(1.3.4/190) इति ? नैवायमादेशावयवस्तकारः, किं तर्हि ? मुखसुखार्थ उच्चार्यते ।
आगमस्येटो ग्रहणं न भवति, `अर्थवद्ग्रहणे नानर्थकस्य'(व्या.प.1) इति ।।
<सुट् तिथोः ।। 3-4-107 ।।>
`लिङः' इत्येव । लिङ्सम्बन्धिनोस्तकारथकारयोः सुडागमो भवति । तकारथकारावागमिनौ, लिङ् तद्विशेषणम्, सीयुटस्तु लिङेवागमी । तेन भिन्नविषयत्वात्सुटा बाधनं न भवति । तकारे इकार उच्चारणार्थः । कृषीष्ट, कृषीयास्ताम् । कृषीष्ठाः, कृषीयास्थाम् ।।
<झेर्जुस् ।। 3-4-108 ।।>
`लिङः' इत्येव । लिङादेशस्य झेर्जुस् आदेशो भवति । झोऽन्तावादः । पचेयुः । यजेयुः ।।
<सिजभ्यस्तविदिभ्यश्च ।। 3-4-109 ।।>
अलिङर्थ आरम्भः । सिचः परस्य, अभ्यस्तसंज्ञकेभ्यो, वेत्तेश्चोत्तरस्य झेर्जुस् आदेशो भवति । अभ्यस्तविदिग्रहणमसिजर्थम् । `ङितः' इति चानुवर्तते । सिचस्तावत् - अकार्षुः, अहार्षुः । अभ्यस्तात् - अबिभयुः, अजिह्रयुः, अजागरुः । विदेः - अविदुः ।।
<आतः ।। 3-4-110 ।।>
सिज्ग्रहणमनुवर्तते । सिच आकारान्ताच्च परस्य झेर्जुसादेशो भवति । कथमाभ्यामानन्तर्यम् ? सिचो लुकि कृते प्रत्ययलक्षणेन सिचोऽनन्तरः, श्रुत्या चाकारान्तादिति । अदुः, अधुः, अस्थुः । तकारो मुखसुखार्थः ।
पूर्वेणैव सिद्धे नियमार्थं वचनम् - आत एव सिज्लुगन्तात्, नान्यस्मादिति । अभूवन् ।

प्रत्ययलक्षणेन जुस्प्राप्तः प्रतिषिध्यते; तुल्यजातीयापेक्षत्वान्नियमस्य । श्रूयमाणे हि सिचि भवत्येव - अकार्षुः, अहार्षुः ।।
<लङः शाकटायनस्यैव ।। 3-4-111 ।।>
`आतः' इत्येव । आकारान्तादुत्तरस्य लङादेशस्य झेर्जुसादेशो भवति, शाकटायनस्याचार्यस्य मतेन । अयुः । अवुः । अन्येषां मते अयान् ।
ननु `ङितः' इत्यनुवर्तते, अत्र लङेवाकारान्तादनन्तरो ङित्सम्भवति नान्यः, तत्किं लङ्ग्रहणेन ? एवं तर्हि लङेव यो लङ् विहितस्तस्य यथा स्यात्, लङ्वद्भावेन यस्तस्य मा भूत्, "लोटो लङ्वत्"(3.4.85/2198) इति। यान्तु, वान्तु । "सिजभ्यस्तविदिभ्यश्च"(3.4.109/2226) इत्ययमपि झेर्जुस् लोटो न भवति। बिभ्यतु, जाग्रतु, विदन्तु । जुस्भावमात्रं हि मुख्येन लङा विशेष्यते । एवकार उत्तरार्थः ।।
<द्विषश्च ।। 3-4-112 ।।>
`लङः शाकटायनस्यैव' इत्येव । द्विषः परस्य लङादेशस्य झेर्जुसादेशो भवति, शाकटायनस्याचार्यस्य मतेन । अद्विषुः । अन्येषां मते अद्विषन् ।।
<तिङ्शित्सार्वधातुकम् ।। 3-4-113 ।।>
तिङः शितश्च प्रत्ययाः सार्वधातुकसंज्ञा भवन्ति । भवति । नयति । स्वपिति । रोदिति । पवमानः । यजमानः ।
सार्वधातुकप्रदेशाः - "सार्वाधातुके यक्"(3.1.67/2756) इत्येवमादयः ।।
<आर्धधातुकं शेषः ।। 3-4-114 ।।>
तिङः शितश्च वर्जयित्वाऽन्यः प्रत्ययः शेषो धातुसंशब्दनेन विहित आर्धधातुकसंज्ञो भवति । लविता । लवितुम् । लवितव्यम् ।
"धातोः"(3.1.91/2829) इत्येव। वृक्षत्वम्, वृक्षताऽस्ति । लूभ्याम्, लूभिः । जुगुप्सते ।।
<लिट् च ।। 3-4-115 ।।>
लिडादेशस्तिङार्धाधातुकसंज्ञो भवति । सार्वधातुकसंज्ञाया अपवादः । पेचिथ । शेकिथ । जग्ले । मम्ले ।
ननु चैकसंज्ञाधिकारादन्यत्र समावेशो भवति ? सत्यमेतत्; इह त्वेवकारोऽनुवर्तते, स नियमं करिष्यति ।।
<लिङाशिषी ।। 3-4-116 ।।>
आशिषि विषये यो लिङ् स आर्धधातुकसंज्ञो भवति । सार्वधातुकसंज्ञाया अपवादः । समावेशश्चैवकारानुवृत्तेर्न भवति । लविषीष्ट । पविषीष्ट ।
आशिषीति किम् ? लुनीयात् । पुनीयात् ।।
<छन्दस्यभयथा ।। 3-4-117 ।।>
छन्दसि विषये उभयथा भवति - सार्वधातुकमार्धधातुकं च ।
किं लिङेवानन्तरः सम्बध्यते ? नैतदस्ति; सर्वमेव प्रकरणमपेक्ष्यैतदुच्यते । तिङ्शिदादि छन्दस्युभयथा भवति ।
`वर्धन्तु त्वा सुष्टुतयः'(ऋ.7.99.7) । आर्धधातुकत्वाण्णिलोपः । वर्धयन्त्विति प्राप्ते । शेषं च सार्वधातुकम् - `स्वस्तये नावमिवारुहेम'(ऋ.10.178.2) । क्तिनः सार्वधातुकत्वादस्तेर्भूभावो न भवति ।
लिट् सार्त्रधातुकम् - `ससृवांसो विशृण्विरे'(ऋ.4.8.6) । `सोममिन्द्राय सुन्विरे'(ऋ.7.32.4) लिङ् उभयथा भवति - `उपस्थेयाम शरणा बृहन्ता'(ऋ.6.47.8) । सार्वधातुकत्वात् - "लिङः सलोपः"(7.2.79/2211), आर्धधातुकत्वात् - एत्वम् ।
"व्यत्ययो बहुलम्"(3.1.85/3433) इत्यस्यैवायं प्रपञ्चः ।
इति श्रीजयादित्यविरिचितायां काशिकावृत्तौ
तृतीयाध्यायस्य चतुर्थः पादः
* समाप्तश्च तृतीयोऽध्यायः *
--------------*************--------------------

4.1

काशिकावृत्तिः
अथ चतुर्थाध्याये प्रथमः पादः
<ङ्याप्प्रातिपदिकात् ।। 4-1-1 ।।>
अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्याम आपञ्चमाध्यायपरिसमाप्तेः ङ्याप्प्रातिपदिकादित्येवं तद्वेदितव्यम् । स्वादिषु कप्पर्यन्तेषु प्रकृतिरधिक्रियते ।
`ङी' इति ङीब्ङीष्ङीनां सामान्येन ग्रहणम्, टाब्डाप्चापाम् आबिति, प्रातिपदिकमुक्तम् - "अर्थवत्"(1.2.45/178), "कृत्तद्धितसमासाश्च"(1.2.46/179) इति, तेषां समाहारनिर्देशः - ङ्याप्प्रातिपदिकादिति ।
यद्यपि च प्रत्ययपरत्वेन पारिशेष्यादियमेव प्रकृतिर्लभ्यते, तथापि वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणप्रत्ययविधौ तत्सम्प्रत्ययार्थं ङ्याप्प्रातिपदिकग्रहणं कर्तव्यम्(म.भा.2.191); इतरथा हि समर्थविशेषणमेतत्स्यात् ।

अथ ङ्याब्ग्रहणं किम्, न `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति'(व्या.प.25) इत्येव सिद्धम् ? नैतदस्ति; स्वरूपविधिविषये परिभाषेयम् `प्रातिपदिकस्वरूपग्रहणे सति लिङ्गविशिष्टग्रहणं भवति'(व्या.प.25) इति । तथा च "युवा खलतिपलितवलिनजरतीभिः"(2.1.67/748) इति ज्ञापकमस्यास्तादृशमेव ।

किञ्च - तदन्तात्तद्धितविधानार्थं ङ्याब्ग्रहणम् । कालितरा, हरिणितरा । खट्वातरा । मालातरा इति । विप्रतिषेधाद्धि तद्धितबलीयस्त्वं स्यात् ।।

<स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ।। 4-1-2 ।।>

`ङ्याप्प्रातिपदिकात्' इत्यधिकृतम् । ङ्याप्प्रातिपदिकात् स्वादयः प्रत्यया भवन्ति । उकारादयोऽनुबन्धा यथायोगमुच्चारणविशेषणार्थाः औटष्टकारः `सुट्' इति प्रत्याहारग्रहणार्थः । पकारः `सुप्' इति प्रत्याहारार्थः ।

सङ्ख्याकर्मादयश्च स्वादीनामर्थाः शास्त्रान्तरेण विहितास्तेन सहास्यैकवाक्यता ।

ङ्यन्तात्तावत्--कुमारी । गौरी । शाङ्र्गरवी । ङीब्ङीष्ङीनां क्रमेणोदाहरणम् ।

कुमारी, कुमार्यौ, कुमार्यः । कुमारीम्, कुमार्यौ, कुमारीः । कुमार्या, कुमारीभ्याम्, कुमारीभिः । कुमार्यै, कुमारीभ्याम्, कुमारीभ्यः । कुमार्याः, कुमारीभ्याम्, कुमारीभ्यः । कुमार्याः, कुमार्योः, कुमारीणाम् । कुमार्याम्, कुमार्योः, कुमारीषु । एवं गौरी, शाङ्र्गरवी चोदाहार्ये ।

आपः खल्वपि--खट्वा । बहुराजा । कारीषगन्ध्या । टाब्डाप्चापां क्रमेणोदाहरणम् । खट्वा । खट्वे, खट्वाः । खट्वाम्, खट्वे, खट्वाः । खट्वया, खट्वाभ्याम्, खट्वाभिः । खट्वायै, खट्वाभ्याम्, खट्वाभ्यः । खट्वायाः, खट्वाभ्याम्, खट्वाभ्यः । खट्वायाः, खट्वयोः, खट्वानाम् । खट्वायाम्, खट्वयोः, खट्वासु । एवं बहुराजा-करोषगन्ध्ये चोदाहार्ये ।

एवं प्रातिपदिकात् - दृषद्, दृषदौ, दृषदः । दषदम्, दृषदौ, दृषदः । दृषदा, दृषद्भ्याम्, दृषद्भिः । दृषदे, दृषद्भ्याम्, दृषद्भ्यः । दृषदः, दृषद्भ्याम्, दृषद्भ्यः । दृषदः, दृषदोः, दृषदाम् । दृषदि, दृषदोः, दृषत्सु ।

<स्त्रियाम् ।। 4-1-3 ।।>

अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्यामः स्त्रियामित्येवं तद्वेदितव्यम् । "ङ्याप्प्रातिपदिकात्"(4.1.1/182) इति सर्वाधिकारेऽपि प्रातिपदिकमात्रमत्र प्रकरणे सम्बध्यते; ङ्यापोरनेनैव विधानात् ।

`स्त्रियाम्' इत्युच्यते, केयं स्त्री नाम ? सामान्यविशेषाः स्त्रीत्वादयो गोत्वादय इव बहुप्रकारा व्यक्तयः । क्वचिदाश्रयविशेषाभावादुपदेशव्यङ्ग्या एव भवन्ति, यथा - ब्राह्मणत्वादयः ।

स्त्रीत्वं च प्रत्ययार्थः, प्रकृत्यर्थविशेषणं चेत्युभयथापि युज्यतेस्त्रियामभिधेयायां स्त्रियां वा यत्प्रातिपदिकं वर्तत इति । वक्ष्यति "अजाद्यतष्टाप्"(4.1.4/454) अजा । देवदत्ता । स्त्रियामिति किम् ? अजः । देवदत्तः ।।

<अजाद्यतष्टाप् ।। 4-1-4 ।।>

अजादिभ्यः प्रातिपदिकेभ्योऽकारान्ताच्च प्रातिपदिकात् स्त्रियां टाप् प्रत्ययो भवति । पकारः स्वरसामान्यग्रहणार्थः । टकारः सामान्यग्रहणाविघातार्थः । अजा । एडका । कोकिला । चटका । अश्वा । खट्वा । देवदत्ता ।

तपरकरणं तत्कालार्थम् । शुभंयाः, कीलालपाः ब्राह्मणी "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्"(6.1.68/252) इति सुलोपः स्यात् ।

अजादिग्रहणं तु क्वचिज्जातिलक्षणे ङीषि प्राप्ते(4.1.63/518), क्वचित्तु पुंयोगलक्षणे(4.1.48/504), क्वचितु पुष्पफलोत्तरपदलक्षणे(4.1.64/519), क्वचितु वयोलक्षणे ङीपि(4.1.20/478), क्वचिट्टिल्लक्षणे(4.1.15/470) ।

हलन्तानां त्वप्राप्त एव कस्मिंश्चिदाब् विधीयते ।

`शूद्रा चामहत्पूर्वा जातिः'(म.भा.2.201) इति पठ्यते, तस्यायमर्थः - शूद्रशब्दष्टापमुत्पादयति जातिश्चेद्भवति । शूद्रा । पुंयोगे ङीषैव भवितव्यम्शूद्रस्य भार्या शूद्री । महत्पूर्वस्य प्रतिषेधः - महाशूद्री । महाशूद्रशब्दोह्मा भीरजातिवचनः, तत्र तदन्तविधिना टाप् प्राप्तः प्रतिषिध्यते । `ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न'(व्या.प.89) इति कथं तदन्तविधिः ? एतदेव ज्ञापकं भवति -`अस्मिन् प्रकरणे तदन्तविधिः' इति । तेनातिधीवरी, अतिपीवरी, अतिभवती, अतिमहती - इति भवति ।

अजा, एडका, चटका, अश्वा, मूषिका इति जातिः । बाला होढा, पाका, वत्सा, मन्दा, विलातेति वयः । पूर्वापहाणा, अपरापहाणा । टित्, निपातनाण्णत्वम् । * सम्भस्त्राजिनशणपिण्डेभ्यः फलात् *(ग.सू.37) सम्फला, भस्त्रफला । अजिनफला । शणफला । पिण्डफला । `त्रिफलाद्विगौ'(ग.सू.38) । बहुव्रीहौ--त्रिफली संहतिः । * सदच्प्राक्काण्डप्रान्तशतैकेभ्यः पुष्पात् *(ग.सू.39) सत्पुष्पा । प्राक्पुष्पा । काण्डपुष्पा । प्रान्तपुष्पा । शतपुष्पा । एकपुष्पा । "पाककर्ण"(4.1.64/519) इति ङीषोऽपवादः । * शूद्रा चामहत्पूर्वा जातिः *(ग.सू.40) । क्रुञ्चा, उष्णिहा, देवविशा - हलन्ताः । ज्येष्ठा, कनिष्ठा, मध्यमा - पुंयोगः । कोकिला जातिः । * मूलान्नञः *(ग.सू.41) अमूला ।।

<ऋन्नेभ्यो ङीप् ।। 4-1-5 ।।>

ऋकारान्तेभ्यो नकारान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति । ङकारः सामान्यग्रहणार्थः । कर्त्री, । हर्त्री । दण्डिनी । छत्त्रिणी ।।

<उगितश्च ।। 4-1-6 ।।>

उग् इद्यत्र सम्भवति यथाकथञ्चित् तदुगिच्छब्दरूपम् , तदन्तात् स्त्रियां ङीप् प्रत्ययो भवति । भवती । अतिभवती । पचन्ती । यजन्ती ।
* धातोरुगितः प्रतिषेधो वक्तव्यः *(म.भा.2.202) । उखास्रत् । पर्णध्वत् ब्राह्मणी ।
* अञ्चतेश्चोपसंख्यानम् *(म.भा.2.202) प्राची । प्रतीची । उदीची ।।
<वनो र च ।। 4-1-7 ।।>
वन्नन्तात्प्रातिपदिकात्स्त्रियां ङीप् प्रत्ययो भवति, रेफश्चान्तादेशः । धीवरी । पीवरी । शर्वरी । परलोकदृश्वरी ।
`ऋन्नेभ्यः' इत्येव ङीपि सिद्धे तत्सन्नियोगेन रेफविधानार्थं वचनम् ।
* वनो न हशः *(म.भा.2.202) । प्राप्तौ ङीब्रावुभावपि प्रतिषिद्ध्येते । सहयुध्वा ब्राह्मणी ।।
<पादोऽन्यतरस्याम् ।। 4-1-8 ।।>
`पादः' इति कृतसमासान्तः पादशब्दो निर्दिश्यते । पादन्तात् प्रातिपदिकादन्यतरस्यां स्त्रियां ङीप् प्रत्ययो भवति । द्विपात्, द्विपदी । त्रिपात्, त्रिपदी । चतुष्पाद्, चतुष्पदी ।।
<टाबृचि ।। 4-1-9 ।।>
`पादः' इत्येव । `ऋचि' इत्यभिधेयनिर्देशः । ऋचि वाच्यायां पादन्तात्प्रातिपदिकात् स्त्रियां टाप् प्रत्ययो भवति । ङीपोऽपवादः । द्विपदा ऋक् । त्रिपदा ऋक् । चतुष्पदा ऋक् ।
ऋचीति किम् ? द्विपदी देवदत्ता ।।
<न षट्स्वस्रादिभ्यः ।। 4-1-10 ।।>
षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च प्रातिपदिकेभ्यः स्त्रीप्रत्ययो न भवति । यो यतः प्राप्नोति स सर्वः प्रतिषिद्ध्यते । पञ्च ब्राह्मण्यः । सप्त । नव । दश । स्वस्रादिभ्यः - स्वसा । दुहिता । ननान्दा । याता । माता । तिस्रः । चतस्रः ।
`षट्संज्ञानामन्ते लुप्ते टाबुत्पत्तिः कस्मान्न स्यात् ?
प्रत्याहाराच्चापा सिद्धं दोषस्त्वित्त्वे तस्मान्नोभौ' ।।(म.भा.2.204)
<मनः ।। 4-1-11 ।।>
मन्नन्तात्प्रातिपदिकात् ङीप् प्रत्ययो न भवति । "ऋन्नेभ्यो ङीप्"(4.1.5/306) इति ङीप् प्राप्तः `मनः' इति सूत्रेण प्रतिषिद्ध्यते । दामा, दामानौ, दामानः । पामा, पामानौ, पामानः ।
`अनिनस्मिन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति'(व्या.प.129) सीमा, सीमानौ, सीमानः । अतिमहिमा, अतिमहिमानौ, अतिमहिमानः ।।
<अनो बहुव्रीहेः ।। 4-1-12 ।।>
अन्नन्ताद् बहुव्रीहेः स्त्रियां ङीप् प्रत्ययो न भवति । अनुपधालोपी बहुव्रीहिरिहोदाहरणम् । उपधालोपिनो हि विकल्पं वक्ष्यति । सुपर्वा, सुपर्वाणौ, सुपर्वाणः । सुचर्मा, सुचर्माणौ, सुचर्माणः ।
बहुव्रीहेरिति किम् ? अतिक्रान्ता राजानमतिराजी ।।
<डाबुभाभ्यामन्यतरस्याम् ।। 4-1-13 ।।>
डाप् प्रत्ययो भवति उभाभ्याम् - मन्नन्तात्प्रातिपदिकादन्नन्ताच्च बहुव्रीहेरन्यतरस्याम् । पामा, पामे, पामाः । सीमा, सीमे, सीमाः । न च भवति - पामानः । सीमानः ।
बहूव्रीहौ - बहुराजा, बहुराजे, बहुराजाः । बहुतक्षा, बङुतक्षे, बहुतक्षाः । न च भवति - बहुराजानः । बहुतक्षाणः ।
अन्यतरस्याङ्ग्रहणं किमर्थम् ? बहुव्रीहौ "वनो र च"(4.1.7/456) इत्यस्यापि विकल्पो यथा स्यात् - बहुधीवा, बहुधीवरी । बहुपीवा, बहुपीवरी ।।
<अनुपसर्जनात् ।। 4-1-14 ।।>
अधिकारोऽयम् । उत्तरसूत्रेषूपसर्जनप्रतिषेधं करोति । यदित ऊर्ध्वमनुक्रमिष्यामः, अनुपसर्जनात् - इत्येवं तद्वेदितव्यम् ।
वक्ष्यति"टिड्ढाणञ्"(4.1.15/470) इति ङीप् । कुरुचरी । मद्रचरी । अनुपसर्जनादिति किम् ? बहुकुरुचरा, बहुमद्रचरा मधुरा ।
"जातेः"(4.1.63/518) इति ङीष् । कुक्कुटी । शूकरी । अनुपसर्जनादिति किम् ? बहुकुक्कुटा, बहुशूकरा, मधुरा ।
कथं पुनरुपसर्जनात्प्रत्ययप्रसङ्गः ? तदन्तविधिना। ज्ञापितं चैतद् - अस्त्यत्र प्रकरणे तदन्तविधिरिति । तथा च प्रधानेन तदन्तविधिर्भवति - कुम्भकारी । नगरकारी ।
न च `अण्' इति कृद्ग्रहणम्, तद्धितोऽप्यणस्ति ।।
<टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्ख्युनाम् ।। 4-1-15 ।।>
`अतः' इति सर्वत्रानुवर्तते । तत् सति सम्भवे विशेषणं भवति । टिदादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति । टापोऽपवादः ।
टितस्तावत् - कुरुचरी । मद्रचरी । इह कस्मान्न भवति पचमाना, यजमाना ? द्व्यनुबन्धकत्वाल्लटः ।

ल्युडादि, कथम् ? टित्करणसामर्थ्यात् । इतरत्र तु टेरेत्वं फलम् । पठिता विद्येति ? आगमटित्त्वमनिमित्तम्; "ट्युट्युलौ तुट्च"(4.3.23/1391) इति लिङ्गात् ।

ढ--सौपर्णेयी । वैनतेयी । निरनुबन्धको ढशब्दः स्त्रियां नास्तीति निरनुबन्धकपरिभाषा न प्रवर्तते(म.भा.2.208) ।

अण्--कुम्भकारी । नगरकारी । औपगवी । णेऽपि क्वचिदण्कृतं कार्यं भवति--चौरी, तापसी । दाण्डा, मौष्टेत्यत्र न भवति ।

अञ्--औत्सी । औदपानी । "शाङ्र्गरवाद्यञः"(4.1.73/527) इति पुनरञो ग्रहणं जातिलक्षणं ङीषं बाधितुम् ।

द्वयसच्--ऊरुद्वयसी । जानुद्वयसी ।(5.2.37/1838)

दघ्नच्--ऊरुदघ्नी । जानुदघ्नी ।(5.2.37/1838)

मात्रच्--ऊरुमात्री । जानुमात्री ।(5.2.37/1838)

तयप्--पञ्चतयी । दशतयी ।(5.2.42/1843)

ठक्--आक्षिकी । शालाकिकी ।(4.4.2/1550)

ठञ्--लावणिकी(4.4.52/1602) ठक्ठञोर्भेदेन ग्रहणं ठनादिनिवृत्त्यर्थम् ।

कञ्--यादृशी । तादृशी ।(3.2.60/429)

क्वरप्--इत्वरी । नश्वरी ।(3.2.163/3142)

ख्युन्--आढ्यङ्करणी । सुभगङ्करणी ।(3.2.56/2973)

* नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसङ्ख्यानम् *(म.भा.2.209) । स्त्रैणी । पौंस्नी । शाक्तीकी । याष्टीकी । तरुणी । तलुनी ।।

<यञश्च ।। 4-1-16 ।।>

`ङीप्' इत्येव । यञन्ताच्च प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति । गार्गी। वात्सी ।

* अपत्यग्रहणं कर्तव्यम् *(म.भा.2.209) । इह मा भूत्--"द्वीपादनुसमुद्रं यञ्"(4.3.10), द्वैप्या । योगविभाग उत्तरार्थः ।।

<प्राचां ष्फ तद्धितः ।। 4-1-17 ।।>

`यञः' इत्येव । प्राचामाचार्याणां मतेन यञन्ताद् स्त्रियां ष्फः प्रत्ययो भवति, स च तद्धितसंज्ञः । षकारो ङीषर्थः । प्रत्ययद्वयेनेह स्त्रीत्वं व्यज्यते । तद्धितग्रहणं प्रातिपदिकसंज्ञार्थम् । गार्ग्यायणी । वात्स्यायनी । अन्येषाम्--गार्गी । वात्सी ।

`सर्वत्र'--ग्रहणमुत्तरसूत्रादिहापकृष्यते, बाधकबाधनार्थम् । "आवट्याच्च"(4.1.75/529) इति चापं वक्ष्यति, तमपि बाधित्वा प्राचां ष्फ एव यथा स्यात् - आवट्यायनी ।

<सर्वत्र लोहितादिकतन्तेभ्यः ।। 4-1-18 ।।>

`यञः' इत्येव । पूर्वेण विकल्पे प्राप्ते नित्यार्थं वचनम् । सर्वत्र लोहितादिभ्यः कतपर्यन्तेभ्यो(4.1.105/1107) यञन्तेभ्यः स्त्रियां ष्फः प्रत्ययो भवति । कतशब्दः स्वतन्त्रं यत्प्रातिपदिकं तदवधित्वेन परिगृह्यते - कपिशब्दात्परः कपिकतेति, न प्रातिपदिकावयवः कुरुकतेति । लौहित्यायनी । शांसित्यायनी । बाभ्रव्यायणी ।।

`कण्वात्तु शकलः पूर्वः कतादुत्तरे इष्यते ।

पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम्'(म.भा.2.210) ।।

प्रातिपदिकेष्वन्यथा पाठः स एवं व्यवस्थापयितव्य इति मन्यते । `कतन्तेभ्यः' इति बहुव्रीहितत्पुरुषयोरेकशेषः, तथा "कण्वादिभ्यो गोत्रे"(4.2.111/1332) इति । तत्र तत्पुरुषवृत्त्या सङ्गृहीतो मध्यपाती शकलशब्दो यञन्तः प्रत्ययद्वयमपि प्रतिपद्यते । शाकल्यायनी । शाकल्यस्येमे छात्राः शाकलाः ।।

<कौरव्यमाण्डूकाभ्यां च ।। 4-1-19 ।।>

कौरव्य, माण्डूक इत्येताभ्यां स्त्रियां ष्फः प्रत्ययो भवति । "कुर्वादिभ्यो ण्यः"(4.1.151/1175) कृते "ढक्च मण्डूकात्"(4.1.119/1122) इत्यणि च । यथाक्रमं टाब्ङीपोरपवादः । कौरव्यायणी । माण्डूकायनी ।

कथं कौरवी सेना ? "तस्येदम्"(4.3.120/1500) विवक्षायामणि कृते भविष्यति ।

* कौरव्यमाण्डूकयोरासुरेरुपसङ्ख्यानम् *(म.भा.2.210) । आसुरायणी । शैषिकेष्वर्थेषु "इञश्च"(4.2.112/2333) इत्यणि प्राप्ते छप्रत्यय इष्यते । आसुरीयः कल्पः ।।

<वयसि प्रथमे ।। 4-1-20 ।।>

कालकृतशरीरावस्था यौवनादिः = वयः । प्रथमे वयसि यत्प्रातिपदिकं श्रुत्या वर्तते ततः स्त्रियां ङीप् प्रत्ययो भवति । कुमारी । किशोरी । वर्करी ।

प्रथम इति किम् ? स्थविरा । वृद्धा । अत इत्येव--शिशुः ।।

* वयस्यचरम इति वक्तव्यम् *(म.भा.2.211) । वधूटी । चिरण्टी । द्वितीयवयोवचनावेतौ । प्राप्तयौवना स्त्र्यभिधीयते ।

कथं कन्या ? "कन्यायाः कनीन च"(4.1.116/1119) इति ज्ञापकात् ।
उत्तानशया, लोहितपादिकेति ? नैता वयःश्रुतयः ।।
<द्विगोः ।। 4-1-21 ।।>
द्विगुसंज्ञकात्प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति । पञ्चपूली । दशपूली ।
कथं त्रिफला ? अजादिषु दृश्यते ।।
<अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि ।। 4-1-22 ।।>
पूर्वेण ङीप् प्राप्तः प्रतिषिद्ध्यते । अपरिमाणान्ताद् द्विगोर्बिस्ताचितकम्बल्यान्ताच्च तद्धितलुकि सति ङीप् प्रत्ययो न भवति । बिस्तादीनां परिमाणार्थं ग्रहणम् । सर्वतो मानम् = परिमाणम् ।
अपरिमाणान्तात्तावत् - पञ्चभिरश्वैः क्रीता पञ्चाश्वा । दशाश्वा ।(5.1.37/1702)(5.1.28/1693)
कालः सङ्ख्या च न परिमाणम् । द्विवर्षा । त्रिवर्षा(5.2.37/1838) । द्वाभ्यां शताभ्यां क्रीता द्विशता । त्रिशता ।(5.1.22/1687)
बिस्तादिभ्यः - द्विबिस्ता । त्रिबिस्ता । द्व्याचिता । त्र्याचिता (5.1.54/1720)। द्विकम्बल्या । त्रिकम्बल्या ।(5.1.37/1702)
अपरिमाणेति किम् ? द्व्याढकी । त्र्याढकी । तद्धितलुकीति किम् ? समाहारे--पञ्चाश्वी । दशाश्वी ।
<काण्डान्तात्क्षेत्रे ।। 4-1-23 ।।>
काण्डशब्दान्ताद् द्विगोस्तद्धितलुकि सति क्षेत्रे वाच्ये ङीप् प्रत्ययो न भवति । द्वे काण्डे प्रमाणमस्याः क्षेत्रभक्तेः, "प्रमाणे द्वयसज्दघ्नञ्मात्रचः"(5.2.37/1838) इति विहितस्य तद्धितस्य `प्रमाणे लो द्विगोर्नित्यम्'(5.2.37/1838) इति लुकि कृतेद्विकाण्डा क्षेत्रभक्तिः, त्रिकाण्डा क्षेत्रभक्तिः ।
काण्डशब्दस्यापरिमाणवाचित्वात्पूर्वेणैव प्रतिषेधे सिद्धे क्षेत्रे नियमार्थं वचनम् । इह मा भूत्--द्विकाण्डी रज्जुः, त्रिकाण्डी रज्जुरिति । प्रमाणविशेषः = काण्डम् ।।
<पुरुषात्प्रमाणेऽन्यतरस्याम् ।। 4-1-24 ।।>
`द्विगोः' `तद्धितलुकि' इत्येव । प्रमाणे यः पुरुषशब्दस्तदन्ताद् द्विगोस्तद्धितलुकि सति अन्यतरस्यां न ङीप् प्रत्ययो भवति । द्वौ पुरुषौ प्रमाणमस्याः परिखायाः द्विपुरुषा, द्विपुरुषी । त्रिपुरुषा, त्रिपुरुषी ।
अपरिमाणान्तत्वान्नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं वचनम् ।
प्रमाण इति किम् ? द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा । त्रिपुरुषा ।
तद्धितलुकीत्येव, समाहारे -- द्विपुरुषी, त्रिपुरुषी ।
<बहुव्रीहेरूधसो ङीष् ।। 4-1-25 ।।>
ऊधस्शब्दान्ताद्बहुव्रीहेः स्त्रियां ङीष् प्रत्ययो भवति । "ऊधसोऽनङ्"(5.4.131/483) इति समासान्ते कृते "अनो बहुव्रीहेः"(4.1.12/460) इति डाप्प्रतिषेधयोः प्राप्तयोरिदमुच्यते । घटोध्नी । कुण्डोध्नी ।
बहुव्रीहेरिति किम् ? प्राप्ता ऊधः प्राप्तोधाः ।
"अन उपधालोपिनोऽन्यतरस्याम्"(4.1.28/462) इत्यस्यापि ङीपोऽयमुत्तरत्रानुवृत्तेर्बाधक इष्यते । समासान्तश्च स्त्रियामेव, इह न भवति--महोधाः पर्जन्य इति ।।
<सङ्ख्याव्ययादेर्ङीप् ।। 4-1-26 ।।>
पूर्वेण ङीषि प्राप्ते ङीब्विधीयते । सङ्ख्यादेरव्ययादेश्च बहुव्रीहेरूधःशब्दान्ताद् ङीप् प्रत्ययो भवति । सङ्ख्यादेस्तावत्--द्व्यूध्नी । त्र्यूध्नी । अव्ययादेः--अत्यूध्नी । निरूध्नी ।
आदिग्रहणं किम् ? द्विविधोध्नी, त्रिविधोध्नीत्यत्रापि यथा स्यात् ।।
<दामहायनान्ताच्च ।। 4-1-27 ।।>
`ऊधसः' इति निवृत्तम् । सङ्ख्याग्रहणमनुवर्तते, नाव्ययग्रहणम् । सङ्ख्यादेर्बहुव्रीहेर्दामशब्दान्ताद्धायनशब्दान्ताच्च स्त्रियां ङीप् प्रत्ययो भवति । दामान्तात् डाप्प्रतिषेधविकल्पेषु प्राप्तेषु नित्यार्थं वचनम् । द्विदाम्नी । त्रिदाम्नी ।
हायनान्ताट्टापि प्राप्ते - द्विहायनी । त्रिहायनी । चतुर्हायणी ।
* हायनो वयसि स्मृतः *(म.भा.2.213) तेनेह न भवति--द्विहायना शाला, त्रिहायना, चतुर्हायना । णत्वमपि `त्रिचतुर्भ्यां हायनस्य' इति वयस्येव स्मर्यते ।।
<अन उपधालोपिनोऽन्यतरस्याम् ।। 4-1-28 ।।>
`बहुव्रीहेः' इत्येव । अन्नन्तो यो बहुव्रीहिरुपधालोपी तस्मादन्यतरस्यां ङीप् प्रत्ययो भवति । ङीपा मुक्ते डाप्प्रतिषेधौ भवतः ।
किमर्थं तर्हीदमुच्यते, ननु सिद्धा एव डाप्प्रतिषेधङीपः ? अनुपधालोपिनो ङीप्प्रतिषेधार्थं वचनम् । बहुराजा । बहुराज्ञी । बहुराजे । बहुतक्षा । बहुतक्ष्णी ।

बहुतक्षे ।
अन इति किम् ? बहुमत्स्या । उपधालोपिनः किम् ? सुपर्वा । सुपर्वे । सुपर्वाः । सुपर्वाणौ । सुपर्वाणः । डाप्प्रतिषेधावेवात्र भवतः ।।
<नित्यं संज्ञाछन्दसोः ।। 4-1-29 ।।>
अन्नन्ताद्बहुव्रीहेरुपधालोपिनः संज्ञायां विषये छन्दसि च नित्यं ङीप् प्रत्ययो भवति । विकल्पस्यापवादः । सुराज्ञो, अतिराज्ञी नाम ग्रामः । छन्दसि--गौः पञ्चदाम्नी । एकदाम्नी । द्विदाम्नी । `एकमूर्ध्नी'(अ.वे.8.9.15) । `समानमूर्ध्नी'(तै.सं.4.3.11.4) ।।
<केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ।। 4-1-30 ।।>
`संज्ञाछन्दसोः' इत्येव । केवलादिभ्यः प्रातिपदिकेभ्यः संज्ञायां छन्दसि विषये स्त्रियां ङीप् प्रत्ययो भवति । केवली । केवलेति भाषायाम् ।
`मामकी'(पै.1.6.8) । मामिकेति भाषायाम् । `मित्रावरुणयोर्भागधेयी स्थ'(तै.1.3.12.1) । भागधेयेति भाषायाम् । `पापी त्वियम्'(मै.4.2.14) ।
पापेति भाषायाम् । `उताऽपरिभ्यो मघवा विजिग्ये'(ऋ.1.32.13) । अपरेति भाषायाम् । `समानी प्रवाणी'(ऋ.10.191.3) । समानेति भाषायाम् ।
`आर्यकृती'(मै.1.8.3) । आर्यकृतेति भाषायाम् । `सुमङ्गली'(ऋ.10.85.33) । सुमङ्गलेति भाषायाम् । `भेषजी'(तै.4.5.10.1) । भेषजेति भाषायाम् ।।
<रात्रेश्चाजसौ ।। 4-1-31 ।।>
जस्विषयादन्यत्र संज्ञायां छन्दसि च रात्रिशब्दाद् ङीप् प्रत्ययो भवति । या च रात्री सृष्टा । `रात्रीभिः'(ऋ.10.10.9) ।
अजसाविति किम् ? यास्ता रात्रयः ।।
*अजसादिष्विति वक्तव्यम् *(म.भा.2.213) रात्रिं सहोषित्वा ।
कथं तिमिरपटलैरवगुण्ठिताश्च रात्र्यः ? ङीषयं बह्वादिलक्षणः, तत्र हि पठ्यते -`कृदिकारादक्तिनः'(ग.सू.50), `सर्वतोऽक्तिन्नर्थादित्येके'(ग.सू.51) इति ।।
<अन्तर्वत्पतिवतोर्नुक् ।। 4-1-32 ।।>
प्रकृतिर्निपात्यते, नुगागमस्तु विधीयते । अन्तर्वत्पतिवतोर्नुग्भवति ङीप् च प्रत्ययः, स तु नकारान्तत्वादेव सिद्धः । निपातनसामर्थ्याच्च विशेषे वृत्तिर्भवति ।
अन्तर्वत्, पतिवदिति गर्भ-भर्तृसंयोगे । इह तु न भवति - अन्तरस्यां शालायां विद्यते । पतिमती पृथिवी ।
अन्तर्वदिति मतुब्निपात्यते, वत्वं सिद्धम् । पतिवदिति वत्वं निपात्यते, मतुप्सिद्धः । अन्तर्वत्नी गर्भिणी । पतिवत्नी जीवपतिः ।
`अन्तर्वत्पतिवतोस्तु मतुब्वत्वे निपातनात् ।
गर्भिण्यां जीवपत्यां च वाच्छन्दसि तु नुग्विधिः'(म.भा.2.214) ।।
सान्तर्वत्नी देवानुपैत् । सान्तर्वती देवानुपैत् । पतिवत्नी तरुणवत्सा । पतिवती तरुणवत्सा ।।
<पत्युर्नो यज्ञसंयोगे ।। 4-1-33 ।।>
पतिशब्दस्य नकारादेशः स्त्रियां विधीयते । ङीप् प्रत्ययस्तु नकारान्तत्वादेव सिद्धः यज्ञसंयोगे । यज्ञेन संयोगः = यज्ञसंयोगः ।
तत्साधनत्वात्फलग्रहीतृत्वाद्वा यजमानस्य पत्नी । पत्नि वाचं यच्छ ।
यज्ञसंयोग इति किम् ? ग्रामस्य पतिरियं ब्राह्मणी ।
कथं वृषलस्य पत्नी ? उपमानाद् भविष्यति ।
<विभाषा सपूर्वस्य ।। 4-1-34 ।।>
`पत्युर्न' इति वर्त्तते । पतिशब्दान्तस्य प्रातिपदिकस्य सपूर्वस्यानुपसर्जनस्य स्त्रियां विभाषा नकारादेशो भवति । ङीप् तु लभ्यत एव । वृद्धपतिः, वृद्धपत्नी । स्थूलपतिः, स्थूलपत्नी(म.भा.2.214) । अप्राप्तविभाषेयम्, अयज्ञसंयोगत्वात् ।
सपूर्वस्येति किम् ? पतिरियं ब्राह्मणी ग्रामस्य ।।
<नित्यं सपत्न्यादिषु ।। 4-1-35 ।।>
सपत्न्यादिषु नित्यं पत्युर्नकारादेशो भवति । ङीप् तु लभ्यत एव । पूर्वेण विकल्पे प्राप्ते वचनम् । नित्यग्रहणं विस्पष्टार्थम् । समानः पतिरस्याः सपत्नी । एकपत्नी ।
समानादिष्विति वक्तव्ये समानस्य सभावार्थं वचनम् ।
समान । एक । वीर । पिण्ड । भ्रातृ । पुत्त्र । * दासाच्छन्दसि * ।।
<पूतक्रतोरै च ।। 4-1-36 ।।>
पूतक्रतुशब्दस्य स्त्रियामैकारश्चान्तादेशो भवति ङीप् प्रत्ययः । पूतक्रतोः स्त्री पूतक्रतायी(म.भा.2.215) ।
त्रय एते योगाः पुंयोगप्रकरणे द्रष्टव्याः । यया हि पूताः क्रतवः पूतक्रतुः सा भवति ।।
<वृषाकप्यग्निकुसितकुसिदानामुदात्तः ।। 4-1-37 ।।>
वृषाकप्यादीनामुदात्त ऐकारादेशो भवति स्त्रियाम्, ङीप् च प्रत्ययः । वृषाकपिशब्दो मध्योदात्त उदात्तत्वं प्रयोजयति । अग्न्यादिषु पुनरन्तोदात्तेषु

स्थानिवद्भावादेव सिद्धम् । वृषाकपेः स्त्री वृषाकपायी । अग्नायी । कुसितायी । कुसिदायी ।
पुंयोग इत्येव--वृषाकपिः स्त्री ।।
<मनोरौ वा ।। 4-1-38 ।।>
`ऐ' `उदात्तः' इति वर्त्तते । मनुशब्दात् स्त्रियां ङीप् प्रत्ययो भवति, औकारश्चान्तादेशः, ऐकारश्चोदात्तः । वाग्रहणेन द्वावपि विकल्प्येते । तेन त्रैरूप्यं भवति--मनोः स्त्री मनायी(काठ.30.1), मनावी(मै.1.8), मनुः । मनुशब्द आद्युदात्तः ।।
<वर्णादनुदात्तात्तोपधात्तो नः ।। 4-1-39 ।।>
`वा' इति वर्तते । वर्णवाचिनः प्रातिपदिकादनुदात्तान्तात्तकारोपधाद्वा ङीप् प्रत्ययो भवति, तकारस्य नकारादेशो भवति । एता, एनी(ऋ.1.144.6) । श्येता, श्येनी । हरिता, हरिणी । सर्व एते आद्युदात्ताः; "वर्णानां तणतिनितान्तानाम्"(फि.सू.2.10) इति वचनात् ।
वर्णादिति किम् ? प्रकृता । प्ररुता । गतिस्वरेणाद्युदात्तः(6.2.49/3783) । अनुदात्तादिति किम् ?श्वेता । घृतादित्वादन्तोदात्तः(फि.सू.1.21) । तोपधादिति किम् ? अन्यतो ङीषं वक्ष्यति । अत इत्येव - शितिर्ब्राह्मणी ।।
* पिशङ्गादुपसङ्ख्यानम् *(म.भा.2.215) । पिशङ्गी ।
* असितपलितयोः प्रतिषेधः *(म.भा.2.215) । असिता । पलिता ।
* तयोश्छन्दसि क्नमित्येके *(म.भा.2.216) । `असिक्नी'(शौ.अ.1.23.1) । `पलिक्नी'(ऋ.5.2.4) । भाषायामपीष्यते--गतो गणस्तूर्णमसिक्निकानाम् ।।
<अन्यतो ङीष् ।। 4-1-40 ।।>
`वा' इति निवृत्तम्, `वर्णादनुदात्तात्' इति वर्त्तते, तोपधापेक्षमन्यत्वम् । वर्णवाचिनः प्रातिपदिकादनुदात्तान्तात् स्त्रियां ङीष् प्रत्ययो भवति । स्वरे विशेषः । सारङ्गी । कल्माषी । शबली । वर्णादित्येव, खट्वा । अनुदात्तादित्येव--कृष्णा । कपिला ।।
<षिद्गौरादिभ्यश्च ।। 4-1-41 ।।>
`ङीष्'अनुवर्तते । षिद्भ्यः प्रातिपदिकेभ्यो गौरादिभ्यश्च स्त्रियां ङीष् प्रत्ययो भवति । "शिल्पिनि ष्वुन्"(3.1.145/2907) नर्तकी । खनकी । रजकी । गौरादिभ्यः--गौरी । मत्सी ।
गौर । मत्स्य । मनुष्य । शृङ्ग । हय । गवय । मुकय । ऋष्य । पुट । द्रुण । द्रोण । हरिण । कण । पटर । उकण । आमलक । कुवल । बदर । बिम्ब । तर्कार । शर्कार । पुष्कर । शिखण्ड । सुषम । सलन्द । गडुज । आनन्द । सृपाट । सृगेठ । आढक । शष्कुल । सूर्म । सुब। सूर्य । पूष । मूष । घातक । सकलूक । सल्लक । मालक । मालत । सात्वक । वेतस । अतस । पृस । मह । मठ । छेद । श्वन् । तक्षन् । अनडुही । अनड्वाही । `एषणः करणे'(ग.सू.42) । देह । काकादन । गवादन । तेजन । रजन । लवण । पान । मेध । गौतम । आयस्थूण । भौरि । भौलिकि । भौलिङ्गि । औद्गाहमानि । आलिङ्गि। आपिच्छिक । आरट। टोट । नट । नाट । मलाट । शातन । पातन । पावन । आस्तरण । अधिकरण । एत। अधिकार । आग्रहायणी । प्रत्यवरोहिणी । सेवन । * सुमङ्गालात्संज्ञायाम् * (ग.सू.43)। सुन्दर । मण्डल । पिण्ड। विटक। कुर्द। गूर्द। पट । पाण्ट । लोफाण्ट । कन्दर । । कन्दल । तरुण । तलुन । बृहत् । महत् । सौधर्म । * रोहिणी नक्षत्रे *(ग.सू.44),* रेवती नक्षत्रे *(ग.सू.45) विकल । निष्फल । पुष्कल । * कटाच्छ्रोणिवचने *(ग.सू.46) । * पिप्पल्यादयश्च *(ग.सू.47) । पिप्पली । हरीतकी । कोशातकी । शमी । करीरी । पृथिवी । क्रोष्ट्री । मातामह । पितामह । मातामहपितामहयोः `मातरि षिच्च'(4.2.36/1242) इति षित्वादेव सिद्धे ज्ञापनार्थं वचनम् - `अनित्यः षिल्लक्षणो ङीष्' इति, तेन दंष्ट्रेत्युपपन्नं भवति ।।
<जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद् वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनाऽयोविकारमैथुनेच्छाकेशवेशेषु ।। 4-1-42 ।।>
जानपदादिभ्य एकादशभ्यः प्रातिपदिकेभ्य एकादशसु वृत्त्यादिष्वर्थेषु यथासङ्ख्यं ङीष् प्रत्ययो भवति । जानपदी भवति, वृत्तिश्चेत् । जानपदी अन्या । स्वरे विशेषः। उत्सादिपाठादञि कृते ङीपाद्युदात्तत्वं भवति । कुण्डी भवति, अमत्रं चेत् । कुण्डाऽन्या । गोणी भवति, आवपनं चेत् । गोणान्या । स्थली भवति, अकृत्रिमा चेत् । स्थलान्या । भाजी भवति, श्राणा चेत्, पक्वेत्यर्थः । भाजाऽन्या । नागी भवति, स्थौल्यं चेत् । नागाऽन्या । नागशब्दो गुणवचनः स्थौल्ये ङीषमुत्पादयति, अन्यत्र गुण एव टापम् । जातिवचनात्तु जातिलक्षणो ङीषेव भवति--नागी । काली भवति, वर्णश्चेत् । कालाऽन्या । नीली भवति अनाच्छादनं चेत् । नीलाऽन्या । न च सर्वस्मिन्ननाच्छादन इष्यते, किं तर्हि ? * नीलादोषधौ, प्राणिनि च * । नीली ओषधिः, नीली गौः, नीली वडवा । * संज्ञायां वा * । नीला । कुशी भवति, अयोविकारश्चेत् । कुशान्या । कामुकी भवति, मैथुनेच्छा चेत् । कामुकान्या । मैथुनेच्छावती भण्यते, नेच्छामात्रम् । कबरी भवति, केशवेशश्चेत् । कबरान्या ।।
<शोणात्प्राचाम् ।। 4-1-43 ।।>
शोणशब्दात्प्राचामाचार्याणां मतेन स्त्रियां ङीष् प्रत्ययो भवति । शोणी, शोणा वडवा ।।
<वोतो गुणवचनात् ।। 4-1-44 ।।>

गुणमुक्तवान् = गुणवचनः । गुणवचनात्प्रातिपदिकाद् उकारान्तात् स्त्रियां वा ङीष् प्रत्ययो भवति । पटुः, पट्वी । मृदुः, मृद्वी ।
उत इति किम् ? शुचिरियं ब्राह्मणी । गुणवचनादिति किम् ? आखुः ।
* वसुशब्दाद्गुणवचनाद् ङीबाद्युदात्तार्थम् * (म.भा.2.217)। वस्वी ।
* खरुसंयोगोपधात्प्रतिषेधो वक्तव्यः *(म.भा.2.217) । खरुरियं ब्राह्मणी । पाण्डुरियं ब्राह्मणी ।
`सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः '।।(म.भा.2.217)
<बह्वादिभ्यश्च ।। 4-1-45 ।।>
`बहु' इत्येवमादिभ्यः प्रातिपदिकेभ्यः स्त्रियां वा ङीष् प्रत्ययो भवति । बहुः, बह्वी ।
बहु । पद्धति । अङ्कति । अञ्चति । अंहति । वंहति । शकटि । * शक्तिः शस्त्रे *(ग.सू.48) । शारि । वारि । गति । अहि । कपि । मुनि । यष्टि । * इतः प्राण्यङ्गात्* (ग.सू.49)। * कृदिकारादक्तिनः * (ग.सू.50)। * सर्वतोऽक्तिन्नर्थादित्येके *(ग.सू.51)। चण्ड । अराल । कमल । कृपाण । विकट । विशाल । विशङ्कट । भरुज । ध्वज । * चन्द्रभागान्नद्याम् *(ग.सू.52) । कल्याण । उदार । पुराण । अहन् ।
बहुशब्दो गुणवचन एव, तस्येह पाठ उत्तरार्थः ।।
<नित्यं छन्दसि ।। 4-1-46 ।।>
बह्वादिभ्यश्छन्दसि विषये नित्यं स्त्रियां ङीष् प्रत्ययो भवति । बह्वीषु हित्वा प्रपिबन् । बह्वी नाम औषधी भवति ।
नित्यग्रहणमुत्तरार्थम् ।।
<भुवश्च ।। 4-1-47 ।।>
छन्दसि विषये स्त्रियां भुवो नित्यं ङीष् प्रत्ययो भवति । `विभ्वी च'(ऋ.5.38.1) । `प्रभ्वी च'(ऋ.1.188.5) । शम्भ्वी च ।
इह कस्मान्न भवति - स्वयम्भूः ? `उतः'(4.1.44/502) इति तपरकरणमनुवर्तते, ह्रस्वादेवेयं पञ्चमी । `भुवः' इति सौत्रो निर्देशः ।।
<पुंयोगादाख्यायाम् ।। 4-1-48 ।।>
पुंसा योगः = पुंयोगः । पुंयोगाद्धेतोर्यत्प्रातिपदिकं स्त्रियां वर्तते पुंस आख्याभूतं तस्माद् ङीष् प्रत्ययो भवति गणकस्य स्त्री गणकी । महामात्री । प्रष्ठी । प्रचरी । पुंसि शब्दप्रवृत्तिनिमित्तस्य सम्भवात् पुंशब्दा एते, तद्योगात्स्त्रियां वर्तन्ते ।
पुंयोगादिति किम् ? देवदत्ता । यज्ञदत्ता । आख्याग्रहणं किम् ? परिसृष्टा । प्रजाता । पुंयोगादेते शब्दाः स्त्रियां वर्तन्ते, न तु पुमांसमाचक्षते ।
* गोपालिकादीनां प्रतिषेधः *(म.भा.2.217) । गोपालकस्य स्त्री गोपालिका ।
* सूर्याद् देवतायां चाब्वक्तव्यः *(म.भा.2.220) । सूर्यस्य स्त्री देवता सूर्या । देवतायामिति किम् ? सूरी ।।
<इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ।। 4-1-49 ।।>
इन्द्रादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीष् प्रत्ययो भवति, आनुक्चागमः । येषामत्र पुंयोग एवेष्यते तेषामानुगागममात्रं विधीयते, प्रत्ययस्तु पूर्वेणैव सिद्धः । अन्येषां तूभयं विधीयते । इन्द्राणी । वरुणानी । भवानी । शर्वाणी । रुद्राणी । मृडानी ।
* हिमारण्ययोर्महत्त्वे *(म.भा.2.220) महद्धिमं हिमानी । महदरण्यमरण्यानी ।
* यवाद्दोषे *(म.भा.2.220) । दुष्टो यवो यवानी ।
* यवनाल्लिप्याम् *(म.भा.2.220) । यवनानी लिपिः ।
* उपाध्यायमातुलाभ्यां वा * (म.भा.2.220)। उपाध्यायी, उपाध्यायानी । मातुली । मातुलानी ।
* आचार्यादणत्वं च *(म.भा.2.220) ।। आचार्यानी । आचार्या ।
* अर्यक्षत्त्रियाभ्यां वा * (म.भा.2.220)। अर्याणी, अर्या । क्षत्त्रियाणी, क्षत्त्रिया । विना पुंयोगेन स्वार्थ एवायं विधिः । पुंयोगे तु ङीषैव भवितव्यम्--अर्यी, क्षत्त्रियी ।
* मुद्गलाच्छन्दसि लिच्च *(म.भा.2.220) । `रथीरभून्मुद्गलानी गविष्टौ'(ऋ.10.102.2) ।।
<क्रीतात्करणपूर्वात् ।। 4-1-50 ।।>
करणं पूर्वमस्मिन्निति करणपूर्वं प्रातिपदिकम् । क्रीतशब्दान्तात् प्रातिपदिकात्करणपूर्वात्स्त्रियां ङीष् प्रत्ययो भवति । वस्त्रेण क्रीयते सा वस्त्रक्रीती । वसनक्रीती ।
करणपूर्वादिति किम् ? सुक्रीता । दुष्क्रीता ।
इह कस्मान्न भवति -
`सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी' इति ?
टाबन्तेन समासः, अत इति चानुवर्तते । `गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति, बहुलं तदुच्यते -"कर्तृकरणे कृता

बहुलम्"(2.1.32/694) इति ।।

<क्तादल्पाख्यायाम् ।। 4-1-51 ।।>

`करणपूर्वात्' इत्येव । करणपूर्वात्प्रातिपदिकात् क्तान्तादल्पाख्यायां ङीष् प्रत्ययो भवति । `अल्पाख्यायाम्' इति समुदायोपाधिः । अभ्रविलिप्ती द्यौः । सूपविलिप्ती पात्री । अल्पसूपेत्यर्थः ।

अल्पाख्यायामिति किम् ? चन्दनानुलिप्ता ब्राह्मणी ।।

<बहुव्रीहेश्चान्तोदात्तात् ।। 4-1-52 ।।>

`क्तात्' इत्येव । बहुव्रीहिर्योऽन्तोदात्तस्तस्मात्स्त्रियां ङीष् प्रत्ययो भवति । स्वाङ्गपूर्वपदो बहुव्रीहिरिहोदाहरणम् , अस्वाङ्गपूर्वपदाद्विकल्पं वक्ष्यति । शङ्खभिन्नी । ऊरुभिन्नी । गलकोत्कृत्ती । केशलूनी ।

बहुव्रीहेरिति किम् ? पादपतिता ।

* अन्तोदात्ताज्जातप्रतिषेधः *(म.भा.2.221) दन्तजाता, स्तनजाता ।

* पाणिगृहीत्यादीनामर्थविशेषे *(म.भा.2.221) पाणिगृहीती भार्या । यस्यास्तु कथञ्चित्पाणिर्गृह्यते पाणिगृहीता सा भवति ।

* अबहुनञ्सुकालसुखादिपूर्वादिति वक्तव्यम् *(म.भा.2.222) । बहुकृता । नञ्-अकृता । सु - सुकृता । काल - मासजाता, संवत्सरजाता । सुखादि - सुखजाता, दुःखजाता । "जातिकालसुखादिभ्योऽनाच्छादनात्क्तोऽकृतमितप्रतिपन्नाः"(6.2.170/6904) इत्येवमादिना बहुव्रीहेरन्तोदात्तत्वम् ।।

<अस्वाङ्गपूर्वपदाद्वा ।। 4-1-53 ।।>

`अन्तोदात्तात् क्तान्तात्' इत्यनुवर्त्तते । अस्वाङ्गपूर्वपदादन्तोदात्तात् क्तान्ताद्बहुव्रीहेः स्त्रियां वा ङीष् प्रत्ययो भवति । पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । शार्ङ्गजग्धी, शार्ङ्गजग्धा । पलाण्डुभक्षिती पलाण्डुभक्षिता । सुरापीती, सुरापीता ।

अस्वाङ्गपूर्वपदादिति किम् ? शङ्खभिन्नी । ऊरुभिन्नी । अन्तोदात्तादित्येव - वस्त्रच्छन्ना, वसनच्छन्ना ।

* बहुलं संज्ञाछन्दसोरिति वक्तव्यम् * । प्रवृद्धविलूनी, प्रवृद्धविलूना । प्रवृद्धा चासौ विलूना चेति, नायं बहुव्रीहिः ।

<स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ।। 4-1-54 ।।>

`बहुव्रीहेः क्तान्तादन्तोदात्तात्' इति सर्वं निवृत्तम् । वाग्रहणमनुवर्तते । स्वाङ्गं यदुपसर्जनमसंयोगोपधं तदन्तात्प्रातिपदिकात्स्त्रियां वा ङीष् प्रत्ययो भवति । चन्द्रमुखी, चन्द्रमुखा । अतिक्रान्ता केशान् अतिकेशी, अतिकेशा माला ।

स्वाङ्गादिति किम् ? बहुयवा । उपसर्जनादिति किम् ? अशिखा । असंयोगोपधादिति किम् ? सुगुल्फा । सुपार्श्वा ।

* अङ्गगात्रकण्ठेभ्य इति वक्तव्यम् *(म.भा.2.222) । मृद्वङ्गी, मृद्वङ्गा । सुगात्री, सुगात्रा । स्निग्धकण्ठी, स्निग्धकण्ठा ।

`अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् ।

अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथायुतम् ।।'(म.भा.2.222)

<नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ।। 4-1-55 ।।>

`स्वाङ्गाच्चोपसर्जनात्' इत्येव । बह्वज्लक्षणे संयोगोपधलक्षणे च प्रतिषेधे प्राप्ते वचनम् । सहनञ्विद्यमानलक्षणस्तु प्रतिषेधो भवत्येव । नासिकाद्यन्तात्प्रातिपदिकात्स्त्रियां वा ङीष् प्रत्ययो भवति । तुङ्गनासिकी, तुङ्गनासिका । तिलोदरी, तिलोदरा । बिम्बोष्ठी, बिम्बोष्ठा । दीर्घजङ्घी, दीर्घजङ्घा । समदन्ती, समदन्ता । चारुकर्णी, चारुकर्णा । तीक्ष्णशृङ्गी, तीक्ष्णशृङ्गा ।

* पुच्छाच्चेति वक्तव्यम् * । कल्याणपुच्छी । कल्याणपुच्छा ।

* कबरमणिविषशरेभ्यो नित्यम् *(म.भा.2.224) कबरपुच्छी । मणिपुच्छी । विषपुच्छी । शरपुच्छी ।

* उपमानात्पक्षात् पुच्छाच्च *(म.भा.2.224) । उलूकपक्षी सेना । उलूकपुच्छी शाला ।।

<न क्रोडादिबह्वचः ।। 4-1-56 ।।>

`स्वाङ्गात्' इति ङीष् प्राप्तः प्रतिषिध्यते । क्रोडाद्यन्ताद बह्वजन्ताच्च प्रातिपदिकात्स्त्रियां ङीष् प्रत्ययो न भवति । कल्याणक्रोडा । कल्याणखुरा । कल्याणोखा । कल्याणबाला । कल्याणशफा । कल्याणगुदा । कल्याणघोणा । कल्याणनखा । कल्याणमुखा । क्रोडादिराकृतिगणः । सुभागा । सुगला ।

बह्वचः खल्वपि - पृथुजघना । महाललाटा ।।

<सहनञ्विद्यमानपूर्वाच्च ।। 4-1-57 ।।>

"स्वाङ्गाच्चोपसर्जनात्"(4.1.54/510) इति "नासिकोदरौष्ठजङ्घा"(4.1.55/511) इति च प्राप्तो ङीष्प्रतिषिद्ध्यते । सह, नञ्, विद्यमान इत्येवम्पूर्वात्प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो न भवति । सकेशा, अकेशा, विद्यमानकेशा । सनासिका, अनासिका, विद्यमाननासिका ।।

<नखमुखात्संज्ञायाम् ।। 4-1-58 ।।>

नखमुखान्तात्प्रातिपदिकात्संज्ञायां स्त्रियां विषये ङीष् प्रत्ययो न भवति । शूर्पणखा । वज्रणखा । गौरमुखा । कालमुखा ।

संज्ञायामिति किम् ? ताम्रनखी कन्या । चन्द्रमुखी ।।

<दीर्घजिह्वी च च्छन्दसि ।। 4-1-59 ।।>

`दीर्घजिह्वी' इति छन्दसि विषये निपात्यते । संयोगोपधत्वादप्राप्तो ङीष् विधीयते । `दीर्घजिह्वी वै देवानां हव्यमवालेट्'(मै.सं.3.10.6) । चकारः संज्ञानुकर्षणार्थः । `दीर्घजिह्वी' इति निपातनं नित्यार्थम् ।।

<दिक्पूर्वपदान्ङीप् ।। 4-1-60 ।।>

"स्वाङ्गाच्चोपसर्जनात्"(4.1.54/510) इत्येवमादिविधिप्रतिषेधविषयः सर्वोऽप्यपेक्ष्यते । यत्र ङीष् विहितस्तत्र तदपवादः । दिक्पूर्वपदात्प्रातिपदिकाद् ङीप् प्रत्ययो भवति । स्वरे विशेषः । प्राङ्मुखी, प्राङ्मुखा । प्राङ्नासिकी, प्राङ्नासिका ।

इह न भवति - प्राग्गुल्फा, प्राक्क्रोडा, प्राग्जघनेति ।।

<वाहः ।। 4-1-60 ।।>

ङीषेव स्वर्यते, न ङीप् । वहेरयं ण्विप्रत्ययान्तस्य निर्देशः । सामर्थ्यात्तदन्तविधेर्विज्ञानम् । वाहन्तात्प्रातिपदिकात्स्त्रियां ङीष् प्रत्ययो भवति । दित्यौही । प्रष्ठौही ।।

<सख्यशिश्वीति भाषायाम् ।। 4-1-62 ।।>

सखी, अशिश्वी - इत्येतौ शब्दौ ङीषन्तौ भाषायां निपात्येते । सखीयं मे ब्राह्मणी । नास्याः शिशुरस्तीति अशिश्वी ।

भाषायामिति किम् ? `सखा सप्तपदी भव'(आ.गृ.1.7.19) । अशिशुमिव मामयं शिशुरभिमन्यते ।।

<जातेरस्त्रीविषयादयोपधात् ।। 4-1-63 ।।>

जातिवाचि यत्प्रातिपदिकं न च स्त्रियामेव नियतमस्त्रीविषयमयकारोपधं च तस्मात्स्त्रियां ङीष् प्रत्ययो भवति ।

`आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् ।

सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह' ।।(म.भा.2.225)

कुक्कुटी । सूकरी । मयूरी । ब्राह्मणी । वृषली । नाडायनी । चारायणी । कठी । वह्वृची । जातेरिति किम् ? मुण्डा । अस्त्रीविषयादिति किम् ? मक्षिका । अयकारोपधादिति किम्? क्षत्त्रिया ।

* योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधः * (म.भा.2.226)। हयी । गवयी । मुकयी । मत्सी । मनुषी ।।

<पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च ।। 4-1-64 ।।>

पाकाद्युत्तरपदाज्जातिवाचिनः प्रातिपदिकात्स्त्रियां ङीष् प्रत्ययो भवति । स्त्रीविषयत्वादेतेषां पूर्वेणाप्राप्तः प्रत्ययो विधीयते । ओदनपाकी । शङ्कुकर्णी । शालपर्णी । शङ्खपुष्पी । दासीफली । दर्भमूली । गोबाली ।

पुष्पफलमूलोत्तरपदात्तु यतो नेष्यते तदजादिषु पठ्यते -`सत्प्राक्काण्डप्रान्तशतैकेभ्यः पुष्पात्'(ग.सू.53), `सम्भस्त्राजिनशणपिण्डेभ्यः फलात्'(ग.सू.54), `मूलान्नञः'(ग.सू.55) इति ।।

<इतो मनुष्यजातेः ।। 4-1-65 ।।>

इकारान्तात्प्रातिपदिकान्मनुष्यजातिवाचिनः स्त्रियां ङीष् प्रत्ययो भवति । अवन्ती । कुन्ती । दाक्षी । प्लाक्षी ।

इत इति किम् ? विट् । दरत् । मनुष्यग्रहणं किम् ? तित्तिरिः । `जातेः' इति वर्तमाने पुनर्जातिग्रहणं योपधादपि यथा स्यात् - औदमेयी (म.भा.2.226)।

* इञ उपसङ्ख्यानमजात्यर्थम् *(म.भा.2.226) । सौतङ्गमी । मौनचित्ती । सुतङ्गमादिभ्यश्चातुरर्थिक इञ् न जातिः ।।

<ऊङुतः ।। 4-1-66 ।।>

`मनुष्यजातेः' इति वर्त्तते । उकारान्तान्मनुष्यजातिवाचिनः प्रातिपदिकात्स्त्रियामूङ् प्रत्ययो भवति । कुरूः । ब्रह्मबन्धूः । वीरबन्धूः ।

ङकारः "नोङ्धात्वोः"(6.1.175/3721) इति विशेषणार्थः । दीर्घोच्चारणं कपो बाधनार्थम् । `अयोपधात्' इत्येतदत्रापेक्ष्यते । अध्वर्युर्ब्राह्मणी ।

* अप्राणिजातेश्चारज्ज्वादीनामिति वक्तव्यम् *(म.भा.2.226) । अलाबूः । कर्कन्धूः । अप्राणिग्रहणं किम् ? कृकवाकुः । अरज्ज्वादीनामिति किम् ? रज्जुः । हनुः ।।

<बाह्वन्तात्संज्ञायाम् ।। 4-1-67 ।।>

बाहुशब्दान्तात्प्रातिपदिकात्संज्ञायां विषये स्त्रियामूङ् प्रत्ययो भवति । भद्रबाहूः । जालबाहूः ।

संज्ञायामिति किम् ? वृत्तौ बाहू यस्याः सा वृत्तबाहुः ।।

<पङ्गोश्च ।। 4-1-68 ।।>

पङ्गुशब्दात्स्त्रियामूङ् प्रत्ययो भवति । पङ्गूः ।

* श्वशुरस्योकाराकारयोर्लोपश्च वक्तव्यः * । श्वश्रूः ।।

<ऊरूत्तरपदादौपम्ये ।। 4-1-69 ।।>

ऊरूत्तरपदात्प्रातिपदिकादौपम्ये गम्यमाने स्त्रियामूङ् प्रत्ययो भवति । कदलीस्तम्भोरूः । नागनासोरूः । करभोरूः ।

औपम्य इति किम् ? वृत्तोरुः स्त्री ।।
<संहितशफलक्षणवामादेश्च ।। 4-1-70 ।।>
संहित, शफ, लक्षण, वाम - इत्येवमादेः प्रातिपदिकादूरूत्तरपदात् स्त्रियामूङ् प्रत्ययो भवति । अनौपम्यार्थ आरम्भः । संहितोरूः । शफोरूः । लक्षणोरूः । वामोरूः ।
* सहितसहाभ्यां चेति वक्तव्यम् * (म.भा.2.227)। सहितोरूः । सहोरूः ।।
<कद्रुकमण्डल्वोश्छन्दसि ।। 4-1-71 ।।>
कद्रुशब्दात्कमण्डलुशब्दाच्च छन्दसि विषये स्त्रियामूङ् प्रत्ययो भवति । `कद्रूश्च वै सुपर्णी च'(तै.सं.6.1.6) । मा स्म कमण्डलूं शूद्राय दद्यात् ।
छन्दसीति किम् ? कद्रुः । कमण्डलुः ।
* गुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम् *(म.भा.2.227) । `गुग्गुलूः'(अ.4.37.3) । `मधूः'(अ.7.56.2) । `जतूः'(मै.3.14.6) ।
`पतयालूः'(अ.7.115.2) ।।
<संज्ञायाम् ।। 4-1-72 ।।>
कद्रुकमण्डलुशब्दाभ्यां संज्ञायां विषये स्त्रियामूङ् प्रत्ययो भवति । अच्छन्दोऽर्थं वचनम् । कद्रूः । कमण्डलूः ।
संज्ञायामिति किम् ? कद्रुः । कमण्डलुः ।।
<शाङ्गरवाद्यञो ङीन् ।। 4-1-73 ।।>
शार्ङ्गरवादिभ्योऽञन्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीन् प्रत्ययो भवति । शार्ङ्गरवी । कापटवी । अञन्तेभ्यः - बैदी । और्वी ।
जातिग्रहणं चेहानुवर्त्तते । तेन जातिलक्षणो ङीषनेन बाध्यते, न पुंयोगलक्षणः - बैदस्य स्त्री बैदी ।
शार्ङ्गरव, कापटव, गौगुलव, ब्राह्मण, गौतम - एतेऽणन्ताः । कामण्डलेय, ब्राह्मकृतेय, आनिचेय, आनिधेय, आशोकेय - एतेढगन्ताः । वात्स्यायन, मौञ्जायन - एतौ फगन्तौ जातिः । कैकसेयः - ढगन्तः । काव्यशैव्यौ ञ्यङन्तौ । एहि, पर्येहि - कृदिकारान्तौ । आश्मरथ्यः - यञन्तः । औदपानः - उदपानशब्दः शुण्डिकाद्यणन्तः प्रयोजयति । अराल, चण्डाल, वतण्ड - जातिः ।
* भोगवद्गौरिमतोः संज्ञायां घादिषु नित्यं ह्रस्वार्थम् * (ग.सू.56)।
* नृनरयोर्वृद्धिश्च *(ग.सू.57) । अत्र यथायोगं ङीबादिषु प्राप्तेषु ङीन्विधीयते ।।
<यङश्चाप् ।। 4-1-74 ।।>
यङन्तात्प्रातिपदिकात्स्त्रियां चाप् प्रत्ययो भवति । ञ्यङः ष्यङश्च सामान्यग्रहणमेतत् । आम्बष्ठ्या । सौवीर्या । कौसल्या । ष्यङ् - कारिषगन्ध्या । वाराह्या । बालाक्या ।
* षाच्च यञः * (म.भा.2.228)। षात्परो यो यञ् तदन्ताच्चाप् वक्तव्यः । शार्कराक्ष्या । पौतिमाष्या । गौकक्ष्या । उत्तरसूत्रे चकारोऽनुक्तसमुच्चयार्थः, तेन वा भविष्यति ।।
<आवट्याच्च ।। 4-1-75 ।।>
अवटशब्दो गर्गादिः, तस्माद्यञि कृते ङीपि प्राप्ते वचनमेतत् । आवट्याच्च स्त्रियां चाप् प्रत्ययो भवति । आवट्या । प्राचां ष्फ एव, सर्वत्र ग्रहणात् । आवट्यायनी ।
<तद्धिताः ।। 4-1-76 ।।>
अधिकारोऽयम् । आपञ्चमाध्यायपरिसमाप्तेर्यानित ऊर्ध्वमनुक्रमिष्यामस्तद्धितसंज्ञास्ते वेदितव्याः । वक्ष्यति -"यूनस्तिः"(4.1.77/531), युवतिः ।
बहुवचनमनुक्ततद्धितपरिग्रहार्थम् - `पृथिव्या ञाञौ'(4.1.85/1077), `अग्रादिपश्चाड्डिमच्'(4.3.23/1391) इत्येवमादि लब्धं भवति ।
तद्धितप्रदेशआः - "कृत्तद्धितसमासाश्च"(1.2.46/179) इत्येवमादयः ।।
<यूनस्तिः ।। 4-1-77 ।।>
युवन्शब्दात्प्रातिपदिकात्स्त्रियां तिः प्रत्ययो भवति, स च तद्धितसंज्ञो भवति । ङीपोऽपवादः । युवतिः ।।
<अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ।। 4-1-78 ।।>
गोत्रे यावणिञौ विहितावनार्षौ तदन्तयोः प्रातिपदिकयोर्गुरूपोत्तमयोः स्त्रियां ष्यङादेशो भवति । `निर्दिश्यमानस्यादेशा भवन्ति'(व्या.प.106) इत्यणिञोरेव विज्ञायते, न तु समुदायस्य । ङकारः सामान्यग्रहणार्थः । षकारस्तदविघातार्थः -"यङश्चाप्"(4.1.74/528) इति ।
उत्तमशब्दः स्वभावात् त्रिप्रभृतीनामन्त्यमक्षरमाह । उत्तमस्य समीपमुपोत्तमम्, गुरुः उपोत्तमं यस्य तद् गुरूपोत्तमं प्रातिपदिकम् । करीषस्येव गन्धोऽस्य करीषगन्धिः, कुमुदगन्धिः; "तस्यापत्यम्"(4.1.92/1088) इत्यण्, तस्य ष्यङादेशः - कारीषगन्ध्या, कौमुदगन्ध्या । वराहस्यापत्यम्, "अत इञ्"(4.1.95/1095), वाराहिः, तस्य ष्यङादेशः - वाराह्या, बालाक्या ।
अणिञोरिति किम् ? ऋतभागस्यापत्यम्, बिदादित्वादञ्, आर्तभागी । गुरूपोत्तमादिकं सर्वमस्तीति न त्वणिञौ । "टिड्ढाणञ्"(4.1.15/470) इति

ङीबेव भवति ।

अनार्षयोरिति किम् ? वासिष्ठी । वैश्वामित्री । गुरूपोत्तमयोरिति किम् ? औपगवी । कापटवी । गोत्र इति किम् ? "तत्र जातः"(4.3.25/1393), आहिच्छत्री, कान्यकुब्जी ।।

<गोत्रावयवात् ।। 4-1-79 ।।>

`अणिञोः' इत्येव । गोत्रावयवाः - गोत्राभिमताः कुलाख्याः पुणिकभुणिकमुखरप्रभृतयः, ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशो भवति । अगुरूपोत्तमार्थ आरम्भः । पौणिक्या । भौणिक्या । मौखर्या ।

येषां त्वनन्तरापत्येऽपीष्यते - दैवदत्या, याज्ञदत्येति; ते क्रौड्यादिषु द्रष्टव्याः ।

<क्रौड्यादिभ्यश्च ।। 4-1-80 ।।>

`क्रौडि' इत्येवमादिभ्यश्च स्त्रियां ष्यङ् प्रत्ययो भवति । अगुरूपोत्तमार्थ आरम्भः, अनणिञर्थश्च । क्रौड्या । लाड्या ।

क्रौडि । लाडि । व्याडि । आपिशलि । आपक्षिति । चौपयत । चैटयत । शैकयत । बैल्वयत । वैकल्पयत । सौधातकि । * सूत युवत्याम् *(ग.सू.58) । * भोज क्षत्त्रिये * (ग.सू.59)। भौरिकि । भौलिकि । शाल्मकि । शालास्थलि । कापिष्ठलि । गौलक्ष्य । गौकक्ष्य ।।

<दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम् ।। 4-1-81 ।।>

दैवयज्ञि, शौचिवृक्षि, सात्यमुग्रि, काण्ठेविद्धि - इत्येतेषामन्यतरस्यां ष्यङ् प्रत्ययो भवति । इञन्ता एते, गोत्रग्रहणं च नानुवर्तते । तेनोभयत्रविभाषेयम् । गोत्रे पूर्वेण नित्यः ष्यङादेशः प्राप्तो विकल्प्यते, अगोत्रे त्वनन्तरेऽपत्ये पक्षे विधीयते । तेन मुक्ते "इतो मनुष्यजातेः"(4.1.65/520) इति ङीषेव भवति । दैवयज्ञ्या, दैवयज्ञी । शौचिवृक्ष्या, शौचिवृक्षी । सात्यमुग्र्या, सात्यमुग्री । काण्ठेविद्ध्या, काण्ठेविद्धी ।

<समर्थानां प्रथमाद्वा ।। 4-1-82 ।।>

त्रयमप्यधिक्रियते - समर्थानामिति च, प्रथमादिति च, वेति च । स्वार्थिकप्रत्ययावधिश्चायमधिकारः - "प्राग्दिशो विभक्तिः"(5.3.1/1947) इति यावत् । स्वार्थिकेषु ह्यस्योपयोगो नास्ति, विकल्पोऽपि तत्रानवस्थितः । केचिन्नित्यमेव भवन्ति । लक्षणवाक्यानि -"तस्यापत्यम्"(4.1.92/1088), "तेन रक्तं रागात्"(4.2.1/1202), "तत्र भवः" (4.3.53/1428) इत्येवमादीनि भविष्यन्ति । तेषु सामर्थ्ये सति प्रथमनिर्दिष्टादेव विकल्पेन प्रत्ययो भवतीति वेदितव्यम् ।

`समर्थानाम्' इति निर्द्धारणे षष्ठी । समर्थानां मध्ये प्रथमः प्रत्ययप्रकृतित्वेन निर्धार्यते । तस्येति सामान्यं विशेषलक्षणार्थम्, तदीयं प्राथम्यं विशेषाणां विज्ञायते । उपगोरपत्यम् औपगवः ।

समर्थानामिति किम् ? कम्बल उपगोरपत्यं देवदत्तस्य । प्रथमादिति किम् ? षष्ठ्यन्ताद्यथा स्यात्, प्रथमान्तान्मा भूत् ।

वाग्रहणं किम् ? वाक्यमपि हि यथा स्यात् - उपगोरपत्यमिति । यद्येवम्, समासवृत्तिस्तद्धितवृत्त्या बाध्येत - उपग्वपत्यमिति ? नैष दोषः, पूर्वसूत्रादन्यतरस्याङ्ग्रहणमनुवर्तते, तेनैतदपि भविष्यति ।।

<प्राग्दीव्यतेऽण् ।। 4-1-83 ।।>

"तेन दीव्यति"(4.4.2/1550) इति वक्ष्यति । तदेकदेशो दीव्यच्छब्दोऽवधित्वेन गृह्यते, प्राग्दीव्यत्संशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामोऽण्प्रत्ययस्तत्र भवतीति वेदितव्यम् । अधिकारः, परिभाषा, विधिर्वेति त्रिष्वपि दर्शनेष्वपवादविषयं परिहृत्याण् प्रवर्तते । वक्ष्यति -"तस्यापत्यम्"(4.1.92/1088) औपगवः, कापटवः ।

<अश्वपत्यादिभ्यश्च ।। 4-1-84 ।।>

अश्वपत्यादिभ्यः प्रातिपदिकेभ्यः प्राग्दीव्यतीयेष्वर्थेष्वण् प्रत्ययो भवति । पत्युत्तरपदाद् ण्यं वक्ष्यति, तस्यापवादः । आश्वपतम् । शातपतम् । अश्वपति । शतपति । धनपति । गणपति । राष्ट्रपति । कुलपति । गृहपति । धान्यपति । पशुपति । धर्मपति । सभापति । प्राणपति । क्षेत्रपति ।

<दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ।। 4-1-85 ।।>

`प्राग्दीव्यतः' इत्येव । दिति, अदिति, आदित्य इत्येतेभ्यः पत्युत्तरपदाच्च प्रातिपदिकात्प्राग्दीव्यतीयेष्वर्थेषु ण्यः प्रत्ययो भवति । दैत्यः । आदित्यः । आदित्यम् । पत्युत्तरपदात् - प्राजापत्यम् । सैनापत्यम् ।

* यमाच्चेति वक्तव्यम् * । याम्यम् ।

* वाङ्मतिपितृमतां छन्दस्युपसङ्ख्यानम् * (म.भा.2.236)। वाच्यम् । मात्यम् । पैतृमत्यम् ।

* पृथिव्या ञाञौ * (म.भा.2.236)। `पार्थिवा'(ऋ.1.64.3) । `पार्थिवी'(पै.16.46.3) ।

* देवाद्यञञौ * (म.भा.2.236)। दैव्यम् । दैवम् ।

* बहिषष्टिलोपश्च * (म.भा.2.236)। `बाह्यः'(अ.19.44.6) ।

*ईकक्च * (म.भा.2.236)। बाहीकः ।

* ईकञ् छन्दसि *(म.भा.2.236) । बाहीकः । स्वरे विशेषः । टिलोपवचनमव्ययानां भमात्रे टिलोपस्यानित्यत्वज्ञापनार्थम् - आरातीयः ।

* स्थाम्नोऽकारः * (म.भा.2.237)। अश्वत्थामः ।
* लोम्नोपत्ये बहुषु * (म.भा.2.237)। उडुलोमाः । शरलोमाः । बहुष्विति किम् ? औडुलोमिः । शारलोमिः ।
* सर्वत्र गोरजादिप्रत्ययप्रसङ्गे यत् *(म.भा.2.237) । गव्यम् । अजादिप्रत्ययप्रसङ्ग इति किम् ? गोभ्यो हेतुभ्य आगतं गोरूप्यम् । गोमयम् ।
* ण्यादयोऽर्थविशेषलक्षणादपवादात्पूर्वविप्रतिषेधेन *(म.भा.2.237) । दितेरपत्यं दैत्यः । वनस्पतीनां समूहो वानस्पत्यम् ।
कथं दैतेयः ? दितिशब्दात् `कृदिकारादक्तिनः'(ग.सू.50) `सर्वतोऽक्तिन्नर्थादित्येके'(ग.सू.51) इति ङीषं कृत्वा स्त्रीभ्यो ढक् क्रियते ।
लिङ्गविशिष्टपरिभाषा चानित्या ।।

<उत्सादिभ्योऽञ् ।। 4-1-86 ।।>

`प्राग्दीव्यतः' इत्येव । उत्सादिभ्यः प्राग्दीव्यतीयेष्वर्थेष्वञ् प्रत्ययो भवति, अणस्तदपवादानां च बाधकः । औत्सः । औदपानः ।
उत्स । उदपान । विकर । विनोद । महानद । महानस । महाप्राण । तरुण । तलुन । * वष्कयाऽसे *(ग.सू.60) । धेनु । पृथिवी । पङ्क्ति । जगती । त्रिष्टुप् । अनुष्टुप् । जनपद । भरत । उशीनर । ग्रीष्म । पीलु । कुल । * उदस्थानाद् देशे * (ग.सू.61)। * पृषदंशे *(ग.सू.62) । भल्लकीय । रथन्तर । मध्यन्दिन । बृहत् । महत् । * सत्वन्तु * । सच्छब्दो मतुबन्त आगतनुङ्को गृह्यते - सत्वन्त्विति । कुरु । पञ्चाल । इन्द्रावसान । उष्णिक् । ककुप् । सुवर्ण । देव ।
* ग्रीष्मादच्छन्दसीति वक्तव्यम् * (ग.सू.63)। इह मा भूत्--`ग्रैष्मी त्रिष्टुप्'(काठ.सं.16.18) । छन्दश्चेह वृत्तं गृह्यते, न वेदः ।।

<स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ।। 4-1-87 ।।>

"धान्यानां भवने क्षेत्रे खञ्"(5.2.1/1802) इति वक्ष्यति । तस्य `प्राक्' इत्यनेनैव सम्बन्धः । प्राग्भवनसंशब्दनाद्येऽर्थास्तेषु स्त्रीशब्दात्पुंस्शब्दाच्च यथाक्रमं नञ्स्नञौ प्रत्ययौ भवतः । स्त्रीषु भवं स्त्रैणम् । पौंस्नम् । स्त्रीणां समूहः स्त्रैणम् । पौंस्नम् । स्त्रीभ्य आगतं स्त्रैणम् । पौंस्नम् । स्त्रीभ्यो हितं स्त्रैणम् । पौंस्नम् ।
"स्त्रियाः पुंवत्"(6.3.34/831) इति ज्ञापकाद्वत्यर्थे न भवति । योगापेक्षं च ज्ञापकमिति स्त्रीवदित्यपि सिद्धम् ।।

<द्विगोर्लुगनपत्ये ।। 4-1-88 ।।>

`प्राग्दीव्यतः' इति वर्तते, न `भवनात्' इति । `द्विगोः' इति षष्ठी । द्विगोर्यः सम्बन्धी निमित्तत्वेन तद्धितः प्राग्दीव्यतीयोऽपत्यप्रत्ययं वर्जयित्वा तस्य लुग्भवति । पञ्चसु कपालेषु संस्कृतः पञ्चकपालः । दशकपालः । द्वौ वेदावधीते द्विवेदः । त्रिवेदः ।
अनपत्य इति किम् ? द्वैदेवदत्तिः । त्रैदेवदत्तिः ।
प्राग्दीव्यत इत्येव - द्वैपारायणिकः ।
द्विगुनिमित्तविज्ञानादिह न भवति - पञ्चकपालस्येदं पाञ्चकपालम् । अथ वा - द्विगोरेवायं लुग्विधीयते, `द्विगोः' इति स्थानषष्ठी ।
ननु च प्रत्ययादर्शनस्यैषा संज्ञा ? सत्यमेतत्;उपचारेण तु लक्षणया दिगुनिमित्तभूतः प्रत्यय एव द्विगुस्तस्य लुग्भवति । द्विगुनिमित्तकोऽपि तर्हि गुणकल्पनया कस्मान्न द्विगुरुच्यते - पाञ्चकपालमिति ? न तस्य द्विगुत्वं निमित्तम्, इतरस्तु द्विगुत्वस्यैव निमित्तमित्यस्ति विशेषः ।
यद्येवम्, इह कथं पञ्चकपाल्यां संस्कृतः पञ्चकपाल इति ? नैवात्र तद्धित उत्पद्यते, वाक्यमेव भवति । त्रैशब्द्यं हि साध्यम् - पञ्चसु कपालेषु संस्कृतः, पञ्चकपाल्यां संस्कृतः, पञ्चकपाल इति; तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः, अपरस्मादुत्पत्तिर्भविष्यति ।
अथेह कस्मान्न भवति - पञ्चभ्यो गर्गेभ्य आगतं पञ्चगर्गरूप्यम्, पञ्चगर्गमयमिति ? वेत्यनुवर्तते, सा च व्यवस्थितविभाषा विज्ञायते ।

<गोत्रेऽलुगचि ।। 4-1-89 ।।>

`प्राग्दीव्यतः' इत्येव । "यस्कादिभ्यो गोत्रे"(2.4.63/1146) इत्यादिना येषां गोत्रप्रत्ययानां लुगुक्तस्तेषामजादौ प्राग्दीव्यतीये विषयभूते प्रतिषिद्ध्यते । गर्गाणां छात्त्रा गार्गीयाः । वात्सीयाः । आत्रेयीयाः । खारपायणीयाः ।
गोत्र इति किम् ? कौबलम् । बादरम् । अचीति किम् ? गर्गेभ्य आगतं गर्गरूप्यम् । गर्गमयम् । प्राग्दीव्यत इत्येव - गर्गेभ्यो हितं गार्गीयम् ।
गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक् बिदानामपत्यं युवा युवानौ - बैदः,बैदौ । बैदशब्दात् "अत इञ्"(4.1.95/1095) कृते तस्य च इञः "ण्यक्षत्त्रियार्षञितो यूनि लुगणिञोः"(2.4.58/1276) इति लुकि रूपम् ।
एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि - बैदस्य बैदयोर्वाऽपत्यं बहवो माणवका बिदाः, न ह्यत्राञ् बहुषूत्पन्नः ।।

<यूनि लुक् ।। 4-1-90 ।।>

`प्राग्दीव्यतः' इति वर्तते, `अचि' इति च । प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षिते बुद्धिस्थेऽनुत्पन्न एव युवप्रत्ययस्य लुग्भवति । तस्मिन्निवृत्ते सति यो यतः प्राप्नोति स ततो भवति । फाण्टाहृतस्यापत्यं फाण्टाहृतिः, तस्यापत्यं युवा, "फाण्टाहृतिमिमताभ्यां णफिञौ"(4.1.150/1174), फाण्टाहृतः, तस्य छात्त्रा इति विवक्षितेऽर्थे बुद्धिस्थे युवप्रत्ययस्य लुग्भवति, तस्मिन्निवृत्ते इञन्तं प्रकृतिरूपं सम्पन्नम्, तस्मात् "इञश्च"(4.2.112/1333) इत्यण् भवति, फाण्टाहृताः ।
भागवित्तस्यापत्यं भागवित्तिः, तस्यापत्यं युवा "वृद्धाट्ठक्सौवीरेषु बहुलम्"(4.1.148/1172) इति ठक् - भागवित्तिकः, तस्य छात्त्राः - पूर्ववद् युवप्रत्यये

निवृत्ते "इञश्च"(4.2.112/1333) इत्यण् - भागवित्ताः ।

तिकस्यापत्यम् "तिकादिभ्यः फिञ्"(4.1.154/1178) - तैकायनिः, तस्यापत्यं युवा - "फेश्छ च"(4.1.149/1173) इति छः, तैकायनीयः, तस्य छात्त्राः - युवप्रत्यये निवृत्ते "वृद्धाच्छः"(4.2.114/1337) - तैकायनीयाः ।

कपिञ्जलादस्यापत्यं कापिञ्जलादिः, तस्यापत्यं युवा - "कुर्वादिभ्यो ण्यः"(4.1.151/1175) - कापिञ्जलाद्यः । तस्य छात्त्राः - ण्ये निवृत्ते "इञश्च"(4.2.112/1333) इत्यण् - कापिञ्जलादाः ।

ग्लुचुकस्यापत्यम् "प्राचामवृद्धात्फिन्बहुलम्"(4.1.160/1184) इति ग्लुचुकायनिः, तस्यापत्यं युवा -"प्राग्दीव्यतोऽण्"(4.1.83/1073) - ग्लौचुकायनः, तस्य छात्त्राः - युवप्रत्यये निवृत्ते स एवाण् - ग्लौचुकायनाः ।

अचीत्येव - फाण्टाहृतरूप्यम् । फाण्टाहृतमयम् ।

प्राग्दीव्यत इत्येव - भागवित्तिकाय हितं भागवित्तिकीयम् ।।

<फक्फिञोरन्यतरस्याम् ।। 4-1-91 ।।>

`यूनि' इत्येव । पूर्वसूत्रेण नित्ये लुकि प्राप्ते विकल्प उच्यते । फक्फिञोर्युवप्रत्यययोः प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षितेऽन्यतरस्यां लुग्भवति । "गर्गादिभ्यो यञ्"(4.1.105/1107) कृते "यञिञोश्च"(4.1.101/1103) इति फक्, गार्ग्यायणः, तस्य छात्त्राः गार्गीयाः, गार्ग्यायणीयाः । वात्सीयाः, वात्स्यायनीयाः ।

फिञः खल्वपि - यस्कस्यापत्यम्, "शिवादिभ्योऽण्"(4.1.112/1115), यास्कः, तस्यापत्यं युवा - "अणो द्व्यचः"(4.1.156/1180) इति फिञ् - यास्कायनिः । तस्य छात्त्राः यास्कीयाः । यास्कायनीयाः ।।

<तस्यापत्यम् ।। 4-1-92 ।।>

अर्थनिर्देशोऽयम्, पूर्वैरुत्तरैश्च प्रत्ययैरभिसम्बद्ध्यते । `तस्य' इति षष्ठीसमर्थादपत्यमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । प्रकृत्यर्थविशिष्टः षष्ठ्यर्थोऽपत्यमात्रञ्चेह गृह्यते । लिङ्गवचनादिकमन्यत्सर्वमविवक्षितम् । उपगोरपत्यमौपगवः । आश्वपतः । दैत्यः । औत्सः । स्त्रैणः । पौंस्नः ।

`तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत् ।

उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनम्' ।।(म.भा.2.245)

भानोरपत्यं भानवः । श्यामगवः ।।

<एको गोत्रे ।। 4-1-93 ।।>

"अपत्यं पौत्रप्रभृति गोत्रम्"(4.1.162/1089), तस्मिन् विवक्षिते भेदेन प्रत्यपत्यं प्रत्ययोत्पत्तिप्रसङ्गे नियमः क्रियते--गोत्रे एक एव प्रत्ययो भवति, सर्वेऽपत्येन युज्यन्ते । अपतनादपत्यम् । योऽपि व्यवहितेन जनितः, सोऽपि प्रथमप्रकृतेरपत्यं भवत्येव । गर्गस्यापत्यं गार्ग्गिः । गार्गेरपत्यं गार्ग्यः । तत्पुत्त्रोऽपि गार्ग्यः । सर्वस्मिन् व्यवहितजनितेऽपि गोत्रापत्ये गर्गशब्दाद् यञेव भवतीति प्रत्ययो नियम्यते ।

अथ वा - गोत्रापत्ये विवक्षिते एक एव शब्दः प्रथमा प्रकृतिः प्रत्ययमुत्पादयतीति प्रकृतिर्नियम्यते - गार्ग्यः । नाडायनः ।।

<गोत्राद् यून्यस्त्रियाम् ।। 4-1-94 ।।>

अयमपि नियमः । यून्यपत्ये विवक्षिते गोत्रादेव प्रत्ययो भवति, न परमप्रकृत्यनन्तरयुवभ्यः । गार्ग्यस्यापत्यं युवा गार्ग्यायणः । वात्स्यायनः । दाक्षायणः । प्लाक्षायणः । औपगविः । नाडायनिः ।

अस्त्रियामिति किम् ? दाक्षी । प्लाक्षी ।

किं पुनरत्र प्रतिषिद्ध्यते ? यदि नियमः, स्त्रियामनियमः प्राप्नोति ? अथ युवप्रत्ययः, स्त्रियां गोत्रप्रत्ययेनाभिधानं न प्राप्नोति गोत्रसंज्ञाया युवसंज्ञया बाधितत्वात् ? तस्माद्योगविभागः कर्तव्यः - गोत्राद्यूनि प्रत्ययो भवति । ततोऽस्त्रियाम् - यूनि यदुक्तं स्त्रिया तन्न भवति । युवसंज्ञैव प्रतिषिद्ध्यते, तेन स्त्री गोत्रप्रत्ययेनाभिधास्यते ।।

<अत इञ् ।। 4-1-95 ।।>

`तस्यापत्यम्' इत्येव । अकारान्तात्प्रातिपदिकादिञ् प्रत्ययो भवति । अमोऽपवादः । दक्षस्यापत्यं दाक्षिः ।

तपरकरणं किम् ? शुभंयाः, कीलालपाः - इत्यतो मा भूत् ।

कथं `प्रदीयता दाशरथाय मैथिली'(वा.रा.युद्ध.9.22) ? शेषविवक्षया भविष्यति ।।

<बाह्वादिभ्यश्च ।। 4-1-96 ।।>

`बाहु' इत्येवमादिभ्यः शब्देभ्योऽपत्ये इञ्प्रत्ययो भवति । बाहविः । औपबाहविः । अनकारार्थ आरम्भः । क्वचिद्बाधकबाधनार्थः ।

बाहु । उपबाहु । विवाकु । शिवाकु । वटाकु । उपबिन्दु । वृक । चूडाला । मूषिका । बलाका । भगला । छगला । ध्रुवका । धुवका । सुमित्त्रा । दुर्मित्त्रा । पुष्करसत् । अनुहरत् । देवशर्मन् । अग्निशर्मन् । कुनामन् । सुनामन् । पञ्चन् । सप्तन् । अष्टन् । * अमितौजसः सलोपश्च * (ग.सू.64) । उदञ्चु । शिरस् । शराविन् । क्षेमवृद्धिन् । शृङ्खलातोदिन् । खरनादिन् । नगरमर्दिन् । प्राकारमर्दिन् । लोमन् । अजीगर्त्त । कृष्ण ।

सलक । युधिष्ठिर । अर्जुन । साम्ब । गत । प्रद्युम्न । राम । * उदङ्कः संज्ञायाम् *(ग.सू.65) । * सम्भूयोऽम्भसोः सलोपश्च *(ग.सू.66) । * बाह्वादिप्रभृतिषु येषां दर्शनं गोत्रभावे लौकिके ततोऽन्यत्र तेषां प्रतिषेधः * (म.भा.2.252)। बाहुर्नाम कश्चित्तस्यापत्यं बाहवः । * सम्बन्धिशब्दानां च तत्सदृशात्प्रतिषेधः *(म.भा.2.252) । संज्ञा-श्वशुरस्यापत्यं श्वाशुरिः' । चकारोऽनुक्तसमुच्चयार्थः, आकृतिगणतामस्य बोधयति । जाम्बिः । ऐन्द्रशर्मिः । आजधेनविः । आजबन्धविः । औडुलोमिः ।।

<सुधातुरकङ् च ।। 4-1-97 ।।>

सुधातृशब्दादपत्ये इञ्प्रत्ययो भवति, तत्सन्नियोगेन च तस्याकङादेशो भवति । सुधातुरपत्यं सौधातिकिः ।।

* व्यासवरुडनिषादचण्डालबिम्बानामिति वक्तव्यम् *(म.भा.2.253) वैयासकिः । वारुडकिः । नैषादकिः । चाण्डालकिः । बैम्बकिः ।।

<गोत्रे कुञ्जादिभ्यश्च्फञ् ।। 4-1-98 ।।>

`तस्यापत्यम्' इत्येव । गोत्रसंज्ञकेऽपत्ये वाच्ये कुञ्जादिभ्यश्च्फञ् प्रत्ययो भवति । इञोऽपवादः । चकारो विशेषणार्थः, "व्रातच्फञोरस्त्रियमाम्"(5.3.113/1100) इति । ञकारो वृद्ध्यर्थः । कौञ्जायन्यः, कौञ्जायन्यौ, कौञ्जायनाः । ब्राध्नायन्यः, ब्राध्नायन्यौ, ब्राध्नायनाः ।

गोत्र इति किम् ? कुञ्जस्यापत्यमनन्तरं कौञ्जिः । एकवचनद्विवचनयोः सतिशिष्टत्वाद् ञित्स्वरेणैव भवितव्यम् । बहुवचने तु कौञ्जायना इति, परमपि ञित्स्वरं त्यक्त्वा । चित्स्वर एवेष्यते । गोत्राधिकारश्च "शिवादिभ्योऽण्"(4.1.112/1115) इति यावत् ।

कुञ्ज । ब्रध्न । शङ्ख । भस्मन् । गण । लोमन् । शठ । शाक । शाकट । शुण्डा । शुभ । विपाश । स्कन्द । स्तम्भ ।।

<नडादिभ्यः फक् ।। 4-1-99 ।।>

नड इत्येवमादिभ्यः प्रातिपदिकेभ्यो गोत्रापत्ये फक् प्रत्ययो भवति । नाडायनः । चारायणः । गोत्र इत्येव - नाडिः ।

`शलङ्कु शलङ्कं च'(ग.सू.67) इति अत्र पठ्यते - शालङ्कायनः, पैलादिषु च शालङ्किशब्दः पठ्यते - शालङ्किः पिता, शालङ्किः पुत्रः, तत्कथम् ? गोत्रविशेषे कौशिके फकं स्मरन्ति, इञेवान्यत्र - शालङ्किरिति । अथ वा - पैलादिपाठ एव ज्ञापक इञो भावस्य ।

नड । चर । बक । मुञ्च । इतिक । इतिश । उपक । लमक । * शलङ्कु शलङ्कं च * (ग.सू.67)। सप्तल । वाजप्य । तिक । * अग्निशर्मन् वृषगणे * (ग.सू.68)। प्राण । नर । सायक । दास । मित्त्र । द्वीप । पिङ्गर । पिङ्गल । किङ्कर । किङ्कल । कातर । कातल । काश्य । काश्यप । काव्य । अज । अमुष्य । * कृष्णरणौ ब्राह्मणवासिष्ठयोः *(ग.सू.69) । अमित्त्र । लिगु । चित्र । कुमार । * क्रोष्टु क्रोष्टञ्च *(ग.सू.70) । लोह । दुर्ग । स्तम्भ । शिंशपा । अग्र । तृण । शकट । सुमनस् । सुमत । मिमत । ऋक् । जत् । युगन्धर । हंसक । दण्डिन् । हस्तिन् । पञ्चाल । चमसिन् । सुकृत्य । स्थिरक । ब्राह्मण । चटक । बदर । अश्वक । खरप । कामुक । ब्रह्मदत्त । उदुम्बर । शोण । अलोह । दण्ड ।।

<हरितादिभ्योऽञः ।। 4-1-100 ।।>

हरितादिर्बिदाद्यन्तर्गणः । हरितादिभ्योऽञन्तेभ्योऽपत्ये फक् प्रत्ययो भवति । इञोऽपवादः । हरितस्यापत्यं हारितायनः । कैदासायनः ।

ननु च `गोत्रे' इति वर्तते । न च गोत्रादपरो गोत्रप्रत्ययो भवति, "एको गोत्रे"(4.1.93/1093) इति वचनात् ? सत्यमेतत्; इह तु गोत्राधिकारेऽपि सामर्थ्याद्यूनि प्रत्ययो विज्ञायते । गोत्राधिकारस्तूत्तरार्थः ।।

<यञिञोश्च ।। 4-1-101 ।।>

यञन्तादिञन्ताच्च प्रातिपदिकादपत्ये फक्प्रत्ययो भवति । गार्ग्यायणः । वात्स्यायनः । इञन्तात् - दाक्षायणः । प्लाक्षायणः । "द्वीपादनुसमुद्रं यञ्"(4.3.10/1380), "सुतङ्गमादिभ्य इञ्"(4.2.80/1292) इत्यतो न भवति । गोत्रग्रहणेन यञिञौ विशेष्येते । तदन्तात्तु यून्येवायं प्रत्ययः; `गोत्राद्यूनि' इति वचनात् ।।

<शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु ।। 4-1-102 ।।>

`गोत्रे' इत्येव । शरद्वत्, शुनक, दर्भ इत्येतेभ्यो गोत्रापत्ये फक् पत्ययो भवति यथासङ्ख्यं भृगुवत्साग्रायणेष्वर्थेष्वपत्यविशेषेषु । शारद्वतायनो भवति भार्गवश्चेत्, शारद्वतोऽन्यः । शौनकायनो भवति वात्स्यश्चेत्, शौनकोऽन्यः । दार्भायणो भवति आग्रायणश्चेत्, दार्भिरन्यः । शरद्वच्छुनकशब्दौ बिदादी, ताभ्यामञोऽपवादः फक् ।।

<द्रोणपर्वतजीवन्तादन्यतरस्याम् ।। 4-1-103 ।।>

`गोत्रे' इत्येव । द्रोणादिभ्यः प्रातिपदिकेभ्यो गोत्रापत्येऽन्यतरस्यां फक् प्रत्ययो भवति । इञोऽपवादः । द्रौणायनः, द्रौणिः । पार्वतायनः, पार्वतिः । जैवन्तायनः, जैवन्तिः ।

कथमनन्तरोऽश्वत्थामा द्रौणायन इत्युच्यते ? नैवात्र महाभारतद्रोणो गृह्यते, किं तर्हि ? अनादिः, तत इदं गोत्रे प्रत्ययविधानम् । इदानीन्तनात्तु श्रुतिसामान्यादध्यारोपेण तथाभिधानं भवति ।।

<अनृष्यानन्तर्थे बिदादिभ्योऽञ् ।। 4-1-104 ।।>

`गोत्रे' इत्येव । बिदादिभ्यो गोत्रापत्येऽञ्प्रत्ययो भवति । बैदः । और्वः । ये पुनरत्रानृषिशब्दाः पुत्रादयस्तेभ्योऽनन्तरापत्य एव भवति पौत्रः, दौहित्रः ।

`अनृष्यानन्तर्ये' इत्यस्यायमर्थः - अनृषिभ्योऽनन्तरे भवतीति । यद्ययमर्थः, ऋष्यपत्येषु नैरन्तर्यप्रतिषेधो न कृतः स्यात्, तत्रेदं न सिद्ध्यति - `इन्द्रभूः सप्तमः

काश्यपानाम्'(वं.ब्रा.2.24) ? अनन्तरापत्यरूपेणैव ऋष्यणाभिधानं भविष्यति । अवश्यं चैतदेवं विज्ञेयम् । ऋष्यपत्ये नैरन्तर्यविषये प्रतिषेधे विज्ञायमाने कौशिको विश्वामित्र इति दुष्यति ।

गोत्रे इत्येव - बैदिः । ननु च ऋष्यणा भवितव्यम् ? बाह्वादिराकृतिगणः, तेनेञेव भवति ।

बिद । उर्व । कश्यप । कुशिक । भरद्वाज । उपमन्यु । किलालप । किदर्भ । विश्वानर । ऋष्टिषेण । ऋतभाग । हर्यश्व । प्रियक । आपस्तम्ब । कूचवार । शरद्वत् । शुनक । धेनु । गोपवन । शिग्रु । बिन्दु । भाजन । अश्वावतान । श्यामाक । श्यमाक । श्यापर्ण । हरित । किन्दास । वह्यस्क । अकलूष । वध्योष । विष्णुवृद्ध । प्रतिबोध । रथन्तर । रथीतर । गविष्ठिर । निषाद । मठर । मृद । पुनर्भू । पुत्र । दुहितृ । ननान्दृ । * परस्त्री परशुं च *(ग.सू.71) ।।

<गर्गादिभ्यो यञ् ।। 4-1-105 ।।>

`गोत्रे' इत्येव । गर्गादिभ्यो गोत्रापत्ये यञ् प्रत्ययो भवति । गार्ग्यः । वात्स्यः ।

मनुशब्दोऽत्र पठ्यते, तत्र कथम् - मानवी प्रजा ? `गोत्रे' इत्युच्यते अपत्यसामान्ये भविष्यति । कथमनन्तरो रामो जामदग्न्यः, व्यासः पाराशर्य इति ? गोत्ररूपाध्यारोपेण भविष्यति । अनन्तरापत्यविवक्षायां तु ऋष्यणैव भवितव्यम् - जामदग्नः, पाराशर इति ।

गर्ग । वत्स । * वाजाऽसे *(ग.सू.72) । संकृति । अज । व्याघ्रपात् । विदभृत् । प्राचीनयोग । अगस्ति । पुलस्ति । रेभ । अग्निवेश । शङ्ख । शठ । धूम । अवट । चमस । धनञ्जय । मनस । वृक्ष । विश्वावसु । जनमान । लोहित । शंसित । बभ्रु । मण्डु । मक्षु । अलिगु । शङ्कु । लिगु । गुलु । मन्तु । जिगीषु । मनु । तन्तु । मनायी । भूत । कथक । कष । तण्ड । वतण्ड । कपि। कत । कुरुकत । अनडुह् । कण्व । शकल । गोकक्ष । अगस्त्य । कुण्डिन । यज्ञवल्क । उभय । जात । विरोहित । वृषगण । रहूगण । शण्डिल । वण । कचुलुक । मुद्गल । मुसल । पराशर । जतूकर्ण । मन्त्रित। संहित । अश्मरथ । शर्कराक्ष । पूतिमाष । स्थूण । अररक । पिङ्गल । कृष्ण । गोलुन्द । उलूक । तितिक्ष । भिषज् । भडित । भण्डित । दल्भ । चिकित । देवहू । इन्द्रहू । एकलू । पिप्पलू । वृदग्नि । जमदग्नि । सुलोभिन् । उकत्थ । कुटीगु ।

<मधुबभ्र्वोर्ब्राह्मणकौशिकयोः ।। 4-1-106 ।।>

मधुशब्दाद्बभ्रुशब्दाच्च गोत्रापत्ये यञ् प्रत्ययो भवति यथासंख्यं ब्राह्मणे कौशिके च वाच्ये । माधव्यो भवति ब्राह्मणश्चेत्, माधव एवान्यः । बाभ्रव्यो भवति कौशिकश्चेत्, बाभ्रव एवान्यः ।

बभ्रुशब्दो गर्गादिषु पठ्यते, ततः सिद्धे यञि कौशिके नियमार्थं वचनम् । गर्गादिषु पाठोऽप्यन्तर्गणकार्यार्थः - "सर्वत्र लोहितादिकतन्तेभ्यः"(4.1.18/476) इति । ब्राभ्रव्यायणी ।।

<कपिबोधादाङ्गिरसे ।। 4-1-107 ।।>

कपिबोधशब्दाभ्यामाङ्गिरसेऽपत्यविशेषे गोत्रे यञ् प्रत्ययो भवति । काप्यः । बौध्यः ।

आङ्गिरस इति किम् ? कापेयः । बौधिः ।

कपिशब्दो गर्गादिषु पठ्यते, तस्य नियमार्थं वचनम् - आङ्गिरसे यथा स्यात् ।

लोहितादिकार्यार्थश्च गणे पाठः - काप्यायनी ।।

<वतण्डाच्च ।। 4-1-108 ।।>

`आङ्गिरसे' इत्येव । वतण्डशब्दादाङ्गिरसेऽपत्यविशेषे गोत्रे यञ् प्रत्ययो भवति । वातण्ड्यः ।

आङ्गिरस इति किम् ? वातण्डः ।

किमर्थमिदम्, यावता गर्गादिष्वयं पठ्यते ? शिवादिष्वप्ययं पठ्यते । तत्राङ्गिरसे शिवाद्यणोऽपवादार्थं पुनर्वचनम् ।

अनाङ्गिरसे तूभयत्र पाठसामर्थ्यात् प्रत्ययद्वयमपि भवति, वातण्ड्यः, वातण्डः ।।

<लुक् स्त्रियाम् ।। 4-1-109 ।।>

`आङ्गिरसे' इत्येव । वतण्डशब्दादाङ्गिरस्यां स्त्रियां यञ्प्रत्ययस्य लुग्भवति । लुकि कृते शाङ्गरवादिपाठान्ङीन् भवति - वतण्डी ।

आङ्गिरस इति किम् ? वातण्ड्यायनी । शिवाद्यणि तु वातण्डी ।।

<अश्वादिभ्यः फञ् ।। 4-1-110 ।।>

`आङ्गिरसे' इति निवृत्तम् । अश्वादिभ्यो गोत्रापत्ये फञ् प्रत्ययो भवति । आश्वायनः । आश्मायनः । ये त्वत्र प्रत्ययान्ताः पठ्यन्ते, तेभ्यः सामर्थ्याद्यूनि प्रत्ययो विज्ञायते ।

अश्व । अश्मन् । शङ्ख । बिद । पुट । रोहिण । खर्जूर । खर्जूल । पिञ्जूर । भडिल । भण्डिल । भडित । भण्डित । भण्डिक । प्रहृत । रामोद । क्षत्त्र । ग्रीवा । काश । गोलाङ्क्य । अर्क । स्वन । ध्वन । पाद । चक्र । कुल । पवित्र । गोमिन् । शयाम । धूम । धूम्र । वाग्मिन् । विश्वानर । कुट । वेश । * शप आत्त्रेये *(ग.सू.73)। नत्त । तड । नड । ग्रीष्म । अर्ह । विशम्य । विशाला । गिरि । चपल । चुनम । दासक । वैल्य । धर्म । आनडुह्य । पुंसिजात । अर्जुन । शूद्रक । सुममस् । दुर्मनस् । क्षान्त । प्राच्य । कित । काण । चुम्प । श्रविष्ठा । वीक्ष्य । पविन्दा । * आत्त्रेय भारद्वाजे * (ग.सू.74)। कुत्स । आतव । कितव । शिव । खदिर । * भारद्वाज आत्त्रेये * (ग.सू.75)।

<भर्गात्त्रैगर्त्ते ।। 4-1-111 ।।>
भर्गशब्दादपत्ये विशेषे त्रैगर्ते गोत्रे फञ् प्रत्ययो भवति । भार्गायणो भवति त्रैगर्त्तश्चेत् भार्गिरन्यः ।।
<शिवादिभ्योऽण् ।। 4-1-112 ।।>
`गोत्रे' इति निवृत्तम् । अतः प्रभृति सामान्येन प्रत्ययो विज्ञायन्ते । शिवादिभ्योऽपत्येऽण् प्रत्ययो भवति । यथायथमिञादीनामपवादः । शैवः । प्रौष्ठः ।
तक्षन्शब्दोऽत्र पठ्यते कारिलक्षणमुदीचामिञं बाधितुम् । ण्यप्रत्ययस्य तु बाधा नेष्यते । ताक्ष्णः, ताक्षण्यः ।
गङ्गाशब्दः पठ्यते तिकादिफिञा शुभ्रादिढका च समावेशार्थम् । तेन त्रैरूप्यं भवति - गाङ्गः, गाङ्गायनिः, गाङ्गेयः ।
विपाशशब्दः पठ्यते कुञ्जादिलक्षणेन च्फञा समावेशार्थम् । वैपाशः, वैपाशायन्यः ।
शिव । प्रौष्ठ । प्रौष्ठिक । चण्ड । जम्भ । भुरि । सन्धि । मुनि । कुठार। अनभिम्लान । ककुत्स्थ । कहोड । लेख । रोध । खञ्जन । कोहड । पिष्ट । हेहय । खञ्जार । कञ्जाल । सुरोहिका । पर्ण । कहूष । परिल । वतण्ड । तृण । कर्ण । क्षीरह्रद । जलह्रद । परिषिक । जटिलिक । गोफिलिक । बधिरिका । मञ्जीरक । वृष्णिक । रेख । आलेखन । विश्रवण । रवण । वर्त्तनाक्ष । पिटक । पिटाक । तृक्षाक । नभाक । ऊर्णनाभ । जरत्कारु । उत्क्षिपा । रोहितिक । आर्यश्वेत । सुपिष्ट । खर्जूरकर्ण । मसूरकर्ण । तूणकर्ण । मयूरकर्ण । खडरक । तक्षन् । ऋष्टिषेण । गङ्गा । विपाश । यस्क । लह्य । द्रुघ । अयः स्थूण । भलन्दन । विरूपाक्ष । भूमि । इला । सपत्नी । * द्व्यचो नद्याः * (ग.सू.76)। * त्रिवेणी त्रिवणंच * (ग.सू.77)।।
<अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः ।। 4-1-113 ।।>
"वृद्धिर्यस्याचामादिस्तद् वृद्धम्"(1.1.73/1335) । `अवृद्धाभ्यः' इति शब्दधर्मः, `नदीमानुषीभ्यः' इत्यर्थधर्मः, तेनाभेदात्प्रकृतयो निर्दिश्यन्ते ।
`तन्नामिकाभ्यः' इति सर्वनाम्ना प्रत्ययप्रकृतेः परामर्शः । अवृद्धानि यानि नदीनां मानुषीणां च नामधेयानि तेभ्योऽपत्येऽण्प्रत्ययो भवति । ढकोऽपवादः ।
यमुनाया अपत्यं यामुनः । इरावत्या अपत्यम् ऐरावतः । वैतस्तः । नार्मदः ।
मानुषीभ्यः खल्वपि - शिक्षिताया अपत्यं शैक्षितः । चिन्तिताया अपत्यं चैन्तितः ।
अवृद्धाभ्यः किम् ? चान्द्र भाग्याया अपत्यं चान्द्रभागेयः । वासवदत्तेयः । नदीमानुषीभ्य इति किम् ? सौपर्णेयः । वैनतेयः । तन्नामिकाभ्य इति किम् ?
शोभनायाः - शौभनेयः ।।
<ऋष्यन्धकवृष्णिकुरुभ्यश्च ।। 4-1-114 ।।>
ऋषयः प्रसिद्धा वसिष्ठायः । अन्धकाः, वृष्णयः, कुरव इति वंशाख्याः । ऋष्यादिकुर्वन्तेभ्यः प्रातिपदिकेभ्योऽपत्येऽण्प्रत्ययो भवति । इञोऽपवादः ।
अत्र्यादिभ्यस्तु परत्वाड्ढगादिभिरेव भवितव्यम् । ऋषिभ्यस्तावत् - वासिष्ठः । वैश्वामित्रः । अन्धकेभ्यः - श्वाफल्कः । रान्धसः । वृष्णिभ्यः - वासुदेवः ।
आनिरुद्धः । कुरुभ्यः - नाकुलः । साहदेवः ।
कथं पुनर्नित्यानां शब्दानामन्धकादिवंशसमाश्रयणेनान्वाख्यानं युज्यते ? केचिदाहुः - कथमपि काकतालीयन्यायेन कुर्वादिवंशेष्वसङ्करेणैव नकुलसहदेवादयः शब्दास्सुबहवः सङ्कलिताः, तानुपादाय पाणिनिना स्मृतिरुपनिबद्धेति ।
अथ वा - अन्धकवृष्णिकुरुवंशा अपि नित्या एव, तेषु ये शब्दाः प्रयुज्यन्ते - नकुलसहदेवादयः; तत्रेदं प्रत्ययविधानमित्यदोषः ।।
<मातुरुत्सङ्ख्यासम्भद्रपूर्वायाः ।। 4-1-115 ।।>
मातृशब्दात्सङ्ख्यापूर्वात्सम्पूर्वाद्भद्रपूर्वाच्चापत्येऽण् प्रत्ययो भवति, उकारश्चान्तादेशः । द्वयोर्मात्रोरपत्यं द्वैमातुरः । षाण्मातुरः । साम्मातुरः । भाद्रमातुरः ।
उकारादेशार्थं वचनम्, प्रत्ययः पुनरुत्सर्गेणैव सिद्धः । स्त्रीलिङ्गनिर्देशोऽर्थापेक्षः, तेन धान्यमातुर्ग्रहणं न भवति ।
सङ्ख्यासम्भद्रपूर्वाया इति किम् ? सौमात्रः ।
<कन्यायाः कनीन च ।। 4-1-116 ।।>
कन्याशब्दादपत्येऽण्प्रत्ययो भवति । तत्सन्नियोगेन कनीनशब्द आदेशो भवति । ढकोऽपवादः । कन्याया अपत्यं कानीनः कर्णः । कानीनो व्यासः ।।
<विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्त्रिषु ।। 4-1-117 ।।>
विकर्णशुङ्गच्छगलशब्देभ्यो यथासङ्ख्यं वत्सभरद्वाजात्त्रिष्वपत्यविशेषेष्वणप्रत्ययो भवति । वैकर्णो भवति वात्स्यश्चेत्, वैकर्णिरन्यः । शौङ्गो भवति ।
भारद्वाजश्चेत्, शौङ्गिरन्यः । छागलो भवत्यात्त्रेयश्चेत्, छागलिरन्यः ।
शुङ्गाशब्दं स्त्रीलिङ्गमन्ये पठन्ति, ततो ढकं प्रत्युदाहरन्ति--शौङ्गेय इति ।
द्वयमपि चैतत्प्रमाणम्; उभयथा सूत्रप्रणयनात् ।
<पीलाया वा ।। 4-1-118 ।।>
तन्नामिकाणो बाधके `द्व्यचः' इति ढकि प्राप्तेऽण्प्रत्ययः पक्षे विधीयते । पीलाया अपत्ये वाऽण्प्रत्ययो भवति । पीलाया अपत्यं पैलः । पैलेयः ।।
<ढक्च मण्डूकात् ।। 4-1-119 ।।>
मण्डूकशब्दादपत्ये ढक् प्रत्ययो भवति । चकारादण् च वा । तेन त्रैरूप्यं भवति -माण्डूकेयः, माण्डूकः, माण्डूकिः ।।
<स्त्रीभ्यो ढक् ।। 4-1-120 ।।>
इह स्त्रीग्रहणेन टाबादिप्रत्ययान्ताः शब्दा गृह्यन्ते । स्त्रीभ्योऽपत्ये ढक् प्रत्ययो भवति । सौपर्णेयः । वैनतेयः ।

स्त्रीप्रत्ययविज्ञापनादसत्यर्थग्रहणे इह न भवति - इडबिडोऽपत्यम्, दरदोऽपत्यम् - ऐडबिडः, दारद इति ।

* वडवाया वृषे वाच्ये * (म.भा.2.258)। वाडवेयो वृषः स्मृतः । अपत्ये प्राप्तस्ततोऽपकृष्य विधीयते, तेनापत्ये वाडव इति भवति ।

* अण् क्रुञ्चाकोकिलात्स्मृतः * (म.भा.2.258)। क्रुञ्चाया अपत्यं क्रौञ्चः । कौकिलः ।।

<द्व्यचः ।। 4-1-121 ।।>

`स्त्रीभ्यः' इत्येव । द्व्यचः स्त्रीप्रत्ययान्तादपत्ये ढक्प्रत्ययो भवति । तन्नामिकाणोऽपवादः । दत्ताया अपत्यं दात्तेयः । गौपेयः ।

द्व्यच इति किम् ? यामुनः ।।

<इतश्चानिञः ।। 4-1-122 ।।>

स्त्रीग्रहणं निवृत्तम् । चकारः `द्व्यचः' इत्यस्यानुकर्षणार्थः । इकारान्तात्प्रातिपदिकादनिञन्तादपत्ये ढक्प्रत्ययो भवति । आत्त्रेयः । नैधेयः ।

इत इति किम् ? दाक्षिः । प्लाक्षिः । अनिञ इति किम् ? दाक्षायणः । प्लाक्षायणः । द्व्यच इत्येव - मरीचेरपत्यं मारीचः ।।

<शुभ्रादिभ्यश्च ।। 4-1-123 ।।>

`शुभ्र' इत्येवमादिभ्यः प्रातिपदिकेभ्यो ढक् प्रत्ययो भवति । यथायोगमिञादीनामपवादः । शौभ्रेयः । वैष्टपुरेयः । चकारोऽनुक्तसमुच्चयार्थ आकृतिगणतामस्य बोधयति, तेन गाङ्गेयः पाण्डवेय इत्येवमादि सिद्धं भवति ।

शुभ्र । विष्टपुर । ब्रह्मकृत । शतद्वार । शतावर । शलाका । शालाचल । शलाकाभ्रू । लेखाभ्रू । विमातृ । विधवा । किङ्कसा । रोहिणी । रुक्मिणी । दिशा । शालूक । अजवस्ति । शकन्धि । * लक्ष्मणश्यामयोर्वासिष्ठे *(ग.सू.78) । गोधा । कृकलास । अणीव । प्रवाहण । भरत । भारम । मृकण्डु । मघष्टु । मकष्टु । कर्पूर । इतर । अन्यतर । आलीढ । सुदत्त । सुचक्षस् । सुनामन् । कद्रु । तुद । अकशाप । कुरेका । किशोरिका । कुवेणिका । जिह्माशिन् । परिधि । वायुदत्त । ककल । खट्वा । अम्बिका । अशोका । शुद्धपिङ्गला । खण्डोन्मत्ता । अनुदृष्टि । जरतिन् । बलिवर्दिन् । विग्रज । बीज । श्वन् । अश्मन् । अश्व । अजिर ।।

<विकर्णकुषीतकात्काश्यपे ।। 4-1-124 ।।>

विकर्णशब्दात्कुषीतकशब्दाच्च काश्यपेऽपत्यविशेषे ढक् प्रत्ययो भवति । वैकर्णेयः । कौषीतकेयः ।

काश्यप इति किम् ? वैकर्णिः । कौषीतकिः ।।

<भ्रुवो वुक्च ।। 4-1-125 ।।>

भ्रूशब्दादपत्ये ढक् प्रत्ययो भवति, तत्सन्नियोगेन च वुगागमः । भ्रावेयः ।।

<कल्याण्यादीनामिनङ् ।। 4-1-126 ।।>

`कल्याणी' इत्येवमादीनां शब्दानामपत्ये ढक् प्रत्ययो भवति, तत्सन्नियोगेन च इनङादेशः । स्त्रीप्रत्ययान्तानामादेशार्थं ग्रहणम्; प्रत्ययस्य सिद्धत्वात् । अन्येषामुभयार्थम् । काल्याणिनेयः । सौभागिनेयः । दौर्भागिनेयः । "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च"(7.3.19/1133) इत्युभयपदवृद्धिः ।

कल्याणी । सुभगा । दुर्भगा । बन्धकी । अनुदृष्टि । अनुसृष्टि । जरती । बलीवर्दी । ज्येष्ठा । कनिष्ठा । मध्यमा । परस्त्री ।।

<कुलटाया वा ।। 4-1-127 ।।>

कुलान्यटतीति कुलटा; पररूपं निपातनात् । कुलटाया अपत्ये ढक् प्रत्ययो भवति, तत्सन्नियोगेन च वा इनङादेशो भवति । आदेशार्थं वचनम्, प्रत्ययः पूर्वेणैव सिद्धः । कौलटिनेयः, कौलटेयः ।

या तु कुलान्यटन्ती शीलं भिनत्ति, ततः "क्षुद्राभ्यो वा"(4.1.131/1137) इति परत्वाड् ढ्रका भवितव्यम् - कौलटेरः ।।

<चटकाया ऐरक् ।। 4-1-128 ।।>

चटकाया अपत्ये ऐरक् प्रत्ययो भवति । चाटकैरः ।

* चटकाच्चेति वक्तव्यम् * (म.भा.2.258)। चटकस्यापत्यं चाटकैरः ।

* स्त्रियामपत्ये लुग्वक्तव्यः * (म.भा.2.258)। चटकाया अपत्यं स्त्री चटका ।।

<गोधाया ढ्रक् ।। 4-1-129 ।।>

गोधाया अपत्ये ढ्रक् प्रत्ययो भवति । गौधेरः । शुभ्रादिष्वयं पठ्यते, तेन गौधेयः इत्यपि भवति ।।

<आरगुदीचाम् ।। 4-1-130 ।।>

गोधाया अपत्ये उदीचामाचार्याणां मतेन आरक् प्रत्ययो भवति । गौधारः ।

आचार्यग्रहणं पूजार्थम्, वचनसामर्थ्यादेव पूर्वेण समावेशो भविष्यति । आरग्वचनमनर्थकम्, रका सिद्धत्वात् ? ज्ञापकं त्वयम् - अन्येभ्योऽपि भवतीति । जाडारः । पाण्डारः ।।

<क्षुद्राभ्यो वा ।। 4-1-131 ।।>

ढ्रगनुवर्तते, न आरक् । क्षुद्राः = अङ्गहीनाः; शीलहीनाश्च । अर्थधर्मेण तदभिधायिन्यः स्त्रीलिङ्गाः प्रकृतयो निर्दिश्यन्ते । क्षुद्राभ्यो वापऽत्ये ढ्रक् प्रत्ययो भवति । ढकोऽपवादः । काणेरः, काणेयः । दासेरः, दासेयः ।।

<पितृष्वसुश्छण् ।। 4-1-132 ।।>
पितृष्वसृशब्दादपत्ये छण्प्रत्ययो भवति । अणोऽपवादः । पैतृष्वस्रीयः ।।
<ढकि लोपः ।। 4-1-133 ।।>
पितृष्वसुरपत्यप्रत्यये ढकि परतो लोपो भवति । पैतृष्वसेयः ।
कथं पुनरिह ढक् प्रत्ययः ? एतदेव ज्ञापकं ढको भावस्य ।।
<मातृष्वसुश्च ।। 4-1-134 ।।>
`पितृष्वसुः' इत्येतदपेक्षते, पितृष्वसुर्यदुक्तं तन्मातृष्वसुरपि भवति - छण्प्रत्ययो ढकि लोपश्च । मातृष्वसेयः ।।
<चतुष्पाद्भ्यो ढञ् ।। 4-1-135 ।।>
चतुष्पादभिधायिनीभ्यः प्रकृतिभ्योऽपत्ये ढञ्प्रत्ययो भवति । अणादीनामपवादः । कामण्डलेयः । शौन्तिबाहेयः । जाम्बेयः ।।
<गृष्ट्यादिभ्यश्च ।। 4-1-136 ।।>
गृष्ट्यादिभ्यः शब्देभ्योऽपत्ये ढञ्प्रत्ययो भवति । अणादीनामपवादः । गार्ष्टेयः । हार्ष्टेयः ।
गृष्टिशब्दो यश्चतुष्पाद्वचनस्ततः पूर्वेणैव सिद्धः, अचतुष्पादर्थं वचनम् ।
गृष्टि । हृष्टि । हलि । बलि । विश्रि । कुद्रि । अजबस्ति । मित्त्रयु ।।
<राजश्वशुराद्यत् ।। 4-1-137 ।।>
राजन्-श्वशुरशब्दाभ्यामपत्ये यत्प्रत्ययो भवति । यथाक्रममणिञोरपवादः । राजन्यः । श्वशुर्यः ।
* राज्ञोऽपत्ये जातिग्रहणम् *(म.भा.2.259) । राजन्यो भवति, क्षत्त्रियश्चेत् । राजनोऽन्यः ।।
<क्षत्त्राद्घः ।। 4-1-138 ।।>
क्षत्त्रशब्दादपत्ये घः प्रत्ययो भवति । क्षत्त्रियः । अयमपि जातिशब्द एव । क्षात्त्रिरन्यः ।।
<कुलात्खः ।। 4-1-139 ।।>
उत्तरसूत्रे पूर्वपदप्रतिषेधादिह तदन्तः केवलश्च दृश्यते । कुलशब्दान्तात्प्रातिपदिकात्केवलाच्चापत्ये खः प्रत्ययो भवति । आढ्यकुलीनः । श्रोत्रियकुलीनः । कुलीनः ।।
<अपूर्वपदादन्यतरस्यां यड्ढकञौ ।। 4-1-140 ।।>
`कुलात्' इत्येव । अविद्यमानं पूर्वपदं यस्य तदपूर्वपदम्, समाससम्बन्धिपूर्वपदस्याभावेन कुलशब्दो विशेष्यते । अपूर्वपदात्कुलशब्दादन्यतरस्यां यत्, ढकञ् इत्येतौ प्रत्ययौ भवतः । ताभ्यां मुक्ते खोऽपि भवति । कुल्यः, कौलेयकः, कुलीनः ।
पदग्रहणं किम् ? बहुच्पूर्वादपि यथा स्यात् । बहुकुल्यः । बाहुकुलेयकः । बहुकुलीनः ।।
<महाकुलादञ्खञौ ।। 4-1-141 ।।>
`अन्यतरस्याम्' इत्यनुवर्त्तते । महाकुलशब्दादञ्खञौ प्रत्ययौ भवतः, पक्षे खः । माहाकुलः, माहाकुलीनः, महाकुलीनः ।।
<दुष्कुलाड्ढक् ।। 4-1-142 ।।>
दुष्कुलशब्दादपत्ये ढक् प्रत्ययो भवति । `अन्यतरस्याम्' इत्यनुवृत्तेः खश्च । दौष्कुलेयः, दुष्कुलीनः ।।
<स्वसुश्छः ।। 4-1-143 ।।>
स्वसृशब्दादपत्ये छः प्रत्ययो भवति । अणोऽपवादः । स्वसुरपत्यं स्वस्रीयः ।।
<भ्रातुर्व्यच्च ।। 4-1-144 ।।>
भ्रातृशब्दादपत्ये व्यत् प्रत्ययो भवति । चकाराच्छश्च । अणोऽपवादः । भ्रातृव्यः । भ्रात्रीयः । तकारः स्वरार्थः ।।
<व्यन्सपत्ने ।। 4-1-145 ।।>
सपत्नशब्दः शत्त्रुपर्यायः शब्दान्तरव्युत्पन्नमेव । सपत्नीशब्दादपरेऽकारम् इवार्थे निपातयन्ति । सपत्नीव सपत्नः । भ्रातृशब्दाद् व्यन्प्रत्ययो भवति समुदायेन चेदमित्त्रः सपत्न उच्यते । अपत्यार्थोऽत्र नास्त्येव - पाप्मना भ्रातृव्येण । भ्रातृव्यः कण्टकः ।।
<रेवत्यादिभ्यष्ठक् ।। 4-1-146 ।।>
रेवतीत्येवमादिभ्योऽपत्ये ठक् प्रत्ययो भवति । यथायोगं ढगादीनामपवादः । रैवतिकः । आश्वपालिकः ।
रेवती । अश्वपाली । मणिपाली । द्वारपाली । वृकवञ्चिन् । वृकग्राह । कर्णग्राह । दण्डग्राह । कुक्कुटाक्ष ।।
<गोत्रस्त्रियाः कुत्सने ण च ।। 4-1-147 ।।>
`अपत्यं पौत्रप्रभृति गोत्रम्' गृह्यते । गोत्रं या स्त्री तदभिधायिनः शब्दादपत्ये णः प्रत्ययो भवति, चकाराट्ठक्च, कुत्सने गम्यमाने । पितुरसंविज्ञाने मात्रा व्यपदेशोऽपत्यस्य कुत्सा । गार्ग्या अपत्यं गार्गोजाल्मः, गार्गिकः । ग्लुचुकायन्या अपत्यं ग्लौचुकायनः, ग्लौचुकायनिकः । `गोत्राद्यूनि' इति यूनि प्रत्ययो भवति ।
गोत्रमिति किम् ? कारिकेयो जाल्मः । स्त्रिया इति किम् ? औपगविर्जाल्मः । कुत्सन इति किम् ? गार्गेयो माणवकः ।।

<वृद्धाट्ठक्सौवीरेषु बहुलम् ।। 4-1-148 ।।>

`कुत्सने' इत्येव । `सौवीरेषु' इति प्रकृतिविशेषणम् । वृद्धात् सौवीरगोत्रादपत्ये बहुलं ठक्प्रत्ययो भवति, कुत्सने गम्यमाने । भागवित्तेर्भागवित्तिकः । तार्णबन्दवस्य तार्णबिन्दविकः । पक्षे यथाप्राप्तं फक् - भागवित्तायनः । पक्षे - तार्णबिन्दविः । अकशापः शुभ्रादिः - आकशापेयः, तस्यापत्यमाकशापेयिकः । पक्षे - आकशापेयिः ।

भागपूर्वपदो वित्तिर्द्वितीयस्तार्णबिन्दवः ।
तृतीयस्त्वाकशापेयो गोत्राट्ठग्बहुलं ततः ।।

वृद्धग्रहणं स्त्रीनिवृत्त्यर्थम् ।

सौवीरेष्विति किम् ? औपगविर्जाल्मः । `कुत्सने' इत्येव - भागवित्तायनो माणवकः ।

बहुलग्रहणमुपाधिवैचित्र्यार्थम् । `गोत्रस्त्रियाः' इत्यारभ्य चत्वारो योगाः - तेषु प्रथमः कुत्सन एव, अन्त्यः सौवीरगोत्रे एव, मध्यमौ द्वयोरपि । तदेतद्बहुलग्रहणाल्लभ्यते ।।

<फेश्छ च ।। 4-1-149 ।।>

`कुत्सने' इत्येव, `सौवीरेषु' इति च । `फेः' इति फिञो ग्रहणम्, न फिनः; वृद्धाधिकारात् । फिञन्तात्प्रातिपदिकात्सौवीरगोत्रादपत्ये छः प्रत्ययो भवति, चकाराट्ठक् कुत्सने गम्यमाने । यमुन्दस्यापत्यम् - "तिकादिभ्यः फिञ्"(4.1.154/1178), तस्यापत्यं यामुन्दायनीयः । यामुन्दायनिकः । कुत्सन इत्येव - यामुन्दायनिः । फिञन्तादौत्सर्गिकस्याण आगतस्य "ण्यक्षत्त्रियार्षञितो यूनिलुगणिञोः"(2.4.58/1276) इति लुक् । सौवीरेष्वित्येव - तैकायनिः ।

यमुन्दश्च सुयामा च वार्ष्यायणिः फिञः स्मृताः ।
सौवीरेषु च कुत्सायां द्वौ योगौ शब्दवित् स्मरेत् ।।

<फाण्टाहृतिमिमताभ्यां णफिञौ ।। 4-1-150 ।।>

सौवीरेषु, इत्येव । `कुत्सने' इति निवृत्तम् । `फाण्टहृति' `मिमत' शब्दाभ्यां सौवीरविषयाभ्यामपत्ये णफिञौ प्रत्ययौ भवतः । फकोऽपवादः । अल्पाच्तरस्यापूर्वनिपातो लक्षणव्यभिचारचिह्नम्, तेन यथासङ्ख्यमिह न भवतीति । फाण्टाहृतः, फाण्टाहृतायनिः (म.भा.2.261)। मैमतः, मैमतायनिः । सौवीरेष्वित्येव - फाण्टाहृतायनः । मैमतायनः । फाण्टाहृतेः "यञिञोश्च"(4.1.101/1103) इति फक् । मिमतशब्दोऽपि नडादिषु पठ्यते ।

<कुर्वादिभ्यो ण्यः ।। 4-1-151 ।।>

`सौवीरेषु' `बहुलम्' इति च निवृत्तम् । `कुरु' इत्येवमादिभ्यः शब्देभ्योऽपत्ये ण्यः प्रत्ययो भवति । कौरव्यः । गार्ग्यः । "कुरुनादिभ्यो ण्यः"(4.1.172/1190) इति कुरुशब्दादपरो ण्यप्रत्ययो भविष्यति । स तु क्षत्त्रियात्तद्राजसंज्ञकः, तस्य बहुषु लुका भवितव्यम्; अयं तु श्रूयत एव - कौरव्याः । कौरव्यशब्दस्य क्षत्त्रियवचनस्य तिकादिषु पाठात्फिञपि भवति । कौरव्यायणिः । रथकारशब्दोऽत्र पठ्यते, स जातिवचनः । त्रैवर्णिकेभ्यः किञ्चिन्न्यूना रथकारजातिः । कारिणस्तु रथकारशब्दादुत्तरसूत्रेणैव ण्यः सिद्धः । केशिनीशब्दः पठ्यते, तस्य कैशिन्यः । पुंवद्भावो न भवति; स्त्रीप्रत्ययनिर्देशसामर्थ्यात् ।

`वेनाच्छन्दसि'(ग.सू.80) इति पठ्यते, कथं भाषायां वैन्यो राजेति ? छान्दस एवायं प्रमादात्कविभिः प्रयुक्तः ।

वामरथशब्दः पठ्यते, तस्य कण्वादिवत्कार्यमिष्यते स्वरं वर्जयित्वा, लुगादिकमतिदिश्यते । बहुषु - वामरथाः । स्त्री - वामरथी । वामरथ्यायनी । युवा - वामरथ्यायनः । वामरथ्यस्य छात्त्रा वामरथाः । वामरथानि सङ्घाङ्कलक्षणानि । स्वरस्तु ण्यप्रत्ययस्यैव भवति, नातिदेशिकमाद्युदात्तत्वम् ।

कुरु । गर्ग । मङ्गुष । अजमारक । रथकार । वावदूक । * सम्राजः क्षत्त्रिये * (ग.सू.79)। कवि । मति । वाक् । पितृमत् । इन्द्रजालि । दामोष्णीषि । गणकारि । कैशोरि । कापिञ्जलादि । कुट । शलाका । मुर । परक । अभ्र । दर्भ । केशिनी । * वेनाच्छन्दसि * (ग.सू.80)। शूर्पणाय । श्यावनाय । श्यावरथ । श्यावपुत्र । सत्यङ्कार । वडभीकार । शङ्कु । शाक । पथिकारिन् । मूढ । शकन्धु । कर्तृ । हर्तृ । शाकिन् । इनपिण्डी ।। वामरथस्य कण्वादिवत्स्वरवर्जम् ।।

<सेनान्तलक्षणकारिभ्यश्च ।। 4-1-152 ।।>

सेनान्तात्प्रातिपदिकाल्लक्षणशब्दात्कारिवचनेभ्यश्चापत्ये ण्यः प्रत्ययो भवति । कारिशब्दः कारूणां तन्तुवायादीनां वाचकः । कारिषेण्यः । हारिषेण्यः । लाक्षण्यः । कारिभ्यः - तान्तुवाय्यः । कौम्भकार्यः । नापित्यः ।।

<उदीचामिञ् ।। 4-1-153 ।।>

ण्ये प्राप्ते इञपरो विधीयते । सेनान्तलक्षणकारिभ्योऽपत्ये इञ् प्रत्ययो भवति उदीचां मतेन । कारिषेणिः । हारिषेणिः । लाक्षणिः । तान्तुवायिः । कौम्भकारिः ।

वचनसामर्थ्यादेव प्रत्ययसमावेशे लब्धे आचार्यग्रहणं वैचित्र्यार्थम् । तक्षन्शब्दः शिवादिः, तेनाणायमिञ् बाध्यते, न तु ण्यः । तक्ष्णोऽपत्यं ताक्ष्णः । ताक्षण्यः ।।

<तिकादिभ्यः फिञ् ।। 4-1-154 ।।>

`तिक' इत्येवमादिभ्यः शब्देभ्योऽपत्ये फिञ् प्रत्ययो भवति । तैकायनिः । कैतवायनिः । वृषशब्दोऽत्र पठ्यते, तस्य प्रत्ययसन्नियोगेन यकारान्तत्वमिष्यते ।

वार्ष्यायणिः । कौरव्यशब्दः पठ्यते, स च क्षत्त्रियवचनः; औरसशब्देन क्षत्त्रियप्रत्ययान्ते साहचर्यात् ।

यस्तु "कुर्वादिभ्यो ण्यः"(4.1.151/1175), तदन्ताद् इञैव भवितव्यम्; तथा च "ण्यक्षत्त्रियार्षञितो यूनिलुगणिञोः"(2.4.58/1276) इत्यत्रोदाहृतम् - कौरव्यः पिता, कौरव्यः पुत्र इति ।

तिक । कितव । संज्ञा । बाल। शिखा । उरस् । शाट्य । सैन्धव । यमुन्द । रूप्य । ग्राम्य । नील । अमित्र । गौकक्ष्य । करु । देवरथ । तैतिल । औरस । कौरव्य । भौरिकि । भौलिकि । चौपयत । चैटयत । शैकयत । क्षैतयत । ध्वाजवत । चन्द्रमस् । शुभ । गङ्गा । वरेण्य । सुयामन् । आरद । वह्यका । खल्या । वृष । लोमका । उदन्य । यज्ञ ।

<कौशल्यकार्मार्याभ्यां च ।। 4-1-155 ।।>

कौशल्यकार्मार्यशब्दाभ्यामपत्ये फिञ् प्रत्ययो भवति । इञोऽपवादः । कौशल्यायनिः । कार्मार्यायणिः ।

परमप्रकृतेरेवायं प्रत्यय इष्यते - कोसलस्यापत्यम्, कर्मारस्यापत्यमिति ।

प्रत्ययसन्नियोगेन तु प्रकृतिरूपं निपात्यते । तथा च स्मृत्यन्तरम् - `दगुकोसलकर्मारच्छागवृषाणां युङ् वादिष्टस्य'(म.भा.2.263) इति । दागव्यायनिः । कौसल्यायनिः । कार्मार्यायणिः । छाग्यायनिः । वार्ष्यायणिः ।।

<अणो द्व्यचः ।। 4-1-156 ।।>

अणन्ताद् द्व्यचः प्रातिपदिकादपत्ये फिञ् प्रत्ययो भवति । इञोऽपवादः । कार्त्रायणिः । हार्त्रायणिः ।

अण इति किम् ? दाक्षायणः । द्व्यच इति किम् ? औपगविः ।

* त्यदादीनां वा फिञ् वक्तव्यः * । त्यादायनिः, त्यादः । यादायनिः, यादः । तादायनिः, तादः । अणत्र प्राप्तः ।।

<उदीचां वृद्धादगोत्रात् ।। 4-1-157 ।।>

वृद्धं यच्छब्दरूपमगोत्रं तस्मादपत्ये फिञ्प्रत्ययो भवति । उदीचामाचार्याणां मतेन । आम्रगुप्तायनिः । ग्रामरक्षायणिः ।
कारिशब्दादपि वृद्धादगोत्रात्परत्वादनेनैव भवितव्यम् । नापितायनिः ।

उदीचामिति किम् ? आम्रगुप्तिः । वृद्धादिति किम् ? याज्ञदत्तिः । अगोत्रादिति किम् ? औपगविः ।।

<वाकिनादीनां कुक्च ।। 4-1-158 ।।>

`वाकिन' इत्येवमादिभ्यः शब्देभ्योऽपत्ये फिञ् प्रत्ययो भवति, तत्सन्नियोगेन चैषां कुगागमः । यदिह वृद्धमगोत्रं शब्दरूपं तस्यागमार्थमेव ग्रहणम्, अन्येषामुभयार्थम् । वाकिनकायनिः । गारेधकायनिः ।

इञाद्यपवादो योगः । `उदीचाम्' इत्यधिकारात्पक्षे तेऽपि भवन्ति । वाकिनिः । गारेधिः ।

वाकिन । गारेध । कार्कट्य । काक । लङ्का । * चर्मिवर्मिणोर्नलोपश्च *(ग.सू.81) ।।

<पुत्रान्तादन्यतरस्याम् ।। 4-1-159 ।।>

`उदीचां वृद्धात्' इति वर्त्तते । पुत्रान्तमगोत्रमिति पूर्वेणैव प्रत्ययः सिद्धः, तस्मिन्ननेन कुगागमोऽन्यतरस्यां विधीयते । पुत्रान्तात् प्रातिपदिकाद्यः फिञ्प्रत्ययस्तस्मिन् परभूतेऽन्यतरस्यां कुगागमो भवति पुत्रान्तस्य । तेन त्रैरूप्यं सम्पद्यते - गार्गीपुत्रकायणिः, गार्गीपुत्रायणिः, गार्गीपुत्रिः । वात्सीपुत्रकायणिः, वात्सीपुत्रायणिः, वात्सीपुत्रिः ।।

<प्राचामवृद्धात्फिन्बहुलम् ।। 4-1-160 ।।>

अवृद्धाच्छब्दरूपादपत्ये फिन् प्रत्ययो भवति बहुलं प्राचां मतेन । ग्लुचुकायनिः । अहिचुम्बकायनिः ।

प्राचामिति किम् ? ग्लौचुकिः । अवृद्धादिति किम् ? राजदन्तिः ।

उदीचाम्, प्राचाम्, अन्यतरस्याम्, बहुलमिति सर्व एते विकल्पार्थाः, तेषामेकेनैव सिद्ध्यति ? तत्राचार्यग्रहणं पूजार्थम् । बहुलग्रहणं वैचित्र्यार्थम्, क्वचिन्न भवत्येव - दाक्षिः । प्लाक्षिः ।।

<मनोर्जातावञ्यतौ षुक्च ।। 4-1-161 ।।>

मनुशब्दादञ्, यत् - इत्येतौ प्रत्ययौ भवतः, तत्सन्नियोगेन षुगागमः, समुदायेन चेज्जातिर्गम्यते । मानुषः, मनुष्यः। जातिशब्दावेतौ ।

अपत्यार्थोऽत्र नास्त्येव, तथा च मानुषा इति बहुषु न लुग्भवति । अपत्यविवक्षायां त्वणैव भवतिव्यम् - मानवी प्रजा ।

`अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः ।

नकारस्य च मूर्द्धन्यस्तेन सिद्ध्यति माणवः' ।।(म.भा.2.264)

<अपत्यं पौत्रप्रभृति गोत्रम् ।। 4-1-162 ।।>

पौत्रप्रभृति यदपत्यं तद् गोत्रसंज्ञं भवति । सम्बन्धिशब्दत्वादपत्यशब्दस्य यदपत्यं तदपेक्षया पौत्रप्रभृतेर्गोत्रसंज्ञा विधीयते । गर्गस्यापत्यं पौत्रप्रभृति गार्ग्यः । वात्स्यः । अपत्यमिति व्यपदेशोऽयं पौत्रप्रभृतेः ।

पौत्रप्रभृतीति किम् ? अन्यस्य मा भूत् । कौञ्जिः । गार्गिः ।

गोत्रप्रदेशाः - "एको गोत्रे"(4.1.93/1093) इत्येवमादयः ।।

<जीवति तु वंश्ये युवा ।। 4-1-163 ।।>
अभिजनप्रबन्धः = वंशः । तत्र भवो वंश्यः पित्रादिः, तस्मिन् जीवति सति पौत्रप्रभृत्यपत्यं युवसंज्ञं भवति । पौत्रप्रभृतीति च न सामानाधिकरण्येनापत्यं विशेषयति, किं तर्हि ? षष्ठ्या विपरिणम्यते - पौत्रप्रभृतेर्यदपत्यमिति । तेन चतुर्थादारभ्य युवसंज्ञा विधीयते । गार्ग्याणः । वात्स्यायनः ।
तुशब्दोऽवधारणार्थः - युवैव भवति, न गोत्रमिति ।।
<भ्रातरि च ज्यायसि ।। 4-1-164 ।।>
भ्रातरि ज्यायसि जीवति कनीयान् भ्राता युवसंज्ञो भवति पौत्रप्रभृतेरपत्यम् । गार्ग्यस्य द्वौ पुत्रौ, तयोः कनीयान् मृते पित्रादौ वंश्ये भ्रातरि ज्यायसि जीवति युवसंज्ञो भवति । अवंश्यार्थोऽयमारम्भः । पूर्वजाः पित्रादयः `वंश्याः' इत्युच्यन्ते । भ्राता तु न वंश्यः; अकारणत्वात् । गार्ग्ये जीवति गार्ग्यायणोऽस्य कनीयान्भ्राता । वात्स्यायनः । दाक्षायणः । प्लाक्षायणः ।।
<वान्यस्मिन् सपिण्डे स्थविरतरे जीवति ।। 4-1-165 ।।>
सप्तमपुरुषावधयः सपिण्डाः स्मर्यन्ते । येषाम् --
`उभयत्र दशाहानि कुलस्यान्नं न भुज्यते'।
इत्येवमादिकायां क्रियायामनधिकारः । भ्रातुरन्यस्मिन्सपिण्डे स्थविरतरे जीवति पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञं वा भवति । प्रकृतं जीवतिग्रहणं सपिण्डस्य विशेषणम्, इदं तु संज्ञितः । तरब्निर्देश उभयोरुत्कर्षार्थः । स्थानेन वयसा चोत्कृष्टे सपिण्डे यथा स्यात्, पितृव्ये पितामहे भ्रातरि च वयसाधिके जीवति । गर्गस्यापत्यं गार्ग्यायणः, गार्ग्यो वा । वात्स्यायनः, वात्स्यो वा । दाक्षायणः, दाक्षिर्वा ।
स्थविरेति किम् ? स्थानवयोन्यूने गार्ग्य एव भवति । जीवतीति किम् ? मृते मृतो वा गार्ग्य एव भवति ।।
<वृद्धस्य च पूजायाम् ।। 4-1-166 ।।>
अपत्यमन्तर्हितं वृद्धमिति शास्त्रान्तरे परिभाषणाद् गोत्रं वृद्धमित्युच्यते । वृद्धस्य युवसंज्ञा वा भवति पूजायां गम्यमानायाम् । संज्ञासामर्थ्याद् गोत्रं युवप्रत्ययेन पुनरुच्यते । `वृद्धस्य' इति षष्ठीनिर्देशः, विचित्रा सूत्रस्य कृतिरिति । तत्र भवान् गार्ग्यायणः, गार्ग्यो वा । तत्र भवान् वात्स्यायनः, वात्स्यो वा । तत्र भवान् दाक्षायणः, दाक्षिर्वा ।
पूजायामिति किम् ? गार्ग्यः । वात्स्यः ।।
<यूनश्च कुत्सायाम् ।। 4-1-167 ।।>
कुत्सायां गम्यमानायां यूनो वा युवसंज्ञा भवति । निवृत्तिप्रधानो विकल्पः, युवसंज्ञायां प्रतिषिद्धायां पक्षे गोत्रसंज्ञैव भवति; प्रतिपक्षाभावात् । गार्ग्यो जाल्मः, गार्ग्यायणो वा । वात्स्यो जाल्मः, बात्स्यायनो वा । दाक्षिर्जाल्मः, दाक्षायणो वा ।
कुत्सायामिति किम् ? गार्ग्यायणः ।।
<जनपदशब्दात्क्षत्त्रियादञ् ।। 4-1-168 ।।>
जनपदशब्दो यः क्षत्त्रियवाची तस्मादपत्येऽञ् प्रत्ययो भवति । पाञ्चालः । ऐक्ष्वाकः । वैदेहः ।
जनपदशब्दादिति किम् ? द्रुह्योरपत्यं द्रौह्यवः । पौरवः । क्षत्त्रियादिति किम् ? ब्राह्मणस्य पञ्चालस्यापत्यं पाञ्चालिः । वैदेहिः ।
* क्षत्त्रियसमानशब्दाज्जनपदशब्दात् तस्य राजन्यपत्यवत् * (म.भा.2.269)। पञ्चालानां राजा पाञ्चालः । वैदेहः । मागधः ।।
<साल्वेयगान्धारिभ्यां च ।। 4-1-169 ।।>
साल्वेयगान्धारिशब्दाभ्यामपत्येऽञ् प्रत्ययो भवति । जनपदशब्दावेतौ क्षत्त्रियाभिधायिनौ ताभ्यामञपवादे `वृद्धात्' इति ञ्यङि प्राप्ते पुनरञ्विधीयते । साल्वेयः । गान्धारः । तस्य राजनीत्येव - साल्वेयो राजा । गान्धारो राजा ।
<द्व्यञ्मगधकलिङ्गसूरमसादण् ।। 4-1-170 ।।>
जनपदशब्दात्क्षत्त्रियाभिधायिनो द्व्यचः, मगध, कलिङ्ग, सूरमस इत्येतेभ्यश्चापत्येऽण् प्रत्ययो भवति । अञोऽपवादः । आङ्गः । वाङ्गः । पौण्ड्रः । सौह्मः । मागधः । कालिङ्गः । सौरमसः । तस्य राजनीत्येव - आङ्गो राजा ।।
<वृद्धेत्कोसलाजादाञ्ञ्यङ् ।। 4-1-171 ।।>
`जनपदशब्दात्क्षत्त्रियात्' इत्येव । वृद्धाच्च प्रातिपदिकादिकारान्ताच्च कोसल-अजादशब्दाभ्यां चापत्ये ञ्यङ् प्रत्ययो भवति । अञोऽपवादः । वृद्धात्तावत् - आम्बष्ठ्यः । सौवीर्यः । इकारान्तात् - आवन्त्यः । कौन्त्यः । कोसलाजादयोरवृद्धार्थं वचनम् । कौसल्यः । आजाद्यः ।
तपरकरणं किम् ? कुमारी नाम जनपदसमानशब्दः क्षत्त्रियः, तस्यापत्यं कौमारः ।
* पाण्डोर्जनपदशब्दात् क्षत्त्रियाड्ड्यण् वक्तव्यः * । पाण्ड्यः । अन्यस्मात्पाण्डव एव । तस्य राजनीत्येव - आम्बष्ठ्यो राजा । आवन्त्यः । कौन्त्यः । कौशल्यः । आजाद्यः ।।
<कुरुनादिभ्यो ण्यः ।। 4-1-172 ।।>
जनपदशब्दात्क्षत्त्रियादित्येव । कुरुशब्दान्नादिभ्यश्च प्रातिपदिकेभ्यो ण्यः प्रत्ययो भवति । अणञोरपवादः । कौरव्यः । नकारादिभ्यः - नैषध्यः । नैपथ्यः ।

तस्य राजनीत्येव - कौरव्यो राजा ।।

<साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् ।। 4-1-173 ।।>

जनपदशब्दात् क्षत्त्रियादित्येव । सल्वा नाम क्षत्त्रिया तन्नामिका, तस्या अपत्यम्, "द्व्यचः"(4.1.121/1124) इति ढक्, साल्वेयः । अणपीष्यते - साल्वः । `तस्य निवासः' साल्वो जनपदः । तदवयवा उदुम्बरादयः, तेभ्यः क्षत्त्रियवृत्तिभ्य इदं प्रत्ययविधानम् । साल्वावयवेभ्यः प्रत्यग्रथकलकूटाश्मकशब्देभ्यश्चापत्ये इञ् प्रत्ययो भवति । अञोऽपवादः । औदुम्बरिः । तैलखलिः । माद्रकारिः । यौगन्धरिः । भौलिङ्गिः । शरदण्डिः । प्रात्यग्रथिः । कालकूटिः । आश्मकिः । तस्य राजनीत्येव - औदुम्बरी राजा ।

उदुम्बरास्तिलखला मद्रकारा युगन्धराः ।

भुलिङ्गाः शरदण्डाश्च साल्वावयवसंज्ञिताः ।।

<ते तद्राजाः ।। 4-1-174 ।।>

"जनपदशब्दात् क्षत्त्रियादञ्"(4.1.168/1186) इत्येवमादयः प्रत्ययाः सर्वनाम्ना प्रत्यवमृश्यन्ते, न तु पूर्वे; गोत्रयुवसंज्ञाकाण्डेन व्यवहितत्वात् । तेऽञादयस्तद्राजसंज्ञा भवन्ति । तथा चैवोदाहृतम् ।

तद्राजप्रदेशाः - "तद्राजस्य बहुषु तेनैवास्त्रियाम्"(2.4.62/1193) इत्येवमादयः ।।

<कम्बोजाल्लुक् ।। 4-1-175 ।।>

"जनपदशब्दात् क्षत्त्रियात्"(4.1.168/1186) इत्यनेन विहितस्याञो लुगुच्यते । कम्बोजात्प्रत्ययस्य लुग् भवति । कम्बोजः ।

* कम्बोजादिभ्यो लुग्वचनं चोलाद्यर्थम् * (म.भा.2.270)। कम्बोजः । चोलः । केरलः । शकः । यवनः । तस्य राजनीत्येव - कम्बोजो राजा ।।

<स्त्रियामवन्तिकुन्तिकुरुभ्यश्च ।। 4-1-176 ।।>

अवन्ति-कुन्ति-कुरुशब्देभ्य उत्पन्नस्य तद्राजस्य स्त्रियामभिधेयायां लुग्भवति । अवन्तिकुन्तिभ्यां ञ्यङः, कुरोर्ण्यस्य । अवन्ती । कुन्ती । कुरूः ।

स्त्रियामिति किम् ? आवन्त्यः । कौन्त्यः । कौरव्यः ।।

<अतश्च ।। 4-1-177 ।।>

`स्त्रियाम्' इत्येव । अकारप्रत्ययस्य तद्राजस्य स्त्रियामबिधेयायां लुग्भवति । तकारो विस्पृष्टार्थः । शूरसेनी । मद्री । दरत् ।

अवन्त्यादिभ्यो लुग्वचनात् तदन्तविधिरत्र नास्ति, तेनेह न भवति - आम्बष्ठ्या । सौवीर्या ।।

<न प्राच्यभर्गादियौधेयादिभ्यः ।। 4-1-178 ।।>

प्राच्येभ्यो भर्गादिभ्यो यौधेयादिभ्यश्चोत्पन्नस्य लुग्न भवति । "अतश्च"(4.1.177/1196) इत्यनेन स्त्रियां लुक् प्राप्तः प्रतिषिद्ध्यते । प्राच्येभ्यः क्षत्त्रियेभ्यस्तावत् - पाञ्चाली । वैदेही । आङ्गी । वाङ्गी । मागधी । भर्गादिभ्यः - भार्गी । कारूषी । कैकेयी । यौधेयादिभ्यः - यौधेयी । शौभ्रेयी । शौक्रेयी ।

कस्य पुनरकारस्य प्रत्ययस्य यौधेयादिभ्यो लुक् प्राप्तः प्रतिषिद्ध्यते ? पाञ्चमिकस्याञः "पर्श्वादियौधेयादिभ्यामणञौ"(5.3.117/2070) इत्येतस्य । कथं पुनस्तस्य भिन्नप्रकरणस्थस्यानेन लुक् प्राप्नोति ? एतदेव विज्ञापयति - पाञ्चमिकस्यापि तद्राजस्य "अतश्च"(4.1.177/1196) इत्यनेन लुग्भवतीति । किमेतस्य ज्ञापनेन प्रयोजनम् ? पर्श्वाद्यणः स्त्रियां लुक् सिद्धो भवति । पर्शूः । रक्षाः । असुरी । तथा चोक्तम् - `यौधेयादिप्रतिषेधो ज्ञापकः पर्श्वाद्यणो लुक्' इति ।

भर्ग । करूष । केकय । कश्मीर । साल्व । सुस्थाल । उरश । कौरव्य । भर्गादिः ।

यौधेय । शौभ्रेय । शौक्रेय । ज्याबाणेय । घार्त्तेय । धार्त्तेय । त्रिगर्त्त । भरत । उशीनर । यौधेयादिः ।।

इति श्रीजयादित्यविरचितायां काशिकावृत्तौ

चतुर्थाध्यायस्य प्रथमः पादः।

----------------*****************------------------

4.2

* अथ चतुर्थाध्याये द्वितीयः पादः *

<तेन रक्तं रागात् ।। 4-2-1 ।।>

शुक्लस्य वर्णान्तरापादनमिह रञ्जेरर्थः । रज्यतेऽनेनेति रागः । तेनेति तृतीयासमर्थाद्रागविशेषवाचिनः शब्दात् `रक्तम्' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । कषायेण रक्तं वस्त्रं काषायम् । माञ्जिष्ठम् । कौसुम्भम् ।

रागादिति किम् ? देवदत्तेन रक्तं वस्त्रम् ।

कथं काषायौ कर्णौ, हारिद्रौ कुक्कुटस्य पादाविति ? उपमानाद्भविष्यति - काषायाविव काषायौ, हारिद्राविव हारिद्रौ ।
"द्वैपवैयाघ्रादञ्"(4.2.12/1213) इति यावत्तृतीयासमर्थविभक्तिरनुवर्त्तते ।।
<लाक्षारोचनाशकलकर्दमाट्ठक् ।। 4-2-2 ।।>
लाक्षादिभ्यो रागवचनेभ्यस्तृतीयासमर्थेभ्यः `रक्तम्' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । अणोऽपवादः । लाक्षया रक्तं वस्त्रं लाक्षिकम् । रौचनिकम् । शाकलिकम् । कार्दमिकम् ।
* शकलकर्दमाभ्यामणपीष्यते *(म.भा.2.270) । शाकलम् । कार्दमम् ।
* नील्या अन् वक्तव्यः * (म.भा.2.271)। नील्या रक्तं नीलं वस्त्रम् ।
* पीतात् कन् वक्तव्यः * (म.भा.2.271)। पीतेन रक्तं पीतकम् ।
* हरिद्रामहारजनाभ्यामञ्वक्तव्यः * (म.भा.2.271)। हारिद्रम् । माहारजनम् ।।
<नक्षत्रेण युक्तः कालः ।। 4-2-3 ।।>
तृतीया समर्थविभक्तिरनुवर्तते । तेनेति तृतीयासमर्थाद् नक्षत्रविशेषवाचिनः शब्दाद् `युक्तः' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । योऽसौ युक्तः, कालश्चेत्स भवति ।
कथं पुनर्नक्षत्रेण पुष्यादिना कालो युज्यते ? पुष्यादिसमीपस्थे चन्द्रमसि वर्तमानाः पुष्यादिशब्दाः प्रत्ययमुत्पादयन्ति । पुष्येण युक्तः कालः । पुष्यसमीपस्थेन चन्द्रमसा युक्त इत्यर्थः । पौषी रात्रिः । पौषमहः । माघी रात्रिः । माघमहः ।
(म.भा.2.272)नक्षत्रेणेति किम् ? चन्द्रमसा युक्ता रात्रिः । काल इति किम् ? पुष्येण युक्तश्चन्द्रमाः ।।
<लुबविशेषे ।। 4-2-4 ।।>
पूर्वेण विहितस्य प्रत्ययस्य लुब् भवति अविशेषे । न चेन्नक्षत्रयुक्तस्य कालस्य रात्र्यादिविशेषोऽभिधीयते । यावान् कालो नक्षत्रेण युज्यतेऽहोरात्रस्तस्याविशेषे लुब् भवति । अद्य पुष्यः । अद्य कृत्तिकाः ।
अविशेष इति किम् ? पौषी रात्रिः। पौषमहः ।।
<संज्ञायां श्रवणाश्वत्थाभ्याम् ।। 4-2-5 ।।>
अविशेषे लुब्विहितः पूर्वेण, विशेषार्थोऽयमारम्भः । श्रवणशब्दादश्वत्थशब्दाच्चोत्पन्नस्य प्रत्ययस्य लुब् भवति संज्ञायां विषये । श्रवणा रात्रिः । अश्वत्थो मुहूर्त्तः ।
लुपि युक्तवद्भावः कस्मान्न भवति ? निपातनाद् "विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः"(4.2.23/1225) इति ।
संज्ञायामिति किम् ? श्रावणी, आश्वत्थी रात्रिः ।।
<द्वन्द्वाच्छः ।। 4-2-6 ।।>
नक्षत्रद्वन्द्वात्तृतीयासमर्थाद्युक्ते काले छः प्रत्ययो भवति, विशेषे चाविशेषे च । राधानुराधीया रात्रिः । तिष्यपुनर्वसवीयमहः । अविशेषे - अद्य राधानुराधीयम् । अद्य तिष्यपुनर्वसवीयम् । लुपं परत्वाद् बाधते ।।
<दृष्टं साम ।। 4-2-7 ।।>
तेनेति तृतीयासमर्थाद् `दृष्टं साम' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । यद् दृष्टं साम चेत्तद्भवति । क्रुञ्चेन दृष्टं क्रौञ्चं साम । वासिष्ठम् । वैश्वामित्रम् ।।
<कलेर्ढक् ।। 4-2-8 ।।>
कलिशब्दात्तृतीयासमर्थाद् `दृष्टं साम' इत्येतस्मिन्नर्थे ढक् प्रत्ययो भवति । अणोऽपवादः । कलिना दृष्टं साम कालेयम् ।
* सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः * (म.भा.2.273)।। अग्निना दृष्टमाग्नेयम् । एवमग्नौ भवम्, अग्नेरागतम्, अग्नेः स्वम् - इति सर्वत्र ढगेव भवति । आग्नेयम्, तथा कालेयमपि प्रतिपत्तव्यम् ।
* दृष्टे सामनि अण्वा डिद्भवतीति वक्तव्यम् * (म.भा.2.273)। उशनसा दृष्टं साम औशनसम्, औशनम् ।
* जाते चार्थे योऽन्येन बाधितः पुनरण्विधीयते स वा डिद्भवतीति वक्तव्यम् * (म.भा.2.273)। "प्राग्दीव्यतोऽण्"(4.1.83/1073) प्राप्तः कालठञा(4.3.11/1381) बाधितः "सन्धिवेलाद्यृतुनक्षत्रेभ्यः"(4.3.16/1387) इति पुनर्विधीयते, स वा डिद्भवतीति वक्तव्यम् । शतभिषजि जातः शातभिषः, शातभिषजः ।
* तीयादीकक् स्वार्थे वा वक्तव्यः * (म.भा.2.273)। द्वैतीयीकम्, तार्तीयीकम् । द्वितीयकम्, तृतीयकम् ।
* न विद्यायाः * (म.भा.2.273)। द्वितीया, तृतीया विद्या ।
* गोत्रादङ्कवदिष्यते * (म.भा.2.273)। दृष्टं सामेत्यस्मिन्नर्थे । औपगवेन दृष्टं साम औपगवकम् । कापटवकम् । "गोत्रचरणाद्
वुञ्"(4.3.126/1506) भवति ।
`दृष्टे सामनि जाते च द्विरण्डिद्वा विधीयते ।

तीयादीकक् न विद्याया गोत्रादङ्कवदिष्यते '।।(म.भा.2.273)

<वामदेवाड् ड्यड्ड्यौ ।। 4-2-9 ।।>

वामदेवशब्दात्तृतीयासमर्थाद् `दृष्टं साम' इत्येतस्मिन्नर्थे ड्यत्, ड्य इत्येतौ प्रत्ययौ भवतः । अणोऽपवादः । वामदेवेन दृष्टं साम वामदेव्यं साम । तित्करणं स्वरार्थम् ।

डित्करणं किमर्थम् ? "ययतोश्चातदर्थे"(6.2.156/3890) इति नञ उत्तरस्यान्तोदात्तत्वे विधीयमानेऽनयोर्ग्रहणं मा भूत् । अननुबन्धकग्रहणपरिभाषया एकानुबन्धकग्रहणपरिभाषया चानयोर्निवृत्तिः क्रियते । अवामदेव्यम् ।

`सिद्धे यस्येति लोपेन किमर्थं ययतौ डितौ ।

ग्रहणं माऽतदर्थे भूद्वामदेव्यस्य नञ्स्वरे' ।।(म.भा.2.274)

<परिवृतो रथः ।। 4-2-10 ।।>

तेनेति तृतीयासमर्थात् `परिवृतः' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, योऽसौ परिवृतो रथश्चेत्स भवति । वस्त्रेण परिवृतो रथः वास्त्रो रथः । काम्बलः । चार्मणः ।

रथ इति किम् ? वस्त्रेण परिवृतः कायः । समन्ताद्वेष्टितः परिवृत उच्यते । यस्य न कश्चिदवयवो वस्त्रादिभिर्वेष्टितः तत्र न भवति । तेनेह न - छात्त्रैः परिवृतो रथः ।।

<पाण्डुकम्बलादिनिः ।। 4-2-11 ।।>

पाण्डुकम्बलशब्दात्तृतीयासमर्थात् `परिवृतो रथः' इत्येतस्मिन्नर्थे इनिः प्रत्ययो भवति । अणोऽपवादः । पाण्डुकम्बली, पाण्डुकम्बलिनौ, पाण्डुकम्बलिनः । पाण्डुकम्बलशब्दो राजास्तरणस्य वर्णकम्बलस्य वाचकः ।

मत्वर्थीयेनैव सिद्धे वचनमणो निवृत्त्यर्थम् ।

<द्वैपवैयाघ्रादञ् ।। 4-2-12 ।।>

द्वीपिव्याघ्रयोर्विकारभूते चर्मणी द्वैपवैयाघ्रे, ताभ्यां तृतीयासमर्थाभ्याम् `परिवृतो रथः' इत्येतस्मिन्नर्थेऽञ् प्रत्ययो भवति । अमोऽपवादः । स्वरे विशेषः । द्वैपेन परिवृतो रथो द्वैपः । वैयाघ्रः ।।

<कौमारापूर्ववचने।। 4-2-13 ।।>

`कौमार' इत्येतदण्प्रत्ययान्तं निपात्यतेऽपूर्ववचने । पाणिग्रहणस्यापूर्ववचनम् । उभयतः स्त्रियाम् अपूर्वत्वे निपातनमेतत् । अपूर्ब्बपतिं कुमारीं पतिरुपपन्नः कौमारः पतिः । कुमारीशब्दाद् द्वितीयासमर्थादुपयन्तरि प्रत्ययः । `अपूर्वपतिः कुमारी पतिमुपपन्ना कौमारी भार्या'(म.भा.2.274) । प्रथमान्तादेव स्वार्थे प्रत्ययोऽपूर्वत्वे द्योत्ये ।

`कौमारापूर्ववचने कुमार्या अण्विधीयते ।

अपूर्वत्वं यदा तस्याः कुमार्यां भवतीति वा' ।।(म.भा.2.275)

कुमार्यां भवः कौमारः पतिः, तस्य स्त्री कौमारी भार्येति सिद्धम् ।।

<तत्रोद्धृतममत्रेभ्यः ।। 4-2-14 ।।>

तत्रेति सप्तमीसमर्थादत्रवाचिनः शब्दात् `उद्धृतम्' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । भुक्तोच्छिष्टमुद्धृतमुच्यते, यस्योद्धरणमिति प्रसिद्धिः । अमत्रम् = भाजनं पात्रमुच्यते । शरावेषूद्धृतः शाराव ओदनः । माल्लिकः । कार्परः ।

अमत्रेभ्य इति किम् ? पाणावुद्धृत ओदनः । `तत्र' इति सप्तमी समर्थविभक्तिः "क्षीराड्ढञ्"(4.2.20/1222) इति यावदनुवर्त्तते ।।

<स्थण्डिलाच्छयितरि व्रते ।। 4-2-15 ।।>

स्थण्डिलशब्दात्सप्तमीसमर्थात् शयितर्यभिधेये यथाविहितं प्रत्ययो भवति, समुदायेन चेद् व्रतं गम्यते । व्रतमिति शास्त्रितो नियम उच्यते । स्थण्डिले शयितुं व्रतमस्य स्थाण्डिलो भिक्षुः । स्थाण्डिलो ब्रह्मचारी ।

व्रत इति किम् ? स्थण्डिले शेते ब्रह्मदत्तः ।।

<संस्कृतं भक्षाः ।। 4-2-16 ।।>

तत्रेति सप्तमीसमर्थात् `संस्कृतम्' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्संस्कृतं भक्षाश्चेत्ते भवन्ति । खरविशदमभ्यवहारार्थं `भक्षम्' इत्युच्यते । सत उत्कर्षाधानम् = संस्कारः । भ्राष्टे संस्कृता भक्षा भ्राष्ट्रा अपूपाः । कालशाः । कौम्भाः ।

भक्षा इति किम् ? पुष्पपुटे संस्कृतो मालागुणः ।।

<शूलोखाद्यत् ।। 4-2-17 ।।>

शूलशब्दादुखाशब्दाच्च सप्तमीसमर्थात् `संस्कृतं भक्षाः' इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति । अणोऽपवादः । शूले संस्कृतं शूल्यं मांसम् । उख्यम् ।।

<दध्नष्ठक् ।। 4-2-18 ।।>

दधिशब्दात्सप्तमीसमर्थात् `संस्कृतं भक्षाः' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । दधनि संस्कृतं दाधिकम् ।

ननु च संस्कृतार्थे प्राग्वहतेष्ठकं वक्ष्यति, तेनैव सिद्धम् ? न सिद्ध्यति; दध्ना हि तत्संस्कृतं तस्य दधिकृतमेवोत्कर्षाधानम्, इह तु दधि केवलमाधारभूतं द्रव्यान्तरेण लवणादिना संस्कारः क्रियते ।।

<उदश्वितोऽन्यतरस्याम् ।। 4-2-19 ।।>

उदश्विच्छब्दात्सप्तमीसमर्थात् `संस्कृतं भक्षाः' इत्येतस्मिन्नर्थेऽन्यतरस्यां ठक् प्रत्ययो भवति । पक्षे यथाप्राप्तमण् भवति । औदश्वितम् । औदश्वित्कम् ।

<क्षीराड्ढञ् ।। 4-2-20 ।।>

क्षीरशब्दात्सप्तमीसमर्थात् `संस्कृतं भक्षा' इत्येतस्मिन्नर्थे ढञ् प्रत्ययो भवति । अणोऽपवादः । क्षीरे संस्कृता क्षैरेयी यावागूः ।।

<सास्मिन्पौर्णमासीति सञ्ज्ञायाम् ।। 4-2-21 ।।>

सेति प्रथमासमर्थाद् `अस्मिन्' इति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत्तत्प्रथमासमर्थं पौर्णमासी चेद्भवति । इतिकरणस्ततश्चेद्विवक्षा भवति ।

`संज्ञायाम्' इति समुदायोपाधिः - प्रत्ययान्तेन चेत्संज्ञा गम्यत इति । मासार्धमाससंवत्सराणामेषा संज्ञा । पौषी पौर्णमासी अस्मिन्पौषो मासः । पौषोऽर्धमासः । पौषः संवत्सरः ।

इह न भवति - पौषी पौर्णमासी अस्मिन्दशरात्र इति । भृतकमासे च न भवति (म.भा.2.275)।

इतिकरणस्य संज्ञाशब्दस्य च तुल्यमेव फलं प्रयोगानुसरणं, तत्र किमर्थं द्वयमुपादीयते ? संज्ञाशब्देन तुल्यतामितिकरणस्य ज्ञापयितुम्, न ह्ययं लोके तथा प्रसिद्धः । संज्ञार्थत्वे तु सम्प्रति ज्ञापिते यत्तत्र तत्रोच्यते इतिकरणस्ततश्चेद्विवक्षेति तदुपपन्नं भवति ।

अथ पौर्णमासीति कोऽयं शब्दः ? पूर्णमासादण्, पौर्णमासी । अथ वा - पूर्णो माः पूर्णमाः, पूर्णमास इयं पौर्णमासी । मा इति चन्द्र उच्यते ।।

<आग्रहायण्यश्वथाट्ठक् ।। 4-2-22 ।।>

`सास्मिन्पौर्णमासी' इति सर्वमनुवर्तते । आग्रहायणीशब्दादश्वत्थशब्दाच्च प्रथमासमर्थात्पौर्णमास्युपाधिकाद् अस्मिन्निति सप्तम्यर्थे ठक् प्रत्ययो भवति । अणोऽपवादः । आग्रहायणिको मासः । अर्द्धमासः संवत्सरः । एवम् - आश्वत्थिकः ।।

<विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः ।। 4-2-23 ।।>

फाल्गुन्यादयः पौर्णमासीशब्दास्तेभ्यो विभाषा ठक् प्रत्ययो भवति, "सास्मिन्पौर्णमासीति संज्ञायाम्"(4.2.21/1223) इत्येतस्मिन्विषये । नित्यमणि प्राप्ते पक्षे ठग्विधीयते । फाल्गुनो मासः, फाल्गुनिकः । श्रावणः, श्रावणिकः । कार्त्तिकः, कार्त्तिकिकः । चैत्रः, चैत्रिकः ।।

<सास्य देवता ।। 4-2-24 ।।>

सेति प्रथमासमर्थात् `अस्य' इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत्प्रथमासमर्थं देवता चेत्सा भवति । यागसम्प्रदानं देवता देयस्य पुरोडाशादेः स्वामिनी, तस्मिन्नभिधेये प्रत्ययः । इन्द्रो देवताऽस्य ऐन्द्रं हविः । आदित्यम् । बार्हस्पत्यम् । प्राजापत्यम् । देवतेति किम् ? कन्या देवताऽस्य । कथमैन्द्रो मन्त्रः ? मन्त्रस्तुत्यमपि देवतेत्युपचरन्ति ।

कथम् - आग्नेयो वै ब्राह्मणो देवतेति ? उपमानाद् भविष्यति । "महाराजप्रोष्ठपदाट्ठञ्"(4.2.35/1238) इति यावत् `सास्य देवता' इत्यधिकारः । सेति प्रकृते पुनः समर्थविभक्तिनिर्देशः संज्ञानिवृत्त्यर्थः ।।

<कस्येत् ।। 4-2-25 ।।>

कशब्दो देवतायां प्रजापतेर्वाचकः, ततः पूर्वेणैवाण्प्रत्ययः सिद्धः, इकारादेशार्थं वचनम् । कस्य इकारादेशो भवति प्रत्ययसन्नियोगेन । कायं हविः । `कायमेककपालं निर्वपेत्'(मै.सं.3.15.10) ।।

<शुक्राद् घन् ।। 4-2-26 ।।>

शुक्रशब्दात् `सास्य देवता' इत्यस्मिन्नर्थे घन् प्रत्ययो भवति । अणोऽपवादः । शुक्रियं हविः । शुक्रियोऽध्यायः ।।

<अपोनत्त्रपान्नप्तृभ्यां घः ।। 4-2-27 ।।>

अपोनप्तृ, अपान्नप्तृ - इत्येताभ्यां घः प्रत्ययो भवति `सास्य देवता' इत्यस्मिन्विषये । अणोऽपवादः । `अपोनप्त्रियं हविः'(श.ब्रा.29.12), अपांनप्त्रियम् । अपोनपाद्, अपांनपादिति देवताया नामधेये एते, तयोस्तु प्रत्ययसन्नियोगेन रूपमिदं निपात्यते ।।

<छ च ।। 4-2-28 ।।>

अपोनप्तृ, अपान्नप्तृ - इत्येताभ्यां छकारः प्रत्ययो भवति `सास्य देवता' इत्यस्मिन्विषये । अणोऽपवादः । `अपोनप्त्रीयं हविः'(आप.श्रौ.22.22.2) । `अपान्नप्त्रीयम्'(काठ.सं.12.6) । योगविभागः सङ्ख्यातानुदेशपरिहारार्थः ।

* छप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसङ्ख्यानम् * (म.भा.2.276)।। पैङ्गाक्षीपुत्रीयम् । तार्णबिन्दवीयम् ।।

* शतरुद्राच्छश्च घश्च * (म.भा.2.276)। `शतरुद्रीयम्'(तै.सं.5.4.3.1)।`शतरुद्रियम्'(मै.3.3.4) ।।

<महेन्द्राद् घाणौ च ।। 4-2-29 ।।>

महेन्द्रशब्दाद् घाणौ प्रत्ययौ भवतः, चकाराच्छश्च, `सास्य देवता' इत्यस्मिन्विषये । महेन्द्रो देवतास्य महेन्द्रियं हविः । `माहेन्द्रम्'(तै.सं.6.5.5.3) । `महेन्द्रीयम्'(काठ.सं.15.1) ।।

<सोमात् ट्यण् ।। 4-2-30 ।।>
शोमशब्दात् ट्यण्प्रत्ययो भवति `सास्य देवता' इत्यस्मिन्विषये । अणोऽपवादः । णकारो वृद्ध्यर्थः । टकारो ङीबर्थः । सोमो देवतास्य सौम्यं हविः । सौम्यं सूक्तम् । `सौमी ऋक्' (मै.1.7.4)।।
<वाय्वृतुपित्रुषसो यत् ।। 4-2-31 ।।>
वाय्वादिभ्यः शब्देभ्यो यत्प्रत्ययो भवति `सास्य देवता' इत्येतस्मिन्विषये । अणोऽपवादः । वायुर्देवतास्य वायव्यम् । ऋतव्यम् । `पित्र्यम्'(ऋ.8.20.13) । उषस्यम् ।।
<द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च ।। 4-2-32 ।।>
द्यावापृथिव्यादिभ्यश्छः प्रत्ययो भवति चकाराद्यत् `सास्य देवता' इत्यस्मिन्विषये । अणो ण्यस्य चापवादः । द्यौश्च पृथिवी च द्यावापृथिव्यौ देवते अस्य `द्यावापृथिवीयम्'(मै.1.8.10), `द्यावापृथिव्यम्'(तै.सं.1.8.2.1) । शुनश्च सीरश्च तौ देवते अस्येति `शुनासीरीयम्'(काठ.सं.26.4), `शुनासीर्यम्'(मै.4.3.3) । शुनः = वायुः । सीर = आदित्यः । मरुत्वान्देवतास्य `मरुत्वतीयम्'(तै.सं.4.4.2.2), मरुत्वत्यम् । `अग्नीषोमीयम्'(तै.सं.1.8.1.1), अग्नीषोम्यम् । `वास्तोष्पतीयम्'(तै.सं.3.4.10.3), `वास्तोष्पत्यम्'(मै.1.5.13) । `गृहमेधीयम्'(ऋ.7.56.14) । `गृहमेध्यम्'(काठ.सं.36.9) ।।
<अग्नेर्ढक् ।। 4-2-33 ।।>
अग्निशब्दाद् ढक् प्रत्ययो भवति `सास्य देवता' इत्येतस्मिन्विषये । अणोऽपवादः । अग्निर्देवतास्य `आग्नेयोऽष्टाकपालः'(काठ.सं.8.10) ।
* प्राग्दीव्यतीयेषु तद्धितार्थेषु सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः * (म.भा.2.277)।।
<कालेभ्यो भववत् ।। 4-2-34 ।।>
कालविशेषवाचिभ्यः शब्देभ्यो भववत्प्रत्यया भवन्ति `सास्य देवता' इत्यस्मिन्विषये । `कालाट्ठञ्' इति प्रकरणे भवे प्रत्यया विधास्यन्ते, ते `सास्य देवता' इत्यस्मिन्नर्थे तथैवेष्यन्ते, तदर्थमिदमुच्यते ।
वत्करणं सर्वसादृश्यपरिग्रहार्थम् । मासे भवं मासिकम् । आर्द्धमासिकम् । सांवत्सरिकम् । वासन्तम् । प्रावृषेण्यम् । तथा - मासो देवतास्य मासिकम् । आर्धमासिकम् । सांवत्सरिकम् । वासन्तम् । प्रावृषेण्यम् ।
<महाराजप्रोष्ठपदाट्ठञ् ।। 4-2-35 ।।>
महाराजशब्दात्प्रोष्ठपदशब्दाच्च ठञ् प्रत्ययो भवति `सास्य देवता' इत्यस्मिन्विषये । महाराजो देवतास्य माहाराजिकम् । प्रौष्ठपदिकम् ।
* ठञ्प्रकरणे तदस्मिन्वर्तत इति नवयज्ञादिभ्य उपसङ्ख्यानम् *(म.भा.2.277) ।
नवयज्ञोऽस्मिन्वर्तते नावयज्ञिकः कालः । पाकयज्ञिकः ।।
* पूर्णमासादण् * (म.भा.2.277)। पूर्णमासोऽस्यां वर्तते `पौर्णमासी तिथिः'(मै.5.6.9) ।।
<पितृव्यमातुलमातामहपितामहाः ।। 4-2-36 ।।>
पितृव्यादयो निपात्यन्ते । समर्थविभक्तिः, प्रत्ययः, प्रत्ययार्थोऽनुबन्ध इति सर्वं निपातनाद्विज्ञेयम् । * पितृमातृभ्यां भ्रातर्यभिधेये व्यत्, डुलच् - इत्येतौ प्रत्ययौ निपात्येते *(म.भा.2.277) । पितुर्भ्राता पितृव्यः । मातुर्भ्राता मातुलः । * ताभ्यां पितरि डामहच् * (म.भा.2.277)। * मातरि षिच्च * । ताभ्यामेव पितरि डामहच् प्रत्ययो भवति - पितुः पिताः पितामहः, मातुः पिता मातामहः । मातरि षिच्च - पितामही, मातामही ।
* अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः * (म.भा.2.278)। अवेर्दुग्धम् अविसोढम् अविदूसम् । अविमरीसम् ।।
* तिलान्निष्फलात्पिञ्जपेजौ प्रत्ययौ वक्तव्यौ *(म.भा.2.278) । निष्फलस्तिलः तिलपिञ्जः । तिलपेजः ।
* पिञ्जश्छन्दसि डिच्च * (म.भा.2.278)। तिल्पिञ्जः ।। `तिलपिञ्जं दण्डनं नडम्'(अ.वे.12.2.54)
<तस्य समूहः ।। 4-2-37 ।।>
`तस्य इति षष्ठीसमर्थात् `समूहः' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । किमिहोदाहरणम् ? चित्तवदाद्युदात्तमगोत्रं यस्य च नान्यत्प्रतिपदं ग्रहणम् । अचित्ताट्ठकं(4.2.47/1256) वक्ष्यति - "अनुदात्तादेरञ्"(4.2.44/1253), "गोत्राद्वुञ्"(4.2.39/1246), प्रतिपदं च "केदाराद्यञ्च"(4.2.40/1248) इत्येवमादि, तत्परिहारेणात्रोदाहरणं द्रष्टव्यम् । काकानां समूहः काकम् । सौकम् । बाकम् । "इनित्रकट्यचश्च"(4.2.51/1260) इति यावत्समूहाधिकारः ।
* गुणादिभ्यो ग्रामज्वक्तव्यः * । गुणग्रामः । करणग्रामः । गुण । करण । तत्त्व । शब्द । इन्द्रिय । आकृतिगणः ।।
<भिक्षादिभ्योऽण् ।। 4-2-38 ।।>
`भिक्षा' इत्येवमादिभ्यः शब्देभ्योऽण् प्रत्ययो भवति `तस्य समूहः' इत्येतस्मिन्विषये । अण्ग्रहणं बाधकबाधनार्थम् । भिक्षाणां समूहो भैक्षम् । गार्भिणम् । युवतिशब्दोऽत्र पठ्यते, तस्य ग्रहणसामर्थ्याद् पुंवद्भावो न भवति - `भस्याऽढे तद्धिते'(6.3.35/836) इति । युवतीनां समूहो यौवतम् । भिक्षा । गर्भिणी । क्षेत्र । करीष । अङ्गार । चर्मिन् । धर्मिन् । सहस्र । युवति । पदाति । पद्धति । अथर्वन् । दक्षिणा । भूत ।।

<गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद् वुञ् ।। 4-2-39 ।।>

गोत्रादिभ्यो वुञ्प्रत्ययो भवति `तस्य समूहः' इत्येतस्मिन्विषये । अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यतेऽपत्यमात्रं न तु पौत्रप्रभृत्येव । औपगवानां समूहः औपगवकम् । कापटवकम् । उक्षन्--औक्षकम् । उष्ट्र--औष्ट्रकम् । उरभ्र--औरभ्रकम् । राजन्--राजकम् । राजन्य--राजन्यकम् । राजपुत्र--राजपुत्रकम् । वत्स--वात्सकम् । मनुष्य--मानुष्यकम् । अज--आजकम् । `प्रकृत्याऽके राजन्यमनुष्ययुवानः'(7.1.1/1247,वा.) इति चलोपो न भवति - "आपत्यस्य च तद्धितेऽनाति"(6.4.151/1082) इति ।

* वृद्धाच्चेति वक्तव्यम् * (म.भा.2.278)। वृद्धानां समूहो वार्द्धकम् ।।

<केदाराद्यञ्च ।। 4-2-40 ।।>

केदारशब्दाद् यञ्प्रत्ययो भवति, चकाराद् वुञ् च, `तस्य समूहः' इत्येतस्मिन्विषये । अचित्तलक्षणस्य ठकोऽपवादः । केदाराणां समूहः कैदार्यम् । कैदारकम् ।

* गणिकायाश्च यञ्वक्तव्यः * (म.भा.2.279)। गणिकानां समूहो गाणिक्यम् ।।

<ठञ् कवचिनश्च ।। 4-2-41 ।।>

कवचिन्शब्दाट्ठञ् प्रत्ययो भवति `तस्य समूहः' इत्येतस्मिन्विषये । कवचिनां समूहः कावचिकम् ।

चकारः केदारादित्यस्यानुकर्षणार्थः - केदाराणां समूहः कैदारिकम् ।।

<ब्राह्मणमाणववाडवाद्यन् ।। 4-2-42 ।।>

ब्राह्मणादिभ्यः शब्देभ्यो यन्प्रत्ययो भवति `तस्य समूहः' इत्येतस्मिन्विषये । नकारः स्वरार्थः । ब्राह्मणानां समूहो ब्राह्मण्यम् । माणव्यम् । वाडव्यम् ।

* यन्प्रकरणे पृष्ठादुपसङ्ख्यानम् * (म.भा.2.279)। पृष्ठानां समूहः पृष्ठ्यः षडहः ।

* अह्नः खः क्रतौ * (म.भा.2.279)। अह्नां समूहः `अहीनः क्रतुः'(काठ.सं.24.10) । क्रताविति किम् ? आह्नः । खण्डिकादिषु दर्शनादञ्भवति ।

* पर्श्वा णस्वक्तव्यः * (म.भा.2.279)। पर्शूनां समूहः पार्श्वम् । पदसंज्ञकत्वाद् गुणो न भवति ।

* वातादूलः * । वातानां समूहो वातूलः ।।

<ग्रामजनबन्धुसहायेभ्यस्तल् ।। 4-2-43 ।।>

ग्रामादिभ्यस्तल्प्रत्ययो भवति `तस्य समूहः' इत्येतस्मिन्विषये । ग्रामाणां समूहः ग्रामता । जनता । बन्धुता । सहायता ।

* गजाच्चेति वक्तव्यम् * (म.बा.2.279)। गजानां समूहो गजता ।।

<अनुदात्तादेरञ् ।। 4-2-44 ।।>

अनुदात्तादेः शब्दादञ्प्रत्ययो भवति `तस्य समूहः' इत्येतस्मिन्विषये । कपोतानां समूहः कापोतम् । मायूरम् । तैत्तिरम् ।।

<खण्डिकादिभ्यश्च ।। 4-2-45 ।।>

`खण्डिका' इत्येवमादिभ्यः शब्देभ्योऽञ् प्रत्ययो भवति `तस्य समूहः' इत्येतस्मिन्विषये । आद्युदात्तार्थमचित्तार्थं च वचनम् । खण्डिकानां समूहः खाण्डिकम् । वाडवम् । क्षुद्रकमालवशब्दोऽत्र पठ्यते । क्षुद्रकाश्च मालवाश्चेति क्षत्त्रियद्वन्द्वः । ततः पूर्वेणैवाञि सिद्धे वचनं गोत्रवुञ्बाधनार्थम् ।

ननु च परत्वादञा वुञ् बाधिष्यते, न च गोत्रसमुदायो गोत्रम्, न च तदन्तविधिरत्रास्ति ? एवं तर्हि एतज् ज्ञापयति - वुञि पूर्वविप्रतिषेधः, सामूहिकेषु च तदन्तविधिरस्तीति । प्रयोजनम् - औपगवकं कापटवमिति वुञ् भवति, वानहस्तिकं गौधेनुकमिति च तदन्तविधिः ।

`क्षुद्रकमालवात्' इत्येतावता योगविभागेन पूर्वविप्रतिषेधस्तदन्तविधिश्च ज्ञापितः, पुनरस्यैव नियमार्थमुच्यते `सेनासंज्ञायाम्' इति।

क्षुद्रकमालवात्सेनासंज्ञायामेवाञ्भवति । क्षौद्रकमालवी सेना । क्षौद्रकमालवकमन्यत् ।(म.भा.2.281)

`अञ्सिद्धिरनुदात्तादेः कोऽर्थः क्षुद्रकमालवात् ।
गोत्राद्वुञ् न च तद्गोत्रं तदन्तान्न च सर्वतः ।।
ज्ञापकं स्यात्तदन्तत्वे तथा चापिशलेर्विधिः ।
सेनायां नियमार्थं च यथा बाध्येत चाञ् वुञा' ।।(म.भा.2.281)

खण्डिका । वडवा । * क्षुद्रकमालवात्सेनासंज्ञायाम् * (ग.सू.82)। भिक्षुक । शुक । उलूक । श्वन्। युग । अहन् । वरत्रा । हलबन्ध ।।

<चरणेभ्यो धर्मवत् ।। 4-2-46 ।।>

चरणशब्दाः कठकलापादयः, तेभ्यः षष्ठीसमर्थेभ्यः समूहे धर्मवत् प्रत्यया भवन्ति । "गोत्रचरणाद् वुञ्"(4.3.126/1506) इत्यारभ्य प्रत्यया वक्ष्यन्ते, तत्रेदमुच्यते - `चरणाद्धर्माम्नाययोः'(4.3.126/1506) इति, तेन धर्मवदित्यतिदेशः क्रियते । वतिः सर्वसादृश्यार्थः । कठानां धर्मः काठकम् । कालापकम् । छान्दोग्यम् । औक्थिक्यम् । आथर्वणम् । तथा समूहेऽपि - काठकम् । कालापकम् । छान्दोग्यम् । औक्थिक्यम् । आथवर्णम् ।।

<अचित्तहस्तिधेनोष्ठक् ।। 4-2-47 ।।>

अचित्तार्थेभ्यो हस्तिधेनुशब्दाभ्यां च ठक् प्रत्ययो भवति `तस्य समूहः' इत्येतस्मिन्विषये । अणञोरपवादः । अपूपानां समूह आपूपिकम् । शाष्कुलिकम् ।

हास्तिकम् । धैनुकम् ।
* धेनोरनञ इति वक्तव्यम् * (म.भा.2.281)। आधेनवम् ।
<केशाश्वाभ्यां यञ्छावन्यतरस्याम् ।। 4-2-48 ।।>
केश, अश्व इत्येताभ्यां यथासङ्ख्यं यञ्, छ इत्येतौ प्रत्ययौ भवतोऽन्यतरस्याम् `तस्य समूहः' इत्येतस्मिन्विषये । केशानां समूहः कैश्यम् । कैशिकम् । अश्वानां समूह आश्वम् । अश्वीयम् ।।
<पाशादिभ्यो यः ।। 4-2-49 ।।>
पाशादिभ्यो यः प्रत्ययो भवति `तस्य समूहः' इत्येतस्मिन्विषये । पाशानां समूहः पाश्या । तृण्या ।
पाश । तृण । धूम । वात । अङ्गार । पोत । बालक । पिटक । पिटाक । शकट । हल । नड । वन ।।
<खलगोरथात् ।। 4-2-50 ।।>
खलगोरथशब्देभ्यो यः प्रत्ययो भवति `तस्य समूहः' इत्येतस्मिन्विषये । खलानां समूहः खल्या । गव्या । रथ्या ।
पाशादिष्वपाठ उत्तरार्थः ।।
<इनित्रकट्यचश्च ।। 4-2-51 ।।>
खलगोरथशब्देभ्यो यथासङ्ख्यम् `इनि' `त्र' `कट्यच्' इत्येते प्रत्यया भवन्ति `तस्य समूहः' इत्येतस्मिन्विषये । खलिनी । गोत्रा । रथकट्या ।।
* खलादिभ्य इनिर्वक्तव्यः * (म.भा.2.282)। डाकिनी । कुण्डलिनी । कुटुम्बिनी ।
* कमलादिभ्यः कण्डच् प्रत्ययो भवति * । कमलखण्डम् । अम्भोजखण्डम् ।
कमल । अम्भोज । पद्मिनी । कुमुद । सरोज । पद्म । नलिनी । कैरविणी । कमलादिराकृतिगणः ।।
* नरकरितुरङ्गाणां स्कन्धच् प्रत्ययः * । नरस्कन्धः । करिस्कन्धः । तुरङ्गस्कन्धः ।।
* पूर्वादिभ्यः काण्डः प्रत्ययो भवति * । पूर्वकाण्डम् । तृणकाण्डम् । कर्मकाडम् ।।<विषयो देशे ।। 4-2-52 ।।>
`समूहः' इति निवृत्तम् । षष्ठी समर्थविभक्तिरनुवर्त्तते । तस्येति षष्ठीसमर्थाद् `विषयः' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, योऽसौ विषयो देशश्चेत्स भवति ।
विषयशब्दोऽयं बह्वर्थः । क्वचिद् ग्रामसमुदाये वर्तते - विषयो लब्ध इति । क्वचिदिन्द्रियग्राह्ये - चक्षुर्विषयो रूपमिति । क्वचिदत्यन्तशीलिते ज्ञेये - देवदत्तस्य विषयोऽनुवाक इति । क्वचिदन्यत्राभावे - मत्स्यानां विषयो जलमिति । तत्र देशग्रहणं ग्रामसमुदायप्रतिपत्त्यर्थम् । शिबीनां विषयो देशः शैबः । औष्ट्रः ।
देश इति किम् ? देवदत्तस्य विषयोऽनुवाकः ।।
<राजन्यादिभ्यो वुञ् ।। 4-2-53 ।।>
राजन्यादिभ्यः शब्देभ्यो वुञ्प्रत्ययो भवति `विषयो देशे' इत्येतस्मिन्नर्थे । अणोऽपवादः । राजन्यानां विषयो देशः राजन्यकः । दैवयानकः ।
आकृतिगणश्चायम् । मालवानां विषयो देशः मालवकः । वैराटकः । त्रैगर्तकः ।
राजन्य । देवयान । शालङ्कायन । जालन्धरायण । आत्मकामेय । अम्बरीषपुत्र । वसाति । बैल्ववन । शैलूष । उदुम्बर । बैल्वत । आर्जुनायन । सम्प्रिय । दाक्षि । ऊर्णनाभ ।।
<भौरिक्याद्यैषुकार्यादिभ्यो बिधल्भक्तलौ ।। 4-2-54 ।।>
भौरिक्यादिभ्य ऐषुकार्यादिभ्यश्च यथासङ्ख्यं विधल्, भक्तल् इत्येतौ प्रत्ययौ भवतः `विषयो देशे' इत्येतस्मिन्विषये । अणोऽपवादः । भौरिकिविधः । वैपेयविधः । ऐषुकार्यादिभ्यः - ऐषुकारिभक्तः । सारस्यायनभक्तः ।
भौरिकि । वैपेय । भौलिकि । चैटयत । काणेय । वाणिजक । वालिज । वालिज्यक । शैकयत । वैकयत । इति भौरिख्यादिः ।।
ऐषुकारि । सारस्यायन । चान्द्रायण । द्व्याक्षायण । त्र्यायण । औडायन । जौलायन । खाडायन । सौवीर । दासमित्रि । दासमित्रायण । शौद्रायण । दाक्षायण । शयण्ड । तार्क्ष्यायण । शौभ्रायण । सायण्डि । शौण्डि । वैश्वमाणव । वैश्वधेनव । नद । तुण्डदेव । विशदेव ।।
<सोऽस्यादिरितिच्छन्दसः प्रगाथेषु ।। 4-2-55 ।।>
`सः' इति समर्थविभक्तिः । `अस्य' इति प्रत्ययार्थः । `आदिः' इति प्रकृतिविशेषणम् । इतिकरणो विवक्षार्थः । `छन्दसः' इति प्रकृतिनिर्देशः । `प्रागाथेषु' इति प्रत्ययार्थविशेषणम् । `सः' इति प्रथमासमर्थात् `अस्य ' इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत्प्रथमासमर्थं छन्दश्चेत्तदादिर्भवति, यत्तदस्येति निर्दिष्टं प्रगाथाश्चेत्ते भवन्ति । इतिकरणस्ततश्चेद्विवक्षा । पङ्क्तिरादिरस्य पाङ्क्तः प्रगाथः । आनुष्टुभः । जागतः ।
आदिरिति किम् ? अनुष्टुभ्मध्यमस्य प्रगाथस्य । छन्दस इति किम् ? उदुत्यशब्द आदिरस्य प्रगाथस्य । प्रगाथेष्विति किम् ? पङ्क्तिरादिरस्यानुवाकस्य । प्रगाथशब्दः क्रियानिमित्तकः क्वचिदेव मन्त्रविशेषे वर्तते । यत्र द्वे ऋचौ प्रग्रथनेन तिस्रः क्रियन्ते स प्रग्रथनात्प्रकर्षगानाद्वा `प्रगाथः' इत्युच्यते ।।
* छन्दसः प्रत्ययविधाने नपुंसके स्वार्थ उपसङ्ख्यानम् * (म.भा.2.283)। त्रिष्टुबेव त्रैष्टुभम् । जागतम् ।।
<सङ्ग्रामे प्रयोजनयोद्धृभ्यः ।। 4-2-56 ।।>
`सोऽस्य' इति समर्थविभक्तिः, प्रत्यायार्थश्चानुवर्तते । प्रथमासमर्थविशेषणं प्रयोजनं योद्धारश्च । प्रत्ययार्थविशेषणं सङ्ग्रामः । प्रयोजनवाचिभ्यो

योद्धृवाचिभ्यश्च शब्देभ्यः प्रथमासमर्थेभ्योऽस्येति षष्ठ्यर्थे सङ्ग्रामेऽभिधेये यथाविहितं प्रत्ययो भवति । भद्रा प्रयोजनमस्य सङ्ग्रामस्य भाद्रः सङ्ग्रामः । सौभद्रः । गौरिमित्रः । योद्धृभ्यः - अहिमाला योद्धारोऽस्य सङ्ग्रामस्य आहिमालः । स्यान्दनाश्वः । भारतः ।

सङ्ग्राम इति किम् ? सुभद्रा प्रयोजनमस्य दानस्य । प्रयोजनयोद्धृभ्य इति किम् ? सुभद्रा प्रेक्षिकाऽस्य सङ्ग्रामस्य ।।

<तदस्यां प्रहरणमिति क्रीडायां णः ।। 4-2-57 ।।>

तदिति प्रथमासमर्थात् `अस्याम्' इति सप्तम्यर्थे णः प्रत्ययो भवति, यत्तदिति निर्दिष्टं प्रहरणं चेत्तद्भवति । यदस्यामिति निर्दिष्टं क्रीडा तद् चेत्सा भवति । इतिकरणस्ततश्चेद्विवक्षा । दण्डः प्रहरणमस्यां क्रीडायां दाण्डा, मौष्टा ।

प्रहरणमिति किम् ? माला भूषणमस्यां क्रीडायाम् । क्रीडायामिति किम् ? खड्गः प्रहरणमस्यां सेनायाम् ।।

<घञः सास्यां क्रियेति ञः ।। 4-2-58 ।।>

`सा' इति समर्थविभक्तिः । `अस्याम्' इति प्रत्ययार्थः स्त्रीलिङ्गः । `क्रिया' इति प्रकृत्यर्थविशेषणम् । `घञः' इति `प्रकृतिनिर्देशः । इतिकरणो विवक्षार्थः । घञन्तात्क्रियावाचिनः प्रथमासमर्थात् `अस्याम्' इति सप्तम्यर्थे स्त्रीलिङ्गे ञः प्रत्ययो भवति । `घञः' इति कृद्ग्रहणम्, तत्र गतिकारकपूर्वमपि गृह्यते । श्येनपातोऽस्यां वर्तते श्यैनम्पाता । तैलम्पाता ।

घञ इति किम् ? श्येनपतनमस्यां वर्तते । क्रियेति किम् ? प्राकारोऽस्यां वर्तते ।

अथ समर्थविभक्तिः प्रत्ययार्थश्च कस्मात्पुनरुपादीयते, यावता द्वयमपि प्रकृतमेव ? क्रीडायामित्यनेन तत्सम्बद्धम्, अतस्तदनुवृत्तौ क्रीडानुवृत्तिरपि सम्भाव्येत । सामान्येन चेदं विधानम् । दण्डपातोऽस्यां तिथौ वर्तते दाण्डपाता तिथिः । मौसलपाता तिथिः ।।

<तदधीते तद्वेद ।। 4-2-59 ।।>

तदिति द्वितीयासमर्थाद् `अधीते', `वेद' इत्येतयोरर्थयोर्यथाविहितं प्रत्ययो भवति । छन्दोऽधीते छान्दसः । वैयाकरणः । नैरुक्तः । निमित्तानि वेद नैमित्तः । मौहूर्तः । औत्पातः ।

द्विस्तद्ग्रहणमधीयानविदुषोः पृथग्विधानार्थम् ।।

<क्रतूक्थादिसूत्रान्ताट्ठक् ।। 4-2-60 ।।>

क्रतुविशेषवाचिभ्य उक्थादिभ्यश्च सूत्रान्ताच्च ठक्प्रत्ययो भवति `तदधीते तद्वेद' इत्यस्मिन्विषये । अणोऽपवादः । अग्निष्टोममधीते वेद वा आग्निष्टोमिकः । वाजपेयिकः । उक्थादिभ्यः - औक्थिकः । लौकायतिकः । सूत्रान्तात् - वार्त्तिकसूत्रिकः । साङ्ग्रहसूत्रिकः ।

* सूत्रान्तादकल्पादेरिष्यते * । कल्पसूत्रमधीते काल्पसूत्रः, अणेव भवति । उक्थशब्दः केषुचिदेव सामसु रूढः । यज्ञायज्ञीयात्परेण यानि गीयन्ते, न च तान्यधीयाने प्रत्यय इष्यते, किं तर्हि ? सामलक्षणे औक्थिक्ये वर्तमान उक्थशब्दः प्रत्ययमुत्पादयति । उक्थमधीते, औक्थिकः । औक्थिक्यमधीत इत्यर्थः । औक्थिक्यशब्दाच्च प्रत्ययो न भवत्येव; अनभिधानात् ।

* विद्यालक्षणकल्पसूत्रान्तादिति वक्तव्यम् * (म.भा.2.284)। वायसविद्यिकः । सार्पविद्यिकः । गौलक्षणिकः । आश्वलक्षणिकः । मातृकल्पिकः । पाराशरकल्पिकः ।

विद्या च नाङ्गक्षत्त्रधर्मसंसर्गत्रिपूर्वा * । अङ्गविद्यामधीते आङ्गविद्यः । क्षात्त्रविद्यः । धार्मविद्यः । सांसर्गविद्यः । त्रैविद्यः ।

* आख्यानाख्यायिकेतिहासपुराणेभ्यष्ठग्वक्तव्यः * (म.भा.2.284)। आख्यानाख्यायिकयोरर्थग्रहणम्, इतिहासपुराणयोः स्वरूपग्रहणम् । यावक्रीतिकः । प्रैयङ्गविकः । वासवदत्तिकः । सौमनोत्तरिकः । ऐतिहासिकः । पौराणिकः ।

* सर्वसादेर्द्विगोश्च लः * (म.भा.2.284)। सर्ववेदः । सर्वतन्त्रः । सादेः - सवार्त्तिकः । ससङ्ग्रहः । द्विगोः - द्विवेदः । पञ्चव्याकरणः ।

* अनुसूर्लक्ष्यलक्षणे च * (म.भा.2.284)। अनुसूर्नाम ग्रन्थः, तमधीते आनुसुकः । लाक्षिकः । लाक्षणिकः ।

* इकन्बहुलं पदोत्तरपदात् * पूर्वपदिकः ।

* शतषष्टेः षिकन् पथो बहुलम् * (म.भा.2.284)। शतपथिकः । शतपथिकी । षष्टिपथिकः । षष्टिपथिकी । बहुलग्रहणादणपि भवति - शातपथः, षाष्टिपथः ।

उक्थ । लोकायत । न्याय । न्यास । निमित्त । पुनरुक्त । निरुक्त । यज्ञ । चर्चा । धर्म । क्रमेतर । श्लक्ष्ण । संहिता । पद । क्रम । सङ्घात । वृत्ति । सङ्ग्रह । गुणागुण । आयुर्वेद । * सूत्रान्तादकल्पादेः * (ग.सू.83)* विद्यालक्षणकल्पान्तात्*(ग.सू.84) । * विद्या चानङ्गक्षत्त्रधर्मसंसर्गत्रिपूर्वा *(ग.सू.85)। * आख्यानाख्यायिकेतिहासपुराणेभ्यष्ठक् *(ग.सू.86)। * सर्वसादेर्द्विगोश्च लः *(ग.सू.87)। * अनुसूर्लक्ष्यलक्षणे च *(ग.सू.88)। * द्विपदी---ज्योतिषि *(ग.सू.89)। अनुपद । अनुकल्प । अनुगुण । * इकन्बहुलं पदोत्तरपदात् *(ग.सू.90)। * शतषष्टेः षिकन् पथो बहुलम् *(ग.सू.91)।।

<क्रमादिभ्यो वुन् ।। 4-2-61 ।।>

`क्रम' इत्येवमादिभ्यः शब्देभ्यो वुन्प्रत्ययो भवति `तदधीते तद्वेद' इत्यस्मिन्विषये । अणोऽपवादः । क्रमकः । पदकः ।

क्रम । पद । शिक्षा । मीमांसा । सामन् ।।

<अनुब्राह्मणादिनिः ।। 4-2-62 ।।>

अनुब्राह्मणशब्दादिनिः प्रत्ययो भवति `तदधीते तद्वेद' इत्यस्मिन्विषये । अणोऽपवादः । ब्राह्मणसदृशोऽयं ग्रन्थोऽनुब्राह्मणम् । तदधीते अनुब्राह्मणी, अनुब्राह्मणिनौ, अनुब्राह्मणिनः ।

मत्वर्थे "अत इनिठनौ"(5.2.115/1922) इति इनिना सिद्धम् ? तत्रैतस्माट्ठन्नपि प्राप्नोति । अनभिधानान्न भविष्यति ? अमो निवृत्त्यर्थं तर्हि वचनम् ।।

<वसन्तादिभ्यष्ठक् ।। 4-2-63 ।।>

`वसन्त' इत्येवमादिभ्यष्ठक्प्रत्ययो भवति `तदधीते तद्वेद' इत्यस्मिन्विषये । अणोऽपवादः । वसन्तसहचरितोऽयं ग्रन्थो वसन्तः, तमधीते वासन्तिकः । वार्षिकः ।

वसन्त । वर्षाशरदम् । हेमन्त । शिशिर । प्रथम । गुण । चरम । अनुगुण । अपर्वन् । अथर्वन् ।।

<प्रोक्ताल्लुक् ।। 4-2-64 ।।>

प्रोक्तसहचरितः प्रत्ययः `प्रोक्तः' । प्रोक्तप्रत्ययान्तादध्येतृवेदित्रोरुत्पन्नस्य लुग्भवति । पाणिनिना प्रोक्तं पाणिनीयम्, तदधीते पाणिनीयः ।

आपिशलः । स्त्रियां स्वरे च विशेषः - पाणिनीया ब्राह्मणी ।।

<सूत्राच्च कोपधात् ।। 4-2-65 ।।>

सूत्रवाचिनः ककारोपधादुत्पन्नस्य प्रत्ययस्य लुग्भवति । अप्रोक्तार्थ आरम्भः । पाणिनीयमष्टकं सूत्रम्, तदधीते अष्टकाः पाणिनीयाः। दशका वैयाघ्रपदीयाः । त्रिकाः काशकृत्स्नाः ।

* सङ्ख्याप्रकृतेरिति वक्तव्यम् * (म.भा.2.285)। इह मा भूत् - महावार्त्तिकं सूत्रमधीते माहावार्त्तिकः । कालापकमधीते कालापकः ।

कोपधादिति किम् ? चतुष्टयमधीते चातुष्टयः ।।

<छन्दोब्राह्मणानि च तद्विषयाणि ।। 4-2-66 ।।>

प्रोक्तग्रहणमनुवर्तते । छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाण्येव भवन्ति । अध्येतृवेदितृप्रत्ययविषयाणि । अनन्यभावो विषयार्थः, तेन स्वातन्त्र्यमुपाध्यन्तरयोगो वाक्यं च निवर्तते । कठेन प्रोक्तमधीयते कठाः । मौदाः । पैप्पलादाः । आर्चाभिनः । वाजसनेयिनः ।

ब्राह्मणानि खल्वपि - ताण्डिनः । भाल्लविनः । शाट्यायनिनः । ऐतरेयिणः ।

ब्राह्मणग्रहणं किम्, यावता छन्द एव तद् ? ब्राह्मणविशेषप्रतिपत्त्यर्थम्, इह तद्विषयता मा भूत् - याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि याज्ञवल्क्यानि । सौलभानि (म.भा.2.285)।

चकारोऽनुक्तसमुच्चयार्थः । कल्पे - काश्यपिनः । कौशिकिनः । सूत्रे - पाराशरिणो भिक्षवः । शैलालिनो नटाः (म.भा.2.286)। कर्मन्दिनः । कृशाश्विनः ।

छन्दोब्राह्मणानीति किम् ? पाणिनीयं व्याकरणम् । पैङ्गी कल्पः ।।

<तदस्मिन्नस्तीति देशे तन्नाम्नि ।। 4-2-67 ।।>

`तत्' इति प्रथमा समर्थविभक्तिः । `अस्मिन्' इति प्रत्ययार्थः । `अस्ति' इति प्रकृत्यर्थविशेषणम् । इतिकरणो विवक्षार्थः । `देशेतन्नाम्नि' इति प्रत्ययार्थविशेषणम् । तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत्प्रथमासमर्थमस्ति चेत्तद्भवति, यदस्मिन्निति निर्दिष्टं देशश्चेत्स तन्नामा भवति - प्रत्ययान्तनामा, इतिकरणस्ततश्चेद्विवक्षा । उदुम्बरा अस्मिन् देशे सन्ति औदुम्बरः । बाल्बजः । पार्वतः । मत्वर्थीयापवादो योगः ।।

<तेन निर्वृत्तम् ।। 4-2-68 ।।>

`तेन' इति तृतीयासमर्थात् `निर्वृत्तम्' इत्यस्मिन्विषये यथाविहितं प्रत्ययो भवति देशनामधेये गम्यमाने । `देशे तन्नाम्नि'(4.4.67-70) इति चतुर्ष्वपि योगेषु सम्बध्यते । सहस्रेण निर्वृत्ता साहस्री परिखा । कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी । हेतौ कर्तरि च यथायोगं तृतीया समर्थविभक्तिः ।।

<तस्य निवासः ।। 4-2-69 ।।>

`तस्य' इति षष्ठीसमर्थात् `निवासः' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति देशनामधेये गम्यमाने । निवसत्यस्मिन्निति निवासः । ऋजुनावां निवासो देश आर्जुनावो देशः । शैबः । औदिष्ठः ।।

<अद्रभवश्च ।। 4-2-70 ।।>

पूर्वा समर्थविभक्तिरनुवर्तते । तस्येति षष्ठीसमर्थाद् `अदूरभवः' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । विदिश्या अदूरभवं नगरं वैदिशम् । हैमवतम् । चकारः पूर्वेषां त्रयाणामर्थानामिह सन्निधानार्थः । तेनोत्तरेषु चत्वारोऽप्यर्थाः सम्बद्ध्यन्ते ।।

<ओरञ् ।। 4-2-71 ।।>

चत्त्वारोऽर्था(4.2.67-70) अनुवर्तन्ते । उवर्णान्तात्प्रातिपदिकाद्यथाविहितं समर्थविभक्तियुक्तादञ् प्रत्ययो भवति `तदस्मिन्नस्ति' इत्येवमादिष्वर्थेषु ।

अणोऽपवादः । अरडु - आरडवम् । कक्षतु - काक्षतवम् । कर्कटेलु - कार्कटेलवम् । नद्यास्तु परत्वान्मतुब्भवति - इक्षुमती ।

अञधिकारः - प्राक् सुवास्त्वादिभ्योऽणः(4.2.77/1289) ।।

<मतोश्च बह्वजङ्गात् ।। 4-2-72 ।।>

बह्वज् अङ्गं यस्यासौ बह्वजङ्गो मतुप्, तदन्तात्प्रातिपदिकादञ्प्रत्ययो भवति चातुरर्थिकः । अणोऽपवादः । ऐषुकावतम् । सैध्रकावतम् ।।

बह्वजङ्गादिति किम् ? आहिमतम् । यावमतम् ।

अङ्गग्रहणं बह्वजिति तद्विशेषणं यथा विज्ञायते, मत्वन्तविशेषणं मा विज्ञायीति । मालावतां निवासो मालावतम् ।।

<बह्वचः कूपेषु ।। 4-2-73 ।।>

बह्वचः प्रातिपदिकादञ् प्रत्ययो भवति चातुरर्थिकः कूपेष्वभिधेयेषु । अणोऽपवादः । यथासम्भवमर्थाः सम्बध्यन्ते । दीर्घवरत्रेण निर्वृत्तः कूपः, दैर्घवरत्रः । कापिलवरत्रः ।।

<उदक्च विपाशः ।।। 4-2-74 ।।>

विपाश उत्तरे कूले ये कूपास्तेष्वभिधेयेष्वञ् प्रत्ययो भवति चातुरर्थिकः । अणोऽपवादः । अबह्वजर्थ आरम्भः । दत्तेन निवृत्तः कूपो दात्तः । गौप्तः ।

उदगिति किम् ? दक्षिणतो विपाशः ।

कूपेष्वणेव - दात्तः । गौप्तः । स्वरे विशेषः । महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य ! ।।

<सङ्कलादिभ्यश्च ।। 4-2-75 ।।>

`कूपेषु' इति निवृत्तम् । `सङ्कल' इत्येवमादिभ्योऽञ् प्रत्ययो भवति चातुरर्थिकः । अणोऽपवादः । यथासम्भवमर्थसम्बन्धः । सङ्गतः कलः सङ्कलः, सङ्कलेन निवृत्तः साङ्कलः । पौष्कलः ।

सङ्कल । पुष्कल । उद्वप । उडुप । उत्पुट । कुम्भ । विधान । सुदक्ष । सुदत्त । सुभूत । सुनेत्र । सुपिङ्गल । सिकता । पूतीकी । पूलास । कूलास । पलाश । निवेश । गवेष । गम्भीर । इतर । शर्मन् । अहन् । लोमन् । वेमन् । वरुण । बहुल । सद्योज । अभिषिक्त । गोभृत् । राजभृत् । गृह । भृत । भल्ल । माल । वृत् ।।

<स्त्रीषु सौवीरसाल्वप्राक्षु ।। 4-2-76 ।।>

`देशे तन्नाम्नि' इत्यस्य विशेषणम् - सौवीरादयः, स्त्रीत्वं च । ङ्याप्प्रातिपदिकादञ् प्रत्ययो भवति चातुरर्थिकः । अणोऽपवादः । सौवीरे स्त्रीलिङ्गे देशे वाच्ये साल्वे प्राचि । सौवीरे तावत् - दत्तामित्त्रेण निर्वृत्ता नगरी दात्तामित्त्री । साल्वे - विधूमाग्निना निर्वृत्ता वैधूमाग्नी । प्राचि खल्वपि - ककन्देन निर्वृत्ता काकन्दी । माकन्दी । माणिचरी । जारुषी ।।

<सुवास्त्वादिभ्योऽण् ।। 4-2-77 ।।>

`सुवास्तु' इत्येवमादिभ्योऽण् प्रत्ययो भवति चातुरर्थिकः । अञ उवर्णान्तलक्षणस्य कूपलक्षणस्य चापवादः । सुवास्तोरदूरभवं नगरं सौवास्तवम् । वार्णवम् ।

अण्ग्रहणं नद्यां मतुपो बाधनार्थम् । सौवास्तवी नदी ।

सुवास्तु । वर्णु । भण्डु । खण्डु । सेचालिन् । कर्पूरिन् । शिखण्डिन् । गर्त । कर्कश । शटीकर्ण । कृष्ण । कर्क । कर्कन्धूमती । गोह्य । अहिसक्थ । वृत् ।।

<रोणी ।। 4-2-78 ।।>

रोणीशब्दादण्प्रत्ययो भवति चातुरर्थिकः । यथासम्भवमर्थसम्बन्धः । कूपलक्षणस्याञोऽपवादः । रोणीति कोऽयं निर्देशः, यावता प्रत्ययविधौ पञ्चमी युक्ता ? सर्वावस्थप्रतिपत्त्यर्थमेवमुच्यते - रोणीशब्दः सर्वावस्थोऽण्प्रत्ययमुत्पादयति, केवलस्तदन्तश्च । रौणः । आजकरोणः । सैंहिकरोणः ।।

<कोपधाच्च ।। 4-2-79 ।।>

ककारोपधाच्च प्रातिपदिकादण्प्रत्ययो भवति चातुरर्थिकः । यथासम्भवमर्थसम्बन्धः । कूपलक्षणस्योवर्णलक्षणस्य चाञोऽपवादः । कार्णच्छिद्रिकः कूपः । कार्णवेष्टकः । कृकवाकुना निर्वृत्तं कार्कवाकवम् । त्रैशङ्कवम् ।।

<वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः ।। 4-2-80 ।।>

वुञादयः सप्तदश प्रत्ययाः, अरीहणादयोऽपि सप्तदशैव प्रातिपदिकगणाः । आदिशब्दः प्रत्येकमभिसम्बध्यते । तत्र यथासङ्ख्यं सप्तदशभ्यः प्रातिपदिकगणेभ्यः सप्तदश प्रत्यया भवन्ति चातुरर्थिकाः । अणोऽपवादः । यथासम्भवमर्थसम्बन्धः । अरीहणादिभ्यो वुञ्प्रत्ययो भवति । आरीहणकम् । द्रौघणकम् ।

अरीहण । द्रुघण । खदिर । सार । भगल । उलन्द । साम्परायण । क्रौष्ट्रायण । भास्त्रायण । मैत्त्रायण । त्रैगर्त्तायन । रायस्पोष । विपथ । उद्दण्ड । उदञ्चन । खाडायन । खण्ड । वीरण । काशकृत्स्न । जाम्बवन्त । शिंशपा । किरण । रैवत । बैल्व । वैमतायन । सौसायन । शाण्डिल्यायन । शिरीष । बधिर । अरीहणादिः ।।

कृशाश्वावादिभ्यश्छण्प्रत्ययो भवति । कार्शाश्वीयः । आरिष्टीयः ।

कृशाश्व । अरिष्ट । अरीश्व । वेश्मन् । विशाल । रोमक । शबल । कूट । रोमन् । वर्वर । सुकर । सूकर । प्रतर । सदृश । पुरग । सुख । धूम । अजिन । विनता । अवनत । विकुघास । अरुस् । अवयास । मौद्गल्य । कृशाश्वादिः ।।

ऋश्यादिभ्यः कः प्रत्ययो भवति । ऋश्यक । न्यग्रोधकः ।

ऋश्य । न्यग्रोध । शिरा । निलीन । निवास । निधान । निवात । निबद्ध । विबद्ध । परिगूढ । उपगूढ । उत्तराश्मन् । स्थूलबाहु । खदिर । शर्करा । अनडुह । परिवंश । वेणु । वीरण । ऋश्यादिः ।।

कुमुदादिभ्यष्ठच्प्रत्ययो भवति । कुमुदिकम् । शर्करिकम् ।
कुमुद । शर्करा । न्यग्रोध । इत्कट । गर्त । बीज । अश्वत्थ । बल्वज । परिवाप । शिरीष । यवाष । कूप । विकङ्कत । कुमुदादिः ।।
काशादिभ्य इलः प्रत्ययो भवति । काशिलम् । वाशिलम् ।
काश । वाश । अश्वत्थ । पलाश । पीयूष । विश । तृण । नर । चरण । कर्दम । कर्पूर । कण्टक । गृह । काशादिः ।
तृणादिभ्यः शः प्रत्ययो भवति । तृणशः । नडशः ।
तृण । नड । बुस । पर्ण । वर्ण । चरण । अर्ण । जन । बल । लव । वन । तृणादिः ।
प्रेक्षादिभ्य इनिप्रत्ययो भवति । प्रेक्षी । हलकी ।
प्रेक्षा । हलका । बन्धुका । ध्रुवका । क्षिपका । न्यग्रोध । इर्कुट । प्रेक्षादिः ।
अश्मादिभ्यो रप्रत्ययो भवति । अश्मरः ।
अश्मन् । यूष । रूष । मीन । दर्भ । वृन्द । गुड । खण्ड । नग । शिखा । अश्मादिः ।
सख्यादिभ्यो ढञ् प्रत्ययो भवति । साखेयम् । साखिदत्तेयम् ।
सखि । सखिदत्त । वायुदत्त । गोहित । भल्ल । पाल । चक्रपाल । चक्रवाल । छगल । अशोक । करवीर । सीकर । सकर । सरस । समल । सख्यादिः ।
सङ्काशादिभ्यो ण्यप्रत्ययो भवति । साङ्काश्यम् । काम्पिल्यम् ।
संकाश । काम्पिल्य । समीर । कश्मर । शूरसेन । सुपथिन् । सक्थच । यूप । अंश । एग । अश्मन् । कूट । मलिन । तीर्थ । अगस्ति । बिरत । चिकार । विरह । नासिका । सङ्काशादिः ।
बलादिभ्यो यः प्रत्ययो भवति । बल्यः। कुल्यम् ।
बल । वुल । तुल । उल । डुल । कवल । वन । कुल । बलादिः ।।
पक्षादिभ्यः फक् प्रत्ययो भवति । पाक्षायणः । तौषायनः ।
पक्ष । तुष । अण्ड। कम्बलिक । चित्र । अश्मन् । अतिस्वन् । पथिन्पन्थच । पक्षादिः ।
कर्णादिभ्यः फिञ्प्रत्ययो भवति । कार्णायनिः । वासिष्ठायनिः ।
कर्ण । वसिष्ठ । अलुश । शल । डुपद । अनडुह्य । पाञ्चजन्य । स्थिरा । कुलिश । कुम्भी । जीवन्ती । जित्व । आण्डीवत् । कर्णादिः ।
सुतङ्गमादिभ्य इञ्प्रत्ययो भवति । सौतङ्गमिः । मौनिचित्तिः ।
सुतङ्गम । मुनिचित्त । विप्रचित्त । महापुत्र । श्वेत । गडिक । शुक्र । विग्र । बीजवापिन् । श्वन् । अर्जुन । अजिर । जीव । सुतङ्गमादिः ।
प्रगदिन्नादिभ्यो ञ्यः प्रत्ययो भवति । प्रागद्यम् ।
प्रगदिन् । मगदिन् । शरदिन् । कलिव । खडिव । गडिव । चूडार । मार्जार । कोविदार । प्रगद्यादिः ।
वराहादिभ्यः कक् प्रत्ययो भवति । वाराहकम् । पालाशकम् ।
वराह । पलाश । शिरीष । पिनद्ध । स्थूण। विदग्ध । विजग्ध । विभग्न । बाहु । खदिर। शर्करा । वराहादिः ।।
कमुदादिभ्यष्ठक् प्रत्ययो भवति । कौमुदिकम् ।
कुमुद । गोमथ । रथकार । दशग्राम । अश्वत्थ । शाल्मली । कुण्डल । मुनिस्थूल । कूट । मुचुकर्ण । कुमुदादिः ।
शिरीषशब्दोऽरीहणादिषु कुमुदादिषु वराहादिषु च पठ्यते, औत्सर्गिकोऽपि तत इष्यते, तस्य च वरणादिषु दर्शनाल्लुब्भवति । तथा चोक्तम् -
शिरीषाणामदूरभवो ग्रामः शिरीषाः, तस्य वनं शिरीषवनमिति ।।

<जनपदे लुप् ।। 4-2-81 ।।>

`देशे तन्नाम्नि' इति यश्चातुरर्थिकः प्रत्ययो भवति, तस्य देशविशेषे जनपदेऽभिधेये लुब्भवति । ग्रामसमुदायः = जनपदः । पञ्चालानां निवासो जनपदः पञ्चालाः। कुरवः । मत्स्याः । अङ्गाः । वङ्गाः । मगधाः । सुह्माः । पुण्ड्राः ।
इह कस्मान्न भवति - उदुम्बरा अस्मिन्सन्ति, औदुम्बरो जनपदः, वैदिशो जनपद इति ? तन्नाम्नीति वर्त्तते । न चात्र लुबन्तं तन्नामधेयं भवति ।।

<वरणादिभ्यश्च ।। 4-2-82 ।।>

`वरण' इत्येवमादिभ्य उत्पन्नस्य चातुरर्थिकस्य प्रत्ययस्य लुब्भवति । अजनपदार्थ आरम्भः । वरणानामदूरभवं नगरं वरणाः । शृङ्गी । शाल्मलयः । चकारोऽनुक्तसमुच्चयार्थ आकृतिगणतामस्य बोधयति । कटुकबदर्या अदूरभवो ग्रामः कटुकबदरी । शिरीषाः काञ्ची ।
वरणाः । पूर्वौ गौदौ । आलिङ्ग्यायन । पर्णी । शृङ्गी । शाल्मलयः । सदाण्वी । वणिकि । वणिक । जालपद । मथुरा । उज्जयिनी । गया । तक्षशिला । उरशा । आकृत्या ।।

<शर्कराया वा ।। 4-2-83 ।।>

शर्कराशब्दादुत्पन्नस्य चातुरर्थिकस्य प्रत्ययस्य वा लुब्भवति ।
वाग्रहणं किम्, यावता शर्कराशब्दः कुमुदादिषु वराहादिषु च पठ्यते, तत्र पाठसामर्थ्यात्प्रत्ययस्य पक्षे श्रवणं भविष्यति ? एवं तर्हि एतज्ज्ञापयति - शर्कराशब्दादौत्सर्गिको भवति, तस्यायं विकल्पितो लुबिति । शर्करा । शार्करम् । गणपाठाच्च श्रवणम्, उत्तरसूत्रे विहितौ च द्वौ प्रत्ययौ । तदेवं षड् रूपाणि भवन्ति - शर्करा, शार्करम्, शर्करिकम्, शार्करकम्, शार्करिकम्, शर्करीयमिति ।।

<ठक्छौ च ।। 4-2-84 ।।>

शर्कराशब्दाट्ठक्, छ इत्येतौ प्रत्ययौ भवतश्चातुर्थिकौ । यथासम्भवमर्थसम्बन्धः । शार्करिकम् । शर्करीयम् ।।

<नद्यां मतुप् ।। 4-2-85 ।।>

नद्यामभिधेयायां मतुप्प्रत्ययो भवति चातुरर्थिकः । तन्नाम्नो देशस्य विशेषणं नदी । उदुम्बरा यस्यां सन्ति उदुम्बरावती । मशकावती । वीरणावती । पुष्करावती । इक्षुमती । द्रुमती ।

इह कस्मान्न भवति - भागीरथी, भैमरथी ? मतुबन्तस्यातन्नामधेयत्वात् ।

<मध्वादिभ्यश्च ।। 4-2-86 ।।>

`मधु' इत्येवमादिभ्यः शब्देभ्यो मतुप्प्रत्ययो भवति चातुरर्थिकः । अनद्यर्थ आरम्भः । मधुमान् । विसवान् ।

मधु । विस । स्थाणु । मुष्टि । इक्षु । वेणु । रम्य । ऋक्ष । कर्कन्धु । शमी । किरीर । हिम । किशरा । शर्पणा । मरुत् । मरुव । दार्वाघाट । शर । इष्टका । तक्षशिला । शक्ति । आसन्दी । आसुति । शलाका । आमिधी । खडा । वेटा । मध्वादिः ।।

<कुमुदनडवेतसेभ्यो ड्मतुप् ।। 4-2-87 ।।>

`कुमुद', `नड', `वेतस' इत्येतेभ्यः शब्देभ्यो ड्मतुप् प्रत्ययो भवति चातुरर्थिकः । कुमुद्वान् । नड्वान् । वेतस्वान् ।

* महिषाच्चेति वक्तव्यम् * (म.भा.2.288)। महिष्मान्नाम देशः ।।

<नडशादाड् ड्वलच् ।। 4-2-88 ।।>

नडशादशब्दाभ्यां ड्वलच् प्रत्ययो भवति चातुरर्थिकः । यथासम्भवमर्थसम्बन्धः । नड्वलम् । शाद्वलम् ।।

<शिखाया वलच् ।। 4-2-89 ।।>

शिखाशब्दाद्वलच् प्रत्ययो भवति चातुरर्थिकः । यथासम्भवमर्थसम्बन्धः । शिखावलं नाम नगरम् । मतुप्प्रकरणेऽपि शिखाया वलच(5.2.113/1920) वक्ष्यति, तददेशार्थं वचनम् ।।

<उत्करादिभ्यश्छः ।। 4-2-90 ।।>

उत्कर इत्येवमादिभ्यश्छः प्रत्ययो भवति चातुरर्थिकः । यथासम्भवमर्थसम्बन्धः । उत्करीयम् । शफरीयम् ।

उत्कर । सम्फल । शफर । पिप्पल । पिप्पलीमूल । अश्मन् । अर्क । पर्ण । सुपर्ण । खलाजिन । इडा । अग्नि । तिक । कितव । आतप । अनेक । पलाश । तृणव । पिचुक । अश्वत्थ । शकाक्षुद्र । भस्त्रा । विशाला । अवरोहित । गर्त्त । शाल । अन्य । जन्या । अजिन । मञ्च । चर्मन् । उत्क्रोश । शान्त । खदिर । शूर्पणाय । श्यावनाय । नैव । बक । नितान्त । वृक्ष । इन्द्रवृक्ष । आर्द्रवृक्ष । अर्जुनवृक्ष । उत्करादिः ।।

<नडादीनां कुक् च ।। 4-2-91 ।।>

`नड' इत्येवमादीनां कुगागमो भवति, छश्च प्रत्ययश्चातुरर्थिकः । यथासम्भवमर्थसम्बन्धः । नडकीयम् । प्लक्षकीयम् ।

नड । प्लक्ष । बिल्व । वेणु । वेत्र । वेतस । तृण । इक्षु । काष्ठ । कपोत । * क्रुञ्चाया ह्रस्वत्वं च * (ग.सू.92)। * तक्षन्नलोपश्च * (ग.सू.93)।

<शेषे ।। 4-2-92 ।।>

`शेषे' इत्यधिकारोऽयम् । यानित ऊर्ध्वं प्रत्ययाननुक्रमिष्यामः, शेषेऽर्थे ते वेदितव्याः ।

उपयुक्तादन्यः शेषः । अपत्यादिभ्यश्चतुरर्थपर्यन्तेभ्योऽन्योऽर्थः शेषः (म.भा.2.291)। तस्येदंविशेषा ह्यपत्यसमूहादयः, तेषु घादयो मा भूवन्निति शेषाधिकारः क्रियते ।

किञ्च - सर्वेषु जातादिषु घादयो यथा स्युरनन्तरेणैवार्थादेशेन सम्बन्धित्वेन कृतार्थता मा ज्ञायीति साकल्यार्थं शेषवचनम् । वक्ष्यति - "राष्ट्रावारपाराद् घखौ"(4.2.93/1313) । राष्ट्रियः । अवारपारीणः । `शेषे' इति लक्षणं चाधिकारश्च । चक्षुषा गृह्यते चाक्षुषं रूपम् । श्रावणः शब्दः । दृषदि पिष्टाः दार्षदाः सक्तवः । उलूखले क्षुण्णः औलूखलो यावकः । अश्वैरुह्यते आश्वो रथः । चतुर्भिरुह्यते चातुरं शकटम् । चतुर्दश्यां दृश्यते चातुर्दशं रक्ष इति ।।

<राष्ट्रावारपाराद् घखौ ।। 4-2-93 ।।>

`राष्ट्र' `अवारपार' इत्येताभ्यां यथासङ्ख्यं घ-खावित्येतौ प्रत्ययौ भवतः । राष्ट्रियः । अवारपारीणः । * विगृहीतादपीष्यते * (म.भा.2.291)अवारीणः । पारीणः । * विपरीताच्च * (म.भा.2.291)पारावारीणः ।

प्रकृतिविशेषोपादानमात्रेण तावत्प्रत्यया विधीयन्ते । तेषां तु जातादयोऽर्थाः समर्थविभक्तयश्च पुरस्ताद्वक्ष्यन्ते ।

<ग्रामाद्यखञौ ।। 4-2-94 ।।>

ग्रामशब्दाद्य, खञ् इत्येतौ प्रत्ययौ भवतः । ग्राम्यः । ग्रामीणः ।।

<कत्त्र्यादिभ्यो ढकञ् ।। 4-2-95 ।।>

`कत्त्रि' इत्येवमादिभ्यो ढकञ् प्रत्ययो भवति । कात्त्रेयकः । औम्भेयकः ।

कत्त्रि । उम्भि । पुष्कर । पुष्कल । मोदन । कुम्भी । कुण्डिन । नगर । वञ्जी । भक्ति । माहिष्मती । चर्मण्वती । ग्राम । उख्या । * कुड्याया यलोपश्च *(ग.सू.94) । कत्त्र्यादिः ।।

<कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु ।। 4-2-96 ।।>

कुलकुक्षिग्रीवाशब्देभ्यो यथासङ्ख्यं `श्वन्', `असि', `अलङ्कार' इत्येतेषु जातादिष्वर्थेषु ढकञ् प्रत्ययो भवति । कौलेयको भवति श्वाचेत्, कौलोऽन्यः । कौक्षेयको भवत्यसिश्चेत्, कौक्षोऽन्यः । ग्रैवेयको भवत्यलङ्कारश्चेत्, ग्रैवोऽन्यः ।।

<नद्यादिभ्यो ढक् ।। 4-2-97 ।।>

`नदी' इत्येवमादिभ्यो ढक् प्रत्ययो भवति । नादेयम् । माहेयम् ।

पूर्वनगरीशब्दोऽत्र पठ्यते । पौर्वनगरेयम् ।

केचित्तु पूर्वनगिरीति पठन्ति, विच्छिद्य च प्रत्ययं कुर्वन्ति - पौरेयम्, वानेयम्, गैरेयमिति; तदुभयमपि दर्शनं प्रमाणम् ।

नदी । मही । वाराणसी । श्रावस्ती । कौशाम्बी । नवकौशाम्बी । काशफरी । खादिरी । पूर्वनगरी । पावा । मावा । साल्वा । दार्वा । दाल्वा । वासेनकी । * वडवाया वृषे* (ग.सू.95) ।।

<दक्षिणापश्चात्पुरसस्त्यक् ।। 4-2-98 ।।>

दक्षिणा, पश्चात्, पुरस् इत्येतेभ्यस्त्यक् प्रत्ययो भवति शैषिकः । दाक्षिणात्यः । पाश्चात्त्यः । पौरस्त्यः ।

<कापिश्याः ष्फक् ।। 4-2-99 ।।>

कापिशीशब्दात् ष्फक् प्रत्ययो भवति शैषिकः । षकारो ङीषर्थः । कापिशायनं मधु । कापिशायनी द्राक्षा ।।

* बाह्ल्युर्दिपर्दिभ्यश्चेति वक्तव्यम् * (म.भा.2.292)। बाह्लायनी । और्दायनी । पार्दायनी ।।

<रङ्कोरमनुष्येऽण् च ।। 4-2-100 ।।>

रङ्कुशब्दादण् प्रत्ययो भवति, चकारात्ष्फक्च शैषिकोऽमनुष्येऽभिधेये । राङ्कवो गौः । राङ्कवायणो गौः ।

अमनुष्य इति किम् ? राङ्कवको मनुष्यः ।

ननु च रङ्कुशब्दः कच्छादिषु पठ्यते, तत्र च "मनुष्यतत्स्थयोर्वुञ्"(4.2.134/1358) इति मनुष्ये परत्वाद्वुञैव भवितव्यम्, कच्छादिपाठादमनुष्येऽणपि सिद्धः, किमिह मनुष्यप्रतिषेधेनाण्ग्रहणेन च ? तदुच्यते; नैवायं मनुष्यप्रतिषेधः, किं तर्हि ? नञिवयुक्तन्यायेन मनुष्यसदृशे प्राणिनि प्रतिपत्तिः क्रियते । तेन राङ्कवः, कम्बल इति ष्फग्न भवति ।

विशेषविहितेन च ष्फकाऽणो बाधा मा भूदित्यण्ग्रहणमपि क्रियते ।।

<द्युप्रागपागुदक्प्रतीचो यत् ।। 4-2-101 ।।>

दिव, प्राच्, अपाच्, उदच्, प्रत्यच् इत्येतेभ्यो यत्प्रत्ययो भवति शैषिकः । दिव्यम् । प्राच्यम् । अवाच्यम् । उदीच्यम् प्रतीच्यम् ।

अव्ययात्तु कालवाचिनः परत्वात् ट्युट्युलौ भवतः । प्राक्तनम् ।

<कन्थायाष्ठक् ।। 4-2-102 ।।>

कन्थाशब्दाट्ठक् प्रत्ययो भवति शैषिकः । कान्थिकः ।।

<वर्णौ वुक् ।। 4-2-103 ।।>

`कन्थायाः' इत्येव । वर्णौ या कन्था तस्या वुक् प्रत्ययो भवति शैषिकः । ठकोऽपवादः । वर्णुर्नाम नदस्तत्समीपो देशो वर्णुः । तद्विषयार्थवाचिनः कन्थाशब्दादयं प्रत्ययः । तथाहि जातं हिमवत्सु कान्थकम् ।

<अव्ययात्त्यप् ।। 4-2-104 ।।>

अव्ययात् त्यप् प्रत्ययो भवति शैषिकः ।

`अमेहक्वतसित्रेभ्यस्त्यब्विधिर्योऽव्ययात्स्मृतः ।

निनिर्भ्यां ध्रुवगत्योश्च प्रवेशो नियमे तथा '।।(म.बा.2.292)

अमात्यः । इहत्यः । क्वत्यः । इतस्त्यः । तत्रत्यः । यत्रत्यः ।

परिगणनं किम् ? औपरिष्टः । पौरस्तः । पारस्तः । वृद्धात्तु छो भवति - आरातीयः ।

* त्यब्नेर्ध्रुवे * (म.भा.2.293)। नियतं ध्रुवम् - नित्यम् ।

* निसो गते * (म.भा.2.293)। निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चण्डालादिः ।

* आविसश्छन्दसि * (म.भा.2.293)। आविस् शब्दाच्छन्दसि त्यप्प्रत्ययो भवति । `आविष्ट्यो वर्द्धते चारुरासु'(ऋ.1.95.5)।

* अरण्याण्णो वक्तव्यः * (म.भा.2.293)। आरण्याः सुमनसः ।

* दूरादेत्यः * (म.भा.2.293)। दूरेत्यः पथिकः ।

* उत्तरादाहञ् । * (म.भा.2.293)। औत्तराहम् ।।

<ऐषमोह्यः श्वसोऽन्यतरस्याम् ।। 4-2-105 ।।>

ऐषमस्, ह्यस्; श्वस् इत्येतेभ्योऽन्यतरस्यां त्यप्प्रत्ययो भवति शैषिकः । ऐषमस्त्यम्, ऐषमस्तनम् । ह्यस्त्यम्, ह्यस्तनम् । श्वस्त्यम्, श्वस्तनम् । "श्वसस्तुट् च"(4.3.15/1385) इति ठञपि तृतीयो भवति - शौवस्तिकम् ।।

<तीररूप्योत्तरपदादञ्ञौ ।। 4-2-106 ।।>

तीरोत्तरपदाद् रूप्योत्तरपदाच्च प्रातिपदिकाद् यथासङ्ख्यमञ्, ञ इत्येतौ प्रत्ययौ भवतः शैषिकौ । अणोऽपवादौ । काकतीरम् । पाल्वलतीरम् ।

रूप्योत्तरपदात् - वार्करूप्यम् । शैवरूप्यम् । तीररूप्यान्तादिति नोक्तम्, बहुच्प्रत्ययपूर्वाद् मा भूदिति । बाहुरूप्यम् । अणेव भवति ।।

<दिक्पूर्वपदादसंज्ञायां ञः ।। 4-2-107 ।।>

असंज्ञायामिति प्रकृतिविशेषणम् । दिक्पूर्वपदात्प्रातिपदिकादसंज्ञाविषयाद् ञः प्रत्ययो भवति शैषिकः । अणोऽपवादः । पौर्वशालः । दाक्षिणशालः । आपरशालः ।

असंज्ञायामिति किम् ? पूर्वैषुकामशमः । अपरैषुकामशमः । "दिक्सङ्ख्ये संज्ञायाम्"(2.1.50/727) इति समासः । "प्राचां ग्रामनगराणाम्"(7.3.14/1400) इत्युत्तरपदवृद्धिः । पदग्रहणं स्वरूपविधिनिरासार्थम् ।।

<मद्रेभ्योऽञ् ।। 4-2-108 ।।>

`दिक्पूर्वपदात्' इत्येव । दिक्पूर्वपदान्मद्रशब्दादञ् प्रत्ययो भवति शैषिकः । पौर्वमद्रः । आपरमद्रः । "दिशो मद्राणाम्"(7.3.13/1399) इति पर्युदासादादिवृद्धिरेव ।।

<उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् ।। 4-2-109 ।।>

दिग्ग्रहणं निवृत्तम् । उदीच्यग्रामवाचिनः प्रातिपदिकाद् बह्वचोऽन्तोदात्ताद् अञ् प्रत्ययो भवति शैषिकः । अणोऽपवादः । शैवपुरम् । माण्डवपुरम् ।।

उदीच्यग्रामादिति किम् ? माथुरम् । बह्वच इति किम् ? ध्वजी । ध्वाजम् । अन्तोदात्तादिति किम् ? शार्करीधानम् । शर्करीधानशब्दे लित्स्वरेण धानशब्द उदात्तः ।।

<प्रस्थोत्तरपदलद्यादिकोपधादण् ।। 4-2-110 ।।>

प्रस्थोत्तरपदात् पलद्यादिभ्यः ककारोपधाच्च प्रातिपदिकादण् प्रत्ययो भवति शैषिकः । उदीच्यग्रामलक्षणस्याञोऽपवादः । माद्रीप्रस्थः । माहकीप्रस्थः ।

पलद्यादिभ्यः - पालदः । पारिषदः । ककारोपधात् - नैलीनकः । चैयातकः । पलद्यादिषु यो वाहीकग्रामस्ततष्ठञ्ञिठयोः (4.2.117/1341)अपवादः, यथा - गौष्ठी, नैतकीति ।

गोमतीशब्दः पठ्यते, ततः "रोपधेतोः प्राचाम्"(4.2.123/2347) इति वुञोऽपवादः । वाहीकशब्दः कोपधोऽपि पुनः पठ्यते परं छं (4.2.114/1337) बाधितुम् । अण्ग्रहणं बाधकबाधनार्थम् ।

पलदी । परिषत् । यकृल्लोमन् । रोमक । कालकूट । पटच्चर । वाहीक । कलकीट । मलकीट । कमलकीट । कमलभिदा । गोष्ठी कमलकीर । बाहुकीट । नैतकी । परिखा । शूरसेन । गोमती । उदयान । पलद्यादिः ।।

<कण्वादिभ्यो गोत्रे ।। 4-2-111 ।।>

गोत्रमिह न प्रत्ययार्थः, न च प्रकृतिविशेषणम् । तर्ह्येवं सम्बध्यते - कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितस्तदन्तेभ्य एवाण् प्रत्ययो भवति शैषिकः । छस्यापवादः । काण्वाश्छात्त्राः । गौकक्षाः ।।

<इञश्च ।। 4-2-112 ।।>

`गोत्रे' इत्येव । गोत्रे य इञ्विहितस्तदन्तात्प्रातिपदिकादण्प्रत्ययो भवति शैषिकः । छस्यापवादः । दाक्षाः । प्लाक्षाः । माहकाः ।

गोत्र इत्येव - सौतङ्गमेरिदं सौतङ्गमीयम् ।।

<न द्व्यचः प्राच्यभरतेषु ।। 4-2-113 ।।>

द्व्यचः प्रातिपदिकात्प्राच्यभरतगोत्रादिञन्तादण् प्रत्ययो न भवति । पूर्वेण प्राप्तः प्रतिषिद्ध्यते । पैङ्गीयाः । प्रौष्ठीयाः । चैदीयाः । पौष्कीयाः । काशीयाः । पाशीयाः ।

द्व्यच इति किम् ? पान्नागाराः । प्राच्यभरतेष्विति किम् ? दाक्षाः ।

काशीया इति कथमुदाहृतम् । यावता काश्यादिभ्यष्ठिञ्ञिठाभ्यां (4.2.116/1340)भवितव्यम् ? नैतदस्ति; देशवाचिनः काशिशब्दस्य तत्र ग्रहणम्, चैदिशब्देन साहचर्यात् । गोत्रात्तु "वृद्धाच्छः"(4.2.114/1337) एव भवति ।

ज्ञापकादन्यत्र प्राच्यग्रहणेन भरतग्रहणं न भवतीति स्वशब्देन भरतानामुपादानं कृतम् ।।

<वृद्धाच्छः ।। 4-2-114 ।।>

`गोत्रे' इति नानुवर्त्तते । सामान्येन विधानम् । वृद्धात्प्रातिपदिकाच्छः प्रत्ययो भवति शैषिकः । अणोऽपवादः । गार्गीयः । वात्सीयः । शालीयः । मालीयः ।

अव्ययतीररूप्योत्तरपदोदीच्यग्रामकोपधविधींस्तु (4.2.104,106,109,110)परत्वाद् बाधते ।।

<भवतष्ठक्छसौ ।। 4-2-115 ।।>

`वृद्धात्' इत्येव । भवच्छब्दात् वृद्धात् ठक्, छस् - इत्येतौ प्रत्ययौ भवतः शैषिकौ छस्यापवादौ । सकारः पदसंज्ञार्थः । भवतस्त्यदादित्वाद् वृद्धसंज्ञा । भावत्कः । भवदीयम् ।

अवृद्धात्तु भवतः शतुरणेव भवति - भावतः ।।

<काश्यादिभ्यष्ठञ्ञिठौ ।। 4-2-116 ।।>
`काशि' इत्येवमादिभ्यः ठञ्, ञिठ इत्येतौ प्रत्ययौ भवतः शैषिकौ । इकार उच्चारणार्थः । ञकार एवोभयत्र विपर्यस्तदेशोऽनुबन्धः । स्त्रीप्रत्यये विशेषः । काशिकी, काशिका । बैदिकी, बैदिका ।
`वृद्धात्' इत्यत्रानुवर्त्तते । ये त्ववृद्धाः पठ्यन्ते, वचनप्रामाण्यात्तेभ्यः प्रत्ययविधिः ।
देवदत्तशब्दः पठ्यते, तस्य "एङ् प्राचां देशे"(1.1.75/1338) इति वृद्धंसज्ञा - दैवदत्तिकः । वाहीकग्रामस्य तु नास्ति वृद्धसंज्ञा - दैवदत्तः । कथं भाष्य उदाहृतम् - `वा नामधेयस्य वृद्धसंज्ञा वेदितव्या; देवदत्तीया, दैवदत्ताः' इति, यावता वृद्धसंज्ञापक्षे काश्यादित्वाट्ठञ्ञिठाभ्यां भवितव्यम् ? तत्रैवं वर्णयन्ति - `वा नामधेयस्येति व्यवस्थितविभाषेयम्, सा छे कर्त्तव्ये भवति, ठञ्ञिठयोर्न भवति' इति ।
काशी । चेदि । संज्ञा । संवाह । अच्युत । मोहमान । शकुलाद । हस्तिकर्षू । कुदामन् । हिरण्य । करण । गोधाशन । भौरिकि । भौलिङ्गि । अरिन्दम । सर्वमित्त्र । देवदत्त । साधुमित्त्र । दासमित्त्र । दासग्राम । सौधावतान । युवराज । उपराज । सिन्धुमित्त्र । देवराज । * आपदादिपूर्वपदात्कालात् * (ग.सू.96)। आपत्कालिकी, आपत्कालिका । और्ध्वकालिकी, और्ध्वकालिका । तात्कालिकी, तात्कालिका ।।
<वाहीकग्रामेभ्यश्च ।। 4-2-117 ।।>
`वृद्धात्' इत्येव । वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ प्रत्ययौ भवतः शैषिकौ छस्यापवादौ । शाकलिकी, शाकलिका । मान्थाविकी, मान्थविका ।।
<विभाषोशीनरेषु ।। 4-2-118 ।।>
`वृद्धात्' इति वर्तते, `वाहीकग्रामेभ्यः' इति च । उशीनरेषु ये वाहीकग्रामास्तद्वाचिभ्यो वृद्धेभ्यः प्रातिपदिकेभ्यो विभाषा ठञ्ञिठौ प्रत्ययौ भवतः । आह्वजालिकी, आह्वजालिका, आह्वजालीया । सौदर्शनिकी, सौदर्शनिका, सौदर्शनीया ।।
<ओर्देशेठञ् ।। 4-2-119 ।।>
`वृद्धात्' इति नानुवर्त्तते, उत्तरसूत्रे पुनर्वृद्धग्रहणात् । उवर्णान्ताद् देशवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः। नैषादकर्षुकः । शाबरजम्बुकः । देश इति किम् ? पटोश्छात्त्राः पाटवाः ।
ठञ्ञिठयोः प्रकरणे ठञः केवलस्यानुवृत्तिर्न लभ्यत इति ठञ्ग्रहणं कृतम् ।।
<वृद्धात्प्राचाम् ।। 4-2-120 ।।>
`ओर्देशे' इत्येव । उवर्णान्ताद् वृद्धात्प्राग्देशवाचिनः प्रातिपदिकाट्ठञ् प्रत्ययो भवति शैषिकः । आढकजम्बुकः । शाकजम्बुकः । नापितवास्तुकः (म.भा.2.297)। पूर्वेणैव ठञि सिद्धे नियमार्थं वचनम् - वृद्धादेव प्राचामवृद्धान्न भवतीति । मल्लवास्तु - माल्लवास्तवः ।।
<धन्वयोपधाद् वुञ् ।। 4-2-121 ।।>
`वृद्धात्' इति वर्तते, देश इति च । धन्ववाचिनो यकारोपधाच्च देशाभिधायिनो वृद्धात्प्रातिपदिकाद् वुञ् प्रत्ययो भवति शैषिकः । धन्वशब्दो मरुदेशवचनः । पारेधन्वकः । ऐरावतकः । योपधात् - साङ्काश्यकः (म.भा.2.297)। काम्पिल्यकः ।।
<प्रस्थपुरवहान्ताच्च ।। 4-2-122 ।।>
`वृद्धात्' इत्येव, `देशे' इति च; अन्तशब्दः प्रत्येकमभिसम्बद्ध्यते । प्रस्थ, पुर, वह इत्येवमन्तादेशवाचिनः प्रातिपदिकाद् वृद्धाद् वुञ्प्रत्ययो भवति शैषिकः । छस्यापवादः । मालाप्रस्थकः । नान्दीपुरकः (म.भा.2.298)। कान्तीपुरकः । पैलुवहकः । फाल्गुनीवहकः ।
पुरान्तो रोपधः, तत उत्तरसूत्रेणैव सिद्धमप्रागर्थमिह ग्रहणम् ।।
<रोपधेतोः प्राचाम् ।। 4-2-123 ।।>
`वृद्धात्' इत्येव, `देशे' इति च । तद्विशेषणं प्राग्ग्रहणम् । रोपधादीकारान्ताच्च प्राग्देशवाचिनो वृद्धाद् वुञ् प्रत्ययो भवति शैषिकः । छस्यापवादः । पाटलिपुत्रकाः । ऐकचक्रकाः । ईतः खल्वपि - काकन्दी, काकन्दकः । माकन्दी, माकन्दकः ।
प्राचामिति किम् ? दात्तामित्त्रीयः ।
तपरकरणं विस्पष्टार्थम् ।।
<जनपदतदवध्योश्च ।। 4-2-124 ।।>
`वृद्धात्' इत्येव, `देशे' इति च । तद्विशेषणं जनपदतदवधी । वृद्धाज्जनपदवाचिनस्तदवधिवाचिनश्च प्रातिपदिकाद् वुञ् प्रत्ययो भवति शैषिकः । छस्यापवादः । आभिसारकः । आदर्शकः । जनपदावधेः खल्वपि - औपुष्टकः । श्यामायनकः ।
तदवधेरपि जनपद एव गृह्यते, न ग्रामः । किमर्थं तर्हि ग्रहणम् ? बाधकबाधनार्थम् । गर्त्तोत्तरपदाच्छं बाधित्वा वुञेव जनपदावधेर्भवति । त्रैगर्त्तकः ।।
<अवृद्धादपि बहुवचनविषयात् ।। 4-2-125 ।।>
`जनपदतदवध्योः' इत्येव । अवृद्धाद्, वृद्धाच्च जनपदात्तदवधिवाचिनश्च बहुवचनविषयात्प्रातिपदिकाद् वुञ्प्रत्ययो भवति शैषिकः । अण्छयोरपवादः । अवृद्धाज्जनपदात्तावत् - अङ्गाः । वङ्गाः । कलिङ्गाः । आङ्गकः । वाङ्गकः । कालिङ्गकः । अवृद्धाज्जनपदावधेः - अजमीढाः । अजक्रन्दाः । आजमीढकः । आजक्रन्दकः । वृद्धाज्जनपदात् - दार्वाः । जाम्ब्वाः । दार्वकः । जाम्ब्वकः । वृद्धाज्जनपदावधेः - कालञ्जराः । वैकुलिशाः । कालञ्जरकः

। वैकूलिशकः ।
विषयग्रहणमनन्यत्र भावार्थम् । जनपदैकशेषबहुत्वे मा भूत् । वर्तन्यः । वार्तनः ।
अपिग्रहणं किम् । यावता वृद्धात्पूर्वेणैव सिद्धम् ? तक्रकौण्डिन्यन्यायेन बाधा मा विज्ञायीति समुच्चीयते ।।
<कच्छाग्निवक्त्रगर्त्तोत्तरपदात् ।। 4-2-126 ।।>
`देशे' इत्येव । उत्तरपदशब्दः प्रत्येकमभिसम्बद्ध्यते । कच्छाद्युत्तरपदाद्देशवाचिनः प्रातिपदिकाच्च वृद्धादवृद्धाच्च वुञ् प्रत्ययो भवति शैषिकः । छाणोरपवादः । दारुकच्छकः । पैप्पलीकच्छकः । काण्डाग्नकः । वैभुजाग्नकः । ऐन्द्रवक्त्रकः । सैन्धुवक्त्रकः । बाहुगर्तकः । चाक्रगर्तकः ।।
<धूमादिभ्यश्च ।। 4-2-127 ।।>
धूमादिभ्यो देशवाचिभ्यः प्रातिपदिकेभ्यो वुञ् प्रत्ययो भवति शैषिकः । अणादेरपवादः । धौमकः । खाण्डकः ।
पाथेयशब्दः पठ्यते, तस्य योपधात्वादेव वुञि सिद्धे सामर्थ्याददेशार्थं ग्रहणम् ।
तथा विदेहानर्तशब्दयोर्जनपदलक्षणे वुञि सिद्धेऽदेशार्थः पाठः । विदेहानां क्षत्त्रियाणां स्वं वैदेहकम् । आनर्तकम् ।
समुद्रशब्दः पठ्यते, तस्य नावि मनुष्ये च वुञिष्यते - सामुद्रिका नौः । सामुद्रको मनुष्यः । अन्यत्र न भवति - सामुद्रं जलमिति ।
धूम । खण्ड । शशादन । आर्जुनाद । दाण्डायनस्थली । माहकस्थली । घोषस्थली । माषस्थली । राजस्थली । राजगृह । सत्रासाह । भक्षास्थली । मद्रकूल । गर्त्तकूल । आञ्जीकूल । द्व्याहाव । त्र्याहाव । संहीय । वर्वर । वर्चगर्त । विदेह । आनर्त्त । माठर । पाथेय । घोष । शिष्य । मित्त्र । वल । आराज्ञी । धार्तराज्ञी । अवयात । तीर्थ । * कूलात्सौवीरेषु * (ग.सू.97)। * समुद्रान्नावि मनुष्ये *(ग.सू.98) । कुक्षि । अन्तरीप । द्वीप । अरुण । उज्जयिनी । दक्षिणापथ । साकेत ।
<नगरात्कुत्सनप्रावीण्ययोः ।। 4-2-128 ।।>
नगरशब्दात् वुञ् प्रत्ययो भवति शैषिकः कुत्सने प्रावीण्ये च गम्यमाने । प्रत्ययार्थविशेषणं चैतत् - कुत्सने प्रावीण्ये च जातादौ प्रत्ययार्थ इति । कुत्सनम् = निन्दनम् । प्रावीण्यम् = नैपुण्यम् ।।
केनेदं मुषितः पन्था गात्रे पक्ष्मालिधूसरः ।
इह नगरे मनुष्येण सम्भाव्यत एतन्नागरकेण । चौरा हि नगरका भवन्ति ।
केनेदं लिखितं चित्रं मनोनेत्रविकाशि यत् ।
इह नगरे मनुष्येण सम्भाव्यत एतन्नागरकेण । प्रवीणा हि नागरका भवन्ति ।
कुत्सनप्रावीण्ययोरिति किम् ? नागरा ब्राह्मणाः । कत्र्यादिषु तु संज्ञाशब्देन साहचर्यात्संज्ञानगरं पठ्यते, तस्मिन् नागरेयकमिति प्रत्युदाहार्यम् ।।
<अरण्यान्मनुष्ये ।। 4-2-129 ।।>
अरण्यशब्दाद् वुञ् प्रत्ययो भवति शैषिको मनुष्येऽभिधेये । औपसङ्ख्यानिकस्य णस्यापवादः । आरण्यको मनुष्यः ।
* पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यम् * (म.भा.2.299)। आरण्यकः पन्थाः । आरण्यकोऽध्यायः । आरण्यको न्यायः । आरण्यको विहारः । आरण्यको मनुष्यः । आरण्यको हस्ती ।
* वा गोमयेषु * । आरण्याः, आरण्यका गोमयाः ।
एतेष्विति किम् ? आरण्याः पशवः ।।
<विभाषा कुरुयुगन्धराभ्याम् ।। 4-2-130 ।।>
कुरु, युगन्धर इत्येताभ्यां विभाषा वुञ् प्रत्ययो भवति शैषिकः । कौरवकः, कौरवः । यौगन्धरकः, यौगन्धरः (म.भा.2.300)। जनपदशब्दावेतौ, ताभ्याम् `अवृद्धादपि' इति नित्ये वुञि प्राप्ते विकल्प उच्यते ।
कुरुशब्दः कच्छादिष्वपि पठ्यते, तत्र वचनादणपि भविष्यति । सैषा युगन्धरार्था विभाषा । "मनुष्यतस्थयोः"(4.2.134/1358)तु कुरुशब्दान्नित्य एव वुञ्प्रत्ययो भवति । कौरवको मनुष्यः, कौरवकमस्य हसितमिति(म.भा.2.300) ।।
<मद्रवृज्योः कन् ।। 4-2-131 ।।>
मद्रवृजिशब्दाभ्यां कन् प्रत्ययो भवति शैषिकः । जनपदवुञोऽपवादः । मद्रेषु जातः मद्रकः । वृजिकः ।।
<कोपधादण् ।। 4-2-132 ।।>
`देशे' इत्येव । ककारोपधात्प्रातिपदिकादण्प्रत्ययो भवति शैषिकः । जनपदवुञोऽपवादः । अन्यत्र जनपदं मुक्त्वा पूर्वेणैव कोपधादणि सिद्धम् । ऋषिकेषु जातः आर्षिकः । माहिषिकः ।
अण्ग्रहणमुवर्णान्तादपि स्यात् - इक्ष्वाकुषु जातः ऐक्ष्वाकः ।।
<कच्छादिभ्यश्च ।। 4-2-133 ।।>
`देशे' इत्येव । `कच्छ' इत्येवमादिभ्यो देशवाचिभ्योऽण्प्रत्ययो भवति शैषिकः । वुञादेरपवादः । काच्छः । सैन्धवः । वार्णवः ।
कच्छशब्दो न बहुवचनविषयः, तस्य मनुष्यतत्स्थयोर्वुञर्थः पाठः । विजापकशब्दः पठ्यते,तस्य कोपधत्वादेवाणि सिद्धे इह ग्रहणमुत्तरार्थम् ।
कच्छ । सिन्धु । वर्णु । गन्धार । मधुमत् । कम्बोज । कश्मीर । साल्व । कुरु । रङ्कु । अणु । खण्ड । द्वीप । अनूप । अजवाह । विजापक ।

कुलून । कच्छादिः ।।

<मनुष्यतत्स्थयोर्वुञ् ।। 4-2-134 ।।>

`कच्छादिभ्यः' इत्येव । मनुष्ये मनुष्यस्थे च जातादौ प्रत्ययार्थे कच्छादिभ्यो वुञ् प्रत्ययो भवति । अणोऽपवादः । काच्छको मनुष्यः । काच्छकमस्य हसितं, जल्पितम् । काच्छिका चूडा । सैन्धवको मनुष्यः । सैन्धवकमस्य हसितं, जल्पितम् । सैन्धविका चूडा ।

मनुष्यतत्स्थयोरिति किम् ? काच्छो गौः । सैन्धवो वार्णवः ।।

<अपदातौ साल्वात् ।। 4-2-135 ।।>

साल्वशब्दः कच्छादिषु पठ्यते, ततः पूर्वेणैव मनुष्यतत्स्थयोर्वुञि सिद्धे नियमार्थं वचनम् । अपदातावेव मनुष्ये मनुष्यस्थे च साल्वशब्दाद् वुञ्प्रत्ययो भवति । साल्वको मनुष्यः । साल्वकमस्य हसितं, जल्पितम् ।

अपदाताविति किम् ? साल्वः पदातिर्व्रजति ।।

<गोयवाग्वोश्च ।। 4-2-136 ।।>

गवि यवाग्वां च जातादौ प्रत्ययार्थे साल्वशब्दाद् वुञ्प्रत्ययो भवति शैषिकः । कच्छाद्यणोऽपवादः । साल्वको गौः । साल्विका यवागूः । साल्वमन्यत् ।।

<गर्त्तोत्तरपदाच्छः ।। 4-2-137 ।।>

`देशे' इत्येव । गर्त्तोत्तरपदाद्देशवाचिनः प्रातिपदिकाच्छः प्रत्ययो भवति शैषिकः । अणोऽपवादः । वाहीकग्रामलक्षणं च प्रत्ययं परत्वाद् बाधते । वृकगर्त्तीयम् । शृगालगर्त्तीयम् । श्वाविद्गर्त्तीयम् ।

उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थम् - बाहुगर्तम् ।।

<गहादिभ्यश्च ।। 4-2-138 ।।>

`गह' इत्येवमादिभ्यः प्रातिपदिकेभ्यश्छः प्रत्ययो भवति शैषिकः । अणादेरपवादः । गहीयः । अन्तःस्थीयः । देशाधिकारेऽपि सम्भवापेक्षं विशेषणम्, न सर्वेषाम् । `मध्यमध्यमं चाण् चरणे' इति पठ्यते, तस्यायमर्थः मध्यशब्दः प्रत्ययसन्नियोगेन मध्यममापद्यते । मध्यमीयाः । चरणे तु प्रत्ययार्थेऽण् भवति - माध्यमा इति । तदेतद्विशेष एव स्मर्यते पृथिवीमध्यस्य मध्यमभावः । चरणसम्बन्धेन निवासलक्षणोऽणिति च (म.भा.2.301)।

* मुखपार्श्वतसोर्लोपश्च * । मुखतीयम् । पार्श्वतीयम् ।

* कुग्जनस्य परस्य च * । जनकीयम् । परकीयम् ।

* देवस्य चेति वक्तव्यम् * । देवकीयम् ।

* वेणुकादिभ्यश्छण् वक्तव्यः * । आकृतिगणोऽयम् । वैणुकीयम् ।

वैत्रकीयम् । औत्तरपदकीयम् । प्रास्थकीयम् । माध्यमकीयम् ।

गह । अन्तःस्थ । सम । विषम । * मध्यमध्यमं चाण्यरणे * (ग.सू.99)। उत्तम । अङ्ग । वङ्ग । मगध । पूर्वपक्ष । अपरपक्ष । अधमशाख । उत्तमशाख । समानशाख । एकग्राम । एकवृक्ष । एकपलाश । इष्वग्र । इष्वनी । अवस्यन्दी । कामप्रस्थ । खाडायनि । कावेरणि । शैशिरि । शौङ्गि । आसुरि । आहिंसि । आमित्रि । व्याडि । वैदजि । भौजि । आढ्यश्वि । आनृशंसि । सौवि । पारकि । अग्निशर्मन् । देवशर्मन् । श्रौति । आरटकि । वाल्मीकि । क्षेमवृद्धिन् । उत्तर । अन्तर । * मुखपार्श्वतसोर्लोपः * (ग.सू.100)। * जनपरयोः कुक्च *(ग.सू.101) । * दैवस्य च * (ग.सू.102)। * वेणुकादिभ्यश्छण् *(ग.सू.103) । गहादिः ।।

<प्राचां कटादेः ।। 4-2-139 ।।>

`देशे' इत्येव । तद्विशेषणं प्राग्ग्रहणम् । प्राग्देशवाचिनः कटादेः प्रातिपदिकाच्छः प्रत्ययो भवति शैषिकः । अणोऽपवादः । कटनगरीयम् । कटघोषीयम् । कटपल्वलीयम् ।।

<राज्ञः क च ।। 4-2-140 ।।>

असम्भवाद्देशाधिकारः, न विशेषणम् । राज्ञः ककारश्चान्तादेशो भवति छश्च प्रत्ययः । राजकीयम् । आदेशमात्रमिह विधेयम्, प्रत्ययस्तु "वृद्धाच्छः"(4.2.114/1337) इत्येव सिद्धः ।।

<वृद्धादकेकान्तखोपधात् ।। 4-2-141 ।।>

`देशे' इत्येव । वृद्धाद्देशवाचिनोऽक, इक इत्येवमन्तात् खकारोपधाच्च प्रातिपदिकाच्छः प्रत्ययो भवति शैषिकः । कोपधलक्षणस्याणोऽपवादः । वाहीकग्रामलक्षणस्य च प्रत्ययस्य, `रोपधेतोः प्राचाम्' इति च । अकान्तात्तावत् - आरीहणकीयम् । द्रौघणकीयम् । इकान्तात् - आश्वपथिकीयम् । शाल्मलिकीयम् । खोपधात् - कौटिशिखीयम् । आयोमुखीयम् ।।

* अकेकान्तग्रहणे कोपधग्रहणं सौसुकाद्यर्थम् * । सौसुकीयम् । मौसुकीयम् । ऐन्द्रवेणुकीयम् ।।

<कन्थापलदनगरग्रामह्रदोत्तरपदात् ।। 4-2-142 ।।>

`देशे' इत्येव, `वृद्धात्' इति च । कन्थाद्युत्तरपदाद्देशवाचिनो वृद्धात्प्रातिपदिकाच्छः प्रत्ययो भवति शैषिकः । वाहीकग्रामादिलक्षणस्य प्रत्ययस्यापवादः । दाक्षिकन्थीयम् । माहिकिकन्थीयम् । दाक्षिपलदीयम् । माहिकिपलदीयम् । दाक्षिनगरीयम् । माहिकिनगरीयम् । दाक्षिग्रामीयम् । माहिकिग्रामीयम् ।

दाक्षिह्रदीयम् । माहिकिह्रदीयम् ।।

<पर्वताच्च ।। 4-2-143 ।।>

पर्वतशब्दाच्छः प्रत्ययो भवति शैषिकः । अणोऽपवादः । पर्वतीयो राजा । पर्वतीयः पुरुषः ।।

<विभाषाऽमनुष्ये ।। 4-2-144 ।।>

पर्वतशब्दाच्छः प्रत्ययो भवति वा, अमनुष्ये वाच्ये । पूर्वेण नित्ये प्राप्ते विकल्प उच्यते - पर्वतीयानि फलानि, पार्वतानि फलानि । पर्वतीयमुदकम्, पार्वतमुदकम् । अमनुष्ये इति किम् ? पर्वतीयो मनुष्यः ।।

<कृकणपर्णाद्भारद्वाजे ।। 4-2-145 ।।>

`देशे' इत्येव । भारद्वाजशब्दोऽपि देशवचन एव, न गोत्रशब्दः । प्रकृतिविशेषणं चैतन्न प्रत्ययार्थः । कृकणपर्णशब्दाभ्यां भारद्वाजदेशवाचिभ्यां छः प्रत्ययो भवति शैषिकः । कृकणीयम् । पर्णीयम् ।

भारद्वाज इति किम् ? कार्कणम् । पार्णम् ।।

इति श्रीजयादित्यविरचितायां काशिकावृत्तौ चतुर्थाध्यायस्य द्वितीयः पादः

-------------------*********************--------------------

4.3

अथ चतुर्थाध्याये तृतीयः पादः

<युष्मदस्मदोरन्यतरस्यां खञ्च ।। 4-3-1 ।।>

देशाधिकारो निवृत्तः । युष्मदस्मदोः खञ् प्रत्ययो भवति शैषिकः । चकाराच्छश्च । अन्यतरस्याङ्ग्रहणाद् यथाप्राप्तम् । तदेते त्रयः प्रत्यया भवन्ति, तत्र वैषम्याद्यथासङ्ख्यं न भवति । त्यदादित्वाद् वृद्धसंज्ञकयोर्युष्मदस्मदोश्छे (4.2.114/1337)प्राप्ते प्रत्येकं प्रत्ययत्रयं विधीयते - यौष्माकीणः, आस्माकीनः । युष्मदीयः, अस्मदीयः । यौष्माकः, आस्माकः ।।

<तस्मिन्नणि च युष्माकास्माकौ ।। 4-3-2 ।।>

तस्मिन्निति साक्षाद्विहितः खञ् निर्दिश्यते, न चकारानुकृष्टश्छः । तस्मिन्खञि अणि च युष्मदस्मदोर्यथासङ्ख्यं युष्माक, अस्माक - इत्येतावादेशौ भवतः । निमित्तयोरादेशौ प्रति यथासङ्ख्यं कस्मान्न भवति ? योगविभागः करिष्यते - `तस्मिन्', खञि युष्मदस्मदोर्युष्माकास्माकौ भवतः । ततः `अणि च' इति । यौष्माकीणः, आस्माकीनः । यौष्माकः, आस्माकः ।

तस्मिन्नणि चेति किम् ? युष्मदीयः । अस्मदीयः ।।

<तवकममकावेकवचने ।। 4-3-3 ।।>

एकवचनपरयोर्युष्मदस्मदोस्तवक, ममक - इत्येतावादेशौ भवतो यथासङ्ख्यं तस्मिन्खञि अणि च परतः । निमित्तयोस्तु यथासङ्ख्यं पूर्ववदेव न भवति । ननु च "न लुमाताङ्गस्य"(1.1.63/263) इति प्रत्ययलक्षणप्रतिषेधादेकवचनपरता युष्मदस्मदोर्न सम्भवति ? वचनात्प्रत्ययलक्षणं भविष्यति । अथ वा - नैवेदं प्रत्ययलक्षणम्, किं तर्हि ? अन्वर्थग्रहणम् । एकवचने युष्मदस्मदी एकस्यार्थस्य वाचके तवकममकावादेशौ प्रतिपद्येते इति सूत्रार्थः । तावकीनः, मामकीनः । तावकः, मामकः ।

तस्मिन्नणि चेत्येव - त्वदीयः, मदीयः ।।

<आर्धाद्यत् ।। 4-3-4 ।।>

अर्द्धशब्दाद् यत् प्रत्ययो भवति शैषिकः । अणोऽपवादः । अर्द्ध्यम् ।

* सपूर्वपदाट्ठञ्वक्तव्यः * (म.भा.2.303)। बालेयार्द्धिकम् । गौतमार्द्धिकम् ।।

<परावराधमोत्तमपूर्वाच्च ।। 4-3-5 ।।>

पर, अवर, अधम, उत्तम इत्येवम्पूर्वाच्चार्धाद्यत् प्रत्ययो भवति शैषिकः । परार्द्ध्यम् । अवरार्द्ध्यम् । अधमार्द्ध्यम् । उत्तमार्द्ध्यम् । पूर्वग्रहणं किम्, `परावराधमोत्तमेभ्यः' इत्येवोच्यते, अर्धादिति वर्त्तते, तस्य तत्पूर्वता विज्ञास्यते ? परावरशब्दावदिग्ग्रहणावपि स्तः - परं सुखम्, अवरं सुखमिति । तत्र कृतार्थत्वाद् दिक्छब्दपक्षे परेण ठञ्यतौ स्याताम् । अस्मात्पूर्वग्रहणाद्यत्प्रत्ययो भवति - परार्द्ध्यम्, अवरार्द्ध्यमिति ।

<दिक्पूर्वपदाट्ठञ्च ।। 4-3-6 ।।>

दिक्पूर्वपदादर्धान्तात्प्रादिपदिकात् ठञ् प्रत्ययो भवति, चकाराद्यच्च शैषिकः । अणोऽपवादः । पूर्वार्द्ध्यम्, पौर्वार्द्धिकम् । दक्षिणार्द्ध्यम्, दाक्षिणार्द्धिकम् । पदग्रहणं स्वरूपविधिनिवारणार्थम् ।।

<ग्रामजनपदैकदेशादञ्ठञौ ।। 4-3-7 ।।>

`दिक्पूर्वपदात्' इत्येव । ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च प्रातिपदिकाद् दिक्पूर्वपदादर्द्धान्तादञ्ठञौ प्रत्ययौ भवतः, शैषिकौ यतोऽपवादौ । इमे खल्वस्माकं ग्रामस्य जनपदस्य वा पौर्वार्धाः, पौर्वार्धिकाः । दाक्षिणार्धाः, दाक्षिणार्धिकाः ।।

<मध्यान्मः ।। 4-3-8 ।।>

मध्यशब्दान्मः प्रत्ययो भवति शैषिकः । अणोऽपवादः । मध्यमः ।।

* आदेश्चेति वक्तव्यम् * । आदिमः ।

* अवोऽधसोर्लोपश्च * । अवमम् । अधमम् ।।

<अ साम्प्रतिके ।। 4-3-9 ।।>

अकारः प्रत्ययो भवति मध्यशब्दात्साम्प्रतिके जातादौ प्रत्ययार्थे । मस्यापवादः । साम्प्रतिकम् = न्याय्यम्, युक्तम्, उचितम्, सममुच्यते । नातिदीर्घं नातिह्रस्वं मध्यं काष्ठम् । नात्युत्कृष्टो नात्यवकृष्टो मध्यो वैयाकरणः । मध्या स्त्री ।।

<द्वीपादनुसमुद्रं यञ् ।। 4-3-10 ।।>

समुद्रसमीपे यो द्वीपस्तस्माद् यञ् प्रत्ययो भवति शैषिकः । कच्छादिपाठाद् अणो(4.2.133य1357) मनुष्यवुञः(4.2.134/1358) चापवादः । द्वैप्यम् । द्वैप्यं भवन्तोऽनुचरन्ति चक्रम् ।

अनुसमुद्रमिति किम् ? द्वैपकम् । द्वैपमन्यत् ।।

<कालाट्ठञ् ।। 4-3-11 ।।>

कालविशेषवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः । अणोऽपवादः । वृद्धात् तु छं परत्वाद्बाधते । मासिकः । आर्द्धमासिकः । सांवत्सरिकः । यथाकथञ्चिद् गुणवृत्त्यापि काले वर्त्तमानात्प्रत्यय इष्यते । कादम्बपुष्पिकम् । व्रैहिपलालिकम् । "तत्र जातः"(4.3.25/1393) इति प्रागतः कालाधिकारः ।।

<श्राद्धे शरदः ।। 4-3-12 ।।>

शरच्छब्दात् ठञ् प्रत्ययो भवति श्राद्धेऽभिधेये शैषिकः । ऋत्वणः(4.3.16/1387) पवादः । `श्राद्धे' इति च कर्म गृह्यते, न श्रद्धावान्पुरुषः; अनभिधानात् । शारदिकं श्राद्धम् । शारदमन्यत् ।।

<विभाषा रोगातपयोः ।। 4-3-13 ।।>

`शरदः' इत्येव । रोगे, आतपे चाभिधेये शरच्छब्दाट्ठञ् प्रत्ययो वा भवति शैषिकः । ऋत्वणोऽपवादः । शारदिको रोगः । शारदिक आतपः । शारदो रोगः । शारद आतपः ।

रोगातपयोरिति किम् ? शारदं दधि ।।

<निशाप्रदोषाभ्यां च ।। 4-3-14 ।।>

निशाप्रदोषशब्दाभ्यां विभाषा ठञ् प्रत्ययो भवति शैषिकः । "कालाट्ठञ्"(4.3.11/1381) इति नित्ये ठञि प्राप्ते विकल्प उच्यते । नैशम्, नैशिकम् । प्रादोषम्, प्रादोषिकम् ।।

<श्वसस्तुट् च ।। 4-3-15 ।।>

`विभाषा' इत्येव । श्वःशब्दाद्विभाषा ठञ् प्रत्ययो भवति, तस्य च तुडागमो भवति । त्यप्प्रत्ययोऽप्यतो विहितः "ऐषमोह्यःश्वसोऽन्यतरस्याम्"(4.2.105/1326) इति; एताभ्यां मुक्ते ट्युट्युलावपि भवतः - शौवस्तिकः, श्वस्त्यः, श्वस्तनः ।।

<सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ।। 4-3-16 ।।>

`कालात्' इत्येव सन्धिवेलादिभ्यः, ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण्प्रत्ययो भवति शैषिकः । ठञोऽपवादः । अण्ग्रहणं वृद्धाच्छस्य बाधनार्थम् । सन्धिवेलादिभ्यस्तावत् - सान्धिवेलम् । सान्ध्यम् । ऋतुभ्यः - ग्रैष्मम् । शैशिरम् । नक्षत्रेभ्यः - तैषम् । पौषम् ।

सन्धिवेला । सन्ध्या । अमावास्या । त्रयोदशी । चतुर्दशी । पञ्चदशी । पौर्णमासी। प्रतिपत् ।

* संवत्सरात्फलपर्वणोः * (ग.सू.104)। सांवत्सरं फलम् । सांवत्सरं पर्व ।।

<प्रावृष एण्यः ।। 4-3-17 ।।>

प्रावृष्शब्दादेण्यः प्रत्ययो भवति शैषिकः । ऋत्वणोऽपवादः । प्रावृषेण्यो बलाहकः ।।

<वर्षाभ्यष्ठक् ।। 4-3-18 ।।>

वर्षाशब्दाट्ठक् प्रत्ययो भवति शैषिकः । ऋत्वणोऽपवादः । वार्षिकं वासः । वार्षिकमनुलेपनम् ।।

<छन्दसि ठञ् ।। 4-3-19 ।।>

वर्षाशब्दाच् छन्दसि विषये ठञ् प्रत्ययो भवति शैषिकः । ठकोऽपवादः । स्वरे भेदः । `नभश्च नभस्यश्च वार्षिकावृतू'(तै.सं.4.4.11.1) ।।

<वसन्ताच्च ।। 4-3-20 ।।>

`छन्दसि' इत्येव । वसन्तशब्दाच्छन्दसि विषये ठञ् प्रत्ययो भवति शैषिकः । ऋत्वणोऽपवादः । `मधुश्च माधवश्च वासन्तिकावृतू'(तै.सं.4.4.11.1) ।।

<हेमन्ताच्च ।। 4-3-21 ।।>

`छन्दसि' इत्येव । हेमन्तशब्दाच्छन्दसि विषये ठञ् प्रत्ययो भवति शैषिकः । ऋत्वणोऽपवादः । `सहश्च सहस्यश्च हैमन्तिकावृतू'(तै.सं.4.4.11.1) । योगविभाग उत्तरार्थः ।।

<सर्वत्राण् च तलोपश्च ।। 4-3-22 ।।>

हेमन्तशब्दादण् प्रत्ययो भवति, तत्सन्नियोगेन चास्य तकारलोपः । हैमनं वासः । हैमनमुपलेपनम् ।

सर्वत्रग्रहणं छन्दोऽधिकारनिवृत्त्यर्थम् । छन्दसि भाषायां च सर्वत्रैतद् भवति ।

ननु च छन्दसीति नानुवर्तिष्यते ? सैवाननुवृत्तिः शब्देनाख्यायते प्रयत्नाधिक्येन पूर्वसूत्रेऽपि सम्बन्धार्थम् । हैमन्तकमिति हि भाषायामपि ठञं स्मरन्ति । अत `अण्च' इति चकार किमर्थः ? अण्, यथाप्राप्तं च ऋत्वणिति । कः पुनरनयोरणोर्विशेषः ? ऋत्वणि हि तकारलोपो नास्ति - हैमन्ती पङ्क्तिः(म.भा.2.304) इति, तदेवं त्रीणि रूपाणि भवन्ति - `हैमन्तिकम्'(तै.सं.4.4.11.1), `हैमन्तम्'(पै.17.19.11), `हैमनम्'(अ.वे.15.4.14) इति ।।

<सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।। 4-3-23 ।।>

`कालाद्' इत्येव । सायम्, चिरम्, प्राह्णे, प्रगे इत्येवमादिभ्योऽव्ययेभ्यश्च ट्युट्युलौ प्रत्ययौ भवतः, तयोश्चादिष्टयोस्तुडागमो भवति । सायन्तनम् । चिरन्तनम् । प्राह्णेतनम् । प्रगेतनम्। अव्ययेभ्यः - दोषातनम् । दिवातनम् । सायमिति मकारान्तं पदमव्ययम्, ततोऽव्ययत्वादेव सिद्धः प्रत्ययः । यस्तु स्यतेरन्तकर्मणो घञि सायशब्दः, तस्येदं मकारान्तत्वं प्रत्ययसन्नियोगेन निपात्यते । दिवसावसानम् = सायः । चिरशब्दस्यापि मकारान्तत्वं निपात्यते । प्राह्णे, प्रगे इत्येकारान्तत्वम् ।

* चिरपरुत्परारिभ्यस्त्नो वक्तव्यः * (म.बा.2.304)। चिरत्नम् । परुत्नम् । परारित्नम् ।

* प्रगस्य छन्दसि गलोपश्च * (म.भा.2.304)। प्रत्नम् ।

* अग्रपश्चाड्डिमच् * (म.भा.2.304)। अग्रिमम् । पश्चिमम् ।

* अन्ताच्चेति वक्तव्यम् * (म.भा.2.304)। अन्तिमम् ।।

<विभाषा पूर्वाह्णापराह्णाभ्याम् ।। 4-3-24 ।।>

पूर्वाह्णापराह्णशब्दाभ्यां विभाषा ट्युट्युलौ प्रत्ययौ भवतस्तुट् च तयोरागमः । "कालाट्ठञ्"(4.3.11/1381) इति ठञि प्राप्ते वचनम्, पक्षे सोऽपि भवति । पूर्वाह्णेतनम् । अपराह्णेतनम् । पौर्वाह्णिकम् । आपराह्णिकम् । "घकालतनेषु कालनाम्नः"(6.3.17/975) इति सप्तम्या अलुक् । यदा तु न सप्तमी समर्थविभक्तिः पूर्वाह्णः सोढोऽस्येति, तदा पूर्वाह्णतन इति भवितव्यम् ।।

<तत्र जातः ।। 4-3-25 ।।>

अणादयो घादयश्च प्रत्ययाः प्रकृताः, तेषामतः प्रभृत्यर्थाः समर्थविभक्तयश्च निर्दिश्यन्ते । तत्रेति सप्तमीसमर्थात् `जातः' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । स्रुघ्ने जातः स्रौघ्नः । माथुरः (4.1.83/1073) । औत्सः । औदपानः (4.1.86/1078)। राष्ट्रियः । अवारपारीणः (4.2.93/1313)। शाकलिकः । माकलिकः (4.2.117/1341)। ग्राम्यः । ग्रामीणः (4.2.94/1314)। कात्त्रेयकः । औम्भेयकः (4.2.95/1315)।।

<प्रावृषष्ठप् ।। 4-3-26 ।।>

प्रावृट्शब्दात्सप्तमीसमर्थाज्जात इत्येतस्मिन्नर्थे ठप् प्रत्ययो भवति । एण्यस्य (4.3.17/1388)अपवादः । पकारः स्वरार्थः । प्रावृषि जातः प्रावृषिकः ।।

<संज्ञायां शरदो वुञ् ।। 4-3-27 ।।>

शरच्छब्दात्सप्तमीसमर्थाज्जात इत्येतस्मिन्नर्थे वुञ् प्रत्ययो भवति, ऋत्वणः (4.3.16/1387)अपवादः समुदायेन चेत्संज्ञा गम्यते । शारदका दर्भाः । शारदका मुद्गाः । दर्भविशेषस्य मुद्गविशेषस्य चेयं संज्ञा ।

संज्ञायामिति किम् ? शारदं सस्यम् ।

संज्ञाधिकारं केचित् "कृतलब्धक्रीतकुशलाः"(4.3.38/1413) इति यावदनुवर्त्तयन्ति ।।

<पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद् वुन् ।। 4-3-28 ।।>

पूर्वाह्णादिभ्यः शब्देभ्यो वुन् प्रत्ययो भवति "तत्र जातः"(4.3.25/1394) इत्येतस्मिन्विषये संज्ञायां गम्यमानायाम् । पूर्वाह्णकः । अपराह्णकः । "विभाषा पूर्वाह्णापराह्णाभ्याम्"(4.3.24/1392) इत्यस्यापवादः । आर्द्रकः । मूलकः । नक्षत्राणः(4.2.3/1204)अपवादः । प्रदोषकः । "निशाप्रदोषाभ्यां च"(4.3.14/1384) इत्यस्यापवादः । अवस्करकः । औत्सर्गिकस्याणः(4.1.83/1073) अपवादः । असंज्ञायां तु यथाप्राप्तं ठञादय एव भवन्ति ।।

<पथः पन्थ च ।। 4-3-29 ।।>

पथिशब्दाद्वुन् प्रत्ययो भवति `तत्र जातः' इत्येतस्मिन्विषये, अणोऽपवादः । प्रत्ययसन्नियोगेन च पथः `पन्थ' इत्ययमादेशो भवति । पथि जातः पन्थकः ।।

<अमावास्याया वा ।। 4-3-30 ।।>

अमावास्याशब्दाद् वुन् प्रत्ययो भवति वा `तत्र जातः' इत्येतस्मिन्विषये । "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्"(4.3.16/1387) इत्यादिषु पाठादणोऽपवादः । अमावास्यकः, आमावास्यः ।

एकदेशविकृतस्यानन्यत्वादमावस्यशब्दादपि भवति । अमावस्यकः । आमावस्यः ।

<अ च ।। 4-3-31 ।।>

अमावास्याशब्दादकारः प्रत्ययो भवति "तत्र जातः"(4.3.25/1393) इत्येतस्मिन् विषये । पूर्वेण वुन्नणोः प्राप्तयोरयं तृतीयः प्रत्ययो विधीयते । अमावास्यः । अमावास्यकः । आमावास्यः । अमावस्यः । अमावस्यकः । आमावस्यः ।।

<सिन्ध्वपकराभ्यां कन् ।। 4-3-32 ।।>

सिन्धुशब्दादपकरशब्दाच्च कन् प्रत्ययो भवति "तत्र जातः"(4.3.25/1393) इत्येतस्मिन्विषये । सिन्धुशब्दः कच्छादिः, ततोऽणि मनुष्यवुञि च(4.2.133,134/1357,1358) प्राप्ते विधानम्, अपकरशब्दादप्यौत्सर्गिकेऽणि । सिन्धुकः । अपकरकः ।।

<अणञौ च ।। 4-3-33 ।।>

सिन्ध्वपकरशब्दाभ्यां यथासङ्ख्यमणञौ प्रत्ययौ भवतः "तत्र जातः"(4.3.25/1393) इत्येतस्मिन्विषये । पूर्वेण कनि प्राप्ते वचनम् । सैन्धवः । आपकरः ।।

<श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशखाषाढाबहुलाल्लुक् ।। 4-3-34 ।।>

श्रविष्ठादिभ्यः शब्देभ्यो नक्षत्रेभ्य आगतस्य(4.2.3/1204) जातार्थे लुग्भवति । तस्मिंस्त्रीप्रत्ययस्यापि "लुक्तद्धितलुकि"(1.2.49/1408) इति भवति । श्रविष्ठासु जातः श्रविष्ठः । फल्गुनः । अनुराधः । स्वातिः । तिष्यः । पुनर्वसुः । हस्तः । विशाखः । अषाढः । बहुलः ।

* लुक्प्रकरणे चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसङ्ख्यानम् * (म.भा.2.307)। चित्रायां जाता चित्रा । रेवती । रोहिणी । स्त्रीप्रत्ययस्य लुकि कृते गौरादित्वात्(4.1.41/498) ङीष् ।

* फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ * (म.भा.2.308)। `फल्गुनी'(तै.सं.2.1.2.2) । `अषाढा'(तै.सं.4.4.10.2) ।

* श्रविष्ठाषाढाभ्यां छणपि वक्तव्यः * (म.भा.2.308)। श्राविष्ठीयः । आषाढीयः ।।

<स्थानान्तगोशालखरशालाच्च ।। 4-3-35 ।।>

स्थानान्तात् प्रातिपदिकाद् गोशालशब्दात् खरशालशब्दाज्जातार्थे प्रत्ययस्य लुग्भवति । गोस्थाने जातः गोस्थानः । अश्वस्थानः । गोशालः । खरशालः ।।

<वत्सशालाभिजिदश्वयुक्छतभिषजो वा ।। 4-3-36 ।।>

वत्सशालादिभ्यः परस्य जातार्थे प्रत्ययस्य लुग् वा भवति । वत्सशालायां जातः वत्सशालः, वात्सशालः । अभिजित्, आभिजितः । अश्वयुक्, आश्वयुजः । शतभिषक्, शातभिषजः । बहुलग्रहणस्यायं प्रपञ्चः ।।

<नक्षत्रेभ्यो बहुलम् ।। 4-3-37 ।।>

नक्षत्रेभ्य उत्तरस्य जातार्थे प्रत्ययस्य बहुलं लुग्भवति । रोहिणः, रौहिणः । मृगशिराः, मार्गशीर्षः ।।

<कृतलब्धक्रीतकुशलाः ।। 4-3-38 ।।>

`तत्र' इत्येव । सप्तमीसमर्थात् कृतादिष्वर्थेषु यथाविहितं प्रत्ययो भवति । स्रुघ्ने कृतो वा लब्धो वा क्रीतो वा कुशलो वा स्रौघ्नः । माथुरः । राष्ट्रियः । ननु च यद्यत्र कृतं जातमपि तत्तत्र भवति, यच्च यत्र क्रीतं लब्धमपि तत्तत्रैव भवति, किमर्थं भेदेनोपादानं क्रियते ? शब्दार्थस्याभिन्नत्वात् । वस्तुमात्रेण क्रीतं लब्धं भवति, शब्दार्थस्तु भिद्यत एव ।।

<प्रायभवः ।। 4-3-39 ।।>

`तत्र' इत्येव । सप्तमीसमर्थाद् ङ्याप्प्रातिपदिकात् `प्रायभवः' इत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति । प्रायशब्दः साकल्यस्य किञ्चिन्न्यूनतामाह । स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः । माथुरः । राष्ट्रियः ।

प्रायभवग्रहणमनर्थकम्, तत्रभवेन कृतार्थत्वात् (म.भा.2.308)।

अनित्यभवः प्रायभव इति चेद् ? मुक्तसंशयेन तुल्यम् (म.भा.2.308)।।

<उपजानूपकर्णोपनीवेष्ठक् ।। 4-3-40 ।।>

उपजान्वादिभ्यः शब्देभ्यः सप्तमीसमर्थेभ्यः `प्रायभवः' इत्येतस्मिन् विषये ठक् प्रत्ययो भवति । अणोऽपवादः । औपजानुकः । औपकर्णिकः । औपनीविकः ।।

<सम्भूते ।। 4-3-41 ।।>

`तत्र' इत्येव । सप्तमीसमर्थाद् ङ्याप्प्रातिपदिकात् `सम्भूते' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । अवक्लृप्तिः प्रमाणानतिरेकश्च सम्भवत्यर्थ इह गृह्यते, नोत्पत्तिः, सत्ता वा; जातभवाभ्यां गतत्वात् । स्रुघ्ने सम्भवति स्रौघ्नः । माथुरः । राष्ट्रियः ।

<कोशाड्ढञ् ।। 4-3-42 ।।>

कोशशब्दाद् ढञ् प्रत्ययो भवति `तत्र सम्भूते' इत्यस्मिन्विषये । अणोऽपवादः । कोशे सम्भूतं कौशेयं वस्त्रम् । रूढिरेषा, तेन क्रिमौ न भवति, खड्गकोशाच्च ।।

<कालात्साधुपुष्प्यत्पच्यमानेषु ।। 4-3-43 ।।>

`तत्र' इत्येव । कालविशेषवाचिभ्यः सप्तमीसमर्थेभ्यः साध्वादिष्वर्थेषु यथाविहितं प्रत्ययो भवति । हेमन्ते साधुः हैमनः प्राकारः । शैशिरमनुलेपनम् । वसन्ते पुष्प्यन्ति वासन्त्यः कुन्दलताः । ग्रैष्म्यः पाटलाः । शरदि पच्यन्ते शारदाः शालयः । ग्रैष्मा यवाः ।।

<उप्ते च ।। 4-3-44 ।।>

`तत्र' इत्येव, `कालात्' इति च । सप्तमीसमर्थात्कालवाचिनः प्रातिपदिकादुप्ते यथाविहितं प्रत्ययो भवति । हेमन्ते उप्यन्ते हैमन्ता यवाः । ग्रैष्मा व्रीहयः । योगविभाग उत्तरार्थः ।।

<आश्वयुज्या वुञ् ।। 4-3-45 ।।>

आश्वयुजीशब्दाद्वुञ् प्रत्ययो भवति उप्तेऽर्थे । ठञोऽपवादः । आश्वयुज्यामुप्ता आश्वयुजका माषाः । अश्विनीभ्यां युक्ता पौर्णमासी आश्वयुजी । अश्विनीपर्यायोऽश्वयुक्शब्दः ।।

<ग्रीष्मवसन्तादन्यतरस्याम् ।। 4-3-46 ।।>

ग्रीष्मवसन्तशब्दाभ्यामन्यतरस्यां वुञ् प्रत्ययो भवति उप्तेऽर्थे । ऋत्वणोऽपवादः । ग्रैष्मं सस्यम्, ग्रैष्मकम् । वासन्तकम्, वासन्तम् ।।

<देयमृणे ।। 4-3-47 ।।>

`तत्र' इत्येव, `कालात्' इति च । सप्तमीसमर्थात्कालवाचिनः प्रातिपदिकाद्देयमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यद् देयमृणं चेत्तद्भवति । मासे देयमृणं मासिकम् । आर्द्धमासिकम् । सांवत्सरिकम् ।

ऋण इति किम् ? मासे देया भिक्षा ।।

<कलाप्यश्वत्थयवबुसाद् वुन् ।। 4-3-48 ।।>

`कालात्' इत्येव । कलापिन्, अश्वत्थ, यवबुस - इत्येतेभ्यः कालवाचिभ्यः सप्तमीसमर्थेभ्यः `देयमृणम्' इत्येतस्मिन्नर्थे वुन्प्रत्ययो भवति । कलाप्यादयः शब्दाः साहचर्यात्काले वर्त्तन्ते । यस्मिन्काले मयूराः कलापिनो भवन्ति स कलापी । यस्मिन्नश्वत्थाः फलन्ति सोऽश्वत्थः । यस्मिन्यवबुसं सम्पद्यते स यवबुसशब्देनोच्यते ।

कलापिनि काले देयमृणं कलापकम् । अश्वत्थकम् । यवबुसकम् ।।

<ग्रीष्मावरसमाद् वुञ् ।। 4-3-49 ।।>

ग्रीष्मावर-समशब्दाभ्यां वुञ् प्रत्ययो भवति `देयमृणम्' इत्येतस्मिन्नर्थे । अण्ठञोरपवादः । ग्रीष्मे देयमृणं ग्रैष्मकम् । आवरसमकम् । प्रत्ययान्तरकरणं वृद्ध्यर्थम् । समाशब्दो वर्षपर्यायः ।।

<संवत्सराग्रहायणीभ्यां ठञ्च ।। 4-3-50 ।।>

संवत्सराग्रहायणीशब्दाभ्यां ठञ् प्रत्ययो भवति, चकाराद् वुञ्च `देयमृणम्' इत्येतस्मिन्नर्थे । संवत्सरे देयमृणं सांवत्सरिकम्, सांवत्सरकम् । आग्रहायणिकम्, आग्रहायणकम् ।

वेति वक्तव्ये ठञ्ग्रहणं सन्धिवेलादिषु `संवत्सरात्फलपर्वणोः' इति पठ्यते, तत्र फले ऋणत्वेन विवक्षितेऽणं बाधित्वा ठञेव यथा स्यादिति ।।

<व्याहरति मृगः ।। 4-3-51 ।।>

`तत्र' इत्येव, `कालात्' इति च । कालवाचिनः सप्तमीसमर्थात् प्रातिपदिकाद् `व्याहरति मृगः' इत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति । निशायां व्याहरति मृगः नैशः, नैशिकः । प्रादोषः, प्रादोषिकः ।

मृग इति किम् ? निशायां व्याहरत्युलूकः ।।

<तदस्य सोढम् ।। 4-3-52 ।।>

`कालात्' इत्येव । तदिति प्रथमासमर्थात्कालवाचिनः प्रातिपदिकात् `अस्य' इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्प्रथमासमर्थञ्चेत्तद्भवति । सोढम् = जितम्, अभ्यस्तमित्यर्थः । निशासहचरितमध्ययनं निशा, तत्सोढमस्य छात्त्रस्य नैशः, नैशिकः । प्रादोषः, प्रादोषिकः ।।

<तत्र भवः ।। 4-3-53 ।।>

`कालात्' इति निवृत्तम् । तत्रेति सप्तमीसमर्थाद् ङ्याप्प्रातिपदिकाद् `भवः' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । सत्ता भवत्यर्थो गृह्यते, न जन्म; "तत्र जातः"(4.3.25/1393) इति गतार्थत्वात् । स्रुघ्ने भवः स्रौघ्नः । माथुरः । राष्ट्रियः । पुनस्तत्रग्रहणम् `तदस्य' इति निवृत्त्यर्थम् ।।

<दिगादिभ्यो यत् ।। 4-3-54 ।।>

`दिश्' इत्येवमादिभ्यः प्रातिपदिकेभ्यो यत्प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । अणश्छस्य चापवादः । दिशि भवं दिश्यम् । वर्ग्यम् । मुख-जघनशब्दयोरशरीरावयवार्थः पाठः - सेनामुख्यम् , सेनाजघन्यमिति ।

दिश् । वर्ग । पूग । गण । पक्ष । धाय्या । मित्त्र । मेधा । अन्तर । पथिन् । रहस् । अलीक । उखा । साक्षिन् । आदि । अन्त । मुख । जघन । मेघ । यूथ । * उदकात्संज्ञायाम् * (ग.सू.105)।। न्याय । वंश । अनुवंश । विश । काल । अप् । आकाश । दिगादिः ।।

<शरीरावयवाच्च ।। 4-3-55 ।।>

शरीरम् = प्राणिकायः । शरीरावयववाचिनः प्रातिपदिकाद् यत्प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । अणोऽपवादः । दन्तेषु भवं दन्त्यम् । कर्ण्यम् । ओष्ठ्यम् ।।

<दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् ।। 4-3-56 ।।>

दृत्यादिभ्यः प्रातिपदिकेभ्यो ढञ् प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । दृतौ भवं दार्तेयम् । कौक्षेयम् । कालशेयम् । वास्तेयम् । आस्तेयम् । आहेयमजरं विषम् ।

अस्तिशब्दः प्रातिपदिकम्, न तिङन्तः ।।

<ग्रीवाभ्योऽण् च ।। 4-3-57 ।।>

ग्रीवाशब्दादण्प्रत्ययो भवति, चकाराड्ढञ्च, `तत्र भवः' इत्येतस्मिन्विषये, शरीरावयवाद्यतोऽपवादः । ग्रीवासु भवं ग्रैवम् । ग्रैवेयम् ।

ग्रीवाशब्दो धमनीवचनः, तासां बहुत्वाद्बहुवचनं कृतम् ।।

<गम्भीराञ्ञ्यः ।। 4-3-58 ।।>

गम्भीरशब्दाद् ञ्यः प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । अणोऽपवादः । गम्भीरे भवं गाम्भीर्यम् ।

* बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम् * (म.भा.2.310)। बाह्यम् । दैव्यम् । पाञ्चजन्यम् ।।

<अव्ययीभावाच्च ।। 4-3-59 ।।>

अव्ययीभावसंज्ञकात्प्रातिपदिकाच्च ञ्यः प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । अणोऽपवादः । न च सर्वस्मादव्ययीभावाद् भवति, किं तर्हि ? परिमुखादेः, परिमुखादीनां च गणपाठस्यैतदेव प्रयोजनम् - तेषां विशेषणमव्ययीभावग्रहणम् । परिमुखं भवं पारिमुख्यम् । पारिहनव्यम् । परिमुखादेरन्यत्र न भवति - औपकूलम् ।

परिमुख । परिहनु । पर्योष्ठ । पर्युलूखल । परिसीर । अनुसीर । उपसीर । उपस्थल । उपकलाप । अनुपथ । अनुखड्ग । अनुतिल । अनुशीत । अनुमाष । अनुयव । अनुयूप । अनुवंश ।।

<अन्तः पूर्वपादट्ठञ् ।। 4-3-60 ।।>

`अव्ययीभावात्' इत्येव । अन्तः शब्दो विभक्त्यर्थे समस्यते, तत्पूर्वपदादव्ययीभावाट्ठञ् प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । अणोऽपवादः । आन्तर्वेश्मिकम् । आन्तर्गेहिकम् ।

* समानशब्दाट्ठञ् वक्तव्यः * (म.भा.2.310)। समाने भवं सामानिकम् ।

* तदादेश्च * (म.भा.2.310)। सामानग्रामिकम् । सामानदेशिकम् ।

* अध्यात्मादिभ्यश्च * (म.भा.2.310)। आध्यात्मिकम् । आधिदैविकम् । आधिभौतिकम् । अध्मयात्मादिराकृतिगणः ।

* ऊर्ध्वन्दमाच्च ठ्ञ् वक्तव्यः * (म.भा.2.310)। और्ध्वन्दमिकः । ऊर्ध्वशब्देन समानार्थ ऊर्ध्वन्दमशब्दः ।

* ऊर्ध्वदेहाच्च * (म.भा.2.310)। और्ध्वदेहिकम् ।

* लोकोत्तरपदाच्च * (म.भा.2.310)। ऐहलौकिकम् । पारलौकिकम् ।

* मुखपार्श्वशब्दाभ्यां तसन्ताभ्यामीयः प्रत्ययो वक्तव्यः * (म.भा.2.310)। मुखतीयम् । पार्श्वतीयम् ।

* जनपरयोः कुक्च * (म.भा.2.310)। जनकीयम् । परकीयम् ।

* मध्यशब्दादीयः * (म.भा.2.310)। मध्यीयः ।

* मण्मीयौ च प्रत्ययौ वक्तव्यौ * (म.भा.2.310)। माध्यमम् । मध्यमीयम् ।

* मध्यो मध्यं दिनण् चास्मात् * (म.भा.2.310)। मध्ये भवं माध्यन्दिनम् ।

* स्थाम्नो लुग्वक्तव्यः * (म.भा.2.310)। अश्वत्थामा ।

* अजिनान्ताच्च * (म.भा.2.310)। वृकाजिनः । सिंहाजिनः ।।

`समानस्य तदादेश्च अध्यात्मादिषु चेष्यते ।
ऊर्ध्वन्दामाच्च देहाच्च लोकोत्तरपदस्य च ।।
मुखपार्श्वतसोरीयः कुग्जनस्य परस्य च ।
ईयःकार्योऽथ मध्यस्य मण्मीयौ प्रत्ययौ तथा ।।
मध्यो मध्यं दिनण्चास्मात्स्थाम्नो लुगजिनात्तथा'।।(म.भा.2.310)

<ग्रामत्पर्यनुपूर्वात् ।। 4-3-61 ।।>

`अव्ययीभावात्' इत्येव । ग्रामशब्दान्तादव्ययीभावात् परि, अनु इत्येवम्पूर्वाट्ठञ् प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । अणोऽपवादः । पारिग्रामिकः । आनुग्रामिकः ।।

<जिह्वामूलाङ्गुलेश्छः ।। 4-3-62 ।।>

जिह्वामूलशब्दादङ्गुलिशब्दाच्च छः प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । यतोऽपवादः । जिह्वामूलीयम् । अङ्गुलीयम् ।।

<वर्गान्ताच्च ।। 4-3-63 ।।>

वर्गशब्दान्ताच्च प्रातिपदिकाच्छः प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । अणोऽपवादः । कवर्गीयम् । चवर्गीयम् ।।

<अशब्दे यत्खावन्यतरस्याम् ।। 4-3-64 ।।>

`वर्गान्तात्' इत्येव । शब्दादन्यस्मिन्प्रत्ययार्थे वर्गान्तात्प्रातिपदिकादन्यतरस्यां यत्खौ प्रत्ययौ भवतः `तत्र भवः' इत्येतस्मिन्विषये । छे प्राप्ते वचनम्, पक्षे सोऽपि भवति । वासुदेववर्ग्यः । वासुदेववर्गीणः । वासुदेववर्गीयः । युधिष्ठिरवर्ग्यः । युधिष्ठिरवर्गीणः । युधिष्ठिरवर्गीयः ।

अशब्द इति किम् ? कवर्गीयो वर्णः ।।

<कर्णललाटात्कनलंकारे ।। 4-3-65 ।।>

कर्ण-ललाटशब्दाभ्यां कन् प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन् विषयेऽलङ्कारेऽभिधेये । यतोऽपवादः । कर्णिका । ललाटिका ।

अलङ्कार इति किम् ? कर्ण्यम् । ललाट्यम् ।।

<तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः ।। 4-3-66 ।।>

व्याख्यायतेऽनेनेति व्याख्यानम्, व्याख्यातव्यस्य नाम व्याख्यातव्यनाम । तस्येति षष्ठीसमर्थाद् व्याख्यातव्यनाम्नः प्रातिपदिकाद् व्याख्यानेऽभिधेये यथाविहितं प्रत्ययो भवति, तत्र भवे च । वाक्यार्थसमीपे चकारः श्रूयमाणः पूर्ववाक्यार्थमेव समुच्चिनोति - "तत्र भवः"(4.3.53/1428) इति । सुपां व्याख्यानः सौपो ग्रन्थः । तैङः । कार्त्तः । सुप्सु भवं सौपम् । तैङम् । कार्त्तम् ।

व्याख्यातव्यनाम्न इति किम् ? पाटलिपुत्रस्य व्याख्यानी सुकोशला, पाटलिपुत्रः सुकोशलया व्याख्यायते - एवंसंनिवेशं पाटलिपुत्रमिति, न तु पाटलिपुत्रो व्याख्यातव्यनाम ।

भवव्याख्यानयोर्युगपदधिकारोऽपवादविधानार्थः (म.भा.2.311)। कृतनिर्देशौ हि तौ ।।

<बह्वचोऽन्तोदात्ताट्ठञ् ।। 4-3-67 ।।>

बह्वचो व्याख्यातव्यनाम्नः प्रातिपदिकादन्तोदात्ताद् भवव्याख्यानयोष्ठञ् प्रत्ययो भवति । अणोऽपवादः । षात्वणत्विकम् । नातानतिकम् । समासस्वरेणान्तोदात्ताः प्रकृतयः ।

बह्वच इति किम् ? द्व्यचष्ठकं (4.3.72/1451)वक्ष्यति । एकाच् प्रत्युदाह्रियते - सौपम्, तैङम्, कार्त्तम् ।

अन्तोदात्तादिति किम् ? संहितायाः सांहितम् । संहिताशब्दो हि गतिस्वरेणाद्युदात्तः ।।

<क्रतुयज्ञेभ्यश्च ।। 4-3-68 ।।>

क्रतुभ्यो यज्ञेभ्यश्च व्याख्यातव्यनामभ्यः प्रातिपदिकेभ्यो भवव्याख्यानयोरर्थयोष्ठञ् प्रत्ययो भवति । अणोऽपवादः । क्रतुभ्यस्तावत् - अग्निष्टोमस्य व्याख्यानस्तत्र भवः आग्निष्टोमिकः । वाजपेयिकः । राजसूयिकः (म.भा.2.312)। यज्ञेभ्यः - पाकयज्ञिकः । नावयज्ञिकः ।

अनन्तोदात्तार्थ आरम्भः । `क्रतुभ्यः' इत्येव सिद्धे यज्ञग्रहणमसोमयागेभ्योऽपि यथा स्यात् - पाञ्चौदनिकः । दाशौदनिकः । बहुवचनं स्वरूपविधिनिरासार्थम् ।।

<अध्यायेष्वेवर्षेः ।। 4-3-69 ।।>

ऋषिशब्दाः प्रवरनामधेयानि, तेभ्य ऋषिशब्देभ्यो भवव्याख्यानयोरर्थयोष्ठञ् प्रत्ययो भवति । अणोऽपवादः । अध्यायेष्वेव प्रत्ययार्थविशेषणेषु ।

`व्याख्यातव्यनाम्नः' इत्यनुवर्त्तते, तत्साहचर्यादृषिशब्दैर्ग्रन्थ उच्यते । वसिष्ठस्य व्याख्यानस्तत्र भवो वा वासिष्ठिकोऽध्यायः । वैश्वामित्रिकः ।

अध्यायेष्विति किम् ? वासिष्ठी ऋक् ।।

<पौरोडाशपुरोडाशात् ष्ठन् ।। 4-3-70 ।।>

पौरोडाशशब्दात्, पुरोडाशशब्दाच्च भवव्याख्यानयोरर्थयोः ष्ठन् प्रत्ययो भवति । पुरोडाशाः = पिष्टपिण्डाः; तेषां संस्कारको मन्त्रः पौरोडाशः, तस्य व्याख्यानस्तत्र भवो वा पौरोडाशिकः । पौरोडाशिकी । पुरोडाशसहचरितो ग्रन्थः पुरोडाशस्तस्य व्याख्यानस्तत्र भवो वा पुरोडाशिकः । पुरोडाशिकी । षकारो ङीषर्थः ।।

<छन्दसो यदणौ ।। 4-3-71 ।।>

छन्दश्शब्दाद् भवव्याख्यानयोरर्थयोर्यदणौ प्रत्ययौ भवतः । `द्व्यचः' इति ठकि प्राप्ते वचनम् । छन्दस्यः । छान्दसः ।।

<द्व्यजृद्ब्राह्मणर्कप्रथमाध्वरपुरश्चरणनामाख्याताट्ठक् ।। 4-3-72 ।।>

द्व्यजादिभ्यः प्रातिपदिकेभ्यो व्याख्यातव्यनामभ्यो भवव्याख्यानयोरर्थयोष्ठक् प्रत्ययो भवति । अणादेरपवादः । द्व्यचस्तावत् - ऐष्टिकः । पाशुकः ।

ऋकारान्तात्- चातुर्होतृकः । पाञ्चहोतृकः । ब्राह्मण - ब्राह्मणिकः । ऋक् - आर्चिकः । प्रथम - प्राथमिकः । अध्वर - आध्वरिकः । पुरश्चरण -

पौरश्चरणिकः ।
नामाख्यातग्रहणं सङ्घातविगृहीतार्थम् । नामिकः । आख्यातिकः । नामाख्यातिकः ।।
<अणृगयनादिभ्यः ।। 4-3-73 ।।>
ऋगयनादिभ्यः प्रातिपदिकेभ्यो भवव्याख्यानयोरर्थयोरण् प्रत्ययो भवति । ठञादेरपवादः । आर्गयनः । पादव्याख्यानः । अण्ग्रहणं बाधकबाधनार्थम् । वास्तुविद्यः ।
ऋगयन । पदव्याख्यान । छन्दोनाम । धन्दोभाषा । छन्दोविचिति । न्याय । पुनरुक्त । व्याकरण । निगम । वास्तुविद्या । अङ्गविद्या । क्षत्त्रविद्या । उत्पात । उत्पाद । संवत्सर । मुहूर्त्त । निमित्त । उपनिषत् । शिक्षा । ऋगयनादिः ।।
<तत आगतः ।। 4-3-74 ।।>
तत इति पञ्चमीसमर्थात् `आगतः' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । स्रुघ्नादागतः स्रौघ्नः । माथुरः । राष्ट्रियः ।
तत इति मुख्यं यदपादानं विवक्षितं तदिह गृह्यते, न नान्तरीयकम् । स्रुघ्नादागच्छन्वृक्षमूलादागत इति ।।
<ठगायस्थानेभ्यः ।। 4-3-75 ।।>
`आय' इति स्वामिग्राह्यो भाग उच्यते, स यस्मिन्नुत्पद्यते तदायस्थानम् । आयस्थानवाचिभ्यः प्रातिपदिकेभ्यष्ठक् प्रत्ययो भवति `तत आगतः' इत्येतस्मिन्विषये, अणोऽपवादः । छं तु परत्वाद्बाधते । शुल्कशालाया आगतः, शौल्कशालिकः । आकरिकम् । बहुवचनं स्वरूपविधिनिरासार्थम् ।।
<शुण्डिकादिभ्योऽण् ।। 4-3-76 ।।>
`शुण्डिक'- इत्येवमादिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति `तत आगतः' इत्येतस्मिन्विषये । आयस्थानठकोऽपवादः । शुण्डिकादागतः शौण्डिकः । कार्कणः ।
अण्ग्रहणं बाधकबाधनार्थम् । औदपानः ।
शुण्डिक । कृकण । स्थण्डिल । उदपान । उपल । तीर्थ । भूमि । तृण । पर्ण। शुण्डिकादिः ।।
<विद्यायोनिसम्बन्धेभ्यो वुञ् ।। 4-3-77 ।।>
विद्यायोनिकृतः सम्बन्धो येषां ते विद्यायोनिसम्बन्धाः, तद्वाचिभ्यः शब्देभ्यो वुञ्प्रत्ययो भवति `तत आगतः' इत्येतस्मिन्विषये । अणोऽपवादः । छं तु परत्वाद्बाधते । विद्यासम्बन्धेभ्यस्तावत् - उपाध्यायादागतम् औपाध्यायकम् । शैष्यकम् । आचार्यकम् । योनिसम्बन्धेब्यः - मातामहकः । पैतामहकः ।।
<ऋतष्ठञ् ।। 4-3-78 ।।>
`विद्यायोनिसम्बन्धेभ्यः' इत्येव । ऋकारान्तेभ्यः प्रातिपदिकेभ्यो विद्यायोनिसम्बन्धवाचिभ्यष्ठञ् प्रत्ययो भवति `तत आगतः' इत्येतस्मिन्विषये । वुञोऽपवादः । विद्यासम्बन्धवाचिभ्यस्तावत् - होतुरागतं हौतृकम् । पौतृकम् । योनिसम्बन्धवाचिभ्यः - भ्रातृकम् । स्वासृकम् । मातृकम् ।
तपरकरणं मुखसुखार्थम् । विद्यायोनिभ्यामन्यत्र - `सावित्रम्'(तै.सं.1.8.2.1) ।।
<पितुर्यच्च ।। 4-3-79 ।।>
पितृशब्दाद् यत् प्रत्ययो भवति चकाराट्ठञ्च `तत आगतः' इत्येतस्मिन्विषये । पितुरागतं पित्र्यम् । पैतृकम् ।।
<गोत्रादङ्कवत् ।। 4-3-80 ।।>
अपत्याधिकारादन्यत्र लौकिकं गोत्रमपत्यमात्रं गृह्यते । गोत्रप्रत्ययान्तात्प्रातिपदिकादङ्कवत् प्रत्ययविधिर्भवति `तत आगतः' इत्येतस्मिन्विषये । अङ्कग्रहणेन तस्येदमर्थसामान्यं लक्ष्यते । तस्माद् वुञतिदिश्यते, नाणेव - "सङ्घाङ्कलक्षणेष्वञ्यञिञामण्"(4.3.127/1507) इति ।
औपगवानामङ्कः औपगवकः । कापटवकः । नाडायनकः । चारायणकः । एवम् - औपगवेभ्य आगतमौपगवकम् । कापटवकम् । नाडायनकम् । चारायणकम् ।।
<हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ।। 4-3-81 ।।>
हेतुभ्यो मनुष्येभ्यश्चान्यतरस्यां रूप्यः प्रत्ययो भवति `तत आगतः' इत्येतस्मिन्विषये । मनुष्यग्रहणमहेत्वर्थम् । हेतुः = कारणम् । हेतुभ्यस्तावत् - समादागतं समरूप्यम् । समीयम् । विषमरूप्यम् । विषमीयम् । गहादित्वाच्छः (4.2.138/1362)। मनुष्येभ्यः - देवदत्तरूप्यम् । यज्ञदत्तरूप्यम् । दैवदत्तम् । याज्ञदत्तम् ।
बहुवचनं स्वरूपविधिनिरासार्थम् ।।
<मयट् च ।। 4-3-82 ।।>
हेतुभ्यो मनुष्येभ्यश्च मयट् प्रत्ययो भवति `तत आगतः' इत्येतस्मिन्विषये । सममयम् । विषममयम् । मनुष्येभ्यः - देवदत्तमयम् । यज्ञदत्तमयम् । टकारो ङीबर्थः - सममयी ।
योगविभागो यथासङ्ख्यनिरासार्थः ।।
<प्रभवति ।। 4-3-83 ।।>
`ततः' इत्येव । पञ्चमीसमर्थाद् ङ्याप्प्रातिपदिकात् `प्रभवति' इत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति । प्रभवति = प्रकाशते, प्रथमत उपलभ्यते इत्यर्थः । हिमवतः प्रभवति हैमवतो गङ्गा । दारदी सिन्धुः ।।

<विदूराञ्ञ्यः ।। 4-3-84 ।।>

विदूरशब्दाञ्ञ्यः प्रत्ययो भवति `ततः प्रभवति' इत्येतस्मिन् विषये । अणोऽपवादः । विदूरात्प्रभवति वैदूर्यो मणिः ।

ननु च वालवायादसौ प्रभवति, न विदूरात्, तत्र तु संस्क्रियते ? एवं तर्हि -

`वालवायो विदूरं च प्रकृत्यन्तरमेव वा ।

न वै तत्रेति चेद् ब्रूयाज्जित्वरीवदुपाचरेत्'।।(म.भा.2.313)

<तद्गच्छति पथिदूतयोः ।। 4-3-85 ।।>

तदिति द्वितीयासमर्थाद् `गच्छति' इत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति, योऽसौ गच्छति पन्थाश्चेत्स भवति दूतो वा । स्रुघ्नं गच्छति स्रौघ्नः पन्था दूतो वा । माथुरः । तत्स्थेषु गच्छत्सु पन्था गच्छतीत्युच्यते । अथ वा स्रुघ्नप्राप्तिः पथो गमनम् ।

पथिदूतयोरिति किम् ? स्रुघ्नं गच्छति सार्थः ।।

<अभिनिष्क्रामति द्वारम् ।। 4-3-86 ।।>

तदित्येव । द्वितीयासमर्थाद् `अभिनिष्कामति' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्तदभिनिष्क्रामति द्वारं चेत्तद्भवति । आभिमुख्येन निष्क्रामति = अभिनिष्क्रामति, स्रुघ्नमभिनिष्क्रामति कान्यकुब्जद्वारं स्रौघ्नम् । माथुरम् । राष्ट्रियम् । द्वारमभिनिष्क्रमणक्रियायां करणं प्रसिद्धम्, तदिह स्वातन्त्र्येण विवक्ष्यते, यथा - साध्वसिश्छिनत्तीति ।

द्वारमिति किम् ? स्रुघ्नमभिनिष्क्रामति पुरुषः ।।

<अधिकृत्य कृते ग्रन्थे ।। 4-3-87 ।।>

`तत्' इत्येव । अधिकृत्यैतदपेक्ष्य द्वितीया । अधिकृत्य = प्रस्तुत्य, आगूर्येत्यर्थः । तदिति द्वितीयासमर्थाद् `अधिकृत्य कृते' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्तत्कृतं ग्रन्थश्चेत्स भवति । सुभद्रामधिकृत्य कृतो ग्रन्थः सौभद्रः । गौरिमित्रः । यायातः ।

ग्रन्थे इति किम् ? सुभद्रामधिकृत्य कृतः प्रासादः ।

* लुबाख्यायिकार्थस्य प्रत्ययस्य बहुलम् * (म.भा.2.313)। वासदत्तामधिकृत्य कृताऽऽख्यायिका वासवदत्ता । सुमनोत्तरा । उर्वशी । न च भवति - भैमरथी ।।

<शिशुक्रन्दयमभद्वन्द्वेन्द्रजननादिभ्यश्छः ।। 4-3-88 ।।>

`तत्' इत्येव । `अधिकृत्य कृते ग्रन्थे' इति च । शिशुक्रन्दादिभ्यो द्वितीयासमर्थेभ्यश्छः प्रत्ययो भवति अधिकृत्य कृते ग्रन्थे । अणोऽपवादः । शिशूनां क्रन्दनं शिशुक्रन्दः, तमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः । यमस्य सभा यमसभम्, यमसभीयः । द्वन्द्वात् - अग्निकाश्यपीयः । श्येनकपोतीयः । शब्दार्थसम्बन्धीयं प्रकरणम् । वाक्यपदीयम् । इन्द्रजननादिभ्यः - इन्द्रजननीयम् । प्रद्युम्नागमनीयम् । इन्द्रजननादिराकृतिगणः प्रयोगतोऽनुसर्त्तव्यः, प्रातिपदिकेषु न पठ्यते ।

* द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः * (म.भा.2.314)। दैवासुरम् । राक्षोऽसुरम् । गौणमुख्यम् ।

इन्द्रजननादेराकृतिगणत्वात् शिशुक्रन्दादयोऽपि तत्रैव द्रष्टव्याः । प्रपञ्चार्थमेषां ग्रहणम् । एवं च सति देवासुरादिप्रतिषेधोऽपि न वक्तव्यः, ततश्छप्रत्ययस्यादर्शनात् ।।

<सोऽस्य निवासः ।। 4-3-89 ।।>

`स' इति प्रथमासमर्थात् `अस्य' इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्प्रथमासमर्थं निवासश्चेत्स भवति । निवसन्त्यस्मिन्निवासः = देश उच्यते । स्रुघ्नो निवासोऽस्य स्रौघ्नः । माथुरः । राष्ट्रियः ।।

<अभिजनश्च ।। 4-3-90 ।।>

`सोऽस्य' इत्येव । स इति प्रथमासमर्थात् `अस्य' इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्प्रथमासमर्थमभिजनश्चेत्स भवति । अभिजनः = पूर्वबान्धवः । तत्सम्बन्धाद् देशोऽप्यभिजन इत्युच्यते - यस्मिन्पूर्वबान्धवैरुषितम् । तस्मादिह देशवाचिनः प्रत्ययः, न बन्धुभ्यः; निवासप्रत्यासत्तेः । स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः । माथुरः । राष्ट्रियः ।

निवासाभिजनयोः को विशेषः ? यत्र सम्प्रत्युष्यते स निवासः । यत्र पूर्वैरुषितं सोऽभिजनः ।(म.भा.2.314)

योगविभाग उत्तरार्थः ।।

<आयुधजीविभ्यश्छः पर्वते ।। 4-3-91 ।।>

`सोऽस्याभिजनः' इति वर्त्तते । `आयुधजीविभ्यः' इति तादर्थ्ये चतुर्थी, `पर्वते' इति प्रकृतिविशेषणम् । पर्वतवाचिनः प्रथमासमर्थादभिजनाद् `अस्य' इति षष्ठ्यर्थे छः प्रत्ययो भवति । आयुधजीविभ्यः - आयुधजीव्यर्थमायुधजीविनोऽभिधातुं प्रत्ययो भवतीत्यर्थः । हृद्गोलः पर्वतोऽभिजन एषामायुधजीविनां हृद्गोलीयाः । अन्धकवर्त्तीयाः । रोहितगिरीयाः ।

आयुधजीविभ्य इति किम् ? ऋक्षोदः पर्वतोऽभिजन एषां ब्राह्मणानाम्, आर्क्षोदा ब्राह्मणाः ।

पर्वत इति किम् ? साङ्काश्यका आयुधजीविनः ।।

<शण्डिकादिभ्यो ञ्यः ।। 4-3-92 ।।>
`शण्डिक' इत्येवमादिभ्यः प्रातिपदिकेभ्यो ञ्यः प्रत्ययो भवति `सोऽस्याभिजनः' इत्येतस्मिन्विषये । अणादेरपवादः । शाण्डिक्यः । सार्वसेन्यः ।
शण्डिक । सर्वसेन । सर्वकेश। शक । सट । रक । शङ्ख । बोध । शण्डिकादिः ।।

<सिन्धुतक्षशिलादिभ्योऽणञौ ।। 4-3-93 ।।>
आदिशब्दः प्रत्येकमभिसम्बध्यते । सिन्ध्वादिभ्यः प्रातिपदिकेभ्यस्तक्षशिलादिभ्यश्च यथासङ्ख्यमणञौ प्रत्ययौ भवतः `सोऽस्याभिजनः' इत्येतस्मिन्विषये । सैन्धवः । वार्णवः ।
सिन्धु । वर्णु । गन्धार । मधुमत् । कम्बोज । कश्मीर । साल्व । किष्किन्धा । गदिका । उरसा । दरत् ।
ये तु कच्छादिषु पठ्यन्ते सिन्धुवर्णुप्रभृतयः, तेभ्यस्तत एवाणि सिद्धे मनुष्यवुञो बाधनार्थं वचनम् ।
तक्षशिलादिभ्यः खल्वपि - ताक्षशिलः । वात्सोद्धरणः ।
तक्षशिला । वत्सोद्धरण । कौमेदुर । काण्डवारण । ग्रामणी । सरालक । कंस । किन्नर । सङ्कुचित । सिंहकोष्ठ । कर्णकोष्ठ । बर्वर । अवसान ।।

<तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः ।। 4-3-94 ।।>
तूद्यादिभ्यश्चतुर्भ्यः शब्देभ्यो यथासङ्ख्यं चत्वार एव ढक्, छण्, ढञ्, यक् इत्येते प्रत्यया भवन्ति `सोऽस्याभिजनः' इत्येतस्मिन्विषये । अणोऽपवादः । तौदेयः । शालातुरीयः । वार्मतेयः । कौचवार्यः ।।

<भक्तिः ।। 4-3-95 ।।>
समर्थविभक्तिः प्रत्ययार्थश्चानुवर्त्तते । `अभिजनः' इति निवृत्तम् । स इति प्रथमासमर्थात् `अस्य' इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत्प्रथमासमर्थं विभक्तिश्चेत्तद्भवति । भज्यते सेव्यते इति भक्तिः । स्रुघ्नो भक्तिरस्य स्रौघ्नः । माथुरः । राष्ट्रियः ।।

<अचित्ताददेशकालट्ठक् ।। 4-3-96 ।।>
देशकालव्यतिरिक्तादचित्तवाचिनः प्रातिपदिकाट्ठक् प्रत्ययो भवति `सोऽस्य भक्तिः' इत्येतस्मिन्विषये । अणोऽपवादः । वृद्धाच्छं परत्वाद्बाधते । अपूपा भक्तिरस्य आपूपिकः । शाष्कुलिकः । पायसिकः ।
अचित्तादिति किम् ? दैवदत्तः । अदेशादिति किम् ? स्रौघ्नः । अकालादिति किम् ? ग्रैष्मः ।।

<महाराजाट्ठञ् ।। 4-3-97 ।।>
महाराजशब्दाट्ठञ् प्रत्ययो भवति `सोऽस्य भक्तिः' इत्येतस्मिन् विषये । अणोऽपवादः । महाराजो भक्तिरस्य माहाराजिकः । प्रत्ययान्तरकरणं स्वरार्थम् ।।

<वासुदेवार्जुनाभ्यां वुन् ।। 4-3-98 ।।>
वासुदेव-अर्जुनशब्दाभ्यां वुन्प्रत्ययो भवति `सोऽस्य भक्तिः' इत्येतस्मिन्विषये । छाणोरपवादः । वासुदेवो भक्तिरस्य वासुदेवकः । अर्जुनकः ।
ननु च वासुदेवशब्दाद् "गोत्रक्षत्त्रियाख्येभ्यः"(4.3.99/1479) इति वुञस्त्येव, न चात्र वुन्वुञोर्विशेषो विद्यते(म.भा.2.314), किमर्थं वासुदेवग्रहणम् ? संज्ञैषा देवताविशेषस्य न क्षत्त्रियाख्या (म.भा.2.314)।
"अजाद्यदन्तम्"(2.2.33/904) "अल्पाच्तरम्"(2.2.34/905) इति चार्जुनशब्दस्य पूर्वनिपातमकुर्वन् ज्ञापयति - अभ्यर्हितं पूर्वं निपततीति ।।

<गोत्रक्षत्त्रियाख्येभ्यो बहुलं बुञ् ।। 4-3-99 ।।>
गोत्राख्येभ्यः क्षत्त्रियाख्येभ्यश्च प्रातिपदिकेभ्यो बहुलं वुञ् प्रत्ययो भवति `सोऽस्य भक्तिः' इत्येतस्मिन्विषये । अणोऽपवादः । वृद्धाच्छं परत्वाद्बाधते ।
ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः । औपगवकः । कापटवकः । क्षत्त्रियाख्येभ्यः - नाकुलकः । साहदेवकः । साम्बकः ।
आख्याग्रहणं प्रसिद्धक्षत्त्रियशब्दपरिग्रहार्थम् - यथाकथञ्चित् क्षत्त्रियवृत्तिभ्यो मा भूत् ।
बहुलग्रहणात् क्वचिदप्रवृत्तिरेव - पाणिनो भक्तिरस्य पाणिनीयः । पौरवीयः ।।

<जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने ।। 4-3-100 ।।>
जनपदिनो ये बहुवचने जनपदेन समानशब्दास्तेषां जनपदवत्सर्वं भवति - प्रत्ययः, प्रकृतिश्च, `सोऽस्य भक्तिः' इत्येतस्मिन्विषये ।
"जनपदतदवध्योश्च"(4.2.124/1348) इत्यत्र प्रकरणे ये प्रत्यया विहिताः, ते जनपदिभ्योऽस्मिन्नर्थेऽतिदिश्यन्ते । जनपदिनः = जनपदस्वामिनः क्षत्त्रियाः। अङ्गाजनपदो भक्तिरस्य आङ्गकः । वाङ्गकः । सौह्मकः । पौण्ड्रकः ।
तद्वद् - अङ्गाः क्षत्त्रिया भक्तिरस्य आङ्गकः । वाङ्गकः । सौह्मकः । पौण्ड्रकः ।
जनपदिनामिति किम् ? पञ्चाला ब्राह्मणा भक्तिरस्य पाञ्चालः ।
सर्वग्रहणं प्रकृत्यतिदेशार्थम्, स च द्व्येकयोः प्रयोजयति - वृद्धिनिमित्तेषु च वुञादिषु विशेषो नास्तीति ।
मद्रवृज्योः कनि विशेषः । मद्रस्यापत्यम् "द्व्यञ्मगधकलिङ्गसूरमसादण्"(4.1.170/1188) इत्यण् - माद्रः । वृजिशब्दादपि "वृद्धेत्कोसलाजादाञ्ञ्यङ्"(4.1.171/1189), इति ञ्यङ् - वार्ज्यः । स भक्तिरस्येति प्रकृतिनिर्ह्रासे कृते - मद्रकः, वृजिकः ।
जनपदेन समानशब्दानामिति किम् ? अनुषण्डो जनपदः, पौरवो राजा, स भक्तिरस्य पौरवीयः ।
बहुवचनग्रहणं समानशब्दताविषयलक्षणार्थम्; अन्यथा हि यत्रैव समानशब्दता तत्रैवातिदेशः स्याद्; एकवचनद्विचनयोर्न स्यात्, वाङ्गौ वा भक्तिरस्येति ।

बहुवचने तु, बहुवचने समानशब्दानामेकवचनद्विवचनयोः सत्यपि शब्दभेदेऽतिदेशो भवति - वाङ्गः वाङ्गौ वा भक्तिरस्य वाङ्गकः ।।

<तेन प्रोक्तम् ।। 4-3-101 ।।>

तेनेति तृतीयासमर्थात् `प्रोक्तम्' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । प्रकर्षेणोक्तम् = प्रोक्तमित्युच्यते, न तु कृतम्; "कृते ग्रन्थे"(4.3.116/1496) इत्यनेन गतत्वात् । अन्येन कृता माथुरेण प्रोक्ता माथुरी वृत्तिः । पाणिनीयम् । आपिशलम् । काशकृत्स्नम् ।।

<तित्तिरिवरतन्तुखण्डिकोखाच्छण् ।। 4-3-102 ।।>

तित्तिर्यादिभ्यः शब्देभ्यश्छण् प्रत्ययो भवति `तेन प्रोक्तम्' इत्येतस्मिन्विषये । अणोऽपवादः । तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः । वारतन्तवीयाः । खाण्डिकीयाः । औखीयाः ।

छन्दसि चाऽयमिष्यते - तित्तिरिणा प्रोक्तः श्लोक इत्यत्र न भवति । "शौनकादिभ्यश्छन्दसि"(4.3.106/1486) इत्यत्रास्यानुवृत्तेश्छन्दोऽधिकारविहितानां च तद्विषयतेष्यते ।।

<काश्यपकौशिकाभ्यामृषिभ्यां णिनिः ।। 4-3-103 ।।>

काश्यप-कौशिकशब्दाभ्यामृषिवाचिभ्यां णिनिः प्रत्ययो भवति `तेन प्रोक्तम्' इत्येतस्मिन्विषये । छस्यापवादः । णकार उत्तरत्र वृद्ध्यर्थः कल्प्यः, `ताभ्यां प्रोक्तः' इति स्मर्यते, तस्यापि च तद्विषयता भवत्येव । "शौनकादिभ्यश्छन्दसि"(4.3.106/1486) इत्यत्रानुवृत्तेश्छन्दोऽधिकारविहितानां च तत्र तद्विषयतेष्यते - काश्यपेन प्रोक्तं कल्पमधीयते काश्यपिनः । कौशिकिनः।

ऋषिभ्यामिति किम् ? इदानीन्तनेन गोत्रकाश्यपेन प्रोक्तं काश्यपीयम् ।।

<कलापिवैशम्पायनान्तेवासिभ्यश्च ।। 4-3-104 ।।>

कलाप्यन्तेवासिनां वैशम्पायनान्तेवासिनां च ये वाचकाः शब्दाः, तेभ्यो णिनिः प्रत्ययो भवति `तेन प्रोक्तम्' इत्येतस्मिन्विषये । अणोऽपवादः । छं तु परत्वाद्बाधते । तत्र कलाप्यन्तेवासिनश्चत्वारः - हरिद्रुः, छगली, तुम्बुरुः, उलप इति । वैशम्पायनान्तेवासिनो नव - आलम्बिः, पलङ्गः, कमलः, ऋचाभः, अरुणिः, ताण्ड्यः, श्यामायनः, कठः, कलापी इति ।

प्रत्यक्षकारिणो गृह्यन्ते, न तु व्यवहिताः शिष्यशिष्याः । कुतः ? कलापि - खाण्डायनग्रहणात् । तथा हि - वैशम्पायनान्तेवासी कलापी, तदन्तेवासिनो वैशम्पायनान्तेवासिन एव भवन्ति किं कलापिग्रहणेन ? तथा वैशम्पायनान्तेवासी कठस्तदन्तेवासी खाडायनस्तस्य किं शौनकादिषु पाठेन ? तदेतत्प्रत्यक्षकारिग्रहणस्य लिङ्गम् ।

कलाप्यन्तेवासिभ्यस्तावत् - हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः । तौम्बुरविणः । औलपिनः । छगलिनो ढिनुकं वक्ष्यति । वैशम्पायनान्तेवासिभ्यः - आलम्बिनः । पालङ्गिनः । कामलिनः । आर्चाभिनः । आरुणिनः । ताण्डिनः । श्यामायनिनः । कठाल्लुकं वक्ष्यति(4.3.107/1487), कलापिनश्चाणम् (4.3.108/1488)।।

हरिद्रुरेषां प्रथमस्ततश्छगलितुम्बुरू ।
उलपेन चतुर्थेन कालापकमिहोच्यते ।।
आलम्बिश्चरकः प्राचां पलङ्गकमलावुभौ ।
ऋचाभारुणिताण्ड्याश्च मध्यमीयास्त्रयोऽपरे ।।
श्यामायन उदीच्येषु उक्तः कठकलापिनोः ।

चरक इति वैशम्पायनस्याख्या, तत्सम्बन्धेन सर्वे तदन्तेवासिनश्चरका इत्युच्यन्ते ।।

<पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ।। 4-3-105 ।।>

प्रत्ययार्थविशेषणमेतत् । तृतीयासमर्थात्प्रोक्ते णिनिः प्रत्ययो भवति यत्प्रोक्तं पुराणप्रोक्ताश्चेद् ब्राह्मणकल्पास्ते भवन्ति । पुराणेन = चिरन्तनेन मुनिना प्रोक्ताः । ब्राह्मणेषु तावत् - भाल्लविनः । शाट्यायनिनः । ऐतरेयिणः । कल्पेषु - पैङ्गी कल्पः । आरुणपराजी ।

पुराणप्रोक्तेष्विति किम् ? याज्ञवल्कानि ब्राह्मणानि । आश्मरथः कल्पः । याज्ञवल्क्यादयोऽचिरकाला इत्याख्यानेषु वार्त्ता, तथा व्यवहरति सूत्रकारः, तद्विषयता कस्मान्न भवति ? प्रतिपदं ब्राह्मणेषु यः प्रत्ययः, तस्य तद्विषयता विधीयते णिनेः । अयं तु याज्ञवल्क्यशब्दस्य कण्वादिषु पाठादण् ।

न वायं योगश्छन्दोऽधिकारमनुवर्त्तयति, तेन कल्पेष्वपि न भवति ।

पुराण इति निपातनात्तुडभावः । न वात्यन्तबाधैव, तेन पुरातनमित्यपि भवति ।।

<शौनकादिभ्यश्छन्दसि ।। 4-3-106 ।।>

`शौनक' इत्येवमादिभ्यो णिनिः प्रत्ययो भवति, `तेन प्रोक्तम्' इत्येतस्मिन्विषये छन्दस्यभिधेये । छाणोरपवादः । शौनकेन प्रोक्तमधीयते शौनकिनः । वाजसनेयिनः ।

छन्दसीति किम् ? शौनकीया शिक्षा । `कठशाठ' इत्यत्र पठ्यते सत्सङ्घातार्थम्, केवलाद्धि लुकं वक्ष्यति । कठशाठाभ्यां प्रोक्तमधीयते काठशाठिनः । शौनक । वाजसनेय । साङ्गरव । शाङ्गरव । साम्पेय । शाखेय । खाण्डायन । स्कन्ध । स्कन्द । देवदत्तशठ । रज्जुकण्ठ । रज्जुभार । कठशाठ । कशाय । तलवकार । पुरुषांस । अश्वपेय । शौनकादिः ।।

<कठचरकाल्लुक् ।। 4-3-107 ।।>
कठचरकशब्दाभ्यां परस्य प्रोक्तप्रत्ययस्य लुग्भवति । कठशब्दाद्वैशम्पायनान्तेवासिभ्यः(4.3.104/1484) इति णिनेश्चरशब्दादप्यणः । कठेन प्रोक्तमधीयते कठाः । चरकाः । छन्दसीत्येव - काठाः । चारकाः ।।
<कलापिनोऽण् ।। 4-3-108 ।।>
कलापिशब्दादण् प्रत्ययो भवति `तेन प्रोक्तम्' इत्येतस्मिन्विषये । वैशम्पायनान्तेवासित्वाण्णिनेरपवादः । कलापिना प्रोक्तमधीयते कालापाः । "इनण्यनपत्ये"(6.4.164/1245) इति प्रकृतिभावे प्राप्ते, * नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकुथुमि तैतलिजाजलिजाङ्गलि लाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसङ्ख्यानम् * इति टिलोपः ।
अथाण्ग्रहणं किम् , यथाप्राप्तमित्येव सिद्धम् ? अधिकविधानार्थम् । तेन माथुरी वृत्तिः, सौलभानि ब्राह्मणानीत्येवमादि सिद्धम् ।।
<छगलिनो ढिनुक् ।। 4-3-109 ।।>
छगलिन्शब्दाद् ढिनुक् प्रत्ययो भवति `तेन प्रोक्तम्' इत्येतस्मिन् विषये । कलाप्यन्तेवासित्वाण्णिनेरपवादः । छगलिना प्रोक्तमधीयते छागलेयिनः ।।
<पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।। 4-3-110 ।।>
णिनिरिहानुवर्त्तते, न ढिनुक् । पाराशर्यशिलालिभ्यां णिनिः प्रत्ययो भवति `तेन प्रोक्तम्' इत्येतस्मिन्विषये । `भिक्षुनटसूत्रयोः' इति यथासङ्ख्यं प्रत्ययार्थविशेषणम्, सूत्रशब्दः प्रत्येकमभिसम्बध्यते, तद्विषयता चात्रेष्यते, तदर्थं छन्दोग्रहणमनुवर्त्यम्, गुणकल्पनया च भिक्षुनटसूत्रयोश्छन्दस्त्वम् । पाराशर्येण प्रोक्तमधीयते पाराशरिणो भिक्षवः । शैलालिनो नटाः ।
भिक्षुनटसूत्रयोरिति किम् ? पाराशरम् । शैलालम् ।
<कर्मन्दकृशाश्वादिनिः ।। 4-3-111 ।।>
`भिक्षुनटसूत्रयोः' इत्येव । कर्मन्द-कृशाश्वशब्दाभ्यामिनिः प्रत्ययो भवति । `तेन प्रोक्तम्' इत्येतस्मिन्विषये यथासङ्ख्यं भिक्षुनटसूत्रयोरभिधेययोः । अणोऽपवादः । अत्रापि तद्विषयतार्थं छन्दोग्रहणमनुवर्त्यम् । कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः । कृशाश्विनो नटाः ।
भिक्षुनटसूत्रयोरित्येव - कार्मन्दम् । कार्शाश्वम् ।।
<तेनैकदिक् ।। 4-3-112 ।।>
तेनेति तृतीयासमर्थात् `एकदिक्' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । एकदिक् = तुल्यदिक्, समानदिगित्यर्थः । सुदाम्ना एकदिक् सौदामनी विद्युत् । हैमवती । त्रैककुदी । पैलुमूली ।
`तेन' इति प्रकृते पुनः समर्थविभक्तिग्रहणं छन्दोऽधिकारनिवृत्त्यर्थम् । पूर्वत्र हि छन्दोऽधिकारात् तद्विषयता साध्यते ।।
<तसिश्च ।। 4-3-113 ।।>
तसिश्च प्रत्ययो भवति `तेनैकदिक्' इत्येतस्मिन्विषये । पूर्वेण घादिषु अणादिषु च प्राप्तेष्वयमपरः प्रत्ययो विधीयते । स्वरादिपाठादव्ययत्वम् । सुदामतः । हिमवत्तः । पिलुमूलतः ।।
<उरसो यच्च ।। 4-3-114 ।।>
`उरस्'शब्दाद्यत् प्रत्ययो भवति, चकारात्तसिश्च, `तेनैकदिक्' इत्येतस्मिन्विषये । अणोऽपवादः । उरसा एकदिग् उरस्यः । उरस्तः ।।
<उपज्ञाते ।। 4-3-115 ।।>
`तेन' इत्येव । तृतीयासमर्थात् `उपज्ञाते' इत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति । विनोपदेशेन ज्ञातम् = उपज्ञातम्, स्वयमभिसम्बद्धमित्यर्थः । पाणिनिनोपज्ञातं पाणिनीयमकालकं व्याकरणम् । काशकृत्स्नम् । गुरुलाघवम् । आपिशलम् । दुष्करणम् ।।
<कृते ग्रन्थे ।। 4-3-116 ।।>
`तेन' इत्येव । तृतीयासमर्थात् `कृते' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत्तत्कृतं ग्रन्थश्चेत्स भवति । वररुचिना कृता वाररुचाः श्लोकाः । हैकुपादो ग्रन्थः । भैकुराटो ग्रन्थः । जालूकः ।
ग्रन्थ इति किम् ? तक्षकृतः प्रासादः ।
उत्पादितम् = कृतम्, विद्यमानमेव ज्ञातम् = उपज्ञातम् - इत्ययमनयोर्विशेषः ।।
<संज्ञायाम् ।। 4-3-117 ।।>
तृतीयासमर्थात् `कृते' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति समुदायेन चेत्संज्ञा ज्ञायते । मक्षिकाभिः कृतं माक्षिकम् । कार्मुकम् । सारघम् । पौत्तिकम् । मधुनः संज्ञा एताः ।।
<कुलालादिभ्यो वुञ् ।। 4-3-118 ।।>
`तेन' `कृते' `संज्ञायाम्' इति चैतत्सर्वमनुवर्तते । कुलालादिभ्यो वुञ् प्रत्ययो भवति `तेन कृतम्' इत्येतस्मिन्नर्थे संज्ञायां गम्यमानायाम् । कौलालकम् । वारुडकम् ।
कुलाल । वरुड । चण्डाल । निषाद । कर्मार । सेना । सिरिध्र । सेन्द्रिय । देवराज । परिषत् । वधू । रुरु । ध्रुव । रुद्र । अनडुह् । ब्रह्मन् ।

कुम्भकार । श्वपाक । कुलालादिः ।।

<क्षुद्राभ्रमरवटरपादपादञ् ।। 4-3-119 ।।>

`तेन' `कृते' `संज्ञायाम्' इति सर्वमनुवर्तते । क्षुद्रादिभ्योऽञ् प्रत्ययो भवति `तेन कृते' इत्येतस्मिन्विषये संज्ञायां गम्यमानायाम् । अणोऽपवादः । स्वरे विशेषः । क्षुद्रादिभिः कृतं क्षौद्रम् । भ्रामरम् । वाटरम् । पादपम् ।।

<तस्येदम् ।। 4-3-120 ।।>

तस्येति षष्ठीसमर्थात् `इदम्' इत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति । अणादयः पञ्च महोत्सर्गाः । घादयश्च प्रत्यया यथाविहितं विधीयन्ते ।

प्रकृतिप्रत्ययार्थयोः षष्ठ्यर्थमात्रं तत्सम्बन्धिमात्रं च विवक्षितम्, यदपरं लिङ्गसङ्ख्याप्रत्यक्षपरोक्षादिकं तत्सर्वमविवक्षितम् । उपगोरिदमौपगवम् । कापटवम् । राष्ट्रियम् । अवारपारीणम् ।

अनन्तरादिष्वनभिधानान्न भवति - देवदत्तस्यानन्तरमिति ।

* संवहेस्तुरणिट् च * (म.भा.2.318)। संवोढुः स्वं सांवहित्रम् । सिद्ध एवात्राण् इडर्थमुपसङ्ख्यानम् ।

* अग्नीधः शरणे रण् भं च * (म.भा.2.318)। आग्नीध्रम् ।

* समिधामाधाने षेण्यण् * (म.भा.2.319)। सामिधेन्यो मन्त्रः । सामीधेनी ऋक् ।।

<रथाद्यत् ।। 4-3-121 ।।>

रथशब्दाद्यत् प्रत्ययो भवति `तस्येदम्' इत्येतस्मिन्विषये । अणोऽपवादः । रथस्येदं रथ्यम्, चक्रं वा,युगं वा ।

रथाङ्ग एवेष्यते, नान्यत्र; अनभिधानात् ।

* रथसीताहलेभ्यो यद्विधाविति तदन्तविधिरुपसङ्ख्यायते * । परमरथ्यम् । उत्तमरथ्यम् ।।

<पत्त्रपूर्वादञ् ।। 4-3-122 ।।>

पतन्ति तेनेति पत्त्रम् = अश्वादिकं वाहनमुच्यते । तत्पूर्वाद्रथशब्दादञ् प्रत्ययो भवति `तस्येदम्' इत्येतस्मिन्विषये । पूर्वस्य यतोऽपवादः । आश्वरथं चक्रम् । औष्ट्ररथम् । गार्दभरथम् ।।

<पत्त्राध्वर्युपरिषदश्च ।। 4-3-123 ।।>

पत्त्रं वाहनं तद्वाचिनः प्रातिपदिकादध्वर्यु-परिषच्छब्दाभ्यां चाञ्प्रत्ययो भवति `तस्येदम्' इत्येतस्मिन्विषये । अणोऽपवादः ।

* पत्त्राद्वाह्ये * (म.भा.2.319)। अश्वस्येदं वहनीयमाश्वम् । औष्ट्रम् । गार्दभम् । आध्वर्यवम् । पारिषदम् ।।

<हलसीराट्ठक् ।। 4-3-124 ।।>

हल, सीरशब्दाभ्यां ठक् प्रत्ययो भवति `तस्येदम्' इत्येतस्मिन्विषये । अणोऽपवादः । हलस्येदं हालिकम् । सैरिकम् ।।

<द्वन्द्वाद् वुन्वैरमैथुनिकयोः ।। 4-3-125 ।।>

द्वन्द्वसंज्ञकाद् वुन् प्रत्ययो भवति `तस्येदम्' इत्येतस्मिन्विषये, वैरमैथुनिकयोः प्रत्ययार्थविशेषणयोः । अणोऽपवादः । छं तु परत्वाद्बाधते ।

वैरे तावत् - बाभ्रव्यशालङ्कायनिका । काकोलूकिका ।

मैथुनिकायाम् - अत्त्रिभरद्वाजिका । कुत्सकुशिकिका । विवहनमैथुनिका । वैरस्य नपुंसकत्वेऽप्यमी स्वभावतः स्त्रीलिङ्गाः ।

* वैरे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः * (म.भा.2.319)। दैवासुरम्। राक्षोऽसुरं वैरम् ।।

<गोत्रचरणाद् वुञ् ।। 4-3-126 ।।>

गोत्रवाचिभ्यश्चरणवाचिभ्यश्च प्रातिपदिकेभ्यो वुञ् प्रत्ययो भवति `तस्येदम्' इत्येतस्मिन्विषये । अणोऽपवादः । छं तु परत्वाद्बाधते गोत्रात्तावत् - ग्लौचुकायनकम्। औपगवकम् ।

चरणाद्धर्माम्नाययोरिष्यते । काठकम् । कालापकम्। मौदकम्। पैप्पलादकम् ।।

<सङ्घाङ्कलक्षणेष्वञ्यञिञामण् ।। 4-3-127 ।।>

सङ्घादिषु प्रत्ययार्थविशेषणेष्वञन्ताद् यञन्ताद् इञन्ताच्च प्रातिपदिकादण्प्रत्ययो भवति `तस्येदम्' इत्येतस्मिन्विषये । पूर्वस्व वुञोऽपवादः ।

* घोषग्रहणमत्र कर्त्तव्यम् * (म.भा.2.319)। तेन वैषम्याद्यथासङ्ख्यं न भवति । अञन्तात् - बैदः सङ्घः । बैदोऽङ्कः । बैदं लक्षणम् । बैदो घोषः ।

यञन्तात् - गार्गः सङ्घः । गार्गोऽङ्कः । गार्गं लक्षणम् । गार्गो घोषः । इञन्तात् - दाक्षः सङ्घः । दाक्षोऽङ्कः । दाक्षं लक्षणम् । दाक्षो घोषः ।

अङ्कलक्षणयोः को विशेषः ? लक्षणं लक्ष्यभूतस्यैव चिह्नभूतं स्वम्, यथा - विद्या बिदानाम् । अङ्कस्तु गवादिस्थोऽपि गवादीनां स्वं न भवति । णित्करणं ङीबर्थं पुंवद्भावप्रतिषेधार्थं च । बैदी विद्याऽस्य बैदीविद्यः ।।

<शाकलाद्वा ।। 4-3-128 ।।>

शाकलशब्दात्सङ्घादिषु प्रत्ययार्थविशेषणेषु वाऽण्प्रत्ययो भवति `तस्येदम्' इत्येतस्मिन्विषये । वुञोऽपवादः । शाकलेन प्रोक्तमधीयते शाकलाः, तेषां सङ्घः शाकलः, शाकलकः । शाकलोऽङ्कः, शाकलकोऽङ्कः । शाकलं लक्षणम्, शाकलकं लक्षणम् । शाकलो घोषः, शाकलको घोषः ।।

<छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः ।। 4-3-129 ।।>

सङ्घादयो निवृत्ताः, सामान्येन विधानम् । छन्दोगादिभ्यः शब्देभ्यो ञ्यः प्रत्ययो भवति `तस्येदम्' इत्येतस्मिन्विषये । वुञणोरपवादः ।

`चरणाद्धर्माम्नाययोः', तत्साहचर्यान्नटशब्दादपि धर्माम्नाययोरेव भवति - छन्दोगानां धर्मो वाऽऽम्नायो वा छान्दोग्यम् । औक्थिक्यम् । याज्ञिक्यम् ।

बाह्वृच्यम् । नाट्यम् । अन्यत्र - छान्दोगं कुलमित्यादि ।।

<न दण्डमाणवान्तेवासिषु ।। 4-3-130 ।।>

दण्डप्रधाना माणवा दण्डमाणवाः, अन्तेवासिनः = शिष्याः, तेष्वभिधेयेषु वुञ्प्रत्ययो न भवति । गोत्रग्रहणमिहानुवर्त्तते, तेन वुञ्प्रतिषेधो विज्ञायते । गौकक्षाः दण्डमाणवा अन्तेवासिनो वा । दाक्षाः । माहकाः ।।

<रैवतिकादिभ्यश्छः ।। 4-3-131 ।।>

रैवतिकादिभ्यश्छः प्रत्ययो भवति `तस्येदम्' इत्येतस्मिन्विषये । गोत्रप्रत्ययान्ता एते, ततः पूर्वेण वुञि प्राप्ते छविधानार्थं वचनम् । रैवतिकीयः । स्वापिशीयः ।

रेवतिक । स्वापिशि । क्षैमवृद्धि । गौरग्रीवि । औदमेयि । औदवाहि । बैजवापि । रैवतिकादिः ।।

<कौपिञ्जलहास्तिपदादण् ।। 4-3-132 ।।>

कौपिञ्जल-हास्तिपदशब्दाभ्यामण्प्रत्ययो भवति `तस्येदम्' इत्येतस्मिन्विषये । गौत्रवुञोऽपवादः; गोत्राधिकारात् । कौपिञ्जलः । हास्तिपदः ।।

<आथर्वणिकस्येकलोपश्च ।। 4-3-133 ।।>

`अण्' इत्येव । आथर्वणिकशब्दादण्प्रत्ययो भवति तत्सन्नियोगेन च इकलोपः, `तस्येदम्' इत्येतस्मिन्विषये । चरणवुञोऽपवादः । आथर्वणिकस्यायमाथर्वणो धर्म आम्नायो वा । `चरणाद्धर्माम्नाययोः'(वा.475) ।।

<तस्य विकारः ।। 4-3-134 ।।>

तस्येति षष्ठीसमर्थात् `विकारः' इत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति । प्रकृतेरवस्थान्तरम् = विकारः । किमिहोदाहरणम् ? अप्राण्याद्युदात्तमवृद्धम्, यस्य च नान्यत् प्रतिपदं विधानम्। अश्मनो विकारः आश्मः । आश्मनः । `अश्मनो विकारः' इति टिलोपः पाक्षिकः । भास्मनः । मार्त्तिकः ।

नित्स्वरेणाद्युदात्ता एते ।

तस्य प्रकरणे तस्येति पुनर्वचनं शैषिकनिवृत्त्यर्थम् (म.भा.2.321)। विकारावयवयोर्घादयो न भवन्ति - हालः, सैरः ।

<अवयवे च प्राण्योषधिवृक्षेभ्यः ।। 4-3-135 ।।>

प्राण्योषधिवृक्षवाचिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्योऽवयवे यथाविहितं प्रत्ययो भवति, चकाराद्विकारे च । तत्र प्राणिभ्योऽञं वक्ष्यति । कपोतस्य विकारोऽवयवो वा कापोतः । मायूरः । तैत्तिरः । ओषधिभ्यः - मौर्वं काण्डम्, मौर्वं भस्म । वृक्षेभ्यः--कारीरं काण्डम्, कारीरं भस्म ।

इत उत्तरे प्रत्ययाः प्राण्योषधिवृक्षेभ्यो विकारावयवयोर्भवन्ति । अन्येभ्यस्तु विकारमात्रे । कथं द्वयमप्यधिक्रियते--`तस्य विकारः', `अवयवे च प्राण्योषधिवृक्षेभ्यः' इति ? विकारावयवयोर्युगपदधिकारोऽपवादविधानार्थः । कृतनिर्देशौ हि तौ ।।

<बिल्वादिभ्योऽण् ।। 4-3-136 ।।>

`बिल्व'- इत्येवमादिभ्योऽण्प्रत्ययो भवति विकारावयवयोरर्थयोः । यथायोगमञ्मयटोरपवादः । बिल्वस्यावयवो विकारो वा बैल्वः । गवेधुकाशब्दोऽत्र पठ्यते, ततः कोपधादेव सिद्धे मयड्बाधनार्थं ग्रहणम् ।

बिल्व । व्रीहि । काण्ड । मुद्ग । मसूर । गोधूम । इक्षु । वेणु । गवेधुका । कर्पासी । पाटली । कर्कन्धू । कुटीर । बिल्वादिः ।।

<कोपधाच्च ।। 4-3-137 ।।>

ककारोपधात्प्रातिपदिकादण् प्रत्ययो भवति यथायोगं विकारावयवयोरर्थयोः । अञोऽपवादः । तर्कु--तार्कवम् । तित्तिडीक--तैत्तिडीकम् । माण्डूकम् । दार्दूरूकम् । माधूकम् ।।

<त्रपुजतुनोः षुक् ।। 4-3-138 ।।>

त्रपु-जतुशब्दाभ्यामण् प्रत्ययो भवति विकारे, तत्सन्नियोगेन तयोः षुगागमो भवति । ओरञोऽपवादः । त्रपुणो विकारः त्रापुषम् । जातुषम् ।

अप्राण्यादित्वान्नावयवे ।।

<ओरञ् ।। 4-3-139 ।।>

उवर्णान्तात्प्रातिपदिकादञ्प्रत्ययो भवति विकारावयवयोरर्थयोः । अणोऽपवादः । अनुदात्तादेरन्यदिहोदाहरणम् । दैवदारवम् । भाद्रदारवम् ।।

<अनुदात्तादेश्च ।। 4-3-140 ।।>

अनुदात्तादेः प्रातिपदिकादञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । अणोऽपवादः । दाधित्थम् । कापित्थम् । माहित्थम् ।।

<पलाशादिभ्यो वा ।। 4-3-141 ।।>

पलाशादिभ्यः प्रातिपदिकेभ्यो वाऽञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । पालाश्म् । खादिरम् । यावसम् । उभयत्रविभाषेयम् ।

पलाशखदिरशिंशपास्पन्दनानामनुदात्तादित्वात्प्राप्ते, अन्येषामप्राप्ते ।

पलाश । खदिर । शिंशपा । स्पन्दन । करीर । शिरीष । यवास । विकङ्कत । पलाशादिः ।।
<शम्याष्ट्लञ् ।। 4-3-142 ।।>
शमीशब्दात् ट्लञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । अञोऽपवादः । शामीलं भस्म । शामीली स्रुक् ।।
<मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ।। 4-3-143 ।।>
प्रकृतिमात्राद्वा मयट् प्रत्ययो भवति, भक्ष्याच्छादनवर्जितयोर्विकारावयवयोरर्थयोर्भाषायां विषये यथायथं प्रत्ययेषु प्राप्तेषु । अश्ममयम् । आश्मनम् । मूर्वामयं, मौर्वम् ।
भाषायामिति किम् ? बैल्वः खादिरो वा यूपः स्यात् । अभक्ष्याच्छादनयोरिति किम् ? मौद्गः सूपः । कार्पासमाच्छादनम् ।
एतयोरिति किमनेन, यावता विकारावयवौ प्रकृतावेव ? ये विशेषप्रत्ययाः "प्राणिरजतादिभ्योऽञ्"(4.3.154/1532) इत्येवमादयः, तद्विषयेऽपि यथा स्यात्--कपोतमयम्, कापोतम् । लोहमयम्, लौहमिति ।।
<नित्यं वृद्धशरादिभ्यः ।। 4-3-144 ।।>
`भाषायामभक्ष्याच्छादनयोः' इत्येव । वृद्धेभ्यः प्रातिपदिकेभ्यः शरादिभ्यश्चाभक्ष्याच्छादनयोर्विकारावयवयोर्भाषायां विषये नित्यं मयट् प्रत्ययो भवति ।
वृद्धेभ्यस्तावत्--आम्रमयम् । शालमयम् । शाकमयम् । शरादिभ्यः--शरमयम् । दर्भमयम् । मृण्मयम् ।
नित्यग्रहणं किम्, यावताऽऽरम्भसामर्थ्यादेव नित्यं भविष्यति ? एकाचो नित्यं मयटमिच्छन्ति, तदनेन क्रियते । त्वङ्मयम् । स्रङ्मयम् । वाङ्मयमिति ।
शर । दर्भ । मृत् । कुटी । तृण । सोम । बल्वज । शरादिः ।।
<गोश्च पुरीषे ।। 4-3-145 ।।>
गोशब्दात्पुरीषेऽभिधेये मयट् प्रत्ययो भवति । गोमयम् ।
पुरीष इति किम् ? गव्यं पयः । पुरीषं न विकारो न चावयवः । तस्येदंविषये विधानम् । विकारावयवयोस्तु गोपयसोर्यतं(4.3.160/1538) वक्ष्यति ।।
<पिष्टाच्च ।। 4-3-146 ।।>
पिष्टशब्दान्नित्यं मयट् प्रत्ययो भवति `तस्य विकार' इत्येतस्मिन् विषये । अणोऽपवादः । पिष्टमयं भस्म ।।
<संज्ञायां कन् ।। 4-3-147 ।।>
पिष्टशब्दात्कन् प्रत्ययो भवति विकारे संज्ञायां विषये । मयटोऽपवादः । पिष्टकः ।।
<व्रीहेः पुरोडाशे ।। 4-3-148 ।।>
व्रीहिशब्दान्मयट् प्रत्ययो भवति पुरोडाशे विकारे । बिल्वाद्यणोऽपवादः । व्रीहिमयः पुरोडाशः । व्रैहमन्यत् ।।
<असंज्ञायां तिलयवाभ्याम् ।। 4-3-149 ।।>
तिल-यवशब्दाभ्यामसंज्ञाविषये मयट् प्रत्ययो भवति विकारावयवयोरर्थयोः । तिलमयम् । यवमयम् ।
असंज्ञायामिति किम् ? तैलम् । यावकः । "यावादिभ्यः कन्"(5.4.29/2097) ।।
<द्व्यचश्छन्दसि ।। 4-3-150 ।।>
द्व्यचः प्रातिपदिकाच्छन्दसि विषये मयट् प्रत्ययो भवति विकारावयवयोरर्थयोः । भाषायां मयडुक्तः, छन्दस्यप्राप्तो विधीयते--`यस्य पर्णमयी जुहूर्भवति'(नि.3.5.7.1) । `दर्भमयं वासो भवति'(मै.सं.1.11.1) । `शरमयं बर्हिर्भवति'(काठ.सं.11.8) ।।
<नोत्वद्वर्ध्रविल्वात् ।। 4-3-151 ।।>
उत्वतः प्रातिपदिकाद् वर्ध्र-बिल्वशब्दाभ्यां च मयट् प्रत्ययो न भवति । "द्व्यचश्छन्दसि"(4.3.150/3453) इति प्राप्तः प्रतिषिध्यते । `मौञ्जं शिक्यम्'(तै.सं.5.1.20.1) । `गार्मुतं चरुम्'(तै.सं.2.4.4.1) । वार्ध्री=बालप्रग्रथिता भवति । `बैल्वो ब्रह्मवर्चसकामेन कार्यः'(मै.सं.3.9.3) ।
तपरकरणं तत्कालार्थम् । धूममयान्यभ्राणि । मतुब्निर्देशस्तदन्तविधिनिरासार्थः । इहैव स्यात्--वैणवी यष्टिरिति ।।
<तालादिभ्योऽण् ।। 4-3-152 ।।>
तालादिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति विकारावयवयोरर्थयोः । मयडादीनामपवादः । तालं धनुः । बार्हिणम् । ऐन्द्रालिशम् ।
*तालाद्धनिषि * । बार्हिण । इन्द्रालिश । इन्द्रादृश । इन्द्रायुध । चाप । श्यामाक । पीयुक्षा । तालादिः ।।
<जातरूपेभ्यः परिमाणे ।। 4-3-153 ।।>
जातरूपम् = सुवर्णम् । बहुवचननिर्देशात्तद्वाचिनः सर्वे गृह्यन्ते । जातरूपवाचिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति परिमाणे विकारे । मयडादीनामपवादः । हाटको निष्कः । हाटकं कार्षापणम् । जातरूपम् । तापनीयम् ।
परिमाण इति किम् ? यष्टिरियं हाटकमयी ।।
<प्राणिरजतादिभ्योऽञ् ।। 4-3-154 ।।>
प्राणिवाचिभ्यः प्रातिपदिकेभ्यो रजतादिभ्यश्चाञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । अणादीनामपवदः । अनुदात्तादेरञ् विहित एव, परिशिष्टमिहोदाहरणम् । प्राणिभ्यस्तावत्--कापोतम् । मायूरम् । तैत्तिरम् । रजतादिभ्यः--राजतम् । सैसम् । लौहम् ।

रजतादिषु येऽनुदात्तादयः पठ्यन्ते--रजत-कण्टकारप्रभृतयः, तेभ्योऽञि सिद्धे पुनर्वचनं मयड्बाधनार्थम् ।
रजत । सीस । लोह । उदुम्बर । नीलदारु । रोहितक । बिभीतक । पीतदारु । तीव्रदारु । त्रिकण्टक । कण्टकार । रजतादिः ।।
<ञितश्च तत्प्रत्ययात् ।। 4-3-155 ।।>
`अञ्' इत्येव । तदिति विकारावयवयोरर्थयोः प्रत्यवमर्शः । ञिद्यो विकारावयवप्रत्ययस्तदन्तात्प्रातिपदिकादञ्प्रत्ययो भवति `विकारावयवयोः' एव ।
मयटोऽपवादः । "ओरञ्"(4.2.71/1283), "शम्याष्ट्लञ्"(4.3.142/1522), "प्राणिरजतादिभ्योऽञ्"(4.3.154/1532),
"उष्ट्राद्वुञ्"(4.3.157/1535), "एण्याढञ्"(4.3.159/1537), "कंसीयपरशव्ययोर्यञञौ लुक्च"(4.3.168/1547)--इत्येते प्रत्यया गृह्यन्ते ।
दैवदारवस्य विकारोऽवयवो वा दैवदारवम् । दाधित्थस्य दाधित्थम् । पालाशस्य पालाशम् । शामीलस्य शामीलम् । कापोतस्य कापोतम् । औष्ट्रकस्य औष्ट्रकम् । ऐणेयस्य ऐणेयम् । कांस्यस्य कांस्यम् । पारशवस्य पारशवम् ।
ञित इति किम् ? बैल्वमयम् । तत्प्रत्ययादिति किम् ? बैदमयम् ।।
<क्रीतवत्परिमाणात् ।। 4-3-156 ।।>
"प्राग्वतेष्ठञ्"(5.1.18/1680) इत्यत आरभ्य क्रीतार्थे ये प्रत्ययाः परिमाणाद्विहितास्ते विकारेऽतिदिश्यन्ते । परिमाणात् क्रीत इव प्रत्यया भवन्ति `तस्य विकारः' इत्येतस्मिन्विषये । अणादीनामपवादः । सङ्ख्यापि परिमाणग्रहणेन गृह्यते, न रूढिपरिमाणमेव । निष्केण क्रीतं नैष्किकम् । एवं निष्कस्य विकारो नैष्किकः । शतेन क्रीतं शत्यम्, शतिकम् । शतस्य विकारः शत्यः, शतिकः । साहस्रः ।
वतिः सर्वसादृश्यार्थः । अद्ध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायाम्"(5.1.28/1693) इत्येवमादिकमप्यतिदिश्यते । द्विसहस्रः, द्विसाहस्रः । द्विनिष्कः, द्विनैष्किकः ।।
<उष्ट्राद् वुञ् ।। 4-3-157 ।।>
उष्ट्रशब्दाद्वुञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । प्राण्यञोऽपवादः । उष्ट्रस्य विकारोऽवयवो वा औष्ट्रकः ।।
<उमोर्णयोर्वा ।। 4-3-158 ।।>
उमाशब्दादूर्णाशब्दाच्च वा वुञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । औमम्, औमकम् । और्णम्, और्णकम् ।।
<एण्या ढञ् ।। 4-3-159 ।।>
एणीशब्दाद् ढञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । प्राण्यञोऽपवादः । ऐणेयं मांसम् । पुंसस्त्वञेव भवति--एणस्य मांसमैणम् ।।
<गोपयसोर्यत् ।। 4-3-160 ।।>
गो, पयस्शब्दाभ्यां यत् प्रत्ययो भवति विकारावयवयोरर्थयोः । गव्यम् । पयस्यम् ।
सर्वत्र गोरजादिप्रसङ्गे यदस्त्येव, मयड्विषये तु विधीयते ।।
<द्रोश्च ।। 4-3-161 ।।>
द्रुशब्दाद्यत्प्रत्ययो भवति विकारावयवयोरर्थयोः । ओरञोऽपवादः । द्रव्यम् ।।
<माने वयः ।। 4-3-162 ।।>
द्रुशब्दान्माने विकारविशेषे वयः प्रत्ययो भवति । यतोऽपवादः । द्रुवयम् ।।
<फले लुक् ।। 4-3-163 ।।>
विकारावयवयोरुत्पन्नस्य फले तद्विषये विवक्षिते लुग्भवति । आमलक्याः फलम् आमलकम् । कुवलम् । बदरम् । फलितस्य वृक्षस्य फलमवयवो भवति विकारश्च । पल्लवितस्येव पल्लवः ।।
<प्लक्षादिभ्योऽण् ।। 4-3-164 ।।>
`फले' इत्येव । प्लक्षादिभ्यः प्रातिपदिकेभ्यः फले विकारावयवत्वेन विवक्षितेऽण् प्रत्ययो भवति । अञोऽपवादः । विधानसामर्थ्यात्तस्य न लुग्भवति । प्लाक्षम् । नैयग्रोधम् ।।
प्लक्ष । न्यग्रोध । अश्वत्थ । इङ्गुदी । शिग्रु । कर्कन्धु । बृहती । प्लक्षादिः ।।
<जम्ब्वा वा ।। 4-3-165 ।।>
`फले' इत्येव । जम्बूशब्दात्फलेऽभिधेये वाऽण् प्रत्ययो भवति । अञोऽपवादः । अत्राणो विधानसामर्थ्याल्लुग्न भवति, अञस्तु भवत्येव--जाम्बवानि फलानि, जम्बूनि वा ।।
<लुप् च ।। 4-3-166 ।।>
`वा' इत्येव । जम्ब्वाः फलेऽभिधेये प्रत्ययस्य वा लुब्भवति । युक्तवद्भावे विशेषः । जम्ब्वाः फलं, जम्बूः फलम्, जम्बु फलम्, जाम्बवमिति वा ।।
* लुप्प्रकरणे फलपाकशुषामुपसङ्ख्यानम् * (म.भा.2.327)। व्रीहयः । यवाः । माषाः । मुद्गाः । तिलाः ।
* पुष्पमूलेषु बहुलम् * (म.भा.2.327)। मल्लिकायाः पुष्पं मल्लिका । नवमल्लिका जातिः । विदार्याः मूलं विदारी । अंशुमती । बृहती । न च भवति पाटलानि पुष्पाणि शाल्वानि मूलानि ।

बहुवचनात्क्वचिदन्यदपि भवति--कदम्बं पुष्पम्, अशोकम्, करवीरम् बैल्वानि फलानीति ।।

<हरीतक्यादिभ्यश्च ।। 4-3-167 ।।>

`हरीतकी' इत्येवमादिभ्यः शब्देभ्यः फले प्रत्ययस्य लुब् भवति । लुकि प्राप्ते लुपो विधाने युक्तवद्भावे स्त्रीप्रत्ययश्रवणे च विशेषः । हरीतक्याः फलं हरीतकी । कोशातकी । नखरजनी । अत्र च व्यक्तिर्युक्तवद्भावेनेष्यते, वचनं त्वभिधेयवदेव भवति । हरीतक्याः फलानि हरीतक्यः ।
हरीतकी । कोशातकी । नखरजनी । शष्कण्डी । दाडी । दोडी । दीडी । श्वेतपाकी । अर्जुनपाकी । काला । द्राक्षा । ध्वाङ्क्षा । गर्गरिका । कण्टकारिका । शेफालिका । येषां च फलपाकनिमित्तः शोषः । पुष्पमूलेषु बहुलम् । हरीतक्यादिः ।।

<कंसीयपरशव्ययोर्यञञौ लुक्च ।। 4-3-168 ।।>

"प्राक्क्रीताच्छः"(5.1.1/1661)- कंसीयः । "उगवादिभ्यो यत्"(5.1.2/1662)--परशव्यः । कंसीयपरशव्यशब्दाभ्यां यथासङ्ख्यं यञञौ प्रत्ययौ भवतः `तस्य विकारः' इत्येतस्मिन्विषये, तत्सन्नियोगेन च कंसीयपरशव्ययोर्लुग्भवति । कंसीयस्य विकारः कांस्यः । परशव्यस्य विकारः पारशवः ।
प्रातिपदिकाधिकाराद्धातुप्रत्ययस्य न लुग्भवति । परशव्यशब्दादनुदात्तादित्वादेवाञि सिद्धे लुगर्थं वचनम् ।
ननु च "यस्येति च"()6.4.148/311 इति लोपे कृते "हलस्तद्धितस्य"(6.4.150/472) इति यलोपो भविष्यति ? नैतदस्ति; `ईति' इति तत्र वर्त्तते ।।
इति श्रीजयादित्यविरचितायां काशिकावृत्तौ चतुर्थाध्यायस्य तृतीयः पादः
-------------------******************----------------

4.4

अथ चतुर्थाध्याये चतुर्थः पादः

<प्राग्वहतेष्ठक् ।। 4-4-1 ।।>

"तद्वहति रथयुगप्रासङ्गम्"(4.4.76/1627) इति वक्ष्यति । प्रागेतस्माद्वहतिसंशब्दनाद्यानर्थाननुक्रमिष्यामः, ठक् प्रत्ययस्तेष्वधिकृतो वेदितव्यः । वक्ष्यति---"तेन दीव्यति खनति जयति जितम्"(4.4.2/1550) इति । अक्षैर्दीव्यति आक्षिकः" ।

* ठक्प्रकरणे तदाहेति माशब्दादिभ्य उपसङ्ख्यानम् * (म.भा.2.329)। माशब्द इत्याह माशब्दिकः । नैत्यशब्दिकः । कार्यशब्दिकः ।
वाक्यादेतत्प्रत्ययविधानम् ।

* आहौ प्रभूतादिभ्यः * (म.भा.2.329)। प्रभूतमाह प्राभूतिकः । पार्याप्तिकः । क्रियाविशेषणात्प्रत्ययः ।

* पृच्छतौ सुस्नातादिभ्यः * (म.भा.2.329)। सुस्नातं पृच्छति सौस्नातिकः । सौखरात्रिकः । सौखशायनिकः ।

* गच्छतौ परदारादिभ्यः * (म.भा.2.329)। परदारान् गच्छति पारदारिकः । गौरुतल्पिकः ।।

<तेन दीव्यति खनति जयति जितम् ।। 4-4-2 ।।>

`तेन' इति तृतीयासमर्थाद् दीव्यति खनति जयति जितमित्येतेष्वर्थेषु ठक् प्रत्ययो भवति । अक्षैर्दीव्यति आक्षिकः । शालाकिकः । अभ्र्या खनति आभ्रिकः । कौद्दालिकः । अक्षैर्जयति आक्षिकः । अक्षैर्जितमाक्षिकम् । शालाकिकम् । सर्वत्र करणे तृतीया समर्थविभक्तिः ।
देवदत्तेन जितमिति प्रत्ययो न भवति; अनभिधानात् । अङ्गुल्या खनतीति च । प्रत्ययार्थे सङ्ख्याकालयोरविवक्षा ।
क्रियाप्रधानत्वेऽपि चाख्यातस्य, तद्धितः स्वभावात्साधनप्रधानः ।।

<संस्कृतम् ।। 4-4-3 ।।>

`तेन' इति तृतीयासमर्थात् `संस्कृतम्' इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति । सत उत्कर्षाधानम् = संस्कारः । दध्ना संस्कृतं दाधिकम् । शाङ्गर्वेरिकम् । मारिचिकम् । योगविभाग उत्तरार्थः ।।

<कुलत्थकोपधादण् ।। 4-4-4 ।।>

कुलत्थशब्दात्ककारोपधाच्छब्दाच्च प्रातिपदिकादण् प्रत्ययो भवति `संस्कृतम्' इत्येतस्मिन्विषये । ठकोऽपवादः । कुलत्थैः संस्कृतं कौलत्थम्।
ककारोपधात्--तैत्तिडीकम् । दार्दभकम् ।।

<तरति ।। 4-4-5 ।।>

तेनेति तृतीयासमर्थात् `तरति' इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति । तरति प्लवते इत्यर्थः । काण्डप्लवेन तरति काण्डप्लविकः । औडुपिकः ।।

<गोपुच्छाट्ठञ् ।। 4-4-6 ।।>

गोपुच्छशब्दाट् ठञ्प्रत्ययो भवति `तरति' इत्येतस्मिन्नर्थे ठकोऽपवादः । स्वरे विशेषः । गौपुच्छिकः ।।

<नौद्व्यचष्ठन् ।। 4-4-7 ।।>

नौशब्दाद् द्व्यचश्च प्रातिपदिकाट्ठन् प्रत्ययो भवति `तरति' इत्येतस्मिन्नर्थे । ठकोऽपवादः । नावा तरति नाविकः । द्व्यचः खल्वपि---घटिकः । प्लविकः

। बाहुकः ।
षकारः सांहितिकः, नानुबन्धः---बाहुका स्त्री ।
आकर्षात्पर्पादिर्भस्त्रादिभ्यः कुसीदसूत्राच्च ।
आवसथात्किशरादेः षितः षडेते ठगधिकारे ।।
विधिवाक्यापेक्षं च षट्त्वम्, प्रत्ययास्तु सप्त (म.भा.2.329)।।
<चरति ।। 4-4-8 ।।>
`तेन' इति तृतीयासमर्थात् `चरति' इत्येतस्मिन्नथे ठक्प्रत्ययो भवति । चरतिर्भक्षणे गतौ च वर्त्तते । दध्ना चरति दाधिकः । हास्तिकः । शाकटिकः ।।
<आकर्षात्ष्ठल् ।। 4-4-9 ।।>
आकर्षशब्दात् ष्ठल् प्रत्ययो भवति `चरति इत्येतस्मिन्नर्थे । ठकोऽपवादः । लकारः स्वरार्थः । षकारो ङीषर्थः । आकर्षेण चरति आकर्षिकः । आकर्षिकी ।
`आकर्ष' इति=सुवर्णपरीक्षार्थो निकषोपल उच्यते ।।
<पर्पादिभ्यः ष्ठन् ।। 4-4-10 ।।>
`पर्प' इत्येवमादिभ्यः ष्ठन् प्रत्ययो भवति `चरति' इत्येतस्गिन्नर्थे । ठकोऽपवादः । नकारः स्वरार्थः । षकारो ङीषर्थः । पर्पिकः, पर्पिकी । अश्विकः, अश्विकी ।
पर्प । अश्व । अश्वत्थ । रथ । जाल । न्यास । व्याल । पादः पच्च । पदिकः । पर्पादिः ।।
<श्वगणाट्ठञ्च ।। 4-4-11 ।।>
श्वगणशब्दाट्ठञ् प्रत्ययो भवति, चकारात् ष्ठन्, `चरति' इत्येतस्मिन्नर्थे । ठकोऽपवादः । श्वगणेन चरति श्वागणिकः, श्वागणिकी । ठन्--श्वगणिकः, श्वगणिका । "श्वादेरिञि"(7.3.8/1560) इत्यत्र वक्ष्यति---`इकारादिग्रहणं च कर्त्तव्यं श्वागणिकाद्यर्थम्'(7.3.8/1560) इति । तेन ठञि द्वारादिकार्यं न भवति ।।
<वेतनादिभ्यो जीवति ।। 4-4-12 ।।>
`तेन' इति तृतीयासमर्थेभ्यो वेतनादिभ्यः शब्देभ्यः `जीवति' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । वेतनेन जीवति वैतनिकः कर्मकरः । धनुर्दण्डग्रहणमत्र सङ्घातविगृहीतार्थम् । धानुर्दण्डिकः । धानुष्कः । दाण्डिकः ।
वेतन । वाह । अर्धवाह । धनुर्दण्ड । जाल । वेस । उपवेस । प्रेषण । उपस्ति । सुख । शय्या । शक्ति । उपनिषत् । उपवेष । स्रक् । पाद । उपस्थान । वेतनादिः ।।
<वस्नक्रयविक्रयाट्ठन् ।। 4-4-13 ।।>
वस्नक्रयविक्रयशब्दाभ्यां तृतीयासमर्थाभ्यां ठन् प्रत्ययो भवति `जीवति' इत्येतस्मिन्विषये । ठकोऽपवादः । वस्नेन जीवति वस्निकः । क्रयविक्रयग्रहणं सङ्घातविगृहीतार्थम्---क्रयविक्रयिकः, क्रयिकः, विक्रयिकः ।।
<आयुधाच्छ च ।। 4-4-14 ।।>
आयुधशब्दाच्छप्रत्ययो भवति, चकाराट्ठँश्च `जीवति' इत्येतस्मिन्विषये । आयुधेन जीवति आयुधीयः । आयुधिकः ।।
<हरत्युत्सङ्गादिभ्यः ।। 4-4-15 ।।>
`तेन' इत्येव । उत्सङ्गादिभ्यस्तृतीयासमर्थेभ्यः `हरति' इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति । हरतिर्देशान्तरप्रापणे वर्त्तते । उत्सङ्गेन हरति औत्सङ्गिकः । औडुपिकः ।
उत्सङ्ग । उडुप । उत्पत । पिटक । उत्सङ्गादिः ।।
<भस्त्रादिभ्यः ष्ठन् ।। 4-4-16 ।।>
`भस्त्रा' इत्येवमादिभ्यस्तृतीयासमर्थेभ्यः `हरति' इत्येतस्मिन्नर्थे ष्ठन्प्रत्ययो भवति । भस्त्रया हरति भस्त्रिकः, भस्त्रिकी । भरटिकः, भरटिकी ।
भस्त्रा । भरट । भरण । शीर्षभार । शीर्षेभार । अम्सभार । अंसेभार । भस्त्रादिः ।।
<विभाषा विवधवीवधात् ।। 4-4-17 ।।>
`हरति' इत्येव । विवधवीवधशब्दाभ्यां तृतीयासमर्थाभ्यां विभाषा ष्ठन् प्रत्ययो भवति । तेन मुक्ते प्रकृतष्ठग्भवति । विवधेन हरति विवधिकः, विवधिकी ।
वीवधिकः, वीवधिकी । ठक् खल्वपि--वैवधिकः, वैवधिकी ।
विवधवीवधशब्दौ समानार्थौ पथि पर्याहारे च वर्त्तते ।।
<अण् कुटिलिकायाः ।। 4-4-18 ।।>
`हरति' इत्येव । कुटिलिकाशब्दात्तृतीयासमर्थादण् प्रत्ययो भवति `हरति' इत्येतस्मिन्नर्थे । कुटिलिकया हरति मृगो व्याधं कौटिलिको मृगः । कुटिलिकया हरत्यङ्गारान् कौटिलिकः कर्मारः ।
कुटिलिका=वक्रगतिः, कर्माराणामायुधकर्षणी लोहमयी यष्टिश्चोच्यते ।।
<निर्वृत्तेऽक्षद्यूतादिभ्यः ।। 4-4-19 ।।>

`तेन' इत्येव । अक्षद्यूतादिभ्यस्तृतीयासमर्थेभ्यः `निर्वृत्ते' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । अक्षद्यूतेन निर्वृत्तम्, आक्षद्यूतिकं वैरम् । जानुप्रहृतिकम् । अक्षद्यूत । जानुप्रहृत । जङ्घाप्रहृत । पादस्वेदन । कण्टकमर्दन । गतागत । यातोपयात । अनुगत । अक्षद्यूतादिः ।।

<क्त्रेर्मम्नित्यम् ।। 4-4-20 ।।>

`निर्वृत्ते' इत्येव, "ड्वितः क्त्रिः"(3.3.88/3266) इत्यय त्रिशब्दो गृह्यते । त्र्यन्तान्नित्यं मप् प्रत्ययो भवति `तेन निर्वृत्ते' इत्येतस्मिन्नर्थे ।

`डुपचष्पाके'(धा.पा.997)--पक्त्रिमम् । `डुवप्'(धा.पा.1003)--उप्त्रिमम् । `डुकृञ्'(धा.पा.1473)--कृत्रिमम् ।

नित्यग्रहणं स्वातन्त्र्यनिवृत्त्यर्थम् । तेन त्र्यन्तं नित्यं मप्प्रत्ययान्त--मेव भवति, विषयान्तरे न प्रयोक्तव्यम्(म.भा.2.330)इति ।।

* भावप्रत्ययान्तादिमब्वक्तव्यः * (म.भा.2.330)। पाकेन निर्वृत्तं पाकिमम् । त्यागिमम् । सेकिमम् । कुट्टिमम् ।।

<अपमित्यायाचिताभ्यां कक्कनौ ।। 4-4-21 ।।>

`निर्वृत्ते' इत्येव । अपमित्ययाचितशब्दाभ्यां यथासङ्ख्यं कक्, कन्--इत्येतौ प्रत्ययौ भवतः `निर्वृत्ते' इत्येतस्मिन्नर्थे । आपमित्यकम् । याचितकम् ।।

<संसृष्टे ।। 4-4-22 ।।>

`तेन' इत्येव । तृतीयासमर्थात् `संसृष्टे' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । संसृष्टम्=एकीभूतम्, अभिन्नमित्यर्थः । दध्ना संसृष्टं दाधिकम् । मारिचिकम् । शाङ्र्गवेरिकम् । पैप्पलिकम् ।।

<चूर्णादिनिः ।। 4-4-23 ।।>

चूर्णशब्दादिनिः प्रत्ययो भवति संसृष्टे । ठकोऽपवादः । चूर्णैः संसृष्टाश्चूर्णिनोऽपूपाः । चूर्णिनो धानाः ।।

<लवणाल्लुक् ।। 4-4-24 ।।>

"संसृष्टे"(4.3.22/1572) इत्यनेनोत्पन्नस्य ठको लवणशब्दाल्लुग्भवति । लवणः सूपः । लवणं शाकम् । लवणा यवागूः ।

द्रव्यवाची लवणशब्दो लुकं प्रयोजयति, न गुणवाची ।।

<मुद्गादण् ।। 4-4-25 ।।>

मुद्गशब्दादण् प्रत्ययो भवति `संसृष्टे' इत्येतस्मिन्विषये । ठकोऽपवादः । मौद्ग ओदनः । मौद्गी यवागूः ।।

<व्यञ्जनैरुपसिक्ते ।। 4-4-26 ।।>

`तेन' इत्येव । व्यञ्जनवाचिभ्यः प्रातिपदिकेभ्यस्तृतीयासमर्थेभ्यः `उपसिक्ते' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । दध्ना उपसिक्तं दाधिकम् । सौपिकम् । खारिकम् ।

व्यञ्जनैरिति किम् ? उदकेनोपसिक्त ओदनः ।।

<ओजः सहोम्भसा वर्तते ।। 4-4-27 ।।>

औजस्, सहस्, अम्भस् इत्येतेभ्यस्तृतीयासमर्थेभ्यः `वर्त्तते' इत्यर्थे ठक्प्रत्ययो भवति । ओजसा वर्त्तते औजसिकः शूरः । साहसिकश्चौरः । आम्भसिको मत्स्यः ।।

<तत्प्रत्यनुपूर्वमीपलोमकूलम् ।। 4-4-28 ।।>

`तत्' इति द्वितीया समर्थविभक्तिः । `प्रति' `अनु'--इत्येवम्पूर्वेभ्य ईप, लोम, कूल-शब्देभ्यो द्वितीयासमर्थेभ्यः `वर्त्तते' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति ।

ननु च वृतिरकर्मकः, तस्य कथं कर्मणा सम्बन्धः ? क्रियाविशेषणकर्मकाणामपि कर्म भवति ।

प्रतीपं वर्त्तते प्रातीपिकः । आन्वीपिकः । प्रातिलोमिकः । आनुलोमिकः । प्रातिकूलिकः । आनुकूलिकः ।।

<परिमुखं च ।। 4-4-29 ।।>

परिमुखशब्दाद् द्वितीयासमर्थाद् `वर्त्तते' इत्यस्मिन्नर्थे ठक्प्रत्ययो भवति । परिमुखं वर्त्तते पारिमुखिकः ।

चकारोऽनुक्तसमुच्चयार्थः । पारिपार्श्विकः ।

<प्रयच्छति गर्ह्यम् ।। 4-4-30 ।।>

`तत्' इति द्वितीयासमर्थात् `प्रयच्छति' इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति, यद् द्वितीयासमर्थं गर्ह्यं चेत्तद्भवति । द्विगुणार्थम्=द्विगुणम्, तादर्थ्यात्ताच्छब्द्यम् । द्विगुणं प्रयच्छति द्वैगुणिकः । त्रैगुणिकः ।

* वृद्धेर्वृधुषिभावो वक्तव्यः * (म.भा.2.331)। वार्धुषिकः । प्रकृत्यन्तरं वा वृद्धिपर्यायो वृधुषिशब्दः ।

गर्ह्यमिति किम् ? द्विगुणं प्रयच्छत्यधमर्णः ।।

<कुसीददशैकादशात् ष्ठन्ष्ठचौ ।। 4-4-31 ।।>

`प्रयच्छति गर्ह्यम्' इत्येव । कुसीदम्=वृद्धिः, तदर्थद्रव्यं कुसीदम् । एकादशार्था दश दशैकादशशब्देनोच्यन्ते । कुसीद, दशैकादशशब्दाभ्यां यथासङ्ख्यं ष्ठन्, ष्ठज्--इत्येतौ प्रत्ययौ भवतः `प्रयच्छति गर्ह्यम्' इत्येतस्मिन्विषये । ठकोऽपवादौ । कुसीदं प्रयच्छति कुसीदिकः, कुसीदिकी । दशैकादशिकः, दशैकादशिकी ।।

<उञ्छति ।। 4-4-32 ।।>

`तत्' इति द्वितीयासमर्थात् `उञ्छति' इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति । बदराण्युञ्छति बादरिकः । श्यामाकिकः । भूमौ पतितस्यैकैकस्य कणस्योपादानम्=उञ्छः । कणानुञ्छति काणिकः ।।

<रक्षति ।। 4-4-33 ।।>

`तत्' इति द्वितीयासमर्थाद् `रक्षति' इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति । समाजं रक्षति सामाजिकः । सान्निवेशिकः ।।

<शब्ददर्दुरं करोति ।। 4-4-34 ।।>

`तत्' इति द्वितीयासमर्थाभ्यां शब्ददर्दुरशब्दाभ्यां `करोति' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । शब्दं करोति शाब्दिको वैयाकरणः । दार्दुरिकः कुम्भकारः ।।

<पक्षिमत्स्यमृगान्हन्ति ।। 4-4-35 ।।>

`तत्' इत्येव । पक्ष्यादिभ्यो द्वितीयासमर्थेभ्यो `हन्ति' इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति । स्वरूपस्य पर्यायाणां च तद्विशेषाणां च ग्रहणमिहेष्यते । पक्षिणो हन्ति पाक्षिकः । शाकुनिकः । मायूरिकः । तैत्तिरिकः । मत्स्य--मात्स्यिकः, मैनिकः, शाफरिकः, शाकुलिकः । मृग--मार्गिकः, हारिणिकः, सौकरिकः, सारङ्गिकः ।।

<परिपन्थं च तिष्ठति ।। 4-4-36 ।।>

परिपन्थशब्दात्तदिति द्वितीयासमर्थात् `तिष्ठति' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । परिपन्थं तिष्ठति पारिपन्थिकश्चौरः ।
चकारो भिन्नक्रमः प्रत्ययार्थं समुच्चिनोति । परिपन्थं हन्ति पारिपन्थिकः ।

समर्थविभक्तिप्रकरणे पुनर्द्वितीयोच्चारणं लौकिकवाक्यप्रदर्शनार्थम्, परिपथशब्दपर्यायः परिपन्थशब्दोऽस्तीति ज्ञापयति, स विषयान्तरेऽपि प्रयोक्तव्यः ।।

<माथोत्तरपदपदव्यनुपदं धावति ।। 4-4-37 ।।>

माथशब्दोत्तरपदात्प्रातिपदिकात् पदवी, अनुपद---इत्येताभ्यां च `धावति' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । दण्डमाथं धावति दाण्डमाथिकः । शौल्कमाथिकः । पादविकः । आनुपदिकः । माथशब्दः पथिन्पर्यायः ।।

<आक्रन्दाट्ठञ्च ।। 4-4-38 ।।>

आक्रन्दन्त्येतस्मिन्नित्याक्रन्दः=देशः, अथ वा---आक्रन्द्यत इत्याक्रन्दः--आर्त्तायनमुच्यते; विशेषाभावाद् द्वयोरपि ग्रहणम् । आक्रन्दशब्दात्तदिति द्वितीयासमर्थात् `धावति' इत्येतस्मिन्नर्थे ठञ्प्रत्ययो भवति, चकाराट्ठक्च । स्वरे विशेषः । आक्रन्दं धावति आक्रन्दिकः, आक्रन्दिकी ।।

<पदोत्तरपदं गृह्णाति ।। 4-4-39 ।।>

पदशब्द उत्तरपदं यस्य तस्मात्पदोत्तरपदशब्दात् `तत्' इति द्वितीयासमर्थाद् `गृह्णाति' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । पूर्वपदं गृह्णाति पौर्वपदिकः । औत्तरपदिकः ।

पदान्तादिति नोक्तम् , बहुच्पूर्वान्मा भूदिति ।।

<प्रतिकण्ठार्थललामं च ।। 4-4-40 ।।>

प्रतिकण्ठार्थललामशब्देभ्यस्तदिति द्वितीयासमर्थेभ्यः `गृह्णाति' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । प्रतिकण्ठं गृह्णाति प्रातिकण्ठिकः । आर्थिकः । लालामिकः ।।

<धर्मं चरति ।। 4-4-41 ।।>

धर्मशब्दात्तदिति द्वितीयासमर्थात् `चरति' इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति । चरतिरासेवायाम्, नानुष्ठानमात्रे । धर्मं चरति धार्मिकः ।

* अधर्माच्च वक्तव्यम् * (म.भा.2.331)। आधर्मिकः ।।

<प्रतिपथमेति ठँश्च ।। 4-4-42 ।।>

प्रतिपथशब्दाद् द्वितीयासमर्थाद् `एति' इत्यस्मिन्नर्थे ठन् प्रत्ययो भवति, चकाराट्ठक् च । प्रतिपथमेति प्रतिपथिकः, प्रातिपथिकः ।।

<समवायान् समवैति ।। 4-4-43 ।।>

समवायवाचिभ्यः शब्देभ्यः `तत्' इति द्वितीयासमर्थेभ्यः `समवैति' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति ।

समवायः समूह उच्यते, न सम्प्रधारणा । `समवायान्' इति बहुवचनं स्वरूपविधिनिरासार्थम् । समवैति, आगत्य तदेकदेशीभवतीत्यर्थः । समवायान्समवैति सामवायिकः । सामाजिकः । सामूहिकः । सान्निवेशिकः ।।

<परिषदो ण्यः ।। 4-4-44 ।।>

परिषदो ण्यः प्रत्ययो भवति `समवायान् समवैति' इत्येतस्मिन् विषये । ठकोऽपवादः । परिषदं समवैति पारिषद्यः ।।

<सेनाया वा ।। 4-4-45 ।।>

सेनाशब्दाद् वा ण्यः प्रत्ययो भवति `समवायान्समवैति' इत्येतस्मिन्नर्थे । ठकोऽपवादः । पक्षे सोऽपि भवति । सेनां समवैति सैन्यः, सैनिकः ।।

<संज्ञायां ललाटकुक्कुट्यौ पश्यति ।। 4-4-46 ।।>

ललाट-कुक्कुटीशब्दाभ्यां तदिति द्वितीयासमर्थाभ्याम् `पश्यति' इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति, संज्ञायां विषये । संज्ञाग्रहणमभिधेयनियमार्थम्, न तु रूढ्यर्थम् । ललाटं पश्यति ललाटिकः सेवकः । कौक्कुटिको भिक्षुः ।

सर्वावयवेभ्यो ललाटं दूरे दृश्यते, तदनेन ललाटदर्शनेन सेवकस्य स्वामिनं प्रत्यनुपश्लेषः कार्येष्वनुपस्थायित्वं लक्ष्यते । लालाटिकः सेवकः । स्वामिनः कार्येषु नोपतिष्ठत इत्यर्थः ।

कुक्कुटीशब्देनापि कुक्कुटीपातो लक्ष्यते । देशस्याल्पतया हि भिक्षुरविक्षिप्तदृष्टिः पादविक्षेपदेशे चक्षुः संयम्य गच्चति स उच्यते कौक्कुटिक इति ।।

<तस्य धर्म्यम् ।। 4-4-47 ।।>

`तस्य' इति षष्ठीसमर्थाद् `धर्म्यम्' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । धर्म्यं न्याय्यम् । आचारयुक्तमित्यर्थः । शुल्कशालाया धर्म्यं शौल्कशालिकम् । आकरिकम् । आपणिकम् । गौल्मिकम् ।।

<अण् महिष्यादिभ्यः ।। 4-4-48 ।।>

`महीषी' इत्येवमादिभ्योऽण् प्रत्ययो भवति `तस्य धर्म्यम्' इत्येतस्मिन् विषये । ठकोऽपवादः । महिष्या धर्म्यं माहिषम् । प्राजावतम् ।

महिषी । प्रजावती । प्रलेपिका । विलेपिका । अनुलेपिका । पुरोहित । मणिपाली । अनुचारक । होतृ । यजमान । महिष्यादिः ।।

<ऋतोऽञ् ।। 4-4-49 ।।>

ऋकारान्तात्प्रातिपदिकादञ् प्रत्ययो भवति `तस्य धर्म्यम्' इत्येतस्मिन्विषये । ठकोऽपवादः । पोतुर्धर्म्यं पौत्रम् । औद्गात्रम् ।

* नराच्चेति वक्तव्यम् * (म.भा.2.331)। नरस्य धर्म्या नारी ।

* विशसितृरिड्लोपश्च * (म.भा.2.331)। विशसितुर्धर्म्यं वैशस्त्रम् ।

* विभाजयितुर्णिलोपश्च * (म.भा.2.331)। विभाजयितुर्धर्म्यं वैभाजित्रम् ।।

<अवक्रयः ।। 4-4-50 ।।>

`तस्य' इत्येव । षष्ठीसमर्थाद् `अवक्रयः' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । अवक्रीणीतेऽनेनेत्यवक्रयः=पिण्डक उच्यते । शुल्कशालाया अवक्रयः शौल्कशालिकः । आकरिकः । आपणिकः । गौल्मिकः ।

नन्ववक्रयोऽपि धर्म्यमेव ? नैतदस्ति; लोकपीडया धर्मातिक्रमेणाप्यवक्रयो भवति ।।

<तदस्य पण्यम् ।। 4-4-51 ।।>

`तत्' इति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत्प्रथमासमर्थं पण्यं चेत्तद्भवति । अपूपाः पण्यमस्य आपूपिकः । शाष्कुलिकः । मौदकिकः ।

पण्यमिति विशेषणं तद्धितवृत्तावन्तर्भूतम्, अतः पण्यशब्दो न प्रयुज्यते ।।

<लवणाट्ठञ् ।। 4-4-52 ।।>

लवणशब्दाट्ठञ् प्रत्ययो भवति `तदस्य पण्यम्' इत्येतस्मिन्विषये । ठकोऽपवादः । स्वरे विशेषः । लवणं पण्यमस्य लावणिकः ।।

<किशरादिभ्यः ष्ठन् ।। 4-4-53 ।।>

`किशर' इत्येवमादिभ्यः ष्ठन् प्रत्ययो भवति `तदस्य पण्यम्' इत्येतस्मिन्विषये । ठकोऽपवादः । किशरादयो गन्धविशेषवचनाः । किशराः पण्यमस्य किशरिकः । किशरिकी । नरदिकः । नरदिकी ।

किशर । नरद । नलद । सुमङ्गल । तगर । गुग्गुलु । उशीर । हरिद्रा । हरिद्रायणी । किशरादिः ।।

<शलालुनोऽन्यतरस्याम् ।। 4-4-54 ।।>

शलालुशब्दादन्यतरस्यां ष्ठन् प्रत्ययो भवति `तदस्य पण्यम्' इत्येतद्विषये । ठकोऽपवादः । पक्षे सोऽपि भवति । शलालुशब्दो गन्धविशेषवचनः ।

शलालुपण्यमस्य शलालुकः, शलालुकी । शालालुकः, शालालुकी ।।

<शिल्पम् ।। 4-4-55 ।।>

`तत्' इति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत्तत्प्रथमासमर्थं शिल्पं चेत्तद्भवति । शिल्पम् = कौशलम् । मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः । पाणविकः । वैणिकः (म.भा.2.332)।

मृदङ्गवादने वर्त्तमानो मृदङ्गशब्दः प्रत्ययमुत्पादयति । शिल्पं तद्धितवृत्तावन्तर्भवति ।।

<मड्डुकझर्झरादणन्यतरस्याम् ।। 4-4-56 ।।>

`मड्डुक', `झर्झर' शब्दाभ्यामन्यतरस्यामण् प्रत्ययो भवति, `तदस्य शिल्पम्' इत्येतस्मिन्विषये । ठकोऽपवादः । पक्षे सोऽपि भवति । मड्डुकवादनं शिल्पमस्य माड्डुकः, माड्डुकिकः । झार्झरः, झार्झरिकः ।।

<प्रहरणम् ।। 4-4-57 ।।>

`तदस्य' इत्येव । `तत्' इति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत्तत्प्रथमासमर्थं प्रहरणं चेत्तद्भवति । असिः प्रहरणमस्य आसिकः । प्रासिकः । चाक्रिकः । धानुष्कः ।।

<परश्वधाट्ठञ् च ।। 4-4-58 ।।>

परश्वधशब्दात् ठञ् प्रत्ययो भवति, चकारात् ठक् । स्वरे विशेषः । परश्वधः प्रहरणमस्य पारश्वधिकः ।।

<शक्तियष्ट्योरीकक् ।। 4-4-59 ।।>

शक्ति, यष्टिशब्दाभ्यामीकक्प्रत्ययो भवति, `तदस्य प्रहरणम्' इत्येतस्मिन्विषये । ठकोऽपवादः । शक्तिः प्रहरणमस्य शाक्तीकः । याष्टीकः ।।

<अस्तिनास्तिदिष्टं मतिः ।। 4-4-60 ।।>

`तदस्य' इत्येव । `तत्' इति प्रथमासमर्थेभ्यः `अस्ति', `नास्ति', `दिष्ट'--इत्येतेभ्यः शब्देभ्यः `अस्य' इति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत्तत्प्रथमासमर्थं मतिश्चेत्तद्भवति । अस्ति मतिरस्य आस्तिकः । नास्ति मतिरस्य नास्तिकः । दैष्टिकः ।

न च मतिसत्तामात्रे प्रत्यय इष्यते, किं तर्हि ? परलोकोऽस्तीति यस्य मतिरस्ति स आस्तिकः, तद्विपरीतो नास्तिकः । प्रमाणानुपातिनी यस्य गतिः स दैष्टिकः । तदेतदभिधानशक्तिस्वभावाल्लभ्यते ।

अस्ति, नास्ति-शब्दौ निपातौ, वचनसामर्थ्याद्वा आख्याताद्वाक्याच्च प्रत्ययः ।।

<शीलम् ।। 4-4-61 ।।>

`तदस्य' इत्येव । `तत्' इति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत्तत्प्रथमासमर्थं शीलं चेत्तद्भवति । शीलम् = स्वभावः । अपूपभक्षणं शीलमस्य आपूपिकः । शाष्कुलिकः । मौदकिकः ।
भक्षणक्रिया तद्विशेषणं च शीलं तद्धितवृत्तावन्तर्भवति ।।

<छत्त्रादिभ्यो णः ।। 4-4-62 ।।>

`छत्त्र' इत्येवमादिभ्यः प्रातिपदिकेभ्यो णः प्रत्ययो भवति, `तदस्य शीलम्' इत्येतस्मिन्विषये । ठकोऽपवादः । छत्त्रं शीलमस्य छात्त्रः ।
छादनादावरणाच्छत्त्रम् । गुरुकार्येष्ववहितस्तच्छिद्रावरणप्रवृत्तश्छत्त्रशीलः शिष्यश्छात्त्रः ।

स्थाशब्दोऽत्र पठ्यते, स चोपसर्गपूर्वो गृह्यते - आस्था, संस्था, अवस्थेति ।

छत्त्र । बुभुक्षा । शिक्षा । पुरोह । स्था । चुरा । उपस्थान । ऋषि । कर्मन् । विश्वधा । तपस् । सत्य । अनृत । शिबिका । छत्त्रादिः ।।

<कर्माध्ययने वृत्तम् ।। 4-4-63 ।।>

`तदस्य' इत्येव । `तत्' इति प्रथमासमर्थात् `अस्य' इति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत्तत्प्रथमासमर्थं कर्म चेत्तद्वृत्तमध्ययनविषयं भवति ।
एकमन्यदध्ययने कर्म वृत्तमस्य ऐकान्यिकः । द्वैयन्यिकः । त्रैयन्यिकः ।

एकमन्यदिति विगृह्य `तद्धितार्थ' इति समासः, ततश्च ठक् प्रत्ययः । `अध्ययने कर्म वृत्तम्' इत्येतत्सर्वं तद्धितवृत्तावन्तर्भवति । यस्याध्ययनप्रयुक्तस्य परीक्षाकाले पठतः स्खलितमपपाठरूपमेकं जातं स उच्यते ऐकान्यिक इति । एवं द्वैयन्यिकः, त्रैयन्यिक इति ।।

<बह्वच्पूर्वपदाट्ठच् ।। 4-4-64 ।।>

बह्वच् पूर्वपदं यस्य तस्माद्बह्वच्पूर्वपदात्प्रातिपदिकाट्ठच् प्रत्ययो भवति `तदस्य कर्माध्ययने वृत्तम्' इत्येतस्मिन्नर्थे । ठकोऽपवादः । द्वादशान्यानि कर्माण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः । त्रयोदशान्यिकः । चतुर्दशान्यिक इति । चतुर्दशापपाठा अस्य जाता इत्यर्थः ।
उदात्ते कर्त्तव्ये योऽनुदात्तं करोति स उच्यतेऽन्यत्त्वं करोषीति ।।

<हितं भक्षाः ।। 4-4-65 ।।>

`तदस्य' इत्येव । `तत्' इति प्रथमासमर्थात् `अस्य' इति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत्तत्प्रथमासमर्थं हितं चेत्तद्भवति, तच्च भक्षाः ।

ननु च हितयोगे चतुर्थ्या भवितव्यम्, तत्र कथं षष्ठ्यर्थे प्रत्ययो विधीयते ? एवं तर्हि सामर्थ्याद्विभक्तिविपरिणामो भविष्यति ।
अपूपभक्षणं हितमस्मै आपूपिकः । शाष्कुलिकः । मौदकिकः । हितार्थक्रिया च तद्धितवृत्तावन्तर्भवति ।।

<तदस्मै दीयते नियुक्तम् ।। 4-4-66 ।।>

`तत्' इति प्रथमासमर्थाद् `अस्मै' इति चतुर्थ्यर्थे ठक् प्रत्ययो भवति, यत्तत्प्रथमासमर्थं तच्चेद् दीयते नियुक्तम् । नियोगेनाव्यभिचारेण दीयत इत्यर्थः ।

अव्यभिचारः = नियोगः । अग्रे भोजनमस्मै नियुक्तं दीयते आग्रभोजनिकः । आपूपिकः । शाष्कुलिकः ।

केचित्तु नियुक्तम् = नित्यमाहुः । अपूपा नित्यमस्मै दीयन्ते आपूपिकः ।।

<श्राणामांसौदनाट्टिठन् ।। 4-4-67 ।।>

`श्राणा', `मांसौदन'- शब्दाभ्यां टिठन् प्रत्ययो भवति, `तदस्मै दीयते नियुक्तम्' इत्येतस्मिन्नर्थे । ठकोऽपवादः । इकार उच्चारणार्थः । टकारो ङीबर्थः ।

श्राणा नियुक्तमस्मै दीयते श्राणिकः, श्राणिकी । मांसौदनिकः, मांसौदनिकी ।

अथ ठञेव कस्मान्नोक्तः, न ह्यत्र ठञष्टिठनो वा विशेषोऽस्ति ? मांसौदनग्रहणं सङ्घातविगृहीतार्थं केचिदिच्छन्ति, तत्र वृद्ध्यभावो विशेषः - ओदनिकः, ओदनिकी ।।

<भक्तादणन्यतरस्याम् ।। 4-4-68 ।।>

भक्तशब्दादण् प्रत्ययो भवत्यन्यतरस्यां `तदस्मै दीयते नियुक्तम्' इत्येतस्मिन्विषये । ठकोऽपवादः । पक्षे सोऽपि भवति । भक्तमस्मै दीयते नियुक्तं भाक्तः,

भाक्तिकः ।।

<तत्र नियुक्तः ।। 4-4-69 ।।>

`तत्र' इति सप्तमीसमर्थात् `नियुक्तः' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । नियुक्तः=अधिकृतः, व्यापारित इत्यर्थः । शुल्कशालायां नियुक्तः शौल्कशालिकः । आकरिकः । आपणिकः । गौल्मिकः । दौवारिकः ।।

<अगारान्ताट्ठन् ।। 4-4-70 ।।>

अगारशब्दान्तात्प्रातिपदिकाट्ठन् प्रत्ययो भवति, `तत्र नियुक्तः' इत्येतस्मिन्विषये । ठकोऽपवादः । देवागारे नियुक्तो देवागारिकः । कोष्ठागारिकः । भाण्डागारिकः ।

<अध्यायिन्यदेशकालात् ।। 4-4-71 ।।>

`तत्र' इत्येव । सप्तमीसमर्थाददेशवाचिनः प्रातिपदिकादकालवाचिनश्चाध्यायिन्यभिधेये ठक् प्रत्ययो भवति । अध्ययनस्य यौ देशकालौ शास्त्रेण प्रतिषिद्धौ तावदेशकालशब्देनोच्येते, तत इदं प्रत्ययविधानम् । श्मशानेऽधीते श्माशानिकः । चातुष्पथिकः । अकालात्--चतुर्दश्यामधीते चातुर्दशिकः । आमावास्यिकः ।

अदेशकालादिति किम् ? स्रुघ्नेऽधीते । पूर्वाह्णेऽधीते ।।

<कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति ।। 4-4-72 ।।>

`तत्र' इत्येव । कठिनशब्दान्तात्सप्तमीसमर्थात् प्रस्तारसंस्थानशब्दाभ्यां च ठक् प्रत्ययो भवति, `व्यवहरति' इत्येतस्मिन्नर्थे । व्यवहारः=क्रियातत्त्वम्, यथा---लौकिकव्यवहार इति । वंशकठिने व्यवहरति वांशकठिनिकश्चक्रचरः । वार्धकठिनिकः । प्रास्तारिकः । सांस्थानिकः ।।

<निकटे वसति ।। 4-4-73 ।।>

निकटशब्दात्सप्तमीसमर्थाद् `वसति' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । यस्य शास्त्रतो निकटवासस्तत्रायं विधिः । `आरण्यकेन भिक्षुणा ग्रामात्क्रोशे वस्तव्यम्' इति शास्त्रम् । निकटे वसति नैकटिको भिक्षुः ।।

<आवसथात् ष्ठछल् ।। 4-4-74 ।।>

`तत्र' इत्येव । आवसथशब्दात्सप्तमीसमर्थाद् `वसति' इत्येतस्मिन्नर्थे ष्ठल्प्रत्ययो भवति । लकारः स्वरार्थः, षकारो ङीषर्थः । आवसथे वसति आवसथिकः । आवसथिकी ।

ठकः पूर्णोऽवधिः, अतः परमन्यः प्रत्ययो, विधीयते ।।

<प्राग्घिताद्यत् ।। 4-4-75 ।।>

"तस्मै हितम्"(5.1.5/1665) इति वक्ष्यति । प्रागेतस्माद्धितसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामो यत्प्रत्ययस्तेष्वधिकृतो वेदितव्यः । वक्ष्यति - "तद्वहति रथयुगप्रासङ्गम्"(4.4.76/1627)। रथ्यः । युग्यः । प्रासङ्ग्यः ।।

<तद्वहति रथयुगप्रासङ्गम् ।। 4-4-76 ।।>

`तत्' इति द्वितीयासमर्थेभ्यो रथयुगप्रासङ्गेभ्यः `वहति' इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । रथं वहति रथ्यः । युग्यः । प्रासङ्ग्यः ।

`रथसीताहलेभ्यो यद्विधौ'(कात्या.वा.1) इति तदन्तविध्युपसङ्ख्यानात् परमरथ्य इत्यपि भवति ।।

<धुरो यड्ढकौ ।। 4-4-77 ।।>

`तद्वहति' इत्येव । `धूर्' इत्येतस्माद् द्वितीयासमर्थाद् `वहति' इत्येतस्मिन्नर्थे यत्, ढक्-इत्येतौ प्रत्ययौ भवतः । धुरं वहतीति धुर्यः, धौरेयः ।।

<खः सर्वधुरात् ।। 4-4-78 ।।>

`तद्वहति' इत्येव । सर्वधुराशब्दाद् द्वितीयासमर्थाद् `वहति' इत्येतस्मिन्नर्थे खः प्रत्ययो भवति । सर्वधुरां वहति सर्वधुरीणः ।

स्त्रीलिङ्गे न्याय्ये `सर्वधुरात्' इति प्रातिपदिकमात्रापेक्षो निर्देशः । `खः' इति योगविभागः कर्त्तव्य इष्टसंग्रहार्थः । उत्तरधुरीणः । दक्षिणधुरीणः ।।

<एकधुराल्लुक् च ।। 4-4-79 ।।>

`तद्वहति' इत्येव । एकधुराशब्दाद् द्वितीयासमर्थाद् `वहति' इत्येतस्मिन्नर्थे खः प्रत्ययो भवति तस्य च लुग्भवति । वचनसामर्थ्यात्पक्षे लुग्भवति । एकधुरां वहति एकधुरीणः । एकधुरः ।।

<शकटादण् ।। 4-4-80 ।।>

`तद्वहति' इत्येव । शकटशब्दाद् द्वितीयासमर्थाद् `वहति' इत्येतस्मिन्नर्थेऽण् प्रत्ययो भवति । शकटं वहति शाकटो गौः ।।

<हलसीराट्ठक् ।। 4-4-81 ।।>

`तद्वहति' इत्येव । हलसीरशब्दाभ्यां द्वितीयासमर्थाभ्यां `वहति' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । हलं वहति हालिकः । सौरिकः ।

<संज्ञायां जन्याः ।। 4-4-82 ।।>

`तद्वहति' इत्येव । जनीशब्दात् द्वितीयासमर्थाद् `वहति' इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति, समुदायेन चेत्संज्ञा गम्यते । जनीं वहति जन्या=जामातुर्वयस्या । सा हि विवाहादिषु जामातृसमीपं प्रापयति। जनी=वधूरुच्यते ।

<विध्यत्यधनुषा ।। 4-4-83 ।।>
`तत्' इति द्वितीयासमर्थाद् `विद्ध्यति' इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति, न चेद्धनुष्करणं भवति । पादौ विद्ध्यन्ति पद्याः शर्कराः । ऊरव्याः कण्टकाः । अधनुषेति किम् ? पादौ विद्ध्यति धनुषा ।
नन्वसमर्थत्वादनभिधानाच्च प्रत्ययो न भवति, न हि धनुषा पद्य इत्युक्ते विवक्षितोऽर्थः प्रतीयते ? एवं तर्हि धनुष्प्रतिषेधेन व्यधनक्रिया विशेष्यते, यस्या धनुष्करणं न सम्भाव्यते इति । तेनेह न भवति--चौरं विध्यति, शत्रुं विध्यति देवदत्त इति ।।
<धनगणं लब्धा ।। 4-4-84 ।।>
`तत्' इत्येव । धनगणशब्दाभ्यां द्वितीयासमर्थाभ्याम् `लब्धा' इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति । धन्यः । गण्यः । लब्धेति तृनन्तम्, तेन द्वितीया समर्था विभक्तिर्युज्यते ।।
<अन्नाण्णः ।। 4-4-85 ।।>
अन्नशब्दात् `तत्' इति द्वितीयासमर्थात् `लब्धा' इत्येतस्मिन्नर्थे णः प्रत्ययो भवति । अन्नं लब्धा आन्नः ।।
<वशं गतः ।। 4-4-86 ।।>
वशशब्दात् `तत्' इति द्वितीयासमर्थाद् `गतः' इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । वशं गतः वश्यः=कामप्राप्तोः, विधेय इत्यर्थः ।।
<पदमस्मिन् दृश्यम् ।। 4-4-87 ।।>
निर्देशादेव प्रथमा समर्थविभक्तिः । पदशब्दात्प्रथमासमर्थाद् दृश्यार्थोपाधिकादस्मिन्निति सप्तम्यर्थे यत्प्रत्ययो भवति । पदं दृश्यमस्मिन् पद्यः कर्दमः । पद्याः पांसवः । शक्यार्थे कृत्यप्रत्यः । शक्यते यस्मिन् पदं द्रष्टुं प्रतिमुद्रोत्पादनेन स पद्यः कर्दमः । कर्दमस्यावस्थोच्यते--नातिद्रवो नातिशुष्क इति ।।
<मूलमस्यावर्हि ।। 4-4-88 ।।>
मूलशब्दात्प्रथमासमर्थाद् `आबर्हि' इत्येवमुपाधिकादस्येति षष्ठ्यर्थे यत्प्रत्ययो भवति । मूलमेषामावर्हि मूल्या माषाः । मूल्या मुद्गाः । `वृहू उद्यमे'(धा.पा.1348), येषां मूलमावृह्यते उत्पाट्यते ते मूल्याः, सुष्ठु निष्पन्नाः । मूलोत्पाटनेन विना ग्रहीतुं न शक्यन्ते इत्यर्थः ।।
<संज्ञायां धेनुष्या ।। 4-4-89 ।।>
`धेनुष्या' इति निपात्यते संज्ञायां विषये । संज्ञाग्रहणमभिधेयनियमार्थम् । धेनोः षुगागमो यश्च प्रत्ययो निपात्यते । अन्तोदात्तोऽपि ह्ययमिष्यते । या धेनुरुत्तमर्णाय ऋणप्रदानाद्दोहनार्थं दीयते सा धेनुष्या । पीतदुग्धेति यस्याः प्रसिद्धिः । धेनुष्यां भवते ददामि ।।
<गृहपतिना संयुक्ते ञ्यः ।। 4-4-90 ।।>
निर्देशादेव तृतीया समर्थविभक्तिः । गृहपतिशब्दात् तृतीयासमर्थात् `संयुक्ते' इत्येतस्मिन्नर्थे ञ्यः प्रत्ययो भवति । गृहपतिना संयुक्तः गार्हपत्योऽग्निः । अन्यस्यापि गृहपतिना संयोगोऽस्ति, तत्र संज्ञाधिकारादतिप्रसङ्गनिवृत्तिः ।।
<नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु ।। 4-4-91 ।।>
नावादिभ्योऽष्टभ्यः शब्देभ्योऽष्टस्वेव तार्यादिष्वर्थेषु यथासङ्ख्यं यत्प्रत्ययो भवति । प्रत्ययार्थद्वारेण तृतीया समर्थविभक्तिर्लभ्यते । नावा तार्यं नाव्यमुदकम् । नाव्या नदी । शक्यार्थे कृत्यः ।
वयसा तुल्यो वयस्यः सखा । संज्ञाधिकारोऽभिधेयनियमार्थः, तेन वयसा तुल्ये शत्रौ न भवति ।
धर्मेण प्राप्यं धर्म्यम् । ननु च "धर्मादनपेते"(4.4.92/1644) इति वक्ष्यमाणेनैव सिद्धम् ? नैतदस्ति; धर्मं यदनुवर्त्तते तद्धर्मादनपेतमित्युच्यते, फलं तु धर्मादपेत्यैव; कार्यविरोधित्वाद्धर्मस्य ।
विषेण वध्यो विष्यः । विषेण वधमर्हतीत्यर्थः ।
मूलेनानाम्यं मूल्यम् । आनाम्यम् = अभिभवनीयम् । पटादीनामुत्पत्तिकारणं मूलम्, तेन तदभिभूयते शेषीक्रियते । मूलं हि सगुणं मूल्यं करोति । "पोरदुपधात्"(3.1.98/2844) इति यति प्राप्ते आनाम्यमिति निपातनाण्ण्यत् । मूलेन समो मूल्यः पटः । उपादानेन समानफल इत्यर्थः ।
सीतया समितं सीत्यं क्षेत्रम् । समितम् = सङ्गतमित्यर्थः ।।
`रथसीताहलेभ्यो यद्विधौ'(कात्या.वा.1) इति तदन्तविधिरपीष्यते । परमसीत्यम् । उत्तमसीत्यम् । द्विसीत्यम् । त्रिसीत्यम् ।
तुलया सम्मितं तुल्यम् । सम्मितम्=समानम्, सदृशमित्यर्थः ।
यथा--तुला परिच्छिनत्ति परम्, एवं तदपीति ।।
<धर्मपथ्यर्थन्यायादनपेते ।। 4-4-92 ।।>
निर्देशादेव पञ्चमी समर्थविभक्तिः । धर्मादिभ्यः पञ्चमीसमर्थेभ्यः-`अनपेतः' इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । धर्मादनपेतं धर्म्यम् । पथ्यम् । अर्थ्यम् । न्याय्यम् ।
संज्ञाधिकारादभिधेयनियमः ।।
<छन्दसो निर्मिते ।। 4-4-93 ।।>
प्रत्ययार्थसामर्थ्यलभ्या समर्थविभक्तिः । छन्दः शब्दात् तृतीयासमर्थात् `निर्मिते' इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । निर्मितः = उत्पादितः । छन्दसा

निर्मितश्छन्दस्यः । इच्छया कृत इत्यर्थः ।
इच्छापर्यायश्छन्दःशब्द इह गृह्यते ।।
<उरसोऽण् च ।। 4-4-94 ।।>
उरः शब्दात्तृतीयासमर्थात् `निर्मिते' इत्येतस्मिन्नर्थेऽण् प्रत्ययो भवति, चकाराद्यच्च । उरसा निर्मित औरसः पुत्रः, उरस्यः पुत्रः ।
संज्ञाधिकारादभिधेयनियमः ।।
<हृदयस्य प्रियः ।। 4-4-95 ।।>
निर्देशादेव समर्थविभक्तिः । हृदयशब्दात्षष्ठीसमर्थात् `प्रियः' इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । हृदयस्य प्रियो हृद्यो देशः । हृद्यं वनम् ।
संज्ञाधिकारादभिधेयनियमः । इह न भवति---हृदयस्य प्रियः पुत्र इति ।।
<बन्धने चर्षौ ।। 4-4-96 ।।>
`हृदयस्य' इत्येव । `बन्धने' इति प्रत्ययार्थः । तद्विशेषणमृषिग्रहणम् । बद्ध्यते येन तद्बन्धनम् । हृदयशब्दात्षष्ठीसमर्थाद्बन्धने ऋषावभिधेये यत् प्रत्ययो भवति । ऋषिः= वेदो गृह्यते । हृदयस्य बन्धनमृषिः हृद्यः । परहृदयं येन बद्ध्यते वशीक्रियते स वशीकरणमन्त्रः=हृद्य इत्युच्यते ।।
<मतजनहलात् करणजल्पकर्षेषु ।। 4-4-97 ।।>
मतादिभ्यस्त्रिभ्यः शब्देभ्यस्त्रिष्वेव करणादिष्वर्थेषु यथासङ्ख्यं यत्प्रत्ययो भवति । प्रत्ययार्थसामर्थ्याल्लब्धा षष्ठी समर्थविभक्तिः । मतम् = ज्ञानम्, तस्य करणं मत्यम्, भावसाधनं वा । जनस्य जल्पो जन्यः । हलस्य कर्षो हल्यः । द्विहल्यः । त्रिहल्यः । कर्षणं कर्षः, भावसाधनं वा ।।
<तत्र साधुः ।। 4-4-98 ।।>
`तत्र' इति सप्तमीसमर्थात् `साधुः' इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । सामसु साधुः सामान्यः । वेमन्यः । कर्मण्यः । शरण्यः ।
साधुरिह प्रवीणो योग्यो वा गृह्यते, नोपकारकः; तत्र हि परत्वात् "तस्मै हितम्"(5.1.5/1665) इत्यनेन विधिना भवितव्यम् ।।
<प्रतिजनादिभ्यः खञ् ।। 4-4-99 ।।>
प्रतिजनादिभ्यः शब्देभ्यः खञ् प्रत्ययो भवति, `तत्र साधुः' इत्येतस्मिन्नर्थे । यतोऽपवादः । प्रतिजने साधुः प्रातिजनीनः । जनेजने साधुरित्यर्थः । ऐदंयुगीनः । सांयुगीनः ।
प्रतिजन । इदंयुग । संयुग । समयुग । परयुग । परकुल । परस्यकुल । अमुष्यकुल । सर्वजन । विश्वजन । पञ्चजन । महाजन । प्रतिजनादिः ।।
यत्र हितार्थ एव साध्वर्थः, तत्र वचनात्प्राक्क्रीतीया बाध्यन्ते ।।
<भक्ताण्णः ।। 4-4-100 ।।>
भक्तशब्दाद् णः प्रत्ययो भवति, `तत्र साधुः' इत्येतस्मिन्विषये । यतोऽपवादः । भक्ते साधुः भाक्तः शालिः । भाक्तास्तण्डुलाः ।।
<परिषदो ण्यः ।। 4-4-101 ।।>
परिषद्-शब्दाद् ण्यः प्रत्ययो भवति, `तत्र साधुः' इत्येतस्मिन् विषये । यतोऽपवादः । परिषदि साधुः पारिषद्यः ।
णप्रत्ययोऽप्यत्रेष्यते । तदर्थं योगविभागः क्रियते---`परिषदः' णो भवति । परिषदि साधुः पारिषदः, ततः `ण्यः', परिषद इत्येव ।।
<कथादिभ्यष्ठक् ।। 4-4-102 ।।>
कथादिभ्यः शब्देभ्यष्ठक् प्रत्ययो भवति `तत्र साधुः' इत्येतस्मिन्विषये । यतोऽपवादः । कथायां साधुः काथिकः । वैकथिकः ।
कथा । विकथा । वितण्डा । कुष्टचित् । जनवाद । जनेवाद । वृत्ति । सद्गृह । गुण । गण । आयुर्वेद । कथादिः ।।
<गुडादिभ्यष्ठञ् ।। 4-4-103 ।।>
गुडादिभ्यः शब्देभ्यष्ठञ् प्रत्ययो भवति `तत्र साधुः' इत्येतस्मिन्विषये । यतोऽपवादः । गुडे साधुः गौडिक इक्षुः । कौल्माषिको मुद्गः । साक्तुको यवः ।
गुड । कुल्माष । सक्तु । अपूप । मांसौदन । इक्षु । वेणु । सङ्ग्राम । सङ्घात । प्रवास । निवास । उपवास । गुडादिः ।।
<पथ्यतिथिवसतिस्वपतेर्ढञ् ।। 4-4-104 ।।>
पथ्यादिभ्यः शब्देभ्यो ढञ् प्रत्ययो भवति `तत्र साधुः' इत्येतस्मिन्विषये । यतोऽपवादः । पथि साधु पाथेयम् । आतिथेयम् । वासतेयम् । स्वापतेयम् ।।
<सभाया यः ।। 4-4-105 ।।>
सभाशब्दाद्यः प्रत्ययो भवति `तत्र साधुः' इत्येतस्मिन्विषये । यतोऽपवादः । स्वरे विशेषः । सभायां साधुः सभ्यः ।।
<ढश्छन्दसि ।। 4-4-106 ।।>
सभाशब्दाड्ढः प्रत्ययो भवति `तत्र साधुः' इत्येतस्मिन्विषये छन्दसि । यस्यापवादः । `सभेयो युवाऽस्य यजमानस्य वीरो जायताम्'(वा.सं.22.22) ।।
<समानतीर्थे वासी ।। 4-4-107 ।।>
`साधुः' इति निवृत्तम् । `वासी' इति प्रत्ययार्थः । समानतीर्थ शब्दात्तत्रेति सप्तमीसमर्थाद् `वासी' इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । समाने तीर्थे वासीति सतीर्थ्यः । समानोपाध्याय इत्यर्थः । तीर्थशब्देनेह गुरुरुच्यते । समानस्य सभावः, तीर्थे यः ।।

<समानोदरे शयित ओ चोदात्तः ।। 4-4-108 ।।>
समानोदरशब्दात्सप्तमीसमर्थात् `शयितः' इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति, ओकारश्चोदात्तः । शयितः=स्थित इत्यर्थः । समानोदरे शयितः समानोदर्यो भ्राता ।।
<सोदराद्यः ।। 4-4-109 ।।>
सोदरशब्दात्सप्तमीसमर्थात् `शयितः' इत्येतस्मिन्नर्थे यः प्रत्ययो भवति । "विभाषोदरे"(6.3.88/1016) इति सूत्रेण यकारादौ प्रत्यये विवक्षिते प्रागेव समानस्य सभावः । समानोदरे शयितः सोदर्यो भ्राता । `ओ चोदात्तः' इति नानुवर्त्तते । यकारे स्वरः ।।
<भवे छन्दसि ।। 4-4-110 ।।>
`तत्र' इत्येव । सप्तमीसमर्थाद् `भवे' इत्येतस्मिन्नर्थे छन्दसि विषये यत्प्रत्ययो भवति । अणादीनां घादीनां चापवादः । सति दर्शने तेऽपि भवन्ति; सर्वविधीनां छन्दसि व्यभिचारात् । `नमो मेघ्याय च विद्युत्याय च नमः'(तै.सं.4.5.7.16) ।
आपादपरिसमाप्तेश्छन्दोऽधिकारः । भवाधिकारश्च "समुद्राभ्राद्धः"(4.4.118/3464) इति यावत् ।।
<पाथोनदीभ्यां ड्यण् ।। 4-4-111 ।।>
पाथशब्दान्नदीशब्दाच्च ड्यण् प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्नर्थे । यतोऽपवादः । पाथसि भवः `पाथ्यो वृषा'(ऋ.6.16.15) । `नाद्यो गिरो मे प्रयच्छति'(ऋ.2.35.1) । पाथोऽन्तरिक्षम् ।।
<वेशन्तहिमवद्भ्यामण् ।। 4-4-112 ।।>
वेशन्तशब्दाद्धिमवच्छब्दाच्चाण् प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । यतोऽपवादः । `वैशन्तीभ्यः स्वाहा'(तै.सं.7.4.13.9) । `हैमवन्तीभ्यः स्वाहा'(शौ.19.2.1) ।
<स्रोतसो विभाषा ड्यड्ड्यौ ।। 4-4-113 ।।>
स्रोतशशब्दाद्विभाषा `ड्यत्', `ड्य'- इत्यतौ प्रत्ययौ भवतः `तत्र भवः' इत्येतस्मिन्विषये । यतोऽपवादः । पक्षे सोऽपि भवति । स्रोतसि भवः `स्रोत्यः'(ऋ.10.104.8) । `स्रोतस्यः'(अ.19.2.4) । ड्यड्ड्ययोः स्वरे विशेषः ।।
<सगर्भसयूथसनुताद्यन् ।। 4-4-114 ।।>
`सगर्भ', `सयूथ', `सनुत'-शब्देभ्यो यन् प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । यतोऽपवादः । स्वरे विशेषः । `अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः'(तै.सं.1.2.4.2) । `यो नः सनुत्यः'(ऋ.2.30.9) । सर्वत्र "समानस्य छन्दसि"(6.3.84/1012) इति सभावः ।।
<तुग्राद् घन् ।। 4-4-115 ।।>
तुग्रशब्दाद्धन् प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । यतोऽपवादः । `त्वमग्ने वृषभस्तुग्रियाणाम्' । अन्नाकाशयज्ञवरिष्ठेषु तुग्रशब्दः ।।
<अग्राद्यत् ।। 4-4-116 ।।>
अग्रशब्दाद्यत् प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्विषये । अग्रे भवम् `अग्र्यम्'(खि.1.3.7) । किमर्थमिदम्, यावता सामान्येन यद्विहित एव ? "घच्छौ च"(4.4.117/3463) इति वक्ष्यति, ताभ्यां बाधा मा भूदिति पुनर्विधीयते ।।
<घच्छौ च ।। 4-4-117 ।।>
अग्रशब्दाद्यत्, घच्छौ प्रत्ययौ भवन्ति, `तत्र भवः' इत्येतस्मिन्विषये । `अग्र्यम्'(खि.1.3.7), `अग्रियम्'(ऋ.1.13.10), `अग्रीयम्'(मै.2.7.13.13) । चकारः `तुग्राद्धन्' इत्यस्यानुकर्षणार्थः । अग्रियम् । स्वरे विशेषः ।।
<समुद्राभ्राद् घः ।। 4-4-118 ।।>
समुद्रशब्दाद्, अभ्रशब्दाच्च घः प्रत्ययो भवति `तत्र भवः' इत्येतस्मिन्नर्थे । यतोऽपवादः । `समुद्रिया नदीनाम्'(ऋ.7.87.1) । `अभ्रियस्येव घोषः'(ऋ.10.68.1) ।
अभ्रशब्दास्यापूर्वनिपातः; तस्य लक्षणस्य व्यभिचारित्वात् ।।
<बर्हिषि दत्तम् ।। 4-4-119 ।।>
`भवः' इति निवृत्तम् । बर्हिः - शब्दात्सप्तमीसमर्थात् `दत्तम्' इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति । `बर्हिष्येषु निधिषु प्रियेषु'(ऋ.10.15.5) ।।
<दूतस्य भागकर्मणी ।। 4-4-120 ।।>
निर्देशादेव समर्थविभक्तिः । दूतशब्दात् षष्ठीसमर्थाद्भागे कर्मणि चाभिधेये यत्प्रत्ययो भवति । भागः = अंशः । कर्म = क्रिया । `यत्ते अग्ने दूत्यम्'(ऋ.1.12.4) । दूतभागः, दूतकर्म वा ।।
<रक्षोयातूनां हननी ।। 4-4-121 ।।>
निर्देशादेव समर्थविभक्तिः । रक्षः शब्दाद्यातुशब्दाच्च षष्ठीसमर्थात् `हननी' इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । हन्यतेऽनयेति हननी । `यावां मित्रावरुणौ रक्षस्या तनूः'(मै.2.3.1) । रक्षसां हननी । `यातव्या'(मै.2.3.1) । यातूनां हननी ।

बहुवचनं स्तुतिवैशिष्ट्यज्ञापनार्थम् । बहूनां रक्षसां हननेन तनूः स्तूयते ।।
<रेवतीजगतीहविष्याभ्यः प्रशस्ये ।। 4-4-122 ।।>
रेवत्यादिभ्यः षष्ठीसमर्थेभ्यः प्रशस्ये वाच्ये यत्प्रत्ययो भवति । प्रशंसनं प्रशस्यम्, भावे क्यप् प्रत्ययो भवति । `यद्वो रेवती रेवत्यम्'(काठ.सं.1.8) । `यद्वो जगती जगत्यम्'(काठ.सं.1.8) । `यद्वो हविष्या हविष्यम्'(काठ.सं.1.8) । हविषे हिता हविष्याः, तासां प्रशंसनं हविष्यम् । यस्येति लोपे कृते "हलो यमा यमि लोपः"(8.4.64/60) इति लोपः ।।
<असुरस्य स्वम् ।। 4-4-123 ।।>
असुरशब्दात्षष्ठीसमर्थात् `स्वम्' इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । अणोऽपवादः । `असुर्यं वा एतत्पात्रम्, यच्चक्रधृतं कुलालकृतम्'(मै.सं.1.8.3) ।।
<मायायामण् ।। 4-4-124 ।।>
असुरशब्दात्षष्ठीसमर्थात् `मायायाम्' स्वविशेषेऽण्प्रत्ययो भवति । पूर्वस्य यतोऽपवादः । `आसुरी माया स्वधया कृतासि'(वा.सं.11.69) ।।
<तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः ।। 4-4-125 ।।>
`तद्वान्' इति निर्देशादेव समर्थविभक्तिः । मतुबन्तात्प्रातिपदिकात् प्रथमासमर्थादासामिति षष्ठ्यर्थे यत्प्रत्ययो भवति, यत्प्रथमासमर्थमुपधानो मन्त्रश्चेत्स भवति । यत्तदासामिति निर्दिष्टमिष्टकाश्चेत्ता भवन्ति । `लुक्च मतोः' इति प्रकृतिनिर्ह्रासः । इतिकरणस्ततश्चेद्विवक्षा । `तद्वान्' इत्यवयवेन समुदायो निर्दिश्यते । वर्चः शब्दो यस्मिन्मन्त्रेऽस्ति स वर्चस्वान् । उपधीयते येन स उपधानः । चयनवचन इत्यर्थः । वर्चस्वानुपधानमन्त्र आसामिष्टकानामिति विगृह्य यति विहिते मतोर्लुकि कृते - `वर्चस्या'(तै.ब्रा.1.8.9.1) उपदधाति, `तेजस्या'(तै.ब्रा.1.8.1.9) उपदधाति । `पयस्याः'(तै.सं.2.3.13.1) । `रेतस्याः'(ष.विं.21) ।
तद्वानिति किम् ? मन्त्रसमुदायादेव मा भूत् । उपधान इति किम् ? वर्चस्वानुपस्थानमन्त्र आसामित्यत्र मा भूत् । मन्त्र इति किम् ? अङ्गुलिमानुपधानो हस्त आसामित्यत्र मा भूत् । इष्टकास्विति किम् ? अङ्गुलिमानुपधानो हस्त आसामित्यत्र मा भूत् ।
इतिकरणो नियमार्थः । अनेकपदसम्भवेऽपि केनचिदेव पदेन तद्वान्मन्त्रो गृह्यते, न सर्वेण ।।
<अश्विमानण् ।। 4-4-126 ।।>
अश्विशब्दो यस्मिन्मन्त्रेऽस्ति सोऽश्विमान्, अश्विमच्छब्दादण् प्रत्ययो भवति । पूर्वस्य यतोऽपवादः । अश्विमानुपधानो मन्त्र आसामिष्टकानामिति विगृह्याण्विधीयते, तत्र मतुपो लुकि कृते "इनण्यनपत्ये"(6.4.164/1245) इति प्रकृतिभावः । `आश्विनीरुपदधाति'(श.ब्रा.8.2.1.11) ।।
<वयस्यासु मूर्ध्नो मतुप् ।। 4-4-127 ।।>
वयस्वानुपधानो मन्त्रो यासां ता वयस्याः, तास्वभिधेयासु मूर्ध्नो मतुप् प्रत्ययो भवति । पूर्वस्य यतोऽपवादः । यस्मिन्मन्त्रे वयः शब्दो मूर्द्धन्शब्दश्च विद्यते, स वयस्वानपि भवति, मूर्द्धन्वानपि; यथा - `मूर्द्धावयः प्रजापतिच्छन्द'(वा.सं.14.9) इति । तत्र वयस्वच्छब्दादिव मूर्द्धन्वच्छब्दादपि यति प्राप्ते मतुब् विधायते - `मूर्द्धन्वतीरुपदधाति'(तै.सं.5.3.8.3), वयस्या एव मूर्द्धन्वत्यः ।
वयस्यास्विति किम् ? यत्र मूर्द्धन्शब्द एव केवलो न वयः शब्दः, तत्र मा भूत् ।
`मर्द्धन्वतः' इति वक्तव्ये `मूर्ध्नः' इत्युक्तम्--मतुपो लुकं भाविनं चित्ते कृत्वा ।।
<मत्वर्थे मासतन्वोः ।। 4-4-128 ।।>
यस्मिन्नर्थे मतुब्विहितस्तस्मिंश्छन्दसि विषये यत्प्रत्ययो भवति मासतन्वोः प्रत्ययार्थविशेषणयोः । प्रथमासमर्थादस्त्युपाधिकात्षष्ठ्यर्थे सप्तम्यर्थे च यत्प्रत्ययो भवति । मत्वर्थीयानामपवादः । नभांसि विद्यन्ते यस्मिन्मासे `नभस्यो'(तै.सं.1.4.14.1) मासः । `सहस्यः'(तै.सं.1.4.14.1) । `तपस्यः'(तै.सं.1.4.14.1) । `मधव्यः'(तै.सं.5.2.9.3) । नभः शब्दोऽभ्रेषु वर्त्तते । तन्वां खल्वपि--ओजोऽस्यां विद्यते `ओजस्या तनू, रक्षस्या'(मै.सं.2.3.1) ।
मासतन्वोरिति किम् ? मधुमता पात्रेण चरति ।
`मासतन्वोरनन्तरार्थे वा'(म.भा.2.334) । मध्वस्मिन्नस्ति, मध्वस्मिन्ननन्तरमिति वा मधव्यो मासः ।
* लुगकारेकाररेफाश्च वक्तव्याः * (म.भा.2.335)। लुक्तावत्-`तपश्च तपस्यश्च'(तै.सं.1.4.14.1) । `नभश्च नभस्यश्च'(तै.सं.1.4.14.1) । `सहश्च सहस्यश्च'(तै.सं.1.4.14.1) । नपुंसकलिङ्गं छान्दसत्वात् । अकारः - `इषो मासः'(तै.सं.1.4.14.1) । `ऊर्जो मासः'(तै.सं.1.4.14.1) । इकारः - `शुचिर्मासः'(तै.सं.1.4.14.1) । रेफः - `शुक्रो मासः'(तै.सं.1.4.14.1) ।
<मधोर्ञ च ।। 4-4-129 ।।>
मधुशब्दान्मत्वर्थे ञः प्रत्ययो भवति, चकाराद्यच्च । उपसङ्ख्यानाल्लुक्च । `माधवः'(तै.सं.1.4.14.1), `मधव्यः'(तै.सं.1.4.14.1), `मधुः'(तै.सं.1.4.14.1) । तन्वां खल्वपि - माधवा, मधव्या, मधुः तनूः ।।
<ओजसोऽहनि यत्खौ ।। 4-4-130 ।।>
`मत्वर्थे' इत्येव । ओजः शब्दान्मत्वर्थे यत्खौ प्रत्ययौ भवतोऽहन्यभिधेये । ओजस्यमहः । ओजसीनमहः ।।

<वेशोयशआदेर्भगाद्यल् ।। 4-4-131 ।।>

`मत्वर्थे' इत्येव । वेशोयशसी आदौ यस्य प्रातिपदिकस्य तस्माद् वेशोयशआदेर्भगान्तात् प्रातिपदिकान्मत्वर्थे यल् प्रत्ययो भवति । लकारः स्वरार्थः । वेशोभगो विद्यते यस्य स वेशोभग्यः । यशोभग्यः ।

वेशः = इति बलमुच्यते । श्रीकामप्रयत्नमाहात्म्यवीर्ययशस्सु भगशब्दः । वेशश्चासौ भगश्च श्रीप्रभृतिर्वेशोभगः, सोऽस्यास्तीति वेशोभग्यः ।।

<ख च ।। 4-4-132 ।।>

वेशोयशआदेर्भगान्तात्प्रातिपदिकान्मत्वर्थे खः प्रत्ययो भवति । योगविभागो यथासङ्ख्यनिरासार्थ उत्तरार्थश्च । चकाराद्यत् । वेशोभग्यः, वेशोभगीनः । यशोभग्यः । यशोभगीनः ।।

<पूर्वैः कृतमिनयौ च ।। 4-4-133 ।।>

`मत्वर्थे' इति निवृत्तम् । निर्देशादेव समर्थविभक्तिः । पूर्वशब्दात् तृतीयासमर्थात्कृतमित्येतस्मिन्नर्थे `इन', `य' इत्येतौ प्रत्ययौ भवतः । चकारात्ख च ।

`गम्भीरेभिः पथिभिःपूर्विणेभिः'(काठ.सं.9.6.19)। `पूर्व्यैः'(तै.1.8.5.2) । पूर्वीणैः ।

`पूर्वैः' इति बहुवचनान्तेन पूर्वपुरुषा उच्यन्ते । तत्कृताः पन्थानः प्रशस्ता इति पथां प्रशंसा ।।

<अद्भिः संस्कृतम् ।। 4-4-134 ।।>

निर्देशादेव समर्थविभक्तिः । अप्शब्दात्तृतीयासमर्थात् `संस्कृतम् ' इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । `यस्येदमप्यं हविः'(ऋ.10.86.12) । अद्भिः संस्कृतमिति ।।

<सहस्रेण संमितौ घः ।। 4-4-135 ।।>

निर्देशादेव समर्थविभक्तिः । सहस्रशब्दात्तृतीयासमर्थात् `सम्मितौ' इत्येतस्मिन्नर्थे घः प्रत्ययो भवति । सम्मितस्तुल्यः सदृशः । `अयमग्निः सहस्रियः'(तै.सं.4.7.13.4) । सहस्रतुल्य इत्यर्थः ।

केचित्तु `समितौ' इति पठन्ति । तत्रापि समित्या सम्मित एव लक्षयितव्यः; तत्र छन्दसि प्रयोगदर्शनात् ।।

<मतौ च ।। 4-4-136 ।।>

मत्वर्थे च सहस्रशब्दात् घः प्रत्ययो भवति । सहस्रमस्य विद्यते सहस्रियः । "तपः सहस्राभ्यां विनीनी"(5.2.102/1909), "अण् च"(5.2.103/1910) इत्यस्यापवादः ।।

<सोममर्हति यः ।। 4-4-137 ।।>

निर्देशादेव समर्थविभक्तिः । सोमशब्दाद् द्वितीयासमर्थाद् `अर्हति' इत्येतस्मिन्नर्थे यः प्रत्ययो भवति । सोममर्हन्ति `सोम्या ब्राह्मणाः'(तै.सं.2.1.2.9) । यज्ञार्हा इत्यर्थः । यति प्रकृते यग्रहणं स्वरे विशेषः ।।

<मये च ।। 4-4-138 ।।>

सोमग्रहणम्, यश्चानुवर्त्तते । `मये' इति मयडर्थो लक्ष्यते । सोमशब्दान्मयडर्थे यः प्रत्ययो भवति ।

आगतविकारावयवप्रकृता मयडर्थाः - "हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः"(4.3.81/1461), "मयट् च"(4.3.82/1462), "मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः"(4.3.143/1523), "तत्प्रकृतवचने मयट्"(5.4.21/2089) इति । तत्र यथायोगं समर्थविभक्तिः । `सोम्यं मधुपिबन्ति'(ऋ.8.24.13) । सोममयमित्यर्थः ।।

<मधोः ।। 4-4-139 ।।>

यशब्दो निवृत्तः । मधुशब्दान्मयडर्थे यत्प्रत्ययो भवति । मधव्यान् स्तोकान्(पै.1.88.2) । मधुमयानित्यर्थः ।

<वसोः समूहे च ।। 4-4-140 ।।>

वसुशब्दात्समूहे वाच्ये यत्प्रत्ययो भवति चकारान्मयडर्थे च । यथायोगं समर्थविभक्तिः । वसव्यः समूहः । मयडर्थो वा ।

* अक्षरसमूहे छन्दसः स्वार्थे उपसङ्ख्यानम् * (म.भा.2.335)। `ओश्रावयेति चतुरक्षरम्, अस्तु श्रौषडिति चतुरक्षरम्, यजेति द्व्यक्षरम्, ये यजामह इति पञ्चाक्षरम्, द्व्यक्षरो वषट्कारः। एष वै सप्तदशाक्षरश्छन्दस्यः प्रजापतिर्यज्ञो मन्त्रे विहितः'(मै.सं.1.4.11) । सप्तदशाक्षराण्येव छन्दस्य इत्यर्थः । छन्दःशब्दादक्षरसमूहे वर्त्तमानात्स्वार्थे यत्प्रत्ययः ।

* वसुशब्दादपि यद्वक्तव्यः * (म.भा.2.335)। `हस्तौ गृहीतस्य बहुभिर्वसव्यैः'(तै.सं.1.2.13.2) । वसुभिरित्यर्थः । `अग्निरीशे वसव्यस्य'(ऋ.4.55.8) । वसोरित्यर्थः ।

<नक्षत्राद् घः ।। 4-4-141 ।।>

नक्षत्रशब्दाद्घः प्रत्ययो भवति स्वार्थे । `समूहे' इति नानुवर्त्तते । `नक्षत्रियेभ्यः स्वाहा'(वा.सं.12.28) ।।

<सर्वदेवात्तातिल् ।। 4-4-142 ।।>

सर्वदेवशब्दाभ्यां तातिल् प्रत्ययो भवति, छन्दसि विषये स्वार्थिकः । `सर्वतातिम्'(ऋ.10.36) । `देवतातिम्'(ऋ.3.19.2) ।।

<शिवशमरिष्टस्य करे ।। 4-4-143 ।।>

करोतीति करः, प्रत्ययार्थः । तत्सामर्थ्यलभ्या षष्ठी समर्थविभक्तिः । शिवादिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्यः `करे' इत्येतस्मिन्नर्थे तातिल्प्रत्ययो भवति । शिवं करोतीति `शिवतातिः'(पै.5.36.1) । `शन्तातिः'(ऋ.8.18.7) । `अरिष्टतातिः'(ऋ.10.60.8) ।।

<भावे च ।। 4-4-144 ।।>

भावे चार्थे छन्दसि विषये शिवादिभ्यस्तातिल्प्रत्ययो भवति । शिवस्य भावः `शिवतातिः'(पै.5.36.1) । `शन्तातिः'(ऋ.8.18.7) । `अरिष्टतातिः'(ऋ.10.60.8) । यतः पूर्णोऽवधिः, अतः परमन्यः प्रत्ययोऽधिक्रियते ।।

इति श्रीजयादित्यविरचितायां काशिकावृत्तौ चतुर्थाध्यायस्य चतुर्थः पादः

* समाप्तोऽयं चतुर्थोऽध्यायः *

-------------------*********************--------------

5.1

काशिकावृत्तिः

अथ पञ्छमाध्याये प्रथमः पादः

प्राक् क्रीताच्छः ।। <5-1-1> ।।

"तेन क्रीतम्"() इति वक्ष्यति, प्रागेतस्मात्क्रीतसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामश्छप्रत्ययस्तेष्वधिकृतो वेदितव्यः। वक्ष्यति-"तस्मै हितम्"() इति। वत्सेभ्यो हितो वत्सीयो गोधुक्। करभीय उष्ट्रः। अकरभीयः। अवत्सीयः''।

अर्थोऽवधित्वेन गृहीतः, न प्रत्ययः। तेन `प्राक् ठञश्छः' इति नोक्तम्।।

।। ।।

उगवादिभ्यो यत् ।। <5-1-2> ।।

`प्राक् क्रीतात्' इत्येव। उवर्णान्तात्प्रातिपदिकाद् गवादिभ्यश्च यत्प्रत्ययो भवति, प्राक्क्रीतीयेष्वर्थेषु। छस्यापवादः। शङ्कव्यं दारु। पिचव्यः कार्पासः। कमण्डलव्या मृत्तिका । गवादिभ्यः खल्वपि-गव्यम्। हविष्यम्। सनङ्गुर्नाम चर्मविकारः, ततः परत्वात् `चर्मणोऽञ्' इत्येष विधिः प्राप्नोति; तथा चरुर्नाम हविः; सक्तुः = अन्नविकारः, अपूपादिषु `अन्नविकारेभ्यश्च' इति पठ्यते, ततः "विभाषा हविरपूपादिभ्यः"() इत्येष विधिः प्राप्नोति; तत्र सर्वत्र पूर्वविप्रतिषेधेन यत्प्रत्यय एवेष्यते--सनङ्गव्यं चर्म, चरव्यास्तण्डुलाः, सक्तव्या धाना इति।

गवादिषु `नाभि नभं च' इति पठ्यते, तस्यायमर्थः--`नाभिशब्दो यत्प्रत्ययमुत्पादयति नभं चादेशमापद्यते' इति। नाभये हितो नभ्योऽक्षः। नभ्यमञ्जनम्। यस्तु शरीरावयवो नाभिशब्दः, ततः "शरीरावयवाद्यत्"() इति यति कृते नाभये हितं नाभ्यं तैलमिति भवितव्यम्। गवादिषु यता सन्नियुक्तो नभभावोऽत्र न भवति। गो। हविस्। बर्हिष्। खट। अष्टका। युग। मेधा। स्रक्। * नाभि नभं च *। * शुनः सम्प्रसारणं वा दीर्घत्वं च तत्सन्नियोगेन चान्तोदात्तत्वम् *। शुन्यम्, शून्यम्। चकारस्यानुक्तसमुच्चयार्थत्वात् "नस्तद्धिते"() इति लोपो न स्यात्। * ऊधसोऽनङ् च *। ऊधन्यः कूपः। उदर। खर। स्खद। अक्षर। विष। गवादिः ।।।।

कम्बलाच्च संज्ञायाम् ।। <5-1-3> ।।

कम्बलात्प्राक्क्रीतीयेष्वर्थेषु यत्प्रत्ययो भवति संज्ञायां विषये। छस्यापवादः। कम्बल्यमूर्णापलशतम्। संज्ञायामिति किम्? कम्बलीया ऊर्णाः।।।।

विभाषा हविरपूपादिभ्यः ।। <5-1-4> ।।

हविर्विशेषवाचिभ्योऽपूपादिभ्यश्च प्रातिपदिकेभ्यः प्राक्क्रीतीयेष्वर्थेषु विभाषा यत् प्रत्ययो भवति। आमिक्ष्यं दधि, आमिक्षीयं दधि। पुरोडाश्यास्तण्डुलाः, पुरोडाशीयाः। हविश्शब्दात्तु गवादिपाठान्नित्यमेव भवति। अपूपादिभ्यः--अपूप्यम्, अपूपीयम्। तण्डुल्यम्, तण्डुलीयम्।

अपूप। तण्डुल। अभ्यूष। अभ्योष। पृथुक। अभ्येष। अर्गल। मुसल। सूप। कटक। कर्णवेष्टक। किण्व। *अन्नविकारेभ्यश्च*। पूप। स्थूणा। पीप। अश्व। पत्त्र। अपूपादिः ।। ।।

तस्मै हितम् ।। <5-1-5> ।।

`तस्मै' इति चतुर्थीसमर्थाद् `हितम्' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। वत्सेभ्यो हितो गोधुक् वत्सीयः। अवत्सीयः। पटव्यम्। गव्यम्। हविष्यम्। अपूप्यम्। अपूपीयम्।। ।।

शीरीरावयवाद्यत् ।। <5-1-6> ।।

शशीरम् = प्राणिकायः। शरीरावयववाचिनः प्रातिपदिकाद्यत् प्रत्ययो भवति `तस्मै हितम्' इत्येतस्मिन्विषये। छस्यापवादः। दन्त्यम्। कण्ठ्यम्। ओष्ठ्यम्। नाभ्यम्। नस्यम्।। <5-1-6> ।।

खलयवमाषतिलवृषब्रह्मणश्च ।। <5-1-7> ।।

खलादिभ्यो यत्प्रत्ययो भवति `तस्मै हितम्' इत्येतस्मिन्विषये। छस्यापवादः। खलाय हितं खल्यम्। यव्यम्। माष्यम्। तिल्यम्। वृष्यम्। ब्रह्मण्यम्। वृष्णे हितम्, ब्राह्मणेभ्यो हितमिति वाक्यमेव भवति। छप्रत्ययोऽपि न भवति, अनभिधानात्।

चकारोऽनुक्तसमुच्चयार्थः-रथाय हिता रथ्या।।

अजाविभ्यां थ्यन् ।। 5.1.8 ।।

अज, अवि-इत्येताभ्यां थ्यन् प्रत्ययो भवति `तस्मै हितम्' इत्येतस्मिन्विषये। छस्यापवादः। अजथ्या यूथिः। अविथ्या।।

आत्मन्विश्वजनभोगोत्तरपदात् खः ।। 5.1.9 ।।

आत्मन्, विश्वजन-इत्येताभ्यां भोगोत्तरपदाच्च प्रातिपदिकात्खः प्रत्ययो बवति `तस्मै हितम्' इत्येतस्मिन्विषये। छस्यापवादः। आत्मन् इति नलोपो न कृतः प्रकृतिपरिमाणज्ञापनार्थम्। तेनोत्तरपदग्रहणं भोगशब्देनैव सम्बध्यते, न तु प्रत्येकम्। आत्मने हितम् आत्मनीनम्। "आत्माध्वानौ खे"() इति प्रकृतिभावः। विश्वजनेभ्यो हितं विश्वजनीनम्। कर्मधारयादेवेष्यते। षष्ठीसमासाद्बहुव्रीहेश्च छ एव भवति। विश्वजनाय हितं विश्वजनीयम्।

* पञ्चजनादुपसङ्ख्यानम् *। पञ्चजनाच्च खः। अत्रापि कर्मधारयादिष्यते। पञ्चजनीनम्। अन्यत्र-पञ्चजनीयम्। * सर्वजनाट्ठञ् खश्च *। सार्वजनिकम्, सर्वजनीनम्,। अत्रापि कर्मधारयादेव। सर्वजनीयम्-अन्यत्।

* महाजनान्नित्यं ठञ्वक्तव्यः *। महाजनाय हितं माहाजनिकम्। तत्पुरुषादेव। बहुव्रीहेस्तु छ एव भवति-महाजनीयम्।

भोगोत्तरपदात्खल्वपि-मातृभोगीणः। पितृभोगीणः। भोगशब्दः शरीरवाची केवलेभ्यो मात्रादिभ्यश्छ एव भवति। मात्रीयम्। पित्रीयम्।

* राजाचार्याभ्यां तु नित्यम् *। भोगोत्तरपदाभ्यामेव प्रत्यय इष्यते, न केवलाभ्याम्। राजभोगीनः।

* आचार्यादणत्वं च *। आचार्यभोगीनः। केवलाभ्यां वाक्यमेव भवति-राज्ञे हितम्, आचार्याय हितमिति ।।

सर्वपुरुषाब्यां णढञौ ।। 5.1.10 ।।

सर्वपुरुषाभ्यां यथासंख्यं णढञौ प्रत्ययौ भवतः, `तस्मै हितम्' इत्येतस्मिन्विषये। छस्यापवादः। सर्वस्मै हितं सार्वम्। पौरुषेयम्।

* सर्वाण्णस्य वा वचनम् *। सर्वीयम्।

* पुरुषाद्वधविकारसमहतेनकृतेष्विति वक्तव्यम् *। पौरुषेयो वधः, विकारः, समूहो वा, तेनकृतः पौरुषेयो ग्रन्थः ।।

माणवचरकाभ्यां खञ् ।। 5.1.11 ।।

माणवचरकशब्दाभ्यां खञ् प्रत्ययो भवति, `तस्मै हितम्' इत्येतस्मिन्विषये। छस्यापवादः। माणवाय हितं माणवीनम्। चारकीणम्।।

तदर्थ विकृतेः प्रकृतो ।। 5.1.12 ।।

प्रकृतिः=उपादानकारणम्, तस्यैव उत्तरमवस्थान्तरम्=विकृतिः। विकृतिवलाचिनः प्रातिपदिकात्प्रकृतावभिधेयायां यथाविहितं प्रत्ययो भवति। `तदर्थम्' इति प्रत्ययार्थविशेषणम्। तदिति सर्वनाम्ना विकृतिः परामृश्यते, विकृत्यर्थायां प्रकृतौ प्रत्ययः। तदर्थग्रहणेन प्रकृतेरनन्यार्थताऽऽख्यायते, न प्रकृतिविकारसंभवमात्रे प्रत्ययः, किं तर्हि? प्रकृतेरनन्यार्थत्वे विवक्षिते। प्रत्ययार्थस्य च तदर्थत्वे सति सामर्थ्याल्लभ्या चतुर्थी समर्थविभक्तिः। केचित्तु `तस्मै हितम्' इत्यनुवर्त्तयन्ति। अङ्गारेभ्यो हितानि एतानि काष्ठानि अङ्गारीयाणि काष्ठानि। प्राकारीया इष्टकाः। पङ्कव्यं दारु। पिचव्यः कार्पासः।

तदर्थमिति किम्? यवानां धानाः। धानानां सक्तवः। प्रकृत्यन्तरनिवृत्तिरत्र विवक्षिता, न तादर्थ्यम्। धानानां सक्तवो न लाजानामिति।

विकृतेरिति किम्? उदकार्थः कूपः। वलिकृतिग्रहणेऽक्रियमाणे या काचित्प्रकृतिर्गृह्यते, नोपादानकारणमेव। भवति च कूप उदकस्य प्रकृतिः; तत्रोत्पादनात्। न तु उदकं तस्य विकृतिः; अत्यन्तभेदात्।

प्रकृताविति किम्? अस्यर्था कोशी। असिरयसो विकृतिर्भवति, न तु कोशी तस्य प्रकृतिर्भवति। द्वयोरपि प्रकृतिविकृत्योर्ग्रहणे विवक्षितः प्रकृतिविकारभावो लभ्यते ।।

छदिरुपधिबलेर्ढञ् ।। 5.1.13 ।।

छदिराधिभ्यः शब्देभ्यो ढञ् प्रत्ययो भवति `तदर्थ विकृतेः प्रकृतौ' इत्येतस्मिन्विषये। छस्यापवादः। छादिषेयाणि तृणानि। औपधेयं दारु। बालेयास्तण्डुलाः। उपधिशब्दात्स्वार्थे प्रत्ययः। उपधीयत इत्युपधिः=रथाङ्गम्। औपधेयमपि तदेव दारु।।

ऋषभोपानहोर्ञ्यः ।। 5.1.14 ।।

ऋषभ, उपानह-इत्येताभ्यां ञ्यः प्रत्ययो भवति `तदर्थं विकृतेः प्रकृतौ' इत्येतस्मिन्विषये। छस्यापवादः। आर्षभ्यो वत्सः। औपानह्यो मुञ्जः। चर्मण्यपि प्रकृतित्वेन विवक्षिते पूर्वविप्रतिषेधादयमेवेष्यते---औपानह्यं चर्म।

चर्मणोऽञ् ।। 5.1.15 ।।

`चर्मणः' इति षष्ठी। तर्मणो या विकृतिः तद्वाचिनः प्रातिपदिकादञ् प्रत्ययो भवति `तदर्थ विकृतेः प्रकृतौ' इत्येतस्मिन्विषये। छस्यापवादः। वार्ध चर्म। वारत्रं चर्म ।।

तदस्य तदस्मिन्स्यादिति ।। 5.1.16 ।।

`तत्' इति प्रथमा समर्थविभक्तिः, `अस्य' इति प्रत्ययार्थः, `स्यात्' इति प्रकृतिविशेषणम्। इतिकरणो विवक्षार्थः। एवं द्वितीयेऽपि वाक्ये। सप्तम्यर्थे तु प्रत्यय इत्येतावान्विशेषः। प्रथमासमर्थात् षष्ठ्यर्थे सप्तम्यर्थे च यथाविहितं प्रत्ययो भवति, यत्तत्प्रथमासमर्थं स्याच्चेत्तद्भवति। इतिकरणस्ततश्चेद्विवक्षा। प्राकार आसामिष्टकानां स्यात् प्राकारीया इष्टकाः। प्रासादीयं दारु। सप्तम्यर्थे खल्वपि-प्राकारोऽस्मिन्देशे स्यात् प्राकारीयो देशः। प्रासादीया भूमिः। स्यादिति संभावनायां लिङ् `संभावनेऽलमिति चेत्' इत्यादिना, इष्टकानां बहुत्वेन तत्संभाव्यते। प्राकार आसामिष्टकानां स्यादिति देशस्य च गुणेन संभाव्यते-प्रासादोऽस्मिन्देशे स्यादिति।

प्रकृतिविकारभावस्तादर्थ्यं चेह न विवक्षितम्, किं तर्हि? योग्यतामात्रम्; तेन पूरवस्यायमविषयः। द्विस्तद्ग्रहणं न्यायप्रदर्शनार्थम्। अनेकस्मिन्प्रत्ययार्थे प्रत्येकं समर्थविभक्तिः सम्बन्धनीयेति।

अथेह कस्मान्त भवति--प्रासादो देवदत्तस्य स्यादिति? गुणवानयं सम्भाव्यते, प्रासादलाभोऽस्योति। `इतिकरणो विवक्षार्थः' इत्युक्तम्।।

परिखाया ढञ् ।। 5.1.17 ।।

परिखाशबप्दाद् ढञ् प्रत्ययो भवति `तदस्य तदस्मिन्स्यादिति' एतस्मिन्नर्ते। छस्यापवादः। पारिखेयी भूमिः। छयतोः पूर्णोऽवधिः। इतः परमन्यः प्रत्ययो विधीयते।।

प्राग्वतेष्ठञ् ।। 5.1.18 ।।

`तेन तुल्यं क्रिया चेद्वतिः' इति वक्ष्यति। प्रागेतस्माद्वतिसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामः ठञ् प्रत्यस्तेष्वधिकृतो वेदितव्यः। वक्ष्यति-`पारायणतुरायणचान्द्रायणं वर्त्तयति'। पारायणिकः। तौरायणिकः। चान्द्रायणिकः।।

आर्हादगोपुच्छसंख्यापरिमणाट्ठक् ।। 5.1.19 ।।

`तदर्हति' इति वक्षयति। आ एतस्मादर्हसंशब्दनाद्यानित उर्ध्वमनुक्रमिष्यामः ठक् प्रक्ययस्तेष्वधिकृतो वेदितव्यः, गोपुच्छादीन्वर्जयित्वा। अभिविधौ वायमाकारः, तेनार्हत्यर्थोऽपि ठग्भवत्येव। ठञधिकारमध्ये तदपवादः ठग्विधीयते। वक्ष्यति-`तेन क्रीतम्। नैष्किकम्। पाणिकम्'।

अगोपुचछसंख्यापरिमाणादिति किम्? गोपुच्छेन क्रीतं गौपुच्छिकम्।

संख्या-षाष्टिकम्। परिमाण-प्रास्थिकम्। कौकडविकम्। ठञ् प्रत्युदाह्रियते।

संख्यापरिमाणयोः को विशेषः? भेदगणनम्=संख्या, एकत्वादिः। गुरुत्वमानम्=उन्मानं पलादिः। आयामामानम्=प्रमाणं वितस्त्यादिः।

आरोहपरिणाहमानम्=परिमाणं प्रस्थादि।।

उर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः।

आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः।।

असमासे निष्कादिभ्यः ।। 5.1.20 ।।

`आर्हात्' इत्येव। निष्कादिभ्यः शब्देभ्योऽसमासे ठक्प्रत्ययो भवति आर्हियेष्वर्थेषु। ठञोऽपवादः। नैष्किकम्। पाणिकमअ। पादिकम्। माषिकम्।

असमास इति किम्? परमनैष्किकम्। उत्तमनैष्किकम्। ठञेव भवति, `परिमाणान्तस्य' इत्यत्तरपदवृद्धिः।

अथ किमर्थमसमास इत्युच्यते, यावता ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिष्यते? निष्कादिष्वसमासग्रहणं ज्ञापकम्-पूर्वत्र तदन्ताप्रतिषेधस्य।

`उगवादिभ्यो यत्'-गव्यम्, सुगव्यम्, अतिसुगव्यम्। `विभाषा हविरपूपादिभ्यः'--अपूप्यम्, अपूपीयम्। यवापूप्यम्, यवापूपीयम्। `शरीरावयवाद्यत्'--दन्त्यम्, राजदन्त्यम् इत्येवमादि सिद्धं भवति।

इत उत्तरं च संख्यापूर्वपदानां तदन्तविधिरिष्यते। `पारायणतुरायणचान्द्रयणं वर्तयति' द्वैपारायणिकः, त्रैपारायणिकः। लुगान्तायास्तु प्रकृतेर्नेष्यते। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम्। त्रिशूर्पम्। द्विशूर्पेण क्रीतमिति तदन्तविधिप्रतिषेधात् `शूर्पादञन्यतरस्याम्' इत्यञ् न भवति, सामान्यविहितष्ठञेव भवति। द्विशौर्पिकम्।
ठञो द्विगुं प्रत्यनिमित्तत्वाल्लुगभावः। तथा चोक्तम्--`प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' इति।
निष्क। पण। पाद। माष। वाह। द्रोण। षष्टि। निष्कादिः।।

शताच्च ठन्यतावशते ।। 5.1.21 ।।
`आर्हाद्' इत्येव। शतशब्दात् ठन्यतौ प्रत्ययौ भवतः अशतेऽभिधेये, आर्हीयेष्वर्थेषु। कनोऽपवादः। शतेन क्रीतं शतिकम्। शत्यम्।
अशते इति किम्? शतं परिमाणमस्य शतकं निदानम्। प्रत्ययार्थोऽत्र सङ्गः। शतमेव वस्तुतः प्रकृत्यर्थान्न भिद्यते। इह तु न भवतिशतेन क्रीतं शत्यं शटकशतम्, शतिकं शाटकशतमिति। वाक्येन ह्यत्र प्रत्ययार्थस्य तत्त्वं गम्यते, न श्रुत्या। तथा चोक्तम्--`शतप्रतिषेधेऽन्यशतत्वेऽप्रतिषेधः' इति।
चकारोऽसमास इत्यनुकर्षणार्थः। द्वौ च शतं च द्विशतम्, द्विशतेन क्रीतं द्विशतकम। त्रिशतकम्।
`प्राग्वदेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' इत्यनया इष्ट्या समासादपि प्राप्नोति।।

संख्याया अतिशदन्तायाः कन् ।। 5.1.22 ।।
भवति आर्हीयेष्वर्थेषु। ठञोऽपवादः। पञ्चभिः क्रीतः पञ्चकः पटः। बहुकः। गणकः।
अतिशदन्ताया इति किम्? साप्ततिकः। चात्वारिंशत्कः।
अर्थवतस्तिशब्दस्य ग्रहणाड्डुतेः पर्युदासो न भवति-कतिकः।।

वतोरिड् वा ।। 5.1.23 ।।
वत्वन्तस्य संख्यात्वात् कन् सिद्ध एव, तस्य त्वेनेन वा इडागमो विधीयते। वतोः परस्य कनो वा इडागमो भवति आर्हीयेष्वर्थेषु। तावलिकः, तावत्कः। यावतिकः, यावत्कः ।।

विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् ।। 5.1.24 ।।
विंशतित्रिंशद्भ्यां ड्वुन् प्रत्ययो भवति, असंज्ञायां विषये, आर्हीयेष्वर्थेषु। विंशकः। त्रिंशकः। `ति विंशतेर्डिति' इति तिलोपः।
असंज्ञायामिति किम्? विंशतिकः। त्रिंशत्कः।
कथं पुनरत्र कन्, यावता `अतिशदन्तायाः' इति पर्युदासेन भवितव्यम्? योगविभागः करिष्यते--`विंशतित्रिंशद्भ्याम् कन्' प्रत्ययो भवति, ततः `ड्वुनसंज्ञायाम्' इति।।

कंसाट्टिठन् ।। 5.1.25 ।।
कंसाट्टिठन् प्रत्ययो भवति आर्हीयेष्वर्थेषु। ठञोऽपवादः। टकारो ङीबर्थः। इकार उच्चारणार्थः। नकारः स्वरार्थः। कंसिकः। कंसिकी।
* अर्द्धाच्चेति वक्तव्यम् *। अर्द्धिकः। अर्द्धिकी।
* कार्षापणाट्टिठन्वक्तव्यः *। कार्षापणिकः। कार्षापणिकी ।।
* प्रतिशब्दश्चास्यातदेशो वा वक्तव्यः *। प्रतिकः। प्रतिकी ।।

शूर्पादञन्यतरस्याम् ।। 5.1.26 ।।
शूर्पशब्दादन्यतरस्यामञ् प्रत्ययो भवति आर्हीयेष्वर्थेषु। ठञोऽपवादः। पक्षे सोऽपि भवति। शूर्पेण क्रीतं शौर्पम्, शौर्पिकम् ।।

शतमानविंशतिकसहस्रवसनादण् ।। 5.1.27 ।।
शतमानादिभ्यः शब्देभ्योऽण् प्रत्ययो भवति आर्हीयेष्वर्थेषु। ठक्ठञोरपवादः। शतमानेन क्रीतं शातमानं शतम्। वैंशतिकम्। साहस्रम्। वासनम्।।

अर्ध्यर्थपूर्वद्विगोर्लुगसंज्ञायाम् ।। 5.1.28 ।।
`आर्हात्' इत्येव। अध्यर्धशब्दः पूर्वो यस्मिंस्तस्मादध्यर्धपूर्वात्प्रातिपदिकाद् द्विगोश्च परस्य आर्हीयस्य लुग् भवति, असंज्ञायां विषये। आध्यर्धकंसम्। द्विकंसम्। त्रिकंसम्। अध्यर्धशूर्पम्। द्विशूर्पम्। त्रिशूर्पम्।
असंज्ञायामिति किम्? पाञ्चलौहितिकम्। पाञ्चकलापिकम्। लोहिनीशब्दस्य `भस्याऽढे तद्धिते' इति पुंवद्भावः।

प्रत्ययान्तस्य विशेषणमसंज्ञाग्रहणम्-न चेत्प्रत्ययान्तं संज्ञेति।
अद्ध्यर्द्धशब्दः संख्यैव, किमर्थं भेदेनोपादीयते? ज्ञापकार्थम् क्कचिदस्य संख्याकार्यं न भवति, `संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति।।

विभाषा कार्षापणसहस्राभ्याम् ।। 5.1.29 ।।
अध्यर्धपूर्वाद् द्विगोश्च कार्षापणसहस्रान्तादुत्तरस्यार्हीयप्रत्ययस्य विभाषा लुग्भवति। पूर्वेण लुकि नित्ये प्राप्ते विकल्प्यते। अध्यर्धकार्षापणम्, अध्यर्धकार्षापणिकम्। द्विकार्षापणम्, द्विकार्षापणिकम्। औपसंख्यानिकस्य टिठनो लुक्। अलुक्पक्षे च प्रतिरादेशो विकल्पितः। अध्यर्धप्रतिकम्। द्विप्रतिकम्। त्रिप्रतिकम्। सहस्रात्--अध्यर्धसहस्रम्, अध्यर्धसाहस्रम्। द्विसहस्रम्, द्विसाहस्रम्। अलुक्पक्षे `संख्यायाः संवत्सरसंख्यस्य च' इत्युत्तरपदवृद्धिः।
* सुवर्णशतमानयोरुपसंख्यानम् *। अध्यर्धसुवर्णम्, अध्यर्धसौवर्णिकम्। द्विसुवर्णम्, द्विसौवर्णिकम्। अध्यर्धशतमानम्, अध्यर्धशातमानम्। द्विशतमानम्, द्विशातमानम्। `परिमाणान्तरस्य' इत्यत्तरपदवृद्धिः ।।

द्वित्रिपूर्वान्निष्कात् ।। 5.1.30 ।।
`द्विगोः' इत्येव। द्वित्रिपूर्वाद्द्विगोर्निष्कान्तातार्हीयप्रत्ययस्य विभाषा लुग्भवति। द्विनष्कम्। द्विनैष्किकम्। त्रिनिष्कम्। त्रिनैष्किकम्।
* बहुपूर्वाच्चेति वक्तव्यम् *। बहुनिष्कम्, बहुनैष्किकम्। `परिमाणान्तस्य' इत्युत्तरपदवृद्धिः।।

बिस्ताच्च ।। 5.1.31 ।।
`द्वित्रिपूर्वात्' इति चकारेणानुकृष्यते। द्वित्रिपूर्वाद्बिस्तान्ताद् द्विगोः परस्यार्हीयप्रत्ययस्य विभाषा लुग्भवति। द्विबिस्तम्, द्विबैस्तिकम्। त्रिबिस्तम्, त्रिबैस्तिकम्। बहुबिस्तम्, बहुबैस्तिकम्।।

विंशतीकात्खः ।। 5.1.32 ।।
अध्यर्धपूर्वात्प्रातिपदिकाद् द्विगोश्च विंशतिकशब्दान्तादार्हीयेष्वर्थेषु खः प्रत्ययो भवति। अध्यर्धविंशतिकीनम्। द्विविंशतिकीनम्। त्रिविंशतिकीनम्।
विधानसामर्थ्यादसर्य लुग्न भवति ।।

खार्या ईकन् । 5.1.33 ।।
`अध्यर्धपूर्वाद् द्विगोः' इत्येव। अध्यर्धपूर्वात्प्रातिपदिकाद् द्विगोश्च कारीशब्दान्तादार्हीयेष्वर्थेषु ईकन् प्रत्ययो भवति। अध्यर्धखारीकम। द्विखारीकम्।
* केवलायाश्चेति बक्तव्यम् *। खीरीकम्।
* काकिण्याश्चोपसंख्यानम् *। अध्यर्धकाकिणीकम्। द्विकाकिणीकम्। त्रिकाकिणीकम् ।।
* केवलायाश्च *। काकिणीकम् ।।

पणपादमाषशताद्यत् ।। 5.1.34 ।।
`अध्यर्धपूर्वाद् द्विगोः' इत्येव। अध्यर्धपूर्वाद् द्विगोश्च पणपादमाषशतशब्दान्तादार्हीयेष्वर्थेषु यत् प्रत्ययो भवति। अध्यर्धपण्यम्, द्विपण्यम्, त्रिणण्यम्। पाद-अध्यर्धपाद्यम्, द्विपाद्यम्, त्रिपाद्यम्। पद्भावो न भवति-`पद्यत्यतद्रथे' इति; प्राण्यङ्गस्य स इष्यते, इदं तु परिमाणम्। माष-अध्यर्धमाष्यम्, द्विमाष्यम्, त्रिमाष्यम्। शतअध्यर्धशत्यम्, द्विशत्यम्, त्रिशत्यम् ।।

शाणाद्वा ।। 5.1.35 ।।
`अध्यर्धपूर्वाद् द्विगोः' इत्येव। शाणशब्दादध्यर्धपूर्वाद् द्विगोरार्हीयेष्वर्थेषु वा यत् प्रत्ययो भवति। ठञोऽपवादः। पक्षे सोऽपि भवति, तस्य च लुक्।
अध्यर्धशाण्यम्। अध्यर्धशाणम्। द्विशाण्यम्। द्विशाणम्। त्रिशाण्यम्। त्रिशाणम्।
* शताच्चेति वक्तव्यम् * । अध्यर्धशत्यम्, अध्यर्धशतम्। दिशत्यम्, द्विशतम्। त्रिशत्यम्, त्रिशतम् ।।

द्वित्रिपूर्वादण्च ।। 5.1.36 ।।
`शाणाद्वा' इत्येव। द्वित्रिपूर्वाच्छाणान्तात्प्रातिपदिकादार्हीयचेष्वर्थेषु अण् प्रत्ययो भवति, चकगाराद्यच्च वा। तेन त्रैरूप्यं सम्पद्यतेद्वैशाणम्, द्विशाणम्, द्विशाण्यम्। त्रैशाणम्, त्रिशाण्यम्स, त्रिशाणम्। `परिमाणान्तस्यासंज्ञाशाणयोः' इति पर्युदासादादिवृद्धिरेव भवति।।

तेन क्रीतम् ।। 5.1.37 ।।

ठञादयस्त्रयोदश प्रत्ययाः प्रकृताः, तेषामितः प्रभृति समर्थविभक्तयः प्रत्ययार्थाश्च निर्दिश्यन्ते। `तेन' इति तृतीयासमर्थात् `क्रीतम्' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। सप्ततया क्रीतं साप्ततिकम्। आशीतिकम्। नैष्किकम्। पाणिकम्। पादिकम्। माषिकम्। शत्यम्। शतिकम्। द्विकम्। त्रिकम्।

`तेन' इति मूल्यात्करणे तृतीया समर्थविभक्तिः। अन्यत्रानभिधानान्न भवति--देवतत्तेन क्रीतम्, पाणिना क्रीतमिति।
द्विवचनबहुवचनामन्तात्प्रत्ययो न भविति---प्रस्थाभ्यां क्रीतम्, प्रस्थैः क्रीतमिति; अनभिधानादेव।
अत्र तु प्रकृत्यर्थस्य संख्याभेदावगमे प्रमाणमस्ति, तत्र द्विवचनबहुवचनान्तादपि प्रत्ययो भवति--द्वाभ्यां क्रीतं द्विकम्, त्रिकम्, पञ्चकम्। तथा--मुदुगौः क्रीतं मौद्गिकम्, माषिकम्; न ह्येकेन मुद्गेन क्रयः संभवति ।।

तस्य निमिचं संयोगोत्पातौ ।। 5.1.38 ।।
`तस्य' इति षष्ठीसमर्थात् `निमित्तम्' इत्योतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत्तन्निमित्तं संयोगश्चेत्स भवति उत्पातो वा। संयोग=सम्बन्धः प्राणिनां शुभाशुभसुचकः। महाभूतपरिणामः=उत्पातः। शतस्य निमित्तं धनपतिना संयोगः शत्यः शतिकः। साहस्रः। उत्पातः खल्वपि--शतस्य निमित्तमुत्पातो दक्षिणाक्षिस्पन्दनम् शत्यम्, शतिकम्। साहस्रम्।
* तस्य निमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम्*। वातस्य शमनं कोपनं वा वातिकम्। पैत्तिकम्। श्लेष्मिकम्।
* सन्निपाताच्चेति वक्तव्यम् *। सान्निपातिकम् ।

गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ।। 5.1.39 ।।
गोशब्दाद् द्व्यचश्च प्रातिपदिकात्संख्यापरिमाणाश्वादिविवर्जिताद्यत् प्रत्ययो भवति `तस्य निमित्तं संयोगोत्पातौ' इत्येतस्मिन्नर्थे। ठञादोनामपवादः।
गोर्निमित्तं संयोग उत्पातो वा गव्यः। द्व्यचः खल्वपि----धन्यम्। स्वर्ग्यम्। यशस्यम्। आयुष्यम्।
असंख्यापरिमाणाश्वादेरिति किम्? पञ्चानां निमित्तं पञ्चकम्। सप्तकम्। अष्टकम्। परिमाण---प्रास्थिक्म्। खारीकम्। अश्वादि---आश्विकः।
* ब्रह्मवर्चसादुपसंख्यानम् *। ब्रह्मवर्चसस्य निमित्तं गुरुणा संयोगः ब्रह्मवर्चस्.यम्।
अश्व। अस्मन्। गण। ऊर्णा। उमा। वसु। वर्ष। भङ्ग। अश्वादिः।।

पुत्राच्छ च ।। 5.1.40 ।।
पुत्रशब्दाच्छः प्रत्ययो भवति चकाराद्यच्च `तस्य निमित्तं संयोगोत्पातौ' इत्येतस्मिन्विषये। `द्व्यचः' इति नित्ये यति प्राप्ते वचनम्। पुत्रस्य निमित्तं संयोग उत्पातो वा पुत्रीयम्। पुत्र्यम् ।।

सर्वभूमिपृथिवीभ्यामणञौ ।। 5.1.41 ।।
सर्वभूमि-पृथिवी-शब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतः `तस्य निमित्तं संयोगोत्पातौ' इत्येतस्मिन्विषये। ठकोऽपवादौ। सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः। पार्थिवः। सर्वभूमेरनुशतिकादिपाठादुभयपदवृद्धिः ।।

तस्येश्वरः ।। 5.1.42 ।।
`तस्य' इति षष्ठीसमर्थाभ्यां सर्वभूमि-पृथिवी-शब्दाभ्यामणञौ प्रत्ययौ भवतः `ईश्वरः' इत्येतस्मिन्विषये। सर्वभूमेरीवरः सार्वभौमः। पार्थिवः।
षष्ठीप्रकरणे पुनः षष्ठीसमर्थविभक्तिनिर्देशः प्रत्ययार्थस्य निवृत्तये; अन्यथा संयोगोत्पाताविव ईश्वरोऽपि प्रत्ययार्थस्य निमित्तस्य विशेषणं सम्भाव्येत ।।

तत्र विदित इति च ।। 5.1.43 ।।
`तत्र' इति सप्तमीस्मर्थाभ्यां सर्बभूमि-पृथिवीशब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतः `विदितः' इत्येतस्मिन्नर्थे। विदितः=ज्ञातः, प्रकाशित इत्यर्थः। सर्वभूमौ विदितः सार्वभौमः। पार्थिवः ।।

लोकसर्वलोकाट्ठञ् ।। 5.1.44 ।।
लोक-सर्वलोक-शब्दाभ्यां तत्रेति सप्तमीसमर्थाभ्यां `विदितः' इत्येतस्मिन्विषये ठञ् प्रत्ययो भवति। लोके विदितः लौकिकः। सार्वलौकिकः।
अनुशतिकादित्वादुभयपदवृद्धिः ।।

तस्य वापः ।। 5.1.45 ।।
`तस्य' इति सप्तमीसमर्थाद् `वापः' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। उत्यतेऽस्मिन्वापः, क्षेत्रमुच्यते। प्रस्थस्य वापः क्षेत्रं प्रास्थिकमअ। द्रौणिकम्।

खारीकम् ।।

पात्रात्ष्ठन् ।। 5.1.46 ।।
पात्रशब्दात्ष्ठन् प्रत्ययो भवति `तस्य वापः' इत्येतस्मिन्विषये। ठञोऽपवादः। नकारः स्वरार्खथः। षकारो ङीषर्थः। पात्रशब्दः परिमाणवाची। पात्रस्य वापः पात्रिकं क्षेत्रम्। पात्रिकी क्षेत्रभक्तिः ।।

तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते ।। 5.1.47 ।।
`तत्' इतिप्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत्तत्प्रथमासमर्थं वृद्ध्यादि चेत्तद्दीयते। `दीयते' इत्येकवचनान्तं वृद्ध्यादिभिः प्रत्येकमभिसम्बध्यते। तत्र यदधमर्णेन उत्तमर्णाय मूलधनातिरिक्तं देयं तद् वृद्धिः। ग्रामादिषु स्वामिग्राह्यो भागः=आयः। पटादीनामुपादानमूलादतिरिक्तं द्रव्यं=लाभः। रक्षानिर्वेशो राजभागः=शुल्कः। उत्कोचः=उपदा। पञ्चास्मिन्वृद्धिर्वा आयो वा लाभो वा शुल्लो वा उपदा वा दीयते पञ्चकः। सप्तकः। शत्यः। शतिकः। साहस्रः।
चतुर्थ्यर्थ उपसंख्यानम्*।। पञ्चास्मै वृद्धिर्वा आयो वा लाभो वा शुल्को वा उपदा वा दीयते पञ्चको देवदत्तः।
सिद्धं त्वधिकरणत्वेन विवक्षितत्वात्। सममब्राह्मणे दानमिति यथा।।

पूरणार्धाट्ठन् ।। 5.1.48 ।।
पूरणवाचिनः शब्दादर्धशब्दाच्च ठन् प्रत्ययो भवति, `तदस्मिन्नवृद्ध्यायलाभशुल्कोपदा दीयते' इत्येतस्मिन्नर्थे। यथायथं ठक्ट्ठिनोरपवादः। द्वितीयो वृद्ध्यादिरस्मिन्दीयते द्वितीयिकः। तृतीयिकः। पञ्चमिकः। सप्तमिकः। अर्धशब्दो रूपकार्धस्य रूढिः।।

भागाद्यच्च ।। 5.1.49 ।।
भागशब्दाद्यत् प्रत्ययो भवति, चकाराट्ठँश्च, `तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते' इत्येतस्मिन्नर्थे। ठञोऽपवादः। भागो वृद्ध्यादिरस्मिन्दीयते भाग्यम्, भागिकं शतम्। भाग्या, भागिका विंशतिः। भागशब्दोऽपि रुपकार्धस्य वाचकः।।

तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ।। 5.1.50 ।।
`तत्' इति द्वितीयासमर्थाद्धरत्यादिष्वर्थेषु यथाविहितं प्रत्ययो भवति। प्रकृतिविशेषणम्--`भाराद्वंशादिभ्यः' इति, वंशादिभ्यः परो यो बारशब्दस्तदन्तात्प्रातिपदिकादिति। वंशभारं हरति वहत्यार्वहति वा वंशभारिकः। कौटजभारिकः। बाल्वजभारिकः।
भारादिति किम्? वंशं हरति। वंशादिभ्य हति किम्? व्रीहिभारं हरति।
अपरा वृत्तिः---भाराद्वंशादिभ्य इति, भारभूतेभ्यो वंसादिभ्य इत्यर्थः। भारशब्दोऽर्थद्वारेण वंशादीनां विशेषणम्। भारभूतान्वंशान् हरति वांशिकः। कौटजिकः। बाल्वजिकः। भारादिति किम्? वंशं हरति। वंशादिभ्य इति किम्? भारभूतान् व्रीहीन् वहति।
सूत्रार्थद्वयमपि चैतदाचार्येण शिष्याः प्रतिपादिताः, तदुभयमपि ग्राह्यम्। हरति देशान्तरं प्रापयति चोरयति वा। वहत्युक्षिप्य धारयतीत्यर्थः। आवहति उत्पादयतीत्यर्थः।
वंश। कुटज। बल्वज। मूल। अक्ष। स्थूणा। अश्मन्। अश्व। इक्षु । खट्वा। वंशादिः।।

वस्नद्रव्याभ्यां ठन्कनौ ।। 5.1.51 ।।
वश्न-द्रव्यशब्दाभ्यां द्वितीयासमर्थाभ्यां यथासंख्यं ठन्, कन्--इत्येतौ प्रत्ययौ भवतो हरत्यादिष्वर्थेषु। वस्नं हरति वहति वा वस्निकः। द्रव्यकः ।।

संभवत्यवहरति पचति ।। 5.1.52 ।।
`तत' इति द्वितीया समर्थविभक्तिरनुवर्तते। तदिति द्वितीयासमर्थात्सम्भवत्यादिष्वर्थेषु यथाविहितं प्रत्ययो भवति। तत्राधेयस्य प्रमाणानतिरेकः=सम्भवः। उपसंहराणम्=अवहारः। विक्लेदनम्=पाकः। प्रस्थं संभवति अवहरति पचति वा प्रास्थिकः। कौडविकः। खारीकः।
ननु च पाके च सम्भवोऽस्ति? नास्त्यत्र नियोगः---प्रस्थं पचति ब्राह्णणी प्रास्थिकी।
* तत्प्चतीति द्रोणादण्च *। द्रोणं पचति द्रौणी। द्रौणिकी ।।

आढकाचितपात्रात्कोऽन्यतरस्याम् ।। 5.1.53 ।।
आढकाचितपात्रशब्देभ्यो द्वितीयासमर्थेभ्योऽन्यतरस्यां संभवादिष्दर्थेषु खः प्रत्ययो भवति। ठञोऽपवादः। पक्षे सोऽपि भवति। आढकं संभवत्यहरति पचति वा आढकीना, आढकिको। आचितीना, आचितिकी। पात्रीणा, पात्रिकी।।

द्विगोष्ठँस्च ।। 5.1.54 ।।

`आढकाचितपात्रात्' इत्येव। आढकाचितपात्रान्ताद् द्विगोः संभवत्यादिष्वर्थेषु ष्ठन् प्रत्ययो भवति चकारात्खः, अन्यतरस्याम्। विधानसामर्थ्यादनयोर्लुग्न भवति। ठञ्स्तु पक्षेऽनुज्ञातस्य `अध्यर्धपूर्वद्विगोः' इति लुग्भवत्येव। नकारः स्वरार्थः। षकारो ङीषर्थः। द्व्यादकी, द्व्याढकीना, द्व्याढकी। द्व्याचिकिकी, द्व्याचितीना, द्व्याचिता। `अपरिमाणविस्ताचित' इति ङीषः प्रतिषेधः। दिपात्रिकी, द्विपात्रीणा, द्विपात्री।।

कुलिजाल्लुक्खौ च ।। 5.1.55 ।।

`द्विगोः' इत्येव। कुलिजशब्दान्ताद् द्विगोः संभवत्यादिष्वर्थेषु लुक्खौ भवतः। चकारात्ष्ठँश्च। `अन्यतरस्याम्' ग्रहणानुवृत्त्या लुगपि विकल्प्यते, ठञः पक्षे श्रवणं भवति। तेन चातूरूप्यं संपद्यते--द्वेकुलिजे संभवत्यवहरति पचति वा द्विकुलिजिकी, द्विकुलिजीना, द्विकुलिजा, द्वैकुलिजिकी।।

`परिमाणान्तस्यासंज्ञासाण्योः' इत्यत्र कुलिजग्रहणमपीष्यते, तेनोत्तरपदवृद्दिरपि न भवति।।

सोऽस्यांशवस्नभृतयः ।। 5.1.56 ।।

`स' इति प्रथमासमर्थात् `अस्य' इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत् प्रथमासमर्थमंशवस्नभृतयश्चेत्ता भवन्ति। अंशः=भागः। वस्नम्=मूल्यम्। भृतिः=वेतनम्। पञ्च अंसो वस्नो वा भृतिर्वास्य पञ्चकः। सप्तकः। साहस्रः ।।

तदस्य परिमाणम् ।। 5.1.57 ।।

`तत्' इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथापविहितं प्रत्ययो भवति यत् प्रथमासमर्थं परिमाणं चेत्तद्भवति। प्रस्थः परिमाणमस्य प्रा स्थिको राशिः। खारशतिकः। शत्यः, शतिकः। साहस्रः। द्रौणिकः। कौडविकः। वर्षशतं परिमाणमस्य वार्षशतिकः। वार्षसहस्रिकः। षष्टिर्जीवलितपरिमाणमस्येति षाष्टिकः। साप्ततिकः।

समर्थविभक्तिः प्रत्ययार्थश्च पूर्वशूत्रादेवानुवर्त्तिष्यते, किमर्थ पुनरनयोरुपादानम्? पुनर्विधानार्थम्। द्वे षष्टी जीवितपरिमाणमस्य द्विषाष्टिकः। द्विसाप्ततिकः। पुनर्विधानसामर्थ्याद् `आद्यर्धपूर्वद्विगोर्लुक्' न भवति।।

संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु ।। 5.1.58 ।।

`तदस्य परिमाणम्' इति वर्त्तते। संक्यावाचिनः प्रातिपदिकात् परिमाणोपाधिकात्प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति।

`संज्ञासङ्घसूत्राध्ययनषु' इति प्रत्ययार्थविशेषणम्।

तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः-पञ्चैव पञ्चकाः शकुनयः। त्रिकाः शालङ्कायनाः।

सङ्घ---पञ्च परिमाणमस्य, पञ्चकः सङ्घः। अष्टकः।

सूत्र-अष्टावध्यायाः परिममाणमस्य सूत्रस्य अष्टकं पाणिनीयम्। दशकं वैयाग्रपदीयम्। त्रिकं काशकृत्स्नम्। ननु चाध्यायसमूहः सूत्रसङ्घ एव भवति? नैददस्ति; प्राणिसमूहे सङ्घशब्दो रूढः।

अध्ययन--पञ्कोऽधीतः। सप्तकोऽधीतः। अष्टकः। नवकः।

अधीतिः=अध्ययनम्, तस्य संख्यापरिमाणं पञ्चावृत्तयः=पञ्च वाराः, पञ्चरूपाण्यस्याध्ययनस्य पञ्चकमध्ययनम्।

* स्तोमे डविधिः पञ्चदशाद्यर्थः *। पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशः स्तोमः। सप्तदशः। एकविंशः।

* शन्शतोर्डिनिश्छनदसि *। पञ्चदशिनोऽर्द्धमासाः। त्रिंशिनो मासाः।

* विंशतेश्चेति वक्तव्यम् *। विंशिनोऽङ्गिरसः ।।

पंक्तिविशतित्रिंशच्चत्वारिशत्पञ्चशत्षष्टि सप्तत्यशीतिनवतिशतम् ।। 5.1.59 ।।

`तदस्य परिमाणम्' इति वर्त्तते। पंस्त्यादयः शब्दा निपात्यन्ते। यदिह लक्षणेनानुपन्नं तत्सर्वं निपातनात्सिद्धम्। पञ्चानां टिलोपः, तिः प्रत्ययस्यः। पञ्त्व परिमाण्मस्य पंक्तिशछन्दः। द्वयोर्दशतोर्विन्भावः शतिश्च प्रत्ययः-द्वौ दशतौ परिमाणमस्य सङ्घस्य विंशतिः। त्रयाणां दशतां त्रिन्भावः शच्च प्रत्ययः---त्रयो दशतः परिमाणमस्य त्रिंशत्। चतुर्णां दशतां चत्वारिन्भावः शच्च प्रत्ययः---चत्वारो दशतः परिमाणमस्य चत्वारिंशत्। पञ्चानां दशतां पञ्चाभावः शच्च प्रत्ययः---पञ्च दशतः परिमाणमस्य पञ्चाशत्। षण्णां दशतां षड्भावः, तिः प्रत्ययः, अपदत्वं च--षड् दशतः परिमाणमस्य षष्टिः। सप्तानां दशतां सप्तभावः तिः प्रत्ययश्च-सप्तदशतः परिमाणमस्य सप्ततिः। अष्टानां दशतामशीभावस्तिः प्रत्ययश्च--अष्टौ दशतः परिमाणमस्य अशीतिः। नवानां दशतां नवभावस्तिः प्रत्ययश्च--तवदशतः परिमाणमस्य नवतिः। दशानां शभावः तश्च प्रत्ययः---दश दशतः परिमाणमस्य सङ्घस्य शतम्।

या चैषां विषयेभेदेन गुणमात्रेगुणिनि च वृकत्तिः, स्वलिङ्गसंख्यानुविधानं च, एतदपि सर्वं स्वाभाविकमेव। सहस्रादयोऽप्येवञ्जातीयकास्तद्वदेव द्रष्टव्याः। उदाहरणमात्रमेतदिति ।।

पञ्चद्दशतौ वर्गे वा ।। 5.1.60 ।।
`पञ्चत्', `दशत्'-इत्येतौ वा निपात्येते `तदस्य परिमाणम्' इत्येतस्मिन्विषये वर्गेऽभिधेये। `संख्यायाः' इति कनि प्राप्ते इतिर्निपात्यते। वावचनात्पक्षे सोऽपि भवति। पञ्च परिमाणमस्य पञ्चद् वर्गः, दशद्वर्गः। पञ्चको वर्गः, दशको वर्गः ।।

सप्तनोऽञ् छन्दसि ।। 5.1.61 ।।
`वर्गे इत्येव।' `तदस्य परिमाणम्' इति च। सप्तन्-शब्दाच्छन्दसि विषयेऽञ् प्रत्ययो भवति वरेगेऽभिधेये। सप्त साप्तान्यसृजन् ।।

त्रिंशच्चत्वारिंशतोर्ब्राह्मणो संज्ञायां डण् ।। 5.1.62 ।।
`तदस्य परिमाणम्' इत्येव। `वर्गे' इति निवृत्तम्। त्रिंशत्चत्वारिंशच्छब्दाभ्यां संज्ञायां विषये डण्प्रत्योयो भवति `तदस्य परिमाणम्' इत्येतस्मिन्विषये ब्राह्मणेऽऽभिधेये। अभिधेये सप्तम्येषा, न विषयसप्तमी। तेन मन्त्रभाषयोरपि भवति। त्रिंशदध्यायाःक परिमाणमेषां ब्राह्मणानां त्रैशानि ब्राह्मणानि। चात्वारिंशानि ब्राह्मणानि। कानिचिदेव ब्राह्माणान्युच्यन्ते ।।

तदर्हति ।। 5.1.63 ।।
`तत' इति द्वितीयासमर्थात् `अर्हति' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः। वास्त्रयुग्मिकः। शत्यः। शतिकः। साहस्रः ।।

छेदादिभ्यो नित्यम् ।। 5.1. 64 ।।
नित्यग्रहणं प्रत्ययार्थविशेषणम्। छेदादिभ्यो द्वितीयासर्म्थेभ्यो `नित्यमर्हति' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। छेदं नित्यमर्हति छैदिकः। भैदिकः। छेद। भेद। द्रोह। दोह। वर्त्त। कर्ष। सम्प्रयोग। विप्रयोग। प्रेषण। सम्प्रश्न। विप्रकर्ष। * विराग विरङ्गं च * (वैरङ्गिकः।) छेदादिः ।।

शीर्षच्छेदाद्यच्च ।। 5.1.65 ।।
शीर्षच्छेदशब्दाद् द्वितीयासमर्थात् `नित्यमर्हति' इत्यस्मिन्नर्थे यत्प्रत्ययो भवति, चकाराद्यथाविहितञ्च। शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः, शैर्षच्छेदिकः। प्रत्ययसन्नियोंगेन शिरसः शीर्षभावो निपात्यते ।।

दण्डादिभ्यो यः ।। 5.1.66 ।।
`नित्यम्' इति निवृत्तम्। दण्डादिब्यो द्वितीयासमर्थेभ्यः `अर्हति' इत्येतस्मिन्नर्थे यः प्रत्ययो भवति। ठकोऽपवादः। दण्कडमर्हति दण्ड्यः। मुसल्यः। दण्ड। मुसल। मधुपर्क। कशा। अर्घ। मेघा। मेघ। युग। उदक। वध। गुहा। भागा। इभ। दण्कडादिः ।।

छन्दसि च ।। 5.1.67 ।।
प्रातिपदिकमात्राच्छन्दसि विषये `तदर्हति' इत्येस्मिन्नर्थे यत्प्रत्ययो भवति। ठञादीनामपवादः। उदक्या वृत्तयः। यूप्यः पलाशः। गर्त्यो देशः ।।

पात्राद् घँश्च ।। 5.1.68 ।।
पात्रशब्दाद् घन् प्रत्ययो भवति, चकाराद्यच्च, `तदर्हति' इत्येतस्मिन्नर्थे। ठक्ठञोरपवादः। पात्रं परिमाणमप्यस्ति। पात्रमर्हति पात्रियः। पात्र्यः ।।

कडङ्गरदक्षिणाच्छ च ।। 5.1.69 ।।
कडङ्गर-दक्षिणाशब्दाभ्यां छः प्रत्ययो भवति, चकाराद्यच्च `तदर्हति' इत्येतस्मिन्विषये। ठकोऽपवादः। कडङ्गरमर्हति कडङ्गरीयो गौः। ककडङ्गर्यः। दक्षिणामर्हति दक्षिणीयो भिक्षुः। दक्षिण्यो ब्राह्मणः।
दक्षिणशब्दस्य अल्पाच्चरस्व पूर्वनिपातेन लक्षणव्यभिचारचिह्नेन यथासंख्याभावं सूचयति ।।

स्थालीबिलात् ।। 5.1.70 ।।
छयतावनुवर्त्तते। स्थालीबिलशब्दाच्छयतौ प्रत्ययौ भवतः `तदर्हति' इत्येतस्भिन्नर्थे। ठकोऽपवादौ। स्थालीबिलमर्हन्ति स्थालीबिलीयास्तण्डुलाः। स्थालीबिल्याः। पाकयोग्या इत्यर्थः ।।

यज्ञर्त्विग्भ्यां घखञौ ।। 5.1.71 ।।

यज्ञशब्दाद्, ऋत्विक्शब्दाच्च यथासंख्यं घखञौ प्रत्ययौ भवतः

`तदर्हिति' इत्येतस्मिन्विषये। ठकोऽपवादः। यज्ञियो ब्राह्मणः। आर्त्विजीनो ब्राह्मणः।

* यज्ञर्त्विग्भ्यां तत्कर्मार्हतोत्युपसंख्यानम् *। यज्ञकर्मार्हति यज्ञियो देशः। ऋत्विक्कर्मार्हति आर्त्विजीनं ब्राम्हणकुलम्।
आर्हीयाणां ठगदादीनां पूर्णोऽवधिः। अतः परं प्राग्वतीयष्ठञेव भवति ।।

पारायणतुरायणचान्द्रायणं वर्तयति ।। 5.1.72 ।।

समर्थविभक्तिरनुवर्त्तते। `अर्हति' इति निवृत्तम्। पारायणादिभ्यो द्वितीयासमर्थेभ्यः `वर्त्तयति' इत्येतस्मिन्नरथे ठञ्प्रत्ययो भवति। पारायणं वर्त्तयत्यधीते पारायणिकश्छात्रः। तौरायणिको यजमानः। चान्द्रायणिकस्तपस्वी ।।

संशयमापत्रः ।। 5.1.73 ।।

संशयशब्दाद् द्विदीयासमर्थाद् `आपन्नः' इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति। संशयमापन्नः प्राप्तः सांशयिकःक स्थाणुः ।।

योजनं गच्छति ।। 5.1.74 ।।

योजनशब्दाद् द्वितीयासमर्थाद् `गच्छति' इत्योतस्मिन्नर्थे ठञ् प्रत्ययो भवति। योजनं गच्छति यौजनिकः।।

* क्रोशशत-योजनशतयोरुपसंख्यानम् *। क्रोशशतं गच्छति क्रौशशतिकः। यौजनशतिकः।

ततोऽभिगमनमर्हतीति च क्रोशशत-योजनशतयोरुपसंख्यानम् *
क्रोशशतादभिगमनमर्हिति क्रौशशतिको भिक्षुः। यौजनशतिक आचार्यः ।।

पथः ष्कन् ।। 5.1.75 ।।

पथिन्शब्दाद् द्वितीयासमर्थाद् `गच्छति' इत्योतस्मिन्नर्थे ष्कन्प्रत्ययो भवति। नकारः स्वरार्थः। षकारो ङीषर्थः। पन्थानं गच्छति पथिकः। पथिकी।।

पन्थो ण नित्यम् ।। 5.1.76 ।।

नित्यग्रहणं प्रत्ययार्थविशेषणम्। पथः पन्थ इत्ययमादेशो भवति भवति, ण्श्च प्रत्ययः, `नित्यं गच्छति' इत्येतस्मिन्विषये। पन्थानं नित्यं गच्छति पान्थो भिक्षां याचते।

नित्यमिति किम्? पथिकः ।।

उत्तरपतेनाहृतं च ।। 5.1.77 ।।

निर्देशादेव समर्थविभक्तिः उत्तरपथशब्दात्तृतीयासमर्थाद् `आहृतम्' इत्येतस्मिन्विषये ठञ् प्रत्ययो भवति। चकारः प्रत्ययार्थसमुच्चये, गच्छतीति च। अत्रापि तृतीयैव समर्थविभक्तिः। उत्तरपथेनाहृतम् औत्तरपथिकम्। उत्तरपथेन गच्छति औत्तरपथिकः।

* आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वपदादुपसंख्यानम् *।
वारिपथेनाहृतं वारिपथिकम्। वारिपथेन गच्छति वारिपथिकः।
जङ्गलपथेनाहृतं जाङ्गलपथिकम्। जङ्लपथेन गच्छति जाङ्गलपथिकः। स्थलपथेनाहतं स्थालपथिकम्। स्थलपतेन गच्छति स्थालपथिकः।
कान्तारपथेनाहृतं कान्तारपथिकम्। कान्तारपथेन गच्छति कान्तारपथिकः।

* अजपथशंकुपथाभ्यां चोपसंख्यानम् *। अजपथेनाहृतं गच्छति वा अजपथिकः। शंकुपथेनाहृतं गच्छति वा शांकुपथिकः।

* मधुकमरिचयोरण् स्थलात् *। स्थलपथेनाहृतं स्थालपथं मधुमक्। स्थालपथं मरिचम् ।।

कालात् ।। 5.1.78 ।।

`कालात्' इत्यधिकारः। यदित ऊर्ध्वमनुक्रमिष्यामः कालादित्येवं वक्ष्यति--`तेन निर्वृत्तम्। मासेन निर्वृत्तं मासिकम्। सांवत्सरिकम्'।

`कालात्' इत्यधिकारः `व्युष्टदिबप्योऽम्' इति यावत्।।

तेन निर्वृत्तम् ।। 5.1.79 ।।

`तेन' इति तृतीयासमर्थात्कालवाचिनः प्रातिपदिकात् `निर्वृतम्' इत्यस्मिन्नर्थे ठञ् प्रत्ययो भवति। अह्ना निर्वृत्तम् आह्निकम्। आर्द्धमासिकम्। सांवत्सरिकम्

।।

तमधीष्ठो भृतो भूतो भावी ।। 5.1.80 ।।

`तम्' इति द्वितीयासमर्थात्कालवाचिनः प्रातिपदिकात् `अधीष्टो भृतो भूतो वा भावी' इत्यस्मिन्नर्थे यताविहितं प्रत्ययो भवति। अधीष्टः=सत्कृत्य व्यापारितः। भृतः=वेतनेन क्रीतः। भूतः=स्वसत्तया व्याप्तकालः। भीवी=तादृश एवानागतः। `कालाध्वनोः' इति द्वितीया। मासमधष्टो मासिकोऽध्यापकः। मासं भृतो मासिकः कर्मकरः। मासं भूतो मासिको व्यधिः। मासं भावी मासिक उत्सवः।

ननु चाध्येषणं भरणं च मूहूर्तं कियते, तेन कथं मासो व्याप्यते? अध्यषणभरणे क्रियार्थे, तत्र फलबूतया क्रियया मासो व्याप्यमानस्ताभ्यामेव व्याप्त इत्युच्चते ।।

मासाद्वयसि यत्खञौ ।। 5.1.81 ।।

मासशब्दाद्वयस्यभिधेय यत्खञौ प्रत्यौ भवतः। ठञोऽपवादः। अघीष्टादीनां चतुर्मामधिकारेऽपि सामर्थ्याद् `भूतः' इत्येवाभिसम्बध्यते मासं भूतो मास्यः , मासीनः।

वयसीति किम्? मासिकम् ।।

द्विगोर्यप् ।। 5.1.82 ।।

`मासाद्वयसि' इति वर्तत। मासान्ताद् द्विगोर्यप् प्रत्ययो भवति वयस्यभिधेये। द्वौ मासौ भूतः द्विमास्यः। त्रिमास्यः ।।

षणमासाणणयच्च ।। 5.1.83 ।।

`वयसि' इत्येव। षण्मासशब्दाद्वयस्यभिधेये ण्यत्प्रत्ययो भवति, यप् च। औत्सर्गिकष्ठञपीष्यते, स चकारेण समुच्चेतव्यः। स्वरितत्वाच्चानन्तरोऽनुवर्त्तिष्यते। तेन त्रैरूप्यं भवति-षाण्मास्यः, षण्मास्यः, षाण्मासिकः ।।

अवयसि ठँश्च ।। 5.1.84 ।।

षण्मासशब्दादवयस्यभिधेये ठन् प्रत्ययो भवति। चकारेणानन्तरस्य ण्यस्य समुच्चयः क्रियते। षण्मासिको रोगः। षाण्मास्यः ।।

समायाः खः ।। 5.1.85 ।

अधीष्टादयश्चत्वारोऽर्था अनुवर्तन्ते। समाशब्दाद् द्वितीयासमर्थाद् अधीष्टादिष्वर्थेषु खः प्रत्ययो भवति। ठञोऽपवादः। समामधीष्टो भृतो भूतो भावी वा समीनः।

`केचित्तु तेन निर्वृत्तम्' इति सर्वत्रानुवर्तयन्ति। समया निर्वृत्तः समीनः ।।

द्विगोर्वा ।। 5.1.86 ।।

`समायाः खः' इत्येव। समाशब्दान्ताद् द्विगोर्निवृत्तादिष्वर्थेषु पञ्चसु वा खः प्रत्ययो भवति। पूर्वेण नित्यः प्राप्तो विकल्प्यते। `प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' इति प्राप्तिरस्त्येव। खेन मुक्ते पक्षे ठञपि भवति। द्विसमीनः, द्वैसमिकः। त्रिसमीनः, त्रैसमिकः ।।

रात्र्यहस्संवत्सराच्च ।। 5.1.87 ।।

`द्विगोः' इत्येव'। रात्रि, अहः, संवत्सर-इत्येवमन्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु वा खः प्रत्ययो भवति। खेन मुक्ते पक्षे ठञपि भवति। द्विरात्रीणः , द्वैरात्रिकः। त्रिरात्रोणः, त्रैरात्रिकः। द्व्यहीनः, द्वैयह्निकः। त्र्यहीणः, त्रैयह्निकः। द्विसंवत्सरीणः, द्विसांवत्सरिकः। त्रिसंवत्सरीणः, त्रिसांवत्सरिकः। `संख्यायाः संवत्सरसंख्यस्य च' इत्युत्तरपदवृद्धिः ।।

वर्षाल्ललुक् च ।। 5.1.88।।

`द्विगोः' इत्येव। वर्षान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु वा खः प्रत्ययो भवति। पक्षे ठञ्। तयोश्च वा लुग्भवति। एवं त्रीणि रूपाणि भवन्ति-द्विवर्षीणो व्यादिः, द्विवार्षिकः, द्विवर्षः। त्रिवर्षीणः, त्रिवार्षिकः; त्रिवर्षः। `वर्षस्याभविष्यति' इत्युतरपदवृद्धिः। भाविनि तु त्रैवर्षिकः ।।

वित्तवति नित्यम् ।। 5.1.89 ।।

चित्तवति प्रत्ययार्थेऽभिधेये वर्षशब्दान्तांद् द्विगोर्निर्वृत्तादिष्वर्थेषूत्पन्नस्य प्रत्ययस्य नित्यं लुग्भवति। पूर्वेण विकल्पे प्राप्ते वचनम्। द्विवर्षो दारकः।

चित्तवतीति किम्? द्विवर्षिणो व्याधिः ।।

षष्टिकाः षष्टिरात्रेण पच्यन्ते ।। 5.1.90 ।।
षष्टिकशब्दो निपात्यते। बहुवचनमतन्त्रम्। षष्टिरात्रशब्दातृतीयासमर्थात्कन् प्रत्ययो निपात्यते `पच्यन्ते' इत्येतस्मिन्नर्थे, रात्रिशब्दस्य च लोपः। षष्टिरात्रेण पच्यन्ते षष्टिकाः। संज्ञैषा धान्यविशेषस्य। तेन मुद्गादिष्वतिप्रसङ्गो न भवति ।।

वत्सान्ताच्छश्छन्दसि ।। 5.1.91 ।।
वत्सरान्तात्प्रातिपदिकान्निर्वृत्तादिष्वर्थेषु छन्दसि विषये छःप्रत्ययो भवति। ठञोऽपवादः। इद्वत्सरीयः, इदावत्सरीयः ।।

संपरिपूर्वात्ख च ।। 5.1.92 ।।
संपरिपूर्वाद्वत्सरान्तात्प्रातिपदिकाच्छन्दसि विषये निर्वृत्तादिष्वर्थेषु खः प्रत्ययो भवति, चकाराच्छश्च। संवत्सरीणः, परिवत्सरीणः। संवत्सरीयः। परिवत्सरीयः ।।

तेन परिजय्यलभ्यकार्यसुकरम् ।। 5.1.93 ।।
`तेन' इति तृतीयासमर्थात्कालवाचिनः प्रातिपदिकात् `परिजय्य, लभ्य, कार्य, सुकर' इत्येतेष्वर्थेषु ठञ् प्रत्ययो भवुति। मासेन परिजय्यः, शक्यते जेतुं मासिको व्याधिः। सांवत्सरहिकः। मासेन लभ्यो मासिकः पटः। मासेन कार्य मासिकं चानद्रायणम्। मासेन सुकरो मासिकःक प्रासादः ।।

तदस्य ब्रह्मचर्यम् ।। 5.1.94 ।।
`तत्' इति द्वितीया समर्थविभक्तिः, सा चात्यन्तसंयोगे। अस्येति प्रत्ययार्थः। `ब्रह्मचर्यम्' इति द्वाभ्यामपि सम्बध्यते। कालस्य व्यापकम्, प्रत्यार्थस्य च स्वमिति। तदिति द्वितीयासमर्थात्कालवलाचिनः प्रातिपदिकात् `अस्य' इति षष्ठ्यर्थे ठञ्प्रत्ययो भवति, ब्रह्मचर्यं चेद् गम्यते। मासं ब्रह्मचर्यमस्य मासिको ब्रह्मचारी। आर्द्धमासिकः। सांवत्सरिकः।
अपरा वृत्तिः---
तदिति प्रथमासमर्थादस्येति षष्ट्यर्थे ठञ् प्रत्ययो भवति, यत्तदस्येति निर्दिष्टं ब्रह्मचर्यं चेत्तद्भवति। मासोऽस्य ब्रह्मचर्यस्य मासिकं ब्रह्मचर्यम्। आर्धमासिकम्। सांवत्सरिकम्।
पूर्वत्र ब्रह्मचारी प्रत्ययार्तः, उत्तरत्र ब्रह्मचर्यमेव। उभयमपि प्रमाणमुभयथा सूत्रप्रणयनात्।
* महानाम्न्यादिभ्यः षष्ठीसमर्थेभ्य उपसंख्यानम् *। माहानामिकम्। गौदानिकम्। आदित्यव्रतिकम्।
* तत्चरतीति च *। महानाम्न्य ऋचः, तत्सहचरितं व्रतं तच्छब्देनोच्यते। महगानाम्नीश्चरति महानामिकः। आदित्यव्रतिकः, गौदानिकः। `भस्याढे' इति पुंवद्भावेन ङीपि निवृत्ते `नस्तद्धिते' इति टिलोपः।

* अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः *। अवान्तरदीक्षां चरति आवान्तरदीक्षी। तिलव्रती।
* अष्टाचत्वारिंशतो ड्वुंश्च डिनिश्च वक्तव्यः *। अष्टाचत्वारिंशद्वर्षाणि व्रतं चरति, अष्टाचत्वारिंशकः। अष्टाचत्वारिंशी।
* चतुर्मास्यानां यलोपश्च ड्वुँश्च डिनिश्च वक्तव्यः *। चातुर्मास्यानि चरति चातुर्मासकः। चातुर्मासी ।।
* चातुर्मासाण्ण्यो यज्ञे तत्र भवे *। ततुर्षु मासेषु भवानि चातुर्मास्यानि ।।
* संज्ञायामण्वक्तव्यः * । चतुर्षुं मासेषु भवा चतुर्मासी पौर्णमासी। आषाढी। कार्तिकी। फाल्गुनी ।।

तस्य च दक्षिणा यज्ञाख्येभ्यः ।। 5.1.95 ।।
`तस्य' इति षष्ठीसमर्तेभ्यो यज्ञाख्येभ्यः `दक्षिणा' इत्येतस्मिन्नर्थे ठञ् प्रत्ययो बवति। अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकी। वाजपेयिकी। राजसूयिकी। आख्याग्रहणमकालादपि यज्ञवाचिनो यथा स्यादिति; इतरथा हि कालाधिकारदेकाहद्वादशाहप्रभृतय एव यज्ञा गृह्योरन्। `प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' इति कालाधिकरेऽपि द्वादशाहादिष्वस्ति प्राप्तिः ।।

तत्र च दीयते कार्यं भववत् ।। 5.1.96 ।।
`तत्र' इति सप्तमीसमर्थात्कालवाचिनः प्रातिपदिकाद् दीयते, कार्यम्--इत्येतयोरर्थयोर्भववत्प्रत्ययो भवति। यथा--मासे भवं मासिकम्। सांवत्सरिकम्। प्रावृषेण्यम्। वासन्तिकम्, वासन्तम्। हैमनम्। हेमन्तम्। हैमन्तिकम्। शरदम्। वतिः सर्वसादृश्यार्थः।
योगविभागश्चात्र कर्त्तव्यः---`तत्र च दीयते', `यज्ञाख्येब्यः' इति। आग्निष्टोमिकं भक्तम्। राजसूयिकम्। वाजपेयिकम्।

कालाधिकारस्य पूर्णोऽवधिः। अतः परं सामान्येन प्रत्ययविधानम्।

ब्युष्टादिभ्योऽण् ।। 5.1.97 ।।
`तत्र' इति सप्तमीसमर्थेब्यो व्युष्टादिभ्यो दीयते, कार्यम्--इत्येतयोरण प्रत्ययो भवति। व्युष्टे दीयते कार्यं वा वैयुष्टम्। नैत्यम् ।।
* अण्प्रकरणे अग्निपदादिभ्यं उपसंख्यानम् * आग्निपदम्। पैलुमूलम्। किं वक्तव्यम्? वक्तव्यम्; अत्रैव ते पठितव्याः।
व्युष्ट। नित्य। निष्कमण। प्रवेशन। तीर्थ। सम्भ्रम। आस्तरण। संग्राम। संघात। अग्निपद। पीलूमूल। प्रवास। उपसंक्रमण। व्युष्टादिः ।।

तेन यथाकथाचहस्ताभ्यां णयतौ ।। 5.1.98 ।।
`दीयते, कार्यम्' इति वर्त्तते। तेनेति तृतीयासमर्थाभ्यां यथाकथाच-हस्तशब्दाभ्यां यथासंख्यं णयतौ प्रत्ययौ भवतः। दीयते, कार्यमित्येतयोरर्थयोः प्रत्येकमभिसम्बन्धः, यथासंख्यं नेष्यते। यथाकथाचशब्दोऽव्ययसमुदायोऽनाद रेवर्त्तते। तृतीयार्थमात्रं चात्र सम्भवति, न तु तृतीया समर्थविभक्तिः। यथाकथाच दीयते कार्यं वा याथाकथाचम्। हस्तेन दीयते कार्यं वा हस्त्यम् ।।

सम्पादिनि ।। 5.1.99 ।।
`तेन' इत्येव। तृतीयासमर्थात्सम्पादिन्यभिधेये ठञ् प्रत्ययो भवति। गुणोत्कर्षः=सम्पत्तिः। आवश्यके णिनिः। कर्णवेष्टकाभ्यां संपादि मुखं कार्णवेष्टकिकं मुखम्। वास्त्रयुगिकं शरीरम्। वस्त्रयुगेण विशेषतःक शोभते इत्यर्थः ।।

कर्मवेषाद्यत् ।। 5.1.100 ।।
कर्मन्, वेष-शब्दाभ्यां तृतीयासमर्थाभ्यां यत्प्रत्ययो भवति `सम्पादिनि' इत्येतस्मिन्विषये। ठञोऽपवादः। कर्मणा सम्पद्यते कर्मण्यं शरीरम्। वेषेण संपद्यते वेष्यो नटः ।।

तस्मै प्रभवति सन्तापादिभ्यः ।। 5.1.101 ।।
`तस्मै' इति चतुर्थासमर्थेभ्यः `सन्तापादिभ्यः प्रभवति' इत्यस्मिन्विषये ठञ् प्रत्ययो भवति। समर्थः, शक्तः=प्रभवतीत्युच्यते। अलामर्थे चतुर्थी। सन्तापाय प्रभवति सान्तापिकः। सान्नाहिकः।
सन्ताप। संनाह। संग्राम। संयोग। संपराय। संपेष। निष्पेष। निसर्ग। असर्ग। विसर्ग। उपसर्ग। उपवास। प्रवास। संघात। संमोदन। सक्तुमांसौदनाद्विगृहीतादपि ।।

योगाद्यच्च ।। 5.1.102 ।।
योगशब्दाद्यत्प्रत्ययो भवति, चकाराद् ठञ् `तस्मै प्रभवति' इत्येतस्मिन्विषये। योगाय प्रभवति योग्यः, यौगिकः ।।

कर्मण उकञ् ।। 5.1.103 ।।
कर्मन्शब्दादुकञ् प्रत्ययो भवति `तस्मै प्रभवति' इत्येतस्मिन्नर्थे। ठञोऽपवादः। कर्मणे प्रभवति कार्मुकं धनुः।
धनुषोऽन्यत्र न भवति, अनभिधानात् ।।

समयस्तदस्य प्राप्तम् ।। 5.1.103 ।।
समयशब्दात् तदिति प्रथमासमर्थाद् अस्येति षष्ठ्यर्थे ठत्र् प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्राप्तं चेत्तद्भवति। समयः प्राप्तोऽस्य सामयिकं कार्यम्। उपनतकालमित्यर्थः।

ॠतोर्ण् ।। 5.1.105 ।।
`तदस्य प्राप्तम्' इत्यनुवर्त्तते। ॠतुशब्दात्तदिति प्रथमासमर्थाद् `अस्य' इति षष्ठ्यर्थेऽण् प्रत्ययो भवति `तदस्य प्राप्तम्' इत्येतस्मिन् विषये। ॠतुः प्राप्तोऽस्य आर्त्तवं पुष्पम्।
* तदस्य प्रकरणे उपवस्त्रादिभ्य उपसंख्यानम् *। उपवस्ता प्राप्तोऽस्य औपवस्त्रम्। प्राशिता प्राप्तोऽस्य प्राशित्रम् ।।

छन्दसि घस् ।। 5.1.106 ।।
ॠतुशब्दाच्छन्दसि विषये घस् प्रत्ययो भवति `तदस्य प्राप्तम्' इत्येतस्मिन्विषये। अणोऽपवादः। अयं ते योनिर्ॠत्वियः ।।

कालाद्यत् ।। 5.1.107 ।।
कालशब्दाद्यत्प्रत्ययो भवति `तगस्य प्राप्तम्' इत्यस्मिन्विषये। कालः प्राप्तोस्य काल्यस्तापः। काल्यं शीतम् ।।

प्रकृष्टे ठञ् ।। 5.1.108 ।।
`कालात्' इत्येव, `तदस्य' इति च। प्राप्तम्' इति निवृत्तम्। प्रकर्षेण कालो विशेष्यते। प्रकर्षे वर्तमानात्कालात्प्रथमासमर्थादिस्येति ठञ् प्रत्ययो बवति।
प्रकृष्टो दीर्घः कालोऽस्य कालिकमृणम्। कालिकं वैरम्।
ठत्र्ग्रहणं विस्प्ष्टार्थम् ।।

प्रयोजनम् ।। 5.1.109 ।।
`तदस्य' इत्येव। तदिति प्रथमासमर्थाद् `अस्य' इति षष्ट्यर्थे ठञ् प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्रयोजनं चेत्तद्भवति। इन्द्रमहः प्रयोजनमस्य
ऐन्द्रमहिकम्। गाङ्गामहिकम् ।।

विशाखाषाढादणमन्थदणडयोः ।। 5.1.110 ।।
विशाखाषाढाशब्दाभ्यामण् प्रत्ययो भवति `तदस्य प्रयोजनम्' इत्योतस्मिन्विषये यथासंख्यं मन्थदण्डयोरभिधेययोः। विशाखा प्रयोजनमस्य वैशाखो मन्थः।
आषाढो दण्डः।
* चूडादिभ्य उपसंख्यानम् * चूडा प्रयोजनमस्य चौडम्। श्रद्धा प्रयोजनमस्य श्राद्धम् ।।

अनुप्रवचनादिभ्यश्छः ।। 5.1.111 ।।
अनुप्रवचनादिभ्यः प्रातिपदिकेभ्यश्छः प्रत्ययो भवति `तदस्य प्रयोजनम्' इत्येतस्मिन्विषये। ठञोऽपवादः। अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयम्।
उत्थापनीयम् ।।
* विशिपूरिपतिरुहि प्रकृतेरनात्सपूर्वपदापुपसंख्यानम् * गृहप्रवेशनं प्रयोजनमस्य गृहप्रवेशनीयम्। प्रपापूरणीयम्। अश्वप्रपतनीयम्। प्रासादारोहणीयम्।
* स्वर्गादिभ्यो यद्वक्तयः *। स्वर्गः प्रयोजनमस्य स्वर्ग्यम्। यशस्यम्। आयुष्यम्। काम्यम्। धन्यम्।
* पुण्याहवाचनादिभ्यो लुग्वक्तव्यः * पुण्याहवाचनं प्रयोजनमस्य पुण्याहवाचनम्। स्वस्तिवाचनम्। शान्तिवाचनम्।
अनुप्रवचन। उत्थापन। प्रवेशन। अनुप्रवेशन। उपस्थापन। संवेशन। अनुवेशन। अनुवचन। अनुवादन। अनुवासन। आरम्भण। आरोहण। प्ररोहण।
अन्वारोहण। अनुप्रवचनादिः ।।

समापनात्सपूर्वपदात् ।। 5.1.112 ।।
समापनशब्दात् सपूर्वपदाद् विद्यमानपूर्ववदाच्छः प्रत्ययो भवति `तदस्य प्रयोजनम्' इत्येतस्मिन्विषये। ठञोऽषवादः। छन्दरसमापनं प्रयोजनमस्य छन्दः
समापनीयम्। व्याकरणसमापनीयम्।
पदग्रहणं बहरुच्पूर्वनिरासार्थम् ।।

ऐकागारिकट् चौरे ।। 5.1.113 ।।
`ऐकागारिकट्' इति निपात्यते चोरेऽभिधेये। एकागारं प्रयोजनमस्य ऐकागारिकः चौरः। ऐकागारिकी।
किमर्थमिदं निपात्यते, यावता `प्रयोजनम्' इत्येव सिद्धष्ठञ? चौरे नियमार्थं वचनम्। इह मा भूत्--एकागारं प्रयोजनमस्य भिक्षोरिति।
टकारः कार्यावधारणार्थः--ङीबेव भवति, न ञित्स्वर इति।
अपरे पुनरिकट् प्रत्ययं वृद्धिं च निपातयन्ति ।।

आकालिकडाद्यन्तवचने ।। 5.1.114 ।।
`आकालिकट् ' इति निपात्यते आद्यन्तवचने। समानकालशब्दस्याकालशब्द आदेशः। आद्यन्तयोस्चैतद्विशेषणम्। इकट् प्रत्ययश्च निपात्यते।
समानकालावाद्यन्तावस्य आकालिकः स्तनयित्ुः। आकालिकी विद्युत्। जन्मना तुल्यकालविनाशा। उत्पादानन्तरं विनाशिनीत्यर्थः।
* आकालाचट् ठँश्च *। चात् ठञ्च। आकालिका विद्युत्। ठञः पूर्णोऽवधिः ।।

तेन तुल्यं क्रिया चेद्वतिः ।। 5.1. 115 ।।
तेनेति तृतीयासमर्थात्तुल्यमित्येतस्मिन्नर्थे वतिः प्रत्ययो भवति यत्तुल्यंक्रिया चेत्सा भवति। ब्राह्मणेन तुल्यं वर्त्तते ब्राह्मणवत्। राजवत्।

क्रियाग्रहणं किम् ? गुणतुल्ये मा बूत्। पुत्रेण तुल्यः स्थूलः। पुत्रेण तुल्यो गोमान् ।।

तत्र तस्येव ।। 5.1. 116 ।।
तत्रेति सप्तमीसमर्थात् `तस्य' इति षष्ठीसमर्थाच्च इवार्थे वतिः प्रत्ययो भवति। मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः। पाटलिपुत्रवत्साकेते परिखा। षष्ठीसमर्थात्--देवदत्तस्येव देवदत्तवद् यज्ञदत्तस्य गावः। यज्ञदत्तस्येव देवदत्तस्य दन्ताः यज्ञदत्तवत् ।।

तदर्हम् ।। 5.1.117 ।।
तदिति द्वितीयासमर्थात् `अर्हम्' इत्येतस्मिन्नर्थे वतिः प्रत्ययो भवति। राजानमर्हति राजवत्पालनम्। ब्राह्मणवत्। ऋषिवत्। क्षत्त्रिवत् ।।

उपसर्गाच्छन्दसि धात्वर्थे ।। 5.1.118 ।।
उपसर्गात्ससाधने धात्वर्थे वर्त्तमानात्स्वार्थे वतिः प्रत्ययो भवति छन्दसि विषये। यदुद्वतो निवतो यासि वप्सद्, उद्गतानि निगतानि च ।।

तस्य भावस्त्वतलौ ।। 5.1.119 ।।
तस्येति षष्ठीसमर्थाद् `भावः' इत्येतस्मिन्नर्थे त्वतलौ प्रत्ययौ भवतः। भवतोऽस्मादभिधानप्रत्ययाविति भावः। शब्दस्य प्रवृत्तिनिमित्तं भावशब्देनोच्यते। अस्वस्य भावः अश्वत्यम्, अश्वता। गोत्वम्, गोता ।।

आ च त्वात् ।। 5.1.120 ।।
`ब्रह्मणस्त्वः' इति वक्ष्यति। आ एतस्मात्त्वसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामस्तत्र त्वतलौ प्रत्ययावधिकृतौ वेदितव्यौ। वक्ष्यति--`पृथ्वादिभ्य इमनिज्वा' इति। प्रथिमा, पार्थवम्, पृथुत्वम्, पृथुता। म्रदिमा, मार्दवम्, मृदुत्वम्, मृदुता।
अपवादैः सह समावेशार्थं वचनम्। कर्मणि च विधानार्थम् `गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति। चकारो नञ्स्तनञ्भयामपि समावेशार्थः। स्त्रियाः भावः स्त्रैणम्, स्त्रीत्वम्, स्त्रीत्वम्, स्त्रीता। पुंसो भावः पुंस्त्वम्, पुंस्ता, पौस्नम् ।।

न नञ्पूर्वात्तत्पुरुषादचतुरमङ्गतलवणवटपबुधकतरसलसेभ्यः ।। 5.1.121 ।।
इत उत्तरे ये भावप्रत्ययास्ते नञ्पूर्वात्तत्पुरुषान्न भवन्ति चतुरादीन्वर्जयित्वा। वक्ष्यति--`पत्यन्पुरोहितादिभ्यो यक्' इति।
अपतित्वम्, अपतिता। अपटुत्वम्, अपटुता। अरमणीयत्वम्, अरमणीयता।
नञ्पूर्वादिति किम् ? बार्हस्पत्यम्। प्राजाप्रत्यम्। तत्पुरुषादिति किम् ? नास्य पटवः सन्तीत्यपटुः, तस्य भाव आपटवम्। आलघवम्। अचतुरादिभ्य इति किम् ? आचतुर्यम्। आसङ्गत्यम्। आलवण्यम्। आवट्यम्। आपबुध्यम्। आकत्यम्। आरस्यम्। आलस्यम् ।।

पृथ्वादिभ्य इमनिज्वा ।। 5.1.122 ।।
`पृथु'-इत्येवमादिभ्यः प्रातिपदिकेभ्य इमनित्प्रत्ययो भवति वा `तस्य भावः' इत्येतस्मिन्नर्थे। वावचनमणादेः समावेशार्थम्। पृथोर्भावः प्रथिमा, पार्थवम्। म्रदिमा, मार्दवम्। `तुरिष्ठेमेयस्सु' `टेः' इति टिलोपः। `र ऋतो हलादेर्लघोः' इति रेफादेशः। त्वतलौ सर्वत्र भवत एव---पृथुत्वम्, पृथुता। मृदुत्वम्, मृदुता।

पृथु। मृद्। महत्। पटु। तनु। लघु। बहु। साधु। वेणु। आसु। बहुल। गुरु। दण्ड। ऊरु। खण्ड। चण्कड। बाल। अकिञ्चन। होड। पाक। वत्स। मन्द। स्वादु। ह्रस्व। दीर्घ। प्रिय। वृष। ऋजु। क्षिप्र। क्षुप्र। क्षुद्र। पृथ्वादिः ।।

वर्णदृढादिभ्यः ष्यञ् च ।। 5.1.123 ।।
वर्णविशेषवाचिभ्यः प्रातिपदिकेभ्यो दृढदिभ्यश्च ष्यत्र प्रत्ययो भवति, चकारादिमनिच्च, `तस्य भावः' इत्येतस्मिन्विषये। शुक्लस्य भावः शौक्ल्यम्, शुक्लिमा, शुक्लत्वम्, शुक्लता। काष्णर्यम्, कृष्णिमा, कृष्णत्वम्, कृष्णता। दृढादिभ्यः---दाढर्यम्, दृढिमा, दृढत्वम्, दृढता।
षकारो ङीषर्थः---औचिती, याथाकामी।
दृढ। परिवृढ भृश। कृश। चक्र। आम्र। लवण। ताम्र। अम्ल। शीत। उष्ण। जड। बधिर। पण्डित। मधुर। मूर्ख। मूक। वेर्यातलाभमतिमनःशारदानाम्। समो मतितमनसोर्जवने। दृढादिः ।।

गुणवचनब्राह्मणादिभ्यः कर्मणि च ।। 5.1.124 ।।
गुणमुक्तवन्तो गुणवचनाः। गुणवचनेभ्यो ब्राह्मणादिभ्यश्च तस्येति षष्ठीसमर्थेभ्यः कर्मण्यभिधेये ष्यञ्प्रत्ययो भवति। चकाराद् भावे च। कर्मन्शब्दः

क्रियावचनः। जडस्य भावः कर्म वा जाड्यम्। ब्राह्मणादिभ्यः खल्वपि-ब्राह्मण्यम्। माणव्यम्। आ पादपरिसमापर्तेर्भावकर्माधिकारः। ब्राहमणादिराकृतिगणः आदिशब्दः प्रकारवचनः।

चातुर्वर्ण्यादीनां स्वार्थ उपसंख्यानम् *। चत्वार एव वर्णाश्चातुर्वर्ण्यम्। चातुराश्रम्यम्। त्रैलोक्यम्। त्रैस्वर्यम्। षाडगुण्यम्। सैन्यम्। सान्निध्यम्। सामीप्यम्। औपम्यम्। सौख्यम्।

ब्राह्मण। वाडव। माणव। चोर मूक। आराधय। विराधय। अपराधय। उपराधय। एकभाव। द्विभाव। त्रिभाव। अन्यभाव। समस्थ। विषमस्थ। परमस्थ। मध्यमस्थ। अनीस्वर।

कुशल। कपि। चपल। अक्षेत्रज्ञ। निपुण। * अर्हतो नुम् च * आर्हन्त्यम् । संवादिन्। संवेशिन्। बहुभाषिन्। वालिश। दुष्पुरुष। कापुरुष। दायाद। विशसि। धूर्त्त। राजन्। सम्भाषिन्। शीर्शपातिन्। अधिपति। अलस। पिशाच। पिशुन। विशाल। गणपति। धनपति। नरपति। गङ्ल। निव। निधान। विष। * सर्ववेदादिभ्यः स्वार्थे *। * चतुर्वेदस्योभयपदवृद्धिश्च *। चातुर्वैद्यम् । ब्राह्मणादिः ।।

स्तेनाद्यन्न्लोपश्च ।। 5.1.125 ।।

स्तेनशबादात्षष्ठीसमर्थाद्भावकर्मणोर्यत्प्रत्ययो भवति, नशब्दस्य लोपश्च भवति। स्तेनस्य भावः कर्म वा स्तेयम्।

`स्तेनात्' इति केचिद् योगविभागं कुर्वन्ति। स्तेनात्ष्यञ् भवति-स्तैन्यम्। ततः `यन्नलोपश्च' स्तेनादित्येव--स्तेयम् ।।

सख्युर्यः ।। 5.1.126 ।।

सखिशब्दाद् यः प्रत्ययो वति भावकर्मणोरर्थयोः। सख्युर्भावः कर्म वा सख्यम्।

* दूतवणिग्भ्यां चेति वक्तव्यम् *। दूत्यम्। वाणिज्यम्। कथं वाणिज्यम् ? ब्राह्मणादित्वात् ।।

कपिज्ञात्योर्ढक् ।। 5.1.127 ।।

कपि, ज्ञाति-शब्दाभ्यां ढक् प्रत्ययो भवत भावकर्मणोरर्थयोः। कपोर्भावः कर्म वा कापेयम्। ज्ञातेयम् ।

यथासंख्यमर्थयोः सर्वत्रैवात्र प्रकारणे नेष्यते ।।

पत्यन्तपुरोहितादिभ्यो यक् ।। 5.1. 128 ।।

पत्यन्तात्प्रातिपदिकात्पुरोहितादिभ्यश्च यक् प्रत्ययो भवति भावकर्मणोरर्थयोः। सेनापतेर्भावः कर्म वा सैनापत्यम्। गार्हपत्यम्। प्राजापत्यम्। पौरोहित्यम्। राज्यम्।

पुरोहित। राजन्। संग्रामिक। एषिक। वर्मित। खण्डिक। दण्डिक। छत्त्रिक। मिलिक। पिण्कडिक। बाल। मन्द। स्तनिक। चूडितिक। कृषिक। पूतिक। पत्त्रिक। प्रतिक। अजानिक। सलनिक। सूचिक। शाक्वर। सूचक। पक्षिक। सारथिक। जलिक। सूतिक। अञ्जलिक। *राजासे*। सूचक। पुरोहितादिः ।।

प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् ।। 5.1.129 ।।

प्राणभृज्जातिवाचिभ्यः प्रातिपदिकेभ्यो वयोवचनेभ्य उद्गात्रादिभ्यश्चाञ् प्रत्ययो भवति भावकर्मणोरर्थयोः। अश्वस्य भावः कर्म वा आश्वम्। औष्ट्रम्।

वयोवचनेभ्यः--कौमारम्। कैशोरम्। उद्गात्रादिभ्यः--ओद्गात्रम्। औन्नेत्रम्।

उद्गातृ। उन्नेतृ। प्रतिहर्तृ। रथगणक। पक्षिगणक। सुष्ठु। दुष्ठु। अध्वर्यु। वधू। * सुभगा मन्त्रे *। उद्गात्रादिः ।।

हायनान्तयुवादिब्योऽण् ।। 5.1.130 ।।

हायनान्तेभ्यः प्रातिपदिकेभ्योः युवादिभ्यश्चाण् प्रत्ययो भवति भावकर्मणोरर्थयोः। द्विहायनस्य भावः कर्म वा द्वैहायनम्। त्रैहायनम्। युवादिभ्यः---यौवनम्। स्थाविरम्।

* श्रोत्रियस्य यलोपश्च वाच्यः *। श्रोत्रियस्य भावः कर्म वा श्रौत्रम् ।

युवन्। स्थविर। होतृ। यजमान। कमण्डलु। * पुरुषासे *। सुहृत्। यात्। श्रवण । कुस्त्री। सुस्त्रई। सुहृदय। सुभ्रातृ। वृषलस।

* श्रोत्रियस्य यलोपश्च वाच्य * । श्रोत्रियस्य भावः कर्म वा श्रौत्रम्।

युवन्। स्थविर। होतृ। यजमान। कमण्डलु। * पुरुषासे *। सुहृत्। यातृ। श्रवण। कुस्त्री। सुस्त्री। सुहृदय। सुभ्रातृ। वृषल। दुर्भ्रात-। * हृदयासे *। क्षेत्रज्ञ। कृतक। परिव्रजक। कुशल। चपल। निपुण। पिशुन। सब्रह्मचारिन्। कुतूहल। अनृशंस। युवादिः ।।

इगन्ताच्च लघुपूर्वात् ।। 5.1.131 ।।

इगन्ताच्च लघुपूर्वादण् प्रत्ययो भवति भावकर्मणोः। लघुपूर्वग्रहणेन प्रातिपदिकसमुदायो विशेष्यते। लघुः पूर्वोऽवयवोऽस्येति लघुपूर्वः। कुतः पुनरसौ लघुः

कपूर्वः ? इक्सन्निधानादिक इति विज्ञायते। लघूपूर्वो यस्मादिकस्तदन्तात्प्रातिपदिकादित्ययमर्थो विवक्षितः।
अपरे तत्पुरुषकर्मधारयं वर्णयन्ति--इक्चासावन्तश्चेतीगन्तः।
लघुपूर्वग्रहणेन स एव विशेष्यते, पश्चात्तेन प्रातिपदिकस्य तदन्तविधिरिति। अस्मिन्व्याख्याने-अन्तग्रहणमतिरिच्यते। `लघुपूर्वादिकः' इत्येतावदेव वाच्यं स्यात्। शुचेर्भावः कर्म वा शौचम्। मौनम्। नागरम्। हारीतकम्। पाटवम्। लाघवम्।
इगन्तादिति किम्? घटत्वम्। पटत्वम्। लघुपूर्वादिति किम्? कण्डूत्वम्। पाण्डुत्वम्।
कथं काव्यमिति ? ब्राह्मणादिषु कविषब्दो द्रष्टव्यः।

योपधाद् गुरुपोत्तमाद् वुञ् । 5.1.132 ।।
त्रिप्रभृतीनामन्तस्यसमीपमुपोत्तम्। गुरुरुपोत्तमं यस्य तद् गुरूपोत्तमम्। यकारोपधाद् गुरूपोत्तमाद्वुञ् प्रत्ययो भवति भावकर्मणोः। रणणीयस्य भावः कर्म वा रामणीयकम्। वासनीयकम्।
योपधादिति किम् ? विमानत्वम्। गुरुपोत्तमादिति किम् ? क्षत्त्रियत्वम्।
* सहायाद्वेति वक्तव्यम् *। साहायकम्। साहाय्यम् ।।

द्वन्द्वमनोज्ञादिभ्यश्च ।। 5.1.133 ।।
द्वन्द्वसंज्ञकेभ्यो मनोज्ञादिभ्यश्च वुञ् प्रत्ययो भवति भावकर्मणोः। गोपालपशुपालानां भावः कर्म वा गौपालपशुपालिका। शैष्योपाध्यायिका। कौत्समुशिकिका।
मनोज्ञादिभ्यः---मानोज्ञकम्, काल्याणकम्।
मनोज्ञ। कल्याण। प्रियरुप। छान्दस। छात्त्र। मेधाविन्। अभिरुप। आढ्य। कुलपुत्र। श्रोत्रिय। चोर। धूर्त्त। वैश्वदेव।
युवन्। ग्रामपुत्र। ग्रामखण्ड। ग्रामकुमार। अमुष्यपुत्र। अमुष्यकुल। शतपुत्र। कुशल। मनोज्ञादिः ।।

गोत्रचरणाच्छ्लाधात्याकारतदवेतेषु ।। 5.1.134 ।।
गोत्रवाचिनश्चरणवाचिनश्च प्रातिपदिकाद् वुञ् प्रत्योयो भवति, प्रत्येकं भावकर्मणोरर्थयोः श्लागादिषु विषयभूतेषु, तत्र श्लाघा=विकत्थनम्।
अत्याकारः=पराधिक्षेपः, तदवेतः=तत्प्राप्तः, तज्ज्ञो वा। तदिति गोत्रचरणयोर्भावकर्मणो निर्दिश्येते। तत्प्राप्तस्तदवगतवान् `तदवेतः' इत्युच्यते श्लाघायां तावत्--गार्गिकया श्लाघते काठिकया श्लाघते। गार्ग्यत्वेन कठत्वेन च विकत्थत इत्यर्थः। अत्याकारेगार्गिकयात्याकुरुते। काठिकयात्याकुरुते। गार्ग्यत्वेन कठत्वेन च परानधिक्षिपतीत्यर्थः। तदवेतः--गार्गिकामवेतः। काठिकामवेतः। गार्ग्यत्वं कठत्वं च प्राप्त इत्यर्थः। तद्वाऽवगतवानित्यर्थः।
श्लाघादिष्विति किम् ? गार्ग्यत्वम्। कठत्वम् ।।

होत्राभ्यश्छः ।। 5.1.135 ।।
होत्राशब्द ऋत्विग्विशेषवचनः। ऋत्विग्विशेषवाचिब्यश्छः प्रत्ययो भवति बावकर्मणोः। अच्छावाकस्य भावः कर्म वा अच्छावाकीयम्। मित्त्रावरुणीयम्।
ब्राह्मणाच्छंसीयम्। आग्नीध्रीयम्। प्रतिप्रस्थात्रीयम्। त्वष्ट्रीयम्। पोत्रीयम्।
बहूवचनं स्वरूपविधिनिरासार्थम् ।।

ब्रह्मणस्त्वः ।। 5.1.136 ।।
`होत्राभ्यः' इत्यनुवर्त्तते। ब्रह्मन्शब्दाद्धोत्रावाचिनस्त्वः प्रत्ययो भवति भावकर्मणोः। छस्यापवादः। ब्रह्मणो भावः कर्म वा ब्रह्मत्वम्।
`न' इति वक्तव्ये त्ववचनं तलो बाधनार्थम्। यस्तु जातिशब्दो ब्राह्मणपर्यायो ब्रह्मन्शब्दः, ततस्त्वतलौ भवत एव-व्रह्मत्वम्, ब्रह्मता।
भवनावधिकयोर्नञ्स्नञोरधिकारः समाप्तः ।।
* इति काशिकावृतौ पञ्चमस्याध्यायस्य प्रथमः पादः *

5.2

काशिकावृत्तिः

अथ पञ्चमाध्याये द्वितीयः पादः

धान्यानां भवने क्षेत्रे खञ् ।। 5.2.1।।

निर्देशादेव समर्थविभक्तिः। धान्यविशेषवाचिभ्यः षष्ठीसमर्थेभ्यो भवनेऽभिधेये खञ् प्रत्ययौ भवति, तच्चेद्बवनं क्षेत्रं भवतिः भवनमिति-भवन्ति जायन्तेऽस्मिन्निति भवनम्। मुद्गानां भवनं क्षेत्रं मौद्गीनम्। कौद्रवीणम्। कौलत्थीनम्।
धान्यानकामिति किम् ? तृणानां भवनं क्षेत्रमित्यत्र न भवति। क्षेत्रमिति किम् ? मुद्गानां भवनं कुशूलम्।
बहुवचनं स्वरुपविधिनिरासार्थम् ।।

व्रीहिशाल्योर्ढक् ।। 5.2.2 ।।
व्रीहि, शालि-शब्दाभ्यां ढक् प्रत्ययो भवति भवने क्षेत्रेऽभिधेये। खञोऽपवादः। व्रीहीणां भवनं क्षेत्रं व्रैहेयम्। शालेयम् ।।

यवयवकषष्टिकाद्यत् ।। 5.2.3 ।।
यवादिभ्यः शब्देभ्यो यत्प्रत्ययो भवति भवने क्षेत्रेऽभिधेये। खञोऽपवादः। यवानां भवनं क्षेत्रं यव्यम्। यवक्यम्। षष्टिक्यम्।

विभाषा तिलमाषोमाभङ्गाणुभ्यः ।। 5.2.4 ।।
तिल, माष, उमा, भङ्गा, अणु--इत्येतेभ्यो विभाषां यत्प्रत्ययो भवति भवने क्षेत्रेऽभिधेये। खञिप्राप्ते वचनम्, पक्षे सोऽपि भवति।
उमाभङ्गयोरपि धान्यत्वमाश्रितमेव। तिल, माष, उमा, भङ्गा, अणुएषां भवनं क्षेत्रं तिल्यम्, तैलीनम्। माष्यम्, माषीणम्। उम्यम्, औमीनम्। भङ्ग्यम्, भाङ्गीनम्। अणव्यम्, आणवीनम्।

सर्वचर्मणः कृतः खखञौ ।। 5.2.5 ।।
सर्वचर्मन्शब्दात्तृतीयासमर्थात् `कृतः' इत्यस्मिन्नर्थे खखञौ प्रत्ययौ भवतः। सर्वशब्दश्चात्र प्रत्ययार्थेन कृतेन सकम्बध्यते, न चर्मणा।
तत्रायमसमर्थसमासो द्रष्टव्यः। सर्वश्चर्मणा कृत इत्येतस्मिन्वाक्यार्थे वृत्तिः। सर्वचर्मीणः, सार्वचर्मीणः ।।

यथामुखसम्मुखस्य दर्शनः खः ।। 5.2.6 ।।
यथामुखशब्दात्सम्मुखशब्दात्षष्ठीसमर्थाद् `दर्शनः' इत्येतस्मिन्नर्थे खः प्रत्ययो भवति। दृश्यतेऽस्मिन्निति दर्शनः=आदर्शादिः, प्रतिबिम्बाश्रय उच्यते।
निपातनात्सादृश्येऽव्ययीभावः। यथामुखं दर्शनः यथामुखीनः। सर्वस्य मुखस्य दर्शनः सम्मुखीनः ।।

तत्सर्वादेः पथ्यङ्गकर्मपत्त्रपात्रं व्याप्नोति ।। 5.2.7 ।।
`तत्' इति द्वितीया समर्थविभक्तिः। `व्याप्नोति' इति प्रत्ययार्थः। परिशिष्टं प्रकृतिविशेषणम्। सर्वादेः प्रातिपदिकात् पथिन्, अङ्ग, कर्मन्, पत्त्र, पात्र-इत्येवमन्ताद् द्वितीयासमर्थात् `व्याप्नोति' इत्यस्मिन्नर्थे खः प्रत्ययो भवति। सर्वपथं व्याप्नोति सर्वपथीनो रथः। सर्वाङ्गीणस्तापः। सर्वकर्मीणः पुरुषः।
सर्वपत्त्रीणः सारथिः। सर्वपात्रीण ओदनः ।।

आप्रपदं प्राप्नोति ।। 5.2.8 ।।
`प्रपदम्' इति पादस्याग्रमुच्यते, आङ् मर्यादायाम्, तयोरव्ययीभावः। आप्रपदशब्दात्तदिति द्वितीयासमर्थात् `प्राप्नोति' इत्यस्मिन्नर्थे खः प्रत्ययो बवति। आप्रपदं प्राप्नोति आप्रपदीनः पटः। शरीरेणासम्बद्धस्यापि पटस्य प्रमाणमाख्यायते ।।

अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ।। 5.2.9 ।।
अनुपदादिभ्यः शब्देभ्यस्तदिति द्वितीयासम्रथेभ्यो यथासंख्यम् `बद्धा', `भक्षयति', `नेय'-इत्येतेष्वर्थेषु खः प्रत्ययो भवति। अनुरायामे, सादृश्ये वा। अनुपदं बद्धा उपानत् अनुपदीना। पदप्रमाणेत्यर्थः। सर्वान्नानि भक्षयति सर्वान्नीतो भिक्षुः। अयः=प्रदक्षिणम्। अनयः= प्रसव्यम्। प्रदक्षिणप्रसव्यगामिनां शाराणां यस्मिन्परशारैः पदानामसमावेशः सोऽयानयः। अयानयं नेयः अयानयीनः शारः। फलकशिरसि स्थित इत्यर्थः ।।

परोवरपरम्परपुत्रपौत्रमनुभवति ।। 5.2.10 ।।
परोवर, परम्पर, पुत्रपौत्र-इत्येतेभ्यस्तदिति द्वितीयासमर्थेब्यः `अनुभवति' इत्येतस्मिन्नर्थे खः प्रत्ययो भवति। परोवरेति परस्योत्वं प्रत्ययसन्नियोगेन निपात्यते।
परांश्चावरांख्वानुभवति परोवरीणः।
परपरतराणां च परम्परभावो निपात्यते। परांश्च परतरांश्चानुभवति परम्परीणः। पुत्रपौत्राननुभवति पुत्रपौत्रीणः।
परम्परशब्दो विनापि प्रत्ययेन दृश्यते--मन्त्रिपरम्परा मन्त्रं भिनत्तीति। तच्छब्दान्तरमेव द्रष्टव्यम्।।

अवारपारात्यन्तानुकामं गामी ।। 5.2.11 ।।

अवारपार, अत्यन्त, अनुकाम--इत्येतेभ्यो द्वितीयासमर्थेभ्यः `गामी' इत्येतस्मिन्नर्थे खः प्रत्ययो भवति। गमिष्यतीति गामी। `भविष्यति गम्यादयः' इति। `अकेनोर्भविष्यदाधमर्ण्ययोः' इति षष्ठीप्रतिषेधः। अवारपारं गामी अवारपारीणः।

* विगृहीतादपीष्यते *। विपरीताच्च *। अवारीणः। पारावारीणः।

अत्यन्तं गामी अत्यन्तीनः। भृशं गन्तेत्यर्थः। अनुकामं गामी अनुकामीनः। यथेष्टं गन्तेत्यर्थः ।।

समांसमां विजायते ।। 5.2.12 ।।

`समांसमाम्' इति वीप्सा, सुबन्तसमुदायः प्रकृतिः, विजायते गर्भ धारयतीति प्रत्ययार्थः। गर्भदारणेन सकलापि समा व्याप्यत इति अत्यन्तसंयोगे द्वितीया। समांसमां विजायते समांसमीना गौः। समांसमीना वडवा।

* पूर्वपदे सुपोऽलुग्वक्तव्यः *।

केचित्तु `समायां समायां विजायते' इति विगृह्णन्ति, `गर्भमोचने विजनिर्वर्त्तते' इत्याहुः, तेषां पूर्वपदे यलोपमात्रं निपात्यते, परिशिष्टस्थालुग्वक्तव्यः।

* अनुत्पत्तावुत्तरपदस्य च वा यलोपो वक्तव्यः *। समांसमां विजायते। समायांसमायां विजायत इति वा।।

अद्यश्वीनावष्टब्धे ।। 5.2.13 ।।

`विजायते' इति वर्त्तते। `अद्यश्वीनः' इति निपात्यते अवष्टब्धे विजने=आसन्ने प्रसवे। आविदूर्ये हि मूर्धन्यो विधीयते--`अवाच्चालम्बनाविदूर्ययोः' इति। अद्य वा श्वो वा विजायते अद्यश्वीना गौः। अद्यश्वीना वडवा।

केचित्तु-`विजायते इति नानुवर्त्तते, अवष्टब्धमात्रे निपातनम्' इत्याहुः. अद्यश्वीनं मरणम्। अद्यश्वीनो वियोग इति।।

आगवीनः ।। 5.2.14 ।।

`अगवीनः' इति निपात्यते। गोराङ्पूर्वाद् आ तस्य गोः प्रतिपादनात् कारिणि खः। प्रत्ययो निपात्यते। आगवीनः कर्मकरः। यो गवा भृतः कर्म करोति आ तस् गोः प्रत्यर्पणात् ।।

अनुग्वलङ्गामी ।। 5.2.15 ।।

गोः पश्चाद् `अनुगु'। अनुगुशब्दाद् `अलङ्गामी' इत्यस्मिन्नर्थे खः प्रत्ययो भवति। अनुगु पर्याप्तं गच्छति अनुगवीनो गोपालकः ।।

अध्वनो यत्खौ ।। 5.2.16 ।।

तदिति द्वितीया समर्थविभक्तिरनुवर्त्तते, अलङ्गामीति च प्रत्ययार्थः। अध्वन्शब्दाद् द्वितीयासमर्थाद् `अलङ्गामी' इत्येतस्मिन्नर्ते यत्खौ प्रत्ययौ भवतः। अध्वानमलह्गामी अध्वनीनः, अध्वन्यः। `ये चाभावकर्मणोः', `आत्माध्वनौ खे' इति प्रकृतिभाव ।।

अभ्यमित्राच्छ च ।। 5.2.17 ।।

अभ्यमित्रशब्दादु द्वितीयासमर्थाद् `अलङ्गामी' इत्येतस्मिन्नर्थे छः प्रत्ययो भवति। चकाराद्यत्खौ च। अभ्यमित्रमलङ्गामी अभ्यमित्रीयः, अब्यमित्र्यः, अभ्यमित्रीमः। अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः ।।

गोष्ठात्खञ् भूतपूर्वे ।। 5.2.18 ।।

गावस्तिष्ठन्त्यस्मिन्निति गोष्ठम्। गोष्ठशब्देन सन्निहितगोसमूहो देश उच्यते। भूतपूर्वग्रहणं तस्यैव विशेषणम्। गोष्ठशब्दाद् भूतपूर्वाधिकात्स्वार्थे खः प्रत्ययो भवति। गोष्ठोनो देसः।

भूतपूर्वग्रहणं किम्? गोष्ठो वर्तेते ।।

अश्वस्यैकाहगमः ।। 5.2.19 ।।

निर्देसादेव समर्थविभक्तिः। अश्वशब्दात्षष्ठीसमर्थाद् `एकाहगमः' इत्येतदर्थे खञ् प्रत्ययो भवति। एहाहेन गम्यत इत्येकाहगमः। अश्वस्यैकाहगमोऽध्वा आश्वीनः। आस्वीनानि शतं पतित्वा ।।

शालीनकौपीने अधृष्टाकार्ययोः ।। 5.2.20 ।।

शालीन, कौपीन-शब्दौ निपात्येते यथासंख्यमधृष्टे, अकार्ये चाभिधेये। अधृष्टः=अप्रगल्भः। अकार्यम्=अकरणार्हं विरुद्धम्। शालीनकौपीने अधृष्टाकार्ययोः

पर्यायौ यथाकथञ्चिद् व्युत्पादयितव्यौ।
शालाप्रवेशनमर्हति, कूपावतारमर्हति--इत्यर्थयोः खञ्प्रत्यय उत्तरपदलोपश्च निपात्यते। शालीनो जडः। कौपीनं पापम् ।।

व्रातेन जीवति ।। 5.2.21 ।।
निर्देशादेव तृतीया समर्थविभक्तिः। व्रातशब्दात्तृतीयासमर्थात् `जिवति' इत्यस्मिन्नर्थे खञ् प्रत्ययो भवति। नानाजातीया अनियतवृत्तय उत्सेधजीविनः सङ्घाः=व्राताः। उत्सेधः=शरीरम्, तदायास्य ये जीवन्ति ते उत्सेधजीविनः, तेषां कर्म व्रातम्। तेन व्रातेन जीवति व्रातीनः। तेषामेव व्रातानामन्यतम उच्यते। यस्त्वन्यस्तदीयेन जीवति तत्र नेष्यते ।।

साप्तपदीनं सख्यम् ।। 5.2.22 ।।
`साप्तपदीनम्' इति निपात्यते सख्येऽभिधेये। सप्तभिः पदैरवाप्यते साप्तपदीनम्। `सख्यं जनाः साप्तपदीनमाहुः'।
कथं साप्तपदीनः सखा, साप्तपदीनं मित्त्रमिति ? यदा गुणप्रधानः साप्तपदीनशब्दः सखिभावे सत्कर्मणि च वर्तते तदा सख्यशब्देन सामानाधिकण्यं भवति, यदा तु लक्षणाया वर्तते तदा पुरुषेण सामनाधिकरण्यं भवति।।

हैयङ्गवीनं संज्ञायाम् ।। 5.2.23 ।।
`हैयङ्गवीनम्' इति निपात्यते संज्ञायां विषये। ह्योगोदोहस्य हियङ्ग्वादेशः, तस्य विकारे खञ् प्रत्ययो भवति संज्ञायाम्। ह्योगोदोहस्य विकारः हैयङ्गवलीनम्, घृतस्य संज्ञा। तेनह न भवति-होगोदोहस्य विकार उदश्वित् ।।

तस्य पाकमूले पील्वादिकर्णादिब्यः कुणब्जाहचौ ।। 5.2.24 ।।
`तस्य ' इति षष्ठीसमर्थेभ्यः पील्वादिभ्यः कर्णादिभ्यश्च यथासंक्यं पाकमूलयोरर्थयोः कुणब्, जाहच्-इत्येतौ प्रत्ययौ भवतः। पीलूनां पाकः पीलुकुणः। कर्कन्धुकुणः। कर्णादिभ्यः--कर्णस्य मूलं कर्णजाहम्।
पीलु। कर्कन्धु। शमी। करीर। कवल। बदर। अश्वत्थ। खदिर। पील्वादिः।
कर्ण। अक्षि। नख। मुख। मख। केश। पाद। गुल्फ। भ्रूभङ्ग। दन्त। ओष्ठ। पृष्ठ। अङ्गुष्ठ। कर्णादिः ।।

पक्षात्तिः ।। 5.2.25 ।।
`तस्य' इत्येव। तस्येति षष्ठीसमर्थात्पक्षशब्दाद् मूलेऽभिधेये तिः प्रत्ययो भवति। मूलग्रहणमुनुवर्त्तते, न पाकग्रहणम्; `एकयोगनिर्दिष्टानामप्येकदेशोऽनुवर्तते' इति। पक्ष्साय मूलं पक्षातिः=प्रतिपत् ।।

तेन वित्तश्चुञ्चुप्चणपौ ।। 5.2.26 ।।
`तेन' इति तृतीयासमर्थाद् `वित्त' इत्येतस्मिन्नर्थे चुञ्चुप्, चणप्इत्येतौ प्रत्ययौ भवतः। वित्तः= प्रतीतः, ज्ञात इत्यर्थः। विद्यया वित्तः विद्यचुञ्चुः। विद्याचणः ।।

विनञ्भ्यां नानाञौ नसह ।। 5.2.27 ।।
वि, नञ्- इत्येताभ्यां यथासंख्यं ना, नाञ्-इत्योतौ प्रत्ययौ भवतः। `नसह' इति प्रकृतिविशेषणम्। असहार्थे पृथग्भावे वर्त्तमानाभ्यां विनञ्भ्यां स्वार्थे नानाञौ प्रत्ययौ भवतः। विना। नाना ।।

वेः शालच्छङ्कटचौ ।। 5.2.28 ।।
विशब्दात् शालच्, शङ्ट्च्-इत्येतौ प्रत्ययौ भवतः। ससाधनक्रियावचनादुपसर्गात्स्वार्थे प्रत्ययौ भवतः। विगते श्रृङ्गे विशाले। विशङ्कटे। तद्योगाद् गौरपि विशालः, विशङ्कट इत्युच्यते।
परमार्थतस्तु गुणशब्दा एते यथाकथञ्चिद्व्युत्पाद्यन्ते। नात्र प्रकृतिप्रत्ययार्थयोरभिनिवेशः ।।

संप्रोदश्च कटच् ।। 5.2.29 ।।
सम्, प्र, उद्-इत्येतेभ्यः कटच् प्रत्ययो प्रत्ययो भवति। चकाराद्वेश्च। सङ्कटः। प्रकटः उत्कटः। विकटः।
* कटच्प्रकरणेऽलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम् *। अलाबूनां रजः अलाबूकटम्। तिलकटम्। उमाकटम्। भङ्गाकटम्।
* गोष्ठादयः स्थानादिषु पशुनामादिभ्य उपसंख्यानम् *। गवां स्थानं गोगोष्ठम्। महिषीगोष्ठम्।

* सङ्घाते कटच् वक्तव्यः *। अवीनां सङ्घातः अविकटम्।
* विस्तारे पटच् वक्तव्यः *। अविपटम्।
* द्वित्वे गोयुगच *। उष्ट्रगोयुगम्। अश्वगोयुगम्।
* प्रकृत्यर्थस्य षट्त्वे षङ्वच् *। हस्तिषङ्गवम्। अश्वषङ्गवम्।
* विकारे स्नेहे तैलच् *। एरण्डतैलम्। इङ्गुदतैलम्। तिलतैलम्।
* भवेने क्षेत्रे इक्ष्वादिभ्यः शाकटसाकिनौ *। इक्षुसाकटम्। इक्षुशाकिनम्। मूलशाकटम्। मूलशाकिनम् ।।

अवात्कुटारच्च ।। 5.2.30 ।।
अवशब्दात् कुटारच्प्रत्ययो भवति। चकारात् कटच। अवकुटारम्। अवकटम् ।।

नते नासिकायाः संज्ञायां टीटञ्नाटजभ्रटचः ।। 5.2.31 ।।
`अवात्' इत्येव। नमनम्=नतम्। नासिकायाः सम्बन्धिनि नतेऽभिधेये टीटच्, नाटच्, भ्रटच्--प्रत्या भवन्ति संज्ञायां विषये। नासिकाया नतम् अवटीटम्। अवनाटम्। अवभ्रटम्। तद्योगान्नासिकापि। पुरुषोऽपि तथोच्यते-अवटीटः, अवनाटः, अवभ्रट इति ।।

नेर्बिडम्बिरीसचौ ।। 5.2.32 ।।
`नते नासिकायाः' इत्यनुवर्त्तते, `संज्ञायाम्' इति च। निशब्दान्नासिकाया नतेऽभिधेये बिडच्, बिरीसच्-इत्येतौ प्रत्ययौ भवतः। निबिडम्। निबिरीसम्। तद्योगान्नासिकापि। पुरुषोऽपि--निबिडः, निबिरीसः।
कथं निबिडाः केशाः, निबिडं वस्त्रम् ? उपमानाद्भविष्यति ।।

इनच्पिटच्चिक चि च ।। 5.2.33 ।।
`नेः' इत्येव, `नते नासिकायाः' इति च। निशब्दान्नासिकाया नतेऽभिधेये इनच्, पिटच्-इत्येतौ प्रत्ययौ भवतः, तत्संनियोगेन च निशब्दस्य यथासंख्यं चिक, चि-इत्येतावादेशौ भवतः। चिकिनः। चिपिटः।
* ककारः प्रत्ययो वक्तव्यश्चिक्च प्रकृत्याऽऽदेशः *। चिक्कः। तथा चोक्तम्-`इनच्पिटच्काश्चिकचिचिकादेशाश्च वक्त्व्याः' इति ।।
* क्लिन्नस्य चिल् पिल्लश्चास्य चक्षुषी *। क्लिन्नस्य चिल्, पिल्--इत्येतावादशौ भवतो लश्च प्रत्ययः `अस्य चक्षुषी' इत्येतस्मिन्नर्थे। क्लिन्ने अस्य चक्षुषी चिल्लः. पिल्लः ।।
* चुलादेशो वक्तव्यः *। चुल्लः।
अस्येत्येनेन नार्तः। चक्षुषोरेवाभिधाने प्रत्यय इष्टते। क्लिन्ने चक्षुषी चिल्ले। पिल्ले। चुल्ले। तद्योगात्तु पुरुषस्तथोच्यते ।।

उपाधिभ्यां त्यकन्नासन्नारूढयोः ।। 5.2.34 ।।
उप, अधि--इत्येताभ्यां यथासंख्यमासन्नारूढयोर्वर्त्तमानाभ्यां स्वार्थे त्यकन्प्रत्ययो भवति। संज्ञाधिकाराच्च नियतविषयमासन्नारूढं गम्यते।
`पर्वतस्यासन्नम्=उपत्यका। तस्यैवाऽऽरूढम्=अधित्यका। `प्रत्ययश्थात्कात्पूर्वस्य' इतीत्वमत्र न भवति, संज्ञाधिकारादेव ।।

कर्मणि घटोऽठच् ।। 5.2.35 ।।
निर्देशादेव समर्थविभक्तिः। कर्मशब्दात्सप्तमीसमर्थाद् `घटः' इत्येतस्मिन्नर्थेऽठच् प्रत्ययो भवति। घटत इति घटः। कर्मणि घटते कर्मठः पुरुषः ।।

तदस्य सञ्जातं तारकादिभ्तयः इतच् ।। 5.2.36 ।।
तदिति प्रथमासमर्थेभ्यस्तारकादिभ्यः शब्देभ्यः `अस्य' इति षष्ठ्यर्थे इतच् प्रत्ययो भवति। सञ्जातग्रहणं प्रकृतिविशेषणम्। तारकाः सञ्जाता अस्य नभसः तारकितं नभः। पुष्पितो वृक्षः।
तारका। पुष्प। मुकुल। कण्टक। पिपासा। सुख। दुःख। ऋजीष। कुड्मल। सूचक। रोग। विचार। व्याधि। निष्क्रमण मूत्र। पुरीष। किसलय। कुसुम। प्रचार। तन्द्रा। वेग। पुक्षा। श्रद्धा। उत्कण्ठ। भर। द्रोह। * गर्भादप्राणिनि ।। तारकादिराकृतिगणः ।।

प्रमाणे द्वयसज्दघ्नञ्मात्रचः ।। 5.2.37 ।।
`तदस्य' इत्यनुवर्त्तते। तदिति प्रथमासमर्थाद् `अस्य' इति षष्ठ्यर्थे द्वयसच्, दघ्नच, मात्रच्-इत्येते प्रत्यया भवन्ति यत्तत्प्रथमासमर्थ प्रमाणं चेत्तद्भभवति।

ऊरुः प्रमाणमस्य ऊरुद्वयसम्, ऊरुदध्नम्, ऊरुमात्रम्। जानुमात्रम्, जानुद्वयसम्, जानुदध्नम् ।।
प्रथमस्च द्वितीयश्च उर्ध्वमाने मतौ मम।
ऊरूद्वयसमुदकम्। ऊरुदध्नमुदकम्। मात्रच्पुनरविशेषेण, प्रस्थमात्रमित्यपि भवति।
* प्रमाणे लो वक्तव्यः *। प्रमाणशब्दा इति ये प्रसिद्धास्तेभ्य उत्पन्नस्य प्रत्ययस्य लुग्भवति। शमः प्रमाणमस्य शमः। दिष्टिः। वितस्तिः।
* द्विगोर्नित्यम् *। द्वौ शमौ प्रमाणमस्य द्विशमः। त्रिशमः। द्विवितस्तिः। नित्यग्रहणं किम् ? संशये श्राविणं वक्ष्यति, तत्रापि द्विगोर्लुगेव यथा स्यात्। द्वे दिष्टी स्यातां वा न वा, द्विदिष्टिः।
* डट् स्तोमे वक्तव्य *। पञ्चदशस्तोमः। पञ्चदशी रात्रिः। टित्वाद् ङीप्।
* शन्शतोर्डिनिर्वक्तव्यः *। पञ्चदशिनोऽर्द्धमासाः। त्रिंशिनो मासाः।
* विंसतेश्चेति वक्तव्यम् *। विंशिनोऽङ्गिरसः।
* प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्यः *। शममात्रम्। दिष्टिमात्रम्। प्रश्थमात्रम्। कुडवमात्रम्। पञ्चमात्रम्। दशंमात्रा गावः।
* वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम् *। तावदेव तावद्द्वयसम्। तावन्मात्रम्। एतावद्द्वयसम्। एतावन्मात्रम्। यावद्द्वयसम्। यावन्मात्रम् ।।

पुरुषहस्तिभ्यामण्च ।। 5.2.38 ।।
`तदस्य' इत्येव, `प्रमाणो' इति च। पुरुषहस्तिभ्यां प्रथमासमर्थाभ्यां प्रमाणोपाधिकाब्यामस्येति षष्ठ्यरेथेऽण् प्रत्ययो भवति, चकाराद् ज्वयसजादयश्च।
पुरुषः प्रमाणमस्य पौरुषम्, पुरुषद्वयसम्, पुरुषदघ्नम्, पुरुषमात्रम्। हास्तिनम्, हस्तिद्वयसम्, हस्तिदघ्नम्, हस्तिमात्रम्।
द्विगोर्नित्यं लुक--द्विपुरुषमुदकम्, त्रिपुरुषमुदकम्। द्विहस्ति, त्रिहस्ति। द्विपुरुषी, त्रिपुरुषी। द्विहस्तिनी, त्रिहस्तिनी ।।

यत्तदेतेभ्यः परिमाणे वतुप् ।। 5.2.39 ।।
`तदस्य' इत्येव। यत्तदेतेभ्यः प्रथमासमर्तेभ्यः परिमाणोपाधिकेभ्यः `अस्य' इति षष्ठ्यर्थे वतुप् प्रत्ययो भवति। तत्परिमाणमस्य यावान्। तावन्। एतावान्।
प्रमाणग्रहणेऽनुवर्तमाने परिमाणग्रहणं प्रमाणपरिमाणयोर्भेदात् ।।
डावतावर्थवैशेष्यान्निर्देशः पृतगुच्चते।
मात्राद्यप्रतिघाताय भावः सिद्धश्य डावतोः ।।
* वतुप्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् *। `न त्वा वा अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते। त्वावतः पुरुवसो यज्ञं विप्रस्य मावतः। त्वत्सदृशस्य मत्सदृशस्येत्यर्थः ।।

किमिदम्भ्यां वो घः ।। 5.2.40 ।।
किमिदम्भ्यामुत्तरस्य वतुपो वकारस्य घकारादेशो भवति। कियान्। इत्यान्।
एतदेव चादेशविधानं ज्ञापकम्-किमिदम्भ्यां वतुप्प्रत्ययो भवतीति। अथ वा-योगविभागेन वतुपं विधाय पश्चाद्वो घो विधीयते ।।

किमः संख्यायापरिमाणे इति च ।। 5.2.41 ।।
संक्यायाः परिमाणम्, संख्यापरिच्छेद इत्यर्थः। संख्यापरिमाणे वर्त्तमानात् किमः प्रथमासमर्थादस्येति षष्ठ्यर्थे इतिः प्रत्ययो भवति। चकाराद्वतुम् च। तस्य च वकारस्य घादेशो भवति। पृच्छ्यमानत्वात् परिच्छेदोपाधिकायां संख्यायां वर्त्तमानात्किमः प्रत्ययो विज्ञायते। का संख्या परिमाणमेषां ब्राह्मणानां कति ब्राह्मणाः। कियन्तो ब्राह्मणाः।
अथ वा-संख्यैव परिमाणात्मिका परिच्छेदस्वभावा गृह्यते--का संख्या परिमाणं येषामिति।
ननु च संख्या एवमात्मिकैव परिच्छेदस्वभावा, सा किमर्थं परिमाणेन विशेष्यते ? यत्रापरिच्छेदकत्वेन विवक्ष्यते तत्र मा भूदिति। क्षेपे हि परिच्छेदो नास्ति-केयमेषां संख्या दशानामिति ।।

संख्याया अवयये तयप् ।। 5.2.42 ।।
`तदस्य' इत्येव। संख्याया अवयवे वर्त्तमानाया अस्येति षष्ठ्यर्थे तयप् प्रत्ययो भवति अवयवा अवयविनः सम्बन्धिन इति सामर्थ्यादवयवी प्रत्ययार्थो विज्ञायते। पञ्च अवयवा अस्य पञ्चतयम्। दशतयम्। चतुष्टयम्। चतुष्टयी ।।

द्वित्रीभ्यां तयस्यायज्वा ।। 5.2.43 ।।
पूर्वेण विहितस्य तयस्य द्वित्रिभ्यां परस्य वाऽयजदेशो भवति। द्वाववयवावस्य द्वयम्, द्वितयम्। त्रयम्, त्रितयम्।
तयग्रहणं स्थानिनिर्देशार्थम्; अन्यथा प्रत्ययान्तरमयज्विज्ञोत।

तत्र को दोषः ? त्रयी गतिरिति तयनिबनधन ईकारो न स्यात्, `प्रथमचरमतय' इत्येष विधिश्च न स्यात्। द्वये, द्वयाः। चकारः स्वरार्थः।

उबादुदात्तो नित्यम् ।। 5.2.44 ।।
उभशब्दात्परस्य तयपो नित्यमयजादेशो भवति स चोदात्तः। वचनसामर्थ्यादादेरुदात्तत्वं विज्ञायते।
उभशब्दो यदि लौकिकी संख्या, ततः पूर्वेणैव विहितस्य तयप आदेशविधानार्थं वचनम्। अथ न संख्या, ततो योगविभागेन तयपं विधाय तस्य नित्यमजयादेशो विधीयते। उभयो मणिः, उभये देवमनुष्याः ।।

तदस्मिन्नधिकमिति दशान्ताड्डः ।। 5.2.45 ।।
तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे दशान्तात्प्रातिपदिकाद् डः प्रत्यो भवति यत्तत्प्रथमासमर्थमधिकं चेत्तद्भवति। इतिकरणस्ततश्चेद्विवक्षा। एकादश अधिका अस्मिन् शते एकादशं शतम्। एकादशं सहस्रम्। द्वादशं शतम्। द्वादशं सहस्रम्।
दसान्तादिति किम् ? पञ्चाधिका अस्मिन शते। अन्तग्रहणं किम् ? दशाधिका अस्मिन् शते।
प्रत्ययार्थेन च समानजातीये प्रकृत्यर्थे सति प्रत्यय इष्यते---
एकादश कार्षापणा अधिका अस्मिन् कार्षापणशते एकादशं कार्षापणशतमिति।
इह न न भवति-एकादश माषा अधिका अस्मिन्कार्षापणशत इति।
शतसहस्रयोश्चेष्यते। इह न भवति--एकादशाधिका अस्यां त्रिंशतीति।
`इतिकरणो विवक्षार्थः' इत्युक्तम्, तत इदं सर्वं लभ्यते।
कथमेकादशं शतसहस्रमिति ? शतानां सहस्रम्, सहस्राणां वा शतमिति शतसहस्रमित्युच्यते। तत्र `शतसहस्रयोः' इत्येव सिद्धम्।
अधिके समानजाताविष्टं शतसहस्रयोः।
यस्य संख्या तदाधिक्ये डः कर्तव्यो मतो मम ।।

शदन्तविंशतेश्च ।। 5.2.46 ।।
`तदस्मिन्नधिकम्' इत्यनुवर्तते, `डः' इति च। शकदन्तान्प्रातिपदिकाद्विशतेश्च डः प्रत्ययो भवति `तदस्मिन्नधिकम्' इत्येतस्मिन् विषये। त्रिंशदधिका अस्मिन् शते त्रिंशि शतम्।
शद्ग्रहणेऽन्तग्रहणं प्रत्ययग्रहणे यस्मात्स तदादेरधिकार्थम्। एकत्रिंशं शतम्। एकचत्वारिंशं शतम्। संख्याग्रहणं च कर्त्तव्यम्। इह मा भूद्--गोत्रिशदधिका अस्मिन् गोशते इति।
* विंशतेश्च * विंशं शतम्।
* तद??तादपीति वक्तव्यम् *। एकविंशं शतम्।
* संख्याग्रहणं च कर्त्तव्यम् *। इह मा भूत्-- गोविंशतिरधिकाऽस्मिन्गोशतते इति ।।

संख्याया गुणस्य निमाने मयट् ।। 5.2.47 ।।
`तदस्य' इत्यनुवर्तते `तदस्य सञ्जातम्' इत्यतः। तदिति प्रथमासमर्थात्संख्यावाचिनः प्रातिपदिकादस्येति षष्ठ्यर्थे मयट् प्रत्ययो भवति यत्तत्प्रथमासमर्थं गुणस्य निमाने चेत्तद् वर्तते। गुणः=भागः। निमानम्=मूल्यम्। गुणो येन निमीयते मूल्यभूतेन सोऽपि सामर्थ्याद्भाग एव विज्ञायते। यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानाम्। त्रिमयम्। चतुर्मयम। भागेऽपि तु विधीयमानः प्रत्ययः प्राधान्येन बागवन्तमाचष्टे। तेन सामानाधिकरण्यं भवति--द्विमयमुदश्विदिति। गुणस्येति चैकत्वं विवक्षितम्, तेनेह न भवति--द्वौ भागौ यवानां त्रय उद्श्वित इति।
भूयसश्च वाचिकायाः संख्यायाः प्रत्यय इष्यते। इह न भवतिएको भागो निमानमस्येति। बूयस इति च प्रत्ययार्थात्प्रकृत्यर्थस्याधिक्यमात्रं विवक्षितम्। बहुत्वमतन्त्रम्, तेन द्विशब्दादपि भवति।
गुणशब्दः समानावयववचनः। तेनेह भवति--द्वौ भागौ यवानामध्यर्द्ध उदश्वित इति।
* निमेये चापि दृश्यते *। निमेये वर्त्मानायाः संख्याया निमाने प्रत्ययो दृश्यते। उदश्वितो द्वौ भागौ निमेयमस्य यवभागस्य द्विमया यवा उदश्वितः। त्रिमया यवा उदश्वितः। यतुर्मयाः।
गुणस्येति किम् ? द्वौ व्रीहियवौ निमानमस्योदश्वितः। निमान इति किम् ? द्वौ गुणौ क्षीरस्यैकस्तैलस्य द्विगुणं तैलं पच्यते क्षीरेणोत्यत्र मा भूत् ।।

तस्य पूरणे डट् ।। 5.2.48 ।।
तस्येति षष्ठीसमर्थात्संख्यावाचिनः प्रातिपदिकात् `पूरणे' इत्यस्मिन्नर्थे डट् प्रत्ययो भवति। पूर्यतेऽनेनेति पूरणम्। येन संख्या संख्यानं पूर्यते सम्पद्यते स तस्या पूरणः। एकादशानां पूरण एकादशः। त्रयोदशः। यस्मिन्नुपशञ्जातेऽन्या संख्या सम्पद्यते स प्रत्ययार्थः। इकह न भवति---पञ्चानां मुष्टिकानां पूरणो

घट इति ।।

नान्तादशंख्यादेर्मट् ।। 5.2.49 ।।

`डट्' इति वर्तते। नकारान्तात्संख्यावाचिनः प्रातिपदिकादसंख्यादेः परस्य डटो मडागमो भवति। नान्तादिति पञ्चमी डट आगमसम्बन्धे षष्ठीं प्रकल्पयति। पञ्चानं पूरणः पञ्चमः। सप्तमः।
नान्तादिति किम्? विंशतेः पूरणो विंशः। असंख्यादेरिति किम्? एकादशानां पूरण एकादशः।।

थट् चच्छन्दसि ।। 5.2.50 ।।

नान्तादसंख्यादेः परस्य डटश्छन्दसि विषये थडागमो भवति। चकारात्पक्षे मडपि भवति। पर्णमयानि पञ्चथानि भवन्ति। पञ्चथः। सप्तथः। मट्--पञ्चमामिन्द्रियमस्यापाक्रामन् ।।

षट्कतिकतिपयचतुरां थुक् ।। 5.2.51 ।।

`डट्' इत्यनुवर्तते, तदिह सप्तम्या विपरिणम्यते। षट्, कति, कतिपय, चतुर्-इत्येतेषां इटि परतस्थुगागमो भवति। कतिपयशब्दो न संख्या। तस्यास्मादेव ज्ञापकाद् डट् प्रत्ययो विज्ञायते। षण्णां पूरणः षष्ठः। कतिथः। कतिपयथः। चतुर्थः।
* चतुरश्छयतावाद्यक्षरलोपश्च *। चतुर्णां पूरणः तुरीयः, तुर्यः ।।

बहुपूगगपसङ्घस्य तिथुक् ।। 5.2.52 ।।

`डटि' इत्येव। बहु, पूग, गण, सङ्घ-इत्येतेषां डटि परतस्तिथुगागमो भवति। पूगसह्घशब्दयोरसंख्यात्वादिदमेव ज्ञापकं डटो भावस्य। बहूनां पूरणो बहुतिथः। पूगतिथः। गणतिथः. सङ्घतिथः ।।

वतोरिथुक् ।। 5.2.53 ।।

`डटि' इत्येव। वतोर्डटि परत इथुगागमो भवुति। वत्वन्तस्य संश्यात्वात्पूर्वेण डड्विहितस्तस्मिन्नयमागमो विधीयते। यावतां पूरणो यावतिथः। तावतिथः। एतावतिथः ।।

द्वेस्तीयः ।। 5.2.54 ।।

द्विशब्दात्तीयःक प्रत्ययो भवति `तस्य पूरणे' इत्यस्मिन्विषये। डटोऽपवादः। द्वयो पूरणो द्वितीयः ।।

त्रेः संप्रसारणं च ।। 5.2.55 ।।

त्रिशब्दात्तीयः प्रत्ययो भवति `तस्य पूरणे'क इत्येतद्विषये। तत्सन्नियोगेन त्रेः संप्रसारणं च भवति। डटोऽपवादः। त्रयाणां पूरणस्तृतीयः। `हल' इति संप्रसारणस्य दीर्घत्वं न भवति। `अणः' इति तत्रानुवर्त्तते--`ढ्रलोपे' इत्यतः, पूर्वेण च णकारेणाण्ग्रहणम् ।।

विंसत्यादिभ्यस्तमडन्यतरस्याम् ।। 5.2.56 ।।

विंशत्यादिभ्यः परस्य डटस्तमडागमो भवत्यन्यतरस्याम्। पूरणाधिकाराद् डट् प्रत्यय आगमी विज्ञायते। विंशतेः पूरणः विंशतितमः, विंशः। एकविंशतितमः, एकविंशः। त्रिविंशतितम्ः, त्रिविंशः। त्रिंशत्तमः, त्रिंशः। एकत्रिंशत्तमः, एकत्रिंशः।
विंशत्यादयो लौकिकाः संख्याशब्दा गृह्यन्ते, न पङ्क्त्यादिसूत्रसन्निविष्टाः। तद्ग्रहणे ह्योकर्विशतिप्रभृतिभ्यो न स्यात्; ग्रहणवता प्रातिपदिकेन तदन्तविदिप्रतिषेधात्। एवं च सति `षष्ट्यादेश्चासंख्यादेः' इति पर्युदासो युज्यत एव ।।

नित्यं शतादिमासार्धमाससंवत्सराच्च ।। 5.2.57 ।।

शतादयः संख्याशब्दा लौकिका गृह्यन्ते। शतादिभ्यो मासार्धमाससंवत्सरशब्देब्यश्च परस्य डटो नित्यं तमडागमो भवति। मासादयः संश्याशब्दा न भवन्ति, तेभ्योऽस्मादेव ज्ञापकाद् डट्प्रत्ययो विज्ञायते। शतस्य पूरणः शततम। सहस्रतमः। लक्षतमः। मासस्य पूरणो मासतमो दिवसः। अर्धमासतमः। संवत्सरतमः।
`षष्ट्यादेश्चासंख्यादेः' इति वक्ष्यमाणेन सिद्धे शतादिग्रहणं सख्याद्यर्थम्। एकशततमः। द्विशततमः ।।

षष्ट्यादेश्चासंख्यादेः ।। 5.2.58 ।।

षष्ट्यादेः संख्याशब्दादसंख्यादेः परस्य डटो नित्यं तमडागमो भवति। `विशत्यादिभ्यः' इति विकल्पेन प्राप्ते नित्यार्थम्। षष्टितमः। सप्ततितमः ? असंख्यादेरिति किम् ? एकषष्टः। एकषष्टितमः। एकसप्तः। एकसप्ततिमः ।।

मतौ छः सूक्तसाम्नोः ।। 5.2.59 ।।

`मतौ' इति मत्वर्थ उच्यते। प्रातिपदिकान्मत्वर्थे छः प्रत्ययो भवति सूक्ते सामनि चाभिधेये। मत्वर्थग्रहणेन समर्थविभक्तिः, प्रकृतिविशेषणम्, प्रत्ययार्थ इति सर्वमाक्षिप्यते। अच्छावाकशब्दोऽस्मिन्निति अच्छावाकीयं सूक्तम्। मित्त्रावरुणीयम्। यज्ञायज्ञीयं साम। वारवन्तीयम्।
अनुकरणशब्दाश्च स्वरूपमात्रप्रधानाः प्रत्ययमुत्पादयन्ति, तेनानेकपदादपि सिद्धम्--अस्यवामीयम्, कयाषुभीयम् ।।

आध्यायानुवाकयोर्लुक् ।। 5.2.60 ।।

`मतौ' इत्येव। मत्वर्थ उत्पन्नस्य छस्य लुग्भवनति, अध्यायानुवाकयोरभिदेययोः। केन पुनरध्यायानुवाकयोः प्रत्ययः? इदमेव लुग्वचनं ज्ञापकं तद्विधानस्य। विकल्पेन लुगयमिष्यते। गर्दभाण्डशब्दोऽस्मिन्नस्ति गर्दभाण्डोऽध्यायः, अनुवाको वा; गर्दभाम्डीयः। दीर्घजीवितः, दीर्घजीवितीयः। पलितस्तम्भः, पलिस्तम्भीयः ।।

विमुक्तादिभ्योऽण् ।। 5.2.61 ।।

`मतौ' इत्येव, `अध्यायानुवाकयोः' इति च। विमुक्तादिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति मत्वर्थे, अध्यायानुवाकयोरभिधेययोः। विमुक्तशब्दोऽस्मिन्नस्ति वैमुक्तोऽध्यायः, अनुवाको वा। दैवासुरः।
विमुक्त। देवासुर। वसुमत्। सत्वत। उपसत्। दशार्हपयस्। इविर्द्धान। मित्री। सोमापूषन्। अग्नाविष्णू। वृत्रहति। हडा। रक्षोसुर। सतदसत्। परिषादक्। वसु। मरुत्वत्। पत्नीवत्। महीयल। दशार्ह। वयस्। पतत्रि। सोम। महित्री। हेतु। विमुक्तादिः ।।

गोषदीदिभ्यो वुन् ।। 5.2.62 ।।

`मतौ' इत्येव, `अध्यायानुवाकयोः' इति च। गोषदादिभ्यः प्रातिपदिकेब्यो वुन्प्रत्ययो भवति मत्वर्थेऽध्यायानुवाकयो। गोषदशब्दोऽस्मिन्नस्ति गोषदकोऽध्यायोऽनुवाको वा। इषेत्वकः। मातरिश्वकः।
गोषद। इषेत्व। मातरिश्वन्। देवस्यत्वा। देवीरापः। कृष्णोस्याखरेष्टः। दैवींधियम्। रक्षोहण। अञ्जन। प्रभूत। प्रतूर्त। कृशानु। गोषदादिः ।।

तत्र कुशलः पथः ।। 5.2.63 ।।

`वुन्' इत्येव। तत्रेति सप्तमीसमर्थात्पथिन्शब्दात् `कुशलः' इत्यस्मिन्नर्थे वुन्प्रत्यो भवति। पथि कुशलः पथकः ।।

आकर्षादिभ्यः कन् ।। 5.2.64 ।।

`तत्र' इत्येव, `कुशलः' इति च। आकर्षादिभ्यः प्रातिपदिकेभ्यः सप्तमीसमर्थेभ्यः `कुशलः' इत्येतस्मिन्नर्थे कन्प्रत्ययो भवति। आकर्षे कुशलः आकर्षकः। त्सरुकः।
आकर्ष। त्सरु। पिपासा। पिचण्ड। अशनि। अश्मन्। विचय। चय। जय। आचय। अय। नय। निपाद। गद्गद। दीप। ह्रद। ह्राद। हलाद। शकुनि। आकर्षादिः ।।

घनहिरण्यात्कामे ।। 5.2.65 ।।

`तत्र' इत्येव, `कन्' इति च। घनहिरण्यशब्दाभ्यां तत्रेति सप्तमीसमर्थाभ्याम् `कामे' इत्यस्मिन्नर्थे कन्प्रत्ययो भवति। कामः=इच्छा, अभिलाषः। धने कामः धनको देवदत्तस्य। हिरण्यको देवदत्तस्य ।।

स्वाङ्गेभ्यः प्रसिते ।। 5.2.66 ।।

`तत्र' इत्येव, `कन्' इति च। स्वाङ्गवाचिभ्यः शब्देभ्यस्तत्रेति सप्तमीसमर्थेभ्यः `प्रसिते' इत्येतस्मिन्नर्थे कन्प्रत्ययो भवति। प्रसितः=प्रसक्तः, तत्पर इत्यर्थः। केशेषु प्रसितः केशकः। केशादिरचनायां प्रसक्त एवमुच्यते।
बहुवचनं स्वाङ्गसमुदायशब्दादपि यथा स्यात्--दन्तौष्ठकः। केशनखकः ।।

उदराट्ठगाद्यूने ।। 5.2.67 ।।

`तत्र' इत्येव, `प्रसिते' इति च। उदरशब्दात्सप्तमीसमर्थात् `प्रसिते' इत्येतस्मिन्नर्थे ठक्, प्रत्ययो भवति। `आद्यूते' इति प्रत्ययार्थ विशेषणम्। उदरेऽविजिगीषुर्बण्यते। यो बुभुक्षयाऽत्यन्तं पीड्यते स एवमुच्यते। उदरे प्रसित औदरिक आद्यूनः।

आद्यून इति किम् ? उदरकः ।।

सस्येन परिजातः ।। 5.2.68 ।।
कन्प्रत्यय इत्येव स्वर्यते, न ठक्। निर्देशादेव तृतीया समर्थविभक्तिः। सस्यशब्दात्तृतीयासमर्थात् `परिजातः' इत्यस्मिन्नर्थे कन् प्रत्ययो भवति। सस्यशब्दोऽयं गुणवाची। परिः सर्वतो भावो वर्त्तते। यो गुणैः सम्बद्धो जायते, यस्य किञ्चिदपि वैगुण्यं नास्ति, तस्येदमभिधानम्। सस्येन परिजातः सस्यकः शालिः। सस्यकः साधुः। सस्यको मणिः। आकरशुद्ध इत्यर्थः ।।

अंशं हारी ।। 5.2.69 ।।
अंशसब्दान्निर्देशादेव द्वितीयासमर्थाद् `हारी' इत्येतस्मिन्नर्थे कन्प्रत्ययो भवति। अंशं हारी अंशको दायादः। अंशकः पुत्रः।
`हारी' इत्यावश्यके णिनिः, तत्र षष्ठीप्रतिषेधाद् कर्मणि द्वितीयैव भवति ।।

तन्त्रादचिरापहृते ।। 5.2.70 ।।
तन्त्रशब्दान्निर्देशादेव पञ्चमीसमर्थाद् `अचिरादहृते' इत्येतस्मिन्नर्थे कन् प्रत्ययो भवति। अचिरापहृतः=स्तोककालापहृत इत्यर्थः। तन्त्रादचिरापहृतः तन्त्रकः पटः। तन्त्रकः प्रावारः। प्रत्यग्रो नव उच्यते ।।

ब्राह्मणकोष्णिके संज्ञायाम् ।। 5.2.71 ।।
ब्राह्मणक, उष्णिक-इत्येतौ शब्दौ कन्प्रत्ययान्तौ निपात्येते संज्ञायां विषये। ब्रामह्मणको देशः। उष्णिका यवागूः।
यत्रायुधजीविनो ब्राह्मणाः सन्ति तत्र `ब्राह्मणक' इति संज्ञा। अल्पान्ना यवागूः `उष्णिका' इत्युच्यते ।।

शीतोष्णाभ्यां कारिणि ।। 5.2.72 ।।
शीतोष्णशब्दाभ्यां कारिण्यभिधेये कन्प्रत्ययो भवति। क्रियाविशेणाद् द्वितीयासमर्थादयं प्रत्ययः। शीतं करोति शीतकः=अलसः, जड उच्यते। उष्णं करोति उष्णकः=शोघ्राकारी, दक्ष उच्यते ।।

अधिकम् ।। 5.2.73 ।।
`अधिकम्' इति निपात्यते। अधअयारूढस्योत्तरपदलोपः कँश्च प्रत्ययः। अधिको द्रोणः शार्याम्। अधिका खारी द्रोणेन।
कर्त्तरि कर्मणि चाऽध्यारूढशब्दः।।

अनुकाभिकाभीकः कमिता ।। 5.2.74 ।।
अनुक, अभिक, अभीकृ---इत्येते शब्दाः कन्प्रत्ययान्ता निपात्यन्ते `कमिता' इत्येतस्मिन्त्रथे। अभेः पक्षे दीर्घत्वं च निपात्यते। अनुकामयते अनुकः। अभिकः। अभीकः ।।

पार्श्वेनान्विच्छति ।। 5.2.75 ।।
पार्श्वशब्दात्तृतीयासमर्थाद् `अन्विच्छति' इत्येतस्मिन्नर्थे कन्प्रत्ययो भवति। अनृजुरुपायः=पार्श्वकः=मायावी। कौसृतिकः, जालिक उच्यते ।।

अयः शूलदण्डाजिनाभ्यां ठक्ठञौ ।। 5.2.76 ।।
`अन्विच्छति' इत्येव। अयः शूलदण्डाजिनाभ्यां तृतीयासमर्थाभ्याम् `अन्विच्चति' इत्येतस्मिन्नर्थे ठक्ठञौ प्रत्ययौ भवतः। तीक्ष्ण उपायः=अयः शूलमुच्यते, तेनान्विच्छति आयःशूलिकः। साहसिकत इत्यर्थः। दम्भः=दण्डाजिनम्, तेनान्विच्छति दाण्डाजिनिकः। दाम्भिक इत्यर्थः ।।

तावतिथं ग्रहणमिति लुरवा ।। 5.2.77।।
तावतां पूरणं तावतिथम्। गृह्यतेऽनेनेति ग्रहणम्। प्रकृतिविशेषणं चैतत्। पूरणप्रत्ययान्तात्प्रातिपदिकाद् ग्रहणोपाधिकात्स्वार्थे कन्प्रत्ययो भवति। पूरणस्य प्रत्ययस्य वा लुक्। द्वितीयेन रूपेण ग्रन्थं गृह्णाति द्विकं ग्रहणम्, द्वितीयकम्। त्रिकम्, तृतीयकम्। चतुष्कम्, चतुर्थकम् ।
* तावतिथेन गृह्णातीति कन्वक्तव्यः, पूरणप्रत्ययस्य च नित्यं लुक् *। षष्ठेन रुपेण ग्रन्थं गृह्णाति षठ्को देवदत्तः। पञ्चकः। चतुष्कः।
इतिकरणो विवक्षार्थः। तेन ग्रनथविषयमेव ग्रहणं विज्ञायते, नान्यविषयम्।

स एषां ग्रामणीः ।। 5.2.78 ।।

`स' इति प्रथमासमर्थादेषामिति षष्ट्यर्थे कन्प्रत्ययो भवति, यत्तत्प्रथमासमर्थं ग्रामणीश्चेत्स भवति। ग्रामणीः=प्रधानः, मुख्यः, इत्यर्थः। देवदतो ग्रामणीरेषां देवदत्तकाः। यज्ञदत्तकाः।
ग्रामणीरिति किम्? देवदत्तः शत्रुरेषाम्।।

श्रृङ्खलमस्य बन्धनं करभे ।। 5.2.79 ।।

श्रृङ्खलशब्दात्प्रथमासमर्थादस्येति षष्ठ्यर्थे कन्प्रत्ययो भवति। यत्तत्प्रथमासमर्थं बन्धनं चेत्तद्भवति, यत्तदस्येति निर्दिष्टं करभश्चेत्स भवति। श्रृङ्खलं बन्धनमस्य करभस्य श्रृह्खलकः। उष्ट्राणां बालकाः=करभाः, तेषां काष्ठमयं पाशकं पादे व्यतिषच्चते, तदुच्यते श्रृङ्कलमिति।
यद्यपि रज्ज्वादिकमपि तत्रास्ति तथापि श्रृङ्खलमस्यास्वतन्त्रीकरणे भवति साधनमिति बन्धनमित्युच्यते ।।

उत्क उन्मनाः ।। 5.2.80 ।।

`उत्कः' इति निपात्यते, उन्मनाश्चेत्स भवति। उद्गतं मनो यस्य स उन्मनाः। उच्छब्दात्ससादनक्रियावचनात् तद्वति कन्प्रत्ययो निपात्यते। उत्को देवदत्तः। उत्कः प्रवासी। उत्सुक इत्यर्थः ।।

कालप्रयोजनाद्रोगे ।। 5.2.81 ।।

अर्थलभ्या समर्थविभक्तिः। कालात्प्रयोजनाच्च यथायोगं समर्थविभक्तियुक्ताद्रोगेऽभिधेये कन्प्रत्ययो भवति। कालः=दिवसादिः, प्रयोजनम्=कारणम्, रोगस्य फलं वा। द्वितीयेऽह्नि भवो द्वितीयको ज्वरः। चतुर्थकः। प्रयोजनात्--विषपुष्पैर्जनितो विषपुष्पको ज्वरः। काशपुष्पकः। उष्णं कार्यमस्य उष्णकः। शीतको ज्वरः।
उत्तरसूत्रादिह संज्ञाग्रहणमपकृष्यते। तेनायं प्रकारनियमः सर्वो लभ्यते ।।

तदस्मिन्नन्नं प्राये संज्ञायाम् ।। 5.2.82 ।।

तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे कन् प्रत्ययो भवति, यत्तत्प्रथमासमर्थमन्नं चेत्प्रायविषयं तद् भवति। प्रायः=बाहुल्यम्। संज्ञाग्रहणं तदन्तोपाधिः। गुकडापूपाः प्रायेणान्नमस्यां पौर्णमास्यां गुडापूपिका। तिलापूपिका पौर्णमासी ।
* वटकेभ्य इनिर्वक्तव्यः *। वटकिनी पौर्णमासी ।।

कुल्माषादञ् ।। 5.2.83 ।।

कुल्माषशब्दाञ् प्रत्ययो भवति `तदस्मिन्नन्नं प्राये संज्ञायाम्' इत्येतस्मिन्नर्थे। ञकारो वृद्धिस्वरार्थः। कुल्माषाः प्रायेणान्नमस्यां कौल्माषी पौर्णमासी ।।

श्रोत्रियँस्छन्दोऽधीते ।। 5.2.84 ।।

`श्रोत्रियन्' इति निपात्यते `छन्दोऽधीते' इत्यस्मिन्नर्थे। नकारः स्वरार्थः। श्रोत्रियो ब्राह्मणः। ब्राह्मणः। `श्रोत्रियँश्छन्दोऽधीते' इति वाक्यार्थे पदवचनम्। छन्दसो वा श्रोत्रभावः `तदधीते' इति घँश्च प्रत्ययः।
कथं छन्दोऽधीते छान्दसः ? वाग्रहणमनुवर्त्तते, `तावतिथं ग्रहणमिति लुग्वा' इत्यतः ।।

श्राद्धमनेन भुक्तमिनिठनौ ।। 5.2.85 ।।

`श्राद्धम्' इति प्रकृतिः, `अनेन' इति प्रत्ययार्थः, `भक्तम्' इति प्रकृतिविशेषणम्। श्राद्धशब्दाद् भुक्तोपाधिकादनेनेत्यस्मिन्नर्थे इनिठनौ प्रत्ययौ भवतः। श्राद्धशब्दः कर्मनामधेयं तत्साधने द्रव्ये वर्तित्वा प्रत्ययमुत्पादयति। श्राद्धं भुक्तमनेन श्राद्धिकः।
इनिठनोः समानकालग्रहणम्--अद्य भुक्ते श्राद्धे श्वः श्राद्धिक इति प्रयोगो मा भूत ।।

पूर्वादिनिः ।। 5.2.86 ।।

`अनेन' इति प्रत्ययार्थः कर्ताऽनुवर्त्तते। न च क्रियामन्तरेण कर्त्ता सम्भवतीति यां काञ्चित्क्रियामध्याहृत्य प्रत्ययो विधेयः। पूर्वाद् `अनेन' इत्यस्मिन्नर्थे इनिः प्रत्ययो भवति। पूर्वं गतमनेन पीतं भुक्तं वा पूर्वो, पूर्विणौ, पूर्विणः ।।

सपूर्वाच्च ।। 5.2.87 ।।

विद्यमानं पूर्वं यस्मादिति सपूर्वं प्रातिपदिकम्, तस्य पूर्वशब्देन तदन्तविधिः। सपूर्वात्प्रातिपदिकात्पूर्वशब्दान्तादनेनेत्यस्मिन्नर्थे इनिः प्रत्ययो भवति। पूर्वं कृतमनेन कृतपूर्वो कटम्। भूक्तपूर्वी ओदनम्। `सप्सुपा' इति समासं कृत्वा तद्धित उत्पाद्यते।

योगद्वयेन चानेन--`पूर्वादिनिः' `सपूर्वाच्च' इति, परिभाषाद्वयं ज्ञाप्यते--`व्यपदेशिवद्भावोऽप्रातिपदिकेन', `ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इति ।।

इष्टादिभ्यश्च ।। 5.2.88 ।।

`अनेन' इत्येव। इष्टादिभ्यः प्रातिपदिकेभ्योऽनेनेत्यस्मिन्नर्थे इनिः प्रत्ययो बवति। इष्टमनेन इष्ठी यज्ञे। पूर्त्ती श्राद्धे। `क्तस्येन्विषयस्य कर्मणि' इति सप्तम्युपसंख्यायते।

इष्ट। पूर्त। उपसादित। निगदित। परिवादित। निकथित। परिकथित। सङ्कलिक। निपठित। सङ्कल्पित। अनर्चित। विकलित। संरक्षित। निपतित। पठित। परिकलित। अर्चित। परिरक्षित। पूजित। परिगणित। उपगणित। अवकीर्ण। परित। उपकृत। उपाकृत। आयुक्त। आम्नात। श्रुत। अधीत। आसेवित। अपवारित। अवकल्पित। निराकृत। अनुयुक्त। उपनत। अनुगुणित। अनुपठित। व्याकुलित। निगृहित। इष्टादिः ।।

छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ।। 5.2.89 ।।

परिपन्थिन्, परिपरिन्-इत्येतौ शब्दौ छन्दसि विषये निपात्येते पर्यवस्थातरि वाच्ये। पर्यवस्थाता=सम्पन्नप्रतिपक्ष उच्यते। मा त्वा परिपन्थिनो विदन्। मा त्वा परिपरिणो विदन् ।।

अनुपद्यन्वेष्टा ।। 5.2.90 ।।

`अनुपदी' इति निपात्यतेऽन्वेष्टा चेत्स भवति। पदस्य पश्चादनुपदम्। अनुपदी गवाम्। अनुपदी उष्ट्राणाम् ।।

साक्षाद् द्रष्टीरि संज्ञायाम् ।। 5.2.91 ।।

साक्षाच्छब्दोऽव्ययम्। तस्मादिनिः प्रत्ययो भवति द्रष्टरि वाच्ये। संज्ञाग्रहणमभिधेयनियमार्थम्। साक्षाद् द्रष्टा साक्षी, साक्षिणो साक्षिमः।

संज्ञाग्रहणादुपद्रष्टैवोच्यते; न दाता, ग्रहीता वा ।।

क्षेत्रियच् परक्षेत्रे चिकित्स्यः ।। 5.2.92 ।।

क्षेत्रियजिति निपात्यते। `परक्षेत्रे चिकित्स्यः' इत्येतस्मिन् वाक्यार्थे पदवचनम्। परक्षेत्राद्वा तत्रेति सप्तमीसमर्थात् `चिकित्स्य' इत्येतस्मिन्नर्थे घच् प्रत्ययः परशब्दलोपश्च निपात्यते। परक्षेत्रे चिकित्स्यः क्षेत्रियो व्याधिः। क्षेत्रक्षियं कुष्ठम्। परक्षेत्रम्=जन्मान्तरशरीरम्, तत्र चिकित्स्यः क्षेत्रियः। असाध्योऽप्रत्याख्येयो व्याधिरुच्यते। नामृतस्य निवर्तत इत्यर्थः।

अथ वा-क्षेत्रियं विषम्। यत्परक्षेत्रे परशरीरे संक्रमय्य चिकित्स्यते।

अथ वा--क्षेत्रियाणि तृणानि। यानि सस्यार्थे क्षेत्रे जातानि चिकित्स्यानि नाशयितव्यानि।

अथ वा--क्षेत्रियः पारदारिकः। परदाराः परक्षेत्रम्, तत्र चिकित्स्यः निग्रहीतव्यः। सर्वं चैतत्प्रमाणम् ।।

इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा ।। 5.2.93 ।।

इन्द्रियमित्यन्तोदात्तं शब्दरूपं निपात्यते। रूढिरेषा चक्षुरादीनां करणानाम्। तथा च व्युत्पत्तेरनियमं दर्शयति। इन्द्रशब्दात्षष्ठीसमर्थात् `लिङ्गम्' इत्येतस्मिन्नर्थे घच्प्रत्ययो भवति। इन्द्रस्य लिङ्मिन्द्रयम्। इन्द्रः=आत्मा, स चक्षुरादिना करणेनानुमीयते, नाकर्तृकंकरणमस्ति। इन्द्रेण दृष्टम्, तृतीयामसर्थात्प्रत्ययः। आत्मना दृष्टमित्यर्थः। इन्द्रेण सृष्टम्। आत्मना सृष्टम्, तत्कृतेन शुभाशुभेन कर्मणोत्पन्नमिति कृत्वा। इन्द्रेण जुष्टम्, आत्मना जुष्टम्=सेवितम्; तद्द्वारेण विज्ञानोत्पादनाद्। इन्द्रेण दत्तम्, आत्मना विषयेभ्यो दत्तं यथायथं ग्रहणाय।

इतिकरणः प्रकारार्थः। सति सम्भवे व्युत्पत्तिरन्यथापि कर्तव्या; रूढेरनियमादिति।

वाशब्दः प्रत्येकमभिसम्बध्यमानो विकल्पानां स्वातन्त्र्यं दर्शयति ।।

तदस्यास्त्यास्मिन्निति मतुप् ।। 5.2.94 ।।

तदिति प्रथमा समर्थाविभक्तिः। अस्यास्मिन्निति प्रत्ययार्थौ।

अस्तीति प्रकृतिविशेषणम्। इतिकरणो विवक्षार्थः। तदिति प्रथमासमर्थादस्येति षष्ठ्यरेथे `अस्मिन्' इति सप्तम्यर्थे मतुप् प्रत्ययो भवति, यत्तत्प्रथमासमर्थमस्ति चेत्तद्भवति। अस्त्यर्थोपाधिकं चेत्तद्भवतीत्यर्थः। इतिकरणस्ततश्चेद्विवक्षा। गावोऽडस्य सन्ति गोमान् देवदत्तः। वृक्षा अस्मिन्नसन्ति वृक्षवान्पर्वतः। यवमान प्लक्षवान्।

इतिकरणाद्विषयनियमः---

भूमनिन्द्राप्रशंसासु नित्ययोगेऽतिशायने।

संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ।।

भूम्नि ताबत्---गोमान्। निन्दायाम्--कुष्ठी, ककुदावर्त्तिनी। प्रशंसायाम्--रूपवती कन्या। नित्ययोगे---क्षीरिणो वृक्षाः। अतिशायने--उदरिणी कन्या। संसर्गे---दण्डी, छत्त्री। अस्तिविवक्षायाम्---अस्तिमान् ।।
* गुणवचनेभ्यो मतुपो लुग्वक्तव्यः। * शुक्लो गुणोऽस्यास्ति शुक्लः पटः। कृष्णः। श्वेतः ।।

रसादिभ्यश्च ।। 5.2.95 ।।
रसादिभ्यः प्रातिपदिकेभ्यो मतुप् प्रत्ययो भवति, `तदस्यास्त्यस्मिन्' इत्येतस्मिन्विषये। रसवान्। रूपवान्।
किमर्थमिदमुच्यते, न पूर्वसूत्रेणैव मतुप् सिद्धः? रसादिभ्यः पुनर्वचनमन्यनिवृत्त्यर्थम्---अन्ये णत्वर्थीया मा भूवन्निति।
कथं रूपिणी कन्या, रूपिको दारकः? प्रायिकमेतद्वचनम्।
इतिकरणो विवक्षार्थोऽनुवर्तते।
अथ वा---`गुणात्' इत्यत्र पठ्यते, तेन ये रसनेन्द्रियादिग्राह्या गुणाः, तेषामेवायं पाठः। इह मा भूत्-रूपिणी, रूपिक इति, शोभायोगः गम्यते। रसिको नट इत्यत्र भावयोगः।
रस। रूप। गन्ध। स्पर्श। शब्द। स्नेह। गुणात्। एकाच। गुणग्रहणं रसादीनां विशेषणम्। रसादिः।।

प्राणिस्थादातो लजन्यतरस्याम् ।। 5.2.96 ।।
प्राणिस्थवाचिनः शब्दादाकारान्ताल्लच् प्रत्ययो भवत्यन्यतरस्यां मत्वर्थे। चूडालः, चूडावान्। कर्णिकालः, कर्णिकावान्।
प्राणिस्थादिति किम् ? शिखावान्प्रदीपः। आदिति किम्? हस्तवान्। पादवान्।
* प्राण्यङ्गादिति वक्तव्यम् *। इह मा भूत-चिकीर्षाऽस्यास्ति, जिहीर्षाऽस्यास्ति चिकीर्षावान्, जिहीर्षावान्।
प्रत्ययस्वरेणैवान्तोदात्तत्वे सिद्धे चकारः-चूडालोऽस्तीत्यत्र `स्वरितो वाऽनुदात्ते पदादौ' इति स्वरितबाधनार्थः ।।

सिध्मादिभ्यश्चः ।। 5.2.97 ।।
`लजन्यतरस्याम्' इति वर्त्तते। सिध्मादिभ्यः प्रातिपदिकेभ्यो लच् प्रत्ययो भवत्यन्यतरस्यां मत्वर्थे। सिध्मलः, सिध्मवान्। गडुलः, गडुमान्।
अन्यतरस्यांग्रहणेन मतुप्समुच्चीयते, न तु प्रत्ययो विकल्प्यते। तस्मादकारान्तेभ्य इनिठनौ प्रत्ययौ न भवतः।
सिध्म। गडु। मणि। नाभि। जीव। निष्पाव। पांसु। सक्तु। हनु। मासं। परशु। * पार्ष्णिधमन्योर्दीर्घश्च *। पार्ष्णीलः। धमनीलः। पर्ण। उदक। प्रज्ञा। मण्ड। पार्श्व। गण्ड। ग्रन्थि। *वातदन्तबलललाटानामूङ् च*। वातूलः। दन्तूलः। बलूलः। ललाटूलः। * जटाघटचाकलाः क्षेपे *। जटालः। घटालः। कलालः। सक्थि। कर्ण। स्नेह। शीत। श्याम। पिङ्ग। पित्त। शुष्क। पृथु। मृदु। मञ्जु। पत्त्र। चटु। कपि। कण्डु। संज्ञा। * क्षुद्रजन्तूपतापयोश्चेष्यते *। क्षुद्रजन्तु---यूकालः। मक्षिकालः। उपतापात्--विचर्चिकालः विपादिकालः। मूर्धालः। सिध्मादिः ।।

वत्सांसाभ्यां कामवले ।। 5.2.98 ।।
वत्सांसशब्दाभ्यां लच्प्रत्ययो भवति यथासंख्यं कामवति, बलवति चार्थे। वत्सलः। अंसलः।
वृत्तिविषये वत्संसशब्दौ स्वभावात्कामबलयोर्वर्त्तमानौ तद्वति प्रत्ययमुत्पादयतः। न ह्यत्र वत्सार्थः, अंसार्थो वा विद्यते; वत्सल इति स्नेहवानुच्यते--वत्सलः स्वामी, वत्सलः पितेति।
अंसल इति चोपचितमांसो बलवानुच्यते। न चायमर्थो मतुपि, सम्भवतीति नित्यं लजेव भवति; अन्यत्रांसवती गौः, अंसवान् दुर्बलः ।।

फेनादिलच्च ।। 5.2.99 ।।
फेनशब्दादिलच् प्रत्ययो भवति मत्वर्थे। चकाराल्लच्च। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थं सर्वत्रेवानुवर्तते। फेनिलः, फेनलः, फेनवान् ।।

लोमादिपामादिपिच्छादिभ्यः शनेलचः ।। 5.2.100 ।।
लोमादिभ्यः पामादिभ्यः पिछादिभ्यश्च त्रिभ्यो गणेभ्यो यथासंख्यं श, न, इलच्-इत्येते प्रत्यया भवन्ति मत्वर्थे, मतुप् च। लोमादिभ्यः शो भवति-लोमशः, लोमवान्, पामादिभ्यो नो भवति-पामनः, पामवान्। पिच्छादिभ्य इलच् भवति--पिच्छिलः, पिच्छवान्। उरसिलः, उरस्वान्।
लोमन्। रोमन्। वल्गु। बभ्रु। हरि। कपि। शुनि। तरु। लोमादिः।
पामन्। वामन्। हेमन्। श्लेष्मन्। कद्रु। बलि। श्रेष्ठ। पलल। सामन्। * अङ्गात्कल्याणे *। * शाकीपलालीदद्रवां ह्रस्वत्वं च *। * विष्वगित्युत्तर्पदलोपश्चाकृ तस्नधेः *। * लक्ष्म्या अच्च *। पामादिः।
पिच्छ। उरस्। ध्रुवका। क्षुवका। * जटाघटाकलाः क्षेपे *। वर्ण। उदक। पङ्क। प्रज्ञा। पिच्छादिः ।।

प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ।। 5.2.101 ।।
प्रज्ञा, श्रद्धा, अर्चा, वृत्ति-इत्येतेभ्यो णः प्रत्ययो भवति मतुबर्थे। मतुप्सर्वत्र समुच्चीयते। प्राज्ञः, प्रज्ञावान्। श्राद्धः, श्रद्धावान्। आर्चः, अर्चावान्। वार्त्तः, वृत्तिमान् ।।

तपः सहस्राभ्यां विनीनी ।। 5.2.102 ।।
तपः सहस्रशब्दाभ्यां विनि, इनि-इत्येतौ प्रत्ययौ भवतो मत्वर्थे। प्रत्ययार्थयोस्तु यथासंख्यं सर्वत्रैवास्मिन् प्रकरणे नेष्यते। तपोऽस्यास्मिन् वा विद्यते पतस्वी। सहस्री।
असन्तत्वाददन्तत्वाच्च सिद्धे प्रत्यये पुनर्वचनमणा वक्ष्यमाणेन बाधा मा भूदिति। सहस्रात्तु ठनपि बाध्यते ।।

अण् च ।। 5.2.103 ।।
तपःसहस्राभ्यामण्च प्रत्ययो भवति। तापसः। साहस्रः योगविभाग उत्तरार्थः, यथासंख्यार्थश्च।
* अण्प्रकरणे ज्योत्स्नादिभ्य उपसंख्यानम् *। ज्योत्स्ना विद्यतेऽस्मिन्पक्षे ज्यौत्स्नः पक्षः। तामिस्रः कौण्डलः। कौतपः। वैसर्पः। वैपादिकः ।।

सिकताशर्कराभ्यां च ।। 5.2.104 ।।
सिकताशर्कराभ्यामण्प्रत्ययो भवति मत्त्वर्थे। सैकतो घटः। शार्करं मधु।
अदेसे इहोदाहरणम्। देशे तु लुबिचचौ भविष्यतः ।।

देशे लुबिलचौ च ।। 5.2.105 ।।
सिकताशर्कराभ्यां देशेऽभिधेये लुबिलचौ भवतः। चकारादण् च, मतुप् च। कस्य पुनरयं लुप् ? मतुबादीनामन्यतमस्य; विशेषाभावात्। सिकता अस्मिन्विद्यन्ते सिकता देशः, सिकतिलः, सैकतः, सिकतावान्। शर्करा देशः, शर्कररिलः, शार्करः, शर्करावान्।
देश इति किम् ? सैकतो घटः। शार्खरं मधु ।।

दन्त उन्नत उरच् ।। 5.2.106 ।।
`उन्नते' इति प्रकृतिविशेषणम्। दन्तशब्दादुन्नतोपाधिकादुरच् प्रत्ययो भवति मत्व्रथे। दन्ता उन्नता अस्य सन्ति दन्तुरः।
उन्नत इति किम् ? दन्तवान् ।।

ऊषसुषिमुष्कमधो रः ।। 5.2.107 ।।
ऊष, सुषि, मुष्क, मधु-इत्येतेभ्यो रः प्रत्ययो भवति मत्वर्थे। ऊषरं क्षेत्रम्। सुषिरं काष्ठम्। मुष्करः मुष्करः पशुः। मधुरो गुडः
इतिकरणो विवक्षार्थः सर्वत्राभिधेयनियमं करोति। इह न भवति-ऊषोऽस्मिन् घटे विद्यते, मध्वस्मिन्घटे विद्यते इति।
* रप्रकरणे खणुखकुञ्जेभ्य उपसंख्यानम् *। खमस्यास्ति कण्ठविवरं महत् खरः. मुखमस्यास्तीति सर्वस्मिन्वक्तव्ये मुखरः। कुञ्अचावस्य स्तः कुञ्चरः। इस्तिहन् कुञ्जशब्देनोच्यते।
* नगपांशुपाण्डुभ्यश्चेति वक्तव्यम् *। नगरम्, पांशुरम्, पाण्डुरम्।
* कच्छ्वा ह्रस्वत्वं च *। कच्छुरम् ।।

द्युद्रुभ्यां मः ।। 5.2.108 ।।
द्युद्रुशब्दाभ्यां मः प्रत्ययो भवति मत्वर्थे। द्युमः। द्रुमः। रूढिशब्दावेतौ। रूढिषु च पुनर्मतुब्न विकल्प्यते ।।

केशाद्वोऽन्यतरस्याम् ।। 5.2.109 ।।
केशश्बदाद्वः प्रत्ययो भवति मत्वर्थेऽन्यतरस्याम्।
ननु च प्रकृतमन्यतरस्यांग्रहणमनुवर्त्तत एव ? मतुप्समुच्चयार्थं तदित्युक्तम्, अनेन त्विनिठनौ प्राप्येते। ततश्चातूरूप्यं भवति-केशवः, केशी, केशिकः, केशवानिति ।।
* वप्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम् *। मणिवः। हिरण्यवः। कुररावः। कुमारावः। राजीवम्। कुञ्जाबः। इष्टकावः। बिम्बावः।
* अर्णसो लोपश्च *। अर्णवः।

* छन्दसीवनिपौ च वक्तव्यौ *। वश्च मतुप् च। रथीरभून्मु द्गलानी गविष्ठौ। सुमङ्गलीरियं वधूः। वनिपु--मघवानमीमहे। वकारमतुपौ च, उद्वा च, उद्वती च।
* मेघारथाभ्यामिरन्निरचौ वक्तव्यौ * मेघिरः। रथिरः ।।

गाण्ड्यजगात्संज्ञायाम् ।। 5.2.110 ।।
गाण्डी, अजग--इत्येताभ्यां वः प्रत्ययोः भवति संज्ञायां विषये मत्वर्थे। गाण्डीवं धनुः। ह्रस्वादपि भवति--गाण्डिवं धनुरिति। तत्र तुल्या हिसंहिता दीर्घह्रस्वयोः। उभयथा च सूत्रं प्रणीतम् ।।

काण्डाण्डादीरन्नीरचौ ।। 5.2.111 ।।
काण्ड, अण्ड-इत्येताभ्यां यथासंख्यमीरन्नीरचौ प्रत्ययौ भवतो मत्वर्थे। काण्डीरः। अण्डीरः ।।

रजःकृष्यासुतिपरिषदो वलच् ।। 5.2.112 ।।
रजः प्रभृतिभ्यः प्रातिपदिकेब्यो वलच् प्रत्ययो भवति मत्वर्थे। रजस्वला स्त्री। कृषीवलः कुटुम्बी। आसुतीवलः शौण्डिकः। परिषद्वलो राजा। `वलः' इति दीर्घत्वम्। इतिकरणो विषयनियमार्थः सर्वत्र सम्बध्यते। तेनेह न भवति--रजोऽस्मिन् ग्रामे विद्यत इति।
* वलच्प्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम् *। भ्रातृवलः। पुत्रवलः। उत्साहवलः ।।

दन्तशिखात्संज्ञायाम् ।। 5.2.113 ।।
दन्त, शिखा-शब्दाभ्यां वलच् प्रत्ययो भवति मत्वर्थे संज्ञायां विषये। दन्तावलः सैन्यः। दन्तावलो गजः। शिखावलं नगरम्। शिखावला स्थूणा ।।

ज्योत्स्नातमिस्राश्रृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः ।। 5.2.114 ।।
ज्योत्स्नादयः शब्दा निपात्यन्ते मत्वर्थे संज्ञायां विष्ये। ज्योतिष उपधालोपो नश्च प्रत्ययो निपात्यते-ज्योत्स्ना चन्द्रप्रभा। तमस उपधाया इकारो रश्च-तमिस्रा रात्रिः। स्त्रीत्वमतन्त्रम्। अन्यत्रापि दृश्यते--तमिस्रं नभः। श्रृङ्गादिनच्प्रत्ययो निपात्यतेश्रृङ्गिणः। ऊर्जोऽसुगागमो निपात्यते विनिवलचौ प्रत्ययौ-ऊर्जस्वी। ऊर्जस्वलः। गोर्मिनिप्रत्ययो निपात्यते-गोमी। मलशब्दादिनजीमसचौ प्रत्ययौ निपात्यते-मलिनः, मलीमसः ।।

अत इनिठनौ ।। 5.2.115 ।।
अकारान्तात्प्रातिपदिकादिनिठनौ प्रत्ययौ भवतः। दण्डी, दण्डिकः। छत्त्री, छत्त्रिकः।

अन्यतरस्यामित्यधिकारान्मतुबपि भवति। दण्डवान्। क्षत्रवान्। तपरकरणं किम्? श्रद्धावान्।
एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ।
एकाक्षरात्तावत्-स्ववान्। खवान् कृतः--कारकवान्। जातेः-व्याघ्रवान्। सिंहवान्। सप्तम्याम्-दण्कडा अस्यां सन्ति दण्डवती शालेति।
`इतिकरणो विषयनियमार्थः सर्वत्र सम्बध्यते' इत्युक्तम्, तेन क्वचिद्भवत्यपि--कार्यी, हार्यी, तण्कडली, तण्डुलिक इति ।।

व्रीह्यादिभ्यश्च ।। 5.2.116 ।।
व्रीह्यादिभ्यः प्रातिपदिकेभ्य इनिठनौ प्रत्ययौ भवतो मत्वर्थे। मतुब्भवत्येव। व्रीही, व्रीहिकः, व्रीहिमान्। मायी, मायिकः, मायावान्।
न च व्रीह्यादिभ्यः सर्वेभ्यःप्रत्ययद्वयमिष्यते, किं तर्हि ?
शिखादिभ्य इनिर्वाच्य इकन्यवखदादिषु।
परिशिष्टेभ्य उभयम्।
शिखा, मेखला, संज्ञा, बलाका, माला, वीणा, वडवा, अष्टका, पताका, कर्मन्, चर्मन्, हंसा--इत्येतेभ्य इनिरेवेष्यते। यवखद, कुमारी, नौ-इत्येतेभ्य इकन्नेवेष्यते। परिशिष्टेभ्यो द्वावपि प्रत्ययौ भवतः।
व्रीहिग्रहणं किमर्थम्, यावता तुन्दादिषु व्रीहिशब्दः पठ्यते, तत्र हनिठनौ चकारेण विधीयेते? एवं तर्हि तुन्दादिषु व्रीहिग्रहणमर्थग्रहणं विज्ञायते। शालयोऽस्य सन्ति सालिनः, शाली, शालिकः, शालिमान् इति ।
व्रीहिशिखादयः पूर्वं पठिताः यवखद। कुमारी। नौ। * शीर्षान्नञः *। अशीर्षी, अशीर्षिकः ।।

तुन्दादिभ्य इलच्च ।। 5.2.117 ।।

तुन्दादिभ्यः प्रातिपदिकेभ्य इलच् प्रत्ययो भवति मत्वर्थे। चकारादिनिठनौ मतुप् च। तुन्दिलः, तुन्दी, तुन्दिकः, तुन्दवान्। उदरिलः, उदरी, उदरिकः, उदरवान्।

तुन्द। उदर। पिचण्ड। घट। यव। व्रीहि। * स्वाङ्गाद्विवृद्धौ च *। तुन्दादिः ।।

एकगोपूर्वाट्ठञ् नित्यम् ।। 5.2.118 ।।
एकपूर्वाद्गोपूर्वाच्च प्रातिपदिकान्नित्यं ठञ् प्रत्ययो भवति मत्वर्थे। एकशतमस्यास्तीति ऐकसहस्रिकः। गोपूर्वाच्चगौशतिकः। गौसहस्रिकः।

अत इत्येव--एकविंशतिरस्यास्तीति न भवति।

कथमैकगविकः ? समासान्ते कृते भविष्यति। कथं गौशकटिकः ? शकटीशब्देन समानार्थः शकटशब्दोऽस्ति ततो भविष्यति। अवश्यं च `अतः'

इत्यनुवर्त्यम्, `द्वन्द्वोपतापगर्ह्यात्' इत्येवमाद्यर्थम् ।

नित्यग्रहणं मतुपो बाधनार्थम्। कथमेकद्रव्यवत्त्वादिति ? नैवायं सादुः। एकेन वा द्रव्यवत्त्वादिति समर्थनीयम् ।।

शतसहस्रान्ताच्च निष्कात् ।। 5.2.119 ।।
शतान्तात् सहस्रान्ताच्च प्रातिपदिकाट्ठञ् प्रत्ययो भवति मत्वर्थे। तौ चेच्छतसहस्रशब्दौ निष्कात्परौ भवतः। निष्कशतमस्यास्ति नैष्कशतिकः। नैष्कसहस्रिकः।

सुवर्णनिष्कशतमस्यास्तीत्यनभिधानान्न भवति ।।

रूपादाहतप्रर्शसयोर्यप् ।। 5.2.120 ।।
आहतप्रशंसे प्रकृत्युपाधी। आहतप्रशंसाविशिष्टार्थे वर्त्तमानाद्रूपशब्दाद्यप् प्रत्ययो भवति मत्वर्थे। आहतं रूपमस्य रूप्यो दीनारः। रूप्यः केदारः। रूप्यं कार्षापणम्। प्रशस्तं रूपमस्यास्ति रूप्यः पुरुषः। निघातिकाताडनादिना दीनारादिषु रूपं यदुत्पद्यते तदाहतमित्युच्यते।

आहतप्रशंसयोरिति किम् ? रूपवान्।

* यप्प्रकरणेऽन्येब्योऽपि दृश्यत इति वक्तव्यम् *। हिम्याः पर्वताः। गुण्या ब्राह्मणाः ।।

अस्मायामेधास्रजो विनिः ।। 5.2. 121 ।।
असन्तातप्रातिपदिकात्, माया, मेधा, स्रज्--इत्येतेभ्यश्च विनिः प्रत्ययो भवति मत्वर्थे। मतुप् सर्वत्र समुच्चीयत एव। असन्तात्तावत्यशस्वी, तपस्वी, पयस्वी। मायावी। मेधावी। स्रग्वी।

मायाशब्दाद् व्रीह्यादिषु पाठादिनिठनावपि भवतः--मायी, मायिकः ।।

बहुलं छन्दसि ।। 5.2.122 ।।
छन्दसि विषये बहुलं विनिः प्रत्ययो भवति मत्वर्थे। अग्ने तेज स्विन्। न भवतिः सूर्यो वर्चस्वान्।

* छन्दसि विनिप्रकरणेऽष्ट्रामेखलाद्वयोभयरुजाहृदयानां दीर्घत्वं चेति वक्तव्यम् *। अष्टावी। मेखलावी। द्वयावी। उभयावी। रूजावी। हृदयावी। द्वयोभयहृदयानि दीर्घत्वं प्रयोजयन्ति।

* मर्मणश्चेति वक्तव्यम् *। मर्मावी।

* सर्वत्रामयस्योपसंक्यानम् *। छन्दसि भाषायां च। आमयावी।

* श्रृङ्गवृन्दाभ्यामारकन्वक्तव्यः *। श्रृङ्गारकः। वृन्दारकः।

* हृदयाच्चालुरन्यतरस्याम् *। हृदयालुः, हृदयी, हृदयिकः, हृदयवान्।

* शीतोष्णतृप्रेभ्यस्तन्न सहत इत्यालुज्वक्तव्यः * शीतं न सहते शीतलुः। उष्णालुः। तुप्रालुः ।

* तन्न सहत इति हिमाच्चेलुः * हिमं न सहते हिमेलुः।

* बलादूलच् * बलं न सहते बलूलः।

* वातात्समूहे च *। *वातं न सहत इति च *। वातानां समूहः, वातं न सहत इति वा वातूलः।* वर्वमरुद्भ्यां तन् वक्तव्यः * पर्वतः। मरुत्तः।

* अर्थात्तदबावे इनिर्वक्तव्यः *। अर्थी। तदभाव इत्येव--अर्थवान्। तदेतत्सर्वं बहुलग्रहणेन सम्पद्यते ।।

ऊर्णाया युस् ।। 5.2.123 ।।
उर्णाशब्दाद्युस् प्रत्ययो भवति मत्वर्थे। सकारः कपदसंज्ञार्थः। ऊर्णाऽस्य विद्यते ऊर्णायुः।

केचिच्छन्दोग्रहणमनुवर्तयन्ति ।।

वाचो ग्मिनिः ।। 5.2.124 ।।
वाच्शब्दात् ग्मिनिः प्रत्ययो भवति मत्वर्थे। वाग्ग्मि, वाग्ग्मिनौ, वाग्ग्मिनः ।।

आलजाटचौ बहुभाषिणि ।। 5.2.125 ।।
वाच्-शब्दात्प्रथमासमर्थादालच्, आटच्--इत्योतौ प्रत्ययौ भवतो मत्वर्थे बहुभाषिण्यभिधेये। ग्मिनेरपवादः। वाचालः। वाचाटः।
* कुत्सित इति वक्तव्यम् *। यो हि सम्यग् बहु भाषते स वाग्गमीत्येव भवति।।

स्वामिन्नैस्वर्ये ।। 5.2.126 ।।
`स्वामिन्' इति निपात्यते ऐश्वर्ये गम्यमाने। स्वशब्दादैश्वर्यवाचिनो मत्वर्थे आमिन्प्रत्ययो निपात्यते। स्वमस्यास्तीति=ऐश्वर्यमस्यास्तीति स्वामी, स्वामिनौ, स्वामिनः.
ऐश्वर्य इति किम् ? स्ववान् ।।

अर्शआदिभ्योऽच् ।। 5.2.127 ।।
`अर्शस्' इत्येवमादिभ्यः प्रातिपदिकेब्योऽच्प्रत्ययो भवति मत्वर्थे। अर्शांसि अस्य विद्यन्ते अर्शसः। उरसः। आकृतिगणश्चायम्।
यत्राभिन्नरुपेण शब्देन तद्वतोऽभिधानां तत्सर्वमिह द्रष्टव्यम्।
अर्शस्। उरस्। तुन्द। चतुर। पलित। जटा। घटा। अभ्र। कर्दम। आम। लवण। * स्वाङ्गाद्धीनात् * । * वर्णात् *। अर्शआदिः ।।

द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः ।। 5.2.128 ।।
द्वन्द्वः=समासः, उपतापः=रोगः, गर्ह्यम्=निन्द्यम्, तद्विषयेभ्यः शब्देभ्यः प्राणिस्थार्थवाचिब्य इनिः प्रत्ययो भवति मत्वर्थे। द्वन्द्वात्तावत्-कटकवलयिनी, शङ्खनूपुरिणी। उपतापात्-कुष्ठी, किलासो। गर्ह्यत्-ककुदातर्त्ती, काकतालुकी।
प्राणिस्थादिति किम्? पुष्पफलवान् वृक्षः।
प्राण्यङ्गान्नेष्यते--पाणिपादवती।
अत इत्यनुवर्त्तते, तेनेह न भवति-चित्रललाटिकावती।
सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम् ।।

वातातिसाराभ्यां कुक् च ।। 5.2.129 ।।
वातातिसारशब्दाभ्यामिनिः प्रत्ययो भवति, तत्सन्नियोगेन च तयोः कुगागमो भवति। वातातिसारयोरुपतापत्वात् पूर्वेणैव सिद्धे प्रत्यये कुगर्थमेवेदं वचनम्। वातकी। अतिसारकी।

* पिशाचाच्येति वक्तव्यम् *। पिशाचकी वैश्रवणः।
रोगे चायमिष्यते। इह न भवति--वातवती गुहेति ।।

वयसि पूरणात् ।। 5.2.130 ।।
इनिरनुवर्तते। पूरणप्रत्ययान्तात्प्रातिपदिकादिनिः प्रत्ययो भवति मत्वर्ये वयसि द्योत्ये। पञ्चमो मासोऽस्यास्ति संवत्सरो वा पञ्चमी उष्ट्रः। नवमी। दशमी। सिद्धे सति नियमार्थं वचनम्-इनिरेव भवति, ठन्न भवतीति। वयसीति किम्? पञ्चमवान् ग्रामरागः ।।

सुखादिभ्यश्च ।। 5.2.131 ।।
`सुख'-इत्येवमादिभ्यः प्रातिपदिकेभ्य इनिः प्रत्ययो नियम्यते मत्वर्थे। सुखी। दुःखी।
`माला क्षेप' इति पठ्यते, व्रीह्यादिषु च मालाशब्दोऽस्ति, तदिह क्षेपे मतुब्बाधनार्थं वचनम्।
सुख। दुःख। तृप्र। कृच्छ्र। आम्र। अलीक। करुणा। कृपण। सोढ। प्रमीप। शील। हल। * माला क्षेपे *। प्रणय। सुखादिः ।।

धर्मशीत्रवार्णान्ताच्च ।। 5.2.132 ।।
अन्तशब्दः प्रत्येकमभिसम्बध्यते, धर्माद्यन्तात्प्रातिपदिकादिनिः प्रत्ययो नियम्यते। ब्राह्मणानां धर्मो ब्राह्मणधर्मः, सोऽस्यास्तीति ब्राह्मणधर्मी। ब्राह्मणशीली।

ब्राह्मणवर्णी।

हस्ताज्जातौ ।। 5.2.133 ।।
हस्तशब्दादिनिः प्रत्ययो नियम्यते मत्वर्थे, समुदायेन चज्जातिरभिधीयते। हस्तोऽस्यास्तीति हस्ती, हस्तनौ, हस्तिनः।
जाताविति किम्? हस्तवान्पुरुषः ।।

वर्णाद् ब्रह्मचारिणि ।। 5.2.134 ।।
वर्णशब्दादिनिः प्रत्ययो भवति मत्वर्थे, समुदायेन चेद् ब्रह्मचारी भण्यते। ब्रह्माचारिति त्रैवर्णिकोऽभिप्रेतः, स हि विद्याग्रहणार्थमुपनीतो ब्रह्मा चरति, नियममासेवते इत्यर्थः। वर्णी, वर्णिनौ, वर्णिनः।
ब्रह्मचारिणीति किम्? वर्णवान्।
ब्राह्मणादयस्त्रयो वर्णा वर्णिन उच्यन्ते ।।

पुष्करादिभ्यो देशे ।। 5.2.135 ।।
`पुष्कर'-इत्येवमादिभ्यः प्रातिपदिकेभ्य इनिः प्रत्ययो भवति समुदायेन चेद्देशेऽभिधीयते। पुष्करिणी। पद्मिनी।
देश इति किम्? पुष्करवान् हस्ती।
* इनिप्रकरणे बलाद्बाहूरुपूर्वादुपसंख्यानम् *। बाहुबली। ऊरुबली।
* सर्वादेश्चेति वक्तव्यम् * सर्वधनी। सर्वबीजी। सर्वकेशी नटः।
* अर्थाच्चासन्निहिते *। अर्थी। असन्निहित इति किम्? अर्थवान्।
* तदन्ताच्चेति वक्तव्यम् *। धान्यार्थी। हिरण्यार्थी।
पुष्कर। पद्म। उत्पल। तमाल। कुमुद। नड। कपित्थ। बिस। मृणाल। कर्दम। शालूक। विगर्ह। करीष। शिरीष। यवास। प्रवास। हिरण्य। पुष्करसादिः ।।

बलादिभ्यो मतुवन्यतरस्याम् ।। 5.2.136 ।।
बलादिभ्यः प्रातिपदिकेभ्यो मतुप्रत्ययो भवति। अन्यतरस्यांग्रहणेन प्रकृत इनिः समुच्चीयते। बलवान्, बली। उत्साहवान्, उत्साही।
बल। उत्साह। उद्भाव। उद्वास। उद्वास। शिखा। पूग। मूल। दंश। कुल आयाम। व्यायाम। उपयाम। आरोह। अवरोह। परिणाह। युद्ध। बलादिः ।।

संज्ञायां मन्माभ्याम् ।। 5.2.137 ।।
मन्नन्तात्प्रातिपदिकान्मशब्दान्ताच्च इनिः प्रत्ययो भवति मत्वर्थे, समुदायेन चेत्संज्ञा गम्यते। प्रथिमिनी। दामिनी। मशब्दान्तात्--होमिनी। सोमिनी।
संज्ञायामिति किम् ? सोमवान्। होमवान् ।।

कंशंभ्यां बभयुस्तितुतयसः ।। 5.2.138 ।।
कम्, शमिति मकारान्तावुदकसुखयोर्वाचकौ; ताभ्यां ब, भ, युस्, ति, तु, त, यस्-इत्येते सप्त प्रत्यया भवन्ति मत्वर्थे। कम्बः, शम्बः। कम्भः, शम्भः। कंयुः, शंयुः। कन्तिः, शन्तिः। कन्तुः, शन्तुः। कन्तः, शन्तः। कंयः, शंयः।
सकारः पदसंज्ञार्थः, तेनानुस्वारपरसवर्णौ सिद्धौ भवतः। संज्ञायां हि सत्याम्-कम्यः, शम्य इति स्यात् ।

तुन्दिबलिवटेर्भः ।। 5.2.139 ।।
तुन्दि, बलि, वटि-इत्येतेभ्यो भः प्रत्ययो भवति मत्वर्थे। तुन्दिरिति बृद्धा नाभिरुच्यते, सास्यास्तीति तुन्दिभः, बलिभः, वटिभः।
बलिशब्दः पामादिषु पठ्यते, तेन बलिन इत्यपि भवति।।

अहंशुभमोर्युस् ।। 5.2.140 ।।
`अहम्' इति शब्दान्तरमहङ्कारे वर्त्तते, `शुभम्' इत्यव्ययं शुभपर्यायः; ताभ्यां युस्प्रत्ययो भवति मत्वर्थे। सकारः पदसंज्ञार्थः। अहंयुः। अहंकारवानित्यार्थः। शुभंयुः। कल्याणवानित्यर्थः।

इति श्रीजयादित्यविरचितायां काशिकावृत्तौ पञ्चमस्याध्यायस्य द्वितीयः पादः

5.3
।। अथ पञ्चमोऽध्यायः।।

----- तृतीयः पादः------

प्राग्दिशो विभक्तिः ।। <5-3-1> ।।

"दिक्शब्देभ्य सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः"(5-3-27/1974) इति वक्ष्यति, प्रागेतस्माद्दिक्संशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामो विभक्तिसंज्ञास्ते वेदितव्याः। वक्ष्यति-"पञ्चम्यास्तसिल्"(5-3-7/1953)। ततः। यतः। कुतः।
तसिलादीनां विभक्तित्वे प्रयोजनम्-त्यदादिविधयः इदमो विभक्तिस्वरश्च। इह। "ऊडिदम्"(6-1-176/3717) इति विभक्त्युदात्तत्वं सिद्धं भवति। अतः परं स्वार्थिकाः प्रत्ययाः, तेषु समर्थाधिकारः प्रथमग्रहणं च प्रतियोग्यपेक्षत्वान्नोपयुज्यत इति द्वयमपि निवृत्तम्। वावचनं तु वर्त्तते एव, तेन विकल्पेन तसिलादयो भवन्ति-कुतः, कस्मात्, कुत्र, कस्मिन्नति।

किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ।। <5-3-2> ।।

\`प्राग्दिशः' इत्येव। किमः सर्वनाम्नो बहुशब्दाच्च प्राग्दिशः प्रत्यया वेदितव्याः। सर्वनामत्वात्प्राप्ते ग्रहणे द्व्यादिपर्युदासः क्रियते। कुतः, कुत्र। यतः, यत्र। ततः, तत्र। बहुतः, बहुत्र।
अद्व्यादिभ्य इति किम् ? द्वाभ्याम्, द्वयोः। प्रकृतिपरिसंख्यानं किमर्थम् ? वृक्षात्, वृक्षे।
प्राग्दिश इत्येव--वैयाकरणपाशः।
सर्वनामत्वादेव सिद्धे किमो ग्रहणं द्व्यादिपर्युदासाद्।
* बहुग्रहणे संख्याग्रहणम् *(म.भा.2-402)। इह न भवति--बहोः सूपात्, बहौ सूपे इति ।।

इदम इश् ।। <5-3-3> ।।

\`प्राग्दिशः' इत्येव। इदम इश् इत्ययमादेशो भवति प्राग्दिशीयेषु प्रत्ययेषु परतः। शकारः सर्वादेशार्थः। इह ।।

एतेतौ रथोः ।। <5-3-4> ।।

रेफथकारादौ प्राग्दिशीये प्रत्यये परत इदम एतेतावादेशौ भवतः। इशोऽपवादः। रेफेऽकार उच्चारणार्थः। "इदमो र्हिल्"(5-3-16/1965), एतर्हि। "इदमस्थमुः"(5-3-24/1972), इत्थम् ।।

एतदोऽश् ।। <5-3-5> ।।

\`प्राग्दिशः' इत्येव। एतदः प्राग्दिशीये परतोऽशित्ययमादेशो भवति। शकारः सर्वादेशार्थः। अतः। अत्र।
\`एतदः' इत् योगविभागः कर्त्तव्यः(म.भा.2-403)। एतदो रथोः परत एत, इत्-इत्येतावादेशौ भवतः--एतर्हि, इत्थम्। रेफादिः "अनद्यतनेर्हिलन्यतरस्याम्"(5-3-21/1969) इति विद्यत एव। थमुप्रत्ययः पुनरेतद् उपसंख्येयः ।।

सर्वस्य सोऽन्यतरस्यां दि ।। <5-3-6> ।।

सर्वस्य \`स' इत्ययमादेशो भवति प्राग्दिशीये दकारादौ प्रत्यये परतोऽन्यतरस्याम्। सर्वदा। सदा।
प्राग्दिशीय इत्येव--सर्वं ददातीति सर्वदा ब्राह्मणी ।।

पञ्चम्यास्तसिल् ।। <5-3-7> ।।
पञ्चम्यन्तेभ्यः किंसर्वनामबहुभ्यस्तसिल्प्रत्ययो भवति। कुतः। यतः ततः। बहुतः ।।

तसेश्च ।। <5-3-8> ।।
"प्रतियोगे पञ्चम्यास्तसिः"(5-4-44/2111) "अपादाने चाहीयरुहोः"(5-4-45/2112) इति वक्ष्यति। तस्य तसेः किंसर्वनामबहुभ्यः परस्य तसिलादेशो भवति। कुत आगतः। यतः। ततः। बहुत आगतः।
तसेस्तसिल्वचनं स्वरार्थं विभक्त्यर्थं च ।।

पर्यभिभ्यां च ।। <5-3-9> ।।
परि, अभि-इत्येताभ्यां तसिल् प्रत्ययो भवति।
सर्वोभयार्थे वर्तमानाभ्यां प्रत्यय इष्यते। परितः। सर्वत इत्यर्थः। अभितः। उभयत इत्यर्थः ।।

सप्तम्यास्त्रल् ।। <5-3-10> ।।
किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्यः त्रल् प्रत्ययो भवति। कुत्र। यत्र। तत्र। बहुत्र।

इदमो हः ।। <5-3-11> ।।
इदमः सप्तम्यन्ताद्धः प्रत्ययो भवति। त्रलोऽपवादः। इह।।

किमोऽत् ।। <5-3-12> ।।
किमः सप्तम्यन्तादत्प्रत्ययो भवति। त्रलोऽपवादः। क्व भोक्ष्यसे। क्वाद्येष्यसे।
त्रलमपि केचिदिच्छिन्ति--कुत्र। तत्कथम् ? उत्तरसूत्राद्वावचनं पुरस्तादपकृष्यते ।।

वा ह चच्छन्दसि ।। <5-3-13> ।।
किमः सप्तम्यन्ताद्वा हः प्रत्ययो भवति छन्दसि विषये। यथाप्राप्तं च। क्व। `कुह'(ऋ.8-73-4)। कुत्रचिदस्य सा दूरे क्व ब्राह्मणस्य चावकाः ।।

इतराभ्योऽपि दृश्यन्ते ।। <5-3-14> ।।
सप्तमीपञ्चम्यपेक्षमितरत्वम्। इतराभ्यो विभक्तिभ्यस्तसिलादयो दृश्यन्ते। दृशिग्रहणं प्रायिकविध्यर्थम्, तेन भवदादिभिर्योग एवैतद्विधानम्।
के पुनर्भवदादयः ? भवान्दीर्घायुरायुष्मान् देवानाम्प्रिय इति। स भवान्। ततो भवान्, तत्र भवान्। तं भवन्तम्, तत्र भवन्तम्, ततो भवन्तम्। तेन भवता तत्र भवता, ततो भवता। तस्मै भवते, ततो भवते, तत्र भवते। तस्माद्भवतः, ततो भवतः, तत्र भवतः। तस्य भवतः, ततो भवतः, तत्र भवतः। तस्मिन् भवति, ततो भवति, तत्र भवति। एवं दीर्घायुःप्रभृतिष्वप्युदाहार्यम् ।।

सर्वैकान्यकिंयत्तदः काले दा ।। <5-3-15> ।।
`सप्तम्याः' इति वर्त्तते, न तु `इतराभ्यः' इति। सर्वादिभ्यः प्रातिपदिकेभ्यो दा प्रत्ययो भवति। त्रलोऽपवादः। सर्वस्मिन् काले सर्वदा। एकदा । अन्यदा। कदा। तदा।
काल इति किम्? सर्वत्र देशे ।।

इदमो र्हिल् ।। <5-3-16> ।।
`सप्तम्याः' इत्येव। `काले' इति च। इदमः सप्तम्यन्तात्काले वर्त्तमानाद् र्हिल् प्रत्ययो भवति। हस्यापवादः। लकारः स्वरार्थः। अस्मिन् काले एतर्हि। काले इत्येव--इह देशे ।।

अधुना ।। <5-3-17> ।।
`अधुना' इति निपात्यते। इदमोऽश्भावो धुना च प्रत्ययः। अस्मिन् काले अधुना ।।

दानीं च ।। <5-3-18> ।।
इदमः सप्तम्यन्तात्काले वर्त्तमानाद्दानीं प्रत्ययो भवति। अस्मिन् काले इदानीम् ।।

तदो दा च ।। <5-3-19> ।।
तदः सप्तम्यन्तात्काले वर्त्तमानाद् दा प्रत्ययो भवति, चकारद्दानीं च। तस्मिन्काले तदा। तदानीम्।
तदो दावचनमनर्थकम्; विहितत्वात् ।।

तयोर्दार्हिलौ चच्छन्दसि ।। <5-3-20> ।।
`तयोः' इति प्रातिपदिकनिर्देशः। तयोरिदमः तदश्च यथासंख्यं दा-र्हिलौ प्रत्ययौ भवतश्छन्दसि विषये। चकाराद्यथाप्राप्तं च। `इदावत्सरीयः'(काठ.सं.13-15)। इदं तर्हि। इदानीम्। तदानीम् ।।

अनद्यतने र्हिलन्यतरस्याम् ।। <5-3-21> ।।
`छन्दसि' इति न स्वर्यते, सामान्येन विधानम्। किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्योऽनद्यतने कालविशेषे वर्त्तमानेभ्यो र्हिल् प्रत्ययो भवत्यन्यतरस्याम्। कर्हि, कदा। यर्हि, यदा। तर्हि, तदा ।।

सद्यः परुत्परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ।। <5-3-22> ।।
`सप्तम्याः' इति, `काले' इति च वर्त्तते। सद्यःप्रभृतयः शब्दा निपात्यन्ते। प्रकृतिः, प्रत्ययः, आदेशः, कालविशेष इति सर्वमेतन्निपातनाल्लभ्यते। समानस्य सभावो निपात्यते द्यश्च प्रत्ययः, अहन्यभिधेये(मम.भा.2-407)। समानेऽह्नि सद्यः।
पूर्वपूर्वतरयोः परभावो निपात्यते, उदारी च प्रत्ययौ, संवत्सरेऽभिधेये। पूर्वस्मिन्संवत्सरे परुत्। पूर्वतरे संवत्सरे परारि।
इदम इश्भावः, समसण् प्रत्ययो निपात्यते संवत्सरेऽभिधेये। अस्मिन्संवत्सरे एषेमः(म.भा.2-407)।
परस्मादेद्यविः प्रत्ययोऽहनि। परस्मिन्नहनि परेद्यवि।
इदमोऽश्भावो द्यश्च प्रत्ययोऽहनि(म.भा.2-407)। अस्मिन्नहनि अद्य।
पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युस्-प्रत्ययो निपात्यतेऽहन्यभिधेये(म.भा.2-407)। पूर्वस्मिन्नहनि पूर्वेद्युः। अन्यस्मिन्नहनि अन्येद्युः। अन्यतरस्मिन्नहनि अन्यतरेद्युः। इतरस्मिन्नहति इतरेद्युः। अपरस्मिन्नहनि अपरेद्युः। अधरस्मिन्नहनि अधरेद्युः। उभयोरह्नोः उभयेद्युः। उत्तरस्मिन्नहनि उत्तरेद्युः।
* द्युश्चोभयाद्वक्तव्यः *(म.भा.2-408)। उभयद्युः ।।

प्रकारवचने थाल् ।। <5-3-23> ।।
"किंसर्वनामबहुभ्योऽद्व्यादिभ्यः"(5-3-2/1948) इति वर्त्तते। `सप्तम्याः' इति, `काले' इति च निवृत्तम्। सामान्यस्य विशेषो भेदकः=प्रकारः। प्रकृत्यर्थविशेषणं चैतत्। प्रकारवृत्तिभ्यः किंसर्वनामबहुभ्यः स्वार्थे थाल् प्रत्ययो भवति। तेन प्रकारेण तथा। यथा। सर्वथा।

जातीयरोऽपीदृशमेव लक्षणम्, स तु स्वभावात्प्रकारवति वर्त्तते। थाल्पुनः प्रकारमात्रे ।।

इदमस्थमुः ।। <5-3-24> ।।
इदम्-शब्दात्प्रकारवचने थमुः प्रत्ययो भवति। थालोऽपवादः। अनेन प्रकारेण इत्थम्। उकारो मकारपरित्राणार्थः ।।

किमश्च ।। <5-3-25> ।।
किंशब्दात् प्रकारवचने थमुः प्रत्ययो भवति। केन प्रकारेण कथम्। योगविभाग उत्तरार्थः।।

था हेतौ चच्छन्दसि ।। <5-3-26> ।।
किंशब्दाद्धेतौ वर्तमानात्था प्रत्ययो भवति, चकारात्प्रकारवचने छन्दसि विषये। हेतौ तावत्-`कथा ग्रामं न पृच्छसि'(ऋ.1-146-1)। केन हेतुना न पृच्छसीत्यर्थः। प्रकारवचने--कथा देवा आसन्पुराविदः।
विभक्तिसंज्ञायाः पूर्णोऽवधिः ।।

दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ।। <5-3-27> ।।
दिशां शब्दाः दिक्शब्दाः, तेभ्यो दिक्शब्देभ्यो दिग्देशकालेषु वर्तमानेभ्यः सप्तमीपञ्चमीप्रथमान्तेभ्योऽस्तातिः प्रत्ययो भवति स्वार्थे।
यथासंख्यमत्र नेष्यते। पुरस्ताद्वसति, पुरस्तादागतः, पुरस्ताद्रमणीयम्। अधस्ताद्वसति, अधस्तादागतः, अधस्ताद्रमणीयम्।
दिक्शब्देभ्य इति किम् ? ऐन्द्र्यां दिशि वसति। सप्तमीपञ्चमीप्रथमाभ्य इति किम् ? पूर्वं ग्रामं गतः। दिग्देशकालेष्विति किम् ? पूर्वस्मिन्गुरौ वसति।
इकारस्तकारपरित्राणार्थः ।।

दक्षिणोत्तराभ्यामतसुच् ।। <5-3-28> ।।
दक्षिणोत्तराभ्यां दिग्देशकालेषु वर्तमानाभ्यां सप्तमीपञ्चमीप्रथमान्ताभ्यां स्वार्थेऽतसुच् प्रत्ययो भवति। अस्तातेरपवादः। दक्षिणाशब्दः काले न सम्भवतीति दिग्देशवृत्तिः परिगृह्यते। दक्षिणतो वसति, दक्षिणत आगतः, दक्षिणतो रमणीयम्। उत्तरतो वसति, उत्तरत आगतः, अत्तरतो रमणीयम्।
अकारो विशेषणार्थः--"षष्ठ्यतसर्थप्रत्ययेन"(2-3-30/609) इति।

विभाषा परावराभ्याम् ।। <5-3-29> ।।
परावरशब्दाभ्यां विभाषाऽतसुच्प्रत्ययो भवति अस्तातेरर्थे। परतो वसति, परत आगतः, परतो रमणीयम्। परस्ताद्वसति, परस्तादागतः, परस्ताद्रमणीयम्।
अवरतो वसति, अवरत आगतः, अवरतो रमणीयम्। अवस्ताद्वसति, अवस्तादागतः, अवस्ताद्रमणीयम् ।।

अञ्चेर्लुक् ।। <5-3-30> ।।
अञ्चत्यन्तेभ्यो दिक्शब्देभ्य उत्तरस्यास्तातिप्रत्त्ययस्य लुग् भवति। प्राच्यां दिशि वसति। "लुक्तद्धितलुकि"(1-2-49/1408) इति स्त्रीप्रत्ययोऽपि निवर्तते।
प्राग्वसति, प्रागागतः, प्राग्रमणीयम्, प्रत्यग्वसति, प्रत्यगागतः, प्रत्यग्रमणीयम् ।।

उपर्युपरिष्टात् ।। <5-3-31> ।।
उपरि, उपरिष्टात्-इत्येतौ शब्दौ निपात्येते अस्तातेरर्थे। ऊर्ध्वस्योपभाव रिल्-रिष्टातिलौ च प्रत्ययौ निपात्येते। उर्ध्वायां दिशि वसति उपरि वसति,
उपर्यागतः, उपरि रमणीयम्। उपरिष्टाद् वसति, उपरिष्टादागतः, उपरिष्टाद्रमणीयम् ।।

पश्चात् ।। <5-3-32> ।।

`पश्चात्' इत्ययं शब्दो निपात्यतेऽस्तातेरर्थे। अपरस्य पश्चभाव आतिश्च प्रत्ययः। अपरस्यां दिशि वसति पश्चाद्दिशि वसति, पश्चादागतः, पश्चाद्रमणीयम् ।

* दिक्पूर्वपदस्यापरस्य पश्चभावो वक्तव्यः, आतिश्च प्रत्ययः *(म.भा.2-409)। दक्षिणपश्चात्। उत्तरपश्चात् ।

* अर्धोत्तरपदस्य दिक्पूर्वपदस्य पश्चभावो वक्तव्यः *(म.भा.2-409)। दक्षिणपश्चार्धः। उत्तरपश्चार्धः।

* विनापि पूर्वपदेन पश्चभावो वक्तव्यः *(म.भा.2-409)

पश्च पश्चा चच्छन्दसि ।। <5-3-33> ।।

पश्च-पश्चाशब्दौ निपात्येते छन्दसि विषये अस्तातेरर्थे। छकारात् पश्चादित्यपि भवति। अपरस्य पश्चभावोऽकाराकारौ च प्रत्ययौ निपात्येते। परो व्याप्तो जायते पश्च सिंहः, पश्चा सिंहः, पश्चात्सिहः ।।

उत्तराधरदक्षिणादातिः ।। <5-3-34> ।।।

उत्तराधरदक्षिणशब्देभ्य अतिः प्रत्ययो भवति अस्तातेरर्थे। उत्तरस्यां दिशि वसति उत्तराद्वसति, उत्तरादागतः, उत्तराद्रमणीयम्। अधराद्वसति, अधरादागतः, अधराद्रमणीयम्। दक्षिणाद्वसति, दक्षिणादागतः, दक्षिणाद्रमणीयम् ।।

एनबन्यतरस्यामदूरेऽपञ्चम्याः ।। <5-3-35> ।।

उत्तराधरदक्षिणशब्देभ्य एनप् प्रत्ययो भवत्यन्यतरस्यामस्तातेरर्थे। अदूरे चेदवधिमामनवधेर्भवति। विभक्तित्रये प्रकृते `पञ्चम्याः' इति पञ्चमी पर्युदस्यते। तेनायं सप्तमीप्रथमान्ताद्विज्ञायते प्रत्ययः। उत्तरेण वसति, उत्तराद्वसति, उत्तरतो वसति। उत्तरेण रमणीयम्, उत्तराद्रमणीयम्, उत्तरतो रमणीयम्। अधरेण वसति, अधराद्वसति, अधस्ताद्वसति। अधरेण रमणीयम्, अधराद्रमणीयम्, अधस्ताद्रमणीयम्। दक्षिणेन वसति, दक्षिणाद्वसति, दक्षिणतो वसति। दक्षिणेन रमणीयम्, दक्षिणाद्रमणीयम्, दक्षिणतो रमणीयम्।

अदूर इति किम् ? उत्तराद्वसति। अपञ्चम्या इति किम् ? उत्तरादागतः।

* अपञ्चम्या इति प्रागसेः *(5-3-39/1975)। असिप्रत्ययस्तु पञ्चम्यन्तादपि भवति।

केचिदिहोत्तरादिग्रहणं नानुवर्तयन्ति। दिक्शब्दमात्रात्प्रत्ययं मन्यन्ते--पूर्वेण ग्रामम्, अपरेण ग्रामम् ।।

दक्षिणादाच् ।। <5-3-36> ।।

`अदूर' इति न स्वर्यते। `अपञ्चम्याः' इति वर्तते। दक्षिणशब्दादाच्प्रत्ययो भवति अस्तातेरर्थे। दक्षिणा वसति। दक्षिणा रमणीयम्।

अपञ्चम्या इत्येव--दक्षिणत आगतः।

चकारो विशेषणार्थः, "अञ्चूत्तरपदाजाहियुक्ते"(2-3-29/595) इति ।।

आहि च दूरे ।। <5-3-37> ।।

दक्षिणशब्दादाहिः प्रत्ययो भवति अस्तातेरर्थे, चकारादाच्। दूरे चेदवधिमानवधेर्भवति। दक्षिणाहि वसति, दक्षिणा वसति। दक्षिणाहि रमणीयम्, दक्षिणा रमणीयम्।

दूर इति किम् ? दक्षिणतो वसति।

अपञ्चम्या इत्येव--दक्षिणत आगतः ।।

उत्तराच्च ।। <5-3-38> ।।

उत्तरशब्दादाजाही प्रत्ययौ भवतः, अस्तातेरर्थे, दूरे चेदवधिमानवधेर्भवति। उत्तरा वसति, उत्तराहि वसति। उत्तरा रमणीयम्, उत्तराहि रमणीयम्।

दूर इत्येव---उत्तरेण प्रयाति।
अपञ्चम्या इत्येव---उत्तरादागतः ।।

पूर्वाधरावराणामसि पुरधवश्चैषाम् ।। <5-3-39> ।।
`अपञ्चम्याः' इति निवृत्तम्। तिसृणां विभक्तीनामिह ग्रहणम्। पूर्वाधरावराणामसिः प्रत्ययो भवति अस्तातेरर्थे। तत्सन्नियोगेन चैषां यथासंख्यं पुर्, अध्, अव्- इत्येते आदेशा भवन्ति। असीत्यविभक्तिको निर्देशः। पुरो वसति, पुर आगतः, पुरो रमणीयम्। अधोःवसति, अध आगतः, अधो रमणीयम्। अवो वसति, अव आगतः, अवो रमणीयम् ।।

अस्ताति च ।। <5-3-40> ।।
सप्तम्यन्तमेतत्। अस्तातिप्रत्यये परतः पूर्वादीनां यतासंख्यं पुरादय आदेशा भवन्ति। इदमेवादेशविधानं ज्ञापकम्-अस्तातिरेभ्यो भवति, असिप्रत्ययेन न बाध्यत इति। पुरस्ताद्वसति, पुरस्तादागतः, पुरस्ताद्रमणीयम्। अधस्ताद्वसति, अधस्तादागतः, अधस्ताद्रमणीयम् ।

विभाषाऽवरस्य ।। <5-3-41> ।।
पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। अवरस्यास्तातौ परतो विबाषा `अव' इत्ययमादेशो भवति। अवस्ताद्वसति, अवस्तादागतः, अवस्ताद्रमणीयम्। अवरस्ताद्वसति, अवरस्तादागतः, अवरस्ताद् रमणीयम् ।।

संख्याया विधार्थे धा ।। <5-3-42> ।।
संख्यावाचिभ्यः प्रातिपदिकेभ्यो विधार्ते वर्तमानेभ्यो धा प्रत्ययो भवति स्वार्थे। विदा=प्रकारः, स च सर्वक्रियाविषय एव गृह्यते। क्रियाप्रकारे वर्तमानायाः संख्याया धा प्रत्ययः। एकधा भुङ्क्ते। द्विधा गच्छति। त्रिधा। चतुर्धा। पञ्चधा ।।

अधिकरणविचाले च ।। <5-3-43> ।।
`संख्यायाः' इत्येव। अधिकरणम्=द्रव्यम्, तस्य विचालः=संख्यान्तरापादनम्--एकस्यानेकीकरणम्, अनेकस्य वा एकीकरणम्। अधिकरणविचाले गम्यमाने संख्यायाः स्वार्थे धा प्रत्ययो भवति। एकं राशिं पञ्चधा कुरु, अनेकमेकधा कुरु ।।

एकाद्धो ध्यमुञन्यतरस्याम् ।। <5-3-44> ।।
एकशब्दात्परस्य धाप्रत्ययस्य ध्यमुञादेशो भवत्यन्यतरस्याम् । एकधा राशिंकुरु, ऐकध्यं कुरु(म.भा.2-410)। एकदा भुङ्क्ते, ऐकध्यं भुङ्क्ते। प्रकरणादेव लब्धे पुनर्धाग्रहणम्---विधार्थे विहितस्यापि यथा स्यात्। अनन्तरस्यैव ह्येतत्प्राप्नोति ।।

द्वित्र्योश्च धमुञ् ।। <5-3-45> ।।
`धा' इत्यनुवर्तते। द्वित्र्योः सम्बन्धिनो दाप्रत्यस्य विधार्थेऽधिकरणविचाले च विहितस्य धमुञादेशो भवत्यन्यतरस्याम्। चकारो विकल्पानुकर्षणार्थः। द्विधा, द्वैधम्। त्रिधा, त्रैधम्।
* धमुञन्तात्स्वार्थे डदर्शनम् *(म.भा.2-411)। मतिद्वैधानि संश्रयन्ते। मतित्रैधानि संश्रयन्ते ।।

एधाच्च ।। <5-3-46> ।।
द्वित्र्योः सम्बन्धिनो धाप्रत्ययस्य एधाजादेशो भवत्यन्यतरस्याम्। चकारो विकल्पानुकर्षणार्थः। द्वेधा, द्वैधम्, द्विधा। त्रेधा, त्रैधम्, त्रिधा ।।

याप्ये पाशप् ।। <5-3-47> ।।

याप्यः=कुत्सित इत्युच्यते। याप्ये वर्तमानात्प्रातिपदिकात्स्वार्थे पाशप् प्रत्ययो भवति। कुत्सितो वैयाकरणो वैयाकरणपाशः। याज्ञिकपाशः।
यो व्याकरणशास्त्रे प्रवीणो दुःशीलः, तत्र कस्मान्न भवति? यस्य गुणस्य सद्भावाद् द्रव्ये शब्दनिवेशः, तस्य कुत्सायां प्रत्ययः ।।

पूरणाद्भागे तीयादन् ।। <5-3-48> ।।

पूरणप्रत्ययो यस्तीयः, तदन्तात्प्रातिपदिकाद्भागे वर्तमानात् स्वार्थेऽन् प्रत्ययो भवति। स्वरार्थं वचनम्। द्वितीयो भागः द्वितीयः। तृतीयः।
भाग इति किम् ? द्वितीयम्। तृतीयम्।
पूरणग्रहणमुत्तरार्थम्, न ह्यपूरणस्तीयोऽस्ति; मुखतीयादिरनर्थकः ।।

प्रागेकादशभ्योऽच्छन्दसि ।। <5-3-49> ।।

`पूरणाद्भागे' इत्येव। प्रागेकादशभ्यः संख्याशब्देभ्यः पूरणप्रत्ययान्तेभ्यो भागे वर्तमानेभ्यः स्वार्थेऽनु प्रत्ययो भवति अच्छन्दसि विषये। स्वरार्थं वचनम्। पञ्चमः। सप्तमः। नवमः। दशमः।
प्रागेकादशभ्य इति किम् ? एकादशः, द्वादशः। अच्छन्दसीति किम् ? `पञ्चममिन्द्रियस्यापाक्रामत्'(मै.सं.1-9-4) ।।

षष्ठाष्टमाभ्यां ञ च ।। <5-3-50> ।।

`भागे' इत्येव। `अच्छन्दसि' इति च। षष्ठाष्टमाभ्यां भागेऽभिधेयेऽच्छन्दसि विषये ञः प्रत्ययो भवति। चकारादँश्च। षष्ठो भागः षाष्ठः, षष्ठः। आष्टमः, अष्टमः ।।

मानपश्वङ्गयोः कन्लुकौ च ।। <5-3-51> ।।

`भागे' इत्येव। षष्ठाष्टमाभ्यां यथासंख्यं कन्लुकौ च भवतो मानपश्वङ्गयोर्भागयोरभिधेययोः। षष्ठको भागो मानं चेत्तद्भवति। अष्टमो भागः पश्वङ्गं चेत्तद्भवति। कस्य लुक् ? ञस्य लुक्, अनो वा। चकाराद्यथाप्राप्तं च। षाष्ठः, षष्टः। अष्टमः।
मानपश्वङ्गयोरिति किम् ? षाष्ठः, षष्ठः। आष्टमः, अष्टमः।

एकादाकिनिच्चासहाये ।। <5-3-52> ।।

एकशब्दादसहायवाचिनः स्वार्थे आकिनिच् प्रत्ययो भवति। चकारात्कन्लुकौ च। आकिनिचः, कनो वा लुग्विज्ञायते। स च विधानसामर्थ्यात्पक्षे भवति।
एकाकी, एककः, एकः।
असहायग्रहणं संख्याशब्दनिरासार्थम्। तदुपादाने हि द्विबह्वोर्न स्यात्---एकाकिनौ, एकाकिनः ।।

भूतपूर्वे चरट् ।। <5-3-53> ।।।

पूर्वं भूत इति विगृह्य `सुप्सुपा' इति समासः। भूतपूर्वशब्दोऽतिक्रान्तकालवचनः। प्रकृतिविशेषणं चैतत्। भूतपूर्वत्वविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात्स्वार्थे चरट् प्रत्ययो भवति। आढ्यो भूतपूर्वः आढ्यचरः। सुकुमारचरः।
टकारो ङीबर्थः--आढ्यचरी ।।

षष्ठ्या रूप्य च ।। <5-3-54> ।।

षष्ठ्यन्तात्प्रातिपदिकाद्रूप्यः प्रत्ययो भवति, चकाराच्चरट् च। षष्ठ्यन्तात्प्रत्ययविधानात्सम्प्रति भूतपूर्वग्रहणं प्रत्ययार्थस्य विशेषणम्, न तु प्रकृत्यर्थविशेषणम्। देवदत्तस्य भूतपूर्वो गौः देवदत्तरूप्यः। देवदत्तचरः।

आतिशायने तमविष्ठनौ ।। <5-3-55> ।।

अतिशयनमतिशायनम्=प्रकर्षः। निपातनाद्दीर्घत्वम्। प्रकृत्यर्थविशेषणं चैतत्। अतिशायनविशिष्टेऽर्थे वर्तमानात्प्रातिपदिकात् स्वार्थे तमबिष्ठनौ प्रत्ययौ भवतः। प्रकृत्यर्थविशेषणं च स्वार्थिकानां द्योत्यं भवति। सर्वे इमे आढ्याः, अयमेषामतिशयेनाढ्य आढ्यतमः। दर्शनीयतमः। सुकुमारतमः। सर्व इमे पटवः, अयमेषामतिशयेन पटुः पटिष्ठः। लघिष्ठः। गरिष्ठः।

यदा च प्रकर्षवतां पुनः प्रकर्षो विवक्ष्यते तदातिशायिकान्तादपरः प्रत्ययो भवत्येव---`देवो वः सविता प्रार्पयतु श्रोष्ठतमाय कर्मणे'(तै.सं.1-1), युधिष्ठिरः श्रोष्ठतमः कुरूणामिति ।।

तिङ्श्च ।। <5-3-56> ।।

तिङन्ताच्चातिशायने द्योत्ये तमप् प्रत्ययो भवति। "ङ्याप्प्रातिपदिकात्"(4-1-1/282) इत्यधिकारात् तिङो न प्राप्नोतीति इदं वचनम्। सर्व इमे पचन्तीति, अयमेषामतिशयेन पचति पचतितमाम्। जल्पतितमाम्। इष्ठन् नोदाह्रियते; गुणवचने तस्य नियतत्वात्।।

द्विवचनविभज्योपपदे तरबीयसुनौ ।। <5-3-57> ।।

द्वयोरर्थयोर्वचनं द्विवचनम्। विभक्तव्यः=विभज्यः। निपातनाद् यद्भवति। द्व्यर्थे विभज्ये चोपपदे प्रातिपदिकात् तिङन्ताच्चातिशायने तरबीयसुनौ प्रत्ययौ भवतः। तमविष्ठनोरपवादः। यथासंख्यमत्र नेष्यते। द्वाविमावाढ्यौ, अयमनयोरतिशयेनाढ्य आढ्यतरः। सुकुमारतरः। पचतितराम्। जल्पतितराम्। ईयसुन्खल्वपि-द्वाविमौ पटू, अयमनयोरतिशयेन पटुः पटीयान्। लघीयान्।

विभज्ये चोपपदे--माथुराः पाटलिपुत्रकेभ्य आढ्यतराः। दर्शनीयतराः। पटीयांसः। लघीयांसः ।।

अजादी गुणवचनादेव ।। <5-3-58> ।।

इष्ठन्नीयसुनावजादी सामान्येन विहितौ, तयोरयं विषयनियमः क्रियते---गुणवचनादेव भवतस्तौ नान्यस्मादिति। पटीयान्। लघीयान्। पटिष्ठः। लघिष्ठः। इह न भवतः---पाचकतरः, पाचकतम इति।

एवकार इष्टतोऽवधारणार्थः--प्रत्ययनियमोऽयम्, न प्रकृतिनियम इति। पटुतरः, पटुतमः ।।

तुश्छन्दसि ।। <5-3-59> ।।

`तुः' इति तृन्तृचोः सामान्येन ग्रहणम्। त्रन्ताच्छन्दसि विषये अजादी प्रत्ययौ भवतः। पूर्वेण गुणवचनादेव नियमे कृते छन्दसि प्रकृत्यन्तराण्यभ्यनुज्ञायन्ते---त्रन्तादप्यजाजी भवत इति। `आसुतिं करिष्ठः'(ऋ.7-97-7)। दोहीयसी धेनुः। `भस्याऽढे तद्धिते'(6-3-35/836) इति पुंवद्भावे कृते "तुरिष्टेमेयस्सु"(3-4-154/2008) इति तृचो निवृत्तिः ।।

प्रशस्यस्य श्रः ।। <5-3-60> ।।

प्रशस्यशब्दस्य `श्र' इत्ययमादेशो भवति अजाद्योः प्रत्यययोः परतः। `अजादी' इति प्रकृतस्य सप्तमी विभक्तिर्विपरिणम्यते।

ननु च प्रशस्यशब्दस्यागुणवचनत्वादजादी न सम्भवतः ? एवं तर्हि आदेशविधानसामर्थ्यात् तद्विषयो नियमो न प्रवर्तते-अजादी गुणवचनादेवेति। एवमुत्तरेष्वपि योगेषु विज्ञेयम्।

सर्व इमे प्रशस्याः, अयमेषामतिशयेन प्रशस्यः श्रेष्ठः। उभाविमौ प्रशस्यौ, अयमनयोरतिशयेन प्रशस्यः श्रेयान्। अयमस्मात् श्रेयान्। "प्रकृत्यैकाच्"(6-4-163/2010) इति प्रकृतिभावाच्छ्रशब्दस्य टिलोप-यस्येतिलोपौ न भवतः ।।

ज्य च ।। <5-3-61> ।।

प्रशस्यशब्दस्य `ज्य' इत्ययमादेशो भवति अजाद्योः प्रत्यययोः परतः। सर्व इमे प्रशस्याः, अयमेषामतिशयेन प्रशस्यः ज्येष्ठः। उभाविमौ प्रशस्यौ, अयमनयोरतिशयेन प्रशस्यः ज्यायान्। अयमस्मात् ज्यायान्। "ज्यादादीयसः"(6-4-160/2012) इत्याकारः ।।

वृद्धस्य च ।। <5-3-62> ।।

वृद्धशब्दस्य च `ज्य' इत्ययमादेशो भवत्यजाद्योः प्रत्यययोः परतः। तयोश्च सत्त्वं नियमाभावेन पूर्ववत् ज्ञाप्यते। सर्व इमे वृद्धाः, अयमेषामतिशयेन वृद्धः ज्येष्ठः। उभाविमौ वृद्धौ, अयमनयोरतिशयेन वृद्धः ज्यायान्। अयमस्मात् ज्यायान्।
"प्रियस्थिर"(6-4-157/2016) इत्यादिना वृद्धशब्दस्य वर्षादेशो विधीयते। वचनसामर्थ्यात्पक्षे सोऽपि भवति--वर्षिष्ठः, वर्षीयानिति ।।

अन्तिकबाढयोर्नेदसाधौ ।। <5-3-63> ।।

अन्तिकबाढयोर्यथासंख्यं नेद, साध--इत्येतावादेशौ भवतोऽजाद्योः परतः। तयोश्च सत्त्वं पूर्ववद्विज्ञेयम्।
निमित्तभूतयोर्यथासंख्यमत्र नेष्यते।
सर्वाणीमान्यन्तिकानि, इदमेषामतिशयेनान्तिकं नेदिष्ठम्। उभे इमे अन्तिके, इदमनयोरतिशयेन नेदीयः। इदमस्मान्नेदीयः। सर्व इमे बाढमधीयते, अयमेषामतिशयेन बाढमधीते साधिष्ठः. उभाविमौ बाढमधीयाते, अयमनयोरतिशयेन बाढमधीते साधीयः। अयमस्मात् साधीयोऽधीते ।।

युवाल्पयोः कनन्यतरस्याम् ।। <5-3-64> ।।

युवाल्पशब्दयोः कनित्ययमादेशो भवत्यन्यतरस्यामजाद्योः परतः। तयोश्च सत्त्वं पूर्ववज्ज्ञेयम्। सर्व इमे युवानः, अयमेषामतिशयेन युवा कनिष्ठः। द्वाविमौ युवानौ, अयमनयोरतिशयेन युवा कनीयान्। यविष्ठः, यवीयान्। सर्व इमेऽल्पाः, अयमेषामतिशयेनाल्पः कनिष्ठः उभाविमावल्पौ, अयमनयोरतिशयेनाल्पः कनीयान्। अयमस्मात्कनीयान्। अल्पिष्ठः, अल्पीयानिति वा ।।

विन्मतोर्लुक् ।। <5-3-65> ।।

विनो मतुपश्च लुग् भवति अजाद्योः प्रत्यययोः परतः। इदमेव वचनं ज्ञापकमजादिसद्भावस्य। सर्वे इमे स्रग्विणः, अयमेषामतिशयेन स्रग्वी स्रजिष्ठः। उभाविमौ स्रग्विणौ, अयमनयोरतिशयेन स्रग्वी स्रजीयान्। अयमस्मात् स्रजीयान्। सर्व इमे त्वग्वन्तः, अयमेषामतिशयेन त्वग्वी त्वचिष्ठः। उभाविमौ त्वग्वन्तौ, अयमनयोरतिशयेन त्वग्वान् त्वचीयान्। अयमस्मात्त्वचीयान्।।

प्रशंसायां रूपप् ।। <5-3-66> ।।

प्रशंसा=स्तुतिः। प्रकृत्यर्थस्य विशेषणं चैतत्। प्रशंसाविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे रूपप् प्रत्ययो भवति। स्वार्थिकाश्च प्रत्ययाः प्रकृत्यर्थविशेषस्य द्योतका भवन्ति। प्रशस्तो वैयाकरणो वैयाकरणरूपः। याज्ञिकरूपः।
प्रकृत्यर्थस्य वैशिष्ट्ये प्रशंसा भवति। वृषलरूपोऽयं यः पलाण्डुना सुरां पिबति। चोररूपः। दस्युरूपः, योऽक्ष्णोरप्यञ्जनं हरेत्।
"तिङश्च"(5-3-56/2002) इत्यनुवर्तते--पचतिरूपम्। पचतोरूपम्। क्रिया प्रधानमाख्यातम्।
एका च क्रियेति रूपप्प्रत्ययान्ताद् द्विवचनबहुवचने न भवतः।
नपुंसकलिङ्गं तु भवति; लोकाश्रयत्वाल्लिङ्गस्य ।।

ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ।। <5-3-67> ।।

सम्पूर्णता=पदार्थानां समाप्तिः। स्तोकेनासम्पूर्णता=ईषदसमाप्तिः। प्रकृत्यर्थविशेषणं चैतत्। ईषदसमाप्तिविशिष्टे स्वार्थे वर्तमानात् कल्पब, देश्य, देशीयर्-इत्येते प्रत्यया भवन्ति। ईषदसमाप्तः पटुः पटुकल्पः। पटुदेश्यः। पटुदेशीयः। मृदुकल्पः। मृदुदेश्यः। मृदुदेशीयः।

"तिङश्च"(5-3-56/2002) इत्येव--पचतिकल्पम्। जल्पतिकल्पम् ।।

विभाषा सुपो बहुच् पुरस्तात्तु ।। <5-3-68> ।।
ईषदसमाप्तिविशिष्टेऽर्थे वर्तमानात् सुबन्ताद्विभाषा बहुच् प्रत्ययो भवति। स तु पुरस्तादेव भवति, न परतः। चित्करणमन्तोदात्तार्थम् । ईषदसमाप्तः पटुः बहुपटुः। बहुमृदुः। बहुगुडो द्राक्षा।
विभाषावचनात् कल्पबादयोऽपि भवन्ति। सुब्ग्रहणम्-तिङन्तान्मा भूदिति ।।

प्रकारवचने जातीयर् ।। <5-3-69> ।।
सामान्यस्य भेदको विशेषः=प्रकारः, तस्य वचने। प्रकृत्यर्थविशेषणं चैतत्। सुबन्तात्प्रकारविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे जातीयर् प्रत्ययो भवति। प्रकारवति चायं प्रत्ययः। थाल्पुनः प्रकारमात्र एव भवति। पटुप्रकारः पटुजातीयः। मृदुजातीयः। दर्शनीयजातीयः ।।

प्रागिवात्कः ।। <5-3-70> ।।
"इवे प्रतिकृतौ"(5-3-96/2051) इति वक्ष्यति, प्रागेतस्मादिवसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामः, कप्रत्ययस्तेष्वधिकृतो वेदितव्यः। वक्ष्यति---
"अज्ञाते"(5-3-73/2028) इति--अश्वकः। गर्दभकः।
तिङ्न्तादयं प्रत्ययो नेष्यते। अकजिष्यते। "तिङ्श्च"(5-3-56/2002) इत्यनुवृत्तमुत्तरसूत्रेणैव सम्बन्धनीयम्।

अव्ययसर्वनाम्नामकच्प्राक् टेः ।। <5-3-71> ।।
"तिङ्श्च"(5-3-56/2002) इत्येव। अव्ययानां सर्वनाम्नां च प्रागिवीयेष्वर्थेष्वकच्प्रत्ययो भवति, स च प्राक् टेः, न परतः। कस्यापवादः। उच्चकैः। नीचकैः। शनकैः। सर्वनाम्नः खल्वपि-सर्वके। उभयके।
`प्रातिपदिकात्', `सुपः'-इति द्वयमिहानुवर्तते, तत्राभिधानतो व्यवस्था भवति-क्वचित्प्रातिपदिकस्य टेः प्राक् प्रत्ययो भवति, क्वचित्सुबन्तस्य टेः प्राक्प्रत्ययः। युष्मकाभिः, अस्मकाभिः, युष्मकासु, अस्मकासु, युवकयोः, आवकयोः--इत्यत्र प्रातिपदिकस्य। त्वयका, मयका, त्वयकि, मयकि--इत्यत्र सुबन्तस्य।
* अकच्प्रकरणे तूष्णीमः काम् प्रत्ययो वक्तव्यः *(म.भा.2-422)। स च मित्त्वादन्त्यादचः परो भवति। तूष्णीकामास्ते। तूष्णीकां तिष्ठिति।
* शीले को मलोपश्च वक्तव्यः * (म.भा.2-423)। तूष्णींशीलः तूष्णीकः।
"तिङ्श्च"(5-3-56/2002) इति प्रकृतमत्र सम्बध्यते-पचतकि। जल्पतकि ।।

कस्य च दः ।। <5-3-72> ।।
ककारान्तस्य प्रातिपदिकस्याकच्सन्नियोगेन दकारादेशो भवति। चकारः सन्नियोगार्थः। सामर्थ्याच्चाव्ययग्रहणमनुवर्तते, न सर्वनामग्रहणम्; ककारान्तस्य सर्वनाम्नोऽसम्भवात्। धिक्-धकित्। हिरुक्- हिरकुत्। पृथक्-पृथकत् ।।

अज्ञाते ।। <5-3-73> ।।
अज्ञातविशेषः=अज्ञातः। अज्ञातत्वोपाधिकेऽर्थे वर्तमानात्प्रातिपदिकात् तिङन्ताच्च स्वार्थे यथाविहितं प्रत्ययो भवति। स्वेन रूपेण ज्ञाते पदार्थे विशेषरूपेणाज्ञाते प्रत्ययविधानमेतत्। कस्यायमश्वः इति स्वस्वामिसम्बन्धेनाज्ञातेऽश्वे प्रत्ययः--अश्वकः। गर्दभकः। उष्ट्रकः।
एवमन्यत्रापि यथायोगमज्ञातता विज्ञेया। उच्चकैः। नीचकैः। सर्वके। विश्वके। पचतकि। जल्पतकि ।।

कुत्सिते ।। <5-3-74> ।।
कुत्सितः=गर्हितः, निन्दितः। प्रकृत्यर्थविशेषणं चैतत्। कुत्सितत्वोपाधिकेऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे यथाविहितं प्रत्ययो भवति। कुत्सितोऽश्वः

अश्वकः। उष्ट्रकः। गर्दभकः। नीचकैः। सर्वके। विश्वके। पचतकि। जल्पतकि ।।

संज्ञायां कन् ।। <5-3-75> ।।
`कुत्सिते' इत्येव। कुत्सितत्वोपाधिकेऽर्थे वर्तमानात् प्रातिपदिकात् कन् प्रत्ययो भवति, प्रत्ययान्तेन चेत्संज्ञा गम्यते। कस्यापवादः। शूद्रकः। धारकः। पूर्णकः।

अनुकम्पायाम् ।। <5-3-76> ।।
कारुण्येनाभ्युपपत्तिः परस्य=अनुकम्पा, तस्यां गम्यमानायां सुबन्तात्तिङन्ताच्च यथाविहितं प्रत्ययो भवति। पुत्रकः। वत्सकः। दुर्बलकः। बुभुक्षितकः। स्वपितकि। श्वसितकि ।।

नीतौ च तद्युक्तात् ।। <5-3-77> ।।
सामदानादिरुपायः=नीतिः। नीतौ च गम्यमानायां तद्युक्तादनुकम्पायुक्ताद्यथाविहितं प्रत्ययो भवति। हन्त ते धानकाः। हन्त ते तिलकाः। एहकि। अद्धकि। अनुकम्प्यमानो दानेनाराधयति। पूर्वेण प्रत्यासन्नानुकम्पासम्बन्धाद् अनुकम्प्यमानादेव प्रत्ययो विहितः; सम्प्रति व्यवहितादपि यथा स्यादिति वचनम् ।।

बह्वचो मनुष्यनाम्नष्ठज्वा ।। <5-3-78> ।।
"अनुकम्पायाम्"(5-3-76/2031) इति, "नीतौ च तद्युक्तात्"(5-3-77/2032) इति च वर्त्तते। वह्वचः प्रातिपदिकान्मनुष्यनामधेयाद्वा ठच्प्रत्ययो भवति अनुकम्पायां गम्यमानायां नीतौ च, देविकः। देवदत्तकः। यज्ञिकः, यज्ञदत्तकः।
बह्वच इति किम्? दत्तकः। गुप्तकः, मनुष्यनाम्न इति किम्? मद्रबाहुकः भद्रबाहुकः ।।

घनिलचौ च ।। <5-3-79> ।।
`अनुकम्पायाम्' इत्यादि सर्वमनुवर्तते। पूर्वेण ठचि विकल्पेन प्राप्ते वचनम्। बह्वचो मनुष्यनाम्नो घन्, इलच्--इत्येतौ प्रत्ययौ भवतः। चकाराद्यथाप्राप्तं च। देवियः, देविलः। देविकः, देवदत्तकः। यज्ञियः, यज्ञिकः, यज्ञदत्तकः ।।

प्राचामुपादेरडज्वुचौ च ।। <5-3-80> ।।
पूर्ववत् सर्वमनुवर्तते। उपशब्द आदिर्यस्य तस्मादुपादेः प्रातिपदिकाद् बह्वचो मनुष्यनाम्नः-अडच्, वुच्-प्रत्ययौ भवतः। चकाराद् घनिलचौ प्रत्ययौ भवतः, ठच्च वा। उपडः उपकः, उपियः, उपिलः, उपिकः, उपेन्द्रदत्तकः।
प्राचांग्रहणं पूजार्थम्। `वा' इत्येव हि वर्तते ।।

जातिनाम्नः कन् ।। <5-3-81> ।।
`बह्वचः' इति नानुवर्तते। सामान्येन विधानम्। जातिशब्दो यो मनुष्यनामधेयो व्याघ्र, सिंह-हत्येवमादिः, तस्मादनुकम्पायां नीतौ च कन्प्रत्ययो भवति। व्याघ्रकः। सिंहकः। शरभकः।
वावचनानुवृत्तेर्यथादर्शनम् अन्योऽपि भवति-व्याघ्रिलः, सिंहिलः।
नामग्रहणं स्वरूपनिवृत्त्यर्थम् ।।

अजिनान्तस्योत्तरपदलोपश्च ।। <5-3-82> ।।
`कन्' इत्यनुवर्तते, `मनुष्यनाम्नः' इति च। अजिनशब्दान्तात् प्रातिपदिकान्मनुष्यनाम्नोऽनुकम्पायां कन्प्रत्ययो भवति, तस्य चोत्तरपदलोपः। व्याघ्राजिनो नाम

कश्चिन्मनुष्यः, सोऽनुकम्पितः व्याघ्रकः। सिंहकः ।।

ठाजादावूर्ध्वं द्वितीयादचः ।। <5-3-83> ।।

`लोप' इत्यनुवर्तते। अस्मिन्प्रकरणे यष्ठोऽजादिश्च प्रत्ययस्तस्मिन् परतः प्रकृतेर्द्वितीयादच ऊर्ध्वं यच्छब्दरूपं तस्य लोपो भवति। ऊर्ध्वग्रहणं सर्वलोपार्थम्। अनुकम्पितो देवदत्तः देविकः, देवियः, देविलः। यज्ञिकः, यज्ञियः, यज्ञिलः। उपडः, उपकः, उपियः, उपिलः, उपिकः।

ठग्रहणमुको द्वितीयत्वे कविधानार्थम्। अजादिलक्षणे हि माथितिकादिवत्प्रसङ्गः। वायुदत्तः, वायुदत्तः, वायुकः। पितृदत्तः, पितृकः।

* चतुर्थादच ऊर्ध्वस्य लोपो वक्तव्यः *(म.भा.2-425)। अनुकम्पितो बृहस्पतिदत्तः बृहस्पतिकः, बृहस्पतियः, बृहस्पतिलः ।।

* अनजादौ विभाषा लोपो वक्तव्यः *(म.भा.2-425)। देवदत्तकः, देवकः। यज्ञदत्तकः, यज्ञकः ।

* लोपः पूर्वपदस्य च ठाजादावनजादौ च वक्तव्यः *(म.भा.2-425)। दत्तिकः, दत्तिलः, दत्तियः, दत्तकः।

* विनाऽपि प्रत्ययेन पूर्वोत्तरपदयोर्विभाषा लोपो वक्तव्यः * (म.भा.2-425)। देवतत्तो दत्तः, देव इति वा ।

* उवर्णाल्ल इलस्य च *(म.भा.2-425)। भानुदत्तो भानुलः। वसुदत्तो वसुलः।

`चतुर्थादनजादौ च लोपः पूर्वपदस्य च।

अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च ।।'(म.भा.2-425)

* द्वितीयादचो लोपे सन्ध्यक्षरद्वितीयत्वे तदादेर्लोपवचनम्। लहोडः, लहिकः। कहोडः, कहिकः।

* एकाक्षरपूर्वपदानामुत्तरपदलोपो बक्तव्यः *(म.भा.2-425)। वागाशीः वाचिकः। स्रुचिकः। त्वचिकः।

कथं षडंगुलिदत्तः षडिक इति? * षषष्ठाजादिवचनात्सिद्धम् *।।

शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ।। <5-3-84> ।।

शेवलादीनां मनुष्यनाम्नां ठाजादौ प्रत्यये परतः तृतीयादच ऊर्ध्वस्य लोपो भवति। पूर्वस्यायमपवादः। अनुकम्पितः शेवलदत्तः शेवलिकः, शेवलियः, शेवलिलः। सुपरिकः, सुपरियः, सुपरिलः। विशालिकः, विशालियः, विशालिलः। वरुणिकः, वरुणियः, वरुणिलः। अर्यमिकः, अर्यमियः, अर्यमिलः।

* शेवलादीनां तृतीयादचो लोपः स चाकृतसन्धीनामिति वक्तव्यम् *(म.भा.2-426)। शेवलेन्द्रदत्तः, सुपर्याशीर्दत्तः-शेवलिकः, सुपरिक इति यथा स्यात्; शेवलयिकः, सुपर्यिक इति मा भूत् ।।

अल्पे ।। <5-3-85> ।।

परिमाणापचये अल्पशब्दः, प्रकृतिविशेषणं चैतत्। अल्पत्वविशिष्टेऽर्थे वर्तमानात्प्रातिपदिकाद्यथाविहितं प्रत्ययो भवति। अल्पं तैलं तैलकम्। घृतकम्। सर्वकम्। विश्वकम्। उच्चकैः। नीचकैः। पचतकि। जल्पतकि ।।

ह्रस्वे ।। <5-3-86> ।।

ह्रस्वत्वविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकाद् यथाविहितं प्रत्ययो भवति। दीर्घप्रतियोगी ह्रस्वः। ह्रस्वो वृक्षो वृक्षकः। प्लक्षकः। स्तम्भकः ।।

संज्ञायां कन् ।। <5-3-87> ।।

`ह्रस्वे' इत्येव। ह्रस्वत्वहेतुका या संज्ञा तस्यां गम्यमानायां कन् प्रत्ययो भवति। पूर्वस्यायमपवादः। वंशकः। वेणुकः। दण्डकः ।।

कुटीशमीशुण्डाभ्यो रः ।। <5-3-88> ।।

`ह्रस्वे' इत्येव। संज्ञाग्रहणं नानुवर्तते, सामान्येन विधानम्। कुटी-शमी-शुण्डाभ्यो ह्रस्वार्थे द्योत्ये रः प्रत्ययो भवति। कस्यापवादः। ह्रस्वा कुटी कुटीरः। शमीरः। शुण्डारः ।

स्वार्थिकत्वेऽपि पुंल्लिङ्गता; लोकाश्रयत्वाल्लिङ्गस्य(व्या.प.74) ।।

कुत्वा डुपच् ।। <5-3-89> ।।

`ह्रस्वे' इत्येव। कुतूशब्दाद्ध्रस्वत्वे द्योत्ये डुपच्प्रत्ययो भवति। कस्यापवादः। ह्रस्वा कूतूः कुतुपम् = चर्ममयं स्नेहभाजनमुच्यते। कुतूरित्यावपनस्याख्या ।।

कासूगोणीभ्यां ष्टरच् ।। <5-3-90> ।।

`ह्रस्वे' इत्येव। कासु-गोणीशब्दाभ्यां ह्रस्वत्वे द्योत्ये ष्टरच्प्रत्ययो भवति। कस्यापवादः। षकारो ङीषर्थः। ह्रस्वा कासूः कासूतरी। गोणीतरी। कासूरिति शक्तिः, आयुधविशेष उच्यते ।।

वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ।। <5-3-91> ।।

`हस्वे' इति निवृत्तम्। वत्स, उक्षन्, अश्व, ऋषभ-इत्येतेभ्यस्तनुत्वे द्योत्ये ष्टरच्प्रत्ययो भवति। यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशः, तस्य तनुत्वे प्रत्ययः(म.भा.2-426)। वत्सतरः। उक्षतरः। अश्वतरः। ऋषभतरः।

प्रथमवया वत्सः, तस्य तनुत्वं द्वितीयवयसः प्राप्तिः। तरुण उक्षा, तस्य तनुत्वं तृतीयवयः प्राप्तिः। अश्वेनाश्वायामुत्पन्नोऽश्वः, तस्य तनुत्वमन्यपितृकता। अनड्वानृषभः, तस्य तनुत्वं भारोद्वहने मन्दशक्तिता ।।

किंयत्तदोर्निर्द्धारणे द्वयोरेकस्य डतरच् ।। <5-3-92> ।।

किं, यत् तत्-इत्येतेभ्यः प्रातिपदिकेभ्यो द्वयोरेकस्य निर्द्धारणे डतरच् प्रत्ययो भवति। निर्धार्यमाणवाचिभ्यः स्वार्थे प्रत्ययः। जात्या, क्रियया, गुणेन, संज्ञया वा समुदायादेकदेशस्य पृथक्करणं निर्धारणम्। कतरो भवतोः कठः। कतरो भवतोः कारकः। कतरो भवतोः पटुः। कतरो भवतोर्देवदत्तः। यतरो भवतोः कारकः। यतरो भवतोः पटुः। यतरो भवतोर्द्देवदत्तः, ततर आगच्छतु।

महाविभाषयाऽत्र प्रत्ययो विकल्प्यते। को भवतोर्द्देवदत्तः, स आगच्छतु।

`निर्धारणे' इति विषयसप्तमीनिर्देशः। `द्वयोः' इति समुदायान्निर्धारणविभक्तिः। `एकस्य' इति निर्द्देशः निधार्यमाणनिर्द्देशः ।।

वा बहुनां जातिपरिप्रश्ने डतमच् ।। <5-3-93> ।।

`किंयत्तदः' इति वर्तते, `निर्धारणे', `एकस्य' इति च। `बहूनाम्' इति निर्धारणे षष्ठी। बहूनां मध्ये एकस्य निर्धारणे गम्यमाने जातिपरिप्रशनविषयेभ्यः किमादिभ्यो वा डतमच् प्रत्ययो भवति। कतमो भवतां कठः। यतमो भवतां कठः, ततम आगच्छतु।

वावचनमकजर्थम्--यको भवतां कठः, सक आगच्छतु। महाविभाषा च प्रत्ययविकल्पार्थाऽनुवर्तत एव--को भवतां कठः। यो भवतां कठः, स आगच्छतु।

जातिपरिप्रश्न इति किम्? को भवतां देवदत्तः।

परिप्रश्नग्रहणं च किम एव विशेषणम्, न यत्तदोः; असम्भवात्। जातिग्रहणं तु सर्वैरेव सम्बध्यते।

किमोऽस्मिन्विषये डतरमपीच्छन्ति केचित्--कतरो भवतां कठः, कतरो भवतां कालाप इति। तत्र "कतरकतमौ जातिपरिप्रश्ने"(2-1-63/742) इति वचनात्सिद्धम् ।।

एकाच्च प्राचाम् ।। <5-3-94> ।।

एकशब्दात्प्राचामाचार्याणां मतेन डतरच्, डतमच्--इत्येतौ प्रत्ययौ भवतः स्वस्मिन्विषये। चकारो डतरचोऽनुकर्षणार्थः। द्वयोर्निर्द्धारणे डतरच्। बहूनां निर्द्धारणे डतमच्। `जातिपरिप्रश्ने' इति नानुवर्तते, सामान्येन विधानम्। एकतरो भवतोर्द्देवदत्तः। एकतमो भवतां देवदत्तः।

प्राचांग्रहणं पूजार्थम्; विकल्पोऽनुवर्तते एव।

अवक्षेपणे कन् ।। <5-3-95> ।।

अवक्षिप्यते येन तदवक्षेपणम्। तस्मिन्वर्तमानात्प्रातिपदिकात्कन् प्रत्ययो भवति। व्याकरणकेन नाम त्वं गर्वितः। याज्ञिक्यकेन नाम त्वं गर्वितः।
परस्य कुत्सार्थं यदुपादीयते तदिहोदाहरणम्। यत्पुनः स्वयमेव कुत्सितम्, तत्र "कुत्सिते"(5-3-74/2029) इत्यनेन कन्प्रत्ययो भवति-देवदत्तकः, यज्ञदत्तक इति।
प्रागिवीयस्य पूर्णोऽवधिः ।।

इवे प्रतिकृतौ ।। <5-3-96> ।।
`कन्' इत्यनुवर्तते। इवार्थे यत्प्रातिपदिकं वर्तते तस्मात्कन्प्रत्ययो भवति। इवार्थः सादृश्यम्, तस्य विशेषणं प्रतिकृतिग्रहणम्। प्रतिकृतिः=प्रतिरूपकम्, प्रतिच्छन्दकम्। अश्व इवायमश्वप्रतिकृतिः अश्वकः। उष्ट्रकः। गर्दभकः।
प्रतिकृताविति किम्? गौरिव गवयः ।।

संज्ञायां च ।। <5-3-97> ।।
`इव' इत्यनुवर्तते, `कन्' इति च। इवार्थे गम्यमाने कन्प्रत्ययो भवति, समुदायेन चेत् संज्ञा गम्यते। अप्रतिकृत्यर्थ आरम्भः। अश्वसदृशस्य संज्ञा अश्वकः। उष्ट्रकः। गर्दभकः ।।

लुम्मनुष्ये ।। <5-3-98> ।।
`संज्ञायाम्' इत्येव। संज्ञायां विहितस्य कनो मनुष्येऽभिधेये लुब् भवति। चञ्चेव मनुष्यः चञ्चा। दासी। खरकुटी(म.भा.2-428)।
मनुष्य इति किम् ? अश्वकः। उष्ट्रकः। गर्दभकः।
देवपथादेराकृतिगणत्वात्तस्यैवायं प्रपञ्चो वेदितव्यः ।।

जीविकार्थे चापण्ये ।। <5-3-99> ।।
जीविकार्थं यदपण्यं तस्मिन्नभिधेये कनो लुब् भवति। विक्रीयते यत्तत्=पण्यम्। वासुदेवः। शिवः। स्कन्दः। विष्णुः। आदित्यः।
देवलकादीनां जीविकार्था देवप्रतिकृतय उच्यन्ते।
अपण्य इति किम् ? हस्तिकान्विक्रीणीते। अश्वकान्। रथकान्। देवपथादेरेवायं प्रपञ्चः ।।

देवपथादिभ्यश्च ।। <5-3-100> ।।
"इवे प्रतिकृतौ"(5-3-96/2051) "संज्ञायां च"(5-3-97/2052) विहितस्य कनो देवपथादिभ्य उत्तरस्य लुब् भवति। आदिशब्दः प्रकारे।
आकृतिगणश्चायम्। देवपथः। हंसपथः।
`अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च।
इवे प्रतिकृतौ लोपः कनो देवपथादिषु ।।'
अर्चासु तावत्--शिवः, विष्णुः । चित्रिकर्मणि--अर्जुनः, दुर्योधनः। ध्वजेषु--कपिः, गरुडः, सिंहः।
देवपथ। हंसपथ। वारिपथ। जलपथ। राजपथ। शतपथ। सिंहगति। उष्ट्रग्रीवा। चामरज्जु। रज्जु। हस्त। हन्द्र। दण्ड। पुष्प। मत्स्य। देवपथादिः ।।

वस्तेढञ् ।। <5-3-101> ।।
`इव' इत्यनुवर्तते। इतः प्रभृति प्रत्ययाः सामान्येन भवन्ति, प्रतिकृतौ च, अप्रतिकृतौ च। वस्तिशब्दादिवार्थे द्योत्ये ढञ्प्रत्ययो भवति। वस्तिरिव वास्तेयः। वास्तेयी ।।

शिताया ढः ।। <5-3-102> ।।
शिलाशब्दादिवार्थे ढः प्रत्ययो भवति। शिलेव शिलेयं दधि।

केचिदत्र ढञमपीच्छन्ति, तदर्थं योगविभागः कर्त्तव्यः। `शिलायाः', ढञ्प्रत्ययो भवति--शैलेयम्। ततः `ढः'---शिलेयम् ।।

शाखादिभ्यो यत् ।। <5-3-103> ।।

`शाखा' इत्येवमादिभ्यः प्रातिपदिकेभ्यो यत्प्रत्ययो भवति इवार्थे। शाखेव शाख्यः। मुख्यः। जघन्यः।
शाखा। मुख। जघन। शृङ्ग। मेघ। चरण। स्कन्ध। शिरस्। उरस्। अग्र। शरण। शाखादिः ।।

द्रव्यं च भव्ये ।। <5-3-104> ।।

द्रव्यशब्दो निपात्यते भव्येऽभिधेये। द्रुशब्दादिवार्थे यत्प्रत्ययो निपात्यते। द्रव्यम् = भव्यः, आत्मवान्; अभिप्रेतानामर्थानां पात्रभूत उच्यते। द्रव्योऽयं राजपुत्रः। द्रव्योऽयं माणवकः ।।

कुशाग्राच्छः ।। <5-3-105> ।।

कुशाग्रशब्दादिवार्थे छः प्रत्ययो भवति। कुशाग्रमिव सूक्ष्मत्वात् कुशाग्रीया बुद्धिः। कुशाग्रीयं वस्त्रम् ।।

समासाच्च तद्विषयात् ।। <5-3-106> ।।

तदित्यनेन प्रकृत इवार्थो निर्दिश्यते। इवार्थविषयात्समासादपरस्मिन्निवार्थे एव छः प्रत्ययो भवति। काकतालीयम्। अजाकृपाणीयम्। अन्धकवर्तकीयम्। अतर्कितोपनतं चित्रीकरणमुच्यते। तत्कथम्? काकस्यागमनं यादृच्छिकम्, तालस्य पतनं च, तेन तालेन पतता काकस्य वधः कृतः; एवमेव देवदत्तस्य तत्रागमनम्, दस्यूनां चोपनिपातः, तैश्च तस्य वधः कृतः। तत्र यो देवदत्तस्य दस्यूनां च समागमः, स काकतालसमागमसदृश इत्येक उपमार्थः। अतश्च देवदत्तस्य वधः, स काकतालवधसदृश इति द्वितीय उपमार्थः। तत्र प्रथमे समासः, द्वितीये प्रत्ययः।
समासश्चायमस्मादेव ज्ञापकात्। न ह्यस्यापरं लक्षणमस्ति।
`सुप्सुपा' इति वा समासः। स चैवंविषय एव ।।

शर्करादिभ्योऽण् ।। <5-3-107> ।।

`शर्करा'--इत्येवमादिभ्यः प्रातिपदिकेभ्य इवार्थेऽण्प्रत्ययो भवति। शर्करेव शार्करम्। कापालिकम्।
शर्करा। कपालिका। पिष्टिक। पुण्डरीक। शतपत्त्र। गोलोमन्। गोपुच्छ। नरालि। नकुला। सिकता। शर्करादिः ।।

अङ्गुल्यादिभ्यष्ठक् ।। <5-3-108> ।।

अङ्गुल्यादिभ्य इवार्थे ठक् प्रत्ययो भवति। अङ्गुलीवाङ्गुलिकः। भारुजिकः।
अङ्गुलि। भरुज। बभ्रु। वल्गु। मण्डर। मण्डल। शष्कुल। कपि। उदश्वित्। गोणी। उरस्। शिखा। कुलिश। अङ्गुल्यादिः ।।

एकशालायाष्ठजन्यतरस्याम् ।। <5-3-109> ।।

एकशालाशब्दादिवार्थेऽन्यतरस्यां ठच्प्रत्ययो भवति। अन्यतरस्यां ग्रहणेनानन्तरष्ठक् प्राप्यते। एकशालेव एकशालिकः, ऐकशालिकः ।।

कर्कलोहितादीकक् ।। <5-3-110> ।।

कर्कलोहितशब्दाभ्यामिवार्थे ईकक् प्रत्ययो भवति। कर्कः=शुक्लोऽश्वः, तेन सदृशः कार्कीकः। लौहितीकः स्फटिकः। स्वयमलोहितोऽप्युपाश्रयवशात्तथा प्रतीयते ।।

प्रत्नपूर्वविश्वेमात्थाल् छन्दसि ।। <5-3-111> ।।

प्रत्न,पूर्व, विश्व, इम-इत्येतेभ्य इवार्थे थाल् प्रत्ययो भवति छन्दसि विषये। `तं प्रत्नथा पूर्वथा विश्वथेमथा'(ऋ.5-44-1) ।।

पूगाञ्ञ्योऽग्रामणीपूर्वात् ।। <5-3-112> ।।

`इवार्थे' इति निवृत्तम्। नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः=पूगाः, पूगवाचिनः प्रातिपदिकादग्रामणीपूर्वात्स्वार्थे ञ्यः प्रत्ययो भवति।

लौहध्वज्यः, लौहध्वज्यौ, लोहध्वजाः। शैब्यः, शैब्यौ, शिबयः। चातक्यः, चातक्यौ, चातकाः।

अग्रामणीपूर्वादिति किम्? देवदत्तो ग्रामणीरेषां त इमे देवदत्तकाः। यज्ञदत्तकाः ।।

व्रातच्फञोरस्त्रियाम् ।। <5-3-113> ।।

नानाजातीया अनियतवृत्तय उत्सेधजीविनः सङ्घाः=व्राताः। व्रातवाचिभ्यः प्रातिपदिकेभ्यश्च स्वार्थे ञ्यः प्रत्ययो भवत्यस्त्रियाम्। कापोतपाक्यः, कापौतपाक्यौ, कपोतपाकाः, व्रैहिमत्यः, व्रैहिमत्यौ, व्रीहिमताः। च्फञः खल्वपि--कौञ्जायन्यः, कौञ्जायन्यौ, कौञ्जायनाः। ब्राध्नायन्यः, ब्राध्नायन्यौ, ब्राध्नायनाः।

अस्त्रियामिति किम्? कपोतपाकी। व्रीहिमती। कौञ्जायनी। ब्राध्नायनी ।।

आयुधजीविसङ्घाञ्ञ्यड् वाहीकेष्वब्राह्मणराजन्यात् ।। <5-3-114> ।।

आयुधजीविनां सङ्घः आयुधजीविसङ्घः, स वाहीकैर्विशेष्यते। वाहीकेषु य आयुधजीविसङ्घः, तद्वाचिनः प्रातिपदिकाद् ब्राह्मणराजन्यवर्जितात्स्वार्थे ञ्यट् प्रत्ययो भवति।

ब्राह्मणे तद्विशेषग्रहणम्। राजन्ये तु स्वरूपग्रहणमेव। टकारो ङीबर्थः, तेन `स्त्रियाम्' इति नानुवर्तते।

कौण्डीबृस्यः, कौण्कडीबृस्यौ, कौम्डीबृसाः। क्षौद्रक्यः, क्षौद्रक्यौ, क्षुद्रकाः। मालव्यः, मालव्यौ, मालवाः। स्त्रियाम्-कौण्डीबृसी। क्षौद्रकी। मालवी।

आयुधजीविग्रहणं किम्? मल्लाः, शयण्डाः। सङ्घग्रहणं किम् ? सम्राट्। वाहीकेष्विति किम् ? शबराः, पुलिन्दाः। अब्राह्मणराजन्यादिति किम् ? गोपालवा ब्राह्मणाः, शालङ्कायना राजन्याः ।।

वृकाट्टेण्यण् ।। <5-3-115> ।।

`आयुधजीविसङ्घात्' इति वर्तते। वृकशब्दादायुधजीविनः स्वार्थे टेण्यण् प्रत्ययो भवति। टकारो ङीबर्थः। णकारो वृद्ध्यर्थः। वार्केण्यः, वार्केण्यौ, वृकाः।

आयुधजीविसङ्घविशेषणम्--जातिशब्दान्मा भूत्।

`कामक्रोधौ मनुष्याणां खादितारौ वृकाविव' ।।

दामन्यादित्रिगर्तषष्ठाच्छः ।। <5-3-116> ।।

`आयुधजीविसङ्घात्' इति वर्तते। दामन्यादिभ्यः प्रातिपदिकेभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसङ्घवाचिभ्यः स्वार्थे छः प्रत्ययो भवति। येषामायुधजीविनां सङ्घानां षडन्तर्वर्गाः, तत्र च त्रिगर्तः षष्ठः; त्रिगर्तः षष्ठो येषां ते त्रिगर्तषष्ठा इत्युच्यन्ते। तेषु चेयं स्मृतिः---

आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी।

क्रौष्टकिर्ज्जालमानिश्च ब्राह्मगुप्तोऽथ जानकिः ।। इति।

दामन्यादिभ्यस्तावत्--दामनीयः, दामनीयौ, दामनयः। औलपीयः, औलपीयौ, उलपयः। त्रिगर्तषष्ठेभ्यः खल्वपि-कौण्डोपरथीयः, कौण्डोपरथीयौ, कौण्डोपरथाः। दाण्डकीयः, दाण्डकीयौ, दाण्डकयः। क्रौष्टकीयः। जालमानीयः। ब्रह्मगुप्तीयः। जानकीयः।

दामनी। औलपि। आकिदन्ती। काकरन्ति। काकदन्ति। शत्रुन्तपि। सार्वसेनि। बिन्दु। मौञ्जायन। उलभ। सावित्रीपुत्र। दामन्यादिः ।।

पर्श्वादियौधेयादिभ्यामणञौ ।। <5-3-117> ।।

`आयुधजीविसङ्घात्' इत्येव। पर्श्वादिभ्यो यौधेयादिभ्यश्च प्रातिपदिकेभ्य आयुधजीविसङ्घवाचिभ्यः स्वार्थेऽणञौ प्रत्ययौ भवतः। पार्शवः, पार्शवौ, पर्शवः। आसुरः आसुरौ, असुराः। यौधेयः। शौक्रेयः।

पर्शु। असुर। रक्षस्। बाल्हीक। वयस्। मरुत्। दशार्ह। पिशाच। विशाल। अशनि। कार्षापण। सत्वत्। वसु। पर्श्वादिः।

यौधेय। कौशेय। क्रोशेय। शौक्रेय। शौभ्रेय। धार्तेय। वार्तेय। जाबालेय। त्रिगर्त। भरत। उशीनर। यौधेयादिः ।।

अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् ।। <5-3-118> ।।

`आयुधजीविसङ्घात्' इति निवृत्तम्। अभिजिदादिभ्योऽणन्तेभ्यः प्रातिपदिकेभ्यः स्वार्थे यञ् प्रत्ययो भवति। अभिजितोऽपत्यमित्यण्, तदन्ताद्यञ्। आभिजित्यः, आभिजित्यौ, आभिजिताः। वैदभृत्यः, वैदभृत्यौ, वैदभृताः। शालावत्यः, शालावत्यौ, शालावताः। शैखावत्यः। शामीवत्यः। और्णावत्यः। श्रौमत्यः। गोत्रप्रत्ययस्यात्राणो ग्रहणमिष्यते। आभिजितो मुहूर्तः, आभिजितः स्थालीपाक इत्यत्र न भवति ।।

ञ्यादयस्तद्राजाः ।। <5-3-119> ।।

"पूगाञ्ञ्योऽग्रामणीपूर्वात्"(5-3-112/2066) इत्यतः प्रभृति ये प्रत्ययाः ते तद्राजसंज्ञा भवन्ति। तथा चैवोदाहृतम्।

तद्राजप्रदेशाः--"तद्राजस्य बहुषु"(2-4-62/1193) इत्येवमादयः ।।

इति श्रीजयादित्यविरचितायां काशिकावृत्तौ
पञ्चमस्याध्यायस्य तृतीयः पादः

5.4

कशिकावृत्तिः

अथ पञ्चमाध्याये चतुर्थः पादः

पादशतस्य संख्यादेर्वीप्सायां बुन्लोपश्च ।। 5.4.1 ।।

पादशतान्तस्य संख्यादेः प्रातिपदिकस्य वीप्सायां द्योत्यायां वुन् प्रत्ययो भवति। तत्सन्नियोगेन चान्तस्य लोपो भवति।

यस्येतिलोपेनैव सिद्धे पुनर्वचनमनैमित्तिकार्थम्। यस्येतिलोपः परनिमित्तकः, तस्य स्थानिवद्भावात् `पादः पत्' इति पद्भावो न स्यात्। अस्य त्वनैमित्तिकत्वान्न स्तानिवत्त्वम्।

द्वौ द्वौ पादौ ददाति द्विपदिकां ददाति। द्वेद्वेशते ददाति, द्विशतिकां ददाति। `तद्धितार्थ' इति समासः, ततः प्रतययः।

स्वभावाच्च वुन्प्रत्ययान्तं स्त्रियामेव वर्तते।

पादशतस्येति किम्? द्वौ द्वौ माषौ ददाति। संख्यादेरिति किम् ? पादं पादं ददाति वीप्सायामिति किम्? द्वौ पादौ ददाति। द्वे शते ददाति।

पादशतग्रहणमनर्थकम्; अन्यत्रापि दर्शतनात्। द्विमोदकिकां ददाति, त्रिमोदकिकां ददाति ।।

दण्डव्यवसर्गयोश्च ।। 5.4.2 ।।

दमनम्=दण्डः, दानम्=व्यवसर्गः। दण्डव्यवसर्गयोर्गम्यमानयोः पादशतान्तस्य प्रातिपदिकस्य संश्यादेर्वुन् प्रत्ययो भवति, अन्तलोपश्च। अवीप्सार्थोऽयमारम्भः। द्वौ पादौ दण्डितः द्विपदिकां दण्डितः। द्वौ पादौ व्यवसृजति द्विपदिकां व्यवसृजति। द्विशतिकां दण्डितः। त्रिशतिकाम्। द्विशतिकां व्यवसृजति। त्रिशतिकाम् ।।

स्थूलादिभ्यः प्रकारवचने कन् ।। 5.4.3 ।।

स्थूलादिभ्यः प्रकारवचने द्योत्ये कन् प्रत्ययो भवति। जातीयरोऽपवादः। प्रकारः=विशेषः। स्थूलप्रकारः स्थूलकः। अणुकः।

* कन्प्रकरणे चञ्चद्-बृहतोरुपसंख्यानम् *। चञ्चत्प्रकारः चञ्चत्कः। बृहत्कः।
`चञ्चबृहयोः' इति केचित्पठन्ति, तेषाम्-चञ्चकः, बृहक इति उदाहरणं द्रष्टव्यम्।
स्थूल। अणु। माष। इषु। कृष्ण तिलेषु। यव व्रीहिषु।
* पाद्यकालावदाताः सुरायाम् *। * गोमूत्र आच्छादने *। *सुराया अहौ *। *जीर्ण शालिषु *। * पत्त्रमूले समस्तव्यस्ते *। कुमारीपुत्र। कुमार। श्वशुर। मणि। स्थूलादिः ।।

अनत्यन्तगतौ क्तात् ।। 5.4.4 ।।
अत्यन्तगतिः=अशेषसम्बन्धः, तदभावोऽनत्यन्तगतिः। अनत्यन्तगतौ गम्यमानायां क्तान्तात्कन्प्रत्ययो भवति। भिन्नकः। छिन्नकः।
अनत्यन्तगताविति किम् ? भिन्नम्। छिन्नम् ।।

न सामिवचने ।। 5.4.5 ।।
सामिवचने उपपदे क्तान्तात्कन्प्रत्ययो न भवति। सामिकृतम्। सामिभुक्तम्।
वचनग्रहणं पर्यायार्थम्। अर्धकृतम्। नेमकृतम्।
सामिवचने प्रतिषेधानर्थक्यम्; प्रकृत्याभिहितत्वात् ? एवं तर्हि नैवायमनत्यन्तगतौ विहितस्य कनः प्रतिषेधः, किं तर्हि? स्वार्थिकस्य।
केन पुनः स्वारिथिकः कन्विहितः ? एतदेव ज्ञापकमनुमास्यतेभवति सवार्थे कन्निति। तत्र यदेतदुच्यते-`एवं हि सूत्रमभिन्नतरकं भवति', `एतैर्हि' बहुतरकं व्याप्यते' इत्येवमादि, तदुपपन्नं भवति' ।।

बृहत्या आच्छादने ।। 5.4.6 ।।
कन्ननुवर्त्तते, न प्रतिषेधः। बृहतीशब्दादाच्चादने वर्त्तमानात् स्वार्थे कन्प्रत्ययो भवति। बृहतिका।
आच्छादने इति किम्? बृहती छन्दः ।।

अषडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात्खः ।। 5.4.7 ।।
अषडक्ष, आशितङ्गु, अलङ्कर्म, अलम्पुरुष-इत्यतेब्योऽध्युत्तरपदाच्च स्वार्थे खः प्रत्ययो भवति। अविद्यमानानि पडक्षीण्यस्येति बहुव्रीहिः, `बहुव्रीहौ सक्थ्यक्ष्णोः' इति षच्, ततः खप्रत्ययः। अषडक्षीणो मन्त्रः। यो द्वाभ्यामेव क्रियते न बहुभिः। आशिता गावोऽस्मिन्नरण्ये आशितङ्गवीनमरण्यम्। निपातनात्पूर्वपदस्य मुमागमः।
अलङ्कमन्, अलम्पुरुष इति `पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' इति समासः। अलङ्कर्मणे अलङ्कर्मीणः। अलम्पुरुषाय अलम्पुरुषीणाः।
अध्युत्तरपदस्तत्पुरुषः। अधिशब्दः शौण्डादिषु पठ्यते। राजाधीनः। नित्यश्चायं प्रत्ययः; उत्तरत्र विभाषाग्रहणात्।
अन्येऽपि स्वार्थिका नित्याः प्रत्ययाः स्मर्यन्ते-तमबादयः प्राक्कनः, ञ्यादयः प्राग्वुनः, आमादयः प्राङ् मयटः, बृहतीजात्यन्ताः समासानताश्चेति ।।

विभाषाञ्चेरदिक्स्त्रियाम् ।। 5.4.8 ।।
अञ्चत्यन्तात्प्रातिपदिकाददिक्श्त्रियां वर्त्तमानात्स्वार्थे विभाषा खः प्रत्ययो भवति। प्राक्, प्राचीनम्। अर्वाक्, अर्वाचीनम्।
अधिक्स्त्रियामिति किम्? प्राची दिक्। प्रतीची दिक्। दिग्ग्रहणं किम्? प्राचीना ब्राह्मणी। अवाचीना शिखा। स्त्रीग्रहणं किम् ? प्राचीनं दिग्रमणीयम्। उदीचीनं दिग्रमणीयम् ।।

जात्यन्ताच्छ बनधुनि ।। 5.4.9 ।।
जात्यन्तात्प्रातिपदिकाद् बन्धुनि वर्त्तमानात्स्वार्थे छः प्रत्ययो भवति। बध्यतेऽस्मिञ्जातिरिति बन्धुशब्देन द्रव्यमुच्यते। येन ब्राह्मणत्वादिजातिर्व्यज्यते तद् बन्धु=द्रव्यमुच्यते। ब्राह्मणजातीयः, क्षत्त्रियजातीयः, वैश्यजतीयः, इति ब्राह्मणादिरेवोच्यते।
बन्धुनीति किम् ? ब्राह्मणजीतिः शोभना ।।

स्थानान्ताद्विभाषा सस्थानेनेति चेत् ।। 5.4.10 ।।
स्थानान्तात्प्रातिपदिकाद्विभाषा छः प्रत्ययो भवति सस्थानेन चेत् स्थानान्तमर्थवद्भवति। सस्थान इति तुल्य उच्यते, समानं स्थानमस्येति कृत्वा। पित्रा तुल्यः पितृस्थानीयः, पितृस्थानः। मातृस्थानीयः, मातृस्थानः। राजस्थानीयः, राजस्थानः।
सस्थानेनेति किम् ? गोस्थानम्। अश्वस्थानम्।
इतिकरणो विवक्षार्थः। तेन बहुव्रीहिः सस्थानशब्दोऽर्थमुपस्तापयति, न तत्पुरुषः।

चेच्छब्दः सम्बनधार्थः। द्वयोर्विभाषयोर्मध्ये नित्यविधयइति पूर्वत्र नित्यविधयः ।।

किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ।। 5.4.11 ।।
किम एकारान्तात्तिङ्नतादव्ययेभ्यश्च यो विहितो घः स किमेत्तिङ्व्ययघः, तदन्तात्प्रातिपदिकादद्रव्यप्रकर्षे आमु प्रत्ययो भवति। यद्यपि द्रव्यस्य स्वतः प्रकर्षो नास्ति, तथापि क्रियागुणस्थः प्रकर्षो यदा द्रव्ये उपचर्यते तदाऽयं प्रतिषेधः। क्रियागुणयोरेवायं प्रकर्षे प्रत्ययः। किंतराम्। किंतमाम्। पूर्वाह्णेतराम्। पूर्वाह्णेतमाम्। पचतितरम्। पचतितमामअ। उच्चैस्तराम्। उच्चैस्तमाम्।
अद्रव्यप्रकर्ष इति किम्? उच्चैस्तरः पर्वतः। उच्चैस्तमः ।।

अमु चच्छन्दसि ।। 5.4.12 ।।
किमेत्तिङव्ययघादद्रव्यप्रकर्षे अमु प्रत्ययो भवति छन्दसिविषये। चकारादामु च। प्रतरं नयामः। प्रतरां वस्यः। स्वरादिषु अम्, आम्, इति पठ्यते, तस्मात्तदन्तस्याव्ययत्वम् ।।

अनुगादिनष्ठक् ।। 5.4.13 ।।
अनुगदतीत्यनुगादी। अनुगादिन्शब्दात्स्वार्थे ठक् प्रत्ययो भवति। आनुगादिकः ।।

अचः स्त्रियामञ् ।। 5.4.14 ।।
`कर्मव्यतिहारे णच् स्त्रियाम्' इति णज्विहितः, तदन्तात्स्वार्थेऽञ् प्रत्ययो भवति स्त्रियां विषये। व्यावक्रोशी। व्यावहासी वर्त्तते।
स्त्रीग्रहणं किमर्थम्, यावता णच् स्त्रियामेव विहितः, ततः स्वार्थिकस्तत्रैव भविष्ति? एवं तर्ह्येतज् ज्ञापयति--स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्तेऽपीति। तेन गुडकल्पा द्राक्षा, तैलकल्पा प्रसन्ना, देव एव देवतेत्येवमादि उपपन्नं भवति।

अणिनुणः ।। 5.4.15 ।।
`अभिविधौ भावे इनुण्' विहितः, तदन्तास्त्वार्थेण् प्रत्ययो भवति। सांराविणं वर्त्तते। सांकूटिनम् ।।

विसारिणे मत्स्ये ।। 5.4.16 ।।
विसरतीति विसारी। विसारिन्-शब्दात्स्वार्थेऽण् प्रत्ययो भवति मन्स्येऽभिधेये। वैसारिणो मत्स्यः।
मत्स्य इति किम् ? विसारी देवदत्तः ।।

संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ।। 5.4.17 ।।
संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने वर्त्तमानेभ्यः स्वार्थे कृत्वासुच् प्रत्ययो भवति। पौनःपुन्यम्=अभ्यावृत्तिः। एककर्तृकाणां तुल्यजातीयानां क्रियाणां जन्मसंख्यानं क्रियाभ्यावृत्तिगणनं तत्र प्रत्ययः। पञ्चवारान् भुङ्क्ते पञ्चकृत्वः। सप्तकृत्वः।
संख्याया इति किम् ? भूरीन्वारान् भुङ्क्ते।
क्रियाग्रहणं किमर्थम्, यावताभ्यावृत्तिः क्रियाया एव सम्भवति, न द्रव्यगुणयोः? उत्तरार्थं क्रियाग्रहणम्।
`एकस्य सकृच्च' इत्यत्रापि क्रियैव गण्यते, नाभ्यावृत्तिः; असम्भवात्।
अभ्यावृत्तिग्रहणं किम् ? क्रियामात्रगणने मा भूत्---पञ्चपाकाः, दशपाकाः।
गणनग्रहणं किमर्थम्, यावता गणनात्मिकैव संख्या ? अक्रियमाणे गणनग्रहणे क्रियाभ्यावृत्तौ वर्तमानेभ्यः संख्येयवचनेभ्य एव प्रत्ययः स्यात्--शतवारान्भुङ्क्ते शतकृत्व इति। इह न स्यात्---शतं वाराणां भुङ्क्त इति, न ह्यत्राभ्यावृत्तौ शतशब्दः; संख्यानमात्रवृत्तित्वात्। गणनग्रहणात्तु सर्वत्र सिद्धं भवति।

द्वित्रिचतुर्भ्यः सुच् ।। 5.4.18 ।।
द्वि, त्रि, चतुर--इत्येतेभ्यः संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने वर्तमानेभ्यः सुच् प्रत्ययो भवति। कृत्वसुचोऽपवादः। द्विर्भुङ्क्ते। त्रिर्भुङ्क्ते। चतुर्भुक्तम्। चकारः स्वरार्थः।।

एकश्य सकृच्च ।। 5.4.19 ।।
एकशब्दस्य सकृदित्ययामादेशो भवति सुच्च प्रत्ययः क्रियागणने। कृत्वसुचोऽपवादः। अभ्यावृत्तिस्त्विह सम्भवति। सकृद् भुङ्क्ते। सकृद धीते ।
एकः पाकः--इत्यत्र न भवति; अनभिधानात् ।।

विभाषा बहोर्धाऽविप्रकृष्टकाले ।। 5.4.20 ।।
बहुशब्दात् क्रियाभ्यावृत्तिगणने वर्त्तमानात् विभाषा धा प्रत्ययो भवति। कृत्वसुचोऽपवादः। पक्षे सोऽपि भवति। अविप्रकृष्टग्रहणं क्रियाभ्यावृत्तिविशेषणम्।
क्रियाणामुत्पत्तयश्चेदासन्नकालाः भवन्ति, न विप्रकृष्टकालाः। बहुधा दिवसस्य भुङ्क्ते। बहुकृ-त्वो दिवसस्य भुङ्क्ते।
अविप्रकृष्टकला इति किम्? बहुकृत्वो मासस्य भुङ्क्ते ।।

तत्प्रकृतवचने मयट् ।। 5.4.21 ।।
`तत्' इति प्रथमा समर्थविभक्तिः, प्राचुर्येण प्रस्तुतम्=प्रकृतम्। प्रथमासमर्थात् प्रकृतोपाधिकेऽर्थे वर्तमानात्स्वार्थे मयट् प्रत्ययो भवति। टकारो ङीबर्थः। अन्नं प्रकृतम् अन्नमयम्। अपूपमयम्।
अपरे तु पुनरेवं सूत्रार्थमाहुः---प्रकृतमित्युच्यतेऽस्मिन्नति प्रकृतवचनम्। तदिति प्रथमासमर्थात् प्रकृतवचनेऽभिधेये मयट् प्रत्ययो भवति। अन्नं प्रकृतमस्मिन्नन्नमयो यज्ञः। अपूपमयं पर्व। वटकमयी यात्रा।
द्वयमपि प्रमाणम्; उभयथा सूत्रप्रणयनात् ।।

समूहवच्च बहषु ।। 5.4.22 ।।
`तत्प्रकृतवचने' इत्येव। बहुषु प्रकृतेषूच्यमानेषु समूहवत्प्रत्यया भवन्ति। चकारान्मयट् च। मोदकाः प्रकृताः=प्राचुर्येण प्रस्तुताः मौदकिकम्, मोदकमयम्।
शाष्कुलिकम्, शष्कुलीमयम्।
अतिवर्तन्तेऽपि स्वार्थिकाः प्रकृतितो लिङ्गवचनानि।
द्वितीये सूत्रार्थे--मोदकाः प्रकृता अस्मिन्यज्ञे मौदकिको यज्ञः, मोदकमयः. शाष्कुलिकः, शष्कुलीमयः ।।

अनन्तावसयेतिहभेषजाञ् ञ्यः ।। 5.4.23 ।।
अनन्तादिभ्यः स्वार्थे ञ्यः प्रत्ययो भवति। अनन्त एव आनन्त्यम्। आवसथ एवावसथ्यम्। इति ह ऐतिह्यम्। निपातसमुदायोऽयमुपदेशपारम्पर्ये वर्तते।
भेषजमेव भैषज्यम्।
महाविभाषया विकल्पते प्रत्ययः ।।

देवतान्तात्तादर्थ्ये यत् ।। 5.4.24 ।।
देवताशब्दान्तात् प्रातिपदिकाच्चतुर्थीसमर्थात् तादर्थ्ये यत् प्रत्ययो भवति। तदर्थ एव तादर्थ्यम्। चातुर्वर्ण्यादित्वात्ष्यञ्। तदिति प्रकृत्यर्थो निर्दिश्यते।
अग्निदेवताये इदम् अग्निदेवत्यम्। पितृदेवत्यम्। वायुदेवत्यम् ।।

पादार्घाभ्यां च ।। 5.4. 25 ।।
`तादर्थ्ये' इत्येव। पादार्घशब्दाभ्यां चतुर्थीसमर्थाभ्यां तादर्थ्येऽभिधेये यत्प्रत्ययो भवति। पादार्थमुदकं पाद्यम्। अर्घ्यम्। अनुक्तसमुच्चयार्थश्चकारः।
यथादर्शनमन्यत्रापि प्रत्ययो भवति--एष वै सप्तदशाक्षरश्छन्दस्यः प्रजापतिः।
वसु, अयस्, ओक, कवि, क्षेम, उदक, वर्चस्, निष्केवल, उक्थ, जन, पूर्व, नव, सूर, मर्त, यविष्ठ---इत्येतेभ्यः छन्दसि स्वार्थे यत्प्रत्ययो भवति। अग्निरीसे वसव्यस्य। अयस्यो वसानाः। द्वितायाबहुवचनस्यालुक्। अयो वसाना इत्यर्थः। स्वओक्ये। कव्योऽसि। क्षेम्यस्य वस्यति। वायुर्वर्चस्यः। निष्केवल्यं शंसति।
उक्थ्यं शंसति। जन्यं ताभिः। पूर्व्या विशः। स्तोमैर्जनयामि नव्यम्। सूर्यः। मर्त्यः। यविष्ठ्यः ।।
* आमुष्यायणामुष्यमुत्रिकेत्युपसंख्यानम् *।
* समशब्दादावतुप्रत्ययो वक्तव्यः *। समावद्वसतु।
* नवस्य नू आदेशः, त्नप्तनप्खाश्च प्रत्ययाः *। नूत्नम्। नूतनम्। नवीनम्।
* नश्च पुराणे प्रात् *। पुराणे पर्त्तमानात् प्रशब्दान्न प्रत्ययो भवति। चकारात् त्नप्तनप्शाश्च। प्रणम्। प्रत्नम्। प्रीणम्।
* भागरूपनामभ्यो धेयः प्रत्ययो वक्तव्यः *। भागधेयम्। रूपधेयम्। नामधेयम्।
* मित्त्राच्छन्दसि *। मित्त्रधेयं यतस्व।
* आग्नीध्रसाधारणादञ् *। आग्नीध्रम्। साधारणम्। स्त्रियां ङीप्---आग्नीध्री, साधारणी।
वाप्रकरणाच्च विकल्पन्ते एतान्युपसंख्यानानि, तेन यथाप्राप्तमपि भवति---आग्नीध्रा शाला, साधारणा भूरिति।
* अयवसमरुद्भ्यां छन्दस्यञ्वक्तव्यः *। आयवसे रेमन्ते। मारुतं शर्धः ।।

अतिथेर्ञ्यः ।। 5.4. 26 ।।
`तादर्थ्ये' इत्येव। अतिथिशब्दाच्चतुर्थीसमर्थात् तादर्थ्येऽभिधेये ञ्यः प्रत्ययो भवति। अतिथये इदम् आतिथ्यम् ।।

देवात्तल् ।। 5.4.27 ।।
`तादर्थ्ये' इति निवृत्तम्। देवशब्दात् स्वार्थे तल् प्रत्ययो भवुति। देव एव देवता।।
अवेः कः ।। 5.4.28 ।
अविशब्दात् स्वार्थे कः प्रत्ययो भवति। अविरेवाविकः ।।

यावादिभ्यः कन् ।। 5.4.29 ।।
`याव'--इत्येवमादिभ्यः स्वार्थे कन् प्रत्ययो भवति। याव एव यावकः। मणिकः।
याव। मणि। अस्थि। चण्ड। पीतस्तम्ब। * ऋतावुष्णशीते *। पशौ लूनवियाते *। * अणु निपुणे *। * पुत्र कृत्रिमे *। * स्नात वेदसमाप्तौ *। * शून्य रिक्ते *। * दान कुत्सिते *। * तनु सूत्रे *। * ईयसश्च *। श्रेयस्कः। ज्ञात। * कुमारीक्रीडनकानि च *। यावादिः ।।

लोहितान्मणौ ।। 5.4.30 ।।
लोहितशब्दान्मणौ वरत्तमानात्स्वार्थे कन् प्रत्ययो भवति। लोहितो मणिः लोहितकः।।

वर्णे चानित्ये ।। 5.4.31 ।।
अनित्ये वर्णे वर्त्तमानाल्लोहितशब्दात्स्वार्थे कन्प्रत्ययो भवति। लोहितकः कोपेन। लोहितकः पीडनेन।
अनित्य इति किम् ? लोहितो गौः। लोहितं रुधिरम्।
* लोहिताल्लिङ्गबाधनं वा वक्तव्यम् *। लोहितिका कोपेन। लोहिनिका कोपेन ।।

रक्ते ।। 5.4.32 ।
लाक्षादिना रक्ते यो लोहितशब्दः, तस्मात् कन्प्रत्ययो भवति। लोहितकः कम्बलः. लोहितकः पटः।
लिङ्गबाधनं वेत्येव---लोहितिका, लोहिनिका शाटी ।।

कालाच्च ।। 5.4.33 ।।
`वर्णे चानित्ये', `रक्ते' इति द्वयमप्यनुवर्तते। कालशब्दादनित्ये वर्त्तमानाद्रक्ते च कन् प्रत्ययो भवति। कालकं मुखं वैलक्ष्येण। रक्ते--कालकः पटः। कालिका शाटी ।।

विनयादिभ्यष्ठक् ।। 5.4.34 ।।
`विनय'--इत्येवमादिभ्यः स्वार्थे कन् प्रक्ययो भवति। विनय एव वैनयिकः। सामयिकः। यौपयिकः। विभाषाग्रहणेन विकल्प्यते प्रत्ययः।
विनय। समय। * उपायाद् ह्रस्वत्वं च *। सङ्गति। कथञ्चित्। अकस्माद्। समयाचार। उपचार। समचार। व्यवहार। सम्प्रदान। समुत्कर्ष। समूह। विशेष। अत्यय। विनयादिः ।।

वाचो व्याहृतार्थायाम् ।। 5.4.35 ।।
व्याहृतः=प्रकाशितोऽर्थो यस्यास्तस्यां वाचि वर्त्तमानाद्वाच्शब्दात्स्वार्थे ठक् प्रत्ययो भवति। पूर्वमन्येनोक्तार्थत्वात् सन्देशवाग्=व्याहृतार्थेत्युच्यते। वाचिकं कथयति। वाचिकं श्रद्दधे।
व्याहृतार्थायामिति किम्? मधुरा वाक् देवदत्तस्य ।।

तद्युक्तात्कर्मणोऽण् ।। 5.4.36 ।।
व्याहृतार्थया वाचा यत्कर्म युक्तं तदभिधायिनः कर्मशब्दात् स्वार्थेऽण् प्रत्ययो भवति। कर्मैव कार्मणम्। वाचिकं श्रुत्वा तथैव यत्कर्म क्रियते तत्कार्म मित्युच्यते।
* अण्प्रकरणे कुलालवरुडनिषादककर्मारचण्डालमित्त्रामित्रेभ्यशछन्दस्पुपसंख्यानम् *। कुलाल एव कौलालः। वारुडः नैषादः। कार्मारः। चाण्डालः। मैत्त्रः। आमित्रः।

* सान्नाय्यानुजावरानुषूकाष्टुभचातुष्प्राश्यराक्षोघ्नवैयातवैकृतवारिवस्कृताग्रायणाग्रहायणसान्तपनाः *। एतेऽणन्ताः स्वार्थिकाश्छन्दसि भाषायां चेष्टन्ते।

ओषधेरजातौ ।। 5.4.37 ।।
ओषधिशब्दादजातौ वर्तमानात्स्वार्थेऽण् प्रत्ययो भवति। औषधं पिबति। औषधं ददाति।
अजाताविति किम्? ओषधयः क्षेत्रे रूढा भवन्ति ।।

प्रज्ञादिभ्यश्च ।। 5.4.38 ।।
प्रजानातीति प्रज्ञः। `प्रज्ञ'-इत्येवमादिभ्यः प्रातिपदिकेभ्यः स्वार्थेण् प्रत्ययो भवति। प्रज्ञ एव प्राज्ञः। स्त्री-प्राज्ञी। यस्यास्तु प्रज्ञा विद्यते सा प्राज्ञा भवति।
`प्रज्ञाश्रद्धार्चावृत्तिभ्योऽणः' इति।
विदन्नित्यत्र पठ्यते, विदेः शत्रन्तस्य ग्रहणम्, `विदेः शतुर्वसुः' इत्यत एव ज्ञापकात् पाक्षिको वस्वादेशः।
अन्यतरस्यांग्रहणं वा तत्रानुवर्तते--`तुह्योस्तातङाशिष्यन्यतरस्याम्' इति।
प्रज्ञ। वणिक्। उशिक्। उष्णिक्। प्रत्यक्ष। विद्वस्। विदन्। षोडन्। षोडश। विद्या। मनस्। * श्रोत्र शीरीरे *। श्रौत्रम्। * जुह्वत् कृष्णमृगे *। चिकीर्षत्। चोर। शक। योध। वक्षस्। धूर्त। वस्। एत्। मरुत्। क्रुङ्। राजा। सत्वन्तु। दशार्ह। वयस्। आतुर। रक्षस्। पिशाच। अशनि। कार्षापण। देवता। बन्धु। प्रज्ञादिः ।।

मृदस्तिकन् ।। 5.4.39 ।।
मृच्छब्दात्स्वार्थे तिकन् प्रत्ययो भवति। विकल्पः सर्वत्रानुवर्तते। मृदेव मृत्तिका ।।

सस्नौ प्रशंसायाम् ।। 5.4.40 ।।
प्रशंसोपाधिकेऽर्थे वर्त्मानाद् मृच्छब्दात् स, स्न-इत्येतौ प्रत्ययौ भवतः। रूपपोऽपवादः। प्रशस्ता मृद् मृत्सा। मृत्स्ना।
नित्यश्चायं प्रत्ययः; उत्तरसूत्रेऽन्यतरस्यांग्रहणात् ।।

वृकज्येष्ठाभ्यां तिल्तातिलौ चच्छन्दसि ।। 5.4.41 ।।
`प्रशंसायाम्' इत्येव। वृकज्येष्ठाभ्यां प्रसंसोपाधिकेऽर्थे वर्तमानाभ्यां यतासंख्यं तिल्-तालिलौ प्रत्ययौ भवतश्छन्दसि विषये। रूपपोऽपवादः। वृकतिः। ज्येष्ठतातिः ।।

बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ।। 5.4.42 ।।
बह्वर्थादल्पार्थाच्च कारकाभिधायिनः शब्दाच् शस् प्रत्ययो भवति अन्यतरस्याम्। विशेषानभिधानाच्च सर्वं कर्मादिकारकं गृह्यते। बहूनि ददाति, बहुशो ददाति। अल्पं ददाति, अल्पशो ददाति।
बहुभिर्ददाति, बहुशो ददाति। अल्पेन, अल्पशः। बहुभ्यः, बहुशः। अल्पाय, अल्पशः। इत्येवमाद्युदाहर्यम्।
बह्वल्पार्थादिति किम् ? गां ददाति। अश्वं ददाति। कारकादिति किम् ? बहूनां स्वामी। अल्पानां स्वामी।
अर्थग्रहणात् पर्यायेब्योऽपि भवति---भूरिशो ददाति। स्तोकशो ददाति।
* बह्वल्पार्थान्मङ्गलामङ्गलवचनम् *। यत्र मङ्गलं गम्यते तत्रायं प्रत्यय इष्यते। बहुशो ददातीत्याब्युदयिकेषु कर्मसु। अल्पशो ददातीत्यनिष्टेषु कर्मसु ।।

संख्यैकवचनाच्च वीप्सायाम् ।। 5.4.43 ।।
संख्यावाचिभ्यः प्रातिपदिकेभ्य एकवचनाच्च वीप्सायां द्योत्यायां शस् प्रत्ययो भवति अन्यतरस्याम्। द्वौ द्वौ मोदकौ ददाति द्विशः। त्रिशः। एकवचनात्खल्वपि-कार्षापणं कार्षापणं ददाति कार्षापणशः। माषशः। पादशो ददाति।
एकोऽर्थ उच्यते येन तदेकवचनम्। कार्षापणादयश्च परिमाणशब्दा वृत्तावेकार्था एव भवन्ति ।
संख्यैकवचनादिति किम् ? घटं घटं ददाति। वीप्सायामिति किम् ? द्वौ ददाति। कार्षापणं ददाति।
`कारकात्' इत्येव--द्वयोर्द्वयोः स्वामी। कार्षापणस्य कार्षापणस्य स्वामी ।।

प्रतियोगे पञ्चम्यास्तसिः ।। 5.4.44 ।।
प्रतिना कर्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्तसिः प्रत्ययो भवति। प्रद्युम्नो वासुदेवतः प्रति। अभिमन्युरर्जुनतः प्रति।

वाग्रहणानुवृत्तेर्विकल्पेन भवति--वासुदेवात्, अर्जुनादित्यपि भवति।

* तसिप्रकरणे आद्यादिभ्य उपसंख्यानम् *। आदौ आदितः। मध्यतः। पार्श्वतः। पृष्ठतः. आकृतिगणश्चायम् ।।

अपादाने चाहीयरुहोः ।। 5.4.45 ।।
अपादाने या पञ्चमी तस्याः पञ्चम्या वा तसिः प्रत्ययो भवति। तच्चेदपादानं हीयरुहोः सम्बन्धि न भवति। ग्रमत आगच्छति, ग्रामात्। चोरतो बिभेति, चोरात्, अध्ययनतः पराजयते, अध्ययनात्।
अहीयरुहोरिति किम् ? सार्थाद्धीयते। पर्वतादवरोहति।
हीयते इति विकारनिर्द्देशो जहातेः प्रतिपत्त्यर्थः, जीहीतेर्मा भूत्---भूमित उज्जिहीते, भूमेरुज्जिहीते।
कथम् `मन्त्रो हीनः स्वरतो वर्णतो वा' इति? नैषा पञ्चमी; किं तर्हि, तृतीया। वंरेण वर्णेन हीन इत्यर्थः ।।

अतिग्रहाव्यथनक्षेपेष्वर्तरि तृतीयायाः ।। 5.4.46 ।।
अतिक्रम्य ग्रहः=अतिग्रहः। अचलनम्=अव्यथनम्। क्षेपः=निन्दा। अतिग्रहादिविषये या तृतीया तदन्ताद्वा तसिः प्रत्ययो भवति, सा चेत् कर्तरि न भवति। वृत्तेनातिगृह्यते वृततोऽतिगृह्यते। चारित्रेणातिगृह्यते चारित्रतोऽतिगृह्यते। सुष्ठु वृतवानन्यानतिक्रम्य वृत्तेन गृह्यत इत्यर्थः।
अव्यथने--वृत्तेन न व्यथते वृत्ततो न व्यथते। चारित्रेण न व्यथते चारित्रतो व्यथते। वृत्तेन न चलतीत्यर्थः।
क्षेपे---वृत्तेन क्षिप्तो वृत्ततः क्षिप्तः चारित्रेण क्षिप्तः चारित्रतः क्षिप्तः। वृत्तेन निन्दित इत्यर्थः।
अकर्तरीति किम्? देवदत्तेन क्षिप्तः ।।

हीयमानपापयोगाच्च ।। 5.4.47 ।।
`अकर्तरि तृतीययाः' इत्येव। हीयमानेन पापेन च योगो यस्य तद्वाचिनः शब्दात्परा या तृतीया विभक्तिरकर्तरि तदन्ताद्वा तसिः प्रत्ययो भवति। वृत्तेन हीयते वृत्ततो हीयते। चारित्रेण हीयते चारित्रतो हीयते। पापयोगात्---वृत्तेन पापः वृत्ततः पापः। चारित्रेण पापः चारित्रतः पापः।
क्षेपस्य चाविवक्षायां तत्त्वाख्यायामिदमुदाहरणम्। क्षेपे हि पूर्वेणैव सिद्धम्।
अकर्तरीत्येव--देवदत्तेन हीयते ।।

षष्ठ्या व्याश्रये ।। 5.4.48 ।।
नानापक्षसमाश्रयः=व्याश्रयः। व्याश्रये गम्यमाने षष्ठ्यन्ताद् वा तसिः प्रत्ययो भवति। देवा अर्जुनतोऽभवन्। आदित्याः कर्णतोऽभवन। षष्ठी चात्र पक्षापेक्षैव। अर्दजुनस्य पक्षे, कर्णस्य पक्ष इत्यर्थः।
व्याश्रय इति किम् ? वृक्षस्य शाखा ।।

रोगाच्चापनयने ।। 5.4.49 ।।
रोगः=व्याधिः। तद्वाचिनः शब्दाद्या षष्ठी विभक्तिः तदन्ताद्वा तसिः प्रत्ययो भवति अपनयने गम्यमाने। अपनयनम्=प्रतीकारः, चिकित्सेत्यर्थः. प्रवाहिकातः कुरु। कासतः कुरु। छर्दिकातः कुरु। प्रतीकारम्स्याः कुर्वित्यर्थः।
अपनयन इति किम् ? प्रवाहिकायाः प्रकोपनं कुरु।

अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः ।। 5.4.50 ।।
कारणस्य विकाररूपेणाभूतस्य तदात्मना भावः=अभूततद्भावः। सम्पद्यतेः कर्त्ता सम्प कर्ता वर्तमानात् सम्पद्यकर्तरि प्रातिपदिकादभूततद्भावे गम्यमाने कृभ्वस्तिभिर्धातुभियोगे च्विः प्रत्ययो भवति। अशुक्लः शुक्लः सम्पद्यते, तं करोति शुक्लीकरोति। मलिन शुक्लीकरोति शुक्लीभवति। शुक्लीस्यात्। घटीकरोति मृदम्। धटीभवति। घटीसयात् ।
अभूततद्भाव इति किम्? शुक्लं करोति। नात्र प्रकृतिर्विवक्षिता। कृभ्वस्तियोग इति किम्? अशुक्लः शुक्लो जायते।
सम्पद्यकर्तरीति किम्, यावता अभूततद्भावसामर्थ्याल्लब्धमेव सम्पद्यकर्तृत्वम् ? कारकान्तरसम्पत्तौ मा भूत्-अदेवगृहे देवगृहे सम्पद्यते। देवगृहस्याधेयविशेषसम्बन्धेन अभूततद्भावः सत्त्वाधिकरणस्य, न कर्तुरिति ।।

अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च ।। 5.4. 51 ।।

अरुःप्रभृतीनामन्तस्य लोपो भवति च्विश्च प्रत्ययः। अत्र सर्वविशेषणसम्बन्धात्पूर्वेणैव प्रत्ययः सिद्धः, लोपमात्रार्थ आरम्भः। अनरुररुः सम्पद्यते, तं करोति अरूकरोति। अरूभवति। अरूस्यात्। मनस्-उन्मनीकरोति। उन्मनीभवति। उन्मनीस्यात्। चक्षुषु--उच्चक्षूकरोति। उच्चक्षूभवति। उच्चक्षूस्यात्। चेतस्--विचेतीकरोति। विचेतीभवति। विचेतीस्यात्। रहस्-विरहीकरोति। विरहीभवति। विरहीस्यात्। रजस्-विरजीकरोति। विरजीभवति। विरजीस्यात्।

विभाषा साति कार्त्त्न्र्ये ।।5.4.52 ।।

`अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि' इति सर्वमनुवर्तते। अस्मिन्विषये विभाषा सातिः प्रत्ययो भवति कार्त्स्न्ये गम्यमाने। यदि प्रकृतिः कृत्स्नां विकारात्मतामापद्यते इत्यर्थः। अग्निसाद्भवति शस्त्रम्। अग्नीभवति शस्त्रम्। उदकसाद्भवति लवणम्। उदकीभवति लवणम्।
कार्त्स्न्ये इति किम्? एकदेशेन पटः शुक्लीभवति। विभाषाग्रहणं च्वेः प्रापकम्। प्रत्ययविकल्पस्तु महाविभाषयैव सिद्धः ।।

अभिविधौ सम्पदा च ।। 5.4. 53 ।।

अभिविधिः=अभिव्याप्तिः। अभिविधौ गम्यमाने च्विविषये सातिः प्रत्ययो भवति सम्पदायोगे, चकारात् कृभ्वस्तिभिश्च।
विभाषाग्रहणानुवृत्तेश्च्विरप्यभ्यनुज्ञायते। स तु कृभ्वस्तियोग एव भवति, न सम्पदा। अग्निसात्सम्पद्यते। अग्निसाद्भवति। उदकसात्सम्पद्यते। उदकसाद्भवकति लवणम्। अग्नीभवति। उदकीभवति।
अथाभिविधेः कार्त्स्न्यस्य च को विशेषः ? यत्रैकदेशेनापि सर्वाप्रकृतिर्विकारमापद्यते सोऽभिविधिः। यथा--अस्यां सेनायामुत्पातेन सर्व शस्त्रमग्निसात्सम्पद्यते, वर्षासु सर्वं लवणमुदकसात्सम्पद्यत इति। कार्त्स्न्य तु सर्वात्मना द्रव्यस्य विकाररूपापत्तौ भवति।

तदधीनवचने ।। 5.4.54 ।।

`अभूततद्भावे' इति निवृत्तम्; अर्थान्तरोपादानात्। `कृभ्वस्तियोगे', `सम्पदा च' इति वर्तते। तदधीनम्=तदायत्तम्, तत्स्वामिकमित्यर्थः। स्वामिसामान्यम्, ईशितव्यसामान्यं च तदधीनशब्देन निर्दिश्यते। स्वामिविशेषवाचिनः प्रातिपदिकादीशितव्येऽभिधेये सातिः प्रत्ययो भवति कृभ्वस्तिभिः सम्पदा च योगे। राजाधीनं करोति राजसात्करोति। राजसाद्भवति। राजसात्स्यात्। राजसात्सम्पद्यते। ब्राह्मणसात्करोति। ब्राह्मणसाद्भवति। ब्राह्मणसात्स्यात्। ब्राह्मणसात्सम्पद्यते।

देये त्रा च ।। 5.4.55 ।।

`तदधीनवचने' इत्यनुवर्तते, तस्य विशेषणं देयग्रहणम्। दातव्यम्=देयम्, तदधीने देये त्रा प्रत्ययो भवति, चकारात्सातिश्च कृभ्वस्तिभिः सम्पदा च योगे। ब्राह्मणेभ्यो देयमिति यद्विज्ञातम्, तद्यदातेषां समर्पणेन तददीनं क्रियते तदा `त्रा' प्रत्ययः। ब्राह्मणाधीनं देयं करोति ब्राह्मणसात्करोति। ब्राह्मणत्राकरोति। ब्राह्मणत्राभवति। ब्राह्मणत्रास्यात्। ब्रह्मणत्रासम्पद्यते।
देये इति किम् ? राजसाद्भवति राष्ट्रम् ।।

देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ।। 5.4.56 ।।

`सातिः' निवृत्तः, त्राप्रत्ययोऽनुवर्तते। देवादिभ्यः प्रातिपदिकेभ्यो द्वितीयासप्तम्यन्तेभ्यः त्रा प्रत्ययो भवति बहुलम्। `कृभ्वस्तिभिः' इति नात्र सम्बध्यते। सामान्येन विधानम्। देवान् गच्छति देवत्रागच्छति। देवेषु वसति देवत्रावसति। मनुष्यान् गच्चति मनुष्यत्रागच्छति। मनुष्येषु वसति मनुष्यत्रावसति। एवमन्येऽप्युदाहार्याः---पुरुषान्गच्चति पुरुषत्रागच्छति। पुरुषेषु वसति पुरुषत्रावसति। पुरून्गच्चति पुरुत्रागच्छति। पुरुषु वसति पुरुत्रावसति। मर्त्यान् वसति मर्त्यावसति। मर्त्येषु वसति मर्त्यत्रावसति।
बहुलवचनादन्यत्रापि भवति---बहुत्रा जीवतो मन इति ।।

अव्यक्तानुकरणाद् द्व्यजवराद्र्धादनितौ डाच् ।। 5.4.57 ।।

यत्र ध्वनावकारादयो वर्णा विशेषरूपेण न व्यज्यन्ते सोऽव्यक्तः। तस्यानुकरणमव्यक्तानुकरणम्। द्व्यच् अवराद्र्ध यस्य तद् द्व्यजवरार्धम्। अवरशब्दोऽपकर्षे। यस्यापकर्षे क्रियमाणे सुष्ठु न्यूनमर्द्धद्व्यच्कं सम्पद्यते, तस्मादव्यक्तानुकरणादनितिपराड्डाच्प्रत्ययो भवति। `कृभ्वस्कतियोगे' इत्यनुवर्तते। तस्य च द्विर्वचने कृते द्व्यजवरार्धम्, ततः प्रत्ययः।
`डाचि बहुलं द्वे भवतः' इति विषयसप्तमी। डाचि विवक्षिते द्विर्वचनमेव पूर्वं क्रियते, पश्चात्प्रत्ययः। पटपटाकरोति। पटपटाभवति। पटपटास्यात्। दमदमाकरोति। दमदमाभवति। दमदमास्यात्। अव्यक्तानुकरणादिति किम् ? दृषत्करोति। द्व्यजवराद्र्धादिति किम् ? श्रत्करोति। अवरग्रहणं किम् ? खरटखरटाकरोति। त्रपटत्रपटाकरोति। अनिताविति किम् ? पटिति करोति।
चकारः स्वरार्थः---स्वरितबाधनार्थः। पटपटासि--अत्र `स्वरितो वानुदात्तेऽपदादौ' इति स्वरितो न भवति।
केचित्-`द्व्यजवराध्र्यात्' इति यकारं पठन्ति, स स्वार्थिको विज्ञेयः ।।

कृञो द्वितीयतृतीयशम्बषीजात्कृषौ ।। 5.4.58 ।।

द्वितीयतृतीयादिभ्यः शब्देभ्युः कृषावभिधेयायां डाच् प्रत्ययो भवति कृञो योगे, नान्यत्र। पुनः कृञ्ग्रहणं भवत्स्योर्निवृत्त्यर्थम्। द्वितीयाकरोति। द्वितीयं कर्षणं विलेखनं करोतीत्यर्थः। तृतीयाकरोति। शम्बाकरोति। अनुलोमकृष्टं क्षेत्रं पुनः प्रतिलोमं कृषतोत्यर्थः। बीजाकरोति। सह बीजेन विलेखनं करोतित्यर्थः।
कृषाविति किम् ? द्वितीयं करोति पदम् ।।

संख्यायाश्च गुणान्तायाः ।। 5.4.59 ।।

`कृञः' इत्यनुवर्तते, `कृषौ' इति च। संक्यावाचिनः शब्दस्य गुणशब्दोऽन्ते=समीपे यत्र सम्भवति सा संख्या गुणान्तेत्युच्यते।
तादृशात्प्रातिपदिकात्कृषावभिधेयायां डाच्प्रत्ययो भवति कृञो योगे। द्विगुणं विलेखनं करोति क्षेत्रस्य द्विगुणाकरोति क्षेत्रम्। त्रिगुणाकरोति।
कृषाविति किम् ? द्विगुणां करोति रज्जुम् ।।

समयाच्च यापनायाम् ।। 5.4.60 ।।

`कृञः' इत्येव। `कृषौ' इति निवृत्तम्। कर्तव्यस्यावसरप्राप्तिः=समयः, तस्यातिक्रमणम्=यापना। समयशब्दाद्यापनायां गम्यमानायां डाच् प्रत्ययो भवति कृञो योगे। समयाकरोति। समयं यापयति, कालक्षेपं करोतीत्यर्थः।
यापनायामिति किम् ? समयं करोति ।।

सपत्त्रनि,पत्त्रादतिव्यथने ।। 5.4.61 ।।

`कृञः' इत्येव। सपत्त्रनिष्पत्त्रशब्दाभ्यामतिव्यथने डाच् प्रत्ययो भवति कृञो योगे सति। अतिव्यथनम्=अतिपीडनम्। सपत्त्राकरोति मृगं व्याधः। सपत्त्रं शरमस्य शरीरे प्रवेशयतीत्यर्थः। निष्पत्त्राकरोति। शरीराच्छरमपरपार्श्वे निष्कामयतीत्यर्थः ।
अतिव्यथन इति किम्? सपत्त्रं वृक्षं करोति जलसेचकः। निष्पत्त्रं वृक्षतलं करोति भूमिशोथकः ।।

निष्कुलान्निष्कोषणे ।। 5.4. 62 ।।

`कृञः इत्येव। निष्कुलशब्दान्निष्कोषणे वर्तमानात्कृञो योगे डाच् प्रत्ययो भवति। निष्कोषणम्=अन्तरवयवानां बहिर्निष्कासनम्। निष्कुलाकरोति पशून्। निष्कुष्णातीत्यर्थः।

निष्कोषण इति किम् ? निष्कुलान् करोति शत्रून् ।।

सुखप्रियादानुलोम्ये ।। 5.4. 63 ।।

सुख-प्रिय-शब्दाब्यामानुलोभ्ये वर्तमानाभ्यां कृञो योगे डाच् प्रत्ययो बवति। आनुलोम्यम्=अनुकूलता, आराध्यचित्तानुवर्तनम्। सुखाकरोति। प्रियाकरोति। स्वाम्यादेश्चित्तमाराधयतीत्यर्थः। सुखं प्रियं वा कुर्वन्नप्यानुलोम्येऽवस्थित एवमुच्यते।
आनुलोम्य इति किम् ? सुखं करोति, प्रियं करोत्यौषधपानम् ।।

दुःखात्प्रातितोम्ये ।। 5.4.64 ।।

`कृञः' इत्येव। दुःखशब्दात्प्रातिपदिकात् प्रातिलोम्ये गम्यमाने डाच् प्रत्ययो भवति कृञो योगे। प्रातिलोम्यम्=प्रतिकूलता, स्वाम्यादश्चित्तपीडनम्।
दुःखाकरोति भृत्यः।
प्रातिलोम्य इति किम् ? दुःखं करोति कदन्नम् ।।

शूलात्पाके ।। 5.4. 65 ।।

`कृञः' इत्येव। शूलशब्दात्पाकविषये डाच् प्रत्ययो भवति कृञो योगे। शूले पचति शूलाकरोति मांसम्।
पाक इति किम्? शूलं करोति कदन्नम् ।।

सत्यादशपथे ।। 5.4.66 ।।

`कृञः' इत्येव। सत्यशब्दादशपथे डाच् प्रत्ययो भवति कृञो योगे। सत्यशब्दोऽनृतप्रतिपक्षवचनः। क्वचित्तु शपथे च वर्तते--सत्येन शापयद्विप्रमिति, तस्यायं प्रतिषेधः। सत्याकरोति वणिक् भाण्कडम् । `मयैतत्क्रेतव्यम्'--इति तथ्यं करोति।

अशपथ इति किम्? सत्यं करोति ब्राह्मणः ।।

मद्रात्परिवापणे ।। 5.4.67 ।।
`कृञः' इत्येव। मद्रशब्दात्परिवापणे डाच् प्रत्ययो भवति कृञो योगे। परिवापणम्=मुण्कडनम्। मद्रशब्दो मङ्गलार्थः। मङ्गलं मुण्डनं करोति, मद्राकरोति।
* भद्राच्चेति वक्तव्यम् *। भद्राकरोति नापितः पुमारम्।
परिवापण इति किम्? भद्रं करोति ।।

समासान्ताः ।। 5.4.68 ।।
अधिकारोऽयम्। आ पादपरिसमाप्तेर्थे प्रत्यया विहितास्ते समासस्यान्तावयवा एकदेशा भवन्ति=तद्ग्रहणेन गृह्यन्त इति वेदितव्यम्। प्रयोजनम्-अव्ययीभावद्विगुद्वन्द्वतत्पुरुषबहुव्रीहिसंज्ञाः। अधिराजम्, उपराजम्। `नाव्ययीभावद्' इत्येष विधिर्भवति, `अनश्च' इति टच्।
द्विपुरो, त्रिपुरीति। `द्विगोः' इति ङीब्भवति। कटकवलयिनी। सङ्खनूपुरिणी। कोशनिषदिनी। स्रक्त्वचिनी। `द्वन्द्वोपतापगर्ह्यात्' इतीनिर्भवति।
विधुरः। प्रधुरः। `तत्पुरुषे तुल्यार्थ' इत्येष स्वरो भवति। उच्चैर्धुरः। नीचैर्धुरः। `बहुव्रीहौ प्रकृत्या पूर्वपदम्' इत्येतद्भवति ।।

न पूजनात् ।। 5.4.69 ।।
यान् शब्दानुपादाय समासान्ता विधीयन्ते `राजाहः सखिभ्यष्टच्' इत्येवमादीन्, यदा ते दूजनात्=पूजनवचनात्परे भवन्ति तदा समासान्तो न भवति। सुराजा। अतिराजा। सुगौः। अतिगौः।
* पूजायां स्वतिग्रहणं कर्तव्यम् *। इह मा भूत्--परमराजः, परमगव इति।
* प्राग्बहुव्रीहिग्रहणं च कर्तव्यम् *। `बहुव्रीहौ सक्थ्यक्ष्णोः' इत्येवमादौ प्रतिषेधो न भवति--सुसक्थः, अतिसक्थः स्वक्षः, आत्यक्षः ।।

किमः क्षेपे ।। 5.4.70 ।।
क्षेपे यः किंशब्दस्ततः परस्य समासान्तो न भवति। किंराजा यो न रक्षति। किंसखा योऽभिद्रह्यति। किंगौर्यो न वहति। `किंक्षेपे' इति समासः।ष
क्षेप इति किम्? कस्य राजा किंराजः। किंसखः। किंगवः ।।

नञस्तत्पुरुपात् ।। 5.4.71 ।।
नञः परे वक्ष्यमाणा ये राजादयस्तदन्तात् तत्पुरुषात् समासान्तो न भवति। अराजा। असखा। अगौः।
तत्पुरुषादिति किम्? अनृचो माणवकः। अधुरं शकटम् ।।

पथो विभाषा ।। 5.4.72 ।।
`नञस्तत्पुरुषात्' इति वर्तते। नञः परो यः पथिन्-शब्दस्तदन्तात्तत्पुरुषात् समासान्तो विभाषा न भवति। पूर्वेण नित्यः प्रतिषेधः प्राप्तो विकल्प्यते। अपथम्, अपन्थाः।।

बहुव्रीहि संख्येये डजबहुगणात् ।। 5.4.73 ।।
संख्येये यो बहुव्रीहिर्वर्तते तस्मादबहुगणान्ताड्डच् प्रत्ययो भवति। `संख्यायाव्ययासन्न' इति यो बहुव्रीहिस्तस्येदं ग्रहणम्। उपदशाः। उपविंशाः। उपत्रिंसाः। आसन्नदशाः. अदूरदशाः। अधिकदशाः। द्वित्राः। पञ्चषाः। पञ्चदशाः।
संख्येय इति किम्? चित्रगुः। शबलगुः. अबहुगणादिति किम्? उपबहवः। उपगणाः। अत्र स्वरे विशेषः।
* डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंक्यानां कर्तव्यं निस्त्रिंसाद्यर्थम् *। निर्गतानि त्रिशतः निस्त्रिशानि वर्षाणि देवदत्तस्य। निश्चत्वारिंशानि यज्ञदत्तस्य। निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः शङ्गः ।।

ऋक्पूरब्धूःपथामानक्षे ।। 5.4.74 ।।
`बहुव्रीहौ' इति न स्वर्य्यते, सामान्येन विदानम्। ऋक्। पुरु, अप्, धुर्, पथिन्--इत्येवमन्तानां समासानामकारः प्रत्ययो भवति समासान्तोऽक्षे । सामर्थ्याद्धुर एतद्विशेषणम्, ऋगादीनां न भवति।
अक्षसम्बन्धिनी या धूस्तदन्तस्य न भवति। अनृचः। बह्वृचः। अर्धर्चः। पुरु---ललाटपुरम्। नान्दीपुरम्। अप--द्वीपम्। अन्तरीपम्। समीपम्। धुर्--राजधूरा। महाधुरः। पथिन्--स्थलपथः। जलपथः।

अन्क्षे इति किम्? अक्षस्य धूः अक्षधूः। दृढधूरक्षः।

अनुचो माणवको ज्ञेयो, बह्वृचश्चरणाख्यायाम्। अनृचो माणवकः। बह्वचो ब्राह्मणः। अनुक्कं साम, बह्वृक्कं सूक्तमित्यत्र न भवति।।

अच् प्रत्यन्ववरूपूर्वत्सामलोम्नः ।। 5.4.75 ।।

प्रति, अनु, अव--इत्येवम्पूर्वात्सामान्ताल्लोमान्ताच्च समासादच् प्रत्ययो भवति। प्रतिसामम्, अनुसामम्, अवसामम्। प्रतिलोमम्, अनुलोमम्, अवलोमम्।
कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः।
गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि ।।
कृष्णभूमः। पाण्डुभूमः। उदग्भूमः। पञ्वनदम्। पञ्चगोदावरम्। `नदीभिश्च' इत्यव्ययीभावः।
भूमेरपि संख्यापूर्वाया अच् प्रत्यय इष्यते---द्विभूमः प्रासादः, त्रिभूमः. दशभूमकं सूत्रम्।
अन्यत्रापि च दृश्यते। पद्मनाभः। ऊर्णनाभः। दीर्घरात्रः। समारात्रः। अरात्रः।
तदेतत्सर्वमिह `अच्' इति योगविभागं कृत्वा साधयन्ति।

अक्ष्णोऽदर्शनात् ।। 5.4.76 ।।

`अच्' इत्यनुवर्तते। दर्शनादन्यत्र योऽक्षिशब्दस्तदन्तादच् प्रत्ययो भवति। लवणाक्षम्। पुष्कराक्षम्। `उपमितं व्याघ्रादिभिः' इति समासः।
अदर्शनादिति किम् ? ब्राह्मणाक्षि।
कथं कबराक्षम्, गवाक्षमिति; अश्वादीनां मुखप्रच्छादनार्थं बहुच्छिद्रं कबराक्षम्, तेनापि हि दृश्यते, गवाक्षेण च? नैष दोषः; चक्षुः पर्यायवचनो दर्शनशब्दः, प्राण्यङ्गवचन इहाश्रीयते ।।

अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्टीवपदष्ठीवनक्तन्दिवरात्रिन्दिवाहर्दिवसरजसनिश्श्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षवृद्धोक्षोपशुनगोष्ठश्वाः ।। 5.4.77 ।।
अच्प्रत्ययान्ता एते शब्दा निपात्यन्ते। समासे व्यवस्थाऽपि निपातनादेव प्रतिपत्तव्या।
आद्यास्त्रयो बहुव्रीहयः। अदृश्यान्यविद्यमानानि वा चत्वारि यस्य सोऽचतुरः। विगतानि चत्वारि यस्य स विचतुरः। शोभनानि चत्वारि यस्य स सुचतुरः।
ततः परे एकादश द्वन्द्वाः। स्त्री च पुमांश्च स्त्रीपुंसौ। इह न भवति-स्त्रियाः पुेमान् स्त्रीपुमानिति। धेनुश्च अनड्वांश्च धेन्वनडुहौ। ऋक्च साम च ऋक्सामे। वाक्च मनश्च वाङ्मनसे। अक्षि च भ्रुवौ च अक्षिभ्रुवम्। दाराश्च गावश्च दारगवम्। ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवम्। टिलोपो निपात्यते। पादौ च अष्ठीवन्तौ च पदष्ठीवम्। पादस्य पदज्भावो निपात्यते। नक्तं च दिवा च नक्तन्दिवम्। सप्तम्यर्थवृत्तयोरव्यययोः समासोऽपि निपातनादेव। रात्रौ च दिवा च रात्रिन्दिवम्। पूर्वपदस्य मान्तत्वं निपात्यते। अहनि च दिवा च अहर्दिवम्। ननु च पर्यायावेतौ, कथमनयोर्द्वन्द्वः? वीप्सायां द्वन्द्वो निपात्यते। अहन्यहनीत्यर्थः। एकोऽव्ययीभावः।
साकल्ये---सरजसमभ्यवहरति। बहुव्रीहौ न भवति--सह रजसा सरजः=पङ्कजमिति, ततस्तत्पुरुषः।
निश्चितं श्रेयो निःश्रेयसम्। निःश्रेयस्कः पुरुष इत्यत्र न भवति। ततः षष्ठीसमासः।
पुरुषस्यायुः पुरुषायुषम्। द्वन्द्वे न भवति---पुरुपश्च आयुश्च पुरुषायुषो। ततो द्विगू।
द्वे आयुषी समाहृते द्व्यायुषम्। त्र्यायुषम्। इह न भवकतिद्वयोरायुः द्व्यायुः, त्र्यायुरहिति। ततो द्वन्द्वः।
ऋक्च यजुश्च ऋग्यजुषम्। इह न भवति-ऋग्यजुरस्योन्मुग्धस्य ऋग्यजुरुन्मुग्धः।
जातादिपूर्वपदा उक्षशब्दान्तास्त्रयः कर्मधारयाः। जातोक्षः। महोक्षः। वृद्धोक्षः। बहुव्रीहौ न भवति--जातोक्षा ब्राह्मणः। महोक्षा, वृद्धोक्षेति। ततोऽव्ययीभावः।
शुनः समीपमुपशुनम्। टिलोपाभावः, सम्प्रसारणं च निपातनादेव। ततः सप्तमीसमासः।
गोष्ठे श्वा गोष्ठश्वः।
* चतुरोऽच्प्रकरणे त्र्युपाभ्यामुपसंख्यातम् *। त्रिच्तुराः। उपचतुराः ।।

ब्रह्मडस्तिभ्यां वर्चसः ।। 5.4.78 ।।
ब्रह्महस्तिभ्यां परो यो वर्चःशब्दः तदन्तात् समासादच् प्रत्ययो भवति। ब्रह्मवर्चसम्। हस्तिवर्चसम्।
* पल्यराजभ्यां चेति वक्तव्यम् *। पल्यवर्चसम्। राजवर्चसम् ।।

अवसमन्धेभ्यस्तमसः ।। 5.4.79 ।।
अव, सम्, अन्ध-इत्येतेभ्यो यः परस्तमःशब्दस्तदन्तात्समासाद् अच् प्रत्ययो भवति। अवतमसम्। सन्तमसम्। अन्धतमसम् ।।

श्वसो वसीयःश्रेयसः ।। 5.4.80 ।।
श्वसः परौ यौ वसीयस्-श्रेयःशब्दौ तदन्तात्समासादच् प्रत्ययो भवति। श्वोवलसीयसम्। श्वःश्रेयसम्। मयूरव्यंसकादित्वात्समासः। स्वभावाच्चेह श्वःशब्द उत्तरपदार्थस्य प्रसंसामाशीर्विषयामाचष्टे। श्वः श्रेयसं ते भूयात्। शोभनं श्रेयस्ते भूयादित्यर्थः.क स्वोवसीयसमित्यस्यैवायं पर्यायः ।।

अन्ववतप्ताद्रहसः ।। 5.4.81 ।।
अनु, अव, तप्त-इत्येतेभ्यः परो यो रहश्शब्दस्तदन्तात् समासाद् अच्प्रत्ययो भवति। अनुरहसम्। अवरहसम्। तप्ररहसम् ।।

प्रतेरुरसः सप्तमीस्थात् ।। 5.4.82 ।।
प्रतेः परो य उरः शब्दस्तदन्तात् समासादच् प्रत्ययो भवति, स चेदुरःशब्दः सप्तमीस्थो भवति। सप्तम्यर्थे वर्त्तत इत्यर्थः। उरसि वर्त्तते। विभक्त्यर्थे `अव्ययम्' इति समासः। प्रत्युरसम्।
सप्तमीस्थादिति किम्? प्रतिगतमुरः प्रत्युरः ।।

अनुगवमायामे ।। 5.4.83 ।।
`अनुगवम्' इत्यच्प्रत्ययान्तं निपात्यते आयामेऽभिधेये। अनुगवं यानम्। `यस्य चायाम्ः' इति समासः।
आयाम इति किम्? गवां पश्चादनुगु ।।

द्विस्तावा त्रिस्तावा वेदिः ।। 5.4.84 ।।
`द्विस्तावा', `त्रिसतावा' इति निपात्यते वेदिश्चेद् अभिधेया भवति। अच्प्रत्ययः, टिलोपः, समासश्च निपात्यते। यावती प्रकृतौ वेदिस्ततो द्विगुणा वा त्रिगुणा वा कस्याञ्चिद्विकृतौ तत्रेदं निपातनम्। द्विस्तावा वेदिः। त्रिस्तावा वेदिः।
वेदिरिति किम्? द्विस्तावती, त्रिस्तावती रज्जुः ।।

उपसर्गादध्वनः ।। 5.4.85 ।।
उपसर्गात्परो योऽध्वन्-शब्दस्तदन्तात् समासाद् अच् प्रत्ययो भवति। प्रगतोऽध्वानं प्राध्वो रथः। प्राध्वं शकटम्। निरध्वम्। प्रत्यध्वम्।
उपसर्गादिति किम्? परमाध्वा। उत्तमाध्वा ।।

तत्पुरुषप्त्याङ्गुलेः संख्यायव्यादेः ।। 5.4.86 ।।
अङ्गगुलिशब्दान्तस्य तत्पुरुषस्य संख्यादेरव्ययादेश्चाच् प्रत्ययो भवति। द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम्। त्र्यङ्गुलम्। `तद्धितार्थ' इति समासः। `प्रमाणे लो द्विगोर्नित्यम्' इति मात्रचो लोपः। अव्ययादेः---निर्गतमङ्गुलिभ्यो निरङ्गुलम्। अत्यङ्गुलम्।
तत्पुरुषस्येति किम्? पञ्चाङ्गुलिः। अत्यङ्गुलिः पुरुषः।
तत्पुरुषाधिकारश्च `द्वन्द्वाच्चुदषहान्तात्' इति यावत् ।।

अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः ।। 5.4.87 ।।
अहरादिभ्यः परो यो रात्रिशब्दस्तदन्तस्य तत्पुरुषस्याच् प्रत्ययो भवति, चकारात्संख्यादेरव्ययादेश्च। अहर्ग्रहणं द्वन्द्वार्थम्। अहश्च रात्रिश्च अहोरात्रः। सर्वरात्रः। एकदेशे--पूर्वं रात्रे पूर्वरात्रः। अपररात्रः। `पूर्वपरावर' इति समासः। एवं पुण्या रात्रिः पुण्यरात्रः। संख्याव्ययादेः खल्वपि--द्वे रात्री समाहृते द्विरात्रः। त्रिरात्रः। अतिक्रान्तो रात्रिमतिरात्रः। नीरात्रः ।।

अह्नोऽह्न एतेभ्यः ।। 5.4.88 ।।
`राजाहः सखिब्यष्टच्' इति वक्ष्यति, तस्मिन् परभूते अहन्नित्येतस्य `अह्न' इत्ययमादेशो भवति एतेभ्य उत्तरस्य। संख्याव्ययादयः प्रक्रान्ताः सर्वनाम्ना प्रत्यवमृश्यन्ते। सामर्थ्याच्चाहःशब्दः पूर्वत्वेन नाश्रीयते। परिशिष्टानां ग्रहणम्। न ह्यहः शब्दात् परोऽहःशब्दः सम्भवति। संख्यायास्तावत्-द्वयोरह्नोर्भवः द्व्यह्नः। त्र्यह्नः। अव्ययात्-अहरतिक्रान्तः अत्यह्नः। निरह्नः। सर्वाह्णः। पूर्वाह्मः। अपराह्मः। संख्याताह्नः।
पुण्यशब्दात्प्रतिषेधं वक्ष्यति ।।

न संख्यादेः समाहारे ।। 5.4.89 ।।

संख्यादेस्तत्पुरुषस्य समाहारे वर्त्तमानस्याहः शब्दास्याह्नादेशो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते। द्वे अहनी समाहृते द्व्यहः। त्र्यहः। समाहार इति किम्? द्वयोरह्नोर्भवो द्व्यह्नः। त्र्यह्नः। `तद्धितार्थ' इति समासे कृतेऽण आगतस्य `द्विगोः' इति लुक् ।।

उत्तमैकाभ्यां च ।। 5.4.90 ।।
उत्तमैकशब्दाभ्यां च परस्याह्न इत्यममादेशो न भवति। उत्तमश्बदोऽन्त्यवचनः पुण्यशब्दमाचष्टे; पुण्यग्रहणमेव न कृतं वैचित्र्यार्थम् । पुण्याहः। एकाहः। केचित्तु उपोत्तमस्यापि प्रतिपत्त्यर्थं वर्णयन्ति। तेन संख्यात्शब्दादपि परस्य न भवति--संख्याताह इति ।।

राजाहस्साखिभ्यष्टच् ।। 5.4.91 ।।
राजन्, अहन्, सखि--इत्येवमन्तात्प्रातिपदिकात् टच् प्रत्ययो भवति। महाराजः। मद्रराजः। परमाहः। उत्तमाहः। राज्ञः सखा राजसखः। ब्राह्मणसखः। इह कस्मान्न भवति-मद्राणां राज्ञी मद्रराज्ञी, लिङ्गविशिष्टपरिभाषया प्राप्नोति ? लघ्वक्षररस्य पूर्वनिपाते प्राप्ते राजन्-शब्दस्य सवर्णदीर्घार्थं प्रथमं प्रयोगं कुर्वन्नेतद् ज्ञापयति--यस्याकारेण सवर्णदीर्घत्वं सम्भवति तस्येदं ग्रहणमिति ।।

गोरतद्धितलुकि ।। 5.4. 92 ।।
गोशब्दान्तात्तत्पुरुषाट्टच् प्रत्ययो भवति स चेत्तत्पुरुषस्तद्धितलुग्विषयो न भवति। परमगवः। उत्तमगवः। पञ्चगवम्। दशगवम्।
अतद्धितलुकिति किम्? पञ्चभिर्गोभिः क्रीतः पञ्वगुः। दशगुः। `तेन क्रीतम्' इत्यागतस्यार्हीयस्य ठकः `अध्यर्द्धपूर्वद्विगोः' इति लुक्।
तद्वितग्रहणं किम्? सुब्लुकि प्रतिषेधो मा भूत्--राजगवमिच्छति राजगवीयति। लुग्ग्रहणं किम्? तद्धित एव मा भूत्पञ्चभ्यो गोभ्य आगतं पञ्चावरूप्यम्, पञ्चगवमयम्। दशगवरूप्यम्, दशगवमयम् ।।

अग्राख्यायामुरसः ।। 5.4.93 ।।
उरःशब्दान्तात्तत्पुरुषाट्टच् प्रत्ययो भवति, स चेदुरःशब्दोऽग्रख्यायां भवति। अग्रम्=प्रधानमुच्यते। यथा शरीरावयवानामुच्यते उरः प्रधानम्, एवमन्योऽपि प्रधानभूत उरशश्ब्देनोच्यते। अश्वानामुरः अश्वोरसम्। हस्त्युरसम्। रथोरसम्।
अग्राख्यायामिति किम्? देवदत्तस्योरः देवदत्तोरः ।।

अनोऽश्मायस्सरसां जातिसंज्ञयोः ।। 5.4.94 ।।
अनस, अश्मन्, अयस, सरस्-इत्येवमन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति जातौ संज्ञायां च विषये। उपानसमिति जातिः। महानसमिति संज्ञा। अमृताश्म इति जातः। पिण्डाश्म इति संज्ञ्ा। कालायसमिति जातिः। लोहितायसमिति संज्ञा। मण्डूकसरसमिति जातिः. जलसरसमिति संज्ञा।
`जातिसंज्ञयोः' इति किम्? सदनः। सदश्मा। सत्सरः ।।

ग्रामकौटाभ्यां च तक्ष्णः ।। 5.4.95 ।।
`जातिसंज्ञयोः' इति नानुवर्त्तते। ग्रामकौटाभ्यां परो यस्तक्षन्शब्दस्तदन्तात्ततद्पुरुषाट्टच् प्रत्ययो भवति। ग्रामस्य तक्षा ग्रामतक्षः। बहूनां साधार्ण इत्यर्थः। कुट्यां भवः कौटः, तस्य तक्षा कौटतक्षः। स्वतन्त्रः कर्मजीवी, न कस्यचित्प्रतिबद्ध इत्यर्थः।
ग्रामकौटाभ्यामिति किम्? राज्ञस्तक्षा राजतक्षा ।।

अतेः शुनः ।। 5.4.96 ।।
अतिशब्दात्परो यः श्वन्-शब्दः तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति। अतिक्रान्तः श्वानमतिश्वो वराहः। जववानित्यर्थः। अतिश्वः सेवकः। सुष्ठु स्वामिभक्त इत्यर्थः. अतिश्वी सेवा। अतिनीचेत्यर्थः ।।

उपमानादप्राणिषु ।। 5.4.97 ।।
उपमानवाची यः श्वन्-शब्दोऽप्राणिषु वर्त्तते तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति। आकर्षः श्वेव आकर्षश्वः। फलकश्वः। `उपमितं व्याघ्रादिभिः' इति समासः। उपमानादिति किम्? न श्वा अस्वा लोष्टः। अप्राणिष्विति किम्? वानरः श्वेव वानरश्वा ।।

उत्तरमृगपूर्वाच्च सक्थ्नः ।। 5.4.98 ।।
उत्तर, मृग, पूर्व-इत्येतेभ्यः परो यः सक्थिशब्दश्चकारादुपमानं च, तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति समासान्तः। उत्तरसक्थम्। मृगसख्यम्। पूर्वसक्थम्।

उपमानात्ख्ल्वपि-फलकमिव सक्थि फलकसक्थम् ।।

नावो द्विगोः ।। 5.4.99 ।।
नौशब्दान्ताद् द्विगोष्टच्प्रत्ययो भवति समासान्तः। द्वे नावौ समाहृते द्विनावम्। त्रिनावम्। द्विनावधनः। पञ्चनावप्रियः। द्वाभ्यां नोभ्यामागतं द्विनावरूपम्। द्विनावमयम्।
द्विगोरिति किम्? राजनौः।
अतद्धितलुकीत्येव--पञ्चभिर्नौभिः क्रीतः पञ्चनौः। दशनौः ।।

अर्धाच्च ।। 5.4.100 ।।
अर्द्धशब्दात्प्रो यो नौशब्दस्तदन्तात्तत्पुरुषाट्टच्प्रत्ययो भवति। अर्द्धं नावः अर्द्धनावम्। `अर्द्धं नपुंसकम्' इति समासः। परवल्लिङ्गं न भवति; लोकाश्रयत्वाल्लिङ्गस्य ।।

खार्याः प्राचाम् ।। 5.4.101 ।।
`द्विगोः', `अर्द्धाच्च' इति द्वयमप्यनुवपर्त्तते। खारीशब्दान्ताद् द्विगोरर्द्धाच्च परो यः खारीशब्दस्तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति प्राचामाचार्याणां मतेन। द्वे खार्यौ समाहृते द्विखारम्, द्विखारि। त्रिखारम्, त्रिखारि। अर्द्ध खार्या अर्द्धखारम्, अर्द्धखारी ।।

द्वित्रिभ्यामञ्जलेः ।। 5.4. 102 ।।
द्वित्रिभ्यां परो योऽञ्जलिशब्दः तदन्तात्पुरुषाट्टच्प्रत्ययो भवति। द्वावञ्जली समाहृतौ द्व्यञ्जलम्। त्र्यञ्जलम्।
द्विगोरित्येव--द्वयोरञ्जलिः द्व्यञ्जलिः।
अतद्धितलुकीत्येव-द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिः। त्र्यञ्जलिः। प्राचामित्येव---द्व्यञ्कजलिप्रियः ।।

अनसन्तान्नपुंसकाच्छन्दसि ।। 5.4.103 ।।
अन्नन्ताद्, असन्ताच्च नपुंसकलिङ्गातद्तत्पुरुषाट्टच् प्रत्ययो भवति छन्दसि विषये। हस्तिचर्मे जुहोति। ऋषभचर्मेऽभिषिञ्चति। असन्तात्--देवच्छन्दसानि। मनुष्यच्छदसानि।
अनसन्तादिति किम्? बिल्वदारु जुहोति। नपुंसकादिति किम्? सुत्रामाणं पृथिवीं द्यामनेहसम्।
* अनसन्तान्नपुंसकाच्छन्दसि वावचनम् *। ब्रह्मसाम। देवच्छन्दः। ब्रह्मसामम्। देवच्छन्दसम् ।।

ब्रह्णो जानपदाख्यायायाम् ।। 5.4.104 ।।
ब्रह्मन्-शब्दान्तात्तत्पुरुषाट्टच्प्रत्ययो भवति समासेन चेद्ब्रह्मणो जानपदत्वमाख्यायते। जनपदेषु भवो जानपदः। यस्य तत्पुरुषस्य जनपदशब्दः पूर्वपदं तस्मादेतत्प्रत्ययविधानम्। सुराष्ट्रेषु ब्रह्मा सुराष्ट्रब्रह्माः। अवन्तिब्रह्माः। योगविभागात्सप्तमीसमासः।
जानपदाख्यायामिति किम्? देवब्रह्मा नारदः ।।

कुमहद्भ्यामन्यतरस्याम् ।। 5.4.105 ।।
कुमहद्भ्यां परो यो ब्रह्मा तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवत्यन्यतरस्याम्। कुबुह्मः, कुब्रह्मा। महाब्रह्मः, महाब्रह्मा। ब्राह्मणपर्यायो ब्रह्मन्शब्दः ।।

द्वन्द्वाच्चुदषहान्तत्समहारे ।। 5.4.106 ।।
तत्पुरुषाधिकारो निवृत्तः। द्वन्दाच्चवर्गान्तदाद्, दकारान्तात्, षकारान्तात्, हकारान्ताच्च टच् प्रत्ययो भवति, स चेद् द्वन्द्वः समाहारे वर्त्तते, नेतरेतरयोगे। वाक्च त्वक्च वाक्त्वचम्। स्त्रक्च त्वक्च स्त्रक्त्वचम्। श्रीस्त्रजम्। इडूर्जम्। वागृर्जम्। समिद्दृषदम्। सम्पद्विपदम्। वाग्विप्रुषम्। छत्त्रोपानहम्। धेनुगोदुहम्।
द्वन्द्वादिति किम्? तत्पुरुषान्मा भूत्-पञ्च वाचः समाहृताः पञ्चवाक्। चुदषहान्तादिति किम्? वाक्समित्। समाहार इति किम्? प्रावृट्खरदौ ।।

अव्ययीभावे शारत्प्रभृतिभ्यः ।। 5.4.107 ।।
`शरद्' इत्येवमादिभ्यः प्रातिपदेकेभ्यष्टच् प्रत्ययो भवत्यव्ययीभावे। शरदः समीपम् उपशरदम्। प्रतिशरदम्। उपविपाशम्। प्रतिविपाशम्।
अव्ययीभाव इति किम्? परमशरत्।
येऽत्र झयन्ताः पठ्यन्ते, तेषां नित्यार्थं ग्रहणम्। स्वर्यते चेदमव्ययीभावग्रहणं प्राग्बहुव्रीहेः।

शरत्। विपाश्। अनस्, मनस्। उपानह्। दिव्। हिमवत्। अनडुह्। दिश्। दृश्। चतुर्। यद्। तद्। * जराया जरश्च *। सदृश्। * प्रतिपरसमनुभ्योऽक्ष्णः *। पथिन्। प्रत्यक्षम् । परोक्षम्। समक्षम्। अन्वक्षम्। प्रतिपथम्। सम्पथम्। अनुपथम्। शरदादिः ।।

अनश्च ।। 5.4.108 ।।
अन्नन्तादव्ययीभावाट्टच् प्रत्ययो भवति समासान्तः। उपराजम्। प्रतिराजम्। अध्यात्मम्। प्रत्यात्मम् ।।

नपुंसकादन्यतरस्याम् । 5.4.109 ।।
`अनः' इत्येव। नपुंसकग्रहणमुत्तरपदविशेषणम्। अन्नन्तं यन्नपुंसकं तदन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति समासान्तः। पूर्वेण नित्ये प्राप्ते विकल्प्यते। प्रतिचर्मम्, प्रतिचर्म। उपचर्मम्, उपचर्म ।।

नदीपौर्णमास्याग्रहायणीभ्यः ।। 5.4.110 ।।
नदी, पौर्णमासी, आग्रहणायणी-इत्येवमन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति। नद्याः समीपम् उपनदम्, उपनदि। उपौर्णमासम्, उपपौर्णमासि। उपाग्रहयणम्, उपाग्रहायणि ।।

झयः ।। 5.4.111 ।।
`झयः' इति प्रत्याहारग्रहणम्। झयन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति। उपसमिधम्, उपसमित्। उपदृषदम्, उपदृषत् ।।

गिरेश्च सेनकस्य ।। 5.4. 112 ।।
गिरिशब्दान्तादव्ययीभावाट्टच् प्रत्ययो भवति सेनकस्याचार्यस्य मतेन। अन्तर्गिरम्, अन्तर्गिरि। उपगिरम्, उपगिरि।
सेनकग्रहणं पूजार्थम्, विकक्लोऽनुवर्तत एव ।

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् । 5.4. 113 ।।
स्वाङ्गवाची यः सक्थिशब्दोऽक्षिशब्दश्च तदन्ताद् बहुव्रीहेः षच् प्रत्ययो भवकति समासान्तः। अयमर्थोऽभिप्रेतः। सूत्रे तु दुःश्लिष्टविभक्तीनि पदानि। दीर्घं सक्थि यस्य दीर्घसक्थः। कल्याणाक्षः। लोहिताक्षः। विशालाक्षः।
बहुव्रीहाविति किम्? परमसक्थिः। परमाक्षिः। सक्थ्यक्षणोरिति किम्? दीर्घजानुः। सुबाहुः। स्वाङ्गादिति किम् ? दीर्घसक्थि शकटम्। स्थूलाक्षिरिक्षुः।
टचि प्रकृते षज्ग्रहणं स्वरार्थम्--चक्रसक्थी सत्री, दीर्घसक्थी स्त्री। `सक्थं चाक्रान्तात्' इति विभाषयोत्तरपदस्यान्तोदात्तता विधीयते। तत्र यस्मिन्पक्षे नास्त्युदात्तत्वं तत्र ङीपि सत्युदात्तनिवृत्तिस्वर स्याभावादनुदात्तः श्रुयेत। ङीषि तु सर्वत्रोदात्तः सिद्धो भवति।
बहुव्रीहिग्रहणमा पादपरिसमाप्तेरनुवर्तते ।।

अङ्गुलेर्दारुणि ।। 5.4.114 ।।
अङ्गुलिशब्दान्ताद्बहुव्रीहेः षच्प्रच्ययो भवति समासान्तो दारुणि समासार्थे। द्व्यङ्गुलं दारु। त्र्यङ्गुलं दारु। पञ्चाङ्गुलम्। अङ्गुलिसदृशावयवं धान्यादीनां विक्षेपणकाष्ठमुच्यते।
यस्य तु द्वे अङ्गलुली प्रमाणं दारुणस्तत्र `तद्धितार्थ' इति समासे कृते `तत्पुरुषस्याङ्गुलेः' इत्यचा भवितव्यम्।
दारुणीति किम्? पञ्चाङ्गुलिर्हस्तः ।।

द्वित्रिभ्यां ष मूर्द्धनः ।। 5.4.115 ।।
द्वित्रिभ्यां परो यो मूर्द्धन्-शब्दस्तदन्ताद्बहुव्रीहेः षः प्रत्ययो भवति समासान्तः।छ द्विमूर्द्धः। त्रिमूर्द्धः।
द्वित्रिभ्यामिति किम्? उच्चैर्मूर्द्धा ।।

अप्पूरणीप्रमाण्योः ।। 5.4. 116 ।।
पूरणप्रत्ययान्ताः स्त्रीलिङ्गाः शब्दाः पूरणीग्रहणेन गृह्यन्ते। `प्रमाणी' इति स्वरूपग्रहम्। पूरण्यन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप् प्रत्ययो भवति समासान्तः। कल्याणी पञ्चमी आसां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः। कल्याणीदशमा रात्रयः। स्त्री प्रमाणी एषां स्त्रीप्रमाणाः कुटुम्बिनः। भार्याप्रधाना इत्यर्थः।
* अपि प्रधानपूरणीग्रहणं कर्त्तव्यम् *। यत्रान्यपदार्थे पूरण्यनुप्रविशति न केवलं वर्त्तिपदार्थ एव, तत्र पूरण्याः प्राधान्यम् । पुंवद्भावप्रतिषेधेऽपि प्रधानपूरण्येव गृह्यते। इह न भवति--कल्याणी पञ्चमी अस्मिन्पक्षे कल्याणपञ्चमीकः पक्ष इति ।।

* नेतुर्नक्षत्र उपसंख्यानम् *। मृगो नेता आसां रात्रीणां मृगनेत्रा रात्रयः। पुष्यनेत्राः। नक्षत्र इति किम्? देवदत्तनेतृकाः ।।

* छन्दसि च नेतुरुपसंख्यानम् *। बृहस्पतिनेत्रा देवाः। सोमनेत्राः।

* मासाद् भृतिप्रत्ययपूर्वपदाट्ठज्विधिः *। पञ्चको मासोऽस्य पञ्चकमासिकः कर्मकरः। दशकमासिकः। `सोऽस्यांश्वस्नभृतयः' इति `संक्याया अतिशदन्तायाः कन्'।।

अन्तर्बहिर्भ्यां च लोम्नः ।। 5.4.117 ।।

अन्तर्, बहिस्-हत्येताभ्यां परो यो लोमन्शब्दः तदन्ताद्बहुव्रीहेरप्रत्ययो भवति। अन्तर्गतानि लोमान्यस्यान्तर्लोमः प्रावारः। बहिर्लोमः पटः ।।

अञ्नासिकायाः संज्ञायां नसं चास्थूलात् ।। 5.4.118 ।।

नासिकान्ताद्वहुव्रीहेरच्प्रत्ययो भवति नासिकाशब्दश्च नसमादेशमापद्यते। `अस्थूलात्' इति नासिकाविशेषणम्--न चेत्स्थूलशब्दात्परा नासिका भवतीति।

`संज्ञायाम्' इति समुदायोपाधिः। द्रुरिव नासिकाऽस्य द्रुणसः। वाध्रीणसः। `पूर्वपदात्संज्ञायामगः' इति णत्वम्। गोनसः।

संज्ञायामिति किम्? तुङ्गनासिकः। अस्थूलादिति किम्? स्थूलनासिको वराहः।

* खुरखराभ्यां नस् वक्तव्यः *। खुरणाः। खरणाः।

पक्षेऽच्प्रत्ययोऽपीष्यते। खुरणसः। खरणसः ।।

शितिनाः, अहिनाः, अर्चनाः-इति निगम इष्यते ।।

उपसर्गाच्च ।। 5.4. 119 ।।

उपसर्गात्परो यो नासिकाशब्दस्तदन्ताद्बहुव्रीहेरच् प्रत्ययो भवति नासिकाशब्दश्च नसमापद्यते। असंज्ञार्थं वचनम्। उन्नता नासिकाऽस्य उन्नसः। प्रणसः।

`उपसर्गाद्बहुलम्' इति णत्वम्।

* वेर्ग्रो वक्तव्यः *। विगता नासिकाऽस्य विग्रः ।।

सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ।। 5.4.120 ।।

सुप्रातादयो बहुव्रीहिसमासा अच्प्रत्ययान्ता निपात्यन्ते। अन्यदपि च टिलोपादिकं निपातनादेवप सिद्धम्। शोभनं प्रातरस्य सुप्रातः। शोभनं श्वोऽस्य सुश्वः दिवाऽस्य सुदिवः। शारेरिव कुक्षिरस्य शारिकुक्षः। चतस्रोऽश्रयोऽस्य चतुरश्रः। एण्या इव पादावस्य एणीपदः। अजस्येव पादावस्य अजपदः। प्रोष्ठः=गौः, तस्येव पादावस्य प्रोष्ठपदः ।।

नञ्दुःसुभ्यो हलिकस्थ्योरन्यतरस्याम् ।। 5.4.121 ।।

नञ्, दुसु, सु-इत्येतेभ्यः परौ यौ हलिसक्थिशब्दौ तदन्ताद्बहुव्रीहेरन्यतरस्यामच् प्रत्ययो भवति समासान्तः। अविद्यमाना हलिरस्य अहलिः। दुर्हलः, दुर्हलिः। सुहलः, सुहलिः। अविद्यमानं सक्थ्यस्य असकथः, दुःसक्थः, दुःसक्थिः। सुसक्थः, सुसक्थिः।

`हलिशक्त्योः' इति केचित्पठन्ति। अविद्यमाना शक्तिरस्य अशक्तः, अशक्तिः। विरूपा शक्तिरस्य दुःशक्तः, दुःशक्तिः। शोभना शक्तिरस्य सुशक्तः। सुशक्तिः ।।

नित्यमसिच्च प्रजामेधयोः ।। 5.4.122 ।।

`नञ्दुस्सुभ्यः' इत्येव। नञ्, दुस्, सु-इत्येतेभ्यः परौ यौ प्रजामेधाशब्दौ तदन्ताद्बहुव्रीहेर्नित्यमसिच् प्रत्ययो भवति समासान्तः। अविद्यमाना प्रजाऽस्य अप्रजाः। दुष्प्रजाः। सुप्रजाः। अविद्यमाना मेधाऽस्य अमेधाः। दुर्मेधाः। सुमेधाः।

नित्यग्रहणं किम्; यावता पूर्वसूत्रेऽन्यतरस्यांग्रहणं नैव स्वर्यते ? एवं तर्हि नित्यग्रहणेनान्यत्रापि भवतीति सूच्यते।

श्रोत्रियस्येव ते राजन्मन्दकस्याल्पमेधसः।

अनुवाकहता बुद्धिर्नषा तत्त्वार्थदर्शिनी ।।

बपहुप्रजाश्छन्दसि ।। 5.4.123 ।।

`बहुप्रजाः' इति छन्दसि निपात्यते। बहुप्रजा निर्ऋतिमाविवेश।

छन्दसीति किम्? बहुप्रजो ब्राह्मणः ।।

धर्मादनिच् केवलात् ।। 5.4.124 ।।

केवलाद् यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच्प्रत्ययो भवति समासान्तः। कल्याणो धर्मोऽस्य कल्याणधर्मा। प्रियधर्मा।
केवलादिति किम् ? परमः स्वो धर्मोऽस्य परमस्वधर्मः। यद्येवम्, त्रिपदे बहुव्रीहौ प्राप्नोति-परमः स्वो धर्मोऽस्येति? एवं तर्हि केवलादिति पूर्वपदं निर्दिश्यते-तेवलात्पदाद्यो धर्मशब्दः, न पदसमुदायात्। तदन्ताद्बहुव्रीहेः प्रत्ययः ।।

जम्भा सुहरिततृणसोमेभ्यः ।। 5.4.125 ।।
बहुव्रीहौ समासे स्वादिभ्यः परं `जभा' इति कृतसमासान्तमुत्तरपदं निपात्यते। जम्भशब्दोऽभ्यवहार्यवाची, दन्तविशेषवाची च। शोभनो जम्भोऽस्य सुजम्भा देवदत्तः। शोभनाभ्यवहार्यः, शोभनदन्तो वा। एवं हरितजम्भा। तृणजम्भा। सोमजम्भा। दन्तवचने--तृणमिव जम्भोऽस्य, सोम इव जम्भोऽस्येति विग्रहीतव्यम्। सुहरिततृणसोमेभ्य इति किम्? पतितजम्भः ।।

दक्षिणेर्मा लुब्धयोगे ।। 5.4.126 ।।
`दक्षिणेर्मा' इति कृतसमासान्तो निपात्यते बहुव्रीहौ समासे लुब्धयोगे। लुब्धः=व्याधः. दक्षिणमीर्ममस्य दक्षिणेर्मा मृगः। ईर्मम्=व्रणमुच्यते। दक्षिणमङ्गं व्रणितमस्य व्याधेनेत्यर्थः।
लुब्धयोग इति किम्? दक्षिणेर्म शकटम् ।।

इच् कर्मव्यतिहारे ।। 5.4.127 ।।
कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच् प्रत्ययो भवति। `तत्र तेनेदमिति सरुपे' इत्ययं बहुव्रीहिर्गृह्यते। केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि। कचाकचि। मुसलैश्च मुसलैश्च प्रहृत्य इदं युद्धं प्रवृत्तं मुसलामुसलि। दण्डादण्डि। तिष्ठद्गुप्रभृतिष्वयमिच्प्रत्ययः पठ्यते ।।

द्विदण्ड्यादिभ्यश्च ।। 5.4.128 ।।
द्विदण्ड्यादयः शब्दा इच्प्रत्ययान्ताः साधवो भवन्ति। `द्विदण्ड्यादिभ्यः' इति तादर्थ्ये एषा चतुर्थी, न पञ्चमी। द्विदण्ड्याद्यर्थमिच् प्रत्ययो भवति। तथा भवति यथा द्विदण्ड्यादयः सिध्यन्तीत्यर्थः। समुदायनिपातनाच्चर्थविशेषेऽवरुध्यन्ते। द्विदण्डि प्रहरति। द्विमुसलि प्रहरति। इह न भवति--द्विदण्डा शालेति। बहुव्रीह्यधिकारेऽपि तत्पुरुषात् क्वचिद्विधानमिच्छन्ति। निकुच्य कर्णौ धावति निकुच्यकर्णि धावति। प्रोह्य पादौ हस्तिनं वाहयति प्रोह्यपादि हस्तिनं वाहयति। मयूव्यंसकादित्वात्समासः।
द्विदण्डि। द्विमुसलि। उभाञ्जलि। उभयाञ्जलि। उभाकर्णि। उभयाकर्णि। उभादन्ति। उभयादन्ति। उभाहस्ति। उभयाहस्ति। उभापाणि। उभयापाणि। उभाबाहु। उभयाबाहु। एकपदि। प्रोहायपदि। आढ्यपदि। सपदि। निकुच्यकर्णि। संहतपुच्छि। उभाबाहु उभयाबाह्विति निपातनादिच्प्रत्ययलोपः। प्रत्ययलक्षणेनाव्ययीभावसंज्ञा। द्विदण्ड्यादिः ।।

प्रसम्भ्यां जानुनोर्ज्ञुः ।। 5.4.129 ।।
प्र, सम्-इत्येताब्यामुत्तरस्य जानुशब्दस्य ज्ञुरादेशो भवकति समासान्तो बहुव्रीहौ। प्रकृष्टे जानुनी अस्य प्रज्ञुः। संज्ञुः ।।

ऊर्ध्वाद्विभाषा ।। 5.4.130 ।।
ऊर्ध्वशब्दादुत्तरस्य जानुशब्दस्य विभाषा `ज्ञुः' इत्ययमादेशो भवति। ऊर्ध्वे जानुनी अस्य ऊर्ध्वजानुः। ऊर्ध्वज्ञुः ।।

ऊधसोऽनङ् ।। 5.4.131 ।।
ऊधः शब्दान्तस्य बहुव्रीहेरनङादेशो भवति समासान्तः। कुण्डमिव ऊधोऽस्याः सा कुण्डोध्नी। घटोध्नी।
* ऊधसोऽनङि स्त्रीग्रहणं कर्तव्यम् *। इह मा भूत्--महोधाः पर्जन्यः। घटोधो धैनुकम् ।।

धनुपश्च ।। 5.4.132 ।।
धनुःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति। शार्ङ्गं धनुरस्य शार्ङ्गधन्वा। गाण्डीवधन्वा। पुष्पधन्वा। अधज्यधन्वा ।।

वा संज्ञायाम् ।। 5.4.133 ।।
धनुःशब्दान्ताद्बहुब्रीहेरनङादेशो वा भवति संज्ञायां विषये। पूर्वेण नित्यः प्राप्तो विकल्प्यते। शतधनुः, शतधन्वा। दृढधनुः, दृढधन्वा ।।

जायाया निङ् ।। 5.4.134 ।।
जायाशब्दान्तस्य बहुव्रीहेर्निङादशो भवति। युवतिर्जाया यस्य युवजानिः। वृद्धजानिः ।।

गन्धस्येदुत्पूतिसुसुरभिभ्यः ।। 5.4.135।।

उत्, पूति, सु, सुरभि-इत्येतेभ्यः परस्य गन्धशब्दस्य इकारादेशो भवति समासान्तो बहुव्रीहौ समासे। तकार उच्चारणार्थः। उद्गतो गन्धोऽस्य उद्गन्धिः। पूतिगन्धिः. सुगन्धिः। सुरभिगन्धिः।

एतेभ्य इति किम्? तीव्रगन्धो वातः।

* गन्धस्येत्त्वे तदेकान्तग्रहणम् *। तेन शोभनो गन्धोऽस्य सुगन्ध आपणिकः ।।

अल्पाख्यायाम् ।। 5.4.136 ।।

अल्पाख्यायां यो गन्धशब्दस्तस्येकारदेशो भवति समासान्तो बहुव्रीहौ समासे। सूपोऽल्पोऽस्मिन् सूपगन्धि भोजनम्। अल्पमस्मिन् भोजने घृतम् घृतगन्धि। क्षीरगन्धि। अल्पपर्यायो गन्धशब्दः ।।

उपमानाच्च ।। 5.4.137 ।।

उपमानात्परो यो गन्धशब्दस्तस्येकारादेशो भवति समासान्तो बहुव्रीहौ समासे। पद्मस्येव गन्धोऽस्य पद्मगन्धिः। उत्पलगन्धिः। करीषगन्धिः ।।

पादस्य लोपोऽहस्त्यादिभ्यः ।। 5.4.138 ।।

`उपमानात्' इत्येव। उपमानाद्धस्त्यादिवर्जितात्परस्य पादशब्दस्य लोपो भवति समासान्तो बहुव्रीहौ समासे। स्थानिद्वारेण लोपस्य समासान्तता विज्ञायते। व्याघ्रस्येव पादावस्य व्याघ्रपात्। सिंहपात्।

अहस्त्यादिभ्य इति किम्? इस्तिपादः। कटोलपादः।

हस्तिन्। कटोल। गण्डोल। गण्डोलक। महिला। दासी। गणिका। कुसूल। हस्त्यादिः ।।

कुम्भपदीषु च ।। 5.4.139 ।।

कुम्भपदीप्रभृतयः कृतपादलोपाः समुदाया एव पठ्यन्ते, तत्रैवं सूत्रं ज्ञेयम्। पादस्य लोपो भवति कुम्भपद्यादिविषये यथा, कुम्भपद्यादयः सिद्ध्यन्ति।

समुदायपाठस्य च प्रयोजनं विषयनियमः--स्त्रियामेव, तत्र ङीष्प्रत्यये एव, नान्यादा। कुम्भपदी। शतपदी।

यच्चेहोपमानपूर्वम्, संख्यापूर्वं च पठ्यते, तस्य सिद्धे लोपे नित्यङीबर्थं वचनम्। `पादोऽन्यतरस्याम्' इति विकल्पो न भवति।

कुम्भपदी। शतपदी। अष्टापदी। जालपदी। एकपदी। मालापदी। मुनिपदी। गोधापदी। गोपदी। कलशीपदी। घृतपदी। दासोपदी। निष्पदी। आर्द्रपदी। कुणपदी। कृष्णपदी। द्रोणपदी। द्रपदी। शकृत्पदी। सूपपदी। पञ्चपदी। अर्वपदी। स्तनपदी। कुम्भपद्यादिः ।।

संख्यासुपूर्वस्य ।। 5.4.140 ।।

संक्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेः पादशब्दान्तस् लोपो भवति समासान्तः। द्वौ पादावस्य द्विपात्। त्रिपात्। शोभनौ पादावस्य सुपात् ।।

वयसि दन्तस्य दतृ ।। 5.4.141 ।।

संख्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेर्यो दन्तशब्दस्तस्य `दतृ' इत्ययमादेशो भवति समासान्तो वयसि गम्यमाने। ऋकार उगित्कार्यार्थः। द्वौ दन्तावस्य द्विदन्। त्रिदन्। चतुर्दन्। शोभना दन्ता अस्य समस्ता जाताः सुदन् कुमारः।

वयसीति किम्? द्विदन्तः कुञ्जरः। सुदन्तो दक्षिणात्यः ।।

छन्दसि च ।। 5.4.142 ।।

छन्दसि च दन्तशब्दस्य `दतृ' इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे। पत्त्रदतमालभेत। उभयदत आलभते ।।

स्त्रियां संज्ञायाम् ।। 5.4.143 ।।

स्त्रियामन्यपदर्थे संज्ञायां विषये दन्तशब्दस्य `दतृ' इत्ययमादेशो भवति। अयोदती। फालदती।

संज्ञायामिति किम्? समदन्ती। स्निग्धदन्ती ।

विभाषा श्यावारोकाभ्याम् ।। 5.4.144 ।।

श्याव, अरोक-इत्येताभ्यां परस्य दन्तशब्दस्य दतृ इत्ययमादेशा भवति विभाषा समासान्तो बहुव्रीहौ। श्यावदन्, श्यावदन्तः। अरोकदन्, अरोकदन्तः।

अरोकः=निर्दीप्तिः।

अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ।। 5.4.145 ।।
`विभाषा' इत्येव। अग्रान्ताच्छब्दात्, शुद्ध, शुभ्र, वृष, वराहइत्येतेभ्यश्च परस्य दन्तशब्दस्य विभाषा `दतृ' इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे। कुड्मलाग्रदन्, कुड्मलाग्रदन्तः। शुद्धदन्, शुद्धदन्तः। वृषदन्, वृषदन्तः। वराहदन्, वराहदन्तः।

अनुक्तसमकुच्चयार्थश्चकारः। अहिदन्, अहिदन्तः। मूषिकदन्, मूषिकदन्तः। गर्दभदन्, गर्दभदन्तः। शिखरदन्, शिखरदन्तः ।।

ककुदसमयावस्थायां लोपः ।। 5.4.146 ।।
ककुदशब्दान्तस्य बहुव्रीहेर्लोपो भवति समासान्तोऽवस्थायां गम्यमानायाम्। कालादिकृता वस्तुधर्मा वयःप्रभृतयः=अवस्था इत्युच्यते। असञ्जातं ककुदमस्य असञ्जातककुत्। बाल इत्यर्थः। पूर्णककुत्। मध्यमवया इत्यर्थः। उन्नतककुत्। वृद्धवया इत्यर्थः। स्थूलककुत्। बलवानित्यर्थः। यष्टिककुत्। नातिस्थूलो नातिकृस इत्यर्थः।
अवस्थायामिति किम्? श्वेतककुदः ।।

त्रिककुत्पर्वते ।। 5.4.147 ।।
त्रिककुदि बहुव्रीहौ ककुदशब्दस्य लोपः समासान्तो निपात्यते वर्वतेऽभिधेये। त्रीणि ककुदान्यस्य त्रिककुत्पर्वतः। ककुदाकारं पर्वतस्य श्रृङ्गम्=ककुदमित्युच्यते। न च सर्वस्त्रिशिखरः पर्वतस्त्रिककुत्। किं तर्हि? संज्ञैषा पर्वतविशेषस्य।
पर्वत इति किम्? क्षत्रिककुदोऽन्यः ।।

उद्विभ्यां काकुदस्य ।। 5.4.148 ।।
उत्, वि--इत्येताभ्यां परस्य काकुदशब्दस्य लोपो भवति बहुव्रीहौ समासे। उद्गतं काकुदमस्य उत्काकुत्। विकाकुत्। तालु=काकुदमुच्यते।।

पूर्णाद्विभाषा ।। 5.4.149 ।।
पूर्णात्परस्य काकुदशब्दास्य विभाषा लोपो भवति बहुव्रीहौ समासे। पूर्णं काकुदमस्य पुर्णकाकुत्, पुर्णकाकुदः ।।

सुहृद्दुर्हृदौ मित्त्रामित्रयोः ।। 5.4.150 ।।
सुहृत्, दुहृत्-इति निपात्यते यथासंख्यं मित्त्रामित्रयोरभिधेययोः। सुशब्दात्परस्य हृदयशब्दस्य हृद्भावा निपात्यते बहुव्रीहौ, तथा दुःशब्दात्परस्य। शोभनं हृदयमस्य सुहृतं मित्त्रम्। दुष्टं हृदयमस्य दुर्हृदमित्रम्।
मित्त्रामित्रयोरिति किम्? सुहृदयः कारुणिकः। दुर्हृदयश्चोरः ।।

उरःप्रभृतिभ्यः कप् ।। 5.4.151 ।।
उरःप्रभृत्यन्ताद्बहुव्रीहेः कप् प्रत्ययो भवति। व्यूढमुरोऽस्य व्युढोरस्कः। प्रियसर्पिष्कः। अवमुक्तोपानत्कः।
पुमान्, अनड्वान्, पयः, नौः, लक्ष्मीरिति विभक्त्यन्ताः पठ्यन्ते, न प्रातिपदिकानि। तत्रेदं प्रयोजनम्--एकवचनान्तानामेव ग्रहणमिह विज्ञायेत, द्विवचनबहुवचनान्तानां मा भूदिति। तत्र `शेषाद्विभाषा' इति विकल्प एव भवतीति। द्विपुमान्, द्विपुंस्कः। बहुपुमान्, बहुपुंस्कः।
उरस्। सर्पिस्। उपानह्। पुमान्। अनड्वान्। नौः। पयः। लक्ष्मीः। दधि। मधु। शालिः। *अर्थान्नञः *। अनर्थकः। उरःप्रभृति ।।

इनः स्त्रियाम् ।। 5.4.152 ।।
इन्नताद्बहुव्रीहेः कप् प्रत्ययो भवति स्त्रियां विषये। बहवो दण्डिनोऽस्यां शालायां बहुदण्डिका शाला। बहुच्छत्त्रिका। बरुस्वामिका नगरी। बरहुवाग्म्मिका सभा।
स्त्रियामिति किम्? बहुदण्डी राजा। बहुदण्डिकः। `शेषा द्विभाषा' इत्येतद्भवति।

नद्यृतश्च ।। 5.4.153 ।।
नद्यन्ताद्बहुव्रीहेर्ऋकारान्ताच्च कप् प्रत्ययो भवति। बह्व्यः कुमार्योऽस्मिन्देशे बहुकुमारिको देशः। बहुब्रह्मबन्धूकः। ऋतः खल्वपि--बहुकर्तृकः। तकारः मुखसुकोच्चारणार्थः ।।

शेषाद्विभाषा ।। 5.4.154 ।।

यस्माद्बहुव्रीहेः समासान्तो न विहितः स शेषः, तस्माद्विभाषा कप्प्रत्ययो भवति। बह्व्यः खट्वा अस्मिन् बहुखट्वकः, बहुमालकः, बहुवीणकः। बहुखट्वाकः, बहुमालाकः, बरुवीणाकः। बहुखट्वः, बहुमालः, बहुवीणः।

कथमनृक्कं साम, बह्वृक्कं सूक्तमिति, यावता विहितोऽत्र सामान्येन समासान्तः `ऋक्पूः' इति? नैतदस्ति; विशेषे स इष्यते--`अनृचो माणवको ज्ञेयो बह्वृचश्चरणाख्याम्' इति।

शेषादिति किम्? प्रियपथः। प्रियधुरः ।।

न संज्ञायाम् ।। 5.4.155 ।।

संज्ञायां विषये वहुव्रीहौ समासे कप् प्रत्ययो न भवति। पूर्वण प्राप्तः प्रतिषिद्ध्यते। विश्वे देवा अस्य विश्वदेवः। विश्वयशाः ।।

ईयसश्य ।। 5.4.156 ।।

ईयसन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति। सर्वा प्राप्तिः प्रतिषिध्यते। बहवः श्रेयांसोऽस्य बहुश्रेयान्। `शेषाद्विभाषा' इत्यस्य प्रतिषेधः। ह्रस्वत्वमपि न भवति; `इयसो बहुव्रीहौ पुंवत्' इति वचनात्।

वन्दिते भ्रातुः ।। 5.4.157 ।।

वन्दितेऽर्थे यो भ्रातृशब्दो वर्तते तदन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति। वन्दितः=स्तुतः, पूजित इत्युच्यते। शोभनो भ्राताऽस्य सुभ्राता।

वन्दित इति किम्? मूर्खभ्रातृकः। दुष्टभ्रातृकः ।।

ऋतश्छन्दसि ।। 5.4.158 ।।

ऋवर्णान्ताद् बहुव्रीहेश्छन्दसि विषये कप् प्रत्ययो न भवति। हता माताऽस्य हतमाता। हतपिता। हतस्वासा। सुहोता ।।

नाडीतन्त्र्योः स्वाङ्गे ।। 5.4.159 ।।

स्वाङ्गे यौ नाडी-तन्त्रीश्बदौ तदन्ताद्बहुव्रहेः कप् प्रत्ययो न भवति। बह्व्यो नाड्योऽस्य बहुनाडिः कायः। बहुतन्त्रीर्ग्रीवा। धमनीवचनस्तन्त्रीशब्दः।

स्वाङ्गो इति किम्? बहुनाडीकः स्तम्भः। बहुतन्त्रीका वीणा ।।

निष्प्रवाणिश्च ।। 5.4.160 ।।

`निष्प्रवाणिः' इति नदीलक्षणस्य कपः प्रतिषेधो निपात्यते। प्रोयतेऽऽयामिति प्रवाणी। प्रवयन्ति तयेति वा प्रवाणी। करणसाधनोऽयं ल्युट्। तन्तुवायशलाका भण्यते। निर्गता प्रवाणी अस्य निष्प्रवाणिः पटः। निष्प्रवाणिः कम्बलः=अपनीतशलाकः समाप्तवानः प्रत्यग्रो नवक उच्यते ।।

इति श्रीवामनविरचितायां काशिकावृत्तौ
पञ्चमाध्ययस्य चतुर्थः पादः

6.1

काशिकावृत्तिः

अथ षष्ठाध्याये प्रथमः पादः

एकाचो द्वे प्रथमस्य ।। 6.1.1 ।।

अधिकारोऽयम्। `एकाचः' इति च, `द्वे' इति च, `प्रथमस्य' इति च त्रितयमधिकृतं वेदितव्यम्। इत उत्तरं यद्वक्ष्यामः प्राक्सम्प्रसारणविधानात् तत्र `एकाचः प्रथमस्य द्वे भवतः' इत्येवं तद्वेदितव्यम्।

वक्ष्यति-`लिटि धातोरनभ्यासस्य' इति। तत्र धातोरवयवस्यानभ्यासस्य प्रथमस्यैकाचौ द्वे भवतः। जजागार। पपाच। इयाय। आर।

`एकाचः' इति बहुव्रीहिनिर्देशः। एकोऽच् यस्य सोऽयमेकाच्---इत्यवयवेन विग्रहः। तत्र समुदायः समासार्थः। अभ्यन्तरश्च समुदायेऽवयवो भवतीति साच्कस्यैव द्विर्वचनं भवति। एवं च--पच् इत्यत्र येनैवाचा समुदाय एकाच्, तेनैव तदवयवोऽच्छब्दः पशब्दश्च। तत्र पृथगवयवैकाचो न द्विरुच्यन्ते, किं तर्हि ? समुदायैकाजेव।

तथा हि--सकृच्छास्त्रप्रवृत्त्या सावयवः समुदायोऽनुगृह्यते। पपाचेत्यत्र प्रथमत्वं व्यपदेशिवद्भावात्। इयाय, आर-इत्यत्रैकाच्त्वमपि व्यपदेशिवद्भावादेव। द्विःप्रयोगश्च द्विर्वचनमिदम्। आवृत्तिसंख्या हि `द्वे' इति विधीयते। तेन स एव शब्दो द्विरुच्चार्यते, न च शब्दान्तरं तस्य स्थाने विधीयते ।।

अजादेर्द्वितीयस्य ।। 6.1.2 ।।

प्रथमद्विर्वचनापवादोऽयम्। अजादेर्द्वितीयस्यैकाचो द्विर्वचनमधिक्रियते। अच् आदिर्यस्य धातोस्तदवयवस्य द्वितीयस्यैकाचो द्वे भवतः। अटिटिषति। अशिशिषति। अरिरिषति। अर्त्तेः `स्मिपूङ्रञ्ज्वशां सनि' इति इट् क्रियते, तस्मिन् कृते गुणे च रपरत्वे च `द्विर्वचनेऽचि' इति स्थानिवद्भावः प्राप्नोति। तत्र प्रतिविधानम्--द्विर्वचननिमित्तेऽचीत्युच्यते। न चात्र द्विर्वचननिमित्तमिट्, किं तर्हि? कार्यी। न च कार्यी निमित्तत्वेनाश्रोयते। तथा हि--क्ङिन्निमित्तयोर्गुणवृद्ध्योः प्रतिषेधो विधीयमानः शयितेत्यत्र न भवति, न हि कार्यिणः शीङो गुणं प्रति निमित्तभाव इति।

अत्र केचिदजादेरिति कर्मधारयात्पञ्चमीमिच्छन्ति---अच्चासावादिश्चेत्यजादिः, तस्मादजादेरुत्तरस्यैकाचो द्वे भवत इति। तेषाम् `द्वितीयस्य' इति विश्पष्टार्थं द्रष्टव्यम् ।।

न न्द्राः संयोगादयः ।। 6.1.3 ।।

`द्वितीयस्य' इत् वर्त्तते। द्वितीयस्यैकाचोऽवयवभूतानां न्द्राणां तदन्तर्भावात् प्राप्तं द्विर्वचनं प्रतिष्ध्यते। नकारदकाररेफा द्वितीयैकाचोऽवयवभूताः संयोगादयो न द्विरुच्यन्ते। उन्दिदिषति। अड्डिडिषति। अर्चिचिषति।

न्द्रा इति किम्? ईचिक्षिषते। संयोगादय इति किम्? प्राणिणिषति। `अनितेः' `उभौ साभ्यासस्य' इति णत्वम्।

अजाजेरित्येव--दिद्रासति।

केचिदजादेरित्यपि पञ्चम्यन्तं कर्मधारयमनुवर्त्तयन्ति। तस्य प्रयोजनम्--इन्दिद्रीयिषतीति। अडजादेरनन्तरत्वाभावाद् दकारो द्विरुच्यत एव, नकारो न द्विरुच्यते। इन्द्रमिच्छति, क्यच्, तदन्तात् इन्द्रीयितुमिच्छतीति सन् ।।

* बकारस्याप्यं प्रतिषेधो वक्तव्यः *। उब्जिजिषति। यदा बकारोपध उब्जिरुपदिश्यते तदायं प्रतिषेधः। दकारोपधोपदेशे तु न वक्तव्यः। बत्वं तु तदा दकारस्य विधातव्यम् ।

* यकारपरस्य रेफस्य प्रतिषेधो न भवतीति वक्तव्यम् *। अरार्यते। अर्तेः `अट्यर्तिशूर्णोतीनामुपसंख्यानम्' इति यङ्। तत्र `यङि च' इति गुणः, ततो द्विर्वचनम्।

* ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यम् *। कस्य कृतीयस्य ? केचिदाहुर्व्यञ्जनस्येति--ईर्ष्यियिषति। अपरे पुनः `तृतीयस्यैकाचः' इति व्याचक्षते--ईर्ष्यिषिषति।

* कण्ड्वादीनां तृतीयस्यैकाचो द्वे भवत इति वक्तव्यम् *। कण्डूयियिषति। असूयियिषति ।।

* वा नामधातूनां तृतीयस्यैकाचौ द्वे भवत इति वक्तव्यम् *। अस्वीयियिषति। अशिस्वीयिषति।

अपर आह---

* यथेष्टं नामधातुष्विति वक्तव्यम् *। पुपुक्षत्रीयिषति। पुतित्रीयिषति। पुत्रीयियिषति। पुपुतित्रीयियिषति। पुत्रीयिषिषति ।।

पूर्वोऽभ्यासः ।। 6.1.4 ।।

`द्वे' इति प्रथमान्तं यदनुवर्त्तते तदर्थादिह षष्ठ्यन्तं जायते। तत्र प्रत्यासत्तेरस्मिन्प्रकरणे ये द्वे विहिते तयोर्यः पूर्वोऽवयवः सोऽभ्याससंज्ञो भवति। पपाच। पिपक्षति। पापच्यते। जुहोति। अपोपचत्।

अभ्यासप्रदेशास्तु--`अत्र लोपोऽभ्यासस्य' इत्येवमादयः ।।

उभे अभ्यस्तम् ।। 6.1.5 ।।

`द्वे' इति वर्त्तमाने `उभे' ग्रहणं समुदायसंज्ञाप्रतिपत्त्यर्थम्। ये द्वे विहिते ते उभे अपि समुदिते अब्यस्तसंज्ञे भवतः। ददति। ददत्। दधतु।

उभेग्रहणं किम् ? नेनिजतीत्यत्र `अब्यस्तानामादिः' इति समुदाये उदात्तत्वं यथा स्यात्, प्रत्येकं पर्यायेण वा मा भूदिति।
अभ्यस्तप्रदेशाः--`अभ्यस्तानामादिः' इत्येवमादयः ।।

जक्षित्यादयः षट् ।। 6.1.6 ।।
`अभ्यस्तम्' इति वर्त्तते। `जक्ष' इत्ययं धातुरित्यादयश्चान्ये षट् दातवोऽभ्यस्तसंज्ञा भवन्ति। सेयं सप्तानां धातूनामभ्यस्तसंज्ञा विधीयते। `जक्ष भक्षहसनयोः' इत्यतः प्रभृति `वेवीङ् वेतिना तुल्ये' इति यावत्। जक्षति। जाग्रति। दरिद्रति। चकासति। शासति।
दीध्यते, वेव्यते---इत्यत्र `अभ्यस्तानामादिः' इत्येष स्वरः प्रयोजनम्। दीध्यदिति च शतरि व्यत्ययेन सम्पादिते `नाभ्यस्ताच्छतुः' इति नुमः प्रतिषेधः ।।

तुजादीनां दीर्घोऽभ्यासस्य ।। 6.1.7 ।।
तुजादीनामिति प्रकारे आदिशब्दः। कश्च प्रारः ? तुजेर्दीर्घोभ्यासस्य न विहितः, दृश्यते च, ये तथाभूतास्ते तुजादयः, तेषामभ्यासस्य दीर्घः साधुर्भवति।
तूतुजानः. मामहानः। अनड्वान् दाधार। स्वधां मीमाय। दाधार। स तूताव।
दीर्घश्चैषां छन्दसि प्रयविशेषे एव दृश्यते, ततोऽन्यत्रक न भवति--तुतोज शबलान् ।।

लिटि दातोरनभ्यासस्य ।। 6.1.8 ।।
लिटि परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः। पपाच। पपाठ। प्रोर्णुनाव। `वाच्य ऊर्णोर्णुवद्भावः' इति वचनाद् ऊर्णोतेरिजादेरित्याम्न भवति।
लिटिति किम्? कर्त्ता। हर्त्ता। धातोरिति किम् ? ससृवांसो विश्रृण्विरे। सोममिन्द्राय सुन्विरे। अनभ्यासस्येति किम् ? कृष्णो नोनाव वृषभो यदीदम्। नोनूयतेर्नोनाव। सम्मान्या मरुतः सम्मिमिक्षुः। लिटि उसन्तः।
* द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् *। यो जागार तमृचः कामयन्ते। दाति प्रियाणीति ।।

सन्यङोः ।। 6.1.9 ।।
`धातोरनभ्यासस्य' इति वर्त्तते। `सन्यङोः' इति च षष्ठ्यन्तमेतत्। सनन्तस्य यङ्न्तचस्य चानभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः। पिपक्षति। पिपतिषति। अरिरिषति। उन्दिदिषति।
यङन्तस्य--पापच्यते। अटाट्यते। यायज्यते। अरार्यते। प्रोर्णोनूयते।
अनभ्यासस्येत्येव--गुगुप्सिषते। लोलूयिषते ।।

श्लौ ।। 6.1.10 ।।
श्लौ परतोऽनभ्यासास्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः। जुहोति। बिभेति। जिह्रेति ।।

चङि ।। 6.1.11 ।।
चङि परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः। अपीपचत्। अपीपठत्। आटिटत्। आशिशत्। आर्दिदत्।
पचादीनां ण्यन्तानां चङि कृते णिलोप उपधाह्रस्वत्वं द्विर्वचनम् इत्येषां कार्याणां प्रवृत्तिक्रमः। तथा च-`सन्वल्लघुनि चङ्परे' इति सन्वद्भावो विधीयमानो ह्रस्वस्य स्थानिवद्भावान्न प्रतिषिध्यते। यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावो भवति। न चास्मिन् कार्याणां क्रमेणानादिष्टादचः पूर्वोऽभ्यासो भवतीति।
आटिटदिति `द्विर्वचनेऽचि' इति स्थानिवद्भावाद् द्वितीयस्यैकाचो द्विर्वचनं भवति ।।

दाश्वान् साह्वान् मीढ्वांश्च ।। 6.1.12 ।।
दाश्वान्, साह्वान्, मीढ्वान्--इत्येते शब्दाश्छन्दसि भाषायां चाविशेषेण निपात्यन्ते। दाश्वानिति `दाश्रृ दाने' इत्येतस्य धातोः क्वसावद्विर्वचनमनिट्त्वं च निपात्येते। दाश्वांसो दाशुषः सुतमिति।
साह्वानिति `षह मर्षणे'--इत्येतस्य परस्मैपदम्, उपधाधीर्घत्वम्, अद्विर्वचनम्, अनिट्त्वं च निपातनात्। साह्वान्बलाहकः।
मीढवानिति `मिह सेचने' इत्येतस्याद्वित्वम्, अनिट्त्वम्, उपधादीर्घत्वं ढत्वं च निपातनात्। मीढ्वस्तोकाय तनयाय मृडय। एकवचनमतन्त्रम्।
* कृञादीनां के द्वे भवत इति वक्तव्यम् *। क्रियतेऽनेनेति चक्रम्। चिक्लिदम्। कृञः क्लिदेश्च `घञर्थेकविदानम्' इति कप्रत्ययः।
* चरिचलिपतिवदीनां द्वित्वमच्याक्चाभ्यासस्य *। चरादीनां धातूनामपि प्रत्यये परतो द्वे भवतः। अभ्यासस्यागागमो भवति, आगागमविधानसामर्थ्याच्च हलादिशेषो न भवति। हलादिशेषे हि सत्यागमस्यादेशस्य च विशेषो नास्ति। चराचरः। चलाचलः। पतापतः। वदावदः।

* वेति वक्तव्यम् *। तेन चरः पुरुषः, चलो रथः, पतं यानम्, वदो मनुष्यः---इत्येवमाद्यपि सिद्धं भवति।

* हन्तेर्घत्वं च *। हन्तेरचि प्रत्यये परतो द्वे भवतोऽभ्यासस्य च हकारस्य च घत्वमाक् चागमो भवति। परस्य `अभ्यासाच्च' इति कुत्वम्। घनाघनः क्षोभणश्चर्षणीनाम्।

* पाटेर्णिलुक् चोक् च दीर्घश्चाभ्यासस्य *। पाटेरचि परतो द्वे भवतः, णिलुक्च भवति। अभ्यासस्य चोगागमो दीर्घश्च भवति। पाटूपटः ।।

ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे ।। 6.1.13 ।।

पुत्र, पति-इत्येतयोरुत्तरपदयोस्तत्पुरुषे समासे ष्यङः सम्प्रसारणं भवति। यणः स्थाने इग्भवतीत्यर्थः। कारीषगन्धीपुत्रः, कारीषगन्धीपतिः। कौमुदगनधीपुत्रः, कौमुदगन्धीपतिः। परीषस्येव गन्धोऽस्य, कुमुदस्येव गन्धोऽस्येति बहुव्रीहिः, तत्र `अपमानाच्च' इति गन्धस्येदन्तादेशः, करीषगन्धेरपत्यमित्यण्, तदन्तात्स्त्रियाम् `अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे' इति ष्यङ्, ततश्चापि विहिते षष्ठीसमासः, `सम्प्रसारणस्य' इति दीर्घत्वम्।

ष्यङ इति किम्? इब्यापुत्रः। क्षत्त्रियापुत्रः पुत्रपत्योरिति किम् ? कारीषगन्धायाकुलम्। कौमुदगन्ध्याकुलम्। तत्पुरुष इति किम् ? कारोषगन्ध्यापतिरस्य ग्रामस्य कारीषगन्ध्यापतिरयं ग्रामः।

ष्यङ इति स्त्रीप्रत्ययग्रहणम्, `न स्त्रीप्रत्यये चानुपसर्जने' इति प्रत्ययग्रहणपरिभाषया `यस्मात् स विहितस्तदादेः' इत्येष नियमो नास्ति; तेन परमकारीषगन्ध्यायाः पुत्रः परमकारीषगन्धीपुत्रः, परमकारीषगन्धीपतिरित्यपि भवति।

उपसर्जने तु ष्यङि न भवति-अतिक्रान्ता कारीषगन्ध्यामतिकारीषगन्ध्या, तस्य पुत्रोऽतिकारीषगन्ध्यापुत्रः, अतिकारीषगन्ध्यापतिः।

पुत्रपत्योः केवलयोरुत्तरपदयोरिदं सम्प्रसारणम्, तदादौ तदन्ते च न भवति--कारीषगन्ध्यापुत्रकुलम्, कारीषगन्ध्यापरमपुत्र इति।

ष्यङ्न्ते च यद्यप्यन्ये यणः सन्ति; तथापि ष्यङ एव संप्रसारणम्, `निर्दिश्यमानस्यादेशा भवन्ति' इति।

सम्प्रसारणमिति चाधिक्रियते `विभाषा परेः' इति यावत् ।।

वन्धुनि बहुव्रीहौ ।। 6.1.14 ।।

`ष्यङः सम्प्रसार्णम्' इत्यनुवर्तते। बन्धुशब्द उत्तरपदे बहुव्रीहौ समासे ष्यङः सम्प्रसारणं भवति। कारीषगन्ध्या बन्धुरस्य कारीषगन्धीबन्धुः। कौमुदगन्धीबन्धुः। बहुव्रीहाविति किम् ? कारीषगन्ध्याया बन्धुः कारीषगन्ध्याबन्धुः। अत्रापि पूर्ववदेव। परमकारीषगन्धीबन्धुरित्यत्र भवति। अतिकारीषगन्ध्याबन्धुरिति च न भवति, तता कारीषगन्ध्याबन्धुधनः, कारीषगन्ध्यापरमबन्धुरित्यादौ न।

बन्धुनीति नपुंसकलिङ्गनिर्द्देशः शब्दरूपापेक्षया, पुंल्लिङ्गाभिधेयोऽयं बन्धुशब्दः।

* मातच्मातृकमातृषु *। ष्यङः सम्प्रसारणं भवति विभाषया बहुव्रीहावेव। कारीषगन्ध्या माताऽस्य-इत्येवं बहुव्रीहौ कृते एतस्मादेवोपसंक्यानात्। पक्षे मातृशब्दस्य मातजादेशः, तत्र चित्करणसामर्थ्याद्बहुव्रीहिस्वरमन्तोदात्तत्वं बाधते।

मातृ मातृकशब्दयोश्च भेदेनोपादनाद् `नद्यृतश्च' इति कबपि विकल्प्यते--कारीषगन्धीमातः, कारीषगन्ध्यामातः; कारीषगन्धीमातृकः, कारीषगन्ध्यामातृकः; कारीषगन्धीमाता, कारीषगन्ध्यामाता ।।

वचिस्वपियजादीनां किति ।। 6.1.15 ।।

`सम्प्रसारणम्' इति वर्त्तते। `ष्यङः' इति निवृत्तम्। वचि--`वच परिभाषणे', `ब्रुवो वचिः' इति च। स्वपि-`ञिष्वप् शये'। यजादयः--`यज देवपूजासङ्गतिकरणदानेषु' इत्यतः प्रभृति आगणान्ताः, तेषां वचिस्वपियजीदीनां किति प्रत्यये परतः सम्प्रसारणं भवति। वचि--उक्तः, उक्तवान्। स्वपि--सुप्तः, सुप्तवान्। यजइष्टः, इष्टवान्। वप्-उप्तः, उप्तवान्। वह-ऊढः, ऊढवान्। वसऊषितः, ऊषितवान्। वेञ्-उतः उतवान्। व्येञ्-संवीतः, संवीतवान्। ह्वेञ्--आहूतः, आहुतवान्। वद-उदितः, उदितवान्। टुओशिव-शूनः, शूनवान्।

धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यं विज्ञायते। तेनेह न भवतिवाच्यति, वाचिक इति।।

ग्रहिज्यचावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ।। 6.1.16 ।।

`ग्रह उपादाने', `ज्या वयोहानौ', `वेञो वयिः', `व्यध ताडने', `वश कान्तौ', `व्यच व्याजीकरणे', `ओव्रश्चू छेदने', `प्रच्छ ज्ञीप्सायाम्', `भ्रस्ज पाके'--इत्येतेषां धातूनां ङिति प्रत्यये परतश्चकारात् किति च सम्प्रसारणं भवति। ग्रह-गृहीतः। गृहीतवान्। ङितिगृह्णाति, जरीगृह्यते। ज्या-जीनः, जीनवान्। `ल्वादिभ्यः' इति निष्ठानत्वम्। ङिति-जिनाति, जेजीयते। `हलः' इति सम्प्रसारणदीर्घे कृते `प्वादीनाम्' इति ह्रस्वः क्रियते।

वयिः--लिटि परतो वेञो वयिरादेशः, तस्य ङिद्भावात् किदेवोदाह्रियते-ऊयतुः, ऊयुः। यद्येवम्, वयिग्रहणमनर्थकम्, यजादिषु वेञ् पठ्यते ? नैवं शक्यम्; लिटि तस्य वेञ इति प्रतिषेधो वक्ष्यकते, तत्र यथैव स्थानिवद्बावाद्वयेर्विधिः, एवं प्रतिषेधोऽपि प्राप्नोति ? नैष दोषः; `लिटि वयो यः' इति यकारस्य सम्प्रसारणप्रतिषेधाद् वयेर्विधौ ग्रहणं प्रतिषेधे चाग्रहणमनुमास्यते ? सत्यमेतत्; एष एवार्थः साक्षान्निर्देशेन वयेः स्पष्टीक्रियते।

व्यध--विद्धः, विद्धवान्। ङिति-विध्यति, वेविध्यते। वशउशितः, उशितवान्। ङिति-उष्टः, उशन्ति।

व्यच-विचितः। विचितवान्। ङिति-विचति, वेविच्यते। `व्यचेः कुटादित्वमनसि' प्रतिपादितम्, तेन सर्वत्राञ्णिति प्रत्यये सम्प्रसारणं भवति--उद्विचिता, उद्विचितुम्, उद्विचितव्यमिति।

व्रश्चेः--वृक्णः, वृक्णवान्। अथ कथमत्र कुत्वम्, `व्रश्चभ्रस्ज' इति हि षत्वेन भवितव्यम् ? * निष्ठादेशः शत्वस्वरप्रत्ययविधीड्विधिषु सिद्धो वक्तव्यः *। तत्र षत्वं प्रति नत्वस्य सिद्धत्वाद् झलादिर्निष्ठा न भवति। कुत्वे तु कर्त्तव्ये तदसिद्धमेवेति प्रवर्तते कुत्वम्। ङिति--वृश्चति, वरीवृश्च्यते।

प्रच्छ--पृष्टः, पृष्टवान्। ङिति--पृच्छति, परीपृच्छ्यते, प्रशनः। नङि तु `प्रशने चासन्नकाले' इति निपातनादसम्प्रसारणम्।

भ्रस्ज--भृष्टः, भृष्टवान्। ङिति--भृज्जति, बरीभृज्जयते। सकारस्य `झलां जश् झशि' इति जश्त्वेन दकारः, `स्तोः श्चुना श्चुः' इति श्चुत्वेन जकारः ।।

लिट्यभ्यासस्योभयेषाम् ।। 6.1.17 ।।

उभयेषां वच्यादीनां ग्रह्यादीनां च लिटि परतोऽभ्यासस्य सम्प्रसारणं भवति। वचि-उवाच, उवचिथ। स्वप्--सुष्वाप, सुष्वपिथ। यज्ञ-इयाज, इयजिथ। टुवप्-उवाप, उवपिथ।

ग्रह्यादीनाम्-तत्र ग्रहेरविशेषः। जग्राह, जग्रहिथ। ज्याजिज्यौ, जिज्यिथ। वयि-उवाय, उवयिथ। व्यध-विप्याध, विव्यधिथ। वश-उवाश, उवशिथ। व्यच-विव्याच, विव्यचिथ।

वृश्चतेः सत्यसति वा योगे नास्ति विशेषः। योगारम्बे तु सति यदि सम्प्रसारणमकृत्वा हलादिःशेषेण रेफो निवर्त्यते, तदा वकारस्य सम्प्रसारणं प्राप्नोति। अथ रेफस्य सम्प्रसारणं कृत्वा उरदत्वं रपरत्वं च क्रियते, तदानीमुरदत्वस्य स्थानिवद्भावात् `न सम्प्रसारणे सम्प्रसारणम्' इति कप्रतिपेधो भवतीत्यस्ति विशेषः। वव्रश्च, वव्रश्चिथ।

पृच्छतिभृज्योरविशेषः। अकिदर्थं चेदमभ्यासस्य सम्प्रसारणं विधीयते। किति हि परत्वाद्धातोः सम्प्रसारेणे कृते पुनः प्रसङ्गविज्ञानाद् द्विर्वचनम्--ऊचतुः, ऊचुरिति।

अधिकारोदेवोभयेषां ग्रहणे सिद्धे पुनरुभयेषामिति वचनम्हलादिःशेषमपि बाधित्वा सम्प्रसारणमेव यथा स्यादिति-विव्याध ।।

स्वापेश्चङि ।। 6.1.18 ।।

स्वापेरिति स्वपेर्ण्यन्तस्य ग्रहणम्, तस्य चङि परतः सम्प्रसारणं भवति। असूषुपत्, असूषुपन्। द्विर्वचनात्पूर्वमत्र सम्प्रसारणम्, तत्र कृते लघूपधगुणः, तस्य `णौ चङ्युपधायाः' ह्रस्वत्वम्, ततो द्विर्वचनम्, `दीर्घो लघोः' इति दीर्घत्वम्।

चङीति किम् ? स्वाप्यते। स्वापितः।

`कितीति निवृत्तम्, ङितीति केवलमिहानुवर्त्तते'--इत्येतद्दुर्विज्ञानम् ।।

स्वपिस्यमिव्येञां यङि ।। 6.1.19 ।।

`ञिष्वप् शये', `स्यमु स्वन् ध्वन शब्दे', `व्येञ् संवरणे'--इत्येतेषां धातूनां यङि परतः सम्प्रसारणं भवति। सोषुप्यते। सेसिम्यते। वेवीयते।

यङीति किम् ? स्वप्नक् ।।

न वशः ।। 6.1.20 ।।

`यङि' इति वर्त्तते। वशेर्द्धातोर्यङि परतः सम्प्रसारणं न भवति। वावश्यते, वावश्येते, वावश्यन्ते।

यङीति किम् ? उष्टः। उशन्ति ।।

चायः की ।। 6.1.21 ।।

`यङि' इति वर्त्तते। `चायृ पूजानिशामनयोः' इत्येतस्य धातोर्यङि परतः कीत्ययमादेशो भवति। चेकीयते, चेकीयेते, चेकीयन्ते।

दीर्घोच्चारणं यङ्लुगर्थम्। चेकीतः।।

स्फायः स्फी निष्ठायाम् ।। 6.1.22 ।।

`स्फायी ओप्यायी वृद्धौ'--इत्यस्य धातोर्निष्टायां परतः `स्फी' इत्ययमादेशो भविति। स्फीतः। स्फीतवान्।

निष्ठायामिति किम् ? स्फातिः। स्फातीभवतीत्येदपि क्तिन्नन्तस्यैव रूपम्, न निष्ठान्तस्य।

`निष्ठायाम्' इत्येतदधिक्रियते `लिङ्यङोश्च' इति प्रागेतस्मात् सूत्रात् ।।

स्त्यः प्रपूर्वस्य ।। 6.1.23 ।।
`निष्ठायाम्' इति वर्त्तते, `सम्प्रसारणम्' इति च। `स्फी' इत्येतन्न स्वर्यते। `स्त्यै ष्ट्यै शब्दसङ्घातयोः'--द्वयोरपर्येतयोर्द्धात्वोः स्त्यारूपमापन्नयोः सामान्येन ग्रहणम्। `रत्या' इत्येतस्य प्रपूर्वस्य धातोर्निष्ठायां परतः सम्प्रसारणं भवति। प्रस्तीतः। प्रस्तीतवान्। सम्प्रसारणे कृते यण्वत्त्वं विहतमिति निष्ठानत्वं न भवति। `प्रस्त्योऽन्यतरस्याम्' इति तु पक्षे मकारः क्रियते--प्रस्तीमः, प्रस्तीमवान्।

प्रपूर्वस्येति किम् ? संस्त्यानः, संस्त्यानवान्।
`प्रस्त्यः' इत्येव सिद्धे पूर्वग्रहणमिहापि यथा स्यात्-प्रसंस्तीतः, प्रसंस्तीतवान्।
तत्कथं प्रपूर्वस्यति षष्ठ्यर्थे बहुव्रीहिः ? प्रः पूर्वो यस्य धातूपसर्गसमुदायस्य स प्रपूर्वस्तदवयवस्य सत्यः--इति व्यधिकरणे षष्ठ्यौ। तत्र प्रसंस्तोत इत्यत्रापि प्रपूर्वसमुदायावयवः स्त्याशब्दो भवति ।।

द्रवमूर्त्तिस्पर्शयोः श्यः ।। 6.1.24 ।।
द्रवमूर्त्तौ=द्रवकाठिन्ये, स्पर्शे वर्त्तमानस्य `श्यैङ् गतौ' इत्यस्य थातोर्निष्टायां परतः सम्प्रसारणं भवति। शीनं घृतम्। शीना वसा। शीनं मेदः। द्रवावस्थायाः काठिन्यं गतमित्यर्थः। `स्योऽस्पर्शे' इति निष्ठानत्वम्।
स्पर्शे च---शीतं वर्त्तते। शोतो वायुः। शीतमुदकम्। गुणमात्रे तद्वति चास्य शीतशब्दस्य वृत्तिर्द्रष्टव्या।
द्वरमूर्त्तिस्पर्शयोरिति किम् ? संश्यानो वृश्चिकः ।।

प्रतेश्च ।। 6.1.25 ।।
`श्यः' इति वर्त्तते। प्रतेरुत्तरस्य श्यायतेर्निष्ठायां परतः सम्प्रसारणं भवति। प्रतिशोनः, प्रतिशीनवान्।
द्रवमूर्त्तिस्पर्शाभ्यामन्यत्रापि यथा स्यादिति सूत्रारम्भः ।।

विभाषाऽभ्यवपूर्वस्य ।। 6.1.26 ।।
`श्यः' इति वर्त्तते। अभि, अव-इत्येवम्पूर्वस्य श्यायतेर्निष्ठायां विभाषा सम्प्रसारणं भवति। अभिशोनम्, अभिशायनम्। अवशीनम्, अवश्यानम्।
द्रवमूर्त्तिस्पर्शविवक्षायामपि विकल्पो भवति। अभिशीनं घृतम्, अभिश्यानं घृतम्। अवशीनं मेदः, अवश्यानं मेदः। अभिशीतो वायुः, अभिश्यानः। अवशीतमुदकम्, अवश्यानमुदकम्।
सेयमुभ्यत्रविभाषा द्रष्टव्या। पूर्वग्रहणस्य च प्रयोजनम्--समभिश्यानम्, समवश्यानमित्यत्र मा भूदिति केचिद् व्याचक्षते। न किलायमभ्यवपूर्वः समुदाय इति। योऽत्राभ्यवपूर्वः समुदायस्तदाश्रयो विकल्पः कस्मान्न भवति! तस्मादत्र भवितव्यमेव। यदि तु नेष्यते, ततो यत्नान्तरमास्थेयमस्माद्विभाषाविज्ञानात्--व्यवस्थेयम्। पूर्वग्रहणस्य चान्यत् प्रयोजनं वक्तव्यम्।

श्रृतं पाके ।। 6.1.27 ।।
`विभाषा' इत्यनुवर्त्तते। `श्रा पाके'----इत्येतस्य धातोर्ण्यन्तस्याण्यन्तस्य च पाकेऽभिधेये क्तप्रत्यये परतः श्रृभावो निपात्यते विभषा। श्रृतं क्षीरम्। श्रृतं हविः। व्यवस्थितविभाषा चेयम्, तेन क्षीरहविषोर्नित्यं श्रृभावो भवति। अन्यत्र न भवति--श्राणा यवलागूः, श्रपिता यवागूरिति।
यदापि बाह्ये प्रयोजके द्वितीयो णिजुत्पद्यते, तदापि नेष्यतेश्रपितं क्षीरं देवदत्तेन यज्ञदत्तेनेति।
श्रातिरयमकर्मकः कर्मकर्तृविष्यस्य पचेरर्थे वर्त्तते, स ण्यन्तोऽपि प्राकृतं पच्यर्थमाह। तदत्र द्वयोरपि श्रृतमितीष्यते-श्रृतं क्षीरं स्वयमेव, श्रृतं क्षीरं देवदत्तेन। पाकग्रहणं निपातनविषयप्रदर्शनार्थम्, तेन क्षीरहविषोरेव ।।

प्यायः पी ।। 6.1.28 ।।
`विभाषा' इत्येव। `ओप्यायी वृद्धौ'--इत्यस्य धातोर्निष्ठायां विभाषां पीत्ययमादेशो भवति। पीनं मुखम्। पीनौ बाहू। पीनमुरः।
इयमपि व्यवस्थितविभाषैव, तेनानुपसर्गस्य नित्यं भवति। सोपसर्गस्य तु नैव भवति। आप्यानश्चन्द्रमाः।
आङ्पूर्वस्यान्धूधसोर्भवत्येव--आपीनोऽन्धुः। आपीनमूध इति ।।

लिङ्यङोस्च ।। 6.1.29 ।।
`विभाषा' इति निवृत्तम्। `प्यायः पी' इत्येतच्चशब्दोनानुकृष्यते। लिटि यङि च परतः प्यायः `पी' इत्ययमादेशो भवति। आपिप्ये। आपिप्यिरे। परत्वात् पीभावे कृते पुनःप्रसङ्गदविज्ञानाद् द्वलिर्वचनम्, `एरनेकाचः' इति यणादेशः।

यङि--आपेपीयते। अपेपीयन्ते ।।

विभाषा श्वेः ।। 6.1.30 ।।
`लिड्यङोः' इति वर्त्तते, `सम्प्रसारणम्' इति च। लिटि यङि च स्वयतेर्धातोर्विभाषा सम्प्रसारणं भवति। सुशाव, शिश्वाय। शुशुवतुः, शिश्वियतुः। यङि--शोशूयते, शेश्वीयते। तदत्र यङि सम्प्रसारणमप्राप्तिविभाषा विधीयते। लिटि तु किति यजीदित्वलाद् नित्यं प्राप्तम्, तत्र सर्वत्र विकल्पो भवतीत्येषोभयत्र विभाषा।
यदा च धातोर्न भवति, तदा `लिट्यभ्यासस्योभ्येषाम्' इत्यभ्यासस्यापि न भवति ।।

णौ च संश्चङोः ।। 6.1.31 ।।
`विभाषा श्वेः' इति वर्त्तते। सन्परे चङ्परे च णौ परतः स्वयतेर्धातोर्विभाषा सम्प्रसारणं भवति। सुशावयिषति। चङि--अशूशवत्, अशिश्वयत्। `सम्प्रसारणं सम्प्रसारणाश्रयं च बलीयो भवति' इति वचनादन्तरङ्गमपि वृद्ध्यादिकं सम्प्रारणेन बाध्यते। कृते तु सम्प्रसारणे वृद्धिः, आवादेश्च। ततः `ओः पुयण्ज्यपरे' इत्येतद्वचनं ज्ञापकम्णौ कृतस्थानिवद्बावस्य, इति स्थानिवद्भावात् शुशब्दो द्विरुच्यते ।।

ह्वः सम्प्रसारणम् ।। 6.1.32 ।।
`णौ टच संश्चङोः' इति वर्त्तते। सन्परे चङ्परे च णौ परतो ह्वः सम्प्रसारणं भवति। जुहावयिषति, जुहावयिषतः, जुहावयिषन्ति। अजूहवत्, अजूहवलताम्, अजूहवन्। सम्प्रसारणस्य बलीयस्त्वात् `शाच्छासाह्वाव्यावेपां युक्' इति प्रागेव युग्न भवति।
`सम्प्रसारणम्' इति वर्त्तमाने पुनः सम्प्रसारणमित्युक्तं विभाषेत्यस्य निवृत्त्यर्थम्।
`ह्वः सम्प्रसारणमभ्यस्तस्य' इत्येकयोगेन सिद्धे पृथग्योगकरणमनभ्यस्तनिमित्तप्रत्ययेन व्यवधाने सम्प्रसारणाभावज्ञापनार्थम्। ह्वायकमिच्छति ह्वायकीयति। ह्वायकीयतेः सन्-जिह्वायकीयिषति ।।

अभ्यस्तस्य च ।। 6.1.33 ।।
`ह्वः' इति वर्त्तते, तद् `अभ्यस्तस्य' इत्यनेन व्यधिकरणम्--अभ्यस्तस्य यो ह्वयतिः। कश्चाभ्यस्तस्य ह्वयतिः ? कारणम्। तेनाभ्यस्तकारणस्य ह्वयतेः प्रागेव द्विर्वचनात्सम्प्रसारणं भवति। जुहाव। जुहूयते। जुहूषति ।।

बहुलं छन्दसि ।। 6.1.34 ।।
`ह्वः' इति वर्त्तते। छन्दसि विषये ह्वयतेर्धातोर्बहुलं सम्प्रसारणं भवति। हन्द्राग्नी हुवे। देवीं सरस्वतीं हुवे। ह्वेञो लट्यात्मनेपदोत्तमैकवचने `बहुलं छन्दसि' इति शपो लुकि कृते सम्प्रसारणमुवङादेशश्च।
न च भवति--ह्वयामि मरुतः शिवान्। ह्वयामि विश्वान्देवान् ।।

चायः की ।। 6.1.35 ।।
`बहुलं छन्दसि' इति वर्त्तते। चायतेर्धातोस्छन्दसि विषये बहुलं कीत्ययमादेशो भवति। विधूना निचिक्युः। नान्यं चिक्युर्न निचिक्युरन्यम्। लिट्युसि रूपम्। न भवति-अग्निर्ज्योतिर्निचायः ।।

आपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्त्ताः ।। 6.1.36 ।।
`छन्दसि' इति वर्त्तते। अपस्पृधेथामिति--`स्पर्ध सङ्घर्षे' इत्यस्य लङि आथामि द्विर्वचनं रेफस्य सम्प्रसारणमकारलोपश्च निपातनात्। इन्द्रश्च विष्णो यदपस्पृधेथाम्। अस्पर्धेथामिति भाषायाम्। अपरआह--स्पर्धेरपपूर्वस्य लङ्याथामि सम्प्रसारणमकारलोपश्च निपातनात्। `बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडागमाभावः। अत्र प्रत्युदाहरणमपास्पर्द्धेथामिति भाषायाम्।
आनृचुः, आनृहुरिति। `अर्च पूजायाम्', `अर्ह पूजायाम्' इत्यनयोर्धात्वोर्लिट्युसि सम्प्रसारणमकारलोपश्च निपातनात्। ततो द्विर्वचनम्, उरदत्वम्, `अत आदेः' इति दीर्घत्वम्। `तस्मान्नुड् द्विहलः' इति नुडागमः। अत्ग्रा अर्कमानृचुः। न वसून्यानृहुः। आनर्चुः, आनर्हुरिति भाषायाम्।
चिच्युषे। `च्युङ् गतौ' इत्यस्य धातोर्लिटि सेशब्देऽभ्यासस्यसम्प्रसारणमनिट् च निपातनात्। चिच्युषे। चुच्युविश इति भाषायाम् ।।
तित्याज। `त्यज हानौ'--इत्यस्य धातोर्लिट्यभ्यासस्य सम्प्रसारणं निपात्यते। तित्याज। तत्याजेति भाषायाम्।
श्राता इति। `श्रीञ् पाके' इत्येतस्य धातोर्निष्ठायां श्राभावः। श्रातास्त इन्द्रसोमाः।
श्रितमिति। तस्यैव श्रीणातेर्ह्रस्वत्वम्। सोमो गौरी अधिश्रितः। श्रिता नो गृहाः। अनयोः श्राभावश्रिभावयोर्विषयविभागमिच्छन्ति। सोमेषु बहुषु श्राभाव एव।

अन्यत्र श्रिभाव इति। सोमादन्यत्र क्वचिदेकस्मिन्नपि श्राभावो दृश्यते। यदि श्रातो जुहोतन। तस्य श्राता इति बहुवचनस्याविवक्षितत्वादुपसंग्रहो द्रष्टव्यः। आसोराशीर्त्त इति। तस्यैव श्रीणातेराङ्पूर्वस्य क्विपि निष्ठायां च शीरादेशः, निष्ठायाश्च नत्वाभावो निपातनात्। तामाशीरा दुहन्ति। आशीर्त्त ऊर्जम्। क्षीरैर्मध्यत आशीर्त्तः ।।

न सम्प्रसारणे सम्प्रसारणम् ।। 6.1.37 ।।

सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न भवति। व्यधः। विद्धः। व्यच-विचितः। व्येञ्-संवीतः।
एकयोगलक्षणमपि सम्प्रसारणमत एव वचनात्प्रथमं परस्ययणः क्रियते। पूर्वस्य च प्रसक्तं प्रतिषिध्यते।
सम्प्रसारणमिति वर्त्तमाने पुनः सम्प्रसारणग्रहणं विदेशस्थस्यापि सम्प्रसारणस्य प्रतिषेधो यथा स्यादिति, `श्वयुवमघोनामतद्धिते'---यूनःऋ, यूना।
सम्प्रासारणग्रहणसामर्थ्यादेव पूर्वस्य प्रतिषेधे वक्तव्ये सवर्णदीर्घत्वमेकादेसो न स्थानिवद्भवति। सति वा स्थानिवत्वे व्यवधानमेतावदाश्रयिष्यते ।।
* ऋचि त्रेरुत्तरपदादिलोपस्छन्दसि *। ऋचि परतस्त्रेः सम्प्रसारणं भवति, उत्तरपदादिलोपश्च छन्दसि विषये। तिस्र ऋचो यस्मिन् तत् तृचं चसूक्तम्, तृचं साम। `ऋक्पूरब्धूःपथामानक्षे' इति समासान्तः। छन्दसीति किम्? त्यृचं कर्म ।।
* रयेर्मतौ बहुलम् *। रयिशब्दस्य छन्दसि विषये मतौ परतो बहुलं सम्प्रसारणं भवति। आ रेवानेतु नो विशः। न च भवति--रयिमान्पुष्टिवर्धनः ।।

लिटि वयो यः ।। 6.1.38 ।।

`न सम्प्रसारणम्' इत्यमनुवर्तते। लिटि परतो वयो यकारस्य सम्प्रसारणं न भवति। उवाय। ऊयतुः। ऊयुः।
लिड्ग्रहणमुत्तरार्थम् ।।

वश्चास्यान्यतरस्यां किति ।। 6.1.39 ।।

अस्य वयो यकारस्य किति लिटि परतो वकारादेशो भवत्यन्यतरस्याम्। ऊवतुः। ऊवुः। ऊयतुः। ऊयुः।
कितीति किम् ? उवाय। उवयिथ ।।

वेञः ।। 6.1.40 ।।

`लिटि' इत्यनुवर्तते। `वेञ् तन्तुसन्ताने' इत्यस्य धातोर्लिटि परतः सम्प्रसारणं न भवति। ववौ। ववतुः। ववुः। किति यजादित्वाद् धातोः प्राप्तमकित्यपि `लिट्यभ्यासस्योभयेषाम्' इत्यभ्यासस्यात उभयं प्रतिषिध्यते ।।

ल्यपि च ।। 6.1.41 ।।

`वेञः' इत्यनुवर्तते। ल्यपि च परतो व्येञः सम्प्रसारणं न भवति। प्रवाय। उपवाय।
पृथग्योगकरणमुत्तरार्थम् ।।

ज्यश्च ।। 6.1.42 ।।

`ल्यपि' इत्येव। `ज्या वयोहानौ' इत्यस्य धातोर्ल्यपि परतः सम्प्रसारणं न भवति। प्रज्याय। उपज्याय ।।

व्यश्च ।। 6.1.43 ।।

`ल्यपि' इत्येव। `व्येञ् संवरणे' इत्येतस्य धातोर्ल्यपि परतः सम्प्रसारणं न भवति। प्रव्याय। उपव्याय। योगविभाग उत्तरार्थः ।।

विभाषा परेः ।। 6.1.44 ।।

`लियपि च', `व्यश्च' इत्यनुवर्तते। परेरुत्तरस्य व्येञित्येतस्य धातोर्ल्यपि परतो विभाषा सम्प्रसारणं न भवति। परिवीय यूपम्। परिव्याय। सम्प्रसारणे कृते परपूर्वत्वे च `ह्रस्वस्य' इति तुक् प्राप्नोति, स `हलः' इति दीर्घत्वेन परत्वाद्बाध्यते ।।

आदेच उपदेसेऽशिति ।। 6.1.45 ।।

`धातोः' इति वर्तते। एजन्तो यो धातुरुपदेशे तस्याकारादेशो भवति, शिति तु प्रत्यये न भवति। ग्लै-ग्लाता, ग्लातुम्, ग्लातव्यम्। शो-निशाता, निशातुम्, निशातव्यम्।
एच इति किम् ? कर्त्ता, हर्त्ता। उपदेश इति किम् ? चेता, स्तोता। अशितीति किम् ? ग्लायति, म्लायति।
कथं जग्ले, मम्ले ? नैव विज्ञायते-शकार इद्यस्य सोऽयं शिदिति, किं तर्हि ? श एव इत् शित्। तत्र `यस्मिन्विधिस्तदादावल्ग्रहणे' इति शिदादौ प्रत्यये

प्रतिषेधः। एश् शकारान्तो भवति।
अशितीति प्रसाज्याप्रतिषेधोऽयम्, तेनैददात्त्वमनैमित्तिकं प्रागेव प्रत्ययोत्पत्तोर्भवतीति। सुग्लः, सुम्ल इति--`आतश्चोपसर्गे' इति कप्रत्ययः। सुग्लानः, सुम्लान् इति--`आतो युच्' इत्येवमादि सिद्धं भवतीति।
आकाराधिकारस्त्वयम् `नित्यं स्मयतेः' इति यावत् ।।

न व्यो लिटि ।। 6.1.46 ।।
`व्येञ्' इत्येतस्य धातोर्लिटि परत आकारादेशो न भवति। संविव्याय। संविव्ययिथ। `लिट्यभ्यासस्योभयेषाम्' इत्यब्यासस्य सम्प्रसारणम्। णलि `अचो ञ्णिति' इति वृद्धिः ।।

स्फुरतिस्फुलत्योर्घञि ।। 6.1.47 ।।
`आदेचः' इति वर्तते। `स्फुर स्फुल चलने'--इत्येतयोर्धात्वोरेचः स्थाने घञि परत आकारादेशो भवति। विस्फारः। विस्फालः। विष्फारः। विष्फालः।
`स्फुरतिस्फुलत्योर्निर्निविभ्यः' इति वा षत्वम् ।।

क्रीङ्जीनां णौ ।। 6.1.48 ।।
`ड्डक्रीञ् द्रव्यविनिमये', इङ् अध्ययने', `जि जये'--इत्येतेषां धातूनामेचः स्थाने णौ परत आकारादेशो भवति। क्रापयति। अध्यापयति। जापयति ।।।

सिध्यतेरपारलौकिके ।। 6.1.49 ।।
`णौ' इति वर्तते। `षिधु हिंसासंराद्ध्योः' इत्यस्य धातोरपारलौकिकेऽर्थे वर्तमानस्यैचः स्थानं णौ परत आकारादेशो भवति। अन्नं साधयति। ग्रामं साधयति। अपारलौकिक इति किम् ? तपस्तापसं सेधयति। स्वान्येवैनं कर्माणि सेधयन्ति। अत्र हि सिध्यतिः पारलौकिके ज्ञानविशेषे वर्तते। तापसः सिध्यति=ज्ञानविशेषमासादयति, तं तपः प्रयुङ्क्ते। स च ज्ञानविशेष उत्पन्नः परलोके=जन्मान्तरे फलमभ्युदयलक्षणमुपसंहरन् परलोकप्रयोजनो भवति। इह कस्मान्न भवति ? अन्नं साधयति ब्राह्मणेभ्यो दास्यामिति। सिध्यतेरत्रार्थो निष्पत्तिः, तस्याः प्रयोजनमन्नम्, तस्य यद्दानं तत्पारलौकिकम्; न पुनः सिद्धिरेवेति न आत्वं पर्युदस्यते। साक्षात्परलोकप्रयोजने च सिध्यर्थे कृतावकाशं वचनमेवंविषयं नावगाहते।
सिध्यतेरिति श्यना निर्देशः `षिधु गत्याम्' इत्यस्य भौवादिकस्य निवृत्त्यर्थः ।।

मीनातिमिनोतिदीङा ल्यपि च ।। 6.1.50 ।।
`आदेच उपदेशे' इति वर्तते। `मीञ् हिंसायाम्', `डुमिञ्प्रक्षेपणे', `दीङ् क्षये'--इत्येतेषां धातूनां ल्यपि विषये चकारादेचश्च विषये उपदेश एव प्राक्प्रत्ययोत्पत्तेरलोऽन्त्यस्य स्थाने आकारादेशो भवति। प्रमाता, प्रमातव्यम्, प्रमातुम्, प्रमाय। निमाता, निमातुम्, निमातव्यम्, निमाय। उपदाता, उपदातव्यम्, उपदातुम्, उपदाय।
उपदेश एवात्त्वविधानादिवर्णान्तलक्षणः प्रत्ययो न भवति, आकारान्तलक्षणश्च भवति---उपदायो वर्तते। ईषदुपदानमिति घञ्चुचौ भावतः ।।

विभाषा लीयतेः ।। 6.1.51 ।।
`ल्यपि' इति वर्तते, `आदेच उपदेशे' इति च। `लीङ् श्लेषणे'--इति दिवादिः, `लि श्लेषणे'--इति क्र्यादिः; तयोरुभयोरपि यका निर्देशः स्मर्यते। लीयतेर्धातोर्ल्यपि च एचश्च विषये उपदेश एवालोऽन्त्यस्य स्थाने विभाषा आकारादेशो भवति। विलाता, विलातुम्, विलाय, विलातव्यम्। विलेता, विलेतुम्, विलेतव्यम्, विलीय।
* निमीमिलियां खलचोः प्रतिषेधो वक्तव्य *। ईषत्प्रमयः। प्रमयो वर्तते। ईषन्निमयः निमयो वर्तते। ईषद्विलयः विलयो वर्तते। अत्र तु लियो व्यवस्थितविभाषाविज्ञानात्सिद्धम्।
एवं च प्रलम्भनशालीनीकरणयोश्च णौ नित्यमात्वं भवतिकस्त्वामुल्लापयते, श्येनो वर्त्तिकामुल्लापयते ।।

खिदेश्छन्दसि ।। 6.1.52 ।।
`विभाषा' इति वर्त्तते। `खिद दैन्ये' इत्यस्य धातोरेचः स्थाने छन्दसि विषये विभाषा आकार आदेशो भवति। चित्तं चिखाद। चित्तं चिखेद।
छन्दसीति किम् ? चित्तं खेदयति ।।

अयगुरो णमुलि ।। 6.1.53 ।।

`गुरी उद्यमने'--इत्यस्य धातोरपपूर्वस्य णमुलि परत एचः स्थाने विभाषा आकार आदेशो भवति। अपगारमपगारम्। अपगोरमपगोरम्। `आभीक्ष्ण्ये णमुल्च' इति णमुल्। अस्यपगारं युध्यन्ते, अस्यपगोरं युध्यन्त इत्यत्र `द्वितीयायां च' इति णमुल् ।।

चिस्फुरोर्णौ ।। 6.1.54 ।।
`चिञ्' `स्फुर'--इत्येतयोर्द्धात्वोर्णौ परत एचः स्थाने विभाषा आकारादेशो भवति। चापयति, चाययति। स्फारयति, स्फोरयति ।।

प्रजने वीयतेः ।। 6.1.55 ।।
`णौ' इति वर्तते। `वी गतिप्रजनकान्त्यसनशादनेषु'-इत्यस्य धातोः प्रजने वर्तमानस्य णौ परतो विभाषा आकारादेशो भवति। पुरोवातो गाः प्रवापयति। पुरोवातो गाः प्रवाययति। गर्भं ग्राहयतीत्यर्थः।
प्रजनो हि जन्मन उपक्रमो गर्भग्रहणम् ।।

बिभेतेर्हेतुभये ।। 6.1.56 ।।
`णौ' इति वर्तते, `विभाषा' इति च। हेतुरिह पारिभाषिकः स्वतन्त्रस्य प्रयोजकः, ततो यद्भयम्, स यस्य भयस्य साक्षाद्धेतुः, तद्भयं हेतुभयम्। तत्र वर्तमानस्य `ञिभी भये' इत्यस्य धातोर्णौ परतो विभाषा आकारादेशो भवति। मुण्डो भापयते, मुण्डो भीषयते। जटिलो भापयते, जटिलो भीषयते। `भीस्म्योर्हेतुभये' इत्यात्मनेपदम्, `भियो हेतुभये षुक्'। स चात्त्वपक्षे न भवति। लिभियोरीकारप्रश्लेषनिर्देशादीकारान्तस्य भियः षुग्विधीयते। हेतुभय इति किम् ? कुञ्चिकयैनं भाययति। अत्र हि कुञ्विकातो भयं करणात्, न हेतोर्देवदत्तात् ।।

नित्यं स्मयतेः ।। 6.1.57 ।।
`णौ' इति वर्तते, `हेतुभये' इति च। नित्यग्रहणात् `विभाषा' इति निवृत्तम्। `स्मिङ् ईषद्धसने'--इत्यस्य धातोर्हेतुभयेऽर्थे णौ परतो नित्यमाकारदेशो भवति। मुण्कडो विस्मापयते। जटिलो विस्मापयते।
भय इति किम् ? कुञ्चिकयैनं विस्मापयति। भयशब्देन हेत्वर्थसामान्यादिह स्मयतेरर्थोऽभिधीयते। न हि मुख्ये भये स्मयतेर्वृत्तिरस्ति ।।

सृजिदृशोर्झल्यमकिति ।। 6.1.58 ।।
`सृज विसर्गे', `दृशिर् प्रेक्षणे'--इत्येतयोर्द्दात्वोर्झलादावकिति प्रत्यये परतोऽमागमो भवति। स्रष्टा, स्रष्टुम्, स्रष्टव्यम्। द्रष्टा, द्रष्टुम्, द्रष्टव्यम्। लघूपधगुणापवादोऽयममागमः। अस्राक्षीत्। अद्राक्षीत्। सिचि वृद्धिर्मि कृते भवति, पूर्वं तु बाध्यते।
झलीति किम् ? सर्जनम्। दर्शनम्। अकितीति किम् ? सृष्टः। दृष्टः।
धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानादिह न भवति--रज्जुसृड्भ्याम्, देवदृग्भ्यामिति ।।

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ।। 6.1.59 ।।
`उपदेशे' इति वर्तते, `झल्यमकिति' इति च। उपशेऽनुदात्तस्य धातोर्ऋकारोपधस्य झलादावकिति प्रत्यये परतोऽन्यतरस्याममागमो भवति। त्रप्ता, तर्पिता, तर्प्ता। द्रप्ता, तदर्पिता, दर्प्ता। `तृप प्रीणने', `दृप हर्षणमोचनयोः'--इत्येतौ रधादी धातू, तयोरिडागमः `रधादीभ्यश्च' इति विकल्प्यते। अनुदात्तोपदेशः पुनरमर्थ एव।
अनुदात्तस्येति किम् ? वर्ढा, वर्ढुम्, वर्ढव्यम्। `वृहू उद्यमने' इत्ययमुदात्तोपदेश ऊदित्वाच्चास्येड् विक्ल्प्यते। ऋदुपधस्यति किम् ? भेत्ता। छेत्ता।
झलीत्येव--तर्पणम्। दर्पणम्।
अकितीत्येव--तृप्तः। दृप्तः ।।

शीर्षश्छन्दसि ।। 6.1.60 ।।
`शीर्षन्' इति शब्दान्तरं शिरःशब्देन समानार्थं छन्दसि विषये निपात्यते, न पुनरयमादेशः शिरःशब्दस्य। सोऽपि हि छन्दसि प्रयुज्यत एव। शीर्ष्णा हि तत्र सोमं क्रीतं हरन्ति। यत्ते शीर्ष्णो दौर्भाग्यम् ।
छन्दसीति किम् ? शिरः ।।

ये च तद्धिते ।। 6.1.61 ।।
`शीर्षन्' इति वर्तते। आदेशोऽयमिष्यते, स कथम् ? `तद्धिते' इति हि परं निमित्तमुपादीयते, स तदनुरूपां प्रकृतिं शिरःशब्दमाक्षिपति। यकारादौ तद्धिते

परतः शिरःशब्दस्य शीर्षन्नादेशो भवति। शीर्षण्यो हि भुख्यो भवति। शीर्षण्यः स्वरः। शिरसि भव इति `शरीरावयवाच्च' इति यत्, `ये चाभावकर्मणोः' इति प्रकृतिभावः।
तद्धित इति किम् ? शिर इच्छति शिरस्यति ।।
* वा केशेषु *। शिरसः शीर्षन्नादेशो वक्तव्यः। शीर्षण्याः केशाः। शिरस्याः केशाः ।।

अचि शीर्षः ।। 6.1.62 ।।
अजादौ तद्धिते शिरसः शीर्षशब्द आदेशो भवति। हस्तिशिरसोऽपत्यं हास्तिशीर्षिः। `बाह्वादिभ्यश्च' इति इञ्। स्थूलशिरस इदं स्थौलशीर्षम्। शीर्षन्भावे हि `अन्' इति प्रकृतिभावः स्यात्।
हास्तिशीर्षिशब्दात् स्त्रियामिञः `अणिञोरनार्षयोः' ष्यङादेशे कृते शीर्षस्य शिरः शब्दग्रहणेन ग्रहणात् शीर्षन्नादेषः प्राप्नोति, तत्र प्रकृतिभावे सति हास्तिशीर्षण्येत्यनिष्टं रूपं स्यात्, इष्यते तु हास्तिशीर्ष्येति, तत्कथम् ? कर्त्तव्योऽत्र यत्नः। अणिञन्ताद् वा परः प्रत्ययः ष्यङाश्रयितव्यः, तत्र यस्येतिलोपस्य स्थानवद्भावाद् व्यवधानम् ।।

पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्तुदन्नासञ्छस्प्रभृतिषु ।। 6.1.63 ।।
पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष, दोष, यकृत्, शकृत्, उदक, आसन--इत्येतेषां शब्दानां स्थाने शस्प्रभृतिप्रत्ययेषु परतः पद, दत्, नस्, मास्, हृत्, निश्, असन्, यूषन्, दोषन्, यकन्, शकन्, उदन्, आसन्--इत्येते आदेशा यथासंख्यं भवन्ति। पद्--निपदश्चतुरो जहि। पदा पर्त्तय गोदुहम्। पादस्य पत्। दत्--या दतो धावति तस्यै श्यावदन्। नस्--सूकरस्त्वखनन्नसा। मास्--मासि त्वा पश्यमि चक्षुषा। हृद्-हृदा पूतेन मनसा जातवेदसम्। निश्-अमावस्यायां निशि यजेत। असन्-आसिक्तोऽस्नावरोहति। यूषन्-या पात्राणि यूष्ण आसेचनानि। दोषन्-यत्ते दोष्णो दौर्भाग्यम्। यकन्-यक्नोऽवद्यति। शकन्-शक्नोऽवद्यति। उदन्उद्नो दिव्यस्य नावाते। आसन्-आसनि किं लभे मधूनि।
शस्प्रभृतिष्विति किम् ? पादौ ते प्रतिपीड्यौ, नासिके चे कृशे।
केचिदत्र छन्दसीत्यनुवर्त्तयन्ति। अपरे पुनरविशेषेणेच्छन्ति। तथा हि-भाषायामपि पदादयः शब्दाः प्रयुज्यन्ते।
`व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः ।।' इत्येवमादयः।
अन्यतरस्यामित्येतदनुवर्तयन्ति, तेन पादादयोऽपि प्रयुडज्यन्ते।
शस्प्रभृतिष्विति प्रकारार्थे प्रभृतिशब्द इति शला दोषणी इत्यत्रापि दोषन्नादेशो भवति।
* पदादिषु मांस्पृत्स्नूनामुपसंख्यानम् *। मांस, पृतना-सानु-इत्येतेषां स्थाने यथासंख्यं मांस्, पृत्। स्नु-इत्येते आदेशा भवति। मांस्पचन्या उखायाः। मांसपचन्या इति प्राप्ते। पृत्सु मर्त्त्यम्। पृतनासु मर्त्त्यमिति प्राप्ते। न ते दिवो न पृथिव्या अधिस्नुषु। अधिसानुष्विति प्राप्ते।
* नस् नासिकाया यत्तस्क्षुद्रेषु *। नासिकाया नस्भावो वक्तव्यो यत्, तस्। क्षुद्र-इत्येतेषु परतः। नस्यम्। नस्तः। नःक्षुद्रः।
* यति वर्णनगरयोर्नेति वक्तव्यम् *। नासिक्यो वर्णः। नासिक्यं नगरम् ।।

धात्वादेः षः सः ।। 6.1.64 ।।
धातोरादेः षकारस्य स्थाने सकारादेशो भवति। षह-सहते। षिच-सिञ्चति।
धातुग्रहणं किम् ? षोडश। षडिकः। षण्डः। आदिरिति किम् ? कषति। लषति। कृषति।
`आदेशप्रत्यययोः' इत्यत्र षत्वव्यवस्थार्थं षादयो धातवः केचिदुपदिष्टाः। के पुनस्ते ? ये तथा पठ्यन्ते। अथ वा, लक्षणं क्रियते--`अज्दन्त्यपराः सादयः षोपदेशाः स्मिस्विदिस्वदिस्वञ्जिस्वपितयश्च', सृपिसृजिस्तृस्त्यासेक्सृवर्जम् ।।
* सुब्दातुष्ठिवुष्वष्कतीनां प्रतिषेधो वक्तव्यः *। षोडीयति। षण्डीयति। ष्ठीवति। ष्वष्कते। `ष्ठिवु'--इत्येतस्य द्वितीयस्थकारष्ठकारश्चेष्यते। तेन तेष्ठीव्यते, टेष्ठीव्यते इति चाभ्यासरूपं द्विधा भवति ।।

णो नः ।। 6.1.65 ।।
`धातोरादेः' इत्यनुवर्तते। धातोरादेर्णकारस्य नकार आदेशो भवति। णीञ्--नयति। णम्--नमति। णह--नह्यति।
धात्वादेरित्येव--अणति।
सुब्धातोरयमपि नेष्यते--णकारमिच्छति णकारीयति।
`उपसर्गादसमासेऽपि णोपदेशस्य' इत्यत्र णत्वविधेर्व्यवस्थार्थ णादयो धातवः केचिदुपदिश्यन्ते। के पुनस्ते ? ये तथा पठ्यन्ते। अथ वा, लक्षणं क्रियते--`सर्वे णादयो णोपदेशाः, नृतीनन्दिनर्दिनक्कनाटिनाथृनाधृवर्जम्' ।।

लोपो व्योर्वलि ।। 6.1.66 ।।

धातोरिति प्रकृतं यत् तद् धात्वादेरिति पुनर्धातुग्रहणान्निवृत्तम्। तेन धातोरधातोश्च वकारयकारयोर्वलि परतो लोपो भवति। दिव्-दिदिवान्, दिदिवांसौ, दिदिवांसः। ऊयी-ऊतम्। क्नूयी क्नूतम्। गोधाया ढ्रक्-गौधेरः। पचेरन्। यजेरन्। वकारस्य--`जीवेरदानुक्' जीरदानुः। स्निवेः--- आस्रेमाणम्। `उणादयो बहुलम्' इति बहुलवचनात् `च्छ्वोः शूडनुनासिके च' इति ऊठ् न भवति।

वलीति किम् ? ऊय्यते। क्नूय्यते। पूर्वं लोपग्रहणं किम् ?

वेरपृक्तलोपात्पूर्वं वलि लोपो यथा स्यात्।

कण्डूयतेः क्विप्-कण्डूः। लोलूयतेः--लोलूः।

व्रश्चादीनामुपदेशसामर्थ्याद् वलि लोपो न भवति। वृश्चति, वव्रश्चेत्यत्रापि हि सम्प्रसार्णहलादिःशेषयोर्बहिरङ्गत्वात्प्राप्नोति ।।

वेरपृक्तस्य ।। 6.1.67 ।।

`लोपः' इति वर्त्तते। `वेः' इति क्विबादयो विशेषाननुबन्दानुत्सृज्य सामान्येन गृह्यन्ते। वेरपृक्तस्य लोपो भवति। `ब्रह्मभ्रूणवृत्रेषु क्विप्'--ब्रह्महा, भ्रूणहा। `स्पृशोऽनुदके क्विन्'--घृतस्पृक्, तैलस्पृक्। `भजो ण्विः'--अर्धभाक्, पादभाक्, तुरूयभाक् ।

अपृक्तस्येति किम् ? `वृदृभ्यां विन्'-दर्विः। `कृगृशृसृजागृभ्यः क्विः'--जागृविः।

इल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ।। 6.1.68 ।।

`लोपः' इति वर्तते। तदिह लौकिकेनार्थेनार्थवत् कर्मसाधनं द्रष्टव्यम्--लुप्यते इति लोपः। हलन्ताद, ङ्यन्तादाबन्ताच्च दीर्घात् परं सु, ति, सि-इत्येतदपृक्तं हल् लुप्यते। हलन्तात् सुलोपः-राजा, तक्षा, उखास्रत्, पर्णध्वत्। ङ्यन्तात्-कुमारी, गौरी, शार्ङ्गरवी। आबन्तात्-खट्वा, बहुराजा, कारीषगन्ध्या। हलन्तादेव तिलोपः, सिलोपश्च। तत्र तिलोपस्तावत्-अबिभर्भवान्। भृञो लङि तिपि `श्लौ', `भृञामित्' इत्यभ्यासस्येत्त्वम्। अजागर्भवान्। सिलोपः-अभिनोऽत्र। अच्छिनोऽत्र। दस्य रेफः।

हल्ङ्याब्भ्य इति किम् ? ग्रामणीः। सेनानीः। दीर्घादिति किम् ? ग्रामणीः। सेनानी। दीर्घादिति किम् ? निष्कौशाम्बिः। अतिशट्वः। सुतिसीति किम् ? अभैत्सीत्। तिपा सहचरितस्य सिशब्दास्य ग्रहणात्सिचो ग्रहणं नास्ति। अपृक्तमिति किम् ? भिनत्ति, छिनत्ति।

हलरिति किम् ? बिभेद। चिच्छेद।

अथ किमर्थं हलन्तात्सुतिसीनां लोपो विधीयते, संयोगान्तलोपेनैव सिद्धम् ? न सिद्ध्यति; राजा, तक्षेत्यत्र संयोगान्तलोपस्यासिद्धत्वान्नलोपो न स्यात्। उखास्रत्, पर्णध्वदित्यत्रापदान्तत्वाद्दत्वं च न स्यात्। अभिनोऽत्रेत्यत्र `अतो रोरप्लुतादप्लुते' इत्युत्वं न स्यात्। अबिभर्भवानित्यत्र तु `रात्सस्य' इति नियमाल्लोप एव न स्यात्।

संयोगान्तस्य लोपे हि नलोपादिर्न सिद्ध्यति।
रात्तु ते नैव लोपः स्याद्, हलस्तस्माद्विधीयते ।।

एङ्ह्रस्वात्सम्बुद्धेः ।। 6.1.69 ।।

`लोप' इति वर्त्तते, `हल्' इति च। `अपृक्तम्' इति नाधिक्रियते, तथा च पूर्वसूत्रे पूनरपृक्तग्रहणं कृतम्। एङन्तात्प्रातिपदिकाद् ह्रस्वान्ताच्च परो हल्लुप्यते स चेत्सम्बुद्धेर्भवति। एङन्तात्--हे अग्ने, हे वायो। ह्रस्वान्तात्--हे देवदत्त, हे नदि, हे वधु, हे कुण्ड। कुण्डशब्दाद् `अतोऽम्' इत्यम्, `अमि पूर्वः' इति पूर्वत्वे कृते हल्मात्रस्य मकारस्य लोपः।

हे कतरदित्यत्र डिदयमद्डादेशः, तत्र टिलोपे सति ह्रस्वाभावान्नास्ति सम्बुद्धिलोपः।एङ्ग्रहणं क्रियते सम्बुद्धिगुणबलीयस्त्वात् ।।

शेश्छन्दसि बहुलम् ।। 6.1.70 ।।

`शि' इत्येतस्य बहुलं छन्दसि विषये लोपो भवति। या क्षेत्रा। या वना। यानि क्षेत्राणि। यानि वनानि ।।

ह्रस्वस्य पिति कृति तुक् ।। 6.1.71 ।।

पिति कृति परतो ह्रस्वान्तस्य धातोः तुगागमो भवति। अग्निचित्। सोमसुत्। प्रकृत्य। प्रहृत्य। उपस्तुत्य।

ह्रस्वस्येति किम् ? आलूय। ग्रमणीः। पितीति किम् ? कृतम्। ह्वतम्। कृतीति किम् ? पटुतरः। पटुतमः।

ग्रामणि ब्राह्मणकुलमित्यत्र ह्रस्वस्य बहिरङ्गस्यासिद्धत्वात् तुग्न भवति ।।

संहितायाम् ।। 6.1.72 ।।

अधिकारोऽयम् `अनुदात्तं पदमेकवर्जम्' इति यावत्। प्रागेतस्मात्सूत्रादित उत्तरं यद्वक्ष्यामः संहितायामित्येवं तद्वेदितव्यम्। वक्ष्यति--`इको यणचि, दध्यत्र'। संहितायामिति किम् ? दधि अत्र। मधु अत्र ।।

छे च ।। 6.1.73 ।।

`ह्रस्वस्य तुक्' इति वर्तते। छकारे परतः संहितायां विषये ह्रस्वस्य तुगागमो भवति। इच्छति। गच्छति।

ह्रस्व एवात्रागमी, न त्वदन्तः। तेन चिच्छिदतुः, चिच्छिदुरित्यत्र तुगभ्यासस्य ग्रहणेन गृह्यत इति हलादिःशेषेण न निवर्त्त्यते। नावयवावयवः समुदायावयवो भवतीति ।।

आङ्माङोश्च ।। 6.1.74 ।।

`तुक्' इत्यनुवर्तते, `छे' इति च। आङो ङित ईषदादिषु चतुर्ष्वर्थेषु वर्त्तमानस्य माङ्श्च प्रतिषेधवचनस्य छकारे परतस्तुगागमो भवति। `पदान्ताद्वा' इति विल्पे प्राप्ते नित्यं तुगागमो भवति। ईषदर्थे--ईषच्छाया। आच्छाया। क्रियायोगे--आच्छादयति।

मर्यादाभिविध्योः---आच्छायायाः। आच्छायम्। माङः खल्वपि माच्छैत्सीत्। माच्छिदत्।

ङिद्विशिष्टग्रहणं किम् ? आछाया, आच्छाया। प्रमाछन्दः, प्रकमाच्छन्दः ।।

दीर्घात् ।। 6.1.75 ।।

`छे तुक्' इति वर्त्तते। दीर्घात्परो यश्छकारस्तस्मिन्पूर्वस्य तस्यैव दीर्घस्य तुगागमो भवति। ह्रोच्छति। म्लेच्छति। अपचाच्छायते। विचाच्छायते ।।

पदान्ताद्वा ।। 6.1.76 ।।

`दीर्घाच्छे तुक्' इति वर्त्तते। पदान्ताद्दीर्घात्परो यश्छकारस्तस्मिन्पूर्वस्य तस्यैव दीर्घस्य पूर्वण नित्यं प्राप्तो वा तुगागमो भवति। कुटीच्छाया। कृटीछाया। कुवलीच्छाया। कुवलीछाया।

* विश्वजनादीनां छन्दसि वा कुगागमो भवतीति वक्तव्यम् *। विश्वजनच्छत्रम्। विश्वजनछत्रम्। नच्छायां कुरवोपराम्। नछायां कुरवोपराम् ।।

इको यणचि ।। 6.1.77 ।।

अचि परत इको यणादेशो भवति। दध्यत्र। मध्वत्र। कर्त्रर्थम्। हर्त्रर्थम्। लाकृतिः।

* इकः प्लुतपूर्वस्य सवर्णदीर्घबाधनार्थं यणादेसो वक्तव्यः *। भो3 इ इन्द्रम् । भो3 यिन्द्रम्।

अचीति चायमधिकारः `सम्प्रसारणाच्च' इति यावत् ।।

एचोऽयवायावः ।। 6.1.78 ।।

एचः स्थानेऽचि परतोऽय्, अव्, आय्, आव्-इत्येते आदेशा यथासंख्यं भवन्ति। चयनम्। लवनम्। चायकः। लावकः। कयेते। ययेते। वायावरुणद्धि ।।

वान्तो यि प्रत्यये ।। 6.1.79 ।।

योऽयमेचः स्थाने वान्तादेशः--ओकारस्य अव, औकारस्याव्, स यकारादौ प्रत्यये परतो भवति। बाभ्रव्यः। माण्डव्यः। शङ्कव्यं दारु। पिचव्यः कार्पासः। नाव्यो ह्रदः।

वान्त इति किम् ? रायमिच्छति रैयति। यीति किम् ? गोब्याम्, नौभ्याम्। प्रत्यय इति किम् ? गोयानम्, नौयानम्।

* गोर्यूतौ छन्दसि *। गोशब्दस्य यूतौ परतश्छन्दसि विषये वान्तादेशो वक्तव्यः। आनो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्।

छन्दसीति किम् ? गोयूतिः।

* अध्वपरिमाणे च *। गोर्यूतौ परतो वान्तादेशो वक्तव्यः। गव्यूतिमात्रमध्वानं गतः ।।

धातोस्तन्निपित्तस्यैव ।। 6.1.80 ।।

`एचः' इति वर्त्तते। `वान्तो यि प्रत्यये' इति च। धातोर्य एच् तन्निमित्तो यकारादिप्रत्ययनिमित्तस्तस्य यकारादौ प्रत्ययो परतो वान्तादेशो भवति। लव्यम्। पव्यम्। अवश्यलाव्यम्। अवश्यापाव्यम्।

धातोरिति किम् ? प्रातिपदिकस्य नियमो मा भूत्। तत्र को दोषः ? ब्राभ्रव्य इत्यत्रैव स्यात्, इह न स्याद्-गव्यम्, नाव्यमिति।

तन्निमित्तस्येति किम् ? अतन्निमित्तस्य मा भूत्-उपोयते। औयत। लौयमानिः। पौयमानिः। `अत इञ्'।
एवकारकरणं किम् ? धात्ववधारणं यथा स्यात्, तन्निपित्तावधारणं मा भूदिति तन्निमित्तस्य हि धातोश्चाधतोश्च भवति-बाभ्रव्यः, अवश्यलाव्यम्, लव्यम् ।।

क्षय्यजय्यौ शक्यार्थे ।। 6.1.81 ।।
`क्षि' `जि'--इत्येतयोर्धात्वोर्यति प्रत्यये परतः शक्यार्थे गम्यमाने एकारस्यायादेशो निपात्यते। शक्यः क्षेतुं क्षय्यः। शक्यो जेतुं जय्यः।
शस्यार्थ इति किम् ? क्षेयं पापम्। जेयो वृषलः ।।

क्रय्यस्तदर्थे ।। 6.1.82 ।।
क्रीणातेर्धातोर्सदर्थे क्रयार्थं यत्तस्मिन्नभिधेये यति प्रत्यये परतोऽयादेशो निपात्यते। क्रय्यो गौः। क्रय्यः कम्बलः। क्रयार्थं यः प्रसारितः स उच्यते।
तदर्थ इति किम् ? क्रेयं नो दान्यम्,न चास्ति क्रय्यम् ।।

भय्यप्रवय्ये चच्छन्दसि ।। 6.1.83 ।।
बिभेतेर्धातोः प्रपूर्वस्य च `वी' इत्येतस्य यति प्रत्यये परतश्छन्दसि विषयेऽयादेशो निपात्यते। भय्यं किलासीत्। वत्सतरी प्रवय्या। भय्येति `कृत्यल्युटो बहुलम्' इत्यपादाने यत्प्रत्ययः। बिभेत्यमादिति भय्यम्। `प्रवय्या' इति स्त्रियामेव निपातनम्। अन्यत्र प्रवेमित्येव भवति।
छन्दसीति किम् ? भेयम्। प्रवेयम्।
*ह्रदय्या आप उपसंख्यानम् *। ह्रदय्या आपः। ह्रदे भवा--`भवे छन्दसि' इति यत्प्रत्ययः ।।

एकः पूर्वपरयोः ।। 6.1.84 ।।
अधिकारोऽयम्। `ख्यत्यात्परस्य' इति प्रागेतस्मात्सूत्रादित उत्तरं यद्वक्ष्यामस्तत्र पूर्वस्य परस्य द्वयोरपि स्थाने एकादेशो भवती त्येतद् वेदितव्यम्। वक्ष्यति--`आद्गुणः' इति। तत्राचि पूर्वस्यावर्णाच्च परस्य स्थाने एको गुणो भवति-खट्वेन्द्रः, मालेन्द्रः।
पूर्वपरग्रहणं द्वयोरपि युगपदादेशप्रतिपत्त्यर्थम्। एकस्यैव हि स्यात्, नोभे सप्तमीपञ्चम्यौ युगपत्प्रकल्पिके भवत इति।
एकग्रहणं पृथगादेशनिवृत्त्यर्थम्, स्थानिभेदाद्धि भिन्नादिषु नत्ववद् द्वावादेशौ स्याताम् ।।

अन्तादिवच्च ।। 6.1.85 ।।
`एकः' इति वर्त्तते, `पूर्वपरयोः' इति च। `एकः पूर्वपरयोः' इति योऽयमेकादेशो विधीयते स पूर्वस्यान्तवद्भवति, परस्यादिवद्भवति। यथा तस्यान्त आदिर्वा तदन्तर्भूतस्तद्ग्रहणेन गृह्यते, तद्वदेकादेशोऽपि तद्ग्रहणेन गृह्यते-इत्येषोऽतिदेशस्यार्थः।
ब्रह्मबन्धूरित्यत्र ब्रह्मबन्ध्विति प्रातिपदिकम्, ऊङित्यप्रातिपदिकम्, तयीः प्रातिपदिकाप्रातिपदिकयोर्य एकादेसः स प्रातिपदिकस्यान्तवद् भवति। यथा शक्यते कर्त्तुम्--`ङ्याप्प्रातिपदिकात्' इति स्वादिविधिः।
वृक्षावित्यत्र सुबौकारः असुबकारः, तयो सुबसुपोरेकादेशः सुप आदिवद्भवति। यथा शक्यते वक्तुम्-सुबन्तं पदमिति।
वर्णाश्रयविधावयमन्तादिवद्भावो नेष्यते, तता हि---खट्वाभिरित्यत्रान्तवद्बावाभावाद् `अतो भिस ऐस्' इति न भवति। ह्वयतेः-जुहावेति सम्प्रसारणपूर्वत्वस्यादिवद्भावाद् `आत औ णलः' इति न भवति। अस्यै अश्वः, अस्या अश्व इति `वृद्धिरेचि' इति वृद्धिः, `एङः पदान्तादिति' इत्यत्र विधावादिवन्न भवति।
पूर्वपरसमुदाय एकादेशस्य स्थानी, स हि तेन निवर्त्यते। तत्रावयवयोरानुमानिकं स्थानित्वमिति तदाश्रयं कार्यं स्थानिवद्भावादप्राप्तमित्यन्तादिवद्भावो विधीयते ।।

षत्वतुकोरसिद्धः ।। 6.1.86 ।।
षत्वे तुकि च कर्तव्ये एकादेशोऽसिद्धो भवति। सिद्धकार्यं न करोतीत्यर्थः। असिद्धवचनमादेशलक्षणप्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च। कोऽसिचद् इत्यत्र `एङः पदान्तादतिः' इत्येकादेशस्य परं प्रत्यादिवद्भावावादपदादेरिण उत्तरस्यादेशस्य सकारस्य षत्वं प्राप्नोति, तदसिद्धत्वान्न भवति। कोऽस्य, योऽस्य, कोऽस्मै, योऽस्मौ--इत्येकादेशस्यासिद्ध्तवाद् `इणः' इति षत्वं न भवति।
तुग्विधौ---अधीत्य, प्रेत्येति। अत्रैकादेशस्यासिद्धत्वात् `ह्रस्वस्य पिति कृति तुक्' इति तुग्भवति।
* सम्प्रसारणङीट्सु प्रतिषेधो वक्तव्यः *। सम्प्रसारेणे--ब्रह्महूषु। परिवीषु। सम्प्रसारणपूर्वत्वस्यासिद्धत्वात्षत्वं न प्राप्नोति। ङौ-वृक्षेच्छक्षत्रम्, वृक्षे छत्रम्। इटि-अपचेच्छत्रम्, अपचे छत्रम्; आद्गुणस्यासिद्धत्वाद् ह्रस्वलक्षणो नित्योऽत्र तुक् प्राप्नोति, `दीर्घात्, पदान्ताद्वा' इति तुग्विकल्प इष्यते ।।

आद् गुणः ।। 6.1.87 ।।
`अचि' इत्यनुवर्तते। अवर्णात्परो योऽच्, अचि च पूर्वो योऽवर्णः, तयोः पूर्वपरयोरवर्णाचोः स्थाने एको गुण आदेशो भवति। तवेदम्। खट्वेन्द्रः, मालेन्द्रः। तवेहते, खट्वेहते। तवोदकम्, खट्वोदकम्। तवर्श्यः, खट्वर्श्यः। तवल्कारः, खट्वल्कारः। लृकारस्य स्थाने योऽणु तस्य लपरत्वमिष्यते ।।

वृद्धिरेचि ।। 6.1.88 ।।
`आत्' इति वर्तते। अवर्णात्परो य एच्, एचि च पूर्वो योऽवर्णः, तयोः पूर्वपरयोरवर्णैचोः स्थाने वृद्धिरेकादेशो भवति। आद्गुणस्यापवादः। ब्रह्मैडका, खट्वैडका। ब्रहमैतिकायनः, खट्वैतिकायनः। ब्रह्मौदनः, खट्वौदनः। ब्रहमौपगवः, खट्वौपगव ।।

एत्येधत्यूठ्सु ।। 6.1.89 ।।
`वृद्धिरेचि' इति वर्तते, `आत्' इति च। तदेतदेज्ग्रहणमेतेरेव विशेषणम्, न पुवनरेधतेः; अव्यभिचाराद्, ऊठश्चास्म्भवात्। `इण्गतौ' इत्येतस्मिन् धातावेचि, `एध वृद्धौ' इत्येतस्मिन् ऊठि च पूर्वं यदवर्ण ततश्च परो योऽच्, तयोः पूर्वपरयोरवर्णाचोः स्थाने वृद्धिरेकादेशो भवति। उपैति, उपैषि, उपैमि। उपैधते, प्रैधते। प्रष्ठौहः, प्रष्ठौहा, प्रष्ठौहे। ऊठ्याद्गुणापवादो वृद्धिर्विधीयते। एत्येधत्योः--एङिपर रूपापवादः।
`ओमाङोश्च' इत्येतत्तु पररूपं न बाध्यते; `येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति' इति, `पुरस्तादपादा अनन्तरान्विधोन्बाधन्ते' इति वा।
तेनेह न भवति--उप+आ+इतः= उपेत इति।
एचीत्येव-उप+आ+इतः= उपेत इति।
* अक्षादूहिन्यां वृद्धिर्वक्तव्या *। औहिणी।
* स्वादीरेरिण्योर्वृद्धिर्वक्तव्या *। स्वैरम्। स्वैरिणी।
* प्रादूढोढ्येषैष्येषु वृद्धिर्वक्तव्या *। प्रौढः। प्रौढिः। प्रैषः। प्रैष्यः।
* ऋते च तृतीयासमासेऽवर्णाद् वृद्धिर्वक्तव्या *। सुखेन ऋतः सुखार्तः। दुःखेन ऋतो दुःखार्तः। ऋत इति किम् ? सुखेन इतः सुखेतः। तृतीयेति किम्? परमर्तः। समास इति किम् ? सुखेनर्तः।
* प्रवत्सतरकम्बलवसनानामृणे वृद्धिर्वक्तव्या *। प्र-प्रार्णम्। वत्सतदर-वत्सतरार्णम्। कम्बल-कम्बलार्णम्। वसन-वसनार्णम्।
* ऋणदशाभ्यां वृद्धिर्वक्तव्या *। ऋणार्णम्। दशार्णम् ।।

आटश्च ।। 6.1.90 ।।
`एचि' इति निवृत्तम्। `अचि' इत्यनुर्त्तते। आटः परो योऽचु, अचि च पूर्वो य आट्-तयोः पूर्वपरयोराडयोः स्थाने वृद्धिरेकादेशो भवति। ऐक्षिष्ट। ऐक्षत। ऐक्षिष्यत। औभीत्। आर्ध्नोत्। औब्जीत्।
चकारोऽधिकविधानार्थः----`उसि' `ओमाङोश्च' इति पररूपबाधनार्थः. औस्रीयत्। औङ्कारीयत्। आ+ऊढा ओढा, तामैच्छत् औढीयत् ।।

उपसर्गादृति धातौ ।। 6.1.91 ।।
`आत्' इत्येव। अवर्णान्तादुपसर्गादृकारादौ धातौ परतः पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति। आद्गुणापवादः। उपार्च्छति। प्रार्च्छति। उपार्ध्नोति। उपसर्गादिति किम् ? खट्वर्च्छति। मालर्च्छति। प्रगता ऋच्छका अस्माद्देशात् प्रर्च्छको देशः। `यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञकाः' इति। ऋतीति किम् ? उप+इत उपेतः। तपकरणं किम् ? उप+ॠकारीयति उपर्कारीयति। `वा सुप्यापिशलेः' इति विकल्पः स्यात्।
उपसर्गग्रहणादेव धातुग्रहणे सिद्धे दातुग्रहणं शाकल्यनिवृत्त्यर्थम्। `ऋत्यकः' इति हि शाकल्यस्य प्रकृतिभावः। प्राप्नोति ।।

वा सुप्यापिशलेः ।। 6.1.92 ।।
`आत्' इत्येव, `उपसर्गादृति धातौ' इति च। सुबन्तावयवे धातावृकारादौ परतोऽवर्णन्तादुपसर्गात् पूर्वपरयोरापिशलेराचार्यस्य मतेन वा वृद्धिरेकादेशो भवति। उपर्षभीयति, उपार्षभीयति। उपल्कारीयति, उपाल्कारीयति। `ऋकारलुकारयोः सावर्ण्यविधिः' इति ऋतीति लृकारोऽपि गृह्यते।
आपिशलिग्रहणं पूजार्थम्, वेति ह्युच्यत एव ।।

औतोऽम्शसोः ।। 6.1.93 ।।
ओतोऽमि शसि च परतः पूर्वपरयोराकार आदेशो भवति। गां पश्य, गाः पश्य। द्यां पश्य, द्याः पश्य।
द्योशब्दोऽप्योकारान्त एव विद्यते, ततोऽपि परं सर्वनामस्थानं णिदिष्यते, तेन नाप्राप्तायां वृद्धावयमाकारो विधीयमानस्तां बाधते।

अमिति द्वितोयैकवचनं गृह्यते; शसा साहचर्यात्, `सुपि' इति चाधिकारात्। तेनाचिनवम्, असुनवमित्यत्र न भवति ।।

एङि पररूपम् ।। 6.1.94 ।।
`आत्' इत्येव, `उपसर्गाद्धातौ' इति च। अवर्णान्तादुपसर्गादेङादौ धातौ पूर्वपरयोः पररूपमेकादेशो भवति। `वृद्धिरेचि' इत्यस्यापवादः। उपेलयति। प्रेलयति। उपोषति। प्रोखति।
केचिद् `वा सुप्यापिशलेः' इत्यनुवर्त्तयन्ति, तच्च वाक्यभेदेन सुब्धातौ विकल्पं करोति-उपेडकीयति, उपैडकीयति। उपोदनीयति, उपौदनीयति।
* शकन्ध्वादिषु पररूपं वक्तव्यम् *। शक+अन्धुः शकन्धुः। कुल+अटा कुलटा।
* सीमन्तः केशेषु *। सीम्नोऽन्तः सीमन्तः। अन्यत्र सीमान्तः।
* एवे चानियोगे पररूपं वक्तव्यम् *। इह+एव इहेव। अद्य+एव अद्येव। अनियोगे इति किम् ? इहैव भव माऽन्यत्र गाः ।।
* ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यम् *। स्थूल+ओतुः स्थूलौतुः, स्थूलोतुः। बिम्बौष्ठी, बिम्बोष्ठी। समास इति किम् ? तिष्ठ देवदत्तौष्ठं पश्य।
* एमन्नादिषु छन्दसि पररूपं वक्तव्यम् *। अपां त्वा एमन्, अपां त्वेमन्। अपां त्वा ओद्मन्, अपां त्वोद्मन् ।।

ओमाङोश्च ।। 6.1.95 ।।
`आत्' इत्येव। अवर्णान्तादोमि आङि च परतः पूर्वपरयोः स्थाने पररूपमेकादेशो भवति। का+ओमित्यवोचत्, कोमित्यवोचत्। योमित्यवोचत्। आङि खल्वपि--आ+ऊढा ओढा। अद्य+ओढा अद्योढा। कदा+ओढा कदोढा। तदा+ओढा, तदोढा। `वृद्धिरेचि' इत्यस्यापवादः।
इह तु-आ ऋश्यात् अर्श्यात्, अद्य अर्श्यात् अद्यर्श्यादिति अकः सवर्णे दीर्घत्वं बाधते ।।

उस्यपदान्तात् ।। 6.1.96 ।।
`आत्' इत्येव। अवर्णादपदान्तादुसि पूर्वपरयोराद्गुणापवादः पररूपमेकादेशो भवति। भिन्द्या+उस् भिन्द्युः। छिन्द्या+उस् छिन्द्युः। अदा+उस् अदुः। अया+उस् अयुः।
अपदान्तादिति किम् ? का+उस्रा कोस्त्रा। का+उषिता कोषिता।
आदित्येव--चक्रुः। अबिभयुः ।।

अतो गुणे ।। 6.1.97 ।।
`अपदान्तात्' इति वर्त्तते। अकारादपदान्ताद् गुणे परतः पूर्वपरयोः स्थाने पररूपमेकादेशो भवति। पचन्ति। यजन्ति। अकः सवर्णो दीर्घस्यापवादः। पचे, यजे--इत्यत्र `वृद्धिरेचि' इति वृद्धिः प्राप्नोति।
अत इति किम्? यान्ति। वान्ति।
गुण इति किम् ? अपचे। अयजे।
अपदान्तादित्येव--दण्डाग्रम्। यूपाग्रम् ।।

अव्यक्तानुकरणस्यात इतौ ।। 6.1.98 ।।
अव्यक्तम्=अपरिस्फुटवर्णम्, तदनुकरणं परिस्फुटवर्णमेव केनचित्सादृश्येन तदव्यक्तमनुकरोति तस्य योऽच्छब्दस्तस्मादितौ पूर्वपरयोः स्थाने पररूपमेकादेशो भवति। पटत् इति पटिति। घटत् इति घटिति। झटत् इति झटिति। छमित् इति छमिति। अव्यक्तानुकरणस्येति किम् ? जगत् इति जगदिति। अत इति किम् ? मरट् इति मरडिति। इताविति किम्? पटत् अत्र पटदत्र ।।
* अनेकाच इति वक्तव्यम् *। इह मा भूत्--स्रत् इति स्रदिति।
कथं घटदिति गम्भीरमम्बुदैर्नदितमिति ? दकारान्तमेतदनुकरणं द्रष्टव्यम् ।।

नाम्रेडितस्यान्त्यस्य तु वा ।। 6.1.99 ।।
अव्यक्तानुकरणस्याम्रेडितस्य योऽच्छब्द इतौ तस्य पररूपं न भवति, तस्य योऽन्त्यस्तकारस्तस्य वा भवति। पटत्पटदिति, पटत्पदेति करोति।
`नित्यवीप्सयोः' इति द्विर्वचनम्।
यदा तु समुदायानुकरणं तदा भवत्येव पूर्वेण पररूपम्--पटत्पटेति करोति ।।

नित्यमाम्रेडिते डाचि ।। 6.1.100 ।।

`अव्यक्तानुकरणस्य', `अतः' `अन्त्यस्य' इति चानुवर्त्तते। डाच्परं यदाम्रेडितं तस्मिन्पूर्वस्याव्यक्तानुकरणस्याच्छब्दस्य योऽन्त्यस्तकारस्तस्य पूर्वस्य परस्य चाद्यस्य पर्णस्य नित्यं पररूपमेकादेशो भवति। पटपटाकरोति। दमादमाकरोति ।
पटदित्यस्माद् `अव्यक्तानुकरणाद्' इति डाचि विहिते `डाचि बहुलम्' इति द्विर्वचनम्, तच्च टिलोपात् पूर्वमेवेष्यते ।।

अकः सवर्णे दीर्घः ।। 6.1.101 ।।
अकः सवर्णेऽचि परतः पूर्वपरयोः स्थाने दीर्घ एकादेशो भवति। दण्कडाग्रम। दधीन्द्रः। मधूदके। होतृश्यः।
अक इति किम् ? इग्नये। सवर्ण इति किम् ? दध्यत्र।
अचीत्येव---कुमारो शेते। `नाज्झलौ' इत्यत्र यदजिति प्रत्याहारग्रहणं तत्र ग्रहणकशास्त्रस्यानिभिनिर्वृत्तत्वात्सवर्णा न गृह्यन्त इति सवर्णत्वमीकारशकारयोरप्रतिषिद्धम् ।।
* सवर्णदीर्घत्वे ऋति ऌ वा वचनम् *। ऋति सवर्णे परभूते तत्र ॠ वा भवतीति वक्तव्यम्। होतृ + ऋकारः होत्रृकारः। यदा न ॠ, तदा दीर्घ एव होतकारः।
* ऌति ल्ऌ वा वचनम् *। ऌति सवर्णे परतो ल्ऌ वा भवतीति वक्तव्यम्। होतृ + ऌकारः। होत्ल्ऌकारः। होतृकारः। ऋकारऌकारयोः सवर्णसंज्ञाविधिरुक्तः। दीर्घपक्षे तु समुदायान्तरतमस्य ऌवर्णस्य दीर्घस्याभावत् ऋकारः क्रियते ।।

प्रथमयोः पूर्वसवर्णः ।। 6.1.102 ।।
`अकः' इति `दीर्घः' इति वर्तते। प्रथमाशब्दो विभक्तिविशेषे रूढः, तत्साहचर्यात् द्वितीयापि प्रथमेत्युक्ता। तस्यां प्रथमायां द्वितायायां च विभक्तावलचि अकः पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घ एकादेशो भवति। अग्नी वायू। वृक्षाः। प्लक्षाः। वृक्षान्। प्लक्षान्।
`अतो गुणे' इति यदकारे पररूपं तदकः सवर्णे दीर्घत्वमेव बाधते, न तु पूर्वसवर्णदीर्घत्वम्, `पूरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान्' इति।
अचीत्येव वृक्षः। वृक्षः, प्लक्षः।
अक इत्येव---नावौ।
पूर्वसवर्णग्रगहणं किम् ? अग्नी इत्यत्र पक्षे परसवर्णो मा भूत्। दीर्घग्रहणं किम् ? त्रिमात्रे स्थानिनि त्रिमात्रादेशनिवृत्त्यर्थम् ।।

तस्माच्छसो नः पुंसि ।। 6.1.103 ।।
तस्मात्पूर्वसवर्णदीर्घादुत्तरस्य शशोऽवयवस्य सकारस्य पुंसि नकारादेशो भवति। वृक्षान्। अग्नीन्। वायून्। कर्तृन्। हर्तन्। षण्डकान्। पण्ढकान्। स्थूरकान्। अररकान्पश्य। सर्व एते पुंल्लिङ्गविशिष्टं स्वार्थं प्रतिपादयन्ति।
इह तु चञ्चेव चञ्चा, `लुम्मनुष्ये' इति कनो लुपि कृते `लुपि युक्तवद् व्यक्तिवचने' इति पुंसोऽपि स्त्रीलिङ्गता, तेन नत्वं न भवतिचञ्चाः पश्य, वध्रिकाः पश्येति। तस्मादिति किम् ? एतांश्चरतो गाः पश्य। शस इति किम् ? वृक्षाः। प्लक्षाः। पुंसीति किम् ? धेनूः। बह्वीः। कुमारीः ।।

नादिचि ।। 6.1.104 ।।
अवर्णादिचि पूर्वसवर्णदीर्घो न भवति। वृक्षौ। प्लक्षौ। सट्वे। कुण्डे।
आदिति किम् ? अग्नी। इचीति किम् ? वृक्षाः ।।

दीर्घाज्जसि च ।। 6.1.105 ।।
दीर्घाज्जसि इचि च परतः पूर्वसवर्णदोर्घो न भवति। कुमार्यौ। कुमार्यः। ब्रह्मबन्ध्वौ। ब्रह्मबन्ध्वः ।।

वा छन्दसि ।। 6.1.106 ।।
दीर्घाच्चन्दसि बिषये जसि च इचि च परतो वा पूर्वसवर्णदीर्घो न भवति। मारुतीश्चतस्रः। पिण्डीः। मारुत्यश्चतस्रः। पिण्ड्यः। वाराही। उपानही। वाराह्यौ। उपरानह्यौ ।।

अमि पूर्वः ।। 6.1.107 ।।
`अकः' इत्येव। अमि परतोऽकः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति। वृक्षम्। प्लक्षम्। अग्निम्। वायुम्।
पूर्वग्रहणं किम् ? पूर्व एव यथा स्यात्, पूर्वसवर्णोऽन्तरतमो मा भूदिति कुमारीमित्यत्र हि त्रिमात्रः स्यात् ।
वा छन्दसीत्येव---शमीं च, शम्यं च। गौरीं च, गौर्यं च ।।

सम्प्रसारणाच्च ।। 6.1.108 ।।

`पूर्वः' इत्येव। सम्प्रसारणादचि परतः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति। यजि--इष्टम्। वपि--उप्पम्। ग्रहि--गृहीतम्।
सम्प्रसार्णविधानसामर्थ्याद्विगृहीतस्य श्रवणे प्राप्ते पूर्वत्वं विधीयते।
वा छन्दसीत्येव--मित्रावरुणौ यज्यमानौ।
परपूर्वत्वविधाने सत्यर्थवत्सम्प्रसारणविधानमिति इष्ट इत्येवमादिषु पूर्वत्वाभावे यणादेशो भवत्येव।
अन्तरङ्गे चाचि कृतार्थं वचनमिति बाह्यो पश्चात्सन्निपतिते पूर्वत्वं न भवति-शकह्वौ, शकह्वर्थम् ।।

एङः पदान्तादति ।। 6.1.109 ।।
एङ् यः पदान्तस्तस्मादति परतः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति। अग्नेऽत्र। वायोऽत्र। अयवादेशयोरयमपवादः।
एङ इति किम्? दध्यत्र। मध्वत्र। पदान्तादिति किम्? चयनम्। लवनम्। अतीति किम्? वायो इति। भानो इति। वायविति। भावविति। तपरकरणं किम् ? वायवायाहि ।।

ङसिङसोश्च ।। 6.1.110 ।।
`एङः' इति वर्त्तते, `अति' इति च। एङ् उत्तरयोर्ङसिङसोरति परतः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति। अग्नेरागच्छति। अग्ने स्वम्।
वायोरागच्छति। वायो स्वम्।
अपदान्तार्थ आरम्भः ।।

ऋत उत् ।। 6.1.111 ।।
`ङसिङसोः' इत्येव। ऋकारान्तादुत्तरयोर्ङसिङसोरति परतः पूर्वपरयोरुकार एकादेशो भवति। होतुरागच्छति। होतुः स्वम्। द्वयोः षष्ठीनिर्दिष्टयोः स्थाने यः स लभतेऽन्यतरव्यपदेशमिति `उरण् रपरः' इति रपरत्वमत्र कृत्वा `रत्सस्य' इति सलोपः कर्तव्यः ।।

ख्यत्यात्परस्य ।। 6.1.112 ।।
`ङसिङ्सोः' इति वर्त्तते, `उत्' इति च। ख्यत्यादिति खिशब्दखीशब्दयोस्तिशब्दतीशब्दयोश्च कृतयणादेशयोरिदं ग्रहणम्, ताभ्यां परस्य ङसिङसोरत उकारादेशो भवति। सख्युरागच्छति। सख्युः स्वम्। पत्युरागच्छति। पत्युः स्वम्।
खीशब्दस्योदाहरणम्--सह खेन वर्त्तत इति सखस्तमिच्छतीति क्यच्-सखीयत्, सखीयतेः सखीः, तस्य ङसिङसोः--सख्युरिति। तीशपब्दस्यापि-लूनामिच्छति लूनीति, लूनीयतेः क्विपि लुप्ते लून्युरागच्छति। लून्युः स्वम्। निष्ठानत्वम् `पूर्वत्रासिद्धम्' इत्यसिद्धम्।
विकृतनिर्द्देसादेवेह न भवति--अतिसखेरागच्छति, सेनापतेरागच्छतीति। सखिशब्दस्य केवलस्य घिसंज्ञा प्रतिषिध्यते, न तदन्तस्य ।।

अतो रोरप्लुतादप्लुते ।। 6.1.113 ।।
`अति' इति, `उत्' इति वर्त्तते। अकारादप्लुतादुत्तरस्य रो रेफस्य उकारानुबन्धविशिष्टस्य अकारेऽप्लुते परत उकारादेशो भवति। वृक्षोऽत्र। प्लक्षोऽत्र।
`भोभगोअघोअपूर्वस्य योऽशि' इत्यस्मिन्प्राप्ते उत्वं विधीयते। रुत्वस्याश्रयत्वात् `पूर्वत्रासिद्धम्' इत्यसिद्धं न भवति।
अत इति किम्? अग्निरत्र। तपरकरणं किम् ? वृक्षा अत्र। सानुबन्धग्रहणं किम् ? स्वरत्र। प्रातरत्र।
अतीत्येव--वृक्ष इह। तस्यापि तपरत्वादत्र न भवति। वृक्ष आश्रितः। अप्लुतादिति किम्? सुस्रोता3 अत्र न्वसि। अप्लुत इति किम्? तिष्ठतु पय आ3 शिवन्।
अत्र प्लुतस्यासिद्धत्वादुत्त्वं प्राप्नोतीति `अप्लुतादप्लुते' इत्युच्यते ।।

हशि च ।। 6.1.114 ।।
हशि च परतोऽत उत्तरस्य रोरुकारादेशो भवपति। पुरुषो याति। पुरुषो हसति। पुरुषो ददाति ।।

प्रकृत्याऽन्तःपादमव्यपरे ।। 6.1.115 ।।
एङोऽतीत्येव। `एङः' इति यत्पञ्चम्यन्तमनुवर्त्तते तदर्थादिह प्रथमान्तं भवति। प्रकृतिरिति स्वभावः। कारणं वाऽभिधीयते। अन्तरित्यव्ययमधिकरणभूतं मध्यमाचष्टे। पादशब्देन च ऋक्पादस्यैव ग्रहणमिष्यते, न तु श्लोकपादस्य। अवकारयकारपरेऽति परत एङ् प्रकृत्या भवति। स्वभावेनावतिष्ठते कारणात्मना वा भा वति न विकारमापद्यते। तौ चेन्निमित्तकार्यिणावन्तः पादमृक्पादमध्ये भवतः। ते अग्रे अश्वमायुञ्जन्। ते अस्मिन् जवमादधुः। उपप्रयन्तो अध्वरम्। शिरो अपश्यम्। सुजाते अश्वसूनृते। अध्वर्थो अद्रिभिः सुतम्।
अन्तः पादमिति किम् ? कया मती कृत एतास एतेऽर्चयन्ति। अव्यपर इति किम्? तेऽवदन्। तेऽयस्मयम्। एङिति किम् ? अन्वग्निरुषसामग्रमख्यत्।
केचिदिदं सूत्रम् `नान्तःपादमव्यपरे' इति पठन्ति, ते संहितायामिह यदुच्यते तस्य सर्वस्य प्रतिषेधं वर्णयन्ति ।।

अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च ।। 6.1.116 ।।

अव्यात्, अवद्यात्, अवक्रमुः, अव्रत, अयम्, अवन्तु, अवस्युइत्येतेषु यकारवकारपरऽप्यति परतोऽन्तः पादमेङ् प्रकृत्या भवति। अग्निः प्रथमो वसुभिर्नो अव्यात्। मित्रमहो अवद्यात्। मा शिवासो अवक्रमुः। ते नो अव्रताः। शतधारो अयं मणिः। ते नो अवन्तु पितरः। कुशिकासो अवस्यवः ।।

यजुष्युरः ।। 6.1.117 ।।

उरःशब्द एदन्तो यजुषि विषयेऽति प्रकृत्या भवति। उरो अन्तरिक्षम्।

अपरे यजुष्युरो इति सूत्रं पठन्ति, उकारान्तमुरुशब्दं सम्बुध्यन्तमधीयते। त इदमुदाहरन्ति--उरो अन्तरिक्षं सजूरिति।

यजुषि पादानामभावादनन्तः पादार्थं वचनम्।।

आपोजुषाणोवृष्णोवर्षिष्टेऽम्बालेऽम्बिकेपूर्वे ।। 6.1.118 ।।

`यजुषि' इत्येव। आपो, जुषाणो, वृष्णो, वर्षिष्ठे-इत्येते शब्दा अम्बे, अम्बाले, इत्येतौ च यावम्बिकेशब्दात्पूर्वौ यजुषि पठितौ ते अति परतः प्रकृत्या भवन्ति। आपो अस्मान्मातरः शुन्धयन्तु। जुषाणो अप्तुराज्यस्य। वृष्णो अंशुभ्यां गभस्तिभिः। वर्षिष्ठे अधिनाके। अम्बे अम्बाले अम्बिके--यजुषीदमीदृशमेव पठ्यते। अस्मादेव निपातनाद् `अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वत्वं न भवकति ।।

अङ्ग इत्यादौ च ।। 6.1.119 ।।

अङ्गशब्दे य एङ् तदादौ चाकारे यः पूर्वः स यजुषि विषयेऽति प्रकृत्या भवति। ऐन्द्रः प्राणो अङ्गे अङ्गे अदीध्यत्। ऐन्द्रः प्राणो अङ्गे अङ्गे निदीध्यत्। ऐन्द्रः प्राणा अङ्गे अङ्गे अशोचिषम् ।।

अनुदात्ते च कुधपरे ।। 6.1.120 ।।

`यजुषि' इत्येव। अनुदात्ते चाति कवर्गधकारपरे परतो यजुषि विषये एङ् प्रकृत्या भवति। अयं सो अग्निः। अयं सो अध्वरः।

अनुदात्ते इति किम् ? अधोऽग्रे। अग्रशब्द आद्युदात्तो निपात्यते। कुधपरे इति किम् ? सोऽयमग्निः सहस्रियः ।।

अवपथासि च ।। 6.1.121 ।।

`यजुषि' इत्येव। `अनुदात्ते' इति चशब्देनानुकृष्यते। अवपथाः-शब्देऽनुदात्तेऽकारादौ परतो यजुषि विषय एङ् प्रकृत्या भवति। त्री रुद्रेभ्यो अवपथाः।

वपेर्लङि थासि `तिङ्ङ्तिङ्' इति निघातेनानुदात्तत्वम्।

अनुदात्त इत्येव--यद्रुद्रेभ्योऽवपथाः। `निपातैर्यद्यदिरहन्त' इति निघातः प्रतिषिध्यते ।।

सर्वत्र विभाषा गोः ।। 6.1.122 ।।

सर्वत्र---छन्दसि भाषायां च, अति परतो गोरेङ् प्रकृत्या भवति विभाषा। गोऽगद्रम्, गो अग्रम्। छन्दसि--अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोश्वाः ।।

अवङ् स्फोटायनस्य ।। 6.1.123 ।।

`अति' इति निवृत्तम् ।। `अचि' इत्येतत्पुनरनुवर्त्तत एव। अचि परतो गोः स्फोटायनस्याचार्यस्य मतेनावङादेशो भवति। गवाग्रम्, गोऽग्रम्। गवाजिनम्, गोऽजिनम्। गवोदनम्, गवोदनम्। गवोष्ट्रम्, गवुष्ट्रम्।

आद्युदात्तश्चायमादेशो निपात्यते। स निपातनस्वरो वहुव्रीहौ प्रकृतिस्वरविधाने भवति--गावो अग्रमस्य गवाग्र इति। अन्यत्र तु समासान्तोदात्तत्वेन बाध्यते।

स्फोटायनग्रहणं पूजार्थम्, `विभाषा' इत्येव हि वर्त्तते।

व्यवस्थितविभाषेयम्। तेन गवाक्ष इत्यत्र नित्यमवङ् भवति ।।

इन्द्रे च नित्यम् ।। 6.1.124 ।।

इन्द्रशब्दस्थेऽचि परतो गोर्नित्यमवङादेशो भवति। गवेन्द्रः। गवेन्द्रयज्ञस्वरः ।।

प्लुतप्रगृह्या अचि ।। 6.1.125 ।।

प्लुताश्च प्रगृह्याश्चाचि प्रकृत्या भवन्ति। देवदत्ता3 अत्र न्वसि। यज्ञदत्ता3 इदमानय। आश्रयादत्र प्लुतः सिद्धः। प्रगृह्याः- अग्नी इति। वायू इति। खट्वे इति। माले इति।

अचीत्यनुवर्त्तमाने पुनरज्ग्रहणमादेशनिमित्तस्याचः परिग्रहार्थम्। तेनेह न भवति-जानु उ अस्य रुजति जान्वस्य रुजति। प्रगृह्यादुकारात्परस्याकारस्य सवर्णदीर्घत्वं प्रत्यनिमित्तत्वादत्र प्रकृतिभावो न भवति।
नित्यग्रहणमिहानुवर्त्तते। प्लुतप्रगृह्याणां नित्यमयमेव प्रकृतिभावो यथा स्याद्, `इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इत्येतन्मा भूदिति ।।

आङोऽनुनासिकस्छन्दसि ।। 6.1.126 ।।
आङोऽचि परतः संहितायां छन्दसि विषयेऽनुनासिकादेशो भवति, स च प्रकृत्या भवति। अभ्रआँ अपः। गभीरआँ उग्रपुत्रे जिघांसत।
केचिद् `आङोऽनुनासिकश्छन्दसि बहुलम्' इत्यधीयते। तेनेह न भवति--इन्द्रो बाहुभ्यामातरत्। आ अतरत्।

इकोऽसवर्णे शाकल्यस्य ह्वस्वश्च ।। 6.1.127 ।।
इकोऽसवर्णेऽचि परतः शाकल्यस्याचार्यस्य मतेन प्रकृत्या भवन्ति, ह्रस्वश्च तस्येकः स्थाने भवति। दधि अत्र, दध्यत्र। मधु अत्र, मध्वत्र। कुमारी अत्र, कुमार्यत्र। किशोरि अत्र, किशोर्यत्र।
इक इति किम्? खट्वेन्द्रः। असवर्ण इति किम् ? कुमारीन्द्रः।
शाकल्यग्रहणं पूजार्थम्, आरम्भसामर्थ्यादेव हि यणादेशेन सह विकल्पः सिद्धः।
* सिन्नित्यसमासयोः शाकलप्रतिषेधो वक्तव्यः *। सितिअयं ते योनिर्ऋत्वियः। नित्यसमासे--व्याकरणम्। कुमार्यर्थम्।
* इषाअक्षादिषु च्छन्दसि प्रकृतिभावमात्रं वक्तव्यम् *। ईषा अक्षः। का ईमरे पिशङ्गिला। पथा अगमन् ।।

अत्यकः ।। 6.1.128 ।।
`साकल्यस्य ह्रस्वश्च' इत्येदनुवर्त्तते। ऋकारे परतः शाकल्यस्यावार्यस्य मतेनाकः प्रकृत्या भवन्ति, ह्रस्वश्च तस्याकः स्थाने भवति। शट्व ऋश्यः। कुमारि ऋश्यः। होतृ ऋश्यः।
ऋतीति किम् ? खट्वेन्द्रः। अक इति किम् ? वृक्षावृश्यः।
सवर्णार्थमनिगर्थं च वचनम् ।।

अप्लुतवदुपस्थिते ।। 6.1.129 ।।
उपस्थितं नामानार्ष इतिकरणः समुदायादवच्छिद्य पदं येन स्वरूपेऽवस्थाप्यते तस्मिन्परतः प्लुतोऽप्लुतवद्भवति। प्लुतकार्यं प्रकृतिभावं न करोति।
शुश्लोका3 इति, सुश्लोकेति। सुमङ्गला3 इति, सुमङ्गलेति ।
वत्करणं किम् ? अप्लुत इत्युच्यमाने प्लुत एव प्रतिषिध्येत।
तत्र को दोषः ? प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात्--अग्नी3 इति। वायू3 इति ।।

ई3 चाक्रवर्मणस्य ।। 6.1.130 ।।
ई3कारः प्लुतोऽचि परतश्चाक्रवर्मणस्याचार्यस्य मतेनाप्लुतवद्भवति। अस्तु हीत्यब्रूताम्, अस्तु ही3 इत्यब्रूताम्। चिनु हीदम्, चिनुही3 इदम्।
चाक्रवर्मणग्रहणं विकल्पार्थम्-तदुपस्थिते निवृत्त्यर्थम्, अनुपस्थिते प्राप्त्यर्थमित्युभयत्रविभाषेयम्।
ईकारादन्यत्राप्ययमप्लुतवद्भाव इष्यते। वशा3 इयम्, वशेयम् ।।

दिव उत् ।। 6.1.131 ।।
`एङः पदान्तादति' इत्यतः पदग्रहणमनुवर्तते। `दिवः' इति प्रातिपदिकं गृह्यते, न धातुः; सानुबन्धकत्वात्। दिवः पदस्य उकारादेशो भवति। दिवि कामो यस्य द्युकामः। द्युमान्। विमलद्यु दिनम्। द्युभ्याम्। द्युभिः।
निरनुबन्धकग्रहणादिह न भवति-अक्षद्यूभ्याम्, अक्षद्यूभिरिति।
तपरकरणमूठो निवृत्त्यर्थम्-द्युभ्याम्, द्युभिरिति। अत्र हि परत्वादूठ् प्राप्नोति।

पदस्येति किम् ? दिवौ। दिवः ।।

एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ।। 6.1.132 ।।
एतत्तदौ यावककारौ नञ्समासे न वर्त्तेते तयोर्यः सुशब्दः, कश्च तयोः सुशब्दः ? यस्ततदर्थेन सम्बद्धः, तस्य संहितायां विषये हलि परतो लोपो भवति। एष ददाति। स ददाति। एष भुङ्क्ते। स भुङ्क्ते।

एतत्तदोरिति किम् ? यो ददाति। यो भुङ्क्ते। सुग्रहणं किम् ? एतौ गावौ चरतः। अकोरिति किम् ? एषको ददाति। सको ददाति।
`तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति रुपभेदेऽपि साकच्कावेतत्तदावेव भवतः।
अनञ्समास इति किम् ? एनेषो ददाति। असो ददाति। उत्तरपदार्थप्रदानत्वात् नञ्समासस्यैतत्तदोरेवात्र सम्बद्धः सुशब्दः।
हलीति किम् ? एषोऽत्र। सोऽत्र ।।

स्यश्छन्दसि बहुलम् ।। 6.1.133 ।।
`स्य' इत्येतस्य च्छन्दसि हलि परतो बहुलं सोर्लोपो भवति। एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि। एष स्य ते मधुमाँ इन्द्र सोमः।
न च भवति--यत्र स्यो निपतेत् ।।

सोऽचि लोपे चेत्पादपूरणम् ।। 6.1.134 ।।
`सः' इत्येतस्याचि परतः सुलोपो भवति लोपे, सति चेत्पादः पूर्यते। सेन्द्र राजा क्षयति चर्षणीनाम्। सौषधी नुरुध्यसे।
लोपे चेत्पादपूरणमिति किम् ? स इव व्याघ्रो भवेत्।
अचिति विस्पष्टार्थम् ।
पादग्रहणेनात्र श्लोकपादस्यापि ग्रहणं केचिदिच्छन्ति, तेनेदमपि सिद्धं भवति--
सैष दाशरथी रामः, सैष राजा युधिष्ठिर।
सैष कर्णो महात्यागी, सैष भीमो महाबलः ।।

सुट् कात्पूर्वः ।। 6.1.135 ।।
अधिकारोऽयम् `पारस्करप्रभृतीनि च संज्ञायाम्' इति यावत्। इत उत्तरं यद्वक्ष्यामस्तक्षत्र `सुंट्' इति, `कात्पूर्वः' इति चैतदधिकृतं वेदितव्यम्। वक्ष्यति--```सम्पर्युपेभ्यः करोतौ भूषणे'। संस्कर्ता। संस्कर्तुम्। संस्कर्तव्यम् ''।
कात्पूर्वग्रहणं सुटोऽभक्तत्वज्ञापनार्थम्। तथा हि-संस्कृषीष्ट, संस्क्रियते इति संयोगादिलक्षणाविड्गुणौ न भवतः। `तिङ्ङतिङः' इति निघातोऽपि तर्हि न प्राप्नोति, सुटा व्यवहितत्वात् ? `स्वरविधौ व्यञ्जनमविद्यमानवत्' इति वचनान्नास्ति व्यवधानम्।
सञ्चस्करतुः, सञ्चस्करुः--इति गुणः कथम् ? `तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति।
संयोगोपधग्रहणं च `ऋतश्च संयोगादेर्गुणः' इत्यत्र कर्तव्यम्। टित्करणम्--`सुट्स्तुस्वञ्जाम्' इत्यत्र विशेषणार्थम् ।।

अडभ्यासव्यवायेऽपि ।। 6.1.136 ।।
अड्व्यवाये, अभ्यासव्यवायेऽपि सुट् कात्पूर्वो भवति। समस्करोत्। समस्कार्षीत्। सञ्चस्कार। परिचस्कार।
किमर्थ पुनरिदमुच्यते, `पूर्व धातुरुपसर्गेण युज्यते' इति तत्र `दातूपसर्गयोः कार्यमन्तरङ्गम्' इति पूर्वं सुट् क्रियते, पश्चादडभ्यासौ ? `अभक्तश्च सुट्' इत्युक्तम्, ततः सकारादुत्तरावडभ्यासावनिष्टे देशे स्याताम्। एतस्मिस्तु सत्यत एव वचानात् कृतयोरडभ्यासयोस्तद्व्यवायेऽपि सुट् कात्पूर्वः क्रियत इति सिद्धमिष्टं भवति ।।

सम्पर्युपेभ्यः करोतौ भूषणे ।। 6.1.137 ।।
सम्, परि, उप--इत्येतेभ्यो भूषणार्थे करोतौ परतः सुट् कात्पूर्वो भवति। संस्कर्ता, संस्कर्तुम्, संस्कर्तव्यम्--अत्र `सम्पुंकानां सत्वम्' इति समो मकारस्य सकारः, पूर्वस्य चाकारस्यानुनासिकः। परिष्कर्ता, परिष्कर्तुम्, परिष्कर्तव्यम्--`सुट्स्तुस्वञ्जाम्' इति षत्वम्। उपस्कर्ता, उपस्कर्तुम्, उपस्कर्तव्यम्।
भूषण इति किम् ? उपकरोति।
सम्पूर्वस्य क्वचिदभूषणेऽपि सुडिष्यते--संस्कृतमन्नमिति ।।

समवाये च ।। 6.1.138 ।।
समवायः=समुदायः, तस्मिश्चार्थे करोतौ सम्पर्युपेभ्यः कात्पूर्वः सुडागमो भवति। तत्र नः संस्कृतम्। तत्र नः परिष्कृतम्। तत्र नः उपस्कृतम्। समुदितमित्यर्थः ।।

उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु ।। 6.1.139 ।।

सतो गुणान्तराधानमाधिक्याय वृद्धस्य वा तादवस्थ्याय समीहा=प्रतियत्नः। विकृतमेव वैकृतम्, प्रज्ञादित्वादण्। गम्यमानार्थस्य वाक्यस्य स्वरूपेणोपादानं वाक्यस्याध्याहारः। एतेष्वर्थेषु गम्यामानेषु करोतौ धातौ परत उपात् सुट् कात्पूर्वो भवति। प्रतियत्ने तावत्एधो दकस्योपस्कुरुते। काण्कडगुणस्योपस्कुरुते।
वैकृते--उपस्कृतं भुङ्क्ते। उपस्कृतं गच्छति।
वाक्याध्याहारे--उपस्कृतं जल्पति। उपस्कृतमधीते।
एतेष्विति किम् ? उपकरोति ।।

किरतौ लवने ।। 6.1.140 ।।
`उपात्' इत्येव। उपादुत्तरस्मिन्किरतौ धातौ लवनविषये सुट् कात्पूर्वो भवति। उपस्कारं मद्रका लुनन्ति। उपस्कारं काश्मीरा लुनन्ति। विक्षिप्य लुनन्तीत्यर्थः।
* णमुलत्र वक्तव्यः * लवन इति किम् ? उपकिरति देवदत्तः ।।

हिंसायां प्रतेश्च ।। 6.1.141 ।।
`किरतौ' इत्येव। उपात्प्रतेश्चोत्तरस्मिन्किरतौ विषये सुट् कात्पूर्वो भवति हिंसायां विषये। उपस्कीर्णं हं ते वृषल भृयात्। प्रतिस्कीर्णं हं ते वृषल भूयात्। तथा ते वृषल विक्षेपो भूयाद् यथा हिंसामनुबध्नातीत्यर्थः।
हिंसायामिति किम् ? प्रतिकीर्णम् ।।

अपाच्चतुष्पाच्छकुनिष्वालेखने ।। 6.1.142 ।।
`किरतौ' इत्येव। अपादुत्तरस्मिन्किरतौ चतुष्पाच्छकुनिषु यदालेखनं तस्मिन् विषये सुट् कात्पूर्वो भवति। अपस्किरते वृषभो हृष्टः। अपस्किरते कुक्कुटो भक्ष्यार्थी। अपस्किरते श्वा आश्रयार्थी। आलिख्य विक्षिपतीत्यर्थः।
चतुष्पाच्छकुनिष्विति किम् ? अपकिरति देवदत्तः।
* हर्षजीविकाकुलायकरणेष्विति वक्तव्यम् *। इह मा भूत्---अपकिरति श्वा ओदनपिण्कडमाशितः।
* हर्षजीविकाकुलायकरणेष्वेव किरतेरात्मनेपस्योपसख्यानम् * ।।

कुस्तुम्बुरुणि जातिः ।। 6.1.143 ।।
`कुस्तुम्बुरुणि' इति सुट् निपात्यते जातिश्चेद्भवति। कुस्तुम्बुरुर्नामौषधिजातिः= धान्यकम्। तत्फलान्यपि कुस्तुम्बुरुणि।
सूत्रनिर्द्देशे नपुंसकलिङ्गमविवक्षितम्।
जातिरिति किम् ? कुत्सितानि तुम्बुरूणि कुतुम्बुरूणि। तुम्बुरुशब्देनात्र तिन्दुकीफलान्युच्यन्ते, समासेन तेषां कुत्सा ।।

अपरस्पराःक क्रियासातत्ये ।। 6.1.144 ।।
`अपरस्परा' इति सुट् निपात्यते क्रियासातत्ये गम्यमाने। अपरस्पराः सार्था गच्छन्ति। सन्ततमविच्छेदेन गच्छन्तीत्यर्थः।
क्रियासातत्य इति किम् ? अपरपराः सार्थाः गच्छन्ति। अपरे परे च सकृदेव गच्छन्तीत्यर्थः। नात्र गमनस्य सातत्य-प्रबन्धो विवक्षितः।
किमिदं सातत्यमिति ? सततस्य भावः सातत्यम्।
कथं सततम् ? समस्तते विकल्पेन मकारलोपो विधियते।
लुम्पेदवश्यमः कृत्ये तुङ्काममनसोरपि।
समो वा हिततयोर्मांसस्य पचि युड्घञोः ।।

गोष्पदं सेवितासेवितप्रमाणेषु ।। 6.1.145 ।।
गोष्पदमिति सुट् निपात्यते, तस्य च षत्वं सेवितेऽसेविते प्रमाणे च विषये। गोष्पदो देशः। गोष्पदो देशः। गावः पद्यन्ते यस्मिन् देशे स गोभिः सेवितो देशो गोष्पद इत्युचते। असेविते-अगोष्पदान्यरण्यानि। असेविते गोष्पदशब्दो न सम्भवतीत्यगोष्पदशपब्दार्थ निपातनम्। यद्येवम्, नार्थ एतेन, गोष्पदप्रतिषेधादगोष्पदं भविष्यति ? सत्यमेतत्; यत्र तु सेवितप्रसङ्गोऽस्ति तत्रैव स्याद्-गोष्पदमिति। यत्र त्वत्यन्तासम्भव एव, तत्र न स्याद्-अगोष्पदान्यरण्यानीति; असेवितग्रहणात्तत्रापि भवति। यानि हि महान्त्यरण्यानि येषु गवामत्यन्तासम्भवः, तान्येवमुच्यन्ते। प्रमाणे-गोष्पदमात्रं क्षेत्रम्, गोष्पदपूरं वृष्टो देवः। नात्र गोष्पदं स्वार्थप्रतिपादनार्थमुपादीयते, किं तर्हि ? क्षेत्रस्य वृष्टेश्च परिच्छेत्तुमियत्ताम् ।
सेवितासेवितप्रमाणेष्विति किम् ? गोः पदं गोपदम् ।।

आस्पदं प्रतिष्ठायाम् ।। 6.1.146 ।।
आत्मयापनाय स्थानम्=प्रतिष्ठा, तस्यामास्पदमिति सुट् निपात्यते। आस्पदमनेन लब्धम्।
प्रतिष्ठायामिति किम् ? आ पदात्-आपदम् ।।

आश्चर्यमनित्ये ।। 6.1.147 ।।
अनित्यतया विषयभूतयाऽद्भुतत्वमिह लक्ष्यते, तस्मिन्नाश्चर्य निपात्यते। `चरेराङि चागुरौ' इति यत्प्रत्यये कृते निपातनात्सुट्। आश्चर्यं यदि स भुञ्जीत। आश्चर्यं यदि सोऽधीयीत। चित्रमद्भुतमित्यर्थः।
अनित्य इति किम् ? आश्चर्यं कर्म शोभनम् ।।

वर्चस्केऽवस्करः ।। 6.1.148 ।।
कुत्सितं वर्चो वर्चस्कम्=अन्नमलम्, तस्मिन्नभिदेयेऽवस्कर इति निपात्यते। अवपूर्वस्य किरतेः कर्मणि `ऋदोरप्' इत्यप्, निपातनात्सुट्। अवकीर्यत इत्यवस्करः=तत्सम्बन्धाद्देशोऽपि तथोच्यते।
वर्चस्क इति किम् ? अवकरः ।।

अपस्करो रथाङ्गम् ।। 6.1.149 ।।
`अपस्कर' इति निपात्यते रथाङ्गं चेद्भवति। अपपूर्वात्किरतेः `ऋदोरप्' इत्यप्, निपातनात् सुट्। अपस्करो रथावयवः ।
रथाङ्गमिति किम् ? अपकर ।।

विष्किरः शकुनिर्विकिरो वा ।। 6.1.150 ।।
`विकिर' इति किरतेर्विपूर्वस्य `इगुपधज्ञाप्रीकिरः कः' इति कप्रत्यये विहिते सुट् निपात्यते, शकुनिश्चेद्भवति, विकिरशब्दाभिधेयो वा शकुनिर्भवति। सर्वे शकुनयो भक्ष्या विष्किराः कुक्कुटादृते।
`विष्किरो वा शकुनौ' इति वाग्रहणादेव सुड्विक्लपे सिद्धे विकिरग्रहणमिह--तस्यापि शकुनेरन्यत्र प्रयोगो मा भूत् ।।

ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ।। 6.1.151 ।।
चन्द्रशब्द उत्तरपदे ह्रस्वात्परः सुडागमो भवति मन्त्रविषये। सुश्चन्द्रो युष्मान्।
ह्रस्वादिति किम् ? सूर्याचन्द्रमसाविव। मन्त्र इति किम् ? सुचन्द्रा पौर्णमासी।
उत्तरपदं समास एवं भवतीति प्रसिद्धम्, तत इह न भवतिशुक्रमसि, चन्द्रमसि ।।

प्रतिष्कशश्च कशेः ।। 6.1.152 ।।
`कश गतिशासनयोः' इत्येतस्य धातोः प्रतिपूर्वस्य पचाद्यचि कृते सुट् निपात्यते, तस्यैव षत्वम्।
ग्रामद्य प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः।
वार्त्तापुरुषः, सहायः, पुरोयायो वा प्रतिष्कश इत्यभिधीयते।
कशेरिति किम् ? प्रतिगतः कशां प्रतिकशोऽश्वः।
अत्र यद्यपि कशेरेव कशाशब्दः, तथापि कशेरिति धातोरुपादानं तदुपसर्गस्य प्रतेः प्रतिपत्त्यर्थम्। तेन धात्वन्तरोपसर्गान्न भवति ।।

प्रस्कण्वहरिश्चन्द्रावृषी ।। 6.1.153 ।।
प्रस्कण्व, हरिश्चन्द्र-इति सुट् निपात्यते, ऋषो चेदभिधेयौ भवतः। प्रष्कण्व ऋषिः। हरिशचन्द्र ऋषिः।
हरिश्चन्द्रग्रहणममन्त्रार्थम् ।
ऋषी इति किम् ? प्रकण्वो देशः। हरिचन्द्रो माणवकः ।।

मस्करमस्करिणौ वेणुपरिव्राजकयोः ।। 6.1.154 ।।
मस्कर, मस्करिन्-इत्येतौ यथासंख्यं वेणौ परिव्राजके च निपात्येते। मकरशब्दो ह्यव्युत्पन्नं प्रातिपदिकम्, तस्य वेणावभिधेये सुट् निपात्यते, परिव्राजके त्विनिरपि। मस्करो वेणुः। मस्करी परिव्राजकः।
वेणुपरिव्राजकयोरिति किम् ? मकरो ग्राहः, मकरी समुद्रः।

केचित्पुनरत्र माङ्युपपदे करोतेः करणेऽच्प्रत्ययमपि निपातयन्ति, माङश्च ह्रस्वत्वम्, सुट् च। मा क्रियते येन प्रतिषिध्यते, स मस्करो वेणुः। वेणुग्रहणं च प्रदर्शनार्थम्। अन्यत्रापि भवति-मस्करो दण्ड इति। परिव्राजकेऽपि माङ्युपपदे करोतेस्ताच्छील्य इनिर्निपात्यते, माङो ह्रस्वत्वं सुट् च तथैव। माकरणशीलो मस्करी कर्मापवादित्वात्परिव्राजक उच्यते। स ह्येवमाह--मा कुरुत कर्माणि, शान्तिर्वः श्रेयसीति ।।

कास्तीराजस्तुन्दे नगरे ।। 6.1.155 ।।
कास्तीर, अजस्तुन्द--इत्येतौ शब्दौ निपात्येते नगरेऽभिधेये। ईषत्तीरमस्य, अजस्येव तुन्दमस्येति व्युत्पत्तिरेव क्रियते, नगरं तु वाच्यमेतयोः। कास्तीरं नाम नगरम्। अजस्तुन्दं नाम नगरम्।
नगर इति किम् ? कातीरम्। अजतुन्दम् ।।

कारस्करो वृक्षः ।। 6.1.156 ।।
`कारस्कर' इति सुट् निपात्यते, वृक्षश्चेद्भवति। कारं करोतीति `दिवाविभानिशाप्रभाभास्करान्त' इति टप्रत्ययः। कास्करो वृक्षः।
वृक्ष इति किम् ? कारकरः।
केचित् पारस्करप्रभृतिष्वेव कारस्करो वृक्ष इति पठन्ति ।।

पारस्करप्रभृतीनि च संज्ञायाम् ।। 6.1.157 ।।।
पारस्करप्रभृतीनि च शब्दरूपाणि निपात्यन्त संज्ञायां विषये। पारस्करो देशः। कारस्करो वृक्षः। रथस्पा नदी। किष्कुः प्रमाणम्। किष्किन्धा गुहा।
* तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च *। तस्करश्चोरः। बृहस्पतिर्देवता।
चोरदेवतयोरिति किम् ? तत्करः। बृहत्पतिः।
संज्ञाग्रहणादुपाधिपरिग्रहे सिद्धे गणे चोरदेवताग्रहणं प्रपञ्चार्थम्।
* प्रात्तुम्पतौ गवि कर्तरि *। तुम्पतौ धातौ प्रशब्दात्परस्सुट् भवति गवि कर्तरि। प्रस्तुम्पति गौः।
गवीति किम् ? प्रतुम्पति वनस्पतिः।
पारस्करप्रभृतिराकृतिगणः।
अविहितलक्षणः सुट् पारस्करप्रभृतिषु द्रष्टव्यः। प्रायश्चित्तम्। प्रायश्चित्तिः। यदुक्तम्--`प्रायस्य चित्तिचित्तयोः सुडस्कारो वा' इति, तत्संगृहीतं भवति ।।

अनुदात्तं पदमेकवर्जम् ।। 6.1.158 ।।
परिभाषेयं स्वरविधिविषया। यत्रान्यः स्वर उदात्तः स्वरितो वा विधीयते, तत्रानुदात्तं पदमेकं वर्जयित्वा भवतीत्येतदुपस्थितं द्रष्टव्यम्। अनुदात्ताच्कमनुदात्तम्। कः पुनरेको वर्ज्यते ? यस्यासौ स्वरो विधीयते। वक्ष्यति--`धातोः' अन्त उदात्तो भवतीति; गोपायति, धूपायति। धातोरन्त्यमचं वर्जयित्वा परिशिष्टमनुदात्तं भवति। धातुस्वरं श्नास्वरो बाधते-लुनाति, पुनाति। श्नास्वरं तस्स्वरः-- लुनीतः, पुनीतः. तस्स्वरमाम्स्वरः--लुनोतस्तराम्, पुनीतस्तराम् ।।

आगम्स्य विकारस्य प्रकृतेः प्रत्ययस्य च।
पृथक्स्वरनिवृत्त्यर्थमेकवर्जं पदस्वरः ।।
आगमस्य--`चतुरनडुहोरामुदात्त' चत्वारः, अनड्वाहः। आगमस्वरः प्रकृतिस्वरं बाधते। विकारस्य-अस्थनि, दधनीत्यनङ्स्वरः प्रकृतिस्वरं बाधते। प्रकृतेः--गोपायति, धूपायति। प्रकृतिस्वरः प्रत्ययस्वरं बाधते। प्रत्ययस्य-कर्त्तव्यम्, हर्त्तव्यम्। प्रत्ययस्वरः प्रकृतेः स्वरस्य बाधकः।
परनित्यान्तरङ्गापवादैः स्वरैर्व्यवस्था, सतिशिष्टेन च। यो हि यस्मिन् सति शिष्यते, स तस्य बाधको भवति। तथा हि-गोपायतीत्यत्र धातुस्वरापवादः प्रत्ययस्वरः, तेनैव धातुस्वरेण प्रत्ययान्तस्य धातोः सतिशिष्टत्वाद् बाध्यते।
पदग्रहणं किम् ? देवदत्त गामभ्याज शुक्लां दण्डेनेति वाक्ये हि प्रतिपदं स्वरः पृथग् भवति। परिमाणआर्थं चेदं पदग्रहणं पदाधिकारस्य निवृत्तिं करोति। तेन प्रागेव पदव्यपदेशात् स्वरविधिसमकालमेव शिष्टस्यानुदात्तत्वं भवति। तथा च-कुवल्या विकारः कौवलमित्यत्रानुदात्तादिलक्षणोऽञ् सिद्धो भवति। तथा गर्भिणीशब्दश्चानुदात्तादिलक्षस्याञो बाधनार्थं भिक्षादिषु पठ्यते।
कुवलगर्भशब्दावाद्युदातौ ।।

कर्षात्वतो घञोऽन्त उदात्तः ।। 6.1.159 ।।
कर्षतेर्धातोराकारवतश्च घञन्तस्यान्त उदात्तो भवति। कर्षः। पाकः। त्यागः राग। दायः। धायः। `ञिनत्यादिर्नित्यम्' इत्यस्यापवादः।
कर्ष इति विकृतनिर्देशः कृषतेर्निवृत्त्यर्थः। तौदादिकस्य घञन्तस्य कर्ष इत्याद्युदात्त एव भवति ।।

उञ्छादीनां च ।। 6.1.160 ।।

`उच्छ' इत्येवलमादीनामन्त उदात्तो भवति।

उच्छः, म्लेच्छः, जञ्जः, जल्पः--एते घञन्ता इति, ञित्स्वरः प्राप्तः। जपः, व्यधः--इत्यबन्तौ, तयोर्धातुस्वरः प्राप्तः। केचित्तु वध इति पठन्ति। युजेर्घञन्तस्य निपातनादगुणत्वं विशिष्टविषये च निपातनमिदमिष्यते। कालविशेष रथाद्युपकरणे च युगशब्दस्य प्रयोगः, अन्यत्र हि योग एव भवति।

* गरो दूष्येऽबन्तः *। गरशब्दोऽबन्तः, स दूष्य एवान्तोदात्तः। गरः=विषम्. अन्यत्राद्युदात्त एव ।।

* वेदवेगवेष्टबन्धाः करणे *। `हलश्च' इति धञन्ताः, एते करणएऽन्तोदात्ता भवन्ति। भावे आद्युदात्ता एव।

* स्तुयुद्रुवश्छन्दसि *। उपसमस्तार्थमेतत्। परिष्टुत्। संयुत्। परिद्रुत्।

* वर्तनिः स्तोत्रे *। स्तोत्रम्=साम, तत्स्थो वर्त्तनिशब्दोऽन्तोदात्तो भवति, अन्यत्र मध्योदात्तः।

* श्वभ्रे दरः *। श्वभ्रेऽभिधेये दरशब्दोऽन्तोदात्तः। अन्यत्राबन्तत्वादाद्युदात्तः।

* साम्बतापौ भावगर्हायाम् *। अन्तोदात्तौ, अन्यत्राद्युदात्तौ।

* उत्तमशश्वत्तमशब्दौ सर्वत्र *। केचित्तु `भावगर्हायाम्' इति अत्राप्यनुवर्तयन्ति।

* भक्षमन्थभोगदेहाः *। एते घञन्ताः। भक्षिर्ण्यन्तोऽपि घञन्त एव; `एरजण्यन्तानाम्' इति वचनात् ।।

अनुदात्तस्य च यत्रोदात्तलोपः ।। 6.1.161 ।।

`उदात्त' इति वर्तते। यस्मिन्ननुदात्ते परत उदात्तो लुप्यते, तस्यानुदात्तस्यादिरुदात्तो भवति। कुमार ई कुमारी। कुमारशब्दोऽन्तोदात्तः, तस्य ङीप्यनुदात्ते उदात्तो लुप्यते। अनुदात्तो ङीब् उदात्तः, भस्य टेर्लोपः। पथः। पथा। पथे। पथिन्-शब्दोऽन्तोदात्तः। `कुमुदनडवेतसेभ्यो ड्मतुपं'। कुमुद्वान्। नड्वान्। वेतस्वान्। कुमुदातयोऽन्योदात्ताः। ड्मतुबनुदात्तः।

अनुदात्तस्येति किम् ? प्रासङ्गं वहति प्रासङ्ग्यः। प्रासङ्गशब्दः थाथा दिस्वरेणान्तोदात्तः। तस्य यति `तित्स्वरितम्' इति स्वरिते उदात्तो लुप्यते ? नैतदस्ति; स्वरिते हि विधीयमाने परिशिष्टमनुदात्तम्, तत् कुत उदात्तलोपः! तदेतदनुदात्तग्रहणमादेरनुदात्तस्योदात्तार्थम्।

`अन्तः' इति हि प्रकृतत्वादन्तस्य स्यात्-मा हि धुक्षाताम्, मा हि धुक्षाथाम् ।

यत्रेति किम् ? भार्गवः, भार्गवौ, भृगवः। प्राक् सुबुत्पत्तेर्गोत्रप्रत्ययस्य लुक्।

उदात्तग्रहणं किम् ? बैदी। और्वी ।।

धातोः ।। 6.1.162 ।।

`अन्तः' इत्येव। धातोरन्त उदात्तो भवति। पचति। पठति। ऊर्णोति। गोपायति। याति ।।

चितः ।। 6.1.163 ।।

चितोऽन्त उदात्तो भवति। `भञ्जभासमिदो घुरच्' भङ्गुरम्। भासुरम्। मेदुरम्। `आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्', कुण्डिनाः।
चिति प्रत्यये प्रकृतिप्रत्ययसमुदायस्यान्त उदात्त इष्यते। बहुपटवः। उच्चकैः ।।

तद्धितस्य ।। 6.1.164 ।।

`चितः' इत्येव। चितस्तद्धितस्यान्त उदात्तो भवति। `गोत्रेकुञ्जादिभ्यश्च्फञ्', कौञ्जायनाः।

किमर्थमिदम् ? परमपि ञित्स्वरं बाधित्वाऽन्तोदात्तत्वमेव यथा स्यादिति ।।

कितः ।। 6.1.165 ।।

`तद्धितस्य' इत्येव। तद्धितस्य कितोऽन्त उदात्तो भवति। `नडादिभ्यः फक्' नाडायनः। चारायणः। `प्राग्वहतेष्ठक्', आक्षिकः। शालाकिकः ।।

तिसृभ्यो जसः ।। 6.1.166 ।।

तिसृभ्य उत्तरस्य जसोऽन्त उदात्तो भवति। तिस्रस्तिष्ठन्ति।

`उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इत्यस्यापवादः।

शशि `उदात्तयणो हल्पुर्वात्' इति सिद्धे, अन्यत्र बहुवचने `षट्त्रिचतुर्भ्यो हलादिः' इति विदानाज्जसेव लभ्यत इति जस्ग्रहणमुपसमस्तार्थमेक इच्छन्ति, अतितिस्रावित्यत्र स्वरो मा भूदिति ।।

चतुरः शसी ।। 6.1.167 ।।
चतुरः शसि परतोऽन्त उदात्तो भवति। चतुरः पश्य।
चतस्रादेशे आद्युदत्तनिपातनाद्यणादेशस्य च पूर्वविधौ स्थधानिवत्त्वादयं स्वरो न भवति-चतस्रः पश्येति ।।

सावेकाचस्तृतीयादिर्विभक्तिः ।। 6.1.168 ।।
`सौ' इति सप्तमीबहुवचनस्य सुशब्दस्य ग्रहणम्। तत्र सौ य एकाच् तस्मात्परा तृतीयादिर्विभक्तिरुदात्ता भवति। वाचा, वाग्भ्याम्, वाग्भिः। वाग्भ्यः। याता, याद्भ्याम्, याद्भिः।
साविति किम् ? राज्ञा। राज्ञे। एकाच इति किम् ? हरिणा। गिरिणा। राजसु। तृतीयादिरिति किम् ? वाचौ। वाचः। विभक्तिरिति किम् ? वाक्तरा। वाक्तमा। सप्तमीबहुवचनस्य ग्रहणादिह न भवति--त्वया, त्वयीति ।।

अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ।। 6.1.169 ।।
`एकाचः' इति वर्तते, `तृतीयादिर्विभक्तिः' इति च। नित्यशब्दः स्वर्यते, तेन नित्याधिकारविहितः समासः पर्युदस्यते। नित्यसमासादन्यत्रानित्यसमासे यदुत्तरपदमन्तोदात्तमेकाच्च तस्मात्परा तृतीयादिर्विभक्तिरन्यतरस्यामुदात्ता भवति। परमवाचा, परमवाचे। परमवाचे। परमत्वचा, परमत्वचे। यदा विभक्तिरुदात्ता न भवति तदा समासान्तोदात्तत्वमेव।
अन्तोदात्तादिति किम् ? अवाचा। सुवाचा। तत्पुरुषोऽयम्। तत्र `तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्यय' इति पूर्वपदप्रकृतिस्वरः।
उत्तरपदग्रहणमेकाच्त्वेनोत्तरपदं विशेषयितुम्, अन्यथा हि समासविशेषणमेतत्स्यात्। तत्र शुन ऊर्क् स्वोर्ज्जा-इत्यत्रैवायं विधिः स्यात्।
अनित्यसमास इति किम् ? अग्निचिता। सोमसुता। `उपपदमतिङ्' इत्यं नित्याधिकारे समासो विधीयते, तत्र `गतिकारकोपपदात् कृत्' इत्युत्तरपदप्रकृतिस्वरेण चित्-शब्द उदात्तः।
यस्तु विग्रहाभावेन नित्यसमासस्तत्र भवत्येव विकल्पः--अवाचा ब्राह्मणेन, सुवाचा ब्राह्मणेनेति। `बहुव्रीहौ नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वं भवति ।।

आञ्चेश्छन्दस्यसर्वनामस्थानम् ।। 6.1.170 ।।
अञ्चेः पराऽसर्वनामस्थानविभक्तिरुदात्ता भवति छन्दसि विषये। इन्द्रो दधीचो अस्थभिः। `चौ' इतिपूर्वपदान्तोदात्तत्वं प्राप्तम्।
`तृतीयादिः' इति वर्तमाने शशोऽपि परिग्रहार्थमसर्वनामस्थानग्रहणम्। इहापि यथा स्यात्-प्रतीचो बाहून्प्रतिभङ्ग्ध्येषामिति ।।

ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः ।। 6.1.171 ।।
ऊठ्, इदम्, पदादि, अप्, पुम्, रै, दिव्--इत्येतेभ्योऽसर्वनामस्थानविभक्तरुदात्ता भवति। उठ्-प्रष्ठौहः, प्रष्ठौहा।
* ऊठ्युपदाग्रहणं कर्तव्यम् *। इह मा भूत्-अक्षद्युवा। अक्षद्युवे ।
इदम्-आभ्याम्, एभिः। `अन्तोदात्तात्' इत्यधिकारादन्वादेशे न भवति-अथो आभ्यां निपुणमधोतमिति।
पदादयः--`पद्दन्नोमास्' इत्येवमादयो निश्पर्यनता इह गृह्यन्ते। निपदश्चतुरो जहि। या दतो धावति। असन्प्रभृतिभ्यो विभक्तिरनुदात्तैव भवति। ग्रोवायां बद्धो अपि अक आसनि। मत्स्यं नदीन उदनि क्षियन्तम् ।
अप्-अपः पश्य। अद्भिः। अद्भ्यः।
पुम्--पुंसः, पुम्भ्याम्, पुम्भ्यः। पुंसा, पुंसे।
रै--रायः पश्य। राभ्याम्। राभिः।
दिव्--दिवः पश्य। दिवा। दिवे ।।

अष्टनो दीर्घात् ।। 6.1.172 ।।
अष्टनो दीर्घान्तादसर्वनामस्थानविभक्तिरुदात्ता भवति। अष्टाभिः। अष्टाभ्यः। अष्टासु। घृतादिपाठादष्टन्-शब्दोऽन्तोदात्तः, तत्र `झल्युपोत्तमम्' इत्येतस्यापवादो विभक्तेरेवोदात्तत्वं विधीयते।
दीर्घादिति किम् ? अष्टसु प्रक्रमेषु ब्राह्मणोऽग्नीनादधीत।
इदमेव दीर्घग्रहणमष्टन आत्वविकल्पं ज्ञापयति, कृतात्वस्य च षट्संज्ञां ज्ञापयति; अन्यथा ह्यात्वपक्षे सावकाशोऽष्टनः स्वरः परत्वादनात्वपक्षे षट्स्वरेण बाधिष्यत इति किं दीर्घग्रहणेन! ।।

शतुरनुमो नद्यजादी ।। 6.1.173 ।।

`अन्तोदात्तात्' इति वर्तते। अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नदी अजादिर्विभक्तिरसर्वनामस्थानमुदात्ता भवति। तुदती, नुदती। लुनती, पुनती। तुदता, नुदता। लुनता, पुनता।
अनुम इति किम् ? तुदन्ती, नुदन्ती। अत्राप्यदुपदेशादिति लसार्वधातुकानुदात्तत्वे एकादेशः, तस्य `एकादेश उदात्तेनोदात्तः' इत्युदात्तत्वम्, तस्य पूर्वत्रासिद्धत्वं नेष्यत इति शत्रन्तमन्तोदात्तं भवति।
नद्यजादी इति किम् ? तुदद्भ्याम्, नुदद्भ्याम्। तुदद्भिः, नुदद्भिः।
अन्तोदात्तादित्येव--ददती। दधतः। `अभ्यस्तानामादिः' इत्याद्युदात्तावेतौ।
* बृहन्महतोरुपसंख्यानम् *। बृहती, महती। बृहता, महता ।।

उदात्तयणो हल्पूर्वात् ।। 6.1.174 ।।
उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात्परा नदी अजादिर्याऽसर्वनामस्थानविभक्तिरुदात्ता भवति। कर्त्री, हर्त्री, प्रलवित्री, प्रसवित्री। कर्त्रा, हर्त्रा, प्रलवित्रा, प्रसवित्रा। तृजन्ता एतेऽन्तोदात्ताः।
उदात्तग्रहणं किम् ? कर्त्री, हर्त्री। कर्त्रा, हर्त्रा, तृन्नन्तोऽयमाद्युदात्तः। हल्पूर्वादिति किम् ? बहुतितवा ब्राह्मण्या।
* नकारग्रहणं कर्तव्यम् *। वाक्पत्नीयं कन्या ।।

नोङ्धात्वोः ।। 6.1.175 ।।
ऊङो धातोश्च य उदात्तयण् हल्पूर्वः, तस्मात्परा तृतीयादिविभक्तिर्नोदात्ता भवति। ब्रह्मबन्ध्वा, ब्रह्मबन्ध्वे। वीरबन्ध्वा, वीरबन्ध्वे। ऊङ् प्रत्ययस्वरेणोदात्तः। तेन सह य एकादेशः सोऽप्युदात्त इति उदात्तयण्वकारः, तस्मादुदात्तत्वे प्रतिषिद्धे `उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति विभक्तिः स्वर्यते।
धातुयणः खल्वपि---सकृल्ल्वा। सकृल्ल्वे। खलप्वे। क्विवबन्तस्य कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तस्य `ओः सुपि' इति यणादेशः ।।

ह्रस्वनुड्भ्यां मतुप् ।। 6.1.176 ।।
`अन्तोदात्ता' इत्येव। ह्रस्वान्तादन्तोदात्तान्नुटश्च परो मतुब् उदात्तो भवति। अग्निमान्। वायुमान्। कर्तृमान्। कर्तृमान्। हर्तृमान्। नुटः खल्वपि--अक्षण्वता। शीर्शण्वता।
`अन्तोदात्तात्' इदित्येव--वसुमान्। वसुशब्द आद्युदात्तः, तस्मान्मतुब् अनुदात्त एव भवति।
अत्र च `स्वरविधौ व्यञ्जनमविद्यमानवत्' इत्येषा परिभाषा नाश्रीयते; नुड्ग्रहणात्। तेन मरुत्वानित्यत्र न भवति।
* रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यम् *। आरेवान्।
* त्रेश्च प्रतिषेधो वक्तव्यः *। त्रिवतीर्याज्यानुवाक्या भवन्तीति ।।

नामन्यतरस्याम् ।। 6.1.177 ।।
ह्रस्वग्रहणमनुवर्तते, मतुब्ग्रहणं च, तेन मतुपा ह्रस्वो विशेष्यते। मतुपि यो ह्रस्वस्तदन्तादन्तोदात्तादन्यतरस्यां नाम् उदात्तो भवति। अग्नीनाम्। वायूनाम्। कर्तृणाम्।
मतुपा ह्रस्वविशेषणं किम् ? भूतपूर्वेऽपि ह्रस्वे यथा स्यात्, अन्यथा हि साम्प्रतिक एव स्यात्-तिसृणाम्, चतसृणामिति। सनुट्कस्य ग्रहणं किम् ? धेन्वाम्। शकट्याम्। `उदात्तयणो हल्पूर्वत्' इत्ययमन्तोदात्तः।
ह्रस्वादित्येव--कुमारीणाम्। अन्तोदात्तादित्येव--त्रपूणाम्। वसूनाम् ।।

ङ्याश्छन्दसि बहुलम् ।। 6.1.178 ।।
ङ्यन्ताच्छन्दसि विषये नामुदात्तो भवति बहुलम्। देवसेनानामभिभञ्जतीनाम्। बह्वीनां पिता। न च भवति-नदीनां पारे जयन्तीनां मरुतः ।।

षट्त्रिचतुर्भ्यो हलादिः ।। 6.1.179 ।।
`अन्तोदात्तात्' इत्येतन्निवृत्तम्। षट्संज्ञकेभ्यः, त्रि, चतुर्इत्येताभ्यां च परा हलादिर्विभक्तिरुदात्ता भवति। षड्भिः, षड्भ्यः, षण्णाम्। पञ्चानाम्। सप्तानाम्। त्रि-त्रिभिः, त्रिभ्यः, त्रयाणाम्। चतुर्-चतुर्भ्यः, चतुर्णाम्।
हलादिरिति किम् ? चतस्रः पश्य ।।

झल्युपोत्तमम् ।। 6.1.180 ।।

षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं भवति। त्रिप्रभृतीनामन्त्यमुत्तमम्, तत्समीपे च यत्तदुपोत्तमम्। पञ्चभिस्तपस्तपति। सप्तभिः परान् जयति। तिसृभिश्च वहसे त्रिंशता। ततुर्भिः।
झलीति किम् ? पञ्चानाम्। सप्तानाम्ः अपोत्तममिति किम् ? षड्भिः। षड्भ्यः ।।

विभाषा भाषायाम् ।। 6.1.181 ।।
षट्त्रिचतुर्भ्यो वा झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं भवति विभाषा भाषायं विषये। पञ्चभिः। सप्तभिः। तिसृभिः। वतसृभिः ।।

न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः ।। 6.1.182 ।।
गो, श्वन्, साववर्णम्=सौ प्रथमैकवचने यदवर्णान्तम्, राड्, अङ्, क्रुङ्, कृद्--इत्येतेभ्यो यदुक्तं तन्न भवति। गवा। गवे। गोभ्यामिति।
`सावेकाचस्तृतीयादिर्विभक्तिः' इति प्राप्तिः प्रतिषिध्यते। सुगुना। सुगवे। सुगुभ्याम्। `अन्तोदात्तादुत्तरपदात्' इति प्राप्तिः।
श्वन्-शुना। शुने। स्वभ्याम्। परमशुना। परमशुने। परमश्वभ्याम्। पूर्ववत्प्राप्तिः।
साववर्णः=सौ प्रथमैकवचने यदवर्णानत्तं तस्य ग्रहणम्--येभ्यः। तेभ्यः। केभ्यः।
राट्--राजतिः क्विबन्तः। राजा। परमराजः।
अङ्-अञ्चतिः क्विबन्तः, तस्य सनकारस्य ग्रहणं विषयावधारणार्थम्, यत्रास्य नलोपो नास्ति तत्र प्रतिषेधो यथा स्यात्। `नाञ्चेःपूजायाम्' इति प्रतिषिध्यते नलोपः। प्राञ्चा। प्राङ्भ्याम्। नलोपविषये तु भवत्येव विभक्तेरुदातत्वम्। प्राचा। प्राचो। प्राग्भ्याम्।
क्रुङ् क्विन्नन्त एव--क्रुञ्चा। परमक्रुञ्चा।
कृत्--करोतिः कृतिर्वा क्विबन्तः। कृता। परमकृता ।।

दिवो झल् ।। 6.1.183 ।।
दिवः परा झलादिर्विभक्तिर्नोदात्ता भवति। द्युभ्याम्। द्युभिः। `सावेकाचः' इति `ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः' इति वा प्राप्तिः प्रतिषिध्यते।
झलिति किम् ? दिवा ।।

नृ चान्यतरस्याम् ।। 6.1.184 ।।
`नृ' इत्येतस्मात्परा झलादिर्वभक्तिरन्यतरस्यां नोदात्ता भवति। नृभ्याम्। नृभिः। नृभ्यः। नृषु।
झलित्येव--न्रा। न्रे ।।

तित्स्वरितम् ।। 6.1.185 ।।
तित्स्वरितं भवति। सन्नन्ताद्यत्--चिकीर्ष्यम्, जिहीर्ष्यम्। `ऋहलोर्ण्यत्'--कार्यम्, हार्यम्, प्रत्ययद्युदात्तस्यापवादः ।।

तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ।। 6.1.186 ।।
तासेरनुदात्तेतो ङितोऽकारान्तोपदेशाच्च शब्दात्परं लसार्वधातुकमनुदात्तं च भवति ह्नुङ्, इङ्-इत्येताभ्यां परं वर्जयित्वा। तासेस्तावत्--कर्ता, कर्तारौ, कर्तारः। प्रत्ययस्वरापवादोऽयम्।
अनुदात्तेतः--आस--आस्ते। वस-वस्ते।
ङित्--षूङ्-सूते। शीङ्-शेते।
अदुपदेशात्--तुदतः। नुदतः। पचतः। पठतः। अनुबन्धस्यानैकान्तिकत्वादकारान्तोपदेश एव शप्। पचमानः। यजमानः। यद्यत्र मुक् अकारमात्रस्य स्यात्, तदा लसार्वधातुकमदुपदेशादनन्तरमिति सिद्धो निघातः। अथाकारान्तस्याङ्गस्य ? तथापि लसार्वधातुकानुदात्तत्वे कर्तव्ये बहिरङ्गत्वादसिद्ध इति सिद्धम्। चित्स्वरोऽप्यनेन लसार्वधातुकानुदात्तत्वेन परत्वाद्बाधते।
तास्यादिभ्य इति किम् ? चिनुतः। चिन्वन्ति। ङिदयं श्नुः पूर्वस्य कार्यं प्रति न तु परस्य। उपदेशग्रहणं किम् ? इह य यथा स्यात्-पचाव, पचाम इति। इह च मा भूत्-हतः, हथ इति। लग्रहमं किम् ? कतीह पचमानाः। सार्वधातुकमिति किम् ? शिश्ये। शिश्याते। शिश्यिरे। अहन्विङोरिति किम् ? ह्नुते। यदधीते ।।

आदिः सिचोऽन्यतरस्याम् ।। 6.1.187 ।।
`उदात्तः' इति वर्तते। सिजन्तस्यान्यतरस्यामादिरुदात्तो भवति। मा हि कार्ष्टाम्। मा हि कार्ष्टाम्। एकोऽत्राद्युदात्तः, अपरोऽन्तोदात्तः। मा हि लाविष्टाम्,

मा हि लाविष्टाम्। एकोऽत्राद्युदात्तः, अपरो मध्योदात्तः। सिचश्चित्करणादागमानुदात्तत्वं हि बाध्यते।
* सिच आद्युदात्तत्वेऽनिटः पितः पक्षे उदात्तत्वं वक्तव्यम् *। मा हि कार्षम्। अनिट इति किम् ? मा हि लाविषम्। मध्योदात्त एवाद्युदात्ताभावपक्षे भवति ।।

स्वपादिर्हिंसामच्यनिटि ।। 6.1.188 ।।
लसार्वधातुकग्रहणं यदनुवर्तते, तद् `अच्यनिटि' इति सम्बन्धादिह सप्तम्यन्तमुपजायते। स्वपादिरा वृत्करणात्। स्वपादीनां हिंसेश्चाजादावनिटि लसार्वधातुके परतोऽन्यतरस्यामादिरुदात्तो भवति। स्वपन्ति। स्वसन्ति। हिंसेः खल्वपि--हिंसन्ति। प्रत्ययस्वरेण पक्षे मध्योदात्तः।
अचीति किम् ? स्वप्यात्। हिंस्यात्। अनिटीति किम् ? स्वपितः। स्वसितः ।।
ङित्यजादावयं विधिरिष्यते। इह न भवति--स्वपानि। हिनसानि ।।

अभ्यस्तानामादिः ।। 6.1.189 ।।
अभ्यस्तानामजादावनिटि लसार्वधातुके परत आदिरुदात्तो भवति। ददति, ददतु। दधति, दधतु। जक्षति, जक्षतु,। जाग्रति, जाग्रतु।
अचीत्येव--दद्यात्। अनिटीत्येव--जक्षितः। `आदिः' इति वर्तमाने पुनरादिग्रहणं नित्यार्थम् ।।

अनुदात्ते च ।। 6.1.190 ।।
अविद्यमानोदात्ते च लसार्वधातुके परतोऽभ्यस्तानामादिरुदात्तो भवति। अनजाद्यर्थ आरम्भः। ददाति। जहाति। दधाति। जिहीते। मिमिते।
अनुदात्त इति बहुव्रीहिनिर्देशो लोपयणादेशार्थः। मा हि स्मदधात्। ददात्यत्र ।।

सर्वस्य सुपि ।। 6.1.191 ।।
सर्वशब्दस्य सुपि परत आदिरुदात्तो भवति। सर्वः, सर्वौ, सर्वे। सुपीति किम् ? सर्वतरः। सर्वतमः।
* प्रत्ययलक्षणेनाप्ययं स्वर इष्यते सर्वस्तोम इति *। * सर्वस्वरोऽनच्कस्येति वक्तव्यम् *। सर्वकः। चित्स्वरेणान्तोदात्तो भवति ।।

भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ।। 6.1.192 ।।
भी, ह्री, भृ, हु, मद, जन, धन, दरिद्रा, जागृ-इत्येतेषामभ्यस्तानां लसार्वधातुके पिति प्रत्ययात्पूर्वमुदात्तं भवति। बिभेति। जिह्रेति। बिभर्ति। जुहोति। ममतु नः परिज्मा। मदेः `बहुलं छन्दसि' इति विकरणस्य श्लुः। जजनमिन्द्रम्। `जन जनने' इत्यस्य पञ्चमे लकारे रूपम्। `धन धान्ये' इत्यस्य पञ्चमे लकारे-दधनत्। दरिद्रति। जागर्ति।
भ्यादीनामिति किम् ? ददाति। पितीति किम् ? दरिद्रति ।।

लिति ।। 6.1.193 ।।
लिति=लकारेत्संज्ञके प्रत्ययात्पूर्वमुदात्तं भवति। चिकीर्षकः। जिहीर्षकः। भौरिकिविधम्। भौलिकिविधम्। ऐषुकारिभक्तम् ।।

आदिर्णमुल्यन्यतरस्याम् ।। 6.1.194 ।।
णमुलि परतोऽन्यतरस्यामादिरुदातो भवति। लोलूयंलोलूयम्। पोपूयंपोपूयम्। आम्रेडितानुदात्तत्वे कृते पूर्वो लोलूयंशब्द एकत्राद्युदात्तः, अपरत्र लित्स्वरेण मध्योदात्तः ।।

अचः कर्तृयकि ।। 6.1.195 ।।
`उपदेशे' इति वर्तते। अजन्ता ये उपदेशे धातवस्तेषां कर्तृयकि अन्यतरस्यामादिरुदात्तो भवति। लूयते केदारः स्वयमेव। स्तीर्यते केदारः स्वयमेव।
यदाऽऽद्युदात्तत्वं न भवति, तदा लसार्वधातुकनिघाते कृते अदुपदेशभक्तयक एव स्वरो भवति।
जनादीनामुपदेश एवात्वं द्रष्टव्यम्, तत्राप्ययं स्वर इष्यते। जायते स्वयमेव। सायते स्वयमेव। खायते स्वयमेव।
अच इति किम् ? भिद्यते स्वयमेव। कर्तृग्रहणं किम् ? लूयते केदारो देवदत्तेन ।।

थलि च सेटीडन्तो वा ।। 6.1.196 ।।
सेटि थलि इट् वा उदात्तो भवति अन्तो वा आदिर्वाऽन्यतरस्याम्। लुलविथ। यदा नैते त्रयः स्वराः, तदा `लिति' प्रत्ययात्पूर्वमुदात्तं भवति। तेनैते चत्वारः स्वराः पर्यायेण भवन्ति।
सेटीति किम् ? ययाथ। `लिति' प्रत्ययात्पूर्वमूदात्तम्-इत्ययमेवात्र स्वरो भवति।।

ञ्नित्यादिर्नित्यम् ।। 6.1.197 ।।

ञिति निति च नित्यमादिरुदात्तो भवति। `गर्गादिभ्यो यञ्' गार्ग्यः। वात्स्यः। `वासुदेवार्जुनाभ्यां वुन्'--वासुदेवकः, अर्जुनकः। प्रत्ययस्वरापवादोऽयं योगः। प्रत्ययलक्षणमत्र नेष्यते, तेन गर्गाः, बिदाः, चञ्चाः-इत्यत्र यञि कनि च लुप्ते भवति ।।

आपन्त्रितस्य च ।। 6.1.198 ।।

आमन्त्रितस्यादिरुदात्तो भवति। देवदत्त ! देवतत्तौ, देवदत्ताः। अत्र `कारकाद्दत्तश्रुतयोरेवाशिषि' इति प्राप्तिर्बाध्यते।
लुमतापि लुप्ते प्रत्ययलक्षणमत्रेष्यते। सर्पिरागच्छ, सप्तागच्छतेति ।।

पथिमथोः सर्वनामस्थाने ।। 6.1.199 ।।

पथिमथिशब्दावौणादिकाविनिप्रत्ययान्तौ प्रत्ययस्वरेणान्तोदात्तौ, तयोः सर्वनामस्थाने परत आदिरुदात्तो भवति। पन्थाः, पन्थानौ, पन्थानः। मन्थाः, मन्थानौ, मन्थानः।
सर्वनामस्थान इति किम् ? पथः पश्य। मथः पश्य। उदात्तनिवृत्तिस्वरेणान्तोदात्तो भवति। प्रत्ययलक्षणमत्रापि नेष्यते।
पथिप्रियः--इत्यत्र पूर्वपदप्रकृतिस्वरेणान्तोदात्तः पथिशब्दः ।।

अन्तश्च तवै युगवत् ।। 6.1.200 ।।

तवैप्रत्ययान्तस्यान्तः, चशब्दादादिश्च युगपदुदात्तौ भवतः। कर्त्तवै। हर्तवै। प्रत्ययाद्युदात्तत्वापवादः।
युगपद्ग्रहणं पर्यायनिवृत्यर्थम् । `एकवर्जम्' इति वचनाद्यौगपद्यं न स्यात् ।।

क्षयो निवासे ।। 6.1.201 ।।

क्षयशब्दो निवासेऽभिधेये आद्युदात्तो भवति। क्षियन्ति निवसन्त्यस्मिन्निति क्षयः, `पुंसि संज्ञायां घः प्रायेण' इति घप्रत्ययान्तस्य प्रत्ययस्वरः प्राप्तः। क्षये जागृहि प्रपश्यन्।
निवास इति किम् ? क्षयो वर्तते दस्यूनाम्। `एरच्' इत्ययमजन्तः ।।

जयः करणम् ।। 6.1.202 ।।।

जयशब्दः करणवाची आद्युदात्तो भवति। ज्यन्ति तेनेति जयः। `पुंसि संज्ञायां घः प्रायेण' इति घः, तस्य प्रत्ययस्वरः प्राप्तः। जयोऽश्वः।
करणमिति किम् ? जयो वर्तते ब्राह्मणानाम्। अत्रापि `एरच्' इत्ययमजन्तः ।।

वृषादीनां च ।। 6.1.203 ।।

`वृष' इत्येवमादीनामादिरुदात्तो भवति। वृषः। जनः। ज्वरः। ग्रहः। हयः गयः। सर्वे एते पचाद्यच्प्रत्ययान्ताः। गय इत्यत्र गायतेर्निपातनादेत्वम्।
नयः। तयः। अयः। अंशः। वेदः। अशः। दवः। एतेऽपि तथैवाच्प्रत्ययान्ताः। सूदः-इगुपधादिति कप्रत्ययान्तः। गुहभिदादिः, अङ्प्रत्ययान्तः ।।
* शमरणौ संज्ञायां सम्मतौ बावकर्मणोः *। शमो भावे रणः कर्मणि अजन्तावेतौ निपातनाद् भावकर्मणोर्भवतः---मन्त्रः पचाद्यजन्तः। शान्तिः--इति क्तिजन्तः। कामः, यामः---घञन्तावेतौ।
आरा,धारा, कारा-भिदादयः। वहः---गोचरादिषु घप्रत्ययान्तः। कल्पः--अजन्तः। पादः--घञन्तः। तत्र क्वचित्प्रत्ययस्वरः प्राप्तः, क्वचित् `कर्षात्वतो घञोऽन्त उदात्तः' इति। वृषादिराकृतिगणः। अविहितमाद्युदात्तत्वं वृषादिषु द्रष्टव्यम् ।।

संज्ञायामुपमानम् ।। 6.1.204 ।।

उपमानशब्दः संज्ञायामाद्यदात्तो भवति। चञ्चा। वध्रिका। खरकुटी। दासी। उपमानशब्दा एते उपमेयस्य संज्ञाः। तत्र `इवे प्रतिकृतौ' इति यः कन् तस्य `लुम्मनुष्ये' इति लुप्।
यद्येवम्, किमर्थमिदमुच्यते, प्रत्ययलक्षणेन सिद्धमाद्युदात्तत्वम् ? एतदेव ज्ञापयति--क्वचिदिह स्वरविधौ प्रत्ययलक्षणं न भवतीति। तथा च पूर्वत्रोदाहृतम्।
संज्ञायामिति किम् ? अग्निर्माणवकः। उपमानमिति किम् ? देवदत्तः ।।

निष्ठा च द्व्यजनात् ।। 6.1.205 ।।

निष्ठान्तं च द्वयच् संज्ञायां विषये आद्युदात्तं भवति स चेदादिराकारो न भवति। दत्तः। गुप्तः। बुद्धः। प्रत्ययस्वरापवादः।
निष्ठेति किम् ? देवः। भीमः। द्व्यजिति किम् ? चिन्तितः। रक्षितः। अनादिति किम् ? त्रातः। आप्तः। संज्ञायामिति किम् ? कृतम्। हृतम् ।।

शुष्कधृष्टौ ।। 6.1.206 ।।
`आदिरुदात्तः' इति वर्तते। शुष्क, धृष्ट-इत्येतावाद्युदात्तौ भवतः। शुष्कः। धृष्टः।
असंज्ञार्थ आरम्भः ।।

आशितः कर्ता ।। 6.1.207 ।।
आशितशब्दः कर्तृवाची आद्युदात्तो भवति। आशितो देवदत्तः। अशेरयमाङ्पूर्वादविवक्षिते कर्मणि कर्तरि क्तः। तत्र `थाथघञ्' इति प्राप्तः स्वरो बाध्यते।
कर्तरीति किम् ? आशितमन्नम्। आशितं देवदत्तेन। पूर्वत्र कर्मणि क्तः, उत्तरत्र भावे।।

रिक्ते विभाषा ।। 6.1.208 ।।
रिक्तशब्दे विभाषा आदिरुदात्तो भवति। रिक्तः। रिक्तः। संज्ञायाम् `निष्ठा च द्व्यजनात्' इत्यनेन पूर्वविप्रतिषेधेन नित्यमाद्युदात्तः ।।

जुष्टार्पिते चच्छन्दसि ।। 6.1.209 ।।
जुष्ट, अर्पित--इत्येते शब्दरूपे छन्दसि विषये विभाषा आद्युदात्ते भवतः। जुष्टः। अर्पितः।
छन्दसीति किम् ? भाषायां प्रत्ययस्वरेणान्तोदात्तावोतौ ।।

नित्यं मन्त्रे ।। 6.1.210 ।।
जुष्ट, अर्पित--इत्येते शब्दरूपे मन्त्रविषये नित्यमाद्युदात्ते भवतः। जुष्टं देवानाम्। अर्पितं पितृणाम्। पूर्वेणात्र विकल्पः प्राप्तः।
केचिदत्र `जुष्ट'-इत्येतदेवानुवर्तयन्ति। अर्पितशब्दस्य विभाषा मन्त्रेऽपीच्छन्ति। अन्तोदात्तोऽपि ह्ययं मन्त्रे पठ्यते--तस्मिन्साकं त्रिशता न शङ्कवोऽर्पिता इति ।।

युष्मदस्मदोर्ङसि ।। 6.1.211 ।।
युष्मदस्मदी मदिक्प्रत्ययान्तेऽन्तोदात्ते, तयोर्ङसि परत आदि रुदात्तो भवति। तव स्वम्। मम स्वम् ।।

ङयि च ।। 6.1.212 ।।
`युष्मदस्मदोः' इति वर्तते, `आदिरुदत्तः' इति च। `ङे' इत्येत्स्मिश्च परतो युष्मदस्मदोरादिरुदात्तो भवति। तुभ्यम्। मह्यम्।
पृथग्योगरणं यथासंख्यशङ्कानिवृत्त्यर्थम् ।।

यतोऽनावः ।। 6.1.213 ।।
`निष्ठा च द्व्यजनात्' इत्यतो द्व्यज्ग्रहणमनुवर्त्तते। यत्प्रत्ययान्तस्य द्व्यच आदिरुदात्तो भवति, न चेन्नौशब्दात्परो भवति। `अचो यत्'--चेयम्, जेयम्।
`शरीरावयवाद्यत्'--कण्ठ्यम्, ओष्ठ्यम्। `तित्स्वरितम्' इत्यस्यापवादः।
अनाव इति किम् ? नाव्यम्।
द्व्यच इत्येव--चिकीर्ष्यम्। ललाट्यम् ।।

ईडवन्दवृशंसदुहां एयतः ।। 6.1.214 ।।
ईड, वन्द, वृ, शंस, दुह्--इत्येतेषां यो ण्यत् तदन्तस्यादिरुदात्तो भवति। ईड्यम्। वन्द्यम्। वार्यम्। शंस्यम्। दोह्या धेनुः। द्व्यनुबन्धकत्वाद् ण्यतो यद्ग्रहणेन ग्रहणं नास्तीति `तित्स्वरितम्' इत्येतत् प्राप्तम्। वार्यमिति--`वृङ् सम्भक्तौ' इत्यस्यायं ण्यत्। क्यब्विधौ हि वृञ एव ग्रहणमिष्यते ।।

विभाषा वेण्विन्धानयोः ।। 6.1.215 ।।
वेणु, इन्धान--इत्येतयोर्विभाषा आदिरुदात्तो भवति। वेणुः, वेणुः। इन्धानः, इन्धानः।

वेणुशब्दोऽयम् `आजिवृरीभ्यो नित्' इति णुप्रत्ययान्तो नित्त्वान्नित्यमाद्युदात्तः प्राप्तः।

इन्धानशब्दोऽपि यदा चानशन्तस्तदा चित्त्वादन्तोदात्तः। अथ शानजन्तस्तदा लसार्वधातुकानुदात्तत्वे कृते उदात्तनिवृत्तिस्वरेण मध्योदात्तः। तदेवमिन्धाने सर्वथाऽप्राप्तमाद्युदात्तत्वं पक्षे विधीयते।
वेणुरिव वेणुरित्युपमानं यदा संज्ञा भवति, तदा `संज्ञायामुपमानम्' इति नित्यमाद्युदात्तत्वमिष्यते ।।

त्यागरागहासकुहश्वठक्रथानाम् ।। 6.1.216 ।।
त्याग, राग, हास, कुह, श्वठ, क्रथ--इत्येतेषां विभाषा आदिरुदात्तो भवति। त्यागः, रागः, हासः--एते घञन्ताः, तेषां पक्षे `कर्षात्वतो घञोऽन्त उदात्तः' इत्युदात्तत्वमेव भवति। कुहः, श्वठः, क्रथः--एते पचाद्यजन्ताः ।।

उपोत्तमं रिति ।। 6.1.217 ।।
रिदन्तस्योपोत्तममुदात्तं भवति। त्रिप्रभृतीनामन्त्यमुत्तमं तस्य समीपे यत्तदुपोत्तमम्। करणीयम्। हरणीयम्। पटुजतीयः। मृदुजातीयः. प्रत्ययस्वरापवादोऽयम् ।।

चङ्यन्यतरस्याम् ।। 6.1.218 ।।
चङन्तेऽन्यतरस्यामुपोत्तममुदात्तं भवति। मा हि चीकरताम्। `न माङ्योगे' इत्यटि प्रतिषिद्धे `हि च' इति निधातेऽदुपदेशादिति लसार्वधातुकानुदात्तत्वे कृते चङ् एव स्वरे प्राप्ते पक्षे धात्वकार उदात्तो भवति।
उपोत्तमग्रहणाद् द्वयोर्न भवति--मा हि दधत् ।।

मतोः पूर्वमात्संज्ञायां स्त्रियाम् ।। 6.1.219 ।।
मतोः पूर्व अकार उदात्तो भवति तच्चेन्मत्वन्तं स्त्रीलिङ्गे संज्ञा भवति। उदुम्बरावती। पुष्करावती। वीरणावती। शरावती। `शरादीनां च' इति दीर्घः। आदिति किम् ? इक्षुमती। द्रुमवती। संज्ञायामिति किम् ? खट्वावती। स्त्रियामिति किम् ? शरावान्। मतोरिति किम् ? गवादिनी ।।

अन्तोऽवत्याः ।। 6.1.220 ।।
`संज्ञायाम्' इत्येव। अवतीशब्दान्तस्यसंज्ञायामन्त उदात्तो भवति। अजिरवती। शदिरवती। हंसवती। कारण्कडवती। ङोप पित्तवादनुदात्तत्वं प्राप्तम्। `अवत्या' इति किमुच्यते, न वत्या इत्येवमुच्येत ? नैवं शक्यम्; इहापि स्यात्--राजवती। स्वरविधौ नलोपस्यासिद्धत्वान्नायमवतीशब्दः। वत्वं पुनराश्रयात्सिद्धम् ।।

ईवत्याः ।। 6.1 221 ।।
ईवतीशब्दान्तस्यान्त उदात्तो भवति स्त्रियां संज्ञायां विषये। अहीवती। कृषीवती। मुनोवतो।

चौ ।। 6.1.222 ।।
`चौ' इत्यञ्चतिर्लुप्तनकारो गृह्यते। तस्मिन्परतः पूर्वस्यान्त उदातो भवति। दधीचः पश्य। दधीचा। दधीचे। मधूचः पश्य। मधूचा। मधूचे। उदात्तनिवृ-त्तिस्वरापवादोऽयम् ।
* चावतद्धित इति वक्तव्यम् *। दाधोचः। माधूचः। प्रत्ययस्वरएवात्र भवति।

समासस्य ।। 6.1.223 ।।
समासस्यान्त उदात्तो भवति। राजपुरुषः। ब्राह्मणकम्बलः। कन्यास्वनः। पटहशब्दः। नदीघोषः। राजपृषत्। ब्राह्मणसमित्।
`स्वरविधौ व्यञ्जनमविध्यमानत्' इति हलन्तेऽप्यन्तोदात्तत्वं भवति। नानापदस्वरस्यापवादः ।।

इति श्रीवामनविरचितायां काशिकावृत्तौ
षष्ठस्याध्यायस्य प्रथमः पादः

6.2

अथ षष्ठाध्याये द्वितीयः पादः

बहुव्रीहौ प्रकृत्या पूर्वपदम्।। 6 - 2 - 1।।

पूर्वपदग्रहणमत्र पूर्वपदस्थे स्वरे उदात्ते स्वरिते वा वर्त्तते। बहुव्रीहौ समासे पूर्वपदस्य यः स्वरः स प्रकृत्या भवति स्वभावेनावतिष्ठते, न विकारमनुदात्तत्वमापद्यते। समासान्तोदात्तत्वे हि सति अनुदात्तं पदमेकवर्जम् इति सोऽनुदात्तः स्यादिति समासान्तोदात्तत्वापवादोऽयमारभ्यते । कार्ष्णोत्तरासङ्गाः । कृष्णो मृगः तस्य विकारः कार्ष्णः प्राणिरजतादिभ्योऽञ् इत्यञ्प्रत्ययान्तो ञित्स्वरेणाद्युदात्तः। यूपवलजः । यूपशब्द उणादिषु कुसुयुभ्यश्च इति पप्रत्ययान्तः तत्र च दीर्घः इति, नित् इति च वर्त्तते,तेनाद्युदात्तः। ब्रह्मचारिपरिस्कन्दः। ब्रह्मचारिन्शब्दः कृदुत्तरपदप्रकृतिस्वरेः णान्तोदात्तः। स्नातकपुत्रः । स्नातशब्दः कन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः। अध्यापकपुत्रः। लित्स्वरेणाध्यापकशब्दो मध्योदात्तः। श्रोत्रियपुत्रः ।श्रोत्रियशब्दो नित्त्वादाद्युदात्तः।मनुष्यनाथः। गनुष्यशब्दः तित्स्वरितम् इति स्वरितान्तः। उदात्तग्रहणं स्वरितग्रहणं चात्रानुवर्तते, तेन सर्वानुदात्ते पूर्वपदे वेधिरेव नास्तीति समासान्तेदात्तत्वं भवति। समभाग इति समशब्दो हि सर्वानुदात्तः।।

तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः।।6 - 2 - 2।।

तत्पुरुषे समासे तुल्यार्थं तृतीयान्तं सप्तम्यन्तमुपमानवाचि अव्ययं द्वितीयान्तं कृत्यान्तं च यत्पूर्वपदं तत्प्रकृतिस्वरं भवति। तुल्यार्थं-तुल्यश्वेतः। तुल्यलोहितः। तुल्यमहान्।सदृक्च्छ्वेतः । सदृग्लोहितः । सदृग्महान् । सदृशश्वेतः । सदृशलोहितः सदृशमहान्। एते कृत्यतुल्याख्या अजात्या इति कर्मधारयाः। तत्र तुल्यशब्दः यतोऽनावः इत्याद्यदात्तः । सदृवशब्दः समानान्ययोश्च इति क्विन्प्रत्ययान्तः , कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः सदृशशब्दोऽपि कञन्तो मध्योदात्तः । तुल्यार्थं । तुतीया-शङ्कुलया खण्डः शङ्कुलाखण्डः। किरिणा काणः किरिकाणः। शङ्कुपूर्वाल्लातेः घञर्थे कविधानम् इति वा कप्रत्ययान्तः शङ्कुलाशब्दोऽन्तोदात्तः। किरिशब्दोऽपि किरतेः कृगृशृपृकुटिभिदिच्छिदिभ्यश्च इतीकारप्रत्ययः, किदौणादिकः तेनासावन्तोदात्तः। तृतीया। सप्तमी-अक्षेषु शौण्डोऽक्षशौण्डः। पनशौण्डः अशेर्देवने इति सप्रत्ययान्तोन्तोऽक्षशब्दोऽन्तोदात्तः। पानशब्दो ल्युडन्तो लित्स्वरेणाद्यदात्तः। सप्तमी । उपमान-शास्त्रीश्यामा। कुमुदश्येनी। हंसगद्गदा । न्यग्रोधपरिमण्डला। दूर्वाकाण्डश्यामा। शारकाण्डगौरी। उपमानानि सामान्यवचनैः इति समासः। शस्त्रीशब्दो ङीष्प्रत्ययान्तोऽन्तोदात्तः। कुमुशब्दोऽपि कौ मोदते इति मूलविभुजादित्वात्कप्रत्ययान्तः,नब्विषयस्यानिसन्तस्य इति वाऽऽद्युदात्तः। हंसशब्दः वृतृवदिहनिकमिकषिभ्यः सः इति सप्रत्ययान्तः। न्यग्रोहतोति न्यग्रोधः पचादित्वाद् अच्प्रत्ययान्तः, तस्य न्यग्रोधस्य च केवलस्य इति निपातनाद् हकारस्य धकारः मध्योदात्तत्वं च। दूर्वाकाण्डशरकाण्डशब्दौ षष्ठीतत्पुरुषा वुत्ततरपादद्युदात्ती।उपमान।अव्ययुअब्राह्मणः। अवृषलः।कुब्राह्मणः। कुवृषलः।निष्कौशम्बिः। विर्वाराणसिः। अतिमालः। एतान्यवययान्याद्युदात्तानि। अव्यये नञ्कुनपितानामिति वक्तव्यम् इह मा भूत् स्नात्वाकालक इति। अव्यय। द्वितीया-मुहूर्त्तसुखम्। मुहूर्त्तरमणीयम्।सर्वरात्रकल्याणी। सर्वरात्रशोभना। अत्यन्तसंयोगे च इति द्वितीयासमासः । मुहूर्त्तशब्दः पूषोदरादिरन्तोदात्तः । सर्वरात्रशब्दोऽप्यच्प्रत्ययान्तः । द्वितीया । कृत्य - भोज्योष्णम् । भोज्यलवणम् । पानीयशीतम् । हरणीयचूर्णम् । भोज्यशब्दौ ण्यदान्तोऽन्तस्वरितः। पानीयहरणीयशब्दयोः उपोत्तमं रिति इति ईकार उदात्तः।।

वर्णो वर्णेष्वनेते ।। 6 - 2 - 3।।

प्रकृत्या पूर्वपदम्, तत्पुरुषे इति च वर्त्तते। वर्णं वर्णवाचि पूर्वपदं वर्ववाचिष्वेवोत्तरपदेषु एतशब्दवर्जितेषु परतस्तत्पुरुषे समासे प्रकृतिस्वरं भवति। कृष्णसारङ्गः, लोहितसारङ्गः। कृष्णकल्माषः, लोहितकल्माषः । कृषेर्वर्णे इति कृष्णशब्दो नक्प्रत्ययान्तोऽन्तोदात्तः। लोहितशब्दोऽपि रुहे रश्च लो वा इतीतन्प्रत्ययान्त आद्युदात्तः। वर्णं इति किम् परमकृष्णः । वर्णेष्वति किम् कृष्णतिलाः अनेत इति किम् कृष्णैतः। लोहितैतः।।

गाधलवणयोः प्रमाणे।। 6 - 2 - 4।।

प्रमाणवाचिनि तत्पुरुषे समासे गाध, लवण- इत्येतयोरुत्तरपदयोः पूर्वपदं प्रकृतिस्वरं भवति। शम्बगाधमुदकम्। अरित्रगाधमुदकम् । तत्प्रमाणमित्यर्थः। गोलवणम् । अश्वलवणम्। यावद् गवे दीयते तावदित्यर्थः। षष्ठीसमासा एते। तत्र शमेर्बन् इति बन्प्रत्ययान्तत्वाच्छम्बशब्द आद्युदात्तः अरित्रशब्दः अर्त्तिलूधूसू इतीत्रप्रत्ययान्तो मध्योदात्तः। गोशब्दो डोप्रत्ययान्तोऽन्तोदात्तः। अश्वशब्दः अशूप्रुषि इति क्वन्प्रत्ययान्त आद्युदात्तः। प्रमाणम् - इयत्तापरिच्छेदमात्रमिह द्रष्टव्यम्, न पुनरायाम एव । स्वरव्यङ्ग्यं च प्रमाणविशेषविषयत्वमेतेषाम्। प्रमाण इति किम् परमगधम् परमलवणम्।।

दायाद्यं दायादे ।। 6 - 2 - 5।।

तत्पुरुषे समासे दायादशब्द उत्तरपदे दायाद्यवाचि पूर्वपदं प्रकृतिस्वरं भवति। विद्यादायादः। धनदायादः। संज्ञायां समजनिषद इति विद्याशब्दः क्यप्प्रत्ययान्तः। उदात्तः इति च तत्र वर्त्तते,तेनायमन्तोदात्तः। कृपृवृजिमन्दिनिधाञ्भ्यः क्युः इति बहुलवचनात् केवलादपि धाञः क्युप्रत्ययः तेन धनशब्दः प्रत्ययस्वरेणाद्युदात्तः । अथ विद्यादायाद तइति केन षष्ठी स्वामीश्वराधिरपतिदायाद इति । यद्येवम्, प्रतिपदविधाना च षष्ठी न समस्यते इति समासप्रतिषेधः प्राप्नोति एवं तर्हि शेषलक्षणैवात्र षष्ठी, तस्यास्तु सप्तमी विधीयमाना बाधिका मा विज्ञायीति पूनरभ्यनुज्ञायते । दायद्यमिति किम् परमदायादः। अत्र समासान्तोदात्तत्वमेव भवति ।।

प्रतिबन्धि चिरकृच्छ्रयोः।। 6 - 2 - 6।।

तत्पुरुषे समासे चिरकृच्छ्रयोरुत्तरपदयोः प्रतिबन्धिवाचि पूर्वपदं प्रकृतिस्वरं भवति। गमानचिरम्। गमनकृच्छ्रम्। व्याहरणचिरम्। व्याहरणकृच्छ्रम्। गमनव्याहरणशब्दौ ल्युडन्तौ,तयोर्लित्स्वरः। गमनं च चञ्चिरम चेति विशेषणसमासोऽयम् पयूरव्यंसकादिर्वैष द्रष्टव्यः। गमनं हि कारणविकलतया

चिम्कालभावि कृच्छ्रयोगि वा प्रतिबन्धि जायते। प्रतिबन्धीति किम् मूत्रकृच्छ्रम्।।

पदेऽपदेशे।।6 - 2 - 7।।

अपदेशः - व्याजः, तद्वाचिनि तत्पुरुषे समासे पदशब्द उत्तरपदे पूर्वपदं प्रकृतिस्वरं भवति। मूत्रपदेन प्रस्थितः उञ्चरपदेन प्रस्थितः। मूत्रशब्दः सिचिमुच्योष्टेरुञ्च इति ष्ट्रन्प्रत्ययान्तः, मूत्रयतेर्वा घञन्त आद्युदात्तः। उञ्चारशब्दोऽपि घञन्तः थाथघञ्क्ताचबित्रकाणाम् इत्यन्तोदात्तः । विशेषणसमासोऽयम्, मयूरव्यंसकादिर्वा । अपदेश इति किम् विष्णोः पदं विष्णुपदम् ।।

निवाते वातत्राणे।। 6 - 2 - 8।।

निवातशब्दो उत्तरपदे वातत्राणाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। कुट्येव निवातम्, अर्थाभाव इत्यव्ययीभावः । निरुद्धो वातोऽस्मिन्निति वा निवातमिति बहुव्रीहिः। तत्र कुड्यादिहेतुके निवाते कुड्यादयो वर्तमानाः समानाधिकरणेन निवातशब्देन सह समास्यन्ते। कुटी-शमीशब्दौ गौरादिङीषन्तावन्तोदात्तौ। कुड्यशब्दोऽपि कवतेर्यत् डिकिञ्च इति यत्प्रत्ययान्त आद्युदात्त इत्येके। ड्यक्प्रत्ययान्तोऽन्तोदात्त इत्यपरे। वातत्राण इति किम् राजनिवाते वसति। सुखं मातृनिवातम्। निवातशब्दोऽयं पार्श्ववाची रुढिशब्दः,तत्रोभयत्र षष्ठीसमासः।

शारदेऽनार्तवे।।6 - 2 - 9।।

ॠतौ भवमार्तवम्। अनार्तववाचिनि शारदशब्दे उत्तरपदे तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। रज्जुशारदमुदकम्। दृषत्शारदाः सक्तवः। शारदशब्दोऽयं प्रत्यग्रवाची, तस्य नित्यसमासः, अस्वपदविग्रह इष्यते। सद्यो रज्जूद्धृतमुदकं प्रत्यग्रमनुपहतं रज्जुशारदमुच्यते। रज्जुशब्दः सृजेरसुम् च इति उप्रत्ययान्त आदिलोपश्च। धान्ये नित् इति च तत्र वर्त्तते,तेनाद्युदात्तः। दृषत्-शब्दः दृणातेः षुग् ह्रस्वश्च इति इदिक्प्रत्यान्तोऽन्तोदात्तः ।अनार्त्तव इति किम् परमशारदम्। उत्तमशारदम्। शरदि ॠतुविशेषे भवं यत्तदिह शारदम्।।

अर्ध्वयुकषाययोर्जातौ।। 6 - 2 - 10।।

अध्वर्यु, कषाय-इत्येतयोर्जातिवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। प्राच्याध्वर्युः। कठाध्वर्युः। कलापाध्वर्युः। एते समानाधिकरणसमासा जातिवचिनो नियतविषयाः। तत्र प्राच्यशब्दो यत्प्रत्ययान्त आद्युदात्तः। कठशब्दः पचाद्यचि व्युत्पादितः, ततः कठेन प्रोक्तमिति वैशम्पायनान्तेवासिभ्यश्च इति णिनिः,तस्य
कठचरकाल्लुक् इति लुक्। कलापिना प्रोक्तमिति कलापिनोऽण् तस्मिन् इनण्यनपत्ये इति प्रकृतिभावे प्राप्ते नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानम् इति टिलोपः। तदेवं कलापशब्दोऽन्तोदात्तः । सर्पिर्मण्डकषायम् । उमापुष्पकषायम् । दौवारिककषायम् । षष्ठीसमासव्युत्पादिता रुढिशब्दा एते। तत्र सर्पिर्मण्डशब्दः, उमापुष्पशब्दश्च षष्ठीसमासावन्तोदात्तौ । दौवारिकशब्दोऽपि द्वारे नियुक्तः इति ठकि सत्यन्तोदात्त एव । जाताविति किम् परमाध्वर्युः।परमकषायः।।

सदृशप्रतिरुपयोः सादृश्ये।। 6 - 2 - 11।।

सदृशा, प्रतिरुप - इत्येतयोरुत्तरपदयोः सादृश्यवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। पितृसदृशः। मातृसदृशः । पितृमातृशब्दावुणदिष्वन्तोदात्तौ निपातितौ । षष्ठीसमासार्थं च सदृशग्रहणमिह तदलुकि षष्ठ्याः। प्रयोजयतिदास्याः सदृशाः वृषल्याः सदृश इति। अत्र दासी - वृषलीशब्दयोरन्तोदात्तत्वाद् उदात्तयणो हल्पूर्वात् इति विभक्तिरन्तोदात्ता । पितृप्रतिरुपः । मातृप्रतिरुपः । सादृश्य इति किम् परमसदृशः उत्तमसदृशः। समासार्थोऽत्र पूज्यमानता, न सादृश्यम् ।।

द्विगौ प्रमाणे।। 6 - 2 - 12।।

द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। प्राच्यसप्तशमः । गान्धारिसप्तशमः । सप्तशमाः प्रमाणमस्येति मात्रच उत्पन्नस्य प्रमाणे लो द्विगोर्नित्यम् इति लुक्। प्राच्यश्चासौ सप्तशमश्चेति प्राच्यसप्तशमः। प्राच्यशब्द आद्युदात्तः। गान्धारिशब्दः कर्दमादित्वादाद्युदात्तः मध्योदात्तो वा। द्विगाविति किम् व्रीहिप्रस्थः। प्रमाण इति किम् परमसप्तशमः ।।

गन्तव्यपण्यं वाणिजे।। 6 - 2 - 13।।

वाणिजशब्द उत्तरपदे तत्पुरुषे समासे गन्तव्यवाचि पण्यवाचि च पूर्वपदं प्रकृतिस्वरं भवति। मद्रवाणिजः। काश्मीरवाणिजः। गान्धारिवाणिजः। मद्रादिषु गत्वा व्यवहरन्तीत्यर्थः। सप्तमीसमासा एते। तत्र मद्रशब्दो रक्प्रत्ययान्तत्वादातोदात्तः। काश्मीरशब्दोऽपि पृषोदरदिषु मध्योदात्तः। गान्धारिशब्दः कर्दमादिषु पठ्यते,तत्र कर्दमादीनां वा इति पक्षे आद्युदात्तो भवति,द्वितीयो वा। पण्य-गोवाणिजः। अश्ववाणिजः । गोशब्दोऽन्तोदात्तः। अश्वशब्द आद्युदात्तः। गन्तव्यपण्यमिति किम् परमवाणिजः उत्तमपाणिजः।।

मात्रोपज्ञोपक्रमच्छायो नपुंसके।। 6 - 2 - 14।।

मात्रा, उपज्ञा, उपक्रम, छाया -एतेषूत्तरदेषु नपुंसकवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। भिक्षामात्रं न ददाति याचितः। समुद्रमात्रं न सरोऽस्ति किञ्चन । मात्रशब्दोऽयं वृत्तिविषय एव तुल्यप्रमाणे वर्त्तते । तत्र भिक्षायास्तुल्यप्रमाणमित्यस्वपदविग्रहः षष्ठीसमासः । तत्र भिक्षाशब्दः गुरोश्च हलः इत्यप्रत्ययान्तोदात्तः। सद्रुद्रशब्दोऽपि फिषि पाटलापालङ्काम्बासागरार्थानाम् इत्यन्तोदात्त एव। उपज्ञा - पाणिनोपज्ञम् अकालकं व्याकरणम् । व्याड्युपज्ञं दुष्करणम् । अपिशल्युपज्ञं गुरुलाघवम् । षष्ठीसमासा एते। तत्र पाणिनोऽपत्यमित्यणन्तः पाणिनशब्दः प्रत्ययस्वरेणान्तोदात्तः। व्याडिरिञन्तत्वादाद्युदात्तः। तद्वदापिशलिः।

उपक्रम - आढ्योपक्रमं प्रासादः। दर्शनीयोपक्रगम्। सुकुमारोपक्रमम् । नन्दोपक्रमाणि मानानि। एतेऽपि षष्ठीसमासा एव। तत्रैत्यैनं ध्यायन्तीत्याढ्यः। घञर्थे

कविधानम् इति कप्रत्यय आङ्पूर्वाद् ध्यायतेः पूषोदरादित्वाद् ह्रस्य ढत्वम्। तदयमाढ्यशब्दस्थाथादिस्वरेणान्तोदात्तः । दर्शनीयशब्दो रित्त्वादुपोत्तमोदात्तः । सुकमारशब्दो नञ्सुभ्याम् इत्यन्तोदात्तः। नन्दशब्दः पचाद्यचि व्युत्पादितः। उपज्ञोपक्रमान्तस्य तत्पुरुषस्य नपुंसकलिङ्गता उपज्ञोपक्रमं तदाद्याचिख्यासायाम् इति । छाया - इषुच्छायम् । धनुश्छायम् । इषुशब्दः इषेः किञ्च इत्युप्रत्ययान्तः तत्र च धान्ये नित् इति वर्त्तते,तेनाद्युदात्तः। धनुःशब्दोऽपि नब्विषयस्यानिसन्तस्य इत्याद्युदात्त एव । इषूणां छायेति षष्ठीसमासः।छाया बाहुल्ये इति नपुंसकलिङ्गता। नपुंसक इति किम् कुड्यच्छाया।।

सुखप्रययोर्हिते।। 6 - 2 - 15।।

सुख, प्रिय - इत्येतयोरुत्तरपदयोर्हितवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । गमनसुखम् । वचनसुखम् । व्याहरणसुखम् । सुख । प्रिय - गमनप्रियम् । वचनप्रियम् । व्याहरणप्रियम् । समानाधिकरणसामसा एते । तत्र सुखप्रियशब्दौ तद्धेतावायत्यां प्रीतिकरे वर्तेते। तद्धि हितं यदायत्यां प्रीतिं करोति । गमनादिषु ल्युडन्तेषु लित्स्वरः । हित इति किम् परमसुखम् । परमप्रियम् ।।

प्रीतौ च।। 6 - 2 - 16।।

प्रीतौ गम्यमानायां सुख, प्रय - इत्येतयोरुत्तरपदयोस्तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । ब्राह्मणसुखं पायसम् । छात्त्रप्रियोऽनध्यायः कन्याप्रियो मृदङ्गः। सुख प्रिययोः प्रीत्यव्यभिचारादिह प्रीतिग्रहणं तदतिशयप्रतिपत्त्यर्थम् । ब्राह्मणच्छात्त्रशब्दौ प्रत्ययस्वरेणान्तोदात्तौ । कन्याशब्दः स्वरितान्तः । प्रीतविति किम् राजसुखम् । राजप्रियम् ।।

स्वंस्वामिनि।। 6 - 2 - 17।।

स्वामिन्शब्द उत्तरपदे तत्पुरुषे समासे स्ववाचि पूर्वपदं प्रकृतिस्वरं भवति । गोस्वामी । अश्वस्वामी । धनस्वामी । अश्वधनगवां कथित एव स्वर । स्वमिति किम् परमस्वामी ।।

पत्यावैश्वर्ये।। 6 - 2 - 18।।

पतिशब्द उत्तरपदे एश्वर्यवाचिनि तत्पुरुषे पूर्वपदं प्रकुतिस्वरं भवति । गृहपतिः । सेनापतिः । नरपतिः। धान्यपतिः। गेहे कः इति प्रकृतिस्वरेणान्तोदात्तो गृहशब्दः । सह इनेन वर्त्तते इति बहुव्रीहौ प्रकुत्या पूर्वपदम् इति सेनाशब्द आद्युदात्तः । न नये एतसामाद् ऋदोरप् इति अप्प्रत्ययान्त आद्युदात्तो नरशब्दः। धान्यमन्तःस्वरितम् । ऐश्वर्यमिति किम् ब्राह्मणो वृषलीपतिः। वृषल्या भर्तेत्यर्थः।।

नभूवाक्चिद्दिधिषु ।। 6 - 2 - 19।।

पतिशब्द उत्तरपदे ऐश्वर्यंवाचिनि तत्पुरुषे समासे भु, वाक्, चित्, दिधिषु - इत्येतानि पूर्वपदानि प्रकृतिस्वराणि न भवन्ति । पूर्वेण प्राप्तः स्वरः प्रितषिध्यते । भूपपिः । वाक्पतिः । चित्पतिः । दिधिषूपतिः । षष्ठीसमासा एते समासस्वरेणान्तोदात्ता भवन्ति।।

वा भुवनम्।। 6 - 2 - 20।।

पतिशब्द उत्तरपदे ऐश्वर्यवाचिनि तत्पुरुषे समासे भुक्नशब्दः पूर्वपदं वा प्रकृतिस्वरं भवति । भुवनपतिः । पूर्वपदप्रकृतिस्वरपक्षे आदिरुदात्तः। रञ्जेः क्युन् इति वर्त्तमाने भूसूधुभ्रस्जिभ्यश्छन्दसि इति क्युन्प्रत्ययान्तो भुवनशब्द आद्युदात्तो व्युत्पादितः । कथं भुवनपतिरादित्य इति उणादयो बहुलम् इति बहुलवचनाद्भाषायामपि प्रयुज्यते ।।

आशङ्काबाधनेदीयस्सु संभावने ।। 6 - 2 - 21।।

प्रकृत्या पूर्वपदम् तत्पुरुषे इति वर्त्तते। आशङ्क, आबाध, नेदीयस् - इत्येतेषूत्तरपदेषु सम्भावनवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । अस्तित्वाध्यवसायः-सम्भावनम् । गमनाशङ्कं वर्त्तते । गमनमाशङ्क्यते इति सम्भाव्यते । वचनाशङ्कम् । व्याहरणाशङ्कम् । आबाध-गमनाबाधम् । वचनाबाधम् । व्याहरणाबाधम् । गमनं बाध्यत इति सम्भाव्यते । नेदीयस्-गमननेदीयः । व्याहरणनेदीयः । गमनमतिनिकटतरमिति सम्भाव्यते । सम्भावन इति किम् परमनेदीयः । पूर्वपदानि ल्युडन्तोन्युक्तस्वरणि ।।

पूर्वे भूतपूर्वे।। 6 - 2 - 22।।

पूर्वशब्दे उत्तरपदे भूतपूर्ववाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । आढ्यो भूतपूर्व आढ्यपूर्वः। पूर्वशब्दो वृत्तिविषये भूतपूर्वे वर्त्तते तत्र, विशेषणं विशेष्यण इति समासः। मयुरव्यंसकादिर्वा द्रष्टव्यः। दर्शनीयपूर्वः । सुकुमारपूर्वः । भूतपूर्वं इति किम् परमपूर्वः । उत्तमपुर्वः । अत्र परमश्चासौ पूर्वश्चेति समासः, न तु परमो भूतपूर्वं इति। तथा च सत्युदाहरणमेव भवति।।

सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये।। 6 - 2 - 23।।

सविध, सनीड, समर्याद, सवेश, सदेश - इत्येतेषूत्तरपदेषु सामीप्यवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। मद्रसविधम्। गान्धारिसविधम्। काश्मीरसविधम्। मद्रसनीडम्। गान्धारिसनीडम्। काश्मीरसनीडम् । मद्रसमर्यादम् । गान्धारिसमार्यादम्। काश्मीरसमर्यादम्। मद्रसवेशम्। गान्धारिसवेशम्। काश्मीरसवेशम्।

मद्रसदेशम् । गन्धारिसदेशम् । काश्मीरसदेशम् । पूर्वपदान्युक्तस्वराणि । सविधादीनां सह विधयेत्येवमादिका व्युत्पत्तिरेव केवलम् । समीपवाचिनस्त्वेते समुदायाः। मद्राणां सविधम् -समीपमित्यर्थः। सामीप्य इति किम् सह मर्यादया वर्त्तते समर्यादं क्षेत्रम्। देवदत्तस्य समर्यादं देवदत्तसमर्यादम् । सविधादिष्विति किम् देवदत्तसमया ।।

विस्पष्टादीनि गुणवचनेषु ।। 6 - 2 - 24।।

विस्पष्टादीनि पूर्वपदानि गुणवचनेषुत्तरपदेषु प्रकुतिस्वराणि भवन्ति । विस्पष्टकटुकम् । विचित्रकटुकम् । व्यक्तकटुकम् । विस्पषटलवणम् । विचित्रलवणम् । व्यक्तलवणम् । विस्पष्टं कटुकमिति विगृह्य सुप्सुपा इति समासः। विस्पष्टादियो ह्यत्र प्रवुत्तिनिमित्तस्य विशेषणम् । कटुकादिभिश्च शब्दैर्गुणवद् द्रव्यमभिधीयते इत्यसामानाधिकरण्यम्, अतो नास्ति कर्मधारयः । विस्पष्टशब्द । गतिरनन्तरः इत्याद्युदात्तः, विचित्रशब्दोऽप्यव्ययस्वरेण । विचित्तशब्दमन्ये पठन्ति, सोऽपि बहुव्रीहिस्वरेणाद्युदात्त एव । व्यक्तशब्द । उदात्तसावरितयोर्यणः स्वरितोऽनुदात्तस्य इत्यादिस्वरितः । ये चात्रापरे पठ्यन्ते, तत्र सम्पन्नशब्दस्थाथादिस्वरेणान्तेदात्तः । पटु-पण्डितशब्दौ प्रत्ययस्वरेणान्तोदात्तौ । कुशलशब्दः कृत्स्वरेणान्तोदात्तः । चपलशब्दश्चित्स्वरेणान्तोदात्तः, चुपेरञ्चोपधायाः इत्यत्र हि चिदिति वर्तते । निपुणशब्दस्थाथादिस्वरेणान्तोदात्तः, कुणेरिगुपधलक्षणः कप्रत्ययोऽयम् । विस्पष्टादीनोति किम् परमलवणम् । उत्तमलवणम् । गुणवचनेष्विति किम् विस्पष्टब्राह्मणः । विस्पष्ट । विचित्र । व्यक्त । सम्पन्न । कटु । पण्डित। कुशल। चपल। निपुण। विस्पष्टादिः।।

श्रन्यावमकन्पापवत्सु भावे कर्मधारये।। 6 - 2 - 25।।

श्र, ज्य, अवम्, कन्- इत्येतेषु पापशब्दवति चोत्तरपदे कर्मधारये समासे भाववाचि पूर्वपदं प्रकृतिस्वरं भवति । गमनश्रेष्ठम् । गमनश्रेयः । ज्य - वचनज्यष्ठम्, वचनज्यायः । अवम् - गमनावमम्, वचनावमम् । कन् - गमनकनिष्ठम् गमनकनीयः । पापवत् - गमनपापिष्ठम्, गमनपापीयः । ल्युडन्तान्येतानि पूर्वपदानि लित्स्वरेणाद्युदात्तानि । श्रज्यकनामादेशानां ग्रहणमिति सामर्थ्यातद्वदुत्तरपदं गृह्यते। श्रादिष्विति किम् गमनशोभनम्। भाव इति किम् गम्यतेऽनेनेति गमनम्,तत् श्रेयो गमनश्रेयः। कर्मधारयो इति किम् गमनं श्रेयो गमनश्रेयः।।

कुमारश्च ।। 6 - 2 - 26।।

कुमारशब्द। पूर्वपदं कर्मधारये समासे प्रकृतिस्वरं भवति । कुमारश्रमणा । कुमारकुलटा । कुमारतापसी । कुमारशब्दोऽन्तोदात्तः । अत्र केचिल्लक्षणप्रतिपदोक्तपरिभाषया कुमारः श्रमाणादिभिः इत्यत्रैव समासे स्वरमेतमिच्छन्ति। केचित्पुनरविशेषेण स्त्रिवत्रैव कर्मधारये।।

आदिः प्रत्यनसि।। 6 - 2 - 27।।

कर्मधारये इति वर्त्तते। प्रतिगत एनसा, प्रतिगतमेनो वा यस्य स प्रत्येनाः । तस्मिन्नुत्तरपदे कर्मधारये कुमारस्यादिरुदात्तो भवति। कुमारप्रत्येना । उदात्तः इत्येतदत्र सामर्थ्याद्वेदितव्यम् । पूर्वपदप्रकुतिस्वर एव ह्ययमादेरुपदिश्यते ।।

पूगेष्वन्यतरस्याम्।। 6 - 2 - 28।।

पूगाः-गणाः, तद्वाचिन्युत्तरपदे कर्मधारये समासे कुमारस्यान्यतरस्यामादिरुदात्तो भवति। कुमारचातकाः। कुमारलोहध्वजाः। कुमारबलाहकाः। कुमारजीमूताः। चातकादयः पूगशब्दाः, तेभ्यः पूगाञ्ञ्यो ग्रमणीपूर्वात् इति ञ्यः प्रत्ययः, तस्य तद्राजस्य बहुषु इति लुक्। अत्र यदाऽऽद्युदात्तत्वं न भवति, तदा कुमारश्च इति पूर्वपदप्रकृतिस्वरत्वमेके कुर्वन्ति। ये तु तत्र प्रतिपदोक्तस्य ग्रहणमिच्छन्ति तेषां समासान्तोदात्तत्वमेव भवति।।

इगन्तकारकपालभगालशालावेषु द्विगौ ।। 6 - 2 - 29।।

इगन्त उत्तरपदे कालवाचिनि कपाल, भगाल, शराव - इत्येतेषु च द्विगौ समासे पूर्वपदं प्रकृतिस्वरं भवति। इगन्त-पञ्चारत्निः ।दशारत्निः। पञ्चारत्नयः प्रमाणमस्य दशारत्नयः प्रमाणमस्यतेति तद्धितार्थे द्विगुः प्रमाणे लो द्विगोर्वित्यम् इति मात्रचो लोपः। इगन्त । काल - पञ्चमास्यः । दशमास्यः। पञ्च मासान्भृतो भूतो भावी
वेति तद्धितार्थे द्विगोर्यप् । पञ्चवर्षः । दशवर्षः । वर्षाल्लुक् च इति ठञो लुक् । काल । कपाल - पञ्चकपालः । दशकपालः । कपाल । भगाल - पञ्चभगालः । दशभगालः । भगाल । शराव - पञ्चशरावः । दशशरावः । संस्कृतं भक्षाः इति तद्धितार्थ एते समासाः द्विगोर्लुगनपत्ये इति कृताण्प्रत्ययलोपा द्रष्टव्याः। इगन्तादिष्विति किम् पञ्चभिरश्वैः क्रितः पञ्चाश्वः दशाश्वः। द्विगाविति किम् परमारत्निः परमशारावः । पञ्चारत्नयो दशारत्न्य इति च यण्गुणयोर्बहिरङ्गलक्षणयोरसिद्धत्वात् स्थानिवद्भावाद्वा द्विगुस्वर इगान्तलक्षणः प्रवर्त्तते ।।

बह्वन्यतरस्याम्।। 6 - 2 - 30।।

बहुशब्दः पूर्वपदमिगन्तादिषूत्तरपदेषुत द्विगौ समासेऽन्यतरस्यां प्रकृतिस्वरं भवति । पूर्वेण नित्ये प्राप्ते विकल्पः । बहुरत्निः । बहुमास्यः । बहकपालः । बहुभगालः । बहुशरावः । बहुशबदोऽन्तोदात्तः, तस्य प्रकृतिस्वरे कृते यत्र यणादेशास्तत्र उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य इत्येष स्वरो भवति ।।

दिष्टिवितस्त्योश्च ।। 6 - 2 - 31।।

दिष्ट - वितस्ति, इत्येतयोरुत्तरपदयोर्द्विगौ समासे पूर्वपदमन्यतरस्यां प्रकृतिस्वरं भवति । पञ्चदिष्टिः । पञ्चवितस्तिः । दिष्टवितस्त्योः प्रमाणे, तेनात्र मात्राचो लुक् ।।

सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात् ।। 6 - 2 - 32।।

सप्तम्यन्तं पूर्वपदं सिद्ध, शुष्क, पक्व, बन्ध - इत्येतेषूत्तरपदेषु प्रकुतिस्वरं भवति, सा चेत्सप्तमी कालात्र भवति । सांकाश्यसिद्धः । काम्पिल्यसिद्धः। सांकाश्य-काम्पिल्यशब्दौ ण्यप्रत्ययान्तावन्तोदात्तौ। फिषि तु सांकाश्यकामिपल्यनासिक्यदार्वाघाटानामन्तः पूर्व वा इति पठ्यते, तत्र मध्योदात्तावपि भवतः। शुष्क - ऊकशुष्कः। निघनशुष्कः। ऊकशब्दो बहुलवचनादवतेः कक्प्रत्ययान्तोदात्तः निधनशब्दो निधाञः क्युप्रत्यये मध्योदात्तः । पक्व - कुम्भीपक्वः। कलशीपक्वः। भ्राष्ट्रपक्वः। कुम्भीकलशीशब्दौ ङीषन्तावान्तोदात्तौ। भ्राष्ट्रशब्दः ष्ट्रन्प्रत्ययान्त आद्युदात्तः। बन्ध - चक्रबन्ध । चारकबन्धः ।

चक्रशब्दोऽन्तोदात्तः ।चारकशब्दो ण्वुलन्त आद्युदात्तः । अकालादिति किम् पुर्वाह्णसिद्धः। अपराह्णसिद्धः । सप्तमीश्वरः कृत्स्वरेण बाधितः पुनरयं विधीयते ।।

परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु।। 6 - 2 - 33।।

परि, प्रति, उप, अप - इत्येते पूर्वपदभूता वर्ज्यमावाचिनि अहरवयववाचिनि रात्र्यवयववाचिनि चोत्तरपदे प्रकृतिस्वरा भवन्ति । परित्रिगर्त्तं वृष्टो देवः । परिसौवोरम् । चपरिसार्वसेनि । प्रति- प्रतिपूर्वह्णम् । प्रत्यपरह्णम् । प्रतिपूर्वरात्रम । प्रत्यपररात्रम् । उप - उपपूर्वाह्णम् । उपापराह्णम् । उपपूर्वरात्रम् । उपापररात्रम् । अप - अपत्रिगर्त्तं वृष्टो देवः। अपसौवीरम् । अपसार्वसेनि । निपाता आद्युदात्ताः उपसर्गश्चिभिवर्जम् इति आद्युदात्तानि पूर्वपदानि । तत्पुरुषे बहुव्रीहौ च सिद्धत्वादव्ययीभावार्थोऽयमारम्भः। तत्रापपरी वर्जने वर्त्तते इति तयोरेव वर्ज्यमानमुत्तरपदम्, नेतरयोः । अहोरात्रावयवा अपि वर्ज्यमाना एव तयोर्भवन्तीति न पृथगुदाह्नियते । वर्ज्यमानाहोरात्रावयवेष्वति किम् प्रत्यग्नि शलभाः पतन्ति। परिवनमित्यत्र वनं समासे इत्येतद्भवति ।।

राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु।। 6 - 2 - 34।।

रातजन्यवाचिनां बहुवचनान्तानां यो द्वन्द्वोऽन्धकवृष्णिषु वर्त्तते तत्र पूर्वपदं प्रकृतिस्वरं भवति । श्वाफल्कचैत्रकरोधकाः । शिनिवासुदेवाः । श्वफल्कशब्दः, चैत्रकशब्दश्च ऋष्यन्धकवृष्णिकुरुभ्यश्च इति अणन्तावन्तोदात्तौ । शिनिशब्द आद्युदात्तः, स तदवत्येष्वभेदेन वर्त्तते । राजन्य इति किम् द्वैप्यहैमायनाः । द्वीपे भवा इति द्वीपदादनुसमुद्रं यञ् । हैमेरपत्यं युवा हैमायनाः । अन्धकवृष्णय एते, न तु राजन्याः । राजन्यग्रहणमिहाभिषिक्तवंशयानां क्षत्त्रियाणां ग्रहणार्थ । एते च नाभिषिक्तवंशयाः । बहुवचनग्रहणं किम् सङ्कर्षणवासुदेवौ। द्वन्द्व इति किम् वृष्णीनां कुमारा वृष्णिकुमाराः। अन्धकवृषणिष्विति किम् कुरुपञ्चालाः ।।

संख्या ।। 6 - 2 - 35।।

द्वन्द्व समासे संख्यावाचि पूर्वपदं प्रकृतिस्वरं भवति । एकादश । द्वादश । त्रयोदश ।
इण्भीकापाशल्यतिमर्चिभ्यः कन् इति नित्त्वादाद्युदात्त एकशब्दः । त्रेस्त्रयस् आदेशोऽन्तोदात्तो निपात्यते।।

आचार्योपसर्जनश्चान्तेवासी ।। 6 - 2 - 36।।

आचार्योपसर्जनान्तेवासिनां यो द्वन्द्वस्तत्र पूर्वपदं प्रकृतिस्वरं भवति । आपिशलपाणिनीयाः । पाणिनीयरौढीयोः । रौढीयकाशकुत्स्नाः। कुत्स्नाः । अपिशलस्यापत्यमापिशलिराचार्यः, अत इञ् तेन प्रोक्तमापिशलम्, इञश्च इत्यण्, तदधीयते येऽन्तेवसिनस्तेऽप्यापिशलाः, प्रोक्ताल्लुक् इति तस्य तद्धितस्याध्येतरि विहितस्य लुक्। क्रियते। आपिशलेर्वा छात्त्रा आपिशाला इत्युभयथाप्याचार्योपसर्जनश्चन्तेवासी भवति । आचार्योपसर्जनग्रहणं द्वन्द्वविशेषणार्थम् - सकलो द्वन्द्व आचार्योपसर्जनो यथा विज्ञायते, इह मा भूत् - पाणिनीयदेवदत्तौ। आचार्योपसर्जन इति किम् छान्दसवौयाकरणाः । अन्तेवासीति किम् आपिशलपाणिनीये शास्त्रे ।।

कार्तकौजपादयश्च।। 6 - 2 - 37।।

कार्तकौजपादयो ये द्वन्द्वास्तेषु पूर्वपदं प्रकृतिस्वरं भवति । प्रकृतिस्वरपूर्वपदाः कार्तकौजपादयो भवन्ति । विभक्त्यन्तानां पाठो वचनविवक्षार्थः। चकारो द्वन्द्वाधिकारानुवृत्त्यर्थः कार्तकौजपौ । कृतस्यापत्यम्, कुजपस्यपत्यम् - इत्यणन्तावेतौ । सार्वाणमाण्डूकेयौ । सावर्णिरिञन्तः । अवन्ततयश्मकाः । अवन्तरपत्यानि बहूनि तन्निवासो जनपदोऽवन्तयः । तथा अश्मकाः । पैलश्यापर्णेयाः। युवद्वन्द्वोऽयम् । पीलाया अपत्यं पैलः, तस्यापत्यं युवेति अणो द्व्यचः इति विहितस्य फिञः पैलदिभ्यश्च इति लुक्। श्यापर्णशब्दो बिदादि, तस्यापत्यं स्त्री श्यापर्णी,तदपत्यं युवा श्यापर्णेयः। बहुवचनमतन्त्रम्, तेन पैलश्यापर्णेयावित्यत्रापि भवति। कपिश्यापर्णेयाः। कपिरन्तोदात्तः,तस्यापत्यम्,बहुत्वे कपिबोधादाङ्गिरसे इत्युत्पन्नस्य यञः यञञोश्च इति लुक्,तेनात्र बहुत्वमाश्रीयत एव। शैतिकाक्षपाञ्चालेयाः।शितिकाक्षे नाम ऋषिः,तस्यापत्यमिति ऋष्यण्,तदपत्ये यूनि य इञ् तस्य ण्यक्षत्त्रियार्षञितो यूनि इति लुक्। पाञ्चालस्यापत्यं स्त्री पाञ्चाली,तदपत्यं युवा पाञ्चालेयः। अत्रापि बहुवचनमविवक्षितमिति शैतिकाक्षपाञ्चालेयावित्यक्षापि भवति।
कटुकवार्चलेयाः।कटुकस्यापत्यमिति अत इञ्, तस्य बह्वच इञः प्रच्यभरतेषु इति बहुषु लुक्। वर्चलाया अपत्यं वार्चलेयः। शाकलशुनकाः। शकलस्यापत्यं शाकल्यः,तस्य छात्त्राः शाकलाः। कण्वादिभ्यो गोत्रे इत्यण्। शुनकस्यापत्यमिति बिदादिभ्योऽञ् तस्य बहुषु लुक्। शाकलशणका इति केचित्पठन्ति। तेषा शणकशब्दादुत्पन्नस्येञः बह्वच इञः प्राच्यभरतेषु इति बहुषु लुक्। शुनकधात्रेयाः। धात्र्या अपत्यं धात्रेयाः। शणकबाभ्रवाः। बभ्रोरपत्यं बाभ्रवः। आर्चाभिमौद्गलाः। ऋचाभेन प्रोक्तमधीयते आर्चाविनः। वैशम्पायनान्तेवासित्वाद् णिनिः। मुद्गलः कण्वादिः,तदपत्यस्य छात्त्रा मौद्गलाः। कुन्तिसुराष्ट्राः। कुन्तेः सुरष्ट्रस्य चापत्यषु बहुषु तन्निवासे वा जनपदे द्वन्द्वोऽयम्। कुन्तिचिन्तिशब्दावन्तोदात्तौ। चिन्तिसुराष्ट्राः। कुन्तिसुराष्ट्रवत्। तण्डवतण्डाः। पचाद्यच्प्रत्ययान्तावन्तोदात्तावेतौ गर्गादिषु पठ्येते। तत्रापत्यपहुत्वे यञो लुक् क्रियते। गर्गवत्साः। अत्रापि अपत्यबहुत्वे यञो लुक्। अविमत्तकामविद्धाः। अविमत्तशब्दौ नञ्स्वरेणाद्युदात्तः। द्वयोरप्येतयोरपत्येषु बहुषु इञः बह्वच इञःप्रच्यभरतेषु इति लुक् क्रियते। बाभ्रवशालङ्कायनाः। बभ्रोरत्यं बाभ्रवः । शलङ्कुशलङ्कं च इति शालङ्कायनः। बाभ्रवदानच्युताः। दानच्युतशब्दादिञः बह्वचः इति लुक्।
कठकालापाः। कठेन प्रोक्तमधीयते कठा। वैशम्यायनान्तेवासित्वाद् णिनिः,तस्य कठचरकाल्लुक्। कलापिना प्रोक्तमधीयते कालापाः, कलापिनोऽण् इत्यण्प्रत्ययः, तस्मन् इनण्यनपत्ये इति प्रकृतिभावे प्राप्ते नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पि इत्यादिनोपसंख्यानेन टिलोपः। कौथुमलऔकाक्षाः। लौकाक्षेण प्रोक्तमधीयते लौकाक्षाः,लौकाक्षस्य चवाऽपत्यं लौक्क्षिः,तस्य छात्त्रा लौकाक्षाः। स्त्रीकुमारम्। स्त्रीशब्दोऽन्तोदात्तः। मौदपैप्पलादाः । मुदस्यापत्यं मौदिः,तस्य छात्त्रा मैदाः। तथा पैप्पलादाः। मौदपैप्पलादा इति द्विः पठ्यते,तस्य प्रयोजनम् - पक्षे समासान्तोदात्तत्वमेव यथा स्यादिति। वत्सजरत्।वत्सश्च जरञ्च,वत्सशब्दोऽन्तोदात्तः।

सौश्रुतपार्थवाः । सुश्रुतस्य पृथोश्च छात्त्राः। प्राग्दीव्यतोऽण्।जरामृत्यु।याज्यानुवाक्ये।यजेर्ण्यत्।यजयाच इति कुत्वाभावः। तित्स्वरितम् इत्यन्तस्वरितः । अनुवाक्येति वचेरनुपूर्वाद् ण्यत्। आचार्योपसर्जनान्तेवासिनामिह पाठः प्रपञ्चार्थः।। महान ब्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु।।6 - 2 - 38।।

प्रकृत्या पूर्वपदम् इति वर्त्तते, द्वन्द्वे इति निवृत्तम्। महानित्यतत्पूर्वपदं व्रीहि, आपराह्ण, गृष्टि, इष्वास, जाबाल, भार, भारत, हैरिहिल, रौरव, प्रवृद्ध इत्येतेषूत्तरपदेषु प्रकुतिस्वरं भवति। महाव्रीहिः। महापराह्णः।

महावृष्टिः। मरहेष्वासः।महाजाबालः।महाभारः।महाहैलिहिलः।महारौरवः।महाप्रवृद्धः।महच्छब्दोऽन्तोदात्तः, तस्य प्रतिपदोक्तो यः समासः सन्महत्परमोत्तमोत्कृष्टाः इति,तत्रेव स्वरः। तेनैषां षष्ठीसमासेऽन्तोदात्त एव भवति - तमहतो व्रीहिः महद्व्रीहिरिति। कर्मधारयेऽनिष्ठा इत्ययमपि श्रण्यादिसमासे विधिरिति प्रवृद्धशब्द इह पठ्यते।।

क्षुल्लकश्च वैश्वदेवे ।। 6 - 2 - 39।।

क्षुल्लक इत्येतत्पूर्वपदम्, महांश्च, वैश्वदेव उत्तरपदे प्रकृतिस्वर भवति। क्षुल्ल्वैश्वदेवम्। महावैश्वदेवम्।क्षुधं लातीति क्षुल्लः। तस्मादज्ञातादिषु प्रागिवात्के ऽन्तोदात्तः क्षुल्लकशब्दः।।

उष्ट्रः सादिवाभ्योः ।। 6 - 2 - 40।।

उष्ट्रशब्दः पूर्वपदं सादिवाम्योरुत्तरपदयोः प्रकुतिस्वरं भवति। उष्ट्रसादि । उष्ट्रवामि । उष्ट्रशब्द उषेः ष्ट्रन्प्रत्ययान्त आद्युदात्तः । कर्मधारयोऽयम्,षष्ठीसमासो वा।।

गौः सादसादिसारथिषु ।। 6 - 2 - 41।।

गोशब्दः पूर्वपदं साद,सादि,सारथि - इत्यतेषूत्तरपदेषु प्रकुतिस्वरं भवति। गोः सादः गोसादः। गां सादयतीति वा गोसादः। गोः सादिः गोसादिः। गोसारथिः।।

कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरुपा पारेवडवा तैतिलकद्रूः पण्यकम्वलो दासीभारणां च ।। 6 - 2 - 42।।

कुरुगार्हपत, रिक्तगुरु, असूतजरती, अश्लीलदृढरुपा, पारेवडवा, तैतिलकद्रू, पण्यकम्बलस - इत्येने समासास्तेषां दासीभारादीनां च पूर्वपदं प्रकृतिस्वरं भवति। कुरुणां गार्हपतं कुरुगार्हपतम्। कृग्रोरुञ्च इति कुरुशब्दः कुप्रत्ययान्तोनऽन्तोऽदात्तः। कुरुवृज्योर्गार्हपत इति वक्तव्यम् । वजीनां गार्हंपतं वृजिगार्हपतम्। वृजिशब्द आद्युदात्तः। रिक्तो गुरुः रिक्तगुरुः। रिक्ते विभाषा इति पूर्वपदमाद्युदात्तम्,अन्तोदात्तं वा । असूता जरती असूतजरती। अश्लीला दृढरुपा अश्लीलदृढरुपा। अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः। श्रीर्यस्यास्ति तत् श्लीलम्,सिध्मादेराकृतिगण्त्वाल्लच् । कपिलकादित्वाञ्चलत्वम्। अश्लीलदृढरुपेति हि संस्खानमात्रेण शोभना निःश्रीका लावण्यविरहिलोच्यते। पारेवडवेव पारेवडवाः निपातनादिवार्थे समासो विभक्तयलोपश्च। पारशब्दो धृतादित्वादन्तोदात्तः। तैतिलानां कद्रूः तैतिलकद्रू.। तितिलिनोऽपत्यं छात्त्रो वा तैतिल इत्यणन्तः।पण्यकम्बलः। पण्यशब्दो यदान्तत्वादाद्युदात्तः। पण्यकम्बलः संज्ञायामिति वक्तव्यम् । अन्यत्र पणितव्ये कम्बले समासान्तोदात्तत्वमेव । कम्बले समासान्तोदात्तत्वमेव। प्रतिपदोक्ते हि कृत्यानां समासे द्वितीया कृत्या इत्येष विहितः स्वरितः। दास्या भारो दासीभारः। देवहूतिः। देवजूतिः। देवसूतिः। देवनीतिः। अन्तोदात्तं पूर्वपदम्। वसुनीतिः। वसुशब्द आद्युदात्तः। श्रृस्वृस्निहित्रप्यसिवसि इत्यत्र हि धान्ये नित् तइति वर्त्तते। ओषधिः। ओषो धीयतेऽस्यामिति कर्मण्यधिकरणे च इति किप्रत्ययः। ओषशब्दो घञन्तत्वादद्युदात्तः। चन्द्रमाः - चन्द्रे मोऽसिः इत्यसिप्रत्ययान्तोऽयम्।चन्द्रशबद्स्तु रक्प्रत्ययान्तत्वादन्तोदात्तः। यस्य तत्पुरुषस्य पूर्वपदप्रकृतिस्परत्वमिष्यते, न च विहितम्, स सर्वो दासीभारादीषु द्रष्टव्यः।।

चतुर्थ्री तदर्थे।। 6 - 2 - 43।।

चतुर्थ्यन्तं पूर्वपदं तदर्थं उत्तरपदे तदभिधेयार्थं यत्तद्वाचिन्युत्तरपदे प्रकृतिस्वरं भवित।तदिति चतुर्थ्यन्तस्यार्थः परामृश्यते। यूपदारु। कुण्डलहिरण्यम् । यूपशब्द आद्युदात्तः। कुसुयुभ्यश्तच इत्यत्र निदिति वर्त्तते। कुण्डलशब्दोऽपि वृषादिभ्यश्चित् इति कलप्रत्ययान्तोऽन्तोदात्तः। रथदारु। वल्लीशब्दो ङीषः स्वरेणान्तोदात्तः । तदर्थ इति किम् कुबेरबलिः। प्रकृतिविकारभावे स्वरोऽयमिष्यते।।

अर्थे।। 6 - 2 - 44।।

चतुर्थी इति वर्तते। अर्थशब्द उत्तरपदे चतुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं भवति। मात्रे इदं मात्रर्थम्। पित्रर्थम्।देवतार्थम्। अतिरथ्यर्थम्। मातृपितृशब्दवन्तोदात्तावुणादिषु निपातितौ। देवताशब्दो लित्स्वरेण

मध्योदात्तः। अतिथिरिति अतेरिथिन् इतीथिन्प्रत्ययान्तः। तदर्थविशेषा एव दारुहिरण्यादयो भवन्ति,न त्वर्थशब्दवाच्यं सामान्यमित्यतदर्थार्थोऽयमारम्भः। केचितपुनराहुः-ज्ञापकार्थमिदम्, एतदनेन ज्ञाप्यते - पूर्वो विधिः प्रकृतिविकृत्योः समासे भवति। अश्वघासः, श्वश्रूश्वसुरमित्यत्र सत्यपि तादर्थ्ये न भवति।।

क्ते च।। 6 - 2 - 45।।

क्तान्ते चोत्तरपदे चतुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं भवति। गोहितम्। अश्वहितम्। मनुष्यहितम्। गोरक्षितम्। अश्वरक्षितम्। वनं तापसरक्षितम्। अश्वशब्द आद्युदात्तः, मनुष्यशब्दोऽन्तस्वरितः,परिशिष्टपूर्वपदमन्तोदात्तम्। गोभ्यो रक्षितमिति सम्प्रदाने चतुर्थी।।

कर्मधारयेऽनिष्ठा ।। 6 - 2 - 46।।

कर्मधारये समासे क्तान्त उत्तरपदेऽनिष्ठान्तं पूर्वपदं प्रकृतिस्वरं भवति। श्रेणिकृताः।ऊककृताः। पूगकृताः। निधनकृताः। श्रोणिशब्द आद्युदात्तः। ऊकपूशब्दावन्तोदात्तो। निधनशब्दोऽयं मध्योदात्तः।

अहीने द्वितीया।। 6 - 2 - 47।।

अहीनवाचिनि समासे क्तान्त उत्तरपदे द्वितीयान्तं पूर्वपदं प्रकृतिस्वरं भवति। कष्टश्रितः। त्रिशकलपतितः। ग्रामगतः। कष्टशब्दोऽन्तोदात्तः। त्रीणि शकलान्यस्येति त्रिशकलः, बहुव्रीहिस्वरेणाद्युदात्तः। ग्रामशब्दो नित्स्वरेणाद्युदात्तः। अहीन इति किम् कान्तारातीतः। योजनातीतः। द्वितीयानुपसर्ग इति वक्तव्यम् । इह मा भूत् - सुखप्राप्तः, दुःखप्राप्तः। सुखापन्नः ,दुःखापन्नः। अन्तः,थाथ इत्यस्यापवादोऽयम्।।

तृतीया कर्मणि।। 6 - 2 - 48।।

कर्मवाचिनि क्तान्त उत्तरपदे तृतीयान्तं पूर्वपदं प्रकृतिस्वरं भवति। आहिहतः वज्रहतः। महाराजहतः। नखनिर्भिन्ना। दात्रलूना। आङि श्रिहनिभ्यां ह्नस्वश्च इति अहिनन्तोदात्तो व्युत्पादितः। केचिदाद्युदात्तमिच्छन्ति। वज्रो रक्प्रतययान्तः। महाराजष्टच्प्रत्ययान्तः। नास्य खमस्तीति बहुव्रीहौ नकुलनख इति नखशब्दो निपातितः। तेन नञ्सुभ्याम् इत्यन्तोदात्तः। दात्रशब्दः दाम्नीशस इति ष्ट्रन्प्रत्ययान्तः। कर्मणीति किम् रथेन यातो रथयातः। गत्यर्थत्वात्कर्तरि क्तः ।।

गतिरनन्तरः ।। 6 - 2 - 49।।

क्ते कर्मणि इति वर्त्तते। कर्मवाचिनि क्तान्त उत्तरपदे गतिरनन्तरः पूर्वपदं प्रकृतिस्वरं भवति। प्रकृतः। प्रहृतः।
अनन्तर इति किम् अभ्युद्धुतः। समुद्धृतः। समुदाहृतः। व्यवहितस्य गतेरयं स्वरो न भवति । अनन्तरे पुनरिष्यते। कारकपूर्वस्य तु सति शिष्टत्वात् थाथादिस्वर एव भवतिदूरादागत इति ।अनन्तरग्रहणसामर्थ्यादेव कृद्ग्रहणे गतिकारकपूर्वस्यापि इत्येतन्नाश्रीयते। कर्मणीत्येव - प्रकृतः कटं देवदत्तः। थाथादिस्वरापवादो योगः।।

तादौ च निति कृत्यतौ।। 6 - 2 - 50।।

तकारादौ च तुशब्दवर्जिते निति कृति परतो गतिरनन्तरःप्रकृतिस्वरो भवति। प्रकर्ता । प्रकर्तुम् । प्रकृतिः। प्रकर्ता इति तृन्नन्तः। कृत्स्वरबाधनार्थ वचनम्। तादाविति किम् प्रजल्पाकः। नितीति किम् प्रकर्त्ता । तृजन्तः।
कृद्ग्रहणमुपदेशे ताद्यर्थम् । इहापि यथा स्यात् - प्रलपिता, प्रलपितुमिति। अताविति किम् आगन्तुः।।

तवै चान्तश्च युगपत् ।। 6 - 2 - 51।।

तवैप्रत्ययस्यान्त उदात्तो भवति गतिश्चानन्तरः प्रकृतिस्वर इति एतदुभयं युगपद्भवति। अन्वेतवै। परिस्तरितवै। परिपातवै। तस्मात् पिता नाभिचरितवै। उपसर्गा आद्युदात्ता अभिवर्जमित्यभिरन्तोदात्तः। कृत्स्वरापवादो योगः ।।

अनिगन्तोऽञ्जतौ वप्रत्यये ।। 6 - 2 - 52।।

अनिगन्तो गतिः प्रकृतिस्वरो भवत्यञ्चतौ वप्रत्यये परतः। प्राङ् प्राञ्चौ, पाञ्चः। स्वरितो वानुदात्तेऽपदादौ इत्ययमेकादेश उदात्तः स्वरितो वा । पराङ् ,पराञ्चौ,पराञ्चः। अनिगन्त इति किम् प्रत्यङ् , प्रत्यञ्चौ , प्रत्यञ्चः । कृदुत्तरपदप्रकृतिस्वर इह भवति । वप्रत्यय इति किम् उदञ्चनः।चोरनगन्तोऽञ्चतौ वप्रत्यय इत्येष स्वरो भवति विप्रतिषेधेन पराचः। पराचा।।

न्यधी च ।। 6 - 2 - 53।।

नि,अधि,इत्येतौ चाञ्चतौ वप्रत्यये प्रकृतिस्वरौ भवतः। न्यङ्, न्यञ्चो न्यञ्चः। उदात्तस्वरिवतयोर्यणः स्वरितोषनुदात्तस्यइत्यञ्चतेरकारः स्वरितः। अध्यङ्, अध्यञ्चः। अधीचः। अधीचा।।

ईषदन्यतरस्याम्।। 6 - 2 - 54।।

ईषत् इत्येतत्पूर्वपदमन्यतरस्यां प्रकृतिस्वरं भवति। ईषत्कडारः। ईषत्पिङ्गलः। ईषदित्ययमन्तोदात्तः। ईषद्भेद इत्येवमादौ कृत्स्वर एव भवति।।

हिरण्यपरिमाणं धने।। 6 - 2 - 55।।

हिरण्यपरिमाणवाचि पूर्वपदं धनशब्द उत्तरपदेऽन्यतरस्यां प्रकृतिस्वरं भवति। द्विसुवर्णधनम्। द्वौ सुवर्णौ परिमाणमस्य द्विसुवर्णं तदेव धनमिति कर्मधारयः। बहुव्रीहावपि परत्वाद्विकल्प एव भवति। द्विसुवर्णधनः।हिरण्यग्रहणं किम् प्रस्थधनम्। परमाणग्रहणं किम् काञ्चनधनम्। धन इति किम् निष्कमाला।।

प्रथमोऽचिरोपसम्पत्तौ।। 6 - 2 - 56।।

प्रथमशब्दः पूर्वपदमचिरोपसम्पत्तौ गम्यमानायामन्यत रस्यां प्रकृतिस्वरं भवति। अचिरोपसम्पत्तिः-अचिरोपश्लेषः, अभिनवत्वम् प्रथमवैयाकरणः- अभिनववैयाकरणः। सम्प्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः । प्रथमशब्दः प्रथेरमच् इति चित्त्वादन्तोदात्तः। अचिरोपसंपत्ताविति किम् प्रथमवैयाकरणः। वैयाकरणाना माद्यो मुख्यो वा यः स नित्यमन्तोदात्त एव।।

कतरकतमौ कर्मधारये।। 6 - 2 - 57।।

कतशब्दः कतमशब्दश्च पूर्वपदं कर्मधारये समासेऽन्यतरस्यां प्रकृतिस्वरं भवति। कतरकठः। कतमकठः। कर्मधारयग्रहणमुत्तरार्थम्, इह तु प्रतिपदोक्तत्वादेव सिद्धम्।।

आर्यो ब्राह्मणकुमारयोः।। 6 - 2 - 58।।

आर्यशब्दः पूर्वपदं ब्राह्मणकुमारशब्दयोः कर्मधारये समासेऽन्यतरस्यां प्रकृतिस्वरं भवति। आर्यब्राह्मणः। आर्यकुमारः। आर्यशब्दो ण्यदन्तोऽन्तस्वरितः। आर्य इति किम् परमब्राह्मणः। परमकुमारः। ब्राह्मणकुमारयोरिति किम् आर्यक्षत्त्रियः।कर्मधारये इत्येव - आर्यस्य ब्राह्मणः आर्यब्राह्मणः।।

राजा च ।। 6 - 2 - 59।।

राजा च पूर्वपदं ब्राह्मणकुमारयोरुत्तरपदयोः कर्मधारये समासेऽन्यतरस्यां प्रकृतिस्वरं भवति। राजब्राह्मणः। राजकुमारः। कर्मधारय इत्येव - राज्ञो ब्राह्मणो

राजब्राह्मणः। राजकुमारः। पृथग्योगकरणमुत्तरार्थम्।।

षष्ठी प्रत्येनसि ।। 6 - 2 - 60।।

राजा इति वर्त्तते अन्यतरस्याम् इति च । षष्ठ्यन्तो राजशब्दः पूर्वपदं प्रत्येनस्युत्तरपदेऽन्यतरस्यां प्रकृतिस्वरं भवति। राज्ञः प्रत्येनाः राजप्रत्येनाः। षष्ठीति किम् राजा चासौ प्रत्येनाश्च राजप्रत्येनाः।।

क्ते नित्यार्थे ।। 6 - 2 - 61।।

क्तान्त उत्तरपदे नित्यार्थे समासे पूर्वपदमन्यतरस्यां प्रकृतिस्वरं भवति। चनित्यप्रहसितः। सततप्रहसितः। कालाः इति द्वितीयासमासोऽयम्। नित्यशब्दः त्यब्नेर्ध्रुवे इति त्यबन्त आद्युदात्तः। सततम् इति -यदा भावे क्तस्तदा थाथादिस्वरेणान्तोदात्तः। नित्यार्थ इति किम् मुहूर्त्तप्रहसितः।

ग्रामः शिल्पिनि ।। 6 - 2 - 62।।

ग्रामशब्दः पूर्वपदं शिल्पिवाचिन्युत्तरपदेऽन्यतरस्यां प्रकृतिस्वरं भवति। ग्रामनापितः। ग्रामकुलालः। ग्रमशब्द आद्युदात्तः। ग्राम इति किम् परमनाषितः शिल्पिनीति किम् ग्रामरथ्या।।

राजा च प्रशंसायाम् ।। 6 - 2 - 63।।

राजाशब्दः पूर्वपदं शिल्पिवाचिन्युत्तरपदे प्रशंसायां गम्यमानायामन्यतरस्यां प्रकृतिस्वरं भवति। राजनापितः। राजकृलालः। कर्मधारये राजगुणाध्यारोपेणोत्तरपदार्थस्य प्रशंसा। षष्ठीसमासे च राजयोग्यतया तस्य । राजेति किम् परमनापितः। प्रशंसायामिति किम् राजनापितः।शिल्पिनीत्येव - राजहस्ती।।

आदिरुदात्तः ।। 6 - 2 - 64।।

आदिरुदात्तः इत्येतदधिकृतम् इत उत्तरं यद्वक्ष्यामः, तत्र पूर्वपदस्यादिरुदात्तो भवतीत्येवं तद्वेदितव्यम्। वक्ष्यति - सप्तमीहारिणौ धर्म्येऽहरणे इति। स्तूषेशाणः। मुकुटेकार्षापणम् । याज्ञिकाश्वः। वैयाकरणहस्ती। दृषदिमाषकः। आदिः इति प्रागन्ताधिकारात् । उदात्तः इति प्रकृत्या भगालम् इति यावत्।।

सप्तमीहारिणौ धर्म्यैऽहरणे ।। 6 - 2 - 65।।

सप्तम्यन्तं हारिवाचि च पूर्वपदं धर्म्यवाचिनि हरणशब्दादन्यस्मिन्नुत्तरपदे आद्युदात्तं भवति। हारोति देयंः स्वोकरोति सोऽपिधीयते। धर्म्यम् इत्याचारनियतं देयमुच्यते। धर्मो ह्यनुवृत्त आचारः ,तस्मादनपेतं तेन वा प्राप्यमिति। स्तूपेशाणः। मुकुटेकार्षापणम्। हलेद्विपदिका। हलेत्रिपदिका । दृषदिमाषकः । संज्ञायाम् इति सप्तमो समासः, कारनाम्नि च इति निभक्तेरलुक् । हारिणि - याज्ञिकाश्वः । वैयाकरणहस्ति। मातुलाश्वः। पितुव्यगवः। क्वचिदयमाचारो व्यवस्थितः - स्तूपादिषु शाणादि दातव्यम्, याज्ञिकादीनामश्वादीति।धर्म्य इति किम् स्तम्बेरमः । कर्मकरवर्द्धितकः । अहरण इति किम् वाडवहरणम् । वडवाया अयं वाडवः, तस्य बीजनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं यद्दीयते हरणमिति तदुच्यते । परोऽपि कृत्स्वरो हारिस्वरेण बाध्यते विप्रतिषेधेन - इत्येतदहरण इत्यनेन ज्ञाप्यते, तेन वाडवहार्यमिति हारिस्वरः सिद्धो भवति।।

युक्ते च ।। 6 - 2- 66।।

युक्तवाचिनि च समासे पूर्वपदमाद्युदात्तं भवति । गोबल्लवः । अश्वबल्लवः । गोमणिन्दः । अश्वमणिन्दः । गोसंख्यः । अश्वसंख्यः । युक्त इति - समाहितः, कर्त्तव्ये तत्परो यः स उच्यते ।।

वितभाषाऽध्यक्षे ।। 6 - 2- 67।।

अध्यक्षशब्द उत्तरपदे विभाषा पूर्वपदमाद्युदात्तं भवति । गवाध्यक्षः । अश्वाध्यक्षः।।

पापं च शिल्पिनि ।। 6 - 2- 68।।

पापशब्दः शिल्पिवाचिन्युत्तरपदे विभाषाऽऽद्युदात्तो भवति । पापनापितः पापकुलालः । पापाणके कुत्सितैः इति पापशब्दस्य प्रतिपदोक्तः समानाधिकरणसमास इति षष्ठीसमासे न भवति - पापस्य नापितः पापनापित इति।।

गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे ।। 6 - 2 - 69।।

गोत्रवाचिन्यन्तेवासिवाचिनि चोत्तरपदे माणवब्राह्मणयोश्च क्षेबवाचिनि समासे पूर्वपदमाद्युदात्तं भवति। जङ्घावात्स्यः । यो जङ्घादानं ददान्यहमिति वात्स्यः सम्पद्यते स जङ्घावात्स्य इति क्षिप्यते । भार्यासौश्रुतः । सुश्रुतापत्यस्य भार्याप्रधानतया क्षेपः । वशाब्राह्मकृतेयः । ब्रह्मकृतशब्दः शुभ्रादिषु पठ्यते । गोत्र। अन्तेवासि

-कुमारीदाक्षाः। कम्बलचारायणीयाः । धृतरौढीयाः । ओदनपाणिनीयाः । कुमार्यादिलाभकामा ये दाक्षादिभिः प्रोक्तानि शास्त्राण्यधीयते तच्छिष्यतां वा प्रतिपद्यन्ते त एवं क्षिप्यन्ते । अन्तेवासि । माणव - भिक्षामाणवः । भिक्षां लप्स्येऽहमिति माणंवो भवति । माणव।ब्राह्मण - दासीब्राह्मणः । वृषलीब्राह्मणः । भयब्राह्मणः । यो भयेन ब्राह्मणः सम्पद्यते । अत्र यस्यान्यत् समासलक्षणं नास्ति, सुप्सुपा इत्येव तत्र समासः कर्त्तव्यः। गोत्रादिष्विति किम् दासीश्रोत्रियः । क्षेप इति किम् महाब्राह्मणः।।

अङ्गानि मैरेये ।। 6 - 2- 70।।

मैरेयशब्द उत्तरपदे तदङ्गवाचीनि पूर्वपदान्याद्युदात्तानि भवन्ति । गुडमैरेयः । मधुमैरेयः । मद्युमैरेयः । मद्यविशेषो मैरेयः, स्तस्य गुडविकारस्य गुडोऽङ्गं भवति । मधुविकारस्य मधु, तस्य मध्वङ्गम्। अङ्गानीति किम् परममैरेयः । मैरेय इति किम् पुष्पासवः । फलासवः।।

भक्ताख्यास्तदर्थेषु ।। 6 - 2- 71 ।।

भक्तम् - अन्नम् , तदाख्याः - तद्वाचिनः शब्दाः, तदर्थेषूत्तरपदेषु आद्युदात्ता भवन्ति । भिक्षाकंसः । श्राणाकंसः । भाजीकंसः । भिक्षादयोऽन्नवचनाः ।भक्ताख्या इति किम् समाशशालयः । समाशनं समाश कइति क्रियामात्रमुच्यते, न द्रव्यम् । तदर्थेष्विति किम् भिक्षाप्रियः। बहुव्रीहिरयमत्र पूर्वपदमन्तोदात्तम् ।।

गोबिडालसिंहसैन्धवेषूपमाने ।। 6 - 2 - 72।।

गवादिषूपमानवाचिषूत्तरपदेषु पूर्वपदमाद्युदात्तं भवति । धान्यगवः । हिरण्यगवः । भिक्षाविडालः । तृणसिंहः । काष्ठसिंहः । सक्तुसैन्धवः । पानसैन्धवः । धान्यं गौरिवेति विगृह्य व्याघ्रादेराकृतिगणत्वाद् उपमितं व्याघ्रादिभिः इति समासः । उपमानार्थाऽपि यथासम्भवं यथाप्रसिद्धि च योजयितव्यः । गवाकृत्या सन्निवेशितं धान्यगवशब्देनोच्यते। उपमान इति किम् परमसिंहः।।

अके जीविकार्थे ।। 6 - 2 - 73 ।।

अकप्रतयान्त उत्तरपदे जीविकार्थवाचिनि समासे पूर्वपदमाद्युदात्तं भवति । दन्तलेखकः । नखलेखकः । अवस्करशेधकः । रगणीयकारकः। दन्तलेखनादिभिर्येषां जीविका त एवमुच्यन्ते । नित्यं क्रीडा जीविकयोः इति समासः । अक इति किम् रमणीयकर्त्त । जीवकार्थ इति किम् इक्षुभक्षिकां मे धारयसि।।

प्राचां क्रीडायाम् ।। 6 - 2 - 74 ।।

प्राग्देशवर्त्तिनां या क्रीडा तद्वाचिनि समासेऽकप्रत्ययन्त उत्तरपदे पूर्वपदमाद्युदात्तं भवति । उद्दालकपुष्पभञ्जिका । वीरणपुष्पप्रचायिका । शालभञ्जिका । तालभञ्जिका । संज्ञायाम् इति ण्वुल् , नित्यं क्रीडाजीविकयोः इति षष्ठीसमासः । प्राचामिति किम् जीवपुत्रप्रचायिका । इयमुदीचां क्रीडा । क्रीडायामिति किम् तव पुष्पप्रचायिका । पर्याये ण्वुच्प्रत्ययो भवति ।।

अणि नियुक्ते ।। 6 - 2 - 75 ।।

अणन्त उत्तरपदे नियुक्तवाचिनि समासे पूर्वपदमाद्युदात्तं भवति । छत्त्रधारः । तूणीरधारः । कमण्डलुग्राहः । भृङ्गारधारः । नियुक्तः - अधिकृतः स च कस्मिंश्चित्कर्तव्ये तत्परो न भवतीति नियुक्तः इत्यनेन सिध्यति । नियुक्त इति किम् काण्डलावः । शरलावः ।।

शिल्पिनि चाकृञ ।। 6 - 2 - 76 ।।

शिल्पिवाचिनि समासेऽणन्त उत्तरपदे पूर्वपदमाद्युदात्तं भवति, स चेदण् कृञो न भवति । तन्तुवायः । तुन्नवायः । वालवायः ।शिल्पिनीति किम् । काण्डलावः । अकृञ इति किम् कुम्भकारः । अयस्कारः।।

संज्ञायां च ।। 6 - 2 - 77 ।।

संज्ञायां विषयेऽणन्त उत्तरपदेऽकुञः पूर्वपदमाद्युदात्तं भवति । तन्तुवायो नाम कीटः । बालवायो नाम पर्वतः । अकृञ इत्येव - रथकारो नाम ब्राह्मणः ।।

गोतन्तियवं पाले ।। 6 - 2 - 78 ।।

गो, तन्ति, यव - इत्येतानि पूर्वपदानि पालशब्द उत्तरपदे आद्युदात्तानि भवन्ति । गोपालः । तन्तिपालः । यवपालः । अनियुक्तार्थ आरम्भः। गोतन्तियवमिति किम् वत्सपालः । पाल थइति किम् गोरक्षः ।।

णिनि ।। 6 - 2 - 79।।

णिनन्त उत्तरपदे पूर्वपदमाद्युदात्तं भवति । पूष्पहारी । फलहारी । पर्णहारी ।।

उपमानं शब्दर्थप्रकृतावेव ।। 6 - 2- 80 ।।

उपमानवाचि पूर्वपदं शब्दार्थप्रकृतावेव णिन्त उत्तरपद आद्युदात्तं भवति । उपमानं नियम्यते । उष्ट्रक्रोशी । ध्वाह्क्षरावी । खरनादी । उपमानग्रहणमस्य पूर्वस्य च योगस्य विश्यविभागार्थम् । शब्दार्थप्रकृताविति किम् वृकवञ्चो । वृकप्रेक्षी । प्रकृतिग्रहणं किम् प्रकृतिरेव यत्रेपसर्गनिरपेक्षा शब्दार्था भवति तत्रैव यथा स्याद्, इह मा भूद् - गंर्दभोञ्चारी, कोकिलाभिव्याहारीति । एवकारकरणमुपमानावधारणार्थम् । शब्दार्थप्रकृतौ त्वनुपमानमुपमानं चाद्युदात्तं भवति । सिंहविनर्दी । पुष्कलजल्पी ।।

युक्तरोह्यादयश्च ।। 6 - 2- 81 ।।

युक्तारोह्यादयः समासा आद्युदात्ता भवन्ति । युक्तारोही । आगतरोही । आगतयोधी । आगतवञ्ची । आगतनर्दी । आगतप्रहारी । एते णिनन्ताः णिनि इत्यस्यैवोदाहरणार्थं पठ्यन्ते । पूर्वोत्तरपदनियमार्था इति केचित् । इह मा बूद् - वृक्षारोही, युक्ताध्यायीति । आगतमत्स्या। क्षीरहोता । भगिनीभर्त्ता । याजकादित्वात् षष्ठीसमासावेतौ ग्रामगोधुक् । अश्वत्रिरात्रः । गर्गत्रिरात्रः । व्युष्टत्रिरात्रः । शणपादः । समपादः । षष्ठीसमासा एते । एकशितिपात् । एकः शितिः पादोऽस्येति त्रिपदबहुव्रीहिः । तत्रैकशितिशब्दः तद्धितार्थात्तरपद इति तत्पुरुषसंज्ञः , तस्य निमित्तिस्वरबलीयस्त्वाद् अन्तोदात्तत्वं प्राप्तमित्याद्युदात्तत्वं विधीयते। एवमपि नार्थ एतेन, इगन्त0 द्विगौ इति सिद्धत्वात् एवं तर्हि ज्ञापकार्थम्, एतज् ज्ञापयति - शित्यन्तस्योत्तरपदे द्विगुस्वरो न भवतीति । तेन द्विशितिपादित्यत्र तिशब्द उदात्तो भवति । निमित्तिस्वलबलीयस्त्वस्याप्येकशितिपात्सवरवचनमेव ज्ञापकं वर्णयन्ति । पात्रेसमितादयश्च युक्तारोह्यादयः, ततस्तेऽप्याद्युदात्ता भवन्ति ।।

दीर्घकाशतुषभ्राष्ट्रवटं जे ।। 6 - 2 - 82 ।।

दीर्घान्तं पूर्वपदम्, काश, तुष, भ्राष्ट्र, वट - इत्येतानि च जे उत्तरपदे आद्युदात्तानि भवन्ति कुटीजः । शमीजः काशजः। तुषजः। भ्राष्ट्रजः । वटजः ।।

अन्त्यात्पूर्वं बह्वचः ।। 6 - 2- 83 ।।

जे उत्तरपदे बह्वचः पूर्वपदस्यान्त्यात्पूर्वमुदात्तं भवति । उपसरजः । मन्दुरजः । आमलकीजः । वडवाजः ।बह्वज इति किम् दग्घजानि तृणानि ।।

ग्रामेऽनिवसन्तः ।। 6 - 2 - 84 ।।

ग्रामशब्द उत्तरपदे पूर्वपदमाद्युदात्तं भवति न चेन्निवसद्वाचि भवति । मल्लग्रामः । वणिग्ग्रामः । ग्रामशब्दोऽत्र समूहवाची । देवग्रामः देवस्वामिक इत्यर्थः। अनिवसन्त इति किम् दाक्षिग्रामः । माहकिग्रामः । दाक्ष्यादयो निवसन्ति यस्मिन्ग्रामे स तेषामिति व्यपदिश्यते ।।

घोषादिषु च ।। 6 - 2 - 85 ।।

घोषादिषु चोत्तरपदेषु पूर्वपदमाद्युदात्तं भवति । दाक्षिघोषः । दाक्षिकटः । दाक्षिपल्वलः । दाक्षिह्नदः । दाक्षिबदरी । दाक्षिपिङ्गलः । दाक्षिपिशङ्गः । दाक्षिशाला । दाक्षिरक्षा । दाक्षिशिल्पी । दाक्ष्यश्वत्थः । कुन्दतृणम् । दाक्षिशाल्मली । आश्रममुनिः । शाल्मलिमुनिः । दाक्षिप्रेक्षा । दाक्षिकूटः । यान्यत्र निवासनामधेयानि तेषु निवसद्वाचीन्यपि पूर्वपदान्यद्युदात्तानि भवन्ति । अनिवसन्त इति नानुवर्त्तयन्ति केचित् । अपहे पुनरनुवर्त्तयन्ति ।।

छात्त्र्यादः शालायाम ।।6 - 2- 86 ।।

शालायामुत्तरपदे छात्त्र्यादय आद्युदात्ता भवन्ति । छात्त्रिशाला । पेलिशाला । भाण्डिशाला । छात्त्रि । पेलि । भाण्डि । व्याडि । आपिशलि । आखण्डि । आपारि । गोमि । छात्त्र्यादिः । यदा शालान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति, तदापि तत्पुरुषे शालायां नपुंसके इत्येतस्मात्पूर्वविप्रतिषेधेन पूर्वपदप्राद्युदात्तं भवति । छात्त्रिशालम् । पेलिशालम् ।।

प्रस्थेऽवृद्धमकक्यादीनाम ।। 6 - 2- 87 ।।

प्रस्थशब्द उत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्यदात्तं भवति। इन्द्रप्रस्थः । कुण्डप्रस्थः ह्नदप्रस्थः । सुवर्णप्रस्थः । अवृद्धमिति किम् दाक्षिप्रस्थः । माहकिप्रस्थः । अकर्क्यादोनामिति किम् कर्कीप्रस्थः । मधीप्रस्थः। कर्की । मधी । मकरी । कर्कन्धू । शमी । करीर । कटुक । कुरल । बदर । कर्क्यादिः ।।

मालादीनां च ।। 6 - 2 - 88 ।।

प्रस्थे इति वर्त्तते । प्रस्थ उत्तरपदे मालादीनामादिरुदात्तो भवति । मालाप्रस्थः । शालाप्रस्थः । माला । शाला। शोणा । द्राक्षा । क्षौमा । क्षामा । काञ्ची । एक । काम । मालादिः । वृद्धार्थ आरम्भः। एकशेणाशब्दयोः एङ् प्राचां देशे इति वृद्धसंज्ञा ।।

अमहन्नवं नगरेऽनुदीचाम् ।। 6 - 2 - 89 ।।

नगरशब्द उत्तरपदे महन्नवशब्दवर्जितं पूर्वपदमाद्युदात्तं भवति, तच्वेदुदीचां न भवति । सुह्मनगरम् । पुण्ड्रनगरम् । अमहन्नवमिति किम् महानगरम् । नवनगरम् । अनुदीचामिति किम् नदीनगरम् । कान्तोनगरम् ।।

अर्मे चावर्ण द्व्यच्त्र्यच् ।। 6 - 2 - 90 ।।

अर्मशब्द उत्तरपदे द्व्यच्त्र्यच् पूर्वपदमवर्णान्तमाद्युदात्तं भवति दत्तार्मम् । गुप्तार्मम् । कुक्कुटार्मम् । वायसार्मम्।

अवर्णमिति किम् वृहदर्मम् । द्व्यच्त्र्यजिति किम् कपिञ्जलार्मम् । अमहन्नबमित्येव - महार्मम् । नवार्मम् ।।

न भृताधिकसञ्जीवमद्राश्मकज्जलम् ।। 6 - 2- 91 ।।

भूत , अधिक, सञ्जीव, मद्र, अश्मन् , कज्जल - इत्येतानि पूर्वपदानि अर्मशब्द उत्तरपदे नाद्युदात्तानि भवन्ति । भूतार्मम् । अधिकार्मम् । सञ्जीवार्मम् । मद्राश्मग्रहणं सङ्घातविगृहीतार्थम् - मद्रार्मम्। अश्मार्मम् । मद्राश्मार्मम् । कव्वलार्मम् । समासान्तोदात्तत्वमेवात्र भवति । आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् दिवोदासाय गायत। पद्यश्वाय दाशुषे ।।

अन्तः ।। 6 - 2 - 92 ।।

अन्तः इत्यधिकृतम्, इत उत्तरं यद्वक्ष्यामस्तत्र पूर्वपदस्यान्त उदात्तो भवतीत्येवं वेदितव्यम् । वक्ष्यति - सर्वं गुणकार्त्स्न्ये । सर्वश्वेतः सर्वकृष्णः । प्राक् उत्तरपदादि इत्येतस्मादयमधिकारो वेदितव्यः ।।

सर्व गुणकार्त्स्न्ये ।। 6 - 2- 93 ।।

सर्वशब्दः पूर्वपदं गुणकार्त्स्न्ये वर्त्तमानमन्तोदात्तं भवति । सर्वश्वेतः सर्वकृष्णः । सर्वमहान् । सर्वमिति किम् परमश्वेतः । आश्यव्याप्त्या परमत्वं श्वेतत्वस्येति । गुणकार्त्स्न्ये वर्त्तते । गुणग्रहणं किम् सर्वसौवर्णः । सर्वराजतः । कार्त्स्न्ये इति किम् सर्वेषां श्वेततरः सर्वश्वेतः । गुणात्तरेण समासस्तरलोपश्च वक्तव्यः इत्येवमत्र

समासः , तरब्लोपश्च ।।

संज्ञायां गिरिनिकाययोः ।। 6 - 2 - 94 ।।

संज्ञायां विषये गिरि, निकाय - इत्येतयोरुत्तरपदयोः पूर्वपदमन्तोदात्तं भवति । अञ्जनागिरिः । भञ्जनागिरिः । नकाये - शापिण्डिनिकायः । मौण्डिनिकायः । चिखिल्लिनिकायः । संज्ञायामिति किम् परमगिरिः । ब्राह्मणनिकायः ।।

कुमार्यो वयसि ।। 6 - 2 - 95 ।।

कुमार्यामुत्तरपदे वयसि गम्यमाने पूर्वपदमन्तोदात्तं भवति । वृद्धकुमारी । जरत्कुमारी ।कुमारीशब्दः पुंसा सहासम्प्रयोगमात्रं प्रवत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिर्वयोविशेषवचनैः समानाधिकरणो भवति । तञ्च वय इह गृह्यते, न कुमारत्वमेव । वयसीति किम् परमकुमारी ।।

उदकेऽकेवले ।। 6 - 2 - 96 ।।

अकेवलम् -मिश्रम्, तद्वाचिनि समासे उदकशब्द उत्तरपदे पूर्वपदमन्तोदात्तं भवति । गुडमिश्रमुदकम् गुडोदकम् । तिलोदकम् । स्वरे कृते एकादेशः स्वरितो वानुदात्तेऽपदादौ इति पक्षे स्वरितो भवति ।अकेवल इति किम् शीतोदकम् । उष्णोदकम् ।।

द्विगौ क्रतौ ।। 6 - 2 - 97 ।।

द्विगावुत्तपदे क्रतुवाचिनि समासे पूर्वपदमन्तोदात्तं भवति । गर्गत्रिरात्रः । कुसुरविन्दसप्तरात्रः । गर्गाणां त्रिरात्रः गर्गत्रिरात्रः । द्विगाविति किम् अतिरात्रः । अचश्चित्त्वादन्तोदात्तः । क्रताविति किम् बिल्वसप्तरात्रः । बिल्वशतस्य बिल्वहौमस्य वा सप्तरात्रो बिल्वसप्तरात्रः ।।

सभायां नपुंसके ।। 6 - 2 - 98 ।।

सभाशब्द उत्तरपदे नपुंसकलिङ्गे समासे पूर्वपदमन्तोदात्तं भवति । गोपालसभम् । पशुपालसभम् । स्त्रीसभम् । दासीसभम् । सभायामिति किम् ब्राह्मणसेनम् । नपुंसकमिति किम् राजसभा । ब्राह्मणसभा । सभायां प्रतिपदोक्तमिह नपुंसकलिङ्ग गृह्यत इति रमणीयसभम् , ब्राह्मणकुलमित्यत्र न भवति ।।

पुरे प्राचाम् ।। 6 - 2 - 99 ।।

पुरशब्द उत्तरपदे प्राचां देशे पूर्वपदमन्तोदात्तं भवति । ललाटपुरम् । काञ्चीपुरम् । शिवदत्तपुरम् । कार्णिपुरम् । नार्मपुरम् । प्राचामिति किम् शिवपुरम् ।।

अरिष्टगौडपूर्वे च ।। 6 - 2 - 100 ।।

अरिष्ट, गौड - इत्येवम्पूर्वे समासे पुरशब्द उत्तरपदे पूर्वपदमन्तोदात्तं भवति । अरिष्टपुरम् । गौडपुरम् । पूर्वग्रहणं किम् इहापि यथा स्यात् - अरिष्टश्रितपुरम् , गौडभृत्यपुरम् ।।

न हास्तिनफलकमार्देयाः ।। 6 - 2 - 101 ।।

हास्तिन, फलक, मार्देय - इत्येतानि पूर्वपदानि पुरशब्द उत्तरपदे नान्तोदात्तानि भवन्ति । पुरे प्राचाम् इति प्राप्तिः प्रतिषिध्यते । हास्तिनपुरम् । फलकपुरम् । मार्देयपुरम् । मृदोरपत्यं मार्देयः । शुभ्रादित्वाद् ढक् ।।

कुसूलकूपकुम्भशालं बिले ।। 6 - 2 - 102 ।।

कुसूल, कूप, कुम्भ, शाला - इत्येतानि पूर्वपदानि बिलशब्दे उत्तरपदेऽन्तोदात्तानि भवन्ति । कुसूलबिलम् । कूपबिलम् । कुम्भबिलम् । शालाबिलम् । कुसूलादिग्रहणं किम् सर्पबिलम् । बिल इति किम् कुसूलस्वामी।।

दिक्शब्दा ग्रामजनपदाख्यानचारनराटेषु ।। 6 - 2 - 103 ।।

दिक्शब्दाः पूर्वपदानि अन्तोदात्तानि भवन्ति ग्रामजनपदाख्यानवाचिषूत्तरपदेषु चारनराटशब्दे च । पूर्वषुकामशमी । अपरेषुकामशमी । पूर्वकृष्णमृत्तिका । अपरकृष्णमृत्तिका । जनपद - पूर्वपञ्चालाः । अपरपञ्चालाः । आख्यान - पूर्वाधिरामम् । पूर्वयायातम् । अपरयायातम् । अधिराममधिकृत्य कृतो ग्रन्थ आधिरामम् । तथा यायातम् । चानराट - पूर्वचानराटम् । अपरचानराटम् । शब्दग्रहणं कालवाचिनोऽपि दिक्शब्दस्य परिग्रहार्थम् ।।

आचार्योपसर्जनश्चान्तेवासिनि ।। 6 - 2 -104।।

आचार्योपसर्जनान्तेवासिवाचिन्युत्तरपदे दिक्शब्दा अन्तोदात्ता भवन्ति। पूर्वपाणिनीयाः । अपरपाणिनीयाः । पूर्वकाशाकुत्स्नाः । अपारकाशकुत्स्नाः ।आचार्योपसर्जन इति किम् पूर्वशिष्याः । अन्तेवासिनीति किम् पूर्वपाणिनीयं शास्त्रम् ।।

उत्तरपदवृद्धौ सर्व च ।। 6 - 2 - 105 ।।

उत्तरपदस्य इत्येवमधिकृत्य य विहिता वृद्धिस्तद्वत्युत्तरपदे सर्वशब्दो दिक्शब्दाश्चान्तोदात्त भवन्ति । सर्वपाञ्चालकः । पूर्वपाञ्चालकः । उत्तरपाञ्चालकः । सुसर्वार्धदिक्यशब्देभ्यः जनपदस्य इति तान्तवधिना जनपदलक्षणो वुञ्प्रत्ययः । सुसर्वार्द्धज्जिनपदस्य दिशोऽमद्राणाम् इति चोत्तरपदवृद्धिः।

अधिकारलक्षणादिह न भवति - सर्वमासः, सर्वकारक इति ।।

बहुव्रीहौ विश्वं संज्ञायाम् ।। 6 - 2 - 106 ।।

बहुव्रीहौ समासे विश्वशब्दः पूरवपदं संज्ञायां विषयेऽनतोदात्तं भवति । विश्वदेवः । विश्वयशाः । विश्वमहान् । पूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तत्वं प्राप्तम् । बहुव्रीहाविति किम् विश्वे च ते देवाः विश्वदेवाः । संज्ञायामिति किम् विश्वे देवा अस्य विश्वदेवः । विश्वामित्त्रः , विश्वाजिन इत्यत्र संज्ञायां मित्त्राजिनयोः इत्येतद्भवति परत्वात् ।

बहुव्रीहौ इत्येदधिक्रियते प्रागव्ययीभावसंज्ञानात् ।।

उदराश्वेषुषु ।। 6 - 2 -107 ।।

उदर, अश्व , इषु - इत्येतेषूत्तरपदेषु बहुव्रीहौ समासे संज्ञायां विषये पूर्वपदमन्तोदात्तं भवति । वृकोदरः । दामोदरः । हर्यश्वः । यौवनाश्वः । सुवर्णपुङ्खेषुः महेषुः ।।

क्षेपे ।। 6 - 2 -108 ।।

क्षेपे गम्यमाने उदरदिषूत्तरपदेषु बहुव्रीहौ समासे संज्ञायां विषये पूर्वपदमन्तोदात्तं भवति । कुण्डोदरः । घटोदरः । कटुकाश्वः । स्पन्दिताश्वः । अनिघातेषुः । चलाचलेषुः । अनुदरः , सूदर इत्यत्र नञ्सुभ्याम् इत्येतद्भवति विप्रतिषेधेन ।।

नदी बन्धुनि ।। 6 - 2 - 109 ।।
बहुव्रीहौ समासे बन्धुन्युत्तरपदे नद्यन्तं पूर्वपदमन्तोदात्त भवति । गार्गीबन्धुः । वात्सीबन्धुः । नदीति किम् ब्रह्मबन्धुः । ब्रह्मशब्द आद्युदात्तः । बन्धुनीति किम् गार्गीप्रियः ।।

निष्ठोपसर्गपूर्वमन्यतरस्याम् ।। 6 - 2 - 110 ।।
बहुव्रीहौ समासे निष्ठान्तमुपसर्गपूर्वं पूर्वपदमन्यतरस्यामन्तोदात्तं भवति । प्रधौतमुखः । प्रक्षालितपादः । यदि मुखशब्दः स्वाङ्गवाची, तदा पक्षे मुखं स्वाङ्गम् इत्येतद्भवति, न चेत्पूर्वपदप्रकृतिस्परत्वेन गतिरन्तरः इत्येतद्भवति । निष्ठेति किम् प्रसेचकमुखः । उपसर्गपूर्वमिति किम् शुष्कमुखः।।

उत्तरपदादिः ।। 6 - 2 - 111 ।।
उत्तरपदादिः इत्येतदधिकृतम् । यदित ऊर्ध्वमनुक्रमिष्याम उत्तररपदस्यादिरुदात्तो भवतीत्येवं तद्वेदितव्यम् । वक्ष्यति - कर्णो वर्णलक्षकणात् । सुक्लकर्णः , कृष्णाकर्णः । उत्तरपदस्य - इत्येतदा पादपरिसमाप्तेः । आदिः इति प्रकृत्या भगालम् इति यावत् ।।

कर्णो वर्णलक्षणात् ।। 6 - 2 - 112 ।।
बहुव्रीहौ समासे वर्णवाचिनो लक्षणवाचिनश्च कर्णशब्द उत्तरपदमाद्युदात्तं भवति । शुक्लकर्णः । कृष्णकर्णः । लक्षणात् - दात्राकर्णः । शङ्कूकर्णः । लक्षणस्य इति दीर्घत्वम् । पशूनां विभागज्ञापनार्थं दात्रशङ्कुप्रतिरुपकं
कर्णादिषु चिह्नं यत् क्रियते तदिह लक्षणं गृह्यते, तेन स्थूलकर्णं इत्यत्र न भवति । कर्ण इति किम् श्वेतपादः । कूटश्रृङ्गः । वर्णलक्षणादिति किम् शोभनकर्णः ।।

संज्ञौपम्ययोश्च ।। 6 - 2 -113 ।।
संज्ञायामौपम्ये च यो बहुव्रीहिर्वर्त्तते तत्र कर्णशब्द उत्तरपदमाद्युदात्तं भवति । संज्ञायाम् - कुञ्चिकर्णः । मणिकर्णः । औपम्ये - गोकर्णः । खरकर्णः ।।

कण्ठपृष्ठग्रीवाजर्ङ्घ च ।। 6 - 2 - 114 ।।
कण्ठ, पृष्ठ, ग्रीवा, जङ्घा - इत्येतानि उत्तरपदानि बहुव्रीहौ समासे संज्ञौपम्ययोराद्युदात्तानि भवन्ति । कण्ठः संज्ञायाम् - शितिकण्ठः । नीलकण्ठः । औपम्ये - खरकण्ठः । उष्ट्रकण्ठः । पृष्ठः संज्ञायाम् - काण्डपृष्ठः । नाकपृष्ठः । औपम्ये - गोपृष्ठः । अजपृष्ठः । ग्रीवा संज्ञायाम् - सुग्रीवः । नीलग्रीवः । दशग्रीवः । औपम्ये - गोग्रीवः । अश्वग्रोवः । जङ्घा संज्ञायाम् - नारीजङ्घः । तालजङ्घः । औपम्ये - गौजङ्घः । अश्वजङ्घः । एणीजङ्घः ।।

श्रृङ्गमक्स्थायां च ।। 6 - 2 - 115 ।।
श्रृङ्गशब्द उत्तरपदमवस्खायां संज्ञाौपम्ययोश्च बहुव्रीहौ आद्युदात्तं भवति । उद्गतश्रृङ्गः । द्व्यङ्गुलश्रृङ्गः । त्र्यङ्गुलश्रृङ्गः । अत्र
श्रृङ्गोद्गमनादिकृतौ गवादेर्वतयोविशेषः - अवस्था । संज्ञायाम् - ऋष्यश्रृङ्गः । औपम्ये - गोश्रृङ्गः । मेषश्रृङ्गः ।।

नञो जरमरमित्त्रमृताः ।। 6 - 2 -116 ।।
नञ उत्तरे जरमरमित्त्रमृता बहुव्रीहौ समासे आद्युदात्ता भवन्ति । अजरः अमरः । अमित्त्रः । अमृतः । नञ इति किम् बाह्मणमित्त्रः । जरादय इति किम् अशत्रुः । नञसुभ्याम् इति उत्तरपदान्तोदात्तत्वमेवात्र भवति ।।

सोर्मनसी अलोमोषसी ।। 6 - 2 -117 ।।
सोरुत्तरमनन्तमसन्तं च बहुव्रीहौ समासे आद्युदात्तं भवति लोमोवसी वर्जयित्वा । सुकर्मा । सुधर्मा। सुधर्मा। सुप्रथिमा । असन्तम् - सुपयाः । सुयशाः। सुस्त्रोताः । सुस्त्रत् । सुध्वत् । सोरिति किम् कृतकर्मा । कृतयशाः । मनसी इति किम् सुराजा । सुरक्षा । अलोमोषसी इति किम् सुलोमा । सूषा ।अखनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च इत्यनर्थकपोरपि मनसोरिह ग्रहणम् । नञ्सुभ्याम् इत्यस्यायमपवादः । कपि तु परत्वात् कपि पूर्वम् इत्येतद्भवति । सुकर्मकः । सुस्त्रोतस्कः ।।

क्रत्वादयश्च ।। 6 - 2 -118 ।।
क्रत्वादयः सोरुत्तरे बहुव्रीहौ समासे आद्युदात्त भवन्ति । सुक्रतुः । सुदृशीकः । क्रतु । दृशीक । प्रतीक । प्रपूर्त्ति । हव्य । भग । क्रत्वादिः ।।

आद्युदात्तं व्द्युच्छन्दसि ।। 6 - 2 -119 ।।
यादद्युदात्तं द्व्यच् उत्तरपदं बहुव्रीहौ समासे सोरुत्तरं तदाद्युदात्तमेव भवति छन्दसि विषये । स्वश्वास्त्वा सुरथामर्जयेम । नित्स्वरेणाश्वरथशब्दावाद्युदात्तौ । आद्युदात्तमिति किम् या सुबाहुः स्वङ्गुरिः । बाहुशब्दः प्रत्ययस्परेणान्तोदात्तः । द्व्यजिति किम् सुगुरसत् । सुहिरण्यः । स्वश्वः । नञ्सुभ्याम् इत्यस्यायमपवादः ।।

वीरवीर्यौ च ।। 6 - 2 -120 ।।
वीर, वीर्य - इत्येतौ च शब्दौ सोरुत्तरौ बहुव्रीहौ समासे छन्दसि विषये आद्युदात्तौ भवतः । सुवीरेण ते । सुवीर्यस्य पतयः स्याम । वीर्यमिति यत्प्रत्ययान्तम् , तत्र यतोऽनावः इति आद्युदात्तत्वं न भवतीत्येतदेव
वीर्यग्रहणं ज्ञापकम् । तत्र हि सति पूर्वेणैव सिद्धं स्यात् ।।

कूलतीरतूलमूलशालाक्षसममव्ययीभावे ।। 6 - 2 - 121 ।।
कूल, तील, तूल, मूल, शाला, अक्ष, सम - इत्येतानि उत्तरपदानि अव्ययीभावसमास आद्युदात्तानि भवन्ति । परिकूलम् । उपकूलम् । परितीरम् । उपतीरम् । परितूलम् । उपतूलम् । परिमूलम् । उपमूलम् । परिशालम् । उपशालम् । उपाक्षम् । पर्यक्षम् । सुषमम् । विषमम् । निषमम् । दुःषमम् ।

तिष्ठद्गुप्रभृतिष्वेते पठ्यन्ते । कूलादिग्रहणं किम् उपकुम्भम् । अव्ययीभाव इति किम् परमकूलम् । उत्तरमकूलम् । पर्यादिभ्यः कूलादीनामाद्युदात्तत्वं विप्रतिषेधेन भवति । परिकूलम् । उपकूलम् ।।

कंसमन्थशूर्पपाथ्यकाण्डं द्विगौ ।। 6 - 2 -122 ।।

कंस , मन्थ , शूर्प, पाथ्य, काण्ड - इत्येतान्युत्तरपदानि द्विगौ समास आद्युदात्तानि भवन्ति । द्विकंसः । त्रिकंसः। द्विमन्थः । त्रिमन्थः । द्विशूर्पः ।त्रिशूर्पः । द्विपाथ्यः । त्रिपाथ्यः । द्विकाण्ड । त्रिकाण्डः । द्विगाविति किम् परमकंसः । उत्तमकंसः ।।

तत्पुरुषे शालायां नपुंसके ।। 6 - 2 -123 ।।

शालाशब्दान्ते तत्पुरुषे समासे नपुंसकलिङ्गे उत्तरपदमाद्युदात्तं भवति । ब्राह्मणशालम् । क्षत्त्रियशालम् । विभाषा सेनासुराच्छायाशालानिशानाम् इति नपुंसकलिङ्गता । तत्पुरुष तइति किम् दृढशालं ब्राह्मणकुलम् । शालायामिति किम् ब्राह्मणसेनम् । नपुंसक इति किम् ब्राह्मणशाला ।।

कन्था च ।। 6 - 2 - 124 ।।

तत्पुरुषे समासे नपुंसकलिङ्गे कन्थाशब्द उत्तरपदमाद्युदात्तं भवति । सौशमिकन्थम् । आह्वकन्थम् । चप्पकन्थम् । संज्ञायां कन्थोशीनरेषु इति नपुंसकलिङ्गता । षष्ठीसमासा एते । नपुंसक इत्येव - दाक्षिकन्था ।।

आदिश्चिहणादीनाम् ।। 6 - 2 -125 ।।

कन्थान्ते तत्पुरुषे समासे नपुंसकलिङ्गे चिहणादीनामादिरुदात्तो भवति । चिहणकन्थम् । मडरकन्थम् । मड्डर इति केचित् पठन्ति । मड्डरकन्थम् । चिहण । मडर । मड्डर । वैतुल। पटत्क । तैत्तालिकर्णः । वैतालिकर्णिरित्यन्ये पठन्ति । कुक्कुट । चिक्कण । चित्कण इत्यपरे पठन्ति । चिहणादिः । आदिः इति वर्तमाने पुरादिग्रहणं पूर्वपदाद्युदात्तार्थम् ।।

चेलखेठकटुककाण्डं गर्हायाम् ।। 6 - 2 - 126 ।।

चेल, खेट, कटुक , काण्ड - इत्येतान्युत्तरपदानि तत्पुरुषे समासे गर्हायां गम्यमानायामाद्युदात्तानि भवन्ति । पुत्त्रचेलम् । भार्याचिलम् । उपानत्खेटम् । नगरखेटम् । दधिकटुकम् । उदश्वित्कटुकम् । भूतकाण्डम् । प्रजाकाण्डम् । चेलादीनां सादृश्येन पुत्रादीनां गर्हा, तत्र पुत्रश्चेलमिवेति विगृह्यव्याघ्रादेराकृतिगणत्वाद् उपमितं व्याघ्रादिभिः इति समासः । गर्हायामिति किम् परमचेलम् ।।

चीरमुपमानम् ।। 6 - 2 - 127 ।।

चीरमुत्तरपमदमुपमानवाचि तत्पुरुषे समासे आद्युदात्तं भवति । वस्त्रं चीरमिव वस्त्रचीरम् । पटचीरम् । कम्बलचीरम् । उपमानमिति किम् परमचीरम् ।।

कललसूपशाकं मिश्रे ।। 6 - 2 - 128 ।।

पलल, सूप , शाक - इत्येतान्युत्तरपदानि मिश्रवाचिनि तत्पुरुषे समासे आद्युदात्तानि भवन्ति । गुडपललम् । धृतपललम् । धृतसूपः । मूलकसूपः । धृतशाकम् । मुद्गशाकम् । गुडेन मिश्रं पललं गुडपललम् । भक्ष्येण मिश्रीकरणम् इति समासः । मिश्र इति किम् परमपललम् ।।

कूलसूदस्थलकर्षाः संज्ञायाम् ।। 6 - 2 - 129 ।।

कूल, सूद, स्थल, कर्ष - इत्येतान्युत्तरपदानि तत्पुरुषे समासे, संज्ञायां विषये आद्युदात्तानि भवन्ति । दाक्षिकूलम् । माहकिकूलम् । देवसूदम् । भाचोसूदम् । दाण्डायनस्थली । माहकिस्थली । दाक्षिकर्षः । ग्रामनामवेयान्यतानि । स्थलग्रहणम् - लिङ्गविशिष्टत्वात्स्थलोशब्दोऽपि गृह्यते । जानपादकुण्ड इत्यनेन ङीष्
। संज्ञायामिति किम् परमकूलम् ।।

अकर्मधारये राज्यम् ।। 6 - 2 - 130 ।।

कर्मधारयवर्जिते तत्पुरुषे समासे राज्यम् इत्येतदुत्तरपदमाद्युदात्तं भवति । ब्राह्मणराज्यम् । क्षत्त्रियराज्यम् । अकर्मधारय इति किम् परमराज्यम् । चेलरान्चादिस्वरादव्ययस्वरो भवति पूर्वविप्रतिषेधेन - कुचेलम् , कुराज्यम् ।।

वर्ग्यादयश्च ।। 6 - 2 - 131 ।।

वर्ग्य - इत्येवमादीन्युत्तरपदानि अकर्मधारये तत्पुरुषे समासे आद्युदात्तानि भवन्ति । वासुदेववर्ग्यः । वासुदेवपक्ष्यः । अर्जुनवर्ग्यः । अर्जुनपक्ष्यः । अकर्मधारय इत्येव - परमवर्ग्यः । वर्ग्यादय ः प्रातिपदिकेषु न पठ्यन्ते । दिगादिषु तु - वर्ग, पूग, गण, पक्ष - इत्येवमादयो यो पठिताः , त एव यत्प्रत्ययान्ता वर्ग्यादय इह प्रतिपत्तव्याः ।।

पुत्रः पुम्भ्यः ।। 6 - 2 - 132 ।।

पुत्रशब्दः पुंशब्देभ्य उत्तरस्तत्पुरुषे आद्युदात्तो भवति । कौनटिपुत्रः । दामकपुत्रः । माहिषकपुत्रः । पुत्र इति किम् कौनटिमातुलः । पुम्भ्य इति किम् गार्गीपुत्रः। वात्सीपुत्रः ।।

नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः ।। 6 - 2 - 133 ।।

आचार्यः - उपाध्यायः । राजा - ईश्वरः । ऋत्विजः - याजकाः । संयुक्ता - स्त्रीसम्बन्धिनः शयालादयः । ज्ञातयः -मातृपितृसम्बन्धिनो बान्धवाः । आचार्याद्याख्येभ्यः परः पुत्रशब्दो नाद्युदात्तो भवति । आख्याग्रहणात्स्वरुपस्य पर्यायाणां विशेषाणां च ग्रहणं भवति । आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः। राजपुत्रः।ईश्वरपुत्रः। नन्दपुत्रः। ऋत्विक्पुत्रः। याजकपुत्रः। होतुः पुत्रः। भ्रातुष्पुत्रः। ऋतो विद्यायोनिसम्बन्धेभ्यः इति षष्ठ्या अलुक् । संयुक्तपुत्रः। सम्बन्धिपुत्रः। श्यालपुत्रः। त्रातिपुत्रः। पुत्रस्वरे प्रतिषिद्धे समासान्तोदात्त्वमेव भवति ।।

चूर्णादीन्यप्राणिषष्ठ्याः ।। 6 - 2 - 134 ।।

उत्तरपदादिः इति वर्त्तते , तत्पुरुष इति छच । चूर्णादीन्युत्तरपदानि अप्राणिवाचिनः षष्ठ्यन्तात्पराणि तत्पुरुषे समासे आद्युदात्तानि भवन्ति । मुद्गवूर्णम् । मसूरजूर्णम् । अप्राणिषष्ठ्या इति किम् मत्स्यचूर्णम् । षष्ठ्या इति
किम् परमचूर्णम् । चूर्ण । करिप । करिव । शाकिन । शाकट । द्राक्षा । तूस्त । कुन्दम । दलप । चमसी । चक्कन । चौल । चूर्णादीन्यप्राण्युपग्रहात् इति सूत्रस्य पाठान्तरम् । तत्र उपग्रह इति षष्ठ्यन्तमेव पूर्वाचार्येपचारेण गृह्यते ।।

षट् च काण्डादीनि ।। 6 - 2 - 135 ।।

षट् पूर्वाक्तानि काण्डादीन्युत्तरपदानि अप्राणिषष्ठ्या आद्युदात्तानि भवन्ति । काण्डं गर्हायाम् इत्युक्तम् , अगर्हायामपि भवति - दर्भकाण्डम् , शरकाण्डम् । चीरमुपमानम् इत्युक्तम् , अनुपमानमपि भवति - दर्भचीरम्, कुशचीरम् । पललसूपशाकं मिश्रे इत्युक्तम् , अमिश्रेऽपि भवति - तिलपललम् , मुद्गसूपः, मूलकशाकम् । कूल संज्ञायाम् इत्युक्तम् , असंज्ञायामपि भवति - नदीकूलम् , समुद्रकूलम् । षडिति किम् राजसूदः ।।

कुण्डं वनम् ।। 6 - 2 - 136 ।।

कुण्डं - शब्दो।त्र कुण्डसादृश्येन वने वर्त्तते । कुण्डम् इत्येतदुत्तरपदं वनवाचि तत्पुरुषे समासे आद्युदात्तं भवति । दर्भकुण्डम् । शरकुण्डम् । वनमिति किम् मृत्कुण्डम् ।।

प्रकृत्या भगालम् ।। 6 - 2 - 137 ।।

भगालवाच्युत्तरपदं तत्पुरुषे समासे प्रकृतिस्वरं भवति । कुम्भीभगालम् । कुम्भीकपालम् । कुम्भीनदालम् । भगालादयो मध्योदात्ताः । प्रकृत्या इत्येतदधिकृतम् अन्तः इति यावद्वेदितव्यम् ।।

शितेर्नित्याबह्वज् बहुव्रीहावभसत् ।। 6 - 2 - 138 ।।

शितेरुत्तरपदं नित्यं यदबह्वज् भसच्छब्दवर्जितं बहुव्रीहौ समासे तत्प्रकृतिस्वरं भवति । शितिपादः। शित्यंसः ।
शित्योष्ठः । पादशब्दो वृषादित्वादाद्युदात्तः । अंसौष्ठशब्दौ च प्रत्ययस्य नित्त्वादाद्युदात्तौ । शितेरिति किम्
दर्शनीयपादः । नित्यग्रहणं किम् शितिककुत् । ककुदस्यावस्खायां लोपो विधीयते । तत्रावस्थाया अन्यत्र शितिककुद इति बह्वजुत्तरपदं भवतीति तेन न नित्याबह्वच् । अबह्वजिति किम् शितिललाटः। बहुव्रीहाविति, किम् शितेः पादः शितिपादः । आभसदिति किम् शितिभसद् । शितिशब्द आद्युदात्तः । पूर्वपदप्रकृतिकस्वरापवादो योगः ।।

गतिकारकोपपदात्कृत् ।। 6 - 2 - 139 ।।

तत्पुरुषे इति वर्त्तते , न बहुव्रीहौ इति । गतेः कारकादुपपदाञ्च कृदन्तमुत्तरपदं तत्पुरुषे समासे प्रकृतिस्वरं भवति । प्रकारकः । प्रकरणम् । प्रहारकः । प्रहरणम् । कारकात् - इध्मप्रप्रश्चनः । पलाशशातनः । श्मश्रुकल्पनः । उपपदात् - ईषत्करः । दुष्करः । सुकरः । सर्वत्रैवात्र लित्स्वरः । गतिकारकोपपदादिति किम् देवदत्तस्य कारको देवदत्तकारकः । देवदत्तस्येति शेषलक्षणा षष्ठी । कृद्ग्रहणं विस्पष्टार्थम् । प्रपचतितराम्, प्रपचतितमाम् । इत्यत्र तरबाद्यन्तेन समासे कृते पश्चादाम् , तत्र सतिशिष्टत्वादाम एव स्वरे भवतीत्येके । प्रपचतिदेशेयाद्यर्थ तु कृद्ग्रहणं दृश्यत एव ।।

उभे वनस्पत्यादिषु युगपत् ।। 6 - 2 - 140 ।।

प्रकृत्या इति वर्त्तते । वनस्पत्यादिषु समासेषु उभे पूर्वोत्तरपदे युगपत् प्रकृतिस्वरे भवतः । वनस्पतिः। वन - पितशब्दावाद्युदात्तौ, पारस्करप्रभृतित्वात् सुट् । बृहस्पतिः ।बृहतां पतिः , तद्बृहतोः कारपत्योश्चोरदेवतयोः सुट् तलोपश्चः इति सुट्, तकारलोपश्च । बृहदित्येतदन्तोदात्तं निपातयन्ति । तस्य केचिदाद्युदात्तत्वं वर्णयन्ति । शचीपतिः । शचीशब्दः कृदिकारादक्तिनः इति ङीषन्तत्वादन्तोदात्तः। केचित्तु शाङ्गर्रवादिषु पठन्ति , तेषामाद्युदात्तः । तनूनपात् । तनोते रौणादिक ऊप्रत्ययः , तेन तनूशब्दोऽन्तोदात्तः । न पाति न पालयति वा नपात्, क्विबन्तः नभ्राण्नपात् इत्यादिनाऽऽद्युदात्तो निपातितः । तन्वा नपात्, तनूनपात् । नराशंसः । नरा अस्मिन्नासीनाः शासन्ति नरा एवं शंसन्तीति वा नराशंसः । नृ नये , अबन्तो नरशब्द आद्युदात्तः । शंसशब्दोऽपि धञन्तः , अन्येषामपि दृश्यते इति दीर्घत्वम् । शुनःशेपः । सुन इव शेपोऽस्येति बहुव्रीहिः । तत्र शेपपुच्छलाङ्गूलेषु शुनः संज्ञायाम् इति षष्ठ्या अलुक् । उपावाद्युदात्तौ । शाण्डापर्कौ । शण्ड-पर्कशब्दौ धञन्तत्वादाद्युदात्तौ । तयोर्द्वन्द्वे अन्येषामपि दृश्यते इति दीर्घत्वम् । तृष्णावरुत्री । तृष्णाशब्द आद्युदात्तः, वरुत्रीशब्दो ग्रसितादिसूत्रे निपातितोऽन्तोऽन्तोदात्तः । तत्र द्वन्द्वे दीर्घत्वं पूर्ववत् । बम्बाविश्ववयसौ । बम्बशब्दोऽन्तोदात्तः । तयोर्द्वन्द्वे दीर्घत्वं पूर्ववत् । मर्मृत्युः । मरिति मृञो विच्प्रत्ययः । मृत्युशब्दोऽन्तोदात्तः । द्वन्द्वानामदेवताद्वन्द्वार्थः , अनुदात्ताद्युत्तरपदार्थश्च वनस्पत्यादिषु पाठः ।।

देवताद्वन्द्वे च ।। 6 - 2 - 141 ।।

देवतावाचिनां यो द्वन्द्वस्तत्र युगपदुभे पूर्वोत्तरपदे प्रकृतिस्वरे भवतः इन्द्रासोमौ । इन्द्रावरुणौ । इन्द्राबृहस्पती । ऋज्रेन्द्राग्र इति इन्द्रशब्द आद्युदात्तो निपातितः । सोम इति मन्प्रत्ययान्तः । वरुणउनन्प्रत्ययान्तः , तेनाद्युदात्तः । बृहस्पतिशब्दे वनस्पत्यादित्वाद् द्वावुदात्तौ, तेन इन्द्राबृहस्पती - इत्यत्र त्रय उदात्ता भवन्ति । देवताग्रहणं किम् प्लक्षन्यग्रोधौ । द्वन्द्वग्रहणं किम् अग्निष्टोमः ।।

नोत्तरपदेऽनुदात्तादवपृथिवीरुद्रपूषमन्थिषु ।। 6 - 2 - 142 ।।

उत्तरपदेऽनुदात्तादौ पृखिवीरुद्रपूषमन्थिवर्जिते देवताद्वन्द्वे नोभे युगपत्प्रकृतिस्वरे भवतः । इन्द्राग्नी । इन्द्रवायु । अग्नि - वायुशब्दावन्तोदात्तौ । उत्तरपदग्रहणम् अनुदात्तादौ इत्युत्तरपदविशेषणं यथा स्याद, द्वन्द्वविशेषणं मा
भूदिति । अनुदात्तादौ इति विधिप्रतिषेधयोर्विषयविभागार्थम् । अपृथिव्यादिष्विति किम् द्यावावृथिव्यौ । द्यावाशब्द आद्युदात्तो निपातितः । पृथिवीशब्दो ङीष्प्रत्ययान्तत्वादन्तोदात्तः । रुद्र - सौमारुद्रौ । रोदेर्णिलुक्च इति रुद्रशब्दो रक्प्रतययान्तोऽन्तोदात्तः ।पूषन् - इन्द्रापूषणौ । श्वन्नुक्षन्पूषन् इति पूषान्तोदात्तो

निपात्येत । मन्थिन् - शुकामन्थिनौ । मन्थोऽस्यास्तीति मन्थी , इन्नन्तत्वादान्तोदात्तः । दृथिव्यादिषु तु उभे युगपत् प्रकृतिस्वरे भवत एव ।।
अन्तः ।। 6 - 2 -143 ।।
अन्तः इत्यधिकारः । यदित ऊर्ध्वमनुकमिष्यामस्तत्र समासस्योत्तरपदस्यान्त उदात्तो भवतीत्येवं तद्वेदितव्यम् ।
वक्ष्यति - थाथधञ्क्ताजबित्रकाणाम् इति । सुनीथः । अवभृथः ।।
थाथधञ्क्ताजबित्रकारणाम् ।। 6 - 2 - 144 ।।
थ , अथ, धञ् , क्त, अप् , इत्र , क - इत्येवमन्तानामुत्तरपदानां गतिकारकोपपदात्परेषामन्त उदात्तो भवति । सुनीथः । अवभृथः ।
हनिकुषिनीरमिकाशिभ्यः क्थन् इति अवे भृञः इति च क्थान्प्रत्ययान्तावेतौ । तत्र कृदुत्तरपदप्रकृतिस्वरत्वेनाद्युदात्तरपदं स्यात् । अथ - आवसथः ।
उपवसथः । उपसर्गे वसेः इत्यथन्प्रत्ययः । घञ् - प्रभेदः । काष्ठभेदः । रज्जुभेदः । क्त - दूरादागतः । विशुष्कः । आतपशुष्कः । अच् -प्रक्षयः ।
प्रजयः । क्षयो निनासे जयः करणम् तइथति आद्युदात्तौ क्षयजयशब्दौ प्रयोजयतः । अप् - प्रलवः । प्रसवः । इत्र - प्रलवित्रम् । प्रसवित्रम् । क - गोवृषः
खरीवृषः । गां वर्षति , खरीं वर्षतीति मूलविभुजा दित्वात्कप्रत्ययः । प्रवृषः । प्रह्वषः । इगुपध इति कप्रत्ययः । वृषादीनां च इति वृषशब्द आद्युदात्तः ।
गतिकारकोपपदादित्येव - सुस्तुतं भवता । कर्मप्रवचनीयेऽव्ययस्वर एव भवति ।।
सूपमानात् क्तः ।। 6 - 2 - 145 ।।
सु इत्येतस्मादुपमानाञ्च परं क्तान्तमुत्तरपदमन्तोदात्तं भवति । सुकृतम् । सुभुक्तम् । उपमानात् - वृकावलुप्तम् । शशप्लुतम् । सिंहविनर्दितम् । सुशब्दाद्
गतिरनन्तलः इति प्राप्ते उपमानादषि तृतीया कर्मणि इति अयमपवादः । ग्तिकारकोपपदादित्येव - सुस्तुतं भवता ।ः
संज्ञायामनाचितादीनाम् ।। 6 - 2 - 146 ।।
संज्ञायां विषये गतिकारकोपपदात् क्तान्तमुत्तरपदमन्तोदात्तं भवति आचितादीन्वर्जयित्वा । सम्भूतो रामायणः । उपहूतः शाकल्यः । परिजग्धः कौण्डिन्यः ।
सम्भूत इति प्राप्त्यर्थाद भवतेः कर्मणि क्तः । गतिरनन्तरः इत्यत्र हि कर्मणि इत्यनुवर्त्तते , तद्बाधनार्थ चेदम् । धनुष्खाता नदी । कुद्दलखाता नगरी ।
हस्तिमृदिता भूमिः । तृतीया कर्मणि इति प्राप्तिरिह बाध्यते ।अनाचितादीनामिति किम् आचितम् । पर्याचितम् । पर्याचितम् । आस्थापितम् । परगृहीतम् ।
निरुक्तम् । प्रतिपन्नम् । प्रशिलष्टम् । प्रशिलष्टम् । उपहतम् । उपस्थितम् ।। संहिताऽगवि । संहिताशब्दो यदा गोरन्यस्य संज्ञा, तदाऽन्तोदात्त एव ।।
प्रवृद्धादीनां च ।। 6 - 2 - 147 ।।
प्रवृद्धादीनां च क्तान्तमुत्तरपदमन्तोदात्तं भवति । प्रवृद्धं यानम् । प्रवृद्धो वृषलः । प्रयुक्तः सक्तवः । आकर्षेऽवहितः । अवहितो भोगेषु । खट्वाखढः ।
कविशस्तः । यानादीनामत्र गणे पाठः प्रयोवृत्तिप्रदर्शनार्थंः ष न विषयनियमार्थः । यानादिभ्योऽन्यत्रापि तेषामन्तोदात्तत्वं भवत्येव । विषयनियमार्थं एवेत्येके
। असंज्ञार्थोऽयमारम्भः । आकृतिगणश्च प्रवृद्धादिर्द्रष्टव्यः । तेन पुरुस्यूतं वासो देयम् , पुनर्निष्कृतो रथः - इत्येवमादि सिद्धं भवति ।।
कारकाद्दत्तश्रुतयोरेवाशिषि ।। 6 - 2 - 148 ।।
संज्ञायाम् इति वर्त्तते क्तः इति च । संज्ञायां विषये आशिषि गम्यमानायां कारकादुत्तरयोर्दत्तश्रुतयोरेव क्तान्तयोरन्त उदात्तो भवति । देवा एनं देयासुर्द्रवदत्तः
। विष्णुरेनं श्रूयाद् विष्णुश्रुतः । कारकादिति किम् कारकान्नियमे म् भूत् - सम्भूतो रामायणः । दत्तश्रुतयोरिति किम् देवपालितः । एतस्मान्निमादत्र
संज्ञायामनाचितादीनाम् इत्यन्तोदात्तत्वं न भवति , तृतीया कर्मणि इत्येवात्र भवति । एवकारकरणं किम् कारकावधारणं यथा स्याद्, दत्तश्रूतावधारणं मा
भूत् । अकारकादपि दत्तश्रुतयोरन्त उदात्तो भवति - संश्रुतः, विश्रुतः । आशिषीति किम् अनाशिषि नियमो मा भूत् । देवैझ खाता देवखाता ।
कारकाद्दत्तश्रुतयोराशिष्येव - इत्यमप्यत्र नियम् इष्यते , तेनाहतो नदति देवदत्त इत्यत्र न भवति । देवदत्त इति कस्यचित् शङ्खस्य नाम । तत्र तुतीया
कर्मणि इति पूर्वपदप्रकृतिस्वरत्वमेव भवति ।।
इत्थम्भूतेन कृतमिति च ।। 6 - 2 -149 ।।
इमं प्रकारमापन्नः - इत्थम्भूतः । इत्थम्भूतेन कृतम् इत्येतस्मिन्नर्थे यः समासो वर्त्तते तत्र क्तान्तमुत्तरपदमन्तोदात्तं भवति । सुप्तप्रलपितम् । उन्मत्तप्रलपितम्
। प्रमगीतम् । विपन्नश्रुतम् । कृतम् इति क्रियासामान्ये करोतिर्वर्त्तते, नाभूतप्रादुर्भाव एव तेन प्रलपिताद्यपि कृतं भवति । तृतीया कर्मणि इत्यस्यायमपवादः
। भावे तु
यदि प्रलपितादयः , तदा थाथादिस्वरेणैव सिद्धमन्तोदात्तं भवति ।
अनो भावकर्मवचनः ।। 6 - 2 - 150 ।।
अनप्रत्ययान्तमुत्तरपदं भाववचनं कर्मवचनं च कारकात्परमन्तोदात्तं भवति । ओदनभोजनं सुखम् । पयः पानं सुखम् । चन्द्नप्रियङ्गुकालेपनं सुखम् ।
कर्मवचन - राजभोजनाः शालयः। राजाच्छाददानि वासांसि । कर्माणि च येन संस्पर्शात्कर्तुः शरीरसुखम् इत्ययं योग उभयथा वर्ण्यते - कर्मण्युपपदे भावे
ल्युङ् भवति, कर्मण्यभिधेये ल्युड् भवतीति । तत्र पूर्वस्मिन् सूत्रार्थे भाववचनोदाहरणानि, उत्तरत्र कर्मवचनोदाहरणानि । अन इति किम् हस्तहार्यमुदश्वित्
। भावकर्मवचन इति किम् दन्तधावनम् । करणे ल्युट् । कारकादित्येव - निदर्शनम् । अवलेखनम् । सर्वेषु प्रत्युदाहरणेषु प्रकृतिस्वरो भवति ।।
मन्क्तिन्व्याख्यानशयनासनस्थानयाकादिक्रीयाः ।। 6 - 2 - 151 ।।
मन्नन्तम् , क्तिन्नन्तम् , व्याख्यान, शयन, आसन, स्थान - इत्येतानि, याजकादयः , क्रीतशब्दश्चोत्तरपदमन्तोदात्तं भवति । मन् - रथवर्त्मं , शकटवर्त्मं ।
क्तिन् - पाणिनिकृतिः आपिशालिकृतिः । व्याख्यान - ऋगयनव्याख्यानम् , छन्दोव्याख्यानम् । शयन - राजशयनम्, ब्राह्मणशयनम्, आसन - राजासनम्,

ब्राह्मणासनम्, स्थान - गोस्थानम् , अश्वस्थानम् . याजकादिः - ब्राह्मणासनम् । स्थान - गोस्थानम् , अश्वस्थानम् । याजकादिः - ब्राह्मणयाजकः । क्षत्त्रिययाजकः । ब्राह्मणपूजकः । क्षत्त्रि.यपूजकः । याजकादयो ये याजकादिभिश्च इति षष्ठी समासार्थाः पठ्यन्ते त एवेह गृह्यन्ते । क्रीत - गोक्रीतः । अश्वक्रीय। कृत्स्वरापवादोऽयं योगः । क्रीतशब्दे तु तृतीया कर्मणि इत्यस्यापवादः। व्याख्यानशयनासनस्खानानामभावकर्मार्थं ग्रहणम् । कारकादित्येव - प्रकृतिः । प्रह्वतिः ।।

सप्तम्याः पुष्यम् ।। 6 - 2 - 152 ।।

सप्तम्यन्तात्परं पुण्यमित्येतदुत्तरपदमन्तोदात्तं भवति । अध्ययने पुण्यम् अध्ययनपुण्यम् । वेदे पुण्यं वेदपुण्यम् । सप्तमी इति योगविभागात्समासः । तत्पुरुषे तुल्यार्थ इति पूर्वपदप्रकृतिस्वरत्वं प्राप्तमित्यन्तोदात्तत्वं विधीयते । उणादीनां तु व्युत्पत्तिपक्षे - कृत्स्वरेणाद्युदात्तः पुण्यशब्दः स्यादिति ।सप्तम्या इति किम् वेदेन पुण्यं वेदपुण्यम् ।।

ऊनार्थकलहं तृतीयायाः ।। 6 - 2 - 143 ।।

ऊनार्थान्युत्तरपदानि, कलहशब्दश्च तृतीयान्तात् परणअयन्तोदात्तानि भवन्ति । माषोनम् । कार्शापणोनम् । माषविकलम् । कार्षापणविकलम् । कलह - असिकलहः । वाक्कलहः । तृतीयापूर्वपदप्रकृतिस्वरापवादो योगः । अत्र केविदर्थ इति स्वरुपग्रहणमिच्छिन्ति । धान्येनार्थो प्रतिपदोक्तत्वादेव तृतीयसमासपरिग्रहे सिद्धे तृतीयाग्रहणं विस्पष्टार्थम् ।।

मिश्रं चानुपसर्गमसन्धौ ।। 6 - 2 -154 ।।

तृतीया इति वर्त्तते । मिश्र - इत्येतदुत्तरपदमनुपसर्गं तृतीयान्तात्परमन्तोदात्तं भवत्यसन्धौ गम्यमाने । गुडमिश्राः । तिलमिश्राः । सर्पिर्मिश्राः । मिश्रमिति किम् गुधानाः । अनुपसर्गमिति किम् गुडसम्मिश्राः । इहानुपसर्गग्रहणं ज्ञापकम् - अन्यत्र मिश्रग्रहणे सोपसर्गग्रहणस्य । तेन मिश्रश्लक्ष्णैरिति सोपसर्गेणापि मिश्रशब्देन तृतीयासमासो भवति । असन्धाविति किम् ब्राह्मणमिश्रो राजा । ब्राह्मणैः सह संहितः - ऐकार्ध्यमापन्नः । सन्धरिति हि पणबन्धेनैकार्थ्यमुच्यते । केचित्पुनराहुः - गृह्यमाणविशेषा प्रत्यासत्तिः - सन्धिरिति, अत्र राज्ञो बाह्मणैः सह देशप्रत्यासत्तावपि सत्यां मूर्त्तिविभागस्वरुपभेदो गृह्यत इति ब्राह्मणमिश्रो राजेति प्रत्युदाह्नियते । उदाहरणेष्वविभागापत्तिरेव - गुडमिश्रा इति ।।

नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः ।। 6 - 2 - 155 ।।

सम्पादि, अर्ह, हित, अलम् - इत्येवमर्था ये तद्धितास्तदन्तान्युत्तरपदानि नञो गुणप्रतिषेधे वर्त्तमानात् पराण्यन्तोदात्तानि भवन्ति । सम्पादिः कर्णवेष्टकाभ्यां सम्पादि मुखं कार्णवेष्टकिकम्, न कार्णवेष्टकिकम् थअकार्णवेष्टकिकम् । अर्ह - छेदमर्ङति छैदिकः , न छैदिकोऽच्छैदिकः । हित - वत्सेभ्यो हितो वत्सीयः , न वत्सीयोऽवत्सीयः । अलमर्थ - सन्तापाय प्रभवति सान्तापिकः, न सान्तापिकोऽसान्तापिकः । नञ इति किम् गर्दभरथमर्हति गार्दभरथिकः । विगार्दभरथिकः । गुणप्रतिषेध इति किम् गार्दभरथिकादन्योऽगार्दभरथिकः । गुण इति तद्धितार्थप्रवृत्तनिमित्तं सम्पादित्वाद्युच्यते । तत्प्रतिषेधो यत्रोच्यते समासे तत्रायं विधिः । कर्णवेष्टकाभ्यां न सम्पादि मुखमिति सम्पाद्युर्हहितालमर्था इति किम् पाणिनीयमधीते पाणिनीयः , नपाणिनीयोऽपाणिनीयः । तद्धिता इति किम् कन्यां वोढुमर्हति कन्यावोढा, न वोढा अवोढा - अर्हे कृत्यतृचश्च इति तृच् ।।

ययतोश्चातदर्थे ।। 6 - 2 - 156 ।।

य , यत् - इत्येतौ यौ तद्धितावतदर्थे वर्त्तेते तदन्तस्योत्तरपदस्य नञो गुणप्रतिषेधविषयादन्त उदात्तो भवति । पाशानां समूहः पाश्या , न पाश्या अपाश्या । अतृण्या । यत् - दन्त्तेषु भवं दन्त्यम् , न दन्त्यम् दन्त्यम् । अकर्ण्यम् । अतदर्थ इति किम् पादर्थमुदकं पाद्यम्, न पाद्यमपाद्यम् । तद्धिता इत्येव - अदेयम् । गुणप्रतिषेध इत्येव - दन्त्यादन्यत् अदन्त्यम् । निरनुबन्धकैकानुबन्धकयोर्ययतोर्ग्रहणादिह न भवति - वामदेवाङ् ड्यड्ड्यौ - वामदेव्यम् , न वामदेव्यमवामदेव्यमिति ।।

अच्कावशक्तौ ।। 6 - 2 - 157 ।।

अच् , क - इत्येवमन्तमशक्तौ गम्यमानायामुत्तरपदं नञः परमन्तोदात्तं भवति । अपचो यः पक्तुं न शक्नोति । अजयः । कः खल्वपि - अविक्षिपः । अविलिखः । अशक्ताविति किम् अपचः , दीक्षितः । अपचः पिरप्राजकः ।।

आक्रोशेच ।। 6 - 2 -158 ।।

आक्रोशे च गम्यमाने नञ उत्तरमच्कान्तमन्तोदात्तं भवति । अपचोऽयं जाल्मः । अपठोऽयं जाल्मः । पक्तुं पठितुं शक्तोऽप्येवमाक्रुश्यते । अविक्षिपः । अविलिखः ।।

संज्ञायाम् ।। 6 - 2 - 159 ।।

आक्रोशे गम्यमाने नञः परमुत्तरपदं संज्ञाया वर्त्तमानमन्तोदात्तं भवति । अदेवदत्तः । अयज्ञदत्तः । अविष्णुमित्रः।।

कृत्योकेष्णुञ्चार्वादयश्च ।। 6 - 2 - 160 ।।

कृत्य, उक , इष्णुच् - इत्येवमन्ताश्चार्वादयश्च नञ उत्तरेऽन्तोदात्ता भवन्ति । कृत्य - अकर्त्तव्यम् । अकारणीयम् । उक्- अनागामुकम् । अनपलाषुकम् । इष्णुच् - अनलङ्करिष्णुः । अनिराकरिष्णुः । इष्णुज्ग्रहणे कर्त्तरि भुवः खिष्णुच् थइत्स्य द्व्यनुबन्धकस्यापि ग्रहणमिकारादेर्वधानसामर्थ्याद् भवति । अनाढ्यम्भविष्णुः । असुभगम्भविष्णुः । चार्वादयः - अचारुः । असाधुः । अयौधिकः । अवदान्यः छ चारु । साधु । यौधिक । अनङ्गमेजय । अत्र द्वितीये नञ्समासेऽन्तोदात्तत्वम् । अनङ्गमेजयः । वदान्यझ । अकस्मात् । अत्रापि द्वितीये नञ्समासेऽन्तीदात्तत्वम् - अनकस्मात्

वर्त्तमानवर्द्धमानत्वरमाणध्रियमाणक्रियमाणरोचमानशोभमानाः संज्ञायाम् । एते वर्त्तमानादयः संज्ञायां द्रष्टव्याः । विकारसदृशे व्यस्तसमस्ते । अविकारः । असदृशः । अविकारसदृशः । गृहिपति । गृहपतिकः । राजाह्नोश्छन्दसि । अराजा । अनहः । भाषायां नञ्स्वर एव भवति । चार्वादिः ।।

विभाषा तृन्नन्नतीक्ष्णशुचिषु ।। 6 - 2 - 161 ।।

तृन्नन्त , अन्न, तीक्ष्ण, शुचि - इत्येतेषु नञ उत्तरेषु विभाषाऽन्त उतात्तो भवति । अकर्त्ता । अन्न - अनन्नम् । तीक्ष्ण - अतीक्ष्णम् । शुचि - अशुचिः । पक्षे - अव्ययस्वर एव भवति ।।

बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ।। 6 - 2 - 162 ।।

बहुव्रीहौ समासे इदम् , एतद् , तत् - इत्येतेभ्य उत्तरस्य प्रखमशब्दस्य पूरणप्रत्ययान्तस्य च क्रीयागणनवर्त्तमानस्यान्त उदात्तो भवति । इदं प्रथमं गमनं भोजनं वा स इदम्प्रथमः, इदन्द्वितीयः , इदन्तृतीयः । एतत्प्रथमः, एतद्द्वितीयः, एतत्तृतीयः । तत्प्रथमः, तद्द्वितीयः, तत्तृतीयः । बहुव्रीहाविति किम् अनेन प्रथम इदम्प्रथमः । तृतीया इति योगविभागात्समासः । इदमेतत्तद्भ्य इति किम् यत्प्रथमः । प्रथमपूरणयोरिति किम् तानि बहून्यस्य तद्बहुः । क्रियागणन इति किम् अयं प्रथम एषां त इदम्प्रथमाः । द्रव्यगणनमेतत् । गणन इति
किम् अयं प्रथम एषामिदम्प्रथमाः । इदाम्प्रधाना इत्यर्थः । उत्तरपदस्य कार्यित्वात् कपि पूर्वमन्तोदात्तं भवति । इदम्प्रथमकाः । बहुव्रीहौ इत्येतद् वनं समासे इति प्रागेतस्मादधिकृतं वेदितव्यम् ।।

संख्यायाः स्तनः ।। 6 - 2 - 163 ।।

संख्यायाः परः स्तनशब्दो बहुव्रीहौ समासेऽन्तोदात्तो भवति । द्विस्तना । त्रिस्तना । चतुः स्तना। संख्याया इति किम् दर्शनीयस्तना । स्तन इति किम् द्विशिराः ।।

विभाषा छन्दसि ।। 6 - 2 - 164 ।।

छन्दसि विषये बहुव्रीहौ समासे संश्यायाः परः स्तनशब्दो विभाषाऽन्तोदात्तो भवति । द्विस्तनां कुर्याद्वामदेवः द्विस्तनां करोति द्यावापृखिव्योर्दोहाय । चतुः स्तनां करोति पशूनां दोह्मय। चतुः स्तनां करोति ।।

शंज्ञायां मित्त्राजिनयोः ।। 6 - 2 - 165 ।।

संज्ञायां विषये बहुव्रीहौ समासे मित्त्र, अजिन - इत्येतयोरुत्तरपदयोरन्त उदात्तो भवति । देवमित्त्रः । ब्रह्ममित्त्रः । वृकाजिनः । कूलाजिनः । कृष्णाजिनः ।। संज्ञायामिति किम् प्रियमित्त्रः । महाजिनः । ऋषिप्रितिषेधो मित्त्रे । विश्वामित्त्र ऋषिः ।।

व्यवायिनोऽन्तरम् ।। 6 - 2 - 166 ।।

व्यवायी - व्यवधाता, तद्वाचिनः परमन्तरं बहुव्रीहौ समासेऽन्तोदात्तं भवति । बस्त्रान्तरः । वटान्तरः । कम्बलान्तरः । वस्त्रमन्तरं व्यवधायकं यस्य स वस्त्रान्तरं । वस्त्र्व्यवधायक इत्यर्थः । व्यवायिन इति किम् आत्मान्तरः । आत्मा - स्वभावोऽन्तरः - अन्यो यस्यासावात्मान्तरः ।।

मुखं स्वाङ्गम् ।। 6 - 2 - 167 ।।

मुखमुत्तरपदं स्वाङ्गवाचि बहुव्रीहौ समासेऽन्तोदात्तं भवति । गौरमुखः । भद्रमुखः । स्वाङ्गमिति किम् दीर्घमुखा शाला । स्वाङ्गमद्रवादिलत्रणमिह गृह्यते ।।

नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ।। 6 - 2 - 168 ।।

अव्यय, दिक्शब्द, गो , महत् , स्थूल, मुष्टि, पृथु, वत्स - इत्येतेभ्यः परं मुखं स्वाङ्गवाचि बहुव्रीहौ समासे नान्तोदात्तं भवति । अव्यय - उञ्चेर्मुखः । नीचैर्मुखः । दिक्शब्द - प्राङ्मुखः । प्रत्यङ्मुखः । गो - गोमुखः । महत् - महामुखः । स्थूल - स्थूलमुखः । मुष्टि -मुष्टिमुखः । पृथु - पृथुमुखः । वत्स - वत्समुखः । पूर्वपदप्रकृतिस्वरो यथायोगमेषु भवति । गोमुषुटिवत्सबूर्वस्योपमानलक्षणो विकल्पः पूर्वविप्रतिषेधेन बाध्यते ।।

निष्ठोपमानादन्यतरस्याम् ।। 6 - 2 - 169 ।।

निष्ठान्तादुपमानवाचिनश्च मुखं स्वाङ्गमुत्तरपदमन्यतरस्यां बहुव्रीहौ समासेऽनेतोदात्तं भवति । प्रक्षालितमुखः । यदैतदुत्तरपदान्तोदात्तत्वं न भवति, तदा निष्ठोपसर्गपूर्वमन्यतरस्याम् इति पक्षे पूर्वपदान्तोदात्तत्वम् , तदभावपक्षेऽपि पूर्वपदप्रकृतिस्वरत्वेन गतिस्वर इति त्रीण्युदाहरणानि भवन्ति । उपमानात् - सिंहमुखः । व्याघ्रमुखः ।।

जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नः ।। 6 - 2 - 170 ।।

जातिवाचिन आच्छादनवर्जितात् कालवाचिनः सुखादिभ्यश्च परं क्तान्तं कृतमितप्रतिपन्नान् वर्जयित्वा बहुव्रीहौ समासेऽन्तोदात्तं भवति । शाङ्गरजग्धः । पलाण्डुभक्षितः । सुरापीतः । काल - मासजातः । संवत्सरजातः । द्व्यहजातः । त्र्यहजातः । सुखादिभ्यः - सुखजातः । दुःखजातः । तृप्रजातः ।जात्यादिभ्य इति किम् पुत्रजातः। आहिताग्न्यादित्वात्परनिपातः । अनाच्छादनादिति किम् वस्त्रच्छन्नः । वसनच्छन्नः । अकृतमितप्रतिपन्न इति किम् कुण्डकृतः । कुण्डमितः । कुण्डप्रतिपन्नः । एतेषु बहुव्रीहिषु निष्ठान्तस्य पूर्वनिपातो न भवति अस्मादेव ज्ञापकात् । प्रत्युदाहरणेषु पूर्वपदप्रकृतिस्वरो योजयोतव्यः । सुखादयस्तृतीयेऽध्याये चपठ्यन्ते ।।

वा जात ।। 6 - 2 - 171 ।।

जातशब्द उत्तरवदे वाऽन्त उदात्तो भवति बहुव्रीहौ समासे जातिकालसुखादिभ्यः । दन्तजातः । स्तनजातः । कालात् - मासजातः । संवत्सरजातः । सुखादिभ्यः - सुखजातः । दुःखजातः ।।

नञ्सुभ्याम् ।। 6 - 2 - 172 ।।

नञ्सुभ्यां परमुत्तरपदं बहुव्रीहौ समासेऽन्तोदात्तं भवति । अयवोदेशः अव्रीहिः । अमाषः । सुयवः । सुव्रीहिः । सुमाषः । समासस्यैतदन्तोदात्तत्वमिष्यते । समासान्ताश्चावयवा भवन्तीतिअनृचः बह्वृच इत्यत्र कृते समासान्तेऽन्तोदात्तत्वं भवति ।।

कपि पूर्वम् ।। 6 - 2 -173 ।।

नञ्सुभ्यां कपि परतः पूर्वमन्तोदात्तं भवति । अकुमारीको देशः । अवृषलीकः । अब्रह्मबन्धूकः । सुकुमारीकः । सुवृषलीकः । सुब्रह्मबन्धूकः।।

ह्रस्वान्तेऽन्त्यात्पूर्वम् ।। 6 - 2 - 174 ।।

ह्रस्वोऽन्तो यस्य तदिदं ह्रस्वान्तमुत्तरपदं समासो वा, तत्रान्त्यात् पूर्वमुदात्तं भवति कपि परतो नञ्सुभ्यां परं बहुव्रीहौ समासे । अयवको देशः । अव्रीहिकः । अमाषकः । सुयवकः । सुव्रीहिकः । सुमाषकः । पूर्वमिति वर्त्तमाने पुनः पूर्वग्रहणं प्रवृत्तिभेदेन नियमप्रतिपत्त्यर्थम्ह्रस्वान्तेऽन्त्यादेव पूर्वमुदात्तं भवति, न कपि पूर्वमिति । तेनाज्ञकः , सुज्ञक इत्यत्र कबन्तस्यैवान्तोदात्तत्वं भवति ।।

बहोर्नञ्वदुत्तरपदभूम्नि ।। 6 - 2 -175 ।।

उत्तरपदार्थबहुत्वे यो बहुशब्दो वर्त्तते तस्मान्नञ इव स्वरो भवति । नञ्सुभ्याम इत्युक्तम्, बहोरपि तथा भवति - बहुयवो देशः, बहुव्रीहिः , बहुतिलः। कपि पूर्वम् इत्युक्तम्, बहोरपि तथा भवति - बहुकुमारीको दशः, बहुवृषलीकः , बहुब्रह्मबन्धूकः । ह्रस्वव्रीहिकः, बहुमाषकः । नञो जरमरमित्त्रमृताः । इत्युक्तम् , बहोरपि तथा भवति - बहुजरः । बहुमरः । पहुमितत्रः । वहुमृतः । उत्तरपदभूम्नीति किम् बहुषु मनोऽस्य बहुमना अयम् ।।

न गुणादयोऽवयवाः ।। 6 - 2 -176 ।।

गुणादयोऽवयवाचिनो बहोरुत्तरे बहुव्रीहौ नान्तोदात्ता भवन्ति । बहुगुणा रज्जुः । बह्वक्षरं पदम् । बहुच्छन्दोमानम् । बहुसुक्तः । बहुध्यायः । गुणादिराकृतिगणो द्रष्टव्यः । अवयवा इति किम् बहुगुणो ब्राह्मणः अध्ययनश्रुतसदाचारादयोऽत्र गुणाः ।।

उपसर्गात् स्वाङ्गं ध्रुवमपशु ।। 6 - 2 - 177 ।।

उपसर्गात् स्वाङ्गं ध्रुवं पर्शुवर्जितमन्तोदात्तं भवति बहुव्रीहौ समासे । प्रवृष्ठः । प्रोदरः । प्रललाटः । ध्रुवम् इत्येकरुपमुच्यते । ध्रुवमस्य शीतमिति यथा । सततं यस्य प्रगतं पृष्ठं भवति स प्रपृष्ठ । उपसर्गादिति किम् दर्शनीयललाटः । स्वाङ्गमिति किम् प्रशाखो वृक्षः । ध्रुवमिति किम् उद्वाहुः क्रोशति। अपर्श्विति किम् उत्पर्शु । विपर्शु ।।

वनं समासे ।। 6 - 2 - 178 ।।

समासमात्रे वनम् इत्येतदुत्तरपदमुपसर्गात्परमन्तोदात्तं भवति । प्रवणे यष्टव्यम् । निर्वणे प्रणिधीयते । प्रनिरन्तरः बहुव्रीहावेव हि स्यात् ।।

अन्तः ।। 6 - 2 - 179।।

अन्तशशब्दादुत्तरं वनमन्तोदात्तं भवति । अन्तर्वणो देशः । अनुपसर्गार्थं आरम्भः ।।

अन्तश्चः ।। 6 - 2 - 180 ।।

अन्तशशब्दश्चोत्तरपदमुपसर्गादन्तोदात्तं भवति । प्रान्तः । पर्यन्तः । बहुव्रीहिरयम् , प्रादिसमासो वा ।।

न निविभ्याम् ।। 6 - 2 - 181 ।।

नि, वि - इत्येताभ्यामुत्तरो।न्तशब्दो नान्तोदात्तो भवति । न्यन्तः । व्यन्तः । पूर्वपदप्रकृतिस्वरत्वे कृते यणादेशाः तत्र उदात्तस्वरितयोर्यणः स्वरितोऽनिदात्तस्य इति स्वरितो भवति ।।

परेरभितोभावि मण्डलम् ।। 6 - 2 - 182 ।।

परेरुत्तरमभितोभाविवचनं मण्डलं चान्तोदात्तं भवति । परिकूलम् । परितोरम् । परिमण्डलम् । बहुव्रीहिरयम् , प्रादिसमासः , अव्ययीभावो वा । अव्ययीभावपक्षेऽपि परिप्रत्युपापावर्ज्यमानाहोरात्रावयवेषु इति पूर्वपदप्रकृत्स्वरत्वं प्रप्तमनेन बाध्यते । अभित इत्युभयतः अभितो भावोऽस्यास्तीति तदभितोभावि ।

यश्चैवंस्वभावं कूलादि, तदभितोभाविग्रहणेन गृह्यते ।।

प्रादतस्वाङ्गं संज्ञायाम् ।। 6 - 2 - 183 ।।

प्रादुत्तरपदमस्वाङ्गवाचि संज्ञायां विषयेऽन्तोदात्तं भवति । प्रकोष्ठम् । प्रगृहम् । प्रैद्वारम् ।अस्वाङ्गमिति किम् प्रहस्तम् । प्रपदम् । संज्ञायामिति किम् प्रपीठम् ।।

निरुदकादीनि च ।। 6 - 2 - 184 ।।

निरुदकादीनि च शब्दरुपाण्यन्तोदात्तानि भवन्ति । निरुदकम् । निरुलपम् । निरुपलमित्यन्ये पठन्ति । निर्मक्षिकम् । निर्मशकम् । एषां प्रादिसमासः बहुव्रीहिर्वा । अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् । निष्कलकः । निष्क्रान्तः क्लकादिति कन्प्रत्ययान्तेन कालब्देन प्रादिसमासः । निष्कालिकः - इत्यन्य पठन्ति । निष्पेषः । दुस्तरीपः । अवितृस्तृतन्त्रिभ्य ईः - तरीः तां पातीति तरीपः , कुत्सितस्तरीपो दुस्तरीपः । निस्तरीप इति केचित् पठन्ति । अपरे - निस्तरीक इति । ते तरीशब्दान्ते बहुव्रीहौ कपं कुर्वन्ति । निरजिनम् । उदजिनम् । उपाजिनम् । परेर्हस्तपादकेशकर्षाः । परिहस्तः । परिपादः । पिरकेशः । परिकर्षः । निरुदकादिराकृतिगणः ।।

अभेर्मुखम् ।। 6 - 2 - 185 ।।

अभेरुत्तरं मुखमन्तोदात्तं भवति । अभिमुखः । बहुव्रीहिरयम् , प्रदिसमासो वा । अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् । उपसर्गात्स्वाङ्गम् इति सिद्धे वचनमबहुव्रीह्यर्यम् , अध्रुवार्थम् स्वाङ्गर्थ च । अभिमुखा शाला ।।

अपाञ्च ।। 6 - 2 - 186 ।।

अपाञ्चोत्तरं मुखमन्तोदात्तं भवति । अपमुखः । अपमुखम् । अव्ययीभावो.्प्यत्र प्रयोजयति । तत्रापि हि परिप्रत्युपापाबर्ज्यमानाहोरात्रावयवेषु इत्युक्तम् । योगविभाग उत्तरार्थः ।।

स्फिगपूतवीणाञ्जोऽध्वकृक्षिसीरनाम नाम च ।। 6 - 2 - 187 ।।

स्फग, पूत, वीणा, अञ्जस् , अध्वन् , कुक्षि - इत्येतान्युत्तरपदानि सीरनामानि च नामशब्दश्च अपादुत्तराण्यन्तोदात्तानि भवन्ति । अपस्फिगम् । अपपूतम् । अपवीणम् । अपाञ्जः । अपाध्वा । उपसर्गादध्वनः चइति यदा समासान्तो नास्ति , तदाऽनेनान्तोदात्तत्वं भवति । तस्मिन् हि सत्यच्प्रत्ययस्य चित्त्वादेव सिद्धम् । अनित्यश्च समासान्तः इत्येतदेव ज्ञापकम् । अपकुक्षिः । अपसीरः । अपहलम् । अपलाङ्गलम् । अपनाम । सर्वत्र प्रादिसमासः , बहुव्रीहिः , अव्ययीभावो वा । स्फिगपूतकुक्षीणां ग्रहणमबहुव्रीह्यर्थम् , अर्ध्रुवार्थम् , अस्वाङ्गार्थं च ।।

अधेरुपरिस्थिम् ।। 6 - 2 - 188 ।।

अधेरुत्तरमुपरिस्थिवाचि अन्तोदात्तं भवति । अधिदन्तः ।थ थअधिकर्णः । अधिकेशः । अध्यारुढो दन्त इति प्रादिसमासः । अध्यारुढो वा दन्त इति समासनाधिकरण उत्तरपदलोपी समासः । दन्तस्योपरि योऽन्यो दान्तो जायते स उच्यते - अधिदन्त इति । उपरिस्थमिति किम् अदिकरणम् ।।

अनोरप्रधानकनीयसी ।। 6 - 2 - 189 ।।

अनोरुत्तरमप्रधानवाचि कनीयश्चान्तोदात्तं भवति । अनुगतो ज्योष्ठमुज्येष्ठः । अनुमध्यमः । पूर्वपदार्थप्रधानः प्रादिसमासोऽयम् । अनुगतः कनीयान् अनुकनीयान् । उत्तरपदार्थप्रधानोऽयम् । प्रधानार्थं च कनीयोग्रहणम् । अप्रंधानकनीयसी इति किम् अनुगतो ज्येष्ठोऽनुज्येष्ठः ।।

पूरुषश्चान्वादिष्टः ।। 6 - 2 - 190 ।।

पुरुषशब्दोऽन्वादिष्टवाची चानोरुत्तरोऽन्तोदात्तो भवति । अन्वादिष्टः पुरुषोऽनुपुरुषः । अन्वादिष्टः - अन्वचितः , कथितानुकथितो वा । अन्वादिष्ट इति किम् अनुगतः पुरुषो।नुपुरुषः ।।

अतेरकृत्यदे ।। 6 - 2 - 191 ।।

अतेः परमकृदन्तं पदशब्दश्चान्तोदात्तो भवति । तअत्यङ्कुशो नागः । अतिकशोऽश्वः । पदशब्दः खल्वपि - थअतिपदा शक्वरी । अकुत्पदे इति किम् अतिकारकः । अतेर्धातुलोप इति वक्तव्यम् । इह मा बूत् - शोभनो

गार्ग्यः । अतिगार्ग्यः । इह च यथा स्यात् - अतिक्रान्तः कारकादितिकारक इति

नेरनिधाने ।। 6 - 2 -192 ।।

नेः परमुत्तरपदमन्तोदात्तं भवत्यनिधाने । नधानम् - अप्रकाशता , तद्भिन्नमनिधानम् - प्रकाशनम् । निमूलम् । न्यक्षम् । नितृणम् । बहुव्रीहिरयम् , प्रदिसमासो वा । अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् । अनिधान इति किम् निवाग्वृषलः । निदण्डः । निहितवाक् , निहितदण्ड इत्यर्थः । निशब्दोऽ निधानार्थं ब्रवीति । प्रदयो हि वृत्तिविषये ससाधनां क्रियामाहुः ।। प्रतेरंश्वादयस्तत्पुरुषे ।। 193 ।।

प्रतेरंश्वादयस्तत्पुरुषे समासेऽन्तोदात्ता भवन्ति । प्रतिगतोंऽशुः प्रत्यंशुः । प्रतिजनः । प्रतिराजा । राजशब्दः समासान्तस्यानित्यत्वद्यदा टज् नास्ति तदा प्रयोजयति । तस्मिन्हि सति चित्त्वादेवान्तोदात्तत्वं सिद्धम् । अंशु । जन । राजन् । उष्ट्र। खेटक । अजिर । आर्द्रा । श्रवण । कृत्तिका । अर्द्ध । पु । अंश्वादिः । तत्पुरुष इति किम् प्रतिगता अंशावोऽस्य प्रत्यंशुरयमुष्ट्रः ।।

उपाद् द्व्यजजिनमगौरादयः ।। 6 - 2 - 194 ।।

उपादुत्तरं द्व्यजजिनं चान्तोदात्तं भवति तत्पुरुषे समासे गौरादीन् वर्जयित्वा । उपगतो देवमुपदेवः । उपसोमः । उपेन्द्रः उपहोडः । अजिन - उपाजिनम् । अगौरदय इति किम् उपगौरः । उपतैषः । गैर । तैष तैट। लट । लोट। जिह्वा । कृष्णा । कन्या । गुड । कल्य ढ वाह ढ गौरादिः । तत्पुरुष इत्येव - उपगतः सौमोऽस्य उपसोमः ।।

सोरवक्षेपणे ।। 6 - 2 - 195 ।।

सुशब्दात्परमुत्तरपदं तत्पुरुषे समासेऽन्तोदात्तं भवति अवक्षेपणे गम्यमाने । अवक्षेपणम् - निन्दा । इह खल्विदानीं सुस्थण्डिले सुस्फिगाभ्यां सुप्रत्यवसितः। सुशब्ददोऽत्र पूजायामेव । वाक्यार्थस्तु अबक्षेपणमसुयया तथाभिधानात् । सोरिति किम् कुब्राह्मणः । अपक्षेपण इति किम् शोभनेषु तृणेषु सुतृणेषु ।।

विभाषोत्पुच्छे ।। 6 - 2 -196 ।।

उत्पुच्छशब्दे तत्पुरुषे विभाषाऽन्त उदात्तो भवति । उत्क्रान्तः पुच्छाद् उत्पुच्छः । यदा तु पुच्छमुदस्यति उत्पुच्छयति , उत्पुच्छयतेरच् उत्पुच्छः , तदा थाथा9दिसूत्रेण नित्यमन्तोदात्तत्वे प्राप्ते विकल्पोऽयमिति सेयमुभयत्र विभाषा भवति । ततपुरुष इतियेव - उदस्तं पुच्छमस्य उत्पुच्छः ।।

द्वित्रिभ्यां पाद्दन्मूर्धसु वहुव्रीहौ ।। 6 - 2 - 197 ।।

द्वि, त्रि - इत्येताभ्यामुत्तरेषु पाद् , दत् , मूर्धन् - इत्ये,ूत्तरपदेषु यो बहुव्रीहिस्तत्र विभाषाऽन्त उदात्तो भवति । द्वौ पादावस्य द्विपात् । त्रिपात् । द्विदन् । त्रिदन् । द्विमूर्धा । त्रिमूर्धा । पादिति कृताकारलोपः पादशब्दो गृह्यते । ददिति कृतददादेशो दन्तशब्दः । मूर्धन्निति त्वकृतसमासान्तो नान्त एव मूर्धन्शब्दः

। तस्यैतत्प्रयोजनम् - असत्यपि समासान्तोऽन्तोदात्तत्वं यथा स्यात् । एतदेव ज्ञापकम् - अनित्यः समासान्तो भवतीति । यादपि समासान्तः क्रियते, तदापि बहुव्रीहेः कार्यित्वात् तदेकदेशत्वाञ्च समासान्तस्यान्तोदात्तत्वं पक्षे भवत्येव - द्विमूर्धः , त्रिमूर्धः । द्वित्रिभ्यामिति किम् कल्याणमूर्धा । पाददिष्विति किम् द्विहस्तम् । बहुव्रीहाविति किम् द्वयोर्मूर्धा द्विमूर्धा ।।

सक्थं चाक्रान्तात् ।। 6 - 2 -198 ।।

सक्थमिति कृतसमासान्तः सक्थिशब्गदोऽ गृह्यते, सोऽक्रान्तात्परो विभाषान्तोदात्तो भवति । गौरसक्थः । शलक्षणसक्थः । अक्रान्तादिति किम् चक्रसक्थः । षचश्चित्वान्नित्यमन्तोदात्तत्वं भवति ।।

परादिश्छन्दसि बहुलम् ।। 6 - 2 - 199 ।।

छन्दसि विषये परादिरुदात्तो भवति बहुलम् । परशब्देनात्र शक्थशब्द एव गृह्यते । अञ्जिसक्थमालभेत । त्वाष्ट्रौ लौमशासक्थौ । ऋजुबाहुः । वाक्पतिः । चित्पतिः । परादिश्च पारन्तश्च पूर्वान्तश्चापि दृश्यते । पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः ।।परादिरुदाहृतः परान्तः अन्तोदात्तप्रकरणे त्रिचक्रादीनांत छन्दस्युपसंख्यानम् । त्रिचक्रेण । त्रिबन्धुरेण । त्रिवृता रथेन । पूर्वान्तः - पूर्वपदान्तोदात्तप्रकरणे मरुद्वृद्धादीनां छन्दस्यूपसंख्यानम् । मरुद्वृद्धः । पूर्वादिः - पूर्वपदाद्युदात्तप्रकरणे दिवोदासादीनां
छन्दस्युपसंख्यानम् । दिवोदासाय सामागाय ते इत्येवमादि सर्वं संगृहीतं भवति ।।

इति श्रीवामनविरचितायां काशिकावृत्तौ षष्ठाध्यायस्य द्वितीयः पादः

6.3

अथ षष्टाध्याये तृतीयः पादः

अलुगुत्तरपदे ।। 6 - 3 - 1 ।।

अलुक् इति च उत्तरपदे इति च एतदधिकृतं वेदितव्यम् । यदित ऊर्ध्वमनुक्रमिष्यामोऽलुगुत्तरपद इत्येव तद्वेदितव्यम् । वक्ष्यति - पञ्चम्याः स्तोकादिभ्यः। स्तोकानमुक्तः । अल्पान्मुक्तः । उत्तरपद इति किम् निष्क्रान्तः स्तोकाद् निः स्तोकः । अन्यार्थमिदमुत्तरपदग्रहणमिहाप्यलुको निवृत्तिं करोतीत्येवमर्थं लक्षणप्रतिपदोक्त - परिभाषा नाश्रयितव्या। अलुगधिकारः प्रागानङः । उत्तरपदाधिकारः प्रागङ्गाधिकारात् ।।

पञ्चम्याः स्तोकादिभ्यः ।। 6 - 3 - 2 ।।

स्तोकान्तिकदूरार्थकृच्छ्राणि स्तोकादीनि, तेभ्यः परस्याः पञ्चम्या उत्तरपदेऽलुग्भवति । स्तोकान्मुक्तः । अल्पान्मुक्तः । अन्तिकादगतः । अभ्याशादागतः । दूरादागतः । विप्रकृष्टादागतः । कृच्छ्रान्मुक्तः । समासे कृते प्रातिपदिकत्वात्सुपो लुकि प्राप्ते प्रतिषेधः क्रियते ।द्विवचनबहुवचनान्तानां तु स्तोकादीनामनभिधानात्समास एव न भवति - स्तोकाभ्यां मुक्तः, स्तोकेभ्यो मुक्त इति । तेनात्र न कदाचिदप्यैकपद्यम् , ऐकस्वर्यं च भवति । ब्राह्मणाच्छंसिन उपसंख्यानं कर्तव्यम् । ब्राह्मणादादाय शंसतीति ब्राह्मणाच्छंसी इति । ऋत्विग्विशेषस्य रुढिरियम् । तस्य व्युत्पत्तिरसता सता वाऽवयवार्थेन क्रियते ।।

ओजः सहौम्भस्तमसस्तृतीयायाः ।। 6 - 3 - 3 ।।

ओजस्, सहस् , अम्भस् , तमस् - इत्यतेभ्य उत्तरस्यास्तृतीयाया अलुग्भवति उत्तरपदे । ओजसाकृतम् । सहसाकृतम् । अम्भसाकृतम् । तमसाकृतम् । अञ्जस उपसंख्यानं कर्तव्यम् । अञ्जसाकृतम् । पुंसानुजो जनुषान्ध इति वक्तव्यम् । पुंसानुजः ।।

मनसः संज्ञायाम् ।। 6 - 3- 4 ।।

मनस उत्तरस्यास्तृतीयायाः संज्ञायामलुग्भवति । मनसादत्ता । मनसागुप्ता। मनसासङ्गता । संज्ञायामिति किम् मनोदात्ता । मनोगुप्ता ।।

आज्ञायिनि च ।। 6 - 3 - 5 ।।

आज्ञायिन्युत्तरपदे मनस उत्तरस्यास्तृतीयाया अलुग्भवति । मनसाऽऽज्ञातुं शीलमस्य मनसाज्ञायी ।।

आत्मनश्च पूरणे ।। 6 - 3 - 6 ।।

आत्मन उत्तरस्यास्तृतीयायाः पूरणप्रत्ययान्त उत्तरपदे।लुगभवति । आत्मनापञ्चमः । अत्मनाषष्ठः । तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानम् इति तृतीया । तृतीया इति यौगविभागात्समासः । आत्मना वा कृतः पञ्चम आत्मनापञ्चमः । कथं जनार्दनस्त्वात्मचतुर्थ एव इति बहुव्रीहिरयम् - आत्मा चतुर्थोऽस्यासावात्मचतुर्थः ।।

वैयाकरणख्यायं चतुर्थ्याः ।। 6 - 3 - 7 ।।

वैयाकरणानामाख्या वैयाकरणाख्या । आख्या - संज्ञा । यया संज्ञया वैयाकरणा एव व्यवहरन्ति तस्यामात्मन उत्तरस्याश्चतुर्थ्या अलुग्भवति । आत्मनेपदम् । आत्मनेभाषा । तादर्थ्ये चतुर्थी । चतुर्थी इति योगविभागात्समासः ।।

परस्य च ।। 6 - 3 - 8 ।।
परस्य च या चतुर्थी तस्या वैयाकरणाख्यायामलुग्भवति । परस्मैपदम् । परस्मैभाषा ।।
हलदन्तात्सप्तम्याः संज्ञायाम् ।। 6 - 3 - 9 ।।
हलन्ताददन्ताञ्चोत्तरस्याः सम्पम्याः संज्ञायामलुग्भवति । युधिष्ठिरः । त्वचिसारः । गविष्ठिर
इत्यत्र तु गवियुधिभ्यां स्थरः इत्यत एव वचनादलुक् । अदन्तात् - अरण्येतिलकाः । अरण्येमाषकाः । वनेकिंशुकाः । वनेहरिद्रकाः । वनेबल्बजकाः । पूर्वह्णेस्फोटकाः । कूपेपिशाचकाः । हलदन्तादिति किम् नद्यां कुक्कुटिका नदीकुक्कुटिका । भूम्यां पाशाः भूमिपाशाः संज्ञायामिति किम् अक्षशौण्डः ।
हृद्द्युभ्यां ङेः हृद्, दिव् - इत्येताभायामुत्तरस्य ङेरलुक् भवति । हृदिस्पृक् । दिविस्पृक् ।।
कारनाम्नि च प्राचां हलादौ ।। 6 - 3 - 10 ।।
प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हदन्तादुत्तरस्याः सप्तम्या अलुग्भवति । कूपेशाणन् । दृषदिमाषकः । हलेद्विपदिका । हलेत्रिपदिका । कारविशेषस्य संज्ञा एताः , तत्र पूर्वेणैव सिद्धे नियमार्थमिदम् । एते च त्रयो नियमविकल्पा अत्रेष्यन्ते - कारनाम्न्येव, प्रचामेव, हलादावेवेति । कारनाम्नीति किम् अभ्यहिते पशुः अभ्यर्हितपशुः । कारादन्यस्तैतद्देयस्य नाम । प्रचामिति किम् यूथे पशुः यूथपशुः । हलादाविति किम् अविकटे उरणः अविकटोरणः । हलदन्तादित्येव - नद्यां दोहनी नदीदोहनी ।।
मध्याद् गुरौ ।। 6 - 3 - 11 ।।
मध्यादुत्तस्याः सप्तम्या गुरावुत्तरपदेऽलुग्भवति । मध्येगुरुः । अन्ताञ्चोति वक्तव्यम् । अन्तेगुरुः । सप्तमी इति योगविभागात् समासः ।।
अमूर्द्धमस्तकात् स्वाङ्गादकामे ।। 6 - 3- 12 ।।
मूर्द्धमस्तकवर्जितात् स्वाङ्गादुत्तरस्याः सप्तम्या अकाम उत्तरपदेऽलुग्भवति । कण्ठे कालोऽस्य कण्ठेकालः । उरसिलोमा । उदरेमणिः ।
अमूर्द्धमस्तकादिति किम् मूर्द्धशिखः । मस्तकशिखः । अकाम इति किम् मुखे कामोऽस्य मुखकामः । स्वाङ्गादिति किम् अक्षशौण्डः । हलदन्तादित्येव - अङ्गलित्राणः । जङ्घावलिः ।।
बन्धे च विभाषा ।। 6 - 3 - 13 ।।
बन्धे इति घञन्तो गृह्यते, तस्मिन्नुत्तरपदे हलदन्तादुत्तरस्याः सप्तम्या विभाषाऽलुग्भवति । हस्तेबन्धः, हस्तबन्धः । चक्रेबन्धः , चक्रबन्धः । उभयत्रदिभाषेयम् । स्वाङ्गाद्धि बहुव्रीहौ पूर्वेण नित्यमलुक् प्राप्नोति तत्पुरुषे तु स्वाङ्गादस्वाङ्गाञ्च नेन्त्सिद्धबध्नातिषु च इति प्रतिषेधः प्राप्नोति । हलदन्तादित्येव - गुप्तिबन्धः ।।
तत्पुरुषे कृति बहुलम् ।। 6 - 3 - 14 ।।
तत्पुरुषे समासे कृदन्त उत्तरपदे सप्तम्या बहुलमलुग्भवति । स्तम्बेरमः । कर्णेजपः । न च भवति - कुरुचरः, मद्रचरः ।।
प्रावृट्शरत्कालदिवां जे ।। 6 - 3 - 15 ।।
प्रावृट्, शारत् , काल, दिव् - इत्येतेषां जे उत्तरपदे सप्तम्या बहुलमलुग्भवति । प्रावुषिजः । शारदिजः । कालेजः । दिविजः । पूर्वस्यैवायं प्रवञ्चः ।।
विभाषा वर्षक्षलशरवरात् ।। 6 - 3 - 16 ।।
वर्ष, क्षर, शर, वर - इत्येतेभ्यः उत्तरस्याः सप्तम्या ज उत्तरपदे विभाषाऽलुग्भवति । वर्षेजः , वर्षजः । क्षरेजः, क्षरजः । शरेजः, शरजः । वरेजः, वरजः ।।
घकालतनेषु कालनाम्नः ।। 6 - 3 - 17 ।।
घसंज्ञके प्रत्यये कालशब्दे तनप्रत्यये च परतः कालनाम्न उत्तरस्याः सप्तम्या विभाषाऽलुग्भवति । घ - पूर्वाह्णेतरे, पूर्वाह्णतरे । पूर्वाह्णेतमे, पूर्वाह्णतमे । काल - पूर्वाह्णेकाले, पूर्वाह्णकाले । तन- पूर्वाह्णेतने , पूर्वाह्णतने । कालनाम्न इति किम् शुक्लतरे, शुक्लतमे । हलदन्तादित्येव - रात्रितरायाम् ।
उत्तरपदाधिकारे प्रत्ययग्रहणे तदान्तविधिर्नेष्ये, हृदयस्य हृल्लेख इति लेखग्रहणाल्लिङ्गात् । तेन घतनग्हहणे तदन्तग्रणं न भवति। कालेति न स्वरुपग्रहणम् ।।
शयवासवासिष्वकालात् ।। 6 - 3 - 18 ।।
शय, वास, वासिन् - इत्येतेषूत्तरपदेष्वकालवाचिन उत्तरस्या सप्तम्या विभाषाऽलुगभवति । खेशयः ,खशयः । ग्रामेवासः, ग्रामवासः ग्रामेवासी, ग्रामवासी । अकालादिति किम् पूर्वाह्णशयः । हलन्तादित्येव - भूमिशयः । अपो योनियन्मतुषु सप्तम्या अतुग्वक्तव्यः । अप्सुयोनिः । अप्सव्यः । अप्सुमन्तौ । अप्सु भव इति
दिगादित्वाद्यत्प्रत्ययः । सर्वत्र सप्तमी इति योगविभागात्समासः ।।
नेन्त्सिद्धबध्नातिषु च ।। 6 - 3 - 19 ।।
इन्नन्ते उत्तरपदे सिद्धशब्दे बध्नातौ च परतः सप्तम्या अलुग्न भवति । स्थण्डिलवर्ती । सिद्ध - सांकाश्यसिद्धः । काम्पिल्यसिद्धः । बध्नाति - चक्रबद्धः । चारबद्धः । सप्तमी इति योगविभागात् समासः । चक्रबन्ध इति केचिदुदाहरन्ति , तत्पचाद्यजन्तं द्रष्टव्यम् । घञन्ते हि बन्धे च विभाषा इत्युक्तम् ।।
स्थे च भाषायाम् ।। 6 - 3 - 20 ।।
स्थे चोत्तरपदे भाषायां सप्तम्या अलुग्न भवति । समस्थः । विषमस्थः । कूटस्थः । पर्वतस्थः । भाषायामिति किम् कृष्णोऽस्याखरेष्ठः । पूर्वपदात् इति षत्वम् ।।

षष्ठ्या आक्रोशे ।। 6 - 3 - 21 ।।

आक्रोशे गम्यमाने उत्तरपदे षष्ठ्या अलुग्भवति । चौरस्य कुलम् । वृषलस्य कुलम् ।आक्रोशे इति किम् ब्राह्मणकुलम् । षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु यथासंख्यमलुग् वक्तव्यः । वाचोयुक्तिः । दिशेदण्ड । । पश्यतोहरः । आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति चालुग्वक्तव्यः । अमुष्यापत्यमावमुष्यायणः । नडादित्वात् फक् । अमुष्य पुत्रस्य भाव आमुष्यपुत्रिका । मनोज्ञादित्वाद्वुञ् । तथा - आमुष्यकुलिकेति । देवानाम्प्रिय इत्यत्र च षष्ठ्या अलुग् वक्तव्यः । देवानाम्प्रियः । शेपपुच्छलाङ्गूलेषु शुनः संज्ञायां षष्ठ्या अलुग्वक्तव्यः । शुनः शेपः । शुनः पुच्छः । सुनोलाङ्गूलः । दिवश्च दासे षष्ठ्या अलुग्वक्तव्यः । दिवोदासाय गायति ।

पुत्रेऽन्यतरस्याम् ।। 6 - 3 - 22 ।।

पुत्रशब्द उत्तरपदे आक्रोशे गम्यमानेऽन्यतरस्यां षष्ठ्या अलुग् भवति । दास्याः पुत्रः, दासीपुत्रः । वृषल्याः पुत्रः, वृषलीपुत्रः, आक्रोश इत्येव - ब्राह्मणीपुत्रः ।।

ऋतो विद्यायोनिसम्बन्धेभ्यः ।। 6 - 3 - 23 ।।

ऋकारान्तेभ्यो विद्यासम्बन्धवाचिभ्यो योनिसम्बन्धवाचिभ्यश्चोत्तरस्याः षष्ठ्या अलुग्भवति । होतुरन्तेवासी । होतुः पुत्रः । पितुरन्तेवासी । पितुः पुत्रः । ऋत इति किम् आचार्यपुत्रः । मातुलपुत्रः । विद्यायोनिसम्बन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणम् । विद्यायोनिसम्बन्धवाचिन्यनोत्तरपदे यथा स्याद् , अन्यत्र मा भूत् - होतृधनम् । पितृधनम् । होतृगृहम् । पितृगृहम् ।।

विभाषा स्वसृपत्योः ।। 6 - 3 - 24 ।

स्वसृ, पति - इत्येतयोरुत्तरपदयोऋकारान्तेभ्यो विद्यायोनिसम्बन्धवाचिभ्यो विभाषाऽलुग्भवति । मातुः ष्वसा। मातुस्वसा । मातृष्वसा । पितुः ष्वसा । पितुः स्वसा । पितृष्वसा । यदा लुक् तदा मातुपितृभ्यां स्वसा इति नित्यं षत्वम् । यदा त्वलुक् तदा मातृपितृभ्यामन्यतरस्याम इति विकल्पेन षत्वम् । दुहितुः पतिः । दुहतृपितः । ननान्दुः पतिः । ननान्दृपतिः ।।

आनङ् ऋतो द्वन्द्वे ।। 6 - 3 - 25 ।।

ऋकारान्तानं विद्यायोनिसम्बन्धवचिनां यो द्वन्द्वस्तत्रोत्तरपदे पूर्वपदस्यानङादेशे भवति । हेतापोतारौ । नेष्टेद्गातारौ । प्रशास्ता प्रतिहर्त्तारौ । योनिसम्बन्धेभ्यः - मतापितरौ । यातानननान्दरौ ।नकारोच्चारणं परत्वनिवृत्त्यर्थम् । ऋत इति किम् पितृपितामहौ । पुत्रे इत्येत्रानुवर्त्तते ष ऋतः , इति च । तेन पुत्रशब्देऽप्युत्तरपदे ऋकारान्तस्यानङादेशो भवति । पितापुत्रौ । मातापुत्रौ ।।

देवताद्वन्द्वे च ।। 6 - 3 - 26 ।।

देवतावाचिनां यो द्वन्द्वस्तत्रोत्तरपदे पूर्वपदस्यानङादेशे भवति । इन्द्रावरुणौ । इन्द्रासोमौ । इन्द्राबृहस्पती ।

द्वन्द्वे इति वर्त्तमाने पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यार्थम् । अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्यतन्निपात्यते । तत्र ये लोके प्रसिद्धसाहचर्याः, वेदे च ये सहवापनिर्दि्ष्टास्तेषामिह ग्रहणं भवति । तेन ब्रह्मप्रजापती, शिववेश्रवणावित्येवमादौ न भवति । उभयत्र वायोः प्रतिषेधी वक्तव्यः । अग्निवायू। वाय्वग्नी ।।

ईदग्नेः सोमवरुणयोः ।। 6 - 3 - 27 ।।

सोम, वरुण - इत्येतयोर्देवताद्वन्द्वेऽग्नेरीकारादेशो भवति । अग्नीषोमौ । अग्नीवरुणौ । अग्नेः स्तुत्स्तोमसोमाः । इति षत्वम् ।।

इद् वृद्धौ ।। 6 - 3- 2 8 ।।

कृतवृद्धावुत्तरपदे देवताद्वन्द्वेऽग्नेरिकारादेशो भवति । आग्निवारुणीमनड्वाहीमालभेत । आग्निमारुत्तं कर्मं क्रियते । अग्नीवरुणौ देवते अस्य, अग्नीमरुतौ देवते अस्येति तद्धितः । तत्र देवताद्वन्द्वे च इत्युभयपदवृद्धौ कृतायामानङ् ईत्वं च बाधितुमिकारः क्रियते । वृद्धाविति किम् आग्नेन्द्रः । नेन्द्रस्य परस्य इत्युत्तरपदवृद्धिः प्रतिषिध्यते । इद् वृद्धौ विष्णोः पिरतिषेधो वक्तव्यः । आग्नावैष्णवं चरुं निर्वपेत् ।।

दिवो द्यावा ।। 6 - 3 - 29 ।।

दिविल्येतस्य द्यावा इत्ययमादेशो भवति देवताद्वन्द्वे देवताद्वन्द्वे उत्तरपदे । द्यावाक्षामा । द्यावाभूमी ।।

दिवसश्च पृथिव्याम् ।। 6 - 3 - 30 ।।

पृथिव्यामुत्तरपदे देवताद्वन्द्वे दिवः दिक्स् - इत्ययमादेशो भवति, चकाराद् द्यावा च । दिवस्पृथिव्यौ । द्यावावृथिवयौ । अकोरोच्चारणं सकारसंय विकाराभावप्रतिपत्त्यर्थम् । तेन रुत्वादीनि न भवन्ति । कथम् द्यावा चिदस्मै पृथिवी नमेते इति कर्तव्योऽत्र यत्नः ।।

उषासेषसः ।। 6 - 3 -31 ।।

उषसः उषासा इत्ययमादेशो भवति देवताद्वन्द्वे उत्तरपदे । गासूर्यम् । उषासानक्ता ।।

मातरपितरावुदीचाम् ।। 6 - 3 - 32 ।।

मातरिपितरौ इत्युदीचामाचार्याणां मतेनारङादेशो मातृशब्दस्य तपात्यते । मातरपितरौ । उदीचामिति किम् मातापितरौ ।।

पितरामातरा च च्छन्दसि ।। 6 - 3 - 33।।

पितरामातरा इति छन्दसि निपात्यते । आ मा गन्तां पितरामातरा च । पूर्वपदस्य अराङगदेशे निपात्यते । उत्तरपदे तु सुपां सुलुक् इति आकारादेशः , तत्र ऋतो ङिसर्वनामास्थानय गुणः । छन्दसीति किम् मातापितरौ ।।

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ।। 6 - 3 - 34 ।।
भाषितः पुमान्येन समानायामाकृतावेकस्मिन्प्रवृत्तिनिमित्ते स भाषितपुंस्कः शब्दः । तदेतदेवं कथं भवति भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कशब्देनोच्यते, तस्य प्रतिपादको यः शब्दः सोऽपि भाषितपुंस्कः । ऊङोऽभावः अनूङ्, भाषितपुंस्कादनूङ् यस्मिन् स्त्रीशब्दे स भाषितपुंस्कादनुङ् स्त्रीशब्दः । बहुव्रीहिरयम् , अलुग् निपातनात् पञ्चम्याः । तस्य भाषितपुंस्कादनूङः स्त्रीशब्दस्य पुंशब्दस्येव रुपं भवति समानाधिकरणे उत्तरपदे स्त्रीलिङ्गे पूरणीप्रियादिवर्जिते। दर्शनीयभार्यः । श्लक्ष्णचूडः । दीर्घजङ्घः ।स्त्रिया इति किम् ग्रामणि ब्राह्मणकुलं दृष्टिरस्य ग्रामणिदृष्टिः । भाषितपुंस्कादिति किम् खट्वाभार्यः । समानायामाकृताविति किम् द्रोणीभार्यः । कथं गर्भिभार्यः, प्रसूतभार्यः, प्रजातभार्यं इति कर्तव्योऽत्र यत्नः । अनूङ इति किम् ब्रह्मबन्धूभार्यः । समानाधिकरण इति किम् कल्याण्या माता कल्याणीमाता । स्त्रियामिति किम् कल्याणी प्रधानमेषां कल्याणीप्रधाना इमे । अपूरणीति किम् कल्याणी पञ्चमी यासां ताः कल्याणीपञ्चमा रात्रयः । कल्याणीदशमाः। प्रधानपूरणीग्रहणं कर्तव्यम् , इह मा मूत् - कल्याणपञ्चमीकः पक्ष इति । अप् पूरकणीप्रमाण्योः इत्यत्रापि प्रधानपूरणीग्रहणमेवत्यप्रत्ययो न भवति । अप्रियादिष्विति किम् कल्याणीप्रियः । प्रिय । मनोज्ञा । कल्याणी । सुभगा । दुर्भगा । भक्तिः । सचिवा । अम्बा । कान्ता । क्षान्ता । समा । चपला । दुहिता । वामा । प्रयादिः । दृढभक्तिरित्यवमादिषु स्त्रीपूर्वपदस्याविवक्षितत्वात् सिद्धमिति समाधेयम् ।।

तसिलादिष्वाकृत्वसुचः ।। 6- 3 - 35 ।।
पञ्चम्यास्तसिल् इत्यतः प्रभृति सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्नसुच् इति प्रागेतस्माद् ये प्रत्ययास्तेषु भाषितपुंस्कादनूङ्स्त्रियाः पुंपद्भवति । तस्याः शालायाः ततः । तस्यां तत्र । यस्या यतः । यस्यां यत्र ।
तसिलादिषु परिगणनं कर्तव्यम् - त्रतसौ तरप्तमपौ चरट्जातीयरौ । कल्पशब्देश्यदेशीयरः । रुपप्पाशपौ । थम्थालौ । दार्हिलौ । तिल्तातिलौ । शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः बह्वीभ्यो देहि । अल्पाभ्यो देहि । बहुशो देहि । अल्पशे देहि । त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः । पट्व्या भावः पटुत्वम् । पटुता । गुणवचनस्येते किम् कठ्या भावः कठीत्वम्, कठीता । भस्याढे तद्धिते पुंवद्भावो वक्तव्य । हस्तिनीनां समूहो हास्तिकम् । अढ इति किम् शयैनेयः । रौहिणेयः । कथमाग्नायो देवताऽस्य आग्नेयः स्थालीपाक इति कर्तव्योऽत्र यत्नः । ठक्छसोश्च पुंवद्भावो वक्तव्य । भवत्याश्छात्त्रा भावत्काः । भवदीयाः ।।

क्यङ्मानिनोश्च ।। 6 - 3 - 36 ।।
क्यङि परतो मानिनि च स्त्रिया भाषितपुंस्कादनूङ् पुंवद्भवति एनी - एतायते । श्येनी - शयेतायते । मानिनि - दर्शनीयमानी अयमस्याः । दर्शनीयमानिनियमस्याः ।। मानिनोग्रहणमस्त्र्यर्थम् , असमानाधिकरणार्थं च । इह तु दर्शनीयमात्मानं मन्यते दर्शनीयमानितीति पूर्वेणैव सिद्धम् ।।

न कोपधायाः ।। 6 - 3 - 37 ।।
कोपधायाः स्त्रियाः पुंवद्भावो न भवति । पाचिकाभार्यः । कारिकाभार्यः । मद्रि काभार्यः । वृजिकाभार्यः । मद्रिकाकल्पा । वृजिकाकल्पा । मद्रिकायते । वृजिकायते । मद्रिकामानिनी । वृजिकामानिनी । विलेनिकाया धर्म्यं वैलेपिकम् । कोपधप्रतिषधे तद्धितवुग्रहणं कर्तव्यम् । इह मा भूत् - पाकभार्यः , भेकभार्यं इति ।।

संज्ञापूरण्योश्चः ।। 6 - - 38 ।।
संज्ञायाः पूरण्याश्च स्त्रियाः पुंवद्भावो न भवति । दत्ताभार्यः । गुप्ताभार्यः । दत्तापाशा । गुप्तापाशा । दत्तायते । गुप्तायते । दत्तामानिनी । गुप्तामानिनी । पूरण्याः - पञ्चमीभार्यः । दशमीभार्यः । पञ्चमीपाशा । दशमीपाशा । पञ्चमीयते । दशमीयते । पञ्चमीमानिनी । दशमीमानिनी ।।

वृद्धिनित्तस्य च तद्धूतस्यारक्तविकारे ।। 6- 3 - 39 ।।
न इति वर्तते । वृद्धिर्निमित्तं यस्मिन् स वृद्धिनिमित्तस्तद्धितः स यदि रक्तेऽर्थे विकारे च न विहितः , तदन्तस्य स्त्रीशब्दस्य न पुंवद्भवति । स्त्रौध्नीभार्यः । माथुरीभार्यः । स्त्रौध्नीपाशा । माथुरीपाशा । स्त्रौध्नीयते । माथुरीयते । स्त्रौध्नीमानिनी । माथुरीमानिनी । वृद्धिनिमित्तस्येति किम् मध्यमभार्यः । तद्धितस्येति किम् काण्डलावभार्यः । बहुव्रीहिपरिग्रहः किमर्थः तावद्भार्यः । यावद्भार्यः । अरक्तविकार इति किम् कषायेणा रक्ता काषायी, काषायी बृहतिका यस्य स काषायबृहतिकः । लोहस्य विकारो लौही, लौही ईषा यस्य रथस्य स लौहेषः खादिरेषः ।।

स्वाङ्गाञ्चेतोऽमानिनि ।। 6 - 3 - 40 ।।
स्वाङ्गादुत्तरो य ईकारस्तदन्तायाः स्त्रिया न पुंवद्भवति अमानिनि परतः । दीर्घकेशीभार्यः । दीर्घकेशीपाशा । श्लक्ष्णकेशीपाशा । दीर्घकेशीयते । श्लक्ष्णकेशीयते । स्वाङ्गादिति किम् पटुभार्यः । ईत थइति किम् अकेशभार्यः । अमानिनीति किम् दीर्घकेशमानिनी ।।

जातेश्च ।। 6 - 3 - 41 ।।
जातेश्च स्त्रिया न पुंवद्भवति अमानिनि परतः । पठीभार्यः । बह्वृयीभार्यः । कठीपाशा । बह्वृचीपाशा । कठीयते । बह्वृतीयते । अमानिनीत्येव - कठमानिनी । बह्वृचमानिनी । अयं प्रतिषेध औपसङ्ख्यानिकस्य पुंवद्भावस्य नेष्यते । हस्तिनीनां समूहो हास्तिकम् ।।

पुंवत्कर्मधारयजातीयदेशीयेषु ।। 6 - 3 - 42 ।।
कर्मधारये समासे जातीय, देशीय - इत्येतयोश्च प्रत्यययोर्भाषितपुंस्कादनूङ् स्त्रियाः पुंवद्भवति । प्रतिषेधार्थोऽयमारम्भः । न कोपधायाः इत्युक्तम् , तत्रापि भवति । पाचकवृन्दारिका । पाचकजातीया पाचकदेशीया । संज्ञापूरण्योश्च इत्युक्तम् , तत्रापि भवति । दत्तवृन्दारिका । दत्तजातीया । दत्तदेशीया । पूरण्याः - पञ्चमवृन्दारिका । पञ्चमजातीया । पञ्चमदेशीया। वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे इत्युक्तम् , तत्रापि भवति । स्त्रौध्नजातीया ।

स्रौध्नदेशीया । स्वाङ्गाच्छेतोऽमानिनि इत्युक्तम्, तत्रापि भवति । श्लक्ष्णमुख वृन्दारिका । श्लक्ष्णमुखजातीया । श्लक्ष्णमुखदेशीया । जातेश्च इत्युक्तम्, तत्रापि भवति ।

कठवृन्दारिका । कठजातीया कठदेशीया । भाषितपुंस्कादित्येव - खट्वावृन्दरिका । अनूङित्येव - ब्रह्मबन्धूवृन्दारिका ।। कुक्कुट्यादीनामण्डादिषु पुंवद्भावो वक्तव्यः । कुक्कुट्या अण्डं कुक्कुटाण्डम् । मृग्याः पदं मृगपदम् । मृग्याः क्षीरं मृगक्षीरम् । काक्याः शावः काकशावः । न वाऽस्त्रीपूर्वपदस्य विवक्षितत्वात् । स्त्रीत्वेन विना पूर्वपदार्थोऽत्र जातिः सामान्येन विवक्षितः । पुंवद्भावाद् ह्रस्वत्वं खिद्घादिषु भवति विप्रतिषेधेन । खित् - कलिम्मन्या । हरिणिम्मन्या । घादि - पट्वितरा । पट्वितमा । पट्विरुपा । पट्विकल्पा । क- पट्विका । मृद्विका । इहेडबिह् , दरद् , पृथु, उशिजत्येते जनपदशब्दाः क्षत्त्रियवचनाः । तत्र तद्राजप्रत्ययस्च स्रियाम् अतश्च इति लुकि कृत् इडबिट्वृन्दारिकेति विगृह्य समासः क्रियते । ततः पुंवद्भावेन ऐडबिडादयः पुंशब्दाः क्रियन्ते । ऐडबिडवृन्दारिका । औशिजवृन्दारिका । दारदवृन्दारिका । पार्थवृन्दारिका ।

घरुपकल्पचेलड्ब्रवगोत्रमतहतेषु ङ्योऽनेकायो ह्वस्वः ।। 6 - 3 - 43 ।।

घ, रुप, कल्प, चेलट्, ब्रुव, गोत्र, मत, हत - इत्येतेषु परतो भाषितपुंस्कात् परो यो ङीप्रत्ययस्तंदन्तस्यानेकायो ह्रस्वो भवति । घ - ब्राह्मणितरा, ब्राह्मणितमा । रुप - ब्रामामणिरुपा । कल्प - ब्राम्मणिकल्पा । चेलट् - ब्राह्माणिचेली ।ब्रुव - ब्राह्मणिब्रुवा । गोत्र - ब्राह्मणिगोत्रा । मत - ब्राह्मणिमता । हत - ब्राह्मणिहता । घरुपकल्पाः प्रत्ययाशेचेलडादीन्युत्तरपदानि । ब्रुव इति - ब्रवीतिति ब्रुवः पचाद्यचि , वच्यादेशे गुणश्च निपातनान्न भवति । ङ्य इति किम् दत्तातरा । गुप्तातरा । अनेकाच इति किम् नद्याः शेषस्यान्यतरस्याम् इति वक्ष्यति । भाषितपुंस्कादित्येव - आमलकीतरा । कुवरीतरा ।।

नद्याः शेषस्यान्यतरस्याम् ।। 6 - 3 - 44 ।।

नद्याः शेषस्य घादिषु परतो ह्रस्वो भवति अन्यतरस्याम् । कश्च शेषः अङी च या नदी ङ्यन्तं च यदेकाच् । ब्रह्मबन्धूतरा, ब्रह्मबन्धुतरा । वीरबन्धूतरा, वोरबन्धुतार । स्रितरा, स्त्रीतरा । स्रितमा । स्त्रीतमा । कृन्नद्याः प्रतिषेधो वक्तव्यः । लक्ष्मीतरा । तन्त्रीतरा ।।

उगितश्च ।।6 - 3 - 45 ।।

उगितश्च परस्या नद्या घादिषु अन्यतलस्यां ह्रस्वो भवति । श्रेयसितरा , श्रेयसीतरा, श्रेयस्तरा । विदुषितरा, वुदुषीतरा विद्वत्तरा । पुंवद्भावोऽप्यत्र पक्षे वक्तव्यः । प्रकर्षयोगात्प्राक् स्त्रीत्वस्याविवक्षितत्वाद्वा सिद्धम् ।।

आन्महतः समानाधिकारणजातीययोः ।। 6 - 3 - 46 ।।

समानाधिकरण उत्तरपदे जातीये च प्रत्यये परतो महत आकारादेशे भवति । महादेवः । महाब्राह्मणः । महाबाहुः । महाबलः । जातीये - महाजातीयः । समानाधिकारणजातीययोरिति किम् महतः पुत्रो महत्पुत्रः। लक्षणोक्तत्वादेवात्र न भवतिष्यतीति चेद् बहुव्रीहावपि न स्याद् महाबाहुरिति । तदर्थं समानाधिकरणग्रहणं वक्तव्यम् । अमहान् महान् सम्पन्नो महद्भूतश्चन्द्रमाः - इत्यत्र गौणत्वान्महदर्थस्य न भवत्यात्त्वम् । महदात्त्वे घासकरविशिष्टेषुपसंख्यानं पुंवद्वचनं चासमानाधिकरणार्थम् । महत्या घासः महाघासः । महत्याः करः माहकरः । महत्या विशिष्टः महाविशिष्टः । अष्टनः कपाले हविष्युपसंख्यानम् । अष्टाकपालं चरुं निर्वपेत् । हविषीति किम् अष्टकपालं ब्राह्मणस्य । गवि च युक्तेऽष्टन उपसंख्यानं कर्त्तव्यम् । अष्टागवेन शकटेन । युक्त इति किम् अष्टगवं ब्राह्मणस्य । तपरकरणं विस्पष्टार्थम् ।।

द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ।। 6 - 3 - 47 ।।

द्वि, अष्टन् - इत्येतयोरकारदेशे भवति संख्यायामुत्तरपदे अबहुव्रीह्यशीत्योः । द्वादश । द्वाविंशतिः । द्वात्रिंशत् । अष्टादशः अष्टाविंशतिः । अष्टात्रिंशत् । द्व्यष्टन इति किम् पञ्चदश । संख्यायामिति किम् द्वैमातुरः । आष्टमातुरः । अबहुव्रीह्यशीत्योरिति किम् द्वित्राः । द्विदशाः । द्व्यशीतिः ।। प्राक् शतादिति वक्तव्यम् । इह मा भूत् - द्विशतम् । द्वेसहस्रम् ।अष्टशतम् । अष्टसहस्रम् ।।

त्रेस्त्रयः ।। 6 - 3 - 47 ।।

त्रि इत्येतस्य त्रयस् इत्ययमादेशे भवति संख्यायामबहुव्रीह्यशीत्योः । त्रयोदश । त्रयोविंशतिः । त्रयस्त्रिंशत् । संख्यायाम् इत्येव - त्रैमातुरः । अबहुव्रीह्यशीत्योः इत्येव - त्रिदशाः । त्र्यशीतिः । प्राक् शतात् इत्येव - त्रिशतम् । त्रिसहस्रम् ।।

विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ।। 6- 3 - 49 ।।

चत्वारिंशत्परभृतौ सङ्ख्यायामुत्तरपदेऽबहुव्रीह्यशीत्योः सर्वेषां द्व्यष्टन् , त्रि - इत्येतेषां यदुक्तं तद्विभाषा भवति । द्विचत्वारिंशत् , द्वाचत्वारिंशत् । त्रिपञ्चाशत् , त्रयः पञ्चाशत् । अष्टपञ्चाशत् , अष्टापञ्चाशत् । सर्वेषाम् - ग्रहणं त्रयाणामपि यथा स्यात् । प्राक् शतादित्येव - द्विशतम् । अष्टशतम् ष त्रिशतम् ।।

हृदयस्य हृल्लेखयदण्लासेषु ।। 6 - 3 - 60 ।।

हृदयस्य हृत् इत्ययमादेशो भवति लेख, यत् , अण् , लास - इत्येतेषु परतः । हृदयं लिखलीति हृल्लेखः । यत् - हृदयस्य प्रियं हृद्यम् । अण् - हृदयस्येदं हार्दम् । लास - हृदयस्य लासो हृल्लासः । लेख इत्यणन्तस्य

ग्रहणमिष्ये । घञि तु - हृदयस्य लेखो हृदयलेखः । एतदेव लेखग्रहणं ज्ञापकम् - उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्ताग्रहणस्य ।।

वा शोकष्यञ्रोगेषु ।। 6 - 3 - 51 ।।

शोक, ष्यञ् , रोग - इत्येतेषु परतो हृदयस्य वा हृत् इत्ययमादेशो भवति । हृच्छोकः हृदयशोकः । ष्यञ् - सौहार्द्यम् , सौहृदयम् । ब्राह्मणादित्वात् ष्यञ् ।

हृदादेशपक्षे हृद्भगसिन्ध्वन्ते पूर्वपदस्य च इत्युभयपदवृद्धिः । रोगे - हृद्रोगः , हृहयरोगः । हृदयशब्देन समानार्थो हृत् -शब्दः प्रकृत्यन्तरमस्ति, तेनैव सिद्धे विकल्पविधानं प्रपञ्चार्थम् ।।

पादस्य पदाज्यतिगोपहतेषु ।। 6 - 3 - 52 ।।

पादस्य पद इत्ययमादेशे भवति आजि, आति, ग, उपहत - इत्येतेषूत्तरपदेषु पादाभ्यामजतीति पादजिः । पादाभ्यामततीति पदातिः । अज्यतिभ्यां पादे च इत्यौणादिक इणप्रत्ययः । तत्राजेर्वीभावो न भवति, अत एव निपातनात् । पादाभ्यां गच्छतीति पदगः । पादेनोपहतः पदोपहतः । पादशब्दो वृषादित्वादाद्युदात्तः, तस्य स्थाने पदादेश उपदेश एवान्तोदात्तो निपात्यते । तेन पदोपहत इति तृतीया कर्मणि इति पूर्वपदप्रकृत्स्वरत्वेनान्तोदात्तत्वं भवति । पदाजिः, पदातिः, पदगः - इत्येतेषु कृत्स्वरेण समासस्यैवान्तोदात्तत्वम् ।।

पद्यत्यतदर्थे ।। 6 - 3 - 53 ।।

यत्प्रत्यये परतः पादस्य पद्त्ययमादेशे भवत्यतदर्थे । पादौ विध्यन्ति पद्याः शर्कराः । पद्याः कण्टकाः । अतदर्थ इति किम् पादार्थमुदकं पाद्यम् । पद्भावे इके चरतावुपसङ्ख्यानम् । पादाभ्यां चरति पदिकः । पर्पादिभ्यः ष्ठन् इति पादशब्दात् ष्ठन्प्रत्ययः । शरीरावयववचनस्य पादशब्दस्य ग्रहणमिहेष्यते , तेन पणपादमाषशताद्यद् इत्यत्र पदादेशो न भवति । द्विपाद्यम् । त्रिपाद्यम् ।।

हिमकाषिहतिषु च ।। 6 - 3 - 54 ।।

हिम, काषिन्, हति - इत्येतेषु पादशब्दस्य पदित्ययमादेशे भवति । हिम - पद्धिमम् । काषिन् - अथ पत्काषिणो यान्ति । हति - पद्धतिः ।।

ऋचः शे ।। 6 - 3 - 55 ।।

ऋवसम्बन्धिनः पादशब्दस्य शे परतः पदित्ययमादेशो भवति । पच्छो गायत्रीं शंसति । पादंपादं शंसतीति संख्यैकवचनाञ्च वीप्सायाम् इति शस्प्रत्ययः । ऋच इति किम् पादशः कार्षापणं ददातीति ।।

वा घोषमिश्रशब्देषु ।। 6 - 3 - 56 ।।

धोष, मिश्र, शब्द - इत्येतेषु चोत्तरपदेषु पादस्य वा पद् तइत्ययमादेशो भवति । पद्घोषः , पादघोषः । पन्मिश्रः , पादमिश्रः । पच्छब्दः, पादशब्दः । निष्के चेति वक्तव्यम् । पन्निष्कः , पादनिष्कः ।।

उदकस्योदः संज्ञायाम् ।। 6 - 3- 57 ।।

उदकशब्दस्य संज्ञायां विषये उद - इत्ययमादेशो भवति उत्तरपदे परतः । उदमेघो नाम यस्य औदमेघिः पुत्रः । उदवारो नाम यस्य औदवाहिः पुत्रः । संज्ञायामिति किम् उदकगिरिः । संज्ञायामुत्तरपदस्य उदकशब्दस्य उदादेशो भवतीति वक्तव्यम् । लोहितोदः । नीलोदः । क्षीरोदः ।।

पेषंवासवाहनधिषु च ।। 58 ।।

पेषं, वास, वाहन, धि, - इत्येतेषु चोत्तरपदेषु उदकस्य उद इत्ययमादेशो भवति । उदपेषं पिनष्टि । स्नेहने पिषः इति णमुल् । वास - उदकस्य वास उदवासः । वाहन - उदकस्य वाहन उदवाहनः । धि - उदकं धीयतेऽस्मिन्नित्युदधिः ।।

एकहलादौ पूरयितव्येऽन्यतरस्याम् ।। 6 - 3- 59 ।।

उदकस्योदः इति वर्त्तते । एकः - असहायः तुल्यजातीयेनानन्तरेण हलादिना । हल् आदिर्यस्योत्तरपदस्य तदेकहलादिः, तस्मिन्नेकहलादौ पूरयितव्यवाचिन्यन्यतरस्यामुदकस्य उद इत्ययमादेशो भवति । उदकुम्भः , उदककुम्भः । उदपात्रम् । उदकपात्रम् । एकहलादाविति किम् उदकस्थालम् । पूरयितव्य इति किम् उदकपर्वतः ।।

मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च ।। 6 - 3- 60 ।।

मन्थ, ओदन, सक्तु, बिन्दु, वज्र, भार, हार, वीवध, गाह - इत्येतेषूत्तरपदेषुदकस्य उद इत्ययमादेषो भवति अन्यतरस्याम् । उदकेन मन्थ उदमन्थः , उदकमन्थः । ओदन - उदकेनौदनः उदौदनः , उदकौदनः । सक्तु -- उदकेन सक्तुः उदसक्तुः, उदकसक्तुः । बिन्दु-उदकस्य, बिन्दुः उदबिन्दुः उदकबिन्दुः।वज्र - उदकस्य वज्रः उदवज्रः, उदकवज्रः । भार - उदकं बिभर्तीति उदभारः, उदकभारः । हार - उदकं हरतीति उदहारः , उदकहारः । वीवध-उदकस्य वीवधः,उदवीवधः, उदकवीवधः। गाह - उदकं गाहत इति उदगाहः,
उदकगाहः ।।

इको ह्वस्वोऽङ्यो गालवस्य ।।6 - 3 - 61 ।।

इगन्तस्याङ्यन्तस्योत्तरपदे ह्रस्वो भवति गालवस्याचार्यस्य मतेनान्यतरस्याम् । ग्रामणिपुत्रः, ग्रामणीपुत्रः । ब्रह्मबन्धुपुत्रः, ब्रह्मबन्धूपुत्रः। इक इति किम् खट्वापादः। मालापादः अङ्य इति किम् गार्गीपुत्रः। वात्सीपुत्रः।

गालवग्रणं पूजार्यम् , अन्यतरस्याम् इति हि वर्तते । व्यवस्थितविभाषा चेयम् । तेनेह न भवति - कारिषगन्धीपुत्र इति । इयङ्वङ्भाविनामव्ययानां च न भवति - श्रीकुलम् , भ्रूकुलम् । काण्डीभूतम् , वृषलीभूतम् । भ्रुकुंसादीनां तु भवत्येव - भ्रुकुंसः, भ्रुकुटिः। अपर आह - भ्रुकुंसादीनामकारो भवतीति वक्तव्यम् । भ्रकुंसः । भ्रुकुटिः ।।

एक तद्धिते च ।। 6 - 3- 62 ।।

एकशब्दस्य तद्धिते उत्तरपदे ह्रस्वो भवति । एकस्या आगतमेकरुप्यम् । एकमयम् । एकस्या भाव एकत्वम् । एकता । उत्तरपदे- एकस्याः क्षीरम्

एकक्षीरम् । एकदुग्धम् । लिङ्गविशिष्टस्य ग्रहणमेकशब्दह्रस्वत्वं प्रयोजयति । अचा हि गृह्यमाणमत्र विशेष्यते , न पुनरच् गृह्यमाणेनेति ।।

ङ्यापोः संज्ञाछन्दसोर्बहुलम् ।। 6 - 3- 63 ।।

ङ्यन्तस्याबन्तस्य च संज्ञाछन्दसोर्बहुलं ह्रस्वो भवति । ङ्यन्तस्य संज्ञायाम् - रेवतिपुत्रः, रोहिणिपुत्रः, भरणिपुत्रः। न च चभवति - नान्दीकरः, नान्दीघोषः, नान्दीविशालः। ङ्यन्तस्य छन्दसि - कुमारिदा, उर्विदा । न च भवति - फाल्गुनीपौर्णमासी, जगतीच्छन्दः। आबन्तस्य संज्ञायाम् - शिलवहम्, शिलप्रस्थम् । न च भवति - लोमकागृहम् । लोमकाषण्डम् । आबन्तस्य छन्दसि - अजक्षीरेण जुहोति, ऊर्णमृदा पृथिवीं विश्वधायसम् । नच भवति - ऊर्णासूत्रेण कवयो वयन्ति ।।

त्वे च ।। 6 - 3- 64 ।।

त्वप्रत्यये परतो ङ्यावोर्बहुलं ह्रस्वो भवति । तदजाया भावः अजत्वम् । आजात्वम् । तद्रोहिण्या भावो रोहिणित्वम् । रोहिणीत्वम् । संज्ञायामसम्भवाच्छन्दस्यवोदाहरणानि भवन्ति ।।

इष्टकेषीकामालानां चिततूलभारिषु ।। 6 - 3 - 65 ।।

इष्टकेषीकामालानां चित, तूल, भारिन् - इत्येतेषूत्तरपदेषु यथा संख्यं ह्रस्वो भवति । इष्टकचितम् । इषीकतूलम् । मालभारिणी कन्या । इष्टकादिभ्यस्तदान्तस्यापि ग्रहणं भवति । पक्वेष्टकचितम् । मुञ्जेषीकतूलम् । उत्पलमालभारिणी कन्या ।।

खित्यनव्ययस्य ।। 6 - 3- 66 ।।

खिदन्त उत्तरपदेऽनव्ययस्य ह्रस्वो भवति । कालिम्मन्या । हरिणिम्मन्या । मुमा ह्रस्वो न बाध्यते अन्यथा हि ह्रस्वशासनमनर्थकं स्यात् । अनव्ययस्येति किम् दोषामन्यमहः । दिवामन्या रात्रिः। अनव्ययस्य इत्येतदेव ज्ञापकमिह खिदन्तग्रहणस्य ।।

अरुर्द्विषदजन्तस्य मुम् ।। 6 - 3 - 67 ।।

अरुस्, द्विषत् - इत्येतयोरजन्तानां च चखिदन्त उत्तरपदे मुमागमो भवति अनव्ययस्य । अरुन्तुदः । द्विषन्तपः । अजन्तानाम् . कालिम्मन्याः अरुर्द्विषदजन्तस्येति किम् विद्वन्मन्यः । अनव्ययस्येत्येव - दोषामन्यमहः । दिवामन्या रात्रिः । अन्तग्रहणं किम् कृताजन्तकार्यप्रतिपत्त्यर्थम् । अतो ह्रस्वे कृते मुम्भवति ।।

इच एकाचोऽभ्प्रतत्ययवञ्च ।। 6 - 3 - 68 ।।

इजन्तस्य एकाचः खिदन्ते उत्तरपदेऽमागमो भवति, आम्प्रत्ययवञ्च द्वितीयैकवचनवञ्च स भवति । अमिति हि द्विरावर्तते । गाम्मन्यः । स्त्रीम्मन्यः , स्त्रियम्मन्यः । नरम्मन्यः । श्रियम्मन्यः । भ्रुवम्मन्यः । अम्प्रत्ययवञ्च - इत्यतिदेशादात्वपूर्वसवर्णगुणेयङुवङादेशा भवन्ति । इच इति किम् त्वङ्मन्यः । एकाच इति किम् लेखाभ्रुम्मन्यः । अथेह कथं भवितव्यम् - श्रियमात्मानं ब्राह्मणकुलं मन्यत इत्युपक्रम्य श्रिमन्यमिति भवितव्यम् इति भाष्ये स्थितम् । तत्रेदं भाष्यकारस्य दर्शनम् - अत्र विषये परित्यक्तस्वरिङ्गः श्रीशब्दो ब्राह्मणकुले वर्तते, यथा - प्रष्ठादयः स्त्रियाम । तत्र स्वमोर्नपुंसकात् इत्यमो लुग्भवति ।।

वाचंयमपुरन्दरौ च ।। 6 - 3 - 69 ।।

वाचंयम, पुरन्दर - इत्येतौ निपात्येते । वाचंयम आस्ते । पुरं दारयतीति पुरन्दरः ।।

कारे सत्यागदस्य ।। 6 - 3- 70 ।।

कारशब्द उत्तरपदे सत्य, अगद - इत्येतयोर्मुमागमो भवति । सत्यं करोतीति, सत्यस्य वा कारः सत्यङ्कारः । एवम् - अगदङ्कारः । अस्तुसत्यागदस्य कार इति वक्तव्यम् । अस्तुङ्कारः । भक्षस्य छन्दसि कारे मुम् वक्तव्यः । भक्षं करोतीति , भक्षस्य वा कारः भक्षङ्कारः । छन्दसीति किम् भक्षकारः । धेनोर्भव्यायां मुम्वक्तव्यः । धेनुम्भव्या । लोकस्य पृणे मुम्वक्तव्यः लोकम्पृणः । इत्येऽनभ्याशास्य मुम्वक्तव्यः । अनभ्याशामित्यः । भ्राष्ट्राग्न्योरिन्धे मुम्वक्तव्यः । भ्राष्ट्रमिन्धः । अग्निमिन्धः । गिलेऽगिलस्य मुम्वक्तव्यः । तिमिङ्गलः । अगिलस्येति किम् गिलगिलः । गिलगिले चेति वक्तव्यम् । तिमिङ्गिलगिलः । उष्णभद्रयोः करणे मुम्वक्तव्यः । उष्णङ्करणम् । भद्रङ्करणम् । सूतोग्रराजभोजमेर्वित्येतेभ्य उत्तरस्य दुहितृश्ब्दस्य पुत्रडादेशो वा वक्तव्यः । सूतपुत्री । सूतदुहिता । उग्रपुत्री । उग्रदुहिता । राजपुत्री । राजदुहिता । भोजपुत्री । भोजदुहिता । मेरुपुत्री । मेरुदुहिता । केचित्तु शाङ्र्गरवादिषु पुत्रशब्दं पठन्ति , तस्य पुत्रीति भवति । अन्यत्रापि हि दृश्यते - शैलपुत्रीति ।।

श्येनतिलस्य पाते ञे ।। 6 - 3 - 71 ।।

श्येन, तिल - इत्येतयोः पातशब्द उत्तरपदे ञप्रत्यये परे मुमागमो भवति । श्येनपातोऽस्यां क्रीडायाम् श्यैनम्पाता मृगया । तैलम्पाता । ञ इति किम् श्येनपातः ।।

रात्रेः कृति विभाषा ।। 6 - 3 - 72 ।।

रात्रेः कृदन्ते उत्तरपदे विभाषा मुमागमो भवति । रात्रिञ्चरः , रात्रिचरः । रात्रिमटः, रात्र्यटः। अप्राप्तविभाषेयम् । खिति हि नित्यं मुम् भवति - रात्रिम्मन्यः ।।

नलोपो नञः ।। 6 - 3 - 73 ।।

नञो नकारस्य लोपो भवत्युत्तरपदे । अब्रह्मणः । अवषलः । असुरापः । असोमपः । नञो नलोपोऽवक्षेपे तिङ्युपसंख्यानं कर्तव्यम् । अपचसि त्वं जाल्म । अकरोषि त्वं जाल्म ।।

तस्मान्नुडचि ।। 6 - 3- 74 ।।
तस्माल्लुप्तनकारान्नञः नुडागप्तो भवति अजादावुत्तरपदे । अनजः । अनश्वः । तस्मादिति किम् नञ एव हि स्यात् । पूर्वान्ते हि ङमो ह्रस्वादिचि ङमुणित्यम् इति ङमुट् प्राप्नोति ।।
नभ्राणनपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या ।। 6 - 3 - 75 ।।
नभ्राट्, नपात्, नवेदाः, नासत्याः, नमुचि, नकुल, नख, नपुंसक, नक्षत्र, नक्र, नाक - इत्येतेषु नञ् प्रकृत्या भवति । न भ्राजत इति नभ्राट् - भ्राजतेः क्विबन्तस्य नञ्समासः । नपातीति नपात् - पातिः शत्रन्तः । न वेत्तीति नवेदाः - वेत्तिरसुन्प्रत्ययान्तः । नासत्याः - सत्सु साधवः सत्याः, न सत्या असत्याः, न असत्याः नासत्याः । न मुञ्चतीति नमुचिः - मुचेरौणादिकः किप्रत्ययः । नास्य कुलमस्ति नकुलः । नख - नास्य खमस्तीति नखम् । नपुंसक - न स्त्री न पुमान्नपुंसकम् - स्त्रीपुंसयोः पुंसाभावो निपात्यते । नक्षत्र - न क्षरते क्षीयत इति वा नक्षत्रम् - क्षियः, क्षरतेर्वा क्षत्रमिति निपात्यते । नक्र - न क्रामतीति नक्रः - क्रमेर्डप्रत्ययो निपातनात् । नाक - नास्मिन्नकमस्ति नाकम् ।
एकादिश्चैकस्य चादुक् ।। 6 - 3 - 7 6 ।।
एकादिश्च नञ्प्रकृत्या भवति एकशब्दस्य चादुगागमो भवति । एकेन न विंशतिः एकान्नविंशतिः । एकान्नत्रिंशत् । तृतीया इति योगविभागात्समासः । पूर्वान्तोऽयमदुक् क्रियते । पदान्तलक्षणोऽत्रानुनासिको विकल्पेन यथा स्याद् इति ।।
नगोऽप्राणिष्वन्यतरस्याम् ।। 6 - 3 - 77 ।।
नञ्प्रकृत्या भवत्यन्तरस्याम् । नगा वृक्षाः, अगा वृक्षाः । नगाः पर्वताः, अगाः पर्वताः । न गच्छन्तीति नगा । गमेर्डप्रत्ययः । अप्रणिष्विति किम् अगो वृषलः शीतेन ।।
सहस्य सः संज्ञायाम् ।। 6 - 3 - 78।।
सहशब्दस्य स इत्ययमादेशो भवति संज्ञायां विषये । साश्वत्थम् । सपलाशम् । सशिंशपम् । संज्ञायामिति किम् सहयुध्वा । सहकुत्वा । सादेश उदात्तो निपात्यते । उदात्तानुदात्तवतो हि सहशब्दस्यान्तर्यतः स्वरितः स्यात् । स च निपातस्वरः पूर्वपदप्रकृतिस्वरत्वं यत्र, तत्र उपयुज्यते । अन्यत्र समासान्तोदात्तत्वेन बाध्यत एव - सेष्टि, सपशुबन्धमिति ।।
ग्रन्थान्ताधिके च ।। 6 - 3 - 79 ।।
ग्रन्थान्ते , अधिके च वर्त्तमानस्य सहशब्दस्य स इत्ययमादेशो भवति । सकलं ज्यौतिषमधीते । समुहूर्तम् । ससंग्रहं व्याकरणमधीयते । कलान्तम् , मुहूर्त्तान्तम् , संग्रहान्तमिति अन्तवचने - अव्ययीभावः समासः । तत्र अवाययीभावे चाकले इति कालवाचिन्युत्तरपदे सभावो न प्रप्वोतीत्ययमारम्भः । अधिके - सद्रोणा खारी । समाषः कार्षापणः । सकाकिणीको माषः ।।
द्वितीये चानुपाख्ये ।। 6 - 3 - 80 ।।
द्वयोः सहयुक्तयोरप्रधानो यः स द्वितीयः । उपाख्यायते - प्रत्यक्षत उपलभ्यते यः स उपाख्यः, उपाख्यादन्योऽनुपाख्यः - अनुमेयस्तस्मिन् द्वितीयेऽनुपाख्ये सहस्य स इत्ययमादेशो भवति । साग्निः कपोतः ।
सपिशाचा वात्या । सराक्षसीका शाला । अग्न्यादयः साक्षादनुपलभ्यमामाः कपोतादिभिरनुमीयमानास्तदुपाख्या भवन्ति ।।
अव्ययीभावे चाकाले ।। 6 - 3 - 81 ।।
अव्ययीभावे च समासेऽकालवाजिन्युत्तरपदे सहस्य स इत्ययमादेशो भवति । सचक्रं धेहि । सधुरं प्राज। अकाल इति किम् सहपूर्वाह्णम् ।।
वोपसर्जनस्य ।। 6 - 3 - 82 ।।
उपसर्जनसर्वावयवः समास उपसर्जम्, यस्य सर्वऽवयवा उपसर्जनीभूताः स सर्वोपसर्जनो बहुव्रीहिर्गृह्यते । तदवयवस्य सहशब्दस्य वा स इत्ययमादेशो भवति । सपुत्रः । सहपुत्रः । सच्छात्रः । सहच्छात्रः । उपसर्जनस्येति किम् सहयुध्वा । सहकृत्वा । सहकृत्वप्रियः, प्रियसहकृत्वेति, इह बहुव्रीहौ यदुत्तरपदं तत्परः सहशब्दो न भवतीति सभावो न भवति ।।
प्रकृत्याशिष्यगौवत्सहलेषु ।। 6 - 3 - 83 ।।
प्रकृत्या सहशब्दो भवति आशिषि विषयेऽगोवत्सहलेषु । स्वस्ति देवदत्ताय सहपुत्राय सहच्छात्राय सहामात्याय। अगोवत्सहलेष्विति किम् स्वस्ति भवते सहगवे, सगवे । सहवत्साय, सवत्साय। सहहलाय,
सहलाय। वोपसर्जनस्य इति पक्षे भवत्येव सभावः ।।
समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु ।। 6 - 3- 84 ।।
सः इति वर्तते । समानस्य स इत्ययमादेशो भवति छन्दसि विषये मूर्द्धन् , प्रभृति, उदर्क- इत्येतान्युत्तरपदानि वर्ज्जयित्वा । अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः । यो नः सनुत्यः । समानो गर्भः सगर्भः तत्र भवः सगर्भसयूथसनुताद्युत् इति यत्प्रत्ययः । अमूर्धप्रभृत्युर्केष्विति किम् समानमूर्धा समानप्रभृतयः । समानोदर्काः । समानस्य इति योगविभाग इष्टप्रसिध्यर्थः क्रियते । तेन सपक्षः, साधर्म्यम्, सजातीयः - इत्येवमादयः सिद्धा भवन्ति ।।
ज्योतिर्जनपदरात्रिनाभिनामगोत्रपस्थानपर्णवयोवचनबन्धुषु ।। 6 - 3 - 85।।
ज्योतिस्, जनपद, रात्रि, नाभि, नामन् गात्र, रुप, स्थान, वर्णं, वयस्, वचन, बन्धु - इत्येतेषूत्तरपदेषु समानस्य स इत्ययमादेशो भवति । सज्योतिः । सजनपदः । सरात्रिः । समनाभिः । सनामा । सगोत्रः । सरुपः । सस्थानः । सवर्णः । सवयाः । सवचनः । सबन्धुः ।।

चरणे ब्रह्मचारिणि ।। 6 - 3 - 86 ।।

चरणे गम्यमाने ब्रह्मचारिण्युत्तरपदे सप्तानस्य स इत्ययमादेशो भवति । समानो ब्रह्मचारी सब्रह्मचारी । ब्रह्म - वेदः , तदध्ययनार्थं यद् व्रतं तदपि ब्रह्म, तच्चरतीति ब्रह्मचारी । समानः, तस्यैव ब्रह्मणः समानत्वादित्ययमर्थो

भवति । समाने ब्रह्मणि व्रतचारी - सब्रह्मचारीति ।।

तीर्थे ये ।। 6 - 3- 87 ।।

तीर्थशब्दे उत्तरपदे यत्प्रत्ययपे परतः समानस्य स इत्ययमादेशो भवति । सतीर्थ्यः । समानतीर्थे वासी इति यत्प्रत्ययः ।।

विभाषोदरे ।। 6 - 3 - 88 ।।

उदरशब्द उत्तरपदे यत्प्रत्ययान्ते समानस्य विभाषा स इत्ययमादेशो भवति । सोदर्यः, समानोदर्यः । समानोदरे शयिति ओ चोदात्तः इति यत् ।।

दृग्दृशवतुषु ।। 6 - 3- 89 ।।

दृक् , दृश, वतु - इत्येतेषु परतः समानस्य स इत्ययमादेशो भवति । सदृक् , सदृशः । त्यदादिषु दृशोऽनालोचने कञ्च इत्यत्र समानान्ययोश्चेति वक्तव्यम् इति कञ्क्विनौ प्रत्ययौ क्रियेते । दृक्षे चेति वक्तव्यम् । सदृक्षः ।।दृशेः वसप्रत्ययोऽपि तत्रैव वक्तव्यः । वतुग्रहणमुत्तरार्थम् ।।

इदंकिमोरीश्की ।। 6 - 3 - 90 ।।

इदम्, किम् - इत्येतयोरीश् , कि - इत्येतौ यथासङ्ख्यमादेशौ भवतो दृग्दृशवतुषु । ईदृक्, ईदृशः, इयान्। कीदृक् , कीदृशः , कियान् । किमिदम्भ्यां वो घः इति वतुप् । दृक्षे चेति वक्तव्यम् । ईदृक्षः । कीदृक्षः ।।

आ सर्वनाम्नाः ।। 6 - 3 - 91 ।।

सर्वनाम्न आकारादेशो भवति दृग्दृशवतुषु । तादृक्, तादृशः, तावान् । यादृक् , तयादृशः, यावान् । दक्षे चेति वक्तव्यम् । तादृ्क्षः । यादृक्षः ।।

विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये ।। 6 - 3- 92 ।।

विष्वक् , देव - इत्येतयोः सर्वनाम्नश्च टेः अद्रीत्ययमादेशी भवति अञ्चतौ वप्रत्ययान्त उत्तरपदे । विष्वगञ्चतीति विष्वद्र्यङ् । देवद्र्यङ् । सर्वनाम्नः - तद्र्यङ् । यद्र्यङ् । अद्रिसध्र्योरन्तोदात्तनिपातनं कृत्स्वरनिवृत्त्यर्थम् । तत्र यणादेशे कृते उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य इत्येषु स्वरो भवति । विष्वग्देवयोरिति किम् अश्वाची । अञ्चताविति किम् विष्वग्युक् । वप्रत्यय इति किम् विष्वगञ्चनम् । वप्रत्ययग्रहणमन्यत्र धातुग्रहणे

तदादिविधिप्रतिपत्त्यर्थम् । तेनायस्कृतम् , अयस्कार इत्यत्र अतः कृकमिकंसकुम्भपात्र इति सत्वं भवति । छन्दसि स्त्रियां बहुलमिति वक्तव्यम् । विश्वाची च धृताची चेत्यत्र न भवति । कद्रीचीत्यत्र तु भवत्येव ।।

समः समि ।। 6 - 3 - 93 ।।

समित्येतस्य समि - इत्ययमादेशो भवति अञ्चतौ वप्रत्ययान्ते उत्तरपदे । सम्यक् , सम्यञ्चौ, सम्यञ्चः ।।

तिरसस्तिर्यलोपे ।। 6 - 3 - 94 ।।

तिरस् इत्येतस्य तिरि इत्ययमादेशो भवत्यञ्चतौ वप्रत्ययान्त उत्तरपदेऽलोपे - यदाऽस्य लोपो न भवति । तिर्यङ् , तिर्यञ्चौ , तिर्यञ्चः । अलोप इति किम् तिरश्चा । तिरश्चे । अचः इत्यकारलोपः ।।

सहस्य सध्रिः ।। 6 - 3 - 95 ।।

सहेत्यस्य सध्रि इत्ययमादेशो भवत्यञ्चतौ वप्रत्ययान्ते उत्तरपदे। सध्र्यङ्, सध्र्यञ्चौ , सध्र्यञ्चः । सध्रीचः । सध्रीचा ।।

सध मादस्थयोश्छन्दसि ।। 6 - 3 - 96 ।।

छन्दसि विषये माद, स्थ - इत्येतयोरुत्तरपदयोः सहस्य सध - इत्ययमादेशो भवति । सधमादो द्युम्न्य एकास्ताः । सधस्थाः ।।

द्व्यन्तरुपसर्गेभ्यो।टप ईत् ।। 6 - 3- 97 ।।

द्वि, अन्तर् - इत्येताभ्यामुपसर्गाञ्चोत्तरस्याबित्यतस्य ईकारादेशो भवति । द्वीपम् । अन्तरीपम् । उपसर्गाम् । उपसर्गात् - समीपम् । वीपम् । नीपम् । समाप ईत्वे प्रतिषेधो वक्तव्यः । समापं नाम देवयजनम् । अपर आह - ईत्वमनवर्णादिति वक्तव्यम् । इह मा भूत् प्रापम् , परापम् । अप्शब्दं प्रति क्रियायोगाभावाद् उपसर्गग्रहणं प्राद्युपरक्षणार्थम् ।

ऊदनोर्देशे ।। 6 - 3 - 98 ।।

अनोरुत्तरस्याप ऊक्रादेशो भवति देशाभिधाने । अनूपो देशः। देश इति किम् अन्वीपम् । दीर्घोञ्चारणमवग्रहार्यम् । अनु ऊपोऽनूप इति ।।

अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरगच्छेषु ।। 6 -3 - 99 ।।

अषष्ठीस्थस्य अतृतीयास्थस्य चान्यशब्दस्य दुगागमो भवति आशिस् , आशा, आस्था , आस्थित, उत्सुक, ऊति , कारक, राग, छ - इत्येतेषु परतः । अन्या आशीः अन्यदाशीः । अन्या आशा अन्यदशा । अन्या आस्था अन्यदास्था । अन्य आस्थितः अन्यदास्थितः । अन्य उत्सुकः अन्यदुत्सुकः । अन्या ऊतिः अन्यदूतिः । अन्यः कारकः अन्यत्कारकः । अन्यो रागः अन्यद्रागः । अन्यस्मिन् भवः अन्यदीयः । गहादिष्वन्यशब्दो द्रष्टव्यः । अषष्ठ्यतृतीयास्थस्येति किम् अन्यस्य आशीः अन्याशीः । अन्येन आस्थितः अन्यास्थितः ।।

दुगागमोऽविशेषेण वक्तव्यः कारकच्छयोः । षष्ठीतृतचीययोर्नेष्ट आशीरादिषु प्तप्तसु ।। अन्यस्य कारकम् अन्यत्कारकम् । अन्यस्येदम् अन्यदीयम् । अस्य च द्विर्नञ्ग्रहणं लिङ्गम् ।।

अर्थे विभाषा ।। 6 - 3- 100 ।।

अर्थशब्दे उत्तरपदे अन्यस्य विभाषा दुगागमो भवति । अन्यदर्थः, अन्यार्थः ।।

कोः कत्तत्पुरुषेऽचि ।। 6 - 3 - 101 ।।

कु इत्येतस्य कदित्ययमादेशो भवति तत्पुरुषे समासेऽजादावुत्तरपदे । कदजः । कदश्वः । कदुष्ट्रः । कदन्नम् । तत्पुरुष इति किम् कूष्ट्रो राजा । अचीति किम् कुब्राह्मणः । कुपुरुषः । कद्भावे त्रावुपसंख्यानम् । कुत्सितास्त्रयः कत्त्रयः ।।

रथवदयोश्च ।। 6 - 3 - 102 ।।

रथ , वद - इत्येतयोश्चोत्तरपदयोः कोः कत् इत्ययमादेशो भवति कद्रथः । कद्वदः ।।

तृणे च जातो ।। 6 - 3 - 103 ।।

तृणशब्दे उत्तरपदे जातावभिधेयायां कोः कदादेशो भवति । कत्तृणा नाम जातिः । जाताविति किम् कुत्सितानि तृणानि ।।

का पथ्यक्षयोः ।।6 - 3 - 104 ।।

पथिन्, अक्ष - इत्येतयोरुत्तरपदयोः कोः का इत्ययमादेशो भवति कापथः । काक्षः ।।

ईषदर्थे च ।। 6 - 3 - 105 ।।

ईषदर्थे वर्त्तमानस्य कोः का इत्ययमादेशो भवति । कामधुरम् । कालवणम् । अजादावपि परत्वात् कादेश एव भवति । काम्लम् । कोष्णम् ।।

विभाषा पुरुषे ।। 6 - 3 - 106 ।।

पुरुषशब्दे उत्तरपदे विभाषा कोः का इत्ययमादेशो भ ति । कापुरुषः । कुपुरुषः । अप्राप्तविभाषेयम् । ईषदर्थे तु पूर्वविप्रतिषेधेन नित्यं का भवति । ईषत्पुरुषः कापुरुषः ।।

कवञ्चोष्णे ।। 6 - 3 - 107 ।।

उष्णशब्द उत्तरपदे कोः कवमित्ययमादेशो भवति, का च विभाषा । कावोष्णम् । कोष्णम् । कदुष्णम् ।।

पथि चच्छन्दसि ।। 6 - 3 - 108 ।।

पथिशब्द उत्तपदे छन्दसि विषये कोः कव, का - इत्येतावादेशौ भवतो विभाषा । कावपथः । कापथः । कुपथः ।।

पृषोदरादीनि यथोपदिष्टम् ।। 6 - 3 - 109 ।।

पृषोदरप्रकाराणि शब्दरुपाणि, येषु लोपागमवर्णविकाराः शास्त्रेण न विहिताः, दृश्यन्ते च, तानि यथोपदिष्टानि साधूनि भवन्ति । यानि यथोपदष्टानि - शिष्टैरुञ्चारितानि, प्रयुक्तानि, तानि तथैवानुगन्तव्यानि । पृषदुदरं यस्य पृषोदरम् । पृषद् उद्वानं यस्य पृषोद्वानम् । अत्र तकारलोपो भवति । वारिवाहको बलाहकः । पूर्वशब्दस्य बशब्द आदेश उत्तरपदादेश्च लत्वम् । जीवनस्य मूतौ जीमूतः । वनशब्दस्य लोपः । शवानां शयनं श्मशानम् । शवशब्दस्य श्मादेशः शयनशब्दस्यापि शानशब्द आदेशः । ऊर्ध्वं खमस्येति उलुखलम् । ऊर्ध्वखशब्दयोरुलू, खल - इत्येतावादेशौ भवतः । पिशिताशः पिशाचः । पिशिताशशब्दयोर्यथायोगं पिशाचशब्दावादेशौ । ब्रुवच्छब्दस्य चोपपदस्य बृशब्द आदेशो भवति । मह्यां रौतोति मयूरः । रौतेरचि टिलोपः । महीशब्दस्य मयूभावः । एवमन्येऽपि अश्वत्थकपित्थप्रमृतयो यथायोगमनुगन्तव्याः । दिक्शब्दस्य उत्तरस्य तीरस्य तारभावो वा भवति । दक्षिणतीरम् , दक्षिणतारम् । उत्तरतीरम् , उत्तरतारम् । वाचो वादे डत्वं च लभावश्चोत्तरपदस्येञि प्रत्यये भवति । वाचं वदतीति वाग्वादः । तस्यापत्यं वाड्वालिः । षष उत्वं दतृदश्धासूत्तरपदादेष्टुत्वं च भवति । षड् दन्ता अस्य षोडन् । षट् च दशा च षोडश । धासु वा षष उत्वं भवति उत्तरपदादेश्च ष्टुत्वम् । षोढा, षड्धा कुरु । बहुवचननिर्देशो नानाधिकरणवाचिनो धाशब्दस्य प्रतिपत्त्यर्थः । इह मा भूत् - षट् दधाति धयति वा षड्धेति ।। दुरो दाशनाशदभध्येषूत्वं वक्तव्यमुत्तरपदादेश्च ष्टुत्वम् । कुच्छ्रेण दाश्यते नाश्यते दभ्यते च यः स दूडाशः । दूणाशः । दूडभः । दम्भेः खल्वनुनासिकलोपो निपातनात् । दुष्टं ध्यायतीति दूढ्यः । दुःशब्दोपपदस्य ध्यायतेः । आतश्चोपसर्गे इति कप्रत्ययः । स्वरो रोहतौ छन्दस्युत्वं वक्तव्यम् । जाय एहि स्वोरौहाव । पीवोपवसनादीनां च लोपो वक्तव्यः । वीवोपवसनानां पयोपवसनानाम् ।। वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ।।

संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ङौ ।। 6 - 3 - 110 ।।

संख्या , वि, साय इत्येवम्पूर्वस्याह्नशब्दस्य स्थाने अहनित्ययमादेशो भवत्यन्यतरस्यां ङौ परतः । द्वयोरह्नोर्भवः द्व्यह्नः । त्र्यह्नः । द्व्यह्नि, द्व्यहनि त्र्यह्नि, त्र्यहनि । द्व्यह्ने । त्र्यह्ने । व्यपगतमहो व्यह्नः । व्यह्नि , व्यहनि । व्यह्ने । सायमह्नः सायाह्नः । सायाह्नि , सायाहनि । सायाह्ने । एकदेशिसमासः पूर्वादिभ्योऽन्यस्यापि भवतीत्येतदेव विसायपूर्वस्याह्नस्य ग्रहणं ज्ञापकम् । तेन मध्यमह्नो मध्याह्न इत्यपि भवति । संख्याविसायपूर्वस्येति किम् पूर्वह्णे । अपराह्णे ।।

ढ्रलोपे पूर्वस्य दीर्घोऽणः ।। -3 - 111।।

ढकाररेफयोर्लोपो यस्मिन् स ढ्रलोपः, तत्र पूर्वस्याणो दीर्घो भवति । लीढम् । मीढम् । उपगूढम् । मूढः । रलोपे - नीरक्तम् । अग्नीरथः । इन्दूरथः । पुनारक्तं वासः । प्राताराजक्रयः । पूर्वग्रहणमनुत्तरपदेऽपि पूर्वमात्रस्य दीर्घार्थम् । अण इति किम् आतुढम् आतुढम् , आवुढम् ।।

सहिवहोरोदवर्णस्य ।। 6 - 3 - 112 ।।

सहि, वहि - इत्येतयोरवर्णस्योकार आदेशो भवति ढ्रलोपे । सोढा, सोढुम् , सोढव्यम् । वोढा, वाढुम्, वोढव्यम् । अवर्णस्येति किम् ऊढः । ऊदवान् ।

वर्णग्रहणं किम् कृतायामपि वृद्धौ यथा स्यात् - उदावोढाम् । उदवोढम् । तादपि परस्तपरः , तपरत्वादाकारस्य ग्रहणं न स्यात् ।।

साढ्यै साढ्वा साढेति निगमे ।। 6 - 3 - 113 ।।

साढ्यै, साढ्वा, साढा - इति निगमे निपात्यन्ते । साढ्यै समन्तात् । साढ्वा शत्रून् । सहेः क्त्वाप्रत्यये ओत्वाभावः । पक्षे क्त्वाप्रत्ययस्च ध्यैभावः । साढा - इदि तृचि रुपमेतत् । निगम इति किम् सोढ्वा, सोढेति भाषायाम् ।।

संहितायाम् ।। 6 - 3 - 114 ।।

संहितायाम् इत्यमधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामः संहितायामित्येवं तद्वेदितव्यम् । वक्ष्यति - द्व्यचोऽतस्तिङः इति । विद्मा हि त्वा सत्पतिं शूर गोनाम् । संहितायामिति किम् विद्म, हि, त्वा, सत्पतिं, शूर, गोनाम् ।।

कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य ।। 6 - 3 - 115 ।।

कर्णशब्दे उत्तरपदे लक्षणवाचिनो दीर्घो भवति विष्ट, अषटन्, पञ्चन् , मणि, भिन्न, छिन्न , छिद्र, स्रुव, स्वस्तिक - इत्येतान्वर्जयित्वा । दात्राकर्णः । द्विगुणाकर्णः । त्रिगुणाकर्णः । द्व्यङ्गुलाकर्णः । अङ्गुलाकर्णः । यत्पशूनां स्वामिविशेषसम्बन्धज्ञापनार्थं दात्राकारादि क्रियते तदिह लक्षणं गृह्यते । लक्षणस्येति किम् शोभनकर्णः । अविष्टादीनामिति किम् विष्टकर्णः । अष्टकर्णः । पञ्चकर्णः । मणिकर्णः । भिन्नकर्णः । छिन्नकर्णः । छिद्रकर्णः । स्रुवकर्णः । स्वस्तिककर्णः ।।

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।। 6 - 3 - 116 ।।

नहि, वृति, वृषि, व्यधि, रुचि, सहि, तनि - इत्येतेषु क्विप्रत्ययान्तेषूत्तरपदेषु पूर्वपदस्य दीर्घो भवति संहितायां

विषये । नहि - उपानत् , परीणत् । वृति - नीवृत् , उपावृत् । वृषि - प्रावृट् , उपावृट् । व्यधि - मर्मावित् , हृदयावित्, श्वावित् । रुचि - नीरुक् , अभीरुक् । सहि - ऋतीषट् । तनि - तरितत् । गमः क्वाविति गमादिनामिष्यते । ततस्तनोतेरप्यनुनासिकलोपः । क्वाविति किम् परिणहनम् ।।

वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम् ।। 6 - 3 - 117 ।।

वन, गिरि - इत्येतयोरुत्तरपदयोर्यथासंख्यं कोटरादीनां किंशुलकादीनां च दीर्घो भवति संज्ञायां विषये । वने कोटरादीनाम् - कोटरावणम् , मिश्रकावणम् , सिध्रकावणम् , सारिकावणम् । गिरौ किंशुलकादीनाम् - किंशुलकागिरिः । अञ्जलागिरिः । कोटरकिंशुलकादीनामिति किम् असिपत्रवनम् । कृष्णगिरिः । कोटर । मिश्रक । पुरक । सिध्रक । सारिक । कोटरादिः । किंशुलक । शाल्वक । अञ्जन । भञ्जन । लोहित । कुक्कुट । किंशुलकादिः ।।

वले ।। 6 - 3 - 118 ।।

वले परतः पूर्वस्य दीर्घो भवति । आसुतीवलः । कृषोवलः । दन्तावलः । रजः कृष्यासुतिपरिषदो वलच् इति वलच्प्रच्ययो गृह्यते, न प्रातिपदिकम् । अनुत्साहभ्रातृपितृणामित्येव । उत्साहवलः । भ्रातृवलः ।। पितृवलः ।।

मतौ बह्वचोऽनजिरादीनाम् ।। 6 - 3- 119 ।।

मतौ परतो बह्वचोऽजिरादिवर्जितस्य दीर्घो भवति संज्ञायां विषये । उदुम्बरावती । मशकावती । वीरणावती । पुष्करावती । अमरावती । नद्यां मतुप् इति मतुप्प्रत्ययः । संज्ञायाम् इति मतोर्वत्वम् । बह्वच इति किम् व्रीहिमती । अनजिरादीनामिति किम् अजिरवती । खदिरवती । पुलिनवती । हंसकारण्डववती । चक्रवाकवती । संज्ञायाम् इत्येव - वलयवती ।।

शरादीनां च ।। 6 - 3- 120 ।।

शरादीनां च मतौ दीर्घो भवति संज्ञायां विषये । शरावती । वंशावती । शर। वंश । धूम । अहि । कपि । मणि । मुनि । शुचि । हनु । शरादिः । संज्ञायाम् इति मतोर्वत्वम् । यवादित्वाद् व्रीह्यादिभ्यो न भवति ।।

इको वहेऽपीलोः ।। 6 - 3- 121 ।।

इगन्तस्य पूर्वपदस्य पीलुवर्जितस्य वह उत्तरपदे दीर्घो भवति । ऋषीवहम् । कपीवहम् । मुनीवहम् । इक इति किम् पिण्डवहम् । अपीलोरिति किम् पीलूवहम् । अपील्वादीनामित वक्तव्यम् । इह मा भूत् - दारुवहम्।

उपसर्गस्य घञ्यमनुष्ये बहुलम् ।। 6 - 3 - 122 ।।

उपसर्गस्य घञन्ते उत्तरपदेऽमनुष्येऽभिधेये बहुलं दीर्घो भवति । वीक्लेदः । वीमार्गः । अपामार्गः । न च भवति - प्रसेवः , प्रसारः ।। सादकारयोः कृत्रिमे दीर्घो भवति । प्रासादः । प्राकारः । कृत्रिम इति किम् प्रसादः । प्रकारः । वेशादिषु विभाषा दिर्घो भवति । प्रतिवेशः , प्रतीवेशः । प्रतिरोधः, प्रतीरोधः । अमनुष्य इति किम् निषादो मनुष्यः ।।

इकः काशे ।। 6 - 3- 123 ।।

इगन्तस्योपसर्गस्य काशशब्द उत्तरपदे दीर्घो भवति । नीकाशः । वीकाशः । अनूकाशः । पचाद्यजन्तोऽयं काशशब्दः , न तु घञन्तः । इक इति किम् प्रकाशः ।।

दस्ति ।। 6 - 3- 124 ।।

दा इत्येतस्य यस्तकारादिरादेशस्तस्मिन्परत ईगन्तस्योपसर्गस्य दीर्घो भवति । नीत्तम् । वीत्तम् । परीत्तम् । अच उपसर्गात्तः इत्यन्तस्य यद्यपि तकारः क्रियत, तथापि चर्त्वंस्याश्रयात्सिद्धत्वमिति तकारादिर्भवति । एक इत्येव - प्रत्तम् , अवत्तम् । द इति किम् वितीर्णम् । नितीर्णम् । तीति किम् सुदत्तम् ।।

अष्टनः संज्ञायाम् ।। 6 - 3- 125 ।।

अष्टन् - इत्येतस्योत्तरपदे संज्ञायां दीर्घो भवति । अष्टावक्रः । अष्टाबन्धुरः । अष्टापदम् । संज्ञायमिति किम्
अष्टपुत्रः । अष्टभार्यः ।।

छन्दसि च ।। 6 - 3 - 126 ।।

छन्दसि विषयेऽष्टन उत्तरपदे दीर्घो भवति । आग्नेयमष्टाकपालं निर्वपेत् । अष्टाहिरण्या दिक्षिणा । अष्टापदी देवता सुमती । अष्टौ पादावस्या इति बहुव्रीहौ पादस्य लौपे कृते पादोऽन्यतरस्याम् इति ङीप् । गवि च युक्ते भाषायामष्टनो दीर्घो भवतीति वक्तव्यम् । अष्टागवं शकटम् ।।

चितेः कपि ।। 6 - 3- 127 ।।

चितिशब्दस्य कपि परतो दीर्घो भवति । एकचितीकः । द्विचितीकः । त्रिचितीकः ।।

विश्वस्य वसुराटोः ।। 6 - 3 - 128 ।।

विश्वशब्दस्य वसु, राट् - इत्येतयोरुत्तरपदेयोर्दीर्घ आदेशो भवति । विश्वावसुः । विश्वाराट् । राडिति विकारनिर्देशः - यत्रास्यैतद्रूपं तत्रैव यथा स्यात् ।
इह न भवति - विश्वराजौ । विश्वराजः ।।

नरे संज्ञायाम् ।। 6 - 3- 129 ।।

नरशब्द उत्तरपदे संज्ञायां विषये विश्वस्य दीर्घो भवति । विश्वानरो नाम यस्य वैश्वानरिः पुत्रः । संज्ञायामिति किम् विश्वे नरा यस्य स विश्वनरः ।।

मित्रे चर्षौ ।। 6 - 3- 130 ।।

मित्रे चोत्तरपदे ऋषावभिधेये विश्वस्य दीर्घो भवति । विश्वामित्रो नाम ऋषिः । ऋषाविति किम् विश्वमित्रो माणवकः ।।

मन्त्रे सोमाश्चेन्द्रियविश्वदेव्यस्य मतौ ।। 6 - 3 - 121 ।।

मन्त्रविषये सोम, अश्व, इन्द्रिय, विश्वदेव्य - इत्येतेषां मतुप्प्रत्यये परतो दीर्घो भवति । सोमावती । अश्वावती । इन्द्रियावती । विश्वदेव्यावती ।।

ओषधेश्च विभक्तावप्रथमायाम् ।। 6 - 3 - 132 ।।

मन्त्रे इति वर्तते । ओषधिशब्दस्य विभक्तावप्रथमायां परतो दीर्घो भवति । ओषधिभिरपीपतत् । नमः पृथिव्यै नम ओषधीभ्यः । विभक्ताविति किम् ओषधिपते । अप्रथमायामिति किम् स्थिरेयमस्त्वोषधिः ।।

ऋचि तुनुधमक्षुतङ्कुत्रोरुष्याणाम् ।। 6 - 3 - 133 ।।

ऋचि विषये तु, नु, घ, मक्षु, तङ् , कुत्र, उरुष्य - इत्येषां दीर्घो भवति । आ तू न इन्द्र वृत्रहन् । नु - नू
करणे । घ- उत वा घा लस्यात् । मक्षु - मक्षू गोमन्तमीमहे तङ् -भरता जातवेदसम् । तङिति थादेशस्य ङित्त्वपक्षे ग्रहणम् , तेनेह न भवति - श्रृणोत ग्रावाणः । कृ - कूमनः। त्र - अत्रा गौः । उरुष्य - उरुष्या णोऽग्नेः ।।

इकः सुञि ।। 6 - 3 - 134 ।।

सुञ् निपातो गृह्यते । इगन्तस्य सुञि परतो गन्त्रविषये दीर्घो भवति । अभी षु णः सखीनाम् । उर्ध्व ऊ षु ण ऊतये । सुञः इति षत्वम् , नश्च धातुस्थोरुषुभ्यः इति णत्वम् ।।

द्व्यचोऽतिस्तिङः ।। 6 - 3- 135 ।।

ऋचि इति वर्तते । द्व्यचिस्तिङन्तस्यात ऋग्विषये दीर्घो भवति । विद्मा हि त्वा सत्पतिं शूर गोनाम । विद्मा स तस्य पितरम् । द्व्यच इति किम् अश्वा भरत वाजिनः । अत इति किम् आ देवान्वक्षि यक्षि च ।।

निपातस्य च ।। 6 - 3- 136 ।।

ऋचि इत्येव । निपातस्य च ऋग्विषये दीर्घ आदेशो भवति । एवा ते । अच्छा ते ।।

अन्येषामपि दृश्यते ।। 6 - 3- 137 ।।

अन्यषामपि दीर्घो दृश्यते स शिष्टप्रयोगादनुगन्तव्यः । यस्य दीर्घत्वं न विहितम् , दृश्यते च प्रयोगे , तदनेन कर्तव्यम् । केशाकेशि । कचाकचि ।
जलाषाट् । नारकः पूरुषः ।। शूनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु । श्वादन्तः । श्वादंष्ट्रः । श्वाकर्णः। श्वाकुन्दः । श्वावराहः । श्वापुच्छः । श्वापदः ।।

चौ ।। 6 - 3- 138 ।।

चौ परतः पूर्वपदस्य दीर्घो भवति । चौ इत्यञ्चतिर्लुप्तनकाराकारो गृह्यते । दधीचः पश्य । दधीचा । दधीचे । मधूचः पश्य। मधूचा । मधूचे ।
अन्तरङ्गोऽपि हि यणादेशो दीर्घविधानसमार्थ्यन्न प्रवर्तते ।।

सम्प्रसारणस्य ।। 6 - 3 - 139 ।।

उत्तरपदे इति वर्तते । सम्प्रसारणान्तस्य पूर्वपदस्योत्तरपदे दीर्घो भवति । कारीषगन्धीपुत्रः । कारीषगन्धीपतिः । कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः ।
करीषस्येव गन्धोऽस्य, कुमुदस्येव गन्धोऽस्य - अल्पाख्यायाम् , उपमानाच्च इति इकारः समासान्तः । करीषगन्धेरपत्यं कारीषगन्ध्या, कुमुदगन्धेरपत्यं कौमुदगन्ध्या, तस्याः पुत्रः कौमुदगन्धीपुत्रः , कौमुदगन्धीपतिः । इको ह्रस्वोङ्यो गालवस्य इत्येतन्न भवति व्यवस्थितविभाषा हि सा । अकृत एव दीर्घत्वे ह्रस्वाभावपक्षे कृतार्थेनापि दीर्घेण पक्षान्तरे परत्वाद् ह्रस्वो बाध्यते । पुनः प्रसङ्गविज्ञानं च न भवति , सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितम् एवेति ।।

इति श्रीवामनविरचितायां काशिकावृत्तौ षष्ठस्याध्यायस्य तृतीयः पादः ।

6.4

अथ षष्ठाध्याये चतुर्थः पादः

अङ्गस्य ।। 6 - 4 - 1 ।।

अधिकारोऽयमा सप्तमाध्यायपरिसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामोऽङ्गस्येत्येवं तद्वेदितव्यम् । वक्ष्यति - हलः । हूतः । जीनः । संवीतः । अङ्गस्येति किम् निरुतम् । दुरुतम् । नामि दीर्घः - अग्नीनाम् । वायूनाम । अङ्गस्येति किम् क्रिमिणां पश्य । पामनां पश्य । अतो भिस ऐस् - वृक्षैः । प्लक्षैः । अङ्गस्येति किम् ब्राह्मणभिस्सा । ओदनभिस्सिटा । अङ्गधिकारः कृतोऽन्यार्थः नामि -दीर्घत्वाद्यपि व्यवस्थापयतीति तदर्थमर्थवद्ग्रहणुपरिभाषा नाश्रयितव्या भवति ।अङ्गस्येति सम्बन्धसामान्ये एषा षष्ठी यथायोगं विशेषेष्ववतिष्ठते । अथ वा - प्रातिपदिकार्थमात्रमपिवक्षितविभक्त्यर्थमधिक्रियते । तदुत्तरत्र यथायोगं विपरिणम्यते । ततोऽकारान्तादङ्गाद् भिस ऐसित्येवमाद्यपि सम्यक् सम्पन्नं भवति ।।

हलः ।। 6 - 4 - 2 ।।

अङ्गावयवाद्धलो यदुत्तरं सम्प्रसारणम् तदान्तस्याङ्गस्य दीर्घो भवति । हूतः । जीनः । संवीतः । हल इति किम् उतः । उतवान् । अङ्गावयवादिति किम् निरुतम् । तदन्तस्येति किम् विद्धः । विचितः । अण इत्येव - तृतीयः, तृतीयेति वा निपातनादत्र दीर्घाभावः । अङ्गग्रहणमावर्तयितव्यम् - हल्विशेषणार्थम् , अङ्गकार्यप्रतिपत्त्यर्थं च ।।

नामि ।। 6 - 4 -3 ।।

नाम् इत्येतत्षष्ठीबहुवचनमागतनुट्कं गृह्यते । तस्मिन्परतोऽङ्गस्य दीर्घो भवति । अग्नीनाम् । वायूनाम् । कर्तृणाम् । अणः इत्येतदत्र निवृत्तम् । आगतनुट्कग्रहणमुत्तरार्थम्, कृते च नुटि दीर्घप्रतिपत्त्यर्थम् , अन्यथा हि नुडेव न स्यात् ।। नामिदीर्घ आमि चेत्स्यात् कृते दीर्घे न नुड् भवेत् । वचनाद्यत्र तन्नास्ति नोपधायाश्च चर्म्मणाम् ।।

न तिसृचतसृ ।। 6 - 4 - 4 ।।

तिसृ , चतसृ - इत्येतयोर्नामि दीर्घो न भवति । तिसृणाम् । चतसृणाम् । इदमेव नामि इति दीर्घप्रतिषेधवचनं ज्ञापकम् - अचिर ऋतः इत्येतस्मात्पूर्वविप्रतिषेधेन नुडागमो भवतीति ।

छनादस्युभयथा ।। 6 - 4 - 5 ।।

छन्दसि विषये तिसृचतसृ - इत्येतयीर्नामि परत उभयथा दृशयतेदीर्घश्च, अदीर्घश्च । तिसृणां मध्यदिने, तिसृणां मध्यदिने । चतसृणां मध्यदिने, चतसृणां मध्यं दिने ।।

नृ च ।। 6 - 4 - 6 ।।

नृ इत्येतस्य नामि परे उभयथा भवति । त्वं नृणाम् नृपते, त्वं नृणाम् नृपते । केचिदेतत् छन्दसि इति नानुवर्तयन्ति, तेन भाषायामपि विकल्पो भवति ।।

नोपधायाः ।। 6 - 4 - 7 ।।

नान्तस्याङ्गस्योपधाया नामि परतो दीर्घो भवति । पञ्चानाम् । सप्तानाम् । नवानाम् । दशानाम् । न इति किम् चतुर्णाम् । ना इत्येव - चर्मणाम् ।।

सर्वनामस्थाने चासम्बुद्धौ ।। 6 - 4 - 8 ।।

सर्वनामस्थाने च परतोऽसम्बुद्धौ नोपधाया दीर्घो भवति । राजा, राजानौ, राजानः । राजानम्, राजानौ । सामानि तिष्ठन्ति । सामानि पश्य । सर्वमामस्थान इति किम् राजनि । सामनि । असम्बुद्धाविति किम् हे राजन् । हे तक्षन् ।।

वा षपूर्वस्य निगमे ।। 6 - 4 - 9 ।।

षपूर्वस्यायो नोपधाया निगमविषये सर्वनामस्थाने परतोऽसम्बुद्धौ वा दीर्घो भवति । स तक्षाणं तिष्ठान्तमब्रवीत्, स तक्षणं तिष्ठन्तमब्रवीत् । ऋभुक्षाणमिन्द्रम् , ऋभुक्षणमिद्रम् । निगम् इति किम् तक्षा , तक्षाणौ , तक्षाणः ।।

सान्तमहतः संयोगस्य ।। 6 - 4 - 10 ।।

सकारन्तस्य संयोगस्य यो नकारः महतश्च तस्योपधाया दीर्घो भवति सर्वनामस्थाने परतः समाबुद्धो । श्रेयान्, श्रेयांसौ, श्रेयांसः । श्रेयांसि । पयांसि । यशांसि । महतः खल्वपि - महान् । महान्तौ । महान्तः । असम्बुद्धाविति किम् हे श्रेयन् । हे महन् ।।

अप्तृन्तृच्छ्स्वसृनप्तृनेष्ट्त्वष्ट्क्षत्तृहोतृपोतृप्रशास्तृणाम् ।। 6 - 4 - 11 ।।

अप् - इत्येतस्य तृजन्तस्य, स्वसृ, नप्तृ, नेष्ट्ृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ, प्रसास्तृ - इत्येतेषां चाङ्गानामुपधाया दीर्घो भवति सर्वनामस्थाने परतोऽसम्बुद्धौ । अप् - आपः । बह्वाम्पि तडागानीति केचिदिच्छन्ति, तत्र समासान्तो विधिरनित्यः इति समासान्तो न क्रियते ।नित्यमपि च नुममकृत्वा दीर्घत्वमिष्यते । तृन् - कर्त्तारौ कटस्य । वदितारौ जनापवादान् । कर्त्तारः । तृच् - कर्त्तारौ कटस्य । कर्त्तारः । हर्त्तारौ भारस्य, हर्त्तारः । स्वसृ - स्वसा । स्वसारौ । स्वसारः

। नप्तृ - नप्ता । नप्तरौ । नप्तारः । नेष्टृ - नेष्टा । नेष्टारौ । नेष्टारः
त्वष्टृ - त्वष्टा । त्वष्टारौ । त्वष्टारः । क्षत्तृ - क्षत्ता । क्षत्तारौ । क्षत्तारः । होतृ - होता । होतारौ । होतारः । पोतृ - पोता । पोतारौ । पोतारः । प्रशास्तृ - प्रशास्ता । प्रशास्तारौ । प्रशास्तारः । नप्त्रादीनां ग्रहणमव्युत्पत्तिपक्षे विध्यर्थम् । व्युत्पत्तिपक्षे नियमार्थम् - एवम्भूतानामन्येषां संज्ञाशब्दानां दीर्घो मा भूदिति । पितरौ , पितरः । मातरौ, मातरः । असम्बुद्धाविति किम् हे कर्तः । हे स्वसः ।।

इन्हन्पूषार्यम्णां शौ ।। 6 - 4 - 12 ।।

इन्, हन्, पूषन्, अर्यमन् - इत्येवमन्तानामङ्गानां शौ परत उपधाया दीर्घो भवति । बहुदण्डीनि । बहुच्छत्रीणि । बहुवृत्रहाणि । बहुभ्रूणहाणि । बहुपूषाणि । बह्वर्यमाणि । सिद्धे सत्यारम्भो नियमार्थः - इन्हन्पूषार्यम्णामुपधायाः शावेव दीर्घो भवति, नान्यत्र। दण्डिनौ । छत्त्रिणौ । वृत्रहणौ । पूषणौ । अर्यमणौ ।।
दीर्घविधिर्य इहेन्प्रभृतीनां तं विनियम्य सुटीति सुविद्वान् ।शौ नियमं पुनरेव विदध्याद् भ्रूणहनीति तथास्य न दुष्येत् ।। शास्मि निवर्त्त्य सुटीत्यविशेषे शौ नियमं कुरु वाऽप्यसमीक्ष्य । दीर्घविधेरुपधानियमान्मे हन्त । यि दीर्घविधौ च न दोषः ।। सुट्यापि वा प्रकृतेऽनवकाशः शौ नियमोऽप्रकृतप्रतिषेधे यस्य हि शौ नियमः सुटि नेतत्तेन न तत्र भवेद्विनियम्यम् ।। हन्तेः अनुनासिकस्य क्विझलोः वङिति इति दीर्घत्वं यत् तदपि नियमेन बाध्यते - वृत्रहणि , भ्रूणहनीति । कथम् योगविभागः क्रियते - इन्हन्पूषार्यम्णाम् सर्वनामस्थान एव दीर्घो भवति, नान्यत्रेति । ततः शौ इति द्वितीयो नियमः - शावेव सर्वनामस्थाने दीर्घो भवति, नान्यत्रेति । सर्वस्योपधालक्षणस्य दीर्घस्य नियमेन निवृत्तिः क्रियते । यस्तु न उपधालक्षणः, स भवत्येव - वृत्रहायते, भ्रूणहायते । अथ वा - अनुवर्त्तमानेऽपि सर्वनामस्थानग्रहणे सामर्थ्यादयमविशेषेण नियमः । शिशब्दो हि सर्वनामस्थानं नपुंसकस्य, न च तस्यान्यत् सर्वनामस्थानमस्तीत्यविशेषेण नियमः । तत्र तु नपुंसकस्य इत्येतन्नाश्रीयते । तेनानपुंसकस्यापि दीर्घो न भवति सर्वनामस्थानसंज्ञाविधाने तु नपुंसकस्य व्यापारोऽस्तीति तत्र नियमः क्रियमाणो नपुंसकस्य स्यात् ।।

सौ च।। 6 - 4 - 13 ।।

सावसम्बुद्धौ परत इन्हन्पूषार्यम्णामुपधाया दीर्घो भवति । दण्डी । वृत्रहा । पूषा । अर्यमा । असम्बुद्धाविति किम् हे दण्डिन् । हे वृत्रहन् । हे पूषन् । हे अर्यमन् ।।

अत्वसन्तस्य चाधातोः ।। 6 - 4 - 14 ।।

अतु, अस् - इत्येवमन्तस्य अधातोरुपधायाः सावसम्बुद्धौ परतो दीर्घो भवति । डवतु - भवान् । क्तवतु - कृतवान् । मतुप् - गौमान् । यवमान् । अत्र कृते दीर्घे नुमागमः कर्त्तव्यः । यदि हि परत्वान्नित्यत्वाच्च नुम् स्यात्, दीर्घस्य निमित्तमतूपधा विहन्येत । असन्तस्य सुपयाः । सुयशाः । सुश्रेताः ।अधातोरिति किम् पिण्डं ग्रसते इति पिण्डग्रः, चर्म वस्ते इति चर्मवः । अनर्थकोऽप्यसशब्दो गृह्यते अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदान्तविधिं प्रयोजयन्ति इति । अन्तग्रहणमुपदेशप्रयोगेकदेशस्याप्यत्वन्तस्य परिग्रहार्थम् , अन्यथा मतुपो ग्रहणं न स्याद् - उपदेशे रुपनिर्ग्रहहेतौ न्यमत्वन्त इति असम्बुद्धावित्येव- हे गोमन् । हे सुपयः ।।

अनुनासिकस्य क्विझखोः क्ङिति ।।6 - 4 - 15 ।।

अनुनासिकान्तस्याङ्गस्य उपधाया दीर्घो भवति क्विप्रत्यये परतो झलादौ च क्ङिति । प्रशान् । प्रतान् । झलादौ किति - शान्तः । शान्तवान् । शान्ता । शान्तिः । ङिति खल्वपि - शंशान्तः । तन्तान्तः । यङ्लुगन्तादयं तस् । अनुनासिकस्येति किम् ओदनपक् । पक्वः । पक्ववान् । क्विझलोरिति किम् गम्यते । रम्यते । क्ङितीति किम् गन्ता । रन्ता ।।

अज्झनगमां सनि ।। 6 - 4 - 16 ।।

अजन्तानामङ्गानां हनिगम्योश्च सनि झलादौ रे दीर्घो भवति । अजन्तानाम् - विवीषति । तुष्टूषति । चिकीर्षति । चिहोर्षति । हन् - जघांसति । गम् - अधिजिगांसते । गमेरिङादेशस्येति वक्तव्यम् । इह मा भूत्
- संजिगंसते वत्सो मात्रेति । स्वर्ग लोकं समजिगांसदिति छन्दसि यदनिङादेशास्यापि दीर्घत्वं दश्यते , तद् अन्यषामपि दश्यते इत्यनेन भवति । अथ वा - इहाज्ग्रहणं न कर्त्तव्यम् , सनि दीर्घो भवतीत्येतावदेव सूत्रं कर्त्तव्यम् । तत्राचा गृह्यमाणस्य विशेषणे सति सिद्धम जन्तस्य दीर्घत्वम् तत्क्रियते प्रवृत्तिभेदेन गमेरपि विशेषणार्थम् - अजन्तस्याङ्गस्य दीर्घो भवति, अजादेशस्य गमेरिति । ततो न वक्तव्यमिदम् - गमेरिङ्गदेशस्येति ।।

तनोतेर्विभाषा ।। 6 - 4 - 17 ।।

तनोतेरङ्गस्य सनि झलादौ विभाषा दिर्घो भवति । तितांसति । तितंसति । झतित्येव - तितनिषति । सनीवन्तर्ध इत्यत्र तनोतेरुपसंख्यानादिडागमो भवति विकल्पेन ।।

क्रमश्च क्त्वि ।। 6 - 4 - 18 ।।

क्रम उपधाया विभाषा दीर्घो भवति क्त्वाप्रत्यये झलादौ परः । क्रन्त्वा , क्रान्त्वा । झलीत्येव - क्रमित्वा । प्रक्रम्य , उपक्रम्येति बहिरङ्गोऽपि ल्यबादेशः अन्तरङ्गनपि विधीन्बाधते इति पूर्वमेव, दीर्घत्वं न प्रवर्त्तते ।।

च्छ्वोः शूडनुनासिके च ।। 6 - 4 - 19 ।।

छ इत्येतस्य सतुक्कस्य, वकारस्य च स्थाने यथाने यथासंख्यं श्, ऊठ् - इत्येतावादेशौ भवतः, अनुनासिकादौ प्रत्ये परतः क्वौ ढलादौ च क्ङिति । प्रश्नः

। विश्नः । अन्तरङ्त्वात् छे च इति तुकि कृते सतुक्कस्य शादेशः । वकारस्य ऊठ् - स्योनः । सिवेरौणादिके नप्रत्यये लघूपधगुणात् पूर्वमूठ् क्रियते, तत्र कृतेऽन्तरङ्गत्वाद् यणादेशो नानाश्रयत्वाच्च न वार्णादाङ्गं बलीयो भवति ।क्वौ छस्य - शब्दप्राट् । क्विब्वचि इत्यदिनौणादिकः क्विप्, दीर्घश्च । गोविट् । वकारस्य - अक्षद्यूः । हिरण्यष्ठ्यूः । असिद्धं बहिरङ्गमन्तरङ्गे इति नाजानन्तर्ये इति प्रतिषिध्यते । झलादौ छस्य - पृष्टः । पृष्टवान् । पृष्ट्वा । वकारस्य - द्यूतः । द्यूतवान । द्यूत्वा । क्ङितीत्येव - द्युभ्याम् । द्युभिः । केचिदत्र क्ङिति इति नानुवर्त्तयन्ति । कथं द्युभ्याम , द्युभिरिति, ऊठि कृते दिव उत् इत् तपरत्वान्मात्राकालो भविष्यति । छशां षः इत्यत्र छग्रहणं न कर्त्तव्यम् । अनेनैव हि सर्वत्र शकारो विधीयते । ऊठष्ठित्करणम् एत्येधत्यूठ्सु इति विशेषणार्थम् । वाह ऊठ् इत्ययमपि ठिदेव ।।

ज्वरत्वरस्रिव्यविमवामुपधायाश्च ।। 6 - 4 - 20 ।।

ज्वर, त्वर, स्रिवि, अव, मव - इत्येतेषामङ्गानां वकारस्य उपधायाश्च स्थाने ऊडित्ययमादेशो भवति क्वौ परतोऽनुनासिके झलादौ च क्ङिति । जूः जूरौ, जूरः । जूर्त्तिः । त्वर - तूः, तूरौ, तूरः । तूर्त्तिः । स्रिवि - स्रूः, स्रुवौ , स्रुवः । स्रुतः । स्रुतवान् । स्रुतिः । अव् - ऊः , उवौ, उवः। ऊतिः । मव - मूः, मुवौ, मवः। मूतः । मूतवान् । मूतिः । ज्वरत्वरोरुपधा वकारात् परा, स्रिव्यवमवां पूर्वा ।।

राल्लोपः ।। 6 - 4 - 21 ।।

रेफादुत्तरयोश्छ्वोर्लोपो भवति क्वौ परतो झलादौ क्ङिति च परतः । मुर्छा - मूः, मुरौ, मुरः । मूर्त्तः । मूर्त्तवान् । मूर्त्तिः । न ध्याख्यापृमूर्छिमदाम् इति निष्ठानत्वाभावः । हुर्छा - हूः , हुरौ, हुरः। हूर्णः । हूर्णवान् । हूर्तिः । राल्लोपे सतुक्कस्य छस्याभावात् केवलो गृह्यते । वकारस्य - तुर्वी - तूः , तुरौ, तुरः । तूर्णः । तूर्णवान् । तूर्तिः । धुर्वी - धूः । धुरौ । धुरः । धुर्णः । धूर्णवान् । धूर्त्तिः ।।

असिद्धवदत्रा भात् ।। 6 - 4 - 22 ।।

असिद्धवदित्ययमधिकारो यदित ऊर्ध्वमनुक्रमिष्याम आ अध्यायपरिसमाप्तेस्तद् असिद्धवद्भवतीत्येवं वेदितव्यम् । आभादिति विषय निर्देशः । आभसंशब्दनाद् यदुच्यते तत्र कर्तव्ये । अत्रेति समानाश्रयत्वप्रतिपत्त्यर्थम् । तच्चेदत्र यत्र भवति तदा भाद् शास्त्रीयं विधीयते तदाश्रयमेव भवति । व्याश्रयं तु नासिद्धवद्भवतीत्यर्थः ।असिद्धवचनमुत्सर्गलक्षणभावार्थम् , आदेशलक्षणप्रतिषेधार्थ च । एधि, शाधीत्यक्ष एत्वशाभावयोः कृतयोर्झल्लक्षणं धित्वं न प्राप्नोति, असिद्धत्वाद्भवति । आगहि, जहीत्यत्रानुनासिकलोपे जभावे च अतो हेः इति लुक् प्राप्नोति , असिद्धत्वान्न भवति । आ भादिति किम् अभाजि । रागः । अत उपधायाः इति वृद्धौ कर्तव्यायां नलोपो नासिद्धो भवति । अत्रग्रहणं किम् पपुषः पश्य । चिच्युषः पश्य । लुलुवुषः पश्य । वसुसम्प्रसारणमाल्लोपे यणादेशे उपङादेशे च कर्तव्ये नासिद्धं भवति । आल्लोपादीनि वसौ, वस्वन्तस्य विभक्तौ सम्प्रसारणमिति समानाश्रयत्वं नास्ति । असिद्धं बहिरङ्गमन्तरङ्गे इति एतदप्यत्र न भवति, किं कारणम् एषा हि परिभाषा आ भाच्छास्त्रीया, तस्यां प्रवर्तमानायां वसुसम्प्रसारणादीनामाभाच्छास्त्रीयाणामेवासिद्धत्वादन्तरङ्गबहिरङ्गयौः युगपत्समुपस्थानं नास्तीति परिभाषा न प्रवर्तते । वुग्युटावुवङ्यणोः सिद्धौ भवत इति वक्तव्यम् । वुग् उवङादेशे - बभूव, बभूवतुः, बभूवुः । युट् यणादेशे - उपदिदिये , उपदिदियाते, उपदिदीयिरे । आ भादित्ययमभिविधावाङ् । तेन भाधिकारेऽप्यसिद्धवद्भवति ।।

श्नान्नलोपः ।। 6 - 4 - 23 ।।

श्नादिति - श्नमयमुत्सृष्टमकारो गृह्यते , तत उत्तरस्य नकारस्य लोपो भवति । अनक्ति । भनक्ति । हिनस्ति । शकारवतो ग्रहणं किम् यज्ञानाम् , यत्नानाम् - सुपि च इति परत्वात् कृतेऽपि दीर्घत्वे स्थानिवद्भावान्नलोपः स्यादेव । विश्नानाम्, प्रश्नानामित्यत्र लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव इत्येवं न भवति ।।

अनिदितां हल उपधायाः क्ङिति ।। 6 - 4 - 24 ।।

अनिदितामङ्गानां हलन्तानामुपधाया नकारस्य लोपो भवति क्ङिति प्रत्यये परतः । स्रस्तः , ध्वस्तः । स्रस्यते, ध्वस्यते । सनीस्रस्यते, दनीध्वस्यते । अनिदितामिति किम् नन्द्यते, नानन्द्यते । हल इति किम् नीयते, नेनीयते । उपधाया इति किम् नह्यते, नानह्यते । क्ङितीति किम् स्रंसिता , ध्वंसिता । अनिदितां नलोपे लङ्गिकम्प्योरुपतापशरीरविकारयोरुपसंखयानं कर्त्तव्यम् । विलगितः । विकपितः । उपतापशरीरविकारयोरिति किम् विलङ्गितः । विकम्पितः । रञ्जेर्णौ मृगरमण उपसंख्यानं कर्त्तव्यम् । रजयति मृगान् जनीज़टष्वनसुरञ्चौऽमन्ताश्च इति मित्त्वादुपधाह्रस्वत्वम् । मगरमण इति किम् रञ्चयति वस्त्राणि । घिनुणि च रञ्चेरुपसंख्यानं कर्तवंयम् । रागो । त्यजरजभज इति निपातनाद्वा सिद्धम् । रजक - रजन - रजः सूपसंख्यानं कर्त्तव्यम् । रजकः । रजनम् । रजः ।।

दंशसज्जस्वञ्जां शपि ।। 6 - 4 - 25 ।।

दंश, सञ्ज, ष्वञ्ज - इत्येतेषामङ्गानां शपि परत उपधाया नकारस्य लोपो भवति । दशति । सजति । परिष्वजते ।।

रञ्जेश्च ।। 6 - 4 - 26 ।।

रञ्जेश्च शपि परत उपधाया नकारस्य लोपो भवति । रजति, रजतः, रजन्ति । पृथग्योगकरणमुत्तरार्थम् ।।

घञि च भावकरणायोः ।। 6 - 4 - 27 ।।

भावकरणवाचिनि घञि परतो रञ्जेरुपधाया नकारस्य लोपो भवति । भावे - आश्चर्यो रागः । विचित्रो रागः । करणे-रज्यतेऽनेनेति रागः । भावकारणयोरिति किम् रजन्ति तस्मिन्निति रङ्गः ।।

स्यदो जवे ।। 6 - 4 - 28 ।।

जवेऽभिधेये स्यदः इति घञि निपात्यते । स्यन्देर्नलोपो वृद्ध्यभावश्च । इक्प्रकरणात् न धातुलोपः इति प्रतिषधो नास्ति - गोस्यदः , अश्वस्यदः । जव इति किम् तैलस्यन्दः । घृतस्यन्दः ।।

अवोदैधोद्मप्रश्रथहिमश्रथाः ।। 6 - 4 - 29 ।।

अवोद, एध, ओद्म, प्रश्रथ, हिमश्रथ - इत्येते निपात्यन्ते । अवोद इति , उन्देरवपूर्वस्य घञि नलोपो निपात्यते । एध इति, इन्धेर्घञि नलोपो गुणश्च निपात्यते न धातुलोप आर्धधातुके इति हि प्रतिषेधः स्यात् ।

ओद्म इति, उन्देरौणादिके मन्प्रत्यये नलोपो गुणश्च निपात्यते । प्रश्रथ इति, प्रपूर्वस्य श्रन्थेर्घञि नलोपो वृद्ध्यभावश्च निपात्यते । हिमश्रथ इति , हिमपूर्वस्य श्रन्थेर्घञ्येव निपातनम् ।

नाञ्चेः पूजायाम् ।। 6 - 4- 30 ।।

अञ्चेः पूजायामर्थे नकारस्य लोपो न भवति । अञ्चिता अस्य गुरवः । अञ्चितमिव शिरो वहति । अञ्चतेः पूजायाम् इति इडागमः । पूजायामिति किम् उदक्तमुदकं कूपात् । उद्धृतमित्यर्थः । यस्य विभाषा इतीट्प्रतिषेधः ।।

क्त्वि स्कन्दिस्यन्दोः ।। 6 - 4 - 31 ।।

क्त्वाप्रत्यये परतः स्कन्द, स्यन्द - इत्येतयोर्नकारलोपो न भवति । स्कन्त्वा । स्यन्त्वा । स्यन्देरुदित्वात्पत्रे इडागमः - स्यन्दित्वा । तत्र यदा इडागमस्तदा न क्त्त्वा सेट् इति कित्त्वप्रतिषेधादेव नलोपाभावः ।।

जान्तनशां विभाषा ।। 6 - 4 - 32 ।।

जान्तनामङ्गानां नशेश्च क्त्वाप्रत्यये परतो विभाषा नकारलोपो न भवति । रङ्क्त्वा , रक्त्वा । भङ्क्त्वा , भक्त्त्वा । नशः नष्ट्वा, नंष्ट्वा । इट्पक्षे - नशित्वा ।।

मञ्चेश्च चिणि ।। 6 - 4 - 33 ।।

भञ्चेश्च चिणि परतो विभाषा नकारलोपो भवति । अभाजि, वभञ्जि । अप्राप्तोऽयं नलोपः पक्षे विधीयते , ततो नेति नानुवर्त्तते ।।

शास इदङ्हलोः ।। 6 - 4 - 34 ।।

शास उपधाया इकारादेशो भवति अङि परतो हलादौ च क्ङिति । अन्वशिषत् , अन्वशिषताम् , अन्वशिषन् . हलादौ किति- शिष्टः । शिष्टवान् । ङिति - आवां शिष्वः । वयं शिष्मः । इत्त्वे कृते शासिवसिघसीनां च इति षत्वम् ।

अङ्हलोरिति किम् शासति । शशासतुः , शशासुः । क्वौ च शास इत्वं भवतीति वक्तव्यम् । आर्यान् शास्तीति आर्यशीः । मित्रशीः । यस्मात् शासेरङ् विहितः शाससु अनुशिष्टौ इति, तस्यैवेदं ग्रहणमिष्ये । आङः शासु इच्छायाम् इत्यस्य न भवति - आशास्ते, आशास्यमानः । क्विप्प्रत्यये तु तस्यापि भवतीति वक्तव्यम् । आशीः, आशिषौ , आशिषः । क्षियाशीः प्रैषेषु तिङाकाङ्क्षम् इति निपातनाद्वा सिद्धम् ।।

शा हौ ।। 6 - 4 - 35 ।।

शासो हौ परतः शा तइत्ययमादेशो भवति । अनुशाधि । प्रशाधि । उपधायाः इति निवृत्तम्, ततः शासः इति स्थानेयोगा षष्ठी भवति । क्ङिति इत्येतदपि निवृत्तम् । तेन यदा वा छन्दसि इति पित्त्वं हिशब्दस्य, तदाप्यादेशो भवत्येव । शाधीत्याद्युदात्तमपि छन्दसि दृश्यते ।।

हन्तेर्जः ।। 6 - 4 - 36 ।।

हन्तेर्धातोर्ज तइत्ययमादेशो भवति हौ परतः । जहि शत्रून् ।।

अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति ।। 6 - 4 - 37 ।।

अनुदात्तोपदेशानामङ्गानां वनतेस्तनोत्यादीनां चानुनासिकलोपो भवति झलादौ क्ङिति प्रत्यये परतः । यमु-यत्वा । यतः । यतनान् । यतिः । रमु - रत्वा । रतः । रतनान् । रतिः । अनुदात्तोपदेशा अनुनासिकान्ता यमिरमिनमिगमिहनिमन्यतयः । वनति - वतिः । क्तिनो रुपमेतत् । क्तिचि तु न क्तिचि दीर्घश्च इति भवति । अन्यत्र झलादाविटा भवितव्यम् । तनोत्यादयः - ततः । ततवान् । सनोतेरात्वं वक्ष्यति । क्षणुक्षतः । क्षतवान् । ऋणु - ऋतः । ऋतवान् । तृणु - तृतः । तृतवान् । घृणु - घृतः । घृतवान् । वनु-वतः । वतवान् । मनु-मतः । मतवान् । ङिति-अतत । अतथाः ।

अनुदात्तोपदेशवनतितनोत्यादीनामिति किम् शान्तः । शान्तवान् । तान्तः । तान्तवान् । दान्तः । दान्तवान्। अनुनासिकस्येति किम् पक्वः । पक्ववान् । झलीति किम् गम्यते । रम्यते । क्ङितोति किम् यन्ता । यन्तवयम् । उपदेशग्रहणं किम् इह च यथा स्यात् - गतिः । इह च मा भूत् - शान्तः , शान्तवानिति ।।

वा ल्यपि ।। 6 - 4 - 38 ।।

ल्यपि परतोऽनुदात्तोपदेशावनतितनोत्यादीनामनुनासिकलोपो वा भवति । व्यवस्थितविभाषा चेयम् , तेन मकारन्तानां विकल्पो भवति । अन्यत्र नित्यमेव लोपः । प्रयत्य, प्रयम्य । प्ररत्य, प्रयम्य । प्ररत्य, प्ररम्य। प्रणत्य, प्रणम्य। आगत्य, आगम्य। आहत्य। प्रमत्य । प्रवत्य। प्रक्षत्य ।।

न क्तिचि दीर्घश्च ।। 6 - 4 - 39 ।।

क्तिचि परतोऽनुदात्तोपदेशादीनामनुनासिकलोपो दीर्घश्च न भवति । यन्तिः । वन्तिः । तन्तिः । अनुनासिकलोपे प्रतिषिद्धे अनुनासिकस्य क्विझलोः क्ङिति

इति दीर्घः प्राप्नोति, सोऽपि प्रतिषिद्ध्यते ।।

गमः क्वौ ।। 6 - 4 - 40 ।।

गमः क्वौ परतोऽनुनासिकलोपो भवति । अङ्गगत् । कलिङ्गगत् । अध्वगतो हरयः ।गमादीनामिति वक्तव्यम् । इहापि यथा स्यात् - संयत् । परितत् । ऊ च गमादीनामिति वक्तवयम् । अग्रेगूः । अग्रेभ्रूः ।।

विड्वनोरनुनासिकस्यात् ।। 6 - 4 - 41 ।।

विटि वनि च प्रत्यये परतोऽनुनासिकान्तस्याङ्गस्याकार आदेशो भवति । अब्जाः । गौजाः । ऋतजाः । अद्रिजाः । गौषा इन्द्रो नृषा असि । कृपखाः । शतखाः । सहस्रखाः । दधिक्राः । अग्रेगा उन्नेतृणाम् । जनसनखनक्रमगमो विट् इति विट् प्रत्ययः । सनोतेरनः इति षत्वम् - गोषा इन्दो नृषा अशीत्यत्र । वन्- विजावा । अग्रेजावा । अन्यभ्योऽपि दृश्यन्ते इति वनिप्प्रत्ययः । अनुनासिकस्य इति वर्त्तमाने पुनरनुनासिकग्रहणमनुनासिकमात्रपरिग्रहार्थम् , अन्यथा ह्यनुदात्तोपदेशावनतितनोत्यादीनामेव स्यात् ।।

जनसनखनां सञ्झखोः ।। 6 - 4 - 42 ।।

झलि, क्ङिति इति चानुवर्त्तते । जन, सन, खन - इत्येतेषामङ्गानां सनि झलादौ क्ङिति झलादौ प्रत्ये परत आकार आदेशो भवति । जन् - जातः । जातनान् । जातिः । सन्-सनि, सिषासति । सातः । सातनान् । सातिः । सातिः । खन् - खातः । खातवान् । खातिः । झल्ग्रहणं सन्विशेषणार्थं किमर्थमनुवर्त्यते इह मा भूत् - जिजनिषति । सिसनिषति । चिखनिषति । सनोतेः सनीवन्तर्ध इति पत्रे इडागमः । तदिह सनोत्यर्थमेव सन्ग्रहणम् । अत्र झलादौ क्ङिति सनोतेर्विप्रतिषेधाद् आत्त्वमनुनासिकलोपं बाधते । घुमास्थागापाजहातिसां हलि इति हल्ग्रहणं ज्ञापकम् - अस्मिन्नसिद्धप्रकरणे विप्रतिषेधो भवतीति ।।

ये विभाषा ।। 6 - 4 - 43 ।।

यकारादौ क्ङिति प्रत्यये परतो जनसनखनामाकार आदेशो भवति विभाषा । जायते, जन्यते । जाजायते, जञ्जन्यते । सायते, सन्यते । सासायते, संसन्यते । खायते, खन्यते। चाखायते, चङ्खन्यते । जनः शयनि ज्ञाजनोर्जा इति नित्यं जादेसो भवति ।।

तनोतेर्यकि ।। 6 - 4 - 44 ।।

तनोतेर्यकि परतो विभाषा आकार आदेशो भवति । तायते, तन्यते । यकिति किम् तन्तन्यते ।।

सनः क्तिचि लोपश्चास्यान्यतरस्याम् ।। 6 - 4 - 45 ।।

सनोतेरङ्गस्य क्तिचि प्रत्ये परत आकार आदेशो भवति लोपश्चास्यान्यतरस्याम् । सातिः, सन्तिः सतिः । अन्यतरस्यांग्रहणं विस्पष्टार्थम् । ये सम्बद्धं हि विभाषाग्रहणमिह निवृत्तमित्याशाङ्क्येत ।।

आर्धधातुके ।। 6 - 4 - 46 ।।

आर्धधातुके इत्यधिकारः । न ल्यपि इति प्रागेतस्यमाद्यदित ऊर्ध्वमनुक्रमिष्यामः आर्धधातुके इत्यवं तद्वेदितव्यम् । वक्ष्यति - अतो लोपः । चजिकीर्षिता । जिहीर्षिता । आर्धधातुक इति किम् भवति । भवतः । अदीप्रभृतिभ्यः शपो लुग्वचनं प्रत्ययलोपलक्षणप्रतिषेधार्थ स्यादित्येतन्न ज्ञापकं शपो लोपाभावस्य । यस्य हलः । बेभिदिता । बेभिदितुम् । बेभिदितव्यम् । आर्धधातुक इति किम् बेभिद्यते । णेरनिटि । कारणा । हारणा । आर्धधातुक इति किम् कारयति । हारयति । आतो लोपः । ययतुः । ययुः । ववतुः । ववुः । आर्धधातुक इति किम् यान्ति वान्ति । घुमास्थागापाजहातिसां हलि । दीयते । धीयते । आर्धदातुक इति किम् अदाताम् ।अधाताम् । वाऽन्यस्य संयोगादेः । स्नेयात्, स्नायात् । आर्धधातुक इति किम् स्नायात् । आशीर्लिङोऽन्यत्र न भवति । स्यसिच्शीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च । कारिषीष्ट । हारिषीष्ट ।

आर्धधातुक इति किम् क्रियेत । ह्रियेत । यगन्तस्याजन्तत्वाच्चिण्वद्भावे सति वृद्धिः स्यात् , ततश्च युक् प्रसज्येत ।। अतो लोपो यलोपश्च णिलोपश्च प्रयोजनम् । आल्लोप ईत्वमेत्वं च चिण्वद्भावश्च सीयुटि।।

भ्रस्जो रोपधयो रमन्यतरस्याम् ।। 6 - 4 - 47 ।।

भ्रस्जो रेफस्योपधायाश्च रमान्यतरस्यां भवति । रोपधयोः इति स्थानषष्ठीनिर्देशादुपधा, रेफश्च निवर्त्तेते । मित्त्वाच्चायमचोऽन्त्यात्परो भवति । भ्रष्टा, भर्ष्टा । भ्रष्टुम् , भर्ष्टुम् । भ्रष्टव्यम् , भर्ष्टव्यम् । भ्रज्जनम् , भर्ज्जनम् । भृष्टः भृष्टवान् इत्यत्र पूर्वविप्रतिषेधेन सम्प्रसारणं भवति । उपदेश इत्येव - बरीभृज्यते ।।

अतो लोपः । 6 - 4 - 48 ।।

अकारन्तस्यार्धधातुके लोपो भवति । चिकीर्षिता । चिकीर्षितुम् । चिकीर्षितव्यम् । धिनुतः । कृणुतः । अत इति किम् चेता । स्तोता । तपरकरणं किम् याता । वाता । आर्धधातुक इति किम् वृक्षत्वम् । वृक्षता । वृद्धिदीर्घाभ्यामतो लोपः पूर्वविप्रतिषेधेन । चिकीर्षकः । जिहीर्षकः । चिकीर्ष्यते । जिहीर्ष्यते ।।

यस्य हलः ।। 6 - 4 - 49 ।।

हल उत्तरस्य यशब्दस्यार्धधातुके लोपो भवति । बेभिदिता । बेभिदितुम् । बेभिदितव्यम् । यस्य इति सङ्घातग्रहणमेतत् । तत्र अलोऽन्त्यस्य इत्येतन्न भवति अतो लोपः इत्यनेनैव तस्य सिद्धत्वात् । हलः इति वा

पञ्चमीनिर्दशः , तत्र आदेः परस्य इति यकारोऽनेन लुप्यते । सङ्घातग्रहणं किम् इर्ष्यिता । मव्यिता । हल इति किम् लोलूयिता । पोपूयिता ।।

क्यस्य विभाषा ।। 6 - 4 - 50 ।।

क्यस्य हल उत्तरस्य विभांषा लोपो भवति आर्धधातुके । समिधिता, समिध्यिता । दृषदिता, दृषद्यिता । समिधमात्मन इच्छति, समिधमिवात्मानमाचरति - इति वा क्यच्क्यङौ यथायोगं कर्त्तव्यौ ।।

णेरनिटिः ।। 6 - 4 - 51 ।।

अनिडादावार्धधातुके णेर्लोपो भवति । इयङ्यण्गुणवृद्धिदीर्घाणामपवादः । अततक्षत् । अररक्षत् । आटिटत् । आशिशत् । कारणा । हारणा । कारकः । हारकः । कार्यते । हार्यते । ज्ञीप्सति । अनिटीति किम् कारयिता । हारयिता ।

निष्ठायां सेटि ।। 6 - 4 - 52 ।।

निष्ठायां सेटि परतो णेर्लोपो भवति । कारितम् । हारितम् । गाणितम् । लक्षितम् । सेटीति किम् संज्ञपितः पशुः । इड्ग्रहणसामर्थ्यादिह पूर्वणापि न भवति । सनीवन्तर्ध इति ज्ञपेरिटि विकल्पिते यस्य विभाषा इति निष्टायां प्रतिषेधः । अथ पुनः एकाचः इति तत्रानुवर्त्तते , तदा नित्यमत्र भवतिव्यमेवेडागमेनेति सेड्ग्रहणमनर्थकम् तत् क्रियते कालावधारणार्थम् - इडागमे कृते णिलोपो यथा स्यात् । अकृते हि तत्र णिलोपे सति कारितमित्यत्र एकाच उपदेशोऽनुदात्तात् इतोटः प्रतिषेधः प्रसज्येत ।।

जनिता मन्त्रे ।। 6 - 4 - 53 ।।

जनितेति मन्त्रविषये इडादौ णिलोपो निपात्यते । यो नः पिता जनिता । मन्त्र इति किम् जनयिता ।

शमिता यज्ञे ।। 6 - 4 - 54 ।।

यज्ञकर्मणि शमितेति इडादौ तृचि णिलोपो निपात्यते । श्रृतं हविः शमितः । तृचि सम्बुद्ध्यन्तमेतत् । यज्ञे इति किम् श्रृतं हविः शमयतिः ।।

अयामन्ताल्वाय्येत्न्विष्णुषु ।। 6 - 4 - 55 ।।

आम् , थअन्त, थआलु, आय्य, इत्नु , इष्णु - इत्येतेषु परतो णेरयादेशो भवति । कारयाञ्चकार । हारयाञ्चकार । अन्त - गाण्डयन्तः । मण्डयन्तः । आलु - स्पृहयालुः । गृहयालुः । आय्य - स्पृहयाय्यः । गृहयाय्यः । इत्नु - स्तनयित्नुः । इष्णु - पोषयिष्णवः । पारयिष्णवः । न इति वक्तव्ये अयादेशवजनमुत्तरार्थम् ।।

ल्यपि लघुपूर्वात् ।। 6 - 4 - 56 ।।

ल्यपि परतो लघुपूर्वाद्वर्णादुत्तरस्य णेरयादेशो भवति । प्रणमय्य, प्रतमय्य, प्रदमय्य, प्रशमय्य, सन्दमय्य गतः ।

प्रबेभिदय्य गतः । प्रगणय्य गतः । ह्रस्वयलोपाल्लोपानामसिद्धत्वं न भवति, असमानाश्रयत्वात् - ह्रस्वादयो हि णौ, ल्यपि णेरयादेशो भवति । लघुपूर्वादिति किम् प्रपात्य गतः ।।

विभाषाऽऽपः ।। 6 - 4- 57 ।।

आप उत्तरस्य णेर्ल्यपि परतो विभाषाऽयादेशो भवति । प्रापय्य गतः । प्राप्य गतः । इङादेशस्य लाक्षणिकत्वान्न भवति - अध्याप्य गतः ।।

युप्लुवोदीर्घश्छन्दसि ।। 6 - 4- 58 ।।

यु, प्लु - इत्येतयोर्ल्यपि परतश्छन्दसि विषये दीर्घो भवति । दान्त्यनुपूर्व वियूय । यत्रा यो दक्षिणा परिप्लूय ।
छन्दसीति किम् संयुत्य । आप्लुत्य।।

क्षियः ।। 6 - 4 - 59 ।।

क्षियश्च दीर्घो भवति ल्यपि परतः । प्रक्षीय ।।

निष्ठायामण्यदर्थे ।। 6 - 4 - 60 ।।

ण्यतः कृत्यस्यार्थो भावकर्मणी, ताभ्यामन्यत्र या निष्ठा तस्यां क्षियो दीर्घो भवति । आक्षीणः । प्रक्षीणः। परिक्षीणः । अकर्मकत्वात् क्षियः कर्त्तरि क्तः । प्रक्षीणमिदं देवदत्तस्येति क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः इत्यधिकरणे क्तः । अण्यदर्थ इति किम् अक्षितमसि मामेक्षेष्ठाः । क्षितमिति भावे दीर्घाभावात् क्षियो दीर्धात् इति निष्ठानत्वमपि न भवति ।।

वाऽऽक्रोशदैन्ययोः ।। 6 - 4 - 61 ।।

आक्रोशे गम्यमाने, दैन्ये च क्षियो निष्ठायामण्यदर्थे वा दीर्घो भवति । क्षितायुरेधि । क्षीणायुरेधि । दैन्ये - क्षितकः । क्षीणकः । क्षितोऽयं तपस्वी । क्षीणोऽयं तपस्वी ।।

स्यसिच्सीयुट्तासिषु भावकर्णणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ।। 6 - 4- 62 ।।

स्य, सिच्, सीयुट्, तासि - इत्येतेषु भावकर्मविषयेषु परत उपदेशेऽजन्तानामङ्गानाम्, हन्, ग्रह, दृश् - इत्येतेषां च चिण्वत्कार्थ भवति वा यदा चिण्वत् तदा इडागमो भवति । कस्य स्यसिच्सीयुट्तासीनामेवेति वेदितव्यम् ते हि प्रकृताः । अङ्गस्य तु लक्ष्यविरोधान्न क्रियते । कानि पुनरसाय योगस्य प्रयोजनानि चिण्वद्वृद्धिर्युक्च हन्तेश्च घत्वं दीर्घचोक्तो यो मितां वा चिणीति । इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विधाती ।। अजन्तानां तावत् - चायिष्ये, चेष्यते, अचायिष्यत, अचेष्यत । दायिष्यते, दास्यते, अदायिष्यत, अदास्यत । शामिष्यते, शमिष्यते, शमयिष्यते, अशामिष्यत, अशमिष्यत, अशमयिष्यत । हन् - घानिष्यते, हनिष्यते , अघानिष्यत, अहनिष्यत । ग्रह - ग्राहिष्यते, ग्रहीष्यते अग्रहिष्यत, अग्रहीष्यत । ग्रहोऽलिटि दीर्घः इति प्रकृतस्येटो दीर्घत्वम् । दृश् - दर्शिष्यते , द्रक्ष्यते, अदर्शिष्यत, अद्रक्ष्यत । सिच्यजन्तानाम् - अचायिषाताम्, तअचेषाताम् । अदायिषाताम्, अदिषाताम्। असामिषाताम्, अशमिषाताम्, अशमयिषाताम् । हन् - अघानिषाताम , अवधिषाताम्, अहसाताम्। ग्रह् - अग्राहिषाताम्, अग्रहोषाताम् । दृश् -अदर्शिषाताम्

, अदृक्षाताम् । सीयुटि अजन्तानाम् - चायिषीष्ट, चेषीष्ट । दायिषीष्ट , दासीष्ट । शामिषीष्ट, शमिषीष्ट, शमयिषीष्ट । हन् - घानिषीष्ट, वधिषीष्ट । ग्रह - ग्राहिषीष्ट, ग्रहीषीष्ट । दृश् - दर्शिषीष्ट, दृक्षीष्ट । तासावजन्तानाम् - चायिता, चेता । दायिता , दाता । शामिता, शमिता, शमयिता । हन् - घानिता, हन्ता । ग्रह - ग्राहिता, ग्रहीता । दृश् - दर्शिता, दरष्टा, द्रष्टा । स्यसिच्सीयुदतासिष्विति किम् चेतव्यम्, दातव्यम् । भावकर्मणोरिति किम् चेष्यति । दास्यति । उपदेशा इति किम् कारिष्यते - इति गुणे कृते रपरत्वे च न प्रापनेति, उपदेशग्रहणाद् भवति । अज्झनग्रहदृशामिति किम् पठिष्यते । अङ्गाधिकारविहितं कार्यमिहातिदिश्यते, तेन हनिणिङामादेशा न भवन्ति । हनिष्यते , घानिष्यते । एष्यते, आयिष्यते । अद्येष्यते, अध्यायिष्यते । हनो वध लिङि, लुङि च इणो गा लुङि, विभाषा लुङ्लृङोः इत्येते विधयो न भवन्ति ।।

दीङो युडचि क्ङिति ।। 6 - 4 - 63 ।।

दीङो युडागमो भवति अजादौ क्ङिति प्रत्यये परतः । उपदिदीये, उपदिदीयाते, उपदिदीयारे । दीङः इति पञ्चमीनिर्देशादजादेर्युडागमो भवति । विधानसामर्थ्याच्च एरनेकाचः इति यणादेशे कर्त्तव्ये तस्यासिद्धत्वं न भवति । अचीति किम् उपदेदीयते । क्ङितीति किम् उपदानम् ।।

आतो लोप इटि च ।। 6 - 4 - 64 ।।

इट्यजादावार्धदातुके क्ङिति चाकारान्तस्याङ्गस्य लोपो भवति । इटि - पपिथ । तस्थिथ। किति - पपतुः, पपुः । तस्थतुः, तस्थुः । गोदः । कम्बलदः । ङिति - प्रदा । प्रधा । आर्धधातुके इतेयेव - यान्ति । वान्ति । व्यत्यरे । व्यत्यले । रातेर्लातेश्च लङि इटि च रुपम् । अचीत्येव - ग्लायते । दासीय ।।

ईद्यति ।। 6 - 4 - 65 ।।

ईकार आदेशो भवति आकारान्तस्याङ्गस्य यति परतः । देयम् । धेयम् । हेयम् । स्तेयम् ।।

घुमास्थागापाजहातिसां हलि ।। 6 - 4 - 66 ।।

घुसंज्ञकानामङ्गानां मा, स्था, गा , पा, जहाति, सा - इत्येतेषां हलादौ क्ङिति प्रतेये परते ईकारादेशो भवति । दीयते, देदीयते । धीयते, देधीयते। मीयते, मेमीयते। स्थीयते, तेष्ठीयते । गीयते, जेगीयते । अध्यगीष्ट, अध्यगोषाताम्, अध्यगीषत । पीयते, पेपीयते । पातेरिह ग्रहणं नास्ति, लुग्विकरणत्वात् । पायते - इत्येव तस्य भवति । हीयते । जेहीयते । जहातेरिह निर्द्दशाद् जिहातेर्ग्रहणं न भवति । हायते । षोऽन्तकर्मणि - अवसोयते , अवसेसीयते । हलीति किम् ददतुः ददुः । आतो लोपाद्धि परत्वादीत्वं स्यात् । एतदेव हल्ग्रहणं ज्ञापकम् - अस्मिन् प्रकारणे विप्रतिषेधेनासिद्धत्वं भवति । क्ङिति इत्येव - दाता । धाता ।।

एलिंङि ।। 6 - 4 - 67 ।।

घुमास्थागापाजहातिसामङ्गानां लिङि परत एकारादेशो भवति । देयात् । मेयात् । धेयात् । स्थेयात् । गेयात् । पेयात् । अवसेयात् । क्ङिति इत्येव - दासीष्ट । धासीष्ट ।।

वाऽन्यस्य संयोगादेः ।। 6 - 4 - 68 ।।

घ्वादिभ्योऽन्यस्य संयोगादेराकारान्तस्य वा एकारादेशो भवति लिङि परतः । ग्लेयात् , ग्लायात् । म्लेयात्, म्लायात् । अन्यस्येति किम् स्थेयात् । संयोगादेरिति किम् यायात् । क्ङिति इत्येव ग्लासीष्ट । अङ्गस्य इत्येव - निर्वायात् ।।

न ल्यपि ।। 6 - 4- 69 ।।

ल्यपि प्रत्ये परतो घुमास्थागापाजहातिसां यदुक्तं तन्न । प्रदाय । प्रधाय । प्रमाय । प्रस्थाय । प्रगाय । प्रपाय । प्रहाय । अवसाय ।।

मयतेरिदन्यतरस्याम् ।। 6 - 4 - 70 ।।

मयतेरिकारादेशो वा भवति ल्यपि परतः । अपमित्य, अपमाय ।।

लुङ्लङ्लृङ्क्ष्वडुदात्तः ।। 6 - 4 - 71 ।।

लुङ्, लङ् , लृङ् - इत्येतेषु परतोऽङ्गस्याडामो भवति , उदात्तश्च स भवति । लुङ् - अकार्षीत् , अहार्षीत् । लङ् - अकरोत् , अहरत् । लृङ्- अकरिष्यत्, अहरिष्यत् ।।

आडजादीनाम् ।। 6 - 4 - 72 ।।

आडागमो भवत्यजादीनां लुङ्लङ्लृङ्क्षु परतः , उदात्तश्च स भवति । ऐक्षिष्ट । ऐहिष्ट । औब्जीत् । औम्भीत् । लङ् - ऐक्षत । ऐहत । औब्जत् । औम्भत् । लृङ् - ऐक्षिष्यत । ऐहिष्यत । औब्जिष्यत् । औम्भिष्यत् । इह ऐज्यत, औप्यत, थऔह्यतेति लङि कृत् लावस्थायामडागमादन्तरङ्गत्वाल्लादेशः क्रियते, तत्र कृते विकरणो नित्यत्वादडागमं बाधते । शब्दान्तरप्राप्तेरडागमस्यनित्यत्वम् कृते हि विकारणान्तस्याङ्गस्य तेन भवितव्यम्, अकृते तु धातुमात्रस्य शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति । ननु शब्दान्तरादिति विकरणोऽनित्यः विकरणे कृते सम्प्रसारणमडागमान्नित्यत्वादेव भवति, सम्प्रसारणे च कृतेऽजाद्यङ्गं जातमिति आडजादौनाम् इत्याडागमः ।।

छन्दस्यपि दृश्यते ।। 6 - 4 - 73 ।।

छन्दसि विषये आडागमो दृश्यते । यतो हि विहितस्ततोऽन्यत्रापि दृश्यते । आडजादीनाम् इत्युक्तम् ,

अनजादीनामपि दृश्यते - सुरुचो वेन आवः । आनक् । आयुनक् । आवः इति वृञो लुङि मन्त्रे घसह्वर इति लेर्लुकि कृते च भवति, तथा आनक् इति नशेः । आयुनक् इति युजेर्लङि ।।

न माङ्योगे ।। 6 - 4 - 74 ।।

माङ्योगे लुङ्लङ्लृङ्क्ष यदुक्तं तन्न भवति । मा भवान् कार्षीत् । मा भवान् हार्षीत् । मा स्म करोत् । मा स्म रहत् । मा भवानीहिष्ट , मा स्म भवानीहत । मा भवानीक्षिष्ट । मा स्म भवानीक्षत ।।

बहलं छन्दस्यमाङ्योगेऽपि ।। 6 - 4 - 75 ।।

छन्दसि विषये माङ्योगेऽपि बहुलमडाटौ भवतः । अमाङ्योगेऽपि न भवतः । अमाङ्योगे तावत् - चनिष्ठा उग्र ।काममूनयोत् । काममर्दयीत् ।

माङ्योगेऽपि भवतः - मा वः क्षेत्रे परबोजान्यवाप्सुः । मा अभित्थाः । मा आवः ।।

इरयो रे ।। 6 - 4 - 76 ।।

इरे - इत्येतस्य छन्दसि विषये बहुलं रे इत्ययमादेशो भवति । गर्भ प्रथमं दघ्र आपः । याऽस्य परिदघ्रे । परिददृश्रे । धाञो रेभावस्यसिद्धत्वादातो लोपो भवति । न च भवति - परमाया धियोऽग्निकर्माणि चक्रिरे । अत्र रेशब्दस सेटां धातुनामिटि कृते पुना रेभावः क्रियते , तदार्थम् इरयोः इत्ययं द्विवचननिर्द्दशः ।।

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ।। 6 - 4 - 77 ।।

श्नुप्रत्ययान्तस्यङ्गस्य धातोरिवर्णोवर्णान्तस्य भ्रु इत्येतस्य च इयङ् , उवङ् - इत्येतावादेशौ भवतोऽजादौ प्रत्यये, परतः । आप्नुवन्ति । राध्नुवन्ति । शक्नुवन्ति । धातोः - चिक्षियतुः चिक्षियुः । लुलुवतुः, लुलुवुः । नियौ, नियः । लुवौ, लुवः । भ्रुवौ , भ्रुवझ । अचोति किम् आप्नुयात् । श्कनुयात् । राध्नुयात् । श्नुधातुभ्रुवामिति किम् लक्ष्म्यै । वध्वै । य्वोरिति किम् चक्रतुः । चक्रुः । इयङुवङ्भ्यां गुणवृद्धी भवतो विप्रतिषेधेन । चयनम्, चायकः । लवनम्, लावकः । इयङ्वङ्प्रकरणे तन्वादीनां छन्दसि बहुलमुपसंखयानं कर्त्तव्यम् । तन्वं पुषेम, तनुवं पुषेम। विष्वं पुषेम, विषुवं पुषेम स्वर्गो लोकः , सुवर्गो लोकः । त्र्यम्बकं यजामहे, त्रियम्बकं यजामहे ।।

अभ्यासस्यासवर्णो ।। 6 - 4 - 78 ।।

अभ्यासस्येवर्णोवर्णान्तस्यासवर्णेऽचि परत इयङ्, उवङ् - इत्येतावादेशौ भवतः । इयेष । उवोष । इयर्त्ति । असवर्ण इति किम् ईयतुः ईयुः । ऊरतुः , ऊवुः । अचि इत्येव - इयाज । उवाप ।।

स्त्रियाः ।। 6 - 4- 79 ।।

स्त्री - इत्येतस्याजादौ प्रत्यये परत इयङादेशो भवति । स्त्री स्त्रियौ, स्त्रियः । स्त्रीणाम् - इत्यत्र परत्वान्नुडागमः । पुथग्योगकरणमुत्तरार्थम् ।।

वाऽम्शसोः ।। 6 - 4 - 80 ।।

अमि शसि परतः स्त्रियां वा इयङादेशो भवति । स्त्रीं पश्य, स्त्रियं पश्य । स्त्रीः पश्य, स्त्रियः पश्य ।।

इणो यण् ।। 6 - 4 - 81 ।।

इणोऽङ्गस्य यणादेशो तभवति अजि परतः । यन्ति । यन्तु । आयन् । इयङ्गदेशापवादोऽयम् । मध्येऽपवादाः पूर्वान्विधीन् बाधन्ते इति गुणवृद्धिभ्यां परत्वादयं बाध्यते । अयनम् । आयकः ।।

एरनेकाजोऽसंयोगपूर्वस्य ।। 6 - 4 - 82 ।।

धातोरिति वर्तते , तेन संयोगो विशेष्यते । धातोरवयवः संयोगः पूर्वो यस्मादिवर्णान्न भवति असावसंयोगपूर्वः, तदन्तस्याङ्गस्यानेकाचोऽचि परतो यणादेशो भवति । निन्यतुः, निन्युः । उन्न्यौ, उन्न्यः । ग्रामण्यौ । ग्रामण्यः । एरिति किम् असंयोगपूर्वग्रहणमिवर्णविशेषणं यथा स्याद्, अङ्गविशेषणं मा भूदिति । लुलुवतुः , लुलुवुः - इत्येतत्तु ओः सुपि इति नियमादपि सिध्यति । अनेकाच इति किम् नियौ, नियः । असंयोगपूर्वस्येति किम् यवक्रियौ । यवक्रियः । धातुना संयोगविशेषणं किम् इहापि न स्याद् - उन्न्यौ, उन्न्य इति । गतिकारकाभ्यामन्यपूर्वस्य नेष्यते । परमनियौ । परमनिय इति ।।

ओः सुपि ।। 6 - 4 - 83 ।।

धात्ववयवः संयोगः पूर्वो यस्मादुवर्णान्न भवति तदन्तस्याङ्गस्यानेकायोऽजादौ सुपि परतो यणादेशो भवति । खलप्वौ, खलप्वः । शतस्वौ, शतस्वः । सकुल्ल्वौ, सकृल्ल्वः । सुपीति किम् लुलुवतुः , लुलुवुः । अनेकाचः इत्येव - लुवौ, लुवः । असंयोगपूर्वस्य इत्येव - कटप्रुवौ, कटप्रुवः ।

गतिकारकाभ्यामन्यपूर्वस्यनेष्यते इत्येव - परमलुवौ, परमलुवः ।।

वर्षाभ्वश्च ।। 6 - 4 - 84 ।।

वर्षाभू - इत्येतस्याजादौ सुपि परतौ यणादेशो भवति । वर्षाभ्वौ, वर्षाभ्वः । पुनर्भ्वश्चेति वक्तव्यम् । पुनभ्वौ, पुनर्भ्वः ।। कारापूर्वस्यापीष्यते - काराभ्वौ, काराभ्वः ।।

न भूसुधितयोः ।। 6 - 4 - 85 ।।

भू, सुधी - इत्येतयोर्यणादेशो न भवति । प्रतिभुवौ, प्रतिभुवः । सुधियौ, सुधियः ।।

छन्दस्युभयथा ।। 6 - 4 - 86 ।।

छन्दसि विषये भू, सुधी - इत्येतयोरुभयथा दृश्यते । वनेषु चित्रं विभ्वं विशे, विशे विभुवम् । सुध्यो हव्यमग्ने, सुधियो हृवयमग्ने ।।

हुश्नुवोः सार्वधातुके ।। 6 - 4 - 87 ।।

हु इत्येतस्याङ्गस्य श्नुप्रत्ययान्तस्यानेकायोऽसंयोगपूर्वस्याजादौ सार्वधातुके परतो यणादेशो भवति । जुह्वति, जुह्वतु । जुह्वत्। सुन्वन्ति , सुन्वन्तु , असुन्वन् । हुश्नुवोरिति किम् योयुवति । रोरुवति । इदमेव हुश्नुग्रहणं ज्ञापकम् - भाषायामपि यङ्लुगस्तीति । छन्दसि छन्दस्युभयथा इत्यार्धधातुकत्वादेव यणादेशस्याप्रसङ्गः । न च यङ्लुगन्तादन्यत् प्रत्युदाहरणम् उवर्णान्तमनेकाजसंयोगपूर्व सार्वधातुके विद्यते । सार्वधातुक इति किम् जुहुवतुः जुहुवुः । असंयोगपूर्वस्य इत्येव - आप्नुवन्ति । राध्नुवन्ति ।।

भुवो वुग्लुङ्लिटोः ।। 6 - 4 - 88 ।।

भुवो वुगागमो भवति लुङि लिटि चाजादौ परतः । अभूवन् । अभूवम् । लिट् - बभूव, बभूवतुः , बभूवुः ।।

ऊदुपधाया गोहः ।। 6 - 4 - 89 ।।

गोहोऽङ्गस्य उपधाया ऊकारादेशो भवति अजादौ प्रत्यये परतः । निगूहति । निगूहकः । साधु निगूही । निगूहंनिगूहम् । निगूहन्ति । निगूहो वर्त्तते । उपधाया इति किम् अलोऽन्त्यस्य मा भूत् । गोहः इति विकृतग्रहणं विषयार्थम् । यत्रास्यैतद्रूपं तत्रैव यथा स्यात्, इह मा भूत् - निजुगूहतुः , निजुगुहुः । अयादेशप्रतिषेधार्थं च केचिदिच्छन्ति । निगूह्य गत इत्यूत्वस्यासेद्धत्वाद् , ल्यपि लघुपूर्वात् इत्ययादेशः स्यात् । व्याश्रयत्वादेवासेद्धत्वमत्र नास्ति- णावूत्वम्, ण्यन्तस्य च ल्यप्ययादेश इति । अचीत्येव निगोढा । निगोढुम् ।।

दोषो णौ ।। 6 - 4 - 90 ।।

दोष उपधाया ऊकार आदेशो भवति णौ परतः । दूषयति । दूषयतः । दूषयन्ति । विकृतग्रहणं प्रकमाभेदार्थम् । पूर्वत्र हि गोहः इत्युक्तम् । णाविति किम् दोषो वर्तते ।।

वा चित्तिविरागे ।। 6 - 4 - 91 ।।

चित्तिविकारार्थे दोष उपधाया वा ऊकारादेशो भवति णौ परतः । चित्तं दूषयति, चित्तं दोषयति । प्रतज्ञं दूषयति, प्रज्ञां दोषयति ।

मितां ह्रस्वः ।। 6 - 4 - 92 ।।

मितो धातवः घटादयो मितः इत्येवमादयो ये प्रतिपादिताः, तेषामुपधाया ह्रस्वो भवति णौ परतः । घटयति । व्यथयति । जनयति । रजयति । शमयति । ज्ञपयति । केचिदत्र वा इत्येनुवर्त्तयन्ति, सा च व्यवस्थितविभाषा, तेन उत्क्रामयति, संक्रामयतीत्येवमादि सिद्धं भवति ।।

चिण्णसुलोर्दीर्घोऽन्यतरस्याम् ।। 6 - 4 - 93 ।।

चिण्परे णमुल्परे च णौ परतो मितामङ्गानामुपधाया दीर्घो भवति अन्यतरस्याम् । अशमि, अशामि । अतमि, अतामि । शमं - शमम्, शमंशामम् । तमन्तमम्, तामन्तामम् । दीर्घग्रहणं किम्, न ह्रस्वविकल्प एव विधीयते नैवं शक्यम् शमयन्तं प्रयुंक्ते - इति द्वितीये णिचि ह्रस्वविकल्पो न स्यात् । णिलोपस्य स्थानिवद्भावाद्

दीर्घविधौ त्वजादेशो न स्थानिवत् । शमयन्तं प्रयुक्तवान् । अशमि, अशामि । शमंशमम्, शामंशामम्। शंशमयतेः - अशंशमि, अशंशामि । शंशमम् । शंशामम् । योऽसौ णौ निर्लुप्यते, यश्च यङ्कारः, तयोर्दीर्धविधो आदेशो न स्थानिवद्भवतीति अस्थानिवद्भावाद्दीर्घः सिद्धो भवति । ह्रस्वविकल्पे तु विधीयमाने स्थानिवद्भावः स्यात् । णिण्यन्ते यङ्ण्यन्ते त्वसिद्धिरेव । व्याश्रयत्वादसिद्धत्वमपि नास्ति । णौ हि णियङोर्लोपः , चिण्णमुल्परे णावङ्गस्य दीर्घत्वम् ।।

खचि ह्रस्वः ।। 6 - 4 - 94 ।।

खच्परे णौ परतो ह्रस्वो भवत्यङ्गस्योपधायाः । द्विषन्तपः । परन्तपः । पुरन्दरः ।।

ह्लादो निष्ठायाम् ।। 6 - 4 - 95 ।।

ह्लादोऽङ्गस्योपधाया ह्रस्वो भवति निष्ठायां परतः । प्रह्लन्नः । प्रह्लन्नवान् । निष्ठायामिति किम् प्रह्लादयति । ह्लाद इति योगाविभागः क्रियते, क्तिन्यपि यथधा स्यात् - प्रह्लत्तिरिति ।।

छादेर्घेऽद्व्युपसर्गस्य ।। 6 - 4 - 96 ।।

छादेरङ्गस्याद्व्युपसर्गस्य घप्रत्यये परत उपधाया ह्रस्वो भवति । उरश्छदः । प्रच्छदः । दन्तच्छदः । णिलोपस्य चासिद्धत्वं स्थानिवद्भाको वा वचनसामर्थ्यादत्र न भवतीति ह्रस्वभाविन्युपधा भवति । अद्व्युपसर्गस्येति किम् समुपच्छादः । अद्विप्रभृत्युपसर्गस्येति वक्तव्यम् । समुपतिच्छादः । उत्तरा हि संख्या पूर्वसंख्याकृतं व्यपदेशं निवर्त्तयति, न हि त्रिपुत्रो द्विपुत्र इति व्यपदिश्यते ।।

इस्मन्त्रन्क्विषु च ।। 6 - 4 - 97 ।।

इस्, मन्, त्रन्, क्वि - इत्येतेषु परतश्छादेरुपधाया ह्रस्वो भवति । छदि - छद्म। छत्त्रम् । धामच्छत् । उपच्छत् ।।

गमहनजनखनघसां लोपः क्ङित्यनङि ।। 6 - 4 - 98 ।।

गम, हन, जन, खन, घस - इत्येतेषामङ्गमनामुपधाया लोपो भवत्यजादौ प्रत्यये क्ङित्यनङि परतः । जग्मतुः, जग्मुः । जघ्नतुः , जघ्नुः । जज्ञे, जज्ञाते, जज्ञिरे। चख्नतुः, चख्नुः । जक्षतुः जक्षुः । अक्षन्नमीमदन्त पितरः । क्ङितीति किम् गमनम् । हननम् । अनङीति किम् अगमत् । अघसत् । अचीत्येव - गम्यते, हन्यते ।।

तनिपत्योश्छन्दसि ।। 6 - 4 - 99 ।।

तनि, पति - इत्येतयोश्छन्दसि विषये उपधाया लोपो भवति अजादौ क्ङिति प्रत्यये परतः । वितत्निरे कवयः । शकुना कइव पप्तिम । छन्दसीति किम् वितेनिरे । पेतिम् ।।

घसिभसोर्हलि च ।। 6 - 4 - 100 ।।

घसि, भस - इत्येतयोश्छन्दसि उपधाया लोपो भवति हलादावजादौ च क्ङिति प्रत्यये परतः । सग्धिश्च मे सपीतिश्च मे । बब्धां ते हरी धानाः । सग्धिरिति - अदेः क्तिनि बहुलं छन्दसि थइति घस्लादेशे उपधाया लोपे च कृते झलो झलि इति सकारलोपः । धत्वं तकारस्य, जशत्वं घकारस्य । ततः समाना ग्धिः सग्धिरिति समासे कृते चसमानस्य सभावः । बब्धामिति - भसेर्लोटि तामि श्लौ द्विर्वचने कृते उपधालोपसलोपधत्वजश्त्वानि कर्त्तव्यानि । द्विर्वचनात्परत्वान्नित्यत्वाच्च उपधालोपः प्राप्नोति, छान्दसत्वात् स तथा न क्रियते । अजादौ - बप्सति । क्ङितीत्येव - अंशून् बभस्ति ।।

हुझल्भ्यो हेर्धिः ।। 6 - 4 - 101 ।।

हु इत्येतस्माद् झलन्तेभ्यश्चोत्तरस्य हलादेर्हेः स्थाने धिरादेशो भवति । जुहुधि । झलन्तेभ्यः - भिन्धि । छिन्धि । हुझल्भ्य इति किम् क्रीणीहि । प्रीणीहि । हेरिति किम् जुहुताम् । हलीत्येव - रुदिहि । स्वपिहि । इह जुहुतात्, भिन्तात् त्वमिति परत्वात् तातङि कृते सकृद् गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव इति पुनर्धिभावो न भवति । भिन्धकि, छिन्धकीत्यत्र परत्वाद् धिभावे कृते पुनः प्रसङ्गविज्ञानादकच् क्रियते ।।

श्रुश्रुणुपृकृवृभ्यश्छन्दसि ।। 6 - 4 - 102 ।।

श्रु, श्रणु, पृ, कृ, वृ - इत्येतेभ्य उत्तरस्य हेर्धिरादेशो भवति छन्दसि विषये । श्रुधी हवमिन्द्र । श्रृणुधी गिरः ।
पूर्ध्दि । उरुणस्कृधि । अपावृधि । श्रृणुधीत्यत्र धिभावविधानसामर्थ्याद् उत्तश्च प्रत्ययात् इति हेर्लुग्न भवति । अन्येषामपि दृश्यते इति दीर्घत्वम् । अतोऽन्यत्र व्यत्ययो बहुलम् इति शप् , तस्य बहुलं छन्दसि इति लुक् ।।

अङितश्च ।। 6 - 4 - 103 ।।

अङितश्च हेर्धिरादेशो भवति । वा छन्दसि इति पित्त्वेनास्याङित्त्वम् । सोम rारन्धि । अस्मभ्यं तद्धर्यश्व प्रयन्धि । युयोध्यस्मज्जुहुराणमेनः । अङित इति किम् हव्यं प्रीणीहि । रारन्धीति - रेमर्व्यत्ययेन परस्मैपदम् , शपः श्लुः , अभ्यासदीर्घत्वं छान्दसत्वात् । मलोपाभावस्तु अङित्त्वादेव । प्रयन्धीति - यमेः शपो लुक् । युयोधीति - यौतेः शपः श्लुः ।।

चिणो लुक् ।। 6 - 4 - 104 ।।

चिण उत्तरस्य प्रत्ययस्य लुग्भवति । अकारि । अहारि । अलावि । अपाचि ।अकारितराम्, अहारितमानित्यत्र तलोपस्यासिद्धत्वात् तरप्तमपोर्न लुग्भवति चिणो लुक् इत्येतद्विषयभेदाद्भिद्यते ।।

अतो हेः ।। 6 - 4 - 105 ।।

अकारान्तादङ्गादुत्तरस्य हेर्लुग्भवति । पच । पठ । गच्छ। धाव । अत इति किम् युहि । रुहि । तपरकरणं किम् लुनीहि । पुनीहि । ईत्वस्यासिद्धत्वादाकार एव भवति ।।

उतश्च प्रत्ययादसंयोगपूर्वत् ।। 6 - 4 - 106 ।।

उकारो योऽसंयोगपूर्वस्तदन्तात्प्रत्ययादुत्तरस्य हेर्लुग्भवति । चिनु । सुनु । कुरु । उत इति किम् लुनीहि । पुनीहि । प्रत्ययादिति किम् रुहि । युहि । असंयोगपूर्वादिति किम् प्राप्नुहि । राध्नुहि । तक्ष्णुहि ।। उतश्च प्रत्ययाच्छन्दोवावचनम् । उतश्च प्रत्ययात् इत्यत्र छन्दसि वा इति वक्तव्यम् । आतनुहि यातुधानान् । धिनुहि यज्ञपतिम् । तेन मा भागिनं कृणुहि ।।

लोपश्चास्यान्यतरस्यां म्वोः ।। 6 - 4 - 107 ।।

योऽयमुकारोऽसंयोगपूर्वः तदन्तस्य प्रत्ययस्यान्यतरस्यां लोपो भवति वकारमकारादौ प्रत्यये परतः । सुन्वः , सुनुवः । सुन्मः , सुनुमः । तन्वः , तनुवः । तन्मः, तनुमः । प्रत्ययस्येत्येव - युवः, युमः । असंयोगपूर्वस्येत्येव - शक्नुवः, शक्नुमः । लुगिति वर्त्तमाने, लोपग्रहणमन्त्यलोपार्थम् ।।

नित्यं करोतेः ।। 6 - 4 - 108 ।।

करोतेरुत्तरस्य उकारप्रत्ययस्य वकारमकारादौ प्रत्यये परतो नित्यं लोपो भवति । कुर्वः कुर्मः । उकारलोपस्य दीर्घविधावस्थानि वद्भावाद् हलि च इति दीर्घत्वं प्राप्तम्, न भकुर्छुराम् इति प्रतिषिध्यते ।।

ये च ।। 6 - 4 - 109 ।।

यकारादौ च प्रत्यये परतः करोतेरुत्तरस्योकारप्रत्ययस्य नित्यं लोपो भवति । कुर्यात्, कुर्याताम्, कुर्युः ।।

अत उत्सार्वधातुके ।। 6 - 4 - 110 ।।

उकारप्रत्ययान्तस्य करोतेरकारस्य स्थाने उकार आदेशो भवति सार्वधातुके क्ङिति परतः । कुरुतः । कुर्वन्ति । सार्वधातुकग्रहणं किम् भूतपूर्वेऽपि

सार्वधातुके यथा स्यात् - कुरु तपरकरणं लघूपधस्य गुणनिवृत्त्यर्थम् । क्ङितीत्येव - करोति । करोषि । करोमि ।।

श्नसोरल्लोपः ।। 6 - 4 - 111 ।।

श्नस्यास्तेश्चाकारस्य लोपो भवति सार्वधातुके क्ङिति परतः । रुन्धः, रुन्धन्ति । भिन्तः , भिन्दन्ति । अस्तेः - स्तः , सन्ति । क्ङितीत्येव - भिनत्ति । अस्ति । श्नसोः इत्याकारस्य पररुपत्वं शकान्ध्वादिषु द्रष्टव्यम् ।।

श्नाभ्यस्तयोरातः ।। 6 - 4 - 112 ।।

श्ना इत्येतस्याभ्यस्तानां चाङ्गानामाकारस्य लोपो भवति सार्वधातुके क्हिति परतः । लुनते । लुनताम् । अलुनत । अभ्यस्तानाम - मिमते । मिमताम् । अमिमत । सञ्जिहते । सञ्जहताम । समजिहत । श्नाभ्यस्तयोरिति किम् यान्ति । आत इति किम् बिभ्रति । क्ङितीत्येव - अलुनात् । अजहात् । आद्ग्रहणं स्पष्टार्थम् ।।

ई हल्यघोः ।। 6 - 4 - 113 ।।

श्नान्तानामङ्घानामभ्यस्तानां च घुवर्जितानामात ईकारादेशो भवति हलादौ सार्वधातुके क्ङिति परतः । लुनीतः , पुनीतः । लुनीथः, पुनीथ-। लुनीते, पुनीते ।अभ्यस्तानाम - मिमिते । मिीमिषे । मिमीध्व। शञ्जिहीते । सञ्जिहीषे । सञ्जिहीध्वे । हलीति किम् लुनन्ति । मिमते । अघोरिति किम् दत्तः । धत्तः । क्ङितीत्येव - लुनाति । जहाति ।।

इद्दरिद्रस्य ।। 6 - 4 - 114 ।।

दरिद्रातेर्हलादौ सार्वधातुके क्ङिति परत इकारादेशो भवति । दरिद्रितः । दरिद्रिथः । दरिद्रिवः । दरिद्रिमः । हलीत्येव - दरिद्रति । क्ङितीत्येव - दरिद्राति । दरिद्रातेरार्धधातुके लोपो वक्तव्यः । सिद्धश्च प्रत्यविधौ भवतीति वक्तव्यम । दरिद्रातीति दरिद्रः । आकारान्तलक्षणो णप्रत्ययो न भवति, पचादित्वादजेव भवति । न दरिद्रायके लोप दरिद्राणे च नेष्यते । दिदिरिद्रासतीत्येके दिदरिद्रषतीति वा ।। अद्यतन्यां वेति वक्तव्यम । अदरिद्रीत्, अदरिद्रासीत्। दरिद्रस्य इति निर्देशे छान्दसं ह्रस्वत्वं द्रष्टव्यम् ।।

भियोऽन्यतरस्याम ।। 6 - 4 - 115 ।।

भी इत्येतस्याङ्गस्यान्यतरस्यामिकारादेशो भवति हलादौ क्ङिति सार्वधातुके परतः । बिभित, बिभीतः । बिभिथः, भिभीथः। बिभिवऋः , बिभीवः । बिभिमः, बिभीमः । हलादावित्येव - बिभ्यति । क्ङितीत्येव - बिभेति । सार्वधातुक इत्येव - भीयते ।।

जहातेश्च ।। 6 - 4 - 116 ।।

जहातेश्च इकारादेशो भवति अन्यतरस्यां हलादौ क्ङिति सार्वधातुके परतः । जहितः, जहीतः। जहिथः, जहीथः। हलादावित्येव - जहति । क्ङितीत्येव - जहाति । सार्वधातुक इत्येव - हीयते । जेहीयते । पृथग्योगकरणमुत्तरार्थम् ।।

आ च हौ ।। 6 - 4 - 117 ।।

जहातेराकारश्चान्तदेशो भवति ङकारश्चान्यतरसायां हौ परतः । जहाहि, जहिहि, जहीहि ।।

लोपो यि ।। 6 - 4 - 118 ।।

लोपो भवति जहातेर्यकारादौ क्ङिति सार्वधातुके परतः । जह्यात् , जह्याताम् . जह्युः ।।

ध्वसोरेद्धावभ्यासलोपश्च ।। 6 - 4 - 118 ।।

घुसंज्ञकानामङ्गानामस्तेश्च एकारादेशो भवति हौ परतोऽभ्यासलोपश्च । देहि । धेहि । अस्तेः - श्नसोरल्लोपः इत्येकारलोपः, एधि । शिदयं लोपः, तेन सर्वस्याभ्यासस्य भवति ।।

अत एकहल्मध्यऽनादेशादेर्लिटि ।। 6 - 4 - 120 ।।

लिटि परत आदेश आदिर्यस्याङ्गस्य नास्ति तस्य एकहल्मध्ये असहाययोर्हलोर्मध्य योऽकारस्तस्य एकारादेशो भवति, अभ्यासलोपश्च लिटि क्ङिति परतः। रेणतुः, रेणुः । येमतुः, येमुः । पेचतुः, पेचुः। देमतुः, देमुः। अत इति किम् दिदिवतुः। दिदिवुः । तपरकरणं किम् ररासे, ररासाते, ररासिरे। एकहल्मध्य इति किम् ररक्षतुः, ररक्षुः। तत्सरतुः, तत्सरुः। अनादेशादेरिति किम् चकणतुः, चकणुः। जगणतुः, जगणुः। बभणतुः , बभणुः । लिट थआदेश विशेषणं किम् इहापि यथा स्यात् - नेमतुः, नेमुः । सेहे, सेहाते, सेहिरे । अनैमित्तिके नत्वसत्वे, तदादिर्लिट्यादेशादिर्न भवति । इहाभ्यासजश्त्वचर्त्वयोरसिद्धत्वं नास्ति, तेन तदादिरप्यादेशादिर्भवति । तथा च फलिभनोरेत्वं विधीयते । रुपाभेदे चादेशादिर्नाश्रीयत इति शसिदद्योः प्रतिषेधवचनं ज्ञापकम्, अन्यथा हि पेचतुः, पेचुः, देमतुः, देमुरित्येवमादीनामपि प्रकृतिजश्चरादीनामेत्वं न स्यात् । क्ङितीत्येव - अहं पपच । अहं पपठ । दम्भेरेत्वं वक्तव्यम् । देभतुः । देभुः । नलोपस्यासिद्धत्वान्न प्रापनोति । नशिमन्योरलिट्येत्वं वक्तव्यम् । अनेशम् । मेनका । अनेशामिति नशेर्लुङि पुषादित्वाद्ङ् । मेनकेति मनेराशिषि चेति वुन् । क्षिपकादिषु प्रक्षेपादित्वं न क्रियते । छन्दस्यमिपचोरप्यलिटि एत्वं वक्तव्यम् । व्येमानम् । अमेर्विपूर्वस्य जानशि मुक् न क्रियते । लिङि - हेचिरन् । पेचिरन्नित्येतस्य छान्दसं ह्रस्वत्वम् । यचिवप्योश्च । आयेजे । आवेपे । येर्वपेश्च लङि इटि छन्दस्यपि दृश्यते इत्यनजादेरप्याडागमः ।।

थलि च सेटि ।। 6 - 4 - 121 ।।

थलि च सेटि परतोऽनादेशादेरङ्गस्य एकहल्मध्यगतस्यातः स्थाने एकार आदेषो भवति अभ्यासलोपश्च । पेचिथ । शोकिथ । सेटीति किम् पपक्थ।

थल्ग्रहणं विस्पष्टार्थम । अक्ङिदर्थमेतद्वचनमित्यन्यस्येटोऽसम्भवात् । अत इत्येव - दिदेविथ। एकहल्मध्यगतस्य इत्येव - ततक्षिथ । ररक्षिथ । अनादेशादेरित्येव - चकणिथ । बभणिथ ।।

तृफलभजत्रपश्च ।। 6 - 4 - 122 ।।

तृ , फल, भज, त्रप - इत्येतेषामङ्गानामत एकारादेशो भवति , अभ्यासलोपश्च लिटि क्ङिति परतस्थलि च सेटि । तेरतुः, तेरुः, तेरिथ । फेलतुः, फेलिथ। भेजतुः , भेजुः, भेजिथ । त्रेपे, त्रेपाते, त्रेपिरे ।तरतेर्गुणार्थ वचनम् । फलिभजोरादेशाद्यर्थम् । त्रपेरनेकहल्मध्यार्थम् । श्रन्थेश्चेति वक्तव्यम् । श्रेथतुः , श्रेथुः ।।

राधो हिंसायाम् ।। 6 - 4 - 123।।

राधो हिंसायामर्थेऽवर्णस्य एकार आदेशो भवति, अभ्यासलोपश्च लिटि क्ङिति परतस्थलि च सेटि । अपरेधतुः, अपरेधुः, अपरेधिथ। हिसायामिति किम् रराधतुः, रराधुः, रराधिथ। अत इत्येतदिहोपस्थितं तपरत्वकृतमपास्य कालविशेषमसम्भवादवर्णमात्रं प्रतिपादयति । अथ वा - श्नाभ्यस्तयोरातः - इत्यनुवर्त्तते इति व्याख्येयम् । एकहलमध्ये वा याः स स्थानी भवतिष्यति ।।

वा जृभ्रमुत्रसाम ।। 6 - 4 - 124 ।।

जृ. भ्रम, त्रस - इत्येतेषामङ्गानामतः स्थाने वा एकार आदेशो भवति, अभ्यासलोपश्च लिटि क्ङिति परतस्थलि च सेटि । जेरतुः,जेरुः, जेरिथ। जजरतुः, जजरुझ, जजरिथ। भ्रेमतुः, भ्रेमुः, भ्रेमिथ। बभ्रमतुः, बभ्रमुः, बभ्रमिथ । त्रेसतुः, त्रसुः, त्रेसिथः तत्रसतुः, तत्रसुः, तत्रसिथ ।।

फणां च सप्तानाम् ।। 6 - 4 - 125 ।।

फणादिनां सप्तानां धातूनामवर्णस्य स्थाने वा एकार आदेशो भवति, अभ्यासलोपश्च लिटि क्ङिति परतः, थलि

च सेटि । फेणतुः, फेषुः, । फेणिथ पफणतुः, पफणुः, पफणिथ। रेजतुः, रेजुः, रेजिथ, रराजतुः, रराजुः, रराजिथ। भ्रेजे, भ्रेजाते, भ्रेजिरेः बभ्राजे, बभ्राजाते, बभ्राजिरे ।भ्रेशे, भ्रेशाते , भ्रेजे, भ्रेजाते, भ्रेजिरे बभ्राजे, बभ्राजाते, बभ्राजिरे। भ्रेशे, भ्रेशाते, भ्रेशिरे बभ्राशे, बभ्राशाते , बभ्राशिरे । भ्लेशे, भ्लेशाते , भ्लेशिरे बभ्लाशे, बभ्लाशाते, बभ्लाशिरे । स्येमतुः, स्येमुः, स्येमिथः, सस्यमतुः, सस्यमुः, सस्यमिथ। सेवनतुः, स्वेनु, स्वेनिथः,सस्वनतुः, सस्वनुः, सस्वनिथ। सप्तानामिति किम् दध्वनतुः, दध्वनुः, दध्वनिथः ।।

नशासददवादिगुणानाम ।। 6 - 4 - 126 ।।

शस, दद - इत्येतयोर्वकारादीनां च धातूनां गुण इत्येवमभिनिर्वुत्तस्य च योऽकारस्तस्य स्थाने एकारादेशो न भवति, अभ्यासलोपश्च । विशशासतुः, विशशसुः, विशशसिथ। दददे, दददाते, ददिरे । वादीनाम - ववमतुः, ववमुः, ववमिथ। गुणस्य - विशशरतुः, विशशरुः, विशशरिथ । लुलविथ, पुपविथ। गुणशब्दाभिनिर्वुत्तस्यार्शब्दस्यौकारस्य चायमकार इति एत्वं प्रतिषिध्यते ।।

अर्वणास्त्रसावनञः ।। 6 - 4 - 127 ।।

अर्वन्नित्येतस्याङ्गस्य तृ इत्ययमादेशो भवति, सुश्चेत्ततः परो न भवति, स च नञ उत्तरो न भवति । अर्वन्तौ, अर्वन्तः। अर्वन्तम्, अर्वन्तौ, अर्वतः। अर्वता, अर्वद्भ्याम्, अर्वद्भिः। अर्वती। आर्वतम् । असाविति किम् अर्वा । अनञ इति किम् अनर्वाणौ, अनर्वाणः । अनर्वाणं वृषभं मन्द्रजिह्वम् ।।

मघवा वहुलम् ।। 6 - 4 - 128 ।।

मधवन् इत्येतस्याङ्गस्य वहुलम् तु इत्ययमादेशो भवति । मघवान्, मघवन्तौ, मघवन्तः। मघवन्तम, मघवन्तौ, मघवतः। मघवता । मघवती। माघवतम् । न च भवति - मघवा, मघवानौ, मघवानः। मघवानमम्, मघवानौ, मघोनः । मघोना, मघवभ्याम, मघवभिः। मघोनी। माघवनम् ।।

भस्य ।। 6 - 4 - 129 ।।

भस्य इत्ययमधिकार आ अध्यायपिरसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामो भस्येत्येवं तद्वेदितव्यम् । वक्ष्यति - पादः पत् । द्विपदः पश्य। द्विपदा कृतम् । भस्येति किम् द्विपादौ । द्विपादः ।।

पादः पत् ।। 6 - 4 - 130 ।।

पादः इति पादशब्दो लुप्ताकारो गृह्यते, तदन्तस्याङ्गस्य भस्य पत् इत्ययमादेशो भवति । स च निर्दिश्यमानस्यादेशा भवन्ति इति पाच्छब्दस्यैव भवति, न तदन्तस्य सर्वस्य । द्विपदः पश्य । द्विपदा । द्विपदे । द्विपदिकां ददाति । त्रिपदिकां ददाति । वैयाघ्रपद्यः।।

वसोः सम्प्रसारणाम् ।। 6 - 4 - 131 ।।

वस्वन्तस्य भस्य सम्परसारणं भवति । विदुषः पश्य । विदुषा । विदुषे । पेचुषः पश्य । पेचुषा । पेचुषे । पपुषः पश्य । आकारलोपे कर्त्तव्ये वसुसम्प्रसारणस्य व्याश्रयत्वादसिद्धत्वं न भवति वसुग्रहणे क्वसोरपि ग्रहणमिष्यते ।

वाह ऊठ् ।। 6 - 4 - 132 ।।

वाहः इत्येवमन्तस्य भस्य ऊठ् इत्येतस्सम्प्रसारणं भवति । प्रष्ठोहः । प्रष्ठौहा । प्रष्ठौहे । दित्यौहः । दित्यौहा । दित्यौहे । एत्येधत्यूठ्सु इति वृद्धिः । अथ किमर्थमूठ् क्रियते , सम्प्रसारण एव कृते गुणे च वुद्धिरेचि इति वृद्धौ सत्यां सिद्धं रुपं भवति - प्रष्ठौह इति , अनकारान्ते चोपपदे वहेर्ण्विर्न दृश्यते ज्ञापनार्थम् । एतज्ज्ञापयति - भवत्येषा परिभाष असिद्धं बहिरङ्गमन्तरङे इति । तस्यां हि सत्यां हि सत्यां बहिरङ्स्य सम्प्रसारणस्यासिद्धत्वाद् अन्तरङ्गो गुणो न स्यात् ।।

श्वयुवमघोनामतद्धिते ।। 6 - 4 - 133 ।।

श्वन्, युवन्, मघवन् - इत्येतेषामङ्गानामतद्धिते प्रत्यये परतः सम्प्रसारणं भवति । शुः, शुना, शुने । यूनः, यूना, यूने । मघोनः, मघोना, मघोने । अतद्धित इति किम् शौवं मांसम् । यौवनं वर्त्तते । माघवनः स्थालीपाकः । शुनो विकारे प्राणिरजतादिभ्योऽञ् द्वारादित्वादैजागमः । श्वादीनामेतत्सम्प्रसारणं नकारान्तानामिष्यते । इह न भवति युवतीः पश्य। मघवता, मघवते। तदर्थमुत्तरत्र योगविभागं कुर्वन्ति - अल्लोपः ,अनः, अन इत्युभयोः शेष इति ।।

अल्लोपोऽनः ।। 6 - 4 - 134 ।।

अन् तइत्येवमन्तस्य भस्य अकारलोपो भवति । राज्ञः पश्य। राज्ञा । राज्ञे । तक्ष्णः पश्य । तक्ष्णा । तक्ष्णे ।

अनो नकारान्तस्यायं लोप इष्यते । इह न भवति - राजकियमिति ।।

षपूर्वहन्धृतराज्ञामणि ।। 6 - 4 - 135 ।।

षकारपूर्वो योऽन् हनो घृतराज्ञश्च तस्याकारलोपो भवति अणि परतः । औक्ष्णः । ताक्ष्णः । भ्रौणघ्नः । धार्त्तराज्ञः । षपुर्वहन्धृतरज्ञामिति किम् सामनः । वैमनः । अन् इति प्रकृतिभावेनाल्लोपटिलोपावुभावपि न भवतः । अणीति किम् ताक्षण्यः ।।

विभाषा ङिश्योः ।। 6 - 4 - 136 ।।

ङो परतः शीशब्दे च अनो विभाषा अकारलोपो भवति । राज्ञि, राजनि । साम्नि , सामनि। साम्नी, सामनी।।

न संयोगाद्वमन्तात् ।। 6 - 4 - 137 ।।

वकारमकारान्तात्संयोगादुतत्रस्यानोऽकारस्य लोपो न भवति । पर्वणा, पर्वणे । अथर्वणा, अथर्वणे । संयोगादिति किम् प्रतिदीव्ना । प्रतिदीव्ने । साम्ना, साम्ने । बमन्तादिति किम् तक्ष्णा । तक्ष्णे ।।

अचः ।। 6 - 4 138 ।।

अचः इत्ययमञ्चतिर्लुप्तनकारो गृह्यते, तदन्तस्य भस्य अकारस्य लोपो भवति । दधीचः पश्य । दधीचा , दधीचे । मधुचः पश्य । मधूचा , मधूचे ।।

उद ईत् ।। 6 - 4 - 139 ।।

उद उत्तरस्याच ईकारादेशो भवति । उदीचः । उदीचा । उदीचे ।।

आतो घातोः ।। 6 - 4 - 140 ।।

आकारन्तस्य धातोर्भस्य लोपो भवति । कोलालपः पश्य । कीलालपा, कीलालपे । सुभंयः पश्य । सुभंया, शुभंये । आत इति किम् निया, निये । धातोरिति किम् खट्वाः पश्य । मालाः पश्य । आतः इति

योगविभागः, तेन क्त्वो ल्यप् हलः श्नः शानच् इत्येवमादि सिद्धं भवति ।।

मन्त्रेष्वाङ्यादेरात्मनः ।। 6 - 4 - 141 ।।

मन्त्रेषु आङि परत आत्मन आदेर्लोपो भवति । त्मना देवभ्यः । त्मना सोमेषु । मन्त्रेष्विति किम् आत्मना कृतम् । आङोति किम् यदा त्मनस्तन्नो वरिष्ठा । आङोऽन्यत्रापि दृश्यते । त्मन्यासप्रव्जत मह्यम् ।।

ति विंशतेर्डिति ।। 6 - 4 - 142 ।।

भस्य विंशतेस्तिशब्दस्य डिति प्रत्यये परतो लोपो भवति । विंशात्या क्रीतः विंशकः । विंशं शतम् । विंशतेः पूरणो विंशः । एकविंशः ।डितीति किम् विंशत्या ।।

टेः ।। 6 - 4 - 143 ।।

टिसंज्ञकस्य डिति प्रत्यये परतो लोपो भवति । कुमुद्वान् । नड्वान् । वेतस्वान् । उपसरजः । मन्दुरजः । त्रिंशता क्रीतः त्रिंशकः । डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् टिलोपो भवति ।।

नस्तद्धिते ।। 6 - 4 - 144 ।।

नकारान्तस्य भस्य टेर्लोपो भवति तद्धिते परतः । आग्निशर्मिः । औहुलोमिः । बाह्वादित्वादिञ्प्रत्ययः । न इति किम् सात्वतः । तद्धित इति किम् शर्मणा । शर्मणे । नान्तस्य टिलोपे सब्रह्मचारिपिठसर्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्हिसूकरसद्मसुपर्वणामुपसंख्यानं कर्तव्यम् । अत्र ये इन्नन्तास्तेषाम् इनण्यनपत्ये इति प्रकृतिभावः प्राप्तः , ये त्वन्नन्तास्तेषाम् अन् इति । सब्रह्मजारिण इमे साब्रह्मचाराः । पीठसर्पिणः - पैठसर्पाः । कलापिना प्रोक्तमधीयते कालापाः । कुथुमिनः - कोथुमाः । तैतिलिजाजलिनावाजार्यौ, तत्कृतो ग्रन्थ उपचारात् तैतिलिजाजलिशब्दाभ्यामबिधीयते , तं ग्रन्थमधीयते तैतिलाः, जाजलाः । शैषिकेष्वर्थेषु वृद्धत्वादत्र छः प्राप्नोति । एवं लाङ्गलाः । शैलालाः । शिखण्डिनः - शैखण्डाः । सूकरसद्मनः - सौकरसद्माः ।सुपर्वणः सौपर्वाः ।

अश्मनो विकार उपसंख्यानमम् । अश्मनो विकार आश्मः । आश्मनोऽन्यः । चर्मणः कोश उपसंख्यानम् । चार्मः कोशः । चार्मणोऽन्यः । शुः सङ्कोच उपसंख्यानम् । शौवः सङ्कोचः । शौवनोऽन्यः । अव्ययानां च सायम्प्रातिकाद्यर्थमुपसंख्यानम् । के पुनः सायम्प्रातिकादयः येषामव्ययानामविहितष्टिलोपः, प्रयोगे च दृश्यते, ते सायम्प्रातिकप्रकारा ग्रहीतव्याः । सायम्प्रातर्भवः सायम्प्रातिकः । पौनः पुनिकः । बाह्यः । कौतस्कुतः । कालाट्ठञ् इति ठञ्प्रत्ययः । ट्युट्युलौ तु नेष्येते । आरातीयः, शाश्वतिकः , शाश्वतः - इत्येवमादिषु न दृश्यते टिलोपः ।।

अह्नष्टखोरेव ।। 6 - 4 - 145 ।।

अहन् इत्येतस्य टखोरेव परतष्टिलोपो भवति । द्वे अहनी समाहृते द्व्यहः । त्र्यहः । द्वे अहनी अधीष्टो भूतो भूतो भावी वा द्व्यहीनः । त्र्यहीनः । अह्नां समूहः क्रतुः अहीनः । अह्नः समूहे खो वक्तव्यः । सिद्धे सत्यारम्भो नियमार्थः । इह मा भूत् - अह्ना निर्वृत्तमाह्निकम् । एवकारकरणं विस्पष्टार्थम् । अह्न एव टखोः - इत्येवं नियमो न भविष्यति आत्माध्वानौ खे इति प्रकृतिभावविधानात् ।।

ओर्गुणः ।। 6 - 4 - 146 ।।

उपर्णान्तस्य भस्य गुणो भवति तद्धते परतः । बाभ्रव्यः । माण्डव्यः । शङ्कव्यं दारु । पिचव्यः कार्पासः । कमण्डलव्या मृत्तिका । परशव्यमयः । औपगवः । कापटवः । ओरोत् इति वक्तव्ये गुणग्रहणं संज्ञापूर्वको विधिरनित्ये यथा स्यात्, तेन स्वायम्भुव इति सिद्धं भवति ।।

ढे लोपोऽकद्रवाः ।। 6 - 4 - 147 ।।

ढे परत उवर्णान्तस्य भस्याकद्र्वा लोपो भवति । कामण्डलेयः । शैतबाहेयः । जाम्बेयः । माद्रबाहेयः । अकद्र्वा इति किम् काद्रवेयो मन्त्रमपश्यत् ।।

यस्येति च ।। 6 - 4 - 148 ।।

इवर्णान्तस्यावर्णान्तस्य च भस्य इकारे परे तद्धिते च लोपो भवति । इवर्णान्तस्य ईकारे - दाक्षी । प्लाक्षी । सखी । सवर्णदीर्घत्वे हि सत्यतिसखेरागच्छतीत्यत्र एकादेशस्यान्तवत्त्वादसखीति घिसंज्ञायाः प्रतिषेधः स्यात् ।

इवर्णान्तस्य तद्धिते - दुलि, दौलेयः। वलि, वालोयः । अत्रि, आत्रेयः । अवर्णान्तस्य ईकारे - कुमारो । गौरी । शाङ्र्गरवी । अवर्णान्तस्य तद्धिते - दाक्षिः । प्लाक्षिः । चौडिः । बालाकिः । सौमित्रिः । यस्येत्यौङः श्यां प्रतिषेधो वक्तव्यः । काण्डे । कुड्ये । सौर्ये हिमवतः श्रृङ्गे । औङः शीभावे कृते यस्येति च इति, सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः इति च लोपः प्राप्नोति । इयङुवङ्भ्यां लोपो भवति विप्रतिषेधेन । वत्सान्प्रीणाति वत्सप्रीः , तस्यापत्यं वात्सप्रेयः । चतुष्पाद्भ्यो ढञ् इति ढञ् प्रत्ययः । लेखाभ्रुः शुभ्रादिः, तस्या अपत्यं लैखाभ्रेयः ।।

सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ।। 6 - 4 - 149 ।।

सूर्य, तिष्य, अगस्त्य, मत्स्य - इत्येतेषां यकारस्य उपधाया भस्य लोपो भवति ईति परतस्तद्धिते च । सूर्येणैकदिक् सौरी बलाका । अणि यो यस्येति लोपस्तस्यासिद्धत्वं नास्ति, वायाश्रयत्वात् । ईकारे तु यस्तस्यासिद्धत्वाद् उपधायकारो भस्यणन्तस्य सूर्यसेय सम्बन्धीति लुप्यते । तिष्य - तैषमहः । तैषी रात्रीः । अघस्तयस्यापत्यं स्त्री, ऋषित्वादणि कृते - आगस्ती । आगस्तीयः । मत्स्य - गौरादित्वान् ङीष् , मत्सी । उपधाया इति किम् मत्स्यचरी । यग्रहणमुत्तरार्थम् । विषयपरिगणनमत्र वर्त्तव्यम् - मत्स्यस्य ङ्यामिति वक्तव्यम् । इह मा भूत् - मत्स्यस्येदं मांसं मात्स्यम् । सूर्यागस्त्ययोश्छे च ङ्यं च । सौरीयः । सौरी । आगस्तीयः । आगस्ती । इह मा भूत् - सौर्य चरुं निर्वबेत् । आगस्त्यः । तिष्यपुष्ययोर्नक्षत्राणि । तिष्येण नक्षत्रेण युक्तः कालः तैषः । पौषः । अन्तिकस्य तसि कादिलोप आद्युदात्तं च । अन्तिकशब्दस्य तसिप्रत्यये परतः ककारादेः शब्दस्य लोपो वक्तव्यः, आद्युदात्तं च । अन्तितो न दूराद् । तमे तादेश्च । तमप्रत्यये अन्तिकशब्दस्य तकारादेः ककारादेश्च लोपो वक्तव्यः । तत्र तादिलोपे - अन्तमः । कादिलोपे - अन्तितमः । कादिलोपे बहुलमिति वक्तव्यम् । अन्यत्रापि हि दृश्यते - अन्तिके सीदतीति अन्तिषत् । पूर्वपदात् इति पत्वम् । ये च । अन्तियः ।।

हलस्तद्धितस्य ।। 6 - 4 - 150 ।।

तद्धिते इति निवृत्तम् । हल उत्तरस्य तद्धितयकारस्य उपधाया ईति परतो लोपो भवति । गार्गी । वात्सी । हल इति किम् चकारिकेयो । तद्धितस्येति किम् वैद्यस्य भार्या वैद्यो ।।

आपत्यस्य च तद्धितेऽनाति ।। 6 - 4 - 151 ।।

अपत्ययकारस्य हल उत्तरस्य तद्धिते अनाकारादौ यलोपो भवति । गार्गाणां समूहौ गार्गकम् । वात्सकम् । आपत्यस्येति किम् साङ्काश्यकः । काम्पिल्यकः । तद्धितग्रहणमीत्यनापत्यस्यापि लोपार्थम् - सौमी इष्टिः । अनातीति किम् गार्ग्यायणः । वात्सस्यायनः । हल इत्येव - कारिकेयस्यापत्यं कारिकेयिः ।।

क्यच्व्योश्च ।। 6 - 4 - 152 ।।

क्य, च्वि - इत्येतयोश्च परत आपत्ययकारस्य हल उत्तरस्य लोपो भवति । वात्सीयति । गार्गीयति । वात्सीयते । गार्गीयते । च्वौ - गार्गीभूतः । वात्सीभूतः । आपत्यस्येत्येव - साङ्काश्यायते । साङ्काश्यभूतः । हल इत्येव - कारिकेयीयति । कारिकेयीभूतः ।।

बिल्वकादिभ्यश्छस्य लुक् ।। 6 - 4 - 153 ।।

नडादिषु बिल्वादयः पठ्यन्ते । नडादीनां कुक्च इति कृतकुगागमा बिल्वकादयो भवन्ति, तेभ्य उत्तरस्य छस्य भस्य तद्धिते परतो लुग् भवति । बिल्वा यस्यां सन्ति बिल्वकीया, तस्यां भवाः बैल्वकाः। वेणुकीयाः , वैणुकाः । वैत्रकीयाः, वैत्रकाः । वेतसकीयाः, वैतसकाः । तृणकीयाः, तार्णकाः । इक्षुकीयाः , ऐक्षुकाः । काष्ठकीयाः, काष्ठकाः । कपोतकीयाः , कापोतकाः । क्रुञ्चा ह्रस्वत्वं च । क्रुञ्चकीयाः, क्रौञ्चकाः । छग्रहणं किम् छमात्रस्य लुग्यथा स्याद् कुको निवृत्तिर्मा भूदिति, अन्था हि सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यभाव इति कुगपि निवर्त्तेत । लुग्ग्रहणं सर्वलोपो यथा स्याद्, यकारमात्रस्य मा भूत् ।।

तुरिष्ठेमेयस्सु ।। 6 - 4 - 154 ।।

इष्ठन्, इमनिच् , ईयसुन - इत्येतेषु परतः तृशब्दस्य लोपो भवति । आसुतिं करिष्ठः । विचायिष्ठः । वहिष्ठः । दोहीयसी धेनुः । सर्वस्य तृशब्दस्य लोपार्थ वचनम् । अन्त्यस्य हि टेरित्येव सिद्धः । लुगित्येतद्त्र

नानुवर्त्तते तथा हि सति न लुमताङ्गस्य इति प्रतिषेधाद् गुणो न स्यात् । इमनिज्ग्रहणमुत्तरार्थम् । इत्रौ तु तुश्छन्दसि इति भवतः ।।

टेः ।। 6 - 4 - 155 ।।

भस्य टेर्लोपो भवति इष्ठेमेयस्सु परतः । पटु - पटिष्ठः, पटिमा, पटीयान् । लघु - लघिष्ठः, लघिमा, लघीयान्। णाविष्ठवत्प्रातिपदिकस्य कार्यं भवतीति वक्तव्यम् । किं प्रयोजनम् पुंवद्भावरभवटिलोपयणादिपरार्थम् । पुंवद्भावः - एनीमाजष्टे एतयति । श्यतयति । तसिलादिष्वाकृत्वसुचः इति इष्ठे पुंवद्भाव उक्तः । रभावः - पृथुमाचष्टे प्रथयति । भ्रदयति । टिलोपः - पटुमाचष्टे पटयति । लघयति । यणादिपरम् - स्थूलमाचष्टे स्थवयति । भारद्वाजीयास्तु पठन्ति - णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरविन्मतोर्लुक्कनर्थम् इति । स्रग्विणमाचष्टे स्रजयति । वसुमन्तमाचष्टे वसयति । युवानमाचष्टे यवयति । कनयति । एतदुभयमप्युदाहरणमात्रम् , न परिगणनम् । प्रादयोऽपि हीष्यन्ते - प्रियमाचष्टे प्रापयति ।।

स्थू लदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणाः ।। 6 - 4 - 156 ।।

स्थूल, दूर, युव, ह्रस्व, क्षिप्र, क्षुद्र - इत्येतेषां यणादिपरं लुप्यते इष्ठेमेयस्सु परतः, पूर्वस्य च गुणो भवति । स्थूल - स्थविष्ठः, स्थवीयान् । दूर- दविष्ठः, दवीयान् । युवन् - यविष्ठः , यवीयान् । ह्रस्व - ह्रसिष्ठः, ह्रसीयान् , ह्रसिमा । क्षिप्र - क्षेपिष्ठः, क्षेपीयान्, क्षेपिमा । क्षुद्र - क्षोदिष्ठः, क्षोदीयान्, क्षोदिमा । ह्रस्वक्षिप्रक्षुद्रशब्दाः पृथ्वादिषु पठ्यन्ते । परग्रहणं किम् यविष्ठः, यवीयान्, ह्रसिष्ठः, ह्रसीयान् इत्यत्र पूर्वस्य यणादेर्लोपो मा भूत् । पूर्वग्रहणं विस्पष्टार्थम् ।।

प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बहिगर्वर्षित्रब्द्राधिवृन्दाः ।। 6 - 4 - 157 ।।

प्रिय, स्थिर, स्फिर, उरु, बहुल, गुरु, वृद्ध, तृप्र, दीर्घ, वृन्दारक - इत्येतेषां प्र, स्थ, स्फ, वर्, बंहि, गर्, वर्षि, त्रप्, द्राघि, वृन्द - इत्येते यथासंख्यमादेशा भवन्ति इष्ठेमेयस्सु परतः । प्रिय - प्रेष्ठः । प्रेमा । प्रेयान् । स्थिर - स्थेष्ठः । स्थेयान् । स्फिर - स्फेष्ठः । स्फेयान् । उरु - वरिष्ठः । वरिमा । वरीयान् । बहुल - बंहिष्ठः । बंहिमा । बंहीयान् । गुरु - गरिष्ठः । गरिमा । गरीयान् । वृद्ध - वर्षिष्ठः । वर्षीयान् । तृप्र - त्रपिष्ठः । त्रपीयान् । दीर्घ - द्राघिष्ठः । द्राघीयान् । द्राघिमा । वृन्दारक - वृन्दिष्ठः । वृन्दीयान् । प्रियोरुगुरुबहुलदीर्घाः पृथ्वादिषु पठ्यन्ते, तेनान्येषामिमनिज् न भवतीति नोदाह्रियते ।।

बहोर्लोपो भू च वहोः ।। 6 - 4 - 158 ।।

बहोरुत्तरेषामिष्ठेमेयसां लोपो भवति, तस्य च बहोः स्थाने भू इत्ययमादेशो भवति । भूयान् । भूमा । बहुशब्दः वृथ्वादिषु पठ्यते । बहोः इति पुर्ग्रहणं स्थानित्वप्रतिपत्त्यर्थम् , अन्यथा हि प्रत्ययानामेव भूभावः स्यात् ।।

इष्ठस्य यिट् च ।। 6 - 4 - 159 ।।

बहोरुत्तरस्य इष्ठस्य यिडागमो भवति बहोश्च भूरादेशो भवति । भूयिष्ठः । लोपापवादो यिडागम, तस्मिन्निकार उच्चारणार्थः ।।

ज्यादादीयसः ।। 6 - 4 - 160 ।।

ज्यादुत्तरस्य ईयस आकार आदेशो भवति । ज्यायान् । लोपस्य यिदा व्यवहितत्वादादित्युच्यते । लोपे हि सति अकृद्यकार इति दीर्घत्वेन ज्यायानिति सिध्यति ।।

र ऋतो हलादेर्लघोः ।। 6 - 4 -161 ।।

रशब्द आदेशो भवति ऋकारस्य हलादेर्लघोरिष्ठेमेयस्सु परतः । प्रथिष्ठः, प्रथिमा, प्रथीयान्। म्रदिष्ठः , म्रदिमा, म्रदीयान् । ऋत इति किम् पटिष्ठः, पटिमा, मटीयान् । हलादेरिति किम् ऋजिष्ठः, ऋजिमा, ऋजीयान् । लघोरिति किम् कृष्णष्ठः , कृष्णीयान्, कृष्णिमा । परिगणनं कर्त्तव्यम् पृथुं मृदुं भृशं चैव कृशं च दृढमेव च । परिपूर्वं वृढं चैव षडेतान् रविधौ स्मरेत् ।। तत इह न भवति - कृतमाचष्टे कृतयति, मातरमाचष्टे मातयति, भ्रातयति ।।

विभापर्जोश्छन्दसि ।। 6 - 4 - 162 ।।

ऋजु इत्येतस्य ऋतः स्थाने विभाषा रेफ आदेशो भवति इष्ठेमेयस्सु परतश्छन्दसि विषये । रजिष्ठमेति पन्थानम् । त्वमृजिष्ठः ।।

प्रकृत्यैकाच् ।। 6 - 4 - 163 ।।

एकाज् यद्भसंज्ञकं तदिष्ठमेयस्सु परतः प्रकृत्या भवति । स्रग्विन्नित्येतस्य विन्नन्तस्य - स्रजिष्ठः, स्रजीयान्, स्रजयति । स्रुग्वदित्येतस्य मत्वन्तस्य - स्रुचिष्ठः , स्रुचीयान्, स्रुचयति । एकाजिति किम् वसुमदित्येतस्य वसिष्ठः । वसीयान् । प्रकृत्याऽके राजन्यमनुष्ययुवानः । अके प्रत्यये परतो राजन्य, मनुष्य, युवन् - इत्येते प्रकृत्या भवन्ति । राजन्यानां समूहो राजन्यकम । मनुष्याणां सूमहौ मानुष्यकम् । आपत्यस्य च तद्धितेऽनाति इति यलोपः प्रकृतिभावेन न भवति । यूनो भावः यौवनिका । मनोज्ञादित्वाद् , वुञ्, तस्य नस्तद्धिते इति टिलोपो न भवति ।।

इनण्यनपत्ये ।। 6 - 4 - 164 ।।

इन्नन्तमनपत्यर्थेऽणि परतः प्रकृत्या भवति । सांकूटिनम् । सांराविणम् । सांमार्जिनम् । आभिविधौ भावे इनुण् , अणिनुण, इत्यण् । स्रग्विण इदं स्राग्विणम् । अणीति किम् दण्डिनां समूहौ दाण्डम् । अनुदात्तादेरञ् इत्यञ्प्रत्ययः । अनपत्य इत् किम् मेघाविनोऽपत्यं मैधावः ।।

गाथिविदिथिकेशिगणिपणिनश्च ।। 6 - 4 - 165 ।।

गाथिन् , विदथिन्, केशिन्, गणिन्, पणिन् - इत्येते चाणि प्रकृत्या भवन्ति । गाथिनोऽपत्यं गाथिनः । वैदथिनः । कैशिनः । गाणिनः । पाणिनः । अपत्यार्थोऽयमारम्भः ।।

संयोगादिश्च ।। 6 - 4 - 166 ।।

संयोगादिश्च इनणि प्रकृत्या भवति । शङ्खिनोऽपत्यं शाङ्खिनः । माद्रिणः । वाज्रिणः ।।
अन् ।। 6 - 4 - 167 ।।
अन्नन्तमणि प्रकृत्या भवति अपत्ये चानपत्ये च । सामनः । वैमनः । सैत्वनः । जैत्वनः ।।
ये चाभावकर्मणोः ।। 6 - 4 - 168 ।।
यकारादौ च तद्धितेऽभावकर्मणोरर्थयोरन् प्रकृत्या भवति । सामसु साधुः सामन्यः । वेमन्यः । अभावकर्मणोरिति किम् राज्ञो भावः कर्म वा राज्यम् । राजन् इति पुरोहितादिषु पठ्यते, ततोऽयं यक् प्रत्ययः ।।
आत्माध्वानौ खे ।। 6 - 4 - 169 ।।
आत्मन् अध्वन् - इत्येतौ खे परतः प्रकृत्या भवतः । आत्मने हित आत्मनीनः । अध्वानमलङ्गमी अध्वनीनः । ख इति किम् प्रत्यात्मम् । प्राध्वम् । प्रत्यात्मम् - इत्यव्ययीभावे अनश्च इति समासान्तष्टच्प्रत्ययः । प्राध्वम् - इति उपसर्गादध्वनः इति अच्प्रत्ययः ।।
न मपूर्वोऽपत्येऽवर्मणः ।। 6 - 4 - 170 ।।
मपूर्वोऽन् अवर्मणोऽणि परतोऽपत्येऽर्थे न प्रकृत्या भवति । सुषाम्णोऽपत्यं सौषामः । चान्द्रसामः । मपूर्व इति किम् सौत्वनः । अपत्य इति किम् चर्मणा परिवृतौ रथः चार्मणः । अवर्मण इति किम् चक्रवर्मणोऽपत्यं चाक्रवर्मणः । मपूर्वप्रतिषेधे वा हितनाम्न इति वक्तव्यम् । हितनाम्नोऽपत्यं हैतनामः, हैतनामनः ।।
ब्राह्मोऽजातौ ।। 6 - 4 - 171 ।।
योगविभागोऽत्र क्रियते । ब्राह्मः इत्येतदपत्याधिकारेऽपि सामर्थ्यादपत्यादन्यत्राणि टेर्लोपार्थं निपात्यते । ब्राह्मो गर्भः । ब्राह्ममस्त्रम् । ब्राह्मं हविः । ततः जातौ, अपत्य इत्येव - अपत्ये जातावणि ब्रह्मणष्टिलोपो न भवति । ब्रह्मणोऽपत्यं ब्राह्मणः । अपत्य इत्येव - ब्राह्मी ओषधिः ।।
कार्मस्ताच्छील्ये ।। 6 - 4 - 172 ।।
कार्मः इति ताच्छील्ये टिलोपो निपात्यते । कर्मशीलः कार्मः । शीलम् छत्त्रादिभ्यो णः इति णप्रत्ययः । यद्येवम् , किमर्थमिदम्, नस्तद्धिते इत्येव टिलोपः सिद्धः सत्यमेतत्, ज्ञापकार्थं तु एतज् ज्ञापयति - ताच्छीलिके णेऽणकृतानि भवन्तीति । तेन चौरी, तापसीति णान्तादपीकारः सिद्धो भवति । ताच्छील्य इति किम् कर्मण
इदं कार्मणम् ।।
औक्षमनपत्ये ।। 6 - 4 - 173 ।।
औक्षमित्यनपत्ये।णि टिलोपो निपात्यते । औक्षं पदम् । अनपत्य इति किम् उक्ष्णोऽपत्यमौक्ष्णः, षपूर्वहन्धृतराज्ञामणि इत्यलोपः ।।
दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ।। 6 - 4 - 174 ।।
दाण्डिनायन, हास्तिनायन, आथर्वणिक, जैह्माशिनेय, वासिनायनि, भ्रौणहत्य, धैवत्य, सारव, एक्ष्वाक, मैत्रेय, हिरण्मय - इत्येतानि निपात्यन्ते । दण्डिन्, हस्तिन् - इत्येतौ नडादिषु पठ्येते , तयोरायने परतः प्रकृतिभावो निपात्यते । केषाञ्चित्तु - हस्तिन्निति नडादिषु न पठ्यते, तेषामत एव निपातनात् फगपि भवति । दण्डिनोऽपत्यं दाण्डिनायनः । हस्तिनोऽपत्यं हास्तिनायनः । अथर्वन् - इति वसन्तादिषु पठ्यते । अथर्वणा प्रोक्तो ग्रन्थोऽपि उपचाराद् अथर्वन्नित्युच्यते, तमधीते यः स आथर्वणिकः । इके प्रकृतिभावो निपात्यते । जिह्माशिन् - इति शुभ्रादिषु पठ्यते, तस्य ण्ये परत- प्रकृतिभावो निपात्यते । जिह्माशिनोऽपत्यं जैह्माशिनेयः ।
वासिनोऽपत्यम्, उदीचां वृद्धादगौत्रात् इति फिञ्, तत्र प्रकृतिभावो निपात्यते - वासिनायनिः । भ्रूणहन्, धीवन् - इत्येतयोः ष्यञि परतस्तकारादेषो निपात्ते । भ्रूणघ्नो भावः भ्रौणहत्यम् । घीव्नो भावो धैवत्यम् । हनस्तोऽचिण्णलोः इति यत्तत्वं तद्धातुप्रत्यय एवेति - भ्रौणघ्नः, वार्त्रघ्न इत्यत्र न भवति, अतो भ्रौणहत्ये तत्वं निपात्यते । सारव - इति सरयू इत्येतस्य अणि परतोऽयूशब्दस्य व इत्यादेशो वनपात्यते । सरय्वां भवं सारवमुदकम् । ऐक्ष्वाक - इति स्वरसर्वनाम्ना एकश्रुत्या पठ्यते । ततोऽयमाद्युदात्तोऽन्तोदात्तश्च निपात्ये । इक्ष्वाकोरपत्यम् , जनपदश्बदात्क्षत्त्रियादञ् इत्यञ्, तत्र उकारलोपो निपात्यते । ऐक्ष्वाकः । इक्ष्वाकुषु जनपदेषु भवः कोपधादाण् इत्यण् । ऐक्ष्वाकः । मैत्रेय - इति, मित्रयुशब्दो गृष्ट्यादिषु पठ्यते, ततो ढञि कृते यादेरियादिशापवादो युशब्दलोपो निपात्यते । मित्रयोरपत्यं मैत्रेयः । अथ किमर्थं मित्रयुशब्दो विदादिष्वेव न पठ्यते, तत्राञि कृते यादेरिति इयादेशेनैव सिद्धम् एवं च युलोपार्थं निपातनं कर्त्तव्यं न भवति यस्कादिषु च बहुषु लुगर्थः पाठो न कर्त्तव्यो भवति, मित्रयव इत्यञ इत्येव हि लुकः सिद्धत्वात् नैतदस्ति, मित्रयूणां सङ्घ इत्यत्र गोत्रचरणाद् वञं बाधित्वा मैत्रयकः सङ्घ इत्यत्र सङ्घाङ्कलक्षणेष्वञ्यञिञामण् इत्यण् प्राप्नोति । हिरण्मयम् - इति हिरण्यस्य मयटि यादिलोपो निपात्यते, हिरण्यस्य विकारः हिरण्मयः ।।
ऋत्व्यवास्त्वयवास्त्वमाध्वीहिरण्ययानिच्छन्दसि ।। 6 - 4 - 175 ।।
ऋत्व्य, वास्त्व्य, वास्त्व, माध्वी, हिरण्यय - इत्येतानि निपात्यन्ते छन्दसि विषये । ऋतु, वास्तु - इत्येतयोर्यति यणादेशो निपात्यते । ऋतौ भवम् ऋत्व्यम् । वास्तौ भवं वास्त्व्यम् । वस्तुशब्दस्याणि यणादेशो निपात्यते । वस्तुनि भवो वास्त्वः । मघुशब्दस्याणि स्त्रियां यणादेशो निपात्यते - माध्वीर्नः सन्त्वोषधीः । हिरण्यश्बदाद्विहितस्य मयटौ मशब्दस्य लोपो निपात्यते । हिरण्ययम् ।। इत्युपाध्यायश्रीवामनकृतायां काशिकावृत्तौ षष्ठध्यायस्य चतुर्थः

पादः

7.1

अथ सप्तमाध्याये प्रथम पादः

युवोरनाकौ ।। 7 - 1 - 1 ।।

यु, वु - इत्येतयोरुत्सुरुत्सृष्टविशेषणयोरनुनासिकयणोः प्रत्यययोर्ग्रहणम्, तयोः स्थाने यथासङ्ख्यमन, अक - इत्येतावादेशौ भवतः । योरनः, वोरकः । नन्द्यदिभ्यो ल्युः - नन्दनः । रमणः । सायमादिभ्यष्ट्युट्युलौ तुट् - सायन्तनः । चिरन्तनः । ण्वुल्तृचौ - कारकः । हारकः । वासुदेवार्जुनाभ्यां वुन् - वासुदेवकः । अर्जुनकः । अनुनासिकयणोरिति किम् ऊर्णाया युस् ऊर्णायुः । भुजिमृङ्भ्यां युक्त्युकौ - भुज्युः, मृत्युरिति । एवमादीनां हि यणोऽनुनासिकत्वं न प्रतिज्ञायते, प्रतिज्ञानुनासिक्याः पाणिनीयाः । इह युवोः इति निर्द्देशाद् द्वन्द्वैकवद्भावपक्षे अनित्यमागमशासनम् इति नुम् न क्रियते । नपुंसकलिङ्गता वा लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य इति न भवति । इतरेतरपक्षे तु छान्दसत्वाद् वर्णलोपो द्रष्टव्यः ।। युवोश्चेद् द्वित्वनिर्देशो द्वित्वे यण्तु प्रसज्यते । अथ चेदेकवद्भावः कथं पुंवद्भवेदयम् ।। द्वित्वे नैगामिको लोप एकत्वे नुमनित्यता । अशिष्यत्वाद्धि लिङ्गस्य पुंस्त्वं वेह समाश्रितम् ।।

आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम ।। 7 - 1 - 2 ।।

आयन्, एय्, ईन्, ईय्, इय् - इत्येते आदेशा भवन्ति यथासंख्यं फ, ढ, ख, छ, घ - इत्येतेषां प्रत्यादीनाम् । फ इत्येतस्यायनादेशो भवति - नडादिभ्यः फक् नाडायनः , चारायणः । ढस्य एयादेशो भवति - स्त्रीभ्यो ढक्, सौपर्णेयः, वैनतेयः । खस्य ईनादेशो भवति - कुलात्खः, आढ्यकुलीनः, श्रोत्रियकुलीनः । छस्य ईयादेशो भवति - वृद्धाच्छः, गार्गीयः, वात्सीयः । घ इत्येतस्येयादेशो भवति - क्षत्त्राद्धः क्षत्त्रियः । प्रत्ययग्रहणं किम् फक्कति । ढौकते । खनति । छिनत्ति । घूर्णते । आदिग्रहणं किम् ऊरुदघ्नम् । जानुदघ्नम् । एते आयन्नादयः प्रत्ययोपदेशकाल एव भवन्ति । कृतेष्वेतेषु प्रत्ययाद्युदात्तत्वं भवति । तथा च घच्छौ च इति घचशिचत्करणमर्थवद्भवति । शङ्खः, षणढः - इत्येवमादीनां हि उणादयो बहुलम् इति बहुलवचनादादेशा न भवन्ति । ऋतेरीयङ् इति वा वचनं ज्ञापकम् - धातुप्रत्ययानामादेशाभावस्य । एजेः खश, पदरुजविशस्पृशो घञ् - इत्येवमादिषु तु इत्संज्ञया भवितव्यम् । तद्धितेषु हि खकारघकारयोरादेशवचनमवकाशवदितीत्संज्ञां बाधितुं नोत्सहते । आयन्नीनोर्नकारस्येत्संज्ञायां प्राप्तायां प्रतिविधातव्यम्, नित्कार्यं हि सम्भवति ।।

झोऽन्तः ।। 7 - 1 - 3 ।।

प्रत्ययग्रहणमनुवर्त्तते, आदिग्रहणं निवृत्तम् । प्रत्ययावयस्य झस्य अन्त इत्ययमादेशो भवति । कुर्वन्ति । सुन्वन्ति । चिन्वन्ति । अद्य श्वो विजनिष्यमाणाः पतिभिः सह शयान्तै । जृविशिभ्यां झच् - जरन्तः, वेशन्तः ।

प्रत्ययस्य इत्येव - उज्झिता । उज्झितुम् । उज्झितव्यम् । अस्मिन्नप्यन्तादेशे कृते प्रत्ययाद्युदात्तत्वं भवति । तथा च - झचश्चित्करणमर्थवद्भवति ।।

अदभ्यस्तात् ।। 7 - 1 - 4 ।।

अभ्यस्तादङ्गादुत्तरस्य झकारस्य अत् इत्ययमादेशो भवति । ददति, ददतु । दधति, दधतु। जक्षति, जक्षतु । जाग्रति, जाग्रतु । अन्तादेशापवादोऽयम् , जुसादेशेन तु बाध्यते - अदधुः, अजागरुः । अत्राप्यादेशे कृते प्रत्ययाद्युदात्तत्वं भवति ।।

आत्मनेपदेष्वनतः ।। 7 - 1 - 5 ।।

आत्मनेपदेषु यो झकारस्तस्यानकारान्तादङ्गादुत्तरस्य अत् इत्ययमादेशो भवति । चिन्वते । चिन्वताम् । अचिन्वत । पुनते । लुनते । लुनताम । अलुनत । आत्मनेपदेष्विति किम् चिन्वन्ति, लुनन्ति । अनत इति किम् च्यवन्ते । प्लवन्ते । नित्यत्वादत्र विकरणे कृते झोऽन्तादेशेन भवितव्यमित्यदादेशो न भवति । अनकारन्तेनाङ्गेन झकारविशेषणं किम् इह मा भूत् - अद्य श्वो विजनिष्यमाणाः पतिभिः सह शयान्तै ।।

शीङो रुट् ।। 7 - 1 - 6 ।।

शीङोऽङ्गादुत्तरस्य झादेशस्यातो रुडागमो भवति । शेरते । शेरताम् । अशेरत । रुडयं परादिः क्रियते, स यदि झकारस्यैव स्यात्, अदादेशोन स्यादिति , अत एवायमादेशस्यागमो विधीयते ।

सानुबन्धग्रहणमयङ्लुगर्थम् । तेनेह न भवति - व्यतिशेश्यते ।।

वेत्तेर्विभाषा।। 7 - 1 - 7 ।।

वेत्तेरङ्गादुत्तरस्य झादेशस्यातो विभाषा रुडागमो भवति । संविद्रते, संविदते । संविद्रताम्, संविदताम् । समविद्रत, समविदत । वेत्तिरिति लुग्विकरणस्य ग्रहणम्, किम् इह मा भूत् - विन्ते, विन्दाते, विन्दते इति ।।

बहुलं छन्दसि ।। 7 - 1 - 8 ।।

छन्दसि विषये बहुलं रुडगमो भवति । देवा अदुह्र । गन्धर्वा अप्सरसो अदुह्र । दुहेर्लङि झकारस्यादादेशे कृते रुट् । लोपस्त आत्मनेपदेषु इति तकारलोपः । न च भवति - अदुहत । बहुलवजनादन्यत्रापि भवति - अदृश्रन्नस्य केतवः । ऋदृशोऽङि गुणः इत्येतदपि बहुलवचनादेवात्र न भवति ।।

अतो भिस ऐस् ।। 7 - 1 - 9 ।।

अकारान्तादङ्गादुत्तरस्य भिस ऐसित्ययमादेशो भवति । वृक्षैः । प्लक्षैः । अतिजरसैः । जरामतिक्रान्तैरिति विगृह्य समाते कृते ह्रस्वत्वे च भिस ऐसादेशो

भवति । एकदेशविकृतमनन्यवद्भवति इति जरशब्दस्य जरसादेशः । सन्निपालक्षणो विधिरनिनिमित्तं तद्विघातस्य इति परिभाषेयमनित्या, कष्टाय क्रमणे इति निर्देशात् । अत इति किम् अग्निभिः । वायुभिः । तपरकरणं किम् खट्वाभिः । मालाभिः ।। एत्वं भिसि परत्वाच्चेदत ऐस् क्व भविष्यति । कृतेऽप्येत्वे भौतपूर्व्यादैस्तु नित्यस्तथा सति ।। अतः इत्यधिकारः - जसः शी इति याकत् ।।

बहुलं छन्दसि ।। 7 - 1 - 10 ।।

छन्दसि विषये बहुलमैसादेशो भवति । अत इत्युक्तम्, अनतोऽपि भवति - नद्यैरिति । अतो न भवति - देवेभिः सर्वेभिः प्रोक्तमिति ।।

नेदमदसोरकोः ।। 7 - 1- 11 ।।

इदम् , अदस् - इत्येतयोरककारयोर्भिस ऐस्न भवति । एभिः । अमीभिः । अकोरिति किम् इमकैः । अमुकैः । अकोरित्येतदेव प्रतिषेधवचनं ज्ञापकम् - तन्मध्यपतितस्तद्ग्रणेन गृह्यते इति । इदमदसोः कात् इति नोक्तम्, विपरीतोऽपि नियमः सम्भाव्येत - इदमदसोरेव कादिति । ततश्चेह न स्यात् - सर्वकैः , विश्वकैः । इह च स्यादेव - एभिः, अमीभिः । प्रतिषेधकरणं विपरीतनियमनिवृत्त्यर्थम् ।।

टाङसिङसामिनात्स्याः ।। 7 - 1 - 12 ।।

अकारान्तादङ्गादुत्तरेषां टाङसिङसाम् इन, आत्, स्य - इत्येते आदेशा भवन्ति यथासंख्यम् । टा इत्येतस्येनादेशो भवति - वृक्षेण, प्लक्षेण। ङसि इत्येतस्य आत् - वृक्षात्, प्लक्षात् । ङस् इत्येतस्य स्यादेशो भवति - वृक्षस्य, प्लक्षस्य । अत इति किम् सख्या । पत्या । अतिजरसिनः ,अतिजरसादिति केचिदिच्छन्ति । यथा तु भाष्ये तथा नैतदिष्यत इति लक्ष्यते ।।

ङेर्यः ।। 7 - 1 - 13 ।।

ङेः इति चतुर्थ्येकवचनस्य ग्रहणम् । अकारान्तादङ्गादुत्तरस्य ङे इत्येतस्य य इत्ययमादेशो भवति । वृक्षाय ।

प्लक्षाय । अत इति किम् सख्ये, पत्ये । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य इति परिभाषेयमनित्या, तेन दीर्घो भवति ।।

सर्वनाम्नः स्मै ।। 7 - 1 - 14 ।।

अकारान्तात्सर्वनाम्न उत्तरस्य ङेः स्मै इत्ययमादेशो भवति । सर्वस्मै । विश्वस्मै । यस्मै । कस्मै । तस्मै । अतः इत्येव - भवते । अथो अत्रास्मै - इत्यन्वादेशोऽशादेशे एकादेशः प्राप्नोति तत्रान्तरङ्गत्वादेकाशात्पूर्व स्मैभावः क्रियते, पश्चादेकादेश इति ।।

ङसिङ्योः स्मात्स्मिनौ ।। 7 - 1 - 15 ।।

ङसि, ङि इत्येतयोरकारान्तात् सर्वनाम्न उत्तरयोः स्मात्, स्मिन् - इत्येतावादेशौ भवतः । ङसीत्येतस्य स्मात् - सर्वस्मात्, विश्वस्मात्, यस्मात्, तस्मात्, कस्मात् । ङीत्येतस्य स्मिन् - सर्वस्मिन् , विश्वस्मिन्, यस्मिन्, तस्मिन् , अन्यस्मिन् । अत इत्येव - भवतः । भवति । सर्वनाम्न इत्येव - वृक्षात् । वृक्षे ।।

पूर्वादिभ्यो नवभ्यो वा ।। 7 - 1 - 16 ।।

पूर्वादिभ्यो नवभ्यः सर्वनाम्न उत्तरयोर्ङसिङ्योः स्मात्, स्मिन् - इत्येतावादेशौ वा भवतः । पूर्वस्मात्, पूर्वात् । पूर्वस्मिन् , पूर्वे । परस्मात्, परात् । परस्मिन् , परे । अवरस्मात्, अवरात् । अवरस्मिन्, अवरे । दक्षिणस्मत्, दक्षिणात् । दक्षिणस्मिन्, दक्षिणे । उत्तरस्मात्, उत्तरात् । उत्तरस्मिन् , उत्तरे । अपरस्मात् , अपरात् । अपरस्मिन्, अपरे । अधरस्मात्, अधरात्। अधरस्मिन् , अधरे । स्वस्मात्, स्वात्। स्वस्मिन्, स्वे । अन्तरस्मात्, अन्तरात् । अन्तरस्मिन , अन्तरे । नवभ्य इति किम् त्यस्मात् । त्यस्मिन् ।।

जसः शी ।। 7 - 1 - 17 ।।

अकारान्तात्सर्वनाम्न उत्तरस्य जसः शी इत्यमादेशो भवति । सर्वे। विश्वे । ये । के । ते । दीर्घोच्चारणमुत्तरार्थम् - त्रपुणी । जतुनी ।।

औङ आपः ।। 7 - 1 - 18 ।।

आबन्तादङ्गदुत्तरस्यौङः शी इत्यमादेशो भवति । खट्वे तिष्ठतः । खट्वे पश्य । बहुराजे । कारीषगन्ध्ये । ङकारः सामान्यग्रहणार्थः - औटोऽपि ग्रहणं यथा स्यात् । औकारोऽयं शीविधौ ङिद्गृहीतो ङिच्चास्माकं नास्ति कोऽयं प्रकारः । सामान्यार्थः, तस्य चासञ्जनेऽस्मिन्ङित्कार्थं ते श्यां प्रसक्तं स दोषः ।। ङित्त्वे विद्याद्वर्णनिर्देशमात्रं वर्णे यत्स्यात्तच्च विद्यात्तदादौ ।वर्णश्चायं तेन ङित्त्वेऽप्यदेषो निर्देशोऽयं पूर्वसूत्रेण वा स्यात् ।।

नपुंसकाच्चः ।। 7 - 1 - 19 ।।

नपुंसकादङ्गादुत्तरस्य औङः शी इत्यमादेशो भवति । कुण्डे तिष्ठति । कुण्डे पश्य । यस्येतिलोपः प्राप्तः । श्यां प्रतिषेधो वक्तव्यः । इति न भवति - दधनि, मधुनी, त्रपुणी, जतुनी ।।

जश्शसोः शिः ।। 7 - 1 - 20 ।।

नपुंसकादङ्गादुत्तरयोर्जश्शसोः शि इत्यादेशो भवति । कुण्डानि तिष्ठन्ति । कुण्डानि पश्य । दधीनि । मधूनि । त्रपूणि । जतूनि । जसा सहचरितस्य शसो ग्रहणादिह न भवति-कुण्डशो ददाति । वनशः प्रविशन्तीति ।।

अष्टाभ्य औश् ।। 7 - 1 - 21 ।।

अष्टाभ्यः इति कृताकारोऽष्टन् - शब्दो गृह्यते । तस्मादुत्तरयोर्जश्शसोः औश् इयमादेशो भवति । अष्टौ तिष्ठन्ति । अष्टौ पश्य । कृताकारस्य ग्रहणं किम् अष्ट तिष्ठन्ति । अष्ट पश्य । एतदेव कृतात्वस्य ग्रहणं ज्ञापकम् - अष्टन आ विभक्तौ इति आत्त्वविकल्पस्य । षड्भ्यो लुक् इत्यस्यायमपवादः, नाप्राप्ते

तस्मिन्निदमारभ्यते । यस्तु सुपो धातुप्रातिपदिकयोः इति , तस्मिन्प्राप्ते चाप्राप्ते चेति स न बाध्यते - अष्टपुत्रः, अष्टभार्य इति । तदन्तग्रहणमत्रेष्यते- परमाष्टौ, उत्तरमाष्टौ । प्रियाष्टानः इत्यत्रात्वस्याभावादौश्त्वं न भवति ।।

षड्भ्यो लुक् ।। 7 - 1 - 22 ।।

षट्संज्ञकेभ्य उत्तरयोर्जश्शसोर्लुग्भवति । षट् तिष्ठन्ति । षट् पश्य । पञ्च । सप्त । नव । दश । षट्प्रधानात्तदन्तादपि भवति - परमषट् । उत्तमषट् । यत्र तूपसर्जनं षट्, ततो न भवति - प्रियषषः, प्रियपञ्चान इति ।।

स्वमोर्नपुंसकात् ।। 7 - 1 - 23 ।।

सु, अम् - इत्येतयोर्नपुंसकादुत्तरयोर्लुग्भवति । दधि तिष्ठति । दधि पश्य । मधु तिष्ठति । मधु पश्य । त्रपु । जतु । तद्ब्राह्मणकुलमित्यत्र लुका त्यदाद्यत्वं बाध्यते पूर्वविप्रतिषेधेन, नित्यत्वाद्वा । लुको रि निमित्तम् अतोऽम् इति लक्षणान्तरेण विहन्यते , न पुनस्त्यदाद्यत्वेनैव । यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यं भवति।।

अतोऽम् ।। 7 - 1 - 14 ।।

अकारान्तान्नपुंसकाद् उत्तरयोः स्वमोः अम् इत्ययमादेशो भवति । कुण्डं तिष्ठति । कुण्डं पश्य । वनम् । पीठम् । मकारः कस्मान्न क्रियते दीर्घत्वं प्राप्नोति ।।

अद्ड् डतरादिभ्यः पञ्चभ्यः ।। 7 - 1 - 25 ।।

डतरादिभ्यः परयोः स्वमोरद्ड् इत्ययमादेशो भवति । कतरत्तिष्ठति । कतरत्पश्य । कतमत्तिष्ठति । कतमत्पश्य । इतरत् । अन्यतरत् । अन्यत् । पञ्चभ्य इति किम् नेमं पश्य । डित्करणं किम् कतरत् तिष्ठतीत्यत्र पूर्वसवर्णदीर्घो मा भूत् । इह तु कतरत्पश्येति स्थानिवद्भावादमि पूर्वत्वेनापि सिद्ध्यति । एवं तर्हि तकारादेश एव कस्मान्न विधीयते हे कतरदिति सम्बुद्धेर्लोपो मा भूत् । अपृक्तश्चेदमो दोषो निवृत्ते डतरादिषु । अद्डित्त्वाड्डतरादीनां न लोपो नापि दीर्घता ।।

नेतराच्छन्दसि ।। 7 - 1 - 26 ।।

इतरशब्दादुत्तरयोः स्वमोश्छन्दसि विषये अद्डादेशो न भवति । इतरमितरमण्डमजायत । वार्त्रघ्नमितरम् । छन्दसीति किम् इतरत्काष्ठम् । इतरत्कुण्ड्यम् । अतोऽम् - इत्यस्मादनन्तरमितराच्छन्दसीति वक्तव्यम् । नेतराच्छन्दसि इति वचनं योगविभागार्थम् । एकतराद्धि सर्वत्र छन्दसि भाषायां प्रतिषेध इष्यते । एक तरं तिष्ठति । एकतरं पश्येति ।।

युष्मदस्मद्भ्यां ङसोऽश् ।। 7 - 1 - 27 ।।

युष्मदस्मद् - इत्येताभ्यामुत्तरस्य ङसः अश् -- इत्ययमादेशो भवति । तव स्वम् । मम स्वम् । शित्करणं सर्वादेशार्थम् अन्यथा ह्यादेशव्यपदेशप्रक्लुप्त्यर्थमादेरेव स्यात्, ततश्च योऽचि इत्येतन्न स्यात् ।।

ङे प्रथमयोरम् ।। 7 - 1 - 28 ।।

ङे इत्यविभक्तिको निर्देशः । ङे इत्येतस्य प्रथमयोश्च विभक्त्योः प्रथमाद्वितीययोर्युष्मदसमद्भ्यामुत्तरयोः अम् इत्ययमादेशो भवति । तुभ्वं दीयते । मह्यं दीयते । प्रथमयोः - त्वम् , अहम् । युवाम्, आवाम् । यूयम् , वयम् । त्वाम्, माम् । युवाम् , आवाम् ।।

शसो न ।। 7 - 1 - 29 ।।

युष्मदस्मद्भ्यामुत्तरस्य शसो नकारादेशो भवति । युष्मान् ब्राह्मणान् । अस्मान् ब्राह्मणान् । युष्मान् ब्राह्मणीः । अस्मान् ब्राह्मणीः । युष्मान् कुलानि । अस्मान्कुलानि । तस्माच्छसो नः पुंसि इति सिद्धे स्त्रीनपुंसकार्थं वचनम् । अलिङ्गे वा युष्मदस्मदी ।।

भ्यसो भ्यम् ।। 7 - 1 - 30 ।।

युष्मदस्मद्भ्यामुत्तरस्य भ्यसः भ्यम् इत्ययमादेशो भवति । युष्मभ्यं दीयते । अस्मभ्यं दीयते । भ्यमादेशे कृते शेषेलोपे च बहुवचने झल्येत् इत्येत्वं प्राप्नोति, तद् अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य इति न भवति । केचित् पुनरभ्यमादेशमेत्वनिवृत्त्यर्थं कुर्वन्ति । येषां तु शेषेलोपष्टिलोपः , तेषामभ्यमादेश एव । उदात्तनिवृत्तस्वरश्चादेरेव भवति ।।

पञ्चम्या अत् ।। 7 - 1 - 31 ।।

पञ्चम्या भ्यसो युष्मदस्मद्भ्यामुत्तरस्य अत् इत्ययमादेशो भवति । युष्मद् गच्छन्ति । अस्मद् गच्छन्ति ।।

एकवचनस्य च ।। 7 - 1 - 32 ।।

पञ्चम्या एकवचनस्य युष्मदस्मद्भ्यामुतरस्य अत् इत्ययमादेशो भवति । त्वद् गच्छन्ति । मद् गच्छन्ति ।।

साम आकम् ।। 7 - 1 - 33 ।।

साम इति षष्ठीबहुवचनमागतसुट्कं गृह्यते । तस्य युष्मदस्मद्भ्यामुत्तरस्य आकम् इत्ययमादेशो भवति । युष्माकम् । अस्माकम् । अथ किमर्थमागतसुट्को गृह्यते, न ह्यदेशविधानकाले सुड् विद्यते तस्यैव तु भाविनः सुटो निवृत्त्यर्थम् । आदेशे कृते हि शेषेलोपे युष्मदस्मदोरकारान्तत्वात्सुट् प्राप्नोति, स स्थान्यन्तर्भुतत्वान्निवर्तते । दीर्घोच्चारणं सवर्णदीर्घार्थम् । अकमि तु सति ह्रस्वकरणे तद्विधानसामर्थ्यादेव सवर्णदीर्घत्वं न प्राप्नोति । तत्सामर्थ्यमेत्वं प्रति भविष्यतीति अकारकरणमेत्वनिवृत्त्यर्थमिति अतो गणे पररुपत्वं स्यात् ।।

आत औ णलः ।। 7 - 1 - 34 ।।

आकारान्तदङ्गादुत्तरस्य णल औकारादेशो भवति । पपौ । तस्थौ । जग्लौ । मम्लौ । अत्रौत्वमेकादेशः, स्थानिवद्भावः, द्विर्वचनम् - इत्यनेन क्रमेण कार्याणि क्रियन्ते । एकादेशादनवकाशत्वादौत्वं द्विर्वचनादपि परत्वा देकादेश इति ।

तुह्योस्तातङाशिष्यन्यतरस्याम् ।। 7 - 1 - 35 ।।

तु, हि - इत्येतयोराशिषि विषये तातङादेशो भवत्यन्यतरस्याम । जीवताद्भवान् । जीवतात्त्वम् । जीवतु भवान् । जीव त्वम् । ङित्करणं गुणवृद्धिप्रतिषेधार्थमिति सर्वादेशस्तातङ् भवति । ङित्त्वाच्चास्य स्थानिवद्भावाद्यत्पित्त्वं प्राप्नोति , तन्निवर्त्तते, ङिच्च पिन्न भवति । तेन ब्रुव ईट् इत् ब्रूताद्भवान् - इतीण्न भवति । आशिषीति किम् ग्रामं गच्छतु भवान् । गच्छ त्वम् । तातङि ङित्वं संक्रमकृत्स्यादन्त्यविधिश्चेतच्च तथा न । हेरधिकारे हेरधिकारो लोपविधौ तु ज्ञापकमाह।। तातङो ङित्त्वसामर्थ्यान्नायमन्त्यविधिः स्मृतः । न तद्वदनङादीनां तेन तेऽन्त्यविकारजाः ।।

विदे शतुर्वसुः ।। 7 - 1 - 36 ।।

विद ज्ञाने - इत्येतस्माद्धातोरुत्तरस्य शतुर्वसुरादेशो भवति । विद्वान्, विद्वांसौ, विद्वांसः । स्थानिवद्भावादुगित्कार्ये सिद्धे वसोरुकारकरणम् वसोः सम्प्रसारणम् इत्यत्र क्वसोरपि सामान्यग्रहणार्थम् । एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य इत्येतदपि न भवति तथा सत्युकारकरणमनर्थकं स्यात् । अन्यतरस्यांग्रहणं केचिदनुवर्त्तयन्ति । विदन्, विदन्तौ , विदन्तः ।।

समासेऽनञ्पूर्वे क्त्वो ल्यप् ।। 7 - 1 - 37 ।।

समासेऽनञ्पूर्वे क्त्वा इत्येतस्य ल्यप् इत्यमादेशो भवति । प्रकृत्य । प्रहृत्य । पार्श्वतः कृत्य । नानाकृत्य । द्विधाकृत्य । समास इति किम् कृत्वा । हृत्वा । अनञपूर्व इति किम् अकृत्वा । अहृत्वा । परमकृत्वा । उत्तमकृत्वा । अनञ् इति हि नञाऽन्यदनञ् नञ्सदृशमव्ययं परिगृह्यते । तेन नञ् अनव्ययं चारञ् न भवति । स्नात्वाकालकादिषु मयूरव्यंसकादिषु निपातनाल्ल्यबादेशो न भवति । अथ वा - समासे इति निर्धारणे सप्तमी । तेन क्त्वान्तः समास एव परिगृह्यते । स च येन विधिस्तदन्तस्य इत्यनेन तदन्तविधिना, नतु कृद्ग्रहणे गतिकारकपूर्वस्यापि इति । तथा च अनञ्पूर्वे इत्युच्यते । गतिकारकपूर्वस्यैव तु ग्रहणे सति नञ्पूर्वस्य प्रसङ्ग एव नास्ति, नञ्न गतिः , न च कारकमिति । प्रधाय, प्रस्थायेत्यादिषु हिप्रभृतीन् अन्तरङ्गानपि विधीन्बहि रङो ल्यब्बाधत तएव - इति ज्ञापितमेतत् ।।

क्त्वापि छन्दसि ।। 7 - 1 - 38 ।।

समासेऽनञ्पूर्वे क्त्वा इत्येतस्य क्त्वा इत्ययमादेशो भवति, अपिशब्दाल्ल्यबपि भवति छन्दसि विषये । कृष्णं वासो यजमानं परिधापयित्वा । प्रत्यञ्चमर्कं प्रत्यर्पयित्वा । ल्यबपि भवति - उद्धृत्य जुहोति । वा छन्दसि इति नोक्तम्, सर्वोपाधिव्यभिचारार्थम् । तेनासमासे ल्यबभवति - अर्च्य तान् देवान् गतः । छन्दोऽधिकारः आज्जसेरसुक् इति यावत् ।।

सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ।। 7 - 1 - 39 ।।

छन्दसि विषये सुपां क्षाने सु, लुक् , पुर्वसवर्ण, आ, आत्, शे, या, डा, ड्या, याच्, आल् - इत्येते आदेशा भवन्ति । सु - अनृक्षरा ऋजवः सन्तु पन्थाः । पन्थान इति प्राप्ते । सुपां सुपो भवन्तीति वक्तव्यम् । धुरि दक्षिणायाः । दक्षिणायामिति प्राप्ते । तिङा तिङो भवन्तीति वक्तव्यम् । चषालं ये अश्वयूपायतक्षति । तक्षन्तीति प्राप्ते । लुक् - आर्द्रे चर्मन्, लोहिते जर्मन् । चर्मणीति प्राप्ते । हविर्द्धाने यत्सुन्वन्ति तत्सामिधेनीरन्वाह । यस्मिन्सुन्वन्ति तस्मिन्सामिधेनीरिति प्राप्ते । पूर्वसवर्णः - धीति । मती । सुष्टुती । धीत्या, मत्या, सुष्टुत्या इति प्राप्ते। आ - उभा यन्तारौ । उभौ यन्तारौ इति प्राप्ते । आत् - न ताद् ब्राह्मणाद् निन्दामि । तान् ब्राह्मणानिति प्राप्ते । शे - न युष्मे बाजवन्धवः । अस्मे इन्द्राबृहस्पती । यूयं वयमिति प्राप्ते । यूयादेशः , वयादेशाश्च छान्दसत्वान्न भवति । या - उरुया । धृष्णुया । उरुणा, धृष्णुनेति प्राप्ते । डा - नाभा पृथिव्याम् । नाभौ वृथिव्यामिति प्राप्ते । ड्या - अनुष्ट्या च्यावयतात् । अनुष्टुभेति प्राप्ते । याच् - साधुया । साध्विति सोर्लुकि प्राप्ते । आल् - वसन्ता यजेत । वसन्त इति प्राप्ते । इयाडियाजोकारणामुपसंख्यानम् । इया - अर्विया परिधानम् । दार्विया । उरुणा, दारुणेति प्राप्ते । डियाच् - सुक्षेत्रिया । सुगात्रिया । सुक्षेत्रिणा, सुगात्रिणेति प्राप्ते । ईकारः - दृतिं न शुष्कं सरसी शयानम् । सरसि शयानमिति प्राप्ते । आङयाजयारामुपसंख्यानम् । आङ् - प्रबाहवा । प्रबाहुनेति प्राप्ते । अयाच् - स्वप्नया
सच सेवनम् । स्वनेति प्राप्ते । अयार्सिन्धुमिव नवया । नावेति प्राप्ते ।।

अमो मश् ।। 7 - 1 - 40 ।।

अम् इति मिबादेशो गृह्यते । तस्य छन्दसि विषये मशादेशो भवति । वधीं वुत्रम् । क्रमीं वृक्षस्य शाखाम् । लुङि बहुलं छन्दस्यमाङ्योगेऽपि इत्यडागमाभावः । शित्करणं सर्वादेशार्थम् । मकारस्यापि हि मकारवचनमनुस्ववारनिवृत्त्यर्थ स्यात् ।।

लोपस्य आत्मनेपदेषु ।। 7 - 1 - 41 ।।

आत्मनेपदेषु यस्तकारस्तस्य छन्दसि विषये लोपो भवति । देव अदुह्र । गन्धर्वाप्सरसो अदुह्र । अदुहतेति प्रापते । दुह्रामश्विभ्यां पयो अघ्न्येयम् । दुग्धामिति प्राप्ते । दक्षिणतः शये । शेत इति प्राप्ते । अपीत्यधिकारन्न भवति - तत्र आत्मानमनृतं कुरुते । आत्मनेपदेष्विति किम् वत्सं दुहन्ति कलशं चतुर्बिलम् ।।

ध्वमो ध्वत् ।। 7 - 1 - 42 ।।

छन्दसि विषये ध्वमो ध्वादित्ययमादेशो भवति । अन्तरेवोष्माणं वारयध्वात् । वारयध्वमिति प्राप्ते ।।

यजध्वैनमिति च ।। 7 - 1 - 43 ।।
यजध्वम् इत्येतस्य एनमित्येतस्मिन्परतो मकारलोपो निपात्यते वकारस्य च यकारश्छन्दसि विषये । यजध्वैनं प्रियमेधाः । यजध्वमेनमिति प्राप्ते ।।
तस्य तात् ।। 7 - 1 - 44 ।।
तशब्दस्य लोण्मध्यमपुरुषबहुवजनस्य स्थाने तात् इत्ययमादेशो भवति । गात्रंगात्रमास्या नूनं कृणुतात् । कृणुतेति प्राप्ते । ऊदध्ये गोहं पार्थिवं खनतात् । खनतेति प्राप्ते । अस्मारक्षः संसृजतात् । संसृजतेति प्राप्ते । सूर्य चक्षुर्गमयतात् । गमयतेति प्राप्ते ।।
तप्तनप्तनथनाश्च ।। 7 - 1 - 45 ।।
तस्य इति वर्त्तते । छन्दसि विषये तस्य स्थाने तप्, तनप्, तन, थन - इत्येते आदेशा भवन्ति । तप् - श्रृणोत ग्रावाणः । श्रृणुतेति प्राप्ते । सुनोत । सुनुतेति प्राप्ते । तनप् - संवरत्रा दधातन । दत्तेति प्राप्ते । तन - जुजुष्टन । जुषतेति प्राप्ते । छान्दसत्वात् श्लुः । थन - यदिष्ठन । यदिच्छतेति प्राप्ते । पित्करणमङित्त्वार्थम् ।।
इदन्तो मसि ।। 7 - 1 - 46 ।।
छन्दसि विषये मसित्ययं शब्द इकारान्तो भवति । मसः सकारान्तस्य इकारगमो भवति, सच तस्यान्तो भवति । तद्ग्रहणेन गृह्यत इत्यर्थः । पुनस्त्वां दीपयामसि । दीपयाम इति प्राप्ते । शलभं भञ्चयामसि । भञ्जयाम इति प्राप्ते । त्वयि रात्रि वासयामसि । वासयाम इति पाप्ते ।
क्त्वो यक् ।। 7 - 1 - 47 ।।
क्त्वा इत्येतास्य यगागमो भवति छन्दसि विषये । दत्त्वाय सविता धियः । दत्त्वेति प्राप्ते । क्त्वापि छन्दसि इत्यस्यानन्तरमिदं कस्मान्नोच्यते समासे इति तत्रानुवर्त्तते ।।
इष्ट्वीनमिति च ।। 7 - 1 - 48 ।।
इष्ट्वीनम् - इत्ययं शब्दो निपात्यते छन्दसि विषये । यजेः क्त्वाप्रत्ययान्तस्य ईनमादेशोऽन्त्यस्य निपात्यते । इष्ट्वीनं देवान् । इष्ट्वा देवानिति प्राप्ते । पीत्वीनमित्यपीष्यते । चकारस्यानुक्तसमुच्चयार्थत्वात्सिद्धम् ।।
स्नात्व्यादयश्च ।। 7 - 1 - 49 ।।
स्नात्वी इत्येवमादयः शब्दा निपात्यन्ते छन्दसि विषये । स्नात्वी मलादिव । स्नात्वेति प्राप्ते । पोत्वी सोमस्य वावृधे । पीत्वेति प्राप्ते । प्रकारार्थोऽयमादिशब्दः ।।
आज्जसेरसुक् ।। 7 - 1 - 50 ।।
अवर्णान्तादङ्गादुत्तरस्य जसेरसुगागमो भवति छन्दसि विषये । ब्राह्मणासः पितरः सोम्यासः । ब्राह्मणाः सोम्या इति प्राप्ते । ये पूर्वासो य उपरासः - इत्यत्र परत्वादसुकि पुनः प्रसङ्गविज्ञानाच्छोभावः प्राप्तः, सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बधितमेव इति न भवति ।।
अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ।। 7 - 1 - 51 ।।
छन्दसि इत्यः प्रभृति निवृत्तम् । अश्व, क्षीर, वृष, लवण- इत्येतेषामङ्गानामात्मप्रतिविषये क्यचि परतोऽसुगागमो भवति । अश्वस्यति वडवा । क्षीरस्यति माणवकः । वृषस्यति गौः । लवणस्यत्युष्ट्रः । आत्मप्रीताविति किम् अश्वीयति । क्षीरीयति । वृषीयति । लवणीयति । अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यम् ।
क्षीरलवणयोर्लासायामिति वक्तव्यम् । तृष्णातिरेकः - लालसा । अन्यत्रात्मप्रीतावपि न भवति । अपर आह - सर्वप्रतिपदिकेभ्यो लालसायामसुग्वक्तव्यः । दधयस्यति, मध्वस्यति, इत्येवमाद्यर्थम् । अपर आह - सुग्वक्तव्यः । दधिस्यति, मधुस्यति - इत्येवमाद्यर्थम् ।।
आमि सर्वनाम्नः सुट् ।। 7 - 1 - 52 ।।
आत् इति वर्त्तते । अवर्णात्सर्वनाम्न उत्तरस्यामः सुडागमो भवति । सर्वषाम् । विश्वेषाम् । येषाम् । तेषाम् । सर्वासाम । यासाम् । तासाम । आदित्येव - भवताम । आमि इति षष्ठीबहुवचनं गृह्यते, न ङेराम्नद्याम्नीभ्यः इति, तस्य हि परत्वादाड्याट्स्याटो भवन्ति । यश्च किमेतिङव्ययघादामुः आम् च लिटिः न तौ सर्वनाम्नः स्तः । सानुबन्धकाविति वा, तौ न गृह्येते । आमि इति सप्तमीनिर्द्देश उत्तरार्थः । इह तु सर्वनाम्नः इति पञ्चमीनिर्द्देशात् तस्मादित्युत्तरस्य इति षष्ठीप्रक्लृप्तिर्भविष्यति ।।
त्रेस्त्रयः ।। 7 - 1 - 53 ।।
त्रि इत्येतस्य आमि पे त्रय इत्ययमादेशो भवति । त्रयाणाम् । त्रीणामित्यपि छन्दसीष्यते - त्रीणामपि समुद्राणामिति ।।
ह्रस्वनद्यापो नुट् ।। 7 - 1 - 54 ।।
ह्रस्वान्तान्नद्यन्तादाबन्ताच्चोत्तरस्यामो नुडागमो भवति । ह्रस्वान्तात्तावत् -- वृक्षाणाम् । प्लक्षाणाम् । अग्नीनाम । वायूनाम । कर्तृणाम् । नद्यन्तात् - कृमारीणाम् । किशोरीणाम् । गौरीणाम् । शाङ्र्गरवीणाम् । लक्ष्मीणाम् । ब्रह्मबन्धूनाम । वीरबन्धूनाम् । मालानाम् । बहुंराजानाम् । कारीषगन्ध्यानाम् ।।
षट्चतुर्भ्यश्च ।। 7 - 1 - 55 ।।
षट्संज्ञकेभ्यश्चतुः शब्दच्चोत्तरस्यामो नुगाडमो भवति । षण्णाम् । पञ्चानाम् । सप्तानाम । नवानाम । दशानाम । चतुर्णाम् । रेफान्तायाः संख्यायाः षट्संज्ञा न विहिता, षड्भ्यो लुक् इति लुग्मा भूत् । बहुवचननिर्दशादत्र संख्याप्रधानस्य ग्रहणं भवति - परमषण्णाम् । परमपञ्चानाम । परमसप्तानाम । पमचतुर्णम् । उपसर्जनीभूतायास्तु संख्याया न भवति - प्रियषषाम् , प्रियपञ्चच्आम् , प्रियचतुरामिति ।।

श्रीग्रगमण्योश्छन्दसि ।। 7 - 1 - 56 ।।

श्री, ग्रामणी - इत्येतयोश्छन्दसि विषये आमो नुडागमो भवति । श्रीणामुदारो धरुणो रयीणाम् । अप्यत्र सूतग्रामणीनाम् । श्रीशब्दस्य वासमि इति विकल्पेन नदीसंज्ञा, तत्र नित्यार्थं वचनम् । सूतग्रामणीनामिति - यदा सूताश्च ग्रामथण्यश्च सूतग्रामण्यो भवन्ति, तदर्थमिदं वचनम् । यदा तु सूतश्च ग्रामणीश्च सूतग्रामणि, सूतग्रामणि च सूतग्रामणि च सूतग्रामणि चेति सूतग्रामणीनामिति, तदा ह्रस्वांदित्येव सिद्धम् ।।

गोः पादान्ते ।। 7 - 1 - 57 ।।

गो इत्येतस्मादृक्पादान्ते वर्त्तमानादुत्तरस्यामो न्ुडागमो भवति । विद्मा हि त्वा सत्पतिं शूरगोनाम । पादान्त इति किम् गवां गोत्रमुदसृजो यदङ्गिरः । सर्वे विधयश्छन्दसि विकल्प्यन्ते इति पादान्तेऽपि क्वचिन्न भवति । हन्तारं शात्रूणां कृधि विराजं गोपतिं गवाम् ।।

इदितो नुम् घातोः ।। 7 - 1 - 58 ।।

इदितो धातोर्नुमागमो भवति । कुडि - कुण्डिता, कुण्डितुम् , कुण्डितव्यम्, कुण्डा । हुडि - हुण्डिता, हुण्डितुम् , हुण्डितव्यम्, हुण्डा । इदित इति किम् पचति । पठति । अयं धातूपदेशावस्थायामेव नुमागमो भवति - कुण्डा, हुण्डेति गुरोश्च हलः इत्यकारप्रत्ययो यथा स्यात् । तथा हि - धिन्विकृण्व्योर च इति प्रत्ययविधावेव नुमनुषक्तयोर्ग्रहणम् । धातुग्रहणं चेह क्रियते - धातूपदेशकाल एव नुमागमो यथा स्यादित्येवमर्थम् । तासिसिचोरिदित्कार्य नास्ति - इत्युच्चारणार्थो निरनुनासिक इकारः पठ्यते ।

अमंस्तेत्येवमादौ हि हनः सिच् इति कित्त्वविधानसामर्थ्यान्नकारलोपो न भवति । मन्ता - इत्यत्रापि असिद्धवदत्राभात् इति टिलोपस्यासिद्धत्वान्नलोपो न भवति । इह कस्मान्न भवति - भत्ता, छेत्तेति इरितां समुदायस्येत्संज्ञा इतीदित्त्वं नास्ति । अवयवशेऽपीत्संज्ञायां सत्याम् गोः पादान्ते इत्ोऽन्तग्रहणमनुवर्त्तयितव्यम् । तेनान्तेदितो धातवो गृह्यन्ते ।।

शे मुचादीनाम् ।। 7 - 1 - 59 ।।

शे प्रत्यये परतो मुचादीनां नुमागमो भवति । मुच्लृ - मृञ्चति । लृप्लृ - लुम्पति । विद्लृ -- विन्दति । लिपि - लिम्पति । सिच् - सिञ्चति । कृती - कृन्तति । खिद - खिन्दसि । पिश - पिंशति । शे इति किम् मोक्ता, मोक्तुम् , मोक्तव्यम् । मुचादीनामिति किम् तुदति, नुदति । शेतृम्फादीनामुपसंख्यानं कर्त्तव्यम् । के पुनस्तृम्फादयझ तृ तृम्फ तृप्तौ । दृफ दृम्फ उत्क्लेशे, गुफ गुम्फ ग्रन्थे उभ उम्भ पूरणे , शुभ शुम्भ शोभार्थे - इत्यत्र ये सानुषङ्गास्तृम्फादयः , तेषाम् अनिदितां हल उपधायाः क्ङिति इत्यनुनासिकलोपे कृते नुम्विधीयते, स च विधानसामर्थ्यान्न लुप्यते - तृम्फति, दृम्फति, गुम्फति, उम्भति, शुम्भति । ये तु निरनुषङ्गाः, तेषां तृफति, दृफति, गुफति, उभति , शुभतीत्येवं भवति ।।

मस्जिनशौर्झलि ।। 7 - 1 - 60 ।।

मस्जि, नशि - इत्येतयोरङ्गयोर्झलादौ प्रत्यये नुमागमो भवति । मङ्क्ता , मङ्क्तुम, मङ्क्तव्यम् । नंष्टा, नंष्टुम्, नंष्टव्यम् । झलीति किम् मज्जनम् । नशनम् । मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गादिलोपार्थम् । मग्नः । मग्नवान ।

रधिजभोरचि ।। 7 - 1 - 61 ।।

रधि, जभि - इत्येतयोरजादौ प्रत्यये नुमागमो भवति । रन्धयति । रन्धकः । साधुरन्धी । रन्धंरन्धम् । रन्धो वर्त्तते । जम्भयति । जम्भकः । साधुजम्भी । जम्भंजम्भम् । जम्भो वर्त्तते । परापि सती वृद्धिर्नुमा बाध्यते नित्यत्वात् । अचीति किम् रद्धा । जभ्यम् ।।

नेठ्यलिटि रधेः ।। 7 - 1 - 62 ।।

इडादावलिटि प्रत्यये परे रधेर्नुमागमो न भवति । रधिता । रधितुम् । रधितव्यम् । इटीति किम् रन्धनम्, रन्धकः । अलिटिति किम् ररन्धिव, ररन्धिम् । नुमि कृत् संयोगान्तत्वाद् असंयोगाल्लिट् कित् इति कित्त्वं नास्तीति नलोपो न भवति । अथ क्वसौ कथं भवतितव्यम् रेधिवानिति । कथम् एत्वाभ्यासलोपयोः कृतयोरि़डागमः क्रियते, ततो नुमागमः, तस्यौपदेशिककित्त्वाश्रयो लोपः । अथ इटि लिटीत्येवं नियमः कस्मान्न क्रियते - लिट्येवेटि नान्यत्रेति विपरीतमप्यवधारणं सम्भाव्येत - इट्येव लिटि नान्यत्रेति । तथा हि सति ररन्धेत्यत्र न स्यात्, रधितेत्यत्र च स्यादेव ।।

रभेरशब्लिटोः ।। 7 - 1 - 63।।

रभेरङ्गस्य शब्लिड्वर्जितेऽजादौ प्रत्यये परतो नुमागमो भवति । आरम्भयति । आरम्भकः । साध्वारम्भी । आरम्भमारम्भम् । आरम्भो वर्त्तते । अशब्लिटोरिति किम् आरभते । आरेभे । अचीत्येव - आरब्धा ।।

लभश्च ।। 7 - 1 - 64।।

लभेश्चाजादौ प्रत्यये शब्लिड्वर्जिते नुमागमो भवति । लम्भयति । लम्भकः । साधुलम्भी । लम्भंलम्भम् । लम्भो वर्त्तते । अशब्लिटोरित्येव - लभते । लेभे । अचीत्येव - लब्धा । लभेश्च पृथग्योगकरणमुत्तरार्थम् ।।

आङो यि ।। 7 - 1 - 65 ।।

आङ उत्तरस्य लभेर्यकारादिप्रत्ययविषये नुमागमो भवति आलम्भ्या गौः । आलम्भ्या वडवा । प्राक्प्रत्ययोत्पत्तेर्नुमि कृते विहतमदुपधत्वमिति ऋहलोर्ण्यत् इति ण्यत्प्रत्ययः, तत्र कृदुत्तरपदप्रकृतिस्वरत्वेनान्तस्वरितत्वं भवति । यति तु पुनरुत्तरपदाद्युदात्तत्वं स्यात् । आङ इति किम् लभ्यम् । कथमग्निष्टोम आलभ्य इति सर्वे विधयश्छन्दसि विकल्प्यन्ते । अथ वा - आलभ्य इत्यत्र नुमि कृतेऽनुषङ्गलोपः क्रियते ।।

उपात्प्रशंसायाम् ।। 7 - 1 - 66 ।।

उपादुत्तरस्य लभेः प्रशंसायां गम्यमानायां यकारादिप्रत्ययविषये नुमागमो भवति । उपलमाभ्या भवता विद्या । उपलमाभ्यानि धनानि । ण्यत्प्रत्ययान्तत्वादन्तस्वररितत्वमेव । प्रशंसायामिति किम् उपलभ्यमस्माद् वृषलात्किञ्चित् । पोरदुपधत्वाद्यत्प्रत्ययान्तमिदम् ।।

उपसर्गात्खल्घञोः ।। 7 - 1 - 67 ।।

उपसर्गादुत्तरस्य लभेः खल्घञोः परतो नुमागमो भवति । ईषत्प्रलम्भः । सुप्रलम्भः । दुष्प्रलम्भः । घञि - प्रलम्भः , विप्रलम्भः । सिद्धे सत्यारम्भौ नियमार्थः - उपसर्गादेव लभेः खल्घञोः परतो नुमागमो भवति, नान्यत्र । ईषल्लभः । लाभो वर्त्तते ।।

न सुदुर्भ्यां केवलाभ्याम् ।। 7 - 1 - 68 ।।

सु, दुर् - इत्येताभ्यां केवलाभ्यामन्योपसर्गरहिताभ्यामुपसृष्टस्य लभेः खल्घञोः परतो नुमागमो न भवति । सुदुर्लभम् । सुलभम् । दुर्लभम् । घञि - सुलाभः , दुर्लाभः । केवलाभ्यामिति किम् सुप्रलम्भः । दुष्प्रलम्भः । सुदुर्भ्याम् इति तृतीयां मत्वा केवलग्रहणं क्रियते । पञ्चम्यां हि व्यवहितत्वादेवाप्रसङ्गः । अतिसुलभमित्यत्र कर्मप्रवचनीयत्वादतेः केवल एव सुशब्द उपसर्ग इति भवति प्रतिषधः । यदा त्वतिशब्दो न कर्मप्रवचनीयः, तदा नुम्भवत्येव - अतिसुम्भ इति पञ्चमीनिर्देशपक्षेऽप्येवमर्थं केवलग्रहणं कर्त्तव्यम् ।।

विभाषा चिण्णमुलोः ।। 7 - 1 - 69 ।।

चिण्, णमुल् - इत्येतयोर्विभाषा लभेर्नुम्भवति । अलाभि, अलम्भि। लाभंलाभम् । लम्भंलम्भम् । व्यवस्थितविभाषा चेयम्, तेनानुपसृष्टस्य विकल्पः । उपसृष्टस्य नित्यं नुम्भवति - प्रालम्भि, प्रलम्भम् ।।

उगिदचां सर्वनामस्थानेऽधातोः ।। 7 - 1 - 70 ।।

उगितामङ्गानां धातुवर्जितानामञ्चतेश्च सर्वनामस्थाने परतो नुमागमो भवति । भवतु - भवन्तौ , भवन्त । ईयसुन् - श्रेयान्, श्रेयांसौ, श्रेयासः । शतृ - पचन् , पचन्तौ, पचन्तः । अञ्चतेः - प्राङ्, प्राञ्चौ , प्राञ्चः । उगिदचामिति किम् दृषत्, दृषदौ, दृषदः । सर्वनामस्थान इति किम् भवतः पश्य । श्रेयसः पश्यः अञ्चतिग्रहणं नियमार्थम् - अञ्चतेरेव धातोरन्यस्य मा भूत् । उखास्रत् । पर्णध्वत् । अधातोरिति किम् अधातुभूतपूर्वस्य यथा स्यात् । गोमन्तमिच्छति गोमत्यति, गोमत्यतेरप्रत्ययः - गोमान् । अत्र हि धातुत्वादञ्चतिग्रहणान्न स्यात् ।।

युजेरसमासे ।। 7 - 1 - 71 ।।

युजेरसमासे सर्वनामस्थाने परतो नुमागमो भवति । युङ्, युञ्जौ, युञ्जः । असमासे इति किम् अश्वयुक्, अश्वयुजौ, अश्वयुजः । युजेः इतीकारनिर्देशाद् युज समाधौ इत्यस्य ग्रहणं न भवति - युजमापन्ना ऋषयः ।।

नपुंसकस्य झलचः ।। 7 - 1 - 72 ।।

नपुंसकस्य झलन्तस्याजन्तस्य च सर्वनामस्थाने परतो नुमागमो भवति । उदश्विन्ति । शकृन्ति । यशांसि । पयांसि । अजन्तस्य - कुण्डानि । वनानि । त्रपूणि । जतूनि । नपुंसकस्येति किम् अग्निचिद् ब्राह्मणः । झलच इति किम् बहुपुरि । बहुधुरि । विमलदिवि । चत्वारि । अहानि । अगितो झलन्तस्य नपुंसकस्य परत्वादेनेनैव नुम्भवति । श्रेयांसि, भूयांसि, कुर्वन्ति, कृषन्ति ब्रह्मणकुलानि । बहूर्जि प्रतिषेधौ वक्तव्यम् । बहूर्जि ब्राह्मणकुलानि । अन्त्यात्पूर्वं नुमेक इचछन्ति । बहूर्न्जि ब्राह्मणकुलानि ।।

इकोऽचि विभक्तौ ।। 7 - 1 - 73 ।।

इगन्तस्य नपुंसकस्याङ्गस्याजादौ नुमागमो भवति । त्रपुणी । जतुनी । तुम्बरुणौ । त्रपुणे । जतुने । तुम्बुरुणे । इक इति किम् कुण्डे । पीठे । अचोति किम् उत्तरार्थम् । यद्येवम् , तत्रैव कर्त्तव्यम् इह तु करणस्य एतत्प्रयोजनम् - हे त्रपो इत्यत्र नम् मा भूदिति, न ङिसम्बुद्ध्योः इति नलोपप्रतिषेधः स्यात् । ननु च न लुमताङ्गस्य इति प्रत्ययलक्षणे प्रतिषिद्धे विभक्तिरेव नास्ति एतदेवाज्ग्रहणं ज्ञापकम् - प्रत्ययलक्षणप्रतिषेधोऽत्र न भवतीति । तथा च - सम्बुद्धिगुणः क्रियते । विभक्ताविति किम् तौम्बुरवं चूर्णम् । इकोऽचि व्यञ्जने मा भूदस्तु लोपः स्वरः कथम् स्वरो वै श्रूयमाणोटपि लुप्ते किं न भविष्यति रायात्वं तिसृभावश्च व्यवधानान्नुमा अपि । नुड् वाच्य उत्तरार्थ तु इह किञ्चित्रपो इति ।।

तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य ।। 7 - 1 - 74 ।।

तृतीयादिषु विभक्तिष्वजादिषु भाषितपुंस्कमिगन्तं नपुंसकं गालवस्याचार्यस्य मतेन पुंवद्भवति । यथा पुंसि ह्रस्वनुमौ न भवतः ,तद्वदत्रापि न भवत इत्यर्थः । ग्रामणीर्ब्राह्मणः, ग्राणि ब्राह्मणकुलम् । ग्रामण्या ब्राह्मणकुलेन, ग्रामणिना ब्राह्मणकुलेन । ग्रामण्ये ब्राह्मणकुलाय, ग्रामणिने ब्राह्मणकुलाय । ग्रामण्यो ब्राह्मणकुलात्, ग्रामणिनो ब्राह्मणकुलात् । ग्रामण्यो ब्राह्मणकुलस्य, ग्रामणिनो ब्राह्मणकुलस्य । ग्रामण्योर्ब्राह्मणकुलयोः, ग्रामणिनोर्ब्राह्मणकुलयोः । ग्रामण्यां ब्राह्मणकुलानाम् - नुमचिर इति पूर्वविप्रतिषेधेन नुट्, ग्रामणीनां ब्राह्मणकुलानाम । ग्रामण्यां ब्राह्मणकुले, ग्रामणिनि ब्राह्मणकुले । शुचिर्बाह्मणः, शुचि ब्राह्मणकुलम् । शुचिना ब्राह्मणकुलेन । शुचये ब्राह्मणकुलाय, शुचिने ब्राह्मणकुलाय । शुचेर्ब्राह्मणकुलात्, शुचिनो ब्राह्मणकुलात् । शुचेर्ब्राह्मणकुलस्य, शुचिनो ब्राह्मणकुलस्य । शुच्योर्ब्राह्मण कुलयोः, शुचिनोर्ब्राह्मणकुलयोः। शुचौ ब्राह्मणकुले, शुचिनि ब्राह्मणकुले । तृतीयादिष्विति किम् ग्रामणिनी ब्राह्मणकुले । शुचिनी ब्राह्मणकुले । भाषितपुंस्कमिति किम् त्रपुणे, जतुने । इह कस्मान्न भवति - पीलुर्वृक्षः पीलु, फलम् - फीलुने फलायेति समानायामाकृतौ यद्भाषितपुंस्कं तुल्ये प्रवृत्तिनिमित्ते पुंवद्भावः । इह तु वृक्षाकृतिः प्रवृत्तिनिमित्तं पुंसि शब्दस्य, फलाकृतिर्नपुंसके । तदेतदेवं कथं भवति - भाषितपुंस्कमिति भाषितः पुमान्यस्मिन्नर्थे प्रवृत्ति निमित्ते स भाषितपुंस्कशब्देनोच्यते, तद्योगादभिधेयमपि यद् नपुंसकं तदपि भाषितपुंस्कम् । तस्य प्रतिपादकं यच्छब्दरुपं तदपि भाषितपुंस्कमिति । इक इत्येव - कीलालपा ब्राह्मणः । कीलालपं ब्राह्मणकुलम् । कीलालपेन ब्राह्मणकुलेन । अचीत्येव - ग्रामणीभ्यां

ब्राह्मणकुलाभ्याम् ।।

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ।। 7 - 1 - 75 ।।

अस्थि, दधिं, सक्थि, अक्षि - इत्येतेषां नपुंसकानां तृतीयादिष्वजादिषु विभक्तिषु परतोऽनङित्ययमादेशो भवति , स चोदात्तो भवति । अस्थ्ना, अस्थ्ने । दध्ना, दध्ने । सक्थ्ना, सक्थ्ने । अक्ष्णा, अक्ष्णे । अस्थ्यादय आद्युदात्ताः, तेषामनङादेशः स्थानिवद्भावादनुदात्तः स्यादित्युदात्तवचनम् । तत्र भसंज्ञायामल्लोपे कृते उदात्तनिवृत्तिस्वरेण विभक्तिरुदात्ता भवति । एतैरस्थ्यादिभिर्नपुंसकैरनपुंसकस्याप्यङ्गस्य तदन्तग्रहणमिष्यते प्रियास्थ्ना ब्राह्मणेन, प्रियदध्ना । तृतीयादिष्विति किम् अस्थिनी, दधिनी । अचीत्येव -अस्थिभ्याम्, दधिभ्याम् ।

छन्दस्यपि दृश्यते ।। 7 - 1 - 76 ।।

अस्थिदधिसक्थ्यक्ष्णामनङ् छन्दस्यपि दृश्यते । यतो विहितस्ततोऽन्यत्रापि दृश्यते । अचि इत्युक्तम्, अनजादावपि दृश्यते - इन्द्रो दधीचो अस्थभिः । भद्रं पश्येमाक्षभिः । तृतीयादिषु इत्युक्तम्, अतृतीयादिष्वपि दृश्यते - अस्थान्युत्कृत्य जुहोति । विभक्तौ इत्युक्तम्, अविभक्तावपि दृश्यते - अक्षण्वता लाङ्गलेन । अस्थन्वन्तं यदनस्था बिभर्ति ।।

ई च द्विवचने ।। 7 - 1 - 77 ।।

द्विवचने परतश्छन्दसि विषयेऽस्थ्यादीनामीकारादोशो भवति, स चोदात्तः। अक्षी ते इन्द्र पिङ्गले कपेरिव । अक्षीभ्यां ते नासिकाभ्याम् । अक्षी - इत्यत्र नुम्परत्वादीकारेण बाध्यते, तत्र कृते सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितं तद्बाधितमेव इति पुनर्नुम्म क्रियते ।।

नाभ्यस्ताच्छतुः ।। 7 - 1 - 78 ।।

अभ्यस्तादङ्गादुत्तरस्य शतुर्नुम्न भवति । ददत् , ददतौ, ददतः । दधत् , दधतौ, दधतः । जक्षत्, जक्षतौ, जक्षतः । जाग्रत्, जाग्रतौ , जाग्रतः । शतुरनन्तर ईकारो न विहित इति व्यवहितस्यापि नुमः प्रतिषेधो विज्ञायते ।।

वा नपुसकस्य ।। 7 - 1 - 79 ।।

अभ्यस्तादङ्गादुत्तरो यः शतृप्रत्ययस्तदन्तस्य नपुंसकस्य वा नुमागमो भवति । ददति ददन्ति कुलानि । दधति दधन्ति कुलानि । जक्षति जक्षन्ति कुलानि । जाग्रति जाग्रन्ति कुलानि ।।

आच्छीनद्योर्नुम् ।। 7 - 1 - 80 ।।

अवर्णान्तादङ्गादुत्तरस्य शतुर्वा नुमागमो भवति शीनद्योः परतः । तुदति कुले, तुदन्ती कुले । तुदती ब्राह्मणी, तुदन्ती ब्राह्मणी। याती कुले, यान्ती कुले । याती ब्राह्मणी, यान्ती ब्राह्मणी । करिष्यती कुले, करिष्यन्ती कुले । करिष्यति ब्राह्मणी, करिष्यन्ती ब्राह्मणी । अत्रान्तरङ्गत्वादेकादेशे कृते व्यपवर्गाभावादवर्णान्तदङ्गदुत्तरस्य शतुरिति न युच्यते वक्तम्, उभयत आश्रये ननान्तादिवत् इत्यन्तादिवद्भावोऽपि नास्ति , भूतपूर्वगत्याश्रयणे वा - अदती, ध्नतीत्येवमादिष्वतिप्रसङ्ग इति अत्र समाधिं केचिदाहुः - शतुरवयवे शतृशब्दो वर्त्तते, अवर्णान्तादङ्गादुत्तरो यः शत्रवयव इति । अपे पुनराहुः - आत् इत्येतेन शीनद्यावेव विशेष्येते, अवर्णान्तादङ्गादुत्तरे ये शीनद्यौ तयोः परतः शत्रन्तस्य नुम्भवतीति । तत्र येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यदिति तकारेणैव व्यवधानमाश्रयिष्यते । आदिति किम् कुर्वती । सुन्वती । शीनद्योरिति किम् तुदताम् । नुदताम् ।

शप्श्यनोर्नित्यम् ।। 7 - 1 - 81 ।।

शप् , श्यन् - इत्येतयोः शतुः शीनद्योः परतो नित्यं नुमागमो भवति । पचन्ती कुले, पचन्ती ब्राह्मणी । दीव्यन्ती कुले, दीव्यन्ती ब्राह्मणी । सीव्यन्ती कुले, सीव्यन्ती ब्राह्मणी । नित्यग्रहणम् वा इत्यस्याधिकारस्य निवृत्त्यर्थम् । इहारम्भसामर्थ्यान्नित्यमुत्तरत्र विकल्प एवत्याशङ्क्येत ।।

सायनडुहः ।। 7 - 1 - 82 ।।

सौ परतोऽनडुहौऽङ्गस्य नुमागमो भवति । अनड्वान् । हे अनड्वन् । अत्र केचित् आत् - इत्यधिकारादाममोः कृतयोर्नुमं कुर्वन्ति । तेन नुमाऽमामौ न बाध्येते, आमम्भ्यां च नुमिति । अपरे तु - सत्यपि सामान्यविशेषत्वे आममोर्नमश्च समावेशमिच्छन्ति, न बाध्यबाधकभावम्, यथा - चिचीषत्यादिषु दीर्धत्वद्विर्वचनयोरिति ।।

दृक्स्ववस्वतवसां छन्दसि ।। 7 - 1 - 83 ।।

दृक्, स्ववस्, स्वतवस् - इत्येतेषां सौ परतो मुमागमो भवति छन्दसि विषये । ईदृङ् । तादृङ् । यादृङ् । सदृङ् । स्ववान् । स्वतवान्पायुरग्ने ।।

दिव औत् ।। 7 - 1 - 84 ।।

दिव - इत्येतस्य सौ परतः औत् इत्यमादेशो भवति । द्यौः । दिविति प्रातिपदिकमस्ति निरनुबन्धकम् । धातुस्तु सानुबन्धकः, स इह न गृह्यते - अक्षद्यूः ।।

पथिमथ्यृभुक्षामात् ।। 7 - 1 - 85 ।।

पथिन्, मथिन्, ऋभुक्षिन् - इत्येतेषामङ्गानां सौ परत आकार आदेशो भवति । पन्थाः । मन्थाः । ऋभुक्षाः । स्थानिन्युनासिकेऽपि आकारोऽनुनासिको न भवति । भाव्यमानेन सर्वानां ग्रहणं न भवतीति शुद्धो ह्ययमुच्चार्यते ।।

इतोऽत्सर्वनामस्थाने ।। 7 - 1 - 86 ।।

पथ्यादीनामिकारस्य स्थाने अकारादेशो भवति सर्वनामस्थाने परतः । पन्थाः, पन्थानौ, पन्थानः, पन्थानम्, पन्थानौ। मन्थाः, मन्थानौ, मन्थानः, मन्थानम्,

मन्थानौ । ऋभुक्षाः, ऋभुक्षाणौ, ऋभुक्षाणः, ऋभुक्षाणम्, ऋभुक्षाणौ । आत् इति वर्त्तमाने पुरद्ववचनं षपूर्वार्थम् । ऋभुक्षणमित्यत्र वा षपूर्वस्य निगमे इति दीर्घविकल्पः ।।

थो न्थः ।। 7 - 1 - 87 ।।

पथिमथोस्थकारस्य स्थाने न्थ - इत्ययमादेशो भवति सर्वनामस्थाने परतः । पन्था, पन्थानौ, पन्थानः । मन्थाः, मन्थानौ, मन्थानः ।

भस्य टेर्लोपः ।। 7 - 1 - 88 ।।

पथ्यादीनां भसंज्ञकानां टेर्लोपो भवति । पथः, पथा, पथे । मथः, मथा, मथे । ऋभुक्षः ऋभुक्षा , ऋभुक्षे । सर्वनामस्थाने इत्यनुवर्त्तमानमपि विरोधादिह न सम्बद्ध्यते ।।

पुंसोऽसुङ् ।। 7 - 1 - 89 ।।

पुंस इत्येतस्य सर्वनामस्थाने परतोऽसुङित्ययमादेशो भवति । पुमान् । पुमांसौ । पुमांसः । इह परमपुमानिति
प्रागेव च प्रत्ययोत्पत्तेः समासान्तोदात्तत्वमुत्पन्नायां विभक्तौ असुञित्यनिष्टः स्वरः प्राप्नोति तदर्थमसुङि उपदेशिवद्वच्नं कर्त्तव्यम् । तेन
परमपुमानित्यन्तोदात्तो भवति । पुमानित्ययं पुनराद्युदात्त एव ।।

गोतो णित् ।। 7 - 1 - 90 ।।

गोशब्दात्परं सर्वनामस्थानं णिद्भवति । णित्कार्यं तत्र भवतीत्यर्थः । गौः, गावौ, गावः । तपरकरणं किम् चित्रगुः। शबलगुः । कथं हे चित्रगो, हे शवलगव इति अङ्गवृत्ते पुनर्वृत्तावविधि र्निष्ठितस्य इति सम्बुद्धिजसोर्गुणे कृते णित्त्वं न भवति । अथ वा - गोतः इति सम्बन्धलक्षणा षष्ठी, गोतः सम्बन्धि यत्सर्वनामस्थानमिति । यच्च तदर्थस्यैकत्वादिषु सर्वनामस्थानं तद् गोः सर्वनामस्थानमित्युच्यते । चित्रगुशब्दात्तु सर्वनामस्थानं तदन्यपदार्थस्यैकत्वादीनाह । तपरकरणं तु निर्देशार्थमेव । केचित् ओतो णित् इति पठन्ति । द्योशब्दादपि यत्सर्वनामस्थानं विद्यते तदर्थम् । द्यौः, द्यावौ, द्यावः । गोतः इत्येतदेव तपरकरणनिर्देशादोकारान्तोपलक्षणं द्रष्टव्यम् । वर्णनिर्देशेषु हि तपरकरणं प्रसिद्धम् ।।

णलुत्तमो वा ।। 7 - 1 - 91 ।।

उत्तमो णल्वा णिद् भवति । णित्कार्य तत्र वा भवतीत्यर्थः । अहं चकार, अहं चकर । अहं पपाच, अहं पपच ।।

सख्युरसम्बुद्धौ ।। 7 - 1 - 92 ।।

असम्बुद्धौ यः सखिशब्दः तस्मात्परं सर्वनामस्थानं णिद्वद्भवति । सखायौ । सखायः । असम्बुद्धाविति किम् हे सखे ।।

अनङ् सौ ।। 7 - 1 - 93 ।।

सखिशब्दस्य सौ परतोऽनङित्ययमादेशो भवति, स चेत्सुशब्दः सम्बुद्धिर्न भवति । सखा । असम्बुद्धाविति किम् हे सखे ।।

ऋदुशनस्पुंरुदंसोऽनेहसां च ।। 7 - 1 - 94 ।।

ऋकारान्तानामङ्गानाम्, उशनस्, पुरुदंसस्, अनेहस् - इत्येतेषां चासम्बुद्धौ सौ परतोऽनङादेशो भवति । कर्त्ता । हर्त्ता । माता । पिता । भ्राता । उशना । पुरुदंसा । उनेहा । असम्बुद्धावित्येव - हे कर्त्तः । हे मातः । हे पितः । हे पुरुदंसः । हे अनेहः । हे उशनः । उसनसः सम्बुद्धावपि पक्षेऽनङ् इष्यते - हे उशनन् । न ङिसम्बुद्ध्योः इति नलोपप्रतिषेधोऽपि पक्ष इष्यते - हे उशन । तथा चोक्तम् - सम्बोधने तूशनसस्त्रिरुपं सान्तं तथा नान्तमथाप्यदन्तम् । माध्यन्दिनिर्वष्ट गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः ।। इति तपरकरणमसन्दहार्थम् ।।

तृज्वत्क्रोष्टुः ।। 7 - 1 - 95 ।।

क्रोष्टुशब्दस्तुन्प्रत्ययान्तः संज्ञाशब्दः सर्वनामस्थानेऽसम्बुद्धौ परतः तृज्वद्भवति । तृजन्तस्य यद्रूपं तदस्य भवतीत्यर्थः । रुपातिदेशोऽयम् । प्रत्यासत्तेश्च क्रुशेरेव तृजन्तस्य यद्रूपं तदतिदिश्यते । तच्च क्रोष्टृ इत्येतदन्तोदात्तम् । क्रोष्टा, क्रोष्टारौ, क्रोष्टारः, क्रोष्टारम्, क्रोष्टारौ । सर्वनामस्थाने इत्येव - क्रोष्टून् । असम्बुद्धौ इत्येव - हे क्रोष्टो ।।

स्रियां च ।। 7 - 1 - 96 ।।

असर्वनामस्थानार्थमारम्भः । स्त्रियां च क्रोष्टुशब्दस्य तृज्वद् भवति । क्रोष्ट्री । क्रोष्ट्रीभ्याम्, क्रोष्ट्रीभिः । क्रोष्टुशब्दं केचिद् गौरादिषु पठन्ति, ते ङीषि प्रत्यये तृज्वद्भावं कुर्वन्ति । तेषां पञ्चभिः क्रोष्ट्रीभिः क्रीतैः पञ्चक्रोष्टृभी रथैरिति स्त्रीशब्दस्य लुकि कृते न सिद्ध्यति, तत्र प्रतिवधेयम् । ये तु गौरादिषु न पठन्ति, तेषां स्त्रियामित्यर्थनिर्देशः - स्त्रियां दर्त्तमानः क्रोष्टुशब्दः तृज्वद्भवति । कृतेऽतिदेशे, ऋन्नेभ्यो ङीप् इति ङीप्प्रत्ययः । तत्र उदात्तयणा हल्पूर्वात् इत्यन्तोदात्त एव क्रोष्ट्रीशब्दो भवति ।।

विभाषा तृतीयादिष्वचि ।। 7 - 1 - 97 ।।

तृतीयादिषु विभक्तिष्वजादिषु क्रोष्टुर्विभाषा तृज्वद्भवति । क्रोष्ट्रा, क्रोष्टुना। क्रोष्ट्रे, क्रोष्टवे । क्रोष्टुः, क्रोष्टोः । क्रोष्टरि, क्रोष्टौ । क्रोष्ट्रोः , क्रोष्ट्वोः । तृतीयादिष्विति किम् क्रोष्टून् । अचीति किम् क्रोष्टुभ्याम ।

क्रोष्टुभिः । तृज्वद्भावात्पूर्वविप्रतिषेधेन नुम्नुटौ भवतः । प्रियक्रोष्टुनेऽरण्याय । हतक्रोष्टुने वृषलकुलाय । नुट् - क्रोष्टूनाम् ।।

चतुरनडुहोरामुदात्तः ।। 7 - 1 - 98 ।।

चतुर्, अनहुह् - इत्येतयोः सर्वनामस्थाने परत आमागमो भवति, स चोदात्तः । चत्वारः । अनड्वान्, अनड्वाहौ, अनड्वाहः , अनवड्वाहम् ।

तदन्तविधिरत्रेष्यते । प्रियचत्वाः, प्रियचत्वारौ, प्रियचत्वारः । प्रियानड्वान्, प्रियानड्वाहौ, प्रियानड्वाहः । अनडुहः स्त्रियां वेति वक्तव्यम् । अनुडुही, अनड्वाही। गौरादिपाठात्सिद्धम् ।।

अम्सम्बुद्धौ ।। 7 - 1 - 99 ।।

सम्बुद्धौ परतश्चतुरनडुहोरमागमो भवति । पूर्वस्यायमपवादः । हे प्रियचत्वः । हे पियानड्वन् ।।

ऋत इद्धातोः ।। 7 - 1 - 100 ।।

ऋकारान्तस्य धातोरङ्स्य इकारादेशो भवति । किरति । गिरति । आस्तीर्णम् । विशीर्णम् । धातोरिति किम् मातृणाम् । पितृणाम् । लाक्षणिकस्याप्यत्र ग्रहणमिष्यते । चिकीर्षतीत्यत्रापि यथा स्यादिति धातुग्रहणं क्रियते ।।

उपधायाश्च ।। 7 - 1 - 101 ।।

उपधायाश्च ऋकारस्य इकारादेशो भवति । कीर्त्तयति, कीर्त्तयतः कीर्त्तयन्ति ।।

उदोष्ठ्यपूर्वस्य ।। 7 - 1 - 102 ।।

ओष्ठ्यः पूर्वो यस्माद् ऋकारादसावोष्ठ्यपूर्वस्तदन्तस्य धातोरङ्गस्य उकारादेशो भवति । पूर्त्ताः पिण्डाः । पुपूर्षति । मुमूर्षति । सुस्वूर्षति । दन्त्योष्ठ्यपूर्वोऽप्.योष्ठ्यपूर्वो भवतीति अत्रापि भवति -- वुवूर्षति ऋत्विचम् , प्रावुवूर्षति कम्बलम् । ओष्ठ्यो ह्यत्र प्रत्यासत्तेरङ्गावयव एव गृह्यते, तेन ॠ गतौ इत्यस्य सम्पूर्वस्य समीर्णमिति भवति । इत्त्वोत्त्वाभ्यां गुणवृद्धी भवती विप्तिषेधेन । आस्तरणम्, आस्तारकः । निपरणम्, निपारकः । निगरणम्, निगारकः ।।

बहुलं छन्दसि ।। 7 - 1 - 103 ।।

छन्दसि विषये ऋकारान्तस्य धातोरह्गस्य बहुलमुकारादेशो भवति । ओष्ठ्यपूर्वस्य इत्युक्तम् , अनोष्ठ्यपूर्वस्यापि भवति - मित्रावरुणौ ततुरिः । दूरे ह्यध्वा जगुरिः । ओष्ठ्यपूर्वस्यापि न भवति - पप्रितमम्, वव्रितमम् । क्वचिद् भवति - पपुरिः ।। इत्युपाध्यायश्रीवामनकृतायां काशिकावृत्तौ सप्तमाध्यायस्य प्रथमः पादः

7.2

अथ सप्तमाध्याये द्वितीयः पादः

सिचि वृद्धिः परस्मैपदेषु ।। 7 - 2 - 1 ।।

परस्मैपदपे सिचि परत इगन्तस्याङ्गस्य वृद्धिर्भति । अचैषीत् । अनैषीत् । अलावीत् । अपावीत्। अकार्षीत् । अहर्षीत् । अन्तरङ्गमपि गुणमेषां वृद्धिर्वचनाद्वाधते । न्यनुवीत् , न्यधुवीद् - इत्यत्र कुटादित्वान्ङित्त्वे सति प्रतिषिद्धायां वृद्धावुवङादेशः क्रियते । परस्मैपदेष्विति किम् अच्योष्ट । अप्लोष्ट ।।

अतो ल्रान्तस्य ।। 7 - 2 - 2 ।।

रेफलकारौ यावतोऽन्तौ - समीपौ, तदन्तस्याङ्गस्य अत एव स्थाने वृद्धिर्भवति । क्षर - अक्षारीत् । त्सर - अत्सारीत् । ज्वल - अज्वालीत् । ह्मल - अह्मालीत् । अतो हलादेर्लघोः इति विकल्पस्यायमपवादः । अत इति किम् न्यखोरीत् । न्यमीलीत् । ल्रान्तस्येति किम् मा भवानटीत् । मा भवानशीत् । अन्तग्रहणं किम् अवभ्रीत् । अश्वल्लीत् । अत्र यौ रेफलकाराङ्गस्यान्तौ न तावतः समीपौ ।।

वदव्रजहलन्तस्याचः ।। 7 - 2 - 3 ।।

वदव्रजोर्हलन्तानां चाङ्गानामचः स्थाने वृद्धिर्भवति सिचि परस्मैपदे परतः । अवादीत् । अव्राजीत् । विकल्पबाधनार्थ वदिव्रजिग्रहणम् । हलन्तानाम् - अपाक्षीत् । अभैत्सीत् । अच्छैत्सीत् । अरौत्सीत् । अत्र योगविभागे सति हलन्तग्रहणमन्तरेणापि सिद्ध्यति, कथम् वदिव्रज्योरित्यत्र प्रथमयोगे अतः इति स्थानी अनुवर्त्तते, ततो यत् अचः इति सूत्रम्, तत्राङ्गेनाज्विशेष्यते - अङ्गस्याचः सिचि परतो वृद्धिर्भवति । तदेतद्धल्ग्रहणं हल्समुदायपरिग्रहार्थम् । इहापि स्यात् - अराङ्क्षीत्, असाङ्क्षीत्। अन्यथा हि येन नाव्यधानं तेन व्यवहितेऽपि वचनप्रामाण्यादित्येकेन वर्णेन व्यवधाने स्यात्, अनेकेन हला न स्यात् । उदवोढाम्, उदवोढमित्यत्र वहेः सिचि ढत्वसलोपादीनाम् पूर्वत्रासिद्धम् इत्यसिद्धत्वात्पूर्वं हलन्तलक्षणा वृद्धिः क्रियते, पश्चाद् ढलोप निमित्तमोत्त्वम् । तत्र कृते पुनर्वृद्धिर्न भवति, कृतत्वात् ।यत्र त्वकृता वृद्धिः, ओकारस्यैव तत्र भवति - सोढामित्रस्यापत्यं सौढामित्रिरिति ।।

नेटि ।। 7 - 2 - 4 ।।

इडादौ सिचि हलन्तस्याङ्गस्य वृद्धिर्न भवति । अदेवीत् । असेवीत् । अकोषीत् । अमोषीत् । हलन्तस्य इत्येव - अलावीत् । तनन्वत्रैतदप्यन्तरङ्गत्वाद् गुणावादेशोः कृतयोर्हलन्तं भवति नैतदेवम्, तअन्तरङ्गमपि गुणं वचनारम्भसामर्थ्यात्सिचि वृद्धिबार्धते इत्युक्तम् ।।

ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ।। 7 - 2 - 5 ।।

हकारान्तानां मकारान्तानां यकारान्तनामङ्गानाम्, क्षण, श्वस, जागृ, णि, श्वि - इत्येतेषामेदितां च इडादौ सिचि परस्मैपदे परतो टुवम् - अवमीत् । क्षण - अक्षणीत् । श्वस् - अश्वसीत् । जागृ - अजागरीत् । णि - औनयीत्, ऐलयीत् । श्वि - अश्वयीत् । एदिताम् - रगे , अरगीत् । कखे - अकखीत् । ह्म्यन्तक्षणश्वसामेदितां च अतो हलादेर्लघोः इति विकल्पे प्राप्ते प्रतिषेधः । जागृ - णि - श्वीनां तु सिचि वृद्धिः प्राप्ता, सा च नेटि इति न प्रतिषिध्यते । न

च अन्तरङ्घत्वादत्र पूर्वं गुणो भवति सिचि वृद्धेरनवकाशात्वात् । यदि पूर्वं गुणः स्यात्, इह णिश्विग्रहणमनर्थकं स्यात्, गुणायादेशायोः कृतयोर्यकारान्तत्वादेव प्रतिषेधस्य सिद्धत्वात् । तस्मादिदमेव णिश्विग्रहणं ज्ञापकम् - न सिच्यन्तरङ्गमस्तीति । अथ जागृग्रहणं किमर्थम्, जाग्रोऽविचिण्णल्ङित्सु इति जागर्त्तेर्गुणो वृद्धेरपवादो विधीयते, स यथा अचो ञ्ति चतइति वृद्धिं बाधते, तथा सिचिवृद्धिमपि बादिष्यते नैतदस्ति, कृते गुणे अतो ल्रान्तस्य इति या वृद्धिः प्राप्नोति सा प्रतिषिध्यते । अथ गुणविधानसामर्थ्यादुत्तरकालभाविन्यपि वृद्धिर्बाध्यते, यथा जागरयतीत्यत्र अत उपधायाः इत्यपि वृद्धिर्न भवति, तथा चिण्णलोः प्रतिषेधोऽर्थवान्भवति इति शक्यमिह जागृग्रहणमकर्त्तुम् तत्त् क्रियते विस्पष्टार्थम् ।।

ऊर्णोतेर्विभाषा ।। 7 - 2 - 6 ।।

ऊर्णोतेरिडादौ सिचि परस्मैपदपरे परतो विभाषा वृद्धिर्न भवति । प्रौर्णवीत्, प्रौर्णावीत् । विभाषोर्णोः इत्यङित्त्वपक्षे वृद्धिविकल्पोऽयम् । ङित्त्वपक्षे तु गुणवृद्ध्योरभावे उवङ् भवति - प्रौर्णुवीत् ।।

अतो हलादेर्लघोः ।। 7 - 2 - 7 ।।

हलादेरङ्गस्य लघोरकारस्य इडादौ सिचि परस्मैपदपे परतो विभाषा वृद्धिर्न भवति । अकणीत् , अकाणीत् । अरणीत्, अराणीत् । अ इतिस किम् अदेवीत् । एसेवीत् । न्यकुटीत्, न्यपुटीत् - इत्यत्र अतः इत्यस्मिन्नसति स्थानिनिर्देशार्थम् अचः इत्येतदनुवर्तयितव्यम् । तत्र अङ्लक्षणा वृद्धिरिग्लक्षणा न भवतीति क्ङिति च इति प्रतिषेधो न स्यात् । हलादेरिति किम् मा भवानशीत् । मा भवानटीत् । लघोरिति किम् अतक्षीत् । अक्षरीत् । अथेह कस्मान्न भवति - अचकासीदिति येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यदिति हला व्यवधानमाश्रितम्, न पुनरचापि व्यवधानमिति वृद्धिर्न भवति । अथ पुनरेकेन वर्णेन व्यवधानमाश्रीयते, न पुनरनेकेन - इति कल्पने शक्यमकर्तुम् लघोः इति अतक्षीदित्यत्रानेकेन व्यवधानमिति न भविष्यति तत्क्रियते विस्पष्टार्थम् । इटीत्येव - अपाक्षीत् ।।

नेड्वशि कृति ।। 7 - 2 - 8 ।।

वशादौ कृति प्रत्यये परत इडागमो न भवति । वरमनादौ प्रयोजनम् । ईशिता, ईसितुम् - ईस्वरः । दीपिता, दीपितुम् - दीप्रः । भसिता, भसितुम् - भस्म । याचिता, याचितुम् - याच्ञा । वालमनादौ इत्युदाहरणप्रदर्शनार्थम्, न परिगणनम् । तेन ञमन्ताण्डुः इत्येवमादावपि हि प्रतिषेधो भवति । अथ तत्र उणादयो बहुलम् इति समाधीयते समाभवोदाहरणप्रदर्शनमेतत् । कृतीति किम् रुरुदिव । रुरुदिम ।।

तितुत्रतथसिसुसरकसेषु च ।। 7 - 2 - 9 ।।

ति, तु , त्र , त, थ , सि, सु, सर, क, स - इत्येतेषु कृत्सु इडागमो म भवति । ति इति - क्तिन्क्तिचोः सामान्यग्रहणम् । क्तिच् - तनिता, तनितुम् - तन्तिः । क्तिन् - दीपिता, दीपितुम् - दीप्तिः । तु - सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्, सचिता, सचितुम् - सक्तुः । त्र - दाम्नीशसयुयुज इति ष्ट्रन् , पतिता, पतितुम् - पत्त्रम् - वाहनम् । उणादिष्वपि सर्वधातुभ्यः ष्ट्रन्, तनिता, तनितुम् - तन्त्रम्। त - हसिमृगृण्वमिदमितमिलूपूधुर्विभ्यस्तन् , तहसिता, हसितुम् - हस्तः । लविता, लवितुम् - लोतः । पविता, पवितुम् - पोतः । धूर्विता, धूर्वितुम् - धूर्तः । औणादिकस्यैव तशब्दस्य ग्रहणमिष्यते, न पुनः क्तस्य हसितमित्येव हि तत्र भवति । थ - हनिकृषिनीरमिकाशिभ्यः क्थन् , कोषिता, कोषितुम्, कुष्ठम् । काशिता, काशितुम् - काष्ठम् । सि - प्लुषिशुषिकुषिभ्यः क्सिः, कोषिता, कोषितुम् - कुक्षिः । सुक् च इषेः , एषिता, एषितुम् - इक्षुः । सर - अशेः क्सरन्, अशिता, अशितुम् - अक्षरम् । क - इण्भीकापाशल्यतिमर्चिभ्य कन् ष शलिता, शलितुम् - शल्कः । स - वृतृवदिहनिक्रमिकषियुमुचिभ्य सः, वदिता, वदितुम् - वत्सः । तितुत्रतथेष्वग्रहादीनामिति वक्तव्यम् । ग्रहादयो ग्रहप्रकाराः, येषामिट् क्तिनि दृश्यते । निगृहीतिः । उपस्निहितिः । निकुचितिः । निपठितिः । कृति इत्येव - रोदिति । स्वपिति ।।

एकाच उपदेशोऽनुदात्तात् ।। 7 - 2 - 10 ।।

उपदेशे चय एकाच् धातुरनुदात्तश्च तस्मादिडागमो न भवति । प्रकृत्याश्रयोऽयं प्रतिषेधः । के पुनरुपदेशेऽनुदात्ताः येतथा गणे पठ्यन्ते, तएव विस्ष्टार्यमनिट्कारिकासु प्रविभक्ताः प्रदर्श्यन्ते - अनिट्स्वरान्तो भवतीति दृश्यताम्, इमांस्तु सेटः प्रवदन्ति तद्विदः । अदन्तमदन्तमृतां च वृङ्वृञौ श्विडीङिवर्णेष्वथ शीङ्श्रिञावपि ।। गणस्थमूदन्तमुतां च रुस्नुवौ क्षुवं तथोर्णोतिमथो युणुक्ष्णवः । इति स्वरान्ता निपुणं समुच्चिताः ततो हलन्तानपि सन्निबोधतः ।।द्वये तएव धातवः - स्वरान्ताः , व्यञ्जनान्ताश्च । तत्र सर्वे स्वरान्ता एकाचोऽनुदात्ताः, अदन्तादीन्वर्जयित्वा । दाता । नेता । चेता । स्तोता । कर्त्ता । हर्त्ता । अजन्तादय उदात्ताः - आबधिष्ट । ॠदन्तम् - तरिता, तरीता । ॠतां च वृङ्वृञौ - निर्वरिता, निर्वरीता। प्रवरिता, प्रवरीता । श्विडीङिवर्णेष्वथ शीङ्श्रियावपि -- श्वयिता, उड्डयिता, शयिता, श्रयिता। गणस्थमूदन्तम् - लविता । पविता । उतां च रुस्नुवौ क्षुवं तथोर्णोतिमथो युणुक्ष्णवः - रीविता । प्रस्नविता । क्षविता । प्रोर्णविता । वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रतयोजनम् - इत्यतिदेशादेकाच्त्वमूर्णोतेरस्तीति उदात्त तउपदिश्यते । यविता । नविता । क्ष्णविता । इति स्वरान्ता निपुणं समुच्चिताः, ततो हलन्तानपि सन्नबोधत । शकिस्तु कान्तेष्वनिडेक इष्यते, धसिश्च सान्तेषु वसिः प्रसारणी ।। घसिः प्रकृत्यन्तरमस्ति -घस्ता । वसिः

प्रसारणी -- वस्ता । प्रसारकणीति किम् वसिता वस्त्राणाम् । वस निवासे इत्सस्य यजादित्वात्सम्प्रसारणं विहितम्, न तु यस आच्छादने इत्यस्य । रभिस्तु भान्तेष्वध मैथुने यभिस्ततस्तृतीयो लभिरेव नेतरे । आरब्धा । यब्धा । लब्धा । यमिर्यमन्तेष्वनिडेक इष्यते रमिश्च यश्च स्नि पठ्यनि मनिः । नमिश्चतुर्थो हनिरेव पञ्चमो चगमिश्च ष्ष्ठः प्रतिषेधवाचिनाम् ।। यन्ता । रन्ता । मन्ता । श्यनीति किम् मनुतेर्मनिता - इत्येव भवति । नन्ता । हन्ता । गन्ता ।

दिहिर्दुहिर्मेहतिरोहती वहिर्नमिस्तु षष्ठो दहतिस्तथा लिहिः । इमेऽनिटोऽष्टाविह मुक्तसंशया गणेषु हान्ताः प्रविभज्य किर्तिताः ।। देग्धा । दोग्धा । मेढा । आरोढा । वोढा । नद्धा । दग्धा । लेढा ।मुक्तसंशया इति किम् तन्त्रान्तरे चत्वारोऽपरे पठ्यन्ते -- सहिमुहिरिहिलुहयः । तत्र सहेर्विकल्पस्तकारादौ, मुहिरपि रधादौ पठ्यते, तेन तौ ससंशयौ सविकल्पौ । इतरौ तु धातुषु न पठ्येते । केश्चिदभ्युपगम्येते इति स्वरुपेणैव ससंशयौ । दिशिं दृशि दशिमथो मृशिं स्पृशिं रिशिं रुशिं रुशि क्रोशतिमष्टमं विशिम् । लिशं च शान्तानिनिटः पुराणगः पठन्ति पाठेषु दशैव नेतरान् ।। देष्टा, द्रष्टा, दंष्टा, आम्रष्टा, आमर्ष्टा, स्प्रष्टा, स्पर्ष्टा । ॠदुपधानामुदात्तोपदेशानां मृजिदृशी वर्जयित्वा अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् इति रमागमविकल्पः । रेष्टा रोष्टा, क्रोष्टा, प्रवोष्टा, लोष्टा । रुचिः सरधिर्युधिबन्धिसाधयः क्रुधिक्षुधी शुध्यतिबुध्यती व्यधिः । इमे तु धान्ता दश योऽनिटो मतास्ततः परं सिध्यतिरेव नेतरे ।। रोद्धा । राद्धा । योद्धा । बन्द्धा । साद्धा । क्रोद्धा । क्षोद्धा । शोद्धा । बोद्धा । व्यद्धा । सेद्धा । बुध्यतिसिध्यत्योः श्यना निर्देशात् न्याय्यविकरणयोर्बुधिसिध्योरिड् भवत्येव - बोधिता, सेधिता। निष्ठायामपि प्रतिषेधाभावात् - बुधितम् , सिधितमित्येव भवति । शिषिं शुष्यतिपुष्यती त्विषिं विषिं तुष्यतिदुष्यती द्विषिम् । इमान् दशैवोपदिशन्त्यनिड्विधौ गणेषु षान्तान् कृषिकर्षती तथा ।। शेष्टा । पेष्टा । शोष्टा । पोष्टा । त्वेष्टा । वेष्टा । श्लेष्टा । तोष्टा । दोष्टा। द्वेष्टा । क्रष्टा । कर्ष्टा । कृषेस्तौदादिकस्य , भौवादिकस्य च कृषिकर्षती - इति निर्देशः । तपिं तिपिं चापिमथो पविं स्वपिं लिपिं लुपिं तृप्यतिदृप्यती सृपिम् स्वरेण नीचेन शपिं छुपिं क्षिपिं प्रतीहिपान्तान् पठितांस्त्रयोदश ।। तप्ता । तेप्ता । आप्ता । वप्ता । स्वप्ता । लेप्ता । लोप्ता । तृप्यतिदृप्यत्योरनुदात्तत्वमागमार्थमेव । इट् त्वनयो रधादिपाठाद्विकल्पेन भवति - त्रप्ता, तर्प्ता, तर्पिता, द्रप्ता, दर्प्ता, दर्पिता। तुदादिषु तु यौ तृपिदृपी तावुदात्तावेव - त्रप्ता, तर्प्ता । शप्ता । छोप्ता। क्षेप्ता । अर्दीं हदिं स्कन्दिभिदिच्छिदिक्षुदीन् शदिं सदिं स्वद्यतिपद्यती खिदिम् । तुदिं नुदिं विद्यति विन्त इत्यपि प्रतीहि दान्तान्शा पञ्च चानिटः ।। अत्ता । हत्ता । स्कन्ता । भेत्ता । छेत्ता । क्षेत्ता । शत्ता । सत्ता । स्वेत्ता । स्विद्यतीति श्यना निर्देशः - ञिष्विदा इत्यस्य ग्रहणं मा भूत् । उदात्त एवायम् । पत्ता । खेत्ता । तोत्ता । नोत्ता । वेत्ता । विद्यति विन्त इत्यपि - श्यना शनमा च निर्देशोऽन्यविकरणनिवृत्त्यर्थः । वेतिविन्ती उदात्तावेव - नेदिता विद्यानाम् , वेदिता धनस्य ।। पचिं वचिं विचिरिचिरञ्जिपृच्छतीन् निजिं सिचिं मुचिभजिभञ्जिभृज्जतीन् । त्यजिं युजिरुजिसञ्जिमज्जतीन् भुजिं स्वजिं सृजिमृजी विद्ध्यनिटस्वरान् ।। पक्ता । वक्ता । विवेक्ता । रेक्ता । रङ्क्ता । प्रष्टा । निर्णेक्ता । सेक्ता । रोक्ता । सङ्क्ता । मङ्क्ता । भोक्ता । परिष्वक्ता । स्रष्टा । मार्ष्टा । मृजिरयमूदित्पठ्यते, ततोऽस्य विकल्पेनेटा भवतितव्यम् - मार्ष्टा , मर्जिता इति अमागमोऽप्यस्य न दृश्यते तदिह पाठस्य प्रयोजनं चिन्त्यम् । केचिदस्य स्थाने विचिं पठन्ति - सृजिं विजिं विद्ध्यनिट्स्वरानिति । निजादिषु यो विजिरसावनिडिष्यते । तथा च ग्रन्थान्तरे - निजिविजिष्वञ्जिवर्जम् इत्युक्तम् । एकाच इति किम् अवधीत् । वृद्धिनिवृत्त्यर्थमदन्तो वधिरुपदिश्यते । उपदेशग्रहणं किम् इह च यथा स्यात् - लविष्यति, पचिव्यति । इह च मा भूत् - कर्ता कटान्, कर्तुमिति ।।

शर्युकः किति ।। 7 - 2 - 11।।

श्रि इत्येतस्य, उगन्तानां च किति प्रत्यये परत इडागमो न भवति । श्रित्वा, श्रितः, श्रितवान् । उगन्तानां च - युत्वा, युतः, युतवान् । लूत्वा, लूनः, लूनवान् । वृत्वा, वृतः, वृतवान् । तीर्त्वा, तीर्णः, तीर्णवान् । शर्युक इति किम् विदितः । कितीति किम् श्रयिता, श्रयितुम्, श्रयितव्यम् । केचिदत्र द्विककारनिर्देशेन गकारप्रश्लेषं वर्णयन्ति - भूष्णुरित्येवं यथा स्यात्, सौत्रत्वाच्च निर्देशस्य शर्युकः किति इत्यत्र चर्त्वस्यासिद्धत्वमनाश्रित्यं रोरुत्वं न कृतम्, विसर्जनीयश्च कृत इति । ग्लाजिस्थश्च वस्नुः इत्यत्र स्था आ इत्याकारप्रश्लेषेण स्थास्नोः सिद्धत्वान्न किञ्चिदेतत् । उपदेशे इत्येव - तीर्ण इत्यत्रापि यथा स्यात् । इत्त्वे हि कृते रपत्वे च न स्यात् । मा भूदेवम्, इट् सनि वेति विकल्पे विहिते यस्य विभाषा इति निष्ठायां प्रतिषेधो भवतिष्यति कस्य पुनः सा विभाषा ॠतः । यद्येवम्, इत्त्वे हि कृते नायमृकारान्तो भवतिष्यति स्थानिवद्भावाद्भविष्यति । अल्विधौ स्थानिवद्भावः, अल्विधिश्चायम् तस्मादनुवर्त्तयितव्यमुपदेश इति । तथा च सति - जागरितः, जागरितवानित्यत्रापि प्राप्नोति, तदर्थम् एकाचः इत्यनुवर्त्तयिव्यम् । ऊर्णोतेस्तु - वाच्य ऊर्णोर्णुवद्भावो तयङ्प्रसिद्धः प्रयोजनम् । आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात् ।। प्रोर्णुतः । प्रोर्णुतवान् ।।

सनि ग्रहगुहोश्च ।। 7 - 2 - 12 ।।

ग्रह, गुह - इत्येतयोरुगन्तानां च सनि प्रत्यये परत इमागमो न भवति । जिघृक्षिति । उगन्तानां च रुरुषति । लुलूषति । सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् इति विकल्पविधानात् श्रयतिरत्र नानुकृष्यते । ग्रहेर्नित्यं प्राप्तः । गुहेरुदित्वाद् विकल्पः ।।

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ।। 7 - 2 - 13 ।।

कु, सृ, भृ, वृ, स्तु, द्रु, स्रु, श्रु - इत्येतेषां लिटि प्रत्यय इडागमो न भवति । कृ - चकृव, चकृम । सृ - ससृव, ससृम । भृ - बभृव, बभृम । वृञ् - ववृव, ववृम । वृङ् - ववृवहे, ववृमहे । स्तु - तुष्टुव, तुष्टुम । द्रु - दुद्रुव, दुद्रुम । स्रु - सुस्रुव, सुस्रुम । श्रु - शुश्रुव, शुश्रुम । सिद्धे सत्यारम्भो नियमार्थः - कादय एव लिट्यनिटः , ततोऽन्येसेट इति । बिभिदिव, बिभिदिम । लुलुविव, लुलुविम । अनुदात्तोपदेशानामत्र प्रकृत्याश्रयः प्रतिषेधः, वृञ्वृङोस्तु प्रत्ययाश्रयः, तदुभयस्याप्ययं नियमः । वृञो हि थलि ववर्थेति निपातनाद् व्यवस्था । स्तुद्रुस्रुश्रुवां तु ॠतो भारद्वाजस्य इत्यस्मादपि नियमाद् य इट् प्राप्नोति सोऽपि नेष्यते - तुष्टोथ, दुद्रोथ, सुस्रोथ, शुश्रोथ । कृञोऽसुट्कस्येति वक्तव्यम् । ससुट्कस्य इडागमो यथा स्यात् । सञ्चस्करिव । सञ्चस्करिम । ॠतो भारद्वाजस्य इत्येतदप्यसुट्कस्यैवेष्यते - सञ्चस्करिथ ।।

श्वीदितो निष्ठायाम ।। 7 - 2 - 14 ।।

श्वयतेरीदितश्च निष्ठायामिडागमो न भवति । शूनः, शूनवान्। ईदितः - ओलजी , लग्नः, लग्नवान। ओविची - उद्विग्नाः, उद्विग्नवान् । ओदित्तश्च इति

निष्ठातकारस्य नकारः । दीपी - दीप्तः , दीप्तवान् ।डीङस्त्वोदितां मध्ये पाठो ज्ञापको निष्ठायामनिट्त्वस्य । स हि नत्वार्थः, नत्वं च निष्ठातोऽनन्तरस्य विधीयते । उड्डीनः । उड्डीनवान् । निष्ठायामित्यधिकारः आर्धधातुकस्येड्वलादेः इति यावत् ।।

यस्य विभाषा ।। 7 - 2 - 15 ।।

यस्य धातोर्विभाषा क्वचिदिडुक्तस्तस्य निष्ठायां परत इडागमो न भवति । वक्ष्यति --स्वरतिसूतिसूयतिधूञूदितो वा विधूतः, विधूतवान् । गुहू - गुढः, गूढवान् । उदितो वा - वृद्धः, वृद्धवान् । तनिपतिदरिद्राणामुपसंख्यानम् इति पतेर्विभाषितेट्कस्यापि द्वितीयाश्रितातीतपतित इति निपातनादिडागमः ।।

आदितश्च ।। 7 - 2 - 16 ।।

आदितश्च धातोर्नष्ठायामिडागमो न भवति । ञिमिदा -- मिन्नः, मिन्नवान् । ञिक्ष्विदा - क्ष्विण्णः, क्ष्विण्णवान् । ञिष्विदा - स्विन्नः, स्विन्नवान् । चकारोऽनुक्तसमुच्चयार्थः । आथश्वस्तः । वान्तः । योगविभागकरणं किमर्थम्, आदितश्च विभाषा भावादिकर्मणोः इत्येवं पठितव्यम्, अन्यत्र हि भावादिकर्मभ्याम् यस्य विभाषा इति प्रतिषेधो भविष्यति ज्ञापनार्थमेतत् । ज्ञापयति - यदुपाधोर्विभाषा तदुपाधेः प्रतिषेधः इति । तेन विभाषा गमहनविदविशाम् इत्यत्र विदेर्लाभार्थस्य विभाषेति ज्ञानार्थस्य प्रतिषेधो न भवति । विदितः । विदितवान् ।।

विभाषा भावादिकर्मणोः ।। 7 - 2 - 17 ।।

भ्वे आदिकर्णणि च आदितो धातोर्विभाषा निष्ठायमिडागमो न भवति । मिन्नमनेन, मेदितमनेन । प्रमिन्नः, प्रमेदितः । सौनागाः कर्मणि निष्ठायां शकेरिटमिच्छन्ति विकल्पेन । शकितो घटः कर्तुम् । शक्तो घटः कर्तुम् । भावे न भवत्येव - शक्तमनेन । अस्यतेर्भावि - असितमनेन । आदिकर्मणि च न भवत्येव- अस्यः काण्डः ।।

क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमः सक्ताविस्पष्टस्वरानायासभूशेषु ।। 7- 2- 18।।

क्षुब्ध, स्वान्त, धवान्त, लग्न, म्लिष्ट, विरिब्ध, फाण्ट, बाढ - इत्येते निपात्यन्ते यथासंख्यं मन्थ, मनः, तमः,

सक्त, अविस्पष्ट, स्वर, अनायास , भृश - इत्येतेष्वर्थेषु । क्षुब्ध इति भवति मन्थाभिधानं चेत् । क्षुब्धो मन्थः ।

क्षुभितमन्यत् । क्षुभितं मन्थेन, क्षुब्धा गिरिनदी - इत्येवमाद्युपमानाद्भविष्यति । स्वान्तमिति मनोऽभिधानं चेत् । स्वनितमन्यत्, स्वनितो मृदङ्गः । स्वनितं मनसा । ध्वान्तमिति भवति तलोऽभिधानं चेत् । ध्वनितमन्यत् । द्वनितो मृदङ्गः । ध्वनितं तमसा । लग्वमिति भवति सक्तं चेत् । लगितमन्यत् । म्लिष्टमिति भवति अविस्पष्टं चेत् । म्लेच्छितमन्यत् । इत्त्वमप्यकारस्य निपातनादेव । विरिब्धमिति स्वरश्चेत् । विरेभितमन्यत् । रेभृ शब्दे इत्यस्यैतन्निपातनम् । अन्ये तु विरिभितमन्यदिति पठन्ति । रभिं सौत्रं धातुं पठन्ति, ते विरिभतमिति प्रत्युदाहरन्ति । फाण्टमिति भवत्यनायासश्चेत् । फाणितमन्यत् । यदश्रृतम्पिष्टं च कषायमुदकसम्पकर्कमात्राद् विभक्तरसमीषदुष्णं तत्फाण्टम् । तदल्पप्रयत्नसाध्यत्वादनायासेन लक्ष्यते । बाढमिति भवति भृशं चेत् । बाहितमन्यत् । बाह्ट प्रयत्ने इत्यस्य धातोरेतन्निपातनम् । अतिशयश्च भृशमिहोच्यते ।।

धृषिशसी वैयात्ये ।। 7 - 2 - 19 ।।

वियातस्य भवो वैयात्यम् - प्रागल्भ्यम्, अविनीतता । तत्र धृष, शस - इत्येतयोर्निष्ठायमिडागमो न भवति । धृष्टेऽयम् । विशस्तोऽयम् । धृषेः आदितश्च इति प्रतिषेधः सिद्ध एव, शसेरपि उदितो वा, यस्य विभाषा इति नियमार्थ वचनम् - धृषिशस्योर्वैयात्ये एवड् न भवति । भावादिकर्णणोरपि वैयात्ये धृषिर्नास्ति । धृष्टः । विशस्तः । वैयात्य इति किम् धर्षितः । विशसितः ।।

दृढः स्थूलबलयोः ।। 7 - 2 - 20 ।।

दृढः इति निपात्यते, स्थूले बलवति चार्थे । दृढः स्थूलः । दृढो बलवान् । किमत्र निपात्यते दृंहेः क्तप्रत्ये इडाभावः, हंकारनकारयोर्लोपः, परस्य ढत्वम् । अथ दृहिः प्रकृत्यन्तरमस्ति तत्राप्येतदेव सर्वं नलोपवर्जम्, नकारस्याभावात् । हलोपनिपातनं पूर्वत्रासिद्धत्वनिवृत्त्यर्थम् । ढलोपे हि सति तस्य पूर्वत्रासिद्धत्वाद् द्रढिमा, द्रढीयान्, द्रढीयतीत्यत्र र ऋतो हलादेर्लघोः इति रेफो न स्यात्, तइह च परिद्रढय्य गत इति ल्यपि लघुपूर्वात् इति णेरयादेशे न स्यात्, इह च परिदृढस्यापत्यं पारिदृढी कन्येति गुरुपोत्तमलक्षणः ष्यङ् च प्रसज्येत । स्थूलबलयोरिति किम् दृंहितम्, दृहितम् ।।

प्रभौ परिवृढः ।। 7 - 2 - 21 ।।

परिवृढः इति निपात्यते प्रभुश्चेद्भवति । परिवृढः कुटुम्बी । पूर्वेण तुल्यमेतत् । वृंहेर्निपातनम् । वृहिश्च यदि प्रकृत्यन्तरमस्ति, तस्यापि तदेव सर्वम् । हलोपनिपातनस्य च तदेव प्रयोजनम् । परिव्राढयति । परिव्रढय्य गतः । पारिवृढी कन्येति । परिवृढमाचष्टे इति विगृह्य वृढशब्दादेव णिजुत्पद्यते । संग्रामयतेरेव सोपसर्गाण्णिजुत्पत्तिरिष्यते नान्यस्मादिति । तथा सति परिव्रढयतीति तिङ्ङतिङ इति नघातो भवति । परिव्रढय्येत्यत्र परिशब्दस्य क्त्वाप्रत्ययान्तेन समासे सति ल्यबादेशः सिद्धो भवति । प्रभाविति किम् परिवृंहितम्, परिवृहितम् ।।

कृच्छ्रगहनयोः कषः ।। 7 - 2 - 22 ।।

कृच्छ्र, गहन - इत्येतयोरर्थयोः कषेर्धातोर्निष्ठायामिडागमो न भवति । कष्टोऽग्निः । कष्टं व्याकरणम् । ततोऽपि कष्टतराणि समानि । कृच्छ्रम् - दुखम्, तत्कारणमप्यग्न्यादिकं कृच्छ्रमित्युच्यते । गहने - कष्टनि वनानि । कष्टाः पर्वताः । कृच्छ्रगहनयोरिति किम् कषितं सुवर्णम् ।।

घुषिरविशब्दने ।। 7 - 2 - 23 ।।

घुषेर्धातोरविशब्दनेऽर्थे निष्ठायामिडागमो न भवति । घुष्टा रज्जुः । घुष्टौ पादौ । अविशब्दन इति किम् अवघुषितं वाक्यमाह । विशब्दनम् - प्रतिज्ञानम् । गुषिरशब्दार्थे इति भूवादिषु पठ्यते, घुषिरविशब्दने इति चुरादिषु तयोरिह सामान्येन ग्रहणम् । विशब्दनप्रतिषेधश्च ज्ञापकः -

चुरादिणिज्विशब्दनार्थस्यानित्यः इति । तेनायमपि प्रयोग उपपन्नो भवति - महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः इति । स्वाभिप्रायं शब्देनाविष्कृतवन्त इत्यर्थः ।।

अर्देः संनिविभ्यः ।। 7 - 2 - 24 ।।

सम्, नि, वि - इत्येतेभ्य उत्तरस्यार्देर्निष्ठायामिडागमो न भवति । समर्णः । न्यर्णः । व्यर्णः । अर्देरिति किम्
समेधितः । संनिविभ्य इति किम् अर्दितः ।।

अभेश्चाविदूर्ये ।। 7 - 2 - 25 ।।

अभिशब्दादुत्तरस्यार्देराविदूर्येऽर्थे निष्ठायामिडागमो न भवति । अभ्यर्णा सेना । अभ्यर्णा शरत् । आविदूर्य इति किम् अभ्यर्दितो वृषलः । शीतेन पीडित इत्यर्थः । विदूरम् - विप्रकृष्टम्, ततोऽन्यदविदूरम्, तस्य भाव आविदूर्यम् । एतस्मादेव निपातनात् न नञ्पूर्वात्तत्पुरुषात् तइत्युत्तरस्य भावप्रत्ययस्य प्रतिषेधो न भवति ।।

णेरध्ययने वृत्तम् ।। 7 - 2 - 26 ।।

ण्यन्तस्य वृत्तेर्निष्ठायामध्ययनार्थे वृत्तमितीडभावो णिलुक्च निपात्यते । वृत्तो गुणो देवदत्तेन । वृत्तं पारायणं देवदत्तेन । अध्ययन इति किम् वर्त्तितमन्यत् । वृतिरयमकर्मकः, स ण्यर्थे वर्त्तमानः सकर्मको भवति । तेन विर्वुत्तम् इति हि प्रकृतेरेव कर्मणि क्तप्रत्ययो दृश्यते । तद्वदिहापि ण्यर्थवृत्तेरेव च वृतेः वृत्तो गुणो देवदेत्तेनेति भविष्यतीति निपातनमनर्थकम् तत्क्रियते - यदापि णिचैव ण्यर्थोऽभिधीयते तदा वर्त्तितमित्यध्ययने मा भूदिति केचित् । अपरे तु- वर्त्तिततो गुणो देवदेत्तेन तइत्यपीच्छन्ति ।।

वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ।। 7 - 2 - 27 ।।

णेः इत्यनुवर्त्तते । दम्, शम्, पूरी, दस्, स्पस्, छद्, ज्ञप् - इत्येतेषां ण्यन्तानं धातूनां वा अनट्त्वं निपात्यते । दगान्तः, दमितः शान्तः, शमितः । पूर्णः पूरितः । दस्तः , दासितः । स्पष्टः, स्पाशितः । छन्नः. छादितः । ज्ञप्तः, ज्ञपितः । इट्प्रतिषेधो णिलुक्च निपात्यते । ज्ञपेस्तु भरज्ञपिसनाम् इति विकल्पविधानाद् यस्य विभाषा इति नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं निपातनम् ।।

रुष्यमत्वरसंघुषास्वनाम् ।। 7 - 2 - 28 ।।

वा इति वर्तते । रुषि, अम, त्वर, सङ्घुष, आस्वन - इत्येतेषां निष्ठायां वा इडागमो न भवति । रुष्टः, रुषितः । तीषसहलुभरुषरिषः इति विकल्पविधानाद् यस्य विभाषा इति प्रतिषेधे प्राप्ते विकल्पार्थं वचनम् । अम् - अभ्यान्तः , अभ्यमितः । त्वर - तूर्णः, त्वरितः । आदितश्च इति प्रतिषधे प्राप्ते वचनम् । सङ्घुष - सक्षङ्घुष्टौ पादौ, सङ्घुषितौ पादौ । सङ्घुष्टं वाक्यमाह, सङ्घुषितं वाक्यमागह । सङ्घुष्टौ दम्यौ, सह्घुषितौ दम्यौ । सम्पूर्वस्य घुषेरविशब्दनेऽपि परत्वादयमेव विकल्पो भवति । आस्वन् - आस्वान्तो देवदत्तः,आस्वनितो देवदत्तः । आस्वान्तं मनः, अस्वनितं मनः । अङ्पूर्वस्य स्वनर्मनोभिधानेऽपि परत्वादयं विकल्पः क्षुब्धस्वान्त इति निपातनं बाधते ।।

हृषेर्लोमसु ।। 7 - 2 - 29 ।।

लोमसु वर्त्तमानस्य हृषेर्निष्ठायां वा इडागमो न भवति । हृष्टानि लोमानि, हृषितानि लोमानि । हृष्टं लोमभिः, हृषितं लोमभिः । हृष्टा, केशाः, हृशिताः केशाः । हृष्टं केशैः, हृषितं केशैः । हृषु अलीकै इत्युदित्त्वान्निष्ठायामनिट् , हृष तुष्टौ इत्ययं सेट् तयोरुभयोरिह ग्रहणमित्युभयत्रविभाषेयम् । लोमानि मूर्धजानि, अङ्गजानि च सामान्येन गृह्यन्ते यथो - लोमनखं स्पृष्ट्वा शौचं कर्त्तव्यम् इति । तद्विषये च हर्षे वर्त्तमानो लोमसु वर्त्तत इत्युच्यते । लोमस्विति किम् हृष्टो देवदत्त इत्यलीकार्थस्य, हृषितो देवदत्त इति तुष्ट्यर्थस्य । विस्मितप्रतिघातयोश्चेति वक्तव्य । हृष्टो देवदत्तः, हृषितो देवदत्तः । विस्मित इतियर्थः । हृष्टा दन्ताः , हृष्टो देवदत्तः, हृषितो देवदत्तः । विस्मित इत्यर्थः । हृषटा दन्ताः, हृषिता दन्ताः । प्रतिहता इत्यर्थः ।।

अपचितश्च ।। 7 - 2 - 30 ।।

अपचितः इति वा निपात्यते । अपपूर्वस्य चायतेर्निष्टायामनिट्त्वं चिभावश्च निपात्यते । अपचितोऽनेन गुरुः । अपचायितोऽनेन गुरुः । क्तिनि नित्यमिति वक्तव्यम् । क्तिनि नित्यं चिभावो निपात्यते । अपचितिः ।।

ह्रु ह्वरेश्छन्दसि ।। 7 - 2 - 31 ।।

ह्वरतेर्धातोर्निष्ठायां छन्दसि ह्रु इत्ययमादेशो भवति । ह्रुतस्य चाह्रुतस्य च । अह्रुतमसि हविर्धनम् । छन्दसीति किम् ह्वृतम् ।

अपरिह्वृताश्च । 7 - 2 - 32 ।।

अकपरिह्वृताः निपात्यते छन्दसि विषये । ह्रु इत्येतस्यादेशस्याभावो निपात्यते । अपरिह्वृताः सनुयाम वाजम् ।।

सोमे ह्वरितः ।। 7 - 2 - 33 ।।

ह्वरितः इति ह्वरतेर्निष्ठायामिडागमो गुणश्च निपात्यते छन्दसि विषये, सोमश्चेद्भवति । मा नः सोमो ह्वरितः, विह्वरितस्त्वम् ।।

ग्रसितस्कभितस्कभितोक्षभितचत्तविकस्ता विशस्तृशंस्तृशास्तृलरुतृतरुतृवरुतृवरुतृवरुत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीतिच ।।7 - 2 - 34 ।।

ग्रसित स्कभित, स्तभित, उत्तभित, चत्त, विकस्त, विशस्तृ, शंस्तृ, शास्तृ, तरुत्तृ, तरुतृ, वरुतृ, वरुतृ, वरुत्रीः, उज्ज्वलिति, क्षिरिति, वमिति, अमिति - इत्येतानि छन्दसि निपात्यन्ते । तत्र ग्रसितस्कभितस्तभतोत्तभितेति - ग्रसु, स्कन्भु, स्तन्भु इत्येतेषामुदित्वान्निष्ठायामिट्प्रतिषेधे प्राप्ते इडागमो निपात्यते । ग्रसितं वा एतत्सोमस्य । ग्रस्तमिति भाषायाम । स्कभित - विष्कभिते अजरे । विष्कब्ध इति भाषायाम् । स्तभित - येन स्वस्तभितम् । स्तब्धमिति

भाषायाम् । उत्तभित - सत्येनोत्तभिता भूमिः । उत्तब्धेति भाषायाम । उत्तभितेति उत्पूर्स्य निपातनसामर्थ्यादन्योपसर्गपूर्वः स्तभितशब्दो न भवति । चत्त विकस्तेति - चतेः, कसेश्च विपूर्वस्य निष्ठायामिडभावो निपात्यते । चत्ता वर्षेण विद्युत् । चतितेति भाषायाम् । वकस्त - उत्तानाया हृदयं यद् विकस्तम् । विकसितमिति भाषायाम् । निपातनं बहुत्वपेक्षम् , विकस्ताः इति बहुवचनं कृतम् । अपरे,ु तु निपातनेषु प्रत्येकं विभक्तिनिर्देशः । विशस्तृ, शंस्तृ, शास्त्रिति - शसेर्विपूर्वस्य, शंसेः, शसेश्च तृचि इडभावो निपात्यते । विशस्तृ - एकस्त्वष्टुरश्वस्याविशस्ता । विशसितेति भाषायाम् । शंस्तृ - उत शंस्ता सुविप्रः । शंसितेति भाषायाम् । शास्तृ - प्रशास्ता । प्रशासितमिति भाषायाम् । तरुतृतरुतृवरुतृवरुतृवरुत्रीरिति - तरतेः,
वृङ्वृञोश्च तृचि उट्, ऊट् - इत्येतावागमौ निपात्येते । तरुतारं रथानाम्, तरुतारम् । तरितारम्, तरीतारमिति भाषायाम् । वरुतारं रथानाम्, वरुतारं रथानाम् । वरितारम्, वरीतारमिति भाषायाम्। वरुत्रीष्ट्वा देवीर्विश्वदेव्यावती । जसि पूर्वसवर्णौच्चारणं प्रयोगदर्शनार्थम् । अतन्त्रं चैतत्, इदमपि हि भवति - अहोरात्राणि वै3 वरुत्र्य इति । छान्दसिकमत्र ह्रस्वत्वम् । प्रवञ्चार्थमेव च ङीबन्तस्य निपातनम्, वरुतृशब्दो ही निपातितः, तत एव ङीपि सति सिद्धो वरुत्रीशब्दः । उज्ज्वलिति, क्षरिति, क्षमिति, वमिति, अमितीति च - ज्वलतेरुत्पुर्वस्य, क्षर, क्षम, वम, अम - इत्येतेषां च तिपि शब इकारादेशो निपात्यते, शपो लुग्वा, इडागमः । अग्निरुज्ज्वलिति । उज्ज्वलतीति भाषायाम् । क्षमिति - स्तोमं क्षमिति । क्षमतीति भाषायाम् । वमिति - यः सोमं वमिति । वमतीति भाषायाम्। अमिति - अभ्यमिति वरुणः । अभ्यमतीति भाषायाम् । इतिकरणं प्रदर्शनार्थम्, तन क्वचिदीकारो भवति - रविमभ्यमीति वरुणः इत्यपि हि वेदे पठ्यते ।।

आर्धधातुकस्येड्वलादेः ।। 7 - 2 0 35 ।।

छन्दसि कइति निवृत्तम् । आर्धधातुकस्य वलादेरिडागमो भवति । लविता, लवितुम्, लवितव्यम् । पविता, पवितुम्, पवितव्यम् । आर्धधातुकस्येति किम् आस्ते । शेते । वस्ते । रुदादिभ्यः सार्वधातुके इत्येतस्मिन्नियमार्थे विज्ञायमाने प्रतिपत्तिगौरवं भवतीति आर्धधातुकग्रहणं क्रियते । वलादेरिति किम् लव्यम्, पव्यम् । लवनीयम्, पवनीयम् । इडिति वर्त्तमाने पुनरिड्ग्रहणं प्रतिषेधनिवृत्त्यर्थम् ।।

स्नुक्रमोरनात्मनेपदनिमित्ते ।। 7 - 2 - 36 ।।

नियमार्थमिदम् । स्नुक्रमोरार्धधातुकस्य वलादेरिडागमो भवति, न चेत्स्नुक्रमौ आत्मनेपदस्य निमित्तं भवतः । क्व च तावात्मनेपदस्य निमित्तम् यत्रात्मनेपदं तदाश्रयं भवति - भावकर्म - कर्तुकर्म - कर्मव्यतिहाराः, क्रमेर्वृत्त्यादयश्च । तेनायं सत्यात्मनेपदे प्रतिषेधो भवति, नासतीति । प्रतिषेधफलं चदं सूत्रम् । स्नुक्रमोरुदित्तवादिट् सिद्ध एव । प्रस्नविता, प्रस्नवितुम्, प्रस्नवितव्यम् । प्रक्रमिता, प्रक्रमितुम्, प्रक्रमितव्यम् ।
अनात्मनेपदनिमित्ते इति किम् प्रस्नोषीष्ट, प्रक्रंसीष्ट । प्रस्नोष्यते, प्रक्रंस्यते । प्रसुस्नूषिष्यते , प्रचिक्रंसिष्यते । सर्वत्रैवात्र स्नौतिः, क्रमिश्चात्मनेपदस्य निमित्तम् । सनन्तादपि हि पूर्ववत्सनः इत्यात्मनेपदं विधीयते ।निमित्तग्रहणं किम् सीयुडादेस्तत्परपरस्य च प्रतिषेधार्थम् । इह तु प्रस्नवितेवाचरतीति प्रस्नवित्रीयत इति क्यङन्तमात्मनेपदस्य निमित्तम् , न स्नौतिः । क्रमेस्तु कर्तर्यात्मनेपदविषयादसत्यात्मनेपदे कृति प्रतिषेधो
वक्तव्यः । प्रक्रन्ता । उपक्रन्ता । कर्त्तरीति किम् प्रक्रमितव्यम् । उपक्रमितव्यम् । आत्मनेपदविषयादिति किम् निष्क्रमिता । स्नौतेः सनि किति च प्रत्यये सनि ग्रहगुहौश्च श्र्युकः किति, इत्येव प्रतिषेधौ भवति - प्रसुस्नूषति । प्रस्नुतः । प्रस्नुतवान् ।।

ग्रहोऽलिटि दीर्घः ।। 7 - 2 - 37 ।।

ग्रह उत्तरस्य इटः अलिटि दीर्घो भवति । ग्रहीता, ग्रहोतुम्, ग्रहीतव्यम् ।अलिटीति किम् जगृहिव । जगृहिम । प्रकृतस्येटो दीर्घत्वम्, इदं चिण्वदिटो न भवति -- ग्राहिता, ग्राहिष्यते ।।

वृतो वा ।। 7 - 2 - 38 ।।

वृ इति वृङ्वृञोः सामान्येन ग्रहणम् । तस्मादुत्तरस्य, ॠकारान्तेभ्यश्चेटो वा दीर्घो भवति । वरिता, वरीता। प्रावरिता, प्रावरीता। ॠकारान्तेभ्यः - तरिता, तरीता । आस्तरिता, आस्तरीता । वृत इति किम् करिष्यति । हरिष्यति । अलिटीत्येव - ववरिथ । तेरिथ।।

न लिङि ।। 7 - 2 - 39 ।।

वृत उत्तरस्य इटो लिङि दीर्घो न भवति । विवरिषीष्ट । प्रावरिषीष्ट । आस्तरिषीष्ट । विस्तरिषीष्ट ।।

सिचि च परस्मैपदेषु ।। 7 - 2 - 40 ।।

परस्मैपदपरे सिचि वृत उत्तरस्य इटो दीर्घो न भवति । प्रवारिष्टाम्, प्रवारिषुः । अतारिष्टाम्, तअतारिषुः । आस्तारिष्टाम् , आस्तारिषुः । परस्मैपदेष्विति किम् प्रावरिष्ट, प्रवरीष्ट ।

इट् सानि वा ।। 7 - 2 - 41 ।।

वृतः सनो वा इडागमो भवति । वुवूर्षति । विवरिषते, विवरीषते । प्रवुवूर्षति, प्राविवरिषति, प्राविवरीषति । ॠकारान्तेभ्यः - तितीर्षति, तितरिषति, तितरीषति । आतिस्तीर्षति, आतिस्तरिषति, आतिस्तरीषति । सनि ग्रहगुहौश्च इति इट्प्रतिषेधे प्राप्ते पक्षे इडागमो विधीयते । इटश्च वृतो वा इति पक्षे दीर्घः । चिकीर्षति, जिहीर्षति - इत्यत्रोपदेशाधिकारात्, लाक्षणिकत्वाच्च इडागमो न भवति ।।

लिङ्सिचोरात्मनेपदेषु ।। 7 - 2 - 42 ।।

वृतो लिङि सिचि च आत्मनेपदपरे वा इडागमो भवति । वृषीष्ट, वरिषीष्ट। प्रावृषीष्ट, प्रावरिषीष्ट । आस्तरिषीष्ट, आस्तीर्षीष्ट। सिचि खल्वपि - अवृत,

अवरिष्ट, अवरीष्ट । प्रावृत, प्रावरिष्ट, प्रवरीष्ट । आस्तीर्ष्ट, आस्तरिष्ट, आस्तरीष्ट । आत्मनेपदेष्विति किम् प्रवारिष्टाम्, प्रवारिषुः । लिङः प्रत्युदाहरणं न दर्शितम् असम्भवात्, यासुटोऽवलादित्वादिति ।।

ऋतश्च संयोगादेः ।। 7 - 2 - 43 ।।

ऋदन्ताद्धातोः संयोगादेरुत्तरयोर्लिङ्सिचोरात्मनेपदेशु वा इडागमो भवति । ध्वृषीष्ट, धवरिषीष्ट । स्मृषीष्ट, स्मरिषीष्ट । अध्वृषाताम्, अध्वरिषाताम्। अस्मृषाताम्, अस्मरिषाताम् । ऋत इति किम् च्योषीष्ट, प्लोषीष्ट । अच्योष्ट, अप्लोष्ट । संयोगादेरिति किम् कृषीष्ट, ह्वषीष्ट । अकृत, अह्वत । अत्मनेपदेषु इत्ये - अध्वार्षीत् , अस्मार्षीत् । संस्कृषीष्ट, समस्कृत -- इत्येत्रोपदेशाधिकारात्, अभाक्तत्वाच्च सुट इडागमो न भवति ।।

स्वरतिसूतिसूयतिधूञूदितो वा ।। 7 - 2 - 44 ।।

स्वरित, सूति, सूयति, धूञ् - इत्येतेभ्यः, ऊदि द्भ्यश्चोत्तरस्य वलोदेरार्धधातुकस्य वा इडागमो भवति । स्वर्त्ता, स्वरिता । सूतिप्रसोता, प्रसविता । सूयति - सोता, सविता । धूञ् - धोता , धविता । ऊदिद्भ्यः खल्वपि - गाहू । विगाढा, विगाहिता । गुपू - गोप्ता , गोपिता ।वा इति वर्त्तमाने पुनर्वाग्रहणं लिङ्सिचोर्निवृत्त्यर्थम् । सूतिसूयत्योर्विकरणनिर्देशः षू प्रेरणे इत्यस्य निवृत्त्यर्थः । धूञ् इति सानुयन्धकस्य निर्देशः - धू निधूनने इत्येस्य निवृत्त्यर्थः । सविता, धुवितेत्येव नित्यमेतयोर्भवति । स्वलतेरेतस्माद्विकल्पाद् ऋद्धनोः स्ये इत्येतद्भवति विप्रतिषेधेन - स्वरिष्यति । किति तु प्रत्यये श्र्युकः किति इति नित्यः प्रतिषेधो भवति पूर्वयिप्रतिषेधेन - स्वृत्वा, सूत्वा, धूत्वा ।।

रधादिभ्यश्च ।। 7 - 2 - 45 ।।

रथ हिंसासंसिद्ध्योः इत्येवमादिभ्योऽष्टाभ्य उत्तरस्य वलादेरार्धधातुकस्य वा इडागमो भवति । रद्धा, रधिता ।

नंष्टा, नशिता ।त्रप्ता, तर्प्ता, तर्पिता । द्रपता, द्रर्प्ता , दर्पिता । द्रोग्धा, द्रोढा, द्रोहिता। मोग्धा, मोढा, मोहिता। स्नोग्धा, स्नोढा, स्नोहिता । स्नेग्धा, सेनेढा, स्नेहिता । क्रादिनियमाल्लिटि रधादिभ्यः परत्वाद्विकल्पं केचिदिच्छन्ति । अपरे पुनराहुः - पुर्वविधेरिण्निषेधविधानसामर्थ्याद् बलीयस्त्वं प्रतिषेधनियमस्येति नित्यमिटा भवतितव्यम् - ररन्धिव, ररन्धिमेति भवति ।।

निरः कुषः ।। 7 - 2 - 46 ।।

निर् इत्येवम्पूर्वात् कुष उत्तरस्य वलादेरार्धधातुकस्य वा इडागमो भवति । निष्कोष्टा, निष्कोषिता। निष्कोष्टुम्, निष्कोषितुम् । निष्कोष्टव्यम्, निष्कोषितव्यम् । निर इति किम् को ता, कोषितुम्, कोषितव्यम् । निसः इति वक्तव्ये निरः इति निर्देशेन रेफान्तमुपसर्गान्तरमस्तीति ज्ञाप्यते । तस्य हि निलयनमिति उपसर्गस्यायतौ इति लत्वं भवति । निसो हि रुत्वस्यासिद्धत्वाल्लत्वं न स्यात् ।।

इण्निष्ठायाम् ।। 7 - 2 - 47 ।।

निरः कुषो निष्ठायामिडागमो भवति । निष्कुषितः । निष्कुषितवान् । इड्ग्रहणं नित्यार्थम् । आरम्भो हि यस्य विभाषा इत्यस्य बाधकः अन्यथा हि विकल्पार्थ एव स्याद् । अत्रैव नित्यमिडागमः, उत्तरत्र विकल्प एवेति ।।

तीषसहलुभरुषरिषः ।। 7 - 2 - 48 ।।

तकारादावार्धधातुके इषु, सह, लुभ, रुष, रिष - इत्येतेभ्यो वा इडागमो भवति । इषु - एष्टा, एषिता । इषु इच्छायाम् - इत्यस्यायं विकल्प इष्यते । यस्तु इष गतौ इति दैवादिकः, तस्य - प्रेषिता, प्रेषितुम्, प्रेषितव्यमिति नित्यं भवति । योऽपि इष आभीक्ष्ण्ये इति क्र्यादौ पठ्यते, तस्याप्येवमेव । तदर्थमेव तीषसह इति सूत्र केचिदुदितमिषं पठन्ति । सह - सोढा, सहिता । लुभ - लोब्धा, लोभिता। रुष - रोष्टा, रोषिता। रिष - रेष्टा, रेषिता । तीति किम् एषिष्यति ।।

सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ।। 7 - 2 - 49 ।।

इवन्तानाम् धातूनाम् , ऋधु, भ्रस्ज, दम्भु , श्रि, स्वृ, यू, ऊर्णु, भर, ज्ञपि, सन् - इत्येतेषां च सनि वा इडागमो भवति । इवन्तानाम् - दिदेविषति, दुद्यूषति । सिसेविषति, सुस्यूषति । ऋध् - अर्दिधिषति, ईर्त्सति ।

भ्रस्ज - बिभ्रज्जिषति, बिभ्रक्षति, बिभर्ज्जिषति, बिभर्क्षति । दम्भु -- दिदिम्भिषति, धिप्सति, धीप्सती । श्रि -- उच्छिश्रयिषति, उच्छिश्रीषति । स्वृ -- सिस्वरिषति, सुस्वूर्षति । यु -- यियविषति , युयूषति । ऊर्णु - प्रोर्णुनविषति, प्रोर्णुनुविषति, प्रोर्णुनूषति । भर इति भृञित्येतस्य भौवादिकस्य ग्रहणम् शपा निर्देशात् । बिभरिषति, बुभुर्षति । ज्ञपि - जिज्ञपयिषति, ज्ञीप्सति । सन् - सिसनषति, सिषासति । केचिदत्र भारज्ञपिसनितनिपतिदरिद्राणाम् इति पठन्ति । तितनिषति, तितंसति , तितांसति । पिपतिषति, पित्सति । दिदरिद्रिषति, दिदरिद्रासति । सनीति किम् देवता । भ्रष्टा ।।

क्लिशः क्त्वानिष्ठयोः ।। 7 - 2 - 50 ।।

क्लिशः क्त्वानिष्ठयोर्वा इडागमो भवति । क्लिष्ट्वा, क्लिशित्वा । क्लिष्टः क्लिष्टवान् । क्लिशितः, क्लिशितवान् । चक्लिशू विबाधने - इत्येस्य क्त्वायां विकल्पः सिद्ध एव, निष्ठायां तु यस्य विभाषा इति प्रतिषेधः प्राप्नोति । क्लिश उपतापे - इत्यस्य तु क्त्वायाम् , निष्ठायां च नित्यमिडागमः प्राप्नोति, तदर्थ क्त्वाग्रहणं क्रियते ।।

पूङश्च ।। 7 - 2 - 51 ।।

पूङ्श्च क्त्वानिष्ठयोर्वा इडागमो भवति । पूत्वा, पवित्वा । सोमोऽतिपूतः, सोमोऽतिपवितः । पूतवान्, पवितवान् । श्र्युकः किति इति प्रतिषेधे प्राप्ते

विकल्पो विधीयते ।।

वसतिक्षुधोरिट् ।। 7 - 2 - 52 ।।

वसतेः क्षुधेश्च क्त्वानिष्ठयोरिडागमो भवति । उषित्वा । उषितः । उषितवान् । क्षुधित्वा । क्षुधितः । क्षुधितवान् । वसति इति विकरणनिर्देशः धातुनिर्धेशार्थ एव । वस्तेस्तूदात्तत्वादेव भवितव्यमिटा । पुनरिड्ग्रहणं नित्यार्थम् ।।

अञ्चेः पूजायाम् ।। 7 - 2 - 53 ।।

अञ्चेः पूजायामर्थे क्त्वानिष्ठयोरिडागमो भवति । अञ्चित्वा जानु जुहोति । अञ्चिता अस्य गुरवः । उदितो वा इति क्त्वाप्रत्यये विकल्पः प्राप्तः, निष्ठायाम् यस्य विभाषा थइति प्रतिषेधः प्राप्तः, तदर्थमिदं प्रारब्धम् । पूजायामिति किम् उदक्तमुदकं कूपात् । उद्धृतमित्यर्थः ।।

लुभो विमोहने ।। 7 - 2 - 54 ।।

लुभो विमोहनेऽर्थे वर्त्तमानात् क्तवानिष्ठयोरिडागमो भवति । लुभित्वा, लोभित्वा । विलुभिताः केशाः । विलुभितः सीमन्तः । विलुभितानि पदानि । विमोहनम् - आकुलीकरणम्, तत्र क्त्वायां तीषसहलुभ इति विकल्पः, निष्टायाम् यस्य विभाषा इति प्रतिषेधः प्राप्तः । विमोहन इति किम् लुब्धो वृषलः । शीतेन पीडित इत्यर्थः । लुब्ध्वा, लुभित्वा , लोभित्वा । गार्ध्ये यथाप्राप्तमेप भवति ।।

जृव्रश्च्योः क्त्वि ।। 7 - 2 - 55 ।।

जृ व्रश्चि - इत्येतयोः क्त्वाप्रत्यये इडागमो भवति । जरित्वा, जरित्वा । व्रश्चित्वा । जृ इत्येतस्य श्र्युकः किति इति प्रतिषेधः प्राप्तो व्रश्चेरुदित्त्वाद्विकल्पः । क्त्वाग्रहणं निष्ठानिवृत्त्यर्थम् ।।

उदितो वा ।। 7 - 2 - 56 ।।

उदितो धातोः क्त्वाप्रत्यये परतो वा इडागमो भवति । समु - शमित्वा, शान्त्वा । तमु - तमित्वा, तान्त्वा । दमु - दमित्वा, दान्त्वा ।।

सेऽसिचि कृतचृतच्छृदतृदनृतः ।। 7 - 2 - 57 ।।

सकारादावसिच्यार्धधातुके कृत, चृत, छृद, तृत, नृद - इत्येतेभ्यो धातुभ्यो वा इडागमो भवति । कृत् -- कर्त्स्यति । अकर्त्स्यत् । चिकृत्सति । कर्तिष्यति । अकर्तिष्यत् । चिकर्तिषति । चृत -- चर्त्स्यति । अचर्त्स्य । चिचृत्सति । चर्तिष्यति । अचर्तिष्यत् । चिचर्तिषति । छृद - छर्त्स्यति । अच्छर्त्स्यत् । चिच्छृत्सति । छर्दिष्यति । अच्छर्दिष्यत् । चिच्छर्दिषति । तृद् -- तर्त्स्यति । अतर्त्स्यत् । तितृत्सति । तर्दिष्यति । अतर्दिष्यत् । तितर्दिषति । नृत् - नर्त्स्यति । अनर्त्स्यत् । निनृत्सति । नर्तिस्यति । अनर्तिष्यत् । निनर्तिषति । से इति किम् कर्तिता । असिचीति किम् अकर्तीत् ।।

गमेरिट् परस्मैपदेषु ।। 7 - 2 - 58 ।।

गमेर्धातोः सकारादेरार्धधातुकस्य परस्मैपदेष्विडागमो भवति । गामिष्यति । अगमिष्यत् । जिगमिषति । गमेरिति किम् चेष्यति । इड्ग्रहणं नित्यार्थम् । परस्मैपदेष्विति किम् संसंसीष्ट । संगंस्यते । संजिगंसते, संजिगंसिष्यते । अधिजिगांसते, अधिजगांसिष्यते । गमेरिङादेशस्य अज्झनगमां सनि इति दीर्घत्वम् । से इत्येव - गन्तास्मि, गन्तास्वः, गान्तास्मः । आत्मनेपदेन समानपदस्थस्य गमेरयमिडागमो नेष्यते । अन्यत्र सर्वत्रैवेष्यते । कृत्यपि हि भवति, परस्मैपदलुकि च - सञ्जिगमिषिता, अधिजिगामिषिता व्याकरणस्य जिगमिष त्वमिति । पदशेषकारस्य पुनरिदं दर्शनम् - गम्युपलत्रणार्थ परसंमैपदग्रहणम् , परस्मैपदेशु यो गमिरुपलक्षितस्तस्मात्सकारादेरार्धधातुकस्येड् भवति । तन्मतेन संजिगंसिता, अधिजिगंसिता व्याकारणस्य - इत्येव भवितव्यम् ।।

न वृद्भ्यश्चतुर्भ्यः ।। 7 - 2 - 59 ।।

वृतादिभ्यश्चतुर्भ्य उत्तरस्य सकारादेरार्धधातुकस्य परस्मैपदेषु इडागमो न भवति । वृत् - वर्त्स्यति । अवर्त्स्यत् । विवृत्सति । वृधू - वर्त्स्यति । अवर्त्स्यत् । विवृत्सति । श्रृधु - शर्त्स्यति । अशर्त्स्यत् । शिश्रृत्सति । स्यन्दू - स्यन्त्स्यति । अस्यन्त्स्यत् । सिस्यन्त्स्यति । चतुर्भ्यः इति न वक्तव्यम् । वृदग्रहणं हि तत्र द्युतादिपरिसमाप्त्यर्थं क्रियते - कृबू समार्थ्ये वृदिति, तदेव यदि वृतादिसमाप्त्यर्थमपि विज्ञायत्, न किञ्चिदनिष्टं प्राप्नोति तत्क्रियते स्यन्दरुदिल्क्षणमन्तरङ्गमपि विकल्पं प्रतिषेधो यथा बाधेतेति । चतुर्ग्रहणे हि सति तात्पर्यण स्यन्दिः सन्निधापितो भवति । परस्मैपदेषु इत्येव । वर्तिष्यते । वर्तिषीष्ट । अवर्तिष्यत । विवर्तिषते । अत्राप्यात्मनेपदेन समानपदस्थेभ्यो वृतादिभ्य इडागम इष्यते । अन्यत्र सर्वत्र प्रतिषेधः । कृत्यपि हि परस्मैपदलुकि च प्रतिषेधो भवति - विवृत्सिता, विवृत्स त्वमिति ।।

तासि च क्लृपः ।। 7 - 2 - 60 ।।

कृप उत्तरस्य तासेः सकारादेश्चार्धधातुकस्य परस्मैपदेषु इडागमो न भवति । श्वः कल्प्ता । कल्प्स्यति । अकल्प्स्यत् । चिक्लृप्सति ।। परस्मैपदेषु इत्येव । कल्पितासे । कल्पिष्यते । कल्पिषीष्ट । अकल्पिष्टत । चिकल्पिषते । क्लृपेरप्यात्मनेपदेन समानपदस्थस्य इडागम इष्यते । अन्यत्र प्रतिषेधः । कृत्यपि हि परस्मैपदलुकि च प्रतिषेधो भवति - चिक्लृप्सिता, चिक्लृप्स त्वमिति ।।

अचस्तास्वत्थल्यनिटो नित्यम् ।। 7 - 2 - 61 ।।

तासौ ये नित्यानिटो धातवोऽजन्ताः तेभ्यस्तचासाविव थलीडागमो न भवति । याता - ययाथ । चेता - चिचेथ । नेता - निनेथ । होता - जुहोथ । अच इति किम् भेत्ता - बिभेदिथ । तास्वदिति किम् लूत्वालुलविथ । थलिति किम् याता - ययिव । ययिम । अनड्ग्रहणं नित्यमित्यनेन विशेषणार्थम् । नित्यग्रहणं किम् विधोता, विधविता विदुधविथ । तासि विभाषितेट्, थलि नित्यमिडागमो भवति । तास्वदिति वतिनिर्द्देशः किमर्थः तासौ सतस्थलि प्रतिषेधार्थः । यो हि तासावसन्, असत्त्वाच्च नित्यानिट्, तस्य थलि प्रतिषेधो न भवति - जघसिथ । उवयिथ । उत्तरसूत्रेऽपि तास्वत् इति वर्त्तते ।

अदादेशो हि घसिः, वेञादेशाश्च वयिस्तासौ नास्ति ।।

उपदेशेऽत्वतः ।। 7 - 2 - 62 ।।

उपदेशे यो धातुरकारवान् तासौ नित्यानिट् तस्मात्तासाविवथलीडागमो न भवति । पक्ता - पपक्थ । यष्टा - इयष्ट । शक्ता - शशक्थ । उपदेशे इति किम् कर्ष्टा - चकर्षिथ । अत्वत इति किम् भेता - भिभेदिथ । तपरकरणं किम् राद्धा - रराधिथ । तास्वदित्येव - जिघृक्षति । जग्रहिथ । नित्यमनिट इत्येव - अङ्क्ता , अञ्चिता - आनञ्जिथ ।।

ऋतो भारद्वाजस्य ।। 7 - 2 - 63 ।।

ऋकारान्ताद्धातोर्भारद्वाजस्यचार्यस्य मतेन तासाविव नित्यानिटस्थलि इडागमो न भवति । स्मर्त्ता - सस्मर्थ । धवर्त्ता - दध्वर्थ । सिद्धे सत्यारम्भौ नियमार्थः - ऋत एव भारद्वाजस्य, नान्येषां धातूनाम् । ययिथ । वविथ । पेचिथ । शेकिथ । तदयमर्थात्पूर्वयोर्योगयोर्विकल्पः । तपरकरणमृकारान्तस्य निवृत्त्यर्थम् । तथा हि सति विध्यर्थमेतत्स्यात् ।।बभूथाततन्थजगृभ्मववर्थेति निगमे ।। 7 - 2 - 64 ।।

बभूथ, आततन्थ, जगृभ्म, ववर्थ - इत्येतानि निपात्यन्ते निगमविषये । निगमः - वेदः । बभूथ - त्वं हि होता प्रथमो बभूथ । बभूविथेति भाषायाम् । आततन्थ - येनान्तरिक्षमुर्वाततन्थ । आतेनिथेति भाषायाम् । जगृभ्म -- जगृभ्मा ते दक्षिणमिन्द्र हस्तम् । जगृहिमेति भाषायाम् । ववर्थ - ववर्थ त्वं हि ज्योतिषा । ववरिथेति भाषायाम् । क्रादिसूत्रादेवास्य प्रतिषेधे सिद्धे नियमार्थ वचनम् - निगम एव, न भाषायामिति ।।

विभाषा सृजिदृशोः ।। 7 - 2 - 65 ।।

सृजि, दृशि -- इत्येतयोस्थलि विभाषा इडागमो न भवति । सस्रष्ठ, ससर्जिथ । दद्रष्ठ, ददर्शिथ ।।

इडत्त्यर्तिव्ययतीनाम् ।। 7 - 2 - 66 ।।

अत्ति, अर्ति, व्ययति - इत्येतेषां थलीडागमो भवति । आदिथ । आरिथ । संविव्ययिथ । व्येञः न व्यो लिटि इत्यात्वप्रतिषेधः । अतिव्ययत्योः ऋतो भारद्वाजस्य इति नियमाद्विकल्पः । अर्त्तेरपि नित्यं प्रतिषेधः । अत्रेड्ग्रहणं विस्पष्टार्थम् । विकल्पविधाने हि सति अत्तिव्ययतिग्रहणमनर्थकम् प्रतिषेधविधाने चार्त्तिग्रहणमिति नित्योऽयं विधिरिड्ग्रहणमन्तरेणापि शक्यते विज्ञातुम् ।।

वस्वेकाजाद्घसाम् ।। 7 - 2 - 67 ।।

कृतद्विर्वतचनानां धातूनामेकाचाम् आकारान्तनाम्, धसेश्च वासविडागमो भवति । आदिवान् । आशिवान् । पेचिवान् । शेकिवान् । धात्वभ्यासयोरेकादेशे कृते एत्वाभ्यासलोपयोश्च कृतयोः कृतद्विर्वचना एते एकाचो भवन्ति । आत् - ययिवान् । तस्थिवान् । घस् - जक्षिवान् ।सिद्धे सत्यारम्भो नियमार्थः - एकाजाद्घसामेव वसाविडागमो भवति, नान्येषाम् । बिभिद्वान् । चिच्छिद्वान् । बभूवान् । शिश्रिवान् । क्रादिनियमात्, प्रतिषेधाभावाच्च य इट् प्रसक्तः स नियम्यते । आद्ग्रहणमनेकाज्ग्रहणार्थम् । द्विर्वचने हि वृते इटि हि सति आतो लोपे भवितव्यम् । दरिद्रातेस्तु कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमित्यामा भवितव्यम् । दरिद्राञ्चकार । अथाप्याम्न क्रियते, तथापि च दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधौ इति प्रागेव प्रत्ययोत्पत्तेराकारे लुप्ते इडागमस्य निमित्तं विहतमिति न इडागमो भवति , ददरिद्रवानिति भवितव्यम् । घसेरपि यदि ग्रहणमिह न क्रियते , तदा द्विर्वचनात् परत्वाद् घसिभसोर्हलि च इति उपधालोपे कृत् द्विर्वचनमेव न स्यात् अनच्कत्वाद् । इह तु घसिग्रहणात् उपधालोपमपि पर्तवादिडागमो बाधते । तत्र कृते गमहनजनखनघसाम् इत्युपधालोपः । सच द्विर्वचनेऽचि इति द्विर्वचने कर्तव्ये स्थानिवद्भवति । तेन जक्षिवान् इति सिद्ध्यति ।।

विभाशा गमहनविदविशाम् ।। 7 - 2 - 68 ।।

गम, हन, विद, विश - इत्येतेषां धातूनां वसौ विभाषा इडागमो भवति । गम - जग्मिवान्, जगन्वान् । मो नो धातोः इति नकारः । हन - जघ्निवान् , जघन्वान् । विद - विविदिवान्, विविद्वान् । विशविविशिवान्, विविश्वान् । विशिना साहचर्यादिह विदेस्तौदादिकस्य लाभार्थस्य ग्रहणम् । ज्ञानार्थस्य तु नित्यं विविद्वानित्येव भवति । दृशेश्चेति वक्तव्यम् । ददृशिवान्, ददृश्वान् ।।

सनिंससनिवांसम् ।। 7 -2 - 69 ।।

सनोतेः , सनतेर्वा धातोः सनिंससनिवांसम् इति निपात्यते अञ्जित्वाग्ने सनिंससनिवांसम् । इडागम एत्वाभ्यासलोपाभावश्च निपात्यते । सनिङपूर्वादन्यत्र सेनिवांसमित्येव भवति । छन्दसीदं निपातनं विज्ञायते । भाषायां सेनिवांसमिति भवति ।।

ऋद्धनोः स्ये ।। 7 - 2 - 70 ।।

ऋकारान्तानां धातूनां हन्तेश्च स्ये इडागमो भवति । करिष्यति । हनिष्यति । हरिष्यति । स्वरतेर्वैट्त्वाद्, ऋद्धनोः स्ये इत्येतद्भवति विप्रतिषेधेन - स्वरिष्यति । तपरकरणं विस्पष्टार्थम् ।।

अञ्जेः सिचि ।। 7 - 2 - 71 ।।

अञ्जेः सिचि इडागमो भवति । आञ्जीत्, आञ्जिष्टाम्, आञ्जिषुः । सिचीति किम् अङ्क्ता, अञ्जिता। ऊदित्वाद् विभाषा भवति ।।

स्तुसुधूञ्भ्यः परस्मैपदेषु ।। 7 - 2 - 72 ।।

स्तु, सु , धूञ् - इत्येतेब्यः सिचि परस्मैपदे परत इडागमो भवति । अस्तावीत् । असावीत् । अधावीत् । परस्मैपदेष्विति किम् अस्तोष्ट । असोष्ट । अधोष्ट, अधविष्ट ।।

यमरमनमातां सक्च ।। 7 - 2 - 73 ।।

यम, रम, नम - इत्येतेषामङ्गानम्, आकारान्तानां च सगागमो भवति परस्मैपदे सचि , इडागमश्च । यम - अयंसीत्, अयंसिष्टाम्, अयंसिषुः । रम- व्यरंसीत्, व्यरंसिष्टाम्, व्यरंसिषुः । नम - अनंसीत्, अनंसिष्टाम्, अनंसिषुः । तआकारान्तानाम - अयासीत्, अयासिष्टाम, अयासिषुः । यमादीनां हलन्तलक्षणा वृद्धिः प्राप्ता सा नेटि इति प्रतिषेध्यते । परस्मैपदेष्वित्येव - अयंस्त, अरंस्त, अनंस्त ।।

स्मिपूङ्रंञ्जवशां सनि ।। 7 - 2 - 74 ।।

स्मिङ् पूङ् , ऋ , अञ्जू, अशू - इत्येतेषां धातूनां सनीडागमो भवति ।सिस्मयिषते । पिपविषते । अरिरिषति । अञ्जिजिषति । अशिशिषते । ङकारग्रहणं पूञो मा भूत् । पुपूषति इत्येव तस्य भवति । अशेरुदितो ग्रहणादश्नोतेर्नित्यमिडागमो।ऽडस्त्येव ।।

किरश्च पञ्चभ्यः ।। 7 - 2 - 75 ।।

किरादिभ्यः पञ्चभ्यस्सनि इडागमो भवति । कृ - चिकरिषति । गृजिगरिषति । ृङ् - दिदरिषते । धृङ् - दिधरिषते । प्रच्छ - पिप्रच्छिषति । पञ्चभ्य इति किम् सिसृक्षति । किरतिगिरत्योः इट् सनि वा इति विकल्पः प्राप्तः, वतो वा इति च । अस्येटो दीर्घत्वं नेच्छन्ति ।।

रुदादिभ्यः सार्वधातुके ।। 7 - 2 - 76 ।।

रुदादिभ्य उत्तरस्य वलादेः सार्वधातुकस्य इडागमो भवति । रुद् - रोदिति । स्वप् - स्वपिति । श्वस् - श्वसिति । अन् - प्राणिति । जक्ष् - जक्षिति । पञ्चभ्यः इत्येव - जागर्ति । सार्वधातुक इति किम् स्वप्ता । वलादेः इत्येव - रुदन्ति ।।

ईशः से ।। 7 - 2 - 77 ।।

ईश उत्तरस्य से इत्येतस्य सार्वधातुकस्य इडागमो भवति । ईशिषे । इशिष्व ।।

ईडजनोर्ध्वे च ।। 7 - 2 - 78 ।।

ईड, जन - इत्येताभ्यामुत्तरस्य ध्वे इत्येतस्य, से इत्येतस्य च सार्वधातुकस्य इडागमो भवति । ईडिध्वे । ईडिध्वम् । ईडिषे । ईडिष्व । जनिध्वे । जनिध्वम् । जनिध्वम् । जनिषे । जनिष्व । जनी प्रादुर्भावे - इत्येस्य छान्दसत्वात् श्यनो लुक्, उपधालोपाभावश्च । जन जनने - इत्येस्यापि श्लुविकरणस्य ग्रहणमत्रेष्यते । तस्य कर्मव्यतिहारे - व्यतिजज्ञिषे, व्यतिजज्ञिष्व, व्यतिजज्ञिध्वे, व्यतिजज्ञिध्वम् - इति च भवति । ध्वेशब्दे ईशेरपि इडगम इष्यते । ईषिध्वे, तईषिध्वमिति । तदर्थ केचित् - ईडिजनोः स्ध्वे च इति सूत्रं पठन्ति । तत्र सकारादेः सेशब्दस्य सूत्र एवोपादानाच्चशब्दो भिन्नक्रम ईशेरनुकर्षणार्थो विज्ञायते । ईशीडिजनां सेध्वयोः इत्येकमेव सूत्रं न पठितम् विचित्रा हि सूत्रस्य कृतिः पाणिनेरिति । ध्वे इति कृतटेरेत्वस्य ग्रहणात् लङि धवमि न भवितव्यमिटा लोटि पुनरेकदेशविकृतस्यानन्यत्वाद् भवितव्यमिटा ।।

लिङः सलोपोऽनन्त्यस्य ।। 7 - 2 - 79 ।।

सार्वधातुके इति वर्त्ते । सार्वधातुके यो लिङ् तस्य अनन्त्यस्य सकारस्य लोपो भवति । कः पुनरनन्त्यो लिङः सकारः यो यासुट् - सुट् - सीयुटाम् । कुर्यात् , कुर्याताम्, कुर्युः । कुर्वीत, कुर्वीयाताम्, कुर्वीरन् । अनन्त्यस्येति किम् कुर्युः, कुर्याः । सार्वधातुके इत्येव - क्रियास्ताम्, क्रियासुः । कृषीष्ट, कृषीयास्ताम्, कृषीरन्।।

अतो येयः ।। 7 - 2 - 80 ।।

अकारान्तादङ्गादुत्तरस्य या इत्येतस्य सार्वधातुकस्य इय् इत्ययमादेशो भवित । पचेत्, पचेताम्, पचेयुरिति । अत्र उस्यपदान्तात् इति पररुपं बाधितम् । अत इति किम् चिनुयात् । सुनयात् । तपरकरणं किम् यायात् । सार्वधातुक इत्येव - चिकीर्ष्यात् । ननु चातो लोपेनात्र भवितव्यम्, पचेदित्यत्रापि हि तर्हि अतो दीर्घो यञि इति दीर्घत्वेन भवितव्यम् तदनेनावश्यं विध्यन्तरं बाधितव्यम्, स यथैव दीर्घस्य बाधकः, एवमतो लोपस्यापि बाधकः स्यात् स्यादेतदेवम्, यदि दीर्घः सार्वधातुके विधीयते । अथ तु तिङि विधीयते, तदा येन नाप्राप्तिन्यायेन दीर्घस्यैव बाधकः स्यात्, न पुनरो लोपस्य । येयः इत्यविभक्तिको निर्दशः । यः इति ना षष्ठीनिर्दशेयलोपस्यासिद्धत्वमनाश्रित्याद्गुणः कृतः सौत्रत्वान्निर्द्दशस्येति । केचिद् अत्र - अतो यासियः - इति सूत्रं पठन्ति। तेषां सकारान्तः स्थानी, षष्ठीसमासश्च ।।

आतो ङित ।। 7 - 2 - 81 ।।

आकारस्य ङिदवयवस्य आकारान्तादङ्गादुत्तरस्य सार्वधातुकस्य इय् इत्यमादेशो भवति । पचेते , पचेथे । पचेताम्, पचेथाम् । यजेते, यजेथे । यजेताम् , यजेथाम् । सार्वधातुकमपित् इत्यत्र न ङितीव ङिद्वदित्येवमङ्गीक्रियते, अपि तु ङित इव ङिद्वदिति । पूर्वसूत्रे एव उच्चुकुटुषतीति प्रसिद्धये तथाङ्गीकरणम् । यदि गाङ्कटादिसूत्रे ङित इव ङिद्वद्भवतीत्येवमङ्गीक्रियते , तदा अनुदात्तङित तआत्मनेपदम् इति आत्मनेपदं प्राप्नोतीति । आत इति किम् पचन्ति , यजन्ति। पचन्ते, यजन्ते । ङित इति किम् पचावहै, पचामहे । अत इत्येव - चिन्वाते, सुन्वाते । तपरकरणं किम् मिमाते । मिमाथे ।।

आने मुक् ।। 7 - 2 - 82 ।।

आने परतोऽङ्गस्यातो मुगागमो भवति । पचमानः, यजमानः । अकारमात्रभक्तोऽयं मुक् अदुपदेशग्रहणेन गृह्यते इति अदुपदे शात् इति लसार्वधातुकानुदात्तत्वं भवति । यद्येवम्, आतो ङितः इत्यमपि विधिः प्राप्नोति तपरनिर्देशान्न भविष्यति । मुकि सत्यध्यर्धमात्रो भवति । लसार्वधातुकानुदात्तत्वमपि तर्हि न प्राप्नोति नैष दोषः, उपदेशग्रहणं तत्र क्रियते । तेन उपदेशादूर्ध्वं सत्यपि कालभेदे भवितव्यम् । तथा च - पचावः,

पचाम इत्यत्रापि भवति ।।

ईदासः ।। 7 - 2 - 83 ।।

आस उत्तरस्यानशब्दस्य ईकारादेशो भवति । आसीनो यजते । अत्र पञ्चम्याः परस्य षष्ठी कल्प्यते ।।

अष्टन आ विभक्तौ ।। 7 - 2 - 84 ।।

अष्टनो विभक्तौ परत आकारादेशो भवति । अष्टाभिः । अष्टाभ्यः । अष्टनाम् । अष्टासु । विभक्ताविति किम् अष्टत्वम् । अष्टता । आ इति व्यक्तिनिर्दशोऽयम्, आकृतिनिर्द्देशे तु नकारस्थानेऽनुनासिकाकारः स्यात् । विकल्पेनायमाकारो भवति, एतज्ज्ञापितम् - अष्टनो दीर्घात् इति दीर्घग्रहणात्, अष्टाभ्य औश् इति च कृतात्वस्य निर्दशात् । तेनाष्टभिः, अष्टभ्य इत्येपि भवति । तदन्तविधिश्चात्रेष्यते - प्रिया अष्टौ येषां ते प्रियाष्टानः । प्रियाष्टौ ।।

रायो हलि ।। 7 - 2 - 85 ।।

रै इत्येतस्य हलादौ विभक्तौ परत आकारादेशो भवति । राभ्याम् । राभिः । हलीति किम् रायौ, रायः । विभक्ताविति किम् रैत्वम्, रैता । मृजेर्वृद्धिः इत्यतः प्राग्विभक्त्यधिकारः ।।

युस्मदस्मदोरनादेशे ।। 7 - 2 - 86 ।।

युष्यदस्मदित्येतयोरनादेशो विभक्तौ परत आकारादेशो भवति । युष्माभिः । अस्माभिः । युष्मासु । अस्मासु । अनादेश इति किम् युष्मत् । अस्मत् । हलि इत्येधिकारादप्यत्र न स्यात्, उत्तरत्र त्वनादेशग्रहणेन प्रयोजनम् - योऽचि इति, तदिहैव क्रियते ।।

द्वितीयायां च ।। 7 - 2 - 87 ।।

द्वितीयायां च परतो युष्मदस्यमदोराकारादेशो भवति । त्वाम, माम् । युवाम्, तआवाम् । युष्मान्, अस्मान् । आदेशार्थं वचनम् ।।

प्रथमायाश्च द्विवचने भाषायाम् ।। 7 - 2 - 88 ।।

प्रथमायाश्च द्विवचने परतो भाषायां विषये युष्मदस्मदोराकारादेशो भवति । युवाम्, आवाम् । प्रथमाया इति किम् युवयोः, तआवयोः । द्विवचन इति किम् त्वम्, अहम् । यूयम्, वयम् । भाषायामिति किम् युवं वस्त्राणि
पीवसा वसाथे ।।

योऽचि ।। 7 - 2 - 89 ।।

अजादौ विभक्तावनादेशे युष्मदस्मदोर्यकारादेशो भवति । त्वया, मया । त्वयि, मयि । युवयोः , आवयोः । अचीति किम् युवाभ्याम्, तआवाभ्याम । युष्मदस्मदोरनादेशे इत्यत्र यदि हलि इत्यनुवर्त्तते, शक्यमकर्तुम् अचि इत्येतत् तत्क्रियते विस्पष्टार्थम् । अनादेश इत्येव - त्वद् गच्छति । मद् गच्छति ।।

शेषे लोपः ।। 7 - 2 - 90 ।।

शेषे विभक्तौ युष्मदस्मदोर्लोपो भवति । कश्च शेषः यत्राकारो यकारश्च न विहितः । पञ्चम्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि । यान्यद्विवचनान्यत्र तेषु लोपो विधीयते ।। त्वम्, अहम् । यूयम्, वयम्। तुभ्यम्, मह्यम्। युष्मभ्यम्, अस्मभ्यम् । त्वत्, मत। युष्मत्, अस्मत्। तव, मम। युष्माकम्, अस्माकम् । शेषग्रहणं विस्पष्टार्थम् । शेषे लोपे कृते स्त्रियां टाप् कस्मान्न भवति - त्वं ब्राह्मणो, अहं ब्राह्मणी सन्निपातलत्रणो विधिरनिमितं तद्विधातस्य । अलिङ्गे वा युष्मदस्मदी इति । केचित्तु शेषेलोपं टिलोपमिच्छन्ति । कथम् वक्ष्यमाणादेशापेक्षेः शेषः ते चादेशा मपर्यन्तस्य विधीयन्ते, तेन मपर्यन्ताद् योऽन्यः स शेष इति, तत्रायं लोप इति टिलोपो भवति ।।

मपर्यन्तस्य ।। 7 - 2 - 91 ।।

मपर्यन्तस्य इत्ययमधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामः मपर्यन्तस्य इत्येवं तद्वेदितव्यम् । वक्ष्यति - युवावौ द्विवचने । युवाम्, तआवाम् । मपर्यन्तस्येति किम् युवकामावकामिति साकच्कस्य मा भूत् । त्वमाव्रेकवचने । त्वया । मया । मपर्यन्तस्येति किम् साकच्कस्य सर्वस्य मा भूत् । तथा च सति त्वमयोरकारस्य योऽचि इति यकारे कृतेऽनिष्टं रुपं स्यात् । मान्तस्येत्येव सिद्धे, अस्मिन् यत्परिग्रहणं कृतम्, कअवधिद्योतनार्थं तत्, मान्त मा भूत् । कदा यदा ण्यन्तयोः क्विपि मान्तत्वं विद्यते युष्मदस्मदाः । स्थानिवत्त्वं च णेरत्र क्वौ लुप्तत्वान्न विद्यते ।।

युवावौ द्विवचने ।। 7 - 2 - 92 ।।

द्विवचने इत्येर्थग्रहणम् । द्विवचने ये यष्मदस्मदी द्व्यर्थाभिधानविषये तयोर्मपर्यन्तस्य स्थाने युव, आव -
इत्येतावादेशौ भवतः । युवाम्, आवाम्। युवाभ्याम्, आवाभ्याम्। युवयोः, आवयोः । यदा समासे द्व्यर्थे युष्मदस्मदी भवतः ,
समासार्थस्यान्यसंख्यत्वादेकवचनं बहुवचनं वा भवति, तदापि द्यर्थयोर्युष्मदस्मदोर्युवावौ भवतः, यदि त्वाहौ सौ इत्येवमादिना आदेशान्तरेण न बाध्येते । अतिक्रान्तं युवाम् अतियुवाम्, अत्यावाम्। अतिक्रान्तान् युवाम् अतियुवान्, अत्यावान् । अतिक्रान्तेन युवाम् अतियुवया, अत्यावया । अतिक्रान्तैर्युवाम् अतियुवाभिः, अत्यावाभिः । अतिक्रान्तेभ्यो युवाम् अतियुवभ्यम्, अत्यावभ्यम् । अतिक्रान्ताद् युवाम् अतियुवत्, अत्यावत्। अतिक्रान्तेभ्यो युवाम् अतियुवत्, अत्यावत्। अतिक्रान्तानां युवाम् अतियुवाकम् , अत्यावाकम् । अतिक्रान्ते युवमा अतियुवयि, अत्यावयि । अतिक्रान्तेषु युवाम् अतियुवासु, अत्यावासु । त्वाहादौनां तु विषये परत्वात्त एव भवन्ति - अतिक्रान्तो युवाम् अतित्वम्, अत्यहम् । अतिक्रान्ता युवाम् अतियूयम्, अतिवयम् । तअतिक्रान्ताय युवाम् अतितुभ्यम, अतिमह्यम् । अतिक्रान्तस्य युवाम् अतितव, अतिमम ।यदा तु यष्मदस्मदी एकत्वबहुत्वयोर्वर्तेते, समासार्थस्तु द्वित्वे, तदा युवावौ न भवतः । अतिक्रान्तौ त्वाम्, अतित्वाम्, अतिमाम् । अतिक्रान्तौ युष्मान् अतियुष्मान्, अत्यस्मान्। एवमुन्नेयम् ।।

यूयवयौ जसि ।। 7 - 2 - 93 ।।

युष्मदस्मदौर्मपर्तयन्तस्य जसि परतो यूय, वय - इत्येतावादेशौ भवतः । यूयम्, वयम् । परमयूयम्, परमवयम् । अतियूयम्, अतिवयम् । तदन्तविधिरत्र भवति, अङ्गाधिकारे तस्य च तदुत्तरपदस्य च इति ।

त्वाहौ सौ ।। 7 - 2 - 94 ।।

युष्मदस्मदोर्मपर्यन्तस्य सौ परे त्व, अह - इत्येतावादेशौ भवतः । त्वम्, अहम् । परमत्वम्, परमाहम् । अतित्वम्, अत्यहम् ।।

तुभ्यमह्यौ ङयि ।। 7 - 2 - 95 ।।

युष्मदस्मदौर्मर्यन्तस्य तुभ्य, मह्य - इत्येतावादेशौ भवतो ङयि परतः । तुभ्यम्, मह्यम् । परमतुभ्यम् , परममह्ययम् । अतितुभ्यम्, अतिमह्यम् ।।

तचममौ ङसि ।। 7 - 2 - 96 ।।

युष्मदस्मदोर्मपर्यन्तस्य तव, मम - इत्येतावादेशौ भवतो ङसि परतः । तव, मम । परमतव, परममम। अतितव, अतिमम ।।

त्वशावेकवचने ।। 7 - 2 - 97 ।।

एकवचने इत्येर्थनिर्देशः । एकवचने ये युष्मदस्मदी एकार्थाभिधानविषये तयोर्मपर्यन्तस्य स्थाने त्व, म - इत्येतावादेशो भवतः । त्वाम, माम् । त्वया, मया । त्वत्, मत् । त्वयि , मयि । यदा समासे एकार्थे युष्मदस्मदी भवतः, समासार्थस्य त्वन्यसंख्यत्वाद् द्विवचनं बहुवचनं वा भवति, तदापि त्वमावादेशौ भवतः । आदेशान्तराणां तु त्वाहौ सौ - इत्येवमादीनां विषये पुर्वविप्रतिषेधेन ते एवेष्यन्ते । अतिक्रान्तस्त्वामतित्वम्, अत्यहम्। अतिक्रान्तौ त्वाम् अतित्वमा, अतिमाम्। अतिक्रान्तान् त्वाम अतित्वान् ,अतिमान्। अतिक्रान्ताभ्यां त्वाम तअतित्वाभ्याम्, अतिमाभ्याम् । अति क्रान्तैस्त्वाम् अतित्वाभिः, अतिमाभिरिति । एवमाद्युदाहर्तव्यम् ।।

प्रत्ययोत्तरपदेयोश्च ।। 7 - 2 - 98 ।।

एकवचने इत्यनुवर्तते । प्रत्यये उतरपदे च परत एकवचने वर्तमानयोर्युष्मदस्मदौर्मपर्यन्तस्य त्व, म - इत्येतावादेशौ भवतः । तवायं त्वदीयः, मदीयः । अतिशयेन त्वं त्वत्तरः, मत्तरः । त्वामिच्छति त्वद्यति, मद्यति । त्वमिवाचारति त्वद्यते, मद्यते । उत्तरपदे - तव पुत्रः त्वत्पुत्रः मम पुत्रो मत्पुत्रः । त्वं नाथोऽस्य त्वन्नाथः, अहं नाथोऽस्य मन्नाथः । एकवचन इत्येव - युष्माकमिदं युष्मदीयम्, अस्मदीयम् । युष्माकं पुत्रोऽस्माकं पुत्रो .युष्मत्पुत्रः, अस्मत्पुत्रः । विभक्तौ इत्येधिकारात् पूर्वयौगो विभक्तावेव । ततोऽन्यत्रापि प्रत्यये उत्तरपदे च यथा स्यादित्ययमारम्भः । ननु चात्राप्यन्तर्वर्तिनी विभक्तिरस्ति, तस्यामेवादेशौ भविष्यतः नैवं शक्यम् लुका तस्या भवितव्यम् । बहिरङ्गो लुक् अन्तरङ्ावादेशौ प्रथमं तौ भवतिष्यः एतदेव तर्ह्यादेशवचनं ज्ञापक् - अन्तरङ्गानपि विधीन्बहिरङगोऽपि लुग्बाघते इति । तेन गोमान्प्रिोऽस्य गोमत्प्रिय इत्येवमादौ नुमादि लुका बाध्यते । एवं च सति त्वाहौ सौ इत्येवमादयोऽपि प्रत्ययोत्तरपदेयोरादेशा न भवतन्ति । त्वं प्रधानमेषां त्वत्प्रधनाः, मत्प्रधानाः । युयं पुत्रा अस्य युष्मत्पुत्रः, अश्मत्पुत्रः। तुभ्यं हितं त्वद्धितम्, मद्धितम् । तव पुत्रस्त्वत्पुत्रः मत्पुत्रः । अथ किमर्थमेषां त्वाहादीनां बाधनार्थमेतन्न विज्ञायते लक्ष्यस्थित्यप्यपेक्षया । ज्ञापकार्थे ह्येतस्मिन् बहुतरमिष्टं संगृह्यते ।।

त्रिचतुरोः स्त्रियं तुसृचतसृ ।। 7 - 2 - 99 ।।

त्रि, चतुर् - इत्येतयोः स्त्रियां वर्तमानयोस्तिसृ, चतसृ - इत्येतावादेशौ भवतो विभक्तौ परतः । तिस्रः । चतस्रः । तिसृभिः । चतसृभिः । स्त्रियामिति किम् त्रयः । त्वारः त्रीणि । चत्वारि । स्त्रियामिति चैतत् त्रिचतुरोरेव विशेषणम्, नाङ्गस्य । तेन यदा त्रिचतुः शब्दौ स्त्रियाम्, अङ्गं तु लिङ्गानत्रे, तदाप्यादेशौ भवत एव - प्रियास्तिस्रो ब्राह्मण्योऽस्य ब्राह्मणस्य प्रियतिसा ब्राह्मण इति । प्रियतिस्रौ, प्रियतिस्रः । प्रियतिसृ ब्राह्मणकुलम्, प्रियतिसृणी, प्रियतिसृणि । प्रियचतसा, प्रियचतस्रौ , प्रियचतस्रः । प्रियचतसृ, प्रियचतसृणी, प्रियचतसृणि । नद्यृतश्च इति समासान्तो न भवति, विभक्त्याश्रयत्वेन तिसृभावस्य बहिरङ्गलक्षत्वात् । यदा च त्रिचतुः शब्दौ लिङ्गान्तरे, स्त्रियामङ्गम्, तदा आदेशौ न भवतः - प्रियास्त्रयोऽस्याः , प्रियणि त्रीणि वा अस्या ब्राह्मण्याः सा प्रियत्रिः, प्रियत्री, प्रियत्रयः । प्रियचत्वाः , प्रियचतवारौ, प्रियचत्वारः । तिसृभावे संज्ञायां कन्युपसंख्यानं कर्त्तव्यम् । तिसृका नाम ग्रामः । चतसर्याद्युदात्तनिपातनं कर्त्तव्यम् । चतस्रः पश्येत्यत्र चतुरः शसि इत्येष स्वरो मा भूत् । चतसृणामित्यत्र तु षट्त्रिचतुर्भ्यो हलादिः इत्येव स्वरो भवति । हलादिग्रहणसामर्थ्यान्निपातनस्वरौ बाध्यते ।।

अचि र ऋतः ।। 7 - 2 - 100 ।।

तिसृ, चतसृ - इत्येतयोर्ऋतः स्थाने रेफादेशो भवति अजादौ विभक्तौ परतः । तिस्रस्तिष्ठन्ति, तिस्रः पश्य । चतस्रुस्तिष्ठिन्ति, चतस्रः पश्य । प्रियतिस्र तआनय, प्रियचतस्र आनय । प्रियतिस्रः स्वम्, प्रियचतस्रः स्वम् । प्रियतिस्रि निधेहि, प्रियचतस्रि निधेहि । पुर्वसवर्णोत्त्वङिसर्वनामस्थानगुणानामपवादः । परमपि हि ङिसर्वनामस्थानगनणं पूर्वविप्रतिषेधेन बाधते । अचीति किम् तिसृभिः । चतसृभिः । ऋतः इति किम् तिसृचसतस्रोः प्रतिपत्त्यर्थम् अन्यथा हि तदपवादस्त्रिचतुरोरेवायमादेसो विज्ञायेत ।।

जराय जरसन्यतरस्याम् ।। 7 - 2 - 101 ।।

जरा - इत्येतस्य जरस् - इत्ययमादेशो भवति अन्यतरस्यामजादौ विभक्तौ परतः । जरसा दन्ताः शीर्यन्ते, जरया दन्ताः शीर्यन्ते । जरसे त्वा परिदद्युः, जरायौ त्वा परिदद्युः । अचि इत्येव - जराभ्याम्, जराभिः । नुमो विधानात् जरसादेशो विप्रतिषेधेन । अतिजरांसि ब्राह्मणकुलानि । इहातिजरसं ब्राह्मणकुलं पश्येति लुग्न भवति, आनुपूर्व्या सिद्धत्वात् । अतिजर - अमिति स्थिते लुक्, अम्भावः, जरस्भावः - इति त्रीणि कार्याणि युगपत्प्राप्नुवन्ति तत्र

लुक् तावदपवादत्वाद् अम्भावेन बाध्यते, अम्भावोऽपि परत्वाज्जरसादेशेन । न च पुनर्लुक्शास्त्रं प्रवर्त्तते, भ्रष्टावसरत्वादिति ेवमेव भवति - अतिजरसं ब्राह्मणकुलं पश्येति । प्रथमैकवचने तृतीयाबहुवचने च अतिजरं ब्राह्मणकुलं तिष्ठति,अतिजरैरिति च भवितव्यमिति गोनर्दोयमतेन । किं कारणम् सन्निपातलक्ष्णो विधिरनिमित्तं तद्विघातस्य इति । अन्ये तु - अनित्यत्वादस्याः परिभाषाया अतिजरसं ब्राह्मणकुलं तिष्ठति, अतिजरसैरित्येवं भवितव्यमिति मन्यन्ते ।।

त्यदादीनामः ।। 7 - 2 - 102 ।।

त्यत् इत्येवमादिनामकारादेशो भवति विभक्तौ परतः । त्यद्स्यः, त्यौ, त्ये । तद् - सः, तौ, ते । यद् - यः , यौ, ये । एतद् - एषः , एतौ, एते । इदम् - अयम्, इमौ, इमे । अदस् - असौ, अमू, अमी । द्वि - द्वौ , द्वाभ्याम् । द्विपर्यन्तानां त्यदादानामत्वमिष्यते । इह न भवति - भवत् - भवान् । संज्ञोपसर्जनीभूतास्त्यदादयः पाठादेव पर्युदस्ता इतीह न भवति - त्यद् , त्यदौ, त्यदः । अतित्यद्, अतित्यदौ, अतित्यदः । त्यदादिप्रधाने तु शबेद भवत्येव - परमसः, परमतौ, परमते ।।

किमः कः ।। 7 - 2 - 103 ।।

किम् - इत्येतस्य क - इत्येयमादेशो भवति विभक्तौ परतः। कः कौ, के । साकच्कस्याप्ययमादेशो भवति, तेनाकार एव किमो न विधीयते किमोऽत् इति ।।

कु तिहौः ।। 7 - 2 - 104 ।।

तकारादौ हकारादौ च विभक्तौ परतः किमित्येतस्य कु इत्ययमादेशो भवति । कुतः । कुत्र । कुह । तिहौः इतीकार उच्छारणार्थः ।।

क्वाति ।। 7 - 2 - 105 ।।

अति इत्येतस्यां विभक्तौ परतः किमित्येतस्य क्व - इत्ययमादेशो भवति । क्व गमिष्यसि । क्व भोक्ष्यते । आदेशान्तरवचनमोर्गुणनिवृत्त्यर्थम् । किमो ड्वत् इति प्रत्ययान्तरं न विधीयते, साकच्कार्थम् ।।

तदोः सः सावनन्त्ययोः ।। 7 - 2 - 106 ।।

त्यदादीनां तकारदकारयोनन्त्योः सकारादेशो भवति सौ परतः । त्यद् - स्यः । तद् - सः । एतद् - एषः । अदस् - असौ । अनन्त्ययोरिति किम् हे स । सा ।।

अदस औ सुलोपश्च ।। 7 - 2 - 107 ।।

अदसः सौ परतः सकारस्य औकारादेशो भवति सोश्च लोपो भवति । असौ । औत्वप्रतिषेधः साकच्काद्वा कत्तव्यः सादुत्वं च । यदा चौत्वप्रतिषेधः, तदा सकारादुत्तरस्य उत्वं भवति । असुकः, असुकौ । उत्तरपदभूतानां त्यदादीनामकृतसन्धीनामादेशा वक्तव्याः । परमाहम् । परमायम् । परमानेन । अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते ह्रस्वाल्लुप्येत सम्बुद्धिर्न हलः प्रकृतं हि तत् । आप एत्वं भवेत्तस्मिन्न झलीत्यनुवर्तनात् । प्रत्ययस्थाच्च कादित्वं शीभावश्च प्रसज्यते ।।

इदमो मः ।। 7 - 2 - 108 ।।

इदमः सौ परतो मकारोऽन्तादेशो भवति । इयम् । अयम् । इदमो मकारस्य मकारवचनं त्यदाद्यत्वबाधनार्थम् ।।

दश्च ।। 7 - 2 - 109 ।।

इदमो दकारस्य स्थाने मकारादेशो भवति विभक्तौ परतः । इमौ, इमे। इमम्, इमौ, इमान् ।।

यः सौ ।। 7 - 2 - 110 ।।

इदमो मकारस्य यकारादेशो भवति सौ परतः । इयम् । उत्तरसूत्रे पुंसि इति वचनात्स्त्रियामयं यकारः ।।

इदोऽय् पुंसि ।। 7 - 2 - 111 ।।

इदम इद्रूपस्य पुंसि सौ परतः अय् इत्ययमादेशो भवति । अयं ब्राह्मणः । पुंसीति किम् इयं ब्राह्मणी ।।

अनाप्यकः ।। 7 - 2 - 112 ।।

इदमोऽकारस्य इद्रूपस्य स्थाने अन इत्ययमादेशो भवति आपि विभक्तौ परतः । अनेन । अनयौः । अक इति किम् इमकेन । इमकयोः । आपि इति प्रत्याहार तृतीयैकवचनात्प्रभृति सुपः पकारेण ।।

हलि लोपः ।। 7 - 2 - 113 ।।

हलादौ विभक्तौ परत इदमोऽककारस्य इद्रूपस्य लोपो भवति । आभ्याम्, एभिः । एभ्यः । एषाम् । एषु । नानर्थकेऽलोन्त्यविधिः इति सर्वस्यायमिद्रूपस्य लोपः । अत वा - नायमिल्लोपः । अनाप्यकः इति अन्ग्रहणमनुवर्त्तते ।।

मृजेर्वृद्धिः ।। 7 - 2 - 114 ।।

विभक्तौ थइति निवृत्तम् । मृजेरङ्गस्य इको वृद्धिर्भवति । मार्ष्टा, मार्ष्टुम्, मार्ष्टव्यम् । मृजेरिति धातुग्रहणमिदम् , धातोश्च कार्यमुच्यमानं धातुप्रत्यय एव वेदितव्यम् । तेन कंसपरिमृड्भ्याम, कंसपरिमृड्भिरित्यत्र न भवति ।।

अचो ञ्णिति ।। 7 - 2 - 115 ।।

अजन्तस्याङ्गसाय ञिति च वृद्धिर्भवति । ञिति - एकस्तण्डुलनिश्चायः । द्वौ शूर्वनिष्पावौ । कारः । हारः । णिति - गौः, गावौ, गावः। सखायौ, सखायः

। जैत्रम् । यौत्रम् । च्यौत्नः । जयतेः, यौतेश्च उणादयौ बहुलम् इति ष्ट्रन् प्रत्ययः । च्यवतेरपि त्नण् ।।
अत उपधायाः ।। 7 - 2 - 116 ।।
अङ्गोपधाया अकारस्य स्थाने ञिति णिति च प्रत्यये वृद्धिर्भवति । पाकः, त्यागः, यागः । पाचयति, पाचकः । पाठयति , पाठकः । अति इति किम् भेदयति, भेदकः । उपधाया इति किम् चकासयति, तक्षकः ।।
तद्धितेष्वचामादेः ।। 7 - 2 - 117 ।।
तद्धिते ञिति णिति च प्रत्यये परतोऽङ्गस्याचामादेरचः स्थाने वृद्धिर्भवति । गार्ग्यः । वात्स्यः । दाक्षिः । प्लाक्षिः । णिति - औप गवः । कापटवः । त्वाष्ट्रः, जागत इत्यत्राचामादेर्वृद्धिरन्त्योपधालक्षणां वृद्धिं बाधते ।।
किति च ।। 7 - 2 - 118 ।।
किति च तद्धिते परतोऽङ्गस्याचामादेरचः स्थाने वृद्धिर्भवति । नडादिभ्यः फक् - नाडायनः , चारायणः । प्राग्वहतेष्ठक् - आक्षिकः , शालाकिकः ।।
इत्युपाध्यायश्रोवामनकृतायां काशिकावृत्तौ सप्तमाध्यायस्य द्वितीयः पादः ।

7.3

काशिकावृत्तिः_ 7_ adyaya
अथ सप्तमाध्याये तृतीयः पादः
देविकाशिंशपादित्यवाड्दीर्घसत्त्रश्रेयसामात् ।। 7.3.1 ।।
देविका, शिंशपा, दित्यवाट्, दीर्घसत्त्र, श्रेयस्---इत्येतेषामङ्गानामचामादेरचः स्थाने वृद्धिप्रसङ्गे आकारो भवति ञिति, णिति, किति तद्धिते परतः ।
देविकायां भवमुदकं दाविकमुदकम् । देविकाकूले भवाः शालयो दाविकाकूलाः शालयः । पूर्वदेविका नाम प्राचां ग्रामः, तत्र भवः पूर्वदाविकः । `प्राचां ग्रामनगराणाम्' इत्युत्तरपदवृद्धइः, साप्याकार एव भवति ।
शिंशपा---शिंशपाया विकारश्चमसः शांशपश्चमसः । पलाशादिरयम्, तेन पक्षे अण्, अनुदात्तादिलक्षणो वा अञ् । शिंशपास्थले भवाः शांशपास्थलाः ।
पूर्वशिंशपा नाम प्राचां ग्रामः, तत्र भवः पूर्वशांशपः ।
दित्यवाट्---दित्यौह इदं दात्यौहम् । दीर्घसत्त्रे भवं दार्घसत्त्रम् । श्रेयस्---श्रेयसि भवं श्रायसम् ।
* वहीनरस्येद्वचनं कर्तव्यम् * । वृद्धिविषयेऽचामादेरचः स्थाने वहीनरस्य इकारादेशो भवति । वहीनरस्यापत्यं वैहीनरिः । केचित्तु विहीनरस्यैव वैहीनरिमिच्छन्ति ।।
केकयमित्रयुप्रलयानां यादेरियः ।। 7.3.2 ।।
केकय, मित्रयु, प्रलय---इत्येतेषां यकारादेः `इय'---इत्ययमादेशो भवति तद्धिते ञिति, णिति, किति च परतः । केकयस्यापत्यं कैकेयः ।
`जनपदशब्दात्क्षत्त्रियादञ्' इत्यञ्प्रत्ययः ।
मित्रयुभावेन श्लाघते मैत्रेयिकया श्लाघते । `गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु' इति वुञ् । लौकिकं हि तत्र गोत्रं गृह्यते । लोके च ऋषिशब्दः `गोत्रम्' इत्यभिधीयते ।
प्रलय---प्रलयादागतं प्रालेयमुदकम् ।।
न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ।। 7.3.3 ।।
यकारवकारभ्यामुत्तरस्य अचामादेरचः स्थाने वृद्धिर्न भवति; ताभ्यां तु यकारवकाराभ्यां पूर्वमैजागमौ भवतो ञिति, णिति, किति च तद्धिते परतः ।
यकारादैकारः, वकारादौकारः । व्यसने भवं वैयसनम् । व्याकरणमधीते वैयाकरणः । स्वश्वस्यापत्यं सौवश्वः ।
य्वाभ्यामिति किम् ? न्नर्थस्यापत्यं न्नार्थिः । पदान्ताभ्यामिति किम् ? यष्टिः प्रहरणमस्य याष्टीकः । यत इमे छात्त्रा याताः ।
प्रतिषेधवचनमैचोर्विषयप्रक्लृप्त्यर्थम् । इह मा भूद्---दाध्यश्विः, माध्वश्विरिति, न ह्यत्र य्वाभ्यामुत्तरस्य वृद्धिप्रसङ्गोऽस्ति । वृद्धेरभावात् प्रतिषेधोऽपि नास्तीत्यप्रसङ्गः ।
उत्तरपदवृद्धेरप्ययं प्रतिषेध इष्यते । पूर्वत्र्यलिन्दे भवः पूर्वत्रैयलिन्दः । यत्र तूत्तरपदसम्बन्धी यण्न भवति तत्र नेष्यते प्रतिषेधः---द्वे अशीति भृतो भूतो भावी वा द्व्याशीतिकः ।।
द्वारादीनां च ।। 7.3.4 ।।
`द्वार'---इत्येवमादीनां य्वाभ्याम् उत्तपदस्याचामादेरचः स्थाने वृद्धिर्न भवति, पूर्वौ तु ताभ्यामैजागमौ भवतः । द्वारे नियुक्तो दौवारिकः । द्वारपालस्येदं दौवारपालम् । तदादिविधिश्चात्र भवति । स्वर---स्वरमधिकृत्य कृतो ग्रन्थः सौवरः । सौवरोऽध्यायः । सौवर्यः सप्तम्य इति । व्यल्कश---व्यल्कशे भवः वैयल्कशः । स्वति---स्वस्तीत्याह सौवस्तिकः । स्वर्---स्वर्भवः सौवः ।
* अव्ययानां भमात्रे टिलोपः * । स्वर्गमनमाह सौवर्गमिकः ।

स्वाध्याय इति केचित्पठन्ति, तदनर्थकम् । शोभनोऽध्याय इत्येतस्यां व्युत्पत्तौ तु पूर्वेणैव सिद्धम् । अथाप्येवं प्युत्पत्तिः क्रियते---स्वोऽध्यायः स्वाध्याय इति ? एवमप्यत्रैव स्वशब्दस्यैव पाठात्सिद्धम् । तदादावपि हि वृद्धिरियं भवत्येव ।

स्फ्यकृत---स्फ्यकृतस्यापत्यं स्फैकृतः । स्वादुमृदुन इदं सौवादुमृदवम् ।

श्वन्---शुन इदं शौवनम् । अणि `अन्' इति प्रकृतिभावः । शुनो विकारो मांसं शौवम् । `प्राणिरजतादिभ्योऽञ्' इत्यञ् । श्वादंष्ट्रायां भवः शौवादंष्ट्रो मणिः । स्वस्येदं सौवम् । स्वग्रामे भवः सौवग्रामिकः । अध्यात्मादित्वाट्ठञ् । अपदान्तार्थोऽयमारम्भः ।

द्वार । स्वर । स्वाध्याय । व्यल्कश । स्वस्ति । स्वर् । स्फ्यकृत । स्वादुमृदु । श्वन् । स्व । द्वारादिः ।।

न्यग्रोधस्य च केवलस्य ।। 7.3.5 ।।

न्यग्रोधशब्दस्य केवलस्य यकारादुत्तरस्याचामादेरचः स्थाने वृद्धिर्न भवति, तस्माच्च पूर्वमैकार आगमो भवति । न्यग्रोधस्य विकारो नैयग्रोधश्चमसः । केवलस्येति किम् ? न्यग्रोधमूले भवाः शालयः न्याग्रोधमूला शालयः । `न्यग्रोहयतीति न्यग्रोधः'---इति व्युत्पत्तिपक्षे नियमार्थम्, अव्युत्पत्तिपक्षे विध्यर्थम् ।।

न कर्मव्यतिहारे ।। 7.3.6 ।।

कर्मव्यतिहारे यदुक्तं तन्न भवति । प्रतिषेधागमयोरयं प्रतिषेधः । व्यावक्रोशी, व्यावलेखी, व्यावव‍र्ती, व्यावहासी वर्त्तते । `कर्मव्यतिहारे णच् स्त्रियाम्' इति णच् प्रत्ययः, तदन्तात् `णचः स्त्रियामञ्' ।।

स्वागतादीनां च ।। 7.3.7 ।।

`स्वागत'---इत्येवमादीनां यदुक्तं तन्न भवति । स्वागतमित्याह स्वागतिकः । स्वध्वरेण चरति स्वाध्यवरिकः । स्वङ्गस्यापत्यं स्वाङ्गिः । व्यङ्गस्यापत्यं व्याङ्गिः । व्यडस्यापत्यं व्याडिः । व्यवहारेण चरति व्यावहारिकः । व्यवहारशब्दोऽयं लौकिके वृत्ते वर्त्तते, न तु कर्मव्यतिहारे । स्वपतौ साधुः स्वापतेयः । द्वारादिषु स्वशब्दपाठादत्र प्राप्तिः ।

स्वागत । स्वध्वर । स्वङ्ग । व्यङ्ग । व्यड । व्यवहार । स्वपति । स्वागतादिः ।।

श्वादेरिञि ।। 7.3.8 ।।

श्वादेरङ्गस्य इञि परतो यदुक्तं तन्न भवति । श्वभस्त्रस्यापत्यं श्वाभस्त्रिः । श्वादंष्ट्रिः । श्वन्शब्दो द्वारादिषु पठ्यते, तत्र च तदादिविधिर्भवतीत्येतदेव वचनं ज्ञापकम् ।

* इकारादिग्रहणं कर्त्तव्यं श्वागणिकाद्यर्थम् * । श्वगणेन चरति श्वागणिकः । श्वायूथिकः ।

तदन्तस्य चान्यत्रापि तद्धिते प्रतिषेध इष्यते । श्वाभस्त्रेरिदं श्वाभस्त्रम् ।।

पदान्तस्यान्यतरस्याम् ।। 7.3.9 ।।

पश्वादेरङ्गस्य पदशब्दान्तस्यान्यतरस्यां यदुक्तं तन्न भवति । श्वापदस्येदं श्वापदम्, शौवापदम् ।।

उत्तरपदस्य ।। 7.3.10 ।।

`उत्तरपदस्य' इत्ययमधिकारः, `हनस्तोऽचिण्णलोः' इति प्रागे तस्मात् यदित ऊर्ध्वमनुक्रमिष्यामः, `उत्तरपदस्य' इत्येवं तद्वेदितव्यम् । वक्ष्यति---

```अवयवादृतोः' । पूर्ववार्षिकम् । अपरवार्षिकम् । पूर्वहैमनम् । अपरहैमनम्" ।

यत्र पञ्चमीनिर्देशो नास्ति---`जे प्रोष्ठपदानाम्' इत्येवमादौ, तदर्थमुत्तरपदाधिकारः ।

पञ्चमीनिर्देशेष्वपि विस्पष्टार्थम्, वृद्धेश्व व्यपदेशार्थम् । `उत्तरपदवृद्धौ सर्व च' इत्युत्तरपदाधिकारे या वृद्धिरित्येवं विज्ञायते ।।

अवयवादृतोः ।। 7.3.11 ।।

अवयववाचिन उत्तरस्य ऋतुवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः । पूर्ववार्षिकम् । पूर्वहैमनम् । अपरवार्षिकम् । अपरहैमनम् । पूर्वं वर्षाणाम्, अपरं वर्षाणामित्येकदेशिसमासः । `तत्र भवः' इत्येतस्मिन्नर्थे `वर्षाभ्यष्ठक्', `हेमन्ताच्च', सर्वत्राण् च तलोपश्च' इत्यण्प्रत्ययः, तत्र ऋतोर्वृद्धिमद्विधौ `अवयवात्' इति तदन्तविधिः ।

अवयवादिति किम् ? पूर्वासु वर्षासु भवं पौर्ववर्षिकम् । `कालाट्ठञ्' इति ठञ् । अवयवपूर्वस्यैव तदन्तविधिः, नान्यस्य ।।

सुसर्वार्धाज्जनपदस्य ।। 7.3.12 ।।

सु, सर्व, अर्ध---इत्येतेभ्य उत्तरस्य जनपदवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः । सुपाञ्चालकः । सर्वपाञ्चालकः । अर्धपाञ्चालकः । `जनपदतदवध्योश्च', `अवृद्धादपि बहुवचनविषयात्' इति वुञ् । `सुसर्वार्धदिक्शब्देभ्यो जनपदस्य' इति तदन्तविधिः ।।

दिशोऽमद्राणाम् ।। 7.3.13 ।।

दिग्वाचिन उत्तरस्य जनपदवाचिनो मद्रवर्जितस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः । पूर्वपाञ्चालकः । अपरपाञ्चालकः । दक्षिणपाञ्चालकः । पूर्ववत्तदन्तविधिः प्रत्ययश्च ।

दिश इति किम् ? पूर्वः पञ्चालानां पूर्वञ्चालः, तत्र भवः पौर्वपञ्चालकः । आपरपञ्चालकः । अमद्राणामिति किम् ? पौर्वमद्रः । आपरमद्रः । `मद्रेभ्योऽञ्' इत्यञ्प्रत्ययः ।।

प्राचां ग्रामनगराणाम् ।। 7.3.14 ।।
```

प्राचां देशे ग्रामनगराणां दिश उत्तरेषामचामादेरचो वृद्धिर्भवति तद्धिते ञिति, किति च परतः ।

ग्रामाणाम्---पूर्वेषु कामशम्यां भवः पूर्वैषुकामशमः । अपरैषुकामशमः । पूर्वकार्ष्णमृत्तिकः । अपरकार्ष्णमृत्तिकः ।

नगराणाम्---पूर्वस्मिन्पाटलिपुत्रे भवः पूर्वपाटलिपुत्रकः । अपर पाटलिपुत्रकः । पूर्वकान्यकुब्जः । अपरकान्यकुब्जः ।
ग्रामत्वादेव नगराणामपि ग्रहणे सिद्धे भेदेन यदुभयोरुपादानं तत्सम्बन्धभेदप्रतिपत्त्यर्थम् । दिक्पूर्वपदो हि समुदायः पूर्वेषुकामशम्यादिः ग्रामनामधेयम् । पाटलिपुत्रादिः पुनरुत्तरपदमेव नगरमाह । तत्र ग्रामवाचिनामङ्गानामवयस्य दिक्शब्दादुत्तरस्य च नगरवाचिनामुत्तरपदानामवयवस्य वृद्धिर्भवतीत्येवमभिसम्बन्धः क्रियते । इतरत्र तु दिश उत्तरेषां नगराणामित्येव ।

पूर्वैषुकामशमः---इत्येवमादिषु कृतायामुत्तरपदवृद्धौ एकादेशो भवतीति ज्ञापितम् `नेन्द्रस्य परस्य' इति प्रतिषेधेन ।।

संख्यायाः संवत्सरसंख्यस्य च ।। 7.3.15 ।।

संख्याया उत्तरपदस्य संवत्सरशब्दस्य संख्यायाश्चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः । द्वौ, संवत्सरावधीष्टो भृतो भूतो भावी वा द्विसांवत्सरिकः ।

संख्यायाः---द्वे षष्टी अधीष्टो भृतो भूतो भावी वा द्विषाष्टिकः । द्विसाप्ततिकः । द्विषष्ट्यादिशब्दो वर्षेषु संख्येयेषु वर्त्तमानः कालाधिकारविहितं प्रत्ययमुत्पादयति ।

`परिमाणान्तस्य' इत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थम् । तेन द्वेसमिकः, त्रैसमिकः---इत्युत्तरपदवृद्धिर्न भवति । द्विवर्षा त्रिवर्षा माणविकेति `अपरिमाणबिस्ताचितं' इति पर्युदासो न भवति ।।

वर्षस्याभविष्यति ।। 7.3.16 ।।

संख्याया उत्तरस्य वर्षशब्दस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः, स चेत्तद्धितो भविष्यत्यर्थे न भवति । द्वे वर्षे अधीष्टो भृतो भूतो वा द्विवार्षिकः । त्रिवार्षिकः ।

अभविष्यतीति किम् ? यस्य त्रैवर्षिकं धान्यं निहितं भृत्यवृत्तये, अधिकं वापि विद्येत, स सोमं पातुमर्हति । त्रीणि वर्षाणि भावीति त्रैवर्षिकम् ।

अधीष्टभृतयोः `अभविष्यति' इति प्रतिषेधो न भवति । गम्यते हि तत्र भविष्यत्ता, न तु तद्धितार्थः । द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः ।।

परिमाणान्तस्यासंज्ञाशाणयोः ।। 7.3.17 ।।

परिमाणान्तस्याङ्गस्य संख्यायाः परं यदुत्तरपदं तस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः; संज्ञायां विषये शाणे चोत्तरपदे न भवति । द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः । द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम् । `विभाषा कार्षापणसहस्राभ्याम्' इत्यत्र `सुवर्णशतमानयोरुपसंख्यानम्' इति लुको विकल्पः । द्वाभ्यां निष्काभ्यां क्रीतम् `द्वित्रिपूर्वान्निष्काद्'---द्विनैष्किकम् ।

असंज्ञाशाणयोरिति किम् ? पाञ्चलोहितिकम् । पाञ्चकलापिकम् । पञ्च लोहित्यः परिमाणस्य, पञ्च कलापानि परिमाणमस्येति विगृह्य `तदस्य परिमाणम्' इति योगविभागात्प्रत्ययः, तद्धितान्तश्चायं समुदायः संज्ञा । द्वाभ्यां शाणाभ्यां क्रीतं द्वैशाणम् । त्रैशाणम् । `शाणाद्वा', `द्वित्रिपूर्वादण्च' इत्यण्प्रत्ययः ।

`असंज्ञाशाणकुलिजानाम्' इति केचित्पठन्ति । द्वे कुलिजे प्रयोजनमस्य द्वैकुलिजिकः ।।

जे प्रोष्ठपदानाम् ।। 7.3.18 ।।

`जे' इति जातार्थो निर्दिश्यते । तत्र यस्तद्धितो विहितस्तस्मिन् ञिति, णिति, किति च परतः प्रोष्ठपदानामुत्तरस्याचामादेरचो वृद्धिर्भवति । प्रोष्ठपदा नाम नक्षत्रम्, ताभिर्युक्तः काल इत्यण् । तस्य `लुबविशेषे' इति लुप् । प्रोष्ठपदासु जातः---`ऋतुनक्षत्रेभ्योऽण्' इत्यण्---प्रोष्ठपदो माणवकः ।

जे इति किम् ? यदा प्रोष्ठपदो मघो धरणीमभिवर्षति---प्रोष्ठपदासु भवः प्रोष्ठपदः ।

`प्रोष्ठपदानाम्' इति बहुवचननिर्देशात् पर्यायोऽपि गृह्यते---भद्रपाद इति ।।

हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ।। 7.3.19 ।।

हृद्, भग, सिन्धु---इत्येवमन्तेऽङ्गे पूर्वपदस्योत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः । सुहृदयस्येदं सौहार्दम् । सुहृदयस्य भावः सौहार्द्यम् । सुभगस्य भावः सौभाग्यम् । दौर्भाग्यम् । सुभगाया अपत्यं सौभागिनेयः । दौर्भागिनेयः ।

कल्याण्यादिषु `सुभगदुर्भग' इति पठ्यते । `सुभग मन्त्रे' इत्युद्गात्रादिषु पठ्यते, तत्रोत्तरपदवृद्धिर्नेष्यते---महते सौभगाय; छन्दसि सर्वविधीनां विकल्पितत्वात् ।

सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः, सक्तुसिन्धुषु भवः साक्तुसैन्धवः । पानसैन्धवः । सिन्धुशब्दः कच्छादिषु पठ्यते, तेन तदन्तविधिरिष्यते इत्यण्प्रत्ययः ।।

अनुशतिकादीनां च ।। 7.3.20 ।।

`अनुशतिक'---इत्येवमादीनां चाङ्गानां पूर्वपदस्य चोत्तरपदस्य चाचामादेरचः स्थाने वृद्धइर्भवति तद्धिते ञिति, णिति, किति च परतः । अनुशतिकस्येदम् आनुशातिकम् । अनुहोडेन चरति आनुहौडिकः । अनुसंवरणे दीयते आनुसांवरणम् । अनुसंवत्सरे दीयते आनुसांवत्सरिकः । अङ्गारवेणुर्नाम कश्चित् , तस्यापत्यम् आङ्गारवैणवः ।

असिहत्य---तत्र भवं आसिहात्यम् । `अस्यहत्य' इति केचित् पठन्ति, ततोऽपि विमुक्तादित्वाद्ण् । अस्यहत्यशब्दोऽस्मिन्नध्यायेऽस्ति आस्यहात्यः । `अस्यहेतिः' इत्येवमपरे पठन्ति, अस्यहेतिः प्रयोजनमस्य आस्यहैतिकः । अत एव वचनादस्य समुदायस्य प्रातिपदिकत्वं विभक्तेश्चालुक् ।

वध्योग इति---विदादिरयम्, तस्यापत्यं वाध्यौगः । पुष्करसत्, अनुहरत्--एतौ बाह्वादिषु पठ्येते । पौष्करसादिः, आनुहारतिः । कुरुकत---गर्गादिः, कौरुकात्यः । कुरुपञ्चाल---कुरुपञ्चालेषु भवः कौरुपाञ्चालः । `जनपदसमुदायो जनपदग्रहणेन न गृह्यते' इति वुञ् न भवति---उदकशुद्धस्यापत्यम् औदकशौद्धिः ।

इहलोक, परलोक---तत्र भवः ऐहलौकिकः, पारलौकिकः । `लोकोत्तरपदस्य' इति ठञ् । सर्वलोक---तत्र विदितः सार्वलौकिकः । सर्वपुरुषस्येदं सार्वपौरुषम् । सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः । प्रयोग---तत्र भवः प्रायोगिकः । परस्त्री---पारस्त्रैणेयः । `कुलटाया वा' इतीनङ् ।

* राजपुरुषात् ष्यञि * । राजपौरुष्यम् । ष्यञीति किम् ? राजपुरुषस्यापत्यं राजपुरुषायणिः । `उदीचां वृद्धादगोत्रात्' इति फिञ् ।

शतकुम्भसुखशयनादयः---शतकुम्भे भवः शातकौम्भः । सौखशायनिकः । पारदारिकः । सूत्रनडस्यापत्यं सौत्रनाडिः ।

आकृतिगणश्चायमिष्यते । तेनेदमपि सिद्धं भवति---अभिगममर्हति आभिगामिकः । अधिदेवे भवमाधिदैविकम् । आधिभौतिकम् । चतस्र एव विद्याः चातुर्वैद्यम् । स्वार्थे ष्यञ् ।

अनुशतिक । अनुहोड । अनुसंवरण । अनुसंवत्सर । अङ्गारवेणु । असिहत्य । वध्योग । पुष्करसत् । अनुहरत् । कुरुकत । कुरुपञ्चाल । उदकशुद्ध । इहलोक । परलोक । सर्वलोक । सर्वपुरुष । सर्वभूमि । प्रयोग । परस्त्री । * राजपुरुषात् ष्यञि * । सूत्रनड । अनुशतिकादिः ।।

देवताद्वन्द्वे च ।। 7.3.21 ।।

देवताद्वन्द्वे च पूर्वपदस्योत्तपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः । आग्निमारुतीमनड्वा हीमालभेत । आग्निमारुतं कर्म ।

यो देवताद्वन्द्वः सूक्तहविः सम्बन्धी, तत्रायं विधिः । इह च न भवति---स्कन्दविशाखौ देवते अस्य स्कान्दविशाखः । ब्रह्मप्रजापती---ब्राह्मप्रजापत्यम् ।।

नेन्द्रस्य परस्य ।। 7.3.22 ।।

इन्द्रशब्दस्य परस्य यदुक्तं तन्न भवति । सौमेन्द्रः । आग्नेन्द्रः ।

परस्येति किम् ? ऐन्द्राग्नमेकादशकपालं चरुं निर्वपेत् ।

इन्द्रशब्दे द्वावचौ---तत्र तद्धिते एकस्य यस्येतिलोपः, अपरस्य पूर्वेण सहैकादेश इत्यप्राप्तिरेव वृद्धेः, तदेदं प्रतिषेधवचनं ज्ञापकम्---बहिरङ्गमपि पूर्वोत्तरपदयोः पूर्वं कार्यं भवति, पश्चादेकादेश इति । तेन पूर्वैषुकामशम इत्यादि सिद्धं भवति ।।

दीर्घाच्च वरुणस्य ।। 7.3.23 ।।

दीर्घादुत्तरस्य वरुणस्य यदुक्तं तन्न भवति । एन्द्रावरुणम् । मैत्रावरुणम् ।

दीर्घादिति किम् ? अग्निवारुणीमनड्वाहीमालभेत । अग्नेः---`ईदग्नेः सोमवरुणयोः' इत्यस्यानङपवादस्य `इद्वृद्धौ' इति प्रतिषेधो विधीयते, तेन दीर्घात्परो न भवति ।।

प्राचां नगरान्ते ।। 7.3.24 ।।

प्राचां देशे नगरान्तेऽङ्गे पूर्वपदस्योत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः । सुह्मनगरे भवः सौह्मनागरः । पौण्ड्रनागरः ।

प्राचामिति किम् ? मद्रनगरमुदक्षु, तत्र भवः माद्रनगरः ।।

जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् ।। 7.3.25 ।।

जङ्गल, धेनु, वलज---इत्येवमन्तस्याङ्गस्य पूर्वपदस्याचामादेरचो वृद्धिर्भवति, विभाषितमुत्तरम्=उत्तरपदस्य विभाषा भवति तद्धिते ञिति, णिति, किति च परतः । कुरुजङ्गलेषु भवं कौरुजङ्गलम्, कौरुजाङ्गलम् । वैश्वधेनवम्, वैश्वधैनवम् । सौवर्णवलजः, सौवर्णवालजः ।।

अर्धात्परिमाणस्य पूर्वस्य तु वा ।। 7.3.26 ।।

अर्धशब्दात्परस्य परिणाणवाचिन उत्तरस्याचामादेरचः स्थाने वृद्धिर्भवति, पूर्वस्य तु वा भवति तद्धइते ञिति, णिति, किति च परतः । अर्धद्रोणेन क्रीतमार्धद्रौणिकम्, अर्धद्रौणिकम् । आर्धकौडविकम्, अर्धकौडविकम् ।

परिमाणस्येति किम् ? अर्धक्रोशः प्रयोजनमस्यार्धक्रोशिकम् ।।

नातः परस्य ।। 7.3.27 ।।

अर्धात्परस्य परिमाणाकारस्य वृद्धिर्न भवति, पूर्वस्य तु वा भवति तद्धिते ञिति, णिति, च परतः । अर्धप्रस्थिकः, आर्धप्रस्थिकः । अर्धकसिकः, आर्धकसिकः । अत इति किम् ? आर्धकौडविकः । तपरकरणं किम् ? इह मा भूत्---अर्धखार्यां भवा अर्धखारी । किं च स्यात् ? अर्धखारी भार्या यस्य अर्धखारीभार्यः---`वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' इति पुंवद्भावप्रतिषेधो न स्यात् । यत्र हि तद्धिते वृद्धिः प्रतिषिष्यते, स वृद्धिनिमित्तं न भवतीति पुंवद्भावो न प्रतिषइध्यते, यथा---वैयाकरणी भार्या अस्य वैयाकरणभार्य इति ।।

प्रवाहणस्य ढे ।। 7.3.28 ।।

प्रवाहणस्य ढे परत उत्तपदस्याचामादेरचो वृद्धिर्भवति पूर्वपदस्य वा भवति । प्रवाहणस्यापत्यं प्रावाहणेयः, प्रवाहणेयः । `शुभ्रादिभ्यश्च' इति ढक् प्रत्ययः ।।

तत्प्रत्ययस्य च ।। 7.3.29 ।।

ढक्प्रत्ययान्तस्य प्रवाहणशब्दस्य तद्धितेषु परत उत्तरपदस्याचामादेरचो वृद्धिर्भवति, पूर्वस्य तु वा । प्रवाहणेयस्यापत्यं प्रावाहणेयिः, प्रवाहणेयिः । प्रावाहणेयकम्, प्रवाहणेयकम् ।

बाह्यतद्धितनिमित्ता वृद्धिर्द्वाश्रयेण विकल्पेन बाधितुमशक्येति सूत्रारम्भः ।।

नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ।। 7.3.30 ।।

नञ उत्तरेषां शुचि, ईश्वर, क्षेत्रज्ञ, कुशल, निपुण--इत्येतेषामचामादेरचो वृद्धिर्भवति, पूर्वपदस्य वा भवति तद्धिते ञिति, णिति, किति च परतः । शुचि---आशौचम्, अशौचम् । ईश्वर---आनैश्वर्यम्, अनैश्वर्यम् । क्षेत्रज्ञ---आक्षैत्रज्ञ्यम्, अक्षैत्रज्ञ्यम् । कुशल---आकौशलम्, अकौशलम् । निपुण---आनैपुणम्, अनैपुणम् ।

अत्र केचिदाहुः--इयं पूर्वपदस्य वृद्धिरप्राप्तैव विभाषा विधीयते । `न नञ्पूर्वात्तत्पुरुषात्' इत्युत्तरो भावप्रत्ययः प्रतिषिध्यते, तत्र शुच्यादिभ्य एव प्रत्यये कृते पश्चान्नञ्समासे सति वृद्धिरनङ्गस्यापि वचनाद्भवतीति ।

तदपरे न मृष्यन्ते---भाववचनादन्योऽपि हि तद्धितो वृद्धिनिमित्तमपत्यादिष्वर्थेषु नञ्समासादेव विद्यते । बहुव्रीहेश्च नञ्समासाद्भाववचनोऽप्यस्ति, तत्राङ्गाधिकारोपमर्दनं न युज्यत इति ।

अक्षेत्रज्ञानीश्वरौ तत्पुरुषावेव ब्राह्मणादिषु पठ्येति, ततस्याताभ्यां भावे ष्यञ्भवति ।।

यथातथायथापुरयोः पर्यायेण ।। 7.3.31 ।।

यथातथ, यथापुर---इत्येतयोर्नञ उत्तरयोः पर्यायेणाचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः । आयथातथ्यम्, अयाथातथ्यम् । आयथापुर्याम्, अयाथापुर्यम् । अयथातथ, अयथापुरेति ब्राह्मणादिषु नञ्समासावेतौ द्रष्टव्यौ ।

सुत्रे यथातथ---यथापुरशब्दौ तु `यथाऽसादृश्ये' इति अव्ययीभावसमासौ, तथा नपुंसकाश्रयं ह्रस्वत्वं कृतम् । भाष्ये तु यथा दर्शितम्---`अयथातथा भावः' इति तथा `सुप्सुपा; इति समासो लक्ष्यते ।।

हनस्तोऽचिण्णलोः ।। 7.3.32 ।।

`तद्धितेषु' इति निवृत्तम्, तत्सम्बद्धम् `किति' इत्यपि । `ञ्णिति' इति वर्तते । हनस्तकारादेशो भवति ञ्णिति प्रत्यये परतः, चिण्णलौ वर्जयित्वा घातयति । घातकः । साधुघाती । घातङ्घातम् । घातो वर्तते ।

अचिण्णलोरिति किम् ? अघानि । जघान ।

धातोः कार्यमुच्यमानं धातोः प्रत्यये विज्ञायते । इह न भवति---वार्त्रघ्नमितरदिति ।।

आतो युक्चिण्कृतोः ।। 7.3.33 ।।

आकारान्तस्याङ्गय चिणि कृति ञ्णिति युगागमो भवति । अदायि । अधायि । कृति---दायः, दायकः; धायः, धायकः ।

चिण्कृतोरिति किम् ? ददौ, दधौ । चौडिः, बालाकिः---बाह्वादित्वादिञ् । ज्ञा देवता अस्य ज्ञः ।।

नोदात्तोपदेशस्य मान्तस्यानाचमेः ।। 7.3.34 ।।

उदात्तोपदेशस्य मान्तस्याङ्गस्याचमिवर्जितस्य चिणि कृति च ञ्णिति यदुक्तं तन्न भवति । किञ्चोक्तम् ? `अत उपधायाः' इति वृद्धिः । अशमि, अतमि, अदमि । कृति खल्वपि---शमकः, तमकः, दमकः । शमः, तमः, दमः ।

उदात्तोपदेशस्येति किम् ? यामकः, रामकः ।

कथमुद्यमोपरमौ ? `अड उद्यमे', `यम उपरमे'---इति निपातनादनुगन्तव्यौ । उपदेशग्रहणं किम् ? शमी, दमी, तमीत्यत्र यथा स्यात्; इह मा भूत्---यामकः, रामक इति । मान्तस्येति किम् ? चारकः, पाठकः । अनाचमेरिति किम् ? आचामकः ।

* अनाचमिकमिवमीनामिति वक्तव्यम् * । आचामः । कामः । वामः । आम इति---चौरादिकस्य णिचि वृद्धौ सत्यां भवति । तत्र हि मित्त्वं नास्ति---`नान्ये मितोऽहेतौ' इति ।

`सूर्यविश्रामा भूमिः'---इत्येवमादिकं प्रयोगमन्याय्यमेव मन्यन्ते ।

चिण्कृतोरित्येव---शशाम, तताम ।।

जनिवध्योश्च ।। 7.3.35 ।।

जनि, वधि---इत्येतयोश्चिणि कृति च ञ्णिति यदुक्तं तन्न भवति । अजनि, जनकः, प्रजनः । अवधि, वधकः, वधः ।

वधिः प्रकृत्यन्तरं व्यञ्जनान्तोऽस्ति, तस्यायं प्रतिषेधो विधीयते `भक्षकश्चेन्न विद्येत वधकोऽपि न विद्यते'---इति हि प्रयोगो दृश्यते वधादेशस्यादन्तत्वादेव वृद्धेरभावः ।

चिष्कृतोरित्येव---जजान गर्भं महिमानमिन्द्रम् ।।

अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ ।। 7.3.36 ।।
सर्वं निवृत्तम्, `अङ्गस्य' इति वर्त्तते । अर्ति, ह्री, व्ली, री क्नूयी, क्ष्मायी---इत्येतेषामङ्गानामाकारान्तानां च पुगागमो भवति मौ वरतः । अर्ति---अर्पयति । ह्री---ह्रेपयति । व्ली---व्लेपयति । री--रेपयति । क्नूयी---क्नोपयति । क्ष्मायी---क्ष्मापयति । आकारान्तानाम्दापयति, धापयति ।
अर्तीति `ऋ गतिप्रापणयोः', `ऋ गतौ'---इति द्वयोरपि धात्वोर्ग्रहणम् ।
रीत्यपि--`री गतिरेषणयोः,' `रीङ् श्रवणे' इति ।
पुकः पूर्वान्तकरणम्---अदीदपदित्यत्रोपधाह्रस्वो यथा स्यादिति ।।
शाच्छासाह्वाव्यावेपां युक् ।। 7.3.37 ।।
शा, छा, सा, ह्वा, व्या, वे, पा---इत्येतेषामङ्गानां युगागमो भवति णौ परतः । शा--निशाययति । छा---अवच्छाययति । साअवसाययति । ह्वा---ह्वाययति । व्या---संव्याययति । वे---वाययति । पा---पाययति ।
पाग्रहणे `पै ओवै शोषणे'---इत्यस्यापीह ग्रहणमिच्छन्ति । `पा रक्षणे' इत्यस्य लुग्विकरणत्वान्न भवति ।
* लुगागमस्तु तस्य वक्तव्यः * । पालयति ।
* धूञ्प्रीञोर्नुग्वक्तयः * । धूनयति । प्रीणयति ।
एतेऽपि पूर्वान्ता एव क्रियन्ते, तेन न्यशीशयत्, अपीपलत्, अदूधुनत्, अपिप्रिणत्---इत्यपधाह्रस्वत्वं भवति ।
शाच्छासाह्वाव्यावेपां कृतात्वानां ग्रहणं पुकः प्राप्तिमाख्यातुम् । किमेतस्याख्याने प्रयोजनम् ? एतस्मिन् प्रकरणे लक्षणप्रतिपदोक्तपरिभाषा नास्तीत्युपदिश्यते । तेनाध्यापयति, जापयति---इत्येवमादि सिद्धं भवति ।।
वो विधूनने जुक् ।। 7.3.38 ।।
`वा'---इत्येतस्य विधूननेऽर्थे वर्तमानस्य जुगागमो भवति णौ परतः । पक्षेणोपवाजयति ।
विधूनन इति किम् ? आवापय ति केशान् ।
किमर्थ सूत्रम्, `वज गतौ' ण्यन्तस्य सिद्धत्वात् ? वातेः पुग्मा भूदित्येवमर्थम् । `पै ओवै शोषणे' इत्यस्यैतद्रूपम् ।।
लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने ।। 7.3.39 ।।
ली, ला--इत्येतयोरङ्गयोरन्यतरस्यां नुक्, लुक्---इत्येतावागमौ भवतो णौ परतः स्नेहविपातनेऽर्थे । घृतं विलाययति । विलीनयति घृतम् । विलालयति । विलापयति ।
ली + ई इतीकारः प्रश्लिष्यते, तत ईकारान्तस्यैव लुग्भवति, न तु कृतात्वस्य `विभाषा लीयतेः' इति ।
स्नेहविपातन इति किम् ? जतु विलापयति । जटाभिरालापयते ।
`ली' इति लीलीङोर्ग्रहणम् । `ला' इति लातेः, कृतात्वस्य च लीयतेः ।।
भियो हेतुभये षुक् ।। 7.3.40 ।।
`भी' इत्येतस्य हेतुभयेऽर्थे षुगागमो भवति मौ परतः । मुण्डो भीषयते । जटिलो भीषयते ।
अत्रापि भी + ई इतीकारप्रश्लेषः कृतात्वस्य षुग्निवृत्त्यर्थः । मुण्डो भापयते---इत्येवं हि तत्र भवति ।
हेतुभय इति किम् ? कुञ्चिकयैनं भाययति । नात्र हेतुः प्रयोजको भयकारणम्, किं तर्हि ? कुञ्चिका ।।
स्फायो वः ।। 7.3.41 ।।
`स्फाय्' इत्येतस्याङ्गस्य वकारादेशो भवति णौ परतः । स्फावयति ।।
शदेरगतौ तः ।। 7.3.42 ।।
शदेरङ्गस्यागतावर्थे वर्तमानस्य तकारादेशो भवति णौ परतः पुष्पाणि शातयति ।
अगताविति किम् ? गाः शादयति गोपालकः ।।
रुहः पोऽन्यतरस्याम् ।। 7.3.43 ।।
रुहेरङ्गस्यान्यतरस्यां पकारादेशो भवति मौ परतः । व्रीहीन् रोपयति । व्रीहीन् रोहयति ।।
प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ।। 7.3.44 ।।
प्रत्ययस्थात्ककारात् पूर्वस्याकारस्य इकारादेशो भवति, आपि परतः, स चेदाप्सुपः परो न भवति । जटिलिका । मुण्डिका । कारिका । हारिका । एतिकाश्चरन्ति ।
प्रत्ययग्रहणं किम् ? शक्नोतीति शका ।
स्थग्रहणं विस्पष्टार्थम्, ककारमात्रं प्रत्ययो नास्तीति सामर्थ्यात् प्रत्ययस्थस्य ग्रहणं शक्यते विज्ञातुम् ।
कादिति किम् ? मण्डना । रमणा । पूर्वस्येति किम् ? परस्य मा भूत्---पटुका । मृदुका । अत इति किम् ? गोका । नौका । तपरकरणं किम् ? राका,

धाका । आपीति किम् ? कारकः, धारकः ।

अथ आपीत्यनेन किं विशिष्यते ? ककारः । यद्येवम्, कारिकेत्यत्रापि न प्राप्नोति, अकारेण व्यवहितत्वात् ? एकादेशे कृते नास्ति व्यवधानम् । एकादेशः पूर्वविधौ स्थानिवद्भवतीति व्यवधानमेव ? वचनाद् व्यवधानमीदृशं यत्स्थानिवद्भावकृतमेकेन वर्णेन तदाश्रीयते । रथ कट्यादिषु तु श्रुतिकृतमनेकेन वर्णेन व्यवधानमिति इत्त्वं न भवति ।

असुप इति किम् ? बहवः परिव्राजका अस्यां मथुरायां बहुपरिव्राजका मथुरा । सुबन्तादयं परिव्राजकशब्दात्पर आबिति प्रतिषेधो भवति ।

प्रसज्यप्रतिषेधश्चायम्, न पर्युदासः । पर्युदासे हि सति समुदायादसुबन्तात्पर आबितीत्त्वमत्र स्यादेव । अविद्यमानः सुप् यस्मिन् सोऽयमसुबिति---अयमपि नीश्रीयते । तथा हि सति बहुचर्मिकेत्यत्रापि न स्यात्।

* मामकनरकयोरुपसंख्यानं कर्त्तव्यमप्रत्ययस्थत्वात् * । मम इयं मामिका । नरिका । अणि ममकादेशः । `केवलमामक' इति नियमात् संज्ञाच्छन्दसोरीकारो नास्त्यत्र । तेनाण्प्रत्ययान्तादपि टाब्भवतिनरान् कायतीति नरिका । `आतोऽनुपसर्गे कः' इति कः प्रत्ययः ।

* प्रत्ययनिषेधे त्यक्त्यपोश्चोपसंख्यानम् * । `उदीचामातः स्थाने यकपूर्वायाः' इति विकल्पो मा भूदिति, दाक्षिणात्यिका । इहत्यिका ।।

न यासयोः ।। 7.3.45 ।।

`या', `सा'---इत्येतयोरिकारादेशो न भवति । यका । सका ।

`यासा' इति निर्देशोऽतन्त्रम्, यत्तदोरुपलक्षणमेतत् । इहापि प्रतिषेध इष्यते---यकांयकामधीमहे, तकांतकां पचामहे इति ।

* यासयोरित्त्वप्रतिषेधे त्यकन उपसंख्यानम् * । उपत्यका । अधित्यका ।

* पावकादीनां छन्दस्युपसंख्यानम् * । हिरण्यवर्णाः शुचयः पावकाः । यासु अलोमकाः । छन्दसीति किम् ? पाविका ।

* आशिषि चोपसंख्यानम् * । जीवताद् जीवका । नन्दताद् नन्दका । भवताद् भवका ।

* उत्तरपदलोपे चोपसंख्यानम् * । देवदत्तिका, देवका । यज्ञदत्तिका, यज्ञका ।

* क्षिपकादीनां चोपसंख्यानम् * । क्षिपका । ध्रुवका ।

* तारका ज्योतिष्युपसंख्यानम् * । तारका । ज्योतिषीति किम् ? तारिका दासी ।

* वर्णका तान्तव उपसंख्यानम् * । वर्णका=प्रावरणभेदः । तान्तव इति किम् ? वर्णिका भागुरी लौकायते ।

* वर्तका शकुनौ प्राचामुपसंख्यानम् * । वर्तका शकुनिः । प्राचामन्यत्र उदीचां तु---वर्तिका । शकुनाविति किम् ? वर्तिका भागुरी लौकायतस्य ।

* अष्टका पितृदैवत्ये * । अष्टका । पितृदैवत्य इति किम् ? अष्टिका खारी ।

* वा सूतकापुत्रकावृन्दारकाणामुपसंख्यानम् * । सूतिका, सूतका । पुत्रिका, पुत्रका । वृन्दारिका, वृन्दारका ।।

उदीचामातः स्थाने यकपूर्वायाः ।। 7.3.46 ।।

उदीचामाचार्याणां मतेन यकारपूर्वायाः ककारपूर्वायाश्चातः स्थाने योऽकारस्तस्यातः स्थाने इकारादेशी भवति । `उदीचाम्'---ग्रहणं विकल्पार्थम् । इभ्यिका, इभ्यका । क्षत्त्रियिका, क्षत्त्रियका । ककारपूर्वायाः---चटकिका, चटकका । मूषिकिका, मूषिकका ।

आत इति किम् ? शांकाश्ये भवा सांकाश्यिका ।

स्थानग्रहणमनुवादेऽपि स्थानसम्बन्धप्रतिपत्त्यर्थम् । `आत' इत्यनेन ह्यत इति विशिष्यते ।

यकपूर्वाया इति किम् ? अश्वा, अश्विका । `यकपूर्वायाः' इति स्त्रीलिङ्गनिर्द्देशः---आतः स्त्रीप्रत्ययस्य प्रतिपत्त्यर्थम् । इह न भवति---शुभं यातीति शुभंयाः, शुभंयिका । भद्रं यातीति भद्रंयाः, भद्रंयिका ।

* यकपूर्वाया धात्वन्तप्रतिषेधः * । धात्वन्तयोर्यकारककारयोरस्य प्रतिषेधस्य प्रतिषेधो वक्तव्यः । सुनयिका । सुशयिका । सुपाकिका । सुशोकिका ।

भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणमपि ।। 7.3.47 ।।

एषामातः स्थाने योऽकारस्तस्य इत्त्वं न भवति उदीचामाचार्याणां मतेन । भस्त्रा---भस्त्रका, भस्त्रिका; अभस्त्रका, अभस्त्रिका । एषका, एषिका । अजा---अजका, अजिका; अनजका, अनजिका । ज्ञा---ज्ञका, ज्ञिका, अज्ञका, अज्ञिका । द्वा---द्वके, द्विके । स्वा---स्वका, स्विका; अस्वका, अस्विका ।

एषाद्वे नञ्पूर्वे न प्रयोजयतः, किं कारणम् ? अत्र हि सति यदि साकच्काभ्यां नञ्सामासः, अथापि कृते नञ्समासे पश्चादकच्उभयथापि समासाद् या विभक्तिरुत्पद्यते तस्यां सत्यां त्यदाद्यत्वे सति टापा भवितव्यम्, सोऽन्तर्वर्त्तिन्या विभक्त्या सुबन्तात्पर इति इत्त्वस्य प्राप्तिरेव नास्ति । तेन अनेषका, अद्वके---इत्येव नित्यं भवितव्यम् ।

स्वशब्दस्तु ज्ञातिधनाख्यायां नञ्पूर्वोऽपि प्रयोजयति ।

`भस्त्रा'---इत्ययमभाषितपुंस्कः, तस्य `अभाषितपुंस्काच्च' इत्येव सिद्धे यदिह ग्रहणं तदुपसर्जनार्थण् । अविद्यमाना भस्ज्ञा यस्या अभस्त्रा, साल्पा अभस्त्रका, अभस्त्रिका । अत्रोपसर्जनह्रस्वत्वे कृते पुनर्बहुव्रीहौ कृते भाषितपुंस्काद् यष्टाबुत्पद्यते तस्य `केऽणः' इति यो ह्रस्वः, नासावभाषितपुंस्काद्विहितस्यातः स्थाने भवति ।

`नञ्पूर्वाणामपि' इत्यपिशब्दादन्यपूर्वाणां केवलानां च विधिरयमिष्यते । निर्भस्त्रिका, निर्भस्त्रका । बहुभस्त्रिका, बहुभस्त्रका---इत्येवमनयोरपीष्यते ।

अत्र `नञ्पूर्वाणाम्' इति वचनमनुवाद एव मन्दबुद्धिप्रतिपत्त्यर्थः ।।

अभाषितपुंस्काच्च ।। 7.3.48 ।।

अभाषितपुंस्काद्विहितस्यातः स्थाने योऽकारस्तस्योदीचामाचार्याणां मतेन इकारादेशो न भवति । खट्वका, खट्विका । अखट्वका, अखट्विका । परमखट्वका, परमखट्विका ।

वहुव्रीहौ यदा कपि ह्रस्वः क्रियते तदा भवितव्यमनेन विधिना । अत्राप्यभाषितपुंस्काद्विहितस्यातः स्थाने भवत्यकार इति ।

यदा तु अविद्यमाना खट्वा अस्याः अखट्वा, अल्पा अखट्वा अखट्विकेति, तदा न भवति । तथा अतिक्रान्ता खट्वामतिखट्वा, अल्पा अतिखट्वा अतिखट्विका ।।

आदाचार्याणाम् ।। 7.3.49 ।।

अभाषितपुंस्कादातः स्थाने योऽकारस्तस्याचार्याणामाकारादेशो भवति । खट्वाका, अखट्वाका, परमखट्वाका ।।

ठस्येकः ।। 7.3.50 ।।

अङ्गस्य निमित्तं यष्ठः, कश्चाङ्गस्य निमित्तम् ? प्रत्ययः, तस्य प्रत्ययठस्य इक इत्ययमादेशो भवति । `प्राग्वहतेष्ठक्', आक्षिकः, शालाकिकः । `लवणाट्ठञ्', लावणिकः ।

ठगादिषु यदि वर्णमात्रं प्रत्ययः, उच्चारणार्थोऽकारः; तदा इहप्यकार उच्चारणार्थः, वर्णमात्रं तु स्थानित्वेनोपादीयते । सङ्घातग्रहणे तु प्रत्ययेऽत्रापि सङ्घातग्रहणमेव । तत्र `कणेष्ठः', कण्ठः---इत्येवमादीनामुणादीनाम् `उणादयो बहुलम्' इति न भवति ।

मथितं पण्यमस्थ माथितिकः---इत्यत्र तु यस्येतिलोपे कृते `इसुसुक्तान्तात्कः' इति स्थानिवद्भावादिकस्य कादेशः प्राप्नोति; `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न भवति । `यस्येति च' इति लोपस्य स्थानिवद्भावाद्वा । पूर्वस्मादपि हि विधौ स्थानिवद्भावः ।।

इसुसुक्तान्तात् कः ।। 7.3.51 ।।

इस्, उस्---इत्येवमन्तानामुगन्तानां तान्तानां चाङ्गानामुत्तरस्य ठस्य `क' इत्ययमादेशो भवति । इस्---सार्पिष्कः । उस्---धानुष्कः । याजुष्कः । उक्---नैषादकर्षुकः । शाबरजम्बुकः । मातृकम् । पैतृकम् । तान्तात्---औदश्वित्कः । शाकृत्कः । याकृत्कः ।

इसुसोः प्रतिपदोक्तयोर्ग्रहणादिह न भवति---आशिषा चरति आशिषिकः । उषा चरति औषिकः ।

* दोष उपसंख्यानम् * । दोर्भ्यां चरति दौष्कः ।।

चजोः कु घिण्ण्यतोः ।। 7.3.52 ।।

चकारजकारयोः कवर्गादेशो भवति घिति ण्यति च प्रत्यये परतः । घिति---पाकः । त्यागः । रागः । ण्यति---पाक्यम् । वाक्यम् । रेक्यम् ।।

न्यङ्क्वादीनां च ।। 7.3.53 ।।

`न्यङ्कु'---इत्येवमादीनां कवर्गादेशो भवति । न्यङ्कुः---`नावञ्चतेः' इति उप्रत्ययः । मद्गुः---`मिमस्जिभ्य उः' इति मस्जेरुप्रत्ययः । भृगुः---`प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च' इत्युप्रत्ययः ।

दूरेपाकः । फलेपाकः । दूरे पच्यते स्वयमेव, फले पच्यते स्वयमेव---पचाद्यच्, निपातनाद्वृद्धिः, `तत्पुरुषे कृति बहुलम्' इति सप्तम्या अलुक् । क्षणेपाकः---इत्यपि हि केचित् पठन्ति । दूरेपाकाः, फलेपाकाः---इति टाबन्तमपरेऽधीयते । उकारान्तावपरे---दूरेपाकुः, फलेपाकुरिति । तेषामुप्रत्ययो निपातनादेव ।

तक्रम्, वक्रमिति---तञ्चतेः, वञ्चतेश्च `स्फायितञ्चिवञ्चि' इत्यादिना सूत्रेण रक् । व्यतिषङ्गः । व्यतिषजतीति पचाद्यच् । अनुषङ्गः । अवसर्गः । उपसर्गः । मेघः । श्वपाकः, मांसपाकः, कपोतपाकः, उलूकपाक इति---कर्मोपदादण्प्रत्ययः ।

संज्ञायम्---मेघः । अवदाघः । निदाघः । अर्हतेर्घञ्---अर्घः । अवपूर्वस्य निपूर्वस्य च दहेः---अवदाघः । निदाघः ।

संज्ञाया अन्यत्र---अर्हः । अवदाहः । निदाहः । न्यग्रोधः, वीरुत्---इत्यत्र न्यक्पूर्वस्य रुहेः पचाद्यचि विपूर्वस्य क्विपि धकारो विधीयते । न्यग्रोहयतीति न्यग्रोधः । विरोहयतीति वीरुत् ।।

हो हन्तेर्ञ्णिन्नेषु ।। 7.3.54 ।।

हन्तेर्हकारस्य कवर्गादेशो भवति ञिति, णिति प्रत्यये परतो नकारे च । घातयति । घातकः । साधुघाती । घातङ्घातम् । घातो वर्तते । नकारे---घ्नन्ति । घ्नन्तु । अघ्नन् ।

ह इति किम् ? अलोऽन्त्यस्य मा भूत् । हन्तेरिति किम् ? प्रहारः । प्रहारकः ।

ञ्णित्प्रत्ययो हन्तेर्विशेषणम् । नकारो हकारस्य---नकारे अनन्तरस्य हन्तिहकारस्येति । तच्चानन्तर्यं श्रुतिकृतं सन्निपातकृतमाश्रीयते । स्थानिवद्भावशास्त्रकृतं तु यदनानन्तर्यं तदविघातकम्; वचनसामर्थ्यात् ।

यद्यपि सर्वैरेव ञ्णिन्नैर्हन्तिहकारो विशिष्यते, तथापि `येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' इति ञ्णिति धात्ववयवेन व्यवहितेऽपि सति भवति । इह तु न भवति---हननमिच्छति हननीयति, हननीयतेर्ण्वुल्, हननीयक इति ।।

अभ्यासाच्च ।। 7.3.55 ।।

अभ्यासादुत्तरस्य हन्तिहकारस्य कवर्गादेशो भवति । जिघांसति । जङ्घन्यते । अहं जघन ।
अभ्यासनिमित्ते प्रत्ययो हन्तेरङ्गस्य योऽभ्यासस्तस्मादेवैतत् कुत्वम् । इह न भवति--हननीयितुमिच्छति जिहननीयिषति ।।
हेरचङि ।। 7.3.56 ।।
हिनोतेर्हकारस्याभ्यासादुत्तरस्य कवर्गादेशो भवति अचङि । प्रजिघीषति । प्रजेघीयते । प्रजिघाय ।
अचङीति किम् ? प्राजीहयद् दूतम् ।
अचङीति शक्यमकर्त्तुम् । कथम् ? चङ्यभ्यासनिमित्ते णौ हिनोतिरङ्गं भवति, तत्राभ्यासनिमित्ते प्रत्यये हेरङ्गस्येति विज्ञायमाने प्राप्तिरेव नास्ति ?
तत्क्रियते ज्ञापकार्थम् । एतज्ज्ञाप्यते---`हेरचङि' इति चङोऽन्यत्र हेर्ण्यधिकस्यापि कुत्वं भवतीति । तेन प्रजिघाययिषतीति सिद्धं भवति ।।
सन्लिटोर्जेः ।। 7.3.57 ।।
सनि लिटि च प्रत्यये जेरङ्गस्य योऽभ्यासस्तस्मादुत्तरस्य कवर्गादेशो भवति । जिगीसति । जिगाय । सन्लिटोरिति किम् ? जेजीयते ।
जिनातेः सम्प्रसारणे कृते यद्यपि जिर्भवति, तथापि लाक्षणिकत्वात्तस्य ग्रहणं न भवति । जिज्यतुः, जिज्युः---इत्येव भवति ।।
विभाषा चेः ।। 7.3.58 ।।
चिनोतेरङ्गस्य सन्लिटोरभ्यासादुत्तरस्य विभाषा कवर्गादेशो भवति । चितीषति, चिकीषति । चिकाय, चिचाय ।
`सन्लिटोः' इत्येव---चेचीयते ।
न क्वादेः ।। 7.3.59 ।।
कवर्गादेर्धातोश्चजोः कवर्गादेशो न भवति । कूजो वर्त्तते । खर्जः । गर्जः । कूज्यं भवता, खर्ज्यं गर्ज्यं भवता ।।
अजिव्रज्योश्च ।। 7.3.60 ।।
अजि, व्रजि---इत्येतयोश्च कवर्गादेशो न भवति । समाजः । उदाजः । व्रजि---परिव्राजः । परिव्राज्यम् ।
`अजेस्तु---`अजेर्व्यघञपोः' इति वीभावस्य विधानात् ण्यति नास्त्युदाहरणम् ।।
भुजन्युब्जौ पाण्युपतापयोः ।। 7.3.61 ।।
भुज, न्युब्ज---इत्येतौ शब्दौ निपात्येते पाणौ, उपतापे च । भुज्यतेऽनेनेति भुजः=पाणिः । `हलश्च' इति घञ् । तत्र कुत्वाभावः गुणाभावश्च निपात्यते ।
`उब्ज आर्जवे', न्युब्जिताः शेरतेऽस्मिन्निति न्युब्जः । उपतापः=रोगः, तथैव घञि कुत्वाभावो निपात्यते ।
पाण्युपतापयोरिति किम् ? भोगः, समुद्गः ।।
प्रयाजानुयाजौ यज्ञाङ्गे ।। 7.3.62 ।।
प्रयाज, अनुयाज---इत्येतौ निपात्येते यज्ञाङ्गे । पञ्च प्रयाजाः । पञ्चानुयाजाः । त्वमग्ने प्रयाजानां पश्चात् त्वं पुरस्तात् ।
यज्ञाङ्गे इति किम् ? प्रयागः अनुयागः ।
प्रयाजानुयाजग्रहणं प्रदर्शनार्थम्---अन्यत्राप्येवम्प्रकारे कुत्वं न भवति । एकादशोपयाजाः, उपांशुयाजमन्तरा यजति, अष्टौ पत्नीसंयाजा भवन्ति,
ऋतुयाजैश्चरन्ति---इत्येवमादि सिद्धं भवति ।।
वञ्चेर्गतौ ।। 7.3.63 ।।
वञ्चेरङ्गस्य गतौ वर्त्तमानस्य कवर्गादेशो न भवति । वञ्च्यं वञ्चन्ति वणिजः ।
गताविति किम् ? वङ्कं काष्ठम् । कुटिलमित्यर्थः ।।
ओक उचः के ।। 7.3.64 ।।
उचेर्धातोः के प्रत्यये `ओकः' इति निपात्यते । किं पुनरत्र निपात्यते ? कुत्वम्, गुणश्च । न्योकः शकुन्तः । न्योको गृहम् ।
कर्त्तरि इगुपधलक्षणः कः प्रत्ययः । अधिकरणादौ तु कारकान्तरे `घञर्थे कविधानम्' इति ।
किमर्थं पुनरयं घञ्येव न व्युत्पाद्यते ? स्वरार्थमन्तोदात्तोऽयमिष्यते, घञि सत्याद्युदात्तः स्यात् ।
दिवौकसः, जलौकसः---इत्येवमादावप्यसुनि प्रत्यये `उणादयो बहुलम्' इति कुत्वं द्रष्टव्यम् ।।
ण्य आवश्यके ।। 7.3.65 ।।
ण्ये परतः आवश्यकेऽर्थे कवर्गो न भवति । अवश्यपाच्यम् । अवश्यवाच्यम् । अवश्यरेच्यम् ।
आवश्यके इति किम् ? पाक्यम् । वाक्यम् । रेक्यम् ।।
यजयाचरुचप्रवचर्चश्च ।। 7.3.66 ।।
यज, याच, रुच, प्रवच, ऋच---इत्येतेषां ण्ये परतः कवर्गादेशो न भवति । यज---याज्यम् । याच---याच्चम् । रुच---रोच्यम् । प्रवच---प्रवाच्यम् । ऋच-
--अर्च्यम् । ऋदुपधादपि ऋचेरत एव निपातनाद् ण्यद्भवति ।
प्रवचग्रहणं शब्दसंज्ञार्थम् । प्रवाच्यो नाम पाठविशेषोपलक्षितो ग्रन्थोऽस्ति ।

अपरे पुनराहुः---उपसर्गपूर्वस्य नियमार्थम्---प्रपूर्वस्यैव वचेरशब्दसंज्ञायां कुत्वप्रतिषेधो यथा स्यात्, अन्योपसर्गपूर्वस्य मा भूदिति । `अविवाक्यमहः' इति पठन्ति, एतत्तु विशेष एवेष्यते---दशरात्रस्य यद् दशममहः । अन्यत्राविवाच्यमेव भवति ।

* ण्यति प्रतिषेधे त्यजेरुपसंख्यानम् * । त्याज्यम् ।।

वचोऽशब्दसंज्ञायाम् ।। 7.3.67 ।।

वचोऽशब्दसंज्ञायां ण्यति परतः कवर्गो न भवति । वाच्यमाह । अवाच्यमाह ।

अशब्दसंज्ञायामिति किम् ? अवघुषितं वाक्यमाह ।।

प्रयोज्यनियोज्यौ शक्यार्थे ।। 7.3.68 ।।

प्रयोज्य, नियोज्य---इत्येतौ शब्दौ शक्यार्थे निपात्येते । शक्यः प्रयोक्तुं प्रयोज्यः । शक्यो नियोक्तुं नियोज्यः ।

शक्यार्थ इति किम् ? प्रयोग्यः, नियोग्यः ।।

भोज्यं भक्ष्ये ।। 7.3.69 ।।

भोज्यं निपात्यते भक्ष्येऽभिधेये । भोज्य ओदनः । भोज्या यवागूः । इह भक्ष्यमभ्यवहार्यमात्रम् ।

भक्ष्य इति किम् ? भोग्यः कम्बलः ।।

घोर्लोपो लोटि वा ।। 7.3.70 ।।

घुसंज्ञकानां लेटि परतो वा लोपो भवति । दधद्रत्नानि दाशुषे । सोमो ददद् गन्धर्वाय । न च भवति---यदग्निरग्नये ददात् ।

आडागमे सति लोपेऽपि ददादिति सिद्धं भवति । तत्र वावचनं विस्पष्टार्थम् । एषा हि कस्यचिदाशङ्का स्याद्---ददादित्येव नित्ये प्राप्ते लोप आरभ्यमाणो बाधत एवैतद्रूपमिति ।।

ओतः श्यनि ।। 7.3.71 ।।

ओकारान्तस्याङ्गस्य श्यनि परतो लोपो भवति । शो---निश्यति । छो---अवच्छ्यति । दो---अवद्यपि । सो---अवस्यति ।।

क्सस्याचि ।। 7.3.72 ।।

क्सस्याजादौ प्रत्यये लोपो भवति । अधुक्षाताम् । अधुक्षाथाम् । अधुक्षि ।

अचीति किम् ? अधुक्षत् । अधुक्षताम् । ककारवत उपादानं किम् ? इह मा भूत्---उत्सौ, उत्साः । वत्सौ, वत्साः ।।

लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ।। 7.3.73 ।।

दुह, दिह, लिह, गुह---इत्येतेषाभङ्गानामात्मनेपदे दन्त्यादौ परतः क्सस्य वा लुग्भवति । अदुग्ध, अधुक्षत । अदुग्धाः, अधुक्षथाः । अदुग्ध्वम्, अधुक्षध्वम् । अदुह्वहि, अधुक्षावहि । दिह---अदिग्ध, अधिक्षत । लिह---अलीढ, अलिक्षत । गुह--न्यगूढ, न्यधुक्षत ।

दुहादीनामिति किम् ? व्यत्यपुक्षत ।

आत्मनेपदे इति किम् ? अधुक्षत् । दन्त्ये इति किम् ? अधुक्षामहि ।

लोप इति वर्त्तमाने लुगग्रहणं सर्वादेशार्थम्, तच्च वह्यर्थम् । अन्यत्र त्वन्त्यस्यैव लोपे कृते `झलो झलि' इति सकारलोपेन सिद्ध्यति । स्थानिवद्भावोऽपि अकारलोपस्य नास्ति; `पूर्वभासिद्धे न स्थानिवत्' इति ।

दन्त्योष्ठ्योऽपि वकारो दन्त्य इति गृह्यते । यदि स न गृह्येत, ततस्तौग्रहणमेवात्र कृतं स्यात् ।।

शामामष्टानां दीर्घः श्यनि ।। 7.3.74 ।।

शमादीमष्टानां दीर्घो भवति श्यनि परतः । शम्---शाम्यति । तम्---ताम्यति । दम्---दाम्यति । भ्रम्---भ्राम्यति । क्षम्---क्षाम्यति । क्लम्---क्लाम्यति । मदी---माद्यति ।

अष्टानामिति किम् ? अस्यति । श्यनीति किम् ? भ्रमति । `वा भ्राश' इति श्यनो विकल्पः । बभ्राम ।।

ष्ठिवुक्लम्याचमां शिति ।। 7.3.75 ।।

ष्ठिवु, क्लमि, आचम्---इत्येतेषां दीर्घो भवति शिति परतः । ष्ठीवति । क्लमु---क्लामति । आचामति ।

क्लमिग्रहणं शबर्थम् ।

चमेराङ्पूर्वस्य ग्रहणम्, इह मा भूत्---चमति, विचमति ।।

क्रमः परस्मैपदेषु ।। 7.3.76 ।।

क्रमः प्रस्मैपदपरे शिति परतो दीर्घो भवति । क्रामति, क्रामतः, क्रामन्ति ।

परस्मैपदेष्विति किम् ? आक्रमते आदित्यः ।

इह उत्क्राम्, संक्राम---इति हेर्लुकि कृते `न लुमताङ्गस्य' इति प्रत्ययलक्षणप्रतिषेधाद्दीर्घो न प्राप्नोति ? नैष दोषः; लुमता शब्देन लुप्ते यदङ्गं तस्य कार्ये स प्रतिषेधः । न च हौ क्रमिरङ्गम्, किं तर्हि ? शपि ।।

इषुगमियमां छः ।। 7.3.77 ।।
इषु, गमि, यम---इत्येतेषां शिति परतश्छकारादेशो भवति । इच्छति । गच्छति । यच्छति ।
इषेरुदितो ग्रहणम्, इह मा भूत्---इष्यति, इष्णातीति ।
ये इषिमुदितं नाधीयते, इह च सूत्रे `अचि'---इत्यनुवर्त्तयन्ति । तच्च प्रधानमज्ग्रहणं शितीत्यनेन विशेष्यते इति वर्णयन्ति । तथा च सति तदादिविधिर्न भवति । `यस्मिन्विधिस्तदादावल्ग्रहणे'---इत्येतदपि विशेषणेनैवेष्यते, तेन इषाणेत्यत्र छत्वं न भवति । न ह्ययमजेव शिदिति ।।
प्राघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ।। 7.3.78 ।।
पा, घ्रा, ध्मा, स्था, म्ना, दाण्, दृशि, अर्ति, सर्त्ति, शद, सदइत्येतेषां पिब, जिघ्र, धम, तिष्ठ, मन, यच्छ, पश्य, ऋच्छ, धौ, शीय, सीद---इत्येते आदेशा भवन्ति शिति परतः । पा---पिबति । घ्राजिघ्रति । ध्मा---धमति । स्था---तिष्ठति । म्ना---मनति । दाण्यच्छति । दृशि---पश्यति । अर्त्ति---ऋच्छति । सर्त्ति---धावति । शदशीयते । सद्---सीदति ।
पिबतेर्लधूपघगुणः प्राप्नोति, सः `अङ्गवृत्ते पुनर्वत्तावविधिर्निष्ठतस्य' इति न भवति । अथ वा---अकारान्तोऽयमादेश आद्युदात्तो निपात्यते ।
सर्तेर्वेगितायां गतौ धावादेशमिच्छन्ति । अन्यत्र---सरति, अनुसरतीत्येव भवति ।।
ज्ञाजनोर्जा ।। 7.3.79 ।।
ज्ञा, जन---इत्येतयोर्जादेशो भवति शिति परतः । जानाति । जायते । जनेर्दैवादिकस्य ग्रहणम् ।।
प्वादीनां ह्रस्वः ।। 7.3.80 ।।
`पू'---इत्येवमादीनां ह्रस्वो भवति शिति परतः ।
प्वादयः क्र्यादिषु पठ्यन्ते । `पूञ् पवने'---इत्यतः प्रभृति `व्ली गतौ वृत्' इति यावत्केचिदिच्छन्ति, वृत्करणमेतल्लवादीनां प्वादीनां च परिसमाप्त्यर्थमिति । अपरे तु---ल्वादीनामेव परिसमाप्त्यर्थं वृत्करणमेतदिच्छन्ति, आगणान्ताः प्वादय इति ।
पूञ्---पुनाति । लूञ्---लुनाति । स्तृञ्---स्तृणाति ।
येषामागणान्ताः प्वादयः, तेषां जानातीत्यत्र ह्रस्वः प्राप्नोति, ज्ञाजनोर्जा' इति इति दीर्घकरणसामर्थ्यान्न भवति । जनेरपि हि ज आदेशे सपि `अतो दीर्घो यञि' इति दीर्घत्वेन---जायते इति सिद्ध्यति ।।
मीनातेर्निगमे ।। 7.3.81 ।।
मीनातेरङ्गस्य शिति प्रत्यये परतो ह्रस्वो भवति निगमविषये । प्रमिणन्ति व्रतानि ।
निगम इति किम् ? प्रमीणाति ।।
मिदेर्गुणः ।। 7.3.82 ।।
मिदेरङ्गस्येको गुणो भवति शिति प्रत्यये परतः । मेद्यति, मेद्यतः, मेद्यन्ति । शितीत्येव---मिद्यते ।।
जुसि च ।। 7.3.83 ।।
जुसि च प्रत्यये परत इगन्तस्याङ्गस्य गुणो भवति । अजुहवुः । अबिभयुः । अबिभरुः ।
अथ चिनुयुः, सुनुयुरित्यत्र कस्मान्न भवति ? अत्र द्वे ङित्त्वे---सार्वधातुकाश्रयम्, यासुडाश्रयं च । तत्र नाप्राप्ते सार्वधातुकाश्रयङित्त्वनिमित्ते प्रतिषेधे जुसि गुण आरभ्यमाणस्तमेव बाधते । यासुडाश्रयङित्त्वनिमित्तं तु न बाधते, तत्र हि प्राप्ते चाप्राप्ते चारभ्यत इति ।।
सार्वधातुकार्धधातुकयोः ।। 7.3.84 ।।
सार्वधातुके आर्धधातुके च प्रत्यये परत इगन्तस्याङ्गस्य गुणो भवति । तरति । नयति । भवति । आर्धधातुके---कर्ता, चेता, स्तोता ।
सार्वधातुकार्धधातुकयोरिति किम् ? अग्नित्वम् । अग्निकाम्यति । यदि हि प्रत्यये, सङीति वोच्येत, इहापि स्यात् ।।
जाग्रोऽविचिण्णल्ङित्सु ।। 7.3.85 ।।
`जागृ'---इत्येतस्याङ्गस्य गुणो भवति अविचिण्णल्ङित्सु परतः । जागरयति । जागरकः । साधुजागरी । जागरंजागरम् । जागरो वर्त्तते । जागरितः । जागरितवान् ।
वृद्धिविषये, प्रतिषेधविषये च यथा स्यात्---इति जागर्त्तेरयं गुण आरभ्यते । तस्मिन् कृते या `अत उपधायाः' वृद्धिः प्राप्नोति, सा न भवति । यदि हि स्याद्, अनर्थक एव गुणः स्यात्, चिण्णलोश्च प्रतिषेधवचनमनर्थकम् ।
अविचिण्णल्ङित्स्विति किम् ? जृशृस्तजागृभ्यः क्विन्'---जागृविः । चिण्---अजागारि । णल्---जजागार । ङित्---जागृतः, जागृथः ।
`वि' इति केचिदिकारमुच्चारणार्थं वर्णयन्ति । क्वसावपि वकारादौ गुणो न भवति---जजागृवान् । कथमजागरुः, अहं जजागर इति, अत्र प्रतिषेधः प्राप्नोति ? न; अप्रतिषेधात् । अविचिण्णल्ङित्स्विति पर्युदासोऽयम् ।
अथ वा---`जाग्रः' इति प्राप्तरसावानन्तर्याद् विचिण्णल्ङित्सु प्रतिषिध्यते; या तु `जुसि च', `सार्वाधातुकार्धधातुकयोः' इति च प्राप्तिः, सा न प्रतिषिध्यते ।।
पुगन्तलघूपघस्य च ।। 7.3.86 ।।

पुगन्तस्याङ्गस्य लघूपधस्य चसार्वधातुकार्धधातुकयोर्गुणो भवति । पुगन्तस्य---व्लेपयति, ह्रेपयति, क्नोपयति । लघूपधस्य---भेदनम्, धेचनम्, भेत्ता, छेत्ता ।
प्रत्ययादेरङ्गावयवस्य च हलोरानन्तर्ये सति लघूपधगुणो न व्यावर्त्यते---इति ज्ञापितमेतत् क्नुसनोः कित्करणेन । `त्रसिगृधिधृषिक्षिपेः क्नुः' ।
`हलन्ताच्च' इति ।
संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति ।
विध्यपेक्षं लघोश्चासौ कथं कुण्डिर्न दुष्यति ।।
धातोर्नुमः कथं रञ्जेः स्यन्दिश्रन्थ्योर्निपातनात् ।
अनल्लोपश्दीर्घत्वे विध्यपेक्षे न सिध्यतः ।।
अभ्यस्तस्य यदाहाचि लङर्थं तत्कृतं भवेत् ।
क्नुसनोर्यत्कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे ।।
उपधा चात्र इगेव गृह्यते, ततो भिनत्तीति गुणो न भवति ।
अपरे---पुकि अन्तः पुगन्तः; लघ्वी उपधा उघूपधा; पुगन्तश्च लघूपधा च पुगन्तलघूपधमिति सूत्रार्थं वर्णयन्ति ।।
नाभ्यस्तस्याचि पिति सार्वधातुके ।। 7.3.87 ।।
अभ्यस्तसंज्ञकस्याङ्गस्य लघूपधस्याजादौ पिति सार्वधातुके गुणो न भवति । नेनिजानि, वेविजानि, परिवेविषाणि । अनेनिजम्, अवेविजम्, पर्यवेविषम् ।
अभ्यस्तस्येति किम् ? वेदानि । अचीति किम् ? नेनेक्ति ।
पिद्ग्रहणमुत्तरार्थम् । सार्वधातुक इति किम् ? निनेज ।
लघूपधस्येत्येव---जुहवानि । अजुहवम् ।
* बहुलं छन्दसीति वक्तव्यम् * । जुजोषदिति यथा स्यात् । पस्पशाते । चाकशीति । वावशीति । यङ्लुकि छान्दसमुपधाह्रस्वत्वं द्रष्टव्यम् । पस्पशाते---इत्यत्राभ्यासह्रस्वत्वं च ।
प्रकृत्यन्तराणां वा स्पशिकशिवशीनामेतानि रूपाणि ।।
भूसुवोस्तिङि ।। 7.3.88 ।।
भू, सू---इत्येतयोस्तिङि सार्वधातुके गुणो न भवति । अभूत्, अभूः, अभूवम् । सुवै, सुवावहै, सुवामहै । सूतेर्लुग्विकरणस्येदं ग्रहणम् ।
सुवति---सूयत्योर्विकरणेन तिङो व्यवधानम् । विकरणस्यैव ङित्त्वाद् गुणाभावः सिद्धः ।
तिङीति किम् ? भवति ।
`सार्वधातुके' इत्येव---व्यतिभविषीष्ट ।
अथ बोभवीतिति यङ्लुकि गुणप्रतिषेधः कस्मान्न भवति ? ज्ञापकात् । यदयं बोभूत्विति गुणाभावार्थं निपातनं करोति ।।
अतो वृद्धिर्लुकि हलि ।। 7.3.89 ।।
`सार्वधातुके', `पिति' इति वर्त्तते । उकारान्तस्याङ्गस्य वृद्धिर्भवति लुकि सति हलादौ पिति सार्वधातुके । यौति, यौषि, यौमि । नौति, नौषि, नौमि । स्तौति, स्तौषि, स्तौमि ।
उत इति किम् ? एति, एषि, एमि । लुकीति किम् ? सुनोति, सुनोषि, सुनोमि । हलीति किम् ? यवानि, रवाणि ।
`पिति' इत्येव---युतः, रुतः ।
अपि स्तुयाद्राजानम्---इत्यत्र हि `ङिच्च पिन्न भवति' इति पित्त्वप्रतिषेधाद् वृद्धेरभावः ।
`नाभ्यस्तस्य' इत्येतदिहानुवर्त्तते---योयोति, रोरोति---इत्येवमाद्यर्थम् ।
ऊर्णोतेर्विभाषा ।। 7.3.90 ।।
ऊर्णोतेर्विभाषा वृद्धिर्भवति हलादौ पिति सार्वधातुके । प्रोर्णौति, प्रोर्णोति । प्रोर्णौषि, प्रोर्णोषि । प्रोर्णौमि, प्रोर्णोमि ।
`हलि' इत्येव---प्रोर्णवानि ।
गुणोऽपृक्ते ।। 7.3.91 ।।
ऊर्णोतेर्धातोरपृक्ते हलि पिति सार्वधातुके गुणो भवति । प्रोर्णोत् । प्रोर्णोः ।
`हलि' इति वर्तमाने यदपृक्तग्रहणं क्रियते, तेनैव ज्ञाप्यते---भवत्येषा परिभाषा `यस्मिन्विधिस्तदादावल्ग्रहणे' इति ।।
तृणह इम् ।। 7.3.92 ।।
`तृणह' इत्येतस्याङ्गस्य इमागमो भवति हलि पिति सार्वधातुके । तृणेढि । तृणेक्षि । तृणेह्मि । अतृणेट् ।
वर्णाश्रयेऽप्यत्र प्रत्ययलक्षणमिष्यते ।
हलीति किम् ? तृणहानि ।
`पिति' इत्येव---तृण्ढः ।

`तृणह'---इत्यागतश्नम्को गृह्यते, श्नमि कृते इमागमो यथा स्यादिति ।।

ब्रुव ईट् ।। 7.3.93 ।।

`ब्रू'---इत्येतस्मादुत्तरस्य हलादेः पितः सार्वधातुकस्य ईडागमो भवति । ब्रवीति । ब्रवीषि । ब्रवीमि । अब्रवीत् ।

हलीत्येव---ब्रवाणि । पितीत्येव---ब्रूतः ।।

यङो वा ।। 7.3.94 ।।

यङ उत्तरस्य हलादेः पितः सार्वधातुकस्य ईडागमो भवति वा । शाकुनिको लालपीति । दुन्दुभिर्वावदीति । त्रिधा बद्धो वृषभो रोरवीति । महो देवो मर्त्त्या आविवेश ।

न च भवति---वर्वर्ति, चर्कर्ति चक्रम् ।

हलादेः पितः सार्वधातुकस्य यङन्तादभाव इति यङ्लुगन्तस्योदाहरणम् ।।

तुरुस्तुशम्यमः सार्वधातुके ।। 7.3.95 ।।

`तु' इति सौत्रोऽयं धातुः, `रु शब्दे', `ष्टुञ् स्तुतौ', `शम उपशमे', `अभ गत्यादिषु'----इत्येतेभ्यः परस्य सार्वधातुकस्य हलादेर्वा ईडागमो भवति ।

उत्तौति, उत्तवीति । उपरौति, उपरवीति । उपस्तौति, उपस्तवीति । शाम्यध्वम्, शमीध्वम् । अभ्यमति, अभ्यमीति ।

शम्यमोः `बहुलं छन्दसि' इति विकरणलुकि सति हलादिसार्वधातुकमनन्तरं सम्भवति ।

आपिशलाः---`तुरुस्तुशम्यमः सार्वधातुकासुच्छन्दसि' इति पठन्ति । तत्र सर्वेषामेव छन्दसि विषये विधिरयं भवति ।

`सार्वधातुके'---इत्यनुवर्त्तमाने पुनः सार्वधातुकग्रहणमपिदर्थम् । स्तुवीत, शमीध्वमित्यत्रापि यथा स्यात् इति ।।

अस्तिसिचोऽपृक्ते ।। 7.3.96 ।।

अस्तेरङ्गात् सिजन्ताच्च परस्यापृक्तस्य सार्वधातुकस्य ईडागमो भवति । अस्तेः---आसीत् । आसीः । सिजन्तात्---अकार्षीत् । असावीत्, अलावीत् । अपावीत् ।

अपृक्ते इति किम् ? अस्ति । अकार्षम् ।

`आहिभुवोरीटि प्रतिषेधः' इति स्थानिवद्भावप्रतिषेधः, तेनेह न भवति---आत्थ । अभूदिति ।।

बहुलं छन्दसि ।। 7.3.97 ।।

अस्तिसिचोरपृक्तस्य सार्वधातुकस्य ईडागमो भवति बहुलं छन्दसि विषये । आप एवेदं सलिलं सर्वमाः । आसीदिति स्थाने आः क्रियापदम् । अहरेवासीन्न रात्रिः ।

सिचः खल्वपि---गोभिरक्षाः । प्रत्यञ्चमत्साः ।

अभैषीर्मा पुत्रकेति च भवति; छान्दसत्वात् । माङ्योगेऽप्यडागमो भवति---अक्षाः, अत्सा इति । सिच इडभावश्च ।।

रुदश्च पञ्चभ्यः ।। 7.3.98 ।।

रुदादिभ्यः परस्य सार्वधातुकस्य हलादेरपृक्तस्य ईडागमो भवति । अहोदीत्, अरोदीः । अस्वपीत्, अस्वपीः । अश्वसीत्, अश्वसीः । प्राणीत्, प्राणीः ।

अजक्षईत्, अजक्षीः ।

पञ्चभ्य इति किम् ? अजागर्भवान् ।

`अपृक्तस्य' इत्येव---रोदिति ।।

अड् गार्ग्यगालवयोः ।। 7.3.99 ।।

रुदादिभ्यः पञ्चभ्यः परस्य अपृक्तस्य सार्वधातुकस्याडागमो भवति गार्ग्यगालवयोर्मतेन । अरोदत्, अरोदः । अस्वपत्, अस्वपः । अश्वसत्, अश्वसः ।

प्राणत्, प्राणः । अजक्षत्, अजक्षः ।

गार्ग्यगालवयोर्ग्रहणं पूजार्थम् ।।

अदः सर्वेषाम् ।। 7.3.100 ।।

`अद भक्षणे'---अस्मादुत्तरस्यापृक्तस्य सार्वधातुकस्याडागमो भवति सर्वेषामाचार्याणां मतेन । आदत् । आदः ।

`अपृक्तस्य' इत्येव---अत्ति । असि ।।

अतो दीर्घो यञि ।। 7.3.101 ।।

अकारान्तस्याङ्गस्य दीर्घो भवति यञादौ सार्वधातुके परतः ।

पचामि, पचावः, पचामः । पक्ष्यामि, पक्ष्यावः, पक्ष्यामः ।

अत इति किम् ? चिनुवः, चिनुमः । यञोति किम् ? पचतः । पचथः ।

`सार्वधातुके' इत्येव---अङ्गना, केशवः ।

केचिदत्र `तिङि' इत्यनुवर्त्तयन्ति, तेषआं भववानिति क्वसौ सार्वधातुकदीर्घो न भवति ।।

सुपि च ।। 7.3.102 ।।
`अको दीर्घो यञि' इत्यनुवर्त्तते । सुपि च यञादौ परतोऽकारान्तस्याङ्गस्य दीर्घो भवति । वृक्षाय । प्लक्षाय । वृक्षाभ्याम् । प्लक्षाभ्याम् ।।
`अतः' इत्येव---अग्निभ्याम् ।
`यञि' इत्येव---वृक्षस्य । प्लक्षस्य ।।
बहुवचने झल्येत् ।। 7.3.103 ।।
बहुवचने झलादौ सुपि परतोऽकारान्तस्याङ्गस्य एकारादेशो भवति । वृक्षेभ्यः । प्लक्षेभ्यः । वृक्षेषु । प्लक्षेषु ।
बहुवचन इति किम् ? वृक्षाभ्याम् । प्लक्षाभ्याम् । झलीति किम् ? वृक्षाणाम् । सुपोत्येव---यज्ञध्वम् । पचध्वम् ।।
ओसि च ।। 7.3.104 ।।
ओसि परतोऽकारान्तस्याङ्गस्य एकारादेशो भवति । वृक्षयोः स्वम् । प्लक्षयोः स्वम् । वृक्षयोर्निधेहि । प्लक्षयोर्निधेहि ।।
आङि चापः ।। 7.3.105 ।।
`आङ्' इति पूर्वाचार्यनिर्देशेन तृतीयैकवचनं गृह्यते । तस्मिन्नाङि परतश्चकारादोसि च आबन्तस्याङ्गस्यैकारादेशो भवति । खट्वया, मालया । खट्वयो, मालयोः । बहुराजया, कारीषगन्ध्यया । बहुराजयोः, कारीषगन्ध्ययोः ।
आप इति पितो ग्रहणं किम् ? कीलालपा ब्राह्मणेन । कीलालपोर्ब्राह्मणकुलयोः ।
`ङ्याब्ग्रहणेऽदीर्घग्रहणम्' इति वचनादिह न भवति---अतिखट्वेन ब्राह्मणकुलेन ।।
सम्बुद्धौ च ।। 7.3.106 ।।
`आपः' इति वर्त्तते । सम्बुद्धौ च परत आबन्तस्याङ्गस्य एत्वं भवति । हे खट्वे ! हे बहुराजे ! हे कारीषगन्ध्ये ! ।।
अम्बार्थनद्योर्हस्वः ।। 7.3.107 ।।
`सम्बुद्धौ' इति वर्त्तते । अम्बार्थनामङ्गानां नद्यन्तानां ह्रस्वो भवति सम्बुद्धौ परतः । हे अम्ब ! हे अक्क ! हे अल्ल !
नद्याः खल्वपि---हे कुमारि । हे शार्ङ्गरवि ! हे ब्रह्मबन्धु ! हे अम्बिके !
* डलकवतीनां प्रतिषेधो वक्तव्यः * । हे अम्बाडे ! हे अम्बाले ! हे अम्बिके !
* छन्दसि वेति वक्तव्यम् * । हे अम्बाड, हे अम्बाडे ! हे हे अम्बाल, हे अम्बाले ! हे अम्बिक, हे अम्बिके !
* तलो ह्रस्वो वा ङिसम्बुद्ध्योरिति वक्तव्यम् * । देवते भक्तिः, देवतायां भक्तिः । हे देवत, हे देवते ! । छन्दस्येव ह्रस्वत्वमिष्यते ।
* मातृणां मातच् पुत्रार्थमर्हते * । मातणां मातजादेशो वक्तव्यः सम्बुद्धौ, पुत्राय पुत्रमभिधातुम्, कीदृशाय ? अर्हते । मात्राव्यपदेशमर्हति श्लाघनीयत्वाद्यः पुत्रस्तदर्थम् । हे गार्गीमात ! `नद्यृतश्च' इति समासान्तापवादो मातजादेशः । चित्करणमन्तोदात्तार्थम् ।।
ह्रस्वस्य गुणः ।। 7.3.108 ।।
`सम्बुद्धौ' इति वर्तते । ह्रस्वान्तस्याङ्गस्य गुणो भवति सम्बुद्धौ परतः । हे अग्ने ! हे वायो ! हे पटो !
हे कुमारि, हे ब्रह्मबन्धु---इत्येवमादीनां ह्रस्वविधानसामर्थ्याद् गुणो न भवति । यदि गुण इष्टः स्यात्, `अम्बार्थानां ह्रस्वः' इत्युक्त्वा `नदीह्रस्वयोर्गुणः' इत्येवं ब्रूयात् ।।
जसि च ।। 7.3.109 ।।
जसि परतो ह्रस्वान्तस्याङ्गस्य गुणो भवति । अग्नयः । वायवः । पटवः । धेनवः । बुद्धयः ।
* जसादिषु छन्दसि वावचनं प्राग्णौ चङ्युपधाया ह्रस्व इत्येत्समात् * । इतः प्रकरणात् प्रभृति छन्दसि वेति वक्तव्यम् । किं प्रयोजनम् ? अम्बे, दर्वि, शतक्रत्वः, पश्वे भृत्यः, किकिदीव्या । अम्बे, अम्ब । पूर्णा दर्वि, पूर्णा दर्वी । अधा शतक्रत्वः, शतक्रतवः । पश्वे भृत्यः, पशवे भृत्यः । किकिदीव्या, किकिदीविना ।।
ऋतो ङिसर्वनामस्थानयोः ।। 7.3.110 ।।
`गुणः' इति वर्त्तते । ऋकारान्तस्याङ्गस्य ङौ परतः सर्वनामस्थाने च गुणो भवति । ङौ---मातरि, पितरि, भ्रातरि, कर्तरि । सर्वनामस्थाने---कर्तारौ, कर्तारः । मातरौ, पितरौ, भ्रातरौ ।
तपरकरणं मुखसुखार्थम् ।।
घेर्ङिति ।। 7.3.111 ।।
घ्यन्तस्याङ्स्य ङिति प्रत्यये परतो गुणो भवति । अग्नये । वायवे । अग्नेरागच्छति, वायोरागच्छति । अग्ने स्वम् । वायोः स्वम् ।
घेरिति किम् ? सख्ये, पत्ये । ङितीति किम् ? अग्निभ्याम् ।।
`सुपि' इत्येव---पट्वी । कुरुतः ।।
आण्नद्याः ।। 7.3.112 ।।

नद्यन्तादङ्गादुत्तरस्य ङितः प्रत्ययस्याडागमो भवति । कुमार्थै, ब्रह्मबन्ध्वै । कुमार्याः, ब्रह्मबन्ध्वाः ।।
याडापः ।। 7.3.113 ।।
आबन्तादङ्गादुतरस्य ङितः प्रत्ययस्य याडागमो भवति । खट्वायै । बहुराजायै । कारीषगन्ध्यायै । खट्वायाः । कारीषगन्ध्यायाः । बहुराजायाः ।
अतिखट्वाय---इत्यत्राकृते दीर्घे ङ्याब्ग्रहणे `अदोर्घः' इति वचनाद्याडागमो न भवति, कृते तु लाक्षणिकत्वात् ।
सर्वनाम्नः स्याड्ढ्रस्वश्च ।। 7.3.114 ।।
सर्वनाम्न आबन्तादङ्गादुत्तरस्य ङितः प्रत्ययस्य स्याडागमे ह्रस्वश्च भवति । सर्वस्यै, विश्वस्यै, यस्यै, तस्यै, कस्यै, अन्यस्यै सर्वस्याः, विश्वस्याः, यस्याः, तस्याः, कस्याः, अन्यस्याः ।
`आपः' इत्येव---भवति । भवते ।।
विभाषा द्वितीयातृतीयाभ्याम् ।। 7.3.115 ।।
द्वितीया, तृतीया---इत्येताभ्यामुत्तरस्य ङितः प्रत्ययस्य विभाषा स्याडागमो भवति, द्वितीयातृतीययोश्च ह्रस्वो भवति । द्वितीयस्यै, द्वितीयायै । तृतीयस्यै, तृतीयायै ।।
ङेराम्नद्याम्नीभ्यः ।। 7.3.116 ।।
नद्यन्तादाबन्तान्नीत्येतस्माच्चोत्तरस्य ङेरामित्ययमादेशो भवति । कुमार्याम् । गौर्याम् । ब्रह्मबन्ध्वाम् । धीबन्ध्वाम् ।
आपः---खट्वायाम् । बहुराजायाम् । कारीषगन्ध्यायाम् ।
नी---राजन्याम् । सेनान्याम् ।।
इदुद्भ्याम् ।। 7.3.117 ।।
इकारोकाराभ्यां नदीसंज्ञकाभ्यामुत्तरस्य ङेरामादेशो भवति । कृत्याम् । धन्वाम् ।।
औत् ।। 7.3.118 ।।
इदुद्भ्यामुत्तरस्य ङेरौकारादेशो भवति । यन्न नदीसंज्ञं नापि घिसंज्ञमिकारान्तम्, तदिहोदाहरणम् । सख्यौ पत्यौ ।।
अच्च घेः ।। 7.3.119 ।।
`औत्' इति वर्तते । घिसंज्ञकादुत्तरस्य ङेरौकारादेशो भवति, तस्य च घेरकारादेशो भवति । अग्नौ । वायौ । कृतौ । धेनौ । पटौ ।
अदिति तपरकरणं स्त्रियां टापो निवृत्त्यर्थम् ।
`औदच्च घेः' इति येषामेकमेवेदं सूत्रम्, ते प्रधानशिष्टमिदुद्भ्यामौत्त्वं वर्णयन्ति---अन्वाचयशिष्टं घेरकारमिति ।।
आङो नाऽस्त्रियाम् ।। 7.3.120 ।।
घेरुत्तरस्याङो नाभावो भवति अस्त्रियाम् । अग्निना । वायुना । पटुना ।
`पुंसि' इति नोक्तम्; अमुना ब्राह्मणकुलेन ।
अस्त्रियामिति किम् ? कृत्या । धेन्वा ।।
इत्युपाध्याश्रीवामनकृतायां काशिकावृत्तौ सप्तमाध्यायस्य तृतीयः पादः
----------------------******************************----------------------

7.4

काशिकावृत्तिः---7
अथ सप्तमाध्याये चतुर्थः पादः
णौ चङ्युपधाया ह्रस्वः ।। 7.4.1 ।।
`अङ्गस्य' इति वर्तते । चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वो भवति । अचीकरत् । अजीहरत् । अलीलवत् । अपीपवत् ।
अत्र द्विर्वचनोपधाह्रस्वत्वयोः प्राप्तयोः प्रत्वादुपधाह्रस्वत्वम्, तत्र कृते द्विर्वचनम् । इह तु---मा भवानटिटदिति नित्यत्वात् द्वितीयस्य द्विर्वचनं प्राप्नोति, तथा सति ह्रस्वभाविनोऽङ्गस्याकारस्योपधात्वं विहितमिति ह्रस्वो न स्यात् ? नैष दोषः; ओणेर्ऋदित्करणं ज्ञापकम्--नित्यमपि द्विर्वचनमुपधाह्रस्वत्वेन बाध्यत इति ।
णआविति किम् ? `टङ्युपधाया ह्रस्वः' इत्युच्यमाने, अलीलवदित्यत्र वचनसामर्थ्यादन्तरङ्गामपि वृद्धिमादेशं च बाधित्वा ह्रस्वः स्यात् । अदीदपदित्यत्र ह्रस्वत्वेन पुको बाधः स्यात् । अपीपचदित्येवमादौ तु नैव स्यात् ।
चङीति किम् ? कारयति । हारयति ।

उपधाया इति किम् ? अचकाङ्क्षत् । अववाञ्छत् । तदेददुपधाग्रहणमुत्तरार्थमवश्यं कर्त्तव्यं तदिहापि ह्रस्वत्वं निवर्त्तयतीत्येवमर्थम्, `येन नाव्यवधानम्' इत्येतन्नाश्रयितव्यमिति ।

* उपधाह्रस्वत्वे णेणिच्युपसंख्यानम् * । वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन । योऽसौ णौ णिलोपस्तस्य स्थानिवद्भावेनाग्लोपित्वादङ्गस्य ह्रस्वो न प्राप्नोति । ण्याकृतिनिर्देशात् सिद्धम् ।।

नाग्लोपिशास्वृदिताम् ।। 7.4.2 ।।

अग्लोपिनामङ्गानां शासेरृदितां च णौ चङ्युपधाया ह्रस्वो न भवति । अग्लोपिनां तावत्---मालामाख्यत् अममालत् । णातरमाख्यत् अममातरत् । राजानमतिक्रान्तवान् अत्यरराजत् । लोमान्यनुमृष्टवान् अन्वलुलोमत् ।

अगेत्र यत्र केवलो लुप्यते तत्र स्थानिवद्भावादपि सिद्धम्, हलचोरादेशे तु न सिद्ध्यतीति तदर्थमेतद्वचनम् ।

शासेः---अशशासत् । ऋदिताम्---बाधृ, अबबाधत्; याचृ, अययाचत्; ढौकृ, अडुढौकत् ।।

भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ।। 7.4.3 ।।

भ्राज, भास, भाष दीप, जीव मील, पीज---इत्येतेषामङ्गानां णौ चङ्युपधाया ह्रस्वो भवत्यन्यतरस्याम् । भ्राज---अबिभ्रजत्, अबभ्राजत् । भास---अबभासत्, अबीभसत् । भाष---अबभाषत्, अबीभषत् । दीप---अदितीपत्, अदीदिपत् । जीव---अजिजिवत्, अजीजिवत् । मील---अमिलीलत्, अमीमिलत् । पीड---अपिपीडत्, अपीपिडत् ।

भ्राजभ्रासोरृदित्करणमपाणिनीयम् ।

* काण्यादीनां वेति वक्तव्यम् * । अचकाणत्, अचीकणत् ।।

लोपः पिबतेरीच्चाभ्यासस्य ।। 7.4.4 ।।

पिबतेरङ्गस्य णौ चङ्युपधाया लोपो भवति अभ्यासस्येकारादेशो भवति । अपीप्यत्, अपीप्यताम्, अपीप्यन् । उपधालोपे कृते ओः पुयण्ज्वचनं ज्ञापकम्---णौ स्थानिवद्भावस्येति । स्थानिवद्भावाद् द्वेर्वचनम् ।।

तिष्ठतेरित् ।। 7.4.5 ।।

तिष्ठतेरङ्गस्य णौ चङ्युपधाया इकारादेशो भवति । अतिष्ठिपत्, अतिष्ठिपताम्, अतिष्ठिपन् ।।

जिघ्रतेर्वा ।। 7.4.6 ।।

जिघ्रतेरङ्गस्य णौ चङ्युपधाया इकारादेशो वा भवति । अजिघ्रिपत्, अजिघ्रिपताम्, अजिघ्रिपन् । अजिघ्रपत्, अजिघ्रपताम्, अजिघ्रपन् ।।

उर्ऋत् ।। 7.4.7 ।।

णौ चङ्युपधाया ऋवर्णस्य स्थाने वा ऋकारादेशो भवति । इररारामपवादः । इर्---अचिकर्त्तत्, अचीकृतत् । अर्---अववर्त्तत, अवीवृतत् । आर्---अममार्जत्, अमीमृजत् । वचनसामर्थ्यादन्तरंङ्गा अपि हररारो बाध्यन्ते ।

तपरकरणं दीर्खेऽपि स्थानिनि ह्रस्व एव यथा स्यात्---अचीकृतदिति । न चायं भाव्यमानः, किन्तु आदेशान्तरनिवृत्त्यर्थ स्वरूपमेवैतदभ्यनुज्ञायते ।।

नित्यं छन्दसि ।। 7.4.8 ।।

छन्दसि विषये णौ चङ्युपधाया ऋवर्णस्य स्थाने ऋकारादेशो भवति नित्यम् । अवीवृधत्पुरोडाशेन, अवीवृधताम्, अवीवृधन् ।।

दयतेर्दिगि लिटि ।। 7.4.9 ।।

दयतेरङ्गस्य लिटि परतो दिगीत्ययमादेशो भवति । अवदिग्ये, अवदिग्याते, अवदिग्यिरे ।

दयतेरिति दीङो ग्रहणम्, न तु `दय दाने'---इत्यस्य । तस्य हि लिट्याम्विहितः ।

दिग्यादेशेन द्विर्वचनस्य बाधनमिष्यते ।।

ऋतश्च संयोगादेर्गुणः ।। 7.4.10 ।।

ऋकारान्तस्याङ्गस्य संयोगादेर्गुणो भवति लिटि परतः । स्वृ---सस्वरतुः, सस्वरुः । ध्वृ---दध्वरतुः, दध्वरुः । स्मृ---सस्मरतुः, सस्मरुः ।

ऋत इति किम् ? चिक्षियतुः, चिक्षियुः । संयोगादेरिति किम् ? चक्रतुः, चक्रुः ।

प्रतिषेधविषयेऽपि गुणो यथा स्यादित्ययमारम्भः । वृद्धिविषये तु पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते । सस्वार । सस्मार । लिटीत्येव---स्मृतः । स्मृतवान् ।

* संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थं कर्त्तव्यम् * । सञ्चस्करतुः, सञ्चस्करुः---इति । अत्र हि `पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' इत्यत्र दर्शने लिटि कृते तदाश्रये च द्विर्वचने पश्चादुपसग्रगयोगे सति `अडभ्यासव्यायेऽपि' इति सुट् क्रियते । एवं च कृत्वा संस्कृषीष्ट, उपस्कृषीष्टेत्यत्र सुटो बहिरङ्गलक्षणस्यासिद्धत्वात् `ऋतश्च संयोगादेः' इति इडामो न भवति ।।

ऋच्छत्यृताम् ।। 7.4.11 ।।

ऋच्छतेरङ्गस्य, ऋ इत्येतस्य, ॠकारान्तानां च लिटि परतो गुणो भवति । ऋच्छ---आनर्च्छ, आनर्च्छतुः, आनर्च्छुः । ऋ---आरतुः, आरुः ।

ॠकारान्तानाम्---निचकरतुः, निचकरुः । निजगरतुः, निजगरुः ।

ऋच्छेरलघूपधत्वादप्राप्तो गुणो विधीयते, ऋतां तु प्रतिषिद्धः ।
वृद्धइविषये तु पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते । निचकार । निजगार ।।
शृदृप्रां ह्रस्वो वा ।। 7.4.12 ।।
शॄ, दॄ, पॄ----इत्येतेषामङ्गानां लिटि परतो वा ह्रस्वो भवति । विशश्रतुः, विशश्रुः । विशशरतुः, विशशरुः । विदद्रतुः, विदद्रुः । विददरतुः, विददरुः ।
निपप्रतुः, निपप्रुः । निपपरतुः निपपरुः ।
ह्रस्ववचनमित्त्वोत्त्वनिवृत्त्यर्थम् ।
केचिदेतत्सूत्रं प्रत्याचक्षते । `श्रा पाके', `द्रा कुत्सायाम्', `प्रा पूरणे'---इत्येतेषामनेकार्था धातव इति शृदृप्रामर्थे वर्त्तमानानाम्---विशश्रतुः, विशश्रुः, विदद्रतुः, विदद्रुः, निपप्रतुः निपप्रुः---इत्येतानि रूपाणि साधयन्ति । तथा च सति क्वसौ विशश्रृवानित्येतद्रूपं न स्यात् ।
केऽणः ।। 7.4.13 ।।
के प्रत्यये परतोऽणो ह्रस्वो भवति । ज्ञका । कुमारिका । किशोरिका ।
अण इति किम् ? गोका । नौका ।
राका, धाकेत्यत्र `उणादयो बहुलम्' इति ह्रस्वो न भवति । `न कपि' इति प्रतिषेधसामर्थ्यात्कनोऽपि सानुबन्धकस्य ग्रहणमिह भवति ।।
न कपि ।। 7.4.14 ।।
कपि प्रत्यये परतोऽणो ह्रस्वो न भवति । बहुकुमारीकः । बहुवधूकः । बहुलक्ष्मीकः ।
`गोस्त्रियोरुपसर्जनस्य' इत्ययमपि ह्रस्वः कपि न भवति । समासार्थे ह्युत्तरपदे कपि कृते पश्चात् कबन्तेन सह समासेन भवितव्यमिति स्त्रीप्रत्ययान्तसमासप्रातिपदिकं न भवति ।।
आपोऽन्यतरस्याम् ।। 7.4.15 ।।
आबन्तस्याङ्गस्य कपि ह्रस्वो न भवत्यन्यतरस्याम् । बहुखट्वाकः, बहुखट्वकः । बहुमालाकः, बहुमालकः ।।
ऋदृशोऽङि गुणः ।। 7.4.16 ।।
ऋवर्णान्तानां दृशेश्च अङि परतो गुणो भवति । शकलाङ्गुष्ठकोऽकरत् । अहं तेभ्योऽकरं नमः । असरत् । आरत् । जरा । दृशेः---अदर्शत्, अदर्शताम्, अदर्शन् ।।
अस्यतेस्थुक् ।। 7.4.17 ।।
अस्यतेरङ्गस्य थुगागमो भवत्यङि परतः । आस्थत्, आस्थताम्, आस्थन् ।।
श्वयतेरः ।। 7.4.18 ।।
श्वयतेरङ्गस्याकारादेशो भवत्यङि परतः । अश्वत्, अश्वताम्, अश्वन् ।।
पतः पुम् ।। 7.4.19 ।।
पतेरङ्गस्य पुमागमो भवत्यङि परतः । अपप्तम्, अपप्तताम्, अपप्तन् ।।
वच उम् ।। 7.4.20 ।।
वचेरङ्गस्य अङि परत उमागमो भवति । अवोचत्, अवोचताम्, अवोचन् ।।
शीङः सार्वधातुके गुणः ।। 7.4.21 ।।
शीङोऽङ्गस्य सार्वधातुके परतो गुणो भवति । शेते, शयाते, शेरत् । सार्वधातुक इति किम् । शिश्ये ।।
अयङ्यि क्ङिति ।। 7.4.22 ।।
यकारादौ क्ङिति प्रत्यये परतः शीङोऽङ्गस्य `अयङ्'---त्ययमादेशो भवति । शय्यते । शाशय्यते । प्रशय्य । उपशय्य ।
यीति किम् ? शिश्ये । क्ङितीति किम् ? शेयम् ।।
उपसर्गाद्ध्रस्व ऊहतेः ।। 7.4.23 ।।
उपसर्गादुत्तरस्य ऊहतेरङ्गस्य ह्रस्वो भवति यकारादै क्ङिति प्रत्यये परतः । समुह्यते । समुह्य गतः । अभ्युह्यते । अभ्युह्य गतः ।
उपसर्गादिति किम् ? ऊह्यते । ऊहतेरिति किम् ? समीह्यते ।
`यि' इत्येव---समूहितम् । `क्ङिति' इत्येव---समूह्योऽयमर्थः । `अणः' इत्येव---आ + ऊह्यते=ओह्यते । समोह्यते ।।
एतेर्लिङि ।। 7.4.24 ।।
एतेरङ्गस्योपसर्गादुत्तरस्य लिङि यकारादौ क्ङिति परतो ह्रस्वो भवति । उदियात् । समियात् । अन्वियात् । आशिषि लिङि `अकृत्सार्वधातुकयोः' इति दीर्घत्वे कृते ह्रस्वोऽनेन भवति ।
उपसर्गादित्येव---ईयात् । `अणः' इत्येव---आ + ईयात् = एयात् । समेयात् ।।
अकृत्सार्वधातुकयोर्दीर्घः ।। 7.4.25 ।।

अकृद्यकारे असार्वधातुकयकारे च क्ङिति परतोऽजन्तस्याङ्गस्य दीर्घो भवति । भृशायते । सुखायते । दुः खायते । चीयते, चेचीयते । स्तूयते, तोष्टुयते । चीयात् । स्तूयात् ।

अकृदिति किम् ? प्रकृत्य । प्रह्वत्य । परत्वाद्दीर्घत्वेन तुको बाधः स्यात् ।

असार्वधातुक इति किम् ? चिनुयात् । सुनुयात् ।

`क्ङिति' इत्येव---उरुया । धृष्णुया ।।

च्वौ च ।। 7.4.26 ।।

च्विप्रत्यये परतोऽजन्तस्याङ्गस्य दीर्घो भवति । शुचीकरोति । शुचीभवति । शुचीस्यात् । पटूकरीति । पटूभवति । पटूस्यात् ।।

रीङ् ऋतः ।। 7.4.27 ।।

ऋकारान्तस्याङ्गस्य अकृद्यकारेऽसार्वधातुके यकारे च्वौ च परतः `रीङ्' इत्ययमादेशो भवति । माक्षीयति, माक्षीयते । पित्रीयति, पित्रईयते । चेक्रीयते । मात्रीभूतः ।

`क्ङिति' इत्येतन्निवृत्तम्, तेनेहापि भवति---पितुरागतं पित्र्यम् ।

ऋत इति तपरकणं किम् ? चेकीर्यते । निजेगिल्यते ।।

रिङ् शयग्लिङ्क्षु ।। 7.4.28 ।।

ऋकारान्तस्याङ्गस्य श, यक्---इत्येतयोर्लिङि च यकारादावसार्वधातुके परतः `रिङ्' इत्ययमादेशो भवति । श---आद्रियते, आध्रियते । यक्---क्रियते, ह्रियते । लिङ्---क्रियात् । ह्रियात् ।

रिङ्वचनं दीर्घनिवृत्त्यर्थम् ।

`असार्वधातुके' इत्येव---बिभृयात् । `यि' इत्येव---कृषीष्ट, ह्रषीष्ट ।।

गुणोऽर्तिसंयोगाद्योः ।। 7.4.29 ।।

अतो यकि लिङि इति वर्त्तते । `श' इत्यत्रासम्भवान्निवृत्तम् । गुणो भवत्यर्तेः संयोगादीनामृकारान्तानां यकि परतो लिङि च यकारादावसार्वधातुके । अर्यते, अर्यात् । स्मर्यते, स्मर्यात् ।

इह संस्क्रियते, संस्क्रियादिति सुटो बहिरङ्गलक्षणस्यासिद्धत्वाद्, अभक्तत्वाद्वा संयोगादित्वमङ्गस्य नास्तीति गुणो न प्रवर्त्तते ।

`यि' इत्येव---स्वृषीष्ट । ध्वृषीष्ट ।`असार्वधातुके' इत्येव---इयृयात् ।।

यङि च ।। 7.4.30 ।।

यङि च परतः, अर्त्तेः संयोगादेश्च ऋतो गुणो बवति । अरार्यते । सास्वर्यते । दाध्वर्यते । सास्मर्यते । सास्मर्यते । अर्तेः `अट्यर्त्यशूर्णोतीनामुपसंख्यानम्' इति यङ्।

`न न्द्राः संयोगादयः' इति द्विर्वचनप्रतिषेधो यकारस्य नेष्यते ।

* हन्तेर्हिंसायां यङि घ्नीभावो वक्तव्यः * । जेघ्नीयते । हिंसायामिति किम् ? जङ्घन्यते ।।

ई घ्राध्मोः ।। 7.4.31 ।।

`घ्रो', `ध्मा'---इत्येतयोर्यङि पारत ईकारादेशो भवति । जेघ्रीयते । देध्मीयते ।।

अस्य च्वौ ।। 7.4.32 ।।

`ई' इति वर्तते । अवर्णान्तस्याङ्गस्य च्वौ परत ईकारादेशो भवति । शुक्लीभवति, शुक्लीस्यात् । खट्वीकरोति, खट्वीस्यात् ।।

क्यचि च ।। 7.4.33 ।।

`अस्य' इति वर्त्तते । क्यचि परतोऽवर्णान्तस्याङ्गस्य ईकारादेशो भवति । पुत्रीयति । घटीयति । खट्वीयति । मालीयति । `अकृत्सार्वधातुकयोर्दीर्घः' इत्यस्यापवादः ।

पृथग्योगकरणमुत्तरार्थम् ।।

अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु ।। 7.4.34 ।।

अशनाय, उदन्य, धनाय---इत्येतानि निपात्यन्ते, बुभुक्षा, पिपासा, गर्ध---इत्येतेष्वर्थेषु । अशनायेति---अशनशब्दस्यात्वं क्यचि निपात्यते । अशनायतीति भवति, बुभुक्षा चेत् । अशनीयतीत्येवान्यत्र ।

उदन्येति---उदकशब्दस्य उदन्नादेशो निपात्यते । उदन्यतीति भवति, पिपासा चेत् । उदकीयतीत्येवान्यत्र ।

धनायेति---धनशब्दस्यात्वं निपात्यते । धनायतीति भवति, गर्धश्चेत् । धनीयतीत्येवान्यत्र ।।

नच्छन्दस्यपुत्रस्य ।। 7.4.35 ।।

छन्दसि विषये पुत्रवर्जितस्यावर्णान्तस्याङ्गस्य क्यचि यदुक्तं तन्न भवति । किं चोक्तम् ? दोर्घत्वम्, ईत्वं च । मित्रयुः । संस्वेदयुः । देवाञ्जिगाति सुम्नयुः ।

अपुत्रस्येति किम् ? पुत्रीयन्तः सुदानवः ।

* अपुत्रादीनामिति वक्तव्यम् * । जनीयन्तोऽन्वग्रवः ।।

दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति ।। 7.4.36 ।।

दुरस्युः, द्रविणस्युः, वृषण्यति, रिषण्यति---इत्येतानि छन्दसि निपात्यन्ते । दुष्टशब्दस्य क्यचि दुरस्भावो निपात्यते । अवियोना दुरस्युः । दुष्टीयतीति प्राप्ते ।
द्रविणशब्दस्य द्रविणस्भावो निपात्यते । द्रविणस्युर्विपन्यया । द्रविणीयतीति प्राप्ते ।
वृषशब्दस्य वृषण्भावो निपात्यते । वृषण्यति । वृषीयतीति प्राप्ते ।।
रिष्टशब्दस्य रिषण्भावो निपात्यते । रिषण्यति । रिष्टीयतीति प्राप्ते ।।

अश्वाघस्यात् ।। 7.4.37 ।।

अश्व, अघ---इत्येतयोः क्यचि परतश्छन्दसि विषये आकारादेशो भवति । अश्वायन्तो मघवन् । मा त्वा वृका अघायवो विदन् ।

एतदेवात्त्ववचनं ज्ञापकम्---`नच्छन्दस्यपुत्रस्य' इति दीर्घप्रतिषेधो भवतीति ।।

देवसुम्नयोर्यजुषि काठके ।। 7.4.38 ।।

देव, सुम्न---इत्येतयोः क्यचि परत आकारादेशो भवति काठके यजुषि । देवायन्तो यजमानाय । सुम्नायन्ता हवामहे ।

यजुषीति किम् ? देवाञ्जिगाय सुम्नयुः । काठक इति किम् ? सुम्नयुरिदमासीत् ।।

कव्यध्वरपृतनस्यर्चि लोपः ।। 7.4.39 ।।

कवि, अध्वर, पृतना---इत्येतेषामङ्गानां क्यचि परतो लोपो भवति ऋचि विषये । कव्यन्तः सुमनसः । अध्वर---अध्वर्यन्तः । पृतना---पृतन्यन्तस्तिष्ठन्ति ।।

द्यतिस्यतिमास्थामित्ति किति ।। 7.4.40 ।।

द्यति, सति, मा, स्था---इत्येतेषामङ्गानामिकारादेशो भवति तकारादौ किति प्रत्यये परतः । द्यति---निर्दितः, निर्दितवान् । स्यति---अवसितः, अवसितवान् । मा---मितः, मितवान् । स्था---स्थितः, स्थितवान् ।

तीति किम् ? अवदाय । कितीति किम् ? अवदाता ।।

शाच्छोरन्यतरस्याम् ।। 7.4.41 ।।

शा, छा---इत्येतयोरन्यतरस्यामिकारादेशो भवति तकारादौ किति । शा---निशितम्, निशातम् । निशितवान्, निशातवान् । छा---अवच्छितम्, अवच्छातम् । अवच्छितवान्, अवच्छातवान् ।

* श्यतेरित्वं व्रते नित्यमिति वक्तव्यम् * । संशितो ब्राह्मणः । संशितव्रत इत्यर्थः । व्यस्थितविभाषाविज्ञानात् सिद्धम् ।
देवत्रातो गलो ग्राह इतियोगे च सद्विधिः ।
मिथस्तेन विभाष्यन्ते गवाक्षः संशितव्रतः ।।

दधातेर्हिः ।। 7.4.42 ।।

दधातेरङ्गस्य `हि' इत्ययमादेशो भवति तकारादौ किति प्रत्यये परतः । हितः । हितवान् । हित्वा ।।

जहातेश्च क्त्वि ।। 7.4.43 ।।

जहातेरङ्गस्य `हि' इत्ययमादेशो भवति क्त्वाप्रत्यये परतः । हित्वा राज्यं वनं गतः । हित्वा गच्छति ।

जहातेर्निर्देशाज्जिहीतेर्न भवति---हात्वा ।।

विभाषा छन्दसि ।। 7.4.44 ।।

जहातेरङ्गस्य विभाषा `हि' इत्ययमादेशो भवति छन्दसि विषये क्त्वाप्रत्यये परतः । हित्वा शरीरं यातव्यम् । हात्वा ।।

सुधितवसुधितनेमधितधिष्वधिपीय च ।। 7.4.45 ।।

सुधित, वसुधित, नेमधित, धिष्व, धिषीय---इत्येतानि छन्दसि विषये निपात्यन्ते । तत्र सुधित, वसुधित, तेमधित---इति सु---वसु---नेमपूर्वस्य दधातेः क्त्वाप्रत्यये इत्त्वमिडागमो वा प्रत्ययस्य निपात्यते । गर्भं माता सुधितम् । सुहितमिति प्राप्ते । वसुधितमग्नौ जुहोति । वसुहितमिति प्राप्ते । नेमधिता बाधन्ते । नेमहिता इति प्राप्ते ।

धिष्वेति---लोण्मध्यमैकवचने दधातेरित्त्वमिडागमो वा प्रत्ययस्य द्विर्वचनाभावश्च निपात्यते । धिष्व सोमम् । धत्स्वेति प्राप्ते ।

धिषीयेति---आशीर्लिङ्यात्मनेपदोत्तमैकवचने दधातेरित्वमिडागमो वा प्रत्ययस्य निपात्यते । धिषीय । धासीयेति प्राप्ते ।।

दो दद् घोः ।। 7.4.46 ।।

`दा'---इत्येतस्य घुसंज्ञकस्य `दद्' इत्ययमादेशो भवति तकारादौ किति प्रत्यये परतः । दत्तः । दत्तवान् । दत्तिः ।

द इति किम् ? धातः । धातवान् । धेट एतद्रूपम् । घोरिति किम् ? `दाप् लवने' । दातं बर्हिः । `दैप् शोधने' । अवदातं मुखम् ।

अयमादेशस्थान्त इष्यते । एवं ह्युक्तम्---
तान्ते दोषो दीर्घत्वं स्याद्दान्ते दोषो निष्ठानत्वम् ।
धान्ते दोषो धत्वप्राप्तिस्थान्तेऽदोषस्तस्मात्थान्तम् ।।
यदि तु `दस्ति' इति तकारादौ दीर्घत्वम्, तदा तान्तेऽप्यदोषः । दान्तधान्तयोरपि `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति नत्वधत्वे न भविष्यत इति न दोषः ।।
अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ।।
`अच उपसर्गात्तः' इति प्राप्ते निपात्यन्ते । अनुपसर्गा वा एते अवादयः क्रियान्तरविषया वेदितव्याः ।।
अछ उपसर्गात्तः ।। 7.4.47 ।।
अजन्तादुपसर्गादुत्तरस्य `दा'---इत्येतस्य घुसंज्ञकस्य `त'---इत्ययमादेशी भवति तकारादौ किति । प्रत्तम्, अवत्तम्, नीत्तम्, परीत्तम् ।
अच इति किम् ? निर्दत्तम् । दुर्दत्तम् ।
उपसर्गादिति किम् ? दधि दत्तम् । मधु दत्तम् ।
`घोः' इत्येव---अवदातं मुखम् ।
उपसर्गादिति पञ्चमीनिर्द्देशाददेरलः प्राप्नोति ? तत्र समाधिमाहुः---`अचः' इत्येतद् द्विरावर्तयिव्यम्, तत्रैकं पञ्चम्यन्तम् उपसर्गविशेषणार्थम्, अपरमपि षष्ठ्यन्तं स्थानिनिर्देशार्थमित्याकारस्य स्थाने तकारो भवति । द्वितकारो वा संयोगोऽयमादिश्यते, सोऽनेकाल्त्वात् सर्वस्य भविष्यति । `अपो भि' इत्यत्र पञ्चम्यन्तम् `अचः' इत्यनुवर्त्तते, तेन पकारमात्रस्य भविष्यति ।
* द्यतेरित्वादचस्त इत्येतद्भवति विप्रतिषेधेन * । अवत्तम् । प्रत्तं जुहोति ।।
अपो भि ।। 7.4.48 ।।
`अप्'---इत्येतस्याङ्गस्य भकारादौ प्रत्यये परतः `त' इत्ययमादेशो भवति । अद्भिः । अद्भ्यः ।
भीति किम् ? अप्सु ।
स्ववः स्वतवसोर्मास उषसश्च तकारादेश इष्यते छन्दसि भकारादौ । स्ववद्भिः । स्वतवद्भिः । माद्भिष्ट इन्द्रो वृत्रहा । समुषद्भिरजायथआः ।।
सः स्यार्धधातुके ।। 7.4.49 ।।
सकारान्तस्याङ्गस्य सकारादावार्धधातुके परतस्तकारादेशो भवति । वत्स्यति; अवत्स्यत् । विवत्सति । जिघत्सति ।
स इति किम् ? वक्ष्यति । सीति किम् ? घासः । वासः । आर्धधातुक इति किम् ? आस्से । वस्से ।।
तासस्त्योर्लोपः ।। 7.4.50 ।।
तासेरस्तेश्च सकारस्य सकारादौ प्रत्यये परतः लोपो भवति । तासेः---कर्तासि । कर्तासे । अस्तेः---त्वमसि । व्यतिसे ।
अस्तेरकारसकारयोर्लुप्तयोः `से' इति प्रत्ययमात्रमेतत्पदम्, तेन `सात्पदाद्योः' इति षत्वं न भवति ।।
रि च ।। 7.4.51 ।।
रेफादौ च प्रत्यये परतः तासस्त्योः सकारस्य लोपो भवति । कर्तारौ, कर्तारः । अध्येतारौ, अध्यतारः । अस्तेर्लिटि---व्यतिरे ।।
ह एति ।। 7.4.52 ।।
तासस्त्योः सकारस्य हकारादेशो भवति एति परतः । कर्ताहे । अस्तेः---व्यतिहे ।।
यीवर्णयोर्दीधीवेव्योः ।। 7.4.53 ।।
यकारादाविवर्णादौ च परतो दीधीवेव्योर्लोपो भवति । यकारादौ---आदीध्य गतः । आवेव्य गतः । आदीध्यते । आवेव्यते ।
इवर्णादौ---आदीधिता । आवेविता । लिङि---आदीधीत । आवेवीत ।
यीवर्णयोरिति किम् ? आदीध्यनम् । आवेव्यनम् ।।
सनि मीमाघुरभलभशकपतपदामच इस् ।। 7.4.54 ।।
सनि प्रत्यये सकारादौ परतो मी, मा, घु, रभ, लभ, शक, पत, पद---इत्येतेषामङ्गानामचः स्थाने इसित्ययमादेशो भवति । `मी' इति मीनातिमिनोत्योर्द्वयोरपि ग्रहणमिष्यते । मित्सति । प्रमित्सति । `मा' इति गामादाग्रहणेष्वविशेषः । मित्सते । अपमित्सते । घु---दित्सति, धित्सति । रभ---आरिप्सते । लभ---आलिप्सते । शकशिक्षति । पत---पित्सति । पद---प्रपित्सते ।
सनीति किम् ? दास्यति ।
`सि' इत्येव---पिपतिषति । `तनिपतिदरिद्राणामुसंख्यानम्' इति पतेरिडागमविकल्पः ।
* सनि राधो हिंसायामच इस्वक्तव्यः * । प्रतिरित्सति । हिंसायामिति किम् ? आरिरात्सति ।।

आप्ज्ञप्यृधामीत् ।। 7.4.55 ।।

आप्, ज्ञपि, ऋध---इत्येतेषामङ्गानामच ईकारादेशो भवति सनि सकारादौ परतः । आप्---ईप्सति । ज्ञपि--ज्ञीप्सति । ऋध्--ईर्त्सति ।

ज्ञपेर्द्वावचौ, तत्र णेः पूर्वविप्रतिषेधेन लोपः, इतरस्य त्वीत्त्वम् ।

`सनि' इत्येव---प्राप्स्यति । सीत्येव---जिज्ञपयिषति । अर्दिधिषति । `सनीवन्तर्ध' इति ज्ञपेः, ऋधेश्चेटो विकल्पः ।।

दम्भ इच्च ।। 7.4.56 ।।

दम्भेरच इकारादेशो भवति, चकारादीच्च सनि सकारादौ परतः । धीप्सति, धिप्सति । `सि' इत्येव---दिदम्भषति ।।

मुचोऽकर्मकस्य गुणो वा ।। 7.4.57 ।।

मुचोऽकर्मकस्य गुणो वा भवति सनि सकारादौ परतः । `हलन्ताच्च' इति कित्त्वप्रतिषेधो विकल्प्यते । मोक्षते वत्सः स्वयमेव, मुमुक्षते वत्सः स्वयमेव ।

अकर्मकस्येति किम् ? मुमुक्षति वत्सं देवदत्तः । कर्मकर्त्तरि मुचिरकर्मको भवति, कर्मविशेषस्याविवक्षितत्वाद्वा ।।

अत्र लोपोऽभ्यासस्य ।। 7.4.58 ।।

यदेतत्प्रक्रान्तम्---`सनि मीमा' इत्यादि `मुचोऽकर्मकस्य' इति यावत्, अत्राभ्यासलोपो भवति । तथैवोदाहृतम् । `अभ्यासस्य' इत्येतच्चाधिकृतं वेदितव्यमाध्यायपरिसमाप्तेः । इत उत्तरं यद्वक्ष्यामोऽभ्यासस्येत्येवं तद्वेदितव्यम् । वक्ष्यति---```ह्रस्वः' । डुढौकिषते । तुत्रौकिपते ।"

`सनि मीमाघुरभलभशकपतपदामच इस् अभ्यासलोपश्च' इत्येवं सिद्धे यद् `अत्र' ग्रहणमिह क्रियते तद्विषयावधारणार्थम्---अत्रैवाभ्यासलोपो भवति, सन्बद्भावविषये न भवति । अमीमपत् । अदीदपत् । `सन्वल्लघुनि चङ्परे' इति सन्वद्भाबात् प्राप्नोति ।

सर्वस्याभ्यासस्यायं लोप इष्यते, तदर्थमेव केचिद् `अत्र' ग्रहणं वर्णयन्ति ।

`नानर्थकेऽवलोऽन्त्यविधिः'---इत्यपरे सर्वस्य कुर्वन्ति ।।

ह्रस्वः ।। 7.4.59 ।।

ह्रस्वो भवत्यभ्यासस्य । डुढौकिषते, तुत्रौकिषते । डुढौके, तुत्रौके । अडुढौकत्, अतुत्रौकत् ।

* अभ्यासस्यानचि * । अभ्यासस्य यदुच्यते अनचि तद्भवतीति वक्तव्यम् । चराचरः । चलाचलः । पतापतः । वदावदः । हलादिः शेषो न भवति ।।

हलादिः शेषः ।। 7.4.60 ।।

अब्यासस्य हलादिः शिष्यते, अनादिर्लुप्यते । जग्लौ । मम्लौ । पपाच । पपाठ । आट, आटतुः आटुः ।

आदिशेषनिमित्तोऽयमनादेर्लोपो विधीयते, तत्र अभ्यासजातेराश्रयणात् क्वचिदपि वर्त्तमानो हलादिरनादेः स्त्रवत्र निवृत्तिं करोति ।

अपरे तु ब्रूवते---शेषशब्दोऽयं निवृत्त्या विशिष्टंमवस्थानमाह । तदवस्थानमुक्तितो यद्यपि प्रधानम्, अविधेयत्वात्तु तदप्रधानम्; निवृत्तेरेव तु विधेयत्वात्प्राधानम् । तत्रायमर्थोऽस्य जायते---अभ्यासस्यानादेर्हलो निवृत्तिर्भवतीति । सा किमित्यादेरविधेयां सतीमनिवृत्तिमपेक्षिष्यत इति ।।

शर्पूर्वाः खयः ।। 7.4.61 ।।

अभ्यासस्य शपूर्वाः स्वयः शिष्यन्ते, अन्ये हलो लुप्यन्ते । चुश्च्योतिषति । तिष्ठासति । पिस्पन्दिषते ।

शर्पूर्वा इति किम् ? पपाच । खय इति किम् ? सस्नौ ।

* खर्पूर्वाः खय इति वक्तव्यम् * । उचिच्छिषतीत्यत्र उच्छेरन्तरङ्गत्वात्तुकि कृते द्विर्वचनम्, तत्र हलादिः शेषे सत्यभ्यासे तकारः श्रुयेत ।।

कुहोश्चुः ।। 7.4.62 ।।

अभ्यासस्य कवर्गहकारयोश्चवर्गादेशो भवति । चकार । चखान । जगाम । जघान । हकारस्य---जहार । जिहीर्षति । जहौ ।

न कवतेर्यङि ।। 7.4.63 ।।

कवतेरभ्यासस्य यङि परतश्चुर्न भवति । कोकूयते उष्ट्रः । कोकूयते खरः ।

`कवतेः' इति विकरणनिर्द्देशः कौतेः, कुवतेश्च निवृत्त्यर्थः । तयोश्चुत्वमेव भवति---चोकूयते ।

यङीति किम् ? चुकुवे ।।

कृषेश्छन्दसि ।। 7.4.64 ।।

कृषेश्छन्दसि विषये यङि परतोऽभ्यासस्य चुर्न भवति । करीकृष्यते यज्ञकुणपः ।

छन्दसीति किम् ? चरीकृष्यते कृषीवलः ।।

दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यद् करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति च ।। 7.4.65 ।।

दाधर्ति, दर्धति, दर्धषि, बोभूतु, तेतिक्ते, अलर्षि, आपनीफणत्, संसनिष्यदत्, करिक्रत्, कनिक्रदत्, भरिभ्रत्, दविध्वतः, दविद्युतत्, तरित्रतः, सरीसृपतम्, वरीवृजत्, मर्मृज्य, आगनीगन्ति---इत्येतानि अष्टादश छन्दसि विषये निपात्यन्ते । दाधर्ति दर्धर्ति दर्धर्षीति---धारयतेः, धृङो वा श्लौ यङ्लुकि वा अभ्यासस्य दीर्घत्वं णिलोपश्च । दाधर्ति । एवं दर्धति---श्लौ रुगभ्यासस्य निपात्यते । तथा दर्धर्षीति । अत्र च यल्लक्षणेनानुपपन्नं तत्सर्वं

निपातनात्सिद्धम् ।

बोभूत्विति---भवतेर्यङ्लुगन्तस्य लोटि गुणाभावो निपात्यते । नैतदस्ति प्रयोजनम्; अत्र `भूसुवोस्तिङि' इति गुणाभावः सिद्धः ? ज्ञापनार्थं तर्हि निपातनमेतत् । ज्ञापयति---अन्यत्र यङ्लुगन्तस्य गुणप्रतिषेधो न भवतीति । बोभोति, बोभवीति ।

तेतिक्ते---तिजेर्यङ्लुगन्तस्यात्मनेपदं निपात्यते । यङो ङित्त्वात् प्रत्ययलक्षणेनात्मनेपदं सिद्धमेव ? ज्ञापनार्थं तु आत्मनेपदनिपातनम्---`अन्यत्र यङलुगन्तादात्मनेपदं न भवति' ।

अलर्षीति---इयर्तेर्लटि सिपि अभ्यासस्य हलादिः शेषापवादो रेफस्य लत्वं निपात्यते । सिपा निर्देशोऽतन्त्रम्, तिप्यपि दृश्यते---अलर्ति दक्षः ।

आपनीफणदिति---फणतेराङ्पूर्वस्य यङ्लुगन्तस्य शतर्यभ्यासस्य नीग्निपात्यते ।

संसनिष्यदिति---स्यन्देः संपूर्वस्य यङ्लुक्, शतर्येभ्यासस्य निक्, धातुसकारस्य षत्वं निपात्यते । च चास्य सम्पूर्वता तन्त्रम्, अन्यत्रापि हि दृश्यते---आसनिष्यददिति ।

करिक्रदिति---करोतेर्यङ्लुन्तस्य शतरि चुत्वाभावः, अभ्यासककारस्य रिगागमो निपात्यते ।

कनिक्रददिति----क्रन्देर्लुङि च्लेरङादेशो द्विर्वचनमभ्यासस्य चुत्वाभावो निगागमश्च निपात्यते । तथा चास्य हि विवरणं कृतम् । अक्रन्दीदिति भाषायाम् ।

भरिभ्रदिति---बिभर्त्तेर्यङ्लुगन्तस्य शतरि `भृञामित्' इति इत्त्वाभावो जश्त्वाभावोऽभ्यासस्य रिगागमो निपात्यते ।

दविध्वत इति---ध्वरतेर्यङ्लुगन्तस्य शतरि जसि रूपमेतत् । अत्राभ्यासस्य विगागम ऋकारलोपश्च निपात्यते । दविध्वतो रश्मयः सूर्यस्य ।

दविद्युतदिति---द्युतेर्यङ्लुन्तस्य शतरि अभ्यासस्य सम्प्रसारणाभावः, अत्वम्, विगागमश्च निपात्यते ।

तरित्रत इति---तरतेः शतरि श्लौ षष्ठ्येकवचनेऽभ्यासस्य रिगागमो निपात्यते ।

सरीसृपतिमिति---सृपेः शतरि श्लौ द्वितीयैकवचनेऽभ्यासस्य रीगागमो निपात्यते ।

वरीवृजदिति--वृजेः शतरि श्लौ रीगागमो निपात्यतेऽभ्यासस्य ।

मर्मृज्येति---मृजेर्लिटि णलि अभ्यासस्य रुगागमो धातोश्च युगागमो निपात्यते । ततः `मृजेर्वृद्धिः' न भवति; अलघूपधत्वात् । लघूपधगुणे प्राप्ते वृद्धिरारभ्यते ।

आगनीगन्तीति---आङ्पूर्वस्य गमेर्लटि श्लौ अभ्यासस्य चुत्वाभावो नीगागमश्च निपात्यते । वक्ष्यन्ती देवदागनीगन्ती कर्णम् ।

इतिकरणमेवम्प्रकाराणामन्येषामप्युपसंग्रहार्थम् ।।

उरत् ।। 7.4.66 ।।

ऋवर्णान्तस्याभ्यासस्याकारादेशो भवति । ववृते, ववृधे, शशृधे ।

नर्नर्ति, नरिनर्त्ति, नरीनर्ति---इत्येवमादौ `अभ्यासविकारेषु अपवादो नोत्सर्गान्विधीन्बाधते' इत्युरदत्वे कृते रुगादय आगमाः क्रियन्ते ।।

द्युतिस्वाप्योः सम्प्रसारणम् ।। 7.4.67 ।।

द्युति, स्वापि---इत्येतयोरभ्यासस्य सम्प्रसारणं भवति । विदिद्युते । व्यदिद्युतत् । विदिद्योतिषते । विदिद्युतिषते । विदेद्युत्यते ।

स्वापेः---सुष्वापयिषति ।

स्वापिर्ण्यन्तो गृह्यते, तस्याभ्यासनिमित्तेन प्रत्ययेनानन्तर्ये सति सम्प्रसारणमिष्यते । इह न भवति---स्वापयतेर्ण्वुल् स्वापकः, तस्मात् क्यचि स्वापकीयति, स्वापकीयतेः सन्---सिष्वापकीयिषति ।।

व्यथो लिटी ।। 7.4.68 ।।

व्यथेर्लिटि परतोऽभ्यासस्य सम्प्रसारणं भवति । विव्यथे, विव्यथाते, विव्यथिरे । हलादिः शेषेण यकारस्य निवृत्तौ प्राप्तायां सम्प्रसारणं क्रियते, यकारस्य `न सम्प्रसारणे सम्प्रसारणम्' इति इति प्रतिषिध्यते । लिटीति किम् ? वाव्यथ्यते ।।

दीर्घ इणः किति ।। 7.4.69 ।।

इणोऽङ्गस्य योऽभ्यासस्तस्य दीर्घो भवति किति लिटि परतः । ईयतुः । ईयुः । `इणो यण्' इति यणादेशे कृते स्थानिवद्भावाद् द्विर्वचनम् ।

कितीति किम् ? इयाय । इययिथ ।।

अत आदेः ।। 7.4.70 ।।

अभ्यासस्यादेरकारस्य दीर्घो भवति लिटि परतः । `अतो गुणे' पररूपत्वस्यापवादः । आट, आटतुः, आटुः ।

आदेरिति किम् ? पपाच । पपाठ ।।

तस्मान्नुड् द्विहलः ।। 7.4.71 ।।

तस्मादतोऽभ्यासाद्दीर्घीभूतादुत्तरस्य द्विहलोऽङ्गस्य नुडागमो भवति । आनङ्ग, आनङ्गतुः, आनङ्गः । आनञ्ज, आनञ्जतुः, आनञ्जुः ।

द्विहल इति किम् ? आट, आटतुः, आटुः ।

ऋकारैकदेशो रेफो हल्ग्रहणेन गृह्यते । तेनेहापि द्विहलोऽङ्गस्य नुडागमो भवति---आनृधतुः, आनृधुः ।।

अश्नोतेश्च ।। 7.4.72 ।।

अश्नोतेश्च दीर्घीभूतादभ्यासादुत्तरस्य नुडागमो भवति । व्यानशे, व्यानशाते, व्यानशिरे ।

`अश्नोतेः' इति विकरणनिर्देशो अश्नोतेर्मा भूदिति---आशष आशतुः, आशुः ।।

भवतेरः ।। 7.4.73 ।।

भवतेरभ्यासस्याकारादेशो भवति लिटि परतः । बभूव, बभूवतुः, बभूवुः ।

`भवतेः' इति धातुनिर्द्देशादिहापि भवति---अनुबभूवे कम्बलो देवदत्तेन । `लिटि' इत्येव---भुभूषति । बोभूयते ।।

ससूवेति निगमे ।। 7.4.74 ।।

`ससूव' इति निपात्यते । सूतेर्लिटि परस्मैपदं वुगागमः, अभ्यासस्य चात्वं निपात्यते । ससूव स्थविरं विपश्चिताम् । सुषुवे इति भाषायाम् ।।

णिजां त्रयाणां गुणः श्लौ ।। 7.4.75 ।।

निजादीनां त्रयाणामभ्यासस्य गुणो भवति श्लौ सति । णिजिर्नेनेक्ति । विजिर्---वेवेक्ति । विष्लृ---वेवेष्टि ।
त्रिग्रहणमुत्तरार्थम् । एषां हि वृत्करणं समाप्त्यर्थं पठ्यत एवेति ।

श्लाविति किम् ? निनेज ।।

भृञामित् ।। 7.4.76 ।।

भृञादीनां त्रयाणामभ्यासस्येकारादेशो भवति श्लौ सति । भृञ्---बिभर्त्ति । माङ्---मिमीते । ओहाङ्---जिहीते ।

`त्रयाणाम्' इत्येव---जहाति । `श्लौ' इत्येव---बभार ।।

अर्तिपिपर्त्योश्च ।। 7.4.77 ।।

अर्ति, पिपर्ति---इत्येतयोरभ्यासस्येकारादेशो भवति श्लौ । इयर्ति धूमम् । पिपर्ति सोमम् ।।

बहुलं छन्दसि ।। 7.4.78 ।।

छन्दसि विषयेऽभ्यासस्य श्लौ बहुलमिकारादेशो भवति । पूर्णां विवष्टि---वशेरेतद्रुपम् । तथा वचेः---जनिमा विवक्ति । सचेः---वत्सं न माना सिषक्ति ।
जिघर्ति सोमम् । न च भवति---ददातीत्येवं ब्रूयात् । जजनमिन्द्रं माता यद्वीरं दधनन्धनिष्टा ।।

सन्यतः ।। 7.4.79 ।।

सनि परतोऽकारान्ताभ्यासस्येकारादेशो भवति । पिपक्षति । यियक्षति । तिष्ठासति । पिपासति ।

सनीति किम् ? पपाच । अत इति किम् ? लुलूषति । तपरकरणं किम् ? पपचिषते ।।

ओः पुयण्ज्यपरे ।। 7.4.80 ।।

`सनि' इति वर्तते, `इत्' इति च । उवर्णान्ताभ्यासस्य पवर्गे यणि जकारे चावर्णपरे परत इकारादेशो भवति सनि प्रत्यये परतः । पवर्गेऽपरे---पिपविषते, पिपावयिषति । विभावयिषति ।

यण्यपरे---यियविषति । यियावयिषति । रिरावयिषति । लिलावयिषति ।

ज्यपरे--`जु' इति सौत्रोऽयं धातुः, जिजावयिषति ।

एतदेव `पुण्ज्यपरे' इति वचनं ज्ञापकम्---अद्विर्वचननिमित्तेऽपिणौ स्थानिवद्भवतीति । ओरिति किम् ? पापच्यते । सन्---पापचिषते । पुयणजीति किम् ? अवतुतावयिषति । जुहावयिषति । अपर इति किम् ? बुभूषति ।।

स्रवतिश्रृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ।। 7.4.81 ।।

स्रवति, श्रृणोति, द्रवति, प्रवति, प्लवति, च्यवति---इत्येतेषामभ्यासस्य ओरवर्णपरे यणि वा इकारादेशो भवति सनि परतः । सिस्रावयिषति, सुस्रावयिषति ।
श्रृणोति---शिश्रावयिषति, शुश्रावयिषति । द्रवति---दिद्रावयिषति, दुद्रावयिषति । प्रवति---पिप्रावयिषति, पुप्रावयिषति । प्लवति---पिप्लावयिषति, पुप्लावयिषति । च्यवति---चिच्यावयिषति, चुच्यावयिषति ।
वचनसामर्थ्यादेकेन वर्णेन यणो व्यवधानमाश्रीयते । पूर्वसूत्रेण त्वनन्तर एव यणि भवितव्यमित्यप्राप्तविभाषेयम् ।

`अपर' इत्येव---सुस्रुषति । शुश्रूषते ।।

गुणो यङ्लुकोः ।। 7.4.82 ।।

यङि, यङ्लुकि च इगन्तस्याभ्यासस्य गुणो भवति । चेचीयते । लोलूयते । यङ्लुकि---जोहवीति । `यङो वा' इतीड्विकल्पः । चोक्रुशोति ।।

दीर्घोऽकितः ।। 7.4.83 ।।

अकितोऽभ्यासस्य दीर्घो भवति यङि यङ्लुकि च । पापच्यते । पापचीति । यायज्यते । यायजीति ।

अकित इति किम् ? यंयम्यते । यंयमीति । रंरम्यते । रंरमीति ।

ननु चात्रापवादत्वान्नुकि कृतेभ्यासस्यानजन्तत्वादेव दीर्घत्वं न भविष्यति ? एवं तर्हि `अकितः' इत्यनेनैतज्ज्ञाप्यते---`अभ्यासविकारेष्वपवादा नोत्सर्गान्

विधीन्बाधन्ते' इति ।

किमेतस्य ज्ञापने प्रयोजनम् ? डोढौक्यते इत्यत्र `दीर्घोऽकितः' इत्यनेन सन्ध्यक्षरह्रस्वो न बांध्यते; अचीकरदित्यत्र `दीर्घो लघोः' इत्यनेन सन्वदित्वं न बाध्यते; मान्प्रभृतीनां दीर्घेण सनीत्वं न बाध्यते---मीमांसते; `ई च गणः' इतीत्वेन हलादिशेषो न बाध्यते---अजीगणत् ।।

नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् ।। 7.4.84 ।।

वञ्चु, स्रंसु, ध्वंसु, भ्रंसु, कस, पत, पद, स्कन्द---इत्येतेषामभ्यासस्य नीगागमो भवति यङि यङ्लुकि च । वञ्चु---वनीवच्यते । वनीवञ्चीति । स्रंसु---सनीस्रस्यते । सनीस्रंसीति । ध्वंसु---दनीध्वस्यते । दनीध्वंसीति । भ्रंसु---बनीभ्रस्यते । बनीभ्रंस्यते । बनीभ्रंसीति । कस---चनीकस्यते । चनीकसीति । पत---पनीपत्यते । पनीपतीति । पद---पनीपद्यते । पनीपदीति । स्कन्द---चनीस्कद्यते । चनीस्कन्दीति ।।

नुगतोऽनुनासिकान्तस्य ।। 7.4.85 ।।

अनुनासिकान्तस्याङ्गस्य योऽभ्यासस्तस्याकारान्तस्य नुगागमो भवति यङ्यङ्लुकोः परतः । तन्तन्यते । तन्तनीति । जङ्गम्यते । जङ्गमीति । यंयम्यते । यंयमीति । रंरम्यते । ररमीति ।

नुगित्येतदनुस्वारीपलक्षणार्थं द्रष्टव्यम् । स्थानिना ह्यादेशो लक्ष्यते । तेन यंयम्यते---इत्येवमादावझल्परत्वेऽप्यनुस्वारो भवति ।

* पदान्तवच्चेति वक्तव्यम् * । `वा पदान्तस्य' इति परसवर्णविकल्पो यथा स्यादिति ।

अत इति किम् ? तेतिम्यते ।

तपरकरणं तु भूतपूर्वस्यापि दीर्घस्य निवृत्त्यर्थम्---बाभाम्यते । अनुनासिकान्तस्येति किम् ? पापच्यते ।।

जपजभदहदशभन्जपशां च ।। 7.4.86 ।।

जप, जभ, दह, दश, भञ्ज, पश---इत्येतेषामभ्यासस्य नुगागमो भवति यङ्यङ्लुकोः परतः । जञ्जप्यते । जञ्जपीति । जभ---जञ्जभ्यते । जञ्जभीति । दह---दन्दह्यते । दन्दहीति । दश---दन्दश्यते । दन्दशीति ।

`दश'---इति दन्शिरयं नकारलोपार्थमेव निर्द्दिष्टः । तेन यङ्लुक्यपि नकारलोपो भवति । भन्ज---बम्भज्यते । बम्भञ्जीति ।

`पश' इति सौत्रो धातुः---पम्पश्यते । पम्पशीति ।।

चरफलोश्च ।। 7.4.87 ।।

चर, फल---इत्येतयोरभ्यासस्य नुगागमो भवति यङ्यङ्लुकोः परतः । चञ्चूर्यते । चञ्चूरीति । पम्फल्यते । पम्फुलीति ।।

उत्परस्यातः ।। 7.4.88 ।।

चरफलोरभ्यासात्परस्यात उकारादेशो भवति यङ्यङ्लुकोः परतः । चञ्चूर्यते । चञ्चूरीति । पम्फुल्यते । पम्फुलीति ।

परस्येति किम् ? अभ्यासस्य मा भूत् । अत इति किम् ? अलोऽन्त्यस्य मा भूत् ।

उदिति तपरकरणम्--चञ्चूर्ति, पम्फुलीति इत्यत्र लघूपधगुणनिवृत्त्यर्थम् । दीर्घस्यासिद्धत्वादिह लघुत्वं न निवर्तते ।।

ति च ।। 7.4.89 ।।

तकारादौ प्रत्यये परतश्चरफलोरकारस्य उकारादेशो भवति । चरणं चूर्तिः । ब्रह्मणश्चूर्त्तिः । प्रफुल्तिः । प्रफुल्ताः सुमनसः ।

`यङ्यङ्लुकोः', `अभ्यासस्य'---इति चानुवर्त्तमानमपि वचनसामर्थ्यादिह नाभिसम्बध्यते ।।

रीगृदुपधस्य च ।। 7.4.90 ।।

ऋदुपधस्याङ्गस्य योऽभ्यासस्तस्य रीगागमो भवति यङ्यङ्लुकोः परतः । वरीवृत्यते । वरीवृध्यते । वरीवृतीति । वरीवृधीति । नरीनृत्यते । नरीनृतीति ।

* रीगृत्वत इति वक्तव्यम् * । इहापि यथा स्यात्---वरीवृश्च्यते । परीपृच्छ्यते । वरीवृश्चीति । परीपृच्छीति ।।

रुग्रिकौ च लुकि ।। 7.4.91 ।।

यङ्लुकि ऋदुपधस्याङ्गस्य योऽभ्यासस्तस्य रुग्रिकावागमौ भवतश्चकाराद्रीक्च । नर्नर्ति, नरिनर्ति, नरीनर्ति । वर्वर्ति, वरिवर्ति, वरीवर्ति । उकार उच्चारणार्थः ।

* मर्मृज्यते मर्मृज्यमानास इत्युपसंख्यानम् * । मर्मृज्यते । मर्मृज्यमानासः ।।

ऋतश्च ।। 7.4.92 ।।

ऋकारान्तस्याङ्गस्य योऽभ्यासस्तस्य रुग्रिकावागमौ भवतो रीक्च यङ्लुकि । चर्कर्ति, चरिकर्ति, चरीकर्ति । जर्हर्ति, जरिहर्ति, जरीहर्ति ।

तपरकरणं किम् ? किरतेः---चाकर्ति ।

किरतिं चर्करीतान्तं पचतीत्यत्र यो नयेत् ।
प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः ।।

तत्रेयं प्राप्तिः---तपरकरणसामर्थादङ्गविशेषणम् `ऋतः' इत्येतत्, तथा चाप्राप्तिः किरते रुगादीनामिति ।।

सन्वल्लघुनि चङ्परेऽनग्लोपे ।। 7.4.93 ।।

लघुनि धात्वक्षरे परतो योऽभ्यासस्तस्य चङ्परे णौ परतः सनीव कार्यं भवति अनग्लोपे । `सन्यतः' इत्युक्तम्, चङ्परेऽपि तथा---अचीकरत् । अपीपचत् ।

`ओः पुण्यण्ज्यपरे' इत्युक्तम्, चङ्परेऽपि तथा---अपीपवत् । अलीलवत् । अजीजवत् ।

`स्रवतिश्रृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा' इत्युक्तम्, चङ्परेऽपि तथा---असिस्रवत्, असुस्रुवत् । अशिश्रवत्, अशुश्रवत् । अदिद्रवत्, अदुद्रवत् । अपिप्रवत्, अपुप्रवत् । अपिप्लवत्, अपुप्लवत् । अचिच्यवत्, अचुच्यवत् ।

लघुनीति किम् ? अततक्षत् । अररक्षत् । जागरयतेः---अजजागरत् ।

अत्र केचिद् गशब्दं लघुमाश्रित्य सन्वद्भावमिच्छन्ति, सर्वत्रैव लघोरानन्तर्यमभ्यासेन नास्तीति व्यवधानेऽपि वचनप्रामाण्याद्भवितव्यम् ? तदसत्; `येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' इत्येकेन व्यवधानमाश्रीयते, न पुनरनेकेन ।

यद्येवम्, कथमचिक्षणदिति ? आचार्यप्रवृत्तिर्ज्ञापयति---भवत्येवञ्जातीयकानामित्त्वमिति । यदयं तद्बाधनार्थं स्मरत्यादीनामत्वं विदधाति ।

चङ्पर इति किम् ? अहं पपच । परग्रहणं किम् ? चङ्येव केवले मा भूत्---अचकमत । अनग्लोप इति किम् ? अचकथत् । दृषदमाख्यातवान् अददृषत् ।

वादितवन्तं प्रयोजितवान् अवीवददित्यत्र योऽसौ णौ णेर्लोपः, नासावग्लोप इत्याश्रीयते, किं कारणम् ? `चङ्परे' इति णिजातेर्निमित्तत्वेनाक्षेपात् ततोऽन्यस्याको लोपः परिगृह्यते । भीमादीनामत्र ग्रहणात् `सन्वद्भावेनाभ्यासलोपो न भवति' इत्युक्तम् ।

किञ्च---सन्वदिति सनाश्रयं कार्यमतिदिश्यते, न च लोपः सनमेवापेक्षते, किं तर्हि ? इस्भावाद्यपि; तदभावाद् अमीमपदित्यादावभ्यासलोपो न भविष्यति ।।

दीर्घो लघोः ।। 7.4.94 ।।

दीर्घो भवति लघोरभ्यासस्य लघुनि णौ चङ्परेऽनग्लोपे ।

अचीकरत् । अजीहरत् । अलीलवत् । अपीपचत् ।

लघोरिति किम् ? अबिभ्रजत् ।

`लघुनि' इत्येव---अततक्षत् । अररक्षत् ।

`चङि' इत्येव---अहं पपच ।।

`पर' इत्येव---अचकमत ।

`अनग्लोपे' इत्येव---अचकथत् ।।

अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम् ।। 7.4.95 ।।

स्मृ, दृ, त्वर, प्रथ, म्रद, स्तृ, स्पश---इत्येतेषामभ्यासस्य `आत्' इत्ययमादेशो भवति चङ्परे णौ परतः । स्मृ---असस्मरत् । दृ---अददरत् । त्वर---अतत्वरत् । प्रथ---अपप्रथत् । म्रद---अमम्रदत् । स्तृअतस्तरत् । स्पश---अपस्पशत् । सन्वद्भावादित्त्वं प्राप्तमनेन बाध्यते ।

तपकरणसामर्थ्यादति कृते `दीर्घो लघोः' इत्येतदपि न भवति---अददरत् ।।

विभाषा वेष्ट्यिष्ट्योः ।। 7.4.96 ।।

वेष्टि, चेष्टि---इत्येतयोरभ्यासस्य विभाषा `अत्' इत्ययमादेशो चङ्परे णौ परतः । अववेष्टत्, अविवेष्टत् । अचचेष्टत्, अचिचेष्टत् । अभ्यासह्रस्वत्वे कृते अत्त्वं पक्षे भवति ।।

ई च गणः ।। 7.4.97 ।।

गणेरभ्यासस्य ईकारादेशो भवति चङ्परे णौ परतः, चकारादच्च । अजीगणत्, अजगणत् ।।

इति श्रीवामनाचार्यविरचितायां काशिकावृत्तौ सप्तमस्याध्यायस्य चतुर्थः पादः

--------------------*******************-----------------------

8.1

काशिकावृत्तिः---8

अथ अष्टमाध्याये प्रथमः पादः

सर्वस्य द्वे ।। 8.1.1 ।।

`सर्वस्य' इति च `द्वे' इति चैतदधिकृतं वेदितव्यम् । इत उत्तरं यद्वक्ष्यामः `पदस्य' इत्यतः प्राक् `सर्वस्य द्वे भवतः' इत्येवं तद्वेदितव्यम् । वक्ष्यति---`नित्यवीप्सयोः' इति, तत्र सर्वस्य स्थाने द्वे भवतः । के द्वे भवतः ? ये शब्दतश्चार्थतश्चोभयथान्तरतमे । एकस्य पचतिशब्दस्य द्वौ पचतिशब्दौ भवतः---पचतिपचति । ग्रामोग्रामो रमणीयः ।

यदा तु `द्विः प्रयोगो द्विर्वचनम्', तदा स एव पचतिशब्दो द्विरावर्त्तते, तस्य द्वे आवृत्ति भवतः ।

सर्वस्येति किम् ? विस्पष्टार्थम् । अथ पदस्येत्येव कस्मान्नोच्यते ? नैवं शक्यम्, इह हि न स्यात्---प्रपचति, प्रपचतीति । इह द्रोग्धा, द्रोढा---इति घत्वढत्वयोरसिद्धत्वादकृतयोरेव तयोर्द्विर्वचनं प्रापनोति, तत्र पश्चाद्विकल्पे सत्यनिष्टमपि स्यात्---द्रोग्धा द्रोढा, द्रोढा द्रोग्धेति । तस्माद्वक्तव्यमेतत्---`पूर्वत्रासिद्धीयमद्विर्वचने' इति ।

`सर्वस्य' इत्येतदेव वा कृतं सर्वकार्यप्रतिपत्त्यर्थं द्रष्टव्यम् ।।

तस्य परमाम्रेडितम् ।। 8.1.2 ।।

तस्य द्विरुक्तस्य यत्परं शब्दरूपं तदाम्रेडितसञ्ज्ञं भवति । चौर चौर चौर वृषल वृषल दस्यो दस्यो घातयिष्यामि त्वा, बन्धयिष्यामि त्वा ।

आम्रेडितप्रदेशाः---`आम्रेडितं भर्त्सने' इत्येवमादयः ।।

अनुदात्तं च ।। 8.1.3 ।।

अनुदात्तं च तद्भवति यदाम्रेडितसंज्ञम् । भुङ्क्तेभुङ्क्ते पशून्पशून् ।।

नित्यवीप्सयोः ।। 8.1.4 ।।

नित्ये चार्थे वीप्सायां च यद्वर्तते तस्य द्वे भवतः । केषु नित्यता ? तिङ्क्षु नित्यता, अव्ययकृत्सु च । कुत एतत् ? आभीक्ष्ण्यमिह नित्यता । आभीक्ष्ण्यं च क्रियाधर्मः । यां क्रियां कर्ता प्राधान्येनानुपरमन्करोति तन्नित्यम् । पचतिपचति । जल्पतिजल्पति । भुक्त्वाभुक्त्वा व्रजति । भोजंभोजं व्रजति । लुनीहिलुनीहीत्येवायं लुनाति ।

कत्वाणमुलोर्लोटश्च द्विर्वचनापेक्षायामेव पौनः पुन्यप्रकाशने शक्तिः ।

यङ्तु तन्निरपेक्षः प्रकाशयति---पुनः पुनः पचति पापच्यत इति ।

यदा तु तत्र द्विर्वचनं तदा क्रियासमभिहारे पौनः पुन्यं द्रष्टव्यम्---पापच्यतेपापच्यत इति ।

अथ केषु वीप्सा ? सुप्सु वीप्सा । का पुनर्वीप्सा ? व्याप्तिविशेष विषया प्रयोक्तुरिच्छा वीप्सा । का पुनः सा ? नानावाचिनामधिकरणानां क्रियागुणाभ्यां युगपत्प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा ।

नानाभूतार्थवाचिनां शब्दानां यान्यधिकरणानि वाच्यानि तेषां क्रियागुणाभ्यां युगपत्प्रयोक्तुमिच्छा वीप्सा । ग्रामोग्रामो रमणीयः । जनपदोजनपदो रमणीयः । पुरुषः पुरुषो निधनमुपैति ।

यत्तिङन्तं नित्यतया प्रकर्षेण च युक्तं ततः कृतद्विर्वचनात् प्रकर्षप्रत्यय इष्यते---पचतिपचतितरामिति ।

इह तु आढ्यतरमाढ्यतरमानयेति प्रकर्षयुक्तस्य वीप्सायोग इष्यते ।।

परेर्वर्जने ।। 8.1.5 ।।

परीत्येतस्य वर्जनेऽर्थे द्वे भवतः । परिपरि त्रिगर्त्तेभ्यो वृष्टो देवः । परिपरि सौवीरेभ्यः । परिपरि सर्वसेनेभ्यः । वर्जनम्=परिहारः ।

वर्जन इति किम् ? ओदनं परिषिञ्चति ।

* परेर्वर्जनेऽसमासे वेति वक्तव्यम् * । परिपरि त्रिगर्त्तेभ्यो वृष्टो देवः, परि त्रिगर्त्तेभ्यः ।

समासे तु तेनैवोक्तत्वाद्वर्जनस्य नैव भवति---परित्रिगर्त्तं वृष्टो देव इति ।'

प्रसमुपोदः पादपूरणे ।। 8.1.6 ।।

प्र, सम्, उप, उत्---इत्येतेषां पादपूरणे द्वे भवतो द्विर्वचनेन चेत्पादः पूर्यते । प्रप्राचमग्निर्भरतस्य श्रृण्वे । संसमिद्युवसे वृषन् । उपोप मे परामृश । किं नोदुदुहर्षसे दातवाउ ।

पादपूरण इति किम् ? प्रदेवं देव्या धिया । सामर्थ्याच्छन्दस्येवैतद्विधानम् । भाषायामनर्थकं स्यात्; प्रयोगाभावात् ।।

उपर्यध्यधसः सामीप्ये ।। 8.1.7 ।।

उपरि, अधि, अधस्---इत्येतेषां द्वे भवतः सामीप्ये विवक्षिते । सामीप्यम्=प्रत्यासत्तिः कालकृता, देशकृता च । उपर्युपरि दुः खम् । उपर्युपरि ग्रामम् । अध्यधि ग्रामम् । अधोऽधो नगरम् ।।

सामीप्य इति किम् ? उपरि चन्द्रमाः ।

इह कस्मान्न भवति---उपरि शिरसो घटं धारयति ? औत्तराधर्यमेव विविक्षितं न सामीप्यमिति द्विर्वचनं न भवति ।।

वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु ।। 8.1.8 ।।

एकार्थः पदसमूहः=वाक्यम् । वाक्यादेरामन्त्रितस्य द्वे भवतः असूया---सम्मति---कीप---कुत्सन---भर्त्सनेषु यदि तद्वाक्यं भवति ।

तत्र परगुणानामसहनम्=असूया । पूजा=सम्पतिः । कोपः=क्रोधः । निन्दनम्=कुत्सनम् । अपकारशब्दैर्भयोत्पादनम्=भर्त्सनम् । एते च प्रयोक्तृधर्माः, नाभिधेयधर्माः ।

असूयायां तावत्---माणवक3 माणवक अभिरूपक3 अभिरूपक शोभनः खल्वसि ।

कोपे---माणवक3 माणवक अविनीतक3 अविनीतक इदानीं ज्ञास्यसि जाल्म ।

कुत्सने---शक्तिके3 शक्तिके यष्टिके3 यष्टिके रिक्ता ते शक्तिः ।

भर्त्सने---चौर3 चौर वृषल3 वृषल घातयिष्यामि त्वा, बन्धयिषायमि त्वा ।

असूयादिषु `स्वरितमाम्रडितेऽसूयासम्मतिकोपकुत्सनेषु'---इति पूर्वपदस्य प्लुतः । भर्त्सने तु `आम्रेडितं---भर्त्सने' इत्याम्रेडितस्यैवप्लुतः ।

वाक्यादेरिति किम् ? अन्तस्य मध्यस्य च मा भूत्---शोभनः खल्वसि माणवक । आमन्त्रितस्येति किम् ? देवदत्त गामभ्जा शुक्लाम् ।।

एकं बहुव्रीहिवत् ।। 8.1.9 ।।

एकमित्येच्छब्दरूपं द्विरुक्तं बहुव्रीहिवद्भवति । बहुव्रीहिवत्त्वे प्रयोजनम्--सुब्लोपपुंवद्भावौ । एकैकमक्षरं पठति । एकैकयाऽऽहुत्या जुहोति ।

सर्वनामसंज्ञाप्रतिषेधस्वरसमासान्ताः समासाधिकारविहिते बहुव्रीहौ विज्ञायन्ते । तेनातिदेशिके बहुव्रीहौ न भवन्ति । एकैकस्मै---`न बहुव्रीहौ' इति प्रतिषेधो न भवति; बहुव्रीहिरेव यो बहुव्रीहिरिति विज्ञानात् । नन, सुसु---`नञ्सुभ्याम्' इत्यन्तोदात्तत्वं न भवति । ऋक्--ऋक्, पूः पू---`ऋक्पुः' इति समासान्तो न भवति ।।

आबाधे च ।। 8.1.10 ।।

आबाधनमाबाधः=पीडाप्रयोक्तृधर्मः, नाभिधेयधर्मः; तत्र वर्त्तमानस्य द्वे भवतः, बहुव्रीहिवच्चास्य कार्यं भवति । गतगतः । नष्टनष्टः । पतितपतितः । गतगता । नष्टनष्टा । पतितपतिता । प्रियस्य चिरगमनादिना पीड्यमानः कश्चिदेवं प्रयुङ्क्ते प्रयोक्ता ।।

कर्मधारयवदुत्तरेषु ।। 8.1.11 ।।

इत उत्तरेषु द्विर्वचनेषु कर्मधारयवत्कार्यं भवतीत्येतद्वेदितव्यम् ।

कर्मधारयत्वे प्रयोजनम्---सुब्लोपपुंद्भावान्तोदात्तत्वानि । सुब्लोपः---पटुपटुः । मृदुमृदुः । पण्डितपण्डितः । पुंवद्भावः---पटुपट्वी । मृदुमृद्वी । कालककालिका ।

कोपधाया अपि हि कर्मधारयवद्भावात् `पुंवत्कर्मधारय' इति पुंवद्भावो भवति ।

अन्तोदात्तत्वम्---पटुपटुः । पटुपट्वी । समासान्तोदात्तत्वमनेनैव विधीयत इति परत्वादाम्रेडितानुदात्तत्वं बाध्यते ।

अधिकारेणैव सिद्धे यद् `उत्तरेषु' इति वचनं तद्विस्पष्टार्थम् ।।

प्रकारे गुणवचनस्य ।। 8.1.12 ।।

प्रकारः---भेदः, सादृश्यं च । तदिह सादृश्यं प्रकारो गृह्यते । प्रकारे वर्तमानस्य गुणवचनस्य द्वे भवतः । पटुपटु । मृदुमृदु । पण्डितपण्डितः । अपरिपूर्णगुण इत्यर्थः । परिपूर्णगुणेन न्यूनगुणस्योपमाने सत्येवं प्रयुज्यते ।

जातीयरोऽनेन द्विर्वचनेन बाधनं नेष्यते । पटुजातीयः । मृदुजातीयः---इत्यपि हि भवति । तत्कथम् ? वक्ष्यमाणमन्यतरस्यांग्रहणमुभयोः शेषो विज्ञायते । प्रकार इति किम् ? पटुर्देवदत्तः ।

गुणवचनस्येति किम् ? अग्निर्माणवकः । गौर्वाहीकः । यद्यप्यत्राग्निशब्दः, गोशब्दश्च मुख्यार्थसम्बन्धादवधृतभेदं तैक्ष्ण्यजाड्यादि कमर्थान्तरे गुणविशेषमेव प्रतिपादयितुं प्रवृत्तः; तथापि सर्वदा गुणवचनो न भवतीति न द्विरुच्यते ।

* आनुपूर्व्ये द्वे भवत इति वक्तव्यम् * । मूलेमूले स्थूलाः । अग्रेऽग्रे सूक्ष्माः । ज्येष्ठंज्येष्ठं प्रवेशय ।

* स्वार्थे अवधार्यमाणेऽनेकस्मिन् द्वे भवत इति वक्तव्यम् * । अस्मात् कार्षापणादिह भवद्भ्यां माषंमाषं देहि । स्वार्थ एतद् द्विर्ववनम्, न वीप्सायाम् । अत्र हि द्वावेन माषौ दीयेते, न सर्वे कार्षायणसम्बन्धिनो माषाः; तेन वीप्सा न विद्यते ।

अवधार्यमाण इति किम् ? अस्मात् कार्षापणादिह भवद्भ्यां माषमेकं देहि, द्वौ माषौ देहि, त्रीन्वा माषान् देहि ।

अनेकस्मिन्निति किम् ? असमात् कार्षाणादिह भवद्भ्यां माषमेकं देहि ।

*चापले द्वे भवत इति वक्तव्यम् * । सम्भ्रमेण प्रवृत्तिः=चापलम् । अहिरहिः बुध्यस्वबुध्यस्व । नावश्यं द्वावेव शब्दौ प्रयोक्तव्यौ, किं तर्हि ? यावद्भिः शब्दैः सोऽर्थोऽवगम्यते तावन्तः प्रयोक्तव्याः---अहिरहिरहिः बुध्यस्वबुध्यस्वबुध्यस्व इति ।

* क्रियासमभिहारे द्वे भवत इति वक्तव्यम् * । स भवान् लुनीहिलुनीहीत्येवायं लुनाति ।

* आभीक्ष्ण्ये द्वे भवत इति वक्तव्यम् * । भुक्त्वाभुक्त्वा व्रजति । भोजंभोजं व्रजति । `नित्य इत्येव सिद्धम्' इति तत्रोक्तम् ।

* डाचि द्वे भवतः इति वक्तव्यम् * । पटपटाकरोति । पटटायते ।

अव्यक्तानुकरणडाजन्तस्य द्विर्वचनमिष्यते । इह न भवति---द्वेतीयाकरोति, तृतीयाकरोति । तदर्थं केचिद् `डाचि बहुलम्' इति पठन्ति ।

* पूर्वप्रथमयोरर्थातिशयविवक्षायां द्वे भवत इति वक्तव्यम् * । पूर्वंपूर्व पुष्प्यन्ति । प्रथमंप्रथमं पच्यन्ते । आतिशायिकोऽपि दृश्यते--पूर्वतरं पुष्प्यन्ति । प्रथमतरं पच्यन्त इति ।

* डतरडतमयोः समसम्प्रधारणयोः स्त्रीनिगदे भावे द्वे भवत इति वक्तव्यम् * । अभाविमावाढ्यौ । कतराकतरा अनयोराढ्यता । सर्व इमे आढ्याः । कतमाकतमा एषामाढ्यता । इतरडतमाभ्यामन्यत्रापि हि दृश्यते---उभाविमावाढ्यौ । कीदृशीकीदृशी अनयोराढ्यता । तथा स्त्रीनिगदाद्भावादन्यत्रापि हि दृश्यते---उभाविमावाढ्यौ । कतरः कतरोऽनयोर्विभव इति ।

* कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यम् * । समासवच्च बहुलम् । यदा न समासवत्प्रथमैकवचनं तदा पूर्वपदस्य । अन्यमन्यमिमे ब्राह्मणा भोजयन्ति । अन्योऽन्यमिमे ब्राह्मणा भोजयन्ति । अन्योऽन्यस्य ब्राह्मणा भोजयन्ति । इतरेतरं भोजयन्ति । इतरेतरस्य भोजयन्ति ।

* स्त्रीनपुंसकयोरुत्तरपदस्य चाम्भावो वक्तव्यः * । अन्योऽन्यामिमे ब्राह्मण्यौ भोजयतः । अन्योऽन्यं भोजयतः । इतरेतरां भोजयतः । इतरेतरं भोजयतः । अन्योऽन्यामिमे ब्राह्मणकुले भोजयतः । इतरेतरामिमे ब्राह्मणकुले भोजयतः । इतरेतरमिमे ब्राह्मणकुले भोजयतः ।।

अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् ।। 8.1.13 ।।

प्रिय, सुख---इत्येतयोरन्यतरस्यां द्वे भवतः अकृच्छ्रे द्योत्ये । कृच्छ्रम्=दुः खम्, तदभावोऽकृच्छ्रम् । प्रियप्रियेण ददाति । सुखसुखेन ददाति । प्रियेण ददाति । अखिद्यमानो ददातीत्यर्थः ।

अकृच्छ्र इति किम् ? प्रियः पुत्रः । सुखो रथः ।।

यथास्वे यथायथम् ।। 8.1.14 ।।

यो य आत्मा यद्यदात्मीयं तत्तद्यथास्वं तस्मिन् यथायथमिति निपात्यते । यथाशब्दस्य द्विर्वचनं नपुंसकलिङ्गता च निपात्यते । ज्ञाताः सर्वे पदार्था यथायथम् । यथास्वभावमित्यर्थः । सर्वेषां तु यथायथं यथात्मीयमित्यर्थः ।।

द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ।। 8.1.15 ।।

`द्वन्द्वम्' इति द्विशब्दस्य द्विर्वचनं पूर्वपदस्यम्भावः । अत्वं चोत्तरपदस्य निपात्यते रहस्य, मर्यादावचन, व्युत्क्रमण, यज्ञपात्र, प्रयोग, अभिव्यक्ति---इत्येतेषु अर्थेषु । तत्र रहस्यं द्वन्द्वशब्दवाच्यम्, इतरे विषयभूताः । द्वन्द्वं मन्त्रयन्ते । मर्यादावचने---मर्यादा=स्थित्यनतिक्रमः । आचतुरं हीमे पशवो द्वन्द्वं मिथुनायन्ते । माता पुत्रेण मिथुनं गच्छति, पौत्रेण, तत्पुत्रेणापीति मर्यादार्थः । व्युत्क्रमणे---द्वन्द्वं व्युत्क्रान्ताः । व्युत्क्रमणम्=भेदः, पृथगवस्थानम् । द्विवर्गसम्बन्धेन पृथगवस्थिता द्वन्द्वं व्युत्क्रान्ता इत्युच्यते । यज्ञपात्रप्रयोगे---द्वन्द्वं न्यञ्चि यज्ञपात्राणि प्रयुनक्ति धीरः । अभिव्यक्तौ---द्वन्द्वं नारदपर्वतौ । द्वन्द्वं संकर्षणवासुदेवौ । द्वावप्यभिव्यक्तौ साहचर्येणेत्यर्थः ।

अन्यत्रापि द्वन्द्वमित्येतद् दृश्यते, तदर्थं योगविभागः कर्त्तव्यः । द्वन्द्वं युद्धं वर्त्तते । द्वन्द्वानि सहते धीरः । चार्थे द्वन्द्व इति ।।

पदस्य ।। 8.1.16 ।।

`पदस्य' इत्ययमधिकारः प्रागपदान्ताधिकारात् । यदित ऊर्ध्वमनुक्रमिष्यामः पदस्येत्येवं तद्वेदितव्यम् । वक्ष्यति---```संयोगान्तस्य लोपः' पचन् । यजन् । पदस्येति किम् ? पचन्तौ । यजन्तौ" ।

वक्ष्यमाणवाक्यापेक्षया `पदस्य' इत्यधिकृतस्य षष्ठ्यर्थव्यवस्था द्रष्टव्या---क्वचित् स्थानषष्ठी, क्वचिदवयवषष्ठी ।।

पदात् ।। 8.1.17 ।।

पदादित्ययमधिकारः प्राक् `कुत्सने च सुप्यगोत्रादौ' इत्येतस्माद् । यदित ऊर्ध्वमनुक्रमिष्यामः पदादित्येवं तद्वेदितव्यम् । वक्ष्यति---```आमन्त्रिस्य' । आमिन्त्रितस्य पदात्परस्यानुदात्तादेशो भवतीति । पचति देवदत्त । पदादिति किम् ? देवदत्त पचसि" ।।

अनुदात्तं सर्वमपादादौ ।। 8.1.18 ।।

`अनुदात्तम्' इति च, `सर्वम्' इति च, `अपादादौ' इति च---एतत्त्रयमधिकृतं वेदितव्यमापादपरिसमाप्तेः । इति उत्तरं यद्वक्ष्यामः `अनुदात्तं सर्वमपादादौ' इत्येवं तद्वेदितव्यम् । वक्ष्यति---```आमन्त्रितस्य च' इति । पचसि देवदत्त । अपादादाविति किम् ? यते नियतं रजसं मृत्यो अनवधृष्ण्यम् । `बहुवचनस्य वस्नसौ' । ग्रामो वः स्वम् । जनपदो नः स्वम्" ।

अपादादाविति किम् ?

रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।

स एव नाथो भगवानस्माकं शत्रुमर्दनः ।।

पादग्रहणेनात्र ऋक्पादः, श्लोकपादश्च गृह्यते ।

सर्वग्रहणं सर्वमनूद्यमानं विधीयमानं चानुदात्तं यथा स्यादिति ।

तेन युष्मदस्मदादेशानामपि वाक्यभेदेनानुदात्तत्वं विधीयते ।

युष्मदस्मदादेशाश्च सर्वस्य सुबन्तस्य पदस्य यथा स्युः---यत्रापि स्वादिपदं पदसंज्ञं भवति । ग्रामो वां दीयते । जनपदो नौ दीयते ।।

आमन्त्रितस्य च ।। 8.1.19 ।।

आमन्त्रितस्य पदस्य पदात्परस्यापादादौ वर्त्तमानस्य सर्वस्यानुदात्तो भवति । पचसि देवदत्त । पचसि यज्ञदत्त । आमन्त्रिताद्युदात्तत्वे प्राप्ते वचनम् । समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः * । इह मा भूवन्---अयं दण्डो हरानेन, ओदनं पच तव भविष्यति, ओदनं पचमम भविष्यति ।

इह च यथा स्यात्---इह देवदत्त माता ते कथयति । नद्यास्तिष्ठति कूले । शालीनां ते ओदनं दास्यामि इति ।

आमन्त्रितान्तं तिङन्तं युष्मदस्मदादेशाश्च यस्मात्पराणि न तेषां सामर्थ्यमिति तदाश्रया निघातयुष्मदस्मदादेशा न स्युः; `समर्थः पदविधिः' इति वचनात् ।।

युष्मादस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ ।। 8.1.20 ।।

युष्मद् अस्मद्---इत्येतयोः षष्ठीचतुर्थीद्वितीयास्थयोर्यथासंख्यं वाम्, नौ---इत्येतावादेशौ भवतस्तौ चानुदात्तौ । `पदस्य पदादनुदात्तं सर्वमपदादौ' इति सर्वमिह सम्बध्यते । ग्रामो वां स्वम् । जनपदो नौ स्वम् । ग्रामो वां दीयते । जनपदो नौ दीयते । ग्रामो वां पश्यति । जनपदो नौ पश्यति । एकवचनबहुवचनान्तयोरादेशान्तरविधानाद् द्विवचनान्तयोरेतावादेशौ विज्ञायेते ।

षष्ठीचतुर्थीद्वितीयास्थचोरिति किम् ? ग्रामे युवाभ्यां कृतम् ।

स्थग्रहणं श्रूयमाणविभक्त्यर्थम् । इह मा भूत्---इति युष्मत्पुत्र इति ।।

बहुवचनस्य वस्नसौ ।। 8.1.21 ।।

बहुवचनान्तयोर्युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयस्थयोर्यथासंख्यंवस्, नस्--इत्येतावादेशौ भवतः । ग्रामो वः स्वम् । जनपदो नः स्वम् । ग्रामो वो दीयते । जनपदो नो दीयते । ग्रामो वः पश्यति । जनपदो नः पश्यति ।।

तेमयावेकवचनस्य ।। 8.1.22 ।।

युष्मदस्मादोरेकवचनान्तयोः षष्ठीचतुर्थीस्थयोर्यथासंख्यं ते, मे---इत्येतावादेशौ भवतः । ग्रामस्ते स्वम् । ग्रामो मे स्वम् । ग्रामस्ते दीयते । ग्रामो मे दीयते ।

द्वितीयान्तस्यादेशान्तरविधानसामर्थ्यात्षष्ठीचतुर्थ्योरेवायं योगः ।।

त्वामौ द्वितीयायाः ।। 8.1.23 ।।

`एकवचनस्य' इति वर्तते । द्वितीयाया यदेकवचनं तदन्तयोर्युष्मदस्मदोर्यथासंख्यं त्वा, मा---इत्येतावादेशौ भवतः । ग्रामस्त्वा पश्यति । ग्रामो मा पश्यति ।।

न चवाहाहैवयुक्ते ।। 8.1.24 ।।

च, वा, ह, अह, एव--एभिर्युक्ते युष्मदस्मदोर्वान्नावादयो न भवन्ति । पूर्वेण प्रकरणेन प्राप्ताः प्रतिषिध्यन्ते । ग्रामस्तव च स्वम्, ग्रामो मम च स्वम्, युवयोश्च स्वम्, आवयोश्च स्वम्; युष्माकं च स्वम्, अस्माकं च स्वम् । ग्रामस्तुभ्यं च दीयते, ग्रामो मह्यं च दीयते; युवाभ्यां च दीयते, आवाभ्यां च दीयते; युष्मभ्यं च दीयते, अस्मभ्यं च दीयते । ग्रामस्त्वां च पश्यति, ग्रामो मां च पश्यति; युवां च पश्यति, आवां च पश्यति; युष्मांश्च पश्यति, अस्मांश्च पश्येति ।

वा---ग्रामस्तव वा स्वम्, ग्रामो मम वा स्वम्; युवयोर्वास्वम्, आवयोर्वा स्वम्; युष्माकं वा स्वम्, अस्माकं वा स्वम् । ग्रामस्तुभ्यं वा दीयते, ग्रामो मह्यं वा दीयते; युवाभ्यां वा दीयते, आबाभ्यां वा दीयते; युष्मभ्यं वा दीयते, अस्मभ्यं वा दीयते । ग्रामस्त्वां वा पश्यति, ग्रामो मां वा पश्यति; युवां वा पश्यति, आवां वा पश्यति, युष्मान् वा पश्यति, अस्मान्वा पश्यति ।

ह---ग्रामस्तव ह स्वम्, ग्रामो मम ह स्वम्; युवयोर्ह स्वम्, आवयोर्ह स्वम्; युष्माकं ह स्वम्, अस्माकं ह स्वम् । ग्रामस्तुभ्यं ह दीयते, ग्रामो मह्यं ह दीयते; युवाभ्यां ह दीयते, आवाभ्यां ह दीयते; युष्मभ्यं ह दीयते, अस्माभ्यं ह दीयते । ग्रामस्त्वां ह पश्यति, ग्रामो मां ह पश्यति; युवां ह पश्यति, आवां ह पश्यति; युष्मान्ह पश्यति, अस्मान्ह पश्यति ।

अह---ग्रामस्तवाह स्वम्, ग्रामो ममाह स्वम्; युवयोरह स्वम्, आवयोरह स्वम्; युष्माकमह स्वम्, अस्माकमह स्वम् । ग्रामस्तुभ्यमह दीयते, ग्रामो मह्यमह दीयते; युवाभ्यामह दीयते, आवाभ्यामह दीयते; युष्मभ्यमह दीयते, अस्मभ्यमह दीयते । ग्रामस्त्वामह पश्यति, ग्रामो मामह पश्यति, युवामह पश्यति, आवामह पश्यति, युष्मानह पश्यति, अस्मानह पश्यति ।

एव---ग्रामस्तवैव स्वम्, ग्रामो ममैव स्वम्; युवयोरेव स्वम्, आवयोरेव स्वम्; युष्माकमेव स्वम्, असमाकमेव स्वम् । ग्रामस्तुभ्यमेव दीयते, ग्रामो मह्यमेव दीयते; युवाभ्यामेव दीयते, आवाभ्यामेव दीयते; युष्मभ्यमेव दायते, अस्मभ्यमेव दीयते । ग्रामस्त्वामेव पश्यति, ग्रामो मामेव पश्यति; युवामेव पश्यति, आवामेव पश्यति; युष्मानेव पश्यति, अस्मानेव पश्यति ।

युक्तग्रहणं साक्षाद्योगप्रतिपत्त्यर्थम् । युक्तयुक्ते प्रतिषेधो न भवति । ग्रामश्च ते स्वम्, नगरं च मे स्वम् ।।

पश्यार्थैश्चानालोचने ।। 8.1.25 ।।

पश्यार्थाः=दर्शनार्थाः, दर्शनम्=ज्ञानम्, आलोचनम्=चक्षुर्विज्ञानम् । तैः पश्यार्थैरनालोचने वर्तमानैर्युक्ते युष्मदस्मदोर्वान्नावादयो न भवन्ति । ग्रामस्तव स्वं समीक्ष्यागतः, ग्रामो मम स्वं समीक्ष्यागतः, ग्रामस्तुभ्यं दीयमानं समीक्ष्यागतः, ग्रामो मह्यं दीयमानं समीक्ष्यागतः, ग्रामस्त्वां समीक्ष्यागतः, ग्रामो मां समीक्ष्यागतः ।

अनालोचन इति किम् ? ग्रामस्त्वा पश्यति, ग्रामो मा पश्यति ।

पश्यार्थैर्युक्तयुक्तेऽपि च प्रतिषेध इष्यते । तथा चैवोदाहृतम् ।।

सपूर्वायाः प्रथमाया विभाषा ।। 8.1.26 ।।

विद्यमानपूर्वात् प्रथमान्तात् पदादुत्तरयोर्युष्मदस्मदोर्विभाषावान्नावादयो न भवति । ग्रामे कम्बलस्ते स्वम्, ग्रामे कम्बलस्तव स्वम्, ग्रामे कम्बलो मे स्वम्, ग्रामे कम्बलो मम स्वम् । ग्रामे कम्बलस्ते दीयते, ग्रामे कम्बलस्तुभ्यं दीयते; ग्रामे कम्बलो मे दीयते, ग्रामे कम्बलो मह्यं दीयते । ग्रामे छात्त्रास्त्वा पश्यन्ति, ग्रामे छात्त्रास्त्वां पश्यन्ति; ग्रामे छात्त्रा मा पश्यन्ति, ग्रामे छात्रा मां पश्यन्ति ।

सपूर्वाया इति किम् ? कम्बलस्ते स्वम्, कम्बलो मे स्वम् । प्रथमाया इति किम् ? कम्बलो ग्रामे ते स्वम्, कम्बलो ग्रामे मे स्वम् ।

* युष्मदस्मदोर्विभाषा अनन्वादेश इति वक्तव्यम् * । इह मा भूत्---अथो ग्रामे कम्बलस्ते स्वम्, अथो ग्रामे कम्बलो मे स्वम् ।

अपर आह---* सर्व एव वान्नावादयोऽनन्वादेशे विभाषा वक्तव्याः * । कम्बलस्ते स्वम्, कम्बलस्तव स्वम्; कम्बलो मे स्वम्, कम्बलो मम स्वम् । अनन्वादेश

इति किम् ? अथो कम्बलस्ते स्वम्, अथो कम्बलो मे स्वम् ।

न तर्हीदानीमिदं वक्तव्यम्---`सपूर्वायाः प्रथमायाः विभाषा' इति ? वक्तव्यं च । किं प्रयोजनम् ? अन्वादेशार्थम्, अन्वादेशे हि विभाषा यथा स्यात् । अथो ग्रामे कम्बलस्ते स्वम्, अथो ग्रामे कम्बलस्तव स्वम्; अथो ग्रामे कम्बलो मे स्वम्, अथो ग्रामे कम्बलो मम स्वम् ।।

तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ।। 8.1.27 ।।

तिङन्तात्पदात्पराणि गोत्रादीनि कुत्सने आभीक्ष्ण्ये चार्थे वर्तमानानि अनुदात्तानि भवन्ति । पचति गोत्रम् । जल्पति गोत्रम् । आभीक्ष्ण्ये---पचतिपचति गोत्रम् । जल्पतिजल्पति गोत्रम् ।

ब्रुव---पचति ब्रुवम् । जल्पति ब्रुवम् । जल्पतिजल्पति ब्रुवम् । पचतिपचति ब्रुवम् ।

`ब्रुवः'---इति ब्रुवः कन्निपातनाद्, वच्यादेशाभावश्च ।

गोत्र । ब्रुव । प्रवचन । प्रसहन । प्रकथन । प्रत्ययन । प्रचक्षण । प्राय । विचक्षण । अवचक्षण । स्वाध्याय । भूयिष्ठ । * वा नाम * ।

नामेत्येतद्वा निहन्यते । पक्षे आद्युदात्तमेव भवति---पचति नाम, पठति नाम ।

तिङ इति किम् ? कुत्सितं गोत्रम् । गोत्रादीनीति किम् ? पचति पापम् । कुत्सनाभीक्ष्ण्ययोरिति किम् ? खनति गोत्रं समेत्य कूपम् ।

कुत्सनाभीक्ष्ण्यग्रहणं च पाठविशेषणं द्रष्टव्यम् । तेनान्यत्रापि गोत्रादिग्रहणएन कुत्सनाभीक्ष्ण्ययोरेव कार्यं भवति ।।

तिङ्ङतिङः ।। 8.1.28 ।।

तिङन्तं पदमतिङन्तात् पदात्पदात् परमनुदात्तं भवति । देवदत्तः पचति । यज्ञदत्तः पचति ।

तिङिति किम् ? नीलमुत्पलम् । शुक्लं वस्त्रम् ।

अतिङ इति किम् ? भवति पचति ।।

न लुट् ।। 8.1.29 ।।

पूर्वेणातिप्रसक्ते प्रतिषेधः आरभ्यते । लुडन्तं तिङन्तं नानुदात्तं भवति । श्वः कर्ता । श्वः कर्तारौ । मासेन कर्तारः ।

तासेः परस्य लसार्वधातुकस्यानुदात्तत्वे सति सर्वतासिरेवोदात्तः । यत्र तु टिलोपः, तत्रोदात्तनिवृत्तिस्वरो भवति ।

निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ।। 8.1.30 ।।

`न' इति वर्तते । यत्, यदि हन्त, कुवित्, नेत, चेत्, चण्, कच्चित्, यत्र---इत्यैतैर्निपातैर्युक्तं तिङन्तं नानुदात्तं भवति । यत्करोति, यत्पचति । यदि करोति, यदि पचति । हन्त करोति, हन्त पचति ।

कुवित्---कुवित्करोति, कुवित्पचति ।

नेत्---नेज्जिह्मायन्तो नरकं पताम ।

चेत्---स चेद् भुङ्क्ते । स चेदधीते ।

चण्---णिद्विशिष्टोऽयं चेदर्थे वर्तते । अयं च मरिष्यति । अयं चेन्मरिष्यतीत्यर्थः । समुच्चयादिषु तु यश्चशब्दस्तेन येगेन विधिरयं न भवति ।

कच्चित् कच्चिद् भुङ्क्ते । कच्चिदधीते । यत्र यत्र भुङ्क्ते । यत्राधीते ।

निपातैरिति किम् ? यत्कूजति शकटम् । गच्छत्कूजति शकटमित्यर्थः । इणः शतरि रूपमेतत् ।

युक्तमिति किम् ? यत्र क्व च ते मनो दक्षं दधस उत्तरम् ।।

नह प्रत्यारम्भे ।। 8.1.31 ।।

`नह' इत्येतेन युक्ते प्रत्यारम्भे तिङन्तं नानुदात्तं भवति । चोदितस्यावधीरणे उपालिप्सया प्रतिषेधयुक्तः प्रत्यारम्भः क्रियते । नह भोक्ष्यसे । नहाध्येष्यसे ।

प्रत्यारम्भ इति किम् ? नह वै तस्मिंश्च लोके दक्षिणामिच्छन्ति ।।

सत्यं प्रश्ने ।। 8.1.32 ।।

`सत्यम्' इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति प्रश्ने । सत्यं भोक्ष्यसे । सत्यमध्येष्यसे ।

प्रश्न इति किम् ? सत्यं वक्ष्यामि नानृतम् ।।

अङ्गाप्रातिलोम्ये ।। 8.1.33 ।।

`अङ्ग' इत्यनेन युक्तं तिङन्तमप्रातिलोम्ये गम्यमाने नानुदात्तं भवति । अङ्ग कुरु । अङ्ग पच । अङ्ग पठ ।

अप्रातिलोम्य इति किम् ? अङ्ग कूज वृषल इदानीं ज्ञास्यसि जाल्म । कूजनमनिभिमतसौ कुर्वन्प्रतिलोमो भवति ।।

हि च ।। 8.1.34 ।।

`हि' इत्यनेन युक्तं तिङन्तमप्रातिलोम्ये नानुदात्तं भवति । स हिं कुरु । स हि पच । स हि पठ ।

`अप्रातिलोम्ये' इत्येव---स हि कूज वृषल इदानीं ज्ञास्यति जाल्म ।।

छन्दस्यनेकमपि साकाङ्क्षम् ।। 8.1.35 ।।

`हि च' इति वर्तते । छन्दसि विषये हियुक्तं तिङन्तं साकाङ्क्षमनेकमपि नानुदात्तं भवति, एकमपि । कदाचिदेकम्, कदाचिदनेकमित्यर्थः । तत्रानेकं तावत्---अनृतं हि मत्तो वदति, पाप्मा एनं विपुनाति । तिङन्तद्वयमप्येतन्न निहन्यते ।

एकं खल्वपि---अग्निर्हि अग्ने उदजयत् । तिङन्तद्वयमपि हिशब्दयुक्तमेतत् । तत्रैकमुदजयदित्यादिरुदात्तम्, अपरमनुदात्तम् । अजा ह्यग्नेरजनिष्ट गर्भम् । सा वा अपश्यज्जनितारमग्रे । अजनिष्टेत्याद्युदात्तम्, अपश्यदित्यनुदात्तम् ।।

यावद्यथाभ्याम् ।। 8.1.36 ।।

`यावत्', `यथा'---इत्येताभ्यां युक्तं तिङन्तं नानुदात्तं भवति । यावद् भुङ्क्ते । यथा भुङ्क्ते । यावदधीते । यथाधीते । देवदत्तः पचति यावत् । देवदत्तः पचति यथा । परेणापि योगे भवति प्रतिषेधः ।।

पूजायां नानन्तरम् ।। 8.1.37 ।।

`यावत्', `यथा'---इत्येताभ्यां युक्तमनन्तरं तिङन्तं पूजायां विषये नानुदात्तं न भवति, किं तर्हि ? अनुदात्तमेव । यावत्पचति शोभनम् । यथा पचति शोभनम् । यावत् करोति चारु । यथा करोति चारु ।

पूजायामिति किम् ? यावद् भुङ्क्ते । यथा भुङ्क्ते । अनन्तरमिति किम् ? यावद्देवदत्तः पचति शोभनम् । यथा देवदत्तः करोति चारु । पूर्वेणात्र निघातः प्रतिषिध्यते ।।

उपसर्गव्यपेतं च ।। 8.1.38 ।।

यावद्यथाभ्यां युक्तं उपसर्गव्यपतें च पूजायां विषये नानुदात्तं न भवति, किं तर्हि ? अनुदात्तमेव भवति । पूर्वमनन्तरमित्युक्तम्, उपसर्गव्यवधानार्थोऽयमारम्भः । यावत्प्रचति शोभनम् । यथा प्रपचति शोभनम् । यावत्प्रकरोति चारु । यथा प्रकरोति चारु ।

अनन्तरमित्येव---यावद्देवदत्तः प्रपचति । यथा विष्णुमित्रः प्रकरोति चारु ।

तुपश्यपश्यताहैः पूजायाम् ।। 8.1.39 ।।

तु, पश्य, पश्यत, अह---इत्येतैर्युक्तं तिङन्तं नानुदात्तं भवति पूजायां विषये । तु---माणवकस्तु भुङ्क्ते शोभनम् । पश्य---पश्य माणवको भुङ्क्ते शोभम् । पश्यत---पश्यत माणवको भुङ्क्ते शोभनम् । अह---अह माणवको भुङ्क्ते शोभनम् ।

पूजायामिति किम् ? पश्य मृगो धावति । `पूजायाम्' इति वर्तमाने पुनः `पूजायाम्' इत्युच्यते निघातप्रतिषेधार्थम् । तद्धि प्रतिषेधस्य प्रतिषेधेन सम्बद्धमिति ।।

अहो च ।। 8.1.40 ।।

`अहो'---इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति पूजायां विषये । अहो देवदत्तः पचति शोभनम् । अहो विष्णुमित्रः करोति चारु ।
पृथग्योगकरणमुत्तरार्थम् ।।

शेषे विभाषा ।। 8.1.41 ।।

`अहो' इत्यनेन युक्तं तिङन्तं शेषे विभाषा नानुदात्तं भवति । कश्च शेषः ? यदन्यत्पूजायाः । कटमहो करिष्यसि । मम गेहमेष्यसि । असूयावचनमेतत् ।

`पूजायाम्'----इत्यस्य पूर्वत्र चानुकृष्टत्वादनधिकारे सिद्धे शेषवचनं विस्पष्टार्थम् ।।

पुरा च परीप्सायाम् ।। 8.1.42 ।।

`पुरा'---इत्यनेन युक्तं तिङन्तं परीप्सायामर्थे विभाषा नानुदात्तं भवति । परीप्सा=त्वरा । अधीष्व माणवक । पुरा विद्योतते विद्युत् । पुरा स्तनयति स्तनयित्नुः । पुराशब्दोऽत्र भविष्यदासत्तिं द्योतयति ।

परीप्सायामिति किम् ? नडेन स्म पुराधीयते । अत्र भूतकालविप्रकर्षं पुराशब्दो द्योतयति । ऊर्णया स्म पुराधीयते ।।

नन्वित्यनुज्ञैषणायाम् ।। 8.1.43 ।।

`ननु' इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति अनुज्ञैषणायां विषये । अनुज्ञाया एषणा=प्रार्थना, अनुज्ञैषणा । अनुज्ञाप्रार्थनेत्यर्थः । ननु करोमि भोः । ननु गच्छामि भोः । अनुजानीष्व माम्, करणं प्रतीत्यर्थः ।

अनुज्ञैषणायामिति किम् ? अकार्षीः कटं देवदत्त । ननु करोमि भोः । पृष्टप्रतिवचनमेतत्, नानुज्ञैषणा ।।

किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् ।। 8.1.44 ।।

`किम्'---इत्येतत्क्रियाप्रश्ने यदा वर्तते तदानेन युक्तं तिङन्तमनुपसर्गमप्रतिषिद्धं नानुदात्तं भवति । किं देवदत्तः पचति, आहोस्विद् भुङ्क्ते । किं देवदत्तः शेते, आहोस्विदधीते ।

अत्र केचिदाहुः---पूर्वं किंयुक्तमिति तन्न निहन्यते । उत्तरं तु न किंयुक्तमिति तन्निहन्यत एवेति ।

अपरे त्वाहुः---यद्यप्येकस्याख्यातस्य समीपे किंशब्दः श्रूयते, तथापि सर्वस्य संशयविषयस्य तेन योगे इति, उभयत्र प्रतिषेधेन भवितव्यमिति ।

क्रियाग्रहणं किम् ? साधनप्रश्न मा भूत्---किं देवदत्त ओदनं पचति आहोस्विच्छाकमिति । प्रश्न इति किम् ? किमधीते देवदत्तः । क्षेपे किंशब्दोऽयम्, न प्रश्ने । अनुपसर्गमिति किम् ? किं देवदत्तः प्रपचति, आहोस्वित्प्रकरोति । अप्रतिषिद्धमिति किम् ? किं देवदत्तो न पठति, आहोस्विन्न करोति ।।

लोपे विभाषा ।। 8.1.45 ।।
किमो लोपे क्रियाप्रश्ने तिङन्तमनुपसर्गमप्रतिषिद्धं विभाषा नानुदात्तं भवति ।
क्व चास्य लोपः ? यत्र गम्यते चार्थः, न च प्रयुज्यते किंशब्दः । देवदत्तः पचति आहोस्वित्पठति । विनैव किमा प्रश्नोऽवगम्यते ।
प्राप्तविभाषेयं किमर्थेन योगात् । पूर्ववत् प्रत्युदाहरणानि ।।
एहिमन्ये प्रहासे लृट् ।। 8.1.46 ।।
`एहिमन्ये'---इत्यनेन युक्तं लृडन्तं नानुदात्तं भवति प्रहासे । प्रकृष्टो हासः प्रहासः=क्रीडा । एहि मन्ये ओदनं भोक्ष्यसे न हि भोक्ष्यसे भुक्तः सोऽतिथिभिः । एहि मन्ये रथेन यास्यसि न हि यास्यसि यातस्तेन पिता ।
प्रहास इति किम् ? एहि मन्यसे ओदनं भोक्ष्ये इति । सुष्ठु मन्यसे । साधु मन्यसे ।
`गत्यर्थलोटा लृट्' इत्येव सिद्धे सत्यारम्भो नियमार्थः--एहिमन्येयुक्ते प्रहास एव यथा स्यात्, अन्यत्र मा भूदिति---एहि मन्यसे ओदनं भोक्ष्य इति ।
`एहिमन्ये' इत्युत्तमोपादानमतन्त्रम् । प्रहास एव हि मन्यतेरुत्तमो विहितः, ततोऽन्यत्र मध्यम एव भवति । तत्रानेन नियमेन निवृत्तिः क्रियते---एहि मन्यसे ओदनं भोक्ष्य इति ।।
जात्वपूर्वम् ।। 8.1.47 ।।
`जातु' इत्येतदविद्यमानपूर्वं तेन युक्तं तिङन्तं नानुदात्तं भवति । जातु भोक्ष्यसे । जातु करिष्यामि ।
अपूर्वमिति किम् ? कटं जातु करिष्यति ।।
किंवृत्तं च चिदुत्तरम् ।। 8.1.48 ।।
किमो वृत्तं किंवृत्तम् । किंवृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात्, डतरडतमौ च प्रत्ययौ । तत्किंवृत्तं चिदुत्तरमविद्यमानपूर्वं यत्तेन युक्तं नानुदात्तं भवति । कश्चिद्भोजयति । कश्चिदधीते । केनचित्करोति । कस्मैचिद्ददाति । कतरश्चित्करोति । कतमश्चिद् भुङ्क्ते ।
चिदुत्तरमिति किम् ? को भुङ्क्ते । अपूर्वमित्येव---देवदत्तः किञ्चित्पठति ।।
आहोउताहो चानन्तरम् ।। 8.1.49 ।।
निघातप्रतिषेधोऽनुवर्तते । `अपूर्वम्' इति च । आहो, उताहो---इत्येताभ्यामपूर्वाभ्यां युक्तमनन्तरं तिङन्तं नानुदात्तं भवति । आहो भुङ्क्ते । उताहो भुङ्क्ते । आहो पठति । उताहो पठति ।
अनन्तरमिति किम् ? शेषे विभाषां वक्ष्यति ।
`अपूर्वम्' इत्येव---देवदत्त आहो भुङ्क्ते । देवदत्त उताहो भुङ्क्ते ।।
शेषे विभाषा ।। 8.1.50 ।।
`आहो', `उताहो'---इत्येताभ्यां युक्तं तिङन्तं नानुदात्तं शेषे विभाषा भवति । कश्च शेषः ? यदन्यदनन्तरात् । आहो देवदत्तः पचति, उताहो दवदत्तः पचति । आहो देवदत्तः पठति उताहो देवदत्तः पठति ।।
गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् ।। 8.1.51 ।।
गमिना समानार्था गत्यर्थाः, गत्यर्थानां लोट् गत्यर्थलोट्, तेन । गत्यर्थलोटा युक्तं लृडन्तं तिङन्तं नानुदात्तं भति, न चेत्कारकं सर्वमन्यद्भवति । यत्रैव कारके कर्तरि कर्मणि वा लोट्, तत्रैव यदि लृडपि भवतीत्यर्थः । कर्तृकर्मणी एवात्र तिङन्तवाच्ये कारकग्रहणेन गृह्येते, न करणादि कारकान्तरम् ।
आगच्छ देवदत्त ग्रामं द्रक्ष्यस्येनम् । आगच्छ देवदत्त ग्राममोदनं भोक्ष्यसे । उह्यन्तां देवदत्तेन शालयः, तेनैव भोक्ष्यन्ते । उह्यन्तां देवदत्तेन शालयः, यज्ञदत्तेन भोक्ष्यन्ते ।
गत्यर्थग्रहणं किम् ? पच देवदत्तौदनं भोक्ष्यस एनम् । लोटेति किम् ? आगच्छेर्देवदत्त ग्रामं द्रक्ष्यस्येनम् । लृडिति किम् ? आगच्छ देवदत्त ग्रामं पश्यस्येनम् । न चेत्कारकं सर्वान्यदिति किम् ? आगच्छ देवदत्त ग्रामं पिता ते ओदनं भोक्ष्यते । उह्यन्तां देवदत्तेन शालयः उक्तवस्तेन पास्यन्ते ।
सर्वग्रहणीकिम् ? आगच्छ देवदत्त ग्रामं त्वं चाहं च द्रक्ष्याव एनम्---इत्यत्रापि निघातप्रतिषेधो यथा स्यात् । लृडन्तवाच्ये हि सर्वस्मिन् कारकेऽन्यस्मिन् भवितव्यम् । इह तु यल्लोडन्तस्य कारकं तच्चान्यच्च लृडन्तेनोच्यते इति ।
लोट् च ।। 8.1.52 ।।
लोडन्तं तिङन्तं गत्यर्थलोटा युक्तं नानुदात्तं भवति, न चेत्कारकं सर्वान्यद्भवति । लोडन्तयोरेकं कारकं यदि भवतीत्यर्थः । आगच्छ देवदत्त ग्रामं पश्य । आव्रज विष्णुमित्र ग्रामं शाधि । आगम्यतां देवदत्तेन ग्रामो दृश्यतां यज्ञदत्तेन ।
`गत्यर्थानाम्' इत्येव---पच देवदत्तौदनं भुङ्क्ष्वेनम् ।
`लोटा' इत्येव---आगच्छेर्देवदत्त ग्रामं पश्यैनम् । `न चेत्कारकं सर्वान्यत्' इत्येव---आगच्छ देवदत्त ग्रामं पश्यत्वेनं यज्ञदत्तः ।
सर्वग्रहणानुवृत्तेस्त्विह भवत्येव---आगच्छ देवदत्त ग्रामं त्वं चाहं च पश्याव । पृथग्योगकरणमुत्तरार्थम् ।।
विभाषितं सोपसर्गमनुत्तमम् ।। 8.1.53 ।।
सर्वं पूर्वमनुवर्तते । प्राप्तविभाषेयम् । लोडन्तं सोपसर्गमुत्तमवर्जितं गत्यर्थलोटा युक्तं तिङन्तं विभाषितं नानुदात्तं भवति, न चेत्कारकं सर्वान्यद्भवति ।

आगच्छ देवदत्त ग्रामं प्रविश । आगच्छ देवदत्त ग्रामं प्रशाधि ।
शोपसर्गमिति किम् ? आगच्छ देवदत्त ग्रामं पश्य । अनुत्तममिति किम् ? आगच्छानि देवदत्त ग्रामं प्रविशानि ।।
हन्त च ।। 8.1.54 ।।
पूर्वं सर्वमनुवर्तते गत्यर्थलोटं वर्जयित्वा । `हन्त'---इत्यनेन युक्तं लोडन्तं सोपसर्गमुत्तमवर्जितं विभाषितं नानुदात्तं भवति । हन्त प्रविश । हन्त प्रशाधि ।
सोपसर्गमित्येव---हन्त कुरु । `निपातैर्यद्यदिहन्त' इति नित्यमत्र निघातप्रतिषेधो भवति ।
अनुत्तममित्येव---हन्त प्रभुञ्जावहै । हन्त प्रभुञ्जामहै ।।
आम एकान्तरमामन्त्रितमनन्तिके ।। 8.1.55 ।।
आम उत्तरमेकपदान्तरमामन्त्रितान्तमनन्तिके नानुदात्तं भवति । आम् पचसि देवदत्त3 । आम् भो देवदत्त3 ।
`भोः' इत्यामन्त्रितान्तमपि `नामन्त्रिते समानाधिकरणे सामान्यवचनम्' इति नाविद्यमानवद्भवति ।
आम इति किम् ? शाकं पचसि देवदत्त 3 । एकान्तरमिति किम् ? आम् प्रपचसि देवदत्त3 । आमन्त्रितमिति किम् ? आम् पचति देवदत्तः । अनन्तिक इति किम् ? आम् देवदत्तः ।
आम एकान्तरमामन्त्रितं यत्तस्य एकश्रुतेरनुदात्तस्य च प्रतिषेध इष्यते । तदुभयमनेन क्रियत इति केचिदाहुः । प्लुतोदात्तः पुनरसिद्धत्वान्न प्रतिषिध्यते ।
अपरेषां दर्शनम्---`अनन्तिक इत्यनेन यन्न दूरं न सन्निकृष्टं तत् परिगृह्यते । तेनास्मिन्नेकश्रुतेः प्राप्तिरेव नास्ति । प्लुतोदात्तोऽपि नोदाहर्तव्यः' इति ।।
यद्धितुपरं छन्दसि ।। 8.1.56 ।।
`आमन्त्रितम्'---इत्येतदस्वरितत्वान्नानुवर्तते । `तिङ्' इति वर्तत एव । यत्परं हिपरं तुपरं च तिङन्तं छन्दसि नानुदात्तं भवति ।
यत्परं तावत्---गवां गोत्रमुदसृजोऽयमङ्गिरः । हिपरम्---इन्दवो वामुशन्ति हि । तुपरम्--आख्यास्यामि तु ते ।
`निपातैर्यद्यदिहन्त' इति `हि च' इति, `तुपश्यपश्यताहै' इति च निघातप्रतिषेधे सिद्धे वचनमिदं नियमार्थम्---एभिरेव परैर्योगे प्रतिषेधो भवति, नान्यैरिति ।
इह न भवति---जाये स्वो रोहावैहि । एहीत्यनेन गत्यर्थलोटा युक्तस्य `रोहाव' इत्येतस्य लोडन्तस्य निघातो भवत्येव ।।
चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ।। 8.1.57 ।।
चन, चिद्, इव, गोत्रादि, तद्धित, आम्रेडित---इत्येतेषु परतः अगतेरुत्तरं तिङन्तं नानुदात्तं भवति । चन---देवदत्तः पचति चन । चित्---देवदत्तः पचति चित् । इव--देवदत्तः पचतीव । गोत्रादि---देवदत्तः पचति गोत्रम् । देवदत्तः पचति ब्रुवम् । देवदत्तः पचति प्रवचनम् । इहापि गोत्रादयः कुत्सनाभीक्ष्ण्योरेव गृह्यन्ते । तद्धित---देवदत्तः पचतिकल्पम् । देवदत्तः पचतिरूपम् । अनुदात्तस्तद्धित इहोदाहरणम्, अन्यत्र तद्धिस्वरेण तिङ्स्वरो बाध्यते---पचतिदेश्यः । आम्रेडित---देवदत्तः पचति पचति ।
अगतेरिति किम् ? देवदत्तः प्रपचति चन ।
अत्रागतिग्रहणे, `सगतिरपि तिङ्' इत्यत्र च उपसर्गग्रहणं द्रष्टव्यम् । इह मा भूत्---शुक्लीकरोति चन । यत्काष्ठं शुक्लीकरोति । यत्काष्ठं कृष्णीकरोति ।।
चादिषु च ।। 8.1.58 ।।
चादिषु च परतः तिङन्तमगतेः परं नानुदात्तं भवति । चादयः `नचवाहाहैवयुक्ते' इत्यत्र ये निर्दिष्टाः, त इह परिगृह्यन्ते । चशब्दे तावत्---देवदत्तः पचति च खादति च । वा---देवदत्तः पचति वा खादति वा । ह---देवदत्तः पचति ह खादति ह । अह---देवदत्तः पचत्यह खादत्यह । एव---देवदत्तः पचत्येव खादत्येव ।
`अगतेः' इत्येव---देवः प्रपचति च प्रखादति च । प्रथमस्यात्र तिङन्तस्य चवायोगे प्रथमेति निघातः प्रतिषिद्ध्यते एव । परं तु निहन्यते ।।
चवायोगे प्रथमा ।। 8.1.59 ।।
`अगतेः' इति पूर्वसूत्रे चानुकष्टमित्यत्र नानुवर्तते । च, वा---इत्येताभ्यां योगे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति । गर्दभाँश्च कालयति, वीणां च वादयति । गर्दभान्वा कालयति, वीणां वा वादयति ।
योगग्रहणं पूर्वाभ्यामपि योगे निघातप्रतिषेधो यथा स्यादिति ।
प्रथमाग्रहणम्---द्वितीयादेस्तिङन्तस्य मा भूदिति ।
चवायोगो हि द्विसमुच्चये विकल्पे च सति भवति, स चानेकस्य धर्म इति ।।
हेति क्षियायाम् ।। 8.1.60 ।।
`ह' इत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति क्षियायां गम्यमानायाम् । क्षिया=धर्मव्यतिक्रमः आचारभेदः । स्वयं ह रथेन याति3 उपाध्यायं पदातिं गमयति । स्वयं हौदनं भुङ्क्ते3 उपाध्यायं वक्तून्पाययति । प्रथमस्य तिङन्तस्यात्र निघातः प्रतिषिध्यते । `क्षियाशोः प्रैषेषु तिङाकाङ्क्षम्' इति च प्लुतो भवति ।।
अहेति विनियोगे च ।। 8.1.61 ।।

`अह' इत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति विनियोगे गम्यमाने । चशब्दात् क्षियायां च । नानाप्रयोजनो नियोगः=विनियोगः । त्वमह ग्रामं गच्छ । त्वमहारण्यं गच्छ । क्षियायाम्---स्वयमह रथेन याति3 उपाध्यायं पदातिं गमयति । स्वयमहौदनं भुङ्क्ते3 उपाध्यायं सक्तून्पाययति ।
पूर्वन्निघातप्रतिषेधः, प्लुतश्च ।।

चाहलोप एवेत्यवधारणम् ।। 8.1.62 ।।

चलोपे अहलोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति । एवेत्येतच्चेदवधारणार्थं प्रयुज्यते, क्व चास्य लोपः ? यत्रार्थो गम्यते, न च प्रयुज्यते, तत्र लोपः । तत्र चशब्दः समुच्चयार्थः, अहशब्दः केवलार्थ इति---समानकर्तृके चलोपः, नानाकर्तृके अहलोपः ।

चलोपे---देवदत्त एव ग्रामं गच्छतु, स देवदत्त एवारण्यं गच्छतु । ग्रामं चारण्यं च गच्छत्वित्यर्थः । अहलोपे---देवदत्त एव ग्रामं गच्छतु यज्ञदत्त एवारण्यं गच्छतु । ग्रामं केवलमरण्यं केवलमित्यर्थः ।

अवधारणमिति किम् ? देवदत्तः क्वेव भोक्ष्यते । अनवक्लृप्तावयमेवशब्दः । न क्वचिद्भोक्ष्यत इत्यर्थः । `एवे चानियोगे' इति पररूपम् ।।

चादिलोपे विभाषा ।। 8.1.63 ।।

चादयः `नचवाहाहैवयुक्ते' इति सूत्रनिर्दिष्टा गृह्यन्ते, तेषआं लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति विभाषा । चलोपे---शुक्ला व्रीहयो भवन्ति । श्वेता गा आज्याय दुहन्ति । भवन्तीतेत्यद्विकल्पेन न निहन्यते । वालोपे---व्रीहिभिर्यजेत । यवैर्यजेत ।
एवं शेषेष्वपि यथादर्शनमुदाहार्यम् ।।

वैवावेति च च्छन्दसि ।। 8.1.64 ।।

`वै', `वाव'---इत्येताभ्यां युक्ता प्रथमा तिङ्विभक्तिर्विभाषा नानुदात्ता भवति छन्दसि विषये । अहर्वै देवानामासीत् । रात्रिरसुराणामासीत् । बृहस्पतिर्वै देवानां पुरोहित आसीत् । शण्डामर्कावसुराणाम् । वाव---अयं वाव हस्त आसीत् । नेतर आसीत् ।

एकान्याभ्यां समर्थाभ्याम् ।। 8.1.65 ।।

`एक', `अन्य'---इत्येताभ्याममर्थाभ्यां युक्ता प्रथमा तिङ्विभक्तिर्विभाषा नानुदात्ता भवति छन्दसि विषये । प्रजामेका जिन्वति । ऊर्जमेका रक्षति । जिन्वतीत्येतत्पक्षे न निहन्यते । तयोरन्यः पिप्पलं स्वाद्वत्ति । अनश्नन्नन्यो अभिचाकशीति । अत्तीत्येतत्पक्षे न निहन्यते ।

समर्थाभ्यामिति किम् ? एको देवानुपातिष्ठत् । एक इति संख्यापदमेतद् अन्यार्थे न वर्त्तते । एकशब्दस्य व्यवस्थार्थं च समर्थग्रहणम्; व्यभिचारित्वात्तस्य ।।

यद्वृत्तान्नित्यम् ।। 8.1.66 ।।

`प्रथम्', `छन्दसि' इति निवृत्तम् । निधातप्रतिषेध इत्येव । यदो वृत्तं यद्वृत्तम्, यत्र पदे यच्छब्दो वर्तते तत्सर्वं यद्वृत्तम् । इह वृत्तंग्रहणेन तद्विभक्त्यन्तं प्रतीयात् । डतरडतमौ च प्रत्ययौ इत्येतन्नाश्रीयते । तस्माद्यद्वृत्तादुत्तरं तिङन्तं नानुदात्तं भवति नित्यम् । यो भुङ्क्ते । यं भोजयति । येन भुङ्क्ते । यस्मै ददाति । यत्कामास्ते जुहुमः । यद्र्यङ् वायुर्वाति । यद्वायुः पवते ।
पञ्चमीनिर्देशेऽप्यत्र व्यवहिते कार्यमिष्यते ।

* यथाकाम्ये वेति वक्तव्यम् * । यत्र क्वचन यजन्ते ।।

पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ।। 8.1.67 ।।

पूजनेभ्यः काष्ठादिभ्य उत्तरपदं पूजितमनुदात्तं भवति । काष्ठ---काष्ठाध्यायकः । काष्ठाभिरूपकः । दारुण---दारुणाध्यापकः । दारुणाभिरूपकः । अमातापुत्र---अमातापुत्राध्यापकः । अयुत---अयुताभिरूपकः । अयुताध्यापकः । अद्भुत---अद्भुताध्यापकः । अनुक्त---अनुक्ताध्यापकः । भृश---भृशध्यापकः । घोर---घोराध्यापकः । परम---परमाध्यापकः । सु---स्वध्यापकः । अति--अत्यध्यापकः ।

* मलोपश्च * । इति वार्त्तिककारमतम् । मयूरव्यंसकादित्वात् समासः, समासे चैतदनुदात्तत्वम् ।

समासान्तोदात्तत्वापवाद इष्यते । दारुणमध्यायक इत्येवमादिषु न भवति । `मलोपश्च' इत्येनाप्ययमेव विषय आख्यायते । यत्र विभक्तेरभावान्मकारो न श्रूयते तत्रानुदात्तत्वमिति ।
असमासे हि मलोपो नैवेष्यते । दारुणमधीते दारुणमध्यायक इति ।

पूजनादित्येव पूजितपरिग्रहे सिद्धे पूजितग्रहणमनन्तरपूजितप्रतिपत्त्यर्थम् । एतदेव ज्ञापकम्---इह प्रकरणे पञ्चमीनिर्देशेऽपि नानान्तर्यमाश्रीयते इति । तथा च `यद्वृत्तान्नित्यम्' इत्यत्रोदाहृतम् ।

`अनुदात्तम्' इति वर्तमाने पुनरनुदात्तग्रहणं प्रतिषेधनिवृत्त्यर्थम् ।।

सगतिरपि तिङ् ।। 8.1.68 ।।
सगतिरगतिरपि पूजनेभ्यः काष्ठादिभ्य परं पूजितं तिङन्तमनुदात्तं भवति । यत्काष्ठं पचति । यत्काष्ठं प्रपचति । यद्दारुणं पचति । यद्दारुणं प्रपचति ।
`तिङ्ङतिङः' इति निघातस्य `निपातैर्यद्यदिहन्त' इति प्रतिषेधे प्राप्ते पुनर्विधानम् । सगतिग्रहणाच्च गतिरपि निहन्यते ।

गतिग्रहणेन चात्रोपसर्गग्रहणमिष्यते । इह न भवति---यत्काष्ठं शुक्लीकरोति । यत्काष्ठं कृष्णीकरोति ।।

कुत्सने च सुप्यगोत्रादौ ।। 8.1.69 ।।

`पदात्' इति निवृत्तम् । `सगतिरपि तिङ्' इति वर्तते । कुत्सने च सुबन्ते गोत्रादिवर्जिते परतः सगतिरपि तिङ् अगतिरप्यनुदात्तो भवति । पचति पूति,

प्रपचति पूति । पचति मिथ्या, प्रपचति मिथ्या ।

कुत्सने इति किम् ? पचति शोभनम् । सुपीति किम् ? पचति क्लिश्नाति । अगोत्रादाविति किम् ? पचति गोत्रम् । पचति ब्रुवम् । पचति प्रवचनम् ।

* क्रियाकुत्सन इति वक्तव्यम् * । कर्तुः कुत्सने मा भूत्---पचति पूतिर्देवदत्तः । प्रपचति पूतिः ।

* पूतिश्च चानुबन्धो भवतीति वक्तव्यम् * । तेनायं चकारानुबन्धकत्वादन्तोदात्तो भवति ।

* विभाषितं चापि बह्वर्थमनुदात्तं भवतीति वक्तव्यम् * । पचन्ति पूति । प्रपचन्ति पूति ।

सुपि कुत्सने क्रियाया मलोप इष्टोऽतिङीति चोक्तार्थम् ।

पूतिश्च चानुबन्धो विभाषितं चापि बह्वर्थम् ।।

गतिर्गतौ ।। 8.1.70 ।।

गतिर्गतौ परतोऽनुदात्तो भवति । अभ्युद्धरति । समुदानयति । अभिसम्पर्याहरति ।

गतिरिति किम् ? देवदत्तः प्रपचति । गताविति किम् ? आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः । याहीत्येतत्प्रति क्रियायोगादाङित्येष गतिः । तस्य गतावित्येतस्मिन्नसति गतिरित्यनाश्रितपरनिमित्तकमनुदात्तत्वं स्यात् ।।

तिङि चोदात्तवति ।। 8.1.71 ।।

`गतिः' इति वर्त्तते । तिङन्तेऽनुदात्तवति परतो गतिरनुदात्तो भवति । यत्प्रपचति । यत्करोति ।

तिङ्ग्रहणमुदात्तवतः परिमाणार्थम्; अन्यथा हि यं प्रति गतिः, तत्रानुदात्तो भवतीति धातावेवोदात्तवति स्यात्; प्रत्यये न स्यात्---यत्प्रकरोतीति ।

`यत्क्रियायुक्ताः प्रादयस्तेषां तं प्रति गत्युपसर्गसंज्ञे भवतः' इति तिङन्ते धातुमेव प्रति गतिसंज्ञा ।

आमन्ते तर्हि न प्राप्नोति---प्रपचतितराम्, प्रपचतितमामिति ? अत्र केचिदामन्तेन गतेः समासं कुर्वन्ति; तेषामव्ययवूर्वपदप्रकृतिस्वरत्वे सत्यक्रियमाणेऽपि तिङ्ग्रहणे परमनुदात्तवद्भवतीति गतिनिघातो नैव सिद्ध्यति ।

अथ तरवन्तस्य गतिसमासः ? एवमपि सतिशिष्टत्वादाम एव स्वरे सति गतेः `अनुदात्तं पदमेकवर्जम्' इत्येवानुदात्तत्वं सिद्धम् ।

येषाम् ```गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेः' इत्यनेन वचने कृदन्तेनैव प्राक्सुबुत्पत्तेः समासो भवति, नान्यने" इति दर्शनम्, तेषामेवंविधे विषये समासेन नैव भवितव्यमिति । पृथक् स्वरप्रवृत्तौ सत्यामनेन निघातेन प्रयोजनमस्ति, तदर्थं यत्नः कर्तव्यः ।

उदात्तवतीति किम् ? प्रपचति । प्रकरोति ।।

आमन्त्रितं पूर्वमविद्यमानवत् ।। 8.1.72 ।।

आमन्त्रितं पूर्वमविद्यमानवद्भवति, तस्मिन् सति यत्कार्यं तन्न भवति, असति यत्तद्भवति ।

कानि पुनरविद्यमानवत्त्वे प्रयोजनानि? आमन्त्रित--तिङ्निघातयुष्मदस्मदादेशाभावाः । देवदद्त, यज्ञदत्तेत्यत्रामन्त्रितस्य पदात्परस्येति निघातो न भवति, षाष्ठिकामन्त्रिताद्युदात्तत्वं भवति; देवदत्त पचसीत्यत्र `तिङ्ङतिङः' इति निघातो न भवति; देवदत्त तव ग्रामः स्वम्, देवदत्त मम ग्रामः स्वम्---इत्येवमादिषु युष्मदस्मदादेशा न भवन्ति । पूजायामनन्तरप्रतिषेधः प्रयोजनम्---यावद्देवदत्त पचसीत्यत्रापि `पूजायां नानन्तरम्' इत्येव प्रतिषेधो भवति । `जात्वपूर्वम्' इत्येतद्---देवदत्त जातु पचसीत्यत्रापि भवति । `आहो उताहो चानन्तरम्' इति---आहो देवदत्त पचसि उताहो देवदत्त पचसीत्यत्रापि भवति `आम एकान्तरमामन्त्रितमनन्तिके' इति---आम् भोः पचसि देवदत्त इत्यत्रापि भवति ।

आमन्त्रितमिति किम् ? देवदत्तः पचति । पूर्वमिति किम् ? देवदत्त इत्येतस्यामन्त्रिताद्युदात्तत्वे कर्तव्ये नाविद्यमानवद्भवति । पूर्वत्वं च परापेक्षं भवतीति परस्यैव कार्ये स्वनिमित्ते, अन्यनिमित्ते वा तदविद्यमानवद्भवति, न तु स्वकार्ये । देवदत्त पचसीत्यत्रापि ह्यामन्त्रिताद्युदात्तत्वं भवत्येव ।

इह---इमं मे गङ्गे यमुने इति गङ्गेशब्दः पूर्वमामन्त्रितम्, ततः परस्य यमुनेशब्दस्यानुदात्तत्वे कर्तव्ये स्वयमविद्यमानवत्त्वान्निमित्तं न भवति । मेशब्दस्य निमित्तभावं न प्रतिबध्नाति ।।

नामन्त्रिते समानाधिकरणे सामान्यवचनम् ।। 8.1.73 ।।

अविद्यमानवत्त्वस्य प्रतिषेधः । आमन्त्रितान्ते समानाधिकरणे परतः पूर्वमामन्त्रितान्तं सामान्यवचनं नाविद्यमानवद्भवति, किं तर्हि ? विद्यमानवदेव । अग्ने गृहपते । माणवक जटिलकाध्यापक । पूर्वस्य विद्यमानवत्त्वात्परमनुदात्तमेव भवति ।

आमन्त्रित इति किम् ? देवदत्त पचसि । समानाधिकरण इति किम् ? देवदत्त पण्डित यज्ञदत्त । अत्र यज्ञदत्तविशेषणं पण्डितशब्दः; न पूर्वेण समानाधिकरणः । सामान्यवचनमिति किम् ? पर्यायेषु मा भूत्---अघ्न्ये देवि सरस्वति ईडे काव्ये विहव्ये । एते पर्यायाः । एवं ह्युक्तम्---एतानि ह्यघ्न्ये नामानीति ।।

विभाषितं विशेषवचने बहुवचनम् ।। 8.1.74 ।।

पूर्वेणाविद्यमानवत्त्वे प्रतिषिद्धे विकल्प उच्यते । विशेषवचने समानाधिकरणे आमन्त्रितान्ते परतः पूर्वमामन्त्रितं बहुवचनान्तं विभाषितमविद्यमानवद्भवति । देवाः शरण्याः । ब्राह्मणा वैयाकरणाः ।

सामान्यवचनाधिकारादेव विशेषवचन इति सिद्धे विशेषवचनग्रहणं विस्पष्टार्थम् ।

बहुवचनमिति किम् ? माणवक । जटिलक । नित्यमेतद्विद्यमानवदेव ।।

इति श्रीवामनाचार्यविरचितायां काशइकावृत्तौ अष्टमस्याध्यायस्य प्रथमः पादः
-------------------*******************-------------------

8.2

काशइकावृत्तिः---8
अथ अष्टमाध्याये द्वितीयः पादः
पूर्वत्रासिद्धम् ।। 8.2.1 ।।

`पूर्वत्रासिद्धम्' इत्यधिकारोऽयमा अध्यायपरिसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामः `पूर्वत्रासिद्धम्' इत्येवं तद्वदितव्यम् । तत्र मेयं सपादसप्ताध्याय्यनुक्रान्ता एतस्यामयं पादोनोऽध्यायोऽसिद्धो भवति । इति उत्तरं चोत्तरउत्तरो योगः पूर्वत्रपूर्वत्रासिद्धो भवति=असिद्धवद्भवति । सिद्धकार्यं न करोतीत्यर्थः । तदेतदसिद्धत्ववचनमादेशलक्षणप्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च । अस्माउद्धर, द्वाअत्र, द्वाआनय, असाआदित्यः---इत्यत्र व्यलोपस्यासिद्धत्वात् `आद्गुणः' इति, `अकः सवर्णे दीर्घः' इति च न भवति । अमुष्मै, अमुष्मात्, अमुष्मिन्---इति उत्वस्यासिद्धत्वात् स्मायादयो भवन्ति ।

शिष्किका शुष्कजङ्घा च क्षामिमानौजढत्तथा ।
मतोर्वत्वे झलां जश्त्वे गुडलिण्मान्निदर्शनम् ।।

शुष्किकेति---अत्र `शुषः कः' इत्यस्यासिद्धत्वाद् `उदीचामातः स्थाने यकपूर्वायाः' इत्येतन्न भवति ।

शुष्कजङ्गेति---`न कोपधायाः' इति पुंवद्भावप्रतिषेधो न भवति ।

क्षामिमानिति---क्षामस्यापत्यं क्षामिः, क्षआमो वा अस्यास्तीति क्षामिः, क्षामी वा यस्यास्तीति क्षामिमान् । `क्षायो मः' इत्यस्यासिद्धत्वात् `मादुपधायाश्च' इति वत्वं न भवति ।

औजढदिति--वहेर्निष्ठायामूढस्तमाख्यदिति णिच्, तदन्ताल्लुङ्; `चिङि' इति द्विर्वचने कर्त्तव्ये ढत्वधत्वष्टुत्वढलोपानामसिद्धत्वाण्णौ च यष्टिलोपः, तस्य स्थानिवद्भावाद् ह्त इत्येतद् द्विरुच्यते । `अनग्लोपे' इति प्रतिषेधात्सन्वदित्त्वं नास्ति, तेन औजढदिति भवति । औजिढत् इत्येतत्तु क्तिन्नन्तस्य ऊढिशब्दस्य भवति ।

गुडलिण्मानिति---गुडलिहोऽस्य सन्ति इति मतुप्, तत्र ढत्वजश्त्वपोरसिद्धत्वाद् `झयः' इति वत्वं न भवति ।

येऽत्र षष्ठीनिर्द्देशाः, सप्तमीनिर्द्देशाः, पञ्चमीनिर्द्देशाश्च; तेषाम् `षष्ठीस्थानेयोगा', `तस्मिन्निति निर्दिष्टे पूर्वस्य', `तस्मादित्युत्तरस्य' इति च कर्तव्ये नासिद्धत्वं भवति; `कार्यकालं हि संज्ञापरिभाषम्' इति पूर्व त्वमासां परिभाषाणां नास्तीति । `विप्रतिषेधे परम्' इत्येषा तु परिभाषा येन पूर्वेण लक्षणेन सह स्पर्द्धते, परं लक्षणं तत्प्रति तस्यासिद्धत्वान्न प्रवर्तते । तथा च विस्फोर्यम्, अवगोर्यमिति गुणः परेण `हलि च' इति दीर्घत्वेन न बाध्यते । अपवादस्य तु परस्यापि उत्सर्दे कर्तव्ये वचनप्रामाण्यादसिद्धत्वं न भवति । तेन दोग्धा, दोग्धुमित्यत्र घत्वस्यासिद्धत्वाद् `हो ढः' इति न भवति ।।

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ।। 8.2.2 ।।

नलोपः पूर्वत्रासिद्धो भवति सुब्विधौ, स्वरविधौ, संज्ञाविधौ, तुग्विधौ च कृति । विधिशब्दोऽयं प्रत्येकमभिसम्बध्यमानः स्वरसंज्ञातुकां विधेयत्वात्तैः कर्मषष्ठीयुक्तैर्भावसाधनोऽभिसम्बध्यते । सुपा तु सम्बन्धसामान्यवचनषष्ठ्यन्तेन कर्मसाधनः । तेन सुपः स्थाने यो विधिः, सुपि च परभूते, सर्वोऽसौ सुब्विधिरिति सर्वत्रासिद्धत्वं भवति ।

सुब्विधौ तावत्---राजभिः, तक्षभिरित्यत्र नलोपस्यासिद्धत्वाद् `अतो भिस ऐस्' इति न भवति । राजभ्याम्, तक्षभ्याम्, राजसु, तक्षस्विति--`सुपि च' इति, `बहुवचने झल्येत्' इति दीर्घत्वम्, एत्त्वं च न भवति ।

स्वरविधौ---राजवतीत्यत्र नलोपस्यासिद्धत्वात् `अन्तोऽवत्याः' इति न भवति । पञ्चार्मम्, दशार्ममिति---अत्र नलोपस्यासिद्धत्वाद् `अर्मे चावर्ण द्व्यच्त्र्यच्' इति पूर्वपदस्याद्युदात्तत्वं न भवति । पञ्चदण्डी---इत्यत्र नलोपस्यासिद्धत्वात् `इगन्ताoद्विगौ' इति पूर्वपदप्रकृतिस्वरो न भवति ।

संज्ञाविधौ---पञ्च ब्राह्मण्यः, दश ब्राह्मण्य इति नलोपस्यासिद्धत्वाद् `ष्णान्ता षट्' इति षट्संज्ञा भवति, ततश्च `न षट्स्वस्रादिभ्यः' इति टापः प्रतिषेधो भवति । तदेतत्प्रयोजनं कथं भवति ? यदि `प्रतिकार्यं संज्ञाप्रवृत्तिः' इत्येतद्दर्शनम् । या हि जश्शसोर्लुगर्था षट्संज्ञाप्रवृत्ता, तया स्त्रीप्रत्ययप्रतिषेधो न क्रियत इति सा पुनः प्रवर्तयितव्येति ।

तुग्विधौ---वृत्रहभ्याम्, वृत्रहभिरिति लनोपस्यासिद्धत्वाद् `ह्रस्वस्य पिति कृति तुक्' इति तुग्न भवति । अत्र केचित्---`सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति तुकं प्रति नलोपस्यानिमित्तत्वाद् बहिरङ्गलक्षणेन वाऽसिद्धत्वात्तुग्विधिग्रहणमनर्थकमिति प्रतिपन्नाः, तत् क्रियते परिभाषाद्वयस्यानित्यत्वं ज्ञापयितुम् ।

कृतिति किम् ? वृत्रहच्छत्त्रम्, वृत्रहच्छाया---`छे च' इति तुग्भवति । अत्र सिद्धे सत्यारम्भो नियमार्थः---एतेष्वेव नलोपोऽसिद्धो भवति, नान्यत्र । तेन राजीयति, राजायते, राजाश्वः--इति ईत्वम्, दौर्घत्वम्, एकादेशश्च सिद्धो भवति ।।

न मु ने ।। 8.2.3 ।।
मुभावो नाभावे कर्तव्ये नासिद्धो भवति । किं तर्हि ? सिद्ध एव । अमुना । मुभावस्यासिद्धत्वात् घिलक्षणो नाभावो न स्यात् । कृते तु नाभावे मुभावस्यासिद्धत्वात् `सुपि च' इति दीर्घत्वं यत्प्राप्नोति, तत् `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न भवति ।
अथ वा---योगद्वयमिदमुभयार्थं तन्त्रेणोच्चारितम् ।
अथ वा---ने परतो यत्प्राप्नोति तस्मिन्कर्तव्ये मुभावो नासिद्ध इत्येष एवात्र सूत्रार्थः । ने तु कर्तव्ये मुभावस्य यत्सिद्धत्वं तदर्थतः संगृहीतम् । तेनात्र मुभावस्य सिद्धत्वान्नाभावश्च भवति, दीर्घत्वं च न भवति ।
* एकादेशस्वरोऽन्तरङ्ग सिद्धो वक्तव्यः * । किं प्रयोजनम् ? अयायावेकादेशशतृस्वरैकाननुदात्तसर्वानुदात्तार्थम् । वृक्ष इदम्, प्लक्ष इदम् । अत्र प्रातिपदिकान्तसप्तम्येकवचनयोरुदात्तानुदात्तयोरेकादेशः, स `एकादेश उदात्तेनोदात्तः' इत्युदात्तः, तस्य सिद्धत्वं वक्तव्यम् । आन्तर्यतः अयादेश उदात्तो यथा स्यात् ।
आय्---कुमार्या इदम् । कथमिदमुदाहरणम् ? यदि `उदात्तयणो हल्पूर्वात्' इत्युदात्तत्वे कृते विभक्तेराटश्चैकादेशः, तदा भवतीदमुदाहरणम् । अथ तु कृते तत्रैकादेशे `उदात्तयणो हल्पूर्वात्' इति स्वरः ? तदा नैतदस्य प्रयोजनं भवति ।
आव्---वृक्षाविदम्, प्लक्षाविदम् ।
एकादेशस्वरः---गाङ्गेऽनूप इति गाङ्गेशब्दे एकारः `एकादेश उदात्तेनोदात्तः' इत्युदात्तः, तस्य सिद्धत्वाद् यः पुनः `एङः पदान्तादति' इति एकादेशः स `एकादेश उदात्तेनोदात्तः' इति, अतः `स्वरितो वाऽनुदात्ते पदादौ' इत्येतद्भवति ।
शतृस्वरः---तुदती । नुदती । `अदुपदेशात्' इति लसार्वधातुकानुदात्तत्वे कृते एकादेशः, तदुदात्तस्य सिद्धत्वात् `शतुरनुमो नद्यजादी' `अन्तोदात्तात्' इत्येष स्वरो भवति । `अनुमः' इति प्रतिषेधो ज्ञापकः---एकादेशस्वरः शतृश्वरे सिद्ध इति । न हि सनुम्कं शत्रन्तं किञ्चिदेकदेशस्वरमन्तरेणान्तोदात्तमस्ति ।
एकाननुदात्तः । तुदन्ति । लिखन्ति । एकादेशस्वरस्य सिद्धत्वाद्, तेन `अनुदात्तं पदमेकवर्जम्' इति वर्ज्यमानता भवति ।
सर्वानुदात्तः---ब्राह्मणआस्तुदन्ति, ब्राह्मणा लिखन्ति । एकादेशस्वरस्य सिद्धत्वाद् कृते तस्मिन् `तिङ्ङतिङः' इति निघातो भवति । `अन्तरङ्गे' इति वचनाद्बहिरङ्गस्यासिद्धत्वमेव---पचतीति, प्रपचतीति ।
* संयोगान्तस्य लोपो रोरुत्वे सिद्धो वक्तव्यः * ।
किं प्रयोजनम् ? हरिवो मेदिनं त्वा । हरिव इति मतुबन्तमेतत्; तत्र `छन्दसीरः' इति वत्वे, संयोगान्तस्य लोपे च कृते `मतुवसो रु सम्बुद्धौ छन्दसि' इति रुत्वम्, तस्य संयोगान्तस्य लोपस्यासिद्धत्वाद् `हशि च' इत्युत्वं न प्राप्नोति ।
* सिज्लोप एकादेशे सिद्धो वक्तव्यः * । अलावीत् । अपावीत् । `इट ईटि' इति सिज्लोपस्य सवर्णदीर्घत्वं भवति ।
* निष्ठादेशः षत्वस्वरप्रत्ययविधीड्विधिषु सिद्धो वक्तव्यः * । वृक्णः, वृक्णवान् । निष्ठादेशस्य सिद्धत्वात् झलीति षत्वं न भवति । कुत्वं तु प्रत्यसिद्ध एवेति तद्भवति । स्वरप्रत्ययविधीड्विधिषु क्षीबशब्द उदाह्रियते । तत्र च निपातनमनेकधा समाश्रीयते---यदा क्षीबेर्निष्ठायामिटि कृते इत्---शब्दलोपो निपात्यते, तदा क्षईब इति संज्ञायामित्--शब्दलोपस्यासिद्धत्वात् `निष्ठा च द्व्यजनात्' इत्येष स्वरो न प्राप्नोति; क्षीबे तरति क्षीबिक इति द्व्यज्लक्षणष्ठन्न प्राप्नोति; यदा तु तकारलोपो निपात्यते, तदा तस्यासिद्धत्वादिडागमः प्राप्नोति ।
* प्लुतविकारस्तुग्विधौ छे सिद्धो वक्तव्यः * । अग्ना3 इच्छत्त्रम् । पटा3उच्छत्त्रम् । प्लुतविकारस्यासिद्धत्वात् `छे च' इति ह्रस्वलक्षणो नित्यस्तुग् न प्राप्नोति ।
* श्चुत्वं धुटि सिद्धं वक्तव्यम् * । `श्च्युतिर् क्षरणए'---इत्ययं धातुः सकारादिः पठ्यते, तस्य श्चुत्वस्यासिद्धत्वाद् अट्श्च्योतति, रट्श्च्योतति इति `ङः सि धुट्' इति प्राप्नोति । अटतीत्यड्, रटतीति रड्---क्विबन्तोऽयम् । किमर्थं पुनरयं सकारादिः पठ्यते ? इह मधुश्च्योततीति मधुश्च्युत्---क्विबन्तः, मधुश्च्युतमाचष्टे इति णिच्---मधुश्च्ययति, मधुश्च्यतेः पुनः क्विपि कृते संयोगादित्वात् सलोपः, संयोगान्तत्वाद् यलोपः, चकारस्य कुत्वम्---मधुगिति सिद्धण् । शकारादौ पुनरेतस्मिन् संयोगान्तलोपेन यकारचकारयोर्लुप्तयोः शकारस्य षत्वे सति मधुडिति स्यात् ।
* अभ्यासजश्त्वचर्त्वे एत्वतुकोः सिद्धे वक्तव्ये * । बभणतुः । बभणुः । अभ्यासजश्त्वस्यासिद्धत्वाद् `अनादेशादेः' इत्येत्त्वं प्राप्नोति । छिदेः---विचिच्छित्सति, उच्छेः---उचिच्छिषतीति अभ्यासादेशस्यासिद्धत्वात् `छे च' इति तुग्न प्राप्नोति ।
* द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम् * । सयँय्यन्ता, सवँव्वत्सरः, यलँल्लोकम्, तलँल्लोकमिति परसवर्णस्यासिद्धत्वाद् `यरः' इति द्विर्वचनं न स्यात् ।
* पदाधिकारश्चेल्लत्वघत्वढत्वनत्वरुत्वषत्वणत्वानुनासिकछत्वानि सिद्धानि वक्तव्यानि * । लत्वम्---गलो गलः । गरो गरः । घत्वम्द्रोग्धा, द्रोग्धा । ढत्वम्---द्रोढा, द्रोढा । नत्वम्---नुन्नः, नुन्नः । रुत्वम्--अभिनोऽभिनः । अभिनदभिनत् । षत्वम्---मातुष्ष्वसा, मातुः स्वसा । पितुष्ष्वसा, पितुः स्वसा । णत्वम्--माषवापाणि, माषवापानि । अनुनासिक---वाङ्नयनम्, वाग्नयनम् । छत्वम्---वाक्छयनम्, वाक्शयनम् । लत्वादीनां विकल्पितानामसिद्धत्वात् कृते द्विर्वचने सत्युपरिष्टाद्विकल्पे सति गरोगलः, गलोगरः---इत्येवं रूपमपि द्विरुक्तं स्यात् । तदेतत्सर्वम् `न मु ने' इति योगविभागेन साध्यते । `न' इत्येतावदनिष्टे विषये पूर्वत्रासिद्धस्य प्रतिषेधार्थम् । ततः `मु ने'इति, `न' इत्येतदनुवर्तते ।।
उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ।। 8.2.4 ।।

उदात्तयणः स्वरितयणश्च परस्यानुदात्तस्य स्वरित आदेशा भवति । उदात्तयणः---कुमार्यौ, कुमार्यः । उदात्तनिवृत्तिस्वरेणायमीकार उदात्तः, तस्य स्थाने यणादेशः स उदात्तयण्, तस्मात् परस्यानुदात्तस्य स्वरित आदेशो भवति । स्वरितयणः---सकृल्ल्व्याशा । खल्प्व्याशा । सकृल्लू, खलपू---इति कृत्स्वरेणान्तोदात्तौ, तयोः `रोः सुपि' इति यणादेशः स उदात्तयण्, ततः परस्य सप्तम्येकवचनस्य स्वरितत्वम्, तस्य यणादेशः स्वरितयण्, तस्मात्स्वरितयणः परस्य आशा--शब्दाकारस्यानुदात्तस्य स्वरितो भवति ।

ननु च सप्तम्येकवचनस्य यदुदात्तयण इति स्वरितत्वम्, तदसिद्धं यणादेशे, तत्कथमयं स्वरितयण् भवति ? आश्रयात् सिद्धत्वं भविष्यति ।

यद्येवम्, `उदात्तदनुदात्तस्य स्वरितः' इति एतस्याप्याश्रयात्सिद्धत्वं प्राप्नोति, ततश्च दध्याशेत्यत्रापि स्वरितः स्यात् ? तस्मादयमेव यण्स्वरो यणादेशे सिद्धो वक्तव्यः ।।

केचित्तु ब्रुवते---उदात्तात्स्वरितयणोऽपि परस्यानुदात्तस्य स्वरितत्वं दृश्यते । तथा च तैत्तिरीयके शाखान्तरे पठ्यते---`यास्ते विश्वाः समिधः सन्त्यग्ने' इति । `अग्ने' इत्ययमकारः स्वरितः पठ्यते । तथा ब्राह्मणेऽपि--`दध्याशयतीत्याकारः स्वरितः पठ्यते' इति ।

यथा तु वार्त्तिकं भाष्यं च, तथा उदात्तात्स्वरितयणः परस्यानुदात्तस्यानेन स्वरितत्वं न भवतीति स्थितम् । तथा च भाष्ये स्वरितयण्ग्रहणमिदं प्रत्याख्यायते; सकृल्ल्व्याशेत्येवमादावुदात्तयण इत्येवस्वरितस्य सिद्धत्वात् । स्वरितयण्व्यवधानमव्यवधानमेव, `स्वरविधौ व्यञ्जनमविद्यमानवत्' इति ।

तत्तु क्रियते---पूर्वस्मादपि विधौ स्थानिवद्भावाद् व्यवधानमस्ति, स्वरदीर्घयलोपेषु च लोपाजादेशस्य स्थानिवद्भावः प्रतिषिध्यते इति ।

उदात्तस्वरितयोरिति किम् ? बैदी आशा बैद्याशा । शाङ्गर्रव्याशा । अनुदात्तयणादेशोऽयम् । अनुदात्तस्येति किम् ? कुमार्यत्र । किशोर्यत्र । अत्रेत्ययमाद्युदात्तो लित्स्वरेण ।।

एकादेश उदात्तेनोदात्तः ।। 8.2.5 ।।

उदात्तेन सहानुदात्तस्य य एकादेशः स उदात्तो भवति । `अनुदात्तस्य' इति वर्तते । अग्नी । वायू । वृक्षैः । प्लक्षैः ।

उदात्तेनेति किम् ? पचन्ति । यजन्ति । लसार्वधातुकानुदात्तत्वे कृते द्वयोरनुदात्तयोरयमेकादेशः; पररूपे कर्तव्ये स्वरितस्यासिद्धत्वात् ।।

स्वरितो वाऽनुदात्ते पदातौ ।। 8.2.6 ।।

अनुदात्ते पदादौ उदात्तेन सह य एकादेशः स स्वरितो वा भवत्युदात्तो वा । सु + उत्थितः=सूत्थितः । वि + ईक्षते=वीक्षते । वसुकः + असि =वसुकोऽसि ।

सूत्थित इति---सुशब्दः `सुः पूजायाम्' इति कर्मप्रवचनीयः, तस्य प्रादित्वात्समासे सति अव्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तः, शेषमनुदात्तमिति चानुदात्ते पदादावेकादेशो भवति ।

वीक्षते, वसुकोऽसीति---अत्रापि `तिङ्ङतिङः' इति निघाते कृतेऽनुदात्ते पदादावेकादेशः ।

स्वरितग्रहणं विस्पष्टार्थम् । उदात्ते हि विकल्पिते तस्मिन्नसत्यान्तर्यत एव स्वरितो भविष्यतीति ।

अनुदात्त इति किम् ? देवदत्तोऽत्र । पदादाविति किम् ? वृक्षौ । वृक्षाः ।।

नलोपः प्रातिपदिकान्तस्य ।। 8.2.7 ।।

`पदस्य' इति वर्तते । प्रातिपदिकस्य पदस्य योऽन्त्यो नकारस्तस्य लोपो भवति । राजा । राजभ्याम् । राजभिः । राजता । राजतरः । राजतमः ।

प्रातिपदिकग्रहणं किम् ? अहन्नहिम् । अन्तग्रहणं किम् ? राजा, राजानौ, राजनः । प्रातिपदिकग्रहणमसमस्तमेव `सुपां सुलुक्' इति षष्ठ्या लुका निर्दिष्टम् ।

* अह्रो नलोपप्रतिषेधो वक्तव्यः * । अहः । अहोभ्याम् । अहोभिः ।

`रोऽसुपि', `अहन्'---इति रेफरुत्वयोरसिद्धत्वाद् नलोपः प्राप्नोति, सावकाशं तदुभयं सम्बुद्धौ---हेऽहः, हे दीर्घाहो निदाघेति ? तत्र समाधिमाहुः---अहन्निति रुविधौ यदुपादीयते प्रथमैक्वचनान्तमकृतलोपं तदावर्त्यते, तत्रैकयाऽऽवृत्त्या तदेव रूपं नलोपाभावार्थमन्वानख्यायते, द्वितीययापि तस्य रुर्विधीयते ।।

न ङिसम्बुद्ध्योः ।। 8.2.8 ।।

ङौ परतः सम्बुद्धौ च नकारलोपो न भवति । आर्द्रे चर्मन् । लोहिते चर्मन् । `सुपां सुलुक्' इति ङेर्लुक् । सम्बुद्धौ---हे राजन् । हे तक्षन् ।

एतस्मादेव नलोपप्रतिषेधवचनाद् `अप्रत्ययः' इति प्रत्ययलक्षणेन प्रातिपदिकसंज्ञा न प्रतिषिध्यते---इति ज्ञाप्यते; भसंज्ञा च न भवतीति । तथा च---राज्ञः पुरुषो राजपुरुष इत्यत्र नलोपश्च भवति, अल्लोपश्च न भवति ।

* ङावुत्तरपदे प्रतिषेधस्य प्रतिषेधो वक्तव्यः * । चर्मणि तिला अस्य चर्मतिलः, हे राजवृन्दारक---इत्यत्र समुदायार्थसम्बोधनम्, न पूर्वपदार्थसम्बोधनं प्रतीयत इति सम्बुद्ध्यन्तं पूर्वपदं नैव समस्यते ।

* वा नपुंसकानामिति वक्तव्यम् * । हे चर्मन्, हे चर्म ।।

मादुपधायाश्च मतोर्वोऽयवादिभ्यः ।। 8.2.9 ।।

मतोरिह कार्यित्वेनोपादानात् सामर्थ्यलब्धं प्रातिपदिकं तत् `मात्' इति मकारावर्णाभ्यां विशिष्यते । मकारावर्णविशिष्टया चोपधया---इत्ययमर्थो भवति । मकारान्ताद् मकारोपधादवर्णान्तादवर्णोपधाच्चोत्तरस्य मतोः `व' इत्ययमादेशो भवति, यवादिभ्यस्तु परतो न भवति । मकारान्तात्---किंवान् । शंवान् ।

मकारोपधात्---शमीवान् । दाडिमीवान् । अवर्णान्ततात्---वृक्षवान् । प्लक्षवान् । खट्वावान् । मालावान् । अवर्णोपधात्---पयस्वान् । यशस्वान् । भास्वान् ।

मादुपधायाश्चेति किम् ? अग्निमान् । वायुमान् । अयवादिभ्य इति किम् ? यवमान् । दल्मिमान् । ऊर्मिमान् ।

यव, दल्मि, उर्मि, भूमि, कृमि, क्रुञ्च, वशा, द्राक्षा---एतेषाम् `मादुपधायाश्च' इति प्राप्नोति । ध्रजि, ध्वजि, सञ्जि---इत्येतेषाम् `छन्दसीरः' इति । हरित, ककुत्, गरुत्---इत्येतेषाम् `झयः' इति । इक्षु, मधु, द्रुम, मण्ड, धूम---इत्येतेषाम् `संज्ञायाम्' इति । आकृतिगणश्च यवादिः ।

अकृतवत्वो मतुब् यवादिषु द्रष्टव्य । यस्य सति निमित्ते मतुपो वत्वं न दृश्यते स यवादिषु द्रष्टव्यः ।

इह नृमत इदं नार्मतमिति बहिरङ्गलक्षणत्वादवर्णोपधस्य मतुपो वत्वं न भवति ।।

झयः ।। 8.2.10 ।।

झयन्तादुत्तरस्य मतोः `व' इत्ययमादेशो भवति । अग्निचित्वान् ग्रामः । उदश्वित्वान्घोषः । विद्युत्त्वान्बलाहकः । इन्द्रो मरुत्वान् । दृषद्वान् देशः ।।

संज्ञायाम् ।। 8.2.11 ।।

संज्ञायां विषये मतोः `व' इत्ययमादेशो भवति । अहीवती । कपीवती । ऋषीवती । मुनीवती ।।

आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ।। 8.2.12 ।।

आसन्दीवद्, अष्ठीवत्, चक्रीवत्, कक्षईवद्, रुमण्वत्, चर्मण्वती---इत्येतानि संज्ञायां निपात्यन्ते । वत्वं पूर्वेणैव सिद्धम्, आदेशार्थानि निपातनानि ।

आसन्दीवदिति---आसनशब्दस्यासन्दीभावो निपात्यते । आसन्दीवान् ग्रामः । आसन्दीवदहिस्थलम् । आसनवानित्येवान्यत्र ।

अपरे त्वाहुः---आसन्दीशब्दोऽपि प्रकृत्यन्तरमेवास्ति । तथा चोक्तम्---औदुम्बरी राजासन्दी भवतीति, तस्य `संज्ञायाम्' इति वत्वेन सिद्धम्, आसन्दीवदित्येतत्प्रपञ्चार्थमिह पठ्यते ।

अष्ठीवदिति---अस्थ्नोऽष्ठीभावः । अष्ठीवानिति शरीरैकदेशसंज्ञा । अस्थिमानित्येवान्यत्र ।

चक्रीवदिति---चक्रशब्दस्य चक्रीभआवो निपात्यते । चक्रीवान् राजा । चक्रवानित्येवान्यत्र । चक्रीवन्ति सदोहविर्धानानि भवन्ति---इत्येतत्तु छान्दसत्वाद् अनुगन्तव्यम् ।

कक्षीवदिति---कक्ष्यायाः सम्प्रसारणं निपात्यते । कक्षीवान्नाम ऋषिः । कक्ष्यावानित्येवान्यत्र ।

रुमण्वदिति---लवणशब्दस्य रुमण्भावो निपात्यते । लवणवानित्येवान्यत्रं ।

अपरे त्वाहुः---रुमन्निति प्रकृत्यन्तरमस्ति, तस्यैतन्निपातनं नलोपाभावार्थम्, णत्वार्थं च । मतोर्वा नुडर्थमिति ।

चर्मण्वतीति---चर्मणो नलोपाभावः, णत्वं च निपात्यते । मतोर्वा नुडर्थम् । चर्मण्वती नाम नदी । चर्मवतीत्येवान्यत्र ।।

उदन्वानुदधौ च ।। 8.2.13 ।।

`उदन्वान्' इत्युदकशब्दस्य मतावुदन्भावो निपात्यते उदधावर्थे, संज्ञायां च विषये । उदन्वान्नाम ऋषिः, यस्यौदन्वतः पुत्रः । उदधौ---उदन्वात् । यस्मिन्नुदकं धीयते स एवमुच्यते ।

उदधाविति किम् ? उदकवान् घट इत्यत्र तु दधात्यर्थो न विवक्ष्यते, किं तर्हि ? उदकसत्तासम्बन्धसामान्यम् ।।

राजन्वान्सौराज्ये ।। 8.2.14 ।।

`राजन्वान्' इति निपात्यते सौराज्ये गम्यमाने । शोभनो राजा यस्मिन्निति स राजन्वान् देशः । राजन्वती पृथ्वी । राजवानित्येवान्यत्र ।।

छन्दसीरः ।। 8.2.15 ।।

छन्दसी विषये इवर्णान्ताद्रेफान्ताच्चोत्तरस्य मतोर्वत्वं भवति । इवर्णान्तात्तवात्--त्रिवती याज्यानुवाक्या भवति । हरिवो मेदिनं त्वा । अधिपतिवती जुहोति । चरुरग्निवानिव । आरेवानेतु मा विशत् । `रयेर्मतौ' इति सम्प्रसारणम् । सरस्वतीवान् । भारतीवान् । दधीवाँश्चरुः ।

छन्दसि सर्वे विधयो विकल्प्यन्ते' इतीह न भवति---सप्तर्षिमन्तम्, ऋषिमान्, ऋतीमान्, सूर्यं ते द्यावापृथिवीमन्तमिति ।

रेफान्तात्---गीर्वान् । धूर्वान् । आशीर्वान् ।।

अनो नुट् ।। 8.2.16 ।।

`छन्दसि' इति वर्तते । अनन्तादुत्तरस्य मतोर्नुडागमो भवति छन्दसि विषये । अक्षण्वन्तः कर्णवन्तः सखायः । अस्थन्वन्तं यदनस्था बिभर्त्ति । अक्षण्वता लाङ्गलेन । शीर्षण्वती । मूर्धन्वती । नुटोऽसिद्धत्वात्तस्य च वत्वं न भवति, ततः परस्य च भवति ।।

नाद् घस्य ।। 8.2.17 ।।

नकारान्तादुत्तरस्य घसंज्ञकस्य नुडागमो भवति छन्दसि विषये । सुपथिन्तरः । दस्युहन्तमः ।

* भूरिदाव्नस्तुड् वक्तव्यः * । भूरिदावत्तरः * ।

* ईद्रथिनः * । रथिन ईकारान्तादेशो घ परतः । रथीतरः । रथशब्दादेव वा मत्वर्थीयोऽयमीकारः `छन्दसीवनिपौ' इति ।।

कृपो रो लः ।। 8.2.18 ।।

कृपेर्धातो रेफस्य लकारादेशो भवति । `रः' इति श्रुतिसामान्यमुपादीयते । तेन यः केवलो रेफो यश्च ऋकारः, तयोर्द्वयोरपि ग्रहणम् । लः' इत्यपि सामान्यमेव; ततोऽयं केवलस्य रेफस्य स्थाने लकारादेशो विधीयते ।

ऋकारस्याप्येकदेशविकारद्वारेण लृकारः । एवं च `लुटि च क्लृपः' इत्येवमादयो निर्देशा उपपद्यन्ते । कल्प्ता, कल्प्तारौ, कल्प्तारः । क्लृप्तः । क्लृप्तवान् ।

कृपा इत्येतत् `क्रपेः सम्प्रसारणं च' इति भिदादिषु पाठाद्भवति, तस्य हि कृतसम्प्रसारणस्य लाक्षणिकत्वात् इह कृप इति ग्रहणं नास्ति ।

कृपणकृपीटकर्पूरादयोऽपि क्रपेरेव द्रष्टव्याः । `उणादयो बहुलम्' इति वा कृपेरेव लत्वाभावः ।

* बालमूलघ्वसुरालमङ्गुलीनां वा रो लमापद्यत इति वक्तव्यम् * । बालः, बारः । मूलम्, मूरम् । लघु, रघु । असुरः, असुलः । अलम्, अरम् । अङ्गुलिः, अङ्गुरिः ।

* कपिलकादीनां संज्ञाछन्दसोर्वा रोलमापद्यत इति वक्तव्यम् * । कपरिरकः, कपिलकः । तिल्पिलीकम्, तिर्पिरीकम् । लोमानि, रोमाणि । पांशुरम्, पांशुलम् । कर्म, कल्म । शुक्रः, शुक्लः ।

रलयोरेकत्वस्मरणमिति केचित् । किमिदमेकत्वस्मरणमिति ? समानविषयत्वमेव तयोः स्मर्यत इत्यर्थः ।।

उपसर्गस्यायतौ ।। 8.2.19 ।।

अयतौ परत उपसर्गस्य यो रेफस्तस्य लकार आदेशो भवति । प्लायते । पलायते । अत्र योऽयमेकादेशः, तस्य स्थानिवद्भावादयतेः, उपसर्गस्य च विभआगे सति यद्ययतिग्रहणं रेफस्य विशेषणम्, तदा `येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' इति एकेन वर्णेन व्यवधानेऽपि सति लत्वं भवति । तथा च पल्ययते इत्यत्रापि भवति ।

उपसर्गविशेषणे त्वयतिग्रहणे सिद्धमेवैतत्सर्वं प्रतेरपि तु व्यवहितेऽपि प्राप्नोति । तत्र केषाञ्चिद्दर्शनं भवितव्यमेव प्लत्ययत इति ।

प्रथमपक्षदर्शनाभिनिविष्टास्तु प्रत्ययत इत्येव भवतीति मन्यन्ते । अपरे तु प्रतिशब्दोपसृष्टस्यायतेः प्रयोगमेव नेच्छन्ति ।

निस्, दुस्---इत्येतयोस्तु रुत्वस्यासिद्धत्वाल्लत्वेन नैव भवितव्यम् । निरयणम् । दुरयणम् ।।

ग्रो यङि ।। 8.2.20 ।।

`गृ' इत्येतस्य धातो रेफस्य लकार आदेशो भवति यङि परतः । निजेगिल्यते, निजेगिल्येते, निजेगिल्यन्ते ।

भावगर्हायां ग्रो यङ्विहितः ।

केचित्--`ग्रः' इति गिरेतेर्गृणातेश्च सामान्येन ग्रहणमिच्छन्ति । अपरे तु---गिरतेरेव न गृणातेः । गृणातेर्हि यङेव नास्ति; अनभिधानादिति ।

यङीति किम् ? निगीर्यते ।।

अचि विभाषा ।। 8.2.21 ।।

अजादौ प्रत्यये परतो ग्रो रेफस्य विभाषा लकारादेशो भवति । निगिरति, निगिलति । निगरणम्, निगलनम् । निगारकः, निगालकः ।

इयं तु व्यवस्थितविभाषा । तेन `गल' इति प्राण्यङ्गे नित्यं लत्वं भवति; `गर' इति विषे नित्यं न भवति । निगार्यते, निगाल्यत इति । णिलोपस्य स्थानिवद्भावाद् `अचि विभाषा' इति लत्वविकल्पः ।

`पूर्वत्रासिद्धे न स्थानिवत्' इति एतदपि सापवादमेव; `तस्य दोषः संयोगादिलोपलत्वणत्वेषु' इति । अन्तरङ्गत्वाद्वा कृते लत्वविकल्पे णिलोपो भविष्यति ।

गिरौ, गिर इत्यत्र `धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' इति लत्वं न भवति । गिरतिर्वा लत्वविधावधिकृतः; गृणातेरेतद्रूपम् ।।

परेश्च घाङ्कयोः ।। 8.2.22 ।।

परि इत्येतस्य यो रेफस्तस्य घशब्देऽङ्कशब्दे च परतो विभाषा लकार आदेशो भवति । परिघः, पलिघः । पर्यङ्कःष पल्यङ्कः ।

घ इति स्वरूपग्रहणमत्रेष्यते, न तरप्तमपौ इति ।

* योगे चेति वक्तव्यम् * । परियोगः, पलियोगः ।।

संयोगान्तस्य लोपः ।। 8.2.23 ।।

संयोगान्तस्य पदस्य लोपो भवति । गोमान् । यवमान् । कृतवान् । हृतवान् ।

इह श्रेयान्, भूयान्---इति रुत्वं परमप्यसिद्धत्वात् संयोगान्तस्य लोपं न बाधते ।

जश्त्वे तु नाप्राप्ते तदारभ्यत इति तस्य बाधकं भवति---यशः, पय इति ।

दध्यत्र, मध्वत्र---इत्यत्र तु यणआदेशस्य बहिरङ्गलक्षणस्यासिद्धत्वात् संयोगान्तलोपो न भवति ।।

रात्सस्य ।। 8.2.24 ।।

संयोगान्तपदस्य यो रेफस्तस्मादुत्तरस्यान्तस्य सकारस्य लोपो भवति । गोभिरक्षआः । प्रत्यञ्चमत्साः । क्षरतेः, त्सरतेश्च लुङि सिचश्छान्दसत्वादीडभावः; `बहुलं छन्दसि' इति वचनात् । दीर्घे सति रूपमेतत् ।

मातुः, पितुरिति--`ऋत उत्' इति उत्त्वे कृते रपरत्वे च सति `रात्सस्य' इति सलोपः ।

सिद्धे सत्यारम्भो नियमार्थः---रात्सस्यैव लोपो भवति, नान्यस्येति । ऊर्जेः---क्विप्, ऊर्क् । मृजेर्लङि---अमार्ट् ।।

धि च ।। 8.2.25 ।।

धकारादौ प्रत्यये परतः सकारस्य लोपो भवति । अलविध्वम्, अलविढ्वम् । अपविध्वम्, अपविढ्वम् । यद्यत्र सकारलोपो न स्यात्, सिचः षत्वे जश्त्वे च `विभाषेटः' इति मूर्द्धन्याभावपक्षेऽपि न धकारः श्रूयेत ।

इतः प्रभृति सिचः सकारस्य लोप इष्यते । इह न भवति---चकाद्धि पलितं शिर इति । तथा पयो धावतीत्येवमादावपि न भवति । सग्धिः, बभ्धामिति छान्दसो वर्णलोपः ।

भाष्यकारस्त्वाह---चकाधीत्येव भवितव्यमिति । तेन पयो धावतीत्येवमादौ यत्नान्तरमास्थेयम् ।

धि सकारे सिचो लोपश्चकाद्धीति प्रयोजनम् ।

आशाध्वं तु कथं जश्त्वं सकारस्य भविष्यति ।।

सर्वमेवं प्रसिद्धं स्याच्श्रुतिश्चापि न भिद्यते ।

लुङश्चापि न मूर्धन्ये ग्रहणं सेटि दुष्यति ।।

घसिभसोर्न सिध्येत तस्मात्सिज्ग्रहणं न तत् ।

छान्दसो वर्णलोपो वा यथेष्कर्त्तारमध्वरे ।।

निष्कर्त्तारमध्वरस्येत्येवं प्राप्ते ।।

झलो झलि ।। 8.2.26 ।।

झल उत्तरस्य सकारस्य झलि परतो लोपो भवति । अभित्त, अभित्थाः । अच्छित्त । अच्छित्थाः ।

अवात्ताम्, अवात्त---इत्यत्र वा सिचः सकारलोपस्यासिद्धत्वात् `सस्यार्धधातुके' इति सकारस्य तकारः ।

झल इति किम् ? अमंस्त । अमंस्थाः । झलीति किम् ? अभित्साताम् । अभित्सत ।

अयमपि सिच एव लोपः, तेनेह न भवति---सोमसुत् स्तोता । दृषत्स्थानमिति ।।

ह्रस्वादङ्गात् ।। 8.2.27 ।।

ह्रस्वान्तादङ्गादुत्तरस्य लोपो भवति झलि परतः । अकृत, अकृथाः । अह्वत, अह्वथाः ।

ह्रस्वादिति किम् ? अच्योष्ट । अप्लोष्ट । अङ्गादिति किम् ? अलाविष्टाम् । अलाविषुः ।

`झलि' इत्येव---अकृषाताम् । अकृषत ।

अयमपि सिच एव लोपः, तेनेह न भवति---द्विष्टराम्, द्विष्टमामिति । सुजन्ताद् द्विशब्दात्तरप्तमपौ, अद्रव्यप्रकर्षे आतिशयिकः आम् प्रत्ययः ।।

इट ईटि ।। 8.2.28 ।।

इट उत्तरस्य सकारस्य लोपो भवति ईटि परतः । अदेवीत् । असेवीत् । अकोषीत् । अमोषीत् ।

इट इति किम् ? अकार्षीत् । अहार्षीत् । ईटीति किम् ? अलाविष्टाम् । अलाविषुः ।।

स्कोः संयोगाद्योरन्ते च ।। 8.2.29 ।।

पदस्यान्ते यः संयोगः झलि परतो वा संयोगः, तदाद्योः सकारककारयोर्लोपो भवति । लस्जेः---लग्नः, लग्नवान् । साधुलक् । मस्जेः---मग्नः । ककारस्य, तक्षः---तट् । तष्टः, तष्टवान् । काष्ठतट् ।

* झलि सङीति वक्तव्यम् * । किमिदं सङीति ? सनः सप्रभृति महिङो ङकारेण प्रत्याहारः । इह मा भूत्--काष्ठशक्स्थातेति । थकारे झलि ककारस्य संयोगादेर्लोपः प्राप्नोति । तदत्र शकेः क्विबन्तस्य प्रयोग एव नास्तीत्याह---`काष्ठशगेव नास्ति, कुतोऽयं काष्ठशकि तिष्ठेत्' इति !

वास्यर्थम्, काक्यर्थम्---इत्यत्रापि बहिरङ्गलक्षणस्य यणादेशस्यासिद्धत्वात् संयोगादिलोपो न भवति ।

स्कोरिति किम् ? नर्नर्ति । वर्वर्ति । संयोगाद्योरिति किम् ? पयः शक् ।

चोः कुः ।। 8.2.30 ।।

चवर्गस्य कवर्गादेशो भवति झलि च परतः, पदान्ते च । पक्ता, पक्तुम्, पक्तव्यम्, ओदनपक् । वक्ता, वक्तुम्, वक्तव्यम्, वाक् ।

क्रुञ्चेत्यत्र सङीति वचनाद् ञकारस्य चकारे झलि कुत्वं न भवति, `युजिक्रुञ्चां च' इति निपातनाद्वा ।

नकारोपधो वा धातुरयं रेफरहितश्च `कुञ्च कौटिल्याप्लीभावयोः' इति पठ्यते । नकारलोपे हि निकुचित इति दृश्यते । `युजिक्रुञ्चां च' इति तस्यैव रेफोऽधिकः, नकारस्य लोपाभावश्चेति निपात्यते । तत्रानुस्वारस्य, परसवर्णस्य चासिद्धत्वात् ञकार एव नास्तीति कुत्वं न भविष्यति ।।

हो ढः ।। 8.2.31 ।।

हकारस्य ढकारादेशो भवति झलि परतः, पदान्ते च । सोढा, सोढुम्, सोढव्यम् । जलाषाट् । वोढा, वोढुम्, वोढव्यम् । प्रष्ठवाट् । दित्यवाट् ।।

दादेर्धातोर्घः ।। 8.2.32 ।।

दकारादेर्धातोर्हकारस्य धकारादेशो भवति झलि परतः, पदान्ते च । दग्धा, दग्धुम्, दग्धव्यम् । काष्ठधक् । दोग्धा, दोग्धुम्, दोग्धव्यम् । काष्ठधक् ।

दादेरिति किम् ? लेढा, लेढुम्, लेढव्यम् । गुडलिट् ।

`धातोः' इति दादिसामानाधिकरणमेतन्न, किं तर्हि ? तद्विशेषणमवयवषष्ठ्यन्तम्---धातोरवयवो यो दादिः शब्दस्तदवयवस्य हकारस्येति । किं कृतं भवति ? अधोगित्यत्रापि घकारः सिद्धो भवति ।

कथं दोग्धा, दोग्धुमिति ? व्यपदेशिवद्भावात् ।

अथ वा---धातूपदेशे यो दादिरित्येवं विज्ञायते । तथा च---दामलिहमिच्छति दामलिह्यति, दामलिह्यतेः क्विप्प्रत्ययः, दामलिडित्यत्रापि न भवति ।।

वा द्रुहमुहष्णुहष्णिहाम् ।। 8.2.33 ।।

द्रुह, मुह, ष्णुह, ष्णिह--इत्येतेषां धातूनां हकारस्य वा घकारादेशो भवति झलि परतः, पदान्ते च । द्रुह्--द्रोग्धा, द्रोढा । मित्रध्रुक्, मित्रध्रुट् । मुह्---उन्मोग्धा, उन्मोढा । उन्मुक्, उम्मुट् । स्नुह---उत्स्नोग्धा, उत्स्नोढा । उत्स्नुक्, उत्स्नुट् । स्निह---स्नेग्धा, स्नेढा । स्निक्, स्निट् ।

द्रुहेर्दादित्वाद् घत्वं नित्यं प्राप्तम्, इतरेषामप्राप्तमेव घत्वं विकल्प्यते ।।

नहो धः ।। 8.2.34 ।।

नहो हकारस्य धकारादेशो भवति झलि परे पदान्ते च । तद्धम्, नद्धुम्, नद्धव्यम् । उपानत् । परीणत् ।।

आहस्थः ।। 8.2.35 ।।

आहो हकारस्य थकारादेशो भवति झलि परतः । इदमात्थ । किमात्थ ।

आदेशान्तरकरणम्---`झषस्तथोर्धोऽधः' इत्यस्य निवृत्त्यर्थम् ।

`झलि' इत्येव---आह, आहतु, आहुः ।

* हृग्रहोर्भश्छन्दसि हस्येति वक्तव्यम् * । गर्दभेन सम्भरति । ग्रभीता । जभ्रिरे । उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ।।

व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ।। 8.2.36 ।।

व्रश्च, भ्रस्ज, सृज, मृज, यज, राज, भ्राज---इत्येतेषआम्, छकारान्तानाम्, शकारान्तानां च षकार आदेशो भवति झलि परतः, पदान्ते च । व्रश्च---व्रष्टा, व्रष्टुम्, व्रष्टव्यम् । मूलवृट् । भ्रस्ज---भ्रष्टा, भ्रष्टुम्, भ्रष्टव्यम् । धानाभृट् । सृज्---स्रष्टा, स्रष्टुम्, स्रष्टव्यम् । रज्जुसृट् । मृज---मार्ष्टा, मार्ष्टुम्, मार्ष्टव्यम् । कंसपरिमृट् । यजयष्टा, यष्टुम् । यष्टव्यम्, उपयट् । राज्---सम्राट् । स्वराट् । विराट् ।।

राजभ्राजोः पदान्तार्थं ग्रहणम्, झलादिराभ्यामिटा पर्यवपद्यते । केचित्तु---राष्टिः, भ्राष्टिरिति क्विन्नन्तमिच्छन्ति ।

छकारान्तानाम्, प्रच्छ---प्रष्टा, प्रष्टुम्, प्रष्टव्यम् । शब्दप्राट् ।

`च्छ्वोः शूडनुनासिके च' इत्यत्र `क्ङिति' इत्यनुवर्त्तते---इति छग्रहणमिह क्रियते ।

शकारान्तानाम्, लिश्---लेष्टा, लेष्टुम्, लेष्टव्यम् । लिट् । विश्---वेष्टा, विष्टुम्, वेष्टव्यम् । विट् ।।

एकाचो बशो भष् झषन्तस्य स्ध्वोः ।। 8.2.37 ।।

धातोरवयवो य एकाच् झषन्तः तदवयवस्य बशः स्थाने भष् आदेशो भवति झलि सकारे ध्वशब्दे च परतः पदान्ते च ।

अत्र चत्वारो बशः स्थानिनः, भषादेशाश्चत्वार एव; तत्र संख्यातानुदेशे प्राप्ते डकारस्य स्थानिनोऽभावाद् ढकारादेशो न भवति ? आन्तर्यतो व्यवस्था विज्ञास्यते ।।

बुध्---भोत्स्यन्ते । अभुध्वम् । अर्थभुत् । गुह---निघोक्ष्यते । न्यघूढ्वम् । पर्णघुट् । दुह---धोक्ष्यते । अधुग्ध्वम् । गोधुक् ।

अजर्घाः--गृधेर्यङ्लुगन्तस्य लङि सिपि लघूपधगुणे कृते सिपो हल्ङ्यादिलोपे च धातोरवयवस्यैकाचो बशः स्थाने भष्भावः, ततो वकारस्य जश्त्वम्, `दश्च' इति रुत्वम्, `रो रि' इति पूर्वरेफस्य लोपः, `ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घत्वम् ।

गर्दभयतेरप्रत्ययः---गर्धप् ।

एकाच इति किम् ? दामलिहमिच्छति दामलिह्यति, दामलिह्यतेरप्रत्ययः, दामलिट् । असत्येकाज्ग्रहणे, `धातोः' इत्येतद् बशो विशेषणं स्यात् ।

बश इति किम् ? क्रुध---क्रोत्स्यति । झषन्तस्येति किम् ? दास्यति । स्ध्वोरिति किम् ? बोद्धा, बोद्धुम्, बोद्धव्यम् । धकारस्य वकारोपसृष्टस्य ग्रहणं किम् ? दादद्धि । `दध धारणे'---इत्येतस्य यङ्लुकि लोटि `हुझल्भ्यो हेर्धिः' इति धिभावे सत्येतद्भवति ।

दधस्तथोश्च ।। 8.2.38 ।।

`दध' इति दधातिः कृतद्विर्वचनो निर्दिश्यते । तस्य झलन्तस्य बशः स्थाने भष् आदेशो भवति तकारथकारायोः परतः, चकारात् स्ध्वोश्च परतः । धत्तः । धत्थः । धत्से । धत्स्व । धध्वम् ।

वचनसामर्थ्यादातो लोपस्य स्थानिवद्भावो न भवति । अभ्यासजश्त्वस्य चासिद्धत्वम् ।

तथोरिति किम् ? आनन्तर्यात् स्ध्वोरेव विज्ञायेत । चकारस्तयोरनुवृत्त्यर्थः ।

`झषन्तस्य' इत्येव---दधाति ।।

झलां जशोऽन्ते ।। 8.2.39 ।।

झलां जश आदेशा भवन्ति पदस्यान्ते वर्तमानानाम् । वागत्र । श्वलिडत्र । अग्निचिदत्र । त्रिष्टुबत्र ।

अन्तग्रहणं झलीत्येतस्य निवृत्त्यर्थम् । वस्ता । वस्तव्यम् ।।

झषस्तथोर्धोऽधः ।। 8.2.40 ।।

झष उत्तरयोस्तकारथकारयोः स्थाने धकार आदेशो भवति, दधार्ति वर्जयित्वा । लब्धा । लब्धुम् । लब्धव्यम् । अलब्ध । अलब्धआः । दुह---दोग्धा । दोग्धुम् । दोग्धव्यम् । अदुग्ध । अदुग्धआः । लिह---लेढा । लेढुम् । लेढव्यम् । अलीढ । अलीढाः । बुध्---बोद्धा । बोद्धुम् । बोद्धव्यम् । अबुद्ध । अबुद्धाः ।

अध इति किम् ? धत्तः । धत्थः ।।

षढोः कः सि ।। 8.2.41 ।।

षकारढकारयोः ककारादेशो भवति सकारे परतः । षकारस्य, पिष्--पेक्ष्यति । अपेक्ष्यत् । पिपक्षति ढकारस्य, लिह--लेक्ष्यति । अलेक्ष्यत् । लिलक्षति । सीति किम् ? पिनष्टि । लेढि ।।

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ।। 8.2.42 ।।

रेफदकाराभ्यामुत्तरस्य निष्ठातकारस्य नकार आदेशो भवति पूर्वस्य च दकारस्य । रेफान्तात्तावत्---आस्तीर्णम् । विस्तीर्णम् । विशीर्णम् । निगीर्णम् । अवगूर्णम् । दकारात्---भिन्नः, भिन्नवान् । छिन्नः, छिन्नवान् ।

रदाभ्यामिति किम् ? कृतः, कृतवान् ।

`र' इत्यत्र रश्रुतिसामान्यं नोपादीयते, किं तर्हि ? व्यञ्जनमात्रम् । रेफसामान्यनिर्देशेऽपिसति रेफात्परा याऽज्भक्तिस्तद्व्यवधानान्नत्वं न भवति ।

निष्ठेति किम् ? कर्ता, हर्ता । त इति किम् ? चरितम् । मुदितम् । पूर्वस्येति किम् ? परस्य मा भूत्---भिन्नवद्भ्याम् । भिन्नवद्भिः ।

इह कृतस्यापत्यं कार्तिरिति वृद्धेर्बहिरङ्गलक्षणाया असिद्धत्वात् नत्वे कर्त्तव्ये रेफस्यासिद्धत्वम् ।।

संयोगादेरातो धातोर्यण्वतः ।। 8.2.43 ।।

संयोगादिर्यो धातुराकारान्तो यण्वान् तस्मादुत्तरस्य निषअठातकारस्य नकारादेशो भवति । प्रद्राणः, प्रद्राणवान् । म्लानः, म्लानवान् ।

संयोगादेरिति किम् ? यातः, यातवान् । आत इति किम् ? च्युतः, च्युतवान् । प्लुतः, प्लुतवान् । धातोरिति किम् ? निर्यातः । निर्वातः । यण्वत इति किम् ? स्नातः, स्नातवान् ।।

ल्वादिभ्यः ।। 8.2.44 ।।

`लूञ् छेदने'---इत्येतत्प्रभृति `वृ वरणे' इति यावत् वृत्करणेन समापिता ल्वादयो गृह्यन्ते । तेभ्य उत्तरस्य निष्ठातकारस्य नकारादेशो भवति । लूनः, लूनवान्, धूनः । धूनवान् । जीनः, जीनवान् ।

* ऋकारल्वादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यम् * । कीर्णिः । गीर्णिः । शीर्णिः । लूनिः । पूनिः ।।

* दुग्वोर्दीर्घश्चेति वक्तव्यम् * । दु--आदूनः । गु---विगूनः ।

पूञो विनाश इति वक्तव्यम् * । पूना यवाः । विनष्टा इत्यर्थः । विनाश । इति किम् ? पूतं धान्यम् ।

* सिनोतेर्ग्रासकर्मकर्तृकस्येति वक्तव्यम् * । सिनो ग्रासः स्वयमेव । ग्रासकर्मकर्तृकस्येति किम् ? सिता पाशेन सूकरी । ग्रासोऽपि यदा कर्मैव भवति न कर्मकर्ता, तदा न भवति---सितो ग्रासो देवदत्तेनेति ।।

ओदितश्च ।। 8.2.45 ।।

ओकारेतो धातोरुत्तरस्य निष्ठातकारस्य नकारादेशो भवति । ओलस्जी---लग्नः, लग्नवान् । ओविजी---उद्विग्नः, उद्विग्नवान् । `ओप्ययी वृद्धो'---आपीनः, आपीनवान् ।

स्वादय ओदितः । षूङ्---सूनः, सूनवान् । दूङ्---दूनः, दूनवान् । दीङ्---दीनः, दीनवान् । डीङ्---डीनः, डीनवान् । धीङ्---धीनः, धीनवान् । मीङ्---मीनः, मीनवान् । रीङ्---रीणः, रीणवान् । लीङ्---लोनः, लीनवान् । व्रीङ्---व्रीणः, व्रीणवान् ।।

क्षियो दीर्घात् ।। 8.2.46 ।।

क्षियो धातोर्दीर्घादुत्तरस्य निष्ठातकारस्य नकारादेशो भवति । क्षीणाः क्लेशाः । क्षीणो जाल्मः । क्षीणस्तपस्वी । क्षियः `निष्ठायामण्यदर्थे', `वाऽऽक्रोशदैन्ययोः' इति दीर्घत्वं भवति ।

दीर्घादिति किम् ? अक्षितमसि मामेक्षेष्ठाः । अक्षितमितिक्तप्रत्ययो भावे, भावश्च ण्यदर्थ इति दीर्घाभावः ।

ह्रस्वस्यापि हि धात्वनुकरणस्य इह इयङा निर्द्देशः ।

क्षियः `निष्ठायामण्यदर्थे' इत्यत्र दीर्घग्रहणं क्रियते ।

`विपरभ्यां जेः' इत्येवमादौ तु धातुत्वमनुकार्यगतं सदप्यविवक्षितत्वात् जिरूपसामान्यानुकरणं द्रष्टव्यम् ।।

श्योऽस्पर्शे ।। 8.2.47 ।।

श्यायतेरुत्तरस्य निष्ठातकारस्यास्पर्शे नकार आदेशो भवति । शीनं घृतम् । शीनं मेदः । शीना वसा ।

अस्पर्श इति किम् ? शीतं वर्तते । शीतो वायुः ।

शीतमुदकम्---इत्यत्र गुणभूतोऽपि स्पर्शो नत्वप्रतिषेधस्य सम्प्रसारणस्य च निमित्तं भवति ।
गुणे च स्पर्शे प्रतिषेधोऽयम्, न रोगे, तेन प्रतिशीन इत्यत्र नत्वं भवत्येव ।।
अञ्चोऽनपादाने ।। 8.2.48 ।।
अञ्चतेरुत्तरपदस्य निष्ठातकारस्य नकारादेशो भवति न चेदपादानं तत्र भवति । समक्नौ शकुनेः पादौ । तस्मात्पशवो न्यक्नाः ।
अनपादान इति किम् ? उदक्तमुदकं कूपात् । व्यक्तमित्येतदञ्जे रूपम् ।।
दिवोऽविजिगीषायाम् ।। 8.2.49 ।।
दिव उत्तरस्य निष्ठातकारस्य नकारादेशो भवति अविजिगीषायामर्थे । आद्यूनः । परिद्यूनः ।
अविजिगीषायामिति किम् ? द्यूतं वर्तते । विजिगीषया हि तत्राक्षपातनादि क्रियते ।।
निर्वाणोऽवाते ।। 8.2.50 ।।
`निर्वाणः' इति निस्पूर्वाद् वातेरुत्तरस्य निष्ठातकारस्य नकारो निपात्यते, न चेद्वाताधिकरणो वात्यर्थो भवति । निर्वाणोऽग्निः । निर्वाणः प्रदीपः । एष निर्वाणो भिक्षुः ।
अवात इति किम् ? निर्वातो वातः । निर्वातं वातेन ।
निर्वाणः प्रदीपो वातेन---इत्यत्र तु प्रदीपाधिकरणो वात्यर्थः, वातस्तु तस्य करणमिति भवत्येव नत्वम् ।।
शुषः कः ।। 8.2.51 ।।
शुषेर्धातोरुत्तरस्य निष्ठातकारस्य ककारादेशो भवति । शुष्कः, शुष्कवान् ।।
पचो वः ।। 8.2.52 ।।
पचेर्धातोरुत्तरस्य निष्ठातकारस्य वकारादेशो भवति । पक्वः, पक्ववान् ।।
क्षायो मः ।। 8.2.53 ।।
क्षै-धातोरुत्तरस्य निष्ठातकारस्य मकारादेशो भवति । क्षआमः, क्षामवान् ।।
प्रस्त्योऽन्यतरस्याम् ।। 8.2.54 ।।
प्रपूर्वात् स्त्यायतेरुत्तरस्य निष्ठातकारस्यान्यतरस्यां मकारादेशो भवति । प्रस्तीमः, प्रस्तीमवान् । प्रस्तीतिः, प्रस्तीतवान् ।
यदा मत्वं नास्ति, तदा `संयोगादेरातो धातोर्यण्वतः' इत्यस्य पूर्वत्रासिद्धत्वात् सम्प्रसारणं प्रथमं क्रियते; तत्र कृते निमित्तव्याघातान्नत्वं न भवति ।।
अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः ।। 8.2.55 ।।
फुल्ल, क्षीब, कृश, उल्लाघ---इत्येते निपात्यन्ते, न चेदुपसर्गादुत्तरा भवन्ति । फुल्ल इति---`ञिफला विशरणे' इत्येतस्माद्धात्तोरुत्तरस्य निष्ठातकारस्य लकारो निपात्यते । उत्वमिडभावश्च सिद्ध एव ।
क्तवत्वन्तस्याप्येतल्लत्वमिष्यते । फुल्लः, फुल्लवान् इति ।
क्षीबकृशोल्लाघा इति---क्षीविकृशिभ्यामुत्पूर्वाच्च लाघेः क्तप्रत्ययस्य तलोप इडभावश्च निपात्यते । कृते वा इटि इच्छब्दलोपः । क्षीबः । कृशः । उल्लाघः ।
अनुपसर्गादिति किम् ? प्रफुल्ताः सुमनसः । प्रक्षीवितः । प्रकृशितः । प्रोल्लाघितः । लाघेरुदोऽन्य उपसर्गः प्रतिषिध्यते ।
* उत्फुल्लसम्फुल्लयोरिति वक्तव्यम् * । उत्फुल्लः । सम्फुल्लः ।
परिकृश इत्यत्र यः परिशब्दः स क्रियान्तरयोगात् कृशिं प्रत्यनुपसर्ग एव---परिगतः कृशः परिकृश इति ।।
नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् ।। 8.2.56 ।।
नुद, विद, उन्दी, त्रा, घ्रा, ह्री---इत्येतेभ्य उत्तरस्य निष्ठातकारस्य नकार आदेशो भवति अन्यतरस्याम् । नुदः नुन्नः, नुत्तः । विद---विन्नः, वित्तः । उन्द---समुन्नः, समुत्तः । त्रा---त्राणः, त्रातः । घ्रा---घ्राणः, घ्रातः । ह्री---ह्रीणः, ह्रीतः ।
`ह्रो' इत्येतस्याप्राप्तं नत्वम्, इतरेषआं नित्यं प्राप्तं विकल्प्यते ।
`विद विचारणे' इत्यस्य विदेरिह ग्रहणमिष्यते । एवं ह्युक्तम्---
वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते ।
विन्तेर्विन्नश्च वित्तश्च भोगवित्तश्च विन्दतेः ।। इति ।।
न ध्याख्यापृमूर्च्छिमदाम् ।। 8.2.57 ।।
ध्या, ख्या, पृ, मूर्च्छि, मद---इत्येतेषआं निष्ठातकारस्य नकारादेशो न भवति । ध्यातः, ध्यातवान् । ख्यातः, ख्यातवान् । पूर्त्तः, पूर्त्तवान् । मूर्त्तः, मूर्त्तवान् । मत्तः, मत्तवान् । `रदाभ्याम्', `संयोगादेः' इति च प्राप्तः प्रतिषिद्ध्यते ।।
वित्तो भोगप्रत्यययोः ।। 8.2.58 ।।
`वित्त'---इति विदेर्लाभार्थादुत्तरस्य क्तस्य नत्वाभावो निपात्यते भोगे प्रत्यये चाभिधेये । वित्तमस्य बहु । धनमस्य बह्वित्यर्थः । धनं हि भुज्यत इति

भोगोऽभिधीयते ।

प्रत्यये---वित्तोऽयं मनुष्यः । प्रतीत इत्यर्थः । प्रतीयत इति प्रत्ययः । भोगप्रत्यययोरिति किम् ? विन्नः ।।

भित्तं शकलम् ।। 8.2.59 ।।

`भित्तम्' इति निपात्यते शकलं चेत्तद्भवति । भित्तं तिष्ठति । भित्ते प्रपतति । शकलपर्यायोऽयम् ।
अत्र भिदिः क्रिया शब्दव्युत्पत्तेरेव निमित्तम् । भिदिक्रियाविवक्षायां हि शकलविषये भिन्नं भित्तमित्येव भवति ।।

ऋणमाधमर्ण्ये ।। 8.2.60 ।।

`ऋणम्' इति `ऋ' इत्येतस्माद्धातोरुत्तरस्य निष्ठातकारस्य नकारो निपात्यते आधमर्ण्यविषये ।

अधम ऋणे अधमर्णः, एतस्मादेव निपातनात्सप्तम्यन्तेनोत्तरपदेन समासः, तद्भाव आधमर्ण्यम् । यद्येवम्, उत्तमर्ण इति न सिध्यति ? नैष दोषः; कालान्तरदेयविनिमयोपलक्षणार्थं चेदमुपात्तम् । तेन उत्तमर्ण इत्यपि हि भवति । ऋणं ददाति । ऋणं धारयति ।

आधमर्ण्ये इति किम् ? ऋतं वक्ष्यामि नानृतम् ।।

नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि ।। 8.2.61 ।।

नसत्त, निषत्त, अनुत्त, प्रतूर्त, सूर्त, गूर्त---इत्येतानि छन्दसि विषये निपात्यन्ते । नसत्त--निषत्तेति---सदेर्नञ्पूर्वान्निपूर्वाच्च नत्वाभावो निपात्यते । नसत्तमञ्जसा । नसन्नमिति भाषायाम् । निषत्तः । निषण्ण इति भाषायाम् ।

अनुत्तमिति--उन्देर्नञ्पूर्वस्य निपातनम् । अनुत्तमा ते मघवन् । अनुन्नमिति भाषायाम् ।

प्रतूर्तमिति---त्वरतेः, `तुर्वी' इत्येतस्य वा निपातनम् । प्रतूर्तं वाजिनम् । प्रतूर्णमिति भाषायाम् ।

सूर्तमिति---`सृ' इत्येतस्य उत्वं निपात्यते । सूर्ता गावः । सृता गाव इति भाषायाम् ।

गूर्तमिति---`गुरी' इत्येतस्य नत्वाभावो निपात्यते । गूर्त्ता अमृतस्य । गूर्णमिति भाषायाम् ।।

क्विन्प्रत्ययस्य कुः ।। 8.2.62 ।।

`पदस्य' इति वर्त्तते । क्विन्प्रत्ययस्य सर्वत्र पदान्ते कुत्वमिष्यते । क्विन्प्रत्ययो यस्माद्धातोः स क्विन्प्रत्ययः, तस्य पदस्यालोन्त्यस्य कवर्गादेशो भवति ।

`स्पृशोऽनुदके क्विन्' । धृतस्पृक् । हलस्पृक् । मन्त्रस्पृक् ।

`क्विनः कुः' इति वक्तव्ये प्रत्ययग्रहणं कृतम्---बहुव्रीहिविज्ञानार्थम् । क्विन्प्रत्ययो यस्माद्विहितस्तस्मादन्यस्मिन्नपि प्रत्यये कुत्वं यथा स्यात्---मा नो अस्राक् । मा नो अद्राक् । सृजिदृशिभ्यां हि क्विन्विहितः, तयोर्लुङि कुत्वमेतत् । माङ्योगेऽपि छान्दसत्वादडागमः । ईट् च न भवति---`बहुलं छन्दसि' इति । तथा दृग्भ्याम्, दृग्भिरिति---क्विबन्तस्यापि दृशेः कुत्वं भवति । एवं च सति रज्जुसृड्भ्यामित्यत्रापि कुत्वं प्राप्नोति ।

अथ तु नेष्यते ? प्रतिविधानं कर्तव्यमिति ।।

नशेर्वा ।। 8.2.63 ।।

`पदस्य' इति वर्तते । नशेः पदस्य वा कवर्गादेशो भवति । सा वै जीवनगाहुतिः, सा वै जीवनडाहुतिः । नशेरयं सम्पदादित्वाद् भावे क्विप् । जीवस्य नाशो झीवनक्, जीवनट् । षत्वे प्राप्ते कुत्वविकल्पः ।।

मो नो धातोः ।। 8.2.64 ।।

मकारान्तस्य धातोः पदस्य नकारादेशो भवति । प्रशान् । प्रतान् । प्रदान् । `शमितमिदमादीनां क्विप्, `अनुनासिकस्य क्विझलोः क्ङिति' इति दीर्घत्वम् । नत्वस्यासिद्धत्वान्नलोपो न भवति ।

म इति किम् ? भित् । छित् । धातोरिति किम् ? इदम् । किम् ।

`पदस्य' इत्येव---प्रतामौ । प्रतामः ।।

म्वोश्च ।। 8.2.65 ।।

मकारवकारयोश्च परतः मकारान्तस्य धातोर्नकारादेशो भवति । अगम्न तमसः पारम् । अगन्व । गमेर्लङि `बहुलं छन्दसि' इति शपोलुक् । जगन्वान् ।
`विभाषा गमहनजनविदविशाम्' इति क्वसाविडागमस्याभावः ।
अपदान्तार्थ आरम्भः ।।

ससजुषो रुः ।। 8.2.66 ।।

सकारान्तस्य पदस्य `सजुष्' इत्येतस्य च रुर्भवति । सकारान्तस्य---अग्निरत्र । वायुरत्र । सजुषः---सजूरृषिभिः । सजूर्देवेभिः । जुषेः क्विपि सपूर्वस्य रूपमेतत् ।।

अवयाः श्वेतवाः पुरोडाश्च ।। 8.2.67 ।।

अवयाः, श्वेतवाः, पुरोडाः---इत्येते निपात्यन्ते । अवपूर्वस्य यजेः, श्वेतपूर्वस्य वहेः, पुरस्पूर्वस्य दाशतेः `मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्', `अवे यजः' इति ण्विनि कृते `श्वेतवहादीनां डस्पदस्य' डस्प्रत्यये निपातनान्येतानि ।

किमर्थं तर्हि निपातनम्, यावता पूर्वेणैव रुः सिद्धः, दीर्घत्वमपि `अत्वसन्तस्य चाधातोः'---इति ? सम्बुद्धौ दीर्घार्थमेते निपात्यन्ते । `अत्वसन्तस्य चाधातोः'---इत्यत्र हि `असम्बुद्धौ' इति वर्त्तते । हे अवयाः । हे श्वेतवाः । हे पुरोडाः ।
चकारोऽनुक्तसमुच्चयार्थः । हे उक्थशाः ।।
अहन् ।। 8.2.68 ।।
`अहन्' इत्येतस्य पदस्य रुर्भवति । अहोभ्याम् । अहोभिः । नलोपमकृत्वा निर्देशो ज्ञापकः---नलोपाभावो यथा स्यादिति । दीर्घाहा निदाघः, हे दीर्घाहोऽत्रेति ।
अहन्---इत्यत्र तु लाक्षणिकत्वादहन्--शब्दस्य रुर्न भवति ।
* अह्नो रुविधौ रूपरात्रिरथन्तरेषुपसङ्ख्यानं कर्त्तव्यम् * । अहोरूपम् । अहोरात्रः । अहो रथन्तरम् । `रोऽसुपि' इत्यस्यापवादो रुत्वमुपसङ्ख्यायते ।
अपर आह---सामान्येन रेफादौ रुत्वं भवति । अहो रम्यम् । अहो रत्नानीति ।।
रोऽसुपि ।। 8.2.69 ।।
`अहन्' इत्यतेस्य रेफादेशो भवत्यसुपि परतः । अहर्ददाति । अहर्भुङ्क्ते ।
असुपीति किम् ? अहोभ्याम् । अहोभिः ।
ननु चात्रापि प्रत्ययलक्षणेन सुबस्ति---अहर्ददाति, अहर्भुङ्क्ते इति ? नैतदस्ति; उक्तमेतत्---`अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवति' इति, नायमहः शब्दः सुप्परो भवति ।
यत्र तु लोपशब्देन लुप्यते तत्र प्रत्ययलक्षणं भवत्येव, यथा---हे दीर्घाहोऽत्र, दीर्घाह निदाघ इति । अत्र हि `हल्ङ्याब्भ्यः' इति लोपेन प्रत्ययस्य निवृत्तिः ।।
अम्नरूधरवरित्युभयथा छन्दसि ।। 8.2.70 ।।
अम्नस्, ऊधस्, अवस्---इत्येतेषां छन्दसि विषये उभयथा भवति---रुर्वा, रेफो वा । अम्नस्---अम्न एव, अम्नरेव । ऊधस्--- ऊधरेव, ऊध एव । अवस्---अवरेव, अव एव । यदा रुत्वं तदा `भोभगोअघोअपूर्वस्य योऽशि' इति यकारः ।
* छन्दसि भाषायां च विभाषा प्रचेतसो राजन्युपसङ्ख्यानं कर्तव्यम् * । प्रचेता राजन्, प्रचेतो राजन् ।
* अहरादीनां पत्यादिषूपसंख्यानं कर्तव्यम् * । अहर्पतिः, अहः---पति । गीर्प्पतिः । गीः पतिः । धूर्प्पतिः । धूः पति ।
विसर्जनीयबाधनार्थमत्र पक्षे रेफस्येव रेफो विधीयते ।।
भुवश्च महाव्याहृतेः ।। 8.2.71 ।।
`भुवस्'---इत्येतत् महाव्याहृतेछन्दसि विषये उभथा भवति---र्वा, रेफो वा । भुवरित्यन्तरिक्षम्, भुव इत्यन्तरिक्षम् ।
महाव्याहृतेरिति किम् ? भुवो विश्वस्य भुवनेषु यज्ञियः ।
`भुवः' इत्येतदव्ययमन्तरिक्षवाचि महाव्याहृतिः ।।
वसुस्रंसुध्वंस्वनडुहां दः ।। 8.2.72 ।।
`ससजुषोः' इत्यतः `स' इति वर्तते, तेन सम्भवाद्व्यभिचाराच्च वसुरेव विशेष्यते, न स्रंसुध्वंसू; व्यभिचाराभावाद् । असम्भवाच्चानडुहूशब्दः । वस्वन्तस्य पदस्य सकारान्तस्य स्रंसु, ध्वंसु, अनडुह्---इत्येतेषां च दकारादेशो भवति । वसु---विद्वद्भ्याम्, विद्वद्भिः । पपिवद्भ्याम्, पपिवद्भिः । स्रंसु---उखास्रद्भ्याम्, उखास्रद्भिः । ध्वंसु---पर्णध्वद्भ्याम्, पर्णध्वद्भिः । अनडुह्---अनडुद्भ्याम्, अनडुद्भिः ।
स इत्येव---विद्वान्, पपिवान् ।
नकारस्य न भवति रुत्वे नाप्राप्ते इदमारभ्यत इति तद्बाध्यते । संयोगान्तलोपस्तु नैवमिति तेनैतदेव दत्वं बाध्यते ।
अनुडुहोऽपि ढत्वमनेन बाध्यते ।
नुमस्तु विधानसामर्थ्यान्न भवति---अनड्वान्, हे अनड्वन्निति । `पदस्य' इत्येव---विद्वांसौ, विद्वांसः ।।
तिप्यनस्तेः ।। 8.2.73 ।।
तिपि परतः सकारान्तस्य पदस्य अनस्तेर्दकार आदेशो भवति । अचकाद् भवान् । अन्वशाद् भवान् ।
तिपीति किम् ? चकास्तेः क्विप्, चकाः । अनस्तेरिति किम् ? आप एवेदं सलिलं सर्वमाः । आ इत्यस्तेर्लङि तिपि `बहुलं छन्दसि' इति ईड् न कृतः ।।
सिपि धातो रुर्वा ।। 8.2.74 ।।
सिपि परतः सकारान्तस्य पदस्य धातो `रुः' इत्ययमादेशो भवति, दकारो वा । अचकास्त्वम्, अचकात्त्वम् । अन्वशास्त्वम्, अन्वशात्त्वम् ।
धातुग्रहणं चोत्तरार्थं रुग्रहणं च ।।
दश्च ।। 8.2.75 ।।
दकारान्तस्य धातोः पदस्य सिपि परतो रुर्भवति, दकारो वा । अभिनत्त्वम्, अभिनस्त्वम् । अच्छिनत्त्वम्, अच्छिनस्त्वम् ।।
वौरुपधाया दीर्घ इकः ।। 8.2.76 ।।

रेफवकारान्तस्य धातोः पदस्य उपधाया इको दीर्घो भवति । गीः । धूः । पूः । आशीः ।
वकारग्रहणमुत्तरार्थम् । उपधाग्रहणं किम् ? अत्रैव प्रत्युदाहरणे भशब्दाकारस्य मा भूत् ।
`धातोः' इत्येव---अग्निः, वायुः । `पदस्य' इत्येव---गिरौ, गिरः ।।
हलि च ।। 8.2.77 ।।
हलि च परतः रेफवकारान्तस्य धातोरुपधाया इको दीर्घो भवति । आस्तीर्णम् । विस्तीर्णम् । विशीर्णम् । वकारान्तस्य---दीव्यति । सीव्यति ।
`धातोः' इत्येव---दिवमिच्छति दिव्यति । चतुर इच्छति चतुर्यति ।
`इकः' इत्येव---स्मर्यते । भव्यम् ।
अपदान्तार्थोऽयमारम्भः ।।
उपधायां च ।। 8.2.78 ।।
`हलि' इत्यनुवर्त्तते । धातोरुपधाभूतौ यौ रेफवकारौ हल्परौ तयोरुपधाया इको दोर्घो भवति । हुर्छा---हूर्छिता । मुर्छा---मूर्छिता । उर्वी---ऊर्विता । धुर्वी---धूर्विता ।
`हलि' इत्येव---चिर, जिरि, चोरिणोति । जिरिणोति ।
इह कस्मान्न भवति---`री गतौ'---रिर्यतुः, रिर्युः, `वी गत्यादिषु'---विव्यतुः, विव्युरिति ? यणादेशस्य स्थानिवत्त्वात् असिद्धत्वाच्च बहिरङ्गलक्षणत्वेन हल्परौ रेफवकारो न भवतः ।
चतुर्यिता---इत्यत्रापि बहिरङ्गलक्षणत्वादतो लोपस्य धातोरुपधाभूतोरेफो न भवति ।
प्रतिदीव्ना---इत्यत्र तु `हलि च' इति दीर्घत्वम्; दीर्घविधौ लोपाजादेशस्य स्थानिवद्भावप्रतिषेधात् । `असिद्धं बहिरङ्गमन्तरङ्गे' इत्येतत्तु नाश्रयितव्यम् ।
`उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' इति जिव्रिः, किर्योः, गिर्योरित्येवमादिषु दीर्घो न भवति ।।
न भकुर्छुराम् ।। 8.2.79 ।।
रेफवकारान्तस्य भस्य कुर्, छुर्---इत्येतयोश्च दीर्घो न भवति । धुरं वहति धुर्यः । धुरि साधुर्धुर्यः । कुर्---कुर्यात् । छुर्---छुर्यात् । दिव्यम् ।
रेफवकाराभ्यां भविशेषणं किम् ? प्रतिदीव्ना । प्रतिदीव्ने ।।
अदसोऽसेर्दादु दो मः ।। 8.2.80 ।।
अदसोऽसकारान्तस्य वर्णस्य दात्परस्य अवर्णादेशो भवति दकारस्य च मकारः । अमुम्, अमू, अमून् । अमुना । अमूभ्याम् । `भाव्यमानेनाप्युकारेण सवर्णानां ग्रहणमिष्यते'---इत्येकमात्रिकस्य मात्रिकः, द्विमात्रिकस्य द्विमात्रिक आदेशो भवति ।
असेरिति किम् ? अद इच्छति अदस्यति ।
* अदसोऽनोस्र इति वक्तव्यम् । ओकाररेफयोरपि प्रतिषेधो यथा स्यादिति । अदोऽत्र । अदः कुलम् ।
तदर्थं केचित्सूत्रं वर्णयन्ति---अः सेर्यस्य सोऽयमसिः---यत्र सकारत्य अकारः क्रियत इति, तेन त्यदाद्यत्वविधाने एतद् अन्यत्र न भवतिव्यमेवेति ।
अद्र्यादेशे कथम् ?
अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत् ।
केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते ।।
यैः `असे' इति सकारस्य प्रतिषेधः क्रियते, `अनन्त्यविकारेऽन्त्यसदेशस्य' इति च परिभाषा नाश्रीयते; तेषामुभयोरपि मुत्वेन भवितव्यम्---अमुमुयङ्, अमुमुयञ्चौ, अमुमुयञ्च इति; यथा---चलीक्लृप्यत इति लत्वम् ।
ये तु परिभाषामाश्रयन्ति, तेषामन्त्यसदेशस्यैव भवितव्यम्--- अदमुयङ्, अदमुयञ्चौ, अदमुयञ्च इति ।
येषां तु `त्यदाद्यत्वविषय एव मुत्वेन भवितव्यम्' इति दर्शनम्, तेषामत्र न भवितव्यम्---अदद्र्यङ्, अदद्र्यञ्चौ, अदद्र्यञ्च इति ।
दादिति किम् ? अलोऽन्त्यस्य मा भूत्---अमुया, अमुयोः ।।
एत ईद्वहुवचने ।। 8.2.81 ।।
अदसो दकारादुत्तरस्य एकारस्य ईकारादेशो भवति, दकारस्य च मकारो बहुवचने=बहूनामर्थानामुक्तौ । अमी । अमीभिः । अमीभ्यः । अमीषाम् । अमीषु ।
`बहुवचने' इत्यर्थनिर्देशोऽयम्, पारिभाषिकस्य हि बहुवचनस्य ग्रहणे, अमी इत्यत्र न स्यात् ।
वाक्यस्य टेः प्लुत उदात्तः ।। 8.2.82 ।।
अधिकारोऽयम् । वाक्यस्य टेरिति, प्लुत इति च, उदात्त इति च---एतत्त्रयमप्यधिकृतं वेदितव्यमापादपरिसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामो वाक्यस्य टेः, प्लुतः, उदात्तः---इत्येवं तद्वेदितव्यम् । वक्ष्यति---```प्रत्यभिवादेऽशूद्रे' अभिवादये देवदत्तोऽहम्, भो आयुष्मानेधिदेवदत्त3" ।
पदाधिकारोऽनुवर्तत एव ।
वाक्यग्रहणमनन्त्यस्य पदस्य प्लुतनिवृत्त्यर्थम् ।

टिग्रहणं व्यञ्जनान्तस्यापि टेरचः प्लुतो यथा स्यात्---अग्निचि3दिति ।।
प्रत्यभिवादेऽशूद्रे ।। 8.2.83 ।।
प्रत्यभिवादो नाम यदभिवाद्यमानो गुरुराशिषं प्रयुङ्क्ते, तत्राशूद्रविषये यद्वाक्यं वर्त्तते तस्य टेः प्लुत उदात्तो भवति । अभिवादये देवदत्तोऽहम्, भो आयुष्मानेधि देवदत्त3 ।
अशूद्र इति किम् ? अभिवादये तुषजकोऽहम्, भो आयुष्मानेधितुषजक ।
* स्त्रियामपि प्रतिषेधो वक्तव्यः * । अभिवादये गार्ग्यहम्, भो आयुष्मती भव गार्गि ।
असूयकेऽपि केचित् प्रतिषेधमिच्छन्ति---अभिवादये स्थाल्यहं भोः, आयुष्मानेधि स्थालिन् ! यावच्च तस्यासूयकत्वं न ज्ञायते, तावदेव प्रत्यभिवादवाक्यम् । तस्मिंस्त्वसूयकत्वेन निर्ज्ञाते प्रत्यभिवाद एव नास्ति, कुतः प्लुतः ! तथा चोक्तम्---असूयकस्त्वं जाल्म, न त्वं प्रत्यभिवादनमर्हसि, भिद्यस्व वृषल स्थालिन्निति ।
अभिवादनवाक्ये यत् सङ्कीर्तितं नाम, गोत्रं वा, तद् यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्र प्लुतिरिष्यते । इह न भवति---देवदत्त कुशल्यसि । देवदत्त आयुष्मानेधीति ।
* भोराजन्यविशां वेति वक्तव्यम् * । भो अभिवादये देवदत्तोऽहम्, आयुष्मानेधि देवदत्त भोः3, आयुष्मानेधि देवदत्त भोः । राजन्य---अभिवादये इन्द्रवर्माहं भोः, आयुष्मानेधीन्द्रवर्म3न्, आयुष्मानेधीन्द्रवर्मन् । विश्---अभिवादये इन्द्रपालितोऽहं भोः, आयुष्मानेधीन्द्रपालित3, आयुष्मानेधीन्द्रपालित ।।
दूराद्धूते च ।। 8.2.84 ।।
दूराद्धूते यद्वाक्यं वर्तते तस्य टेः प्लुतो भवति स चोदात्तः । आह्वानम्=हूतम्, शब्देन सम्बोधनम् । आगच्छ भो माणवक देवदत्त3 । आगच्छ भो माणवक यज्ञदत्त3 ।
दूरं यद्यप्यपेक्षाभेदादनवस्थितम्, तथापि हूतापेक्षं यत्तदाश्रीयते इति, यत्र प्राकृतात् प्रयत्नाद्यत्नविशेष आश्रीयमाणे शब्दः श्रूयते=तद् दूरम् ।
हूतग्रहणं च सम्बोधनमात्रोपलक्षणार्थं द्रष्टव्यम् । तेन यत्राप्याह्वानं नास्ति, तत्रापि प्लुतिर्भवति---सक्तून्पिब देवदत्त3 । पलायस्व देवदत्त3 इति । अस्याश्च प्लुतेरेकश्रुत्या समावेश इष्यते ।
दूरादिति किम् ? आगच्छ भो माणवक देवदत्त ।
दूरादाह्वाने वाक्यस्यान्ते यत्र सम्बोधनपदं भवति तत्रायं प्लुत इष्यते । तेनेह न भवति---देवदत्त आगच्छ ।।
हैहेप्रयोगे हैहयोः ।। 8.2.85 ।।
हैहेप्रयोगे दूराद्धूते यद्वाक्यं वर्त्तते तत्र हैहयोरेव प्लुतो भवति । है3 देवदत्त, देवदत्त है3 । हे3 देवदत्त, देवदत्त हे3 ।
पुनर्हैहयोर्ग्रहणमनन्त्ययोरपि यथा स्यात् ।।
गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ।। 8.2.86 ।।
`प्रत्यभिवादेऽशूद्रे'---इत्येवमादिना यः प्लुतो विहितः, तस्यैवायं स्थानिविशेष उच्यते । ऋकारवर्जितस्य गुरोरनन्त्यस्य, अपिशब्दादन्त्यस्यापि टेरेकैकस्य सम्बोधने वर्तमानस्य प्लुतो भवति प्राचामाचार्याणां मतेन । दे3वदत्त, देवद3त्त, देवदत्त3 । य3ज्ञदत्त, यज्ञद3त्त, यज्ञदत्त3 ।
गुरोरिति किम् ? वकारात्परस्य मा भूत् । अनृत इति किम् ? कृष्णमि3त्त्र, कृष्णमित्त्र 3 ।
एकैकग्रहणं पर्यायार्थम् ।
प्राचामिति ग्रहणं विकल्पार्थम् । आयुष्मानेधि देवदत्त । तदनेन यदेतदुच्यते---`सर्व एव प्लुतः साहसमनिच्छता विभाषा कर्त्तव्यः' इति, तदुपपन्नं भवति ।।
ओमभ्यादाने ।। 8.2.87 ।।
अभ्यादानम्=प्रारम्भः । तत्र य ओम्शब्दः तस्य प्लुतो भवति । ओ3म् अग्निमीळे पुरोहितम् ।
अभ्यादाने इति किम् ? ओमित्येतदक्षरमुद्गीथमुपासीत ।।
ये यज्ञकर्मणि ।। 8.2.88 ।।
`ये' इत्येतस्य यज्ञकर्मणि प्लुतो भवति । ये3 यजमाहे ।
यज्ञकर्मणीति किम् ? ये यजामह इति पञ्चाक्षरम्---इति स्वाध्यायकाले मा भूत् ।
ये यजामहे---इत्यत्रैवायं प्लुत इष्यते । इह हि न भवति---ये देवासो दिव्येकादशस्थ इति ।।
प्रणवष्टेः ।। 8.2.89 ।।
`यज्ञकर्मणि' इति वर्तते । यज्ञकर्मणि टेः प्रणव आदेशो भवति ।
क एष प्रणवो नाम ? पादस्य वा, अर्धर्चस्य वान्त्यमक्षरमुपसंगृह्य तदाद्यक्षरशेषस्य स्थाने त्रिमात्रमोकारम्, ओङ्कारं वा विदधति तं प्रणवमित्याचक्षते । अपां रेतांसि जिन्वतो3म् । देवान् जिगाति सुम्नयो3म् ।
टिग्रहणं सर्वादेशार्थम् । ओकारः सर्वादेशो यथा स्यात्, व्यञ्जनान्ते अन्तस्य मा भूदिति ।

`यज्ञकर्मणि' इत्येव---अपां रेतांसि जिन्वति ।।

याज्यन्तः ।। 8.2.90 ।।

याज्या नाम ये याज्याकाण्डे पठ्यन्ते मन्त्रआः, तेषामन्त्यो यष्टिः स प्लवते यज्ञकर्मणि । स्तोमैर्विधेमाग्नये3 । जिह्वामग्ने चकृषे हव्यवाहाम्3 ।

अन्तग्रहणं किम् ? याज्या नाम ऋचः काश्चिद्वाक्यसमुदायरूपाः; तत्र यावन्ति वाक्यानि तेषां सर्वेषां टेः प्लुतः प्राप्नोति; सर्वान्त्यस्यैवेष्यते, तदर्थमन्तग्रहणम् ।।

ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ।। 8.2.91 ।।

ब्रूहि, प्रेष्य, श्रौषट्, वौषट्, आवह---इत्येतेषामादेः प्लुतो भवति यज्ञकर्मणि । अग्नयेऽनुब्रू3हि । प्रेष्य---अग्नये गोमयान्प्रे3ष्य । श्रोषट्---अस्तु श्रौ3षट् । वौषट्--सोमस्याग्ने व्रीहि3वौ3षट् । आवह---अग्निमा3वह ।

आवह देवान्यजमानाय---इत्येवमादावयं प्लुतो न भवति; `सर्वे विधयश्चन्दसि विकल्प्यन्ते' इति ।।

अग्नीत्प्रेषणे परस्य च ।। 8.2.92 ।।

अग्नीधः प्रेषणम्=अग्नीत्प्रेषणम्, तस्मादेवादेः प्लुतो भवति परस्य च । आ3 श्रा3वय । ओ3श्रा3वय ।

अत्रैवायं प्लुत इष्यते । तेनेह न भवति---अग्नीदग्नीन्विहर बर्हिस्तृणीहीति । तदर्थं केचिद्वक्ष्यमाणम् `विभाषा' इत्यभिसम्बध्नन्ति, सा च व्यवस्थितविभाषेति । अपर आह---`सर्व एव प्लुतः साहसमनिच्छता विभाषा विज्ञेयः' इति ।

इह तु---उद्धर3 उद्धर, अभिहर3 अभिहरेति छान्दसः प्लुतव्यत्ययः ।

`यजकर्मणि' इत्येव---ओ श्रावय ।।

विभाषा पृष्टप्रतिवचने हेः ।। 8.2.93 ।।

पृष्टप्रतिवचने विभाषा हेः प्लुतो भवति । अकार्षीः कटं देवदत्त ? अकार्षं हि3, अकार्षं हि । अलावीः केदारं देवदत्त ? अलाविषं हि3, अलाविषं हि ।

पृष्टप्रतिवचन इति किम् ? कटं करिष्यति हि । हेरिति किम् ? करोमि ननु ।।

निगृह्यानुयोगे च ।। 8.2.94 ।।

स्वमतात्प्रच्यावनम्=निग्रहः । अनुयोगः=तस्य मतस्याविष्करणम् । तत्र निगृह्यानुयोगे यद्वाक्यं वर्त्तते तस्य टेः प्लुतो भवति विभाषा । `अनित्यः शब्दः' इति केनचित्प्रतिज्ञातम्, तमुपालिप्सुरुपपत्तिभिर्निगृह्या साभ्यसूयमनुयुङ्क्ते---अनित्यः शब्द इत्यात्थ3, अनित्यः शब्द इत्यात्थ । अद्य श्राद्धमित्यात्थ3, अद्य श्राद्धमित्यात्थ । अद्यामावास्येत्यात्थ3, अद्यामावास्येत्यात्थ । अद्य अमावास्येत्येवं वादी युक्त्या प्रच्याव्य स्वमतादेवमनुयुज्यते ।।

आम्रेडितं भर्त्सने ।। 8.2.95 ।।

`वाक्यादेरामन्त्रितस्य' इति भर्त्सने द्विर्वचनमुक्तम्, तस्याम्रेडितं प्लवते । चौरचौर3, वृषलवृषल3, दस्योदस्यो3, घातयिष्यामि त्वा बन्धयिष्यामि त्वा ।

* भर्त्सने पर्यायेणेति वक्तव्यम् * । चौर3चौर । चौरचौर3 । तदर्थमाम्रेडितग्रहणं द्विरुक्तोपलक्षणार्थं वर्णयन्ति ।।

अङ्गयुक्तं तिङाकाङ्क्षम् ।। 8.2.96 ।।

`अङ्ग' इत्यनेन युक्तं तिङन्तमाकाङ्क्षं भर्त्सने प्लवते । अङ्ग कूज3, अङ्ग व्याहर3, इदानीं ज्ञास्यसि जाल्म ।

तिङिति किम् ? अङ्ग देवदत्त मिथ्या वदसि । आकाङ्क्षमिति किम् ? अङ्ग पच । नैतदपरमाकाङ्क्षति ।

`भर्त्सने' इत्येव---अङ्गाधीष्व ओदनं ते दास्यामि ।।

विचार्यमाणानाम् ।। 8.2.97 ।।

प्रमाणेन वस्तुपरीक्षणम्=विचारः, तस्य विषये विचार्यमाणानां वाक्यानां टेः प्लुतो भवति । होतव्यं दीक्षितस्य गृहा3इ । होतव्यं न होतव्यमिति विचार्यते ।

तिष्ठेद्यूपा3इ । अनुप्रहरेद्यूपा3इ । यूपे तिष्ठेद्, यूपे अनुप्रहरेदिति विचार्यते ।।

पूर्वं तु भाषायाम् ।। 8.2.98 ।।

भाषायां विषये विचार्यमाणानां पूर्वमेव प्लवते । अहिर्नु3 । रज्जर्नु3 । लोष्टो नु3 । कपोतो नु3 । प्रयोगापेक्षं पूर्वत्वम् ।

इह भाषाग्रहणात् पूर्वयोगश्छन्दसि विज्ञायते ।।

प्रतिश्रवणे च ।। 8.2.99 ।।

प्रतिश्रवणम्=अभ्युपगमः, प्रतिज्ञानम् । श्रवणाभिमुख्यं च तत्राविशेषात् सर्वस्य ग्रहणम् । प्रतिश्रवणे यद्वाक्यं वर्तते तस्य टेः प्लुतो भवति । गां मे देहि भोः, अहं ते ददामि3 । नित्यः शब्दो भवितुमर्हति, देवदत्त भोः किमात्थ3 ।।

अनुदात्तं प्रश्नान्ताभिपूजितयोः ।। 8.2.100 ।।

अनुदात्तः प्लुतो भवति प्रश्नान्ते, अभिपूजिते च । अगम3 पूर्वा3न् ग्रामा3न् अग्निभूता3इ, पचा3 उ ?

अगनिभूते, पटो---इत्येतयोः प्रश्नान्ते वर्त्तमानयोरनुदात्तः प्लुतो भवति ।

`अगमः' इत्येवमादीनां तु `अनन्त्यस्यापि प्रश्नाख्यानयोः' इति स्वरितः प्लुतो भवति ।

अभिपूजिते---शोभनः खल्वसि माणवक3 ।
चिदिति चोपमार्थे प्रयुज्यमाने ।। 8.2.101 ।।
`अनुदात्तम्' इति वर्त्तते । `चित्'---इत्येतस्मिन्निपाते उपामार्थे प्रयुज्यमाने वाक्यस्य टेरनुदात्तः प्लुतो भवति । प्लुतोऽप्यत्र विधीयते, न गुणमात्रम् ।
अग्निचिद्भाया3त् । राजचिद्भायात्3 । अग्निरिव भायात्, राजेव भायादित्यर्थः ।
उपमार्थे इति किम् ? कथञ्चिदाहुः । प्रयुज्यमान इति किम् ? अग्निर्माणवको भयात् ।।
उपरिस्विदासीदिति च ।। 8.2.102 ।।
`अनुदात्तम्' इति वर्त्तते । `उपरिस्विदासीत्'---इत्येतस्य टेरनुदात्तः प्लुतो भवति । अधः स्विदासी3त् । उपरिस्विदासी3त् ।
अधः स्विदासीत्---इत्यज्ञ `विचार्यमाणानाम्' इत्युदात्तः प्लुतः । उपरिस्विदासीत्---इत्यत्र तु अनेनानुदात्तः ।।
स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु ।। 8.2.103 ।।
स्वरितः प्लुतो भवति आम्रेडिते परतः असूयायाम्, सम्मतौ, कोपे, कुत्सने च गम्यमाने । `वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु' इत् द्विर्वचनमुक्तम्, तत्रायं प्लुतविधिः ।
असूयायां तावत्---माणवक3माणवक अभिरूपक3अभिरूपक रिक्तं त आभिरूप्यम् ।
सम्मतौ---माणवक3माणवक अभिरूपक3भइरूपक शोभनः खल्वसि ।
कोपे---माणवक3माणवक अविनीतक3अविनीतक इदानीं ज्ञास्यसि जाल्म ।
कुत्सने---शात्त्कीक3शात्त्कीक याष्टीक3याष्टीक रिक्ता ते शक्तिः ।
* असूयादिषु वावचनं कर्त्तव्यम् * । माणवक माणवक---इत्येवमाद्यपि यथा स्यात् ।।
क्षियाशीः प्रैषेषु तिङाकाङ्क्षम् ।। 8.2.104 ।।
`स्वरित' इति वर्तते । क्षिया=आचारभेदः, आशीः=प्रार्थनाविशेषः, शब्देन व्यापारणम्=प्रैषः---एतेषु गम्यमानेषु तिङन्तमाकाङ्क्षं यत्तस्य स्वरितः प्लुतो भवति । आकाङ्क्षतीत्याकाङ्क्षम्, तिङन्तमुत्तरपदमाकाङ्क्षतीत्यर्थः ।
क्षियायां तावत्---स्वयं रथेन याति3 उपाध्यायं पदातिं गमयतीति । स्वयं ओदनं ह भुङ्क्ते 3 उपाध्यायं सक्तून्पाययति । पूर्वमत्र तिङन्तमुत्तरपदमाकाङ्क्षतीति साकाङ्क्षं भवति ।
आशिषि---सुताँश्च लप्सीष्ट3 धनं च तात । छन्दोऽध्येषीष्ट3 व्याकरणं च भद्र ।
प्रैषे---कटं कुरु3 ग्रामं च गच्छ । यवान् लुनीहि3 सक्तुंश्च पिब ।
आकाङ्क्षमिति किम् ? दीर्घं ते आयुरस्तु । अग्नीन्विहर ।।
अनन्त्यस्यापि प्रश्नाख्यानयोः ।। 8.2.105 ।।
पदस्येति वर्तते, स्वरितमिति च । अनन्त्यस्यापि अन्त्यस्यापि पदस्य टेः प्लुतो भवति प्रश्ने, आख्याने च । अगम3: पूर्वा3न् ग्रामा3न् अग्निभूत3इ । पट3उ । सर्वेषामेव पदानामेष स्वरितः प्लुतः । अन्त्यस्य `अनुदात्तं प्रश्नान्ताभिपूजितयोः' इति । अनुदात्तोऽपि पक्षे भवति ।
आख्याने---अगम3: पूर्वा3न् ग्रामा3न् भोः3 ।।
प्लुतावैच इदुतौ ।। 8.2.106 ।।
दूराद्धूतादिषु प्लुतो विहितः, तत्र ऐचः प्लुतप्रसङ्गे तदवयवभूता विदुतौ प्लुतौ । ऐ3तिकायन । औ3पमन्यव । अत्र यदेवर्णोवर्णयोः, अवर्णस्य च समविभागः, तदा इदुतौ द्विमात्रावनेन प्लुतौ क्रियेते ।
`प्लुतौ' इति हि क्रियानिमित्तोऽयं व्यपदेशः---इदुतौ प्लवेते, वृद्धिं गच्छत इत्यर्थः । तावती च सा प्लुतिर्भवति, यया तावेचौ त्रिमात्रौ सम्पद्येते ।
यदा त्वर्धमात्रावर्णस्याध्यर्धमात्रा इवर्णोवर्णयोः, तदा तावर्धतृतीयमात्रौ क्रियते इति ।
भाष्ये तूक्तम्---`इष्यते चतुर्मात्रः प्लुतः' इति । तत्कथम् ? समप्रविभागपक्षे इदुतोरनेन त्रिमात्रः प्लुतो विधीयते ।।
एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ।। 8.2.107 ।।
एचोऽप्रगृह्यस्यादूराद्धूते प्लुतविषयस्यार्धस्याकार आदेशो भवति च स प्लुतः, उत्तरस्येकारोकारावादेशौ भवतः ।
विषयपरिगणनं कर्त्तव्यम्---*प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्विति वक्तव्यम् * । प्रश्नान्ते---अगम3: पूर्वा3न् ग्रामा3न् अग्निभूता3इ । पटा3उ । अभिपूजिते---भद्रं करोषि माणवक3 अग्निभूता3इ । पटा3उ । विचार्यमाणे---होतव्यं दीक्षितस्य गृहा3इ । प्रत्यभिवादे---आयुष्मानेधि अग्निभूता3इ । पटा3उ । याज्यान्ते---उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे स्तोमैर्विधेमाग्नया3इ । सो ऽयमाकारः प्लुतो यथाविषयमुदात्तः, अनुदात्तः, स्वरितो वेदितव्यः । इदुतौ पुनरुदात्तावेव भवतः ।
परिगणनं किम् ? विष्णुभूते विष्णुभूते3 घातयिष्यामि त्वा । आगच्छ भो माणक विष्णुभूते ।
परिगणने च सति `अदूराद्धते' इति न वक्तव्यम् ।

पदान्तग्रहणं तु कर्त्तव्यम् । इह मा भूत्---भद्रं करोषि गौरिति ।
अप्रगृह्यस्येति किम् ? शोभने खलु स्तः खट्वे3 ।
* आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः * । अग्ना3इ पत्नीव3: ।
तयोर्य्वावचि संहितायाम् ।। 8.2.108 ।।
तयोरिदुतोर्यकारवकारादेशौ भवतोऽचि संहितायां विषये ।
`संहितायाम्' इत्येतच्छाधिकृतम् । इत उत्तरमाध्यायपरिसमाप्तेर्यद्वक्ष्यामः संहितायामित्येवं तद्वेदितव्यम् ।
अग्ना3याशा । पटा3वाशा । अग्ना3यिन्द्रम् । पटा3वुदकम् ।
अचीति किम् ? अग्ना3इ । पटा3उ ।
संहितायामिति किम् ? अग्ना3इ इन्द्रम् । पटा3उ । उदकम् ।
इदुतोरसिद्धत्वात् `इको यणचि' इति न प्राप्नोतोत्ययमारम्भः ।
अथापि कथञ्चित्तयोः सिद्धत्वं स्यात् ? एवमपि सवर्णदीर्घत्वनिवृत्त्यर्थम्, शाकलनिवृत्त्यर्थं च वक्तव्यमेतत् ।
अथापि तन्निवृत्त्यर्थं यत्नान्तरमस्ति ? तथापि यण्स्वरनिवृत्त्यर्थमिदमारभ्यते । यणादेशस्यासिद्धत्वात् `उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इत्येष स्वरो न भवति ।।
किन्तु यणा भवतीह न सिद्धं य्वाविदुतोर्यदयं विदधाति ।
तौच मम स्वरसन्धिषु सिद्धौ शाकलदीर्घविधी तु निवर्त्यौ ।।
इक्तु यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवादम् ।
तेन तयोश्च न शाकलदीर्घौ यण्स्वरबाधनमेव तु हेतुः ।।
इति श्रीवामनाचार्यविरचितायां काशिकावृत्तौ अष्टमाध्यायस्य द्वितीयः पादः
---------------------******************-----------------

8.3

काशिकावृत्तीः---6
अथ अष्टमाध्याये तृतीयः पादः
मतुवसो रु सम्बुद्धौ छन्दसि ।। 8.3.1 ।।
`संहितायाम्' इति वर्त्तते । मत्वन्तस्य वस्वन्तस्य च पदस्य `रुः' इत्ययमादेशो भवति सम्बुद्धौ परतः छन्दसि विषये । मत्वन्तस्य तावत्---इन्द्र मरुत्व इह पाहि सोमम् । हरिबो मेदिनं त्वा । मरुतोऽस्य सन्ति, हरयोऽस्य सन्ति---इति तमुप्, सुप्तकारयोर्हल्ङ्यादिलोप संयोगान्तस्य लोपे च कृते नकारस्य रुर्भवति ।
वस्वन्तस्य खल्वपि---मीढ्वस्तोकाय तनयाय इन्द्र साह्वः । क्वसोर्निपातनम् `दाश्वान् साह्वान् मीढ्वान्' इति ।
मतुवसोरिति किम् ? ब्रह्मन्स्तोष्यामः । सम्बुद्धाविति किम् ? य एवं विद्वानग्निमाधत्ते । छन्दसीति किम् ? हे गोमन् । हे पपिवन् ।
* वन उपसंख्यानं कर्त्तव्यम् * । यस्त्वायन्तं वसुना प्रातरेत्वः । इणः प्रातः पूर्वस्य छन्दसि क्वनिम् ।
* विभआषा भवद्भगवदघवतामोच्चावस्य * । छन्दसि भाषायां व भवाद्, भगवद्, अघवद्---इत्येतेषां विभाषा रुर्वक्तव्यः, अवशब्दस्य व ओकारादेशः ।
सामान्येन छन्दसि भाषायां चेदं वचनम् । भवत्---हे भोः, हे भवन् । भगवद्---हे भगोः, हे भगवन् । अघवत्---हे अघोः, हे अघवन् ।
निपातविज्ञानाद्वा सिद्धण् । अथ वा---भो इत्येवमादयो निपाता द्रष्टव्याः । असम्बुद्धावपि द्विवचनबहुवचनयोरपि दृश्यन्ते । भो देवदत्तयज्ञदत्तौ । भो देवदत्तयज्ञदत्तविष्णुमित्त्राः ।
तथा स्त्रियामपि च दृश्यन्ते---भो ब्राह्मणि ।
संहिताधिकार उत्तरत्रोपयुज्यते, यत्र भिन्नपदस्थौ निमित्तनेमित्तिनौ---`नश्छव्यप्रशान्' इति ।।
अत्रानुनासिकः पूर्वस्य तु वा ।। 8.3.2 ।।
अधिकारोऽयम् । इत उत्तरं यस्य स्थआने रुर्विधीयते ततः `पूर्वस्य तु वर्णस्य वाऽनुनासिको भवति'---इत्येतदधिकृतं वेदितव्यम्, यदित उर्ध्वमनुक्रमिष्यामस्तत्र । वक्ष्यति---```समः सुटि' । सँस्कर्ता, सँस्कर्तुम् सँस्कर्तव्यम् ।"
अत्रग्रहणं रुणा सह सन्नियोगप्रतिपत्त्यर्थम् । अधिकारपरिमाणापरिग्रहे हि सति `ढो ढे लोपः' इत्यत्रापि पूर्वस्यानुनासिक आशङ्क्येत ।।
आतोऽटि नित्यम् ।। 8.3.3 ।।

अटि परतो रोः पूर्वस्याकारस्य स्थाने नित्यमनुनासिकादेशो भवति । `दीर्घादटि समानपादे' इति रुत्वं वक्ष्यति, ततः पूर्वस्यातोऽनुनासिकविकल्पे प्राप्ते, नित्यार्थं वचनम् । महाँ असि । महाँ इन्द्रो य ओजसा । देवाँ अच्छादीव्यत् ।

केचिदनुस्वारमधीयते, स च्छान्दसो व्यत्ययो द्रष्टव्यः ।

आत इति किम् ? ये वा वनस्पतीरनु । अटीति किम् ? भवांश्चरति, भवांश्लाघयति ।

नित्यग्रहणं विस्पष्टार्थम् ।।

अनुनासिकात् परोऽनुस्वारः ।। 8.3.4 ।।

अन्यशब्दोऽत्राध्याहर्त्तव्यः । तदपेक्षया चेयम् `अनुनासिकात्' इति पञ्चमी । अनुनासिकादन्यो यो वर्णः रोः पूर्वः, यस्यानुनासिको न कृतः, ततः परोऽनुस्वार आगमो भवति । वक्ष्यति---```समः सुटि' । संस्कर्ता, संस्कर्तव्यम्' । `पुमः खय्यम्परे'---पुंस्कामा । `नश्छव्यप्रशान्'---भवांश्चरति" ।

केचित्तु परशब्दमेवान्यार्थं वर्णयन्ति । अनुनासिकात्परः=अनुनासिकादन्योऽनुस्वारे भवति । यस्मिन्पक्षेऽनुनासिको नास्ति तत्रानुस्वारागमो भवति । स तु कस्यागमो भवति ? रोः पूर्वस्यैवेति वर्तते, व्याख्यानादादेशो न भवति ।।

समः सुटि ।। 8.3.5 ।।

रुर्वर्तते । `सम'---इत्येतस्य रुर्भवति सुटि परतः संहितायां विषये । सँस्कतु, सँस्कर्तुम्, सँस्कर्तव्यम् । संस्स्कर्त्ता, संस्स्कर्तुम्, संस्स्कर्तव्यम् ।

अत्र रोर्विसर्जनीये कृते `वा शरि' इति पक्षे विसर्जनीय एव प्राप्नोति । व्यवस्थितविभाषा द्रष्टव्या । तेनात्र नित्यं सकार एव भवति ।

अस्मिन्नेव सूत्रे सकारादेशो वा निर्दिश्यते---`समः स्सुटि' इति द्विसकारको निर्द्देशः ।

सम इति किम् ? उपस्कर्ता । सुटीति किम् ? संकृतिः ।

कश्चिदाह---* संपुंकानां सो वक्तव्यः * । रुविधौ ह्यनिष्टप्रसङ्गः । संस्स्कर्ता । पुंस्स्कामा । कांस्स्कानिति ।।

पुमः खय्यम्परे ।। 8.3.6 ।।

पुमित्येतस्य रुर्भवति अम्परे खयि परतः । पुँस्कामा, पुंस्कामा । पुँस्पुत्रः, पुंस्पुत्रः । पुँस्फलम्, पुंस्फलम् । पुँश्चली, पुंश्चलो ।

पुंस्कामेत्यत्र विसर्जनीयस्य `कुप्वोः ःकःपौ च' इति प्राप्नोति । तस्मादत्र सकार एवादेशो वक्तव्यः ।

द्विसकारकनिर्देशपक्षे तु पूर्वस्मादेव सूत्रात् `स' इत्यनुवर्तते ।

रुत्वं त्वनुवर्तमानमपि नात्राभिसम्बध्यते । सम्बन्धानुवृत्तिस्तस्येति ।

खयीति किम् ? पुंदासः । पुंगवः । अम्पर इति किम् ? पुंक्षीरः । पुंक्षुरः । परग्रहणं किम् ? पुमाख्यः । पुमाचारः ।।

नश्छव्यप्रशान् ।। 8.3.7 ।।

`अम्परे' इति वर्तते । नकारान्तस्य पदस्य प्रशान्वर्जितस्य रुर्भवति अम्परे छवि परतः । भवाँश्छादयति, भवांश्चादयति । भवाँश्छादयति, भवांश्छादयति । भवांश्चिनोति, भवांश्चिनोति । भवाँष्टीकते, भवांष्टीकते । भवाँस्तरति, भवांस्तरति ।

छवोति किम् ? भवान्करोति । अप्रशानिति किम् ? प्रशाञ्छादयति । प्रशान् चिनोति ।

`अम्परे' इत्येव---भवान् त्सरुकः ।।

उभयथर्क्षु ।। 8.3.8 ।।

पूर्वेण नित्ये प्राप्ते विकल्पः क्रियते । नकारान्तस्य पदस्य छवि परतः अम्परे उभयथा ऋक्षु भवति---रुर्वा, नकारो वा । तस्मिंस्त्वा द्रधाति । तस्मिन्त्वा दधाति ।

ऋक्ष्विति किम् ? तांस्त्वं खाद सुखादितान् ।।

दीर्घादटि समानपादे ।। 8.3.9 ।।

`नः' इत्यनुवर्तते । दीर्घादुत्तरस्य पदान्तस्य नकारस्य रुर्भवत्यटि परतस्तौ चोन्निमित्तनिमित्तिनौ समानपादे भवतः । `ऋक्षु' इति प्रकृतत्वाद् ऋक्पाद इह गृह्यते । परिधीं रति । देवां अच्छादीव्यत् । महां इन्द्रो य ओजसा ।

दीर्घादिति किम् ? अहन्नहिम् । अटीति किम् ? इभ्यान्क्षत्त्रियान् । समानपाद इति किम् ? यातुधानानुपस्पृशः ।

`उभयथा' इत्येव---आदित्यान् हवामहे ।।

नॄन्पे ।। 8.3.10 ।।

`नॄन्' इत्येतस्य नकारस्य रुर्भवति पशब्दे परतः । अकार उच्चारणार्थः । नॄँःपाहि । नॄं ः पाहि । नॄँ ः प्रीणीहि । नॄं ःप्रणीहि ।

पे इति किम् ? नॄन् भोजयति ।

उभयथेत्यपि केचिदनुवर्तयन्ति, नॄन्पाहीत्यपि यथा स्यात् ।

स्वतवान् पायौ ।। 8.3.11 ।।

`स्वतवान्' इत्येतस्य नकारस्य रुर्भवति पायुशब्दे परतः । स्वतवाँः पायुरग्ने ।

कानाम्रेडिते ।। 8.3.12 ।।
कानित्येतस्य नकारस्य रूर्भवति आम्रेडिते परतः । कांस्कानामन्त्रयते । कांस्कान्भोजयति ।
अस्य कस्कादिषु पाठो द्रष्टव्यः । तेन `कुत्वोः ःकःच' इति न भवति ।
`समः सुटि' इत्यतो वा सकारोऽनुवर्तते, स एवात्र विधीयते ।
पूर्वेषु योगेषु सम्बन्धानुवृत्त्या गतस्य रोरत्रानभिसम्बन्धः । आम्रेडित इति किम् ? कान् कान्पश्यति । एकोऽत्र कुत्सायाम् ।।
ढो ढे लोपः ।। 8.3.13 ।।
ढकारस्य ढकारे लोपो भवति । सत्यपि पदाधिकारे तस्यासम्भवादपदान्तस्य ढकारस्यायं लोपो विज्ञायते । लीढम् । उपगूढम् ।
ष्टुत्वस्यात्र सिद्धत्वमाश्रयाद् द्रष्टव्यम् ।
श्वलिड्ढौकते---इत्यत्र तु जश्त्वे कृते कार्यं नास्तीति लीपाभावः । न च ढलोपो जश्त्वापवादो विज्ञातुं शक्यते; तस्य हि लोढादिर्विषयः सम्भवति । तत्र हि श्रुतिकृतमानन्तर्यमस्ति । शास्त्रकृतं तु यदा नानन्तर्यंष्टुत्वस्यासिद्धत्वेन प्राप्तम्, तत्तु सूत्रकरणसामर्थ्याद्बाध्यते । श्वलिड् ढौकते---इत्यत्र तु न श्रुतिकृतमानन्तर्यम्, न शास्त्रकृतमिति अविषयोऽयं ढलोपस्य ।।
रो रि ।। 8.3.14 ।।
रेफस्य रेफे परतो लोपो भवति । नीरक्तम् । दूरक्तम् । अग्नीरथः । इन्दू रथः । पुना रक्तं वासः । प्राता राजक्रयः ।
`पदस्य' इत्यत्र विशेषणे षष्ठी, तेन पदान्तस्यापि रेफस्य लोपो भवति । जर्गृधेः---अजर्घाः । पास्पर्धेः---अपास्पा इति ।
खरवसानयोर्विसर्जनीयः ।। 8.3.15 ।।
`र' इति वर्तते । रेफान्तस्य पदस्य खरि परतोऽवसाने च विसर्जनीयादेशो भवति । वृक्षश्छादयति । प्लछश्छादयति । वृक्षस्तरति । प्लक्षस्तरति ।
अवसाने---वृक्षः । प्लक्षः ।
खरवसानयोरिति किम् ? अग्निर्नयति । वायुर्नयति ।
इह नृकुट्यां भवः नार्कुटः, नृपतेरपत्यं नार्पत्यः---इति वृद्धेर्बहिरङ्गलक्षणत्वात्तदाश्रयस्य रेफस्य `असिद्धं बहिरङ्गम्' इत्यसिद्धत्वाद् विसर्जनीयो न भवति ।।
रोः सुपि ।। 8.3.16 ।।
`रु'---इत्येतस्य रेफस्य सुपि परतो विसर्जनीयादेशो भवति । पयः सु । सर्पिः षु । यशः सु ।
`सुपि'---इति सप्तमीबहुवचनं गृह्यते । सिद्धे सत्यारम्भो नियमार्थः---रोरेव सुपि विसर्जनीयादेशः, नान्यस्य । गीर्षु । धूर्षु ।।
भोभगोअघोअपूर्वस्य योऽशि ।। 8.3.17 ।।
भोर, भगोर, अघोर्---इत्येवम्पूर्वस्य अवर्णपूर्वस्य च रो रेफस्य यकारादेशो भवति अशि परतः । भो अत्र । भगो अत्र । अघो अत्र । भो ददाति । भगो ददाति । अघो ददाति । अवर्णपूर्वस्य---क आस्ते, कय् आस्ते । ब्राह्मणा ददति । पुरुषा ददति ।
भोभगोअघोअपूर्वस्येति किम् ? अग्निरत्र । वायुरत्र ।
अश्वग्रहणं किम् ? वृक्षः । प्लक्षः । नैतदस्ति; `संहितायाम्' इत्यनुवर्तते ? तर्हि अश्ग्रहणमुत्तरार्थम् । `हलि सर्वेषाम्' इत्ययं लोपः अशि हलि यथा स्यात्, इह मा भूत्---वृक्षं वृश्चतीति वृक्षवृट्, तमाचष्टे यः स वृक्षवयति, वृक्षवयतेरप्रत्ययः---वृक्षव् करोति ।
अथ तत्रैव अश्ग्रहणं कस्मान्न कृतम् ? उत्तरार्थम्, `मोऽनुस्वारः' इति हल्मात्रे यथा स्यात् । `व्योर्लघुप्रयत्नतरः शाकटायनस्य', `लोपः शाकल्यस्य' इत्येतच्च वृक्षव् करोतीत्यत्र मा भूदित्यश्ग्रहणम् ।
`रोः' इत्येव---प्रातरत्र । पुनरत्र ।।
व्योर्लघुप्रयत्नतरः शाकटायनस्य ।। 8.3.18 ।।
वकारयकारयोर्भोभगोअघोअवर्णपूर्वयोः पदान्तयोर्लघुप्रयत्नतर आदेशो भवति अशि परतः शाकटायनस्याचार्यस्य मतेन । भगोयत्र, भगो अत्र । अघोयत्र, अघो अत्र । क आस्ते, कयास्ते । अस्मायुद्धर, अस्मा उद्धर । असावादित्यः, असा आदित्यः । द्वावत्र, द्वा अत्र । द्वावानय, द्वा आनय ।
लघुप्रयत्नतरत्वमुच्चारणे स्थान---करणशैथिल्यम् । स्थानम्=ताल्वादि । करणम्=जिह्वामूलादि । तयोरुच्चारणे शैथित्लम्=मन्दप्रयत्नता ।।
लोपः शाकल्यस्य ।। 8.3.19 ।।
वकारयकारयोः पदान्तयोरवर्णपूर्वयोर्लोपो भवति शाकल्यस्याचार्यस्य मतेनाशि परतः । क आस्ते, कयास्ते । काक आस्ते, काकयास्ते । अस्मा उद्धर, अस्मायुद्धर । द्वावत्र, द्वा अत्र । असावादित्यः, असा आदित्यः ।
शाकल्यग्रहणं विभाषार्थम् । तेन यदापि लघुप्रयत्नतरो न भवत्यादेशः, तदापि व्योः पक्षे श्रवणं भवति ।।
ओतो गार्ग्यस्य ।। 8.3.20 ।।
ओकारादुत्तरस्य यकारस्य लोपो भवति गार्ग्यस्याचार्यस्य मतेन अशि परतः । भो अत्र । भगो अत्र । भो इदम् । भगो इदम् ।
नित्यार्थोऽयमारम्भः ।

गार्ग्यग्रहणं पूजार्थम् । योऽयमलघुप्रयत्नस्य विकल्पेन लोपः क्रियते सोऽनेन निवर्त्यते । लघुप्रयत्नतरस्तु भवत्येव यकारः । भो अत्र, भोयत्र । भगो अत्र, भगायत्र । अघो अत्र, अघोयत्र ।
केचित्तु सर्वमेव यकारमत्र नेच्छन्ति ।।
उञि च पदे ।। 8.3.21 ।।
अवर्णपूर्वयोः व्योः पदान्तयोर्लोपो भवति उञि च पदे परतः । स उ एकविंशतिः । स उ एकाग्निः ।
पद इति किम् ? तन्त्र उतम्, तन्त्रयुतम् । वेञः सम्प्रसारणे कृते उञिति भूतपूर्वेण ञकारेण शक्यते प्रतिपत्तुमिति ।
अथ `उञ्' इत्येवरुपो निपातः प्रतिपदोक्ताऽस्ति ? तदा लाक्षणिकत्वाद् वेञादेशस्य ग्रहणमिह नास्ति, उत्तरार्थं पदग्रहणं क्रियते ।।
हलि सर्वेषाम् ।। 8.3.22 ।।
हलि परतो भोभगोअघोअपूर्वस्य यकारस्य पदान्तस्य लोपो भवति सर्वेषामाचार्याणां मतेन । भो हसति । भगो हसति । अघो हसति । भो याति । भगो याति । अघो याति । वृक्षा हसन्ति ।
सर्वेषांग्रहणं शाकटायनस्यापि लोपो यथा स्यात्, लघुप्रयत्नतरो मा भूदिति ।
मोऽनुस्वारः ।। 8.3.23 ।।
मकारस्य पदान्तस्यानुस्वार आदेशो भवति हलि परतः । कुण्डं हसति । वनं हसति । कुण्डं याति । वनं याति ।
हलीत्येव---त्वमत्र, किमत्र । पदान्तस्येत्येव--गम्यते, रम्यते ।।
नश्चापदान्तस्य झलि ।। 8.3.24 ।।
नकारस्य मकारस्य चापदान्तस्यानुस्वारादेशो भवति झलि परतः । पयांसि । यशांसि । सर्पींषि । धनूंषि । मकारस्य---आक्रंस्यते । आचिक्रंस्यते । अधिजिगांसते ।
अपदान्तस्येति किम् ? राजन्भुङ्क्ष्व । झलोति किम् ? रम्यते । गम्यते ।।
मो राजि समः क्वौ ।। 8.3.25 ।।
समो मकारस्य मकार आदेशो भवति राजतौ क्विप्प्रत्ययान्ते परतः । सम्राट् ।साम्राज्यम् ।
मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थम् ।
राजीति किम् ? संयत् । सम इति किम् ? किंराट् । क्वाविति किम् ? संराजिता । संराजितुम् । संराजितव्यम् ।।
हे मपरे वा ।। 8.3.26 ।।
हकारे मकारपरे परतो मकारस्य वा मकार आदेशो भवति । किं ह्मलयति, किम् ह्मलयति । कथं ह्मलयति, कथम् ह्मलयति ।
* यवलपरे यवला वा * । यवलपरे हकारे मकारस्य यवला यथासंख्यं वा भवन्तीति वक्तव्यम् । कियँ ह्यः, किं ह्यः । किवँ ह्वलयति, किं ह्वलयति । किलँ ह्लायति । किं ह्लादयति ।।
नपरे नः ।। 8.3.27 ।।
नकारपरे हे परतः मकारस्य वा नकारादेशो भवति । किन् ह्नुते, किं ह्नुते । कथन् ह्नुते, कथं ह्नुते ।।
ङ्णोः कुक्टुक् शरि ।। 8.3.28 ।।
ङकारणकारयोः पदान्तयोः कुक्, टुक्---इत्येतावागमौ वा भवतः शरि परतः । प्राङ्क् शेते, प्राङ् शेते । प्राङ्क् षष्ठः, प्राङ् षष्ठः । प्राङ्क् साये, प्राङ् साये । णकारस्य---वण्ट् शेते, वण् शेते ।
पूर्वान्तकरणम्---प्राङ्क् छेते इत्यत्र छत्वार्थम् । `शश्छोऽटि' इति हि पदान्ताज्झय इति तद्विज्ञायते । इह मा भूत्---पुरा क्रूरस्य विसृपो विरप्शिन् ।
प्राङ्क् साय इत्यत्रापि `सात्पदाद्योः' इति षत्वप्रतिषेधार्थं च ।
वण्ट् साय इत्यत्र च `न पदान्ताट्टोरनाम्' इति ष्टुत्वप्रतिषेधार्थम् ।।
ङः सि धुट् ।। 8.3.29 ।।
डकारान्तात् पदादुत्तरस्य सकारादेः पदस्य वा धुडागमो भवति । श्वलिट्त्साये, मधुलिट्त्सायेः श्वलिट् साये, मधुलिट् साये ।
परादिकरणम् `न पदान्ताट्टोरनाम्' इति ष्टुत्वप्रतिषेधार्थम् ।।
नश्च ।। 8.3.30 ।।
नकान्तात्पदादुत्तरस्य सकारस्य वा धुडागमो भवति । भवान्त्साये, महान्त्साये; भवान्साये, महान्साये ।
धुटश्चर्त्वस्य चासिद्धत्वात् `नश्छव्यप्रशान्' इति रुत्वं न भवति ।
शि तुक् ।। 8.3.31 ।।
नकारस्य पदान्तस्य शकारे परतो वा तुगागमो भवति । भवाञ्च्छेते ।
पूर्वान्तकरणं छत्वार्थम् । यद्येवम्, कुर्वञ्छेते इत्यत्र नकारस्यापदान्तत्वाण्णत्वं प्राप्नोति ? तत्र समाधिमाहुः---`स्तोः श्चुना श्चुः' इत्यत्र योगविभागः

क्रियते---णत्वप्रतिषेधार्थम् `स्तोः श्चुना' णकारो न भवतीति, ततः `श्चुः' इति ।।

ङमो ह्रस्वादचि ङमुण्नित्यम् ।। 8.3.32 ।।

ह्रस्वात्परो यो ङम् तदन्तात्पदादुत्तरस्याचो ङमुडागमो भवति नित्यम् । ङणनेभ्यो यथासंख्यं ङणना भवन्ति । ङकारान्तान् ङुट्---प्रत्यङ्ङास्ते ।

णकारान्ताण्णुट्---वण्णास्ते । वण्णवोचत् । नकारान्तान्नुट्---कुर्वन्नास्ते, कुर्वन्नवोचत् । कृषन्नास्ते, कृषन्नवोचत् ।

ङम इति किम् ? त्वमास्से । ह्रस्वादिति किम् ? प्राङास्ते । भवानास्ते । अचीति किम् ? प्रत्यङ्करोति ।

इह परमदण्डिनौ, परमदण्डिनेति `उत्तरपदत्वे चापदादिविधौ' इति प्रत्ययलक्षणप्रतिषेधादुत्तरपदस्य पदत्वं नास्तीति ङमुण्न भवति ।

अथ वा---`उञि च पदे' इत्यतः सप्तम्यन्तम् `पदे' इत्यनुवर्त्तते, तेन अजादौ पदे ङमुड् भवति ।।

मय उञो वो वा ।। 8.3.33 ।।

मय उत्तरस्य उवो वा वकारादेशो भवति अचि परतः । शमु अस्तु वेदिः, शम्वस्तु वेदिः । तदु अस्य परेतः, तद्वस्य परेतः । किमु आवपनम्, किम्वावपनम् ।

प्रगृह्यत्वादुञः प्रकृतिभावे प्राप्ते वकारो विधीयते । तस्यासिद्धत्वाद्धलीति `मोऽनुस्वारः' न भवति ।।

विसर्जनीयस्य सः ।। 8.3.34 ।।

`खरि' इत्यनुवर्त्तते । विसर्जनीयस्य सकार आदेशो भवति खरि परतः । वृक्षश्छादयति । प्लक्षश्छादयति । वृक्षष्ठकारः । प्लक्षष्ठकारः । वृक्षस्थकारः । प्लक्षस्थकारः । वृक्षश्चिनोति । प्लक्षश्चिनोति । वृक्षष्टीकते । प्लक्षष्टीकते । वृक्षस्तरति । प्लक्षस्तरति ।।

शर्परे विसर्जनीयः ।। 8.3.35 ।।

शर्परे खरि परतो विसर्जनीयस्य विसर्जनीयादेशो भवति । शशः क्षुरम् । पुरुषः क्षुरम् । अद्भिः प्सातम् । वासः क्षौमम् । पुरुषः त्सरुः । घनाघनः क्षोभणश्चर्षणीनाम् ।

`न' इति वक्तव्ये विसर्जनीयस्य विसर्जनीयादेशविधानं विकारनिवृत्त्यर्थम्; तेन जिह्वामूलीयोपध्मानीयौ न भवतः ।।

वा शरि ।। 8.3.36 ।।

विसर्जनीयस्य विसर्जनीयादेशो वा भवति शरि परे । वृक्षः शेते, वृक्षश्शेते । प्लक्षः शेते, प्लक्षशशतेते । वृक्षः षण्डे, वृक्षष्षण्डे । वृक्षः साये, वृक्षस्साये ।।

* खर्परे शरि वा लोपो वक्तव्यः * । वृक्षा स्थातारः, वृक्षाः स्थातारः, वृक्षास्स्थातारः ।।

कुप्वोः ॱकॱपौ च ।। 8.3.37 ।।

कवर्गपवर्गयोः परतो विसर्जनीयस्य यथासंख्यं ॱकॱप---इत्येतावादेशौ भवतः, चकाराद्विसर्जनीयश्च । वृक्षॱकरोति, वृक्षः करोति । वृक्षॱखनति, वृक्षः खनति । वृक्षॱपचति, वृक्षः पचति, वृक्षॱफलति, वृक्षः फलति ।

कपावुच्चारणार्थौ । जिह्वामूलीयोपध्मानीयावेतावादेशौ ।

`विसर्जनीयस्य सः' इत्येतस्मिन्नाप्राप्ते इदमारभ्यते इत्येतस्य बाधकम् । `शर्परे विसर्जनीयः' इत्येतत्तु न बाध्यते---वासः क्षौमम्, अद्भिः प्सातम्;

`पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य' इति `सर्परे विसर्जनीयः' इत्येतदेव भवति ।

केचित्तु एतदर्थं योगविभागं कुर्वन्ति---`कुप्वोः' शर्परयोः विसर्जनीयस्य विसर्जनीय आदेशो भवति । किमर्थमिदम् ? `ॱकॱपौ च' इति वक्ष्यति, तद्बाधनार्थमिति ।।

सोऽपदादौ ।। 8.3.38 ।।

सकार आदेशो भवति विसर्जनीयस्य कुप्वोरपदाद्योः परतः, पाशकल्पककाम्येषु । `याप्ये पाशप्'---पयस्पाशम् । `ईषदपरिसमाप्तौ कल्पप्'---पयस्कल्पम्, यशस्कल्पम् । `प्रागिवात्कः'---पयस्कम्, यशस्कम् । `काम्यच्च'---पयस्काम्यति । यशस्काम्यति ।

अपदादाविति किम् ? पयॱकामयते । पयॱपिबति ।

* सोऽपदादावित्यनव्ययस्येति वक्तव्यम् * । इह मा भूत्---प्रातः कल्पम् । पुनः कल्पमिति ।

* रोः काम्ये नियमार्थम् * । रोरेव काम्ये, नान्यस्येति नियमार्थं वक्तव्यम् । पयस्काम्यति । यशस्काम्यति । इह मा भूत्---गीः--काम्यति । धूः काम्यति ।

* उपध्मानीयस्य कवर्गे परतः सकार आदेशो भवतीति वक्तव्यम् * । किं प्रयोजनम् ? `उब्जिरुपध्मानीयोपधः पठ्यते' इति दर्शने अभ्युद्गः, समुद्ग इति यथा स्यात् ।।

इणः षः ।। 8.3.39 ।।

`अपदादौ' इति वर्त्तते । इण उत्तरस्य विसर्जनीयस्य षकारादेशो भवति कुप्वोरपादाद्योः परतः, पाशकल्पककाम्येषु । पाश---सर्पिष्पाशम् । यजुष्पाशम् । कल्प---सर्पिष्कल्पम्, यजुष्कल्पम् । क---सर्पिष्कम्, यजुष्कम् । काम्य---सर्पिष्काम्यति, यजुष्काम्यति ।

`अपदादौ' इत्येव---अग्निः करोति, वायुः करोति । अग्निः पचति, वायुः पचति । `कुप्वोः' इत्येव---सर्पिस्ते, यजुस्ते ।

इत उत्तरम् `सः' इति, `इणः षः' इति च वर्तते;तत्र इणः परो यो विसर्जनीयस्तस्य षकारो भवति, अन्यस्य सकारो भवति ।।

नमस्पुरसोर्गत्योः ।। 8.3.40 ।।

नमस्, पुरुस्---इत्येतयोर्गतिसंज्ञकयोर्विसर्जनीयस्य सकारादेशो भवति कुप्वोः परतः । नमस्कर्ता । नमस्कर्तुम् । नमस्कर्तव्यम् ।

गत्योरिति किम् ? पूः, पुरौ, पुरः करोति ।।

इदुदुपधस्य चाप्रत्ययस्य ।। 8.3.41 ।।

इकारोपधस्य, उकारोपधस्य चाप्रत्ययस्य विसर्जनीयस्य षकार आदेशो भवति कुप्वोः परतः । निर्दुर्बहिराविश्चतुर्प्रादुस् । निस्---निष्कृतम्, निष्पीतम् । दुस्---दुष्कृतम्, दुष्पीतम् । बहिस्---बहिष्कृतम्, बहिष्पीतम् । आविस्---आविष्कृतम्, आविष्पीतम् । चतुष्---चतुष्कृतम्, चतुष्कपालम् । चतुष्कण्टकम्, चतुष्कलम् । प्रादुस्---प्रादुष्कृतम्, प्रादुष्पीतम् ।

अप्रत्ययस्येति किम् ? अग्निः करोति, वायुः करोति ।

मातुः करोत, पितुः करोति । अत्र `रात्सस्य' इति सकारलोपे कृते रेफस्य यो विसर्जनीयः, तस्याप्रत्ययविसर्जनीयत्वात् षत्वं प्राप्नोति ? कस्कादिषु तु भ्रातुष्पुत्रग्रहणं ज्ञापकम्---एकादेशनिमित्तत्वात् षत्वप्रतिषेधस्य ।

* पुम्मुहुसोः प्रतिषेधो वक्तव्यः * । पुंस्कामा । मुहुःस्कामा । नैष्कुल्यम्, दौष्पुरुष्यम् । नि3ष्कुलम्, दु3ष्कुलम् । दु3ष्पुरुषः ।
बहिरङ्गलक्षणयोर्वृद्धिप्लुतयोरसिद्धत्वात् षत्वं प्रवर्त्तते ।।

तिरसोऽन्यतरस्यात् ।। 8.3.42 ।।

तिरसो विसर्जनीयस्यान्यतरस्यां सकारादेशो भवति कुप्वोः परतः । तिरस्कर्ता । तिरस्कर्तव्यम् । तिरः कर्ता । तिरः कर्तुम् । तिरः कर्तव्यम् ।

`गतेः' इत्येव---तिरः कृत्वा काण्डं गतः ।।

द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ।। 8.3.43 ।।

`षः' इति सम्बद्ध्यते । द्विस, त्रिस्, चतुर्---इत्येतेषां कृत्वोऽर्थे वर्त्तमानानां विसर्जनीयस्य षकार आदेशो भवति अन्यतरस्यां कुप्वोः परतः । द्विष्करोति, द्विः करोति । त्रिष्करोति, त्रिः करोति । चतुष्करोति, चतुः करोति । द्विष्पचति, द्विः पचति । त्रिष्पचति, त्रिः---पचति । चतुष्पचति, चतुः पचति ।

कृत्वोऽर्थ इति किम् ? चतुष्कपालम्, चतुष्कण्टकम् । पूर्वेण नित्यं षत्वं भवति ।

`इदुदुपधस्य'---इत्यस्यानुवृत्तौ सत्यां कृत्वोऽर्थविषयेण च पदेन विसर्जनीये विशेष्यमाणे `द्विस्त्रिश्चतुरिति' शक्यमकर्त्तुम् ।

कृत्वसुजर्थे षत्वं ब्रवीति कस्माच्चतुष्कपाले मा ।
षत्वं विभाषया भून्ननु सिद्धं तत्र पूर्वेण ।।
सिद्धे ह्ययं विधत्ते चतुरः षत्वं यदापि कृत्वोऽर्थे ।
लुप्ते कृत्वोऽर्थीये रेफस्य विसर्जनीयो हि ।।
एवं सति त्विदानीं द्विस्त्रिश्चतुरित्यनेन किं कार्यम् ।
अन्यो हि नेदुदुपधः कृत्वोऽर्थः कश्चिदप्यस्ति ।।
अक्रियमाणे ग्रहणे विसर्जनीयस्तदा विशेष्येत ।
चतुरो न सिध्यति तथा रेफस्य विसर्जनीयो हि ।।
तस्मिंस्तु क्रियमाणे युक्तं चतुरो विशेषणं भवति ।
प्रकृतं पदं तदन्तं तस्यापि विशेषणं न्याय्यम् ।।

एवं तु क्रियमाणे द्विस्त्रिश्चतुर्ग्रहणे चतुः शब्दस्य कृत्वोऽर्थेऽपि वर्तमानस्य पूर्वेणैव नित्यं षत्वं स्यात् । पूर्वत्रासिद्धे नास्ति प्रतिषेधः; अभावादुत्तरस्य ।।

`षः' इति सम्बद्ध्यते । इस्, उस्---इत्येतयोर्विसर्जनीयस्यान्यतरस्यां षकारादेशो भवति सामर्थ्ये कुप्वोः परतः । सर्पिष्करोति, सर्पिः करोति । यजुष्करोति, यजुः करोति ।

सामर्थ्य इति किम् ? तिष्ठतु सर्पिः पिब त्वमुदकम् ।

सामर्थ्यमिह व्यपेक्षा; न पुनरेकार्थीभावः, उभयं वा ।।

नित्यं समासेऽनुत्तरपदस्थस्य ।। 8.3.45 ।।

`इसुसोः' इति वर्तते । समासविषये इसुसोर्विसर्जनीयस्यानुत्तरपदस्थस्य नित्यं षत्वं भवति कुप्वोः परतः । सर्पिष्कुण्डिका । धनुष्कपालम् । सर्पिष्पानम् । धनुष्फलम् ।

अनुत्तरपदस्थस्येति किम् ? परमसर्पिः कुण्डिका । परमधनुः---कपालम् । पूर्वसूत्रेण विकल्पोऽप्यत्र न भवति ।

एतदेव `अनुत्तपदस्थस्य' इति वचनं ज्ञापकम्---इसुसोः `प्रत्ययग्रहणे यस्मात्स विहितस्तदादेः' इत्ययं नियमो न भवति । तेन वाक्येऽपि---
परमसर्पिष्करोति, परमसर्पिः करोति `इसुसोः सामर्थ्ये' इत्येतद् भवति । व्यपेक्षा च तत्र सामर्थ्यमाश्रितमिति समासे न भवति ।।

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ।। 8.3.46 ।।

आकारादुत्तरस्य अनव्ययविसर्जनीयस्य समासेऽनुत्तरपदस्थस्य नित्यं सकारादेशो भवति कृ, कमि, कंस, कुम्भ, पात्र, कुशा, कर्णी---इत्येतेषु परतः । कृ---अयस्कारः । पयस्कारः । कमि---अयस्कामः । पयस्कामः । कंस---अयस्कंसः । पयस्कंसः । कुम्भ---अयस्कुम्भः । पयस्कुम्भः । अयस्कुम्भी,

पयस्कुम्भीत्यत्रापि भवति; `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' इति ।

पात्र---अयस्पात्रम् । पयस्पात्रम् । अयस्पात्री । पयस्पात्री । कुशा---अयस्कुशा । पयस्कुशा । कर्णी---अयस्कर्णी । पयस्कर्णी ।
शुनस्कर्ण इत्ययं तु कस्कादिषु द्रष्टव्यः ।

अत इति किम् ? गीः कारः । दूः कारः । तपरकरणं किम् ? भाः करणम् । भास्कर इत्ययं तु कस्कादिषु द्रष्टव्यः ।

अनव्ययस्येति किम् ? श्वः कारः । पुनः कारः ।

`समासे' इत्येव---यशः करोति । यशः कामयते ।

`अनुत्तरपदस्थस्य' इत्येव---परमपयः कारः । परमपयः कामः ।।

अधः शिरसी पदे ।। 8.3.47 ।।

अधस्, शिरस्---इत्येतयोर्विसर्जनीयस्य समासेऽनुत्तरपदस्थस्य सकार आदेशो भवति पदशब्दे परतः । अधस्पदम् । शिरस्पदम् । अधस्पदी । शिरस्पदी ।
`समासे' इत्येव---अधः पदम् ।

`अनुत्तरपदस्थस्य' इत्येव---परमशिरः पदम् ।
अधस्पदमिति मयूरव्यंसकादित्वात् समासः ।।

कस्कादिषु च ।। 8.3.48 ।।

`कस्क'---इत्येवमादिषु च विसर्जनीयस्य सकारः, षकारो वा यथायोगमादेशो भवति कुप्वोः परतः । कस्कः । कौतस्कुतः । कुत आगतः---इत्यण् ।

भ्रातुष्पुत्रः शुनस्कर्णः । सद्यस्कालः । सद्यस्क्रीः । क्रीणातेरयं सम्पदादित्वात् क्विप्प्रत्ययः, तत्र भवः क्रतुः---साद्यस्कः । कांस्कान्---`कानाम्रेडिते' इति रुत्वमत्र ।

सर्पिष्कुण्डिका, धनुष्कपालम्, बर्हिष्पूलम्, यजुष्पात्रमित्येषां पाठः---उत्तरपदस्थस्यापि षत्वं यथा स्यादिति । परमसर्पिः फलमित्येवमादिप्रत्युदाहरणादिति पारायणिका आहुः ।

भाष्ये, वृत्तौ च`नित्यं समासेऽनुत्तरपदस्थस्य' इत्यत्र परमसर्पिः--कुण्डिकेत्येतदेव प्रत्युदाहरणम् । अयस्काण्डः । मेदस्पिण्डः । अविहित लक्षण उपचारः कस्कादिषु द्रष्टव्यः ।।

छन्दसि वाऽप्राम्रेडितयोः ।। 8.3.49 ।।

छन्दसि विषये विसर्जनीयस्य वा सकारादेशो भवति कुप्वोः परतः, प्रशब्दमाम्रेडितं वर्जयित्वा । अयः पात्रम्, अयस्पात्रम् । विश्वतः पात्रम्, विश्वतस्पात्रम् ।
उरणः कारः, उरुणस्कारः ।

अप्राम्रेडितयोरिति किम् ? अग्निः प्रविद्वान् । परुषः परुषः परि ।

सूर्यरश्मिहरिकेशः पुरस्तात्, स नः पावकः---इत्येवमादिषु `सर्वे विधयश्चन्दसि विकल्प्यन्ते' इति सत्वं न भवति ।।

कः करत्करतिकृधिकृतेष्वनदितेः ।। 8.3.50 ।।

कः, करत्, करति, कृधिष कृत---इत्येतेषु परतः अनदितेर्विसर्जनीयस्य सकारादेशो भवति छन्दसि विषये । कः---विश्वतस्कः । करत्---विश्वतस्करत् ।
करति---पयस्करति । कृधि---उरुणस्कृधि । कृत---सदस्कृतम् ।

अनदितेरिति किम् ? यथा नो अदितिः करत् ।।

पञ्चम्याः परावध्यर्थे ।। 8.3.51 ।।

`छन्दसि' इत्येव । पञ्चमीविसर्जनीयस्य सकारादेशो भवति परौ परतः अध्यर्थे । दिवस्परि प्रथमं जज्ञे । अग्निर्हिमवतस्परि । दिवस्परि । महस्परि ।

पञ्चम्या इति किम् ? अहिरिव भोगैः पर्येति बाहुम् । पराविति किम् ? एभ्यो वा एतल्लोकेभ्यः प्रजापतिः समैरयत् ।

अध्यर्थ इति किम् ? दिवः पृथिव्याः पर्योज उद्भृतम् ।

अत्र परिः सर्वतोभावे, अध्यर्थः उपरिभावः ।।

पातौ च बहुलम् ।। 8.3.52 ।।
पातौ च धातौ परतः पञ्चमीविस्रजनीयस्य बहुलं सकार आदेशो भवति छन्दसि विषये । दिवस्पातु । राज्ञस्पातु ।

न च भवति---परिषदः पातु ।।

षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ।। 8.3.53 ।।

षष्ठीविसर्जनीयस्य सकारादेशो भवति पति, पुत्र, पृष्ठ, पार, पद, पयस्, पोष---इत्येतेषु परतः छन्दसि विषये । वाचस्पतिं विश्वकर्माणमृतये । पुत्र---
दिवस्पुत्राय सूर्याय । पृष्ठ---दिवस्पृष्ठे धावमानं सुपर्णम् । पार---अगन्म तमसस्पारम् । पद---इडस्पदे समिध्यसे । पयस्--सूर्यं चक्षुर्दिवस्पयः । पोष---
रायस्पोषं यजमानेषु धत्तम् ।

षष्ठ्या इति किम् ? मनुः पुत्रेभ्यो दायं व्यभजत् ।।

इडाया वा ।। 8.3.54 ।।

इडायाः षष्ठीविसर्जनीयस्य वा सकार आदेशो भवति पत्यादिषु परतश्चन्दसि विषये । इडायास्पतिः, इडायाः पतिः । इडायास्पुत्रः, इडायाः पुत्रः । इडायास्पृष्ठम्, इडायाः पृष्ठम् । इडायास्पारम्, इडायाः पारम् । इडायास्पदम्, इडायाः पदम् । इडायास्पयः, इडायाः पयः । इडायास्पोषम्, इडायाः पोषम् ।।

अपदान्तस्य मूर्धन्यः ।। 8.3.55 ।।

पदाधिकारो निवृत्तः । `अपदान्तस्य' इति, `मूर्धन्यः' इति चैतदधिकृतं वेदितव्यमापादपरिसमाप्तेः । वक्ष्यति---```आदेशप्रत्यययोः' । सिषेव । सुष्वाप । अग्निषु । वायुषु । अपदान्तस्येति किम् ? अग्निस्तत्र, वायुस्तत्र ।"

`ष' इत्येवं सिद्धे मूर्धन्यग्रहणं ढकारार्थम्---अकृढ्वम्, चकृढ्वे ।।

सहः साडः सः ।। 8.3.56 ।।

सहेर्धातोः साड्रूपस्य यः सकारस्तस्य मूर्धन्य आदेशो भवति । जलाषाट् । तुराषाट् । पृतनाषाट् ।

सहेरिति किम् ? सह डेन वर्तते सडः, तस्यापत्यं साडिः ।

साड्ग्रहणं किम् ? यत्रास्यैतद्रूपं तत्र यथा स्यात्, इह मा भूत्---जलासाहम् । तुरासाहम् ।

स इति किम् ? आकारस्य मा भूत् ।।

इण्कोः ।। 8.3.57 ।।

`इण्कोः' इत्येतदधिकृतं वेदितव्यम् । इत उत्तरं यद्वक्ष्यामः, इणः कवर्गाच्चेत्येवं तद्वेदितव्यम् । वक्ष्यति---```आदेशप्रत्यययोः' । सिषेव । सुष्वाप । अग्निषु । वायुषु । कर्तृषु । गीर्षु । धुर्षु । वाक्षु । त्वक्षु । इण्कोरिति किम् ? दास्यति । असौ ।।"

नुम्विसर्जनीयशर्व्यवायेऽपि ।। 8.3.58 ।।

नुम्व्यवायेऽपि, विसर्जनीयव्यवायेऽपि, शर्व्यवायेऽपि इण्कोरुत्तरस्य सकारस्य मूर्धन्यादेशो भवति । व्यवायशब्दः प्रतेयकमभिसम्बद्ध्यते । नुम्व्यवाये तावत्---सर्पींषि, यजूंषि, हवींषि । विसर्जनीयव्यवाये---सर्पिःषु, यजुःषु, हविःषु । शर्व्यवाये---सर्पिष्षु, यजुष्षु, इविष्षु ।

नुमादिभिः प्रत्येकं व्यवाये षत्वमिष्यते, न समस्तैः । तेनेह न भवति---निंस्से, निसस्व इति । `णिसि चुम्बने'---इत्येतस्यैतद्रूपम् । अत्र हि नुमा, सकारेण, शरा च व्यवधानम् ।।

आदेशप्रत्ययोः ।। 8.3.59 ।।

`मूर्धन्यः' इति वर्तते, `स' इति च । `आदेशप्रत्ययोः' इति षष्ठी भेदेन सम्बद्ध्यते । आदेशो यः सकारः, प्रत्ययस्य च यः सकारः इण्कोरुत्तरः, तस्य मूर्धन्यो भवति आदेशः । आदेशस्य तावत्---सिषेव । सुष्वाप । प्रत्ययस्य---अग्निषु । वायुषु । कर्तृषु । हर्तृषु ।

इन्द्रो मा वक्षत्, स देवान्यक्षदिति व्यपदेशिवद्भावात् प्रत्ययस्येति षत्वं भवति । यजतेः, वहतेश्च पञ्चमलकारे परस्मैपदप्रथमैकवचने इकारलोपः, `लेटोऽडाटौ' इत्यट्, `सिब्बहुलं लेटि' इति सिप्, ततः सिद्धम्---यक्षत्, वक्षत्, इति ।।

शासिवसिघसीनां च ।। 8.3.60 ।।

शासि, वसि, घसि---इत्येतेषां च इण्कोरुत्तरस्य सकारस्य मूर्धन्यो भवति । अन्वशिषत्, अन्वशिषताम्, अन्वशिषन् । शिष्टः, शिष्टवान् । वसि---उषितः, उषितवान् । उषित्वा । घसि---जक्षतुः, जक्षुः । `घसिभसोर्ह्र' इत्युपधालोपः । अक्षन्नमीमदन्त पितरः ।

अनादेशार्थं वचनम् । घसिर्यद्यप्यादेशः, सकारस्त्वादेशो न भवति ।

`इण्कोः' इत्येव---शास्ति । वसति । जघास ।।

स्तौतिण्योरेव षण्यभ्यासात् ।। 8.3.61 ।।

स्तौतेर्ण्यन्तानां च षभूते सनि परतः अभ्यासादिण उत्तरस्य आदेशसकारस्य मूर्धन्यादेशो भवति । तुष्टूषति । ण्यन्तानाम्---सिषेवयिषति । सिषञ्जयिषति । सुष्वापयिषति ।

सिद्धे सत्यारम्भो नियमार्थः---स्तोतिण्योरेव षण्यभ्यासाद्यथा स्यात्, अन्यस्य मा भूत्---सिसिक्षति । सुसूषति ।

एवकारकरणमिष्टतोऽवधारणार्थम् । स्तौतिण्योः षण्येव---इति हि विज्ञायमाने तुष्टावेत्यत्र न स्यात् । इह च स्यादेव---सिसिक्षतीति ।

षणीति किम् ? अन्यत्र नियमो मा भूत्---सिषेच ।

को विनतेऽनुरोधः ? अविनते नियमो मा भूत्---सुषुप्सति । तिष्ठासति ।

कः सानुबन्धेऽनुरोधः ? षशब्दमात्रे नियमो मा भूत्---सुषुपिष इन्द्रम् ।

अभ्यासादिति किम् ? अभ्यासाद् या प्राप्तिस्तस्या नियमो यथा स्यात्, धातोर्या प्राप्तिस्तस्या नियमो मा भूत्---प्रतीषिषति । अधीषिषति ।।

स स्विदिस्वदिसहीनां च ।। 8.3.62 ।।

स्विदि, स्वदि, सहि---इत्येतेषां ण्यन्तानां सनि षभूते परतोऽभ्यासादुत्तरस्य सकारस्य सकारादेशो भवति । स्विदि---सिस्वेदयिषति । स्वदि---

सिस्वादयिषति । सहि---सिसाहयिषति ।
सकारस्य सकारवचनं मूर्धन्यनिवृत्त्यर्थम् ।।
प्राक्सितादड्व्यवायेऽपि ।। 8.3.63 ।।
`सेवसित' इति वक्ष्यति । प्राक्सितसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामस्तत्राड्व्यवायेऽपि मूर्धन्यो भवतीत्येवं तद्वेदितव्यम्, अपिशब्दादनड्व्यवायेऽपि । वक्ष्यति---```उपसर्गात्सुनोतिसुवति' इति षत्वम् । अभिषुणोति । परिषुणोति । विषुणोति । निषुणोति । अभ्यषुणोत् । अर्यषुणोत् । व्यषुणोत् । न्यषुणोत्" ।।
स्थादिष्वभ्यासेन चाभ्यासस्य ।। 8.3.64 ।।
`प्राक् सितात्' इति वर्तते । `उपसर्गात्सुनोति' इत्यत्र `स्थासेनयसेध' इति स्थादयः, तेषु स्थादिषु प्राक् सितसंशब्दनाद् अभ्यासेन व्यवाये मूर्धन्यो भवति, अभ्याससकारस्य च भवतीत्येवं वेदितव्यम् । अभ्यासेन व्यवाये---परितष्ठौ ।
अषोपदेशार्थं च---अभिषिषेणयिषति, परषिषेणयिषति ।
अवर्णान्ताभ्यासार्थं च---अभितष्ठौ ।
षणि प्रतिषेधार्थं च---अभिषिषिक्षति, परिषिषिक्षति ।
`अभ्यासस्य' इति वचनं नियमार्थम्---स्थादिष्वेवाभ्याससकारस्य मूर्धन्यो भवति, नान्यत्र । अभिसुसूषति, अभिसिषासति ।।
उपसर्गात् सुनोतिसुवतिस्यतिस्यौतिस्तोभतिस्थासेनयसेधसिचसन्जस्वन्जाम् ।। 8.3.65 ।।
`मूर्धन्यः' इति वर्तते, `स' इति च । उपसर्गस्थान्निमित्तादुत्तरस्य सुनोति, सुवति, स्यति, स्तौति, स्तोभति, स्था, सेनय, सेध, सिच, सन्ज, स्वन्ज---इत्येतेषां सकारस्य मूर्धन्यादेशो भवति ।
सुनोति---अभिषुणोति, परिषुणोति । अभ्यषुणोत्, पर्यषुणोत् ।
सुवति---अभिषुवति, परिषुवति । अभ्यषुवत्, पर्यषुवत् ।
स्यति---अभिष्यति, परिष्यति । अभ्यष्यत्, पर्यष्यत् ।
स्तौति---अभिष्टौति, परिष्टौति । अभ्यष्टौत्, पर्यष्टौत् ।
स्तोभति---अभिष्टोभते, परिष्टोभते । अभ्यष्टोभत, पर्यष्टोभत ।
स्था---अभिष्ठास्यति, परिष्ठास्यति । अभ्यष्ठात्, पर्यष्ठात् । अभितष्ठौ, परितष्ठौ ।
सेनय---अभिषेणयति, परिषेणयति । अभ्यषेणयत्, पर्यषेणयत् । अभिषिषेणयिषति, परिषिषेणयिषति ।
सेध---अभिषेधति परिषेधति । अभ्यषेधत्, पर्यषेधत् ।
सिच---अभिषिञ्चति, परिषिञ्चति । अभ्यषिञ्चत्, पर्यषिञ्चत् । अभिषिषिक्षति, परिषिषिक्षति ।
सन्ज---अभिषजति, परिषजति । अभ्यषजत्, पर्यषजत् । अभिषिषङ्क्षति, परिरङ्क्षति ।
स्वन्ज---अभिष्वजते, परिष्वजते । अभ्यष्वजत, पर्यष्वजत । अभिषिष्वङ्क्षते, परिषिष्वङ्क्षते ।
`सेध' इति शब्विकरणनिर्देशः सिध्यतिनिवृत्त्यर्थः ।
उपसर्गादिति किम् ? दधि सिञ्चति । मधु सिञ्चति ।
निर्गताः सेचका अस्माद् देशान्निः सेचको देश इति नायं सिचेरुपसर्गः । अभिसावकीयतीत्यत्रापि न सुनोर्तिं प्रति क्रियायोगः, किं तर्हि ? सावकीयं प्रति । अभिषावयतीत्यत्र तु सुनोतिमेव प्रति क्रियायोगः, न सावयतिमिति षत्वं भवति ।।
सदिरप्रतेः ।। 8.3.66 ।।
सदेः सकारस्य उपसर्गस्थान्निमित्तादप्रतेरुत्तरस्य मूर्धन्य आदेशो भवति । निषीदति, विषीदति । न्यषीदत्, व्यषीदत् । निषसाद, वेषसाद ।
अप्रतेरिति किम् ? प्रतिसीदति ।।
स्तन्भेः ।। 8.3.67 ।।
`उपसर्गात्' इति वर्तते । स्तन्भेः सकारस्य उपसर्गस्थान्निमित्तादुत्तरस्य मूर्धन्य आदेशो भवति । अभिष्टभ्नाति, परिष्टभ्नाति । अभ्यष्टभ्नात्, पर्यष्टभ्नात् । अभितष्टम्भ, परितष्टम्भ ।
`अप्रतेः' इत्येतदिह नानुवर्तते, तेनैतदपि भवति---प्रतिष्टभ्नाति, प्रत्यष्टभ्नात्, प्रतितष्टम्भ ।।
अवाच्चालम्बनाविदूर्ययोः ।। 8.3.68 ।।
अवशब्दादुपसर्गादुत्तरस्य स्तन्भेः सकारस्य मूर्धन्यादेशो भवति । आलम्बनेऽर्थे, आविदूर्ये च । आलम्बनम्=आश्रयणम् । अविदूरस्य भाव आविदूर्यम् ।
आलम्बने तावत्--अवष्टभ्यास्ते । अवष्टभ्य तिष्ठति । आविदूर्ये---अवष्टब्धा सेना । अवष्टब्धा शरत् ।
आलम्बनाविदूर्ययोरिति किम् ? अवस्तब्धो वृषलः शीतेन । अनिगर्थ आरम्भः ।।

वेश्च स्वनो भोजने ।। 8.3.69 ।।
वेरुपसर्गादवाच्चोत्तरस्य भोजनार्थे स्वनतेः सकारस्य मूर्धन्यादेशो भवति । विष्वणति, व्यष्वणत्, विषष्वाण । अवष्वणति, अवाष्वणत्, अवषष्वाण ।
अभ्यवहारक्रियाविशेषोऽभिधीयते, यत्र स्वननमस्ति ।
भोजन इति किम् ? विस्वनति मृदङ्गः ।।
परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वन्जाम् ।। 8.3.70 ।।
परि, नि, वि---इत्येतेभ्य उपसर्गेभ्य उत्तरेषां सेव, सित, सय, सिवु, सह, सुट्, स्तु, स्वन्ज---इत्येतेषआं सकारस्य पूर्धन्य आदेशो भवति । परिषवते, निषेवते, विषेवते । पर्यषेवत, न्यषेवत, व्यषेवत । परिषिषेविषते, विषिषेविषते, निषिषेविषिते ।
सित---परिषितः, विषितः, निषितः । सय---परिषयः, निषयः, विषयः ।
सिव्---परिषीव्यति, निषीव्यति, विषीव्यति । पर्यषीव्यत्, न्यषीव्यत्, व्यषीव्यत् । पर्यसीव्यत्, न्यसीव्यत्, व्यसीव्यत् ।
सह---परिषहते, निषहते, विषहते । पर्यषहत, न्यषहत, व्यषहत ।
सुट्---परिष्करोति । पर्यष्करोत् ।
स्तु---परिष्टौति, निष्टौति, विष्टौति । पर्यष्टौत्, न्यष्टौत्, व्यष्टौत् । पर्यस्तौत्, न्यस्तौत्, व्यस्तौत् ।
ष्वञ्ज---`दन्शसन्जस्वन्जाम्' इति नलोपः । परिष्वजते, विष्वजते, निष्वजते । पर्यष्वजत, पर्यस्वजत ।
पूर्वेणैव सिद्धे स्तुस्वन्जिग्रहणमुत्तरार्थम्, अड्व्यवाये विभाषा यथा स्यात् ।।
सिवादीनां वाड्व्यवायेऽपि ।। 8.3.71 ।।
अनन्तरसूत्रे `सिवुसहसुट्स्तुस्वञ्जाम्' इति सिवादयः । सिवादीनामड्व्यवायेऽपि परिनिविभ्य उत्तरस्य सकारस्य वा मूर्धन्यो भवति । तथा चैवोदाहृतम् ।।
अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ।। 8.3.72 ।।
अनु, वि, परि, अभि, नि--इत्येतेभ्य उत्तरस्य स्यन्दतेरप्राणिषु सकारस्य वा मूर्धन्यादेशो भवति । अनुष्यन्दते, विष्यन्दते, परिष्यन्दते, अभिष्यन्दते तैलम्, निष्यन्दते । अनुस्यन्दते, विस्यन्दते, परिस्यन्दते, अभिस्यन्दते, निस्यन्दते ।
अप्राणिष्विति किम् ? अनुस्यन्दते मत्स्य उदके । प्राण्यप्राणि विषयस्यापि स्यन्दतेरयं विकल्पो भवति---अनुष्यन्देते मत्स्योदके, अनुस्यन्देते ।
`अप्राणिषु' इति पर्युदासोऽयम्, न प्रसज्यप्रतिषेधः ।।
वेः स्कन्देरनिष्ठायाम् ।। 8.3.73 ।।
वेरुपसर्गादुत्तरस्य स्कन्देः सकारस्य मूर्धन्यो वा भवति अनिष्ठायाम् । विष्कन्ता, विस्कन्ता । विष्कन्तुम्, विस्कन्तुम् । विष्कन्तव्यम्, विस्कन्तव्यम् ।
अनिष्ठायामिति किम् ? विस्कन्नः ।।
परेश्च ।। 8.3.74 ।।
परिशब्दाच्चोत्तरस्य स्कन्देः सकारस्य वा मूर्धन्यो भवति । परिष्कन्ता, परिष्कन्तुम्, परिष्कन्तव्यम् । परिस्कन्ता, परिस्कन्तुम्, परिस्कन्तव्यम् ।
पृथग्योगकरणसामर्थ्यात् `अनिष्ठायाम्' इत्येतन्नानुवर्तते---परिष्कण्णः, परिस्कन्नः ।।
परिस्कन्दः प्राच्यभरतेषु ।। 8.3.75 ।।
`परिस्कन्द' इति मूर्धन्याभावो निपात्यते प्राच्यभरतेषु प्रयोगविषयेषु । पूर्वेण मूर्धन्ये प्राप्ते तदभावो निपात्यते । परिस्कन्दः । अन्यत्र परिष्कन्दः । अचि निपातनम् । अथ वा---निष्ठातकारस्यः लोपः ।
भरतग्रहणं प्राच्यविशेषणम् ।।
स्फुरतिस्फुलत्योर्निर्निविभ्यः ।। 8.3.76 ।।
स्फुरतिस्फुलत्योः सकारस्य निस्, नि, वि---इत्येतेभ्य उत्तरस्य वा मूर्धत्यादेशो भवति । स्फुरति---निष्ष्फुरति, निस्स्फुरति, निष्फुरति, निस्फुरति । विष्फुरति, विष्फुरति । स्फुलति---निष्ष्फुलति, निस्स्फुलति । निस्फुलति, निस्फुलति । विष्फुलति, विस्फुलति ।।
वेः स्कभ्नातेर्नित्यम् ।। 8.3.77 ।।
वेरुत्तरस्य स्कभ्नातेः सकारस्य नित्यं मूर्धन्यादेशो भवति । विष्कभ्नाति । विष्कम्भिता । विस्कम्भितुम् । विस्कम्भितव्यम् ।।
इणः षीध्वंलुङ्लिटां धोऽङ्गात् ।। 8.3.78 ।।
`मूर्धन्य' इति वर्तते । इणन्तादङ्गादुत्तरेषां षीध्वंलुङ्लिटां यो धकारस्तस्य मूर्धन्यादेशो भवति । च्योषीढ्वम् । प्लोषीढ्वम् । लुङ्अच्योढ्वम् । अप्लोढ्वम् । लिट्---चकृढ्वे, ववृढ्वे ।
`इण्कोः' इति वर्तमाने पुनरिण्ग्रहणं कवर्गनिवृत्त्यर्थम् । पक्षीध्वम् । यक्षीध्वम् ।
षीध्वंलुङ् लिटामिति किम् ? स्तुध्वे । अस्तुध्वम् । अङ्गादिति किम् ? परिवेविषीध्वम् ।
अर्थवद्ग्रहणादपि सिद्धम् ? तत्तु नाश्रितम् ।।

विभाषेटः ।। 8.3.79 ।।

इणः परस्मादिट उत्तरेषां षीध्वंलुङ्लिटां यो धकारस्तस्य मूर्धन्यादेशो भवति विभाषा । लविषीढ्वम्, लविषीध्वम् । पविषीढ्वम्, पविषीध्वम् । लुङ्---अलविढ्वम्, अलविध्वम् । लिट्---लुलुविध्वे, लुलुविढ्वे ।

इण इत्येव---आसिषीध्वम् ।

अथेह कथं भवितव्यम्---उपदिदीयिध्वे ? केचिदाहु---इणन्ताङ्गादुत्तरस्य इट आनन्तर्यं युटा व्यवहितमिति न भवितव्यं ढत्वेनेति । अपरेषां दर्शनम्---```अङ्गात्' इति निवृत्तम्, `इणः' इत्यनुवर्त्तते, ततश्च यकारादेव इणः परोऽनन्तर इडिति पक्षे भवितव्यं मूर्धन्येन" इति ।।

समासेऽङ्गुलेः सङ्गः ।। 8.3.80 ।।

सङ्गसकारस्याङ्गुलेरुत्तरस्य मूर्धन्य आदेशो भवति समासे । अङ्गुलेः सङ्गः अङ्गुलिषङ्गः । अङ्गुलिषङ्गा यवागूः । अङ्गुलिषङ्गो गाः सादयति । समास इति किम् ? अङ्गुलेः सङ्गं पश्य ।।

भीरोः स्थानम् ।। 8.3.81 ।।

स्थानसकारस्य भीरोरुत्तरस्य मूर्धन्यादेशो भवति । भीरुष्ठानम् । समास इत्येव---भीरोः स्थानं पश्य ।।

अग्नेः स्तुत्स्तोमसोमाः ।। 8.3.82 ।।

अग्नेरुत्तरस्य स्तुत्, स्तोम, सोम---इत्येतेषां सकारस्य मूर्धन्यादेशो भवति समासे । अग्निष्टुत् । अग्निष्टोमः । अगनीषोमः ।

अग्नेर्दीर्घात्सोमस्येष्यते । तेनेह न भवति---अग्निसोमौ माणवकौ । तथा च ज्योतिः=अग्निः, सोमः=लताविशेषः---अग्निसोमौ तिष्ठतः ।

समा इत्येव---अग्ने सोमः ।।

ज्योतिरायुषः स्तोमः ।। 8.3.83 ।।

ज्योतिस्, आयुस्---इत्येताभ्यामुत्तरस्य स्तोमसकारस्य मूर्धन्यादेशो भवति समासे । ज्योतिष्टोमः । आयुष्टोमः ।

`समासे' इत्येव---ज्योतिः स्तोमं दर्शयति ।

मातृपितृभ्यां स्वसा ।। 8.3.84 ।।

मातृ, पितृ---इत्येताभ्यामुत्तरस्य स्वसृसकारस्य समासे मूर्धन्यादेशो भवति । मातृष्वसा । पितृष्वसा ।

मातुः पितुर्भ्यामन्यतरस्याम् ।। 8.3.85 ।।

मातुर्, पितुर्---इत्येताभ्यामुत्तरस्य स्वसृशब्दस्यान्यतरस्यां मूर्धन्यादेशो भवति समासे । मातुः ष्वसा, मातुः स्वस्वा । पितुः ष्वसा, पितुः स्वसा ।
मातुः पितुरिति रेफान्तयोरेतद्ग्रहणम् । एकदेशविकृतस्यानन्यत्वाद् विसर्जनीयान्तात् सकारान्ताच्च षत्वं भवति ।

समास इत्येव---वाक्ये मा भूत्; मातुः स्वसेत्येव नित्यं भवति ।।

अभिनिसः स्तनः शब्दसंज्ञायाम् ।। 8.3.86 ।।

अभि, निस्--इत्येतस्मादुत्तरस्य स्तनतिसकारस्य मूर्धन्यादेशो भवति अन्यतरस्यां शब्दसंज्ञायां गम्यमानायाम् । अभिनिष्टानो वर्णः । अभिनिष्टानो विसर्जनीयः । अभिनिस्तानो वर्णः । अभिनिस्तानो विसर्जनीयः ।

शब्दसंज्ञायामिति किम् ? अभिनिस्तनति मृदङ्गः ।

`समासे' इति अतः प्रभृति निवृत्तम् ।।

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ।। 8.3.87 ।।

उपसर्गस्थान्निमित्तात्प्रादुस्शब्दाच्चोतरस्य यकारपरस्याच्परस्य चास्तिसकारस्य मूर्धन्यो भवति । अभिषन्ति, निषन्ति, विषन्ति, प्रादुः षन्ति । अभिष्यात्, निष्यात्, विष्यात्, प्रादुः ष्यात् ।

उपसर्गादिति किम् ? दधि स्यात् । मधु स्यात् ।

अस्तीति किम् ? अनुसृतम् । विसृतम् ।

अथासत्यपि अस्तिग्रहणे सकारमेव प्रति उपसर्ग आश्रीयते, प्रादुः शब्दस्य च कृभ्वस्तिष्वेव प्रयोग इत्यन्यत्राप्रसङ्गः ? तथाप्येतत् प्रत्युदाहर्तव्यम्---अनुसूते अनुसूः, अनुस्वोऽपत्यम् अनुसेयः । शुभ्रादित्वाड् ढक्, `ढे लोपेऽकद्रवा' इत्युवर्णलोपः ।

यच्पर इति किम् ? निस्तः । विस्तः । प्रादुस्तः ।।

सुविनिर्दुर्भ्यः सुपिसूतिसमाः ।। 8.3.88 ।।

सु, वि, निर्, दुर्--इत्येतेभ्य उत्तरस्य सुपि, सूति, सम---इत्येतेषां सकारस्य मूर्धन्यादेशो भवति । `सुपि' इति स्वपिः कृतसम्प्रसारणो गृह्यते । सुषुप्तः । निः षुप्तः । दुःषुप्तः ।

`सूति' इति स्वरूपग्रहणम् । सुषूतिः । विषूतिः । निः षूतिः । दुः षूतिः ।

सम---सुषमम्, विषमम्, निः षमम्, दुः समम् ।

सुपेः षत्वं स्वपेर्मा भूद्विसुष्वापेति केन न ।
हलादिशेषान्न सुपिरिष्टं पूर्वं प्रसारणम् ।।
स्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः ।
अनर्थके विषुषुपुः सुपिभूतो द्विरुच्यते ।।
`पूर्वत्रासिद्धीयमद्विर्वचने' इति कृते षत्वे ततो द्विर्वचनम् ।।

निनदीभ्यां स्नातेः कौशले ।। 8.3.89 ।।

नि, नदी---इत्येताभ्यामुत्तरस्य स्नातिसकारस्य मूर्धन्यादेशो भवति कौश्ले गम्यमाने । निष्णातः कटकरणे । निष्णातो रज्जुवर्तने । नद्यां स्नातोति नदीष्णः । `सुपि स्थः' इत्यत्र `सुपि' इति योगविभागात्कप्रत्ययः ।

कौशल इति किम् ? निस्नातः । नद्यां स्नातो नदीस्नात इति ।।

सूत्रं प्रतिष्णातम् ।। 8.3.90 ।।

`प्रतिष्णातम्' इति निपात्यते सूत्रं चेद्भवति । प्रतिष्णातं सूत्रम् । शुद्धमित्यर्थः । प्रतिस्नातमित्येवान्यत्र ।।

कपिष्ठलो गोत्रे ।। 8.3.91 ।।

`कपिष्ठलः' इति निपात्यते गोत्रविषये । कपिष्ठलो नाम यस्य स कापिष्ठलिः पुत्रः ।

गोत्र इति किम् ? कपेः स्थलं कपिस्थलम् ।।

प्रष्ठोऽग्रगामिनि ।। 8.3.92 ।।

`प्रष्ठः' इति निपात्यते अग्रगामिन्यभिधेये । प्रतिष्ठत इति प्रष्ठोऽश्वः । अग्रतो गच्छतीत्यर्थः ।

अग्रगामिनीति किम् ? प्रस्थे हिमवतः पुण्ये । प्रस्थो व्रीहीणाम् ।।

वृक्षासनयोर्विष्टरः ।। 8.3.93 ।।

`विष्टरः' इति निपात्यते वृक्षे आसने च वाच्ये । विपूर्वस्य स्तृणातेः षत्वं निपात्यते । विष्टरो वृक्षः । विष्टरमासनम् ।

वृक्षासनयोरिति किम् ? औलपिवाक्यस्य विस्तरः ।।

छन्दोनाम्नि च ।। 8.3.94 ।।

`विष्टारः' इति निपात्यते । विपूर्वात् `स्तृ'---इत्येतस्माद्धातोः छन्दोनाम्नि चेत्येवं विहित इति `विष्टर' प्रकृते `विष्टार' इत्यत्र विज्ञायते । विष्टारपङ्क्तिः छन्दः । विष्टारो बृहतीछन्दः ।
छन्दोनाम्नीति किम् । पटस्य विस्तारः ।।

गवियुधिभ्यां स्थिरः ।। 8.3.95 ।।

गवियुधिभ्यामुत्तरस्य स्थिरसकारस्य मूर्धन्यादेशो भवति । गविष्ठिरः । युधिष्ठिरः ।
गोशब्दादहलन्तादपि एतस्मादेव निपातनात्सप्तम्या अलुग्भवति ।।

विकुशमिपरिभ्यः स्थलम् ।। 8.3.96 ।।

वि, कु, शमि, परि---इत्येतेभ्य उक्तस्य स्थलसकारस्य मूर्धन्यादेशो भवति । विष्ठलम् । कुष्ठलम् । शमिष्ठलम् । परिष्ठलम् ।।

अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेवर्हिर्दिव्यग्निभ्यः स्थः ।। 8.3.97 ।।

अम्ब, आम्ब, गो, भूमि, सव्य, अप, द्वि, त्रि, कु, शेकु, शङ्कु, अङ्गु, मञ्जि, पुञ्जि, परमे, बर्हिस्, अग्नि---इत्येतेभ्य उत्तरस्य स्थशब्दसकारस्य मूर्धन्यादेशो भवति । अम्बष्ठः । आम्बष्ठः । गोष्ठः । भूमिष्ठः । सव्येष्ठः । अपष्ठः । द्विष्ठः । त्रिष्ठः । कुष्ठः । शेकुष्ठः । शङ्कुष्ठः । अङ्गुष्ठः । मञ्जिष्ठः । पुञ्जिष्ठः । परमेष्ठः । बर्हिष्ठः । दिविष्ठः । अग्निष्ठः ।

* स्थास्थिन्स्थणामिति वक्तव्यम् * । सव्येष्ठाः । परमेष्ठीः । सव्येष्ठृसारथिः ।।

सुषामादिषु च ।। 8.3.98 ।।

सुषामादिषु शब्देषु सकारस्य मूर्धन्यादेशो भवति । शोभनं सामयस्यासौ सुषामा ब्राह्मणः । दुष्षामा, निष्षामा । निष्षेधः, दुष्षेधः । सुशब्दस्य कर्मप्रवचनीयसंज्ञकत्वान्निर्दुर्शब्दयोश्च क्रियान्तरविषयत्वादनुपसर्गत्वे सति पाठोऽयम् । `सेधतेर्गतौ' इति वा प्रतिषेधबाधनार्थः । सुषन्धिः । दुः षन्धिः । निषन्धिः । सुष्ठु । दुष्ठु । तिष्ठतेरुणादिष्वेतौ व्युत्पाद्येते ।

* गौरिषक्थः संज्ञायाम् * । `ङ्यापोः संज्ञाछन्दसोर्बहुलम्' इति पूर्वपदस्य ह्रस्वत्वम् । प्रतिष्णिका । प्रतिष्णाशब्दादयं कन्प्रत्ययः । जलाषाहम् । नौषेचनम् । दुन्दुभिषेवणम् ।

* एति संज्ञायामगात् * । एकारपरस्य सकारस्य मूर्धन्यादेशो भवति इण्कोरुत्तरस्यागकारात्परस्य संज्ञायां विषये । हरिषेणः । वारिषेणः । जानुषेणी । एतीति किम् ? हरिसक्थम् । संज्ञायामिति किम् ? पृथ्वी सेना यस्य स पृथुसेनो राजा । अगादिति किम् ? विष्वक्सेनः ।

`इण्कोः' इत्येव---सर्वसेनः ।

* नक्षत्राद्वा * । नक्षत्रवाचिनः शब्दादुत्तरस्य सकारस्य वा एति संज्ञायामगकाराद्, मूर्धन्यो भवति । रोहिणीषेणः, रोहिणीसेनः । भरणीषेणः, भरणीसेनः । अगकारादित्येव---शतभिषक्सेनः । अविहितलक्षणो मूर्धन्यः । सुषामादिषु द्रष्टव्यः ।।

ह्रस्वात्तादौ तद्धिते ।। 8.3.99 ।।

ह्रस्वादुत्तरस्य सकारस्य मूर्धन्यादेशो भवति तादौ तद्धिते परतः । तरप्, तमप्, तय, तल्, तस, त्यप्---एतानि प्रयोजयन्ति । तरप्--सर्पिष्टरम्, यजुष्टरम् । तमप्---सर्पिष्टमम्, यजुष्टमम् । तय---चतुष्टये ब्राह्मणानां निकेताः । त्व---सर्पिष्ट्वम्, यदुष्ट्वम् । तल्---सर्पिष्टा, यजुष्टा । तस्---सर्पिष्टः, यजुष्टः । त्यप्---आविष्ट्यो वर्द्धते ।

ह्रस्वादिति किम् ? गीस्तरा, धूस्तरा । तादाविति किम् ? सर्पिस्साद्भवति । प्रत्ययसकारस्य `सात्पदाद्योः' इति सत्यपि प्रतिषेधे प्रकृतिसकारस्य स्यात् । तद्धित इति किम् ? सर्पिस्तरति ।

* तिङन्तस्य प्रतिषेधो वक्तव्यः * । भिन्द्युस्तराम् । छिन्द्युस्तराम् ।।

निसस्तपतावनासेवने ।। 8.3.100 ।।

निसः सकारस्य मूर्धन्यादेशो भवति तपतौ परतोऽनासेवनेऽर्थे । आसेवनम्=पुनः पुनः करणम् । निष्टपति सुवर्णम् । सकृदग्निं स्पर्शयतीत्यर्थः ।

अनासेवन इति किम् ? निस्तपति सुवर्णं सुवर्णकारः । पुनः पुनरग्निं स्पर्शयतीत्यर्थः । निष्ठप्तं रक्षः, निष्टप्ता अरातया इत्यत्र सदप्यासेवनं न विवक्ष्यते । छान्दसो वा वर्णविकारः ।

युष्मत्तत्ततक्षुः ष्वन्तः पादम् ।। 8.3.101 ।।

युष्मत् तत्, ततक्षुस्---इत्येतेषु तकारादिषु परतः सकारस्य मूर्धन्यादेशो भवति से चेत् सकारोऽन्तः पादं भवति । युष्मदादेशआः---त्वम्, त्वाम्, ते, तव । अग्निष्ट्वं नामासीत्, । त्वा---अग्निष्ट्वा वर्धयामसि । ते---अग्निष्टे विश्वमानय । तव---अप्स्वग्ने सधिष्टव । तत् अग्निष्टद्विश्वमापृणाति । ततक्षुस्---द्यावापृथिवी निष्टतक्षुः ।

अन्तः पादमिति किम् ? यन्म आत्मनो मिन्दाभूदग्निस्तत्पुनराह जातवेदा विचर्षणिः ।।

यजुष्येकेषाम् ।। 8.3.102 ।।

यजुषि विषये युष्मत्तत्ततक्षुः षु परत एकेषामाचार्याणां मतेन सकारस्य मूर्धन्यादेशो भवति । अर्चिभिष्ट्वम्, अर्चिभिस्त्वम् । अग्निष्टेऽग्रम्, अग्निस्तेऽग्रम् । अग्निष्टत्, अग्निस्तत् । अर्चिर्भिष्टतक्षुः । अर्चिर्भिस्ततक्षुः ।।

स्तुतस्तोमयोश्छन्दसि ।। 8.3.103 ।।

`एकेषाम्' इति वर्तते । स्तुत, स्तोम---इत्येतयोः सकारस्य छन्दसि विषये मूर्धन्यादेशो भवति एकेषामाचार्याणां मतेन । त्रिभिष्टुतस्य, त्रिभिस्तुतस्य । गोष्टोमं षोडशिनम्, गोस्तोमं षोडशिनम् ।

`पूर्वपादत्' इत्येव सिद्धे प्रपञ्चार्थमिदम् ।।

पूर्वपदात् ।। 8.3.104 ।।

`छन्दसि' इति वर्त्तते, `एकेषाम्' इति च । पूर्वपदस्थान्निमित्तादुत्तरस्य सकारस्य मूर्धन्यादेशो भवति छन्दसि विषये एकेषामाचार्याणां मतेन । द्विषन्धिः, द्विसन्धिः ।त्रिषन्धिः, त्रिसन्धिः । मधुष्ठानम्, मधुस्थानम् । द्विषाहस्रं चिन्वीत, द्विसाहस्रं चिन्वीत ।

असमासेऽपि यत्पूर्वपदं तदपीह गृह्यते । त्रिः षमृद्धत्वाय, त्रिः समृद्धत्वाय ।।

सुञः ।। 8.3.105 ।।

`सुञ' इति निपात इह गृह्यते, तस्य पूर्वपदस्थान्निमित्तादुत्तरस्य मूर्धन्यादेशो भवति छन्दसि विषये । अभीषुणः सखीनाम् । ऊर्ध्व ऊषुणः । `इकः सुञि' इति दीर्घः । `नश्च धातुस्थोरुषुभ्यः' इति णत्वम् ।।

सनोतेरनः ।। 8.3.106 ।।

सनोतेरनकारान्तस्य सकारस्य मूर्धन्यादेशो भवति । गोषाः । नृषाः ।

अन इति किम् ? गोसनिं वाचमुदीरयन् ।

`पूर्वपदात्' इत्येव सिद्धे नियमार्थमिदम् । अत्र केचित् सवनादिपाठाद् गोसनिर्नियमस्य फलं न भवतीति सिसानयिषतीति प्रत्युदाहरन्ति । सिसनिषतेरप्रत्ययः । सिसनीरित्यपरे ।

सहेः पृतनर्ताभ्यां च ।। 8.3.107 ।।

पृतना, ऋत---इत्येताभ्यामुत्तरस्य सहिसकारस्य मूर्धन्यादेशो भवति । पृतनाषाहम् । ऋतीषाहम् ।

केचिद् `सहः' इति योगविभागं कुर्वन्ति---ऋतीषहमित्यत्रापि यथा स्यात् । ऋतिशब्दस्य पूर्वपदस्य संहितायामेतद्दीर्घत्वम्, षत्वं च । अवग्रहे तु ऋतिसहमित्येव भवति । चकारोऽनुक्तसमुच्चयार्थः । तेन ऋतीषहमिति सिद्धम् ।।

न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ।। 8.3.108 ।।

रेफरस्य सकारस्य सृपि, सृजि, स्पृशि, स्पृहि, सवनादीनां च मूर्धन्यो न भवति । रपर---विस्रंसिकायाः काण्डं जुहोति । विस्रब्धः कथयति । सृपि---पुरा क्रूरस्य विसृपः । सृजि---बाचो विसर्जनात् । स्पृशि---दिविस्पृशम् । स्पृहि----निस्पृहं कथयति ।

सवनादीनाम्---सवनेसवने । सूतेसूते । सामेसामे । सवनमुखेसवनमुखे । किं स्यतीति किंसंकिंसम् । अनुसवनमनुसवनम् । गोसर्निगोसनिम् । अश्वसनिमश्वसनिम् । पूर्वपदादिति प्राप्तेः प्रतिषेधः ।

अश्वसनिग्रहणनिणोऽपि षत्वमस्तीति ज्ञापनार्थम् । तेन जलाषाहम्, अश्वषाहमित्येतत्सिद्धं भवति ।

क्वचिद्वं गणपाठः---सवनेसवने । अनुसवनेऽनुसवने । संज्ञायां बृहस्पतिसवः । शकुनिसवनम् । सोमेसोमे । सूतेशूते । संवत्सरेसंवत्सरे । किंसंकिंसम् । बिसंबिसम् । मुसलंमुसलम् । गोसनिमश्वसनिम् । सवनादिः ।।

सात्पदाद्योः ।। 8.3.109 ।।

`सात्' इत्येतस्य, पदादेश्च मूर्धन्यादेशो न भवति `विभाषा साति कार्त्स्न्ये' । प्रत्ययसकारत्वात् प्राप्तिः, पदादेश्चादेशसकारत्वात् । सात्--अग्निसात्, दधिसात्, मधुसात् । पदादेः---दधि सिञ्चति । मधु सिञ्चति ।।

सिचो यङि ।। 8.3.110 ।।

सिचः सकारस्य यङि परतो मूर्धन्यादेशो न भवति । परिसेसिच्यते । अभिसेसिच्यते ।

`उपसर्गात्' इति या प्राप्तिः सा पदादिलक्षणमेव प्रतिषेदधं बाधते, न `सिचो यङि' इति । तस्मादयं प्रतिषेधः सर्वत्र भवति ।

यङीति किम् ? अभिषिषिक्षति ।।

सेधतेर्गतौ ।। 8.3.111 ।।

गतौ वर्त्तमानस्य सेधतेः सकारस्य मूर्धन्यादेशो न भवति । अभिसधयति गाः । परिसेधयति गाः ।

गताविति किम् ? शिष्यमकार्यात् प्रतिषेधयति ।।

प्रतिस्तब्धनिस्तब्धौ च ।। 8.3.112 ।।

प्रतिस्तब्ध, निस्तब्ध---इत्येतौ मूर्धन्यप्रतिषेधाय निपात्येते । `स्तन्भः' इति प्राप्तं षत्वं प्रतिषिध्यते । प्रतिस्तब्धः । निस्तब्धः ।।

सोढः ।। 8.3.113 ।।

सहिरयं सोड्भूतो गृह्यते, तस्य सकारस्य मूर्धन्यादेशो न भवति । परिसोढः, परिसोढुम्, परिसोढव्यम् ।

सोड्भूतग्रहणं किम् ? परिषहते ।।

स्तन्भुसिवुसहां चङि ।। 8.3.114 ।।

स्तम्भु, सिवु, सह---इत्येतेषां चङि परतः सकारस्य मूर्धन्यादेशो न भवति । ` स्तन्भेः' इति `परिनिविभ्यः' इति च प्राप्तो मुर्धन्यः प्रतिषिध्यते । स्तम्भु कर्ततस्तम्भत्, अभ्यतस्तन्बत । सिवपर्यसीषिवत्, न्यसीषिवत् । सह---पर्यसीषहत्, व्यसीषहत् ।

* स्तम्भुसिवुसहां चङि उपसर्गादिति वक्तव्यम् * । उपसर्गाद्या प्राप्तिस्तस्या एव प्रतिषेधो यथा स्यात्, अभ्यासाद्या प्राप्तिस्तस्या मा भूदिति । तथा चैवोदाहृतम् ।।

सुनोतेः स्यसनोः ।। 8.3.115 ।।

सुनोतेः सकारस्य मूर्धन्यादेशो न भवति स्ये सनि च परतः । अभिसाष्यति । परिसोष्यति । अभ्यसोष्यत् । पर्यसोष्यत् ।

सनि किमुदाहरणम् ? अभिसुसूषति । नैतदस्ति प्रयोजनम्, तत्र `स्तौतिण्योरेव षण्यभ्यासात्' इति नियमान्न भविष्यति । इदं तर्हि---अभिसुसूषते ? एतदपि नास्ति; `स्थादिष्वभ्यासेन चाभ्यासस्य' इति नियमात् । इदं तर्ह्यभिसुसूषतेरप्रत्ययः अभिसुसूरित्युदाहरणमिति ? अत्र हि सन्षभूतो न भवतीत्यभ्यासात् प्राप्तिरस्ति ।

स्यसनोरिति किम् ? सुषाव ।।

सदिस्वन्ज्योः परस्य लिटि ।। 8.3.116 ।।

सदि, स्वन्जि---इत्येतयोर्धात्वोर्लिटि परतः सकारस्य परस्य मूर्धन्यो न भवति । अभिषसाद, परिषसाद, निषसाद, विषसाद । परिषस्वजे, परिषस्वजाते, परिषस्वजिरे । अभिषस्वजे । स्वञ्जेः संयोगान्तादपि विभाषा लिटः कित्त्वमिच्छन्तीति पक्षेऽनुषङ्गलोपः ।।

निव्यभिभ्योऽड्व्यवाये वा छन्दसि ।। 8.3.117 ।।

नि, वि, अभि---इत्येतेभ्य उपसर्गेभ्य उत्तरस्य सकारस्याड्व्यवाये छन्दसि विषये मूर्धन्यादेशो न भवति वा । न्यषीदत्पिता नः, न्यसीदत् । व्यषीदत्पिता नः, व्यसीदत् । अभ्यषीदत्, अभ्यसीदत् ।

`सदिष्वन्ज्योः' इति, तदिह नानुवर्त्तते, सामान्येनैव तद्वचनम् । व्यष्टौत्, व्यस्टौत्; अभ्यष्टौत्, अभ्यस्तौत्---इत्येतदपि सिद्धं भवति ।।

इति श्रीवामनाचार्यविरचितायां काशिकावृत्तौ अष्टमाध्यायस्य तृतीयः पादः

---------------------*******************------------------

8.4

काशिकावृत्तिः---6

अथ अष्टमाध्याये चतुर्थः पादः

रषाभ्यां नो णः समानपदे ।। 8.4.1 ।।

रेफषकाराभ्यामुत्तरस्य नकारस्य णकारादेशो भवति, समानपदस्थौ चेन्निमित्तनिमितिनौ भवतः । आरतीर्णम्, विस्तीर्णम्, अवपूर्णम् । षकारात्--कुष्णाति, पुष्णाति, मुष्णाति ।

पग्रहणमुत्तरार्थम्; ष्टुत्वेनैव हि सिद्धमेतत् ।

समानपद इति किम् ? अग्निर्नयति । वायुर्नयति ।

* ऋवर्णाच्चेति वक्तव्यम् * । तिसृणाम् । चतसृणाम् । मातृणाम् । पितृणाम् ।

रश्रुतिसामान्यनिर्देशात्सिद्धम् । वर्णभक्त्या च व्यवधानेऽपि णत्वं भवतीति क्षुभ्नादिषु नृनमन---तृप्नोतिग्रहणं ज्ञापकम् ।

अथ वा---ऋवर्णादपि णत्वं भवतीत्येतदेवानेन ज्ञाप्यते ।।

अट्कुप्वाङ्नुम्व्यवायेऽपि ।। 8.4.2 ।।

अट्, कु, पु, आङ्, नुम्---इत्येतैर्व्यवायेऽपि रेफषकाराभ्यामुत्तरस्य नकारस्य णकार आदेशो भवति । अड्व्यवाये तावत्---करणम्, हरणम् । किरिणा । गिरिणा । कुरुणा । गुरुणा ।

कवर्गव्यवाये---अर्केण । मूर्खेण । गर्गेण । अर्घेण ।

पवर्गव्ययाये--दर्पेण । रेफेण । गर्भेण । चर्मणा । वर्मणा ।

आङ्व्यवाये---पर्याणद्धम् । निराणद्धम् ।

`अड्व्यवाये' इति सिद्धे आङ्ग्रहणम् `पदव्यवाये'---इत्यस्य प्रतिषेधस्य बाधनार्थम् ।

नुम्व्यवाये--बृंहणम् । बृंहणीयम् ।

नुम्ग्रहणमनुस्वारोपलक्षणार्थं द्रष्टव्यम् । तेन तृंहणम्, तृंहणीयमित्यत्रानुस्वारव्यवाये नुमभावेऽपि णत्वं भवति । सत्यपि च नुमि यत्रानुस्वारो न श्रूयते, तत्र न भवति---प्रेन्वनम्, प्रेन्वनीयमिति ।

व्यवायोपलक्षणार्थत्वादडादीनामिह व्यस्तैः समस्तैश्च व्यवायेऽपि णत्वं भवति ।।

पूर्वपदात्संज्ञायामगः ।। 8.4.3 ।।

पूर्वपदस्थान्निमित्तादुत्तरस्य गकारवर्जिताद् नकारस्य णकार आदेशो भवति संज्ञायां विषये । द्रुणसः । वार्ध्रीणसः । खरणसः । शूर्पणखा ।

संज्ञायामिति किम् ? चर्मनासिकः ।

अग इति किम् ? ऋगयनम् ।

केचिदेतन्नियमार्थं वर्णयन्ति--पूर्वपदात्संज्ञायामेव णत्वं नान्यत्रेति । समासेऽपि हि समानपदे निमित्तनिमित्तनोर्भावादस्ति पूर्वेण प्राप्तिरिति । स च नियमः पूर्वपदसम्बन्धादुत्तरपदस्थस्यैव णत्वं निवर्त्तयति---चर्मनासिक इति, न तद्धितपूर्वपदस्थस्य---खारपायणः, मातृभोगीणः, करणप्रिय इति ।

`अगः' इति योगविभागेन णत्वप्रतिषेधः, न नियमप्रतिषेध इति ।

अपरे तु---पूर्वसूत्रे `समानमेव यन्नित्यं पदं तत्समानपदम्' इत्याश्रयन्ति; समानग्रहणात् । तेषामप्राप्तमेव णत्वमनेन विधीयते । समासे हि पूर्वपदोत्तरपदविभागादसमानपदत्वमप्यस्तीति ।।

वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः ।। 8.4.4 ।।

`पूर्वपदात्संज्ञायाम्' इति वर्तते । पुरगा, मिश्रका, सिध्कका, शारिका, कोटरा, अग्रे---इत्येतेभ्यः पूर्वपदेभ्य उत्तरस्य वननकारस्य णकारादेशो भवति संज्ञायां विषये । पुरगावणम् । मिश्रकावणम् । सिध्ककावणम् । शारिकावणम् । कोटरावणम् । अग्रेवणम् ।

सिद्धे सत्यारम्भो नियमार्थः---एतेभ्य एव परस्य वनकारस्य णकारादेशो भवति, नान्येभ्य इति । कुबेरवनम् । शतधारवनम् । असिपत्रवनम् ।।

प्रनिरन्तः शरेक्षुल्पक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि ।। 8.4.5 ।।

प्र, निर्, अन्तर्, शर, इक्षउ, प्लक्ष, आम्र, कार्ष्य, खदिर, पीयूक्षा---इत्येतेभ्य उत्तरस्य वननकारस्य संज्ञायामसंज्ञायामपि णकारा देशो भवति । प्र---प्रवणे यष्टव्यम् । निर्---निर्वणे प्रतिधीयते । अन्तर्---अन्तर्वणे । शर---शरवणम् । इक्षु---इक्षुवणम् । प्लक्ष---प्लक्षवणम् । आम्र---आम्रवणम् । कार्ष्य---कार्ष्यवणम् । खदिरवणम् । पीयूक्षा---पीयूक्षावणम् ।।

विभाषौषधिवनस्पतिभ्यः ।। 8.4.6 ।।

`वनम्' इत्येव । ओषधिवाचि यत्पूर्वपदं वनस्पतिवाचि च तत्स्थान्निमित्तादुत्तरस्य वननकारस्य णकार आदेशो भवति विभाषा । ओषधिवाचिभ्यस्तावत्---
दूर्वावणम्, दूर्वावनम् । भूर्वावणम्, मूर्वावनम् । वनस्पतिभ्यः---शिरीषवणम्, शिरीषवनम् । बदरीवणम्, बदरीवनम् ।
* द्व्यक्षरत्र्यक्षरेभ्य इति वक्तव्यम् * । इह मा भूत्---देवदारुवनम् । भद्रदारुवनम् ।
* इरिकादिभ्यः प्रतिषेधो वक्तव्यः * । इरिकावनम् । मिरिकावनम् ।
फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः ।
ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः ।।
(इति) सत्यपि भेदे वृक्षवनस्पत्योरिहाभेदेन ग्रहणं द्रष्टव्यम् ।
अह्नोऽदन्तात् ।। 8.4.7 ।।
अदन्तं यत्पूर्वपदं तत्स्थान्निमित्तादुत्तरस्याह्नो नकारस्य णकार आदेशो भवति । पूर्वाह्णः । अपराह्णः ।
अदन्तादिति किम् ? निरह्नः । दुरह्नः । `अह्नोऽह्न एतेभ्यः' इत्यह्नादेशः । `अह्नः' इत्यकारान्तग्रहणाद् दीर्घाह्नो शरदित्यत्र न भवति ।।
वाहनमाहितात् ।। 8.4.8 ।।
आहितवाचि यत्पूर्वपदं तत्स्थान्निमित्तादुत्तरस्य वाहननकारस्य णकार आदेशो भवति । इक्षुवाहणम् । शरवाहणम् । दर्भवाहणम् ।
वाहने यद् आरोपितमुह्यते तदाहितमुच्यते ।
आहितादिति किम् ? दाक्षिवाहनम् । दाक्षिस्वामिकं वाहनमित्यर्थः ।।
पानं देशे ।। 8.4.9 ।।
पाननकारस्य पूर्वपदस्थान्निमित्तादुत्तरस्य देशाभिधाने णकार आदेशो भवति । पीयते इति पानम् । `कृत्यल्युटो बहुलम्' इति कर्मणि ल्युट् । क्षीरं पानं येषआं ते क्षीरपाणा उशीनराः । मनुष्याभिधानेऽपि देशाभिधानं गम्यते । सुरापाणाः प्राच्याः । सौवीरपाणा बाह्लीकाः । कषायपाणा गन्धाराः ।
देश इति किम् ? दाक्षीणां पानं दाक्षिपानम् ।।
वा भावकरणयोः ।। 8.4.10 ।।
भावे करणे च यः पानशब्दस्तदीयस्य नकारस्य णकार आदेशो भवति वा पूर्वपदस्थान्निमित्तादुत्तरस्य । क्षीरपाणं वर्त्तते, क्षीरपानम् । कषायपाणम्, कषायपानम् । सुरापाणम्, सुरापानम् । करणे---क्षीरपाणः कंसः । क्षीरपानः ।
* वाप्रकरणे गिरिनद्यादीनामुपसंख्यानम् * । गिरिणदी, गिरिनदी । चक्रणदी, चक्रनदी । चक्रणितम्बा, चक्रनितम्बा ।।
प्रातिपदिकान्तनुम्विभक्तिषु च ।। 8.4.11 ।।
`वा' इति वर्तते । प्रातिपदिकान्ते नुमि विभक्तौ च यो नकारस्तस्य पूर्वपदस्थान्निमित्तादुत्तरस्य वा णकार आदेशो भवति। प्रातिपदिकान्ते तावत्---
माषवापिणौ, माषवापिनौ । नुमि---माषवापाणि, माषवापानि । व्रीहिवापाणि, व्रीहिवापानि । विभक्तौ---माषवापेण, माषवापेन । व्रीहिवापेण, व्रीहिवापेन ।
पुर्वपदाधिकारादुत्तरपदस्य प्रातिपदकस्थो योऽन्त्यो नकारस्तस्येदं णत्वमिष्यते । इह हि न भवति---गर्गाणां भगिनी गर्गभगिनी ।
यदा त्वेवं भवति--गर्गाणां भगो गर्गभगः, गर्गभगोऽस्या अस्तीति गर्गभगिणीति; तदा मातृभोगीणवन्नित्यमेव णत्वेन भवितव्यम् । माषवापिणी, माषवापिनीत्यत्र तु `गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः' इति कृदन्तेनैव समासे सति प्रातिपदिकस्य उत्तरपद्सयैव सतो नकारो भवति । तथात्र नुम्ग्रहणं कृतम् । स हि समुदायभक्तत्वादुत्तरपदस्यान्तो न भवति ।
* युवादीनां प्रतिषेधो वक्तव्यः * । आर्ययूना । क्षत्रिययूना । प्रपक्वानि । दीर्घाह्नी शरत् ।।
एकाजुत्तरपदे णः ।। 8.4.12 ।।
एकाजुत्तरपदं यस्य स एकाजुत्तरपदः, तस्मिन्नेकाजुत्तरपदसमासे प्रातिपदिकान्तनुम्विभक्तिषु पूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य णकार आदेशो भवति ।
वृक्षहणौ । वृत्रहणः । नुमि---क्षीरपाणि । सुरापाणि । विभक्तौ---क्षीरपेण । सुरापेण ।
`णः' इति वर्त्तमाने पुनर्णग्रहणं विकल्पाधिकारनिवृत्तेर्विस्पष्टीकरणार्थम् ।।
कुमति च .। 8.4.13 ।।
कवर्गवति चोत्तरपदे प्रातिपदिकान्तनुम्विभक्तिषु पूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति । वस्त्रयुगिणौ, वस्त्रयुगिणः । स्वर्गकामिणौ ।
वृषगामिणौ । नुमि---वस्त्रयुगाणि । खरयुगाणि । विभक्तौ---वस्त्रयुगेण । खरयुगेण ।।
उपसर्गादसमासेऽपि णोपदेशस्य ।। 8.4.14 ।।
ण उपदेशे यस्यासौ णोपदेशः । णोपदेशस्य धातोर्यो नकारः तस्य उपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति असमासेऽपि, समासेऽपि, प्रणमति,
परिणमति । प्रणायकः, परिणायकः ।
उपसर्गादिति किम् ? प्रगता नायका अस्माद् देशात् प्रनायको देशः । असमासेऽपीति किम् ? पूर्वपदाधिकारात् समास एव स्यादिति
तदधिकारनिवृत्तिद्योतनार्थम् । णोपदेशस्येति किम् ? प्रनर्दति । प्रनर्दकः ।।
हिनुमीना ।। 8.4.15 ।।

हिनु, मीना---इत्येतयोरुपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति । प्रहिणोति, प्रहिणुतः । प्रमीणाति, प्रमीणीतः ।
हिनुमीनाग्रहणे विकृतस्यापि भवति; अजादेशस्य स्थानिवत्त्वात् ।।

आनि लोट् ।। 8.4.16 ।।

`आनि' इत्येतस्य लोडादेशस्योपसर्गस्थान्निमित्तादुत्तरस्यनकारस्य णकारादेशो भवति । प्रवपाणि । प्रयाणि । परियाणि ।

लोडिति किम् ? प्रवपानि मांसानि ।।

नेर्गदनदपतपदघुमास्यतिहन्तियातिवादिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ।। 8.4.17 ।।

`नि' इत्येतस्योपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति गद, नद, पत, पद, घु, मा, स्यति, हन्ति, याति, वाति, द्राति, प्साति, वपति, वहति, शम्यति, चिनोति, देग्धि---इत्येतेषु परतः । गद---प्रणिगदति, परिणिगदति । नद---प्रणिनदति, परिणिनदति । पत---प्रणिपतति, परिणिपतति । पद---प्रणिपद्यते, परिणिपद्यते । घु---प्रणिददाति, परिणिददाति । प्रणिदधाति, परिणिदधाति ।

माङ्---प्रणिमिमीते, परिणिमितीते । मेङ्---प्रणिमयते, परिणिमयते । `मा' इति माङ्मेङोर्ग्रहणमिष्यते ।

स्यति---प्रणिष्यति, परिणिष्यति । हन्ति---प्रणिहन्ति, परिणिहन्ति । याति---प्रणियाति, परिणियाति । वाति---प्रणिवाति, परिणिवाति । द्राति---प्रणिद्राति, परिणिद्राति । प्साति---प्रणिप्साति, परिणिप्साति । वपति---प्रणिवपति, परिणिवपति । वहति---प्रणिवहति, परिणिवहति । शाम्यति---प्रणिशाम्यति, परिणिशाम्यति । चिनोति---प्रणिचिनोति, परिणिचिनोति । देग्धि---प्रणदेग्धि, परिणिदेग्धि ।

अड्व्यवायेऽपि नेर्गदादिषु णत्वमिष्यते । प्रण्यगदत्, परिण्यगदत् ।।

शेषे विभाषाऽकखादावषान्त उपदेशे ।। 8.4.18 ।।

`नः' इति वर्त्तते, `उपसर्गात्' इति च । अककारादिः, अखकारादिः, अषकारान्तश्च उपदेशे यो धातुः स शेषः; तस्मिन्परत उपसर्गस्थान्निमित्तादुत्तरस्य नेर्नकारस्य विभाषा णकार आदेशो भवति । प्रणिपचति, प्रनिपचति । प्रणिभिनत्ति, प्रनिभिनत्ति ।

अकखादाविति किम् ? प्रनिकरोति । प्रनिखादति । अषान्त इति किम् ? प्रनिपिनष्टि । उपदेशग्रहणं किम् ? इह च प्रतिषेधो यथा स्यात्---प्रनिचकार, प्रनिचखाद, प्रनिपेक्ष्यतीति । इह च मा भूत्---विशेः प्रणिवेष्टा, प्रणिवेक्ष्यति ।।

अनितेः ।। 8.4.19 ।।

अनितेर्नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति । प्राणिति । पराणिति ।।

अन्तः ।। 8.4.20 ।।

`अनितेः' इति वर्तते, उपसर्गस्थान्निमित्तादुत्तरस्यानितिनकारस्य पदान्ते वर्तमानस्य णकारादेशो भवति । हे प्राण् । हे पराण् । `पदान्तस्य' इति प्रतिषेधस्यापवादोऽयम् । अन्तश्च पदापेक्षो गृह्यते ।

केचित्तु पूर्वसूत्र एवैतदन्तग्रहणँ सामीप्यार्थमभिसम्बध्नन्ति । निमित्तसमीपस्थस्यैकवर्णव्यवहितस्यानितिनकारस्य पदान्ते वर्तमानस्य णकारादेशो यथा स्यात् । इह मा भूत्---पर्यनितीति । तैर्द्वितीयमपि पदान्तस्य णत्वार्थमन्तग्रहणमाश्रयितव्यमेव ।

येषां तु `प्रर्यणितीति भवितव्यम्' इति दर्शनम्, तेषां पूर्वसूत्रे नार्थोऽन्तग्रहणे न ।।

उभो साभ्यासस्य ।। 8.4.21 ।।

साभ्यासस्यानितेरुपसर्गस्थान्निमित्तादुत्तरस्योभयोर्नकारयोर्णकार आदेशो भवति । प्राणिणिषति, प्राणिणत् । पराणिणिषति, पराणिणत् ।

`पूर्वत्रासिद्धीयमद्विर्वचने' इत्येतस्मिन् सति पूर्वेणैव कृतणत्वस्य द्विर्वचने कृते सिद्धमेतदन्तरेणापि वचनम् ? एतत्तु नाश्रयितव्यमिति सूत्रमिदमारभ्यते । तेन औजढदिति सिद्धं भवति ।।

हन्तेरत्पूर्वस्य ।। 8.4.22 ।।

अकारपूर्वस्य हन्तिनकारस्य उपसर्गस्थान्निमित्तादुत्तरस्य णकार आदेशो भवति । प्रहण्यते, परिहण्यते । प्रहणनम्, परिहणनम् ।

अत्पूर्वस्येति किम् ? प्रघ्नन्ति । परिघ्नन्ति । तपरकरणं किम् ? चिणि---प्राघानि । पर्यघानि ।।

वमोर्वा ।। 8.4.23 ।।

`हन्तेः इति वर्तते । वकारमकारयोः परतो हन्तिनकारस्योपसर्गस्थान्निमित्तादुत्तरस्य वा णकारादेशो भवति । प्रहण्वः, परिहण्वः; प्रहन्वः, परिहन्वः । प्रहण्मः, परिहण्मः;प्रहन्मः, परिहन्मः' ।।

अन्तरदेशे ।। 8.4.24 ।।

अन्तः शब्दादुत्तरस्य हन्तिनकारस्यात्पूर्वस्य णकारादेशो भवति अदेशाभिधाने । अन्तर्हण्यते । अतर्हणनं वर्तते ।

अदेशे इति किम् ? अन्तर्हननो देशः ।

`अत्पूर्वस्य' इत्येव---अन्तर्घ्नन्ति ।

तपरकरणं किम् ? अन्तरघानि ।।

अयनं च ।। 8.4.25 ।।

`अन्तरदेशे' इति वर्तते । अयननकारस्य चान्तः शब्दादुत्तरस्य णकारादेशो भवति अदेशाभिधाने । अन्तरयणं वर्तते । अन्तरयणं शोभनम् ।

`अदेशे' इत्येव---अन्तरयनो देशः ।।

छन्दस्यृदवग्रहात् ।। 8.4.26 ।।

`पूर्वपदात्' इति वर्तते । ऋकारान्तादवग्रहात् पूर्वपदादुत्तरस्य णकारादेशो भवति छन्दसि विषये । नृमणाः । पितृयाणम् ।

अत्र हि नृमणाः, पितृयाणमिति ऋकारोऽवगृह्यते ।

अवग्रहग्रहणं किमर्थमुच्यते, यावता `संहिताधिकार आ अध्यायपरिसमाप्तेः' इत्युक्तम् ? विषयोपलक्षणार्थमवग्रहग्रहणम् । अवगृह्यमाणाद्यथा स्याद्, अनवगृहमाणान्मा भूत् । अपदान्ते चावग्रहो नास्ति ।।

नश्च धातुस्थोरुषुभ्यः ।। 8.4.27 ।।

`नस्' इत्येतस्य नकारस्य णकारादेशो भवति धातुस्थान्निमित्तादुत्तरस्योरुशब्दात्सुशब्दाच्च छन्दसि विषये । धातुस्थात्तावत्---अग्नेरक्षा णः । शिक्षा णो अस्मिन् । ऊरुशब्दात्--ऊरुणस्कृधि । षुशब्दात्---अभीषु णः सखीनाम् । ऊर्ध्व ऊषु ण ऊतये । अस्मदादेशोऽयं नस्शब्दः, `बहुवचनस्य वस्नसौ' इति ।।

उपसर्गाद् बहुलम् ।। 8.4.28 ।।

उपसर्गस्थान्निमित्तादुत्तरस्य नसो नकारस्य णकारादेशो भवति बहुलम् । प्रणः शूद्रः । प्रणसः, प्रणो राजा । न च भवति---प्रनोमुञ्चतम् ।

बहुलग्रहणाद्भाषायामपि भवति । प्रणसं मुखम् । `उपसर्गाच्च' इति नासिकाया नसादेशः ।।

कृत्यचः ।। 8.4.29 ।।

कृत्स्थो यो नकारोऽच उत्तरस्तस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति । अन, मान, अनीय, अनि, इनि, निष्ठादेश---एते णत्वं प्रयोजयन्ति । अन---प्रयाणम्, परियाणम् । प्रमाणम्, परिमाणम् । मान---प्रयायमाणम्, परियायमाणम् । अनीय---प्रयाणीयम्, परियाणीयम्, अनिः---अप्रयाणिः, अपरियाणिः । इनि---प्रयायिणौ, परियायिणौ । निष्ठादेशः---प्रहीणः, परिहीणः; प्रहीणवान्, परिहीणवान् ।

अच इति किम् ? प्रमग्नः, परिभुग्नः । `भुजो कौटिल्ये', अस्य निष्ठाप्रत्ययः `ओदितश्च' इति निष्ठानत्वम्, `चोः कुः' इति कुत्वे सिद्धम्---परिभुग्न इति ।

* कृत्स्थस्य णत्वे निर्विणअणस्योपसंख्यानं कर्त्तव्यम् * । निर्विण्णोऽस्मि खलसङ्गेन । निर्विण्णोऽहमत्र वासेन ।।

णेर्विभाषा ।। 8.4.30 ।।

ण्यन्ताद्यो विहितः कृत्प्रत्ययः तत्स्थस्य नकारस्योपसर्गस्थान्निमित्तादुतरस्य विभाषा णकारादेशो भवति । प्रियापणम्, प्रयापनम् । परियापणम्, परियापनम् । प्रियाप्यमाणम्, प्रयाप्यमानम् । प्रयापणीयम् । प्रयापनीयम् । अप्रयापणिः, अप्रयापनिः । प्रयापिणौ, प्रयापिनौ ।

विहितविशेषणं किम् ? प्रयाप्यमाणमित्यत्र यका व्यवधानेऽपि यथा स्यादिति ।।

हलश्चेजुपधात् ।। 8.4.31 ।।

`कृत्यचः' इति वर्त्तते । हलादिर्यो धातुरिजुपधस्तस्मात्परो यः कृत्यप्रत्ययः तत्स्थस्य नकारस्याच उत्तरस्योपसर्गस्थान्निमित्तादुत्तरस्य विभाषा णकारादेशो भवति । प्रकोपणम्, प्रकोपनम् । परिकोपणम्, परिकोपनम् ।

हल इति किम् ? प्रेहणम्, प्रोहणम् । इजुपधादिति किम् ? प्रवपणम्, परिवपणम् । `कृत्यचः' इति नित्ये प्राप्ते विकल्पः ।

अच इत्येव---परिभुग्नः ।

इजुपधस्य सर्वस्य हलन्तत्वादिह हल्ग्रहणमादिविशेषणम् ।।

इजादेः सनुमः ।। 8.4.32 ।।

`हलिः' इति वर्तते, तेनेह सामर्थ्यात्तदन्तविधिः । इजादेः सनुमो हलन्ताद्धातोर्विहितो यः कृत्, तत्स्थस्य नकारस्योपर्गस्थान्निमित्तादुत्तरस्य णकारो भवति । प्रेङ्खणम् । परेङ्खणम् । प्रेङ्गणम्, परेङ्गणम् । प्रोम्भणम्, परोम्भणम् ।

सिद्धे सत्यारम्भो नियमार्थः---इजादेरेव सनुमः, नान्यस्मादिति । प्रमङ्गनम्, परिमङ्गनम् ।

`हल' इत्यधिकाराद् ण्यन्ते नित्यं विद्ध्यर्थमेतन्न भवति ।।

वा निंसनिक्षनिन्दाम् ।। 8.4.33 ।।

`उपसर्गात्' इति वर्त्तते । निंस, निक्ष, निन्द---इत्येतेषां नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य वा णकारादेशो भवति । प्रणिंसनम्, प्रनिंसनम् । प्रणिक्षणम्, प्रनिक्षणम् । प्रणिन्दनम्, प्रनिन्दनम् । णोपदेशत्वादेतेषां नित्ये प्राप्ते विकल्पः ।।

न भाभूपूकमिगमिप्यायीवेपाम् ।। 8.4.34 ।।

भा, भू, पू, कमि, गमि, प्यायी, वेप---इत्येतेषामुपसर्गस्थात् निमित्तादुत्तरस्य कृत्स्थस्य नकारस्य णकारादेशो न भवति । भा---प्रभानम्, परिभानम् । भू---प्रभवनम्, परिभवनम् ।

पू---प्रपवनम्, परिपवनम् । पूग्रहणेन पूञ्ग्रहणं द्रष्टव्यम् । पूङो हि भवत्येव णत्वम्---प्रपवणं सोमस्येति ।

कमि---प्रकमनम्, परिकमनम् । गमि---प्रगमनम्, परिगमनम् । प्यायी---प्रप्यायनम्, परिप्यायनम् ।

वेप---प्रवेपनम्, परिवेपनम् ।

* ण्यन्तानां भादीनामुपसंख्यानं कर्तव्यम् * । प्रभापनम्, परिभापनम् ।।

षात् पदान्तात् ।। 8.4.35 ।।

षकारात्पदान्तादुत्तरस्य नकारस्य णकारादेशो न भवति । निष्पानम् । दुष्पानम् । सर्पिष्पानम् । यजुष्पानम् ।

षादिति किम् ? निर्णयः । पदान्तादिति किम् ? कुष्णाति । पुष्णाति ।

पदे अन्तः पदान्तः---इति सप्तमीसमासोऽयम्, तेनेह न भवति---सुसर्पिष्केण, सुयजुष्केण । `शेषाद्विभाषा' इति कप् ।।

नशेः षान्तस्य ।। 8.4.36 ।।

`न' इति वर्तते । नशेः षकारान्तस्य णकारादेशो न भवति । प्रनष्टः, परिनष्टः । षान्तस्येति किम् ? प्रणश्यति, परिणश्यति ।

अन्दग्रहणं षान्तबूतपूर्वमात्रस्यापि यथा स्यात्---प्रनङ्क्ष्यति, परिनङ्क्ष्यति ।।

पदान्तस्य ।। 8.4.37 ।।

पदान्तो यो नकारस्तस्य णकारादेशो न भवति । वृक्षान्, प्लक्षान्, अरीन्, गिरीन् ।।

पदव्यवायेऽपि ।। 8.4.38 ।।

पदेन व्यवायः पदव्यवायः=पदव्यवधानम् । पदेन व्यवायेऽपि सति निमित्तनिमित्तिनोर्नकारस्य णकारादेशो न भवति । माषकुम्भवापेन । चतुरङ्गयोगेन । प्रावनद्धम् । पर्यवनद्धम् । प्रगान्नयामः । परिगान्नयामः ।

* पदव्यवायेऽतद्धित इति वक्तव्यम् * । इह मा भूत्---आर्द्रगोमयेण । शुष्कगोमयेण । `गोश्च पुरीषे' इति मयट् । स्वादौ पूर्व पदमिति गोशब्दः पूर्वपदम्, तेन व्यवायः ।।

क्षुभ्नादिषु च ।। 8.4.39 ।।

`न' इति वर्तते । `क्षुभ्ना' इत्येवमादिषु शब्देषु नकारस्य णकारादेशो न भवति । क्षुभ्नाति । अजादेशस्य स्थानिवद्भावादिहापि प्रतिषेधा भवति । क्षुभ्नीतः । क्षुभ्नन्ति ।

नृनमनः । `पूर्वपदात्संज्ञायाम्' इति प्राप्तिः । `छन्दस्यृदवग्रहात्' इति च प्राप्नोति ।

नन्दिन्, नन्दन, नगर---एतान्युत्तरपदानि संज्ञायां प्रयोजयन्ति ।

हरिनन्दी । हरिनन्दनः । गिरिनगरम् ।

नृतिर्यङि प्रयोजयति---नरीनृत्यते ।

तृप्नु---तृप्नोति ।

नर्तन, गहन, नन्दन, निवेश, निवास, अग्नि, अनूप---एतान्युत्तरपदानि प्रयोजयन्ति । परिनर्तनम्, परिगहनमिति, संज्ञायाम्---`पूर्वपदात्संज्ञायाम्' इति प्राप्नोति । परिनन्दनमित्यत्र `उपसर्गादसमासेऽपि' इति प्राप्नोति ।

शरनिनेशः । शरनिवासः । शराग्निः । दर्भानूपः । इत्येताः संज्ञाः ।

* आचार्यादणत्वं च * । आभार्यभोगीनः । आचार्यानी ।

* इरिकादिभ्यो वनोत्तरपदेभ्यः संज्ञायाम् * । इरिका, तिमिर, कुबेर, हरि । कर्मार---इत्युत्तरपदवनशब्दस्थस्य संज्ञायाम् । क्षुभ्नादिराकृतिगणः । अविहितलक्षणो णत्वप्रतिषेधः क्षुभ्नादिषु द्रष्टव्यः ।।

स्तोः श्चुना श्चुः ।। 8.4.40 ।।

सकारतवर्गयोः शकारचवर्गाभ्यां सन्निपाते शकारचवर्गावादेशो भवतः । स्तोः श्चुनेति यथासंख्यमत्र नेष्यते । सकारस्य शकारेण, चवर्गेण, द्वाभ्यामपि सन्निपाते शकारो भवति । तवर्गस्यापि च शकारेण, चवर्गेण च सन्निपाते चवर्गो भवति । आदेशे तु यथासंख्यमिष्यते---सकारस्य शकारः , तवर्गस्य च चवर्ग इति ।

सकारस्य शकारेण सन्निपाते---वृक्षश्शेते । प्लक्षश्शेते । तस्यैव चवर्गेण---वृक्षश्चिनोति, प्लक्षश्चिनोति । वृक्षश्छादयति, प्लक्षश्छादयति ।

तवर्गस्य शकारेण---अग्निचिच्छेते, सोमसुच्छेते । तस्यैव चवर्गेण---अग्निचिच्चिनोति, सोमसुच्चिनोति । अग्निचिच्छादयति, सोमसुच्छादयति ।

अग्निचिज्जयति, सोमसुज्जयति । अग्निचिज्झकारम्, सोमसुज्झकारम् । अग्निचिञ्ञकारः, सोमसुञ्ञकारः । मस्जेः---मज्जति । भ्रस्जेः---भृज्जति व्रश्चेः---वृश्चति । यजः---यज्ञः । याचेः---याच्ञा ।

`शात्' इति प्रतिषेधो ज्ञापकः---संख्यातानुदेशाभावस्य ।

`स्तोः श्चो' इति सप्तमीनिर्देशो न कृतः; पूर्वेण परेण च श्चुना सन्निपाते श्चुत्वं यथा स्यादिति ।।

ष्टुना ष्टुः ।। 8.4.41 ।।

`स्तोः' इति वर्त्तते । सकारतवर्गयोः षकारटवर्गाभ्यां सन्निपाते षकारटवर्गावादेशौ भवतः । तत्रापि तथैव संख्यातानुदेशाभावः । षकारेण सकारस्य---

वृक्षषण्डे । प्लक्षषण्डे । तस्यैव टवर्गेण---वृक्षष्टीकते, प्लक्षष्टीकते । वृक्षष्ठकारः, प्लक्षष्ठकारः ।
तवर्गस्य षकारेण---पेष्टा । पेष्टुम् । पेष्टव्यम् । कृषीष्ट । कृषीष्ठाः । तस्यैव टवर्गेण---अग्निचिट्टीकते, सोमसुट्टीकते । अग्निचिट्ठकारः, सोमसुट्ठकारः । अग्निचिड्डीनः, सोमसुड्डीनः । अग्निचिढ् ढौकते, सोमसुढ् ढौकेते । अग्निचिण्णकारः, सोमसुण्णकारः । अत्ट्--अट्टति । अद्ड्---अड्डति ।।

न पदान्ताट्टोरनाम् ।। 8.4.42 ।।

पदान्ताट्टवर्गादुत्तरस्य स्तोः ष्टुत्वं न भवति `नाम्' इत्येतद्वर्जयित्वा । श्वलिट्साये । मधुलिट् तरति ।
पदान्तादिति किम् ? `ईड स्तुतौ'---ईट्टे । टोरिति किम् ? सर्पिष्टमम् । अनामिति किम् ? षण्णाम् ।
अत्यल्पमिदमुच्यते । * अनाम्नवतिनगरीणामिति वक्तव्यम् * । षण्णाम् । षण्णवतिः । षण्णवतिः । षण्णगरी ।।

तोः षि ।। 8.4.43 ।।

`न' इति वर्तते । तवर्गस्य षकारे यदुक्तं तन्न भवति । अग्निचित्षण्डे । भवान्षण्डे । महान्षण्डे ।।

शात् ।। 8.4.44 ।।

`तोः' इति वर्तते । शकारादुत्तरस्य तवर्गस्य यदुक्तं तन्न भवति । प्रश्नः । विश्नः ।।

यरोऽनुनासिकेऽनुनासिको वा ।। 8.4.45 ।।

पदान्तग्रहणमनुवर्तते । यरः पदान्तस्यानुनासिके परतो वाऽनुनासिकादेशो भवति । वाग्नयति, वाङ्नयति । श्वलिण्नयति, श्वलिड् नयति । अग्निचिन्नयति, अग्निचिद् नयति । त्रिष्टुम्नयति, त्रिष्टुब्नयति ।
`पदान्तस्य' इत्येव---वेद्मि । क्षुभ्नाति ।
* यरोऽनुनासिके प्रत्यये भाषायां नित्यवचनं कर्तव्यम् * । वाङ्मयम् । त्वङ्मयम् । व्यवस्थितविभाषाविज्ञानात् सिद्धम् ।।

अचो रहाभ्यां द्वे ।। 8.4.46 ।।

`यरः' इति वर्तते । अच उत्तरौ यौ रेफहकारौ ताभ्यामुत्तरस्य यरो द्वे भवतः । अर्क्कः । मर्क्कः । ब्रह्म्मा । अपह्नुते ।
अच इति किम् ? हनुते । किम् ह्मलयति ।।

अनचि च ।। 8.4.47 ।।

`अचः' इति वर्तते, `यरः' इति च । अनच्परस्य=अच उत्तरस्य यरो द्वे वा भवतोऽनचि परतः । दद्ध्यत्र । मद्ध्वत्र ।
अच इत्येव--स्मितम् । ध्मातम् ।
* यणो मयो द्वे भवत इति वक्तव्यम् * । केचिदत्र `यणः' इति पञ्चमी, `मयः' इति षष्ठीति व्याचक्षते । तेषामुल्क्का, वाल्म्मीक इत्युदाहरणम् । अपरे तु `यणः' इति षष्ठी, `मयः' इति पञ्चमीति, तेषां दध्य्यत्र, मध्व्वत्रेत्युदाहरणम् ।
* शरः खयो द्वे भवत इति वक्तव्यम् * । अत्रापि यदि `शरः' इति पञ्चमी, `खयः' इति षष्ठी; तदा स्त्थाली, स्त्थातेत्युदाहरणम् । अथ वा---खय उत्तरस्य शरो द्वे भवतः । वत्स्सः, इक्ष्षुः, कष्षीरम्, अप्स्सराः ।
* अवसाने च यरो द्वे भवत इति वक्तव्यम् * । वाक्क्, वाक् । त्वक्क, त्वक् । षट्ट्, षट् । तत्त्, तत् ।।

नादिन्याक्रोशे पुत्त्रस्य ।। 8.4.48 ।।

आदिनिपरत आक्रोशे गम्यमाने पुत्त्रशब्दस्य न द्वे भवतः । `अनचि च' इति प्राप्तिः प्रतिषिध्यते । पुत्रादिनी त्वमसि पापे ।
आक्रोश इति किम् ? तत्त्वकथने द्विर्वचनं भवत्येव---पुत्त्रानत्तीति पुत्त्रादिनी । शिशुमारी व्याघ्री ।
* तत्परे चेति वक्तव्यम् * । पुत्रपुत्रादिनी त्वमसि पापे ।
* वा हतजग्धपर इति वक्तव्यम् * । पुत्त्रहती, पुत्रहती । पुत्त्रजग्धी । पुत्रजग्धी ।
* चयो द्वितीयाः शरि पौष्करसादेः * । चयो द्वितीया भवन्ति शरि परतः पौष्करसादेराचार्यस्य मतेन । तकारस्य थकारः--वथ्सः । ककारस्य खकारः---ख्षीरम् । पकारस्य फकारः---अफ्सराः ।

शलोऽचि ।। 8.4.49 ।।

`न' इति वर्तते । शरोऽचि परतो न द्वे भवतः । `अचो रहाभ्याम्' इति प्राप्तिः प्रतिषिध्यते । कर्षति । वर्षति । आकर्षः । अक्षदर्शः ।
अचीति किम् ? दर्श्श्यते ।

त्रिप्रभृतिषु शाकटायनस्य ।। 8.4.50 ।।

त्रिप्रभृतिषु वर्णेषु संयुक्तेषु शाकटायनस्याचार्यस्य मतेन द्वित्वं न भवति । इन्द्रः । चन्द्रः । उष्ट्रः । राष्ट्रम् । भ्राष्ट्रम् ।।

सर्वत्र शाकल्यस्य ।। 8.4.51 ।।

शाकल्याचार्यस्य मतेन सर्वत्र द्विर्वचनं न भवति । अर्कः । मर्कः । ब्रह्मा । अपह्नते ।।

दीर्घादाचार्याणाम् ।। 8.4.52 ।।
दीर्घादुत्तरस्याचार्याणां मतेन न द्वित्वं भवति । दात्रम् । पात्रम् । मूत्रम् । सूत्रम् ।
झलां जश्झशि ।। 8.4.53 ।।
झलां स्थाने जशादेशो भवति झशि परतः । लब्धा, लब्धुम्, लब्धव्यम् । दोग्धा, दोग्धुम्, दोग्धव्यम् । बोद्धा, बोद्धुम्, बोद्धव्यम् ।
झशीति किम् ? दत्तः । दत्थः । दध्मः ।।
अभ्यासे चर्च ।। 8.4.54 ।।
अभ्यासे वर्तमानानां झलां चरादेशो भवति, चकाराज्जश्च । चिखनिषति । चित्छित्सति । टिठकारयिषति । तिष्ठासति । पिफकारयिषति । बुभूषति । जिघत्सति । डुढौकिषते ।
प्रकृतिचरां प्रकृतिचरो भवन्ति---चिचीषति । टिटीकिषते । तितनिषति ।
प्रकृतिजशां प्रकृतिजशो भवन्ति---जिजनिषते । बुबुधे । ददौ । डिड्ये ।।
खरि च ।। 8.4.55 ।।
खरि च परतो झलां चरादेशो भवति । झल्ग्रहणं नानुवर्तते; पूर्वसूत्रे चानुकृष्टत्वात् । भेत्ता, भेत्तुम्, भेत्तव्यम् । युयुत्सते । आरिप्सते । आलिप्सते ।।
वावसाने ।। 8.4.56 ।।
`झलाम्', `चर्' इति वर्तते । अवसाने वर्तमानानां झलां वा चरादेशो भवति । वाक्, वाग् । त्वक्, त्वग् । श्वलिट्, श्वलिड् । त्रिष्टुप्, त्रिष्टुब् ।।
अणोऽप्रगृह्यस्यानुनासिकः ।। 8.4.57 ।।
अणोऽप्रगृह्यसंज्ञस्यावसाने वर्तमानस्य वाऽनुनासिकादेशो भवति । दधिँ, दधि । मधुँ, मधु । कुमारीँ, कुमारी ।
अण इति किम् ? कर्तृ । हर्तृ । अप्रगृह्यस्येति किम् ? अग्नी । वायू ।।
अनुस्वारस्य ययि परसवर्णः ।। 8.4.58 ।।
अनुस्वारस्य ययि परतः परसवर्ण आदेशो भवति । शङ्किता, शङ्कितुम्, शङ्कितव्यम् । उञ्छिता, उञ्छितुम्, उञ्छितव्यम् । कुण्डिता, कुण्डितुम्, कुण्डितव्यम् । नन्दिता, नन्दितुम्, नन्दितव्यम् । कम्पिता, कम्पितुम्, कम्पितव्यम् ।
इह कुर्वन्ति, वृषन्ति---इत्यत्र णत्वस्यासिद्धत्वात्पूर्वं नकारस्यानुस्वारः क्रियते, तस्यापि परसवर्णेन पुनर्नकार एव भवति, तस्याप्य सिद्धत्वात् पुनर्णत्वं न भवति । एवमनुस्वारीभूतो णत्वमतिक्रामतीति ।
ययीति किम् ? आक्रंस्यते । आचिक्रंस्यते ।।
वा पदान्तस्य ।। 8.4.59 ।।
पदान्तस्यानुस्वारस्य ययि परतो वा परसवर्णादेशो भवति । तङ्कथञ्चित्रपक्षण्डयमानन्नभः स्थ्म्पुरुषोऽवधीत्, तं कथं चित्रपक्षं डयमानं नभः स्थं पुरुषोऽवधीत् ।।
तोर्लि ।। 8.4.60 ।।
तवर्गस्य लकारे परतः परसवर्णादेशो भवति । अग्निचिल्लुनाति । सोमसुल्लुनाति । भवाँल्लुनाति । महाँल्लुनाति ।।
उदः स्थास्तम्भोः पूर्वस्य ।। 8.4.61 ।।
`सवर्णः' इति वर्तते । उद उत्तरयोः स्था, स्तम्भ---इत्येतयोः पूर्वसवर्णादेशो भवति । उत्थाता, उत्थातुम्, उत्थातव्यम् । स्तम्भेः खल्वपि---उत्तम्भिता, उत्तम्भितुम्, उत्तम्भितव्यम् ।
स्थास्तम्भोरिति किम् ? उत्स्नाता ।
* उत्पूर्वस्य स्कन्देश्छन्दस्युपसंख्यानम् * । अग्ने दूरमुत्कन्दः ।
* रोगे चेति वक्तव्यम् * । उत्कन्दको नाम रोगः । कन्दतेर्वा धात्वन्तरस्यैतद्रूपम् ।।
झयो होऽन्यतरस्याम् ।। 8.4.62 ।।
झय उत्तरस्य हकारस्य पूर्वसवर्णादेशो भवति अन्यतरस्याम् । वाग्घसति, वाग् हसति । श्वलिड् ढसति, श्वलिड् हसति । अग्निचिद्धसति, अग्निचिद् हसति । सोमसुद्धसति, सोमसुद् हसति । त्रिष्टुब्भसति । त्रिष्टुब् हसति ।
झय इति किम् ? प्राङ् हसति । भवान्हसति ।।
शश्छोऽटि ।। 8.4.63 ।।
`झयः' इति वर्त्तते, `अन्यतरस्याम्' इति च । झय उत्तरस्य शकारस्याटि परतश्छकारादेशो भवति अन्यतरस्याम् । वाक्छेते, वाक् शेते । अग्निचिच्छेते, अग्निचित् शेते । सोमसुच्छेते, सोमसुत् शेते । श्वलिट् छेते, श्वलिट् शेते । त्रिष्टुप्छेते, त्रिष्टुप् शेते ।
* छत्वममीति वक्तव्यम् * ।

किं प्रयोजनम् ? तच्छ्लोकेन, तच्छ्मश्रुणा---इत्येवमर्थम् ।।

हलो यमां यमि लोपः ।। 8.4.64 ।।

`अन्यतरस्याम्' इति वर्तते । हल उत्तरेषां यमां यमि परतो लोपो भवति अन्यतरस्याम् । शय्य्या इत्यत्र द्वौ यकारौ, क्रमजस्तृतीयः; तत्र मध्यमस्य वा लोपो भवति---शय्या, शय्य्या ।

अदितेरपत्यमादित्य इत्यत्र तकारात्पर एको यकारः, यणो मय इति क्मजो द्वितीयः, तत्र मध्यमस्य वा लोपो भवति । आदित्यः, आदित्य्यः । आदित्यो देवता अस्य स्थालीपाकस्येति आदित्य्यः, आदित्य इति । अत्रापि द्वौ यकारौ; क्रमजस्तृतीयः; तत्र मध्यमस्य मध्य मयोर्वा लोपो भवति ।

हल इति किम् ? आन्नम् । यमामिति किम् ? अग्निः । अर्ध्यम् । यमीति किम् ? शाङ्र्गम् ।।

झरो झरि सवर्णे ।। 8.4.65 ।।

`हलः' इति वर्तते, `अन्यतरस्याम्' इति च । हल उत्तरस्य झरो झरि सवर्णे परतो लोपो भवति अन्यतरस्याम् । प्रप्तम्, अवत्त्तमित्यत्र त्रयस्तकाराः, क्रमजश्चतुर्थः; तत्र मध्यमस्य मध्यमयोर्वा लोपो भवति ।

मरुत्त्त इत्यत्र चत्वारस्तकाराः, क्रमजः पञ्चमः; तत्र मध्यमस्य मध्यमयोर्मध्यमानां वा लोपो भवति । मरुच्छब्दस्य हि उपसंख्यानसामर्थ्याद् `अच उपसर्गात्तः' इति तत्वं भवति ।

झर इति किम् ? शाङ्र्गम् । झरीति किम् ? प्रयपञ्च्ा । अल्लोपस्य च `पूर्वत्रासिद्धे न स्थानिवत्' इति स्थानिवद्भावप्रतिषेधादत्र चकारस्य ञकारे लोपः स्यात् ।

सवर्ण इति किम् ? तर्प्ता, तर्प्तुम्, तर्प्तव्यम् । सवर्णग्रहणसामर्थ्यादिह सङ्ख्यातानुदेशो न भवति, सवर्णमात्रे लोपो विज्ञायते । तेन शिण्ढि, पिण्ढि इति ढकारे डकारस्य लोपो भवति ।।

उदात्तादनुदात्तस्य स्वरितः ।। 8.4.66 ।।

उदात्तादुत्तरस्यानुदात्तस्य स्वरितादेशो भवति । गार्ग्यः । वात्स्यः । पचति । पठति ।

अस्य स्वरितस्यासिद्धत्वाद् `अनुदात्तं पदमेकवर्जम्' इत्येतन्न प्रवर्त्तते । तेनोदात्तस्वरितावुभावपि श्रूयेते ।।

नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ।। 8.4.67 ।।

उदात्तोदयस्य स्वरितोदयस्य चानुदात्तस्य स्वरितो न भवति । पूर्वेण प्राप्तः प्रतिषिध्यते, अगार्ग्य---काश्यप---गालवानां मतेन । उदात्त उदयो यस्मात्स उदात्तोदयः । उदात्तपर इत्यर्थः । एवं स्वरितोदयः ।

उदात्तोदयस्तावत्---गार्ग्यस्तत्र । वात्स्यस्तत्र । तत्रशब्द आद्युदात्तः, तस्मिन्नुदात्ते परतो गार्ग्यशब्दः स्वरितो न भवति ।

स्वरितोदयः---गार्ग्यः क्व । वात्स्यः क्व । क्वशब्दः स्वरितः, तस्मिन्परतोऽनुदात्तः स्वरितो न भवति ।

अगार्ग्यकाश्यपगालवानामिति किम् ? गार्ग्यस्तत्र । गार्ग्यः क्व । तेषां हि मतेन स्वरितो भवत्येव ।

`उदात्तस्वरितपरस्य' इति वक्तव्य उदयग्रहणं मङ्गलार्थम् । अनेकाचार्यसङ्गीर्तनं पूजार्थम् ।।

अ अ इति ।। 8.4.68 ।।

एकोऽत्र विवृतः, अपरः संवृतः, तत्र विवृतस्य सवृतः क्रियते । अकारो विवृतः संवृतो भवति । वृक्षः । प्लक्षः ।

इह शास्त्रे कार्यार्थ मकारो विवृतः प्रतिज्ञातः, तस्य तथाभूतस्यैव प्रयोगो मा भूदिति संवृतप्रत्यापत्तिरियं क्रियते ।

दीर्घप्लुतयोश्चानेन विवृतेनाकारेण ग्रहणं नेष्यते । तेन तयोः संवृतो न भवति ।

संवृतेन च सर्वगुणस्य मात्रिकस्य ग्रहणमिष्यते । तेन सर्वगुणः प्रत्यापद्यते ।।

इष्ट्युपसंख्यानवती शुद्धगणा विवृतकूढसूत्रार्था ।

व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ।।

इति श्रीवामनाचार्यकृतायां काशिकावृत्तौ अष्टमाध्यायस्य तुरीयः पादः

----------------*************************----------------

Nyasa

1.1
श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचिता
न्यासापरपर्याया
काशिकाविवरणपञ्जिकाख्या
काशिकाव्याख्या
अनुबन्धचतुष्टयनिरूपणम्

जयन्ति ते सदा सन्तः सर्वथा यैरूपार्जितम्।
गुणानां सुमहद्वन्दं दोषाणां च विमार्जनम्।।1।।
अन्यतः सारमादाय कृतैषा काशिका यथा।
वृत्तिस्तस्या यथाशक्ति क्रियते पञ्जिका तथा।।2।।
`वृत्तौ'इत्यादि। अथ किमर्थः काशिकारम्भेऽस्य श्लोककस्योपन्यासः ? तस्यामग
ौरवपरिहारार्थः, गौरवप्रतिपादनार्थश्च। अत्र ह्यसति प्रागन्यासु वृत्तिषु रचितासु पश्चादियं रचितेति पुनरुक्ततादोषं सम्भावयतां तस्यामगौरवं स्यात्, न तु गौरवम्। अस्मिंस्तु सति न भवत्येष दोषः, यस्मादनेन स विशेषस्तस्या आख्यायते सम्यगशेषशब्दव्युत्पत्तिहेतुः, यस्मिन् सति
पुनरुक्ततादोषसम्भावनाऽगौरवहेतुर्न भवति, गौरवं चोत्पद्यते। स पुनरुक्ततादोषसभ्भावना! तस्यां चासत्यां नागौरवं भवति, किं तर्हि ?
पूर्वोक्ताद्विशेषाद्गौरवमेव। तत्र च वृत्तिः-पाणिनिप्रणीतानां सूत्राणां विवरणं चूल्लिभट्टिनल्लूरादिविरचितम्। भाष्यं कात्यायनप्रणीतानां वाक्यानां विवरणं पतञ्जलिप्रणीतम्। `तथा' इति समुच्चये। धातुनामपारायमादिषु चेत्यर्थः। अथ वा सादृश्ये। यथा वृत्त्यादौ
विप्रकीर्णस्य तन्त्रस्य सारसंग्रहः क्रियतेतथा धातुनामपारायणादिष्विति यावत्।
धातवो भूवादयः नामानि प्रातिपदिकानि, तेषां परां पर्यन्तं निष्ठामयन्ते गच्छन्ति
याभ्यां शास्त्राभ्यां ते धातुनामपारायणे पारायणशब्दः प्रत्येकमभिसम्बध्यते- धातुपारायणं नामपारायणञ्चेति। ते आदी येषामिति बहुब्रीहिः। आदिशब्देन शिक्षादीनांग्रहणम्। `विप्रकीर्णस्य' इति। विक्षिप्तस्य, विस्तारितस्येत्यर्थः। तन्त्रस्य व्याकरण-
शास्त्रस्येत्यर्थः। तद्धि तन्त्रमिव तन्त्रम्। दैर्ध्येण प्रसारहितास्तन्त-
वस्तन्त्रमित्युच्यन्ते। तथा तदनेकस्य तिरश्चीनस्य तन्तोरनुग्राहकम्, तथेदमप्यनेकस्य लक्ष्यस्येति, एतदस्य तन्त्रेण साधर्म्यम्। अथ वा -तन्त्र्यन्ते व्युत्पाद्यन्ते शब्दा अनेनेति तन्त्रं व्याकरणम्। अनेकार्थत्वादद्धातुनाम् `तत्रि कुटुम्बधारणे(धा.पा.1978) इत्येष धातुरत्र व्युत्पादने वर्तते। अथ वा , तन्त्रं
सिद्धान्तः,`तन्त्रंप्रधाने सिद्धान्ते'(3.3.185) इत्यमरः) `सारसंग्रहः' इति। सारशब्दोऽयं नपुंसक-
लिङ्गो न्यायादनपेते वर्तते। तथा च अर्द्धर्चादिषु वक्ष्यति- `सारशब्द उत्कर्षे पूंलिङ्गो न्यायादनपेते नपुंसकम्'(2.4.31) इति। सम्यक् समस्ताद्वा गृह्यते लक्ष्यं लक्षणञ्चानेनेति संग्रहः। `ग्रहवृदृनिश्चिगमश्च'(3.3.58)ठइति करणेऽप्। सारञ्चासौ -
संग्रहश्चेति सारसंग्रहः। स पुनरयमेव काशिकाख्यो वृत्तिविशेषः। अत्र सारशब्देन -
निर्दोषतोद्भाविता। न हि सदोषस्य शास्त्रस्य न्यायावनपेतत्वमुपपद्यते;न्यायेन तस्य बोध्यमानत्वात्। संग्रहः शब्देनापि गुणवत्ता ख्याप्यते। न ह्यन्यथा सम्यक् सर्वं
लक्षणं लक्ष्यञ्चानेन शक्यते संग्रहीतुम्।
के पुनरत्र गुणाः ? इष्टयुपसंख्यानवत्त्वम्, शुद्धगणत्वम्, विवृतगूढसूत्रा-
र्थत्वम्; व्युत्पन्नरूपसिद्धित्वञ्च। तथा च वक्ष्यति शास्त्रान्ते--
इष्टयुपसंख्यानवती सुद्धगणा विवृत्तगूढसूत्रार्था।
व्युत्पन्नरूपसिद्धर्वृत्तिरियं काशिका नाम।।इति।
अथ वा संग्रहशब्दोऽयं भावसाधनः- संग्रहणं संग्रह=संक्षेप, शास्त्रभेदेन विप्रकीर्णस्य तन्त्रस्य पिण्डीकृत्यैकत्रावस्थापनमिति यावत्। सारशब्दस्तु प्रधानवचनः। यावता ग्रन्थसन्दरर्भेण परिपूर्णता शब्दव्युत्पत्तेर्भवति स सारः। सारस्य संग्रहः सार-
संग्रहः, तस्य करणं सुखोदग्रहणार्थम्। एकत्र हि व्यवस्थितस्य सुकरमुदग्रहणं भवति,
दुष्करन्तु विप्रकीर्णस्य। सारग्रहणं परिकरबन्धनिरासार्थम्। स हि तस्योपकारकत्वाव-
ङ्गम्, अप्रधानम्। इतरस्तु तेनैवोपकार्यत्वादङ्गि,प्रधनाम्।
`अथ' इत्यादि। अथशब्दोऽधिकारार्थः, अधिकारः = प्रस्तावः, शब्दानुशासन
शास्त्रं प्रस्तूयत इत्यमुमर्थमथशब्दो द्योतयति। `शब्दानुशासनम्' इत्येतावति

ह्यभिहिते सन्देहः स्यात्- किं शब्दानुशासनमारभ्यते ? पठ्यते? श्रूयते वा ? इति, अथशब्दप्रयोगे त्वर्थान्तरव्यवच्छेदेन प्रस्तूयत इत्येषोऽर्थो निश्चीयते। अनुशिष्यन्ते संस्क्रियन्ते व्युत्पाद्यन्तेऽनेन शब्दा इत्यनुशासनम्। शब्दानामनुशासनं
शब्दानुशासनम्।
अत्र केचिच्चोदयन्ति-- ```उभयप्राप्तौ कर्मणि' (2.3.66)इत्यनेनात्र षष्ठी, ततश्च `कर्मणि च ' (2.2.14) समासप्रतिषेधेन भवितव्यम्''' इति,
एतच्चायुक्तम्; यत्र ह्युभयोः प्राप्तिस्तत्रानेन कर्मणि दोहोऽशिक्षितेनागोपालकेनेति, एवं नाम दुर्दोहानां गवामशिक्षितेनागोपालकेन दोहइत्याश्चर्यभूतोऽत्र गवां दोहः प्रतिपादयितुमा-
श्चर्यशब्दः, नान्यथेति सामर्थ्यप्राप्तमुभयोरुपादानम्। शब्दानुशासनमित्यत्र तु
शब्दानामिदमनुशासनम्, नार्थानाम्- इत्येतावतोऽर्थस्य विवक्षितत्वात्,
तस्याचार्यस्य कर्त्तृरूपादानमन्तरेणापि प्रतिपादयितुं शक्यत्वादाचार्योपदानमकिञ्चित्करम्।तस्मान्नात्रास्ति द्वयोरति=कर्तृकर्मणओओओओओओओः
सामर्थ्यप्राप्तमुपादानम्। ततश्चोभयप्राप्तिरपि नास्त्येव। असत्याञ्च तस्यां न `उभयप्राप्तौ कर्मणि' (3.2.66)
इत्यनेन षष्ठी, केन तर्हि? `कर्त्तृकर्मणोओः कृति' (2.3.65)इत्यनेन। ततश्चेष्मप्र-
व्रश्चनवत् समासो भविष्यति। अथ वा, शेषलक्षमैवेयं षष्ठीत्यचोद्यमेतत्।
व्याकरणस्यचेदमन्वयर्थं नाम शब्दानुशासनमिति। अतस्तेनैव सूचित्तवात् प्रयोजनस्यानभिधानम्। ये हि शब्दा अनुशिष्यन्ते, तस्य तदुद्देशे प्रवृत्तिः। यस्य च यदुद्दिश्य प्रवृत्तिः , तत्तस्य प्रयोजनं भवति। तदेतदुक्तं भवति- शब्दानुशिष्टि-
रस्य प्रयोजनमिति। एतच्च साक्षात् प्रयोजनम्, पारम्पर्येण तु वेदरक्षणादीनि
प्रयोजनानि भाष्यादवधार्याणि। सम्बन्धस्तु साध्यसाधनभावलक्षमः। शब्दानुशिष्टेः
साध्यायाः; व्याकरणस्य साधनस्य च यः सम्बन्धः, स प्रयोजन एवान्तभूतः।
`केषां शब्दानाम्' इति। कथं पुनरनुशासने गुणीभूतानां शब्दानां किंशब्देन
प्रत्यवमर्शो भवति ? नैषः दोषः; प्रधाने ह्यन्तर्भूतस्याप्युपसर्जनस्य बुद्ध्या
प्रविभज्य किंशब्देन प्रत्यवमर्शो दृष्टः, यथा- राजपुरुषोऽयम्, कस्य राज्ञ इति। कः पुनरत्र प्रष्टुरभिप्रायः ? एवं मन्यते- शब्दानुशासनमित्यत्र शब्दशब्दः सामान्य
वचनः। न च सामान्यशब्द प्रकरणादिरहितो विंशेषे वर्त्तितुमुत्सहते, सन्ति च समुद्र-घोषादयोऽपि बहवः शब्दाः, अतस्तेषामपि व्युत्पादनं प्राप्नोतीति ? इह तु व्याकरणं
प्रस्तुतम्, तच्च बेदाङ्गम्, अङ्गञ्चोपकारकं भवति। एवञ्च तद्वेदस्योपकारकं भवति यदि तेनैव वैदिकाः शब्दाः संस्क्रियन्ते, लौकिकाश्च तदुपकारिणः।
वैदिकोपकारित्वं तु लौकिकानाम; तैस्तदर्थस्याख्यानात्। तस्माच्छब्दानुशासनाधिकाराद्विशिष्टा एवात्र शब्दा व्युत्पादयितुमभीष्टाः,न तु समुद्रघोषादयोऽपि।
तथाविधशब्दरव्युत्पादने हि व्याकरणस्यावेदाङ्गतापि स्यादिति मन्यमान आह`लौकिकानाम्' इत्यादि। लोके विदिता लौकिकाः,
तत्र विदित इत्यनुवर्तमाने `लोकसर्वलोकाट्ठञ्' (5.1.44) इति ठञ्। अथ वा , लोके भवा लौकिकाः- अध्यात्मादित्वाट्ठञ् (वा.456)। एवं वैदिकाः। वैदिकानां लौकिकेभ्यः
पृथगुपादानं प्राधान्यख्यापनार्थम्। यथा- `ब्राह्मणा आयाताः, वसिष्ठोऽप्यायाताः' इैइति। अत्र ब्राह्मणत्वादेव वसिष्ठस्याप्यागमने सिद्धे प्राधान्यख्यापनार्थं तस्य पृथगुपादानम्। प्राधान्यख्यापनं तु वैदिकानां यत्नेनापभ्रंश निरासार्थम्। तेषां
ह्यपभ्रंशे याज्ञे कर्मणि महान् प्रत्यवायो दृष्टः- `हेलयो हेलयः' इति। अथ वा, ये
लोकायात्रा हेतवो भाषाशब्दास्तैरेव लौकिकत्वं प्रसिद्धमिति वैदिकानां पृथगुपादानम्। तत्र लौकिका अनियतवर्णानुपूर्वीकाः- गौः,अश्वः,पुरुषः, हस्तीत्येवमादयः।
वैदिकास्तु नियतानुपूर्वीकाः- `शन्नो देवीरभिष्टये' (ऋ.10.9.4)इत्येवमादयः।
इह ह्यन्वाख्याने प्रतिपदपाठोऽभ्युपेयः। तस्यापि त्रयः प्रकाराः- शब्दाप-
शब्दोभयोपदेशभेदेन। आनन्त्याच्च शब्दानां स सर्वथाप्यसम्भवः। एवं हि श्रूयते- `बृह-
स्पति किलेन्द्राय दिव्यं वर्षसहस्रं प्रतिपदविहितानां पारायणं प्रोवाच, न चान्तं
जगाम' इति। तदीदृशे वक्तर्यध्येतर्यध्ययकाले च नान्तगमनमभूद्यस्य, तस्य कुतोऽ-
द्यत्वे भविष्यति स्वल्पायुषि प्रजयाम्। न चान्योऽभ्युपायोऽस्तीति मन्यमान् आह- `कथम्' इत्यादि। कथमनुशासनम् ? न केनचित् प्रकारेण शब्दानां
व्याकरणमनुशासनमित्यर्थः। अथ वा भावसाधनोऽत्रानुशासनशब्दः। अनुशिष्टिरनुशासनम्- संस्कारः, न कथञ्चिच्छब्दानां संस्कारः सम्भवतीति यावत्।
येनाल्पेनैव प्रयत्नेन महतः शब्दौघान् प्रतिपद्येत, तदुपायन्तरं दर्शयितुमाह- `प्रकृत्यादिविभाग' परिकल्पनया' इत्यादि। प्रत्ययात् प्रथमं क्रियत इति प्रकृतिः,
प्रकृतिरादियषां ते प्रकृत्यादयः, आदिशब्दः प्रत्ययादीनां परिग्रहाय, तेषां विभगोऽसंकीर्णरूपता,तस्य कल्पना परिकल्पिकया बुद्ध्या परिकल्पनम्; तया परिकल्पनया शब्दानामनुशासनं व्याकरणनुशिष्टिर्वा। हेताविदयं तृतीया। न हि तया विना व्याकरणमनुशासनं भवति; नापि तेन विनानुशिष्टिः शब्दानां

शक्यते कर्तुम्। परिकल्पनयेत्यनेनैतत्
प्रतिपादयति। कल्पनामात्रं प्रकृत्यादिविभागः, परमार्थवस्तु; प्रत्यस्तमितप्रकृत्यादिविभागः समुदाय एव कस्यचिदर्थस्य वाचक इति।
`सामान्यविशेषवता लक्षणेन' इति। करण एषा तृतीया। सामान्यञ्च
विशेषश्च सामान्यविशेषौ तौ यस्मिन् लक्षणे स्तस्तत् सामान्यविशेषवल्लक्षमम्।
तत्रोत्सर्गलक्षणं सामान्यवत्,यथा `कर्मण्यण्' (3.2.1)इति। तत्र हि `धातोः' इत्येततअनुपसर्ग इति च विशेषः। तत्र सामान्यवता लक्षणेन प्रकृत्यादिविभागः परिकल्पनया कुम्भकारः, काण्डलावः, शरलावः- इत्यवमादिकं महान्तं शब्दौघं प्रतिपद्यते। विसेषवता तु
पार्ष्णित्रः, गोदः, कम्बलद इत्यवमादिकम्। एवमन्यत्रापि वेदितव्यम्।

प्रत्याहारप्रकरणम्।
`अथ' इत्यादि। एवं मन्यते- शब्दानुशासनमधिकृतम्, तत्र यन शब्दा अनुशिष्यन्ते
तस्यैवोपदेशो युक्तः न चैषामुपदेशेन कस्यचिच्छब्दस्य संस्कारः क्रियते;
ततश्चाप्रस्तुतभिधानमिति प्रश्नस्याभिप्रायः। `वर्णानाम्' इत। वर्णा अकारादयः, तेषामाद्युच्चारणमुपदेशः। `प्रत्याहार्थः' इति। प्रत्याहारः `अइउण्' (मा.सू.1) इत्येवमादिको विशिष्टानुपूर्वीको विशिष्टानुबन्धकश्चाक्षरसमाम्नायः, प्रत्याह्रियन्ते
संक्षिप्यन्ते वर्णा अस्मिन्निति कृत्वा। स यता स्यादित्येवमर्थो वर्णानामुपदेशः। कस्यादेतत्। तस्यापि प्रकृतानुपयोगित्वात् तदवस्थ एवैष दोष इत्यत आह- `प्रत्याहारो
लाघवेन' इत्यादि। लघोर्भावो लाघवम्, तत् पुनरल्पप्रयासः। अल्पप्रयाससाध्यं हि
वस्त्वल्पप्रयत्नयोगाल्लगूच्यते।तेन लाघवेन शास्त्रस्य ढ्रलोपे पूर्वस्य दीर्घोऽणः(6.3.111) इत्येवमादेः प्रवृत्त्यर्थोऽभिनिर्वृत्यर्थ इत्यर्थः। सति हि प्रत्यहारे `आदिरन्त्येन सहेता'(1.1.71) इत्येतत् प्रवर्त्तते। तत्प्रवृत्तौ चाकारादीनामणित्येवमादिकाः संज्ञाः सिध्यन्ति। ततश्च यत्राकारादीनां ग्रहणमिष्टं तत्राणित्येवमादिकयैव संज्ञया बहवोऽपि ते निर्दिश्यन्त इति लाघवेन शास्त्रस्याभिनिर्वृत्तिर्भवति। तस्मिश्चासति `आदिरन्त्येन सहेता' इत्येवमादेः शास्त्रस्य प्रवृत्तिर्न स्यात्; आद्यन्तयोरभावात्। न ह्यसति सन्निवेशविशेषे तावुपपद्येते,
असत्याञ्च तत्प्रवृत्तरौ पूर्वोक्ताः संज्ञा न स्युतः। ततश्च यत्र यत्र सूत्रेऽका-
कारादीनां यावतां ग्रहणमिष्टं तत्र ते तावन्तः स्वरूपेणैव निर्दिश्येरन्निति लाघवेन शास्त्रस्य प्रवृत्तिर्न स्यात्। तदेवं प्रकृतस्यैवाल्पप्रयासेन निष्पादनार्थ-त्वान्न भवति पूर्वदोषावसरः।
1.अइउण्।
अथ कस्मादिहाद् गुणादिकमच्कार्य न भवति? 'प्लुतप्रगृह्याअचि'(6.1.125) इति प्रकृतिभावात्। प्रगृह्यत्वं तु तेषां 'निपात एकाजनाङ्' (1.1.14)इति प्रगृह्यसंज्ञाविधानात्। निपातत्वं तु चाजिषु पाठात्। अत एव निपातत्वादर्थवत्वे चोत्पन्नाया
विभक्तेः श्रवणं न भवति।इहानार्थवत्वे विभक्त्युत्पत्तिरनर्थकस्ययापि निपातस्य प्रातिपदिकसंज्ञोपसंख्यानाद्देदितव्या। 'अनेन क्रमेण'इति। अनयाऽऽनुपूर्व्या। किं पुनःकारणमयमेव क्रम आश्रीयतेः न क्रमान्तरम्? तदुच्यतेः इहाणग्रहणेन त्रयाणामध्येषामकारादीनां ग्रहणमिष्यते, इण्ग्रहणे त्वकारस्य ग्रहणं नेष्यते, उण्ग्रहणे पुनरकारयोर्दयोरपि । एतच्च क्रमान्तराश्रयणे न सम्पद्यत इत्येष्वेवं क्रम आश्रीयते।
'वर्णात कारः'(वा.320) इति कारप्रत्यस्योपसंख्यानादिह च तदकरणन्नैते वर्णाः,अपि तु तच्छायानुकारिणोऽन्य एव सन्ध्यक्षरराविवर्णैकदेशा इति कस्यचिदाशङ्काक्डा
स्यात्; अतस्तन्निराकरणायाह-'वर्णान्'इति। कारप्रत्ययस्तु 'रोगाख्यायां ण्व्वल बहुलम्'(3.3.108)इत्यत्रोपसंख्यायते। तेन षबहुल्वनचाैतल्सत्यपि वर्णत्वे न भवतीति
भावः। णकारस्य पूर्वोत्तरवर्णान्तरःपातित्वात् मध्यभावः, नान्त्यत्वम्; अत
इत्संज्ञया न भवितव्यम् ? अथापि कथञ्चिदन्त्यत्वं स्यात्? एवमपि वक्ष्यमाणेन न्यायेनाप्रधानत्वाद् यथा तत्राच्कार्यमस्य न भवति तथेत्संज्ञापि न भवेदिति यस्य
भ्रान्तिः स्यात्, तं प्रत्यन्त इत्युक्तम्, इतमिति च । यद्यपि पूर्वोत्तरवर्णा-
पेक्षयाऽस्य मध्यमभावः, तथापि पूर्ववर्णापेक्षयान्त्यत्वमस्त्येव। सति च
तस्मिन्नप्रधानस्यपीत्संज्ञया भवितव्यम्; उपदेशसामर्थ्यात्। अन्यथा हि तदुपदेश-
वैयर्थ्यं स्यात्। `आदिरन्त्येन सहेता' (1.1.71) इत्यनेनाणित्येवमादिकाः संज्ञा यथा स्युरित्येवमर्थो णकारादीनामनुबन्धानामुपदेशः। स च तदर्थोऽसत्यामित्संज्ञायां न
स्यादित्यभिप्रायः। `तस्य' इत्यादि। `एकेन' इति सहारथयोगे तृतीया, `तस्य' इति
इति कर्मणि षष्ठी। तस्य णकारस्य प्रदेशवाक्येषु संज्ञिप्रत्यायनार्थमेकेनैवाकारेण सहोपदानां भवति।स ह्यकारादीनां वर्णानामकारसहित एव संज्ञा, न

केवलः, नापि
वर्णान्तरसहितः। तस्मात् प्रत्यायनार्थं तेनैव सहोपादीयते, न केवलः, नापि वर्णान्तरसहितः।
अभ्ये त्वाहुः - तस्येति कर्त्तरि षष्ठी; एकेनेति च सहयोगे तृतीया।
तेनायमर्थः-आदिवर्णसहितो णकारोऽन्येषां मध्यपातिनां वर्णानां ग्राहको भवत्यादिवर्णस्य चेति।
अपरे आहुः- अनेकार्थ्वाद्धातूनां गृह्णातिरत्रोच्चारणे वर्त्तते `ग्रहणवता प्रातिपदिकेन' (व्या.प.89) इति यथा। तेनायमर्थ-- तस्यैकेन सहोच्चारणं भवतीति। अथ
`इणः षीध्वम्' (8.3.78) इत्यत्रेकारेणास्य ग्रहणं न भवतीति कुतोऽवसितम् ? `अति
श्नुधातुभ्रुवां य्वोः' (6.4.77) इतीकारोकारयोः संसृज्य निर्देशात्। यदीकारेणास्य
ग्रहणं स्यात् ततो लाघवार्थं `इण्' इत्येव निर्दिशेत्। `य्वोः' इति संसृज्य
निर्देशेऽर्धचतस्त्रो मात्रा भवन्ति, इणिति निर्देशे तिस्त्रः, तत्र लघीयसा न्यासेन सिद्धे यद्गरीयासं प्रयत्नमारभते ततो ज्ञायते नास्य णकारस्येकारेण ग्रहणं भवतीति। इह तर्हि `कृवापाजिमिस्विदिसाध्यशूभ्य उण्' (द.उ. 1.86) इत्युकारेण ग्रहणं
कस्मान्न भवति ? उकारादन्यस्य ग्राह्यस्याभावात्, तस्य च स्वरूपेणैव
निर्देशात्।
`ह्रस्वमवर्णम्'इत्यादि। प्रयुज्यत इति प्रयोगो धात्वादिः। ह्रस्वमवर्ण
प्रयोगगे संवृतम्। संवृतगुणयोगात् संवृतम्। यथा शुक्लगुणयोगात् शुकक्लः पट इति।
`दीर्घप्लुतयोस्तु विवृतत्वम्' इति। विवृतगुणयोगित्वनमित्यर्थः। तथा चाहुः शिक्षा
काराः- `विवृतकरणाः स्वराः, तेभ्य ए ओ विवृततरौ, ताभ्यामपि ऐ औ, एताभ्यामप्याकारः, संवृतोऽकारः'इति। `तेषाम्' इत्यादि। तेषां ह्रस्वादीनां
`तुल्यास्यप्रयत्नं
संवर्णम्' (1.1.9) इति सवर्णसंज्ञा यथास्यादित्येवमर्थमिह शास्त्रे ह्रस्वोऽकारो
विवृतगुणोऽभ्युपगम्यते। अन्यथा हि भिन्नत्वात् प्रयत्नस्यासति सावर्ण्ये दण्डाढकमित्यादौ `अकः सवर्णे दीर्घः' (6.1.101) इति दीर्घत्वं न स्यातत्। ननु च सत्यपि विवृतत्वप्रतिज्ञानैव ह्रस्वप्लुतयोरकः सवर्णे दीर्घत्वं प्राप्नोति, तस्मिन् कर्त्तव्ये प्लुतस्यासिद्धत्वात्, नैष दोषः; `सिद्धः प्लुतः स्वरसन्धिषु' इत स्वरसन्धिषु
प्लुतस्य सिद्धत्वात्त; इतरथा हि `प्लुतप्रगृह्या अचि' (6.1.125) इत प्रकृतिभाव-
विधानमनर्थकं स्यात्। अत्र च यद्यपि `विवृतः प्रतिज्ञायते' इत्युक्तम्, तथापि तेषां सावर्ण्यप्रसिद्ध्यर्थमिति वचनाद्ववृततर इति गम्यते। न हि विवृतस्य विवृततरेण
सावर्ण्यमुपपद्यते; प्रयत्नभेदात्; विवृतत्वप्रतिज्ञानसामर्थ्याद्वा।
अविवृततरस्यापि विवृततरेण सावर्ण्यं भविष्यति। यदि`इह' इत्येतावदेवोच्येत, तदा
प्रत्यासत्तेः प्रकृतत्वाच्चक्षरसमाम्नायिक एव विवृतः प्रतिज्ञायत इति विज्ञायेत्, न धातुप्रातिपदिकप्रत्ययनिपातस्थः; ततः प्रयत्नभेदादसति सावर्ण्ये
आक्षरसमाम्नायिकेन तस्याग्रहणादच्त्वं न स्यात्। तस्मिश्चासति शाम्यतीत्यत्राच्परि-
भाषानुपस्थानात् स्थानिनोऽकारस्याच्त्वाभावात् `शमामष्टानां दीर्घः श्यनि' (7.3.74) इति दीर्घत्वं न स्यात्। दृषद् इत्यत्र प्रातिपदिकस्यान्त उदात्तो भवतीति अन्तोदात्तत्वं नस्यात्; तस्याज्धर्मत्वात्। नायक इत्यत्र प्रत्ययस्याकारस्यानच्त्वात्
तत्रायादेशो न स्यात्। अवनमतीत्यत्र `निपाता आद्युदात्ताः' (फि.सू.4.80) `उपसर्गाश्चाभिवर्जम्' (फि.सू.4.81) इत्याद्युदात्तत्वं न स्यात्। किञ्च
अनुवृत्तिनिर्देशस्थे-नाकारे णासति सावर्ण्ये दीर्घस्य ग्रहणं न स्यात्। तत्र को दोषः? `अस्य च्वौ' (6.4.32) इतीहैव स्यादीत्त्वम् शुक्लीभवतीति;
मालीभवतीत्यत्र तु न स्यात्। `यस्येति च' (6.4.148) इतीहैव स्यादकारलोपः वाक्षिः, प्लाक्षिरिति, वालाकिरित्यत्र तु न स्यात्। तस्माद्यावत् किञ्चिदवर्णमात्रमिह शास्त्रे तस्य सर्वस्य विवृतत्वं प्रतिज्ञायत
इति प्रदर्शनार्थ शास्त्रग्रहणं कृतम्। ननु च सत्यपि सावर्ण्ये नैवानुवृत्तिनिर्देशस्थेनाकारेण सवर्णानां ग्रहणं सिध्यति; अनण्त्वात्। न ह्यनुवृत्तिनिर्देशे येऽकारादयस्तेऽणः, किं तर्हि ? ये अक्षरसमाम्नाये। जातिपक्षाश्रयाददोष इति चेत् ? न; जातिपक्षे ग्रहणकशास्त्रस्य प्रत्याख्यानान्नैष दोषः। इह हि व्यक्तिषु द्वयमस्ति--
सादृश्यम्,भेदश्च। तत्र कदाचित् किञ्चित्प्राधान्येन विवक्ष्यते, यदा सादृश्यं
विविक्ष्यतेतदा तस्य भागस्य सदृशस्य सर्वासु व्यक्तिषु समानत्वादशेषव्यक्त्या-
क्षेपो भवति; भेदस्यापरामृष्टत्वात्। सोऽयं प्रत्याहारे सदृशभागः प्रधान उपदेश इति सर्वासामवर्णव्यक्तीनामनुवृत्तिनिर्देशस्थानामण्त्वमुपपद्यते। कः पुनरस्य सादृश्यस्यावर्णजातेश्च विशेषः ? अयमस्ति विशेषः- एतच्च सादश्यं
ह्रस्वास्वेवावर्णव्यक्तिषु वर्त्तते, न दीर्घप्लुतासु। अवर्णजातिस्तु दीर्घप्लुता-

स्वपि वर्त्तत इति गतमेतत्।
अथ कथमेतदवगम्यते अकार इह शास्त्रे विवृतः प्रतिज्ञायत
इत्यत आह- `तस्य' इत्यादि। यदि पूर्वं निवृतोऽकारो न प्रतिज्ञायेत, ततस्तस्याप्रयोगार्थम् `अ अ' (8.4.68) इत्यनेन प्रत्यापत्तिं न कुर्यात्। स्वरूपाद्धि प्रच्युतस्यपुनस्तत्प्राप्तिः- प्रत्यापत्तिः, सा कथमविचलितस्वरूपस्यैवोपपद्येत ? अथ वा, यदि विवृतः प्रतिज्ञायते, तदा तस्य शास्त्रस्य परिसमाप्तावपि तथाभूतस्यैव प्रयोगः
स्यात् ? इति पूर्वपक्षमाशङ्क्याह- `तस्य' इत्यादि। अर्थशब्दो निवृत्तिवचनः, यथा-मशकार्थो धूम इति। तस्य विवृतस्य प्रयोगनिवृत्तिर्यथा स्यादित्यर्थः। अथ वा - अर्थ-
शब्दः प्रयोजनवचनः, तस्येत्यनेन संवृतः प्रत्यवमृश्यते, प्रयोगोऽर्थः प्रयोजनं
यस्य तत् तथोक्तम्। क्रियाविशेषणत्वान्नपुंसकत्वम्। तदेतदुक्तं भवति- तस्य संवतस्य स्वरूपात् प्रच्युतस्य प्रयोगनिमित्तं प्रत्यापत्तिः करिष्यते; यतः शास्त्रपरि-
समाप्तौ ततो न भवति तथाभूतस्यैवायं प्रयोगः इति।

2.ऋलृक।
`तस्य ग्रहणं भवति त्रिभिः' इति। कथं त्रिभिर्ग्रहणं लभ्यते? यदि समुदायानुबन्धः, अवयवानुबन्धो न; अथ चावयवानुबन्धः, न तदा समुदायानुबन्ध इत्येकनैव ग्रहणं स्यात् ? नैष दोष; प्रतिज्ञया त्वनुबन्धानां व्यवहारः। प्रतिज्ञा तु
पौरुषेयी, पुरुषश्चोभयत्र प्रतिज्ञानं कुर्वन्न विरमति; विरोधाभावात्। न हि समुदायानुबन्धता अवयवानुबन्धप्रतिज्ञया विरुध्यते, इतरया न चेतरेति। तस्माद्युक्तमुक्तम्-
त्रिभिर्ग्रहणं भवतीति। एवं सर्वत्र योजनीयम्।
इह शास्त्रे वर्णानुमुपदेशः प्रयोजनवशात्। लृकारोपदेशस्य न किञ्चित् प्रयोजनं सम्भवतीत्यभिप्रायेणाह- `अकारादयो वर्णाः' इति। प्रयुज्यते इति प्रयोगः= धात्वादिः; अनन्यत्रभावो विषयार्थः, प्रचुरः प्रभूतः प्रयोगो विषयो येषामिति
बहुव्रीहिः। अथ वा, प्रयुक्तिः= प्रयोगः उच्चारणम्, तस्य विषय इति षष्ठीसमासः। तस्य प्रचुरशब्देन बहुव्रीहिः। `तेषां सुज्ञानमुपदेशे प्रयोजनं पृच्छयत इति, अस्य वचन-
स्यावकाशनिरासार्थमुक्तम्. यदि ह्येतन्नोच्येत, लृकारस्यैव तु केवलं प्रयोजनं

प्रच्छ्यत इति, तदा स्यादस्य वचनस्यावकाशः।
`लृकारस्तु क्लृपिस्थ एव प्रयुज्यते' इति। तुशब्दोऽकारादिभ्यो विशेषार्थः। स्यादेतत्- क्लृपिसम्बन्धिनस्तस्य यान्यच्कार्याणि तदर्थमुपपेशः कर्त्तव्य इत्यत आह- `क्लुपेश्च' इत्यादि। यद्यसिद्धत्वं ततः किमित्याह- `तत्र ऋकार एव' इत्यादि। `लत्वविधानाद्यानि' इत्यादि। लत्वं विधीयते येन शास्त्रेण तल्लत्वविधानम्। करणे
ल्युट्। अथ वा-भावे विधिर्विधानम्। लत्वस्य विधानमिति षष्ठीसमासः। `ततदः पराणि'
इत्यादि। एतेन लत्वस्य तेषु सिद्धत्वं दर्शयति। पूर्वत्र हि परमसिद्धम्, न तु
परस्मिन् पूर्वम्। `क्लृ3प्तशिखः' इति। क्लृप्ता शिखा यस्येति बहुव्रीहिः।अत्र
`गुरोरनृतः' (8.2.86) इत्यादिना प्लुतो विधीयते। स च `अचश्च' (2.1.88)
इत्येवं स्थानिनमुपस्थापयति। लृकारस्याक्ष्वनुपदेशादसत्यच्त्वे स न स्यात्। `प
प्रक्लृप्तः' इति। अत्र `निपाता आद्युदात्ताः' (फि.सू. 4.80), `उपसर्गाश्चा-
भिवर्जम्' (फि.सू.4.81) इति प्रशब्दाकार उदात्तो भवति। लृकारोऽपि धातुस्वरेण
उदात्त एव। निष्ठाप्रत्ययस्वरे कृते `अनुदात्तं पदमेकवर्जम्' (6.1.158) इति
पश्चात् सोऽनुदात्तो भवति। `कुगतिप्रादयः' (2.2.18) इति समासे कृते समासान्तरोदात्तत्वे प्रसक्ते `कतिरनन्तरः' (6.2.49) इति पूर्वपदप्रकृतिभावेन प्रशबद् एवोदात्तः, तस्मात् परस्य लृकास्य `उदात्तादनुदात्तस्य स्वरितः' (8.4.66) इति स्वरितत्वं विधीयते, तदसत्यचत्वे न स्यात्; तस्याज्धर्मत्वात्।
`क्लृप्तः' क्लृप्तवान्' इति।
`अनचि च' (8.4.47) इति अच उत्तरस्य यरो द्वर्वचनं विधीयते, तदप्यनच्त्वे न स्यात्
। यदुक्तम् `क्लृपिस्थ एव प्रयुज्यते' इति, तद्विघटयन् प्रयोजनान्तरं दर्शयितुमाह- `यच्च' इत्यादि साधुशब्दोच्चारणशक्तेरन्या शक्तिः अशक्तिः, ततो जातम्- अशक्तिजम्। `तदनुकरणस्यापि साधुत्वमिष्यते' इति। अर्थभेदेन शब्दान्तरत्वात्, शिष्यप्रयुक्तत्वाच्च, तदन्यसाधुशब्दवत्। ननु

चानुकार्यस्यासाधुत्वादनुकरणस्यासाधुत्वेन भाव्यम् `प्रकृतिवदनुकरणं भवति' इति वचनात्, नैतदस्ति; शास्त्रीया हि तत्र प्रकृतिराश्रीयते। प्रकृतिवदिति च शास्त्रनिबन्धनमेव कार्यमतिदिश्यते। न चाशक्तिजमसाधुशब्दरूपं
शास्त्रीया प्रकृतिः, नाप्यपशब्दत्वं शास्त्रनिबन्धनं कार्यम्। न हि शक्यं व्याकरणेनाप्यपशब्दत्वमाख्यातुम्, तस्य साधुशब्दसंस्कारायैव प्रवृत्तत्वात्। तस्माद-
पशब्दसयाप्यनुकरणं साध्वेव। तत्र तत्स्थस्यापि लृकारस्याच्कार्याणि न स्युः, यद्य7ु तस्योपदेशो न स्यात्। `कुमार्य्लृतकः'इति। आत्राच्त्वे सति
लृकारस्य तत्र परतो यणादेशो भयति। ननु च `इको यणचि' (6.1.77) इत्यत्र संख्यातानुपदेशोऽपि लृकारोपदेशस्य
प्रयोजनमुपपद्यत एव। असति लृकारोपदेशे तस्य युक्तं प्रयोजनम् ? न चैतदस्ति; मा भूत्संख्यातानुदेशः, असत्यपि तस्मिन् `स्थानेऽन्तरतमः'(1.1.50) इति परिभाषया व्यवस्था
भविष्यति। इत्संज्ञा तर्ह्यपरं पर्योजनम्, उपदेशे ह्यसति `गम्लृ सृप्लृ गतौ' (धा.पा.982,983) इत्यादिषु `उपदेशेऽजनुनासिकः' (1.3.2) इतीत्संज्ञा न स्यात्। तस्यां
चासत्यां `पुषादिद्युताद्यलृदितः परस्मैपदेषु' (3.1.55) इति अङ् न स्यात्, नैतदस्ति; असत्यप्युपदेशे अस्मादेव लृदितो धातोरङ्गविधानादित्संज्ञा विधास्यते इति नाक्षु
प्रयोजनमुपदेशस्य। तस्मात् पूर्वोक्तान्येव प्रयोजनानि। तानि च ऋकारलृकारयोः सवर्ण-
संज्ञा वक्तव्येत्येतदनाश्रित्योक्तानि। अत्र ह्याश्रिते सत्यस्त्यपि लृकारोपदेशे `
अणुदित्सवर्णस्य च' (1.1.69) इति ऋकारेण गृह्यमाणे लृकारस्य ग्रहणादेव सिध्यन्ति।

3. एओङ्।
`पूर्वाश्च' नोक्तम्, पूर्वेरस्य ग्रहणासम्भवात्। अथ `षिद्भिदादिभ्योऽङ्' (3.3.104) इत्यत्राकारेणास्य कस्माद्ग्रहणं न भवति? तत्र केचिदाहुः-`आदिरन्त्येन सहेता' (1.1.71) इत्यत्र `अणुदित्सवर्णस्य चाप्रत्ययः' (1.1.69) इत्यतोऽप्रत्यय-
ग्रहणमनुवर्त्तते, तेनायमर्थः सम्पद्यते- आदिरन्त्येन ग्राहको भवति, न चेत् प
प्रत्ययो भवतीति। प्रत्ययश्चायम्, तेन ग्राहको न भवति। एवञ्च `सुप्तिङन्तं पदम्' (1.4.14) इत्यावावपि प्रत्ययो ग्राहको न स्यात्। तस्मादनभिधानादिह प्रत्याहारग्रहणं न भवतीति वेदितव्यम्। अभिधानलक्षणा हि कृत्तद्धितसमासा भवन्ति। न च `षिद्भिदादि-
भ्योऽङ्' (3.3.104) इति अकारादिप्रत्ययोत्पत्तौ विवक्षितार्थाभिधानं भवति। इह
तर्हि `शास इदङ्हलोः' (6.4.34)`ऋदृशोऽङि गुणः'(7.4.16) इति चाकारेण
प्रत्याहारग्रहणं कस्मान्न भवति? चिण्सदृशस्य चङसदृशस्य चाङो ग्रहणात्। `शास इदङ-
हलोः' इत्यत्र हि `भञ्जेश्च चिणि'(6.4.33) इत्यनुवर्तते। `ऋदृशोऽङि गुणः' 97.4.16)इत्यत्रापि `णौ चङ्युपषाया ह्रस्वः' (7.4.1)। अतो मण्डुकप्लुतिन्यायेन चङग्रहणेन
समानाधिकरणेनाङ विशेष्यते-चङ्यङीतीति, न चाङः चङभवति; अतिविलक्षणत्वात्। तत्र
सामर्थ्यादिवार्थो गम्यते। परपदार्थेषु हि प्रयुज्यमानाः शब्दा अन्तरेणापि इवशब्द-
प्रयोगमिवशब्दार्थ गमयन्ति, यथा-अग्निर्माणवकः, गौर्वाहीकः इति।तेनायमर्थो भवति-
चङीवाङीति, चङसदृशोऽङित्यर्थः। कश्च चङसदृशोऽङ ? यश्च्लेः स्थाने विहितः। तथा च
च्लिस्थानिकस्यैवाङो ग्रहणं सम्पद्यते, न तु प्रत्याहारस्य। एवं `शास इदङहलोः'(6.4.34)इत्यत्रापि च्लिग्रहणेनाङि विशेष्यमाणे च्लिस्थानिकस्यैवाङो ग्रहणं वेदितव्यम्। इह तर्हि `सनि च' (2.4.47) `इङश्च'(2.4.48) इति,`परिमाणाख्यायां
सर्वेभ्यः' (3.3.20) `इङश्च' (3.3.21) इति च कस्मादिकारेण प्रत्याहारग्रहणं न
भवति ? पूर्वत्र तावन्न भवति, `इको झल्' (1.2.9) इति कित्त्वविधानात्। प्रत्याहारे ह्येतस्मिन् सनि गम्यादेशविधानादिगन्तत्वाभावे गुणस्याप्राप्त्या कित्त्वविधानमन-
र्थकं स्यात्। पूर्वत्र तावन्न भवति, यदि हि स्यात्इक इति ककारेणैव प्रत्याहारं
कुर्यात्। न ह्यङन्ताद्धातोः परस्य सनः सम्भवोऽस्ति; यतः प्रत्याहारग्रहणं ङकारेणार्थवद्भवति। परत्रापि न भवति; वैयर्थ्यप्रसङ्गात्। तथा हि इकारान्तेभ्यः `एरच्'
(3.3.56) इत्यचा भवितव्यम्, उकारन्तेभ्योऽपि `ऋदोरप्'(3.3.21)इत्यपा।
लृकारान्ता न सन्त्येव। एजन्तानां प्रागेव प्रत्ययोत्पत्तेः `आदेच उपदेशेऽशिति(6.1.45)इत्यात्त्वेन भवितव्यम्, अतस्तेऽपि प्रत्ययविधानकाले न सन्त्येवेति। ऋकार एक
एवावशिष्यते, ततो यदि घञ् विधित्सितः,अपार्थकं प्रत्याहारग्रहणं स्यात्, उरित्येव
ब्रूयात्। `क्रीङजीनां णौ' (6.1.48) इत्यत्रापि क्रिणातिजयत्योः पृथगुपादानादिकरेण

ग्रहणं न भवति। इकारान्तानां मध्ये तयोरेव यता स्यादिति नियमार्थं पृथगुपादानमिति
चेत् न; एवमपि ककारेणैव प्रत्याहारं कुर्यात्, एजन्तानामात्त्वस्य सामान्यलक्षणेनैव सिद्धत्वात्। `इङधार्य्योः शत्रकृच्छ्रिणि' (3.2.130) इत्यात्रापि
धारयतिना धातुना साहचर्यात् `इङ' इत धातोर्ग्रहणम्, न प्रत्याहारस्येति वेदितव्यम्।

4.ऐऔच्।
इह `आदिरन्त्येन सहेता' (1.1.71) इत्यनेन सूत्रेणाकारादीनामजित्येषा
संज्ञा विधीयते। सा च यथा इकारादीनां भवति, तथा णकारादीनामप्यनुबद्धानां स्यात्; तेषामपि तत्रोपदेशात्। ततश्च तया प्रदेशान्तरे `इको यणचि' (6.1.77) इत्येवमादौ तेषु
प्रातिपदिकेषु यथा दध्यत्रेत्यादौ यणादेशो भवति, तथा दधि णकारीयतीत्यादावपि
स्यादित्यभिप्रायेणाह- `प्रत्याहारे' इत्यादि। कथमज्ग्रहणेषु नेति कार्यमिति शेषः। `अचः' इत्यस्याः संज्ञायाः प्रदेशवाक्येषु ग्रहणानि उच्चारणानि अज्ग्रहणानि। तेषु
सत्सु णकारादीनां कथमच्कार्यं न भवेत्। भवेदेवेत्यर्थः। `आचारात्' इति। आचरणमाचारः=आचार्यप्रृत्तिः, ततो ज्ञापकान्न भवति। यदयम् `उणादयो बहुपलम्' (3.3.1),
`तृषिमृषिकृशेः काश्यपस्य' (1.2.25), `ङमोह्रस्वादचि ङमुण् नित्यम्' (8.3.32),
`ङसिङसोश्च' (6.1.110) इति णकारादिषु परतो यणादेशं न करोति, ततो ज्ञापयति
`सत्यामप्यच्संज्ञायामच्कार्याणि न भवन्ति' इति। अथ वा - `अजित्येषैव संज्ञैषां न
भवति' इत्येषोऽर्थोऽनया आचार्यप्रवृत्त्या ज्ञाप्यते।यदि हि संज्ञा स्यात् आचार्यस्तेष्वच्कार्याणि कुर्यात्। एवं ज्ञापकेन संज्ञाभावं प्रतिपाद्य, इदानीं न्यायेन
प्रतिपादयितुमाह- `अप्रधानत्वात्' इति। अणित्येवमादिकाः संज्ञाः प्रणेतुं तद्रूपप्रतिपादनाय अनुबन्धा उच्चार्यन्ते। ततश्च
परार्थमुपादीयमानत्वादप्रधान्यमनुभवन्ति।
इतरे तु स्वार्थमुपादीयन्त इति तेषां प्राधान्यम्। तेन तेषामेवाजिति एषा संज्ञा
भवति, नानुबन्धानाम्। प्रधानाप्रधानसन्निधौ हि प्रधानमेव कार्येण सम्बन्धमनुभवति,
नेतरत्। तथा चाह भाष्यकारः- `प्रधाने कार्यसम्प्रत्ययात् सिद्धम्' इति। यद्येवम्, अकारस्याप्येषा संज्ञा न स्यात्, संज्ञाप्रतिपादने तस्याप्यङ्गभावोऽस्त्येव?
`स्वस्य च रूपस्य' इत्यनुवृत्तिसामर्थ्यात् तस्य भवतीत्यदोषः। एतेनानन्तरोक्तेन
कारणद्वयेन सा न भविष्यतीति प्रतिपादयितुमाह- `लोपश्च' इत्यादि। बलवानेव बलवत्तरः, स्वार्थे एव तरप्; `अल्पाच्तरम्' (2.2.34)इति यथा। अनुबन्धा हि इत्संज्ञकाः, तेन
तेषामच्संज्ञायाः प्रागेव `तस्य लोपः' (1.3.9)इति लोपेन भवितव्यम्; तस्य
बलवत्त्वात्। तदसतां तेषां कुतः संज्ञा? तस्याञ्चासत्यां कुतोऽज्ग्रहणेष्वच्कार्य-
स्य सम्भवः? बलवत्त्वं तु लोपस्य परत्वान्नित्यत्वाच्च। संज्ञाशास्त्राद्धि लोप-
शास्त्रं परम्, अतस्तस्यापि परत्वम्। कृताकृतप्रसङ्गत्वान्नित्यत्वम्। कृतायामपि
संज्ञायां लोपेन भवितव्यम्, अकृतायामपि। न तु लोपे कृते संज्ञा भवति, संज्ञिनाम-
सत्त्वात्। यद्येवम्, यथा अजन्तः पतिनां णकारादीनामनुबन्धानां प्रथमं लोपो भवति तथा चकारस्यापि स्यात्, ततश्चाजिति संज्ञा न निष्पद्यते?
वचनसामर्थ्यात् तस्य प्राग्लोपो न भविष्यति। लुप्तेऽपि वा तस्मिन् भूतपूर्वेण तेन सहितः अकारः संज्ञा भविष्यति। अजन्तः पतिनां तु लुप्तानां णकारादीनां नार्हित संज्ञा भवितुम्; इकारादिषु
सावकाशत्वात्।
इहैते अकारादयो वर्णा अनेकावयवा इष्यन्ते `तस्यादित उदात्तमर्धह्रस्वम्' (12.32) `एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ' (8.2.107)इति
वचनात्। सन्ति च केषाञ्चित् केचिदवयवा वर्णान्तरसरूपाः, तद्यथा-ऋकारे रेषः लृकारे
लकारः,एकारे च ऐकारे चाकाररेकारौ, ओकारे च औकारे च अकारोकारौ। दीर्घेष्वाकारादिषु
ह्रस्वा अकारादयः। तत्र य एते ऋकारादिवर्णानामवयवास्ते किं वर्णग्रहणेन गृह्येरनम्?न वा? तत्र पूर्वस्मिन् कल्पे-अग्ने इह, वायो उदकमित्यकः सवर्णे दीर्घत्वं
प्राप्नोति, प्रणीय, आलूयेति ह्रस्वाश्रयस्तुक्। एवमादयोऽन्त्येऽप्यचस्मिन् पक्षे दोषाः प्रसजन्ति, ते च भाष्यादवधार्याः। इतरत्र तु नुडविधिलादेशविनामेषु
ऋकारग्रहणं कर्त्तव्यम्। नुडविधौ तावत् `ऋधु वृद्धौ' (धा.पा.1245)लिट्, अनृधतुः आनुधुरित्यत्र ऋकारे रेफस्य हल्ग्रहणेनाग्रहणात्
द्विहल्त्वाभावे`तस्मान्नुड द्विहलः' (7.4.71) इति नुड् न प्राप्नोति;लादेशविधौ-क्लृप्तः क्लृप्तवानिति रेफस्य `कृपो रो लः' (8.2.18) इति लत्वं न
सिध्यति;विनामविधौ-मातृणाम्, पितृणामिति णत्वं न

स्यादित्यत आह- `वर्णेषु' इत्यादि। वर्णेषु ऋकारादिषु । `वर्णैकदेशाः' इति। रेफादय इति। वर्णात्मभूतत्वज्ञापनार्थमेकदेशा इत्युक्तम्। एतदुक्तं भवति-
वर्णानामात्मभूता एकदेशा वर्णैकदेशा इति। यदि हि `एकदेशाः' इत्येतावदुच्येत, ततः कस्यचिदभ्रान्तिः
स्यात्- `अर्थान्तरभूता एवैते एकदेशाः' इति। वर्णैकदेशास्तूर्य्यादयोऽपि सन्तीति
तद्व्यवच्छेदार्थमाह-`वर्णान्तरसमानाकृतयः' इति। वर्णान्तरसमानाकृतयः इति। वर्णान्तरवत् समानाकृतिर्येषां ते वर्णान्तरसमानाकृतयोऽवयवाः।
ततोऽन्यैर्वर्णैरनवयवभूतै-
स्तुल्याकृतय इत्यर्थः। `तेषु' इति। वर्णैकदेशेषु । `तत्कार्यम्' इति। वर्णान्तर-
कार्य्यम्- अकः सवर्णे दीर्घत्वादि। किं पुनः कारणं न भवतीत्याह- `तच्छायानुकारिणो हि'इत्यादि। तच्छाया तदाकारः।
वर्णान्तराणामकारादीनामाकारमात्रम्। तेऽनुकुर्वन्ति; तत्तुल्यरूपत्वात्, न तु त एव। न हि तदाकारानुकारित्वमात्रेणैव तत्त्वं भवति। तथा हि गवि
गवयावयवानुकारिणोऽवयवाः सन्ति, न च तेषां तत्स्वभावता। किं पुनः कारणं ते त एव न भवन्तीत्याह- `पृथक्' इत्यादि। प्रयत्नः प्रयतनं
स्थानकरणव्यापारः। वर्णान्तरहेतोः प्रयत्नात्पृथगन्येन प्रकारेण यं निर्वर्त्त्यं निष्पाद्यं वर्णमाचार्या इच्छन्ति, तदेते वर्णा अवयवाः। यदि वर्णाः स्युः,
प्रयत्नान्तरनिर्वर्त्त्याः स्युः, न चैवम्। तथा हि- समुदायार्थो यः प्रयत्नः तेनैव ते निष्पाद्यन्ते। तदेवम्, अग्रहणक-
पक्षमाश्रयतैव ग्रहणकपक्षभाविनो ये दोषास्तेषां प्रसङ्गः प्रतिक्षिप्तः। ननु च ग्रहण-
पक्षोऽपि भाष्ये व्यवस्थापितः; तदनुषङ्गिणां दोषाणां परिहारात्, तत्कस्मात् स
परित्यक्तः ? बहुप्रतिविधेयत्वात्। अग्रहणकपक्षे त्वल्पं प्रतिविधेयम्। अतः स एव
वृत्तिकारेणाश्रितः।
यदि तर्हि गृह्यन्ते, नुडादिविधिषु ऋकारग्रहणं कर्त्तव्यतया स्थितमेवेत्यत आह-`नुड्विधिलादेशविनामेषु' इत्यादि। नुडाविधिषु यच्चोद्यमापतति ऋकारविषये तस्य
प्रतिविधानं कर्त्तव्यमित्यर्थः। तत्र नुडाविधौ तावत्-ऋकारस्य रेफो हल्ग्रहणेन
गृह्यते। तेनात्रापि द्विहलोऽङ्गस्य नुड्भवति- `आनुधतुः आनृधुः' इति। एतत्
स्वयमेव वृत्तिकारेण प्रतिपदानं कृतम्। अथ किमयमृकारस्थो रेफो वर्णात्मकः ? नेत्याह। इदानीमेव ह्युक्तम्- `तच्छायानुकारिणो हि ते, न पुनस्त एव'इति। ये तर्हि
हकारादयो वर्णा अक्षरसमाम्नाये उपदिष्टास्ते किं वर्णआत्मकाः ? नेत्याह। तथा हि `हयवरट्' (मा.सू.5) इत्यादौ वक्ष्यति- `इत्येतान् वर्णानुपदिश्य' इति। अथ कथमिदानीं
वर्णात्मनां हलां ग्रहणेन ऋकारस्थस्यापि अवर्णात्मनो रेफस्य ग्रहणं भवति ? द्वि-
हल्ग्रहणसामर्थ्यादित्यभिप्रायः। तत्र हि `तस्मान्नुड्' इत्येतावदेव वक्तव्यम्। न
चैवमुच्यमा4ने आटतुः, आटुरित्यादावपि प्रसङ्गो भवति; `अश्नोतेश्च' (7.4.72) इत्यस्यनियमार्थत्वात्- अद्विहलो यदि भवति तदश्नोतेरेव,नान्यस्येति।
अश्नातिनिवृत्त्यर्थं तदिति चेत् ?वार्त्तमेतत। यदि ह्येतावत् प्रयोजनं स्यात्, `नाश्नः' इत्येव
प्रतिषेधं कुर्यात्।तदेवमन्तरेणापि द्विहल्ग्रहणं सिद्धे यद्द्विहल्ग्रहणं करोति तस्यैतत् प्रयोजनम्-द्विहल्छायानुकारिणोहि यथा स्यादिति।यस्याप्येको मुख्यो हल,
अपरोऽवयवः तत्समानाकृतित्वादुपचारेण हल्व्यपदेशर्हः,तस्यापि यथा स्यादित्येवमर्थः। एतच्च कथं लभ्यते? यदि हलित्येषा श्रृतिस्तत्र
हल्छायानुकारिण्यापि ऋकारस्थायां रेफव्यक्तौ वर्त्तते, नान्यथा। तस्माद्द्विहल्ग्रहणेन ऋकारस्थो रेफोऽपि गृह्यते; अन्यथा द्विहल्ग्रहणमनर्थकं स्यात्।
`रेफः' इति परप्रसिद्ध्या तत्रोक्तम्। वर्णग्रहणवादिनां हि ऋकारभागोऽपि `रेफः' इति प्रसिद्धः। सादृश्यादेवमुक्तम्। भवति हि
सादृश्यादतस्मिन्नपि तद्व्यपदेश- यथा- अग्निर्माणवक इति। अथ वा `रादिफः'(वा.321)
इत्यत्र `वर्णात्कारः' (वा.320) इत्यतो `वर्णात्' इति नाणुवर्त्तते, तेनावर्णात्मकादपि रादिफो भवतति, बहुलवचनाद्वा। अत एव लृकारस्थाल्लकारसरूपादवयवाद्
अवर्णात्मनोऽपि कारप्रत्ययो भवतीति वेदितव्यम्। लादेशविधावपि -`र' इति सामान्यमुपादीयते।. तेन यः केवलो रेफः यश्च ऋकारस्थः- तयोर्द्वयोरपि ग्रहणम्। `ल' इत्यपि
सामान्यमेव। ततोऽयं केवलस्य रेफस्य स्थाने केवल एव लकार आदेशो विधीयते।
ऋकाररस्याप्येकदेशविकारद्वारेण लृकारः। चथा च `लुटि च क्लृपः' (1.3.93) इत्येवमादयोनिर्देशा उपपद्यन्त इति। एतत् `कृपो रो लः'
(8.2.18)इत्यत्र स्वयमेव वृत्तिकृता प्रतिपादितम्`र इति(1) सामान्यमुपादीयते' (काशिका. 8.2.18) इति। वर्णत्वावर्णत्वकृतं
भेदमुत्सृज्य यत् सामान्यवर्णात्मिकायां च रेफव्यक्तौ वर्त्तते यतस्तयोर्वर्णत्वा-
वर्णत्वभेदभिन्नयोरपि `र' इति शब्दप्रत्यौ अभिन्नौ भवतः, तावुपादीयेते; न तु

वर्णात्मिकैव रेफव्यक्तिः। `तेन' इति। सामान्योपादानेन द्वयोरपि ग्रहणं भवतीति।
तस्य सामान्यस्य द्वयोरपि सद्भावात्। `ल इत्यपि सामान्यमेव' इति। `उपादीयते' इत्यपेक्षते। अत्रापि यश्च केवलो लकारः, यश्च लृकारस्थः तयोर्द्वयोरपि ग्रहणमित्येतद्वय-
क्तव्यं स्यात्। पूर्वानुसारेण गम्यमानत्वान्नोक्तम्। `ततोऽयम्'
इत्यादि। यत एवं द्वयोरपि रेफलकारयोर्ग्रहणम्, तस्मात् केवलस्य रेफस्य स्थाने
लकारोऽयमादेशो विधीयते। अन्तरतमत्वादृकारस्यापि लृकारः। ननु च सत्यपि द्वयोरपि ग्रहणे ऋकारस्य स्थाने लृकारो भवतीत्येतत् कुतो लभ्यते? न हि ऋकारस्थो रेफ ऋकारो भवति, किं तर्हि ? तदवयवः। नापि लृकारस्थो लकार ऋकारो भवति, किं तर्हि? तदवयवः। तत्र
द्वयोरपि ग्रहणे सति ऋकारस्थस्यापि रेफस्य लृकारस्थो लकारो वर्णैकदेशतयान्तरतमो
भवतीत्येतस्य चोद्यस्यापाकरणार्थमेकदेशविकारद्वारेणेत्युक्तम्।तदेकदेश ऋकारस्यावयवो रेफसस्तस्य विकार लृकारावयवो लकारः। अथ वा एकदेश-। अथ वा एकदेशलृकारस्थो लकारः, स एव विकारः। ऋकारस्थस्य रेफस्य स एव एकदेशविकारः। द्वारं मुखम्, उपाय इति यावत्। तेन समस्तस्यैवऋकारस्य स्थाने समस्त एव लृकार आदेशो विधीयते। यदि हि ऋकारलृकाराभ्यां तत्स्थयोश्च रेफलकारयोः पृथग्भावः सम्भवेत्, तदा ऋकाररैकदेशस्य रेफस्य केवलस्य
लृकारैकदेशो लकारः केवल शक्यते विधातुम्। न च तयोस्ततः पृथग्भाव सम्भवति। तस्माद्य-
थोक्तेन प्रकारेण ऋकारस्य लृकारादेशो विधीयते। अनन्तरोक्तस्यार्थस्य दृढीकरणाय `तथा च' इत्यादेरुपन्यासः। यत एवमेकदेशद्वारेण ऋकारस्य स्थाने लृकार आदेशो विधीयते।
एवञ्च सति `लुटि च क्लृपः' (1.3.93) इत्येवमादयो निर्देशा उपपद्यन्ते, नान्यथा। आदिशब्देन `ऋदुपुपधाच्चाक्लृपिचृतेः' (3.1.110) `तासि च क्लृपः' (7.2.60) इत्येतयोर्निर्देशयोर्ग्रहणम्। विनामविधावपि `ऋवर्णाच्चेति वक्तव्यम्' (वा.946) इत्युक्त्वा
"रश्रुतिसामान्यनिर्देशाद्वा सिद्धम्। अवर्णभक्त्या च व्यवधाने णत्वं भवतीति
क्षुभ्नादिषु नृनमनतृप्नोति(1) ग्रहणं णत्वप्रतिषेधार्थं द्रष्टव्यम्। अथ वा ऋवर्णादपि णत्वं भवतीत्येदेव (2) तेन ज्ञाप्यते" (काशिका.8.4.1) इति वृत्तिकृता स्वयमेव
प्रतिविहितम्।`रश्रुतिसामान्यनिर्देशात् सिद्धम्'इति। `र' इति श्रुतिः
उपलब्धिर्यस्यस रश्रुतिः रेफः। तस्य केवलस्य ऋकारस्थस्य च वर्णत्वावर्णत्वकृतभेदं
परित्यज्य यत् सामान्यं रेफमात्रं तदिह निर्दिश्यते, न तु वर्णत्मिकैव रेफव्यक्तिः। तेन सिद्धं तिसृणाम्, चतसृणाम्, मातृणाम्, पितृणाम् इत्यादावपि णत्वम्; ऋकारेऽपि तस्य रश्रुतिसामान्यस्य विद्यमानत्वात्। स्यादेतत्- ऋकारेत्रयो
वर्णावयवाः, तन्मध्ये रेपोऽर्धमात्रात्मा, तत्र रश्रुतिसामान्यस्य निर्देशेनैव
सिध्यति। यासौ रेफात् पराऽवर्णभक्तिस्तस्या व्यवधानादित्यस्य चोद्यस्य परिहारायो-
त्तरो ज्ञापकग्रन्थः- यदयं क्षुभ्नादिषु णत्वप्रतिषेधाय नृनमनशब्दं तृप्तनोति-
शब्दञ्च पठति, तेनैतज्ज्ञाप्यते `अवर्णभागव्यवधानेऽपि णत्वं भवति' इति; अन्यथा हि तत्र त्रयोः पाठोऽनर्थकः स्यात्,प्राप्त्यभावात्। प्राप्तिपूर्वकत्वाच्च प्रतिषेधानाम्। यद्यपि वर्णात्मिकैव रेफव्यक्तिर्निर्दिश्यते, तथापि सिद्धमिति दर्शयितुमाह- `अथ वा' इत्यादि। पूर्वसूत्रोपात्ताद् रश्रुतिसामान्यचनिर्देशात् परयाऽवर्णभक्त्या व्यवहितादपि णत्वं भवतीति ज्ञापितम्। इदानीं तु सूत्रानुपात्तदृकारदव्यवहितादेवे-
त्येष विशेषः।
अपरे तु- सर्वाण्येतानि प्रतिविधानानि वर्णैकदेशग्रहणकपक्षमाश्रित्य विहितानीत्याचक्षते, एतच्चासम्यक्; यं हि पक्षमाश्रित्य `नुड्विधिलादेशविनामेषु ऋकारे प्रतिविधातव्यम्' (वा.1)इत्युक्तं तत्रैव प्रतिविधातुं युक्तम्; अन्यथा ह्यग्रहणकपक्षमभ्युपेत्य ग्रहणकपक्षेऽपि प्रतिविधानं कुर्वता वृत्तिकारेणाकौशलमेव केवलमा-
मात्मनः प्रकटितं स्यात्।।

5. हयवरट्।
`तस्य ग्रहणं भवत्येकेन `शश्छोऽटि'इत्यकारेण इति। अत्र `शश्छोऽटि'
(8.4.63) इत्येतत् प्रदेशवाक्योपलक्षणं द्रष्टव्यम्। एवंजातीयकेषु निर्देशेष्वकारेण ग्रहणं भवति, न तु वर्णान्तरेणेत्यत्रायमर्थोऽभिप्रेतः। न त्वत्रैव सूत्रे अकारेण ग्रहणं भवतीति, `अट्कुप्वाहनुम्व्यवायेऽपि' (8.4.2) Flf दीर्घादटि' (8.3.9)
इत्यत्राप्यकारेण ग्हणस्येष्टत्वात्। अथ `लुङलङलृङक्ष्वड्डुदात्तः'(6.4.71)
इत्यत्राप्यकारेण ग्रहणं कस्मान्न भवति? `प्राक्सितादड्व्यवायेऽपि' (7.3.63) इति वचनात्। प्रत्याहारे ह्येतस्मिन्नकारादीनां योऽन्यमतस्ते
नालोऽन्त्यपरिभाषयाङ्गान्तरस्य भवितव्यम्; प्रत्येकमट्संज्ञकत्वात्, प्रत्येकमेवाकारादीनामादेशत्वात्।
तथा चान्त्यग्रहणेन ग्रहणादड्व्यवधानं नोपपद्यते। अथ प्रत्येकमप्यसंज्ञकत्वे समस्तानामप्यादेशभावः प्रकल्प्येत, एवमनेकाल्त्वात् सर्वादेशः स्यात्, तथा च

स्थान्यपि
सकारो न स्यादिति कस्य केन व्यवधानान्मूर्धन्यो बवेदभ्युषुणोदित्यत्र ? अथ `आर्धधातुकस्येड् वलादेः' (7.2.35) इत्यत्रेकारेणास्य ग्रहणं कस्मान्न भवति ? `तत्र विदित
इति च' (5.1.43) इति निर्देशात्। प्रत्याहारे ह्येतस्मिन् न `आदेः परस्य ' (1.1.54) इति इकारादीनामन्यतमस्तकारस्यादेशः स्यात्, तथा च विदितमिति रूपं नोपपद्यते। अथ
`दीधीवेवीटाम्' (1.1.54) इत्यत्रापीकारेण ग्रहणं कस्मान्न भवति? `जयति' `सम्भवति'
`अवहरति'इत्येवमादिनिर्देशात्। प्रत्याहारे ह्येतस्मिन् गुणप्रतिषेधादेवमादयो
निर्देशा न सम्भवेयुः।
यकारात्परस्य रेफस्योपदेशे सति यो दोषस्तमुद्भावयितुकाम आह- `अयम्' इत्यादि परोपदेशस्तु वल्यन्तर्भावात् `जीवेरदानुक्' (द..1.163) जीरदानुः, `गोधायाः ढ्रक्' (4.1.129) गौधेर इत्यत्र `लोपो व्योर्वलि' (6.1.66) इति व्योर्लोपो यथा स्यात्, रल्ग्रहणे च वकारस्य ग्रहणं मा भूदित्येवमर्थश्च । यदि हि वकारात् पूर्वो रेफ
उपदिश्येत्, `रलो व्युपधाद्धलादेः संश्च' (1.2.26) इति देवित्वा विदेविषतीत्यत्र
कित्वं वा स्यात्। ननु च क्रियमाणेऽपि रस्य यकारात् परोपदेशे प्राप्नोत्येव
वकारस्य रल्ग्रहणेन ग्रहणम्, जशामपि मध्ये तस्योपदेशात् ? नैतदस्ति; उभयोर्भिन्नगुणनिष्पाद्यत्वात् भेदस्य सिद्धत्वात्। यथोक्तम्--
`(1)पृथक्प्रयत्ननिर्वर्त्यवर्णमि-
च्छन्ति' इति। अन्तःस्थत्वेनेषत्स्पृष्टकरणत्वादितरस्य च स्पर्शत्वेन स्पृष्टकरण-
त्वात्। अयञ्च दन्त्योष्ठ्यो वकारः।
यस्तु `जबगडदश्' (मा.सू.10) इष्यते, स ओष्ठ्यो वेदितव्यः। ननु च वकारेण
व्यवधानान्नयं यकारात् परः, किं तर्हि ? वकारात् पर इति। तत् किमुच्यते यकारात् पर
इति? व्यवधानेऽपि परशब्दो वर्त्तते, यथा-बाल्यात् परं वृद्धत्वमित्यदोषः। अत्र यौवनेन व्यवहितेऽपि वृद्धभावे परशब्दस्य वृत्तिः. यदि यकारात् पर उपदिश्यते ततः
किमित्याह- `तस्य यर्ग्रहणेन' इत्यादि। यरित्यस्याः संज्ञाया ग्रहणेनोच्चारणेन, तथा ययितत्यस्याः संज्ञाया ग्रहणेनोच्चारणेनेत्यर्थ-। अथ वा- यरां संज्ञानां ग्रहणेनोपदानन , ययां संज्ञिनां ग्रहणेनोपादानेनेत्यर्थः। `ग्रहणे सति' इति। उपादाने सति।
तद्ग्रहणेन तु तद्ग्रहणम्, तस्यापि तत्संज्ञकत्वात्; तदन्तर्भावाच्च।स्वर्नयती-
त्यत्र `ऋटुरषा मूर्धन्याः' इति तुल्यस्थानत्वाद् रेफस्य नकारे परे परसवर्णो णकारा
देशो भवति, विशेषानभिधानात्। ननु चैवं सति स्थानेऽन्तरतमपरिभाषा बाध्येत; न ह
रेफस्यान्तरतमो णकारः प्रयत्नभेदात् ? नैतदस्ति; `व्यक्तिः पदार्थः' इत्येतद्धि
दर्शनमाश्रित्य चोद्यते। तेन स्थानेऽन्तरमपरिभाषया बाधानाशङ्कनीया।
यत्र ह्यन्तरतमोऽनन्तरतमश्च विद्यते तत्र तस्या व्यापारः। न चेहान्तरतमोऽस्ति,
यस्माद्वयक्तौ पदार्थे प्रतिलक्ष्यं लक्षमं प्रवर्त्तते। आनन्त्यात् सर्वाणि लक्षणानि नोच्चार्यन्ते। तत्र यदेतद्विषयं लक्षणं तत् प्रयत्नभेदादन्तरतमेऽपि णकारे यदि न प्रवर्तते, तदा यस्य वैयर्थ्यमेव स्यात्। तस्माज्जातौ पदार्थे इयं परिभाषा
वेदितव्या,न तु द्रव्ये। `मद्रह्दो भद्रह्रदः' इति। अचो हकारादुत्तरोऽयं रेफो यर् भवतीति द्विर्वचनं प्राप्नोति, `अचो रहाभ्यां द्वे' (8.4.46) इत्यत्र `यरोऽनु-
नासिकेऽनुनासिको वा' (8.4.45) इत्यतो यरित्यनुवर्त्तते, तत्र द्विर्वचने सति द्वयोः
रेफयो श्रवणं स्यात्। `रो रि' (8.3.14) इत्येकस्य लोपो भविष्यतीति चेत्? न;
लोपे कर्त्तव्ये द्विर्वचनस्यासिद्धत्वात्। `हलो यमां यमि लोपः' (8.4.64) इत्यनेन
तर्हेयकस्य लोपो भविष्यति? सिद्धं ह्यस्मिंल्लोपे द्विर्वचनम्। एवमपि पक्षे द्वयो
रेफयोः श्रवणं प्रसज्येत। तत्र हि `झयो होऽन्यतरस्याम्'(8.4.62) इत्यतो-
ऽन्यतरस्यांग्रहणमनुवर्तते। अथापि तन्नानुवर्त्तेत ? एवमपि द्विर्वचनविधान्-
सामर्थ्याल्लोपो न भविष्यति। अन्यथा हि द्विर्वचनविधानमनकर्थकं स्यात्।
`कुण्डं रथेन' इति। `अनुस्वारस्य ययि परसवर्णः' (8.4.58) इति तदन्यस्य परसवर्णस्यासम्भवाद्रेफस्य रेफ एव परसवर्णः स्यात्। `रेफोष्णणां सवर्णा न सन्ति' इति ट
रेफस्य सवर्णो न भवतीत्येतच्च नाशङ्कनीयम्; वर्णान्तरपेक्षया तदुक्तम्,
वर्णान्तराणां यथायोगमतुल्यस्थानप्रयत्नत्वात्। रेफव्यक्तीनां तु परस्परापेक्षया सावर्ण्यमस्त्येव; तुल्यस्थानप्रयत्नत्वात्।

अन्ये तु-`यिय रेफ अनुस्वारस्य परसवर्णो णकारः स्यात्, तुल्यस्थानत्वात्'
इति वर्णयन्ति; एतच्चायुक्तम्; न हि स्थानमात्रतुल्यतया सवर्णो भवति। किं तर्हि ?
तुल्यस्थानतया, तुल्यप्रयत्नतया च। न च रेफस्य णकारतुल्यप्रयत्नः; रेफस्येषत्स्पृ-
त्वात्, णकारस्य च स्पृष्टत्वात्। एवं व्यक्तिपदार्थमाश्रित्य परेण चोदिते जाति-
पदार्थमाश्रित्य परिहारं वक्तुकाम आह- `नैष दोषः' इत्यादि। आकृताविति जाताविर्त्थः। केषाञ्चित् जातिः पदार्थः,केषाञ्चिद् द्रव्यम्, पाणिनेस्तूभयम;
लक्ष्यानुरोधात्। तत् क्वचित् किञ्चिदाश्रीयते। तत्र जातौ पदार्थ आश्रीयमाणे जातिरेव शब्देनाभिधीयते, नान्तरीयकत्वात्तु तदाधारा व्यक्तयः प्रतीयन्ते;
जातेराधारमन्रेण प्रत्येतुमशक्य-
त्वात्। एतस्मिन् दर्शने तस्यास्तु जातेः स्थानित्वमादेशत्वं परत्वमव्यवहितत्व-
मित्यायो धर्माः शब्दसंस्कारोपयोगिनो व्यक्तिद्वारकाः। तेन `यरोऽनुनासिकेऽनुनासि-
को वा' (8.4.45) इत्येवमादिलक्षणं प्रवर्त्तमानं जातिमतीषु व्यक्तिष्वेव
प्रवर्त्तते, तत्र प्रवृत्तेर्जातौ प्रवृत्तं भवति। न च तासु व्यक्तिषु जातिं प्रति कासाञ्चिदासत्तिर्विप्रकर्षो वा; यतः क्वचिदेव प्रवर्त्तेत; न सर्वत्र; सम्बन्ध-
स्याविशिष्टत्वात्। तस्मात् तत्र प्रवर्त्तमानं यत्र वचनान्तरेण न्यायेन वा न
बाध्येत,तत्र सर्वत्रैव प्रवर्त्तते। एवञ्च प्रवृत्तं समुदाये प्रवृत्तं भवति।
`सकृत्' इति। एकवारम्, न पुनः पुनः; सकृत्प्रवृत्यैव लक्षणस्य च चरितार्थत्वात्। एतस्मिन् दर्शने `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इत्येतल्लक्षमं कथं
प्रवर्त्तेत? किमविशेषेण सर्वेष्वेव जातिमत्सु पदार्थेषु प्रवर्त्तते ? उत विशेषेण केषुचिदेव ? यद्यविशेषेण स्यात्, स दोषस्तदवस्थ एव। अथ विशेषेण वाच्यः, तर्हि
सविशेष इत्यत आह- `यरोऽनुनासिके' इत्यादि। एतेन स्थानेऽन्तरतमपरिभाषाया
उपस्थानात् तद्वशेनान्तरतमेष्वेव प्रवर्त्तते, नान्येष्विति दर्शयति- `तदनेन'

इत्यादि। यत एवान्तरतमेष्वेव प्रवर्त्तते, तस्मादनेन लक्षणेन गकारादीनां
येऽन्तरतमाः स्थानगुणाभ्यामुभाभ्यामपि ते ङकारादयोऽनुनासिका विहिताः।`यथास्वम्'
इति। यथात्मीयमिति। ये येषामन्तरतमास्ते तेषां विहिता इत्यर्थः। `गकारादीनाम्'इति। आदिशब्देन जाकारादीनां ग्रहणम्।`ङकारादयः' इत्यत्रापि
आदिशब्देन ञकारादयोऽनुनासिका गृह्यन्ते। तत्र स्थानतो गुणतश्चान्तरतमाः। तद्यथा- गजडदबानां यथाक्रमं ङञणनमाः।
तथा हि- `अकुहविसर्जनीयाः कण्ठ्याः' इति गकारङकारयोस्तुल्यं कण्ठः स्थानम्।
`इचुयशास्तालव्याः' इति जकारञकारयोस्तालु।`ऋटुरषा मूर्द्धन्याः' इति ङकारणकारयो-
मूर्धा। `लुतुलसा दन्त्याः' इति दकारनकारयोर्दन्तः। `उपूपध्मानीया ओष्ठ्याः' इति बकारकमकारयोरोष्ठः। गुणस्तु सर्वेषामेषवैषां तुल्यः; `स्पृष्टं करणं स्पर्शनाम्'
इति। कादयो मावसानाः स्पर्शाः। `ये तु न स्थानतो नापि गुणतः' इति। अन्तरतमा
इत्यपेक्षते। `ते सर्वे निवर्त्तिताः' इत्यनेन वक्ष्यमाणेन सम्नब्धः। अविधानमेवैषां निवर्त्तनम्। `स्थानमात्रेण गुणमात्रेण वा' इति। तत्राप्यन्तरतमा इत्यपेक्षते।
पूर्ववच्च सम्बन्धः। तत्र नापि स्थानतो नापि गुणतोऽन्तरतमा अनुनासिकाः, ते यथा-

गजडानां यवलाः सानुनासिकाः, निरनुनासिकाश्चापि, ते तेषां स्थानगुणाभ्यामनन्तरतमा एव। सानुनासिकग्रहणं तु `यरोऽनुनासिके' (8.4.45) इत्यादौ सूत्रेऽनुनासिक्सयादेशत्वेनोपादानात्। तत्र गकारयकारयोर्यथाक्रमं कण्ठतालुस्थानत्वात् स्थानत आन्तरतम्यं
नास्ति; जकारलकारयोस्तालुदन्तस्थानत्वात्, डकारयकारयोर्यथाक्रमं कण्ठतालुस्थान-
त्वात् मूर्धदन्तोष्ठस्थानत्वात्। गुणतोऽपि तेषां नास्त्यान्तरतम्यम्; गकारादीनां स्पृष्टकरणत्वात्, यकारादीनामीषत्स्पृष्टकरणत्वात्; `ईषत्स्पृष्टं
करणमन्तःस्थानम्' इति। वचनात्। अन्तस्था यरलवाः। स्थानमात्रेणान्तरतमा अनुनासिकाः। तद्यथा- जदबानां यँलँवाँः सानुनासिकाः। अत्र जकारस्य यकारस्तुल्यस्थानः; तयोस्तालुस्थानत्वात्।
दकारस्य लकारः; तयोर्दन्तस्थानत्वात्। बकारस्य वकारः; उभयोरोष्ठस्थानत्वात्।
यदप्यन्तःस्थस्य वकारस्य `दन्ताः'- स्थानमधिकम्, तथापि यत्र तयोस्तुल्यस्थानमोष्ठः, तत्कृतमान्तरतम्यमस्त्येव, उकारौकारवत्- उकारस्य ओष्ठस्थानम्, ओकारस्य तु
कण्ठोऽपि, `ओ औ कण्ठ्योष्ठ्यौ' इति वचनात्; तथापि यत्तयोस्तुल्यं स्थानम् ओष्ठस्त-
त्कृतमान्तरतम्यं भवत्येव। यथा च तयोरेकस्य स्थानाधिक्येऽपि आन्तरतम्यम्, तथा बकारवकारयोरपि । गुणमात्रेणान्तरतमा यथा- जबजानां ङणनाः;

सर्वेषां स्पृष्टतागुणत्वात्। स्थानतस्तेषामान्तरतम्यं नास्ति; जबडानां यथाक्रमं ताल्वोष्ठमूर्धस्थानत्वात्, ङणनानान्तु कण्ठमूर्धदन्तस्थानत्वात्। `इति' इत्यादि। इतिकरणो हेतौ। यत एवं स्थान-
गुणाभ्यां येऽन्तरतमास्त एवानेन विहिताः, अन्ये तु सर्वे निवर्त्तिताः। तस्मात्
स्थानमात्रेणान्तरतमो रेफस्य णकारो न भवति। स्थानमात्रेणान्तरतमत्वञ्चोभयोर्मूर्ध-
स्थानत्वात्। गुणतस्त्वान्तरतम्यं नास्ति; स्पृष्टतादिगुणभेदाच्च। `रेफस्य यरन्त-
र्भावे सति' इति। यर्कार्यप्राप्तेरयं हेतुः। `यर्कार्यं प्राप्तम्' इति। द्विर्वचनमित्यर्थः। तद्धि यरन्तर्भावात् रेफस्य प्राप्नोति यथाऽन्येषां यराम्। `तत्'
इत्यादि। रेफस्य द्विर्वचनं प्रति निमित्तभावः साक्षाच्छिष्टः = प्रत्यक्षविहितः, `अचो रहाभ्याम्' (8.4.46) इति साक्षाद्रेफं निमित्तत्वनोपादाय द्वर्वचनविधानात्। यर्कार्यन्तु यरन्तर्भावादनुमितम्। `प्रत्यक्षानुमितमोश्च प्रत्यक्षं बलीयः' कात.प.95) इति साक्षाद्विहितेन निमित्त साक्षाद्रेफं निमित्तत्वेनोपादाय द्विर्वचन-
विधानात्। यर्कार्यन्तु यरन्तर्भावादनुमितम्। `प्रत्यक्षानुमितमोश्च प्रत्यक्षानुमितमोश्च प्रत्यक्षं बलीयः' (कात.प.95)इति साक्षाद्विहितेन निमित्तभावेन रेफस्य द्विर्वचनं बाध्यते; तद्यथा-ब्राह्मणा भोज्यन्ताम्, माठरकौण्डिन्यौ परिवेविष्टामितिअत्र हि साक्षाद्विहितेन परिवेषणं प्रति साधनभावेन
माटरकौण्डिन्ययोर्ब्राह्मणत्वाद्योऽनुमितो भोजनं प्रति साधनभावः स बाध्यते। यद्येवम्; दध्युदकादिषु दोषः। `इको
यणचि' (6.1.77) इत्यत्र ह्यजन्तर्भावादिको यणादेशं प्रति निमित्तभावोऽनुमीयमानः। यणादेशस्तु साक्षाच्छिष्टः; `इकः' इत साक्षादिकं कार्यिममुपादाय विधानात्। ततश्च
साक्षाच्छिष्टेन तेन निमित्तभाव इको बाध्यते। तत्र व्यक्तेः पदार्थस्याश्रितत्वा-
ददोषः। व्यक्तौ पदार्थे प्रतिलक्ष्यं लक्षणं प्रवर्त्तत इत्युक्तम्। भूदेष दोष इति लक्षममप्येकमेव, यच्चार्क्कः मर्क्क इत्यादौ चरितार्थम्। अतो यद्यपि मद्रह्रवादौ द्विर्वचनं न विदधाति, तथापि न भवति वैयर्थ्यप्रसङ्ग इति। `न द्वरुच्यते रेफः' इति।इतिकरणेनानन्तरोक्तस्यार्थस्य द्विर्वचनाभावं प्रति हेतुभावो द्योत्पते।
`अनुस्वारस्य'इत्यादि। न केवलं `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45)इत्येतदन्तरतमं सकृदेव प्रवर्त्तमानं विदधाति, अपि तु `अनुस्वारस्य ययि परसवर्णः' (8.4.
58) इत्येतदपि इति `अपि' शब्दस्यार्थः। स्यादेतत्- यद्यप्यन्तरतमं विदधाति, तथापि
भवितदव्यमेवात्र रेफेण परसवर्णेन। तस्याप्यन्तरतमत्वादित्यत आह- `न च' इत्यादि। न च रेफस्य सवर्णोऽस्तीति सम्बन्धः; किंविशिष्टो नास्ति? अनुस्वारान्तरतमः।
अनुस्वारस्य सदृशतम इत्यर्थः। इति हेतोर्न भवति कुण्डं रथेनेत्यत्र परसवर्णः। कथं
पुनरनुस्वारान्तरतमः, सवर्णो रेफस्य नास्ति? उच्यते- रेफस्य रेफ एव सवर्णः, नान्यो वर्णः। स चानुस्वारस्यान्तरतमो न भवति; स्थानभेदाद्गुणभेदाच्च। रेफस्य हि मूर्धा
स्थानम्, अनुस्वारस्य पुनः `अनुस्वारयमा नासिक्याः' इति इष्यते, नान्येषाम्। यद्यपिवर्गाणां तृतीयचतुर्था अन्तःस्था हकारानुस्वारौ च यमौ च तृतीयचतुर्थौ नासिक्याश्च
संवृतकण्ठा नादानुप्रदाना घोषवन्तश्चेति बाह्यप्रयत्नाख्येन गुणेन संवतकण्ठत्वादिना अनुस्वारान्तरतमो रेफः सवर्णः सम्भवति, तथापि न कगुणमात्रेणान्तरतममेतल्लक्षणम्
परसवर्ण विधातुमुत्सहते। यत्र स्थानतो गुणतश्चान्तरतमास्तत्रानुस्वारस्य परसवर्णाः सन्ति; शङ्कितः, कुण्ठित इत्यत्र चरितार्थत्वात्। अत्र
स्थानतोऽप्यनुस्वारस्य नासिकास्थानस्य ङणावन्तरतमौ; तयोरपि नासिकास्थानत्वात्। `ञमङणनाः स्वस्थाना नासिकास्था-नाश्च' इति वचनात्।
गुणतोऽपि; तेषां पूर्वोक्तैरनुस्वारगुणैरनुगतत्वात्,`यथा
तृतीयास्तथा पञ्चमाः' इति वचनात्। अनेन हि `वर्गाणां तृतीयचतुर्थाः' इत्यादिना
ग्रन्थेन येऽनुस्वारसाधारणा वर्गतृतीयानां गकारादीनां गुणा उक्तास्ते ङकारादीनां
निर्दिश्यन्ते। गुणमात्रेणाप्यन्तरतमं विदध्याद्रेफम्, यद्यसकृत् प्रवर्त्तते तत्। मा भूत् पुनः पुनः प्रवृत्तिरपार्थिकेति कृत्वा न चासकृत् प्रवर्त्तत इत्युक्तम्।
`उरःकेण'इत्यादि। उरः कायति, उरः पाति। `कै शब्दे'(धा.पा.916), `पा रक्षणे'
(धा.पा.1056) इत्याभ्याम् `आतोऽनुपसर्गे कः' (3.2.3) `आतो लोप इटि च'(6.4.64)
इत्याकारलोपः, उपपदसमासः, सुब्लुक्, `ससजुषो रुः' (8.2.66) तस्य `खरवसानयोर्विसर्ज-
नीयः। (8.3.15), `कुप्वोः क पौ च' (8.3.37) इति यथायोगं विसर्जनीयावुपध्मानीय-
जिह्वामूलीयौ।।

6.लण्।

अयं णकारो द्विर्बध्यते- पूर्वतश्चैवं परतश्चैवम्। तत्रेण्ग्रहणेष्वण्ग्रहणेषु च सन्देहो भवति; किं पूर्वेण स्युः, परेण वेति ? अतस्तदपनयनार्थमाहे-
`इण्ग्रहणानि' इत्यादि। तत्र यथा सर्वाणीण्ग्रहणानि परेण णकारेण गृह्यन्ते तथा `अइउण्' (मा.सू.1) इत्यत्र प्रतिपादितम्। अण्ग्रहणानि तु यानि परेणानि

सम्भाव्यते, तानि पूर्वेण प्रतिपादितानि। कानि पुनस्तानि ? `ढ्रलोपे पूर्वस्य दीर्घोऽणः' (6.3.111) `केऽणः' (7.4.13) `अणोऽप्रगृह्यस्यानुनासिकः' (8.4.57), `उरण रपरः' (1.1.51)

इत्येतेषु सूत्रेषु यान्यण्ग्रहणानि। तत्र पूर्वस्मिंस्तावत् सूत्रे दृढादिषु `वृढ'शब्दपाठो ज्ञापकः `न परेणाण्ग्रहणम्' इति। यदि हि परेण स्यात्, `वृढः' इति रूपं न

स्यात्। ततश्च दृढादिषु `वृढ'

पाठो नोपपद्येत। `बृहू उद्यमे' (धा.पा.1347)इत्यस्य सूत्रेषु निष्ठायां ठत्वघत्व-

ष्टुत्वढलोपेषु कृतेषु `वृढ' इति रूपं भवति। किञ्च दीर्घश्रुत्या तत्र `अचश्च' (1.2.28) इति सन्निधापिते सत्य च एव दीर्घत्वेन भवितव्यम्। तथा च यदि परेण, अन्तःपातिनामप्यचां दीर्घत्वमभिमतं स्यात्, असन्देहार्थमज्ग्हणमेवकुर्यात्। अथ वा- तदपि न

कुर्यात्; `अचश्च' इत्यस्मादेव सर्वाचां दीर्घत्वसिद्धेः। तस्मादण्ग्रहणसामर्थ्यात्पूर्वेणाण्ग्रहणं विज्ञायते। `केऽणः'(7.4.13) इत्यनेनापि के परतो

हलामणामसम्भवादचामेव ह्रस्वो विधीयते। तत्र यदि सर्वेषामचां ह्रस्वत्वमभीष्टं स्यात्। असन्देहार्थम-

ज्ग्रहणमेव कुर्यात्। अथ वा- तदपि न कुर्यात्, ह्रस्वग्रहणेनोपस्थापितात् `अचश्च' इत्यस्मादेवाभिलषितार्थसिद्धेः। तृतीयेनापि सूत्रेण

पदान्तस्याणोऽनुनासिको विधीयते, न च पदान्ता हलोऽणः सन्तीत्यचामेवानुनासिको विधेयः; तत्र यदि सर्वेषामचामनुनासि-

को विधित्सितः स्यात्, असन्देहार्थमच्ग्रहणमेव कुर्यात्। अथ वा - तदपि न कुर्यात्; अच एव हि प्रगृह्यसंज्ञा भवन्ति, न हलः। तत्र नञिवयुक्तन्यायेन प्रगृह्य प्रतिषेधात् तत्सदृशस्याच एव कार्यं विज्ञास्यते। तस्मात् तत्राप्यण्ग्रहमसामर्थ्यात् पूर्वेणैवाण्ग्रहणं प्रतीयते। `उरण रपरः'(1.1.51) इत्यत्रापि

`होतृप्रशास्तृणाम्'(6.4.11) इति निर्देशो ज्ञापयति- `नेह परेणाण्ग्रहणम्' इति। परेणाण्ग्रहणे सति

`नामि' (6.4.3) इति रपरो दीर्घः स्यात्' तथा च प्रशास्तृणामिति निर्देशो न स्यात्। किञ्च- न च रेफादन्य ऋकारस्य स्थाने हलोऽणः क्वचिच्छास्त्रे विधीयन्ते। तथा हि

`इको यणचि' (6.1.77) इति रेफः स्यात्। न च ऋकारस्य स्थाने `कर्त्र्थम्' इत्यादौ

रेफे रेफपरे अरेफपरे वा विहिते कश्चिद्विशेषः, कृते हि रपरे तत्रैकस्य रेफस्य

`रो रि'(8.3.14) इति लोपेन भवितव्यम्। तस्मादेतदप्यण्ग्रहणं परेण णकारेण भवदजर्थमेवस्यात्। तत्र यदि सर्वेषामचां स्थाने विधीयमानानां रपरत्वमिष्टं स्यात्, असन्देहार्थमज्ग्रहणणेव कुर्यात्। तदेवमेतदज्ग्रहणं पूर्वेणैव णकारेण भवतीति निश्चीयते। `

अणुदित्सवर्णस्य चाप्रत्ययः' (1) इत्येकमनेन इति।अत्र च `उर्ऋत्'(7.4.7) इत्यत्र

नैव सवर्णानामृकारो ग्राहक उपपद्यते,भाव्यमानत्वात्, `भाव्यमानेनाणा सवर्णानां ग्रहणं न' (व्या.प.35) इति प्रतिषेधात्, नैतदस्ति; वक्ष्यति हि तत्र- `न चायं भाव्यमानोऽण्, किं तर्हि ? आदेशान्तरनिवृत्यर्थं स्वरूपमेवाभ्यनुज्ञायते'इति। अची-

कृतदित्यत्र`कृत संशब्दने' (धा.पा. 1653)चुरादिणिच्, लुङ, च्लेः `णिश्रि'(3.1.48)

इत्यादिना चङ। `उर्ऋत' इति ॠकारस्य ऋकारः, णिलोपः, `चङि'(6.1.11) इति

द्विर्वचनम्; `उरत्' (7.4.66) इत्यत्त्वम् हलादिः शेषः, `सन्वल्लघुनि' (7.4.93) इतीत्त्वम्, `दीर्घो लघोः'(7.4.94) इति दीर्घत्वम्।

अथ किमर्थमज्ग्रहणमेवैतन्न क्रियत इति ? यत्र कृते सन्देह एव न भवतीति भावः। किं कारणम् ? नैवं शक्यमित्यत आह- `अन्तःस्थानामपि हि' इत्यादि। अन्तःस्था द्वि

प्रभेदाः- रेफवर्जिताः सानुनासिकाः, निरनुनासिकाश्चेति वचनात्। यवलाः सानुनासिका-

श्चेति वचनात्। यवलाः सानुनासिकनिरनुनासिकभेदेन द्विप्रकाराः; ते प्रत्याहारेऽपि

निरनुनासिका वा उपदिश्येरन्, सानुनासिका वा ? यदि निरनुनासिकाः ? सयँय्यन्तेत्यादौ `अनुस्वारस्य ययि परसवर्णः' (8.4.58) इत्यान्तरतम्यात् सानुनासिकेषु यकारादिषु

परसवर्णेषु कृतेषु तेषां प्रत्याहारेऽनुपदेशाद् यत्वं नास्तीति `अनचि च' (8.4.47) इति यरो द्विर्वचनं विधीयमानं न स्यात्। अण्ग्रहणे तु सत्यम् सवर्णान् गृह्णातीत्येतेषामपि द्विर्वचनं सिध्यति। ननु च कृतेऽपि द्विर्वचने `हलो यमां यमि लोपः' (8.4.

64) इत्येकस्य लोपविधानात् त्रयाणां यकाराणां श्रवणं न सम्भवत्येव। तत्किं द्विर्वचनार्थेन प्रयोजनेन ? नैतदस्ति; पाक्षितो हि स लोपः, `झयो होऽन्यतरस्याम्'(8.4.62) इत्यन्यतरस्याग्रहणानुवृत्तेः। तत्र यस्मिन् पक्षे लोपो नास्ति, तत्र त्रयाणां श्रवणं भवत्येव।अथ सानुनासिका उपदिश्येरन् ? प्रत्याहारेऽनुस्वारस्य परसवर्णत्वं निरनुनासिके परतो न स्यात्; ययां मध्ये तेषामसन्निवेशात्।

`हकारादिषु' इत्यादि। प्रतिज्ञानुनासिक्याः पाणिनीया-। यत्रेच्छन्ति

तत्रानुनासिक्यं प्रतिजानते, नान्यत्र। लकारे च तैरकारस्य तत् प्रतिज्ञायते, न

हकारादिषु। `(1)इत्संज्ञकः' इति। `उपदेशेऽजनुनासिक इत्' (1.3.2) इतीत्संज्ञा

विधानात्। तेन इत्यादिना अनुनासिकप्रतिज्ञायाः फलं दर्शयति। ऋकारऌकारयोः सवर्णसंज्ञोपसंख्यानादृकारो गृह्यमाणो ऌकारमपि गृह्णाति, ततः `उरण्

रपरः' (1.1.51) इति यथा ऋकारस्याण् शिष्यमाणो रपरो भवति एवं लृकारस्यापि भवन् लपरश्चेष्यते।
तस्मादनुनासिकः प्रतिज्ञायते। तेन `आदिरन्त्येन सहेता' (1.1.71) इति `उरण रपरः'
इत्यत्र `र' इति प्रत्याहारग्रहणं भवति, रेफात्प्रभृत्या लणोऽकारात्। तस्मिंश्च
ऋकारस्याण् रपरः भवति, लृकारस्य तु लपर इति। ततः `तवल्कारः' इत्याद्युपपन्नं भवति।।

7. ञमङणनम्।
`तस्य ग्रहणं भवति त्रिभिः' इति। अथ `सृजिदृशोर्झल्यमकिति'(6.1.58)
इत्यत्राप्यस्याकारेण ग्रहणं कस्मान्न भवति? `साक्षाद्द्रष्टरि' (5.2.91) इति
निर्देशात्। प्रत्याहारे ह्येतस्मिन्नकाराद्यादेशविधानाद् द्रष्टृशब्दो न सिध्येत्। इह तर्हि `भ्रस्जो रोपश्रयो रमन्यतरस्याम्' (6.4.47) इति रेफेण कस्मान्न
भवति? अथ रमयमुपात्तः, न त्वम्- इत्येष कुतो निश्चयः? तुल्या हि संहिता तत्र भवितव्यं
सन्देहेन किमयं रम्? आहोस्विदमिति? व्याख्यानान्निश्चय इति चेत्? यदि तर्हि
व्याख्यानस्य निश्चयहेतुत्वमभ्युपेयते, तत एवात्र चान्यत्र च सर्वत्रैवंजातीयके
सन्देहविषये निश्चयो भविष्यतीति किमन्यैरतिविस्तरग्रन्थकारिभिर्हेतुभिरुपन्यस्तैः
प्रयोजनम् ! यस्तु मन्यते `भ्रस्जौ रोपधयो रम्' इत्यत्र व्यवस्थितविभाषया
प्रत्याहारस्य ग्रहणं न भविष्यतीति, स इदं स्याद्वचनीयः- किमनेनान्यतरस्यांग्रहणेन?रम्ग्रहणं विकल्प्यते- अन्यतरस्यां रम् गृह्यत इति ? अथ
विधानमन्यतरस्यां रम्
विधीयत इति ? यदि रम्ग्रहणम्, ततो रेफस्यैवेदं स्वरूपेण मकारानुबन्धवतो ग्रहणम्, नप्रत्याहारस्येति लभ्यते। एतद्व्यवस्थितविभाषया रमागमस्तु विकल्पेन
न स्यात्; अन्यतरस्यांग्रहणविकल्पे चरितार्थत्वात्। न हि द्वितीयमन्यतरस्यां ग्रहणमस्ति, येन विधानं विकल्प्येत, इतरत्र तु पक्षे सिध्यति पाक्षिकं विधानम्;
किन्तु यत् तदभिमतं
व्यवस्थितविभाषया रेफस्यैवेदं मकारानुबन्धवतः स्वरूपेण ग्रहणम्, न प्रत्याहारस्येति, तन्नोपपद्यते; एकत्वादन्यतरस्यांग्रहणस्य। तस्य
विधानविकल्पेनैवोपयुक्तत्वात्।
किञ्च, कुतश्चायमध्यवसायो व्यवस्थितविभाषेयमिति ? व्याख्यानादिति चेत्; किमिदानीं
पारम्पर्याश्रयणेन ! व्याख्यानादेव नैवं प्रत्याहारग्रहणं भविष्यतीति
यत्किञ्चिदेतत्। ` ञकारेणापि प्रत्याहारग्रहणमस्य दृश्यते' इति। यद्येवम्, किमर्थं त्रिभिरियुक्तम् ? `ञमन्ताड्डः'(द.उ.5.7) इत्यत्र प्रत्याहारस्य नावश्यं
ग्रहणमिति दर्शयितुम्। अत्र हि ञकारमकारस्वरूपोपादानेऽपि विना प्रत्याहारग्रहणेनान्यतोऽपि
मकाराद्यन्ताड्डप्रत्ययः सिध्यत्येव, बहुलाधिकारविधानात्। नन्वेवमपि `चतुर्भिः'
इत्येवं वक्तव्यम्, यमिर्ञमन्तेष्वित्यत्र ञारेणाप्यस्य ग्रहणदर्शनात्क, सत्यमेतत्;यदि ग्रहणमात्रमभिप्रेत्यैतदुच्येत्, न चचेदं ग्रहणमात्रमभिसन्धायोक्तम्, किं
तर्हि? ग्रहणविशेषम्, सौत्रम्। न चेदं सौत्रं ग्रहणम्, किं तर्हि ? आनिट्कारिकम्।
`केचित्' इत्यादि। यान्येतान्यनन्तरं प्रत्याहारग्रहणान्युक्तानि तानि `झभञ्' (म.
सू.8) इत्यत्र यो ञकारस्तेनैव भवत्वित्येवं विचिन्त्य केचिदाचार्या मकारस्य प्रत्याख्यानं कुर्वन्ति। तत्र तु प्रत्याख्याने `पुमः खय्यम्परे' (8.3.6) इत्यादिषु
सूत्रेषु मकारस्य स्थाने ञकारः कर्त्तव्य इति तेषामभिप्रायः। `तथा च सति' इत्यादिना मकारानुबन्धप्रत्याख्याने दोषं दर्शयति। `ङञो ह्रस्वादचि ङञुण्
नित्यम्' (8.3.32) इति हि पाठे झभोरपि प्रत्याहारहेऽन्तर्भावाज्झभावप्यागमिनौ स्याताम्- इत्येतच्चो-
द्यमापतति। तयोः झभोः पदान्तयोरभावान्न भविष्यत इति परिहारो वाच्यः। तस्मिन्नुक्ते, `ननु च लभेरुब्जेश्च क्विपि विहित आगमिनावभौ स्त एव पदान्तौ'
इति पुनश्चोद्यम्।
तस्मिन् `झलां जशोऽन्ते' (8.2.39) ति बकारजकारयोः कृतयोः कुतस्ताविति पुनः
परिहारः! ननु चागमिनोझभोरभावाद्वषम्यं स्यात्; तथा हि-ङणनास्त्रय आगमिनः,आगमास्तु
ङणनझभाः पञ्च; ततश्च संख्यावैषम्यान्नैषाम् `यथासंख्यम्' (1.3.10) इति संख्यातानु-
देश स्यादिति पुनश्चोद्यम्; नैष दोषः; सूत्रे यावन्त आगमाः, आगमिनोऽपि तावन्त एव
पठ्यन्ते, तत्र लक्ष्यमनपेक्ष्य ङकारादीनामेव यथासंख्यमागमा भवन्तीति सूत्रार्थे
विहिते उत्तरकालं यथासम्भवं कार्यप्रतिपत्तिर्भविष्यतीति। येषां तावदागमानामागमिनः सन्ति तेषां यथासंख्यं भविष्यति। `झकारभकारौ तु पदानतावागमिनौ
न स्तः' इति कृत्वा
आगमावपि न भविष्यत इति पुनः परिहारो वाच्यः। एवमनेकचोद्यपरिहारेणागमिनो-
र्झभोरभावाद्धेतोरागमाभावप्रतिपत्तौ साध्यायां महाप्रतिपत्तिगौरवं भवेत्।

तस्मादयुक्तं मकारप्रत्याख्यानमिति भावः।

8.झभञ्।

9.घढधष्।

10.जबगडदश्।

11. खफछठथचतव्।
ननु च छकारेणैवास्य ग्रहणम्, न च खफौतदन्तर्भूतौ, तत्किमर्थं तयोरिह
ग्रहणम्? इत्याह- `खफग्रहणम्' इत्यादि। उत्तरेषु प्रत्याहारेष्वनयोरप्यन्तर्भावो
यथा स्यादित्येवमर्थं तयोर्ग्रहणमित्यर्थः।।

12.कपय्।

13 शषसर्।

14. हल्।
इहान्येषां वर्णानां सकृदुपदेशः हकारस्तु द्विरुपदिश्यते, तस्य द्विरुपदेशे प्रयोजनं जिज्ञासुराह- `अथ किमर्थम्' इत्यादि। `स्निहित्वा' इति। `ष्णह प्रीतौ' (धा.पा.1200), आदेः ष्णः स्नः, `समानकर्तृकयोः पूर्वकाले' (3.4.21) इति क्त्वा,इट्।`अलिक्षत्' इति। `लिह आस्वादने' (धा.पा.1026)लृङ, `हो ढः' (8.2.31), `षढोः कः
सि' (8.2.41) इति कत्वम्, `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्। `रुदिहि, स्वपिहि' इति। रुदिस्वपिभ्यां विध्यादिलोट्; `सेर्ह्यपिच्च' (3.4.87), अदादित्वाच्छपो लुक्; `रुदादिभ्यः सार्वधातुके' (7.2.76)इतीट्। `अदाग्धाम्' इति। `दह भस्मीकरणे' (धा.पा.
991)लुङ, तस्य च्लिः, `तस्थस्थमिपाम्' (3.4.101) इत्यादिना तसस्ताम्,च्लेः सिच्
`वदव्रज'(7.2.3) इति वृद्धिः, `दादेर्धातोर्घः'(8.2.32), `झलो झलि' (8.2.26) इति
सिचो लोपः, `झषस्तथोर्धोऽधः' (8.2.40) इति तकारस्य धत्वम्, `झलां जश् झशि'(8.4.53) इति घकारस्य गकारः। तत्र यदि ग्रहणं न स्यात्, ततो घत्वस्याप्यसिद्धत्वात् घकारात् अझलः परः सिजिति' तस्य `झलो झलि' (8.2.26) इति लोपो न स्यात्। तस्मात्
शल्वल्झल्ग्रहणेषु चास्य ग्रहणं यथा स्यादित्युपदिष्टस्यापि पुनरुपदेशः।
यद्येतानि प्रयोजनानि परोपदेश एवास्तु; तेनैव ह्येतानि सिध्यन्ति, पूर्वो-
पदेशस्तु न कर्त्तव्य इत्यभिप्रायेणाह- `हयवरदित्यत्र तर्हि' इत्यादि।
`अड्ग्रहणेषु' इत्यादि। यदि पूर्वत्र नोपदिश्येत,अड्ग्रहणेन चाश्ग्रहणेन चाग्रहणात् `महाँ हि सः' इत्यत्र रुत्वानुनासिकत्वयत्वयलोपा न स्युः। महच्छब्दात् सुः,
`उगिदचाम्' (7.1.70) इति नुम; `सान्तमहतः संयोगस्य ' (6.4.10) इति दीर्घः,
हल्ङ्यादिसंयोगान्तलोपौ। महान् हि इति स्थिते हकारे परतस्तस्याड्ग्रहणेन ग्रहणात् `दीर्घादटि समानपदे' (8.3.9) इति रुत्वम्, `आतोऽटि नित्यम्' (8.3.3) इति पूर्वस्यानुनासिकः। अश्ग्रहणेन ग्रहणात्`भो भगो अघो' (8.3.17) इत्यादिना रेफस्य यत्वम्,
अशीति वर्त्तमाने `हलि सर्वेषाम्' (8.3.22) इति यलोपः। `हशि च' इत्यादि। इदमपरं
पूर्वोपदेशस्य प्रयोजनम्। असति हि तस्मिन्, ब्राह्मणो हसतीत्यत्र हकास्य हश्ग्रहणे-नाग्रहणात् तस्मिंस्त्वसति परतो रोरूत्वं न स्यात्। ब्राह्मणशब्दात् सुः, तस्य
`ससजुषो रुः' (8.2.66), `हशि च' (6.1.114) इत्युत्वम्,`आद्गुणः' (6.1.87)।
`एकस्मात्' इत्यादि। परे ग्राह्या इति शेषः। स्युरिति वक्ष्यमाणेन सम्बन्धः। एकस्मादिति दिग्योगलक्षणा पञ्चमी। एकस्माद्वर्णात् परे ङकारादयो ग्राह्या भवेयु रित्यर्थ। अथ वा - एकस्मादिति ल्यब्लोपे पञ्चमी, प्रासादात् प्रेक्षते इति यथा, तथा प्रदेशवाक्येष्वेकं वर्णमुपच्चार्य परिगृह्य वा ङकारादयो ग्राह्या
भवेयुरित्यर्थः। स पुनरेको वर्णः। ` एओङ' (मा.सू. 3), `झभञ्'(मा.सू.8),`अइउण्' (मा.सू.1)

`खफछठथचटतव्' (मा.सू.11) `हयवरट्' (मा.सू.5) इत्यत्र येन सह ङकारादीनां ग्रहण
मुक्तं स एव वेदितव्यः। `द्वाभ्यां षः' इत्यत्र परे ग्राह्या इति यदध्याहृतं यच्च
`स्युः' इति क्रियापदं तदर्थादेकवचनतया विपरिणमति। द्वाभ्यां परो द्वौ वा उच्चार्य षकारो ग्राह्यो भवेदित्यर्थः। एवमुत्तरत्राप्यर्थो वेदितव्यः। कौ पुनर्द्वौ ?
`झभञ्' (मा.सू.8) `घढधष्' (मा.सू.9) इत्यत्र याभ्यां षकारस्य ग्रहणमुक्तम्, तावेव।
`त्रिभ्य एव कणमाः स्युः' इति। ते पुनस्त्रयः - `ॠलृक्'(मा.सू2) `लण्'(मा.सू.6)
`ञमङणनम्' (मा.सू.7) इत्यत्र यैः ककारादीनां ग्रहणमाख्यातम्, त एव। `ज्ञेयौ चयौ
चतुर्भ्यः' इति। ते पुनश्चत्वारः- `ऐऔच्' (मा.सू.4), `कपय्'(मा.सू.12) इत्यत्र
चयोर्यैश्चकारयकारयोर्ग्रहणमभिमतम्, त एव। `रः पञ्चभ्यः' इति। तेन पुनः पञ्च -
`शषसर्'(मा.सू.13) इत्यत्र यै रेफस्य ग्रहणं प्रतिपादितम्, त एव। `शलौ षड्भ्यः'
इति। ते पुनः षट्- `जबडदश्' (मा.सू.10) `हल्' (मा.सू.14) इत्यत्र यैः
शकारलकारयर्ग्रहणमुक्तम्, ते वेदितव्या इति।।
इति प्रत्याहारप्रकरण्।

अथ प्रथमाध्यायस्य
प्रथमः पादः
1.वृद्धिरादैच्।(1.1.1)
वृद्धिः,आत् ऐच्- इति केचित् त्रिपदमिदं सूत्रं वर्णयन्ति। अन्ये तु, आच्च, ऐच्च् इति आदैजिति समाहारे द्वन्दोऽयमिति मत्वा वृद्धिः, आदैच् इति द्विपदम्।
इतरेतरयोगे हि बहुत्वाद्बहुवचनं स्यात्। ननु च समाहारेऽपि `द्वन्द्वाच्चुदषहान्ता-
त्'(5.4.106)इति टच् समासान्तः स्यात्; समासान्तविधेरनित्यत्वान्न भविष्यति। अनित्यत्वं षष्ठे ज्ञापयिष्यते। अथ `चोः कुः' (8.2.30) इति कुत्वं
कस्मान्न भवति? `अय-
स्मयादीनि च्छन्दसि' (1.4.20) इति भसञ्ज्ञकत्वात्। आदिशब्दस्य प्रकारवाचित्वादैच्छ-
ब्दोऽयमयस्मयादिषु द्रष्टव्यः। ननु तत्र च्छन्दसीत्युच्यते, न चेदं छन्दः, तत्कुतो भसञ्ज्ञा ? `छन्दोवत् सूत्राणि भवन्ति' इत्यदोषः।
इहेदं सूत्रमनर्थकं वा स्याद्यथाकथञ्चिदुदात्तादिवचनवत् ? साध्वनुशासनार्थवा, वृद्धिशब्दस्यादैचाञ्चानेन साधुत्वमाख्यायत इति ? प्रयोगनियमार्थं वा, आदैच
पर एव वृद्धिशब्दः प्रयोक्तव्य इति ? आदेशार्थवा, आदैचां वृद्धिशब्द आदेशो भवति ते वा तस्येति ? आगमागमिसम्बन्धार्थं वा, आदैचां वृद्धिशब्द आगमो
भवति, ते वा तस्येति ?
विशेषणविशेष्यभावप्रसिद्ध्यर्थं वा, आदैचां वृद्धिशब्दो विशेषणम्, ते वा, तस्येति ?एकविभक्तिकत्वं ह्यत्र दृष्टम्, दृष्टश्चैकविभक्तिकयोर्विशेषणविशेष्यभावः,
तद्यथा
नीलमुत्पलमिति; सञ्ज्ञासञ्ज्ञिसम्बन्धार्थं वा ? दृश्यते हि सोऽप्येकविभक्तिकयोः, तद्यथा `अयं पनसः' इति? तत्र तावदाद्यः पक्षो नोपपद्यते।
सगषिगतज्ञानातिशयो
ह्याचार्यः परहितप्रतिपन्नः समाहितचेताः शिष्याणां कृतरक्षासंविधानो मङ्गलपूर्वकं
महता प्रयत्नेन सूत्राणि प्रणीतवान्। तत्राशक्यमेकेन वर्णनाप्यनर्थकेन भवितुम, किं पुनरियता सूत्रप्रबन्धेन!नापि शक्यं वृद्धिशब्दस्यादैचां च साधुत्वमनेन
विधीयत इति विज्ञातुम्, लक्षणान्तरेण विहितत्वात् तेषां साधुत्वस्य। तथा हि वृद्धिशब्दोऽयम-
विशेषेणचोपदिष्टः। `वृधु वृद्धौ' (धा.पा.759) इत्यतः क्तिन्प्रत्ययः `स्त्रियां
क्तिन्'(3.3.94) इति, `झषस्तथोर्धोऽधः'(8.2.40) इति धत्वम्, `झलां जश् झशि' (8.4.
53)इति धकारस्य दकारः। आदैचोऽप्यक्षरसमाम्नाय उपदेशात्। ऐचोऽक्षरसमाम्नाय उपदेशः, नाकारस्येति चेत्? अवर्णजातेरुपदेशात् सोऽपि गृह्यत
इत्यदोषः। अथाप्यकारव्यक्तेरुपदेशः? एवमप्यदोषः। `अणुदित्सवर्णस्य चाप्रत्ययः'(1.1.69) इत्यकारेण गृह्यमाणेनाकारस्यापि ग्रहणात्।
प्रयोगनियमार्थमप्येतन्नार्हति भवितुम। प्रयोगनियमार्थे
ह्येतस्मिन् `सिचि वृद्धिः' (7.2.1) मृजेर्वृद्धिः' (7.2.114) इत्यादावनादैच्परस्य वृद्धिशब्दस्य प्रयोगो नोपपद्यते। कथं हि नाम स्वयमेव नियमं कृत्वा
तमनादैच्परं
प्रयुञ्जीत!
अन्यस्तु प्रयोगनियमार्थमेतन्न भवतीति प्रतिपादयितुमाह- नह च प्रयोगनियमा-
र्थमारभ्यत इति। ननु चायं प्रयोगनियमार्थमेवारभ्यते `ते प्राग धातोः' (1.4.80) इति ? ते गत्यपसर्गसञ्ज्ञका धातोः प्रागेव प्रयोक्तव्याः इति परेण चोदिते

परिहारमाह- `
प्रत्याख्यायते स योगः, न वा, तथानिष्टदर्शनात्' इति। न हि प्रपचतीति प्रयोक्तव्ये कश्चित् पचति प्र इति प्रयुङ्कते। अथापि न प्रत्याख्यायेत, एवमपि न दोषः, यतः
सञ्ज्ञानियमोऽयं न प्रयोगनियमः, ते प्रादयो धातोः प्राक् प्रयुज्यमाना एव गत्युपस-र्गसञ्ज्ञका भवन्तीति। अथापि प्रयोगनियमार्थं स्यात्, एवमपि न दोषः, लौकिकानां
शब्दानामर्थे प्रयुक्तानां प्रयोगनियम आरभ्यते, आदैच्छब्दश्च लौकिकः, तस्य किं
प्रयोगनियमार्थेन वचनेनेति? तत्र यदुक्तं `प्रत्याखअयायते स योगः' इति, तदयुक्तम्। न हि सार्थकस्य प्रत्याख्यानं युक्तम्। निरर्थकः स इति चेत् ?
अत्राप्यनर्थकत्वाशङ्काप्रसङ्गः। यदि ह्यनर्थकान्यपि कानिचित् सूत्राणि प्रणीतवान् सूत्रकार इत्येषोऽ-
ध्यवसायः स्यात्। तस्मात तस्य प्रामाण्यमभ्युपगच्छता सर्वं तत्प्रणीतं येन केनचित् प्रकारेण सार्थकमभ्युपेयम्। योऽपि सञ्ज्ञानियमपक्षमाश्रित्य परिहार उक्तः, सोऽपि वृत्त्या विरुध्यते। `ते गत्युपसर्गसञ्ज्ञका धातोः प्राक् प्रयोक्तव्याः' इत्यनेन
हि वृत्तिग्रन्थेन प्रयोगनियम एवाश्रित इति स्पष्टमेवाख्यातम्। न च वृत्तिं
व्याख्यातुमुद्यतस्य तद्विरुद्धं व्याख्यानं युज्यते कर्तुम।
यदप्युक्तं `लौकिकानां शब्दानाम्' इत्यादि, तदपि न प्रयोगनियमार्थता-
शङ्कापनोदायालम्। तथा हि `विभाषा सुपो बहुच् पुरस्तातु(5.3.68), `अव्ययसर्व-
नाम्नामकच् प्राक् टेः' (5.3.71), `कृञ्चानुप्रयुज्यते लिटि' (3.1.40) इत्यलौकिकानामपि बहुजादीनं शास्त्रे प्रयोगनियमो दृश्यते, तत्र
भवितव्यमेवाशङ्क्या, किमेतत्
प्रयोगनियमार्थम्, अथान्यार्थमित्यलमतिप्रसङ्गेन। तस्मात् पूर्वोक्त एव परीहारो
युक्तः।
आदेशार्थमप्येतच्छक्यते न विज्ञातुम्। यदि ह्यादैचामनेन वृद्धिशब्द आदेशो
विधीयेत, य एते निर्देशाः `याति वाति द्राति प्साति' (8.4.17) इति, यश्च `रायो हलि'(7.2.85) इति, यश्च `नावो द्विगोः' (5.4.99) इति, ते
नोपपद्येरन्। अथ वृद्धिशब्द-
स्यादैच आदिश्येरन्, एवमपि `इद्वृद्धौ'(6.3.28), `वृद्धिनिमित्तस्य च तद्धितस्य' (6.3.39)इत्येवमादयो निर्देशा न सम्भवेयुः। अत
एवागमार्थमप्येतन्नोपपद्यते। न
ह्यादैचां वृद्धिशब्द आगमे विहिते तस्य वा तेषु पूर्वोक्ता निर्देशा उपपद्यन्ते।
अन्यस्त्वाह- आदेशविधाने स्थान्यादेशसम्बन्धे षष्ठ्या भवितव्यम्, आगमविधानेप्यवयवावयविसम्बन्धे, न चेह षष्ठी विद्यते, तस्मात् षष्ठ्या
अभावान्नेदमादेशार्थम्, नाप्यागमार्थम् इति। एतच्चासम्यक्। विनाऽपि षष्ठ्या `हल्ङ्याग्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' (6.1.68), `अनिते'(8.4.19),
`अन्तः'(8.4.20), `उभौ साभ्यासस्य'
(8.4.21) इत्यावेशविधानदर्शनात्। आगमविधानस्यापि `न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' (7.3.3) इति षष्ठीमन्तरेणापि दर्शनात्
विशेषणविशेष्यभावप्रसिद्ध्यर्थमप्येतन्न सम्भाव्यते। तथा हि सम्भवव्यभिचारे च सति विशेषणविशेष्यभावो भवति,
नीलोत्पलवत्। न चेहादैचां वृद्धिशब्दे तस्य वा तेषु सम्भवः। ननु च यथोत्पलशब्दःसर्वत्रोत्पलार्थे वर्तमानो नीलशब्देनार्थान्तराद्वयवच्छिद्यत इति
व्यवच्छिद्यमानो विशेष्यो भवति, नीलशब्दस्तु व्यवच्छिन्दन् विशेषणम्, तथानयोरपबि यो वयवच्छेद्यः स
विशेष्यो भवति, यस्तु व्यवच्छेदकः स विशेषणमिति? नैतदस्ति। उभयोर्हि सार्थकत्वे
सत्येतदुपपद्यते, नीलोत्पलशब्दवत्। न चादैचोऽर्थवन्तः। भवतु नामानयोर्विशेषणविशे-
ष्यभावः, तथापि नैतत्सिद्ध्यर्थमिदं युक्तम्; निष्प्रयोजनत्वात्, तत्पुनः प्रकृतानुपयोगित्वात्। शब्दानुशासने हि शास्त्रे प्रकृते यग्नाम शब्दसंस्कारानुपयोगिवचनं तत्सर्वमप्रयोजनम्। शब्दसंस्कारानुपयोगित्वं त्वेतत्प्रतिपदितेन विशेषणविशेष्यभावेनवृद्धिशब्दस्यादैचां वा स्वरविशेषस्य वा रुपविशेषस्य वा
संस्कारस्यासिद्धेः। विशेषणविशेष्यभाव एव तेषां संस्कार इति चेत् ? यद्येवम्, अत्यल्पमिदमुच्यते`वृद्धिरादैच्' (1.1.1)इति। नीलोत्पलमित्यद्पि हि
वक्तव्यम्, नीलोत्पलादिशब्दानां विशेषणविशेष्यभावप्रसिद्धये। न चोक्तम्, अतो नैष संस्कारोऽभिमत इति नास्य तादर्थ्यं सम्भाव्यते।
ननु तुल्यविभक्तिकानां तद्गुणसमाध्यारोपोऽपि दृष्टः, तद्यथा `सिंहो माणवकः' इति, तस्मात् तदर्थमेतद्भविष्यतीति यत्पक्षान्तरमेके परिकल्पयाम्बभूवुः, तदर्थम-
प्येतन्न भवति, तद्गुणसमाध्यारोपस्य सतोऽप्यत्र प्रकृतानुपयोगित्वेनानर्थकत्वात्। तस्मात् पारिशेष्यात् सञ्ज्ञासञ्ज्ञिसम्बन्धार्थमेवैतदित्यालोच्याह-`वृद्धिशब्दः सञ्ज्ञात्वेन' इत्यादि। भवतु नाम परिशेष्यात्तदर्थम्। एतत् कुतो लभ्यते ? वृद्धि-
शब्दः सञ्ज्ञा, आदैचः सञ्ज्ञिनः इति। विपर्ययः कस्मान्न भवति,आदैचः सञ्ज्ञा, वृद्धिशब्दः सञ्ज्ञी इति? नार्हति विपर्ययो भवितुम्। तथा हि, लघ्वर्थत्वात् सञ्ज्ञाकरणस्य, यस्मिन्नुच्चार्यमाणे प्रदेशेषु लाघवं भवति तस्य सञ्ज्ञार्थत्वेन भाव्यम्। वृद्धिशब्दे च विभक्तिकेऽप्युच्चार्यमाणे लाघवं भवति, नादैक्षु;

यस्माद्वृद्धिशब्द
उच्चार्यमाणे चतस्त्रो मात्रा भवन्ति, आदैक्षु तु पञ्च। न चादैचां प्रत्येकं
सञ्ज्ञाभावाल्लाघवं भवतीति शक्यं परिकल्पयितुम्, प्रयोजनविशेषमन्तरेणैकस्थाने-
सञ्ज्ञाविधानस्य निष्फलत्वात्। किञ्चावर्तिभ्यः सञ्ज्ञा भवन्ति। वृद्धिशब्दश्चावर्तते, नादैच्छब्दः तस्मान्न भवति विपर्ययः `वृद्धिशब्दः' इति।
शब्दग्रहणमर्थव्यवच्छे-
दार्थम्। असति हि तस्मिन् शब्दादर्थावगतेरर्थस्यैव सञ्ज्ञात्वं विज्ञायेत। यद्यपि प्रागेव सञ्ज्ञा विहिता, तथापि शिष्यप्रशिष्यप्रबन्धाद्युपरमाद्विधीयत इतिवर्तमान प्रयत्वेन् निर्देशः। यत्र समुदास्य कार्यमिच्छति तत्र उभेपदग्रहणं करोति, यथा `उभे
अभ्यस्तम्' (6.1.5) इति, अन्वर्थां वा महतीं सञ्ज्ञाम्, `हलोऽन्तराः संयोगः'(1.1.7) इति। तत्र हि महती सञ्ज्ञैवमर्था क्रियते, समुदायस्यैषा सञ्ज्ञायथा स्यादिति।
एतच्चोत्तरत्र व्यक्तीकरिष्यामः। इह तु न किञ्चित्तथाविधं वचनमस्ति यतः समुदायस्यै-
षा सञ्ज्ञा स्यात्। तस्मादेकैकस्यैषा सञ्ज्ञेति मनसि कृत्वाह `प्रत्येककम्' इति।
ननु चेहापि लाघवार्थमेकाक्षरायां सञ्ज्ञायां कर्तव्यायां वृद्धिरिति महत्याः
सञ्ज्ञायाःकरणं समुदायस्य सञ्ज्ञा यथा स्यादित्येवमर्थम्? नैतदस्ति। मङ्गलार्थत्वा-
दस्याः सञ्ज्ञायाः। अत एवास्याः प्रागुच्चारणम्। अन्यथा सञ्ज्ञायाः सतः कार्यिणः
कार्येण भवितव्यमिति, यथा `अदेङ्गुणः'(1.1.2) इत्यादौ पूर्वसञ्ज्ञीनिर्दिष्ट-,
तथेहापि निर्दिशेत्। आकारस्य गुणान्तरयुक्तयोश्चैचोः प्रत्याहारेऽसन्निवेशान्नामी वर्णा इति कस्यचिन्मन्दधियो भ्रान्तिः स्यात्, अतस्तन्निराकरणायाह-
`वर्णानाम्'
इत्यादि। प्रत्यासत्तेस्तद्भावितानामेवैषां सञ्ज्ञा स्यादिति कस्यचिद्विपर्ययः
स्यात्, अतस्तमपाकर्तुमाह-`सामान्येन' इति। व्याप्तेर्न्यायादित्यभिप्रायः।
सामान्येनेत्यस्यार्थं विस्पष्टीकर्तुमाह- `तद्भावितनाम्' इत्यादि। ते तद्भाविताः
ये वृद्धिशब्देनोत्पादिताः, ततोऽन्येऽतद्भाविताः। आदिति तपरकरणम्-`तपरस्तत्कालस्य'(1.1.70) इति गुणान्तरभिन्नानामपि तुल्यकालानां ग्रहणार्थं वा स्यात्, भिन्न-
कालानां ग्रहणनिवृत्त्यर्थं वा ? तत्र् पूर्वः पक्षस्तावन्नोपपद्यते; अभेदकत्वादिहोदात्तादीनां शास्त्रे गुणानाम। कुत एतत् ? `लुङलङलृङक्ष्वडुदात्तः'(6.4.71) इत्युदात्तग्रहणात्, अन्यथा ह्युदात्तगुणयुक्तमेवाटमुच्चारयेत्। द्वितीयोऽपि नोपपद्यते।
यदि ह्याकारः सवर्णानां ग्राहकः स्यात्, ततस्तेन भिन्नकालस्याप्यवर्णस्य ग्रहणे सति तस्यापि सञ्ज्ञा मा भूदिति भिन्नकालानां ग्रहणनिवृत्त्यर्थं तपरकरणमुपपद्यते। न
चासौ सवर्णानां ग्राहकः, अनण्त्वात्, तस्य पुनरक्षरसमाम्नायेऽसन्निवेशात्। तस्मादनर्थकं तपरकरणम्। ततो न कर्तव्यमेवेत्यत आह- `तपरकरणम्' इत्यादि। एचोरर्थः प्रयोजनं
यसय् तत् तथोक्तम्। ननु च जातौ पदार्थे प्लुतस्यापि ग्रहणं भवति, तत्राप्यवर्णजातेः समवयात्, तत्रासति तपरकरणे तस्यापि सञ्ज्ञा स्यत्, तस्मात्
तन्निवृत्तय तपरकरणं भवदाकारार्थमप्युपपद्यत एव, तत्किमुच्यते `एजर्थम्' इति ? एवं मन्यते-
जातिपक्षसमाश्रयणेऽपि हि दीर्घोच्चारणसामर्थ्याद्द्विमात्रा एवावर्णव्यक्तयः
समाश्रिता इति गम्यते, इतरथा हि लाघवार्थम् `अद्' इत्येवाभिदध्यात्। न च ह्रस्वनिवृत्त्यर्थं दीर्घोच्चारणमिति शक्यते परिकल्पयितुम्, दीर्घोच्चारणेऽपि ह्रस्व-
ग्रहणं प्राप्नोत्येव, तत्राप्यवर्णजातेः सम्भवादिति। न चासन्देहार्थम् `आत्' इत्युक्तम्, वर्णान्तरासाधारणत्वात्, असंहितया वा सन्देहाभावादिति। ननु च `तपरस्तत्काल-
स्य' (1.1.70)इत्यत्र तः परो यस्मादिति बहुव्रीहिराश्रितः, न चात्रैच् तपरः, तत्कथं तपरकरणमैजर्थं भवतीत्यत आह- `तावपि परस्तपरः' इति। न केवलं तः परो यस्मात् स तपर
इति, अपि तु तादपि यः परः सोऽपि तपर इति अपिशब्देन दर्शयति. एतदुक्तं भवति, न
केवलं बहुव्रीहिरेव तत्राश्रीयते, किं तर्हि? पञ्चमीतत्पुरुषोऽपि। यता चैतदुभयमा-
श्रीयते तथा तत्रैवोपपादयिष्यामः। इति करणो हेतौ यत एवं तादपि परस्तपरः, तेन तपरकरणमैजर्थमित्यर्थः।`खट्वैडकादिषु' इत्यादिना तदेवैजर्थत्वं तपरकरणस्य स्पष्टीकरोति।
वृक्ष एलका `वृक्षैलका'। अक्रियमाणे ह्यत्र तपरकरणे त्रिमात्रिकस्याकारैकारसमुदाय
स्यस्थाने वृद्धिरेचि'(6.1.88) इति वृद्धिरान्तरतम्यात् त्रिमात्रिक एवैकारः स्यात्यदि तस्यापि वृद्धिसञ्ज्ञा स्यात्। खट्वा ओदनं खट्वौदनम्, खट्वा एलका

खट्वैलका इत्यत्रापि पूर्वोत्तरसमुदाययोश्चतुर्मात्रायोश्चतुर्मात्रावकारैकारौ स्याताम्,तन्मा
भूदेष दोष इति त्रिमात्रचतुर्मात्राणामैचां वृद्धिसञ्ज्ञानिवृत्तये तपरकरणं क्रियते। आश्वलायनः, ऐतिकायनः' इति। अश्वलेतिकशब्दाभ्यां `नडादिभ्यः फक्' (4.1.99),
`यस्येति च' (6.4.148) इति लोपः, `किति च'(7.2.118) इत्यादिवृद्धिः। `औपगवः' इति।
उपगुशब्दात् `प्राग्दीव्यतोऽण्'(4.1.83)। `औपमन्यवः' इति। उपमन्युशब्दात `अनृष्यानन्तर्ये बिदादिभ्योऽञ्' (4.1.104)इत्यञ्, उभयत्रापि
`ओर्गुणः'(6.4.146), अवादेशः (6.1.78), ` तद्धितेष्वचामादेः' (7.2.117) इति वृद्धिः। एतानि चत्वार्यपि तद्भावितो-
दाहरणानि। ननु येऽत्र त्रयः सञ्ज्ञिनस्तेषामाद्यैस्त्रिभिर्विषयो दर्शितः, किमर्थ-
श्चतुर्थोपन्यासः? केचिदाहुः- वद्धिनिमित्तभेदात्, आद्ययोरुदाहरणयोः कित्तद्धितो
वृद्धेर्निमत्तम्, तृतीयेऽपि णित्, तचुर्थेऽपि ञित् इति। एतच्चायुक्तम्। तथा हि `इको गुणवृद्धी' (1.1.3) इत्यत्र`अकार्षीत्' इत्युदाहृत्य `अहार्षीन्' इत्युदाहृतम्', न च तत्र वृद्धिनिमित्तभेदोऽस्ति। तथा `न धातुलोप आर्धधातुके' (1.1.4) इत्यत्र
लोलुवः इत्युदाहृत्य `पोपुवः, मरीमृजः' इत्यधिकोदाहरणोपन्यासः कृतः। न च तत्र लोपनिमित्तभेदः; प्रतिषेधनिमित्तभेदो वा अधिकोदाहरणोपन्यासस्य हेतुर्विद्यते। प्रायेणा-
न्यष्वेपि च सामान्यलक्षणेषु विनापि निमित्तभेदानाधिकोदाहरणोपन्यास उपलभ्यते।
योऽप्याह `ओपगव इत्यनेनैच औकारस्य विषये दर्शितेऽपि स्वरभेदादौपमन्यव
इत्येतदधिकमुदाहरणमुपन्यस्तम्' इति, तस्यापि तदयुक्तम्, अत एवानन्तरोक्ताद्धेतोर्वेदितव्यम्।. यदि निमित्तभेदः, स्वरभेदो वा सर्वत्राधिकोदाहरणोपन्यासो वेदितव्यः। `शालीयः, मालीयः' इति। अतद्भावितस्योदाहरणे । अत्र हि वृद्धिसञ्ज्ञायां वृद्धिर्यस्या
चामादिस्तद्वृद्धम्' (1.1.73) इति वृद्धसञ्ज्ञाफं छप्रत्ययोपन्यासस्तस्या एव फलभूताया अभिव्यक्त्यर्थः। वृद्धसञ्ज्ञायां हि सत्यां ` वृद्धाच्छः' (4.2.114) इति जातादावर्थे छो विधीयते। ऐकारौकारयोस्त्वतद्भावितयोरुदाहरणं नात्र दर्शितम्, एतदनुसरसार-
णैव गम्यमानत्वात्। आकारस्यातद्भावितस्य वृद्धिसञ्ज्ञायाः कार्ये दर्शिते, तयोरपि तदेव कार्यमिति तन्मुखेनैव गम्यत एव। के पुनसत्योरुदाहरणे? `रैमयम्, नौमयम्' इति।
आत्रैकारौकारयोर्वृद्धिसञ्ज्ञायां सत्यां पूर्ववद्वृद्धसञ्ज्ञा। तस्यां च सत्यां
रायो विकारः, नावो विकार इति `नित्यं वृद्धशरादिभ्यः' (4.3.144) इति मयड्भवति।

2.अदेङ् गुणः। (1.1.2)

`तपरकरणं त्विह सर्वार्थम्'इति। सर्वस्मिन्नर्थः प्रयोजनं यस्य तत्
तथोक्तम्। तुशब्दः पूर्वस्माद्विशेषं दर्शयति। तत्र ह्यैजर्थमेव, इह तु सर्वार्थम्, अकारार्थमेङर्थमपि। असति हि तपरकरणं अदेङामणत्वात् सवर्णानां ग्रहणं सति भिन्नकालानामप्येषा सञ्ज्ञा स्यात्। ततश्च `तरिता' इत्यत्रान्तरत्मयाद्दीर्घस्य दीर्घ एव गुणस्यात्।ननु च वृद्धिसञ्ज्ञा गुणसञ्ज्ञाया बाधिका भविष्यति, तत् कुतोऽयं प्रसङ्गः ? नैतदस्ति। एकसञ्ज्ञाधिकारे हि सञ्ज्ञया सञ्ज्ञान्तरं बाध्यते, न चात्रेकसञ्ज्ञाधि-कारः। स्यादेतत्, असत्यप्येकसञ्ज्ञाधिकारे यथा `जीवति तु वंश्ये युवा'(4.1.163) इति गोत्रसञ्ज्ञा युवसञ्ज्ञया बाध्यते, यथा च `लिट् च' (3.4.115), `लिङाशिषि'(3.4.116)इति
चार्धधातुकसञ्ज्ञया सार्वधातुकसंज्ञा बाध्यते, तथा गुणसंज्ञा वृद्धिसञ्ज्ञया बाधिष्यते इति? अयुक्तमेतत। युवसञ्ज्ञाविधौ तुग्रहणं नियमार्थं क्रियते। ततो युक्तं यद्युवसञ्ज्ञया गोत्रसञ्ज्ञा बाध्यत इति। आर्धधातुकसञ्ज्ञाऽपि यत् सार्वधातुकसञ्ज्ञा बाध्यते तदपि युक्तमेव, `छन्दस्युभयथा' (3.4.117)ति वचनात्। यदि सार्व-
धातुकार्धधातुकसञ्ज्ञयोः समावेशः स्यात्, न बाध्यबाधकभावः, तदा `छन्दस्युभयथा'(3.4.117) इति वचनमपार्थकं स्यात्। इह तु न किञ्चित् तथाविधं निबन्धनमस्ति, यतो वृद्धिसञ्ज्ञया गुणसञ्ज्ञा बाध्यते। अथापि कथञ्चिद्बाध्येत, एवमपि त्रिमात्रिकस्यापि गुण-
सञ्ज्ञा स्यादेव। न हि सा तया शक्या बाधितुम्, तस्य अतद्विषयत्वात्। त्रिमात्रस्यापि गुणसञ्ज्ञायां सत्यां त्रिमात्रोऽपि गुणः प्रसज्यते। ॠकारस्य हि कालतो यथैकमत्रिकोऽकारोऽन्तरतमो न सम्भवति, तथा त्रिमात्रोऽपि, तत् कुत एतल्लभ्यते ? ह्रस्वेनैवास्य गुणेन भवितव्यम् न हि त्रिमात्रेणाकारेणेति। किञ्च, यदि भिन्न-
कालानामपि गुणसञ्ज्ञा स्यात्, `खट्वा इन्द्रः= खट्वेन्द्रः खट्वा उर्वी खट्वोर्वी' इत्यत्र त्रिमात्रत्वात् पूर्वोत्तरसमुदायात्मनः स्थानिनः `आद्गुणः' (6.1.87)इति
त्रिमात्रो गुणः स्यात्। खट्वा ईषा= खट्वेषा, खट्वा उढा=खट्वोढा' इत्यत्र चतुर्मा-
मात्रित्वात् चतुर्मात्रः। तस्मात् सर्वार्थं तपरकरणं कर्तव्यम्। `तरिता' इत्यादि। `तॄ तप्लवनतरणयोः' (धा.पा.969), `चिञ् चयने' (धा.पा.1251), `ष्टुञ् स्तुतौ'

(धा.पा.1043), एभ्यः `ण्वुल्तृचौ'(3.1.133) इति तृच्। `आर्धधातुकस्येड् वलादेः'(7.2.35) इतीट्, `सार्वधातुकार्धधातुकयोः' (7.3.84) इति गुणः, सु, `ऋदुशनस्'(7.1.94) इत्यादिना अनङ, `सर्वनामस्थाने च' (6.4.8) इति दीर्घः। एतानि त्रीणि यथाक्रमदेङां तद्भावितानामुदाहरणानि। `पठन्ति, पठन्' इत्यकारस्यातद्भावितस्योदाहरणे। अत्रान्त्याकारस्य गुणसञ्ज्ञायां `अतो गुणे' (6.1.97) पररूपत्वं भवति। पठन्निति शत्रन्तमेतत्।
एकास्यातद्भावितस्यकार्योदाहरणम्- `अहं पचे' इत्यादि। ओकारस्यातद्भावितस् तन्न
सम्भवतीति न प्रदर्श्यते।

3.इको गुणवृद्धी। (1.1.3)
`परिभाषेयम्' इति। नाधिकारः, अस्वरितत्वात्। नापि गुणवृद्ध्योर्विधायकं लक्षणम्, लक्षणान्तरेण तयोर्विधास्यमानत्वात्। `स्थानिनियमार्था' इति। स्थानिनि नियमः
स्थानिनियमः, स्थान्यन्तरव्यवच्छेदेनैकत्र प्रवर्तनम्, सोऽर्थः प्रयोजनं यस्याः सा तथोक्ता। `अनियमप्रसङ्गे नियमो विधीयते' इति। यत्र साक्षात् स्थानी न निर्दिष्टः
`सार्वधातुकार्धधातुकयोः'(7.3.84), `सिचि वृद्धिः परस्मैपदेषु'(7.2.1) इत्यादौ,
तत्रानियमे प्रसक्ते नियममेषां करोति-इक एव नान्यस्येति. अतः स एवस्या विषयो
वेदितव्यः, न तु यत्र साक्षात् स्थानी निर्दिश्यते सोऽपि, यथा- `ओर्गुणः' (6.4.146) `अत उपधायाः' (7.2.116) इत्यादिः। तत्र ह्यनियमस्य प्राप्तिरेव नास्ति। लिङ्गवती चेयं परिभाषा, लिङ्गं चास्या गुणवृद्धिग्रहणम्, तत्रोपतिष्ठते। तथा च द्वे षष्ठ्यौ प्रादुर्भवतः,-`इकः' इत्येका षष्ठी,
`मिदेर्गुणः'(7.3.82) इत्येवमादिका द्वितीया।
तत्र कामचारादयथेष्टं सिध्यति। तयोर्विशेषणविशेष्यभावः क्रियते। `मिदेः'
इत्यत्रान्त इग न सम्भवतीति त्सयाङविशेषणत्वं नोपपद्यतेतस्मादत्राङ्गेनेगेव विशिष्यते- मिदेरङ्गस्य य इगिति। तेन स्थानष्ठ्यभावादलोऽन्त्यस्यानुपस्थाने सति यत्र तत्र स्थस्येको गुणः सिद्धो भवति। `सार्वधातुकार्धधातुकयोः' (7.3.84) इत्यादौ त्वङ्गस्य इगन्तत्वं सम्भवति। तेन चाङ्गे विशिष्यमाणे तदन्तविधौ सतीष्टं सिध्यति। तस्मादिकै-वाङ्गं विशिष्यते, `इगन्तस्याङ्गस्येति। एवंचय सत्यस्याः स्थानषष्ठीत्वात् `अलो।-
न्त्यस्य' (1.1.52) इत्येतदुपतिष्ठछते, तेनेगन्तस्यैवाङ्गस्य गुणवृद्धी भवतः,
नेतरस्य। `स्वसञ्ज्ञया' इति। अत्र वक्ष्यमाणोऽभिप्रायः। `इक एव स्थाने' इति।
यदर्थेयं परिभाषा तस्य नियमस्य स्वरूपं दर्शयति- `अकार्षीत्' इति। `डुकृञ् करण' (धा.पा. 1472),लुङ, `च्लेः सिच्' (3.1.44) सिचि वृद्धिः (7.2.1)`अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्। एवम् `अहार्षीत्' इति। अत्र `ह्रञ् हरणे' (धा.899) इत्ययं विशेषः। `इक इति किम्' इत। एकदेशद्वारेण समुदायस्य पर्यनुयोगो वेदितव्यः। न हि `गुणवृद्धी'
इत्येतावता विनेग्ग्रहणेनार्थः कश्चित् संगृह्यते। `यानम्' इति। यातेर्ल्युटि गुणे विधीयमान आन्तरतम्यादकारः स्यात्। ततश्च द्वयोरकारयोः `अतो गुणे' (6.1.97
पररूपत्वे कृते `यनम्' इत्यनिष्टं रूपं स्यात्। `ग्लायति' इति। `ग्लै म्लै
हर्षक्षये' (धा.पा.903.904), अत्र सन्ध्यक्षरस्य ऐकारस्य एकारो गुणः स्यात्। ततश्चायादेशे कृते ग्लयति इत्यनिष्टं रूपं स्यात्। `उम्भिता'इति। `उभ उम्भ पूरणे' (धा.पा.1319,1320), तृच्, इट्। अत्र व्यञ्जनस्य कारस्यौष्ठ्यस्य ओकारो गुणः स्यात्। ततश्चावादेशे कृते `उभविता' इत्यनिष्टं रूपं स्यात्।
अथ कथं स्वसञ्ज्ञया शिष्यमाणावित्येष विशेषो लभ्यते? न हि सूत्रे
स्वसञ्ज्ञाग्रहणमस्तीत्यत आह `पुनर्गुणवृद्धिग्रहणम्' इत्यादि। इहपूर्वसूत्राभ्यां गुणवृद्धिग्रहणमनुवर्तते। कतस्मिन्ननुवर्तमाने यत् पुनरिह गुणवृद्धरिग्रहणं क्रियतेतस्यैतत् प्रयोजनम्- `यत्र स्वसञ्ज्ञया गुणवृद्धी विधीयेते तत्रायं नियमो यथा
स्यात्, अन्यत्र मा भूत्'इति। पुनर्गुणवृद्धिग्रहणसामर्थ्यादन्यतरस्य गुणवृद्धिग्रहणस्य सञ्ज्ञाप्रधानत्वं सम्पाद्यते। कतेन स्वसञ्ज्ञया विधाने नियमो भवतीत्येषोऽ-
र्थो लभ्यते। अन्यथा हि यद्येवं पूर्वो नियमो नात्राभिमतः स्यात्, ततो नियतस्य निय मस्य प्रकृतगुणवृद्धिग्रहणानुवृत्त्यैव सिद्धत्वात् पुनरिह गुणवृद्धिग्रहणमनर्थकं
स्यादित्येवमभिप्रायः। `इह मा भूत्' इत्यादिनार्यैवं प्रकारस्य नियमस्य व्यवच्छेद्यत्वं दर्शयति- `द्यौः' इति। `दिव औत्'(7.1.84) इत्यौकारः। स्वरूपेण विधीयमानोऽलोऽन्त्यस्यैव भवति, नेकः। `पन्थाः' इति। `पथिमथ्यृभुक्षामात्' (7.1.85) इत्याकारोऽन्त्यस्यैव भवति, नेकः।
`इतोऽत्सर्वनामस्थाने'(7.1.86) इतीकारस्य अकारः, `थोऽन्थः'
(7.1.87) इति थकारस्य न्थादेशः। `इयम्' इति। `त्यदादीनामः'

(7.2.102) इत्यत्वमन्तर्सयैव भवति, नेकः। `दश्च' (7.2.109) इति दकारस्य मकारः। स
इत्यत्र त्वस्याः परिभाषाया उपस्थाने सति त्यदाद्यत्वं न स्यादेव। `तदोः सः सावन-
न्त्ययोः' (7.2.106) इति सत्वम्, ननु च `अनश्च' (1.2.28) इत्ययमपि स्थानिनियमः
स्वसञ्ज्ञाविधान एवेष्यते, तस्यापि च नियमस्य द्यौरित्यादिकं व्यवच्छेद्यम्। तथा
हि वृत्तिकारस्तत्र वक्ष्यति `स्वसञ्ज्ञया विधाने नियमः। अजिति वर्तते। इह मा भूत्, द्यौः, पन्थाः, सः, द्युभ्याम्, द्युभिः' (का 38) इति, ततश्च यदनेन
नियमेनैवंविधेन कर्त्तव्यं तत्तेनैव सिध्यति, नार्थ एवंविधयनियमर्थेन पुनरिह गुणवृद्धिग्रहणेन?
सत्यमेतत्' किन्त्वेवमर्थप्रतिपत्तौ य एते मन्दधियः प्राथमकल्पिकाः श्रोतारः, तेषांप्रतिपत्तिगौरवं स्यात्। तस्मात्ताननुग्रहीतं विस्पष्टार्थमिह सञ्ज्ञाविधाने
नियमं प्रतिपादयितुं पुनर्गुणवृद्धिग्रहणं कृतम्. तद्येवम्, यत् येन विधातव्यं तदनेनैव
विहितमिति तत्र सञ्ज्ञाविधाने नियमो न कर्त्तव्यः ? नैतदस्ति; यदि ह्यसावित्थम्भूतो नियमो न स्यात्, ततो `द्युभ्याम् द्युभिः' इत्यत्र `दिव उत्'(6.1.131) इत्युकारः
स्वरूपेणैव विधीयमानोऽच एव स्थाने स्यात्, नालोऽन्त्यस्य। न ह्यनेन नियमेनाचः
शक्यते व्यावर्तयितुम्, तस्य गुणवृद्धिसञ्ज्ञकत्वात्।

4.न धातुलोप आर्धधातुके। (1.1.4)

उक्तपरिमाणस्य शब्दस्य धातुसञ्ज्ञा कृता। तस्य सर्वस्य लोपे कृते यत्र गुणवृद्धी प्राप्नुतस्तदार्धधातुकेन सम्भवत्येव, तत् किं प्रतिषेधेन ? तस्मात्
प्रतिषेधविधानसामर्थ्याद्धात्वेकदेशे धातुशब्दो वर्तत इति मत्वाह- `धात्वेकदेशो धातुः' इति। `धातुलोपे'इति। यद्ययं धातोर्लोपो धातुलोप इति तत्पुरूषः, तत
आर्धधातुकग्रहणं गुणवृद्धिविशेषणं वा स्यात्- `धा4तुलोपे सत्यार्धधातुकनिमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः' इति। लोपविशेषणं वा स्यात्-`
आर्धधातुकनिमित्ते धातुलोपे सति
गुणवृद्धी न भवतः' इति? पूर्वस्मिन् `क्नोपयति'इत्यत्र प्रतिषेधः प्राप्नोति। तत्र प्रतिविधानं कर्तव्यम्। द्वितीये तु न भवत्येष दोषः। न हि `क्नोपयति'
इत्यत्रार्धधातुकनिमित्तलोपः, किं तर्हि, कतवल्निमित्तकः। किन्तु द्वितीये पक्षे प्रेद्धमित्यत्र प्राप्नोति। अस्ति ह्यत्रार्धधातुकनिमित्तो लोपः। ननु
चेग्लक्षणयोर्गुणवृद्धयोरयं प्रतिषेधः; न चात्रेग्लक्षणो गुणः ? नैतदस्ति; अत्रापीग्लक्षण एव गुणो यो ह्युभयोः स्थाने भवति, लभते सोऽन्तयतरव्यपदेशम्। तथा
हि- `मातुः, पितुः' इत्यत्रोभयोः
स्थाने भवन् रपरोऽण् भवति। तस्माल्लोपविशेषणपक्षेऽपि तत्पुरुषे प्रतिविधानं
कर्त्तव्यमेव। बहुव्रीहौ तु न किञ्चित् प्रतिविधेयमिति मन्यमानो बहुव्रीहिरयमिति
दर्शयन्नाह- `तस्य' इत्यादि। एतेन लोपविशेषणमार्धधातुकमित्येतद्दर्शितं भवति। एवं
चार्धधातुके सम्भवति यदि तत्तस्य निमित्तं भवति, ततश्च क्नोपयतीत्यत्रातिप्रसङ्गो
नावतरति। `तत्र' इत्यादि। नापि गुणवृद्ध्योरार्धधातुकं निमित्त्वेन विशेषणमित्या-
ख्यातम्। ततश्च प्रेद्धमित्यत्राप्यतिप्रसङ्गो न भवति, न ह्याद्गुण आर्धधातुक-
निमित्तः। `ये ते' इति। स्त्रीलिङ्गनिर्देशः `गुणवृद्धी'इत्यनेन स्त्रीलिङ्गेन सामानाधिकरण्यात्। अस्य तु स्त्रीलिङ्गता `परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः'
(2.4.26)
इत्यतिदेशात्। अर्थस्य च सोऽतिदेश इति यत्तदोरपि तत्रार्थे वर्तमानयोः स्त्रीलिङ्गता भवति। ननु च नियमस्य प्रकृतत्वात् तस्यैवायं प्रतिषेधो युक्तः, तत्
किमित्येवमाह-`तत्र ये गुणवृद्धी प्राप्नुतस्ते न भवतः' इति। तयोः प्राधान्यात्। तत् पुनर्नियमेनोपक्रियमाणत्वात्, नियमस्य तु तादर्थ्यादप्राधान्यम्।
तस्माद्गुणवृद्धयोरेवायं
प्रतिषेधो न्याय्यः।
`लोलुवः, पोपुवः' इति। `लूञ् छेदने' (धा.पा.1483), `पूञ् पवने (धा.पा.1482)इत्येताभ्यां `धातोरेकाचः' (3.1.22) इत्यादिना यङ्, `सन्यङो'
(6.1.9) इति द्विर्वचनम्, `गुणोयङलुकोः' (7.4.82) इत्यभ्यासस्य गुणः, यङन्तात् पचाद्यचि `यङोऽचि च' (2.4.74) इति लुकि तन्निमित्तगुणप्रतिषेधः,
तस्मिन् सति `अचि श्नुधातुकभ्रुवाम्' (6.4.
77) इत्यादिनोवङ। `मरीमृजः' इति। `मृजू शुद्धौ' (धा.पा.1066), पूर्ववद्यङ, द्विर्वचनम्, उरदत्त्वम्, (7.4.66) `हलादिः शेषः' (7.4.60) `रीगृदुपधस्य
च' (7.4.90)इति
रीगागमः। लोलूयादिभ्य इत्यादिशब्देन `पोपूय, मरीमृज्य' इत्येतयोर्ग्रहणम्। `लूञ्-
लविता' इति। यावदेव धातुसञ्ज्ञा न भवति तावदेव `सर्वविधिभ्यो लोपविधिर्बलीयात्'
(व्या.प.70) इति ञकारस्य लोपो भवति, पश्चाल्लू इत्येतस्य धातुसञ्ज्ञा, तेन ञकारलोपो धातुलोपो न भवतीति भवति प्रत्युदाहरणम्। `रेड् ' इति। `रिष

रुष हिंसायाम्' (धा.पा.1232,1230), `अन्येभ्योऽपि दृश्यन्ते'(3.2.75) इति विच्, इकारचकारौ `वेरपृक्तस्य'(6.1.67) इत्यत्र सामान्यग्रहणाविघातार्थौ, वकारस्य चानेनैव लोपः, `पुगन्तलघूपधस्य च' (7.3.86) इति गुणः। `झलां जशोऽन्ते' (8.2.39) इति षकारस्य डकारः। ननु च द्वयङ्गविकले द्वे अपि एते प्रत्युदाहरणे, तथैव ह्यत्र धातुलोपो न भवति, एवमार्धधातुकनिमि-त्तोऽपि न भवति, नैतदस्ति; सति हि धातुग्रहणे पदद्वयसान्निध्याद्बहुव्रीहिर्लभ्यते। तस्मिंश्च सत्यार्धधातुकनिमत्तत्वं लोपस्य। असति हि धातुग्रहणे `न लोप आर्धधातुके' इत्युच्यमाने `आर्धधातुकाश्रये ये गुणवृद्धी प्रतिषेधः स्यात्। `रोरवीति' इति। `
रु शब्दे' (धा.पा. 1034) इत्यस्माद्यङ, `बहुलं छन्दसि' (2.4.73) इति यङो लुक्, लट्,तिप्, शप्। अदादित्वाच्छपो लुक् (2.4.72(,`यङो वा'()7.3.94) इतीट्। अत्र
सार्वधातुकनिमित्तो गुणो न प्रतिषिध्यते। ननु च द्वयङ्गविकलमेवेदम्, यथैव
ह्यार्धधातुकनिमित्तो गुणो न भवत्येवं लोपोऽपि ? नैतदस्ति; सति ह्यार्धधातुकग्रहणेऽन्यपदार्थत्वे न तस्याश्रयणात् तन्निमित्तो लोपो लभ्यते, तस्मिंश्च सति `न धातुलोपे' इतीयत्युच्यमाने `ये केचन गुणवृद्धी ते च लोपे सति भवतः' इत्येष वाक्यार्थः
स्यात्। ततश्चाविशेषितत्वाल्लोपस्य लोपमात्रे प्रतिषेधो विज्ञायते। `अभाजि' इति। `भञ्जो आमर्द्दने' (धा.पा. 1453),लुङ्, च्लिः, `चिण् भावकर्मणोः'(3.1.66) इति चिण्,
`इणो लुक्' (6.4.104)इति तशब्दस्य लुक्, `भञ्जेश्च चिणि' (6.4.33) इत्यनुनासिकलोपः। `रागः' इति। अत्रापि `घञि च भावकरणयोः' (6.4.27) इति नलोपः। `रञ्ज रागे' (धा.पा.1167), भावे घञ्। यद्यप्यत्र स्रवमस्ति तथापीक इत्यत्रानुवृत्तेरिह चेकोऽसम्भवात् `
अत उपधायाः' (7.2.116) इति वृद्धेः प्राप्तायाः प्रतिषेधो न भवति। `क्नोपयति' इति। "क्नूयी शब्दे" (धा.पा.485), `हेतुमति च' (3.1.26) इति णिच्, `अर्त्तिह्री' गुणः। `प्रेद्धम्' इति। `ञिइन्धी दीप्तौ' (धा.पा.1448), क्तः, `अनिदिताम्' (6.4.24) इत्या-दिनानुनासिकलोपः, `झषस्तथोर्धोऽधः' (8.2.40) इति तकारस्य धत्वम्। `झलां जश् झशि'(8.4.53) इति धातुधकारस्य दकारः, प्रगतमिद्धमिति `कुगतिप्रादयः' (2.2.18) इति समासः।

5. क्ङिति च। (1.1.5)
क्ङितीति यदीयं परसप्तमी स्यादनन्तरस्यैवेकः प्रतिषेधः स्यात्, `चितः,
चितवात्' इत्यादौ व्यवहितस्य `भिन्नो भिन्नवात्' इत्यादौ न स्यात्, `तस्मिन्निति निर्दिष्टे स्पूर्वस्य' (1.1.66) इत्यत्र निर्दिष्टग्रहणस्यानन्तरर्यार्थत्वात्।
निमित्तसप्तम्यां त्वस्यां सर्वत्र भवितव्यम्, व्यवहितयोरपि निमित्तनिमित्तिभावसद्भावा-
दिति मन्यमान आह- `निमित्तसप्तम्येषा' इति। निमित्तात् सप्तमी निमित्तसप्तमी। `पञ्चमी भयेन' (2.1.37) इति `पञ्चमी' इति योगविभागात् समासः।
सा पुनः सप्तमी `यस्य च
भावेन भावलक्षणम्' (2.3.37) इत्यनेन वेदितव्या। क्ङितो हि निमित्तभावेन गुणवृद्ध्योःप्राप्तिलक्षणो भावो लक्ष्यते। अथ निमित्तसप्तम्यामप्यस्यां कस्मादेव व्यवहितस् प्रतिषेधो लभ्यते? तत्र तस्मिन् (1.1.66) इत्यादिकायाः परिभाषाया अनुपस्थानात्।
`क्ङिति च' (1.1.73) इत्यादरावप्यस्या इक्परिभाषाया उपस्थानात् `शालीयः, मालीयः'
इत्यत्र वृद्धरसञ्ज्ञा न स्यात। यता चेयमिक्परिभाषा विध्यङ्गशेषभूतत्वाद्विधावेवोपतिष्ठते, तथासावप्यानन्तर्यपरिभाषा। न चेह गुणवृद्धी विधीयेते, किं तर्हि ? विहिते अप्यन्यत्र क्ङितीत्यनेन विशिष्येते। तस्मान्नात्र तस्याः परिभाषाया उपस्थानमित्यन-न्तरस्यापि प्रतिषेधः सिध्यति। `क्ङिन्निमित्ते ये गुणवृद्धी' इति।
क्ङिन्निमित्तं ययोस्ते तथोक्ते। ते पुनर्ये क्ङिन्निमित्ते सति प्राप्नुतस्ते विज्ञेये। एतेन गुण-
वृद्धीविशेषणं क्ङिद्ग्रहणमिति दर्शयति। ननु च विधीयमानतया प्राधान्यात् प्रतिषेध-
स्यैवैतद्विशेषणं युक्तम् ? नैतदस्ति; यत्र हि गुणः कृतात्मसंस्कारः प्रधानोपकाराय महते प्रभवति, तत्र प्रधानस्यैव भूयांसमुपकारं कर्तुमात्मनः संस्कारमनुभूय प्रधानेन सम्बन्धमनुभवति। यथोक्तम्-

`गुणः कृतात्मसंस्कारः प्रतिपद्यते।
प्रधानस्योपकारे हि तथा भयसि वर्तते।। इति।
इह तु गुणवृद्ध्योः क्ङिद्ग्रहणेन विशेषितयोर्महान प्रधानस्य प्रतिषेधस्योपकारो भवति, व्यवहितस्यापि तत्सिद्धेः। `भिन्नः' इति। `भिदिर् विदारणे' (धा.पा. 1439),क्तः, `रदाभ्यां निष्ठातोनः'(8.2.42) इति नत्वम्। `मृष्टः' इति। मृजेः `व्रश्च'(8.2.36) इत्यादिना जकारस्य षत्वम्, `ष्टुना ष्टुः'(8.4.41) इति ष्टुत्वम्। चिनुत
इत्यादौ तु `सार्वधातुकमपित्'(1.2.4) इति क्ङित्त्वम्। `चिन्वन्ति'इति। `हुश्नुवोः
सार्वधातुके'(6.4.87) इति यणादेशः। अत्र `चितः, चितवान्, स्तुतः, स्तुतवान्, चिनतः, चिन्वन्ति' इत्येषूदाहरणेषु यतायोगं सार्वधातुकार्धधातुकलक्षणस्य गुणस्य प्रतिषेधः, `भिन्नः भिन्नवान्' इति लघूपधलक्षणस्य, परिशिष्टेषु `मृजेर्वृद्धिः' (7.2.114)

इति वृद्धेः। `ग्लाजिस्थश्च क्स्नुः' इति। क्स्नुप्रत्ययोऽयं यदि कित् स्यात्,
स्थास्नुरित्यत्र घुमास्थादिसूत्रेण (6.4.66) तिष्ठतेरीत्त्वं स्यात्। अतस्तत्परिहाराय क्स्नोर्गित्त्वं प्रतिज्ञायते। तथा हि तत्र वक्ष्यति-`गिच्चायं प्रत्ययो न कित्। तेन स्थ ईकारो न भवति'(का.241) इति। गित्वे च सति `भूष्णुः, जिष्णुः' इत्यत्र`क्ङिति च' (1.1.5) इति प्रतिषेध उच्यमानो न प्राप्नोति। अत एतद्दोषपरिहारायाह- `गकारोऽप्यत्र' इत्यादि (का241)।चर्त्त्वभूतः चर्त्वं प्राप्त इत्यर्थः। चर्त्वं तु `
खरि च'(8.4.55) इति. यदि हि क्स्नोर्गित्त्वमिष्यते, भूष्णुरित्यत्र `श्र्युकः किति'(7.2.11) इति किति प्रतिषेध उच्यमानो न स्यात् ? नैष दोषः; तत्रापि चर्त्त्वभूतो
गकारो निर्दिश्यते। तथा हि -`ग्लाजिस्थश्च क्स्नुः' (3.2.139) इत्यत्र जयादित्यवृ-
त्तौ ग्रन्थः- ``क्ङिति च' (1.1.5) इत्यत्र गकारश्चर्त्त्वभूतो निर्दिश्यते, तेन गुणो न भवति। `श्र्युकः किति' (7.2.11) इत्यत्रापि गकारो निर्दिश्यते, तेन भुव इड् न भवति'(का. 241) इति। `श्र्युकः किति' (7.2.11) इत्यत्रापि जयादित्यवृत्तौ ग्रन्थः- `गकारोऽप्यत्र चर्त्त्वभूतो निर्दिश्यते भूष्णुरित्यत्र यथा स्यात्' इति। वामनस्य
त्वेतत् सर्वमनभिमतम्। तथा हि तस्यैव सूत्रस्य तद्विरचितायां वृत्तौ ग्रन्थः- केचिदत्र द्विककरानिर्देशेन गकारप्रश्लेषं वर्णयन्ति भूष्णुरित्येवं यथा स्यात्। सौत्रत्वाच्च निर्देशस्य `श्र्युकः किति' (7.2.11) इत्यत्र चर्त्वस्यासिद्धत्वमना-
श्रित्य रोरुत्वं न कृतम्, विसर्जनीयश्च कृतः इति। `ग्लाजिस्थश्च क्स्नुः' (3.2.139) इत्यत्र स्था आ इत्यकारप्रश्लेषेण स्थास्नोः सिद्धत्वान्न किञ्चदेतत्"(का 802)
इति। स एवं मन्यते- यदि क्स्नुप्रत्यययस्य कित्त्वे सति तिष्ठतेरीत्त्वं
प्राप्नुयात् तथा तत्परिहारार्थं गित्त्वं युज्यते प्रतिज्ञातुम। गित्त्वे च सति
जिष्णुः, भूष्णुः' इत्यत्र यथायोगमिड्गुणयोर्निरासाय `क्ङिति च'(1.1.5) इत्यत्र
`श्र्युकः किति' (7.2.11) इत्यत्र च गकारश्चर्त्वभूतो निर्दिश्यमानः शोभेत। न च
क्स्नुप्रत्ययो गित्,किं तर्हि ? किदेव। तत्किमिड्गुणप्रतिषेधार्थेन चर्त्त्वभूतगकारस्य निर्देशेन !न च क्स्नोः कित्त्वेसति तिष्ठतेरात्वं प्राप्नोति। तस्मात् `ग्लाजिस्थशअच क्स्नुः' (3.2.139) इत्याकारप्रश्लेषः कृतः, क्स्नुप्रत्ययान्तस्य
तिष्ठतेराकार एव यथा स्यात्, यदन्यत् प्राप्नोति तन्मा भूत् इत्येवमर्थः। ततश्च
तेनैव सिद्धत्वात् स्थास्नुशब्दस्याकिञ्चित्करमिह गकारप्रश्लेषवर्णनमिति. `कामयते' इति। `कमेर्णिङ'(3.1.30)। अत्र `अत उपधायाः'(7.2.116) इति वृद्धेः प्रतिषेधो न भवति। `लैगवायनः' इति। लिगुशब्दात् `नडादिभ्यःफक्' (4.1.99) इति फकि कृते `ओर्गुणः' (6.4.146) इति गुणस्य प्रतिषेधो न भवति। ननु चोकारइगेव, तदयुक्तमिदं प्रत्युदाहरणम् ? नैतदस्ति; अत्र हि चकारः क्रियते `इकः' इत्यनुकर्षणार्थः। तत्र चकारेणानुकर्षणसा-
मर्थ्यादिक इत्येतदर्थपदार्थतामुत्सृज्य स्वरूपपदार्थतामनुभवति। अन्यथा हि यदि
चकारेणाध्यनुकृष्यमाणमर्थपदार्थकमेव स्यात् तदनुकर्षणार्थं चकारकरणमनर्थकं स्यात्, अर्थपदार्थस्य स्वरितत्वादेवानुवृत्तिसिद्धेः। स्वरूपपदार्थके च तस्मिन्निह सन्नि-
हिते सत्ययमर्थो भवति, `इकग इत्येवं ये गुणवृद्धी विधीयेते, इक इतीमं शब्दमुचार्य
ये गुणवृद्धी विधीयेते, ते क्ङिन्निमित्ते न भवतः' इति। न च `लैगवायनः' इत्यत्र
इकः' इतीमं शब्दमुचार्य गुणो विधीयते, इक्परिभाषायास्तत्रानुपस्थानात्। अनुपस्थानं तु साक्षादुकारस्य स्थानिनो निर्देशात्। यत्र हि साक्षात् स्थानी न निर्दिश्यते
तत्रासावुपतिष्ठते। ननु यदि स्वरूपपदार्थस्येक इत्यस्येह सन्निधानम्, स्थानी न
निर्दिष्टः स्यात्, ततश्च न ज्ञायते कस्य गुणवृद्धी प्रतिषिध्येते इति ? नैष दोषः। सामर्थ्यादिक एव गुणवृद्धयोः प्रतिषेधोऽयं गम्यते। न ह्यन्यस्येक इतीमं शब्दुमु-
च्चार्य गुणवृद्धी विधीयेते। अथ वा " यद्यपीक्परिभाषा विध्यङ्गशेषभूता, तथापीहास-
त्यपि गुणवृद्धयोर्विधाने चकारेणानुकृशष्य सन्निधाप्यते। एतदेव हि चकारकरणस्य प्रयोजनं यदिदमिक्परिभाषायाः सन्निधापनम्। ततश्च तस्या उपस्थाने सति यत्रासौ व्याप्रियते तत्रैवायं प्रतिषेधो विज्ञायते। क्व चासौ व्याप्रियते ? यत्र स्थानी साक्षान्
निर्दिश्यते. इह तु निर्दिश्यते स्थानी, तस्मादिक्परिभाषाया व्यापाराभावाद्भवति
प्रत्युदाहरण्। `मृजेः' इत्यादि। कथं पुनरिष्यमाणापि सा लभ्यते ? यथा लभ्यते तथा
श्रूयताम। `अचो ञ्णिति' श्(7.2.115) इत्यत्र `मृजेर्वृद्धिः' (7.2.114) इति वर्तते, `जराया जरसन्यतरस्याम्' (7.2.101) इत्यतोऽन्यतरस्यां ग्रहणं च मण्डूकप्लुतिन्यायेनानुवर्त्तते, सा च व्यवस्थितविभाषा। `अचः' इति योगविभागः क्रियते। मृजेरजादौ संक्रमे विभाषा वृद्धिर्भवति, अन्यत्र न भवत्येव।
`लघूपधगुणस्याप्यत्र प्रतिषेधः' इति । एतेन संक्रमत्वं दर्शयति। अन्ये तु

उत्तरसूत्रे `कणिता श्वः' रणिता श्वः' इत्यनन्तरमनेन ग्रन्थेन भवितव्यम्,इह तु दुर्विन्यस्तकाकुपदजनितभ्रान्तिभिः कुलेखकैर्लिखितमिति वर्णयन्ति। अथ वा- निमित्तसप्त-
म्या एवेदं फलं दर्शितमिति मन्तव्यम्। `अचिनवम्, असनुवम्' इत्यत्र लङो ङित्वात्
तदादेशस्यापि मिपो ङित्त्वम्। स्थानिवद्भावेन मिपो ङित्त्वात् तदादेशस्याप्यमो
ङित्त्वं पूर्ववत्, ततश्च तदाश्रयो विकरणस्य गुणप्रतिषेधः प्राप्नोति। कस्मान्न
भवतीत्याह- `अचिनवम्' इत्यादि। आदिशब्देन `अकरवम्' इत्यादिनां परिग्रहः। `लकारस्य' इति। लकारादेशोऽपि पारम्पर्येण लकारपूर्वकत्वादुपचारेण लकार इत्युक्तः। सत्यपीत्य-
भ्युपगमे `हलः श्नः शानज्झौ' (3.2.83) इति शानजादेशस्य शित्करणाल्लिङ्गान्नावश्यमनुबन्धकार्येषु स्थानिवद्भावो भवतीत्यध्यवसितोऽयमर्थः। अतो ङित्त्ववचम्' इत्यादि।
यदि ङिति यत्कार्यं विधीयते तल्लकारे ङिति स्यात्, ततो लिङ एव ङित्त्वेन चिनुयादि-
त्यादौ गुणप्रतिषेधस्य सिद्धत्वात् `यासुट् परस्मैपदेषूदात्तो ङिच्च' (3.4.103) इति यत् तस्य यासुटो ङ्द्विचनं तन्न कुर्यात्, कृतञ्च; ततोऽवसीयते- `ङिति यत् कार्यं तल्लकारे इति न भवति' इति।

6. दीधीवेवीटाम्। (1.1.6)
`दीधीवेव्योः' इति। दीधीङ दीप्तिदेवनयोः' (धा.पा. 1076); `वेवीङ वेतिना
तुल्ये (धा.पा.1077) इत्येतयोर्ग्रहणम्। ननु च `दीङ क्षये' (धा.पा. 1134) `धीङ अनादरे'(धा.पा.1136), `वेञ् तन्तुसन्ताने' (धा.पा.1006) `वी गतिप्रजनकान्त्यसनखादनेषु' (धा.पा.1048) इत्येतेषां ग्रहणं कस्मान्न विज्ञायते ? यद्येषां ग्रहणमभिमतं
स्यादसन्देहार्थं `वीवेधीदीटाम्' इत्येवं न्यासं कुर्यात्। अन्यथा तु कृतम्।
तस्मात् पूर्वोक्तयोरेव धात्वोरिह ग्रहणम्। इटश्चेति- `आर्धरधातुकस्य' (7.2.35)
इत्यादिना विहितस्य। अथ `इट्, किट, कटी गतौ' (धा.पा.318,319320) इत्यस्य
ग्रहणं कस्मान्न भवति, युक्तं चैतत्, धातुसाहचर्यात् ? नैतदस्ति; इह`अल्पाच्तरम्' (2.2.34) इत इटः पूर्वनिपाते कर्त्तव्ये तद्विपर्यासं कुर्वतैतत् सूचितम्- `अन्योऽ-
प्यत्र कश्चिद्विपर्यासो विज्ञेयः' इति। तेन धातुसाहचर्याद्धातुग्रहणे प्राप्ते तद्विपरीतस्यैवागमस्य ग्रहणं विज्ञायते। `आदीध्यनम्' इति। ल्युट्। `आदीध्यकः' इति।
ण्वुल्।`कणिता श्वः, रणिता श्वः' इति। `अण रण कण' (धा.पा.444,445,449) इत्यादौ
शब्दार्थे धातुवर्गे कणिरणी पठ्येते , ताभ्यां लुटि स्यताशी लृलुटोः' (3.1.33) इति तासिः, `लुटः प्रथमस्य '(2.4.85) इत्यादिना तिषो डादेशः, टिलोपः, `आर्धधातुकस्य' (7.2.35) इत्यादिनेट्। अथेटो वृद्धेरुदाहरणं कस्मान्न प्रदर्शितमित्याह- `वृद्धिरिटो न सम्भवति' इति। अङ्गस्य वृद्धिर्ञ्णिदादौ प्रत्यये विधीयते इट् चायमार्धधुकभवतः। न चार्धधातुकस्याङसञ्ज्ञास्ति ञ्णिदादौ प्रत्यये। तस्मादिटो वृद्धिर्न भवति।

7. हलोऽनन्तराः संयोगः। (1.1.7)
अन्तरं छिद्रं विवरं वर्णशून्यः काल इत्यर्थः। न विद्यतेऽन्तरं यषां ते
तथोक्ताः। `भिन्नजातीयैः' इत्यादि। भिन्नजातीयैरिति वचनं भिन्नजातीयानामेव लोके व्यवधायकत्वदर्शनात्। तथा हि कश्चित् केनचित् किमनन्तरे परे ब्राह्मणकुले इति पृष्टः सन्नाह- नानन्तरे, वृषलकुलमनयोर्मध्ये प्रतिवसीति। `श्लिष्टोच्चारितस्य हलः सञ्ज्ञा स्यादिह निर्वायाय्, निर्यायादिति `वान्यस्य संयोगादेः' (6.4.68) इत्येत्वं स्यात्, इह च `संस्कषीष्ट' इति `ऋतश्च संयोगादेः' (7.2.43) इतीट्, इह च
`संस्क्रियते' इति `गुणोऽर्तिसंयोगाद्योः' (7.4.29) इति गुणः- इत्येवमादयोऽन्येऽपि बहवो दोषाः प्रत्येकं हलां सञ्ज्ञित्वे भाष्य उद्भाविताः। यद्यपि तत्रैव ते कथ-
ञ्चित् प्रयासेन परिहृताः, तथापि यस्तु तत्परिहारेण प्रतिपत्तौ साध्यायां प्रति-
पत्तिगौरवदोष आपद्यते सोऽपरिहार्य एव। समुदाये तु सञ्ज्ञिनि दोषाशङ्काऽपि नास्ति। तस्मात् स एव सञ्ज्ञी युक्त इत्यालोच्याह- `समुदायः सञ्ज्ञी' इति। ननु च यत्र
सहभूतानां कार्यमिच्छति तत्र यत्न आरभ्यते, यथा- `उभे अभ्यस्तम्' (6.1.5) इति
उभेग्रहणं करोति, न चेह कश्चिद्यत्नः कृतः, तत्कथं समुदायस्य सञ्ज्ञा लभ्यते ?
इहापि कृत एव यत्न इत्यदोषः। पुनरसौ ? महत्याः सञ्ज्ञायाः करणम्। `लघ्वर्थं हि
सञ्ज्ञाकरणम्' (व्या.प.135) इति महत्याः सञ्ज्ञायाः करणं प्रयोजनमन्तरेण न सम्भाव्यते। तस्मान्महानत्र सञ्ज्ञीत्येतत् सूचयितुं महती सञ्ज्ञा कृतेति

गम्येति। तथा
चोक्तम्- `इङ्गितेनोन्मिषितेमन महता वा सूत्रप्रबन्धेनाचार्याणामभिप्रायो लक्ष्यते' इति। एवं च महान् सञ्ज्ञी भवति, यदि समुदायः सञ्ज्ञी भवति, नैकैको हळ्। तस्मादुप-
पन्नमेतत् समुदायः सञ्ज्ञीति `हलः' इति बहुवचननर्देशाद्द्वयोः सञ्ज्ञा न सिद्ध्यतीति यश्चोदयेत् तं प्रत्याह- `जातौ च ' इत्यादि। चशब्दो यस्मादर्थे। यस्माज्जातौ बहुवचनं तेन द्वयोर्बहूनां च संयोगसञ्ज्ञा सिद्धा भवति। अग्निरित्यादिकं रूपोदाहरणं
द्रष्टव्यम् `तिलान्स्त्रावपति' इत्यादि। `हे मपरे वा' (8.3.26) इत्यतो वेति वर्त्तमाने , `ङः सि धुट्' (8.3.29) इत्यतो धुडिति च, `नश्च' (8.3.30) इति पक्षे धुट्,
`खरि च' (8.4.55) इति च तकारः। तत्र यदा धुण्नास्ति तदा`नसतयाः' इति। यदा त्वस्ति तदा `नतसतरयाः'। `तितउच्छत्रम्' इति। `तनोतेर्डउः सन्वच्च(द.उ.1.160) इति डउ-
प्रत्यये टिलोपे द्विर्वचने च कृते रूपम्। `संयोगान्तस्य लोपः'स्यात् इति। यद्य-
त्राकारस्योकारेण सञ्ज्ञा स्यादित्यभिप्रायः। न च लोपे सत्युकारोपदेशस्य वैयर्थ्यमाशङ्कनीयम्। यत्र पदसञ्ज्ञा नास्ति तितउनीत्यादौ, तत्र श्रूयमाणत्वात्। `पचति' इति
रूपप्रत्युदाहरणम्, `पनसम्' इति कार्यप्रत्युदाहरणम् `स्कोः संयोगाद्योरिति लोपः
स्यात्' इति। यदि सकारनकारयोः सान्तरयोरपि संयोगसञ्ज्ञा स्यादिति भावः।

8.मुखनासिकावचनोऽनुनासिकः। (1.1.8)
`मुखसहिता नासिका मुखनासिका' इत्यनेन मुखनासिकाशब्दोऽयं तत्पूरुषः, न
द्वन्द्व इति दर्शयति। ततपुरुषस्तु मयूरव्यंसकादित्वाद्वेदितव्यः। यदि च मुखं च
नासिका चेति द्वन्द्व स्यात्, प्राणितूर्यादिसूत्रेण (2.4.2) एकवद्भावः स्यात्।
ततश्च `स नपुंसकम्' (2.4.17) इति नपुंसकत्वं स्यात्। तस्मिंश्च सति `ह्रस्वो
नपुंसके प्रातिपदिकस्य'(1.2.47) इति ह्रस्वत्वं प्रसज्येतेति भावः। ननु चोच्यते-
अनयेति करणे ल्युटि कृते, तदन्तात् `टिड्ढाणञ्' (4.1.15) इत्यादिना ङीपा भवितव्यम्, ततशच् तदन्तेन बहुव्रीहौ `मुखनासिकावचनः' इति निर्देशो नोपपद्यते ? नैतदस्ति; वचनशब्दोऽयं `कृत्यल्युटो बहुलम्' (3.3.113) इति बहुलवचनात् कर्मसाधनः- उच्यत इति
वचनो वर्णे वर्तते, न नासिकायाम्। अत एवाह- `तया य उच्चार्यते' इति।` उच्चार्यते'
इति कर्मणि लकारः। एवं कृत्वा `मुखनासिकावचनः' इति षष्ठीसमासोऽयं वेदितव्यः, न बहुव्रीहिः। `अनुस्वास्यैव' इति। अनुस्वारे ह्युच्यमाने नासिकायाश्च व्यापारो न मुखस्य ; तेन तस्यैव स्यात्, न तु स्यात् ञमङणनानाम् ; नापि `अभ्र आँ अपः' (ऋ.5.48.1)
इत्यात्रार्धचन्द्राकृतेर्वर्णस्य; तदुच्चारणे मुखस्यापि व्यापारात्। ततश्च `यरोऽ
नुनासिके ' (8.4.45) इत्येतस्मिन् कार्ये कर्त्तव्येऽनुस्वारस्यैव ग्रहणं स्यात्, न तु ङकारादीनामित्यभिप्रायः। ननु च प्रासादवासिन्यायेन तेषामपि भविष्यति ? यथा
`प्रासादवासिन आनीयन्ताम्' इत्युक्ते ये प्रासाद एव निवसन्ति, तेषामपि ग्रहणं भवति, येऽपि प्रासादे भूमौ च उभयत्र वसन्ति तेषामपि। यथा ह्यभय आनीयन्ते, तथेहापि `नासिकावचनः' इत्येतावत्युच्यमाने नासिकावचनस्यानुस्वारस्य मुखानसिकावचनानां
च ङकारादीनां ग्रहणं भविष्यति,ततश्चानुस्वारस्य हि स्यादित्ययुक्तमुक्तम्. एवं तु
वक्तव्यम्- अनुस्वारस्यापि हि स्यादिति ? नैतदस्ति; इह हि त्रीणि दर्शनानि
सम्भवन्ति,-` समस्त एवानुनासिको वर्णओ नासिकावचनो मुखवचनश्च' इत्येकं दर्शनम्; `
पूर्वभागस्त्वस्य मुखवचनः' इति तृतीयम्। उभयोरप्यनन्तरयोर्दर्शनयोर्नासिकामुखवचने
भागे तथानुरागं करोति यथाऽसावपि नासिकावचनभाग इव लक्ष्यते। तत्र यदेतदनन्तरदर्शन-
द्वयम्, तस्यान्यरत् पाणिनेरभिमतम्। न चास्मिन् प्रासादवासिन्याय एकत्राप्यवतरति।
यदि हि ङकारादयो नासिकायोऽपि साकल्येनोच्चार्येरन्, मुखेनापि; ततः प्रासादवासि
न्यायेन `नासिकावचनः' इत्येतावत्युक्ते तेषामपि ग्रहणं स्यात्। न चैवं भागस्यैव; तेषां नासिकया मुखेन चोच्चारणात्। तदसति मुखग्रहणे तेषां ग्रहणं न स्यात्, तदभावे च
सञ्ज्ञा न स्यादिति युक्तमुक्तम्- अनुस्वनारस्यैव हि स्यात्' इति। `कचटतपानां मा

भूत्' इति। एते हि ककारादयो मुखेनैवोच्चार्यन्ते, न नासिकया; ततश्चासति नासिका-
ग्रहणे तेषामेव स्यात्। एवं च `शक्तः', `सुप्तम्' इत्यत्र `अनुदात्तोपदेशवनति' (6.4.37) इत्यादिना लोपः प्रसज्येत, `ओदनपक्' इत्यत्र `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इति दीर्घत्वम्।
अथ किमर्थं महती सञ्ज्ञा क्रियते ? अनु पश्चान्नासिका व्याप्रियते यस्मिन्, अथ वा - अनु पश्चान्नासिकाया व्याप्रियते यस्मिन्, यद्वा- नासिकायाः पश्चात् व्याप्रियते ? मुखस्य तु प्रकृतत्वात् तदेव गम्यते। तत्र ये ते द्वे दर्शने, ययोः
पाणिनेरन्यतरदभीष्टम्, तयोः पूर्वस्मिन् नासिका मुखात् पश्चात् व्याप्रियते,
उत्तरत्र मुखं नासिकायाः। अन्वर्थसञ्ज्ञाकरणं तु पूर्वोक्तयोर्दर्शनयोरन्यतराभ्युपगमसूचनार्थम्। तदभ्युपगमसूचनं तु प्रासादवासिन्यायमाश्रित्य मुखग्रहणं ये प्रत्य-
चक्षीरन्, तेषां निराकरणार्थम्।

9.तुल्यास्यप्रयत्नं सवर्णम्। (1.1.9)
तुलया सम्मितं तुल्यमिति `नौवयोधर्म' (4.4.91) इत्यादिना यतमुत्पाद्य तुल्यशब्दो व्युत्पाद्यते। न च प्रयत्नस्य तुलया सम्मितत्वं सम्भवति,
ततश्चासम्भवद्विशेषणमिति यश्चोदयेत्, तं प्रत्याह- `तुल्यशब्दः' इत्यादि। एवं मन्यते-
व्युत्पत्त्यर्थं तु केवलं तुलोपादमते, न त्वत्र तुलार्थो विद्यते, न वा
सम्मितार्थः। सदृषपर्यायो ह्ययं तुल्यशब्दः। तथा हि- `तुल्य' इत्युक्ते `सदृश' इति पर्यायो भवति, न तु तुलया सम्मित इति। आस्यशब्दोऽयं ण्यदन्तोऽप्यस्ति। अस्यते
क्षिप्यतेऽन्नमनेनेति `कृत्यल्युटो बहुलम्' (3.3.113) इति करणे ण्यत्। आस्यम्- मुखम्। तत्पुनः ओष्ठात्प्रभृति प्राक् काकलकात्। काकलकं नाम ग्रीवायामुन्नतप्रदेशः, लोके यः कण्ठमणिः इत्युच्यते। तद्धितान्तोऽप्यास्यशब्दोऽस्ति- आस्ये भवमिति, `शरीरावयवाच्च' (4.3.55) इति यति कृते, `यस्येति च' (6.4.148) इत्यकारलोपे
`हलो यमां यमि लोपः' (8.4.64) इति यलोपे च कृते `आस्यम्' इति। एतच्च
मुखान्तर्वर्त्तिनां ताल्वादीनां वाचकम्। तत्र यदि पूर्वस्यास्यशब्दस्येदं ग्रहणं
स्यात्, कचटतपानामपि सवर्णसञ्ज्ञा स्यात्, ण्यदन्तस्यास्यशब्दस्य वाच्येऽर्थे
तेषां तुल्यत्वात् प्रयत्नविषयस्य। इममतद्धितान्तस्यास्यशब्दस्य ग्रहणे दोषं दृष्ट्वा तद्धितान्तस्येदं ग्रहणमिति दर्शयन्नाह- `आस्ये भवमास्यम' इति। किं पुनस्तदित्याह- `ताल्वादिस्थानम' इति। यस्मिन् वर्णा निष्पाद्यन्ते, तत् स्थानम्। आविशब्देन
नासिकादीनां ग्रहणम्। ननु च नासिका मुखाद्बहिर्वृत्तिरास्यं न भवति ? नैतदस्ति; न
हि मुखाद्बहिर्वर्त्तिनी नासिकेयं विवक्षिता, तस्यां वर्णानामनिष्पत्तेः। का तर्हि ? अन्तरास्ये चर्म विततमस्ति पणवचर्मवत्, तत्सम्बद्धा रेखा, यस्यां वायुनाभिहन्यमा-नायां वर्णा निष्पद्यन्ते सेह नासिका विवक्षिता। कथं पुनर्विज्ञायते तद्धितान्तस्यास्यशब्दस्येदं ग्रहणमिति ? आस्यग्रहणसार्थ्यात्। यदि ह्यतद्धितान्तस्य ग्रहणं
स्यात्, आस्यग्रहणमनर्थकं स्यात्। सर्वेषामेव हि तद्वाच्य एवार्थे प्रयत्नस्तुल्यः।नास्त्येव हि सः, यस्य व्यवच्छेदार्थमास्यग्रहणं स्यात्। ननु च विसर्जनीयस्य सत्य-
सति वा सवर्णत्वे प्रयोजनमस्ति, नापि दोषः।`स्पृष्टतादिः' इति। आदिशब्देन ईषत्स्पृ-ष्टतादीनां ग्रहणम्। `वर्णगुणः' इति। अकारादीनां वर्णानां धर्म इत्यर्थः।
`तुल्य आस्ये प्रयत्नो यस्य' इति। एतेन तुल्यास्यप्रयत्नशब्दस्त्रिपदोऽयं बहुव्रीहिरिति दर्शयति। व्याधिकरणानामपि गमकत्वनाद्बहुव्रीहिर्भवत्येव; यथा -
`कण्ठेकालः, उरसिलोमा' इति। अथ द्वन्द्वगर्भबहुव्रीहिः कस्मान्नाश्रीयते- आस्यं च
प्रयत्नश्च आस्यप्रयत्नौ,तौ तुल्यौ यस्य तत् तुल्यास्यप्रयत्नमिति ? एवं मन्यते-
द्वन्द्वगर्भबहुव्रीहावाश्रीयमाणे ताल्वादिना स्थानेन प्रयत्नो न विशेषितः स्यात्। ततश्च ककारङकारयोर्मिथः सवर्णसञ्ज्ञा न स्यात्, बाह्यस्य प्रयत्नस्य भिन्नत्वात्।
ककारस्य विवृतकण्ठत्वादिर्बाह्यः प्रयत्नः। ङकारस्य संवृतकण्ठत्वादिः। असत्यां च सवर्णसञ्ज्ञायां शङ्कितेत्यत्र `अनुस्वारस्य ययि परसवर्णः' (8.4.58) इति ङकारो न स्यात्। अथ सत्यपि बाह्यस्य प्रयत्नस्य भेद आभ्यन्तरः स्पृष्टताख्योऽनयोस्तुल्यः
प्रयत्नः, तं समाश्रित्यसवर्णसञ्ज्ञा भविष्यति ? यद्येवम्, शकारचकारसयोरपि सत्यप्याभ्यन्तरयोर्विवृतास्पृष्टतयोः प्रयत्नयोर्भेदे योऽनयोर्बाह्यः प्रयत्नस्तुल्यो विवृत्कण्ठत्वादिस्तदाश्रया सवर्णसञ्ज्ञा स्यात्। ततश्च `अरुश्च्योतति' इति वक्ष्य-माणं प्रत्युदाहरणं नोपपद्यते।थ त्रिपदे तु बहुव्रीहौ ताल्वादिस्थानेन प्रयत्नो विशिष्यते। तेन बाह्यं प्रयत्नमुत्सृज्याभ्यन्तर एव स्पृष्टतादिर्गृह्यते। स एव हि
ताल्वादावास्ये सम्भवति, नेतरः। आभ्यन्तरस्य प्रयत्नस्य ग्रहणे सति सत्यपि बाह्य-

प्रयत्नभेदे भतत्येव ककार ङकारयोः सवर्णसञ्ज्ञा; आभ्यन्तरप्रयत्नस्य तुल्यत्वात्,
तस्यैव चेह ग्रहणात्। न च चकारशकारयोः सत्यपि बाह्यस्य प्रयत्नस्य तुल्यत्वे
सवर्णसञ्ज्ञा प्रसजति; तस्येहाग्रहणात्, यस्य च ग्रहणं तस्य चासमानत्वात्। तस्यात् त्रिपद एव बहुव्रीहिराश्रयितुं युक्तः; न द्वन्द्वगर्भ इति। यदि तर्हि त्रिपदो बहु-
व्रीहिराश्रीयते, भिन्नविभक्तिकत्वादप्राधान्याच्चास्यं तुल्यत्वेनाविशेषितं भवति, ततश्च भिन्नस्थानानामपि सवर्णसञ्ज्ञा प्राप्नोति ? नैष दोषः। यदाधेयं प्रति यदधिकरणमुपदीयते, तदाधेयतुल्ययैव तत् तुल्यमिति विज्ञायते। तथा हि- `देवदत्तयज्ञदत्तयोस्तुल्यं कांस्यपात्र्यां भोजनम्' इत्युक्ते कांस्यपात्र्यपि तयोस्तुल्येति
गम्यते। यं प्रति यस्तुल्यास्यप्रयत्नः, स तमेव प्रति सवर्णसञ्ज्ञो भवतीत्येषोऽ-
र्थो यतो वचनाल्लभ्यत इह तन्नास्ति। ततश्च यो यं प्रति तुल्यास्यप्रयत्नः, स ततोऽ-
न्यमपि प्रति सवर्णसञ्ज्ञः स्यादिति चोद्यमाशङ्क्याह- `समानजातीयं प्रति' इति। समानजातीयो यं प्रति यस्तुल्यास्यप्रयत्नः, तं प्रति स सवर्णसञ्ज्ञो भवति, न ततोऽन्यम्। एतच्च तुल्यास्यप्रयत्नशब्दस्य सवर्णशब्दस्य च सम्बन्धिशब्दत्वाल्लभ्यते।
सम्बन्धिशब्दो ह्यन्तेरणापि शब्दान्तरसन्निधिः नियमेव सम्बन्धिनमुपस्थापयति, यथा-
`पितरि शुश्रूषितव्यम्' इति। नोच्यते स्वस्मिन्निति, सम्बन्धाच्चैतदवगम्यते, `यो
यस्य पिता' इति। तथेहापि। यद्यपि यो यस्य तुल्यास्यप्रयत्नः, स तं प्रति सवर्णसञ्ज्ञो भवतीति,न चोच्यते, तथापि सम्बन्धात् तुल्यास्यप्रयत्नः समानजातीयमेव प्रति
सवर्णसञ्ज्ञो भवतीति गम्यते। अथ वा समानो वर्णः `सवर्णः' इत्यन्वर्थसञ्ज्ञेयम्। तेनतुल्यजातीयमेव प्रति सवर्णसञ्ज्ञो भवति। एवं हि समानोऽस्य वर्णो भवति, यदि तमेव
प्रति सवर्णसञ्ज्ञो भवति, न विजातीयं प्रति।
`चत्वारः' इत्यादि। द्विविधाः प्रयत्नाः, आभ्यन्तराः, बाह्याश्च। तत्राभ्य-न्तराः चत्वारो वृत्तरौ दर्शिताः। बाह्यास्त्वेकादशष। के पुनस्ते ? `विवारः,
संवारः,श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितश्च' इति। तत्र नाभिप्रदेशात् प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्ध्वमात्रामन्नुरः
प्रभृतीनामन्यतमस्मिन् स्ताने प्रयत्नेन विधार्यते, स विधार्यमाणः स्थानमभिहन्ति,
ततः स्थानाभिघाताद् ध्वनिरुत्पद्यते। आकाशे सावर्ण्यश्रुतिः सवर्णस्यात्मलाभः। तत्र वर्णध्वनावुत्पद्यमाने यदा स्थानमभिहन्ति, ततः स्थानाभिघाताद् ध्वनिरुत्पद्यते।
आकाशे सावर्ण्यश्रुतिः सवर्णस्यात्मलाभः। तत्र वर्णध्वनावुत्पद्यमाने यदा स्थानकरण-प्रयत्नाः परस्परं स्पृशन्ति, तदा सा `स्पृष्टता'। ईषद्यदा स्पृशन्ति, तदा सा ईष-
स्पृष्टता; सामीप्येन यदा स्पृशन्ति, सा संवृतता; दूरेण यदा स्पृशन्ति, सा
विवृतता-एते चत्वार आभ्यन्तराः प्रयत्नाः। आभ्यन्तरत्वं पुनरेषां स्थानकरणप्रयत्न-
व्यापारेणोत्पत्तिकाल एव सम्भवात्। तत्र स्पृष्टकरणाः स्पर्शाः। कादयो मावसानाः स्पर्शाः, स्पष्टता गुणः। करणं कृतिरुच्चारणप्रकारः। स्पृष्टतानुगतं करणं येषां ते
स्पृष्टकरणाः। एवमन्यत्रापि वेदितव्यम्। ईषत्स्पृष्टकरणा अन्तः स्थाः।
अन्तः स्था यरलवाः। विवृतं करणमूष्मणाम्, स्वराणां च। स्वराः सर्व एवाचः।
उष्ममाणः शषसहाः।
अथ बाह्याः प्रयत्नाः किंलक्षणाः ? स एव प्राणो नाम वायुपरूर्ध्वमाक्रामन्
मुर्ध्नि प्रतिहतो निवृतो यदा कोष्ठमभिहन्ति तदा कोष्ठेऽभिहन्यमाने गलबिलस्य संवृतत्वात् संवारो नाम वर्णधर्म उपजायते। विवृतत्वाद् विवारः। संवृते गलबिलेऽव्यक्तः शब्दो नादः, विवृते श्वासः। उपरिवर्तिनौ तौ श्वासनादावनुप्रदानमिति केचिदाचक्षते।
वर्णनिष्पत्तेरनु-पश्चात् प्रदीयत इत्यनुप्रदानम्। अन्ये तु ब्रुवते `अनुप्रदानमनु-
स्वानो घष्टानिर्ह्लादवत्' यथा- घण्टानिर्ह्लादोऽनुस्वनमनुभवति तथा इति। तत्र यदा स्थानाभिघातजे ध्ननौ नादोऽनुप्रदीयते, तदा नादध्वनिसङ्गाद् घोषो जायते, यदा
श्वासोऽनुप्रदीयते, तदा श्वासध्वनिसङ्गादघोषः, महित वायौ महाप्राणः, अस्पवायावल्प-
प्राणः। यदा सर्वाङ्गानुसारी प्रयत्नस्तीव्रो भवति तदा गात्रस्य निग्रहः, कण्ठविवर-
स्य च चाणुत्वम्, स्वरस्य च वायोस्तीव्रगतित्वाद् रौक्ष्यं भवति, तमुदात्तमाचक्षते। यदा तु मन्दः प्रयत्नो भवति, तदा गात्रस्य स्रंसनम्, कण्ठबिलस्य महत्त्वम्, स्वरस्य वायोर्मन्दगतित्वात् स्निग्धता भवति, तमनुदात्तमाचक्षते। उदात्तानुदात्तस्वरसन्निकर्षात् स्वरित इत्येवं लक्षणा बाह्याः प्रयत्नाः। बाह्यत्वं पुनरेषां

वर्णनिष्पत्तिकालादूर्ध्वं, वायुवशेनोत्पत्तेः। तत्र वर्गाणां प्रथम द्वितीयाः शषरविसर्ज-नीयजिह्वामूलीयोपध्मानीया यमौ च प्रथमद्वितीयौ विवृतकण्ठाः श्वासानुप्रदाना अघोषाः।वर्ग्ययमानां प्रथमेऽल्पप्राणाः। इतरे सर्वे महाप्राणाः। वर्गाणाञ्च तृतीयचतुर्था अन्तःस्था हकारानुस्वारौ यमौ च तृतीयचतुर्थौ संवृतकण्ठा नादानुप्रदाना घोषवन्तः।

वर्ग्यमानां तृतीया अन्तःस्थाश्च अल्पप्राणाः। इतरे सर्वे महाप्राणाः। यथा तृतीया-

स्तथा पञ्चमाः, आनुनासिक्यमेषामधिको गुणः।

य एवैते द्विप्रकाराः प्रयत्ना बाह्या आभ्यन्तराश्चाख्याताः, तेषामिह सवर्णसञ्ज्ञायां पूर्वोक्ता आभ्यन्तराश्चत्वारः स्पृष्टतादय आश्रीयन्ते,न बाह्या

विवारादयः, आस्यग्रहणेन तेषां व्यावर्तितत्वात्। स्पृष्टतादय एव ह्यास्ये भवन्ति, नविवारादयः। यद्येवम्, किमर्थं प्रयत्नग्रहणम्, एतावदस्तु तुल्यास्यमिति,

आस्यग्रहणेनैव हि स्पृष्टतादयोऽपि प्रयत्नाः सवर्णसञ्ज्ञायां निमित्तभूतास्ताल्वादिस्थानवल्लभ्यन्त एव, तेषामप्यास्ये भवनात् ? सत्यमेतत्, तथाप प्रत्येकं व्यापार-

निरासार्थमुभयोरुपादानाम्। इतरथा हि यथैव स्थानं तुल्यं स्थानान्तरनिरपेक्षं सवर्ण

सञ्ज्ञायां व्याप्रियते, एवं प्रयत्नोऽपि स्थाननिरपेक्षः, स्थानं च प्रयत्ननिर-

पेक्षं व्याप्रियेत; ततश्च भिन्नप्रयत्नानामपि तुल्यस्थानानाम्, भिन्नस्थानानामपि

तुल्यप्रयतनानां सवर्णसञ्ज्ञा स्यात्। `अ अ अ' इत्यादिना येषां यावतां च यादृशां च मिथो नित्या सवर्णसञ्ज्ञा, तान् दर्शयति। अकाराणां हि सर्वेषाम् `अकुहविसर्जनीयाः

कण्ठ्याः' इति तुल्यं कण्ठस्थानम्। इकाराणामपि `इचुयशास्तालव्याः' इति तालु। उकारा-णामपि `उपूपध्मानीया ओष्ठ्याः' इत्योष्ठः। ऋकाराणामपि `ऋटुरषा मूर्धन्याः' इति

मूर्धा। लृकाराणामपि `लृतुलसा दन्त्याः' इत दन्तः। एकाराणामैकाराणां च

`एऐ कण्ठ्यतालव्यौ' इति कण्ठतालु। ओकाराणामौकाराणां च `ओ ओ कण्ठ्यौष्ठ्यौ' इति

कष्ठोष्ठम्। प्रयत्नस्तु सर्वेषामेवैषां विवृतं करणमूष्मणां स्वराणां चेति विवृतत्वम्। तस्मात् तुल्यस्थान्प्रयत्नत्वात् स्वरेऽकारादयो मिथः सवर्णसञ्ज्ञाः। एवं यावदौकारः। अन्तःस्था द्विप्रभेदाः, सानुनासिका निरनुनासिकाश्च रेफवर्जिताः। तेऽपि समानजातीयानन्तःस्थान् प्रति सवर्णसञ्ज्ञा भवन्ति। `रेफोष्मणां सवर्णा न सन्ति'

इति। तेऽभ्योऽन्येऽकारादयो वर्णा विजातीया इत्येषोऽभिप्रायः। तुल्यजातीयास्तु रेफोष्माणस्तुल्यस्थानप्रयत्नाः सवर्णाः सन्त्येव। तत्र रेफस्य तावद् ऋटुरषेभ्यो यवलेभ्यश्चान्ये वर्णा भिन्नस्थानत्वाच्च भिन्नप्रयत्नत्वाच्च सवर्णा न भवन्ति। तथा

हि- `अकुहविसर्जनीयाः कण्ठ्याः, इचुयशास्तालव्याः, लृतुलसा दन्त्याः,अपूपध्मानीया ओष्ठ्याः, एऐ कण्ठ्यतालव्यौ, ओ औ कण्ठ्योष्ठयौ' इति वचनादकारादीनां यथायोगं

कण्ठादि स्थानम्। रेफस्य त्वृटुरषा मूर्धन्या इति मूर्धा। प्रयत्नोऽप्यनन्तरनिर्दिष्टेष्वकारादिषु ये स्वराः तेषां विवृतं करणमूष्मणां स्वराणां चेति विवृतत्वम्। ये तु वर्गान्तः पातिनः ककारादयः, तेषां स्पृष्टकरणाः स्पर्शा इति स्पृष्टता। रेफ-

स्येषत्स्पृष्टकरणा अन्तःस्था इतीषत्स्पृष्टता। शकारसकारावपि स्थानप्रयत्नभेदाद्

रेफस्य सवर्णौ न भवतः। तौ हि यथाक्रमं तालव्यदन्त्यौ। रेफस्तु मूर्धन्यः। प्रयत्नो

ऽपि तयोर्विवृतत्वम्। रेफस्य तु पूर्वोक्त एव। ऋटुषाः प्रयत्नभेदाच्चैव रेफस्य

सवर्णा न भवन्ति; न तु स्थानभेदेन; तेषामपि मूर्धन्यत्वात्। प्रयत्नभेदस्तु विद्यतेऋकारषकारयोः पूर्ववद् विवृतत्वम्, रेफस्य तु स एव पूर्वोक्तः। टवर्गस्य स्पृष्टता।

यवलास्तु पुनः स्थानभेदादेव सवर्णा न भवन्ति, न तु प्रयत्नभेदात्; तेषामपीषत्स्पृ-

ष्टगुणत्वात्। स्थानभेदस्तु विद्यते, यवलानां यथायोगं तालव्यदन्त्योष्ठ्यत्वात्।

एवं विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वाराः। कुँ खुँ गुँ घुँ इत्येते च

यमाश्चातुल्यस्थानप्रयत्नत्वादेव रेफस्य सवर्णा न भवन्ति। विसर्जनीयो हि कण्ठ्यः,

जिह्वामूलीयो हि जिह्व्यः; उपध्मानीय ओष्ठ्यः, अनुस्वारयमा नासिक्याः, रेफस्तु

मूर्धन्यः। प्रयत्नस्तु यस्तस्य पूर्वोक्तः, स विसर्जनीयादीनां नास्त्येव तदेवं रेफस्य रेफादन्यो नास्ति कश्चित् सवर्तो वर्णः। अनया दिशोष्मणामपि शकारादीनां सावर्ण्याभावे वेदितव्यः।

`वर्ग्यः' इत्यादि। वर्गे भवो वर्ग्यः। `दिगादित्वाद् यत्' (4.3.54),

`यस्येति च' (6.4.148) इत्याकारलोपः। वर्ग्यो यो वर्णः, सोऽन्येन वर्ग्येण

स्ववर्गान्तःपातिना तुल्यास्यप्रयत्नेन सह सवर्णो भवति,यथा-ककारः खकारेण।

एवमन्यत्रापि वेदितव्यम्। `भिन्नस्थानानाम्' इत्यादि। एते हि ककारादयः सर्वे स्पृ

ष्टगुणत्वात् तुल्यप्रयत्ना यथाक्रमं कण्ठतालुमूर्धदन्तोष्ठस्थानत्वाद्भिन्नस्थानाः। `तर्प्ता, तर्प्तुम्' इति। `तृप तृन्फ तृप्तौ' (धा.पा.1307,1308) इत्यस्य

तृचि तुमुनि च रूपम्। `भिन्नप्रयत्नानाम्'इत्यादि। इकारादयोहि तालव्यत्वात् सर्वे तुल्य-
स्थाना विवृतत्वस्पृष्टत्वेषत्स्पृष्टत्वप्रयत्नात् यथायोगं भिन्नप्रयत्नाः। इकार-
शकारयोर्यद्यपि प्रयतनोऽप्यभिन्नः,तथापि, तयोः प्रतिषेधं वक्ष्यतीति न भवति सवर्ण-
त्वम्। `अरुश्च्योतति'इति `श्च्युतिर् क्षरणे' (धा.पा.41) इत्यस्य लटि रूपम्। तत्र परत्रावस्थितऽरुस्शब्दस्य सकारस्य रुत्वम्। तस्य विसर्जनीयः,
तस्यापि `वा शरि' (8.3.36) इति सकारः, तस्यापि श्चुत्वं शकारः। `होतृकारः' इति। कथं पुनरत्र ऋकार
आदेशो भवति, न हि ऋकारलृकारयोः समुदायस्य स्थानिनः सोऽन्तरतम इत्याह- `उभयोः'
इत्यादि। ऋकारो मूर्धन्यः, लृकारस्तु दन्त्यः। तत्र तयोर्यद्येको मूर्धन्यो
दन्त्यश्च दीर्घो वर्णोऽन्तरतमः सम्भवेत्, तदा सोऽन्तरतम आदेशो भवेत्। स च न सम्भवतीत्यवयवस्य योऽन्तरतमः, तेन भाव्यम्। तत्रापि यदि लृकारो
दीर्घः स्यात्। सोऽपि पर्यायेण स्यात्, स च नास्ति; तस्मात् पारिशेष्यात् समुदायस्यैकादेशस्य योऽन्तरतमः स एव ऋकारो भवति।

10.नाज्झलौ। (1.1.10)

`तुल्यास्यप्रयत्नावपि' इति प्रसङ्गे हेतुमाह, प्रसङ्गपूर्वकत्वात् प्रतिषेधस्य। `दण्डहस्त' इत्यत्राकारहकारयोर्द्वयोरपि कण्ठस्थानत्वात् तुल्यस्थानत्वम्,
उभयोर्विवृतकरणत्वात् तुल्यप्रयत्नत्वम्; `दधि शीतम्' इत्यत्राप्यत एव तुल्युप्रयत्नत्वम्, उभयोस्तालव्यत्वात् तुल्यस्थानत्वम्। `सवर्णदीर्घत्वं न भवति' इति
प्रतिषेध-
स्य फलं दर्शयति। ननु च अकः सवर्णे दीर्घविधौ (6.1.101) `अचि'; इति वर्तते,
तत्रासत्यपि प्रतिषेधे दीर्घत्वं न भविष्यति, यथा- कुमारी शेते इत्यत्र, तदयुक्तमे-वोदाहरणद्वयम्। स्यादेतत्- `अणुदित् सवर्णस्य चाप्रत्ययः' (1.1.69)
इत्यकारेका-
राभ्यां सावर्ण्येन ग्रहणादच्त्वमस्ति, तथापि हल्षूपदेशाद् हल्त्वमप्यस्तीति न
तावद्धकारश्कारवचावेव, अपि तु हलावपीति, सत्यमेतत्। अयं पुनरत्र वृत्तिकारस्याभि
प्रायः- अवश्यं तावदन्यार्थं `नाज्झलौ' (1.1.10) इत्येतत् कर्तव्यम्, यस्येति लोपा-भावार्थम्। तदन्यार्थं कृतमेतदर्थमपि स्यात्। एवं तर्ह्यजनुवृत्तिद्वारेण
दीर्घत्वाभावप्रतिपत्तौ साध्यायां यत् प्रतिपत्तिगौरवमापद्यते, तदपास्तं भवतीति।
`वैपाशः' इति। विपाशि भव इत्यण्। `यस्येति च' (6.4.148) इत्यत्रेवर्ण
उपादीयमानः सावर्ण्येन शकारमप्युपादत्ते। एवं च तस्य लोपः प्रसज्येत। `आनहुहम्' इति। अनडुहो विकार इति `प्राणिरजतादिभ्योऽञ्' (4.3.154),तत्र
`यस्येति च' (6.4.148)
इत्यत्राकारो गृह्यकारो हकारमपि गृह्णीयात्, ततश्च पूर्ववत् तस्य लोपः स्यात्।

11.ईदूदेद्द्विवचनं प्रगृह्यम्। (1.1.11)

अत्रेदादि यद्द्विवचनम्,तत् प्रगृह्यमित्येवं वा विज्ञायते ? ईदाद्यन्तं
यद् द्विवचनम्, तत् प्रगृह्यमिति वा? तत्राद्ये पक्षे `पचेते' इत्यादौ प्रगृह्यसञ्ज्ञा न प्राप्नोति, न ह्येकारमात्रमत्र द्विवचनम्; अपि तु आतेशब्द इति। इममाद्ये
पक्षे दोषं दृष्ट्वा द्वितीयं पक्षमाश्रित्याह- `ईदूदेदित्येवमन्तम्'इत्यादि। नन्वेतस्मिन्नपि पक्षे अग्नी इत्येवमादि न सिध्यति, ईदाद्येव ह्यत्र द्विवचनं न तदन्तम् ?
`आद्यन्तवदेकस्मिन्' (1.1.21) इत्यनेनान्तवद्भावो भवतीत्यदोषः। `अग्नी' इति। ` प्रथमयोः पूर्वसवर्णः' (6.1.102) इति दीर्घत्वम्। अत्र प्रगृह्यसञ्ज्ञायां
सत्याम्
`प्लुतप्रगृह्या अचि' (6.1.125) इति प्रकृतिभावादितिशब्दे परतः `अकः सवर्णे'
दीर्घत्वं (6.1.101) न भवति। `वायु' इत्यत्रापि `इको यणचि' (6.1.77) इति यणादेशः।
शेषेष्वप्युदाहरणेष्वयादेशः। `खट्वे' इति। `औङ आपः' (7.1.18) इति शीभावः। ` आद्गुणः' (6.1.87)। `पचेते' इति,`यजेते' इति।
स्वरितेत्वादात्मनेपदम्, आताम्, टेरेत्त्वम्, `आतो ङितः' (7.2.81) इतीयादेशः `लोपो व्योर्वलि' (6.1.66) इति यलोपः।
`वृक्षावत्र, प्लक्षावत्र' इति। भवत्येतद् द्विवचनम्; न त्वीदूदेदन्तम्। तेन
प्रकृतिभावाभावादादेशो भवत्येव। `कुमार्यत्र' इति। `वयसि प्रथमे' (4.1.20) इति ङीपिकृते `कुमारी' इत्येतदीकारान्तम्, न तु द्विवनचान्तम्; तेनासति
प्रकृतिभावे भवत्येव यणादेशः।
अथ तपरकरणं किमर्थम् ?प्लुतनिवृत्त्यर्थमिति चेत्, न; इष्टत्वात् प्लुतस्य। यथा च तपरत्वे क्रियमाणेऽपि प्लुतस्य प्रगृह्यसञ्ज्ञा सिध्यति, तथा भाष्ये
`असिद्धः प्लुतः, तस्यासिद्धत्वात् तत्काल एव'(म.भा.1.66) इत्यादिना प्रतिपादितम्। गुणान्तरभिन्नानां तत्कालानां ग्रहणार्थमिति चेत्,न;
`अभेदकत्वाच्छास्त्रे गुणानाम्' (सो.प.80) इत्यत आह- `तपरकरणमसन्देहार्थम्' इति । असति हि तपरकरण

ईकारस्योकारस्य च यणादेशः स्यात्। ततश्च सन्देह एव स्यात्-किमिदं यकारवकारोयर्ग्रहणम्, आहोस्विदिकारोकारयोरिति `वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यातम्- वक्ष्यमाणं शाकल्यग्रहणमिहोपतिष्ठते सिंहावलोकितन्यायेन , सा च व्यवस्थित-
विभाषा; तेन मणीवादीनां प्रतिषेधो भविष्यति, मणीव, दम्पतीव, रोदसीवेति। मणीवेत्या-
दयः शब्दा द्विवचनान्ताः। तत्रासति प्रगृह्यत्वे `अकः सवर्णे दीर्घः' ((6.1.101)
एकादेशो भवत्येव।

12. अदसो मात्। (1.1.12)
`अदसः सम्बन्धी यो मकारः' इति। अवयनवावयविभावलक्षणेन सम्बन्धेन षष्ठी।
`अमी अत्र' इति अदस्शब्दात् परस्य जसः शी (7.1.17) त्यदाद्यत्वम् (7.1.102) ,
अतो गुणो' (6.1.97)पररूपत्वम्, ईकारेण सह `आद्गुणः' (6.1.87) `एत ईद्बहुवचने'
(8.2.81) इतीत्त्वम्, दस्य च मत्वम्, (8.2.80)। अयमद्विवचनार्थ आरम्भः। `अमू
आसाते' इति। अदसो द्विवचनमौ। त्यदाद्यत्वम्,`वृद्धिरेचि' (6.1.88) इति वृद्धिः; `अदसोऽसेर्दादुदो मः' (8.2.80) इत्यौकारस्य दीर्घस्य स्थाने तादृश एवान्तरतम्यादुकरः।अत्राप्यूकारादिकार्यमसिद्धमिति पूर्वेणाप्राप्तिः। अतः `पूर्वात्रासिद्धम्' (8.2.1) इत्यस्य बाधनार्थं आरम्भः। कथं पुनः
`पूर्वत्रासिद्धम्'(8.2.1) इत्येतच्छक्यं
बाधितुम्, वचनसामर्थ्यात्? नैतदस्ति; यत् सिद्धे प्रगृह्यकार्यम् `अणोऽप्रगृह्य-
स्यानुनासिकः' (8.4.57) इति, तदर्थं वचनं स्यात्, नैतदेवम्; न ह्येकं प्रयोजनं
योगारम्भं प्रयोजयति। यदि ह्येतावत् प्रयोजनं स्यात्, तत्रैवेदं ब्रूयात्,
`अणोऽप्रगृह्यस्यानुनासिकः, अदसो न' इति। `शम्यतर, दाडिम्यत्र' इति। `षिद् गौरादिभ्यश्च' (4.1.41)इति ङीष्, `यस्येति च' (6.4.148)
इत्यकारलोपः। भवत्ययं
मकारात्पर ईकारः, न त्वदः सम्बन्धीति। `अमुकेऽत्र' इति। `अव्ययसर्वनाम्नाम्'(5.3.
71) इत्यकच्, `जसः शी' (7.1.17), `आद्गुणः' (6.1.87), पूर्ववदुत्वमत्वे अमुके इति
स्थिते परत्र चात्रशब्दे `एङः पदान्तादति' (6.1.109) इति पूर्वरूपत्वम्।

13. शे। (1.1.13)
`शे' इति। शेश्रुतेरविशिष्टत्वात् काशे कुशे इत्यत्र यः शेशब्दस्तस्यापि
ग्रहणं प्राप्नोति, अतो विशेषो वक्तव्य इत्यभिप्रायेणाह- `किमिदं शे' इति। `सुपाम्'इत्यादि। यस्तु काशकुशशब्दाभ्यां सप्तम्येकवचने च कृते आद्गुणे (6.1.87) च शेशब्दः सम्पद्यते, तस्येह ग्रहणं न भवति; लाक्षमिकत्वादिति भावः। `युष्मे, अस्मे' इति।
षष्ठीबहुवचनस्य `सुपां सुलुक्' (7.1.39) इत्यादिना शेशब्दादेशः, `शेषे लोपः'(7.2.90) अथ वा- प्रथमाबहुवचनस्यैव शेभावः, छान्दसत्वात् `यूयवयौ जसि' (7.2.93) इत्येतन्न
प्रवर्तते। `त्वे इति, मे इति'। सप्तम्येकवचनस्य पञ्चम्येकवचनस्य च शेभावः। `त्वमा-
वेकवचने' (7.2.97) इति युष्मदस्मदोस्त्वमावादेशौ। `इतरत् तु लौकिकमनुकरणम्' इति।
यदा `युष्मे इति' एवमादिकं तदा लौकिकमनुकरणमिति भावः। यदा `युष्मे', `अस्मे' इत्याददीनां वेदवाक्यस्थानामर्थाद्वयवच्छिद्य स्वरूपेऽवस्थानार्थं पदकारैरितिकरणोऽध्या-
ह्रियते, तदा `युष्मे इति', `अस्मे इति' एवमादिकमुदाहरणमिति भवति। इतरत् तु लौकिकम
नुकरणमित्युक्ते `न युष्मे वाजबन्धवः' (ऋ.8.69.19), `त्वे रायः' (तै.सं.1.2.5.2), `मे रायः' (वा.सं.4.22) इत्येतेष्वपि वेदवाक्येषु यत् `युष्मे' इत्यादिशेशब्दान्तं शब्दरूपम्, तत् स्वरूपेण दर्शयितुमाह- `युष्मे इति, अस्मे इति, त्वे इति, मे इति'।
यद्येववं किमर्थं `न युष्मे वाजबन्धवः' )ऋ 8.69.19) इत्यादीनामुपन्यासः ? एषु वेदवाक्येषु ये `युष्मे' इत्यादयः शब्दाः, तेषामेतान्यनुकरणनीति प्रदर्शनार्थः; अन्यथा
हि ज्ञायते कस्यैतान्यतनुकरणनीति।।

14. निपात एकाजनाङ्। (1.1.14)
एकाजिति बहुव्रीहिर्वाऽयं स्यात्,कर्मधारयो वा ? यदि बहुव्रीहिः, प्रशब्द-

स्यापि प्रगृह्यसञ्ज्ञा स्यात्। ततश्च `प्रोपाभ्याम्' (1.3.42) इति निर्देशो नोपप-
द्येत, प्राग्नय इति च प्रत्युदाहरणम्। तस्मात् कर्मधारयोऽयमिति मनसि कृत्वाह- `एकश्चासावच्छेत्येकाच्' इति। `अ अपेहि' इत्यादीनि त्रीणि च्छान्दसान्युदाहरणानि;
इतरत् तु लौकिकम्। तत्र `आ एवं नु मन्यसे' इत्यत्राकारो वाक्यापरिपूरणार्थः। `आ
एवं किल तत्' इत्यत्र तु स्मरणार्थः। `चकारात्र' इति। करोतेर्लिट्। `परस्मैपदानाम्' (3.4.82) इत्यादिना तिपो णल्, वृद्धिः, रपरत्वम्। `द्वर्वचनेऽचि' (1.1.59) इति
स्थानिवद्भावेन द्विर्वचनम्। उरत्त्वम् (7.4.66)। `कुहोश्चुः' (7.4.62)
इति चुत्वम्। भवत्ययं णलकार एकाच्, न तु निपातः।
`प्राग्नये' इति। प्रशब्दो भवति निपातः, न त्वेकाच्। तेन `प्लुतप्रगृह्या अचि' (6.1.125) इति प्रकृतिभावो न भवति। `अकः सवर्णे' (6.1.101) इति दीर्घत्वं
तु भवत्येव।
आकारोऽत्र हि ङिद्विशिष्ट उपात्तः, तस्य न ज्ञायते- क्व च ङित्त्वम्, क्व च नेति। अतो ङित्त्वाङित्त्वयोर्विषयविभागप्रदर्शनार्थमाह- `ईषदर्थे' इत्यादि।
तत्रेषदर्थे-आ-उष्णम्- ओष्णमिति।ईषदुष्णमित्यर्थः। क्रियायोगे उपसर्गसञ्ज्ञायां
ङिद्विशिष्ट एव पठ्यते।

प्रपरापसमन्ववनिर्दुर्व्याङन्यधयोऽप्यतिसूदभयश्च।
प्रतिना सह लक्षयितव्याः पर्युपयोरपि लक्षणमत्र।। इति।
आ इहि- एहि। आ अत्ति= आत्ति। मर्यादाभिविध्योरपि ङिद्विशिष्ट एव पठ्यते, `आङ
मर्यादाभिविध्योः' (2.113) इति। मर्यादा= ,सीमा; अवधिः। आ उदकान्तात्= ओदकान्तात्
प्रियं प्रोधमनुव्रजेत्। अभिविधिः = अभिव्याप्तिः। आ अहिच्छत्रात्, आहिच्छत्रं
वृष्टो देवः। अहिच्छत्रं गृहीत्वा वृष्टो देव इत्यर्थः। ङिद्विशिष्टस्य `अनाङ' इति प्रगृह्यसञ्ज्ञाप्रतिषेधात् स्वरसन्धिर्भवति। अथ `एतमातम्' इत्यत्रैतदः `द्वितोयाटौस्त्वेनः' (2.4.35) इत्येनादेशः कस्मान्न भवति ? `अन्वादेशे' इति तत्रानुवर्त्तते। अस्ति चेहान्वादेश इत्यस्ति प्राप्तिः ? यथा न भवति तथा तत्रैव प्रकरणे वृत्तिकारः स्वयमेव वक्ष्यतीति(का.162) पुनरिह नोच्यते। `आतम्' इति। आकारे तकारो मुखसुखार्थः। ये तु पुरेतमाङमिति ङकारसहितमाकारं पठन्ति तेषां ङितं विद्यादिति वचनमनर्थकं स्यात्; ङकारसहितस्य पाठादेव ङित्त्वविज्ञानात्। तस्मात् तकारपर एवायमाकारः पठितव्यः। `
वाक्यस्मरणयोः' इति। वाक्यशब्देन वाक्यार्थ उक्तः; अबिधेयेऽभिधानोपचारात्। प्रक्रान्तं हि वाक्यार्थं किञ्चिदपेक्ष्येदं प्रयुज्यते- `आ एवं नु मन्यसे' इति। एवमयं वाक्यार्थो विज्ञायत इत्य्रथः। पूर्वप्रक्रान्तवाक्यार्थप्रदर्शनपरोऽयमाकारः
प्रयुक्तः। अथ वा- पूर्वप्रक्रान्तवाक्यार्थस्यान्यथाकरणमिदं प्रयुज्यते, `आ एवं नु मन्यसे' इति, नैवं पूर्वममंस्थाः, सम्प्रति त्वेवं मन्यस इति। अथ वा- वाक्याशब्देन वाक्यमेवोच्यते, वाक्यावयवो निरर्थक एवाकारः प्रयुज्यत इति। स्मरणं स्मृतिः, तत्र य आकारो वर्त्तते स्मृतिसूचकः,स ङिन्न भवति। `आ एवं किल तत्', एवमिदं विज्ञातमित्यर्थः। ज्ञातं स्मृतमेव। अथ वा- स्मर्त्तव्यार्थविषयः पूर्वमाकारः प्रयुज्यते। `आ'
इति स्मतेरुत्तरकालमर्थ आख्यायते। `आ' इत्येतस्यैवं किल तदिति भवत्ययमर्थ इत्यर्थः। वाक्यस्मरणयोराकारस्य प्रगृह्यसञ्ज्ञास्त्येवेति `प्लुतप्रगृह्या अचि' (6.1.125) इति प्रकृतिभावः। तेन `वृद्धिरेचि' (6.1.88) इति वृद्धिर्न भवति।

15. ओत्। (1.1.15)

16. सम्बुद्धौ शाकल्यस्येतावनार्षे। (1.1.16)
`सम्बुद्धिनिमित्तः' इति। सम्बुद्धिर्निमित्तं यस्य स तथोक्तः। एतेन `सम्बुद्धौ' इत्यस्य निमित्तसप्तमीत्वं दर्शयति। परसप्तम्यां त्वस्याम् `हे त्रपो'
इत्यत्र न स्यात्, `स्वमोर्नपुंसकात्' (7.1.23) इति सम्बुद्धेर्लुप्तत्वादिति भावः। `सम्बुद्धौ च' (7.3.106) इति वर्त्तमाने `ह्रस्वस्य गुणः' (7.3.108) इत्यनेन यो
गुणो विधीयते, स सम्बुद्धिनिमित्तः, तस्य सम्बुद्धिनिमित्तत्वमुपादाय विहितत्वात्। `गवित्ययमाह' इति। केनचिद् गौरिति वक्तव्ये शक्तिवैकल्याद् `गो' इत्युक्तम्, तमन्यो यदानुकरोति, तत्रैतत् प्रत्युदाहरणम्। ननु चानुकार्येणार्थेनार्थवत्त्वात्
प्रतिपदिकत्वे सति विभक्त्यात्र भवितव्यमित्यत आह- `अत्र' इत्यादि। अत्रानुक्रियमाणस्यानुकरणस्य यदि भेदो विवक्ष्यते, ततोऽर्थवत्तायां सत्यां स्याद्विभक्तिः, स तु न विवक्ष्यत इति कुतस्तस्याः प्रसङ्गः? न हीह शब्दशास्त्रे वस्तुनः सत्तैव शब-
संस्कारस्य प्रधानं कारणम्, किं तर्हि, विवक्षा च। सा चेह नास्ति। `शाकल्यग्रहणं विभाषार्थम्' इति। एतेन पूजार्थताशङ्कां निरस्यति। यदि हि पूजार्थमेव

तत् स्यात्,
विकल्पो न भवेदिति भावः।।

17.उञः। (1.1.17)

18.ऊँ। (1.1.18)
`तेन त्रीणि रूपाणि भवन्ति' इति शाकल्यग्रहणानुवृत्तेः फलं दर्शयति। यदि
ह्यत्र शाकल्यग्रहणं नानुवर्त्तेत, तदा पूर्वसूत्रेण यस्मिन् पक्ष उञः प्रगृह्यसंज्ञा न विहिता तस्मिन्ननेनन नित्यम् `ऊँ' आदेशः स्यात्। तत `उ'इति, `ऊँ' इति च
द्वे रूपे स्याताम्; न वितीति तृतीयम्। शाकल्यग्रहणानुवृत्तौ तु सत्यां यस्मिन्
पक्षे पूर्वसूत्रेण प्रगृह्यसञ्ज्ञा उञो न कृता, तस्मिन्नेन ऊँ आदेशे विभाषा विहिते वितीति तृतीयं रूपं सिध्यति।

19. ईदूतौ च सप्तम्यर्थे। (1.1.18)
`अध्यस्यां मामकी तनू' इति। एतद् वेदवाक्यं वेदितव्यम्। अत्र `मामकी'
`तनू' इति शब्दौ`सूपां सुलुक्' (7.1.39) इति लुप्तसप्तमीकौ। तत्र यदा अर्थाद्वियव-
च्छिद्य स्वरूपे व्यवस्थापनायेतिशब्दः प्रयुज्यते उदाहरणे- `मामकी'इति, `तनू' इति च। तथा स`सोमो गौरी' इत्येतदपि। मामक्यामित्यादेरुपन्यासः सप्तम्यर्थप्रदर्शनार्थः।
`डादेशः' इति। सुपां सुलुगित्यादिना (7.1.39)। तत्रेतिशब्दे परतोऽकः
सवर्णे दीर्घत्वं (6.1.101) भवत्येव। `धीती' इत्यादि। `धीतिमतिसुष्टुतिशब्देभ्यः परस्य तृतीयैकवचनस् पूर्वसवर्णदीर्घत्वम्, लुग् वा। इतिशब्दे
परतोऽकोऽत्रापि सवर्ण-दीर्घत्वं भवत्येव। धीत्येत्यादिना तृतीयार्थवृत्तितां दर्शयति। `वाप्यामश्वः,
नद्यामातिः' इति `सञ्ज्ञायाम्' (2.1.44) इति सप्तमीसमासः। अथार्थग्रहणे क्रियमाणेऽपि कस्मादेवात्र न भवति, अस्ति ह्यत्रापि सप्तम्यर्थः ? नैतदस्ति, अर्थग्रहणसाम-
र्थ्यात्। अर्थग्रहणे सति केवलो योऽसंसृष्टः सप्तम्यर्थः स इह गृह्यते। नैवंविधे समासे सप्तम्यर्थः सम्भवति; संविभिन्नोभयरूपत्वाद् वृत्तौ वर्त्तिपदार्थानाम्।
एषोऽजहत्स्वार्थायां वृत्तौ परिहार उक्तः, जहत्स्वार्थायां तु तस्यां वाक्यावस्थायामुपसर्जनीभूतो योऽर्थः, तं शब्दो जहातीति सप्तम्यर्थो नास्त्येव। तेनार्थग्रहणे सति
समासे प्रगृह्यसञ्ज्ञा न भवति।
अथ तपकरणं किमर्थम्? प्लुतनिवृत्यर्थमिति चेत्, न ; असम्भवात्। न
प्लुते हीकारोकारन्तं सतप्यमर्थ रूपं किञ्चिदस्ति, यद्वयावृत्तये तपकरणं क्रियते।
गुणान्तरभिन्नानां तुल्यकालानां ग्रहणार्थमिति चेत्, न; अभेदकाच्छास्त्रे गुणानाम् इत्यत आह- `तपरकरणम्' इत्यादि। तपरत्वे ह्यसति यणादेशः स्यात्। ततश्च
किमयं दीर्घः, उत ह्रस्व इति सन्देहः स्यात्, स मा भूदिति तपरत्वं क्रियते।
`ईदूतौ सप्तमी' इत्यादि। ईदूतौ सप्तमीत्येतावदेव सूत्रमस्तु, किमर्थग्रहणेन ? `लुप्तेऽर्थग्रहणाद् भवेत्' इह `सोमो गौरी अधिश्रितः'(ऋ 9.12.3) इति लुप्ताय-
मपि सप्तम्यां प्रगृह्यसञ्ज्ञा यथा स्यादित्येव मर्थग्रहणम्। अत्र हि सप्तम्या
अभावात् प्रगृह्यसञ्ज्ञा न स्यात्,अर्थग्रहणात् तु भवति, सप्तम्यर्थस्य विद्यमान-
त्वात्। `पूर्वस्य चेत्सवर्णोऽसौ' इति। स्यादेतत्- नैवात्र सप्तम्या लुक् क्रियते,किं तर्हि ? `सुपां सुलुक्' (7.1.39) इत्यादिना पूर्वसवर्णः ईकारः। तत्राकः सवर्णेदीर्घत्वे कृते तस्यान्तवद्भावे सति सप्तमीग्रहणेन ग्रहणादस्त्येव सप्तमी, ततो
नार्थोऽर्थग्रहणेनेति। एतच्चायुक्तम्। एवं हि सति आडाम्भावः प्रसज्यते। यद्यत्र पूर्वसवर्णः स्यात्, तदा परत्वादक सवर्णदीर्घत्वं बाधित्वा `आण् नद्याः' (7.3.112)
इत्याटो भाव आपपद्यते, `ङेराम्नद्याम्नीभ्यः' (7.3.116) इत्यामश्च। भावः प्रादुर्भावः, सत्ता वा। तस्मात् पूर्वल्लुगेव कर्तव्यः,ततश्चासत्यां सप्तम्यां प्रगृह्य-
सञ्ज्ञा न स्यात्। तसमादर्थग्रहणं कर्त्तव्यम् ? न कर्त्तव्यम्; यस्मात् सर्वत्रैव सप्तम्या लुका भवितव्यमिति न क्वचित् सप्तम्यस्ति। उच्यते चेदं वचनम्-
`तत्र वचनसामर्थ्याल्लुप्तायामपि तस्यां भविष्यति' ? नैतदस्ति; यथो वचनाद् यत्र
दीर्घत्वम्, तत्र भविष्यति; यथा- `दृतिं न शुष्कं सरसी शयानम्' (ऋ.7.103.2) इति।

अत्र सरः शब्दात् परस्याः सप्तम्या `इयाडियाजीकाराणाम्' (का.वा.820) इत्यस्मादुप-
सङ्ख्यानात् `व्यत्ययो बहुलम्' (3.1.85) इत्यतो वा दीर्घ ईकारे कृते सप्तमी श्रयूते; ततश्चात्र वचनस्य सावकाशत्वात् `सोमो गौरी
अधिश्रितः'(ऋ.9.12.3) इत्यत्र न स्यात्। `तत्रापि सरसी यदि' इति। यदि सरसीशब्दोऽस्ति तदात्रापि नैवावकाशः। अस्ति च सरसीशब्दः। तथा हि-
गौरादिषु(4.1.41) `पिप्पल्यादयश्च' (ग.सू.47) इति पाठात्
पिप्पल्याद्यन्तःपातिनः सरः शब्दादीकारे कृते सरसीति रूपं सम्पद्यते तथा च दक्षिणापथे महान्ति सरांसि `सरस्य' इत्युच्यन्ते। सरसीशब्दस्य
प्रगृह्यसञ्ज्ञायां प्रयोजनम्-तत उत्पनायायः सप्तम्या लुकि कृते इतिशब्दे चाध्याहृते `सरसी' इत्यत्र स्वरसन्ध्य-
भावः। तदेवं सरसीशब्दो विद्यत एवेति। `दृतिं न शुष्कं सरसी शयानम्' (ऋ.7.103.2)
इत्यत्रापि सरसीशब्दो लुप्तसप्तमीक एव प्रयुक्तः तथा च तदेवावस्थितम्। वचनाद् भवि-
ष्यतीति प्रत्याख्यातमर्थग्रहणम्। एवं तर्हि - ज्ञापकं स्यात्तदन्तत्वे `ईदूदेद्-
द्विवचनम्' (1.1.11) इत्यत्र चत्वारः पक्षा आश्रीयन्ते। इदादयो हि द्विवचनेन
विशिष्यन्ते-ईदादियद् द्विवचनमिति; ईदादिभिर्वा द्विवचनम् इति, ईदाद्यन्तं यद् द्विवचनमिति; द्विवचनप्रकृतिर्वोभाभ्याम्-द्विवचनान्तमीदाद्यन्तं यच्
शब्दरूपमिति।
इदादीभिर्वा द्विवचनं विशिष्य पश्चात् तेनेदन्तेन द्विवचनेन प्रकृतिः, ईदाद्यन्तं
यद् द्विवचनमं शब्दरूपमितीदाद्यन्तं द्विवचनान्तमित्यर्थः। तत्र तृतीये पक्षे दोष
उक्तः-`कुमार्योरगारं कुमार्यगारम्, व्दवोरगारं वध्वगारमम्' इत्यत्र प्रगृह्य-
सञ्ज्ञा प्राप्नोति; एतदीदाद्यन्तं द्विवचनान्तं च भवति प्रत्ययलक्षणेनेति चतुर्थे पक्षेऽपि दोष उक्तः। अशुक्ले वस्त्रे शुक्ले सम्पद्येतां शुक्ल्यास्तां वस्त्रे
इत्यत्र प्राप्नोति। शुक्लशब्दाच्च्विप्रत्ययान्तत् `नपुंसकाच्च' (7.1.19) इत्यौङः शीभावे कृते `अध्ययादाप्सुपः' (2.4.82) इति लुक्। एतद्धीदाद्यन्तं
द्विवचननान्तं भवति प्रत्ययलक्षणेनेति। `तदन्तत्वे' इति अनेन तृतीयचतुर्थपक्षावुपलक्षयति। तदन्तत्वे तदन्तपक्षे तृतीये चतुर्थे च ज्ञापकं भवेदेतदर्थग्रहणम्
इति। इह प्रगृह्यप्रकरणे प्रत्ययलोपलक्षणेन प्रगृह्यसञ्ज्ञा न भवतीति। यदि हि स्यादर्थग्रहणमनर्थकं
स्यात्।एतावद् वक्तव्यम्- `ईदूतौ च सप्तमी' इति। सप्तम्या लुकि कृते प्रत्ययलक्षणेन सप्तमीसहचरितौ यावीदूतौ सप्तम्यां परतो वा यावीदूतौ तयोः
प्रगृह्यसञ्ज्ञा भवेत्ये-
तेति नार्थोऽर्थग्रहणेन। अर्थग्रहणाद्विज्ञायते- `प्रत्ययलक्षणेन प्रगृह्यसञ्ज्ञा न भवति' इति। तेन तदन्तपक्षद्वये यो दोषः उक्तः स न भवति। `मा वा पूर्वपदस्य
भूत्' इति। पूर्वपदग्रहणे समास उपलक्ष्यते। यस्मात् समासे सत्येतद्भवति पूर्वपदमुत्तरपदमिति। तदेतदुक्तं भवति- वाप्यश्वो नद्यातिरित्यादौ समासे
प्रगृह्यसञ्ज्ञा मा भूदित्येवमर्थमर्थग्रहणमिति। यथा च तस्मिन् सति समासे प्रगृह्यसञ्ज्ञा भवति, तथा पूर्वमेव
प्रतिपादितम्।

20. दाधा घ्वदाप्। (1.1.20)

`दाधा' इति। दारूपाणां चतुर्णां कृतैकशेषाणां धारूपयोर्द्वयोश्च कृतै
कशेषयोर्द्वन्द्वः। ननु च लक्षण प्रततिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्, न तु लाक्षणिकस्य' (व्या.प.3), इत्यनया परिभाषया `दो अवखण्डने'
(धा.पा.1148), `देङ
रक्षणे' (धा.पा.962), `धेट् पाने' (धा.पा.902) इत्येतेषां ग्रहणं न स्यात् ?
नैतदस्ति; तस्या हि परिभाषायाः `गामादाग्रहणेष्वविशेषः' (व्या.प.124) इत्यपवादोऽ
स्ति, तेन सत्यपि लाक्षणिकत्वेदोदेङौ तावद् गृह्येते। धेटोऽपि लिङ्गाद् ग्रहणमनुमीयते। तत् पुनर्लिङं दैपः पकारानुबन्धः,स हि `अदाप्' इति
दाप्रतिषेधसामान्य-
ग्रहणार्थः क्रियते। यदि चास्याः परिभाषाया इह व्यापारः स्यात्, दैपः पकारानुबन्धकरणमनर्थकं स्यात्। लाक्षणिकत्वादेव ह्यस्य ग्रहणं न भविष्यतीति किं
प्रतिषेधेऽस्य
ग्रहणेन ? ननु लाक्षणिकमपि दारूपं धारूपं च धेटो नोपपद्यत एव, सानुबन्धकस्य
ह्यनेजन्तत्वादात्त्वानुपपत्तेः ? नैष दोषः यदयम् `उदीचां माङो व्यतीहारे' (3.4.19) इति मेङ सानुबन्धकस्यात्त्वभूतस्य निर्देशं करोति , तज्ज्ञापयति-
नानुबन्धकृत-
मनेजन्तत्वम्'(शा.प.15) इति। ननु च `माङ माने' (धा.पा.1142) इत्यस्याप्यसौ
निर्देशः स्यात्, तत् कथं ज्ञापकम् ? नैतदस्ति। `मेङ प्रणिदाने' (धा.पा. 961) इत्ययमेव व्यतीहारे वर्तते, न `माङ माने' (धा.पा.1142) इति। तस्मान्
मेङ एवायं कृतात्त्वस्य निर्देशो ज्ञापनार्थः। `प्रणिददाति' इति। `नेर्गदनदपतपदघुमास्यतिहन्ति' (8.4.17) इत्यादिना घुसञ्ज्ञायां सत्यामिह णत्वं भवति.

`प्रणिदाता' इति। तृजन्तम्।
`प्रणिद्यति' इति। `ओतः श्यनि' (7.3.71) इत्योकारलोपः। अशिद्विषये दारूपोऽयं
भवतीत्यत्र घुसञ्ज्ञा प्रवर्त्तत एव। `दातं बर्हिः' इति। घुसञ्ज्ञाया अभावात् `दो
दद्घोः' (7.4.46) इति ददादेशो न भवति। `अवदातम्' इति। अत्रापि `निष्ठा'
(3.2.102) इति क्तप्रत्ययः।अत्र `अच उपसर्गात्तः' (7.4.47) इति तकारादेशो न भवति।

21. आद्यन्तवदेकस्मिन्। (1.1.21)
`असहायस्य' इत्यादिना सूत्रारम्भस्य फलं दर्शयति। इति करणो हेतौ। यस्मादादेरन्तस्य यानि कार्याण्युपदिष्टानि, तान्यविद्यमानसहायस्य न सिध्यन्ति; तस्मादतिदेशोऽयमारभ्यते। द्वितीयादिकं हि सहायमपेक्ष्याद्यन्तशब्दौ प्रवर्त्तते। तथा हि - लोकः सति हि परस्मिन् सहाये पूर्वाभावे चादिरिति व्यपदिशति, सति च पूर्वस्मिन्पराभावे
चान्त इति। अतस्तदुभयमसहाये नास्तीति। तत्राद्यन्तप्रतिबद्धानि कार्याणि न स्युः,
यद्ययमतिदेशो आरभ्यते। `एकस्मिन्' इति वचनात् `आद्यन्तवत' इत्यत्र सप्तमीसमर्था-
द्वतिर्गम्यत इत्याह- `सप्तम्यर्थे वतिः' इति। आद्यन्तयोरिवाद्यन्तवत्, `तत्र तस्येव' (5.1.116) इति वतिः। `औपगवम्' इत्यत्राप्यादिव्यपदिष्टं कार्यमतिदेशस्य फलम्।
प्रत्ययाद्युदात्तत्वं ह्यादेरुपदिष्टम्, `आद्युदात्तश्च' (3.1.3) इति वचनात्। `
आभ्याम्' इति। अत्रान्तोपदिष्टं दीर्घत्वं ह्यन्तस्योपदिष्टम्, `अलोऽन्त्यस्य' (1.1.52) इति वचनात्। इदमो भ्याम्, त्यदाद्यत्वम्, (7.2.102), `अतो गुणे' (6.1.97)
पररूपत्वम्, `हलि लोपः' (7.2.113) इतीद्रूपस्य लोपः, `सुपि च' (7.3.102) इति दीर्घः।

22. तरप्तमपौ घः। (1.1.22)
`कुमारितरा' इति। `द्विवचविभज्योपपदे' (5.3.57) इत्यादिना तरप्। `कुमारितमा' इति। `अतिशायने' इत्यादिना तमप्। तयोर्घसञ्ज्ञायां सत्यां `घरूपकल्प' (6.3.43)
इत्यादिना ह्रस्वत्वं भवति।

23. बहुगणवतुडति संख्या। (1.1.23)
अत्र बहुगणशब्दौ प्रातिपदिके, वतुडती प्रत्ययौ। `बहुकृत्वः' इति- `
सख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (5.4.17)। `बहुधा' इति- `सख्याया
विधार्थे धा' (5.3.42) `बहुकः' इति- `सख्याया अतिशदन्तायाः कन्' (5.1.22)
`तावत्कृत्वः' इत्यादि- तच्छब्दात् `यत्तदेतेभ्यः परिमाणे वतुप्' (5.2.39) इति
वतुपि कृते `आ सर्वनाम्नः' (6.3.91) इत्यात्त्वे कृते `तावत्' इति भवति; किंशब्दात् किमः संख्यापरिमाणे डतौ कृते टिलोपे च `कति' इति भवति; ताभ्यां पूर्ववदेव
कृत्वसुजादयः।
`बहुगणशब्दयोः' इत्यादि। बहुशब्दोऽयं संख्यावचनोऽप्यस्ति, वैपुल्यवचनोऽ
पि; गणशब्दः संख्यावचनोऽप्यस्ति, सङ्घवचनोऽपि; तत्र यौ वैपुल्यसङ्घवचनौ,तयोरिह
ग्रहणं नास्ति, संख्यावाचिनोरेव तयोस्त्वेषा सङ्ख्यासंज्ञा विधीयते,तत्कथं संख्ये-
त्यन्वर्थसंज्ञेयम्- संख्यायतेऽनया संख्या ! न च यो वैपुल्ये बहुशब्दो वर्त्तते,
यश्च सङ्घे गणशब्दः, ताभ्यां संख्यायते। तथा हि- `बहुरोदनः' इत्युक्ते वैपुल्यं
गम्यते; तथा `महान् भिक्षऊमां गणः' इत्युक्ते सङ्घः,न तु संख्यानम्। तस्मादन्वर्थसंज्ञाकरणाद् यावेकद्विसंख्याव्यवच्छेदेन संख्याविशेषमाहतुः, तयोरेव ग्रहणम्।
यद्येवम्,किमर्थं तयोरियं संज्ञा विधीयते, यावता संख्यावाचिनौ तौ लौकिकसंख्यायामन्तर्भूतौ ? लौकिकी च संख्या शास्त्रे गृह्यत एव; अन्यथा `संख्याया
अतिशदन्तायाः कन्' (5.1.22) इत्यत्र `अतिशदन्तायाः' इति प्रतिषेधोऽनर्थकः स्यात्, शास्त्रीयायाः
संख्याया अतिशदन्ताया अभावादित्यत् आह- `भूर्यादीनां निवृत्त्यर्थम्' इति। भूरि-
प्रभूतमित्येवमादयस्तज्जातीयाः प्रचुरविशेषवाचिनः सन्ति, तेषां मा भूदित्येवमर्थ

बहुगणशब्दयोः संख्यासंज्ञा विधीयते। तदेतेन नियमार्थमेतयोः संज्ञाविधानमेतदिति दर्शयति। तुल्यजातीयापेक्षया हि नियमः। अतस्तुल्यजातीयानां भूर्यादीनामेव नियमेन
व्यावृत्तिः क्रियते, नान्येषाम्।
`अर्धपूर्वपदश्च' इति। अर्धशब्दः पूर्वपदं यस्य पूरणप्रत्ययान्तस् सोऽर्ध-
पूर्वपदः, स च संख्यासंज्ञो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। किमर्थमित्याह- `समासकन्विध्यर्थम्' इति। तत्रेदं व्याख्यानम्- `डति च' (1.1.25) इत्यत्र यश्चकारः, स इह स्वरितत्वमासज्य सिंहावलोकितन्यायेनोपस्थाप्यते। स चानुक्तसमुच्चयार्थः। तेनार्धपूर्वपदश्च पूरणप्रत्ययान्तः संख्यासंज्ञो भवतीति। अर्धपञ्चमशूर्पः' इति। अर्धं पञ्चमं येषामिति बहुव्रीहिः। अर्धपञ्चमैः शूर्पैः क्रीतमिति `तद्धितार्थोत्तरपदसमा-
हारे च' (5.1.51) इति समासः। `संख्यापूर्वो द्विगुः' (2.1.52) इति द्विगुसंज्ञा। `
शूर्पादञन्यतरस्याम्' (5.1.26) इति विहितस्याञष्ठञो वा `अध्यर्धपूर्वद्विगोर्लुग-
संज्ञायाम्' (5.1.28) इति लुक्। `अर्धपञ्चकः' इति। `संख्याया अतिशदन्तायाः कन्'(5.1.22)।।

24.ष्णान्ता षट्। (1.1.24)
`स्त्रीलिङ्ग निर्देशात्' इत्यादि। ष्णान्तेति स्त्रीलिङ्गनिर्देशः क्रियते, न चेह किञ्चित् स्त्रीलिङ्गं श्रूयते, नापि प्रकृतमन्यत् संख्यायाः। तस्मात् स्त्रीलिङ्गनिर्देशात् संख्यैव `ष्णान्ता' इत्यनेन विशेषणेन विशिष्यते। `षट्' इति
चानया संज्ञया सम्बध्यते। यदि ष्णान्तेत्यत्र स्त्रीलिङ्गनिर्देशो न क्रियते, सर्वं ष्णान्तं शब्दरूपं षट्संज्ञं स्यात्। ततः `पामानः' विप्रुषः' इत्यादावपि `ष ड्भ्यो लुक्' (7.1.22) इति लुक् प्रसज्येत। ननु च संख्येत्यनुवर्त्तिष्यते, तत्
कुतोऽतिप्रसङ्गः ? सत्यमेतत्; सैवानुवृत्तिः स्त्रीलिङ्गनिर्देशेन स्पष्टीक्रियते। यदि संख्येत्यनुवर्त्तते, सामर्थ्यादेव तदन्ता विज्ञास्यते, न हि षकारमात्रं वा नकारमात्रं वा संख्यास्ति, तदपार्थकमन्तग्रहणम्, नैतदस्ति; उपदेशावस्थायां या
ष्णान्ता सा षट्संज्ञा यथा स्यादित्येवमर्थत्वादन्तग्रहणस्य। असति तस्मिन् शतानि
सहस्राणीति नुमि कृते षट्संज्ञा स्यात्। इह च अष्टानाम् इत्यष्टन आत्वे कृते
षट्संज्ञा न स्यात्। ततश्च `षट्चतुर्भ्यश्च' (7.1.55) इति नुण् न भवति।

25. डति च। (1.1.25)
`डत्यन्ता या संख्या सा षट्संज्ञा भवति' इति। संख्याग्रहणेनेहापि संख्यानुवर्त्तत
इति दर्शयति। किमर्थं पुनः सेहानुवर्त्तते ? पातेर्डतिः पतय इत्यत्र मा भूत्। अथ
संख्यानुवृत्तावपि कस्मादेवात्र न भवति, यावतायमपि संख्यासंज्ञ एव, सामान्येन हि
पूर्वं डतेः संख्यासंज्ञा विहिता ? नैतदस्ति; वतुना साहचर्यात् तद्धितस्यैव
डतेस्तत्र ग्रहणम्, न कृतः; कृच्चायम्।

26.क्तक्तवतू निष्ठा। (1.1.26)
`भुक्तवान्' इति। `चोः कुः' (8.2.30) इत कुत्वम्। `अत्वसन्तस् चाधातोः'
(6.4.14) इति दीर्घः। अथ केन विहितयोः क्तक्तवत्वोरेषा संज्ञा विधीयते ? अनयैव
संज्ञया। वक्ष्यति तृतीये `निष्ठा' (3.2.102) इति। यद्येवम्, निष्ठासंज्ञया क्तक्तवतू भाव्येते, तावेवाश्रित्य निष्ठासंज्ञेति; इतरेतराश्रयो दोषो भवति,
`इतरेतराश्रयाणि कार्याणि शास्त्रे न प्रकल्प्यन्ते, (व्या.28) नैष दोषः; भाविनी हि संज्ञा
विज्ञास्यते, यथा- `अस्य सूत्रस्य शटकं वय' इति। तौ भूते काले भवतः, ययोर्विहित-
र्निष्ठेत्येषा संज्ञा भवतीति।

27. सर्वादीनि सर्वनामानि। (1.1.27)
`सर्वशब्द आदिर्येषां तानीमानि सर्वादीनि' इति। एष तद्गुणसंविज्ञानो बहुव्रीहिः;
इतरथा ह्युपलक्षणार्थत्वात् सर्वशब्दस्य संज्ञा न स्यात्। न ह्युपलक्षणस्योपसर्जनी-भूतस्य कार्येण सम्बन्धो भवति। तथा हि- `चित्रगुरानीयताम्' इत्युक्ते न गवा-
मप्यानयनं भवति. तद्गुणसंविज्ञानस्य बहुव्रीहेर्लिङ्गम्- `अदः सर्वेषाम्' (7.3.100) इति निर्देशः। सर्वशब्दस्य सुट् सर्वनाम्नः कार्यम्; अन्यथा हि तन्नोपपद्यते। `

सर्वः, सर्वौ सर्वे' इति। इदमत्रोदाहरणं `सर्वे' इति। अत्र हि सर्वनामसंज्ञायाम् `
जसः शी' (7.1.17) इति शीभावः कार्यः। पूर्वयोस्तु तत्साहचर्येण `सर्वे' इत्येतस्य
पुँल्लिङ्गतां श्रूयमाणविभक्तितां च दर्शयितुमुपन्यासः; अन्यथा `सर्वे' इत्येता-
वत्युच्यमाने स्त्रीलिङ्गस्य लुप्तसम्बुद्धेरयं प्रयोग इति। कस्यचिद् भ्रान्तिः
स्यात्। `सर्वस्मै' इति। `सर्वनाम्नः स्मै' (7.1.14)। `सर्वस्मात्, सर्वस्मिन्' इति। `ङसिङ्योः स्मात्स्मिनौ' (7.1.14)। `सर्वस्मात्, सर्वस्मिन्' इति।
`ङसिङ्योः
स्मात्स्मिनौ' (7.1.15) इति। `सर्वकः' इति- `अव्ययसर्वनाम्नामकच् प्राक् टेः' (5.3.71) इति।
उभशब्दोऽयं द्विवचनटाब्विषय एव प्रयुज्यते-`उभौ उभे'इति । न च तत्
किञ्चित् सर्वनामकार्यं सम्भवति; स्मैप्रभृतीनां यतायोगमेकवचनबहुवचनविषयत्वात्। अकजपि नैवं सर्वनामसंज्ञां प्रयोजयति; विशेषाभावात्। नहि
तस्मादकचि, कप्रत्यये वा विहिते रूपभेदो वा भवति। तत् किमर्थस्तस्येह पाठः ? इत्याह- `उभशब्दस्थ' इत्यादि। `सर्व-नाम्नस्तृतीय च' (2.3.27)
इत्यनेन उभाभ्यां हेतुभ्याम्, उभोयर्हेत्वोरिति तृतीया-षष्ठ्यौ यथा स्यातामित्येवमर्थ्स्तस्येह पाठ इति दर्शयति।
`डतरतम' इति। `किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्' (5.3.92) `वा
बहुनां जातिपरिप्रश्ने डतमच्' (5.3.93) इत्येतयोः प्रत्ययोर्ग्रहणम्।
`वक्ष्यमाणेन' इति। `प्रथमचरम' (1.1.33) इत्यादिना।
`कथम्' इत्यादि। समशब्दस्य सर्वनामसंज्ञायां सत्यां `आमि सर्वनाम्नः सुट्' (7.1.52) इति सुटि `समेषाम्' इति भवितव्यम्, तत् कथं सामानामिति
भवति ? ततश्च
सप्तम्येकवचनस्य स्मिन्भावे कृते समस्मिन्निति भवितव्यम्, तत् कथं `समे देशे यजेत्' इति प्रयोग उपपद्यते ! इत्यभिप्रायः। `न सर्वत्र' इति। न सर्वत्रार्थे
वर्त्तमान-
स्येत्यर्थः। एतच्च `सर्वेषां नामानि सर्वनामानि' इत्यन्वर्थसंज्ञाकरणाल्लभ्यते। स एव हि समशब्दः सर्वेषां नाम भवति यः सर्वशब्दपर्यायः, न चान्योः
प्रयोगयोः समशब्दः सर्वपर्यायः। तथा हि `समानाम्' इत्यत्र समशब्दस्तुल्यार्थे वर्त्तते। `समे देशे'
इत्यत्राप्यविषमे- निम्नोन्नतादिरहिते। अत एव चान्वर्थसंज्ञाकरणात् संज्ञोपसर्जनीभूतानां संज्ञा न भवति। यथा- सर्वो नाम कश्चित्, तस्मै सर्वाय देहि।
अतिक्रान्तः
स्रर्वमतिसर्वः, तस्मा अतिसर्वाय देहीति। न ह्येवंप्रकाराणि सर्वेषां नामानि;
विशिष्टव्सतु विषयत्वात्। `सर्वनामानि' इत्यत्र`पूर्वपदात् संज्ञायाम्' (8.4.3) इतिणत्वं तु न भवति, अत एव निपातनात्।

28. विभाषा दिक्समासे बहुव्रीहौ। (1.1.28)
`दिगुपदिष्टे' इति। दिशामुपदिष्ट उक्तो दिगुपदिष्टः। स पुनः
`दिङनामान्यन्तराले' (2.2.26) इति यः समासस्तस्यात्र ग्रहणम्। स पुनर्लक्षणप्रतिपदोक्तपरिभाषया लभ्यते। प्रतिपदोक्तसमासाश्रयणं तु या पूर्वा दिक्
सोत्तराऽस्योन्मु-
ग्धस्य, `अस्मै पूर्वोत्तराय देहि' इत्यत्रा मा भूत्। `उत्तरपूर्वस्मै' इति।
उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालमिति पूर्वोक्तेन सूत्रेण बहुव्रीहिः,
`सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः' (जै.प.वृ.103) इति पूर्वपदस्य
पुंवद्भावः, चतुर्थ्येकवचनम्, `सर्वनाम्नः स्याड्ढ्रस्वश्च' (7.3.114) इति याट्,
`आटश्च' (6.1.90) इति वृद्धिः।
`समासग्रहणं किम्' इति। यावता न बहुव्रीहिः समासत्वं व्यभिचरत्येव, ततोऽ
पार्थकं विसेषणमित्यभिप्रायः। `समास एव यो बहुव्रीहि' इति। यस्यातिदेशेन बहुव्रीहिवद्भावो न विधीयते स वेदितव्यः समास एव बहुव्रीहिरिति। स पुनर्यः
समासाधिकारे विहितः। `बहुव्रीहिवद्भावेन' इति। यस्यातिदेशिकं बहुव्रीहित्वं स बहुव्रीहिवद्भावेन
बहुव्रीहिः। `दक्षिणदक्षिणस्यै' इति। `एकं बहुव्रीहिवत्' (7.1.9) इत्यतो बहुव्रीहिवदिति वर्त्तमाने `आबाधे च' (8.1.10) इति दक्षिणाशब्दस्य द्विर्वचनम्।
बहुव्रीहि-
वद्भावाच्च सुब्लुक्। अयं बहुव्रीहिवद्भावेन बहुव्रीहिरिति विभाषा न प्रवर्त्तते।
योऽपि `न बहुव्रीहौ' (1.1.29) इति वक्ष्यमाणः प्रतिषेधः सोऽपीह न भवति; तत्रापि
समासाधिकारात। `दक्षिणोत्तरपूर्वाणाम्' इति। अत्र `द्वन्द्वे च' (1.1.31) इति नित्य एव प्रतिषेधो भवति, तेन पक्षे सुण्न भवति। यद्येवम्, `सर्वनाम्नो

वृत्तिमात्रे' (
जै.प.वृ103) इति पुंवद्भावोऽत्र न स्यात्; नैतदस्ति; अवयवस्याद्वन्द्वत्वात्। ननु विनाऽपि बहुव्रीहिग्रहणेनात्र `द्वन्द्वे च'(1.1.31) इति प्रतिषेधेन भाव्यमेव; तदपार्थकं बहुव्रीहिग्रहणम्, नैतदस्ति; यो हि दिग्द्वन्द्वो न भवति स तस्य विषयः
स्यात्। दिग्द्वन्द्वे त्वसति बहुव्रीहिग्रहणे एषैव विभाषा स्यात्। तस्माद्बहुव्री-
हिग्रहणं कर्त्तव्यम् ? न कर्त्तव्यम्। कस्मान्न भवति? `दक्षिणोत्तरपूर्वाणाम्'
इत्यत्र प्रतिपदोक्तसमासस्येह ग्रहणात्। एवं तर्ह्युत्तरार्थं बहुव्रीहिग्रहणम्। `न वहुव्रीहौ' (1.1.29) इत्यत्रास्य प्रयोजनं वक्ष्यति। वृत्तिकारस्य त्वेषोऽभिप्रायः- `उत्तरार्थमवश्यकर्त्तव्यम्, तदुत्तरार्थं कृतमिहापि स्पष्टार्थं भविष्यति' इति।

29. न बहुव्रीहौ। (1.1.29)
`सर्वनामसंज्ञायाम्' इत्यादि। कथं पुरेतदवगतम्- अभ्युपगतस्तदन्तविधिरिति? अत एव प्रतिषेधात्, अन्यथा हि निष्फलः प्रतिषेधः स्यात्। तदन्तविध्यभ्युपगमे हि `परमसर्वस्मै उत्तमसर्वस्मै' इत्यत्रापि संज्ञा यथा स्यात्। `इह च' इत्यादि। अस्य `प्रतिषेध आरभ्यते' इत्यनेन सम्बन्धः। `त्वं पिताऽस्य, अहं पिताऽस्य' इति विगृह्य
बहुव्रीहौ कृतेऽज्ञाताद्यर्थविवक्षायाम् असति प्रतिषेधे। `अव्ययसर्वनाम्नामकच्
प्राक् टेः' (5.3.71) इत्यत्राकच् प्रसज्येत। ततश्च `त्वकत्पित-कः, मकत्पितृकः'
इत्यनिष्टं रूपं स्यात्। तस्मादकज् मा भूदिति प्रतिषेद आरभ्यते। तेन `प्रागिवात् कः' (5.3.70) इति क एव भवति। तत्र परतः `प्रत्ययोत्तरपदयोश्च'
(7.2.98) इति मपर्यन्त-र्योर्युष्मदस्मदोस्त्वमयोः कृतयोः `नद्यृतश्च' (5.4.153) इति समासान्ते कपि च
`त्वत्कपितृकः, मत्कपितृकः' इति सिद्ध्यति। ननु चान्वर्थसंज्ञाकरणादेव संज्ञानिरासे कृतेऽकज् न भविष्यति-न ह्यत्र सर्वार्थता सम्भवति, विशेषविषयत्वात्, नैतदस्ति;
समुदायो हि विशेषे वर्त्तते, पूर्वपदं तु सर्वार्थताया अनपेतमेव। भवत्वनयोरनन्तरयो-रुदाहरणयोरेतत्सूत्रविषयता, `प्रियिश्वाय' इत्यादिस्तु नपपद्यते; न हि प्रियविश्वादयः शब्दाः सर्वेषां नामानि नापि तदवयवभूतानां विश्वादिशब्दानां किञ्चित् सर्वनामका-
र्यमुपपद्यते; स्मैप्रभृतीनामङ्गकार्यत्वात्, विश्वादिशब्दानां चानङ्गत्वात् ? एवं मन्यते- `त्वत्कपितृकः, कत्कपितृकः' इत्यत्राकज् मा भूदिति, एतदर्थं तावदेतदार-
ब्धव्यम्, `प्रियविश्वाय' इत्येवमादावपि विस्पष्टार्थं भविष्यतीति।
अथ `बहुव्रीहौ' इति वर्त्तमाने किमर्थं पुनर्बहुव्रीहग्रहणमित्याह- `बहुव्रीहौ' इत्यादि। `वस्त्रान्तरवसनान्तराः' इति। वस्त्रमन्तरं येषामिति
बहुव्रीहि कृत्वा वस्त्रान्तराश्च वसनान्तराश्चेति द्वन्द्वः कृतत्र्। अत्र वर्त्तमा-
नत्वाद् द्वन्द्वस्य `द्वन्द्वे च' (1.1.61), `विभाषा जसि' (1.1.32) इति द्वन्द्वा-
श्रितो विभाषाप्रतिषेधः स्यात्, न नित्यो बहुव्रीह्याश्रितः। पुनर्बहुव्रीहिग्रहणा-तु भूतपूर्वस्यापि बहुव्रीहेराश्रयमात् तदाश्रयो नित्यः प्रतिषेधो भवति। वसनशब्द-श्चात्र वसत्यस्मिन्नित्यधिकरणसाधनो गृहे वर्त्तते, न वस्त्रे; अन्यथा वस्त्रान्तरवसनान्तरशब्दयोः पर्यायत्वाद् द्वन्द्वो न स्यात्, `तुल्यार्थाञ्च विरुपाणामेकशेषः' इत्येकशेषविधानात्।

30.तृतीयासमासे। (1.1.30)
ननु च `विभाषा दिक्समासे' (1.1.28) इत्यत समासग्रहणमनुवर्त्तत एव, तत्
किमर्थं पुनः समासग्रहणमित्यत आह- `समास इत्यनुवर्त्तमाने' इत्यादि। अस्त्येव
तृतीयासमासो मुख्यः, यस्मिन् सत्यैकपद्यमैकस्वर्यमेकविभ्कतिकत्वं च भवति। अस्ति च
गौणः, यस्मिंस्तादर्थ्यादतस्मिन्नपि ताच्छब्द्यं भवति। स पुनस्तृतीयासमासार्थं
वाक्यम्। तत्रासति पुनः समासग्रहणे `गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः' (व्या.प.4) इति मुख्य एव प्रतिषेधः स्यात्। नेतरत्र। तस्मात् तत्रापि प्रतिषेधो यथा स्यादित्येवमर्थं पुनः समासग्रहणम्। यदि तर्हि तृतीयासमासार्थेऽपि वाक्ये प्रतिषेधो भवति,यावान् कश्चित् तृतीयासमासः, तदर्थे वाक्ये सर्वत्र प्रतिषेधः स्यात्;
ततश्च `त्वयका कृतम्, मयका कृतम्'इत्यत्राकज् न स्यात्। भवति ह्येतत्
`कर्तृकरणे कृता बहुलम्' (2.1.32) इत्यनेन यः समासस्तदर्थं वाक्यम्;तत्र कप्रत्यये कृते `त्वत्केन कृतम्, मत्केन कृतम्' इति रूपं स्यादित्यत आह- `पूर्वसदृश'
इत्यादि। एतच्च लक्षमप्रतिपदोक्तपरिभाषया लभ्यते।
`त्वयका, मयका' इति। पूर्ववत् त्वमावादेशौ, सुबन्तादकच्। क्वचित् त्वकया, मकया इति पाठः स त्वयुक्तः। प्रातिपदिकात् त्वकजुत्पत्तौ त्वकया मकयेति

भवति, न
चात्र प्रातिपदिकादकजुत्पत्तिरिष्यते; अपि तु सुबन्तात्। तथा ह्यकज्विधौ वक्ष्यति-"प्रातिपिदकात्" सुपः' इति च द्वयमपीहानुवर्त्तते। तत्राभिधानतो व्यवस्था- क्वचित्
प्रातिपदिकस्य प्राक् टेः प्रत्ययो भवति, क्वचित् सुबन्तस्य। `युष्मकाभिः,
युष्मकासु, अस्मकासु, युवकयोः, आवयकयोः' इत्यत्र प्रातिपदिकस्य। त्वयका, मयका,
त्वयकि,मयकि' इत्यत्र सुबन्तस्य" इति।

31. द्वन्द्वे च। (1.1.31)

32. विभाषा जसि।(1.1.32)
`जसः कार्यं प्रति' इत्यादि। एतच्च् व्यवस्थितविभाषात्वादस्या विभाषाया
लभ्यते। अथ वा जसीति कार्यापेक्षया आधारसप्तमीयम्, न तु सर्वाद्यपेक्षया परसप्तमी; तेन जसि यत् कार्यम्= जसाधारं यत् कार्यं जसः शीभावः तत्र
विभाषा भवति, नान्यत्र
। किं कारणमेवं व्याख्यायत इत्यत आह-`अकज् हि न भवति' इति हि शब्दो हेतौ।एवं
व्याख्यायमाने सति `कतरकतमकाः' इत्यत्राकज् न भवति; पूर्वसूत्रेण संज्ञाप्रतिषेधात् अन्यथा हि यदि जसि परतः संज्ञा विकल्प्यते,तदा पक्षेऽकज् भवेदेव। तथा च तस्य तन्मध्यपतित्वात् तद्ग्रहणेन ग्रहणात् पाक्षिकः शीभावः प्रसज्येत। कप्रत्यये तु सति तेन व्यवधानादेवैष दोषो न भवति।

33.प्रथमचरमतयाल्पार्धकतिपयनेमाश्च। (1.1.33)
उभयशब्दस्य तयप्प्रत्ययान्तस्य' इति। `संख्याया अवयवे तयप्' (5.2.42)
इत्युभशब्दाद्विहितस्य तयपो यद्यपि`उभादुदात्तो नित्यम्' (5.2.44) इत्ययजादेशो विधीयते, तथापि स्थानिवद्भावात् तद्ग्रहणेन गृह्यत इत्युभयशब्दस्तयप्प्रत्ययान्तो भवति।
`तस्य गणे पाठान्नित्या सर्वनामसञ्ज्ञा'इति। न त्वनेन योगेन परेणापि पाक्षिकी। एतच्च व्यवस्थितविभाषात्वाल्लभ्यते। `काकचोर्यथायोगं वृत्तिः'इति।
तेनोभय- नेम-शब्दयोः सर्वादित्वान्नित्यमकचो वृत्तिः, प्रथमादिभ्यस्तु कप्रत्ययस्य- इत्येष यथा-
योगार्थः।।
34. पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्। (1.1.34)
`असंज्ञायाम्' इति। संज्ञायामसत्याम् पूर्वादयश्चेत् संज्ञारूपा न भवन्ती-
त्यर्थः। `स्वाभिधेयापेक्ष' इत्यादि अवधिर्मर्यादा,तस्य नियमोऽवश्यम्भावः; अवधिभा-
वादभ्रंशः।किंविशिष्टोऽवधिनियमः ? स्वाभिधेयापेक्षः ह्यर्थानाम्- पूर्वादिशब्दाभिधयानां यत् पूर्वादित्वम्, तन्नियोगतः कञ्चनावधिमपक्ष्य सम्पद्यते, न
त्ववधिनिरपेक्षम्; यथा- पूर्वदेशस्य यत् पूर्वत्वम्,तत्परं देशमपेक्ष्य भवति; परस्यापि यत्
परत्वम्, तत् पूर्वदेशम्; तस्मात् पूर्वादिशब्दवाच्यापेक्षेणावश्यं केनचिदवधिना
भाव्यम्। तत्र तस्यैवावधेः यः पूर्वादिशब्दार्थापेक्षोऽवधिभाव ऐकान्तिकः, स नियमो व्यवस्था, तस्यां गम्यमानायां पूर्वादीनां शब्दानां स्वाभिधेय एव वर्त्तमानानामियं संज्ञा भवति; न तु वाच्यायाम्। यो हि पूर्वादिशब्दाभिधेयादन्यस्यार्थस्यावधिभूतस्य
नियमः, स कतं पूर्वादिशब्दवाच्यो भविष्यति!
`पूर्वे,पर्वाः' इति। अत्र परसमादेवावधेरिति गम्यते। `परे,पराः'इति। पूर्व-
स्मादेवावदेरिति गम्यते। `प्रवीणाः' इति। कुशला इत्यर्थः। अत्र प्रावीण्यमात्रेण
निमित्तेनावधिनिरपेक्ष एव दक्षिणशब्दो वर्त्तत इति व्यवस्था न गम्यते। `सत्यामेव'
इत्यादि। जम्बूद्वीपं वावधिमपेक्ष्य तत्रोत्तरशब्दो वर्त्तत इति विद्यत एव व्यवस्था।

35.स्वमज्ञातिधनाख्यायाम्। (1.1.35)
`अत्रापि नित्या सर्वनामसंज्ञा प्राप्ता' इति। गणपाठात्। एवमुत्तरत्रापि
वेदतव्यम्। `न चेत्' इत्यादिना ज्ञातिधनाख्याशब्दस्यार्थमाचष्टे। यत्र च शब्दान्तर-

निरपेक्षः स्वशब्दो ज्ञातिधने स्वरूपेणाचष्टे, तत्रासौ संज्ञारूपेण तयोर्वर्त्तते। `आत्मीया इत्यर्थः' इति। कथं पुनरयमर्थः, यावता `स्वे पुत्राः' इति ज्ञात्यर्थो

गम्यते, `स्वे गावः' इति धनार्थः ? नैतदस्ति; पुत्त्रगोशब्दसान्निध्यादतदुभयं
गम्यते। स्वशभ्देनात्मीयत्वमात्रं गम्यते- `स्वा ज्ञातयः' इति। प्रभूता स्वा इति
चोभयत्र शब्दान्तरमनपेक्ष्य ज्ञातिधने स्वरूपेणैव स्वशब्देनाभिधीयेते। यद्येवम्, ज्ञातय इत्यनुप्रयोगो नोपपद्यते; पर्यायत्वात्, यथा- वृक्षशब्दप्रयोगे सति तरुशब्द-
शब्दस्यानुप्रयोगो विरुध्यते, नैष दोषः; पर्यायशब्दस्य हि यत्रानेकार्थो भवति सन्दिग्धार्थो वा, तत्र तदर्थस्यैव व्यक्तीकरणार्थः पर्यायान्तरस्यानुप्रयोगो न विरुध्यते; यथा- मेघाद्यनेकार्थवृत्तेर्वराहकशब्दस्य प्रयोगे शूकरशब्दस्य प्रयोगः। तथा सन्दिग्धार्थस्य पिकशब्दस्य प्रयोगे कोकिलशब्दस्य !
स्वशब्दश्चायमनेकार्थः,
तत्रासत्यनुप्रयोगे किंविषयोऽयं प्रयुक्तः- इति सन्देह स्यात्।

36. अन्तरं बहिर्योगोपसंव्यानयोः। (1.1.36)
`बर्हिर्योगे' इति। बहिरित्यनेनानावृतदेश उच्यते। तेन योगो बर्हिर्योगः। स चानावृतस्य बाह्यस्य वस्तुनो भवति। `उपसंव्याने च' इति। उपसंवीयते परिधीयते यत्
तदुपसंव्यानम्- `कृत्यल्युटो बहुलम्' (3.3.113) इति कर्मणइ ल्युट्। अथ वा, संवीयते
पिधीयतेऽनेनेति संव्यानम्- `करणाधिकरणयोश्च' (3.3.117) इति ल्युट्। संव्यानस्य
समीपमुपसंख्यानम्। अबहिर्योगे सामर्थ्यात् तदेव वेदितव्यम्। `नगरबाह्याः' इति। अनेन बहिर्योगं दर्शयति- `परिधानीयमुच्यते' इति। उपसंव्यान्सयेदमुदाहरणमुपन्यस्तम्।
वस्त्रान्तरावृतवस्तु वस्त्वन्तरेणापिहितमुच्यते। अविशेषाभिधानेऽपि यद्वस्त्रान्तरेणावृतम्, सामर्थ्यात् तदेवोपसंव्यानमुच्यते, नेतरत्। `न प्रावरणीयम्' इति।
प्राव्रियतेऽपिधीयते-नेनेति प्रावरणीयम्, तन्नभिधीयते। तदभिधाने तस्य बहिर्योगत्वात्
बहिर्योग एवेदमुदाहरणं स्यादित्याभिप्रायः।
`अन्तरे तापसः प्रतिवसति' इति. अत्र संज्ञाया अभावात् सप्तम्याः स्मिन्नादेशो न भवति। ननु च जसीत्यनुवर्त्ते, तत् कस्मात् सप्तम्यन्तं प्रत्युदाहृतमित्यत आह-`गुणसूत्रस्य च' इत्यादि। `अपुरीति वक्तव्यम्' इति। अनन्तरं `गणसूत्रस्य च'
इत्यभिधानाद् गणसूत्रमेवैतद् वक्तव्यमिति गम्यते। यद्यपि गणसूत्रेऽन्तरशब्द पठ्यते,तथापि `प्रतिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (व्या.प.29)
इति प्राकाराद्ब-हिर्वर्त्तिनी या पूस्तस्या अपि बहिर्योगोऽस्तीति तत्र वर्त्तमानस्य टाबन्तस्याप्यन्तराशब्दस्य सर्वनामसंज्ञा प्राप्नोति, तेनापुरीति वक्तव्यम्।
तेनान्तरायामित्यत्र स्याण् न भवति। `विभाषाप्रकरणे' इत्यादि। उपसंख्यानशब्दस्येह प्रतिपादनमर्थः।
अस्मिन् विभाषाप्रकरणे तीयप्रत्ययान्तस्य सर्वनामसंज्ञायाः प्रतिपादनं कर्त्तव्यमि-
त्यर्थः। तत्रेदं प्रतिपादनम् `विभाषा जसि' (1.1.32) इत्यत्र `विभाषा' इति योग-
विभागः क्रियते, तत्र च `सर्वादीनि' `द्वन्द्वे' इति च निवृत्तम्, तेन तीयस्य
विभाषा सर्वनामसंज्ञा भविष्यतीति। न चैवं सत्यतिप्रसङ्गः; योगविभागदिष्टसिद्धेः
नापि `विभाषा द्वितीयतृतीयाभ्याम्' (7.3.115) इत्यस्य वैयर्थ्यापत्तिः; प्रपञ्चार्तत्वात्। ततः `जसि' द्वितीयो योगः। अत्र विभाषाग्रहणम्, सर्वादिग्रहणम्, द्वन्द्व
ग्रहणं चानुवर्त्तते।

37. स्वरादिनिपातमव्ययम्। (1.1.37)
स्वरादिषु स्वस्तिशब्दोऽस्तिशब्दश्च पठ्यते। तत्र स्वस्तिशब्दस्य किमर्थः पाठः? यावतास्तिशब्दपाठादेव तदन्तविधिना स्वस्तिशब्दस्यापि भविष्यति। `ग्रहणवता
प्रातिपदिकेन ' (व्या.प.89) इति तदन्तविधि प्रतिषेधान्न सिध्यतीत्येतत् तु नाशङ्कनीयम्, `अव्ययम्' इति महती संज्ञा क्रियते, अन्वर्थसंज्ञा यथा
विज्ञायेतलिङ्गकारकसंक्याविशेषानुपादान्न व्येति= विविधत्वं न गच्छतीत्यव्ययम्। तस्याश्चोपसर्जनप्रतिषेधः, तदन्तविधिश्च प्रयोजनम्।
तस्मादन्वर्थसंज्ञकरणादेव तदन्तस्यापि भविष्यति, स्वस्तिशब्दोऽपि न व्येत्येव, सत्यमेतत्;एवं त्वन्वर्थसंज्ञाकरणाल्लब्धस्तदन्तविधिरननोपद-
र्शितः। विस्पष्टार्थमुदाहरणमेतत्। `तसिलादिस्तद्धित एधाच्पर्यन्तः' इति। `पञ्च-
म्यास्तसिल्' (5.3.7) इत्यत प्रभृति`एधाच्च' (5.3.46) इत्येतत्पर्यन्तः।`शस्तसी'
इति। `बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्' (5.4.42) `प्रतियोगे पञ्चम्यास्तसिः' (5.4.44) `कृत्वसुच्' इति। `संख्यायः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (5.4.17)इति। `द्वित्रिचतुर्भ्यः सुच्' (5.4.18) । `आस्थालौ' इति। `इण आसिः' (द.उ.9.81) इत्युणा-
दिसूत्रेण इणो धातोरासिप्रत्ययः। `अयाः' इत्युदाहरणम्। `प्रत्नपूर्वविश्वेमात्थाल् छन्दसि' (5.3.111) इति। `च्व्यर्थाश्च' इति। अभूततद्भावे

`कृभ्यस्तियोगे सम्पद्य-
कर्त्तरि च्विः' (5.4.50) `विभाषा साति कात्र्स्न्ये' (5.4.52)। `आम्' इति। `किमे-
त्तिङव्ययधादाम्वद्रव्यप्रकर्षे' (5.4.11)। `निपाता वक्ष्यन्ते' इति। अथ कस्मात् ते स्वरादिषु न पठ्यन्ते ? कः पुरेवं गुणो भवति ? अवययसंज्ञायां निपातग्रहणं तथा हि
क्रियायोगे दृश्यते-`स्वः पश्यन्ति, स्वरारोहन्ति' इति। तत्र यदि चादयो निपाताः पठ्येरन्, तेषां सत्त्वेऽपि वर्त्तमानानामव्ययसंज्ञा प्रसज्येत।
`अव्ययम्' इत्यन्वर्थसंज्ञेयम्' इति दर्शयितुमाह- `सदृशम्' इति। त्रिषु
लिङ्गेषु स्त्रीपुंनपुंसकेषु सदृशं तुल्यम्, लिङ्गविशेषापरिग्रहाल्लिङ्गसामान्योपा-
दानाच्च। `सर्वासु च विभक्तिषु' इति। विभक्तिनिमित्तत्वाद् विभक्तिः। विभज्यते वा
प्रातिपदिकार्थ आभिरिति कर्मादीनि कारकाणि शक्तिरूपाणि विभक्तिशब्देनोच्यन्ते। `वच-
नेषु च' इति। वचनान्येकवचनद्विवचनबहुवचनानि। इहाभिधेयेऽभिधानोचाराद् एकाधिका
संख्या गृह्यते `यस्मान्न व्येति लिङ्गादिसंख्याविशेषानुपादानाद् विविधं नानात्वं न गच्छति तस्माद् अव्ययम्' इत्यन्वर्थता प्रतिपादिता भवति। प्रयोजनं पुनरुपसर्जनप्र-
तिषेधः, तदन्तविधिश्चेत्युक्तम्। तत्रोपसरजनप्रतिषेधः- `अत्युच्चैः, अत्युच्चैसौ, अत्युच्चैसः'। न ह्यत्र यथोपदर्शितार्थानुगमः सम्भवति। यत्र तु सम्भवति, तत्र तदन्तस्याव्ययसंज्ञा भवत्येव; यथा- `परमस्वः, उत्तमस्वः' इति। अत्र हि स्वर् शब्द-
स्य प्राधान्याल्लिङ्गादिविशेस्यासम्भवः। पूर्वत्र तूच्चैः शब्दस्य विपर्ययाद्वि-
पर्ययः।

38.तद्धितश्चासर्वविभक्तिः। (1.1.38)
प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणं भवतीत तद्धितान्त
स्य संज्ञा विज्ञायत इत्याह `तद्धितान्तः शब्दः'इति। `यस्मान्न सर्व' इत्यादि।
अत्रावयवकात्र्स्न्यवृत्तिः सर्वशब्दः। सर्वा निरवशेषा येषां त्रयाणां वचनानां विभ-
क्तिरिति संज्ञा कृता। तानि सर्वाणि यतो नोपत्पद्यन्त इत्यर्थः. `ततः,यतः' इति। तद्- यच्छपब्दात् पञ्चमीसमर्थात् `पञ्चम्यास्तसिल्' (5.3.7)इति तसिल, `सुपो धातुप्रा
तिपदिकयोः' (2.4.71) इति सुब्लुक्;`प्राग्दिशो विभक्तिः' (5.3.1) इति
विभक्तित्वात् त्यदाद्यत्वम्; `अतो गुणे' (6.1.97), पररूपत्वम्। `तत्र यत्र 'इति। `सप्तम्यास्त्रल्' (5.3.100 इति त्रल्। `तदा, यदा, सर्वदा' इति।
`सर्वैकान्यकिंयत्तदः काले दा' (5.3.15)। सर्वे एते-ततः प्रभृतयः विभक्त्यर्थप्रधानाः। स च
विभक्तयर्थः प्रातिपदिकार्थः सम्पन्न इति प्रातिपदिकार्थे प्रथमैव भवति। सापि संख्याविशेषाभावान्न सर्वा। किं तर्हि? एकवचनमेव; तस्योत्सर्गत्वात्। तथा चोक्तम्-
`एकवचनमुत्सर्गतः करिष्यते' इति। तस्य `अव्ययादाप्सुपः' (2.4.82) लुक्। `एकः'
इति। अत्रासर्वविभक्तिकत्वमस्ति; एकत्वे द्वित्वायोगात्। अतद्धितत्वान्न भवति। `औपगवः' इति. अत्र तद्धितान्तस्य सर्वविभक्तियोगान्न भवति।।

39.कृन्मेजन्तः। (1.1.39)
`स्वादुङ्कारं भुङ्क्ते' इति। `स्वादुमि णमुल्' (3.4.26)। `स्वादुमि' इत्यत एव
निर्देशादुपपदस्य मकारान्तत्वं निपात्यते। स्वादुमिति चार्थग्रहणम्। तेन सम्पन्नादावप्युपपदे णमुल् भवति। `वक्षे' इति। `वच परिभाषणे' (धा.पा.1063), `ब्रुवो वचिः'
(2.4.56)इति ब्रूञादेशो वा। `चोः कुः' (8.2.30) इति कुत्वम्।
`अन्तग्रहणम्' इत्यादि। `औपदेशिकप्रतिपत्त्यर्थम्' इति। नित्ययोगे
बहुव्रीहिविज्ञानादौपदेशिकप्रतिपत्तिः। उपदेशे भवमौपदेशिकम्।तस्य प्रतिपत्तिर्ज्ञानम् प्रयोजनं यस्य तत् तथा। एवं मन्यते- विनाप्यन्तग्रहणेन `येन विधिस्तदन्तस्य' (1.1.72) इति सामर्थ्याद्वा कृतस्तदन्तविधौ सिद्धे यदन्तग्रहणं क्रियते तस्यैतत् प्रयोजनम् नियोगतो यस्यैजन्तत्वमुपदेशावस्थायामेव भवति तस्यैव प्रतीतिर्यथा स्यादिति। `आधये' इति। दधातेराङ्पूर्वात् `उपसर्गे घोः किः' (3.3.92) इति किः, `आतो लोप इटि च' (6.4.34) इत्याकारलोपः, चतुर्थ्येकवचने `घेर्ङिति' (7.3.111) इति गुणः। `चिकीर्षदः' इति। करोतेः सन्, `अज्झनगमां सनि' (6.4.16) इति दीर्घः;
`सनाशंसभिक्ष उः' (3.2.168) इत्युप्रत्ययः; अतो लोपः, शेषं पूर्ववत्। `कुम्भकारेभ्यः' इति। `कर्मण्यण्' (3.2.1) `उपपदमतिङ'(2.2.19) इति

समासः; `बहुवचने झल्येत्' (7.3.103) इत्येत्त्वम्। ननु च लक्षमप्रतिपदोक्तपरिभाषयैव वा `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इत्येव वात्र संज्ञा न भविष्यति- विभक्तिप्रत्ययं ह्याश्रित्य विधीयमानत्वाद् गुणादिकार्यं बहिरङ्गम्, अव्ययसंज्ञा त्वन्तरङ्गम्, बाह्यस्य निमित्तस्यानाश्रयणात्, सत्यमेतत्; एवं त्वर्थप्रतिपत्तौ प्रतिपत्तिगौरवं स्यात्। अतस्तत्परिहारार्थमन्तग्रहणं कृतम्।।

40. क्त्वातोसुन्कसुनः। (1.1.40)

`कृत्वा,हृत्वा' इति। `समानुकर्तृकयोः पूर्वकाले' (3.4.21) इति क्त्वा। `
उदेतोः' इति। `इण् गतौ' (धा.1045) `सार्वधातुक' (7.3.84) इति गुणः। `अपाकर्त्तोः' इति। कृञः। `विसृपः'इति।`गम्लृ' (धा.942) `सृप्लृ' (धा.983) इतौ। `आतृदः' इति।
`तृदिर् हिंसानारदयोः' (धा.1447)

41. अव्ययीभावश्च। (1.1.41)

`उपाग्नि' इति। `अव्ययं विभक्ति' (2.1.6) इत्यादिना सामीप्येऽव्ययीभावः।
`अव्ययात्' (2.4.82) इत लुक्। अग्नेः समीपे उपाग्नीति। उपाग्नि मुखं यस्येत्यव्ययी-भावगर्भो बहुव्रीहिः।तत्र `मुखं स्वाङ्गम्' (6.2.167) इत्युत्तरपदान्तोदात्तत्वे
प्राप्ते`नाव्यय' (6.2.168) इति प्रतिषिद्धम्। `तस्मिन् प्रतिषिद्धे पूर्वपदप्रकृतिस्वरः' इति। `बहुव्रीहौ प्रकृत्या' (6.2.1) इत्यादिना तत् पुनरन्तोदात्तत्वम्,उपाग्निशब्दस्य समासस्वरेणान्तोदात्तत्वात्। `उपपयःकारः'इति। `कर्मण्यण्' (3.2.1) एवम्,
`उपपयः कामः' इत्यत्रापि। उपपयः कामो यस्येति बहुव्रीहिर्वायम्। काम्यत इति कामः, `अकर्त्तरि च कारके संज्ञायाम्' (3.3.19) इति कर्मण्यपि घञ्।
`अनव्ययस्य' (वा.939) इति सत्त्वे प्रतिषिद्धे `कुप्वो क पौ च'(8.3.37) जिह्वामूलीयो भवति, विसर्जनीयो वा। अत्र मुखस्वरोपचारौ निर्वर्त्यमानौ प्रयोजनम्, न तु विधीयमानौ; लुक् पुनर्विधीयमानः। ननु चावययनिबन्धनमकजादिकार्यमस्त्येव,तत् कुतोऽयं कार्यनियमो लभ्यत इत्याह-
`सर्वम्' इत्यादि। `इदम्' इति। `तद्धितश्चासर्वविभक्तिः' (1.1.38)इत्यादिकम्।
किञ्चित् स्वरूपेणैव पठ्यते, कस्यचित् पर्यायान्तरेणार्थः। स त्वभिधेयधर्मेणोपचारा-दित्युच्यते। तत्र `कृम्भकारसन्ध्यरान्तः' इति `कृन्मेजन्तः' (1.1.39) इत्यस्यार्थःपठ्यते। क्त्वातोसुन्कसुनोऽव्ययीभावश्चेति स्वरूपेणैव। तसिलादिस्तद्धित एधाच्पर्य-
न्त इति यावत्। च्व्यर्थाश्चेति। असिमौणादिकं वर्जयित्वा। तद्धितश्चासर्वविभक्तिरि-
त्यस्यार्थः। `अनित्यत्वज्ञापनार्थम्' इति। प्रकृतत्वात् `संज्ञायाः' इति लभ्यते।
तेनाकजादौ कर्त्तव्ये संज्ञा न भवतीति। अज्ञाताद्यर्थविवक्षायामुपाग्निकमित्यत्रा-
कज् न भवति, क एव तु भवति। इह च उपकुम्भमात्मानं मन्यत उपकुम्भम्मन्यः,
`आत्ममाने खश्च' (3.2.83) इत खशि कृते `खित्यनव्ययस्य' (6.3.66)
इत्यनुवर्त्तमाने `अरुर्द्विषदजन्तस्य मुम्' (6.3.67) इति मुमः प्रतिषेधो न भवति। `इह च' इत्यादिना `अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः' इति यद्वक्ष्यति तस्यात्रावक्तव्यतां दर्शयति। सूर्यस्येत्यत्र `कर्तृकर्मणोः कृति' (2.3.65) इति षष्ठी।।

42. शि सर्वनामस्थानम्। (1.1.42)

`कुण्डानि' इत्यादि। `जश्शसोः शिः' (7.1.20) इति शिः, तस्य सर्वनामस्थान
त्वे सति `नंपुसकस्य' स्थानम्' इति। पूर्वाचार्यैरेवेयं प्रयोजनमन्तरेणापि महती
संज्ञा प्रणिता। तस्या इह यत् समाश्रयणम् तत् तत्कृतस्य शब्दानुशासनस्य दोषवत्त्वसूचनार्थम्। तत् पुनः स्वशास्त्रस्य पुनरुक्ततादोषपरिहारार्थम्। यदि हि तद्दोषवद्भवत्येवमस्य प्रणयनं युज्यते, नान्यथा।

43. सुजनपुंसकस्य। (1.1.43)

सुड़िति प्रत्याहाररग्रहणम्- सुशब्दादारभ्य आ औटष्टकारात्। तत्र पञ्चैव
वचनानयन्तर्भवन्तीत्याह -`सुडिति पञ्च वचनानि' इत्यादि। `नपुंसकादन्यत्र' इत्यादि। अनेनानपुंसकशब्दस्य पर्युदासतां दर्शयति। प्रसज्यप्रतिषेधे हि प्रतिषेधप्रधानमिदं
वाक्यं स्यात् - नपुंसकस्य न भवतीति। ततश्च यावती काचित् सुटः सर्वनामस्थानसंज्ञा-
प्राप्तिः, तस्याः सर्वस्याः प्रतिषेधः स्यात्। एवं हि `कुण्डानि तिष्ठन्ति'
इत्यत्र पूर्वेणापि संज्ञा न स्यात्। तस्यास्तु शसः शिरादेशोऽवकाशः। यद्यपि `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा (व्या.प.त19) इत्येतत्समाश्रयेण

प्रसज्यप्रतिषेधे
ऽप्येष दोष- शक्यते परिहर्तुम्, तथापि प्रतिपत्तिगौरवदोषः स्यात्। तथा हि- विधिप्रतिषेधयोर्विरोधादेकेन वाक्येन तावच्छक्यो न विधातुमिति वाक्यभेदः कर्त्तव्यः- `सुट् सर्वनामस्थानसंज्ञो भवति। नपुंसकस्य च न भवति' इति। ततश्चासम्बद्धं प्रतिषेधवचन-
मिति पूर्वस्या अपि प्राप्तेरयं प्रतिषेधः सम्भाव्येत। ततस्तत्परिहारेणाभीष्टार्थ
प्रतिपत्तौ साध्यायां नियतभावी गौरवदोषः प्रसज्येत। तस्मात् सुखावबोधार्थं -
पर्युदास एवाश्रितः। नपुंसके न विधिः' इति। स्त्रीपुंसम्बन्धिनः सुट उपादानात्। `न प्रतिषेधः' इति। विधिप्रधानत्वात् प्रयुदासस्य। एतेन नपुंसकेऽस्य योगस्याव्यापारं दर्शयति- `तेन' इत्यादि। यत एव नुपंसके नास्य विधौ प्रतिषेधे वा व्यापारः, तेन जसो यः शिरादेशस्तस्य तेन पूर्वयोगेन संज्ञा भवत्येव; अप्रतिषिद्धत्वात्। `राजा' इति।
पूर्वद्दीर्घः। हल्ङ्यादिलोपः। `सामनी,वमनी'इति। `नपुंसकाच्च' (7.1.19) इति औङः
शीभावः। तत्र संज्ञाया अभावाद्दीर्घत्वं न भवति।

44. न वेति विभाषा। (1.1.44)
नवेति शब्दोऽयमेको निपातोऽप्यस्ति प्रतिषेधवाची, यथा-`नवा वक्तव्यं
भुक्तार्थत्वात्' इत्यादौ भाष्यवाक्ये। तस्येह यदि ग्रहणं स्यात् `विभाषा दिक्समासे बहुव्रीहौ' (1.1.28) इत्युक्त्वा `न बहुव्रीहौ' (1.1.29) इत्यत्र तु पुनः प्रति-
षेधोपादानमनर्थकं स्यात्। तस्मान्न निपातसमुदायोऽयमिति दर्शयन्नाह- `नेति प्रतिषे-
धः' इत्यादि। ननु चान्यत्र संज्ञासंज्ञिसम्बन्धप्रक्रियाया हि शास्त्रे शब्दस्यैव
ग्रहणं प्रसिद्धम्, यथा तरप्तमपौ घः' (1.1.22) `दाधा घ्वदाप्' (1.1.20) इति,
तथेहापि नवाशब्दयोरेव ग्रहणं युक्तम्। तत् कथं तदर्थयोः संज्ञा लभ्यत इत्याह-`इतिकरणः' इत्यादि। क्रियत इति करणः, इतश्चासौ करणश्चेतीतिकरणः, सोऽर्थस्य संज्ञिनो
निर्देशो यथा स्यादित्येवमर्थः। इतिशब्दो हि विपर्यासकृत्। यथा गवित्यर्थमाहेति गोशब्दात् परतः प्रयुज्यमान इतशब्दस्तमर्थपदार्थकत्वात् प्रच्याव्य शब्दपदार्थकत्वे
व्यवस्थापयति, तथा `नवा' शब्दाभ्यां परः इति शब्दः प्रयुज्यमानः, तौ स्वरूपपदार्थक-
त्वात्प्रच्याव्यार्थपदार्थकत्वे व्यवस्थापयति। तस्मादर्थनिर्देशार्थ एवेतिशब्दः कृत इति नवेति यावर्थौ प्रतीयेते प्रतिषेधविकल्पौ, तयोरेवेयं संज्ञा भवति; न नवाशब्द-
योः। `तत्र प्रतिषेधेन' इत्यादिना प्रतिषेधविकल्पयोः प्रवृत्तिक्रमं व्यापारबेदं च दर्शयति। `समीकृते' इति। तुल्यतामापादिते। `विकल्पः प्रवर्त्तते' इति। पक्षे कार्यसम्पादनाय। ननु च वाशब्द एव विकल्पार्थत्वेन लोके प्रसिद्धः, प्रदेशेष्वयमुपादीयमानो विकल्पेन कार्यं सम्पादयिषयति। तथा हि प्राप्ते वा कार्ये विकल्पः क्रियताम् ? यदि प्राप्ते? तत्र प्राप्तिरस्त्येवेति प्रतिषेध एव पक्षे कर्त्तव्यः। अथाप्राप्ते ? तत्र प्राप्तिपूर्वकत्वात् प्रतिषेधस्य तामन्तरेण स न युज्यत इति विधिरेव पक्षे
कर्त्तव्यः, न प्रतिषेधः। एतच्चोभयं वाशब्द एव शक्तः प्रयुज्यमानः सम्पादयितुम्।
तत् किमर्थमियं संज्ञा क्रियत इत्याह- `उभयत्र विभाषाः प्रयोजन्ति' इति। प्रकृतत्वात् संज्ञामिति गम्यते। `विभाषा श्वेः' (6.1.30) इत्यत्र प्रतिषेधमुखेन वाशब्दस्य
प्रवृत्तिः स्यात्? विधिमुखेन वा ? तत्र यदि प्रतिषेधमुखेन वा न भवतीत्येवं
प्रवृत्तिः ? प्राप्तिपूर्वकत्वात् प्रतिषेधस्य यत्र स एव तस्य विषय इति कित्स्वेव विकल्पेन प्रतिषेधायेदं प्रवर्त्तते। तत्र `वचिस्वपि' (6.1.15) इत्यादिना श्वयतेः सम्प्रसारणस्य विहितत्वात्, न पित्सु; तत्र तस्य न केनचिद्विहितत्वात्. एकत्वच्चा-
स्य वाक्यस्य कित्सु च प्रतिषेधसम्पादन एव चरितार्थत्वात् नोपपद्यते पुनर्विधिमुखेन प्रवृत्तिः। अथ विधिमुखेन वा भवतीत्येवं प्रवृत्तिः स्यात् ? यत्र प्राप्तिर्ना-
स्ति स एव विधिविषय इति पित्स्वेव विकल्पेन विध्यर्थः प्रवर्त्तते;तत्र चरितार्थ-
त्वात् न कित्सु। संज्ञाविधाने तु न दोषः; तस्यां हि सत्यां प्रतिषेधः प्रवर्त्त-
मानो योऽसौ सम्प्रसारणनिमित्तानिमित्तभेदाद्विषय आसीत् तं समीकरोति। सर्वस्याः
सम्प्रसारणनिमित्ततया तुल्यतामापादयति।तस्मिन् समीकृते किति च पिति च विकल्पः प्रव-
र्त्तमानो विधिमुकेन सर्वत्र पाक्षिकं कार्यं सम्पादयति, सम्प्रसारणं पक्षे भवतीति। अप्राप्तिस्तु पक्षे स्थितैवेति सर्वमिष्टं सिध्यति। तस्मादुभयत्र प्राप्तावप्रा-
प्तौ विभाषार्थमियं संज्ञा विधीयते। शुशावेति। `टुओश्विगतिवृद्ध्योः' (धा.पा.1010), लिट्, णल्, संप्रसारणे कृते वृद्ध्यावादेशौ। `शुशुवतुः,शिश्वियतुः' इति।

`अचि श्नुधातु' (6.4.77) इत्यादिना इयङुवङौ।।

45.इग्यणः सम्प्रसारणम्। (1.1.45)
`भूतः'इति। यत्र शास्त्रान्तरेण विहितो भूतविभक्त्या कार्यान्तरार्थमनूद्य-ते, यथा- `सम्प्रसारणस्य' (6.1.139) `सप्रसारणाच्च' (6.1.108)इति, तत्र भूतः। `भावी वा' इति। यत्र भाव्यमानविभक्त्या विधानार्थं निर्दिश्यते, यथा `ष्यङः
सम्प्रसारणम्' (6.1.13) `वसोः सम्प्रसारणम्' (6.4.131) इति, तत्र भावी। अत्र हि
ष्यङः स्थानिको वसुस्थानिकश्चेङः नास्ति यस्य संज्ञा सूत्रस्य शाटकं वय' इति। स इग् यणः स्थाने भवति, यस्य भूतस्य सम्प्रसारणमित्येषा संज्ञा भवतीति। `इष्टम्, उप्तम्' इति। `वचिस्वपियजादीनां किति' (6.1.15) इत सम्प्रसारणम्। `गृहीतम्'इत्यत्रापि
`ग्रहिज्यावयि'(6.1.16) इत्यादिना सम्प्रसारणम्। `ग्रहोऽलिटि दीर्घः' (7.2.37) ।
`केचित्' इत्यादिना ये भाविनीं संज्ञां नाश्रयन्ति तन्मतं दर्शयति। कथं पुनरेकस्य
सूत्रस्यैतदर्थद्वयमेकेन वाक्येन लभ्यते? तन्त्रेण, आवृत्त्या वा। ननु च संज्ञाविधौशब्दस्यैव ग्रहणं प्रसिध्दमित्युक्तम्, ततो युक्तं वर्णस्यैव संज्ञित्वम्, अर्थस्यततु कथम् ? यथा `नवेति विभाषा' (1. .44) इति सूत्र इति चेत्? न युक्तम्; तत्रेतिकरण-
स्यार्थनिर्देशार्थस्य प्रयोगात्, इह तु स नास्तीत्ययुक्तम् । इहापि तन्त्रस्यावृ-
त्तेर्वा न्यायस्याश्रितत्वाद् युक्तमेव । अस्य च सूत्रार्थद्वयस्य विभक्तिविशेषनि-र्देशो लिङ्गम् । यदयं `ष्यङः सम्प्रसारणम्' (6 1.13) इत्यादौ विधिवाक्ये भाष्यमानविभकूत्या निर्देशं करोति ततो ज्ञायते-`वाक्यार्थः संज्ञी' इति । यतश्च
`सम्प्रसारणस्य' (6.3.139) इत्यादौ भूतविभकूत्या निर्देशं करोति ततोऽवसीयते-
`वर्ण' इति । तस्माद् युक्तं वाक्यार्थस्यापि संज्ञित्वम्। किरूपोऽसौ वाक्यार्थः ? इत्याह-`स्थान्यदेशः' इत्यादि । तत्रेत्यादिना अनन्तरयोः
सूत्रार्थयोर्विषयविभागं
दर्शयति--विधौ वर्णो न सम्भवतीति । `ष्यङः सम्प्रसारणम्' (6 1.13) इत्यादौ
विधिवाक्ये प्रथमः सूत्रार्थ उपतिष्ठते । अनवादे तु `सम्प्रसारणस्य'(6.3.139)
इत्यादौ विहितत्वाद्विधेयस्य प्रथमोऽकिञ्चित्कर इति द्वितीयः । `अदुहितराम्' इति ।
अत्र यणः स्थानिकत्वादिकः सम्प्रसारणसंज्ञया भाष्यम् । तस्यां च सत्यां `हलः'
(6.4.2) इति दीर्घत्वं प्रसज्येतीति चोद्यमपाकर्त्तुमाह-`संख्ययातानुदेशात्'इत्यादिइह स्थानिनो यणश्चत्वारः इकोऽप्यादेशाश्चत्वार एव, तेन संख्यातानुदेशेन भवितव्यम्
`यथासंख्यमनुदेशः' (1.3.10) इत्यादिना । ततश्च यकारस्य स्थाने य इवर्णस्तस्यैव
सम्प्रसारमसंज्ञा भवति । न चेह यकारस्य स्थान इवर्णः । किं तर्हि ? लकारस्य ।
तत् कुतस्तस्याः प्रसङ्गः ? `द्रुह प्रपूरणे' (धा. पा. 1014), लङ, `कर्मवत् कर्मणा
तुल्यक्रियः' (3.1.87) इत्यतिदेशे कर्मकर्तयस्मिनेपदम्, इट् । `न दुहस्नुनमां यक्चिणौ' (3.1.89) इति यकि प्रतिषिद्धे शप् । तस्यादादित्वाल्लुक् । अदुहि इति स्थिते
`तिङश्च' (5.3.56) इति तरप् । `किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे'(5 4.11)
इत्याम् । तरप इहोपन्यासोऽङ्गसंज्ञार्थः ।

46. आद्यतन्तौ टकितौ। (1.1.46)
`षष्ठी स्थानेयोगा' (1.1.49) इत्यस्याः परिभाषाया अयमपवादः। तेन
तत्सम्बन्धादस्यापि परिभाषात्वं विज्ञायते। यदि तर्ह्यादिष्टिद् भवत्यन्तः किद्भवति, तदा `चरेष्टः' (3.2.16) `आतोऽनुपसर्गे कः' (3.2.3) इत्यादयोऽपि प्रत्यया
आद्यन्तभूताः स्युओः। न च टितः प्रत्ययस्यादित्वे `टिड्ढाणञ्' (4.1.15) इति टितो
विधीयमानो ङीब् निरवकाश इत्याशङ्कनीयम्। यत्र हि प्रकृतेरेव सिद्धं टित्त्वं न
प्रत्ययस्य, नदड् भष़डित्येवमादौ, स तस्यावकाशो भविष्यतीति। टितश्च प्रत्ययस्या-
दित्वे सति कुरुचर इत्येवमादिरूपमेव सिध्येत्। कितस्त्वन्त्यत्वे आध्योः, विध्योरि-
त्यत्र `उपसर्गे घोः किः' (3.3.92) इति किप्रत्ययस्य प्रकृत्यन्तः-पातित्वाद्धातु-
ग्रहणेन ग्रहणे सति `उदात्तयणो हल्पूर्वात्' (6.1.174) इत्येष स्वरो न स्यात्। `नोङ धात्वोः' (6.1.175) इति प्रतिषेधादित्यत आह- `षष्ठीग्रहणस्य सिंहावलोकितन्यायेनोप-स्थानात्। नन्वेवमपि `गापोष्टक्' (3.2.8) `व्रीहिशाल्योर्ढक्' (5.2.2) इत्येतावाद्य न्तौ प्राप्नुतः, नैष दोषः, `पुरस्तादपवादा

अनन्तरात् विधीन् बाधन्ते नोत्तरान्' (व्या.प.9) इति स्थानेयोगत्वस्यैवायमपवादो भविष्यति, न प्रत्ययपरत्वस्य। अपर आह-
आद्यन्तावयवौ, अवयवश्चावयविनमन्तरेण न सम्भवतीत्यवयविनमाक्षिप्य तौ वर्त्तेते।
ततश्चावयवावयविसम्बन्धे यलस्यादिरन्तो वावयवो विधीयते, सोऽवयवो षष्ठ्या निर्देष्ट-
व्य इति सामर्थ्यादवयवषष्ठ्या निर्दिष्टस्येति ज्ञायते। न चैवम्। `गापोष्टक्' (3.2.8) `व्रीहिशाल्योर्ढक्' (5.2.2) इत्येतौ प्रत्ययावाद्यन्तौ प्राप्नुतः, यस्मादिह
प्रकृतयोऽवयवषष्ठ्या निर्दिष्टाः, किं तर्हि ? सुपां सुपो भवन्तीति पञ्चम्यर्थे या षष्ठी तयेति। `भीषयते' इति। `ञिभी भये'(धा.पा.1084) हेतुमण्णिच्, `भियो
हेतुभये षुक्' (7.3.40) `भीस्म्योर्हेतुभये' (1.3.68) इत्यात्मनेपदम्।

47. मिदचोऽन्त्यात्परः। (1.1.47)
अत्र यदि `अचः' (4.3.31) इत्येषा पञ्चमी स्यात्, अन्त्यादित्यनया
पञ्चम्या समानाधिकरणत्वं स्यात्। ततः `नपुंसकस्य झलचः' (7.1.52) इति नुमीहैवा-
न्त्यादचः परः स्यात्- `कुण्डानि' इति; अस्ति ह्यत्र नपुंसकस्यान्त्योऽचः; पयांसी-
त्यत्र तु न स्यात्, `अलोऽन्त्यस्य ' (1.1.52) इति सकारस्यैव तु स्थाने स्यात्।
ह्यत्राजन्त्यः, किं तर्हि? सकारः। तस्मान्निर्धारणे षष्ठीयमिति दर्शयन्नाह-`अचाम्'इत्यादि। जातौ बहुवचम्। सूत्रेऽप्यच इत्येकवचनं जातावेव। यदि तर्हि
निर्धारणषष्ठीयम्, अन्त्यस्याविशेषितत्वादविशेषेण यतः कुतश्चिदन्त्यात् परो मित् स्यात्; न हि
द्वीतीयमज्ग्रहणमस्ति, येनान्त्यो दिशेष्यते, नैष दोषः; समानजातीयस्यैव हि लोके
निर्धारणप्रतीतिर्भवति। तथा हि `कृष्णा गवां सम्पन्नश्रीरतमा' इत्युक्ते गौरेव
प्रतीयते; नाजा, नाप्यश्वा। तसस्मादिहाप्यचां मध्येऽन्त्यादचोऽवधेरित्यन्त्यत्वेन निर्धार्यमाणः समानजातीयोऽजेव। प्रतीयते। तेनाच एवान्त्यात् परो भविष्यति।
स्थानेयोगित्वप्रत्ययपरत्वापवादार्थञ्चेदमारब्धम्। तत्र स्थानेयोगित्वापवादार्थम्-`शेमुचादीनाम्' (7.1.59) नुम् भवति, मुञ्चति। `नपुंकस् झलचः' (7..72)पयांसि।
प्रत्ययपरत्वापवादार्थम्- `रुधादिभ्यः श्नम्' (3.1.78),रुणद्धि। ननु च `पुरस्ताद-पवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् (व्या.प.9) इति
स्थानेयोगित्वस्यैवापवादो युज्यते, न तु प्रत्ययपरत्वस्य, नैतदस्ति; एवं हि श्नमो मित्करणमनवकाशत्वादनर्थकं
स्यात्। श्रवणार्थत्वान्नानर्थकमिति चेत् ? नः; `तृणह इम्'(7.3.92) इति निर्देशात्। श्रवणार्थे ह्येतस्मिन् `तृणम् ह इम्' इति निर्देशः स्यात्। तस्मात् प्रत्ययपरत्व-
स्यापवादो युक्तः। यद्येवं `तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' (व्या.प.21) इति
प्रकृत्यन्तः पातिनस्तद्ग्रहणेन ग्रहणादपरत्वाच्च श्नमः प्रत्ययसंज्ञा न स्यात्,
तथा च `लशक्वतद्धिते' (1.3.8) इति प्रत्ययादेः शकारस्य विधीयमानेत्संज्ञा न स्यात्, नैष दोषः; प्रत्ययाधिकारे विधीयमानत्वात् प्रत्ययसंज्ञा भविष्यति-
सत्यप्यपरत्वे, सत्यपि प्रकृत्यन्तः पातित्वे; यथा-बहुजकचोरन्तोदात्तत्वम्। `बहुपटवः, उच्चकैः'
इत्यनयोरसति परत्वे सत्यं प्रत्ययसंज्ञायां `चितः' (6.1.163) इत्यन्तोदात्तत्वं
भवत्येव। `मस्जेः' इत्यादि। नकारस्योपधाया `अनुषङ्गः' इति पूर्वाचार्येः संज्ञा
कृता। `टुमस्जो शुद्धौ' (धा.पा.1416) इत्यस्य `मस्जिनशोर्झलि' (7.1.60)इति नुमं
वक्ष्यति। स च यद्यचोऽन्त्यात् परः स्यात् `स्कोः संयोगाद्योः' (8.2.29) इति सकार-
स्य `अनिदिताम्' (6.4.24) इति नकारस्य च लोपो न स्यात्; यथाक्रममनादित्वादनु-
धत्वाच्च। तस्मादन्त्याज्जकारात् पूर्वो जकारसकारयोर्मध्ये नुम् कर्त्तव्यः। यथा चान्त्यात् पूर्वो लभ्यते,तथा सप्तमे वक्ष्यते। `मग्नः' इति। `ओदितश्च' (8.2.45)इति
निष्ठानत्वम्, तस्यासिद्धत्वत् `चोः कुः' (8.2.30) इति कुत्वं जकारस्य गकारः।
`मङ्क्ता' इति अत्र पूर्ववद् गकारे कृते तस्य `खरि च' (8.4.55) इति चर्त्वं ककारः। `नश्चापदान्तस्य झलि' (8.3.24) इत्यनुस्वारः। `अनुस्वारस्य ययि परसवर्णः' (8.4.58) ङकारः। पूर्वभक्तश्चायं मिद् वेदितव्यः; अन्यथा `वहाभ्रे लिहः' (3.2.32) इति लिहः
खशि कृते `अरुर्द्विषदजन्तस्य' (6.3.67) इति मुमि कृते वहंलिह् इत्यत्र `मोऽनुस्वारः' (8.3.23) इति पदान्तस्य विधीयमानोऽनुस्वारो न स्यात्, अपदान्तत्वात्।

48.एच इग्घ्रस्वादेशे। (1.1.48)

परिभाषेयमादेशनियमार्था `ह्रस्वो नपुंसके प्रातिपदिकस्य'(1.2.47) इत्यादावु-पतिष्ठते। इहेम् एचोऽवयवसमाहारवर्णाः। तत्र `ए ऐ' इत्येतयोः पूर्वो भागो वर्णसमा-
नाकृतिर्मात्रात्मैव तालव्यः। अत एव `ए ऐ कण्ठ्यतालव्यौ' (आ.शि. 17) इति
शिक्षाकाराः पठन्ति; तदवयवोः कण्ठ्यतालव्यत्वात्। `ओऔ' इत्येतयोः पूर्वो भागस्तादृश एव, यादृश एकारैकारयोः। उत्तरस्तूवर्णसमानाकृतिर्मात्रिक ओष्ठ्यः। अत एव `ओ औ
कण्ठ्योष्ठ्यौ' (आ.शि।18) इति शिक्षाकाराः पठन्ति; तदवयवोः कण्ठ्योष्ठ्यत्वात्।
तत्र समुदायात्मनामेचां समुदायान्तरतमो ह्रस्वो नास्तीति तदवयवस्य योऽन्तरतमः, तनैव युक्तं भवितुम्। स पुनरकारा इकार उकारो वा। तत्र एकारैकारयोर्ह्रस्वो विधीयमानः
कदाचिदकारः स्यात्,कदाचिदिकारः। ओकारौकारयोरपि कदाचिकारः स्यात्, कदाचिदुकारः।
इकारोकारावेव यथायोगं यथा स्याताम्, कदाचिदप्यकारो मा भूदित्येवमर्थमिदमारभ्यते।
अत्र यद्यप्येचामिकां साम्यम्, तथापि संख्यातानुदेशो न भवति, यस्मादत्रेदं विधायकम्, किं तर्हि? नियामकम्। प्राप्तिपूर्वकश्च नियम इति ये प्राप्ता अन्तरतमा इक
एचो ह्रस्वास्तेषामनेन नियमः क्रियते। न च प्राप्तावृकारलृकाराविति कुतो यथासंख्य-
त्वम्? यद्येवम्, इण्णित्येव वक्तव्यम्, न त्वगिति, सत्यमेतत्; किन्त्वेवमुच्यमाने सन्देहः स्यात्- किं पूर्वेण णकारेण प्रत्याहारः ? उत परेण ? इति;
तस्मादसन्देहार्थमिगित्युक्तम्। `अतिरि, अतिनु' इति। रायमतिक्रान्तं, नावमतिक्रान्तं ब्राह्मणकुलम्
`अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (वा.91) इति `कुगति' (2.2.18) इत्या-
दिना समासः, `परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (2.4.26) इति पुंल्लिङ्गे
स्त्रीलिङ्गे च प्राप्ते `द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु तल्लिङ्गमेव भवति। `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति ह्रस्वः. इक् कण्ठतालव्यस्यैकारस्य
तालव्य इकारो भवति। कण्ठ्योष्ठ्यस्यौकारस्यौष्ठ्य उकारः। `उपगु' इति। गोः समीपमिति। `अव्ययं विभक्ति' (2.1.6) इत्यादिना सामीप्येऽव्ययीभावः।
`गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति ह्रस्वः। कण्ठ्योष्ठ्योकार्सयौष्ठ्य उकारः। एकारस्य तूदाहरणम्- हे
इतीमं शब्दमतिक्रान्तं ब्राह्मणकुलमतिहि। `अततिखट्वः' इति। पूर्ववत् प्रादिसमासे कृते `गोस्त्रिरुपसर्जनस्क' (1.2.48) इत्येवमादिना ह्रस्वोऽकार एव भवत्यन्तरतमः।
`दे3वदत्त' इति। अत्रामन्त्रित्सयादेरुदात्तादेशे कर्त्तव्ये `देवद3त्त' इत्यत्र च `गुरोरनृतोऽन्त्यस्य' (8.2.86) इत्यादिना प्लुतादेशे कर्त्तव्य इङ न भवति।।

49. षष्ठी स्थानेयोगा।। (1.1.49)

`योगनियमार्था' इति। योगनियमः सम्बन्धनियमः, सोऽर्थः प्रयोजनं यस्याः सा
तथोक्ता। यदि योगनियमार्थयम्- शास्त्रे या षष्ठी, सा स्थानेयोगैव् भवति, नान्ययोगे-
ति। एवं सति `ऊदुपधाया गोहः' (6.4.89) इत्येषापि षष्ठी स्थानेयोगैव स्यात्, नावयवादयविसम्बन्धयोगा। ततश्च `अलोऽन्त्यस्य' (1.1.52) इति
स्थानषष्ठ्या अन्त्येऽप्युपसंहाराद् गोहश्चान्तस्य हकारस्य ऊकारः स्यात् । `उपधायाश्च' (7.1.101) इति वचनादुपधा-मात्रस्य चेत्यत आह-`इह शास्त्रे या षष्ठ्यनियतयोगा' इत्यादि। अनियमप्रसङ्गे
नियमोऽनया क्रियते। क्व चानियमप्रसङ्गः ? यत्र सन्देहः; यथा-`अस्तेर्भूः' (2.4.52)इति। अत्र हि किमस्तेः स्थाने? आहोस्विदनन्तरे ? इति सन्देहः, पूर्वत्र तूपधाया अवयवलक्षणस्य स्थानिनो विशिष्टावयविनो व्यवच्छिन्नत्वादवयवष्ठ्येवेयमिति निश्चितम्;
ततो नात्रास्या व्यापारः। `स्थानेयोगैव' इति। स्थान इति निमित्तसप्तमी, योगः
सम्बन्धः। तेनेदमुक्तं भवति-स्थाननिमित्तकसम्बन्धैवेति। एतदेव विस्पष्टीकुर्वन्नाह-`स्थाने योगस्य निमित्ते' इत्यादि। स्थानेयोगस् निमित्तभूते निमित्तत्वं प्राप्ते सति सा वेदितव्या। भूतशब्दो ह्यत्र प्राप्तशब्दे वर्तते; यथा- `देवभूतः' इत्यत्र
देवत्वं प्राप्त इत्यर्थः। निमित्तग्रहणं कुर्वन् सूत्रे स्थानेयोगेति निमित्तसप्त-
मीयमिति दर्शयति। योगः पुनरिह स्थान्यादेशभावलक्षणः। कुत एतत्? तस्यैव स्थानि-
हेतुत्वात्। स्थानशब्दोभावसाधनः, स्थितिः स्थानम्। तत् पुनस्त्रिधा- `अपकर्षः,
निवृत्तिः,प्रसङ्गश्च' इति। गोस्थानेऽश्वो बध्यतामित्यपकर्षः स्थानशब्दस्यास्थेयः। `श्लेष्मणः स्थाने कटुकमौषधम्' इत्यत्र निवृत्तिः। `दर्भाणां स्थाने शरैरास्तकरित-
व्यम्' इति प्रसङ्गः। तत्राद्यावर्थाविह न सम्भवतः; नित्यत्वाच्छब्दार्थसम्बन्धस्य प्रथमो न सम्भवति; सामान्येनास्तेरुपदेशान्न द्वितीयः। तस्मात् तृतीय एवार्थ

इति
मत्वाह-`स्तानशब्दश्च' इति। प्रसङ्गस्त्वर्थक्रियानिमित्तभूतस्य कालस्यावसरः। `
अस्तेस्थाने प्रसङ्गे' इति। अस्तेर्या क्रिया स्वार्थप्रतिपादनलक्षणा, तस्या
निमित्तभूतस्य कालस्यावसरः प्राप्त इत्यर्थः। प्रसङ्गे सम्बन्धस्य निमित्तभूत इत्यादिना सूत्रार्थस्योदाहरणे सम्भवं दर्शयति। `ब्रुवः' इति चोपलक्षणमात्रम्। अस्तेरि-
त्यादेरपि हि षष्ठी प्रसङ्ग एव सम्बन्धस्य निमित्तभाव उत्पन्ना।
के पुनर्बहवः षष्ठ्यर्थाः, यतः सम्बन्धान्तरविषयव्यवच्छेदनार्थं षष्ठ्या इदमुच्यते? इत्याह-`बहवो हि' इत्यादि। शब्दे हि समीपानन्तरविकारावयवादिनिमित्ताः सम्बन्धाः सन्ति। न त्वपत्यापत्यवत्प्रभृतय इत्यतो `यावन्तः शब्दे सम्भवन्ति' इत्याह। अथ स्थानेयोग इत किमसमासः? अथ समासः? यद्यसमासः? तदा योगशब्दस्य
पुंल्लिङ्गत्वात् स्त्रीलिङ्गेन निर्देशः, षष्ठीशब्देन च सामानाधिकरण्यं न प्राप्नोति; योगस्याषष्ठीत्वात्। अतः समासः किं तत्पुरुषः ? आहोस्विद् बहुव्रीहिः ? यदि
तत्पुरुषः ? तौ च पूर्वोक्तौ दोषौ स्याताम्, सप्तम्या लुकप्रसङ्गश्च। अथ बहुव्रीहिः? एवमपि लुक्प्रसङ्गोऽत्रानिवार्य एवेत्यत आह-`षष्ठी स्थानेयोगा' इत्यादि।
गतार्थम्।

50.स्थानेऽन्तरतमः। (1.1.50)

परिभाषेयमादेशनियमार्था।`स्थाने प्राप्यमाणानाम्' इति। एतेन नेदं विधायकं
वाक्यम्, किं तर्हि? लक्षणान्तरेण प्राप्तानामनन्तरतमानामितरेषां च योऽन्तरतमः, स एव भवतीति नियमार्थमिति दर्शयति। विधायकत्वे हि `दधि मधु' इतादावपि प्रसज्यते।
किं पुनरत्रानिष्टम् ? यावतान्तरतम्याद् दधिमधुशब्दयोस्तावेवादेशौ भविष्यतः, तयोरप्यादेशयोरन्यौ दधिमधुशब्दौ यावादेशौ स्याताम्,
तयोरप्यन्यावित्येवमपरिसमाप्तादेशपर-
म्पराविधानादनवस्था स्यात्। ततश्चार्थप्रत्यायनं प्रति शब्दानां विनियोगो न स्यात्,अन्वाख्यायकस्य शास्त्रस्य प्रवृत्त्यनुपरमात्। शास्त्रोपरतौ ह्यन्वाख्यातास्ते प्रयुज्यते, नान्यथेत्यनिष्टम्। ननु च सकृत्प्रवृत्तौ लक्षणस्य चरितार्तत्वात् पुनः
प्रवृत्तिर्न भविष्यति, नैतदस्तिच यत्र हि प्रयोजनार्था प्रवृत्तिस्तत्रैतदुक्तम्, इह पुनरकस्मादन्तरतमो विधीयत इत्यनुपरतैवास्य प्रवृत्तिः। नियमाकत्वेऽप्यस्य यदीदं विहितानां नियमं कुर्यात् ! अनर्थकमेव वचनं स्यात्। यो हि भुक्तवन्तं ब्रुयात्-
`मा भुङ्क्ष्य' इति,किं तस्य तेन कृतं स्यात् ! तस्मात् प्राप्यमाणावस्थायामेव
वाक्यान्तरः सह संहत्यानन कार्यं निर्वर्त्यते; तदेकदेशभूत्वादस्य। `सदृशतमः' इति। अन्तरतमशब्दस्यार्थ कथयति।
`अर्थतः' इत्यादि। वतण्डशब्दात् स्त्रियामपत्यार्थे `वतण्डाच्च' (4.1.108) इति यञ्,तस्य `लुक् स्त्रियाम्'(6.4.14) इत्यकारलोपः, वतण्डी चासौ युवतिश्चेति
`पोटायुवति' (2.1.65) इत्यादिना समासः। तत्रानेन `पुंवत कर्मधारयः' (6.3.42)
इत्यादिना पुंवद्भावे कर्तव्ये सर्वः पुंशब्दः प्रसक्तः। तत्रानेन वतण्डापत्यार्थ-
स्य वतण्डी शब्दस्यार्थतोऽन्तरतमो वतण्डापत्यार्थ एव वातण्ड्यशब्दो भवति।
`पाकः' इत्यादौ भावे घञ्। `चकारस्य' इत्यादि। `वर्गाणां प्रथमा अल्पप्राणाः' (आपि.शि. 4.3.) इति चकारककारावल्पप्राणौ। `वर्गाणां प्रथमद्वितीयाः शषसविसर्जनीय-
जिह्वामूलीयोपध्मानीया यमौ च प्रथमद्वितीयौ विवृतकण्ठाः श्वासानुप्रदाना अघोषाः' (आपि.शि।4.2.) इत्यघोषौ। `जकारस्य' इत्यादि। `वर्गाणां तृतीयचतुर्थां अन्तःस्था
हकारानुस्वारौ यमौ च द्वितीयचतुर्थौ नासिक्याश्च संवृकण्ठा नादानुप्रदाना घोषवन्तः'महाप्राणाः' इत्यल्पप्राणौ। `अमुष्मै, अमूभ्याम्' इति।
अदसश्चतुर्थ्येकवचने भ्यामि च परतस्त्यदाद्यत्वम्,`अतो गुणे' (6.1.97) पररूपत्वम्, `सर्वनाम्नः स्मैः' (7.1.4) इति स्मैभावः। भ्यामि `सुपि च' (7.3.102) इति दीर्घः, ततो ह्रस्वस्य ह्रस्व उकारो
भवति, दीर्घस्य दीर्घः।
`स्थाने इति वर्त्तमाने' इति। प्रकृतो हि स्थानशब्दः प्रसङ्गवाची। तदनुवृ-
त्तौ स्थाने प्राप्यमाणानामन्तरतमो भवति' इत्येषोऽर्थो लभ्यते। ननु च यत्रानेकमा-
न्तर्यं तत्र ताल्वादिस्थानत एवान्तर्यस्य बलीयस्त्वम्, तस्मात् तद् यथा स्यादिति

पुनस्ताल्वादिस्थानवाचिनः स्थानशब्दस्योपादानं क्रियते। यद्येवम्,स्थानकृतमेवेहान्तर्यं विशिष्टमुपात्तमिति प्रमाणादिकृतं परित्यक्तं स्यात् ? नैष दोषः, वाक्यभेदं हि कृत्वा तत्र सम्बन्धः क्रियते, स्थाने प्राप्यमाणानामन्तरतम आदेशो भवति। `स्थाने च भवति' इति पूर्वत्र वाक्ये प्रसङ्गवाची स्थाशब्दः, उत्तरत्र ताल्वादिस्थानवाची।
एवं वाक्यभेदेन सम्बन्धे सति, पूर्वस्मिन् वाक्ये स्थानादिकृतानामान्तर्याणां -
परिग्रहः प्रतीयते। द्वितीये तु तेषामेव बलाबलवत्त्वम्। `स्थाने' इति च निमित्तसप्तमी। तेनेदमुक्तं भवति- यत्रानेकमान्तर्यं तत्र स्थानेन निमित्तेन योऽन्तरतमः, स एव भवति। वाक्यभेदस्य च तमब्ग्रहणं लिङ्गम्। सादृश्ये प्रकर्षो हि तेन प्रतिपादयितुमिष्टः। स चानेकस्मिन् सादृश्ये सति सादृश्यान्तरापेक्षया भवति। एकवाक्यतायां च स्थानग्रहणेन सादृश्यान्तरे निरस्ते किमपेक्षया सादृश्यप्रकर्षः स्यात् ! तस्मात् तम-
ब्ग्रहणाद् वाक्यभेदोऽनुमीयते, अन्यथा हि तस्य वैयर्थ्यं स्यात्।
`चेता' इति। अत्रेकारस्य तालव्यत्वादेकारस्य कष्ठतालव्यत्वात् स्थानत
आन्तर्यम्; इकाराकारयोस्तु प्रमाणयोरपि मात्रिकत्वात्। `स्तोता' इति। अत्राप्युकार-स्यौष्ठ्यत्वादोकारस्य कण्ठ्यौष्ठ्यत्वात् स्थानत आन्तर्यम्। उकाराकायोस्तु
प्रमाणतः पूर्ववत्। तत्रासति पुनः स्थानग्रहणे, प्रमाणत आन्तर्यात् कदाचिदकारो गुणः स्यात्, स्थानत आन्तर्यात् कदाचिदेकारौ। पुनः स्थानग्रहणात् तु स्थानकृतस्यान्तर्यस्य बलीयस्त्वादेकारौकारौ एव भवतः, न कदाचिदकारः। `सोष्मणः, सोष्माण इति '
इत्यादि। इतिकरणो हेतौ; यस्मात् सोष्माणो द्वितीयस्तस्मात् सोष्मणो हकारस्य
द्वितीयाः प्रसक्ता इत्यर्थः। एवं `नादवतो नादवन्तः' इत्यादौ वाक्ये हेत्वर्थो
योज्यः। `शादय ऊष्माणः सस्थानेन द्वितीया हकारेण चतुर्थाः' इति शिक्षा (आ.शि.1.4.
8.10) । अत्र `शादय ऊष्माणः' वचनेन हकारस्य सोष्मत्वं प्रतिपादितम्। `सस्थानेन
द्वितीयाः' इत्यनेन तु वर्गद्वितीयानां खकारादीनाम्। `हकारेण चतुर्थाः' इत्यनेनापि वर्गचतुर्थानां धकारादीनाम्। समानं स्थानं यस्य स सस्थानः। `सस्थानेन' इति। इत्थ-
म्भूतलक्षणे तृतीया। सस्थानेन द्वितीया ऊष्मतया लक्ष्यन्ते। एतदुक्तं भवति- `यथा
सस्थान एवेषामूष्मा, एवमेतेऽपि वर्गाणां द्वितीया ऊष्माणः' इति। अथ वा - तुल्यार्थयोग एषा तृतीया, तुल्यशब्दस्त्वध्याहार्यः, तुल्यत्वमूष्मतया वेदितव्यम्। तत्र खकारस्य सस्थानो हकारः, छकारस्य शकारः, ठकारस्य षकारः, थकारस्य सकारः। फकारस्य
सस्थान ऊष्मा नास्ति। तस्मात् तस्यापि विशेषेणोष्मत्वं लक्ष्यन्ते, तत्सदृशत्वात्। तेन यथा हकार ऊष्मा एवं तेऽपीत्यर्थः। `नादवतः' इत्यादि। `वर्गाणां तृतीयचतुर्थाः' इत्यादिना पूर्वोक्तेन ग्रन्थेन तृतीयानां हकारस्य नादवत्त्वमुक्तम्। ये सोष्माणो `नादवन्तश्च' इति। सोष्मत्वं हकारस्य `शादय ऊष्माणः' (आ.शि.1.4.8) इत्यनेनाख्यातम्,चतुर्थानां तु `हकारेण चतुर्थाः' (आ.शि. 1.4.1) इत्यनेन नादवत्त्वम्, उभयेषां वर्गाणां तृतीयचतुर्था इत्यादिनैव पूर्वोक्तेन।

51. उरण् रपरः। (1.1.51)
अत्र त्रयः पक्षाः सम्भवन्ति- `उः स्थानेऽण् रपरत्वं चानेनोभयं विधीयते'
इत्येकः पक्षः। `लक्षणान्तरेण विहितस्याण उः स्थाने पश्चादनेन रपरत्वमात्रं क्रियते' इति द्वितीयः पक्षः। `उः स्थाने लक्षणान्तरेण विधीयमानोऽण विधानकाल एव तेन
लक्षणान्तरेण सह संहत्य रपरत्वविशिष्टोऽनेन भाव्यते' इति तृतीयः। तत्र यद्याद्यः
पक्ष आश्रीयते, ऋकारस्य स्थान उदात्तादयो न स्युः, अनेन बाधित्वात्; `कृति' इत्यत्र `ञ्नित्यादिनित्यम्' (6.1.197) इत्याद्युदात्तो न स्यात्, `प्रकृतम्' इत्यत्र
पूर्वपद्सयाद्युदात्तस्य `गतिरनन्तरः' (6.2.49)इति प्रकृतिस्वरे कृते `अनुदात्तं पदमेकवर्जम्' (6.1.198) इत्यनुदात्तो न स्यात्, `उदात्तानुदात्तस्य स्वरितः' (8.4.66)इति स्वरितश्च। यद्यचः स्थाने उदात्तादयो विधीयन्ते, तथापि तेषामन्योऽजवकाश इति
ऋवर्णस्थाने प्रतिपदोक्तोऽणेव रपरः स्यात्। ये चाप्यन्य ऋवर्णस्थाने प्रतिपदमादेशा उच्यन्ते, `ऋत इद्धातोः' (7.1.100) इत्येवमादिभिर्लक्षणान्तरैस्तेषु रपरत्वं न
स्यात्; ततश्च `किरति' इत्यादि न सिध्येत्।
अथ द्वितीयः पक्ष आश्रीयते, तरतेस्तृजादौ गुणो विधीयमानः प्रमाणत
आन्तरतम्याद् दीर्घस्य दीर्घ एव स्यात्, तथा च `तरिता' इत्यादि न सिध्येत्। किं च-
ण्वुलादौ वृद्धौ विधीयमानामृकारस्य केनचिद् वृद्धिसंज्ञकेनान्तरतम्यविशेषो नास्तीति सर्वे वृद्धिसंज्ञकाः पर्यायेण प्रसज्येरन्। तथा च पक्षे `नायकः, स्तावकः' इत्या-
द्यप्यनिष्टं रूपं स्यात्। इत्येवमाद्ययोः पक्षयोर्दोषवत्तां दृष्ट्वा, तृतीयं पक्षमाश्रित्याह- `उः स्थानेऽण् प्रसज्यमान एव'इत्यादि। एतेन लक्षणान्तरेण विधीयमान-

स्याणो विधानकाल एव तेन सह संहत्य रपरत्वविशिष्टस् विधावियं परिभाषा व्याप्रियत इति दर्शयति। एतच्च स्थानद्वयग्रहणस्यात्रानुवृत्तेर्लभ्यन्ते। पूर्वकेण हि स्थानग्रह-

णेनेहानुवृत्तौ `उः स्थाने' इत्यतदर्थरूपं लभ्यते। द्वितीयेन तु प्रसज्यमान
इत्येतत्। तथा हि- स्थानग्रहणं सप्तम्यन्तं प्रकृतमनुवर्त्तमाने तत्सामर्थ्यात् प्रथमान्तं सम्पद्यते, स्थानशपब्दश्चायं प्रसङ्गवाची। ततश्च यदा स्थानेनाण् विशिष्यते-`अण् स्थानम्' इति, तदा `अण् प्रसज्यमान एव' इत्येषोऽर्थो जायते।
`प्रसज्यमानः' इति। प्रसङ्गेनाभिसम्बध्यमान इति यावत्। `एव' इति। अवधारणं
पुनरत्र व्यवच्छेद फलत्वेन सर्ववाक्यानां सावधारणत्वाल्लभ्यते। कथं पुनरण् स्थानं
भवति? नैव हि स स्थानं भवति, तद्योगात्तु तत्र स्थानव्यपदेशो भवति, यथा-`यष्टीः
प्रवेशय' इत यष्टियोगात् पुरुषाणां व्यपदेश-। ननु च `स्थानेऽन्तरतमः' लभ्यते ? नैष दोषः, स्वरितत्वचिह्नाद्धि यो यत्रोपष्ठते, स तत्र सामर्थ्यात् तत्कार्ययोग्यस्यै-वार्थस्याभिधाता सन्नुपतिष्ठते। तेन यद्यपि पूर्वसूत्रे स्थानशब्दस्तवादिस्थानवचनः, तथापीहोपतिष्ठमानः प्रसङ्गवचन एवोपतिष्ठते। तेदवं यस्मान्नेदं स्वतन्त्रमणो रपरत्वविशिष्टस्य च विधायकम्। तस्मादाद्ये पक्षे यो दोषः स इह न भवति ततश्च लक्षणान्तरेण विहितस्याणः पश्चादनेन रपरत्वं न विधीयते, किं तर्हि? प्रसज्यमान एवाण् लक्षणान्तरेण तत्सहायं प्रतिपद्य रपरो भाव्यते। तेन द्वितीये पक्षे यो दोषः, सोऽप्यस्मिन्न भवत्येव। प्रसज्यमानस्यैव हि रपरत्वविधौ यथा ऋवर्णो रश्रुतिमान्, एवमादेशोऽपि
रश्रुतिमानेव भवति। ततश्चान्तरतम्यादृकारस्य रश्रुतिमतस्तादृश एव रश्रुतिमानेदेशो भवति। अन्ये गुणवृद्धिसंज्ञका व्यावर्तिता भवन्ति। यदि तर्हि प्रसज्यमान एव रपरो
भवति, अनेकल्त्वात् सर्वादेशः प्रसज्येत, नैष दोषः; यदयं `तरति' इति निर्देशं करोति; ततो ज्ञाप्यते-सर्वादेशो न भवतीति।
`कर्ता, हर्ता'इति। `डुकुञ् करणे'(धा.पा.1473) `ह्रञ् हरणे' (धा.पा.899)
आभ्यां `ण्वुल्तृचौ' (3.1.133) इति तृच्, `सार्वधातुकार्धकयोः' (7.3.84) इति गुणः, `अचो रहाभ्याम्' (8.4.46) इति द्वित्वम्। `किरति, गिरति' इति। `कृ विक्षेपे' (धा.पा.1410) `गृ निगरणे' (धा.पा.1411)- आभ्यां लट्, `शेषात् कर्तरि परस्मैपदम्' (1.3.78)इति तिप्, तुदादित्वाच्छः, `ऋत इद् धातोः' (7.1.100) इतीत्त्वम्। `द्वैमातुरः, त्रैमातुरः' इति। द्वयोर्मात्रोरपत्यम्, तिसृणां मातृणामपत्यमिति `मातुरुत् संख्यासम्भद्रपूर्वायाः' (4.1.115) इत्यण्, उकारश्चान्तादेशः। `तद्धितेष्वचामादेः' (7.2.117) इति वृद्धिः। `खेयम्' इति। `ई च खनः' (3.1.111) इति क्यप्, इकारश्चान्तादेशः,
`आद्गुणः'(6.1.87)। `सौधातकिः' इति। `सुधातुरकङ च' (4.1.97) इतीञ्।
तत्संयोगेनाकङादेशः क्रियमाणो रपरो न भवति, अनण्त्वात्। अथ योऽत्राण्, स रपरः
कस्मान्न भवति ? अनादेश्त्वात्। समुदायो ह्यत्रादेशो न तदवयवः। नैष दोषः; यो हि
द्वयोः षष्ठीनिर्दिष्टयोः स्थाने भवति, लभते सोऽन्यतरव्यपदेशम्, यथा- देवदत्तस्य
पुत्रो देवदत्तायाः पुत्रः' इति।।

52.अलोऽन्त्यस्य। (1.1.52)

अल्ग्रहणमन्त्यस्य विशेषणम्, नादेशस्य; अन्यथा ह्यलन्त्यस्येत्येवं
ब्रूयात्। आदेशः पुनरत्रैकाल्लभ्यते। अन्यस्य `अनेकाल्शित् सर्वस्य' (1.1.55) इति सर्वादेशतां वक्ष्यति। `षष्ठीनिर्दिष्टस्य' इति। सामान्यवचनेऽपि `षष्ठी स्थानेयोगा' (1.149) इत्यधिकारात् स्थानषष्ठ्या निर्दिष्टस्येति वेदितव्यम्; अन्यथा टित्किन्मितोऽप्यवयवसम्बन्धषष्ठीनिर्दिष्टा विधीयमाना अन्त्यस्य स्युः। `इद् गोण्याः' (1.2.50) इति। येयं षष्ठी सान्त्यमलं नीयते- अन्त्यस्याल इत्त्वमिति। `पञ्चगोणिः' इति।
पञ्चभिर्गोणीभिः क्रीत इति `तद्धितार्थोत्तरपदसमाहारे च' (2.1.51) इति समासः। `तेन
क्रीतम्' (5.1.37) इति `प्राग्वहतेष्ठक्' (4.4.1) `अध्यर्धपूर्वद्विगोर्लुगसंज्ञा-याम्' (5.1.28) इति तस्य लुक्। यद्यलोऽन्त्यस्य षष्ठीनिर्दिष्टस्यादेशो भवति,`
इदोऽय् पुंसि' (7.2.111) इत्यतः `इदः' इत्यनुवृत्तेः `हलि लोपः'(7.2.113)
विधीयमान इद्रूपस्य योऽन्त्यस्तस्य स्यात्। तथा च - आभ्यामिति न सिध्येत्, नैष
दोषः; `नानार्थकेऽलोऽन्त्यविधिरनभ्यासविकारेषु' (व्या.प.62) इति परिभाषया न
भविष्यति।।

53.ङिच्च। (1.1.53)

`होतापोतारौ' इति। होतृपोतृशब्दयोर्द्वन्द्व, आनङ्, औप्रत्यये परतः `ऋतो

ङिसर्वनामस्थानयोः' (7.3.110) इति गुणः, रपरत्वं च। `अप्तृन्तृच्' (6.4.11)
इत्यादिना दीर्घः। `मातापितरौ' इति। `पिता मात्रा' (1.2.70) इति यस्मिन् पक्ष एक-
शेषो नास्ति, तत्रेदमुदाहरणम्। यदि ङिदादेशोऽनेकालप्यन्त्यस्य भवति, एवं सति तातङ-
प्यन्त्यस्य भवतीत्यत आह-`तातङि' इत्यादि। तत्र गुणप्रतिषेधार्थम् चिनुतादित्यादौ। अत्र हि सार्वधातुकलक्षणस्य गुणस्य प्राप्तिः। वृद्धिप्रतिषेधार्थम्-मृष्टादिति।
अत्र हि `मृजेर्वद्धिः' (7.2.114) इति वृद्धिप्राप्तिः। तदेवं गुणवृद्धिप्रतिषेधे
चरितार्थत्वात् तातङो ङित्करणस्य सावकाशत्वे सति तस्मिन परत्वात `अनेकाल्शित्सर्व-
स्य' (1.1.55) इत्यनेन तातङ सर्वादेशो भवति। ङिच्चेत्यस्यावकाशः-
`होतापोतारौ' इत्यादि। अनेकालित्यादेरवकाशो योन ङित्-`अस्तेर्भूः' (2.4.52),
भवितेत्यादि।
`जीवतात्' इत्यादावुभयप्राप्तौ परत्वदनेकाल्त्वात् तातङ सर्वादेशो भवति, `
जीवताद् भवान्' `जीवतात् त्वम्' इति। जीवतादिति `आशिषि लिङ्लोटौ' (3.3.173) इति
लोट्, तिप्, `एरुः' `तु ह्योस्तातङ्' (7.1.35) इत्यादिना तातङ।।

54. आदे परस्य। (1.1.54)

अलोऽन्त्यस्यापवादोऽयम्। शास्त्रे न क्वचित् परस्येतुच्चार्य कार्यं विधीयते। ततश्च निर्विषयमेतदित्यभिप्रायेणाह-`क्व च' इत्यादि। `यत्र पञ्चमीनिर्देशः'इति। `तस्मादित्युत्तरस्य' (1.1.67) इति वचनाद् यत्र पञ्चमीनिर्देशस्तत्र परस्य कार्यं शिष्यते। `आसीनः' इति। `आस उपवेशने' (धा.पा.1021), लट्, अनुदात्तेत्वादात्मनेपदम्, शानच्, अदादित्वाच्छपो लुक्। `द्वीपम्, अन्तरीपम्' `समीपम्' इति। द्विर्गता
अन्तर्गताः सङ्गता' आपोऽस्मिन्निति विगृह्य बहुव्रीहिः। `ऋक्पूः' (5.4.74) इत्यादिना अकारप्रत्ययः समासान्तः।।

55. अनेकाल्शित्सर्वस्य। (1.1.55)

शितः शकारानुबन्धेनानेकाल्त्वेऽपि शिदिति पृथक्करणं `नानुबन्धकृतमनेकाल्त्वम्'(व्या.प.14) इति ज्ञापनार्थम्। तस्य तु प्रयोजनम्-- `दिव उत्' (6.1.131) इत्या-दिषु सर्वादेशाभावः।।

56. स्थानिवदादेशोऽनल्विधौ। (1.1.56)

स्थानं प्रसङ्गः, स च पूर्वमुक्तस्वरूपः। अतिदेशोऽनेकप्रकारः- निमित्ताति-
देशः; व्यपदेशातिदेशः, शास्त्रातिदेशः, रूपातिदेशः, कार्यातिदेशश्चेति। तत्र
तावन्निमित्तमशक्यमतिदेष्टुम, न हि धात्वादिधर्माः शब्दप्रवृत्तिनिमित्तभूता धात्वादिव्यक्त्याश्रिता वस्त्वन्तरमादेशं प्रापयितुम्, प्रापयितुं पार्यन्ते; यथा-ब्राह्मणवदस्मिन् क्षत्रिये वर्त्तितव्यमिति ब्राह्मणशब्दप्रवृत्तिनिमित्तं न शक्यं क्षत्रिये प्रापयितुम्, तद्वत् तस्मादशक्यत्वात् नेह निमित्तादेश आश्रीयते। नापि व्यपदशातिदेशः; संज्ञासंज्ञिसम्बन्धादभिन्नत्वात्। संज्ञासंज्ञिसम्बन्धे हि वत्करण-
स्यानर्थक्यं स्यात्, विनापि तेन तत्सिद्धेः। अप्रधानत्वाच्च नात्र व्यपदेशातिदेशो युक्त आश्रीयतुम्। अत एव शास्त्रातिदेशोऽपि। अप्रधानत्वं तु तयोरपि कार्यं प्रत्यङ्गभूतत्वात्। रूपातिदेशस्याप्याश्रयणमयुक्तम्' निष्फलत्वात्। यदि ह्यादेशस्य स्थानिनोरूपमतिदिश्येत; आदेशस्य वैयर्थ्यं स्यात्। `द्विर्वचनेऽचि' (1.1.59) इत्यत्र रूपातिदेशेऽपि न भवत्यादेशवैयर्थ्यम्, द्वर्वचनादुत्तरकालं श्रवणार्थत्वात्। तस्मादतिदेशान्तराश्रयणस्यायुक्तत्वात् कार्यातिदेश आश्रीयते। `स्थानिना तुल्यं वर्तते' इति। तत्तुल्यकार्यत्वात्, `तेन तुल्यम्' (5.1.115)। `स्थान्याश्रयेषु' इति।
स्थानी आश्रय एषामिति बहुव्रीहिः। `अनलाश्रयेषु' इति। अल आश्रय एषामिति बहुव्रीहि
कृत्वा न अळाश्रयाणि अनलाश्रयाणीति नञ्समासः। अनन्तरोक्तमेवार्थं विस्पष्टीकर्तृमाह- `स्थान्यलाश्रयाणि' इत्यादि। स्थानी अल् आश्रयोयेषां तानि तथोक्तानि। आश्रयग्रह-णेन सूत्रे योऽल्विधिशब्दः, सोऽलाश्रयो विधिरल्विधिरित्युत्तरपदलोपी समास इति
दर्शयति। स पुनः समासो मयूरव्यंसकादित्वात् समासं कृत्वा नञ्समासः कृतः। न
अल्विधिरनल्विधिः' इति। पुनरलाश्रयो विधिः ? यो वर्णमात्राश्रितः। यस्तु समुदाया-
श्रितः सोऽनलाश्रयः। कार्यशब्देन क्मसाधनेन विधिशब्दस्यार्थमाचक्षाणः `विधीयते'
इति विधिरिति तस्य कर्मसाधत्वं दर्शयति।
`किमुदाहरणय्'इति प्रश्नः। `धात्वाद्यादेशाः प्रयोजनम्' इत्युत्तरम्।

प्रयुज्यतेऽनेनेति प्रयोजनम्, उदाहरणेन च प्रयुज्यत इति। अर्थात् प्रश्नानुरूपं
प्रतिवचनम्।
ननु चार्धधातुके परतो भाव्यमादेशाभ्याम्, तत्र किमत्रादेशेनेत्यत आह-
`आर्धधातुके विषये' इति। `प्रकृत्य' इत्यादि। `कुगति' (2.2.18) इत्यादिना समासः,
`समासेऽनञ्पूर्वे क्त्वो ल्यप्' (7.1.37)।
`दधिकम्' इति। दध्ना संस्कृतमिति `दध्नष्ठक्' (4.2.18)। `अद्यतनम्' इति।
`सायंचिरम्' (4.3.23) इत्यादिना ट्युप्रत्ययः, तुडागमश्च, योरनादेशः।
`अकुरुताम्,अकुरुतम्' इति। कृञो लङ्, `तस्थस्थमिपाम्' (3.4.101) इत्यादिना तसस्ताम्, थसस्तम्, तनादित्वात् `तनादिकृञ्भ्य उः' (3.1.79), धातोर्गुणः। `अत उत्
सार्वधातुके' (6.4.110)।
ग्रामो वृ स्वम्, जनपदो नः स्वम्' इति। युष्मदस्मदोः षष्ठी, `बहुवचनस्य
वस्नसौ' (8.1.21) इति वस्नसादेशौ।
`वत्करणं किम्' इति ? विनापि तेन तदर्थो गम्यते, यथा `असंयोगाल्लिट्
कित्' (1.2.5) इत्यादावित्यभिप्रायः। `स्थानो' इत्यादि। प्रायेण ह्यस्मिन् पादे `वृद्धिरादैच्' (1.1.1) इत्यादीनि सूत्राणि संज्ञासंज्ञिसम्बन्धार्थान्येव दृष्टानि। अतोऽसति वत्करणे स्थान्यादेशस्य संज्ञा विधीयत इति विज्ञायते। तदेवं मा विज्ञायी-
त्येवमर्थं वत्करणम्। किमर्थं पुनः स्थान्यादेशस्य संज्ञा नेष्यत इत्याह-- `स्वाश्रयमपि' इत्यादि। संज्ञा हिसंज्ञिप्रत्ययनार्था न स्वतः कार्यं प्रतिपद्यते, अपि तु तत्प्रत्यायितः संज्ञीति। अत्र यदि स्थान्यादेशस्य संज्ञा स्यात्, आदेशस्यैव हि
संज्ञिनः कार्यं स्यात्,न संज्ञाभूतस्य स्थानिनः। ततश्च `आङो यमहनः' (1.3.28) इति
वधेरादत्मनेपदं स्यात्, न हन्तेः।वत्करणे तु सत्यतिदेशोऽयं भवति, अतिदेशेन चान्य-
सम्बन्धिकार्यमन्यत्र सम्पाद्यते;न तु तत्र स्वाश्रयं निवर्त्त्यते। तथा हि `ब्राह्मणवदस्मिन् क्षत्रिये वर्त्तितव्यम्' इत्यतिदेशे तद्ब्राह्मणसम्बन्धिकार्यं क्षत्रिये भाव्यते। न तु ब्राह्मणस्य यत् स्वाश्रयमग्रभोजनादि तद्व्यावर्त्त्यते। स्वाश्रयमपीत्यपिशब्दादतिदेशप्रापितमादेशे पराश्रितमपि। `आहत' इति। हन्तेरलुङ्, `हनः सिच्'
(1.2.14) इति कित्त्वम्। `अनुदात्तोपदेश' (6.4.37) इत्यादिनाऽनुनासिकलोपः। `ह्स्वादङ्गात्' (8.2.27) इति सिचो लुक्। `आवधिष्ट' इति ।
`आत्मनेपदेष्वन्यतरस्याम्' (3.1.54) इति वधादेशः, इट्, `अतो लोपः' (6.4.48) षत्वष्टुत्वे।
`आदेशग्रहणं किम्' इति। सथानीति सम्बन्धिशब्दोऽयम्। तत्र यथा `पितृवत्
स्थूलः' इत्युक्तेऽन्तरेणाप्यत्र पुत्रग्रहणं सम्बन्धिशब्दत्वात् पुत्र इति गम्यते,तथा स्थानिवदित्युक्ते विनाप्यादेशग्रहणेन सम्बन्धिशब्दत्वादादेश एव स्थानिवद् भवतीति विज्ञायत इत्यभिप्रायः। `आनुमानिकस्य' इत्यादि। `अस्तेर्भूः' (2.4.52) इत्यादौ स्थान्यपि शब्देन साक्षात् प्रत्याय्यते, आदेशोऽपि। पचत्वित्यत्र स्थान्यपि,
आनुमानिक आदेशोऽपि। तथा हि- `एरुः' (3.4.86) इत्यत्र न वस्तुत इकार एव स्थानी
, अपि तु तिशब्दः। नाप्युकारमात्र आदेशः, तर्हि ? तुशब्दः। लाघवार्थं तु तदेकदेशयो-रिकारोकारयोरुच्चारणम्। तेनैकदेशद्वारेण समुदायस्य समुदाय एवादेशो विधीयते। तत्र
यथा विषाणेनैकदेशेनोपलब्धेन विषाणी समुदायोऽनुमीयते, तथैकदेशेनेकारेणोकारेण तिशब्दस्तुशब्दश्च। अत्र च शास्त्रे यस्य च क्रियाबिसम्बन्धः साक्षाच्छब्दादेव प्रतीयते,
यस्य च कुतश्चिदर्थप्रकरणादेरनुमीयते,तयोः पूर्वस्य प्राधान्यमितरस्य विपर्यय
इष्यते। तथा हि- `सहयुक्तेऽप्रधाने' (2.3.19) इत्यत्र वृत्तिकारः `पुत्रेण सहागतः' इत्याद्युदाहृत्य वक्ष्यति- `पितुरत्र क्रियादिसम्बन्धः शब्देनोच्यते, पुत्रस्य तु प्रतीयमान इति तस्याप्राधान्यम्' इति। प्रधानेतरयोश्च सन्निधाने प्रधानस्यैव
कार्येण सम्प्रत्ययो युक्तः। तथा चाह- `प्रधाने कार्यसम्प्रत्ययात् सिद्धम्' इति।
अत्र हि यद्यादेश इत नोच्येत, ततो य आदेशशब्देनोपादाय विधीयमानत्वात् प्राधान्यमनुभवति तस्यैव स्थानिवद्भावः स्यात्, नाप्रधानस्यानुमानिकस्य। तस्मात् तस्यापि स्थानि-वद्भावो यथा स्यादित्येवमादेशग्रहणम्। तेन पचत्वित्यादावपि `सुप्तिङन्तं पदम्' (1.414) इति पदसंज्ञा सिद्धा भवति। कुतः पुनरेतदवसीयते ? `एरुः' (3.4.86) इत्यनेनैकदेश-द्वारेण तुःशब्दः समुदायो विधीयते, न पुनर्यथाश्रुतमिकारमात्रस्योकारमात्रमेवेति; पचत्वित्यत्र पदसंज्ञाकार्योपलब्धेः, तद्धि न विना पदसंज्ञया, सापि न विना तिङवद्
भावेन, सोऽपि न विना समुदायोदेशेनेति। तस्मिन् हि सति स्थानिवद्भावेन यत्न-

प्रतिपादितेन तिङभावो लभ्यते; नान्यथेति गतमेतत्। अथानुमानिके गृहीते कथमितरस्य
ग्रहणं लभ्यते? एवं मन्यते स्थानिवदित्येतावानेको योगः कर्त्तव्यः, एतेन योगेनादेशः प्रधानभूतः सम्बन्धिशब्दत्वाल्लभ्यते। तत आदेश द्वितीयो योगः, आनुमानिकस्य स्थानि-
वद्भावाय। अत्र च स्थानिवदिति वर्त्तते। एवमुभयोः प्रत्यक्षानुमानशिष्ट्योर्ग्रहणमुपपद्यते।
`अनल्विधौ' इति। द्वयोरपि योगयोः शेषभूतः। `द्युपथित्यदादेशा' इत्यादि। `दिव औत्' `पथिमथ्यृभुक्षामात्' (7.1.85), `त्यदादीनामः' (7.1.102) इत्येते `
हल्ङ्याब्भ्यः' (6.1.68) सुलोपे कर्त्तव्ये न स्थानिवद्भवन्ति; तस्य हल्मात्रमाश्रित्य प्रवृत्तेरलाश्रयत्वात्।।

57. अचः परस्मिन् पूर्वविधौ।। (1.1.57)

किमर्थमिदमुच्यते ? अनल्विधौ स्थानिवद्भावः उक्तः, अल्विध्यर्थमिदम्। पटयतीत्यादौ `अत उपधायाः' (7.2.116) इति वृद्धिरलाश्रया; अकारस्योपधाया अल्त्वात्। तस्मात् पूर्वेण न प्राप्नोतीत्येके एव परनिमित्तक एव पूर्वविधावेव कर्त्तव्ये स्थानिवद् भवतीति नियमार्थमित्यन्ये।
`अच इति स्थानिनिर्देशः' इति। `अचः' इत्यनेन स्थानषष्ठ्यन्ततां दर्शयति। `परस्मिन्निति सप्तमीति' इति। न परसप्तमी, परशब्देनैव
परस्योक्तत्वादित्यभिप्रायः। `
पूर्वविधौ' इति, `विषय' इति। प्रकृतत्वात् स्थानवद्भावस्येति गम्यते, पूर्वविधौ विषये स्थानिवद्भवति, नान्यस्मिन्नित्यर्थः। पूर्वस्य विधिः पूर्वविधिः। विधि-
शब्दश्चायं कर्मसाधनः-- विधियत इति विधिः। भावसाधनो वा-- विधानं विधिरिति। कर्म-
साधने ह्येतस्मिन् पूर्वस्येति शेषलक्षणा षष्ठी। पूर्वस्य व्यवस्थितस्य लब्धसत्ताक-
स्य सम्बन्धिनि कार्ये कर्त्तव्य इत्यर्थः। भावसाधने तु `पूर्वस्य ' इति कृद्योग-
लक्षणा कर्मणि षष्ठी। पूर्वस्यापरिनिष्पन्नस्य विधाने कर्त्तव्य इत्यर्थः।
पूर्वस्मिन् विधातव्य इति यावत्।
पूर्वत्वं पुनरिहादेशापेक्षम्, अजपेक्षम्, निमित्तापेक्षं वा; एषामेवादेशा-
दीनामिह सन्निधानात्। तत्रादेशः स्वरितत्वात् सन्निहितः, इतरयोस्त्वत्रैव सूत्र उपादानात्। ननु च त्रिष्वप्येषु दोषः, तत्कथमादेशाद्यपेक्षया पूर्वत्वं शक्यमाश्रयि-
तुम्, आदेशापेक्षे हि पूर्वत्व आश्रीयमाणे `पटयति' इत्यादौ स्थानिवद्भावो न सिध्यति; लोपो हि तत्रादेशः, न च तेन पूर्वपरता सम्भवति; तस्याभावरूपत्वात्।
स्यादेतत्- लोपस्य यः स्थानी तदपेक्षया पौर्वापर्यमस्तीतित तद्द्वारेणादे-
शापेक्षयाप्यौपचारिकं तद् भविष्यतीति वार्तमेतत्; बहुखद्वकादिषु मुख्ये पौर्वा-
पर्ये सत्यौपचारिककल्पनाया अयुक्तत्वात्। `व्यक्तिः पदार्थः' इत्यस्य दर्शनस्याश्रयणाददोषः। व्यक्तौ हि पदार्थे प्रतिलक्ष्यं लक्षणं प्रवर्त्तते। तत्र यदि
पटयतीत्या-दिष्वौपचारिकत्वात् पौर्वापर्यस्य स्थानिवद्भावो न स्यात्, यदेतद्विषयं लक्षणं -
तस्यानवकाशत्वाद् वैयर्थ्यं स्यात्, अयं तर्हि दोषः प्रथमस्तावत्पक्षोऽयुक्तः।
द्वितीये तु काममेष दोषो न भवति। तथा हि - तत्र योऽचः पूर्वस्तस्य विधौ कर्त्तव्ये स्थानिवद्भवतीत्येषः सूत्रार्थः, इह च `न य्वाभ्यां पदान्ताभ्याम' (7.3.3) इति
वचनात् प्रगेवैजागमाद् यणादेशेन भवितव्यम्। तेन नास्त्यैचोरजपेक्षं पूर्वत्वमिति न भवति स्थानिवद्भावः, तदभावादैचोरायावावपि न प्राप्नुतः; किन्त्वत्र `अचः' इत्येतदा-
देशविशेषणार्थं षष्ठ्यन्तं प्रतिज्ञातम्, न तु पञ्चम्यन्तम्। तदा चाचः तदा पञ्चम्य-न्तं सम्पद्यते। अयं तर्हि दोषः-- इह `तन्वन्ति' इत्युप्रत्ययस्य यणादेशकृत इट्
प्राप्नोति, न ह्यत्राचः पूर्वस्य व्यवस्थितस्य किञ्चित्कार्यं विधीयते; यतो यणादेशस्य स्थानिवद्भावादिडागमो न स्यात्। तृतीये तु पक्षे यणादेश एव निमित्तात् पूर्वः। तस्य व्यवस्थितस्येटि विधातव्ये स्थानिवद्भावो लभ्यत इति न भवति तन्वन्तीत्यत्रेट्
प्रसङ्गः; किन्त्वाद्ये पक्षे यो दोषः, स इहापि प्रसज्येत। `वैयाकरणः, सौवश्वम्'
इत्यत्रापि यवौ निमित्तात् पूर्वौ भवत इति। ननु च निमित्तात् पूर्वस्य कार्ये विधातव्ये स्थानिवद्भाव उच्यते, न चेह निमित्तात् पूर्वयोर्व्योः किञ्चित् कार्यं विधीयते। न ह्यायावादेशौ य्वोः कार्यम्, किं तर्हि ? ऐचः,नैतदस्ति; ऐचो हि यत् कार्यं
तद् य्वोरपि सम्बन्धि भवत्येव, तयोस्तद्भक्तयोस्तदवयवभूतत्वात्।
अत्रोच्यते-- आद्यन्तयोः पक्षयोर्यो दोष उक्तः, स तावन्न भवति; यस्माद् बहिरङ्गावैचौ, तद्धितश्रयत्वादङ्गाश्रयत्वाच्च; अन्तरङ्गावायावौ, तद्धितनिरपेक्षत्वाद् वर्णाश्रयत्वाच्च। `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.42) इत्यसिद्धत्वादैचोरायावौ नभ भविष्यतः। इतरस्मिन्नपि पक्षे यो दोष उक्तः, सोऽपि न भवत्येव; तत्र

कर्मसाधने सर्वमिष्टं न सिध्यतीति भावसाधनोप्याश्रीयते। तेन तन्वन्तीत्यत्रेट एवापरिनिष्पन्न-
स्याचः पूर्वस्य विधाने कर्त्तव्ये स्थानिवद्भावः सिद्धो भवति। कर्मसाधनेऽप्यदोषः; यणादेश एवात्राचः पूर्वः, तस्य विधाने कर्त्तव्ये एव। न हि यणादेशात् पूर्वस्य
व्यवस्थितस्य कस्यचिदिड् विधीयते, किं तर्हि ? यणादेशस्यैव। भावसाधने तु तस्मिन्न
दोषः; यणादेशात् पूर्वस्यापरिनिष्पन्नस्येट एव विधानात्। तस्मात् तत्रापि पक्षे भावसाधन एव विधिशब्दोऽङ्गीकर्त्तव्यः।
`पटयति' इति। `तत्करोति तदाचष्टे' इति णिच्, `णाविष्ठवत् प्रातिपदिकस्य'
(वा.813)इति टिलोपः। ननु चात्र व्यवधानात् पूर्वत्वं न सम्भवति; नैष दोषः; व्यवहितेऽपि हि पूर्वशब्दो वर्त्तते, यथा-`मथुरायाः पूर्वं पाटलिपुत्रम्' इति। ननु च
द्वितीया समर्थाण्णिजुत्पद्यते, तत्रान्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदसंज्ञायां सत्यां जश्त्वे सति पडयतीति भवितव्यम्। टिलोपस्य स्थानिवद्भावाज्जश्त्वं न
भवतीति चेत्, न; जश्त्वविधौ स्थानिवद्भावप्रतिषेधात्, नैष दोषः; `तदाचष्टे' इत्यत्र हि
तदिति न द्वितीयासमर्थादिति, कुतस्तर्हि ? कर्मणि इति। कुत एतत् ? अर्थनिर्देश-
परत्वात्। एतदुक्तं भवति- कर्मसंज्ञकात् तदाचष्ट इत्यस्मिन्नर्थे णिज् भवतीति।
तस्मादसुबन्धाण्णिजुत्पत्तेः पदसंज्ञाया अभावाज्जश्त्वं न प्रवर्त्तते। `अवधीत्'
इति। हन्तेर्लुङ, `हनो वध लुङि' (2.4.42) इति वधशब्दोऽदन्त आदेशः, `अतो लोपः' (6.4.48), `आर्धधातुकस्येट्' (7.2.35), `अस्तिसिचोऽपृक्त' (7.3.96) इतीट्,`इट ईटि'
(8.2.28) इति सिचो लोपः। `हलन्तलक्षण' इति। `वदव्रज' (7.2.3) इत्यादेः
सूत्राद्धल्ग्रहणानुवृत्तेः `अतो हलादेर्लघोः' (7.2.7) इति वृद्धिर्हलन्तलक्षणा। `बहुखट्वकः' इति। ननु च `स्वरविधिं प्रति न स्थानिवद्भवति' इति प्रतिषेधं वक्ष्यति,
अतः स्थानिवद्भावस्य प्राप्तिरेव नास्तीत्ययुक्तमेतदुदाहरणम्, नैतत्; विशेषे हि स
प्रतिषेधः--स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवद् भवतीति। न चायं लोपाजादेशः स्वरो न भवतीति खकाराकारस्योदात्तत्वं न भवति। `कपि पूर्वम्' (6.2.173) इत्युत्तर-
पदान्तोदात्तत्वमेव भवति।
`प्रश्नः' इति। `यजयाचयतवितच्छप्रच्छ' (3.3.90) इत्यादिना नङ। `तुकि न
स्थानिवद्भवति' इति। तुकि कर्त्तव्ये न स्थानिवद्भवतीत्यर्थः। यदि हि स्याच् छकारमात्रस्य शादेशे कृते स्थानिवद्भावाद्विहितस्य तुकः श्रवणं स्यादित्येके,
एतच्चायुक्तम्; अत्र ह्यन्तरङ्गत्वात् `छे च' (6.1.73) इति तुकैव प्राग् भवितव्यम्।न चात्रेद-
मस्ति `वार्णादाङ्गं बलीयः' (व्या.परि.39) इति, नानाश्रयत्वात। यत्र ह्येकं निमित्तमाश्रित्ययुगपद् वार्णमाङ्गं च प्राप्नोति, तत्रेदमुपतिष्ठते, यता-- `इयाय' इति।
अत्राकारमाश्रित्याभ्यासेकारस्य `इको यणचि' (6.1.77) इति यण् प्राप्नोति, `अभ्यास-
स्यासवर्ण्ये' (6.4.78) इतीयङ च। तत्र `वार्णादाङ्गं बलीयः' (व्या.परि.39) इत्यस्योपस्थानादियङेव भवति। प्रश्न इत्यत्र तु शादेशमनुनासिकमाश्रयति, तुक् पुनश्छकारम्;
अतो नानाश्रयत्वान्नोपतिष्ठते। तस्मात् तुकात्र भवितव्यमेव। अवश्यं चैतदेवं विज्ञेयम्; अन्यथा `च्छ्वोः शूडनुनासिके च' (6.4.19) इत्यत्र यद्वक्ष्यति वृत्तिकारः--
`अन्तरङ्गत्वात् `छे च' (6.1.73) इति तुकि कृते सतुक्कस्यायमादेशः' इति, तद्विरुध्यते।
अन्ये तु व्याचक्षते--`च्छवोः शूडनुनासिके च' (6.4.19) इति सूत्रे `सतुक्क-
स्य च्छकारस्य निर्देशः' इत्येव केनचिदाचार्येण शिष्याः प्रतिपादिताः, केनचित्तु
`तुग्विरहितस्य शुद्धस्य' इत्येवम्, उभयं चैतत् प्रमाणम्। द्वैतत्वे तत्राङ्गेन वा च्छ्वौ विशेष्येते, छकारवकाराभ्यां वाङ्गमिति। तत्राद्ये पक्षेऽङ्गस्य
यश्छस्तस्य शादेश इति। वाक्यार्थः; सतुक्कस्य च स्थानित्वेनोपादानात्। अन्तरङ्गे तुकि कृते
`नानार्थके अलोऽन्त्यविधिः' (व्या.प.62) इति तदन्तविध्यभावात् समुदायस्यैवादेशो भवति। यदा शकारविधौ सतुक्कस्य च्छकारस्य निर्देशः, प्रश्न इत्येतत् तदानीमज्ग्रहण-
स्याप्रत्युदाहरणमेव; तुकः पुनः प्रसङ्गाभावात्। यदा तु च्छकारवकाराभ्यामङ्गं
विशेष्यते, तदा छकारान्तस्याङ्गस्य स्थानित्वम्। अस्मिन् पक्षे शविधौ शुद्ध एव छकार उपात्तो वेदितव्यः। अन्तरङ्गत्वात् तु पूर्वं तुकि कृते
पश्चादलोऽन्त्यपरिभाषाया उपस्थानात् उपस्थानात् छकारमात्रस्य शकारः। तस्मिन् कृते निमित्ताभावात् तुको
निवृत्तिः; यथा-- स्थातेत्यत्र षत्वनिवृत्तौ ष्टुत्वस्य। अत्र पक्षे प्रश्न

इत्येतत् प्रत्युदाहरणमज्ग्रहणस्य। यद्यत्र स्थानिवद्भावः स्यात्, तुकः प्रत्यावृत्तिर्भवेत्; निमित्तसद्भावात्, यथा-- `प्रत्यष्ठात्' इत्यत्र ष्टुत्वस्य। `तुकि न स्थानिवद्भवति' इत्यस्यायमर्थः- योऽसौ निमित्ताभावान्निवृत्तस्तुगासीत्, तमेव
पश्चात् प्रत्यावर्त्तमानं प्रति न स्थानिवद्भवतीति पुनः प्रत्यावृत्तिरेव।
`पूर्वविधिः' इति। ननु च यद्यत्र तुकः प्रत्यावृत्तिः स्यान् नङो ङित्करणम-र्थकं स्यात्। तद्धि प्रच्छः प्रसारणार्थ वा विच्छेर्गुणप्रतिषेधार्थ वा क्रियते। तत्र प्रच्छेर्नङि सम्प्रसारणेन न भवितव्यम्; `प्रश्ने चासन्नकाले' (3.2.117) इति
निपातनात्। यदि च स्थानिवद्भावे सति तुकः प्रत्यावृत्तिः स्यात्र् ततो गुणप्रतिषेधार्तमपि स्यात्, अलघूपधत्वादेव गुणो न भविष्यति, ततश्चानर्थकमेवैतत् स्यात्? नानर्थकम्; `अनित्यमागमशास्त्रम्' (व्या.प.99) इति ज्ञापनार्थत्वात्। अनित्यत्वज्ञपाने
त्वागमशासनस्य `स्नक्रमोरनात्मनेपदनिमित्ते' (7.2.36) इत्यत्र यद्वक्ष्यति--
`क्रमेस्तु कर्तर्यात्मनेपदविषयादसत्यात्मनेपदे कृति प्रतिषेधो वक्तव्यः' इति, तन्न वक्तव्यं इति। `उछि उञ्छे' (धा.पा.215), `विछ गतौ' (धा.पा.1424), `सनाद्यन्ता
धातवः' (3.1.32) इत्येवमादयो निर्देशाश्चोपन्ना भवन्ति।
`आक्राष्टाम्' इति। `कृष विलेखने' (धा.पा. 990) आङ्पूर्वाल्लुङ; च्लिः, `
स्पृशमृशकृषतृपदृपां सिज् वा' (वा.207) इत्युपसंख्यानात् क्सस्यापवादः पक्षे सिच्, ततस्ताम् `अनुदात्तस्य चदुपधस्यान्यतरस्याम्' (6.1.59) इत्यमागमः, यणादेशः,
`वदव्रजः' (7.2.3) इत्यादिना वृद्धिः।
`वैयाघ्रपद्यः' इति। व्याघ्रस्यैव पादावस्येति बहुव्रीहिः। `पादस्य लोपोऽहस्त्यादिभ्यः' (5.4.138) इत्यन्तलोपः। व्याघ्रपादिति स्थिते गर्गादित्वाद् यञ्, `पादः पत्' (6.4.130) इति पद्भावः। `आदीध्ये' इति। अदादित्वाच्छपो लुक्। अथात्र
टेरेत्त्वात् प्रागेव कस्माल्लोपो न भवति ? स्यात्, यदि `परस्मिन्' इत्युच्यमाने तु स्थानिवद्भावाभावात् कृते टेरेत्त्वे न प्राप्नोतीत्यनित्यो लोपः। टेरेत्त्वं तु कृताकृतप्रसङ्गित्वान्नित्यम्। तस्मात् तदेव पूर्वं भवति।
`हे गौः'इति। `गोतो णित्' (7.1.90) इति णित्त्वात् सर्वनामस्थानस्य
`अचो ञ्णिति' (7.2.115) वृद्धिः। `सम्बुद्धिलोपे कर्त्तव्ये' इति। `एङ ह्रस्वात्
सम्बुद्धेः' (6.1.69) इत्यनेन। `बाभ्रव्यस्य' इति। बभ्रोरपत्यमिति `मधुबभ्रो-
र्ब्राह्मणकौशिकयोः' (4.1.106) इति यञ्, `ओर्गुणः' (6.4.146) `वान्तो यि प्रत्यये'
(6.1.79) इति वान्तादेशः, आदिवृद्धिः, बाभ्रव्य इति स्थिते `वृद्धाच्छः' (4.2.114) `यस्येति च' (6.4.148) इत्यकारलोपः। `अवादेशो न स्थानिवद्भवति' इति। ननु चासत्यपि
स्थानिवद्भावे `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या.परि.12) इति न भवितव्यमेवात्र यलोपेन, तथा हि-- यकारादववादेशेनात्मलाभः प्रतिलब्धः इति नोत्सहते स तं बाधितुम्; नैतदस्ति; सङ्घातो ह्यत्र सन्निपातलक्षणः, नावयवो हल्; सत्यपि वा तस्य
सन्निपातलक्षणत्वे न भवत्येव दोष-; अनित्यत्वात् सन्निपातलक्षणपरिभाषायाः। अनित्य-
त्वं तु `न लोपः सुप्स्वर' (8.2.2) इत्यादौ सूत्रे ज्ञापयिष्यतते। `नैधेयः' इति। निपूर्वो डुधाञ् (धा.पा.1092), `उपसर्गे घोः किः' (3.3.92), आतो लोपः,निधि इति स्थिते द्वयचः `इतश्चानिञः' (4.1.122) इति ढक्। ननु पूर्वस्माद् विधिः पूर्वविधिरिति पञ्चमीसमासस्याप्यभीष्टत्वात् पूर्वस्मादपि विधौ कर्त्तव्ये स्थानिवद्भावेन भाव्यम्,
तथा हि `ठस्येकः' (7.3.50) इत्यत्र वक्ष्यति- `मथितं पण्यमस्य माथितिक इत्यत्र
यस्येति लोपे कृते `इसुसुक्तान्तात्कः' (7.3.51) इति स्थानिवद्भावादिकस्य कादेशः
प्राप्तः; सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न भवति,अकारलोपस्य स्थानि-
वद्भावत्वात्; पूर्वस्मादपि विधौ स्थानिवद्भवति" इति। तदेवं यस्मात् पूर्वस्मादपि
विधौ स्थानिवद्भावोऽनेन भवति, तस्मात् ` हे गौः' इत्यादिष्वपि स्थानिवद्भावेन भवितव्यमेवेत्ययुक्तान्येतानि प्रत्युदारणानि, नैष दोषः; इत्यादिष्वपि स्थानिवद्भावेन भवितव्यमेवेत्ययुक्तान्येतानि प्रत्युदाहरणानि, नैष दोषः; पूर्वस्माद् विधौ
कर्त्तव्येयः स्थानिवद्भावाः,तस्यानित्वात्। अत एव चानित्यत्वादप्रधानभूतोऽसाविति वृत्तावस्य सूत्रस्य पूर्वस्मादिति न प्रतिपादितस्तदेवा प्राधान्यस्य दर्शयितुम्। कुतः पुनस्तस्यानित्यत्वमवसितम्? `निष्ठायां सेटि' (6.4.52) इत्यत्र सेड्ग्रहणात् ।तदेवमर्थं क्रियते- इटि कृते णिलोपो यथा स्यादिति। यदि ह्यकृत एव तस्मिन् णिलोपः
स्यात्, कारितमित्यत्रेडागमो न स्यात्; `एकाच' इति प्रतिषेधात्। तथा च तत्र
वक्ष्यति-- " सेडिति किम? `संज्ञापितः पशुः' `सनीवन्तर्ध' (7.2.49) इति ज्ञपेरिड्

विकल्प्यते। `यस्य विभाषा' (2.7.15) इति निष्ठायामिट्प्रतिषेधः। अथ पुनरेकाच इति
तत्रानुवर्त्तते, तत्र निष्ठायाम् `अत्र भवितव्यमिडागमेन' इति। सेड्ग्रहणमनर्थकं
स्यात्; तत् क्रियते कालावधारणार्थम्। इडागमे कृते णिलोपो यथा स्यात्" इति। अकृते
तस्मिंष्टिलोपे सति कारितमित्यत्र `एकाच उपेदेशेऽनुदात्तात्' (7.2.10) इति प्रतिषेधः इटः प्रसज्येत। यदि च रपूर्वस्माद् विधौ कर्त्तव्ये नित्यं
स्थानिवद्भावः स्यात्, णिलोपस्य स्थानिवद्भावे सत्यनेकाचत्वादिट्प्रतिषेधस्य प्रसङ्ग एव नास्तीति
सेड्ग्रहणम् न कुर्यात्, कृतं च; ततोऽवसीयते-- `पूर्वस्माद् विधानित्यः स्थानि-
वद्भावः' इति। तेन गौरित्यादिषु पूर्वस्माद् विधौ कर्त्तव्ये स्थानिवद्भावो न भवति।
अथ विधिग्रहणं किमर्थम्, यावता पूर्वस्येत्येवं सिद्धम? तथा हि, कार्यापे-
क्षया षष्ठी भविष्यति-पूर्वस्य विधौ कर्त्तव्य इति, नैतदस्ति; असति हि विधिग्रहणे यदि पूर्वस्येत्युच्येत, पूर्वस्येत्युच्येत, पूर्वस्माद् विधौ स्थानिवद्भावो न स्यात्। अथ पूर्वस्मादित्युच्येत, पूर्वस्य विधौ न स्यात्। विधिग्रहणे सति षष्ठीसमासः पञ्चमीसमासश्च लभ्यत इति सर्वत्र सिध्यति। तस्मात् समासद्वयार्थं विधिग्रहणं
कर्त्तव्यम्।।

58. न पदानतद्विर्वचनरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। (1.1.58)
अत्रापि विधिशब्दो भावसाधनः कर्मसाधनश्च। स च प्रत्येकमभिसम्बध्यते। तत्र
यथायोगं क्वचित् भावसाधन आश्रीयते, क्वचित् कर्मसाधनः। तत्र द्विर्वचनविधौ भावसाधनः, तत्र हि तदेव विधातव्यम्, न हि तस्यावस्थितस्य किञ्चित् कार्यम्। अन्यत्र तु कर्मसाधनः। तत्र हि व्यवस्थितस्य पदान्तादेः कार्यान्तरविधानात्।
`कौ स्तः, यौ स्तः' इति। अस्तेर्लट्, तस्, अदादित्वाच्छपो लुक्, पूर्वविधा-वावादेशे यणादेशे च कर्त्तव्ये स्थानिवत् स्यादिति। कथं पुनः स्थानिवत् स्यात्,
यावता पदसंस्कारायैव प्रयुक्तत्वाद् व्याकरणस्य ? `स्तः' इत्यादिकं पदं पदान्तरनिर-
पेक्षमेव संस्क्रियते, अनादिष्टादचो यः पूर्वः, तस्य विधिं प्रति स्थानिवद्भावेन
भवितव्यम्। न चायं प्रकारः पदानतरनिरपेक्षे पदसंस्कारे सम्भवति; `स्तः' इत्यादिके
पदे संस्क्रियमाणे कावित्यादेः पदान्तररस्यासन्निधानात्। किं पुनरिदं राजशासनम्--
पदसंस्कारायैव शब्दानुशासनं कर्त्तव्यमिति ? अथ शास्त्रकारस्यैवायमभिप्रायः ? इति
चेत्, न; शास्त्रकारेण दि `युष्मद्यपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' (1.4.105)इति युष्मदाद्युपपदे मध्यमादिपुरुषविधानाद् वाक्यसंस्कारप्रयुक्तमपि शास्त्रमेतदिति सूचितम्। अत्र `कौ' इत्यादिकं पदं प्रागेव व्यवस्थाप्य `स्तः' इत्यादेः पदस्य
संस्कारे क्रियमाणेऽनादिष्टावचः पूर्वं औकारादिर्भवतीति स्थानिवद्भावः स्यात्। अतः प्रतिषेध उच्यते।
ननु च `दध्यत्र' इत्येवमादौ' प्रतिषिद्धेऽपि स्थानिवद्भावे बहिरङ्गस्य यणादेशस्यासिद्धत्वादन्तरङ्गं द्वर्वचनं न प्राप्नोति। तत् किमित्येवमाह-- `अस्माद्वच-
नात् भवति' इति। न च शक्यं वक्तुम्--" स्थानिवद्भावप्रतिषेधात् `असिद्धं बहिरङ्गम्'(व्या.प.42) इत्येषा न प्रवर्त्तते" इति। यत्रोभयमेकपदाश्रयम्--
`पट्व्यौ पट्व्यः
शुच्यौ शुच्यः' इत्येवमादौ,तत्र स्थानिवद्भावप्रतिषेधस्यार्थवत्त्वान्नैष दोषः।
द्विर्वचनमेव बहिरङ्गम्; बह्वपेक्षत्वात्। तथा ह्यच उत्तरस्य योरऽनचीति च त्रितयं तदपेक्षते। यणादेशस्त्विकोऽचीति द्वयमेव।
`वरे' इति। ननु चात्र समासे सति सप्तम्या लुका भवितव्यम्। तत् कथं वरे
इति निर्देशः? अत एव निपातनादलुगित्यदोषः। अन्ये त्वीकारप्रश्लेषोऽत्रेति
वर्णयन्ति। एवं च सम्बन्धं कुर्वन्ति--`वरे योऽजादेशस्तस्य विधिं प्रति न
स्थानिवत्, ईविधिं च प्रति न स्थानवत्' इति। तेनामलक्याः फलं विकार इति नित्यं
वृद्धशरादिभ्यः' (4.3.144) इति मयट्, तस्य `फले लुक्' (4.3.163) इति लुक्, अतः
`लुक् तद्धितलुकि' (1.2.49) गौरादिलक्षणस्य ङीषो लुकि कृते तस्य स्थानिवद्भावात् `
यस्येति च' (6.4.148) इति लोपः प्राप्नोति। ईकारे परतो यो विधिस्तं प्रति स्थानिवद्भावप्रतिषेधान्न भवति। ननु चाजादेशः परनिमित्तकः लोपः पूर्वविधौ स्थानिवद्भवतीत्यु-
च्यते, न च लुका पौर्वापर्यमस्तीत्यत एव स्थानिवद्भावो न भविष्यति? तदप्रयोजनमीकार-
प्रश्लेषस्य। लोपेनापि तर्हि पौर्वापर्यं नास्तीति पटयतीत्यादावपि स्थानिवद्भावो न
स्यात्। अथ तत्र स्थानिद्वारकं पौर्वापर्यं सम्भवति, इहापि तथा स्यात्। ये त्वीकार-प्रश्लेषं नेच्छन्ति, त आयलक्याः फलं विकार आमलकमित्येतदर्थं नेति योगविभागं

कुर्वन्ति।

`यायावरः' इति। अत्यर्थं यातीति `धातोरेकाचः' (3.1.22) इत्यादिना यङ्,
द्विर्वचनम्, अभ्यासस्य ह्रस्वः, `दीर्घोऽकितः' (7.4.83) इति दीर्घः, ततो वरच्च, अतो लोपे कृते `लोपो व्योर्वलि' (6.1.66) इति यकारलोपः। `अतो लोपः परनिमित्तकः' इति।आर्धधातुके परतो विधानात्। यद्यतो लोपः परनिमित्तकः, ततः `अचो यत्' (3.1.97)
इत्यत्र `अज्ग्रहणं किम्, यावता हलन्ताण्ण्यतं वक्ष्यति' इति चोद्यं समुत्थाप्य `
अजन्तभूतपूर्वावपि यथा स्यात्--- दित्स्यं धित्स्यम्' इति यद् वक्ष्यति तद् विरुध्यते; न हि परनिमित्तकेऽतो लोपेऽजन्तभूतपूर्वाद् यतो विधिः सम्भवति, प्राक्कृदुत्प-
त्तेरतो लोपस्याभावात्, अभावस्तु परस्य निमित्तस्याभावात्? पक्षे भेदादविरोधः। तत्र ह्यार्धधातुक इति वर्त्तते। `आर्धधातुके' इति विषयप्तमी चैषा, परसप्तमी चेति पक्ष-द्वयम्; आर्धधातुकसमान्यविवक्षायां सामान्येन पौर्वापर्यं न सम्भवतीति विषयसप्तमी भवति आर्धधातुकव्यक्तिविवक्षायां तु व्यक्तेः पौर्वापर्यं सम्भवतीति परसप्तमी। यदा
तु व्यक्तिद्वारकं सामान्यस्य पौर्वापर्यं विवक्ष्यते; तदापि परसप्तम्येव।
तत्राद्ये पक्ष आर्धधातुके विषयभूते प्रागेव यदुत्पत्तेरतो लोपो भवति, इतरत्र तु
तस्मिन्नुत्पन्ने। तत्र `अचो यत्' (3.1.97) इत्यत्र यदज्ग्रहणस्य प्रयोजनं वक्ष्यति, तत् पूर्वं पक्षमाश्रित्य। यत् पुनरिहातो लोपः परनिमित्तक इत्युक्तम्, तदितरं
पक्षम्। तस्माद् विषयभेदादविरोधः। परसप्तमीपक्षे तु तत्राज्ग्रहणं विस्पष्टार्थमेव वेदितव्यम्।
कथं पुनर्ज्ञायते परसप्तमीपक्षोऽपि तत्राभिमत इति ? `अनुदात्तेतश्च हलादेः' (3.2.149) इत्यादिग्रहणात्। तद्ध्येवमर्थं क्रियते-- हलन्तादित्येवं मा विज्ञायीति। एवं हि विज्ञायमाने जुगुप्सनः, मीमांसनः इत्यत्र युज् न स्यात्; अजन्त-
त्वात्। यदि च `आर्धधातुके' इति विषयसप्तम्येवैषाभिमता स्यात्, न परसप्तमीतदाऽऽदिग्रहणमनर्थकं स्यात्; आर्धधातुके विषयेऽकारलोपे कृते
जुगुप्सतिमीमांसत्योरपि हलन्तत्वात्। तस्मादादिग्रहणाद् विज्ञायते-- परसप्तमीपक्षोऽपि तत्राभीष्ट इति। विषयसप्तमीपक्षे तु तत्रादिग्रहणं विस्पष्टार्थमेव द्रष्टव्यम्।
`कण्डूतिः' इति । `कण्ड्वादिभ्यो यक्' (3.1.27) `स्त्रियां क्तिन्' (3.3.94) । `चिकीर्षकः, जिहीर्षकः' इति। चिकीर्षजिहीर्षशब्दाभ्यां ण्वुल्। `शिशेः, पिषेश्च' इति। `शिष्लु विशेषणे' (धा.पा.1452)`पिष्लृ संचूर्णने' (धा.पा.1453)। हित्वधित्व-ष्टुत्वजश्त्वेष्विति। `सेर्ह्यपिच्च' (3.4.87) इति हेरादेशे कृते `हुझल्भ्यो
हेर्धिः' (6.4.101) ति धिरादेशः। `ष्टुना ष्टुः' (8.4.41) इति ष्टुत्वम्, `झलां जश् झशि' (8.4.53) इति जश्त्वम्। ननु चात्र स्थानिवद्भावस्य प्राप्तिरेव नास्ति; यो ह्यनादिष्टादचः पूर्वस्तस्य विधौ स्थानिवद्भवतीत्युच्यते, न चामानादिष्टादचः पूर्वः, तत् किं प्रतिषेधेन ? नैष दोषः; स्थानिनो नाकरस्याऽनादिष्टाजपेक्षं पूर्वत्वम-
स्तीति तदादेशोऽप्यनुस्वारः स्थानिवद्भावादनादिष्टादचः पूर्व इति लभ्यते।
`शिषन्ति' इत्यादि। किमर्थं पुनरुदाहरणान्तरोपन्यासः, यावता शिण्ढीत्याद्य-न्तरोक्तमेवेदं युक्तमुदाहरण् ? एवं मन्यते-- यदि तदेवोदाह्रियते तदा यत्र परसवर्ण-
स्तत्रानुस्वारेण भवितव्यम्,तत्रैव हि स विधीयते; ततश्च नान्तरीयकत्वात् परसवर्ण-
विधौ स्थानिवद्भावप्रतिषेधेऽनुस्वारविधावपि स्थानिवद्भावप्रतिषेधः कृत एव, ततोऽ-
नुस्वारग्रहणं पृथङ न कर्त्तव्यमिति कस्यचिद् भ्रान्तिः स्यात्। तस्माद् यत्र
परसवर्णो न सम्भवति, तदेवोदाहरणं युक्तमिति।
`प्रतिदिव्ना' इति। दिवेः `कनिन्युवृषि' (द.उ.6.51) इत्यादिना कनिन् प्रत्यये रूपम्। `हलि च' इति। `उपधायाञ्च' (8.2.78)
इत्येतदिदानीन्तनकुलेखकैः प्रमादाल्लिखितम्। तथा हि `उपधायाञ्च' (8.2.78)इत्यत्र वक्ष्यति " प्रतिदीव्न इत्यत्र तु `हलि च' (8.2.77) इति दीर्घत्वम्" इति। ननु च स्थानिवद्भावे प्रतिषिद्धेऽपि `न भकुर्छु-राम्' (8.2.79) इति दीर्घत्वप्रतिषेधेनात्र भवितव्यम्, तत् किमित्येवमाह--`अस्माद् वचनाद् भवति' इति। न च स्थानिवद्भावप्रतिषेधसामर्थ्यादत्र प्रतिषेधो न भवतीति शक्यं परिकल्पयितुम्; स्थानिवद्भावप्रतिषेधस्य पिपठीरित्यत्रार्थत्वात्। अत्र हि पिपठिषतेः क्विपि कृतेऽतो लोपे रुत्वे च, रुत्वं पुनरस्य पूर्वत्रासिद्धमिति षत्व-
स्यासिद्धत्वात्, यदि स्थानिवद्भावो न प्रतिषिध्येत, ततोऽकारलोपस्य स्थानिवद्-
भावात् `र्वोरुपधाया दीर्घ इकः' (8.2.76) इत्यधिकाराद् रेफवकारान्तस्य भस्य
दीर्घत्वं प्रतिषिध्यते। न चैतद् रेफवकारान्तं भसंज्ञकम्, अपि तु नाकरान्तमिति।
`सग्धिः' इति। समाना ग्धिरिति विशेषणसमासः। `समानस्य च्छन्दस्यमूर्ध' (6.3.84) इति सभावः। `बब्धाम्' इति। `भस भर्त्सनदीप्त्योः' (धा.पा.1100), `अभ्यासे चर्च' (8.4.54) इत्यभ्यासभकारस्य जश्त्वं बकारः।

`चक्षतुः, जक्षुः' इति। `लिट्यन्यतरस्याम्' (2.4.40) इति घस्लादेशः, `
कुहोश्च'(7.4.62) इत्यभ्यासघकारस्य चुत्वं झकारः; तस्य पूर्ववज्जश्त्वं जकारः। बहुवचने घस्लादेश इति। `लुङ सनोर्घस्लु' (2.4.37) इत्यनेन।
`बहुखट्वकः' इति। अत्र
स्थानिवद्भावाद् `ह्रस्वान्तेऽन्त्यात्पूर्वम्' (6.2.174) इति, खकारस्योदात्तत्वं न भवति। `कपि पूर्वम्' (6.2.173) इति ट्वशब्दस्याकारास्यैव भवति।
`किर्योः, गिर्योः' इति। `र्वोरुपधाया दीर्घ इकः' (8.2.76) `हलि च' (8.2.77) इति दीर्घत्वं न भवति। एतच्च व्युत्पत्तिपक्षमाश्रित्योक्तम्, `कृग्रोरिच्च'
इति किरिगिरिशब्दौ व्युत्पाद्येते। अव्युत्पत्तिपक्षे त्वसत्यपि स्थानिवद्भावे धातुत्वाभावान्न भवत्येव दीर्घत्वम्। तथा ह्यव्युत्पत्तिपक्षमाश्रित्य `उपधायाञ्च'
(8.2.78)इत्यत्र वक्ष्यति--`उणादयऽव्युत्पन्नानि प्रातिपदिकानि' (हे.प.103) इति किर्यो-
गिर्योरित्येवमादिषु दीर्घो न भवति' इति। `वाय्वोः' इति। `लोपो व्योर्वलि'(6.1.66) इति यलोपो न भवति।

59.द्वर्वचनेऽचि। (1.1.59)

पूर्वं कार्यातिदेशः कृतः, इदानीं तु रूपातिदेशार्थमिदमारभ्यते। अथ वा
निमित्तात् पूर्वमित्येतस्मिन् पक्षेऽनन्तरसूत्रेण द्विर्वचनविधिं प्रति प्रतिषेधः प्राप्तः इत्यस्यारम्भो वेदितव्यः। `द्विर्वचनेऽचि' (1.1.59) इति समानाधिकरणे सप्तम्यौ। तत्राज् विशेष्यः, द्विर्वचनं विशेषणम्। विशेषणविशेष्यभावस्य च प्रयोजनं `दुद्यूषति' इति प्रत्युदाहरण दर्शयिष्यते। कथं पुनरज् द्विर्वचनशब्देनोच्यते ?
द्वर्वचननिमित्तत्वात्। अत एव वृत्तावाह-- `द्विर्वचननिमित्तेऽचि' इति। भवति हि
तन्निमित्तत्वात् ताच्छब्द्यम, यथा -- `आर्युर्घुतम्' इति। परसप्तमी चेयमपीति
`यस्मिनन् विधिस्तदादावल्ग्रहणम्' (व्या.प.127) इति अजादाविति द्रष्टव्यम्। परस्मिन्निति च प्रकृत्वात् परस्मिन्नजादाविति गम्यते।
अथ वा - द्वर्वचनस्य प्रत्ययविशेषनिमित्त्वाद् द्विर्वचनग्रहणेन प्रत्ययः सन्निधापितः, तेनाजादौ प्रत्यय इति प्रतीयते। यदि तर्ह्यजादावजादेशः स्थानिवद्भवति,
`पपौ' इति न सिध्यति, न ह्यजादावादेशः, किं तर्हि? अच्येव; इहापि व्यपदेशिवद्भावेना-जादित्वमस्तीत्यदोषः। इह तर्हि न सिध्यति-- `चक्रतुः' इति;
अच्येव तु यणादेशो विधीयते, न त्वजादौ ? नैष दोषः; यो ह्यत्राचि यणादेशो विधीयते सोऽजादावपि भवत्येव। यदि द्विर्वचननिमित्तेऽच्यजादेशः
स्थानिवद्भवति सर्वस्यामवस्थायां द्विर्वचनादुत्तरकालमपि स्यादित्यत आह--`द्विर्वचन एव कर्त्तव्ये' इति। एवकारेण द्विर्वचन क्रिया-
कालात् कालान्तरे स्थानिवद्भावस्याभावं दर्शयति। कथं पुनरेतल्लभ्यते, यावतैकं
द्विर्वचनग्रहणम्, तेन चाज् विशेषितः ? एवं मन्यते-- द्वितीयमपि द्विर्वचनग्रहणमन-
न्तरसूत्रादिहानुवर्त्तते।
अथ वा- द्विर्वचनञ्चेत्येकशेषं कृत्वा `द्विर्वचने' इति निर्देशः कृतः।
तत्रैकेन द्विर्वचनग्रहणेन `द्वर्वचननिमित्तेऽचि' इत्थेषोऽर्थो लभ्यते। द्वितीयेन तु `द्विर्वचन एव कर्त्तव्ये' इति। इह द्विर्वचने कर्त्तव्ये स्थानिवद्भावो
विधीयते इत द्विर्वचनकार्यार्थं एवैष प्रतीयते। साच्कस्य द्विर्वचनं विधीयमानमनच्क-
स्य न प्राप्नोति युज्यते द्विर्वचनकार्यार्थत्वमस्य। `द्वर्वचनकार्यार्थत्वमस्य। `द्विर्वचनकार्यार्थे त्वस्मिन् --`चक्रतुः,चक्रुः' इत्यत्रास्यानच्कस्य द्विर्वचने कृते
सतीष्टमभ्यासरूपं न सिध्यति' इतिव्यामोहाद् यो मन्यते, तं प्रत्याह--
`रूपातिदेशश्चायम्' इति। `च' शब्दोऽवधारणे, रूपातिदेश एव, न कार्यातिदेश इत्यर्थः। कुतः पुनरेष निश्चयः-स `रूपातिधेशश्चायम्' इति ? अज्ग्रहणात्।
तस्य ह्येतत् प्रयोजनम्-- `जेघ्रीयते देध्मीयते' इत्यत्र मा भूदिति। यदि चायं द्विर्वचनकार्यातिदेशः स्यान्न रूपातिदेशः; अज्ग्रहणमनर्थकं स्यात्। भवत्वत्र
स्थानिवद्भावः, तथापि न कश्चि-द्विशेषः। तथा हि-- यद्यप्यत्र स्थानिवद्भावः, एवमपि द्विर्वचनकार्येण भवितव्यम्; अथापि न स्थानिवद्भावः, एवमपि
भवितव्यम्--उभयत्रापि साच्कत्वात्, ततश्च कथमेतत्
प्रत्युदाहरणम् ? तदेतदज्ग्रहणं कथमर्थवद् भवति? यद्येष रुपादेशः ररूपेऽस्यातिदि-
श्यमाने यद्यज्ग्रहणं न क्रियते तदिहापि रूपातिदेशे सति ध्रा इति, ध्मा इति च द्वि-र्वचनं स्यात्, तथाऽनिष्टमभ्यासरूपं प्रसज्येत। तस्मादज्ग्रहणाद् रूपातिदेशोऽय-
मिति निश्चीयते। यद्येवम्, भेदनिबन्धनो वतिर्नं प्राप्नोति; स्थान्येव हि पुनरात्मीयं रूपं प्रापित इति कुतो भेदः ? आतिदेशिकानामतिदेशिकत्वेन रूपभेदस्य विवक्षितत्वाददोषः।
`द्विर्वचन एव कर्त्तव्ये' इति यदुक्तं तस्यार्थं विस्पष्टीकर्तुमाह--`नियतकालः' इति। कृते द्विर्वचने इत्यादिना तदेव नियकालत्वं दर्शयति।
`जघ्नतुः' इति। `अभ्यासाच्च' (7.3.55) इति हकारस्य कुत्वम्।
`आटिटत्' इति। अटतेर्हेतुमति णिच्; लुङ्, चङ, `चङि' (6.1.11) इति `अजादे-
र्द्वितीयस्य' (6.1.2) इति द्विर्वचनम्। `आडजादीनाम्'(6.4.72) इत्याड् भवति।

`निनय' इत्यादि। `णलुत्तमो वा' (7.1.91) इति यदा णित्त्वं नास्ति तदा गुणः, यदा णित्वं तदा वृद्धिः।
`जग्ले,मग्ले' इति। `ग्लै हर्षक्षये' (धा.पा. 904), `म्लै गात्रविनामे' (धा.पा.904) `आदेश उपदेशेऽशिति' (6.1.45) इत्यात्त्वम्। भावे आत्मनेपदम्,
`लिटस्तझयो-रेशिरेच्' (3.4.81)इत्येश्। `श्रवणमाकारस्य न भवति' इति। यदा कालावधिपरिग्रहार्थं
द्विर्वचनग्रहणं न क्रियते, तदोत्तरकालमपि स्थानिरूपं प्रसज्येत, ततश्चाकारस्य श्रवणमेव स्यात्। आतो लोपस्य तु गोद इत्येवमाद्यवकाशः। श्रूयमाणे चाकारे परेण सह
वृद्धिः स्यात्। `दुद्युषति' इति। दिवेः `सनीवन्तर्ध' (7.2.49) इत्यादिना यदा पक्ष इडागमो न क्रियते तदा `इको झल्' (1.2.9) `हलन्ताच्च' (1.2.10) इति कित्त्वम्, ततः
`च्छ्वोः शूडनुनासिके च' (3.4.19) इत्यूठ्। स च द्विर्वचननिमित्तं न भवति। तत्र यदि द्विर्वचननिमित्तत्वेन नाज् विशेष्यते, ऊठि परतो यो
यणादेशस्तस्यापि स्थानिवद्भावः स्यात्। एवं चाभ्यासरूपमिवर्णान्तं श्रूयेत। द्विर्वचननिमित्तच्परिग्रहे तु `द्यु' इत्यस्य द्विर्वचनं भवति। तत्र
हलादिशेषह्रस्वत्वयोर्दुद्यूषतीत्यभ्यासरूपमुकारा-
न्तं सिध्यति।।

60. अदर्शनं लोपः।(1.1.60)

`अदर्शनम्' इत्यादि। ननु चादर्शनानुपलब्धिशब्दावनुपलब्धिसामान्यवचनौ। अश्रवणानुपच्चारणशब्दौत्वनुपलब्धिविशेषवचनौ। तथा ह्यश्रवणादिशब्दोच्चारणे
शब्दस्यैवानुपलब्धिः प्रतीयते, नानुपलब्धिमात्रम्, न च सामान्यविशेषशब्दानामेकार्थता, तत्
किमित्येवमाह-- `अनर्थान्तरम्' इति। एवं मन्यते- सामान्यशब्द अपि प्रकरणवशाद्
विशेषे वर्तन्ते। इह च शब्दा व्युत्पाद्यत्वेन प्रकृताः, तस्माद् यद्यप्यदर्शनानुपलब्धिशब्दौ सामान्यवचनौ, तथापीह प्रकरणसामर्थ्याद् विशेषे शब्दानुपलब्धावेव वर्त्तेते।
इह वृद्धिरित्यादिकाः संज्ञा शब्दानां विहिताः। तद्वदिहाप्यदर्शनमित्यस्यैव शब्दस्य `लोपः' इत्येषा संज्ञा स्यात्। ततश्च लोपप्रदेशेष्वदर्शनशब्दस्यैवोपस्थानात्
स एवादेशः स्यादित्यत आह-- `एतैः शब्दैः' इत्यादि। कथं पुरेतल्लभ्यते ? एवं मन्यते-- `नवेति विभाषा' (1.1.44) इत्यत
इतिकरणोऽर्थनिर्दशार्थोऽनुवर्त्तते। तेन ह्यवधारणं गम्यते, यथा--- `क्रिया हि द्रव्यं विनयति नाद्रव्यम्' इति। विनापीकरणेन शब्द-स्वरूपस्य संज्ञा सिध्यत्येव,
यथा-- `तरप्तमपौ घः' (1.1.22) इत्यत्र। तस्मादिति-
करणानुवृत्तिसामर्थ्याददर्शनमिति योऽर्थः प्रतीयते, तस्यैवेषा संज्ञा, न शब्दस्य।
किञ्च `लोपः' महती संज्ञा क्रियते यथान्वर्थसंज्ञा विज्ञायेत। लोपनं लोपः; अनुपलब्धिरनुच्चारणमित्यर्थः। न चादर्शनमित्येतच्छब्दरूपमेवाभावात्मकम्, किं
तर्हि ? तदर्थः। तस्मादन्वर्थसंज्ञाविज्ञानादर्थस्यैवैषा संज्ञा। यदि तर्ह्यर्थस्यैवैषा
संज्ञा, ततोऽतिप्रसङ्गः। सर्वो हि शब्दः स्वविषयादन्यत्र न दृश्यते। ततश्च `त्रपुजतु' इत्यत्र क्विपोऽदर्शनस्य लोपसंज्ञा स्यात्। एवञ्च सति `प्रत्ययलोपे प्रत्यय-
लक्षणम्' (1.1.62) इति ह्रस्वस्य पिति कृति तुक्' (6.1.71) इति तुक् प्रसज्यत
इत्यत आह-- `प्रसक्तस्य' इत्यादि। तर्हयदर्शनमात्रस्यैषा संज्ञा ? न किं तर्हि ? शास्त्रादर्थाद्वा कुतश्चित् प्रसक्तस्य यददर्शनं तस्यैव। तदिह न केनचित्प्रकारेण
क्विप्रसङ्गोऽस्ति, तत्कुतोऽस्तिप्रसङ्गः ? कतं पुरेष विशेषो लभ्यते, यावता नेहप्रसक्तग्रहणमस्ति, नापि तत् कृतम् ? एवं मन्यते-- `स्थानिवत्' इत्यतः
स्थानिग्रहण-मिहाप्यनुवर्तते, स्थानी, प्रसङ्गवन्, प्रसक्तः-- इति पर्याया ह्येते। तेनायमर्थो लभ्यते-- प्रसक्तस्य यददर्शनं तस्येयं संज्ञेति।
`गौधेरः' इति। `गोधाया ढ्रक्' (4.1.129) एयादेशः, `लोपो व्योर्वलि' (6.1.76) इति यकारस्य शास्त्रेण प्रसक्तस्य लोपः। `पचेरन' इत्यत्रापि सीयुटः शास्त्रेण। एवम-
न्यत्रापि यथायोगं प्रसक्तता वेदितव्या। `जीरदानुः' `आस्त्रेमाणम्' इति। पूर्वपद् वकारस्य लोपः। `स्त्रिवु गतिशोषणयोः' (धा.पा. 1109) यस्य
`सर्वधातुभ्यो मनिन्' (5.5.584) इति मनिन्प्रत्ययान्तस्य द्वितीयैकवचन उपधादीर्गेणैत्वे चकृते `आस्त्रेमाणम्'
इति। `अपरस्यानुबन्धादेः' इति। ककारादेरनुबन्धस्य। आदिशब्देन सीयुट्सकारस्य।

61. प्रत्ययस्य लुक्श्लुलुपः। (1.1.61)

यथा वृद्धिशब्दस्तद्भावितानमतद्भावितानामपि संज्ञा, तथा लुगित्यादिका
अप्यतद्भावितस्यापि संज्ञाः प्राप्नुवन्ति, ततश्च संज्ञासंकरः स्यात्। संज्ञासंकरे हि सति संकीर्येरन्नित्यत आह-- `अनेकसंज्ञाविधानाच्च' इत्यादि।
यद्यतद्भावितस्या-

प्येताः संज्ञाः स्युः, अनेकसंज्ञाकरणमर्थकं स्यात्; एकस्यैव सर्वकार्यसिद्धः।

तस्मादनेकसंज्ञाविधानाद् यददर्शनं यया संज्ञयोच्चारितया भावितम्= निष्पादितं, तस्यैव प्रत्ययादर्शनस्य सा संज्ञा, नान्यस्येति न भवति संकरः। एवं तर्हीतरेतराश्रयदोषः प्राप्नोति, तथा हि-- संज्ञया विशिष्टमदर्शनं भाव्यम्, सति च तस्मिन् प्रत्यया-

दर्शने संज्ञया भाव्यमित्यत आह-- `विधिप्रदेशेषु च' इत्यादि। तददर्शनं विधीयते यस्य विहितस्य लुगित्येवमादिकाः संज्ञा भवन्तीति भाविन्याः संज्ञया विज्ञानान्न भवतीतरेतराश्रयदोषः।

`अत्ति' इति। `अदिप्रभृतिभ्यः शपः' (2.4.72) इति शपो लुक्। `जुहोति' इति।

`जुहोत्यादिभ्यः श्लुः' (2.4.75)। `वरणाः' इति। वरणानां वृक्षाणामदूरभवो ग्राम इति। `प्राग्दीव्यतोऽण्' (4.1.83) तस्य `वरणादिभ्यश्च' (4.2.82) इति लुप्।

`अगस्तयः, कुण्डिनाः' इति। यदि प्रत्ययग्रहमं न क्रियेत, आगस्त्यस्याप-

त्यानि बहूनि `ऋष्यन्धकवृष्णिकुरुभ्यः' (4.1.114) इति ऋष्यण्। कुण्डिन्या अपत्यानि बहूनि गर्गादित्वाद् यञ् (4.1.165),

तयोरागस्त्यकौण्डिन्यशब्दयोर्जसि परतो यदा `

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्' (2.4.70) इति लुक् क्रियते,अगस्तिकुण्डिनचौ

चादेशौ; तदा वैषम्यादेकैकस्य षष्ठीनिर्दिष्टस्य स्थानिनस्त्रय आदेसाः पर्यायेण

स्युः। तत्र यदा लुक् क्रियते तदा विभक्तिमात्रस्य श्रवणं प्राप्नोति। अथाप्यलोऽ-

न्त्यस्य स्यात् ?एवमप्यागस्त्यः,कौण्डिन्यः इति स्यात्; अगस्तयः, कुण्डिना इति चेष्यते। यदाप्यागस्त्यशब्दस्य कुण्डिनजादेशः, कौण्डिन्यशब्दस्य चागसत्यादेशः, तथाप्यनिष्टमेव प्राप्नोति। आगस्त्यशब्दस्य हि जसन्तस्य अगस्तयइति रूपमिष्यते, कौण्डिन्यशब्दस्य तु कुण्डिना इति। अत एवागस्तयः कुण्डिना इत्यनयानुपूर्व्या तयोरुपन्यासः।

अथाप्यान्तरतम्यादागस्त्यशब्दस्यागस्तिशब्द एवादेशो भवति, न कुण्डिनजिति?

कौण्डिन्यशब्दस्यापि कुण्डिनजादेशो भवति, नागस्तिशब्द इति ? एवमपि नैवानिष्टापत्ते-

र्मुक्तिः। तथा हि-- एवं ह्यगस्तयः, कुण्डिना इति च सिध्यति, तथापि प्राग्दीव्यतीये-ऽजादौ प्रत्यये विवक्षिते सति `वृद्धाच्छः' (4.2.114) इति च्छोः न स्यात्,अवृद्ध-त्वात्। प्रकृतेः। प्रत्ययग्रहणे तु सति तददर्शनस्यैवेयं संज्ञा विहितेति तस्यैव लुग् भवति। परिजादिप्रत्ययविवक्षायामपि `गोऽत्रेऽलुगचि' (4.1.89) इति लुकि

प्रतिषिद्धे वृद्धाच्छप्रत्ययश्च। अगस्तीनां छात्रा आगस्तीया इति। कौण्डिन्यशब्दात् तु सत्यपि लुकि `कण्वादिभ्यो गोत्रे' (4.2.111) इत्यणेव भवति-- कौण्डिन्याश्चात्रा इति। तेन तत्र छप्रत्ययाभावदोषो न प्रसञ्जनीयः।

62. प्रत्ययलोपे प्रत्ययलक्षणम्। (1.1.62)

`प्रत्ययलक्षणम्' इति। प्रत्ययो लक्षणं यस्येति कार्येऽन्यपदार्थे बहुव्रीहिः। प्रत्ययनिमित्तमित्यादिना सूत्रारम्भस्य प्रयोजनमाह।

ननु च स्थानिवद्भावनाप्येतत् सिध्यति, नैतदस्ति; अलाश्रयमपि हि प्रत्ययलोपे प्रत्ययलक्षणं कार्यमिष्यते। तथा ह्यग्निचिदित्यत्र `ह्रस्वस्य पिति कृति तुक्' (6.1.71) इत्यलाश्रयोऽपि तुग् भवत्येव। `अग्निचित्' इति। `अग्नौ चेः'

(3.2.9) इति क्विप्। अधोगिति हल्ङ्यादिसूत्रेण तिलोपः; अदादित्वाच्छपो लुक् (2.4.72) `दादेर्धातोर्घः' (8.2.32) इति धत्वम्, `एकाचो बशो भष्' (8.2.37) इत्यादिना भष् धकारः, `झलाञ्जशोऽन्ते' (8.2.39) इति जश्त्वम्, घकारस्य गकारः,तस्य `वावसाने' (8.4.56) इति चर्त्वं ककारः।

`प्रत्ययः' इति। `वर्तमाने' इति पूर्वसूत्रात्। `आहो यमहनः' (1.3.28)इत्या-त्मनेपदम्। `गमहन' (6.4.99) इत्यादिनोपधालोपः। `हो हन्तेः' (7.3.54) इति घत्ष। `

संग्मीय' इति। संपूर्वाद् गमेः `समो गमि' (1.3.29) इत्यादिनात्मनेपदम्। `इटोऽत्' (3.4.146) इत्यद्भावः। `बहुलं छन्दसि' (2.4.73) इति शपो लुक्। पूर्ववदुपधालोपः।

`अनुनासिकलोपो न भवति' इति। `अनुदात्तोपदेश' (6.4.37) इत्यादिना।

`रैकुलम्' इति। षष्ठीसमासः। `गोहितम्' इति। `चतुर्थी' (2.1.36) इत्यादिना। अस्त्यत्र षष्ठीचतुर्थ्येकवचनयोः प्रत्ययर्लोपः; किं त्वयावादेशयोरचि विधानात्

तद्विधौ वर्ण आश्रयीते, न तु प्रत्ययः। तेन वर्णनिमित्तकौ तौ न प्रत्ययनिमित्त-

काविति न भवतः। ननु च चात्र प्रत्ययस्य लोपः क्रियते, किं तर्हि ? लुक्, नैतदस्ति; लोपशब्दोऽपि सामान्येन तद्भावितस्यातद्भावितस्य चाऽदर्शनस्य संज्ञा। तस्माल्लुगपि लोपो भवत्येव।।

63. न लुमताङ्गस्य। (1.1.63)

`लुमता' इति। लुशबोद यस्मिन्निस्ति स लुमान्। कः पुनरसौ ? लुगित्यादिसंज्ञाशब्दः। करणे चेयं तृतीया, हे तौ व, इत्थम्भूतलक्षणे वा। लुमता करणेन लुप्ते
प्रत्यये, तेन हेतुना वा, तदुपलक्षितेन वेत्यर्थः। अथ प्रत्य इत्येतत् कुतो लभ्यते ? प्रत्ययादर्शनस्यैव लुगादिसंज्ञाविधानात्।
`लुमताशब्देन लुप्ते प्रत्यये यदङ्गम्' इति। तत् पुनस्तमेव प्रत्ययं
निमित्तमाश्रित्य येनाङ्गसंज्ञा प्रतिलब्धा तद् वेदितव्यम्।तस्य प्रत्ययलक्षणं
कार्यं न भवतीत्यविशेषाभिधानेऽपि प्रत्यासत्तेर्य एवासौ लुमता लुप्तः प्रत्ययोऽङ्गसंज्ञाया निमित्तं तल्लक्षणमिति गम्यते। `गर्गाः' इति. `गर्गादिभ्यो यञ्' (4.1.105) `यञञोश्च' (2.4.64) इति बहुषु लुक्। अत्र `तद्धितेष्वलचामादेः' (7.2.117) इति
वृद्धिर्न भवति। `मृष्टः' इति। मृजेस्तदस्, अदादित्वाच्छपो लुक्, व्रश्चादिसूत्रेण षत्वम्, ष्टुत्वम्, `मृजेर्वृद्धिः' (7.2.114) इति वृद्धिर्न भवति। `जुहुतः' इति। तसि परतो जुहोत्यादिभ्यः श्लौ कृते सार्वधातुकलक्षणो गुणो न भवति। सर्वत्र यमेव प्रत्ययमाश्रित्याङ्गसंज्ञा जाता स एव वृद्ध्यादेः कार्यस्य निमित्तम्। इह च विशेषस्यानाश्रणान्न केवलमङ्गाधिकारविहितं कार्यं प्रतिषिध्यते; अपि त्वनङ्गा4धिकारविहितमपि। तेन गर्गाः, बिदाः, उष्ट्रग्रीवा इत्यत्र `ञ्नित्यादिर्नित्यम्' (6.1.197) इत्याद्युदात्तत्वमनङ्गाधिकारविहितमपि न भवति। इह च -- अत्रय इति तद्धितस्य `कितः' (6.1.165) इत्यन्तोदात्तत्वम्। गर्गाः, बिदा इति यथाक्रमं गर्गादियञ्। `अनृष्यान्नतर्ये विददिभ्योऽञ्' (4.1.104) इत्यञ्। `यञञोश्च' (2.4.64) इति लुक्। उष्ट्रग्रीवा इति। `इवे प्रतिकृतौ(5.3.96) इति विहितस्य कनो `देवपथादिभ्यश्च' (5.3.100) इति लुप्। अत्रय इति अत्रेरपत्यार्थे `इतश्चानिञः' (4.1.122) इति विहितस्य ढकः `अत्रिभृगुकुत्सवसिष्ठ' (2.4.65) इत्यादिना बहुषु लुक्। `पञ्च, सप्त' इति। `ष़ड्-
भ्यो लुक्' (7.1.22) इति जश्शसोर्लुक्। `पयः साम'इति। अत्रापि `स्वमोर्नपुंसकात्'
(7.3.23) इति। अत्र यद्यपि लुमता लुप्तः प्रत्ययः, तन्निमित्ता चाङ्गसंज्ञा, तथापि प्रत्ययलक्षणेन `सुप्तिङ्गन्तं पदम्' (1.4.14) इति पदसंज्ञा भवत्येव; यस्मान्नासाव-ङ्गस्य कार्यम्, अपि तु सविभक्तिकस्य समुदायस्य प्रत्ययस्य हि पूर्वभागोऽङ्गम्. न चेह तस् लुमता यो लुप्तः प्रत्यमाश्रित्याह्गसंज्ञा भवति तमेवाश्रित्य पदसंज्ञा
प्राप्नोति। पदसंज्ञायञ्चेह सत्यां पय इत्यत्र `ससजुषो रुः' (8.2.66) इति रुत्वम्। खरवसनियोर्विसर्जनीयश्च पदकार्यं भवति। `पञ्च, सप्त,साम' इति। अत्रापि `नलोपः प्रा-
तिपदिकान्तस्य' (8.2.7) इति नलोपः पदसंज्ञाकार्यम्। `कार्यते' इति। ण्यन्तात्
कर्मणि लकारः, `सार्वधातुके यक्' (3.1.67) अत्र न लुमता प्रत्ययो लुप्तः किं तर्हि ? `णेरनिटि'(6.4.51) इति; अत्र `आतो लोपः' (6.4.64) इत्यस्माल्लोपग्रहणानुवृत्तेः। तेन प्रत्ययलक्षणा वृद्धिर्भवत्येव।।

64. अचोऽन्त्यादि टि। (1.1.64)

`अन्त्यादि'इति बहुव्रीहिः अचां मध्ये योऽन्त्योऽच्,स आदिर्यस्य शब्दरूप-
स्य तत् तथोक्तम्। ननु चान्त्यशब्दोऽत्राचामित्येतदपेक्षत इत्यसामर्थ्यादादिशब्देन सह समासो न प्राप्नोति, नैष दोषः; अन्त्यशब्दो हि सम्बन्धिशब्दः, सम्ब्नधिशब्दानां नित्यसापेक्षत्वेन गमकत्वात् सापेक्षत्वेऽपि समासो भवति, यथा देवदत्तस्य गुरुकुल-
मिति।
`निर्धारणे षष्ठी' इति। `यतश्च निर्धारणम्' (2.3.41) इत्यनेन यदि निर्धारणे षष्ठीयम्, एवं हि सति निर्धारणमनेकसन्निपाते भवतीत्यच इत्येकवचनं न स्यात्।
बहुत्वद्बहुवचनेन भवितव्यमित्यत आह -- `जातावेकवचनम्' इति। जातेरेकत्वादिति भावः।
`अचां सन्निविष्टानां योऽन्त्योच्' इति। कथं पुनरजित्येष विशेषो लभ्यते, यावता नेह द्वितीयमज्ग्रहणम्, नापि प्रकृतम् ? एवं मन्यते -- समानजातीयस्यैव लोके निर्धारणं प्रसिद्धम्। तथा हि, कृष्णा गवां सम्पन्नक्षीरतमेति द्वितीयं गोशब्दमन्तरेणापि गौरेव प्रतीयते। तस्मादिहापि यद्यपि द्वितीयमज्ग्रहणं नास्ति, तथापि समानजातीयोऽजेव
निर्धार्यमाणोऽवसीयत इति। अन्ते भवोऽन्त्यः, दिगादित्वात् यत्। `तदादि' इति। स
आदिर्यस्येति विग्रहः। `इच्छब्दः' इत्यादिनि रूपोदाहरणानि। कार्यं पुनरिच्छब्दस्य
टिसंज्ञायामग्निचितमाचष्ट इति णिचि कृते `णाविष्टवत् प्रातिपदिकस्य' (वा.813) इति
टिलोप अग्निं चयतीति।
`आताम्, आथाम्' इति। अनयोस्तु टिसंज्ञाकार्यम्-- `टित आत्मनेपदानां टेरे'(3.4.97) टेरेत्वम्। `पचेते, पचेथे' इति कार्योदाहरणे। अथ वह्मिमहिङोरिकारस्य कथं
टिसंज्ञा, यावता न सोऽस्ति यस्य सोऽन्त्यः, अजादिरिति व्यपदिश्यते ? नैष दोषः; `आद्यन्तवदेकस्मिन्' (1.1.21) इतिव्यपदेशिद्भावेनादिः, अन्त्य इति व्यपदेशो भविष्यति।

65. अलोऽन्त्यात्पूर्व उपधा। (1.1.65)

अलोऽन्त्यादितिसमानाधिकरणे पञ्चम्यौ। `धात्वादौ वर्णसमुदाये'इति। ननु च नेह वर्णसमुदाय ग्रहणमस्ति, नापि तत् प्रकृतम्। तत् कथमेषोऽर्थो लभ्यते ? अन्त्यग्रहणात्, समुदायस्यैवान्त्योऽल् भवति, न केवलः। तस्मादन्त्यग्रहणादेषोऽर्थो लभ्यते।

`अलेव' इति।एवकारकरणादेवाल्समुदायो व्यवच्छिद्यते। ननु च नेह द्वितीय-

मल्ग्रहणमस्ति, तदल्सुमुदायस्याप्येषा संज्ञा कसमान्न भवति ? लोकतश्च। लोके

ह्यमीषां बाह्मणानामन्त्यात् पूर्व आनीयतामित्युक्तएक एवान्त्यात् पूर्व आनीयते, न समुदायः । एवमप्यल एव व्यवहितस्य कस्मादेषा संज्ञा न भवति ? व्यहितेऽपि पूर्वशब्दो वर्त्तत एव। अत एव लौकिकाद् दृष्टान्तात्-- लोके ह्यन्त्यात् पूर्वमानयेत्युक्ते न कश्चिद् व्यवहितमानयति, अपि त्वननतरमेव। यदि ह्यल एवैषा संज्ञा, नाल्समुदायस्य,

`ऋतश्च संयोगादेर्गुणः'(7.4.10) इत्यत्र यद् वक्ष्यति-- `संयोगादिगुणविधाने संयोगोपधग्रहणं कर्त्तव्यम्' इति, तद्व्याहन्यते; न ह्यल एवोपधासंज्ञायामनेकानन्तरहल्समुदायात्मनः संयोगस्योपधात्वमुपपद्यते। संयोगावयवस्योपधात्वादवयवधर्मेण समुदायस्य तथा

व्यपदेश इत्यविरोधः। भवति ह्यवयवधर्मेण समुदायस्य तथा व्यपदेशः, यथा--

आढ्यमिदं नगरमिति ।

अथ वा- संयोगस्याल्पूर्वत्वोपलक्षणार्थं तत्रोपधाग्रहणं द्रष्टव्यम्। अकार इत्यादीनि रूपोदाहरणानि। कार्यं त्वकारस्योपधासंज्ञायां पाचकः, पाठक इत्यत्र `अत उपधायाः' (7.2.116) इति वृद्धिः। इकारलृकारयोस्तु भेदकः, छेदकः, वर्त्तकः वर्द्धक इति। अत्र `पुगन्तलघूपधस्य' (7.3.86) इति गुणः।

`शिष्टः' इति। `शासु अनुशिष्टौ' (धा.पा.1075), निष्ठा, `शास इदङ हलोः' (6.4.34) इति उपधाया इत्त्वम्। तत्र हि `अनिदिताम्' (6.4.24) इत्यादेः सुत्रादुपधाग्रहणमनुवर्त्तते। `शासिवसि' (8.3.60) इत्यादिना षत्वम्। `समुदायात्' इत्यादि। अकारसकारसमुदायात्। पूर्वस्य शकारस्योपधासंज्ञा मा भूदित्यर्थः। यदि हि स्यात्,तस्यैवेत्त्वं स्यात्।।

66. तस्मिन्नित निर्दिष्टे पूर्वस्य। (1.1.66)

किमर्थमिदम् ? `इको यणचि' (6.1.77) इत्येवमादावचीत्येवमादेराधाराधेयभावः

प्रत्यासत्तिनिबन्धनः, यथा -- गङ्गायां घोषः प्रतिवसतीति। अत्र गङ्गायाः सा च प्रत्यासत्तिर्यथा पूर्वमपेक्ष्य भवति, तथा परमपि। ततदश्च दध्युदकादिषु न ज्ञायते-- किं पूर्वस्येकः प्रत्यासत्तिभाजो यणादेशः, उत परस्येति। तत्र सन्देहेसति नियमार्थेयं परिभाषाऽऽरभ्यते। यद्येवं सन्देहविषय इयमारभ्यत इति यत्र सन्देहस्तत्रोपतिष्ठते,

ततश्च दध्युदकमिति सिद्धं स्यात्; इदं तु न सिध्यति-- दध्यत्रेति। ननु च विनैव परि-

भाषैतत् सिद्धम्, न ह्यत्र सन्देहोऽस्ति। इदं तर्हि न सिध्यति-- समिदत्रेति, अग्निचिदत्रेति। यदि हि यत्र सन्देहो नास्ति, तत्रैषा परिभाषा न स्यादिहानुपस्थानात्,

व्यवधानेऽपि यणादेशः स्यादेव। तस्मादसन्देहविषयेऽप्येषा परिभाषा यथा भवति स यत्नःकर्त्तव्यः। एष क्रियते-- इह (तस्मिन्निति) `सप्तमीनिर्दिष्टे पूर्वस्य' (1.1.66)

तावत् सूत्रं कर्त्तव्यम्; इयतैवाभिलषितार्थसिद्धेः। तत्राप्ययमर्थः-- स्वरूपग्रहणशङ्कां निराकर्तुमितिकरणो न कर्त्तव्यो भवति। न हि क्वचिच्छास्त्रं सप्तमीनिर्दिष्टः शब्दः श्रूयते, येन स्वरूपग्रहणमाशङ्क्येत। सोऽयमल्पेन सूत्रेण सिद्धे यन्महत्

सूत्रं करोति तन्महाविषयेयं परिभाषेति। सूचनार्थम्। एवं च महाविषयेयं भवति यदि

सर्वत्र-- सन्देहविषये, अन्यत्र च प्रवर्त्तते।

स्यादेतत्-- "सप्तमीनिर्दिष्ट" इत्युच्यमाने सप्तम्या यद्यप्यधिकरणं निर्दि-श्यते, तथापि तस्याधेयप्रधानत्वात् `इको यणचि' (6.1.77) इत्यत्राचि योल्व्यवस्थित-स्तस्मिन् यणादेशो विज्ञायते, ततश्चेहैव स्यात् दधि भुङ्क्त इति, इह तु न स्यात्-- दध्यत्रेति; यथान्यासे त्वेष दोषो नास्ति, तस्मात् महत् सूत्रं प्रणीतम्' इति, नैतदस्ति; यदयं `दाधाघ्वदाप्' (1.2.20) इति निर्देशं करोति, तज्ज्ञापयति-- अधिकरण

एव यणादेशादिकार्यं भवति, न त्वाधेय इति। अपि च-यथान्यासेऽप्यधिकरणस्यादेयप्रधानत्वादाधेय एव यणादेशादिकार्यं तेन सर्वत्रैषा परिभाषोपतिष्ठत इति सर्वमिष्टं सिद्धं भवति।

इह `स्वं रूपं शब्दस्याशब्दसंज्ञा'(1.1.68) इति स्वरूपस्यैव ग्रहणेन

भवितव्यम्। ततश्च यत्रैव तस्मिन्नित्येतत् पदमुच्चार्यते तत्रैवेयं परिभाषा स्यात् `तस्मिन्नणि च यष्माकास्माकौ' (4.3.2) इति। अस्ति ह्यत्र तस्याः परिभाषायाः

परनिवृत्तिः प्रयोजनम्-- यौष्माकीणं युष्मभ्यं देहि, आस्माकीनमस्मभ्यं देहीति।

युष्मभ्यं देहि यौष्माकीणम्, अस्मभ्यं देह्यास्माकीनमिति। `इको यणचि' (6.1.77)
इत्येवमादौ त्वेषा नोपतिष्ठते,इत्यत आह-- `तस्मिन्' इति।
`सप्तम्यर्थनिर्देशे' इति। एवं मन्यते-- इतिकरणो ह्यत्र कृतः, स च स्वरूप-
पदार्थकत्वं निरस्यार्थपदार्थकत्वं तस्मिन्नित्यस्य सम्पादयति, तेनार्थस्यैव ग्रहणं भवति। स त्वर्थोऽवश्यं येन केनचिचछब्देन निर्देष्टव्य इति नानार्थकत्वात् सामान्यवाचिना तस्मिन्नित्यनेन पदेन निर्दिष्ट इति।
ननु च शब्दस्यार्थेन पौर्वापर्यं न सम्भवतीत्यर्थेनासम्भवात् तद्वाचिना
शब्देन विज्ञास्यत इत्यदोषः। अत्रेदं चोद्यते-- अर्थस्य ग्रहणं यथा स्यात् स्वरूपस्य च ग्रहणं मा भूदित्येवमर्थमितिकरणः क्रियते, तच्च स्वरूपग्रहणम्
`तस्मिन्नणि च
युष्माकास्माकौ'
(4.3.2) इति सूत्रेण सम्भाव्यते; यदि च स्वरूपग्रहणं स्यात्, तत्रैव पूर्वग्रहणं कुर्यात्, न च कृतम्; तसमादवगम्यते-- अन्तरेणापीतिकरणमर्थस्यैव ग्रहणं भविष्यति, न स्वरूपस्येति नार्थस्तेन ?. स्तयमेतत्; ये तु मन्दवुद्ध्य एव प्रतिपत्तुमसमर्थास्तान् प्रति सुखावबधनार्थमितिकरणः क-तः।
निर्दिष्टग्रहणमिदर्थस्य विशेषणम्। इह च
शास्त्रे `इको यणचि' (6.1.77) इत्यादिषु वाक्येषु यत्र सप्तम्यर्थोऽस्ति तत्रासौ
निर्दिष्ट एव सर्वत्र। तदपार्थकं निर्दिष्टग्रहणविशेषणं व्यभिचाराभावादित्यत आह--
`निर्दिष्टग्रहणम्' इत्यादि। आनन्तर्यमव्यवधानमर्थो यस्य तत् तथोक्तम्। कथं पुनस्त-दानन्तर्यार्थं भवति ? ततस्तत्प्रतीतेः। तथा हि दिशिरयमुच्चारणक्रियः, निःशब्दोऽ-
प्ययमिह नैरन्तर्यं द्योतयति। तत्र निरन्तरं दिष्टः= निर्दिष्ट इति प्रादिसमासे
कृते स्फुटमेनानन्तरमुच्चारितमिति प्रतीयते।
किमर्थं पुनरानन्तर्यमाश्रितमित्यत आह-- अग्निचिदत्रेत्यादि। पूर्वशब्दोऽ-यं व्यवहितेऽपि वर्त्तते। तत्र यद्यानन्तर्य नाश्रीयते ततो व्यवहितेऽपि
स्यादित्यभिप्रायः। ननु च `अचि' इत्यौपश्लेषिकमधिकरणं विज्ञायते, न च व्यवहितमुपश्लिष्टं
भवति, तत् किमानन्तर्यार्थेन निर्दिष्टग्रहणेन ? असदेतत्; असति हि निर्दिष्ट्ग्रहणऔपश्लेषिकमधिकरणमेव न शक्यं विज्ञातुम्। यस्मात् पूर्वशब्दो व्यवहितेऽपि
वर्त्तमानः परस्यैव निवृत्तिं करोति, न व्यवहितपूर्वस्यापि। निर्दिष्टग्रहणे तु सति, सप्तम्या औपश्लेषिकाधिकरणाभिधायिन्याः प्रत्यासत्तिरुपादीयते। सा च पूर्वग्रहणेन न निवर्त्यते, परनिवृत्तिरेव क्रियत इत्येषोऽर्थो लभ्यते। तेन व्यवहितस्य कार्यंन भवति। उत्तरार्थं च निर्दिष्टग्रहणं कर्त्तव्यमेव।।

67. तस्मादित्युत्तरसस्य। (1.1.67)
किमर्थमिदम् ? `तिङ्ङतिङः' (8.1.28) इति याऽत्र सा तु न कारकविभक्तिः, किंतर्हि ? `दिक्शब्दादञ्चूत्तरपद' (2.3.29) इति दिग्योगलक्षणा। दिक्शब्दस्त्वध्या-
हार्यः, तत्र किं पूर्वशब्दमध्याहृत्यातिङः पूर्वस्य निघातः क्रियते ? उत परशब्दम-
ध्याहृत्य परस्य ? इति सन्देहे सति परिभाषेयं नियमार्ताऽऽरभ्यते।
`निर्दिष्टग्रहणमनुवर्त्तते'इति। तेन तस्यानन्तर्यार्थत्वाद्वयवहितस्य
कार्यं न भवतीति भावः। इहापीतिकरणोऽर्थनिर्देशार्थः क्रियते। तेन पञ्चम्यर्थग्रहणं भवति, न तु शब्दस्वरूपस्येत्यभिप्रायेणाह-- `तस्मात्' इति।
`पञ्चम्यर्थनिर्देशः'
इति। ननु च पूर्वसूत्रादेवेतिकरणोऽनुवर्तिष्यते, तत् किमर्थः पुनरिहेतिकरणः ? अनेन प्रकारेण पूर्वसूत्रादेकदेशोऽनुवर्त्तत इति ज्ञापनार्थ-।
तेनेतिशब्दवन्निर्दिष्ट-ग्रहणमनुवर्त्ततेत्येतदाख्यातं भवति।
अन्यस्त्वाह-- "इतिकरणं त्विहावधेरवधिमत्तन्त्रतां निवर्त्तयति। तेनावधेरे-वोत्तरस्य विज्ञायते, नावधिमतः। स्वरूपग्रहणनिरासार्थस्त्वितिकरणो न भवति; स्वरूपा-भावात्। यदपि `तस्माच्छसो नः पुंसि' (6.1.103) इति, तत्रापि पूर्वसवर्णदीर्घात्
पूर्वः शस् न सम्भवतीति न भवति सन्देहः। तस्मादवधेरवधिमत्तन्त्रतानिरासार्थ एवेति-
शब्दः' इति, अत्रोच्यते; यद्यवधेरेवोत्तरस्य कार्यं यथा स्यादवधिमतो मा भूदित्येवम-र्थं इतिकरणोऽवधेरवधिमत्तन्त्रतामपाकर्तुं क्रियते, नार्थस्तेन; लोकत एव तत्सिद्धेः; लोके हि तस्माच्छात्रादुत्तरो भोज्यतामित्युक्तेरवधेरेवोत्तरो भोज्यते, नावधिमतः। तदिहापि विनापीतिकरणेनावधेरेवोत्तरस्य कार्यं भविष्यति; नावधिमतः।
यदप्युक्तम्-- "तसमाच्छसो नः पुंसि' (6.1.103) इत्यत्रापि पूर्वसवर्णदीर्घात्
पूर्वः शस् न सम्भवति" इति, तदप्ययुक्तम्;तथा ह्यशब्दादिशब्दाच्च शसि परतः

पूर्वसवर्णदीर्घत्वे पूर्वत्र च वृक्षादिशब्दे शसन्ते व्यवस्थापिते गच्छत आन्
वृक्षानुपलभते गच्छतो वृक्षानानुपलभत इत्यत्र पूर्वसवर्णदीर्घात् पूरवं शश्
सम्भवत्येव।

अथ यत्रोभयनिर्देशस्तत्र कस्य कार्येण भवितव्यम् ? तत्र यानवकाशा सेतरस्याः षष्ठीं प्रकल्पयिष्यति, अतः षष्ठीनिर्दिष्टस्य कार्यं भविष्यति। यथा `आने मुक्' (7.2.82) इत्यत्र सप्तमी निरवकासा `अतो येयः' (7.2.80) इत्यत इति पञ्चम्याः
पूर्वसूत्रे सावकाशायाः षष्ठीत्वं प्रकल्पयिष्यति। तथा `ईदासः' (7.2.83) इति पञ्च-
म्याऽऽन इति पूर्वसूत्रे सावकाशायाः सप्तम्याः। यत्रोभे सावकासे तत्र परत्वात्
पञ्चमी सप्तम्याः षष्ठीं प्रकल्पयिष्यति। यथा-- `आमि सर्वनाम्नः सुट्' (7.1.52) इति`आज्जसेरसुक्' (7.1.50) इत्यत्र पञ्चमी सावकाशा। `आमि' इति सप्तम्युत्तरार्था।

तत्रादिति पञ्चमी आमीति सप्तम्याः षष्ठीत्वं प्रकल्पयति, तेन सर्वनाम्न उत्तरस्यामः सुड् भवति। इह तु `दीर्घात्' (6.1.75) `पदान्ताद्वा' (6.1.76) इति, यद्यपि
`च्छे च' (6.1.73) इति सप्तमी पूर्वसूत्रे सावकाशा, तथापि तस्याः स्वरित्त्वात्
पूर्वयोगादनुवृत्ताया निरवकाशत्वम्। अतः सा च सप्तमी पञ्चम्याः षष्ठीत्वं प्रकल्पयिष्यति। पञ्चमी तु पौर्वपर्यं प्रकल्प्य सावकाशा निवर्त्तते। तेनायं सूत्रार्थो भवति- दीर्घादुत्तरो यच्छः, तस्मिन् परतः पूर्वस्य दीर्घस्यैव तुग् भवतीति। `सार्वधा-
तुके यक्' (7.1.67) इत्यत्र निरवकाशापि सप्तमी धातोरिति पञ्चम्याः सावकाशाया अपि
षष्ठीत्वं न प्रकल्पयति; अन्यथा हि धातोरेवादेशा यगादयः स्युः। ततश्च `परश्च' (3.1.2) इत्यस्यानुवृत्तस्य बाधाद् यगादीनां चानुबन्धकरणस्य वयर्थ्य प्रसज्येत। न हि
धात्वादेशत्वे सति तेषां परत्वमुपपद्यते तु ते धातोः परे भवन्ति।।

68. स्वं रूपं शब्दस्याशब्दसंज्ञा। (1.1.68)

`शास्त्रे स्वमेव' इत्यादि। शास्त्रग्रहणं लोकेऽर्थस्यैव ग्राह्यत्वात्। शब्दस्येति `कृत्यानां कर्तरि वा' (2.3.71) इति कर्त्तरि षष्ठी, शब्दः स्वमेव रूपं ग्राहयति बोधयति, प्रत्याययतीत्यर्थः। कः पुनः शब्दस्य स्वरूपस्य च भेदः ? येन शब्दस्येत व्यतिरेकनिबन्धना षष्ठी भवति। परमार्थतो वस्तुगतो नास्त्येव भेदः। तथा हि--
स्वं रूपं शब्दस्य स्वभावः। तच्चेत् ततोऽर्थान्तरं स्याच् शब्दस्य वैस्वभाव्यमेव
स्यात्। असत्यपि तु वास्तवे भेदे बुद्धिविरचितं भेदमाश्रित्य षष्ठी भवति।
बुद्धिर्हि स्वबीजपरिपाकवशादाकारविशेषपरिग्रहवत्युपजायमाना वस्तुनोऽसत्यपि भेदे भेदमापादयति, यथा-- राहोः शिरः, स्वस्य स्वभाव इति। `न बाह्योऽर्थः' इति
एवकारेण यद्व्यवच्छिन्नं तद्दर्शयति।
अतिप्रसक्तस्यापवादमाह--`अशब्दसंज्ञा' इत्यादि। किमर्थं पुनरिदमारभ्यत
इत्याह-- `शब्देन' इत्यादि। शब्देनोच्चारितेनार्थः कार्योपयोगितया गम्यते, न शब्द-
स्वरूपम्। तथा हि-- गौरुपलभ्यतमित्युक्तेऽर्थमेवोपलब्धुमाद्रियते, न शब्दस्वरूपम्; व्याकरणे तु प्रत्ययविधानादिकार्यमर्थस्य न सम्भवति; तेन सह शब्दस्य पौर्वापर्याभावात्। न चार्थाद् विहितेन प्रत्ययेन कश्चित् प्रकृतोपयोगः। तेन `अग्नेर्ढक्' (4.2.
33) इत्युक्ते नायं संप्रत्ययो भवति। अग्निशब्दस्य योऽर्थः, स इह कार्यी, तस्येदं कार्यं विधीयत इति। ततश्च तस्यार्थस्य ये वाचकाः विधेयमिति। यथा -- आकृतिवादिनां
गौर्दुह्यतामिति शब्देन जातौ चोदितायां तत्र तत्कार्यासम्भवात् तदाधारायां व्यक्तौ संभवात् तत्साहचर्याच्च तस्यामेव व्यक्तौ संप्रत्ययो भवति, न जातौ; तथेहापि तन्मा
भूत् तद्वाचिनां संप्रत्यय इत्येवमर्थमिदमारभ्यते। तद्वाचिनामिति कर्मणि षष्ठी।
तद्वाचिनो मा विज्ञायीत्येवमर्थमिदमारभ्यत इत्यर्थः।
तत्र केचिदाहुः-- स्वरूपस्य पर्यायाणां च कार्ये प्रसक्ते श्रूयमाणस्यैव
तद् यथा स्यात्, पर्यायाणां भूदिति नियमार्था परिभाषेयमिति।
अन्ये तु-- " लिङ्गवती परिभाषा भवति' , यथा, `इको गुणवृद्धी' (1.1.3)
इति गुणवृद्धी लिङ्गम्। विध्यन्तरशेषभूता वा; यथा-- `विप्रतिषेधे परं कार्यम्' (कात.प.67) इति परस्य विध्यन्तरस्य शेषभावमापद्यते। न वास्या लिङ्गं विध्यन्तरशेषभावो
वा विद्यत इति संज्ञासूत्रमिदम्" इति प्रतिपन्नाः। यद्यपि वृत्तौ संज्ञाशब्दो

नोच्चारिनः, तथापि `स्वमेव रूपं शब्दस्य ग्राह्यम्' इत्येवं ब्रुवता वृत्तिकारेण संज्ञैवेत्याख्यातं भवति। अग्निशब्दादौ शब्दान्तरैः साधारणमपि रूपमस्ति शब्दत्वादि, असाधारणमपि अग्निशब्दत्वादि, तत्र साधारणरूपव्युदासेनासाधारणस्याग्निशब्दत्वादि-
रूपस्य परिग्रहार्थं `स्वम्' ग्रहणम्। तद्धि स्वमेव तस्य रूम्, इतरत् पुनः परस्यापि। प्रतीति प्रत्यनुपदेशाच्छब्दस्य स्वरूपमेवासन्नम्, नार्थः; विपर्ययात्, अहेयत्वा-
च्च, तन्नित्यसम्बन्धित्वाच्च। तथा ह्यनुकरणशब्दा ह्यर्थं जहति, न तु स्वरूपम्। असाधारणञ्च रूपम्,अर्थस्तु साधारणः; शब्दान्तरैरपि प्रत्यायमानत्वात्। तदेवमासन्नत्वान्नित्यसम्बधित्वादसाधारणत्वाच्च रूपमेव शब्दस्य स्वम्,
नार्थः। ततश्च स्वग्रहणादेव रूपपरिग्रहे सिद्धे व्याकरणे रूपवदर्थोऽप्यङ्गीक्रियत इति ज्ञापनार्थं रूपग्रहणम्। तेन-- `अर्थवद्ग्रहणेन नानर्थकस्य' (व्या.प.1) इत्येतदुपपन्नं भवति। शब्दानुशासननप्रस्तावादेव च शब्दस्येति सिद्धे शब्दग्रहणम्-- यत्र शब्दपरो निर्देशस्तत्र स्वरूपं गृह्यते, नार्थपरो निर्देश इति ज्ञापनार्थम्। तेन `
स्वे पुषः' (3.4.40) इत्यत्र स्वरूपस्य ग्रहणं न भवति। अर्थपरत्वं तु निर्देशस्याविच्छिन्नपारम्पर्यादाचार्योपदेशाद्विज्ञायते।
`आग्नेयम्' इति। अग्निर्देवताऽस्येत्यत्रार्थे ढक्।
`औदश्वित्कम्' इति। आत्राप्युदश्विता संस्कृतमित्यत्रार्थे ढक्। `उदश्वितो-
ऽन्यतरस्याम्' (4.2.19) इत्यत्र `दध्नष्ठक्' (4.2.18) इत्यस्यानुवत्तेः, `इसुसु-
क्तान्तात्कः' (7.3.51) इति ठकः कादेशः।
`घग्रहणेषु' इत्यादि। यदि घुप्रभृतिरपि संज्ञाशब्द स्वरूपस्य ग्राहकः
स्यात् `उपसर्गे घोः किः' (3.2.92) इत्यत्र यद्यपि धात्वधिकारस्तथापि घुग्रहणाद् घुशब्दात् किप्रत्ययः स्यात्। उपसर्गग्रहणं तु प्राद्युपलक्षणार्थ स्यात्। यथा-- `अञ् नासिकायाः संज्ञायां, नसञ्चास्थूलात्' (5.4.118) `उपसर्गाच्च' (5.4.119) इत्यत्र। कुमारीघ इत्यत्र च घ इति संज्ञाशब्देन स्वरूपप्रत्यायने सति `घरूपकल्प' (6.4.43)
इत्यादिन घशब्दे परतो ह्रस्वत्वं प्रसज्येत।
ननु च संज्ञाविधानसामर्थ्यात् संज्ञायाः स्वरूपग्रहणं न भवति, संज्ञा हि संज्ञिनः प्रत्यायनार्था क्रियते; यदि संज्ञाशब्दोऽपि स्वरूपं प्रत्याययेत् संज्ञाविधानमनर्थकं स्यात्, नैतदस्ति; संज्ञाविदानसामर्थ्याद्धि संज्ञिनं प्रत्याययेत्, परिभाषाविधानसामर्थ्याच्च स्वरूपम्। तस्मात् प्रतिषेधः कर्त्तव्यः ? न कर्त्तव्यः,
ज्ञापकात् संज्ञाशब्दो रूपस्य ग्राहको न भविष्यति। यदयं `ष्णान्ता षट्' (1.4.24)
इति षकारान्तायाः संख्यायाः षट्संज्ञां विदधाति,तज्ज्ञापयति- संज्ञाशब्दः स्वरूपस्य ग्राहको न भवतीति; अन्यथा हि `ष्ड्भ्यो लुक्' (7.1.22) इत्यत्र षट्शब्देन
स्वरूपस्य प्रत्यायितत्वात् ततोऽपि लुग् भवतीति षकारन्तायायः संख्यायाः षडिति
संज्ञा न कुर्यात्। षट्शब्दो हि षकारान्ता संख्या, नान्या, सत्यमेतत्; तथापि येषां
ज्ञापकद्वारेणार्थप्रतिपत्तौ प्रतिपत्तिगौरवं स्यात्, तान् प्रतितत्परिहाराययाशब्द-
संज्ञेति प्रतिषेधः कृतः। शब्दग्रहणम्- व्याकरणे या संज्ञा तस्या एव प्रतिषेधो न
लौकिक्या इति प्रदर्शनार्थम्।
`सित्त्दविशेषाणाम्' इत्यादि। यत्र विशेषाणां ग्रहणमिष्यते तत्र सकार इत्संज्ञकः कर्त्तव्यः `वृक्षस्य,मृगस्'इति। `ततो वक्तवयः' इत्यादि। सिन्निर्देशं कृत्वा ततः प्रथमेऽध्यायेऽन्यत्र वा परिभाषेयं कर्त्तव्या-- सित्तद्विशेषाणामित्यादि। यस्य सकार इत्संज्ञकः, स तद्विशेषाणां वृक्षादिविशेणाणां खदिरादीनां प्रतिपादक इति वक्तव्यम्। एवं `पित्पर्यायवचनस्य च स्वाद्यर्थम्' (कात्या.वा.519) इत्यादावपि वेदितव्यम् न्यायादपि चैतत् प्रतिपाद्योऽर्थः सिध्यति। यथा सिध्यति तथा यथावससं पुरस्तात् प्रतिपादयिष्यामः सुखावबोधनार्थं सित्तद्विशेषाणामित्यादिग्रन्थोपन्यासः।।

69. अणुदित्सवर्णस्य चाप्रत्ययः। (1.1.69)
संज्ञासूत्रमिदम्, न परिभाषा। साहि नियमार्था भवति। न चाणुदितां सवर्णाना-
मन्येषांच ग्रहणं प्राप्तम्, येन सवर्णानामेव ग्रहणं भवतीति नियमः क्रियते- `परेण णकारेण प्रत्याहारग्रहणम्' इति। तेन ॠकारादयोऽपि सवर्णानां ग्राहकाः सिध्यन्तीत्यभिप्रायः। परेण च णकारेण प्रत्याहारग्रहणम् `अ इ उ ण्' इत्यत्र प्रतिपादितम्। पूर्वसूत्रात् `स्वं रूपम्' इत्येतदिहानुवर्त्तते।
तच्चार्थाद्विभक्तिविपरिणामो भवतीति
षष्ठ्यन्तं सम्पद्यते। तेन स्वस्यापि रूपस्याण् गृह्यस्याण उदिच्च ग्राहको भवतीति
दर्शयन्नाह-- `स्वस्य च रूपस्य' इति। `आद्गुणः' इत्यादि। यथेह भवति देवेन्द्र इति,
तथा खट्वेन्द्र इत्यत्राप्याद्गुणो भवति। `अस्य च्वौ' (7.4.32) यथा पटीभवतीत्यत्रे-

त्वं भवति तथा मालीभवतीत्यत्रापि। `यस्येति च' (6.4.148)। यथा दिक्षिरित्यत्र लोपो भवति, तथा चौडिरित्यत्रापि। बाह्वादित्वाच्चूडाशब्ददिञ्।
`स्वरानुनासिक्य' इत्यादि। उदात्तः सूत्रे गृह्यमाणः स्वरान्तरभिन्नस्यापि ग्राहको भवति। एवमनुदात्तः
स्वरितश्च। तथा सानुनासिको निरनुनासिकस्य, सोऽपि तस्य।
`दीर्घो न भवति' इति। यदि `अप्रत्ययः' इति प्रतिषेधो न स्यात् प्रत्ययोऽपि सवर्णानां ग्राहकः स्यात्। ततश्च दीर्घोऽपि स्यात्। ननु चात्यल्पमिदमुच्यते- `अप्रत्ययः' इति, अप्रत्ययादेशटित्किन्मित इति वक्तव्यम्। प्रत्यये प्रत्युदाहृतम्। आदेशे--- `इदम इश्' (5.3.3), अस्मात्= इतः, `पञ्चम्यास्तसिल्' (5.3.7) इति
तसिल्, अस्मिन् = इह, `इदमो हः' (5.3.11)। अत्र हि सवर्णग्रहणे सति यद्यकृते
त्यदाद्यत्व इश्भावस्तदान्तरतम्यात् त्रिमात्र इकारः प्राप्नोति, अथ कृतेऽर्द्धच-
तुर्थमात्रः। यदि `अतो गुणे' (6.1.97) पररूपत्वेऽकृतेतदापि; अथ कृते ततोऽर्द्धतृ-तीयमात्रः। अथ वा- अर्द्धचतुर्थमात्रोऽर्द्धतृकतीयमात्रश्च नास्ति ततो द्विमात्र-
स्त्रिमात्रश्च स्यात। टित्-- `आर्धधातुकस्येड् वलादेः' (7.2.35), लविता, सवर्णग्रहणे सति दीर्घोऽपि स्यात्। कित् भुवो वुग् लुङलिटोः' (6.4.88) बभूव, अत्र सानुनासि-कोऽपि स्यात्। सन्ति हि यणः सानुनासिका निरनुनासिकाश्च। मित्-- `चतुरनुडुहोरामुदा-त्तः', (7.1.98) `अम् सम्बुद्धौ' (7.1.99), अनड्वन्-- अत्र दीर्घोऽपि स्यात्। तत् तर्ह्येवं वक्तव्यम् ? न वक्तव्यम्; चकारोऽत्र क्रियते, सोऽनुक्तप्रतिषेधसमुच्च-
यार्थो भविष्यति। तेन येषामादेशादीनां ग्राहकत्वं नेष्यते ते सवर्णानां ग्राहका न
भविष्यन्ति।
अन्ये त्वाहुः- "`अप्रत्यः' इति नेह संज्ञाग्रहणम्, किं तर्हि ? अन्वर्थग्रहणम्। प्रतीयते विधीयते=उत्पाद्यत इति प्रत्ययः। तेनाप्रत्यय इत्यस्यायमर्थो भवति-- `भाव्यमानोऽण् सवर्णान् न गृह्णाति (व्या.प35)इति। हशादयोऽपि भाव्यन्ते= उत्पाद्यन्त इति तेऽपि प्रत्ययाः, तेन ते सवर्णानां ग्राहका न भवन्ति" इति। चैश्चकारस्य
प्रयोजनं वक्तव्यम्। `स्वं रूपम्' इत्यस्यानुकर्षणं तस्य प्रयोजनमिति चेत्, न; चानुकृष्टत्वादुत्तरत्र तदनुवृत्तिर्न स्यात्। न चैतत्प्रयोजनमुपपद्यते; स्वरितत्वादेवानुवृत्तिसिद्धेः।
अथ मतम्-- `प्रथमान्तं स्वमित्येतत्प्रकृतं षष्ठीनिर्दिष्टेन चेहार्थः, तस्माच्चकाररे कृते यत्नात् षष्ठ्यन्तता तस्य यथा स्यादित्येवमर्थश्चकारः' इति, एतदपि नास्ति; अर्थादेव हि विभ्कतिविपरिणामसिद्धेः।।

70. तपरस्तत्कालस्य। (1.1.70)
तःपरो यस्मात् सोऽयं तपर इति बहुव्रीहिं दर्शयति, तादपि परस्तपर इति पञ्च-मीतत्पुरुषं च। स पुनः पञ्चमीति योगविभागात् समास इति वेदितव्यः। कथं पुनरेतत् समासद्वयं लभ्यते, यावतैकस्परशब्दः ? एकस्याप्यावृत्त्या द्विधा भेदो भविष्यतीत्यदोषः। अत्र हि बहुव्रीहेर्लिङ्गम्--`अतो भिस ऐस्' (7.1.9) इति तपरकरणम्। न ह्यत्र पञ्चमी
तत्पुरुष उपपद्यते। अवर्णो ह्यत्र तपरोऽभिमतः, न भिस्। यदि चेह पञ्चमीतत्पुरुषः
स्यात्, तर्हि भिस् तपरः स्यात्; यतस्तपरो वर्ण इहोच्यते, न चासौ वर्णः, किं तर्हि ? तत्समुदायः। पञ्चमीतत्पुरुषे तु लिङ्गम्--`वृद्धिरादैच्' (1.1.1) इति तपरकरणम्।
न ह्यत्र बहुव्रीहिर्युज्यते। यदि बहुव्रीहिः स्यात् तदाऽऽकारस्य तपरत्वं स्यात्,न चाऽऽकारार्थं तपरकरणम्, अपि त्वैजर्थम्. एतच्च तत्रैव प्रतिपादितम्।
सवर्णस्येति वर्त्तते, वर्णस्य च सवर्णो न भवति, ननु वर्णसमुदायस्य; तस्मादविशेषाभिधानेऽपि वर्ण एव तपरो विज्ञायत इत्याह-- `तपरो वर्णः' इति।
तत्कालस्येति बहुव्रीहिः-- स कालोऽस्येति। अयुक्तोऽयं निर्देशः। तथा हि -- तच्छब्देन तपरः परामृश्यते, तपरश्च वर्णः। कालस्तु क्रियाविशेष इष्यते। तथा ह्युक्तम्---
आदित्यग्रहनक्षत्रपरिस्पन्दमथापरे।
भिन्नमावृत्तिभेदेन कालं कालविदो विदुः।। (वा.प.3.9.76) इति।
तत् कुतो वर्णक्रियाविशेषाभिधायिनोस्तपरकालशब्दयोः सामानाधिकरण्यम् ? एवं
तत्काल इव कालो यस्य स तत्काल इति। अस्यार्थं दर्शयितुमाह-- `आत्मना' इत्यादि।
यद्यपि तपरकरणसन्निधानादिहात्मशब्दस्य तत्र वृत्तिर्युक्ता; तथापीह साहचर्यात् तत्सहचरितायामुच्चारणक्रियायां कालाख्यायां स वर्त्तते। कुत एतत् ? तपरेण वर्णेन क्रियायास्तुल्यत्वानुपपत्तेः। सम्भवति साहचर्यात् ताच्छब्द्यम्। तदेतदुक्तं भवति- तपर-
वर्णसहचरितया क्रियया तुल्यकालस्येति यादृशी तपरवर्णस्योच्चारणक्रिया तादृगुच्चारण-
क्रिया यस्येति यावत्। `गुणान्तरयुक्तस्य' इति। यन गुणेन धर्माख्येनोदात्तादिना

विशिष्ट उच्चारितस्ततोऽन्यैरुदात्तादिभिर्गुणैः सम्बद्धस्येत्यर्थः।

`स्वस्य च रूपस्य' इति। इहापि तदनुवृत्तेः। इहेदं सूत्रं नियमार्थं वा स्यात् ? विध्यर्थं वा ? यद्यणित्यनुवर्त्तते,ततः पूर्वेणैव `सिद्धे सत्यारम्भो नियमा-
र्थो भवति'--- (कात्य.प.62)तपरोऽण् तत्कालस्यैव ग्राहको भवति, नान्यस्येति।

अथाणिति निवृत्तम्, ततो विध्यर्थम्।

तत्राद्ये पक्षे `विड्वनोरनुनासिकस्यात्' (6.4.41) इत्याकारो दीर्घस्तपरो

निरनुनासिकः सूत्र उपात्तः `भेदका गुणाः' इत्यस्मिन् दर्शने सानुनासिकस्य ग्राहको न स्यात्; अनणत्वात्। ततश्च निरनुनासिक एवादेशः स्यात्। इतरत्र तु पक्षे सत्यपि भेदकत्वे गुणानामेष दोषो न भवतीति मन्यमानो द्वितीयं पक्षमाश्रित्याह-- `विध्यर्थमिदम्' इति। कथं विध्यर्थमित्याह-- `अणिति नानुवर्त्तते' इति। `अणामन्येषां च ' इत्यादि। युक्तं यदन्येषामेव तपराणां ग्रहणकशास्त्रमिति तेषां पूर्वेण ग्रहणस्यासिद्धत्वात्। अणां तु पूर्वेणैव सिद्धे ग्राहकत्वे कथमित्यत आह--- `अतो भिस ऐस्' इत्यादि।

स्यादेतत्, इहापि तत् प्रवृत्तमेवानवकाशत्वादित्यत आह-- `अत पराः' इत्यादि।`आद्गुणः' (1.3.87) इत्यादावतपरा अणोऽवकाशः।अस्य त्वनणस्तपरा दीर्घाः। यथा `विड्-
वनोरनुनासिकस्यात्' (1.4.41)इति। ये त्वणस्तपराः, तेषूभयप्राप्तौ परत्वादिदमेव ग्रहणकशास्त्रं प्रवर्त्तत इत्यभिप्रायः।

`वृक्षै प्लक्षैः' इति। तृतीयाबहुवचनं भिस्।`अतो बिस ऐस्' ((7.1.9)
इत्यैसादेशः; वृद्धिरेचि' (6.1.88) इति वृद्धिः। `अब्जाः गोजाः' इति। `जनी प्रादु-
र्भावे' (धा.पा.1149) अप्सु जायते, गोषु जायत इति-- `दजनसनकखनक्रमगमो विट्' (3.2.6)।

`खट्वाभिः' इति। कतं पुनरेतत् प्रत्युदाहरणम्, यावता `अन्तादिवच्च' (6.1.85) इत्यन्तादिवद्भावे भवितव्यमेवात्रैस्भावेन, तपरकरणस्य तु य्तरैकादेशो नास्ति
तद्वयवच्छेद्यं भविष्यति-- `कीलालपाभिः, सोमपाभिः' इत्यादि ? नैष दोषः;
अन्तदिवच्च' (6.1.85) इत्यत्र वक्ष्यति--- `वर्णाश्रयविधावन्तादिवद्भावो नेष्यते'
इति। तथा हि-- खट्वाभिरितद्यत्रान्तवद्भावाभावात् `अतो भिस ऐस्' (7.1.9) न भवतीति।

अथ वा -- `अतः' इत्यत्राकारद्वयप्रश्लेषः कृतः, श्रूयमाणादतो यथा स्यात्।

71.आदिरन्त्येन सहेता। (1.1.71)

स्वरूपविधिपरिहारायारम्भः।इदमपि संज्ञासूत्रम्। अनादिभूत वस्त्वपेक्ष्य तत्पूर्ववस्तुन आदित्वं न भवति, अन्त्यभूतं वस्त्वपेक्ष्य ततः परस्यान्त्यत्वम्। न चेहाद्यन्तयोः परस्परापेक्षे आद्यन्तत्वे युज्येते। एवं हि सति वस्त्वन्तरस्य
संज्ञिनो भावादादिरन्त्येन सहितः स्वयैव संज्ञा स्यात्। ततश्च `स्वं रूपम्' (1.1.68) इत्येतस्येहानुवृत्तये स्वरितत्वासङ्गो वृता स्यात्। तस्मादाद्यन्तशब्दाभ्यां
सामर्थ्यादाद्यन्तव्यतिरेकेण तन्मध्यपाति वस्तु संज्ञित्वेनाक्षिप्तमिति मत्वाह-- `तन्मध्यपतितानाम्' इति। जाताविदं बहुवचनम्; अन्यथा ह्येङ शब्द ओकारस्य संज्ञा न
स्यात्।

ननु चाद्यन्तशब्दाभ्यां नियतदेशावयवावभिधीयते, अवयवाश्चावयविनः समुदाय-
रूपस्य सम्बन्धिन इति सम्बन्धिशब्दत्वादाद्यन्तशब्दाभ्यां तस्यैव संज्ञित्वेना-
क्षेपो युक्तः। अकत एवं वक्तव्यम्-- `तन्मध्यपतितानां समुदायस्य' इति। एवं मन्यते-- यदयम् `तस्मादित्युत्तरस्य' (1.1.67)इत्यादौ वर्णानां समुदाये परतो यकारं यणादेशं कृत्वा निर्देशं करोति, ततो गम्यते-- न वर्णसमुदायः संज्ञीति, किं तर्हि ?
प्रत्येकं वर्णा एवेति; अन्यथा वर्णसमुदाये संज्ञिनि परतो वर्णमालां यणादेशं कृत्वा निर्देशं कुर्यादिति। असम्भवात् स न कृत इति चेत्, न; वर्णमालात्मन आदेशस्य सम्भवात्। तर्हि समुदाये संज्ञिनि कार्यमेव न सम्भवतीति चेत्, यदि च समुदाये परतः
कार्यं न सम्भवति वर्णा एव प्रत्येकं सन्तु संज्ञिनः; तत्र कार्यं सम्भवति, किं समुदायेन ? `टा' इत्यनेन ग्रहणं मा भूदिति। ननु च सोऽपि तावतोऽवधेरन्त एव, न;
तावतोऽवधेरविवक्षितत्वात्। टकारो ह्ययम् `टाङसिङसामिनात्स्याः' (7.1.12) `द्वितीयाटौस्त्वेनः' (2.4.34) इत्यत्र तृतीयैकवचनस्य विशेषणार्थः, न तु प्रत्याहारार्थः।

अथादिग्रहणं किमर्थम् ? अन्त्येन सह समुदाय एव संज्ञा मा भूदिति, नैतदस्ति; `आवृत्तिधर्माणो हि संज्ञाशब्दा भवन्ति'। आदिरेव प्रदेशवाक्येष्वावर्त्तते, न समुदायः; तस्मादन्तरेणाप्यादिग्रहणं सामर्थ्यादादेरेवान्त्यसहितस्य संज्ञात्वं
विज्ञायते, न समुदायस्य। एवं तर्हि सामर्थ्यलब्धस्यैवार्थस्य विस्पष्टीकरणार्थमादि-

ग्रहणम्।
अथ सहग्रहणं किमर्थम्, यावता तृतीययैव सहार्थो गम्यते, यथा-- `वृद्धो यूना' (1.2.65) इत्यत्र ? नैतदेवम्; इत्थम्भूतलक्षणेऽपि तृतीयाऽस्ति। तस्यां च सत्यामादिरेवान्त्येनेत्संज्ञकेनोपलक्षितः संज्ञा स्यात्। ततश्च प्रदेशेष्वक इति, इक इति, अचि इति च समुदायाद्विभक्तिर्न स्यात्, निरर्थकत्वेनाप्रातिपदिक्तवात्। `सह' ग्रहणात् तु सहभूता संज्ञेति समुदायस्य संज्ञात्वेनार्थत्त्वात् प्रातिपदिकत्वे सति
विभक्तिर्लभ्यते।
इद्ग्रहणं तु `अचि' इत्यत्रानित्संज्ञकेन `चटतव' इत्यनेन चकारेण संज्ञा मा भूदित्येवमर्थम्। अन्त्यत्वं तस्य पूर्ववत्, न समुदायापेक्षया। एवं तर्हि `हलन्त्यम्' (1.3.3) इतीत्संज्ञा प्राप्नोति, तदर्थं `न विभक्तौ तुस्माः' (1.3.4)
इत्यत्र नेति योगविभागः कर्त्तव्यः।

72. येनविधिस्तदन्तस्य। (1.1.72)
`स्वं रूपं शब्दस्येत्यस्यायमपवादः'। इदमपि संज्ञासूत्रम्। न तु परिभाषा। न ह्यत्र नियमरूपता परिभाषाधर्मो विद्यते। `येन' इति करमए तृतीया। विधीयते = अपूर्व
एव क्रियते इति विधिः कर्मसाधनः; उपसर्गे घोः किः' (3.3.92) इति किप्रत्ययान्तः।
तदन्तस्य' इति। सोऽन्तोऽस्येति बहुव्रीहिः। तदित्यनेन स एव करणभूतः शब्दः प्रत्यवमृश्यते। अनतशब्दोऽयमवयववाची, अवयवश्च समुदायस्य भवति। अतश्च तस्यैवेयं
संज्ञा विज्ञायत इत्याह--- `समुदायस्य संज्ञा भवति' इति।
`अवश्यलाव्यम्' इति। `अवश्यपाव्यम्' इति। `लूञ् छेदने' (धा.पा.1484),
`पूञ् पवने' (धा.पा.1483) वृद्धौ कृतायाम् `वान्तो यि प्रत्यये' (6.1.79) इत्यावादेशः, मयूरव्यंसकादित्वात् समासः; `लुम्पेदवश्यमः कृत्येः'
(काशिका.6.1.144) इति मकारलोपः।
अथेह कस्मादेजन्तस् संज्ञा न सम्भवति, `एचोऽयवायावः' (6.1.78) इति ? किञ्चस्यात् ? `चयनं चायको लवनं लावकः' इत्यत्रानेकाल्त्वादयादयः सर्वादेशाः स्युः, नैष दोषः; `निर्दिश्यमानस्यादेशा भवन्ति' (व्या.प.106) इत्येच एव भविष्यन्ति, न सर्वस्यतदन्तस्य। अथ वा-- अस्य योगस्यैवं विधो विषय एव न भवति, ततो नायमिह प्रवर्तते। तथा हि येनेति करणे तृतीयेत्युक्तम्, न चाकर्तृकं करणमस्तीति कर्त्ताप्याश्रितः। स

पुनरिह सम्बन्धिशब्दत्वादन्तशब्देनावयववाचिना सन्निधापितः समुदायो विज्ञाप्यते। प्रकृतत्वात् स्वरूपं च कर्ता च त्रिभिः प्रकारैः सन्निहितो भवति। क्वचिन्निर्देशात्-- `ईदूदेद्द्विचनम्' (1.1.11) इति, अत्र द्विवचनं कर्तृभूतं निर्दिष्टम्। तथा
हीदादिभिः करणैः प्रगृह्यसंज्ञां विदधाति। क्वचित् प्रकरणात्--यथा `एरच्' (3.3.56) इति, अत्र `धातोः' (3.1.91) इत्यधिकाराद्धातुः प्रकरणात् कर्त्ता सन्निहितः। स इकारेण करणेनाचं विदधाति। क्वचिच् सामर्थ्यात्-- यथा `इको झल्' (1.2.9)
इति, अत्र धातोरेव सन् विधीयते, नान्यसमादिति सामर्थ्याद्धातुः कर्ता सन्निहितः; स
इका करणेन सनः कित्त्वं विदधाति। तदेवम्, `ईदूदेद्द्विवचम्' (1.1.11) इत्यादौ
कर्तृकरणयोरुभयोरपि विद्यमानत्वात् सोऽस्य सूत्रस्य विषय इति तत्र तदन्तविधिर्भवति। `एचोऽयवायावः' (6.1.78) इत्यत्र तु न केनचित् कर्त्ता सन्निहितः प्रकारेण, न
चाकर्तृकं करणं सम्भवति;तस्मात् कर्तृकरणयोरुभयोरप्यसन्निहितत्वान्नायमस्य सूत्रस्य विषय इति न सम्भवति तदन्तविधिः।
`वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यायम्-- `द्वितीया श्रित' 2.1.24) इत्यादौ सुपा श्रितादयो विशिष्यन्ते,न श्रितादिभिः सुप्। विशेषणेन च तदन्तविधिः, न विशेष्येण। यस्मादयेनेति करणे तृतीया, करणं च परतन्त्रं परार्थं भवति, न विशेष्यम्, तस्माद्विशिष्टैः श्रितादिभिस्तदन्तविधिर्न भवति। `नडादिभ्यः फक्'
इति। अत्रापि प्रकृतेन प्रातिपदिकेन नडादयो विशिष्यन्ते, न नडादिभिः प्रातिपदिकम्
अतोऽत्रापि नास्ति तदन्तविधिरिति।
`उगिद्वर्णग्रहणवर्जम्' इति। उगिता वर्णेन च प्रातिपदिकं विशिष्यते।
विशेषणेन च तदन्तविधिर्भवत्येव।
`यस्मिन् विधिः' इत्यादि। तदन्तविधौ प्राप्ते तदादिविधिरुच्यते। यस्मिन्नि-
ति सप्तमीनिर्दिष्टे तदादिविधिं दर्शयति। यत्राल्ग्रहणे सप्तमीनिर्दिष्टे पूर्वस्य विधिस्तत्र तदादौ वेदितव्यः। अलादावित्यर्थः। यदि तर्हि तत्रापि तदन्तिविधिः स्यात्, इहैव स्यात्-- श्रियाविति,इह तु न स्यात्-- `श्रियः' इति ? तदादिविधौ तु
सतीहापि भवति, स्वस्य च रूपस्येति श्रियावित्यत्रापि भवत्येव।

73.वृद्धिर्यस्याचामादिस्तद्वृद्धम्। (1.1.73)

`यस्येति समुदाय उच्यते' अचां मध्ये यस्यादिर्वृद्धिसंज्ञकस्तस्यैव शब्दरूपस्य संज्ञा विधीयते। तच्च नियोगतः समुदायात्मकमेवेति सामर्थ्याद् यस्येति सामान्यप-देनापि समुदाय एवाभिधीयते। संज्ञिनिर्देशार्थं यस्येति वचनम्। अचां मध्य इत्यादिना वृद्धिसंज्ञिनः समुदायादेकदेशस्य निर्धारणं दर्शयन्नचामित्यस्य निर्धारणषष्ठीत्वं

दर्शयति। आदिशब्दस्त्विहोपक्रमे वर्त्तते, उपक्रमम्यते इत्युपक्रमः, प्रथमत उच्चारित इत्यर्थः। अचामिति बहुवचननिर्देशाद् यस् बहूनामचां मध्ये वृद्धिसंज्ञक आदिभूतः,

तस्यैव वृद्धसंज्ञया भवितव्यम्; न तु यस्य द्वयोर्मध्ये इति चोद्यमपाकर्तुमाह--

`अचाम्' इत्यादि।

यदि तर्ह्यचामिति निर्धारणषष्ठीयम्, एवं सति समानजातीयस्यैव निर्धारणं भवतीत्यचां मध्ये वृद्धिकोऽजेव यथा स्यादित्येषोऽर्थः स्यात्। तथा च सत्याकारो यस्यादिस्तस्य संज्ञा न स्यादाश्वलायन इत्यादेः, न ह्याकारस्य मुख्यमच्त्वमस्ति;

अक्ष्वसन्निवेशात्। उपचरितं तु स्यात् ; `अणुदित्सवर्णस्य चाप्रत्ययः' (1.1.69)

इत्येनेनानचोऽपि सतोऽच्कार्यकरणात्। न च मुक्ये सति गौणस्याश्रयणं युक्तम्, गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययात्, नैष दोषः; व्याप्तेर्न्यायादाकारस्यापि गौणमच्त्वमाश्रित्य भविष्यति,अन्यथा ह्यैज्ग्रहणमेव कुर्यात्, न वृद्धिग्रहणम्। `शालीयः,

मालीयः, इत्यादि। अत्र वृद्धसंज्ञायां सत्याम् `वृद्धाच्छः' श्(4.2.114) इति च्छो भवति।

ननु च शालामालाशब्दयोः कापटुशब्दस्य च संज्ञया न भवितव्यम्, न ह्येषां

वृद्धिसंज्ञक आदिः,किं तर्हि ? हल्,नैतदेवम्; विद्यमानोऽपि ह्यत्र हल् नापेक्ष्यते,अजपेक्षस्यादित्वस्याश्रयणात्। एतदेव ह्यज्ग्रहणस्य प्रयोजनम्। कतं नाम तदपेक्ष-

यादित्वं विज्ञायेतेति ? अन्यथा तत्र कर्तव्यमेव स्यात्। अज्ग्रहणे क्रियमाणे सत्यमर्थो भवति। अचां मध्ये यस्य यो वृद्धिसंज्ञकोऽजेवादिभूत इति। अन्येभ्योऽज्भ्यो

यस्य वृद्धिसंज्ञकः प्रागुच्चार्यत इति यावत्। तेन शालाशब्दादेरपि संज्ञा सिध्यति।

`साभासन्नयनः' इति। अत्र वृद्धिसंज्ञाभावादणेव भवति, न तु च्छः। यदि पुनरा-दिग्रहणं न क्रियेत ततो यस्याप्यचां मध्ये वृद्धिसंज्ञकः कश्चित् सभासन्नयनादेस्त-

स्याप्येषा संज्ञा स्यात्। अत्र यद्यपि वृद्धिशब्दः श्रूयते, तथापि तल्लिङ्गकपरि-

भाषा नोपतिष्ठते। यसमाद् यत्र नियतस्थानिके गुणवृद्धी विधीयते तत्र स्थानिनियमार्थासा व्याप्रियते। एतच्च प्रागेवोक्तम्. न चेह गुणवृद्ध्योर्विधानम्, अतो नात्र

व्यापारस्तस्याः। तेन यस्याप्यनियतस्थानिको वृद्धिसंज्ञक आदिभूतः, तस्यापि संज्ञा

सिद्धा भवति। `वा नामधेयस्य' इत्यादि। ये पुरुषैर्व्यवहाराय संकीर्त्यमानाः शब्दा

देवदत्त इत्येवमादयः, तेषामेषा संज्ञा वेदितव्या। तेष्वेव नामधेयशब्दो रूढः,न तु ये जात्यादिनिमित्तका गवादिशब्दा अनादिव्यवहारान्तः पातिनस्तेषु। ननु च काश्यादिपाठात् `काश्यादिभ्यः' (4.2.116) ठञ्ञिठाभ्यां भवितव्यम्, तदयुक्तं

देवदत्तीय इति च्छप्रत्ययान्तस्योदाहरणम्, नैष दोषः; यो हि देवैदत्तो देवदत्त इति

क्रियानिमित्तको देवदत्तशब्दः, तस्यैव तत्र पाठः,न संज्ञाशब्दस्य। तेन संज्ञाभूताद्देवदत्त शब्दाद् यदा वृद्धसंज्ञा तदा छो भवति,अन्यथा त्वण्। `गोत्रान्तात्' इत्यादि। तथाऽसमस्तात्त केवलाद्गोत्रप्रत्ययान्ताद् वृद्धाच्छप्रत्ययो भवति तथा समस्ताद-वृद्धादपि। `घृतरौढिः' इति। `समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपद-लोपश्च' (वा.83) इति समासः। एवमुत्तर रूढस्यापत्यम्, पाणिनस्यापत्यम्-- `अत इञ्'

(4.1.95) इतीञ्। बाह्वादिषु `सम्भूयोऽम्भसः सलोपश्च' (ग.सू.66) इति पठ्यते।

काश्यपशब्दो बिदादित्वादञन्तः। `जैह्वाकाताः, हारितकाताः' इति। कात्यशब्दो गर्गादियञन्तः। जिह्वाचपलः कात्यः, जिह्वाकात्यः। हरितभक्षः कात्यः हरितकात्यः, ताभ्यामौत्सर्गिक एवाण, `यस्येति च' (6.4.148)इत्यकारस्य लोपः; `आपत्यस्य च तद्धितेऽनाति'

(6.4.151) इति यकारस्य।।

74. त्यदादीनि च। (1.1.74)

`उत्तरार्थम्' इति। उत्तरसूत्रेऽस्य प्रयोजनवत्त्वात् यद्यनुवर्त्तते,एतद-र्थमपि कस्मान्न भवतीत्याह-- `इह न सम्बध्यते' इति। यदीहापि सम्बध्येत तदायमर्थः स्यात्--- `त्यदादीनि यस्याचामादिभूतानि तद्वद्धम्' इति। ततश्च त्वत्पुत्र इत्यादावेव स्यात्, केवालानां च त्यदादीनां न स्यादित्यभिप्रायः। ननु च त्वत्पुत्रो मत्पुत्र इत्यादावुपसर्जनानि त्यदादीनि, उपसर्जनानां च तेषां त्यदादित्वं

निवर्तितम्, तत् कुतोऽयं प्रसङ्गः ? यदि यस्याचामादेरित्येतदिह सम्बध्यते तदा
सत्युपसर्जनत्वे वचनात् त्यदादावेव संज्ञा स्यात्, न केवलानामिति मन्यते; कथं
पुनरिहानुवर्तमानं शक्यमसम्बन्धुम् ? स्वसम्बन्धानुवृत्तेः। `वृद्धिर्यस्याचामादिस्तद्वृद्धम्' (1.1.73) इति त्यदादीनि च वृद्धिसंज्ञकानि भवन्ति।
`वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति तद्वृद्धम्, `एङ प्राचां देशे' (1.1.75) यस्याचामादिग्रहणमनुवर्त्तते। वृद्धिग्रहणं निवृत्तम्. एवं वृद्धिग्रहणं निवृत्तम्। एवं वृद्धिशब्देन
सम्बन्धमनुवर्त्तमानं न शक्यते त्यदादिभिः सम्बन्धुम्। `त्वादायनिः, मादायनिः' इति। `उदीचां वृद्धादगोत्रात्' (4.1.157) इति फिञ्, `प्रत्ययोत्तरपदयोश्च' (7.2.97)
इति युष्मदस्मदोस्त्वामादेशौ। चकारोऽनुक्तसमुच्चयार्थः। तेन `वा नामधेयस्य' (वा.15) इत्यादि वक्तव्यं न भवति।।

75. एङ् प्राचां देशे। (1.1.75)
`प्राचां देशाभिधाने' इति। प्राचां सम्बन्धी यो देशस्तदभिधान इत्यर्थः।
एतेन प्राचामिति देशविशेषणं न विकल्पार्थमिति दर्शयति। प्राचां मतेनेत्यस्याविवक्षितत्वादित्याख्यातं भवति।
`एणीपचनीयः' इत्यादि। एणीपचन इत्यादिभ्यच्छः। `आहिच्छत्रः' इति,
`कान्यकुब्जः' इति अहिच्छत्रकान्यकुब्जशब्दाभ्यामणेव भवति। `देवदत्तः' इति। वृद्धा-धिकारे विहितो `वाहीकग्रामेभ्यश्च' (4.2.117) इति ठञ्ञिठौ न भवतः, काश्यपादि-
पाठादपि तौ न भवतः; क्रियानिमित्तको हि देवदत्तशब्दस्तत्र पठ्यते संज्ञाशब्दस्य
चेदं प्रत्युदाहरणम्। एतच्च यदा `वा नामधेयस्य' (वा. 15) इति वृद्धसंज्ञा नास्ति;
तदा वेदितव्यम्। `गौमताः'इति। अत्र सर्वमस्ति न तु देशाभिधानम्। तथा हि गोमती नदी प्रग्देशे, न देशः। न हि नदी देशग्रहणेन गृह्यते;`नदीदेशोऽग्रामाः' (2.4.7)
इत्यत्र नद्याः पृथग्ग्रहणात्।
`एङ् प्राचां देशे' इति। `उदीचां वृद्धादगोत्रात्' (4.1.157) इत्येवमादिषु प्रागुदञ्चौ श्रूयेते, तयोश्च विभागो न विज्ञायते। अतस्तत्परिज्ञानायाह-- `
प्रागुदञ्चौ' इत्यादि। शरावती नाम नदी , तस्याः पूर्वेण व्यवस्थितो देशः प्राग्देशः, उत्तरेण उदग्देशः। तौ शरावती विभजते = विभागेन व्यवस्थापयति
तस्यां हि मर्यादायां सत्यां तयोर्विभागः परिज्ञायते। किमर्थं विभजते ? `विदुषां शब्दसिद्ध्यर्थम्'
इति। पण्डितानां वैयाकरणानां शब्दव्युत्पत्त्यर्थम्। कतं विभजते ? `हंसः क्षीरोदकं यथा'। क्षीरोदकमिति `जातिरप्राणिनाम्' (2.4.6) इत्येकवद्भावः। क्वचित् क्षीरोदके
इति पाठः। सः `सर्वो द्वन्द्वो विभाषयैकवद्भवति' (व्या.प.91) इति वेदितव्यः। यथा
हंसः क्षीरमुदकं च मिश्रीभावमुपगतं पृथगसङ्करेण व्यवस्थापयति, तथा शरावती प्रागुदञ्चौ। यत्-तदोर्नित्याभिसम्बन्दात् सेति वचनादनुक्तमपि
येत्येतल्लभ्यते। या विभजते सा नोऽस्मान् पातु रक्षतु। प्रसिद्धस्तु पाठो यत्र श्लोके प्रागुदीचाविति, तत्राऽचः `उद ईत्' (6.4.139) इति
भसंज्ञकस्योच्यमानः कथमीकारः ? कथं च `उगिदचां
सर्वनामस्थानेऽधातोः' (7.1.70) इति नुम न भवतीति चिन्त्यम्। अत्र वर्णयन्ति--
`अच्प्रत्यन्ववपूर्वात् सामलोम्नः' (5.4.75) इत्यत्राजितियोगविभागेनाच्प्रत्ययः
कृतः, तेनात्राचि परतो भसंज्ञामीत्वं भवति। नुम् न भवति; अचा सर्वनामस्थानस्य
व्यवहितत्वादिति।
अनये तु प्रागुदीचमिति समाहारे कुर्वन्ति। तेषां `द्वन्द्वाच्चुदषहान्तात् समाहारे' (5.4.106) इति टचि समासान्ते कृते पूर्ववदीकारो नुमभावश्च भवति। क्वचित्तु प्रागुदीच इति पाटः। तत्रावयवदेशापेक्षया बहुत्वविवक्षायां बहुवचनम्।
प्राग्देशानुदग्देशाश्च विभजत इत्यर्थः।
श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धपादविरचितायां
काशिकाविवरणपञ्जिकायां

प्रथमाध्यायस्य
प्रथमः पादः

1.2

अथ प्रथमाध्ययस्य

द्वितीय पादः

1.गाङ्कुटादिभ्योऽञ्णिन्ङित्। (1.2.1)

अत्र पक्षत्रयं सम्भाव्यते-- इत्संज्ञको वा ङकारोऽनेन भाव्यते,

गाङकुटादिभ्यः परे येऽञ्णितः प्रत्ययास्ते ङितो भवन्ति, इत्संज्ञको ङकार एषां सम्बन्धी भवतीति यावत्; एवं हि ते ङितो भवन्ति यदि हि तेषां ङकारोऽनुबन्धो विधीयते, नान्यथा; न हि विना चित्रगवीभिर्देवदत्तश्चित्रगुर्भवति। ङिदितीयं वा संज्ञाऽनेन

क्रियते, गाङकुटादिभ्यः परे येऽञ्णितः प्रत्ययास्ते ङितो भवन्ति, ङित्संज्ञका

भवन्तीति यावत्। अतिदेशोऽयं वा स्यात्, गाङकुटादिभ्यः परे येऽञ्णितः प्रत्ययास्ते ङितो भवन्ति, ङिद्वद्भवन्तीत्यर्थः। तत्राद्ये पक्षे `गाङकुटादिभ्यः' इत्यनया

पञ्चम्याऽञ्णिदित्यस्याः प्रथमायाः षष्ठ्यां परिकल्पितायां सत्याम्। `आदेः परस्य' (1.1.54) इति वचनादादेरलः स्थान आदेश एव ङकारः प्राप्नोति। द्वितीये तु पक्षे

`अनिदितां हल उपधायः क्ङिति ' (76.4.24) इत्यत्र संज्ञिनः संप्रत्ययो न स्यात्;

शब्दभेदात्। अन्योहि ङिच्छब्दः, अन्यो हि क्ङिशब्दः।

किञ्च, `ङिद्ग्रहणे ग्रह्यादौ' (6.1.16) सूत्र एषामेव संज्ञिनां ग्रहणं

प्राप्नोति, न यङादीनाम् `कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः' (व्या.प.6) इति वचनात्। अथापि कथञ्चिदेते दोषाः परिहर्तुं शक्येरन्, आद्ययोः पक्षयोर्यस्तु

तत्परिहारद्वारेण प्रवृत्तौ साध्यायां प्रतिपत्तिगौरवदोष आपद्यते सोऽपरिहार्य एव। तृतीये तु पक्षे न कश्चिद् दोष इति मत्वा तमेवाश्रित्याह--

`अतिदेशोऽयम्'इति।

यद्येवम्, वतिना निर्देशः कर्त्तव्यः, अन्यथा तदर्थो नावगम्येत; नैतदेवम्, परपदार्थेषुहि प्रयुज्यमानाः शब्दावतिमन्तरेणापि वत्यर्थ गमयन्ति, यथा-- सिंहो माणवकः,गौर्वाहीकः।

गाङितीङादेशो गृह्यते-- `इङश्च' (2.4.48), `गाङ लिटि' (2.4.49),

विभाषा लुङ लृङो' (2.4.50) इति। गाङादेशो य इङः स्थाने वक्ष्यते तस्येदं ग्रहणम्, न `गाङ गतौ' (धा.पा.950) इत्यस्य। अथ `गाङ गतौ' (धा.प.950) इत्यस्य धातोर्ग्रहणं कस्मान्न भवतीत्याह--`ङकारस्य' इत्यादि।इङादेशस्य यो ङकारस्तस्येदं प्रयोजनम्--इह सूत्रे तस्यैव ग्रहणं यथा स्यान्नान्यत् किञ्चिदात्नेपदार्थ स्यादिति चेत् ? न; आत्मनेपदस्य स्थानमिवद्भावेनैव सिद्धत्वात्। तस्मादिङादेश एव गृह्यते; अन्यथा ङकारस्य वैयर्थ्यं स्यात्। ननु चोभयोरपि सामान्यग्रहणार्थो ङकारः स्यात्, तत् कुतो वैयर्थ्यम्?नैतदस्त; यदि हि तौ समानौ स्यातां तदा सामान्यग्रहणार्थता तस्य, न च तौ समानौ; गत्यर्थस्य गाङो ङकारस्यात्मनेपदविधौ चिरार्थत्वात्. इतरस्य तु न क्विच्चरितार्थता। तस्मादसमानार्थत्वादयुक्तं सामान्यग्रहणमिति गाङादेश गृह्यते। किमर्थं पुनरिह उच्चार्यते, न गा इत्येवोच्येत ? चैवं शक्यम्; एवं हि सति निरनुबन्धकग्रहणे न सानुबन्धकस्य' (व्या.प.53) इति `कै गै शब्दे' (धा.पा. 916-917) इत्यस्यैव ग्रहणं स्यात्। कुटादयो हि `कुट कौटिल्ये' (धा.पा.1366) इत्यत आरभ्य `कुङ शब्दे' (धा.पा.1401) इति यावदिति। तदनन्तरं वृत्करणात् ततोऽधिकानां कुटादित्वानुपपत्तेः।

`अध्यगीष्ट' इति। सिचो ङित्त्वे घुमास्थागादि (6.4.66) सूत्रेणेत्त्वम्। अत्र हि `दीङो युडचि क्ङिति' (6.4.65) इत्यतः क्ङितीत्यनुवर्त्तते, `ईद् यति' (6.4.5) इत्यत ईदिति च। `अध्यगीषत' इति। `आत्मनेपदेष्वनतः' (7.1.5) इत्यदादेशः। अथ लिटि यो गाङादेशस्तस्य कस्मादुदाहरणं न प्रदर्शितम् ? एवं मन्यते-- लुङ एवायम्, नासाविह लिङ्ग्रहणं प्रयोजयति; `अंसयोगाल्लिट् कित्' (1.2.5) इति वक्ष्यमाणेनैव सिद्धत्वात्। `उत्कुटिता' इति। `कुट कौटिल्ये' (धा.पा.1366)। `उत्पुटिता' इति। `पुट

संश्लेषणे'(धा.पा.1367)। अथेहोच्चुकुटितषतीति सनो ङित्त्वादात्मनेपदं कस्मान्न भवति? उपदेशाधिकारात्। तत्र हि `उपदेशेऽजनुनासिकः' (1.3.2) इत्यत उपदेशग्रहणमनुवर्त्तते। न चात्रौपदेशिकं ङित्त्वम्, किं तर्हि? आतिदेशिकम्।

`व्यचेः' इत्यादि। `व्यच व्याजीकरणे'(धा.पा.1293) इति तुदादौ कुटादिभ्यः

प्राक् पठ्यते। `विचिता' इति। ङित्त्वादिह ग्रह्यादिसूत्रेण (6.1.6) संप्रासरणम्। `उरुव्यचाः' इति। `सर्वधातुभ्योऽसुन्' (द.उ.9.49) इत्यसुन्प्रत्ययः। `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः।

2.विज इट्। (1.2.2)

`इडादिप्रत्ययः' इति। इट आदिर्यस्य तृजादेः स तथोक्तः।अथोत्तमपुरुषस्यैकवचनस्येटो ग्रहणं कस्मान्न भवति, `सार्वधातुकमपित्' (1.2.4) इत्यनेनैव तस्य कित्त्वस्य सिद्धत्वात् ?नैतदस्ति,यत्र हि तेन न सिद्ध्यति तत्रोत्तमपुरुषस्यैककवचनस्य ङित्त्वविधानार्थमिड्ग्रहणं स्यात्। क्व च तेन न सिद्ध्यति ? आर्धुधातुक आशिषि लिङि-- `उद्विजिषीय' इत्यत्र। अतो युक्तं चोत्तमपुरुषस्यैकवचनस्य ग्रहणम् नागमस्य;`अर्थवद्ग्रहणे नानर्थकस्य' (व्या.प.9), `प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्' (व्या.प.72) इति परिभाषाद्वयात्। अथापि कथञ्चिदागमस्येटो ग्रहणं स्यात् ? एवमपि तन्मात्रस्यैव ङित्त्वं लभ्यते, न तु तदादेः प्रत्ययस्य, तत्किमित्याह-- `इडादिप्रत्ययो ङिद्भवति ' इति ? एवं मन्यते--- `वद्धिर्यस्याचामादिः' (1.1.73) इत्यत आदिग्रहणमनुवर्त्तते, तेन चेड् विशिष्यते। न चोत्तमपुरुषस्यैकवचनस्यादित्वमस्ति, किं तर्हि ? आगमस्यैव; तस्मात् स एव गृह्यते। तस्य च केवलस्यादिभूतस्य ङित्वे प्रयोजनं नास्तीति सामर्थ्यादिडादेः प्रत्ययस्य ङित्त्वं विज्ञायत इति। `उद्विजिता' इति। ङित्त्वात् `पुगन्तलघुपधस्य' (7.3.86) इति गुणो न भवति।

3.विभाषोर्णोः। (1.2.3)

`प्रोर्णुविता' इति। ङित्वाद् गुणे प्रतिषिद्धे `अचि श्नुधातु' (6.4.77) इत्यादिनोवङादेशः।।

4.सार्वधातुकमपित्। (1.2.4)

`अपित्' इति। किमयं प्रसज्यप्रतिषेधः ? उत पर्युदासः ? किञ्चात्र ? पूर्वस्मिन् पक्षे लोडुत्तमपुरुषस्यैकवचनस्य `आडुत्तमस्य पिच्च' (3.4.92) इत्याटि पिति कृते तुदानीत्यत्राड्विकरणाकारयोः पिदपितोरेकादेशः परं प्रति `अन्तादिवच्च' (6.1.85) इत्यादिद्भावात् पिद्ग्रहणेन गृह्यते इति पित्त्वम् , पित्त्वे च सत्यपिदिति ङित्त्वप्रतिषेधः स्यात्, ततश्च धातोर्गुणः प्रसज्येत। इतरत्र तु पक्षे `च्यवन्ते, प्लवन्ते' इत्यत्र शबन्तादेशाकारयोः पिदपितोर्य एकादेशस्तस्य पितोऽन्यत्वात् ङित्त्वमपाद्येत, ततश्च धातोर्गुणो न प्राप्नोति? पितोऽन्यत्वं त्वेकादेशस्य सर्वं प्रत्यादिवत्त्वात् परग्रहणेन ग्रहणात्, उच्यते,यथेच्छसि तथैवास्तु, उभयथाप्यदोषः। पूर्वत्र तावददोषः; यस्मादपितोरेव तुदानीत्यत्रैकादेशः, न पिदपितोः। तथा हि-- `आडुत्तमस्य पिच्च' (3.4.92) लोडुत्तमपुरुषस्यैव पित्त्वं विधीयते, न त्वाटः। इतरत्राप्यदोषः, यस्मादपिदित्यनेन सार्वधातुकं विशिष्यते-- पितोऽन्यत् सार्वधातुकमपिदिति। न चान्तशब्दाकारः सार्वधातुकम्, किं तर्हि ? तदेकदेशः। यच्चात्र सार्वधातुकं न च तेन सहैकादेशः, येन सहैकादेशो न च तत्सार्वधातुकम्;तेन यद्यप्ययमेकादेशः पितोऽन्यः; तथापि सार्वधातुकं न भवतीति तत्कुतो ङित्त्वस्य प्रसङ्गः ? अथ वा भवतु ङित्तवम्, सत्यपि तस्य ङित्वे तस्मिन् नास्ति गुणाभावप्रसङ्गः ? यस्मात् `वार्णादाङ्गं बलीयः' (व्या.प.39) इति वचनादेशाद्धि प्रागेव `च्यवन्ते, प्लवन्ते' इत्यत्र गुणेन भवितव्यम्।

`कुरुतः' इति। ततो ङित्त्वे सति विकरणस्य गुणो न भवति। करोतेरस्य `अत उत् सार्वधातुके' (6.4.130) इत्युत्त्वं भवति। तत्र हि `गमहन' (6.4.98) इत्यादिसूत्रात् क्ङितीत्यनुवर्तते।।

5.असंयोगाल्लिट् कित्। (1.2.5)

धातोरेव लिड् विधीयते, नान्यस्मादिति लिटा सामर्थ्याद्धातुः सन्निधापितः; स चासंयोगग्रहणेन विशिष्यते, विशेषणेन च तदन्तविधिर्भवतीत्याह--

`असंयोगान्ताद्धातोः' इति। यदि तर्ह्यसंयोगान्ताद्धातोः परस्य लिटः कित्त्वं विधीयते; तदा `ववृते, ववृधे' इति न सिध्यति, परत्वाद् गुणेन भवितव्यम्। कित्त्वस्यावकाशः -- `ईजतुरीजुः' इति, गुणस्यावकाशः-- `वर्त्तित्वा, वर्धित्वा इति; `ववृते,ववृधे' इत्यादावुभयप्राप्तौ परत्वाद् गुण एव स्यात्, नैतदस्ति; इष्टवाचित्वात्परशब्दस्य, कित्त्वमेवेष्टम्, कित्वमेव परम्, अतस्तदेव भविष्यतीत्यदोषः।

अत्र च यदि `असंयोगात्' इति पर्युदास आश्रीयते, तदा संयोगादन्यस्मिन् गृह्यमाणे नञिवयुक्तन्यायेन (व्या.प.65) सदृशस्यैव ग्रहणं स्यात्-- संयोगस्य सदृशो योऽन्योऽसहायो हल् इति हलन्तादेव कित्त्वं भविष्यति, नाजन्तात्,ततः `चक्रश्चक्रुः' इति न सिध्यति। तस्मात् प्रसज्यप्रतिषेधोऽयम्, न पर्युदासः-- न चेत् संयोगात् यजादीनां किति' (6.1.15) इति किति विधीयते, न ङिति।

`बिभिदतुः, बिभिदुः' इति। कित्त्वात् `पुगन्तलघूपधस्य' (7.2.86) इति गुणाभावः। `सस्त्रंसे, दध्वंसे' इति। कित्त्वाभावात् `अनिदिताम्' (6.4.24) इत्यरनुनासिकल्लोपो न भवति। `स्त्रन्सु ध्वन्सु अधः पतने' (धा.पा. 754-755), अनुदात्तेत्वादात्मनेपदम्, `लिटस्तझयोरेशिरेच्' (3.4.81) इत्येशादेशः। `बिभेदिथ' इति। सिप्,थल्, क्रादिनियमादिट्।

6. इन्धिभवतिभ्यां च। (1.2.6)

`समीधे' इति। `ञिइन्धी दीप्तौ', (धा.पा. 1448) पूर्ववदात्मनेपदम्, एशादेशः, कित्त्वात् `अनिदिताम्' (6.4.24) इत्यादिनानुनासिकलोपः, द्विर्वचनम्, अकः सवर्णे दीर्घत्वं च (6.1.101)। अथ `इजादेश्च गुरुमतोऽनृच्छः' (3.1.36) इत्याम् कस्मान्न भवति ? मन्त्रविषयत्वादस्य; तत्र च `अमन्त्रे' इत्यधिकारात। एवं तर्हि मन्त्रश्छन्द एवेति `च्छन्दस्युभयथा' (3.4.117) इति सार्वधातुकत्वम्, ततश्च सार्वधाकुमपित्' (1.2.4) इति ङित्त्वम्, अत एव ङित्त्वादनुनासिकलोपो भविष्यतीति तत् किमर्थमिन्धेःपरस्य लिटऋ कित्त्वं विधीयते ? ज्ञापनार्थम्। एतदनेन ज्ञाप्यते- अनित्योऽयमामिति। नित्ये ह्यामि तेन

व्यवधानादेवेन्धेः परो लिण्न सम्भवतीति कित्त्वविधानं नोपपद्यते; तस्मादनित्योऽयमामिति। तेन भाषायामपि `समीधे' इति प्रयोग उपपन्नो भवति।
`बभूव, बभूविथ' इति। कित्त्वाद् यथाक्रमं वृद्धिगुणौ न भवतः।`भुवो वुग् लुङलिटोः' (6.4.88) इति वुक्। `भवतेरः' (7.4.73) इत्यभ्यासस्यात्त्वम्। ननु च कृतयोरपि गुणवृद्ध्योर्वुका भवितव्यम्, अकृतयोरपीति नित्यो वुक्; कृताकृतप्रसङ्गित्वात्, तत्र नित्यत्वाद् वुकि कृते गुणवद्धयोः प्राप्तिरेव नास्ति, भवतेरलघूपधत्वात्, अनजन्तत्वाच्चेति भवतिग्रहणमनर्थकम् ? नैतदस्ति; `शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति' (व्या.प.100) इति वुगप्यनित्यः। ततश्च परत्वात् गुणवृद्ध्योः कृतयोर्वङ न स्यात्। तस्माद् भवतिग्रहणं कर्त्तव्यम्। अथ कृतयोरपि गुणवृद्ध्योरेकदेशविकृतमनन्यवद्भवतीति नास्ति शब्दान्तरत्वम् ? एवं सति शक्यं भवतिग्रहणमकर्तुम्। तत् क्रियते विस्पष्टार्थम्।
अथ `बभूव' इत्यत्र `अचो ञ्णिति' (7.2.15) इति वृद्धेः कथं प्रतिषेधः, यावतेक इत्यनुवर्त्तते ? क्ङिति च' (1.1.5) इत्यनेनेग्लक्षणा वृद्धिः प्रतिषिध्यते, न चेयमिग्लक्षणा वृद्धिः, निर्दिष्टस्थानिकत्वात्। अत्र कित्त्वविधानसामर्थ्यादनिग्लक्ष
णा अपि वृद्धेर्भविष्यति प्रतिषेधः; अन्यथा कित्त्वविधानमनर्थकं स्यादिति चेत्, न; तस्य थल्युत्तमणलि च गुणुप्रतिषेधार्थत्वात्। एवं तर्हि ङिद्ग्रहणमप्यनुवर्त्तते, तदनुवर्त्तमाने न विद्यमानमन्यत् प्रयोजनम्, तेनानिग्लक्षणाया अपि वृद्धेः प्रतिषेधो भविष्यति। `इन्धेः संयोगार्थं (ग्रहणम्-- काशिका) वचनम्' इति। तस्य संयोगान्तत्वात् पूर्वेणासिद्धेः।
`भवतेः पिदर्थम्' इति। नापिदर्थम्; तस्यासंयोगान्तत्वादपिदिति पूर्वेण सिद्धेः। भवतेरिह श्तिपा निर्देशो यङलुग्निवृत्त्यर्थः-- यङलुगन्तल्लिटः कित्त्वं मा भूदिति। `बोभाव' इति। तथा चोक्तम्----
श्तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च।
यत्रैकाज्ग्रहणं किञ्चित् पञ्चैतानि न यङलुकि।। (पु.प.94) इति।
`अन्थिग्रन्थि' इत्यादि। `श्रन्थ ग्रन्थ सन्दर्भे' (धा.पा.1512,1513), `दम्भ,दम्भे' (धा.पा. 1290) `ष्वन्ज परिष्वङ्गे' (धा.पा.973) एषामपि श्रन्थिग्रन्थिप्रभृतीनां लिटः कित्त्वं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- चकारोऽनुक्तसमुच्चयार्थः क्रियते, तेन श्रन्थिप्रभृतीनामपि संयोगान्तानां लि
टः कित्त्वं भविष्यतीति। `श्रेथतुः' इत्यादि। कित्त्वात् `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः । `तृफलभजत्रपश्च' (6.4.122) इति चकारस्यानुक्तसमुच्चयार्थत्वादनेकहल्मध्यस्याप्येत्वाभ्यासलोपौ। `परिषस्वजे' इति। अनुदात्तेत्त्वादात्मनेपदम्। पूर्वस्य सकारस्य `स्थादिष्वभ्यासेन चाभ्यासस्य' (8.3.64) इति वर्त्तमाने, `उपसर्गात् सुनोति' (8.2.65) इत्यादिना षत्वम्। परस्य तु सकारस्य `सदिस्वञ्जयोः परस्य लिटि' (8.3.118) इति षत्वप्रतिषेधः।

7.मृडमृदगुधकुषक्लिशवदवसः क्त्वा। ल(1.2.7)
`मुड सुखने', (धा.पा.1516) `मृद क्षोदे' (धा.पा.1515) , `गुध रोषे ' (धा.पा.1517) , `कुष निष्कर्षे' (धा.पा.1518) `क्लिशू विबाधने' (धा.पा.1522), `वद व्यक्तायां वाचि' (धा.पा. 1009), `वस निवासे' (धा.पा.1942)। `न क्त्वा सेट् इति कित्त्वप्रतिषेधं वक्ष्यति' इति। नन्वेदतदेव नियमार्थं भविष्यतीति--- मृडादिभ्य एव सेट् क्त्वा किद् भवति, नान्येभ्य इति, ततश्च सिद्धं देवित्वा, सेवित्वेत्यादि, तत् किमर्थं `न क्त्वा सेट्'(1.2.18) इति प्रतिषेधं वक्ष्यतिर ? विस्पष्टार्थम्; अन्यथा हि
केचिद्विपरीतनियमं सम्भावयेयुः-- मृडादिभ्यः क्त्वाप्रत्यय एव किद् भवति, नान्य इति। `पुरस्तादपकर्षः' इत्यादि। अपकर्ष इत्यपवाद इत्यर्थः। `क्लिशित्वा' इति। `क्लिशः क्त्वानिष्ठयोः' (7.2.50) इतीट्। `उदित्वा'इति, `उषित्वा' इति। वच्यादिसूत्रेण (6.1.15) संप्रसारणम्। वसतेः `शासिवसिधसीनाञ्च' (8.3.60) इति षत्वम्, `वसतिक्षुधोः' (7.2.52) इतीट्।

8.रुदविदमुषग्रहिस्वपिप्रच्छः संश्च। (1.2.8)
`रुदिर् अश्रुविमोचने' (धा.पा.1067), `विद ज्ञाने' (धा.पा.1064), `मुष स्तेये' (धा.पा.1530), `ग्रह उपादाने' (धा.पा.1533), `ञिष्वप् शये (धा.पा. 1068) `प्रच्छ ज्ञीप्सायाम्' (धा.पा.1413)। `ग्रहेर्विध्यर्थमेव' इति। `न क्त्वा सेट' (1.2.18) इति प्रतिषिद्धस्य कित्त्वस्य पुनर्विधिर्यथा स्यात्। `स्वपिर्विध्यर्थमेव' इत्यादि। `सन्नर्थम्' इति। अथ क्त्वार्थं वचनं कस्मान्न भवतीत्याह--- `किदेव हि क्त्वा' स्वपिप्रच्छयोर्हि `एकाच उपदेशेऽनुदात्तात्' (7.2.10) इतीट्प्रतिषेधात् क्त्वा सेड् न भवतीत्यतः `न क्त्वा सेट्' (1.2.18) इति निषेधो न प्रवर्त्तते। तेन किदेव हि क्त्वेति। `रुदित्वा' इति। `समानकर्तृकयोः पूर्वकाले' (3.4.21) इति क्त्वा। `गृहीत्वा' इति। `ग्रहोऽलिटि दीर्घः' (7.2.37) ग्रह्यादिसूत्रेण (6.1.16) संप्रासरणम्। `जिघृक्षति' इति। `हो ढः' (8.2.31) इति तत्वम्, `षढोः कः सि' (8.2.41) इति कत्वम्;
`एकाचो बसो भष्' (8.2.37) इत्यादिना गकारस्य घकारः, `सनि ग्रहगुहोश्च' (7.2.12) इतीट्प्रतिषेधः। `सुषुप्सति' इति। वच्यादिसूत्रेण (6.1.15) संप्रसारणम्। `पिपृच्छिषति' इति। अत्रापि ग्रह्यादिसूत्रेण (6.1.16) संप्रसारणम्; `छे च' (6.1.73) इति तुक्, `स्तोः श्चुना श्चुः' (8.4.40) इति श्चुत्वम्।।

9.इको झल्। (1.2.9)

`क्त्वेति निवृत्तम्' इति। झलादेः क्त्वाप्रत्ययस्यौपदेशिकं कित्त्वमस्त्येवेति तदनुवृत्तेरपार्थकत्वात्। सन्ग्रहणन्तु प्रथमान्तमिहानुवर्त्तते, तस्य झलित्यनेन सामानाधिकरण्यमुपपन्नम्। अतः सामर्थ्यात् तदादिविधिर्विज्ञायत इत्यत आह-- `झलादिः सन् किद्भवति' इति।

अथ तदन्तविधिः कस्मान्न भवति-- झलन्तः सन्निति ? एवं मन्यते-- वृद्धसंज्ञा (1.1.73) सूत्रादिहादिग्रहणमनुवर्त्तते, तेन झल् विशिष्यते; तस्मात् तदादिविधिरेव विज्ञायिते, न तदन्तविधिरिति। यदि पुनस्तदन्तविधिः स्यात् तदा किं स्यात् ? यत्रातो लोपे कृते झलन्तत्वं सनस्तत्रैव स्यात्-- चिकीर्षितेत्यादौ; चिकीर्षतीत्यादौ तदु न स्यात्, अदन्तत्वात्। अदन्तत्वन्तु सञ्शबकारयोर्द्वयोरेकादेशस्य पूर्वं प्रत्यन्तवद्भावात्।

अथेक इति `इक् स्मरणे' (धा.पा.1047) इत्यस्य धातोर्ग्रहणं कस्मान्न भवति ? झलिति प्रत्याहारस्यैव युक्तत्वात्; किञ्च-- गर्गादिषु जिगीषुशब्दपाठाच्च। धातुग्रहणे हि सति जयतेः परस्य सनः कित्त्वं न स्यात्, तथा च जिगीषुशब्दो न सिद्ध्येत्। किञ्च-- धातुग्रहणे हि सतीको धातोः समीपगतो हल् न सम्भवतीति `हलन्ताच्च' (1.2.10) इत्येदप्यघटमानं स्यात्। तस्मात् प्रत्याहारस्यैव ग्रहणं न्याय्यम्, न धातोः। `चिचीषति' इति। `अज्झनगमां सनि' (6.4.16) इति दीर्घः। `एकाचः' (7.2.10) इत्यादिना पूर्वोक्तेनेट्प्रतिषेधः। उत्तरत्रापि यत्रेटः श्रवणं नास्ति, तत्राप्यनेनैव प्रतिषेधो वेदितव्यः। यत्र तु विशेषोऽस्ति, तत्रासौ वक्तव्य एव। `तुष्टूषति'इति। `शर्पूर्वाः खयः' (7.4.61) इति खयः शेषः। `शिशयिषते' इति। `पूर्ववत् सनः ' (1.3.62) इत्यात्मनेपदम्। एवमुत्तरत्रापीच्छासन्नन्तादात्मनेपदमनेनैव बोद्धव्यम्।

`किमर्थ पुनः' इत्यादि। अत्र वक्ष्यमाणोऽभिप्रायः। `गुणो मा भूत्' इति। यदर्थमिदमुच्यते तदाह। येनाभिप्रायेण पृष्टवांस्तमाविष्कर्तुमाह-- `अज्झनगमां सनि' इत्यादि। यदि दीर्घत्वे कृतेऽपि गुणः स्यात् तदा दीर्घत्वस्य वैयर्थ्यं स्यात्। तस्मान्मा भूतस्य वैयर्थ्यमिति दीर्घत्वं तद्गुणस्य बाधकं भविष्यतीति। अत्र दोषमापादयितुमाह-- `यथैव तर्हि' इत्यादि। असति कित्त्वेऽनवकाशं दीर्घत्वं यता गुणस्य बाधकं भवति, तथा-- `तस्मात्' इत्यादि। यत एवमनारभ्यमाण एतस्मिन्नेष दोषोऽनुषज्येत, तस्माद्दीर्घत्वस्यावकाशदानाय कित्त्वमिदमारभ्यते। अथारभ्यमाणेऽप्येतस्मिन् कस्मादेष दोषो न भवतीत्यत आह----`चिचीषति' इत्यादि। कित्त्वे सति तेनैव गुणस्य बाधितत्वात्। चिचीषति, तुष्टूषतीत्यादिषु सावकाशं दीर्घत्वं भवति; तेन च परत्वाण्णिलोपो न बाध्यते। न हि कित्त्वे सति शक्यमेवं वक्तम्-- यथा दीर्घत्वं गुणं बाधते, तथा णिलोपमपीति; यस्मान्न गुणो दीर्घत्वेन बाध्यते,किं तर्हि ? कित्त्वेन। अत्र दीर्घत्वस्यावकाशो दर्शितः णिलोपस्य त्वेषोवकाशः- पाचयतेः पाक्तिः, याजयतेर्याष्टिरित्यादि; ज्ञीप्सतीत्यत्रोभयप्राप्तौ दीर्घत्वं बाधित्वा परत्वात् णिलोप एव भवति। `ज्ञा अवबोधने' (धा.पा.1507), `मारणतोषणमनिशामनेषु' (धा.पा.811), `मिच्च' (धा.पा.1624)इति चुरादिपाठाण्णिच्। `अर्त्तिह्री' (7.3.36) इत्यादिना पुक्। `मितां ह्रस्वः' (6.4.92) इति ह्रस्वत्वम्। अन्ये तु-- `ज्ञप मारणतोषणनिशामनेषु' (धा.पा.1624) इति पठन्ति, ततो णिच्, तत इच्छासन्, `सनीवन्तर्द्ध' (7.2.49) इत्यादिना पक्षे इडभावः, क`आप्ज्ञपृधामीत्' (7.4.55) इतीत्वम्, `अत्र लोपोऽभ्यासस्य' (7.4.58) इत्यभ्यासलोपः। त`णेरनिटि' (6.4.51) इति णिलोपः।

`इकः कित्त्वम्' इत्यादि। अथ किमर्थमिक उत्तरस्य सनः कित्त्वं विधीयते, किमर्थमिको झलिति योगविभागः क्रियते, नन्वेकमेवेदं सूत्रं पठितव्यम्, `इको झल् हलन्ताच्च' इति ? प्रयोजनमाह--- `गुणो मा भूत्' इति। चिचीषतीत्यादौ `सार्वधातुकार्धधातुकयोः' (7.3.84) इति गुणः प्राप्नोति, स मा भूदित्येवमर्थं कित्त्वं विधीयते। नैतदस्ति प्रयोजनम्; यस्मात् `अज्झनगमां सनि' (6.4.16) इति नाप्राप्ते गुणे दीर्घत्वमारभ्यते, अतो दीर्घारम्भाद् गुणो न भविष्यतीति; अन्यथा हि दीर्घग्रहणमनर्थकं स्यात्। ननु च चुकूषते इत्यत्र दीर्घवचनस्य सार्थकत्वम्, अत्र हि गाङकुटादिसूत्रेण (1.2.1) ङित्त्वे सति गुणो न प्रवर्त्तते, नैतदस्ति; न ह्येकमुदाहरणं प्रति योगारम्भं प्रयोजयति। यदि ह्येतत् प्रयोजनमभिमतं स्यात्, णिग्रहणमेव कुर्यात्। समुदायामात्रादपेक्षया वा `पुरस्तादपदादाः' इत्यादिका परिभाषा नास्त्येवेति।

10. हलन्ताच्च। (1.2.10)

इक इत्यनुवर्त्तते। अत्र यदि चान्तशब्दोऽवयववाची स्यादिको हला सह सम्बन्धोन स्यात्, न हीको हलवयवः सम्भवति। यो हि येनारभ्यते, अपृथग्देशभूतः स तस्यावयवो भवति; यथा-- पटस्य तन्तव इति। न च हलेगारभ्यते, तस्मान्नायमन्तशब्दोऽवयववाची; अपि तु समीपवचनो युक्त इति मत्वाऽऽह-- `समीपवचनोऽऽयमन्तशब्दः' इति। ननु च धातुरत्र सामर्थ्यादाक्षिप्तः, अत्सतदपेक्षया हलोऽवयवत्वं भविष्यति, नैतदस्ति; एवं तर्ह्यन्तशब्दोऽतिरिच्येत, `येन विधिस्तदन्तस्य' (1.1.720 इत्यनेनैव तदन्तविधेर्लब्धत्वात्। हल् चासावन्तश्चेति विग्रहविशेषेण कर्मधारयत्वं दर्शयति। कस्य पुनरसावन्तः ? प्रकृतस्येकः। यद्येवम्, सापेक्षमसमर्थं भवतीतिकमपेक्षमाणस्यान्तशब्दस्य समासो नोपपद्यते, नैष दोषः; अन्तशब्दो ह्यत्र प्रधानः। भवति च प्रधानस्य सापेक्षस्यापि समास िति द्वितीयेऽध्याये ज्ञापयिष्यति `उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' (2.1.56) इत्यत्र सामान्याप्रयोगग्रहणेन।

`इगन्तात्'इति। षष्ठीसमासोऽयम्। ननु चेक इति पञ्चम्यन्तं प्रकृतम्, तत् कथं षष्ठीसमासः ? नैष दोषः; यद्यपि पञ्चम्यन्तं प्रकृतम्, तथापीह समीपसमीपिसम्बन्धे
सति विभक्तिविपरिणामेन षष्ठ्यन्ततामनुभवति-- `इकः समीपगतात्' इति। इकः समीपवर्तिन इति। `बुभुत्सते' इति। `बुध अवगमने' (धा.पा.1172), `एकाचो बशो भष्' (8.2.37) इत्यादिना भष्भावः। एवमुत्तरत्रापि यत्र भष्भावस्तत्रानेनैव बोद्धव्यः। `खरि च' (8.4.55) इति चर्त्वम् = धकारस्य तकारः। `यियक्षते' इति। यजेर्व्रश्चादिना (6.1.15) इत्यादिना संप्रसारणं न भवति।

यदि समीपवचनोऽमन्तशब्दस्तदा दम्भेः परस्य सनः कित्त्वं न सिध्यति। तथा हि-- तस्य य इकः समीप गतो हल् न तस्मात् परः सन्, यस्मात् परः सन् नासाविकः समीपगत इत्यत आह-- `दम्भेः' इत्यादि। हलित्यनेन हल्जातिरुच्यते, न तु व्यक्तिः। तेन यदा `ता एव व्यक्तयस्त्यक्तभेदा जातिः' इति दर्शनम्; तदा तासां व्यक्तीनां हल्त्वेनाश्रितानां नास्ति व्यवधानम्। अतो यैव हल्जातिरिकः समीपवर्तिनी तत एव परः सन्निति दम्भेर्विहितस्य सनः कित्त्वं सिद्धमेव। यदाप्यर्थान्तरभूता जातिर्व्यक्तिषु प्रत्येकं परिसमाप्ता निरवयवैका, तदापि नास्ति व्यवधानम्; यस्माद्व्यक्तिर्व्यक्त्यन्तरस्य व्यवधायिका भवति, न तु जातेः; तस्या अशरीरिणीत्वात्। तस्मादिहापि दर्शने यैव हल्जातिरिकः समीपगता तत एव परः सन्निति दम्भेः परस्य सनः कित्त्वं भवति। तस्यास्तु व्यक्तिव्यतिरिक्ताया जातेर्यदिकमपेक्ष्य समीपवर्तिनीत्वम्, यच्च तज्जातिमपेक्षमाणस्य सनः परत्वम्-- तदुभयं व्यक्तिद्वारकं वेदितव्यम्। तत्र नकारव्यक्तिरिकः समीपगतेति तदाधारा हल्जातिरपीकः समीपगतेति भकारस्य व्यक्तेः परः सन्निति तदाधारभूताया जातेरपि परः सन्, न तु जातेर्व्यक्तिनिरपेक्षं समीपवर्तिनीत्वं सम्भवति। नापि जात्यपेक्षं सनः परत्वम्; तदुभयं व्यक्तिद्वारकं वेदितव्यम्। तत्र नकारव्यक्तिरिकः समीपगतेति तदाधारा हल्जातिपीकः समपीगतेति भकारस्य व्यक्तेः परः सन्निति तदाधारभूताया जातेरपि परः सन, न तु जातेर्व्यक्तिनिरपेक्षं समीपवर्तिनीत्वं सम्भवति नापि जात्यपेक्षं सनः परत्वम्; जातेरशरीरिणीत्वात्। यदि तर्हि व्यक्तिद्वारकमेतदुभयम् ? एवं तर्हि विपर्ययोऽपि व्यक्तिद्वारकः स्यात्। भकारव्यक्तिरिकः समीपगता न भवतीति जातिरपि न स्यात्; नकारव्यक्तेः परः सन् न भवतीति जातेरपि न स्यात्, ततश्च हल्ग्रहमस्य सत्यपि जातिवाचकत्वे दम्भेः परस्य सनः कित्त्वं न सिध्यत्येव ? नैतदस्ति; यद्यपि जातेर्व्यक्तिद्वारकमिकः समीपवर्तिनीत्वं तद्विपर्ययश्च, सनोऽपि यद्यपि व्यक्तिद्वारकं जात्यपेक्षं परत्वं तद्विपर्ययश्च; तथापि यदत्र हल्त्वसामान्यस्येकः समीपगतत्वं यदपेक्षञ्च सनः परत्वं तदाश्रयं कित्त्वं भविष्यतीति विपर्ययस्तु विद्यमानोऽपि नापेक्ष्यत एव, लक्ष्यानुरोधात्।

ननु च हल्त्वं नाम जातिर्नासत्येव, तथा हि-- हलिति संज्ञाशब्दः संङ्केतवशादेव प्रवर्तते डित्थादिशब्दवत्। न हि यथा गवादिषु गोत्वादिकं नाम सामान्यमभिन्नमस्ति, तथा हकारादिषु वर्णेषु हल्त्वं नाम सामान्यमभिन्नमस्तीति शक्यमभ्युपगन्तुम्; तन्नबन्धनस्याभावात्। ततश्चायुक्तमुक्तम्-- दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्त सिद्धमिति, नैतदस्ति; जातिपदार्थवादिनां मते येऽपि तावदेकवस्त्वभिधायिनः संज्ञाशब्दा देवदत्तादयस्तदर्थानामप्यवस्थाभेदे परिकल्पितानानात्वेन जातिरभ्युपगम्यते, किं पुनर्हलित्येवमादीनामनेकवर्णविषयाणां संज्ञाशब्दानाम !अन्यथा ह्यतिव्यापिनी शब्दार्थस्य व्यवस्था स्यात्। इदञ्च तावद्भवान् प्रष्टव्यः-- गवादिषु जातेरस्तित्वस्य किं निबन्धनं येनासौ तत्राभ्युपगम्यत इति ? भिन्नेष्वभिन्नाभिधानप्रत्ययाविति चेत्, एतावितरत्रापि समानौ।यथैव हि गवादिषु भिन्नेष्वपि प्राक् सह्केतादुत्तरकालमनुयायिनौ तौ भवतः, तथा हकारादिष्वपि । प्राक् सङ्केताद्यथा तेषु तौ न भवतस्तथा गवादिष्वपि। तस्माद् यौ भिन्नेष्वभिन्नाभिधनाप्रत्ययौ जातिसद्भावसम्प्रत्ययहेतुभूतौ हल्ष्वपि स्त इति तत्रापि हल्त्वं नाम जातिरभ्युपेया, न तु गवादिष्वेव गोत्वादिकमस्तीत्येकान्त एव।

`धिप्सति, धीप्सति' इति। `सनीवन्तर्ध' (7.2.49) इत्यादिना यत्र पक्ष इण् नास्ति तत्रेदमुदाहरणम्। `दम्भ इच्च' (7.4.56) इतीत्त्वम्, ईत्त्वञ्च, `अत्र लोपोऽभ्यासस्य' (7.4.58) इत्यभ्यासलोपः। `खरि च' (8.4.55) इति चर्तम् = भकारस्य पकारः।

कित्त्वे सति `अनिदिताम्' (6.4.24) इति न लोपः। दकारस्य भष्भावेन धकारः।।

11. लिङ्सिचावात्मनेपदेषु। (1.2.11)

`लिङसिचावात्मनेपदेषु परतः'इति। कथं पुनर्लिङात्मनेपदेषु परतो भवति, यावता सिच एवात्मनेपदेषु परत्वं सम्भवति, न लिङः ? एवं मन्यते-- लिङेकदेशेऽत्र सीयुटि लिङशब्दो वर्तते, यथा-- `न धातुलोप आर्धधातुके' (1.1.4) इत्यत्र धात्वेकदेशे धातुशब्दो वर्तते। तस्मात् सीयुट एवानेन प्रकारेण कित्त्वं विधीयते। अथ वा-- यथा हल्ङ्यादिसूत्रे (6.1.68) ययोरेव दीर्घत्वं सम्भवति तयोरेव ङ्यापो दीर्घादित्येतद्विशेषणम्, तथेहापि यस्मादात्मनेपदं परं सम्भवति सिचः, तस्यैवैतद्विशेषणम्। आत्मनेपदग्रहणं भवति परस्मैपदव्यवच्छेदार्थम्।

`भिस्तीष्ट'इति। `आशिषि लिङलोटौ' (3.3.173) इति लिङ्; स्वरितत्वादात्मनेपदम्। एवमुत्तरत्रापि स्वरितञितः कर्त्रयात्मनेपदमनेनैव वेतितव्यम्। `सुट तिथोः' (3.4.107) इति सुट्। कर्तरि श्नम्, `लिङ सलोपोऽनन्त्यस्य' (7.2.79) इति च न भवति, `लिङाशिषि' (3.4.116) इत्यार्धधातुकत्वात्, तयोश्च सार्वधातुके विधानात्। `भुत्सीष्ट' इति। बुधेः `अनुदात्तङितः' (1.3.12) इत्यात्मनेपदं वेदितव्यम्। उत्तरत्राप्यनुदात्तङिद्भ्यः कर्तर्यात्मनेपदमनेनैव वेदितव्यम्। `अभित्त' इति। `झलो झलि' 8.2.26) इति सिचो लोपः। `अबुद्ध' इति। `झषस्तथोर्धोऽधः' (8.2.40) इति तकारस्य धकारः, `झलां जश् झशि' (8.4.53) इति पूर्वधकारस्य दकारः। `यक्षीष्ट' इति। स्वरितेत्त्वादात्मेपदम्। पूर्ववत् षत्वं कत्वञ्च। `संप्रसारणं हि स्यात्' इति। वच्यादिसूत्रेण (6.1.15)।

`अद्राक्षीत्' इति। `अस्ति सिचोऽपृक्ते' (7.3.96) इतीट्, `वदव्रजहलन्तस्याचः' (7.2.3) इति वृद्धिः। पूर्ववत् षत्वकत्वे।।

12. उश्च। (1.2.12)

लिङसिचाविहानुवर्तमानौ धातुं सन्निधापयतः, तत एव तयोर्विधानात्। न च ऋकारेण विशिष्यते। `येन विधिस्तदन्तस्य ' (1.1.72) इति ऋकारेण तदन्तविधिर्विज्ञायत इत्याह--`ऋकारान्ताद्धातोः' इत्यादि।

अथ `ऋ गतौ' (धा.पा.1098) इत्यस्य धातोर्ग्रहणं कस्मान्न भवति ? शैलीहेयमाचार्यस्य यत्र यस्य धातोर्ग्रहणमिच्छति तत्र यस्य श्तिपा निर्देशः करोति, यथा-- `अर्तिपिपर्त्योश्च' (7.4.77) `सर्तिशास्त्यर्तिभ्यश्च' (3.1.56) इति, न चेह श्तिपा निर्देशः कृतः; तस्मादृवर्णस्यैवेदं ग्रहणम्, न धातोः। `अकृत' इति। `ह्रस्वादङ्गात् (8.2.27) इति सिचो लोपः। `वरिषीष्ट' इति। वृङो वृञो वैकस्य रूपम्। `लिङसिचोरात्मनेपदेषु' (7.2.42) इतीट्।

13. वा गमः। (1.2.13)
`संगसीष्ट' इति। `समो गमृच्छि' (1.3.29) इत्यादिनात्मनेपदम्। `समगत' इति।
ह्रस्वाङ्गात्' (8.2.27) इति सिचो लोपः।

14. हनः सिच्। (1.2.14)
`आहत' इति। ` आङो यमहनः' (1.3.28) इत्यात्मनेपदम्। पूर्ववत् सिचो लोपः।
`आहसत' इति। `आत्मनेपदेष्वनतः' (7.1.5 इत्यदादेश-। अथ सिज्ग्रहणे प्रकृते पुनः सिज्ग्रहणं किमर्थं क्रियत इत्याह-- `सिज्ग्रहणं लिङनिवृत्यर्थम्' इति। प्रकृतं हि सिज्ग्रहणं लिङा सह सम्बद्धम्, अतस्तदनुवृत्तौ सत्यां तस्याप्यनुवृत्तिराशङ्क्येत; तस्मात् तन्निराकर्तुं सिज्ग्रहणं क्रियते। ननु च हन्तेलिङि वधादेशेन भवितव्यम्; न च तत्र सत्यपि कित्त्वे किञ्चिदनिष्टमापद्यते, तत् कस्माल्लिङनिवृत्त्यर्थं सिज्ग्रहणं क्रियत इत्यत आह-- `उत्तरत्र' इत्यादि। यद्यत्र लिङनुवर्त्तते तत उत्तरत्र तस्यानुवृत्तिः स्यात्, ततश्चोत्तरसूत्रेण तस्यापि कित्त्वं स्यादित्यभिप्रायः।
इह तु वृत्तावात्मनेपदेन सिज् न विशेष्यत इत्यात्मनेपदं निवृत्तमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तन्निराकर्तुमाह--- `आत्मनेपदग्रहणम्' इत्यादि। इहापि कस्मान्न भवतीत्यत आह-- `इह तु' इत्यादि। `लुङि च' (2.4.43) इति हन्तेः परस्मैपदेषु लुङि वधादेशः क्रियते, स च नित्यः। नित्यत्वन्तु तस्य `आत्मनेपदेष्वन्यतरस्याम्' (2.4.44) इत्युत्तरसूत्रेऽन्यतरस्यां ग्रहणात्। नच नित्ये वधादेशे कित्त्वस्य किञ्चित् प्रयोजनमस्ति अतो नेहात्मनेपदस्यानुवृत्तिरुपपद्यते।
अथ किमर्थं हन्तेः परस्य सिचः, कित्त्वं विधीयते, यावता `सार्वधातुकमपित्' (1.2.4) इति सिचः परस्य सार्वधातुकस्य ङित्त्वमस्त्येव ? तत्र `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः सिद्धः। सिच इदित्त्वान्न सिध्यतीति चेत् ? न; सिच इकारस्योच्चारणार्थत्वात्। तथा हि `च्लेः सिच्' (3.1.44) इत्यत्र वक्ष्यति-- `इकार उच्चारणार्थः' इति। एवमपि च्लेरिदित्वात् सिचोऽपि स्थानिवद्भावेनेदित्त्वमतो न सिध्यतीति चेत्, न ; च्लेरकारस्योच्चारणार्थत्वात्. तथा हि `च्लि लुङि' (3.1.43) इत्यत्र वक्ष्यति--- `इकार उच्चारणार्थः' इति। एवं तर्हि सिद्धे ङित्त्वे सति यत् पुनरिह हनः सिजिति सिचः कित्त्वं विदधाति तज्ज्ञापयति--बाह्य सार्वधातुकमाश्रित्य सिजन्तस्य `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपो न भवतीति; तेनारंस्त,अमंस्त आयंस्त पादमिति सिद्धं भवति; अन्यथा ह्यनुनासिकलोपे कृत आयतेत्यनिष्टं रूपं स्यात्।

15.यमो गन्धने। (1.2.15)
ननु च `यम उपरमे' (धा.पा.984) इति पठ्यते, तत् कथमयं गन्धने वर्तते, इत्यत आह-- `अनेकार्थत्वात्' इति। `आङो यमहनः' (1.3.28) इत्यत्र `अकर्मकाच्च' (1.3.26) इत्यतोऽकर्मकग्रहणमनुवर्तते। तत् कथमिह सकर्मकत्वे सत्यात्मनेपदमित्यत आह-- `सकर्मकत्वेऽपि इत्यादि। सकर्मकत्वन्तु पदादेः क्रमणोऽत्र विद्यमानत्वात्। `उदायंस्त पादम्' इति। आकृष्टवानित्यर्थः।।

16. विभाषोपयमने। (1.2.16)
`दारकर्म' इति। कर्मशब्दः क्रियावाची। दारक्रियेत्यर्थः।।

17। स्थाघ्वोरिच्च। (1.2.17)
सिच्च किद्भवतीति चकारेण कित्त्वं समुच्चीयत इति दर्शयति। किमर्थं पुनः सिचः कित्त्वं विधीयते; यावता गुणप्रतिषेधस्तस्य फलम्, इकारविधानसामर्थ्यादेव गुणो न भविष्यति; अन्यथा ह्येकारमेव विदध्यात् ? नैतदस्ति; लाघवार्थं हीकारविधानं स्यात्। दीर्घोच्चारणाद्ध्रस्वोच्चारणं लघु भवति। `उपास्थित' इति। `समप्रविभ्यः स्थः' (1.3.22) इत्यतः स्थग्रहणेऽनुवर्तमाने `उपान्मन्त्रकरणे' (1.3.25) इत्यत उपादिति तेन `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या.प.12) इतीत्त्वं नोत्सहते सिचं विहन्तुम्, तत् कुतो लोपः ? नैतदस्ति;न हीत्त्वं सिचीत्युच्यते, किं तर्हि ? इकारश्चान्तादेशो भवति सिच्च किद्भवतीति। अथापि सिज्निमित्तकं स्यात् ? एवमप्यदोषः; तस्याः परिभाषायाश्चानित्यत्वात्। अनित्यत्वन्तु सप्तमेऽध्याये ज्ञापयिष्यते(काशिका.7.1.13)।
`इच्च' इत्यादि। हेतुशब्दोऽत्राध्याहार्यः। तेन `षष्ठी हेतुप्रयोगे' (2.3.26) इति हेतुशब्दप्रयोगे कस्येति षष्ठी भवति। तकार इत् तकारेत्, तकार एव वा इद् यस्य स तकारेत्, तकारेतो भावस्तकारेत्त्वम्। इच्चेत्यत्र निर्देशे कस्य हेतोरिकारस्य तकारेत्त्वं क्रियते ? किमर्थमिकारस्तपरः क्रियत इत्यर्थः। शेषलक्षणा वा कार्यसम्बन्धविवक्षायां षष्ठीयम्। कस्य कार्यस्य निष्पत्त्यर्थमिकारस्तपरः क्रियत इति यावत्।

`दीर्घो मा भूत' इति, असति हि तपरत्वेऽण् गृह्यमाणः सवर्णान् गृह्णातीतीकारेण सवर्णानां ग्रहणे सति स्थानेन्तरतमपरिभाषयोपास्थित, अदितेत्यत्र दीर्घस्थाने दीर्घो भवति, स मा भूदिति तपरत्वं क्रियते।

`ऋतेऽपबि सः' इति। स इत्यनेन दीर्घस्य प्रत्यवमर्शः। ऋतेऽप्यस्मादेव वचनाद् घुमास्थादिसूत्रेण (6.4.66) दीर्घः सिद्धः, तस्माद् वचनसामर्थ्याद्दीर्घो न भविष्यतीत्यभिप्रायः। `भाव्यमानोऽण् सवर्णान् न गृह्णाति' (व्या.प.30) इत्यतो दीर्घो न भविष्यतीति। एष तु परिहारो नोक्तः, भाव्यमानेनाप्यणा क्वचित् सवर्णानां ग्रहणात्। तथा हि-- अदस औप्रत्यये परतस्त्यदाद्यत्वे `वृद्धिरेचि' (6.1.88) इति वृद्धौ कृतायाम् भवति। `अदसोऽसेर्दादु दो मः' (8.2.80) इत्युकारो विधीयमानः सवर्णानां ग्रहणादौकारस्य दीर्घस्य स्थाने दीर्घ एव भवति-- अमू इति।

`अनन्तरे प्लुतो मा भूत्' इति। अनन्तरार्थे विसदृशार्थ आरम्भे सति।कुत एतत्? विसदृशस्य आकारस्य स्थाने क्रियमाणो ह्रस्वो भवति, न पुनः प्लुतः। तस्मात् प्लुतबाधनार्थं तपरत्वं कर्तव्यम्। एतदपि नास्ति प्रयोजनम्। `प्लुतश्च विषये स्मृतः' इति। चशब्दो हेतौ। प्लुतो हि दूराद्धूतादिविषयविशेषे (8.2.84) उक्त एव। तत्र यद्यनेन प्लुतो विधीयते तदा सर्वत्र दूराद्धूतादिविषयेऽन्यत्र चानेन भवितव्यम्, ततश्च दूराद्धूतादिविषयेऽपि तस्मिन् भवत्युक्तानुवाददोषः स्यात्; तस्य कृतस्य करणात्। तस्मात् पक्ष उक्तानुवाददोषो मा भूदिति ह्रस्व एव भविष्यति, न प्लुतः इति प्रत्याख्यातं भाष्ये तपरत्वम्। अन्ये तु वर्णयन्ति-- `प्लुतश्च विषये स्मृतः' इत नानेन तपरत्वं प्रत्याख्यायते, किं तर्हि? तस्य प्रयोजनमाख्यायते। दूराद्धूतादिविषये प्लुत इष्टोऽभिप्रेतः, स न प्राप्नोति। स्थानेऽन्तरतमपरिभाषया(1.1.50) दीर्घस्यैव स्थाने दीर्घ एव विधीयते। ननु चोक्तं सिद्ध एव दीर्घ इति ? सिद्धस्य पुनर्वचनं प्लुतस्य बाधनार्थं स्यात्। इष्यते च प्लुतो दूरादधूतादिविषये। तस्मात् तस्य बाधको दीर्घो मा भूदिति तपरत्वं कर्तव्यम्। तेन विचार्यमाणानामित्याष्टमिको भवत्येव प्लुत इति।

18. न क्त्वा सेट्। (1.2.18)

क्त्वाप्रत्ययस्यौपवेशिकं कित्त्वमस्त्येवेति तदिटः क्त्वाप्रत्ययेन ग्रहणात् सेटोऽपि प्राप्नोतीत्यतः प्रतिषेधऽयमारभ्यते। `क्त्वाप्रत्ययः सेट् किन्न भवति' इति। अथ किं ककारस्येत्संज्ञाप्रतिषेधात् कित्त्वन्न भवति ? कित्कार्यस्य प्रतिषेधाद्वा ? यदि ह्यत्र ककारस्येत्संज्ञाप्रतिषेधादकित्त्वं विधित्सितं स्यादित्संज्ञाप्रकरणे `लशक्वसेट्क्त्वातद्धितयोः' इति सूत्रं कुर्यात्। एवं हि द्विष्प्रतिषेधो न कर्त्तव्यो भवति। तस्मात् कित्त्वप्रतिबद्धं यत् कार्यं तत्प्रतिषेधादकित्त्वं सेटः क्त्वाप्रत्यस्यानेन क्रियते, न तु ककारस्येत्संज्ञाप्रतिषेधात्।

अथ सानुबन्धकस्य ग्रहणं किमर्थम् `न त्वा' इत्येवोच्येत,एवं हि लघु सूत्रं भवति? नैतदस्ति; ककारानुच्चारणे हि कश्चिद्द्वेष्यमपि विजानीयात्। सेटः क्त्वाप्रत्ययस्य ककारानुबन्ध एव नास्ति, निरनुबन्धकस्योच्चारणादिति। तदेवं मा विज्ञायीति सानुबन्धकस्योच्चारणम्।कः पुनः सेटो निरनुबन्धकत्वे विधौ निरनुबन्धक उच्चार्यते ? एवमपि सेट एव ग्रहणं स्यात्, नानिटः;सानुबन्धकत्वात्।

`निगृहीतिः'इति। `स्त्रियां क्तिन्' (3.3.94) `तितुत्रतथ' (7.2.9) इति `ग्रहादीनां प्रतिषेधो वक्तव्यः (वा.831. ?) इति तितुत्रतथेत्यादिनेट्प्रतिषेधो न भवति।`उपस्निहितिः' इति। `स्निह प्रीतौ' (धा.पा.1200),`निकुचितिः' इति। `कुन्चु क्रुन्चु कौटिल्याल्पीभावयोः'(धा.प.185,186) एषु त्रिषूदाहरणेषु यथाक्रमं संप्रसारणगुणप्रतिषेधौ। `अनिदितां हल उपधायाः क्ङिति' (6.4.24) इत्यनुनासिकलोपश्च कित्त्वाद्भवति।

`न सेट्' इत्यादि। न सेडित्येतावता योगेनाकित्त्वे सति सिद्धं देवित्वेत्यादि,क्त्वाग्रहणं तु किमर्थम्, तेन विनाऽकित्त्वे सति `गुध परिवेष्टने' (धा.पा.1120) निगुधितो निगुधितो निगुधितवानित्यत्र निष्ठायां प्राप्नोतीति चेत् ? नैतदस्ति; निष्ठायामवधारणात्। `निष्ठा शीङस्विदिमिदि' (1.2.19) इत्यत्रावधारणान्निष्ठायां न भविष्यति-- शीङादिभ्य एव निष्ठा सेट् किन्न भवति नान्येभ्यो धातुभ्य इति। शीङादिभ्यो निष्ठैवेति विपरीत नियमस्तु नाशङ्कनीयः, न ह्यनिष्टार्था शास्त्रे प्रक्लृप्तिरिति न भविष्यति। लिटस्तर्हि कित्त्वस्य प्रतिषेधः स्यात्, ततश्च जग्मिव,जग्मित्येतत्र `गमहन' (6.4.98) इत्यादिनोपधालोपो न स्यादित्यत आह-- `ज्ञापकान्न परोक्षायाम्' इति। परोक्षे विहितत्तवाल्लिटः श्रुतिः परोक्षेत्युच्यते, तस्यां कित्त्वप्रतिषेधो न भविष्यति। कथम् ? ज्ञापकात् । किं तज्ज्ञापकम् ? इत्याह-- `सनि झल्ग्रहणं विदुः' इति। यदयम् `इको झल्' (1.2.9) इति सन्विशेषणं करोति,ततो ज्ञायते-- औपदेशिकस्य कित्त्वस्यन सेडिति प्रतिषेधोऽयम् नातिदेशिकस्येति। झल्ग्रहणं हिशिशयिषत इत्यत्र कित्त्वं मा भूदित्येवमर्थः क्रियते। यदि च न सेडिति प्रतिषेधः आतिदेशिकस्यापि कित्त्वस्य स्यात्; झल्ग्रहणमनर्थकं स्यात्। अस्त्वत्र कित्त्वम्, तस्य न सेडिति प्रतिषेधो भविष्यतीति तस्मादौदेशिकस्य कित्त्वस्य प्रतिषेधोऽयं नातिदेशिकस्येति। अस्यार्थस्य ज्ञापकं झल्ग्रहणं स्यात्, `स्थाध्वोरिच्च' (1.2.17) इत्यत्र झलादौ सिचीत्वं यथा स्यात्, अजादौ मा भूदिति-- उपास्थायिषातामिति। अत्र हि `स्यसिच्सीयुट्तासिषु' (6.4.62) इत्यादिना चिष्वद्भावः प्राप्नोति, इत्त्वञ्च; तत्र परत्वाच्चिण्वद्भावादिट्। चिण्वद्भावे सति `आतो युक् चिण्कृतोः' (7.3.33) इति युक्; तत्रासति झल्ग्रहण इडादावपीत्त्वं यकारस्थाने प्राप्नोति, नैतदस्ति; यस्मादित्त्वं कित्सन्नियोगेन विधीयते। कित्त्वं हि प्रधानभूतम्, इत्त्वमन्वाचयशिष्टम्। अतः कित्त्वाभावे तदित्त्वं न भविष्यतीति। अथ `स्थाध्वोरिच्च' (1.2.17) इत्यत्रापि कित्त्वं कस्मान्न भवति ? `न सेट्' इत्येतावता योगेन प्रतिषिद्धत्वात्।

`रेण तुल्यं सुधीवनि' इति। रेफेण तुल्यमेतदित्त्वम्। क्व चोदाहरणे ? सुधीवनीत्यत्र। शोभना धीवानो यस्यां सा सुधीवा। `अनो बहुव्रीहेः' (4.1.12) इति ङीपोऽत्र प्रतिषेधे कृते यथा `वनो र च' (4.1.7) इति रेफो ङीप्सन्नियोगेन विधीयमानस्तदभावे न भवति, तथा कित्तवसन्नियोगेन विधायमानमित्त्वं तदभावे न भविष्यति। किमर्थं तर्हि

क्त्वाग्रहणम् ? क्वसौ कित्त्वप्रतिषेधो मा भूदित्येवमर्थं क्त्वाग्रहणं कर्त्तव्यम्। क्वसौ त्वौपदेशिकं कित्त्वमस्ति, तस्य `न सेट्' इत्येतावता योगेन प्रतिषेधः स्यात्। ततश्च जग्मिवान्-- इत्यत्रोपधालोपो न स्यात्। `वस्वर्थं किदतीदेशात्' इति। न भविष्यतीत्यध्याहार्यम्। अस्तु क्वसावौपदेशिकस्य कित्त्वस्य प्रतिषेधः, सत्यपि तस्मिन् `असंयोगाल्लिट् कित्' (1.2.5) इति यदातिदेशिकं कित्त्वम्, तेनोपधालोपो भविष्यति। झल्ग्ररहणादातिदेशिकस्य कित्त्वस्य प्रतिषेधो न भविष्यतीत्युक्तं ह्येतत्। तस्माद्वस्वर्थं क्त्वाग्रहणं न भविष्यतीति।
एवं तर्हि-- निगृहीतिः प्रयोजनम्। क्तिनि तु प्रतिषेधो मा भूदित्येवमर्थं
क्त्वाग्रहणमित्यर्थः। जग्मिवानित्यत्र `विभाषा गमहनविदविशाम्' (7.2.68) इति क्वसोरिट्, `उगिदचाम्' (7.1.70) इति नुम्, हलङ्यादिसंयोगान्तलोपौ (5.1.68; 8.2.23)
`सान्तमहतः' (6.4.10) इत्यादिना दीर्घः।

19. निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः। (1.2.19)
`शीङ स्वप्ने' (धा.पा.1032) , `ञिष्विदा गात्रप्रक्षरणे' (धा.पा.1188), `ञिमिदा स्नेहने' (धा.पा.1243), `ञिक्ष्विदा स्नेहनमोचनयोः' (धा.पा.1244), `ञिधृषा प्रागल्भ्ये' (धा.पा.1269) । `शयिततवान्' इति। `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः। `शयितः' इति। `गत्यथाकर्मक' (3.4.72) इत्यादिना कर्तरि क्तः। `प्रस्वेदितः' इत्यादौ `आदिकर्मणि क्तः कर्तरि च' (3.4.71) इत्यनेन प्रशब्द आदिकर्म = प्रारम्भं द्योतयति।`प्रधर्षितः' इति। वैयात्यादन्यत्रेदमुदाहरणम्। तत्र हि `धृषिशसीवैयात्ये' (7.2.19) इतीट्प्रतिषेधेन भवितव्यम्। प्रकृतिग्रहणे यङलुको ग्रहणं स्मरति। अतो यङलुको `एरनेकाचः' (6.4.82) इत्यादिना यणादेशः।।

20. मृषस्तितिक्षायाम्। (1.2.20)
तितिक्षा = क्षमा, क्षान्तिरिति। यद्येवम्, क्षान्तिग्रहणेव कर्त्तव्यम्,लघु ह्येवं सूत्रं भवति ? सत्यमेतत्; वैचित्र्यार्थं तु न कृतम्।
`अपमृषितम्' इति। अपरामृष्टमित्यर्थः, अनेकार्थत्वातद्धातूनाम्। अनेकार्थत्वं तु तितिक्षाग्रहणाद्विज्ञायते। असति हि तत्र मृषस्तितिक्षायामेव पठ्यत इति तन्न कुर्यात्, व्यवच्छेद्याभावात्।

21. उदुपधाद्भावदिकर्मणोरन्यतरस्याम्। (1.2.21)
`आदिकर्मणि वर्तमानः' इति। आदिभूतक्रियाक्षण आदिकर्म, तस्मिन् भूतत्वेन विवक्षते यः क्तो भवति, स आदिकर्मणि वर्तते। `द्योतितमनेन, द्युतितमनेन' इति। `द्युत
दीप्तौ' (धा.पा.741) नंपुसके भावे क्तप्रत्ययः। एवं `मोदितमनेन, मुदितमनेन' इत्यत्रापि ; `मुद हर्षे' (धा.पा.16) इत्यस्मात्। `प्रद्युतितः' इत्यादिषु तु `आदिकर्मणि क्त कर्त्तरि च' (3.4.71) इति क्तः कर्त्तर्येव विधीयते, न कर्मणि; धातोरकर्मकत्वात्. नापि भावे; भावोदाहरणादविशेषप्रसङ्गात्।कर्त्तर्यव्युत्पन्नः क्त आदिकर्मसम्बन्धादादिकर्मणीत्युच्यते।आदिकर्मसम्बन्धस्त्वर्थद्वारकः।
`रुचितम्' इति। `रुच दीप्तौ' (धा.पा. 745) अस्याकर्मकत्वात् `गत्यर्थाकर्मक' 3.4.72) इत्यादिना कर्त्तरि क्तः। दीप्तिमत् कार्षापणमित्यर्थः। आदिकर्मात्र न विवक्षितम्। `प्रभुक्त ओदनः' इति। `भुज पालनाभ्यवहारयोः' (धा.पा.1454) `तयोरेव कृत्यक्तखलर्थाः' (3.4.70) इति कर्मणि क्तः। तस्यादिकर्मसम्बन्धादादिकर्मणि वृत्तिः।
`गुध परिवेष्टने' (धा.पा.1120) इति दौवादिकः। निगुधितमिति भावे क्तः। यदि व्यवस्थितविभाषया शब्विकरणानामेव भवति, सेड्ग्रहणेन किमर्थमिह निष्ठा विशिष्यते ? अशब्विकरणत्वादेव हि प्रभुक्त इत्यत्र न भवति। न हि भुजिः शब्विकरणः, अपि तु श्नम्विकरणः, सत्यमेतत्; उत्तरार्थं सेड्ग्रहणमनुवर्त्तनीयम्। अतस्तदुत्तरार्थयनुवर्त्तमानमिहापि मन्दधियां सुखप्रतिपत्तिर्यथा स्यादित्येवमर्थम्। तकारोऽत्र मुखसुखार्थः, न दीर्घनिवृत्त्यर्थः; अलघूपधत्वादेव हि दीर्घोपधानां गुणप्रसङ्गाभावात्।।

22. पूङः क्त्वा च।(1.2.22)
`न सेट् वर्त्तते' इत्यक्तम्। `न क्त्वा सेट्' (1.2.18) इत्यतः। ननु च पूङः परयोः क्त्वानिष्ठयोरिटा न भवितव्यमेव; `श्रयुकः किति' (7.2.11) इति प्रतिषेधात्। तदपार्थिका सेड्ग्रहणानुवृत्तिरिति यश्चोदयेत् तं प्रत्याह-- पूङश्चेड् विहितः' इत्यादि। अत क्त्वाप्रत्ययस्योदाहरणं कस्मान्न प्रदर्शितमित्यत आह-- `क्त्वाप्रत्ययस्य' इत्यादि। यदि ह्यनेन योगेन क्त्वाप्रत्ययस्य कित्त्वं प्रतिषिध्येत, तदा तस्याप्युदाहरणं प्रदर्श्येत, न चानेन प्रतिषिध्यते, किन्तर्हि ? `न क्त्वा सेट्' (1.2.18) इत्यनेनैव प्रतिषिद्धत्वात्। तस्मात तस्योदाहरणं न प्रदर्शितमितित भावः। क्त्वाप्रत्ययस्य `न क्त्वा सेट्' (1.2.18) इत्यनेन प्रतिषेध इत्येतदेव द्रढयितुमाह-- `तथा च ' इत्यादि। `पूङ्श्च' (7.2.51) इत्यत्र सूत्रे द्वयोर्विभाषयोर्मध्ये ये विधयस्ते नित्या भवन्तीति मन्यमानैर्भारद्वाजीयैरिदमुक्तम्-- `नित्यमकित्त्वमिडाद्योः' इति। तौ पुनरिडादी क्त्वानिष्ठाप्रत्ययौ। यदि तर्हि नित्यमकित्त्वमिडाद्योः; तदा क्त्वाग्रहणमनर्थकं स्यात्। विकल्पेन ह्यत्राकित्तवसद्धये तस्य ग्रहणमर्थवद्भवति, नान्यथा। नित्यत्वं कित्त्वप्रतिषेधस्य `न क्त्वा सेट्' (1.2.18) इत्यनेनैव सिद्धत्वादिति

चोद्यमाशङ्क्येदमुक्तम्-- `क्त्वाग्रहणमुत्तरार्थम्' इति। `पूङः' इति सानुबन्धकस्योच्चारणं किमर्थम् ? पोपुवितः, पोपुवितवान्, पोपुवित्वेति यङ्लुगन्तात् कित्त्वप्रतिषेधो मा भूदिति। पूङनिवृत्यर्थं सानुबन्धक्सयोच्चारणं नोपपद्यते; `श्र्युकः किति' (7.2.11) इतीट्प्रतिषेधात्। पूञः परयोः क्त्वानिष्ठयोः सेटोरभावात्।।

23. नोपधात्थफान्ताद्वा। (1.2.23)

`निष्ठेति निवृत्तम्' इति। पूर्वसूत्रे चानुकृष्टत्वात्। `ग्रथित्वा' इति। कित्त्वपक्षे `अनिदिताम्' (6.4.24) इत्यनुनासकिलोपः। `गुफित्वा' इति। `गुफ गुन्फ ग्रन्थे' (धा.पा.1317,1318) `रिफित्वा' इति। `रिफ कत्थनयुद्धनिन्दाहिंसादानेषु' (धा.पा.1306)। ननु चैतद्विक्पाभावेऽपि `रलो व्युपधात्' (1.2.26) इत्यादिनैवात्र विकल्पेन भवतव्यम्, न चानयोर्विकल्पयोः कश्चिद्विशेषोऽप्यस्ति ? एवं तर्हि नोपधग्रहणसाम-
र्थ्याद्योगान्तरकृतोऽपबि विकल्पोऽनेन बाध्यते। ननु च ऋकारोपधो नोपधग्रहणस्य प्रत्युदाहरणविषयो भविष्यति, `ऋफ ऋन्फ हिंसायाम्' (धा.पा.1315,1316), अर्फित्वेति, नैतद्स्ति; इहास्माभिरनयोर्धात्वो रूपत्रयं साध्यम्-- अर्फित्वा, ऋम्फित्वा, ऋफित्वेति। एतत् तु सत्यसति वा नोपधग्रहणऽनेनैव सिद्ध्यत्येव। सति तावन्नोपधग्रहणे, अनोपधस्य ऋफेः `न क्त्वा सेट्' (1.2.18) इति प्रतिषेधे सत्यर्फित्वेति सिद्ध्यति। नोपधस्य तु ऋम्फेरस्मिन् विकल्पे सति, ऋम्फित्वा ऋफित्वेतीदमपरं रूपद्वयं सिद्धयति। असत्यपि नोपधग्रहणे सर्वथास्मिन् विकल्पे सतीदं रूपत्रयं सिद्ध्यत्येव। तस्माद् युक्तमुक्तं प्रत्युदाहरणं रेपित्वेति। `येन विधिस्तदन्तस्य' (1.1.72) इति तदन्तविधौ सिद्धेऽन्तग्रहणम् `इह क्त्वाप्रत्यकाण्डे यत्नमन्तरेण तदन्तविधर्न भवति' इति ज्ञापनार्थम्। तेनोत्तरसूत्रे `ऋत' इति धातुः स्वरूपेण गृह्यते, न तु तदन्त इति।

24. वञ्चिलुञ्च्यृतश्च।(1.2.24)

`वन्चु प्रलम्भने' (धा.पा.1703), `लुन्च अपनयने' (धा.पा.187), `ऋत' इति
सौत्रौ धातुः, यत्र `ऋतेरीयङ' (3.1.29) इतीयङ विहितः। `ऋतेरीयङ' आर्धधातुके
विकल्प्यते' इति। `आदाय आर्धधातुके वा' (3.1.31) इत्यनेन। `वचित्वा' इति। `अनिदिताम्। (6.4.24) इति नलोपः।
`वक्तवा' इति। `उदितो वा' (7.2.56) इतीडभावः पक्षे। चकारो वाग्रहणस्य स्वरितत्वविस्पष्टीकरणार्थः। तेनोत्तरसूत्रे काश्यपग्रहणस्य पूजार्थता; अन्यथा हि तस्य
विकल्पार्थता विज्ञायेत। तथा च द्वयोर्विभाषयोर्मध्यवर्त्तित्वान्नित्योऽयं विधिः स्यात।

25. तृषिमृषिकृशेः काश्यपस्य। (1.2.25)

`ञितृषा पिपासायाम्' (धा.पा.1228), `मृष तितिक्षायाम्' (धा.पा.1164), `कृश तनूकरणे' (धा.पा.1227)।
`काश्यपग्रहणं पूजार्थम्' इति। `काश्यपस्यैवैतद्विषयकं ज्ञानं नान्येषाम्' इत्यसाधारणज्ञानोद्भावनमेव पूजा। तस् तत्पूजाद्वारेण शास्त्रस्यापि महार्थतोद्भावनलक्षणा पूजा कृता भवति। एवन्नाम शास्त्रस्य महार्थत्वं येन तथाविधा मुमुक्षवोऽप्याद्रियन्त इति। तेन विकल्पार्थं काश्यपग्रहणं कस्मान्न भवतीत्यत आह-- वेत्येव हि
वर्त्तते' इति।।

26. रलो व्युपधाद्धलादेः संश्च। (1.2.26)

क्त्वाप्रत्ययश्च `न क्त्वा सेट्' (1.2.18) इति कित्त्वे प्रतिषिद्धे सनोऽप्यकित्वे स्वभावत एव व्यवस्थित उभयत्रेदं विधिमुखेनैव प्रवर्त्तत इतिपक्षे कित्त्वं भवतीति।
`{दिद्युतिषते' -- काशिका,पदमंजरी च} विदद्युतिषते' इति। `द्युतिस्वाप्योः संप्रासरणम्' (7.4.67) इत्यभ्यासस्य संप्रासरणम्। `एषिषिषति' इति। `इषु इच्छायाम्' (धा.पा.1351), इडागमे कृते `अजादेर्द्वितीयस्य' (6.1.2) इति द्वितीयस्यैकाचो द्विर्वनचम्। `बुभुक्षते' इति. `हलन्ताच्च' (2.1.10) इति नित्यं कित्त्वं भवति। लाघवार्थम् `इणुपधात्' इति वाच्ये, इण्ग्रहणानि सर्वाणि परेम णकारेणेति ज्ञापनार्थं `व्युपधात्' इत्युक्तम्। तेन `लण्' इत्यत्र यदुक्तम्-- `इण्ग्रहणानि सर्वाणि परेण णकारेण' इति तदुपपन्नं भवति।।

27. ऊकालोऽज्झ्रस्वदीर्घप्लुतः। (1.2.27)

ऊः कालो यस्याचः स ऊकालः। ननु चायुक्तोऽयं निर्देशः, तथा हि-- ऊ इति शब्दः कालस्तु क्रिया, तत् कुतोऽत्र सामानाधिकरण्यम् ? नैष दोषः; यस्मात् `ऊ' इत्येतत्सहचरितायामुच्चारणक्रियायामिह साहचर्यात् `ऊ' इत्येष शब्दो वर्त्तते, एवमप्ययुक्तम्; यतः `ऊ' इत्येतत्सहचरितं यदुच्चारणं तदूकारस्यैव, नान्यस्याचः। तत्कथं सोऽन्यसम्बन्धिन्या क्रियया ऊकारलः स्यात्, न हि यज्ञदत्तसम्बन्धिनीभिश्चित्रगवीभिर्देवदत्तश्चित्रगुर्भवति ? अयमप्यदोषः; वत्यर्थस्येह गमयन्तीत्युक्तमेतत्। तदेतदुक्तं भवति-- `ऊ' इत्येतत्सहचिरतयोच्चारणक्रियया तुल्योच्चारणक्रिया कालालख्या यस्याचः स ऊकाल इति। ननु च ऊकाल

इत्येकः संज्ञी, संज्ञास्तु तिस्त्रः, ततो वैषम्यात् संख्यातानुदेशो न प्राप्नोतीति यो मन्येत, तं प्रत्याह-- `ऊ इति त्रयाणाम्' इत्यादि। मात्रिकाणां त्रयाणामकः सवर्णे (6.1.101) दीर्घत्वमेकादेशं कृत्वा `ऊ' इति निर्देशः कृत इत्यर्थः। कुतः पुनरेतद्विज्ञायते त्रयाणामेकः प्रश्लेषनिर्देश इति ? तिसृणां संज्ञानां विधानसामर्थ्यात्। न ह्येकस्य भिन्नप्रयोजनमन्तरेणानेकसंज्ञाविधानमर्थवद्भवति। न चेहैकस्यानेकसंज्ञाकरणे भिन्नप्रयोजनमस्ति। `ह्रस्वदीर्घप्लुत' इति यद्येक एवायं शब्दः संज्ञा स्यात्, लाघवार्थत्वात् संज्ञाकरणस्य, महत्याः संज्ञायाः करणमयुक्तं स्यात्। किञ्च-- आवृत्तिधर्माणः संज्ञाशब्दाः प्रदेशेषु भवन्ति, न चायं समुदाय संज्ञाशब्दाः प्रदेशेषु भवन्ति, न चायं समुदायः प्रदेशेष्वावर्त्यते,अपि तु प्रत्येकं ह्रस्वादिशब्दाः। तस्मात् तेषां द्वन्द्वं कृत्वा निर्देश इति मत्वाह- `ह्रस्वदीर्घप्लुतः' इत्यादिः। द्वन्द्वैकवद्भावस्तु `सर्वो द्वन्द्वो विभाषयैकवद्भवति' इति वचनात्। ननु च द्वन्द्वैकवद्भावे `स नपुंसकम्' (2.4.17) इति नुपंसकत्वेन भवितव्यम्, तत्कथं
पुंल्लिङ्गेन निर्देशः, सौत्रत्वान्निर्देशस्य। छन्दसि `व्यत्ययो बहुलम्' (3.1.85) इति लिङ्गव्यत्यय उक्तः। `छन्दोवत्सूत्राणि भवन्ति' (म.भा.1.1.1) इत्यविरुद्धास्य
पुंल्लिङ्गता। उ ऊ ऊ3 इत्यनया आनुपूर्व्यैषां प्रश्लेष इति दर्शयति। कुतः पुनरेष निश्चयः-- एषैवैषामानुपूर्वीति ? एवं मन्यते-- `विभाषा पृष्टप्रतिवचने हेः' (8.2.93) इत्येकमात्रिकस्य हेः प्लुतविधानाज्ज्ञायते-- न मात्रिकोऽन्त्य इति। अन्त्यत्वे हि सति तस्य प्लुतसंज्ञा स्यात्। एवञ्च प्लुतविधानमनर्थं स्यात्। द्विमात्रिकोऽप्यन्त्यो न भवति; `ओमभ्यादाने' (8.2.87) इति द्विमात्रिकस्य प्लुतविधानात्। तस्य चान्त्यत्वे हि सति यदि प्लुतसंज्ञा स्यात्, तदा च प्लुतस्य प्लुतविधानमनर्थकं स्यात्। तसमादन्ते एकमात्रिकद्विमात्रिकौ न भवतः। मध्येऽप्येकमात्रिको न भवति, `अतो दीर्घो यञि' (7.3.101) इति `सुपि च' (7.3.102) इतिच दीर्घविधानसामर्थ्यात्। यदि मध्य
एकमात्रिकः स्यात् तदा तस्य दीर्घसंज्ञा स्यात्,दीर्घस्य दीर्घवचनमकिञ्चित्करं स्यात्, तस्मादादावेकमात्रिकत्वे हि सति पारिशेष्यान्मध्ये द्विमात्रिकः, अन्ते त्रिमात्रिक इति। `उ ऊ ऊ3' इति। अत्राप्युकारादिसहचरितायामुच्चारणक्रियायमुकारादयो वर्त्तन्ते। एवं कालोऽजिति यकारस्य लोपः।
ननु चोकारोऽयमण् गृह्यमाणः सवर्णान् गृह्णातीत्यत उकारेण दीर्घप्लुतयोर्ग्रहणे सति तयोरपि ह्रस्वसंज्ञा भवतीत्यत आह- `कालग्रहणम्' इत्यादि। कालग्रहणे हि येषामेताःसंज्ञा विधीयते तेषां यथाक्रममेकमात्रिकत्व द्विमात्रिकत्वत्रिमात्रिकत्वानि विशेषणानि लभ्यन्ते। तथा हि, कालग्रहणेसति प्रत्येकं वाक्यपरिसमाप्तौ क्रियमाणायां त्रयो बहुव्रीहयो भवन्ति- उः कालो यसय् स उकालः, ऊः कालो यस्य स ऊकालः, ऊ3ःकालो यस्य सः ऊ3 कालः। एषां यथार्ममेकमात्रिकद्विमात्रिकत्रिमात्रिका अचोऽन्यपदार्थाः। यस्मान्मात्रिक एवाचः `उ' इत्येतत्सहचारिण्या उच्चारमक्रियायास्तुल्यकालः; एवं
द्विमात्रिक एवाच `ऊ' इत्येतत्सहचारिण्या उच्चारणक्रियायास्तुल्यकालः; एवं
त्रिमात्रिक एवाच `ऊ3' इत्येतत्सहचारिण्या उच्चारणक्रियायास्तुल्यकालः। एवं च सति
मात्रापरिमाणस्याचो ह्रस्वसंज्ञा विधीयमाना सत्यप्युकारेण दीर्घप्लुतयोर्ग्रहणे तयोर्न भवति, न हि तौ मात्रा परिमाणौ। तेन आलूय, परिणीयेत्यत्र ह्रस्वाश्रयस्तुङ न
भवति।
`प्रत्यक्ष्य, प्रक्ष्य' इति। `तक्षू त्वक्षू तनूकरणे' (धा.पा.655, 656) `रक्ष पालने' (धा.पा.658) `कुगतिप्रादयः' (2.2.18) इति समासे कृते `समासेऽनञ्पूर्वे क्त्वो ल्यप्' (7.1.37) इति ल्यप्। तत्र परतो द्वयोरर्धमातर्योर्हलोः संयोगसंज्ञिनोरूकाल्त्वमस्तीत्यसत्यज्ग्रहणे ह्रस्वसंज्ञा स्यात्, ततश्च ह्रस्वाश्रयस्तुक
प्रसज्येत।
`तितउच्छत्रम्' इति। अत्राकारोकारचोः समुदायस्य ऊकालत्वाद् द्विमात्रिकत्वमस्तीति दीर्घसंज्ञा स्यात्। ततश्च `पदान्ताद्वा' (6.1.76) इति विकल्पितस्तुक्
प्रसज्येत। अज्ग्रहणे तु सति दीर्घसंज्ञा न भवति,अच्समुदायस्याज्ग्रहणेनाग्रहणात् । ननु च सत्यामपि तस्यां समुदायाश्रयायां दीर्घसंज्ञायायमवयवाश्रया ह्रस्वसंज्ञा भविष्यति। तदाश्रयस्तुङनित्य एव, नैतदस्ति; परत्वाद्दीर्घाश्रयस्तुग्विकल्पः
प्राप्नोति। न चैवं विधविषये पुनः प्रसङ्गविज्ञानमस्ति; यत्र पूर्वो विधिः प्रवर्त्तमानः परविधिविज्ञानं न बाधते तत्रैतद्भवति-- `पुनः प्रसङ्गविज्ञानात् सिद्धम्' इति, इह तु नित्यो विधिः परविधिविकल्पविज्ञानं बाधते; नित्यविकल्पयोर्विरोधात्। ततश्च `सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' (व्या.प.40) इति परिभाषयैव विकल्पः स्यात्। तस्मादज्ग्रहणं

28.अचश्च। (1.2.28)
परिभाषेयं लिङ्गवती स्थानिनियमार्था प्रदेशेषु `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इत्येवमादिषूपतिष्ठते;तदुपस्थाने च षष्ठीद्वयं प्रादुर्भवति; विशेषणविशेष्यभावं प्रति कामचारात्। `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इत्यत्राचा प्रातिपदिकं गृह्यमाणं विशिष्यते-- अजन्तस्य प्रातिपदिकस्येति, न तु प्रातिपदिकेना-ज्विशिष्यते। यदि हि प्रातिपदिकेनाज्विशिष्येत-- प्रातिपदिकस्य योऽजिति, तदा मध्यस्थितस्याप्यचो ह्रस्वः स्यात्।
`सुवाग् ब्राह्मणकुलम्' इति। अचा तु प्रातिपदिके विशिष्यमाणे प्रातिपदिकस्यैवेत्येषा स्थानषष्ठी भवति, न चावयवषष्ठी, तेनालोऽन्त्यस्यैवाचो ह्रस्वो भवति। `वाक्यस्य टेः प्लुत उदात्तः' (8.2.82) इत्यत्र गृह्यमाणेन टिशब्देनाज्विशिष्यते-- टेर्योऽजिति। तेन टेर्मध्यवर्तिनोऽप्यचः प्लुतो भवति। यदि त्वचा

टिर्विशिष्यते-- अजन्तस्य टेरिति, तदेहैव स्यात्-- देवदत्ता3 इति; इह तु न स्यात्-- अग्निचिदिति। चकारेणाजित्यनुकृष्यते, त्सय प्रयोजनमिहैव वक्ष्यति। अतिरि- इत्यादीन्युदाहरमानि `एच इग्घ्रस्वादेशे' (1.1.48) इत्यत्र व्युत्पादितानि। चीयते इति कर्मणि लकारः।

`संज्ञाविधाने नियमः' इत्यत्र युक्तिमाह-- `अजिति वर्त्तते' इति। अज्ग्रहणे ह्यनुवर्त्तमाने ह्रस्वादिशब्दा अनुवर्त्तमाना अच एवोपस्थानं प्रति व्याप्रियन्ते;तस्य स्वयमेवोपस्थितत्वात्। ततश्च स्वरूपमात्रपदार्थकाः सन्तो विधीयमानस्याचो विशेषणतामुपयान्ति। तत्रैवमभिसम्बन्धः क्रियते-- अः स्थानेऽज् भवति `ह्रस्वदीर्घप्लुतः इत्येवं संज्ञया विधीयमान इति। `द्यौः, पन्थाः, सः' इति। एतानि `इको गुणवृद्धी' (1.1.3) इत्यत्र व्युत्पादितानि। एषु च यथायोगं `दिव औत्' (7.1.84) `पथिमथ्यृभुक्षामात्' (7.1.85) `त्यदादीनामः' (7.2.102) इत्येभिरौकारादयः स्वरूपेण विधीयमाना दीर्घादिसंज्ञया न विधीयन्त इति हल एव स्थाने ते भवन्ति, नाचः। द्युभ्याम्, द्युभिरित्यत्रापि `दिव उत्(7.1.131) इत्युकारो ह्रस्वसंज्ञया न विधीयत इति हल एव स्थाने भवति, नाचः। ननु च द्यौरित्यादीनि त्रीण्युदाहरणानि `इको गुणवृद्धि' (1.1.3) इत्यनेनैव

संज्ञाविधाननियमेन सिद्धानि, तत्र हि तस्याप्येतानि प्रत्युदाहरणानि प्रागुपन्यस्तानि, तस्मान्नार्थ एतदर्थेन संज्ञया विधीयमानेन नियमेन ? सत्यमेतत्; एवं मन्यते--

द्युभ्याम्, द्युभिरित्येवमर्थं संज्ञाविधाने नियमः कर्त्तव्यः; न ह्युकारस्य गुणसंज्ञास्ति, नापि वृद्धिसंज्ञा; यतः पूर्वेणैव संज्ञाविधाननियमेनैतदपि सिद्ध्यति। तस्मादन्यार्थोऽयं संज्ञाविधाननियमः क्रियमाणो येऽपि विस्मरणशीलाः पूर्वस्य नियमस्य प्रयोजनं न स्मरन्तिताननुग्रहीतुम्-- द्यौः, पन्था-, स इत्येवमर्थोऽपि भवति।।

29. उच्चैरूदात्तः। (1.2.29)

उदात्तादयो लोकवेदयोः प्रसिद्धाः। तत् किं संज्ञाकरणेनेति यश्चोदयेत् तं

प्रत्याह-- `उदात्तादिशब्दाः' इत्यादि। आदिशब्देनानुदात्तस्वरितयोः परिग्रहः।

एवकारो भिन्नक्रमो वर्णधर्मे इत्यस्यानन्तरं द्रष्टव्यः। लोकवेदयोरुदात्तादयः शब्दा वर्णनां यो धर्मः = गुणस्तत्रैव प्रसिद्धाः, न तु तद्वित्यचि। तस्मादिह व्याकरण उदात्तादयो धर्मा यस्याचस्तद्गुणेऽचि संज्ञाप्यन्ते = परिभाष्यन्ते; अन्यथा प्रदेशेषूदात्तादिशब्दश्रवणाद्वर्णधर्म एव गृह्येत, न तद्वानजित्यभिप्रायः। उच्चैरिति श्रुतिप्रकर्षेऽस्ति-- श्रुतिप्रकर्षवत्युच्चैर्भाषते उच्चः पठतीति। अस्ति च प्रमाणाधिकरणवाची उच्चैः स्थितो देवदत्त इति, उच्चैर्नाम प्रमाणम्, तस्य तदधिकरणं तदिहोच्चैः शब्देनोच्यते। तदिह द्वितीयस्योच्चैः शब्दस्यार्थो गृह्यते, नेतरस्येति दर्शयितुमाह-- `उच्चैः' इति। उच्चैर्भाषते इत्येवमादौ तु वाक्ये प्रयुक्तस्योच्चैः शब्दस्य योऽर्थः श्रुतिप्रकर्षः स उच्चैरित्यत्र न गृह्यते। यदि

गृह्येत, उपांशुप्रयोग उदात्तादिसंज्ञा न स्यात्; प्रकर्षाभावात्, प्रकर्षस्थितत्वादुदात्तादयो न विशिष्येरन्। य एव हि कञ्चित् प्रत्युच्चैर्भवति, स एव हि कञ्चित्प्रतति नीचैर्भवति। एवञ्च सर्वमुदात्तं स्यात्, अनुदात्ततमोऽपि चेष्यत इत्यभिप्राय।

`स्थानकृतम्' इत्यादि। उच्यता नाम प्रमाणविशेषः, तदधिकरणभूतस्थानमुच्चैर्भवति। एवञ्च सर्वनमुदात्तं न स्यात्। अनुदात्तमुच्चैरुच्यत इत्यर्थः। `भागवत्सु' इति। भागा अवयवा येषां तानि भागवन्ति। ते भागास्ताल्वादिषु स्थानेष्वौत्तराधर्येण व्यवस्थिताः। स्थानमुच्चैः शब्देनोच्यते, तत् कुतः संज्ञिन उच्चैस्त्वविशेषणम् ? उच्चैस्थाननिष्पन्नत्वात्। तत्र समाने स्थान उच्चैरूर्ध्वभागे यो

निष्पन्नः स उदात्तसंज्ञो भवति। यदि स्थाने य ऊर्ध्वभागनिष्पन्नोऽच् स उदात्तसंज्ञो भवतीत्येतावदुच्यते, एवञ्च स एवानवस्थितदोषः। तथा हि- अल्पशरीरेषु य एव ताल्वादिभाग उच्चैर्भवति, स एव महाशरीरेषु ताल्वादिभागापेक्षया नीचैर्भवति। अतः `समान' इत्येतत् स्थानविशेषणमुक्तम्। एतच्च् लघ्वर्थत्वात् संज्ञाकरणस्यैकाक्षरायां संज्ञायां कर्तव्यायामनेकाक्षरसंज्ञाकरणाल्लभ्यते। ग्रन्थाधिक्यादर्थाधिक्यं भवतीति। ननु च ग्रन्थाधिक्यादत्र

कश्चिदाचार्यस्याधिकोऽर्थोऽभिप्रेत इत्येतावन्मात्रं प्रतीयते, समानत्वमित्येषोऽर्थ विशेषः कुतो लभ्यते ? अविच्छिन्नादुपदेशपारम्पर्यात्। तत् पुनः समानत्वं वक्त्रभिन्नत्वाद्वेदितव्यम्; न तु ताल्वादिस्थानस्याभिन्नत्वात्; अन्यथा तालव्यमेवापेक्ष्योदात्तः स्यात्, न तु कण्ठादीन्। वक्तृरभेदात् तद्द्वारेण भिन्नानामपि ताल्वादीनां समानत्वेऽपि विज्ञायमान एष दोषो न भवति। किंलक्षणः पुनरसावुच्चभागनिष्पन्नोऽजित्याह-- `यस्मिन्' इत्यादि। `आयामः' इत्यस्य विवरणं `निग्रहः' इति। निग्रहः = स्तब्धता। संवृतकण्ठता = कण्ठविवरस्य संवृतता। अत एव शनैर्निष्क्रामन् वायुर्गलावयवाञ्शोषयति। रूक्षता भवत्यस्निग्धता। `ये ते के' इति। यत्तत्किंशब्देभ्यस्त्यदाद्यत्वम्, `अतो गुणे' (6.1.97) पररूपत्वम्,`जसः शी' (7.1.17), `आद्गुणः' (6.1.87)। अत्र प्रातिपदिकस्वरेण प्रकृतिरूदात्ता। `अनुदात्तौ सुप्पितौ' (3.1.4) इति विभक्तिस्वरः। एकादेशस्तु `एकादेश उदात्तेनोदात्तः' (8.1.5) इति।।

30. नीचैरनुदात्तः। (1.2.30)

अन्ववसर्ग इत्यस्य विवरणं मार्दवमिति। शैथिल्यमित्यर्थः। मृदुतेत्यस्य विवरणं स्निग्धतेति। उरुतेत्यस्यापि महत्तेति। महत्त्वादेव कण्ठविवरस्य पुनः शीघ्रं वायुर्निष्क्रामन् गलावयवान्न शोषयतीति। अतः स्वरस्य स्निग्धता भवति। त्व-सम-सिम-नेमेत्यनुच्चानीति सर्वादिष्वेव पठ्यन्ते। अनुच्चानि अनुच्चानि अनुदात्तानीत्यर्थः। `नमस्ते रुद्र' इत्यादि। तेशब्दः `तेमयावेकवचने' (8.1.22) इति `अनुदात्तं सर्वमपादादौ' (8.1.18) इत्यधिकारादनुदात्तः। रुद्रादयोऽपि `आमन्त्रितस्य च' (8.1.19) इत्यनेनाष्टमिकेन सर्वेऽनुदात्ता भवन्तीति।

31. समाहारः स्वरितः।(1.2.31)
उदात्तानुदात्तशब्दावव्विशेषयोः संज्ञे। संज्ञा हि प्रदेशेषूच्चारिताः
संज्ञिनं प्रत्याययन्ति। ताभ्यामिहानुवृत्ताभ्यामुदात्तानुदात्तयोरचोरुपस्थापितयोः प्रत्ययः। तस्मात् समाहारात्मकस्याचः स्वरितसंज्ञा विधीयते।
समाहारशब्दश्चसमाहरणं समाहार इति भावसाधनोऽयं लोके समुदाये रूढः। न चोदात्तानुदात्तात्मकः कश्चिदच्समुदायः सम्भवतीति, ततश्च
संज्ञिनोऽसम्भवात् संज्ञापि न सम्भवीति यश्चोदयेत्, तं प्रत्याह-- `सामर्थ्याच्च' इत्यादि। उच्यते चेदम्-- उदात्तानुदात्तसमाहारः स्वरितसंज्ञो भवतीति, न च
पारिभाषिकोदात्तानुदात्तसमाहारत्मनोऽचः सम्भवोऽस्ति। तत्र सामर्थ्याल्लोकवेदप्रसिद्धौ यौ धर्मावुदात्तानुदात्तौ तावेव गृह्येते; नाचौ। नन्वेवमपि स एव दोषः,
लोके प्रसिद्धोदात्तानुदात्तात्मनोऽच एषा संज्ञा विधीयते, कस्य तर्हि ? लोकवेदप्रसिद्धावुदात्तानुदात्तौ समाह्रियेते यस्मिन्नचि तस्य। सम्भवति चैकस्मिन्नप्यचि
तयोः समाहार इति कुतः संज्ञिनोऽसम्भवः। `समाह्रियेते यस्मिन्' इति ब्रुवताऽधिकरण
साधनोऽयं समाहारशब्दो न भावसाधन इति दर्शितम्। समाह्रियेते = संहन्येते, सहितावुपलभ्येते इत्यर्थः। `शिक्यम्' इति। `पूञो यण्णुग् ह्रस्वश्च'
(द.उ.16) इति यदिति
वर्त्तमाने `श्रन्सेः शि कुट् किच्च' (द.उ.817) इति श्रंसतेर्यत्प्रत्यये शिशब्दादेशे कुडागमे च कृते रूपम्। तित्त्वात् स्वरितम्। `कन्या' इति।
`तिल्यशिक्यमर्त्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः' (फि.सू.4.76) इत्यन्तः स्वरितम्। `सामान्यः' इति। सामनि साधुः। `तत्र साधुः' (4.4.98)
इति यत्प्रत्ययः। क्वेति किंशब्दात् सप्तम्यन्तात्`किमोऽत्' (5.3.12) इत्यत्प्रत्ययः। `क्वाति' (7.2.105) इति क्वादेशः।।

32. तस्यादित उदात्तर्धह्रस्वम्। (1.2.32)
आदौ = आदितः, सप्तम्य्रथे तसिः। अयमेव निर्देशो ज्ञापकः-- `आद्यादिभ्यस्तसिर्भवति' इत्यत्र। तेन तसिप्रकरणे `आद्यादिभ्यः उपसंख्यानम्' (वा.634)
इत्येतन्न वक्तव्यं भवति। `अर्द्धह्रस्वम्' इति। ह्रस्वस्यार्द्धमित्यर्थः। `अर्धं नपुंसकम्' (2.2.2) इति समासः। ततश्च `परवल्लिङ्गम्' (2.4.26) इत्यादिना
पुंल्लिङ्गेन भवितव्यम्, ह्रस्वशब्दस्य पुंल्लिङ्गत्वात्, नैतदस्ति; ह्रस्वशब्दो हि प्रमाणविशेषं गुणमुपादाय प्रवृत्तः, `गुणवनचानाञ्चाश्रयलिङ्गवचनानि' इति
गुणवचनत्वाच् शुक्लशब्द एव ह्रस्वशब्दस्त्रिलिङ्गः। `ह्रस्वः' इति मात्रिकस्य संज्ञा कृता, तस्यैव विभागः स्यात्, न तु दीर्घप्लुतयोरित्याशङ्क्याह--
`अर्द्धह्रस्वम्' इत्यादि। ह्रस्वस्यार्द्धमर्द्धमात्रा भवति, अतोऽर्द्धमात्रा भवति, अतोऽर्द्धह्रस्वग्रहणेनार्द्धमात्रोपलक्ष्यते। तत एव च तस्येत्युक्तम्। त्रयाणां
ह्रस्वदीर्घप्लुतानां स्वरितानां निर्देशार्थम्। यदि चार्द्धह्रस्वग्रहणमर्द्धमात्रोपलक्षणम्, अतस्त्रयाणां निर्देशोऽर्थवान् भवति; नान्यथा।
`ह्रस्वग्रहणमतन्त्रम' इति। अतन्त्रप्रधानम्, उपलक्षणार्थत्वात्। यथा काकेभ्यो दधि रक्ष्यतामित्यत्रकाकाः। तेन सर्वेषामेव ह्रस्वादीनामेष स्वरितविभागो भवति।
नन्वेवमप्याष्टमिकस्य स्वरितस्य विभागो न सिध्यति, तस्यासिद्धत्वात्, नैतदेवम्; यस्मात् परविधिः पूर्वविधावसिद्धः। न चायं विधिः, किं तर्हि ? तस्य
विहितस्य विभागाख्यानार्थः। अथ वा-- `न मु ने' (8.2.3) इत्यत्र नेति योगविभागात् सिद्धं भवति।।.`एवश्रिर्वा' इति। पूर्वो भागोऽयमुदात्तः पटुतरः।
तेनोपरज्यमानस्तद्रूपतामिवापन्नः परो
भागः स्फटिकमणिरिवोपधानेनोपरक्तः शुद्धेनोदात्तेन भिन्नश्रुतिकत्वादनुदात्तव्यपदेशं नार्हति। उदात्तव्यपदेशमपि नार्हति; उपरागमात्रत्वात्। तस्मादेकश्रुतिरिति
केचित्। अन्ये त्वाहुः-- पूर्वेण भागेनानुपजातरूपातिशयेन नोपरज्यते यदोत्तरभागस्तदा स्वेन रूपेण प्रतिभानादनुदात्त इति व्यपदिश्यते। यदा तूपधानेन
स्फटिकमणिरिव पूर्वेण भागेन पटीयसोदात्तेनाभिभूयानुरज्यमानस्तद्रूपतामिवोपपद्यते तदैकश्रुतिरिति व्यपदिश्यते। पूर्वभागश्रुतेरभिन्नैका तुल्याकारा
श्रुतिर्यस्येति कृत्वा। न हि तदानीं पूर्वोत्तरयोः स्वरितश्रुतिं प्रति कश्चित् भेदोऽस्ति; द्वयोरप्युदात्तगुणवत्तया प्रतीयमानत्वनादिति।

33. एकश्रुति दूरात्सम्बुद्धौ। (1.2.33)
`एकश्रुति वाक्यं भवति' इति। वाक्यग्रहणेन पदपदैकदेशयोर्निरासं करोति; तयोःसम्बोधनं प्रत्यसामर्थ्यात्। वाक्यस्य सम्बुद्धौ कर्तव्यायां
करणभावोपगमादस्ति
सामर्थ्यम्। ततस्तस्यैकश्रुत्यं विधीयते। कुतः पुनस्तद्वाक्यमित्याह-- `दूरात् सम्बोधयति येन' इति। एतेन सम्बुद्धिं प्रति वाक्यस्य करणभावो दर्शितो भवति।
दूरादिति-- `दूरान्तिकार्थेभ्यो द्वितीया च' (2.3.35) इति पञ्चमी। `सम्बोधनं सम्बुद्धिः' इत्यादिना सम्बुद्धिरित्कयन्वर्थग्रहणम्, न पारिभाषिकं
सम्बुद्धिग्रहणमिति दर्शयति। यदि पारिभाषिक्याः सम्बुद्धेर्ग्रहणं स्यात् तदा `देवा {ब्राह्मणाः इति पदंजरीपाठः}
ब्रह्माणःट इत्यत्रैकश्रुत्यं न स्यात्; पारिभाषिक्याः सम्बुद्धेरसत्त्वात्। अन्वर्थग्रहणे तु भवति; सम्बोधनलक्षणक्रियारूपायाः सम्बुद्धेरिहापि विद्यमानत्वादिति
भावः। कुतः पुनरेतदन्वर्थग्रहणं व्यवसितम् ? दूरग्रहणात्। अन्वर्थग्रहणे दूरादित्यनेन सम्बुद्धिरुत्पद्यते। `{पंक्तिरियं नास्ति-काशिका} दूरात् सम्बोधने
कर्त्तव्ये' इति। तेनार्थवद्भवति दूरशब्दस्यपादानम्। पारिभाषिक्यास्तु ग्रहणे तदसम्बद्धमेव स्यात्। न ह्यामन्त्रितविभक्तेर्दूरत्वमस्ति। दूरत्वञ्च
यद्यप्यनवस्थितम्, तथापि यत्र प्राकृतप्रयत्नसंस्थापितं वचनं न श्रूयते, तदिह दूरं वेदितव्यम्। `स्वराणाम्' इत्यादि। `{पंक्तिरियं नास्ति-
काशिका}एकश्रुतिस्वरूपाख्यानमविभागः' भेदतिरोधानमित्यनन्तरं विवरणम्। उदात्तादिस्वरविशेषानुपलब्धिरकारादिवर्णमात्रावबोध एकश्रुतिरित्युक्तं भवति।
`आगच्छ भो माणवक देवदत्ता3' इति। `दूराद्धूते च' (8.2.84) इत्यत्रैवार्थे प्लुतः, स चोदात्तः; `वाक्यस्य टेः प्लुतः उदात्तः' (8.2.82) इत्यधिकारात्।
तस्यैकश्रुत्योदात्तस्य समावेश इष्यते, प्लुतनिवृत्त्यर्थम्। यथा चासौ लभ्यते तथा वक्ष्यति। प्रत्युदाहरणे त्रैस्वर्यमेव भवतीति तत्र आकारः `निपाता

आद्युदात्ताः' (फि.सू.4.80) `उपसर्गाश्चाभिवर्जम्' (फि.सू.4.81) इत्युदात्तः। गच्छेत्यस्य `तिङ्ङतिङः' (8.1.28) इति निघातः। भो इति `निपाता आद्युदात्ताः' इत्युदात्तः। माणवक-- देवदत्तशब्दयोः `आमन्त्रतस्य च' (8.1.19) इत निघातः।

34. यज्ञकर्मण्यजपन्यूङ्खसामसु। (1.2.34)

`अग्निर्मूर्धा दिवः' इत्यादि। `अगि रगि गत्यर्थाः' (धा.पा.146,144)। `वीज्याज्वरिभ्यो निः' (द.उ.1.18) इत वर्त्तमाने `अङ्गेर्निर्नलोपश्च' (द.उ.1.20) इति निप्रत्ययः; नलोपश्च भवति। अग्निशब्दः प्रत्ययस्वरेणान्तोदात्तः। `मुर्वी बन्धने' (धा.पा.575),`aकनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः' (द.उ.6.51) इत्यतः कनिन्निति वर्त्तमाने `श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्' (द.उ.6.55) इति मूर्धन्शब्दः कनिन्प्रत्यान्तो निपातित इति निपातनादाद्युदात्तः। वकारस्य धकारोऽत्र निपातनादेव। `दिवु क्रीडादौ' (धा.पा.1107) डिविन् प्रत्ययः। इकार उच्चारणार्थः। डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् `ट
ेः' (6.4.143) इति टिलोपः। `दिव्' इति स्थिते `ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः' (6.1.171) इति विभक्तेरन्तोदात्त्वम्। ककुच्छब्दः `{फिषोन्त उदात्तः-िति मुद्रितं सूत्रम्}प्रातिपदिकमन्तोदात्तं भवति' (फि.सू. 1.1)इत्यन्तोदात्तः। पतिशब्दः `पातेर्डतिः' (द.उ.1.27) इति डतिप्रत्ययान्तः प्रत्ययस्वरेणाद्युदात्तः, ततः ककुदः पतिः ककुत्पतिरिति षष्ठीसमासः, स`समासस्य' (6.1.223) इत्यन्तोदात्तत्वम्। `प्रथ प्रख्याने' (धा.पा.1553), `प्रथेः षिवन् संप्रसारणञ्च' (द.उ.8.124)। `षिद्गौरादिभ्यश्च'(4.1.41) इति पृथिवशब्दान्ङीष्। प्रत्ययस्वरेण धातुप्रत्यङीष आद्युदात्तोदात्तः। षष्ठ्यैकवचनम् ङस्। `आण्नद्याः'इत्यनुदात्तत्वम्। सवर्णदीर्घः। `इको यणचि' (6.1.77) इति यणादेशः. `उदात्तयणो हल्पूर्वात्' (6.1.174) इति विभक्तिरुदात्ता। `अयम' इति। `इदि परमैश्वर्ये' (धा.पा.63) `इदितो नुम् धातोः' (7.1.58) इति नुम्, `इन्देः कमिर्नलोपश्च' (पं.उ.596) इति कमिप्रत्ययो नलोपश्च; इदम्शब्दः कमिप्रत्ययेनान्तोदात्तः। सौ परतः `इदोऽय् पुंसि' (7.1.111) इतीदम इद्रूपस्यादेशः। `अपाम्' इति। `आप्लृव्याप्तौ' (धा.पा.1260), `आप्नोतेर्ह्रस्वश्च' (द.उ.1.127) इति क्विप्, ह्रस्वश्च, षष्ठीबहुवनचम्। `ऊडिदं पद' (6.1.171) इति विभक्तेरुदात्तत्वम्। तेनापामित्यस्यान्तोदात्तत्वम्। `रि गतौ' (धा.पा.1404), `स्त्रुरिभ्यां तुट् च' (द.उ.9.62) इत्यसुन् प्रत्ययः। तुडागमः। `रेतांसि' इति नित्स्वरेणाद्युदात्तः। `जिन्वति' इति। `जि जये' (धा.पा.561) लट्,शत्रादेशः। `व्यत्ययो बहुलम्' (3.1.85) इति व्यत्ययेन श्नुप्रत्ययः।`हुश्नुवोः सार्वधातुके' (6.4.87) इति यणादेशः। `उगितश्च' (4.2.6) इति ङीप्। `अम्बार्थनद्योर्ह्रस्वः' (7.3.107) इति ह्रस्वः। `एङ ह्रस्वात् सम्बुद्धेः' (6.1.69) इति सुलोपः। `ये यज्ञकर्मणि' (8.2.88) इति वर्त्तमाने `प्रणवष्टेः'(8.2.89) इति प्रणवादेशः। स च प्लुत
उदात्तश्च,`वाक्यस्य टेः प्लुत उदात्तः' (8.2.82) इत्यधिकरात्। प्रणव इत्योकारम्, ओङ्कारं वाऽऽचक्षते। प्रणवस्योदात्तविधानसामर्थ्यादसिद्धत्वाच्च पदादुत्तरस्य `आमन्त्रितस्य च' (8.1.19) इत्यनुदात्तं न भवति; शेषस्य तु भवति। एषु स्वरेषु प्राप्तेष्वेकश्रुतिर्विधीयते।
`संपाठे मा भूत्' इति। संपाठ= स्वाध्यायकालः। `ममाग्ने' इत्यादि। `असु क्षपणे' (धा.पा.1209), `युष्यसिम्यां मदिक्' (द.उ.6.50) इति मदिक्। अस्मच्छब्दः
प्रत्ययस्वेरणान्तोदात्तः। षष्ठ्येकवचनस्य `युष्मदसमद्भ्यां ङसोऽश्' (7.1.27) इत्यशादेश-, `तवममौ ङसि' (7.2.96) इत्यस्मदो ममादेशः। स्था4निवद्भावादन्तोदात्तः। `अतो गुणे' (6.1.97) पररूपत्वम्। `एकादेश उदात्तेनोदात्तः' (8.2.5) अग्निशब्दस्य `आमन्त्रितस्य च' (8.1.19) इति निघातः। `वर्च दीप्तौ' (धा.पा.162), `असुन्' (द.उ.9.49) इतिअसुन् प्रत्ययः। वर्चशब्दो नित्स्वरेणाद्युदात्तः। `ह्वेञ् स्पर्धायाम्' (धा.पा.1008) । `ह्वः संप्रासारणञ्च न्यभ्युपदिषु (3.3.72) इत्यप् प्रत्ययः। `उपपदमतिङ' (2.2.19) इति समासः। `गतिकारकोपपदात् कृत्' (6.2.139) इत्युत्तरपदप्रकृतिस्वरत्वे
प्राप्ते, `अन्तः' (6.2.143) इत्यनुवर्तमाने `थाथघञ्क्ताजवित्रकारणाम्' (6.2.144) इत्यन्तोदात्तत्वम्, सप्तमीबहुवचने `बहुवचने झल्येत्'(7.3.103) इत्येत्त्वम्, स्थानिवद्भावादेकारोऽपब्यदात्त एव। `अस भुवि' (धा.पा.1065) , लोट्, तिप्, `एरुः' (3.4.86) इत्युत्वम्, अदादित्वाच्छपो लुक्। `तिङ्ङतिङः' (8.1.28) इति निघातेन `अस्तु' शब्दोऽनुदात्तः। `जपोऽनुकरणमन्त्रः' इति। `जप' इत्यक्तेरर्थकथनमनुकरणमन्त्र इति। अनुकृतिः = अनुकरणम्। सर्वत्र मन्त्रे स्फुटमुच्चारणमित्यनुकरणमन्त्रः। अत एवाह-- `उपांशुप्रयोगः' इति। यता जले निमग्नस्य पाठः।
क्वचिदकरणमन्त्र इति पाठः। तत्रायमर्थः-- ईषत् करणमुच्चारणं यस्य सोऽकरणमन्त्र इति; नञ ईषदर्थत्वात्।
एशब्दो निपातः। `निपाता आद्युदात्ताः' (फि.सू.4.80)। `विश प्रवेशने' (धा.पा.1424),`अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' (द.उ.125) इति क्वप्रत्ययान्तत्वाद्विश्वशब्दो नित्स्वरेणाद्युदात्तः। समञ्च तत् अत्रिणञ्चेति विशेषणसमासः। समासान्तोदात्तत्वम्। `दह भस्मीकरणे' (धा.पा.991), लोट्,सिप्, सेर्हिरादेशः,`अतो हेः' (6.4.105) इति हेर्लुक्, `तिङ्ङतिङ' (8.1.28) इति निघातविधानात् दहशब्दोऽनुदात्तः। केचिद् वहा3 इति प्लुतान्तं पठन्ति; तेषां साहसमनिच्छतां `सर्वत्र विभाषा प्लुतो वक्तव्यः' (म.भा.3.420) इत्यतो वचनात् प्लुतो वक्तव्यः, स चोदात्तः।
अन्ये त्वाकारान्तं पठन्ति, तेषां छान्दसत्वादाकारः। ह्रस्वोऽपि हि वर्णो व्यत्ययेन दीर्घो भवति,`पुरुषः' `नारकः' इति यथा। `वाक्यविशेषस्था गीतयः' इति। यथोक्तं जैमिनिना-- `गीतिषु सामाख्या' इति। गीतिः = ध्वनिविशेषः।
कर्मग्रहणं किमर्थम्,यज्ञ इत्येवोच्येत, यज्ञमन्त्राणां यज्ञक्रियार्थत्वाद्यज्ञकर्मणि भविष्यति ? सत्यमेतत्; विस्पष्टार्थ हि कर्मग्रहणम्। अथ वा -- योऽपि न

प्रसिद्धो यज्ञः पञ्चयजनादिः, तत्रापि यथा स्यादित्येवमर्थम्; अन्यथा `यज्ञे' इच्युच्यमाने प्रसिद्धो यो यज्ञोऽश्वमेधादिस्तत्रैव स्यात्।।

35. उच्चैस्तरां वा वषट्कारः। (1.2.35)
`वषट्शब्देनात्र वौषट्शब्दो लक्ष्यते'इति। समानार्थ्वादित्यभिप्रायः। द्वावपि तौ देवानां दानवचनौ। यथा `वषट्' शब्देन देवानां दानं दीयते तथा वौषट्शब्देनापि। तस्मात् समानार्थत्वात् `वषट्' शब्दो `वौषट्' शब्दं लक्षयति। कारशब्दग्रहणमर्थपदार्थकत्वं विहाय शब्दपदार्थकत्वेन दानक्रियायामुपयुज्यमानस्य तस्योदात्ततरत्वं यथा स्यादित्येवमर्थम्। कारग्रहणे शब्दपदार्थतया दृष्टा, यथा एवकार इति।
अन्ये कारग्रहणमन्यस्यापि यथा स्यादिति वर्णयन्ति। तेन `अस्तु श्रौषट्' इत्यत्रायमुदात्ततरो भवति। उच्चैस्तरामिति प्रकर्षप्रत्ययो वौषट्शब्दे `ब्रूहिप्रेष्यश्रौषडावहानामादेः' (8.2.91) इति यः प्लुतो विहितस्तदपेक्षया वेदितव्यः; स ह्युदात्तः, `याज्यान्तः' (8.2.90) इत्यनेन य उदात्तः प्लुतो विहितस्तदपेक्षया प्रकर्षस्य सत्त्वात्। अथ वा-- प्रकर्षप्रत्यान्तः स्वरूपशब्दान्तरमेवैतदिति।
अपरे त्वाहु-- `अनुदात्तं पदमेकवर्जम्' (6.1.158) इति वचनेन प्लुतश्चोदात्तः। अन्यस्त्वनुदात्ततर इति।

36. विभाषा छन्दसि।(1.2.36)
`इषे त्वा' इत्यादि। `इषु इच्छायाम्' (धा.पा.1351), `अन्येभ्योऽपि दृश्यते' (3.2.178) इति क्विप्। इडस्यास्तीति लुगधिकारस्य `अप्रत्ययः' (वा. 492) इत्यनेनोपसंख्यानेन अकारप्रत्ययः, प्रत्ययस्वरेणाद्युदात्तः, इषशब्दात् सप्तम्येकवचनम्, `आद्गुणः' (6.1.87) , `एकादेश उदात्तेनोदात्तः' (8.2.5) । युष्मच्छब्दस्य द्वितीयान्तस्य `त्वामौ द्वितीयायाः' (8.1.23) इति त्वामादेशः, स त्वनुदात्तः; `अनुदात्तं सर्वमपादादौ' (8.1.18) इत्यधिकारात्। `अग्ने' इति। `आमन्त्रितस्य च' (6.1.198) इति षाष्ठिकमाद्युदात्तत्वम्। आङ्पूर्वात् `या प्रापणे' (धा.पा.1049) इत्यस्माल्लोट, सिप्, सेर्हिरादेशः, आङ `उपसर्गाश्चाभिवर्जम्' (फि.सू.4.81) इत्युदात्तः। `तिङ्ङतिङ' (8.1.28) इति याहीत्यस्य निघातः। `वी गत्यादिषु' (धा.पा.1019) `मन्त्रेवृषेषपच' (3.3.96) इत्यादिना क्तिन्नुदात्तः, चतुर्थ्येकवचने प्रत्यये `घेर्ङिति' (7.3.111) इति गुणः, अयादेशः, द्वावपि स्थानिवद्भावेनोदात्तौ, शेषमनुदात्तम्। अग्निशब्दः पूर्ववन्निप्रत्ययस्वरेणान्तोदात्तः। द्वितीयैकवचनेऽमि पूर्वत्वम्। `एकादेश उदात्तेनोदात्तः' (8.2.5)। `ईड स्तुतौ' (धा.पा.1019)। अनुदात्तेत्त्वादात्मनेपदम्। `तिङ्ङततिङः' (8.1.28) इतीडेशब्दस्य निघातः। पुरः पूर्वस्मिन् देश इति विगृह्य `पूर्वापराधरावराणामसि पुरधवश्चैषाम्' (5.3.39) इत्यसिप्रत्ययः, पूर्वशब्दस्य पुरादेशः। पुरः शब्दः प्रत्ययस्वरेणान्तोदात्तः। दधातेर्निष्ठायां `दधातेर्हिः' (7.4.42) इति हिरादेशः। `पुरोऽव्ययम्' (1.4.67) इति गतिसंज्ञायां सत्यां `कुगतिप्रादयः' (2.2.18) इति समासः। समासस्यान्तोदात्तत्वे प्राप्ते `गतिरनन्तरः' (6.2.49) इति पूर्वपदप्रकृतिस्वरेण पुरः शब्दोऽन्तोदात्तः। शंशब्दश्चादित्वान्निपातः। निपातस्वरेणाद्युदात्तः। अस्मच्छब्दस्य षष्ठी, `बहुवचनस्य वस्न सौ' (8.1.21) इति नसादेशोऽनुदात्तः,अनुदात्ताधिकारात्। दिवः पचाद्यच्।। पचादिषु देवडिति पठ्यते। 'टिड्ढाणञ्' (4.1.15) ङीप् अनुदात्तः,`यस्येति च' (6.4.148) इत्यकारलोपः। `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इति ङीबुदात्तः। द्वितीयाबहुवचने `प्रथमयोः पूर्वसवर्णः' (6.1.102) इति पूर्वसवर्णदीर्घत्वम्। `एकादेश उदात्तेनोदात्तः' (8.2.5)। `ष्टुञ् स्तुतौ' (धा.पा.1043), अभिपूर्वात्`ऋदोरप्' (3.3.57) इत्यप्, गुणावादेशौ। वर्णव्यत्ययेन वकारस्य यकारः। `गतिकारक' (6.2.139) इत्युत्तरपदप्रकृतिस्वरत्वे प्राप्ते `अन्तः' (6.2.143) इति वर्तमाने `थाथघञ्क्ताजवित्रकाणाम्' (6.2.144) इत्युत्तरपदान्तोदात्तत्वम्। सप्तम्येकवचम्। `आद्गुणः' (6.1.87) `एकादेश उदात्तेनोदात्तः' (8.2.5) तस्मात् `अभिष्टये' शब्दोऽन्तोदात्तः।।
37. न सुब्रह्मण्ययां स्वरितस्य तूदात्तः। (1.2.37)
`सुब्रह्मण्या नाम निगदः' इति। अपादबन्धे गदतिर्वर्तते। अपादबन्धं हि गद्यमुच्यते। निशब्दः प्रकर्षे। यदुच्चैरविच्छिन्नमपादबन्धं मन्त्रवाक्यं निगद इति तस्य व्यपदेशः। तस्य च सुब्रह्मण्योपलक्षमत्वात्, `सुब्रह्मण्या' इति स्त्रीलिङ्गनिर्देशः। `सुब्रह्मण्योम्' इति। सुब्रह्मणि साधुः।`तत्र साधुः' (4.4.98) इति यत्। `तत् स्वरितम्' (6.1.185) इति स्वरितत्वम्, `प्रणवष्टेः' (8.2.89) इत्योङ्कार आदेश इति केचित्, तदयुक्तम्; `पादस्य वार्द्धर्चस्य वान्त्यमक्षरमुपसंहृत्य तदाद्यक्षरशेषस्य स्थाने् त्रिमात्रमोकारमोङ्कारं वा विदधति तं प्रणवमित्याचक्षते' इति {काशिका-8.2.89}वक्ष्यति। न च निगदे पादव्यवस्था, नाप्यर्द्धर्चव्यवस्था। तस्मादोशब्दोऽस्ति निपातोऽनर्थकः। तस्य स्वरितेन सहैकादेशः स्वरितः। `आमन्त्रितमाद्युदात्तम्' इति। `आमन्त्रितस्य च' (6.1.198) इत्यनेन षाष्ठिकेन। `त्सयानेनोदात्तः क्रियते' इति। ननु चासिद्धोऽसौ स्वरितः; वचनात् तस्यासिद्धत्वं न भवति। ननु च वचनस्य सुब्रह्मण्योमिति प्रयोजनं वक्तुं शक्यम् ? न हि समस्ते निगदे सुब्रह्मण्याशब्दनोपलक्षिते सतीदमेकमुदाहरणं युक्तम्। `अकार उदात्तः' इति। निपातस्वरेण। `ततः परोऽनुदात्तः स्वरितः' इति। `तिङ्ङतिङ' (8.1.28) इति निघाते कृते, `उदात्तादनुदात्तस्य स्वरितः' (8.4.66) इत्यनेन। `पश्चिम एकः' इति। छकाराकारः। `चत्वार उदात्ताः' इति। वकारच्छाकाराभ्यामन्ये। `द्वावनुदात्तौ' इति। वकारच्छकारौ। `द्वितीयमक्षरम्' इति। मेधाशब्दाकारः। `शेषमनुदात्तम्' इति। मेधाशब्दे यावचौ ताभ्यामन्यत्। `पूर्वेण' इति। मेधातिथेर्मेषेत्यनेन। `तथैव द्वे आद्ये अक्षरे उदात्ते' इति। `यदि गौरावस्कन्दिन्' इति समस्तमामन्त्रितमाद्युदात्तमिति। अथापि गौरेति शब्दान्तरमामनन्ति, तथापि तस्यापि प्रवेशे कृते सकलस्यामन्त्रितस्याद्युदात्तत्वे `उदात्तादनुदात्तस्य' (8.4.66) इत्यादिना पूर्वोक्तेन विधिना द्वे उदात्ते भवतः। `अहल्यायै जार' इति। षष्ठ्यर्थे चतुर्थी, `बहुलं छन्दसि' (2.3.62) इत्यत्र `षष्ठ्यर्थे चतुर्थी वक्व्या' (वा.142) इत्युपसङ्ख्यानात्; `व्यत्ययो बहुलम्' (3.1.85) इति व्यत्ययेन वा। `समस्तमामन्त्रितमाद्युदात्तम्' इति। कौशिकशब्दस्य

परामन्त्रितानुप्रवेशात्। `एवं गौतमब्रुवाण' इति। एतदपि कौशिकब्राह्मणेत्यनेन तुल्यमित्यर्थः। `द्वावुदात्तौ' इति। अनन्तरयोरुदाहरणयोः प्रत्येकमाद्यवित्यर्थः। `श्वः शपब्द उदात्तः' इति। प्रातिपदिकस्वरेण। `उदात्त इति वर्तते' इति. `मन्त्रे वृष' (3.3.96) इत्यादेः सूत्रात्। `द्वावुदात्तौ' इति। तौ पुनरादी आगच्छेत्यत्र दर्शितौ। `पदात् परमामन्त्रितं निहन्यते' इति। `आमन्त्रितस्य च' (8.1.19) इत्यनेन।

38. देवब्रह्मणोरनुदात्तः। (1.2.38)

`द्वयोरपि पदयोरामन्त्रिताद्युदात्तत्वे कृते' इति। `विभाषितं विशेषितं विशेषवचने बहुवचनम्' (8.1.74) इति पूर्वस्याविद्यामानत्वात् `आमन्त्रितस्य च' (8.1.19) इति पदात् परस्यापि निघातो न भवति। तेन द्वयोरपि पृथगेव षाष्ठिकमाद्युदात्तत्वं भवति। `शेषनिघातः' इति। `अनुदात्तं पदमेकवर्जम्' (6.1.158) इत्यनेन।

39. स्वरितात्संहितायामनुदात्तानाम्। (1.2.39)

`अनुदात्तानाम्' इति जातौ बहुवचनम्। तेन द्वयोरपि भवति। `इममित्यन्तोदात्तम्' इति। इदंशब्दस्य कमिप्रत्ययान्तत्वात् प्रत्ययस्वरेणान्तोदात्त्वम्, तस्य त्यदात्यत्वे `अतो गुणे' (6.1.97) पररूपत्वे तस्याप्येकादेश (8.2.5) उदात्तेनोदात्तत्वात्। `विधिकल एव' इति। `तेमयावेकवचनस्य' (8.1.22) इति विधिकाल एव निघातविधानात्। `सर्व एत आमन्त्रितनिघातेनानुदात्ताः' इति। यद्यपि ``आमन्त्रितं पूर्वमविद्यमानवत्' (8.1.72) इति, तथापि मेशब्दापेक्षया सर्वेषां निघातापत्तेः। `प्रथमामन्त्रितमाद्युदात्तम्' इति। `आमन्त्रितस्य च' (6.1.198) इति षाष्ठिकेन। `तस्य द्वितीयमक्षरं स्वरितम्' इति। `उदात्तादनुदात्तस्य स्वरितः' (8.4.66) इति। `ततः परेषामनुदात्तानाम्' इति। `नामन्त्रिते समानाधिकरणे सामान्यवचनम्' (8.1.73) इत्यविद्यमानत्वस्य प्रतिषेधे सति माणवकात् परयोः `आमन्त्रितस्य च' (8.1.19) इति निघातविधानात् परेऽनुदात्ताः। `अवग्रहे मा भूत' इति। अवग्रहः = असंहितापाठः। ननु च स्वरितादिति पञ्चमी, तेन `तस्मादित्युत्तरस्य' (1.1.67) इत्यत्र निर्दिष्टग्रहणस्यानन्तरर्यार्थकत्वादवग्रहे प्राप्तिरेव नास्ति, यथैव हि वर्णो व्यवधायकस्तथा कालोऽपि, तत् किं संहिताग्रहणम्? पञ्चमीनिर्देशकालो न व्यवधायक इति ज्ञापनार्थम्। तेन `तिङ्ङतिङः' (8.1.28) इत्यत्रावग्रहेऽतिङन्तात् परं तिङन्तं निहन्यते।।

40. उदात्तस्वरितपरस्य सन्नतरः। (1.2.40)

`मातर इत्यनुदात्तः' इति। अनुदात्तत्वं तु विभक्तिस्वरेण। मातर इति मातृशब्दाज्जस्, `ऋतो ङिसर्वनामस्थानयोः' (7.3.110) इति गुणः। जसः सकारस्य रुत्वम्। तस्याप्यशब्दे शसन्ते परतः `अतो रोरप्लुतादप्लुते' (6.1.113) इत्युत्वम्। `आद्गुणः' (6.1.87) `उडिदम्' (6.1.171) इत्यादिना विभक्तेरन्तोदात्तत्वे कृते `एङः पदान्तादति' (61.109) इतिय ओकारः, सोऽपि स्थानिवद्भावेनानुदात्तो भवति। `तस्योदात्ते परभूते' इति। विभक्त्यकारे। `इकारोऽनुदात्तः' इति। सरस्वतीतिशब्दसम्बन्धी; `आमन्त्रित्सय च' (8 .1.19) इति सरस्वतीशब्दस्य निघातविधानात्। `तस्मान्न निहन्यते' इति। `अनुदात्तं सर्वमपादादौ' (8.1.18) इत्यत्रापादादाविति निघातप्रतिषेधात्। `प्रथममक्षरम्' इति। शकारोकार उदात्तः, `आमन्त्रितस्य च' (6.1.198) इति षाष्ठिकेन।

41. अपृक्त एकाल्प्रत्ययः। (1.2.41)

`घृतस्पृक्' इति। `क्विन्प्रत्ययस्य कुः' (8.2.62) इति कुत्वम् = शकारस्य खकारः, तस्य जश्त्वम् = खकारस्य गकारः। `अर्द्धभाक्' इति। `चोः कुः' (8.2.30) इति जकारस्य गकारः। उभयत्र `वाऽवसाने' (8.4.56) इत चर्त्वं ककारः। त्तरापृक्तसंज्ञायां सत्याम् ` वेरपृक्तस्य' (6.1.67) इति वकारलोपो भवति। प्रत्युदाहरणेषु हि तदभावान्न भवति।
`दर्विः' इति। `दृ विदारणे' (धा.पा.1493) `वृ दृभ्यां विन्' (द.उ.1.23) इति विन्। `जागृविः' इति। `जागृ निद्राक्षये' (धा.पा.1072), `जृशृस्तृजागृभ्यः क्विन्' (द.उ.1.24) इति क्विन्। `सुराः' इति। `षूञ् अभिषवे' (धा.पा.1247), सुरां सुनोतीति `अन्यभ्योऽपि दृश्यते' (3.2.178) इति क्विप्; सुरासुत्, ह्रस्वस्य तुक्। `तमाचष्टे
' (वा. 201) इति णिच्। `णाविष्टवत् कार्यं प्रातिपदिकस्य' (वा.813) इति टिलोपः। सुरासवतेः पुनः क्विप्, णिलोपः, प्रथमैकवनचम्, हल्ङ्यादिना(6.1.68) सुलोपः; रुत्वविसर्जनीयौ। अत्रापि णिलोपे कृतेऽसति प्रत्ययग्रहणे धातुकारस्यापृक्तसंज्ञा स्यात्। तस्यां च सत्यां `हल्ङ्याब्भ्यः' (6.1.68) इति धातुसकारलोपत्रः स्यात्। ननु चासत्यपि प्रत्ययग्रहणे `प्रत्याप्रत्ययोः प्रत्ययस्यैव ग्रहणम्' (व्या.प.72) इति संज्ञा विज्ञास्यते, तत् किमर्थं प्रत्ययग्रहणम् ? क्रियते विस्पष्टार्थम्।
अथैकग्रहणं किमर्थम् ? अल्समुदायस्य मा भूदिति, नैतदस्ति; अल्ग्रहणसामर्थ्यान्न भविष्यति, अन्यथा ह्यल्ग्रहणमनर्थकं स्यात्- यदि हल्समुदायस्यापि संज्ञा स्यात्। एवं तर्ह्यल्ग्रहणेनात्र जातिग्रहणं भवतीति ज्ञापनार्थमेकग्रहणमम्। तेन `हलन्ताच्च' (1.2.10) इत्यत्र यदुक्तम्--`दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात् सिद्धम्' इति तदुपपन्नं भवति।

42.तत्पुरुषः समानाधिकरणः कर्मधारयः (1.2.42)।

`तत्पुरुषः' इति समासविशेषस्याख्या। स च एक एवशब्दः। अनेकस्य च
शब्दस्य भिन्नप्रवृत्तिनिमित्तकस्यैकस्मिन्नर्थे वृत्तिः =सामानाधिकारण्यम्। ततश्च यत्र बाह्येन पदेन तत्पुरूषस्य सामानधिकरण्यम्, तत्रैवेयं संज्ञा स्यात्--राजपुरुषः शोभन इत्यादौ,अस्ति ह्यत्र तत्पुरुषस्य केनचित् सामानाधिकरण्यमस्ति; शोभनशब्देन सह। पाचकवृन्दारिकेत्यादौ तु न स्यात्, न ह्यत्र तत्पुरुषस्य केनचित् सामाधिकारण्यमस्ति; शब्दान्तरस्य प्रयोगाभावादिति चोद्यमपाकर्त्तुमाह- `समानाधिकरणपदः' इति। समानम् = अभिन्नम्, एकमधिकरणम् = वाच्यं येषां पदानां तानि समानाधिकरणानि पदानि, तान्याश्रयभूतानि यस्य तत्पुरुषस्य स समानाधिकरणपदस्तत्पुरुषः। एतेन तत्पुरुषार्थानां पदानां समानाधिकरणत्वादुपचारेण तत्पुरुषोऽत्र सूत्रे समानाधिकरणशब्देनोक्त इति दर्शयति। कथं पुनर्बाह्यन्यपदापेक्षया तत्पुरुषस्य मुख्ये सामानाधिकरण्ये सम्भवति सत्यौपचारिकस्य ग्रहणमुपपद्यते ? `कर्मधारयः' इति महत्याः संज्ञायाः करणात्। इह हि लाघवार्थत्वात् कसंज्ञाकरणस्य, लघीयस्यां संज्ञायां कर्त्तव्यायां `कर्मधारयः' इति महतीं संज्ञां कुर्वता-- `अन्योऽप्यत्र कश्चित् विपर्ययः संज्ञायामाश्रितः' इत्येषोऽर्थः सूचितः। तेन `गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' (व्या.प.4) इति मुख्यस्य समानाधिकरणस्य ग्रहणं न विज्ञायते।
`समानाभिधेयः' इति. तदर्थानां पदानां समानाभिधेयत्वात् तत्पुरुषोऽप्युपचारेण समानाभिधेय इत्युक्तः। `परमराज्यम्, उत्तमराज्यम्' इति। `सन्महत्' (2.1.61) इत्यादिना समासः। कर्मधारये सति `अकर्मधारये राज्यम्' (6.2.130) इत्युत्तरपदाद्युदात्तमत्वं न भवति। `पाचकवृन्दारिका' इति। वृन्दारकनागकुञ्जरैः' (2.1.62) इति पुंवद्भावः। `पाचिकाभार्यः' इति। बहुव्रीहिरयम्। तेनात्र `न कोपधायाः' (6.3.37) इति प्रतिषेधो भवत्येव। `ब्राह्मणराज्यम्' इति। षष्ठीतत्पुरुषोऽयम्। तेनात्र समासान्तोदात्तमेव न भवति, अपि तूत्तरपदाद्युदात्तत्वम्।।

43. प्रथमानिर्दिष्टं समास उपसर्जनम्। (1.2.43)
`समासे' इत्यधिकरणनिर्देशोऽयम्। कष्टश्रितादयः समासाः न किञ्चित् प्रथमानिर्दिष्टं शब्दरूपमस्ति। तथा हि-- समासे कृते तत एव समासाद् विभक्तिरुत्पद्यते, न तु तत्र स्थाच्छब्दात्। न च वाक्यकाले समासार्थात् पदाद् या प्रथमोत्पन्ना तदाश्रयं प्रथमानिर्दिष्टत्वं समासावयवस्य कल्पयितुं युक्तम्, यतः `समासे' इत्यधिकरणनिर्देशोऽयम्। तत्र समासे कृते यस्मात् प्रथमोत्पद्यते, तदेव समासे प्रथमानिर्दिष्टं भवति; न तु यस्मात् वाक्यकाले विभक्तिकाले विभक्तिरुत्पद्यते। तद्धि वाक्य एव प्रथमानिर्दिष्टम्, न तु समासे; प्रागेव समासात् तस्य प्रथमानिर्दिष्टत्वात्। ततश्च समासे कृते प्रथमानिर्दिष्टस्य संज्ञिनोऽसम्भवात् संज्ञा न सम्भवीत्येतच्चोद्यमपाकर्तुमाह- `प्रथमया विभक्त्या यन्निर्दिश्यते' इति। समासार्थं यच्छास्त्रं तत् समासशास्त्रं गृह्यते। तत्र प्रथमानिर्दिष्टस्येयं संज्ञा विधीयते, न तु कष्टश्रितादौ; समासे प्रथमानिर्दिष्टस्याविद्यामानत्वात् विद्यते च समासशास्त्रे प्रथमानिर्दिष्टं संज्ञीति कुतः संज्ञाया अप्रसिद्धिः ? कथं पुनः `समासे' इत्युच्यमाने समासशास्त्रे यत् प्रथमया निर्दिश्यते तस्य संज्ञित्वं लभ्यत इत्यत आह-- `समासे' इति। `समासशास्त्रं गृह्यते इति। कथं पुनः `समासे' इत्युच्यमाने समासशास्त्रं ग्रहीतुं शक्यम् ? तादर्थ्यात् तत्र समासशब्दस्य प्रवृत्तेः। भवति हि तादर्थ्यात् तावच्छब्द्यम् , यथा-- प्रदीपार्था मल्लिका `प्रदीपः' इति, इन्द्रार्था स्थूणा `इन्द्रः' इति। कष्टश्रितादिषूपसर्जनसंज्ञयायाः कार्यम्-- `उपसर्जनं पूर्वम्' (2.2.30) इति पूर्वनिपातः। तत्रेदं चोद्यते-- राज्ञः कुमारीं पश्य राजकुमारीं पश्येत्यत्र राजन्शब्दः `षष्ठी' (2.2.8) इति समासशास्त्रे प्रथमानिर्दिष्टः; `द्वितीया श्रितातीतपतित' (2.1.24) इति द्वितीयासमासशास्त्रे कुमारीशब्दश्च। समसाशास्त्रे तत्रोभयोरप्यस्यां संज्ञायां सत्यां पूर्वनिपातानियम उपसर्जनह्रस्वस्वत्वञ्चेत्येतद्दोषद्वयं प्राप्नोतीति। इह च राज्ञः कुमार्याः स्वं राजकुमारीस्वमिति द्वयोरपि षष्ठ्यन्तयोः समासशास्त्रे प्रथमानिर्दिष्टत्वादुभयोरप्युपसर्जनसंज्ञायां सत्यां तदेव दोषद्वयं प्राप्नोति ? नैष दोषः; यस्मादुसर्जनमिति महत्याः संज्ञायाः करणस्यैतदेव प्रयोजनम्-- अन्वर्थसंज्ञा यथा विज्ञायेतेति। अप्रधनामुपसर्जनम्, प्रधानमनुपसर्जमिति। अप्रधानञ्च प्रधानमपेक्षते; सम्बन्धिशब्दत्वात्। तत्र सम्नब्धादेतवगन्तव्यं यत् प्रति यदप्रधानं तत् प्रतितदुपसर्जनमिति। श्रितादींश्चापेक्ष्य द्वितीयान्तमुपसर्जनं भवति, न तु द्वितीयान्तमात्रम्। न चेह श्रितादयः सन्ति। राज्ञः कुमार्याः स्वं राजकुमारीस्वमित्यात्राप्येष परीहारः। अत्रापि कुमारीशब्दमपेक्ष्य राजन्शब्दस्याप्राधान्यम्; न तु राजन्शब्दमपेक्ष्य कुमारीशब्दस्य। तस्मात् राजन्शब्दस्योपसर्जनसंज्ञा, न तु कुमारीशब्दस्य। यदि ह्यन्वर्थसंज्ञेयम्, पाचकवृन्दारिका, पुरुषव्याघ्रः, अर्धपिप्पली, पूर्वकायः-- इत्येतेषु पूर्वपदार्थ एव प्रधानमिति पाचिकादीनामिह प्राधान्यम्। अतो यद्यप्येते `वृन्दारकनागकुञ्जरैः पूज्यमानम्' (2.1.62), `उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' (2.1.56), `अर्धं नपुंसकम्' (2.2.2), `पूर्वापराधरोत्तरमेकदेशिकनैकाधिकरणे' (2.2.1) इत्येतेषु समासशास्त्रेषु प्रथमानिर्दिष्टाः, तथापि तेषामुपसर्जनसंज्ञा न प्राप्नोति; कुतः ? तेषां प्राधान्यात्। एवं तर्ह्युत्तरसूत्रेऽनुक्तसमुच्चयार्थत्वाच्चकारस्य भविष्यतीत्यदोषः।
अन्यस्त्वेवं मन्यते-- `पाचकवृन्दारिकेत्येवमादिषु पूर्वोक्तेषु समासेष्वाद्यौ `विशेषणं विशेष्येण बहुलम्' (2.1.57), `उपमानानि सामान्यवचनैः' (2.1.55) इत्येताभ्यामेव सिद्धौ; शेषौ तु `षष्ठी' (2.2.8) इत्यनेनैव। तस्मात् `वृन्दारकनागकुञ्जरैः' (2.1.62) इत्यादीनां न तदर्थ आरम्भः; किं तर्हि ? उपसर्जन संज्ञार्थः; तेनासत्यपि पाचिकादीनामप्रधानत्वे तेषामियं संज्ञा भविष्यति" इति, एतच्चासम्यक्, तथा हि -- `पूज्यमानम्', `सामान्याप्रयोगे', `नपुंसकम्', `एकाधिकरणम्'-- इत्येतान् विशेषान् वक्ष्यामीत्येतदर्थ आरम्भः स्यात्। सति चैतदर्थ आरम्भेऽत्राप्रधानस्योपसर्जनसंज्ञा विधीयमाना प्रधानस्य न स्यात्।।

44. एकविभक्ति चापूर्वनिपाते। (1.2.44)
अप्रधमानिर्दिष्टार्थोऽयमारम्भः। विभक्तिशब्दः सुपां वाचकः, विभागवचनो वा। कारकशक्तिर्विभागः--विभज्यते प्रातिपदिकार्थोऽनयेति कृत्वा। `समासे

विधीयमाने'
इति। समासार्थवाक्यकाले। तदा हि तस्य समासस्य विधीयमानता भवति। एतेन समासग्रहणमनुवर्तमानं समासार्थे वाक्ये वर्त्तते, न समासशास्त्र इति दर्शयति। समासशास्त्रे हि सर्वमेव शब्दरूपमेकविभक्तिकमेव भवतीत्येकविभक्तिग्रहणमनर्थकं स्यादिति भावः। सर्वमेव हि प्रातिपदिकं पर्यायेणैकया विभक्त्या प्रयुज्यते। तस्मादेकविभक्तिग्रहणसामर्थ्यादवधारणमत्र विज्ञायत इत्यत आह-- `यन्नियतविभक्तिकम्' इति। तदेव स्पष्टीकुर्वन्नाह-- `द्वितीये सम्बन्धिति' इत्यादि। `पूर्वपदेनानाविभक्तिकेऽपि' इति। निष्क्रान्तशब्दः कर्तृशक्त्युपसर्जनीभूतं द्रव्यमाह। तच्चानेकसाधनशक्त्युपचितमिति क्रियान्तरसम्बन्धादेनेकसाधनविभक्तिकं भवति। `उत्तरपदंद तु पञ्चम्यन्तमेव भवति' इति। निषक्रमणक्रियापेक्षयाऽऽविर्भूतापादानशक्तिकत्वात्। `निष्कौशाम्बिः' इत्यत्रोपसर्जनसंज्ञाकार्यम्`गास्त्रियोरुपसर्जनस्य' (1.2.48) इति हस्वत्वम्। अथ निसोऽत्र केनोपसर्जनसंज्ञा विधीयते, ययोऽस्य पूर्वनिपातः ? पूर्वसूत्रेणेति चेत्, नैतदस्ति; तेनाप्रधानस्योपसर्जनसंज्ञाविधानात्, निसश्चात्र प्राधान्यात्। एवं तर्हि चकारस्यानुक्तसमुच्चायार्थत्वात् भविष्यति। अन्ये त्वाहुः-- मा भून्निस उपसर्जनसंज्ञा, असत्यामपि तस्यां पूर्वनिपातो भविष्यति, `एकविभक्ति चापूर्वनिपाते' (1.2.44) इति वचनादिति, एतच्चायुक्तम्; पूर्वनिपाते हि कर्त्तव्य एकविभक्तिकस्योपसर्जनसंज्ञा नास्त्येव। तत्र यदि निस उपसर्जनसंज्ञा न स्यात्, तदोदहरणे द्वयोरप्यसत्यां तस्यां पर्यायेणानियः पूर्वनिपातः प्रसज्येत। अथ कथमर्धपिप्पल्यादीनामूपसर्जनसंज्ञा न भवति ? अत्र च `विभाषा च्छन्दसि' (1.2.36) इत्यतो विभाषाग्रहणं मम्डूकप्लुतन्यायेनानुवर्तते, सा च व्यवस्थितविभाषा। तेनार्ध पिप्पल्या अर्धपिप्पलीत्यादौ विषये पिप्पल्यादीनामेकविभक्तियुक्तानामप्युसर्जनसंज्ञा न भवति। यदि हि स्यात्, तदा ह्रस्वत्वं स्यात्।।

45. अर्थवदगधातुरप्रत्ययः प्रातिपदिकम्। (1.2.45)
`अभिधेयवचनोऽयमर्थशब्दः' इति। एतेन प्रयोजनादिवचनाद्व्यवच्छिनत्ति। अर्थशब्दो हि प्रयोजनवचनोऽप्यस्ति, यथा-- अनेनार्थनागतः, अनेन प्रयोजनेनेति गम्यते। निवृत्तिवचनोऽप्यस्सि, यथा-- मशकारर्थो धूम इति, मशकनिवृत्त्यर्थ इति गम्यते। धनवचनोऽप्यस्ति,यथा--अर्थवान् देवदत्त इति, धनवानिति गम्यते। अभिधेयवचनोऽप्यस्ति, यथा-- अस्य वचनस्यायमर्थ इति, इदमस्याभिधेयमिति गम्यते। इह त्वभिधेयवचनस्यैव ग्रहणम्। तत् पुनरभिधेयं जातिगुणक्रियाद्रव्यभेदेन चतुर्विधम्।अत एव चतुष्टयी शब्दानां प्रवृत्तिर्भवति। तत्र जातिशब्दानां जातिरभिधेया-- गौरिति। यद्यर्थवतः प्रातिपदिकसंज्ञा विधीयते तदाऽभाववचनशशविषाणादिशब्दानां प्रातिपदिकसंज्ञा नोपपद्यते, अर्थाभावात्, नैतदस्ति; `अर्थशब्दोऽभिधेयवचनः' (का.1.2.45) इत्युक्तम्, अभावोऽप्यभिधेयो भवत्येव। अन्यथा ह्यर्थाभावादितीदं वचनमनुच्चारणीयं स्यात्, अनर्थकत्वात्, न ह्यनर्थकं वचनं प्रयोगर्हति। तस्मादबाववचनानामपि प्रातिपदिकसंज्ञा भवत्येव।
`नान्तस्याधेर्मा भूत्' इति। ननु चाधातुरिति प्रतिषेधो भविष्यति, तथा हि `वन सम्भ्कतौ' (धा.पा.463), `धन धान्ये' (धा.पा.1104) इत्येतयोः धरात्वोरेते रूपे, नैतदस्ति; अव्युत्पन्नावपि वनधनशब्दौ स्तः, तयोरेवायं प्रयोगः। अत्र यदि नान्तस्यावधेः प्रातिपदिकसंज्ञा स्यात् तदा सुबुत्पत्तिः स्यात्, ततश्च पदसंज्ञायां सत्यां नलोपः स्यात्। ननु च `अधातुः' `अप्रत्ययः'-- नैतदस्ति; अनर्थकस्यापि धातोर्विद्यमानत्वात् यथा-- `इङ अध्ययने' (धा.पा.1046), `इक् स्मरणे' (धा.पा.1047) इति-- एतयोरधिपूर्वयोरेवार्थवत्त्वम्, न केवलयोः। यस्तु गणपाठेऽनयोरर्थनिर्देशः, स समुदायार्थमवयवेऽध्यारोप्य कृत इति वेदितव्यम्। अध्यारोपितार्थयोरपि तयोर्गणपाठसामर्थ्याद्धातुसंज्ञा भवत्येव। एवं प्रत्ययोऽप्यनर्थकोऽप्यस्ति। यथा-- `यावादिभ्यः कन्' (5.4.29), याव एव यावक इति। न ह्यत्र प्रत्ययस्यान्वयव्यतिरेकाभ्यां शक्यतेऽर्थवत्त्वं प्रत्येतुम्। विनापि तेन कन्प्रत्ययेन यावशब्दादेव तदर्थः प्रतीययते। तस्मादर्थवदिति युक्तमुक्तम्।
`अहन्' इति। अदादित्वाच्छपो लुक्, तिपो हल्ङ्यादिना (6.1.68) लोपः, अट्। स च हन्तिग्रहणेन गृह्यत इति कृतेऽपि तस्मिन् हन्तिर्दातुरेव। अत्र विना धातुग्रहणेन प्रागेव प्रत्ययोत्पत्तेः प्रातिपदिकसंज्ञा स्यात्। नलोपस्तु प्रत्ययोत्पत्तौ पदत्वे सत्युत्तरकालम्। अथ वा-- प्रातिपदिकसंज्ञाऽपि प्रत्ययोत्पत्तेरुत्तरकालमेव स्यात्, तस्माद्धातुग्रहणं कर्तव्यम्। ननु चात्र प्रत्ययलक्षणेन `अप्रत्ययः' इति प्रतिषेधेन भवितव्यम्,तत् किमधातुग्रहणेन ? नैतदस्ति; प्रातिपदिकसंज्ञायां नलोपः कार्यः, नलोपे च `न ङिसम्बुद्धयोः' (8.2.8) इति प्रतिषेधो ज्ञापकः- प्रत्ययलक्षणेन `अप्रत्ययः' इति प्रतिषेधो न प्रवर्तत इति। यदि ह्यप्रत्यय इति प्रत्ययलक्षणेन हे राजन्नित्येवमादिषु प्रातिपदिकसंज्ञायाः प्रतिषेधः स्यात्, `न ङिसम्बुद्धयोः' (8.2.8) इति प्रतिषेधो अनर्थकः स्यात्; प्राप्त्यभावात्। अथ भिद्-छिद्-लूः- पूरित्येवमादीनां कथं प्रातिपदिकसंज्ञा, यावता क्विबन्ता धातुत्वं न जहतीति धातव एवैत इति, अत्राधातुरिति प्रतिषेधेन भवितव्यम् ? नैष दोषः; मा भूदनेन, कृदन्तत्वादुत्तर सूत्रेण भविष्यति। न चोत्तरस्याः प्राप्तेरयं बाधकः; वाक्यान्तरस्थत्वात्। `मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' (व्या.प.10) इति वा।
`काण्डे, कुड्ये' इति। प्रथमाद्विवचनान्ते एते रूपे। `नपुंसकाच्च' (7.1.19) इति शीभावः। अत्र च `प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य' (भा.प.सू.7) इति तदन्तस्य प्रतिषेधो भविष्यति, न प्रत्ययमात्रस्य। ननु च `सुप्तिङन्तं पदम्' (1.4.14) इत्यत्रान्तग्रहणेन `अन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति' इति ज्ञापितत्वात् `अप्रत्ययः' इति प्रत्ययान्तस्य प्रतिषेधो न लभ्यते, नैष दोषः; संज्ञाविधौ स प्रतिषेधः, न चायं संज्ञाविधिः, किं तर्हि ? प्रतिषेधविधिः। अथ किमर्थमप्रत्यय इत प्रतिषेध उच्यते, यावतोत्तरसूत्रे कृत्तद्धितग्रहणं नियमार्थं भविष्यति-- `कृत्तद्धितान्तस्यैव प्रातिपदिकसंज्ञा, नान्यप्रत्ययान्तस्य-- काण्डे,कुड्ये इत्येवमादेः'इति ? नैतदस्ति, असत्यस्मिन् प्रतिषेधेऽन्यत्र`संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति' इति कृत्तद्धितयोरेव

प्रातिपदिकसंज्ञा स्यान्न तदन्तस्य; तदन्तस्य चैवेष्यते-- भिच्छिल्लूःपूरित्येवमादीनां प्रातिपदिकसंज्ञार्थम्। सत्यप्रत्यय इत्येतस्मिन् प्रतिषेधे प्राप्ते यथा कृत्तद्धितान्तस्य प्रातिपदिकसंज्ञा लभ्यते तथोत्तरसूत्रे प्रतिपादयिष्यामः। ननु च `काण्डे' `कुड्ये'-- इत्येतयोः पूर्वमेव प्रकृतेः प्रातिपदिकसंज्ञा प्रवृत्ता, विभक्त्या च सहैकादेशे कृतेऽन्तादिवद्भावादस्त्येव प्रातिपदिकत्वमिति सत्यप्यप्रत्ययग्रहणे ह्रस्वत्वं प्राप्नोत्येव, नैतदस्ति; अप्रत्ययग्रहणसामर्थ्यान्न भविष्यति,अन्यथा ह्यप्रत्ययग्रहणमनर्थकं स्यात्।

`अधातुरप्रत्ययः' इति द्विष्प्रतिषेधः षष्ठीतत्पुरुषाशङ्कानिरासार्थः `अधातुप्रत्ययः' इत्युच्यमाने षष्ठी तत्पुरुषोऽप्याशङ्क्येत-- धातोर्यः प्रत्ययस्य न भवतीति।।

46. कृत्तद्धितसमासाश्च। (1.2.46)

अत्र `अन्यत्र संज्ञाविधौ प्रत्ययग्रणे तदन्तविधिर्नास्ति' इत्यतन्नोपतिष्ठते, यस्मादप्रत्यय इति प्रतिषेधे प्राप्ते वचनमिदम्। `अप्रत्ययः' इति प्रत्ययान्तस्य प्रतिषेधः उक्तः। तेन यत्र संज्ञायाः प्रतिषेधस्तत्रेयमारभ्यमाणा तदन्तस्यैव भवतीत्येतच्चेतसि कृत्वाऽऽह-- `अप्रत्यय इति पूर्वसूत्रे पर्युदासात् कृदन्तस्य' इत्यादि।

अथ समासग्रहणं किमर्थम् ? यावता समासस्यार्थवत्त्वात् पूर्वेणैव संज्ञा

सिद्धेत्यत आह-- `अर्थवत्समुदायानाम्' इत्यादि। निर्धारणषष्ठीयम्-- अर्थवन्तो ये समुदायास्तेषां मध्ये समासस्यार्थवतः समुदायस्य प्रातिपदिकसंज्ञा यथा स्यादिति नियमार्थं समासग्रहणम्।

यद्येवम्, प्रकृतिप्रत्ययसमुदायस्यार्थवतः प्रातिपदिकसंज्ञा न स्यात्-- बहुपटव उच्चकैरिति ? कोऽत्र दोषः ? `चितः' (6.1.163) इत्यस्मिन् सूत्रे चितः सप्रकृतेर्बहुजकजर्थमिति वचनादेतद्वयवस्थाप्यते-- प्रकृतिमन्तर्भाव्य चित्स्वरो विधीयत इति। बहुपटव इत्यत्र बहुचि विहिते यदि प्रातिपदिकसंज्ञा न स्यात्,तदा प्रातिपदिकत्वाभावात् यथा सुबुत्पत्तिर्न स्यात् तथोत्पन्नाया अपि विभक्तेः `सुपो धातुप्रातिपदिकयोः' (2.4.71) इति लुका न भवितव्यम्। ततश्च बहुपटव इत्यत्र जस्विभक्तेरकारस्य स्वरः स्यात्; उकारस्य चेष्यते। प्रातिपदिकत्वे तु सति पूर्वोत्पन्नाया विभक्तेर्लुकि कृते याऽन्या विभक्तिरुत्पद्यते, सा बहुजुत्पत्तेरुत्तरकालभाविनीत्वात् प्रकृतौ नान्तर्भवति। तेन तामुत्सृज्य पूर्वो भागः स्वरभाग भवति। अत उकारस्य स्वरः सिध्यति। उच्चकैरित्यत्र प्रातिपदिक्तवाभावाकज्वतः समुदायाद्विभक्तिर्न स्यात्, तस्याञ्चासत्यां पदत्वं न स्यात्। ततश्चोच्चकैः पठतीति `तिङ्ङतिङः' (8.1.28) इति निघातो न स्यात्। तस्मात् प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा वक्तव्या ? न वक्तव्या, यस्मात् तुल्यजातीयानां नियमः, तेन तुल्यजातीयो नियमेन व्यवच्छिद्यते। तुल्यजातीयश्चच समाससुबन्तसमुदायादन्यः वाक्यसमुदाय एव, न तु प्रकृतिप्रत्ययसमुदायः। तेनायं तस् नियमेन व्यवच्छेदो न करिष्यते, नैतदस्ति; सुबन्तासुबन्तसमुदायोऽपि समासोऽस्ति, यथा-- प्रकर्त्ता, प्रकारक इति। अत्र हि `गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेः' (व्या.,प.वृ 138) इति कृदन्तेनासुबन्तेन गतिकारकं सुबन्तं समस्यते, तेन सुबन्तासुबन्तसमुदायोऽयं समास इति तुल्यजातीयस्यापि नियमे विज्ञायमाने बहुपटवः, उच्चकैरित्यत्र प्रातिपदिकसंज्ञा न स्यात्। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति-- भवति प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञेति; यदयमप्रत्यय इति प्रत्ययान्तस्य प्रतिषेधं शास्ति।।

47. ह्रस्वो नपुंसके प्रातिपदिकस्य। (1.2.47)

`नपुंसकलिङ्गे' इति। नुपुंसकं लिङ्गं यस्येति बहुव्रीहिः। स पुनर्नपुंसकलिङ्गोऽर्थो द्रव्यभूतो वेदितव्यः; न पुंसकिलिङ्गस्य द्रव्यधर्मत्वात्। `अलोऽन्त्यस्य' इति। `अलोऽन्त्यस्य' (1.1.52) इति परिभाषा।

`ग्रामणीः' इति। `सत्सूद्विष' (3.2.61) इत्यादिना क्विप्। `अग्रग्रामाभ्यां च' (का.वा.5064) इत्युपसंख्यानाण्णत्वम्। काण्डे, कुड्ये-- इत्यत्रापि `अप्रत्ययः' इति प्रतिषेधात्प्रातिपदिकसंज्ञा नास्ति, तेन ह्रस्वत्वं न भवति। ननु च प्रातिपदिकाप्रातिपदकयोरेकादेशोऽन्तादिवद्भावात् प्रातिपदिकग्रहणेन गृह्यते, ततश्च क्रियमाणे प्रातिपदिकग्रहणे ह्रस्वत्वं प्राप्नोतीत्यत आह-- `प्रातिपदिकगर्हणसमर्थ्यात्' इत्यादि। इह यदन्तवद्भावः स्यात्, प्रातिपदिकगर्हणमनर्थकं स्यात्,व्यवच्छेद्याभावादिति भावः।।

48. गोस्त्रियोरुपसर्जनस्य। (1.2.48)

`स्त्रीति स्त्रीप्रत्ययग्रहणम्' इति। अत्र हेतुमाह-- `स्वरितत्वात्' इति। स्त्रीग्रहणस्येह स्वरितत्वं क्रियत इति स्वरितेनाधिकारादवगतिर्भवति। तेन `स्त्रियाम्' (4.1.3) इत्यधिकृत्य ये प्रत्यया विहिताष्टावादयस्तेषां ग्रहणं भवति; न स्त्रर्थाभिधायिनः शब्दमात्रस्य, नापि स्त्रीशब्दस्यैव स्वरूपस्य उपसर्जनग्रहणं द्वयोर्विशेषणमित्यादेः स्पष्टीकरणयाह-- `गोरुपसर्जनस्य, स्त्रीप्रत्ययस्योपसर्जनस्य' इत्यादि। ताभ्यां प्रातिपदिकस्यत्यादेरपि स्फुटीकरणायाह--

`उपसर्जनगोशब्दान्तस्य' इत्यादि। उपसर्जनगोशब्दोऽन्तो यस्येति विग्रहः। एवं गोशब्देनोपसर्जनेन स्त्रीप्रत्ययेन च प्रातिपदिकस्य तदन्तविधो सति गोः कुलं गोकुलम्, राज्ञः कुमार्याः पुत्रो राजकुमारीपुत्र इत्यत्र गोशब्द्य कमारीशब्दस्य च ह्रस्वत्वं न भवति, अन्यथा इहापि स्यात्। भवति ह्यत्र गोशब्दस्य राजकुमारीशब्दस्य चोपसर्जनत्वमित्यभिप्रायः।

`चित्रगुः' इति। `प्रथमानिर्दिष्टम्' (1.2.43) इत्यादिना गोशब्दसयोपसर्जनसंज्ञा, निष्कोशाम्बिरित्यादौ तु `एकविभक्ति चापूर्व' (1.2.44) इत्यादिना।

`अतितन्त्रीः' इत्यादि। `तत्रि कुटुम्बधारणे' (धा.पा.1678), `इदितो नुम्' (7.1.58), `अवितृस्तृतन्त्रीभ्यः' (द.उ.1.82) इतीः- तन्त्रीः। `लक्ष दर्शनाङ्कनयोः' (धा.पा.त1538), `लक्षेर्मुट् च' (द.उ.1.84) इति मुट् ईप्रत्ययश्च-- लक्ष्मीः। `श्रिञ् सेवायाम्' (धा.पा. 897), `क्विब वचिप्रच्छि'(वा.288) इत्यादिना क्विप्, दीर्घः- श्रीः। `अत्यादयः क्रान्त्याद्यर्थे द्वितीयया' (वा.91) इति प्रादिसमासः।
यदि स्त्रीति स्त्र्यधिकारविहिताः प्रत्यया गृह्यन्ते ततश्च `प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य' (भो.सू.7) इति तदन्तग्रहणेऽतिराजकुमारीरित्यत्र ह्रस्वत्वं न सिध्यति; न हि राजकुमारशब्दात् `वयसि प्रथमे' (4.1.20) इति ङीप्प्रत्ययो विहितः,किं तर्हि ? कुमारशब्दात्, नैष दोषः; एषा परिभाषा `यस्मात्प्रत्ययविधिस्तदादि' (1.4.13) इत्यत्र सूत्रे प्रतिपादिता। तत्र च `वाऽऽमि (1.4.5) इत्यतः `वा' ग्रहणमनुवर्तते, सा च व्यवस्थितविभाषा विज्ञायते। तेन व्यवस्थिविभाषावतीयं क्वचिन्नोपतिष्ठत एव। अथ वा-- `कृत्तद्धितसमासाश्च' (1.2.46) इत्यतश्चकारोऽनुवर्तते,स चानुक्तसमुच्चयार्थः, तेनातिराजकुमारिरित्यत्रापि ह्रस्वत्वं भविष्यतीत्यदोषः।
`ईयसो बहुव्रीहौ प्रतिषेधः' इति। ईयसन्ताद्यो विहितः स्त्रीप्रत्ययः,तदन्तस्य बहुव्रीहौ प्रतिषेध इति। कथं पुनरसौ लभ्यते ? ` विभाषा च्छन्दसि' (1.2.36) इत्यतो विभाषाग्रहणानुवृत्तेः। न चैवं सत्यतिप्रसङ्गः; व्यवस्थितविभाषाविज्ञानात्।
`बहुश्रेयसी' इति। अतिशयेन प्रशस्येति `द्विवचनविभज्योपपदे तरबीयसुननौ' (5.3.57) इतीयसुन्प्रत्ययः। `प्रशस्यस्य' (5.3.60) इति प्रशस्यशब्दस्येयसुनि परतः श्रादेशो भवति, `प्रकृत्यैकाच्' (6.4.163) इति प्रकृतिवद्भावः, `आद्गुणः' (6.1.87), `उगितश्च' (4.1.6) इति ङीप्। बह्व्यःश्रेयस्यो यस्येति बहुश्रेयसीति `नद्युतश्च' (5.4.153) इति कप् न भवति; `ईयसश्च' (5.4.156) इति कपो निषेधात्।

49. लुक्तद्धितलुकि। (1.2.49)

अदर्शनं (1.1.60) लुक्, तच्चाभावः। अभावे पौवापर्यन्नोपपद्यते। तस्माल्लुकीति सति सप्तमीयम्, न परसप्तमीति मत्वाहऽऽह-- `तद्धितलुकिसति' इति। `पञ्चेन्द्रः' इति। `तद्धितार्थ' (2.1.51) इत्यादिना समासे कृते `साऽस्य देवता' (4.2.24) इत्यण्, तस्य `द्विगोर्लुगनपत्ये' (4.1.88) इति लुक्, `इन्द्रवरुण' (4.1.49) इत्यादिना विहितस्य ङीषोऽनेन लुक्। तस्मिन्निवृत्ते सन्नियोगशिष्टानामेकतरापाय उभयोरप्यपाय इत्यानुको निवृत्तिः। `पञ्चशष्कुलिः' इति। `अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायम्' (5.1.28) इत्यार्हीयस्य ठकस्तेन क्रीतार्थे विहितस्य लुक्। `आमलकम्' इति। आमलक्याः फलं विकार इति `नित्यं वृद्धशरादिभ्यः' (4.3.44) इत्यञ्। पूर्ववल्लुक्। शष्कुली, बदरी, आमलकी, कुवली-- गौरादिपाठदेते ङीषन्ताः।
`गार्गीकुलम्'इति। गार्ग्यशब्दात् `यञश्च' (4.1.16) इति ङीप्; `यस्येति च' (6.4.148) इत्यकारलोपः; `हलस्तद्धितस्य' (6.4.150) इति यकारस्य च लोपः, गार्ग्याः कुलमिति षष्ठीसमासः, षष्ठ्या लुक्। गार्गीशब्दस्य समासशास्त्रे प्रथमानिर्दिष्टत्वाच्छास्त्रीयमुपसर्जनत्वम्, मूलोदाहरणेषु त्विन्द्रणी प्रभृतीनां लौकिकमात्रोपसर्जनमत्वम्। उभयगतिरिह शास्त्रे सम्भवतीति लौकिकमप्रधानत्वमुपसर्जनत्वम्। लोके ह्यप्रधानमुपसर्जनमित्यच्यते। `गार्गीत्वम्' इत्यत्रापि गार्गीशब्दस्य लौकिकमेवोपसर्जनत्वम्. `अवन्ती, कुन्ती कुरूः' इति। अवन्तेरपत्यं गोत्रं स्त्री, कुन्तेरपत्यं गोत्रं स्त्री-- `वृद्धेत्कोशलाजादाञ्ञ्यङ' (4.1.171) । कुरोरपत्यं स्त्री-- `कुरुनादिभ्यो ण्यः' (4.1.172) इति ण्यः। `स्त्रियामवन्तिकुन्तिकुरुभ्यश्च' (4.1.176) इति लुक्। अवन्तिकुन्तुशब्दाभ्याम्, `इतो मनुष्यजातेः' (4.1.65) इति ङीष्। कुरुशब्दात् `ऊङुतः' (4.1.66) इत्यूङ्। अत्र ङीषा ऊङा च तद्धितार्थो गोत्रापत्यं स्त्रीप्रधानमेवाभिधीयत इत्युपसर्जनत्वं नासति लौकिकम्। शास्त्रीयमपि नास्ति; अप्रथमानिर्दिष्टात् समासशास्त्र इति।।

50. इद्गोण्याः। (1.2.50)

`पञ्गोणिः' इति। `तद्धितार्थ' (2.1.51) इति समासे कृत आर्हीयष्ठक्। तस्य
पूर्ववल्लुक्। `इदिति योगविभागः' इति. एतस्येद्ग्रहणमेव लिङगम्। तथा हि गोणी इत्येतावति सूत्रे ह्रस्वग्रहणानुवृत्तौ ह्रस्वत्वे कृते पञ्चगोणिरिति सिद्ध्यत्येव;किमिद्ग्रहणेन ? तदेतदिद्ग्रहणं क्रियमाणं योगविभागर्थं विज्ञायते। ननु चानन्तरसूत्राल्लुक एवानुवृत्तिः स्यात्, न ह्रस्वस्य, नैतदस्ति; लुगनुवृत्तौ हि सूत्रमिदमनर्थकं स्यात्; लुकोऽनन्तरसूत्रेणैव सिद्धत्वात्। तस्माद्ध्रस्वग्रहणमेवानुवर्त्तते, न लुग्ग्रहणम्।
`पञ्चसूचिः' इति। पञ्चगोणिरित्यनेन तुल्यम्। यदि योगविभागः क्रियते, तदातिप्रसङ्गः स्यात्। अन्येषामपि प्रसज्यत इत्यत आह-- `स च' इत्यादि। यदि सर्वत्रेत्त्वं पूर्वयोगेणैव स्यात्, तदा `गोण्याः' इति वचनमनर्थकम्। तस्मादगोणीग्रहणादस्यासर्वविषयत्वम्। तेन योगविभागः सूचीविषय एव, नान्यविषय इति। तपरकरणं दीर्घानिवृत्त्यर्थम्। दीर्घस्य दीर्घकरणमनर्थकं स्यात्। अतो विना तपरकरणेन दीर्घो न भविष्यीति चेत्, न; लुग्ह्रस्वबाधनार्थत्वाद्दीर्घकरणस्य। भाव्यमानोऽण् सवर्णान् न गृह्णातीति, तस्माददीर्घनिवृत्त्यर्थं तपरत्वं नोपपद्यत इति चेत्, न; तस्याभाव्यमानत्वात्। अपूर्वस्य हि विधानं भाव्यमानत्वम्। न चात्रापूर्वस्य विधानम्। तथा हि-- लुग्घ्रस्वयोः प्राप्तयोः पुनः स एव ईकारः प्रतिप्रसूयते। तस्मात् तपरकरणं कर्त्तव्यम्।।

51. लुपि यक्तवद्वयक्तिवचने। (1.2.51)

अभिधेयस्य लिङ्गसङख्ययोः प्राप्तयोरयमारम्भः। लुबिति प्रत्ययस्यादर्शनम्,तच्चाभावात्मकम्। न चाभावे व्यक्तिवचनयोः शक्यतेऽतिदेशः कर्त्तुम्। तस्माल्लुप्संज्ञया लुप्तस्य प्रत्ययस्यार्थो लुप्शब्देन विवक्षित इति मत्वाऽह--`लुपीति लुप्संज्ञया' इत्यादि। कथं पुनरेतल्लभ्यते, यावता प्रत्ययादर्शनस्यैषा

संज्ञा, न तु प्रत्ययार्थस्य ? साहचर्यात्। साहचर्य्यन्तु यत्र लुप्, तत्रावश्यं प्रत्ययार्थस्य सद्भावात्। `युक्तवदिति निष्ठाप्रत्ययेन क्तवतुना प्रकृत्यर्थ उच्यते' इति। अत्र कारणमाह-- `स हि' इत्यादि। युनक्ति = अभिसम्बध्नाति, विशेषणविशेष्यभावलक्षणसम्बन्धेनात्मसम्बन्धिनं करोतीत्यर्थः। तत्र `तस्य निवासः' इत्यादि प्रत्ययार्थो विशेष्यः,पञ्चालादिशब्दस्यार्थः प्रकृत्यर्थो विशेषणम्। तेन हि पूर्व विज्ञातेन स्वाम्यन्तरव्यवच्छेदेन
प्रत्ययार्थो विशिष्यते।
`अथ वा' इत्यादि। पूर्वं `युजिर् योगे' (धा.पा.1444) इत्यस्माद्धातो
क्तवतुप्रत्यये सति युक्तवदित्यतद्रूपं प्रदर्शितम्, इदानीं तस्यैव धातोः क्तप्रत्ययाद्वतिप्रत्यये सति युक्तवदित्येतद्रूपं दर्शयति। यद्यपि द्विष्ठत्वात् सम्बन्धस्य -- यथा प्रत्ययार्थेन प्रकृत्यर्थो युक्तः, तथा प्रकृत्यर्थेनापि प्रत्ययार्थः; तथापि प्रत्ययार्थसम्बन्धिनोर्व्यक्तिवचनयोः प्रत्ययार्थ एवातिदेशोऽनर्थक इति प्रकृत्यर्थ एवात्र युक्तशब्देन विवक्षित इति मत्वाऽह-- `युक्तः प्रकृत्यर्थः' इति। `सप्तम्यर्थे वतिः' इति। लुपीति सप्तमीनिर्देशात्।
व्यक्तिशब्दः प्रादुर्भावादावप्यर्थे वर्त्तते, वचनशब्दो हि भाषणादिषु, अतस्तत्संप्रत्ययो मा भूदित्यत आह-- `व्यक्तिवचने' इति। किं पुनः कारणं पूर्वाचार्यनिर्देश आश्रीयत इत्यत्र आह-- `तदीयम्' इत्यादि। कुत एतदित्यत आह-- `तथा च' इत्यादि। न हि स्वकीयस्यैव प्रत्याख्यानं युक्तमिति भावः।
`पञ्चालाः क्षत्रियाः' इति। पञ्चालस्यापत्यानि बहूनीति विवक्षायाम् `जनपदशब्दात् क्षत्रियादञ्' (4.1.168), तस्य `तद्राजस्य बहुषु तेनैवास्त्रियाम्' (2.4.62) इति लुक्। `तेषां निवासो जनपदः' इत्यस्य वक्ष्यमाणेन `पञ्चालानाम्' इत्यनेन सम्बन्धः। `पञ्चालानां निवासो जनपदः' इति। तस्य `जनपदे लुप्' (4.2.81) इति लुक्। कुरुशब्दादपत्यार्थे `करुनादिभ्यो ण्यः' (4.1.172) इति ण्यप्रत्ययः। मत्स्यादिशब्देभ्योऽप्यपत्यार्थे `द्वयञ्मगध' (4.1.170) इत्यादिनाण्। शेषं पूर्ववत्।
`लवणः सूपः' इति। लवणेन संसृष्ट इति प्राग्वहतीष्ठक् (4.4.1), तस्य `लवणाल्लुक्' (4.4.24) इति लुक्। अत्राभिधेयवल्लिङ्गवचने भवतः।
शिरीषाणामदूरभदो ग्राम इति
शिरीषाः। `अदूरभवश्च' (4.1.70) इति शरीषशब्दादण्, तस्य `वरणादिभ्यश्च ' (4.2.82)
इति लुप्। णत्वन्न भवतीति व्यक्तिवचनग्रहणस्य फलम्। यदि `व्यक्तिवचने' इति नोच्येत, तदा शिरीषेषु यद्वनस्पतित्वं तस्यापि ग्रामेऽतिदेशः स्यात्। एवञ्च शिरीषवनमित्यत्र `विभाषौषधिवनस्पतिभ्यश्च' (8.4.6) इति णत्वं प्रसज्येत्।
`हरीतक्यः फलानि' इति। हरीतकीशब्दो गौरादिषु पिप्पल्यादिदर्शनान्ङीषन्तः। ततः फले विकारे `अनुदात्तादेरञ्' (4.2.44) इत्यञ्; तस्य `हरीतक्यादिभ्यश्च' (4.3.167) इति लुप्। अत्र व्यक्तिरेव युक्तवद्भावेन भवति, वचनन्त्वभिधेयवदिति। एतच्च
विभाषाग्रहणानुवृत्तेर्व्यवस्थितविभाषाविज्ञानाच्च लभ्यते। `खलतिकं वनानि' इति। `अदूरभवश्च' (4.2.70) इत्यण्, तस्य `वरणादिभ्यश्च' (4.2.82) इति लुप्। अत्र वचनमेव
युक्तवद्भावेन भवति, व्यक्तिस्त्वभिधेयवदेवेति। एतदपि पूर्ववदेव लभ्यते।।

52. विशेषणानां चाजातेः। (1.2.52)
पूर्वं प्रकृत्यर्थगतयोर्लिङ्गसंख्ययोर्लुबर्थेऽतिधेशात् तद्विशेषणानामपि रमणीयादीनां व्यक्तिवचनातिदेशः सिद्ध एव। यद्यपि भिन्नं विशेषणानां प्रवृत्तिनिमित्तम्; तथापि तेन भिन्नेनापि तत्र प्रवर्त्तमानानां स एव लुबर्थोऽतिदिष्टव्यक्तिवचनस्तेषामभिधेयः, तस्मात् तद्गतेनैव लिङ्गसंख्याभिधाने सिद्धे जातिप्रतिषेधार्थमिदं वचनम्। `गोदौरमणीयौ' इति। गोदौ नाम ह्रदौ, तयोरदूरभवो ग्राम इत्यर्थेऽण्। `वरणादिभ्यश्च' (4.2.82) इति लुप् तस्य।
`पञ्चालाः जनपदः'। `गोदौ ग्रामः 'इति। जनपदग्रामशब्दौ जातिवचनौ। ताभ्यां जातिनिमित्ताभ्यां स एव लुबर्थो जातिरूपेणोच्यत इति तयोरपि व्यक्तवचने युक्तवत् स्याताम्। ततो `जातेः' इति प्रतिषेधः।
`जात्यर्थस्य' इत्यादि। जातिशब्दस्यार्थो जात्यर्थः, तस्यायम् `अजातेः' इति युक्तवद्भावप्रतिषेधः, न जातिशब्दस्यैवेत्यर्थः। किमेव सति सिद्धं भवतीत्यत आह- `तेन' इत्यादि। अर्थस्य युक्तवद्भावप्रतिषेधे सति यथा जातिशब्दस्य तत्रार्थे वर्त्तमानस्य तदीये लिङ्गसंख्ये न भवतः, तथा तद्विशेषणानामपि युक्तवद्भावो न बह्वन्न इत्यादौ न स्यात्, रमणीयादीनामजातिशब्दत्वात्। द्वारग्रहणं लुबर्थे जातिशब्द्स्य प्रवृत्तत्वात्, लुबर्थे जातिविशेषणानां साक्षादप्रवृत्तेः। तानि हि साक्षाज्जातिमेव विशेषयन्ति। तस्यां तु विशेषितायां लुबर्थोऽपि विशिष्ट एव प्रतीयत इति जातिद्वारेण तस्य तानि विशेषणानि भवन्ति।
`मनुष्यलुपि' इति। मनुष्यलक्षणो यो लुप् तस्य विशेषणानां युक्तवद्भावप्रतिषेध इति। स च विभाषाग्रहणानुवृत्तेर्व्यवस्थितविभाषाविज्ञानाल्लभ्यते।
`चञ्चाभिरूपः' इति। चञ्चेव मनुष्यश्चञ्चा-- `इवे प्रतिकृतौ' (5.3.96) इति कन्। तस्य `लुम् मनुष्ये' (5.3.98) इति लुप्। `अभिरूपः' इति विशेषणस्याभिधेयवल्लिङ्गवचनानि भवन्ति। `
वर्ध्रिका' इति। पूर्ववत् कँल्लुपौ।।

53. तदशिष्यं संज्ञाप्रमाणत्वात्। (1.2.53)
`तदशिष्यम्' इति प्रतिज्ञा, `संज्ञाप्रमाणत्वात्' - इति हेतुः। यस्मात् संज्ञाभूतानां पञ्चालादिशब्दानां प्रमाणत्वम्, तस्मात् तदशिष्यम्। प्रमाणत्वं पुनः प्रत्ययलक्षणम्। सर्वेषामेव शब्दानामेवं विधे स्वविषये प्रमाणत्वमस्ति, उच्यते चेदम्, तत्र विशेषो विज्ञायते, स पुनरभिधेयगतलिङ्गसंख्यानपेक्षया

भिन्नलिङ्गसंख्यानामपि तेषां स्वार्थे प्रत्यायकत्वम्। अत एवाह-- `संज्ञाशब्दा हि नानालिङ्गसंख्याः' इति। `प्रमाणम्'इति। प्रमाणं प्रत्यायका वाचका इत्यर्थः। तत्रैतत् स्यात्-- संज्ञाशब्दा एवामी पञ्चालादयो न भवन्ति, किं तर्हि ? योगनिमित्तका इत्यत आह-- `पञ्चाला वरणाः' इत्यादि। योगनिमित्तकाः शब्दा योगशब्दाः। न हि पञ्चालादयः शब्दाः क्षत्रियादिसम्बन्धेन जनपदादौ वर्त्तन्ते; किं तर्हि ? संज्ञा एता जनपदादीनाम्।
यदि संज्ञाशब्दा एते, ततः किमिति ? तदशिष्यमित्यत आह-- `तत्र लिङ्गं वचनञ्च' इत्यादि। कुत एतत् ? यत् संज्ञाशब्दानां लिङ्गं वचनञ्च तत्स्वभावसिद्धमित्यत आह-- `यथा' इत्यादि। एकस्यामपि जलकणिकायां बहुवचनान्तः स्त्रीलिङ्गोऽप्शब्दः प्रयुज्यते, एकस्यामपि योषिति दारशब्दः पुंल्लिङ्गो बहुवचनान्तः, गृहशब्दश्चैकस्मिन् वेश्मनि बहुवचनान्तः पुंल्लिङ्गश्च, एकस्यामपि वालुकायां बहुवचनान्तः सिकताशब्दः स्त्रीलिङ्गः, वर्षा इत एकस्मिन् विशिष्टकालेऽपि प्रवर्त्तमानः स्त्रीलिङ्गो बहुवचनान्तश्च वर्त्तते। तस्मात् यथैवेषामप्प्रभृतिशब्दानां स्वाभाविकं लिङ्गं वचनञ्च तथा पञ्चालादिशब्दानामपीति नार्थो युक्तवद्भावचनेन। यद्येवम्, कस्मात् पूर्वं तदुक्तम् ? प्रतिषेधविषयोपदर्शनार्थम्। न ह्यनिर्दिष्टविषयस्य प्रतिषेधः शक्यते कर्त्तु ज्ञातुं वा।।

54. लुब्योगाप्रख्यानात्। (1.2.54)

`योगप्रख्यानात्' इति।योगो जनपदादेः क्षत्रियादिभिः सह सम्बन्धः, तस्याप्रख्यानादनुपलब्धेरित्यर्थः। ये हि योगनिमित्तिकाः शब्दा योगमभिधाय तद्वति द्रव्ये वर्त्तन्ते, तेभ्यो योग उपलभ्यते; यथा-- दण्डिशब्दादिभ्यः। न च पञ्चालादिभ्यो दण्ड्यादिशपब्दवद्योग उपलभ्यते, तस्मान्नैते योगशब्दा इत्यत आह- `न हि' इत्यादि। प्रख्यायते = कथ्यते, प्रकाश्यते, बुद्धेर्विषय आपद्यत इति यावत्। यत एवं पञ्चाला वरणा इति सम्बन्धो न प्रख्ययते अत एव नैतदुपलभामहे वृक्षयोगान्नगरे वरणा इति, किं तर्हि ? संज्ञा एता अनपेक्षितप्रवृत्तिनिमित्ताः। यदि संज्ञाश्बदा एते, ततः किमित्याह-- `तस्मादत्र' इत्यादि। गतार्थम्। ननु च संज्ञा शब्दानामपि व्युत्पत्त्यर्थ तद्धित उत्पद्यत ए, यथा `हस्ताज्जातौ' (5.2.133) हस्ती, `कम्बलाच्च संज्ञायाम्' (5.1.3) कम्बल्यमिति, तत्किमुच्यते-- " तस्मादत्र `तस्य निवासः' (4.2.69) `अदूरभवश्च' (4.2.70) इति तद्धितो नोत्पद्यते" इति ? सत्यम्, संज्ञाशब्दव्युत्पत्त्यर्थं तद्धित उत्पद्यते। स च क्वोत्पद्यते ? यत्र श्रुतिकृतो विशेषो विद्यते, न चेह तद्धितोत्पत्तौ लुपि सति
कश्चिद्विशेष इति न तद्धितोत्पत्तिः।।

55. योगप्रमाणे च तदभावेऽदर्शनं स्यात्। (1.2.55)

`योगप्रमाणे' इति। योगस्य प्रमाणं योगप्रमाणम्, येन योगः प्रत्याय्यते। तत् पुनरिह प्रकृतत्वात् पञ्चालादिशब्दः। स हि परमतेन पञ्चालादिसम्बन्धं स्वप्रवृत्तिनिमित्तमभिधायैव जनपदादौ वर्त्तते, नानभिधाय। तेन योगस्य प्रमाणं प्रत्यायको वाचक इत्यर्थः। `तदभावेऽदर्शनं स्यात्' इति। यो हि योगनिमित्तकः स योगाभावे न प्रयुज्यते, दणड्यादिशब्दवदित्यभिप्रायः। `योगप्रमाणे हि' इत्यादि। हिशब्दं हेत्वर्थं प्रयुञ्जानश्चशब्दो हेत्वर्थवृत्तिः सूत्रे उपात्त इति दर्शयति। स्यादेतत्, भवत्येव योगाभावे पञ्चालादिशब्दस्यादर्शनमित्यत आह-- `दृश्यते च' इत्यादि। गतार्थम्।

56. प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्। (1.2.56)

`अन्यप्रमाणत्वात्' इति। अन्यत् प्रमाणम् अवगतिहेतुर्यस्यार्थाभिधानलक्षणस्य तदन्यप्रमाणम्, तस्य भावोऽन्यप्रमाणत्वम्। `प्रधानं समासे किञ्चित् पदम्' इति। यथा राजपुरुषशब्दे पुरुष इत्येतत्। `प्रधानोपसर्जने' इत्यादि। राजपुरुष इत्यत्र पूर्ववदुपसर्जनम्, इतरत् प्रधानम्। ते च प्रधानार्थं सह ब्रूतः। `प्रकृतिप्रत्ययौ' इत्यादि। अशक्यत्वं त्वनन्तप्रकारत्वात्। तथा हि-- चित्रगुरिति बहुव्रीहौ कृते गुणगुणिभ्यामन्यपदार्थ उच्यते। अत्र गुणपदं चित्रशब्दोऽप्रधानम्, विशेषणत्वात्; गुणिपदं गोशब्दः प्रधानम्, विशेष्यत्वात्। क्वचिदुपसर्जनाभ्यामन्योऽर्थोऽभिधीते-- प्लक्षन्यग्राधाविति। तथा हि, न केवलं प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः अपि तु, क्वचित् प्रकृत्यर्थमपि, यथा-- स्वार्थिकेषु शुक्लतरम्, शुक्लतममिति। तथा केचिदाख्यातेषु स्वभावात् प्रधानमाहुः प्रकृत्यर्थम्-- `क्रियाप्रधानमाख्यातम्' इति।
अन्ये तु मन्यन्ते- आख्यातेषु प्रधानभूतः प्रत्ययार्थ एव शक्तिरूपेणोच्यते, यथा विभक्तिभिः क्वचित् प्रत्यये; न तु शक्तिमान् पदार्थो द्रव्यभावमापन्न उच्यते। अतः क्रियान्तरेण च सम्बन्धे शक्त्यन्तरमाविर्भवति कर्त्तारं पश्येति। एवमाद्यनन्तप्रकारमर्थाभिधानशक्यं सर्वमुपदेष्टुम्, तस्माल्लोकत एवार्थावगतिः। कथं पुनरेतद्विज्ञायत इत्यत आह-- `यैरपि' इत्यादि। सुगमम्।।

57. कालोपसर्जने च तुल्यम्। (1.2.57)

अर्थस्यान्यप्रमाणत्वादित्युक्तम्। कथं पुनरत्राप्ययं हेतुर्लभ्यत इति
प्रश्नावसर इत्याह-- `तुल्यशब्दो हेत्वनुकर्षणार्थः' इति। कथं पुनस्तुल्यशब्दो हेत्वनुकर्षणार्थो भवति ? मन्यते-- तुल्यमिति प्रत्याख्यानक्रियाविशेषणमेतत्। अनन्तरोक्तेन प्रत्याख्यानेन तुल्यमेतत् प्रत्याख्यानम्। एवञ्च तुल्यं भवति यदि यस्तस्य हेतुः स एवास्यापि भवति। तस्मात् तुल्यग्रहणसामर्थ्यात् पूर्वको हेतुत्रानुवर्त्तते। तेन तुल्यशब्दो हेत्वनुकर्षणार्थो भवतीति। `आन्याय्यादुत्थानात्' इत्यादि। उत्थानं शयनाद्रात्रेः पश्चिमे यामे न्याय्यमुक्तम्। संवेशनम् = शयनम् तदपि रजन्याः प्रथमे यामे न्याय्यम्। तदेवं सकलो दिवसः; पूर्वस्याश्च रात्रेः पश्चिमो यामः, आगमिन्याश्च प्रथमो याम इत्येषोऽद्यतनः काल इत्युक्तं भवति। `अहरुभयतोऽर्द्धरात्रम्' इत्यादि। कृत्स्नो दिवस उभयश्चार्द्धरात्रम्। अतिक्रान्तायाश्च रात्रेरागामिन्याश्च रात्रेरद्यतनः काल इत्यपरे।।

58.जात्याख्यामेकस्मिन्बहुवचनमन्यतरस्याम्। (1.2.58)

`जातिर्नामायमेकोऽर्थः इत्यादिना सूत्रारम्भस्य प्रयोजनमाह। ननु जातेः संख्या न विद्यते ? तस्या द्रव्यधर्मत्वात्। यद्यपि वैशेषिकसिद्धान्तप्रसिद्धा गुणपदार्थसंगृहीता या संख्या सा न विद्यते; तथापि `भेदका गुणाः' इत्यस्मद्दर्शने' भेदमात्रा या संख्या सा विद्यत एवेत्यदोषः। `जातेराख्या' इति। आख्यानमाख्या = प्रत्यायनम्। `एकस्मिन्नर्थे' इति। जात्याख्योऽर्थो `जात्यर्थो बहुवद्भवतीति यावत्' इति। एतेनैतद्दर्शयति-- न हि जातिविशेषणेभ्यः सम्पन्नादिभ्यस्तन्न स्यात्। तेषामजातिशब्दत्वादित्यभिप्रायः। कथं पुनर्जात्यर्थस्य बहुवद्भावो लभ्यते ? अन्वर्थग्रहणात्। बहुवचनमिह न पारिभाषिकं बहुवचनं गृह्यते, किं तर्हि ? अन्वर्थम्। उक्तिः = वचनम्। बहूनां वचनं बहुवचम्. न चैकस्मिन्नर्थे बहूनां वचनं सम्भवति, अतः सामर्थ्याद्वित्यर्थो गम्यते-- एकस्मिन्नर्थे बहुविदिति। तदनेन प्रकारेण जात्यर्थो बहुवद्भवति। `तेन' इत्यादि। यत ए जात्यर्थस्य बहुवद्भावो विधीयते, तेन जातिविशेषणानामजातौ वर्तमानानां बहुवचनमुपपद्यते, जातिशब्दवत्।

`देवदत्तः' इति। देवदत्तशब्दो यदृच्छाशब्दः। नानेनैकं वस्त्वनेकव्यक्त्यनुगतमभिधीयते। अनेकव्यक्त्याधारा हि जातिः। ततो न देवदत्तत्वं नाम जातिरस्तीति न भवत्यत्र बहुवद्भावः। ननु चात्रावस्थाभेदेनानेकाधारं देवदत्तत्वमस्ति, नैतदस्ति; एवं हि जातिग्रहणमनर्थकं स्यात्, सर्वत्र जातेः सम्भवात्। तस्माज्जातिग्रहणसामर्थ्याल्लोके ये जातिशब्दाः, प्रतीताः, तदर्था एवात्र जातिशब्देन विवक्षिता इति विज्ञायते, न च देवदत्तशब्दो लोके जातिशब्दः प्रतीतः। `काश्यपप्रतिकृतिः काश्यपः' इति। काश्यपस्यापत्यम् `अनृष्यानन्तर्ये विदादिभ्योऽञ्' (4.1.104) इत्यञ्-- काश्यप इति। तत इवार्थे `एवे प्रतिकृतौ'(5.3.96) इति कन्। `लुम् मनुष्ये' (5.3.98)इति लप् भवति। `अयं जातिशब्दः' इति। `गोत्रञ्च चरणैः सह' (4.1.63म.भा) इति लक्षणात्, तस्य च गोत्रप्रत्ययान्तत्वात्। न त्वयं जातिरूपेणोच्यते, किं तर्हि ? प्रतिकृतिरिति। एवं तर्हि जातिप्रत्यायने हि चिकीर्षिते बहुवद्भावेन भवितव्यम्। न चेह जातिप्रत्यायनं चिकीर्षितम्, किं तर्हि ? प्रतिकृतिप्रत्यायनम्।`व्रीहियवौ' इति। एकस्मिञ्जात्यर्थे बहुवद्भावोऽनेन विधीयते। इह तु द्वौ जात्यर्थो विवक्षितौ। वक्तव्यशब्दस्य व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्-- अन्यतरस्यामिति व्यवस्थितविभाषेयम्। तेन संख्याप्रयोगे न भविष्यति। अथ वा- एको व्रीहिः सम्पन्न इत्यत्रैकशब्दः प्रयुज्यमानो जात्यर्थस्यैकत्वमुद्भावयति,तच्च बहुत्वेन विरुध्यते। तस्मादेकत्वबहुत्वयोर्विरोधाद्बहुवद्भावो नेह भविष्यति।।

59. अस्मदो द्वयोश्च। (1.2.59)

अत्राप्यर्थस्य बहुत्वातिदेशः। `अस्मदो योऽर्थः स बहुवद्भवति' इति। तेन तिङन्तस्यापि तत्र वर्तमानस्य बहुवचनान्तत्वं भवति। `वयं ब्रूमः' इति। `एकत्वे द्वित्वे च' इत्यादि। युक्तं यदेकत्वे भवति, द्वित्वे तु कथम् ? न हि द्वित्वमस्मदर्थस्य सम्भवति; अस्मच्छब्दस्यात्मविषयत्वात्, आत्मनश्चैकत्वात्, नैष दोषः; आत्मत्वं परत्र यदोपचर्यते `अयं मे द्वितीय आत्मा' इति तदा अस्मच्छब्दस्य तत्रापि वृत्तेर्द्व्यर्थविषयत्वं सम्भवति। अथ वा-- त्यदादीनां मिथो यद्यत् परं तच्छिष्यत इत्यस्मच्छब्द एव शिष्यमाणो युष्मदर्थमप्याहेति द्वयर्थतोपपद्यत इति युज्यते द्वयर्थता। अथ यद्यस्मच्छब्दो बहुवचनान्तः प्रयुज्यते तदैकार्थविषयोऽयम्, न द्वयर्थविषय इति; अथ द्व्यर्थविषयोऽयं नैकार्थविषय इति कुतस्यस्यैकार्थद्वयर्थविषये वृत्तिरवसीयते ? प्रकरणात्। यथा-- आराच्छब्दस्य दूरान्तिकार्थयोर्वृत्तिरिति। `अहम्' इति। `ङे प्रथमयोरम्' (7.1.28) इत्यम्भावः, `त्वाहौ सौ' (7.2.94) इत्यहारदेशः। `वयम्' इति। जसि `मपर्यन्तस्य' (7.2.91) `यूयवयौ जसि' (7.2.93) इत वयादेशः, `शेषे लोपः' (7.2.90) `आवाम्' इति। औप्रत्यये `युवावौ द्विवचने' (7.2.92) इत्यावादेशः। `प्रथमायाश्च' (7.2.88) इत्यादिनात्वम्। वक्तव्य इति व्याख्येय इत्यर्थः। व्याख्यानां तु-- अन्यतरस्यांग्रहणं यदनुवर्तते तस्य व्यवस्थितविभाषात्वमाश्रित्य कर्त्तव्यम्। `युष्मदि गुरावेकेषाम्' इति। एतदपि चकारस्यानुक्त समुच्चयार्थत्वात् सूत्रेणैव संगृहीतम्।।

60. फल्गुनीप्रोष्ठपदानाञ्च नक्षत्रे। (1.2.60)

`चकारो द्वयोरनुकर्षनार्थः' इति। ननु च फल्गुन्यौ नक्षत्रे द्वे एव, तथा प्रोष्ठपदे अपि द्वे; अत्रानयोर्दित्वाद्वित्व एव बहुवचनं भविष्यति, तत् किं चकारेण द्वयोरित्यनुकर्षणार्थेन ? एवं तर्ह्येतज्ज्ञापयति-- नक्षत्रग्रहणं ज्योतिष उपलक्षणार्थमिति। तेनैतदपि सिद्धं भवति-- उदिताः पूर्वाः फल्गुण्यः, उदिते पूर्वे फल्गुन्याविति। यदि नक्षत्रग्रहणं ज्योतिष उपलक्षणार्थमिति न ज्ञाप्यते, तदिह तु न स्यात्, यतो ज्योतिषामावस्थिकी नक्षत्रता चन्द्रमसा योगे सति भवति, नान्यदा; अन्यदा तु ज्योतिष्ट्वमेव। न च नक्षत्राभिधायिनः `उदिताः पूर्वाः फल्गुन्यः' इत्यत्र फल्गुनीशब्दस्य प्रयोगः, किं तर्हि ? ज्योतिर्मात्राभिधायिन इति। अत्र ज्योतिष्ट्वमेक्सयाप्यस्तीति तन्निवृत्यर्थं द्वयोरित्यनुकर्षणार्थं चकारकरणं युक्तम्। यदि पुनर्ज्योतिष उपलक्षणार्थं नक्षत्रग्रहणं न स्यात्, तदा क्व स्यात् ? तदेहैव स्यात्-- अद्य पूर्वाः फल्गुन्यः, अद्य पूर्वे फल्गुन्याविति। अस्ति ह्यत्र फल्गुन्योर्नक्षत्रता, चन्द्रमसा युक्तत्वात्। तथा ह-- `नक्षत्रेण युक्तः कालः' (4.2.3) इत्यण् भवति। श्रवणं तस्य न भवति; `लुबविशेषे' (4.2.4) इति लुप्तत्वात्। `फल्गुन्यौ माणविके' इति। फल्गुन्योर्जाते इति। `फल्गुन्याषाढाभ्यां टानौ' (वा.451) इत्युपसंख्यानाट्टप्रत्ययः। `टिड्ढाणञ्' (4.1.15) इति ङीप्।।

61. छन्दसि पुनर्वस्वोरेकवचनम्। (1.2.61)

62. विशाखयोश्च। (1.2.62)

63.तिष्यपुनर्ववस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्। (1.2.63)
`तिष्यपुनर्वसवो माणवकाः' इति। तिष्यपुनर्वसुशब्दाभ्यां `नक्षत्रेण युक्तः कालः' (4.2.3) इत्यण् भवति। तस्य `लुबविशेषे' (4.2.4) इति लुप्। ततस्तिष्ये जातो माणवकः पुनर्वस्वोर्जातौ माणवकाविति `सन्धिवेलादि' (4.3.16) इत्यादिनाऽण्, तस्य `श्रविष्ठाफल्गुन्यनुराधा' (4.3.34) इत्यादिना लुप्। `पर्यायाणामपि यथा स्यात्' इति। नक्षत्रग्रहणे सत्यर्थग्रहणादेतद्भवति। शब्दग्रहणे च `स्वं रूपम्' (1.1.68) इत्यषा परिभाषा भवतीत्युक्तमेतत्। तदभावे पर्यायाणामपि भवति। `सिद्ध्यपुनर्वसू' इति। सिद्ध्यशब्दस्तिष्यपर्यायः। `यस्तिष्यस्तौ पुनर्वसू येषाम्' इत्यवयवेन विग्रहं दर्शयति। समुदायस्तु समासार्थो वेदितव्यः। अथ तिष्यपुनर्वसव इति ? बहुव्रीहिणा विपर्यस्तमतयः पुरुषा एवैवमुच्यन्ते । ततश्च नक्षत्रसमास एवायं न भवति। तत् किमेतन्निवृत्त्यर्थेन द्वन्द्वग्रहणेनेत्येवं यो देशयेत् तं प्रत्याह-- `तिष्यादय एव' इत्यादि। स्वदर्णनापराधादन्यथा तिष्यादीन् दृष्ट्वा प्रतिपत्तृभिस्त ए तिष्यादयो विपर्ययेण दृश्यमाना
बहुव्रीहिणैवमुच्यन्ते, न तु पुरुषाः। तस्मान्नक्षत्रसमास एवायम्। `तिष्यपुनर्वस्विदम्' इति। केन पुनरत्रैकवद्भावः ? `जातिरप्राणिनाम्' (2.4.6) इति चेत्, न; संज्ञाशबद्त्वात्, देवदत्तादिशब्दवत्। नायं जातिशब्दः,अनेकधारा हि जातिर्भवति, न च तिष्यादिस्तथा। किञ्च वक्ष्यति-- `जातिप्रधानपरत्वे च जातिद्रव्याणामयमेकवद्भावः, न नियतद्रव्यविवक्षायाम्' इति; नियतद्रव्यविवक्षा चात्र, तस्मान्न `जातिरप्राणिनाम्' इत्यनेनैकवद्भाव उपपद्यते। न चान्यदेकवद्भावलक्षणमस्ति। तत्र तिष्यपुनर्वस्वोर्नक्षत्रे
द्वन्द्वसमासे बहुत्वाद्बहुवचनेन भवितव्यम्। एवञ्च बहुवचनग्रहणमनर्थकमित्यत आह-- `सर्वो द्वन्द्वो विभाषा' इत्यादि। यदयमेकवचननिवृत्त्यर्थं बहुवचनग्रहणं करोति, ततोऽवसीयते-- अस्तीयम्परिभाषा `सर्वो द्वन्द्वो विभाषैकवद्भवतिट (व्या.प.91) इति। तेनेह बहुवचनग्रहणमेकवचननिवृत्त्यर्थं कृतिमित्यभिप्रायः।

64. सरूपाणामेकशेष एकविभक्तौ। (1.2.64)
`सरूपाणाम्' इति बहुव्रीहौ कृते `ज्योतिर्जनपद' (6.3.85) इत्यादिना समानस्यसभावः। रूपशब्दोऽत्र स्वभावे वर्त्तते। `सरूपाणां शब्दानाम्' इति निर्धारणे षष्ठी। तेन स्वरूपाणां मध्ये समानजातीयो यः सरूपः, स एक एव शिष्यते, न विरूपः। समानजातीयस्यैव हि निर्धारणं भवति, न विजातीयस्य। अथ वा-- समुदायलक्षणैषा षष्ठी, सरूपसमुदायान्तः पाती च सरूप एव भवति, न विरूपः। तेन सरूप एव शिष्यते। `एक विभक्तौ' इति। एकशब्दः समानार्थः, एकधनाविति यथा। एका चासौ विभक्तिश्चेति `पूर्वकालैक' (2.1.49) इत्यादिना समासः। एकमेकशेष इत्यत्रापि। अत्र त्वेकशब्दः संख्यावचनः, शेषशब्दोऽयं निवृत्त्या विशिष्टवस्थानमाह, नावस्थानमात्रम्। अत एवाह-- `एकः शिष्यते, अपरे निवर्त्तन्ते' इति। `वृक्षश्च वृक्षश्च वृक्षौ' इत्यादि। अविभक्तिकानामयमेकशेषः; अनैमित्तकत्वाद्विभक्तेः। न ह्ययं परां विभक्तिमाश्रित्य विधीयते। एकविभक्तावितीहसारूप्योपलक्षणमेतत्, न निमित्तनिर्देशः। एकस्यां विभक्तौ परतो यानि रूपाणि दृष्टानि, तेषामनुत्पन्नायामेव विभक्तौ प्रातिपदिकानामेकशेषो भवति। ततः कृत एकशेषे विभक्तिरुपपद्यते। अथ वा -- सविभक्तिकानामेवैकशेषः, कथम् ? विभक्तिशब्देन हि कारकमभिधीयते, विभज्यते प्रातिपदिकार्थोऽनयेति कृत्वा। तदेतदुक्तं भवति-- एकस्मिन् समानेऽभिन्ने कारके यानि सरूपाणि तेषामेवैककारकाणामेकशषो भवतीति। यद्येवम्, `परतः' इति वृत्तिग्रन्थो नोपपद्यते, कारकं ह्यर्थसमवायिनी शक्तिः, न च तया शब्दानां पौर्वापर्यं सम्भवति, कथञ्च विभक्तिशब्देन कारकेऽभिधीयमाने सविभक्तिकानामेकशेषो लभ्यते ? उच्यते; वृत्तिग्रन्थस्तावदुपपद्यते-- परशब्दो ह्ययमिष्टवाची, एकविभक्तौ परतः = एकस्यां विभक्ताविष्टायामित्यर्थः। विषयसप्तमी चेयम्, सति सप्तमी वा। एकस्मिन् कारके विषयभूत इष्टे सति सप्तमी वा। एकस्मिन् कारके विषयभूत इष्टे सति चेत्यर्थः। किञ्चेष्टं कारकं भवति ? यद्विवक्षितम्। अत ए विवक्षितत्वात् कारकं स्वनिमित्तां विभक्तिकानामेकशेषो लभ्यते।
सहभावविवक्षायाञ्चायमेकशेषो भवति। यद्येकेन युगपत् सर्वेषामर्थोऽभिधातुमिष्यत एवं सति भवति; नान्यथा। ननु च जातिः पदार्थः, जातिश्चैकैव; तत्रैकत्वाज्जातेर्बहूनां शब्दानां प्रसङ्ग एव नास्ति,तत्किमेकशेषारम्भेण ? इति चोद्यावसरे `द्रव्यं पदार्थः' इत्येतद्दर्शनमाश्रित्याह-- `प्रत्यर्थम्' इत्यादि। प्रत्यर्थम् = एकैकस्मिन्नर्थे यस्माच्छब्दानां निवेशप्रवृत्तिस्ततोऽकेन शब्देनानेकार्थ्सयाभिधानम्। तत्रैतद्दर्शनेऽकेषामर्थाभिधाने प्रत्येकेनैव कर्तव्येऽनेकशब्दत्वं प्रसज्यत इति यावन्तस्तेऽर्थास्तावतां शब्दानां प्रयोगः प्राप्नोति, इष्यते चैकशब्दता। तस्मादेकशेष आरभ्यते।
`रूपग्रहणं किम्' इति। एवं मन्यते-- रूपग्रहणे क्रियमाणे पदद्वयसमनुगम्योऽर्थः प्रतिपत्तव्य इति प्रतिपत्तिगौरवं भवति । समानानामित्युच्यमाने सत्येकपदसमनुहम्योऽर्थः प्रतीयत इति प्रतिपत्तिलाघवं भवति; तस्मात् समानग्रहणमेव कर्त्तव्यमिति ? भिन्नेऽप्यर्थे यथा स्यादिति रूपग्रहणम् । यदि रूपग्रहणं न क्रियेत तदा विशेषानभिधानाद्यत्र सर्व समानं शब्दोऽर्थश्च तत्रैव स्याद्वृक्षा इत्यादौ, अक्षा इत्यादौ तु न स्यात्; अर्थभेदात्। तथा ह्यक्षशब्द इन्द्रियाख्ये, शकटाङ्गे, बिभीतकादावर्थे च वर्ततेष पादशब्दोऽपि कार्षापण-- श्लोकपाद-- पाणिपदादावर्थे वर्तते, माषशब्दोऽपि व्रीह्यादौ। `द्विबह्वोः शेषे मा भूत्' इति। ननु च `शेष' इत्येकत्वसंख्याविवक्षायां द्वयोर्बहूनाञ्च शेषो न भविष्यति,नैतदेवम्; इह विधीयमानत्वाच्छेष एव प्रधानम्, न च प्रधाने संख्या विवक्ष्यते। तथा हि-- `कर्त्तुरीप्सिततमं कर्म' (1.4.49) इति
कर्मसंज्ञा; ईप्सिततमस्य प्राधान्यात्। असत्यां संख्याविवक्षायां द्वयोर्बहूनाञ्च कर्मसंज्ञा भवति। गुणे तु संख्या विवक्ष्यते, यथा-- `ङ्याप्प्रातिपदिकात्'

(4.1.1)
इति स्वादयो विधीयमानत्वात् प्रधानम्; ङयाप्प्रातिपदिकमप्रधानमिति तत्र संख्या विवक्ष्यते। तेनैकैक्मादेव स्वादय उपपद्यन्ते। लक्षणानुरोधाद्गुणेऽपि क्वचित् संख्या न विवक्ष्यते, यथा इहैव-- सरूपाणामिति। तेन द्वयोरपि सरूपयोरेकः शिष्यते।
`आदेशो मा भूत्' इति। असति शेषग्रहणे सरूपाणामिति स्थानषष्ठीयं स्यात्; ततशचादेशः स्यात्। एवञ्च `अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' (द.उ.8.125) इति क्वन्प्रत्ययान्तोऽश्वशब्दो नित्स्वरादाद्युदात्त इति द्वयोरश्वशब्दयोराद्युदत्तयोः स्थान आद्युदात्तद्वयवानेवादेशः स्यात्; आन्तरतम्यात्।
`पयः' इत्यादि। एकः पयः शब्दः प्रथमान्तः कर्तृपदम्, द्वितीयो द्वितीयान्तः कर्मपदम्, ततो भिन्नविभक्तिकत्वम्;नैकविभक्तिपरत्वमित्येकशेषो न भवति।
` ब्राह्मणाभ्याम्' इति। प्रथमो ब्राह्मणशब्दस्तृतीयान्तः,द्वितीयस्तु चतुर्थ्यन्तः। तेनात्रापि समानविभक्तिकत्वं नास्ति।।

65. वृद्धो यूना तल्लक्षणश्चेदेव विशेषः। (1.2.65)
वृद्धशब्दोऽयमस्ति लौकिकः, यश्चरमे वयसि वर्तते; अस्ति च शास्त्रीयः-- `वृद्धिर्यस्याचामादेस्तद्वृद्धम्' (1.1.73) इति; अस्ति च पूर्वाचार्यसंज्ञा-- अपत्यमन्तर्हितं वृद्धमिति। तत्र यदि लौकिको गृह्येत ? युवशब्दस्यापि तत्साहचर्याल्लौकिकस्यैव वयोविशेषवाचिनो ग्रहणं स्यात्, ततश्चाजश्च वर्करश्चेत्येवमादौ प्रसज्येत। वृद्धावस्थो हि पशुविशेषोऽज इत्युच्यते, युवा तु वर्करः। अथ शास्त्रीय उपादीयते ? औपगवश्चौपगविश्चेत्यादावपि स्यादित्येतदालोच्याह-- `वृद्धशब्दः' इत्यादि। एतेन पूर्वाचार्यप्रणीतायाः संज्ञाया वृद्धस्येदं ग्रहणमिति दर्शयति। कथं पुनरेतल्लभ्यते ? उपदेशात्। अथ वा एवं मन्यते-- युवशब्दो यद्यपि लोके द्वितीये वयसि रूढः, तथापि `जीवति तु वंश्ये युवा' (4.1.163) इति परिभाषाबलादपत्ये यो वर्त्तते स एव गृह्यते। तेन तत्साहचर्यात् वृद्धशब्दस्यापत्यार्थवृत्तेरेव ग्रहणं युक्तमिति। गोत्रग्रहणं तु न कृतम्, वैचित्र्यार्थम्। `यूना सह वचने' इति। सहग्रहणेन यूनेति सहयोग एषा तृतीयेति दर्शयति। अत ए सहयोगे तृतीयाविधानादवगम्यते- सहभावविवक्षायामेकशेषो भवतीति। `समानायाम्' इत्यादिना यत्र वृद्धयुनिमित्तमेव वैरूप्यं तद्वि षयं दर्शयति। आकृतिः= शब्दस्य प्रवृत्तिनिमित्तम्, गार्ग्यात्वादि, तस्यां समानायाम् = अभिन्नायां यत्र वृद्धयुवप्रत्ययादेव केवलं भिद्येते, नान्यत् प्रकृत्यादिकम्, तत्र वृद्धयुवप्रत्ययनिमित्तमेव वैरूप्यं भवतीति भावः। `गार्ग्यश्च' इत्यादि । गर्गवत्सशब्दाभ्यां गर्गादित्वाद् यञ्, गार्ग्यः, वात्स्यः, ताभ्यां यून्यपत्ये `यञिञोश्च' (4.1.101) इति फक्। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ, वात्स्यश्च वात्स्यायनश्च वात्स्यौ। प्रकरणादिनात्र युवार्थो गम्यते। `गर्गश्च' इति। गर्गशब्दोऽयं मूलप्रकृततिः; न वृद्धे वर्त्तते, नापि यूनि। `गार्ग्यवात्स्यायनौ' इति। अत्र न केवलं वृद्धयुवप्रत्ययनिमित्तको विशेषोऽस्ति, अपि तु प्रकृतिनिमित्तकोऽपि। भागवित्तिशब्दो गोत्रापत्ये भगवित्तशब्दादिञन्तः। `भागवित्तिकश्च' इति। भागवित्तिशब्दाद्यून्यपत्ये `गोत्रस्त्रियाः कुत्सने ण च' (4.1.147) इत्यतः `कुत्सने' इत्यनुवृत्तौ `वृद्धाट्ठक् सौवीरेषु बहुलम्' (4.1.148)
इति ठक्।।

66.स्त्री पुंवच्च। (1.2.66)
स्त्र्यर्थस्य वैरूप्यकारणस्याधिक्यात् पूर्वेण न सिध्यतीति वचनम्। `पुंवच्च' इति वचनादतदेशोऽयम्। `स्त्री' इति। स्त्रीप्रत्ययग्रहणं वेदं स्यात् ? स्त्र्यर्थवृत्तिशब्दस्य वा ग्रहणम् ? अर्थग्रहणं वा ? यदि स्त्रीप्रत्ययस्य ग्रहणं स्यात्, ततोऽनेन तस्यैव निवृत्तिः क्रियते-- पुंवत् स्त्रीप्रत्ययो भवतीति; न तु स्त्र्यर्थस्य निवृत्तिः क्रियते; ततो गार्ग्यश्च गार्ग्यायणश्चेति गर्गा इत्यत्र `अस्त्रियाम' (2.4.62) इत्यनुवर्त्तमाने `यञञोश्च' (2.4.64) इति लुङ्न स्यात्; इह तु गर्गान् पश्यतीति `तस्माच्छसो नः पुंसि' (6.1.103) इति नत्वं न स्यात्। द्वितीये तु पक्षे स्त्र्यर्थवृत्तेः शब्दस्यानेन पुंवद्भावः क्रियते, न तु स्त्रीत्वस्य निवृत्तिः; तथापि स एव दोषः स्यात्। अर्थगर्हणे तु न कश्चिद्दोष इत्यतः स्त्र्यर्थस्येदं ग्रहणमिति मत्वाऽऽह-- `स्त्र्यर्थः पुंवद्भवति' इति। कथं पुनरर्थस्येदं ग्रहणं लभ्यते ? उच्यते; स्त्रीप्रत्ययानां तु तस्याभिधेयपातन्त्र्यात्। अर्थस्याप्राधान्यमपारतन्त्रयात् । प्रधानगुणन भवति; अप्राधान्यात्। अप्रधान्यं तु तस्याभिधेयपारतन्त्र्यात्। अर्थस्याप्राधान्यमपारतन्त्र्यात्। प्रधानगुणसन्निपाते तु प्रधानस्य ग्रहणं न्याय्यम् अतः स्त्र्यर्थं एव गृह्यते। `गार्गी, वात्सी च' इति। गार्ग्यवात्स्यशब्दाभ्यां
`य़ञश्च' (4.1.16) इति ङीप्,पूर्ववदकारयकारलोपो। `दाक्षी' इति। पूर्ववन्ङीप्। `दाक्षायणश्च' इति। दाक्षेरपत्यमिति `यञिञोश्च' (4.1.101) इति फक्।।

67. पुमान् स्त्रिया। (1.2.67)
`स्त्रीपुंसलक्षणश्चेदेव विशेषः' इति। यद्येवम्, इह न स्यात्-- गौश्चायं गौश्चेयमित्येतौ गावौ तिष्ठत इति, न ह्यत्र स्त्रीपुंसकृतः कश्चिद्विशेषोऽस्ति ? मा भूदनेन , `सरूपाणाम्' (1.2.64) इत्यादिना भविष्यति ? नैतदस्ति; यदि हि तेन स्यात् स्त्रीशब्दस्याप्येकशेषः प्रसज्येत। ततश्च स्त्रीलिङ्गतापि स्यात् लिङ्गमशिष्यं लोकाश्रयत्वात्। स्त्रीलिङ्गस्यैकशेषे कृते पुंसत्वं विवक्षितव्यमित्यदोषः।
अथ वा, पुमानिति योगविभागः क्रियते। तेनेहाप्यसत्यपि स्त्रीपुंसकृते विशेषे पुंस एवैकशेषो भवति। न चैवं सत्यतिप्रसङ्गो भवति;
योगविभागादिष्टसिद्धेरिति। `ब्राह्मणी, कुक्कुटी, मयूरी' इति। `जातेरस्त्रीवषयादयोपघात्' (4.1.63) इति ङीष्। `कुक्कुटमयूर्यौ' इति। अत्र न केवलं स्त्रीपुंसकृतो विशेषः,किं तर्हि ? आकृतिश्रुतिकृतोऽपि। `इन्द्राणी' इति। `इन्द्रवरुण' (4.1.49) इत्यादिना ङीष्, आनुगागमश्च। `प्राक् च प्राची' इति।

प्राञ्चीति प्रपूर्वादञ्चतेः `ऋत्विक्' (3.2.59) इत्यादिना क्विन्, `क्विन्प्रत्ययस्य कुः' (8.2.62) इति कुत्वम्। क्विनन्तात् `दिक्छब्देभ्यः' (5.3.27) इत्यादिनाऽस्तातिप्रत्ययः। तस्य `अञ्चेर्लुक्' (5.3.3)) इति लुक्। `प्राची' इति। प्राक्छब्दात् `उगितश्च' (4.1.6) इत्यत्राञ्चतेश्चोपसंख्यानान्ङीप्। `प्रागित्यव्ययम्' इति। `तद्धितश्चासर्वविभक्तिः' (1.1.38) इत्यव्ययत्वम्।।

68. भ्रातृपुत्रौ स्वसृदुहितृभ्याम्। (1.2.68)

69. नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम्। (1.2.69)
`अनपुंसकेन' इति। `किम' इत्यादि। ननु च विना नपुंसकेनापि सहवचनेन सरूपाणामित्यादिनैकशेषो भवत्येव; तत् कोऽत्र विशेषः, यस्तेनैकशेषो विधीयमानः, अनेनैव चेत्यत आह-- `एकवच्चेति न भवति' इति। यद्यनेनैकशेषः स्यात्, पक्ष एकवद्भावः स्यात्। तेन त्वेकशेषे सति न भवति। अथास्येति किमर्थमुच्यते ? यद्यस्येति नोच्येत, उत्तरत्राप्येकवच्चेत्यनुवृत्तिः स्यात्। ततश्चोत्तरत्र तु यस्यैकशेषः करिष्यते, तस्यैकवद्भावः प्रसज्येत। तस्मादस्यैव नपुंसकस्यैकवद्भावो यथा स्यात्। उत्तरत्र तु यस्यैकशेषः करिष्यते, तस्य मा भूदित्येवमर्थमस्येति वचनम्। अस्येति हि वचने सति मा भूदस्य वैयर्थ्यमित्युत्तरत्राप्येकवच्चेति नानुवर्तते। ननु चास्वरितत्वादेव नानुवर्तष्यते। एवं तर्हि तदेवास्वरितत्वमनेन प्रकारेणाख्यायते विस्पष्टार्थम्। एकारोऽत्रानुवर्त्तते। तेन हिमञ्च हिमानी च हिमहिमान्यौ, अरण्यञ्चारण्यानी चारण्यारण्यान्यावित्यत्र न भवति। इन्द्रवरुणादिसूत्रेण (4.1.49) `हिमारण्ययोर्महत्वे' (वा. 352) इति वचनात्
महत्त्वमपरो विशेषः।।

70.पिता मात्रा। (1.2.70)
`पितरौ' इति। `ऋतो ङि' (7.3.110) इति गुणः। `मातापितरौ' इति। `आनङृतो द्वन्द्वे' (6.3.25) इत्यानङ, अभ्यर्हिततत्वन्मातुः पूर्वनिपातः।।

71. श्वशुरः श्वश्वा। (1.2.71)
`श्वश्रूश्वशुरौ' इति। पूर्ववत्पूर्वनिपातः।।

72. त्यदादीनि सर्वैर्नित्यम्। (1.2.72)
`सर्वग्रहणं साकल्यार्थम्' इति। विना तेनानपुंसकेनेत्यस्यानुवृत्तिराशङ्क्येत, ततश्च नपुंसकेन सह न स्यात्। अथ वा-- तल्लक्षमश्चेदेव विशेष इत्येतदिहानुवर्त्तत इत्याशङ्क्येत, ततश्च यत्र त्यदादिकृत एव विशेषस्तत्रैव स्यात्-- स च यश्च यावित्यादि, इहि तु न स्यात्- स च देवदत्तशच् ताविति। अतः सर्वग्रहणम्। `स च देवदत्तश्च तौ' इति। यदा विशेषविवक्षा तदैतदुदाहरणम्, यदा तु सामान्यविवक्षा , तदा देवदत्तोऽपि तच्छब्देन सम्बध्यत इति `सरूपाणाम्' (1.2.64) इत्यनेननैव सिध्यति। `यद्यत्परम्' इति। गणपाठापेक्षं परत्वं वेदितव्यम्।।

73. ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री। (1.2.73)
`ग्राम्याणाम्' इति। ग्रामे भवा ग्राम्याः। `ग्रामाद्यखञौ (4.2.94) इति यः। ननु च सङ्घस्य तरुमत्वं न सम्भवति, नापि तद्वयवच्छेद्यं तरुणत्वम्। अतः `अतरुणेषु ' इत्ययुक्तं विशेषणमित्याह- `अतरुणग्रहणम्' इत्यादि। उच्यते चेदं विशेषणम्, न च सङ्घस्य तत्सम्भवति, तत्र सामर्थ्यादन्येषां सङ्घो विज्ञायते। `गावः इमाः' इति। इमा इत्यनुप्रयोगः स्त्रीत्वाभिव्यक्तये। `एतौ गावौ' इति। कथं पुनरिदं प्रत्युदाहरणम्, यावता द्वाभ्यामपि सङ्घो भवत्येव ? नैष दोषः, यस्मात् मतं स्यात् सङ्घग्रहणमनर्थकं स्यात्, व्यवच्छेद्याभावात्। `अनेकशफेषु' इत्यादि। अनेकानि शफानि खुरा येषां तेष्वयमेकशेषो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- अन्यतरस्यांग्रहणमिहानुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञायते। तेनानेकशफेष्वेव भवति, नान्यत्रेति।।
इति श्रोबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
प्रथमाध्यायस्य

द्वितीयः पादः

1.3

अथ प्रथमाध्यायस्य
तृतीयः पादः

1.भूवादयो धातवः। (1.3.1)

भूरादिर्येषां ते भूवादयः। भूवादयो दशगणीपरिपठिता गृह्यन्ते। `भवति' इत्यादि। अत्र धातुसंज्ञायां सत्याम् `धातोः' (3.1.91) इत्यनुवर्त्तमाने `वर्त्तमाने लट्' (3.2.123) इति लट्प्रत्ययः। `भू इत्येवमादयः शब्दा धातुसंज्ञका भवन्ति' इत्यनेन गणपाठेनैवेयं धातुसंज्ञा विधीयत इति दर्शयति। तेन अणपयति, कड्ड्पयति इत्येवमादीनां धातुसंज्ञा न भवतीत्युक्तं भवति। यद्यवम्, या-वा- दिव-इत्येवमादीनां सर्वनाम--विकल्प-स्वर्गाभिधायिनां धातुसमानशब्दानामक्रियावचनानामपि धातुसंज्ञा प्राप्नोतीति कस्यचिद्भ्रान्तिः स्यात्, अतस्तन्निराकर्त्तुमाह-- `धातुशब्दः' इत्यादि। लघ्वर्थं हि संज्ञाकरणमिच्छन्त्याचार्या इत्येकाक्षरायां संज्ञायां कर्त्तव्यायां महत्याः पूर्वाचार्यसंज्ञाया यदाश्रयणं तस्यैतत्प्रयोजनम्--यथाविधानां ते धातुसंज्ञां कृतवन्तः, तथाविधानमेवैषा संज्ञा यथा स्यादिति। ते च क्रियावचनानामेव धातुसंज्ञां विहितवन्तः। तदिहापि पूर्वाचार्यसंज्ञाश्रयणात् क्रियावचनानामेव धातुसंज्ञा विधीयते। तेन या-वा-दिव इत्येवमादीनां धातुसमानशब्दानामक्रियावचनानान्न भवतीति भावः।

ननु च भूरादिर्येषामिति बहुव्रीहौ कृते, आदिशब्दे परतो यदि संहितया निर्देशः, तदा `इको यणचि' (6.1.77) इति यणादेशे कृते `भ्वादयः' इति भवितव्यम्, अथासंहितया निर्देशस्तदा भू आदय इति, तत्कुतोऽयं वकारो यस्मिन् सति भूवादय इति निर्देशो भवतीत्यत आह-- `भवादीनाम्' इत्यादि। भूवादीनां संज्ञिनां निर्देशेऽयं वकारो मङ्गलार्थः प्रयुज्यते। मङ्गलमर्थः प्रयोजनं यस्य स तथोक्तः। स मङ्गलशब्दो धर्मपर्यायः, धर्मार्थ इति यावत्। यथा वेदे `त्रियम्बकं यजामहे' इत्यत्र यकारस्य दृष्टप्रयोजनं नास्त्रीत्यदृष्टार्थो धर्मार्थ एव पाठस्तस्य, तथेहापि वकास्य। अथ वा-- अपूर्वस्य वस्तुनो लाभो लोके मङ्गलं सम्मतम्, यथा प्रातर्दध्यादीनाम्; तथेहापि वकारस्यापूर्वस्यलाभो मङ्गलं प्रशस्तम्। प्रशस्तार्थो मङ्गलशब्दः। तथा चोक्तम्- `मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि च' (म.भा. 1.1.1) इति। इह चादौ वृद्धिशब्दो मङ्गलम्, मध्ये चायं वकारः, (1.3.) अन्ते च `स्वरिदतोयम्' (8.4.67) इत्युदयशब्दः।

`भुवो वार्थम्' इत्यादि। अथ वा-- भूवादय इत्यत्र निर्देशे नायमादिशब्द्स
प्रयोगः, नापि मङ्गलार्थस्य वकारस्य किं तर्हि? वादिशब्दस्यौणादिकस्य। वदन्तीति वादयः,वाचका इत्यर्थः। वदेर्धातोः `वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्' (द.उ. 1.53) इति कर्तरीञ्प्रत्ययः। यद्यपि वादीति सूत्रण्यन्तस्योपदानाम्, तथापि बहुलवचनादण्यन्तादपि भवति।`भ्वर्थाः' इति। तेषां वदीनामिदं विशेषणम्,भवनं भूः, सम्पदादित्वाद्भावे क्विप्। भवतेरर्थः क्रियासामान्यम्। भूरर्थो येषां ते भ्वर्थाः।कस्मात् पुनस्ते भ्वर्थाः ? `भुवो वार्थं वदन्ति' इति। इतिकरणो हेतौ-- यस्माद्भुवो धातोरर्थ वदन्त्यभिदधति तस्मात् ते भ्वर्थाः। एवं विधा वादयो वाचकाः शब्दा भूवादयो धातुसंज्ञा भवन्तीत्युक्तं इतीह सूत्रे संज्ञिनः स्मृताः =अभिमताः, अभिप्रेता इत्यर्थः। तदेवं क्रियावचनाः शब्दा भूवादयो धातुंसज्ञा भवन्तीत्युक्तं भवति।तेन याव-वा- दिव प्रभृतीनां धातुसमानशब्दानां क्रियावचनानां धातुसंज्ञा न भवति। गणपाठसामर्थ्यात् पाठोऽप्यङ्गीक्रियते। तेनाणपयतीत्येवमादीनां क्रियावचनानामपि धातुसंज्ञा न भवतकीत्युक्तंभवति। अस्मिन् व्याख्याने भूवादय इति षष्ठीसमासो वेदितव्यः-- भुवोवादयो भूवादय इति।

अथ वा-- आदिशब्दस्यैवात्र `वा गतिगन्धनयोः'(धा.पा.1050)इत्यस्मात् परस्य प्रयोगः। वा आदिः येषां ते वादयः। आदिशब्दः प्रकारवाची, वाप्रकारा इत्यर्थः। प्रकारस्तु सादृश्यम्, तत्पुनः क्रियात्मकतया, यदाह-- `भ्वर्थाः' इति। भ्वर्थता तु भुवोऽर्थ वदतीति हेतोः। एवं विधा वाप्रकारकाः शब्दा इह सूत्रे संज्ञिनः स्मृता।तदनेन प्रकारेण क्रियावचनानामेव भूवादीनां धातुसंज्ञा भवतीत्युक्तम्। तेन धातुसमानशब्दानां या-वा-दिव-प्रभुतीनां धातुसंज्ञा न भवति। न हि ते क्रियावचनाः; निष्पन्नवस्त्वभिधायित्वात्। साध्यमानस्वरूपा हि क्रिया निरवयवा क्वचित् पूर्वापरीभूतावयवाऽनिष्पन्नवस्तुस्वभावा। गणपाठस्तु पूर्ववदेवाङ्गीक्रियते। तेनाणपयतीत्येवमादीनां शब्दानां धातुसंज्ञा न भवतीति। अस्मिन्नपि व्याख्यानं `भूवादयः' इति षष्ठीसमासोऽयम्। षष्ठी च वाच्यवाचकसम्न्बधलक्षणा वेदितव्या।।

2.उपदेशेऽजनुनासिक इत्। (1.3.2)

`उपदिश्यतेऽनेनेत्युपदेशः' इति। `अकर्तरि च कारके संज्ञायाम्' (3.3.19) इति करणे घञ् ननु च संज्ञायामित्युच्यते, न चेयं संज्ञा ? नैतदस्ति; `कृत्यल्युटो बहुलम्' (3.3.113) इति बहुलवचनादसंज्ञायामपि भवतीत्यदोषः। `शास्त्रवक्यानि' इति. अस्येदं विवरणम्-- `सूत्रपाठः, खिलपाठश्च' इति। खिलपाठः = धातुपाठः। चकारात् प्रातिपदिकपाठश्च। अथ रगेलगेप्रभृतीनां कथमानुनासिक्यम्; न हि तेषामानुनासिक्यं गणे पठ्यते ? अथापरिपठितानामपि भवति, तदा `भू' इत्येवमादीनां कस्मान्न भवतीत्याह--- `प्रतिज्ञाननासिक्याः पाणिनीयाः' इत्यादि। प्रतिज्ञयाऽऽनुनासिक्यं येषां ते प्रतिज्ञानुनासिक्याः। यत्रैवानुनासिक्यं पाणिनीयाः प्रतिजानते, तत्रैव तदपठ्यमानमपि भवति, नान्यत्र। एतदपि प्रतिज्ञानं नानियमेन भवति, किं तर्हि ? यत्रैवाचार्याः स्मरन्ति तत्रैव

तेन भवितवयम्, यथा स्वरितत्वमनुदात्तत्वञ्च स्मरणेन विज्ञायते, तथाऽऽनुनासिक्यमपि। यदि तर्ह्यानुनासिक्यं प्रतिज्ञामात्रभावि तत् किमर्थं तत् क्वचित् पठ्यते-- `डुपचँष् पाके ' (धा.पा.996) इत्यादौ ? एवंविधोऽर्थोऽनुनासिकः प्रतिज्ञेय इत्यर्थस्य प्रदर्शनार्थम्।
`अभ्र आँ अपः' इति। अत्रोपपदेशात्तूत्तरकालम् `आङोऽनुनासकिश्छन्दसि' (6.1.126) इत्यनेनानुनासिको विहितः, तेनेत्संज्ञा न भवति। ननु चानुनासिकविधानसामर्थ्यादेव न भविष्यति, तत् किमुपदेशग्रहणेन? इत्संज्ञायां हि सत्यां `तस्य लोपः' (1.3.9) इति लोपः स्यात्, ततश्चानुनासिकविधानमनर्थकं स्यात्, सत्यमेतत्; एवं मन्यते-- उत्तरार्थमवश्यमुपदेशग्रहणं कर्त्तव्यम्। उत्तरार्थ क्रियमाणमिहापि विस्पष्टार्थं भविष्यति। अथ वा-- प्रत्युदाहरणदिगियं वृत्तिकृता दर्शिता। इदन्त्वत्र प्रत्युदाहरणम्-- `अणोऽप्रगृह्यस्यानुनासिकः' (8.4.57), दधिं ब्राह्मणकुलम्। यद्यत्रेत्संज्ञा स्यात् `इदितो नुम् धातोः' (7.1.58) इति नुम् स्यात्। ननु च धातोरित्युच्यमाने धातोर्नुम् विधीयते, नचायं धातुः, किं तर्हि ? प्रातिपदिकम्,तत्कथं नुम् स्यात् ? नैतदस्ति; `क्विबन्ता धातुत्वं न जहति' (व्या.प.132) इति क्विबन्तत्वाद्धातुत्वं भवति। आत्मनो दधीच्छति `सुप आत्मनः क्यच्' (3.1.8) दधीयति, दधीयतेः क्विप्; दधिं ब्राह्मणकुलमिति। `अतो लोपः' (6.4.48) इत्यकारलोपः। `लोपो व्योर्वलि' (6.1.66) इत्यत्रादौ लोपग्रहणात् पूर्वं यकारस्य लोपो भवति। `वेरपृक्तस्य' (6.1.67) इति वकारस्य। प्रत्ययलोपलक्षणेन `अकृतसार्वधातुकयोः' (7.4.25) इति दीर्घः। `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति ह्रस्वत्वम्। `अणोऽप्रगृह्यस्यानुनासिकः'(8.4.57) इत्यनुनासिके कृते `क्वबन्ता धातुत्वं न जहति' (व्या.प.132) इति नुम् स्यात्। अश्मा,भस्मेति `आतो मनिन्' (3.2.74) इत्यत्र मकारस्येत्संज्ञा न भवति। यदि हि स्यात्, `अन्येभ्योऽपि दृश्यन्ते' (3.2.75) इति हलन्तेभ्यो विधीयमानो मनिन्नचोऽन्त्यात् परः स्यात्।
`सर्वस्याचो मा भूत्' इति। दरिद्राप्रभृतिसम्बन्धिनोऽपि।।

3.हलन्त्यम्। (1.3.3)
`अन्ते भवमन्त्यम्' इति। दिगादित्वाद्यत्। अन्तशब्दोऽयं समाप्तौ वर्त्तते। यथा-- एतदन्तं वनमिति। येन च समाप्यते समुदायः सोऽन्तः। त्तरान्ते = समाप्तौ भवमन्त्यम्। हलिति हल्शब्दस्योभयलिङ्गत्वादन्त्यमिति नपुंसकेन निर्देशः। `धात्वादेः' इत्यादि। आदिशब्देन सूत्रप्रातिपदिकप्रत्ययागमादेशानां ग्रहणम्। तत्र धातोः -- `डुकृञ्' (धा.पा.1472) इति ञकारः; सूत्रस्य-- `अइउण्' (मा.सू.1) इति णकारः; प्रातिपदिकस्य - `नवट्' इति टकारः; नदडिति पचादिषु पठ्यते। प्रत्ययस्य-- `गुप्तिज्किद्भ्यः सन्'
(3.1.5) इति नकारः; आगमस्य `त्रपुजतुनोः षुक्' (4.3.138) इति ककारः; आदेशस्य च -- `चक्षिङः ख्याञ्' (2.4.54) इति ञकारः।
`अग्निचित्, सोमसुत्' इति। चिनोतेः सुनोतेश्चाग्निं चितवान् सोमं सुतवानिति क्विप्, तुक्।
ननु च हलिति प्रत्याहारपाठे योऽन्त्यो लकारस्तस्येत्संज्ञा न प्राप्नोति; इतरेतराश्रयत्वात्। तथा हि-- इत्संज्ञायाम् `आदिरन्त्येन सहेता' (1.1.71) इति हलिति प्रत्याहारग्रहणं भवति। तस्मिंश्च तस्य लकारस्य हलन्त्यमितीत्संज्ञा। तदिदमितरेतराश्रयत्वं स्फुटतरमेव। `इतरेतराश्रयाणि कार्याणि शास्त्रे न प्रकल्प्यन्ते' (व्या.प.28) इत्यत आह-- `हस्य ल् हल्' इत्यादि। यदेकमावृत्तिभेदमन्तरेणाप्यनेकेषामुपकारं करोति तत् तन्त्रम्। यथा-- प्रदीपः सुप्रज्वलितो बहूनां छात्राणामुपकारं करोति। इह तु प्रयत्नविशेषस्तन्त्रशब्देन विवक्षितः। तेन तन्त्रेण द्वितीयमत्र हल्ग्रहणमुपात्तं परिगृहीतं वेदितव्यम्। यथा श्वेतो धावतीत्येकेन प्रयत्नेन द्वे वाक्ये उच्चारिते भवतः, तथेहाप्येकेनैव प्रयत्नेन द्वौ हल्शब्दावुच्चारितावित्यभिप्रायः। हस्य ल् हलिति समीपिसामीप्यसम्बन्धे षष्ठी। `तेन' इत्यादि। यतस्तन्त्रेण न्यायेन द्वितीयं हल्ग्रहणं कृतम्, तेन प्रत्याहारपाठे हलित्यस्य लकारस्य हकारसमीपवर्तिनः साक्षादेव संज्ञित्वेनोपात्तस्येत्संज्ञा क्रियते, न तु प्रत्याहारसमाश्रयणेन। एवञ्च सति `हलन्त्यम्' (3.3.3) इत्यत्र प्रत्याहारपाठे इतरेतराश्रयदोषो न भवति।

4. न विभक्तौ तुस्माः। (1.3.4)
`वृक्षात्' इत्यत्र तकारस्येत्संज्ञायां सत्याम् `तित्स्वसितम्' ((6.1.185) इति स्वरितत्वं स्यात्।`अपचतात्, अपचतम्' इति। पचेर्लङ्, `तस्तथस्थमिपां तान्तन्तामः' (3.4.101) इति तान्तमादेशौ भवतः। `किमोऽत्' (5.3.12) इत्यत्राच्छब्दस्य `प्राग् दिशो विभक्तिः' (5.3.1) इत्यस्य मकारस्येत्संज्ञापरित्राणार्थादुकारानुबन्धाद्विज्ञायते। नित्यत्वे हि सत्येतस्मादेव प्रतिषेधान्मकारस्येत्संज्ञा न भविष्यतीत्युकारानुबन्धग्रहणमनर्थकं स्यात्।

5. आदिर्ञिटुडवः। (1.3.5)
अत्र टुग्रहणेन `अणुदित्सवर्णस्य चाप्रत्ययः' (1.1.69) इति टवर्गस्य ग्रहणं कस्मान्न भवति ? उकार्सयानुनासिकत्वाप्रतिज्ञानात्, `चुटू' (1.3.7) इत्यत्र टुग्रहणाच्च। यद्यत्र टवर्गस्य ग्रहणं स्यात्, तदानेनैव प्रत्ययादेरपि सिद्धत्वात् टुग्रहणमनर्थकं स्यात्। `मिन्नः' इति। `ञीतः क्तः' (3.2.187) , `आदितश्च' (7.2.16) इतीट्प्रतिषेधः। `वेपथुः'इति। `ट्वितोऽथुच'(3.3.89) । `पक्त्रिमम्' इति। `ड्वितः क्त्रिः' (3.3.88)। पाकेन निवृत्तम्, `क्त्रेर्मम् नित्यम्' (4.4.20) इति मप्। `उप्त्रिमम्' इति। वच्यादिसूत्रेण (6.1.15) सम्प्रासारणम्।
`पटूयति' इति। `सुप आत्मनः क्यच्' (3.1.8), `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः। `कण्डूयति' इति। `कण्ड्वादिभ्यो यक्' (3.1.27)। कथं पुनरत्रेत्संज्ञाप्राप्तिः, यावता सूत्रे टुडुशब्दौ ह्रस्वान्तावुपात्तौ,दीर्घान्ताविमौ ? नेतत्; यद्यपि दीर्घत्वे कृते दीर्घान्तावेतौ भवतस्तथाप्युदेशे ह्रस्वान्तावेव,`उपदेशे'

(1.3.2.) इति चेहानुवर्तते। तत्र पटुशब्दस्य पृथ्वादिपाठात् टुशब्दस्योपदेशे ह्रस्वान्तता सिद्धा। कण्डूशब्दस्य `कण्डवादिभ्यो यक्' (3.1.27) इत्यत्र पाठात् डुशब्दस्यापि। द्विविधा हि कण्ड्वादयः-- धातवः, प्रातिपदिकानि च। तत्र धातुः कण्डुशब्दो ह्रस्वान्तः। प्रातिपदिकं तु कण्डुशब्दो दीर्घान्तः। अथ वा-- यद्यप्युपदेश इति नानुवर्तते, तथापि दीर्घत्वे कृतेप्येकदेशविकृतस्यानन्यत्वादस्त्येव प्राप्तिः। `ञिकारीयति' इति। पूर्ववत् क्यच्। ञिकारशब्दो न क्वचित् पठ्यत इति तेनात्रेत्संज्ञा न भवति। यदि स्यात्, लोपे कृते रूपं न सिद्ध्येत्।।

6. षः प्रत्ययस्य। (1.3.6)

`रजकी' इति। षित्त्वात् `षिद्गौरादिभ्यश्च' (4.1.49) इति ङीष्। अथ केनात्रानुनासकिलोपः ? `अनिदिताम्' (6.4.24) इति चेत् ? न; तत्र क्ङितीत्युच्यते,न चात्र क्ङित्प्रत्ययोऽस्ति, नैष दोषः; `जनीजृष्क्नसुरञ्जौ।ञमन्ताश्च' (ग.सू.धा.पा.817) ितिमित्संज्ञाकरणं रञ्जेर्ज्ञापकम्- अक्ङित्यपि तस्यानुनासिकलोपो भवति, अन्यथा णौ रञ्जेरकारस्यानुपधत्वात् `अत उपधायाः' (7.2.116) इति वृद्ध्या न भवितव्यमिति मित्संज्ञाकरणमनर्थकं स्यातदित्येके।

`घञि च भावकरणयोः' (6.4.27) इत्यत्र चकार्सयानुक्तसमुच्चयार्थत्वादक्ङित्यपि क्वचिद्रञ्जेरनुनासकिलोपो भवतीत्यपरे।

`षोडः' इति। षड् दन्ता अस्येति बहुव्रीहिः; `वयसि दन्तस्य दतृ' (5.4.141) इति दत्रादेशः, ऋकार उगित्कार्यार्थः; `षष उत्वं दतृदशधासूत्त्रपदादेः ष्टुत्वञ्च' (वा.765) पृषोदरादिपाठात् षषोऽन्त्यस्योत्वम्, `आद्गुणः' (6.1.87), उत्तरपदादिष्टुतवमिति दकारस्य डकारः। षोडत् इति स्थिते षोडन्तमाचष्ट इति `तत्करोति तदादष्टे' (वा.200,201) इति णिच्, `णाविष्ठवत् कार्यम् प्रातिपदिकस्य' (वा.813) इतीष्ठवद्बावाट्टिलोपः-- षोडयतीति, ततः पचाद्यच्, णिलोपः।

`षण्ड़ः' इति। `षणु दाने' (धा.पा.1464)। `ञमन्ताड्डः' (द.उ.5.7), `उणादयो बहुलम्' (3.3.1)इति बहुलवचनात् `धात्वादेः षः सः' (6.1.64) इति सत्वं न भवति। अथ वा-- `षण्ड' इत्येतदव्युत्पनन्नं प्रातिपदिकमिति।

`ष़डिकः' इति। षडङ्गुलिदत्तशब्दात् अनुकम्पायाम् `बह्वचोऽमनुष्यनाम्नष्ठज्वा' (5.3.78) इति ठच्। `ठाजादापूर्ध्वं द्वितीयादयः' (5.3.83) इति ङ्गुलिदत्तस्य लोपः; `ठस्येकः' (7.3.50) इतीकादेशः। ष़डशब्द्सय `यस्येति च' (6.4.148) इत्यकारलोपः, तस्य स्थानिवद्भावे सति व्यवधानात् षट्शब्दस्य `यचि भम्' (1.4.18) इति भसंज्ञा न भवति। अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वात् `झलां जशोऽन्ते' (8.2.39) इति जश्त्वम् = षकारस्य डकारः। यद्येषां षकारस्येत्संज्ञा स्यात्, स्त्रीविवक्षायां `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीष् स्यात्। षण्डशब्दोऽयं यद्यपि बलीवर्दे वर्त्तते, तथापि स्त्रीगवीष्वपि षण्डधर्मयोगाद्वृत्तिरस्य सम्भवत्येव। यद्यप्येते षोडादयो लाक्षणिकाः, तथाप्युदेशग्रहणेन षकारो विशिष्यत इति भवन्त्येतानि प्रत्ययग्रहणस्य प्रत्यदाहरणानि। भवति ह्यत्राप्युदेशे षकारः।`अविषः, महिषः' इति। `अव रक्षणे' (धा.पा.600) `मह पूजायाम्' (धा.पा.1867), `अविमह्योष्टिषच्' (द.उ.9.3.) ननु च`उणादयो बहुलम्' (3.3.1) इति बहुलवचनात् प्रत्ययसंज्ञैवात्र न भवति, सत्यामपि तस्यामित्संज्ञा न भविष्यति, बहुलवचनात्, तत् कस्मादादिग्रहणमेतदनुवर्त्तत े ? एवं मन्यते-- उत्तरार्थमवश्यमादिग्रहणमनुवर्त्तमानमिहापि स्पष्टार्थं भविष्यति।

7. चुटू। (1.3.7)

`कौञ्जायन्यः' इति। च्फञन्तात् `व्रातच्फञोरस्त्रियाम्' (5.3.113) इति स्वार्थे ञ्यः। `छस्येयादेशं वक्ष्यति' इति। इत्संज्ञापवादम्। `शाण्डिक्यः' इति। `शण्डिकादिभ्यो ञ्यः' (4.3.92) इति शण्डिकोऽभिजनोऽस्येत्यर्थे ञ्यः, तत्र हि `सोऽस्याभिजनः' इति वर्त्तते। `मन्दुरजः'इति। `ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (6.3.63) इति मन्दूराशब्दस्य ह्रस्वत्वम्। `अन्नाण्णः- आन्नः' इति। `अन्नं लब्धा' इत्यथे णः।

तत्र हि `धनगणं लब्धा' (4.4.84) इत्यतो लब्धेत्यनुवर्त्तते। अथ किमर्थं पृथग्योगः

क्रियते, `चुटुषाः प्रत्ययस्य' इत्येक एव योगः क्रियतामित्यत आह-- `पृथग्योगकरणम्' इत्यादि। `तेन वित्तः' (5.2.26) इत्यादिनाऽस्य विधेरनित्यत्वज्ञापनस्य प्रयोजनं
दर्शयति।।

8.लशक्वतद्धिते। (1.3.8)

`प्रियंवदः' इति। `प्रियवशे वदः खच्' (3.2.38), `अरुर्द्विषदजन्तस्य' (6.3.67) इति मुम्। `जिष्णुः'- इति। `ग्लाजिस्थश्च क्स्नुः' (3.2.139) इति। ये तु क्स्नुप्रत्ययं गितमिच्छन्ति तन्मतेनेदं गकारस्योदाहरणम्। ये तु कितमिच्छन्ति तन्मतेनेमपि ककारस्योदाहरणं भवति।

`चूडाल ः' इति। मत्वर्थे `प्राणिस्थादातो लजन्यतरस्याम्' (5.2.96) इति लच् प्रत्ययः। ननु च प्रयोजनाभावादत्रेत्संज्ञा न भविष्यति; लित्प्रत्ययात् पूर्वस्योदात्तत्वं प्रयोजनमिति चेत्, न; चित्स्वरस्य हि सर्वस्य रस्यापवादत्वात् प्रत्ययस्वरेणह्यन्तोदात्तत्वे सिद्धे चित्करणस्यैतत् प्रयोजनम्-- चित्स्वर एव यथा स्यात्, योऽन्यः स्वरः प्राप्नोति स मा भूदिति। इदं तु प्रत्युदाहरणम्-- लोमान्यस्य सन्तीति `लोमादिपामादि' (5.2.100) इत्यादिना शः, लोमशः ? एतदपि नास्ति, अत्रापि प्रोयजनाभावादेवेत्संज्ञा न भविष्यति। इदं तर्हि प्रत्युदाहरम्-- `कर्णललाटात् कनलङ्कारे' (4.3.65) इति भावार्थे कन्; कर्णिका,

यद्यत्रेत्संज्ञा स्यात् `किति च' (7.2.118) इत्यादिवृद्धिः स्तात्, ततश्च रूपमेव न सिद्ध्येत ? यद्येवम् इवमेवोपन्यसनीयम्, नेतरे ? एवं मन्यते-- एतदर्थम् `अतद्धिते'इति क्रियमाणमिहापि मन्दधियां प्रतिपत्तिगौरवं परिहर्तुं चूडालः, लोमश इत्येवमर्थमपि भवितुमर्हतीति।।

9. तस्य लोपः। (1.3.9)

अथ किमर्थम् `तस्य' इत्युच्यते, यवातेत्संज्ञायाः प्रकृतत्वाद्यस्येत्संज्ञा विहिता सामर्थ्यात्तस्यैव लोपो भविष्यतीति आह-- `तस्यग्रहणम्' इत्यादि। कः पुनरित्संज्ञको योऽलोन्त्यस्य निवृत्त्यर्थं तस्यग्रहणं प्रयोजनतीत्याह-- `आदिर्ञिटुडवः' इति। असति तस्यग्रहणे, एषामपि ञिप्रभृतीनाम् `अलोऽन्त्यस्य' (1.1.52)
इति वचनादन्त्यस्य लोपः स्यात्। तस्यग्रहणेन तु प्रकृत इत्संज्ञके सन्निधापिते सर्वस्य लोपो भवति, नान्त्यस्य; अन्यथा हि तस्यग्रहणमनर्थकं स्यात्। यदि तु `नानर्थकेऽलोऽन्त्यविधिः' (व्या.प.62) इत्येषा परिभाषाऽऽश्रीयते, तदा तस्यग्रहणमकर्तुं शक्यते। तत् क्रियते विस्पष्टार्थम्।

10. यथासंख्यमनुदेशः समानम्। (1.3.10)

`संख्याशब्देनात्र क्रमो लक्ष्यते' इति। यत्रानेके उद्देशिनोऽनुदेशिनश्च, तत्रानियमेन सम्बन्धे प्राप्ते नियमार्थमिदमारभ्यते। यत्रोद्देशिनोऽनुदेशिनोऽनेकसंख्याः; तत्रावश्यं संख्याभेदेन भवितव्यम्। यत्र च संख्याभेदः, तत्र नियतभावी क्रमः ; संख्याभेदवतां युगपदुच्चारयितुमशक्यत्वात्। अतः साहचर्यात् संख्याशब्देन क्रमो लक्ष्यते। अर्थधर्मत्वं तु शब्दे समारोप्य संख्याशब्देन क्रमो लक्ष्यत इत्युक्तम्। यथाक्रमग्रहणं कथं न कृतम्? वैचित्र्यार्थम्।
`यथासंख्यम्' इति। `यथाऽसादृश्ये' (2.1.7) इति वीप्सायामव्ययीभावः। `अनुदिश्यत इत्यनुदेशः' इति। `अकर्तरि च कारके संज्ञायाम्' (3.3.19) इति घञ्। `पश्चादुच्चार्यते' इति. अनुशब्दस्य पश्चादर्थवृत्तित्वाद्दिश्चोच्चारणक्रियत्वात्। `समसंख्यानम्' इति। समसंख्यतया समानत्वं दर्शयति। `{समं परिपठितानाम्'इति मूल (काशिका) पाठः। }समगणनपरिपठितानाम' इति। तमेवार्थं शब्दान्तरेण व्यक्तीकरोति। `उद्देशिनामनुदेशिनाञ्च' इति। यथाक्रममित्येतदपेक्षया षष्ठी। उद्देशिनो यद्यपि सूत्रे न श्रूयन्ते, तथापि सम्बन्धित्वात् पश्चाद्भावस्यानुदेशग्रहणाल्लभ्यन्ते। `यथाक्रमम्' इति। पूर्ववद्वीपसायामव्ययीभावः, तृतीयान्तञ्चैतत्; तदयमत्रार्थः- उद्देशिनामनुदेशिनाञ्च योऽयं क्रमस्तेन क्रमेणानुदेशिनः सम्बध्यन्त उद्देशिभिः सहेति। यद्यप्युद्देशिनामिति षष्ठ्यन्तं प्रकृतम्, तथाप्यर्थाद्विभक्तेर्विपरिणामो भविष्यतीति तृतीयान्तं सम्पद्यते। `प्रथमात् प्रथमः' इत्यादिना यथाक्रमसम्बन्धं दर्शयति। आदिशब्दस्तृतीयात् तृतीयः, चतुर्थाच्चतुर्थ इत्यादिपरिग्रहाय। तौदेय इत्यादौ `सोऽस्याभिजनः' (4.3.90) इत्यत्रार्थे तद्धितः।
`इह' इत्यादि। `वेशोयशआदेर्भगात्' 94.4.131) इति द्वे प्रकृती, `यल्खौ' इति प्रत्ययावपि द्वावेव; अतो यथासंख्येन भवितव्यमित्यभिप्रायः। इह केनचिनदाचार्येण शिष्याः प्रतिग्राहिताः-- `वेशो यश आदेर्भगाद्यल् ख च' इत्येको योगः। अन्ये तु द्वावेतौ योगविति- `वेशोयश आदेर्भगात्' इत्येको योगः, `यल् ख च' इति द्वितीयः। तत्र य एक एवायं योग इत्येवं शिष्या ग्राहितास्तान्प्रत्ययं प्रश्नः। वृत्तिकारेणापि तन्मतमेवाश्रित्य`स्वरितेन' इत्यादिना परीहार उक्तः। ये तु द्वावेतौ योगावित्येवं ग्राहितास्तान् प्रत्येष प्रश्नो नास्ति; योगविभागेनैव यथासंख्यस्य स्यात्, योगविभागकरणमनर्थकं स्यादित्यभिप्रायः। कथं पुनः स्वरितेन लिङ्गेन यथासंख्यं लभ्यते, यावता नेह स्वरितग्रहणमस्तीत्याह-- `स्वरितेनाधिकारः' इत्यादि। `स्वरितेनाधिकारः' (1.3.11) इति योगं विभज्य `स्वरितेन' इत्येको योगः, `अधिकारः' इति द्वितीयः। तत्र प्रथमो योगः पूर्वेणापि `यथासंख्यम्' इत्यादिना सम्बध्यते। अपिशब्दात् परेणापि `अधिकारः' इत्यनेन। यदि तर्हि स्वरितेन लिङ्गेन यथासंख्यं भवति, एवं हि सति सन्देहः स्यात्। तथा हि-- यथासंख्यमिति स्वरितेनाधिकारोऽपि तत्र न ज्ञायते -- किमधिकारार्थः स्वरितानुषङ्गः ? अथ वा यथासंख्यार्थ इति ? सन्देहमात्रमेतत्। सर्वनसन्देहेष्विदमुच्यते-- `भवति व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' (व्या.प.75) इति।।

11.स्वरितेनाधिकारः। (1.3.11)

`इत्थंभूतलक्षणे तृतीय' इति। स्वरितेन चिह्नेनाधिकारस्योपलक्षणीयत्वात्। यदि पारिभाषिकस्येह स्वतिस्य ग्रहणं स्यात्, `रषाभ्यां नो णः समानपदे' (8.4.1) इत्यत्र णकारण्णाकारस्याधिकारस्याधिकारता न स्यात्; परिभाषिकस्याज्धर्मत्वात्। णकारस्यानच्कत्वादिति मत्वा सर्वेषां वर्णानामचां हलाञ्च स्वरिताख्यो यो वर्णधर्मो गुणस्यस्येदं ग्रहणम्, न पारिभाषिकस्येति दर्शयन्नाह-- `स्वरितो नाम स्वरदोषो वर्णधर्मः' इति। वर्णधर्मस्य तु गर्हणमधिकारावगमाय। स इह हल्यपि स्वरितासरञ्जनाद्विज्ञायते। `अधिकारो विनियोगः' इति। व्यापारकरणम्। `अधिकृतत्वादुत्तरत्रोपतिष्ठते' इति। यथा पुरुषो यत्राधिकृतो नगरादौ तत्रैवोपतिष्ठते, तथा स्वरितगुणयुक्तं शब्दरूपं सूत्रकारेण नियुक्तं सूत्रकारेण तत्र तत्रोपतिष्ठते। `उत्तरत्र' इति वचनमुपलक्षणार्थम्। क्वचित् पूर्वत्राप्युपतिष्ठत एव।
क्व पुनरस्य सद्भावो भवति ? क्व च वा न भवति ? इत्याह-- `प्रतिज्ञास्वरिताः पाणिनीयाः' इति। प्रतिज्ञया स्वरितो येषां ते तथोक्ताः। तदेतदुक्तं भवति-- यत्रेव त आचार्याः स्वरितत्वं प्रतिजानते तत्रैवास्य सद्भावो भवति, नान्यत्रेति। तदपि प्रतिज्ञानं नानियमेन भवति, किं तर्हि ? यत्राचार्याः स्मरन्ति तत्रैव भवति। स चायं धर्मः कलागद्युपम इति वेदितव्यः। कार्यार्थमुपादीयते, कृतकार्यस्तु निवर्तते; न तु प्रयोगसमवायी भवति। `प्रत्ययः' (3.1.1) इत्यादिना येऽधिकाराः स्वरितनावच्छिद्यन्ते तेषामुदाहरणानि दर्शयति। अथ किमर्थोऽयमधिकारः क्रियते ? प्रतियोगं तस् ग्रहणं मा कार्षीदित्येवमर्थमिति चेत्, न; यथा

देवदत्ताय गौर्दीयतां कम्बलश्चेत्युक्ते न च पुनरुच्यते देवदत्तायेति, अथ च प्रस्तुतत्वाद्देवदत्तस्य कम्बलश्चेत्यस्य साकाङ्क्षत्वात् तेनैव सम्बन्धो भवति; तथा च `सृ स्थिरे' (3.3.17)`भावे' (3.3.18) इत्येवमादीनामपि वाक्यानां साकाङ्क्षत्वादघञादीनाञ्च प्रस्तुतत्वात् तैरेव सम्बन्धो भविष्यति, तत्किमधिकरेण ? सत्यमेतत्; यत्रान्य निर्देशो नास्ति तत्रोपतिष्ठते, यत्र त्वन्यनिर्देशस्तत्रासौ प्रकृतस्य निवर्तक एव स्यात्। तथा हि-- गौर्दीयतां यज्ञदत्ताय कम्बलो विष्णुमित्रायेत्युक्तेऽन्यनिर्देशेन प्रस्तुतो देवदत्तो निवर्तत्ते। एवञ्चान्यनिर्देशेनास्य निवर्तकत्वे सति `अभिविधौ भाव इनुण' (3.3.44) इत्यस्येनुणो निर्देशेन प्रस्तुतस्य घञो निवर्तितत्वात् `आक्रोशेऽवन्योर्ग्रहः' (3.3.45) इत्यत्रानन्तरेणेनुणा सम्बन्धः स्यात्,न पुनर्व्यवहितेन घञा,घञ् त्विष्यते। ननु च दृष्टानुवृत्तिसामर्थ्याद् घञेवानुवर्तिष्यते तेनैवाभिसम्बन्धो भविष्यति, तथा च तत्र वक्ष्यति-- `दृष्टानुवृत्तिसामर्थ्यात्तत्र घञेवानुवर्त्तते, नानन्तर इनुण् ' इति नैतदस्ति; यदि दृष्टानुवृत्तिसामर्थ्यादघञ एवानुवृत्तिः स्यात्, तदा `ऋदोरप्' (3.3.57) इत्तत्रोत्तरेष्वपि योगेषु घञेवानुवर्त्तेत, नाप्प्रत्ययः। यत्पवुनर्वक्ष्यति-- `दृष्टानुवृत्तिसामर्थ्यात्' इति, तत्र दृष्टानुवृत्तिसामर्थ्यशब्देन स्वरितत्वमेवोक्तम्। दृष्टमनुवृत्तौ सामर्थ्यम्-- अधिकृतस्य शब्दरूपस्य यस्मादिति बहुव्रीहिकृत्वा।तस्मात् स्वरितत्वादित्ययमत्रार्थः। यद्येषोऽर्थः सूत्राकाराभिमतः स्यात्, स्वरितत्वादिति कस्मान्नोक्तमिति चेत्? न;स्वच्छन्दतो हि वचसां प्रवृत्तिः, अर्थस्तु परीक्षणीय इत्यचोद्यतमेतत्। तदेवं यतोऽन्यनिर्दशः प्रस्तुतस्य निवर्त्तको भवति तस्मादधिकारः कर्त्तव्यः। तस्मिंश्च क्रियमाणे तदवगमोपायदर्शनाय `स्वरितेनाधिकारः' इत्येतदिप कर्त्तव्यः।।

12. अनुदात्तङित आत्मनेपदम्। (1.3.12)

`तत्रायं नियमः क्रियते' इति। विधीयमानत्वात् प्रधानस्य प्रत्ययस्य न तु प्रकृतेरिति विज्ञायते। अत एवाह-- `अनुदात्तेतो ये धातवो ङितश्च तेभ्यः' इति। यदि पुनरयं प्रकृतिनियमः स्यात्, तदा किं स्यात् ? अनुदात्तङिद्भ्यः प्रत्ययान्तरं न स्यात्। कामं वचनसामर्थ्यात् प्रत्ययान्तरमपि भविष्यतीत्येष दोषः शक्यते परिहर्तुम्। यस्तु वचनसामर्थ्यद्वारेणाभीष्टेऽर्थे प्रतीयमाने प्रतिपत्तिगौरवदोषः स्यात्, सोऽपरिहार्य एव। यदि तर्हि प्रत्ययनियमोऽयम्, तदा प्रकृतीनामनियतत्वात् ताभ्यः परस्मैपदमपि स्यात् ? न भविष्यति; `शेषात्कर्त्तरि परस्मैदपदम्' (1.3.78) इति द्वितीयनियमविधानात् शेषादेव परस्मैपदम्, नान्यस्मादिति। `आस्ते' इत्यादि। `आस उपवेशने' (धा.पा.1021) `वस आच्छादने' (धा.पा.1023), `षूङ प्राणिगर्मविमोचने' (धा.पा.031) , `शीङ स्वपने' (धा.पा.1032), अदादित्वाच्छपो लुक्। `शेते' इति। `शीङः सार्वधातुके गुणः' (7.4.21)।।

13. भावकर्मणोः। (1.3.13)

भाव इति धात्वर्थः क्रियात्मक उच्यते, कर्म तु पारिभाषिकमेव। तत्रेदमुच्यते नियमार्थ इति विशेषः। अयमपि पूर्वत् प्रत्ययनियः-- भावकर्मणोरेवात्मनेपदं भवति, नार्थनियमः। अर्थनियमे सति `को भवता दायोदत्तः', `को भवता लाभो लब्धः' इति कर्मणि घञादिर्दुर्लभः स्यात्। `सुप्यते' इति। `ञिष्वप् शये' (धा.पा.1068) वच्यादिना (6.1.15) सम्प्रासरण्। `क्रियते' इति। `रिङ शयग्लिङक्षु' (7.4.28) इति रिङादेशः। `लूयते केदारः स्वयमेव' इति। `कर्मवत्कर्मणा तुल्यक्रियः' (3.1.87) इत्यत्र व्यपदेशातिदेशशासत्रातिदेशपक्षयोः कर्मकर्तरि परस्मैपदेन परत्वाद्भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तन्निराकर्तुमाह -- `कर्मकर्तरि' इत्यादि। `द्वितीयं कर्तरिग्रहणमुपतिष्ठते' इति। `कर्तरि कर्मव्यतिहारे' (1.3.14) इत्यतः। तेन कर्त्तैव यः कर्त्ता शुद्धः केवलः कर्मवद्भावरहितः, तत्र परस्मैपदं भवति; यत्र कर्मवद्भावस्तत्रात्मनेपदं भवति।कार्यातिदेशपक्षे `क्रमवत् कर्मणा तुल्यक्रियः' (3.1.87) इत्यनेनैवात्मनपेपदं भवति।

14. कर्त्तरि कर्मव्यतीहारे। (1.3.14)

`कर्मशब्दः क्रियावाची' इति। एतेन लौकिकमिह कर्म क्रियात्मकं गृह्यते, न पारिभाषिकमिति दर्शयति। कुत एतल्लभ्यते ? प्रत्यासत्तेः। क्रिया हि धातोः प्रत्यासन्ना, तत्र साक्षाद्वृत्तेः। साक्षाद्वृत्तिस्तु धातुवाच्यत्वात् क्रियायाः। पारिभाषिके तु साधनात्मके कर्मणि धातुः साक्षान्न वर्त्तते;तस्याधातुवाच्यत्वात्। तस्माद्धातुं प्रतिन तस्य प्रत्यासत्तिरिति न गृह्यते, तेन साधनकर्मव्यतीहारे न भवत्यात्मनेपदम्-- देवदत्तस्य धान्यं व्यतिलुनन्तीति। लुनातिरुपसंगहार्थे लवने वर्त्तते। देवदत्तेन यद्धान्यं सङगृहीतं पुरस्ताल्लवनेनोपसंगृह्णन्तीत्यर्थः। ततश्चान्यसम्बन्धिनो धानयस्यान्येन संग्रहणाद्भवति साधनकर्मव्यतीहारः। `अन्यसम्बन्धिनीम्' इति। अन्यस्य कर्त्तुरभीष्टया क्रियेमां क्रियां करिष्यामीति सेहान्यसम्बन्धिन्यभिप्रेता, अन्यथा यद्यन्येन निष्पादिता या क्रिया सेहान्यसम्बन्धिन्यभिप्रेता स्यात् तदा व्यतिहारो नोपपद्येत, न ह्यन्येन निष्पादितायाः पुनर्निष्पादनमुपपद्यते। `व्यतिलुनते' इति। `आत्मनेपदेष्वनतः' (7.1.5) इत्यदादेशः, `श्नाभ्यस्तयोरातः' (6.4.112) इत्याकारलोपः। अथ कर्तृग्रहणं किमर्थम् ? भावकर्मनिवृत्त्यर्थमिति चेत्, न; अभीष्टत्वाद्भावकर्मणोरात्मनेपदम्-- व्यतिभूयते सेनया, व्यतिगम्यन्ते ग्रामाः, व्यतिहन्यन्ते दस्यव इति। `भावकर्मणोः' (1.3.13) इत्यनेनैव यथा स्यात्, अनेन मा भूदित्येवमर्थमिति चेत्, न; विशेषाभावात्। न हि तेनात्मनेपदे सत्यनेन वा कश्चिद्विशेषोऽस्ति। यद्यनेन स्यात् तदा `न गतिहिंसार्थेभ्यः' (1.3.15) इति प्रतिषेधः स्यात्, तेन चात्मनेपदे विधीयमाने न भवत्येष दोष इति चेत्, सत्यम्; एषोऽस्तु विशेषः,तथापि न कर्त्तृग्रहणं कर्त्तव्यम्; यस्मात् `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इत्यनन्तरा या प्राप्तिः सा प्रतिषिध्यते, न पूर्वा। तेन भावकर्मणोरात्मनेपदं भविष्यति। अत आह-- `कर्त्तृग्रहणमुत्तरार्थम्' इति। कः पुनरसावुत्तरो योगो यत्रास्य प्रयोजनमित्याह-- `शेषात्' इत्यादि।।

15. न गतिहिंसार्थेभ्यः। (1.3.15)

`व्यतिगच्छन्ति'इति। `इषुगमियमां छः' (7.3.77) इति छत्वम्, `छे च' (6.1.73) इति तुक्। `व्यतिसर्पन्ति' इति। `गम्लृ सृप्लृ गतौ' (धा.पा.982,983), लघूपधगुणः। `व्यतिहिंसन्ति' इति। `तृहि हिसि हिंसायाम्' (धा.पा.1348,1829)। `व्यतिघ्नन्ति' इति। `हन हिंसागत्योः' (धा.पा.1012) `गमहन' (6.4.98) इत्युपधापलोपः, `हो हन्तेर्ञ्णिन्नेषु' (7.3.54) इति कुत्वम्।

`प्रतिषेधे' इत्यादि। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। उपसंख्यानशब्दोऽत्रानेकार्थत्वाद्धातूनां प्रतिपादने वर्त्तते। तच्च प्रतिपादनं प्रकृतत्वात् प्रतिषेधस्येति गम्यते। तदयमर्थः-- प्रतिषेधे कर्त्तव्ये हसादीनामप्यात्मनेपदप्रतिषधस्य प्रतिपादनं कर्त्तव्यमिति। तत्रेदं प्रतिपादनम्-- नेति योगविभागः क्रियते, तेन हसादीनामपि भविष्यतीति। ततः `गतिहिंसार्थेभ्यः' इति द्वितीयो योगः, तत्र `न' इति वर्त्तते।किमर्थं पुनरयम् ? पूर्वयोगस्यासर्वविषयत्वज्ञापनार्थम्, तेन `न' इति योगविभागेन हसादीनामेव प्रतिषेधो भविष्यति, नान्येष्यमिति।

16.इतरेतरान्योऽन्योपपदाच्च। (1.3.16)

उपोच्चारितं पदमुपपदम्। इतरेतरान्योऽन्यशब्दावुपपदे यस्य स तथोक्तः। अथोपपदग्रहणं किमर्थम्, `नेतरेतरान्योऽन्याभ्याम्' इत्युच्यताम् ? अशक्यमेवं वक्तुम्; एवं ह्युच्यमाने पञ्चमीनिर्देशात् `तस्मादित्युत्तरस्य' (1.1.67) इत्युत्तरस्यैव स्यात्-- इतरेतरस्य व्यतिलुनन्तीति, इह तु न स्यात्-- व्यतिलुनन्तीतरेतरस्येति।

`परस्परोपपदाच्चेति वक्तव्यम्' इति। परस्परशब्द उपपदं यस्य तस्मात् प्रतिषेधो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्- चकारोऽत्र क्रियते। स चानुक्तसमच्चयार्थः। तेन परस्परोपपदादपि प्रतिषेधो भविष्यतीति।

17.नेर्विशः। (1.3.17)

`निविशते' इति। `विश प्रवेशने' (1424) तुदादित्वाच्छः।

`न्यविशत' इति। अडागमेन व्यवधानमित्यात्मनेपदेन न भविव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तन्निराकर्त्तुमाह-- `{यदागमास्तद्ग्रहणेन' इति-- काशिका.पदमञ्जरी च. अडागमः' इत्यादि। `मधुनि विशन्ति' इति। अत्र नेः परस्य विशतेरात्मनेपदं प्राप्नोति, तत्कस्मान्न भवतीत्याह-- `नेरुपसर्गस्य' इत्यादि। मधुशब्दस्य सप्तमेयकवचने `इकोऽचि विभक्तौ' (7.1.73) इति नुमि मधुनीति रूपं भवति, तस्य चावयवो निशब्दोऽनर्थकः।।

18. परिव्यवेभ्यः क्रियः। (1.3.18)

`परिक्रीणीते' इति। `ई हल्यघोः' (6.4.113) इतीत्त्वम्। `पर्यादय उपसर्गा गृह्यन्ते' इति। कथम् ? क्रिय इति सम्बन्धलक्षणा षष्ठी, न पञ्चमी-- क्रियो ये सम्बन्धिनः पर्यादय इति। अर्थद्वारश्च तेषां सम्बन्धो विशेषणविशेष्यभावलक्षणः। स चोपसर्गैरेव पर्यादिभिः सम्भवति; नान्यैरिति सामर्थ्यादुपसर्गग्रहणं भवति। `बहुवि क्रीणाति' इति। बहवो वयो यस्मिन्निति बहुव्रीहिः। विशब्दोऽत्र पक्षिणि वर्त्तते।।

19. विपराभ्यां जेः। (1.3.19)

`साहचर्यात्' इति। उपसर्गग्रहणए हेतुः `नेर्विशः' (1.3.17) इत्यत्र नेरुपसर्गस्य ग्रहणम्। अनन्तरसूत्रेऽपि (1.3.18) पर्यादीनामुपसर्गाणामेव ग्रहणम्। अतः प्रकरणसाहचर्याादद्विपराशब्दावुपसर्गौ गृह्येतेत-- इत्येके।

अपरे तु वर्णन्ति-- साहचर्य पर्त्यासत्त्युपलक्षणम्। येषां साहचर्यं तेषां नियोगतः प्रत्यासत्त्या भवितव्यमिति। अतः साहचर्यस्य प्रत्यासत्त्याऽविनाभावित्वात् तेन प्रत्यासत्तिर्लभ्यते। तदेतदुक्तं भवति-- प्रत्यासत्तेर्विपराशब्दावुपपसर्गौ गृह्येते इति। प्रत्यासत्तिश्च जयतेर्विपराशब्दाभ्यामुपसर्गाभ्यामेव, नानुपसर्गाभ्याम्। तथा हि-- ताभ्यामेव जयत्यर्थो जयत्यर्थो विशिष्यते,नेतरभ्यामिति।।

20. आङो दोऽनास्यविहरणे। (1.3.20)

ददातेरेवास्यविहरणे वृत्तिः सम्भवति, नान्येषां दारूपाणां धतूनामिति। अतस्तत्प्रतिषेधेन तस्यैव ग्रहणं विज्ञायत इत्यत आह-- `आङपूर्वाद्दाञः' इति। `आदत्ते' इति। पूर्ववदाकारलोपः, `खरि च' (8.4.55) इति चर्त्वम्।

`आस्यविहरणसमानक्रियादपि प्रतिषेधो वक्तव्यः' इत्युपसंख्यानध्याजेनास्यविहरणविषयं दर्शयति। कथम् ? विहरणग्रहणं न कर्त्तव्यम्, इह `आङो दोऽनास्ये' इत्येतद्वक्तव्यम्, तत्रास्ये दाञो वृत्तिर्न सम्भवतीति सामर्थ्यादास्यसमवायिन्यां क्रियायां वृत्तिर्विज्ञास्यते, तत्रैव प्रतिषेधः,तत् किं विहरणग्रहणेन ? ननु च `आङो दोऽनास्ये' इत्येतावत्युच्यमाने, स्वं मुखमादत्ते देवदत्त इत्यत्रापि प्रतिषेधः स्यात्, नैष दोषः, वा ह्यास्यविषयैव क्रिया तस्यां वर्त्तमानो ददातिरास्यवृत्तिर्भवति, विहरणमेवास्यविषयम्, ग्रहणं त्वास्यविषयं ग्रहीतृविषयञ्च। तदेवं विहरणमन्तेरणापि सिद्धे यद्विहरणग्रहणं क्रियते तस्यैतत् प्रयोजनम्-- आस्यविहरणसमानक्रियादपि प्रतिषेधोऽयं यथा स्यादित्येवमित्येके। `इतरेतरान्योऽन्योपपदाच्च' (1.3.16) इत्यतश्चकारोऽनुवर्तते, स चानुक्तसमुच्चयार्थः। तेनास्यविहरणसानक्रियादपि प्रतिषेधो भवतीत्यपरे।

`स्वाङ्गकर्मकाच्च' इति। वक्तव्यमिति शेषः। न चात्राद्रवमूर्तिमल्लक्षमं पारिभाषिकं स्वाङ्गं विवक्षितम्, किं तर्हि ? स्वमङ्गं स्वाङ्गमिति। तत् कर्म यस्य स स्वाङ्गकर्मकः,तस्मात् स्वाङ्गकर्मात् प्रतिषेधो भवतीत्येतदर्थरूपं वक्तव्यमित्यर्थः। तेन परसम्बन्धिना मुखेन यदा सकर्मको भवति तदा भवत्येवात्मनेपदम्-- `व्याददते पिपीलिकाः पतङ्गस्य मुखम्' इति। वक्तव्यशब्दस्य व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- कर्त्तरीति वर्त्तते, आस्यमिति च सम्बन्धिशब्दः, तत्रैवं विज्ञायते-- `यस्मिन् कर्त्तर्यैवात्मनेपदं भवति तस्य चेदास्यम्' इति। `आङ' इति योगविभागः क्रियते-- आगमयस्व तावन्माणवकम्, आनुते शृगालः, आपृच्छते गुरूनित्येवमर्थः। तेन `आगमेः क्षमायाम्' (वा.35) इति `आङि नुप्रसच्छयोः' (वा.40) इति च नोपसंख्येयं भवति।।

21. क्रीडोऽनुसंपरिभ्यश्च। (1.3.21)

`समा साहचर्यात्' इति। यद्यप्यन्वादिरुपसर्गत्वं व्यभिचरति, सम्शब्दस्तु न व्यभिचरति, अतस्तत्साहचर्यादन्वादिरुपसर्ग एव गृह्यते। `माणवकमनुक्रीडति' इति। माणवकेन सह क्रौडतीत्यर्थः। `तृतीयार्थे' (1.4.85) इत्यनुशब्दस्य कर्मप्रवचनीयसंज्ञा।

`आगमेः' इति। आङ्पूर्वस्य गमेर्ण्यन्तस्य ग्रहणम्। `क्षमा उपेक्षा कालहरण्' इति। कालप्रतिपादनं प्रतीक्षणमित्यर्थः। `आगमयस्व' इति।

`जनीजृष्वनसुरञ्जौऽमन्ताश्च' (ग.सू.धा.पा. 817) इति मित्संज्ञायाम् `मितां ह्रस्वः' (6.4.92) इति ह्रस्वत्वम्। लोण्मध्यमपुरुषैकवचनम्, `थासः से' (3.4.80) `सवाभ्यां वामौ' (3.4.91) इति वादेशः। `शिक्षेः' इति। शकिः सन्नन्तो गृह्यते।`विद्यासु शिक्षते' इति। विद्यां जिज्ञासितुं घटत इत्यर्थः। शकेः सन्, `सनि मीमाघुरभलभ' (7.4.54) इत्यादिनेस्भावः। `अत्र लोपोऽभ्यासस्य' (7.4.58) इत्यभ्यासस्य लोपः। `स्कोः संयोगाद्योरन्ते च ' (8.2.29) इति सकारलोपः, शिक्ष इति स्थिते लट्। यस्तु `शिक्ष विद्योपादाने' (धा.पा.605) इति पठ्यते, ततोऽनदात्तेत्त्वादात्मनेपदं सिद्धमेव।

`आशिषि नाथः' इति। गतेस्ताच्छील्यं गतिताच्छील्यम्। ताच्छील्यम् = तत्स्वभावता। `पैतृकमश्वा अनुहरन्ते, मातृकं गावोऽनुहरन्ते' इति। पितृवन्मातृवद्गमनमेषां स्वभाव इत्यर्थः। `मातुरनुहरति, पितुरनुहरति' इति। मातुराकारं पितुराकारमनुकरोतीत्यर्थः। मातृसदृशः,पितृसदृशः इत्यर्थः। पैतृकमिति पितुरागतमिति `ऋतष्ठञ्' (4.3.78), `इसुसुक्तान्तात् कः' (7.3.51)। मातुरनुहरतीत्यत्र गतिताच्छील्यं न विवक्षितम्।

`किरतेः' इत्यादि। `कृ विक्षेपे' (धा.पा. 1409) अस्य विक्षेप एवार्थः। हर्षादयस्तस्य विषयभूताः। अत्र हर्षो विक्षेपस्य कारणम्, जीविकाकुलायकरणञ्च तत्फलम्। एतेष्वेवार्थेषु किरतेरात्मनेपदं भवति। `अपस्किरते' इति। `अपाच्चतुष्पाच्छकुनिष्वालेखने' (6.1.142) सुट्।

`आनुते' इति। `णु स्तुतौ' (धा.पा.1035), अदादिः। अयञ्चात्रोत्कण्ठापूर्वकशब्देन वर्तते। `आपृच्छते' इति। `प्रच्छ ज्ञीप्सायाम्' (धा.पा.1413) तौदादिकः, ग्रह्यादिना (6.1.16) सम्प्रसारणम्।

`वाचा शरीरस्पर्शनमुपलम्भनम्' इति। शपथविशेषः। तथा हि-- देवदत्तस्य शरीरं स्पृशामीति शपथं कुर्वाणो देवदत्ताय शपत इति प्रयुज्यते। `श्लाघह्नुङस्थाशपाम्'(1.4.34) इत्यादिना समप्रदानसंज्ञायाम्, देवदत्तायेति सम्प्रदाने चतुर्थी। शपतीत्याक्रोशतीत्यर्थः। `समोऽकूजने' (वा.34) इत्यादिग्रन्थस्य शप उपलम्भनपर्यन्तस्य योऽर्थः स इह चकारेणानुक्तसमुच्चयार्थेनोपात्तः, तस्यैवार्थस्य चकारोपात्तस्य स्पष्टीकरणायास्य ग्रन्थस्योपन्यासः कृतः।।

22. समवप्रविभ्यः स्थः। (1.3.22)

`सन्तिष्ठते' इति। पाघ्रादिसूत्रेण (7.3.78) तिष्ठादेशः।

`अस्तिं सकारमातिष्ठते' इति सकारमात्रमस्तिं धातुम् आपिशलिराचार्यः प्रतिजानीते। तथा हि -- न तस्य पाणिनेरिव `अस भुवि' (धा.पा.1065) इति गणपाठः, किं तर्हि?

`स भुवि' इति स पठति। `आगमौ गुणवृद्धी आतिष्ठते' इति। स त्वागमौ गुणवृद्धी आतिष्ठते। एवं हि स प्रतिजनीत इत्यर्थः।।

23. प्रकाशनस्थेयाख्ययोश्च। (1.3.23)

`तिष्ठन्त्यस्मिन्नति स्थेयः' इति। `कृत्यल्युटो बहुलम्'(3.3.113) इत्यधिकरणे `अचो यत्' (3.1.97)। `ईद्यति' (6.4.65) इतीत्त्वम्। गुणः। `विवाद' इति। सन्देहविषये। `निर्णेता' इति। निश्चेता, प्रमाणभूत इत्यर्थः। कथं पुनः स्थेयशब्दात् तस्य प्रतीतिर्भवति, यावता स्थेयशब्दो भावसाधनोप्यस्ति गतिनिवृत्तिवचन इत्याह-- `तस्य' इत्यादि। यस्य `स्थेय' इत्याख्या, लोके तस्य प्रतीतिर्यथा स्यादित्येवमर्थमाख्याग्रहणम्। तेनाख्याग्रहणेन तस्य प्रतीतिर्भवतीति दर्शयितुमाख्याग्रहणं कृतम्। `तिष्ठते कन्या छात्रेभ्यः' इति। पूर्ववत् सम्प्रदानसंज्ञायां सत्यां छात्रेभ्य इति चतुर्थी। `प्रकाशयत्यात्मानमित्यर्थः ' इति। अनेकार्थद्धातूनां तिष्ठतिरत्र प्रकाशने वर्त्तते। `संशय्य' इति।

जहातु नैनं कथमर्थसिद्धः
संशय्य कणादिषु तिष्ठते यः।
असाधुयोगा हि जयान्तरायाः
प्रमाथिनीनां विपदां पदानि।। (किरा-3.14)

इत्यस्य श्लोकस्यायमेकदेश इहोपन्यस्तः। संशय्येति विवादपदभूते वस्तुनि संशयित्वो भूत्वा कर्णादिषु तिष्ठत इति। कर्णशकुनिप्रभृतिषु निर्षेतृत्वेनाभिमतेषु

तत्सु पक्षान्तरं परित्यज्य तिष्ठते; तदुपदर्शितस्यैव पक्षस्याश्रयणात्।।

24. उदोऽनूर्ध्वकर्मणि। (1.3.24)
अनुर्ध्वकर्मणि वर्त्तमानादित्युक्ते, यश्चोदयति--- `ननु च तिष्ठतेरकर्मकक्रियावचनत्वान्न कर्मणि वृत्तिरुपपद्यते। तत्किमुच्यते-- `अनूर्ध्वकर्मणि वर्त्तमानात्' इति, तं प्रत्याह-- `क्रियावाची' इति। यदुक्तम्-- अनूर्ध्वकर्मणि वर्त्तमानादिति, तस्यार्थं विस्पष्टीकर्त्तुमाह-- `अनूर्ध्वकर्मविशिष्टात् क्रियावचनात्' इति।
`उद ईहायामिति वक्तव्यम्'इति। उत्पूर्वात् तिष्ठतेरीहायां परिस्पन्दने
वर्त्तमानादात्मेपदं भवतीत्येतदर्थरूपं व्याख्येमित्यर्थः। तत्रेदं व्याख्यानम्-- अन्तरेणापि कर्मग्रहणं क्रियामात्रवृत्तित्वे तिष्ठतेः सिद्धे यत् कर्मग्रहणं तल्लोके या क्रिया कर्मत्वेन प्रसिद्धा तस्याः प्रतिपत्तयर्थं कृतम्, सा तु परिस्पन्दनात्मकैव परिस्पन्दनात्मिकैव घटनभ्रमणादिका, तथा हि--तां कुर्वाणः `सक्रियः' इत्युच्यते। स्थानासनादिकां त्वपरिसम्पन्दनात्मिकां कुर्वाणोऽपि `निष्क्रियः' इति। तस्मादात्मनेपदमिदं कर्मग्रहणादीहायामेव वर्त्तमानाद्भविष्यति। उद ईहायामित्युक्ते, ईहाग्रहणमनूर्ध्वकर्मणोऽपवाद इति कस्यचिद्भ्रान्तिः स्यात्, अतस्तन्निराकर्तुमाह-- `ईहाग्रहणम्' इत्यादि। विशेषणं व्यक्तीकरणमिहाभिप्रेतम्। एतदुक्तं भवति-- यदिदमुक्तम् `उद ईहायामिति वक्तव्यम्' इति, तत्र यदीहाग्रहणं तदनूर्ध्वकर्मण एव विशेषणं सूत्रोपात्तस्य व्यक्तीकरणार्थम्। ईहात्मकमिहानूर्ध्वकर्म विवक्षितमिति प्रतिपादनार्थमित्यर्थः।।

25. उपान्मन्त्रकरणे। (1.3.25)
`मन्त्रकरणे'इति। मन्त्रः करणं साधकतमं यस्य धात्वर्थस्य स तथोक्तः। `उपात्' इत्यादि। अत्र वक्तव्यशब्दस्य व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्-- उत्तरसूत्रे चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, तेन उपपूर्वात्तिष्ठतेर्देवपूजादिष्वप्यात्मनेपदं भवति।
`वा लिप्सायाम्' इति। लब्धुमिच्छा लिप्सा। लिप्सायां गम्यमानायामित्येषोऽर्थोवेदितव्यः,न तु तत्र वर्त्तमानात् तिष्ठतेरिति, न लिप्सा तिष्ठरेरर्थः। तथा हि-- `भिक्षुको ब्राह्मणकुलमुपतिष्ठते'इत्यत्र तिष्ठतिरुपसंक्रमणे वर्त्तते। लिप्सा तूपसंक्रमणस्य हेतुभूता गम्यते। लिप्सायां हेतुभूतानां ब्राह्मणकुलमुपसंक्रामतीत्यर्थः।।

26. अकर्मकाच्च। (1.3.26)
`अकर्मकात्' इति। नास्य कर्मास्तीति बहुव्रीहिः। `डुकृञ् करणे'(धा.पा.1472), `अन्यभ्योऽपि दृश्यन्ते' (3.2.75) इति मनिन्, धातोर्गुणः, `शेषाद्विभाषा' (5.4.154) इति कप्। ननु धातोः क्रियावचनादकर्मकत्वं न सम्भवतीति तस्मादयुक्तमकर्मकादिति विशेषणम्, व्यवच्छेद्याभावादित्यत आह-- `अकर्मकक्रियावचनात्'इति। अकर्मिका चासौ क्रिया चेत्यकर्मकक्रिया, तस्या वचनो यः, तां वक्ति सोऽकर्मकक्रियावचनः। एतेनार्थद्वारकं विशेषणमिदं दर्शयति-- अकर्मको यो धात्वर्थस्तसत्साहचर्यादभिधेयधर्मस्याभिधान उपचारात् धातुरकर्मक इति। अर्थस्य च युक्तमेतद्विशेषणम्,तस्य सकर्मकत्वाकर्मकत्वसम्भवात्। `यावद्भुक्तम्' इति। यावच्छब्दो निपातोऽव्ययम्, तस्य यथार्थे वीप्सायामव्ययीभावः, सप्तम्यन्तञ्चैतत्।अत एवाह-- `भोजने भोजने सन्निधीयते' इति। `भावे क्तः' इति।
`नपुंसके भावे क्तः' (3.3.114) इत्यनेन।।

27. उद्विभ्यां तपः। (1.3.27)
`स्वाङ्गकर्मकाच्चेति वक्तव्यम्' इति। स्वाङ्गं कर्म यस्य तस्मात् तपतेरात्मनेपदं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः, तत्रेदं व्याख्यानम्-- पूर्वसूत्राच्चकारोऽनुवर्त्तते, तस्यानुक्तसमुच्चयार्थत्वात् स्वाङ्गकर्मकादपि भविष्यति। स्वाङ्गञ्चेह न पारिभाषिकम्, किं तर्हि ? स्वमङ्गं स्वाङ्गमिति। आत्मीयमङ्गमित्यर्थः।
`निष्टपति' इति। `निसस्तपतावनासेवने' (8.3.100) इति मूर्धन्यः।।

28. आङो यमहनः। (1.3.28)
`आहते' इति। `अनुदात्तोपदेश' (6.4.37) इत्यादिनानुनासिकलोपः। `आघ्नते' इति। `गमहन' (6.4.98) इत्युपधालोपः, `हो हन्तेः' (7.3.54) इत्यादिना कुत्वम्।
`स्वाङ्गकर्मकाच्चेति वक्तव्यम्' इति। अस्य पूर्ववदर्थः। व्याख्यानमपि पूर्ववदेव ।।

29. समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः। (1.3.29)
`संस्वरते' इति। `स्वृ शब्दोपतापयोः' (धा.ता.932)। `समरन्त' इति। अर्त्तेः `सर्तिशास्त्यर्तिभ्यश्च' (3.1.56) इत्यत्र पुषादिसूत्रात् परस्मैपदग्रहणानुवृत्तेरात्मनेपदेष्वङागेशेन न भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तन्निराकर्तुमाह-- `तत्र हि' इत्यादि। `संशृणुते'इति। `श्रु श्रवणे'

(धा.पा.942), `श्रुवः शृ च' (3.1.74) इति श्नुप्रत्ययः, शृभावश्च।
`ऋच्छेरनादेशस्य ग्रहणम्' इति। `ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु' (धा.पा.1296) इत्यस्य। `स्मृच्छिष्यते' इति लृट्। स्यप्रत्ययः। यद्यादेशस्य ग्रहणं स्यात् तदेतन्न सिध्येत्। प्राध्रादि (7.3.72) सूत्रेणार्त्तेर्ऋच्छादेशस्यच्छादशस्य शितीत्येवं विधानात्। अथार्त्त्यादेश्यापि ग्रहणं कस्मान् भवतीत्याह--
`अर्त्त्यादेशस्यत्वर्त्तीत्येवम्' इत्यादि।
अथ वा-- यद्यनादेशस्य ग्रहमं स्यात्, आदेशस्यात्मनेपदं न सिध्यतीत्यत आह--
अर्त्त्यादेशस्य त्वर्तीत्येवम्' इत्यादि। स्थानिवद्भावेनेत्यभिप्रायः।
`न लाभार्थस्य' इति। `विद्लृ लाभे' (धा.पा.1432) इत्यस्य। अथ `न तु सत्तार्थस्य, नापि विचारणार्थस्य' इत्येवमपि कस्मान्नोक्तम् ? एवं मन्यते-- नित्यात्मनेपदित्वादनयोरात्मनेपदार्थग्रहणं नाशङ्क्यैतैवेति।
`दृशेश्चेति वक्तव्यम्' इति। `दृशिर् प्रेक्षणे'(धा.पा.988) इत्यस्मात् संपूर्वादात्मनेपदं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याखानं तु पूर्वपदेव। `सम्पश्यते इति। पाध्रादिना(7.3.72) पश्यादेशः।।

30. निसमुपविभ्यो ह्वः। (1.34.30)
`ह्वः' इति `ह्वेञ् स्पर्द्धायां शब्देन च' (धा.पा.1008) इत्यस्य कृतात्त्वस्य `आतो धातोः' (6.4.140) इत्यकारलोपं कृत्वा निर्देशः। `निह्वयते' इति। ननु च कृतात्त्वस्य निर्देशादत्रात्मनेपदेन न भवितव्यम्, न हि विकृतिः प्रकृतिं गृह्णाति; अन्यत्वात्, नैष दोषः; क्वचिद्विकृतिरपि प्रकृतिं गृह्णात्येव। कथं ज्ञायते ? यदयं `न व्यो लिटि' (6.1.46) इति कृतात्त्वस्य व्येञो निर्देशोनात्त्वप्रतिषेधं शास्ति, ततो ज्ञायते-- विकृतिरपि प्रकृतिं गृह्णातीति; अन्यथा `व्यः' इति निर्देशेन व्येञो ग्रहणाभावात् कस्यायं प्रतिषेधः स्यात् !
`उपसर्गादस्यत्यूह्योर्वा वचनम्' इति। वक्तव्यमित्यर्थः। `असु क्षेपणे
' (धा.पा.1209), `ऊह वितर्के' (धा.पा.648) अस्यतीति श्यना निर्देशाद्दैवादिकस्य ग्रहणम्, न त्वादादिकस्य-- `अस भुवि' (धा.पा.1065) इत्यस्य।।

31. स्पर्द्धायामाङः। (1.3.31)
`स्पर्द्धायां विषये' इति। स्पर्धेह धात्वर्थस्य विषयोऽभिमतः, न धातोः। अत एवाह-- `स्पर्धा सङ्घर्षः। `पराभिभवेच्छा' इति। स्पर्धायाः स्वरूपं दर्शयित्वा धात्वर्थस्य विषयं दर्शयितुमाह- `स विषयो धात्वर्थस्य' इति। कः पुनर्धातोरर्थो नाम यस्यैवं विषयः ? इत्याह-- `धातुस्तु शब्दक्रियः' इत्यादि। शब्दनं शब्दः। सा क्रिया यस्य स तथोक्तः। शब्दनक्रियावाचीति यावत्। यद्यपि ह्वयतिः स्पर्द्धायामपि पठ्यते, तथाप्याङ्पूर्वस्तत्र न वर्त्तते, यथा-- तिष्ठतिर्गतिनिवृत्तौ पठ्यते, अथ च प्रपूर्वो गतावेव वर्त्तते, न गतिनिवृत्तौ; तथा हि प्रतिष्ठित इत्युक्ते गच्छतीत्यर्थः। तस्मादाङ्पूर्वस्य ह्वयतेः स्पर्द्धायां वृत्त्यभावात् स्पर्द्धा धात्वर्थस्य विषयः। धात्वर्थविषयत्वं तु तद्धेतुभावेन वेदितव्यम्।।

32. गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः। (1.3.32)
`अपकारप्रयुक्तम्' इति। तृतीयासमासोऽयम्। अपकारमुद्दिश्य यत्प्रवर्तते तदपकारप्रयुक्तं वेदितव्यम्। `हिंसात्मकम्' इति। हिनस्तीति हिंसः, पचाद्यच्, हिंस आत्मा यस्य तत् तथोक्तम्। पीडाकरणमित्यर्थः। `सूचनम्' इति दोषाविष्करणम्। कथमेतद्विज्ञायत एंविधं सूचनं गन्धनमित्याह-- `तथा ह' इत्यादि। `वस्त' इत्यादिनना गन्धयतिधातुरर्दयतेरर्थे वर्त्तते इति दर्शयति। `अर्द हिंसायाम्' इत्यादिना अर्दयतेर्हिसात्मकत्वम्। एवञ्च हिंसार्थेनार्दयतिना गन्धयतेः समानार्थतां दर्शयता गन्धनशब्दवाच्यस्यार्थस्य हिंसात्मकत्वं दर्शितं भवति। भर्त्सनं तिरस्करणम्। अनुवृत्तिः परचितावधारणम्। `साहसिक्यं साहसं कर्म' इति। `ओजः सहोऽम्भसा वर्त्तते' (4.4.27) इति ठक्, साहसिकः। तस्य कर्मेति तस्माद्गुणवचनब्राह्मणादित्वात् (5.1.124) ष्यञ्, साहसिक्यम्। `उपयोगो धर्मादिप्रयोजनो विनियोगः' इति। धर्मादिषु प्रयोजनं यस्य स तथोक्तः। आदिशब्दः कामापरिग्रहाय। `एधो दकस्योपस्कुरुते' इति। `उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु' (6.1.139) इति सुट्। `कृञः प्रतियत्ने' (2.3.53) इति षष्ठी।।

33. अधेः प्रहसने। (1.3.33)
`तमधितक्रे' इति। कृञो लिट्, तस्य चैशादेशः। `द्विर्वचनेऽचि (1.1.59) इति स्थानिवद्भावाद्द्विर्वचनम्, `उरत'(7.4.66) इत्यत्त्वम्, रपरत्वञ्च, `हलादिः शेषः' (7.4.60) `कुहोश्चुः' (7.4.62) इति चुत्वम्।।

34.वेः शब्दकर्मणः। (1.3.34)
`कर्तरि कर्म' (1.3 .14) इत्येवमादौ क्वचित् कर्मशब्दस्य क्रियावाचिना दृष्टा। इहापि तस्य क्रियावाचिता मा विज्ञायीत्याह- `कर्मशब्द इह कारकाभिधायि'इति। अथ
क्रियाभिधायी कस्मान्न भवति ? विपूर्वस्य करोतेः शब्दनक्रियायां वृत्त्यसम्भवात्। `शब्दकर्मणः' इति। धातोरर्थद्वारकं चेदं विशेषणम्-- शब्दः कर्मास्येति;

शब्दकर्मा धात्वर्थः। तदर्थस्य शब्दकर्मत्वात्तद्द्वारेण धातुरपि शब्दकर्मेति; अन्यथा हि क्रियावाचित्वाद्धातोः कतं शब्दः कर्मास्येति सम्बन्ध उपपद्यते।।

35. अकर्मकाच्च। (1.3.35)

`ओदनस्य {पूर्णाः' इत्येव-- काशिका, पदमञ्जरी च।} परिपूर्णाः' इति। सुहितार्थयोगे षष्ठी। `पूरणगुणसुहितार्थ'(2.2.11) इत्यादिना षष्ठीसमासप्रतिषेधेन ज्ञापितमेतत्-- सुहितार्थयोगे षष्ठी भवतीति। सुहितार्थाः = तृप्त्यर्थाः। पूर्णास्तृप्ता इत्यर्थः।।

36. सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः। (1.3.36)

`सम्मानानादिषु विशेषणेषु' इति। किंस्विदत्र विशिष्यते नयत्यर्थोऽनेनेति विशेषणम् ? किंस्विन्नयत्यर्थ एव विशेषणम् ? विशिष्यते व्यावर्त्त्यतेऽर्थान्तरादिति कृत्वा। तत्र सम्माननमाचार्यकरणं भृतिश्चेति पूर्वेणैवार्थेनैतानि विशेषणानि, परिशिष्टानि तु नयत्यर्थस्वभावानि द्वितीयेन विशेषणानि। `नयते चार्वी लोकायते' इति। अत्र नयतेः प्रापणमर्थो विशेष्यः, शिष्यसम्माननन्तु तस्य फलभावेन विशेषमम्। तत्सम्बन्धादाचार्योऽपि चार्वीत्युच्यत इति। यथा कुन्तान्न प्रवेशयेत्युक्ते कुन्तशब्दः कुन्तसम्बन्धात् पुरुषेष्वपि वर्त्तते, तथेहापि चार्वीशब्दश्चार्वीसम्नब्धादाचार्येऽपि। `स्थिरीकृत्य' इति। निशच्लीकृत्येत्यर्थः। निश्चलत्वन्तु तेषामनन्यार्थभावः। `स्थाप्यमानाः' इति। लोकायते शास्त्रे पदार्थानां सम्यगवबोधः। `पूजिता भवन्ति' इति। अभिलषितार्थसम्पादनमेव तेषां पूजा। अभिलषितोऽर्थस्तु लोकायते शास्त्रे पदार्थानां सम्यवबोधः। `उत्क्षिपतीत्यर्थः' इति। एतेनोपत्सञ्जनं नयतेरर्थः, न तु तस्य विशेषणमिति दर्शयति। एवं `निश्चिनोतीत्यर्थः' इत्यादिभिरपि ज्ञानादीनां यथासम्भवं नयत्यर्थतां दर्शयतीति वेदितव्यम्। `ईदृशेन' इति। यादृशः शास्त्रोक्तो विधिः, तादृशेनेत्यर्थः। अत्राप्याचार्यकरणं नयत्यर्थस्य फलभावेनैव विशेषणम्। `कर्मकरानुपनयते' इति। अत्र हि भृतिर्हेतुभावेन नयत्यर्थस्य समीपकरणस्य विशेषणम्। `ऋणादेः' इति। आदिशब्देन करशुल्कदण्डादीनां ग्रहणम्। करो नाम राजग्राह्यो भागः कर्षकैः रक्षार्थं परिकल्पितः। `धर्मादिषु' इति। आदिशब्देन कामादिष्वपि।।

37. कर्तृस्थे चाशरीरे कर्मणि। (1.3.37)

`नयतेः कर्त्ता' इति। अर्थद्वारकः सम्बन्धो वेदितव्यः। `तदेकदेशोऽपि शरीरम्' इति। समुदायेषु हि प्रवृत्ताः शब्दाः क्वचिदवयवेष्वपि वर्त्तन्त इति भावः। कथं पुनर्मुख्ये सति गौणस्यापि ग्रहणं लभ्यते ? शरीरग्रहणात्। इह लघुत्वात् कायग्रहणं कर्त्तव्ये यच्छरीरग्रहणं कर्त्तव्ये यच्छरीरग्रहणं करोति तच्छरीरैकदेशोऽपि शरीरश्रुत्या नाम गृह्येतेत्येवमर्थम्। `क्रोधं विनयते' इति। अत्र नयतेर्यः कर्त्ता स हि बुद्धीन्द्रियदेहसमुदायस्वभावो देवदत्तादिः। तत्रैव कर्म क्रोधो वर्त्तत इति कर्त्तृस्थं कर्माशरीरं भवति। एवं गडुं विनयतीत्यादौ गड्वादेः शरीरैकदेशस्य कर्मणः कर्त्तृस्थाभावो वेदितव्यः। अत्र च क्रोधाद्यपगमः क्रियाफलं कर्त्रभिप्राय एवेति ` स्वरितञितः कर्त्रभिप्राये' (1.3.72) इत्यनेनैव सिद्धे नियमार्थमेतद्वचनं वेदितव्यम्-- कर्त्तृस्थे कर्मण्यशरीर एव, नान्यत्रेति।।

38. वृत्तिसर्गतायनेषु क्रमः। (1.3.38)

शेषलक्षणेन क्रमेः परस्मेपदे प्राप्त आत्मेपदं विधीयते। वृत्त्यादयोऽर्था अप्रतिबन्धोत्साहस्फीततासु प्रसिद्धाः।।

39. उपपराभ्याम्। (1.3.39)

`संक्रमति' इति। `क्रमः परस्मैपदेषु' (7.3.76) इति दीर्घः।

40. आङ उद्गमने। (1.3.40)

`आक्रामति माणवकः कुतपम्' इति।अवष्टभ्नातीत्यर्थः। `ज्योतिरुद्गमन इति
वक्तव्यम्' इति। ज्योतिषां ग्रहनक्षत्रादीनामुद्गमन एवात्मनेपदं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- `अनुपसर्गाद्वा' (1.3.43) इत्यतो वाग्रहणमनुवर्त्तते सिंहावलोकितन्यायेन, सा च व्यवस्थितविभाषा; तेन ज्योतिरुद्गमन् एव भविष्यति, नान्यत्रेति। यदि तर्हि `वा' ग्रहणमनुवर्त्तते, उभयोरपि योगयोरनुवर्त्तेत ? मण्डूकप्लुतिन्यायेन नानुवर्तिष्यत इत्यदोषः।

41.वेः पादविहरणे। (1.3.41)

`विक्रामत्यजिनसन्धिः' इति। द्विधा भवति। स्फुटतीत्यर्थः।।

42.प्रोपाभ्यां समर्थाभ्याम्। (1.3.42)

`प्रकर्मते, उपक्रमते' इति। आरभत इत्यर्थः।

43. अनुपसर्गाद्वा। (1.3.43)

`अप्राप्तविभाषेयम्' इति। वृत्यादीनां निवृत्त्वात्।

44. अपह्नवे ज्ञः। (1.3.44)
`शतमपजानीते' इति। `ज्ञाजनोर्जा' (7.3.79) इति जादेशः श्ना, पूर्ववत् `ई हलघोः' (6.4.113) इतीत्त्वम्।।

45. अकर्मकाच्च। (1.3.45)
`कथञ्चायमकर्मकः' इति। एवं मन्यते-- सर्पिरादि ज्ञेयत्वेन विवक्षितं कर्म, अतस्तेन कर्मणा सकर्मक एवायमित्यभिप्रायः। `कथम्' इति। न कथञ्चिदित्यर्थः। तथा चेत्यादिना `नात्र सर्पिरादि कर्मत्वेन, अपि तु करणत्वेन विवक्षितम् इत्यत्र युक्तिमाह-- `सर्पिषोपायेन' इत्यादि। यस्य सर्पिःष्वभिष्वङगो विना तेन भुजिक्रियायामभिलाषो न भवति तस्य भोजने प्रवृत्तिं प्रति सर्पिरुपायभावं प्रतिपद्यत इति तेनोपायेन स प्रवर्तत इति। `अकर्मकादिति किम्' इति। `नात्र सर्पिरादि ज्ञेयत्वेन विवक्षितम्। किं तर्हि? करणत्वेन' इति ब्रुवता वृत्तिकृता साक्षाच्छब्दोपात्तेन करणेन सकरणादात्मनेपदं भवतीत्युक्तं भवति। एवञ्च सकरणादित्येवं वाच्यम्, किमकर्मकग्रहणेनेति भावः। एवमुच्यमाने करणयुक्तात् सकर्मकादपि स्यादिति दर्शयितुमाह--- `स्वरेण पुत्रं जानाति' इति।।

46. संप्रतिभ्यामनाध्याने। (1.3.46)
`उत्कण्ठास्मरणम्' इति। उत्कण्ठापूर्वकस्मरणमिति। `मातुः' इति। `अधीगर्थदयेशां कर्मणि' (2.3.52) इति षष्ठी।।

47. भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रमेषु वदः। (1.3.47)
`{भासनादिषु विशेषणेषु' इत्येव-काशिका, पदमञ्जरी च।} भासनादिष्वर्थेषु विशेषणेषु' इति। अत्रापि किंस्विद्विशिष्यते वदत्यर्थोऽनेनेति विशेषणम् ? किंस्विद्वदत्यर्थ एव, विशेषणं ह्यर्थान्तराद्विशिष्यते व्यवच्छिद्यत इति कृत्वा ? तत्रोपसम्भाषोपलसान्त्वनमुपमन्त्रणञ्च द्वितीयेनार्थेन वदत्यर्थ एव विशेषणम्। परिशिष्टानि तु भासनादीनि प्रथमेनार्थेन विशेषणानि। `भासनमान' इत्यादिना भासनं वदत्यर्थस्य लक्षणभावेन हेतुभावेन वा विशेषणमिति दर्शयति। तथा ह्यत्र भासमान इति `लक्षणहेत्वोः क्रियायाः' (3.2.126) इत्यनेन शानजादेशो विहितः। `जानाति' इत्यादिना ज्ञानं वदत्यर्थस्य विषयिभावेन विशेषणमिति दर्शयति। ज्ञानेन ह्यसौ वदितुं जानाति। अत्र येन ज्ञानेन वदनं
वदत्यर्थस्य हेतुभावेन तत्र तेनैव विषयेण परिच्छेद्येन विषयीभवति। `तद्विषयम्' इत्यादिना यत्र आविष्करणस्य वदत्यर्थस्य हेतुभावेन विशेषणमित्याचष्टे। उत्साहो ह्याविष्क्रियमाण आदिष्करणक्रियायाः कर्माख्यं साधनं भवति, साधनं च हेतुः; कारकाणां क्रियानिमित्तत्वात्। `विमतिपतिताः' इत्यादिना विमतिर्भाषणस्य वदत्यर्थस्य हेतुभावेन विशेषणमिति दर्शयति। सत्यां विमतौ विचित्रं नानाप्रकारं भाषन्ते। यदि ह्यभिन्ना मतिः स्यादभिन्नमेव भाषेरन्। `उपच्छन्दयति' इति। `भद्रे भजस्य मामिदं ते दास्यामि' इत्येवमादिभिरभिष्टेऽर्थे प्रवर्त्तयतीत्यर्थः।।

48. व्यक्तवाचां समुच्चारणे। (1.3.48)
`प्रसिद्ध्युपसंग्रहार्थम्' इति। यदि तदर्थं व्यक्तवाचामिति नोच्येत,`वरतनु सम्प्रवदन्ति कुक्कुडा {अयि विजहीहि दृढोपगूहनं त्यज नवसङ्गमभीरु वल्लभम्। अरुणकरोद्गम एष वर्त्तते वरतनु सम्प्रवदन्ति कुक्कुटाः।इत्येवं सयग्रः श्लोकः।}। कुक्कुटाः अपि व्यक्तवाच एव। तथा हि -- कुक्कुटेनापि लपिते विशेषपरिच्छेदादुच्यते- कुक्कुटा लपन्तीति। वरतन्विति तनूशब्दस्य `अम्बार्थनद्योर्ह्रस्वः' (7.3.107) इति ह्रस्वः। ह्रस्वकवचनसामर्थ्यात् `ह्रस्वस्य गुणः' (7.3.108) इति गुणो न भवति। नृणामिति न कृतं वैचित्र्यार्थम्।।

49. अनोरकर्मकात्। (1.3.49)
`अनुवदति' इति। अनुशब्दः पुनरित्यस्यार्थे वर्त्तते। पुनर्वदतीत्यर्थः। यजुषात्र कर्मणा सकर्मकत्वम्।

50. विभाषा विप्रलापे। (1.3.50)
`विप्रलापात्मके' इति। परस्परप्रतिबन्धेन विरुद्धः प्रलापो विप्रलापः, स यस्यात्मा स्वभावः स तथोक्तः। `प्राप्तविभाषेयम्' इति। `व्यक्तवाचां समुच्चारणे' (1.3.48) इत्यस्यानुवृत्तेः।

51. अवाद्ग्रः। (1.3.51)
`अवगिरते' इति। `ऋत इद्धातोः' 97.1.100) इतीत्त्वम्, रपरत्वञ्च।

52. समः प्रतिज्ञाने। (1.3.52)

53. उदश्चरः सकर्मकात्। (1.3.53)
`गेहेमुच्चरते' इति। चरिर्गत्यर्थः। `गुरुवचनमुच्चरते' इति। अत्रोत्क्रमणात्मिकायां गतौ वर्त्तमानश्चरतिर्गुरुवचनेन कर्मणा सकर्मकः। `बाष्पमुच्चरति' इति। उपरिष्टाद्गच्छतीत्यर्थः। नात्र किञ्चित्कर्म विवक्षितमित्यकर्मकत्वम्।

54. समस्तृतीयायुक्तात्। (1.3.54)
यद्यत्र तृतीयेति गृह्यते, तदेहापि स्यात्-- उभौ लोकौ सञ्चरति इमाञ्चामुत्र देवलेति। अत्रापि तृतीयार्थो गम्यत एव। तपसा श्रुतेन वा विद्यत एवेत्येतच्चेतसि कृत्वाह-- `तृतीया' इति। ` तृतीयाविभक्तिर्गृह्यते' इति। यद्येवं तया सह धातोः सम्बन्धो नोपपद्यते। न हि तृतीय धातुवाच्येत्याह-- `तया' इत्यादि। अर्थो द्वारं मुखमुपायो यस्य स तथोक्तः। तृतीयार्थेन धात्वर्थस्य युक्तवादौपचारिको धातोस्तृतीयीर्थेन योग इति दर्शयति। `यत्रप्यत्र तदर्थेन योगः सम्भवति' इति। विना करणेन क्रियानिष्पत्तेरभावात्, तथापि न भवति। `तृतीय तु' इत्यादि। तृतीयायपुक्तग्रहणं ह्येवमर्थं क्रियते-- श्रूयमाणतृतीययुक्ताद्यथा स्यादिति, अन्यथा सम इत्येवं वक्तव्यं स्यात् ? अनुक्तेऽपि सिद्ध्वतात् तृतीयाप्रयोगस्य। न हि तेन विना क्रियानिष्पत्तिरुपपद्यते। तस्माद्यत्र तृतीया श्रूयते तन्मूलोदाहरणम्, यत्र तु न श्रूयते तत्प्रत्युदाहरणम्।।

55. दाणश्च सा चेच्चतुर्थ्यर्थे। (1.3.55)
कथं पुनस्तृतीया चतुर्थ्यर्थे स्यादिति ? न कथञ्चिदित्यर्थः। तद्विधायिनः शास्त्रस्याभावादिति भावः। `वक्तवयमेवैतत्' इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- तदेव सम्प्रदानं यदा साधकतमत्वेन विवक्ष्यते तदा साधकतमत्वेन विवक्ष्यते तदा चतुर्थ्येऽपि तदा चतुर्थ्येऽपि तृतीया भवति, विवक्षातः कारकाणि भवन्तीति कृत्वा; न तु स्वभाववतः। सा च विवक्षा लौकिकी समाश्रीते, न तु प्रोयोगिकीति। लोके चाशिष्टव्यवहारे एव सा सम्भवति, नान्यत्र। लौकिकविवक्षात्र समाश्रीयत इति अस्यैवार्थस्य द्योतनाय चेच्छब्दः प्रयुक्तः। `दास्या मालां सम्प्रच्छते' इति। यो हि धर्मशास्त्रविरुद्धां दासीं कामयितुं तस्यै मालां ददाति तस्यासावशिष्टव्यवहारो भवतीत्यस्त्यत्राशिष्टव्यवहारः। सम्प्रयच्छत इति पाघ्रादिसूत्रेण (7.3.78) दाणो यच्छादेशः। कथमात्मनेपदं भवतीति। न कथञ्चिदित्यर्थः। `तस्मादित्युत्तरस्य' (1.1.67) इत्यत्र निर्दिष्टग्रहणस्यानन्तर्यार्थत्वादिति। एवं मन्यते-- `सम इति विशेषणे षष्ठी' इत्यादि। यदि `समः' इति पञ्चमी स्यान्न षष्ठी, तदा प्रशब्देन व्यवधानादात्मननेपदं न स्यात्; तस्मान्नेयं पञ्चमी, किं तर्हि ? षष्ठी-- समो विशेषणस्य सम्बन्धी यो विशेष्यो दाणिति। ततश्च व्यवहितोऽपि विशेषणविशेष्यभावो भवतीति तेन व्यवधानेऽपि भवत्यात्मनेपदम्।।

56. उपाद्यमः स्वकरणे। (1.3.56)
यदि स्वकरणमात्र आत्मनेपदं भवति शाकटकादिस्वीकारेऽपि स्यादिति चोद्यमपाकर्त्तुमाह-- `पाणिग्रहणम्' इत्यादि। एवं मन्यते-- प्रतिनियतविषया हि शब्दशक्तयो भवन्ति, यस्मादुपपूर्वो यमिरात्मनेपदान्त एवंविध एव स्वीकारे वर्तते; न तु सर्वस्मिन्। तस्मात् पाणिग्रहणात्मकमेव स्वीकरणं गृह्यते। उपयच्छत इति पूर्ववद्यच्छादेशः।।

57. ज्ञाश्रुस्मृदृशां सनः। (1.3.57)
`त्रिभिः सूत्रैः' इति। `अपह्नवे ज्ञः' (1.3.44) इत्यादिभिः। `धर्मं जिज्ञासते' इति। `ज्ञा अवबोधने' (धा.पा.1507), सन्, द्विर्वचनम्, अभ्यासस्य ह्रस्वत्वम्, `सन्यतः' (7.4.79) इतीत्त्वम्। `शुश्रूषशते' इति । श्रु श्रवणे' (धा.पा.942), `इको झल्' (1.2.9) इति सनः कित्तम्, `श्रयुकः किति' (7.2.11) इतीट्प्रतिषेधः, `अज्झनगमां सनि' (6.4.16) इति दीर्घः। `सुस्मूर्षते' इति।`स्मृ आध्याने' (धा.पा.807) ; पूर्ववत् कित्वात् `उदोष्ठ्यपूर्वस्य' (7.1.102) इत्युत्त्वम्, रपरत्वम्। `दिदृक्षते' इति। `हलन्ताच्च' (1.2.10) इति कित्त्वम्, ततश्च व्रश्चादिना (8.2.36) षत्वम्, `षढोः कः सि' (8.2.41) इति कत्वम्।।

58. नानोर्ज्ञः। (1.3.58)
`पूर्वेण' इति। अनन्तरसूत्रप्राप्तं यत्तत्प्रतिषिध्यते-- `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा ' (व्या.प.19) इति कृत्वा। `तथा च' इत्यादि। यस्मादनन्तरसूत्रेणआत्मनेपदं ेयत्प्राप्नोति, तस्यायं प्रतिषेधः सम्पद्यते। एवंसति सकर्मकस्यैवायं प्रतिषेधः; अनन्तरसूत्रेण सकर्मकादात्मनेपदविधानात्। अकर्मकाद्धि `अकर्मकाच्च' (1.3.45) इत्यनेन प्रागेवात्मनेपदं विहितमित्यनन्तरातीतो योगः सकर्मकार्थो विज्ञायते; यतश्चैवम्, तेनाकर्मकात् `पूर्ववत्सनः' (1.3.62) इत्यात्मनेपदं भवत्येव-- औषधस्यानुजिज्ञासत इति।।

59. प्रत्याङ्भ्यां श्रुवः। (1.3.59)

`उपसर्गग्रहणञ्चेदम्' इति। कथं श्रुव इति ? विशेषणविशेष्यभावसम्बन्धे षष्ठी। तेनायं सम्बन्धो भवति-- शृणोतेर्यौ विशेषणभूतौ प्रत्याङौ तत्पूर्वाच्छरुवः सम्बन्धात् सन्नन्तादात्मनेपदं न भवति। उपसर्गादेवार्थ द्वारेण शृणोतेर्विशेषणभूताविति सामर्थ्यादुपसर्गयोर्ग्रहणम्। `देवदत्तं प्रति शुश्रूषते' इति। प्रतिशब्दस्य `लक्षणे त्यम्भूताख्यान' (1.4.90) इत्यादिना लक्षणे कर्मप्रवचनीयसंज्ञा, तेन प्रतिना देवदत्त् एव सम्बध्यते; न धात्वर्थ इति।।

60. शदेः शितः। (1.3.60)

यदि `शदेः शितः' इति व्यधिकरणे एते पञ्चम्यावित्यभ्युपगम्यैवं व्याख्यायते-- शदेः परो यः शित् तस्मादात्मेपदं भवतीति, तदा सार्वधातुकाश्रयत्वाच्छितः प्रागेव तदुत्पत्तेर्धातोः शेषत्वादस्य लावस्थायां परस्मैपदं स्यात्, ततस्तन्निमित्तकः व्याचिख्यासुराह-- शदिर्यः शिदिति। एतेन `शदेः शितः' इति समानाधिकरणे एते पञ्चम्याविति दर्शयति। कथं पुनः शदिः शिद्भवति, यावता विकरणस्य शकार इत्संज्ञक इत्संज्ञासम्बन्धी, न तु शदेः ? इत्यत आह-- `शद्भावी' इति। भाविशब्दोऽयम् `भविष्यति गम्यादयः'(3.3.3) इति भविष्यत्कालविषयः। शिद्भावीति यतः शिद्भविष्यति स शिद्भावी।एतदुक्तं भवति-- शिन्निमित्तत्वादुपचारेण शदिः शिदित्युक्तमिति। भवति हि कारणे कार्योपचारात् तथा व्यपदेशः, यथा-- नड्वलोदकं पकादरोग इति। शितो वा सम्बन्धी' इति। एतेन `शितः' इत्यस्य षष्ठ्यन्ततां दर्शयति। कः शदेः शित्सम्न्बधी ? यस्तस्य प्रकृतिः। प्रागपि शितः शदेस्तत्प्रकृतित्वमस्त्येवेति शित्प्रकृतेः शदेरात्मनेपदं भवति। `शीयते' इति। पाघ्रादिसूत्रेण (7.3.78) शीयादेशः।।

61. म्रियतेर्लुङलिङोश्च । (1.3.61)

`नियमार्थमिदं वचनम्'इति। म्रियतेर्लुङलिङोः शित एव यथा स्यात्। यद्येवम्, ङिद्ग्रहणं किमर्थम् ? यावताऽन्यत्रात्मनेपदेन न भवितव्यमिति ? उच्यते; स्वरार्थमुपदिश्यते-- मा हि मृतेति लुङि `तास्यनुदात्तेन्ङिदुपदेशाल्ल सार्वधातुकस्य' (6.1.186) इति अनुदात्तत्वे कृते धातोरन्तोदात्तत्वं भवति। `तिङ्ङतिङः' (8.1.28) इति निघातोऽत्र `हि च' (8.1.34) इति प्रतिषिध्यते। अडागमोऽपि `न माङ्योगे' (6.4.74) इति। `अमृत' इति। `ह्रस्वाद्ङात्' (8.2.27) इति सिचो लोपः। `मृषीष्ट' इति। आशिषि लिङ, तस्य `लिङाशिषि' (3.4.116) इत्यार्द्धधातुकत्वाद्विकरणाभावः; `सुट् तिथोः' (6.4.107) इति सुट्; वलि (6.1.66) यलोपः। `म्रियते'इति। तुदादित्वाच्छः; `रिङ शयग्लिङक्षु' (7.4.28) इति रिङादेशः, `अचि श्नुधातु' (6.4.77) इत्यादिनेयङ। `मरिष्यति'इति। `ऋद्धनोः स्ये' (7.2.70) इतीट्।।

62. पूर्ववत्सनः। (1.3.62)

`पूर्ववत्' इति। `तेन तुल्यं क्रिया चेद्वतिः' (5.1.115) इति वतिः।. पूर्वशब्दः सम्बन्धिशब्दत्वादवधिमपेक्षते। स चावधिः श्रुतत्वात्सन्नेव विज्ञायत इत्याह-- `सनः पूर्वो यो धातुः' इति। यद्येवम्, अवधिभावोपगम एव सन्ग्रहणस्योपयुक्तत्वात्त सन्नन्तादात्मनेपदं भवतीति, न तत्रैतल्लभ्यते; कुतस्तर्हि स्यात् ? धातुमात्रात्, नैतदस्ति; एवं ह्यात्मनेपदं परस्मैपदानुक्रमणमनर्थकं स्यात्। अथ प्रत्ययान्तात् स्यात् ? एवमपि सन्ग्रहणमनर्थकं स्यात्, पूर्ववत् प्रत्ययादिति वाच्यं स्यात्। तस्मात् पर्त्यासन्नं सनं त्यक्त्वा न युक्त्वा न युक्ताऽन्यन्यस्याश्रुतस्य परिकल्पनेति सन्न्तादेव भवतीति विज्ञायते। `येन' इत्यादिना वत्यर्थमाचष्टे। `तदेव निमित्तम्' इति। अनुदात्तेत्वं ङित्त्वञ्च धात्वन्तरावस्थायामपि सन्नन्ताद्वचनसामर्थ्यान्निमित्तं भवति। `असिसिषते' इति। इटि कृते `अजादेर्द्वितीयस्य' (6.1.2) इति सिशब्दस्य द्विर्वचनम्। `निविविक्षते' इति। `विश प्रवेशने' (धा.पा.1424), पूर्ववत् कित्त्वषत्वकत्वानि। `आचिक्रंसते' इति। आत्मनेपदनिमित्तत्वात् `स्नुक्रमोरनात्मनेपदनिमित्ते' (7.2.36) इतीण् न भवति।

`शिशत्सति', मुमूर्षति'इति। अत्र सनो यः पूर्वो भागः, तस्यात्मनेपदनिमित्तत्वमस्ति; शीयते, म्रियत इत्यात्मनपददर्शनात्। तत आत्मनेपदेन भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह-- `इह न भवति' इत्यादि। किं कारणमित्याह-- `न हि' इत्यादि। किं तर्हि ? `शिदाद्यपि'इति। शिच्छब्देनात्र शिद्भावित्वं शित्सम्बन्धित्वञ्चोक्तम्। आदिशब्देन लुङलिङोर्ग्रहणम्, तच्चेह नास्तीति न ह्यत्र सनः पूर्वभागस्य शिद्भावित्वं शित्सम्बन्धित्वं वास्ति; शित्प्रत्ययस्यास्मिन् विषयेऽत्यन्तासम्भवात्, नापि म्रियतेः परौ लुङलिङौ स्तः; तस्मान्नेह शदिम्रियत्योरात्मनेपदनिमित्तत्वमस्तीति न भवत्यात्मनेपदम्। इह तर्हि कस्मान्न भवति-- अनुचिकीर्षति, पराचिकीर्षतीति ? करोतेर्हि गन्धनादिष्वर्थेष्वात्मनेपदं विहितम्, अतस्त्दविवक्षायां सनन्तादपि तेन भवितव्यमित्याह-- `यस्य च' इत्यादि। गन्धनादिष्वर्थेषु पूर्वत्रासनन्तावस्थायाम् `अनुपराभ्यां कृञः' (1.3.79) इत्यनेन परस्मैपदविधानात् करोतेरात्मनेपदाभावः क्रियते। तस्मादाभ्यां सनन्तादप्यात्मनेपदनिमित्ताभावान्न भवति।

`अथ जुगुप्सते, मीमांसत इत्यत्र कथमात्मनेपदम्, यावता `पूर्ववत्सनः' (1.3.62) इत्युच्यते, न च गुपादिषु सनः प्रागेवात्मनेपदं भवतीति; अतः पूर्ववदित्यतिदेशाभावान्न भवितव्यमात्मनेगदेनेत्यत आह-- `इह' इत्यादि। `जुगुप्सते'इति। `गुप्तिज्किद्भ्यः सन्' (3.1.5) इति सन्। `मीमांसते' इति। `मानबध' (3.1.6) इत्यादिना सन्, अभ्यासस्य `सन्यतः' (7.4.79) इतीत्वे दीर्घः। कथं पुनरिह `अनुदात्तङित आत्मनेपदम्' (1.3.12), यावता गुपादाववयवेऽनुदात्तेत्वं लिङ्गम्, न जुगुप्सादौ समुदाय इत्यत आह -- `अवयवे कृतम्' इत्यादि। यथा गोः कर्णादाववयवे कृतं लिङगं समुदायस्य विशेषकं भवति, तथा गुपादाववयवे कृतमनुदात्तेत्त्वं समुदायस्य जुगुप्स इत्येवमादेर्विशेषक्रं भवति। यद्येवम्, गोपयति, तेजयति, सङ्केतयतीत्येवमादावपि प्राप्नोति, सत्यम्; स्यादेतत्-- अवयवेकृतं लिङगं तस्य समुदायस्य गोर्विशेषकं भवति, यं समुदायं सोऽवयवो न व्यभिचरति; सनन्तं पुनर्न व्यभिचरति; णिजन्तन्तु

व्यभिचरतीत्यतोऽत्रात्मनेपदेन न भवितव्यम्; वार्त्तमेतत्, सनन्तमपि व्यभिचरतीति विनापि तेन गोपयतीत्यादौ सम्भवात्। तस्मात् समुदायं यं गुपादिर्न व्यभिचरति, तस्यासम्भवात् सर्वस्य गुपादावयवे कृतमनुदात्तेत्त्वं लिङ्गं समुदायस्य विशेषकं भविष्यति। ततश्च गोपयतिप्रभृतिभ्योऽप्यात्मनेपदं प्राप्नोतीत्येव। एवं तर्हि `निगरणचलनार्थेभ्यश्च' (1.3.87) इत्यत्र चकारोऽनुक्तसमुच्चयार्थः क्रियते। तेन गुपादिभ्यो ण्यन्तेभ्यः परस्मैपदात्मनेपदापवादो भविष्यति।।

63. आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य। (1.3.63)
`आम्प्रत्ययवत्'इति। `तत्र तस्येव' (5.1.116) इति षष्ठीसमर्थाद्वतिः। `कृञोऽनुप्रयोगस्य' इति समानाधिकरणे षष्ठ्यौ। `ईक्षाञ्चक्रे' इत्यादि। `ईक्ष दर्शने' (धा.पा.610), `ईह चेष्टायाम्' (धा.पा.632), `ऊह वितर्के' (धा.पा.648) लिट्, `इजादेः' (3.1.36) इत्यादिऽऽनाम्, `आमः' (2.4.81) इति लेर्लुक्; प्रातिपदिकत्वात् सुप प्राप्तः; सुः, स्वरादित्वादव्ययत्वात् सुब्लुक्, `कृञ्च' (3.1.40) इत्यादिना कृञो लिट्परस्यानुप्रयोगः।
`अकर्त्रभिप्रायायर्थोऽयमारम्भः' इति ब्रुवता विध्यर्थमेतदित्युक्तं भवति। तत्रास्मिन्विध्यर्थे यो दोषस्तमुद्भावयितुमाह-- `यदि' इत्यादि। `उदुब्जाञ्चकार' इति। `उब्ज आर्जवे'(धा.पा. 1303), उत्पूर्वाल्लिट्, पूर्ववदाम्। `परस्मैपदानाम्' (3.4.82) इत्यादिना तिपो णल्। `उदुम्भाञ्चकार' इति। `उभ उम्भ पूरणे' (धा.1319, 1320) `उभयम्' इत्यादिना परिहारः। `कथम्'इति ? एकेन प्रयत्नेनाशक्यमेतदुभयं कर्त्तुमित्यत आह-- `पूर्ववत्' इत्यादि। नैवात्रेको यत्नः, किं तर्हि ? द्वौ-- `आम्प्रत्ययवत्' इत्येको यत्नः,पूर्ववद्ग्रहणमनुवर्त्तमानं द्वितीयः। तत्र पूवण यत्नेन विधिः क्रियते, इतरेण नियमः। यद्यनुप्रयोगस्य कृञ आत्मनेपदं भवति, पूर्ववदेव; नान्यथा। तेनोदुब्जाञ्चकारेत्येनमादौ न भवति। न ह्युब्जादीनामात्मनेपदं सम्भवति, परस्मैपदित्वात्।
`ईक्षामास' इति। आम्, अस्तेरनुप्रयोगः। `ईक्षाम्बभूव' इति। `भवेतरः' (7.4.73) `कृञ्च' (3.1.40) इत्यत्र करोतेरेव ग्रहणमित्यभिप्रायेणाह-- `कथं पुनः' इत्यादि। `कृञिति प्रत्याहारग्रहणम्' इत्यादि। तत्र प्रत्याहारे।डस्तिभवत्योरपि सन्निदेशः। तस्तयोरप्यनुप्रयोगो भवतीति भावः। यद्यवम्, सम्पदोऽप्यनुप्रयोगः प्राप्नोति,तस्यापि तत्र सन्निवेशोस्त्येव; `अभिविधौ सम्पदा च' (5.4.53) इति वचनात्। सत्यपि सन्निवेशे नासौ प्रत्याहारग्रहणन गृह्यत इत्यदोषः। यथा तस्याग्रहणं ततोत्तरत्र प्रस्तावान्तरे प्रतिपदायिष्यामः। अथाम्प्रत्ययवदिति किम् ? असति हि तस्मिन्ननुप्रयोगमात्रस्यात्मनेपदं स्यात्-- देवदत्तः करोतीति ? अत्रापि पूर्ववदित्यनुवर्त्तते। तथापीह स्यात्-- ईहते, करोतीति ? `आम्प्रत्ययम्' इत्युच्यमाने प्रत्यासत्तेराम एवानुप्रयोगस्येति गम्यते, नानुप्रयोगमात्रे, तेनातिप्रसङ्गो न भवति।।

64. प्रोपाभ्यां युजेरयज्ञपात्रेषु। (1.3.64)
`युज समाधौ'(धा.पा.1177) इत्यस्यानुदात्तेत्त्वात् सिद्धमात्मनेपदमित्यतस्तस्येह ग्रहणमयुक्तमित्यभिप्रायेणाह-- `युजिर् योगे' इति। `प्रयुङ्कते' इति। रुधादित्वात् `श्नसोरल्लोपः' (6.4.111) इत्यकारलोपः। `चोः कुः' (8.2.30) इति कुत्वम् = जकारस्य गकारः, `खरि च' (8.4.55) इति चर्त्त्वम् = ककारः, `नश्च' (8.3.24) इत्यादिनाऽनुस्वारः, `अनुस्वारस्य ययि परसवर्णः' (8.4.58) इति ङकारः।
`स्वराद्यन्तोपसृष्टाविति वक्तव्यम्' इति। स्वरोऽज् आदिरन्तो वा यस्य स स्वराद्यन्तः, तदुपसृष्टात् = तत्सम्बन्धाद्युजेरात्मनेपदं भवति-- इत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्- इह सूत्रे प्रशब्दोऽजन्तोपसर्गलक्षणार्थः, उपशब्दोजाद्युपलक्षणार्थः, उपशब्दोऽजाद्युपलक्षणार्थः, तेन सर्वेणाजन्तेनाजादिना चोपसर्गेण चयुक्ताज्युजेरात्मनेपदं भवतीति। स्वराद्यन्तोपसृष्टादिति किम् ? निर्युनक्ति।।

65. समः क्ष्णुवः। (1.3.65)
`अकर्मकादिति तत्रानुवर्त्तते' इति। सकर्मकादपि क्ष्णुव आत्मनपदमिष्यत इति मन्यते। अत एव सकर्मकस्योदाहरणमुपन्यस्तम्। `संक्ष्णुते शस्त्रम्' इति। अदादित्वाच्छपो लुक्। `संक्ष्णुवाते' इति। `अचि श्नुधातु' (6.4.77) इत्यादिनोवङ। `संक्ष्णुवते' इति। पूर्ववदादेशः।

66. भुजोऽनवने। (1.3.66)
`अवनप्रतिषेधेन' इत्यादि। अवनं पालनम्। तत्प्रतिषेधेन रौधादिकस्य भुजेर्ग्रहणं विज्ञायते; न तौदादिकस्य-- `{भुजौ-- धातुपाठः} भुज कौडिल्ये' (धा.पा.1417) इत्यस्य। यथैव हि सवत्सा धेनुरानीयतामित्युक्ते यस्या हि वत्सेन सह सम्बन्धः सम्भवति सैव गोधेनुरानीयते, न महिष्यादिधेनुः; तथेहाप्यवनप्रतिषेधेन यस्य भुजोऽनवने वृत्तिः सम्भवति, स एव रौधादिकः प्रतीयते; तस्मात् तस्यैव ग्रहणं विज्ञायते। तेन निर्भुजति, विभुजतीति तौदादिकस्यात्मनेपदं न भवति।।

67. णेरणौ यत्कर्म णौ चेत्स कर्त्तानाध्याने। (1.3.67)
`आरोहन्ति हस्तिनं हस्तिपकाः' इति। अणौ कर्मप्रदर्सनार्थमेतदुक्तम्। इदं त्वत्रोदाहरणम्-- `आरोहयते हस्ती स्वयमेव' इत। आरोहन्ति हस्तिनं हस्तिपका इत्यत्राङपूर्वस्य तु `रुह बीजजन्मनि प्रादुर्भावे' (धा.पा.859) इत्यस्य द्वे क्रिये वाच्ये-- न्यगम्भवनम्, न्यग्भावनञ्च। तत्र न्यग्भवनस्य हस्ती कर्त्ता, न्यगम्भावनस्य हस्तिपका इति। न्यग्भवन्तं हस्तिनं न्यग्भावयन्तीत्यर्थः। स यदा तु सुशिक्षितत्वात् सुविधेयत्वाच्च न्यग्भावनक्रियायामत्यन्तमानुकूल्यं प्रतिपद्यते हस्ती स्वयमेव; तदासौ हस्ती हस्तिपकान् प्रति प्रयोजनकत्वेन विवक्ष्यते, हस्तिपकास्तु प्रयोज्यत्वेन। हस्ती हस्तिपकान् प्रयुङ्क्ते-- मामारोहतेति,

ततश्च प्रयोज्यप्रयोजकभावे विवक्षिते हेतुमण्णिच्। एवमुत्तरत्रापि कर्मणः कर्त्तृत्वस्य विवक्षितत्वात् प्रयोजकभावविवक्षायां णिज्विधेयः। ततस्तस्मिन्नुत्पन्ने यदा निर्ज्ञातस्वरूपत्वाच्चरितार्थत्वात् प्रयोज्या न विवक्ष्यन्ते, तदा निवृत्तत्वात् प्रयोज्यप्रयोजकभावस्य न्यग्भवनमात्रे रुहिर्वर्तते। अत्रेदमुदाहरणम्-- आरोहयते हस्ती स्वयमेवेति। तथा हि यदेवाण्यन्ते कर्मासीत् स एव ण्यन्ते हस्ती कर्त्ता भवति। न च प्रयोज्यप्रयोजकभावे निवृत्तेऽपि णिचो निवृत्तिर्भवतिः निवृत्तिकारणाभावात्। यथैव हि देवदत्तस्य व्यापारे निवृत्तेऽपि पचिः पाकान्न निवर्त्तते-- पच्यत ओदनः स्वयमेवेति, तथेहापि निवृत्ते प्रयोज्यप्रयोजकव्यापारे णिचो निवृत्तिर्न भवतीति वेदितव्यम्।

`सिञ्चन्ति' इत्यादि। अत्रापि सिच्यमानो हस्ती कर्म यदा सुशिक्षितत्वात् सुविधेयत्वाच्च सेचनक्रियां प्रति प्रकृष्टमानुकूल्यं भजते, तदा तस्य प्रयोजकत्वे विवक्षिते हस्तिपकानाञ्च प्रयोज्यत्वे णिच्। तत्र कृते पूर्ववत् प्रयोज्येष्वविवक्षितेषु यदेवाण्यन्ते कर्म स एव ण्यन्ते कर्त्ता भवति। `पश्यन्ति' इत्यादि। अत्रापि दृश्यमानस्य राज्ञः दर्शनक्रियायामतिशयेनानुकूल्यभावोपगमनात् प्रयोजकत्वे विवक्षिते भृत्यानाञ्च प्रयोज्यत्वे णिच्। तत्र विहिते पूर्ववत् प्रयोज्याविवक्षायां यदेव दृशेरण्यन्ते कर्म राजा, स एव ण्यन्ते कर्त्ता। क्रियपि च सर्वेष्वेतेषूदाहरणेषु यैवाण्यन्तावस्थायाम्, सैव ण्यन्तेऽपि। सत्यपि च णिचि प्रयोज्यप्रयोजकभावस्य निवर्त्तितत्त्वात् क्रियान्तरस्य चानुत्पत्तेः।

`गणयति' इत्यादि। `गण संख्याने' (धा.पा.1853) चनुरादवदन्तः पठ्यते। ततो णिच् , `अतो लोपः' (6.4.48) इत्याकारलोपः। तस्य पूर्वविधौ कर्त्तव्ये स्थानिवद्भावात् `अत उपाधायाः' (7.2.116) ति वृद्धिर्न भवति। `गणयति गोगणं गोपालकः। गणयति गणः स्वयमेव' इति। अत्र स गण्यमानो यदा गणनं प्रत्यानुकूल्यं भजमानः प्रयोजकत्वेन विवक्ष्यते, गोपालकस्तु प्रयोज्यत्वेन; तदा हेतुमण्णिच्। तस्मिन् कृते पूर्ववत् प्रयोज्याविवक्षायां यदेव कर्म स एव कर्त्ता भवति। तथाप्यणाविति वचनादात्मनेपदं न भवति; न हि गणःप्रागणौ कर्मासीत्, किं तर्हि ? ण्यन्त एव। ननु च "अणावकर्मकाच्चित्तवत्कर्तृकात्' (1.3.88) इत्यत्र `अणौ' इति किम् ? चेतयमानं प्रयोजयति चेतयते इति केचित् प्रत्युदाहरन्ति" इत्युक्त्वा प्रत्युदाहरन्ति" इत्युक्त्वा वृत्तिकारो वक्ष्यति, तदयुक्तम्, `हेतुमण्णिचो विधिः। प्रतिषेधोऽपि प्रत्यासत्या तस्यैव न्याय्यः'इति, तच्चेत्, सत्यम्, गणयति गोगणं गोपालकः, गणयति गोगणः स्वयमेवेत्येतदपि प्रत्युदहारणमयुक्तमेव स्यात्, नैतदस्ति; भेदस्याविवक्षिततत्वात्। यदि हि भेदो विवक्ष्यते, तदा हेतुमण्णिचो विधिरिति प्रतिषेधोऽपि प्रत्यासत्तेस्तस्यैव स्यात्, न हि विप्रकृष्टस्य चुरादिणिचः।न चेह भेदो विवक्षितः, `णेः'इति जातिनिर्देशात्। तस्माण्णिज्मात्रविधिः, अतः प्रितिषेधोऽपि णिज्मात्रस्यैव स्यदिति युक्तमेतत् प्रत्युदाहरणम्। `अणावकर्मकात्' (1.3.88) इत्यादौ सूत्रेऽणाविति हेतुमण्णिच एव ग्रहणम्। अत एव हेतुमण्णिच एव विधिरिति प्रायासत्तेस्तस्यैव प्रतिषेधो युक्तः। यथा तत्र हेतुमण्णिचो ग्रहणं तथा तत्रैव प्रतिपादयिष्यामः। न चात्र तथाविधं किञ्चिन्निबन्धनमस्ति, यतो णेरिति हेतुमण्णिच एव ग्रहणमवसीयते; चौरादिकानामप्यनित्यण्यन्तत्वात्, विभाषितणिचां च केषाञ्चिद्विद्यमानत्वात् येषामण्यन्तानामेव यत् कर्म, तेषामेव चुरादिणिजन्तानां तस्यैव कर्त्तृत्वसम्बवात्। तस्मादिह णेरिति णिज्मात्रस्य ग्रहणं सूत्रकारस्याभिमतमिति लक्ष्यते।

अथ गणयति गोगणः स्वयमेवेत्यत्र `कर्मवत् कर्मणा तुल्यक्रियाः'(3.1.87) इत्यतिदेशात् कस्मादात्मनेपदं न भवति ? कर्त्तृस्थभावकत्वात्। अत्र हि गणयतिरयं संख्यानिमित्ते परिच्छेदे ज्ञानविशेषे वर्त्तते, यस्य हि संख्यानमित्याख्या। स च ज्ञाविशेषः कर्त्तरि वर्त्तते; तत्र तस्य समवेतत्वात्, न कर्मणि। तस्मात् कर्त्तृस्थभावकत्वादिहात्मनेपदं न भवति। कर्मस्थक्रियाणां कर्मस्थभावकानाञ्च कर्मवद्भावातिदेशेनात्मनेपदमिष्यते, नेतरेषाम्।

`लुनाति दात्रेण' इत्यादि। दात्रस्य तीक्ष्णतया करणस्यापि सतो विशिष्टव्यापारभूतत्वाल्लावकपुरुषान् प्रति प्रयोजकत्वविवक्षायां णिच्।

`णौ चेद्ग्रहणम्' इत्यादि। इह णौ चेदिति यत् कर्म स कर्त्तेत्येतावत्युच्यमानेऽणौ यत् कर्म तस्य सामर्थ्याण्णावेव कर्त्तृत्वं विज्ञायत इति किं णौ चेदित्यनेन ? तदैतण्णौ चेद्ग्रहणं क्रियमाणं समानक्रियार्थं विज्ञायते-- यदि यैव कर्मावस्थायां क्रिया, सैव कर्त्रवस्थायां भवतीति। एतदुक्तं भवति-- यस्यैव धात्वर्थस्य यत्कर्म तस्यैव यदि तत् कर्त्तृत्वेन विवक्ष्यत एवमात्मनेपदं भवति; नान्यथेति। तेन `आरोहन्ति हस्तिनं हस्तिपकाः, आरोह्यमाणो हन्ती भीतान् सेचयति मूत्रेण' इत्यत्र सेचयतेरात्मनेपदं न भवति; भिन्नत्वात् क्रियायाः। तथा हि, न्यग्भावनक्रियायां प्राक् ह्सती कर्मत्वेन विवक्षितः, सेचनक्रियायां तूत्तरकालं कर्त्तृत्वेन। `यत्सग्रहणमनन्यकर्मार्थम्' इति. अण्यन्ते यत्कर्म ण्यन्तेऽपि यदि तदेव कर्म कर्त्ता भवति न कर्मान्तरम्, एवमात्मनेपदं भवति; नान्यथा। ननु विप्रतिषिद्धमेतत्-- एकस्यैवैकदा कर्मत्वं कर्त्तृत्वञ्च ? नैतद्विप्रतिषिद्धम्; एको हि वस्तुधर्मः, अपरश्च विवक्षाधर्मः, स्वातन्त्र्यविवक्षायां कर्त्तृत्वस्य विवक्षाधर्मत्वात्त वस्तुध्रमत्वाच्चारुह्यमाणताय कर्मत्वम्। `स्थलमारोहयति मनुष्यान्' इति। अत्र कर्मान्तरमप्यस्ति। मनुष्यानिति न केवलं हस्त्येवेति न भवत्यात्मनेपदम्। यद्येवम्, भीतान् सेचयति मूत्रेणेत्यत्र कर्मान्तरसद्भावादात्मनेपदं न भविष्यति; अस्ति ह्यत्रापि कर्मान्तरम्-- भीतानिति; अतो न वक्तव्यम्-- समानक्रियार्थं णौ चेदित्येतत् ? नैतदस्ति, न हि भीतानिति सेचयतः कर्म किं तर्हि ? आरोहयतेः। भीतानाराहयमाणः सन् मूत्रेणात्मानं सेचयतीत्यर्थः; अयुक्तमेतत्, एवं ह्यारोह्यमाण इत्यत्रात्मनेपदं शानच्च न स्यात्, कर्मान्तरसद्भावात्। नैवं तर्हि शानजेवात्र विहितः किं तर्हि ? `ताच्छील्यवयोवचनशक्तिषु' (3.2.129) चानश्प्रत्ययः। तत्र यदि समानक्रियार्थं णौ चेद्ग्रहणं न क्रियेत, तदा यदेवारोहयतेरण्यन्ते कर्म, स एव हस्ती सेचयतेर्ण्यन्ते कर्त्ता भवतीति तदेव कर्म, स एव कर्त्तेति स्यादेवात्मनेपदम्। तस्माण्णौ चेद्ग्रहणं समानक्रियार्थं कर्त्तव्यम्।

`कर्त्तेति किमि' इति। कर्त्तर्येवात्मनेपदमनेन विधीयते; भावकर्मणोः (1.3.13) इत्मनेनैव सिद्धत्वात्। तस्मात् सामर्थ्यलब्धः कर्त्तेत्यभिप्रायः। कर्त्तृग्रहणं येवाण्यन्ते कर्म तस्मिन्नेव ण्यन्ते कर्त्तृत्वेन विवक्षिते सत्येवात्मनेपदं भतवि, नान्यथेत्येवमर्थ क्रियत इति दर्शयितुमाह-- `आरोहन्ति हस्तिनं हस्तिपकाः, तानारोहयति महामात्रः' इति। अत्र यदेवाण्यन्ते हस्ती कर्म न तदेव ण्यन्ते कर्त्तृत्वेन विवक्षितम्, किं तर्हि ? महामात्रः, तेनात्मनेपदं न भवति। एतच्च कर्त्तृग्रहणाल्लभ्यते; तस्यानन्यार्थत्वात्। ननु च यत्सग्रहणमनन्यकर्मार्थमित्यक्तम्, इहच कर्मान्तरं हस्तिपकाख्यमस्त, अतो यत्सग्रहणादेव न भविष्यति, तत्

किमेतन्निवृत्त्यर्थेन कर्त्तृग्रहणेन ? नैतदस्ति;एवं सति हि कर्तृग्रहणेऽणौ यत्कर्म णौ चेत् स कर्त्ता तदेव कर्म कर्त्ता भवतीत्यस्यार्थस्यच प्रतिपादनाय क्रियमाणं यत्सग्रहणमर्थवद्भवतीति । असति तु कर्त्तृग्रहणे तन्न कर्त्तव्यमेव स्यादिति कुतः समानकर्मता प्रतीयते।
`स्मरति वनगुल्मस्य' इति। अणौ कर्मप्रदर्शनार्थमेतत्। कर्मविषयेण शेषत्वेन विषयिणा विषयं दर्शयितुमुक्तम्। नन्वत्र न कर्मास्ति; तस्य शेषत्वेन विवक्षितत्वात्। तथा हि `शेषे' (2.3.50) इत्यनुवर्त्तमाने `अधीगर्थ' (2.3.52) इत्यादिना कर्मणि शेषत्वेन विवक्षिते षष्ठीयं विहिता। तस्मादेदं दर्शयितव्यम्,-- स्मरति वनगुल्ममिति। अथ वा-- यद्यपि तच्छेषत्वेन विवक्षितम्, तथापि स्मर्यमाणत्वात् तस्य कर्मत्वं वस्तुतोऽस्त्येवेति। `स्मरयति' इति। `स्मृ आध्याने' (धा.पा.807), वनगुल्मस्य प्रयोजकत्वे विवक्षिते णिच्, घटादित्वान्मित्संज्ञा, `मितां ह्रस्वः' (6.4.92) इति ह्रस्वत्वम्। `एनम्' इति। `गतिबुद्धिप्रत्यवसानार्थ' (1.4.52) इत्यादिना कर्मसंज्ञायां सत्याम्, `द्वितीया टौस्त्वेनः' (2.4.34) इत्येनादेशः। ननु च यत्सग्रहणमनन्यकर्मार्थम्, इह च कर्मानतरमस्ति कोकिलः, ततश्च कर्मान्तरसद्भावादात्मनेपदं न भविष्यतीति किमेतन्निवृत्यर्थेनानाध्यानग्रहणेन ? नैतदस्ति; आध्यानामात्रं विवक्षित्येदं प्रत्युदाहरणमुपन्यस्तम्। एनम इति तु वचनं वनगुल्मः कर्त्ता न कोकिल इत्यर्थोपदर्शनपरं वेदितव्यम्। एवं वनगुल्मं वनगुल्मो स्मरयति। आत्मानमात्मना स्मरयतीत्यर्थः। णिच्युत्पन्ने
कोकिलस्य प्रयोज्यस्य विवक्षितत्वान्निवृत्ते प्रयोज्यप्रयोजकभावे स्मरयतेर्ण्यन्तस्य प्रकृत एवार्थो भवति। ननु च स्मरणं चेतनावतां धर्मः, वनगुल्मश्चाचेतनः, तत् कथमसौ स्मरेत् ? नैतदस्ति; अचेतनेष्वपि चेतनावद्धर्मोपचारः-- यथा नदीकूलं पिपतिषतीति। `रुहुः कर्त्तस्थक्रियः' इति। तदर्थस्य न्यग्भावनात्मनो हस्तिपकेषु समवेतत्वात्। `दृशिश्च कर्त्तस्थभावकः' इति। तदर्थस्य दर्शनस्य कर्त्तृषु भृत्येषु व्यवस्थितत्वात्।।

68. भीस्म्योर्हेतुभये। (1.3.68)
`हेतुभये'इति। हेतोर्भयं हेतुभयमिति। `पञ्चमी भयेन' (2.1.37) इति समासः। भीतिर्भयम् = त्रासः, अनिष्टापाताशङ्का। `ततश्चद्भयं भवति' इति। यदि ततो हेतुसंज्ञकात् प्रयोजकाद्भयं भवत्येवमात्मनेपदं भवति, नान्यथेति। यद्येवम्,स्मयत्यर्थो न विशेषितः स्यात्; यस्माद्भयं बिभेतेरेवार्थो न स्मरतेः, ततश्च रूपेण विस्माययतीत्यवमादावप्यात्मनेपदं स्यात्। मुण्डो विस्मापयत इत्यादौ न स्यादित्यत आह-- `भयग्रहणम्' इत्यादि। भयग्रहणं हि धात्वर्थोपलक्षणार्थम्। धात्वर्थश्चेत् प्रयोजकाद्भवतीत्ययमर्थो विवक्षितः।तेन विस्मयोऽपि यदि तत एव हेतोर्भवति यद्येषोऽर्थो लभ्यत इति स्मयत्यर्थोऽपि विशेषित एव। विस्मयः = आश्चर्यम्। `मुण्डः' इति। मुण्डगुणोपेतत्वान्मुण्डः। `भीषयते' इति। `ञिभी भये' (धा.पा.1084),`विभाषा लीयतेः' (6.1.51) इत्यतो विभाषाग्रहणानुवृत्तेः `बिभेतेर्हेतुभये' (6.1.56) इति पक्ष आत्त्वम्। `भियो हेतुभये षुक्' (7.3.40) इति षुक्। `विस्मापयते' इति। `{ष्मिङ'-धातुपाठः} स्मिङ ईषद्धसने' (धा.पा.948)। `नित्यं स्मयतेः' (6.1.57) इत्यात्त्वम्;`अर्तिह्री' (7.3.36) इत्यादिना पुक्।
`कुञ्चिकयैनं भाययति' इति। करणादत्र भयम्, न हेतोः प्रयोजकात्। तेनात्मनेपदं न भवति। षुगप्यत्र न भवति, स हीकारान्तस्यैवेष्यते, `भियो हेतुभये षुक्' (7.3.40) इत्यत्र भी ई-- इतीकारप्रश्लेषनिर्द्देशात्। `रूपेण विस्माययति' इति। अत्र करणादेव विस्मयः;न हेतोः।।

69. गृधिवञ्च्योः प्रलम्भने। (1.3.69)

70. लियः सम्माननशालीनीकरणयोश्च। (1.3.70)
`विशेषाभावात्' इति। कतं पुनर्विशेषभावः, यावता निरनुबन्धकत्वं सानुबन्धकत्वञ्चानयोर्विशेषोऽस्त्येव,ततश्च `निरनुबन्धकग्रहणे न सानुबन्धकस्यट (व्या.प.ा53) इत्यनया पिरभाषाय न लीङो ग्रहणेन भवितव्यम्। तदयुक्तमुक्तं विशेषाभावाद्द्वयोरपि ग्रहणमिति ? नैष दोष-, उत्सृष्टानुबन्धको हि लीह ल्यन्तो भवति। उत्सृष्टे चानुबन्धे द्वयमेवाभेदकं भवति-- अर्थः, शब्दान्तरत्वञ्च। तत्रार्थस्तावदनयोरेक एव, शब्दान्तरत्वमपि नास्ति। शब्दान्तरत्वञ्च प्रकृतिबेदविकरणभेदाभ्यां भवति। न चानयोर्ण्यन्तयोः प्रकृतिभेदः़ नापि विकरणभेदोऽस्ति;शब्विकरणत्वात्। यदपि `विभाषा लीयतेः' (6.1.51) इत्यात्त्वं तदप्युभयोर्भवति। तथा च वक्ष्यति-- `किमिदं लीयतेरिति ? लीनातिलीयत्योरागन्तुकेन यका निदशः' इति। `न्यग्भावम्' इति। अभिभवनमित्यर्थः। `जटाभिः' इति। हेतौ तृतीया। जटा हि पूजाद्यधिगमहेतुभूताः। तथा हि-- यस्य जटाः सन्ति लोके महानयं तपस्वी्तयुपजातसम्प्रत्ययैः पूज्यते।।

71. मिथ्योपपदात्कृञोऽभ्यासे। (1.3.71)
`मिथ्योपपदात्' इति। उपोच्चारितं पदमुपपदम्, मिथ्याशब्द उपपदं यस्य स तथोक्तः। `पदं मिथ्या कारयते' इति। अत्रात्मनेपदनाभ्यासस्य द्योतितत्वात् `नित्यवीप्सयोः' (8.1.4) इसि द्विर्वचनं न भवति। `सापचारम्' इति। सदोषम्। अनेन मिथ्याशब्दस्यार्थमाचष्टे। `स्वरादिदुष्टम्' इति। पूर्वस्यैवार्थं व्यक्तीकरोति। आदिशब्देन रूपस्य परिग्रहः। `असकृत्' इति। अभ्यासशब्दार्थमुदाहरणेन दर्शयति।।

72. स्वरितञितः कर्त्रभिप्राये क्रियाफले। (1.3.72)
`कर्त्रभिप्राये' इति। कर्त्तारमभिप्रैतीति `कर्मण्यण्' (3.2.1)। यदि सामान्येन यत्र क्रियाफलं कर्त्तारमभिप्रैति तत्रात्मनेपदम्, तदेहापि स्यात्-- पचन्ति

पाचकाः, यजन्ति याजका इति। तथा ह्यत्र क्रियाफलं दक्षिणा याजकान् कर्त्तृनभिप्रैति, भृतिश्च पाचकानित्यत आह-- `क्रियायाः फलम्' इत्यादि। प्रधानभूतं यत्फलं क्रियायास्तदिह गृह्यते। न च दक्षिणादिकं क्रियाफलं प्रधानभूतम्, ततो न भवत्यतिप्रसङ्गः। किं पुनस्तत्प्रधानभूतमित्यत आह- `यदयर्थम्' इत्यादि। एतेन यदुद्दिश्यासौ यागादिक्रियारभ्यते, न तु दक्षिणाद्यर्थम्। `यदर्थम्' इति। स्वर्गादि, न तु दक्षिणादि। तथा हि स्वर्गाद्यर्थं यागादिक्रियारभ्यते, न तु दक्षिणाद्यर्थम्। `यदर्थम्' इति। क्रियाविशेषणमेतत्। यच्छब्देन क्रियायाः प्रधानभूतं फलं निर्दिश्यते। यदर्थः प्रयोजनं यस्य क्रियारम्भस्य फलमात्रस्य ग्रहमभिप्रेतं स्यात्, तदा फलग्रहणमनर्थकं स्यात्; व्यवच्छेद्याभावत्। नास्त्येव हि स विषयो यत्र क्रियाफलं कर्त्तारं नाभिप्रैति; ततश्च कर्त्रभिप्राये क्रियाया इत्येदं ब्रुयात्। एवमप्युक्ते षष्ठ्या क्रियायाः सम्बन्धिनि कर्त्रभिप्राये प्रत्यायिते सामर्थ्यात् फमलेव क्रियायाः कर्त्रभिप्रायं गम्यते। न हि फलान्यत् क्रियासम्बन्धि कर्त्तारमभिप्रैति। तस्मात् फलग्रहणसामर्थ्यात् प्रधानं फलं गृह्यते। अथ वा-- प्रधानत्वादेव प्रधानं फलं गृह्यते। तथा चोक्तम्-- प्रधाने कार्यसम्प्रत्ययात् सिद्धमिति। अस्मिन् व्याख्याने फलग्रहणं स्पष्टार्थम्, कर्तर्यात्मनेपदविधानात्। प्रत्यासत्तर्यस्तस्य वाच्यः कर्त्ता यदि तस्यैव तत् फलं भवतीति विज्ञायत इत्याह-- `तच्च' इत्यादि। गतार्थम्। `स्वर्गादि' इति। आदिशब्देनौदनादिकमपि गृह्यते।

`तथापि' इत्यादिना दक्षिणादेः फलस्याप्रधान्यं दर्शयति। यदर्थं सा क्रियारभ्यते तत्प्रधानमिहोपात्तं फलम्। स्वर्गाद्यर्थं च यागादिक्रियाऽऽरभ्यते; न दक्षिणाद्यर्थम्। अतोऽप्रयोजकत्वात्तदप्रधाम्। तेन यद्यपि तत् कर्त्तारमभिप्रैति तथाप्यात्मनेपदं न भवति।

अथाभिप्रग्रहणं किमर्थम् ? विप्रकृष्टेऽपि फले यथा स्यात् द्विविधं हि क्रियाफलम्-- आसन्नम्, विप्रकृष्टञ्च। तत्रासन्नम्-- यस्य व्यापारानन्तरमेव निष्पत्तिः। विप्रकृष्टन्तु-- उपरतेषु व्यापारेषु यन्निमित्तान्तरमपेक्ष्य कालविप्रकर्षकृतं संस्कारपरिपाकाच्चिरादभवति। तत्राद्यमासन्नत्वात् दृष्टत्वादुत्पत्तिं प्रत्यव्यभिचाराच्च प्रधानमम्। इतरत् पुनर्विप्रकृष्टत्वादनुमेयत्वात् सम्भवव्यभिचाराच्चोत्पत्तिं प्रति व्यभिचारः। यद्यपि तदुद्दिश्य क्रियारम्भात् तदपि प्रधानम्, तथाप्यविप्रकृष्टफलापेक्षया तस्याप्राधान्यमस्त्येव। तत्र यद्यभिप्रग्रहणं न क्रियेत, तदा लुनीत पुनीत इत्यादावेव स्यात्-- यत्राविप्रकृष्टं क्रियाफलम्। यजते इत्यादौ तु न स्यात्-- यत्र विप्रकृष्टं स्वर्गादिकं क्रियाफलम्, प्रधाने कार्यसम्प्रत्ययात्। अभिग्रहणे तु न दोषः; यस्मादभिराभिमुख्ये वर्त्तते, प्रशब्दसत्त्वारम्भे। तेन प्रारम्भमात्रस्याभिमुख्ये फलनिष्पत्तौ बुद्धावाश्रीयमाणायां सर्वत्र सिद्धं भवति। ननु चासत्यभिप्रग्रहणे प्रकृतीनां यजिप्रभृतीनामनुबन्धविशेषासञ्जनादेव विप्रकृष्टेऽपि फले भविष्यतिच अन्यथा हि तस्य वैयर्थ्यं स्यात्, न; अभिचारादौ यत्राविप्रकृष्टं फलं दृष्टमस्ति तत्र तस्य सार्थकत्वात्। तस्माद्विप्रकृष्टेऽप्यप्रधाने फले स्यादित्येवमर्थमिप्रग्रहणं कर्त्तव्यमेव।।

73. अपाद्वदः। (1.3.73)

`न्यायपवादेन' इत्यादिना येनाभिप्रायेण धनकामो न्यायमपवदते तं दर्शयति।।

74. णिचश्च। (1.3.74)

75. समुदाङ्भ्यो यमोऽग्रन्थे। (1.3.75)

`उद्यचछति' इति। `चिकित्सा वैद्यः' इति। चिकित्साशास्त्रमधिगन्तुमुद्यमं करोतीत्यर्थः।।

76. अनुपसर्गाज्ज्ञः। (1.3.76)

नास्योपसर्गाः सन्तीति बहुव्रीहिः। कतसकर्मकार्थेञ्चेदम्। `अकर्मकाच्च' (1.3.45) इत्येवं सिद्धत्वात्।।

77. विभाषोपपदेन प्रतीयमाने। (1.3.77)

तत्र `स्वरितञितः'(1.3.72) इत्यादीनि पञ्च सूत्राण्यनुवर्त्तन्ते। `कर्त्रभिप्राये क्रियाफले द्योग्ये' इति। केन द्योत्ये ? प्रकृतत्वादात्मनेपदेनेति विज्ञेयम्। `तदुपपदेन द्योतिते न प्राप्नोति' इति। उक्तार्थानामप्रयोगात्। एतेनाप्राप्तविभाषेयमिति दर्शयति। ननु चस्वं यज्ञं यजते इत्यत्र स्वशब्दस्योपपदत्वान्नोपपद्यते ? यतः `तत्रोपपदं सप्तमीस्थम्' (3.1.92) इति द्वितीयधात्वधिकारे यत् सप्तमीनिर्दिष्टं तदुपपदसंज्ञं भवति, न च स्वशब्द एवंविध इत्याह-- `समीपे श्रूयमाणम्' इत्यादि। एतेनोपोच्चारितं पदमुपपदमित्यन्वर्थस्योपपदस्य ग्रहणम्, न पारिभाषिकस्येति दर्शयति। एतच्च पारिभाषिकस्यासम्भवाल्लभ्यते। `स्वं यज्ञम्' इत्यादिना पञ्चसूत्र्यां यदाद्यं सूत्रं तत्रोदाहरति। `स्वं पुत्रम्' इत्यादिना यद्द्वितीयं तत्र। `एवं पञ्चसूत्र्यामुदाहरार्यम्' इति। अन्यत्रापीति सेषः। पञ्चसूत्र्यन्तर्गते सूत्रे यदुदाहृतं ततोऽन्यत्राप्युदाहार्यमित्यर्थः । स्वं कटं कारयते, कारयति वा। स्वं व्रीहिं संयचछते, संयच्छति वा। स्वं भारमुद्यच्छते, उद्यच्छति वा। स्वं वस्त्रमायच्छते, आयच्छति वा। स्वं गां जानीते, जानाति वेति। एतानि `णिचश्च' (1.3.74) इत्यादिषु सूत्रेषु यथायोगमुदाहरणानि।।

78. शेषात्कर्तरि परस्मैपदम्। (1.3.78)

`पूर्वेण' इति। `अनुदात्तहितः' (1.3.12) इत्यादिना। `सर्वत्र प्राप्नोति' इति। अशेषेभ्योऽपि। `तदर्थमिदमुच्यते' इति। सर्वत्र परस्मैपदे प्रसक्ते तन्निवृत्त्यर्थम्; अर्थशब्दस्य निवृत्तिवचनत्वात्। तथा-मशकार्थो धूम इति। तदेनैतत् नियमार्थमित्युक्तं भवति। `येभ्यो धातुभ्यः' इत्यादिना शेषत्वं दर्शयति। `येन विशेषणेन'

इति। अनुबन्धादिना। `याति, वाति' इत्यनुबन्धशेषस्योदाहरणम्। `आविशति, प्रविशति' इत्युपसर्गशेषस्यार्थशेषस्यापि. एवं गन्धनादिभ्योऽन्यत्र करोतीत्येवमादिकमुदाहरणं वेदितव्यम्। ननु च शेषादित्यनेन पञ्चम्यन्तेन धातुसमानाधिकरणेन धातुरेव विशिष्यते, नार्थः, ततश्चाशेषेषु गन्धनादिष्वर्थेषु परस्मैपदं प्राप्नोति, नैतदस्ति; गन्धनादयो हि प्रकृतेरेवार्थाः, तत्रासौ शेषग्रहणान्निवर्त्तमानस्तानपि निवर्त्तयति।
`पच्यते, गम्यते' इति। ननु च यद्यत्र परस्मैपदं स्यात्, तदा `भावकर्मणोः' (1.3.13) इति वचनमनर्थकं स्यात्, अनवकाशत्वात्, नैतदस्ति; अस्ति हि तस्यावकाशः। कः पुनरसौ ? यो न शेषः-- आस्यते, शय्यते, क्रियत इति। अनुदात्तत्वं ङित्त्वञ्चाशेषः। `शेषात् कर्तरि' (1.3.78) इत्यत्र कर्त्तृग्रहणं सामान्यमुपात्तमिति यो देशयेत् तं प्रत्याह--`कर्मकर्त्तरि' इत्यादि। `कर्त्तरि कर्मव्यतीहारे' (1.3.14) इत्यादिना परिहरति। `कर्त्तैव यः कर्त्ता' इति। शुद्धो यः कर्त्ता, कर्त्तृवद्भावरहितो यः कर्त्तैत्यर्थः।।

79. अनुपराभ्यां कृञः। (1.3.79)

80. अभिप्रत्यतिभ्य क्षिपः। (1.3.80)
`अभिक्षिपति' इति। तुदादित्वाच्छःष।

81. प्राद्वहः। (1.3.81)

82. परेर्मृषः। (1.3.82)
`परिमृष्यति' इति। दिवादित्वाच्छ्यन्।।

83. व्याङपरिभ्यो रमः। (1.3.83)

84. उपाच्च। (1.3.84)
`उपाच्च' इति। चकारः पूर्वापेक्षया समुच्चयार्थः। `उपरमति देवदत्तम्' इति। ननु चोपपूर्वो रमिरकर्मक एव भवति। तथा ह्युपपूर्वस्यास्य विनाशोऽर्थो भवति; यथा-- उपरतानि, नष्टानीति गम्यते। निवृत्तिर्वा भवति, स्वाध्यायादुपरमते, निवर्तत इति गम्यते। न चास्मिन्नार्थे वर्तमानस्य सकर्मकत्वमुपपद्यते। तत्कतं सकर्मकस्योदाहरणं युज्यत इत्याह-- `उपरमयतीति यावत्' इति। एतेन ण्यर्थवृत्तितामुपरमतेर्दर्शयन् सकर्मकतामुपपादयतीति। अकर्मको हि धातुर्ण्यर्थे वर्तमानः सकर्मको भवति। अथ पुनरण्यन्तस्य ण्यर्थवृत्तितोपपद्यते कथम् ? स तथोक्तः। एवंविधस्य तस्य प्रयोज्येन सकर्मत्वमुपपद्यत एव।
अथ किमर्थं पृथग्योगः क्रियते ? `न व्याङपर्युपेभ्यो रमः' इत्येक एव योगः
क्रियतामित्याह-- `पृथग्योगकरणम्' इत्यादि। गतार्थम्।।

85. विभाषाऽकर्मकात्। (1.3.85)
`यावद्भुक्तम्' इति। `यावदवधारणे' (2.1.8) इत्यव्ययीभावः।`भुक्तम' इति। `नपवंसके भावे क्तः' (3.3.114) इति क्तप्रत्ययः। यावन्ति भोजनानि तावद्भ्यो निवर्त्तत
इत्यर्थः। अथ वा-- यावद्भुक्तमिति यथार्थे वीप्सायामव्ययीभावः। भोजनाद्भोजनन्निवर्त्तत इत्यर्थः।।

86. बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः। (1.3.86)
`बुध अवगमने' (धा.पा.1172), `युध सम्प्रहारे' (धा.पा.1173), `णश अदर्शने' (धा.पा.1194), `जनी प्रादुर्भावे' (धा.पा. 1149), `इह अध्ययने' (धा.पा.1046), `च्यङ' (धा.पा.955) छ्युङ्, ज्युङ (धा.पा.956), झयुङ प्रुङ (धा.पा.957) प्लुङ (धा.पा.958) गतौ `दु द्रु गतौ' (धा.पा.944, 945), `सु स्रु गतौ' (धा.पा.940)। `जनयति' इति। `जनीजृष्' (ग.सू.धा.पा.817) इत्यादिना मित्संज्ञा। मितां ह्रस्वत्वम्। `अध्यापयति' इति। `क्रीडजीनां णौ' (6.1.48) इत्यात्त्वम्। पूर्ववत् पुक्। `एतद्विषयाण्युदाहरणानि' इति। प्राप्तिविलयनस्यन्दनविषयाण्येतानि प्रावयतीत्याद्युदाहरणानि यथाक्रममित्यर्थः। स्यन्दनं चलनमिति लोके प्रसिद्धम्। ततोऽन्यत्र स्यन्दयतीति बोद्धयम्। प्रावयति = प्रापयति द्रावयति = विलापयति। स्रावयति = स्यन्दयतीत्यर्थः।

87.निगरणचलनार्थेभ्यश्च। (1.3.87)

`निगारयति' इति। `गृ निगरणे' (धा.पा.1410)। `आशयति' इति। `अश भोजने' (धा.पा.1523)। `भोजयति' इति। `भुज पालनाभ्यवहारयोः' (धा.पा.1046), `चलति' इति। `चल कम्पने' (धा.पा.832)। घटादित्वान्मित्त्वम्; पूववद्ध्रस्वः। `चोपयति' इति। `चुप मन्दायां गतौ' (धा.पा.403)। `कम्पयति' इति। `कपि चलने' (धा.पा.375)। अयमपि योगः सकर्मकार्थः, अचितत्वत्कर्त्तृकार्थश्चेति। तद्विपरीतेभ्यः `अणावकर्मकाच्चितवत्कर्त्तृकात्' (1.3.88) इत्यनेनैव सिद्धत्वात्। तत्र येषामुदाहरणान्युपन्यस्तानि, तेषु चलिकम्पी अकर्मकौ द्वौ; तयोरचितवत्कर्त्तृकार्थोऽयं योगः। शेषाणान्तु सकर्मकार्थः।

`वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्-- `विभाषाऽकर्मकात्' (1.3.85) इत्यतो विभाषाग्रहणं मण्डूकप्लुत्याऽनुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञायते। तेनादेरन्येभ्यो नित्यं परस्मैपदम्, अदेस्तु न भवत्येव। `आदयते देवदत्तेन' इति। अत्र `गतिबुद्धि' (1.4.52) इत्यादिना कर्मसंज्ञा न भवति; `आदिखादिनीवहीनां प्रतिषेधः' (वा.64) इति वचनात्।।

88. अणावकर्मकाच्चित्तवत्कर्त्तृकात्। (1.3.88)

`चेतयमानम्' इति। `चिती संज्ञाने' (धा.पा.39), चौरादिकः। अय़ञ्चाकर्मकश्चित्तवत्कर्तृकश्च। `हेतुमण्णिचो विधिः' इति। बुधादेः (1.3.86) सूत्रादिह णिज्ग्रहणमनुवर्त्तते, स च हेतुमण्णिजेव; बुधादिभ्योऽन्यस्य णिचोऽसम्भवात्। यतश्च हेतुमण्णिचो विधिः, प्रत्यासत्तेस्तस्यैव प्रतिषेधो युक्तः। यथाभूत एव विधिभाक्; तथाभूतेनैव प्रतिषेधभाजा भवितव्यम्; प्रत्यासत्तेः। तथा हि-- ब्राह्मणाः प्रवेश्यन्तामन्यताधीयानेभ्य इत्युक्ते यताजातीयकानां प्रवेशो विहितस्तथाजातीयकानामेव प्रत्यासत्तेः पर्युदासो विज्ञायते। `{आरोह्यमाणः'- इति मुद्रितः पाठः.} आरोह्यमाणम्' इति। णेरणावादि (1.3.67) सूत्रेणात्मनेपदम्। यद्यप्यत्र हस्तिपकान् प्रति हस्तिनः प्रयोजकत्वे विवक्षिते णिज्विहितः, तथापि ण्यन्तावस्थायां हस्तिपकाः प्रयोज्यत्वेन न विवक्ष्यन्ते; अन्यथा ह्यणौ यत्कर्म तदेव णौ कर्त्ता न स्यात्। तत्र प्रयोज्यत्वाविवक्षायामारोह्य-
माण इत्यस्य स्वयमेवारोहयतीत्येषोऽर्थो भवति। तमारोहयमाणं यदान्यः प्रयुङ्क्ते, तदा द्वितीयो हेतुमण्णिच्। तदन्तात् `णिचश्च' (1.3.74) इत्यात्मनेपदं भवति। तेनारोहयत इति युक्तमेव प्रत्युदाहरणम्।।

89. न पादम्याङ्यमाङ्यसमपरिमुहरुचिनृतिवदवसः। (1.3.89)

`पा' इति `लुग्विकरणालुग्विकरणायोरलुग्विकरणस्यैव ग्रहणम्' (व्या.प.50) इत्यनेन `पा पाने' (धा.पा.925) इत्यस्यैव ग्रहणम्, न `पा रक्षणे' (धा.पा.1056)इत्येतस्य। `दमु उपशमे' (धा.पा.1203), `यम उपरमे' (धा.पा.984), `यसु प्रयत्ने' (धा.पा.1210), आङ्पूर्वावेतौ। `मुह वैचित्ये' (धा.पा. 1198), परिपूर्वः, `रुच दीप्तौ' (745), `नृती गात्रविक्षेपे' (धा.पा.1116), `वद व्यक्तायां वाचि' (धा.पा.1009) `वस निवासे' (धा.पा.1005), आच्छादनार्थस्य वसेर्ग्रहणं पूर्वोक्तादेव हेतोर्न भवति। `पूर्वेण योगद्वयेन' इति। अन्तरेणेत्यर्थः। `नृतिश्चलनार्थोऽपि' इति। अपिशब्दाच्चितवत्कर्त्तृकार्थश्च। `पाययते' इति। `शाच्छासाह्वाव्यावेपां युक्' (7.3.37)। पातेस्त्वकर्मकत्वविवक्षायां परस्मैपदं भवति। `पालयति' इति। `पातेलुग्वक्तव्यः' (वा.2;7, 3.37) इत्युपसंख्यानाल्लुगागमः। `दमयते' इति। पूर्ववत् `मितां ह्रस्वः' (6.4.92)। `आयामयते' इति। ननु चात्रपिमित्वे सति ह्रस्वेन भवितव्यमित्यत आह-- `यमोऽपरिवेषणे' इति। तत्र हि `न कम्यमिचमाम्' (ग.सू.धा.पा.817)इत्यतो नेत्यनुवर्तते। `आङ'इति। ङिद्विशिष्टस्याकारस्योपबदानमुपसर्गप्रतिपत्त्यर्थम्। तेनोपसर्गप्रतिरूपको य आकारस्तस्य ग्रहणं न भवति।

`पादिषु धेट उपसंख्यानम्' इति। पादिष्विति विषयसप्तमी। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। धेटः पादिविषयस्य परस्मैपदप्रतिषेधस्य प्रतिपादनं कर्त्तव्यम्। योऽयं पादिविषयः परस्मैपदप्रतिषेधः,स धेटोऽपि भवतीत्यर्थः। तत्रेदं प्रतिपादनम्- नेति योगविभागः क्रियते, तेन धेटोऽपि प्रतिषेधो भविष्यति। यद्येवम्, नेत्यनेनैव सिद्धत्वात् पादीनां ग्रहणमनर्थकम् ? नानर्थकम्; पूर्वयोगस्यासर्वविषयात्वज्ञापनार्थत्वात्। `धापयेते' इति। `धेट पाने' (धा.पा.902) `आदेचः' (6.1.45) इत्यादिनात्त्वम्, पूर्ववत् पुक्। `शिशुम्' इति। `गतिबुद्धि' (1.4.52) इत्यादिना कर्मसंज्ञायां द्वितीया।।

90. वा क्यषः। (1.3.90)

`लोहितायति' इति। अलोहितो लोहितो भवतीत्यत्रार्थे `लोहितादिडाज्भ्यः क्यष्' (3.1.13)इति क्यष्। `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः। `पटपटायति' इति। पटच्छब्दस्य डाचि विषयभूते `डाचि बहुलं द्वे' (वा.888) इत्युपसंख्यानाद्द्विर्वचनम्, `अव्यक्तानुकरणात्' (5.4.57) इत्यादिना डाच्, `नित्यमाम्रेडिते डाचि'(6.1.100) इति पटशब्दस्य योऽन्त्यस्तकारः, यश्च तस्मात्परः पकारः-तयोः

`कथम्' इति। न कथञ्चिदित्यर्थः। किं कारणं न लभ्यत आह-- `यावता' इत्यादि। आत्मनेपदं हि `अनुदात्तङितः' (1.3.12) इत्यादि नियतम्, अतो न शक्यते क्यषन्ताद्विज्ञातुमिति। `एवं तर्हि' इत्यादिना परिहरति। `विकल्पितम्' इति विभाषितम्, पाक्षिकमित्यर्थः। ननु चात्मनेपदं परस्मैपदेन व्यवच्छिन्नम्, अतोऽसन्निहितत्वान्न शक्यते विज्ञातुमित्याह-- `तच्च'इत्यादि। कर्त्रभिप्राये क्रियाफले विवक्षित आत्मनेपदं प्राप्ते तदपवादेन `अमावकर्मकात्' (1.3.88) इत्यादिना योगद्वयेन परस्मैपदं विहितम्। तस्यापवादस्यानन्तरसूत्रेण यः प्रतिषेधो विहितः, तेनापवादेन परस्मैपदमपनयतात्मनेपदं सन्निधापितम्। अपवादे ह्यपनीते नियोगत एवोत्सर्गेण भवितव्यम्। तदेवं प्रतिषेधेन सन्निधापितमिहात्मनेपदं सम्बध्यते। यदि तर्ह्यनेन कर्तर्यात्मनेपदमेव विकल्पेन विधीयते, पक्षे

परस्मैपदं कथं लभ्यत इत्याह-- `तेन' इत्यादि।।

91. द्युद्भ्यो लुङि। (1.3.91)
ननु च द्युतेरेकत्वाद्बहुवचननिर्देशो नोपपद्यत इत्याह-- `तत्साहचर्यात्' इत्यादि। यथैकेन छत्त्रिणा साहचर्यादन्येऽपि तत्सहचारिणश्छत्रिण इत्युच्यन्ते-- छत्रिणो गच्छन्तीति, तथेहापि द्युतिना साहचर्यात् श्वितादयोऽपि `द्युत' इति व्यपदिश्यन्ते। कथं पुनरेकस्य व्यपदेशे सत्ययमभिप्रेतोऽर्थः सम्पद्यत इत्याह-- `बहुवचननिर्देशात्' इत्यादि। एं हि विनाऽप्यादिशब्देन तदर्थो लभ्यत इत्येषोऽर्थः सम्पद्यत इति दर्शयति। `कृपूपर्यन्ताः'इति। अनेन कृपेः परे ये पठ्यन्ते ते द्युतादयो न भवन्तीत्याचष्टे। एतच्च तदनन्तरं वृत्करणाद्गणपरिसमाप्तेर्लिङ्गाद्विज्ञायते। `व्यद्युतत्' इति। पुषादित्वादङ। यद्येवम्, तत एवाङविधानात् परस्मैपदं तेभ्यो भविष्यति, किमनेन योगेन ? नैतदस्ति; ज्ञापकाद्धि नित्यं लुङि परस्मैपदं विज्ञायते। किञ्च लुङोऽन्यत्रात्मनेपदं न भवतीति सम्भाव्येत। ननु चानुदात्तेत्करणसामर्थ्यादन्यत्र न भविष्यति, नैतत्; अनुदात्तेत्करणम् `अनुदात्तेतश्च हलादेः' (3.2.149) इति युजर्थं स्यात्। तस्मात् कर्त्तव्योऽयं योगः। अलुठत्। `रुठ लुठ प्रतीघाते' (धा.पा.747, 749)।।

92. वृद्भ्यः स्यसनोः। (1.3.92)
`स्यसनोः' इति। सती सप्तमीयम्। वर्त्स्यतीत्यादौ `सेऽसिचि' (7.2.57) इत्यादेः सूत्रादसिचि स इत्यनुवर्त्तमाने `गमेरिट् परस्मैपदेषु'(7.2.58) इत्यतः परस्मैपदे च `न वृद्भ्यश्चतुर्भ्यः' (7.2.59) इतीट्प्रतिषेधः। आत्मनेपदं त्विड्भवत्येव। `विवृत्सति' इति। `हलन्ताच्च' (1.2.10) इति कित्वाद्गुणाभावः।।

93. लुटि च क्लृपः। (1.3.93)
`चकारस्तर्हि' इत्यादि। स्यसनोर्वृतादित्वादेव सिद्धे विकल्प इत्यभिप्रायः। `एवं तर्हि'इत्यादिना विशेषविधानं सामान्यविधानस्य बाधकं भवतीति विज्ञायते। ननु च
यदीयं प्राप्तिः कृपेः प्राप्तिं बाधते, द्युतादिषु पाठस्य तस्यानर्थक्यं प्रसज्येत ? नैतदस्ति; अङर्थत्वात्। ननु च स्यसनोरिति स्वरितत्वमिष्यते, तेन तस्य बाधा न भविष्यतीति, सत्यमेतत्; सूत्रकारस्तु चकारं वैचित्र्यार्थं चकार, न स्वरितत्वार्थम्। `कल्प्ता' इति। पूर्ववदधिकारद्वयानुवृत्तौ सत्यां `तासि च क्लृपः' (7.2.60) इतीट्प्रतिषेधः। `लुटः प्रथमस्य डारौरसः' (2.4.85) इति डादेशः। `कृपो रो लः' (8.2.18) इति लत्वम् `चिक्लृप्सति' इति। पूर्ववत् कित्वाद्गुणाभावः।।
इति श्रोबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
प्रथमाध्यायस्य
तृतीयः पादः

1.4

अथ प्रथमाध्यायस्य
चतुर्थः पादः

1.आ कडारादेका संज्ञा। (1.4.1)
`या परा' इति। यत्र विप्रतिषेधस्तत्र `विप्रतिषेधे परम्' (1.4.2) इति वचनात् परा भवति। `अनवकाशा च या' इति। यस्याः संज्ञायाः क्वचिदवकाशो नास्ति, साऽप्यपवादभूत्वात् संज्ञान्तरं बाधित्वा प्रवर्त्तते। यद्येवम्, अत एव संज्ञासमावेशो न भविष्यति, तत् किमेकसंज्ञाधिकारेण ? नैतदस्ति, विरोधे हि सत्यपवादभूतत्वं भवति। विप्रतिषेधस्तु विरोध एव, स च विरोध एकसंज्ञाधिकारे सति भवति, नासति; तथा हि यत्रैकसंज्ञाधिकारो नास्ति, तत्र विप्रतिषेधो नास्त्येव, यथा-- प्रत्ययादीनां संज्ञायाम्; तस्मादस्मिन्नधिकारे सति विरोधो भवति। तस्मिंश्च सति `विरोधे परम्' इति वचनात् परा भवति, ऽपवादभूतत्वादनवकाशा च। तस्मात् कर्त्तव्योऽयमधिकारः।
यद्येवम्, अङसंज्ञायां भपदसंज्ञयोः समावेशो वक्तव्यः-- बाभ्रव्यः, धानुष्क इति। बभ्रुशब्दात् `मधुबभ्र्वोर्ब्राह्मणकौशिकयोः' (4.1.106) इति यञ्। तत्र भत्वात् `ओर्गुणः' (6.4.146) अङ्गत्वादादिवृद्धिः, तत्र `वान्तो यि प्रत्यये' (6.1.79) इत्यवादेशः; धनुःशब्दाच्च धनुः प्रहरणमस्य `तदस्य प्रहरणम्' (4.4.57) इति ठक्; `इसुसुक्तान्तात्कः' (7.3.51) इति कादेशः, अत्र पदत्वात् `इणः षः' (8.3.39) इति षत्वम्।

अङ्गत्वादादिवृद्धिर्न वक्तव्या। `वा क्यषः' (1.3.90) इततो वाग्रहणमनुवर्तते, सा च व्यवस्थितविभाषा। तेन क्वचित् संज्ञासमावेशो भविष्यतीति। `अन्यत्र ' इति। लोके च, शास्त्रे च। लोके तावत्-- इन्द्रः, शुक्रः, पुरन्दर इति संज्ञायाः समावेशो दृष्टः। शास्त्रेऽपि प्रत्ययः,कृत्, कृत्यप्रत्ययः। एवमन्यत्र संज्ञासमावेशादिहापि स्यात्, अतएवैका संज्ञा यथा स्यादिति नियमार्थमेतत्। `भिदिच्छिदिः' इति। लघुसंज्ञाया अवकाशः। प्रयोजनं तु-- `भेत्ता, छेत्ता' इति। `पुगन्तलघूपधस्य' (7.3.86) इति गुणः। `शिक्षिर्भिक्षिः' इति। गुरुसंज्ञाया अवकाशः। प्रयोजनं-- `शिक्षा, भिक्षा' इत। `गुरोश्च हलः' (3.3.103) इत्यकारप्रत्ययः। लघुसंज्ञा त्वत्र प्रयोजनाभावान्न भवति। इहोभयं प्राप्नोति-- `अततक्षत्, अररक्षत्' इति। परत्वाद्गुरुसंज्ञैव भवति। `तक्षूत्वक्षू तनूकरणे' (धा.पा.655, 656), `रक्ष पालने' (धा.पा.65र8), हेतुमण्णिच्, लुङ, च्लेश्चङ, णिलोपः, `चङि' (6.1.11) इति द्वर्वचनम्। यद्यत्र लघुसंज्ञा स्यात्, `सन्वल्लघुनि' (7.4.93) इत्यादिना सन्वद्भावादित्वं स्यात्। तदभावान्न भवतीत्याह-- `सन्वल्लघुनि' इत्यादि। `एष विधिः ' इति। सन्वद्भावविधिः। परस्या इदमुदाहरणमुक्तम्। अनवकाशायास्तूच्यते-- अयन्ते योनिर्त्रत्त्विय इति। ऋतुः प्राप्तोऽस्तेति `ऋतोरण्' (5.1.105) `छन्दसि घस्' (5.1.106) इति घस्; तस्येयादेशे कृते `सिति च' (1.4.16) इति पदसंज्ञा प्राप्नोति, `यचि भम्' (1.4.18) इति भसंज्ञा च, अनवकाशत्वात् पदसंज्ञैव भवति। यदि भसंज्ञा स्यात् तदा `ओर्गुणः' (6.4.146) इति गुणः स्यात्। भसंज्ञायास्त्वौपगवादिष्ववकाशः। आ कडारादितीयतोऽवधेर्ग्रहणं वैचित्र्यार्थम्; अन्यथा हि `आ द्वन्द्वात इत्येवं ब्रूयात्। न हि द्वन्द्वसंशब्दानात् परेणाकडारादेकसंज्ञाविधानस्य प्रयोजनमस्ति; यत एतावतोऽवधेर्ग्रहणमर्थवद्भवति।।

2. विप्रतिषेधे परं कार्यम्। (1.4.2)

`विरोधो विप्रतिषेधः ' इत। विप्रतिषेधशब्दस्य लोके विरोधवाचित्वेन प्रसिद्धत्वात्। तथा हि-- विरुद्धेऽभिहिते वक्तारो वदन्ति-- `विप्रतिषिद्धमिदमुच्यते' इति, विरुद्धमिति गम्यते। तस्य विप्रतिषेधस्य विषयं दर्शयितुमाह-- `यत्र' इत्यादि। प्रसज्येते विधीयेते इति प्रसङ्गौ = विधी। `अन्यार्थौ' इति। अन्यत्र विषयेऽर्थः प्रयोजनं ययोस्तौ तथोक्तौ। अन्यत्र विषयान्तरे कृतार्थावित्यर्थः। `एकस्मिन्' इति। अभिन्ने। युगपत् = एककलाम्। स इत्यस्य विप्रतिषेध इत्यने सम्बन्धः। स विप्रतिषेधो विप्रतिषिद्धः, विप्रतिषेधस्य विषय इत्यर्थः। विप्रतिषेधविषयत्वाद्विप्रतिषेदविषयो ह्यत्र विप्रतिषेधशब्देनोक्तो विषयिणा विषयं दर्शयितुम्। यस्मान्न प्रसङ्गो विप्रतिषेध उपपद्यते, नापि तदाधारः। `तुल्यबलविरोधः' इति। तुल्यबलयोर्विरोधोऽस्मिन्निति बहुव्रीहिः। इदं जातिपक्षमाश्रित्य विवरणं कृतम्। द्रव्यपदार्थपक्षे त्वयं विशेषः-- अन्यः= भिन्नोऽर्थः = प्रयोजनं यतोस्तावन्यार्थाविति। शेषं समानम्। `विप्रतिषेधे' इति च सती सप्तमीयम्।

`उत्सर्गापवाद' इत्यादि। विप्रतिषेधो यत्रास्ति, सोऽय योगस्यावकाशः। विप्रतिषेधञ्च तुल्यबलयोरेव भवतीति नातुल्यबलयोः। एतत्तु `यत्र हि प्रसङ्गावन्यार्थौ'इत्यादिग्रन्थेन तस्य विषयं दर्शयता व्याख्यातम्। न चोत्सर्गापवादादिषु तुल्यबलतास्तीति, ततो नासावुत्सर्गापवादादिरस्य योगस्य विषयः। तेन बलवानेव तत्र भवति; तत्र सामान्येनोत्सर्गः प्रवर्त्तते; यथा--`आर्धधातुकस्येड्वलादेः' (7.2.35) इति, वलादिसामान्यस्येड्विधानात्। विशेषोऽपवादः, यथा-- नेड वशि कृति' (7.2.8) इतीट्प्रतिषेधस्य वलादिविशेषे वशादौ कृति विधानात्। यस्य च विशेषे विधिः, स बलवान् भवति; तथा हि-- ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्यायेति विशेषविहितं तक्रदानां सामान्यविहितस्य दधिदानस्यैव बाधकं भविष्यति। तस्माद्वशादौ कृति परेऽपीडागमो न भवति, प्रतिषेध एव भवति-- `स्थेशभासपिसकसो वरच' (3.2.175) ईश्वर इति।

नित्यानित्ययोर्नित्यं बलवत् यथा- `भिस ऐस्' (7.1.9) इत्यैत्वम्। तद्धि `बहुवचने झल्येत्' (7.3.103) इत्येत्त्वे कृते प्राप्नोति। अकृतेऽपि-- भूतपूर्वगत्याश्रयणादकारान्तादङ्गद्भिस ऐस् विहित इति कृत्वा। यश्च कृताकृतप्रशङ्गी विधिः स नित्य इति। तथा च तत्र (7.1.9) वक्ष्यति--

एत्त्वं भिसि परत्वाच्चेदत ऐस् क्व भविष्यति।

कृतेऽप्येत्त्वे भौतपूर्व्यादैस्तु नित्यस्तथा सति।।

इति स नित्यः। ऐस्त्वे एत्त्वं न प्राप्नोति; निमित्तस्य झलादेर्विहितत्वात्। वृक्षेष्व्तयादादेत्त्वस्यावकाशः, अस्मिंश्च सति भूतपूर्वगत्याश्रयणस्यायुक्तत्वात्। तस्मात् तदनित्यम्। यच्चानित्यं तत् परस्य भावाभावमपेक्षत इति दुर्बलम्। विपर्ययात् तु नित्यं बलवत्। तेन वृक्षैरिति परमप्येत्त्वं न भवति। ऐस्भाव एव तु भवति।

अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलवदिति लोकत एव दृष्टत्वात्। लोको हि प्रातरुत्थायान्तरङ्गाणि मुखप्रक्षालनादीनि कार्याणि करोति, पश्चद्बहिरङ्गाणि राजगृहगमनादीनि कार्याणि कर्त्तुमारभते। शास्त्रेऽप्येवं वेदितव्यम्। दिवि कामोऽस्य द्युकामः, तस्यापत्यम् `अत इञ्' (4.1.95) द्यौकामिः. यद्यपि द्युकामशब्दादिञ् विहितः, तथापि `अकृतव्यूहाः पाणिनीयाः' (व्या.प.84) कृतमपि शास्त्रं निवर्त्तयन्तीति,प्रविभ्जायन्वाख्याने दिव् काम इञिति स्थिते `दिव् उत्' (6.1.131) इत्युत्त्वे कृते यणादेशः प्राप्नोति, `तद्धितेष्वचामादेः' (7.2.117) इति परत्वात् वृद्धिः प्राप्नोति ? अन्तरङ्गत्वाद्यणादेशः पूर्वो विधिः क्रियते, पश्चाद्वृद्धिरुकारस्य। अन्तरङ्गत्वन्तु यणादेशस्य वर्णाश्रयत्वात्। वृद्धेस्तु बाह्यतद्धिताश्रयाद्बहिरङ्गत्वम्। `वार्णादाङ्गं बलीयः' (व्या.प.39) इत्येतदिह न प्रवर्तते; व्याश्रयत्वात्।

`अप्रवृत्तौ' इत्यादि। यदा `आकृतिः पदार्थः'इत्येष पक्ष, तदाऽन्यत्र कृतार्थत्वाच्छास्त्रयोर्विप्रतिषेधे सति परस्परप्रतिबन्धादप्रवृत्तिरेव प्राप्नोति; यथा-- यदिह द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति, तौ च युगपत् प्रेषयतः, नानादिक्षु तयोः कार्ये भवतः। ततो यद्यसावविरोधार्थी भवति तदोभयोरपि कार्ये न प्रवर्तते। द्रव्ये पदार्थे तु प्रतिव्यक्ति लक्षणं प्रवर्त्त इत्यकृतार्थत्वल्लक्षणयोः पर्यायेण प्रवृत्तिः प्राप्नोति, यथा-- ब्राह्मणक्षत्रियादीनामसहभुजामेकस्मिन् भाजने भुजक्रियायां पर्यायः स्यात्। तत्र जातौ पदार्थे कृतार्थत्वाद्वृत्तौ प्राप्तयां विध्यर्थमिदमारभ्यते-- विप्रतिषेधे सति परं कार्यं भवतीति। तत्र कृते यदि पूर्वमपि प्राप्नोति, तदपि

भवत्येव। तत्रेदमुच्यते-- पुनः प्रसङ्गविज्ञानात् सिद्धमिति। व्यक्तौ तु पदार्थेऽकृतार्थत्वात् शास्त्रयोः पर्यायेण प्रवृत्तौ प्राप्तयां नियमार्थमिदम्-- विप्रतिषेधे परमेव भवति न पूर्वमिति। तत्रेदमुच्यते-- `सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' (व्या.प.40) इति।

3. यू स्त्र्याख्यौ नदी। (1.4.3)

`ई च ऊ च यू' इति। ननु च `दीर्घाज्जसि च' (6.1.105) इति प्रथमयोः पूर्वसवर्णदीर्घत्वे प्रतिषिद्धे यणादेशे सति य्वाविति भवितव्यम्. तत्कथं `यू' इति निर्देश इत्यत आह-- ` अविभक्तिकोऽयं निर्देशः' इति। `सुपां सुलुक्' (7.1.39) इति विभक्तिर्लुप्तत्वात्। नास्माद्विभक्तिर्विद्यत इत्यविभक्तिकः।
`स्त्रियमाचक्षाते स्त्र्याख्यौ' इति। ननु च `कर्मण्यण्' (3.2.1) इत्यणि कृते `आतो युक् चिण्कृतोः' (7.3.33) इति युकि च स्त्र्याख्यायाविति भवितव्यम्, तत्कथं स्त्र्याख्याविति ? `आतोऽनुपसर्गे कः' (3.2.3) इति कप्रत्यये कृत एतद्रूपमिति चेत्, न; चक्षिङोऽत्र सोपसरग्त्वादित्यत आह-- `मुलविभुजादिदर्शनात्' इति। मूलविभुजादिष्वपि कप्रत्यय इष्यते। तथा च वक्ष्यति तृतीयेऽध्याये कप्रकरणे-- `मूलविभुजादिभ्य उपसंख्यानम्' (वा.232) इति। तेन `स्त्र्याख्यौ' इति शब्दस्य मूलविभुजादिषु दर्शनात् कप्रत्ययः।
इहेदूतोरेवेयं संज्ञा विधीयते ? तदन्तयोर्वा ? तत्र यद्याद्यः पक्ष आश्रीयेत, कृत्स्त्रियां न स्यात्-- हे लक्ष्मि, हे यवाग्विति; समुदायौ ह्यत्र स्त्र्याख्यौ, न त्वीदूताविति। इममाद्ये पक्षे दोषं दृष्ट्वा द्वितीयं पक्षमाश्रित्याह -- `ईकारान्तमूकारान्तम्' इत्यादि। ननु च `सुप्तिङन्तं पदम्'(1.4.14) इत्यत्रान्तग्रहणादन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्न लभ्यते, नैष दोषः; यदयम् `नेयङवङस्थानौ' (1.4.4) इति प्रतिषेधं शास्ति; तज्ज्ञापयति-- भवतीह प्रकरणे तदन्तविधिरिति ; अन्यथा प्रतिषेधोऽनर्थकः स्यात्। न हीकारोकारमात्रं स्त्र्याख्यामियङस्थानमस्ति,किं तर्हि ? तदन्तम्। `कुमारी' इति। `वयसि प्रथमे' (4.1.20) इति ङीष्। `गौरी' इति। `षिद्गौरादिभ्यश्च' ((4.1.41) इति ङीष्। `शार्ङरवी' इति। `शार्ङरवाद्यञो ङीन्' (4.1.73)। `लक्ष्मीः' इति। `लक्ष दर्शनाङ्कयोः' (धा.पा.1538) `अवितृस्तृतन्त्रिभ्य ईः' (द.उ.1.82) इत्यनुवर्त्तमाने `लक्षेर्मुट् च' (द.उ.1.84) चकारादीकारश्च। `ब्रह्मबन्धूः' इति। `ऊङुतः' (4.1.66) इत्यूङप्रत्ययः। ङकारः `नोङधात्वोः' (6.1.175) इति विशेषणार्थः। `यवागूः' इति। `यू मिश्रणे' (धा.प.ा1033) `सुयूवचिभ्योऽन्युजागूजक्नुच्' (द.उ.10.4) इत्यागूच्प्रत्ययः। रूपोदाहरणान्येतानि।कार्यं तु `अम्बार्थनद्योर्ह्रस्वः'(7.3.107) इत्येवमादि।
`मात्रे, दुहित्रे' इत्यत्र नदीसंज्ञाया अभावात् `आण् नद्याः' (7.3.112) इत्याण् न भवति। `ग्रामणीः, खलपूः' इति। पंस्येतौ वर्त्तेते। तेन नतीसंज्ञाया अभावात् `अम्बार्थनद्योर्ह्रस्वः' (7.3.107) इति ह्रस्वो न भवति। ग्रामं नयतीति `सत्सूद्विष' (3.2.61) इत्यादिना क्विप्। `अग्रग्रामाभ्याञ्च' (का.वा.5064) इति णत्वम्। खलं पुनातीति `अन्यभ्योऽपि दृश्यते' (3.2.178) इति क्विप्। `ग्रामण्ये स्त्रियै' इति। `एरनेकाचोऽसंयोगपूर्वस्य' (6.4.82) इति यणआदेशः। `खलप्वे स्त्रियै' । अत्रापि ओः सुपि' (6.4.83) इति। अत्र स्त्रीशब्देन पदान्तरेण स्त्रीत्वं द्योत्यत इति नदीसंज्ञा न भवति, तेनाण्न भवति। इष्वशनिप्रभृतीनां तूभयलिङ्गानां शब्दार्थ एव स्त्रीत्वमिति भवत्येव नदीसंज्ञा-- इष्वै, अशन्या इति। यदि पदान्तरद्योत्ये स्त्रीत्वे नदीसंज्ञा न भवति, इह पट्वै स्त्रिया इति पटुशब्दस्य पुरुषेऽपि दृष्ट्त्वात् पदान्तरद्योत्यमत्र स्त्रीत्वमिति नदीसंज्ञा न स्यात्, नैतदस्ति; पदान्तरं हि दविविधम्- क्वचित्सामान्येन प्रवृत्तिमाशङ्कमानस्य शब्दस्य सामान्यस्याभिधेयान्तरं व्यवच्छिनत्ति, यथा-- गोशब्दस्य गवादिषु गौर्वागिति; क्वचित् प्रवृत्तिमेव करोति , यथा-- वाहीकादौ गौर्वादीक इति। अत्र यत् सामान्यस्य शब्दस्य पट्वादेः पदान्तरसम्बन्धेन विशेषेऽवस्थानं तत् पदेऽन्तर्भूतमेवेत्याख्याग्रहणेन नापनीयते। ग्रामणीशब्दस्य तु स्त्रीत्वप्रवृत्तिः पदान्तरेण क्रियते,न तु व्यवच्छिद्यते। तेनासावाख्याग्रहणेनापसार्यते। एतयोस्तु क्रियाशब्दत्वेन रूढा पुंसिमुख्या वृत्ति। पटुशब्दस्य पाटवोपादयिनः परत्र मुख्येऽपीत्यस्ति भेदः।

4.नेयङुस्थानावस्त्री। (1.4.4)

`इयङुवङस्थानौ यौ यू तौ नदीसंज्ञकौ न भवतः' इति। यूद्वारेण य्वन्तस्यायं प्रतिषेधो विज्ञायते, न केवलयोः; प्राप्त्यभावात्. न हि यू केवलावियङुस्तानौ स्त्र्याख्यौ विद्येते। `हि श्रीः, हे भ्रूः' इति। अत्र नदीसंज्ञाया अभावात् तन्निबन्धनः `अ म्बार्थनद्योर्ह्रस्वः' (7.3.107) इति ह्रस्वो न भवति। `श्रिञ् सेवायाम्' (धा.पा.897) `क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसम्प्रासारणञ्च'(वा. 288) इति क्विपि दीर्घत्वे कृते श्रीरिति भवति। `भ्रमु अनवस्थाने' (धा.पा.1205) इत्यस्मात् `भ्रमेर्डूः' (द.उ.1.177) इति डूप्रत्यये टिलोपे भ्रुरिति भवति। उभयोः `अचि श्नुधातु' (6.4.77) इत्यादिनेयङुवङोर्विधानादियङुवङस्थानौ यू भवतः।
`हे स्त्रि' इति। `ष्ट्यै स्त्यै शब्दसंधातयोः' (धा.पा.911,910)। `आदेच उपदेशेऽशिति (6.1.45) इत्यात्त्वम्; स्त्यायतेर्ड्रट, `टेः'(6.4.155) इति टिभागलोपः; `लोपो व्योर्वलि' (6.1.66) इति वाकरस्य लोपः, `टिट्ढा' (4.1.15) इत्यादिना ङीप्। अत्र नदीसंज्ञायाः प्रतिषेधाभावात् ह्रस्वत्वं भवत्येव। स्त्रीशब्दस्य `स्त्रियाः' (6.4.79) इतीयङविधानादियङस्थान ईकारः।
अथ स्थानग्रहणं किमर्थम् ? इयङुवङस्थानयोः प्रतिषेधो यथा स्यादिति चेत् ? न; यद्येतत् प्रयोजनमभिमतं स्यात् `इयङुवङोः' इत्येवं वाच्यम्। एवमप्ययमेवार्थः--- इइयङुवङोः सम्बन्धौ यौ यू तयोर्नदीसंज्ञा न भवतीति। कौ च तयोः सम्बन्धिनौ यू ? यौ तयोः प्रकृतिभुतावियङुवङरस्थानाविति, अन्तरेणापि स्थानग्रहणमियङुवङस्थानयोः प्रतिषेधो विज्ञास्यते। इदं तर्हि स्थानग्रहणस्य प्रयोजनम्-- यत्रेयङ्वङोः स्थितिरभिनिवृत्तिस्तत्र प्रतिषेधो यथा

स्यात्। यत्र त्वपवादेन तयोर्बाधस्तत्र मा भूदिति-- आध्यै, वर्षाभ्वै इति। `ध्यै चिन्तायाम्' (धा.पा.908) `अन्यभ्योऽपि दृश्यते' (3.2.178) इति क्विप्; सम्प्रसारणञ्च। सम्प्रसारणन्तु दृशिग्रहणाल्लभ्यते। तथा हि तत्रैव दृशिग्रहणं विध्यन्तरोपसंग्रहार्थम्। क्वचिद्दीर्घः, क्वचिद्द्विर्वचनमित्युक्त्वा `ध्यायतेः सम्प्रसारणञ्च' (वा.292) इति वक्ष्यति। कृतसम्प्रसारणस्यैव चतुर्थ्येकवचने `एरनेकाचः' (6.4.82) इत्यादिना यणादेशः। वर्षाभूशब्दस्यापि `वर्षाभ्वश्च' (6.4.84) इति।

5.वाऽऽमि। (1.4.5)

संहितासाम्येऽपि षष्ठीबहुवचनस्यामो ग्रहणम्, न तु द्वितीयैकवचनस्य; तत्र नदीसंज्ञाकार्याभावात्। नापि सप्तम्यादेशस्यामो ग्रहणम्; तस्य नदीसंज्ञोत्तरकालं `ङेराम्नद्याम्नीभ्यः' (7.3.116) इत्याम्विधानात्। `श्रीणात्र' इति। नदीसंज्ञापक्षे `ह्रस्वनद्यापो नुट्' (7.1.54) इति नुट्। इह स्त्र्याख्यादिति वर्त्तते, विभक्तिसम्बन्धेन चेयं नदीसंज्ञा विधीयत इति विभक्तिसम्बन्धिन एव शब्दरूपस्य स्त्र्याख्यस्य नदीसंज्ञा युक्ता, तेन यत्रावयवस्त्र्याख्यः, तत्र नदीसंज्ञा न भवति-- अतिश्रियां ब्राह्मणानाम्, अतिभ्रुवां ब्राह्मणानामिति।।

6. ङिति ह्रस्वश्च। (1.4.6)

यद्यत्र ह्रस्वविशेषणार्थ `यू' इति नानुवर्त्तते इति नानुवर्त्तते, तदेहापि स्यात्-- मात्रे दुहित्रे इति; तस्मात् तदिहानुवर्त्तते। अनुवर्त्तमानमपि यदि प्रथमान्तमनुवर्तते, तदा प्रथमान्तयोर्ह्रस्वत्वं प्रति विशेषणविशेष्यभावो नोपपद्यते। तस्मात् तदिहार्थात् षष्ठ्यन्तमुपजायत इत्यत आह-- `ह्रस्वश्च य्वोः सम्बन्धी' इति। कः पुनस्तयोः सम्बन्धी ह्रस्वः ? यस्तयोर्ह्रस्वः सवर्णः; तेन सामर्थ्यादिकारोकारयोर्ग्रहणम्, न हि ताभ्यामन्यो ह्रस्व ईदुतोः सवर्णः सम्भवति। `कृत्यै, कृतये' इति। यदा नदीसंज्ञा तदा पूर्ववदाट्, अन्यथा तु `शेषो ध्यसखि' (1.4.7) इति धिसंज्ञकत्वात् `घेर्ङिति'(7.3.111) गुणः। अत्रापि यत्र विभक्तिसम्बन्धिनः शब्दरूपस्यावयवः स्त्र्याख्यस्तत्र पूर्वोक्तया रीत्या नदीसंज्ञा न प्राप्नोति-- अतिकृतये ब्राह्मणाय, अतिश्रियेति।।

7.शेषो घ्यसखि। (1.4.7)

`सख्या' इति। घिसंज्ञाया `आङो नास्त्रियाम्' (7.3.120) इति नाभावो न भवति। `सख्ये, सख्युः' इत्यत्रापि `घेर्ङिति' (7.3.111) न गुणः। `सख्यौ' इत्यत्र `अच्च घेः' (7.3.119) इत्यत्त्वं न भवति। `इदुद्भ्याम्' (7.3.117) `औत्' (7.3.118) इत्यौत्त्वं भवति। सख्युरित्यत्रापि `ख्यत्यात् परस्य' (6.1.112) इत्युक्तम्। इह शोभनः सखाऽस्येति सुसखिरिति; सुसखेरागच्छतीत्यत्र तदन्तविधिना प्रतिषेधः प्राप्नोति, स च `ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' (व्या.प.89) इति प्रतिषेधान्न भवति। इह द्विविधा घिसंज्ञा-- अवयवाश्रया, समुदायाश्रया च। तत्र याऽवयवाश्रया सा प्रतिषिध्यते, या पुनः समुदायाश्रया सा च भवत्येव; तस्या अप्रतिषेधात्।।

8.पतिः समसा एव। (1.4.8)

`पतिशब्दस्य सिद्धायां घिसंज्ञायाम्' इति। अनन्तरसूत्रेणैवेति शेषः। `प्रजापतिना' इति षष्ठीसमासः। यदि सिद्धायां घिसंज्ञायामिदमारभ्यते तदा `सिद्धे सत्यारम्भो नियमार्थः' (दु.सि.का.सू.वृ.59) इति विनाप्येवकारेण लभ्यत एव नियमः, तत् किमर्थमेवकारकरणमित्यत आह-- `एवकारकरणम्' इत्यादि। विना ह्येवकारेण विपरीतमप्याशङ्क्येत-- पतिरेव समसा इति। ततश्च दृढमुष्टिनेत्यादौ न स्यात्, एवकारे तु सति भवतीति। तथा ह्यतर् समासशब्दादनन्तरं प्रयुज्यमानं यत एवकारकरणं ततोऽन्यत्रावधारणमिति पतिशब्द एव नियम्यते, न समासः।।

9. षष्ठीयुक्तश्छन्दसि वा। (1.4.9)

अत्र यदि पतिशब्दः षष्ठीविभक्त्यन्तो घि ज्ञो भवतीत्येषोऽर्थोऽभिमतः स्यात्, तदा युक्तग्रहणमनर्थकं स्यात्; षष्ठीत्यवं ब्रूयात्। तस्माद्युक्तग्रहणे सति षष्ठ्यन्तशब्दान्तरेण युक्त इत्येषोऽर्थो विज्ञायत इत्यत आह-- `षष्ठ्यन्तेन' इत्यादि। यदि पुनः पतिशब्दस्य षष्ठ्यन्तस्य घिसंज्ञा स्यात्, तदा किं स्यात् ? पत्युरित्यत्रैव स्यात्, इह तु न स्यात्-- क्रुञ्चानामपतये नम इति।

`मया पत्या' इति। तृतीयायुक्तोऽत्र पतिशब्दः। अस्मदः `मपर्यन्तस्य' (7.2.91) `त्वमावेकवचने' (7.2.97) इति मादेशः। `योऽचि' (7.2.89) इति यकारः।।

10. ह्रस्वं लघु। (1.4.10)

`भेत्ता' इति। `पुगन्तलघूपधस्य च' (7.3.86) इति गुणः। `अचीकरत्' इत। कृञो णिच्, लुङ, अडागमः, च्लेश्चङ, णिलोपः,`णौ चङ्युपधायाः' (7.4.1) इति ह्रस्वः। `ओः पुयण्ज्यपरे' (7.4.80) इति वचनं ज्ञापकम्-- णौ कृतं स्थानिवद्भवतीति। `चङि' (6.1.11) इति कृशब्दो द्विरुच्यते। `उरत्' (7.4.66) इत्यत्त्वम्, रपरत्वम्, `सन्वल्लघुनि' (7.4.93) इति लघुसंज्ञायां सत्यां सन्वद्भावादित्त्वम्, `दीर्घो लघोः' (7.4.94) इति दीर्घत्वम्।।

11. संयोगे गुरु। (1.4.11)

`कुण्डा, हुण्ड़ा' इति। `कुडि दाहे' (धा.पा.270), `हुडि सङ्घाते' (धा.पा.269), नुम्विधावुपदेशिवद्वचनादुपदेशावस्तायामेव नुम्। `शिक्षा, भिक्षा' इति। `शिक्ष विद्योपादाने' (3.3.103) इत्यकारप्रत्ययः, `अजाद्यतष्टाप' (4.1.4)।।

12. दीर्घञ्च। (1.4.12)

`ईहाञ्चक्रे, उहाञ्चक्रे' इति। `आम्प्रत्ययवत्' (1.3.63) इत्यादौ सूत्र एते व्यत्पादिते। गुरुसंज्ञायां त्वत्र कार्यम्- `इजादेश्च गुरुमतोऽनुच्छः (3.1.36) इत्यात्मप्रत्ययः।।

13. यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्। (1.4.13)

`कर्त्ता' इति लुट्। `करिष्यति,अकरिष्यत्' इति। लुट्लृङौ। अङ्गसंज्ञायाः कार्यमत्र `सार्वधातुकार्धधातुकयोः' (7.3.84) इति गुणः, `ऋद्धनोः स्ये' (7.2.70) इतीडागमो यथायोगम्। `यस्मादिति संज्ञिनिर्देशार्थम्' इति। संज्ञिनो निर्देशः, सोऽर्थः प्रयोजनं यस्य तत् तथोक्तम्। ननु च तदादीत्यनेनात्र संज्ञीनिर्दिष्टः, तत्कथं संज्ञिनिर्देशार्थमिति पर्यनुयोगमाशङ्क्य येन हेतुना यस्मादित्यस्य संज्ञिनिर्देशार्थत्वं भवति,तं दर्शयितुमाह-- `तदादिसम्बन्धात्' इति। यस्मादित्येतस्मिन् सत्यनेन प्रकृतेन तदादीत्यस्य सम्बन्धो भवति। यस्मात् प्रत्ययो विधीयते स आदिर्यस्य तत् तदादीति। अनुच्यमाने ह्येतस्मिंस्तदित्यनेन सर्वनाम्ना प्रकृतप्रत्ययवमर्शिना किं सम्बध्येतेति, असदेतत्; एवं हि सति प्रत्ययादेः प्रत्यये परतोऽङ्गसंज्ञा स्यात्, ततश्च करिष्यावः, करिष्याम इत्यत्र धातोर्गुणो न स्यात्। तस्माद्विशिष्टस्य संज्ञिनो निर्देशार्थ तस्मादिति वक्तव्यम्। अनेन हि सम्बन्धे सति तदादीत्यनेन योऽत्र विशिष्टः संज्ञी विवक्षितः स शक्यते निर्द्देष्टुम्; नान्यथा। `नेर्विशः' (1.3.17) इत्युपसर्गाद्विधिरस्तीति नियमस्य, न तु प्रत्ययस्य; तस्य लक्षणान्तणरे विहितत्वात्। `नेर्विशः' (1.3.17) इत्युपलक्षणमात्रम्। `परिव्यवेभ्यः क्रियः' (1.3.18) इत्येतदपीहोपात्तं द्रष्टव्यम्। तदादेरङ्गसंज्ञा स्यात्, ततश्चोपसर्गात् प्रागडागमः स्यादिति भावः।

`स्त्री इयती' इति। इदं परिमाणमस्या इति `किमिदम्भ्यां वो घः' (5.240) इति वतुप्। वस्य च घत्वम्, इयादेशः, `इदम्किमोरीश्की' (6.3.90) इतीदम ईश, `यस्येति च' (6.4.148)इतीकारलोपः। `उगितश्च' (4.1.6) इति ङीप्- इयती। स्त्रीशब्दात् सुः, तस्य हलङ्यादिना (6.1.68) लोपः, स्त्री इयती इति स्थिते यदि विधिग्रहणं न क्रियेत, तदेयच्छब्दे प्रत्यये परतः स्त्रीशब्दस्याङ्गसंज्ञा स्यात्; ततश्च `यस्येति च' 6.4.148) इतीकारलोपः प्रसज्येत। ननु च`असिद्धवदत्राभात्' 6.4.22) इत्यसिद्धत्वादीकारलोप एवासिद्धः, तत् कुतोऽयं लोपप्रसङ्गः ? प्राग्भाधिकारादसिद्धत्वमित्यभिप्रायः, नैषोऽस्त्यभिप्रायः; वक्ष्यति हि तत्र वृत्तिकारः-- र`असिद्धवदित्यधिकारोऽयम्, यदित ऊर्ध्वमनुक्रिमिष्याम आअध्यायपरिसमाप्तेस्तदसिद्धवद्भवति' इति, तथा ह्या भादित्यभिविधावाङ,तेन भाधिकारेऽप्यसिद्धत्वं भवतीति ? एवं तर्हि विधिग्रहणेनैतज्ज्ञाप्यते-- भाधिकारीयमसिद्धत्वमनित्यत्वमिति; तेन `वुग्युटावुवङ्यणोः सिद्धौ वाच्यौ' (वा.776) इत्येतन्न वक्तव्यं भवतीति। वुक्-- बभूव, युट्-- उपदिदीय इति।

नन्वेवम् `अचः परस्मिन् पूर्वविधौ' (1.1.57) इतीकारलोपस्य स्थानिवत्त्वात् स्त्रीशब्देकारलोपाप्रसङ्ग एव, नैतदस्ति; यो ह्यनादिषअटदचः पूर्वस्तस्य पूर्वस्तस्यविधिं प्रति स्थानिवद्भवतीत्यादिष्टदचः पूर्वः स्त्रीशब्देकारः प्राक् संस्कृतस्य सत इयीतशब्द्योत्तरकालं स्त्रीशब्देन सम्बध्यते। अथ क्रियमाणेऽपि विधिग्रहणे कस्मादेवाङ्गसंज्ञा न भवति, यावता स्त्रीशब्दाद्विभक्तेः प्रत्ययस्य विधिरस्त्येव, प्रत्ययोऽपि चास्मात् पर इयच्छब्दो विद्यत एव ? नैष दोषः; विधिग्रहणे सति यस्मात्प्रत्ययो विधीयते प्रत्यासत्तेस्तस्मिन् परतोऽङ्गसंज्ञा विधीयते। इह तु यः स्त्रीशब्दाद्विहितः प्रत्ययो नासौ परः, लुप्तत्वात्; यश्च पर इयच्छब्दो विहितः, नासौ ततो विहितः।

अथ तदादिग्रहणं किमर्थम् ? यावाता विनाऽपि तेन `यस्मात् प्रत्ययविधिः प्रत्ययेऽङ्गम्' इत्येतावत्युच्यमाने यत्तदोर्नित्याभिसम्बन्धाद्यस्मात्प्रत्ययो विधीयते तत्प्रत्यये परतोऽङ्गसंज्ञा भवतीत्येषोऽर्थो लभ्यत इत्यत आह-- `तदादिवनचम्' इत्यादि। असति तदादीत्येतस्मिन् यस्मादेव प्रत्ययो विधीयते तस्यैवाङ्गत्वं स्यात्, न तु सर्वस्य सहस्यादेः, नापि सनुम्कस्य समुदायस्य; ततः प्रत्ययस्यादिविहितत्वत्. तदादिग्रहणे सति यस्मात् प्रत्ययो विधीयते स आदिर्यस्य शब्दरूपस्य तत् तदादीति बहुव्रीहिराश्रितो भवति, तेन सर्वस्य सहस्यादेः सनुम्कस्य समुदायस्याङ्गसंज्ञा सिद्ध्यति-- इति तदादिवचनं स्यादिनुमर्थम्। आदिग्रहणेन प्रकृतिप्रत्ययस्य मध्यवर्तिनां प्रत्ययागमानां ग्रहणम्; नुम आगमोपलक्षणत्वात्। `करिष्यावः' इत्यत्र यस्मात् प्रत्ययो विहितस्तदादेः सहस्य प्रत्ययस्य समुदायस्याङ्गसंज्ञायां सत्याम् `अतो दीर्घो यञि'(7.3.101) इति दीर्घत्वं भवति; अन्यथा क्व तर्हि स्यात् ? `वावावः, वावामः' इत्यादौ। `अय वय मय पय तय चय णय गतौ' (धा.पा.474-480), यङलुक्, अभ्यासस्य `दीर्घोऽकितः'(7.4.83) इति दीर्घत्वम्; वस्मसोः `लोपो व्योर्वलि' (6.1.66) इति यलोपः-- इह विना विकरणेन धातोदीर्घत्वम्; विकरणस्य शपः `अदिप्रभृतिभअयः शपः' (2.4.72) इति लुप्तत्वात्। अदादित्वम् `चर्करीतञ्च' (धा.पा.1081) इत्यादिषु पाठात्। `चर्करीतम्' इति यङलुकः पूर्वाचार्यसंज्ञा। `कुण्डानि' इति। जसि `जश्शसोः शिः' (7.1.20) इति शिभावः। `नपुंसकस्य झलचः' (7.1.72) इति नुम्। तदायं नुम् परादिरिति पक्षः, तदा `सुपि च' (7.3.102) इति दीर्घत्वं विनापि सनुम्कस्याङ्गसंज्ञया सिद्धम्। यदापि पूर्वान्तः, तदाप्यङ्गकदेशत्वात् `नोपधायाः' (6.4.7) इत्यनुवर्त्तमाने `सर्वनामस्थाने चासम्बुद्धौ' (6.4.8) इति दीर्घत्वं सिद्धम्। यदा त्वभक्तः, तदाङ्स्यानेकदेशत्वान्न सिद्ध्यति। अभक्तश्चायं नुमिति सूत्रकारस्य पक्षः। तेन नुमर्थमपि तदादिवचनं कृतम्। `श्रयर्थम्, भ्व्यर्थम्' इति। श्रिय इदं भ्रुव इदमिति-- `चतुर्थी तदर्थार्थ' (2.1.36) इत्यादिना समासः; अस्त्यत्र चतुर्थ्यैकवचनस्य विधिरिति। असति हि पुनः प्रत्ययग्रहणे श्रीभ्रूशब्दयोरर्थशब्दे

परतोऽङ्गसंज्ञा स्यात्, ततश्चेयङुवङौ स्याताम्। सप्तमीनिर्दिष्टे तु पुनः प्रत्ययग्रहणे श्रीभ्रूशब्दयोरर्थशब्दे परतोऽङ्गसंज्ञा स्यात्, ततश्चेयङुवङौ स्याताम्ा। सप्तमीनिर्दिष्टे तु पुनः प्रत्ययग्रहणे सति न दोष इति। तथा हि-- ततो विहिते प्रत्यये परत इत्येवं विज्ञायते। यश्चातो विहितः प्रत्ययः स लुप्तः। यद्यपि लुप्तेऽपि तस्मिन् प्रत्ययलक्षणेनाङ्गसंज्ञा लभ्यते, कार्यं तु न लभ्यते; `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षमप्रतिषेधात्।।

14.सुप्तिङन्तं पदम्। (1.4.14)

`सुप् तिङिति प्रत्याहारग्रहणम्' इति। युक्तं हि तिङिति प्रत्याहारग्रहणम्, अन्यस्य तिङशब्दस्याभावात्; कथं सुबिति प्रत्याहारग्रहणम्, सप्तमीबहुवचनस्य विद्यमानत्वात् तस्य ग्रहणं कस्मान्न भवतीति ? नैष दोषः; ` न ङिसम्बुद्ध्योः' (8.2.8) इति प्रतिषेधात्। सप्तमीबहुवचनस्य सुपो ग्रहणे ङिसम्बुद्ध्योः पदत्वाभावान्नलोपस्य प्राप्तिरेव नास्तीति प्रतिषेधोऽर्थकः स्यात्। `ब्राह्मणाः' इति। पदत्वे च सति `ससजुषो रुः' (8.2.66), `खरवसानयोर्विसर्जनीयः' (8.3.15)। `पठन्ति' इति। अत्र पदत्वे सति `तिङङतिङः' (8.1.28) इति निघातः।

ननु च`प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य' (पु प 24) इत्यनेन `येन विधिस्तदन्तस्य' (1.1.72) इत्यनेन वाऽन्तरेणाप्यन्तग्रहणं तदन्तस्यैव संज्ञा भविष्यति, तत्किमर्थमन्तग्रहणमित्यत आह-- `पदसंज्ञायाम्' इत्यादि। यदीहान्तग्रहणेनाप्यन्यत्र संज्ञाविधौ तदन्तविधिर्नास्तीत्येषोऽर्थो न ज्ञाप्यते, तदा `तरप्तमपौ घः' (1.1.22) इत्यत्र तरबन्तस्य घसंज्ञा स्यात्, न प्रत्ययमात्रस्य। तस्मादत्रास्मिन्नर्थेऽन्तग्रहणेन ज्ञाप्यते-- अन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिनिषेधो यथा स्यादित्येवमर्थमन्तग्रहणम्। तेन तरप्तमपोरेव घसंज्ञा भवति, न तु तदन्तस्य। `गौरीब्राह्मणितरा' इति।अत्र गौरीशब्दस्य तरबन्ते ब्राह्मणितराशब्दे परतः `घरूपकल्प' (6.3.43) इत्यादिना ह्रस्वो न भवति; तरबन्तस्याघसंज्ञकत्वात्। प्रत्ययमात्रस्य घसंज्ञायां तत्र परतो ब्राह्मणीशब्दस्य ह्रस्वो भवत्येव।।

15. नः क्ये। (1.4.15)

`राजीयति' इति। आत्मनो राजानमिच्छतीति `सुप आत्मनः क्यच्' (3.1.8) `क्यचि च' (7.4.33) इतीत्त्वम्। `राजायते' इति। राजेवाचरतीति `कर्त्तृः क्यङ सलोपश्च' (3.1.11) इति क्यङ। `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः। `वर्मायते' इति। अवर्म भवतीति `लोहितादिडाज्भ्यः क्यष' (3.1.13) इति क्यष्प्रत्ययः। `वा क्यषः' (1.3.90) इत्यात्मनेपदम्। पदसंज्ञायामिह नलोपः कार्यः।

ननु चैते क्यजादयः सुबन्तादेव विधीयन्ते प्रत्ययलक्षणेन, ततश्च `सुप्तिङन्तं पदम्' (1.4.14) इत्यनेनैवात्र पदसंज्ञा सिद्धा, तत् किमर्थोऽयमारम्भ इत्यत आह-- `सिद्धे सत्यारम्भो नियमार्थः' इति। सिद्ध इति सिद्धावित्यर्थः। `नपुंसके भावे क्तः' (3.3.114) सिद्धत्वन्तु प्रकृतत्वात् पदसंज्ञाया एव विज्ञायते। अथ वा सिद्ध इत्यकर्मकत्वात् कर्तरि क्तप्रत्ययः। सिद्धे निष्पन्ने पदसंज्ञाकार्य इत्यर्थः। नान्तमेव इति। नियमस्य प्रतिषेधात्। विपरीतनियमे हि सति ङिसम्बुद्धयोः पदसंज्ञाया अभावान्नलोपो न भविष्यतीति किं तत्प्रतिषेधेन ? `वाच्यति' इति। `सुप आत्मनः क्यच्' (3.1.8)। क्यचि पदत्वाभावात् `चोः कुः' (8.2.30) इति कुत्वं न भवति।।

16. सिति च। (1.4.16)

`भवदीयः' इत्यादि। `तत्र जातः'(4.3.25) इत्यादौ शैषिकेऽर्थे तद्धितः, पदत्वात् `झलाञ्जशोऽन्ते' (8.2.39) इति जश्त्वम्। `ऊर्णायुः' इति। `ऊर्णाया युस्' (5.2.123) इति युसि कृते पदसंज्ञया भसंज्ञायां निरस्तायां `यस्येति च' (6.4.148) इत्याकारलोपो न भवति। `ऋत्वियः' इति। ऋतुः प्राप्तोऽस्त्येति `ऋतोरण्' (5.1.148) `छन्दसि घस्' (5.1.106) ऋत्वियः, पदत्वात् भत्वाभावे तदाश्रयः `ओर्गुणः' (6.4.146) न भवति।

17.स्वादिष्वसर्वनामस्थाने। (1.4.17)

अत्र यदि सप्तमीबहुवचनादारभ्य आ कपः प्रत्यया गृह्येरन्, तदा `असर्वनामस्थाने' इति प्रतिषेदं न कुर्यात्; प्राप्त्यभावात्। कृतश्चासावतोऽवसीयते प्रथमैकवचनादारभ्या कपः प्रत्ययाः स्वादयो गृह्यन्त इत्यत आह-- `स्वादिष्विति सुशब्दादेकवचनादारभ्य' इति। `राजत्वम्, राजता' इति। `तस्य भावस्त्वतलौ' (5.1.119)। `राजतरः' इति। `द्विवचनविभज्योपपदे तरबीयसुनौ' (5.3.57) इति तरप्। `राजतमः' इति। `अतिशायने' (5.3.55) इत्यादिना तमप्।

`राजानौ,राजानः' इति। अत्र पदसंज्ञाया अभावान्नलोपो न भवति। यद्येवम्, राजत्यत्रापि न स्यात्, प्रत्ययलक्षणेनासर्वनामस्थान इति पदसंज्ञाया अभावात्,नैष दोषः; आचार्यप्रवृत्तिर्ज्ञापयति-- भवति सौ परतः पदसंज्ञेति, यदयम् `नङिसम्बुद्धयोः' (8.2.8) इति प्रतिषेधं शास्ति। अत्र सम्बुद्धिशब्दोऽनर्थकः स्यात्, पदत्वाभावादेव नलोपस्याप्राप्तेः। अथ वा -- `असर्वनामस्थाने' इति पर्युदासोऽयम्, न प्रसज्यप्रतिषेधः,तेन सर्वनामस्थानादन्यत्र पदसंज्ञा विधीयते; न तु सर्वनामस्थानं प्रतिषिध्यते। तेन तत्र पूर्वसूत्रेण सौ परे पदसंज्ञा भविष्यति। अथ वा- प्रसज्यप्रतिषेधेऽपि न दोषः, यस्मात् `अनन्तरस्य विधिर्वा प्रतिषेधो वा'(व्या.प.12) इत्यनन्तरा या प्राप्तिः सा प्रतिषिध्यते; न व्यवहिता। तेन `सुप्तिङन्तं पदम्' (1.4.14) इत्यकारलोपः।।

18. यचि भम्। (1.4.18)

`यचि' इति वर्णग्रहणं सप्तमीनिर्दिष्टम्। अतः `यस्मिन् विधिस्तदावल्ग्रहणे' (वा.14) इति तदादिविधिनात्र भवितव्यमित्यत आह-- `यकारादौ' इत्यादि। गार्ग्य इत्यादौ भसंज्ञायां सत्यां `यस्येति च' (6.4.148) इत्यकारलोपः।
`नभोऽङ्गिरोमनुषां वत्युपसंख्यानं कर्तव्यम्' इति। भसंज्ञायास्त्वत्र पदसंज्ञाबाधः फलम्। `नभ इव' इति तुल्यार्थतोपदर्शनमेतत्; न तु प्रथमासमर्थाद्वतिः। स तु नभसा तुल्यं वर्त्तत इति `तेन तुल्यम्' (5.1.115) `आङ्गिरस्वत्' इति। पूर्वेण तुल्यम्। `मनुष्वत' इति। `जनेरुसिः'(द.उ.9.37) इत्यत्र बहुलग्रहणानुवृत्तेः `मन ज्ञाने' (धा.पा.1176) इत्येतस्मादुसिप्रत्ययः। `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्। मनुष् इति स्थिते पूर्ववद्वतिः-- मनुष्वदिति। यद्यत्र पदसंज्ञा स्यात् तदा षत्वस्यासिद्धत्वादिह रुत्वं स्यात्, ततश्च मनुर्वदित्यनिष्टं रूपं स्यात्। उपसंख्यानशब्दस्य चेह प्रतिपादनम्-- `सिति च' (1.4.16) इत्यतश्चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः। तेन नभोऽङ्गिरोमनुषां वतौ भसंज्ञा भविष्यति।
`वृषण्वस्वश्वयोः' इति। अन्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदसंज्ञायां प्राप्तायां भसंज्ञा विधीयते,तस्याश्च विधिश्चकारानुवृत्तेरेव लभ्यते। वृष्णोऽश्वः, अत्र भत्वे सति यद्यपि णत्वस्यासिद्धत्वम्, तथापि नलोपः पदनिबन्धनो न भवति, `पदान्तस्य' (8.4.37) इति णत्वप्रतिषेधश्च।।

19.तसौ मत्वर्थे। (1.4.19)

`तसौ' इति वर्णग्रहणम्। न च वर्णमात्रान्मत्वर्थीय सम्भति, अतः सामर्थ्यात् तदन्तविधिर्विज्ञायत इत्याह-- `तकारान्तम्' इत्यादि। `मत्वर्थे प्रत्यये' इति व्यधिकरणे पदे; षष्ठीसमासः। मतोरर्थो मत्वर्थ इति, तत्र यो वर्त्तते प्रत्ययस्तस्मिन्नित्यर्थः। अथ वा- समानाधिकरणे पदे, मतुशब्देन साहचर्यान्मतुप्सहचरितार्थ उच्यते-- णतुबर्थो यस्य तस्मिन्, न तु यस्मिन्निति मत्वर्थे प्रत्यय इति।
अर्थग्रहणं कमतुपोऽन्यत्रापि यथा स्यात्; इतरथा हि मतावित्युच्यमाने मतावेव स्यात्; नान्येषु। मत्वर्थग्रहणे क्रियमाणे मतुपि न स्यात्; तस्यार्थविशेषणत्वात्। विशेषणस्य च कार्येण सम्बन्धानुपपत्तेः। न हि चित्रगुरानीयतामित्युक्ते विशेषणभूता गावोऽडप्यानीयन्ते, नैष दोषः; विशेषमपि क्वचित् कार्ये विशिष्यते, यथा हि-- देवदत्तशालाया ब्राह्मणा आनीयन्तामित्युक्ते देवदत्तः शालायां विशेषणभूतो यदि ब्राह्मणो भवति तदा सोऽप्यानीयत एव।
`उदश्वित्वान' इति। भत्वात् पदसंज्ञाभावे जश्त्वं सिध्यति। `झयः' (8.2.10) इति वत्वम्, `उगिदचाम्' (7.1.70) इति नुम्, `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः। `पयस्वी, यशस्वी' इति। `अस्मायामेधास्रजो विनिः' (5.2.121) भत्वाद्रुत्वं न भवति। `इन्दरन्पूषार्यम्णां सौ' (6.4.12) इत्यनुवर्त्तमाने `सौ च' (6.4.13) इत्यनेन दीर्घः।।

20. अयस्मयादीनि च्छन्दसि। (1.4.20)

यद्यत्र भसंज्ञा विधीयेत तदा पदसंज्ञा न स्यात्, अथ यदि पदसंज्ञा विधीयेत तदाऽत्र भसंज्ञा न स्यात्, तदा भपदसंज्ञयोः समावेशो न स्यात्; एकसंज्ञाधिकारात्। साधुत्वविधाने त्वेष दोषो न भवति, तद्धि केषाञ्चिद्भसंज्ञा विधीयते पदसंज्ञकानाम्, केषाञ्चिदुभयसंज्ञाकानाम्; तस्मात् साधुत्वमेव विधातुं युक्तमित्यत आह-- `अयस्मयादीनि' इत्यादि। कथं पुनरेषां साधुत्वं विधीयत इत्याह-- `भपदसंज्ञाधिकारे' इत्यादि। द्वारम्, मुखम्, उपाय तत्र भाषाग्रहणमस्ति, तथाप्ययस्मयशब्दस्यास्मादेव साधुत्वविधानाच्छन्दस्यपि मयड् भवतीति भत्वाद्रुत्वं न भवति। `सत्रृक्वता' इति। ऋचोऽस्य सन्तीति मतुप्। पदत्वात् `चोः कुः' 8.3.30) इति कुत्वम्। भत्वात् `झलां जशोऽन्ते' (8.2.39) इति जश्त्वं न भवति। `आकृतिगणोऽयम्' इति। आदिशब्दस्य प्रकारवाचित्वात्।।

21. बहुषु बहुवचनम्। (1.4.21)

`तस्यानेन बहुत्वसंख्या वाच्यत्वेन विधीयते' इति। एतेन विध्यर्थतामस्य योगस्य दर्शयति।
इह केषाञ्चित् `स्वार्थद्रव्यलिङ्गसंख्याकर्माद्यात्मकः पञ्चकः प्रातिपदिकार्थः' इति दर्सनम्। केषाञ्चित् `स्वार्थद्रव्यलिङ्गात्मकस्त्रिकः प्रातिपदिकार्थः' इति। तत्र स्वार्थो विशेषणम्; स्वरूपजातिगुणद्रव्याणि। द्रव्यस्तु विशेष्यम्, तत्पुनर्जातिगुणद्रव्याणि। तत्र यदा शब्दस्वरूपेण विशिष्टा जातिरभिधीयते-- गौरिति, तदा शब्दस्वरूपं विशेषणत्वात् स्वार्थो भवति; जातिस्तु विशेष्यत्वाद्द्रव्यम्। यदा तु जात्या विशिष्टो गुणोऽभिधीते-- पटस्य शुक्लो गुण इति, तदा जातिर्विशेषणत्वात् स्वार्थो भवति; गुणस्तु विशेष्यत्वाद्द्रव्यम्। यदा तु गुणैर्विशिष्टं पटादिकं द्रव्यमुच्यते-- शुक्लः पट इति, तदा विशेषणभूतो गुणः स्वार्थो भवति; विशेष्यभूतं पटादिकं द्रव्यमेव। यदा पुनर्द्रव्यमपि द्रव्यान्तरस्य विशेषणभूतं भवति-- यष्टीः प्रवेशय, कुन्तान् प्रवेशयेत्यादौ, तदा यष्ट्यादिकं द्रव्यं विशेषणभावापन्नं स्वार्थः; द्रव्यान्तरं विशेष्यभावापन्नं पुरुषादिकं द्रव्यमेव। क्वचित्सम्बन्धोऽपि स्वार्थो भवति-- यत्र सम्बन्धनिमित्तकः प्रत्यय उत्पद्यते, यथा-- दण्डी, विषाणीति। अत्र दण्डपुरुषसम्बन्धो विशेषणम्, दण्डीति द्रव्यम्। क्वचित् क्रियापि स्वार्थो भवति, यत्र क्रियानिमित्तकः प्रत्ययः उत्पद्यते, यथा-- पाचकः, पाठक इति। क्रियाकारकसम्बन्धोऽत्र स्वार्थ इत्यपरे। लिङ्गं स्त्रीत्वादि, संख्यैकत्वादि, कर्मादयो वक्ष्यमाणाः कारकविशेषाः। तत्र पूर्वोक्तयोर्दर्शनयोर्द्वितीयं यद्दर्शनं तदिह वृत्तिकारेणाश्रितम्।
धातोस्तु क्रियैव वाच्येत्यत्राचार्याणामविवाद एव। तत्र प्रातिपदिकस्य पूर्वोक्ते त्रिकेऽर्थे सति धातोश्च क्रियात्मकत्वे यदीदं सूत्रं नोच्येत, ततः `अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' (सी.वृ.125) इति प्रातिपदिकाज्जसादिबहुवचनं विधीयमानं त्रिक एवार्थे स्यात्, न बहुत्वसंख्यायाम्। धातोरपि झिप्रभृति बहुवचनं

विधीयमानं क्रियायामेव स्यात्; न तु बहुत्वसंख्यायाम्। तस्मादनेनैव तस्य बहुत्वसंख्यावाच्यत्वेन विधीयत इति विध्यर्थमेतद्भवति। यथा चानेन योगेन बहुत्वसंख्या बहुवचनस्य वाच्यत्वेन विधीयते, तथा `कर्मणि द्वितीया' (2.3.2) इत्येवमादिभिर्योगैर्द्वितीयादीनां कर्मादि च। `लः कर्मणि च भावे चाकर्मकेभ्यः' (3.4.69) इत्यनेनापि लकाराणां कर्माद्येव। तस्मादेतेऽपि योगा विध्यर्था एव वेदितव्याः।

येषाञ्च पञ्चकं प्रातिपदिकार्थ इति मतम्, तेषां प्रातिपदिकस्यैव पञ्चाप्यर्था वाच्याः। विभक्तयश्च तद्द्योतिका भवन्ति। तत्र `अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' (सी.वृ.125) इति विनापि वचनेनानेन प्रातिपदिकाद्बहुवचनं जसादि बहुत्वे सिद्धमेव। तत्र त्वनियमेनान्यत्राप्येकत्वादौ प्राप्तमनेन नियम्यत इति नियमार्थमेतद्भवति।

कस्मात् पुनर्वृत्तिकारेण त्रिकं प्रातिपदिकार्थ इति दर्शनमाश्रितम् ? युक्तत्वात्। तथा हि-- वृक्षं पश्येत्यादौ न हि विना विभक्तिभिः संख्याकर्मादयश्चार्थाः प्रतीयन्ते। यद्यपि पयः पयो जरयतीत्यादौ विनापि विभक्त्या संख्याकर्मादेरर्थस्य प्रतीतिर्भवतीति, तथापि पयसी पयांसि पयसेत्येवमादौ संख्याकर्मादिप्रतीत्यर्थं नियोगतो विभक्तिरपेक्ष्यत एव। न हि यथा गर्गा इत्यत्र बहुवचनेन यञ्प्रत्ययमन्तरेणापत्यार्थः प्रतीयते, तथा गार्ग्य इत्यत्र प्रकृतिरेवापत्यार्थमभिधत्त इति शक्यते वक्तुम। अपि च -- पयः पयो जरयतीत्येवमादौ विभक्तिविशेषओत्पत्तिसामर्थ्यादेव संख्याकर्माद्यर्थ्स्य प्रतीतिर्भवति। तथा हि, यतः स विभक्तिविशेष उत्पन्नस्त एवासावर्थविशेषः प्रतीयते, नान्यस्मादिति त्रिक एव प्रातिपदिकार्थो युक्तः।

यदि तर्हि बहुत्वसंख्या बहुवचनस्य वाच्यत्वेन विधीयते तदा सूत्रे भावप्रत्ययेन बहुत्वनिर्देशः कर्त्तव्यः, अन्यथा बहुत्वसंख्या न प्रतीयेत ? न कर्त्तव्यः; अन्तरेणापि भावप्रत्ययं भावप्रधानो निर्देशो भविष्यतीति, यथा -- पटस्य शुक्ल इति। नन्वेवमपि भादस्यैकत्वाद्बहुष्विति बहुवचनं नोपपद्यते, नैष दोषः; यस्माद्बहुतवसंख्याधारस्य द्रव्यस्य यो भेदस्तं बहुत्वे गुणेऽध्यारोप्य बहुष्विति बहुवचनेन निर्देशः कृतः , संख्यावाच्ययं बहुशब्दो न वैपुल्यवाचीति ज्ञापनार्थश्च। तेन वैपुल्यं बहुवचनस्य वाच्यं न भवतीति बहुरोदनः,बहुः सूप इति वैपुल्यवाचिनो बहुशब्दादेकवचनमेव भवति, न बहुवचनम्।

यदि बहुत्वसंख्या बहुवचनस्य वाच्यत्वेन विधीयते, इह वृक्षं पश्येत्यत्र बहुवचनं प्राप्नोति, द्वे ह्यत्र संख्ये-- समुदायसंख्या चैकत्वम्, अवयवसंख्या च फलमूलशाखाद्यवयवसमवेता बहुत्वम्। अस्यापि प्रातिपदिकार्थेनैकार्थसमवायलक्षणः सम्बन्धोऽस्त्येव। तथा हि-- येष्वयववेषु समवेत। बहुत्वसंख्या प्रातिपदिकार्थोऽपि समुदायस्तत्रैव समवेतः, ततश्च तस्माद्बहुवचनं प्राप्नोतीत्यत आह-- `कर्मादयः' इत्यादि। कर्मादयो ह्येकविभक्तिशब्दवाच्यत्वात् प्रत्यासन्ना बहुत्वसंख्यायाः; ततः प्रत्यासत्तेस्तदीय एव बहुत्वे बहुवचनं भवति। समुदाय एव हि वृक्षं पश्येत्यत्र दृशिक्रियया व्याप्तमिष्टतम इति स एव कर्मभावमापद्यते, नावयवाः, तत्कुतो बहुवचनस्य प्रसङ्ग ? `कर्मादिषु' इत्यादि। कर्मादयो बहुवचनस्य वाच्याः। तदीयं बहुत्वं बहुष्वेव कर्मदिषु सम्भवति, अतः सामर्थ्यात् कर्मादिषु बहुष्वित्येषोऽर्थः सम्पद्यते।

यदि तर्हि विभक्तीनां बहुवचनस्य बहुत्वसंख्या वाच्यत्वेन विधीयते, तदा निःसंख्येभ्योऽव्ययेभ्यः स्वादयो न स्युः; ततश्च पदसंज्ञा तेषां न स्यादित्याह-- `यत्र च' इत्यादि। ननु स्वादिविधानसूत्रे संख्याकर्मादयः स्वादीनामर्थाः शास्त्रान्तरेण विहिताः, तेन सहास्यैकवाक्यतेति वक्ष्यति। तत्कुतः स्वादीनां सामान्यविहितत्वम् ? न हि `बहुषु बहुवचनम' (1.4.21), `कर्मणि द्वितीया' (2.3.2) इत्यादिना शास्त्रान्तरेण स्वौजसादेः सूत्रस्यैकवाक्यतायां स्वादीनां सामान्यविहितत्वमुपपद्यते। एवं तर्हि ज्ञापकेन अव्ययेभ्यः सामान्येन स्वाद्युत्पत्तेर्ज्ञापि तत्वात् सामान्यविहिता इत्युक्तमित्यदोषः; किं पुनस्तज्ज्ञापकम् ? `अव्ययादाप्सुपः' (2.4.82) इत्यव्ययादुत्पन्नानां सुपां लृग्ववचम्, न ह्यनुत्पन्नानां लुगुपपद्यते।।

22. द्वयेकयोर्द्विवचनैकवचने। (1.4.22)

`द्व्येकयोः' इति। अयमपि भावप्रधानो निर्देशः; अन्यथा हि बहुत्वाद्बहुवचनं स्यात्। भावप्रधाने तु निर्देशे,द्वित्वमेकत्वञ्च द्वावेतावर्थाविति युक्तं द्विवचम्। `एतदपि' इत्यादिनाऽस्यापि योगस्य विध्यर्थतां दर्शयति। `अर्थाभिधानम्' इति। अर्थो वाच्योऽभिधीयते येन तदर्थाभिधानम्।।

23.कारके। (1.4.23)

`कारक इति विशेषणमपादानादिसंज्ञाविषयम्' इति। अपादानदयः संज्ञा विषयो यस्य तत्तथोक्तम्। आदिशब्देन सम्प्रदानादीनां ग्रहणम्। अथ वक्ष्यमाणानां ध्रुवादीनाभियं संज्ञा कस्मान्न भवति ? एवं मन्यते-- यदीयं संज्ञाशब्दा निर्दिश्यन्ते; अयं तु सप्तम्या निर्दिष्टः, तस्मान्नेयं ध्रुवादीनां संज्ञेति। `कारके' इति निर्धारणे सप्तमी, निर्धारणं तु बहुनां सम्भवति, तत्कथमेकवचनेन निर्देशः ? सामान्यपेक्षया त्वेकवचनम्। अथ वा-- `छन्दोवत् सूत्राणि भवन्ति' (म.भा.1.1.1) ततो `व्यतयो बहुलम्' (3.1.85) इति बहुवचने प्राप्त एकवचम् कारकेषु मध्ये यद् ध्रुवं कारकं तदपादानसंज्ञं भवति। एवमन्यत्रापि वेदितव्यमिति।

कारकशब्दोऽयमस्त्येव व्युत्पन्नः-- ण्वुलन्तः कर्तृपर्य्याय इति, अस्ति च संज्ञाशब्दः-- अव्युत्पन्नो पर्य्याय इति। तत्रेह यदि पूर्वोक्तस्य ग्रहणं स्यात तदापादानादिषु कारकशब्दो न वर्त्तते, यथा-- कर्तृशब्दः `ण्वुल्तृचौ' (3.1.133) इति कर्तरि व्युत्पादितः, तथा कारकशब्दोऽपि; कर्त्ता च स्वतन्त्रः, अपादानादयश्चास्वतन्त्राः, तत्कथं तेषु कारकव्यपदेशः स्यात् ? असति हि कारकव्यपदेशे कारकसंशब्देषु तेषां ग्रहणं न स्यात्। अथ तेषामपि कथञ्चित् स्वतन्त्रताभ्युपेयेत, एवञ्च तत्र कर्तृसंज्ञा प्रसज्येत, ततश्च ग्रामादागच्छति, उपाध्यायाय गां ददातीत्यादौ ग्रामादिभ्यस्तृतीया प्रसज्येत, इतरेतराश्रयश्चापि दोषः स्यात्। तथा हि-- कर्तृसंज्ञोत्तरकालं कारकशब्दस्य व्युत्पत्तिः, तस्यां सत्यां कारकशब्दोपक्रमेण कर्त्तृसंज्ञा स्यात् बह्वेवं प्रतिविधेयं स्यात्, प्रतिविधाने

च प्रतिपत्तिगौरवं स्यात्। निमित्तपर्यायस्य तु कारकशब्दस्य ग्रहणे न दोषः स्यात्, ततः स एव गृह्यत इति मत्वाह--`कारकशब्दोऽयं निमित्तपर्यायः' इति। `ग्रामादागच्छति' इति। ग्रामस्य ध्रुस्यागमनक्रियां प्रति निमित्तभावोऽस्ति। यदीह ग्रामोऽवधिभावेन नावतिष्ठेततत आगमनं न निष्पद्येत,तस्माद्ग्रामः कारकम्।

`वृक्षस्य पर्णं पतति' इति। वृक्षः सम्बन्धित्वेनात्र विवक्षितः न तु निमित्तत्वेन। अपायस्य कारकग्रहणान्निमित्तत्वेनाविवक्षितस्यापादानसंज्ञा न भवति। नैतत् कारकग्रहणस्य प्रत्युदाहरणं युक्तम्; ध्रुग्रहणेनैवात्रापादानसंज्ञाया निवर्तितत्वा◌ात्, ध्रुवं हि तद्यदवधिभूतमपाये साध्ये। तथा हि वृत्तिकारो वक्ष्यति-- `अपाये साध्ये यदवधिभूतम्' (का.1.4.24) इति। न चेह वृक्षोऽवधित्वेन विवक्षितः, किं तर्हि ? सम्बन्धत्वेन, नैतदस्ति; विवक्षितावधिभावस्यैव वृक्षस्य सम्बन्धिभावेन विवक्षित्वात्। अवधिभूतस्य वृक्षस्य सम्बन्धिनः पर्ण पततीत्यर्थः। न हि सम्बन्धित्वेन विवक्षाऽवधिभावविक्षाया विरुध्यते। तस्माद्विवक्षितावधिभावस्यैव वृक्ष्सय सम्बन्धित्वमात्रं विवक्षितम्, न तु विद्यमानमप्यपायं प्रति निमित्तत्वमिति काऽत्रायुक्तता !

`माणवकस्य पितरं पन्थानं पृच्छति'इति। `अकथितञ्च' (1.4.51) इत्यकथितस्य कर्मसंज्ञा विधीयमाना `कारके ' (1.4.82) इत्येतस्मिन्नसति माणवकस्यापि स्यात्, कथम् ? अकथितशब्दोऽयमकीर्त्तित पर्यायः। स च कस्याचिद्विशेषस्याप्रकृतत्वद्विशेषानुपादाने सति प्रयुज्यमानः सर्वत्राविशेषएणाकीर्त्तितमात्रे स्यात्। ततश्च `अकथितम्' इत्युच्यमाने कारकञ्चाकारकञ्च सर्वमकथितमिति सर्वकथितमिति गम्यते। यथा पिताऽपादानादिभिर्विशेषकथाभिर्न कथितः, तथा माणवकोऽपि, अत्स्तस्यापि कर्मसंज्ञा स्यात्। `कारके' इत्यस्मिंस्तु सति प्रश्नक्रियानिमित्तस्य पितुरेव भवति; न तु माणवकस्य। न ह्यसौ प्रश्नक्रियां प्रति निमित्तभावेन विवक्षितः, किं तर्हि ? पितुः सम्बन्धित्वेन।

यदि विशेषणमिदं ध्रुवादीनाम्; न संज्ञा, ततश्च `कारकादत्तश्रुतयोरेवाशिषि' (6.2.148) इत्येवमादिषु प्रदेशेषु यत्र कारकशब्दः संशब्द्यते तदा तत्रापादानादीनां कारकग्रहणेन ग्रहणं न स्यात्। संज्ञापक्षे तु न दोषः, संज्ञा ह्यावर्तमाना संज्ञिनं प्रत्यायतीत्यत आह-- कारकसंशब्दनेषु'इत्यादि। यत्र कारकशब्दस्य संशब्दनं तत्राप्यनेनैव विशेषणेन विवक्षितार्थप्रत्यायनलक्षणो व्यवहारोऽयं विज्ञायते; प्रदेशान्तरेऽपि कारकशब्दस्य निमित्तपर्यायस्यैवोपादानात्। तच्च् निमित्तमपादाननाद्येव, न हि ततोऽन्यत्क्रियानिमित्तं भवति। तस्मात् कारकग्रहमेनापादानादीनां ग्रहणं भवति।

अन्ये त्वाहुः-- साहचर्यात् कारकविशेषणसहचरिता अपादानादयः कारकशब्देनोच्यन्त इति तद्ग्रहणेनैव तेषां ग्रहणम्। कारकग्रहमं वा स्वरयितव्यम्। तेन `स्वरितेनाधिकारः' (1.3.11) इत्येष विधिर्भवति। तस्मात् कारकग्रहणेनापादानादीनां ग्रहणं भविष्यति।

24. ध्रुवमपायेऽपादानम्। (1.4.24)

अपायः = विश्लेषःक; विभाग इत्यर्थः। तस्य द्विष्टत्वाद्याथा तेन विभागेन योऽपैति सोऽपाययुक्तः, तथा यतोऽपैति सोऽप्यपाययुक्तः; तस्मादुभयत्र पञ्चम्या भवितव्यमित्यत एवाह-- `ध्रुवं यदापायमुक्तम्' इति। `अपाये साध्ये' इति। विषयसप्तमीयम्. अपायस्य साध्यत्वेन विषयभूत इत्यर्थः। यद्यपि ध्रुवशब्दो लोक एकरूपतामाचष्टे-- ध्रुवमस्य शीलम्, ध्रुवमस्य रूपमिति; तथाप्ययाये साध्येऽभिहितया तया न कश्चिदर्थः सम्पद्यत इति नात्र ध्रुवताऽपायं प्रत्युपयुज्यते ? सैवोपदीयते, सा चावधिभाव एव। तस्यादपायस्य सन्निधौ ध्रुवशब्दः सम्बन्धात् सश्लेषलक्षणात् प्रच्यवमानस्यावधिभावमाचष्टे, इत्यत आह-- `अवधिभूतम्' इति। अत एवापाये साध्येऽवधिभूतं यत्तदिह ध्रुवशब्देनोच्यते। तेन धावतोऽश्वात् पतित इत्येवमादावप्यपादानसंज्ञा अश्वादेः सिद्धा भवति। असति ह्यत्रापि सत्यपि चलत्वेऽश्वादेरप्यपायेऽवधिभावः।

अथेह कथमपादानसंज्ञा-- अधर्याज्जुगुप्सते, अधर्माद्विरमति, धर्मात्प्रमाद्यतीति, न ह्यत्रापायोऽस्ति ? कथम् ? कार्यसम्प्राप्तिपूर्वको ह्यपायो भवति, न चेह कार्यसम्प्राप्तिरस्तीति आह-- `जुगुप्सा' इत्यादि। जुगुप्साद्यर्थानां धातूनां प्रयोगेऽपादानासंज्ञाया उपसंख्यानम् = प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्-- `अपादानम्'इति महती संज्ञा क्रियते, महाविषयेयं संज्ञेति सूचनार्थम्। एवञ्च महाविषया भवतीयम्-- यदि सूत्रोपात्तात् संज्ञिनोऽन्योऽप्यस्या विषयो भवति, नान्यथा; तेन दजुगुप्सादीनां प्रयोगेऽसत्यपायेऽपादानसंज्ञा भविष्यतीति। अथ वा-- अस्त्येवाऽत्रापायः, न हि कार्यसम्प्राप्तिपूर्वक एवापायो भवतीति, किं तर्हि ? चित्तसम्प्राप्तिपूर्वकोऽपि भवति। इह तावदधर्माज्जुगुप्सते, अधर्माद्विरमतीति, य एव मनुष्यः प्रेक्षापूर्वकारी भवति स एवं पश्यति-- दुःख हेतुरयमधर्मो नाम, अतो नार्हत्येनं सचेताः कर्त्तुमिति; एवं पश्यति-- `नास्माद्धर्मात् किञ्चिदिष्टं सम्पद्यते, दुःखमेव केवलं तदारम्भ निमित्तकं भवति' स एवं विचारयंस्तं बुद्ध्या प्राप्नोति, प्राप्य च ततो निवर्त्तते। तथा च ध्रुवमपायेऽपादानमित्येवं स◌िद्धम्। `प्रमाद्यति' इति। `मदी हेर्षे' (धा.पा.1208), `शमामष्टानां दीर्घः श्यनि' (7.3.74) इति दीर्घः। अथेह कथमपादानसंज्ञा-- ग्रामान्नागच्छतीति ? कथञ्च न स्यात् ? ग्रामस्यापायेनायुक्तत्वात्। यस्यां सत्यामपायो भवति, सा प्रतिषिद्ध्यते चापादनसाधनागमनक्रिया, तदसत्यां तस्यां कुतोऽपायः ? नैष दोषः अत्र ह्यपादानसंज्ञायां समुपजातायां पश्चात्प्रतिषेधेन सम्बन्धः क्रियते,अन्यथा हि प्रतिषेधस्य विषयो न दर्शितः स्यात्। तथा ह्यपादानसाधनागमनक्रिया प्रतिषेद्धुमिष्टा।तत्र यदि चादावेव निषेधः स्यात्, अपायाभावात् तदसम्बद्धस्य ग्रामस्यापादानसंज्ञा सिद्धा न स्यात्। ततश्च या प्रतिषेध्यापादानसाधनागमनक्रिया प्रतिषेधस्य विषयभूता; सा न शक्यते प्रदर्शकयितुम्; न चात्राप्रदर्शितकविषयेत प्रतिषेधः शक्यते वक्तुम्. तस्मात् पूर्वमपादानसंज्ञा भवति, पश्चात्प्रतिषेधेन योग इत्येष क्रमः।

25.भीत्रार्थानां भयहेतुः। (1.4.25)

भीतिर्भीः; त्राणं त्राः; सम्पदादित्वात् क्विप्। भीश्च त्राश्च भीत्रौ। भीत्रादर्थौ येषां ते भीत्रार्थाः। `बिभेत्यर्थानाम्' इत्यादि। बिभेतित्रायतिशब्दाविह

साहचर्याद्बिभेतित्रायत्यर्थयोर्वर्तते। बिभेतिरर्थो येषां ते बिभेत्यर्थाः। त्रायतिरर्थो येषां ते त्रायत्यर्थाः। `बिभेति' इति। `ञिभी भये' (धा.पा.1084), जौहोत्यादिकः। `उद्विजते' इति। `ओविजी भयचलनयोः' (धा.पा.1460) तौदादिकोऽनुदात्तेत्। `त्रायते' ितिि। `त्रैङ पालने' (धा.पा.965) भौवादिकः। `अरण्ये बिभेति' इति। नात्रारण्याद्भयम्, किं तर्हि ? तत्रस्थेभ्यश्चौरादिभ्यः। ननु चात्राधिकरणसंज्ञा परत्वात् बाधिका भविष्यति।अपि च-- ध्रुवमित्यनुवर्त्तते, `ध्रुवञ्चावधिभूतम्' इत्युक्तम्। न चारण्यमवधिबावेन विवक्षितम्, तत्किमेतन्निवृत्त्यर्थेन भयहेतुग्रहणेन ? एवं तर्हि पूर्वस्यायं प्रपञ्चः। न हि कायसम्प्राप्तिपूर्वक एवापायो भवति, किं तर्हि ? बुद्धिसम्प्राप्तिपूर्वकोऽपि। अस्ति चेह बुद्धिकसंप्राप्तिपूर्वकोऽप्ययायः, तथा हि -- चौरेभ्यो बिभेतीत्यत्र यस्तावत् पुरुषः प्रेक्षावान् भवति स एवं पश्यति-- `यदि मां चौराः पश्येयुर्ध्रुवं मे मृत्युः' इति विचारयंस्तान् बुद्ध्या प्राप्नोति, प्राप्य चततो निवर्तते। तत्र ध्रुवमित्यादिनैव सिद्धम्। तस्मात् पूर्वस्यायं प्रपञ्चः। न च प्रपञ्चे गुरुलाघवं चिन्त्यते। एवमुत्तरेऽपि योगाः पूर्वस्यैव प्रपञ्चा वेदितव्याः; तदुदाहरणानां `अध्ययनात् पराजयते' इत्येवमादीनां पूर्वेणैव सिद्धत्वात्। यथा च तेषां सिद्धत्वं तथा भाष्ये एव प्रतिपादितम्। तस्मात् तत्रापि गुरुलाघवं न चिन्तनीयम्।।

26. पराजेरसोढः। (1.4.26)

`सोढुं न शक्यते' इति। अनुभवितुं न शक्यत इत्यर्थः। `अध्ययनात् पराजयते' इत्यध्ययनमभिभवितुं न शक्नोति, न पारयतीत्यर्थः। `विपराभ्यां जेः' (1.3.19) इत्यात्मनेपदम्।

`शत्रून् पराजयते' इति। अभिभवतीत्यर्थः। ननु च परत्वात् कर्मसंज्ञयैवात्र बाधितत्वादपादानसंज्ञा न भविष्यति, तत् किमेतन्निवृत्त्यर्थेनासोढग्रहणेन ? सत्यमेतत्; प्रपञ्चे गुरुलाघवं न हि चिन्त्यते, प्रपञ्चश्चायम्। अस्ति ह्यत्राध्ययनाद् बुद्धिसंसर्ग पूर्वकोऽपायः। तथा हि-- यएव पुरुषोऽलसो भवति, स एवं मन्यते-- दुःखायैवैतदध्ययनमिति, पश्यन् बुद्ध्या तत्प्राप्नोति, प्राप्य च ततो निवर्तते; तस्मात् पूर्वेणैव सिद्धम्।।

27. वारणार्थानामीप्सितः। (1.4.27)

वारणमर्थो येषां ते वारणार्थाः। `यवेभ्यो गा वारयति' इति। `गाः' इति गवामीप्सिततमत्वेन विवक्षितत्वात्कर्मसंज्ञा, गोशब्दाच्छस, `औतोऽम्शसोः' (6.1.93) इत्यात्त्वम्, रुत्वे कृते `भोभगोअधोअपूर्वस्य' (8.3.17) इति यत्वम्, `हलि सर्वेषाम्' (8.3.22) इति यलोपः। `वारयति' इति। `वृञ् आवरणे' (धा.पा.1813), चुरादिणिच्। `निवर्तयति' इति। `वृतु वर्तने' (धा.पा. 758), हेतुमण्णिच्।

`यवेभ्यो गा वारयति क्षेत्रे' इति। अत्र क्षेत्रस्यानीप्सितस्य न भवति संज्ञा; ईप्सितग्रहणम्। ननु चात्र परत्वादरधिकरणसंज्ञयैव बाधितत्वादपादानसंज्ञायाः, क्षेत्रस्यापादानसंज्ञा न भविष्यतीत्यतो न कर्तव्यमीप्सितग्रहणमिति, एतन्नाशङ्कनीयम्; उक्तोत्तरत्वात्।।

28.अन्तर्द्धौ येनादर्शनमिच्छति। (1.4.28)

`अन्तर्द्धौ' इति निमित्तसप्तमीयम्. `निमित्तात् कर्मयोगे' (वा.138) इति सप्तमी, यथा-- चर्मणि द्वीपिनं हन्तीति। एतदेव ज्ञापकम्-- निमित्तात् कर्मसंयोगेऽस्ति सप्तमीति। अस्त ह्यत्रादर्शनेन कर्मणा संयोगः। `येन' इति। कर्त्तरि तृतीया। ननु च `कर्त्तृकर्मणोः कृति' (2.3.65) इति षष्ठ्या भवितव्यमिति ? नैतदस्ति; `उभयप्राप्तौ कर्मणि' (2.3.66) इति नियमात् कर्मण्येव, न कर्तरि। कर्म त्वत्रादर्शनस्यात्मा, तस्यान्तरङ्त्वात् स एव कर्म विज्ञायते। `तत् कारकम्' इति। यद्यप्यत्र सूत्रे तच्छब्दो नोपात्तः, तथापि स यत्तदोर्नित्याभिसम्बन्धाल्लभ्यते। `उपाध्यायादन्तर्धत्ते' इत्यत्रोपाध्यायेन कर्ता शिष्य आत्मनः कर्मभूतस्यादर्शनमिच्छति। अन्तर्द्धिनिमित्तम्। अन्तर्द्धते इति दधातेर्लट्,`स्वरितञितः' (1.3.72) इत्यात्मनेपदम्, शपः श्लुः, क`श्लौ' (6.1.10) इति द्विर्वचनम्, `श्नाभ्यस्तयोरातः' (6.4.112) इत्याकारलोपः, अभ्यासस्य जश्त्वम्, `दधस्तथोश्च' (8.2.38) इति दकारस्य धकारः, परस्य धकारस्य `खरि च' (8.4.55) इति चर्त्वम् = तकारः। `निलीयते' इति। `लीङ श्लेषणे' (धा.पा.1139) वैवादिकः।

`चौरान्न दिदृक्षते' इति। अत्र यश्चौरान् न दिदृशत इति स तैरात्मनोऽदर्शनमिच्छति, न त्वन्तर्द्धिनिमित्तम्; किन्तूपघातनिवृत्त्यर्थम्। विस्पष्टार्थञ्चान्तार्द्धिग्रहण्। परत्वात् कर्मसंज्ञैव बाधितत्वाच्चौराणामिहापादानसंज्ञा न भविष्यति। प्रपञ्चार्थोऽयं योगः, न च प्रपञ्चे गुरुलाघवं चिन्त्यत इत्युक्तम्। उपाध्यायादन्तर्धते शिष्य इति शिष्यस्यान्तर्द्धातुर्मा भूत्, नैतदस्ति; ध्रुवमित्यनुवर्तते, ध्रुवञ्चावधिभूतमित्युक्तम्; न चान्तर्द्धातावधिभूतः। एवं तर्ह्यसति येनेत्येतस्मिन् वचने, सत्यामपि ध्रुवमित्यस्यानुवृत्तौ सूत्रस्यावाचकत्वं स्यात्। अतस्तन्माभूदिति येनेत्युक्तम्।।

29. आख्यातोपयोगे। (1.4.29)

`नियमपूर्वकं विद्याग्रहणम्' इति। विद्याग्रहणार्थं शिष्यप्रवृत्तिः = नियमः। स पूर्वो यस्य तत् तथोक्तम्। `शेषाद्विभाषा' (5.4.154) इति कप्। `नटस्य गाथां शृणोति' इति। सम्बन्धलक्षणा षष्ठी। नियमपूर्वकमिह विद्याग्रहणं नास्ति।।

30. जनिकर्तुः प्रकृतिः। (1.4.30)

जनिशब्दोऽत्र साहचर्याज्जन्यर्थ वर्तते। अत एवाह-- `जन्यर्थस्य' इति। `जन्मनः' इति। एतेन जन्यर्थं दर्शयति। तथा हि-- `जनी प्रादुर्भावे'

(धा.पा.1149) इति पठ्यते। प्रादुर्भावो जन्म एव। कः पुनस्तस्य कर्त्तेत्यत आह-- `जायमानः' इति। `ज्ञाजनोर्जा' (7.3.79) इति जादेशः। अथ प्रकृतिग्रहणं किमर्थम् ? यावता ध्रुवमित्यनुवर्त्तते, ध्रुवञ्चावधिभुतमित्युक्तम्। जनिकर्त्तृश्चावधिः कारणमेव भवति; तत्रान्तरेणापि प्रकृतिग्रहणं प्रकृतेरेव भविष्यति, नैतदस्ति; पुत्रात् प्रमादो जायत इत्यादौ पुत्रादेरप्यपादानासंज्ञा यथा स्यादित्येवमर्थं प्रकृतिग्रहणम्। द्विविधं हि कारणम्-- उपादानकारणम्, सहकारिकारणञ्च। तत्र यत् कार्येणाभिन्नदेशं तदुपादानकारणम्, यथा- घटस्य मृत्पिण्डः। सहकारिकारणं यत् कार्येण भिन्नदेशम्, यथा-- तस्यैव दण्डचक्रादि। तत्रासति प्रकृतिग्रहणे प्रत्यासत्तेरुपादानकारणस्यैव स्यात्, नेतरस्य। प्रकृतिग्रहणे तु सति सर्वस्यैव कारणमात्रस्य भवति।।

31.भुवः प्रभवः। (1.4.31)

`भवनं भूः'इति। सम्पदादित्वात् क्विप्। प्रभवत्यस्मीदित प्रभव इत्यपादाने `ऋदोरप्'(3.3.57) इत्यप्। ननु च `हिमवतो गङ्गा प्रभवति' इत्येतत् पूर्वेणैव सिद्धम्. तथा ह्ययमत्रार्थः-- हिमवतो गङ्गा जायत इति, तत्किमर्थमिदमारभ्यत इत्याह-- `प्रथमत उपलभ्यते' इति। एष चार्थोऽनेकार्थत्वाद्धातूनां वेदितव्यः। जन्यर्थस्त्वत्र न सम्भवत्येव, न हि हिमवान् गङ्गायाः कारणम्, सा ह्यन्येभ्य एव कारणेभ्य उत्पन्ना। हिमवति तु केवलं प्रथमत उपलभ्यत इति।।

32. कर्मणा यमभिप्रैति स सम्प्रदानम्। (1.4.32)

`कर्मणा करणभूतेन' इति। ननु च कथं कर्म करणं भवति ? क्रियाभेदसम्बन्धात्। तथा हि ददातिक्रिययाऽऽस्तुमिष्टतमत्वात् तस्याः कर्मत्वम्, अभिप्रयाणक्रियां प्रतितस्य साधकतमत्वात् करणत्वम्। `अभिप्रैति' इति। अभिसम्बध्नातीत्यर्थः। यदि कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञो भवति, एवमजां नयति ग्राममित्यजादिभिर्नयनक्रियाकर्मभिः सम्बध्यमानस्य ग्रामस्य सम्प्रदानसंज्ञा प्रसज्येतेत्यत आह-- `अन्यर्थसंज्ञाविज्ञानात्' इत्यादि। सम्प्रदानमिति। तेन ददातेः कर्मणा यमभिप्रैति तत् सम्प्रदानमिति विज्ञायते। नन्वेवमपि रजकस्य वस्त्रं ददाति, घ्नतः पृष्ठं ददातीत्यतत्र प्राप्नोति, नैतदस्ति; दानं हि नाम पूजानुग्रहकाम्यया स्वकीयद्रव्यपरित्यागः परस्वत्वापत्तिः, तच्चेह नास्ति, अतो न भविष्यति। कर्मणेति किमर्थम् ? " यमभिप्रैति स सम्प्रदानम्" इत्युच्यमाने यमभिप्रैति तस्य कर्मण एव सम्प्रदानसंज्ञत्रा स्यात्. कर्मसंज्ञायास्तु ददातिकर्मणोऽन्यत्रावकाशः स्यात्-- ओदनं पचतीति। `यं स' ग्रहणं किमर्थम् ? `कर्मणाभिप्रैति सम्प्रदानम्' इत्युच्यमाने कयोऽभिप्रैति तस्य सम्प्रदानसंज्ञा स्यात्। ततश्च कर्तुः सम्प्रदानसंज्ञा स्यात्, कर्तसंज्ञायास्तु यत्र कर्मसम्बन्धो नास्ति, सोऽवकाशः स्यात्--आस्ते, शेते इति। अथाभिप्रग्रहण किमर्थम् ? `कर्मणा यमेति स सम्प्रदानाम्' इत्युच्यमाने कालविशेषविक्षा स्यात्, वर्तमान एव स्यात्। ततश्चोपाध्यायस्य गामदात्, उपाध्यायायं गां दास्तीत्यत्र न स्यात्, अभिग्रहणे तु सति भवति। अभिराभिमुख्ये वर्त्तते तच्चाप्यतीतेऽप्यस्ति। प्रशब्द आदिकर्मणि, प्रारम्भे। स चासन्निहितायां भाविन्यामपि क्रियायां सम्भवतीति सर्वत्र संज्ञा सिद्धा भवति। नैतदभिप्रग्रहस्य प्रयोजनमुपपद्यते। यथैव कर्मणेत्यत्रैकत्वसंख्याया विवक्षा न भवति; यता च `यं' `सः' इत्यत्र लिङ्गसंख्योर्विवक्षा न भवति तथा कालस्यापि न भविष्यति। किं कारणम् ? उपलक्षणार्थत्वात्। यथा-- `सोऽर्थो योऽनर्थ बाधते' इत्युक्ते योऽपि बाधितवान्, योऽपि बाधिष्यते सोऽप्यर्थ एव। एवं तर्हि ग्रन्थाधिक्यादर्थाधिक्यं यथा स्यादित्यवमर्थमभिप्रग्रहणम्। एतेन क्रिययापि यमभिप्रैति तस्यापि सम्प्रदानसंज्ञा सिद्धा भवति; अन्यथा हि यद्यपि क्रिया प्रार्थनाध्यवसानाभ्यां व्याप्तुमिष्टतमत्वात् कर्म, तथापि ददातिकर्मसम्बन्धाभावान्न सिद्ध्येत्। कथं पुनरेतदवसितम्-- क्रियया यमभिप्रैतिस सम्प्रदावमित्ययमर्थोऽत्र प्रतिपादयितुमिष्टतम् इति ? अभिप्रग्रहणात्। अस्ति ह्यत्राचार्यस्य कश्चिदर्थोऽधिकोऽभिमतः, यस्यावभासनायाधिकं शब्दान्तरं प्रयुक्तमिति गम्यते, न त्वर्थविशेषः। न हि तत् तस्य वाचकम्। यद्यप्यवाचकं स्यात्, तथापि लक्ष्यदर्शनवशादविच्छिन्नाचार्यपारम्पर्योपदेशाच्च विशेषावगतिर्भविष्यतीत्यद्वेष्यमेतत्। `क्रियाग्रहणमपि कर्त्तव्यम्' इति। क्रियया ग्रहणं क्रियाग्रहणम्। येन क्रिया गृह्यते, तद्वयाख्यानं कर्त्तव्यम्। किं पुनस्तद्व्याख्यानम् ? तच्चास्माभिरभिग्रहण्सय प्रयोजनं वर्णयद्भिः कृतमेव। का पुनरिह क्रिया, ययाभिप्रेयमाणस्य सम्प्रदानसंज्ञेष्यते ? सा विवक्षिता। अत आह-- `क्रिययापि यमभिप्रैति' इत्यादि। `निगल्हते' इति। `गर्ह गल्ह कुत्सायाम्' (धा.पा.636,637) अनुदात्तेत्। `युद्धाय सन्नह्यते' इति। `नह बन्धने' (धा.पा.1166) दिवादौ स्वरितेत्। स चेह निश्चये वर्त्तते, युद्धे निश्चयं करोतीत्यर्थः। `पत्ये शेते' इति। शीङत्रोपसर्पणपूर्वके शयन वर्त्तते। पतिमुपसृत्य शेते इत्यर्थः। `कर्मणः करणसंज्ञा' इत्यादि। एतत् `पशुना रुद्रं यजते' इत्येतद्विषयमेव वेदितव्यम्। यजिः स्वरितेत्। एतच्च `व्यत्ययो बहुलम्' (3.1.85) इति सुव्यत्ययेन सिद्धमेवेति न वक्तव्यम्।।

33. रुच्यर्थानां प्रीयमाणः। (1.4.33)

`रुचिना समानार्था रुच्यर्थाः' इति। रुच्यर्थानामित्यस्मादेव निपातनात-- मयूरव्यंसकादित्वान्मध्यमपदलोपो समासः। `समानार्थाः' इति। एकार्था इत्यर्थः। यद्यपि `रिचिर्दीप्तौ' (धा.पा.745) पठ्यते, तथापीहाभिलाषे वर्त्तते, अनेकार्थत्वाद्धातूनाम्; तत्रैव प्रीयमाणार्थस्य सम्भवात्। यस्य ह्यभिलाषः स प्रीयमाणः. यस्त्वभिलषति स प्रीणाति। `प्रीयमाणः' इति। तृप्यमाण इत्यर्थः। `प्रीञ् तर्पणे' (धा.पा. 1474) इत्येतस्मात् कर्मणि विहितस्य लस्य शानच्। `अन्यकर्त्तृकः' इत्यादिना तमभिलाषविशेषं दर्शयन् रुचिशब्दस्यार्थमाचष्टे। प्रीयमाणापेक्षयाऽन्योर्थो वेदितव्यः। प्रीयमाणादन्यः कर्त्ता यस्य सोऽन्यकर्त्तुकः। `रोचते स्वदते' इति। `रुच दीप्तौ'(धा.पा.745) `स्वद आस्वादने' (धा.पा.18) अनुदात्तेत्तौ। `देवदत्तस्थस्य' इत्यादिनाऽन्यकर्त्तृकतामभिलाषस्य दर्शयति।

`देवदत्ताय रोचते मोदकः पथि' इति। प्रीयमाणग्रहादिहाधिकरणस्य पथः सम्प्रदानसंज्ञा न भवति। अथ देवदत्तो मोदकमभिलषतीत्यत्र देवदत्तस्य

सम्प्रदानसंज्ञा कस्मान्न भवति ? रुच्यर्थाभावात् `अन्यकर्तृको ह्यभिलाषो रुचिः, (का. 1.4.33) इत्युक्तम्. न चेहान्यकर्तृकोऽभिलाषः, किं तर्हि ? प्रीयमाणो देवदत्तो यस्तत्रस्थोऽभिलाषस्तत्कर्तृकः।।

34. श्लीघह्नुङ्स्थाशपां ज्ञीप्स्यमानः। (1.4.34)
`ज्ञीप्स्यमानः' इति. `मारणतोषणनिशामनेषु ज्ञा' (धा.पा.811) इति घटादिषु पठ्यते। तस्मात् निशामने ज्ञाने वर्त्तमानात् हेतुमण्णिच्। अथ वा `ज्ञप मिच्च' (धा.पा.1624) इति चुरादौ पठ्यते। तस्माच्चुरादिणिच्, मित्त्वात् ह्रस्वत्वम्, सन्, द्विर्वचनम्, `आप्ज्ञप्यृधामीत्' (7.4.55) इतीत्वम्, `अत्र लोपऽभ्यासस्य' (7.4.58) इत्यभ्यासलोपः, कर्मणि लकारः, शानच् यक्, `अतो लोपः' (6.4.48)। `श्लाघते' इति। `श्लाघृ कत्थने' (धा.पा.115) अनुदात्तेत्। `{ह्नुते-काशिका, `निह्नुते-पदमञ्जरी.} अपह्नते' इति। `ह्नुङ अपनयने' (धा.पा.1082), आदादिकः। `तिष्ठते' इति। `प्रकाशनस्थेयाख्ययोश्च' (1.3.23) इति तङ। `शपते' इति। `{शप आक्रोशे- धा.पा.} शप उपलम्भने' (धा.पा.1000) इत्यनेनोपलसंख्यानन तङ।।

35. धरेरुत्तमर्णः। (1.4.35)
`उत्तमर्णः' इति। ऋणे उत्तम् उत्तमर्णः। अत एव निपातनात् समासः, सप्तमीसमासे ऋणस्य पूर्वनिपातात्। ननु चोत्तमर्णे ऋणशब्देन न भवितव्यम्। `ऋणमाधमर्ण्ये ' (8.2.60) इत्याधमर्ण्ये तस्य निपातनात्, नैतदस्ति; कालान्तरे देयनियमोपलक्षणार्थं हि तत्राधमर्ण्यग्रहणम्। अत उत्तमर्णोऽपि भवत्येव। `शतं धारयति' इति। `धृङ अवस्थाने' (धा.पा.1412), शतं ध्रियते स्वरूपेणावतिष्ठते, स्वभावान्न प्रच्यवते। तदन्यः प्रयुङ्क्त इति `हेतुमति च' (3.1.26) इति णिच्। `ग्रामे' इति ग्रामस्याधिकरणस्यानुत्तमर्णस्य न भवति।।

36. स्पृहेरीप्सितः। (1.4.36)
`स्पृहयति' इति। अतो लोपस्य (6.4.48) `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावाद्गुणो न भवति। यदा तु पुष्पादीनामीप्सिततमत्वं विवक्ष्यते, तदा परत्वात् कर्मसंज्ञैव भवति-- पुष्पाणि स्पृह्यतीति।।

37.क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः। (1.4.37)
क्रुधद्रुहावकर्मकौ, तत्र षष्ठ्यां प्राप्तायामयमारम्भः, इतरौ सकर्मकौ। तत्र द्वितीयायां प्राप्तायाम्। कथं पुनरेषां भिन्नार्थत्वे सति `यं प्रति कोपः' इति सामान्येन तद्विशेषणमुपपद्यत इत्याह-- `क्रोधस्तावत्' इत्यादि। सुगमम्। `क्रुद्ध्यति, द्रुह्यति' इति। `क्रुध कोपे'(धा.पा.1189), `द्रुह जिघांसायाम्' (धा.पा.1197) दैवादकौ। `ईर्ष्यति' इति। `{ईक्ष्यं, सूक्ष्यं-धा.पा.}ईर्क्ष, सूर्क्ष, ईर्ष्य ईर्ष्यार्थाः' (धा.पा.510,509,511)। `असूयति' इति। असूयशब्दः कण्ड्वादियगन्तः। `भार्यामीर्ष्यति'इति। अस्ति भार्यायामीर्ष्या, न तु तां प्रति कोपः। केवलं परैर्दृश्यमानां तां न क्षमते। अथास्मिन् द्वेष्टीत्यत्र कथं न भवति सम्प्रदानसंज्ञा ? द्विषेरक्रोधाद्ययर्थत्वात्। अप्रीतौ ह्येनं स्मरन्ति; तथा चाचेतनेष्वपि प्रयुज्यते-- औषदं द्वेष्टीति। नाभिनन्दतीति गम्यते।।

38. क्रुधद्रुहोरुपसृष्टयोः कर्म। (1.4.38)

39. राधीक्ष्योर्यस्य विप्रश्नः। (1.4.39)
`राध्यति' इति। `राध साध संसिद्धौ' (धा.पा.1262,1263),दैवादिकः। `दैवम्' इति शुभाशुभं कर्म। यस्येति ग्रहणं विस्पष्टार्थम्। तथा हि-- `यं प्रति' इत्यनुवर्त्तते, तत्र यं विप्रश्न इत्येवमभिसम्बन्धे क्रियमाणे यस्येत्यस्यार्थोऽप्रयुज्यमानस्यापि गम्यत एव।

40. प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता। (1.4.40)
`परेण' इत्यादि। अन्येन केनचिदिदं मे क्रियतामिति प्रयुक्तो व्यापारितः सन् प्रतिजानीते। अतः प्रतिज्ञातुरन्येन प्रयुक्तस्याभ्युपगमो भवति। प्रयोक्तेति व्यापारयिता। सूत्रे पूर्वस्येत्यर्थापेक्षया पुंल्लिङ्गेन निर्देशः।स त्वर्थो विचार्यमाणः क्रियैव भवति। यस्मात् कर्त्तेति क्रियाया एव भवति नान्यस्यार्थस्येत्याह-- `पूर्वस्याः क्रियायाः' इति। यश्चासौ पूर्वस्याः क्रियायाः कर्त्ता भवति, स प्रतिज्ञातुः प्रयोजको भवतीति हेतुसंज्ञायां प्राप्तायामिदं वनचम्। `देवदत्ताय गां प्रतिशृणोति' इति। अत्र पूर्वस्या यानचक्रियाया देवदत्तः कर्त्ता। देवदत्तेन हि मह्यं गां देहीति याचित स यदा ददामीति प्रतिजानीते, तदैवं प्रयुज्यते-- देवदत्ताय गां प्रतिशृणोतीति । पूर्वस्य कर्त्तेति किम् ? विना तेन गवादेरभ्युपयेमानस्य कर्मण एव स्यात्। ननु च परत्वात् कर्मसंज्ञा तस्य बाधिका भविष्यति, नैतदस्ति; नाप्राप्ते हि संज्ञान्तर इदमारभ्यत इति। इहापि च देवदत्ताय गामाशृणोतीति देवदत्तस्य हेतुसंज्ञा प्राप्नोति। तत्र पूर्वस्य कर्त्तेत्यस्मिन्नसति यथा देवदत्तस्य हेतुसंज्ञां बाधते, तदा कर्मसंज्ञामपि बाधेत। अथ वा-- `पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' (व्या.प.9) इति कर्मसंज्ञामेव बाधेत। पूर्वस्य कर्त्तेत्यस्मिंस्तु सति हेतुसंज्ञामेव बाधते, न कर्मसंज्ञाम्।।

41.अनुप्रतिगृणश्च। (1.4.41)
`अनुप्रतिगृणः' इति श्नाप्रत्ययेन निर्देशात् क्र्यादिपठितस्य `गृ शब्दे' (धा.पा.1498) इत्यस्य, न `गृ निगरणे' (धा.पा.1410) इत्यस्य तौदादिकस्य। `होता प्रथमं शंसति'इति। एतेन स्तुतिक्रियायाः पूर्वस्या होता कर्त्तेति दर्शयति। प्रोत्साहयतीत्यनेनागृणातिप्रतिगृणातिशब्दयोरर्थमाचष्टे। कथं पुनर्ज्ञायते-- अनुपूर्वः प्रतिपूर्वश्च शंसितुर्गृणातिः प्रोत्साहने वर्त्तत इत्याह-- `अनुगरः प्रतिगरः' इति। अनुगीर्यते = होता प्रथमं प्रशस्यते येन शब्देन सोऽयमनुगरः। एवं प्रतिगीर्यते येन स प्रतिगरः। पूर्वसय् कर्त्तत्येव, होत्रेऽनुगृणातिक सदसीत्यधिकरणस्य मा भूत्।।

42. साधकतमं करणम्। (1.4.42)
ननु च सामग्र्यधीना हि क्रियासिद्धरेकस्याप्यभावेन न भवति। तत् कस्यात्र प्रकर्षो यत्परिग्रहाय साधकतमशब्दस्य ग्रहममित यश्चोदयेत्, तं प्रत्याह-- `क्रियासिद्धौ' इत्यादि। प्रकृष्टम् = अत्यन्तमुपकारकम्। अथ वा -- प्रकर्षः प्रकृष्टम् `नुपंसके भावे क्तः' (3.3.114)। प्रकृष्टेन प्रकर्षेणोपकारकं प्रकृष्टोपकारकं यत् क्रियायसिद्धिविषये प्रकर्षेणोपकारकं विवक्षितं तत् साधकतमम्। विवक्षितग्रहणं यदा प्रकृष्टोपकारकत्वेन विवक्ष्यते, तदा साधकतमव्यवहारो विज्ञायते, नान्येदित ज्ञापनार्थम्। तथाहि-- विवक्षावशाद् यदेव कदाचित् करणम्भवति-- धनुषा विध्यतीति, तदेव कदाचित् स्वातन्त्र्यविवक्षायां कर्त्तृत्वमनुभवति-- टधनुर्विध्यतीति। `लुनाति' इति। `प्वादीनां ह्रस्वः' (7.3.80)।
`तमब्ग्रहणं किम् ? गङ्गायां घोषः' इति। यदि तमब्ग्रहणं न क्रियेत, ततोऽत्राधिकरणसंज्ञा न स्यात्। इह हि द्विवध आधारः- गौणः,मुख्यश्च। तत्र मुख्यो य आधेयेन व्याप्यते, यथा-- तिलेषु तैलमस्ति;अत्र तैलेनाधेयेनाधारभूतास्तिला व्याप्ताः। अव्याप्तो गौणो यथा-- गङ्गायां घोष इति। अत्र हि सामीप्याद् गङ्गायां आधारत्वमुपचरितम्, न मुख्यम्; व्याप्त्यभावात्। तत्रासति तमब्ग्रहणे `गौणमुख्ययोर्मुख्ये कार्यसंम्प्रत्ययः' (व्या.प.4) इति मुख्यस्यैवाधिकरणसंज्ञा स्यात्, नेतरस्य; तमब्ग्रहणात् तस्यापि भवति; तथपीह तमब्ग्रहणं न कर्त्तव्यम्,कथम् ? विनापि तेन प्रकर्षावगतेः। यथैव ह्यनभिरूपाय कन्यादानस्य प्रवृत्तिर्नास्तीत्यभिरूपाय कन्या देयेत्युक्ते विनापि प्रकर्षप्रत्ययेनाभिरूपतमायेति गम्यते; तथेहापि कारकाधिकारादसाधके संज्ञायाः प्रवृत्तिर्नस्तीति `साधकं करणम्' इत्युक्तेऽन्तरेणापि तमब्ग्रहणं साधकतममिति गम्यते, तत्किं तमब्ग्रहणेन ? तदेतत् तमब्ग्रहणं ज्ञापनार्थं कृतम्। एतदनेन ज्ञाप्यते-- `इह कारकाधिकारे इतः सूत्रादन्यत्र विना तमब्ग्रहणेन प्रकर्षो नाश्रीयते' इति। तेन `आधारोऽधिकरणम्' (1.4.45) इत्यनेन `गङ्गायां घोषः' इत्यादावमुख्यस्यापि गङ्गादेराधारस्याधिकरणसंज्ञा सिद्धा भवति।।

43. दिव कर्म च। (1.4.43)
`दीव्यति' इति। `हलि च' (8.2.77) इति दीर्घः।।

44. परिक्रयणे कसंप्रदानमन्यतरस्याम्। (1.4.44)
परिक्रीतिः = परिक्रयणम्। `नियतकालम्' इति। नात्यन्तिकम्। `वेतनादिना' इति। आदिशब्देन बन्धकादीनां ग्रहणम्। `नात्यन्तिकः क्रय एव' इति नियतकालत्वं स्पष्टीकरोति। परिशब्दोऽत्र प्रत्यासतिं द्योतयति। क्रयो हि नामात्यन्तिकः। वेतनादिना केवलं यत्तु नियतकालं तदात्यन्तिकस्य क्रयस्य समीपमिति परिशब्देनाख्यायते।।

45. आधारोऽधिकरणम्। (1.4.45)
`आध्रियन्ते क्रियागुणा अस्मिन्नित्याधारः' इति। `अध्यायन्यायोद्यावट (3.3.122) इत्यादिनाऽऽधारशब्दोऽधिकरणे घञन्तो व्यत्पादित-। क्रियापेक्षत्वत् कारकस्येति क्रियाग्रहणम्। यद्याध्रियन्ति क्रिया यस्मिन् स आधारः इति, एवं हि सति कर्तृकर्मणोरेवाधिकरणसंज्ञा प्रसज्येत, तयोरेव हि क्रिया आध्रियन्ते। तथा हि- कर्त्तस्था व ा क्रिया भवति, कर्मस्था वा, अनवकाशत्वात् कर्त्तृकर्मणोः संज्ञा न भविष्यत्येष दोष प्रसङग् इति, एतच्चानुत्तरम्; सत्यपि ह्यनवकाशत्वे तयोः पर्यायः स्यात्। एकदाधिकरणसंज्ञा भवितव्यं तं दर्शयति। प्रतिराभिमुख्ये। `क्रियां प्रति य आधारः' इति।। क्रियाया अभिमुखो य आधार इत्यर्थः। यश्च क्रियां धारयति स क्रियाया अभिमुखो भवति। क्रियायास्तु धारणं साक्षात्, व्यवधानेन वा; कर्त्तृकर्मणोः क्रियाश्रययोर्धारणात्। अत्र पूर्वस्य व्यवच्छेदार्थं `कर्त्तृर्मणोः' इत्युक्तम्।
तदेतदुक्तं भवति-- कर्त्तृकर्मणोः क्रियाधारभूतयोर्धारणात् क्रियाया अभिमुखो य आधारस्तस्याधिकरणसंज्ञा भवतीति। तदेवं क्रियाधारभूतकर्त्तृकर्मधारणद्वारेण क्रियाया अभिमुखो य आधारस्तस्याधिकरणसंज्ञा; यतोऽनेन विधीयते ततो न भवति पूर्वस्य दोषप्रसङ्गः। न हि कर्त्तृकर्मणोरनेन प्रकारेण क्रियां प्रत्याधारत्वम्; अपि तु साक्षादेव क्रियाधारणात्। नन्वेवमपि कर्त्तृकर्मणोर्मुख्यं क्रियाधारत्वम्, साक्षादेव क्रियाधारणात्, कर्त्तृकर्माधारस्य तु कटादेर्गौणत्वं क्रियाश्रयभूतकर्त्तृकर्मधारणद्वारेण क्रियाधारणात्। तत्र मुख्य आधारे सति गौणस्याधिकरणसंज्ञा न प्राप्नोतीति स दोषसत्दवस्थ एव? नैतदस्ति; तमब्ग्रहणेन ज्ञापितमेतत्-- गौणस्याप्याधारस्याधिकरणसंज्ञा भवतीति। भवतु गौणस्याधिकरणसंज्ञा, मुख्यस्यापि कर्त्तृ कर्मणश्च कस्मान्न भवतीति चेत्, न; परत्वादनवकाशत्वाच्च कर्त्तृकर्मसंज्ञाभ्यां बाध्यमानत्वात्। अधिकरणसंज्ञा हि पूर्वो गौण आधारे सावकाशा, तद्विपरीते तु कर्त्तृकर्मसंज्ञे इति ताभ्यां बाध्यमाना नोत्सहते तयोर्विषयमवगाहितुम्।

`कटे आस्ते' इति। कर्त्तृस्था क्रिया यत्र पूर्वेण प्रकारेणाध्रियते तस्योदाहरणम्;; विक्लेदनक्रियायाः कर्मस्थत्वात्। `स्थाल्यां पचति' इति। कर्मस्था क्रिया यत्राध्रियते तस्योदाहरणम्; विक्लेदनक्रियाया कर्मस्थत्वात्।

तत्पुनरधिकरणं त्रिप्रकारम्-- औपश्लेषिकम्,वैषयिकम्, अभिव्यापकञ्च। तत्राद्ये -- कटे आस्ते,स्थाल्यां पचतीति कटादेर्पयाधारस्य ह्याधेयेन सहोपश्लेषः संयोगलक्षणोऽस्तीत्यौपश्लेषिकं तद्भवति। वैषयिकम्-- गुरौ वसति, गङ्गायां घोष इति। प्रतिवसतीति विषयो ह्यनन्यत्रभावः, यथा-- चक्षुष्वप्रभृतीनां रूपादिभ्योऽनन्यत्रभावाच्चक्षुरादीनां रूपादयो विषया इत्युच्यन्ते, एवं शिष्यादीनां गुर्वादिभ्योऽनन्यत्रभावादेषां ते विषया इति। ननु च `आधारोऽधिकरणम्' (1.4.45) इत्युक्तम्, आधारश्च को भवति ? य आश्रयः; संयोगतः समवायो वा भवति, न च शिष्यादीनां गुरुप्रभृतिभिः सह संयोगः समवायो वाऽस्ति, तदयुक्तं तेषामधिकरणत्वम् ? नैतदस्ति; यदायत्ता हि यस्य स्थितिः स विनापि संयोगसमवायाभ्यां तस्याश्रयो भवति, यथा-- राजायत्तस्थितित्वात् पुरुषस्य राजेति; न च राज्ञा सह पुरुषस्य संयोगसमवायौ स्त-। तथा हि-- तदधीनस्थितित्वात् राजाश्रयः पुरुष इति लोके व्यपदिश्यते, तथा शिष्यादीनां गुर्वाद्यायत्ता स्थितिरिति युक्तस्तान् प्रति गुरुप्रभृतीनामाश्रयभावः। अभिव्यापकं यथा-- तिलेषु तैलम्, दघ्नि सर्पिरिति। तिलादिकं तैलदिकमाधेयं व्याप्यावतिष्ठत इति तिलादिकमभिव्यापकमधिकरणम्। यद्यप्यत्र तिलादीनां तैलादिभिः सह संयोगोऽस्ति, तथापि देशविभागाभावादत्र संश्लेषव्यवहारो नास्तीत्यौपश्लेषिकात् तत्पृथगेवोपस्थाप्यते।।

46.अधिशीङ्स्थासां कर्म। (1.4.46)

`अध्यास्ते' इति। `आस उपवेशने' (धा.पा.1021) अदादिः अनुदात्तेत्।।

47. अभिनिवशश्च।(1.4.47)

48. उपान्वध्याङ्वसः।(1.1.48)

लुग्विकरणालुग्विकरणपरिभाषया (व्या.प.50) `वस निवासे' (धा.पा.1005) इत्यस्य भौवादिकस्य ग्रहणम्, न `वस आच्छादने' (धा.पा.1023) इत्यस्यादादिकस्य।

`वसेरश्यर्थस्य' इत्यादि। `उपोष्य रजनीमेकाम्' इति, त्रिरात्रमुपवसतीत्यत्र च `कालाध्वनोः' (2.3.5) इति द्वितीया। अथ वा `कालभावाध्वगन्तव्याः' (वा; म.भा.1.336) इति कर्मत्वे। अत्रार्थशब्दो निवृत्तिवचन इति भोजननिवृत्तिवाचिन इत्यर्थ-। `वक्तव्यम्' इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- इहाप्यन्यतरस्याग्रहणनुवर्तते, सा च व्यवस्थितविभाषा विज्ञायते; तेन वसेरश्यर्थस्य प्रतिषेधो भविष्यति।।

49. कर्त्तुरीप्सिततमं कर्म। (1.4.49)

`कर्त्तुः क्रियया' इति। एतेन कर्त्तुरिति नेप्सिततमापेक्षया `क्तस्य च वर्तमाने' (2.3.67) इत्यनेनेयं षष्ठी, अपि तु क्रियापेक्षया शेषलक्षणैवेति दर्शयति। ननु च नेह क्रियोपात्ता, तत्कथं तदपेक्षया षष्ठी प्रयुज्यते ? यद्यपि नोपात्ता, तथापि कर्त्तुः क्रियापेक्षत्वात् कर्त्तृशब्दोऽयं सम्बन्धिशब्द इति कर्त्तृसम्बन्धिनीं क्रियामुपस्थापयतीत्यदोषः। ईप्सितशब्दो ह्यस्ति रूढिशब्दः-- ईप्सितोऽभिप्रेत इति, अस्ति च क्रियाशब्दः-आप्तमिष्ट ईप्सित इति ; तत्रह क्रियाशब्दो गृह्यते, नेतरः; न हि रूढिशब्दस्य क्रियया कर्त्तृसाध्यया सम्बन्ध उपपद्यते। `ईप्सित' इति। `आप्लृ व्याप्तौ' (धा.पा.1260) सन्, द्विर्वनचम्, `आप्ज्ञप्यृधामीत्' (7.4.55) इतीत्त्वम्। `अत्र लोपोऽभ्यासस्य' (7.4.58) इत्यभ्यासलोपः। ईप्स इति स्थिते, क्तप्रत्यये कृते, इटि च `अतो लोपः' (6.4.48) इत्यकारलोपे चेप्सितशब्दः सम्पद्यते। तेनार्थद्वयमिहोपात्तम्-- प्रकृत्यर्थः, प्रत्ययार्थश्च। तत्राप्तुमित्यनेन प्रकृत्यर्थं दर्शयति,इष्टतममित्यनेन प्रत्ययार्थम्।

`कर्मणः' इत। अश्वस्य। अत्र बन्धक्रियया आप्तमिष्टतमत्वात् कर्मत्वम्। स हि भक्षणक्रियया माषानाप्तुमिच्छति। `पयसौदनं भङ्क्ते' इति। असति हि तमब्ग्रहणे पयसोऽपि स्यात्। तदपि कर्त्तृर्भुजिक्रियया व्याप्तुमिष्टं भवति। तमब्ग्रहणे तु सति न भवत्यतिप्रसङ्गः; प्राधान्यादौदनस्यैवेप्सिततमत्वात्। प्राधान्यं त्वोदनस्य संस्कार्यत्वात्, पयसस्त्वप्राधान्यं संस्कारकत्वात्।

`कर्मेत्यनुवर्त्तमाने' इति। `अधिशीङस्थासां कर्म' (1.4.46) इत्यतः। `पुनः'इत्यादि। पूर्व कर्मग्रहणमाधारेण सम्बद्धम्; अतस्तदनुवृत्तौ तस्यानुवृत्तिः स्यादत आधारनिवृत्त्यर्थं पुनः कर्मग्रहणं क्रियते। यदि पुनराधारोऽनुवर्त्तते, ततः किं स्यादित्यत्राह-- `आधारस्यैव हि स्यात्' इति। `हि' शब्दो यस्मादर्थे। यस्मास्यादित्याह-- `गेहम्' इत्यादि। आधारानुवृत्तौ तु यत्र न भवति तद्दर्शनयितुमाह-- `ओदनं पचति' इत्यादि। आदिशब्देनौदनं भङ्क्त इत्येवमादेर्ग्रहणम्। अथ नदी कूलं कर्षतीत्यादौ कथं कर्मसंज्ञा ? कथञ्च न स्यात् ? नद्यादेरचेतनत्वात्, अचेतनानामीप्साया असम्भवात्, नैतदस्ति; अत्र नदीति पदान्तरसम्बन्दादीप्साया अभावोऽचेतनस्यापि भावः प्रतीयते। न च पदसंस्कारे पदानतरसम्बन्धगम्योऽर्थ उपयुज्यते, तेन कूलं कर्षतीत्यादाविच्छामात्रमाश्रिता व्याप्तिः, कर्म च संस्क्रियते। यद्यपि पश्चान्नद्या सह सम्बन्धादचेतनत्वमिच्छाया अभावश्च प्रतीयते, तथापि च तद्बहिरङ्गत्वादन्तरङ्गसंज्ञाकार्य न शक्नोति निवर्तयितुम्। अनेनैव न्यायेन यत्र व्याप्तिर्नास्ति,इच्छामात्रं च केवलम्, तत्रापि कर्मसंज्ञा भवति, यथा- ग्रामं गनतुमिच्छामि न च मे गमनशक्तिरस्तीति।

तच्च कर्म त्रिविधम्-- निर्वर्त्यम्, विकार्यम्, प्राप्यञ्च। तत्र निर्वर्त्त्यं यदसकदेवोत्पाद्यते, यस्य जन्म क्रियते, तन्निर्वर्त्त्यम् , यथा-- कटं करोति, कटो ह्यसन्नेव

क्रियते। विकार्यं यल्लब्धसत्ताकमवस्थान्तरमापाद्यते केवलं भस्माख्यामवस्थामापाद्यन्ते। प्राप्यं यत्र व्याप्तिव्यितरेकेण क्रियाकृता विशेषा न विभाव्यन्ते, यथा--आदित्यं पश्यतीति। न हि दृशिक्रियया व्याप्यमानस्य सवितुः क्रियाकृतविशेष उपलभ्यत इति प्राप्यमेतत् कर्म।।

50.तथायुक्तं चानीप्सितम्।(1.4.50)

चकारोऽवधारणे। अत एव वृत्तावाह-- `तेनैव' इति। `अनीप्सितम्' इति। यद्यप्ययं प्रसज्यप्रतिषेधः स्यात्, तदा ग्रामं गच्छन् वृक्षमूलान्युपसर्पतीत्यादौ वृक्षमूलादीनां कर्मसंज्ञा न स्यात्। तथा हि-- प्रसज्यप्रतिषेधे सत्यनेन योगेनानीप्सितस्यैव कर्मसंज्ञा विधीयते; वृक्षमूलानि च न तावदीप्तितानि, पूर्वमनभिसन्धाय प्रवृत्तेः; नाप्यनीप्सितानि, अप्रतिकूलत्वात्; ततश्चानीप्सितस्य कर्मसंज्ञा विधीयमाना तेषमीप्सितादन्यत्वेनानीप्सितान्न स्यात्। पर्युदासे तु सत्यनेन योनेनेप्सितादन्यस्य कर्मसंज्ञा विधीयते। भवन्ति च यथोक्तप्रकरणानि वृक्षमूलानीप्सितादन्यानि; अतस्तेषामपि कर्मसंज्ञा सिध्यतीत्येतदालोच्य पर्युदासोऽयमिति दर्शयितुमाह-- `ईप्सितादन्यत्' इत्यादि। किं पुनस्तदित्याह-- `द्वेष्यम्' इत्यादि। द्वेष्यम् = प्रतिकूलम्, यथा-- विषचौरादि। इतरदप्रतिकूलम्, यथा -- उक्तप्रकाराणि वृक्षमूलानि। `भक्षयति' इति। `भक्ष अदने' (धा.पा. 1557) चौरादिकः।।

51.अकथितञ्च। (1.4.51)

`{मुद्रित `काशिकावृत्तौ' तु `अपादानादिविशेषकथाभिः' इत्येवास्ति।}अपादानाधिभिर्विशेषकथाभिः' इति। कारकसामान्यकथाया व्यवच्छेदार्तमेतत्। यदि हि केनाप्यकथितस्य कर्मसंज्ञा स्यात्, तदा माणवकस्य पितरं पन्थानं पृच्छतीत्यत्राकारकस्यापि माणवकस्य कर्मसंज्ञा स्यात्। `परिगणनम्' इति। अनयधातुव्यवच्छेदार्थमेतत्। तेन `दुह प्रपूहरणे' (धा.पा.1014) इत्येवमादीनामेव धातूनां प्रयोगेऽकथितस्य कर्मसंज्ञा विधीयते, नान्येषाम्। `उपयुज्यत इत्युपयोगः' इति। कर्मसाधनो घञन्तः।

`उपयज्यते' इति। इष्टार्थसिद्धौ व्यापार्यत इत्यर्थ-। `पयःप्रभृति' इति। प्रभृतिशब्दन भिक्षादीनां ग्रहणम्। `तस्य निमित्तं गवादि' इति. आत्राप्यादिशब्देन पौरवादेर्ग्रहणम्। `तस्योपर्युज्यमानपयः प्रभृतनिमित्तस्य' इति। उपयुज्यमानञ्च तत् पयः प्रभृति चेति विशेषणसमासं कृत्वना उपयुज्यमानपयः प्रभृतेर्निमित्तमिति षष्ठीसमासः। `गवादेः' इति। आदिशब्देन पौरवादेर्ग्रहणम्। ननु च पाण्यादिकमप्युपयोगनिमित्तमिति, तेन विनोपयोगस्य पयसोऽसम्भवात्। आदिशब्देन कांस्यपात्रादेर्ग्रहणम्। `विहिता हि तत्र करणादि संज्ञा' इति। आदिशब्देनाधिकरणसंज्ञाया ग्रहणम्। `तदर्थम्' इति। करणादेः कर्मसंज्ञानिवृत्त्यर्थमित्यर्थः। अर्थशब्दस्य निवृत्तिवचन्तवात्. `अपूर्वविधौ' इति। पूर्वग्रहणमत्रान्यविधेरुपलक्षणार्थम्। एतदुक्तं भवति-- यस्यान्यो विधिर्नोक्तस्य कर्मसंज्ञेति। तेन यत्रापि वक्ष्यमाणे हेतुकर्त्तृसंज्ञे इति तत्राप्येषा संज्ञा न
भवतीति दोग्धाप्युपयोगस्य निमित्तं तस्य कर्मसंज्ञा न भवति। सूत्रेऽपि `अकथितम्' इति कथमनिवृत्तपरायां चोदनायां भूतकालो न विवक्ष्यते; उपलक्षणत्वात्। तेन योऽपि कथयिष्यमाणो हेतुकर्त्तृसंज्ञाभ्याम्, तस्यापि कर्मसंज्ञा न भवतीत्युक्तं भवति।

ब्रुविशासिगुणेन' इति। कः पुनर्गुण इत्याह-- `साधनम्' इति। साधनं हि क्रियया उपकारकम् । यच्चोपकारकं तदुपकार्यम् प्रधानमपेक्ष्य गुणो भवति। कतरत् पुनः साधनमित्याह-- `प्रधानं कर्म' इति। किं पुनस्तदित्याह-- `धर्मादिकम्' इति। आदिशब्देन पत्त्यादेर्ग्रहणम्। प्रधानत्वन्तु धर्मादेस्तदर्थत्वाच्छिष्यादिप्रवृत्तेः। `सम्बध्यते' इति सचत इत्यस्यार्थकथनम्। तथा हि-- `षच समवाये' (धा.पा.997) इति पठ्यते, समवायश्च सम्बन्ध एव। सचते = तेन गुणेन सम्बन्धमुपैति। यच्च तेन सम्बन्धमुषैति तत्तेन सम्बध्यते। `उक्तम्' इति आचरितमित्यस्य विवरणम्। सूत्राकारेणेत्येतदपि `कविना' इत्यस्य।

`गां दोग्धि पयः' इति। `दुह प्रपूरणे' (धा.पा.1014) आदादिकः। `दादेर्धातोर्घः' (8.2.32), `झषस्तथोर्धोऽधः' (8.2.40), `झलां जश् झशि' (8.4.53) इति जश्त्वम्। ननु चात्र विहिताऽपादान संज्ञा, अस्ति ह्यत्रापायः-- गोः दुहेः क्षरणार्थत्वात्, क्षरति गौओः क्षीरम्, तद्गोर्दोग्धा क्षारयति, एवञ्च तत् क्षार्यमाणं ततोऽपक्रामतीति स्पष्ट एवापायः, ततो नेदमुदाहरणमुपपद्यते ? नैतदेवम्; सत्यपि ह्यपाये नात्र गोरवधित्वं विवक्षितम्, किं तर्हि ? क्षीरं प्रति निमित्तभावमात्रम्। यद्येवम्, गोः कारकत्वं न स्यात्, यथा -- वृक्षस्य पर्णं पततीत्यत्र वृक्षस्य न; क्षरणक्रियां प्रति निमित्तभावेनाविवक्षितत्वात्, नैतत्; अवधित्वं ह्यत्र गोर्न विवक्षितम्। क्षरणं प्रति निमित्तभावस्तु विवक्षित एव. वृक्षस्य पर्णं पततीत्यत्र तु पतनं प्रति वृक्षस्य निमित्तभावमात्रमपि न विवक्षितम्, न केवलमवधिभाव इत्यसमानम्। `पौरवं गां याचते' इति। ननु चात्र कथितापादानादिसंज्ञा , अस्ति ह्यसौ। पौरवाद्गामादत्त इति अस्त्येववापायः ? नैतदस्ति; न हि याचनादेवापायो भवति , किं तर्हि ? अवरोधनक्रियां प्रति निमित्तबावमात्रम्। अस्याञ्चावस्थायां वा विवक्ष्यते; न चैतदिह विवक्षितम्, हेतुना गामवस्थापयतीत्ययमत्रार्थो वेदितव्यः, न तु क्वावस्थापयतीत्येतदिह चिन्त्यत एव। `माणवकं पन्थानं पृच्छति' इति। `प्रच्छ ज्ञीप्सायाम्' (धा.पा. 1413), तुदादिः, ग्रहिज्यादिसूत्रेण (6.1.16) सम्प्रसारणम्। ननु च कथितात्रापादानसंज्ञा, अस्ति ह्यत्रापायः-- सहि तस्मादुपदेशमादित्सते, नैतदस्ति; न हि प्रश्नमात्रेणापायो भवति, किं तर्हि ? पृष्टः सन् यद्यसावाचष्टे तदापायेन युज्यते। सत्यप्यपाये नात्र माणवकोऽवधिभावेन विवक्षितः, किं तर्हि ? प्रश्नक्रियां प्रति निमित्तभावमात्रेण।

`पौरवं गां भिक्षते' इति। `भिक्ष याच्ञायाम्' (धा.पा.606) अनुदात्तेत्। अत किमर्थ याचिभिक्ष्योर्द्वयोरुपादानम्, यावताऽनयोरर्थभेदो नास्ति ? न चेयं संज्ञा श्बदाश्रया, किं तर्हि ? अथश्रिया। तथा हि- याचिना समानार्थस्यान्यस्यापि ग्रहणं भवति-- देवदत्तं शतं प्रार्थयते, देवदत्तं शतं मृगयत इति। तस्मात् सत्यपि

शब्देभेदे न युक्तं तयोः पृथग्ग्रहणम्। एवं तर्हि याचिरत्रानुनये वर्त्तते-- तन क्रुद्धं याचते, अविनीतं याचत इति, तदर्थं पृथग्ग्रहणं स्यात्।

`वृक्षमवचिनोति फलानि' इति। ननु चात्र विहिताऽपादानसंज्ञा तथा हि-- वृक्षात् फलान्यादत इत्यपायोऽत्रार्थः,नैतदस्ति; न ह्यत्र वृक्षोऽवधित्वन विवक्षितः। किन्तर्हि ? फलावचयनस्य हेतुभावमात्रेण। वृक्षेण हेतुना फलावचयनं करोत्यर्थः। तस्य वृक्षस्य हेतुभावः किमवधिभूतस्य ? अधिकरणभूतस्य वा ? इत्येवमादिका चिन्ता न कृता।

एवं `माणवकं धर्मं ब्रूते, माणवकं धर्ममनुशास्ति' इति। `ब्रूञ् व्यक्तायां वाचि' (धा.पा.1044), `शासु अनुशिष्टौ' (धा.पा.1075) अदादी। ननु च कथितात्र सम्प्रदानसंज्ञा, अस्ति ह्यत्र सम्प्रदानत्वम्, सम्प्रदेयेन धर्मेणाभिप्रेयमाणत्वात्, नैतदस्ति; ददातिकर्मणाभिप्रेयमाणस्य सम्प्रदानसंज्ञा विहिता, न चात्र धर्मो ददातिकर्म; ब्रुविशास्योरदानार्थत्वात्। अथापि दानार्थता स्यात् ? एवमपि माणवेकन निमित्तेन धर्मं ददातीत्ययमर्थः स्यात्। माणवकस्य सम्प्रदानत्वनाविवक्षितत्वात्; धर्मदाननिमित्तत्वेन विवक्षितत्वात्।

ब्रुविशासिगुणेन चेति चकारोऽनुक्तसमुच्चयार्थः। तेन नयतिप्रभृतीनां प्रयोगेऽप्यकथितस्य कर्मसंज्ञेष्यते।तथा चोक्तम्--

नीवह्योहरतेश्चैव गत्यर्थानां तथैव च।

द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः।। इति।

अत्रापि श्लोके चकारो जयतिप्रभृतीनां प्रयोगेऽकथितस्य समुच्चयार्थः।

किमुदाहरणम् ? अजां नयति ग्रामं देवदत्तः। अजां वहति ग्रामं देवदत्तः। अजां हरति ग्रामं देवदत्तः। शतं जयति देवदत्तं यज्ञदत्तः। शतं गर्गान् दण्डयतीति। ननु चोभयेषामपि `कर्त्तुरीप्सिततमं कर्म' (1.4.49) इत्यनेनैव कर्मसंज्ञा सिद्धा। यदि तर्ह्यजादीनामीप्सिततमत्वं विवक्ष्यते, न ग्रामादीनाम्, तदा कथं कर्मसंज्ञा ? तथापि `तथायुक्तम्' (1.4.50) इत्यनेन सिद्धा। यदा तर्हि ग्रामादीनामीप्सितत्वं प्रकर्षरहितं विवक्ष्यते, तदा न सिद्ध्यति।

अकर्मकाणाञ्च धातूनां कालभावाध्नगन्तव्यदेशानां कर्मसंज्ञेष्यते। तथा चोक्तम्--

कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्।

दशाश्चाकर्मकाणाञ्च कर्मसंज्ञा भवन्ति च।।

इति वक्तव्यम् (म.भा.1.336) इति।

तस्मात् तदर्थोऽनुक्तसमुच्चयार्थश्चकारः कृतः कालः -- मासमास्ते मासं स्वपितीति। भावः-- गोदोहमास्ते, गोदोहं कस्वपितीति। अध्वा गन्तव्यः-- क्रोशमास्ते,

क्रोशं स्वपितीति। अध्वा चासौ गन्तव्यश्चेति विशेषमसमासः। `कडाराः कर्मधारय' (2.2.38) इति विशेष्यस्य पूर्वनिपातः। देशः कुरूनास्ते, कुरून् स्वपितीति। सर्वं एते कालादयोऽकथिताः; पूर्वविधेः कस्यचिद्प्रवृत्तत्वात्।।

52.गतिबुद्धिकप्रत्यवसानाथशब्दकर्माकर्मकाणामणि कर्त्ता स णौ।(1.4.52)

`यापयति' इति। `अर्तिह्री' (7.3.36) इत्यादिना पुक्।

`वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्-- उत्तरसूत्रे (1.4.53) अन्यतरस्यांग्रहणमुभयोर्योगयोः शेषभूतो विज्ञायते, सा च व्यवस्थितविभाषा; तेन नीवह्योर्न भविष्यति।

`वहेः' इत्यादि। नियच्छति = विशिष्टे विषयेऽवस्थापयतीति नियन्ता सारथिः, अविद्यमानो नियन्ता कर्त्ता यस्य स तथोक्तः, तस्य। `नीवह्योः प्रतिषेधो वक्तव्यः' (वा.62) इति योऽनन्तरोक्तः स वहेरनियन्तृकर्त्तृकस्य भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- तस्यैवान्यतरस्यांग्रहणस्य व्यवस्थितविभाषा त्वान्नियन्तृकर्त्तृकस्य वहेः कर्मसंज्ञा भविष्यतीति।

`आदिखाद्योः' इत्यादि। अत्रापि वक्तव्यशब्दस्य पूर्ववदेवार्थः। व्याख्यानमपि पूर्ववदेव कर्त्तव्यम्। `भक्ष्यति पिण्डी देवदत्तः' इति। चुरादिणिच्। `भक्षयति' पिण्डीं देवदत्तेन' इति। हेतुमण्णिच्। `भक्षयति बलीवर्द्दान् शस्यम्' इति। भक्षिरत्र हिंसार्थः। `सर्वे सचेतना भावाः' इत्यस्मिन् दर्शे हिंसितं शस्यमिति शस्यस्य भक्षणेन देवदत्तो हिंसितो भवति। यस्य हि तच्छस्यं तस्य हिंसा गम्यते।

`शब्दकर्मणाम्' इति। शब्दग्रहणेनेह पारिभाषिकं कर्म गृह्य.ते, न तु क्रिया। क्रिया ग्रहणे हि कर्म ग्रहणमनर्थकं स्यात्। कारकाधिकारादेव कारकस्य क्रियापेक्षत्वाच्छब्दात्मिकायां क्रियायां वर्त्तमाना धातवो ग्रहीष्यन्त इति, तत् किं कर्मग्रहणेन ? यदि तर्हि पारिभाषिकं कर्म गृह्यते, जल्पति देवदत्तो जल्पयति देवदत्तम्, विलपति देवदत्तं कार्षापणमित्यत्र न प्राप्नोति, शब्दादन्यस्य पारिभाषिकस्य कर्मणो विवक्षितत्वात्, नैष दोषः; बुद्ध्यर्थत्वात् भविष्यति। अत्र हि जल्पतिप्रभृतयस्तावच्छब्दसाधने बोधने वर्त्तन्ते। जल्पति देवदत्त इति। वचनेन बोधयतीत्यर्थः। एवमन्यत्रापि। पश्यति कार्षापणमित्यत्र दृशिश्चक्षुः साधने ज्ञाने वर्त्तते। चक्षुषा जानीत इत्यर्थः। तस्मादबुद्ध्यर्थत्वात् सिद्धम्। `अध्यापयति' इति। `क्रीङजीनां णौ' (6.1..48) इत्यात्त्वम्। `अर्तिह्री' (7.3.36) इत्यादिना पुक्। किमर्थं पुनरिदं सूत्रम्, यावता ण्यन्ते धातौ प्रयोजनकव्यापारेण प्रेषणाध्येषणाख्येन व्याप्तुमिष्टतमत्वात् प्रयोज्यस्य `कर्त्तुरीप्सिततमं कर्म' (1.4.49) इत्यनेनैव कर्मसंज्ञा सिद्धा ? सत्यम्, नियमार्थं वचनम्-- प्रयोजकव्यापारेण व्याप्यमानस्य यदा कर्मसंज्ञा तदा गत्यर्थादीनामेव,नान्येषामिति।।

53. ह्रक्रोरन्तयतरस्याम्।(1.4.53)

गत्यर्थादयो निवृत्ताः। तेनोभयत्र विभाषेयम्। यदा हरतिर्गतौ वर्त्तते, अभ्यवहारे वा, करोतिश्चाकर्मणो भवति तदा प्राप्ते। यदा तु हरतिः स्तेयादौ वर्त्तते,

करोतिश्च सकर्मको भवति तवाऽप्राप्ते। `उपसंख्यानम्' इति। प्रतिपादनमित्यर्थः। एतच्च प्रकृतत्वात् तत्रेदं प्रतिपादनम्-- `अकथितञ्च' (1.4.51) इत्यतश्चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः। तेनाभिवादिदृशोरप्यात्मनेपदे कर्मसंज्ञा भविष्यतीति। `अभिवादयते' इति. `णितश्च'(1.3.क74) इत्यात्मनेपदम्। `दर्शयते' इति। अत्रापि `णेरणौ' (1.3.67) इत्यादिना।

54.स्वतन्त्रः कर्ता। (1.4.54)

अस्त्ययं स्वतन्तरशब्दो बहुव्रीहिः। स्वं तन्त्रं यस्य स स्वतन्त्रः। अस्ति च समासप्रतिरूपको रूढिशब्दः, प्रधानार्थवृत्तिः, यथा-- स्वतन्त्रोऽयमिह देवदत्त इति, प्रधानभूत इति गम्यते। तत्र यदि पूर्वो गृह्येत तदा तन्तुवायस्यैव स्यात्; विस्तृता हि तन्तवस्तन्त्रम्, तच्च तन्तुवायस्यैवास्ति। देवदत्तः पचतीत्यादौ न स्यात्। इतरस्य तु ग्रहणे सर्वत्र भवति। तस्मात् व्याप्तेर्न्यायात् स एव गृह्यत इति मत्वाह-- `स्वतन्त्र इति प्रधानभूतः' इति। यद्येवमप्रधानमपेक्ष्य प्रधानमुच्यत इति यत्राधिकरणादीन्यपराण्यप्रधानानि कारकाणि सन्ति, देवदत्तः काष्ठैरग्निनोदनं स्थाल्यां पचतीत्यादौ तत्रैव स्यात्। यत्र तु तेषामविवक्षा-- आस्ते देवदत्तः, शेते देवदत्त इत्यादौ, तत्र न स्यादिति यो देशयेत् तं प्रत्याह-- `अगुणभूतः' इति। एवं मन्यते-- प्रधानेनागुणभाव उपलक्ष्यते। गुणभावो यत्र नास्ति स कर्त्तेति। कारकान्तराविवक्षायामप्यगुणभावोऽस्त्येवेति सर्वत्र भवति। ननु च सामग्र्यधीना हि क्रियासिद्धिः, एकस्याप्यभावे न सिध्यति, तत् कस्यात्र प्राधान्यं यत्परिग्रहाय स्वतन्त्रग्रहणं क्रियते ? इत्याह -- `यः क्रियासिद्धौ' इत्यादि। यद्यपि क्रियासिद्धौ सर्वेषां व्यापारः, तथापि स्वातन्त्र्यं यस्य विवक्ष्यते स एव स्वतन्त्र इत्युत्यते, नान्य इति। देवदत्तः पचतीत्यत्र देवदत्तः कर्त्तृसंज्ञकत्वात् कर्त्तृप्रत्ययेनोच्यते लकारेण।।

55. तत्प्रयोजको हेतुश्च।((1.4.55)

`तस्य प्रयोजकस्तत्प्रयोजकः' इति. ननु च `कर्त्तरि च' (2.2.16) इत्यनेन षष्ठीसमासप्रतिषेधे नात्र भवितव्यमित्याह-- `निपातनात्समासः' इति। `प्रयोजकः' इति प्रेरकः = उपदेशकः, व्यापारक इत्यर्थः। न चान्येन प्रयुज्यमानस्य स्वव्यापारे स्वातन्त्र्यं हीयते; अन्यथा ह्यकुर्वत्यपि कारयीति स्यात्। प्रयोजकत्वं द्विविधम्-- मुख्यम्, इतरच्च। देवदत्तः कटं कारयीत्यत्र देवदत्तस्य मुख्यम्। भिक्षा वासयतीत्यत्र भिक्षाणां वासहेतुत्वात् प्रयोजनत्वमुपचरितम्, न मुख्यम्. न हि भिक्षा यूयं वसथेत्येवं प्रयुञ्जते। इह च कारकाधिकारे तमब्ग्रहणव्यतिरेकेणातिशयो न विवक्षित इति `साधकतमं करण म्' (1.4.42) इत्यत्र तमब्ग्रहणेन ज्ञापितमेतत्। तेन यस्यापि प्रयोजगत्वमुपचरितम्, न मुख्यम्, तस्यापि हेतुसंज्ञा भवत्येव।

`संज्ञासमावेशार्थश्चकारः' इति। असति तस्मिन्नेकसंज्ञाधिकारादत्र कर्तृसंज्ञा न स्यात्। अतः संज्ञासमावेशार्थश्चकारः क्रियते। `हेतुत्वात्' इत्यादिना संज्ञाद्वयस्य प्रयोजनं दर्शयति। प्रयोजकव्यापारे हि `हेतुमति च' (3.1.26) इति णिच् विधीयते। तस्य हेतुत्वं प्रयोजकस्य हेतुत्वे सत्युपपद्यते। हेतुत्वात्प्रयोजको णिचो निमित्तं भवति। कर्तृप्रत्येन न लकारेणाभिधानं कर्त्तृसंज्ञायां सत्यां भवतीति कर्त्तृत्वत् कर्त्तृप्रत्ययेन लकारेणोच्यत इति।।

56. प्राग्रीश्वरान्निपाताः। (1.4.56)

च,वा,ह, अह इत्यत्र निपातसंज्ञायां सत्याम् `स्वरादिनिपातमव्ययम्' (1.1.37) इत्यव्ययसंज्ञा भवति। `निपाता आद्युदात्ता भवन्ति' (फि.सू.4.80) इत्याद्युदात्तत्वञ्च। अथ किमर्थं प्राग्ग्रहणम् ? यावता पञ्चम्युच्चारणसामर्थ्यादेव प्रागित्यस्य दिक्छब्दस्याध्याहारो भविष्यति। न च `पराम्' इत्ययमपि दिक्छब्दोऽस्ति। अतो नाध्याहार आशङ्कनीयः। तदध्याहारे हि `चादयोऽसत्त्वे' (1.4.57) इत्येवमादयो योगा निपातसंज्ञासम्बन्धाभावादसम्बद्धाः स्युः। तस्मात् प्रागित्येतदेवाध्याहरिष्यते। तत् किं प्रागवचनेन ? इत्याह-- `प्राग्वचनम्' इत्यादि। एका संज्ञेत्यनुवर्त्तते। निपातसंज्ञा चादिषु प्रादिषु वा क्रियायोगे चरितार्था। तत्रासति प्राग्वचने निपातसंज्ञाया उपसर्गादिसंज्ञाभिरनवकाशाभिर्बाध्यमानत्वात् ताभि) सह तस्याः समावेशो न स्यात्। इष्यते चात्र, तदर्थं प्राग्वचनम्, तस्मिन् सत्येवं सम्बन्धः क्रियते-- रीश्वरात यावन्तः प्राग्व्यवस्थितास्ते सर्वे निपातसंज्ञका भवन्ति, निपाताश्च सन्त उपसर्गादिसंज्ञका इति। तेन निमित्तमेव निपातसंज्ञोपसर्गसंज्ञानां भवति। न च निमित्तिना निमित्तं व्याहन्यते, अन्यथा हि तस्य निमितत्वमेव न स्यात्। अध्याहृते तु प्राक्शब्दे रीश्वराद्ये प्राग्व्यवस्थितास्ते सर्वे निपातसंज्ञका भवन्तीत्येषोऽर्थोऽभिमतः स्यात्, न तु निपाताः सन्त उपसर्गादिसंज्ञका इत्येषोऽप्यर्थो लभ्यते। सूत्रोपात्तो तु प्राक्शब्द एषोऽर्थो लभ्यत एव; अन्यथा तस्य वैयर्थ्यं स्यात्।

अथ किमर्थं रेफादिक ईश्वरशब्दो गृह्यते-- प्राग्रीश्वरादिति, न च प्राग्रीश्वरादित्येवोच्येत, प्रत्यासत्तेरनन्तर एव हीश्वरशब्दो ग्रहीष्यत इत्यत आह-- `रीश्वराद्वीश्वरात्मा भूत' इति। रेफसहित ईश्वरो रीश्वरः। शाकपार्थिवादित्वान्मयूरव्यंसकादित्वाद्वा समासः। रीश्वरादित्युच्यमाने वीश्वरान्मा भूत्, `अधिरीश्वरे' (1.4.97) इत्यस्यैवेश्वरशब्दस्य ग्रहणं यथा स्यात्। `ईश्वरे तोतुन्कसुनौ' (3.4.13) इत्यत्र यो वीश्वरशब्दस्तस्य ग्रहणं मा भूत्। यस्य ग्रहणे बहूनां संज्ञा भवत्यतो व्याप्तेर्न्यायादस्यैव ग्रहणं स्यात। ननु च वकारस्तत्र नास्त्येव, तत् किमुच्यते वीश्वरान्मा भूदिति ? एवं मन्यते-- यदा सूत्राणि संहितया पठ्यन्ते-- `शकि णमुल्कमुलावीश्वरेतोसुन्कसुनौ' (3.4.12,13) इति तदा लौशब्दस्य ग्रहणे न प्रयोजकम्। यद्यपि परस्येश्वरशब्दस्य ग्रहणे तन्निबन्धना व्याप्तिरस्ति, तथाप्यनन्तरस्यैवेश्वरशब्दस्य ग्रहणं भविष्यति, न परस्य; कथम् ? ज्ञापकात्; यदयं `कन्मेजन्तः' (1.1.39) इति कृतो मान्तस्यैजन्तस्याव्ययसंज्ञा शास्ति तज्ज्ञापयति-- अनन्तरस्येश्वरशब्दस्य ग्रहणं नेतरस्येति; अन्यथा हि णमुलादीनां निपातत्वादेवाव्ययसंज्ञा सिद्धेति `कृन्मेजन्तः' (1.1.39) इति वचनमर्थकं स्यात्, नैतदस्ति ज्ञापकम्; यस्मात् `ईश्वरे तोसुन्कसुनौ' (3.4.13) इत्यस्मात् परोऽपि कृदेजन्तो मान्तश्चास्ति। `कृत्यार्थे तवैकेन्केन्यत्वनः'

(3.4.14) `आभीक्ष्ण्ये णमुल च' (3.4.22) इत्येवमादिः। तत्कथं `कृन्मेजन्तः' (1.1.39) इत्येत ज्ञापकं स्यात् ? एवं तर्हि यदयमव्ययीभावस्य `अव्ययीभावश्च' (1.1.41) इत्यव्ययसंज्ञां शास्ति, तज्ज्ञापयति-- अनन्तरो य ईश्वरशब्दस्तस्य ग्रहणमिति। अन्यथा हि `अव्ययीभावश्च' (1.1.41) इत्येदपार्थकं स्यात्; निपातत्वादेवाव्ययीभावस्याव्ययसंज्ञायाः सिद्धत्वात्।
अस्यापि ज्ञापकतामपाकर्त्तुमहा-- `समासेष्वव्ययीभावः' इति। सर्वेषां समासानां निपातत्वादव्ययसंज्ञायां प्राप्तायां `अव्ययीभावश्च' (1.1.39) इत्येतद्वचनं नियमार्थं स्यात्-- समासेषु तत्पुरुषादिषु मध्येऽव्ययीभाव एवाव्ययसंज्ञो भवति, नान्य इति। एवं तर्हि लौकिकन्यायादनन्तरस्यैवेश्वरशब्दस्य ग्रहणं भविष्यति। लोके हि `ओदकान्तं प्रियं प्रोथमनुव्रजेत्' इति य एवानन्तर उदकान्तस्तमेव गत्वा तत एव बान्धवा निवर्त्तन्ते, न व्यवहितात्। तस्मादिहाप्यनेनैव न्यायेनानन्तरादेवश्वरशब्दान्निपातसंज्ञा निवर्तिष्यत इत्यत आह-- `लौकिकं चातिवर्त्तते' इति। लौकिकमपि न्यायं लोकोऽतिक्रम्य वर्त्तते, यस्मात् द्वितीयमप्यदकान्तं स्नेहात् कथाप्रसङ्गद्वा गत्वा निवर्त्तन्ते बान्धवाः। तदेवं रेफाधिक ईश्वरशब्द उच्चार्यते। तेन वीश्वरान्मा भूदिति स्थितमेतत्।।

57. चादयोऽसत्त्वे।(1.4.57)

`असत्त्वे' इति। पर्युदासोऽयं वा स्यात्, प्रसज्यप्रतिषेधो वा ? तत्र यद्ययं पर्युदासः स्यात्, तदा सत्त्वादन्यत्र वर्त्तमानाश्चादयो निपातसंज्ञका भवन्तीत्ेयषः सूत्रार्थः स्यात्। ततश्च पशुशब्दस्य चादिपरिपठितस्य जातिव्यवच्छिन्ने द्रव्ये वर्त्तमानस्य निपातसंज्ञा स्यात्। यो हि जातिविशिष्टे द्रव्ये वर्त्तते, स जातिद्रव्यसमुदायात्मकमर्थमाह। यश्चैवंविधोऽर्थः स द्रव्यात् केवलादन्यो भवति। निपातसंज्ञायां सत्यां पशुरिति सविभक्तिकस्य श्रवणं न स्यात्। प्रसज्यप्रतिषेधे त्वेष दोषो न भवति। तत्र हि यत्र द्रव्यगन्धोऽप्यस्ति तत्र सर्वत्र प्रतिषेधेन भवितव्यम्। अस्ति चेह द्रव्यगन्धः। पशुत्वजात्याश्रितस्य द्रव्यस्यापि पशुशब्देनाभिधानात्। तस्मात् प्रसज्यप्रतिषेध एवायं युक्त इत्यालोच्याह-- `प्रसज्यप्रतिषेधोऽयम्' इति। क्व तर्हि वर्त्तमानः पशुशब्दोऽसत्त्ववचनो भवति ? यत्र वृत्तौ निपातसंज्ञां लभते दृश्यर्थे-- यथा, लोधं नयन्ति पशु मन्यमाना इति। अत्र दृश्यर्थेन पशुशब्देन मननं विविष्यते। दर्शनमेतन्मननम्, सम्यग्ज्ञानमित्यर्थः। सत्त्वशब्दोऽयमिह सत्तायां वर्त्तत इति कस्यचिद्भ्रान्तिः स्यात्, अतस्तन्निराकर्त्तुमाह-- `सत्त्वमिति च द्रव्यमुच्यते' इति। चशब्दोऽवधारणे। द्रव्यमेव न सत्तेत्यर्थः। यदि ह्यत्र सत्त्वशब्देन सत्तोच्यते, प्रतिषेधोऽनर्थकः स्यात् ? न हि चादिषु मध्ये शब्दः सत्तावाची कश्चिदस्ति। तस्माददद्रव्यमेवोच्यते। इदं तर्हि सर्वनामप्रत्यवमर्शयोग्यो योऽर्थस्तद्द्रव्यमिति। तथा चोक्तम्--
वस्तूपलक्षमं यत्र सर्वनाम प्रयुज्यते।
द्रव्यमित्यच्यते सोऽर्थो भेद्यत्वेन विवक्षितः।। इति।
भेद्यत्वेन विशेष्यत्वेनेत्यर्थः। अत एवावसीदति यत्र गुणो विशेषणभावेनेति सत्त्त्वं तद्द्रव्यमुच्यते।
`चण्' इति पठ्यते। तस्य णकारो विशेषार्थः `निपातैर्यद्यदिहन्तकुविन्नेकच्चेण्कच्चिद्यत्रयुक्तम्' (8.1.30) इति, स तु चेच्छब्दस्यार्थे वर्त्तते।
यत्र' इति पठ्यते। तस्य `तद्धितश्चासर्वविभक्तिः' (1.1.38) इत्यव्ययसंज्ञा सिद्धैव। `निपातैर्यद्यदिहन्तः' (8.1.30) इति विशेणणार्थ निपात संबोध्यते। असति निपातत्वे `त्रैङ पालने' (धा.पा.965) यं त्रायत इति यत्र इत्यस्य `आतोऽनुपसर्गे कः' (3.2.3) इति कप्रत्ययस्य ग्रहणं स्यात्।
`नञ्' इति पठ्यते; नञो ञकारः `नलोपोः नञः' (6.3.73) इति विशेषणार्थः। `नलोपो नञ्' इत्युच्यमाने पामनपुत्र इत्यत्रापि स्यात्, यदि तत्र `अलुगुत्तरपदे' (6.3.1) इत्युत्तरपदग्रहण पूर्वपदं नशब्देन विशेष्यते-- नान्तस्य पूर्वपदस्येति। अथ तु पूर्वपदेन विशेष्यते-- (see in other text)page no.206)
उत्तरसंज्ञीत्तरसूत्रे कृता संज्ञोपसर्गसंज्ञा। तस्या विशेषणं व्यवच्छेदः प्रादिभ्योऽन्यस्माद्वयावर्तनमुत्तरसंज्ञा मा भूत्' इति। एकयोगे हि सति यथा प्रादीनामुपसर्गसंज्ञा भवति तथा चादीनामपि स्यात्। अतः प्रादीनामेवोपसर्गसंज्ञा यथा स्याच्चादीनां मा भूदित्येवमर्थं पृथग्योगः क्रियते। `पराः सेनाः' इति। सेनायाः द्रव्यत्वात् तत्र वर्त्तमानस्य पराशब्दस्येह ग्रहणं न भवति। परा उत्कृष्टाः परदेशस्थिता वा। यत्र त्वेकवचनं पठ्यते-- परा सेनेति, तत्र रूपोदाहरणं वेदितव्यम्। द्विवचनबहुवचनयोस्तु निपातत्वादव्ययसंज्ञायां सत्यां विभक्तेर्लुक्स्यात्।।

59.उपसर्गाः क्रियायोगे। (1.4.59)

`प्रणयति' इति। प्रशब्दस्योपसर्गत्वात् `उपसर्गादसमासेऽपि णोपदेशस्य' (8.4.14) इति णत्वम्।
`प्रनायको देशः' इति। अत्रनयनक्रियया प्रशब्दस्य योगो नास्तीत्युपसर्गसंज्ञा न भवति. ननु चात्रापि गमिक्रियया योगोऽस्त्येवेति स्यादेव तस्योपसर्गसंज्ञा, नेतदस्ति; क्रियायोगग्रहणं ह्येवमनर्थकं स्यात्। कथम् ? प्रादीनां क्रियायोगाव्यभिचारात्; तस्मात् क्रियायोगग्रहणसामर्थ्याद्यं प्रति क्रियायुक्ताः प्रादयस्तं प्रति गत्ुयपसर्गसंज्ञका भवन्ति, नान्यं प्रति। न चेह नयनक्रियया युक्तः प्रशब्दः, किं तर्हि ? गमिक्रिययेति नयतिं प्रत्युपसर्गसंज्ञको न भवति।
`मरुच्छब्दस्योपसंख्यानम्' इति। तत्वविधाविति। शेषः; अन्यथा हि `निपाता आद्युदात्ताः' (फि.सू.4.80) `उपसर्गाश्चाभिवर्जम्' (फि.सू.4.81) इत्याद्युदात्तत्वमपि स्यात्। अन्तोदात्तश्चेष्यते मरुच्छब्दः। उपसंख्यानशब्दस्य प्रतिपादनमर्थः; मरुच्छब्दस्योपसर्गसंज्ञायाः प्रतिपादनं कर्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्-- `उपसर्गाः' इति योगविभागः क्रियते। अत्र च `प्रादयः' इति नाभिसम्बध्यते। तेन मरुच्छब्दस्य तत्वविधावुपसर्गसंज्ञा भवतीति। अत एव योगविभागात् श्रच्छब्दस्याङविधावन्तः शब्दस्याङ्गिविधिणत्वेषूपसर्गसंज्ञा भवतीति वेदितव्यम्। योगविभागस्येदं लिङ्गम् `प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (5.2.101), `तिरोऽन्तर्धौ' (1.4.71) इति च निर्देशः। ततः `क्रियायोगे' इति द्वितीयो योगः। अत्र च `प्रादयः' इति सम्बध्यते। किमर्थमिदम् ? पूर्वेणैव

सिद्धमिति पूर्वयोगस्यासर्वविषयत्वाज्ञापनार्थम्, तेन नातिप्रसङ्गः। प्रादीनामक्रियायोग उपसर्गसंज्ञा मा भूदित्येवमर्थञ्च। `मरुत्तः' इति। `अच उपसर्गात्तः' (7.4.47) इति क्तप्रत्यये कृते द्वितकारनिर्देशाद्दवातेः सर्वादेशः। ननु चसत्यामुपसर्गसंज्ञयां करुच्छब्दस्यानजन्तत्वात् तत्वेन न भवितव्यमित्यत आह-- `संज्ञाविधान सामर्थ्यात्' इत्यादि। यथा ह्युपसरज इत्यत्र डित्करणसामर्थ्यादभस्यापि टिलोपो भवति, तथेहाप्यनजन्तादपि तत्वं भविष्यति; अन्यथा हीदं वचनमपार्थकं स्यात्। मरुच्छब्दस्योपसर्गसंज्ञाया अन्यकार्याभावादिति भावः।

`श्रच्छब्दस्योपसंख्यानम्' इति। अत्राप्युपसंख्यानशब्दस्य स एवार्थः। प्रतिपादनमपि तदेव। ननु च भिदादिपाठादेव हि श्रद्धेति सिद्धम्;तत्कथं तत्सिद्धये श्रच्छब्दस्योपसर्गसंज्ञा क्रियते ? एवं मन्यते- अनार्षस्तत्र पाठ इति।।

60. गतिश्च। (1.4.60)

`प्रकृत्य' इति। गतिसंज्ञायां सत्यां `कुगतिप्रादयः' (2.2.18) इति समासः। `समासेऽनञ्पूर्वे क्त्वो ल्यप्' (7.1.37) इति ल्यप्। `प्रकृतम्' इति। `क्ते च' (6.2.45) इत्यनुवर्तमाने `गतिरनन्तरः' (6.2.49) इति प्रकृतिस्वरेणाद्यदात्तः प्रशब्दः। `यत्प्रकरोति' इति। प्रशब्दादनन्तरस्य `तिङ्ङतिङः' (8.1.28) इति निघाते प्राप्ते `निपातैर्यद्यदि' (8.1.30) इत्यादिना प्रतिषेधे तिपः पित्त्वादनुवदात्तत्वम्। `सतिशिष्टस्वरस्य बलीयस्त्वमन्यत्र विकरणस्वरेभ्यः' (वा; 9;6.1.158) इति विकरणस्वरस्य प्रत्यय्याद्युदात्तत्वं न भवति। करोतेरेव तु भवति-- `धातोः' (6.1.162) इति। शेषमनुदात्तं भवति। प्रशब्दस्य `उपसर्गाश्चाभिवर्जम्' (फि.सू.4.81) इत्याद्युदात्तत्वे प्राप्ते `गतिर्गतौ' (8.1.70) इति निघातेऽनुवर्तमाने `तिङि चोदात्तवति' (8.1.71) इति करोतिशब्दे तिङन्त उदात्तवति परतोऽनुदात्तत्वं भवति। तत्र हि `पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः' (8.1.67) इत्यतोऽनुदात्तमिति वर्तते। एतच्च प्रयोजनत्रयमुत्तरत्र गतिसंज्ञाया वेदितव्यम्।

अथ किमर्थो योगविभागः, न गतिग्रहणं पूर्वयोगग एव क्रियते ? इत्यत आह- `योगविभाग उत्तरार्थः' इति। `उत्तरत्र ' इत्यादिना योगविभागस्योत्तरार्थतां दर्शयति। यद्युत्तरत्राप्युपसर्गसंज्ञा स्यात्, तदा किं स्यादित्यत आह-- `ऊरीस्यादित्यत्र ' इत्यादि।

`चकारः संज्ञासमावेशार्थः' इति। असति चकार एकसंज्ञाधिकारादेकत्र संज्ञाद्वयस्य विधानात् पर्यायः स्यात्, न समावेशः। `प्रणीतम्' इत्यादिना संज्ञासमावेशस्य फलं दर्शयति। `गतिरनन्तर इति स्वरः' इति। उदाहरणद्वयेऽपि `उपसर्गादिति णत्वषत्वे भवतः' इति। `प्रणीतम्' इति। `उपसर्गादसमासेऽपि णोपदेशस्य' (8.4.44) इति णत्वम्। `अभिषिक्तम्' इति। `उपसर्गात्सुनोति' (8.3.65) इत्यादिना षत्वम्।

`कारिका' इत्यादि। धात्वर्थनिर्देश एतदुपसंख्यानं कर्त्तव्यम्। योऽन्यः कर्त्तरि कारिकाशब्दो ण्वुलन्तः, तस्य कारिकां कृत्वेत्येवं भवति। `उपाख्यान' शब्दस्य प्रतिपादनमर्थः. तत्रेदं प्रतिपादनम्-- उत्तरसूत्रे चकार्सयानुक्तसमुच्चयार्थत्वात् कारिकाशब्दस्य गतिसंज्ञा भवतीति।

`पुनश्चनसौ' इत्यादि। पुनश्चनः शब्दौ छन्दसि विषये गतिसंज्ञकौ च भवत इत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तूत्तरसूत्रे चकारस्यानुक्तसमुच्चयार्थतामाश्रित्य कर्त्तव्यम्। `पुनरुस्त्यूतम्' इति। `षिवु तन्तुसन्ताने' (धा.पा.1108), निष्ठा, उदित्वात् `इदितो वा' (7.2.56) इति विभाषेट्त्वात् `यस्य विभाषा' (7.2.15) इतीट्प्रतिषेधः; `च्छ्वोः शूडनुनासिके च' (6.4.19) इति वकारस्योठ्, यणादेशः। `चनोहितम्' इति। `दधातेर्हिः' (7.4.42) इति नहिरादेशः, `गतिरनन्तरः' (6.2.49) इति प्रकृतिस्वरे णाद्युदात्तत्वम्। चनः शब्दो हि `निपाता आद्युदात्ता भवन्ति' (फि.सू.4.80) इत्याद्युदात्तः।।

61.ऊर्यादिच्विडाचश्च। (1.4.61)

`च्व्यन्ता डाजन्ताश्च' इति। ननु च पदसंज्ञायामन्तग्रहणेन ज्ञापितम्--`अन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति' (पु.प.वृ.81) इति; अतश्च्विडाचोरेव गतिसंज्ञया भवितव्यम्, तत् किमुच्यते-- च्व्यन्ता डाजन्ताश्चेति ? एवं मन्यते-- `क्रियायोगे' (1.4.59) इति वर्त्तते, न च प्रत्ययमात्रस्य क्रियायोगः सम्भवति। तस्मात् क्रियायोगानुवृत्तिसमार्थ्यात् तदन्तस्यैव संज्ञा विज्ञायत इति भवत्येव तदन्तस्य संज्ञा। सा तु विशेषानुपादानाद्धातुमात्रेण योगे प्राप्नोतीत्यत आह-- `च्विडाचोः' इत्यादि। अभूततद्भावे कृभ्वस्तियोगे (5.4.50) च्विर्विहितः। `अव्यक्तानुकरणात्' (5.4.57) इत्यादावपि सूत्रे कृभ्वस्तियोगस्यानुवृत्तेर्डाजिपि तत्रैव विहितः। तेन च्विडाचोस्तावद्धात्वन्तरेण योगासम्भवात् कृभ्वस्तियोगे गतिसंज्ञाविधानम्। अतस्तत्साहचर्यादूर्यादीनामपि तैरेव योगे विधीयते। ऊर्यादिभ्यश्च्व्यर्थस्याप्रतीतेर्न प्रतिपादयितुमाह-- `उरी, उररी' इत्यादि। श्रौषत्रडादीनां स्वधापर्यन्तानां चादिषु पाठादक्रियायोगेऽपि निपातसंज्ञा भवति। आविस्शब्दः साक्षात्प्रभृतिषु पठ्यते। तेन तस्य `विभाषा कृञि' (1.4.72) इति करोतियोगे विभाषा गतिसंज्ञा। `शुक्लीकृत्य' इति। `अस्य च्वौ' (7.4.32) इतीत्त्वम्। `पटपटाकृत्य' इति। `वा क्यषः' (1.3.90) इत्यत्र पटपटाशब्दो व्युत्पादितः।।

62. अनुकरणं चानितिपरम्। (1.4.62)

`अनितिपरम्' इति। अत्रेतिपरशब्द इते पर इति पञ्चमीति योगविभागात् तत्पुरुषो वा स्यात् ? इतिः परो यस्मादिति बहुव्रीहिर्वा ? तत्र यद्याद्यः पक्ष आश्रीयेत, तदेतिखाट्कृत्येत्यत्र प्रतिषेधः स्यात्; इह तु न स्यात्-- खडिति कृत्वा आगत इत, अनिष्टञ्चैतत्; द्वितीये तु पक्ष एष दोषो न भवति, अतस्तमेवाश्रित्याह-- `इतिः परो यस्मात्' इति। `निरष्ठीवत्' इति। `ष्ठिवु निरसने' (धा.पा.560) `सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधो वक्तव्यः' (वा.671)

इति प्रतिषेधात् `धात्वादेः षः सः' (6.1.64) इति सत्वं न भवति। `ष्ठिवुक्लमुचमां शिति' (7.3.75) इति दीर्घत्वम्।।

63. आदरानादरयोः सदसती। (1.4.63)

`{प्रीत्यतिशयः = आदरः-- काशिका}प्रीतिसम्भ्रम आदरः' इति। प्रीत्या सम्भ्रमः प्रीतिसम्भ्रमः, प्रीतिपूर्विका प्रत्युत्थानासनादिदानक्रियेत्यर्थः। `परिभवौदासीन्यम्' इति। परिभवः = अवज्ञा। तिरस्कारः = औदासीन्यम्। कर्त्तव्यम् = प्रत्युत्थानासनादिदानं प्रत्युपेक्षा। परिभवेणौदासीन्यं परिभवौदासीन्यमिति, `तृतीया' इति योगविभागात् समासः। अथ वा-- परिभवश्चौदासीन्यञ्च परिभवौदासीन्यम्। अथ किमर्थमनादरग्रहणमसद्ग्रहणञ्च क्रियते ? नादरे सदित्येवोच्यते ? अथ कथमिदानीमनादेऽसच्छब्दस्याव्ययसंज्ञा स्यात् ? कथञ्च समासादि कार्यम् ? तदन्तविधिनासच्छब्दस्यापि निपातसंज्ञायां गतिसंज्ञायाञ्च सत्यां सच्छब्दस्य निपातस्याव्ययसंज्ञा विधीयमानाऽव्ययसंज्ञायां तदन्तविधेरुपसंख्यानादसच्छब्दस्याप्यव्ययसंज्ञा भविष्यति। `कुगतिप्रादयः' (2.2.18) इत्यत्र च सुबन्तस्य प्रकृतत्वाद्गत्यन्तस्य सुबन्तस्य समासो विधीयमानोऽसच्छब्दस्यापि भविष्यति। `गतिरन्तरः' (6.2.49) इत्यत्रापि पूर्वपदमित्यनुवर्त्तते। `गतिर्गतौ' (8.1.70) इत्यत्रापि पदस्येति। तेन गत्यन्तस्य पूर्वपदस्य प्रकृतिस्वरो विधीयमानस्तता यथोक्तं कार्यम्, अनादरावगतिस्तु कथं स्यात् ? असत्यनादरग्रहणे न सदसदिति नञाऽऽदरप्तिषेधात्। आदरश्चेत् प्रतिषिद्धः किमन्यदनादरात् स्यात् ? नैतद्युक्तमुच्यते; नञ्समासो हि तत्पुरुषः सदृशमेव कार्यं प्रतिपादयति, यथा-- अब्राह्मणमानयेति। तत्रेह यद्यनादरग्रहणं न क्रियेत तदा सत्सदृशं यत् तदसद् यत्रादरप्रसङ्गस्तत्रैव स्यात्-- गुरुमसत्कृत्य गतः। यत्र त्वप्रसक्त एवादरस्तत्र न स्यात्-- भृत्यमसत्कृत्य गतः। अनादरग्रहणे तु सति बहुव्रीहिर्विज्ञायते-- अविद्यमान आदरो यस्मिन्नित्यनादर इतो। बहुव्रीहिश्चात्यन्ताभावे प्रसक्त्यबावे च भवतीति सर्वत्र संज्ञा सिध्यति। तस्मादनादरग्रहणं कर्त्तव्यम्। तस्मिंश्च क्रियमाणे सत्यसदृग्रहणमपि कर्त्तव्यमेव। अन्यथा हि किमनादरग्रहणेन विशिष्येत-- य्सयानादरे वर्त्तमानस्य गतिसंज्ञा विधीयते ! न हि सच्छब्दस्यानादरे वृत्तिः सम्भवति। यद्यपि तस्य न सम्भवति तदन्तस्यासच्छब्दस्य सम्भवतीति चेत्, सत्यम्; सम्भवति, न तु तस्य गतिसंज्ञा लभ्यते, तदन्तविधेरभावात्। प्रकृते न हि तदन्तविधिर्भवति, न चेह किञ्चित् प्रकृतमस्ति ; तस्मादसच्छब्दार्थमनादरग्रहणम्। यदि तु यथा `गोष्पदं सेवितासेवितप्रमाणेषु' इत्यत्रासेविते गोष्पदशब्दो न सम्भवतीत्यगोष्पदशब्दार्थमसेवितग्रहणं विज्ञायते, तथेहापि सच्छब्दोऽनादरे न सम्भवतीत्यस्छब्दार्थमनादरग्रहणं विज्ञायेत; तदा शक्यमसच्छब्दस्य ग्रहणमकर्त्तुम्। असद्ग्रहणन्तु क्रियते तदा विस्पष्टार्थम्। सत्कृत्वाऽसत्कृत्येति। शोभनाशोभनार्थाविह सदसच्छब्दौ। विद्यमानाविद्यमानार्थौ वा।।

64.भूषणेऽलम्।(1.4.64)

`अलं कृत्वा' इति। पर्याप्ताविहालंशब्दो वर्त्तते।

65.अन्तरपरिग्रहे।(1.4.65)

अन्तःशब्दोऽयं मध्येऽधिकरणभूते वर्तते; परिग्रहे च। तत्र परिग्रहप्रतिषेधादिरत्र संज्ञा विधीयते।यस्त्वस्य स्वरादिषु पाठः, स परिग्रहेऽप्यव्ययसंज्ञार्थः। `अन्तर्हस्य' इति। मध्ये हत्वेत्यर्थः। `वा ल्यपि' (6.4.38), इत्यनुनासिकलोपः। वक्तव्य इति व्याख्येय इत्यर्थः। व्याख्यानं तु पूर्वमेव कृतम्। `अन्तर्धा' इति। आतश्चोपसर्ग' (3.3.106) इत्यङ। `अन्तर्द्धिः' इति। `उपसर्गे घोः किः' (3.3.92) इति किप्रत्ययः। `अन्तर्णयति' इति। `उपसर्गादसमासेऽपि' (8.4.14) इति णत्वम्।।

66. कणेमनसी श्रद्धाप्रतीघाते।(1.4.66)

कणेशब्दः सप्तम्यन्तप्रतिरूपको निपातः। न चेहाभिलाषातिशये वर्त्तमानो गृह्यते। तस्य हि श्रद्धाप्रतीघात इत्युपाधिः सम्भवति। मनःशब्दोऽपि तत्साहचर्यादभिलाषवृत्तिरेव विज्ञायते।

`कणे' हत्वा, मनो हत्वा' इति। अत्र कणेशब्दः सूक्ष्मे तण्डुलावयवे वर्त्ततेऽधिकरणभूते, मनश्शब्दश्चेतसि।।

67. पुरोऽव्ययम्।(1.4.67)

`पुरस्कृत्य' इति। पूर्वस्माद्देशागत इत्यस्मिन्नर्थे `पूर्वाधरावराणामसि पुरधवश्चैषाम्' (5.3.39) इत्यसिप्रत्ययः पूर्वशब्दस्य च पुरादेशः। `तद्धितश्चासर्वविभक्तिः' (1.1.38) इत्यव्ययसंज्ञा विसर्जनीयस्थानिकस्य सकारस्योपचार इत्येषा संज्ञा पूर्वाचार्यप्रणीता। `नमस्पुरसोर्गत्योः' (8.3.40) इति सकारः।

`पूः पुरौ, पुरः कृत्वा गतः' इति। पुरः कृत्वेतीदं प्रत्युदाहरण्। पूः परावित्येतयोस्तूपन्यसस्तत्साहचर्येण पुरःशब्दस्यानव्ययत्वप्रदर्शनार्थः। `पृ पालनपूरणयोः' (धा.पा.1489), `भ्राजभ्रास' (3.2.177) इत्यादिना। क्विप्। `उदोष्ठ्यपूर्वस्य' (7.1.102) इत्युक्तम्, रपरत्वञ्च। गतिसंज्ञाया अभावादिह समासादि कार्यं न भवति। `नमस्पुरसोर्गत्योः' (8.3.40) इति विसर्जनीयस्य सकारोऽपि न भवति। ननु च यद्यत्र गतिसंज्ञा स्यात् गतिसमासे कृते सुपो निवृत्त्या भवितव्यम्, तदा पुर इति रूपं न स्यात्; असति तस्मिन् संज्ञाऽपि निवर्त्तते, नैतदस्ति; यद्यपि विभक्तौ निवृत्तायां पुर इति रूपं न स्यात्, नैवं संज्ञा निवर्त्तते; एकदेशविकृतस्यानन्यत्वात् (व्या.प.16)।।

68. अस्तं च।(1.4.68)
`अस्तंशब्दो मकारान्तोऽव्ययम्' इति। अव्ययमित्यत एव विशेषणोपादानससामर्थ्याददव्ययत्वं विज्ञेयम्। चादेशकृतिगणत्वाद्वा। `अस्तं कृत्वा काण्डं गतः' इति। `असु क्षेपणे' (धा.पा.1209), निष्ठा, पूर्ववदिट्प्रतिषेधः। चकारः `अव्ययम्' (1.4.क67) इत्यस्यानुकर्षणार्थः। यद्येवम्,चानुकृष्टत्वादुत्तरत्र तस्यानुवृत्तिर्न स्यात् ? उत्तरत्रापि चकारस्तदनुकर्षणार्थोऽनुवर्तिष्यत इत्यदोषः।।

69. अच्छ गत्यर्थवदेषु।(1.4.69)
`अच्छशब्दोऽव्ययमभिशब्दस्यार्थे'इति। अभिराभिमुख्ये। `अच्छोद्य' इति। यजादित्वाद्वच्यादिसूत्रेण (6.1.15) सम्प्रसारणम्। अच्छमित्यकलुषमित्यर्थः।।

70. अदोऽनुपदेशे।(1.4.70)
उपदेशः = परस्यार्थकथनम्। तच्च परस्य प्रत्यायनार्थ भवतीत्याह-- `उपदेशः परार्थः' इति। `अदः कृत्वा' इति। एतत्कृत्वेत्यर्थः।।

71. तिरोऽन्तर्द्धौ।(1.4.71)
`तिरो भूत्वा स्थितः' इति। अनृजुर्भूत्वा, पार्श्वतो भूत्वेत्यर्थः।।

72. विभाषा कृञि।(1.4.72)
`तिरस्कृत्य'इति। `तरिसोऽनयतरस्याम्' (8.3.42) इति विसर्जनीयस्य सत्त्वम्।

73. उपाजेऽन्वाजे। (1.4.72)

74.साक्षात्प्रभृतीनि च।(1.4.74)
`साक्षात्प्रभृतिषु च्व्यर्थवचनम्' इति। च्व्यर्थ उच्यते कथ्यते येन तच्व्यर्थवचम् - च्व्यर्थव्याख्यानम्। एतेनैतदुक्तं भवति-- साक्षात्प्रभृतीनां च्व्यर्थो येन प्रतिपाद्यते अस्मिन् संज्ञाविधौ तच्व्यर्थवचनं कर्त्तव्यमित्यर्थः। किमर्थम् ? असाक्षाद्भूतं यदा साक्षात् क्रियते तदा गतिसंज्ञा यथा स्यात्। यदा त्वसाक्षाद्भावो न क्रियते, किन्तु साक्षाद्भूत्सय प्रत्यक्षभावमुपगतस्यैव सतो योऽन्यो विशेषः कश्चित् क्रियते, तदा मा भूदिति। एवं मिथ्याप्रभृतीनाम्। अमिथ्याभूतानां मिथ्याभूतानां यदा क्रियते, तदा यथा स्यात्; अन्यथा मा भूत्। तदेवं व्याख्यानम्-- `ऊर्यादिच्विडाचश्च' (1.4.61) इत्यत्र च्विग्रहणम् `अच्छ गत्यर्थवदेषु' (1.4.69) इत्यतश्चार्थग्रहणमिह मण्डूकप्लुतिन्यायेनानुवर्त्तते। तेन च्व्यर्थे वर्त्तमानानां साक्षात्प्रभृतीनां गतिसंज्ञा विधीयत इति। व्यवस्थितविभाषाविज्ञानाद्वा च्व्यर्थ एव वर्त्तमानानां तेषां संज्ञा भविष्यतीति। च्व्यर्थता चोभयथा सम्भवति-- च्व्यन्तानाम्, अच्व्यन्तानाञ्च। तत्र यदा च्व्यन्तता भवति तदा `ऊर्यादिच्विडाचश्च' (1.4.61) इति नित्यं संज्ञा भवति, अन्यथा त्वनेन गतिसंज्ञा विभाषा भवति; वयवस्थितविभाषया चास्य सूत्रस्य च्व्यर्थष्वेव प्रवृत्तेः। मकारान्तत्वनिपातनम्। अग्नौ, वशेप्रभृतयो विभक्तिप्रतिरूपकनिपाता द्रष्टव्यः। प्रादुराविः शब्दावूर्यादिषु उरसिमनसिशब्दौ विभक्तिप्रतिरूपकौ निपातौ। `उरसिकृत्य'इति। अभ्युपगम्येत्यर्थः। `मनसिकृत्य' इति। निश्चित्येत्यर्थः।।

76. मध्ये पदे निवचने च।(1.4.76)
`मध्ये पदे' इति। सप्तम्यन्तप्रतिरूपकौ। `निवचने' इति। अर्थाभावेऽव्ययीभावः; नितृणं निवुसमिति यथा। `निवचनेकृत्य' इति। उच्चारणसामर्थ्यात् सप्तम्याः समासेऽप्यलुग् भवति। एवमुत्तरत्र।।

77.नित्यं हस्ते पाणावुपयमने। (1.4.77)
`हस्तेकृत्य, पाणौकृत्य' इति। सप्तम्याः पूर्ववदलुक्। `दारकर्म' इति। भार्याकरणम्।।

78. प्राध्वं बन्धने।(1.4.78)
`बन्धने' इति निमित्तसप्तमीयम्। प्राध्वंशब्दस्यानुकूल्यवृत्तित्वात् `बन्धने' इत्यस्य विशेषणं नोपपद्यत इति सामर्थ्यात् तदर्थस्य विशेषणं विज्ञायत इत्यत आह-- `तदानुकूल्यम्' इत्यादि। बन्धनं हेतुर्यस्य तत्तथोक्तम्। `प्राध्वंकृत्य' इति। बन्धनेन निमित्तेनानुकूल्यं कृत्वेत्यर्थः। `प्राध्वं कृत्वा' इति। समर्थमध्वगमने शकटम्, अध्वाभिमुखं कृत्वेति गम्यते। `उपसर्गादध्वनः' (5.4.85) इत्यच् समासान्तः। `नस्तद्धिते' (6.4.144) इति टुलोपः। प्रगतमध्वानमिति प्रादिसमासः। लक्षमप्रतिपदोक्तपरिभाषयैवात्र (व्या.पा.3) प्राप्तौ सिद्धायां लाक्षणिकोऽपि प्राध्वंशब्दो यत्र बन्धनेनाभिसम्बध्यते, तत्रापि गतिसंज्ञा भवतीति

ज्ञापनार्थं बन्धनग्रहणम्। तेन यदा बन्धनेनैव शकटस्याध्वनि सामर्थ्यादध्वाभिमुखता विवक्ष्यते, तदा प्राध्वंकृत्य शकटं गतमित्येतदपि सिद्धं भवति।।

79. जीविकोपनिषदावौपम्ये।(1.4.79)
`{औपम्ये विषये'-- काशिका.} औपम्यविषये' इति। उपमीयतेऽनयेत्युपमा। `आतश्चोपसर्गे' (3.3.106) इत्यङ। तस्या भाव औपम्यम्; ष्यञ्। तत्पुनः क्रियाकारकसम्बन्धः। `समासकृत्तद्धितेषु सम्बन्धाभिधानमन्यत्र रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्यः'इति वचनात्। विषयग्रहणेनौपम्ये इति सप्तम्या विषयसप्तमीत्वं दर्शयति। सम्भवति च जीविकोपनिषदावुपमाभूते प्रत्यौपम्यविषयभावः, तेन विनोपमाया अभावात्। `जीविकाकृत्य' इत्यादि।जीविकामिव कृत्वा। उपनिषदमिव कृत्वेत्यर्थः। जीविका = जीवनोपायः। उपनिषत् = रहस्यं हेतुश्च। यत्तत्सदृशं तज्जीविकेन जीविका। उपनिषधिवोपनिषदिति जीविकोपनिषद्भ्यामुपमीयते।।

80. ते प्राग्धातोः।(1.4.80)
नियमार्थमेतत्। नियमः पुनः संज्ञाननियमो वा स्यात्-- ते प्रादयो यदा धातोः प्राक प्रयुज्यते तदैव गत्युपसर्गसंज्ञकाः भवन्तीति ? प्रयोगनियमो वा-- ते प्रादयो गत्युपसर्गसंज्ञकाः सन्तो धातोः प्राक् प्रज्ञोक्तव्या इति ? यत्र यदि पूर्वो नियम आश्रीयेत तदा संज्ञावाक्यानामयमेकदेशो विज्ञायेत-- ते प्रादयो धातोः प्राक् प्रयुज्यमाना गत्युपसर्गसंज्ञका भवन्तीति। तथा च गत्युपसर्गसंज्ञयोरनभिनिर्वृत्तत्वात् ते गत्युपसर्गसंज्ञा इति प्रत्यवमर्शो न युज्यते। निपातसंज्ञायाश्चाभिनिर्वृत्तत्वात् त इत्यनेन निपाता एव प्रत्यवमृश्येरन्; ततश्च निपातसंज्ञाया नियमः स्यात्। इतरत्र तु नियमेनायं योगो गत्युपसर्गसंज्ञावाक्यानामेकदेशभूतो भवतीति न भवत्येव दोषप्रसङ्गः। संज्ञानियमस्य चाप्राक्प्रयुज्यमानानां संज्ञानिवृत्तिः फलं स्यात्, तच्चायुक्तम्; न ह्यप्राक्प्रयुज्यमानानां सत्यामपि संज्ञायां किञ्चिदनिष्टमापद्यते। इतरस्य तु नियमस्याप्राक्प्रयोगाभावः फलम्, तच्च युक्तम्; न हि गत्युपसर्गसंज्ञकानामप्राक्प्रयोग इष्यते। तस्मात् प्रयोगनियम एव न्याय्य इति तमाश्रित्याह-- `ते गत्युपसर्गसंज्ञकाः' इति। `तथा च' इत्यादि। यादृशो नियमः कृतस्तदनुरूपं तत्सदृशमेवेत्यर्थः। ननु च नैव कश्चित् प्रपठतीति प्रयोक्तव्ये `पठति प्र' इति प्रयुङ्क्ते, ततोऽनिष्टादर्शनादपार्थकमेतत्, नैतदस्ति; यद्यपि भाषायां धातोः परेण प्रयुज्यमानास्ते गत्युपसर्गसंज्ञका न दृश्यन्ते, छन्दसि तु दृश्यन्ते। तत्र य एव मन्दबुद्धिः प्रतिपत्ता तेषां छन्दसि धातोः परे प्रयोगं दृष्ट्वा यथैव ते छन्दसि विषये धातोः परेण प्रयुज्यन्ते, तथा भाषायमपि प्रयोक्तव्या इति मन्यते, तं प्रति व्युत्पादनार्थत्वान्नास्ति वैयर्थ्यप्रसङ्गः। अथ किमर्थं तेग्रहणम् ? यावता प्रकृतत्वादेव गत्युपसर्गसंज्ञकानां प्राक्प्रयोगेण सम्बन्धो विज्ञस्यत इत्याह-- `तेग्रहणम्' इत्यादि। असति तेग्रहणे गतिसंज्ञकानामनन्तरत्वात् त एव प्राक्प्रयोगेण सम्बध्येरन्। तेग्रहणे तूपसर्गसंज्ञा अपि निर्दिश्यन्त इति तषामपि सम्बन्ध उपपद्यते। तस्मादुपसर्गाणामपि प्राक्प्रयोगनियमो यथा स्यादित्येवमर्थ तेग्रहणम्। ननु चयं प्रति क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञका भवन्तीत्यन्तरेणापि धातुग्रहणं धातोरेव प्राक् प्रयोगो विज्ञास्यते, न हि धातोरन्यत्र क्रियाऽस्ति, तत्कथं धातोरित्युच्यते ? नैतदस्ति ; प्रकर्त्तुमिच्छति प्रचिकीर्षतीत्यत्रापि धातोश्च प्राक् प्रयोगो यथा स्यात्। अत्र सनः सम्बन्धिन्यषणक्रियया युक्तः प्रशब्द इति सनं गत्युपसर्गसंज्ञा यथा स्यात्। ततश्चासति धातुग्रहणे तत एव प्राक् प्रयुज्येत ।धातुग्रहणे तु चिकीर्षतेर्धातोः प्राक्प्रयुज्यते, न सनः।।

81. छन्दसि परेऽपि।(1.4.81)

82.व्यवहिताश्च। (1.4.82)
छन्दसि व्यवहितानां प्रयोगवचनात् भाषयां व्यवहितानां प्रयोगो न भवतीत्युक्तं भवति। यद्येवम्, गतिव्यवधानेऽपि प्राक्प्रयोगो न प्राप्नोति-- समाहरतीत्यादौ नैष दोषः; न हि तुल्यजातीयको व्यवधायको भवति। गत्युपसर्गजातेराश्रयणान्नास्ति व्यवधानम्। `आ मन्द्रैः' इत्यादि। अत्राङो मन्द्रैरित्यादिभिः पदैर्व्यधानेऽपि यातेर्धातोः प्राक्प्रयोगः। `आयाहि' इति। एतेनाङो याहीत्यनेन सम्बन्धं दर्शयति।।

83. कर्मप्रवचनीयाः। (1.4.83)
`कर्मप्रवचीयाः' इति वक्ष्यमाणानां संज्ञिनां बहुत्वाद्बहुवचनेन निर्देशः। महत्याः संज्ञायाः करणस्यैतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत-- कर्म प्रोक्तवन्तः कर्मप्रवचीया इति। भूते `कृत्यल्युटो बहुलम्' (3.3.113) इति कर्त्तर्यनीयर्। कर्मशब्दः क्रियावचनः। के च कर्म प्रोक्तवन्तः ? ये सम्प्रति क्रियां न त्वाहुः। तदेवमन्वर्थसंज्ञाकरणद्वारेण ये क्रियां द्योतितवन्तः, न तु प्रोक्तवन्तः ? येत सम्प्रति क्रियां न त्वाहुः। तदेवमन्वर्थसंज्ञाकरणद्वारेण ये क्रियां द्योतितवन्तः, न तु सम्प्रति द्योतयन्ति, ते कर्मप्रवचनीयसंज्ञा भवन्तीत्युक्तं भवति। यदि सम्प्रतति न क्रियां द्योतयन्ति, किन्तर्हि ? सम्बन्धविशेषम्। यथा शाकल्यस्य संहितामनुप्रावर्षखदित्यत्र हि निशमनक्रियया संहिताप्रवर्षणयोर्यः सम्बन्ध उपजनितो हेतुहेतुमद्भावलक्षणः, तमनुशब्दो द्योतयति। कर्मप्रवचनीयसंज्ञायां सत्याम् `कर्मप्रवचनीययुक्ते द्वितीया' (2.3.8) इति द्वितीया भवति।।

84. अनुर्लक्षणे। (1.4.84)

`लक्षणाशब्दोऽत्र चिह्ने वर्तते' इति मत्वा कश्चिच्चोदयति-- `किमर्थम्' इत्यादि। इतरस्तु `लक्षणेत्थम्भूताख्यानभागवीप्सासु' (1.4.90) इत्यादौ सूत्रे। तत्र चिह्ने ज्ञापके वर्त्तमानस्य लक्षणशब्दस्य ग्रहणम्, इह तु कारके हेतौ, अतस्तेन न सिध्यतीत्येनाभिप्रायेण तं प्रत्याह-- `हेत्वर्थन्तु वचनम्' इत्यादि। तुशब्दोऽवधारणे-- हेत्वमर्थमेवेति। हेतुशब्दोऽतर् कारकहेतुवचनः, न ज्ञापकहेतुवचनः; अन्यथा ह्यपरिहार एवायं स्यात्। हेतुरर्थो यस्य तत्तथोक्तम्। हेतौ वर्त्तमानस्यानोः कर्मप्रवचनीयसंज्ञा यथा स्यादित्येवमर्थमिदं वचनमित्यर्थः। किमर्थं पुनहतौ वर्त्तमानस्य तस्येयं संज्ञा विधीयत इत्याह-- `हेतौ तृतीयायाम्' इत्यादि। संहिता हि वर्षणस्य हेतुः, अनुहुद्द्यज्ञः सेकस्य, तथा हि-- संहितामनुनिशम्य श्रुत्वा प्रावर्षत्। अवुड्ड्यज्ञञ्चानुनिशम्यासिञ्चत्। तत्र यदि हेतावनोरेषा संज्ञा नोच्येत शाकल्यस्य संहितामनु रप्रावर्रषदित्यादौ `हेतौ' (2.3.23) इति तृतीया स्यात्। तस्मात्तां बाधित्वा द्वितीयैव यथा स्यादित्येवमर्थ हेतावियं संज्ञाऽनोर्विधीयते।।

85. तृतीयार्थे।(1.4.85)
`नदीमन्ववसिता' इति। सहार्थोऽत्र तृतीयार्थः। `सहयुक्तेऽप्रधाने' (2.3.19) इति सहार्थयोगे तृतीयाविधानात्। `अन्ववसिता' इति। `षिञ् बन्धने' (धा.पा.1477) इत्यस्य निष्ठायां रूपम्।।

86. हीने।(1.4.86)
`अनुशाकटायनं वैयाकरणाः' इति। शाकटायनमपेक्ष्यान्ये वैयाकरणा हीना इति। अपेक्षयात्र जनितो यः सम्बन्धस्तेन व्यतिरिच्यते शाकटायन इति। ततः षष्ठ्यां प्राप्तायां तदपवादेन द्वितीया विधीयते। एकयैव विभक्त्योभयस्थोऽपि सम्बन्धो द्योतित इति। तेन सम्बन्ध्यन्तरवाचिनो वैयाकरणशब्दादपरः सम्बन्धिविभक्तिर्न भवति।।

87. उपोऽधिके च। (1.4.87)
अधिकध्यारूढमुच्यते। न चानधिकेन विनाधिकं सम्भवति। तेनाधिके सम्बन्धेऽध्यारूढक्रियाजनिते संज्ञेयं विज्ञायते। चकाराद्धीने च। `उपखार्यां द्रोणः' इति। खार्या द्रोणोऽधिक इत्यर्थः। `यस्मादधिकम्' (2.3.9) इत्यादिना सप्तमी। तयैव सम्बन्धस्याभिहितत्वात् द्रोणशब्दात् `कर्मप्रवचनीययुक्ते द्वितीया' (2.3.8) इति द्वितीया न भवति।।

88. अपपरी वर्जने।(1.4.88)
`प्रकृतेन सम्बन्धिना' इति। वर्षादिना। `कस्यचित्' इति। त्रिगर्त्तादेः। `अप त्रिगर्तेभ्यः' इति। `पञ्चम्यपाङ्परिभिः' (2.3.10) इति पञ्चमी। `परि परि त्रिगर्तेभ्यः' इति। `परेर्वर्जने' (8.1.5) इति द्विर्वचनम्।
`ओदनं परिषिञ्चिति' इति। सर्वतः सिञ्चतीत्यर्थः। `शे मुचादीनाम्' (7.1.59) इति नुम्। कर्मप्रवचनीयसंज्ञाया अभावादुपसर्गसंज्ञैव भवति। तेन `उपसर्गात्सुनोति' (8.3.65) इत्यादिना षत्वं भवति।।

89. आङ् मर्यादावचने।(1.4.89)
यत्राङो मर्यादायामभिविधौ च कार्यमिच्छति तत्रोभयोरपि ग्रहणं करोति, यथा-- `आङ मर्यादाभिविध्योः' (2.1.13) इत्यादि। इह तु मर्यादाग्रहमेव कृतम्, नाभिविधिग्रहणम्, अतोऽभिविधावनया संज्ञया न भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्त्तुमाह-- `वचनग्रहणात्' इत्यादि। वचनग्रहणे हि सति बहुव्रीहिर्लभ्यते। `मर्यादा' इत्येतद्वचनं यत्र सूत्रे तन्मर्यादावचनम्। तत्रायमर्थो भवति-- यत्र मर्यादाग्रहणमस्त सूत्रे, तत्र य आङ स कर्मप्रवचनीयसंज्ञो भवति। तत्पुनः सूत्रम्-- `आह मर्यादाभिविध्योः' (2.1.13) इत्येतत्-- तत्र चाङ मर्यादाभिविध्योर्वर्त्तमान उपात्त इत्युभयत्रापि भवति।
कः पुनर्वर्जनस्य मर्यादाश्च विशेषः, येन पूर्वसूत्रे वर्जनमभिधायेह मर्यादाग्रहणं करोति ? अयमस्ति विशेषः-- वर्जने हि तत्परित्यागेनान्यत्र सामान्येन वर्षणादिना सम्बन्धो गम्यते, यथा-- आ त्रिगर्त्तेभ्यो वृष्टो देव इति, अत्र हि यस्यां दिशि व्यवस्थितो वक्तेदं वाक्यं प्रयुङ्क्ते तस्यां दिशि यो देशो यस्तथान्यासु दिक्षु तत्र सर्वत्रैव त्रिगर्तान् वर्जयित्वा वृष्ट इति गम्यते। मर्यादायां त्विदं वाक्यं प्रयुङ्क्ते-- आ पाटलिपुत्राद्वृष्टो देव इति, तत्सम्बन्धिन्यामेव दिशि यो व्यवस्थितो देशस्तस्य देशस्य वर्षणेन सम्बन्धरः प्रतीयत इत्येष विशेषः।
`ईषदर्थे क्रियायोगे मा भूत्' इति। ईषदर्थ आकडार इति। क्रियायोगे समाहरतीति। पूर्वत्र संज्ञाया अभावात्पञ्चमी न भवति। इतरत्र `गतिर्गतौ' (8.1.70) इति निघातो भवति। यस्तु वाक्यस्मरणयोराकारो वर्त्तते, तस्याङित्त्वादिह ङकारोच्चारणादेव संज्ञाया अप्रसक्तिः।।

90. लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः।(1.4.90)
लक्षणं ज्ञापको हेतुश्चिह्नमिहाभिप्रेतम्। लक्ष्यते चिह्न्यते येन तल्लक्षणम्। कञ्चित्प्रकारमापन्नमित्थम्भूतम्, तस्याख्यानमित्थम्भूताख्यानम्। `भी प्राप्तौ' (धा.पा.1844) आत्मनेपदी। तस्मात् `आ धृषाद्वा' (धा.पा.1805 तः पश्चात्) इति विभाषितणिचो यदा चुरादिणिज् नास्ति, तदा क्तान्तस्य भूत इति रूपं

भवति। स्वीक्रियमाणोंऽशो भागः। यस्त्वस्वीक्रियमाणेऽशे भागशब्दः प्रयुज्यते-- प्रियङ्गोर्भागो नगरस्य भाग इति, स स्वीक्रियमाणांशसादृश्यात्। पदार्थान् व्याप्तुमिच्छा वीप्सा। एते च लक्षणादयः प्रत्यादीनां न द्योत्याः। किं तर्हि ? विषयभूताः, अत एवाह-- `विषयभूतायम्' इति। एतच्च `अभिधेयवल्लिङ्गवचनानि भवन्ति' (व्या.प.73) इति लिङ्गविपरिणामं कृत्वा लक्षणादिभिः सम्बध्यते। एतच्च `अभिधेयवल्लिङ्गवचनानि भवन्ति' (व्या.प.73) इति लिङ्गविपरिणामं कृत्वा लक्षणादिभिः सम्बध्यते। यदि लक्षमादयः प्रत्यादीनां न द्योत्याः, तर्हि किं ते द्योतयन्ति ? सम्बन्धविशेषम्। `वृक्षं प्रति विद्योतते विद्युत्' इति। अत्र वृक्षो लक्षणम्, विद्योतमाना विद्युल्लक्ष्या; सा हि वृक्षं प्राप्य विद्योतत इति तयोः प्राप्तिक्रियाजनितोऽत्र लक्ष्यलक्षणभावः सम्बन्धः प्रतिशब्देन द्योत्यते। `साधुर्देवदत्तो मातरं प्रति' इति। प्रतिना देवदत्तस्य मातृविषया साधुभावापत्तिराख्यायते। अत्रापि मातरं प्राप्य साधुभावापत्तिरिति प्राप्तिक्रियाजनित एव मातुः साधुभावापत्तेश्च विषयविषयिभावलक्षणः सम्बन्धः प्रतिनाऽऽख्यायते। `यदत्र माम्'इत्यादि। यो भागो मामभिभजते स दीयतामित्यर्थः। अत्रापि विभजनक्रियाजनितः स्वीकारक्रियाजनितो वा स्वस्वामिभावः सम्बन्धः। `माम्' इति। अस्मच्छब्दस्य `त्वमावेकवचने' (7.2.97) इति मादेशः। `द्वितीयायाञ्च' (7.2.87) इत्यात्त्वम्। `वृक्षं वृक्षं प्रति सिञ्चति' इति। अत्र वीप्सा द्विर्वचनेनैव द्योत्यते। प्रतिशब्दस्य तु सेकक्रियाजनितो वृक्षायां यः सम्बन्धः साध्यसाधनभावलक्षणः स एव द्योत्यः। वृक्षादिनिमित्तं साधनम्, सेकः साध्यः। द्वितीया चेह सकर्मकत्वात् सिचेः सेकेन व्याप्तुमिष्टतमानां वृक्षाणां कर्मत्वे सति `कर्मणि द्वितीया' (2.3.2) इत्यनेनैव सिद्धा। कर्मप्रवचनीयसंज्ञयोपसर्जनसंज्ञया निवर्त्तितत्त्वात् `उपसर्गात् सुनोति' (8.3.65) इत्यादिना धत्वं न भवति।

`परिषिञ्चति' इति। सर्वतः सिञ्चतीत्यर्थः। अथेत्यादि चोद्यम्। वर्जनेत्यादि परीहारः। अपशब्दसाहचर्यादित्यतत्रैवोपपत्तिः। तत्र हि कर्मप्रवचनीयाधिकाराद्वर्जनार्थस्यापशब्दस्य ग्रहणं वर्जन एव। तस्य `अपपरी वर्जने' (1.4.88) इति कर्मप्रवचनीयसंज्ञा विहिता। तस्मात्तेन साहचर्याद्वर्जनार्थस्य परोर्ग्रहणम्। अतस्तेनापि योगे वर्जन एव विषय इयं पञ्चमी विधीयते, न लक्षणादिषु।।

91. अभिरभागे।(1.4.91)

`यदत्र मामाभिष्यात्' इति। `श्नसोरल्लोपः' (6.4.111) इत्यकारलोपः। कर्मप्रवचनीयसंज्ञाया अभावदुपसर्गत्वमस्त्येव। तेन `उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' (8.3.87) इति षत्वम्। `माम्' इति। यद्यप्यस्तिरकर्मकस्तथाप्यकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्तीति कर्मणि द्वितीया (2.3.2) ननु चाभिशब्दो भागसम्बन्धस्य द्योतक इति तेनास्तेः सम्बन्धो नास्ति; तत्कथं सकर्मकता ? नैतदस्ति; अस्ति सम्बन्धद्वारेण ह्यभिशब्दो भागसम्बन्धं द्योतयति, अन्यथा हि यदि तस्यास्तिना योगो न स्यात् तदोपसर्गसंज्ञापि न स्यात्। ततश्चोपसर्गसंज्ञानिबन्धनमभिष्यादिति षत्वमपि न स्यात्।।

92. प्रतिः प्रतिनिधिप्रतिदानयोः।(1.4.92)

`अभिमन्युरर्जुनतः प्रति' इति। अर्जनो मुख्यः। तत्सदृशोऽभिमन्युः। सोऽर्जुमनुकरोतीत्यत्रानुकरणक्रियाजनितः सम्बन्धविशेषोऽनुकार्यानुकरणभावः प्रतिना द्योत्यते। `प्रतिनिधिप्रतिदाने च यस्मात्' (2.3.11) इति पञ्चमी। `प्रतियोगे पञ्चम्यास्तसिः' (5.4.44)। `माषानस्मै तिलेभ्यः' इति। तिलानां पूर्वदत्तानां माणाणां प्रतिदानमिह निर्यातनम्। तिलान् गृहीत्वा माषान् ददातीत्यर्थः। दानग्रहणक्रियाजनितोऽत्र सम्बन्ध उत्तमर्णाधमर्णभावलक्षणः।।

93. अधिपरी अनर्थकौ।(1.4.93)

`अनर्थान्तरवाचिनौ' इति। ेतेनानर्थान्तरवाचित्वादनर्थकादवित्युक्तम्, न त्वर्थाभावादिति दर्शयति। यदि ह्यविद्यमानार्थत्वादनर्थकौ स्याताम्, निरर्थकमिदं सूत्रं स्यात्। तथा हि-- कर्मप्रवचनीयसंज्ञा गत्युपसर्गसंज्ञाबाधनार्थाऽनेन विधीयते। न चानर्थकयोरधिपर्योर्गत्युपसर्गसंज्ञाप्राप्तिरस्ति। यं प्रति क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा विधानात्। अनर्थकयोश्च क्रियायोगासम्भवात्। `कुतोऽध्यागसच्छति' इत्यादि। कुत इत्यापादाने पञ्चमी। कर्मप्रवचीयेति (2.3.8) द्वितीया न भवति; `उपपदविभक्तेः कारकविभक्तिर्बलीयसी'(चां.प.69) इति वचनात्। सूत्रारम्भस्य तु प्रयोजनमाख्यातमेव। कुत इति, किंशब्दात् `पञ्चम्यास्तसिल्' (5.3.7) इति तसिल, `कु तिहोः' (7.2.104) इति कुभावः। कर्मप्रवचनीयसंज्ञया गत्युपसर्गसंज्ञोर्वाधितत्वात् `गतिर्गतौ' (8.1.70) इति निघातो न भवति। ननु चागच्छतीत्युक्त आगमनं विशिष्टं प्रतीयते, अध्यागच्छति, पर्यागच्छतीति-- अधिपरियोगे त्वागमनस्योपरिभावः सर्वतोभावश्चावगम्यत इत्यपरो विशेषः, तत्कथमनर्थान्तरवाचित्वमनयोः ? नैतदस्ति; यदा तयोरप्यर्थयोः प्रकरणादेः कुतश्चिदवगतयोरधिपरी प्रयुज्येते तदा तयोरनर्थान्तरवाचित्वं वेदितव्यम्। कथं पुनरवगतार्थयोः ? नैतदस्ति; यदा तयोरप्यर्थयोः प्रयोगः, `उक्तार्थानामप्रयोगः' (व्या.प.60) इति वचनात् ? सत्यम्, अवगतार्थस्यापि प्रयोगो दृश्यते, यथा-- `ब्राह्मणौ द्वौ' इति। लोकस्य प्रयोगे गुरुलाघवं प्रत्यनादरात्।।

94.सुः पुजायाम्।(1.4.94)

`सुसिक्तं भवता' इति। भवच्छब्दात् कर्त्तरि तृतीया। द्वितीया तु पूर्ववदेव न भवति। `धात्वर्थः स्तूयते' इति। शोभनोद्भावनं स्तुतिः, सैव तस्य पुजा। `उपसर्गाश्रयं षत्वं न भवति' इति। कर्मप्रवचनीयसंज्ञयोपसर्गसंज्ञाया बाधितत्वादिति भावः। `सुषिक्तं किं तवात्र' इति। क्षेपोऽयम्,न पूजा।।

95. अतिरतिरक्रमणे च।(1.4.95)

`अतिस्तुतमेव भवता' इति। निष्पन्नेऽपि फले स्तुतिः प्रवृत्तेर्थः। `शोभनं कृतमित्यर्थः' इति। पूजामाविष्करोति।।

96. अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु।(1.4.96)

`पदार्थे' इति। अन्यस्य पदस्यार्थो लक्ष्यते। न स्वार्थः, नापि स्वसम्बन्धिनः; पदस्यार्थः पदार्थः. स्वपदार्थग्रहणं, स्वसम्बन्धिपदार्थग्रहणं वा पदार्थग्रहणमनर्थकं स्यात्। अपिशब्दस्य हि योऽर्थः यश्चापिशब्दसम्बन्धिनः स्यादित्यादेः पदस्य , स पदार्थ एवेति किं पदार्थग्रहणेन ? तस्मात् पदार्थग्रहणसामर्थ्याद्विशिष्टपदस्यार्थो विज्ञायत इत्याह-- `पदान्तरस्य' इत्यादि। `सर्पिषोऽपि स्यात्' इति। कर्मप्रवचनीयसंज्ञयोपसर्गसंज्ञाया निवर्तितत्वात् `उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' (8.3.क87) इति षत्वं न भवति। अथ सर्पिःशब्दाद्द्वितीया कथं न भवति ? अपिशब्देन तस्य योगासम्भवात्। सर्पिषो हि या मात्रा साऽपिशब्देन युक्ता, न सर्पिः। मात्राशब्दात् तर्हि कस्मान्न भवति ? तस्य प्रयोगाभावात्। यदा तु प्रयुज्यते, तदा कर्मप्रवचनीयसंज्ञैव नास्ति; अप्रयुज्यमानस्य पदान्तरस्यार्थे तद्विधानात्। `अधिकार्थवचनेन' इति। अधिकर्थो मूलकसहस्रसेकादिः, तस्य वचनेन सेकादावर्थे क्रियायां यच्छक्तेरप्रतिघातस्याविष्करणम् = प्रकाशनं तत्सम्भावनम्। `अपि सिञ्चेन्मूलकसहस्रम्। अपि स्तुयाद्राजानम्' इति। तस्य सेके स्तुतौ च सामर्थ्यं न विहन्यत इत्यर्‍थः। `सम्भावनेऽलमिति चेत् सिद्धाप्योगे' (3.3.154) इति लिङ। `कामचाराभ्यनुज्ञानम्' इति। कमचारः = इच्छया प्रवृत्तिः, तस्याभअयनुज्ञानं कामचाराभ्यनुज्ञानम्। `अपि सिञ्च, अपि स्तुहि' इति। सिञ्च वा स्तुहि वा यथेष्टमभ्यनुज्ञातोऽसीत्यर्थः। `धिग्जाल्मं देवदत्तम्' इति।

उभयसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।(वा.118)

इत्युपसंख्यानाद्द्वितीया। `अपि सिञ्चेत्पलाण्डुम्' इति। `अर्हे कृत्यतृचश्च' (3.3.69) इति लिङ। पलाण्ड्डुमिति कर्मणि द्वितीया (2.3.2)। `अपि सिञ्च, अपि स्तुहि ' इति। एकस्मिन् कर्त्तरि स्तुतिसेकक्रिययोश्चनीयमानता। अत्र समुच्चयः। सिञ्च च स्तुहि चेति प्रसिद्धसमुच्चयार्थस्य चशब्दस्य प्रयोगेण तमेव समुच्चयमुदाहरणे व्यक्तीकरोति।।

97.अधिरीश्वरे।(1.4.97)

`तदयं स्वस्वामिसम्बन्धे' इति। परिलपालनादिक्रियाजनितोऽत्र सम्बन्धः। `तत्र' इत्यादि। सर्वत्र हि सम्बन्धे किञ्चिदनूद्यते, किञ्चिदाख्यायते। यत्प्रसिद्धं तदनूद्यते, यदप्रसिद्धं तदाख्यायते = विधीयते; ज्ञाप्यते; यथा-- यः कुण्ड्ली स देवदत्त इति। कुण्डलित्वानुवादेन देवदत्तनुवादेन देवदत्तत्वं विधीयते। यच्च विधीयते तत्प्रधानम्, इतरदप्रधानं विशेषमम्। तत्र यदा स्वमप्रसिद्धत्वाद्विधीयते तदा स्वामी प्रधानत्वाद्वयतिरेकमापद्यत इति तत इव कर्मप्रवचनीयसंज्ञायुक्तत्वाद्व्यतिरेकनिबन्धनविभक्तो षष्ठ्यां प्राप्तायां तदपवादः `यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' (2.3.9) इति सप्तमी भवति। तयैव सम्बन्धस्य द्योतितत्वात् स्वात् प्रथमैव भवति, न सप्तमी। यदा तु स्वाम्यप्रसिद्धत्वात् विधीयते, तदा विपर्ययो वेदितव्यः।।

98. विभाषा कृञि। (1.4.98)

अधिरीश्वर इति वर्त्तते। तेन प्राप्ते विभाषेयम्। अधिपूर्वः करोतिर्विनियोगे वर्तते। विनियुक्तस्यैवश्वर्यं सम्पद्यते। `यदत्र मामधिकरिष्यति' इति। मामिति कर्मणि द्वितीया। अधिकरिष्यतीति; अत्र `निपातैर्यद्यदि' (8.1.30) इत्यादिना निघाते प्रतिषिद्धेऽस्य प्रकृतिस्वरेणाद्युदात्तत्वं भवति।।

99. लः परस्मैपदम्। (1.4.99)

ल इति प्रथमा वा स्यात् ? षष्ठी वा ? तत्र यदि प्रथमा स्याल्लकारस्यैव परस्मैपदसंज्ञा स्यात्, न तदादेशानां तिबादीनाम्। कामम्, तेषममपि स्थानिवद्भावेन स्यात्। `तङानावात्मनेपदम्' (1.4.100)इत्यत्र तु `लः' इत्यनेन तङानयोः सम्बन्धो नोपपद्येत, न हि तङानौ लौ भवतः। अत्र तङानभावो लकार एव तङानावित्येवमभिहितः। साहचर्याद्वा लादेशौ तङानावव `ल' इत्युक्ताविति व्याख्येयम्। तथा च व्याख्यानद्वारेणेष्टार्थप्रतिप्त्तौ साध्यायां प्रतिपत्तिगौरवं स्यात्। षष्ठीपक्षे त्वेष दोषो नास्ति, अतस्तमाश्रित्याह-- `लः' इति षष्ठी' इत्यादि। नन्वयमपि पक्षो दोषवानेव, लादेशस्य हि परस्मैपदसंज्ञा विधीयमाना तिङां न स्यात्, तेषां परत्वात् `तिङस्त्रीणि त्रीणि' (1.4.101) इत्यादिना प्रथमपुरुषादिसंज्ञया भवितव्यम्। परस्मैपदसंज्ञायास्तु शतृक्वस्वोश्चावकासः ? नैष दोषः; यदयं `सिचि वृद्धिः परस्मैपदेषु' (7.2.1.) इत्याह तज्ज्ञापयति-- भवति च तिङां परस्मेपदसंज्ञेति। स हि परस्मैपदे परे सिचि विधीयते, न हि सिज्विषये शतृक्वसू सम्भवतः। `तिप्तस्झि' इत्यादि रूपोदाहरणमात्रम्।।

100. तङानावत्मनेपदम्।

`कतीह निघ्नानाः' इति। निपूर्वोद्धन्तेः `ताच्छील्यवयोवचनशक्तिषु चानश्' (3.2.129) इति चानश्प्रत्ययः। `गमहन' (6.4.98) इत्यादिनोपधालोपः। `होहन्तेर्ञ्णिन्नेषु' (7.3.54) इति कुत्वम्। यद्यनादेशोऽपि चानशात्मनपदसंज्ञकः स्यात् परस्मैपदिनो हन्त्तर्न स्यात्।।

101. तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः।

तिङ इति प्रथमाबहुवचनम्। तिङः संज्ञिनः किंभुताः ? त्रीणि त्रीणित्येवम्भूता इत्यर्थः। वचनापेक्षया नपुंसकलिङ्गेन निर्देशः। वीप्सायाञ्चैतद्द्विर्जनम्। यदि तिङस्त्रीणि त्रीणि वचनानि प्रथममध्यमोत्तमपुरुषसंज्ञकानि भवन्ति, एवं सति षट्त्रिकाः संज्ञिनः संज्ञास्तित्र इति यथासंख्यं न प्राप्नोति; वैषम्यात्। तत्र यद्येकस्यानेकसंज्ञाविधानवैयर्थ्यादेका संज्ञा भवेत्, न त्वेकैकस्य तिस्रः, तथापि सैवैकैका भवन्तीत्यव्यवस्था वा स्यात्; नैष दोषः;इह हि परस्मैपदग्रहणमात्मनेपदगर्हणञ्चानुवर्तते। तदनुवृत्तौ च द्वौ राशी भवतः- नवानां तिङां परस्मैपदसंज्ञकानामेको राशिः, तथा नावानामात्मनेपदसंज्ञकानां द्वितीयः। तत्र प्रथमे राशौ ये त्रयस्त्रिकाः, ये च द्वितीये राशौ त्रयस्त्रिकास्तैरिदं सूत्रं प्रत्येकमभिसम्बध्यते-- परस्मैपदेषु तिङस्त्रीणि त्रीणि थ्थममध्यमोत्तमाः, तथात्मनेपदेषु तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमा इति। एवं हि सति न भवति संख्यातानुदेशाभावप्रसङ्गः। तमेवार्थं दर्शयितुमाह-- `तिङोऽष्टादश प्रत्ययाः' इति। `नव' इत्यादिना राशिद्वयं दर्शयति। `तत्र' इत्यादिना प्रथमे राशौ ये त्रयस्त्रिकास्तैरस्य सूत्रस्य सम्बन्धं करोति। `आत्मनेपदेषु' इत्यादिनापि द्वितीये राशौ ये त्रयस्त्रिकास्तैश्च।।

102. तान्येकवचनद्विवचनबहुवचनान्येकशः।

`तानि' इति बहुवचनं संज्ञासमावेशार्थम्; अन्यथा ह्येकसंज्ञाधिकारे सति वचन्परामाण्यात् पुरुषवचनसंज्ञाः पर्यायेण प्रवर्तेरन्। एवञ्च तत्र `आडुत्तमस्य पिच्च' (3.4.92) इत्यादिना विधीयमानमाडादिकार्यं पाक्षिकं स्यात्। अस्मिंस्तु सति भवति संज्ञासमावेशः। तच्छब्देन हि त्रीणि त्रीणि लब्धपुरुषसंज्ञकानि तान्येकवचनादिसंज्ञकानि भवन्तीति प्रत्यवमृश्यन्ते, तेन यानि लब्धप्रथमपुरुषादिसंज्ञकानि तान्येवैकवचनादिसंज्ञकानि भवन्ति। ननु च त्रिकाणां प्रथमादिसंज्ञैकैकस्य चैकवचनादिसंज्ञा, तत्र विषयबेदादेकसंज्ञाधिकारेऽपि विरोधो नास्त्येवेति; नैष दोषः; तदस्ति पुरुषादिसंज्ञापि हि प्रत्येकमेव, न हि समुदायो नामान्यस्त्रिकेभ्योऽस्ति; तस्मात् तिबादयस्त्रका एव संज्ञिनः। त्रिग्रहणन्तु मर्यादार्थम्। त्रत्वसंख्यापरिच्छिन्नास्तिङः प्रत्येकं पुरुषसंज्ञाः प्रतिपाद्यन्ते। तस्मात् प्रथमादिसंज्ञानामेकवचनादिसंज्ञानाञ्चैकविषयतैवेति संज्ञासमावेशार्थं तानीत्युक्तम्।।

103. सुपः। (1.4.103)

सुविति प्रत्याहारग्रहणम्। प्रथमैकवचनात् सुशब्दादारभ्य सप्तमीबहुचनस्य सुपः पकारेण। अथ कपः पकारेणायं प्रत्याहार कस्मान्न विज्ञायते ? सप्तमीबहुवचनस्य पकारस्य वैयर्थ्यप्रसङ्गात्। स ह्यनुदात्तार्थः स्यात् ? प्रत्याहारार्थो वा ? तत्रानुदात्तार्थो न भवति; अनुदात्तस्य सुपत्वादेव सिद्धत्वात्। तत्र यदि प्रत्याहारार्थोऽपि न स्यात् तदास्यापार्थकत्वमेव स्यात्। तस्मात् तेनैवायं प्रत्याहारो विज्ञायते, न तु कपः पकारेण; स्वरविधौ तस्य चरितार्थत्वात्।।

104.विभक्तिश्च। (1.4.104)

चकारः पुरुषादिसंज्ञासमावेशार्थः। विना तेनैकसंज्ञाधिकारे वचनप्रामाण्यात् पर्यायः स्यात्। तिङो विभक्तत्वे प्रयोजनम् `न विभक्तौ तुस्माः' (र1.3.4) इतीत्संज्ञाप्रतिषेधः। सुपस्त्वेच्च, अन्यच्च त्यदाद्यत्वादि।।

105.युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः। (1.4.105)

नियतार्थमेतदिति दर्शयितुमाह-- `लस्येत्यधिकृत्य' इत्यादि। एतच्च नियमार्थत्वे कारणम्। सत्यारम्भो नियमार्थो भवति, नासिद्धे। स पुनरयं नियम उपपदार्थनियमो वा स्यात्-- तिङो युष्मद्युपपदे मध्यम एव ? पुरुषनियमो वा स्यात्-- युष्मद्येवोपपदे मध्यम् इति वा ? तत्र यदि प्रथमो नियम आश्रीयते, त्वया कुर्वता त्वया कुर्वाणेनेति युष्मद्युपदे लस्य शतृशानजादेशौ न भवतः। तस्मात् तदर्थं यत्नान्तरमास्थेयम्। इतरत्र तु न किञ्चिद्यत्नसाध्यम्, अतो द्वितीयपक्षमाश्रित्याह-- `तेषामयम्' इत्यादि। व्यवहिते च, अव्यवहिते चेति। ननु च परस्परं सन्निकृष्टं यत्पदं तदुपपदमुच्यते-- उपोच्चारितं पदमिति कृत्वा;यच्च व्यवहितं तदव्यवहितापेक्षया विप्रकृष्टम्, अतो व्यवहितेन भवितव्यम्, नैष दोषः; यस्मात् सन्निकृष्टं विप्रकृष्टमित्यव्यवस्थितमेतदुभयग्रहणम्; सापेक्षत्वात् परापरवत्। तत्र यद्यव्यवहितमपेक्ष्य व्यवहितं विप्रकृष्टं भवति, तथाप्यन्यद्विप्रकृष्टतरमपेक्ष्य सन्निकृष्टं भवतीतीतरत्र व्यवहितेनापि भवितव्यम्। यद्येवम्, उपपदग्रहणं किमर्थम् ? पूर्वभूतेऽपि यथा स्यादित्येवमर्थ कृतम्। अन्यथा `युष्मदि' इत्येतावत्युच्यमाने' तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66)इति परभूत एव युष्मदि पूर्वस्य मध्यमः स्यात्, न तु पूर्वभूते परस्य। उपपदग्रहणादत्रापि भवति। पूर्वेण परेणापि प्रयुज्यमानमुपपदं भवत्येव। `समानाधिकरणे' इत्यनेन समानाभिधेय इति व्याचक्षाणोऽयमधिकरणशब्दोऽभिधेयवचनः सूत्र उपात्त इति दर्शयति। तत्पुनरभिधेयं यत्र लकार उत्पद्यते कर्तरि कर्मणि वा कारके प्रत्यासत्तेस्तदेव विज्ञायते इत्याह-- `तुल्यकारके' इत्यादि। तुल्यं कारकं यस्य तत् तथोक्तम्। तुल्यशब्देन समानशब्दस्यार्थो दर्शितः। `प्रयुज्यमानेऽप्रयुज्यमानेऽपि' इति। अनेन स्थानिन्यपीत्यस्यार्थमाचष्टे। स्थानशब्दः प्रसङ्गवाची-- स्थानमस्यास्तीति स्थानी। कस्य च स्थानम् ? तस्यैव स्थानमस्ति यस्यार्थो गम्यते, शब्दो न प्रयुज्यते। तदेतदुक्तं भवति-- अप्रयुज्यमानेऽपि युष्मदि, अपिशब्दात् प्रयुज्यमानेऽपि। समानाधिकरणग्रहणं किम् ? `त्वया पच्यते' इत्यत्र मा भूत्, भिन्नं ह्यधिकरणम्। तथा हि-- `त्वया' इत्येतत् कर्त्तृवाचि; कर्त्तरि तृतीयाविधानात्। `पच्यते' इति कर्मवाचि; कर्मणि लकारविधानात्।।

106. प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च।(1.4.106)
`प्रहासे गम्यमाने' इति। यत्र भूतार्थाभावाद्वञ्चनैव केवलं तत्र वक्तुरभिप्रयाविष्करणेन प्रहासो गम्यते। `मन्योपपदे' इति।मन्यतिरुपपदमुपोच्चारितं पदं यस्य स तथोक्तः। मध्यमस्य धातोर्विधानात् धातुरन्यपाद्रथो विज्ञायत इत्याह-- `धातोःट इति। `स चैकवत्' इति। यत्र द्वौ मन्तारौ बहवो वा तत्रायमेकवद्भावो विधीयते। अन्यत्र तु मन्तुरेकत्वादेवैकवचनं सिद्धम्। `मध्यमोत्तमयोः' इति। यथाक्रमं युष्मदस्मदोरुपपदयोः समानाधिकरणयोरप्रयुज्यमानयोरप्यर्थस्य विद्यमानत्वात्। यथा प्रत्युदाहरणे पूर्वकमुपपदग्रहणं युष्मच्छब्देनाभिसम्बद्धमिहानुवर्त्ततेति तन्मन्यतिनाऽशक्यमभिसम्बन्धुमिति पुनरुपपदग्रहणं क्रियते। मन्यतेरिति श्यना निर्देशः, इत्यस्य तानादिकस्य ग्रहणं मा भूदत्येवमर्थः। तेनेनह न भवति-- एहि मनुषे रथेन यास्यामि न हि यास्यसि यातस्तेन ते पितेति। एवं हि मनोतेर्भवति।।

107. अस्मद्युत्तमः। (1.4.107)
यदा युष्दस्मदी द्वे अप्येते उपपदे स्तः, तदा कथं भवितव्यम् ? यदि कर्त्तृशक्ती आधारप्रतिनियते अपेक्ष्येते, तदाऽऽख्यातमपि पृथगेव प्रयुज्यते-- पचसि पचामि चेति। अथाविरोधाच्छक्तिद्वयेऽपि लकार उत्पद्यते, तदा विप्रतिषेधादुत्तम एव भवति-- त्वञ्चाहञ्च पचाव इति। यद्यपि `त्यदादीनां यद्यत्परं तच्छिष्यते' भवति। आवां पचाव इत्यत्र ह्यस्मच्छब्दस्य युष्मदर्थोऽपि वाच्यः, अन्यथा हि द्विवचनं न स्यात्। न ह्यस्मच्छब्दस्यैव द्वित्वमुपपद्यते।।

108. शेषे प्रथमः। (1.4.108)

109. परः सन्निकर्षः संहिता। (1.4.109)
`परशब्दोऽतिशये वर्त्तते' इति। यथा परं दुःखमिति। एतन परशब्दोल दिगादिष्वप्यर्थेषु वर्त्तते, तथापीहातिशये वर्त्तमानस्य तस्य ग्रहणमित दर्शयति। सन्निकर्षः = प्रत्यासत्तिः, संश्लेषश्च। तत्रेह प्रत्यासत्तिर्गृह्यत इति दर्शयन्नाह-- `सन्निकर्षः प्रत्यासत्तिः' इति। संश्लेषस्तु न गृह्यते, तस्य वर्णेष्वसम्भवात्। संश्लेषो ह्येककालानां भवति, न च वर्णामामेककालतापत्तिः; क्रमेणोच्चारित्वादुच्चरितप्रध्वंसितत्वात्। संश्लेषो ह्येककालानां भवति, न च वर्णानामेककालतापत्तिः; क्रमेणोच्चारित्वादुच्चरितप्रध्वंसतत्वात्। सत्यामपि चैककालतायां न सम्भवत्येव वर्णानां सश्लेषः। तथा हि-- संश्लेषः संयोगतो वा स्यात्, समवायतो वा; तत्र पूर्वको द्रव्यस्यैव स्यात्, न तु शब्दस्य-- निर्गुणा गुणा इति कृत्वा। इतरोऽपि नैव शब्दस्य सम्भवति, न हि वर्णो वर्णे समवैति; शब्दस्याकाशसमवायित्वात्। न च संयोगसमवाययोरतिशयः सम्भवति; सर्वत्रैकरुपकत्वात्। तथा च `परः' इति विशेषणं नोपपद्यते। प्रत्यासत्तिस्त्वपेक्षाकृतभेदात् प्रकर्षाप्रकर्षाभ्यां प्रयुज्यमानापरग्रहणेन विशिष्यत इति युक्तं तस्य विशेषणत्वम् । कः पुनरसौ परः सन्निकृष्टान् वर्णानुच्चारयति वक्तरि पूर्वस्य वर्णस्य ये निष्पादकास्ताल्वादयस्तेषां व्यापारोपरतौ वर्णान्तरस्य च ये निष्पादकास्ताल्वादयस्तेषां व्यापारोपदेशनमर्द्धमात्राकालमाहुः। स वर्णानां व्यवधानः = व्यवधायको यस्मिन् सोऽर्द्धमात्राकालव्यवधानः सन्निकर्षः। यदि वर्णानामर्द्धमात्राकालव्यवधानः सन्निकर्षः,कथं तर्हि दध्यत्रेत्यादौ वयवधायककालो नोपलक्ष्यते,वर्णाः संश्लिष्टा एवोपलभ्यन्ते ? नैतत्; किमर्थं पुनरेतदारभ्यते, यावता परमेव सन्निकर्षं संहितेति वदन्त्याचार्याः, तथा हि संहितामधीष्वेत्युक्ते परं सन्निकर्षमेवाधीते शिष्यः ? नैतदेवम्; पदस्य पदान्तरेण यदानन्तर्यं सा संहितेति लोकेऽभिधीयते । तथा च वक्तारो वदन्ति-- संहितामधीते न पदानि, पदान्यधीते न संहितामिति। तथा चैकपदे हि संहिताकार्यं न स्यात्, `इको यणचि'(6.1.77) इति-- कुमार्यौ, कुर्मार्य इति। सति ह्यस्मिन् वर्णानां सन्निकर्षविशेषस्यानेन संहितासंज्ञा विधीयत इत सर्वत्रैव भवति।।।

110. विरामोऽवसानम्। (1.4.110)
`विरतिर्विरामः' इति। भावे घञ्। विरामो वणोच्चारणाभावोऽवसानसंज्ञो भवति। `विरम्यतेऽनेनेति विरामः' इति विरामशब्दस्य द्वितीयमर्थं दर्शयति। `कृत्यल्युटो बहुलम्' (3.3.13) इति बहुलवचनादसंज्ञायामपि `हलश्च' (3.3.121) इति घञ्। अत्र पक्षे येनान्त्येन वर्णेन विरम्यते सोऽवसानसंज्ञो भवति। तत्र पूर्वस्मिन् पक्षेऽभावे पौर्वापर्याभावात् `खरवसानयोः' (8.3.15) इत्यत्रावसानापेक्षया विषयसप्तमीयं विज्ञायते; न परसमप्तमी। खरपेक्षया तु सप्तमीयम्।
अन्ये तु-- यद्यभावे पौर्वापर्यं न सम्भवतीत्यवसनापेक्षया `खरवसानयोः' (8.3.15) इति परसप्तमी नोपपद्यते, तदा `इको यणचि' (6.1.77) इत्यादावपि परसप्तमी नोपपद्यते। कथम् ? वर्णानां क्रमभावित्वात्, उच्चरितप्रध्वंसितत्वाच्च। यदेगस्ति तदाञ् नास्ति, यदा त्वजस्ति तदेग् नास्ति। अथात्र बुद्धिप्रकल्पितं पौर्वापर्यमाश्रित्य परसप्तमीष्यते, तदा `खरवसानयोः' (8.3.15) इत्यत्रापितथैवैष्टव्येति मन्यमाना अवसानापेक्षयापि परसप्तमीमिच्छन्ति। अपरे तु--अन्त्यस्य तु वर्णस्यावसानसंज्ञायां सत्यां `खरवसानयोः' (8.3.15) इति षष्ठी विज्ञायते। अत्रावसानापक्षया स्थानषष्ठी। रेफस्यावसानस्य विसर्जनीय इति खरपेक्षया तवानन्तर्यलक्षणा षष्ठीति वदन्ति। तन्मते स्थानषष्ठ्यां हि `रो रि' (8.3.14) इत्यतो रेफस्यानुवृत्तस्य यत् स्थानित्वं तदविरुध्यते तदेवमेकापि विभक्तिर्यथायोगं विभज्यते। ननु चाभावपक्षेऽपि पूर्वस्मिन्नपि भागेऽनुच्चारममस्ति, तत्रापि विसर्जनीयः प्राप्नोति-- रथ इति, अस्ति ह्यत्रापि रेफात् प्रागुच्चारणम् ? नैष दोषः तत्र हि प्रकृतं पदग्रहणं रेफेण विशिष्यते-- रेफान्तस्य पदस्येति। न च पूर्वेण रेफेण पदं भवति। नन्वेवप्यर्थस्यैषा

संज्ञा स्यादिति `खरवसनायोः' (8.3.15) इत्यत्र `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इति परिभाषा नोपतिष्ठते। शब्दे हि सप्तमीनिर्दिष्टे सतीयमुपतिष्ठते, नार्थे। तदनुपस्थाने च परेण रेफेण रेफान्तस्य रथ इत्येतस्य पदस्य पूर्वो यो रेफस्तस्य व्यवहितस्यापि विसर्जनीयः स्यात्, नैष दोषः; ज्ञापकान्न भविष्यति, यदयं `उरण् रपरः' (1.1.51) इति व्यवहितस्य रेफस्य विसर्जनीयमकृत्वा निर्देशं करोति, तज्ज्ञापयति- व्यवहितस्य रेफस्य विसर्जनीयो न भवतीति।

`नन्वत्र लोके प्रसिद्धेरेवायन्त्ये वर्णेऽवसानशब्दस्य सम्प्रत्ययो भविष्यति। प्रसिद्धो हि लोके--अन्त्ये वर्णेऽवस्यतेः प्रयोगः। तथा हि केनावस्यतीत्युक्ते वक्तारो वदन्ति-- इकारेणोकारेण वेति। इकारादिवर्णेनावसानं करोतीत्यर्थः। ततः प्रदेश एवावसानग्रहणं कर्त्तव्यमिति नार्थः संज्ञासंज्ञिप्रणनेन, नैतदस्ति; अपूर्वो हि स्यतिः परिसमाप्तावपि वर्त्तते-- अवसितो वाद इति, अवगमेऽपि वर्त्तते-- अवसितोऽर्थ इति, पराभवेऽपि वर्त्तते--द्वयोर्विवादेऽवसितो दवदत्त इति। तत्र यदीयं नारभ्यते, तदावसानग्रणे सन्देहः स्यात्-- किमभिधानावसानशब्दस्य ग्रहणमिति ? `विरामोऽवसानम्' (1.4.110) इति तु ह्यन्तग्रहणं कर्त्तव्यम्-- खरन्त्ययोरिति ? एतदपि नास्ति; एवं हि सन्देहः स्यात्-- किमन्त्यस्य वर्णस्य ? उत पदस्य? आहोस्वद्वाक्यस्येति ? तत्रान्त्यस्य विशेषणार्थं वर्णग्रहणं कर्त्तव्यं स्यात्। तस्मात् संज्ञासंज्ञिसम्बन्धः कर्त्तव्यः।

`वृक्षः, प्लक्षः' इति। `खरवसनायोर्विसर्जनीयः' (8.3.15)। `दधिं मधुँ' इति। `अणोऽप्रगृह्यस्यानुनासिक' (8.4.57) इति। अत्र हि `वाऽवसाने'(8.4.56) इत्यतोऽवसानग्रहणमनुवर्तते।।

इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
प्रथमाध्यायस्य
चतुर्थः पादः
समाप्तश्चायं प्रथमोऽध्यायः।।

2.1

श्रीबोधिसत्त्वदशीयाचार्यजिनेन्द्रबुद्धिपादविरचिता
न्यासापरपर्याया
काशिकाव्याख्या

द्वितीयाध्यायस्य
प्रथमः पादः

1.समर्थः पदविधिः। (2.1.1)

`परिभाषेयम्' इति। परितो व्यापृता भाषा = परिभाषा। तथा चोक्तम्-- `परिभाषा पुनरेकस्था सर्व शास्त्रमभिज्वलयति, यथा-- वश्मप्रदीपः'। कुतः पुनरेतद्विज्ञायते-- परिभाषेयम्, नाधिकार इति ? पदविधिग्रणाल्लिङ्गात् । उत्तरत्र हि सर्वः पराङ्गवद्भावादिरनुकरस्यमानः पदविधिरेव। तत्र यद्यमधिकारः स्यात्, पदविधिग्रहणमनर्थकं स्यात्; वयावर्त्याभावात्। परिभाषायां त्वस्याम्, परिभाषा ह्येकदेशस्यापि सर्वत्र शास्त्रे व्याप्रियत इत्यसति पदविधिग्रहणे वर्णविधायवप्युपतिष्ठेत। ततो वर्णविधिनिरासार्थ क्रियमाणं पदविधिग्रहणमर्थवद्भवति। तस्मात् पदिविधग्रहणाल्लिङ्गात् परिभाषेयं नाधिकार इत्यवसीयते। यद्यवम्, `इसुसोः सामर्थ्ये' (8.3.44) , `न चवाहाहैवयुक्ते' (8.1.24) इत्येवमादिषु योगेषु सामर्थ्यग्रहणं युक्तग्रहणञ्च किमर्थं क्रियते, यावता `पदस्य' इति तत्रानुवर्त्तते, तत्र पदविधित्वादेवासामर्थ्ये न भविष्यति ? सत्यमेतत्; यदर्थं तु क्रियते तत् तत्रैव प्रतिपादयिष्यामः।

विधिशब्दोऽयमस्त्येव भावसाधनः-- विधानं विधिरिति। अस्ति च कर्मसाधनः-- विधीयत इति विधिः। तत्र भावसाधने विधिशब्द आश्रीयमाणे पदानामपरिनिष्पन्नानां परिनिष्पादनं पदविधिरिति पदेषु कर्मणि कृद्योगलक्षणा षष्ठी; तेषां विधिना सम्बन्धात्। कर्मसाधने तु परिनिष्पन्नानां व्यवस्थितानामेव पदानां यत्समासादि कार्यं विधीयते स पदिविधिः। तत्र पदेषु च शेषलक्षणा षष्ठी भवति; विधीयमानस्य कार्यस्य पदसम्बन्धित्वेनोपादानात्। तत्र यदीह भावसाधनो विधिशब्द आश्रीयेत तदा विभक्तिविधानमेव सङ्गृहीतं स्यात्,समास-- पराङ्गवद्भाव--तद्धितवृत्त्यादिकं न सङ्गृह्येतच न हि तत्र पदानामसतां विधानम्; किं तर्हि ? व्यवस्थितानामेव पदानां समासादि कार्य विधीयते। इतरत्र तु विधिशब्द आश्रीयमाणे तेऽपि सङ्गृहीता भवन्तीति मन्यमानः कर्मसाधनं विधिशब्दमाश्रित्याह-- `विधीयत इति विधिः' इति। ननु चात्रापि पक्षे विभक्तिविधानं न सङ्गृह्येत, न हि `कर्मणि द्वितीया' (2.3.2) इत्येवमादिशास्त्रेण व्यवस्थितानां पदानां किञ्चित् कार्यं विधीयते, अपि तु पदान्येव विधीयन्ते ? यदि न सङ्गृहीतं स्यान्न नाम। न च तदसङ्ग्रहे किञ्चिदनिष्टमापद्यत इत्युत्तरत्र प्रतिपादयिष्यामः। `समासादिः' इति। आदिशब्देन तद्धितवृत्यादीनां ग्रहणम्।

`समर्थः शक्तः' इति। स्वकार्यनिर्वर्तनक्षम इत्यर्थः। स हि लोके समर्थ इत्युच्यते। स्वार्थप्रतिपादनमेव शब्दानां स्वकार्यम्। ये चेह लौकिका वैदिकाश्च शब्दा अधिकृतास्ते सर्वे एव स्वकार्यप्रतिपादनं प्रति समर्थाः। तस्मात् `समर्थः' इत विशेषणोपादानसामर्थ्याद्विशेषः कश्चिदाश्रीयते। स च विशेषः-- वृत्त्यर्थ

यद्वाक्यमुपादीयते, प्रत्यासत्तेस्तदर्थप्रतिपादने या शक्तता तल्लक्षमो विज्ञायत इत्याह-- `विग्रहवाक्यर्थाभिधाने' इत्यादि। विशेषेण गृह्यते विज्ञायतेऽनेनेति विग्रहः, विग्रहश्च तद्वाक्यम्। अथ वा-- विशेषेण ग्रहणं विग्रहः, विग्रहार्थं यद्वाक्यं तद्विग्रहवाक्यम्। शाकपार्थिवादित्वान्मध्यमपदलोपी समासः। विग्रहवाक्यस्यार्थो विग्रहवाक्यार्थः, तदभिधाने तत्प्रत्यायने यः शक्तः स समर्थो वेदितव्यः, यथा-- राजपुरुष इत्ययं समसाः, एतदर्थं यद्वाक्यं राज्ञः पुरुष इति तस्य योऽर्थस्तदभिधाने राजपुरुष इत्ययं शब्दं शक्तः; ततोऽपि तदर्थस्य प्रतीतेः। स पुनरर्थः-- संसर्गः, भेदश्च;भेदसंसर्गौ वा।तत्र स्वविशेषस्य स्वामिविशेस्य स्वामिविशेषेण यः सम्बन्धः स `संसर्गः' आख्यायते। स्वान्तरस्य स्वाम्यन्तरेभ्यः, स्वाम्यतरस्य स्वातन्तरेभ्यश्च व्यावृत्तिः `भेदः' आख्यायते।

तत्र संसर्गवादिनो मते संसर्ग एव शब्दार्थः, व्यावृत्तिस्त्वर्थसंगृहीता। न ह्यव्यावर्त्त्यसंगृहीता। न ह्यव्यावर्त्त्यमानयोः स्वस्वामिनोः सम्बन्ध्यन्तरेभ्यः संसर्ग उपपद्यते। भेदवादिनस्तु व्यावृत्तिरव शब्दार्थः, संसर्गोऽर्थसङ्गृहीतः; न हि व्यावर्त्त्यमानस्य सम्बन्ध्यन्तरेणासम्बद्धस्य स्वाम्यादेरवस्थानमस्ति। उभयवादिनस्तु उभय एव शब्दार्थः। यदि विग्रहवाक्यार्थाभिधाने यः शक्तः स समर्थो विज्ञायेत, एवं सति समासतद्धितविषयमेव सामर्थ्यामिति पराङ्गवद्भावविभक्तिविधानयोरियं परिभाषा नोपतिष्ठेत; न हि तत्र विग्रहवाक्यार्थाभिधानमस्ति ? यदि नोपतिष्ठेत, न नाम; न च तदनुपस्थाने किञ्चिदनिष्टमापद्येत। तथा हि-- पराङ्गवद्भावे तावन्निमित्तग्रहणं देशयिष्यति भाष्यकारः। तत्र च निमित्तस्य निमित्तिना सामर्थ्यमस्त्येव-- मद्राणां राजन्, परशुना वृश्चन्निति। विभक्तिविधानेऽपि यास्तावत् कारकविभक्तयस्ता येष्वेव कारकेषु कर्मादिषु विधीयन्ते तेषां क्रियया सम्बन्धोऽस्त्येव। उपपदविभक्तिष्वपि `सहयुक्तेऽप्रधाने' (2.3.19) इत्येवमादिषु युक्तग्रहणादीनि सन्ति, तत्रापि सामर्थ्यमस्त्येव। तत्रैवं सम्बन्धे सति विभक्तय इष्यन्ते, न तु वििग्रहवाक्यार्थाभिधानलक्षणसामर्थ्ये। एवं तावन्मुख्यार्थवृत्तिः समर्थशब्दो दर्शितः।

इदानीमुपचरितवृत्तिं दर्शयितुमाह-- `अथ वा' इत्यादि। समर्थानि पदान्याश्रयो यस्य स समर्थपदाश्रायः; तद्भावः समर्थपदाश्रयत्वम्। ततो हेतोः समासादिः समर्थ उच्यते। आश्रयस्य समर्थत्वादुपचारेणाश्रितोऽपि तथेति व्यपदिश्यते; कारणधर्मस्य कार्य उपचारात्, यथा-- नड्वलोदकं पादरोगः। `समर्थानाम्' इत्यनेन वाक्ये व्यपदेशलक्षणं सामर्थ्यमाह। तथा हि `राज्ञः पुरुषः' इत्यत्र वाक्ये राजा पुरुषमपेक्षते -- ममायमिति, पुरुषोऽपि राजानमपेक्षते-- अहमस्येति। `संसृष्टार्थानाम्' इत्यनेन समासे पदानामेकार्थीभावनलक्षमं सामर्थ्यं दर्शयति। एकार्थीभावश्च पृथगवस्थितानां भिन्नार्थानां पदानां समासे साधारणार्थता नामावस्थाविशेषः। वाक्ये हि साधारणार्थता नास्ति; भिन्नार्थत्वात्। अत एव तत्र भेदनिबन्धना षष्ठ्युपजायते-- राज्ञः पुरुष इति। वृत्तौ तूभयपदव्यवच्छिनार्थाभिधानत् साधारणार्थता भवति। एतेनैतदुक्तं भवति-- समासे हि विशेषणं विशेष्यमनुप्रविशत्येकार्थी भवति विशेष्येण सरह, वाक्ये हि विशेषमं विशेष्यात् पृथगवतिष्ठत इति। यस्मिन्नसति, वाक्ये राज्ञो गौश्चाश्वश्च पुरुषश्चेति भेदनिबन्धनसमुच्चयप्रतिपादनाय चशपब्द प्रयुज्यते। समासे तु यस्मिन् सति स निवर्त्तते राज्ञो गवाश्वपुरुषा इत्ययमेकार्थीभावो वेदितव्यः। `पश्य देवदत्त कष्टम्, श्रितो विष्णुमित्रो गुरुकुलम्' इति। अत्र कष्टशब्दस्य पश्येत्यनेन सम्बन्धः; न तु श्रितशब्दन; तेन सामर्थ्याभावात्समासो न भवति। ननु च श्रितादीनां श्रुतत्वात्तैरेव द्वितीयां विशेषयिष्यामः-- श्रितादीनां सम्बन्धिनी या द्वितीयेति शक्यते व्यपदेष्टम् : असति तु तस्मिन्, द्वितीयामात्रं श्रितादिभिः समस्यत इति विज्ञायते। एवं सापेक्षस्यापि समासः स्यादेव-- महत् कष्टं श्रित इति, भवति ह्यत्र श्रितादिनिमित्ता द्वितीया। तस्मात् समर्थग्रहणं कर्त्तव्यम्। `किं त्वं करिष्यसि सङ्कुलया, खण्डो देवदत्त उपलेन' इति। अत्रोपलेन तृतीयान्तेन कृतं खण्डनम्। अतस्तत्कृतत्वमस्तीति प्राप्नोति समासः; समर्थग्रहमान्न भवति। समर्थग्रहणे तु सत्ययमर्थो भवति-- यस्यैव तृतीयान्तस्य समासस्तेनैव यदि कृतं खण्डनमिति। न चेह तत्कृतं खण्डनमतो न भवति समासः। एवमन्यत्राप्यसामर्थ्यादसमासो वेदितव्यः।

2.सुबामन्त्रिते पराङ्गवत्स्वरे। (2.1.2)

`परस्याङ्गवत्' इति। अत्राङ्गवशब्दोऽवयववचनः। पर्सयाङ्गवत् परैकदेशवद्भवति। तद्ग्रहणेन गृह्यत इत्यर्थः। एवं तादात्म्यातिदेशोऽयं विज्ञायत इत्याह-- `तादात्म्यातिदेशोऽयम्' इति। तादात्म्यम् = तत्सभावत्वम्। `सुबन्तम्' इत्यादिना तमेव तादात्म्यातिदेशं स्पष्टीकरोति।

`सुबन्तमामन्त्रितमनुप्रविशति' इति। तत्रान्तर्भवतीत्यर्थः। `कुण्डेनाटन्' इति। अत्र कुण्डशब्दोकार आमन्त्रितस्वरः। एवमन्यत्रापि ससुप्कस्यामन्त्रितस्य स्वरो वेदितव्यः।

`पीड्ये पीड्यमान' इति। हे पीड्यमान त्वदीयया पीडयाऽहं पीड्ये, बाध्येऽहमित्यर्थः। `पीड अवगाहने' (धा.पा.1544), चुरादिणिच्, उभयत्र कर्मण्यात्मनेपदम्, एकत्रोत्तमपुरुषैकवचनमिट्, अन्यत्र शानच्, सार्वधातुके यक्, णिलोपः, `तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुमनुदात्तमहन्विङोः' (6.1.186) इतीटोऽनुदात्तत्वम्, यकः प्रत्ययस्वरेणाद्युदात्तत्वम्, यकः प्रत्ययसर्वेणाद्युदात्तत्वम्, `एकादेश उदात्तेनोदात्तः' (र8.2.5) इत्येकार उदात्तः। पीड्यमानेत्यस्य तु `पीड्य' इत्यस्यात् पदादुत्तरस्य `आमन्त्रितस्य च' (8.1.19) इति निघातः। `गेहे गार्ग्यः' इति। गेहशब्द उञ्छादिपाठादन्तोदात्तः, सप्तम्येकादेशः पूर्ववदुदात्तः, गार्ग्य इति ञ्त्सरेणाद्युदात्तः। पृथक्स्वर एवात्र भवति। `देवदत्त कुण्डेनाटन्' इति। यदि परग्रहणं न क्रियते तदा देवदत्तशब्दं पूर्वमप्यामन्त्रितं प्रति सुबन्तस्यानुप्रवेशः स्यात्, ततश्च देवदत्तशब्दात् पदात्परस्याटन्नित्येतस्य `आमन्त्रितस्य च'(8.1.19) इति निघातः स्यात्। ननु च परग्रहणे क्रियमाणे कुण्डशब्दस्य पराङ्गवद्भावे सत्याद्युदात्तत्वे षाष्ठिके कृते देवदत्तशब्दात् पदात्परस्याटन्नित्येतस्य निघातेन भवितव्यमेव ? नैतदस्ति; अपादादौ हि स निघातः, पादादित्वञ्चेह विवक्षितम्; तत्र च देवदत्तेत्यामन्त्रितस्वरेणाद्युदात्तः। एवं कुणेडनाटन्नित्यपि। आमन्त्रितनिघातोऽत्र न भवति; पादादित्वात्। `यथा मृत्पिण्डीभूतः स्वरं लभेत' इति। कथं नाम सुबन्तसमुदायो मृत्पिण्ड इवैकीभूत एकरूपतामिवापन्नः स्वरं लभेततेत्यवमर्थमङ्गग्रहणम्।

किमर्थं पुनरेकीभूतस्य स्वरप्राप्तये यत्नः क्रियत इत्यत आह-- `उभयोः' इत्यादि। यद्यङ्गग्रहणं न क्रियेत, ततश्च कार्यातिदेश- शास्त्रातिदेश- व्यपदेशातिदेशानामन्यतमः स्यात्। तथा च सति यथा परस्य कार्यमाद्युदात्तत्वमामन्त्रितव्यदेश आद्युदात्तशास्त्रं च; तथा सुबन्तस्य पूर्वस्यापि स्यादिति,ततश्चोभयोरप्याद्युदात्तत्वं स्यात्। अङ्गग्रहणे तु सति तादात्म्यातिदेशोऽयं भवति। तेन मृत्पिण्डीभूतः सुबन्तसमुदाय आमन्त्रिताद्युदात्तरूपं स्वरं लभत इति न भवत्युभयोराद्युदात्तत्वप्रसङ्गः। `स्वाश्रयमपि कार्यं यथा स्यात्' (इति)। `आम कुण्डेनाटन्' इत्यत्र अटन्नित्येतस्य पदात्परस्य `आमन्त्रितस्य' (8..19) इति निघाते प्राप्ते `न लुट्' (8.1.29) इत्यतो नेत्यनुवर्त्तमाने `आम एकान्तरताया अभावात्। परमेव हि स्यात् सुबन्तमसतिवत्करणे, न च तथाभूतेनैकान्तरता युक्ता। वत्करणे तु सति, भवति कदाचित् स्वाश्रयमप्यनङ्गत्वमित्युपपद्यत एकान्तरता, तेन निघातप्रतिषेधः सिध्यति। तत्रायं स्वरविभागः-- आमित्यस्य निपातस्वरेणाद्युदात्तत्वम्। कुण्डशब्दस्यापि पराङ्गवद्भावे सत्यामन्त्रितस्वरेणाद्युदात्तत्वम्। तथा निघातप्रतिषेधे सत्यटन्नित्येतस्यापि षाष्ठिकेनाद्युदात्तेन भवितव्यम्। `कूपे सिञ्चन्' इति। अत्र पराङ्गवद्भावो नास्तीति पदादित्वं सकारस्य भवति। तेन `सात्पदाद्योः' (8.3.109) इति षत्वप्रतिषेधः स्यात्। `चर्म नमन्' इति। अत्रापि पराङ्गवद्भावाभावात् समानपदस्थौ निमित्तनिमित्तिनौ न भवत इति समानपदाश्रयं णत्वं न भवति।

`सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्य' इत्यादि। किं पुनः कारणं समानाधिकरणस्य न प्राप्नोति, यत इदमुपसंख्यानं क्रियत इत्याह-- `अनन्तरत्वात्' इति। `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इत्यत्र निर्दिष्टग्रहणस्यानन्तर्यार्थत्वात् व्यवहिते न प्राप्नोतित्तयुपसंख्यायते। `तीक्ष्णया सूच्या सीव्यन्' इत्यत्र सीव्यन्नित्येतस्मिन् परतस्तीक्ष्णयेत्यस्य व्यवहितस्यापि पराङ्गवादाद्युदात्तत्वं भवति। `उच्चैरधीयान' इति। उच्चैः शब्दस्य पराङ्गवद्भावाभावादामन्त्रितनिबन्धनमाद्युदात्तत्वं न भवति। तस्मिन्नसति तत्रान्तोदात्तत्वमेव भवति; स्वरादिष्वनन्तोदात्तस्य पाठात्। तथा हि तत्रैव सन्नतर-- उच्चैस्- नीचैरित्येवमादीनि पृथक्पर्यन्तान्युपदिश्य `एते सन्नतरप्रभृतयोऽन्तोदात्ताः पठ्यन्ते' (1.1.37) इत्युक्तम्। अधीयानेत्यस्य यदा पादादित्वं विवक्ष्यतेतदाऽऽद्युदात्तत्वम्, अन्यत्र `आमन्त्रितस्य च' (8.1.19) इति निघातः।।

3. प्राक्कडारात्समासः। (2.1.3)

`यथावृद्धम्' इति। अत्र समाससंज्ञायां सत्याम् `कृत्तद्धितसमासाश्च ' (1.2.46) इत्येवमादि कार्यं भवति। अथ किमर्थं प्राग्वचनम् ? यावता पञ्चमीनिर्देशादेव प्रागित्यस्याध्याहारो भविष्यति; न च परागित्ययमपि दिक्छब्दोऽस्ति, अतस्तस्याप्यध्याहारः स्यादित्यशङ्कनीयम्, तदध्याहारे कडारसंशब्दनात् परे येऽनुक्रंस्यन्ते तेषां समाससंज्ञा स्यात्; तथा च कडारसंशब्दनादनन्तरमेव समासाधिकारं कुर्यात्, इह तु कृतः, तस्मादिह करणसामर्थ्यात् समासाधिकारस्य प्रागित्यस्याध्याहारो भविष्यति, ततो नार्थः प्राग्वचनेनेत्याह-- ` प्राग्वचनम्' इत्यादि। उत्तरत्राव्ययीभावादिसंज्ञाभिः सह समाससंज्ञायाः समावेशो यथा स्यादित्येवमर्थ प्राग्वचमनम्। असति तु तस्मिन्, ताभिरनवकाशाभिरियं संज्ञाल बाध्येत। अस्यास्तु समाससंज्ञायाः `सह सुपा' (2.1.4) इत्यत्र सहेति योगविभागेन यः समासः क्रिते सोऽवकाशः स्यात्-- अनुप्रावर्षत्, अनुव्यचलदिति, तिङन्तेनात्र समासः; असत्यपि सावकाशत्व एकसंज्ञाधिकारे वचनप्रमाण्यात् पर्यायेण वृत्तिः स्यात्, न तु समावेशः। साक्षात् सूत्रेणोपात्ते तु प्राग्वचने सति भवति समावेशः, कथम्? एवं हि सम्बन्धः क्रियते-- कडारात् प्राग्यावन्तो व्यवस्थितः सर्वे ते समाससंज्ञका भवन्ति, समाससंज्ञकाः सन्तोऽव्ययीभावादिसंज्ञां लभन्त इत। तेन निमित्तमेव समाससंज्ञाऽव्ययीभावादिसंज्ञानाम्। नच निमित्तिना निमित्तं विहन्यते; अन्यथा तस्य निमित्तत्वमेव न स्यादिति युक्तः सूत्रोपात्तेन प्राग्वचनेन समावेशः। अध्याहृते तु तस्मिन् `कडारसंशब्दनात्प्राग्यावन्तो व्यवस्थिताः सर्वे ते समाससंज्ञका भवन्ति' इत्येषोऽर्थो लभ्यते, न तु `समाससंज्ञकाः सन्तोऽव्ययीभावादिसंज्ञकाः' इत्येषोऽपि। साक्षात् सूत्रोपात्ते तु तस्मिन्नेषोऽपि लभ्यते; अन्यथा तस्य सूत्रे साक्षादुपादानमनर्थकं स्यात्।।

4. सह सुपा। (2.1.4)

`सहग्रहणं योगविभागार्थम्' इति; ननु चासति तस्मिन्नेकैकस्य संज्ञा स्यात्, ततश्च ऋक्पाद इत्यत्र `ऋक्पूरब्धूः पथामानक्षे' (5.4.74) इत्यत्राकारः समासान्तः स्यात्; इह च `राजाश्वः' इत्यत्र `समासस्य' (6.1.223) इति द्वौ स्वरौ स्याताम्, सहभूतयोरेव समाससंज्ञा यथा स्यादेकैकस्य मा भूदित्येवमर्थ सहग्रहणं कस्मान्न विज्ञायते ? एवं मन्यते-- सुपेति तृतीयैव सहार्थ गमयति, यथा `वृद्धो यूना' (1.2.65) इति। समासट इति च महती संज्ञा क्रियते-- अन्वर्थसंज्ञा यथा विज्ञायेतेति। कथं नामान्वर्थसंज्ञा क्रियते ? समसनम् = समासः, संक्षेप इत्यर्थः। संक्षेपश्चानेकवस्तुविषयः। तेनासत्यपि सहेतस्मिन् सहभूतयोरेव समाससंज्ञा भविष्यति। `न प्रत्येकम्' इति। `अनुव्यचलत्' इति। तिङन्तेनात्र समासः। अत्र `तिङङतिङः' (8.1.28) इति निघाते कृते समाससंज्ञायां सत्यां तन्निबन्धनमन्तोदात्तत्वं भवति।।

5. अव्ययीभावः। (2.1.5)

`यथावृद्धम्' इत्यत्राव्ययीभावत्वे सति `अव्ययीभावश्च' (2.4.18) इति नपुंसकत्वे `नाव्ययीभावादतोऽम्त्वपञ्चम्याः' (2.4.83) इत्येष विधिर्भवति। `अन्वर्थसंज्ञा चेयम्' इति। अनव्ययमव्ययं भवतीत्यव्ययीभावः। `पूर्वपदार्थप्राधान्यम्' इत्यादिना अन्वर्थसंज्ञायाः फलमाह। प्रायेण ह्यव्ययीभावे पूर्वपदमव्ययम्, परपदमन्यव्ययम्; समुदायो नाव्ययम्। स यदि पूर्वपदवशेन तस्य पूर्वपदस्य यो धर्मोऽव्ययत्वं तत्प्रतिपद्यते ततोऽनव्ययस्वभावः सन्नव्ययस्वभावो भवति। एवञ्च पूर्वपदवशेन तद्धर्मं प्रतिपद्यते यदि पूर्वपदं प्रधानं भवति, नान्यथा। प्रधानवशेन हि वस्तुनः स्वधर्मपरित्यागेन धर्मान्तरापत्तिर्युक्ता। तदेवमन्वर्थसंज्ञेयं

भवन्ती पूर्वपदार्थप्राधान्यमव्ययीभावस्य दर्शयति। तेन यदा पूर्वपदार्थस्य प्राधान्यं भवति तदाव्ययीभावो भवति, नान्यथेत्युक्तं भवति।।

6.अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु। (2.1.4)
`स्त्रीष्वधिकृत्य कथा प्रवर्त्ततेऽधिस्त्रि' इति। `अनभिहिते' (2.3.1) इति सूत्रे `तिङकृत्तद्धितसमासैः परिसंख्यानम्' (म.भा.1.441) इति परिगणनं कृतम्, तेनाधिशब्देन द्योतिते सप्तम्यर्थे स्त्रीशब्दात् सप्तमी भवति। तेन तदन्त एव समस्यते। अधिशब्दस्तु प्रथमान्तः। `अव्ययीभावश्च' (2.4.18) इति नपुंसकत्वम्। `ह्रस्वो नपुंसके' (1.2.47) इति ह्रस्वः। विभक्तिशब्देनेह कारकमुच्यते-- विभज्यते प्रातिपदिकार्थोऽनयेति कृत्वा। तच्चेहाधिकरणं विवक्षितमित्याह-- `सप्तम्यर्थे यदव्ययम्' इति।
`उपकुम्भम्' इति। समीपार्थेनोपशब्देनोपजनिते व्यतिरेके कुम्भशब्दात् षष्ठी भवतीति षष्ठ्यन्तं एव समस्यते।
`समुद्रम्' इति। यदा मद्रैर्विशिष्यमाणत्वात् समृद्धेः प्राधान्यं भवति तदायं समासः। मद्राणामाधिक्येन ऋद्धिर्वर्त्तत इत्यर्थः। यदा तु मद्राः समृद्ध्या विशिष्यमाणाः प्रधानभावमनुभवन्ति तदा `कुगतिप्रादयः' (2.2.18) इत तत्पुरुषो भवति-- सुमद्रा इति। समृद्धिमन्तो मद्रा इत्यर्थः।
`दुर्गवदिकम्' इति। गवादिकानामृद्धिविगमो वर्त्तत इत्यर्थः। ननु चार्थाभाव इत्यनेनैव तत्सिद्धम्, तथा ह्यर्थाभावो वस्त्वभावो भवत्येव, तत्कोऽत्र विशेषो येनार्थाभावात् ऋद्धिविगमस्य पृथगभिधानं क्रियते ? अयमस्ति विशेषः; उत्तरपदार्थाभावो हि द्रव्याभावः, यथा-- निर्मक्षिकमिति, मक्षिकाणामभाव उच्यते; न तु दुर्गवदिकमित्यत्र गवादिकानामभावः, किं तर्हि ? तदीयाया ऋद्धेर्विगमः।
`अर्थाभावः' इति। अर्थार्थग्रहणं किमर्थम् ? धर्माभावे प्रसज्यप्रतिषेधो मा भूत्, यथा-- न भवति ब्राह्मणोऽब्राह्मण इति। ब्राह्मणत्वं धर्मोऽत्र प्रतिषिध्यते, न तु वस्त्वभावः। किञ्च-- इतरेतराभावेच मा भूत्, गौरश्वो न भवतीति। अत्राप्यर्थान्तरत्वं प्रतिध्यते, न तु वस्त्वभावः।
`अत्ययोऽभूतत्वम् इति। अस्यैव प्रयायोऽतिक्रमः। अतिक्रमः इत्युत्पत्त्यभावः, प्रध्वंसाभाव इत्यर्थः। अर्थाभावस्तु क्वचिद्देशे सर्वदैव वस्तुनोऽभावः, न तूत्पन्नस्य पश्चादभाव इत्यत्ययोऽर्थाभावाद्भिद्यते।
`उपभोगस्य' इत्यादिनाऽर्थाभावाद्भेदं दर्शयति। अर्थाभावो हि क्वचिद्देशे कालत्रयेप्यभावः, असम्प्रति पुनरुपभोगस्य यो वर्त्तमानः कालस्तस्यैव प्रतिषेध इति भिद्यते; असम्प्रत्यर्थाभावात्। `अतितैसृकम्' इति। तिसृका नाम ग्रामः `तत्र भवः' (4.3.53) `तत आगतः' (4.3.74) इति वाऽण्, तैसृकम्, न तैसृकस्य वर्त्तमानः काल उपभोगस्येत्यर्थेऽतितैसृकमिति भवति।
`अनुरूपम्' इत्यत्र योग्यतायामनुशब्दः। योग्यं रूपं वहतीत्यर्थः। `प्रत्यर्थम्' इति। प्रतिशब्दोऽव्ययमत्र वीप्सायाम्, अर्थमर्थ प्रति प्रत्यर्थम्। ननु चात्र नित्यसमासत्वात् वाक्येन न भवितव्यम् ? नैतदस्ति; प्रतिशब्दस्य वीप्सायामर्थे कर्मप्रवचनीयसंज्ञा विहिता, तद्योगे द्वितीया यथा स्यादित्येवर्थम्। तस्याश्च वाक्य एव प्रयोगो नान्यत्रेति तेन सत्यपि नित्यसमासत्वे वाक्यमपि भवति। `यथाशक्ति' इति। पदार्थानतिवृत्तौ यथाशब्दः। पदमत्र शक्तशब्दस्तस्यार्थः शक्तरेव; तस्या अनतिवृत्तिरनतिक्रमः। यथाशक्ति करोतीति शक्यनतिक्रमेण करोतीत्यर्थः। `ज्येष्ठानुपूर्व्येण' इति। ज्ेयष्ठानुक्रमेणेत्यर्थः।
`सचक्रम्' इति। `अव्ययीभावे चाकाले' (6.3.81) इति सहशब्दस्य सभावः। एवं `सकिखि' इत्यादावपि सभावो वदितव्यः।
`गुणभूतेऽपि' इत्यादि। यदि सादृश्य इति नोच्येत तदा पूर्वपदार्थप्रधानोऽव्ययीभाव इति यदा सादृश्यं विशेष्यत्वात् प्रधानं भवति तदैव स्यात्, सादृश्यं किख्याः सकिखीति गुणभूते तु न स्यात्, अस्माद्वचनाद्भवति। `सदृशः किख्या' इति। सादृश्यवतः प्राधान्यप्रदर्शनेन सादृश्यस्य गुणभावं प्रदर्शयितुं सदृशः किख्या इत्युक्तम्। सादृश्यप्राधान्ये विवक्षिते हि सादृश्यमिति भावप्रत्ययेन युक्तो निर्देशः स्यात्। `सकिखि' इति। पूर्ववद् ह्रस्वः।
ननु च सम्पत्तिः समृद्धिरेव, तत्कथं पृथगुच्यत इत्यत आह-- `सम्पत्तिरनुरूपम्' इत्यादि। `सब्रह्मवाभ्रवाणाम्' इति। तेषामनुरूप आत्मभाव इत्यर्थः।
`अधिकार्थवचनेन ' इति। तृणानामभ्यवहारोऽधिकार्यस्तद्वचनेन। न किञ्चिदित्यादिना वाक्येनाधिकार्थतां दर्शयति। यो हि तृणान्यभ्यवहरति स कथमन्यदभ्यवहार्य्यं परित्यज्यति !
ननु चान्तशब्दः परिसमाप्तौ वर्त्तते, तत्र च साकल्यमस्त्येव तत्कथमन्तवचनं साकल्यात्पृथगुच्यत इत्यत आह-- `{अन्तः-- काशिका} अन्तशब्दः'इत्यादि। यावतोऽध्ययनस्य परिग्रहः-- एतावन्मयाऽध्येतव्यमिति-- तदपेक्षया या समाप्तिः सोऽन्तः, स चासाकल्येऽप्यध्ययनस्य भवतीति साकल्यात् पृथगुच्यते।
`साग्न्यधीते' इति। अग्निपर्यन्तमधीत इत्यर्थः। अग्नर्थो ग्रन्थस्तादर्थ्यादग्निशब्देनोच्यते। यावतोऽध्ययनस्य परिग्रहस्तस्याग्निरन्तः; न तु ततः परेणाध्ययनमेव नास्तीति। तत्तु नाधीयत इत्यसाकल्यमत्रेत्याह-- `इयम्' इत्यादि। सुबोधम्।।

7. यथाऽसादृश्ये। (2.1.7)
`ये य वृद्धाः' इत्यनेन `यथावृद्धम्' इत्यत्र यथाशब्दो वीप्सायां वर्त्तत इत्याचष्टे। `यथा देवदत्तस्तथा यज्ञदत्तः' इति। देवदत्तसदृशो यज्ञदत्त इत्यर्थः। ननु च यथाशब्दोऽयमुपमानं `यज्ञदत्त' इत्युपमेयमपेक्षते। तत्र `सापेक्षमसमर्थं भवति' इत्यसामर्थ्यादेव समासो न भविष्यति, तत्किमर्थमसादृश्य इति प्रतिषेधेन ? नैतदस्ति; न ह्यत्र यथाशब्द उपमानम्, किं तर्हि ? `यथा देवदत्तः' इत्येष समुदायः। तस्मात् तस्यैवोपमेयापेक्षयाऽसामर्थ्यम्, न तु यथाशब्दस्य।।

8. यावदवधारणे। (2.1.8)

`इयत्तापरिच्छेदः'इति। इयतो भाव इयत्ता = परिमाणम्, तस्याः परिच्छेदो निश्चयः। `यावन्ति पात्राणि' इत्यादिना तमेवेयत्तापरिच्छेदं विस्पष्टीकरोति। `नावधारयामि' इत्यादिना इयत्तापरिच्छेदाभावं दर्शयति।।

9. सुप्प्रतिना मात्रार्थे। (2.1.9)

`वृक्षं प्रति' इत्यत्र लक्षणे प्रतिशब्दो वर्त्तते, न मात्रार्थे। ननु परं सुब्ग्रहणं कमर्थम् ? यावता `सुबामन्त्रिते' (2.1.2) इत्यतः सुब्ग्रहणमतुवर्तिष्यत इत्यत आह-- `सुब्ग्रहणम्' इत्यादि। सुब्ग्रहणं पूर्वं ह्यव्ययेन सम्बद्धम्; अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्। तस्मादव्ययनिवृत्त्यर्थमिदमन्यत सुब्ग्रहणं क्रियते।।

10. अक्षशलाकासंख्याः परिणा। (2.1.10)

`कितव्यवहारे' इत्यादि। कथं पुनः कितवव्यवहार इष्यमाणेऽपि तत्र लभ्यते ? स्वभावत एव; समासस्य तत्र वृत्तेः।न ह्यर्था अतिदिश्यन्ते, लौकिकत्वात् तेषाम्। `तस्य' इत्यादि। तस्य पातयितुस्तस्य च विपात इत्यनेन सम्बन्धः। विपातः = पराजयः। `एतस्य' इति। अक्षादेरेव प्रत्यवमर्शः। अभेदविवक्षायामेकवचनम्। एतस्यानयथा पात इत्यनेन सम्बन्धः। `अन्यथा' इति। जये य उक्तः पातप्रकारस्तदपेक्षयाऽन्यथात्वं विवक्षितम्। `पञ्चसु त्वेकरूपासु जय एव भवति' इति। पञ्चपरीति समसो न भवतीति भावः। जये हि यदक्षादीनां वृत्तं तदपेक्षयान्यपातत्वे सति समासेन भवितव्यम्। न च पञ्चस्वेकरूपास्वन्यथात्वं सम्भवति। अत एव जयस्तदा भवति यदा पञ्चाप्येकरूपा भवन्ति-- उत्ताना अवाञ्चो वा। एतेन प्रकारेण `परेण चतुष्परि' इत्यत्रोपपत्तिर्दर्शिता। `परेण' इति। अतिशयेनेत्यर्थः।

`अक्षादयस्तृतीयान्ताः' इत्यादि। अन्यथा वृत्तावयं समास इष्यते। तत्र चाक्षादिनामन्यथावृत्तौ कर्त्तृत्वं करणत्वं वा भवति, अतस्तृतीयया भवितव्यमिति तदन्ता एव समस्यन्ते । `पूर्वोक्तस्य' इति। अक्षादेरित्यर्थः। कुत एतत् ? अक्षादयस्तृतीयान्ता इति पूर्वमक्षादेरेवोक्तत्वात्। अभेदविवक्षायामेकवचनम्। षष्ठी चेयं शेषविवक्षायां वृत्तशब्दापेक्षया सम्बन्धलक्षणा, वृत्तशब्दस्त्वध्याहर्तव्यः। `यथा न तत्' इति। अक्षादेः पूर्वोक्तस्य यथा वृत्तमभूत् पूर्वं जये तथा वृत्तं यदि सम्प्रति न भवत्येवं समासो भवति , नान्यथा। पूर्ववृत्तस्यान्यथात्वद्योतने समासोऽयम्, तच्चैकेनापि क्रियते, ततो द्विवचनाद्यपेक्षया निष्प्रयोजनमित्याह-- `एकत्वेऽक्षशलाकयोः' इति। अक्षशलाकयोरेकवचनान्तयोरित्यर्थः। ततोऽयं न्यायसिद्ध एवार्थः श्लोकेन संगृहीतः।

अथ वा-- उत्तरं विभाषाग्रहणमिहापि सिंहावलोकितन्यायेन सम्बध्यते। सा च व्यवस्थिविभाषा। तेन वचनसिद्ध एवायमर्थो वेदितव्यः। अक्षादय इति किम् ? पाशकेनेदं न तथावृत्तं यथा पूर्वं जये। परिणेति किम् ? सुबन्तमात्रेण सह समासो मा भूत्। कितवव्यवहार इति किम् ? अक्षाभ्यामक्षैर्वा न तथा वृत्तं यता पूर्वं जये।।

11.विभाषा। (2.1.11)

12. अपपरिबहिरञ्चवः पञ्चम्या। (2.1.12)

`ननु बहिः शब्दयोगे न केनचित्पञ्चमी विधीयते, तत्कथं तदन्तेन समास इत्याह-- `बहिः शब्दयोगे' इत्यादि। यदेतत् पञ्चम्यन्तेन सह बहिः शब्दस्य समासविधानम्, तज्ज्ञापयति- भवति हि बहिः शब्दयोगे पञ्चमीति। अथोपादानसामर्थ्यात् बहिः शब्दयोगे पञ्चमी न सम्भवतीत्यपञ्चम्यन्तेनैव सुबन्तमात्रेण समास इत्येवं कस्मान्न विज्ञायते ? अशक्यमेतद्विज्ञातुम्; पञ्चमीग्रहणस्य वैयर्थ्यप्रसङ्गात्। तथा हि `अपपरि वर्जने' (1.4.88) इत्येवमपपर्योः कर्मप्रवचनीयसंज्ञायां सत्यां ताभ्यां योगे `पञ्चम्यपाङपरिभिः' (2.310) इति पञ्चम्यैव भवितव्यम्; नान्यथा विभक्त्या। `अञ्चुशब्देनापि योगे' `अन्यारात्' (2.3.29) इत्यादिना पञ्चम्यैव भवितव्यमित्यपार्थकं पञ्चमीग्रहणं स्यात्. ननु चाकर्मप्रवचनीयौ यावपरी तयोरपञ्चम्यन्तेन समासो मा भूदित्येवमर्थं पञ्चमीग्रहणं स्यात्-- परिगतः, अपगत इति ? नैतदस्ति; परत्वाद्धि तयोः `कुगतिप्रादयः' (र2.2.18) इतितत्पुरुषे भवितव्यम्। ननु च नाप्राप्ते ह्येतस्मिन्नयमारभ्यमाणो बाधको भवति ? नैतदस्ति; कर्मप्रवचनीयो यावपपरी तत्रावकाशः स्यात्। तत्र हि कर्मप्रवचनीयानां प्रतिषेधं वक्ष्यतति। तस्माद्बहिः शब्दस्य पञ्चम्यन्तेनैव समसाविधानम्, नान्येन; अन्यथा पञ्चमीग्रहणमनर्थकं स्यात्। तस्मात्साधूक्तम्-- `बहिःशब्दयोगे पञ्चमीभावस्यैतदेव ज्ञापकम्' इति।।

13. आङ् मर्यादाभिविध्योः। (2.1.13)

अथ मर्यादाभिविधिग्रहणं किमर्थम् ? यावता पञ्चमीत्यनुवर्त्तते, आङा च कर्मप्रवचनीयेनैव योगे पञ्चमी विधीयते-- एतयोरेवार्थयोः `आङ मर्यादावचने' (1.4.89) इत्याङः कर्मप्रवचनीयसंज्ञा4, नान्यत्र; तत्रान्तरेणापि मर्यादाविधिग्रहणं तयोरेवार्थयो समासो भविष्यति, नान्यत्रेति ? सत्यमेतत्; तथापि मन्दधियां सुखावबोधनार्थं मर्यादाभिविधिग्रहणम्।।

14. लक्षणेनाभिप्रती आभिमुख्ये। (2.1.14)

`अभ्यग्नि, प्रत्यग्नि' इति। `अग्निमभि, अग्निं प्रति' इति विग्रहः। `कर्मप्रवचनीययुक्ते द्वितीया' (2.3.8) कर्मप्रवचनीयसंज्ञा त्वेकस्य `अभिरभागे' (1.4.91) इत्यनेन। अपरस्य `लक्षणेत्यम्भूताख्यान' (1.4.90) इत्यादिना। अत्र चाग्निर्लक्ष

णम्, तेन शलभपातो लक्ष्यते। अत्राभिमुख्ये चाभिप्रती वर्त्तेते; तथा ह्यग्न्यभिमुखमेव शलभाः पतन्ति, नापि पार्श्वतः, नापि पृष्ठत इत्यर्थोऽवगम्यते। `स्रुघ्नं प्रतिगतः' इति। स्रुघ्नान्मथुरां प्रस्थितो दिङ्मोहात् स्रुघ्नमेव प्रतिनिवृत्त इति नात्र स्रुघ्नो लक्षणम्। यदुद्दिश्य हि गच्छति तल्लक्षणं भवति। यदा तु दिङ्मोहाद्यत एव प्रस्थितस्तमेव प्रतिगच्छतितदा तदप्रतीतं कथं लक्षणं भवति-- `स्रुघ्नमिति ! `तथायुक्तञ्चानीप्सितम्' (1.4.50) इति कर्मसंज्ञायां सत्यां कर्मणि द्वितीया। `येनाग्निस्तेन गतः' इति। भवत्यत्राग्निर्लक्षणमाभिमुखअयमप्यस्ति, अभिप्रती तु न स्त इति तेन येनतेनशभ्दाभ्यां सह समासो न भवति। `अभ्यङ्का गावः, प्रत्यङ्का गावः' इति। अभिनवः प्रतिनवोऽङ्क आसामिति बहुव्रीहिः। अभिशब्दोऽत्राभिनवार्थे वर्त्तते, प्रतिशब्दश्च प्रतिनवार्थे। अङ्कोऽत्र भवति गवां लक्षणम्, आभिमुख्यन्तु नास्ति। ननु चात्र परत्वाद्बहुव्रीहिणा भवितव्यम्, अतः स बाधको भविष्यति, किमाभिमुख्यग्रहणेन ? नैवम्; असत्याभिमुख्यग्रहणेऽशेषत्वात् कुतो बहुव्रीहिर्भवति ! अथ वैतज्ज्ञापयति-- बहुव्रीहिरव्ययीभावेन बाध्यत इति। तेन द्वौ मुनी व्याकरणमिसि सिद्धं भवति; अन्यथा हि स्वपदार्थे चरितार्थोऽव्ययीभावो द्विमुनि व्याकरणमित्यत्रान्यपदार्थे परत्वाद्बहुव्रीहिणा बाध्येत।।

15. अनुर्यत्समया। (1.4.15)

यस्य समया यत्समयेति षष्ठीसमासोऽयम्। ननु च समयाशब्दयोगे `अभितः परितः समयानिकषा' (वा. 119) इत्यादग्युपसंख्यानाद्द्वितीयया भवितव्यम्, अतः षष्ठ्येव तावन्न न सम्भवति, कुतः पुनस्तस्याः समासः ? अथापि कथञ्चित् षष्ठी स्यात्, तथापि समयाशब्दस्याव्ययत्वत् `पूरणगुण' (2.2.11) इत्यादिना षष्ठीसमासप्रतिषेधेन भवितव्यम् ? नैष दोषः; योगग्रहणादिह समयाशब्दार्थेन योगे द्वितीया विज्ञायते। स चार्थो मुख्य एव गृह्यते, न गौणः। स पुनर्मुख्योऽर्थः समीपम्। न चेह समयाशब्दस्य मुख्योऽर्थोऽस्ति, किं तर्हि ? गौणोऽर्थः। अनुरेव समयाशब्देनोच्यते, तस्माच्छेषलक्षणा षष्ठ्येव न्याय्या। अत एव द्रव्यवाचित्वादव्ययसंज्ञाया अभावात् `पूरणगुण' (2.2.11) इति प्रतिषेधो नोपपद्यते। `अनुर्यत्समया' इति। एतेनानुशब्दार्थे समयाशब्दो वर्त्तत इति दर्शयति। ननु च समयाशब्दस्य समीपमर्थः, तत्कथमनुशब्दः समयाशब्देनोच्येत इत्याह-- `यस्य समीपवाची'इति। एतेन समयाशब्दार्थाभिधायित्वादनुशब्दः समयाशब्देनोपचाराद्व्यपदिष्ट इत्याचष्टे। भवत्युपचारेण हि तदर्थाभिधायिनि तद्व्यपदेशः, यथा-- सीताहरणं काव्यमिति। तेनेत्यनेन यस्यानुशब्दः समयवाची स परामृश्यते। ननु च सोऽर्थः, तत्कुतस्तेन समासः ? अर्थे कार्यासम्भवात् तद्वाचिनि शब्दे कार्यं विज्ञायते, तथा च तेनेत्यस्य तद्वाचिना शब्देनेत्ययमर्थोऽत्र गम्यते। `अनुवनम्' इति। तेनेत्यनेन यत् षष्ठ्यन्तं तेन वनशब्देन समासः। वनस्यान्विति समीपसमीपिसम्बन्धे षष्ठ्येव युक्ता। `वनं समया' इति; पूर्वोक्तेनोपसंख्यानेन वनशब्दाद्द्वितीया। `वृक्षमनु विद्योतते विद्युत्' इति। अत्र कर्प्रवचनीयलक्षणा द्वितीया। अनुशब्दोऽत्र लक्षणे वर्त्तते, न सामीप्ये।।

16. यस्य चायामः। (2.1.16)

अत्राप्युपचारेणायामवाचित्वादनुरेवायामशब्दनोक्तः। `अनुगङ्गं वाराणसी' इति. यद्यपि गङ्गावाराणस्यावुभे अप्यायमवत्यौ, तथाप्यायामवत्तया गङ्गायाः प्रसिद्धत्वाद् गङ्गैवात्र लक्षणम्, न वाराणसी। प्रसिद्धं हि लक्षणं भवति, नाप्रसिद्धम्। तस्माद्ग्ङ्गयैवात्र समासो भवति, न वाराणस्या। `यमुनायामेन गथुरायामः लक्ष्यते' इति। यमुनया तद्वत्या लक्षणभूतयेति वेदितव्यम्। यस्माद्यस्यायामवाच्यनुशब्दस्तेन लक्षणभूतेन सुबन्तेन समस्यते। युमनायाश्चायामवाच्यनुशब्दः, न यमुनायामस्य। न ह्यायामस्यापर आयामोऽस्ति, तस्माद्यमुनायामेति हेतावियं तृतीया। यमुनायामेन हेतुना तद्वत्या यमुनया लक्षणयभूतया करणभावमापन्नया वा मथुरायामो लक्ष्यत इत्ययमर्थो वेदितव्यः।।

17. तिष्ठद्गुप्रभृतीनि च।(2.1.17)

तिष्ठद्गुप्रभृतीनां गणपाठादेव कृतसाधुत्वानामिह प्रकरणे सङ्कीर्तनमव्ययीभावसंज्ञार्थम्; न तु सुबन्तेन समासार्थम्। अत एवाह-- `समुदाया एव निपात्यन्ते' इति। तथाभूतानां पाठ एवैषां निपातनम्। `अव्ययीभावसंज्ञकानि भवन्ति' इति। अनेन संज्ञामातर्ं विधीयते, न त्वेषां सुबन्तेन समास इति दर्शयति। `तिष्ठद्गु, बहद्गु'इति। पूर्वपदस्य शत्रादेशो निपात्यते। `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति ह्रस्वः। तिष्ठन्ति गावो यस्मिन्न काले स तिष्ठद्गु कालः। वहन्ति गावो यस्मिन् काले स बहद्गु कालः। `चकारोऽवधारणार्थः' असति तस्मिन् परमतिष्ठद्ग्विति `सन्महत्' (2.1.61) इत्यादिना परमशब्देन समासः स्यात्। अवधारणार्थे तु तस्मिन् तिष्ठद्गुप्रभृतीनीत्येवम्भूतान्येवावतिष्ठते। `आयतीगवम्' इति। पुंवद्भावाभावः समासान्तश्च भवति। आयत्यो गवो यस्मिन् काले स आयतीगवम्। `खलेयवम्; खलेबुसम्' इति। सप्तम्या अलग् निपात्यते। `लूयमानयवम्' इति। शानज् निपात्यते। तथा `पूयमानयवम्' इत्यत्रापि। `एते कालशब्दाः' इति। तिष्ठद्गुप्रभृतयः संस्क्रियमाणबुसपर्यन्ताः।

`समभूमि, समपदाति' इति। समत्वं भूमेः, समत्वं पदातेरिति पूर्वपदार्थप्राधान्येऽव्ययीभावः। उत्तरपदार्थप्राधान्यविवक्षायान्तु समपदातिः समभूमिरिति विशेषणसमासस्तत्पुरुषो भवति। अन्ये मकारान्तं समशब्दं पठन्ति-- समम्भूमि, समम्पदाति' इति। ` सुषमम्, विषमम्, दुःषमम्,अपरसमम्' इति। समशब्देनेति। सुषमादयश्चैते। सुषमादयश्चैते पूर्वपदार्थप्राधान्ये समासाः। अत्र शोभनत्वं समस्येत्येवमादि वाक्यं द्रष्टव्यम्। उत्तरपदार्थप्राधान्ये तु प्रादिसमासो विशेषणसमासश्च यथथायोगं कर्त्तव्यः। `आयतीसमम्' इति। समाशब्दः संवत्सरवाची, तेन समासः- आयती समं आयतीसमम्। एवं पापा समा पापसमम्। पुण्या समा पुष्यसमम्। अन्ये तु तृतीयासमासं वर्णयन्ति-- आयत्या समं आयतीसममिति; एवमन्यत्रापि। प्रगतत्वमह्नः प्राह्णम्। अयमपि पूर्वपदार्थप्रधानः। उत्तरपदार्थप्राधान्ये तु तत्पुरुष एव भवति-- प्राह्णे कल्याणनामानावेतौ तिष्यपुनर्वसू इति। एवं `प्ररथम्' `प्रदक्षिणम्' `प्रमृगम्' ,

`अपरदक्षिणम्' , `सम्प्रति', `असम्प्रति'। `इच् कर्मव्यतीहारे' (5.4.127) इतीचोऽव्ययीभावत्वे प्रयोजनमव्ययसंज्ञा, नपुंसकत्वञ्च। दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं वृत्तिमितिि। `तत्र तेनेदमिति सरूपे'(2.2.क27) इति समासः, `इच् कर्मव्यतीहारे' (5.4.127) इतीच् समासान्तः-- `अन्येषामपि दृश्यते' (6.3.137) इति दीर्घः, `दण्डादण्डि' इति।।

18. पारे मध्ये षष्ठ्या वा। (2.1.18)
ननु च प्रकृतैव महाविभाषा तयैव विकल्पो भविष्यति, तत्किं वाग्रहणेनेत्याह-- `वावचनात्' इत्यादि। गतार्थम्। यदि तर्हि वावचनात् पक्षे षष्ठीसमासो भवति, माहविभाषया किं क्रियत इत्याह-- `महाविभाषया' इत्यादि।।

19. संख्या वंश्येन। (2.1.19)
`एकलक्षण' इति। एकस्वभावः। सन्तानः = प्रबन्धः। सन्तानिनामेकलक्षणत्वात्, सन्तानोऽप्येकलक्षमो भवति। ततर् विद्ययैकलक्षणः-- वैयाकरणवंशः, उपाध्यायवंश इति। जन्मना-- ब्राह्मणवंशः, क्षत्रियवंश इति। `तत्र भवो वंश्यः' इति। दिगादित्वाद्यत्। `द्वौ मुनी' इति। पाणिनिकात्यायनौ। `व्याकरणस्य' इति। सम्बन्धलक्षमा षष्ठी। `त्रिमुनिव्याकरणस्य' इति। पूर्वौ द्वौ, भाष्यकारस्तृतीयः। `विद्यया' इति। व्याकरणाख्यया। `तद्वताम्' इति। पाणिनिप्रभृतनीनाम्। `अभेदविवक्षा' इति। यौ तौ द्वौ मुनी तावेव व्याकरणमित्यतिशयेन विद्यया योगं तयोराख्यातुमभेदविवक्षा यदा क्रियते तदा सामानाधिकरण्यं भवति-- द्विमुनि व्याकरणमिति।।

20. नदीभिश्च। (2.1.20)
चकारेण `संख्या' इत्यनुकृष्यते। बहुवचननिर्देशेनार्थस्येदं ग्रहणम्, न स्वरूपस्य, नापि संज्ञायाः, तेन सर्वैर्नदीवाचिभिः समासो विज्ञायत इत्याह-- `नदीवचनैः' इत्यादि। `समाहारे चायमिष्यते' इति। चकारोऽवधारणे -- समाहार एव नान्यत्रेति। यद्येवम्, समाहारग्रहणमं कर्त्तव्यम् ? न कर्त्तव्यम्, यत एव हेतोरक्षादीनां परिणा सह कितवव्यवहार एव समासो भवति, ततएव हेतोरयमपि समाहार एव भविष्यति- सप्त गङ्गाः समाहृताः सप्तगग्ङमिति। पूर्ववद् ह्रस्वः। अन्यपदार्थे तु न भवति-- द्वीरावतीको देश इति। `पञ्चनवम्, सप्तगोदावरम्'इति।
कृष्णोदकपाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः।
गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि।।
इति वचनादच् समासान्तः।।

21. अन्यपदार्थे च संज्ञायाम्। (2.1.21)
`कृष्णवेण्णा' इति। कृष्णा चासौ वेण्णा चेति विशेषणसमासः। `शीघ्रगङ्गः' इति। बहुव्रीहिः।

22. तत्पुरुषः। (2.1.22)
`कष्टश्रितः' इति। तत्पुरुषसंज्ञायां सत्यां `तत्पुरुषे तुल्यार्थ'(6.2.2) इत्यादिना पूर्वपदप्रकृतिस्वरत्वम्। अथ किमर्थमियं महती संज्ञा विधीयत इत्याह-- `पूर्वाचार्यसंज्ञा चेयम्' इति। तदङ्गीकरणं किमर्थमित्याह-- `तदङ्गीकरणम्' इत्यादि। उपाधिः = विशेषणम्। कः पुनरसौ तदीय उपाधिरित्याह-- उत्तरपदार्थप्रधानस्तत्पुरुषः' इति।।

23. द्विगुश्च। (2.1.23)
`समासान्ताः प्रयोजनम्' इति। `तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (5.4.86) इत्यतस्तत्पुरुष इत्यनुवर्त्तमाने `राजाहःसखिभ्यष्टच्' (5.4.91) `गोरतद्धितलुकि' (5.4.92) इति च द्विगोरपि यथा स्यात्। `पञ्चराजी' इति। पञ्चानां राज्ञां समाहार इति `तद्धितार्थोत्तरपदसमाहारे च' (2.1.51) इति समासः। `संख्यापूर्वो द्विगुः' (2.1.52) इति द्विगुसंज्ञा, टच्, `नस्तद्धिते' (6.4.144) इति टिलोपः `अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते' (वा.156) इति स्त्रीलिङ्गता, `द्विगोः' (4.1.21) इति ङीप्। `द्व्यह्नः, त्र्यह्नः' इति। `अह्नष्टखोरेव' (6.4.145) इति टिलोप), `रात्रह्नाहाः पुंसि'(2.4.29) इति पुंस्त्वम्। `पञ्चगवम्' इति। `स नपुंसकम्' (2.4.17) इति नपुंसकत्वम्। सत्यप्यकारान्तत्वे स्त्रीत्वं न भवति; `पात्रादीनां प्रतिषेधो वक्तव्यः' (वा.1.5.9) इति वचनात्।।

24. द्वितीया श्रितातीतपतितगत्यास्तप्राप्तापन्नैः। (2.1.24)
`श्रितादिषु' इत्यादि। श्रितादिषु समासकारणत्वेनोपात्तेषु सत्सु गमिगाम्यादीनां समासस्योपसंख्यानं प्रतिपादनं कर्त्तव्यमित्यर्थः। एतैरपि समासः प्रतिपादयितव्यः। तत्रेदं प्रतिपादनम्-`द्वितीया' इति योगविभागः क्रियते, तेन गमिगामिप्रभृतिभिरपि समासो भवति। न चैवं श्रितादिग्रहणनर्थकम्;

पूर्वविषयस्यासर्वविषयत्वज्ञापनार्थत्वात्। आदिशब्दः प्रकारवाची। गमिगामिशब्दयोरेकतरोपादानेनैव सिद्धे द्वयोरुपादानमुणादीनामन्येषाञ्च यथा स्यात्; अन्यथा यदि गमिग्रहणमेव क्रियेत तदाऽऽदिशब्दस्य प्रकारवाचित्वात् गमिप्रकाराणामुणादीनामेव ग्रहणं स्यात्। अथ गामिग्रहणमेव क्रियेत, तदा गामिप्रकाराणामुणादीनां स्यात्। तस्माद्द्वयोरपि ग्रहणं कर्त्तव्यम्। `ग्रामं गमी'इति। `गमेरिनि' (द.उ.6.57) इतीनिप्रत्ययः। स च भविष्यत्काले; `भविष्यति गम्यादयः' (3.3.3) इति वचनात्। `ग्रामं गमी' इति। `आवश्यकाधमर्ण्ययोः' (3.3.170) इत्यावश्यमे णिनिः। `अकेनोर्भविषअयदाधर्मर्ण्ययोः' (2.3.70) इति षष्ठीप्रतिषेधः। `ओदनं बुभुक्षुः' इति। भुजेः सन्नन्तात् `सनाशंसभिक्ष उः' (3.2.168) इत्युप्रत्ययः। क`न लोक
' (2.3.69)इत्यादिना षष्ठीप्रतिषेधः। कष्टं श्रित इत्यादावप्यनेनैव षष्ठीप्रतिषेधः।

25. स्वयं क्तेन। (2.1.25)
`तस्य द्वितीयया सह सम्बन्धो नोपपद्यते' इति। द्वितीयार्थासम्भवात्। इतिशब्दो हेतौ। यतस्तस्य द्वितीयया सह सम्बन्धोऽनुपपन्नस्तस्माद्द्वितीयाग्रहणमुत्तरार्थमनुवर्त्तते, न त्वेतदर्थम्। `स्वयंधौतौ पादौ' इति। `धावु गतिशुद्धयोः' (धा.पा.601), अस्योदित्त्वाद्विभाषितेट्। `यस्य विभाषा' (7.2.15) इतीट्प्रतिषेधः। `च्छवोः शूडनुनासिके चट (6.4.19) इत्यूठ्। `एत्येधत्यूठसु' (6.1.89) इति वृद्धिः। `स्वयंविलीनमाख्यम्' इति। `लीङ श्लेषणे' (धा.पा.1139), `स्वादय ओदितः' (का.8.2.45) इत्योदित्त्वात् `ओदितश्च' (8.2.45) इति नत्वम्। `कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' (व्या.प.126) इति गतिपूर्वस्यापि समासो भवति। कः पुनरत्र समासे सति विशेषः यावता विनापि तेनैतद्रूपं सिध्यतीत्याह-- `ऐकपद्यम्' इत्यादि।।

26. खट्वा क्षेपे। (2.1.26)
`स च' इत्यादि। एवकारेण वाक्यार्थतां क्षेपस्य निरस्यति। स्यादेतत्-- वाक्यार्थोऽपि क्षेपः; तेन वाक्यमपि भविष्यतीत्याह-- `न हि' इत्यादि। वाक्येन हि क्रियाकारकसम्बन्धमात्रं गम्यते, न तु क्षेपः। `खट्वारोहणञ्च' इत्यादि। विरुद्धो मार्गः = विमार्गः,तेन प्रस्थानम् = गमनम्। अधीत्य स्नात्वा गुरुणाभ्यनुज्ञातेन खट्वाऽरोढव्या। यत्त्वन्यथा खट्वारोहणं तद्विमार्गप्रस्थनम्। न तु खट्वारोहणमेव। इह च `खट्वारूढः' इत्यादौ खट्वारोहणं विमार्गप्रस्थानस्योपलक्षणं वेदितव्यम्। किं पुनः कारणमेव विज्ञायत इत्याह-- `सर्व एव' इत्यादि। आरूढ इत्याङ्पूर्वस्य रुहेः क्तप्रत्यये ढत्वधत्वष्टुत्वढलोपदीर्घेषु कृतेषु रूपम्। जाल्म इत्ययुक्तकारीत्यर्थः।

27. सामि। (2.1.27)
`असत्त्ववाचित्वात्' इति। द्रव्याधारा हि कर्मशक्तिः। अतो द्रव्यवाचिन एव द्वितीयया सम्बन्धो भवति, नासत्त्ववाचिनः।।

28. कालाः। (2.1.28)
`चराचराः' इति। अनत्यन्तसंयोगप्रतिपादनार्थम्। चरन्ति भ्रमन्तीति चराचराः, अनवस्थिता इत्यर्थः। `चरिचलिपतिवदीनमच्याक्चाभ्यासस्य' (वा.658) इति चरेः पचाद्यचि द्विर्वचनमभ्यासस्याक्चागमश्च। `कदाचिदहर्गच्छन्ति' इत्युत्तरायणे। `कदाचिद्रात्रिम्' इति दक्षिणायने। एतेन तदेवानवस्थितत्वं व्यक्तीकुर्वन्नह्नो रात्रेश्च तैर्मुहूर्तैरनत्यन्तसंयोगमाचष्टे। `अहरतिसृताः' इति। `रोऽसुपि' (8.2.69) इत्यह्नो नकारस्य रेफः। `अहः संक्रान्ताः' इति। `क्रमु पादविक्षेपे' (धा.पा.473),पूर्वपदिट्प्रतिषेधः। `अनुनासिकस्य क्विझलोः' (6.4.15) इति दीर्घः। `मासप्रमितः' इति। `माङ माने' (धा.1088), `आदिकर्मणि कर्त्तरि च' (3.4.71) इति कर्त्तरि निष्ठा। `द्यतिस्यति' (7.4.40) इत्यादिनेत्त्वम्। `मासं प्रमातुमारब्धः' इति. मासस्यैकदेशस्य प्रतिपदश्चन्द्रमसा योगं दर्शयन् मासस्य तेनात्यन्तसंयोगमाचष्टे। कालस्य हि कृत्स्नस्य स्वेन सम्बन्धिना व्याप्तिः = अत्यन्तसंयोगः। न च प्रतिपच्चन्द्रमा मासस्येह व्याप्तिः = संयोगोऽस्तीति नेहात्यन्तसंयोगः।

29. अत्यन्तसंयोगे च। (2.1.29)
`कृत्स्नसंयोगः' इति। कृत्स्नस्य संयोगः कृत्स्नसंयोगः, कृत्स्नस्य कालस्य मुहूर्त्तादेः स्वेन सम्बन्धिना = सुखादिना संयोग = सम्बन्धोऽत्यन्तसंयोगः। एतदेव स्पष्टीकर्त्तुमाह-- `कालस्य' इत्यादि। `मुहूर्त सुखम्' इति। `कालाध्वनोरत्यन्तसंयोगे' (2.3.5) इति द्वितीया। अत्र मुहूर्तस् कालस्य स्वेन सम्बन्धिना सुखेन व्याप्तिः।

30. तृतीया तत्कृतार्थेन गुणवचनेन। (2.1.30)
`तत्कृत' इति। एतदर्थशब्देनासमस्तमेव, अविभक्तिञ्च। तृतीयाविभक्तेः `सुपां सुलुक्' (7.1.39) इति लुप्तत्वात्। एतच्च गुणवचनेनेत्यस्य समानाधिकरणं विशेषणम्। अत एव कीदृशेनेति पृष्टः सन्नाह-- `तत्कृतेन' इति। तदिति सर्वनाम्ना प्रकृतस्य तृतीयान्तस्य प्रत्यवमर्श इति तृतीयान्तकृतेनेति दर्शयति। तृतीयान्तेन गुणवचनस्य करणत्वं न सम्भवतीत्यतः सामर्थ्यात् तदर्थकृतेनेति विज्ञायत इत्यत आह-- `तृतीयान्तार्थकृतेनेति यावत्' इति। अर्थद्वारेण चेदं

गुणवचनस्य विशेषणं वेदितव्यम्- तृतीयान्तार्थकृतो गुणवचनार्थ इति। सोऽपि तथोच्यते। एतदुक्तं भवति-- तृतीयान्तार्थकृतेन गुणवचनार्थेनेति। अर्थ एव हि तृतीयान्तार्थेन क्रियते, न च गुणवचनशब्दः। गुणमुक्तवान् = गुणवचनः। ` कृत्यल्युटो बहुलम्' (3.3.13) इति कर्त्तरि ल्युट्। अथ वा-- करणे, गुण उक्तोऽनेनेति गुणवचनः। यश्च पूर्व गुणे वर्तित्वा पश्चात् तद्वति द्रव्ये वर्त्तते स गुणवचनः। गुणेनेत्युच्यमाने घृतेन पाटवमित्यादौ प्रसङ्गः, अतस्तन्निवृत्त्यर्थं वचनग्रहणम्। तस्मिंश्च सति गुणे वर्तित्वा तद्वति द्रव्ये यो वर्त्तते तेनैव समासो भवति, न तु गुण एव यो वर्त्तते तेन सह। न च पाटवादयः शब्दाः पूर्वं गुणे वर्तित्वा पश्चात् तद्वति द्रव्ये वर्त्तन्ते, अपि तु गुण एव। वचनग्रहणात् तैः सह समासो न भवति। `शङ्कुलाखण्डः, गिरिकाणः' इति। खण्डकाणशब्दावत्र खण्डनेन निमीलने च क्रियारूपापन्ने गुणे वर्तित्वा पश्चान्मतुब्लोपादभेदोपचाराद्वा तद्वति द्रव्ये वर्तते इति गुणवचनौ भवतः। `धान्यार्थः' इति। भवुत्ययमर्थशब्दस्तत्कृतः, तथा हि स गोभिर्वपावान् कृतः। न तु वपावानित्ययं शब्दो गुणमुक्तवामिति न गुणवचनः, ततस्तेन सह समासो न भवति।।

31. पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः। (2.1.31)
युक्तः समसदृशशब्दाभ्यां समासः, यावाता ताभ्यां योगे `तुल्यार्थैरतुलोपमाभ्याम्' (2.3.72) इति तृतीयाविधानम्, इतरैस्तु पूर्वादिभिः कथं तृतीयासमास उपपद्यते ? न हि तद्योगे केनचित्तृतीया विहिता इत्याह `अस्मादेव' इत्यादि। सुबोधम्।
`पूर्वादिष्ववरस्योपसंख्यानम्' इति। पूर्वादिषु समासकारणत्वेनोपात्तेषु सत्स्ववरशब्दस्योपसंख्यानं प्रतिपादनं कर्त्तव्यमित्यर्थः। अवरशब्देनापि तृतीयासमासः प्रतिपद्यत इत्यर्थः। तत्रेदं प्रतिपादनम्-- उत्तरसूत्रे बहुलग्रहणं क्रियते। तेनावरशब्देनापि समासो भवति।।

32. कर्त्तृकरणे कृता बहुलम्। (2.1.32)
`भिक्षाभिरुषितःट इति। हेतौ (2.3.23) तृतीया विहिता। वसेर्वच्यादिसूत्रेण (6.1.15) सम्प्रसारणम्, `शासिवसिघसीनाञ्च' (8.3.60) इति षत्वम्, `वसतिक्षुधोः' (7.2.क52) इतीट्। `दात्रेण धान्यं लूनवान्' इति। `ल्वादिभ्यश्च' (8.2.44) इति निष्ठानतवम्। `पादहारकः' इति। पादाभ्यां ह्रियत इति पादाहारकः। पादाभ्यामिति पञ्चमी चतुर्थी वा। हारक इति `कृत्यल्युटो बहुलम्' (3.3.113) इति कर्मणि ण्वुल्। `गलेचोपकः' इति। गले चुप्यत इति। `चुप मन्दायां गतौ' (धा.पा. 403) इत्यस्मात् पूर्ववदेव ण्वुल्। `तत्पुरुषे कृति बहुलम्' (6.3.14) इत्युलक्।।

33. कृत्यैरधिकार्थवचने। (2.1.33)
`स्तुतिनिन्दाप्रयुक्तम्' इति। स्तुत्या निन्दया वा यत् प्रयुक्तं प्रवर्त्तितं तत् स्तुतिनिन्दाप्रयुक्तम्। तदर्थमुच्चारितमित्यर्थः। `अध्यारोपितार्थवचनम्' इति। अध्यारोपितोऽर्थोऽसन्नेव बुद्ध्या समारोपितस्तस्य वचनमिति षष्ठीसमासः। `कृर्त्तृकरणयोःट इति। अर्थे कार्यासम्भवात् तदभिधायिनि सुबन्ते कार्यं विज्ञायते। `काकपेया' इति। `पा पाने' (धा.पा.925) इति `अचो यत्' (3.1.97) `ईद्यति' (6.4.65) ईत्त्वम्। अत्र सम्पूर्णतोयत्वोद्भावनं नद्याः स्तुतिः, अध्यारोपितः पुनरत्रार्थः काकपेयत्वम्-- एवं नाम सम्पूर्णतोया नदी यत्तटस्थैरपि काकैः शक्या पातुम्। `श्वलेह्यः कूपः' इति। `ऋहलोर्ण्यत्' (3.1.124) अत्राप्यासन्नोदकत्वोद्भावनं कूपस्य स्तुतिः। अध्यारोपितः पुनरत्रार्थः श्वलेह्यत्वम्-- एवं नामासन्नोदकः कूपो यतः श्नभिरपि लिह्यते। `बाष्पच्छेद्यानि तृणानि' इति। अत्र मारद्वातिशयोद्भावनं तृणानां स्तुतिः। अध्यारोपितः पुनरत्रार्थो बाष्पच्छेद्यता-- एवं नाम मृदूनि तृणानि यद्बाष्पेणापि शक्यानि छेत्तुम्। `कण्टकसञ्चेय ओदनः' इति। अत्रापि वैषद्यातिशयोद्भावनं विक्लिन्नतोद्भावनञ्चौदनस्य स्तुतिः। अध्यारोपितः पुनरत्रार्थः कण्टकसञ्चेयत्वम्-- एवं नामौदनस्य विशदतातिशयो विक्लेदश्च यत्कण्टकेनापि शक्यः सञ्चेतुम्। एवं तावत् स्तुतिप्रयुक्तेऽधिकार्यवचन उदाहरणानि। निन्दाप्रयुक्तेऽधिकार्थवचन एतावन्त्येव द्रष्टव्यानि। तथा हि-- काकेया नदीत्यत्राल्पतोयत्वोद्भावनं नद्या निन्दा। अध्यारोपितः पुनरत्रार्थस्तदेव पूर्वोक्तं काकपेयत्वम्, एवं श्वलेह्यादावपि पूर्वोक्त एवाध्यारोपितोऽर्थो द्रष्टव्यः-- एवं नामाल्पतोया नदी यत्काकैरपि शक्यं पातुमिति। श्वलेह्यः कूप इत्यत्राप्यशुद्धतोयत्वोद्भावनं निन्दा- एवं नामाल्प ओदनो यत्कण्टकैरपि चीयत इति। ननु च बहुलवचनादधिकार्थोऽपि पूर्वेणैव सिद्धः समासः, तत्किमर्थमिदमित्याह-- `पूर्वस्य' इत्यादि। ते वै विधयः सुसंगृहीता येषां प्रपञ्चश्चेति। सुसंगृहीतं यथा स्यादिति पूर्वस्यायं प्रपञ्च क्रियते।।

34. अन्नेन व्यञ्चनम्।
`दध्योदनः' इति। ननु च क्रियाकृतः कारकाणां सम्बन्ध-, न तु स्वतः। न च वृत्ताविह काचन क्रिया श्रूयत इति सामर्थ्याभावः। असति च सामर्थ्ये समासाभावः। अथासत्यपि सामर्थ्ये वचनसामर्थ्यात् समासो भवतीति चेदास्यतां दध्ना, ओदनो भुज्यतां देवदत्तेनेत्यत्रापि स्यादित्यत आह-- `वृत्तौ' इत्यादि। न ह्यसत्यामुपसेचनक्रियायां संस्कार्यं संस्कारकं सम्भवति। अस्ति चेह तदुभयमित्यतस्तद्भावादेव समासान्तर्भूता क्रिया गम्यते। तद्द्वारकश्चान्नव्यञ्जनयोः सम्बन्ध इति विद्यत एव सामर्थ्यम्।।

35. भक्ष्येण मिश्रीकरणम्। (2.1.35) `मिश्रीकरणम्' इति। अमिश्रं मिश्रं क्रियतेऽनेनेति मिश्रीकरणम्। `खरविशदमभ्यवहार्य भक्ष्यम्' इति। तत्रैव भक्ष्यशब्दस्य रूढत्वात्।।

36. चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः। (2.1.36)
`तदर्थेन' इत्यादि। यदि तादर्थ्यमात्रे समासः स्यात्, बलिरक्षितग्रहणमनर्थकं स्यात्। तथा हि-- कुबेरबलिः,गोरक्षितमित्यत्रापि तादर्थ्यं गम्यतत एव। तसमाद्बलिरक्षितग्रहणाल्लिङ्गात् `तादर्थ्ये प्रकृतिविकारभावे समासो भवति' इति विज्ञायते। ननु च सम्प्रदाने चतुर्थ्यर्थं बलिरक्षितग्रहणं स्यात्, नैतदस्ति; ददातिकर्मणा हि अभिप्रेयमाणस्य क्रियया वा सम्प्रदानसंज्ञेष्यते, न चेह ददातिकर्मणा क्रियया वाऽभिप्रेयमाणताऽस्ति, तत्कुतः सम्प्रदाने चतुर्थी ? केन पुनस्तादर्थ्ये चतुर्थी भवतीत्याह-- `अस्मादेव' इत्यादि। यदि तादर्थ्ये चतुर्थी न स्यात्, तदा तदर्थग्रहणमनर्थकं स्यात्। तस्माद्यदेतत्, तदर्थेन चतुर्थ्यन्तस्य समासविधानं तदेव ज्ञापकम्-- तादर्थ्ये चतुर्थी भवतीति।
`अर्थेन' इत्यादि। कर्त्तव्यमिति शेषः। नित्यसमास उच्यते = कथ्यते, येन तन्नित्यसमासवचनं व्याख्यातव्यम्। एतदुक्तं भवति-- येनार्थशब्देन नित्यसमासः प्रत्याय्यते तद्वयाख्यानं कर्त्तव्यमिति। तत्रेदं व्याख्यानम्-- विभाषाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञायते। तेनार्थशब्देन नित्यसमासो भविष्यति, सर्वलिङ्गता चेति। `परवल्ललिङ्गं द्वन्द्वतत्पुरुषयोः' (2.4.26) इति परवल्लिङ्गतायां प्राप्तायां सर्वलिङ्गता विधीयते। एषा तु लोकाश्रयत्वाल्लिङ्गस्येति सिद्धा। अथ वा -- बहुलग्रहणानुवृत्तेः सर्वमेतत् सिद्धम्। गोहितम्, गोसुखमिति `चतुर्थी चाशिष्यायुष्य' (2.3.73) इत्यादिना चतुर्थी। हितयोगे त्वनाशिष्यपि चतुर्थी भवति। तथा हि वक्ष्यति-- `हितयोगे चतुर्थी वक्तव्या' (वा. 123) इति।

37. पञ्चमी भयेन। (2.1.37)
`भयभीतभीतिभीभिरिति वक्तव्यम्' इति। एवं हि त्रिभिरपि भीतादिभिः समासो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। स्वयमेव व्याख्यातुमाह-- `पूर्वस्य' इत्यादि। यथैव हि `कर्त्तृकरणे कृता बहुलम्' (2.1.32) इति तृतीयान्तस्य समासो विधीयमानो बहुलग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वादन्यविभक्त्यन्तस्यापि समासो भवति-- पादहारकः, गलेचोपक इति, तथा वृकभीत इत्यादावपि समासो भविष्यति। तस्मात् पूर्वकस्य बहुलग्रहणस्सयैवोदाहरणप्रदर्शनार्थोऽयं योगः प्रपञ्चार्थो वेदितव्यः। `तथा च' इत्यादि। यस्मात् पूर्वकेणैव बहुलग्रहणेन सिद्धं तस्यैवायम्प्रपञ्चः; तस्मात्तत एव बहुलग्रहणात् `ग्रामनिर्गतः' इत्याद्यपि सिद्धं भवति। आदिशब्देन वृकभीतादेर्ग्रहणम्।।

38.अपेतापोढमुक्तपतितापत्रस्तैरल्पशः। (2.1.38)
`अल्पशः' इति। `बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्' (5.4.42) इति शस्। `अल्पा पञ्चमी समस्यते' इति।। अल्पेभ्यः प्रातिपदिकेभ्यः उत्पन्ना या पञ्चमी सा समस्यते, न तु सर्वेभ्यः प्रातिपदिकेभ्यः इत्यर्थः।।

39. स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन। (2.1.39)
`स्तोकान्मुक्तः; कृच्छ्रान्मुक्तः' इति। `करणे स्तोकाल्पकृच्छ्र' (2.3.33) इत्यादिना पञ्चमी। `अन्तिकादागतः, दूरादागतः' इति। दूरान्तिकार्थेभ्यो द्वितीया च' (2.3.35) इत्यनेन।।

40. सप्तमी शौण्डैः। (2.1.40)
शौण्डैरिति बहुवचननिर्देशादाद्यर्थो गम्यत इत्याह-- `शौण्डादिभिः' इत। केन पुनर्विहितायां सप्तम्यां तदन्तस्य शौण्डादिभिः समासो विधीयते ? `सप्तम्यधिकरणे च' (2.3.36) इत्यनेनेति चेत्, वार्त्तमेतत्। तथा ह्यधिकरणं कारकम्, तच्च क्रियापेक्षम्। न चाक्षशौण्ड इत्यादौ वृत्तौ काचन क्रिया श्रूयते। तत्कुतोऽधिकरणस्येह सम्भवः ? न च शक्यते वक्तुम्-- अस्मादेव वचनाच्छौण्डादिभिर्योगे सप्तमी भविष्यतीति, देवदत्तः शौण्ड इत्यत्रापि प्रसङ्घः स्यादित्यत आह-- `वृत्तौ' इत्यादि. अस्त्येवात्र प्रसक्तिक्रिया। सा तु समासार्थ एवान्तर्भूतेतिगम्यमानत्वाद्द्वतौ क्रियापदं न प्रयुज्यते। तस्या यत्साधनमधिकरणं तत्र सप्तमीत्यदोषः। अन्तः शब्दस्त्वत्राधिकरणप्रधान एव पठ्यते। तस्य प्रयोगे तत्सामानाधिकरण्यमेव सप्तम्याः कारणम्। वनेऽन्तर्वनान्तर्वसतीति पूर्वपदार्थप्रधान्ये तु `विभक्त्यर्थे यदव्ययम्' (2.1.6) इत्यव्ययीभाव एव भवतिः- अन्तर्वणमिति। अधिशब्दोऽत्र पठ्यते-- तस्याधिकरणप्राधान्ये सत्यव्ययीभावः- अधिस्त्रि। आधेयप्राधान्ये तु तत्पुरुषः-- ब्राह्मणेष्वपि ब्राह्मणाधीन इति। ब्राह्मणाधिशब्दः केवलो न प्रयुज्यते। `अषडक्षाशित' (5.4.7) इत्यादिनाऽध्युत्तरपदात् स्वार्थिकस्य नित्यस्य खस्य विधानात्।।

41. सिद्धशुष्कपक्वबन्धैश्च। (2.1.41)

42. ध्वाङ्क्षेण क्षेपे। (2.1.42)
`ध्वाङक्षेणेत्यर्थग्रहणम्' इति। अर्थप्रधानत्वान्निर्देशस्य। यत्र हि शब्दप्रधानो निर्देशस्तत्र स्वरूपग्रहणं भवति, अन्यत्र त्वर्थग्रहणमेवेति प्रतिपादितमेतत् प्राक्। अर्थप्रधानत्वन्तु निर्देशस्याविच्छिन्नाचार्यपारम्पर्योपदेशाद्विज्ञायते। बहुलग्रहणानुवृत्तेरर्थस्येदं ग्रहणं वा। अपि च `क्षेपे' इत्युच्यते, क्षेपश्चार्थकारित

एवेत्यर्थग्रहणमेव युक्तम्। अर्थग्रहणे च सति ध्वाङ्क्षपर्यायैरपि समासो भवति, अत आह-- `ध्वाङ्क्षवाचिना' इत्यादि। `तीर्थे ध्वाङ्क्ष इव' इति। उपमानभावे सति ध्वाङ्क्षस्य क्षेपो गम्यते,नान्यथेति दर्शयितुमिवशब्दः प्रयुक्तः। समासे तु समास एवोपमानार्थस्यान्तर्भूतत्वादिवशब्दो गतार्थो न प्रयुज्यते। यथैव हि तीर्थ ध्वाङ्क्षश्चिरं स्थातारो न भवन्ति, तद्वदन्योऽपि यः कार्यं प्रत्यनवस्थितः स `तीर्थध्वाङ्क्षः' इत्युच्यते, यदाह-- `अनवस्थित इत्यर्थः' इति। कार्यं प्रत्यनवस्थितत्वमेव क्षेपः।।

43. कृत्यैर्ऋणे। (2.1.43)

`यप्रत्ययान्तेनैव समास इष्यते' इति। कथं पुनर्यत्प्रत्ययेनैव लभ्यते ? अल्पश इत्यनुवृत्तेः, `मासदेयम्' इति। पूर्ववद्यत्, ईत्त्वञ्च। सप्तमी ह्यत्रौपश्लेषिकेऽधिकरणे वेदितव्या। मासे ह्यतीते योऽन्तरो दिवसः स मासं प्रत्युपश्लिष्टो भवति, `यस्य च भावेन भावलक्षमम्' (2.3.37) इत्यनेन वा। मासातिक्रमणभावेन हि ऋणदानभावो लक्ष्यते। अथ ऋण इत्युच्यते, तत्रेदं न सिध्यति-- पूर्वाह्णेगेयं साम, प्रातरध्येयोऽनुवाकः, इत्यत आह-- `ऋणम्' इत्यादि। ऋणं हि नियोगतो निर्यातयितव्यमिति नियोगसहचरितम्। अतः साहचर्यात् तेन नियोगोऽवश्यम्भाव उपलक्ष्यते। एतच्च `कृत्यैः' इति बहुवचननि्रदेशाल्लिङ्गाद्गम्यते। कथम् ? `कृत्यैः' इति बहुवचनमत्र विवक्षितम्, तच्च ऋणग्रहणस्य नियोगोपलक्षणार्थत्वे प्रकृतिभेदेन। भिद्यमाने कृत्ये सति प्रसज्यते, न त्वन्यथा। यत्प्रत्ययस्यैकत्वात् तेनैव समासस्येष्टत्वात्।।

44. संज्ञायाम्। (2.1.44)

`समुदायोपाधिः' इति। `संज्ञायाम्' इति नेदं पूर्वपदस्योत्तरपदस्य वा विशेषणम्, किं तर्हि ? समुदायस्य-- समुदायेन चेत्संज्ञा गम्यत इति। किमेवं सति सिध्यतीत्यत आह-- `तेन' इत्यादि। अत्रैवोपपत्तिमाह-- `न हि' इत्यादि।।

45. क्तेनाहोरात्रावयवाः। (2.1.45)

`एतत्तु ते दिवावृत्तं रात्रौ वृत्तञ्च द्रक्ष्यसि' इत्यादि. नात्राहरवयवाः रात्र्यवयवाश्च सन्ति, किं तर्हि ? कृत्स्नमेवाहः, कृत्स्ना च रात्रिरिति, तेनेह समासो न भवति ।।

46. तत्र। (2.1.46)

`तत्रेत्येतत् सप्तम्यन्तम्' इति। सप्तमीसाधर्म्यात्। त्रल्प्रत्यय एवात्र सप्तमीशब्देनोक्तः। भवति हि ताद्धर्म्यात् ताच्छब्द्यम्। यथा-- गौर्वाहीक इति। सप्तमीसाधर्म्यं पुनस्त्रलोऽधिकरणार्थत्वात्. यथैव ह्यधिकरणप्रत्यायनाय सप्तमी प्रयुज्यते,तथा त्रलपि। अथ मुख्यैव सप्तमीविभक्तिः कस्मान्न विज्ञायते ? तस्यास्तत्रशब्देऽसम्भवात्। असम्भवस्तु त्रलैव तदर्थस्य द्योतित्तवात्। अन्यस्त्वाह-- यदा विभक्त्यादशास्त्रलादयस्तदा स्थानिवद्भावेनैवैतत् सप्तम्यन्तं भवति। आदेशपक्षसत्ु तत्र वृत्तिकृता नाश्रित इत्यसम्यगेतत्। अन्तशब्दश्चात्रावयववचनः। सप्तमीत्रल्प्रत्ययोऽन्तोऽवयवो यस्य तत्तथोक्तम्।।

47. क्षेपे। (2.1.47)

`अवतप्तेनकुलस्थितम्' इति। `तत्पुरुषे कृति बहुलम्' (6.3.14) इति सप्तम्या अलुक्। कः पुनरत्र क्षेपः ? कार्येष्वनवस्थितता। यदाह-- `एतच्चापलम्' इत्यादि। यथा अवतप्ते देशे नकुला न चिरं स्थातारो भवन्ति, तद्वदन्योऽपि योऽर्थानारभ्य न चिरं तेष्ववतिष्ठते तं प्रतीदमुच्यते-- अवतप्तेनकुलस्थितमिति। `उदकं विशीर्णम्' इत्यादावप्यारम्भस्य निष्फलता क्षेपः। अत एवाह-- `निष्फलं यत्क्रियते तदेवमुच्यते' इति। `प्रवाहे मूत्रितम्' इति। `मूत्र प्रस्रवणे' (धा.पा.1909) चुरादिः।।

48. पात्रेसमितादयश्च। (2.1.48)

`युक्तारोह्याविपरिग्रहार्थः' इति। युक्तारोह्यादिषु युक्तारोह्यादिभिर्वा परिगर्होऽर्थः प्रयोजनं यस्य पाठस्य स तथोक्कतः। किमर्थं पुनर्युक्तारोह्यादिषु परिग्रहस्तेषामिष्यत इत्याह-- `पूर्वपदाद्युदात्तत्वं यथा स्यात्' इति युक्तारोह्यादीनां हि `युक्तारोह्यादयश्च' (6.2.81) इत्यनेन पूरवपदाद्युदात्तत्वं विधीयते। तत्र यदि ये क्तान्तास्ते न पठ्येरन्, तदा तेषामाद्युदात्तत्वं न स्यात्। कथं पुनः पात्रेसमितादयो युक्तारोह्यादिग्रहणेन गृह्यन्ते; यतस्तेषां विधीयमानमाद्युदात्तत्वं पात्रेसमितादीनमपि भवतीत्याह-- `युक्तारोह्यादिषु हि' इत्यादि। `उदुम्बरमशकादिषूपमया क्षेपः' इति। यस्तत्रैवावरुद्धो न क्वचिद्गच्छति तमव विशिष्टचं मन्यते-- नास्मात्परमस्तीति, सोऽदृष्टविस्तार उच्यत उदुम्बरमशक इति। एवमन्यत्राप्यपमानात् क्षेपः। `प्रतिषिद्धसेवनेन' इति। यः कश्चित् प्रतिषिद्धमाचरति स `मातरिपुरुषः' इत्युच्यते। `निरीहतया' इति। यो न किञ्चित् कर्तुं समर्थः स `पिण्डीशूरः' इत्येवमादिभिः पदैरभिधीयते। `चकारोऽवधारणार्थः' इति। पात्रेसमितादय एव यता स्युः, यदन्यत् समासान्तरं तेषां प्राप्नोति तन्मा भूदिति। तेन परमपात्रेसमिता इति `सन्महत्' (2.1.61) इत्यादिना समासान्तरं न भवति।।

49. पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन। (2.1.49)

`भिन्नप्रवृत्तिनिमित्तप्रयुक्तस्य' इत्यादि। भिन्नप्रवृत्तिनिमित्तग्रहणं पर्यायनिवृत्त्यर्थम्। एकग्रहणं गौरश्व इत्यादिनिवृत्त्यर्थम्। `पूर्वकाल इत्यर्थनिर्देशः' इति। अर्थप्रधानत्वान्निर्देशस्य। तेन स्वरूपग्रहणं न भवतीति भावः। `परिशिष्टानां स्वरूपग्रहणम्' इति। शब्दप्रधानत्वान्निर्देशस्य। `पूर्वकालोऽपरकालेन' इति। कुतः पुनरनुक्तोऽप्येषोऽर्थविशेषो लभ्यते; सम्बन्धिशब्दत्वात् पूर्वकालस्य ? न ह्यनपेक्ष्यापरकालं पूर्वकालं सम्भवति; अतः पूर्वकालपरिग्रहे कृते सत्यपरकालस्यापि परिग्रहः कृत एव। `स्नानानुलिप्तः' इति. पूर्वं स्नातः पश्चादनुलिप्त इत्यत्र स्नातशब्दः स्नानेन निमित्तेन प्रयुक्तः, अनुलिप्तशब्दोऽनुलेपनेन; तयोश्चैकत्रार्थे वृत्तिरित्यस्ति सामानाधिकरण्यम्। `एकशाटी' इति। एका चासौ शाटी चेति `पुंत्कर्मधारय' (6.3.42) इत्यादिना पुंवद्भावः।।

50. दिक्संख्यं संज्ञायाम्। (2.1.50)

`पूर्वेषुकामशमीत्यादिः' ग्रामाणां संज्ञा। पूर्वा चासाविषुकामशमी चेति पूर्वेषुकामशमी। मन्दश्रियां पूर्वोत्तरपदविभागमात्रप्रदर्शनार्थं वाक्यं कृतम्। न ह्यत्र वाक्येन भवितव्यम्। न हि वाक्येन संज्ञा गम्यते।।

51.तद्धितार्थोत्तरपदसमाहारे च। (2.1.51)

एकस्या अपि सप्तम्या विषयभेदेन भेदं दर्शयितुमाह-- `तद्धितार्थे विषये' इत्यादि। यदि तद्धितार्थेऽभिधेय इत्येवं विज्ञायेत, तदा पाञ्चनापितिरित्यादौ तद्धितो दुर्लभः स्यात्। तदर्थस्य समासेनैवोक्तत्वादित्येतन्मनसि कृत्वा तद्धितार्थापेक्षया विषयसप्तमीयमिति दर्शयितुं `तद्धितार्थे विषये' इत्युक्तम्। तद्धिताः = अणादयः, तेषामर्थोऽपत्यादिः, तस्मिन् विषये। अनन्यत्रभावो विषयशब्दस्यार्थः, यथा-- मत्स्यानां जलं विषः इति। `पौर्वशालः' इति। पूर्वस्यां शलायां भव इति तद्धितार्थे विषयभूते प्राक् समासः। ततः सुब्लुक्। ततस्तद्धितः। `पूर्वशालाप्रियः' इति। पूर्वा शाला प्रियाऽस्येति पूर्वं पदानां त्रयाणां बहुव्रीहिः। पश्चात् प्रियशब्दे उत्तरपदे परतः पर्वयोः पदयोस्तत्पुरुषः। तस्मिन् सति समासान्तोदात्तत्वं भवति शालेत्यत्र। `समाहारे {दिक्शब्दः इति मूलपाठः, पदमञ्जरी च। } दिङ न सम्भवति' इति। समाहारो हि समूहः। स च भिन्नार्थानामेवैककालानां भवति. बुद्ध्या युगपदार्थानां परिग्रहादेककालत्वम्, न त्वभिन्नवस्तुनः। संखअयैव च भेदमाचष्टे; तस्या भिन्नार्थाभिधायित्वात्, न तु दिक्शब्दः; तस्य प्रतिनियतविषयत्वात्। तस्मात् समाहारे दिक्शब्दोन सम्भवतीति स न तत्र समस्यते। `पञ्चानापितिः' इति। पञ्चानां नापितानामपत्यमिति तद्धितार्थे विषयभूते प्राक् समासः। पश्चात् `अत इञ्' (4.1. 95)। `पञ्चकपालः' इति। पञ्चसु कपालेषु संस्कृत इति तद्धितार्थे विषयभूते पूर्वं समासः; पश्चादण्। तस्य `द्विगोर्लुगनपत्ये' (4.1.88) इति लुक्। `{पञ्चगवधनम् इति मुद्रित पाठः}पञ्चगवधनः' इति। पञ्च गावो धनमस्येति प्राक् त्रयाणां पदानां बहुव्रीहिः। उत्तरकालं धनशब्द उत्तरपदे परतः पूर्वयोः पदयोस्तत्पुरुषः। तस्मिन् सति `गोरतद्धितलुकि' (5.4.92) इति टच् समासान्तः। तत्र हि `तत्पुरुषस्याङ्गुलेः' (5.4.86) इत्यतस्तत्पुरुषग्रहणमनुवर्त्तते। `पञ्चपूली'इति। पञ्चानां पूलानां समहार इति विग्रहः। `द्विगुरेकवचनम्' (2.4.1.) इत्येकवद्भावः। `अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते' (वा.156) इति स्त्रीलिङ्गता; `द्विगोः' (4.1.21) इति ङीप्। ननु समाहारः = समूहः, समूहश्च तद्धितकार्थो भवतीत्यपार्थकं समाहारग्रहणम्; तद्धितार्थ इत्येव सिद्धत्वात् ? नैतदस्ति; पञ्चकुमारीत्यत्र हि समूहप्रत्ययस्य `द्विगोर्लुगनपत्ये' (4.1.21) इति लुकि कृते `लुक् तद्धितलुकि' (1.2.49) इति स्त्रीप्रत्ययस्यापि लुक् स्यात्। समाहारे तु पृथगगृहीते तद्धितानुत्पत्तिरेवात्र विषये समाख्यायते। ततो न भवत्येष दोषः। पञ्चानां कुमारीणां समाहारः पञ्चमकुमारि। `एकविभक्तिचापूर्वनिपाते' (1.2.44) इत्युपसर्जनसंज्ञायाम् `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति ह्रस्वत्वम्। कथं पुनरत्रैकविभक्तत्वम् ? षष्ठ्यैवैकया योगात्। तथा हि समाहारः समूहः, तेन च तत्सम्बन्धे षष्ठ्यैव भवितव्यम्। अतः समाहारः कुमा4रीणाम्, समाहारं कुमारीणां पश्य, समाहारेण कुमारीणामित्येवमादिभिरनेकाभिर्विभक्तिभिर्युज्यमानेऽपि समाहारशब्दे कुमारीशब्दः षष्ठ्यैवैकया युज्यत इत्येकविभक्तिकत्वम्।।व

52. सख्यापूर्वो द्विगुः। (2.1.52)

`समासान्तो भवति' इति। टच्। `राजाहःसखिभ्यष्टच्' (5.4.91) इत्युवृत्तेः।।

53. कुत्सितानि कुत्सनैः। (2.1.53)

कुत्सितशब्दोऽयमिह रूढिमाचष्टे। तथा च निष्ठा भूतकालं नोपादत्ते। कुत्सनशब्देन च कुत्साहतुर्धर्मो गृह्यते-- कुत्स्यते गर्ह्यतेऽनेनेति कृत्वा। बहुवचननिर्देशस्तु स्वरूपविधेर्निरासार्थः। तेन कुत्सितवादिना कुत्सनवचनैः सह समासो विज्ञायते, न तु कुत्सितशब्दस्य कुत्सनशब्देन। अत आह-- `कुत्सितवाचीनि' इत्यादि। शब्दप्रवृत्तिनिमित्तकुत्सायामयं समासो वेदितव्यः। कुतः पुनरेतल्लभ्यते ? प्रत्यासत्तेः। शब्दस्य हि प्रवृत्तिनिमित्तं प्रत्यासन्नम्, अतस्तत् कुत्सायामेव समासेन भवितुं युक्तम्। `वैयाकरणखसूचिः' इति। वैयाकरणश्चासौ खसूचिश्चेति विग्रहः। यः पृष्टः सन् व्याकरणे खमाकाशं सूचयतीति निरीक्षते निष्प्रतिभो भवति स एवमुच्यते। अत्र हि वैयाकरणत्वं वैयाकरणशब्दस्य प्रवृत्तिनिमित्तं तत् कुत्स्यते; तत्पुनः व्याकरणाध्येतृसम्बन्धः, व्याकरणवेदितृसम्बन्धो वा.तेन हि निमित्तेन वैयाकरणशब्दो पुरुषे वर्त्तते। एवमन्यत्रापि शब्दप्रवृत्तिनिमित्तकुत्सायां समासो वेदितव्यः। `याज्ञिककितवः' इति. कितव इव कितवः। यथा हि कितवः किं तवास्तीति धनवत्तामात्रमपेक्षमाणो द्यूते प्रवर्त्तते, न तु तस्य जात्यादिकमपेक्षते; तथा याज्ञिकोऽपि याजने प्रवर्त्तमानो यस्तृष्णयाऽयाज्यस्य धनवतामात्रमपेक्षते, न तु तस्य यागार्हतां स याज्ञिककितव इत्युच्यते। अत आह- `अयाज्ययाजनतृष्णापर उच्यते' इति।

`मीमांसकदुर्दुरूढः' इति. मीमांसको मीमांसाध्ययनफलमनवाप्य नास्तिको जात इति प्रतीयते।
`वैयाकरणश्चौरः' इति। ननु चौरत्वेन गर्ह्यमाणो वैयाकरणः कुत्सितो भवत्येव। तदभिषायी च वैयाकरणशब्दः । तत्कथमिदं प्रत्युदाहरणमुपपद्यत इत्याह-- `न ह्यत्र ' इत्यादि। प्रत्यासत्तेर्हि शब्दप्रवृत्तिनिमित्तस्य कुत्सायां ससासेन भवितव्यम्। न चेह वैयाकरणशब्दस्य प्रवृत्तिनिमित्तं कुत्स्यते; यस्माच्चौरोऽपि सम्यक् व्याकरणं वेत्त्यधीते वा। तस्मान्नात्र शब्दप्रवृत्तिनिमित्तं कुत्स्यते, किं तर्हि ? यत्र तद्वैयाकरणत्वं वर्त्तते स कुत्स्यते, वैयाकरणत्वन्तु तस्योपलक्षणमेव केवलम्, योऽसौ वैयाकरणः स चौरः, यथा-- यः कम्पते सोऽश्वत्थ इति। अत्र कम्पनमश्वत्थस्योपलक्षणम्। `कुत्सितो ब्राह्मणः' इति। भवत्यत्र कुत्सितशब्दः कुत्सिताभिधायी। न तु ब्राह्मणशब्दः कुत्सनवचनः।।

54. पापाणके कुत्सितैः।
`पापाणकशब्दौ कुत्सनाभिधायिनौ' इत्युक्तम्। यद्येवमत्र पूर्वेणैव सिद्धः समासः, किमर्थमिदनुच्यत इत्याशङ्क्याह-- `तयोः' इत्यादि। यदि पूर्वेण स्यात् समासः, ततः कुत्सितशब्दस्य प्रथमानिर्दिष्टत्वात् पूर्वेनिपातः स्यात्, पापापणकशब्दयोस्तु परनिपातः। तस्मात् पूर्वनिपातार्थमिदमारभ्यते। कुत्सितग्रहणं विस्पष्टार्थम्। अन्यथा पूर्वयोगादेव कुत्सित इत्यनुवर्तिष्यत इति तन्न कर्त्तव्यमेव स्यात्।।

55. उपामानानि सामान्यवचनैः। (2.1.55)
`उपमीयतेऽनेनेत्युपमानम्' इति। सादृश्येन येन परिच्छिद्यते तदुपमानमित्यर्थः। यथा गौरिव गवय इत्यत्र गौरुपमानम्,तेन हि सादृश्येन गवयः परिच्छिद्यते। `यादृशो गौस्तादृशो गवयः' इत्यर्थः प्रतीयते। सामान्यमनेकसाधारणं भवति; इह चोपमानस्य श्रुतत्वात् तस्य चोपमेयापेक्षत्वादुपमानोपमेयोरेव साधारणो धर्मः सामान्यं विज्ञायत इत्याह--`उपमानोपमेययोः' इत्यादि। `तद्विशिष्टोपमेयवचनैरयं समासः' इति। तेन सामान्येन धर्मेण विशष्टं यदुपमेयं तद्वचनैरयं समासो भवति। कृतः पुनः सामान्यवचनैरित्युक्ते सत्येष विशेषो लभ्यते ? न्यायात्। तथा हि-- सामान्यमुक्तवन्तः सामान्यवचनाः, यथा- गुणमुक्तवन्तो गुणवचना इति। कदा च ते सामान्यवचना भवन्ति ? यदा सामान्यमभिधाय सामान्यविशिष्टे तद्वति द्रव्ये वर्त्तन्ते। तच्च सामान्यवदुपमानस्य सम्बन्धिशब्दत्वादुपमेयमेव विज्ञायत इति न्यायप्राप्त एवार्थो वृत्तिकृता दर्शितः। `शस्त्रीश्यामा देवदत्ता' इति। अत्रोपमानं शस्त्री, उपमेया देवदत्ता। प्रसिद्धं ह्युपमानं भवति, नाप्रसिद्धम्. शस्त्र्येव श्यामगुणत्वेन प्रसिद्धा, न देवदत्ता। तयोः सामान्यं साधारणो धर्मः श्यामत्वम्। तत् श्यामत्वमुक्त्वा श्यामशब्दो देवदत्तयामभेदोपचारान्मतुब्लोद्वा वर्त्तत इति सामान्यवचनो भवति। ननु च समानाधिकरणेनेत्यनुवर्त्तते, इह च शस्त्रीशब्दस्य शस्त्र्यां वृत्तिः, श्यामाशब्दस्य देवदत्तायाम्, अतो वैयधिकरण्यात् समासेन न भवितव्यम् ? नैतदस्ति; सर्वत्र ह्युपमानोपमेययोर्भेदात् तद्वाचिनोर्वैयधिकरण्यमेव, उच्यते चेदं वचम्, अतो वैयधिकरण्येऽपि वचनसामर्थ्यात् समासो भविष्यति।
अथ वा-- शस्त्रीशब्दोऽप्यत्र देवदत्तायां वर्त्तते। तेन सामानाधिकरण्यं एवायं समासः-- शस्त्रौ चासौ श्यामा चेति शस्त्रीश्यामा। ननु च शस्त्रीशब्दोऽयं जातिवचनः शस्त्रीत्वं प्रवृत्तिनिमित्तमुपादाय तद्वति वर्त्तते, न च तत् शस्त्रीत्वं देवदत्तायामस्ति, तत् कथं तत्र वर्त्तते ? नैष दोषः; `सर्व एवामी शब्दा गुणमुपादाय तद्वति द्रव्ये वर्त्तन्ते' इत्यपि दर्शनमस्ति। तत्र श्यामत्वं गुणमुपादाय शस्त्रीशब्दो देवदत्तायां वर्तिष्यते। ताद्धर्म्याद्वा देवदत्ता शस्त्रीशब्देनाभिधास्यते। भवति हि ताद्धर्म्यात् ताच्छब्द्यमित्युक्तं प्राक्। ताद्धर्म्यं पुनः श्यामगुणत्वम्।
`फाला इव तण्डुलाः' इति। भवन्ति हि फाला उपमानम्। तथाहि तैर्दीर्घत्वादिना सादृश्येन तण्डुला उपमीयन्ते। तण्डुलशब्दस्तु सामान्यवचनो न भवति। ननु च तण्डुलशब्दोऽपि तण्डुलत्वं सामान्यमुपादाय तद्वति द्रव्ये वर्त्तत इति भवत्येव सामान्यवचनः, तदयुक्तमिदं प्रत्युदाहरणम् ? नैतदस्ति; तथा ह्युपमानोपमेययोः साधारणो धर्मः सामान्यमित्युक्तम्। न च तण्डुलत्वं फालानामस्ति, किं तर्हि ? तण्डुलानामेव।।

56. उपमितं व्याघ्रादिभिः सामान्याप्रयोगे। (2.1.56)
`सामर्थ्यादुपमानवचनैः' इति। यद्यपि `उपमानवचनैः' इति सूत्रे नोपात्तं, तथाप्युपमेयमानापेक्षमित्युपमितशब्दः सम्बन्धिशब्दत्वादुपमानत्वं व्याघ्रदीनां गमयति। तेन विशेषानभिधानेऽपि सामर्थ्यादुपमानवचनैस्तैः समासो विज्ञायते। `न चेत्सामान्यवाची शब्दः प्रयुज्यते' इति। उपमानोपमेययोः साधारणो धर्मः, शौर्यादि, सामान्यम्ष यदि तद्वाची शब्दो न प्रयुज्यते, एवं सति समासो भवति; नान्यथा। ननु च सामान्यस्य समासेऽन्तर्भूत्तवात् त्वदवाचिनां शब्दानां प्रयोगो नास्ति, तत्किं प्रतिषेधेन ? नैतदस्ति; साधारणधर्मः सामान्यं हि समासेऽन्तर्भूतम्, न तु तद्विशेषः। तत्रासति प्रतिषेधे विशिष्टसाधारणधर्मवाचिनः प्रयोगः स्यादेवेति कर्त्तव्यः प्रतिषेधः ? न कर्त्तव्यः,कथम्? सामान्यशब्दप्रयोगे हि सति तदपेक्षत्वेन सापेक्षमसमर्थ भवतीत्यसामर्थ्यादेव समासो न भविष्यति। एं तर्ह्येतज्ज्ञापयति-- `भवति हि प्रधानस्य सापेक्ष्यस्यापि समासः' इति। पुरुषाश्चात्रोपमेयत्वात् प्रधानः, उपमानन्तु व्याघ्रादि तदर्थत्वादप्रधानम्। किमेतेन ज्ञापकेन प्रयोजनम् ? `राजपुरुषः शोभनः' इत्येवमादि सिद्धं भवति। `विशेषणं विशेष्येणेति प्राप्ते' इति। ननु च विशेषणस्य विशेष्येण समानाधिकरणेन समासं वक्ष्यति, उपमानोपमेययोश्च भेदाद्वैयधिकरण्यम्, तत्कुतो विशेषणं विशेष्येणेति प्राप्तिः ? एवं मन्यते-- पुरुषादावुपमेये वर्त्मानैर्व्याघ्रादिभिरुपमानशब्दैरयं समासो भवति. यथा चोपमानशब्दानामुपमेयवृत्तित्वे सामानाधिकरण्यं तथा पूर्वसूत्र एव व्याख्यातम्।।

57. विशेषणं विशेष्येण बहुलम्। (2.1.57)

`भेदकं विशेषणम्' इति। `{शिष्लृ विशरणे इति मुद्रित); शिष्लृ शेषणे, विपूर्वः-- पदमंजरी} शिष्लृ विशेषणे' (धा.पा.1451) इत्यस्माद्धातोर्विपूर्वात् करणे ल्युट्। विशिष्यतेऽनेनेति विशेषणम्। तस्येदं लक्षणम्-- भदेमिति। यत् सामान्याकारेण प्रवृत्तमनेकप्रकारवद्वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्यैकत्र प्रकारे व्यवस्थापयति, तद् भेदकं विशेषणमिति। `भेद्यं विशेषणम्' इति। विशेषणीयं विशेष्यम्। विपूर्वात् तस्माद्धातोः `ऋहलोर्ण्यत्' (3.1.124) इति कर्मणि ण्यत्। तस्येदं लक्षणम्, भेद्यमिति। यदनेकप्रकारवद्वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्यैकत्र प्रकारे व्यवस्थाप्यते तद्भेद्यं विशेष्यमिति। अथ किमर्थं विशेषणविशेष्ययोरुभयोरुपादानं क्रियते ? न; अन्यतरस्यैव क्रियेत, सम्बन्धिशब्दत्वाद्धि तयोरन्यतरोपादानेनैवेतरस्याप्यवगतिर्भवत्येव ? सत्यमेतत्; यत्र पूर्वोत्तरपदे प्रत्येकं विशेषणविशेष्यभूते भवतस्त्रैव समासो भवतीति ज्ञापानार्थमुभयोरुपादानम्, यथा-- नीलोत्पलमिति. अत्र नीलार्थो भ्रमरादिभ्यो व्यावर्त्योत्पलार्थेनोत्पले व्यवस्थाप्यते। उत्पलार्थोऽपि रक्तोत्पलादिभ्यो व्यावर्त्य नीलार्थेन नीले व्यवस्थाप्यत इत्यस्ति प्रत्येकं विशेषणविशेष्यभावः। स यत्र नासत्ि तत्र तु न समासः यथा-- वृक्षः शिंशपेति। वृक्षो हि शिंशपात्वं व्यभिचरति, शिंशपा तु न वृक्षत्वम्। अतस्तत्प्रकारान्तरेभ्यः पलाशादिभ्यस्तं व्यवच्छिनत्तीति शिंशपा तस्य विशेषणं भवति, न तु विशेष्यम्। वृक्षस्तु विशेष्यः शिंशपार्थस्तु वृक्षत्वं न व्यभिचरतीति न तस्यासौ विशेषणं भवति। अथ किं न भवितव्यमेव शिंशपावृक्षः, आम्रवृक्ष इति ? विशेषणसमासेन भवितव्यम्, यदा शिंशपादिशब्दानां विशेषे वृत्तिर्नावधार्यते। तथा हि-- शिंशपादिशब्दाः फलस्य वृक्षस्य मूलस्य च वाचकाः सामान्यशब्द इति तदर्थानां वृक्षत्वव्यभिचारादद्विशेष्यभावः, वृक्षश्च विशेषणं भवति। यदा तु कुतश्चित् प्रकरणादर्थाद्वा वृक्षाद्यर्था एवावसितवृत्तयो भवन्ति तदा न भवितव्यम्। ननु च वृक्षार्थावसितवृत्तित्वाद्वृक्षशब्दस्य तदा प्रयोग एव नोपपद्यते, उक्तार्थत्वात्, `उक्तार्थानामप्रयोगः' (व्या.प.60) इति वचनात्। ततश्च समासस्याप्रसङ्ग एव। तत्किं तन्निवृत्त्यर्थेनोभयग्रहणेन? नैतदेवम्; क्वचिदुक्तार्थानामपि लोके प्रयोगो दृश्यते, यथा-- अपूपौ द्वावानयेति।

यदि तर्हि यत्रोभयोः प्रत्येकं विशेषमविशेष्यभावस्तत्र समासेन भवितव्यम्, एवं सति प्रत्येकमुपसर्जनत्वं स्यात्, उभयोरपि विशेषणत्वात्, विशेषणस्येह सूत्रे प्रथमानिर्दिष्टत्वात्, ततश्चोत्पलनीलरमित्यपि स्यात्, नीलोत्पलमिति तु सर्वदैवेष्यते ? नैष दोषः; यस्मादेकतरं प्रधानम्, इतरदप्रधानम्। द्वयोः प्राधान्ये परस्परानुपकारित्वादसम्बन्धयोरेकत्र प्रयोगो न स्यात्। अप्राधान्येऽपि द्वयोः प्रधानापेक्षावतोर्नास्ति परस्परोपकारित्वमिति न स्यादेवैकत्र प्रयोगः। तस्मादेकत्र प्रधानम्, अपरं त्वप्रधानम्। यच्चाप्रधानं तेदवोपसर्जनसंज्ञां भवति, नेतरत्; अन्वर्थत्वादुपसर्जनसंज्ञायाः-- उप = समीपे विशेष्ये स्वार्थ सृजति = क्षिपतीति। नीलशब्दश्चाप्रधानम्, तदर्थस्य गुणस्याप्राधान्यात्; उत्पलशब्दस्तु प्रधानम्, तदर्थस्य द्रव्यस्य प्राधान्यात्। तस्मान्नीलशब्द एवोपसर्जनम्, नोत्पलशब्द इति न भवति पूर्वोक्तदोषावसरप्रसङ्गः। यत्रोभावपि तत्र पर्यायेणोपसर्जनभावः, यथा-- कुब्जखञ्ज, खञ्जकुब्ज इति।

अथ कुतोऽत्र द्रव्यस्य प्राधान्यमवसितम् ? उच्यते;यथा-- श्वेतं छागमालभेतेत्यस्यां देशनायां देशनायां श्वेतगुणस्याभावेऽन्यवर्णस्यापि च्छागस्यालम्भनाच्छागाबावे श्वेतगुणस्यान्यद्रव्यस्यानालम्भनाच्च। न हि च्छागाभावे पिष्टकपिण्डीलमालभ्य याज्ञिकः कृती भवति। यदि च प्रधानं गुणः स्यात्तदा यथा छागाभावे पिष्टकपिण्डी नालभ्यते, तथा श्वेतगुणाभावेऽन्यगुणोऽपि च्छागो नालभ्यते। न च स नालभ्यते, तस्मात् द्रव्यमेव प्रधानम्, न गुण इति। ननु चोत्पलशब्दोऽपि नैव द्रव्यशब्दोऽयमिति व्यवस्थाप्यते। एवं नीलशब्देऽप्यतिप्रसङ्गः, प्रभृत्या विनाशात् स्वाधारं द्रव्यं नैव जहाति। अतो द्रव्यात्मभूतत्वाज्जातेस्तन्निमित्तकः शब्दो द्रव्यस्योत्पत्ते। गुणाः पुनरपायिनोऽनपायिनो वा सत्येतस्मिन् द्रव्ये वर्त्तन्ते निवर्त्तन्ते च। तस्मान्नैते द्रव्यात्मभूता इति न तन्निमित्तशब्दो द्रव्यशब्दो व्यवस्थाप्यत इत्यलमतिप्रसङ्गेन।

`तक्षकः सर्पः' इति। ननु च तक्षकः सर्पस्य विशेषणं भवत्येव, तथा हि-- सर्प त्युक्ते सर्पसामान्यं प्रतीयते, न सर्पविशेषः। तक्षक- सर्प इत्युक्ते सर्पविशेषोऽतक्षकाद्व्यावृत्तोऽवसीयते, तदयुक्तं प्रत्युदाहरणमेतत्; नैतदस्ति;उक्तं ह्येतत्- यत्रैकैस्योभयत्र भावस्तत्र समास इति। न तु कदाचित् सर्पार्थस्य तक्षको विशेष्यो भवति। कथं न भवति ? तक्षकस्य सर्पत्वाव्यभिचारात्। ननु च तक्षकशब्दस्यानेकप्रकारत्वेन प्रकारान्तरनिवृत्तये युज्यत एव सर्पस्य तक्षकोऽपि विशेष्यः ? नैतदस्ति; न नामधेयस्य क्रियाशब्देन तुल्यमर्थाभिधानसामर्थ्यम्। अवयवार्थानुसारेण हि क्रियाशब्दोऽर्थं बोधयति, समुदायरूपेण तु नामधेयम्। `अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी' (व्या.प.108) इति तस्यां सत्यां क्रियाशब्दार्थविषयापेक्षा नोपजायत एव। `लोहितस्तक्षकः' इति। भवति लोहितो विशेषणम्, न तु तक्षको विशेष्यम्। तस्य लोहितत्वाव्यभिचारात्। यदि तर्हि तक्षको न विशेष्यः, लोहितोऽपि विशेषणं न स्यात्; विशेषणस्य विशेष्यापेक्षत्वात्। न च शक्यं तक्षकाद्यर्थान्तरं पटादिकं विशेष्यं तदपेक्षया लोहितस्य विशेषणत्वं परिकल्पयितुम्। एवं हि लोहिताद्यदर्थान्तरं तीव्रविषादिकं विशेषणं तदपेक्षं तक्षकस्यापि विशेष्यत्वं प्रसज्येत। तस्माद्विस्पष्टार्थमुभयोर्ग्रहणमित्यपरे।।

58. पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च। (2.1.58)

`पूर्वस्यैवायं प्रपञ्चः' इति। तेनैव सिद्धत्वात्। अस्ति ह्यत्रापि प्रत्येकं पूर्वोत्तरपदयर्विशेषणं विशेष्यभावः।।

59. श्रेण्यादयः कृतादिभिः। (2.1.59)

`श्रेण्यादिषु च्व्यर्थवचनम्' इति। अभूततद्भावे वर्त्तमानानां समासो यथा स्यात्। यदा हि श्रेण्यादिशब्दानामर्था अपरिनिष्पन्ना एव निष्पाद्यन्ते तदा समास इष्ते। यदा तु निष्पन्ना एव ते रूपान्तरेण क्रियते तदा श्रेणयः कृता दण्डिताः सत्कृता वेत्येवमाद्यर्थविवक्षायां नेष्यते। कृतशब्दस्य दण्डितादिशब्दानामर्थेषु वृत्तिर्न सम्भवतीत्येतच्च नाशङ्कनीयम्। करोतेः क्रियासामान्यवाचित्वात्। अनेकार्थत्वाद्वा धातूनाम्। श्रेण्यादिषु च्व्यर्थवचनमित्यस्यायमर्थः-- च्व्यर्थ उच्यते = प्रत्याय्यते येन तच्च्व्यर्थवचनम्। `कर्त्तव्यम्' इति। येन श्रेण्यादिषु समासकराणत्वेनोपात्तेषु च्व्यर्थता प्रतिपद्यते तद्वयाख्यानं कर्त्तव्यमित्यर्थः। तत्रेदं

व्याख्यानम्-- बहुलग्रहणमिहानुवर्त्तते, तेन च्व्यर्थानामेव समासो भवतीति नाच्व्यर्थानाम्। `च्व्यन्तानाम्' इत्यादि। च्वेर्विकल्पेन विधानाद्द्विविधाश्च्व्यर्थाः-- च्व्यन्ताः, अच्व्यन्ताश्च। तत्र ये श्रेण्यादयोऽच्व्यन्तास्तेषामनेन समासः। च्व्यन्तानान्तु `ऊर्य्यादिच्विडाचश्च' (1.4.61) इति गतिसंज्ञायां सत्यां परत्वात् `कुगतिप्रादयः' (2.2.18) इति समासो भविष्यतीति।।

60. क्तेन नञ्विशिष्टेनानञ्। (2.1.60)

अयं विशिष्टशब्दोऽस्त्येव सावधारण आधिक्ये वर्त्तमानः। यथा-- देवदत्तयज्ञदत्तावाढ्यावभिरूपौ प्रेक्षावन्तौ। देवदत्तस्तु यज्ञदत्तात् स्वाध्यायेन विशिष्टः; स्वाध्यायेनैवाधिक इति गम्यते। अन्ये तु गुणाः समाना एव भवन्ति। अस्ति च निरवधारण आधिक्ये वर्त्तमानः, यथा-- देवदत्तयज्ञदत्तावाढ्याविभिरूपौ प्रेक्षावन्तौ। देवदत्तस्तु यज्ञदत्तात् स्वाध्यायेन विशिष्टः, स्वाध्यायेनाधिक इति गम्यते। अन्ये तु गुणाः समाना भूयांसो वा, ते न विवक्षिता भवन्ति। यद्यपि चाभिन्नरूपमेव वाक्यद्वयमेतत्, तथापि प्रकरणादेः कुतश्चिदर्थभेदो गम्यते, यथा-- आराच्छब्दे दूरान्तिकार्थभेदः। तत्र यदि निरवधारण आधिक्ये वर्त्तमानो विशिष्टशब्दो गृह्येत, तदा सिद्धं च तदभुक्तञ्चेत्यत्रापि स्यात्, अस्त्यत्र नञाधिकं क्तान्तम्। तस्मात् सावधारण आधिक्ये वर्तमानं विशिष्टशब्दं परिगृह्याह-- `नञैव विशेषो यस्य' इत्यादि। `प्रकृत्यादिकम्' इति। आदिशब्देन प्रत्ययोपसर्गयोः परिग्रहः। `अनञ्' इति। अविद्यामानो नञ् यस्मिन् क्तान्ते तदनञ्। `कृतञ्च तदकृतञ्च' इति। कथं पुनरेकमेव वस्तु कृतं स्यादकृतञ्च ? अवयवधर्मेण समुदायस्य तथा व्यपदेशाददोषः। कृतभागसम्बन्धात् कृतम्, अकृतभागसम्बन्धात् तदेवाकृतमित्युच्यते। अथ वा- यदर्थं कृतं तत्रासामर्थ्यादकृतम्, यथा-- पुत्रकार्यासामर्थ्यात् पुत्रोऽप्यपुत्र इति। यदि नञेव विशेषो यस्य सर्वमन्यत् प्रकृत्यादिकं तुल्यं तेन समासः, एवं सति यस्य नुडप्यधिक इडागमो वा, तेन सह समासो न भवतीत्याह-- `नुडिटौ' इत्यादि। यत्तु नञ्विशिष्टं क्तान्तं तद्भक्तौ नुडिटौ, अतस्तद्ग्रहणेन गृह्येते, अतो नास्य भेदकौ तौ। अभेदकावित्यर्थः। तेन तदधिकमपि नञ्विशिष्टमेव भवतीति तेन समासो भवत्येव। `अशितानशितेन' इति। `तस्मान्नुडचि' (6.3.74) इति नुट्। `क्लिष्टाक्लिशितेन' ति। `क्लिशः क्त्वानिष्ठयोः'
(7.2.50) इति पक्षे इट्। अनञिचि शक्यमकर्तुम्। यदि स नञ् समस्येत तदा नञ्विशिष्टता नोपपद्यते; द्वयोरपि नञ्सम्बन्धात्। तस्मान्नञ्विशिष्टग्रहणादेवानञ् समस्यत इत्येषोऽर्थो लभ्यत इत्यनञ्ग्रहममनर्थकम्। तत् क्रियते विस्पष्टार्थम्।
`कृतापकृतादीनाम्' इत्यादि। कृतापकृतप्रभृतीनामुपसंख्यानम् = प्रतिपादनं कर्त्तव्यम्। तत्रेदं प्रतिपादनम्-- बहुलग्रहणमिहानुवर्त्तते, तेन कृतापकृतादीनामपि समासी भवतीति। `कृतापकृतम्' इति। तदेकदेशस्येष्टस्य करणात् कृतम्। अपकृतञ्च तदेकदशस्यानभिमतस्य करणात्। `भुक्तविभुक्तम्' इति। भुक्तं त्वभ्यवहृतत्वात्, विभुक्तञ्चाशोभनत्वात्। विशब्दोऽत्राशोभवत्वं प्रतिपादयति विरूपवत्। अथ वा- भुक्तञ्च तत्प्रत्यागतञ्चेति `गतप्रत्यागतम्'। यातञ्च तत्पूर्वमनुयातञ्च पश्चात् `यातानुयातम्'। `क्रयाक्रयिका' िति। महान् क्रयः क्रयशब्दोनोच्यते, अल्पस्तु क्रयिकाशब्देन। क्रयावयवसम्बन्धात् क्रयः, क्रयिकावयवसम्बन्धात् क्रयिता, क्रयश्चासौ क्रयिका चेति क्रयाक्रयिका। `अन्येमामपि दृश्यते' (6.3.137) इति दीर्घः। एवं पुटश्चासौ पुटिका चेति `पुटापुटिका'। फलञ्च तत् फलिका चेति `फलफलिका'। मानञ्च तदुन्मानिका चेति `मानोन्मानिका'। `समानाधिकरणाधिकारे' इत्यादि। अत्राप्युपसंख्यानशब्दस्य प्रतिपादनमर्थः। प्रतिपादनन्तु पूर्ववदेव।।

61. सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः।

`पूज्यचमानवचनैरिति वचनात्' इत्यादि। पूज्यमनत्वं ह्यवमुत्तरपदस्य भवति यदि पूजावचना भवन्ति, नान्यथा; तस्मात् पूज्यमानग्रहणात् सदादयः पूजावचना विज्ञायन्ते। अत एव सच्छब्देन शतृशानचोर्ग्रहणं न भवति, न हि तौ पूजामाहतुः। `उत्कृष्टा गौः कर्दमात्' इति। उद्धृतेत्यर्थः। अथ कथं महाद्रुमः, महोदधिरिति समासः, न ह्यत्र पूजा गम्यते, किं तर्हि ? प्रमाणातिरेक उत्तरपदार्थस्य ? यद्यप्येवम्, तथापि बहुलग्रहणानुवृत्तेर्भविष्यति।।

62. वन्दारकनागकुञ्जरैः पूज्यमानम्। (2.1.62)

वन्दारकादयो जातिशब्दाः। ते चोपमानत्वे सति पूजावचना भवन्ति। तत्र व्याघ्रादेराकृतिगणत्वात् `उपमितं व्याघ्रादिभिः' (2.1.56) इत्येवं सिद्धे समान्यप्रयोगगेऽपि यथा स्यादित्येवमर्थोऽयमारम्भः। "`पूज्यमानम्' इति वचनाद्वृन्दारकादयः पूजावनचना गृह्यन्ते" इति। न ह्यन्यथा पूज्यमानत्वमुपपद्यत इति भावः।
`सुषीमो नागः' इति। ननु च विशेषणं विशेष्येणेति वर्त्तते। न च नागादन्यः सुषीमोऽस्ति, संज्ञा ह्येषा नागस्यैव ? एवं तर्हि प्रत्युदाहरणदिगियं वृत्तिकृता दर्शिता।इदन्त्वत्र प्रत्युदाहरणम्--देवदत्तो नागो यस्मान्मूर्ख इति।।

63. कतरतमौ जातिपरिप्रश्ने। (2.1.63)

`जातिपरिप्रश्न एव व्युत्पाद्येते'इति। `किंयत्तदौर्निर्धारणे'(5.3.92) इत्यनुवर्त्तमाने `वा बहूनाम्' (5.3.93) इत्यादिना। स्यादेतत्-- कतरशब्दविशेषणार्थ जातिपरिप्रश्नग्रहणमित्याह-- `कतरशब्दोऽपि' इत्यादि। `तदेव ज्ञापयति' इति। यदि तर्हि कतमशब्दो जातिपरिप्रश्न एव वर्त्तमानो गृह्यते, जातिपरिप्रश्नग्रहणमनर्थकं स्यात, विनाऽपि तेन यथोक्तया नीत्या कतरतमशब्दौ जातिपरिप्रश्न एव वर्त्तमानो ग्रहीष्येते। `तथा च' इत्यादि। यत एव

तकमशब्दस्य जातिपरिप्रश्नादन्यत्रापि वृत्तिः, एवञ्च कृत्वा भवतां देवदत्तः कतम इति प्रत्युदाहरणमुपपद्यते। अन्यथा तन्नोपपद्येत्; तस्य जातिपरिप्रश्नादन्यत्राप्रवृत्तेः।।

64. किं क्षेपे। (2.1.64)
`किंसखा' इति। `अनङ सौ' (7.1.93) इत्यनङादेशः। अथ किंराजेत्यादौ `राजाहः सखिभ्यष्टच्' (5.4.91) `गोरतद्धितलुकि' (5.4.92) इति टच् समासान्तः कस्मान्न भवतीत्याह-- `किमः क्षेपे' इत्यादि। अत्र `न पूजनात्' (5.4.69) इत्यतः `न' इत्यनुवर्त्तते।।

65. पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः। (2.1.65)
विशेषणमित्यादिना समासे प्राप्ते वचनमिदं परनिपातार्थम्। गुणशब्दा ह्येते। तत्र यदि तेन समासः स्यात तदैषां पूर्वनिपातः प्रसज्येत। अथ धूर्त्तग्रहणं किमर्थम्, यावता कुत्सनशब्दोऽयम्, `कुत्सितानि कुत्सनैः' (2.1.53) इत्येवं समासः सिद्ध ? इत्याह-- `धूर्त्तग्रहणमकुत्सार्थम्' इति। शब्दप्रवृत्तिनिमित्तकुत्सायां समासो विज्ञायते, न कुत्सायाम्।।

66. प्रशंसावचनैश्च। (2.1.66)
`रूढिशब्दाः प्रशंसावचना गृह्यन्ते' इति। त्रिप्रकारा हि प्रशंसाशब्दाः- केिज्जातिशब्दाः परार्थे प्रयुज्यमानाः प्रशंसामाचक्षते यथा-- सिंहो देवदत्त इति। केचिद्गुणशब्दा गुणगुणिसम्बन्धेन प्रशंसावचना भवन्ति, यथा-- रमणीयो ग्रामः, शोभनः पाचक इति। केचिद्रूढिशब्दा मतल्लिकादयः; तेषां प्रशंसैव शब्दार्थः। तदिह वचनग्रहणात् प्रशंसायामेव ये वर्त्तन्ते ते गृह्यन्ते रूढिशब्दाः। `गोप्रकाण्डम्' इति। शोभनः प्रशस्तो गौरित्यर्थः। योगविभागोऽसन्देहार्थः। यदि पूर्वयोग एव प्रशंसावचना गृह्येरन्, तदा सन्देहः स्यात्-- किं पोटादिभिः प्रत्येकं वचनमभिसम्बध्यते ? अथ प्रशंसयेति ? पोटादिभिः सम्बन्धे तत्पर्यायैरपि समासः स्यात्।।

67. युवा खलतिपलितवलिनजरतीभिः। (2.1.67)
`खलत्यादिभिः समानाधिकरणैः' इत्यादि। यद्येवम्, किमर्थं जरतीभिरिति स्त्रीलिङ्गेन निर्देशः, जरद्भिरित्येवं नाम निर्देशः कर्त्तव्यः स्यात्, न हि जरतीशब्देन स्त्रीलिङ्गेन युवशब्दस्य पुंलिङ्गस्य सामानाधिकरण्यमुपपद्यत इत्याह-- `जरतीभिरिति स्त्रीलिङ्गेन निर्देशः' इत्यादि। कथं पुनरनेन निर्देशेनैषा परिभाषा शक्यते ज्ञापयितुम् ? यद्येषा न स्यात् तदा जरतीभिरित्येवं निर्देशोऽनर्थकः स्यात्. तथा च समानाधिकरणाधिकारात् समानाधिकरणेन जरतीशब्देनायं समासो विज्ञायते। न च तेन स्त्रीलिङ्गेन पुंसि वर्त्तमानस्य युवशब्दस्य सामानाधिकरण्यं भवति, तदेष निर्देशः कथमर्थवान् भवति ? यद्येषा परिभाषाऽवतिष्ठते ! तस्यां हि सत्यां युवशब्दस्य ग्रहणे युवतिशब्दस्य ग्रहणं भवतीत्युपपद्यते। युवतिजरतीशब्दयोः सामानाधिकरण्यम्, तस्मिंश्च सति तयोः समासः। तेदवं जरतीभिरिति निर्देशो ज्ञापयति-- एषा परिभाषाऽस्तीति। नन्वेवमपि जरत्या समास उच्यमाने जरता न प्राप्नोति-- युवजरन्निति ? नैष दोषः; वृत्त्यन्तरे हि जरद्भिरिति पठ्यते। उभयथाऽप्याचार्येण शिष्याः प्रतिपादिता इत्युभयं सिध्यति।।

68. कृत्यतुल्याख्या अजात्या। (2.1.68)
`तुल्यपर्यायाश्च' इति। अथ स्वरूपग्रहणं कस्मान्न विज्ञायते ? एवं मन्यते--कृत्य इत्यर्थग्रहणम्। अतस्तत्साहचर्यात् तुल्य इत्यर्थस्यैव ग्रहणं युक्तम्, तत्रार्थे कार्यासम्भवात् तद्वाचिनां समासो विज्ञायत इत्याख्याग्रहणं तुल्यनामधेयपरिग्रहार्थम्। अन्यथा गौर्वाहीक इत्यत्रापि स्यात् ; गोशब्दस्येह सादृश्यार्थत्वात्। सर्व एव हि शब्दाः परपदार्थे प्रयुज्यमानाः सादृश्यं गमयन्ति। आख्याग्रहणे तु क्रियमाणे गोशब्दोऽत्र तुल्यनामधेयं न भवतीति समासाभावः। भोज्योष्णमित्यादावुष्णादयः शब्दा गुणवचनाः। तत्रासत्यस्मिन् योगे विशेषणसमासे सति तेषां पूर्वनिपातः स्यात्। अतः परनिपातार्थ आरम्भः। `तुल्यमहान्' इति। यद्यप्यत्र `सन्महत्' (2.1.561) इत्यादिना समासः प्राप्नोति, तथापि परत्वादनेनैव भवति। तुल्याख्यायामस्यावकाशः-- तुल्यश्वेत इति। तस्य चातुल्याख्यायामवकाशः-- महापुरुष इति। `भोज्य ओदनः' इति। ओदन शब्दोऽत्र जातिवचनः।।

69. वर्णो वर्णेन । (2.1.69)
`विशेषणं विशेष्येण' (2.1.57) इति वर्त्तते। तत्र यदि द्वयोरपि वर्णशब्दयोः स्वरूपग्रहणमिह स्यात्, विशेषणविशेष्यभावो नोपपद्येत; अभिन्नार्थत्वात्। न हि तदेव देवदत्तस्य विशेषणत्वं विशेष्यत्वं चोपपद्यते। अथाप्येकस्य स्वरूपग्रहणं स्यात्, अपरस्यार्थग्रहणम् ? एवप्येकः सामान्यवाची स्याद्वर्णशब्दः, द्वितीयस्तु विशेषवाची कृष्णादिशब्दः। ततश्च प्रत्येकं विशेषणत्वं विशेष्यत्वं च न स्यात्। यत्र च तदुभयमस्ति तत्र समास इति प्रागुभयग्रहणस्य प्रयोजनमुक्तम्। तस्मादुभयत्राप्यर्थग्रहणं विज्ञायत इत्याह-- `वर्णविशेषवाचि' इत्यादि। `कृष्णसारङ्गः, लोहितसारङ्गः' इति। ननु च कृष्णशब्दो लोहितशब्दश्चावयवे वर्त्तते सारङ्गशब्दस्तु समुदाये; यथा-- शबलशब्दः, तत्कथमवयववृत्तेः कृष्णादिशब्दस्य समुदायवृत्तिना सारङ्गादिशब्देन सामानाधिकरण्यमित्याह-- `अवयवद्वारेण' इत्यादि। कृष्ण इत्युच्यते, लोहितावयवसम्बन्धाल्लोहित इति। अत एव गौणत्वादत्र सामानाधिकरण्यस्य `विशेषणं विशेष्येण' (2.1.57)

इत्यादिना समासो न प्राप्नोतीतीदमारभ्यते महत्याः संज्ञायाः करणमन्वर्थसंज्ञा यथा विज्ञायेतेति। तेनाप्रधानमुपसर्जनमिति। न चात्र समुदायोऽप्रधानम्, किं तर्हि ? प्रधानमेव। अवयवानान्तु तदर्थत्वादप्राधान्यम्। अतोऽवयववचनस्यैव कृष्णशब्दादेरुपसर्जनत्वम्। न समुदायवचनस्य सारङ्गादिशब्दस्य।।

70. कुमारः श्रमणादिभिः। (2.1.70)
`तैः सह स्त्रीलिङ्ग एव कुमारीशब्दः समस्यते' इति। न तु पुंल्लिङ्ग इत्यवधारणेन दर्शयति। न हि पुंल्लिङ्गस्य स्त्रीलिङ्गेन सामानाधिकरण्यमुपपद्यत इति भावः। `तैरुपभयथा' इति। स्त्रीलिङ्गः, पुंल्लिङश्च। कथं पुनः पुंल्लिङ्गैः समास उच्यमानः स्त्रीलिङ्गैः स्यादित्यत आह-- `प्रातिपदिकग्रहणे' इति। गतार्थम्।।

71. चतुष्पादो गर्भिण्या। (2.1.71)
`चतुष्पादः' इति। चत्वारः पादा यासां ताश्चतुष्पादः। `पादस्य लोपोऽहस्त्यादिभ्यः' (5.4.138) इत्यन्तस्य लोपः। `चतुष्पाज्जातिरिति वक्तव्यम्' इति। चतुष्पादो जातिवचना एव गर्भिण्या समस्यन्त इत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- पोटादि(2.1.65) सूत्रादिह जातिग्रहणमनुर्त्तते। तेन चतुष्पज्जातिवाच्येव गर्भिण्या समस्यते, नान्यदिति।।

72. मयूरव्यंसकादयश्च। (2.1.72)
`मयूरव्यंसकः' इति। मयूरश्चासौ व्यंसकश्चेति मयूरव्यंसकः। व्यंसकशब्दस्य पूर्वनिपाते प्राप्ते परनिपातार्थः पाठः। एवं चात्र मयूरव्यंसकादीनां यवनमुण्डपर्यन्तानाम्। `छन्दसि ह्स्तेगृह्य' इत्यादि। समासेऽनञ्पूर्वे क्त्वो ल्यप्' (7.1.37)। भाषायान्तु -- हस्तेगृहीत्वा, पुनर्दत्त्वेत्येवं भवति। `एहीडादयोऽन्यपदार्थे' इति। एहि ईड यत्र कर्मणि वर्त्तते तदुच्यते-- `एहीडम्' इति। एवम्-- `एहियवम्' इति। एहिवाणिजेति यस्यां क्रियायां सा `एहिवाणिजा'। एवम्-- `अपेहिवाणिजा, प्रेहिवाणिजा'। एहि सवागतमिति यस्यां क्रियायां सा `एहिस्वागता'। एवम्-- `अपेहिस्वागता'। प्रौह कटमिति यस्यां सा `प्रोहकटा'। एं प्रोहकर्दमादय आहरवसनान्ताः। कृन्धि विचक्षणेति यस्यां क्रियायां सा `कृन्धिविचक्षणा' । `उद्धरोत्सृज' इति। तिङन्तयोः समासः। `आख्यातमाख्यातेन क्रियासात्ये' (ग.सू.20) इत्येवं सिद्धेऽसातत्यार्थं वचनम्। उद्धरोत्सृजति यस्यां क्रियायां सा उद्धरोत्सृजा। क्रियाप्रधानश्चायं समासः। `उत्पतनिपता'। `उत्तमविधमा'। एवमुद्धरोत्सृजेत्यादिकमसातत्यविषयमेव। `उच्चावचनम्' इति निपात्यते। उदक् चावाक् चिति विगृह्य। उच्चैश्च नीचैश्चेति विगृह्योच्चनीचमिति निपात्यते। आचितञ्चोपचितञ्चेति विगृह्य `आचोपचम्'। आचितञ्च पराचितञ्चेति `आचपराचम्'। निश्चितञ्च प्रचितञ्चेति `निश्चप्रचम्'। न किञ्चन `अकिञ्चनम्'। `स्नत्वाकालकः'। `पीत्वास्थिरकः'। `भुक्त्वासुहितः' इत्येषामन्तोदात्तार्थः पाठः। ल्यब्भावश्च निपात्यते। `प्रोष्यपापीयान्' इति। ऐकपद्यमैकस्वर्यञ्च समासाद्भवति। एवम्-- उत्पत्यपाकलादीनाम्। `नित्यरोहिणी। निषण्णश्यामा। अपेहिप्रसवा। इहपञ्चमी। इहद्वितीया' इति। ऐकपद्यमैकस्वर्यञ्च समासे भवति।
`जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारञ्चाधिदधाति' इति। जहीति लोण्मध्यमपुरुषैकवचनम्। तदन्तं कर्मणा च बहुलं समस्यत आभीक्ष्ण्ये गम्यमाने समासेन चेत्कर्त्ता चाभिधीयते। जहिजोडमित्याभीक्ष्ण्यं य आह स उच्यते `जहिजोडः' इति। जहिस्तम्ब इति, लोट्; सिप्, `हन्तेर्जः' (6.4.36) इति जादेशः। जोडादेरत्र कर्मभावः।
`आख्यातम्' इत्यादि। तिङन्तं तिङन्तेन सह समस्यते क्रियासातत्ये गम्यमाने। अश्नीत पिबतेत्यसकृद्यत्रोच्यते तत्र `अश्नीतपिबत' इति प्रयुज्यते। क्रियाप्रधानश्चायं समासः। एवं पचतभृज्जतेत्येवमादयो वेदितव्याः। भिन्धि लवणमिति यत्रीभिधीयते सा `भिन्धिलक्षणा'। एवं `पचलवणा' इति।।
इति श्रीबोधसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
द्वितीयाध्यायस्य
प्रथमः पादः

2.2
अथ द्वितीयाध्यायस्य
द्वितीयः पादः
1. पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे। (2.2.1)
`सामर्थ्यादेकदेशवचनाः' इति। यदि हि पूर्वादयः शब्दा एकदेशवचना न स्युसतदोत्तरपदस्यैकदेशित्वं न गम्येत;एकदेशिन एकदेशापेक्षत्वात्। तस्मात् सामान्योक्ता अपि पूर्वादयः शब्दा सामर्थ्यादेकदेशवचनाः समस्यन्त इति विज्ञायते। एकाधिकरणग्रहणमेकदेशिनो विशेषणमित्यस्यार्थं विस्पष्टीकर्तुमाह--

`एकं च' इत्यादि। एकमित्येकसंख्याविशिष्टं द्रव्यमित्यर्थः। `एकद्रव्यम्' इत्यनेनाधिकरमशब्दोऽत्र द्रव्ये वर्त्तमान उपात्त ति दर्शयति। ननु `एकदेशिना' इति तृतीयान्तमेतत्, `एकाधिकरणे इत्येतत् सप्तम्यन्तम्, तत् कथं तयोर्भिन्नविभक्तिकयोः सामानाधिकरण्येन विशेषणविशेष्यभाव उपपद्यते, कथञ्च न स्यात्; भिन्नार्थत्वात् ? नैतदस्ति; `छन्दोवत् सूत्राणि भवन्ति' (म.भा.1.1.1) इत्यतो `व्यत्ययो बहुलम्' (3.1.85) इति बहुलवचनात्। `एकाधिकरणे' इत्यत्र तृतीयार्थ एवैषा सप्तमी। न `सप्तम्यधिकरणे च' (2.3.36) इत्यनेन। अतो नास्ति भिन्नार्थत्वमित्यदोषः। `षष्ठीसमासापवादोऽयं योगः' इति। `एकदेशिना' इति वचनात् पूर्वादयः शब्दा एकदेशवचना आश्रीयन्ते। सम्बन्धिशब्दा हि नियतमेव प्रतियोगिनमुपस्थापयन्ति। तत्रावयवावयविसम्बन्धे स्तेयकदेशिनः षष्ठ्यामुपजनितायां `षष्ठी' (2.2.8) इति समासः प्राप्नोति, अतस्तदपवादोऽयं योग इति। `पूर्वकायः' इत्यत्र काय एकदेशी, एकद्रव्यञ्च; एकसंख्यायुक्तत्वात्।

`पूर्वं नाभेः कायस्य' इति। नाभेरिति दिग्योगलक्षणा पञ्चमी। नाभेरुपरिष्टात् यत् पूर्वं तत् कायस्येत्येषोऽर्थो विवक्षितः। तेनात्र नाभिरेकदेशिनी न भवति। किं तर्हि ? अवधिभूता, तद्वाची नाभिशब्दः पञ्चम्यन्तो न समस्यन्ते। यस्त्वेकदेशी कायस्तद्वाचिनः कायशब्दस्य भवत्येव समासः। सत्यपि पूर्वशब्दस्य सापेक्षत्वे कायस्य प्राधान्यात् प्रधानस्यच सापेक्षस्यापि समासो भवतीति ज्ञापितमेतत् `उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' (2.1.56) इत्यत्र। `पूर्वं {छात्राणामामन्त्रय इत मूलपाठः, पदमञ्जरीसम्मतश्च।} छात्राणामामन्त्रयस्व'इति। अत्र बहुत्वसंख्याविशिष्टैकदेशिनश्छात्रा इति न भवति समासः। ननु चात्र परत्वात् `न निर्द्धारणे' (2.2.10) इति षष्ठीसमासनिषेधो भविष्यति। तत् {किमेवाधिकरणे- इति मुद्रित पाठः।} किमेकाधिकरणग्रहणेन ? नैतदस्ति; यदि तर्ह्यामन्त्रयस्वेत्येतन्नापेक्ष्यते तदा पूर्वं छात्राणामित्येतावद्वाक्यं परिसमाप्यते,तदा निर्द्धारणाभावान्नायं तस्य प्रतिषेधस्य विषय इत्यसत्येकाधिकरणेऽनेकसंख्येनाप्येकदेशिना समासः स्यात्। अथ सर्वं हि वाक्यं क्रियया परिसमाप्यत इति पूर्वं छात्राणामित्यत्र यां काञ्चित् क्रियामध्याहृत्य निर्द्धारणं परिकल्प्येत, एवं `पूर्वं कायस्य' इत्यत्रापि निर्द्धारणं स्यात्। अस्ति ह्यत्राप्यकर्षणक्रिया निर्द्धारणहेतुः। तथा च तस्यैव योगस्य विषये किलारभ्यमाणोऽयं योगस्तदपवादः स्यात्. न चोत्सर्गापवादयोर्विप्रतिषेध उपपद्यते, तत्कथं परत्वात् `न निर्द्धारणे' (2.2.10) इति प्रतिषेधः प्रवर्त्तते-- संख्याविसायपूर्वस्येत्यादि ? यदयं `संख्याविसायपूर्वस्याह्नस्य' (6.3.110) इत्याह, ततो ज्ञापकादवसीयते-- सर्वेणैकदेशिनाऽह्नः समासो भवतीति। अन्यथा हि सायपूर्वत्वमह्नशब्दस्य नोपपद्यत इत्ययुक्तमेतद्वचनं स्यात्।।

2.अर्द्धं नुपंसकम्। (2.2.2)

`समप्रविभागे त्वर्द्धशब्दो नपुंसकमाविष्टलिङ्गस्तस्येदं ग्रहणम्' इति। यद्येवम्, समग्रहणमेव कर्त्तव्यम् ? नैवं शक्यम्, अनेकार्थत्वात् समशब्दस्य। तथा हि-- स निम्नोन्नतादिरहितेऽपि देशे वर्त्तते-- यथा--समे यजेतेति, निम्नोन्नतादिरहिते देशे यजेतेत्यर्थः। अथापि समप्रविभाग इच्युच्यते, एवमपि गुरुत्वं स्यात्, तस्मान्नपुंसकग्रहणं कर्त्तव्यम्? न कर्त्तव्यम्; अर्द्धमिति नपुंसकलिङ्गेन निर्देशादेव हि नपुंसकस्य ग्रहणं भविष्यति, नैतदस्ति; असति हि नपुंसकग्रहणं शब्दरूपापेक्षया नपुंसकनिर्देश इति विज्ञायेत, यथा-- `स्वमज्ञातिधनाख्यायाम्' (1.1.35), `बन्धुनि बहुव्रीहौ' (6.1.14) इति च; ततश्चार्द्धशब्दस्य नपुंसकलिङ्गत्वताऽनाश्रिता स्यात्। एवमनुपंसकलिङ्गोऽपि समस्येत। तस्मादर्द्धशब्दस्य नपुंसकलिङ्गत्वमाश्रयितुं नपुंसकमिति वक्तव्यम्। `अर्द्धपिप्पली' इति। `परवलिङ्गम्' (2.4.26) इति स्त्रीलिङ्गता। अथात्र `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति ह्रस्वत्वं कस्मान्न भवति ? अनुपसर्जनत्वात्। उपसर्जनत्वं तु `एकविभक्ति च' (1.2.44) इति। अत्र `विभाषा छन्दसि' (1.2.36) इत्यतो विभाषाग्रहणमनुवर्त्तते। सा च व्यवस्थितविभाषा प्रतिपादिता। `ग्रामार्द्धः' इति। ग्रामस्यैकदेश इत्यर्थः।

`अर्द्धं पशोर्दैवदत्तस्य' इति। देवदत्तशब्देन सह समासो न भवति। अनेकदेशित्वाद्देवदत्तस्य। न ह्यसावेकदेशः, किन्तर्हि ? स्वामी। यस्त्वेकदेशी पशुशब्दः, तेन सह भवत्येव समासः। सत्यपि पशुशब्दस्य सापेक्षत्वे पशोः प्राधान्यात् समासो भवत्येव-- अर्द्धपशुर्देवदत्तस्येति।।

3. द्वितीयतृतीयचतुर्थतुर्याण्यन्तरस्याम्। (2.2.3)

`अन्यतरस्यां ग्रहणात् सोऽपि षष्ठीसमासो भवति' इति। ननु च पूरणप्रत्ययान्ता एते द्वितीयादयः शब्दाः। तत्र पूरणेत्यादिना समासनिषेधेन भवितव्यम्, तत्कथं सोऽपि भवतीत्याह-- `पूरण' इत्यादि। यद्यत्र षष्ठीसमास्य प्रतिषेधः स्यात् तदाऽन्यतरस्यां ग्रहणमनर्थकं स्यात्। वाक्यस्य तु महाविभाषयैव सिद्धत्वादिति भावः। `द्वितीयं भिक्षायाः' इति। भिक्षाया द्वितीयो भाग इत्यर्थः। `द्वितीयं भिक्षाया भिक्षकस्य' इति। भिक्षुकेण सहात्र समासो न भवति। न ह्यसावेकदेशी, किं तर्हि ? स्वामी। तुर्यशब्दः `चतुरश्छयतावाद्यक्षरलोपश्च' (वा.571) इति यत्प्रत्ययान्तः पूरणार्थस्य प्रतिपादकः।।

4. प्राप्तापन्ने च द्वितीयया। (2.2.4)

`द्वितियासमासे प्राप्ते' इति। `द्वितीया श्रित' (2.1.24) इत्यादिना। `समासविधानात्सोऽपि भवति' इति। अपिशब्दादयमपि भवति। `प्राप्तजीविकः'इति। `एकविभक्ति च' (1.2.44) इत्यादिनोपसर्जनत्वम्। ह्रस्वत्वं तु `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति। अत्र च `परवल्लिङ्गम्' (2.4.26) इत्यादिना जीविकाया यल्लिङ्गं तत् समुदायस्य कस्मान्न भवति ? `द्विगुप्राप्तापन्नलंपूरवगतिसमासेषु प्रतिषेदो वक्तव्यः'(वा.163) इति वचनात्। तेन प्राप्तापन्योर्यल्लिङ्गं तत् समुदायस्य भवति। अथ यदा प्राप्ताजीविकामिति विगृह्य समासः क्रियते तदा किमुदाहरणम् ? प्राप्तजीविक इति। टापः श्रवणं

कस्मान्न भवति ? `स्त्रियाः पुंवत्' (6.3.34) इति योगविभागात् पुंवद्भावेन टापो निवर्तितत्वात्।।

5. कालाः परिमणिना। (2.2.5)

`सामर्थ्यात् परिमाणवचनाः' इत। एवं ह्युत्तरपदस्य परिमणिवाचित्वं गम्यते यदि कालशब्दाः परिमाणवचना भवन्ति, नान्यथा। तस्मात् काला इत्येविशेषाभिधानेऽपि सामर्थ्यात् `परिमाणवचनः कालशब्दाः समस्यन्ते' इति विज्ञायते। ननु चकालः परिमाणेव भवति; अनवधित्वात्, तत् कथं तदभिधायिनः शब्दाः परिमाणवचना भवन्ति ? नैष दोषः; यद्यपि मुख्यस्य परिमाणस्य वाचका न भवन्ति, गौणस्य तु भवत्येव। इह हि मुख्यं परिमाणत्वं कालस्य मासदेर्न भवतीति सामर्थ्यात् परिच्छेदहेतुमात्रपरिमाणसाधर्म्यमुपादायोपचारेण कालाः परिमाण्तवेनाभिमताः। मासादयोऽपि हि जातादेः सम्बन्धिनीरादित्यगतीर्गमयन्ति, अतो भवन्ति परिच्छेददेहेतवः। `षष्ठीसमासविषये योगारम्भः' इति। परिमाणपरिमाणिसम्बन्धे हि परिमाणवाचिनः षष्ठ्या भवितव्यम्। यत्र च षष्ठी भवति स षष्टीसमासस्य विषयः,तेनायं षष्ठीसमासस्य विषयो योग आरभ्यते। `मासजातः' इत्यत्र जातः परिमाणी। तस्य परिमाँ मासः। `द्वयहजातः' इति। द्वयोरह्नोः समाहार इति द्व्यहः। `राजाहःसखिभ्यष्टच्' (5.4.91)। `अह्नष्टखोरेव' (6.4.145) इति टिलोपः। `न संख्यादेः समाहारे' (5.4.89) इत्यह्नादेशप्रतिषेधः। द्व्यहो जातस्य द्व्यहजातः। अथ `कालाः' इति बहुवचननिर्देशः किमर्थः ? स्वरूपविधिनिरासार्थ इति चेत्; नैतदस्ति; न हि स्वरूपग्रहणे सत्युत्तरपदस्य परिमाणिवाचित्वं गम्यते, कालशब्दस्यापरिमाणवाचित्वात्। तस्मात् परिमाणिग्रहणादेव कालविशेषवाचिनां मासादीनां ग्रहणं भविष्यति। एवं तर्हि बहुवचननिर्देशोऽयं मात्राधिक्येन सूत्रप्रबन्धस्यार्थाधिक्यसूचनार्थः। तथा चोक्तम्-- `इङ्गितेनोन्मिषितेन महता सूत्रप्रबन्धेनाचार्याणामबिप्राया लक्ष्यन्ते' इति। तेन संख्यापूर्वपदस्त्रिपदोऽप्ययं परिमाणिना तत्पुरुषसमासो भवतीत्येषोऽर्थो लभ्यते। तेन द्व्यह्नजात इत्येवमादि सिद्धं भवति। द्वे अहनी जातमस्येति विगृह्य त्रिपदे तत्पुरुषे कृते जातशब्द उत्तरपदे पूर्वयोः पदयोः `तद्धितार्थोत्तरपदसमाहारे च' (2.1.51) इति द्व्यवयवस्तत्पुरुषो भवति, पूर्वषट्टच्, `अह्नोह्न एतेभ्यः' (5.4.88) इत्यह्नादेशः।।

6. नञ्। (2.2.6)

नञो ञकारः `नलोपो नञः' (6.3.73) इति विशेषणार्थः, पामनपुत्रादिषु मा भूत्। `लोमादिपामादिपिच्छादिभ्यः शनेलचः' (5.2.100)। अथाब्राह्मण इति किंप्रधानोऽयं समासः ? उत्तरपदार्थप्रधानस्तत्पुरुषः, यथा-- राजपुरुष इति। पूर्वपदार्थप्रधानोऽव्ययीभावः, यथा-- अमक्षिकमिति। अन्यपदार्थप्रधानो बहुव्रीहिः, यथा--अब्राह्मणको देश इति। यद्येवम्, अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति ? अथ निवृत्तिपदार्थकोऽयं ब्राह्मणशब्दः, सा च निवृत्तिः स्वाभाविकी नञा द्योत्यत इति मतम्, एवं च सत्यभाव एवास्यार्थ इत्यब्राह्मणमानयेत्युक्ते न कस्यचिदानयनं प्राप्नोति ? नैष दोषः;सर्वं हि पदं स्वार्थे प्रयुज्यमानं प्रयोगप्रतिज्ञानमपेक्षते। तथा चोक्तम्--

"आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया" इति।

तच्च द्विविधं ज्ञानम्-- सम्यक्, मिथ्या चेति। उभयमप्येतत् ब्राह्मणशब्दः प्रवर्त्तयति। यत्र सम्यग्ज्ञानपूर्वके ब्राह्मणशब्दप्रयोगे नास्ति नञो व्यापारः, न हि तत्र नञा किञ्चित क्रियते। मिख्याज्ञानपूर्वके तु विद्यत एव तस्य व्यापारः। तत्र हि तेन मिथ्याज्ञानप्रभावता परस्याख्यायते। मिथ्याज्ञानं च दुष्टेन्द्रियहेतुकम्। तच्चसादृश्यादृते न सम्भवतीति प्रतिषेधे सत्यत्तरपदार्थसदृशः समासार्थो जायते। तथा चोक्तम्-- `नञिव युक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः' (व्या.प.65) इति। तस्मादब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशे क्षत्रियादौ प्रतीतिर्भवतीति न भवति पूर्वोकत्दोषावसरप्रसङ्गः।।

7. ईषदकृता। (2.2.7)

`ईषद्गुणवचनेनति वक्तव्यम्' इति। ईषदित्येतदव्ययं समस्यते, न सर्वेणाकृदन्ेतनेत्येतद्रूपं व्याख्येयमित्यर्थः। त्तरेदं व्याख्यानम्-- विभाषेत्यनुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञायते। तेन गुणवचनेनैव समासो भविष्यति, नान्येन। `ईषद्गार्ग्यः' इति। गार्ग्यशब्दऽयं जातिवचनः, न गुणवचनः। नन्वकृतेत्युच्यते, त्तर ईषत्पीतः, ईषदुन्न त इत्यादि न सिध्यति; पीतादिशब्दस्य कृदन्तत्वात् ? नैष दोषः; अव्युत्पन्ना ह्येते पीतादिशब्दा वेदितव्याः; न तु कृदन्ताः।।

8. षष्ठी। (2.2.8)

`कृद्योगा च' इत्यादि। `कृद्योगलक्षणा षष्ठी समस्यते' इति व्याख्येयम्। तत्रेदं व्याख्यानम्-- यदयं `क्तेन च पूजायाम्' (2.2.12) `अधिकरणवाचिना च' (2.2.13) `कर्मणि च' (2.2.14) `तृजकाभ्यां कर्तरि च {च नासति सूत्रे}' इति निषेधमारभते, तज्ज्ञापयति -- `कृद्योगा या षष्ठी सा समस्यते' इति ; अन्यथा प्रतिषेधारम्भोऽनर्थकः स्यात्; प्राप्त्यभावात्। `इध्मप्रव्रश्चः' इति। करण ल्युट्। `कृत्युल्युटो बहुलम्' (3.3.113) इति कर्त्तरि वात। `कर्त्तृकर्मणोः कृति' (2.3.65) इति कर्मणि षष्ठी। पलाशशातनः' इति। शदेर्ण्यन्तस्य `शदेरगतौ तः' (7.3.42) इति दकारस्य तकारः। पूर्ववल्ल्युट्, षष्ठी च। किमर्थमित्युच्यते, यावता षष्ठीत्यनेनैव कृद्योगलक्षणाया अपि षष्ठ्याः समासः सिद्धः एवेत्यत आह- `प्रतिपदविधाना च' इत्यादि। सुबोधम्।

9.याजकादिभिश्च। (2.2.9)

चकारोऽनुक्तसमुच्चयार्थः। तेन `तत्स्थैश्च गुणैः षष्टी समस्यत इति वक्तव्यम्' (इति) इति न वक्तव्यं भवति;अनेनैव सिद्धत्वात्। तस्मिन् स्थिताः =

तत्स्थाः। प्रकृतस्यान्यस्याभावात् तदित्यनेन गुणा एव प्रत्यवमृश्यन्ते। तेन गुणात्मन्येव ये गुणा वर्त्तन्ते , न कदाचिद्द्रव्यात्मनि, तैः षष्ठी समस्यते। यद्यपि नास्त्येव हि स गुणो यो द्रव्ये न वर्त्तते, सर्वनस्य गुणस्य द्रव्याश्रितत्वात्; तथापि गुणशपब्दास्तु केचित् मतुब्लोपादबेदोपचाराद्वा तद्वति द्रव्ये वर्त्तमाना गुणमाधारानुगतं गमयन्ति, यथा-- शुक्लः पटः, लोहितः कम्बल इति। अपरे त्वाश्रयाद्विभक्तं द्रव्यं प्रत्यनुपसर्जनीभूतं गुणमाहुः, यथा-- चन्द्रनस्य गन्धः, कपिस्थस्य रस इति। तस्मादभिधानशक्तव्यापारापेक्षया तत्स्थैरिति विशेषणं युक्तम्. तदेतदुक्तं भवति-- ये गुणाः स्वशब्दैर्द्रव्यं प्रत्यनुपसर्जनभावापन्ना एव प्रत्याय्यन्ते, तैः सह षष्ठी समस्यत इति चन्दनस्य गन्धशब्दनगन्धः, कपित्थस्य रसः कपित्थरसः। गन्धादयो हि स्वशब्दैराधारविभक्ता एव प्रत्याय्यन्ते, न तु कदाचिदाश्रयानुगता द्रव्यं प्रति विशेषणीभूताः।।

10. न निर्द्धारणे। (2.2.10)
`मनुष्याणां क्षत्रियः शूरतमः' इति. `यतश्च निर्द्धराणम्' (2.3.41) इति षष्ठी। `प्रतिपदविधाना च' इत्यादि। `षष्ठी शेषे' (2.3.50) इति सामान्यलक्षणविहितां षर्ष्ठी त्यक्त्वा याऽन्या विशेषलक्षणाविहिता षष्ठी सा प्रतिपदविधाना,क सा च षष्ठी न समस्यत इत्येतद्रूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- नेति योगविभागः क्रियते, तेन प्रतिपदविदाना षष्ठी न समस्यत इति।यद्येवम्, कथं गृहस्वामी, विद्यादायादः, पृथ्वीश्वर इति, प्रतिपदविधाना ह्येषा षष्ठी बाधिष्यत इति चकारेण पुनः षष्ठीप्रतिप्रसवः क्रियते। न ह्येवंविदा षष्ठी प्रतिपदविधाना भवति। अत व `न निर्द्धारणे' इति निषेधो विधीयते। `यतश्च निर्द्धारणम्' (2.3.41) इत्यत्रापि चकारेण सैव शेषलक्षणा षष्ठी प्रतिप्रसूयते, अन्यथा हीयमपि प्रतिपदविधानैव षष्ठीति समासो न स्यात्। ततश्च `न निर्द्धारणे'इति प्रतिषेधोऽनर्थकः स्यात्।`सर्पिषो ज्ञानम्' इति. `ज्ञोऽविदर्थस्य' (2.3.51) इति करणे षष्ठी।।

11. पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन। (2.2.11)
`छात्राणां पञ्चमः' इति। `तस्य पूरणे डट्' (5.3.48) `नान्तादसंख्यादेर्मट्' (5.3.49) समुदायसमुदायिसम्बन्धे शेषलक्षणा षष्ठी। एवं `वलाकायाः शौक्ल्यम्', `काकस्य काष्र्ण्यम्' इत्यत्र गुणगुणिसम्बन्धे शेषलक्षणैव षष्ठी वेदितव्या। ब्राह्मणस्य कर्त्तव्यमित्यत्र `कृत्यानां कर्त्तरि वा'(2.3.71) इति षष्ठी। अथ कथं गोर्विंशतिरिति षष्ठीसमासः, यावता संख्याया गुणत्वात् प्रतिषेधेन भवितव्यम् ? नैष दोषः; यदयं `
शतसहस्तरान्ताच्च निष्कात्' (5.2.119) इत्याह, तज्ज्ञापयति-- संख्यायाः समासो भवतीति। न हि तेना विना शतसहस्रान्तता निष्कस्य प्रातिपदिकस्य सम्भवति। `तव्यता सानुबन्धकेन समासो भवत्येव' इति। निरनुबन्धकपरिभाषया तस्याग्रहणात्। `ब्राह्मणकर्त्तव्यम्' इति। `गतिकारकोपपदात् कृत्' (6.2.139) इति प्रकृतिस्वरेणान्तस्वरितमुत्तरपदं भवति. यदि तर्हि निरनुबन्धकेनापि समासः स्यात् प्रकृतिस्वरे कृते प्रत्ययस्वरेण मध्योदात्तः स्यात्, स चानिष्टः; अतो निरनुबन्धकेन समासः प्रतिषिध्यते, न तु सानुबन्धकेन। किञ्च स्यादिति ? एवं मन्यते-- क्रियमाणेऽप्येतस्मिन् प्रतिषेधे विशेषणसमासेनात्र भवितव्यमेव। तदवस्यम्भाविनि समासे यदि षष्ठीसमासः स्यात् तदा को दोषः स्यात्, यत्परिह्वतयेऽयं षष्ठीसमासः प्रतिषिध्यत इति ? --
`{पूर्वनिपातस्यानियमः--काशिका}पूर्वनिपातानियः' इत्यादिना दोषमाह। यदि षष्ठीसमासः स्यात् तदा द्वयोरपि पदयोः प्रथमानिर्दिष्टत्वादुपसर्जने सति पक्षे विशेषणस्यापि पूर्वनिपातः स्यात्, स च नेष्यते। विशेषणसमासे सति विशेषणस्यैव समासशास्त्रे प्रथमानिर्दिष्टत्वात् पूर्वनिपातो भवतीति न भवत्येष दोषप्रसङ्ग।।

12. क्तेन च पूजायाम्। (2.2.12)
``मतिबुद्धिपूजार्थेभ्यश्च' इति वक्ष्यति'इति। क्तमिति वाक्यशेषः। `तस्येदं ग्रहणम्' इति। `मतिबुद्धि' (3.2.188) इत्यादिना सूत्रेण यो विहितः क्तः, तस्य पूजायामन्यत्र च सर्वस्य विहितस्येदं ग्रहणम्। न केवलं पूजायां यो विहितस्त्सयैवेष्यत इत्यभिप्रायः। अत एवाह-- `पूजाग्रहणमुपलक्षणार्थम्' इति। कस्योपलक्षणार्थम् ? `मतिबुद्धि' (3.2.188) इत्यादौ सूत्रे निर्दिष्टार्थस्य यः क्तो विधीयते तस्य मत्यादेः। तेन न केवलं पूजायां यः क्तो विहितस्तेन षष्ठीसमासप्रतिषेधो भवति, अपि तु मतिबुद्धयोरपि यो विहितस्तेनापि। `राज्ञां मतः' इति। `क्तस्य च वर्त्तमाने' (2.3.67) इति षष्ठी। पूजायां किम् ? छात्रस्य हसितं छात्रहसितम्। `नपुंसके भावे क्तः' (3.3.114) शेषलक्षणा षष्ठी।।

13.अधिकरणवाचिना च। (2.2.13)
`इदमेषामासिम्' इति। अस्यतेऽस्मिन्नित्यधिकरणे क्तः। `अधिकरणवाचनिश्च' (2.3.68) षष्ठी। एवं पीतमित्यादावपि। अधिकरणवाचिनेति किम् ? छात्रस्य हसितं छात्रहसितमिति।।

14. कर्मणि च। (2.2.14)
``उभयप्राप्तौ कर्मणि' (2.3.66) इत्यस्याः षष्ठ्या इदं ग्रहणम्' इति। एतच्च् पुनः `कर्त्तरि चट (2.2.16) इति प्रतिषेधाद्विज्ञायते। यदि हि कर्मणि या काचित् षष्ठी तस्याः सर्वस्या इदं ग्रहणं स्यात् तदा `कर्त्तरि च' (2.2.16) इति पुनः प्रतिषेधं न कुर्यात्; अनेनैव सिद्धत्वात्। यत्र हि कर्त्तरि तृजकौ विहितौ तत्र नियोगतः कर्मणि षष्ठ्या भवितव्यम्. तस्मात् `कर्त्तरि च' (2.2.16) इति पुनः प्रतिषेधवचनादुभयप्राप्तौ कर्मणि या षष्ठी विहिता तस्या अत्र

ग्रहणमवसीयते। `उभयप्राप्तौ कर्मणि' (2.3.66) इति षष्ठ्या इह ग्रहणादिध्मव्रश्चनः; पलाशशातनः, इक्षुभक्षिकां मे धारयसीति समासनिषेधो न भवति।।

15. तृजकाभ्यां कर्त्तरि। (2.2.15)
भवतः शायिकेत्यादौ भावे `पर्यायार्हर्णोत्पत्तिषु ण्वुच्'(3.3.111) भवतीति ` कर्तृकर्मणो कृति' (2.3.65) इति कर्त्तरि षष्ठी। तृचा योगे कर्त्तरि षष्ठी नास्ति, तेनैव कर्त्तृरभिहितत्वात्। तर्हि किमर्थं तृचो ग्रहणमित्याह-- `तस्मत्' इत्यादि। `इक्षुभक्षिकां मे धारयति' इति। पूर्ववण्ण्युच्। अत्रेक्षुशब्दात् कृद्योगे कर्मणि षष्ठी। `मे'इति कर्त्तरि षष्ठी कृद्योगैव। `उभयप्राप्तौ कर्मणि' (2.3.66) इत्यत्र न प्रवर्तते; `अकाकारयोः प्रतिषेधः' (वा.143) इति वचनात्।।

16. कर्त्तरि च। (2.2.16)
`इतरत्र व्यभिचाराभावात्' इति । तृचि। सामर्थ्यादकस्येदं विशेषणम्। कर्त्तृग्रहणमित्यत्र हेतुः। सम्भवव्यभिचारे हि विशेषणविशेष्यभावो भवति. न हि तृच् कर्त्तारं व्यभिचरति; तस्य कर्त्तर्यैव विधानात्। अकस्तु व्यभिचरति; तस्य भावेऽपि विधानात। अतः सामर्थ्यादकस्यैव विशेषणं कर्त्तृग्रहणम्; न तृचः। `अपां स्रष्टा' इति। अपामइति कर्मणि षष्ठी। `अपां स्रष्टा' इति तृच्; व्रश्चादिना (8.2.36) षत्वम्। `सृजिदृशोर्झल्यमकिति' (6.1.58) इत्यमागमः।
`ननु च' इत्यादि। याजकादिपाठाद्भवितव्यमेवात्र समासनेनेत्यभिप्रायः।`सम्बन्धिशब्दस्य' इत्यादिना परीहारः। होतृशब्देन सम्बन्धिशब्देन सम्बन्धिशब्देन साहचर्याद्भवर्तृशब्दोऽपि सम्बन्धिशब्दस्तत्र गृह्यते; अयन्तु क्रियाशब्दः-- बिभर्त्तीति भर्त्ता। `सक्तूनां पायकः' इति। `आतो युक् चिण्कृतोः' (7.3.33) इति युक्। अथ किमर्थं तृचः सानुबन्धकस्योच्चारमम् ? तृनो निवृत्त्यर्थमिति चेत्, नैतदस्ति; तद्योगे `न लोकाव्ययनिष्ठा' (2.3.69) इत्यादिना षष्ठीप्रतिषेधात्। एवं तर्ह्येतदेव ज्ञापकम्--तृन्योगेऽपि क्वचित् भवतीति। तेन `भीष्मः कुरुणां भशोकहर्त्ता' इत्यादि सिद्धं भवति।।

17. नित्यं क्रीडाजीविकयोः। (2.2.17)
`उद्दालकपुष्पभञ्जिका' इति। `रोगाख्यायां ण्वुल् बहुलम्' (3.3.108) इत्यनुवर्त्तमाने `संज्ञायाम्' (3.3.109) इति ण्वुल्। उद्दालकपुष्पादिषु कर्मणि षष्ठी। `दन्तलेखकः, नखलेखकः' इति। `ण्वुलृतृचौ'(3.1.133) इति ण्वुल्। क्रीडायां विषये `षष्ठी' (2.2.8) इति सूत्रेण महाविभाषया विकल्पेन समासे प्राप्ते जीविकायाञ्च `कर्त्तरि च' (2.2.16) इति निषेधे प्राप्तेऽयमारम्भः। तत्र नित्यग्रहणं किमर्थम् ? जीविकार्थम्। इतरत्र त्वारम्भसामर्थ्यान्नित्योऽयं भविष्यति। जीविकायां त्वसति नित्यग्रहणे महाविभाषाधिकाराद्विकल्पेन समासः स्यादिति तदर्थं नित्यग्रहणं कृतम्, उत्तरार्थञ्च।।

18. कुगतिप्रादयः। (2.2.18)
`कुशब्दोऽव्ययं परिगृह्यते' इति। अलिङ्गसंख्यत्वादव्ययत्वम्, न तु निपातेषु पाठात्। न ह्ययं तत्र पठ्यते। `न द्रव्यवचनः' इति। पृथिव्यादौ यो द्रव्ये वर्त्तते तस्यात्र ग्रहणं न भवति। कुत एतदित्याह-- `गत्यादिभिः साहचर्यात्' इति। गतार्थम्।
`कोष्णम्' इति। `ईषदर्थे च' (6.3.105) इति कोः कादेशः। `कवोष्णम्' इति। `कव्चोष्णे' (6.3.107) इति कवादेशः। `कदुष्णम्' इति. `कोः कत्तत्पुरुषेऽचि' (6.3.101) इति कत्। `कुपुरुषः' इति पापार्थे। `दुष्कृतम्' इति। `दुस्' कृच्छ्रार्थे वर्त्तते। `इदुदुपधस्य चाप्रत्ययस्य' (8.3.41) इति षत्वम्। `{नास्ति काशिकायाम्; पदमञ्जर्यां दृश्यते-- सुष्टुतम् इति।}सुस्तुतम्' इति। सुशब्दोऽतिशये वर्त्तते। `अतिस्तुतम्' इति। अतिरक्रमणे। `{आबद्धम्-काशिका}आविद्धम्' इति। आङ क्रियायोगे, मर्यादायां वा।
`पर्यायदयो ग्लानाद्यर्थे' इति. पर्यादिराकृतिगणः। `पर्यध्ययनः' इति। परिग्लानोऽध्ययनायेत्यर्थः। `वापसी इव' इत्यादि। `सर्वधातुभ्योऽसुन्' (द.उ.9.49) इत्यनुवर्त्तमाने `वसेर्णिच्च' (द.उ.9.77) इत्यसुन्प्रत्ययान्तो वासःशब्दो व्युत्पादितः, वस्त्रशब्दोऽप्यौगणादिकष्ट्रन्प्रत्ययान्तः, तेन द्वावप्येतौ `ञ्नत्यादिर्नित्यम्' (6.1.197) इत्याद्युदात्तौ।
`प्रादिप्रसङ्गे' इत्यादि. प्रादिग्रहणे यः प्रसङ्गः समासशास्त्रस्य तत्र कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्-- लक्षणादिष्वर्थेषु कर्मप्रवचनीयसंज्ञा भवति। न च तेऽर्थाः समासेन गम्यन्त इत्यनभिधानात् कर्मप्रवचनीयानां समासो न भवति। यत्र तेऽर्था गम्यन्ते तत्र भवत्येव समासः -- अतिस्तुतमिति।।

19. उपपदमतिङ्। (2.2.19)
`एधानाहारको व्रजति' इति। `तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (3.3.10) इति ण्वुल्। `एतयोर्योगयोः सुप्सुपेति `{न सम्बध्यते इति मूलपाठः} नाभिसम्बध्यते' इति। ननु चास्मिन्नव योगे तदनभिसम्बन्दो युक्तो यत्रातिङग्रहणमस्ति, न तु पूर्वसूत्रेण, न हि तत्रातिङित्येतदस्ति ? एवं मन्यते-- `अतिङ' इति योगविभागः क्रियते, स च पूर्वसूत्रस्यापि शेषभूतो विज्ञायते। नन्वेवमप्यतिङिति प्रथमान्तेन निर्देशात् प्रथमान्तस्यैव सुबित्यस्य निवृत्तिर्युक्ता, न तृतीयान्तस्य सुपेत्यस्य ? नैतदस्ति; समान्येन सुबधिकारनिवृत्त्युपलक्षणार्थत्वाद्युक्ता द्वयोरपि निवृत्तिः। `तेन' इत्यादिना ज्ञापकस्य प्रयोजनं दर्शयति। पूर्वयोगेऽप्यतिङग्रहणात् `गत्युपसर्गसंज्ञकानांकृद्भिः सह प्राक् सुबुत्पत्तेः समासो भविष्यति' (व्या.प.138) इत्येतदुपपन्नं भवति। तथा हि तत्र गतयः कृद्भिः सह समस्यन्ते, अस्मिंस्तु योगेऽतिङग्रहणात् कारकोपपदानां कृद्भिः समासः सुबुत्पत्तेः प्रागुपपन्नो भवति। तथा ह्यत्र कारकं कृद्भिः सह समस्यते

प्राक् सुबुत्पत्तेः।
समासे सति यदिष्टं सिध्यति तद्दर्सयन्नाह-- `अश्वक्रीती' इति। अत्राश्वः करणं कारकम्, तद्वाचिनोऽश्वशब्दस्य `कर्तृकरणे कृता बहुलम्' (2.1.32) इति समासः। सुबुत्पत्यां स्तायं यदि स समासः स्यात् तदा प्रागन्तरङ्गत्वाट्टाप स्यात्, ततः सुप्, पश्चात् समासः, ततश्च `क्रीतात् करणपूर्वात्' (4.1.50) इति ङीष् न स्यात् ; अत इत्यधिकारात्। ङीषस्त्ववकाशः--धनेन क्रीतं क्रयणं यस्याः। प्राक्सुबुत्पत्तेः समासे सति टाप्न क्रियते, प्रथमतः समास एव भवति, तेनादन्तत्वान्ङीष् सिद्धो बवति। कथं पुनरश्वदेरुपपदत्वम्। यावता द्वितीयधात्वधिकारे सप्तम्या निर्देशः कृतः ? नैष दोषः; न हि द्वितीयधात्वधिकारे यत् सप्तम्या निर्दिष्टं तदेवोपपदसंज्ञं भवति। अपि तु यदप्युपोच्चारितं पदं तदप्युपपदं भवत्येव, तदपि शास्त्रे `इतरेतरान्योन्योपपदाच्च' (1.3.16) इत्यादौ सूत्रे क्वचिदाक्षीयत ेव. तस्मादश्वादिकमप्युच्चारितपदत्वादुपपमिह विवक्षितम्। पद्वं पुनस्तस्य पद्यते गम्यतेऽनेनार्थ इत कृत्वा; न तु सुबन्तत्वात्; इह सुपोऽसम्भवात्। सुबनुत्पत्तेः प्राक् समासात्। यदि तर्हि यदुपोच्चा4रितं पदं तदपीहोपपदं गृह्यते, तदातिप्रसङ्गः स्यात्; राजश्रितमित्यत्रापि प्राक् सुबुत्पत्तेः समासप्रसङ्गात्, तदतश्च पदत्वाभावान्नलोपो न भवति ? असर्वविषयत्वादस्य ज्ञापकस्येत्यदोषः। न ह्यनेन सर्वत्र `गतिकारकोपपदानां कृद्भिः प्राक् सुबुत्पत्तेः समासो भवतिट इित ज्ञाप्यते, किं तर्हि ? क्वचिदेवेष्टविषये । कथमेतज्ज्ञायते ? `तत्पुरुषे कृति बहुलम्' (6.3.14) इति कृदन्त उत्तरपदे सप्तम्या अलुग्विधानात्। यदि तर्हि सर्वत्रैव गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः स्यात् तदा सप्तम्याः कृदन्त उत्तरपदेऽलुग्विधानं नोपपद्यते-- बिलेशय इत्यादौ, सप्तम्या असम्भवात्। तस्मात् क्वचिदेव प्राक् सुबुत्पत्तेः समासः, न सर्वत्रेति।एवञ्च कृत्वा `सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी' इत्यादौ टाबन्तेन समास उपपन्नो भवति।।

20.अमैवाव्ययेन। (2.2.20)
`स्वादुङ्कारं भुङ्क्ते' इति। `स्वादुमि' (3.4.26) इति णमुल्। स्वादुमीत्यतस्मादेव मान्तनिर्देशादुपपदस्य मकारान्तत्वं निपात्यते। यदि पूर्वेणैव समासे सिद्धे नियमार्थम् वचनम्; एवञ्च सति सद्धे विधिरारभ्यमाणोऽन्तेरणाप्येवकारकरणं नियमार्थो भविष्यति, तत्किमर्थमेवकारकरणमित्याह-- `एवकारककरणम्' इत्यादि किमर्थं पुनस्तदुपपदविशेषणार्थं क्रियत इत्यत आह-- `अमैव तुल्यविधानम्' इत्यादि। येन वाक्येनायमेव प्रत्ययो विधीयते न तु प्रत्ययान्तरम्; तेन यदुपपदं निर्दिश्यते तदमैव तुल्यविधानम्, तस्यैव समासो यथा स्यादित्येवमर्थमेवकारकरणमुपपदविशेषणार्थं क्रियते। स च समासः प्रत्यासत्तेरमैव भवति, न प्रत्ययान्तरेणेति विज्ञायते। `अग्रे भुक्त्वा, अग्रे भोजम्' इति। अत्राग्रेशब्द उपपदम् `विभाषाग्रेप्रथमपूर्वेषु' (2.4.24) इत्यमा क्त्वाप्रत्ययेन च तुल्यविधानमिति न समस्यते। अव्ययग्रहणं स्पष्टार्थम्। न ह्यनव्यवममन्तमस्ति यन्निवृत्त्यर्थमव्ययग्रहणमर्थवद्भवति।।

21. तृतीयराप्रभृतीन्यन्यतरस्याम्। (2.2.21)
`पर्याप्तो भोक्तुम्' इति। `पर्याप्तवचनष्वलमर्थेषु' (3.4.66) इत्यत्र `शकधृषज्ञाग्लाघटरभ' (3.4.65) इत्यादेः सूत्रात् तुमुन्ग्रहणानुवृत्तेस्तुमुन्प्रत्ययः।।

22. क्त्वा च। (2.2.22)
`अलं कृत्वा, खलु कृत्वा ' इति। `अलंखल्योः प्रतिषेधयोः प्राचां क्त्वा' (3.4.18) स च तृतीयप्रभृतिभ्यः पूर्वः।।

23. शेषो बहुव्रीहिः। (2.2.23)
`उपयुक्ताद्योऽन्यः' इति। अभिहितादन्य इत्यर्थः। `यद्यान्यः समासो नोक्तः' इति। यत्रान्या समाससंज्ञा न विहितेत्यर्थः। `चित्रगुः' इति। अत्र बहुव्रीहित्वे सति `बहुव्रीहौ प्रकृत्या पूर्वपदम्' (6.2.1) इत्येष विधिर्भवति। `उन्मत्तगङ्गम्' इति। `अन्यपदार्थे च संज्ञायाम्' (2.1.21) इत्यव्ययीभावः। असति हि शेषग्रहण इहापि बहुव्रीहिः स्यात्। ननु च बहुव्रीहौ प्राप्तेऽव्ययीभावस्त्वारभ्यमाणस्तस्यैव बाधको भविष्यति, तत्कुतो बहुव्रीहिप्रसङ्गः ? `प्राक्कडारात् परं कार्यम्' इत्यस्मिन् पक्ष इदं प्रत्युदाहरणमुपन्यस्तम्। तत्र हि पक्षे कयदि शेषग्रहणं न क्रियेत, ततः अन्यपदार्थेच संज्ञायाम्' (2.1.21) इति वचनप्रामाण्यदव्ययीभावः स्यात्। परत्वाद्बहुव्रीहिरित्येके। अयन्तु पक्षो वृत्तिकारेण नाश्रित इत्ययुक्तमेतत्। तस्मात् `आकडारादेका संज्ञा' (1.4.1) इत्यस्मिन् पक्षे `व्यक्तिः पदार्थः' इत्येद्दर्शमाश्रित्येदं प्रत्युदाहरणमुपन्यस्तम्। व्यक्तौ हि पदार्थे प्रतिलक्ष्ये लक्षणं प्रवर्त्तते। अत्रासति शेषग्रहणे यदेसद्विषयं लक्षणं तदकृतार्थमित्यवश्यं तेन प्रवर्त्तितव्यम्। एकसंज्ञाधिकाराच्च योगपद्यं न सम्भवतीति वचनप्रामाण्यादुभयप्रसङ्गः, उभे अपि पर्यायेण स्यातामित्यपरे।।

24. अनेकमन्यपदार्थे। (2.2.243)
अनेकग्रहणं सुबित्यनेन सम्बध्यते, प्रथमान्तत्वात्; न सुपेति तृतीयान्तेन। `प्राप्तोदको ग्रामः' इत्यादीनि द्वितीयादिविभक्त्यर्थेषु यथाक्रमं बहुव्रीहेरुदाहरणानि। `प्रथमार्थे तु न भवति' इति। अनभिधानात्। न हि वृष्टे देवे गत इति वाक्याद्योऽर्थः प्रतीयते, स वृष्टदेवशब्दात् प्रतीयते।
`अनेकग्रहणं किम्' इति। एवं मन्यते-- अनेकग्रहणमित्येकस्य मा भूदित्येवमर्थं स्यात्, एतच्चायुक्तम्; यथैव हि `सुप्सुपा' (2.1.4) इत्यधिकारात् समर्थपरिभाषोपस्थानाच्च तत्पुरुष एकस्य न सम्भवति, तथा बहुव्रीहिरपि न भविष्यतीति किमर्थमनेकग्रहणमित्याह-- `बहूनामपि यथा स्यात्' इति।
`सुप्सुपा'(2.1.4) इत्यधिकारात् समर्थपरिभाषोपस्थानाच्चानेकस्यैव समासे लब्धे सत्यनेकग्रहणं प्रचुरतार्थं विज्ञायते, तेन बहूनामपि भवति। चित्रग्वादेः

सकाशात् सुसूक्ष्मजटकेशादिषु प्रचुराणि पदानि भवन्ति। अथान्यपदार्थग्रहणं किमर्थम् ? बहुव्रीहितत्पुरुषयोर्विषयविभागार्थम्। अविशेषण तत्पुरुष उच्यमाणोऽनन्यपदार्थे कृतावकाशोऽन्यपदार्थे परत्वातद्बहुव्रीहिणा यथा बाध्येत-- वीरपुरुषको ग्रामः, चित्रगुर्देवदत्त इति।

`बहुव्रीहिः समानाधिकरणानाम्' इत्यादि। समानाधिकरणानां पदानां बहुव्रीहिर्भवतीत्येतर्थरूपं व्याख्येयमित्यर्थः। किमर्थमिदमित्याह-- `व्यधिकरणानां मा भूत्' इति। तत्रेदं व्याख्यानम्-- अभिधानलक्षणा हि कृतद्धितसमासा भवन्ति, न च व्यधिकरणानां बहुव्रीहौ कृते विवक्षितार्थाभिधानमस्ति। न हि पञ्चाभिर्भुक्तमस्येति वाक्याद्योऽर्थः प्रतीयते स पञ्चभुक्तशब्दात्। तस्मादनभिधानाद्वयधिकरणानां बहुव्रीहिर्न भविष्यति। यत्र त्वभिधानमस्ति तत्र वैयधिकरण्येऽपि भवत्येव समासः- कण्ठेकाल इति।

`अव्ययानाञ्च' इति। बहुव्रीहिर्भवतीति सम्बन्धनीयम्। चकारादनव्ययानाञ्च क्वचित्। असमानाधिकरमार्थमिदम्। `उच्चैर्मुखम्' इति। उच्चैः शब्दस्याव्ययस्यासत्तकत्ववाचित्वात् सत्त्ववाचिना मुखशब्देन नास्ति सामानाधिकरण्यम्, तथाऽपि गमकत्वात् समासो भवत्येव। अनव्ययानामुदाहरणम्- कण्ठे स्थितः कालो यस्येति स कण्ठेकाल इत्येवमादि। कथं पुनस्तुल्येऽपि वैयधिकरण्ये पदानां क्वचिद्बहुव्रीहेर्गमकत्वं भवति ? क्वचिन्न भवतीति ? शब्दशक्तिस्वभावात्। शब्दशक्तयश्च प्रतिनियताश्रयाः क्वचिदेव प्रवर्त्तन्ते; न सर्वत्र।

`सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' इति। सप्तम्यन्तं पूर्वपदं यस्योत्तरपदस्य तत् सप्तमीपूर्वपदम्। तस्य परेण पदान्तरेण समासो भवति। तस्य च सप्तम्यन्तपूर्वपदस्योत्तरपदलोपो भवति। कण्ठे स्थित इति विगृह्य `सप्तमी' (2.1.40) इति योगविभागात् समासः। `तत्पुरुषे कृति बहुलम्' (6.3.14) इत्यलुक्। `कण्ठे स्थितः कालोऽस्येति कण्ठेकालः' इति। अत्र सप्तम्यन्तपूर्वपदस्य समानाधिकरणत्वात् सिद्ध एव बहुव्रीहिः। उत्तरपदलोपस्तु विधीयते. एवमन्यत्रापि वेदितव्यम्। उपमानं पूर्वपदं यस्योत्त्रपदस्य तत् पदान्तरेण समस्यते। तस्योपमानपूर्वपदस्योत्तरपदलोप विधीयते। उष्ट्रमुखमिव मुखमस्योष्ट्रमुखः, खरमुखः। अत्रोष्ट्र उपमानं पूर्वपदं मुखस्य। ननु चोष्ट्रमुकमुपमानं देवदत्तमुखस्य, न तूष्ट्रः ? उपमनावयवत्वादुष्ट्रोऽप्युपमानमुच्यत इत्यदोषः।

`समुदायविकारषष्ठ्याश्च' इति।उत्तरपदलोपश्चेत्यनुवर्त्तते। समुदायषष्ठ्यान्ताद्विकारषष्ठ्यन्ताच्च पूर्वपदात् परं यदुत्तरपदं तत् पदान्तरेण समस्यते। तस्य च समुदायविकारषष्ठ्यन्तपूर्वपदस्योत्तरपदस्य लोपो भवति। केशानां सङ्घातः केशसङ्घातः, स चूडास्येति केशचूड इत्यत्र समुदायसमुदायितसम्बन्धें षष्ठी। `सुवर्णस्य विकारोऽलङ्कारोऽस्य' इत्यत्र विकारविकारिसम्बन्धे षष्ठी।

`प्रादिभ्यः'इत्यादि। उत्तरपदलोपश्चेत्यनुर्त्तते। धातोर्जातं निष्पन्नं धातुजम्। प्रादिभ्यः पूर्वपदेभ्यः परं यद्धातुजमुत्तरपदं पतितशब्दादि तदन्तस्य बहुव्रीहिर्भवति। तस्य चोत्तरपदस्य वा लोपः।

`नञोऽस्त्यर्थानाम्'इत्यादि। नञ उत्तरेषां विद्यमानादीनामित्यर्थः।

इह सुबिति वर्त्तते; अस्तिशब्दश्चायं तिङन्तः ठअस्तिक्षीरेत्येवमादि न सिध्यतीति यो मन्येत तं प्रत्याह-- `सुबधिकारे' इति। अस्तिक्षीरादेः समास उच्यते = प्रतिपाद्यते येन तदस्तिक्षीरादेर्वचनम्। व्याख्यानं कर्त्तव्यमित्यर्थः। तत्रेदं व्याख्यानम्- `उपसर्गविभक्तस्वरप्रतिरूपकाश्च निपाता भवन्ति' इति विभक्तिप्रतिरूपकोऽयमस्तिशब्दो निपातः, न तिङन्तः। तेनास्तिक्षीरा ब्राह्मणीत्यादि सिद्धं भवति।

25. संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये। (2.2.25)

`उपदशाः' इति। `बहुव्रीहौ संख्येये डजबहुगणात्' (5.4.73) इति डच् समासान्तः, टिलोपश्च। दशानां समीपे ये वर्त्तन्ते ते तथोच्यन्ते, ते पुनर्नवैकादश वा। पूर्वपदार्थप्रधानोऽयं समासः। यद्येवम्, कस्तर्ह्यव्ययीभावस्यास्य च विषयविभागः; सोऽव्ययीभावोऽवव्ययस्य समीपे वर्त्तमानस्य `अव्ययं विभक्ति' (2.1.6) इत्यादिना पूर्वपदार्थप्रदान एव विधीयते ? उच्यते-- यदा समीपिनः प्राधान्यं तदा बहुव्रीहिः,यदा तु समीपस्य प्राधान्यं तदाव्ययीभावः- इत्येष विषयविभागः। `उपविंशाः' इति। पूर्ववड्डच्। `तिर्विंशतेर्डिति' (6.4.142) इति टिलोपः। `आसन्नदशाः' इति। दशानामासन्ना आसन्नदशाः। ते च पूर्ववन्नवैकादश वा। `अदूरदशाः' इति। दशानामदूरा ये, ते पुनः पूर्वोक्ता एव। `अधिकदशाः' इति। दशानामधिकाः , ते पुनरेकादशादयः। `द्वित्राः' इति। द्वौ वा त्रयो वति विग्रहः। वार्थेचायं समासः। वार्थश्चायं संशयः, न विकल्पः। यदि वार्थ इह विकल्प आश्रीयते ततो यदा द्वौ भवतः, तदा बहुवचनं न स्यात्। तस्मात् संशयोऽत्र वार्थः। संशयिते चार्थे बहुवचनं भवति, यथा-- कित भवतः पुत्राः। उक्तञ्च भाष्ये-- `अविज्ञातेऽर्थे बहुवचनं प्रयोक्तव्यम्' इति। तत्कथम्? संशयज्ञानस्योभयपक्षरामर्शित्वेन बह्वर्थविषयत्वात्। उभयपक्षापरामर्शित्वे संशय एव न स्यात्। अथ वा-- पञ्चैवात्र सदा भवन्ति, न कदाचिद्द्वौ त्रयो वेति। तथा च `द्वित्रा' इत्युक्ते पञ्चैवेति गम्यते। सैषा पञ्चाधिष्ठानावागिति ततो युक्तं बहुवचनम्। यदि तर्हि वार्थेऽयं समासः, तस्यार्थस्यान्यपदार्थत्वात् पूर्वेणैव सिद्धः समासः ? न सिद्ध्यति, मत्वर्थे हि पूर्वयोगः; अमत्वर्थोऽयं योगः। अथ वा-- प्रथमार्थे वर्जयित्वाऽन्यत्र विभक्त्यर्थे पूर्वेण समासः। प्रथमार्थमिदं वचनम्। `त्रिचतुराः' इति। `चतुरोऽच्प्रकरणे चतुरस्त्र्युपाभ्यामुपसंख्यानम्' (वा.639) इत्यच् समासान्तः। `द्विदशाः' इति। द्विर्दशेति विग्रहः। सुजर्थेऽयं समासः। दशसम्बन्धिनी याऽऽवृत्तिर्दशशब्देन लक्ष्यमाणा सा द्विशब्देनाख्यायते। सुजर्थश्च प्रत्ययार्थो नान्यपदार्थ इति पूर्वेण न सिद्ध्यति। अथ वा-- प्रथमार्थेऽपिचायम्, अमत्वर्थेऽपि; अतः पूर्वेण न सिध्यति। समास एव सुजर्थं गमयितुं समर्थ इति वृत्तौ सुज् न प्रयुज्यते।

`अधिका विंशतिर्गवाम्' इति। विंशतिशब्दोऽत्र संख्यान एव वर्त्तते; न तु संख्येये द्रव्ये।।

26. दिङ्नामान्यन्तराले। (2.2.26)
`दक्षिणपूर्वा' इति। प्रथमार्थेऽप्ययं समास इष्यते, अमत्वर्थेऽपि तत्पूर्वेण न सिध्यतीत्यममत्वर्थं आरम्भः प्रतिपदविधानार्थश्च। `विभाषा दिक्समासे' (1.1.28) इत्यत्र दिशां यः समासः प्रतिपदविहितस्तस्य ग्रहणमिष्यते। प्रतिपदविहितश्च समासो दिशामेव भवति यद्ययं योग आरभ्यते, नान्यथा। `सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति। स पुनः `स्त्रियां पुंवत्' (6.3.34) इति योगविभागेन सिध्यतीति वेदितव्यम्। `नामग्रहणं रूढ्यर्थम्' इति। लोके ये रूढत्रा दिक्शब्दास्तत्परिहार्थमित्यर्थः। `ऐन्द्र्याश्च कौबेर्याश्च' इति. नेमौ रूढिशब्दौ, किं तर्हि ? योगिकौ-- इन्द्रस्येयमैन्द्री, कुबेरस्येयं कौबेरी। `तस्येदम्' (4.3.120) इत्यण्।।

27. तत्र तेनेदमिति सरूपे।(2.2.27)
`इतिकरणः' इत्यादि। समासादभिमतेऽर्थे इतिकरणो यमर्थं प्रतिपादयति तं दर्शयितुमाह-- `लौकिकमर्थमनुसारयति' इति। अनुगमयति प्रबोधयतीति यावत्। स पुनर्लौकिकोऽर्थो ग्रहणादिरिति दर्शयन्नाह `ततः' इत्यादि। यस्मादितिकरणो लौकिकमर्थमनुसारयति ततो हेतोर्गर्हणादिरिति सर्वं लभ्यते। `यत्तत्रेत्यादिना' कर्मव्यतीहार इति परस्परग्रहणम्, परस्परग्रहणञ्चेतिकरणादेव लभ्यत इति वेदितव्यम्। स्वरूपविधिरत्रेतिकरणादेव न भवतीति वेदितव्यम्। दण्डैश्चेति करणे तृतीया। `स चाव्ययम्' इति। तिष्ठद्गुप्रभृतिषु पाठादव्ययीभावः; `अव्ययीभावश्च' (1.1.41) इत्यव्ययसंज्ञाविधानात्। `सरूपम्' इति। समानस्य `ज्योतिरवचनस्य' (6.3.85) इत्यादिना सभावः।।

28.तेन सहेति तुल्ययोगे। (2.2.28)
`तुल्ययोगे वर्त्तमानम्' इत्यादि। तुल्योगः = समानसम्बन्धः। तं यदा सहशब्दोद्योतयति तदासौ तत्र वर्त्तते। `सपुत्रः' इति। सह पुत्रेणेति विग्रहः कर्त्तव्यः। `सहयुक्तेऽप्रधाने' (2.3.19) इति तृतीया। `वोपसर्जनस्य' (6.3.82) इति सहस्य सभावः। अत्र सपुत्र आगतो देवदत्त इति देवदत्तस्य पुत्रस्य चागमनेन तुल्यसम्बन्धः सहशब्देन द्योत्यते। अथ कथं पुनः सकर्मक इत्यादौ स्यात् ? कथञ्च न स्यादित्याह-- `न ह्यत्र' इत्यादि। `प्रायिकम्' इति।असर्वविषयमित्यर्थः। कुतः पुनः प्रयिकत्वमस्य लभ्यते ? इतिकरणात्। ननु चान्यदितिकरणस्य प्रयोजनमस्ति, किं तत् ? सहशब्दः स्वरूपपदार्थको यथा गम्येत; अन्यथा ह्यर्थनिर्देशोऽयं विज्ञायेत। ततश्च साकं सार्द्धमित्यादयोऽपि समस्येरन् ? नैवं ब्रूमः; -- इह सूत्रे य इतिकरणस्ततो लभ्यत इति, किं तर्हि ? पूर्वसूत्राद्योऽनुवर्त्तते तत इति।।

29. चार्थे द्वन्द्वः। (2.2.29)
कः पुनरयं चार्थो नामेत्याह-- `समुच्चयाऽन्वाचय' इत्यादि। समुच्चितिः = समुच्चयः। साधनमेकं क्रियां वा प्रति क्रियासाधनानामात्मरूपभेदनेन चीयमानताऽनेकत्वमिति यावत्। स पुनस्तुल्यबलानामनियतक्रमयोगपद्यानामेव भवति, यथा-- गामश्वं पुरुषं पशुञ्चाहरहर्नयमानो वैवस्वतस्तृप्तिं नोपयातीति। अन्वाचयोऽपि यत्रैकस्य प्राधान्यम्, इतरदप्रधानम्, तदनुरोधेनान्वाचीयमानता, यथा-- भो वटो भिक्षामट गाञ्चानयेति। इतरेतरयोगः समाहारश्च समुच्चयस्यैव प्रभेदः। स एव हि परस्परापेक्षाणामवयवभेदानुगत इतरेतरयोगः, यथा-- देवदत्तयज्ञदत्ताभ्यामिदं कार्यं कर्त्तव्यम्। उभावपि तत्कार्यं प्रति परस्परापेक्षौ। तथा हि तदेकस्याप्यभावे न क्रियते। अवयवप्रधानश्चायमिति द्वित्वाद्द्विचवचनं भवति। परस्परापेक्षाणामेव तिरोहितावयवभेदः संहतिप्रधानः समाहारः; यथा-- छत्रोपानहमतिति। अत्रापि कस्याञ्चित् क्रियायां छत्त्रादेः परस्परापेक्षत्वम्। संहतिप्रधानत्वाच्चैकवचनम्। यदि तर्हि समुच्चयान्वाचयावपि चार्थौ तदा तयोरपि समासः प्राप्नोतीत्तयत आह-- `तत्र' इत्यादि। समुच्चये तावत् परस्परानभिसम्बन्धा एव गवादयो नयनादिभिः सम्बध्यमानाः समुचीयन्त इत्यासामर्थ्यात् सत्यपि चार्थे तस्मिन् न भवति समासः। अन्वाचयेऽप्येकं सापेक्षं नेतरत्, यथा-- पूर्वोक्त उदाहरणे। त्तर हि गवानयनं भिक्षाटनमपेक्षते, न तु भिक्षाटनं गवानयनम्,; विनापि तेन तदनुष्ठानात्। स यदि गां पश्यति तदा तामप्यानयति, न चेत् भिक्षामेवाटतीत्यन्यतरापेक्षारहिते चार्थे न भवति समासः। `इतरेतरयोगे समाहारे च विधीयते' इति। तत्र सर्वेषां सामर्थ्यस्य विद्यामानत्वात्। `वाक्त्वचम्, वाग्दृषदम्' इति. `द्वन्द्वाच्चुदषहान्तात् समाहारे' (5.4.106) इति टच्। समासान्तः। `जातिरप्राणिनाम्' (2.4.6) इत्येकवद्भावः।।

30. उपसर्जनं पूर्वम्। (2.2.30)
`पूर्ववचनं परप्रयोगनिवृत्त्यर्थम्' इति। ननु च परप्रयोगविपर्ययो लोके न दृष्ट एव; तत्कथं परप्रयोगनिवृत्त्यर्थेन पूर्वग्रहणेनेत्यत आह-- `अनियमो हि स्यात्' इति। सम्भावनायां लिङ। एवं मन्यते-- यद्यपि परप्रयोगविपर्ययो न दृष्टः, तथाप्यसति नियामके वाक्ये पुरुषापराधाद्विपरीतप्रयोगोऽपि सम्भाव्येत। येषाञ्च वाक्यमेव समासीभवतीति दर्शनम्, तेषां वाक्यस्यानितयतक्रमत्वात् तद्विकारोऽपि समासोऽनियतक्रमः स्ादिति सूत्रारम्भः।।

31. राजदन्तादिषु परम्। (2.2.31)ट
`पूर्वस्य परनिपात' इति। लिप्तवासिताद्युप्तगाढपर्यन्तेषु। उदूखलमसलादयो ये द्वन्द्वाः, तत्र क्वचिदल्पाच्तरत्वात् पूर्वनिपातः प्राप्नोति, क्वचिद् ध्यन्तत्वात्

पूर्वनिपातः, क्वचिदजाद्यन्तत्वात्; क्वचितुल्यादनियमः। `दृषदुपलम्' इति प्रमादाच्चायं पाठो लक्ष्यते। अल्पाच्तरत्वादद्दृषच्छब्दस्य पूर्वनिपातः सिद्धः। `अक्षिभ्रुवम्, दारगवम्' इति। अचतुरादिसूत्रेणाच् (5.4.79) समासान्तः। `स्थूलपूलासम्' इति। प्रमदपाठोऽयं लक्ष्यते;पूर्वोक्तादेव कारणात्।।

32. द्वन्द्वे घि। (2.2.32)

`उपसर्जनम्' इत्यन्वर्थसंज्ञाविधानादप्रधानस्योपसर्जनसंज्ञा विहिता। द्वन्द्वे च सर्वेषां पदानां प्राधान्यम्। न कस्यचिदप्राधान्यमित्युपसर्जनसंज्ञाया अभावादनियमे प्राप्ते वचनमिदम्। अत्र यत्र बहूनां पूर्वनिपातप्रसङ्गस्तत्र किमेकस्यानियमो भविष्यति, उत सर्वेषामित्याह-- `अनेकप्राप्तावेकस्य' इत्यादि। एव चार्थो जातिपदार्थस्याश्रयणाल्लभ्यते व्यक्तौ तु पदार्थे प्रतिव्यक्ति शास्त्रप्रवृत्या भवितव्यम्, ततः सर्वेषां नियमः स्यात्। आकृतौ तु पदार्थे लक्ष्य एकं लक्षणं सकृदेव प्रवर्त्तते। तेन चैकस्य पूर्वनिपाते जातिः कृतार्थेति शेषाणामनियमो भवति। एवमुत्तरत्राप्येकस्य नियमः, शेषाणान्त्वनियम इति वेदितव्यम्। `विस्पष्टपटुः' इति। विस्पष्टः पटुः, मयूरव्यंसकादित्वात्समासः।।

33. अजाद्यदन्तम्। (2.2.33)

`द्वन्द्वे घ्यन्तादजाद्यदन्तं विप्रतिषेधेन' इति। `द्वन्द्वे घि' (2.2.32) इति तस्मादजाद्यदन्तमित्येततद्भवति विप्रतिषेधेन। `द्वन्द्वे घि'इत्यस्यावकाशः-- पटुशुक्लौ,पटुगुप्तौ। `अजाद्यदन्तम्' इत्यस्यावकाशः-- उष्ट्रशशौ, उष्ट्रखरौ। इन्द्राग्नी इत्यत्रोभयं प्राप्नोति, अजाद्यदन्तं भवति विप्रतिषेधेन।।

34. अल्पाच्तरम्। (2.2.34)

`ऋतुनक्षत्राणाम्' इत्यादि। ऋतूनामानुपूर्व्यं प्रादुर्भावकृतम्, नक्षत्राणामुदयकृतम्। ऋतुनक्षत्राणामित्यत्रैव वर्णग्रहणं कस्मान्न कृतमिति पर्यनुयोगदोषमाशङ्क्याह-- `समानाक्षराणाम्' इत्यादि। असमानाक्षराणामपि वर्णानामानुपूर्व्येण पूर्वनिपात इष्यत इति पृथग्वचनम्. आनुपूर्व्यञ्च वर्णानां जन्मकृतमिति लोकव्यवहारे प्रसिद्धम्। प्रसिद्धिश्च श्रुतिकृता। श्रुतौ हि पठ्यते `मुखते ब्राह्मणमसृजत्, बाहुभ्यां राजनयम्, ऊरुभ्यां वैश्यम्, पद्भ्यां शूद्रम्' इति। `संख्याया अल्पीयस्याः' इति द्वन्द्वे चेति वक्तव्यम्। `द्वित्राः,त्रिचतुराः' इति बहुव्रीहिः। `नवतिशतम्' इति द्वन्द्वः।।

35. सप्तमीविशेषणे बहुव्रीहौ। (2.2.35)

`सर्वनामसंख्ययोः' इति। यत्र गुणवचनेन सह समासः सोऽस्य विषयः। यत्र तु द्रव्यवाचिना तत्र सर्वनामंख्ययोर्विशेषणत्वादेव पूर्वनिपातः सिद्धः। `सप्तम्याः पूर्वनिपाते' इत्यादि। सप्तम्यन्तस्य पूर्वनिपाते प्राप्ते गड्वादिभ्यः परवचनं कर्त्तव्यमिति। सप्तम्यन्तं परमुच्यते = कथ्यते येन व्याख्यानेन तत् परवचनम्। तत्रेदं व्याख्यानम्-- आहितादेराकृतिगणत्वाद् गडुककण्ठप्रभृतयस्तत्रैव द्रष्टव्याः,तेन गड्वादिभ्यः परं सप्तम्यन्तं भविष्यति। `कथं वहेगडुः' इति। यदि गड्वादिभ्यः सप्तम्याः परवचनमिति भावः। `प्राप्तस्य च बाधा व्याख्येया' इति। तत्रेदं व्याख्यानम्-- `वाहिताग्न्यादिषु' (2.2.37) इत्यतो वाग्रहणं क्रियते, सा च व्यवस्थितविभाषा विज्ञायते। तेन प्राप्तस्य परनिपातस्य बाधनं भविष्यति।।

36. निष्ठा। (2.2.36)

`ननु विशेषणमेवात्र निष्ठा' इति। कृतशब्दः क्रियाशब्दः। कटशब्दो द्रव्यवचनः। तत्र यथा गुणो द्रव्यस्य विशेषणं तथा क्रियाऽपि। तथा सति निष्ठान्तस्य विशेषणत्वात् पूर्वेणैव पूर्वनिपातः सिद्धः। कटेकृतमनेनेत्यादिना विग्रहभेदेन निष्ठाया विशेषणत्वाभावं दर्शयति। अत्र विग्रहे सप्तम्यन्तमेव विशेषणम्, निष्ठान्तं विशेष्यम्, सामानाधिकरण्ये हि क्रियागुणौ विशेषणविशेष्यभावौ नियमेनानुभवतः, न हि वैयधिकरण्ये। तथा हि-- पटस्य शुक्लः, काकस्य गतिरित्यत्र गुणादेर्विशिष्येत्वम्, व्यवच्छेद्यत्वात्; द्रव्यस्य तु विशेषणत्वम्, व्यवच्छेदकत्वात्। `निष्ठायाः पूर्वनिपाते' इत्यादि। जात्यादिभ्यो निष्ठान्तं परमुच्यते, तेन तद्व्याख्यानं कर्त्तव्यम्। तत्रेदं व्याख्यानम्-- सारङ्गजग्धी-मासजाता-सुखजातादयः शब्दाः आहितादेराकृतिगणत्वात् तदन्तःपातिनः, तेन जातिकालसुखादिभ्यो निष्ठान्तं परं भवतीति। `सारङ्गजग्धी' इति। सारङ्गशब्दो जातिवचनः। ततः `क्तादल्पाख्यायाम्' (4.1.51) इत्यनुवर्त्तमाने `अस्वाङ्गपूर्वपदाद्वा' (4.1.53) इति ङीष्। `कथं कृतकटः' इति। कटशब्दस्य जातिवाचित्वादिति प्रश्नः। `प्राप्तस्य चाबाधा व्याख्येया' इति। तेन कृतकट इत्यत्रापि भविष्यतीति भावः। सा पुनरप्राप्तस्य चाबाधा पूर्ववदेव व्याख्येया। एवमुत्तरत्रापि व्याख्येया। `प्रहरणार्थेभ्यः' इत्यादि। प्रहरणमर्थो येषां ते तथोक्ताः। तेभ्य परे निष्ठासप्तम्यौ भवत इत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- अस्युद्यतः, दण्डपाणिरित्येवमादिनां शब्दानामाहिताग्न्यादिषु पाठात् परे निष्ठासप्तम्यौ भवत इति।।

37. वाऽऽहिताग्न्यादिषु।(2.2.37)

38. कडाराः कर्मधारये। (2.2.38)

कडारादयो ये गुणशब्दास्तेषां विशेषणत्वं भवतीत्याह-- `गुणशब्दानाम्' इत्यादि। गतार्थम्।।
इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
द्वितीयाध्यायस्य
द्वितीयः पादः

2.3

अथ द्वितीयाध्यायस्य
तृतीयः पादः
1. अनभिहिते। (2.3.1)
दधातेर्हिनोतेर्वाऽनभिहित इत्यस्य रूपम्; समानत्वात्, अनेकार्थत्वाच्च धातूनाम्। न ज्ञायते किमर्थस्यानभिहितशब्दस्य ग्रहणमिति सन्देहः स्यात्, अतस्तं निराकर्त्तुमाह-- `अनभिहितेऽनुक्ते' इत्यादि। यद्यनभिहिते कर्मादौ द्वितीयादयो विभक्तयो भवन्तीति सामान्येनोच्येत; ततो यथा `कृतः कटः' इत्यत्र क्तप्रत्ययेन कर्मणोऽभिहितत्वात् कटशब्दाद्द्वितीया न भवति, तथा `कटं करोति', `भीष्ममूदारं शोभनं दर्शनीयम्' इत्यत्र कटशब्दादुत्पद्यमानया द्वितीयया भीष्मादिगतस्य कर्मणोऽभिहितत्वाद्भीष्मादिभ्यो द्वितीया न प्राप्नोति। तस्मात् कश्चिद्विशेषोऽत्राभिमत इति मत्वा तं विशेषं पृच्छति-- `केनानभिहितते'? इति। इतरो विदिताभिप्राय आह-- `तिङकृत्तद्धितसमासैः' इत्यादि। क्रियत इति कर्मणि लकारः। `सार्वधातुके यक्' (3.1.67)। `रिङ शयग्लिङ्शु' (7.4.28) इति रिङादेशः। `शत्यः, शतिकः' इति। `शताच्च ठन्यतावशते' (5.1.21) इति ठन्यतौ भवतः।
`बहुषु बहुवचनम्' इत्येवमादि। तत्रेदमुक्तम्- कर्मादयोऽव्यपरे विभक्तीनां वाच्याः, अत स्तदीये बहुत्वे बहुवचनं भवतीति। एवञ्च ब्रुवता वृत्तिकृता कर्माद्याश्रितायां संख्यायां द्वितीयादयो विभक्तयो भवन्तीत्येतदुक्तं भवति। न च तत्र कश्चिद्विशेष उपात्तः। सन्ति च कर्मादयोऽभिहिताः, अनभिहिताश्च। तत्र विशेषानुपादान्त, यथा अनभिहितकर्माद्याश्रयेष्वेकत्वादिषु द्वितीयादयो विभक्तयो भवन्ति, तथाऽभिहितकर्माद्याश्रयेष्वपि स्युः। अतोऽनभिहिता ये कर्मादयस्तदाश्रयेष्वेकत्वादिषु यथा विभक्तयः स्युरन्यत्र मा भूवन्नित्यनभिहित इत्येतद्विशेषणमारभ्यते। `अनभिहितकर्माद्याश्रयेषु' इति। अनभिहिताः कर्मादय आश्रया येषामिति बहुव्रीहिः। एतेन `बहुषु बहुवचनम्' (1.4.21) इत्यादेः शास्त्रस्य, अनभिहित इत्येतस्य च `कर्मणि द्वितीया' (2.3.2) इत्येवनमादिभिः सहैकवाक्यतां दर्शयति-- अनभिहिते कर्मणि द्वितीया बहुषु बहुवचनमिति। एवमन्यत्राप्येकवाक्यता वेदितव्या। एकवाक्यता च गुणप्रधानभावमन्तरेण न सम्भवतीत्येकस्य गुणभावेन भवितव्यम्, अपरस्य प्रधानभावेन। तत्र विशेषणत्वादनभिहित इत्यस्य कर्माद्यपेक्षया गुणबावः, कर्मादीनां तु विशेष्यत्वात् प्राधान्यम्, एकत्वाद्यपेक्षया कर्मादीनान्तु विशेषणत्वादप्राधान्यम्। एकत्वादीनां विशेष्यत्वात् प्रधानभावः। अथ कथं कटशब्दादुत्पद्यमाना द्वितीया मीष्मादिपदानुगतं कर्माभिदधाति, यथा-- निष्ठेति चेत् ? स्याददत्-- `यथा कटः कृतो भीष्म उदारः शोभनो दर्शनीय इत्यत्र करोतेः कर्मण्युत्पद्यमाना निष्ठा सर्व भीष्मादिकमपि कर्माभिदधाति,तथा कटशब्दादुत्पद्यमाना द्वितीया' इति, वार्त्तमेतत्; कृत इति क्रियाकारकसम्बन्धनिमित्तकभिधानम्। क्रिया चोत्पद्यमाना सामर्थ्यात् सर्वाणि कारकद्रव्याण्याक्षिपति। ततः कृञ उत्पद्यमानः क्तः साधारणतया यावत् करोतेरुयाति कर्मतां तावत् सर्वमेवाभिदधातीति युक्तम्। भीष्मादिगताया अपि कर्मतायाः क्तप्रत्ययेनाभिधानम्। कटस्तु विशिष्टद्रव्यवचनः, तत उत्पद्यमाना द्वितीया तद्गतमेव कर्म शक्नोत्यभिधातुम्, नान्यगतं किञ्चित्, तत्कथं तया भीष्मादिगतमपि कर्माभिधीयते ? तथा च निरर्थकं परिगणनम्। तस्मात् तिङकृत्तद्धितसमासैरेवाभिधानं सम्भवतीति सम्भवदुदाहरणप्रदर्शनमपरमेतत् परिसंख्यानं वेदितव्यम्, न परिगणनम्।।

2. कर्मणि द्वितीया। (2.3.2)
द्वितीया तिङविभक्तिरप्यस्तीति तस्या अप्यत्र ग्रहणमिति कस्यचिदाङ्का स्यात्, अतस्तन्निराकर्तुमाह-- `द्वितीयादयः शब्दाः' इत्यादि। कर्मशब्देनेह साधनं कर्म गृह्यते, न तु क्रियाकर्म। तथा हि - ये विभक्त्यर्था एकत्वादयस्तेषां विशेषणत्वेनैव कर्मादयोऽनुक्रंस्यन्ते। न च क्रियाकर्मणि द्वित्वबहुत्वे स्तः; साधनकर्मणि तु विद्येते, तस्मात् तस्यैव ग्रहणं युक्तम्, नेतरस्य।
`उभसर्वतसोः'इत्यादि। उभसर्वशब्दयोस्तसिप्रत्ययान्तयोः प्रयोगे द्वितीयाविभक्तिः कार्याः। शेषलक्षणायां षष्ठ्यां प्राप्तायामयमारम्भः। उभसर्वतसोरित्यत्र यद्युप्युभशब्दः पठितस्तथापि सामर्थ्यादुभयशब्दो गृह्यते; साधर्म्यात्। न ह्युभशब्दस्तसिप्रत्ययान्तोऽस्ति; तस्य नित्यदविवचनटाब्विषयत्वात्। तथा चोक्तम्-- `अन्यभावो निे्त्यद्विवुचनटाब्विषयत्वादुभयोऽन्यत्र' (1.1.27-वा.8,9) इति। `उभयतः, सर्वतः' इति। `पञ्चम्यास्तसिल्' (5.3.7)। धिक्शब्दयोगेऽपि द्वितीया कार्या। तथोपर्यादिषु त्रिषु योगे द्वितीया कार्या। `आम्रेडितान्तेषु'इति। कृतद्विर्वचनेष्वित्यर्थः। `उपर्युयरि ग्रामम्' इत्यादौ `उपर्यध्यधसः सामीप्ये' (8.1.7) इति द्विर्वचनम्। `ततोऽन्यत्रापि दृश्यते' इति। यथोक्तादन्यत्रापि दृश्यते द्वितीयेति सम्बन्धः।

क्व चान्यत्र दृश्यत इत्यत आह-- `अभितः' इत्यादि। `प्रयभिभ्याञ्च' (5.3.9) इति तसिः। अपिशब्दो विकल्पार्थः। अपि दृश्यतेऽपि न दृश्यतेच। तेन हा तात हा मातरित्यादि सिध्यति।।

3. तृतीया च होश्छन्दसि। (2.3.3)
`यवाग्वाऽग्नहोत्रं जुहोति' इति। यद्यप्यत्र `सुपां सुपो भवन्ति' (वा.818) इति द्वितीयास्थाने तृतीयादेशविधानेऽप्येतत् सिध्यति; तथापि पयसा जुहोति, आज्येन जुहोतीत्येवमादि न सिध्यति। तथा हि-- स्थानिवद्भावात् `स्वमोर्नपुंसकात्' (7.1.23) इत्येकस्य लुक् प्राप्नोति। अपरस्य `अतोऽम्' (7.1.24) इत्यम्भावः।।

4.अन्तरान्तरेण युक्ते। (2.3.4)
`अन्तरान्तरेणशब्दौ निपातौ साहचर्याद्गृह्येते' इति। अयमन्तराशब्दो यद्यपि स्त्रीप्रत्ययान्तोऽस्ति, तथाऽस्त्रीप्रत्ययान्तोऽपि;अन्तरेणशब्दस्त्वस्त्रीप्रत्ययान्तो गृह्यते। यश्चास्त्रीप्रत्ययान्तोऽन्तराशब्दः स निपात एवेत्यन्तराशब्दस्य तावन्निपातस्य ग्रहणम्। अतस्तेन निपातेन साहचर्यादन्तरेणशब्दस्यापि तस्यैव ग्रहणम्। तेनानिपातो यस्तृतीयान्तोऽन्तरेणशब्दः, यश्च टाबन्तोऽन्तराशब्दस्ताभ्यां योगे द्वितीया न भवति। किं ते बाभ्रावाणां शालङ्कायमानाञ्चान्तरेण गतेन ? ग्रामयोरन्तरायां पुरि वसतीत्यन्तरशब्दोऽत्र विशेषवचनः। गमिरपि ज्ञानवचनः। किं ते विशेषण ज्ञानेनेत्यर्थः। `षष्ठ्यपवादोऽयं योगः' इति।र शेषलक्षणायां षषठ्यां प्राप्तायामस्यारम्भात्। षष्ठ्यापवादत्वमस्य योगस्यान्तरान्तरेणशब्दार्थप्रदर्शनद्वारेण विस्पष्टीकर्त्तुमाह-- `तत्र' इत्यादि। मध्यं हि सम्बन्धिशब्दत्वादमध्यभूतं द्वितीयं सम्बन्धिनमपेक्ष्य भवति। तत्र यदपेक्षं मध्यत्वं ततो मध्येन व्यतिरेके समुपजनिते षष्ठी प्राप्नोति। विनार्थोऽपि शेष एव। अत्रापि षष्ठ्येव प्राप्नोति। `अन्तरा त्वाञ्च माञ्च कमण्डलुः' इति। तव मम मध्ये कमण्डलुरित्यर्थः। अथ कमण्डलुशब्दाद्द्वितीता कस्मान्न भवति ? सत्यप्यन्तरान्तरेणयोगे तस्य प्राधान्यात्। तथा हि-- कमण्डलोः स्वार्था प्रवृत्तिः , युष्मदस्मदोस्तु परार्था; कमण्डलुविशेषणत्वेन तयोः प्रवृत्तत्वात्। तत्र कमण्डलोः स्वार्थे वर्त्तमानात् प्राधान्येनावस्थित्वात् प्रातिपदिकार्थादप्रच्युतत्वात् परत्वात् प्रथमैव भवति। द्वितीयायास्त्वप्रधाने युष्मदस्मच्छब्देऽवकाश इति ताभ्यां तेनेव प्रथमान्तेन कमण्डलुनोपजनिते व्यतिरेके षष्ठ्यां प्राप्तायां द्वितीया विधीयते। `अन्तरेण पुरुषकारम्' इति। विना पुरुषकारेणेत्यर्थः। `अन्तरा तक्षशिलां पाटलिपुत्रञ्च स्रुघ्नस्य प्राकारः' इति। अत्र स्रुघ्नः प्राकारविशेषणत्वेनोपक्षीणसामर्थ्य इति न भवति त्सयान्तराशब्देन योगः।।

5. कालाध्वनोरत्यन्तसंयोगे। (2.3.5)
कालाध्वनोरित्यर्थग्रहणम्। अत आह-- `कालशब्देभ्योऽध्वशब्देभ्यश्च' इत्यादि। `मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः। योजनस्यैकदेशे पर्वतः' इति। नात्र `कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया भवति।।

6. अपवर्गे तृतीया। (2.3.6)
`अपवर्गः'इति। अत्यन्तसंयोगस्य फलरूपमेतद्विशेषणमुपात्तम्। तच्च क्रियात्यन्तसंयोगस्यैव सम्भवति, नान्यस्यति सामर्थ्यादत्र क्रियात्यन्तसंयोग एव गृह्यते। सर्वस्याश्च क्रियायाः परिसमाप्तिरस्ति; तस्माद्विशेषणोपादानसामर्थ्यात् फलप्राप्तौ सत्यां क्रियायाः परिसमाप्तिरिहापवर्गो विज्ञायत इत्यत आह-- `फलप्राप्तौ' इत्यादि। `कर्त्तृव्यावृतौ' इति। न हि मासमधीतोऽनुवाको न चानेन गृहीत इत्युक्तेऽपवर्गो गम्यते, किं तर्हि ? कर्त्तुरशक्तिमात्रम्। न च तत्रापवर्गव्यपदेशः।।

7. सप्तमीपञ्चम्यौ कारकमध्ये। (2.3.7)
`अद्य भुक्त्वा देवदत्तो द्व्यहे भोक्ता, द्व्यहाद्भोक्ता' इति। ननु चात्र एक एव कर्त्ता, कारकभेदे सति तन्निबन्धनो मध्यव्ययपदेशो भवति, तत् कथमसति कारकभेदे कारकयोर्मध्ये कालो भवतीत्यत आह-- `कर्त्तृशक्त्योः'इत्यादि। न हि द्रव्यं कारकम्, किं तर्हि ? शक्तिः, सा चेह भिद्यते। तथा हि-- देवदत्ते द्वे शक्ती व्यवस्थिते; एकाद्य भुजेः साधनम्, अपरा द्व्यहेऽतीति इति कर्त्तृशक्तिभेदे सति युक्तो मध्यव्यपदेशः। `कर्त्तृकर्मणोः' इत्यादि। इष्वासः कर्त्ता, लक्ष्यं कर्म। `कर्मापादानयोः' इति. कर्म तदेव। अपादानं यतः परो निर्याति। `कर्माधिकरणयोर्वा' इति। इहेत्यनेन यन्निर्दिश्यतेतदधिकरम्। कर्म च तदेव। `तयोर्मध्ये क्रोशः' इति। क्रोशस्येहापादानाधिकरमत्वाभावात् सप्तमीपञ्चम्यौ न भवतिः। न हि क्रोशाच्छरोऽपैति, किं तर्हि ? तदेकदेशात्। नापि क्रोशे व्यवस्थितं लक्ष्यम्, किं तर्हि ? तदेकदेश एव। तस्मात् क्रोशस्य शेषत्वात् षष्ठ्यां प्राप्तायां सप्तमीपञ्चम्यौ विधीयेते। अथात्र संख्यातानुदेशः कस्मान्न भवति ? यावता कालाध्वनौ हि द्वौ, सप्तमीपञ्चम्यावपि द्व, अत एव सामात् संख्यातनुदेशेन भवितव्यम्- कालात् सप्तमी, अध्वनः पञ्चमीत्यत आह-- `संख्यातानुदेशः' इत्यादि। `स्वरितेनाधिकारः' (1.3.11) इत्यत्र स्वरितेनेति योगविभागः कृतः, तत पूर्वेणापि सम्बध्यते. यत्र स्वरितत्वं प्रतिज्ञायते तत्र यथासंख्यं यथा स्यात्। इह तु स्वरितत्वं नास्ति, अतो न भवति संख्यातानुदेशः।।

8. कर्मप्रवचनीययुक्ते द्वितीया। (2.3.8)

`शाकल्यस्य संहितामनु प्रावर्षत्' इति। `अनुर्लक्षणे' (1.4.84) इति कर्मप्रवचनयीसंज्ञा।

9. यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी। (2.3.9)
`उपखार्यां द्रोणः' इति। खार्या अधिको द्रोण इत्यर्थः। `उपोऽधिके च' (1.4.87) इत्युपशब्दस्य कर्मप्रवचनीयसंज्ञा। `यस्य चेश्वरवचनम्' इति। यस्य चेश्वरव्यपदेश इत्यर्थः। ईश्वरव्यदेशस्तु स्वामिन एव सम्भवति। तत्रैव सप्तम्या भवितव्यमिति कस्यचिद्भ्रान्ति स्यात्, अतस्तान्निराकर्त्तुमाह-- `यस्य चेश्वरवचनम्' इत्यादि। यस्य चेश्वरवचनमित्यनेन द्वयोरपि = स्वस्वामिनोः पर्यायेण सप्तमी भवतीति। कथम्, यावता `अधिरीश्वरे' (1.4.97) इत्यनेनाधिकशब्दस्य कर्मप्रवचनीयसंज्ञा विहिता, ईश्वरस्तु स्वमी, स च स्वमपेक्ष्य भवति ? स्वस्वामिसम्बन्धेऽधिशब्दः कर्मप्रवचनीयसंज्ञो भवति। तत्र कदाचित् स्वामी कर्मप्रवचनीयविभक्तया युज्यते, कदाचित् स्वमित्येतत् प्रतिपादितं प्रागेव। कथं पुनर्यस्य चेश्वरवचनमित्युच्यमाने स्वमपि कर्मप्रवचनीयविभक्त्या युज्यते, न हि तस्येश्वरव्यपदेशोऽस्ति ? एवं तर्हि अनुक्तसमुच्चयार्थश्चकारः क्रियते, तेन यस्येश्वरव्यपदेशो नास्ति तत्रापि सप्तमी विज्ञायत इत्यदोषः।।

10. पञ्चम्यापाङपरिभिः। (2.3.10)
अपपरिशब्दयोः `अपपरी वर्जने' (1.4.88) इत्यनेन कर्मप्रवचनीयसंज्ञा विहिता, आङश्च `आङमर्यादावचने' (1.4.89) इत्यनेन। `वृक्षं परि विद्योतते' इति। परिः `लक्षणेत्यम्भूतख्यान'(1.4.90) इत्यादिना।।

11. प्रतिनिधिप्रतिदाने च यस्मात्। (2.3.11)
`मुख्यसदृशः प्रतिनिधिः' इति। मुख्यो यः कश्चित् कार्ये रूढः = समर्थः, प्रसिद्धः = प्रधानभूतस्तेन सदृशो यस्तदभावे तस्य कार्यस्य सिद्ध्यर्थमुपादीयते स प्रतिनिधिः। `अभिमन्युरर्जुनतः प्रति' इति। मुख्यादर्जुनादभिमन्युः प्रतिनिधिस्ततः पञ्चमीविभक्तिर्भवति। प्रतियोगे पञ्चम्यास्तसिः। `माषानस्मै तिलेभ्यः प्रतियच्छति' इति। ये तिलाः पूर्वं दत्तास्तेभ्यो माषाणां प्रतिदानम्। तिलेभ्य इति पञ्चमी भवति। तिलान् गृहीत्वा माषान् ददातीत्यर्थः।
ननु च `प्रतिः प्रतिनिधिप्रतिदानयोः' (1.4.92) इति प्रतेः प्रतिनिधिप्रतिदानरोरेवार्थयोः कर्मप्रवचनीयसंज्ञा, तयोरेव प्रतिना योग उपपद्यते, न तु यतस्ते तस्येति मन्यमान आह-- `ननु च' इत्यादि। `सम्बन्धसम्बन्धात्' इति। सम्बध्यत इति सम्बन्धः=प्रतिनिधिः, प्रतिदानञ्च, तदुभयमयि कर्मप्रवचनीयेन प्रतिना युज्यते। तेन सम्बन्धेन यः सम्बन्धः स सम्बन्धसम्बन्धः। कस्यपुनस्तेन सम्बन्धः ? यतः प्रतिनिधिः प्रतिपादनञ्च तस्य। सम्बन्धिशब्दौ हि प्रतिनिधिप्रतिदानशब्दौ। तौ च नासति पूर्वविज्ञाते मुख्ये पूर्वदत्ते च भवति इति प्रतिनिधिप्रतिदानाभ्यां यस्य सम्बन्धस्तस्य ताभ्यां सम्बन्धोऽस्तीति ते अपि कर्मप्रवचनीयैर्युक्ते भवत इति। क्वचित् `सम्बन्धिसम्बन्धात्' इति पाठः। तत्रापि प्रतिनिधिः हूतिदानञ्च सम्बन्धिशब्देनोच्यते; तदुभयस्यापि कर्मप्रवचनीयेन सम्बन्धात्। तेन सम्बन्धिना यः सम्बन्धः स सम्बन्धिसम्बन्ध इति स एवार्थः।।

12. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि। (2.3.12)
यदि क्रियामात्रमिह चेष्टाशब्देनोच्यते तदा चेष्टाग्रहणमपार्थकम्। सर्वो हि धातुः क्रियावचनः। तस्माद्विशेषणं पादानसामर्थ्यात् परिस्पन्दवचनोऽयं चेष्टाशब्दो विज्ञायते, इत्याह-- `परिस्पन्दक्रियाणाम्' इति। परिस्पन्दः = शरीरव्यापारः, सा क्रिया येषां ते तथोक्ताः।
`अध्वनीत्यर्थग्रहणम्' इति। अर्थप्रधानत्वन्निर्देशस्य, सप्तमीनिर्देशाच्च। यदीह स्वरूपग्रहणं स्यात् `अनध्वनः' इति कुर्यात्। `आस्थितप्रतिषेधश्चायं {विज्ञेयः- काशिका।} विज्ञायते इति। येन देशविशेषेण प्राप्यं ग्रामादिकं प्राप्यते स देशविशेषो लोकेऽध्वेति रूढः। केन च प्राप्यं प्राप्यते ? यः पन्था आक्रान्तस्तेन। तस्मात् तस्यैवायं प्रतिषेधः। यदा तु स एवोत्पथेन प्राप्यते तदा तस्य पथोऽध्वव्यपदेशो न भवतीति भवत्येव तत्र चतुर्थी। `द्वितीयाग्रहणं किम्' इति। कर्मणि कारके चतुर्थ्यां विकल्पितायां पक्षे न्यायप्राप्तैव द्वितीयेति भावः। तत् क्रियते बाधकबाधनार्थम्। `अपवादविषयेऽपि यथा स्यात्' इति। अथार्थग्रहणं किमर्थम्, न गतिकर्मणीत्येवोच्येत, यावता गतिरर्थ एव ? नैतदस्ति; या गतिर्गमिनैव शब्दान्तरसन्निधानाद्यनपेक्षतयोच्यते तत्र यथा स्यात्। पादविहरणात्मिका च या गतिः प्रधानभूता तस्या एवग्रहणं यथा स्यादित्येवमर्थम्। तेनेह न भवति-- स्त्रियं गच्छति, अजां ग्रामं नयति। अत्र हि गमेर्मैथुनमथः स्त्रीशब्दसन्निधानाद्गम्यते, न तु गमेः केवलात्। नयतेश्च प्रापणमेवार्थः प्रदानभूतः, तद्विशेषणन्तु प्रादविहणमप्रधानम्। यद्येवम्,ग्रामं गमयति ग्रामाय गमयतीति णन्ते गुणभूतत्वाद्गमर्न सिध्यति, गमेरत्र प्रेषणाध्येषणादिको ह्यर्थः प्राधान्यमनुगच्छति, नैष दोषः ; न ह्यत्र ग्रामो ण्यन्तस्य कर्म, किं तर्हि ? गमेरेव।।

13. चतुर्थी सम्प्रदाने। (2.3.13)
`देवदत्ताय रोचते' इति। `रुच्यर्थानां प्रीयमाणः' (1.4.33) इति संप्रदानसंज्ञा। `पुष्पेभ्यः स्पृह्यति' इति। अत्र `स्पृहेरीप्सितः' (1.4.36) इत्यनेन। `तादर्थ्ये उपसंख्यानम्' इति। तच्छब्देन चतुर्थ्यन्तस्यार्थो निर्दिश्यते। तस्मा इदं तदर्थम्, तस्य भावस्तादर्थ्यम्। तत्र चतुर्थ्या उपसंख्यानम् = प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्-- `चतुर्थी' इति योगविभागः क्रियते, तेन तादर्थ्ये चतुर्थी भवतीति। अथवा `चतुर्थी

तदर्थार्थबलिहितसुखरक्षितैः'(2.1.36) इति तादर्थ्ये चतुर्थ्याः समासवचनं ज्ञापकं भवति-- तादर्थ्येऽपि चतुर्थीति।
`क्लृपि सम्पद्यमाने' इत्यादि। क्लृप्त्यर्थानां धानूनां प्रयोगे सम्पद्यमाने कर्त्तरि संपादनक्रियाविशिष्टे चतुर्थी वक्तव्या, व्याख्येयेत्यर्थः। व्याख्यानं तु तमेव योगविभागमाश्रित्य। तथा `उत्पातेन ज्ञाप्यमाने' इत्यादावपि। `मूत्राय कल्पते यवागूः' इति। यवागूर्मूत्रविकाररूपेण भवतीत्यर्थः। विकाररूपापत्तौ चतुर्ती विज्ञेया। तेनेह न भवति-- देवदत्तस्य शालयः संपद्यन्त इति। यदा चाभेदविवक्षा तदा परत्वात् प्रथमैव भवति, न चतुर्थी-- मूत्रमिदं संपद्यते यवागूरिति, उच्चारोऽयं सम्पद्यते यवौदन इति। यदा तु `जनिकर्त्तृः प्रकृतिः' (1.4.30) इति प्रकृतेरपादानात्वं विवक्ष्यते तदा यवाग्वा इति पञ्चम्येव स्यात्-- मूत्रं सम्पद्यते यवाग्वा इति।
`वाताय कपिला विद्युत्' इति। अत्र कपिलाविद्युदुत्पातो वातस्य लक्षणम्। तेन ज्ञाप्यमाने वाते चतुर्थी भवति। `अरोचकिने' इति। `अत इनिठनौ' (5.2.115) इतीनिः।।

14. क्रियार्थोपपदस्य च कर्मणि स्थानिनः। (2.3.14)
`क्रियार्था क्रियोपपदं यस्य' इत्यादि। कथं पुनरयमर्थो लभ्यते, यावता नेह सूत्रे द्वितीयं क्रियाग्रहणमुपात्तमस्तीत्याह-- `तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (3.3.10) इत्यस्मिन् विषये क्रियार्थोपपदं सम्भवतीति यदत्र क्रियार्थोपपदं तत् क्रियैवेति गम्यते। `स्थानिनः'इति। शब्दास्तिष्ठन्त्यस्मिन्निति स्थानम्। तदस्यास्तीति स्थानि। एतदुक्तं भवति-- यस्यार्थः प्रतीयते, न तु प्रयोगोऽस्ति, स स्थानीत्युच्यत इति।
`एधेभ्यो व्रजति'इति। आङपूर्वो हरतिरत्र स्थानी, तत्कर्म त्वेधाः। एधानाहर्त्तु व्रजतीत्यर्थः। ननु चात्र तादर्थ्यमस्ति, अतस्तादर्थ्ये इत्येवं सिद्धा चतुर्थी, तत्किमर्थमिदं वननम् ? नियमार्थम्- स्थानिनोऽप्रयुज्यमानस्यैव कर्मणि यथा स्यात्, प्रयुज्यमानस् मा भूत्। `भक्षिरत्र स्थानी' इति। प्रविश गृहं पिण्डीं भक्षयेति गम्यमानत्वात्। प्रविश तर्पणमित्यत्रापि पिबतिः स्थानी। `न तु क्रियार्थोपपदः' इति। तुमुन्नादिविशिष्टप्रत्ययान्तो हि क्रियार्थोपपदो भवति। अयन्तु लोडन्तः। न च लोट् क्रियार्थोपपदे विधीयत इति न भवति भक्षिरत्र क्रियार्थोपपदः।।

15. तुमर्थाच्च भाववचनात्। (2.3.15)
`तुमुना समानार्थः' इति। वृत्तौ गम्यमानत्वात् समानशब्दो न प्रयुक्तः। `तुमर्थभाववचनप्रत्ययान्तात्' इति। तुमर्थो भाववचनप्रत्ययोऽन्तो यस्य स तथोक्तः। `भाववचनाश्चेति वक्ष्यति, तस्येदं ग्रहणम्' इति। स एव हि तुमर्थो भाववचनः सम्भवति, नान्यः। `पाकाय व्रजति' इति। यद्यप्यत्र तादर्थ्य गम्यते तथापि चतुर्थी न भवति; तस्मिन्नेव तादर्थ्ये विहितेन भावप्रत्ययेन तस्योक्तत्वात्,यथा-- पाचको व्रजतीत्यत्र न भवति। तेन चतुर्थीविधानार्थमिदमारब्धम्। अथ वा-- भाववचनादेव यथा स्यात्, इह मा भूत्-- पाचको व्रजतीति नियमार्थमेतत्। `पाकः, त्यागः, रागः' इति भावे घञ्। ननु च क्रियार्थोपपदग्रहणमनुवर्तिष्यते, तदर्थाद्विभक्तेर्विपरिणामं कृत्वैवमभिसम्बन्धः करिष्यते-- क्रियार्थोपपदाद्भाववचनादिति। यस्तु क्रियार्थोपपदो भाववचनः स तुमर्थ एवेति किं तुमर्थग्रहणेन ? नैतदस्ति; न हि क्रियार्थोपपदग्रहणं भाववचनस्य विशेषणं सम्भवति। किं तर्हि ? धातोरेव। तस्मात् तुमर्थग्रहणं कर्त्तव्यमेव। `कारको व्रजति'इति-- `तुमुन्ण्वुलौ' (3.3.10) इति ण्वुल्। भवत्ययं तुमर्थो न तु भाववचनः, किं तर्हि ? कर्त्तृवचनः, तेन तदन्तान्न भवति।।

16. नमःस्वस्तिस्वाहास्वधालंवषड्यागाच्च। (2.3.16)
`अलमिति पर्याप्त्यर्थस्य ग्रहणम्' इति. `तस्मै प्रभवति सन्तापादिभ्यः' (5.1.101) इत्यलंशब्दसमानार्थेन प्रभवतिशब्देन योगे चतुर्थीनिर्देशाल्लिङ्गात्। ननु चास्माल्लिङ्गादर्थस्येदं ग्रहणम्, न तु शब्दस्येत्येषोऽर्थः प्रतीयते; न तु पर्याप्त्यर्थस्येत्येषोऽर्थः। तथा च भूषणप्रतिषेदयोरपि ग्रहणं स्यात्। एवञ्च कन्यामलंकुरुते, अलं बाले रोदनेनेत्यादावपि चतुर्थी स्यात्; नैष दोषः; सामर्थ्यात् पर्याप्त्यर्थस्यैव ग्रहणं भविष्यति, कथम् ? कन्यामलङ्कुरुते इत्यत्र `उपपदविभक्तेः कारकविभक्तिर्बलीयसी' (चां.प.69) इति `कर्मणि द्वितीया' (2.3.2) इति द्वितीययैव भवितव्यम्। `अलं बाले रोदनेन' इत्यत्राप्यत एव हेतोः करणे तृतीययैव। अत्र हि रोदनं करणभावमापन्नमेव प्रतिषेधेन सम्बध्यत इति सामर्थ्यात् पर्याप्त्यर्थस्य ग्रहणं सम्पद्यते। `चकारः पुनरस्यैव समुच्चयार्थः' इति। यदेतन्नमःप्रभृतियोगे चतुर्थीविधानं तत्समुच्चयार्थश्चकारः। तेन पुनर्विध्नात् `चतुर्थी चाशिष्यायुष्य' (2.3.73) इत्यादिनाशीर्विवक्षायां पक्षे या षष्ठी विधीयते तामपि बाधित्वा चतुर्थ्येव भवति। यद्यवम्, कारकविभक्तिमपि बाधित्वा `कन्यामलङ्कुरुते' इत्यादौ चतुर्थ्येव स्यात्, ततश्च यदुक्तम्- सामर्थ्यात् पर्याप्त्यर्थस्यैव ग्रहणं भविष्यतीति, तन्नोपपद्यते ? नैष दोषः; कारकविभक्तेर्बलीयस्त्वात्, पुनर्विधानस्य चान्यत्र चरितार्थत्वात्। अथ वा-- वक्ष्यमाणा विभाषा सिंहावलोकितन्यायेनेहाप्युपतिष्ठते। तेन `कन्यामलङ्कुरुते इत्यादौ चतुर्ती न भवति।।

17.मन्यकर्मण्यनादरे विभाषाऽप्राणिषु। (2.3.17)
`अनादरस्तिरस्कारः' इति। अत्रैवानादरशब्दस्य रूढत्वात्। तिरस्कारः = परिभवः, अवज्ञानमित्यर्थः। ` न त्वा तृणाय मन्ये' इति। तृणादपि निकृष्टतरं त्वामहं इत्यर्थः। ` विकरणनिर्देशः किमर्थः' इति। `मनिकर्मणि' इति कस्मान्नोक्तम् ? एव हि लघु सूत्रं भवतीति ? `मन ज्ञाने' (धा.पा.1176) इत्यस्य दैवादिकस्य ग्रहणं यथा स्यात्, `मनु बोधने' (धा.पा.1471) इत्यस्य तानादिकस्य ग्रहणं मा भूदित्येवमर्थो विकरणनिर्देश इति दर्शयितुमाह- `न त्वां तृणं

मन्वे' इति।

`अश्मानं दृषदं मन्ये' इत्यादौ यथाव्यवस्थितस्य वस्तुनः स्वरूपमाविष्क्रियत इत्यत्रानादरो न गम्यते।

`येदतदप्राणिष्विति तदनावादिष्विति वक्तव्यम्' इति। अप्राणिग्रहणपनीयनावादिग्रहणं कर्त्तव्यमित्यर्थः। यथान्यासे हि न त्वा नावं मन्य इत्यत्र चतुर्थी स्यात्। न त्वा शुने मन्य इत्यत्र चतुर्थी न स्यादित्यभिप्रायः।।

18. कर्त्तृकरणयोस्तृतीया। (2.3.18)

`तृतीयाविधाने {प्रकृतयादीनाम्'इतिवृत्तौ पाठः} प्रकृत्यादिभ्य उपसंख्यानम्' इति। किं पुनः कारणम् ? न सिद्ध्यति, कर्त्तृकरणयोरभावात्। तयोस्त्वभावः प्रकृत्याऽभिरूप इत्यादौ क्रियाया अविद्यमानत्वादित्यभिप्रायः। प्रातिपदिकेनात्र सम्बन्दमात्रं प्रतीयते, न तु काचन क्रिया। न च तया विना कर्त्तृकरणे सम्भवतः; तयोः क्रियापेक्षत्वात्। ततश्च सम्बन्धलक्षणा षष्ठी स्यात्-- प्रकृतेरभिरूपः, प्रायस्य याज्ञिकः, गोत्रस्य गार्ग्य इति। `समेन धावति, विषमेण धावति' इति। यद्यप्यत्र क्रियाऽप्यस्ति, तथाऽपि नात्र समविषमशब्दौ करणत्वेन विवक्षितौ, किं तर्हि ? कर्मत्वेन, ततश्च द्वितीया स्यात्। `द्विद्रोणेन धान्यं क्रीणाति' इत्यादावपि द्विद्रोणात्येषोऽर्थो विवक्षितः। `पञ्चकेन पशून् क्रीणाति' इति। पञ्च परिमाणमस्य पशुसंघस्य पञ्चकः सङ्घः। पञ्चकं सङ्घं कृत्वा पशून् क्रीणातीत्यर्थः। एवं `साहस्रेणाश्वान् क्रीणाति'इति साहस्रं सङ्घं कृत्वा। सहस्रं सहस्रं कृत्वेत्यर्थः। उपसंख्यानशब्दस्य प्रतिपादनार्थः। तत्रेदं प्रतिपादनम्-- प्रतीयमानाऽपि क्रिया कारकाणां निमित्तं भवत्येव। इह च प्रकृत्याऽभिरूप इत्यत्रापि करोत्यर्थो भवत्यर्थो वा गम्यते। गार्ग्योऽस्मि गोत्रेणेत्यत्रापि ज्ञाने भवने वा गम्यमाने गोत्रस्य करणत्वं प्रतीयते। समेन धावतीत्यदौ समेन विषमेण वा पथा करणेनेति गम्यते। द्विद्रोणेनेत्यत्रापि तृतीया न कर्मत्वं बोधयति। किं तर्हि ? करणत्वम्। अत्र हि द्विद्रोणाद्यर्थं हिरण्यादिकं मूल्यभूतं तादर्थ्याद्द्विद्रोणादिशब्देनोक्तम्। तस्यापि करणत्वमस्त्येवेति करण इत्येवं सर्वत्र तृतीया सिद्ध्यति।।

19. सहयुक्तेऽप्रधाने। (2.3.19)

क्रियागुणद्रव्यसम्बन्धे हि सति सहयोगो भवति। अतः `पुत्रेण सहागतः' इत्यादीनि क्रियादिसम्बन्धे यथाक्रमुदाहरणानि वृत्तिकृतोपन्यस्तानि। सर्वत्र च पुत्रस्यात्राप्रधान्यमिति ततस्तृतीया भवति। ननु चोभयोरपि पितापुत्रयोः क्रियादिसम्बन्धः प्रतीयते, तत्कुतः पुत्रस्याप्राधान्यमितरस्य प्रधानभाव इत्याह-- `पितुरत्र' इत्यादि। `यद्य्प्युभयगतः क्रियादिसम्बन्धः प्रतीयते, तथाऽप्युपात्तशब्दव्यापारापक्षया प्रधानाप्रधानव्यवस्थाः-- शब्देन यस्य क्रियादिसम्बन्धः प्रत्याय्यते तत् प्रधानमितरदप्रधानमिति। इह तु पितुरव क्रियादिसंबन्धः प्रत्याय्यते शब्देन, न तु पुत्रस्य । कुत एतत् ? शब्दशक्तस्वाभाव्यात्। तथाविधा हि शब्दशक्तिर्यतः पितुरेवात्र क्रियादिसम्बन्धं श्नोति प्रतिपादयितुम्, न पुत्रस्येति; एवञ्चागत इत्यादवेकवचनमुपपद्यते; अन्यथा हि द्वित्वाद्द्विवचनं स्यात्, यथा-- पिततापुत्रावागताविति। `पुत्रस्य तु प्रतीयमानत्वादप्राधान्यम्' इति। अर्थात्स पुनरर्थः सहार्थयोगः। स च भेदाधिष्ठानत्वात् पुत्रस्य क्रियादिसम्बन्धमन्तरेण न सम्भवतीति सम्बन्धस्य नान्तरीयकत्वात् पुत्रस्यापि क्रियादिसम्बन्धं प्रत्याययति। `सहार्थेन योगे तृतीयाविधानात्' इति। कुतः पुनरेतदवगतं सहार्थेन योगे तृतीयाविधानमिति ? युक्तग्रहणात्। तस्य चैतदेव प्रयोजनम्-- सहार्थेन योगे तृतीया यथा स्यात्, नान्यत्। `शिष्येण सहोपाध्यायस्य गौः' इति। अत्र द्रव्यसम्बन्धः षष्ठ्यैवोपाध्यायस्योच्यत इत्यस्य प्राधान्यात्। तत्रासत्यप्रधानग्रहणे प्रधानेऽप्युपाध्याये स्यात्। ननु च परत्वात् षष्ठी भविष्यति? न भविष्यति; अशेषत्वात्। सति त्वप्रधानग्रहणे शेषोऽयं सम्पद्यत इति षष्ठी।।

20. येनाङ्गविकारः। (2.3.20)

अयमङ्गशब्दोऽवयवे प्रसिद्धः। स यदि तत्रैव वर्त्तमान इह गृह्यते तदाऽत्रैव स्यात्-- अक्षि काणमस्येति; अत्र ह्यक्ष्णः शरीरावयवस्य विकारः काणेन गुणेन द्योत्यत इति। इह तु न स्यात्-- अक्ष्णा काण इति। न ह्यत्रावयवस्याक्ष्णो विकारो लक्ष्यते, किं तर्हि ? अङ्गनः समुदायस्येत्यत आह-- `अङ्गशब्दोऽत्र'इत्यादि। अङ्गमस्यास्तीत्यङ्गः, अर्श आदित्वादच्प्रत्ययान्तोऽङ्गशब्द उपात्त इति दर्शयति; अङ्गिनोऽङ्गापेक्षत्वात्। यदपेक्षयाऽङ्गिनोऽङ्गित्वं तदेव येनेत्यनेन निर्दिश्यत इति दर्शयितुमाह-- `येन' इत्यादि। विकृतेनेति सामर्थ्याल्लब्धमर्थं दर्शयति। न ह्यविकृतेनाङ्गनिनोऽङ्गेन विकारो लक्ष्यते। `लक्ष्यते' इति। द्योत्यत इत्यर्थः। `अक्ष्णा काणः' इति। अत्राक्ष्णाऽवयवेन विकृतेनाङ्गिनो देवदत्तस्य विकारो लक्ष्यत इति तत्सतृतीया। विभक्तिर्भवति। कथं पुनरवयवेन विकृतेन समुदायस्तथा व्यपदिश्यत इत्याह-- `अवयवधर्मेण' इत्यादि। याथाऽढ्यमिदं नगरमित्यवयवधर्मेणाढ्यत्वेनात्र समुदायो व्यपदिश्यते, तथेहाप्यवयवेन विकृतन समुदायो व्यपदिश्यत इति। कथं पुनरत्राक्षिशब्दस्य प्रयोगः क्रियते, यावता विनाऽपि तेन काणत्वं गुणः समुदायस्य प्रतीयत एव ? सत्यमेतत्; लौकिके शब्दप्रयोगे गुरुलाघनं प्रत्यनादरात्। यस्तु तदाद्रियते सोऽक्षिशब्दं न प्रयुङ्क्त एव।

`अक्षि काणमस्य' इति। अत्रासत्यङ्गग्रहणे काणशब्दात् तृतीया स्यात्। लक्ष्यते हि काणत्वेन गुणेनाक्ष्णो विकारः समुदायस्यावयवस्य।।

21. इत्थम्भूतलक्षणे। (2.3.21)

कञ्चित् प्रकारमित्यनेन इत्यमित्यस्यार्थमाचष्टे। तथा हि प्रकारवचने `इदमस्थमुः' (5.3.24) इति थमुप्रत्यये विहिते इत्थमित्येद्रूपं भवति। सामान्यस्य

भेदको विशेषः प्रकार उच्यते। आपन्न इत्यनेन भूतशब्द्सयार्थमाचष्टे। तथा हि-- `भू प्राप्तावात्मनेपदी' (धा.पा.1844) इत्यस्य चौरादिकस्य `आ धृषाद्वा' (धा.पा.805) इत्यस्यानन्तरम्) इति यदा णिज् नास्ति तदा क्तप्रत्यये `भूत' इति रूपं भवति। तस्येतीत्वम्भूतस्य । `लक्षणम्' इति। लक्ष्यते चिह्न्यतेऽनेनेति लक्षणम् = चिह्नम्। `अपि भवान् कमण्डलुना छात्रमाद्राक्षीत्' इति। अत्र मनुष्यत्वं सामान्यम्, तस्य च्छात्रत्वं प्रकारःच; तं प्राप्तस्य च्छात्रस्य कमण्डलुर्लक्षणम्। `छात्रेणोपाध्यायम्' इति। मनुष्यत्वं सामान्यम्, तस्योपाध्यायत्वं प्रकारः; तं प्राप्तस्योपाध्यायस्य लक्षणं छात्रः। `शिखया परिव्राजकम्' इति। मनुष्यत्वं सामान्यम्, परिव्राजकत्वं प्रकारः। तं प्राप्तस्य परिव्राजकस्य लक्षणं शिखा।
`लक्षणस्य समासेऽन्तर्भूतत्वात्' इति। एकार्थीभावद् बहुव्रीह्यर्थेन लक्षणार्थस्यापृथग्भावादित्यर्थः। बहुव्रीहावेव वाच्यत्वेनान्तर्भावो लक्षणस्येति गतार्थत्वात् तृतीया न भवति। इत्थम्भूतलक्षण इति किम् ? वृक्षं परि विद्योतते विद्युत्। नात्र विद्योतनत्वप्राप्तस्य कस्यचिद्वृक्षेण लक्षणम्। किं तर्हि ? विद्योतनस्यैव।।

22. संज्ञोऽन्यतरस्यां कर्मणि। (2.3.22)
`मात्रा सञ्जानीते' इति। `ज्ञाननोर्जा' (7.3.79) इति जादेशःक, `ई हल्यघोः' (6.4.113) इतीत्वम्, `संप्रतिभ्यामनाध्याने' (1.3.46) इत्यात्मनेपदम्। आध्याने तु `अधीगर्थदयेशां कर्मणि' (2.3.52) इति परत्वात् षष्ठी भवति-- मातुः सञ्जानातीति। कृत्प्रयोगे चानाध्यानेऽपि `कर्तृकर्मणोः कृति' (2.3.65) इति परत्वात् षष्ठ्येव भवति-- संज्ञातेति।।

23. हेतौ। (2.3.23)
हेतुर्द्विविधः-- शास्त्रीयः,लौकिकश्च। तत्र शास्त्रीयः ` तत्प्रयोजको हेतुश्च' (1.4.55)। लौकिकः फलसाधनयोग्यः पदार्थः। तत्र शास्त्रीये हेतौ `कर्तृकरणयोस्तृतीया' (2.3.18) इत्येवं सिद्धा तृतीया। तस्माल्लौकिकस्य हेतोरिदं ग्रहणमित्यत आह-- `फलसाधनयोग्यः' इत्यादि। अनिष्पादयन्नपि फलं तासाशनयोग्यः पदार्थो लोके हेतुरित्युच्यत इति योग्यग्रहणम्। `धनेन कुलम्' इत्यादौ कुलादीन्यकुर्वन्त्यपि धनादीनि तत्करणयोग्यतया लोके हेतुवय्पबदेशमासादयन्तीति तेभ्यस्तृतीया। इह यूपाय दार्विति सदपि दारुणो हेतुत्वं न विवक्षितम्। किं तर्हि ? कारणस्यान्यथात्वम्। तेन तादर्थ्ये चतुर्थी भवति।।

24. अकर्त्तर्यृणे पञ्चमी। (2.3.24)
`शतेन बन्धितः'इति। बन्धेर्ण्यन्तस्य निष्ठायामेतद्रूपम्। `शतमृणञ्च भवति'इति। उत्तमर्णाय देयत्वात्। प्रयोजकत्वात् कर्तृसंज्ञेति, `तत्प्रयोजको हेतुश्च' (1.4.55) इति चकारात् कर्त्तृसंज्ञाविधानात्। ननु लौकिको हेतुः पूर्वसूत्रे गृहीतः, स चेहानुवर्त्तत इति तत एव पञ्चमी विधीयते, न चात्र लौकिको हेतुः, किं तर्हि ? पारिभाषिक इति प्राप्त्यभावादकर्त्तरीति प्रतिषेधोऽनर्थकः ? नैतदस्ति;तत्र हि शास्त्रीये हेतौ तृतीया सिद्धेवेति लौकिकस्य हेतोर्ग्रहणम्, इह तु पञ्चमी विधीयते। न चातर्ाऽसौ शास्त्रीये हेतौ केनचित् सिध्यति। द्वावपीह हेतू गृह्येते। अथ वा शास्त्रीयस्यापि हेतोर्लौकिकं हेतुत्वमविरुद्धमेव। यो हि बन्धने प्रयुङ्क्ते स तत्साधनयोग्यो भवत्येव।।

25. विभाषा गुणेऽस्त्रियाम्। (2.3.25)
`धनेन कुलम्' इति। धनं द्रव्यम्, न गुणः। द्रव्याश्रितो हि गुणो भवति, न द्रव्यमेव ! गुणशब्देन चात्र सम्बन्धिमात्रं परार्थरूपापन्नमुच्यते, तेनाग्निरत्र धूमादित्याद्यपि सिद्धं भवति। ननु चास्त्रियामित्युच्यते, तेन नास्तीह घटोऽनुपलब्धेरित्यादि न सिध्यति ? नैतदस्ति;`विभाषा गुणे' इति योगविभागः कर्त्तव्यः।तेन यत्रेष्यते तत्रय योगविभागादिष्टसिद्धिरिति स्त्रियामपि भवत्येव।।

26. षष्ठी हेतुप्रयोगे। (2.3.26)
प्रयोगस्य शब्दधर्मत्वात् हेतुरित्यनेन हेतुशब्द एव विज्ञायत इत्यत आह--`{हेतुशब्दस्य प्रयोगे--काशिका} हेतुशब्दप्रयोगे' इति। एवञ्च हेतुशब्दस्य स्वरूपग्रहणे सति तत्पर्याणां निमित्तकारणादीनां प्रयोगे षष्ठी न भवतीति किमर्थं पुनरिदमुच्यते, यावता शेषविवक्षयैवात्राध्ययनादिभ्यः षष्ठी भविष्यति, तत्समानाधिकरण्याच्च हेतुशब्दादपि ? एवं तर्हि सैव शेषविवक्षाऽस्मिन् विषये वचनेनाख्यायते मन्दधियामनुग्रहाय।।

27. सर्वनाम्नस्तृतीया च। (2.3.27)
`निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायदर्शनम्' इति। एतच्चकारस्यानुक्कतसमुच्चयार्थत्वल्लभ्यत इति वेदितव्यम्।
यदर्थग्रहणमेतत कस्मात् पर्यायोपादानं कृतमित्माह-- `पर्यायोपादानम्' इत्यादि। असति पर्यायग्रहण एतत् स्वरूपग्रहणमिति कस्यचिद्भ्रान्ति स्यात्। अतस्तन्निराकर्त्तु पर्यायग्रहणम्।।

28. अपादाने पञ्चमी। (2.3.28)

`वृकेभ्यो बिभेति' इति। `भीत्रार्थानां भयहेतुः' (1.4.25) इत्यपादानत्वम्। अध्ययनात् पराजयत इत्यत्र `पराजेरसोढः' (1.4.26) इत्यपादानत्वम्। `विपराभ्याञ्जेः' (1.3.19) इत्यात्मनेपदम्।

`पञ्चमीविधाने इत्यादि। यदेतत् पञ्चमीविधानमत्र ल्यब्लोपे पञ्चमो स्यादित्युपसंख्यानम् = व्याख्यानं कर्त्तव्यमित्यर्थः। तत्रेदं व्याख्यानम्-- इह पूर्वसूत्राच्चकारोऽनुवर्त्तते। स चानुक्तसमुच्चयार्थः। तेन ल्यब्लोपे कर्मणि पञ्चमी भविष्यति।

`अधिकरणे चोपसंख्यानम्' इत्यादि। अत्राप्युपसंख्यानशब्दस्य प्रतिपादनमर्थः। प्रतिपादनं तु पूर्ववच्चकारानुक्तसमुच्चयार्थत्वमाश्रित्य कर्त्तव्यम्।

`प्रश्नाख्यानयोश्च' इत्यादि। वक्तव्येति व्याख्यातव्येत्यर्थः। व्याख्यानन्तु तामेव चकारानुवृत्तिमाश्रित्य कर्त्तव्यम्। अथ वा-- अत्रापादान इत्येवं सिद्धा पञ्चमी। तथा हि कुतो भवानित्यत्रागच्छतीति प्रतीयते, पाटलिपुत्रादित्यत्राप्यगच्छामीति; अतः स्फुटमेवापादानत्वम्।

`यतश्चाध्वकाल' इत्यादि। यतः प्रभृत्यध्वनः कालसय् निर्माणमियत्तापरिच्छेदस्तत्र पञ्चमी वक्तव्या। एतदुक्तं भवति-- अध्वनि काले च निर्मीयमाणे यदवध्रिभूतत्वेन विवक्ष्यते तत्र पञ्चमी वक्तव्या = व्याख्येया। व्याख्यानन्तु पूर्ववच्चाकारानुवृत्तिमाश्रित्य कर्त्तव्यम्। अथ वा- अध्वनि निर्मीयमाणे अपादान इत्येवं सिद्धा पञ्चमी। तथा हि-- गवीधुमतः साङ्काश्यं चत्वारि योजनानीत्यत्र निःसृत्येति क्रिया गम्यते। अतो युक्तमेवापादानत्वम्। कार्त्तिक्या आग्रहायणी मास इत्यत्रापि परेणेति शब्दो गम्यते। तत्रोत्तरसूत्रेण दिग्योलक्षणा पञ्चमी भविष्यति।

`तद्युक्तात्काले' इत्यादौ तदित्यनेन पञ्चमी सम्बध्यते। पञ्चमीयुक्तात् परो यः कालस्तत्र सप्तमी वक्तव्या = व्याख्येया। व्याख्यानं तु कार्त्तिक्या आग्रहायणी मास इत्यत्र `यस्य च भावेन भावलक्षणम्'(2.3.37) इत्यनेन सप्तमी सिद्धा। कार्त्तिक्याः परो यो मासस्तत्सत्तयाऽऽग्रहायण्या भावो लक्ष्यते।

`अध्वनः प्रथमा' इत्यादि। तद्युक्तादिति वर्त्तते। तत्र यदा साङ्काश्यस्य योजनादभेदो विवक्ष्यते तदा प्रथमा। `गवीधुमतः साङ्काश्यं चत्वारि योजनानि' इति. भेदविवक्षायान्तु `यस्य च भावेन भावलक्षणम्' (2.3.37) इति सप्तमी। तथा हि गवीधुमतः सांकाश्यं चतुर्षु योजनेषु गतेषु सत्सु भवतीत्येषोऽर्थः प्रतीयते। तत्र योजनस्य सम्बन्धि सम्बन्धि गमनं साङ्काश्यभावस्य लक्षणं भवति।।

29. अन्यारादित्तरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते। (2.3.29)

`अन्य इत्यर्थग्रहणम्' इति। अर्थद्वारक एव हि शब्दस्य शब्दान्तरणे योगो भवति। तस्मादर्थस्येदं ग्रहणं विज्ञायते। तेनेत्यादिनाऽर्थग्रहणस्य फलं दर्शयति। अथान्यो देवदत्ताद्यज्ञदत्त इति यज्ञदत्तशब्दादपि पञ्चमी कस्मान्न भवति ? देवदत्तादुत्पन्नया पञ्चम्योभयगतस्याप्यन्यत्वस्य प्रतिपादित्वात् तद्विशिष्टमन्यत्वमेकत एवोत्पाद्यमानया पञ्चम्या शक्यं प्रतिपादयितुमिति द्वितीयसम्बन्धिनः पञ्चमी न भवति।

`इतर इति निर्दिश्यमानस्य प्रतियोगी पदार्थ उच्यते' इति।यथा क्वचित्प्रकरणे द्वौ प्रकृतौ -- देवदत्तः, अन्यश्च कश्चित्। तत्रैकस्तावन्निर्दिश्यते-- देवदत्तः शूर इति। तस्य निर्दिश्यमानस्य योऽसौ द्वितीयः सम्बन्धी प्रतियोगी स इतरशब्देनोच्यते, यथा--इतरः कातर इति।

`शब्दग्रहणम्'इत्यादि। शब्दग्रहणे सति दिशि दृष्टः शब्दो दिक्शब्द इतेषोऽर्थो लभ्यते । तेन योऽपि सम्प्रति दिक्शब्दो देशे काले च वर्त्तते, सोऽपि दिशि दुष्ट इति तद्योगे पञ्चमी भवति। तत्र देशवृत्तिना पञ्चमी-- पूर्वो ग्रामात् पर्वत इति । कालवृत्तिनाऽपि-- पूर्वो ग्रीष्माद्वसन्त इति। `इतरथा हि दिग्वृत्तिनैव योगे स्यात्' इति। तत्रैव दिक्शब्दस्य मुख्यत्वात्।

`प्राग्ग्रामात्' इति। प्रपूर्वादञ्चतेर्ऋत्विगादिसूत्रेण (3.2.59) क्विन्प्रत्ययः। तदन्ताद्यदादिशब्देभ्यः `सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकाल' (5.3.27) इत्यादिना विहितस्य स्तातेः `अञ्चेर्लुक्' (5.3.30) इति लुक्; लुकि कृते तदेदमुदाहरणम्। `दक्षिणा ग्रामादुत्तरा ग्रामात्। `दक्षिणाहि ग्रामादुत्तराहि ग्रामात्' इति। `दक्षिणादाच' `आहि च दूरे' (5.3.37) `उत्तराच्च' (5.3.38) इत्याजाही प्रत्ययौ।।

30. षष्ठ्यतसर्थप्रत्ययेन। (2.3.30) अतसर्थाः प्रत्यया दिक्शब्देभ्यः स्वार्थ एव भवन्तीति तदन्तस्य दिक्शब्दत्वात् पूर्वेण पञ्चम्यां वचनमिदम्. `पुरो ग्रामस्य' इति। `पूर्वाधरावणामसिपुरधवश्चैषाम्' (5.3.39) इत्यादिनाऽसिप्रत्ययः, पूर्शब्दस्य पुरादेशश्च। पुरस्तादित्यत्रापि `दिक्शब्देभ्यः सप्तमी' (5.3.27) इत्यादिनाऽस्तातिप्रत्ययः।`अस्ताति च' (5.3.40) इति पुरादेशः। `उपरि ग्रामस्य, उपरिष्टाद्ग्रामस्य' इति। `उपर्युपरिष्टात्' (5.3.31) इत्यूर्ध्वशब्दस्योपि इत्यादेशो रिलरिष्टातिलौ च प्रत्ययौ भवतः।.

31. एनपा द्वितीया। (2.3.31)

`पूर्वेण षष्ठ्यां प्राप्तायां वचनमिदम्'इति। एनपोऽतसर्थत्वात्। `तदर्थो योगविभागः कर्त्तव्यः' इति. एनपेति पृथयोगः कर्त्तव्यः,एनपा षष्ठी यथा स्यात्। अन्यथा हि द्वितयीयासौ बाध्येत। ततो द्वितीयेति द्वितीयो योगः, अत्र चैनपेति वर्त्तते।।

32. पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्। (2.3.31)

`पञ्चमीग्रहणमनुवर्त्तते' इति। स्वरितत्वात्। इमे सर्वे पृथगादयोऽसहायेऽर्थे वर्त्तन्ते। भेदेनोपादानन्तु पर्यायान्तरनिवृत्त्यर्थम्। इह तृतीयापञ्चम्यौ मा भूताम्-- हिरुग् देवदत्तस्य। विष्वग् देवदत्तस्येति। तत्रासत्यां पञ्चमीग्रहणानुवृत्तौ यथा हिरुगित्यादिना पर्यायान्तरेण योगे षष्ठी भवति, तथा पृथगादिभिर्योगे पक्षे षष्ठी स्यात्, न पञ्चमी। तस्मात् पञ्चमीग्रहणमनुवर्त्तनीयम्, अनुवृत्तेरेव पक्षे भविष्यति, तत् किमर्थमन्यतरस्यां ग्रहणम् ? सत्यम्; तत् कृतञ्च तस्या

एवानुवृत्तेः सूचनार्थमुत्तरार्थञ्च।।

33.करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य। (2.3.333)
`यदा तु धर्ममात्रम्' इत्यादि। यद्योगाद्द्रव्यं स्तोकादिव्यपदेशमासादयति ते गुणा धर्मशब्देनोच्यन्ते। तन्मात्रं स्तोतादिभिः शब्दैरभिधीयमानं करणत्वेन यदा विवक्ष्यते न तु द्रव्यम्, तदा स्तोकादिशब्दानामसत्त्ववचनता। यदा तु सोऽयमित्यभेदात् तद्वति द्रव्ये वर्त्तन्ते, तदा तेषां सत्त्ववनता भवति।
`क्रियाविशेषणे मा भूत्' इति। क्रियायाः साध्यत्वात् कर्मत्वम्। तद्विशेषणमपि कर्म भवति, तच्चासत्त्वं भवति। क्रियैव हि तावद्द्रव्यं न भवति, कुतः पुस्तद्विशेषणं द्रव्यं भविष्यति ? एकार्थत्वेऽपि स्तोकादीनां भेदेनोपादानां पर्यायान्तरनिवृत्त्यर्थम्। इह मा भूत्-- मात्रया मुक्त इति।।

34. दूरान्तिकार्थैः षष्ठ्यन्तरस्याम्। (2.3.34)
विकल्पेन पञ्चम्यां विहितायां पक्षे शेषत्वादेव यद्यपि सिध्यति, तथाऽपि तदिह षष्ठीग्रहणं कृतं तत् `चतुर्थी चाशिष्य' (2.3.73) इत्यादिनाऽऽशिषि या चतुर्थी विधीयते तामपि बाधित्वा षष्ठ्येव यथा स्यादित्येवमर्थम्-- दूरं हितं ग्रामस्य, अन्तिकं हितं ग्रामस्येति। ननु चान्यतरस्यांग्रहणं प्रकृते पुनरन्यतरस्यांग्रहणं किमर्थमित्याह-- `अन्यतरस्यांग्रहणम्' इत्यादि। यदीहान्यतरस्यांग्रहणं न क्रियेत तदा पक्षे तृतीया स्यात्; तस्या एवानन्तरसूत्रे श्रुतत्वात्। पुनरन्यतरस्यांग्रहणं क्रियमाणं पञ्चमीविधानार्थं विज्ञायते; प्रयोजनान्तराभावात्। तथा हि-- तृतीयाविकल्पार्थं तावदेतन्न भवति। तृतीयाविकल्पो हि पूर्वकेणान्यतरस्यांग्रहणेन सिध्यति। न चान्या काचिद्विभक्तिः प्रकृता, किं तर्हि ? पञ्चमी। तस्मात् पञ्चमीविकल्पार्थमेतद्विज्ञायते।।

35. दूरदान्तिकार्थभ्यो द्वितीया च। (2.3.35)
`{एवम्प्रकारकं वाक्यं वृत्तौ नास्ति}पञ्चमी च' इति। तदनुवृत्तिसामर्थ्यात्। `तृतीयाऽपि समुच्चीयते' इति। चकारेण। `यथायथम्' इति। यथास्वं यो यस्यात्मीयो विषयस्तत्रासौ भवति, न विभक्त्यन्तरमित्यर्थः।।

36. सप्तम्यधिकरणे च। (2.3.36)
`दूरान्तिकार्थेभ्यश्चतस्रो विभक्तयो भवन्ति' इति। पूर्वसूत्रेण द्वितीयादयस्तिस्रः, अनेन सप्तमी।
`सप्तमीविधाने क्तस्येन्विषयस्य' इत्यादि। इन्विषयो यः क्तस्तदीये कर्मणि सप्तमी। विधेया। कश्चेन्विषः क्तः ? यस्तदन्तस्तेनैव सह प्रयुज्यत इत्यर्थः। अनन्यत्रभावार्थत्वादत्र विषयशब्दस्य। `अधीती व्याकरणे' इति। अधीतं व्याकरणमनेनेति। `श्राद्धमनेन भुक्तम्' (5.2.85) इत्यतोऽनेनेत्यनुवर्त्तमाने `पूर्वादीनिः' (5.2.86) इत्यत इनिरित्यनुवर्त्तमाने च `इष्टादिभ्यश्च' (5.2.88) इतीनिप्रत्ययः। अत्र यद्यपि कर्मण्येव क्तो विहितस्तथापि तद्धित उत्पन्नेऽधीतव्याकरणोरभिसम्बन्धो निवर्त्तते। अस्ति च धात्वर्थस्य व्याकरणेन सम्बन्ध इति कर्मैव व्याकरणं भवतीत्यतो द्वितीया स्यात्, यथा-- कृतपूर्वी कटमिति। तस्मात् सप्तम्या उपसंख्यानम् = प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्-- योऽसावधीती कर्त्ता तस्य व्याकरणं विषमत्वेन विवक्ष्यते। तस्मादधिकरण इत्येवं सिद्धा सप्तमी।।
`साध्वसाधुप्रयोगे' इत्यादि। अनर्चार्थमिह साधुशब्दस्य ग्रहणम्। अर्चायां हि `साधुनिपुणाभ्यामर्चायाम्' (2.3.43) इत्यनेनैव सिद्धा सप्तमी। `साधुर्देवदत्तो मातरि' इत्यादि। अत्राप्यधिकरण एव सप्तमी। तथा ह्यत्र मातृस्थासु क्रियासु मातृशब्दो वर्तते, पितृस्थासु क्रियासु पितृशब्दः; तासाञ्च क्रियाणां साध्वसाधुतां प्रति विषयभावोऽस्तीति वैषयिकाधिकरण एव सप्तमी। वक्तव्यशब्दस्तु व्याख्येय इत्यर्थे वर्त्तते। एवमुत्तरत्रापि।
`कारकार्हाणाञ्च' इत्यादि। भावप्रधानोऽत्र कारकशब्दः। क्रियां प्रति येषां कारकत्वं साधनत्वं न्याय्यं ते कारकार्हाः, तेषां कारकार्हत्वे सप्तमी वक्तव्या। `ऋद्धेषु' इत्यादि। ऋद्धा हि भुजिक्रियां प्रति साधनभावमर्हन्ति। तेषामेव चेह कारकत्वं विवक्षितम्। एतदनुसारेण कारकार्हाणाञ्चाकारकत्व इत्येवमादेरर्थो वेदितव्यः। अत्रापि सर्वत्र `यस्य च भावेन भावलक्षणम्' (2.3.37) इत्येनैव सिद्धा सप्तमी। तथा हि-- ऋद्धादिसम्बन्धिना भुजिक्रियादिलक्षणेनात्र भावेन दरिद्रादिसम्बन्ध्यासनादिभावो लक्ष्यते।
`चर्मणि द्वीपिनं हन्ति' इत्यत्र द्वीपिननस्य निमित्तं चर्म, तस्य द्वीपिना कर्मणा सह संयोगः। अत्रापि चकारस्यानुक्तसमुच्चयार्थत्वात् सिद्धा सप्तमी। ननु च दूरान्तिकार्थानुकर्षणार्थश्चकारःच नार्थस्तदनुकर्षणार्थेन चकारेण, सप्तमीति योगविभगादेव दूरान्तिकार्थेभ्यः सप्तममी भविष्यति। अथ वा-- उत्तरसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात् सप्तमी वेदितव्या।।

37. यस्य च भावेन भावलक्षणम्। (2.3.37)
कीदृशी पुनः क्रिया क्रियान्तरं लक्षयतीत्य त आह-- `प्रसिद्धा च' इत्यादि। चकारोऽवधारणार्थः, प्रसिद्धैवेत्यर्थः। न हि स्वयमप्रसिद्धं परस्य लक्षणमुपपद्यते। अथ कथं फलायामानेष्वाम्रेषु गतः, पक्तेवष्वागत इत्यत्र सप्तमी, न हीह भावः श्रूयते ? यद्यपि न श्रूयते ? तथाऽपि गम्यते। फलायमानेषु जातेष्वित्यर्थः।।

38. षष्ठी चानादरे। (2.3.38)

अनादरः तिरस्कारः, परिभव इत्यर्थः। `रुदतः' इति। `रुदिर् अश्रुविमोचने' (धा.पा.1067) शतृप्रत्ययः।।

39. स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च। (2.3.39)
स्वामीश्वराधिपतीनामेकार्थत्वेऽपि भेदेनोपादानं पर्यायान्तरनिवृत्यर्थम्। इह मा भूत्-- ग्रामस्य राजेति। `षष्ठ्यामेव प्राप्तायाम्' इति। शेषलक्षणायां षष्ठ्यां प्राप्तायाम्।।

40. आयुक्तकुशलाभ्यां चासेवायाम्। (2.3.40)
आयुक्तता निपुणता च कटादिकरणविषयैवेति सप्तम्यामेव प्राप्तायां पक्षे षष्ठीविधानार्थं वचनम्।
`आसेवायामिति किम् ? आयुक्तो गौः शकटे' (इति)। ईषद्युक्त इत्यर्थः।।

41. यतश्च निर्धारणम्। (2.3.41)
किमर्थं पुनरिदम् ? यावता निर्धार्यमाणोऽवयवः समुदायान्तर्भूतः; तत्र यदा समुदायास्याधिकरणत्वं विवक्ष्यते तदा सप्तमी सिद्धैवेति, यथा-- वृक्षे शाखेति; यदा त्ववयवावयविसम्बन्धस्तदा षष्ठी, यथा-- वृक्षस्य शाखेति ? सत्यमेतत्; प्रपञ्चार्थं वचनम्।।

42. पञ्चमी विभक्ते। (2.3.42)
`विभागो विभक्तम्' इति। `नपुंसके भावे क्तः' (3.3.114)। ` यस्मिन्निर्धारणाश्रये' इति। यतो निर्धारयते स इह निर्धारणाश्रय इति सर्वस्मिन्नेव निर्धारणाश्रये विभागोस्तीति विशेषणोपादानसार्थ्याद्विभाग एव यत्र स निर्धारणाश्रयो विज्ञायते; तेन कृष्णा गवां सम्पन्नक्षीरतमेत्यत्र न भवति। तथा हि-- गोषु निर्धार्यमाण एकदेशो यस्मात् गोत्वेनान्तर्भूतः प्रतीयते तस्मान्नास्ति विभाग इति। यदा तु कृष्णेन गुणेन पथग्भूतः प्रतीयते तदास्ति विभाग इति। नात्र निर्धारणाश्रयो विभाग एव। इह पुनर्माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इति माथुरत्वेन नाप्याढ्यतरत्वेन माथुराणामन्तर्भावः। तस् ादत्र विभाग एवेत्ययमस्य योगस्य विषयः।
अन्ये त्वाहुः-- यत्र राशीकृत्य पृथक्करणं स पूर्वस्य योगस्य विषयः; यत्र तु पृथग्भूतस्यैव गुणान्तराविष्करणं सोऽस्य; तत्र द्वयोरप्यवस्थयोर्विभाग एवेति कृत्वा अयमपि योगः प्रपञ्चार्थ एव। विभागो हि सम्नब्धात्प्रच्युतिः। पाटलिपुत्रकाश्च सम्बन्धात् प्रच्यवमानानां माथुराणां सम्बन्धे प्रच्युतेरवधिभावमुपवान्तीत्यपादान इत्येवं पञ्चमी सिद्धा।।

43. साधुनिपुणाभ्यमर्चायां सप्तम्यप्रतेः। (2.3.43)
`{अप्रत्यादिभिरहित वक्तव्यम्' इति वृत्तौ पाठः।} अप्रत्यादेरिति वक्तव्यम्' इति। के पुनः प्रत्यादयः ? येषां `लक्षणेत्थम्भूताख्यान' (1.4.90) इत्यादिना कर्मप्रवचनीयसंज्ञा विहिता ते प्रतिपर्यनवः इत्यादयः।।

44. प्रसितोत्सुकाभ्यां तृतीया च।
प्रसितशब्दोऽयं गुणवचनोऽप्यस्ति-- प्रकृष्टः सितः प्रसितः, क्रियाशब्दोऽप्यस्ति-- `षिञ् बन्धने' (धा.पा.1477) इत्यस्य प्रपूर्वसय् निष्ठायां व्युत्पाद्यते, तत्रेहोत्सुकशब्देन क्रियाशब्देन साहचर्यात् क्रियाशब्दो विज्ञायत इत्यत आह-- `प्रसितः प्रसक्तः' इति। `यस्तत्र नित्यमेवाबद्धः स प्रसितशब्देनोच्यते' इति। आबद्ध इवाबद्धः, यो हि यत्र प्रसक्तः स तत्राबद्ध इव भवति। `केशैः प्रसितः, केशेषु प्रसितः' इत्यादि। प्रसितत्वमुत्सुकत्वञ्च केशविषयमिति `सप्तम्यधिकरणे' (2.3.36) इत्येव सिद्धा सप्तमी पक्षे तृतीयाविधानार्थं वचनम्।।

45.नक्षत्रे च लुपि। (2.3.45)
नक्षत्रे च लुपीति सुब्व्यत्ययेन पञ्चम्यर्थे सप्तमीविधानम्। अत एवाह-- `लबन्तान्नक्षत्रशब्दात्' इत्यादि. `पुष्येण' इत्यादि। `नक्षत्रेण युक्तः कालः' (4.2.3) इति विहितस्याणः `लुबविशेषे' (4.2.4) इति लुप्। पञ्चालेषु वसतीत्यत्रापि `तस्य निवासः' (2.3.36) इति विहितस्याणः `जनपदे लुप्' (4.2.81) इति लुप्।
`मघासु ग्रहः' इति। सामीप्येऽधिकरण एव सप्तमी। अत्र `नक्षत्रेण युक्तः कालः' (4.2.3) इत्यस्यार्थस्याविवक्षितत्वादण् न भवति। `अद्य पुष्यः' इति। पूर्ववदण्, लुप्। `अधिकरणे' (2.3.36) इत्यनुवर्त्तते। न चेहाधिकरणत्वं विवक्षितमिति भावः।।

46. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा। (2.3.46)
`प्रातिपदिकार्थः सत्ता'इति। यदि जातिस्तदा देवदत्तादौ न स्यात्। अथ सतो भावः सत्ता, तदाकाशकुसुमादौ न स्यादित्याह-- प्रादिपदिकार्थः सत्तेति। यत्रार्थान्तरनिरपेक्षा शब्दस्य प्रवृत्तिः स सर्वः प्रातिपदिकार्थः। सत्ताग्रहणन्तूपलक्षणार्थम्। उच्चैर्नीचैः' इति। अत्रोच्चैः शब्दस्य स्वार्थे जात्याद्यर्थान्तनिरपेक्षः

वृत्तिः। अत्र च प्रथमायाः प्रयोजनम्-- `सपूर्वायाः प्रथमाया विभाषा' (8.1.26) इति विकल्पेन तेमयादिविधिर्यथा स्यात्-- ग्राम उच्चैस्ते स्वम्, ग्राम उच्चैस्तव स्वमिति। पदसंज्ञा तु षष्ठ्याऽपि स्यादेव।
`कुमारी, वृक्षः, कुण्डम्' इति। ननु चात्रापि प्रातिपदिकार्थ इत्येवंसिद्धा प्रथमा; लिङ्गमपि प्रातिपदिकार्थ एव भवति। तथा च वक्ष्यत `स्त्रियाम्' (4.1.3) इत्यत्र `सिद्धास्तु स्त्रियाः प्रातिपदिकविशेषणत्वात् स्वार्थे टाबादयः' (वा.4.13) इति ? नैतदस्ति; इदमपि हि तत्र वक्ष्यति-- `अथ वा पुनरिदमस्तु। स्त्रियामभिधेयायाम्' (म.भा.4.1.3) इति। किञ्च-- स्त्रीतवं प्रत्येषा गतिः स्यात्, पुंनपुंसके तु नियोगतो विभक्तिवाच्ये एव। तथा हि-- विना विभक्त्या तटशब्दाः प्रत्युज्यमानः किं पुंस्त्वमाचष्टे ? उत नपुंसकत्वम् ? इति सन्देहः स्यात्। तत्र यथा राज्ञः पुरुषः इत्यत्र प्रातिपदिकार्थेनानुपात्ते स्वस्वामिकसम्बन्धे तस्य चाभिधाने विभक्त्यपक्षया षष्ठी भवति, तथा पुंनपुंसकयोरपि षष्ठी स्यात्। तस्माल्लिङ्गग्रहणं कर्त्तव्यम्।
`द्रोणः, खारी, आढकम्' इति। ननु चात्रापि प्रातिपदिकार्थत्वादेव सिध्यति प्रथमा, तथा हि -- द्रोणादयः शब्दाः परिमाणे लौहे दारुमये वा अर्थान्तरनिपेक्षा एव वर्त्तन्ते ? सत्यम्; सिध्यति तदा यदा परिमाण एव वर्त्तन्ते, यदा तु पुनः परिमेये वर्तन्ते तदा न सिध्यति। तथा हि-- द्रोणादयः शब्दा द्रोणादिकं परिमाणमर्थान्तरं प्रवृत्तिनिमित्तमुपादाय व्रीह्यादौ परिमेयं वर्त्तन्ते। कथं पुनस्ते तत्र वर्त्तन्ते ? सोऽयमित्यबेदसम्बन्धात्- द्रोणपरिमितो व्रीहिर्द्रोण इति । यद्येवम्, निमित्तरूपेण निमित्तनोऽभिधानादव्यतिरिक्त एव प्रातिपदिकार्थ इति प्रातिपदिकार्थ इत्येव सिद्धा प्रथमा ? न सिध्यति, न हि मुख्ये सति गौणस्याश्रयणं युक्तम्। नन्वेवमपि लिङ्गग्रहणादेवात्र प्रथमा भविष्यति, तत्किं परिमाणग्रहणेन ? नैतदस्ति; तस्य हि यत्र परिमाणं नास्ति सोऽवकाश इति। अत्र परिमाणाधिक्ये षष्ठ्येव स्यात्। तस्मात् परिमाणग्रहणं कर्त्तव्यम्।
परिमाणग्रहणञ्च यत्र निमित्तादर्थान्तरे सोऽयमित्यभेदसम्बन्धाच्छब्दः प्रवर्त्तते, तदुपलक्षणार्थ वेदितव्यम्। तेन परिमाणवदर्थान्तरभूतेष्वप्युन्मानादिषु प्रथमा भवति। घृतम्, पलम्, दीर्घ काष्ठम्, शुक्लः पटः, हस्तो मुष्टिर्वितस्तिरित्येवमादि सिद्धं भवति। कुत एतत् ? मात्रशब्दात्। स ह्यत्र व्याप्तिवचनो गृह्यते, यथा-- कन्यामात्रं वरयति, ब्राह्मणमात्रं भोजयतीति। तेन परिमाणग्रहणस्यैवोपलक्षणार्थता विज्ञायते यदि तु यथा `पयोमात्रं भुङ्क्ते' इत्यत्र मात्रशब्दो नियमार्थः, तथेहापि नियमार्थ एव स्यात्; ततश्चोन्मानादिषु प्रथमा न स्यात्; तस्य परिमाणादन्यत्वात्-- उक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यादिति। वचनग्रहणे त्वसत्युक्तेष्वेकत्वादिषु प्रथमा न स्यात्। `अनभिहिते' (2.3.1) इत्यधिकारात्। ननु च परिगणनं तत्र कृतम्, तत् कुतोऽयं प्रसङ्गः ? नैतदस्ति; प्रत्याख्यातं हि तत्र परिगणनम्। तथा हि--रूढः कर्म, भीष्मादयोऽपि कर्मणि, तत्र कर्माणि, तत्र कर्मणीत्येव द्वितीया सिद्धा। कटशब्दादुत्पद्यमाना द्वितीयया सामान्यकर्मोक्तम्, न विशेषकर्म। तत्रावश्यं विशेषो वक्तव्य इति भीष्मादिभ्योऽपि विशेषाभिधानार्थ द्वितीया भविष्यति। अथ वा-- कट एव कर्म, तत्सामानाधकरण्यात् भीष्मादिभ्योऽपि द्वितीया भविष्यति; नार्थः परिगणनेन।
यत्पुनरिदं `तिङकृत्तद्धितसमासैः परिसंख्यानम्' (2.3.1) इति वृत्तावुपन्यसत्म्, तदेभिरेवाभिधानं सम्भवतीति सम्भवप्रदर्शनार्थपरं वेदितव्यम्। यद्यप्येकादिभिरपि संख्याशब्दैरेक्तवादीनामभिधानं सम्भवति, तथाऽप्यभिहितेऽपि तैरेत्कत्वादावर्थे वचनग्रहणात् यत्नात् विभक्त्येति। तैरप्यभिधानस्य सम्भवप्रदर्शनार्थ यत्नः कृतः।
`निपातरस्यानर्थकस्य' इत्यादि। अथार्थविशेषणार्थ प्रातिपदिकग्रहणं कस्मान्न विज्ञायते ? असति हि तस्मिन् न ज्ञायते-- कस्यार्थ इति, तथा चार्थमात्रे प्रथमा स्यात् ? नैतदस्ति;प्रातिपदिकाद्धि प्रथमा विधीयते। तत्रासति प्रातिपदिकग्रहणे प्रातिपदिकार्थ एव भवतीति विज्ञायते। तस्याद्वृत्तिकारोक्तमेव प्रातिपदिकग्रहणस्य प्रयोजनं न्याय्यम्।।

47. सम्बोधने च। (2.3.47)
सम्बोधनम् = अभिमुखीकरणम्, "तदधिके प्रातिपदिक्रथा" इति। अभिमुखीकरणस्य क्रियापरत्वात् प्रातिपदिकार्थे तस्यान्तर्भावो नास्ति, त्सयातदात्मकत्वात्, तस्मात तेनाधिकः प्रातिपदिकार्थो भवति। अथ कथमिह प्रथमा-हे-पचनम्, हे पचमानेति ? कथञ्च न स्यात् ? शतृशानज्भ्यामुक्तत्वात् सम्बोधनस्य। एतावपि `सम्बोधने च' इति सम्बोधन एव वक्ष्यते। मा भूदनेन, पूर्वसूत्रेण भविष्यति ? सम्बोधनार्थस्येह `कृत्तद्धितसमासाश्च' (1.2.46) इत्यनेन प्रातिपदिकार्थत्वात्। योगविभाग उत्तरार्थः।।

48. साऽऽमन्त्रितम्। (2.3.48)
`तदन्तं शब्दरूपम्' इति। ननु च `संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति' (पु.प.वृ.81) इति ज्ञापितमेतत् `सुप्तिङन्तं पदम्' (1.4.14) इत्यत्रान्तग्रहणेन। इह च संज्ञाविधौ प्रत्ययग्रहणम्, तत् कथं तदन्तस्य संज्ञा विधीयते ? नैतदस्ति; यद्यपि संज्ञाविधौ प्रत्ययग्रहणमिह, तथाऽपि तदन्तस्यैवेयं संज्ञा विधीयते। यदीह प्रत्ययमात्रस्य संज्ञाग्रहणं स्यात् तदा प्रदेशेषु तस्यैव ग्रहणं स्यात्, तथा च संज्ञाकरणमनर्थकं स्यात्। प्रदेशेषु सम्बोधन इत्येवं ब्रूयात्। एवमपि प्रत्ययमात्रस्य ग्रहणं लभ्यत एव। तस्यैव सम्बोधने विहितत्वात्। तस्मात् संज्ञाकरणादेव तदन्तस्य संज्ञा लभ्यते। सेति वचनं पूर्वसूत्रेणापि सम्बोधने या विहिता तस्या अपीयं संज्ञा यथा स्यात्-- हे पचन्, हे पचमानेत्यत्र। असति त्वस्मिन् `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इति पूर्वसूत्रेणैव या विहिता तस्या एव स्यात्; सेत्येतदुच्यमानं सर्वनामपदं सामान्येन प्रवर्त्तत इति कृत्वा। अतः सम्बोधनमात्रे या प्रथमा तां प्रतिपादयति, तेन सर्वत्र संज्ञा सिद्धा भवति। आमन्त्रितसंज्ञायां सत्यां हे देवदत्त इत्यादौ `आमन्त्रितस्य' (6.1.198) इत्याद्युदात्तत्वं भवति। `आमन्त्रितम्' इति महत्याः संज्ञायाः करणं वैचित्र्यार्थम्।।

49. एकवचनं सम्बुद्धिः। (2.3.49)

`हे पटो, हे देवदत्त' इति। अत्र सम्बुद्धिसंज्ञायां सत्याम्, `सम्बुद्धौ च' (7.3.106) इत्यधिकृत्य `ह्रस्वस्य गुणः' (7.3.108) इति गुणे `एङ ह्रस्वात् सम्बुद्धेः' (6.1.69) इति सोर्लोपो यथायोगं भवति। अथ सुग्रहणमेव कस्मान्न कृतम्, न च सप्तमीबहुवचनस्य प्रसङ्गः, सम्बोधनप्रथमाधिकारात् ? सत्यम्; किन्तु नैतदस्ति; प्रत्ययमात्रस्य संज्ञाविधानार्थमेकवचनग्रहणं कृतम्-- हे पचनम्, हेपचमानेति; अन्यथा हि पूर्वेण यथा तदन्तस्य संज्ञा विहिता तथेहापि स्यात्। न चेहासंज्ञिनः कश्चिद्विशेषोऽङ्गीक्रियत इति सुशब्देन तदन्तमेव लक्ष्यते, ततश्च तदन्तकस्यैव संज्ञा स्यात्। तथा `एङ ह्रस्वात् सम्बुद्धेः' (6.1.69) इति सोर्लोपो विधीयमानः `आदेः परस्य' (1.1.54) इत्यादेरेव स्यात्; प्रत्ययमात्रस्य न स्यात्। तस्मात् प्रत्ययमात्रस्य संज्ञा यथा स्यादित्येवमर्थमेकवचनग्रहणम्।।

50. शेषे षष्ठी। (2.3.50)

कर्मादीनां प्रकृतत्वात् तदपेक्षया शेषत्वं विज्ञायत इत्याह-- `कर्मादिभ्यो योऽन्यः' इति। कर्मादयः कारकविशेषास्तस्य सम्बन्धस्य हेतुभूताः, स तु फलभूतः। हेतुफलयोश्च प्रसिद्धमन्यत्वमिति तेभ्योऽन्यो भवति। प्रातिपदिकार्थ{व्यतिरिक्तः-काशिका.पदमञ्जरी च} व्यतिरेकः। व्यतिरेकः = आधिक्यम्। अथ वा-- येन प्रातिपदिकार्थो व्यतिरिच्यते = व्यतिरेकीक्रियते स व्यतिरेकः। प्रातिपदिकार्थस्य व्यतिरेकः = प्रातिपदिकार्थव्यतिरेकः। स शेषः। कः पुनरसवित्याह-- `स्वस्वामिकसम्बन्धादिः' इति। आदिशब्देनोवयवावयविप्रभृतेः सम्बन्धस्य ग्रहणम्। सम्बन्धश्च यद्यपि द्विष्ठस्तथापि तस्यैकत्वादेकत एव सम्बन्धिन उत्पद्यमानया षष्ठ्या विभक्त्याऽभिहितत्वात् द्वितीयासम्बन्धिनःषष्ठी न भवति। एकस्मादुत्पद्यमानाऽपि षष्ठी विशेषणादेव भवति ; न विशेष्यात्। विशेष्यात्तु प्रथमैव भवति; यस्माच्छेषशब्दोऽयंयथा प्रकृतादन्यविशेषणमाचष्टे तथा परार्थमपि। एवं ह्यभियुक्ताः पुरुषा उपदिशन्ति-- शेषः परार्थ इति। राज्ञा पुरुष इति स्वस्वामिकसम्बन्दस्योदाहरणम् । अत्र पुरुषस्य प्रादान्यम्, विशेष्यत्वात्। राज्ञोऽप्राधान्यम्, विशेषणत्वात्। विशेषणस्य परार्थत्वात् शेषभाव इति ततः षष्ठी भवति। यदा तु द्वावपि विशेषणभूतौ तृतीये सम्बन्धिन्यपेक्षितौ भवतः, तदा द्वाभ्यामपि षष्ठी भवति `राज्ञः पुरुषस्य गृहम्' इति।
`पशोः पादः' इति। अत्रावयवावयिसम्बन्धे षष्ठी। `पितुः पुत्रः' इत्यत्र जन्यजनकसम्बन्धे षष्ठी। अथ शेषग्रहणं किमर्थम्, यावता `कर्मणि द्वितीया' (2.3.2) इत्येवमादौ प्रत्यनियमोऽर्थनियमश्चेति द्वावपि पक्षौ। तत्र प्रत्ययनियमपक्षे यदि शेषग्रहमं न क्रियेत तदा कर्मण्येव द्वितीयेति कर्मानियतम्, द्वितीया तु नियता; अतस्तत्रापि षष्ठी स्यादिति शेषग्रहणं कर्त्तव्यम्। शेष एव यथा स्यादन्यत्र माभूदिति अर्थनियमपक्षे तु शेषग्रहमं शक्यमकर्त्तुम्। यावता कर्मणि द्वितीयैवैति कर्म नियतम्, द्वितीया त्वनियता; तस्यामन्यत्रापि प्राप्तायां षष्ठीत्युच्यमानं सूत्रमिदं नियमार्थं भविष्यति-- यत्र षष्ठी चान्या च प्राप्नोति तत्र षष्ठ्येव भवति। एवमन्यत्रापि वेदितव्यम्।।

51. ज्ञोऽविदर्थस्य करणे। (2.3.51)

यद्यपि बहवो विदयः सन्ति, तथापि यस्यार्थे जानातर्वृत्तिः सम्भवति तस्यैव विदेः प्रतिषेधकरणं युक्तम्, `विद ज्ञाने' (धा.पा.1064) इत्यस्यैवार्थे जानातेर्वृत्तिः सम्भवति, तस्मादविदर्थस्येत्यनेन ज्ञानार्थस्यैव प्रतिषेधो विज्ञायत इत्याह-- `अज्ञानार्थस्य' इत्यादि। `सर्पिषो जानीते, मधुनो जानीते' इति। `अपह्नवे ज्ञः' (1.3.44) इत्यनुवर्त्तमाने, `अकर्मकाच्च' (1.3.45) इत्यात्मनेपदम्। धुन इति-- ` इकोऽचि विभक्तौ' (र7.1.73) इति नुम्। सर्पिषा करणभूते प्रवर्त्तत इत्यर्थः। यस्य प्रियतमं सर्पिस्तस्य प्रवृतिं प्रति सर्पिषः करणभूतत्वात्। धातूनामनेकार्थत्वाज्जानातिरिह प्रवृत्त्यर्थः। `सर्पिषिरक्तः प्रतिहतो वा' इति। सर्पिषि रक्तत्वं प्रतिहतत्वं च चित्तभ्रान्तेः कारणमाह। यदि सर्वमेव ग्राह्यं तदात्मना सर्पिःस्वभावतया प्रतिपद्यते। एवं सत्यविदर्थता नोपपद्यते, ज्ञानार्थत्वादित्यत आह-- `मिथ्याज्ञानमज्ञानमेव' इति। ज्ञानकार्याकरणादिति भावः। अविपरीतविषयपरिच्छेदो हि ज्ञानकार्यम्, कतच्च मिथ्याज्ञानेन न क्रियत इति मिथ्याज्ञानमज्ञानमुच्यते, यथा-- पुत्रकार्याकरणात् पुत्रोऽपुत्र इति।।

52. अधीगर्थदयेशां कर्मणि। (2.3.52)

`अधीक' इति। `इक् स्मरणे' (धा.पा.1047) इत्यस्याधिपूर्वस्य ग्रहणम्। अधीगित्यनेन समानार्था अधीगर्थाः। ककारानुबन्धकरणमस्य धातोरत्रैव सूत्रे विशेषणार्थम्। अध्ययनार्थानामित्युच्यमाने सन्देहः स्यात्-- कोऽयं धातुरिति। अधिपूर्वस्योच्चारणेनाधिपूर्वस्यैवास्य प्रयोग इति दर्शयति। `कर्मणि कारके' इत्यादि। यदा तदेव कर्म शेषकार्यत्वाच्छेषत्वेन विवक्ष्यते न कर्मत्वेन, तदा तत्र षष्ठी भवति। `अध्येति' इति। अदादित्वाच्छपो लुक्। एवम् `ईष्टे' इति। व्रश्चादिसूत्रेण (8.2.36) षत्वम्।
`मातुर्गुणैः स्मरति' इति। अत्र कर्मग्रहणाद्गुणानां करणभूतानां शेषविवक्षायामपि षष्ठी न भवति।।

53. कृञः प्रतियत्ने। (2.3.53)

`एथो दकस्योपस्कुरुते' इति। गन्धनादि (1.3.32) सूत्रेणात्मनेपदम्, `उपात्प्रतियत्न' (6.1.139) इत्यादिना सुट्।।

54. रुजार्थानां भाववचनानामज्वरेः। (2.3.54)

रुजेति केचिद्भिदादिषु पठन्ति। ये न पठन्ति तेऽपि `चिन्तिपूजिकथिकुम्बचर्च्चश्च' (3.3.105) इति चकारस्यानुक्तसमुच्चयार्थत्वादस्मादेव निपातनाद्वा रुजाशब्दस्य साधुत्वं वर्णयन्ति। रुजा अर्थो येषां ते रुजार्थाः। `भाववचनानाम्' इति। यदि भावार्थाभिधायिनां रुजार्थानामित्येषोऽर्थो विवक्षितः स्यात्, तदाऽनर्थकमिदं वचनं स्यात्। सर्व एव हि रुजार्था भाववचनाः। तस्मान्नातर् धातुवाच्यो भावो विवक्षितः, किं तर्हि ? प्रतययवाच्यः, यत्र `भावे' (3.3.18) इति धञ् विधीयते। वचनशब्दोऽयं कर्त्तृसाधनः, वक्तीति वचनः, `कृत्यल्युटो बहुलम्' (3.3.113) इति कर्त्तरि ल्युट्। न च रुजार्थानां यो भावस्तस्य वचनक्रियां प्रति कर्त्तृत्वं सम्भवतीति सामर्थ्यादवचनशब्देन प्रकृत्यर्थं परित्यज्य प्रत्ययार्थो विवक्षित इति प्रतीयते। स पुनः कर्त्तृशक्तिः। भाववचनानामिति बहुव्रीहिः-- भावो वचनः कर्त्ता येषां ते भाववचनाः। भावकर्त्तृका इत्यर्थः। एतत्सर्वं चेतसि कृत्वाऽऽह-- `भावकर्त्तृकाणाम्' इति। भावकर्त्तृकाणामित्येवं नोक्तं वैचित्र्यार्थम्। `चौरस्य रुजति' इति। `रुजो भङ्गे' (धा.पा.1416), तौदीदिकः। अत्र रोगो भावः कर्त्ता। `चौरस्यामयति' इत्यत्राप्यामयः। `अम रोगे' (धा.पा.1720), चौरादिकः।

`एति जीवन्तमनन्दो नरं वर्षशतादपि' इति। अस्त्यत्रानन्दो भावः कर्त्ता। न त्वेतिर्धातू रुजार्थः, किं तर्हि ? गत्यर्थः। `नदी कूलानि रुजति' इति। रुजिरत्र द्रव्यकर्त्तृकः, न भावकर्त्तृकः, नद्या द्रव्यत्वात्। नैतद्युक्तं प्रत्युदाहरणम्, रुजाशब्दो हि रुढिशब्दत्वात् व्याधिमेवाचष्टे; न चात्र व्याधिवचनः, किं तर्हि ? भङ्गवचनो रुजिः। एवं तर्हि प्रत्युदाहरणदिगियं दर्शिता वृत्तिकृता। इदन्त्वत्र प्रत्युदाहरणम्-- श्लेष्मा पुरुषं रुजतीति। व्याधिना ग्राहयतीत्यर्थः। ज्वरयतीति। `ज्वर योगे' (धा.पा.776), हेतुमण्णिच्। घटादित्वान्मित्त्वम्। `मितां ह्रस्वः' (6.4.92) इति ह्रस्वः।

`सन्तापयति' इति। `तप सन्तापे' (धा.पा.985), हेतुमण्णिच्। सन्तापोऽत्र भावः कर्त्ता।।

55. आशिषि नाथः।

`सर्पिषो नाथते' इति। सर्पिर्यस्य नास्त्यतोऽर्थित्वादाशास्ते सः-- सर्पिर्मे भूयादिति। `आशिषि नाथः' इत्युपसंख्यानादात्मनेपदम्।

`माणवकमुपनाथति' इति। याचत इत्यर्थः।।

56. जासिनिप्रहणनाटक्राथपिषां हिंसायाम्। (2.3.56)

`न दैवादिकस्य' इति। हिंसायामिति वचनात्। अस्य च तत्राप्रवृत्तेः। अत एव हि ण्यन्तस्यैव ग्रहणं भविष्यति, तत्किमर्थो ण्यन्तस्य निर्देश इति ? कः पुनराह च्यन्तस्य निर्देश इति ? अत्र हीकारोऽयं धातुनिर्देशार्थः कृतः, `इक्श्तिपौ धातुनिर्देशे' (वा.319) इति। यद्येवम्, जासीत्याकारः कथं श्रूयते? उच्यते-- आकारमुच्चार्य विकृतनिर्देशः कृतः, विकृतनिर्देशस्तू यत्रास्यैतद्रूपं भवति तत्रैव यथा स्यादिह मा भूत्,-- दस्युमजीजसदिति। लुङ्, `णिश्रि'(3.1.48) इत्यादिना च्लेश्चङ, `णौ चङ्युपधाया ह्रस्वः' (7.4.1), `चङि' (6.1.11) इति द्विर्वचनम्, `सन्वल्लघुनि' (7.4.93) इत्यादिना सन्वद्भावः, `सन्यतः' (7.4.79) इतीत्वम्, `दीर्घो लघोः' (7.4.93) इति दीर्घः। नाटक्राथयोरपि वकृतानिर्देशस्यैतदेव प्रयोजनम्। इह मा भूत-- दस्युमनीनटदिति, दस्युमचिक्रथदिति। क्रथेर्वृद्धिश्च प्रयोजनम्, एतच्च `निपातनाद्वृद्धिः' इति ब्रुवता वृत्तिकारेण दर्शितम्। `{निप्रहन्ति'इति वृत्तौ पाठः} निप्रहन्' इति। धातूपसर्गानिर्देशमात्रमिह तन्त्रम्। न तूपसर्गसयोः संघातः, नाप्यानुपूर्वी; तयोरविवक्षितत्वात्। तेन निप्रशब्दयोर्व्यस्तसमस्तयोर्विपरीतानुपूर्वीकयोश्च ग्रहणं विज्ञायत इत्याह-- `संघातविगृहीतविपर्यस्तस्य ग्रहणम्' इति. `चौरस्य प्रणिहन्ति' इति। नेर्गदनद' (8.4.17) इत्यादिना णत्वम्. `चौरस्योन्नाटयति' इति। `नट अवस्पन्दने' (धा.पा.(7.2.116) इति वृद्धि सिद्धा; तत्किमर्थमुच्यते-- निपातनाद्वृद्धिरिति ? अत आह-- `अयं हि' इत्यादि। `ह्रस्वस्य स्यात्' इति। `मितां ह्रस्वः' (6.4.92) इत्यनेन। `चौरस्य पिनष्टि' इति। ` पिष्लृ सञ्चूर्णने' (धा.पा.1452) रुधादित्वात् श्नम्। `धानाः पिनष्टि' इति। अत्र हिंसा नास्ति; तस्या प्राणिधर्मत्वात्। इदञ्चाभावकर्त्तृकाणामपि यथा स्यादित्येवमर्थमारब्धम् चौरस्योजासयति देवदत्तः।।

57. व्यवहृपणोः समर्थयोः। (2.3.57)

`शतस्य व्यवहरति' इति। शतं क्रयविक्रयेण विनियुङ्क्ते, दीव्यतीति वेत्यर्थः। `शतस्य पणते' इत्यत्रापि स एवार्थः। अनुदात्तेत्वादात्मनेपदम्,। `आयप्रत्ययः कस्मान्न भवति' इति। `गकपूधूप'(3.1.28) इत्यादिना प्राप्नोतीति भावः। `स्तुत्यर्थस्य' इत्यादि। यद्यपि `पण व्यवहारे स्तुतौ च'(धा.पा.439) इति स्तुतिव्यवहारयोः पणिः पठ्यते; तथापि स्तुत्यर्थस्यैव पणतेरायप्रत्यय इष्यते, न व्यवहारार्थस्य। तत्र वृत्तिकारः स्वयमेव युक्तिं वक्ष्यति। स्तुत्यर्थ्येन पणिना साहचर्यात् तदर्थ एव पणिरायमुत्पादयति,न व्यवहारार्थ इति। `शलाकां व्यवहरति' इति। परिगणयतीत्यर्थः। अत्र व्यवहारार्थे वर्त्तत इत्यसमानार्थत्वम्।

`ब्राह्मणान् पणयति' इति। स्तौतीत्यर्थः। पणयीत्यस्यार्थे व्यवहरतेर्वृत्तिर्नास्तीत्यसमानार्थता।ओ।

58. दिवस्तदर्थस्य। (2.3.58)

`ब्राह्मणान् दीव्यति' इति। स्तौतीत्यर्थः। `हलि च' (8.2.77) इति दीर्घः। यदि तदर्थस्यैव भविष्यति, पूर्वयोग एव दिवो ग्रहणं कर्त्तुं युक्तं स्यात्।

तत्किमर्थो योगविभाग इत्यत आङ-- `योगविभाग उत्तरार्थः' इति।।

59. विभाषोपसर्गे। (2.3.59)
`शलाकां प्रति दीव्यति' इति। अर्थान्तरे क्रीडादौ दीव्यतिर्वर्त्तते।।

60. द्वितीया ब्राह्मणे। (2.3.60)
`ब्राह्मणे; इति। ब्राह्मणशब्दः शथपथस्याख्या। `ग्रामस्य' इति। शेषषष्ठी। सभायामित्येतदपेक्षया। `तदहः' इति। एतदुहारणम्। `स्वमोर्नपुंसकात्' (7.1.23) इत्यमो लुक्। `अहन्' (8.2.68) इत्यनुवर्त्तमाने `रोऽसुपि' (8.2.69) इति नकारस्य रेफः, विसर्जनीयः। `दीव्येयुः' इति। लिङ, झेर्जुस्, `अतो येयः' (7.2.80) इतीयादेशः, `लिङ सलोपोऽनन्तयस्य' (7.2.79) इति सलोपः। सोपसर्गस्य विभाषया षष्ठ्यां प्राप्तायां नित्यं द्वितीयाविधानार्थं वचनं कस्मान्न भवतीत्याह-- `सोपसर्गस्य' इति। `विभाषोपसर्गे' (2.3.59) इत्यनेन व्यवस्थितविभाषयापि च्छन्दसि नित्यं द्वितीया भविष्यतीति तदर्थकमिदं वचनं नोपपद्यते।।

61. प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने। (2.3.61)
`इष्यतेर्दैवादिकस्य' इति। `इष गतौ' (धा.पा. 1127) इत्यस्य श्यना निर्देश इष्यन्तराणां निवृत्त्यर्थः। लोण्मध्यमपुरुषैकवचनेन निर्देशस्तु लकारान्तरस्य पुरुषान्तरस्य वचनान्तरस्य च निवृत्यर्थः। `तद्विषय एव' इति। लोण्मध्यमपुरुषैकवचनविषय एव। `अग्नये छागस्य' इत्यादि। छागस्य विकारश्चछागः। तत्राग्निर्देवता सम्प्रदानम्। कछागविकारो वपादि सम्प्रदेयं हविः कर्म। `{नास्ति-काशिका, पदमञ्जरी च} ननु प्रेष्य' इति। `अतो हेः' (6.4.105) इति हर्लुक्। ` अनुब्रूहि' इति। `सेर्ह्यपिच्च' (3.4.87) इति हिरादेशः। अदादित्वाच्छपो लुक्। भाषाविषयेऽप्ययं योगः; उत्तरसूत्रे छन्दोग्रहणात्। `जुहुधि' इति। `हुझल्भ्यो हेर्धिः' (6.4.101) इति धिभावः। `अग्नये गोमयानि प्रेष्य' इति। ननु च गोमयानि हर्वीषि भवन्त्येव, तत्कथं प्रत्युदाहरणम् ? नैवम्; देवतासम्प्रदानग्रहणादेव सम्बन्धिशब्दात्वाद्धविर्ग्रहणे सिद्धे पुनर्हविर्ग्रहणादभ्यवहार्यस्य हविषो ग्रहणं विज्ञायते। न च गोमयान्यभ्यवहार्याणि भवन्तीति युक्तं प्रत्युदाहरणम्।
`हविषः प्रस्थितस्य' इत्यादि। प्रस्थितशब्देन यद्विशिष्यते हविस्तत् प्रस्थितम्। तस्य षष्ठ्याः प्रतिषेधो वक्तव्यः। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम् -- `विभाषोपसर्गे' (2.3.59) इत्यतो विभाषाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा। तेन हविषः प्रस्थितस्य न भवति।।

62. चतुर्थ्यर्थे बहुलं छन्दसि। (2.3.62)
`बहुलग्रहणं किम्' इति। विभाषाग्रहणानुवृत्तेरेव सिध्यतीति मन्यमानस्य प्रश्नः। `कृष्णो रात्र्यै, हिमवतो हस्ती' इति। अत्र बहुलग्रहणात् सप्तम्यर्थेऽपि चतुर्थी भवति। `वक्तव्या' इति। व्याख्यातव्येत्यर्थः। तत्रेदं प्रतिपादनम्-- बहुलग्रहणमिह क्रियते। तेन क्वचित् षष्ठ्यर्थेऽपि चतुर्थी भवति। क्वचिदन्यदेवेत्येषोऽपि बहुलगर्हणस्यार्थोऽभिमत एव।।

63. यजेश्च करणे। (2.3.63)
`धृतस्य यजते' इति। यजिरत्र देवपूजायां वर्त्तते, तत्र च घृतस्य करणभावः।।

64. कृत्वोऽर्थप्रयोगे कालेऽधिकरणे। (2.3.64)
`पञ्चकृत्वः' इति। `संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (5.4.17) ` द्विरह्नः' इति। `द्व्त्रिचतुर्थ्यः सुच्' (5.4.18)।
`गम्यते हि द्विस्त्रिश्चतुर्वा' इति। प्रकरणादेरिति भावः। ननु च बहिरङ्गः प्रकरणाद्यर्थ इति पञ्चकृत्व इत्यमत्र च वचनस्य चरितार्थत्वादिह न भविष्यति ? एवं तर्ह्येतज्ज्ञापयति-- प्रकरणाद्यर्थोऽपि विभक्तीनां निमित्तमिति। तेन `वृद्धो यूना' (1.2.65) इति ` सहयुक्तेऽप्रधाने' (2.3.19) इति सहार्थे गम्यमाने तृतीया भवतीति।।

65. कर्त्तृकर्मणोः कृति। (2.3.65)
`आसिका' इति। भावे `पर्यायार्हणोत्पत्तिषु ण्वुच्' (3.3.111)। `स्रष्टा'
इति। सृजेस्तृच्'। `सृजिदृशोर्झल्यमकिति' (6.1.58) इत्यम्, `व्रश्चादिना (8.2.36) षत्वम्।
`तद्धितप्रयोगे मा भूत्' इति। अथ तिङप्रयोगे मा भूदित्येवमर्थमपि कृद्ग्रहणं कस्मान्न भवति ? तत्र `न लोकाव्ययनिष्ठा' (2.3.69) इत्यनेन षष्ठीप्रतिषेधात्। ` कृतपूर्वी कटम्' इति। `पूर्वादिनिः' (5.2.86) इत्यत्र इनिरित्यनुवर्त्तमाने `सपूर्वाच्च' (5.2.87) इतीनिप्रत्ययः। अत्र कर्त्ता तद्धितेनैवोक्त इत्यत्र वाक्यमेवैतन्नोपप्रसङ्गो नास्ति, कर्म तु तेनानभिहितमित्यसति कृद्ग्रहणे कटादेः कर्मणः षष्ठी स्यात्। ननु चात्र वाक्यमेवैतन्नोपपद्यते, तथा हि--

कर्मणो निष्ठयाऽभिहितत्वात् द्वितीययाऽत्र न भवितव्यम्, नापि तद्धितेन, असमार्थ्यात्। तत्पुनरसामर्थ्य सापेक्षत्वात्। तथा हि-- कृतः कटः पूर्वमनेनेति कृतशब्दः कटमपेक्षते, नैवम्; धातोरुत्पद्यमाना निष्ठा कथं कटशब्दस्य कर्मतामभिदध्यात्। तस्या हि कर्मसामान्यमेवाभिधातुं सामर्थ्यम्, न कर्मविशेषम्। वाक्ये तर्हि कथं तया कटशब्दस्य कर्मत्वमभिधीयते ? तत्र युक्तमभिधानम्; कृत इत्यनेन सामानाधिकरण्यात्। तद्धिते तूत्पन्न एकार्थीभावात्सामानाधिकरण्यं निवृत्तमिति केन कटादेः कर्मभावोऽभिधीयते ? क्रिया तु प्रकृत्यर्थत्वाद्यथा वाक्ये गुणीभूता साधनसम्बन्धमनुभवति, तथा वृत्तावपीति करोत्यर्थापेक्षं कटशब्दस्य कर्मत्वमुपपद्यते। तस्माद्भवितव्यमेव द्वितीयया।
किञ्च वृत्तिसमानार्थेन वाक्यन भवितव्यम्। न च वृत्तौ बाह्यं कटादिकं कर्म गम्यते येन प्रत्यय उत्पादयिष्यते। वाक्ये कटादिकर्मापेक्षा निष्प्रयोजनेति गम्यते। तस्मादेवं विग्रहः कर्त्तव्यः-- कृतं पूर्वमनेनेति। ततश्च नास्ति सापेक्षत्वमिति भवत्येव तद्धितः।
`इतरथा हि' इति। यदि शेषगर्हणमनुवर्त्तत इत्यर्थः। `कर्त्तरि च कृतीत्येवं ब्रूयात्' इति। एवमपि ह्युच्यमाने शेष इत्यनुवृत्तौ चकारकरणात् कर्मणीत्येतल्लभ्यत एव, किं कर्मग्रहणेन ? तस्मात् पुनः कर्मग्रहणं शेषाधिकरानिवृत्त्यर्थम्। पुनः कर्मग्रहणेन हि पूर्वस्य कर्मग्रहणस्य निवृत्तिराख्यायते। तन्निवृत्तौ तत्सम्बद्धमनुवृत्तमपि शेषग्रहणं निवर्त्तते।।

66.उभयप्राप्तौ कर्मणि। (2.3.66)
`उभयप्राप्ताविति बहुव्रीहिः' इति। तेन तत्पुरुषशङ्कां निरस्यति। बहुव्रीहेराश्रयणस्य प्रयोजनं वक्ष्यति। उभयग्रहणमेन प्रकृतत्वात् कर्त्तृकर्मणी सम्बध्येते। `उभयोः प्राप्तिर्यस्मिन् कृति'इत्यनेनैकस्मिन्नेवेत्यभिप्रायः। `कर्मण्येव' इति नियमस्य स्वरूपं दर्शयति। उभयप्राप्तावेव कर्मणीत्येष तु विपरीतनियमो न भवति। मा भूत् पूर्वसूत्रेण कर्मणि षष्ठीविधानस्य वैयर्थ्यमिति। `आश्चर्यो गवां दोहोऽगोपालकेन' इति। दुहेर्भावे घञ्। तत्रोभयोप्राप्तौ कर्मण्येव गोषु षष्ठी भवति; नाऽगोपालके कर्त्तरि। अत्र च `कृत्वोऽर्थप्रयोगे' (2.3.64) इत्यतः प्रयोगग्रहणं नानुवर्त्तते। तेन गम्यमानेऽपि कर्मणि षष्ठी भवति, यथा-- `अन्तर्धौ येनादर्शनमिच्छति' (1.4.28) इत्यत्र ह्यप्रयुज्यमानस्यात्मनः कर्मत्वं गम्यते। `पानम्' इति। `ल्युट् च' (3.3.115) इति भावे ल्युट्। इह तु न भवति-- आश्चर्यमिदमोदनस्य च पाको ब्राह्मणानाञ्च पादुर्भाव इति। न ह्यत्रैकस्मिन् कृत्युभयोः प्राप्तिः। तथा ह्योदनस्य पाक इत्यत्र कर्मण्येवौदने प्राप्तिः, न तु ब्राह्मणेषु कर्त्तुषु। न हि पाकस्य कर्त्तृत्वेन विवक्षिता ब्राह्मणाः, किं तर्हि ? प्रादुर्भावस्य कर्तृत्वेन । ब्राह्मणानां नच प्रादुर्भाव इत्यत्रापि प्रादुर्भाव इत्येतस्मिन् कृति कर्त्तृष्वेव ब्राह्मणेषु प्राप्तिः, न कर्मण्योदने। न हि प्रादुर्भावस्योदनः कर्म; भवतेरकर्मकत्वात्। पाकस्यैव त्वोदनः कर्मत्वेन विवक्षितः।
`अकाकारयोः'इत्यादि। नियमस्यायं प्रतिषेधः। अकाकारयोः प्रयोगे नियमो न भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- `चतुर्थ्यर्थे बहुलं छन्दसि' (2.3.62) इत्यतो बहुलग्रहणमनुवर्त्तते, तेनाकाकारयोः प्रयोगे नियमो न भविष्यतीति।
`शेषे विभाषा' इति। अस्याप्यर्थो बहुलग्रहणसमाश्रयणेन व्याख्यातव्यः। `भेदिका' इति। पूर्ववद्भावे ण्वुच्। `चिकीर्षा' इति। `अ प्रत्ययात्' (3.3.102) इत्यकारप्रत्ययः।।

67. क्तस्य च वर्त्तमाने। (2.3.67)
`राज्ञां मतः' इति। `मतिबुद्धि' (3.2.188) इत्यादिना क्तः। राज्ञामिति कर्त्तरि षष्ठी। कर्म तु निष्ठयाभिहितम्। अथेह कस्मान्न भवति-- शीलितो देवदत्तेन, रक्षितो देवदत्तेनेत्यादि, शीलितादिष्वपि `मतिबुद्धिपूजार्थेभ्यश्च' (3.2.188) इति चकारस्यानुक्तसमुच्चयार्थत्वनाद्वर्तमान एव क्तो विधीयते ? यद्यप्येवम्, तथापि बहुलग्रहणानुवृत्तेरिह न भविष्यतीत्यदोषः। अथ वा-- प्रकरणादेवात्र वर्त्तमानकालता गम्यते। पदार्थस्तु भूतत्वमेव प्रतिपादयति, न वर्त्तमानताम्। यस्य तु पदार्थो वर्त्तमानस्तत्प्रयोगे भवत्येव षष्ठी, यथा-- `कान्तो हरिश्चन्द्र इव प्रजानाम्' इति।
`शेषविज्ञानात् सिद्धम्' इति। उपसंख्यानं प्त्याचष्टे-- `तथा च' इत्यादिना। यस्तूपसंख्यानमारभते, तस्य कर्त्तृत्वाविवक्षायामपि षष्ठ्येव भवति, न तृतीयेति दर्शयति।।

68. अधिकरणवाचिनश्च। (2.3.68)
`तस्य प्रयोगे षष्ठी विभक्तिर्भवति' इति। यथासम्भवं यत्र कर्त्तैव संभवति तत्र कर्तरि भवति; यथा-- इदमेषामासितमिति। अत्रासेरकर्मकत्वात् कर्तैव सम्भवति, न कर्म। यत्र तु कर्म कर्त्तापि सम्भवति तत्रोभयत्रापि, यथा-- इदमेषां भुक्तमोदनस्येति। भुजेः सकर्मकत्वात् कर्माप्यस्त्येवौदनः। `उभयप्राप्तौ कर्मणि' (2.3.66) इति नियमः कस्मान्न भवति ? `कर्त्तृकर्मणो कृतिः' (2.3.65) इत्यस्याः षष्ठ्याः प्राप्तेरेव नियमो विज्ञायते। `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इति, `मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' (व्या.प.10) इति वा। अधिकरणे चेति वक्तव्ये वाचिग्रहणमधिकरणक्तोपलक्षणं मा विज्ञायीत्येवमर्थम्। उपलक्षणार्थत्वे हि तस्यार्थान्तरवृत्तेरपि ध्रौव्यगतिप्रत्यवसानार्थेभ्य उत्पन्नस्य क्तस्य प्रयोगे षष्ठी स्यात्। वाचिग्रहणे तु यदा भावे क्तप्रत्ययो भवति तदा षष्ठी न भवति। तदा कर्त्तरि तृतीयैव भवति -- हहानेनासितमिति। न ह्यत्राधिकरणवाची क्तः; `{क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेऽभ्यः' इति सूत्रम्।} क्तोऽधिकरणे ध्रौव्यगतिप्रत्यवसानाथभ्यश्च' (3.4.76) इति चकारात् यथाप्राप्तञ्चेति भावे कर्त्तरि च विधानात्। यदा तु कर्त्तरि क्तो भवति तदा तेनैवाभिहतत्वात् तत्र षष्ठी न भवति। इहेम आसिता इति चकारः पूर्वापेक्षया समुच्चयार्थः।।

69. न लोकाव्ययनिष्ठाखलर्थतृनाम्। (2.3.69)

`किकिनौ च गृह्येते' इति। यद्यपि किकिनोरलादेशत्वात् स्थानिवद्भावेन लग्रहणेन तयोर्ग्रहणं नास्ति, तथापि `लिट् च' (3.2.171) इत्यतिदेशेन भवितव्यम्। विशेषातिदेशे हि नान्तरीयकः सामान्यातिदेश इति; विशेषस्य सामान्येनाविनाभावादिति। तेन सामान्यनिबन्धनः प्रतिषेधः किकिनोरपि सिध्यतीति युक्तं तयोरपि ग्रहणम्। `पचमानः' इति शानच्। स्वरितेत्त्वादात्मनेपदम्। `पेचानः' इति। `लिटः कानज्वा' (3.2.106) इति वचनात्, कानच्। द्विर्वचनम्। `अत एक' (6.4.120) इत्यादिनैत्वाभ्यासलोपौ। `पेचिवान्' इति। `क्वसुश्च' (3.2.107) इति क्वसुः। एत्वाभ्यासलोपयोः कृतयोः `वस्वेकाजाद्धसाम्' (7.2.67) इतीट्। `उगिदचाम्' (7.1.70)इति नुम्। `सान्तमहसः' (6.4.10) इत्यादिना दीर्घः। `ददिः। पपिः' इति। `आदृगमहनजनः किकिनौ लिट् च' (3.2.171) इति किकिनोरन्यतरः। लिट् चेत्यतिदेशाद्द्विवनम्। `आतो लोप इटि च' (6.3.64) इत्याकारलोपः। `चिकीर्षुः' इति। `सनासंसभिक्ष उः' (3.2.168)। `अलङ्करिष्णुः'इति। `अलंकृञ्' (3.2.136) इत्यादिनेष्णुच्। `{आगामुकम्- काशिका, पदमञ्जरी च।} आगामुकः' इति। `लषपतपद'(3.2.154) इत्यादिनोकञ्।

`उकप्रतिषेधे' इत्यादि। प्रतिपाद्यत इति शेषः। प्रतिपादनन्तु बहुलग्रहणानुवृत्तिमाश्रित्य कर्त्तव्यम्। `कृत्वा' इति। `समानकर्त्तृकयोः' (3.4.21) इति क्त्वा। `अव्ययप्रतिषेधे' इत्यादि। अत्रापि पूर्ववद्वाक्यशेषो वेदितव्यः। प्रतिपादनञ्च पूर्ववदेव। अथ वा -- `अव्ययीभावश्च' (1.1.41) इत्यत्र `सर्वमिदं काण्डं स्वरादिषु पठ्यते' (1.1.41 काशिका) इत्यादिना वृत्तिकारेण प्रतिपादनं कृतम्। `संज्ञापूर्वको विधिरनित्यः' (व्या.प.64) इति वा। `उदेतोः' इति। उत्पूर्वादिणो `भावलक्षणे स्थेण्कृञ्वदिचरि' (3.4.16) इत्यादिना तोसुन्। `विसृपः' इति। `सृपितृदोः कसुन्' (3.4.17) । ` ईषत्करः' इति। `ईषद्' (3.3.126) इत्यादिना खल्। `ईषत्पानः' इति। `आतो युच्' (3.3.128)। `आतृनो नकारात्' इति। ताच्छीलिकस्य तृनः सम्बन्धिनो नकारादित्यर्थः। ` पवमानः' इति। `पूङ पवने' (धा.पा.966), `पूङयजोः शानन्' (3.2.128)। `नडमघ्नानः' इति। `ताच्छील्यवयोवचनशक्तिषु चानश् (3.2.129)। `गमहन' (6.4.98) इत्यादिनोपधालोपः। `हो हन्तेः'(7.3.54) इत्यादिना कुत्वम्। `अधीयन्' इति। `इङ धार्योः शत्रकृच्छ्रिणि' (3.2.130) इति शत्रादेशः। इयङादेशः। उपसर्गेण सह दीर्घः। `कर्त्ता' इति। `आ क्वेस्तच्छील' (3.2.134) इत्यादिना तृन्।

`द्विषः शतुर्वावचनम्' इति। द्विषः परो यः शतृप्रत्ययस्य प्रयोगे वावचनं कर्त्तव्यम्; अभिधानाभिधेययोरभेदोपचारात्। वेत्यनेन वार्थ उक्तः। वार्थोऽपि विकल्पः। विकल्प उच्यते = प्रत्याय्यते येन तद्वावचनम्। तस्य व्याख्यानं कर्त्तव्यमित्यर्थः। तत्रेदं व्याख्यानं -- बहुलग्रहणमिहानुवर्त्तते, तेन द्विषः शतुर्विकल्पेन प्रतिषेधो भविष्यति। `द्विषन्' इति। `द्विषोऽमित्रे' (3.2.131) इति शतृप्रत्ययः।।

70. अकेनोर्भविष्यदाधमर्ण्ययोः। (2.3.70)

`अकस्य भविष्यति काले' इति। नाधमर्ण्ये, तस्य तत्रासम्भवात्। `इनस्तु भविष्यदाधमर्ण्ययोः' इति। तस्योभयोरपि सम्भवात्। ननु च साम्यादिह संख्यातानुदेशेन भवितव्यम् ? नैतदस्ति; स्वरितेन हि संख्यातानुदेशो भवति, न चेह तदर्थं स्वरितत्वं प्रतिज्ञायते। `कटं कारको व्रजति' इति। `तुमुन्ण्वुलौ' (3.3.10) इत्यादिना ण्वुल्। `ग्रामं गमी' इति। गमेरिनिः। स च `भविष्यति गम्यादयः' (3.3.3) इति वचनाद्भविष्यत्कालविषयः। `शतं दायी' इति। `आवश्यकाधमर्ण्ययोर्णिनिः' (3.3.170)। `यवानां लावकः' इति। `ण्वुलतृचौ' (3.1.133) इति ण्वुल्। `अवश्यं कारी' इति। आवश्यके णिनिः। `वर्षशतस्य पूरकः' इति। `पूरी आप्यायने' (धा.पा.1151) चौरादिकः। तस्मात् `ण्वुल्तृचजौ' (3.1.133) इति भविष्यत्काले ण्वुल्। स हि त्रिषु कालेषु भवति। `भविष्यदधिकारविहितस्याकस्येदं ग्रहणम्' इति। इह हि भविष्यदिति स्वर्यते। स्वरितेनाधिकारावगतिर्भवति। तेन भविष्यदधिकारविहितस्येदमकस्य ग्रहणम्, न सर्वस्य।।

71. कृत्यानां कर्त्तरि वा। (2.3.71)

`गेयो माणवकः साम्नाम्'इति। `भव्यगेय' (3.4.68) इत्यादिना कर्त्तरि गेयशब्दो व्युत्पादितः। गायतीति गेयः साम्नामिति कर्मणि षष्ठी नित्यमेव भवति। `वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्-- `न लोकाव्ययनिष्ठा' (2.3.69) इत्यत्र नेति योगविभागः कर्त्तव्यः, तेनोभयप्राप्तौ कृत्ये षष्ठ्याप्रतिषेधो भविष्यति। तेन क्रष्टव्या शाखा ग्रामं देवदत्तेनेति। कृषेः `अनुदात्तस्य चर्दुपधस्यान्तरस्याम्' (6.1.59) इत्यमागमो भवति। देवदत्ते कर्त्तरि षष्ठी मा भूदिति। एवमुभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधो वक्तव्य इत्युक्तम्। कर्मणि तु शाखायां कृत्येनाभिहित्वादेव षष्ठी न भविष्यति। ग्राम्यस्याप्रधानत्वादेव यथैव हि कृत्याः प्रधाने कर्मणि भवन्ति नाप्रधाने तथा षष्ठ्यपि। न चेह ग्रामः प्रधानं कर्म, किं तर्हि ? शाखेति।।

72.तुल्यार्थैरतुलोपमाभ्मां तृतीयाऽन्यतरस्याम्। (2.3.72)

तुल्यार्थैः सदृशार्थैरित्यर्थः। अर्थग्रहणं पदान्तरनिरपेक्षया ये तुल्यार्थतामाहुस्तत्परिग्रहार्थम्। तेन पदान्तरसान्निध्येन द्योतका इवादयो निवर्तिता भवन्ति-- गौरिव गवय इति, यथा गौस्तथा गवय इति। स्वरूपनिवृत्त्यर्थत्वर्थग्रहणं न भवति; बहुवचननिर्देशादेव स्वरूपविधेर्निरस्तत्वात्। इहापि पितुस्तुल्यः प्रज्ञयेति प्रज्ञाशब्दात् षष्ठी न भवति हेतुत्वन करणत्वेन वा प्रज्ञाया विवक्षितत्वात् `इतरथा हि तृकतीयानुकृष्येत' इति। तस्या अनन्तरसूत्रे श्रुतत्वात्। अन्यतरस्यांग्रहणस्य त्वेतदेव प्रयोजनमिति। तदेव चकारेणानुकृष्यत इति।।

73. चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः।

`तृतीयानिर्देशादेवार्थग्रहणे सिद्धेऽर्थग्रहणादर्थशब्दः पृथगेव निमित्तं विज्ञायते। कथं पुनस्तृतीयाग्रहणादर्थग्रहणं सिध्यति ? अपरिसमाप्तत्वादस्य योग इत्यध्याह्रियते। स चार्थैरेव सम्भवति, न शब्दैरिति सामर्थ्यादर्थग्रहणं सिध्यति।।

इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेदन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
द्वितीयाध्यायस्य
तृतीयः पादः

2.4

अथ द्वितीयाध्यायस्य
चतुर्थः पादः

1. द्विगुरेकवचनम्। (2.4.1)

अत्र यदि पारिभाषिकमेकवचनं गृह्येत तदानुप्रयोग एकवचनं न स्यात्-- पञ्चपूलीयं शोभनेति, अनुप्रयोगस्याद्विगुत्वात्। यदि पारिभाषिकमेकवचनमिहाभिप्रेतं स्यात् तदा द्विगोरेकवचनमित्येवं ब्रूयात्, तस्मादन्वर्थस्यैकवचनस्येदं ग्रहणं न पारिभाषिकस्येति मनसि कृत्वाह-- `एकस्य वचनमेकवचनम्' इति। एतेनैकवचनशब्दस्य षष्ठीसमासतां दर्शयन्नन्वर्थतां दर्शयति। एकस्य वचनं वाचकमेकवचनमिति। वक्तीति वचनम्, `कृत्यल्युटो बहुलम्' (3.3.113) इति कर्त्तरि ल्युट्। एकवचनस्यैवार्थं पर्यायान्तरेण स्पष्टीकर्तुमाह-- `एकार्थस्य' इत्यादि। ननु चैकवचनमिति पुंल्लिङ्गेन भवितव्यम्; कथम् ? द्विगोः पुंल्लिङ्गत्वात्; न; लिङ्गसामान्यस्य विवक्षितत्वान्नपुंसकलिङ्गेनैव सामान्येन निर्देशः कृत इत्यदोषः। `तदनेन प्रकारेण' इति। अन्वर्थस्यैकवचनशब्दग्रहणात्मकेनेत्यर्थः। नचानेकार्थाभिधायिनः शब्दस्य वचनशतैरप्येकार्मथाभिधायित्वं शक्यते कर्त्तुम्; शब्दानामर्थाभिधायित्वस्य स्वाभाविकत्वात्; उच्यते चेदं वचनम्, ततः सामर्थ्याददतिदेशोऽयं विज्ञायत इत्यत आह-- `द्विग्वर्थस्यैकवद्भावो विधीयते' इति। अस्यैवार्थं स्पष्टीकर्त्तमाह-- `द्विग्वर्थ एकवद्भवति' इति। यद्येवम्, तद्धितार्थो यो द्विगुस्तस्याप्यकवद्भावः प्राप्नोति-- पञ्चसु कपालेषु संस्कृतौ संस्कृता वा पञ्चकपालौ पञ्चकपाला वेत्यत आह-- `समाहारद्विगोश्च' इत्यादि। चकारोऽवधारणे। समाहारद्विगोरेवेति यावत्। कथं पुनः समाहारद्विगोरेव ग्रहणं लभ्यते ? एवं मन्यते-- `द्वन्द्वश्च' (2.4.2) इत्यत्र चकारेण द्विगुरनुकृष्यते। यस्मिन्नर्थे द्वन्द्व एकार्थीभवति तस्मिन्नेवार्थे द्विगोरप्येकवद्भावो यथा स्यादिति। द्वन्द्वश्च समाहार एवैकार्थीभवति, नान्यत्र। तस्मात् द्विगोरप्येकवद्भावस्तत्रैव भवति; अतः समाहारद्विगोरेवेदं ग्रहणं युक्तं भवति। यदि तर्हि समाहारद्विगोरेवेदं ग्रहणं तदा निष्प्रयोजनोऽतिदेशः, तथा हि-- समाहारो द्विगोरर्थः, समाहारश्च भावसाधनः, समाहरणं समाहारः = समुदायः, स चैक एव। तत्र न्यायप्राप्तमेवैकवचनमिति निष्फलः सूत्रारम्भः ? नैतदस्ति; यतः `समुदायिभ्योऽनन्यः समुदायः' इत्यस्मिन् दर्शनेऽनेकद्रव्यात्मकत्वात् समुदायस्यैकवचनं न सिद्ध्यतीतीदमारब्धम्। तथा चोक्तं भाष्ये-- `प्रत्यधिकरणं वचनोत्पत्तेः संख्यासामानाधिकरण्याच्च द्विगोरेकवचने विधानम्' इति। प्रत्यधिकरणम् = प्रतिद्रव्यम्। वचनस्योत्पत्तौ प्रत्यभिधेयद्रव्यसमवायिनी संख्याविभक्तिः प्रयोजिकोत्पद्यते। द्विगोश्च योऽर्थः सोऽनेकद्रव्यात्मकः। तथा हि-- पञ्च समाहृताः। समाह्रियमाणानां पूलानां पञ्चसंख्यावच्छिन्नत्वात् संख्यासामानाधिकरण्याच्च पञ्चैतानि द्रव्याणीति कृत्वा समुदायस्यैकवचनं न सिद्ध्यति। तत्रासत्यस्मिन् वचने बहुत्वात् बहुवचनं स्यात्। अत एवद्भावो विधीयत इति वाक्यार्थः।

`समुदायिभ्योऽन्यः समुदायः' इत्यस्मिन् दर्शने सूत्रमिदं प्रत्याख्यातव्यमेव। तथा चोक्तं भाष्ये-- `न वा समाहारैकत्वात्' इति। न वा योगारम्भेणैवार्थः। यस्मादेकोऽयमर्थः समाहारो नाम। तत्रैकत्वादेकवचनं भविष्यतीति वाक्यार्थः। `पञ्चपूली' इति। `अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते' (वा.156) इति स्त्रीत्वे सति द्विगोः' (4.1.21) इति ङीप्। `अर्थस्यैकत्वात्' इत्यादिनाऽर्थातिदेशस्य फलं दर्शयति।।

2. द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्। (2.4.2)

अत्राङ्गशब्दः समुदाये परिसमाप्यते ? प्रत्येकं परिसमाप्यते वा ? तत्र यदि समुदाये परिसमाप्येत तदैकमेवेदं वाक्यं स्यात्, तथा च व्यतिकरः प्रसज्येत। प्राणितूर्यसेनाङ्गानां परस्परसहितानां यो द्वन्द्वो व्यतिकीर्णावयवस्तस्यैकवद्भावः स्यात्। प्रत्येकं परिसमाप्तौ त्वेष दोषो न भवति। तत्र हि प्राण्यङ्गानां द्वन्द्व एकवद्भवतीत्येवमादीनि त्रीणि वाक्यानि सम्पद्यन्ते। स्वविषये यत्र बहुवचनान्तं वाक्यं क्रियते तत्र प्रथमेन वाक्येन प्राण्यङ्गानां प्राण्यङ्गैरेव यः समासस्तस्यैकवद्भावो विधीयते। द्वितीयेन वाक्येन तूर्याङ्गानां तूर्याङ्गैः। तृतीयेन सेनाङ्गानां सेनाङ्गैरिति न भवति सङ्करप्रसङ्गः। न हि चतुर्थ वाक्यमस्ति येन व्यतिकीर्णावयवस्य द्वन्द्वस्यैकार्थता स्यादिति मन्यमानः प्रत्येकं वाक्यपरिसमाप्तिपक्षमाश्रित्याह-- `अङ्गशब्दस्य' इत्यादि। तथा तूर्याङ्गानामिति द्वन्द्व एकवद्भवतीत्येपेक्षते। एवं सेनाङागनाञ्चेत्यत्रापि। `पाणिपादम्' इति। अत्र यदि प्राण्यङ्गमपि प्राणिग्रहणेन गृह्यते तदा `जातिरप्राणिनाम्' (2.4.6) इत्येवं सिद्धम्। यथा-- पणवमृदङ्गमिति। `रथिकाश्वारोहम्' इति। रथिकाश्चाश्वारोहाश्चेति वृत्तिपदार्थस्य बहुत्वं

दर्शयितव्यम्। यस्माद्बहुत्वमेव सेनाङ्गत्वे कारणम्। बहुत्वाभावे सेनाङ्गत्वन्नास्तीति रथिकाश्वारोहाविति भवितव्यम्। `हस्त्यश्वादिषु परत्वात् पशुद्वन्द्वविभाषयैव भवितव्यम्' इति। `विभाषा वृक्षमृग' (2.4.12) इत्यादिना। `इतरेतरयोगे' इत्यादिना द्वन्द्वप्रकरणस्य प्रयोजनं दर्शयति। `प्राण्यङ्गादीनां समाहार एव' इत्यादिना विषयविभाषागार्थतां स्पष्टीकरोति।।

3. अनुवादे चरणानाम्। (2.4.3)

`चरणशब्द' इत्यादिना सूत्रस्य विषयं दर्शयति। तथा हि-- यो हि कठादिप्रोक्ताध्ययनविशेषः शाखा, तत्र यदा चरणशब्दो वर्त्तते तदा `जातिरप्राणिनाम्' (2.4.6) इत्येव सिद्धम्। यदा तु शाखानिमित्तकः' इति। शाखा निमित्तम्सयेति बहुव्रीहिः। `प्रमाणान्तरावगतस्य' इति। शब्दात् प्रमाणाद्यदन्यत् प्रमाणं तत् प्रमाणान्तरम्, तत्पुनःप्रत्यक्षादि। तेनावगतस्य परिच्छिन्नस्य शब्देन रसङ्कीर्तनमात्रमिति मात्रशब्दोऽर्थावगतिव्युदासार्थः। `उदगात्,प्रत्यष्ठात्' इति। उत्पूर्वादिणः प्रतिपूर्वात्तिष्ठतेर्लुङ, `इषो गा लुङि' (2.4 .45) इति गादेशः, `गातिस्था' (2.4.77) इति सिचो लुक्। `कठकालापम्' इति। कठेन प्रोक्तमधीयत इति कठाः। कठशब्दात् प्रोक्तार्थे `कलापिवैशम्पायनान्तेवासिभ्यश्च' (4.3.104) इति णिनिः, तस्य `कठचरकाल्लुक्' (4.3.107) , ततः `तदधीते तद्वेद' (4.2.59) इत्यण्, तस्य `प्रोक्ताल्लुक्' (4.2.64) , `छन्दोब्राह्मणानि च तद्विषयाणि' (4.2.66) इति तद्विषयता। कलापिना प्रोक्तमधीयत इति कलापाः। प्रोक्तार्थे कलापिनोऽण्, `इनण्यनपत्ये' (6.4.164) इति प्रकृतिभावे प्राप्ते `सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखष्टिशूकरसद्मसुपर्वणामुपसंख्यानम्' (वा. 798) इति टिलोपः। ततः `तदधीते तद्वेद' (4.2.59) इत्यण्। तस्य `प्रोक्ताल्लुक्' (4.2.64) इति लुक्। पूर्ववत् तद्विषता च। कठाश्च कालापाश्च कठकालापम्। ` यदा तु प्रथमत एवोपदेशः' इति। अनवगतस्यैव प्राक् प्रमाणान्तरेण शब्देनाद्यं प्रत्यायनमर्थस्य प्रश्ने प्रतिवचने वोपदेशः, स यदा भवति तदात्र प्रत्युदाहरणम्। ` उदगुः' इति। `आतः' (3.4.110) इति झर्जुस्। `उस्यपदान्तात्' (6.1.96) इति पररूपत्वम्। `स्थेणोरद्यतन्याञ्चेति वक्तव्यम्' इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- `तुल्यार्थैरतुलोपमाभ्याम्' (2.3.72) इत्यतः सूत्रादन्यतरस्यामित्यनुवर्त्तते। सा च व्यवस्थितविभाषा विज्ञायते। तेन स्थेणोरद्यतन्यामनुवादे चरणानामेकवद्भावो भविष्यति, नान्यत्रेति। `अद्यतनी' इति लुङः पूर्वाचार्यप्रणीतैषा संज्ञा। `अनन्दिषुः' इति। `टुनदि समृद्धौ' (धा.पा.67), `सिजब्यस्तविदिभ्यश्च' (3.4.109) इति झेर्जुस्। `उद्यन्ति' इति। `इको यण्' (6.4.81) इति यणादेशः।।

4. अध्वर्युक्रतुरनपुंसकम्। (2.4.4)

`अध्वर्युवेदे' इति। ऐतेनाध्वर्युशब्दनात्र यजुर्वेदो लक्ष्यत इति दर्शयति। अथाष्वर्योर्ऋत्विग्विशेषस्य यः क्रतुरिति क्रतुविशेषणमेवाध्वर्युग्रहणं कस्मान्न विज्ञायते ? असम्भवात्; को हि तस्य क्रतुर्भवति ! अपि तु घनव्ययशीलस्य। यद्यपि तस्य क्रतौ कर्त्तृत्वमस्ति तदपि ऋत्विगन्तरेण साधारणमित्यध्वर्युणैकेन तस्य विशेषणमयुक्तम्। ननु चाथर्ववेदविहितो यः क्रतुस्तन्निवृत्त्यर्थमध्वर्युणैकेन कथं विशेषणं न स्यात्; न हि त्तराध्वर्यवः सन्ति ? नैतदस्ति; यदि ह्येतावत् प्रयोजनमभिहितं स्यात् तदाऽनथर्वण इति प्रतिषेधमेव कुर्यात्। लघीयसी हि साक्षात् प्रतिषेधे प्रतीतिर्भवति। त्रयीग्रहणं वा कुर्यात्। यदि चाध्वर्युणा क्रतुर्विशेष्येत तदेषुवज्रावित्यत्रापि स्यात् ? इषुवज्रावपि ह्यध्वर्योः क्रतू भवतः; तयोरपि तत्कर्तृकत्वात्। तस्मादध्वर्यूणां यजुर्वेदविदां यो वेदः सोऽध्वर्युशब्देनोपलक्ष्यते। स पुनर्यजुर्वेदः। तत्राध्वर्युवेदे यस्य क्रतोर्विधानं सोऽध्वर्युक्रतुरिति। इतिकर्त्तव्यतोपदेशः प्रयोगश्चानुष्ठानात्मको विधानशब्देनोक्तः। यदि तर्ह्यध्वर्युक्रतुवाचिनामनपुंसकलिङ्गानां द्वन्द्व एकवद्भवतीति सूत्रार्थस्तदा सूत्रेऽध्वर्युक्रतुशब्दस्यानपुंसकमित्यस्य च द्वन्द्व इतयनेन प्रकृतेन सामानाधिकरण्येन निर्देशो नोपपद्यते। अतोऽध्वर्युक्रतुवाचिनामनपुंसकलिङ्गानामिति वक्तव्यं स्यादित्यत आह-- `अध्वर्युक्रतुरनपुंसकम्' इति। `गौणोऽयं निर्देशः' इति। गौण इत्यमुख्य औपचारिक इत्यर्थः। अध्वर्युक्रत्ववयवो द्वन्द्व उपचारेणाध्वर्युक्रतुरित्युक्तः। स एवानपुंसकलिङ्गावयवोऽनपुंलकमिति। गौणन्र्दिेशस्तु लाघवार्थो वेदितव्यः। यदि पुनरनपुंसकमित्यनेन मुख्यया वृत्त्या द्वन्द्व एवोच्येत तदा `स नपुसंकम्' (2.4.17) इत्यस्यापवादोऽयं विज्ञायेत। `अर्काश्वमेधम्' इत्यादि। अर्कश्चाश्वमेधश्चेत्यर्काश्वमेधम्। सायाह्नश्चातिरात्रश्चेति `सायाह्नातिरात्रम्'।

`इषुवज्रौ' इत्यादि। इषुवज्रप्रभृतयोऽध्वर्युक्रतवो न सम्भवति, न हि तेषामध्वर्युवेदे विधानम्। किं तर्हि ? सामवेदे। `राजसूयवाजपेये' इति. एतौ राजसूयवाजपेयशब्दौ पुंल्लिङ्गावपि स्तः। तत्र यदा नपुंसकलिङ्गौ प्रयुज्येते तत्रेदं प्रत्युदाहरणम्। `सोमयागेषु' इति। यत्र यत्र सोमपानं विहितं ते सोमयागाः। तेष्वेव क्रतुशब्दो रूढः। न च दर्शपौर्णमासौ सोमयागौ। `अनपुंसकम्' (2.4.4) इत्युपादानात् स्वरूपग्रहणमिह न भवति। न हि क्रतुसामान्यो नपुंसकलिङ्गो भवति।।

5. अध्ययनतोऽविप्रकृष्टाख्यानाम्। (2.4.5)

अधीतिरध्ययनमिति भावसाधनोऽध्ययनशब्दः, कर्मसाधनो वा -- अधीयत इत्यध्ययनमिति। `अध्ययनतः' इति। `आद्यादिभ्यस्तस्युपसंख्यानम्' (वा. 634) इति हेतुतृतीयान्तात् तसिः। अत आह-- `अध्ययनेन निमित्तेन' इति। `अविप्रकृष्टा' इति। अविप्रकृष्टाऽऽख्या येषां तेऽविप्रकृष्टाख्याः। निमित्तस्य साधारणत्वादिविप्रकृष्टता। तत्पुनर्निमित्तं सूत्रोपात्तमेवाध्ययनमाख्यानामधेयम्। `पदकक्रमकम्' इति। पदमधीते, क्रममधीते इति `क्रमादिभ्यो वुन्' (4.2.61)। `क्रमकवार्तिकम्' इति. वृत्तिमधीत इति वार्तिकः। क्रतूक्थादिसूत्रान्ताट्ठक् (4.2.60)। कथं पुनः पदस्याध्येतुः क्रमस्य चाध्ययनेन निमित्तेनाविप्रकृष्टता भवतीत्याह-- `सम्पाठः' इत्यादि। यस्मात् पदानां क्रमस्य च यः पाठः स नातिभिन्नः। ग्रन्थोऽपि तादृश एव, अतः प्रत्यासन्नः। यतश्च

पदान्यधीत्य क्रमोऽध्येतव्यः, ततोऽपि सम्पाठस्तयो। प्रत्यासन्नः, ततश्च तेन सम्पाठेनाध्ययनेन निमित्तेन पदक इति क्रमक इति च याऽध्येतुराख्या साऽपि प्रत्यासन्ना भवतीत्यभिप्रायः। `पितापुत्रौ' इति। `आनङ ऋतो द्वन्द्वे' (6.3.25) इत्यानङादेशः। तत्र हि `पुत्रेऽन्यतरस्याम्' (6.3.22) इत्यतः पुत्र इत्यनुवर्त्तते। अत्रापि पितेति पुत्र इति चाख्ये प्रत्यासन्ने साधारणत्वान्निमित्तस्य। तथा हि-- जन्यजनकभावो द्वयोरपि तयोर्निमित्तम्। `याज्ञिकवैयाकरणम्' इति। यज्ञमधीते याज्ञिकः। क्रतूक्थादिना (4.2.60) इक्। व्याकरममधीते वैयाकरणः। `तदधीते तद्वेद' (4.2.59) इत्यण्। अस्त्यत्राध्ययननिमित्तत्वमनयोराख्ययोः, न तु प्रत्यासतिः। न हि यज्ञाध्ययनेन व्याकरणाध्ययनेन वा तयोः क्रियाप्रत्यासत्तिर्नापि ग्रन्थप्रत्यासत्तिः।।

6. जातिरप्राणिनाम्। (2.4.6)

अयमपि गौण्या वृत्त्या जातिर्द्वन्द्व इति सामानाधिकरण्येन निर्देशः कृतः। जातिवाच्यवयवो द्वन्द्वो जातिरित्युक्तः। जातेश्च स्वरूपग्रहणं न भवति, अप्राणिनामिति प्रतिषेधात्। `आराशस्त्रि' इति। `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति ह्रस्वः।

`नन्दकपाञ्चजन्यौ' इति। संज्ञाशब्दयोरेव द्वन्द्वोऽयम्, न जातिशब्दयोः। अनेनाप्राणिनामित्यस्य पर्युदासतां दर्शयति। तेनायमर्थो भवतीत्याह-- `नञिवयुक्त' इत्यादि। `रूपरसगन्धस्पर्शाः' इत्यादि गुणजातिः। `गमनाकुञ्चनप्रसारणानि' इति क्रियाजातिः। `जातिपरत्वे च' इति। यदा जातेः प्राधान्येन विवक्षा तदा जातेःपरत्वे प्रधानत्वे सति जातिशब्दानाममेकवद्भावो भवति। `न नियतद्रव्यविवक्षायाम्' इति। यदा क्वचिद्देशादौ नियतानां द्रव्यविशेषाणां विवक्षा भवति तदा जातिशब्दस्य प्रयोगेऽप्येकवद्भावो न भवति। कुत एतत् ? जातिरित्यभिधानान्मुख्या जातिराश्रीयते; न गौणी। एतच्च प्रधाने कार्यसम्प्रत्ययाल्लभ्यते। एतदुक्तं भवति-- यदा जातिरेव व्यक्तिविशेषमाश्रित्य प्रयुज्यते तदा नैकवद्भावः। यदा तु व्यक्तिविशेषमनाश्रित्य प्रयुज्यते तदैवैकवद्भाव इति।

`बदरामलकानि' इति। अत्र बदरामलकानाञ्च व्यक्तिप्रयुक्तानां प्रतीतिः; न जातिशब्दानाम्। अत एव व्यक्त्याश्रयं बहुवचनम्; अन्यथा जातेर्द्वित्वाद्दविवचनमेव स्यात्, न बहुवचनम्। अप्राणिनामिति पर्युदासोऽयम्। तेनायमर्थो लभ्यते-- नञिवयुक्तन्यायेन (व्या.प.65) रूपरसस्पर्शादीनान्नैकवद्भाव इति। अप्राणिनामिति प्रतिषेधे बहुत्वं श्रूयमाणं विधावपि बहुत्वं गमयति। तेन बहुप्रकृतेरेव द्वन्द्व एकदवद्भवति, न द्विप्रकृतेः-- आराशस्त्र्याविति।।

7. विशिष्टलिङ्गो नदीदेशोऽग्रामाः। (2.4.7)

विशिष्टशब्दोऽयं भेदवचनः। योञऽपि `क्तेन नञ्विशिष्टेनानञ्' (2.1.क60) इत्यत्र सावधारणाधिक्ये विशिष्टशब्दो व्याख्यातः; सोऽपि भेद्वारेणैव प्रतिपत्तयः। तेनेह वृत्तिकारोऽपि `भिन्नलिङ्गाना{अपि नास्ति--काशिका}मपि' इत्याह। `अग्रामाः' इति। प्रतिषेधादनयोः स्वरूपग्रहणं न भवतीत्याह-- `नदीवाचिनाम्' इत्यादि। यदि नदीवाचिनां द्वन्द्वो देशवाचिनाञ्चैकवद्भवतीत्ययमत्र सूत्रार्थोऽभिमतः, तत्कथं नदीदेश इत्ययं द्वन्द्व इत्यनेन प्रकृतेन सामानाधिकरण्येन निर्देश इत्याह-- `नद्यवयवो द्वन्द्वोनदीत्युच्यते' इत्यादि। एतेन गौणः सूत्रे निर्देश इति दर्शयति। नदीदेश इत्ययं यदि द्वन्द्वसमासस्तदा व्यतिकीर्णावयवो द्वन्द्वो यस्य कश्चिदवयवो नदी कश्चिद्देशस्तस्यैकवद्भावः स्यात्। किञ्च, द्वन्द्वो भवन्नेष समाहारे वा स्यात् ? इतरेरतरयोगे वा ? त्त्र पूर्वस्मिन् पक्षे `स नपुंसकम्' (2.4.17) इति नपुंसकत्वं स्यात्, इतरत्र तु द्विवचनमितीमं दोषं दृष्ट्वाऽऽह-- `नदीदेश' इति। `असमास एवायं निर्देशः' इति।

`मद्रकेकयाः' इति। मद्राश्च केकयाश्च मद्रकेकयाः। अथ नदीग्रहणं कस्मात् क्रियते ? न देशग्रहणादेव नदीग्रहणं सिद्धमित्यत आह--

`नदीग्रहणमदेशत्वात्' इति। कस्मात् पूनर्नदी देशो न भवतीत्याह-- `जनपदो हि देशः' इति। तत्रैव देशशब्दस्य रूढत्वात्। यत् पुनर्नदी देश इत्युच्यते तत् तात्स्थ्यात्। भवति हि तात्स्थ्यात् ताच्छब्द्यम्, यथा- मञ्चाः क्रोशन्तीति। `तथा च' इत्यादि। तस्माज्जनपद एव देशो नान्यः पर्वतादिः। एवञ्च कृत्वा देशग्रहणेन पर्वतादीनां ग्रहणं न भवति।

`अग्रामा इत्यत्र ' इत्यादि। लोके हि ग्रामग्रहणेन नगरग्रहणं भवति, तथा ह्यभक्ष्यो ग्राम्यशूकर इत्युक्ते नागरोऽपि न भक्ष्यते। ततश्चेहाग्रामा इति प्रतिषेधः क्रियमाणो नगराणामपि प्राप्नोति, तस्मादग्रामा इति प्रतिषेधे नगरप्रतिषेधो वक्तव्यः, अग्रामा इत्यनेन नगराणां यः प्रतिषेधः प्राप्नोति तस्य प्रतिषेधस्य प्रतिषेधो वक्तव्यः, व्याख्येय इत्यर्थः। तेन नगराणां विधिरेव भवति। तत्रेदं व्याख्यानम्-- यदयम् `प्राचां ग्रामनगराणाम्' (7.3.14) इत्यत्र ग्रामनगरयोर्भेदेनोपदानं करोति कज्ज्ञापयति-- इह शस्त्रे ग्रामग्रहणेन नगराणां ग्रहणं न भवतीति। तेनाग्रामा इति प्रतिषेधो नगराणां न भवति।

`उभयतच्च' इत्यादि। उभयस्मिन्नित्यर्थः उभयतः। यत्र कश्चिदवयवो ग्रामः कश्चिन्नगरं तत्र ग्रामाणां यः प्रतिषेध उच्यते स एव वक्तव्यः, व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्-- अग्रामा इति प्रसज्य प्रतिषेधोऽयं विज्ञेयः, नचेत् द्वन्द्वे ग्रामा विद्यन्त इति। तेन यत्र ग्रामगन्धोऽप्यस्ति तत्राप्येकवद्भावो न भवतीति।।

8. क्षुद्रजन्तवः। (2.4.8)

क्षुद्रशब्दोऽयमस्त्येव यः कार्पण्यवति पुरुषे वर्त्तते; यथा-- क्षुद्रो देवदत्त इति, कृपण इति गम्यते। अस्ति च शीलहीनेऽङ्गहीने च, यथा --क्षुद्राभ्यो वेति। अत्र ह्यनियतपुंस्का विकलाङ्गाश्च स्त्रियः क्षुद्राग्रहणेन गृह्यन्ते। अस्ति च परिमाणापचये, यथा-- क्षुद्रास्तण्डुला इति। इह तु जन्तुशब्दसन्निधानात् प्राणिशरीरस्याल्पतामाचष्टे। तेन परिमाणापचये वर्त्तमानस्य क्षुद्रशब्दस्य ग्रहणं विज्ञायत इत्याह-- `अपचितपरिमाणः क्षुद्रः' इति। अल्पशरीर इत्यर्थः। अपचितपरिमाणता चापेक्षाभेदादनवस्थितेति। अस्थिरेत्यर्थः।

क्षुद्रजन्तुशब्दस्याभिधेयं प्रति स्म-तीरुपन्यस्यति-- `क्षुद्रजन्तुरनस्थिः स्यात्' इति। `क्षुदिर् सम्पेवणे' (धा.पा.1443) क्षुद्यत इति क्षुद्रः। औणादिकः `स्फायीतञ्चि' (द.उ.8.31) इत्यादिना रक्। क्षुद्रश्चासौ जन्तुश्चेति क्षुद्रजन्तुः। `अनस्थिः' इति। यस्यास्थीनि न विद्यन्ते। कवलं यस्य चर्मशोणितमांसमस्ति स क्षुद्रश्चासौ जन्तुश्चेति क्षुद्रजन्तुः। `अथ वा क्षुद्र एव यः' इति स्मृत्यन्तरमाह। क्षोदयितुं यः शक्यते स क्षुद्रजन्तुः। शब्दार्थवशात् प्रसिद्ध एव लोके क्षुद्रजन्तुर्ग्राह्यः। स पुनर्मशकादिरङ्गे यस्यात्मीयं शोणितं नास्ति। येषां वा गोचर्ममात्रं राशिहत्वापि नरः पतितो न भवति ते प्रसिद्धाः क्षुद्रजन्तव उच्यन्ते। `शतं वा प्रसृतौ येषाम्' अपरा स्मृतिः। प्सृतौ अञ्जलौ बद्धं येषां प्राणिनां शतं प्रसृतिर्भवति शतेन वा प्रसृतिः पूर्यते ते क्षुद्रजन्तवः। `केचिदानकुलादपि' इति. ककेचिद्वर्णयन्ति-- नकुलपर्यन्ताः क्षुद्रजन्तव इति। `इयमेव स्मृतिः प्रमाणम्' इति। अस्याः सर्वस्मृत्यनुग्राहिणीत्वात्। तथा ह्येतदुपलक्षितेषु क्षुद्रजन्तुषु स्मृत्यन्तरदर्शिता अपि क्षुद्रजन्तवोऽन्तर्भवति। इतरा अपि स्मृतयः प्रमाणं कस्मान्न भवन्तीत्याह-- `इतरासाम्' इत्यादि। अनस्थ्यादीनां स्मृतीनामा नकुलादपीति स्मृत्या विरोधः। तस्मान्नैताः प्रामाण्येनाभ्युपगम्यन्ते, तेन सर्वत्रेदं सिद्धं भवति। `क्षुद्रजन्तवः' इति बहुवचननिर्देशात् बहुवचननिर्देशात् बहुप्रकृतेरेवैकवद्भावो यथा स्यात्। तनेह न भवति-- यूकालिक्षे, दंशमशकाविति। अयञ्च प्राणिजात्यर्थ आरम्भः। `क्षुद्रजन्तव इति किम्' इति ? ननु च सूत्रास्याभावे किं प्रत्युदाहरणं स्यात् ? एवं मन्यते-- अन्यथा हि जन्तव इति सूत्रं कर्त्तव्यम्, ततश्चातिप्रसङ्ग स्यादिति।।

9. येषां च विरोधः शाश्वतिकः। (2.4.9)

प्रतिपक्षभावमात्रं लोके विरोधशब्देनोच्यते। तस्येह ग्रहणे सति छायातपौ, अग्निजले इत्यत्रापि स्यादिति मत्वा वैरमिह विरोधोऽभिमत इति दर्शयितुमाह-- `विरोधो वैरम्' इति। एवं मन्यते-- `क्षुद्रजन्तवः' (2.4.8) इत्यतो जन्तुग्रहणमनुवर्त्तते। तेन जन्तूनां यो विरोधस्तस्येह ग्रहणं विज्ञायते। स च वैरस्वभाव एवेति। `शाश्वतिको नित्यः' इति। शस्वदिति त्रैकल्यमुच्यते। तत्र भवः शाश्वतिकः। `कालाटठञ्'(4.3.11)। अस्मादेव निपातनात् तान्तादपि को न भवति। यश्च त्रैकल्ये भवति स नित्यः। `गोपालिशालङ्कायनाः' इति। गोपालयश्च शालङ्कायनाश्च गोपालिशालङ्कायनाः। नात्र शाश्वतिको विरोध इत्येकवद्भावो न भवति। `चकारः पुनरस्यैव समुच्चयार्थः' इति। प्रकृतस्यान्यस्य समुच्चेतव्यस्याभावादस्यैकवद्भावस्य समुच्चयार्थश्चकारो विज्ञायते। तेन किं भवतीत्याह-- `तेन पशुशकुनि' इत्यादि। पशुशकुनिविभाषाया अवकाशः--महाजोरभ्रम्, महाजोरभ्राः, हंसचक्रवाकम्, हंसचक्रवाका इति। नित्यविरोधिनामेकवद्भावस्यावकाशः-- ब्राह्मणनास्तिकमिति, श्वशृगालम्, अश्वमहिषम्। काकोलूकमित्यत्रोभयप्राप्तौ परत्वात् पशुशकुनिविभाषा स्यात्। चकारस्य पुनरस्यैव समुच्चयार्थत्वादनेन नित्यमेकवद्भवति।।

10.शूद्राणामनिरवसितानाम्। (2.4.10)

यद्यपि `षिञ् बन्धने' (धा.पा. 1248) इति सिनोतिर्बन्धने वर्त्तते; तथापि निरवपूर्वो बहिष्करणे वर्त्तत इत्याह-- `निरवसानं बहिष्करणम्'। यैर्भुक्ते पात्रं संस्कारेणापि न शुद्ध्यति तस्मात् ते ततो बहिष्कृताः = पृथक्कृताः। न लभन्ते तत्र भोक्तुमित्यर्थः।।

11. गवाश्वप्रभृतीनि च। (2.4.11)

गवाश्चादीनि कृतैकवद्भावानि गणे पठ्यन्ते। तेषाममनेन साधुत्वमात्रं विधीयते। न त्वेकवद्भाव इति दर्शयन्नाह-- `गवाश्वादीनि' इति। ग्वाश्वमित्येवमादीनामजैडकपर्यन्तानां पशुद्वन्द्वविकल्पे वचनमिदम्। कुब्जवामनप्रभृतीनां त्रयाणामप्राप्ते। श्वचाण्डालस्याविरोधः ? यदा विरोधं द्वन्द्वो नाचष्टे केवलञ्चार्थमात्रे वर्त्तते तदा श्वचाण्डालमिहास्तीति। `स्त्रीकुमारं दासीमाणवकम्' इत्यप्राप्ते वचनम्। `शाटीपिच्छकम्' इति `जातिरप्राणिनाम्' (2.4.6) इति सिद्धे, अबहुप्रकृत्यर्थः पाठः। `उष्ट्रखरमुष्ट्रशशम्' इति। पशुद्वन्द्वविभाषाप्राप्तौ नित्यार्थम्। मूत्रशकृदादीनां मांसशोणितपर्यन्तानामप्राणिजातीनामबहुप्रकृत्यर्थः पाठः। दर्भशरप्रभृतीनां तृणविभाषायां प्राप्तायां वचनम्। दासीदासादीनां त्रयाणामप्राप्ते। `पुमान् स्त्रिया' (1.2.67) इत्येकशेषो न भवत्यस्मादेव निपातनात्।

`गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तम्' इति। कथम् ? तथा रूप्सयाश्रयणात्। गणपाठे हि यदेषां शब्दानां रूपं तदाश्रितम्। येन यथोच्चारितानामेकवद्भावलक्षणं द्वन्द्ववृतं भवति। `रूपान्तरे तु नायं विधिः' इति। यदा `अवङ स्फोटायनस्य ' (6.1.123) इत्यवङ नास्ति तदा रूपान्तरे जातेऽनेन सूत्रेण यो विधिः क्रियते स न भवति। पशुद्वन्द्वविभाषैव प्रवर्त्तते।।

12. विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्। (2.4.12)

वृक्षादिग्रहयणेनेह वक्षादिविशेषवाचिनां ग्रहणम्। कथम् ? यस्मादत्र हि वृक्षादिभिर्द्वन्द्वः प्रत्येकं विशिष्यते, तेनैषा विभाषा तुल्यजातीयेष्वेवावतिष्ठते। विरूपेषु तुल्यजातीयेष्वपि, न स्वरूपेषु। तेषां द्वन्द्वो नास्ति; एकशेषविधानात्। विरूपेष्वपि न पर्यायेषु। तेषां द्वन्द्वाभावात्। द्वन्द्वाभावश्च युगपत्प्रयोगाभावात, युक्तार्थाभावाच्च। चार्थाभावस्त्वर्थभेदाभावात्। भिन्नाधिष्ठाना हि चार्थता। न च पर्यायाणां भिन्नार्थता सम्भवति; तस्माद्वरूपेष्वेव वृक्षादिविशेषवाचिष्वस्या विभाषाया उपस्थानम्। तेन विशेषग्रहणं वृक्षादिषु विज्ञायते, न स्वरूपग्रहणम्, नापि पर्यायग्रहणम्। अथ सामान्यविशेषवाचिनां ग्रहणं कस्मान्न विज्ञायते, सम्भवति हि सामान्यविशेषवाचिनां द्वन्द्वः, यथा-- गोवलीवर्दमिति ? न; अनभिधानात्। न हि वृक्षधवमित्येवं लोकेऽभिधानमस्ति; धवशब्दादेव तदर्थाभिधायिनो वृक्षशब्दस्यार्थस्यावगत्वात्, धवादिशब्दप्रयोगे वृक्षादिशब्दस्य प्रयोगानर्हत्वात्। गोवलीवर्दमित्यत्र तु बलीवर्दसन्निधाने गोशब्दस्य स्त्रीगवीष्वेव

वृत्तेर्द्वावपि विशेषवाचिनाविति युक्तो द्वन्द्वः। येऽत्राप्राणिवाचिनस्तेषां `जातिरप्राणिनाम्' (2.4.6) इत्येकवद्भावे नित्ये प्राप्ते वचनमिदं विभाषार्थम्। परिशिष्टानामप्राप्ते। पशुग्रहणेनैव मृगादिग्रहणे सत्यपि पश्वन्तरेणेषां किमर्थम् ? तुल्यजातीयानां द्वन्द्वोऽयमेकवद्भवतीत्युक्तम्, अत्र पशुग्रहणेनैव सिद्धे मृगादिग्रहणे सत्यपि पश्वन्तरेणेषां परस्परेण वा द्वन्द्वो मा भूदित्येवमर्थम्। `पशुद्वन्द्व' इत्येवं सिद्धेऽश्ववडवग्रहणं नियमार्थम्। योऽन्य एतयोः पर्यायस्तत्र मा भूत्-- हयवडवे इति।
`बहुप्रकृतिः' इति। बह्वर्था बहुवचनान्ता वा प्रकृतिर्यस्य स बहुप्रकृतिः। बह्वर्थानां फलादीनामेषां बहुवचनान्तानां वा द्वन्द्व एकवद्भवतीत्यर्थः।।

13. विप्रतिषिद्धं चानधिकरणवाचि। (2.4.13)
`अद्रव्यवाचिनाम्' इति। एतेनाधिकरणशब्दोऽत्र द्रव्ये वर्त्तते नाधार इति दर्शयति। न हि विप्रतिषिद्धवाचिनां शब्दानामाधारे वृत्तिरस्तिः; विभक्त्यर्थत्वादाधारशक्तेः। `शीतोष्णे' इति। शीतोष्णयोः सहानवस्थानलक्षणेनैव विरोधेन विरुद्धत्वाद्विप्रतिषिद्धवाचित्वम्। तथा सुखदुःखयोरपि।।
`कामक्रोधौ' इति। क्रुद्धोऽपि काममाचरतीति नानयोर्विप्रतिषिद्धत्वम्।।

14. न दधिपयआदीनि। (2.4.14)
`यथायथम्' इति। यथास्वं यस्य यदात्मीयं लक्षणं तेनेत्यर्थः। तत्र दधिपयसी इत्यादीनां त्रयाणां व्यञ्जनवाचित्वाद्विभाषैकवद्भावप्राप्तिः। ननु च सर्पिर्मधुनी, मधुसर्पिषी इति राजदन्तादिष्वनयोर्निपातनादेवैकवद्भावो न भविष्यति ? नैतदस्ति; पाक्षिको हि व्यञ्जनैकवद्भावः। तत्र यस्मिन् पक्षे स नास्ति तस्मिन्निपातनं पूर्वनिपात्व्यभिचारार्थं स्यात्। इतरस्मिन्नपि पक्ष एकवद्भावनिषेधार्थोऽत्र पाठः। यद्येवम्, अनेनैव सिद्धत्वाद्राजदन्तादिषु पाठोऽनर्थकः स्यात् ? नानर्थकः; बहुवचनार्थत्वात्। `सर्पिर्मधुनी, मधुसर्पिषी' इति। ननु तत्रापि द्ववचनान्तावेव पठ्येते ? यद्यप्येवम्, तथापि शब्दाश्रयत्वात् परनिपातस्यार्थधर्मत्वाद्द्वित्वं नापेक्ष्यते। अर्थाश्रयस्त्वेकवद्भाव इति तत्प्रषेधे युज्यते संख्यां विवक्षितुम्। `ब्रह्मप्रजापती' इत्यादीनां पञ्चानां समाहारैकत्वात् प्राप्तिः। `शुक्लकृष्णौ' इति। `विप्रतिषिद्धम्' (2.3.13) इत्यादिना। `इध्माबार्हिषी' इत्यादीनां समाहारैकत्वात् प्राप्तिः।।

15.अधिकरणैतावत्त्वे च। (2.4.15)
अधिकरणं वर्त्तिपदार्थः' इति। वर्त्तन वर्त्तः = समासः। भावे घञ्। वर्तोऽस्यास्तीति वर्ति = समासावयवभुतम। वर्त्तिश्च तत् पदञ्चेति वर्त्तिपदं तस्य पदस्यार्थोऽधिकरणमित्युच्यते। कथं पुनस्तस्याधिकरणत्वामित्यत आह-- `स हि' इत्यादि। आधारो ह्यधिकरणम्। वर्त्तिपदार्थश्च समासार्थस्याधारो भवति; तत्र तस्य समवायात्। वर्त्तिपदार्थैर्ह्यवयवैरवयवी समासार्थ आरभ्यते, अवयवी चावयवेषु कसमवैति। `तस्य ' इति। वर्त्तिपदार्थस्य। `दश {इमे नास्ति-- काशिका, पदमञ्जरी च} इमे दन्तौष्ठाः}' इति। `द्वन्द्वश्च' (2.4.2) इत्यादिना प्राप्तिः।।

16. विभाषा समीपे। (2.4.16)
अधिकरणैतावत्त्वस्य प्रकृतत्वात् तदपेक्षयैव समीपत्वं विज्ञायत इत्यत आह-- `अधिकरणैतावत्त्वस्य समीपे' इति। `उपदशं दन्तौष्ठम्'इति। अत्राधिकरणैतावत्त्वं दशसंख्या, तत्समीपं नवैकादश वा। तत्र दशशब्द एतावत्त्वमाचष्टे। उपशब्दः सामीप्यम्।
कथं पुनर्द्वन्द्वैकवद्भावो विकल्प्यमानोऽनुप्रयोगस्य लभ्यत इत्यत आह-- `अव्ययस्य' इत्यादि। यद्यप्यर्थातिदेशादनुप्रयोगस्यापि विकल्पो लभ्यते, तथापि परीहारान्तरमप्यस्तीति दर्शनार्थमस्योपन्यासः। तत्राव्ययस्य संख्याया अव्ययीभावो विहितः--`अव्ययं विभक्ति' (2.1.6) इत्यादिना। बहुव्रीहिरपि विहितः-- `संख्यायाव्ययासन्न' (2.2.25) इत्यादिना। अत्रैकवद्भावपक्ष एकार्थस्य द्वन्द्वस्यैकार्थ एवाव्ययीभावोऽनुप्रयुज्यते। एकार्थत्वं पुनस्तस्य सामीप्यप्रधानसत्वात्। यद्यप्यव्ययीभावोऽव्ययम्, तथाप्यभेदैकत्वं भेदाभावलक्षणं तस्यास्त्येव सामानाधिकरण्यम्। इतरत्र तु बह्वर्थस्य द्वन्द्वस्य बह्वर्थ एव बहुव्रीहिरनुप्रयुज्यते। बह्वर्थं पुनर्बहुव्रीहेः समीपिनः प्राधान्यात्। बहुव्रीहिर्हि समीपी प्रधानत्वाद्भेदसंख्यामुपादत इति बह्वर्थो भवति। `उपदशम्' इति। `अव्ययीभावे शरत्प्रभृतिभ्यः' (5.4.7) इत्यनुवर्त्तमाने `अनश्च' (5.4.108) इति टच् समासान्तः। `नस्तद्धिते' (6.4.144) इति टिलोपोः। `उपदशाः' इति। बहुव्रीहौ संख्येये डजबहुगणात्' (5.4.73) इति डच्।।

17. स नपुंसकम्। (2.4.17)
`पञ्चगवम्' इति। `गोरतद्धितलुकि' (5.4.92) इति टच्। सग्रहणं द्विगोरपि यथा स्यादित्येवमर्थम्. इतरथा हि `अनन्तरस्य विधिर्वा भवति प्रतिषेदो वा' (व्या.प.19) इत्यनन्तरस्यैव द्वन्द्वस्य स्यान्न व्यवहितस्य द्विगोः, नैतदस्ति; एकवचनमित्यनुवर्त्तते, तस्य `नपुंसकम्' इत्यनेन सम्बन्धे सति कुतो व्यवधानम् ! न ह्यत्रैकरवचनेन विशेषो द्वन्द्वोऽनेनापेक्ष्यते, किं तर्हि ? एकवचनमात्रम्। प्रसिद्ध्युपसंग्रहार्थं तर्हि सग्रहणम्। स इत्येतदनुवादो भविष्यति, अनुवादश्च प्रसिद्धस्यैव भवति। तथा च यथादर्शनमियं लिङ्गव्यवस्थाऽऽख्यायत इति। तेन द्वन्द्वैकवद्भावे नित्यं नपुंसकत्वं विज्ञायते। द्विगोश्चानियता। तेन `अकारान्तोत्त्रपदो द्विगुः स्त्रियां भाष्यते' (वा.156) इत्येतदुपपन्नं भवति। `पञ्चपूली' इति। `द्विगोः' (4.1.21) इति ङीप्। एतदेव द्विगोः स्त्रीप्रकरणे

ङीब्विधानं ज्ञापकम्-- `क्वचित् स्त्रियां द्विगुर्भाष्यते' इति।
`पञ्चखट्वम्, पञ्चखट्वी' इति। उपसर्जनह्रस्वत्वे कृते पक्षे ङीप्।
`पञ्चतक्षम्, पञ्चतक्षी' इति। नलोपे कृते पक्षे ङीप्।।

18. अव्ययीभावश्च। (2.4.18)
`अधिस्त्रि' इति। `अव्ययं विभक्ति' (2.1.6) इत्यादिनाऽव्ययीभावः। `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति ह्रस्वत्वम्। `उन्मत्तगङ्गम्, लोहितगङ्गम्' इति। `अन्यपदार्थे च सञ्ज्ञायाम्' (2.1.21) इति समासः। पूर्ववद्ध्रस्वत्वम्। `पूर्वपदार्थप्रधानस्यालिङ्गतैव प्राप्ता' इति. अधिस्त्रीत्यादौ पूर्वपदस्यालिङ्गत्वात्। `अन्यपदार्थप्रधानस्याभिधेयलिङ्ता' इति। उन्मत्तगङ्गिमत्यादौ देशोऽभिधेयः, स च पुंल्लिङ्ग इति पुंल्लिङ्गत्वं प्राप्तम्। `पुण्याहम्' इति। कर्मधारयः। `राजाहःसखिभ्यष्टच्' (5.4.91) इति टच् समासान्तः। `रात्राह्नाहाः पुंसि' (2.4.29) इति पुल्लिङ्गतायां वचनम्। `विपथम्' इति। `पथः संख्याव्ययादेः' (वा. 161) इति परवल्लिङ्गतायां प्राप्तायां वचनम्। `कुगतिप्रादयः' (2.2.18) इतकि समासः। `चतुष्पथम्' इति। षष्ठीसमासः। समाहारद्विगौ तु पूर्वेणैव सिद्धम्। `ऋक्पूरब्धूःपथामानक्षे' (5.4.74) इत्यकारः समासान्तः।।

19. तत्पुरुषो।ऽनञ्कर्मधारयः।
नञ्मात्रस्य तत्पुरुषस्याभावन्नञात्र नञ्समासो लक्ष्यत इत्याह-- `नञ्समासम्' इति। `वक्ष्यति-विभाषा सेनासुराच्छाया' इति। अनन्तरयोगेय्वस्याधिकारस्य प्रयोजनं नास्तीत्यस्तानुल्लङ्घ्य व्यवहितस्य `विभाषा सेनासुरा' (2.4.25) इत्यादियोगस्योपन्यासः। इत उत्तरेष्वनन्तरेषु योगेष्वस्य प्रयोजननाभावः `न हि संज्ञायां कन्थोशीनरेषु तत्पुरुष नञ्समासः, कर्मधारयो वाऽस्ति' इत्यादिना भाष्ये प्रतिपादितः। `दृढसेनः' इति। बहुव्रीहिः। अथानञ्कर्मधारय इति कोऽयन्निर्देशः ? यदि ह्यत्र नञ्कर्मधारययोर्वदन्द्वः, तदा समाहारे वा स्यादितरेतरयोगे वा ? तत्र पूर्वस्मिन् पक्षे नपुंसकत्वं प्रसज्येत; इतरत्र तु द्विवचनम्। निर्देशस्य सौत्रत्वादुभयथाप्यदोषः। तथा हि-- च्छन्दोवत् सूत्राणि भवन्तीति। छन्दसि च लिङ्गवचनव्यत्ययं तृतीयेऽध्याये वक्ष्यति ।।

20. संज्ञायां कन्थोशीनरेषु। (2.4.20)
प्रकृते न तदन्तविधिरिति प्रकृतस्य तत्पुरुषस्य कन्यया तदन्तविधिर्वज्ञायत इत्याह-- `कन्थान्तस्तत्पुरुषः' इति। `सौशमिकन्थम्' इति। सौशमीनां कन्था इति षष्ठीसमासः। `दाक्षिकन्था' इति। अस्तीयं ग्रामस्य संज्ञा; न तूशीनरेषु किं तर्हि ? ततोऽन्यत्रेति।।

21. उपज्ञोपक्रमं तदाद्याचिख्यासायाम्। (2.4.21)
`उपज्ञायत इत्युपज्ञा' इति। `आतश्चपसर्गे' (3.3.106) इति कर्मण्यङ। `उपक्रम्यत इत्युपक्रमः'। अत्र `अकर्त्तरि च कारके संज्ञायाम्' (3.3.19) इति कर्मणि घञ्। `नोदात्तोपदेशस्य' (7.3.34) इत्यादिना वृद्धिनिषेधः। `यद्यप्युपज्ञेयस्योपक्रम्यस्य च' इत्यादि। उपज्ञेयः = परिज्ञेयः। उपक्रमः = उपक्रमितव्यः। आदिः = प्राथम्यम्। `पाणिन्युपज्ञम्' इति। षष्ठीसमासः। तेन तत्प्रथमतः प्रणीतम्। `अकालम्' इति। स स्वस्मिन् व्याकरणे कालाधिकारं न कृतवान्। `व्याड्युपज्ञं दशहुष्करणम्' इति। व्यडिरप्यत्र युगपत्कालभाविनां विधीनां मध्ये दश हुष्करणानि कृत्वा परिभाषितवान् पूर्वं पूर्वं कालमिति। वाल्मीकेः श्लोका वाल्मीकिश्लोका इति षष्ठीसमासः।।

22. छाया बाहुल्ये। (2.4.22)
`पूर्वपदार्थधर्मो बाहुल्यम्' इति। अत्र हेतुमाह-- `शलभादीनाम्'इत्यादि। शळभादीनां बहुत्वं शलभच्छायमित्यादौ हि गम्यते, न हि तेन विना छाया सम्भवति। अतः पूर्वपदार्थस्य शलभादेर्बाहुल्यं धर्मः।।

23. सभा राजाऽमनुष्यपूर्वा। (2.4.23)
`इह कस्मान्न भवति-- राजसभा' इति। `स्वं रूपं शब्दस्याशब्दसंज्ञा' (1.1.68) इति वचनदिहैव युक्तं भवितुमित्यभिप्रायः। `तदयुक्तम्' इत्यादि। एतेन `पर्यायवचनस्यैवेष्यते' (का.वृ.2.4.23) इत्येतदाप्तवचनेन द्रढयति। यतः पर्यायवचनस्यैवेष्यते तस्मादेव हेतोरिदमुक्तम्। `{जित्पर्यायवचनस्यैव-काशिका। जदित्पर्यायवनस्यैव' इत्यादि। कथं पुनः पर्यायवचनस्यैव भवतीत्येषोऽर्थः, यावता नेह सूत्रे तथाविधं वचनमस्ति ? एवं मन्यते-- ननु च पूर्वग्रहणमस्ति, अतः पूर्वग्रहणादेषोऽर्थो लभ्यते, कथम् ? यदि स्वरूपग्रहणं स्यात् `राजाऽमनुष्यात्' इत्येवं ब्रूयात्, पञ्चम्येव हि दिक्शब्दमध्याहरयिष्यति, न च सभान्तस्य तत्पुरुषस्य पूर्वशब्दादन्यो दिक्शब्दोऽध्याहर्त्तुं शक्यत इति किं पूर्वग्रहणेन ? तत् क्रियतेऽर्थग्रहणं यथा स्यात्। अर्थग्रहणे च सत्यराजाऽमनुष्यपूर्वा इति द्विष्प्रतिषेधो वर्ण्यते-- अराजपूर्वा, अमनुष्यपूर्वेति। तदनेन नञिवयुक्तन्यायेन (व्या.प.65) तत्सदृशा राजपर्याया गृह्यन्ते, न तु तद्विशेषाश्चन्द्रगुप्तादयः, न हि ते राजार्थस्य वाचका इति। अथ वा-- अर्थग्रहणेऽस्मिन् `विभाषा समीपे' (2.4.16) इत्यतो विभाषागर्हणमनुवर्त्तते मण्डूकप्लुतिन्यायेन, सा च व्यवस्थितविभाषा विज्ञायते। तेनेह प्रयायवचनस्यैवेश्वरादेर्ग्रहणं भविष्यति, नान्यस्य।

`अमनुष्यशब्दो {हि-- वृत्तौ नास्ति} हि रूढिरूपेण रक्षः पिशाचादिषु वर्त्तते' इति। यद्येवम्, `अनुष्यकर्त्तृके च' (3.2.53) इत्यत्र यदुदाहरिष्यति-- जायाघ्नस्तिलकालकः, पतिघ्नी पाणिरेखा, श्लेष्मध्नं मधु, पित्तघ्नं घृतमिति,तद्व्याहन्यते ? नैष दोषः; अत्र हि चकार क्रियते, तस्यैव विधेः समुच्चयार्थः। तेन पुनर्विधानात्, `कृत्यल्युटो बहुलम्' (3.3.क113) इति वचनाद्वा रक्षः पिशाचादिभ्योऽन्यत्रापि भविष्यति। अथ वा-- अमनुष्यशब्दोऽयं द्विविधः-- अस्त्येवायमव्युत्पन्नो यो रक्षः पिशाचादिषु वर्त्तते, अस्ति च व्युत्पन्नो नञ्समासः; तत्रेहाव्युत्पन्नस्य रूढिशब्दस्य ग्रहणम्। `अमनुष्यकर्त्तृके च'(3.2.53) इत्यत्र व्युत्पन्नस्यारूढिशब्दस्य ग्रहणमित्यविरोधः। `देवदत्तसभा' इति। देवदत्तशब्दो न राजपर्यायः; नाप्यमनुष्यवचनः।।

24. अशाला च। (2.4.24)
सभाशब्दोऽयमस्त्येव कुटीवचनः-- कदीर्घा सभा,ह्रस्वा सभेति। अस्ति च सङ्घातवचनः, यथा-- ब्राह्मणानां सभा, स्त्रीणां सभेति; इह चाशालेति कुटीवचनप्रतिषेधादितरो गृह्यत इत्यत आह-- `सङ्घातवचनः' इत्यादि।।

25. विभाषा सेनासुराच्छायाशालानिशानाम्। (2.4.25)
`श्वनिशम्' इति। यस्यां निशायां श्वानो मत्ता विहरन्ति सा श्वनिशम्; श्वनिशेति चोच्यत इति।।

26. कपरवल्लिङ्गं द्वन्द्वतत्पुरुषयोः। (2.4.26)
किमर्थमिदम् ? इहायं द्वन्द्वः स्रवपदार्थप्रधानः, स यदा भिन्नलिङ्गवयवो भवति तदा पूर्वोत्तरयोः पदयोर्भिन्नलिङ्गयोरनुग्राहकमेकं लिङ्गं नास्ति येन समुदायो व्यपदिश्यते। उभाभ्याञ्च युगपदसम्भवादशक्यो व्यपदेशः कर्तृम्। अतः पर्यायः स्यादिति द्वन्द्वे नियमार्थं वचनम्। तत्पुरुषोऽपि द्विविधः-- पूर्वपदार्थप्रधानः, उत्तरपदार्थप्रधानश्चेति। ततो य उत्तरपदार्थप्रधानस्तत्पुरुषस्तस्य प्रधानत्वादेव परस्य यल्लिङ्गं तत्समुदायस्य भविष्यतीति तं प्रत्यनर्थकं वचनम्। यस्तु पूर्वपदार्थप्रधानस्तस्य पूर्वपदस्य यल्लिङ्गं तस्मिन् प्रसक्त उत्तरपदस्य यल्लिङ्गं तद्विधीयत इति तत्र विध्यर्थमेतद्भवति। `द्वन्द्वस्य तत्पुरुषस्य च' इति। द्वन्द्वतत्पुरुषयोरिति षष्ठीयपरशब्दस्य सम्बन्धिशब्दत्वात्। तथा च मयूरीकुक्कुटावित्यत्र पूर्वपदस्य स्त्रीप्रत्ययो निवर्त्तेत, तत्पुरुषेऽप्यर्थपिप्पलीत्यत्र पूर्वपदस्यापि स्त्रीप्रत्ययः स्यात्; तस्मात षष्ठीयम्। तथा च सति समासार्थस्यायमतिदेशो विज्ञायते। पूर्वपद्सय न प्रतिषिध्यते; नापि विधीयत इति न भवति पूर्वोक्तदोषावसरप्रसङ्गः। समासार्थस्य लिङ्गातिदेशादनुप्रयोगोऽपि समासार्थस्यैव विशेषणमिति तल्लिङ्गमेव भवति। क`कुक्कुटमयूर्याविमे' इति। उपसर्जनह्रस्वत्वं न भवति, उपसर्जनसंज्ञाया अभावात्। उक्तं ह्येतत् प्राक्-- `उपसर्जनमिति महत्याः संज्ञायाः प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत-- अप्रधानमुपसर्जनम्' इति। द्वन्द्वश्च सर्वपदार्थप्रधान इति नास्त्युपसर्जनसंज्ञा। अर्धपिप्पलीत्यादावपि सत्येकविभक्तियोगे यथा पिप्पल्यादेरुपसर्जनसंज्ञा न भवति, तथोपसर्जनसंज्ञाविधावेव तत्प्रतिपादितम्।
`वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्-- `तत्पुरुषः' (2.4.19) इत्यनुवर्तमाने पुनस्तत्पुरुषग्रहणस्यैतत् प्रयोजनम्-- तत्पुरुषविशेषस्य परवल्लिङ्गता यथा स्यादिति. तेन द्विगुप्राप्तापन्नलम्पूर्वगतिसमासेषु परवल्लिङ्गता न भवति; अन्यथा यदि सर्वस्थेयं तत्पुरुषस्य परवल्लिङ्गता स्यात् तदा `परकवल्लिङ्गं द्वन्द्वस्य च' इत्येवं ब्रूयात्। चकाराद्धि प्रकृतस्य तत्पुरुषस्येति विज्ञास्यत एवेति। `पञ्चकपालः' इति। तद्धितार्थे द्विगुः। संस्कृतार्थ उत्पन्नस्याणः `द्विगोर्लुगनपत्ये'(4.1.88) इति लुक्। `प्राप्तजीविकः' इति। प्राप्तापन्ने च द्वितीयया' (2.2.4) इति समासः। `अलञ्जीविकः' इति। `पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' (वा. 93) इति समासः। निष्कौशाम्बिः' इति। `निरादयः क्रान्ताद्यर्थे पञ्चम्या' (वा.94) इति।।

27. पूर्ववदश्ववडवौ। (2.4.27)
`अश्ववडवयोर्विभाषैकवद्भावो विहितः'इति। `विभाषा वृक्षमृग' (2.4.12) इत्यादिना। `अर्थातिदेशश्चायम्, न निपातनम्' इति। निपातने हि पूर्ववदिति वचनमर्थकं स्यात, अश्ववडवावित्येवं ब्रूयात्। तेन `द्विवचनमतन्त्रम्' इत्यादिनाऽर्थातिदेशस्य फलं दर्शयति। निपातने हि वचनान्तरे पूर्ववल्लिङ्गता न स्यात्।।

28. हेमन्तशिशिरावहोरात्रे च च्छन्दसि। (2.4.28)
परवल्लिङ्गतापवादोऽयं योग इति हेमन्तशिशिरावित्यत्र नपुंसकत्वापवादः, परस्य शिशिरशब्दस्य नपुंसकत्वात्। `अहोरात्रे' इति। पुंल्लिङ्गत्वापवादोऽयम्। `रात्राह्नाहाः पुंसि' (2.4.29) इति पुंल्लिङ्गत्वे प्राप्ते छन्दसि लिङ्गव्यत्यय उक्त इति-- `व्यत्ययो बहुलम्' (3.1.85) इत्यनेन।।

29. रात्राह्नाहाः पुंसि। (2.4.29)
`परवल्लिङ्गतया स्त्रीनपुंसकयोः प्राप्तयोः' इति। रात्रिशब्दस्य स्त्रीलिङ्गत्वादहः शब्दस्य च नपुंसकत्वात्। `द्विरात्रः' इति। द्वयो रात्र्योः समाहारः। `तद्धितार्थ' (2.1.51) इत्यादिना समाहारे द्विगुः। `अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः' (5.4.87) इत्यच् समासान्तः। अत्र हि `अच् प्रत्यन्ववपूर्वात् सामलोम्नः' (5.4.75) इत्यतोऽजित्यनुवर्त्तते। `पूर्वाह्णः' इति।र अह्नः पूर्वमिति विगृह्य `पूर्वापर' (2.2.1) इत्यादिना समासः, `राजाहःसखिभ्यष्टच्'

(5.4.91) इति टच्, `अह्नोऽह्न एतेभ्यः' (5.4.88) इत्यह्नादेशः; `अह्नोऽदन्तात्' (8.4.7) इति णत्वम्। `द्वयहः' इति। पूर्ववत् समाहारे द्विगुः। पूर्ववत् टच्। `न संख्यादेः समाहारे' (5.4.89) इति प्रतिषेधावह्नदेशो न भवति। `अह्नष्टखोरेव' (6.4.145) इति टिलोपः। `अनुवाकादयः' इति। केचिदाहः-- बहुव्रीहिरयम्, अनुक्रान्तो वाकोऽनयानेन वाऽनुवाकः। स्त्रीलिङ्गे नपुंसकलिङ्गे च प्राप्ते वचनम्। अन्ये च मन्यन्ते-- योऽयं घञ् स सामर्थ्यात् पुंल्लिङ्गः। तस्य हि नपुंसके भावे क्तोऽपवादः, स्त्रियाञ्च क्तिन्। तेनासौ सामर्थ्यात् पुंस्यवावतिष्ठते। यस्त्वकर्त्तरि कारके विधीयते स पुंसि नपुंसके च वर्त्तते; बाधकाभावात्। स्त्रियान्तु न भवति; यतः `स्त्रियां क्तिन्' (3.3.94) इत्यकर्त्तरि च कारके विदीयते, स विशेषविहितो घञं बाधते। इह च वचेः `अकर्त्तरि च कारके संज्ञायाम्' (3.3.19) इति घञ् विहितः। अनूच्यते यत् पदं तदनुवाकः। `कुगतिप्रादयः' (2.2.18) इति समासः। अस्मिन् पक्षे नपुंसके प्राप्ते वचनम्।।

30. अपथं नपुंसकम्। (2.4.30)
`अपधम्' इति। `पथो विभाषा' (5.4.72) इति यदा समासान्तप्रतिषेधो नास्ति तदा `ऋक्पूरब्धूपथामानक्षे' (5.4.74) इत्यकारः समासान्तः। समासान्तनिर्दशाद्यदा समासान्तो नास्ति तदा पुंल्लिङ्गतैव भवति-- अपन्था इति।।

31. अर्द्धर्चाः पुंसि च। (2.4.31)
अर्द्धर्चा इति बहुवचननिर्देशादाद्यर्थो गम्यत इत्याह-- `अर्द्धर्चादयः' इत्यादि।
`शब्दरूपाश्रया चेयम्' इति। शब्दरूपमाश्रयो यस्याः सा तथोक्ता। शब्दरूपमाश्रित्यार्थमनपेक्ष्यद्विलिङ्गतेयं विधीयत इत्यर्थः।
क्रियाशब्दस्याभिधेयवल्लिङ्गमिति भूतं कुण्डम्, भूता शाटी, भूतो घट इति। यौगिकस्याभिधेयवल्लिङ्गमिति लवणं शाकम्, लवणा यवगूः, लवणः सूपः इति। लवणेन संसृष्टमिति `संसृष्टे' (4.4.क22) इति ठक्। तस्य `लवणाल्लुक्' (4.4.24) इति लुक्। अत एव तद्धितार्थयोगे भूतत्वात् अपूर्वशब्दोऽयं धर्माधर्मयोर्वर्त्तते। `तत्साधने' इति। अदृष्टोपार्जनं प्रति यस्याङ्गभावः स तत्साधनमित्यर्थः, स पुनर्यागादिः। कर्मशब्दो नकारान्त एवोभयलिङ्ग इति क्रम कर्मा चेति।।

32. इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ। (2.4.32)
`आदेशः कथनम्' इति। प्रथमतः प्रतिपादनम्, शब्देन। `अनवादेशोऽनुकथम्' इति। पश्चात्प्रतिपादनम्। तच्च यादृशमिहाभिप्रेतं तादृशं पश्चाद्वक्ष्यति। `आभ्यां छात्राभ्याम्' इत्यादि। आदेश एषः। `अथो आभ्याम्' इत्याद्यन्वादेशः एषः। अथोशब्देनात्रान्वादेश उच्यते।
ननु च त्यादाद्यत्वे कृते हलि लोपे (7.2.113) चाथो आभ्यामित्यादिरूपं सिध्यत्येव, तस्मादनुदात्तमेव केवलं विधेयम्, आदेशवचनं त्वनर्थकमित्यत आह-- `आदेशवचनम्' इत्यादि। `अव्ययसर्वनाम्नामकच् प्राक् टेः' (5.3.71) इत्यकरच्प्रत्यये कृते सत्यपि `अनाप्यकः' (7.2.112) इत्यधिकारादिद्रूपस्य लोपो नास्तीत्यस्तयादेशवचने रूपं न सिध्यति। ननु च `हलि लोपः' (7.2.113) इत्यनेन हलादाविद्रूपस्य लोपेऽनेनाजादौ यथा स्यादित्यवेवमर्थ कस्मान्न भवति ? नैतदस्ति; सामर्थ्याद्धि हलादावेव भवितव्यम्, तत्र स्मैभावादिषु कृतेषु। तस्मात् साकच्कार्थमादेशवचनम्। साकच्कार्थे चास्मिन्नारब्धे शित्करणं सर्वादशार्थम्; अन्यथा ह्यलोऽन्त्स्य स्यात्। प्रयोजनाभावान्न भविष्यतीति चेत्, न; अकारस्य त्वकारवचनं दीर्घादेशनिवृत्त्यथं विज्ञायते। अथानुदात्तवचनं किमर्थम्, यावता `ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः' (6.1.171) इति विभक्तेरुदात्तत्वे कृते `आनुदात्तं पदमेकवर्जम्' (6.1.158) इति प्रकृतेरनुदात्तत्वं भविष्यति ? नैतदस्ति; सविभक्त्यर्थमनुदात्तवचनम्, सविभक्तिकस्यानुदात्तत्वं यथा स्यात्। तेन सर्वानुदात्तमेवाभ्यामिति पदमन्वादेशे भवति। यदि पश्चादुच्चारणमात्रमन्वादेशस्तदेह कस्मान्न भवति-- देवदत्तं भोजय, इमञ्च यज्ञदत्तमिति ? अस्ति ह्यत्राप्यन्वादेशः, ततश्च `द्वितियाटौस्स्वेनः' (2.4.34) इत्येनादेशः प्राप्नोतीत्यत आह-- `नेह पश्चादुच्चारणमात्रम्' इत्यादि। `तेनेह न भवति' इति। न ह्यत्रैकस्याभिधेयस्य पूर्वं शब्देन प्रतिपादितस्य द्वितीयं प्रतिपादनम्, किं तर्हि ? अभिधेयान्तरस्य। तथाहि पूर्वं देवदत्तस्य प्रतिपादनम्, उत्तरकालं यज्ञदत्तस्य। कथं पुनरयं विशेषो लभ्यते, यावतापश्चादुच्चारणमात्रेऽन्वादेशशब्दः प्रसिद्धः, न च सामान्यशब्दः शब्दान्तसन्निधानादिकरमन्तेरण विशेषेऽवतिष्ठते ? नैष दोषः; यस्मात् `विभाषा सेना' (2.4.25) इत्यतो विभाषाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञायते। तेनैवंविधविषय एवान्वादेशोऽत्र ग्रहीतव्यः, नान्वादेशमात्रम्। तसमाद्विशिष्टस्यान्वादेशस्य ग्रहणं युक्तमिति भावः। यदपि च वक्ष्यति तत्र-- `यत्र किञ्चिद्विधाय' इत्यादि, तदपीममेव न्यायं हृदि कृत्वेति बोद्धव्यम्।।

33. एतदस्त्रतसोस्त्रतसौ चानुदात्तौ। (2.4.33)
`अथो अत्र' इति। `सप्तम्यास्त्रल्' (5.3.10)। `अथो अतः'
इति। `पञ्चम्यास्तसिल्' (5.3.7)। `पुनर्वचनमनुदात्तार्थम्' इति। `एतदोऽश्' (5.3.5) इति यः पाञ्चमिकोऽशादेशः स उदात्तः स्यात्। अनुदात्ततश्चेष्यत इत्यनुदात्तार्थ वचनम्। अथ त्रतसोरिति किमर्थम्, यावता `त्रतसौ चानुदात्तौ' इति वचनात् तयोरेव निमित्तभावो विज्ञास्यते ? नैतदस्ति; अन्वाचयोऽपि विज्ञायेत, यथा-- `करत्तुः क्यङ सलोपश्च' (3.1.11) इति। अत्राविशेषेण क्यङ भवति। तथाऽत्राविशेषेण तावदशादेशो भवति। यत्र तु त्रतसौ दृश्येते

तत्र तावनुदात्तौ भवतः, तस्मात् तावन्निमितभावार्थं त्रतसोरितिवक्तव्यम्। अथ त्रतसोरनुदात्तत्वं किमर्थम्, यावता लित्स्वर एव तयोरनुदात्तत्वं करिष्यति ? नैतदस्ति; न ह्यत्र लित्स्वरोऽस्ति, अनुदात्तस्यादेशस्य विधानात्। ननु च लितस्वरे कृत आदेशस्वरः क्रियते; यद्येवम्, लित्स्वरापवाद आदेशस्वरो विज्ञायेत, न चापवादविषयमनुत्सर्गोऽभिनिविशते ? तस्माद्यथा गोष्पदप्रमित्यत्र लिति पूर्वमनुदात्तभावो नास्तीति प्रत्तययस्वर एव भवति; तथेहापि स्यादिति त्रतसोरनुदात्तार्थ वचनम्। ततश्चैतदपि सर्वमनुदात्तं पदं भवति। ताविति वक्तव्ये त्रतसोरिति वचनं स्पष्टार्थम्। गोषपदप्रमिति। `यावति विन्दरजीवोः' (3.4.30)। `चर्मोदयोः पूरेः' (3.4.31)। `वर्षप्रमाण ऊलोपश्चादन्यतरस्याम्' (3.4.32) इति णमुल्, ऊलोपश्च।।

34. द्विदीयाटौस्स्वेन। (2.4.34)

`इदमेतदोः' इत्यादि। ननु चानन्तरत्वादेतद एवात्रानुवृत्तिः प्राप्नोति, नेदमः; व्यवहितत्वादित्यत आह-- `मण्डूकप्लुतिन्यायेन' इत्यादि। `एकमेवेदं विधानम्' इति। अयं दण्ड इत्यनेन दण्डस्य सत्तोपलक्षणमात्रं कृत्वा `हरानेन' इत्यनेनैव हरणक्रियां प्रति दण्डस्य करणभावो निर्दिश्यत इत्येकं विधानम्। `एतमातं ङितं विद्यात्' इत्यत्रापि `ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः' (म.भा.1.71) इतीषदाद्यर्थस्याकारस्य निर्देशामात्रं कृत्वा `एतमातं ङितं विद्यात्' इत्यनेन वेदनक्रियां प्रत्याकारमात्रस्य कर्मभाव एव विधीयत इत्येकमेव विधानम्।।

35. आर्धधातुके। (2.4.35)

`दध्यात्' इति। आशिषि लिङ। `लिङाशिषि' (3.4.116) इत्यार्धधातुकसंज्ञा। `हन्यात्' इति। `विधिनिमन्त्रण' (3.3.161) इत्यादिना लिङ। `विषयसप्तमी चेयम्' इति। यदि परसप्तमी स्यात् तदा भव्यमित्यादि न सिद्ध्यति। तथा हि-- हलन्तत्वादस्त्यादीनाम् `ऋहलोर्ण्यत्' (3.1.124) इति ण्यति कृते तस्मिन् परतः `अस्तेर्भूः' (2.4.52), `अजेर्व्यघञपोः' (2.4.56) `चक्षिङः ख्याञ्' (2.4.54) इत्येते आदेशाः स्युतः। तत्र द्वयोर्वृद्धौ कृतायां तृतीयस्य युकि कृते भाव्यं प्रवैयमाख्याय्यमित्यनिष्टं रूपं स्यात्। विषयसप्तम्यां त्वस्यामार्द्धधातुकत्वे विवक्षिते प्रागेव प्रत्ययोत्पत्तेरादेशाः स्युः। ततोऽजन्तत्वात् `अचो यत्' (3.1.97) इति यति `ईद्यति' (6.4.65) इतीत्वे कृते सर्वेषां गुणेऽस्त्यादेशस्य `धातोस्तन्निमित्तस्यैव' (6.1.80) इत्यवादेशे च भव्यं प्रवेयमाख्येयमिति सिद्ध्यति। तस्माद्विषयसप्तमीयम्, न परसप्तमी। कथं पुनर्विषयसप्तमीयं लभ्यते, यावता `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इति परिभाषोपस्थानात् परसप्तम्येव न्याय्या, न विषयसप्तमी ? नैतदस्ति; `आर्धधातुके' (2.4.35) इति सामान्यनिर्देशात्, न च सामान्ये पौर्वापर्यमस्ति। ब◌ुद्ध्या पौर्वापर्यमस्तीति चेत् ? नैवम्; एवं हि गौरवं स्यात्। अथ वा-- `अचो यत्' (3.1.97) इत्यज्ग्रहणं ज्ञापकम्-- विषयसप्तमीयमिति। `पश्चाद्यथाप्राप्तम्' इत्यादि। आदेशेषु कृतेषूत्तरकालं यो यतः प्राप्नोति स ततो भवतीत्यर्थः।।

36. अदो जग्धिर्ल्यप्ति किति। (2.4.36)।

`प्रजग्घ्य' इति। `समानकर्त्तृकयोः पूर्वकाले' (3.4.21) इति क्त्वा। `कुगतिप्रादयः' (2.2.18) इति समासः। `समासेऽनञ्पूर्वे क्त्वो ल्यप्' (7.1.37)। `जग्धः' इति। `झषस्तथोर्द्धोऽधः' (8.2.40) इति तकारस्य धकारः। `झलां जश् झशि' (8.4.53) इति जश्त्वम्-- धकारस्य दकारः। `झरो झरि सवर्णे' (8.4.65) इति लोपः। अथेह `इदितो नुम् धातोः' (7.1.58) इति नुम् कस्मान्न भवतीत्यत आह-- `इकार उच्चारणार्थः' इति। यथा-- `अद भक्षणे' (धा.पा.1011) इत्यत्राकार उच्चारणार्थः, तथेहापीकारो वेदितव्यः। अथ ल्डग्रहणं किमर्थम्, ति कितीत्येवं सिद्धम् ? न सिध्यति; यस्मात् क्त्वाप्रत्ययस्य परत्वाल्ल्यवादेशः प्राप्नोति, नैतदस्ति; अन्तरङ्गत्वाज्जग्ध्यादेशेन भवितव्यम्। अन्तरङ्गत्वन्तु तस्यैकपदाश्रयत्वात्। ल्यबादेशस्य तु बहिरङ्गत्वम्; समासाश्रयत्वात्; समासस्य चानेकपदाश्रयत्वात्। एवं तर्हि---

जग्धौ सिद्धेऽन्तरङ्गत्वात् ति किति यल्ल्यबुज्यते।

(तज्) ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम्।।इति।

तेन दधातेः, जहातेश्च संपूर्वाद्विपूर्वाच्च क्त्वाप्रत्यये कृते `द्यतिस्यतिमास्थामिति किति' (7.4.40) इत्यतस्ति कितीत्यनुवर्त्तमाने `दधातेर्हिः' (7.4.42) `जहातेश्च क्त्वि' (7.4.43) इति हिरादेशो ल्यबादेशं बाधित्वं प्राप्तः। अस्मादेव ज्ञापकाल्ल्यपा बाधितत्वान्न भवति-- संधाय, विहायेति। एवं निर्दाय दुर्दायेति `दो दद् घोः' (7.4.46) इति ददादेशो न भवति। प्रस्थायेत्यत्र `द्यतिस्यातिमास्थामितित किति' (7.4.40) इतीत्वं न भवति। प्रखन्य प्रखायेति `जनसनखनां सञ्जलोः' (6.4.42) इति नित्यमात्त्वं न भवति, `ये विभाषा' (6.4.43) इति विभाषैव भवति। तत्र हि `विह्वनोरनुनासिकस्यात्' (6.4.41) इत्यत आद्ग्रहणनुवर्त्तते। `प्रक्रम्य' इति `क्रमश्च क्त्वि' (6.4.18) इति दीर्घत्वं न भवति। तत्र हि `ढ्रलोपे पूर्वस्य दीर्घोऽणः' (6.3.111) इत्यतो दीर्घग्रहणम्, `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इत्यतो झल्ग्रहणं क्ङिति चानुवर्त्तते। आपृच्छ्येति `च्छ्वोः शूजनुनासिके च' (6.4.19) इति शकारो न भवति। प्रदीव्येत्यत्रानेनैव सूत्रेणोठ् न भवति। `हलि च' (8.2.77) इति दीर्घत्वम्। प्रपठ्येत्यत्र `आर्द्धधातुकस्य' (7.2.35) इतीड् न भवति।।

37. लुङसनोर्घस्लृ। (2.4.37)

`अघसत्' इति। लृदित्त्वात् पुषादिसूत्रेण (3.1.55) च्लेरङ्गादेशः। `जिघत्सति' इति। `सः स्यार्द्धधातुके' (7.4.49) इति सकारस्य तकारः।

`घस्लृभावेऽच्युपसंख्यानम्' इति। घस्लृभावे कर्त्तव्येऽचि तस्योपसंख्यानम् = प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्-- उत्तरसूत्रे चकारोऽनुक्तसमुच्चयार्थः, तेन घस्लृभावेऽच्यपि भवति। `प्रघसः' इति। पचाद्यच्।।

38. घञपोश्च। (2.4.38)

`घासः' इति। भावे घञ्। `प्रघसः' इति। `उपसर्गेऽदः' (3.3.59) इत्यप्। `लुङसन्घञप्सु घस्लृ' इत्येकयोगे कर्त्तव्ये योगविभागो वैचित्र्यार्थः।।

39. बहुलं छन्दसि। (2.4.39)

`घस्ताम्' इति। लङ, तसस्ताम्, आदादिकत्वाच्छपो लुक्। `बहुलं छन्दस्यामाङ्योगेऽपि' (6.4.75) इत्यहागमाभावः। अथ वा लुङ्युदाहरणमेतत्। `मन्त्रे घसह्वर' (2.4.80) इत्यादिना च्लेर्लुक्। `सग्धिः' इति। स्त्रियां क्तिन्' (3.3.94)। `घसिभसोर्हलि च' (6.4.100) इत्युपधलोपः। `झलो झलि' (8.2.26) इति सकारलोपः। अथ तु सिचोऽनेन लोपो विधीयते तदा च्छान्दसी वर्णलोपो द्रष्टव्यः-- यथा इष्कर्त्तारमध्वर इति। पूर्ववत् तकारस्य धकारः। घकारस्य जश्त्वम्। समाना ग्धिरिति `पूर्वापरप्रथम' (2.1.58) इत्यादिना समासः, `समानस्य च्छन्दस्यमूर्द्धप्रभृकत्युदर्केषु' (6.3.84) इति सभावः। `अत्ताम्' इति। `झलो झलि' (8.2.26) इति सिचो लोपः। तसस्ताम्। `खरि च' (8.4.55) इति दकारस्य तकारः। अथ वा लङ्युदाहरणमेतत्। अथ बहुलग्रहणं किमर्थम्, अन्यतरस्यांग्रहणमेव कस्मान्न क्रियते इत्युच्यते कः पुनरेवं सति गुणे भवतीति पर्यनुयोगमाशङ्क्याह-- `तदेवोत्तरार्थमपि भविष्यति' इति। एतेनेहान्यतरस्यांग्रहणे सत्युत्तरसूत्रेऽन्यतरस्यांग्रहणं न कर्त्तव्यं भवतीतीमं गुणं दर्शयति। तर्हीहैवान्यतरस्यांग्रहणमुत्तरसूत्रेऽनुवर्तिष्यते। यदि पुनरुत्तरसूत्रे बहुलग्रहणमनुवर्त्तेत तदा किं स्यात् ? अन्यदपि किञ्चित कार्यं भवतीत्याशङ्क्येत। क्वचिदन्यदेवेत्येषोऽप्यर्थो हि बहुलग्रहणस्याभीष्ट एव। `घस्तामित्यत्रोपधालोपो न भवति' इति। `घसिभसोर्हलि च' (6.4.100) इति प्राप्तः। स बहुलग्रहणान्न भवति।।

40. लिट्यन्यतरस्याम्। (2.4.40)

`लिटि परतः' इति। ननु च `आर्धधातुके' (2.4.35) इति वर्त्तते, `आर्धधातुके' इति च विषयसप्तमीयमित्युक्तम्, तदयुक्तं लिटि परत इति वचनम् ? नेदमयुक्तम्; आर्धधातुकशब्दस्यार्धधातुकत्वमनेकप्रत्ययसाधारणं सामान्यमर्थः, तेन च पौर्वापर्यं न सम्भवति। तद्धि देशतो वा भवति कालतो वा, सामान्यस्य चादेशत्वात् कालत्वान्नित्यत्वाच्च तेन सह देशकृतं कालकृतञ्च पौर्वापर्यं नोपपद्यते, अतो युक्ता `आर्धधातुके' इति विषयसप्तमी। इह तु `लिटि' इत्यार्धधातुक उपात्तः, सम्भवति चानेन पौर्वापर्यम्। किञ्च-- लिटि रभूते घस्लृ- आदेशे विधीयमाने न किञ्चिदनिष्टमापद्यते। तस्मात् परसप्तम्येवैषा युक्ता। `जक्षतुः' इति। `गमहन' (6.4.98) इत्यादिनोपधालोपः, `शासिवसिघसीनाञ्च' (8.3.60) इति षत्वम्, `खरि च' (8.4.55) इति चर्त्वम्। `आद, आदतुः, `आदुः' इति। `अत आदेः' (7.4.70) इत्यभ्यासस्य दीर्घः। ननु च `घस्लृ अदने' (धा.पा.715) इत्येतस्य जाघास, जक्षतुः, जक्षुरिति भविष्यति; `अद भक्षणे' (धा.पा.त1011) इत्यस्य आद, आदतुः, आदुरिति; अस्ति घसिः प्रकृत्यन्तरम्, `सृघस्यदः क्मरच्' (3.2.160) इति क्मरज्विधानात्, तत् कथमिह लिटि विकल्पविधानम् ? घसेः प्रकृत्यन्तरस्यासर्वविषयत्वज्ञापनार्थम्। तेन तस्य सार्वधातुक आर्धधातुके च यत्र लिङ्गं नास्ति वचनञ्च, तत्र प्रयोगो न भवति।।

41. वेञो वयिः। (2.4.41)

`इकार उच्चारणार्थः' इति। नानुबन्धः। तेन नुम् न भवतीति भावः। `उवाय' इति। `लिट्यभ्यासस्योभयेषाम्' (6.1.17) इति सम्प्रसारणम्। `ऊयतुः, ऊयुःक' इत्यत्रापि ग्रह्यादिसूत्रेण (6.1.16) सम्प्रसारणम्। अथ यकारस्य सम्प्रसारणं कस्मान्न भवतीत्याह-- `लिटि वयो यः' इत्यादि। `वेञ इति सम्प्रसारणं न भवति' इति। वच्यादिसूत्रेण प्राप्तम् `वेञः' (6.1.40) इति प्रतिषेधान्न भवति। तत्र हि `न सम्प्रसारणे सम्प्रसारणम्' (6.1.37) इत्यतो नेति वर्त्तते। उवाय इत्यादि रूपं वयेरात्मनेपदित्वान्न सिद्ध्यतीति सूत्रारम्भः।।

42. हनो वध लिङि। (2.4.42)

`अकारान्तश्चायमादेशः' इति। कुत एतत् ? शैलीयमाचार्यस्य यत्रेह प्रकरणे व्यञ्जनान्त आदेशः, तत्रोच्चारणार्थमिकारं करोति, यथा--जग्धिरित्यादौ। तस्मादिकारान्ताकरणादकारान्तोऽयमादेश इति विज्ञायते। `हलन्तलक्षणा' इति। `वदव्रजहलन्तस्याचः' (7.2.3) इत्यनेन या वृद्धिर्विधीयते सा हलन्तलक्षणा।

43. लुङि च। (2.4.43)

`आत्मनेपदेषु लुङि विकल्पो यथा स्याल्लुङि मा भूत्' इति। अनेन योगविभागस्योत्तरार्थतां दर्शयति। एकयोगे हि सति लिङोऽप्युत्तरत्रानुवृत्तेस्तत्राप्यात्मनेपदेषु विकल्पः स्यात्।।

44. आत्मनेपदेष्वन्यतरस्याम्। (2.4.44)
`आवधिष्ट' इति। `आङो यमहनः' (1.3.28) इत्यात्मनेपदम्। `आफधिषत' इति। `आत्मनेपदेष्वनतः' (7.1.5) इत्यवादेशः। `आहत' इति। `हनः सिच्' (1.2.14) इति कित्त्वम्, `अनुदात्तोपदेश' (6.4.37) इत्यादिनाऽनुनासिकलोपः, `ह्रस्वादङ्गात्' (8.2.27) इति सिचो लोपः।।

45. इणो गा लुङि। (2.4.45)
`अगात्' इति। `गतिस्था' (2.4.77) इत्यादिना सिचो लुक्। `अगुः' इति। `आतः' (3.4.110) इति झेर्जुस, `उस्यपदान्तात्' (6.1.96) इति पररूपत्वम्। `लुङीति वर्त्तमाने' इत्यादि। `लुङि च' (2.4.43) इत्योत लुङगर्हणेऽनुवर्त्तमाने यत्पुनः लुङग्रहणं कृतं तस्यैततप्रयोजनम्-- परस्मैपदेष्वपि यथा स्यात्। नित्यञ्चात्मनेपदेषु। एतेनैतद्दर्शयति-- पूर्वकं हि लुङग्रहणमात्मनेपदग्रहणेनान्यतरस्याग्रहणेन च सम्बद्धम्, अतस्तदनुवृत्तौ तयोरप्यनुवृत्तिः स्यात्। तथा चात्मनेपदष्वेव विकल्पेनादेशः स्यात्। तस्मादविशेषेण, नित्यञ्च यथा स्यादित्येवमर्थं पुनर्लुङग्रहणं क्रियते। `अगायि' इति। `चिण् भावकर्मणोः' (3.1.66) इति चिण्। `आतो युक् चिण्कृतोः' (7.3.33) इति युक्। `चिणो लुक्'(6.4.104) इति तकारस्य लुक्। `इण्वदिक इति वक्तव्यम्' इति। यथेणो गादेशो लुङि भवति, तथा `इक् स्मरणे' (धा.पा.1047) इत्यस्यापि भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- `बहुलं छन्दसि' (2.4.39) इत्यतो बहुलग्रहणमनुवर्त्तते मण्डूकप्लुतिन्यायेन। तेनेकोऽपि लुङि गादेशो भविष्यतीति।।

46. णौ गमिरबोधने। (2.4.46)
`गमयति' इति. `जनीजृष्क्नसुरञ्जोऽमन्ताश्च' (धा.पा.ग.सू.817) इति मित्त्वात् ह्रस्वत्वम्।।

47. सनि च। (2.4.47)
`जिगमिषति' इति। `गमेरिट् परस्मैपदेषु' (7.2.58) इतीट्। `प्रतीषिषति' इति। `अजादेर्द्वितीयस्य' (6.1.2) इति `सन्यङोः' (6.1.9) इत्यनेन स इत्यस्य द्ववर्चनम्। `सन्यतः' (7.4.79) इतीत्त्वम्। उपसर्गकारस्य धातोरिकारेण सह `अकः सवर्णे दीर्घः' (6.1.101)। `इङश्च' (2.4.48) इत्यादिना योगविभागस्योत्तरार्थतां दर्शयति। एकयोगे हि णेरप्युत्तरत्रानुवृत्तिः स्यात्, ततश्च तत्राप्ययमादेशः प्रसज्येत।।

48. इङश्च। (2.4.48)
`अधिजिगांसते' इति। `पूर्ववत् सनः' (1.3.62) इत्यात्मनेपदम्। `अज्झनगमां सनि' (6.4.16) इति दीर्घः।।

49. गाङ् लिटि। (2.4.49)
`अधिजगे' इति। `लिटस्तझयोरेशिरेच्' (3.4.81) इत्येश्। `आतो लोप इटि च' (6.4.64) इत्याकारलोपः। गा इत्येतस्य द्विर्वचनम्। ननु लिटि परभूते तशब्दस्य परत्वात् प्रगेवैशादेशेन भवितव्यम्; पश्चात् गाङादेशेन, ततश्च द्विर्वचने निमित्तेऽच्ययं गाङादेश इति `द्विर्वचनेऽचि' (1.1.59) इति स्थानिवद्भावादिवर्णस्य द्विर्वचनं प्राप्नोति, तत्कथं गा इत्येतस्य द्ववचनम् ? नैतदस्ति; यस्मात् लिण्मात्रापेक्षत्वात् गाङादेशोऽन्तरङ्गः, लिडादेशविशेषाश्रयत्वादेशादेशो बहिरङगः, तस्मादन्तरङ्गत्वादेशादेशात् प्रागेव गाङ्गादेशेन भवितव्यम्, ततश्च द्विर्वचननिमित्तेनायमच्यजादेश इति स्थानिवद्भावो न भवति, तत्कुत इवर्णस्य द्विर्वचनप्रसङ्गः। `गाङोऽनुबन्धकरणं विशेषणार्थम्' इति। गाङकुटादिसूत्रे (1.2.1) `गाङकुटादिभ्यः' इत्युच्यमाने `कै गै शब्दे' (धा.पा.916,917) इत्यस्यापि ग्रहणं स्यात्, ततश्चागासीन्नट इत्यत्र ग्रहणं कस्मान्न भवति ? येन हेतुना न भवति स हेतुर्गाङ्कुटादिसूत्रे एव दर्शितः। ननु चेङो ङितस्तत्र स्थानिवद्भावेनैव ग्रहणं भविष्यति, तत्किं ङकारेणेत्यत आह-- `न हि' इत्यादि। तत्र हि गाङित्येतस्य स्वरूपस्य ग्रहणम्। न च तत् स्थानिवद्भावेन लभ्यते। किं तर्हि ? कार्यम्। यस्मात् `स्थानिवदादेशः' (1.1.56) इति कार्यातिदेशोऽयम्, न रूपातिदेशः।।

50. विभाषा लुङ्लृङोः। (2.4.50)
`अध्यैष्ट' इति। `आडजादीनाम्' (6.4.72) इत्याट्। `आटश्च' (6.1.90) इति वृद्धि ।

51. णौ च संश्चङोः। (2.4.51)
`णावितीङपेक्षया' इत्यादि। णावितीयं या परसप्तमीङपेक्षया सा। `संश्चङोः' इतीयं या परसप्तमी सा ण्यपेक्षयेत्यर्थः। `अधिजिगापयिषति' इति। णिच्। `अर्तिह्री' (7.3.36) इत्यादिना पुक्, सन्, इट्, गुणायादेशौ। अध्यापिपयिषति' इति। `क्रीङजीनां णौ' (6.1.48) इत्यात्त्वम्, पुक्, `अजादेर्द्वितीयस्य' (6.1.2) इति `पा' इत्यस्य द्विर्वचनम्। `अध्यजीगपत्' इति। `णिश्रि' (3.1.48) इत्यादिना चङ। `णौ चङ्युपधाया ह्रस्वः' (7.4.1)। `सन्वल्लघुनि' (7.4.93) इति सन्वद्भावात् `सन्यतः' (7.4.79) इतीत्त्वम्। `दीर्घो लघोः' (7.4.94) इती दीर्घः।।

52. अस्तेर्भूः। (2.4.52)
`ईहामास' इति। ईहतेः `इजादेश्च गुरुमतोऽनृच्छः' (3.1.36) इत्याम्। `आमः' (2.4.81) इति लेर्लुक्; `कृञ्चानुप्रयुज्यते लिटि' (3.1.40) इत्यस्तेर्लिट्परस्यानुप्रयोगः। `प्रत्याहरग्रहणेनास्तेर्ग्रहणसामर्थ्यात्' इति। `कृञ्चानुप्रयुज्यते लिटि' (3.1.40) इत्यत्र कृञिति प्रत्याहारग्रहणम्, `अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि' (5.4.50) इति कृशब्दादारभ्य `कृञो द्वितीयतृतीयशम्बबीजात्' (5.4.58) इत्याकृञो ञकारात्। तेन च प्रत्याहारग्रहणेनास्तेरपि ग्रहणम्; तस्यैतदेव प्रयोजनम्-- आसेत्ेयतदनुप्रयोगे रूपं यथा स्यादिति। यदि चास्तेरनुप्रयोगेऽपि भूभावः स्यात्, तदासेत्येतदनुप्रयोगे रूपं न स्यादिति प्रत्याहारग्रहणमनर्थकम्। ततश्च`कृभ्वनुप्रयुज्यते लिटि' इत्येवं ब्रूयात्। तत्राप्ययमर्थः-- किमिदं प्रत्याहारग्रहणमुत करोतेरित्येव सन्देहः परिहृतो भवति, कृतञ्च प्रत्याहारग्रहणम्, तस्मात् प्रत्याहारग्रहणसामर्थ्यादनुप्रयोगेऽपि भूभावोऽस्तेर्न भवति। `तथा चोच्यते' इत्यादिनाऽनन्तरोक्तमेवार्थमाप्तवचनेन द्रढयति। भूरिति दीर्घोच्चारणं निष्ठायां ह्रस्वश्रवणं मा भूत्-- भूतो भूतवानिति, अस्तेरिति श्तिपा निर्देशोऽस्यतेर्मा भूत्; नैतदस्ति, निरनुबन्धक(व्या.प.53) पिरभाषयैवास्यतेर्न भविष्यति। तस्य ह्युकारोऽनुबन्धः `इदितो वा' (7.2.56) इति विशेषणार्थः कृतः। अस्तेस्त्वकार उच्चारणार्थः, नानुबन्धः। एवं तर्हि श्तिपा निर्देशो वैचित्र्यार्थ इत्येके। निरनुबन्धकपरिभाषायाः प्रत्ययविधिविषयत्वादित्यपरे।।

53. ब्रुवो वचिः। (2.4.53)
`वक्ता' इति। `चोः कुः' (8.2.30) इति कुत्वम्। `ऊचे' इति। वच्यादिसूत्रेण (6.1.15) सम्प्रासारणम्।।

54. चक्षिङः ख्याञ्। (2.4.54)
`नित्यमात्मनेपदं न भवति' इति। यदि हि स्यात्, अकारानुबन्धकरणमनर्थकं स्यात्। तस्मात् कर्त्रभिप्राये क्रियाफले विवक्षित आत्मनेपदं स्यान्नान्यत्र।
`क्शादिरपि' इति। ककारशकारयोरकार उच्चारणार्थः। क्ॢश् ख्याञित्येवंरूप आदेशो वक्तव्यः। कथं पुनरिष्यमाणोऽप्येवंविध आदेशो लभ्यते ? पूर्वोक्तस्य बहुलग्रहणस्यानुवृत्तेः। अत ए बहुलग्रहणस्यानुवृत्तेर्वर्जनेऽसनयोश्चादेशप्रतिषेधो भवतीति व्याख्यानं कर्त्तव्यम्।
`संचक्ष्या' इति। `ऋहलोर्ण्यत्' (3.1.124)।
`नृचक्षा' इति। `सर्वधातुभ्योऽसुन्' (द.उ.9.49), `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः। `विचक्षणः' इति। `कृत्यल्युटो बहुलम्' (3.3.113) इति कर्त्तरि ल्युट्।
`बहुलम्' इत्यादि। संज्ञायां छन्दसि च जग्ध्यादेशादिकार्यं बहुलं न भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। किमर्थम् ? अन्नाद्यर्थम्। अन्नादयः शब्दा साधवो यथा स्युः। व्याख्यानन्तु तदेव बहुलग्रहणमाश्रित्य कर्त्तव्यम्। `अन्नम्' इति। अदो जग्धिरादेशो न भवति; बहुलग्रहणस्य सिंहावलोकितन्यायेनानुवृत्तेः। `वधक' इति। `हनो वध' (2.4.42) इत्यादिना वधादेशो लिङ्युटच्यमानो हन्तेर्ण्वुल्प्रत्यये कृतेऽपि भवति। `गात्रम्' इति। औणादिकः ष्ट्रन्। `इणो गा लुङि' (2.4.45) इति लुङ्युच्यमानो गादेशोऽत्रापि भवति. ` विचक्षणः' इति। चक्षिङ ख्याञादेशो न भवति ल्युटि। अजिरशब्दस्तु `अजिरशिशिरशिथिर' (द.उ.8.27) इति किरच्प्रत्ययान्त औणादिको निपातितः। तस्यात एव निपातनात् `अजेघञपोः' (2.4.56) इति विधीयमानो वीभावो न भवति। आदिशब्देन `प्रघस' इत्यादेर्ग्रहणम्।।

55. वा लिटि। (2.4.55)

56. अजेर्व्यघञपोः। (2.4.56)
`प्रवायकः' इति। ण्वल्। `प्रवयणीयम्' इति। अनीयर्। `कृत्यचः' (8.4.29) इति णत्वम्।
`घञपोः प्रतिषेधे क्यप उपसंख्यानं कर्त्तव्यम्' इति। घञपोः कर्त्तव्ये क्यपः प्रतिषेधस्योपसंख्यानं प्रतिपादनं कर्त्तव्यमित्यर्थः। क्यपः प्रतिषेधनिमित्तत्वेन प्रतिषेधं प्रति सम्बन्धित्वेन विवक्षितत्वात् क्यप इति षष्ठी। तत्रेदं प्रतिपादनम्-- `संज्ञायां समजनिपतमनविद' (3.3.99) इत्यादिना संज्ञायां गम्यमानायामजेः क्यप् विधास्यते। नियतवर्णानुपूर्वीका च संज्ञा भवति, न चादेशे कृते संज्ञा गम्यते, तस्मात् संज्ञायां विधानात् क्यपि वीभावो न भवति। `वलादावर्द्धधातुके विकल्प इष्यते' इति। कथं पुनरिष्यमाणोऽपि लभ्यते ? अजेरुदात्तत्वात्, स हीडर्थो धातुषूदात्तः पठ्यते। यदि चास्य नित्यं वीभावः स्यात्, तदा तस्योदात्तपाठोऽनर्थकः स्यात्। न हि वीभावे विहित इट् प्राप्नोति;तस्यानुदात्तत्वात्।

57. वा यौ। (2.4.57)
`यु' इति ल्युटो ग्रहणम्' इति। अन्यस्यासम्भवात्। `प्रवयणो दण्डः' इति। प्राज्यतेऽनेनेति करणे ल्युट्। पूर्ववण्णत्वम्।।

58. ण्यक्षत्त्रियार्षञितो यूनि लुगणिञोः। (2.4.58)

`ण्यादयो गोत्रप्रत्ययाः' इति। `गोत्राद्यून्यस्त्रियाम्' (4.1.94) इति गोत्रप्रत्ययान्तादेव युवप्रत्ययविधानात्। `तस्माद्यूनीञ्' इति। `अत इञ्' (4.1.95) इत्यनेन। `कौरव्यशब्दस्तिकादिषु पठ्यते' इति। औरसशब्दादनन्तरम्। `क्षत्रियगोत्रस्य तत्र ग्रहणम्' इति। औरसशब्देन क्षत्रियगोत्रप्रत्ययान्तेन साहचर्यात्। औरसशब्दो हि जनपदशब्दात् क्षत्त्रियादञ् (4.1.168) इति क्षत्त्रियगोत्रप्रत्ययान्तः।।
`ऋष्यण्' इति। `ऋष्यन्धकवृष्णिकुरुभ्यश्च' (4.1.114) इत्यनेन। `कुर्वादिभ्यो ण्यः' इति। वमरथ्यशब्दं व्युत्पादयति। तस्मात् `कण्वादिभ्योगोत्रे इति शैषिकोऽण्' इति। ननु च वामरथ्यशब्दः कुर्वादिषु पठ्यते, न कण्वादिषु, तत्कथमेवमुक्तम् ? यद्यपि न पठ्यते, तथापि वामरथ्यस्य कण्वादिवत् स्वरवर्जमिति पाठात् कण्वादिवद्भावोऽस्ति, अत एवमुक्तमित्यदोषः।
`दाक्षायणः' इति। `यञिञोश्च' (4.1.101) इति फक्।
`अब्राह्मणगोत्रमात्रात्' इति। इह कैश्चिदुक्तम्-- `अणिञोर्लुकि क्षत्रियगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम्' इति। तेषां वैश्यगोत्रान्न प्राप्नोति; तस्माद्वैश्यगोत्रादपि यथा स्यादित्येवमर्थं मात्रग्रहणम्। ब्राह्मणक्षत्रियवैश्यानां हि गोत्राणि सम्भवन्ति, तत्र ब्राह्मणगोत्रं वर्जयित्वाऽन्यतः सर्वस्माद्भवति। पूर्वके तु वाक्येऽतद्राजादपि क्षत्रियगोत्राद्यथा स्यादित्येवमर्थं मात्रग्रहणम्। तथा हि `अणिञोर्लुकि तद्राजाद्युप्रत्ययस्योपसंख्यान्' दर्शयति। `भाण्डीजङ्घिः' इत्येवमादिना वैश्यगोत्रोदाहरणम्। ब्राह्मणगोत्रप्रतिषेधादिह न भवति--दाक्षायण इति। `शाल्वावयवलक्षणः' इति। क्षत्रियगोतर्मधिकृत्येदमुक्तम्। भाण्डीजङ्घिरित्यत्र वैश्यगोत्रे `अत इञ्' (4.1.95) इत्यनेनेञेव भवतीति वेदितव्यम्। `पैलादिदर्शनात् सिद्धम्' इति। पैलादेराकृतिगणत्वात् तत्रेते द्रष्टव्या इति दर्शयति।।

59. पैलादिभ्यश्च। (2.4.59)
`पीलाया वेत्यण्' इति। तत्र हि `शिवादिभ्योऽण्' (4.1.112) इत्यतोऽण्ग्रहणानुवृत्तेः। `अन्ये पैलादयः इञन्ताः' इति। अत्रौदञ्चिशब्दो बाह्वादित्वादिञन्तः। बाह्वादिषु ह्युदञ्चुशब्दः पठ्यते। उकारोच्चारणमतन्त्रम्। धातुप्रदर्शनार्थत्वात्। उदञ्चतीति `ऋत्विक्' (3.2.59) इत्यादिना सूत्रेण क्विन्। उदचोऽपत्यमौदञ्चिः। निपातनात् `अनिदिताम्' (6.4.24) इत्यादिना नलोपो न भवति, `अचः' (6.4.138) इत्यकारलोपश्च। भौलिङ्गिशब्दः शाल्वावयव इञन्तः। शेषास्तु `अत इञ्' (4.1.95) इतीञन्ता वेदितव्याः। शालङ्किरिति पठ्यते, स कथम्, यावता नडादिषु `शलङ्कु शलङ्कञ्च' (ग.सू.67) इति पाठात् शालङ्कायन इत भवितव्यम् ? प्रकृत्यन्तरं शलङ्कुशब्दोऽस्ति, ततोऽयमिञ् विहित इत्येके। अस्मादेव निपातनाच्छलङ्कुशब्दादिञिति विज्ञायते, तत्सन्नियोगे च शलङ्कादेश इत्यपरे। `तद्राजाच्चाणः' इति। तद्राजसंज्ञकाच्चाण उत्तरस्य युवप्रत्ययस्य लुग् भवति। अङ्गस्यापत्यमिति `द्व्यञ्मगध' (4.1.170) इति फिञ्, तस्यानेन लुक्।।

60. इञः प्राचाम्। (2.4.60)
अन्यत्र प्राग्ग्रहणं विकल्पार्थं दृष्टम्, अत इहापि विकल्पो मा विज्ञायीत्याह-- `गोत्रविशेषणम्' इत्यादि।।

61. न तौल्वलिभ्यः। (2.4.61)
तौल्वल्यादिष्वान्तरहातिशब्दः पौष्करसादिशब्दश्च बाह्वादी इञन्तौ। बाह्वादिषु ह्यन्तरहच्छब्दः पुष्करसच्छब्दस्य पठ्येते; अत्रोभयपदवृद्धिकश्चानुरशतिकादित्वात्। शेषास्तु `अत इञ्' (4.1.95) इति इञन्ताः।।

62. तद्राजस्य बहुषु तेनैवास्त्रियाम्। (2.4.62)
`बहुषु वर्त्तमानस्य' इति। बहुष्वर्थेषु वर्त्तमानस्येत्यर्थःर। अथ `बहुवचने परतः' इत्येवं कस्मान्न व्याख्यायते ? अशक्यमेवं वक्तुम्; यतः संख्यावाची बहुशब्दो न बहुवचनवाची। यदि तु `बहुवचने परतः' इत्ययमर्थोऽत्राभिमतः स्यात्, अस्त्रियामिति प्रतिषेधे न कुर्यात्; प्राप्त्यभावात्। न हि तद्राजान्तदुत्पन्नेन स्त्रीप्रत्ययेन व्यवहिते बहुवचने परतो लुकः प्राप्तिरस्ति। किञ्च, अत्त्रय इत्यत्र बहुचने परतो लुकि विधीयमाने उदात्तनिवृत्तिस्वरः प्रसज्येत। कथम् ? अत्त्रेरपत्यानि बहूनीति `इतश्चानिञः' (4.1.122) इति ढकि तस्य `तद्धितस्य', `कितः' (6.1.164,165) इत्यन्तोदात्तत्वे कृते बहुवचने जसि परतः `अत्त्रिभृगुकुत्सवसिष्ठ' (2.4.65) इत्यादिना लुकि कृते `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इति विभक्तेरुदात्तत्वं प्राप्नोति। तस्मात् बहुषु वर्त्मानस्येत्ययमेवार्थः। बहुष्विति च तद्राजान्तस्य विशेषणम्, न तद्राजस्य; अन्यथा हि द्वन्द्वे दोषः प्रसज्येत-- आङ्गश्च वाङ्गश्च सौह्मश्चाऽङ्गवाङ्गसुह्मा इत्यत्र हुङ् न स्यात्; न ह्यत्र तद्राजो बहुषु वर्त्तते। तदन्तस्तु वर्त्तते, युगपदधिकरणवचनो हि द्वन्द्व इति कृत्वा। तस्मात् तद्राजान्तस्यैवेदं विशेषणम्, न तद्राजस्य।
`तद्राजसंज्ञकस्य प्रत्ययस्य बहुषु वर्त्तमानस्यास्त्रीलिङ्गस्य लुग्भवति' इत्ययं तु वृत्तिग्रन्थ एवमुन्नेयः-- बहुषु वर्त्तमानस्यास्त्रीलिङ्गस्य तद्राजान्तस्य यः सम्बन्धी तद्राजसंज्ञकः प्रत्ययस्तस्य तद्राजसंज्ञकस्य प्रत्ययस्य लुग्भवति। कथम् ? तद्राजान्तस्यैवैतत् सामर्थ्य लब्धम्। न ह्यतद्राजान्तस्य तद्राजसंज्ञकः प्रत्ययः सम्बन्धी भवति। सूत्रेऽप्यन्तग्रहणं न कृतम्; प्रत्ययग्रहणपरिभाषयैव तदन्त स्य लब्धत्वात्। तथापि प्रत्ययान्तस्य लुगुच्यमानः प्रत्ययमात्रस्यैव विज्ञायते; `प्रत्ययस्य लुक्श्लुलुपः' (1.1.61) इति प्रत्ययादशनस्यैव लुक्संज्ञाविधानात्। `तेनैव चेत्' इति। तद्राजप्रत्ययान्तेनैवेत्यर्थः। `अङ्गाः, वङ्गाः,

सुह्माः' इति। अङ्गस्यापत्यानि बहुनि। `द्वयञ्मगध' (4.1.170) इत्यादिनाऽण्, तस्य लुक्। `लोहध्वजाः, व्रीहिमन्तः' इति। `पूगाञ्ञ्योऽग्रामणीपूर्वात्' (5.3.112) इति ञ्यप्रत्ययः, तस्य लुक्।

`औपगवाः' इति। `प्राग्दीव्यतोऽण' (4.1.83) `प्रियवाङ्गाः' इति। बहुव्रीहिः। नात्र तद्राजप्रत्ययेन बहुत्वं किं तर्हि ? समासेन। न चासौ तद्राजप्रत्ययान्तःच ततस्तद्राजस्याविहितत्वात्। तद्येवम्, द्वन्द्वोऽपि, तद्राजप्रत्ययान्तो न भवतीति तत्रापि लुङ न स्यात् ? नैतत् ; यदि द्वन्द्वोऽपि तद्राजप्रत्ययान्तो न भवति, तथापि प्रत्येकं द्वन्द्वावयवास्तद्राजप्रत्ययान्ता गह्वर्थाश्चेति तत्र भवत्येव लुक।

न च बहुष्वित्यर्थग्रहणम्, यश्च बह्वर्थस्तत्रावश्यमेव तत्कृतेन बहुत्वेन भवितव्यम्, तत्किं तेनैवेत्यनेन ? एवं मन्यते-- अन्तरङ्गत्वात् तद्राजप्रत्ययोत्पत्तिवेलायां यद्बहुत्वमुपजायते तदेव यदि गृह्यते, न तु तत्पदान्तरापेक्षम्, ततश्च द्वन्द्वेषु लुग् न स्यात्। तेनैवग्रहणं तु द्वितीयोऽयं यत्न इति-- यः प्रत्ययान्तस्य बहुत्वं तेनैव क्रियते, यच्च पदान्तरापेक्षेणापि तत्र सर्वत्र भवतीति। यद्येवम्, इहापि प्राप्नोति-- प्रियवाङ्गा इति ? नैष दोषः; एवकारो ह्यत्र क्रियते। स तुल्यजातीयापेक्षयैव नियमं करोति, लोपिबिरेव यत् कृतं बहुत्वमिति। न च प्रियवाङ्गा इत्यत्र लोपिभिरेव कृतं बहुत्वम्, यस्मादत्र किञ्चिल्लोपि पदं किञ्चिदलोपि, एवञ्च नियमे सति द्वन्द्वे सति द्वन्द्वेऽपि यत्र लोप्यलोपिनां तत्रापि न भवति-- `गार्ग्यकाश्यपगालवानाम्' (8.4.67) इति, अत्र गार्ग्यकाश्यपयोः `यञिञोश्च' (4.1.101) इति लोपः प्राप्नोति। गालवस्य तु ऋष्यणन्तत्वान्नास्ति लुकः प्राप्तिः। `आङ्ग्यः' इति। `टिड्ढाणञ्' (4.1.15) इति ङीप्।।

63. यस्कादिभ्यो गोत्रे। (2.4.63)

`अपत्यं पौत्रप्रभृति गोत्रम्' (4.1.162) इति पारिभाषिकमेवेदं गोत्रं गृह्यते, न लौकिकमिति कस्यचिद्भ्रान्तिः स्यात्। अतस्तां निराकर्त्तुमाह-- `प्रत्ययविधेयश्चान्यत्र ' इत्यादि। एतच्चोभयगतिरिह शास्त्रे संभवतीति लभ्यते। लौकिके गोत्रे गृह्यमाणे शास्त्रीयमपि तत्रान्तर्भवति; प्रत्ययविधौ तु लौकिकगोत्रस्य ग्रहणं न भवतीति ज्ञापकात्। यदयम्-- `गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजादवुञ' (4.2.39) इत्यत्र गौत्रग्रहणं कृत्वा राजन्यग्रहमं करोति, तज्ज्ञापयति-- प्रत्ययविधौ लौकिकगोत्रग्रहणं न भवतीति।

`यास्काश्छात्राः' इति। `तस्येदम्' (4.3.120) इत्यण्। पुष्करच्छब्दोऽप्यत्र पठ्यते, स किमर्थः; यावता `बह्वच इञ् प्राच्यभरतेषु' (2.4.66) इत्येवं सिध्यति ? न सिध्यति; `न गोपवनादिभ्यः' (2.4.67) इति प्रतिषेधः प्राप्नोति। गोपवनादिषु हि कैश्चित् तौल्वल्यादयश्चेति पठ्यते, तौल्वल्यादिषु पुष्करसच्छब्दः पठ्यते, तौल्वल्यादीनाञ्च गोपवनादिषु पाठोऽस्तीत्ययमेव यस्कादिषु पुष्करसच्छब्दपाठो ज्ञापयति।।

64. यञञोश्च। (2.4.64)

`गार्ग्यः' इति। `यञश्च' (4.1.16) इति ङीप्। `यस्येति च' (6.4.148) इत्यकारलोपः, `हलस्तद्धितस्य' (6.4.50) इति यकारस्य च। तत्र हि `सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः' (6.4.149) इत्यतः `य' इत्यनुवर्त्तते, `अल्लोपोऽनः' (6.4.134) इत्यतो लोप इति च। `वैद्यः' इति। `शाङ्गर्रवाद्यञो ङीन्' (4.1.73)। `द्वैप्याः, औत्साः' इति। जातादौ शैषिकेऽर्थे यञञो।

`यञादीनाम्' इत्यादि। यञादीनां बहुषु लुगुच्यमान एकत्वे द्वित्वे च प्राप्नोतीति वचनम्। एकद्वयोरिति च संख्याप्रधानोऽयं निर्देशः, यथा-- `द्वयेककयोर्द्विचवनैकवचने' (1.4.22) इति, एकत्वद्वित्वयोरिति यावत्; उपसंख्यानशब्दस्य प्रतिपादनमर्थः। कर्त्तव्यमित्यध्याहार्यम्। तत्रेदं प्रतिपादनम्-- `वा यौ' (2.4.57) इत्यतो मण्डूकप्लुतिन्यायेन वाग्रहणमनुवर्तते। चकारो वात्रानुक्तसमुच्चयार्थः क्रियते। तेन यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या लुग्भवतीति। यदि वेत्यनुवर्त्तते तदा बहुष्वपि विकल्पः स्यात्। व्यवस्थिविभाषाविज्ञानान्न भविष्यतीत्यदोषः।

`आङ्गकुलम्' इति। अत्राङ्गशब्दात् तद्राजसंज्ञकोऽण्, स च यञादिर्न भवति तस्येह प्रकरणे यञादिभ्यः प्राङ्निर्देशात्। `उपगार्ग्यम्' इति। `अव्ययं विभक्ति' (2.1.6) इत्यादिनाव्ययीभावः। `परमगार्ग्यः' इति। `सन्महत्' (2.1.61) इत्यादिना प्रथमान्तयोस्तत्पुरुषः।।

65. अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च। (2.4.65)

`{आत्रेय्यः-- इति मुद्रितः पाठः'आत्त्रेयः' इति। `टिड्ढाणञ्' (4.1.15) इति। ङीप्।।

66. बह्वच इञः प्राच्यभरतेषु। (2.4.66)

`भरताः' इति। येषां भरत आद्यः संज्ञाकारी ते भरताः। `पन्नागाराः' इत्यादिषूहाहरणेषु `अत इञ्' (4.1.95), तस्य लुक्। `बालाकयः' इति। बाह्वादित्वादिञ्। `हास्तिदासयः' इति। `अत इञ्' (4.1.95)। `आर्जुनायनः' इति। `यञियोश्च' (4.1.101) इति फक्।।

67. न गोपवनादिभ्यः। (2.4.67)

विदाद्यन्तर्गणोऽयमिति लुक्प्राप्तिं दर्शयति। `शैग्रवाः' इति। `ओर्गुणः' (6.4.146) । ननु चान्येऽपि हरितादयोऽत्र पठ्यन्ते, तत्किमित्यवधार्यत एतावन्त

इत्यत आह-- `परिशिष्टानाम्' इत्यादि। `प्रमादपाठः' इति। अनार्षः पाठः इत्यर्थः। यदि तेषां प्रमादपाठः, एवं तर्ह्यबिदादित्वादञप्येभ्यो न प्राप्नोतीत्यत आह-- `ते हि' इत्यादि। ते हि चतुर्थेऽध्याये बिदादिषु गोपवनादिभ्यः पर्वे पठ्यन्त इति न भवत्येष दोषप्रसङ्गः। यस्त्विह गोपवनादिभ्योऽष्टभ्यः पर एषां पाठः, स प्रमादपाठ इत्युच्यते।।

68. तिककितवादिभ्यो द्वन्द्वे। (2.4.68)
किमर्थं पुनस्तिककितवाभ्यां द्वाभ्यां गण उपलक्ष्यते, नैकेनैवोपलक्ष्येत ? नैतत्; कार्यिणा हि गण उपलक्षणयितुं युक्तः, द्वन्द्वश्चात्र कार्यी, तेनैवोपलक्षयितुं युक्तः।।

69. उपकादिभ्योऽन्यतरस्यामद्वन्द्वे। (2.4.68)
यदि द्वन्द्वे च भवत्यद्वन्द्वग्रहणं तर्हि किमर्थमित्याह-- `अद्वन्द्वग्रहणम्' इत्यादि। द्वन्द्वग्रहणे नात्र द्वन्द्वाधिकारः सम्बध्यते-- द्वन्द्वे द्वन्द्वाधिकार इति, तस्य नञा सम्बन्धे च द्वन्द्वाधिकारनिवृत्तिः प्रतीयते।थ विषयोपग्रहणार्थमद्वन्द्वग्रहणं कस्मान्न विज्ञायते-- अद्वन्द्वेऽद्वन्द्वविषय इति ? यद्ययमर्थोऽभीष्टः स्यादद्वग्रहणं न कुर्यात्; विनापि तेनार्थस्य प्रतीतेः। कथम् ? तिककितवादयोऽपीह त्रयः पठ्यन्ते-- उपकलमकाः, भ्रष्टककपिष्टलाः, कृष्णाजिनकृष्णसुन्दरा इति, तेषाञ्चाद्वन्द्व एव ग्रहणं प्रयोजयति न द्वन्द्वः; पूर्वेणैव सिद्धत्वादिति। तेषां तावन्नियमेनाद्वन्द्वार्थं ग्रहणम्, तत्साहचर्यादितरेषामप्यद्वन्द्वार्थं ग्रहणं युक्तमिति निष्फलमेवाद्वन्द्वग्रहणं स्यात्। तस्माद् द्वन्द्वाधिकारनिवृत्त्यर्थमेतद्युक्तमिति। `तेषां पूर्वेण नित्यमेव लुग्भवति' इति। अन्यथा हि तिककितवादिषु तेषां पाठोऽनर्थकः स्यात्। `अद्वन्द्वे त्वनेन विकल्पः' इति। प्रकृतत्वाल्लुको विज्ञेयः। तत्रोपकलमशब्दाभ्यां नडादिफग्विधानात् तस्य लुग्विकल्पः, ततः परेभ्यः प्राक् कपिष्ठलशब्दात् इञः। कपिष्ठलमयूरकर्ण-- इत्येतेभ्यः शिवादिभ्योऽणः। खारीजङ्घादिभ्यः प्राक् कठेरणिशब्दादत इञः। कठेरणिशब्दादौत्सर्गिकस्याणः। कुषीतकादिभ्यः कृष्णपिङ्गलपर्यन्तेभ्योऽत इञः। अनुलोमशब्दात् बाह्वादीञः। बाह्वादिषु हि लोमशब्दः पठ्यते, स च तदन्तविधिं प्रयोजयति। अनुगतानि लोमान्यस्येत्यनुलोमा, तस्यापत्यानुलोमयः, अनुलोमान इति। शेषाणामत इञः।।

70. आगस्त्यगौण्डिन्ययोरगस्तिगुण्डिनच्। (2.4.70)
यद्यपि प्रत्ययान्तात् षष्ठ्युच्चारिता, तथापि प्रत्ययस्यैव लुग्विज्ञायते, न तदन्तस्य; यस्मात् प्रत्ययादर्शनस्य लुगित्येषा संज्ञा विहिता, न तदन्तस्येत्यालोच्याह-- `आगस्त्यकौण्डिन्ययोर्गोत्रप्रत्यययोः' इति। व्यधिकरणे षष्ठ्यौ। आगस्त्यकौण्डिन्ययोर्याववयवौ गोत्रप्रत्ययौ तयोरित्यर्थः। तावेव प्रत्ययौ स्वरूपेण दर्शयन्नाह-- `अणो यञश्च' इति। यञो यद्यपि लुक् सिद्धस्तथापि पुनर्विधीयते कुण्डिनजादेशेन तस्य बाधा मा विज्ञायीति। `मध्योदात्तो हि कुण्डिनीशब्दः' इति। कुण्डमस्यास्तीति `अत इनिठनौ' (5.2.115) इतीनिप्रत्यये कृते प्रत्ययस्वरेण। `तदादेशोऽपि तथा स्यात्' इति। स्थानिवद्भावेन मध्योदात्तः स्यात्। चित्करणान्मध्योदात्तत्वं न बवति। किमर्थं पुनः प्रत्ययान्तरयोरेवायमादेशो न क्रियत इत्याह--- `तयोः' इत्यादि. यदि प्रत्ययान्तयोरेवायमादेशः स्यात `गोत्रेऽलुगचि' (4.1.89) इति प्रतिषधो न स्यात्. यस्माल्लुकोऽसौ प्रतिषेधो नादेशस्येति स्यादेवात्रादेशः, ततश्चावृद्धादणेव स्यात्; एवं चागस्ता इत्यनिष्टं रूपं स्यात्। यद्यपि वृद्ध्सयादेशः स्थानिवद्भावाद् वृद्धग्रहणेन गृह्यते तथाप्यगस्तीया इति स्यात्, आगस्तीया इति न सिध्यति। न च स्थानिवद्भावो लभ्यते; वृद्धसंज्ञाया अल्विधित्वात्। इह प्रत्ययस्य तु लुकि परिशिष्टस्यादेशे विहिते `गोत्रेऽलुगचि' (4.1.89) इति लुकि च प्रतिषिद्धे `वृद्धाच्छः' (4.2.114) सिद्धो भवति। `तत्र विशेषो नास्ति' इति। सत्यामपि वृद्धसंज्ञायां `कण्वादिभ्यो गोत्रे' (4.2.111) इति च्छापवदेनाणैव भवितव्यमिति नास्ति कौण्डिन्ये विशेषः।।

71. सुपो धातुप्रातिपदिकयोः। (2.4.71)
`धातुप्रातिपदिकयोः' इति। यदीयं सप्तमी स्यात् तदाऽयमर्थो विज्ञायेत-- धातौ च प्रातिपदिके च या सन्निकृष्टा विभ्कतिस्तस्या लुग्भवतीति। सन्निकृष्टत्वञ्चोपश्लेषमन्तरेण न सम्भवतीतीहापि स्यात्--- वृक्षः प्लक्ष इति, अस्ति ह्यत्रापि प्रादिपदिकेन विभक्तेरुपश्लेषः। तस्मात् षष्ठीयं युक्तेति मत्वाह-- `सुपो विभक्तेर्धातुसंज्ञायाः' इत्यादि। कथं पुनविभक्तेर्धातुसंज्ञा प्रातिपदिकसंज्ञा च भवतीत्यत आह-- `तदन्तर्गता' इत्यादि। नन्वेमपि धातुप्रातिपदिकयोरेवकदेशीभूता विभक्तयः स्युः, न धातुसंज्ञकाः, नापि प्रातिपदिकसंज्ञकाः ? समुदायेषु हि प्रवृत्ताः शब्दा अवयेवष्वपि वर्त्तन्त इत्यदोषः। `पुत्रीयती' िति। आत्मनः पुत्रमिच्छतीति `सुप आत्मनः क्यच्' (3.1.8) `क्यचि च' (7.4.36) इतीत्त्वम्, `सनाद्यन्ता धातवः' (3.1.32) इति धातुसंज्ञा, सा च सुबन्तात् क्यज्विहित इति ससुप्कस्यैव भवतीति तेनात्र विभक्तिर्धात्वन्तर्गता भवति। `कष्टश्रितः' इति। कष्टं श्रित इति `द्वितीया श्रित' (2.1.24) इत्यादिना समासः। `कृत्तद्धितसमासाश्च' (1.2.46) इति प्रातिपदिकसंज्ञा, सापि सुबन्तानां समासो भवतीति ससुप्कस्यैव भवति। तेनात्रापि विभक्तिः प्रातिपदिकान्तर्गता भवति। वृक्षः, प्लक्ष इत्यत्राप्यप्रत्यय इति प्रातिपदिकसंज्ञाप्रतिषेधात् सविभक्तिकस्य प्रातिपदिकसंज्ञा नास्तीति नास्ति विभक्तेः प्रातिपदिकान्तर्भावः।।

72. अदिप्रभृतिभ्यः शपः। (2.4.72)

73. बहुलं छन्दसि। (2.4.73)

`त्राध्वम्' इति। `त्रैङ पालनै' (धा.पा.965) भौवादिकः, लोट, ध्ममादेशः, टेरेत्त्वम्, `सवाभ्यावामौ' (3.4.91) इत्यमादेशः।।

74. यङोऽचि च। (2.4.74)

`अचि प्रत्यये परतः' इति। प्रत्ययग्रहणमचीति न प्रत्याहारग्रहणमिति प्रदर्शनार्थम्। यदि हि प्रत्याहारग्रहणमिमतं स्यात् तदाऽणीति णकारेणैव कुर्यात्। न हि यङन्तादणोऽन्येऽचः परे सम्भवन्तीत्यभिप्रायः। इदमेवाज्ग्रहणं ज्ञापकम्-- सर्वे धातवः पचाद्यन्तःपातिन इति। `लोलुवः'इति। `धातोरेकाचो हलादेः क्रियासमभिहारे' (3.1.22) इति यङ्, द्वर्वचनं `सन्यङोः' (6.1.9) इत्यनेन, `गुणो यङलुकोः' (7.4.82) इति गुणः। लोलू य इति स्थिते पचाद्यच्, यङो लुक्, `न धातुलोप' (1.1.4) इत्यादिना गुणप्रतिषेधः। `अचि श्नुधातु' (6.4.77) इत्यादिनोवङ। `सनीस्रंसः। दनीध्वंसः' इति। `स्रन्सु ध्वन्सु अवस्रंसने' (धा.पा.754,755), पूर्ववद्यङ्दिकार्यम्। ` न लुमताङ्गस्य' (1.1.63) इति प्रतिषेधात् प्रत्ययलक्षणेन `अनिदिताम्' (6.4.24) इत्यादिनाऽनुनासिकलोपो न भवति। `नीग्वञ्चु' (7.4.84) इत्यादिनाऽभ्यासस्य नीगागमः। `लालपीति।वावदीति' इति। लपेर्वदेश्च `दीर्घोऽकितः' (7.4.83) इत्यभ्यासस्य दीर्घः। `यङो वा' (7.3.94) इतीट्।।

75. जुहोत्यादिभ्यः श्लुः। (2.4.75)

`शबनुवर्त्तते, न यङ' इति। शब एव स्वरितत्वप्रतिज्ञानात्। `जुहोति' इति। `श्लौ' (6.1.10) द्विर्वचनम्। बिभर्ति' इति। `उरत्ट (7.4.66) इत्यत्त्वम्। `रपरत्वम्। `भृञामित्' (7.4.76) इतीत्त्वम्। `नेनेक्ति' इति। `णिजिर् शौचपोषयोः' (धा.पा.1093) , `निजां त्रयाणां गुणः' (7.4.75), `श्लौ' (6.1.10) इति द्वर्वचनम्।।

76. बहुलं छन्दसि। (2.4.76)

`दाति, धाति' इति। ददातिदधात्योः पूर्वसूत्रेण श्लौ प्राप्ते बहुलं प्रतिषिध्यते। शपो लुक्। `विवष्टि' इति। `वश कान्तौ' (धा.पा.1080), अदादित्वाच्छपो लुकि प्राप्ते श्लुः, `श्लौ' (6.1.10) इति द्वर्वचनम्, `भृञामित्' (7.4.76) इत्यनुवर्त्तमाने `बहुलं छन्दसि' (7.4.78) इतीत्त्वम्, व्रश्चादिसूत्रेण (8.2.36) षत्वम्। `ष्टुना ष्टुः' (8.4.41) इति ष्टुत्वम्। `विभक्ति' इति। `भज सेवायाम्' (धा.पा.998) भौवादिकः,शपः श्लुः, पूर्ववदित्त्वम्, `चोः कुः' (8.2.3)) इति कुत्वम्। `विवक्ति' इति क्वचित्पाठः। स च `वच परिभाषणे' (धा.पा.1063) इत्येतस्यादादिकस्य वेदितव्यः।।

77. गतिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु।(2.4.77)

`अगात्' इति। `इमो गा लुङि' (2.4.45) इति गादेश-। `अपात्' इति। `पा पाने' (धा.पा.925)। `अभूत्' इति। `भू सुवोस्तिङि' (7.4.88) इति गुणप्रतिषेधः।।

`गापोर्ग्रहणे इण्पिवत्योर्ग्रहणम्' इति। इणादेशस्य ग्रहणं तावद्गातीत्यत एव श्तिपा निर्देशाद्विज्ञायते। श्तिपा हि विकरणशून्य एवमर्थो निर्देशः क्रियते-- लुग्विकरणस्यैव ग्रहणं यथा स्यादिति; अन्यथा हि यदि गायतेर्ग्रहणमिष्टं स्यात् तदा गा इत्येवं ब्रूयात्। एवं तर्हि `गामादाग्रहणेष्वविशेषः' (व्या.प.124) इत्युभयोरपि ग्रहणं भविष्यति, किं श्तिपा निर्देशेन ? तस्मादयमेव श्तिपा निर्देशो ज्ञापयति-- इमादेश्सयैवेदं ग्रहणम्, न गायतेरिति। पाग्रहणे पिबतेरेव गर्हणमित्येतदपि `लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्' (व्या.प.50) इत्यनया परिभाषया विज्ञायते। `अघासीत्' इति। `कै गै शब्दे' (धा.पा.916,917) `यमरमनमातां सक् च' (7.2.73) इति सगागमः। सिच्, इट् च। `अस्तिसिचोऽपृक्ते (7.3.96) इतीट्। `इट ईटि' (8.2.28) इति सिचो लोपः। `अपासीत्' इति। `पा रक्षणे' (धा.पा. 1056) पूर्ववत् सगादिकार्यम्।

`आगासाताम्' इति। कर्मण्यात्मनेपदम्। आताम्। किमर्थं पुनः सिचो लुगुच्यते, न लेरित्येवोच्येत ? अत्राप्ययमर्थः सम्पाद्यते, उत्तरसूत्रे लिग्रहणं न कर्त्तव्यं भवति ? नैतदस्ति; इह लेर्हि लुकि विज्ञायमाने मा हि गातामिति `आदिः सिचोऽन्यतरस्याम्' (6.1.187) इत्यादिः स्वरो न सिद्ध्येत्,स पुनरुदात्तः। अगुरित्यत्रापि `आतः' (3.4.110) इति `सिजभ्यस्तविदिभ्यश्च' (3.4.109) इति झेर्जुस्भावो न सिद्ध्यति। तस्मात् सिच एव लुग् वक्तव्यः।।

78. विभाषा घ्राधेट्शाच्छासः। (2.4.78)

`घ्रा गन्धोपादाने' (धा.पा.926), `धेट् पाने' (धा.पा.902), `शो तनूकरणे' (धा.पा.1145), `छो छेदने' (धा.पा.1146), `षोऽन्तकर्मणि' (धा.पा.1147)। `धेटः पूर्वेण नित्ये प्राप्ते' इति। घुसंज्ञकत्वात्। अलुक्पक्षे पूर्ववत् सगादिकार्यम्। धेटः सानुबन्धकस्य निर्देशो धाञ्परीहारार्थः। यदि कृतात्त्वो निर्दिश्येत तदा धाञोऽपि ग्रहणं स्यात्। `अध्रासाताम्' इति। कर्मण्यात्मनेपदम्।।

79. तनादिभ्यस्तथासोः। (2.4.79)
`अतत' इति। `स्वरितञितः' (1.3.72) इत्यात्मनेपदम्। `अनुदात्तोपदेश' ((6.4.37) इत्यादिनाऽनुनासिकलोपः। `अतनिष्ट ययम्' इति। मध्यमपुरुषबहुवचनान्तमेतत्।।

80. मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः। (2.4.80)
सिच इत्यनुवर्त्तमाने पुनर्लिग्रहणं `आदिः सिचोऽन्यतरस्याम्' (6.1.187) इत्यादेःसिच्कार्यस्य निवृत्त्यर्थम्, उत्तरार्थञ्च। `अक्षन्' इति। `अद भक्षणे' (धा.पा.1011) लुङ, `लुङसनोर्धस्लृ' (2.4.37) इति घस्लादेशः। ततः `च्लि लुङि' (3.1.43) इति च्लिः, तस्यानेन लुक्, झेरन्तादेशः, `इतश्च' (3.4.100) इकतीकारलोपः, `संयोगान्तस्य' (8.2.23) इति तकारलोपः, `गमहन' (6.4.98) इत्यादिनोपधालोपः, `शासिवसिघलसीनाञ्च' (8.3.60) इति षत्वम्, `झलां जश् झशि' (8.4.53) इति जश्त्वम्, `खरि च' (8.4.55) इति चर्त्वम्। ह्वरेत्यागन्तुकेनाकारेण निर्देशः। `मा ह्वः' इति। लुङ, तिङगुणरपरत्वानि, हल्ङ्यादिलोपः, (6.1.68), `न माङयोगे' (6.4.74) इत्यडागमाभावः। `प्राणड्' इति। `णश अदर्शने' (धा.पा.1194), पूर्ववल्लुङादिकार्यम्, व्रश्चादिसूत्रेण (8.2.36) षत्वम्, `झलां जशोऽन्ते' (8.2.39) इति जस्त्वम्-- षकारस्य डकारः, तस्य `वावसाने' (8.4.56) इति चर्त्वं टकारः,`उपसर्गादसमासेऽपि' (8.4.14) इति णत्वम्। क्वचित् `प्राणग्' इति पाठः। तत्र `क्विन्प्रत्ययस्य कुः' (8.2.62) इत्यतः कुरित्यनुवर्त्तमाने `नशेर्वा' (8.2.63) इति कुत्वम्। `आवः' इति। वृञस्तिप्, गुणो रपरत्वम्, हल्ङ्यादिना (6.1.68) सिपो लोपः। `धक्' इति। `दह भस्मीकरणे' (धा.पा.911), सिप्,हल्ङ्यादिना (6.1.68) सिपो लोपः। `दादेर्धातोर्घः' (8.2.32) इति हस्य घः। `एकाचो बशो भष्' (8.2.37) इत्यादिना दकारस्य धकारः, धकारस्य जश्त्वम्-- गकारः, तस्य चर्त्वम्-- ककारः, आडागमस्य `बहुलं छन्दस्यामाङ्योगेऽपि' (6.4.75) इति निषेधः। `आप्रात्' इति। `प्रा पूरणे' (धा.पा.1061) इत्यस्मात् तिप्। `परावर्क' इति। वृजेस्तिप्, लघूपधगुणः,हल्ङ्यादिना (6.1.68) लोपः। `रात्सस्य' (8.2.24) इति नियमात् संयोगान्तलोपाभावः। जकारस्य पूर्ववत् कुत्वं गकारः, तस्य चर्त्वं ककारः। `अक्रन्' इति। कृञो झेरन्तादेशः, संयोगान्तलोपः। `अज्ञत' इति। जनेर्झस्य `आत्मनेपदेष्वनतः' (7.1.5) इत्यदादेशः, पूर्ववदुपधालोपः, `स्तोः श्चुना श्चुः' (8.4.40) इतिश्चुत्वम्। क्वचित् `अज्ञन्' इति पाठः। तत्र झिः, ततः परस्मैपदं वधेयम्। `ब्राह्मणे प्रयोगोऽयम्' इति। योऽयमनन्तरं मन्त्रे जनेरुक्तः स ब्राह्मणो मन्त्रव्याख्यानग्रन्थः। मन्त्रे जनेर्लुक् च दृश्यत इति तद्विषयमुदाहरणं नोपन्यस्तम्। यदि तर्ह्यमन्त्रे लुग्भवति मन्त्रग्रहणं किमर्थमित्याह-- `मन्त्रग्रहणम्' इत्यादि।।

81. आमः। (2.4.81)
`ईहाञ्चक्रे' इति। `ईह चेष्टायाम्' (धा.पा.632), लिट्, `इजादेश्च' (3.1.36) इत्यादिनाऽऽम्। तस्य कृत्वे मकारान्तस्य कृदन्तत्वात् प्रातिपदिकसंज्ञा, सुः, आमः स्वरादिपाठादव्ययत्वम्, `अव्ययादाप्सुपः' (2.4.82) इति सुलोपः, `कृञ्च' (3.1.40) इत्यादिना लिट्परस्य कृञोऽनुप्रयोगः, `आम्प्रत्ययवत्'(1.3.63) इत्यादिनाऽऽत्मनेपदम्, तत एशादेशः, द्विर्वचनम्, अभ्यासकार्यम्। आमो मकारस्यानुस्वारः, `अनुस्वारस्य ययि परसवर्णः' (8.4.58)। अथेह कस्मान्न भवति-- जगाम, शशामेति ? अर्थवदामो ग्रहणात्, अस्य चानर्थकत्वात्। प्रत्ययस्तु `अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' (पु.प.पा.90) इत्यर्थवान्। इह तर्हि कस्मान्न भवत्यम् रोग इति-- आमेति ? `लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' (व्या.प.3), अस्य तु लाक्षणिकत्वात्।।

82. अव्ययादुप्सुपः। (2.4.82)
`तत्र शालायाम्' इति। तच्छब्दात् सप्तम्यास्त्रल्। तस्य `प्राग्दिशो विभक्ति' (5.3.1) इति। विभक्तिसंज्ञा, त्यदाद्यत्वम्,टाप्, `तसिलादिष्वाकृत्वसुचः' (6.3.35) इति पुंवद्भावः। `तद्धितश्चासर्वविभक्तिः' (1.1.38) इति त्रलोऽव्ययत्वम्, ततउत्पन्नस्य टापो लुक्। केन पुनरव्ययाट्टाबुत्पद्यते ? `अजाद्यतष्टाप्' (4.1.4) इति चेत्, नच स्त्रियां टापो विधानात्, अव्ययस्य चालिङ्गत्वात्। तस्मादव्ययाट्टापः सम्भव एव नास्तीत्यव्ययादपार्थकं टापो लुग्वचनम् ? नापार्थकम्; `स्त्रियाम्' (4.1.3) गुणिप्रधाननिर्देशः-- स्त्रीत्ववति पदार्थे टाबादय इति। स्त्रीत्ववति च तस्यां शालायमित्येतस्मिन् पदार्थे तत्रेत्येतदव्ययं वर्त्तते। यद्यपि वाक्यार्थोऽत्र स्त्रीत्वम्; तथापि वाक्यार्थतयैव तसय् स्त्रीप्रत्ययो द्योत्यते, सति च स्त्रीप्रत्यये पदार्थ एव स्त्रीत्वं भवति, ततष्टापो लुग्वक्तव्यः। `कृत्वा, हृत्वा' इति। `क्त्वातोसुन्कसुनः' (1.1.40) इति क्त्वाप्रत्ययस्याव्ययत्वम्, तत उत्पन्नस्य सुपो लुक्। केन पुरव्ययात् सुबुत्पत्तिः ? स्वादि (4.1.2) सूत्रेणेति चेत्, न; तत्र `बहुषु बहुवचनम्' (1.4.21) इतयादिना शास्त्रान्तरेणैकवाक्यतायां स्वादीनां नियत्वात्, अव्ययानाञ्चासंख्यत्वात्। स्यादेतत्-- यत्र संख्यास्ति तत्र `बहुषु वहुवचनम्' (1.4.21) इत्येवमादिना स्वादिनियः कृतः, अव्ययेभ्यस्तु निःसंख्येभ्यः समान्यविहिताः स्वादयो विद्यन्त एवेति ?वार्त्तमेतत्; स्वादिसूत्रेण (4.1.2) हि `बहुषु बहुवचनम्' (1.4.21) इत्यादिना शास्त्रान्तरेणैकवाक्यतायां स्वादीनां विधानात्। तथा हि-- तत्रोक्कतं संख्याकर्मादयश्च स्वादीनामर्थाः शास्त्रान्तरेण विहिताः, तेन सहास्यैकवाक्यतेति। एकवाक्यतायाञ्च कुतः स्वादीनां सामान्येन विधानाम्। न ह्यपरं लक्षणमस्ति येन स्वादयः सामान्येन विहिताः। एवं तर्ह्येतदेवाव्ययादुत्पन्नस्य सुपो लुग्वचनं ज्ञापकम्-- भवन्त्यवययात् स्वादय इति। न ह्यनुत्पन्नस्य लुगुपपद्यते। एतदेव ज्ञापकं हृदि कृत्वोक्तम्-- `अव्ययेभ्यस्तु निःसंख्येभ्यः सामान्यविहिताः स्वादयो विद्यन्त एव' इति।।

83. नाव्ययीभावदतोऽमत्वपञ्चम्याः। (2.4.83)
`एतस्मिन् प्रतिषिद्धे पञ्चम्याः श्रवणमेव भवति' इति। कथम् ? इह द्वोयरर्थयोर्विधानात्, विधायके च वाक्ये द्वे एव। तत्र `नाव्ययीबावादतः' इत्येतत् प्रतिषेधस्य विधायकमेकं वाक्यम्। `अम् त्वपञ्चम्याः' इत्येतदमो विधायकं द्वितीयं वाक्यम्, तत्र चात इत्येतदपेक्षते। अत एव वृत्तौ वाक्यद्वयमुपन्यस्तम्-- `अदन्तादवययीभावदुत्तरस्य सुपो न लुग्भवति' इत्येकं वाक्यम्, `अमादेशस्तु तस्य भवत्यपञ्चम्याः' इति द्वितीयम्। तत्रापञ्चम्या इत्यनेन `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इति पञ्चम्या अमादेश एव प्रतिषिध्यते, न त्वलुक् पूर्ववाक्येन विहितः। अत एवालुकि सति पञ्चम्याः श्रवणमेव बवति। एकवाक्यतायां हि सत्यां कार्यद्वयस्यैकया पाठप्रवृत्या विधीयमानत्वात् कार्यद्वयस्यापञ्चम्या इति प्रतिषेधः स्यात्। पञ्चमीं वर्जयित्वैतत् कार्यद्वयं वेदितव्यम्। वाक्यभेदे त्वपञ्चमम्या इत्येतत् प्रत्यासन्नममादेशमपेक्षते, न तु वाक्यान्तरविहितमलुकम्। तेनापञ्चम्या इत्यनेन सम्बध्यमानः सामान्येन विधीयमानः सन्नलुक् पञ्चमीमप्यवगाहते; तस्मात् पञ्चम्याः श्रवणमेव युक्तम्। तुशब्देनाप्ययमर्थो लभ्यते।
ननु च क्रियायाः कारकाणि भवन्ति, पूर्वपदार्थप्रधानश्चाव्ययीभाव उक्तः,पूर्वपदार्थस्य चासत्त्वभूतत्वात् क्रियामन्तरेण सम्बन्धाभावादपादानादिभावो नास्ति, तत् कुतोऽव्ययीभावात् पञ्चम्यादयो विभक्तयो भवेयुः ?नैतदस्ति; पूर्वपदार्थप्राधान्येऽपि गुणभूतोत्तरपदार्थपेक्षः क्रियायोग उपपद्यते, यथा-- पञ्चपूलीमानयेति। तत्र भावप्राधान्येऽपि गुणभूत द्रव्यापेक्षः क्रियासम्बन्धः।।

84. तृतीयासप्तम्योर्बहुलम्। (2.4.84)
`सुमद्रम्' इति। `अव्ययं विभक्ति' (2.1.6) इत्यादिना समृद्धावव्ययीभावः। ` उन्मत्तगङ्गम्' इति। `अन्यपदार्थे च संज्ञायाम्' (2.1.21) इत्यनेन। `एकविंशतिभारद्वाजम्' इति। `संख्या वंश्येन' (2.1.19) इति।।

85. लुटः प्रथमस्य डारौरसः। (2.4.85)
परस्मैपदस्यात्मनेपदस्य च यथाक्रमं डारौरस्-- इत्येत आदेशा भवन्ति' इति। यद्ेयवम्, परस्मैपदेषु तिप् तस् झीत्येतत् प्रत्येकं प्रथमपुरुषसंज्ञा, आत्मनेपदेष्वपि त आतां झ इति; तत्र स्थानिनः षट्, त्रय आदेशा इति वैषम्यात् संख्यायानुदेशाभावादेकैकस्य पर्यायेण सर्व आदेशाः स्युः ? नैष दोषः; आनन्तर्यतो हि व्ययस्था भविष्यति। तच्चार्थकृतमानन्तर्यम्---` एकार्थस्यैकार्थः, द्वयर्थस्य द्व्यर्थः, बह्वर्थस्य बह्वर्थ इति। `कर्त्ता' इति। `अनद्यतने लुट्' (3.3.15), तिप्, तस्यानेकाल्त्वात् डा इत्ययं सर्वादेशः। ननु च नानुबन्धकृतमनेकाल्त्वम् (व्या.प.14), डकारश्चानुबन्धः,तत् कुतोऽनेकाल्त्वं यतः सर्वादेशः स्यात् ? नैष दोषः; न ह्यकृते सर्वादेशे `चुटू' (1.3.7) इतीत्संज्ञा भवति। इत्संज्ञाया अभावे चानुबन्धो न भवतीत्यनेकाल्त्वात् सर्वादेशो भवति। डित्यभस्यापि `टेः' (6.4.143) इति टिलोपः। `कर्त्तारौ, कार्त्तारः' इति। `रिच' (7.4.51) इति सकारलोपः। एवमध्येतेत्येवमादीनि रूपाणि `इङ अध्ययने' (धा.पा.1046) इत्येतस्य। अत्र परमपि टेरेत्वं बाधित्वाऽन्तरङ्गत्वात् डादय आदेशा भवन्ति। अन्तरङ्गत्वं पुनस्तेषां स्थानिमात्रापेक्षत्वात्। टेरेत्वन्तु बहिरङ्गम्; तद्धि धातुमप्यपेक्षते, न केवलं स्थानिनम्; आ तृतीयाध्यायपरिसमाप्तेः `धातोः' (3.1.7) इत्यस्याधिकृतत्वात्। `थासः से' (3.4.80) इति ज्ञापकम्-- तिङादेशस्य टेरेत्वं न भवतीति। तेन कृतेष्वपि डारौरस्स्वेत्त्वं न भवति। `कर्त्तासि' इति। `तासस्त्योर्लोपः'(7.4.50) इति सकारलोपः।।
इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
द्वितीयाध्यायस्य
चतुर्थः पादः

समाप्तश्चायं द्वितीयोऽध्यायः।।

3.1
श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचिता
न्यासापरपर्याया
काशिकाविवरणपञ्जिकाख्या
काशिकाव्याख्या
तृतीयोऽध्यायः
प्रथमः पादः
1. प्रत्ययः। (3.1.1)

`प्रत्ययशब्दः संज्ञात्वेनाधिक्रियते' इति। शास्त्रस्य लाघवार्थम्। यदि सन्प्रत्ययः, क्यच्प्रत्ययः, क्यङप्रत्ययः इत्येवमेकैकं संज्ञिनमुपादायानकेषां भिन्नवाक्यैः प्रत्ययसंज्ञा विधीयेत् तदा शास्त्रसय् गौरवं स्यात्; संज्ञिनां बहुत्वात्। न हि तेषां तथाविधं सायान्यमभिन्नमस्ति यदुपादायैकेन वाक्येनानेकेषां संज्ञा कविधीयेत् यथा--- `वृद्धिर्यस्याचामादिस्तद्वृद्धम्' (1.1.73) इति। ननु चेदमस्ति समान्यं सविति, एवञ्च सूत्रं करिष्यते-- `सप्प्रत्ययः' इति, सविति प्रत्याहारग्रहणं च सनः सकारादारभ्य कपः पकारेण ? नैतदस्ति; अन्येऽपि बहवः पकाराः सन्ति-- `सिब्बहुलं लेटि' (3.1.34), `वदः सुपि क्यप् च' (3.1.106) इत्येवमादयः तत्र यदि प्रत्यासत्तिमाश्रित्यानन्तरः पकारः प्रत्याहारार्थ गृह्यते,तदा सिपः पकारेमैव प्रत्याहारग्रहणं विज्ञायेत। अथ व्याप्तिर्गृह्यते ? तदा `तप्तनप्तनाथनाश्च' (7.1.45) इति तनपः पकारेणैव स्यात्। स्यादेतत्-- व्याप्तेरेव न्याय आश्रयितव्यः। न च तनपः पकारेण प्रत्याहारगर्हणं भविष्यति, अपि तु कप एव, `इच एकाचोऽम्प्रत्ययवच्च' (6.3.68) इति वचनाज्ज्ञापकात्; अन्यथा षष्ठेऽपि प्रत्ययसंज्ञाव्यापारादपार्थकमिदं स्यात् ? नैतदस्ति; असति हि प्रयोजने ज्ञापकं भवति, अस्ति ह्यस्य प्रयोजनम्, किं तत् ? अम्प्रत्ययप्रतिबद्धं विशिष्टमेव यथा स्यात्। प्रत्ययमात्रप्रतिबद्धं मा भूदिति नियमार्थमेतत् स्यात्, तत्कुतो वैयर्थ्यम्। अथापि कथञ्चित् कपः पकारेणैव प्रत्याहारो लभ्येत, एवमपि प्रतिपत्तिगौरवं स्यात्। अतो लाघवार्थमधिकारेणैवेयं संज्ञा विधातुं युक्तेति मत्वाऽऽह-- `प्रत्ययशब्दः संज्ञात्वेनाधिक्रियते' इति। यद्येवम्, प्रतियोगं तेनोपस्थातव्यम्, तत्रासावुपस्थितः सन्नादिभिरेव सम्बध्यते, न प्रकृत्यादिभिरिति नियमहेतुर्नास्ति। अतः प्रकृत्युपपदोपाधिविकारागमानामप्येषा संज्ञा स्यात्। तत्र प्रकृतिः-- `गुप्तिज्किद्भ्यः सन्' (3.1.5), उपपदम्-- `स्तम्बकर्णयो रमिजपोः' (3.2.13), उपाधिः-- `हरतेर्दतिनाथयोः पशौ' (3.2.25)। यद्यपि पश्वर्थस्य संज्ञायाः प्रयोजनं नास्ति, तथापि तद्वाचिनोऽस्तीति तस्य स्यादेव। विकारः-- `हनस्त च' (3.1.108), आगमः--`त्रपुजतुनोः षुक्' (4.3.138)। प्रत्ययसंज्ञायाञ्चैषां परत्वमाद्युदात्तत्वञ्च स्यात्। यद्यपि युगपदगुपादीनां परस्परापेक्षया सनादीनाञ्च परत्वं न सम्भवति, तथापि पर्यायेण स्यात्--- कदाचित् गुपादयः परे स्युः, कदाचित् सन्नादयः, अन्यतो वा कुतश्चिद्गुपादयः परे भवेयुरित्यत आह-- `प्रकृत्युपपद' इत्यादि। एतच्च न्यायप्राप्तमेवोक्तम्। कथम् ? प्रकृत्युपपदोपाधयस्तावत् परकार्यसिद्धये भूतविभक्त्या पञ्चम्यादिकया निर्दिश्यन्त इति तेषां पञ्चम्यादिविभक्त्यन्तं शब्दरूपं संज्ञासंज्ञिसम्बन्धं प्रतिपत्तुमयोग्यम्। तथा हि-- प्रथमान्तसय् वा सामानाधिकरण्येन संज्ञासंज्ञिसम्बन्धो भवति यत्र बुद्ध्याहितसंज्ञारूपः सोऽयमित्यभेदसम्बन्धमुपगतः संज्ञी संज्ञया सह निर्दिश्यते, यथा-- `वृद्धिरादैच्' (1.1.1) इति; षष्ठ्यन्तस्य वा यत्र संज्ञासंज्ञिनोर्भेदविवक्षायां संज्ञाशब्देन स्वरूपपदात्मकेनोपादीयमानेनोपजनितव्यतिरेकः षष्ठ्या संज्ञी निर्दिश्यते, यथा-- `स्वं रूपं शब्दस्याशब्दसंज्ञा' (1.1.68) इति। प्रकृत्यादयस्तु परोपकारयोग्यं विभक्तिविशेषमुपादाय वर्त्तन्त इत्यशक्य एषां संज्ञासम्बन्धः कर्त्तुम्। न च संज्ञासंज्ञिसम्बन्धयोग्यविभक्त्यध्याहारे सत्येषां संज्ञा भविष्यतीति युक्तं परिकल्पियितुम्। असति हि वचनस्यावकाशेऽध्याहारो युक्तः, न तु सति। अस्ति चावकाशः सन्नादिः। अप्राधान्याच्च प्रकृत्यादीनामयुक्ता संज्ञा। प्रधाने हि कार्यसम्प्रत्ययो लोके दृष्टः, यथा-- बहुषु गच्छत्सु कश्चित् पृच्छति कोऽयं याति ? स आह-- राजेति। तत्र यः पृच्छति, यश्चाचष्टे-- तयोरुभयोरपि प्रधाने राजनि सम्प्रत्ययो भवति। तस्मादिहापि प्रधाने सन्नादौ कार्यसम्प्रत्ययात् तस्यैव संज्ञा भविष्यति। प्राधान्यं पुनस्तस्यापूर्वस्य विधानात्। प्रकृत्यादीनां धात्वदिपाठे निर्ज्ञातस्वरूपाणां सन्नाद्यर्थोपादानादप्राधान्यम्, तत् कुतस्तेषां संज्ञा ? आगमविकारयोर्यद्यपि संज्ञासंज्ञिसम्बन्धयोग्यतया प्रथमया निर्देशः, विधेयत्वाच्च प्राधान्यम्, तथापि न भवति संज्ञा;यस्मात्प्रत्यय इति महती संज्ञा क्रियते। तस्या एतत्प्रयोजनमन्वर्थसंज्ञा यथा स्यात्--- प्रतियनत्यनेनार्थानिति प्रत्ययः। न च विकारागमाभ्यां कञ्चनार्थं प्रतियन्ति। यदि तर्ह्यन्वर्थसंज्ञेयम्, `अवेः कः' (5.4.28) `यावादिभ्यः कन्' (5.4.29) इत्येवमादीनां प्रत्ययसंज्ञा न प्राप्नोति; अर्थाभावात्। द्विवधो ह्यर्थः--लौकिकः, शास्त्रीयश्च; तत्र पूर्वः पदेनैव प्रतीयते, द्वितीयस्त्वन्वयव्यतिरेकाभ्याम्; स च तेषां नास्ति, विना प्रत्ययैः प्रकृतेरेव तदर्थस्य प्रतीतेः ? नैष दोषः; यद्यपि तेषामन्वयव्यतिरेकाभ्यामर्थो न समधिगम्यते, तथापि `अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' (पु.प.90) इत्यस्मादेवाप्तवचनात् समधिगम्यते। तस्मात् तैरपि स्वार्थं प्रतियन्तीति तेऽपि प्रत्यया इत्लमतिप्रसङ्गेनेति स्थितमेतत्-- प्रकृत्यादीनां प्रत्ययसंज्ञा न भवतीति। `कर्त्तव्यम्, करणीयम्' इति। तव्यदादेः प्रत्ययसंज्ञायां `यस्मात्प्रत्ययविधिः' (1.4.13) इति तस्मिन् परतोऽङ्गसंज्ञा भवति। अथ कथं तदनन्तरं सन्नादिमतिक्रम्य व्यवहित एव तव्यदादिरुदाहृतः ? तत्राद्युदात्तादेरपि प्रत्ययसंज्ञाकार्यस्य सम्भवात्। सन्नादौ तु तन्न सम्भवति; धातुस्वरेणैव बाधितत्वात्।।

2. परश्च। (3.1.2)

`अयमप्यधिकारः' इति। न केवलं प्रत्यय इत्यपिशब्दार्थः। `योगे योगे उपतिष्ठते' इति। परिभाषाया अधिकारस्य भेदं दर्शयति। परिभाषा ह्येकदेशस्थैव सर्वत्र शास्त्रे व्याप्रियते, न तु प्रतियोगमुपतिष्ठते। `परिभाषा वा' इति। पक्षान्तरं दर्शयति। एकदेशस्यैव सर्वत्र शास्त्रे व्याप्रियत इत्येष परिभाषाधर्मो वृत्तौ न दर्शितः; अधिकारधर्मप्रदर्शनद्वारेणावगम्यमानत्वात्। यदि हि प्रयोगमुपतिष्ठमाना परिभाषा कार्यसिद्धौ व्याप्रियेत तदाऽधिकारपरिभाषयोर्भेदो न स्यात्, तथा च तयोरिह भेदेनोपन्यसो निष्फलः स्यात्। लिङ्गवती चेयं परिभाषा, लिङ्गञ्चास्याः प्रत्ययसंज्ञैव। धातोर्वेति क्रियावाचिन्या प्रकृतेरिदमुपलक्षणम्, तेन तिङन्तमपि गृह्यते। तदपि क्रियाप्रधानत्वात् क्रियावाचीति शक्यते व्यपदेष्टुम्। प्रधानेन हि व्यपदेशा भवन्ति, यथा--- राजधानीति। `प्रातिपदिकाद्वा' इति। अक्रियाभिधायिन्याः प्रकृतेरिदमुपक्षणम्, तेन ङ्यापावपि गृह्येते। `तैत्तिरीयम्' इति। प्रोक्तार्थे `तित्तिरवरतन्तुखण्डिकोखाच्छण्' (4.3.102) इति छण्। तदन्तात् `तदधीते तद्वेद' (2.4.59) इत्यण्। तस्य `प्रोक्ताल्लुक्' (4.2.64) इति लुक्। अथ चकारः किमर्थः; यावता नात्र किञ्चित् प्रकृतमस्ति यच्चकारेण समुच्चीयते ? इत्याह-- `चकारः पुनः' इत्यादि। अन्यस्य समुच्चेतव्यस्याभावादस्यैव समुच्चयार्थश्चकारो विज्ञायते, तेन बहुलाधिकारेऽपि ये प्रत्यया विधीयन्ते तेष्वप्यृणादिषु परत्वं न विकल्प्यते।

किमर्थं पुनरिदमुच्यते ? परो यथा स्यात्, पूर्वो मा भूदिति। नैतदस्ति प्रयोजनम्, तथा हि-- यमिच्छति पूर्वं तमाह--- `अव्ययसर्वनाम्नामकच् प्राक्टेः' (5.3.71) इति। य इदानीमतोऽन्यः प्रत्ययः सोऽन्तरेणापि वचनं पर एव भविष्यति ? नैतदस्ति; येषामेव हि प्रत्ययानां देशो नियम्यते त एव नियतदेशाः स्युः। य इदानीमतोऽन्योऽनियतदेशः स कदाचित् परे, कदाचित् पूर्वे, कदाचिन्मध्ये स्यात्, तस्मात् परश्चेति वक्तव्यम् ? न वक्तव्यम्; यस्मात् धातोः प्रतिपदिकादिति च दिग्योगलक्षमेयं पञ्चमी; अन्यस्यापादानादेः पञ्चमीनिमित्तस्याभावात्। तस्मादेवैव परदिक्शब्दाध्याहारं करिष्यति ? नैतदस्ति; पूर्वदिक्शब्दाध्याहारः स्यात्, तथा च पूर्वेऽपि कदाचित् सन्नादयः स्युः। `तस्मादित्युत्तरस्य' (1.1.67) इत्यनया परिभाषया तर्हि व्यवस्था भविष्यति ? नैतदस्ति; यत्र पञ्चमीनिर्दिष्टात् परस्य षष्ठीनिर्देशस्य कार्यं विधीयते सोऽस्य विषयः, न च सन्नादयः षष्ठ्या निर्दिश्यन्ते, तनापि तेषां सम्बन्धिकार्यं विधीयते, तेषामेव भाव्यमानत्वात्। ननु च प्रत्ययसंज्ञाकार्यं विधीयते ? नैवम्, कथं पुनरसतां तेषां शक्यं संज्ञाकार्यं विधातुम् ? किञ्च येषां प्रत्ययसंज्ञैव न विधीयते-- `कणेष्ठः' (द.उ. 5.6) `शमेर्ढः' (5.11), इत्येवमादीनाम्, तत्र का गतिः स्यात् ? न ह्येषां प्रत्ययसंज्ञेष्यते, तथा हि-- कण्ठः, शण्ढ इत्यत्र प्रत्ययस्योच्यमानमिकादेशादिकार्यं न भवति। यद्येवम्, प्रत्ययस्योच्यमानं परत्वमपि न स्यात्? परश्चेत्यधिकारसामर्थ्याद्भविष्यति। असति ह्येतस्मिन् वचने सत्यपि तस्याः परिभाषाया उपस्थाने बहुलाधिकारे विधीयमानत्वादुणादिषु परत्वं विकल्प्येत। तस्मात् कर्त्तव्यमेतत्।।

3. आद्युदात्तश्च। (3.1.3)

`अनियतस्वरप्रत्ययप्रसङ्गे' इत्यादिना सूत्रारम्भस्य प्रयोजनं दर्शयति। अनियतोऽव्यवस्थितः स्वरो यस्य स तथा, स चासौ प्रत्ययश्चेति कर्मधारयः, तस्य प्रसङ्गशब्देन षष्ठीसमासः। अनियतस्वरो यः प्रत्ययस्तस्य प्रसङ्गे सति वचनमिदमादेरुदात्तार्थम्। `अनियतस्वरप्रसङ्गे' इति क्वचित्पाठः। तत्रानियतशब्दस्य स्वरशब्देन विशेषमसमासं कृत्वा प्रसङ्गशब्देन षष्ठीसमासः। अनियतानामुदात्तादीनां स्वराणां प्रसङ्गे सत्यादेरुदात्तार्थ वचनम्। `अनेकाक्षु च' इत्यादि। अनेकेऽचो येषां तेऽनेकाचः। तेष्वनेकाक्षु प्रत्ययेषु देशस्यानियमे सति वचनमादेरुदात्तार्थम्-- आदेरेवोदात्तत्वं यथा स्यात्, मध्येऽन्ते च मा भूदिति। ये ह्येकाचः प्रत्ययास्तत्र देशस्याभावादसत्यप्यादिग्रहणे देश्यानियमो न सम्भवति, अतोऽनेकाक्षु चेत्युक्तम्।
अनेकाचां ह्यसत्यादिग्रह आदिमध्यान्तानामनियमेन स्वरः प्रसज्येतनेकाचः प्रत्ययादेर्यद्याद्युदात्तार्थवचनं नार्थं एतेन; यस्मादादेरनुदात्तादीनां मध्यान्तयोश्चोदात्तस्य प्रसङ्ग एव नास्ति। तथा हि-- यमनुदात्तमिच्छति, करोति तत्र पकारमनुबन्धम्, आह च-- `अनुदात्तौ सुप्पितौ' (3.1.4) इति; स्वरितमपि यमिच्छति, करोति तत्र तकारमनुबन्धम्, आह च-- `तित् स्वरितम्' (6.1.185) इति; एकश्रुतिं यमिच्छति तत्रैकश्रुतिग्रहणं करोति, आह च-- `एकश्रुति दूरात्सम्बुद्धौ' (1.2.33) इति; अन्तोदात्तमपि यमिच्छति करोति तत्र चकारमनुबन्धम्, आह च-- `चितोन्त उदात्तो रित' (का.6.1.163) इति; मध्योदात्तमपि यमिच्छति, करोति तत्र रेफमनुबन्धम्, आह-- `उपोत्तमं रिति' (6.1.217) इति; य इदानीमतोऽन्यः प्रत्ययः सोऽन्तरेणापि वचनमाद्युदात्त एव भविष्यति ? नैतदस्ति; येषामेव हि स्वरो नियम्यते त एव नियतस्वराः स्युः, यस्त्वनियतस्वरः प्रत्ययस्तस्यानियमेनैव स्वरः प्रसज्येत-- कदाचिदुदात्तः कदाचित् स्वरान्तरम्। उदात्तोऽपि भवन् कदाचिदादौ, कदाचिन्मध्ये, कदाचिदन्ते स्यात्। तस्मात् कर्त्तव्यमेतत्।।

4. अनुदात्तौ सुप्पितौ। (3.1.4)

`पूर्वस्यायमपवादः' इति। नाप्राप्ते तस्मिन्नस्यारम्भात्। सुबिति प्रत्याहारस्य ग्रहणम्, न सप्तमीबहुवचनस्य; तस्य पित्त्वादेवानुदात्तस्य सिद्धत्वात्। अत एव वृत्तौ `सुपः' इति बहुवचनेन निर्देशः कृतः। प्रत्याहारग्रहणञ्चेदं सुप एव पकारेण नान्येन; तस्यानन्यार्थत्वात्। `पचति, पठति' इति। शबत्रोदाहरणम्, न तिप; तस्य `तास्यनुदात्त' (6.1.186) इत्यादिनैव सिद्धत्वात्।।

5. गुप्तिज्किद्भ्यः सन्। (3.1.5)

`प्रत्ययसंज्ञा चाधिकृतैव' इति। विस्पष्टार्थमेतत्। प्रत्ययशब्दः संज्ञात्वेनाधिक्रियते; `आ पञ्चमाध्यायपरिसमाप्तेः' (का.3.1.1) इत्यतो वचनादेव प्रतिपाद्यस्यावगतत्वात्। ननु च सत्यपि प्रत्ययसंज्ञाया इहोपस्थाने नैव तया सनो भवितव्यम्; यतः प्रत्यय इत्यन्वर्थसंज्ञेयम्-- प्रतियन्त्यनेनार्थानिति प्रत्ययः, न च सना कञ्चनार्थं प्रतियन्ति; तस्यानर्थकत्वात्, न हीह सनः कश्चनार्थो निर्दिश्यते। न च `अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भविष्यति' (पु.प.पा.90) इतिस्वार्थ एव सन् भविष्यतीति युक्तं परिकल्पयितुम्; गोपनादेः स्वार्थस्य सन्नन्तादप्रतीतेः।
अथानर्थकस्यापि प्रत्ययाधिकारे विधानसामर्थ्यात् संज्ञा भविष्यतीति चेत् ? न; एवञ्च `हनस्त च' (3.1.108) `त्रपुजतुनोः षुक्' (4.3.138) इति विकारागमयोरपि स्यात्। नैष दोषः; अस्त्येव सनोऽर्थः, कः पुनरसो ? निन्दादिः। यदाह-- `निन्दाक्षमाव्याधिप्रतीकारेषु सनिष्यते' (वा. 178) इति। कुतः पुनरेतदवसितम्-- सनोऽर्था निन्दादय इति ? अन्वयव्यतिरेकाभ्याम्। सति हि सनि जुगुप्सत इत्यादौ तेऽर्थाः प्रतीयन्ते, असति तु सनि सत्स्वपि गुपादिषु गोपयतीत्यादौ ते न प्रतीयन्ते। तस्मादर्थवानेव सन्निति भवत्येव प्रत्ययसंज्ञा। `जुगुप्सते' इत्यार्धधातुकत्वाभावादिण् न भवति। आर्धधातुकत्वाभावस्तु सनो धातोरित्यविधानात्। `कुहोश्चु' (7.4.62) इति चुत्वम्-- जकारः। `तितिक्षते' इति। जकारस्य `चोः कुः' (8.2.30) कुत्वम्-- गकारः। तस्य `खरि च' (8.4.55) इति चर्त्वम्-- ककारः।
`निन्दाक्षमा' इत्यादि। कथं पुनर्निन्दादिष्विष्यमाणो लभ्यते ? वक्ष्यमाणं वाग्रहणं सर्वस्य शेषो विज्ञायते, सा च व्यवस्थितविभाषा। तेन निन्दादिषु नित्यं सन्

भवति, अन्यत्र न भवति। प्रायिकञ्चैतत् व्याधिप्रतीकारस्यार्थमन्यथा व्याख्यास्यति। अथ वा-- क्षेत्रियाणि च तृणानि शस्यार्थे क्षेत्रे जातानि चिकित्स्यानि विनाशयितव्यानि। अथ वा-- क्षेत्रियः पारदारिकः। परदाराः परक्षेत्रम्,तत्र चिकित्स्यो निग्रहीतव्य इत्यर्थः। संशयेऽपि दृश्यते-- `विचिकित्सति मे मनः' इति। यद्यप्यत्रोपसर्गसम्बन्धात् संशयः प्रतीयते, तथापि धातोरेव वाच्य इष्यते, उपसर्गस्य तु द्योत्यः। तस्मात् प्रायिकं व्याधिप्रतीकारग्रहणम्। प्रायेण हि लोके व्याधिप्रतीकारे चिकित्सतीति प्रयुज्यते। `अन्यत्र' इति। गोपनादौ। `गोपयति' इति। हेतुमण्णिच्। तेजयति, `सङ्केतयति'इति। हेतुमण्णिच्, चुरादिण्ज्वाः; भ्वादौ चुरादौ चानयोः पाठात्।

अथ जुगुप्सत इत्यादौ कथमात्मनेपदं सन्नन्ताद्विधीयते, न च गुपादिभ्य प्राक् सन आत्मनेपदं पश्यामः ? इत्याह-- `गुपादिष्वनुबन्धकरणम्' इत्यादि। आत्मनेपदं यथा स्यादिति। गुपादिष्वनुबन्धोऽनुदात्तार्थः कृतः तस्मात् `अनुदात्तङितः' (1.3.12) इत्यात्मनेपदं भवतीति भावः। ननु च कृतेऽप्यनुबन्धे न भवितव्यमेव तेभ्य आत्मनेपदेन; सना व्यवहितत्वात् ? नैतदस्ति; अनुबन्धकरणसामर्थ्याद्भविष्यति। अथ वा-- `अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति' (है.ग.प.107) इति जुगुप्सादय एव समुदाया अनुदात्तेतः, तेनावयवधानेनैव तेभ्य आत्मनेपदं भविष्यति। एवं स्थिते यदत्र द्वेष्यमापद्यते तत् `पूर्ववत्सनः' (1.3.62) इत्यत्रोपन्यस्तमपास्तञ्च। अथ किमर्थं सनोऽकार उपदिश्यते, यावता तस्यार्धधातुके `अतो लोपः' (6.4.48) इति लोपेन भवितव्यम्, सार्वधातुकेऽपि शपा सहैकादेशेन, तत्र सत्यसति वाऽकारोपदेशे नास्ति कश्चिद्विशेषः ? नैतदस्ति; इह प्रतीषिषतीति प्रपूर्वादिणः सनि विहिते यद्यकारोपदेशो न स्यात् `अजादेर्द्वितीयस्य' (6.1.2) इति द्वितीयस्यैकाचो द्वर्वचनं विधीयमानं स इत्यस्य न स्यात्, अनच्कत्वात् सनः। अकारोपदेशे सति स इत्यस्य द्वितीयस्यैकाचो भवति। तदर्थोऽपकारोपदेशः।।

6. मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य। (3.1.6)

मान्बन्धी अनुदात्तेतौ, शेषौ स्वरितेतौ। इह दीर्घग्रहमात् `अचश्च' ((1.2.28) इति परिभाषोपस्थानादचाऽभ्यासो विशिष्यत इत्यजन्तस्याभ्यासस्य दीर्घो विधीयमानो नियतं हलादिशेषमपेक्षते; विना तेनाजन्तत्वाभावात्। तस्मिंस्तु सति न किञ्चित् प्रतीक्षणीयमिति तत्समनन्तरमेव दीर्घेण भवितव्यम्, ततश्चाभ्यासस्यावर्णस्य स्थाने भवन् ब्धेरित्त्वस्य बाधकः स्यात्, शेषाणान्तु ह्रस्वस्य, ततश्चानिष्टं रूपं स्यादिति यो मन्येत तं प्रत्याह-- `अभ्यासस्य चेकारस्य दीर्घो भवति' इति।कथं पुनरिकारस्य दीर्घो लभ्यते, यावता विशेषविधिः सामान्यविधेर्बाधको भवति, विशेषविहितश्च दीर्घः, ततोऽयं सामान्यविहितमित्त्वं बाधित्वाऽकारस्यैव प्राप्नोति ? अत एवं मन्यते-- `दीर्घोऽकितः (7.4.83) इत्यत्र ज्ञापितमेतत् स्यात्-- `अभ्यासविकारेष्वपवादानोत्सर्गान् विधीन्बाधन्ते' (व्या.प.23) इति। अकिद्ग्रहणस्यैतत् प्रयोजनम्, इह मा भूत्-- यंयम्यते, रंरम्यते इति। यदि चाभ्यासविकारेष्वपवादैरुत्सर्गा बाध्येरन्नेवं सत्यपवादत्वान्नुकि कृतेऽनजन्तत्वादेव दीर्घो न भविष्यति, किमकित इत्यनेन। कृतञ्च; अतस्ततो ज्ञापयति-- नाभ्यासविकारेषु बाध्यबाधकभाव इति। `बीभत्सते' इति। `एकाचो बशो भष्' (8.2.37) इति बकारस्य भकारः, धकारस्य `खरि च' (8.4.55) इति तकारः।

`उत्तरसूत्रे' इत्यादि। अत्र हि सनो विधिमात्रमपेक्ष्यते वावचनेन, न त्वनन्तर एव विधिः। तेन त्रयाणामपि योगानां शेषो विज्ञायते। सर्वग्रहणं गुपादिसूत्रस्यापि (3.1.5) शेषो विज्ञायत इति ज्ञापनार्थम्, अन्यथा ह्यनन्तरस्यैव सूत्रस्य शेषो विज्ञायेत। `मानयति' इति। हेतुमण्णिच्, चुरादिणिज्वा, चुरादावप्यस्य पाठात्। `{निशानयति-- काशिका} निशानम्' इति। पचाद्यच्।।

7. धातोः कर्मणः समानकर्त्तृकादिच्छायां वा। (3.1.7)

कर्त्तृः क्रियया व्याप्तुमिष्टतमस्य कर्मभाव उपपद्यते। नान्यथेत्यवश्यं या काचित् क्रियाऽपेक्षितव्येति। इह चान्या न श्रूयते, प्रत्ययार्थत्वेन चेच्छा सन्निधापिता, अतः सैवापेक्षितुं युक्ता; प्रत्यासत्तेर्न्यायात्,तस्मात्, तयैव व्याप्यमानस्य कर्मभावो विज्ञायत इत्याह-- `इषिकर्म' इत्यादि। इषेः कर्मेति षष्ठीसमासः। प्रतियोग्यपेक्षत्वात् समानत्वस्य नियोगतः प्रतियोग्यपेक्षितव्यः, न च सूत्रे प्रतियोगी श्रूयते, तत्र पूर्वोक्तन्यायेनेषेरेव प्रतियोगित्वं विज्ञायत इत्याह--- `इषिणैव' इत्यादि। समान एकः कर्त्तास्येति बहुव्रीहिः, एककर्त्तृक इत्यर्थः। ननु चट धातोः कर्मत्वं नोपपद्यते, तस्यार्थधर्मत्वात्, धातोश्च शब्दात्मकत्वात्। अथ करोति धातुमिच्छतीत्यादौ प्रयोगे धातोरपि कर्मता दृष्टेति चेत् ? न ब्रूमः-- सर्वथा धातोः कर्मत्वं न भवतीति, किं तर्हि ? य इह सन्नुत्पत्तिनिमित्तभावनोपात्तः समानकर्त्तृकः, तस्य न सम्भवतीति ब्रूमः; यस्मात् समानकर्त्तृकत्वं साध्यमानस्यार्थस्य भवति, कर्मत्वं तु सिद्धस्वभावस्य। अङ्गीकृत्य च समानकर्त्तृकत्वं धातोः कर्मत्वे दोष उक्तः इदानीं तदपि न सम्भवत्येव। तथा हि-- धातुः शब्दः क्रियायाश्च कर्त्ता भवति, न शब्दस्येतत् आह-- `कर्मत्वम्' इत्यादि। `अर्थद्वारकम्' इति। अर्थो द्वारमुपायो यस्य तदर्थद्वारकमिति। अर्थस्य कर्मत्वात् समानकर्त्तृकत्वाच्च तद्वचनोऽपि धातुरर्थधर्मेणोपचारात् कर्मसमानकर्त्तृकश्चोच्यते, यथा--- `द्वन्द्वश्च प्राणितूर्य' (2.4.2) इत्यत्रार्थस्य प्राण्यङ्गत्वात् तद्वचनोऽपि प्रामअयङ्गमित्युच्यत इति भावः। `चिकीर्षति' इत्यत्र करोतेरर्थ इच्छया व्याप्यमानत्वात् समानत्वात् कर्मसमानकर्त्तृकश्चेषिणा; यस्मात् य एवेषेः कर्त्ता स एव तस्यापि। अतस्तद्द्वारेण करोतिरपि कर्मसमानकर्त्तृकश्चेति भावः। ततः सन्, `इको झल्' (1.2.9) इति सनः कित्त्वात् गुणभावः, `अज्झनगमां सनि' ((6.4.16) इति दीर्घः, `ऋत इद्धातोः' (7.1.100) इतीत्त्वम्, रपरत्वम्, `हलि च' (8.2.77) इति दीर्घः, `इण्कोः' (8.3.57) इत्यनुवर्त्तमाने `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्, द्विर्वचनम्, अभ्यासकार्यम्।

धातुग्रहणं किमिति। धातुग्रहणं ह्येवमर्थं क्रियते-- गमनमिच्छतीति सुबन्थान्मा भूदिति। ननु चासत्यपि धातुग्रहणे ततः सन् भवितुं नोत्सहते; `सुप आत्मनः क्यच्' (3.1.8) इत्यपवादेन बाधितत्वात्, तस्मात् पारिशेष्याद्विनापि धातुग्रहणेन धातोरेव भविष्यतीत्यभिप्रायेणाह-- `सोपसर्गादुत्पत्तिर्मा भूत्' इति। यदोपसर्गविशिष्टो धात्वर्थ इषिणा व्याप्यते तदासावुपसर्गविशिष्ट एव कर्मत्वमनुभवतीति तदद्वारेणासौ सोपसर्ग एव धातुः। कर्मेति सोपसर्गादुत्पत्तिः स्यात्,ततश्च प्राचिकीर्षदित्यत्र द्विर्वचनं क्रियमाणं सन्नन्तस्यैकाचः प्रथमस्य द्विर्वचनं भवतीति `सन्यङोः' (6.1.9) इति समुदायादेः प्रशब्दस्य स्यात्। लङि च सोपसर्गस्याङ्गसंज्ञायां ततः प्रागडागमः स्यात्। यदि तर्हि सोपसर्गः, कर्मधातोरुत्पत्तिर्न स्यात्, तस्याकर्मकत्वात् ? नैतदस्ति, समुदायस्य हि कर्मत्वेऽवयवा अपिक्मत्वमनुभवन्ति;अवयवात्मकत्वात् समुदायस्य। अभ्युपाय एव ह्यवयवकर्मता समुदायकर्मतायाः; अन्यथा यदि समुदाये कर्मण्यवयवाः कर्मभावापन्ना न भवेयुः, तदा महान्तं पुत्रमिच्छतीत्यत्र कर्मलक्षणावयवा द्वितीया न स्यात्। ` गमेनेनेच्छति' इति। करणत्वप्रदर्शनार्थं ल्युहन्तोपन्यासः। धातोरेव हि सनोऽनुत्पत्तिः प्रत्युदाहरणम्। अस्त्यत्र समानकर्त्तृकत्वम्। तथा हि--- य एवेषेः कर्त्ता स एव गमनस्य, स ह्यात्मीयेन गमनेन करणभावमापन्नेन किमपि वस्त्विच्छति। क्मत्वं तु गमेरर्थद्वारकं नास्तीति न भवत्यतः सन्। `देवदत्तस्य भोजनमिच्छति' इति। देवदत्तस्येति `कर्त्तकर्मणोः कृति' (2.3.65) इति कर्त्तरि षष्ठी। अत्र हि भोजनस्य देवदत्तः कर्त्ता, इषेस्तु यज्ञदत्त इति समानकर्तृकत्वं नास्ति। `कर्तुं जानाति' इति। इच्छाग्रहणादिह ज्ञानेऽर्थे सन्न भवति। ननु चेषिकर्मा यो धातु रिषिणैव समानकर्तृकस्तत इच्छाया वा सन् भवतीत्युक्तम्। इह च यथेच्छा प्रत्ययार्थो नास्ति तथा धातोरिषिकर्मत्वमपि, इषिणा समानकर्तृकत्वञ्च, तदयुक्तं प्रत्युदाहरणम्, अङ्गत्रयवैकल्यात् ? नैतदस्ति, सति हीच्छाग्रहणे तद्विशेषणद्वयं प्रत्यासत्तेर्लभ्यते। असति तु तस्मिन् यां काञ्चित् क्रियां प्रति धातोः कर्मत्वं विज्ञायते, प्रतियोगिमात्रापेक्षया च समानकर्तृकत्वमिति काऽत्रायुक्तता !

`वावचनाद्वाक्यमपि भवति' इति। उत्तरसूत्र इति शेषः। इह तु `समानकर्त्तृकेषु तुमुन्' (3.3.158) इत्यत एव विधानात् कर्त्तृमिच्छतीति वाक्यं भविष्यति। नित्यत्वेहि सनस्तस्य वचनस्यानर्थक्यं स्यात्. अन्यदपि वावचनप्रयोजनमुक्तमेव, तस्यै समुच्चयार्थोऽपिशब्दः। `धातोरिति विधानात्' इत्यादि। `आर्धधातुके शेषः' (3.4.114) इत्यनेन धातोरित्येवं धातुशब्दमुच्चार्य विहितस्य प्रत्ययस्यार्धधातुकसंज्ञाविधानात्। इह धातोरित्येव सनो विधानमित्यार्धधातुकसंज्ञा न भवति, न हि तस्य तथा विधानमस्ति।

`आशङ्कायामुपसंख्यानम्' इति। आशङ्का = सम्भावना, सा च प्रयोक्तृधर्मः। `नदीकूलं पिपतिषति' इत्यचेतनत्वात् कूलस्येच्छा न सम्भवतीति न प्राप्नोति। `आशङ्के कूलं पतिष्यति' इत्यस्मिन् विषय एवं प्रयोगः। `श्वा मुमूर्षति' इति। पूर्ववत् कित्त्वदीर्घत्वे। `उदोष्ठ्यपूर्वस्य' (7.1.102) इत्युक्तम्; रपरत्वञ्च। अत्र सत्यपि चेतनत्वे जीनस्य प्रियत्वाच्छुनो मर्तुमिच्छा न सम्भवतीति न प्राप्नोति। एष च प्रयोगः `अहमाशङ्केमरिष्यति श्वा' इत्यत्रार्थे वेदितव्यः। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। कर्त्तव्य इत्यव्याहार्यम्। प्रतिपादनं तु-- धातोरिति योगविभागः कर्त्तव्यः, तेनाशङ्कायामपि सन् भविष्यति। `इच्छासनन्तात्' इत्यादि। इच्छायामर्थे यो विहितः सन् तदन्तात् सनः प्रतिषेधो व्याख्येयः। व्याख्यानं तूत्तरत्र करिष्यामः। स्वार्थे यः सन् तदन्तात् सनिष्यत एवेतीच्छाविशेषणं कृतम्। `जुगुप्सिषते' इति। `अतो लोपः' (6.4.48) इत्यकारलोपः।

`शैषिकात्' इत्यादि। अश्वप्तयादिभ्योऽर्थेभ्योऽदूरभव इत्येतत्पर्यन्तेभ्योऽन्यो योऽर्थः स शेषः, तत्र भवः शैषिकः, `अध्यात्मादिभ्यष्ठञ्' (वा.456) । तस्माच्छैषिकः सरूपः प्रत्ययो नष्टः। शालायाम्भव इति `वृद्धाच्छः' (4.2.114) शालीयः, शालीये भव इति पुनश्छो न भवति। विरूपस्तु भवत्येव-- अहिच्छत्रे भव आहिच्छत्रः, `प्राग्दीव्यतोऽण्' (4.1.83) आहिच्छत्रे भव आहिच्छत्रीयः-- अणन्ताद्वृद्धाच्छो (4.2.114) भवति। मतुबर्थे भवः प्रत्ययो मतुबर्थीयः, `गहादिभ्यश्च' (4.2.138) इति च्छः, मतुबर्थोऽस्यास्तीति मतुबर्थिकः प्रत्ययः, `अत इनिठनौ' (5.2.115) इति ठन्। मतुबर्थोऽस्यास्तीतिमतुबर्थीयात् प्रत्ययान्मतुबर्थिकः सरूपः प्रत्ययो नेष्टः। दण्डोऽस्यास्तीति दण्डिकः, पूर्ववट्ठन्, दण्डिकोऽस्यास्तीति मतुबर्थीयात् पुनष्ठन् न भवति। विरूपस्तु भवत्येव-- दण्डोऽस्यास्तीति दण्डी, दण्डिनोऽस्यां शालायां सन्तीति दण्डमती शाला, इन्नन्तान्मतुप् भवति। `सन्नतान्न सनिष्यते' इति। `सरूपः' इति सम्बध्यते। तत्र यद्यपि सनो रूपसारूप्यव्यभिचारो नास्ति, तथापि विशेषणसामर्थ्यादर्थसारूप्यमाश्रीयते। तेनेच्छासनन्तादिति गम्यते, पूर्वम् `इच्छासनन्तात्प्रतिषेधो वक्तव्यः' (वा.181) इत्यभिधानाच्च। यस्तु निन्दादिषु गुपादिभ्यः सन् तत् इच्छासन् भवत्येव। तथा चैवं वृत्तादुदाहृतम्।एतत्सर्वं न्यायप्राप्तमेवोदाहृतम्। कथम् ? निष्पन्ना हि प्रकृतिः प्रत्ययविधेर्निमित्तं भवति। न च सरूपशैषिकप्रत्ययविधानकाले तथाविधप्रत्ययानता निष्पन्ना प्रकृतिरस्ति, नापि सरूपमतुबर्थिकप्रत्ययविधानकाले तथाविधप्रत्ययान्ता निष्पन्ना प्रकृतिः, नापीच्छासनि विधीयमान इच्छासनन्तात् प्रकृतिर्लब्धसत्ताकास्ति; इदानीमेव हि `तत्र भवः' (4.3.53) इत्यादिभिर्लक्षणैः सरूपाणां शैषिकादीनां भाव्यमानत्वात्। तस्मादविद्यमानप्रकृतिकत्वात् ते यथोक्तप्रकारायाः प्रकृतेर्न सम्भवन्तीति।।

8. सुप आत्मनः क्यच्। (3.1.8)

आत्मशब्दः परस्य व्यावृत्तिं कुर्वाणो यस्तत्प्रतियोगिनमर्थमाचष्टे स इह परिगृह्यते, न तु योऽन्तर्व्यापारवति पुरुषे भोक्तरि वर्त्तते; स इह गृह्यमाणोऽकिञ्चित्करः स्यात्। तेनेच्छा विशिष्येत, सुबन्तं वा; तत्रेच्छा तावदात्मनः, अन्यस्य न सम्भवत्येवेति तद्विशेषणता तस्यायुक्ता। सुबन्थमप्येषित्रान्येन वा सम्बध्यमानमात्मसम्बद्धमेव भवति; उभयोरपि तयोरात्मसम्बन्धित्वात्। तस्मात् सुबन्तविशेषणत्वमपि तस्यायुक्तमिति परप्रतियोगिवचन एव गृह्यते। एवं हि कपरनिवृत्तिः शक्यते कर्त्तुम्, नान्यथा। अत्रापीच्छायाः सन्निधानात् तयैव व्याप्यमानस्य कर्मत्वं विज्ञायते, इत्याह-- `इषिकर्मणः' इति। आत्मग्रहणेन यदीच्छा विशिष्येत तदेहापि स्यात्-- राज्ञः पुत्रमिच्छतीति। राज्ञोऽपि पुत्र इष्यमाणे सत्यात्मन एवैषितुरिच्छा भवति। तस्मासुबन्तमेवात्मगर्हणेन विशेषयितुं युक्तमिति मत्वाऽऽह-- `एषितुरात्मसम्बन्धिनः' इति। आत्मसम्बन्धित्वं तु सुबन्तस्यार्थद्वारकं वेदितव्यम्। अथैषितुरेवैतत् कुतो लभ्यते ? इच्छया

सन्निधीयमानयेहैषितुः सन्निधापितत्वात्। एतदपि कुतः ? तेन विना तदभावात्। `पुत्रीयति' इति। `क्यचि च' (7.4.33) इतीत्त्वम्।
सब्ग्रहणमिह प्रातिपदिकनिवृत्त्यर्थं वा स्यात् ? धातुनिवृत्त्यर्थं वा ? तत्र प्रातिपदिकनिवृत्त्यर्थं तावन्नोपपद्यते, न हि सुबन्तात् प्रत्ययोत्पत्तौ प्रातिपदिकाद्वा कश्चिद्विशेषोऽस्ति। धातुनिवृत्त्यर्थमपि न युज्यते, ततो विहितस्य सनो बाधकत्वादित्यभिप्रायेणाह-- `सुब्ग्रहणं किम्' इति, `वाक्यान्मा भुत्' इति।
सुब्ग्रहणप्रयोजनमाह-- असति सुब्रग्रहणे वाक्यादपि स्यात्, अतस्तन्निवृत्त्यर्थं कृतं सुब्ग्रहणम्। अथ किमिदानीं न भवितव्यमेव महापुत्रीयतीति ? भवितव्यं यदा समासे कृत एतद्वाक्यं भवति-- महापुत्रमिच्छतीति, यदात्वेतद्वाक्यं भवति-- महान्तं पुत्रमिच्छतीति, तदा न भवितव्यम्। पदसमुदायोपलक्षणञ्च वाक्यग्रहणं वेदितव्यम्। तस्मान्महान्तं पुत्रमित्यतः समुदायात् प्राप्तिराशङ्क्यते, न चैतद्वाक्यम्; अपरिसमाप्त्यर्थत्वात्। किञ्च स्यात् यद्यतः स्यात् ? प्रत्ययार्थे गुणीभूतयोर्महत्पुत्रशब्दयोरसत्येकार्थीभावलक्षणेऽसामार्थ्ये समासो न स्यात्। ततश्चोत्तरपदे विधीयमानं `आन्महतः समानाधिकरणजातीययोः' (6.3.46) इत्यात्त्वं न स्यात्। अथ वा-- प्रत्ययार्थे गुणीभूतस्य पुत्रशब्दस्य पूज्यमानताविशेषणं न स्यादिति `सन्महत्' (2.1.61) इत्यादिना समासो न स्यात्, तदभावादात्त्वमपि न स्यात्। अथ क्रियमाणे सुब्ग्रहणे कस्मादेवात्र न भवति, सुबन्तं ह्येतत् ? नैतत्; प्रत्ययग्रहणपरिभाषया यतः सुबूत्पन्नः सुब्ग्रहणे सति तदादेरेव ग्रहणं भवति। न चेह वाक्यात् सुबुत्पन्नः, किं तर्हि ? अवयवात्। तेन वाक्यादुत्पत्तिर्न भवति। अवयवात् तर्हि पुत्रशब्दात् कस्मान्न भवति? अगमकत्वात्। वृत्तिसमानार्थेन हि वाक्येन प्रत्ययान्तेन भवितव्यम्। यश्चेह महान्तं पुत्रमिच्छतीति वाक्यनार्थः प्रतीयते नासौ प्रत्ययान्तेन। {तथा हि महान्तं पुत्रमिच्छतीति वाक्येनार्थः कञ्चित्-- वाराणसीमुद्रणम्} तथा हि महान्तं पुत्रीयतीत्युक्ते महान्तं कञ्चित् पुत्रमिवाचरतीत्येषोऽर्थो वाक्यार्थद्भिन्नजातीय ए गम्यते। `राज्ञः पुत्र मिच्छति' इति। ननु च सापेक्षत्वादसामर्थ्ये सति न भविष्यति, किमात्मग्रहणेन,कथमसामर्थ्यम् ? सापेक्षमसमर्थं भवति' (चां.प.27) इति वचनात् ? नैतत्। यदा तर्ह्यर्थात् प्रकरणाद्वाऽनपेक्षं निर्ज्ञातं भवति तदा प्राप्नोति। इह च प्राप्नोति-- पापमिच्छति, अघमिच्छतीति। अत्र हि तृतीयस्य परपदस्य प्रयोगमन्तरेणापि परस्येति गम्यते, न हि कश्चिदात्मनः पापमिच्छति। `ककारः' इत्यादि। असति ककारेऽस्य ग्रहणं न स्यात्; `नः क्ये' (1.4.15) इत्यत्र ककारानुबन्धवतो ग्रहणात्। चकारस्तदविघातार्थः। असति चकारे तु सति क्यच्क्यङक्यषो द्वनुबन्धका भवन्तीति सामान्यग्रहणस्य विघातो न भवति। अन्तोदात्तार्थस्तु चकारो न भवति; `घातोः' (6.1.162) इति तस्य सिद्धत्वात्। `वक्तव्यः' इति। व्याख्येय इत्यर्थः। व्याख्यानन्तु-- वेत्यनुवर्त्तमानस्य व्यवस्थितविभाषात्वमाश्रित्य कर्त्तव्यम्। तेन मान्ताव्ययेभ्यएः क्यज्न भवति।
`छन्दसि' इत्यादि। छन्दसि परेच्छायामपि क्यज्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं पुनर्यद्यं क्यचि कृते `अश्वाद्यस्यात्' (7.4.37) इतीत्त्वबाधनार्थमघशब्दस्येत्त्वं शास्ति तज्ज्ञापयति-- छन्दसि परेच्छायामपि क्यज्भवति। न हि कश्चिदात्मनोऽघमिच्छति। `अघायवः' इति। ज्ञापकसुत्रेणात्त्वम्, `क्याच्छन्दसि' (3.2.170) इत्युप्रत्ययः, `जसि च' (7.3.109) इति गुणः, अवादेशः।।

9. काम्यच्च। (3.1.9)

ननु च द्वावप्येतौ क्यच्काम्यचौ सुबन्तात् कर्मण आत्मेच्छायां विधीयेते, तदेकयोग एव कथं न कृत इत्याह--- `योगविभागः' इत्यादि। `सुप आत्मनः क्यच्काम्यचौ' (इत्येक योगे सत्युत्तरत्र द्वयोरप्यनुवृत्तिः स्यात्। ननु च योगविभागेऽप्यानन्तर्यात् काम्यच एवानुवत्तिः स्यात्, न क्यचः ? नैष दोषः; चकारोऽत्र क्रियते क्यचोऽनुकर्षणार्थः; क्यचोऽनुकर्षणस्यैतत्प्रयोजनम्-- उत्तरसूत्रेऽनुवृत्तिर्यथा स्यात् इह योजनाभावात्। काम्यजपि कस्मान्नानुवर्त्ततत इति चेत्, न; योगविभागसामर्थ्यात्। अथ `लशक्वतद्धिते' (1.3.8) इति ककारस्येत्संज्ञा कस्मान्न भवतीत्याह-- `ककारस्येत्संज्ञा' इत्यादि। ननु च लोप एव कार्यम् ? न कार्यम्; लोप इह हि वर्णस्य कार्यार्थो भव्तयुपदेशः, श्रवणार्थो वा। कार्यं तावदिह नास्ति। तत्रि यदि श्रवणार्थो न स्यादुपदेशोऽनर्थकः स्यात्। इदं तर्हि कार्यम्-- अग्निकाम्यतीति गुणप्रतिषेधो यथा स्यात् ? नैतत् प्रयोजनम्, सार्वधातुकार्धधातुयोरङ्गस्य गुण उच्यते। धातोर्विहितश्च प्रत्ययः शेष आर्धधातुकसंज्ञो भवति; न चायं धातोर्विधीयते, किं तर्हि? सुबन्तात्। इदं तर्हि प्रयोजनम्-- उपयट्काम्यतीति, वच्चादिना (6.1.15) संप्रसारणं यथा स्यात् ? नैतदपि; यस्मात् तत्र यजादिभिः किद्विशिष्यते-- यजादीनां यः किदिति। कश्च यजादीनां कित् ? यो यजादिभ्यो विहितः, न चायं तथा विहितः। अभ्युपगम्यापि प्रयोजनं परीहारान्तरमाह-- `चकारादित्वात्' इति। एवं मन्यते-- क्रियते विन्यास एवम्, द्विचकारो निर्देशः, सुप आत्मनः क्यच्च काम्यच्चेति; स इत्संज्ञकश्चकारः ककारस्यत्संज्ञापरित्राणार्थो भविष्यतीति। अथ द्वितीयश्चकारः किमर्थः, यावता `धातोः' (6.1.162) इत्येवमन्तोदात्तत्वं सिद्धम् ? इह पुत्रकाम्यिष्यीतति सतिशिष्टस्वरमपि बाधित्वा चित्करणसामर्थ्यात् काम्यच एव स्वरो यथा स्यात्। `उपयट्काम्यति' इति। `विजुपे छन्दसि' (3.2.73) इति विच्, उपयजमिच्छतीति काम्यच्, व्रश्चादिना (8.2.36) षत्वम्, तस्य जश्त्वं डकारः, तस्यापि `वावसाने' (8.4.56) इति चर्त्वं टकारः।।

10. उपमानादाचारे। (3.1.10)

`क्यजनुवर्त्तते न काम्यच्' इति। अत्र च कारणं पूर्वमुक्तम्। आचारक्रियायाः प्रत्ययार्थत्वात् तदपेक्षयवोपमानस्य कर्मता; पूर्ववत् प्रत्यासत्तेः।
`अधिकरणाच्च' इत्यादि। अधिकरणादाचारे क्यज्भवतीत्येतदर्थरूपं व्याख्येमित्यर्थः। व्याख्यानन्तु पूर्ववच्चकारकरणमनुवर्त्त्य तस्यानुक्तसमुच्चयार्थत्वमाश्रित्य कर्त्तव्यम्।।

11. कर्त्तु- क्यङ् सलोपश्च। (3.1.11)

सलोपसन्नियोगेन चायं क्यङ विधीयते। तेन यत्रैव सलोपस्तत्रैव स्यात्-- पयायत इत्यादौ, इह तु न स्यात्-- काकः श्येनायत इत्यादौ। एकं हीदं वाक्यम्,चकारश्च समुच्चये, तेनैतदुक्तं भवति-- क्यङसलोपौ भवत इति। तथा च युगपदनयोर्विधानात् सलोपाभावे क्यङा न भवितव्यम्। युगपदनयोर्विधाने हि नान्यतराभावे कार्यमुपयुज्यते, यथा-- `स्थाध्वोरिच्च' (1.2.17), इत्यत आह-- `अन्वाचशिष्टः' इत्यादि। एतदनेन हि। नायं समुच्चये चकारः, किं तर्हि ? अन्वाचये। तत्र द्वे वाक्ये भवतः-- कर्त्तुः भवति सर्वत्र, यत्र त्वस्ति सकारस्तत्र तस्यापि लोपः। तत्राद्येन वाक्येन सलोपमनपेक्ष्य प्राधान्येन विधीयमानः क्यङ सलोपविधावपि प्रवर्त्तते। `श्येनायते' इति। `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः।
`सलोपविधावपि वाग्रहणं सम्बध्यते' इति। अन्यथा पयस्यत इति न सिध्येत्। `सा च व्यवस्थितविभाषा' इति। अन्यथौजसोऽप्सरसोरपि विभाषा सलोपः स्यात्। `ओजसोप्सरसोर्नित्यं पयसस्तु विभाषया' (वा.185-- (जै.सू.2.1.91) इति यदुक्तम्, सा च व्यवस्थितविभाषा भवतीति, तदनेन विस्पष्टीकरोति। अथ हंसायते सारसायत इत्यत्र सलोपः कस्मान्न भवतीत्याह-- `सलोपविधौ च' इत्यादि। यदि सलोपविधावपि कर्त्तुरित्येषा पञ्चमी स्यात तदा हि `अलोऽन्त्यस्य' (1.1.52) इत्यस्यानुपस्थानात् यत्रतत्रस्थस् सलोपो भवन्निहापि स्यात्। न च सलोपविधौ कर्त्तुरित्येषा पञ्चमी, किं तर्हि ? षष्ठी। यस्मादर्थाद्विभक्तिपरिणामो भवतीति स्थानषष्ठी सम्पद्यते। स्थानषष्ठ्यां च `अलोऽन्त्यस्य' (1.1.52) इत्युपस्थानेऽन्त्यस्यैव लोपेन भवितव्यम्। तेन हंसायत इत्यादौ न भवति लोपः।
`आचारे' इत्यादि। क्यङविषयोपलक्षणार्थम्; तेन क्यङपवादः क्विब्विधीयते। अत्र चावगल्भादीनामनुदात्तमकारमनुबन्धमासज्य निर्देशादवगल्भत इत्यात्मनेपदं भवति, पुनरवल्भादिभ्यो विकल्पेन क्विब् विधीयते, यावता `{गल्भ धार्ष्ट्ये-- धा.पा.} अवगल्भ आ धृष्टे' (धा.पा.392), `क्लीबृ {अधार्ष्ट्ये-- धा.पा.) मदे' (धा.पा.381), `हुडृ होडृ गतौ' (धा.पा.352, 354) इत्यात्मनेपदिनः, तत्रैतेभ्यो यदा लकारस्तदावगल्भत इत्यादि भविष्यति, यदा तु कृतमुत्पाद्याचं प्रातिपदिकानि कृत्वा क्यङुत्पाद्यते तदावगल्भायत इति भविष्यति ? इदं प्रयोजनं विकल्पेन क्विब्विधानस्य-- अवगल्भाञ्चक्र इति `कास्प्रत्ययादाममन्त्रे' (3.1.35) इत्यां यथा स्यात्। अन्यथा ह्यप्रत्ययान्तात् प्रत्ययान्ताद्धातोरामुच्यमानो न स्यात्।
`सर्वप्रातिपदिकेभ्यः' इति। तरप्यवगल्भाद्यनुकर्षणं कर्त्तव्यम्-- अनुबन्धासञ्जनार्थम्। इह चाचारे क्विब् वेत्यपेक्षते। तेन सर्वप्रातिपदिकेभ्य आचार एव क्विब् भवतीति वाक्यं निष्पद्यते। अथ किमर्थं ककारपकारौ क्विपोऽनुबन्धावासज्येते, यावताककारस्य गुणप्रतिषेधः प्रयोजनम्, न चेह गुणप्राप्तिरस्ति ? क्विपो धातोरित्यविधानात् सार्वधातुकत्वाभावात्। सार्वधातुकार्धधातुकयोर्हि गुण उच्यते। पकारस्य चानुदात्तत्वं प्रयोजनं, तच्च क्विपो न सम्भवति; अनच्कत्वात्, सर्वलोपित्वाच्च `वेरपृक्तस्य' (6.1.67) इति। तर्हि द्वावेतौ सामान्यग्रहणाविघातार्थौ, न; अन्यतरेणैव सामान्यग्रहणाविघातस्य सिद्धत्वात। अन्यथा विज्विटोरपि तदर्थोऽनुबन्धः कर्त्तव्यः स्यादिति चिन्त्यमेतत्।।

12. भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः। (3.1.12)
`भुवि' इति। भवनं भूः, सम्पदादित्वाद्भावे क्विप्। इह हल्ग्रहणेन यथासम्भवं भृशादयो विशिष्यन्ते, विशेषेणेन न तदन्तविधिर्भवतीत्याह-- `हलन्तानाञ्च' इत्यादि। इहापि पूर्ववदन्वाचयशिष्टो हलो लोपः, तेन तदभावेऽपि क्यङ भवत्येव। हलो लोपविधौ भृशादिभ्य इति स्थानषष्ठी सम्पद्यते, अर्थाद्विभक्तिविपरिणामात्। तत्र `अलोऽन्त्यस्य ' (1.1.52) इति नियमे सति भृशायत इत्यादावहलन्त्यस्य हलो लोपो न भवति। ननु च भृशादीनां बहुत्वात् तत्सम्बन्धेनाच्विभ्य इति बहुवचनेन भवितव्यम्, तत्कथमच्वेरित्येकवचनेन निर्देश इत्याह--- `अच्वेः' इत्यादि। भृशादच्वेः, शीघ्रादच्वेरिति प्रत्येकमभिसम्बध्यते। तस्मादेकवचनं न्याय्यम्।
`किमर्थं पुनः ' इत्यादि। अच्वेरित्यधिकृत्य प्रश्नः। कस्मान्न कर्त्तव्यमित्याह-- `यावता' इत्यादि। `अभूततद्भाव' इत्यादिना भवतिप्रयोगे च्विर्विधीयते। तत्र तेनैवोक्तार्थत्वाच्च्व्यन्तेभ्यः क्यङ न भविष्यति, `उक्तार्थानामप्रयोगे' (व्या.प.60) इति कृत्वा। ननु चानुप्रयोगं बाधित्वा क्यङेव स्यात् ? नैतदस्ति; अनवकाशा हि विधयो बाधका भवन्ति, सावकाशश्च क्यङ। क्व ? अच्च्व्यन्ता ये भुशादयस्तत्र; अच्व्यन्तात् च्वेर्विकल्पेन विधानात्। तत्राच्वेरित्यनुवर्त्तमाने ज्व्यन्तेषूभयप्रसङ्गे परत्वादनुप्रयोगेणैव भवितव्यम्, अत एवाह-- `तत्सदृश' इत्यादि। `नञिवयुक्तमनयसदृशाधिकरणे तथा ह्यर्थगतिः' (व्या.प.65) इति च्व्यन्तसदृशाभृशादयः कथं नाम प्रतीयेरन्नित्येवर्थोऽच्वेरिति प्रतिषेधः। तत्सांदृश्यं च्व्यन्तस्याभूततद्भावविषयत्वात् अर्थकृतमेवाश्रीयते, न शब्दादिकृतमित्याह-- `अभूततद्भावविषयेभ्यः' इत्यादि। इह भृशादिषु कैश्चिन्मनस्प्रभृतयः सोपसर्गाः पठ्यन्ते, तेभ्यः सोपसर्गेभ्य एव प्रत्ययः स्यात्। ततशचोदमनायतेति सोपसर्गस्याङ्गसंज्ञात्वादुपसर्गात् प्रागडागमः स्यात्। सुमनाय्य गत इत्यत्र सोपसर्गस्य क्वान्तेऽनुप्रवेशात् तद्व्यतिरिक्त उपसर्गो नास्तीति समासो न स्यात्, ततश्च लब्न स्यात् ? नैतदस्ति; यथैव हि प्रकृर्त्तुमैच्छदिति सोपसर्गस्यापि कर्मत्वे धातुग्रहणेनोपसर्गान्निष्कृष्य धातुमात्रात् प्रत्ययो भवति, तथेहापि भविष्यति। ननु तत्र धातुग्रहणमस्तीति चेत् ? इहापि सुब्ग्रहणमनुवर्त्तत इति हेतुः। सुमनस् इत्यादीनि सुबन्तसमुदायानि। तेन सुबन्तसमुदायात् क्यङ। लङ कस्मान्न भवति? उच्यते-- लङविधावपि धातुग्रहणमनुवर्त्तते। अथ `लोपः' (3.1.11) इत्यनुवर्त्तमाने पुनर्लोपग्रहणं किमर्थम् ? सकारनिवृत्त्यर्थम्। पूर्वकं हि लोपग्रहणं सकारेण सम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्, ततश्च तस्यानन्तस्यापि लोपः प्रसज्येत; इतरथा हि तदनुवृत्तिरपार्थिका स्यात्।।

13. लोहितादिडाज्भ्यः क्यष्। (3.1.13)

`लोहितयाते' इति। `वा क्यषः' (1.3.90) इत्यात्मनेपदम्। `पटपटायते' इति। पटच्छब्दात् `अव्यक्तानुकरणात्' (5.4.57) इति डाच्। `डाचि बहुलं द्वे' (वा.888) इति द्विर्वचनं डाचः प्रागेव भवति; डाचीत्यस्य हि विषयसप्तमीत्वात्। डाचि कृते टिलोपः। द्विर्वचने योऽच्छब्दस्तदवयवस्य तकारस्य `नित्यमाम्रेडिते डाचि' (6.1.100) इति पररूपम्-- पकारः। `लोहितडाज्भ्यः क्यष्वचनम्' इत्यादि। लोहितादिसूत्रेण यदेतत् क्यषो विधानं तल्लोहितात्, डाजन्तेभ्यश्चेत्यर्थः। ननु चान्यान्यपि नीलादिशब्दरूपाणि लोहितादिषु पठ्यन्ते, अतस्तेभ्योऽपि क्यषा भवितव्यमित्याह-- `भृषादिषु' इत्यादि। लोहितशब्दादितराणि यानि तानि भृशादिषु द्रष्टव्यानि। यस्त्विह तेषां पाठः, स प्रमादतः। अर्वाक्कालभावित्वादनार्ष इत्यभिप्रायः। यदि तर्हि भृशादिष्वितराणि पठ्यन्ते, एवमादिशब्दस्यानर्थक्यम्, न हि किञ्चिदस्ति यत् तेनोपादीयेत ? अत आह-- `यानि' इत्यादि। यानि प्रामादाल्लोहितादिषु पठ्यन्ते तेषां भृशादिषु पाठो वेदितव्यः। न त्वपरिपठितानां वर्मादीनाम्। अतस्तेषामादिग्रहणेन ग्रहणे सति क्यषेव भवति। `वर्मायते' इति। `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नलोपः, `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः। निद्रादयोऽत्र शब्दाः पठ्यन्ते, ते यद्यपि धरममात्रवचनास्तथापि क्यष्वृत्तिविषये तद्वपि द्रव्ये वर्त्तन्ते; शब्दशक्तिस्वाभाव्यात्। `निद्रायते' इति। अनिद्रावान् निद्रावान् भवतीत्यर्थः। कथं पुनरपरिपठितानां लोहितादित्वं भवतीत्याह-- `आकृतिगणश्चायम्' इति। कथमेतज्ज्ञायत इत्याह-- `तथा च' इत्यादि। केयति सामान्यग्रहणार्थमित्याह-- `नः क्ये' इति। तत्रैतत् स्यात्। परिपठितानां मध्ये यो नकारान्तस्तस्य पदसंज्ञार्थः ककारोऽनुबध्यत इत्याह-- `न हि' इत्यादि। कथं पुनः क्यषा योगे डाज्भवति, यावता `कृभ्वस्तियोगे' इत्यनुवृत्तेः करोत्यादियोगे डाज् विधीयते, न क्यषा ? इत्याह--- `{कृभ्वस्तिभिरेव' इति मुद्रितः पाठः}कृभ्वस्तिभिरिव' इत्यादि। यदेतत् डाजन्तेभ्यः क्यषो विधानमेतदेव ज्ञापयति-- यथा कृभ्वस्तिभिर्योगे डाज्भवति तथा क्यषापीति। अन्यथा डज्ग्रहणमनर्थकं यदि क्यषा योगे डाज् न स्यात्। ननु च यदा भवतियोगे डाज्भवति तदा तदन्तात् क्यष् भविष्यति, त्तकुत आनर्थक्यम् ? नैतत्; न हीदानां क्यष् भवितुमर्हति, भुवो भवतिनैवोक्तार्थत्वात्। `अच्वेरित्यनुवृत्तेरभूततद्भावे क्यष्विज्ञायते' इति। मञिवयुक्तन्यायेनेति भावः। यथैव हि पूर्वसूत्रेऽच्वेरिति प्रतिषेधादमुना न्यायेनाभूततद्भावविषये क्यङ विधीयते, तथेहापि क्यषिति।।

14. कष्टाय क्रमणे। (3.1.14)

`क्यङनुवर्त्तते, न क्यष्' इति। क्यङ एव स्वरितत्वात्। `चतुर्थी समर्थात्' इति कष्टायेति निर्देशादेव चतुर्थी समर्थविभक्तिर्लभ्यते, अतस्तत्समर्थ्यात् प्रत्ययो विज्ञायते। क्रमणशब्दोऽयमस्ति पादविहरणे, असति चानार्जवे; तत्र क्रमण इत्यविशेषाभिधाने पादविहरणे प्रत्ययो मा विज्ञायीति विशेषणमुपात्तम्। जिह्मम्, पापम्, अनार्जवमित्यनर्थान्तरम्। ततोऽनार्जव इत्यनेन क्रमेण विशेषिते सत्यानार्जवलक्षणं यत्क्रमणं तत्रैव प्रत्ययो विज्ञायते, न क्रमणमात्रे। एतच्च `धातोः कर्मणः' (3.1.7) इत्यादेः सूत्राद्वाग्रहणस्यानुवर्त्तमानस्य व्यवस्थितविभाषात्वाल्लभ्यते। `कष्टाय क्रमणे' इति तादर्थ्ये चतुर्थी। `कष्टायते' इति। कष्टाय क्रमणमनार्जवं करोतीत्यर्थः।

`अत्यल्पमिदमुच्यते' इति। सर्वलक्ष्यासंग्रहात्। कथं तर्हि वक्तव्यमित्याह- `{सत्त्रकक्ष' इति मुद्रितः पाठः} सत्रकष्ट' इत्यादि। अस्मिन् न्यसान्तरे यद्यपि समर्थविभक्तिनिर्दशो नास्ति, तथापि सुबधिकारात् तत्समर्थयोग्या विभक्तिरध्याहर्त्तव्या। सत्रं चिकीर्षतीति सत्त्रायते, पापं कर्त्तुमिच्छीत्यर्थः।

`अजः कष्टं क्रामति' इति। क्रमिरत्र पादविहरणे। कष्टमिति कर्मपदमेतत्। कष्टं देशं गहनं क्रामतीत्यर्थः। अथ वा-- कष्टमिति क्रियाविशेषणमेतत्। अजः कष्टं यथा भवति तथा सञ्चरतीत्यर्थः। क्रियाविशेषमपक्षेऽपि कष्टमिति द्वितीयान्तमेतत्। प्रसिपादितं हि `करणे च स्तोकाल्प' (2.3.33) इत्यादौ सूत्रे-- क्रिया विशेषाणानां कर्मतेति। तेनात्र सूत्रे प्रत्युदाहरणे द्वितीयान्तस्य कष्टशब्दस्य निर्देशः। मूलोदाहरणेष्वपि द्वितीया समर्थविभक्तिरध्याहर्त्तव्येति विज्ञायते।।

15. कर्मणो रोमन्थतपोभ्यां वर्त्तिचरोः। (3.1.15)

कर्मण इति पञ्चमी; रोमन्थतपोभ्यां पञ्चम्यन्ताभ्यां सामानाधिकरण्यात्। सत्यपि ताभ्यां सामानाधिकरण्ये द्विवचनं न भवति, प्रत्येकं वाक्यपरिसमाप्तेः। `वर्त्तिचरोः' इति। वर्त्तनं वर्त्तिः, ण्यन्तात् स्त्रियां क्तिन्। ननु च क्तिना न भवितव्यम्, `ण्यासश्रन्थो युच्' (3.3.107) इति युचा बाधितत्वात्। अस्मादेव निपातनात् क्तिन् भविष्यतीत्यदोषः। चरणं चरिति सम्पदादित्वात् क्विप्।

`हनुचलने' इत्यादि। अभ्यवहृतस्य यत् पुनरुद्गीर्य चर्वणं हनुचलनम्। अत्रार्थे रोमन्थशब्दात् क्यङ भवतीत्येतदर्थरूपं व्याख्येयम्। व्याख्यानं तु वाग्रहणमनुवर्त्त्य तद्व्यवस्थितरकविभाषात्वमाश्रित्य कर्त्तव्यम्। वाग्रहणं त्ववश्यमनुवर्त्तयितव्यम्, रोमन्थं वर्त्तयतीति वाक्यं यथा स्यात्। `कीटो रोमन्थं वर्त्तयति' इति। उद्गीर्णं वहिर्निरस्तमवगीर्णं वा पृष्ठान्तेन निर्गतं रोमन्थाख्यं द्रव्यं वर्त्तयति, गुटिकां करोतीत्यर्थः। तेनात्र हनुचलनं न विद्यते। मूलोदाहरणे तु विद्यत एव, तथा हि रोमन्थायत इति। अभ्यवहृतं पुनराकृष्य चर्वयीत्यर्थः। तच्चर्वणं हनुचलनात्मकमेव।

अन्ये तु हनुचलने प्रत्ययमन्यथा प्रतिपादयन्ति। अस्ति चायं रोमन्थशब्दः क्रियापदार्थको यो रोमन्थशब्दात् प्रातिपदिकाद्धात्वर्थ इत्यादिना णिचमुत्पाद्य घञन्तो व्युत्पाद्यते, स ह्यभ्यवहृतस्य द्रव्यस्य पुनराकृष्य यच्चर्वणं तत्र वर्तते। अस्ति च द्रव्यवचनोऽयं य उद्गीर्णमवगीर्णं वा रोमन्थक्रियाविशिष्टं द्रव्यमाह। तत्र यः क्रियावचनस्तस्येदं ग्रहणम्, यतो द्रव्येऽप्ययं वर्त्तमानः क्रियाद्वारेणैव वर्त्तते। अतो द्रव्ये गौणः, क्रियायां मुख्यः; गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः (व्या.प.4)। तेन क्रियावचनादेव भवति, न द्रव्यवचनादिति।

`तपसः परस्मैपदं च' इति। वक्तव्यमित्यपेक्षते। ङित्त्वादात्मनेपदे प्राप्ते परस्मैपदं वक्तव्यम् = व्याख्येयम्। व्याख्यानं तु `अनुदात्तङितः' (1.3.12) इति सूत्रे

`नपुंसकमनपुंसकेन' (1.2.69) इत्यादेः सूत्रान्मण्डूकप्लुतिन्यायेनानुवर्त्तमानस्यान्थतरस्यांग्रहणस्य व्यवस्थितविभाषात्वमाश्रित्य कर्त्तव्यम्। तेन तपसः क्यङन्तादात्मनेपदं न भवति। तदभावात् `शेषात् कर्त्तरि परस्मैपदम्' (1.3.78) इति परस्मैपदमेव भवति।

16. बाष्पोष्मभ्यामुद्वमने। (3.1.16)

`फेनाच्चेति वक्तव्यम्' इति। फेनशब्दाद्वमनेऽर्थे वर्त्तमानात् क्यङ भवतीत्येतदर्थरूपं व्याख्येयम्। व्याख्यानं तु-- `भृशादिभ्यः' (3.1.12) इत्यतः सूत्राच्चकारमनुक्तसमुच्चयार्थमनुवर्त्त्य कर्त्तव्यम्।।

17. शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे।

करणशब्देनात्र क्रियोच्यते, न साधकतमम्। यस्मात् `कर्मणः' (3.1.15) इत्यधिकाराच्छब्दादिभ्यः कर्मभ्य एव प्रत्ययेन भवितव्यम्। तत्र यदि साधकतमे प्रत्ययः स्यात् प्रकृतिप्रत्ययावसम्बद्धौ स्याताम्, क्रियापेक्षत्वाच्च कर्मत्वस्य क्रियाया अभावे कर्मत्वं न स्यात्। तस्मात् क्रियावचन एव करणशब्दं निश्चित्याह-- `करणे करोत्यर्थे'इति।

`सुदिन' इत्यादि। सुदिनादिभ्यः कर्मभ्यः करमए करोत्यर्थे क्यङप्रत्ययो भवतिीत्येतदर्थरूपं व्याख्येयम्। व्याख्यानं तु-- इहापि तमेवानुक्तसमुच्चयार्थ चकारमनुवर्त्त्य कर्त्तव्यम्। अत एवानुक्तसमुच्चयार्थाच्चाकारादटादीनामपि ग्रहणम्। तेनटायत इत्याद्यपि सिद्धं भवति।

`अटाट्ट' इत्यादि। अटादीनां ग्रहणमुपादानमित्यर्थः। अयञ्च `तत्करोति' (वा.200) इति णिचि प्राप्त आरम्भः; सोऽपीष्यते-- शब्दयति, वैरयतीति। तस्मादेतदर्थापि चकारानुवृत्तिर्वेदितव्या।।

18. सुखादिभ्यः कर्त्तृवेदानायाम्। (3.1.18)

`वेदनायामर्थेऽनुभवे' इति। प्रत्यक्षेण वस्तुन उपलब्धिः = अनुभवः। ननु च वेदनाशब्द उपलब्धिमातर्वचनो लोके दृष्टः, तत्कथमेष विशेषो लभ्यते ? यथा लभ्यते तथोत्तरसूत्रे प्रतिपदायिष्यामः। कर्त्ता कारकम्, कारकञ्च क्रियापेक्षं क्रियाया एव भवति। वेदना चेह क्रिया श्रूयते, नान्या। तस्मात् तस्या एव कर्त्ता विज्ञायते। तस्याश्च सो वेदयिता स एव विज्ञायते। तस्मादविशेषाभिधानेऽपि वेदयितरि कर्त्तरि वर्त्तमानः कर्त्तृशब्दः गृह्यत इति-- `वेदयितुश्चेत् कर्त्तुः' इत्यादि। एतेन कर्त्तृग्रहणेन सुखादयो विशिष्यन्ते, न तु वेदनेति दर्शयति। यदि कर्त्तृग्रहणेन वेदना विशिष्येत-- कर्त्तुः सम्बन्धिनी चेद्वेदना भवतीति, तदेहापि स्यात्--- देवदत्तस्य सुखं वेदयति प्रसाधक इति। प्रसाधकस्यापि सम्बन्धिनी वेदना भवत्येव, तथा हि सोऽपि तस्याः कर्त्ता। यथैव हि प्रसाध्यः सुखं वेदयते तथा प्रसाधकोऽपि। एतावांस्तु विशेषः-- एकः प्रत्यक्षेण वेदयते, अपरश्चानुमानेन; सर्वथा हि तदकर्त्तृकत्वे वेदयत इत्येतन्न स्यात, न ह्यकर्त्ता वेदयत इत्युच्यते। तस्मात् सुखादीनामेव कर्त्तृग्रहणं विशेषणं युक्तिमिति भावः। ननु च सुखादिविशेषणत्वेऽपि स एव दोषः, यस्मात् प्रसाधकस्यापि जन्यजनकभावलक्षणेन सम्बन्धेन सुखादयः सम्बन्धिनो भवन्ति ? नैतत्; सर्वत्रैव हि कर्त्तृसम्बन्धिनः सुखादयः, क्रियते चेदं कर्त्तृग्रहणम्। अतः कर्त्तृग्रहणसामर्थ्याद्विशिष्टो यः कर्त्ता सुखादीनामाश्रयः समवायिकारणं स एव गृह्यते। तेनाश्रयाश्रयिभावेन सम्बन्धेन कर्त्तृसम्बन्धिभ्यः सुखादिभ्यः प्रत्ययो विज्ञायते। न च प्रसाधकः सुखादीनां समवायिकारणम्, किं तर्हि ? निमित्तकारणम्। सुखादिसमवायिकारणस्य कर्त्तुर्ये सुखादय आश्रयाश्रयिभावेन सम्बन्धिनस्ते प्रत्यक्षेणोपलभ्यन्ते। तेन तदुपलब्धिरनुभवस्वभावा भवतीति युक्तमुक्तम्-- वेदनायामर्थेऽनुभव इति। यदि तर्हि कर्त्तृग्रहणेन सुखादयो विशिष्यन्ते, न वेदना, ततश्च कर्त्तृवेदनायामिति षष्ठीसमासो न प्राप्नोति, असामर्थ्यात् ? सौत्रत्वान्निर्देशस्य सत्यप्यसामर्थ्ये समासो भविष्यतीत्यदोषः। अथ वा-- असमास एव, षष्ठ्यास्त्वश्रवणम्; `सुपां सुलुक्' (7.1.39) इति लुप्तत्वात्।।

19. नमोवरिवश्चित्रङः क्यच्। (3.1.19)

`करणविशेषे पूजाद्वौ' इति। आदिशब्देन परिचर्याश्चर्ययोर्ग्रहणम्। `नमसः' इत्यादिनाऽनन्तरस्योक्तार्थस्य विषयविभागं दर्शयति। एष चार्थो यद्यपि करण इति करणसामान्यमनुवर्त्तते, तथाप्यभिधानशक्तिस्वाभाव्यल्लभ्यते विनापि वचनेन, यथा--- पचादीनां विक्लेदादिषु वृत्तिः, बहुव्रीहेश्च मत्वर्थे। `नमस्यति देवान्' इति। ननु च नमस्यतिशब्दे नमःशब्दोऽस्ति, अतस्तद्योगे `नमः स्वस्ति' (2.3.16) इत्यादिना चतुर्थ्या भवितव्यम् ? नैतदस्ति; `अर्थवद्ग्रहणे नानर्थकस्य' (व्या.प.1) इत्यर्थवतो नमःशब्दस्य कर्त्तुमशक्यत्वात्। अथ वा-- `उपपदविभक्तेः कारकविभक्तिर्बलीयसी' (चां.प.69) इति द्वितीयैव भवति। उपपदसम्बन्धनिरपेक्षत्वात् कारकविभक्तेर्बलीयस्त्वम्। उपपदविभक्तेस्तु पदान्तरसापेक्षत्वाद्दुर्बलत्वम्। `नमस्यति' इति। नमस्कारं करोतीत्यर्थः। `वरिवस्यति'। परिचरीत्यर्थः। `चित्रीयते' इति। विस्मापयत इत्यर्थः।।

20. पुच्छभाण्डचीवराण्णिङ्। (3.1.20)

`पुच्छात्' इत्यादि। उदसनम् = ऊर्ध्वक्षेपणम्, पर्यसनम् = परितः क्षेपणम्। यदोदसने प्रत्ययस्तदा तस्य द्योतनार्थ उच्छब्दः प्रयुज्यते--- `उत्पुच्छयते' इति। यदा पर्यसने प्रत्ययस्तदा परिशब्दः-- `परिपुच्छयते' इति। `णाविष्ठवत् कार्यम् प्रातिपदिकस्य' (वा.813) इतीष्ठवद्भाववाट्टिलोपः। समाचयनम्-- राशीकरणम्। अर्जनम् = अलब्धस्य लाभः। परिधानम् = आच्छादनम्।।

21. मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्। (3.1.21)
`प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (धा.पा.ग.सू.186) इत्यनेन मुण्डादिभ्यः सिद्धो णिच्। अयञ्च तस्यैव प्रपञ्चः। यद्यपि तस्य तत्करोतीत्यादिः प्रपञ्च उक्तः, तथापीह मन्दबुद्धीनामनुग्रहाय पुनरुच्यते। `तन्निवृत्तौ वा' इति। भोजननिवृत्तौ। `पयो व्रतयति' इत। पयो भुङ्क्त इत्यर्थः। `वृषलान्नं व्रतयति' इति वृवलान्नं न भुङ्क्त इत्यर्थः। `हलिं गृह्णाति हलयति, कलिं गृह्णाति कलयति' इति। ननु चेह हलकलशब्दयोः एतेनैतद्दर्शयति-- सूत्रेऽपि हलिकल्योरेव ग्रहणम्, तयोस्त्वत्त्वनिपातनं कृतम्, `सन्वल्लघुनि' (7.4.93) इत्यादिना सन्वद्भावो मा भूदिति। अतो युक्तं हलिकल्योर्ग्रहणम्। तथा हि-- नात्र णिज् दुर्लभः, गणसुत्रेणैव सिद्धत्वात्। केवलं प्रपञ्चार्थमिदमुच्यते। स च प्रपञ्चो हलिकल्योरपि ग्रहण उपपद्यत एव। अयन्तु विशेषः-- अकारान्तयोर्ग्रहणे सतीकारान्ताभ्यामपि गणसूत्रेणैव णिच् प्राप्नोति, तत्र कृते सतीष्ठवद्भावेन टिलोपः प्राप्नोति, `अचो ञ्णिति' (7.2.115) इति वृद्धिश्च,उभयोरपि तयोरनित्यत्वम्। तथा हि, टिलोपस्य सत्यपि कृताकृतप्रसङ्गित्वे शब्दान्तरप्राप्त्याऽनित्यत्वम्। तथा हि, कृतायां वृद्धावैकारस्य प्राप्नोति, अकृताय◌ान्त्विकारस्य; वृद्धेस्तु टिलोपे सत्यप्राप्त्याऽनित्यम्। अप्राप्तिस्त्वनजन्तत्वात्। उभयोरनित्ययोः परत्वाद्वृद्धिः, तस्यां कृतायां टिलोपः, तत्राप्यग्लोप्यङ्गं न भवति। तथा च सति `सन्वल्लघुनि' (7.4.93) इति सन्वद्भावेऽभ्यासस्येत्वे `दीर्घो लघोः' (7.1.94) इति दीर्घत्वे च अचीकलत्, अजीहलदित्यनिष्टं रूपं प्रसज्येत। हलिकलिशब्दयोस्तु कृतात्त्वयोर्ग्रहणे सति यद्यपि परत्वाद्वृद्धिर्भवति, तथापि सत्यामपि तस्यामगेव लुप्यत इत्यग्लोप्यङ्गं भवति। ततश्च सन्वद्भावात् अचकलत्, अजहलदितीष्टं रूपं सिध्यति। तत्र ययोर्ग्रहणे सतीष्टं सिध्यति तयोरेव ग्रहणम्, न तु ययोर्ग्रहणेऽनिष्टं प्राप्नोति। नह्यनिष्टार्था शास्त्रे प्रक्लृप्तिर्युक्ता।।

22. धातोरेकाचो हलादेः क्रियासमाभिहारे यङ्। (3.1.22)
`एकाच्' इति। बहुव्रीहिरयं न तत्पुरुषः; `हलादेः' इति विशेषणात्। `क्रियासमभिहारे वर्त्तते' इति। एतेन क्रियासमभिहारस्य प्रकृतिविशेषणत्वं दर्शयति। `तस्माद्यङ्प्रत्ययो भवति' इति। क्व ? `अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति'(पु.प.पा.90) इति तत्रैव क्रियासमभिहारे। विप्रकीर्णानामकेत्र राशीकरणं समुदायभावापत्तिर्मुख्यः समभिहारः। स च क्रियागामुत्पन्नापवर्गिणीनां सहानवस्थानादेकेन च धातुनाऽनकस्याः क्रियाया युगपदनभिधानान्न सम्भवतीति गौणं समभिहारं दर्शयतुमाह--`पौनः पुन्यम्' इत्यादि। उभयमपि ह्येतत् समभिहारसादृश्यादुपचारेण समभिहारे व्यपदेशमासादयति। यथा द्रव्याणां समाहृतानां द्रव्यान्तरैरव्यपेतानां समाहारो भवति, तथा क्रियाणामपि क्रियान्तरैरव्यपेतानामेतदुभयं भवतीति सादृश्यम्। क्रिया च द्विप्रकारा--- प्रधाना,अप्रधाना च । तत्र प्रधानक्रिया विक्लेदनादिः, गुणक्रिया चाधिश्रयणादिः। तत्र यः फलान्तं पाकमवसाय्य क्रियान्तरमनारभ्य पुनः पाकमेवारभते स प्रधानक्रियां समभिहरति, तासां पौनःपुन्यं समभिहारः। यस्त्वधिश्रयणादीरेव क्रियाः क्रियान्तरैरव्यपेताः साकल्येन करोति स गुणक्रियाः समभिहरति, तासां भृशार्थता समभिहारः। फलातिरेको वा भृशार्थता। तथा हि--- यो ज्वलनफलमवाप्य ज्वलति, दीप्यते वा, स जाज्वल्यते देदीप्यते इति चोच्यते। `पापच्यते' इति। `सन्यङोः' (6.1.9) इति द्विर्वचनम्, `दीघोऽकितः' (7.4.83) इति दीर्घः। अत्र `क्रियासमभिहारे द्वे भवतः' (वा.886) इति द्वित्वं न भवति; क्रियासमभिहारे विधीयमानस्य यङः स्वयमेव तदभिव्यक्तौ सामर्थ्यात्। यस्तु `क्रियासमभिहारे लोड् लोटो हिस्वौ वा च तध्वमोः' (3.4.2) इति लोड् वक्ष्यते स क्रियासमभिहारव्यक्तौ स्वयमशक्त इत्यपेक्षते द्विर्वचनम्। न ह्यसौ क्रियासमभिहारे विधीयते, किं तर्हि ? कर्मादिषु; `लः कर्मणि च भावे चाकर्मकेभ्यः' (3.4.69) इति वचनात्। तेन तस्य प्रयोगे द्विर्वचनं भवत्येव-- `लुनीहि लुनीहीत्येवायं लुनाति। `देदीप्यते' इति। `गुणो यङ लुकोः' (7.4.82) इति गुणः।
`भृशं प्राटति' इति। असति धातुग्रहणे, एकाज् यः शब्दो हलादिः क्रियासमभिहारे वर्त्तते तस्माद्यङ प्रत्ययो भवतीत्ये। सूत्रार्थः स्यात्। ततश्च प्रपूर्वादटतेर्यङ प्रसज्येत; प्रपूर्वस्याटतेर्यः समुदायस्तस्य यथोक्तविशेषणविशिष्टत्वात्। धातुग्रहणे सत्येष प्रसङ्गो न भवति। न ह्ययं धातुः, किं तर्हि ? धातूपसर्गसमुदायः। `जागर्ति' इति। आदादित्वाच्छपो लुक्। अथ क्रियाग्रहणं किमर्थम्, न समभिहार इत्येवोच्येत ? नैवम्। साधनसमभिहारेऽपि स्यात्। नैतदस्ति, प्रकृतिविशेषणं ह्येतत्। न च प्रकृतेः साधनसमभिहारे वृत्तिः सम्भवति। अपि च `करणे' (3.1.17) इति वर्त्तते, तेन समभिहारो विशेषयिष्यते-- करणसम्बन्धी चेत् समभिहारः, तत् कुतः साधनसमभिहारे प्रसङ्गः ? इदं तर्हि प्रयोजनम्--- क्रियामात्रसमभिहारे यथा स्यात्; अन्यथा प्रधाने कार्यसम्प्रत्ययात् प्रधानक्रियासमभिहार एव स्यात्, न गुणक्रियासमभिहारे।
`सूचि' इत्यादि। `सूच पैशून्ये' (धा.पा.1873), `सूत्र {वेष्टने' धा.पा.} अवमोचने' (धा.पा.1908), `मूत्र प्रस्रवणे' (धा.पा.1909) `अट गतौ' (धा.पा.295), `ऋ गतौ' (धा.पा.1098), `अश भोजने' (धा.पा.1523) `ऊर्णूञ् आच्छादने' (धा.पा.1039),-- आसां प्रकृतीनां यङविधौ ग्रहणं कर्त्तव्यम्, तच्च पूर्वस्यैव चकारस्यानुक्तसमुच्चयार्थत्वाल्लभ्यते, किमर्थं पुनरासां प्रकृतीनां ग्रहणमित्याह--- `अनेकाजहलाद्यर्थम्' इति। अनेकाज् अहलादिरर्थः प्रयोजनं यस्य तत्तथोक्तम्। सूच्यदीनां तिसृणां चुरादिणिजन्तानामनेकार्थं ग्रहणम्, ऊर्णोतेस्त्वनेकाजर्थमहलाद्यर्थञ्च, शेषाणां तु अहलाद्यर्थमेव। `सोसूयते' इति। `णेरनिटि' (6.4.51) इति णिलोपः, पूर्ववदभ्यासस्य गुणः। `अटाटयते' इति। `अजादेर्द्वितीयस्य' (6.1.2) इति ट्यकारस्य द्विर्वचनम्, हलादिः शेषः, दीर्घश्च। `अरार्यते' इति। `यङि च' (7.4.30) इति गुणः। द्वितीयस्यैकाचो र्यशब्दस्य द्वर्वचनम्। `न न्द्राः संयोगादयः' (6.1.3) इति तु नास्ति, `यकारपरस्य रेफस्य प्रतिषेधः' (वा. 651) इति वचनात्। `अशाश्यते' इति। द्वितीयस्यैकाचः `श्य' इत्यस्य द्विर्वचनम्। `प्रोर्णुनूयते' इति। अत्रापि

नुशब्दस्य द्विर्वचनम्। रेफस्तु न द्विरुच्यते, तथैव प्रतिषेधात्। `भृशं रोचते, भृशं शोभत इत्यत्र नेष्यते' इति। तदर्थं वेत्यनुवृत्तस्य व्यवस्थितविभाषात्वं व्याख्येयम्।।

23. नित्यं कौटिल्ये गतौ। (3.1.23)
धातोरित्येव। `गतौ' इति। प्रकृतिविशेषणमेतत्। गतौ वर्त्तमानाद्धातोरित्यर्थः। अमुमेवार्थं पर्यायान्तरेणाचष्टे--- `गतिवचनाद्धातोः' इति। `चंक्रकम्यते, दंद्रम्यते' इति। `क्रमु पादविक्षेपे' (धा.प.473), द्रम हम्म मीमृ गतौ (धा.पा.466, 467, 468) `नुगतोऽनुनासिकान्तस्य' (7.4.85) इति नुमागमः। योऽल्पीयस्यध्वनि गतागतानि करोति स कुटिलां गतिं सम्पादयन् चंक्रभ्यते देद्रम्यत इति चोच्यते। अथ नित्यग्रहणं किमर्थम्, यावताऽनभिदानादेवात्र वाक्यं न भविष्यति ? न हि चङक्रम्यत इति वृत्तेरर्थं कुटिलं क्रामतीति वाक्यं शक्नोति गमयितुम्। तथा हि कुटिलं क्रामतीति वाक्यात् संशयो भवति-- किं गतिकौटिल्यम् ? उत मनः-- कौटिल्यमिति ? चंक्रम्यत इति वृत्तौ त्वसंशयं गतिकौटिल्यमेव गम्यते, इत्याह-- `नित्यग्रहणम्' इत्यादि। गतिकौटिल्यं विषयः। तत्र यङो नियमोऽर्थः प्रयोजनं यस्य तत् तथोक्तम्। `गतिवचनात्' इत्यादिना नियमस्य प्रयोजनं दर्शयति। `न तु' इत्यादिना तद्व्यवच्छेद्यम्। नित्यम् = सर्वकालं गतिवचनात् कौटिल्य एव भवति, न तु कदाचित् क्रियासमभिहारे। तेन `भृशं क्रामति' इति क्रियासमभिहारे पूर्वेण प्राप्तो यङ् न भवति।

24. लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्। (3.1.24)
`लुप्लृ छेदने' (धा.पा.1431), `षद्लृ विशरणगत्यवसादनेषु' (धा.पा.1427), `अभ्र वभ्र चर गत्यर्थाः' (धा.पा.556, 557, 559), `जप जल्प व्यक्तायां वाचि' (धा.पा.397, 398), `{जभी धा.पा.}जभ {जृभि-धा.पाक} गात्रविनामे' (धा.पा.388,389), `दह भस्मीकरणे' (धा.पा.991), `दन्श दंशने' (धा.पा.989), `गृ निगरणे' (धा.पा.1410)। `धात्वर्थगर्हायाम्' इत्यनेन भावगर्हायामित्यस्यार्थमाह। `गर्हितं लुम्पति' इति। गर्हितमिति क्रियाविशेषणमेतत्। तेन भावगर्हात्र गम्यते। गर्हितत्वं छेदनसय् निरर्थकत्वात्, दोषदुष्टत्वाच्च। एवमुत्तरत्रापि गर्हितत्वं वेदितव्यम्। `चञ्चूर्यते' इति। `चरफलोश्च' (7.4.87) इति नुक्। `उत्परस्यातः' (7.4.88) इत्युत्त्वम्, `हलि च' (8.2.77) इति दीर्घः। `जञ्जप्यते' इति। `जपजभ' (7.4.86) इत्यादिना नुक्। `ऋत इद्धातोः' (7.1.100) इतीत्त्वम्, रपरत्वम्, द्विर्वचनम्। गिर्याशब्दस्य रेफयकारयोस्तु हलादिशेषेण निवृत्तिः, पुर्ववद्गुणः, `ग्रो यङि' (8.2.20) इति लत्वम्।
`साधु जपति' इति। नात्र धात्वर्थस्य गर्हा, किं तर्हि? प्रशंसा। `मन्त्रं जपति वृषलः' इति। अत्र साधनस्य वृषलस्य गर्हा गम्यते; वृषलस्य = शूद्रस्य वैदिकमन्त्रजाप्यं प्रत्यनधिकारात्।।

25.सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्। (3.1.25)
चुरादिभ्योऽन्येंषामिह ग्रहणं प्रपञ्चार्थम्। `प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (वा.813) इति सिद्धत्वात्।
`अर्थवेद' इत्यादि। वक्तव्यशब्दस्य व्याख्येयमित्यर्थः। व्याख्यानं तु-- प्रातिपदिकाद्धात्वर्थे बहुलमिति कार्यान्तरविधानार्थादबहुलणादेषां णिच्सन्नियोगेनापुग्भवतीति। सत्यशब्दस्य तु `सत्याप' इत्यत एव निपातनादापुग्भवतीति वेदितव्यम्। `विपाशयति' इति। पाशं विमोचयतीत्यर्थः। `निरूपयति' इति। रूपं पश्यतीत्यर्थः। `अभिषेणयति' इति। `उपसर्गात्' (8.3.65) इत्यादिना षत्वम्। `त्वचयति' इति। ननु च त्वच्शब्दो हलन्तः, तस्मात् णिचि `णाविष्ठवत्' (वा.813) इतीष्ठवद्भावाट्टिलोपे प्राप्ते तत्र `प्रकृत्यैकाच्' (6.4.163) इति प्रकृतिवद्भावे कृते `अत उपधायाः' (7.2.116) इति वृद्धिः प्राप्नोति, तत् कथं त्वचयतीति हि भवितव्यमित्याह-- `अकारान्तोऽयं त्वचशब्दः' इति। शब्दान्तरमेवेदमकारान्तं त्वच्शब्दसमानार्थम्। अत एव त्वच इत्यकारान्तस्य सूत्रे निर्देशः, तस्यकारस्य लोपे कृते स्थानिवद्भावाद्वृद्धिर्न भवति। `चुरादिभ्य स्वार्थे' इति। स्तेयादौ। ननु च नेह सूत्र आख्यानादयोऽर्था उपात्ताः, तत्कथं ते लभ्यन्ते ? अलब्धाश्च कथं निर्दिश्यन्ते ? इत्याह-- `स्वाभाविकत्वात्' इत्यादि। शब्दानामर्थाभिधानं स्वाभाविकम्,न तु वाचनिकम्; तस्याशक्यत्वादिति प्रागेवोक्तम्। तस्मात् स्वभावत एव यो यस्यार्थस्याभिधायकः स सूत्रानुपात्तोऽर्थो युक्त एव निर्देष्टुम्। `यथायथम्' इति। यो यस्यात्मीय इत्यर्थः।।

26. हेतुमिति च। (3.1.26)
फलसाधनयोग्यः पदार्थो लोके हेतुरित्युच्यत इति तस्य यदीह ग्रहणं स्यादिहापि णिच् स्यात्-- अध्ययनेन वसतीति। तस्मात् पारिभाषिकस्य हेतोर्ग्रहणमिति दर्शयितुमाह= `हेतुः स्वतन्त्रस्य प्रयोजकः' इति। स पुनर्यस्य `तत्प्रयोजको हेतुश्च' (1.4.55) इति हेतुसंज्ञा विहिता। कुतः पुनरेतदवगम्यते ? हेतुमद्ग्रहणात्, पूर्वसूत्रे चुरादिग्रहणाच्च। इह हि `करणे' (3.1.17) इति वर्त्तते, धात्वधिकाराच्च धातोः करणे क्रियायां णिच्प्रत्ययेन भवितव्यम्। यदि च लौकिकस्य हेतोर्ग्रहणं स्यात् `हेतुमति' इति करणविशेषणं न कुर्यात्; व्यावर्त्याभावात्-- सर्वेव हि क्रिया हेतुमतीति। पूर्वसूत्रे च चुरादिगर्हमं न कुर्यात्, चुरादयोऽपि धातव एव। तदर्थश्च क्रियालक्षण एव। `सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णेभ्यश्च णिच्' इत्येकयोगं कुर्यात्। एवं हि

चकाराद्धातोः प्रकृतत्वात् करणे प्रत्ययो भविष्यतीति विज्ञास्यते। सोऽयमेकयोगेनैव सिद्धे यत् पृथग्योगमारभते, पूर्वसूत्रे च चुरादिग्रहणं करोति, ततोऽवसीयते पारिभाषिकस्य हेतोर्ग्रहणमिति। `तदीयः' इति। तत्सम्बन्धी क्रियात्मको व्यापारः। कः पुनरसावित्यत आह-- `प्रेषण' इत्यादि। भृत्यादेर्निकृष्टस्य क्वचिदर्थे नियोजनम् = आदेशः, प्रेषणम्। गुर्वादेराराध्यस्य सत्कारपूर्वव्यापारणमध्येषणम्। आदिशब्देन तत्समर्थाचरणस्य। एतत् प्रेषणादिकं लक्षणं स्वभावो यस्य स तथोक्तः। ननु च चत्वारोऽत्र हेतुमन्तः सम्भवनति-- प्रयोज्यः, प्रयोज्यव्यापारोऽधिश्रयणादिः, सर्वसाधनसाध्यश्च प्रधानक्रिया विक्लेदादिः, प्रयोजनकव्यापारश्च प्रेषणाध्येषणादिः। चतुर्णामपि ह्येषां हेतुना सह सम्बन्धोऽस्ति। तत्र प्रथमस्य तदधिष्ठितस्य प्रवर्त्तनात्, तदभिप्रायसम्पादनाच्च। द्वितीयस्य सम्बन्धाय हेतोः प्रवृत्तेः। तृतीयस्य तत्प्रवर्त्तितेन प्रयोज्येनाधिश्रयणादिक्रियां कुर्वाणेन साधनात्। चतुर्थस्य तु तन्निर्वर्तितत्वात् तत्र च समवायात्। तत्र `करणे' इत्यधिकारादयुक्तं प्रयोज्यस्य ग्रहणम्, इतरेषामेव ग्रहणं क्रियात्मकत्वात् सर्वेषां न्याय्यम्, तत् कस्मात् प्रयोजनकव्यापार एव गृह्यते ? सत्यपि सर्वेषां क्रियात्मकत्वे तदग्रहणस्यैव न्याय्यत्वात्। तथा हि-- हेतुरिति कारकविशेषस्यैषा संज्ञा, कारकञ्च क्रियानिमित्तम्, तच्च तस्य निमित्तं भवति यद् यस्मिन् सत्येव भवति, असति तु तस्मिन् न भवत्येव। न च प्रयोज्यव्यापारः प्रयोजके सत्येव भवति; विनापि तेनार्थित्वादेव प्रयोज्यस्याधिश्रयणादिव्यापारस्य सम्भवात्। सत्यपि च तस्मिन् प्रयुक्तस्यापि स्वार्थमपश्यतः प्रयोज्यस्याप्रवृत्तेः। तस्मात् प्योज्यस्य व्यापारं प्रति प्रयोजकस्य कारकत्वाभावाद्धेतुत्वं नास्तीति न स हेतुमान्। एतेन विक्लेदनादिरपि प्रधानक्रियाविशेषो हेतुमान्न भवतीति वेदितव्यम्। भवतु नाम तौ प्रति कथञ्चित् तस्य हेतुत्वम्, तथापि न तयोर्हेतुमत्त्वं युक्तम्; यस्मात्---

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः।।

इति वचनात् भूमादिविशिष्टस्यार्थस्य सत्तायां मतुबादयः प्रत्यया विधीयन्ते, इह च नित्ययोगादन्ये भूमादयोऽर्था न सम्भवन्ति; अप्रतीतेः। न हि यथा गोमानित्यत्र बहुत्वं प्रतीयते, यथा च ककुदावर्त्तीत्यत्र च निन्दा, यथा च रूपवानित्यत्र प्रशंसा, यथा चोदरिणी कन्येत्यत्रातिशयः, तथा `हेतुमति' इत्यत्र। संसर्गाऽपीह न सम्भाव्यते--- संसर्गो हि संयोगः,स च द्रव्ययोरेव परस्परं सम्भवति, यथा-- दण्डीत्यत्र दण्डपुरुषयोः। न च व्यापारो द्रव्यम्, अतो नास्ति केनचित् संसर्गः।तस्मान्नित्ययोगे एवायं मत्वर्थीयः, यथा-- क्षीरिणो वृक्षा इति। न च प्रयोज्यव्यापारस्याधिश्रयणादेर्विक्लेदादेश्च हेतुना नित्ययोगोऽस्ति; उपरतेऽपि तस्मिन् प्रयोक्तरि तयोः सम्भवात्। सत्यपि तस्मिन् विरोधिसन्निधानात्, असम्भवाच्च। न चान्यतरासन्निधाने सम्बन्धो युज्यते; तस्य द्विष्ठत्वादिति। न तौ हेतुमन्तौ। प्रेषणादेस्तु प्रयोजको भवति निमित्तम्च तेन विना तदसम्भवात्, सति च तस्मिंस्तत् सम्भवात्; अतस्तं प्रति कारकत्वं तस्योपद्यते। तेन तस्य हेतुसंज्ञा। नित्योगेऽपि मतुपो निमित्तमस्त्येव; उत्पत्तेः प्रभृत्याविनाशात्, प्रेषणादेर्व्यापारस्य हेतौ समवायात्। तस्मात् स एव हेतुमानिति तस्यैव ग्रहणं न्याय्यम्। `तस्मिन्नभिधेये' इति। प्रत्ययेन वाच्ये। एतेन प्रत्ययार्थविशेषणं हेतुमद्ग्रहणं न प्रकृत्यर्थविशेषणमिति दर्शयति। तेन प्रकत्यर्थविशेषणपक्षे ये दोषास्ते तत्पक्षानङ्गीकारेणैव निरस्ताः। येऽपि प्रत्ययार्थविशेषणपक्षे दोषाः सम्भाव्यन्ते,ते भाष्ये एवोद्भाविताः, परिहृताश्च। इह त्वतिग्रन्थविस्तरभयान्न लिखिताः।

अथेह कथं णिज्भवति-- भिक्षा वासयति, कारीषोऽग्निरध्यापयतीति ? कथञ्च न स्यात् ? अचेतनत्वात्, चेतनवतो ह्येतद्भवति प्रेषणमध्येषणं वा ? नैष दोषः; उक्तं ह्येतत्-- `आदिग्रहणेन तत्समर्थाचरणस्य ग्रहणम्' इति। तच्छब्देन यत्र वसनादौ प्रयोज्यो नियुज्यते तत्सम्बध्यते तत्र वासादौ। ये समर्थाः = योग्याः, अनुकूलास्तृप्तिविशेषादयस्तेषामाचरणं सम्पादनम् = तत्समर्थाचरणम्, तदपि प्रयोजकव्यापार एव। भिक्षा हि प्रचुरतरव्यञ्जनवत्यो लभ्यमाना रसानुकूलं तृप्तिविशेषमुपजनयन्त्येव। कारीषोऽग्निरपि निर्वातप्रदेशेषु सुप्रज्वलितोऽध्ययनविरोधिनं शीतादिकृतमुपद्रवमुपशमयन्नध्ययनानुकूलं सामर्थ्यमादधाति। अतस्तयोरपि युक्तं प्रयोजकत्वम्।

`तत्करोति' इत्यादि। तदिति कर्मपदम्। एतत् करोतीत्यर्थनिर्देशः। तदिति कर्मणः प्रातिपदिकात् करोतीत्यस्मिन्नर्थे णिच उपसंख्यानं प्रतिपादनं कर्त्तव्यमित्यर्थः। किमर्थमित्याह--- `सूत्रयतीत्याद्यर्थम्' इति। तत्रेदं प्रातिपादनम्-- चुरादौ `प्रातिपदिकद्धात्वर्थे' इत्यस्य `तत्करोतति' इत्ययं प्रपञ्चः पठ्यते। तेन सूत्रादिभ्यः प्रातिपदिकेभ्यः कर्मभ्यः करोत्यर्थे णिज् भवतीति। `आख्यानात् कृतः' इत्यादिकं वाक्यम् `आख्यानात् कृदन्तात्' इत्यादिना व्याचष्टे। आख्यायत इत्याख्यानम्। यत् किञ्चिदाख्यायते तत् सर्वं राजागमनादिकमपीहाख्यानमभिप्रेतम्, न तु संज्ञाभूतमेव कंसवधादिकम्। तस्य यो वाचकः शब्दः सोऽप्यभिधानेऽभिधेयोपचारादाख्यानमित्युच्यते। कृदिति प्रत्ययग्रहमम्, प्रत्ययग्रहणे च तदन्तविधिर्भवतीत्याह--- `कृदन्तात्' इत्यादि। `वक्तव्यः' इति। व्याख्येय इत्यर्थः। `तत्' इति। कर्मपदमेतत्। `आचष्टे' इति । प्रत्ययार्थः। `कुल्लुक्' इति। येन कृता तदन्तमाख्यानमुच्यते तस्य लुग्भवतीत्यनेन वक्ष्यमाणेन सम्बन्धः। `प्रकृतिप्रत्यापत्तिः' इति. यासौ प्रकृतिः प्रत्ययमुत्पादितवती साऽविकृतार्थेनैव रूपेणावतिष्ठत इत्यर्थः। `प्रकृतिवच्च कराम्' इति। चकारो भिन्नक्रमः कारकस्यानन्तरं द्रष्टव्यः। कार्यशब्दश्चात्राध्याहार्यः। तेनायमर्थो भवति-- कृतो या प्रकृतिर्हन्यादिस्तस्या यथा कार्यमडागमादि, तथा ण्यन्ताया अपि भवतीति। किञ्च कारकञ्च प्रकृतिवद्भवतीति ? कृतः प्रकृतेर्यादृशं कारकमभूत् ण्यन्ताया अपि प्रकृतेस्तादृशमेव भवतीति। तत्रेदं व्याख्यानम्-- चुरादौ `प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (वा. 813) इति पठ्यते, `तत्करोति' इत्यादिकञ्च तस्यैव प्रपञ्चः। बहुलं तत्राधिकविधानार्थमिति सर्वमेतद्यथोक्तं भविष्यतीति। एवमुत्तरत्रापि व्याख्यानं कर्त्तव्यम्। किमर्थं पुनः कार्यशब्दमध्याहृत्य कार्यातिदेशो वर्ण्यते ? आख्यानावयवभूतायाः प्रकृतेरडागमादिकार्यं यथा स्यात्। अन्यथा हि यदि प्रकृतिवच्च कारकं भवतीति कारकातिदेश एव क्रियेत तदा `कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' (व्या.प.126) इति कंसवधादिभ्यो णिचि कृतेऽङ्गसंज्ञा नामधातुत्वञ्च तेषामेव स्यात् ततश्चाड्द्विर्वचने तेषामेव स्याताम्। किञ्च-- धातोः स्वरूपग्रहणे तत्प्रत्यये तत् कार्यं विज्ञायेत, कंसवधशब्दाच्च णिचि विहिते तत्वकुत्वे न स्याताम्, ततश्च कसंमघातद्राजानमजीगमदित्यादि न

सिध्येत्। कार्यातिदेशे यद्यपि समुदायेभ्यः कंसवधादिभ्यो णिज्विहितः, तथापि कृतो या प्रकृतिर्हन्यादिस्तस्याः केवलाया अकृदन्ताया यथाऽडागमादिकार्यं भवति, तथा कृदन्ताया अपि णिचि विहिते भवतीति न भवत्येष दोषः। तस्मात् कार्यमतिदिश्यते। `कंसं घातयति' इति। हन्तेर्भावे `हनश्च वधः' (3.3.76) इत्यप्प्रत्ययः, तत्सन्नियोगेन वधादेशः। हननं वधः, कंसस्य वध इति षष्ठीसमासः। रककंसवधशब्दाण्णिच, अपो लुक्। प्रकृतेः प्रत्यापत्तिः वधादेशपरित्यागेन हन्तेः स्वरूपेणावस्थानम्। `अत उपधायाः'(7.2.116) इति वृद्धिः, `हो हन्तेर्ञ्णिन्नेषु' (7.3.54) इति हकारस्य घकारः, `हनस्तोऽचिण्णलोः' (7.3.32) इति तत्वम्। कारकञ्च कंसवध इत्यस्याः प्रकृतेर्यादृशमासीत् तादृशमेव भवति, कर्म च कारकं कंस आसीत्। तथा च कृद्योगलक्षणायाः कर्मषष्ठ्या कंसवध इति समासः। स कंस आख्यानक्रियायामप्यतिदेशात् कर्मैव भवति। असत्यतिदेशे, आख्याक्रियायाः कंसवधशब्दस्तदर्थो वा कर्म स्यात्; तयोरेव तथा व्याप्यमानत्वात्। कंसस्त्वाख्यानक्रियायामुज्झितव्यापार एवेति कर्मभावं न प्रतिपद्येत्। तस्मात् कारकातिदेशः। `बलिं बन्धयति' इति। बन्धनं ब्नधः, भावे घञ्। राज्ञ आगमनमिति कर्त्तरि कृद्चयोगलक्षणाया षष्ठ्याः समास। शेषं कृल्लुगादिकं यथायोगं पूर्ववत्। अथ राजानमिति कथं द्वितीया, यावता राजागमनमित्यस्याः कृदन्तायाः प्रकृते राजा कर्त्तासीत्, तत्र `प्रकृतिवच्च कारकम्' (2.3.65) इति षष्ठ्यैव भवितव्यम् ? अथ `न लोकाव्यय' (2.3.69) इति षष्ठीनिषेधः; एवं तर्हि तृतीया प्राप्नोति ? नैष दोषः; `गतिबुद्धि' (1.4.52) इत्यादिना गमेर्गत्यर्थत्वाद्राजोऽत्र कर्मसंज्ञा। तेन द्वितीयैव न्याय्या।

अन्ये त्वस्यैव चोद्यस्य परिहारार्थ कारकातिदेशमन्यथा वर्णयन्ति-- नैवं विज्ञायते प्रकृतिरिव प्रकृतिवत्, प्रकृतेर्यत् कार्यमिष्टं तत् णिजन्तस्यैव भवतीति; न ह्यत्र `तत्र तस्येव' (5.1.116) इति वतिः, किं तर्हि ? `तेन तुल्यम्' (5.1.115) इत्यादिना। तस्मादेव विज्ञायते-- प्रकृत्या तुल्यं वर्त्तत इति प्रकृतिवदिति। प्रकृतिशब्देनेह णिचो या प्रकृतिः कंसवध इत्यादिः सा विवक्षिता।तस्याश्चाख्यानक्रियया व्याप्यमानत्वात् कर्त्तव्यम्। अतः प्रकृतिवच्च कारकं भवतीत्यस्यायमर्थः-- यथा णिच्प्रकृतेराख्यानभूतायाः कर्मत्वं तथा कारकस्यापीति, तेन कर्तुः कर्मत्वं सिद्धं भवति। यद्येवम्, पुष्ययोगं जानाति पुष्येण योजयतीत्यत्रापि कर्मत्वं पुष्यस्य स्यात् ? नैतदस्ति; यतः प्रकृतिवच्च कारकं भवतीत्युच्यते, न च पुष्यस्य कारकत्वं भवति; सहयोगे तृतीया विधानात् पुष्येण सह चन्द्रमसो यो योगस्तं जानाति पुष्येण योजयति।

`आङलोपश्च' इत्यादि। मर्यादावाची य आङ तस्य लोपो वक्तव्यः। चकारात् पूर्वोक्तञ्च णिजादिकार्यम्। `कालात्यन्तसंयोगे' इति। कृत्स्नस्य कालस्य व्याप्तिः = कालात्यन्तसंयोगः, तस्मिन् गम्यमाने। `आरात्रिविवासमाचष्टे' इति। विवसनं विवासः, भावे घञ्। रात्रेर्विवास इति षष्ठीसमासः। पश्चात् `आह मर्यादाभिविध्योः' (2.1.13) इत्यवय्यीभावसमासः। रात्रिशब्दश्चेह रात्रिसहचरितासु क्रियासु वर्त्तते, वसिरपि विपूर्वोऽतिक्रमे। तेनायमर्थो भवति-- असत्मयनात् प्रभृति याः प्रवृत्ताः क्रियास्ता यावदतिक्रान्ता रात्रिः साकल्येन कथयीति। `प्रकृतिवच्च कारकम्' इत्यतिदेशात् कृल्लक्षणायां कर्त्तरि षष्ठ्यां प्राप्तायां रात्रौ कर्मणि द्वितीया भवति। अतिक्रमणे हि रात्रिः कर्त्री। कर्मत्वञ्च तस्याः पूर्ववद्गत्यादि (1.4.52) सूत्रेण।

`चित्रीकरणे प्रापि' इति। चित्रीकरणम् = तस्मिन् गम्यमाने णिच्। कृल्लुगादिकञ्च पूर्ववत्। उज्जयिन्या माहिष्मती विदूरदेश इति तावतो देशस्याल्पकालेनातिक्रमणमाश्चर्यम्। `सूर्योद्गमनम्' इति। कर्त्तरि कृद्योगलक्षणायाः षष्ठ्याः समासः। सूर्य उद्गमने कर्त्ता। `सम्भावयते' इति। प्राप्नोतीत्यर्थः। `भू प्राप्तावात्मनेपदी' (धा.पा.844) चुरादौ पठ्यते, तस्येदं रूपम्। `सूर्यमुद्गमयति' इति. सूर्योद्गमनशब्दाण्णिच्, ल्युटो लुक्। `प्रकृतिवच्च कारकम्' इत्यतिदेशात् पूर्ववत् कर्त्तरि षष्ठ्यां प्राप्तायां तस्य कर्मसंज्ञकत्वाद्द्वितीया। कर्मसंज्ञा तु पूर्ववत्।

`नक्षत्रयोगे ज्ञि' इति। नक्षत्रयोगे यत् प्रातिपदिकं वर्त्तते तस्मान्नक्षत्रयोगवाचिनो णिच्। कृल्लुगादिकं यथायोगं पूर्ववत्। ज्ञीति सप्तम्या धात्वर्थो निर्दिश्यते, तेन जानात्यर्थे णिज् भवति। पुष्येण करणभूतेन चन्द्रमसो योगः पुष्ययोगस्तस्माण्णिच्, घञ्, कृतो लुक्, प्रकृतिप्रत्यापत्तिः। `प्रकृतवच्च कारकम्' इत्यतिदेशात् ज्ञानक्रियायामकारकस्यापि पुष्यस्य करणत्वमिति करणे तृतीया। यदा तु पुष्येण सह चन्द्रमसो योग इत्यर्थो विवक्ष्यते, तदा कारकातिदेशस्य विषयो न भवति,पुष्यस्याकारकत्वात्। पुष्येणेति तृतीया सहार्थ एव वेदितव्या।।

27. कण्ड्वादिभ्यो यक्। (3.1.27)

किं पुनरिमे कण्ड्वादयो धातवः ? उत प्रातिपदिकानि ? तत्र यदि धातवः, यकि कृते कण्डूरिति न सिध्यति। कण्डूयेति प्राप्नोति। ननु च वेत्यनुवर्तिष्यते, ततर् यदा यङ नास्ति तदा कण्डूरिति भविष्यति ? नैतदस्ति; न हि धातोः सुब्विभक्तिरुत्पत्तुमुत्सहते; तस्याः प्रातिपदिकाद्विधानात्। स्यादेतत्-- यगन्तात् `अन्यभ्योऽपि' (3.2.178) इति क्विपि कृते अतो लोपे (6.4.48) वलि यकारलोपे (6.1.66) च कण्डूरिति भविष्यति ? असदेतत्; कर्त्तरि क्विब् विधीयते, कण्डूरिति च वेदनामात्रमुच्यते, न कर्ता; तथापि सम्पदादेराकृतिगणत्वात् भावे क्विपं विधाय कण्डूरिति व्युत्पाद्यते। एवमपि मन्तुः, वल्गुरिति न सिध्येत्। यदि तावद्वेत्यनुवृत्त्या मनुवल्गुशब्दाभ्यां पक्षे यग्न भवति तदा विभक्तिस्ताभ्यां नोपपद्येत, तथा च मन्तु, वल्गु इत्यविभक्तिकं रूपं स्यात्। अथापि ताभ्यां यकं विधाय क्विप् क्रियते ? एवमपि मन्तूर्वल्गुरित्यनिष्टं रूपं स्यात्। अवश्यं यकि कृते `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घत्वेन भवितव्यम्। अथ प्रातिपदिकानि कण्डवादयस्तदा यकः करारोऽनर्थकः स्यात्, स हि `सार्वधातुकार्धधातुकयोः' (7.3.84) इति प्राप्तस्य गुणस्य `क्ङिति च' (1.1.5) इति प्रतिषेधो यथा स्यादित्येवमर्थं क्रियते। प्रातिपदिकत्वे तेषामेतत्प्रयोजनं नोपपद्यते, न हि प्रातिपदिकाद्विहितः प्रत्यय अर्धधातुकसंज्ञां लभत इति यो देशयेत्, तं प्रत्याह-- `द्विविधाः' इत्यादि। तत्रेति निर्धारणे सप्तमी। तेषु धातुप्रातिपदिकेषु मध्ये ये धातवः कण्ड्वादयस्तेभ्यो यक्। `धात्वधिकारात्' इत्यत्रवोपपत्तिः। एवमेवार्थं द्रढयितुमाह-- `तथा च' इत्यादि। यत एवं धातुभ्यः प्रत्ययो विधीयते; धात्वधिकारात् , प्रातिपदिकेभ्यः। एवञ्च कृत्वा यकः

ककारोऽनुबध्यते गुणप्रतिषेधात्। यदि तु प्रतिपदिकेभ्यो यक् स्यात् तस्यानार्धधातुकत्वाद्गुणस्य प्राप्तिरेव नास्ति, तत्प्रतिषेधार्थं ककारानुबन्धकरणमनर्थकं स्यात्।

`धातुप्रकरणाद्धातुः' इति। प्रत्ययमुत्पादयतीति शेषः। `धातोरेकाचः' (3.1.22) इत्योत धातुग्रहणमनुवर्तते। तेन धातुरेव कण्ड्वादिशब्दः प्रत्ययमुत्पादयति, न प्रातिपदिकम्। `कस्य' इत्यादि। यच्चेदं ककारानुबन्धासञ्जनमतोऽपि हेतोरेव धातुः प्रत्ययमुत्पादयति। अन्यथा ककारानुबन्धकरणं पूर्वोक्तया रीत्या निरर्थकमेव स्यात्। अतएव धातुभूतेभ्यः कण्डवादिभ्यो यग्विधानात् ककारानुबन्धासञ्जनाच्च तेषां धातुत्वं विज्ञायते। न ह्यधातुभूतेभ्यो यग्विधानमुपपद्यते, नापि ककारानुबन्धकरणम्; प्रयोजनाभावात्. अथ प्रातिपदिकत्वं कण्ड्वादीनां कथमवसीयते ? इत्याह-- `आह चायम्' इत्यादि। चकारो हेतौ। यद्येते धातव एव स्युस्ततो यकि कृते `अकृत' (7.4.25) इति दीर्घत्वस्य सिद्धत्वात् कण्डूञ्, हृणीङ्, महीङिति दीर्घ नोच्चारयेत्, उच्चारयति च दीर्घम्, अतोऽवसीयते-- `धातुर्विभाषितः' इति। धातुत्वमेषां विकल्पितमित्यर्थः। ननु च पक्षे यत्र यङ नास्ति तत्रायगन्तेभ्यः क्विबादौ प्रत्यय उत्पन्ने कण्डूः, कण्डूतिः, कण्डूतवानिति दीर्घस्य श्रवणं यथा स्यादित्येवमर्थं दीर्घोच्चारणं स्यात्। तत् कुतस्तस्यानर्थक्यम्! कथं पुनरयगन्तेभ्यः क्विबादयो भवन्ति, यकः पाक्षिकत्वात्, तदपि कुतः ? वेत्यनुवृत्तेः, नैतत्; नित्यत्वादस्य विधेः। नित्यत्वन्तु वाग्रहणस्य निवर्तितत्वात्। कुतः पुनस्तन्निवृत्तिरवीसयते ? `आयादयः' (3.1.31) इत्यादेः सूत्रारम्भात्। यद्यत्र वेत्यनुवृत्तिस्तदोत्तरत्राप्यनुवर्त्तनादायादयो वा भविष्यन्तीत्येतन्नारभेत। न च तदनारम्भे सार्वधातुकेऽप्यायादयो विकल्पेन प्राप्नुवन्ति; वाग्रहणस्य व्यवस्थितविभाषात्वात्। तस्मादायादय इत्यादेरारम्भाद्वाग्रहणनिवृत्तिरवसीयत इति नित्यं यका भवितव्यम्। ततश्च यद्येषां पक्षे प्रातिपदिकत्वं न स्याद्दीर्घोच्चारणमनर्थकं स्यात्। तस्माद्दीर्घोच्चारणसामर्थ्यात् प्रातिपदिकत्वमेषामस्तीत्येकान्त एष पक्षः। तत्र धातुपक्षे कण्डूयत इत्यादयः सिध्यन्ति, प्रातिपदिकपक्षे त्वसति यकि कण्डूर्मन्तुर्वल्गुरित्यादयः। मगध इत्यादयो येऽकारान्ताः कण्ड्वादिषु पठ्यन्ते तेषां `अतो लोपः' (6.4.48) इत्यकारलोपः--- मगध्यति, सुख्यति, दुःख्यति। लेट्लोटौ शब्दौ पठ्येते, तयोः ल्वरूपेणैव ग्रहणम्, न तु प्रत्ययत्वेन, कण्ड्वादिभिः स्वरूपशब्दैः साहचर्यात्।।

28. गुपूधूपविच्छिपणिपनिभ्य आयः। (3.1.28)

`स्तुत्यर्थेन' इत्यादि। `पण व्यवहारे स्तुतौ च' (धा.पा. 439) `पन च' (धा.पा.440) इत्यनयाऽनुपूर्व्या गणे पाठः। तत्र `पन च' (धा.पा.440) इत्यत्र स्तुतावित्यनुवर्त्तते, न व्यवहारार्थः तेन पणिर्व्यवहारार्थः, स्तुत्यर्थश्च,पनिः स्तुत्यर्थ एव। तदिह स्तुत्यर्थेन पणिना साहचर्यात् पनेरपि स्तुत्यर्थ एव गृह्यते। तेनासौ स्तुतावेव वर्त्तमानः प्रत्ययमुत्पादयति, न तु व्यवहारे। `शतस्य' इति। `व्यवहृपणोः समर्थयोः' (2.3.57) इति कर्मणि षष्ठी। अत्र पणायतीत्यत्रात्मनेपदं कस्मान्न भवति, यावता पणिरयमनुदात्तेत् पठ्यते ? तत्र `अनुदात्तङितः' (1.3.12) इति यथा केवलादात्मनेपदं भवति तथायपत्प्रत्ययान्तादपि तेन भवितव्यमित्यत आह-- `अनुबन्धः' इत्यादि। यो हि तस्यानुबन्धः स आयप्रत्ययरहिते पणतौ चरितार्थः = कृतात्मनेपदकार्यः, तेनायप्रत्ययान्तादात्मनेपदं न भवति; तस्य धात्वन्तरत्वात्।।

29. ऋतेरीयङ्। (3.1.29)

`सौत्रः' इति। सूत्रे परिपठितत्वात्। सूत्रे भवः सौत्रः। `घृणायां वर्त्तते' इति। घृणा = जुगुप्सा। तस्यामयं स्वभावत एव वर्त्तते। अथ कस्मादीयङुच्यते, न च्छङित्येवोच्येत, तस्येयादेशे ऋतीयत इति सिध्यति ? न सिध्यति; परत्वादिडागमे कृते सत्यप्रत्ययादित्वादीयादेशो न स्यात्। ननु चान्तरङ्गत्वादीयादेश एव भविष्यति, अन्तरङ्गत्वन्तु तस्यायन्नादिषु `उपदेशिवद्वचनमिष्टस्वरसिद्ध्यर्थम्' (7.1.2.वा.1) इति वचनात्; एवं तर्ह्येतज्ज्ञापयति-- `धातुप्रत्ययानामायन्नादयो न भवन्ति' इति। तेन शमेर्ढप्रत्यये कृते शण्ढः इत्येवमादयः सिद्धा भवन्ति। अथ वा-- स्वरविधावुपदेशिवद्भावः स्वरसिध्यर्थमिति वचनात्। तेन नास्त्यन्तरङ्गतेति परत्वादिडागमः स्यात्, तस्मादीयङ् विधीयते।।

30. कर्मर्णिङ्। (3.1.30)

`णकारो वृद्ध्यर्थः' इति `अच उपधायाः'(7.2.116) इति वृद्धिर्यथा स्यात्। यद्येवम्, किमर्थं `न कम्पमिचमाम्' (धा.पा.817) इति कमेर्मित्संज्ञा प्रतिषिध्यते `मितां ह्रस्वः' (6.4.92) इति ह्रस्वो मा भूदिति ? नैतदस्ति; णित्करणसामर्थ्यादेव तन्न भविष्यति; अन्यथा णित्करणमनर्थकं स्यात्। नानर्थकम् ? `णेरनिटि' (6.4.51) इति सामान्यग्रहणार्थत्वात्। यदा च `आयादय आर्धधातुके वा' (3.1.31) इति णिङ् नास्ति, तदा हेतुमण्णिचि ह्रस्वत्वं मा भूदिति मित्संज्ञा प्रतिषिध्यते।।

31. आयादय आर्धधातुके वा। (3.1.31)

`आर्धधातुकविषये' इत्येतेनार्धधातुक इत्यस्य विषयसप्तमीत्वं दर्शयति। आर्धधातुकविषयत्वं तु तद्विवक्षायां सत्यां बुद्धिस्थे तस्मिन् सम्भवति,नान्यथेत्याह-- `आर्धधातुकविवक्षायाम्' इति। केन पुनरभिसन्धिना विषयसप्तमीत्वमाश्रीयत इति ? एवं मन्यते-- परसप्तम्यामुत्पत्तिर्वा विकल्प्यते ? निवृत्तिर्वा ? यद्युत्पत्तिस्तदा गुपेः स्त्रियां क्तिनि विहिते तत्र यदायप्रत्ययो नोत्पद्यते तदा कामं गुप्तरितीष्टं सिध्यति। यदा तूत्पद्यते, तदातो लोपे (6.4.48) वलि लोपे (6.1.66) इत्यकारे कृते तत्र परतो यदा निवृत्तिर्न भवति तदा कामं गोपायेतीष्टं सिध्यति। यदा तु भवति तदा गोपेत्यनिष्टं प्राप्नोति। गुप्तिरिति

सत्यामसत्यां वा निवृत्ताविष्टं न सिध्यति; विषयसप्तम्यां तूत्पत्तौ विकल्पितायामुत्पत्स्यते। अर्धधातुकमिति आर्धधातुकविवक्षायामादावेव विकल्पः। तत्रानुत्पत्तिपक्षे स्त्रियां क्तिनि विहिते गुप्तिरिति सिध्यति, उत्पत्तिपक्षे गोपायेति। न च गोपातिरित्यनिष्टमपि; आयप्रत्ययान्तात् क्तिनोऽभावात्। नापि गोपेत्यनिष्टमापद्यते, आयप्रत्ययस्यानुत्पत्तेः। `नित्यप्रत्ययप्रसङ्गे' इति। पूर्वकैस्त्रिभिः सूत्रैर्नित्यमायादिषु प्राप्तेष्वित्यर्थः। `तदुतप्त्तौ' इत्यादि। तेषामायादीनामार्धधातुकविषय उत्पत्तिर्विकल्प्यते, न तूत्पन्नानां निवृत्तिः। यदि हि निवृत्तिर्विकल्प्येत तदार्धधातुके विषयभूते सत्यायप्रत्यये निवृत्ते प्रत्ययलक्षणेन `अ प्रत्ययात्' (3.3.102) इत्यकारप्रत्यये विहिते विषयसप्तम्यामपि गोपेत्यनिष्टं स्यादित्यभिप्रायः। `यथायथम्' इति। यो यतः प्राप्नोति स पश्चादुत्पत्तिविकल्पादुत्तरकालं ततो भवतीत्यर्थः।।

32. सनाद्यन्ता धातवः। (3.1.32)

`सनादयोऽन्ते येषाम्' इति वाक्यविशेषेण बहुव्रीहि दर्शयति। गमकत्वन हि व्यधिकरणानामपि बहुव्रीहिर्भवत्येव, यथा-- कण्ठेकालः, उरसिलोमेति। आदिशब्देन क्यजादीनां णिङपर्यन्तानां ग्रहणम्। `समुदायाः' इति। प्रकृतिप्रत्ययसमुदायाः। एतेन तद्गुणसंविज्ञानबहुव्रीहि दर्शयति; अन्यथा सनाद्युपलक्षितानां प्रकृतीनामेव धातुसंज्ञा विधीयेत। `{धातुसंज्ञाः-- काशिका, पदमञ्जरी च.}धातुसंज्ञकाः' इति। धातुः संज्ञा येषां ते धातुसंज्ञकाः। धातुशब्दश्चात्र स्वरूपपदार्थकः, न भूवादिपदार्थकः, अन्यथा भूवादयः सनाद्यन्तानां संज्ञाः स्युः, तच्चायुक्तम्, न हि तावतीनां संज्ञानां करणे किञ्चित् प्रयोजनमस्ति। आवर्तिन्यश्च संज्ञा भवन्ति। न हि भूवादीनामेव सर्वेषामावृत्तिः क्वचिच्छास्त्रेऽस्तीति न तत्पदार्थको धातुशब्दः। इह हि संज्ञाविधौ सनादीनां प्रत्ययनां ग्रहणम्। `सुप्तिङन्तं पदम्' (1.4.14) इत्यत्र चान्तग्रहणेन ज्ञापितमेतत-- `प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य' (पि.प.वृ.44) इति। एषा परिभाषा संज्ञाविधौ प्रत्ययग्रहणे प्रतिषिद्धा। तत्रासत्यन्तग्रहणे तदन्तविधिर्न स्यात्, इष्यते च, अतस्तदर्थमन्तग्रहणं कृतम्, तत्रानेनान्तग्रहणेनापूर्व एव तदन्तविधिः क्रियत इति मन्यमानो यो देशयेत् तं प्रत्याह--- यदि तर्हि सनाद्यन्तानामियं संज्ञा विधीयते तदा देवदत्तः प्राचिकीर्षदित्यत्र देवदत्तस्य सोपसर्गस्य च संज्ञा प्रसज्येतेति। अत आह-- `प्रत्ययग्रहणपरिभाषयैव' इत्यादि। न ह्यनेनान्तग्रहणेनापूर्व एव तदन्तविधिः क्रियते, किं तर्हि ? पदसंज्ञाविधादन्तग्रहणेन प्रतिषिद्धा सती प्रत्ययग्रहणपरिभाषयैव पुनरिह प्रतिप्रसूयते। कृतप्रवृत्तिविधाता सती पुनः प्रवर्त्तत इत्यर्थः। ततश्च यतः सनादयो विहितास्तदादेरेव समुदयस्य संज्ञा भवति, न शब्दान्तरादेरिति भावः। अथ `भूवादयो धातवः' (1.3.1) इत्यस्यानन्तरं `सनाद्यन्ताश्च इति कस्मान्नोक्तम्; एवं हि धातुग्रहणं द्विर्न कर्त्तव्यं भवति ? नैवं शक्यम्, एवं हि क्रियमाणे सनादीनामियत्तापरिच्छदो न स्यात्। इह तु क्रियमाणे णिङपर्यन्तानां ग्रहणं विज्ञायते। तर्हि `सनाद्यन्ता धातवः' (3.1.32) इत्यस्यानन्तरं `भूवादयश्च' इति कस्मान्नोक्तम् ? एतदपि न; एवं हि क्रियमाणे सनाद्यन्तस्यानुक्रान्तापेक्षित्वात् भूवादीनामप्यनुक्रान्तापेक्षित्वं स्यात्; ततश्चानुक्रान्तानामेव गुपादीनां धातुसंज्ञा स्यात्, नान्येषां भूवादीनाम्। अथ भूवादीनामनुक्रान्तापेक्षा न भवति सनादीनामपि न स्यात्, ततश्च सनादयः कप्पर्यन्ता गृह्येरन्निति सन्देहः स्यात्। तस्माद्यथान्यासमेव न्याय्यम्।।

33. स्यतासी लृलुटोः। (3.1.33)

इह द्वे लृरूपे--- एकं लृटः सम्बन्धिः, द्वितीयं लृङः। द्वयोरपि तेयोर्ग्रहणम्,इष्टत्वात्, विशेषानुपादानाच्च। ततश्चैते द्वे तृतीयञ्च लुडिति त्रीणि निमित्तानि भवन्ति। निमित्तिनौ तु द्वौ स्यातासी इति वैषम्यम्। अतः संख्यातानुदेशो न स्यादिति यो देशयेत्, तं प्रत्याह-- `लृरूपम्'इत्यादि। टकारङकारयोरनुबन्धयोः परित्यागेन ततकृत्यस्य भेदस्याभावाल्लृरूपं लृङलृटोः सामान्यमेकमेवेति निमित्तयोरपि द्वित्वम्। तेन संख्यतानुदेशो न विरुध्यत इत्यभिप्रायः। अत एवाह-- `यथा संख्यम्' इति। `करिष्यति' इति। `लृट् शेषे च' (3.3.13) इति लुट्, ऋद्धनोः स्ये' (7.2.70) इतीट्। `अकरिष्यत्' इति। लृङ, अडागमः, `इतश्च' (3.4.100) इतीकारलोपः। `कर्त्ता' इति। `अनद्यतने लृट्', (3.3.15) `लुटः प्रथमस्य' (2.4.85) इत्यादिना तिपो डादेशः,टिलोपः। `इदित्करणम्' इत्यादि। इच्चासावित् इत्संज्ञकश्चेतीति,तस्य करणमिदित्करणम्। इकारस्येत्संज्ञकस्य करणित्यर्थः। अथ वा-- इदित् यस्य तासेः स इदित् तासिः, तस्य करणमिदित्करणसंज्ञकेकारस्य तासेः करणमित्यर्थः। `अनुनासिकलोपप्रतिबन्धार्थम्' इति। असति तु तस्मिन् `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः स्यात् । अतस्तस्य प्रतिबन्धः प्रवृत्तिविघातो यथा स्यादित्येवमर्थमिदित्करणम्। `मन्ता' इति। `मन ज्ञाने' (धा.पा.1176), `मनु अवबोधने'(धा.पा.1471) इति वा। `अनुदात्तङितः'(1.3.12) इत्यात्मनेपदम्। `संगन्ता' इति। अत्रापि संपूर्वाद्गमेः `समो गमि' (1.3.29) इत्यादिना अत्रोभयत्रापि टिलोपे कृते ङित्वादात्मनेपदमाश्रित्यानुनासकिलोपः प्राप्नोति, स इदित्करणेन प्रतिषिध्यते। यदि तर्हि तासेरिदित्करणमनुनासिकलोपप्रतिबन्धार्थम्, एवं सति `इदितो नुम् धातोः' (7.1.58) इत्यत्र यद्वक्ष्यति `तासिसिचोरिदित्कार्यं नास्तीत्युच्चारणार्थो निरनुनासिक इकारः पठ्यते' इति तद्विरुध्यते ? नास्ति विरोधः, भिन्नकर्त्तृकत्वात्। इदं हि जयादित्यवचनम्, तत् पुनर्वामनस्य। वामनवृत्तौ तु तासिसिचोरिकार उच्चारणार्थो नानुबन्धो पठ्यते, तेन विरोधो नाशङ्कनीयः। केन पुनरभिसन्धिना जयादित्यस्तासेरिकारस्यानुनासिकलोपप्रतिबन्धार्थतां कृतवान् ? वामनस्तूच्चारणर्थताम् ? येनाभिसन्धिना स तावच्छरूयताम्-- आभाच्छास्त्रीयमसिद्धत्वमनित्यम्, अनित्यत्वं तु तस्य तत्रैव प्रतिपादयिष्यते जयादित्येन। आभाच्छास्त्रीयस्य टिलोपस्यासिद्धत्वमिह नास्ति। अनित्यत्वादित्यभिप्रेत्य तासेरिकारस्यानुनासिकलोपे प्रतिबन्धार्थतोक्ता। वामनेनत्वसिद्धत्वमिहास्त्येवेति मन्यमानेनोच्चारणार्थतोक्ता। न हि टिलोपस्यासिद्धत्वे सत्यनुनासिकलोपः प्राप्नोति। तदयुक्ता तत्प्रतिबन्धार्थतेकारस्य। यथैव हि गोनर्द्दीय आचार्यः-- सन्निपातलक्षणपरिभाषाया उपस्थानमाश्रित्यातिजरं ब्राह्मणकुलं तिष्ठति, अतिजरैर्ब्राह्मणकुलैरिति भवितव्यमित्याह; अन्ये

त्वनित्यत्वादस्याः परिभाषाया अनुपस्थानमाश्रित्यातिजरसं ब्राह्मणकुलमतिजरसैरिति भवितव्यमित्याहुः, तथेदमपि प्रयोजनद्वयमाभाच्छास्त्रीय्सयास्तित्वञ्चाश्रित्य वृत्तिकारावुक्तवन्ताविति वेदितव्यम्।
अन्ये चाचक्षते-- प्राग भादसिद्धाधिकार इतीमं पक्षमाश्रित्येकारस्यानुनासिकलोपप्रतिबन्धार्थतोक्ता। सह तेनासिद्धाधिकार इत्यश्रित्योच्चारणार्थतेति। एतच्चाशक्यं विज्ञातुम्; प्राग् भादसिद्धाधिकार इत्यस्य पक्षस्य जयादित्यवामनाभ्यामनाश्रित्वात्। अनाश्रितत्वंतु तत्रैव वृत्तावभिव्यक्तमिति तत एवावगन्तव्यम्। एते च स्वादयो येननाप्राप्तिन्यायेनान्तरङ्गत्वाच्च सर्वेषां यगादीनामपवादाः; अन्तरङ्गत्वं तु तेषां लावस्थायामेव विधानात्।।

34. सिब्बहुलं लेटि। (3.1.34)
`जोषिषत्' इति।`जुषी प्रीतिसेवनयोः' (धा.पा.1288) लिङर्थे लेट्। सिप इकार उच्चारणार्थः, पकारः स्वरार्थः, `लेटोऽडाटौ' (3.4.94) इत्यट्। `इतश्च लोपः परस्मैपदेषु' (3.4.97) इतीकारलोपः, `आर्धधातुकस्येडवलादेः' (7.2.35) इतीट्, लघूपधगुणः, `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्। `तारिषत्' इति। `तृ प्लवनतरणयोः' (धा.पा.969) `सार्वधातुकार्धधातुकयोः' (7.3.84) `व्यत्ययो बहुलम्' (3.1.85) इति वर्णव्यत्ययेन धात्वकारस्याकारः। शेषं पूर्ववत्। `मन्दिषत्' इति। `मदि {स्तुतिमोदमदस्वप्नकान्तिगतिषृ' धा.पा.} स्तुतिमोदनस्वप्नगितषृ' (धा.पा.13), `इदितो नुम् धातोः' (7.1.58) इति नुम्। `पदाति' इति। `पद गतौ' (धा.पा.1169), दिवादिरनुदात्तेत्, व्यत्ययेन परस्मैपदम्, शप्प्रत्ययश्च, अटा सह सवर्णदीर्घत्वम्। तिप इकारलोपोऽत्र न भवति; तद्विधौ `वैतोऽन्यत्र' (3.4.96) इत्यतो वेत्यनुवृत्तेः। `च्यावयाति' इति। `च्यङ {न स्तो धातुपाठे} छ्युङ ज्युङ {न स्तो धातुपाठे} झयुङ प्रुङ प्लुङ गतौ' (धा.पा.955,956,957,958)। हेतुमण्णिच्। सिपः पित्करणं बोभूयिषातामित्यत्रोदात्तनिवृत्तिस्वरेणोदात्तत्वे प्राप्तेऽनुदात्तार्थम्। यङन्तात् बोभूयशब्दाल्लेट आत्मनेपदम्, त, टेरेत्वम्। `एत ऐ' (3.4.93) `लेटोऽडाटौ' (3.4.94) इत्याट् `तस्यानुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमहन्विङोः' (6.1.186) इति सार्वधातुकस्यानुदात्तत्वं पित्करणसामर्थ्यादन्तरङ्गोऽपि सिप्स्वरं प्रतीक्षते। तेन कृते तस्मिन् सिप इडागमः। स चागमानुदात्तत्वेनानुदात्तः। `अतो लोपः' (6.4.48) इति यङोऽकारस्योदात्तस्य लोपः। उदात्तत्वं तु तस्य धातुस्वरेण च। `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इत्युदात्तत्वे प्राप्ते पित्करणादनुदात्तत्वमिटो भवति।।

35. कास्प्रत्ययादाममन्त्रे लिटि। (3.1.35)
प्रत्ययग्रहणेनेह सन्नादीनां प्रत्यायानां ग्रहणम्। `प्रत्ययग्रहणे यस्मात्' (पु.प.वृ.44) इति परिभाषया `येन विधिस्तदन्तस्य' (1.1.72) इति वा तदन्तविधिर्विज्ञायते।धात्वधिकाराच्च प्रत्ययग्रहणेनेह धातवो विशिष्यन्त इत्याह--- `प्रत्ययान्तेभ्यो धातुभ्यः' इति। आम्प्रत्ययो भवतीति हलन्तपक्षमाश्रित्योक्तम्। अदन्तपक्षे त्वामः प्रत्ययो भवतीत्येवं वक्तव्यम्, तच्च नोक्तम्; वक्ष्यमाणादामोऽमित्त्वमदन्तत्वादित्यत एवावगम्यमानत्वात्। `अमन्त्रे' इति विषयसप्तमीयम्, न परसप्तमी, तेन मन्त्रप्रतिषेधात् भाषायां ब्राह्मणे च विषयेऽयं विधिर्विज्ञायते। ब्राह्मणो नाम मन्त्राणामेव व्याख्यानग्रन्थः। न च नञिवयुक्तन्यायेन (व्या.प.65) ब्राह्मण एव भवितव्यम्, न भाषायाम् ? नैतत्; यदि भाषायामपि न स्यात् ब्राह्मण इत्येवं ब्रूयात्। `कासाञ्चक्रे' इति। `आमः' (2.4.81) इति लेर्लुक्। लिटः कृत्तवाल्लुप्ते तस्मिन् `कृत्तद्धितसमासाश्च' (1.2.46) इति प्रत्ययलक्षणेन प्रातिपदिकसंज्ञा, सुः, स्वरादिपाठात् ` तद्धितश्चासर्वविभक्तिः' (1.1.38) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वाद्वाऽव्ययसंज्ञायां सोर्लुक्। अथ `हल्ङ्याब्भ्यः' (6.1.68) इत्यनेनात्र सोर्लोपो भविष्यति, किमत्राव्ययसंज्ञया। `लोलूयाञ्चक्रे' इति। लोलूयशब्दाद्यङन्तादाम्।
`नोनाव' इति। `णु स्तुतौ' (धा.पा.1035), `णो नः' (6.1.65) इति नत्वम्, यङ, नोनूयत इति स्थिते `यङोऽचि च' (2.4.74) इति यङो लुक्, लिट्, तिप्, `परस्मैपदानाम्' (3.4.82) इति णल्, वृद्धिः। अत्र प्रत्ययलक्षणेन प्रत्ययान्तादाम् स्यात्, अमन्त्र इति वचनान्न भवति।
`कास्यनेकाचः' इत्यादि। प्रत्ययग्रहणमपनीयानेकाज्ग्रहणं कर्त्तव्यमित्यर्थः। किमर्थमित्याह-- `चुलुम्पाद्यर्थम्' इति। यथान्यासं हि क इत्यस्मात् प्रजापतिवाचिनो विष्णुवाचिनोऽशब्दादाचारक्विपि तदन्तादप्याम् प्रसज्येत, चकासृप्रभृतिभ्योऽप्रत्ययान्तेभ्यश्च न स्यात्, तस्मादिदं न्यासान्तरं द्रष्टव्यम्। अन्ये तु प्रत्ययग्रहणस्यानेकाजुपलक्षणान्न कर्त्तव्यमेतदिति मन्यन्ते, एतच्चायुक्तम्; न हि प्रत्ययग्रहणमनेकाजुपलक्षणार्थमुपपद्यते, एकाचामपि प्रत्ययानां धातूनां विद्यमानत्वात्। यथा त्वेतन्न्यासान्तरं प्रत्याख्येयं भवेत् तथोत्तरत्र दर्शयिष्यामः। `चकासाञ्चकार, दरिद्राञ्चकार' इति। `चकासृ दीप्तौ' (धा.पा.1074), `दरिद्रा दुर्गतौ' (धा.पा.1073)। `चुलुम्पाञ्चकार' इति। चुलुम्पतेर्धातुष्वपरिपठितस्यापि कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमिति कात्यायनवचनप्रामाण्यात् धातुत्वं वेदितव्यम्।
अथामो मकारस्य `हलन्त्यम्' (1.3.3) इतीत्संज्ञा कस्मान्न भवतीत्याह-- `आमोऽमित्तवम्' इत्यादि। मकार इद्यस्य सोऽयमित्, न मिदमित्, तस्य भावोऽमित्त्वम्। कथममित्तवमित्याह-- `अदन्तत्वात्' इत्यादि। मकारान्तत्वे हि सति मकार्सयेत्संज्ञा स्यात्। न चास्य मकारान्तत्वम्, किं तर्हि ? अदन्तत्वम्। तेनाकार एव `उपदेशेऽजनुनासिक इत्' ((1.3.2ः इतीत्संज्ञामनुभवन् मकारस्येत्संज्ञां प्रतिबध्नाति। यथा चामेऽमित्तवमदन्तत्वादगुणत्वं विदेस्तथा। गुणाभावोऽपि हि विदेर्विदाञ्चकारेत्यत्राकारान्तत्वादावेव भवति. अथाकारान्तत्वे सत्यतो लोपे (6.4.48) तस्याः `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावादिकार उपधा न भवति, तेन लघूपपधगुणो न भवति। अदन्तत्वं तु विदेः `उषविदजागृभ्योऽन्यतरस्याम्' (3.1.38) इत्यनेनाम्प्रत्ययसन्नियोगेनाकारान्तत्वनिपातनात्। अभ्युपेत्यामो मकारान्तत्वममित्त्वं प्रतिपादयितुमाह-- `आश्चकासोर्विधानाच्च' इति। आमोऽमित्त्वमिति

प्रकृतेन सम्बन्धः,`दयायासश्च'(3.1.37) इत्यास आमो विधानात्। कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमित्युपसंख्यानाच्चकासेः। आदिग्रहणेन हि चकासेरपि ग्रहणम्। मकारस्येत्संज्ञैयतत् प्रयोजनम्-- अचोऽन्त्यात् परो यथा स्यादिति। यदि चामोऽमित्त्वं स्यात् तदाऽऽश्चकासोरामो विधानमनर्थकं स्यात्। न हि तयोरचोऽन्त्यात् प आशि भवत्यभवति वा कश्चिद्विशेषः। उभयथा हि `अकः सवर्णे' (6.1.101) इति दीर्घत्वे तदेव रूपं स्यात्, तदेतदाश्चकासोरामो विधानं कथमर्थवद्भवति ? यद्यमित्तवमामो भवति नान्यथा। न ह्यन्यत् किञ्चित्प्रयोजनमस्तीति प्रयोजनाभावादित्संज्ञा न भविष्यति। आश्चकासोर्विधानसमार्थ्यात् सवर्णदीर्घत्वमिह न भविष्यति। `मिदचोऽन्त्यात् परः' (1.1.47) इति परिभाषा वा नोपस्थास्य इत्येतच्च नाशङ्कनीयं लक्ष्यविरोधमनिच्छता। एवं ह्यनिष्टं रूपं स्यात्। न चानिष्टार्था शास्त्रे प्रक्लृप्तिर्युक्ता। यदि तर्ह्यमोऽदन्तत्वमेवं सत्याममन्त्र इति निर्देशो नोपपद्यते, सवर्णदीर्घत्वे `आमामन्त्रे' इति भवितव्यमित्याह-- `पररूपं कतन्तवत्' इति। यथा` सर्वत्र लोहितादिकतन्तेभ्यः' (4.1.18) इत्यत्र पररूपं तथेहापीति न भवति निर्देशानुपपत्तिः।।

36. इजादेश्च गुरुमतोऽनृच्छः। (3.1.36)

`{यजादेः इति मुद्रितः पाठः।} इजादेः' इति। आदिर्यस्येति बहुव्रीहिः। `इच्' इति प्रत्याहारग्रहणम्। गुरुरस्यास्तीति गुरुमान्। `ऋच्छतिवर्जितः' ऋच्छिना त्यक्तः। तद्रूपरहित इत्यर्थः। `ईहाचञ्क्रे' इति। `ईह चेष्टायाम्' (धा.पा.632) `ऊहाञ्चक्रे' इति। `ऊह वितर्के' (धा.पा.648)।
`ततक्ष, ररक्ष' इति। `तक्षू त्वक्षू तनूकरणे' (धा.पा.655, 656), `रक्ष पालने' (धा.पा.658)। `इयज; उवप' इति। यजिवप्योरुत्तमे णलि `णलुत्तमो वा' (7.1.91) इति णित्त्वाभावपक्षे वृद्ध्यभावाद्गुरुमत्ताभावः। केचित् इयेष, उवोषेति प्रत्युदाहरन्ति। `{इष धा.पा.} इषु इच्छायाम्' (धा.पा.1351) `उष दाहे' (धा.पा.696), णलि लघूपधगुणःष द्विर्वचनम्, `अभ्यासस्यासवर्णे' (6.4.78) इतीयङुवङौ। ननु च गुणे कृत एतावपि गुरुमन्तो भवत इति भवितव्यमेवामात्र ? न भवितव्यम्; `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या.प.12) इति लिट्सन्निपातो गुरुमत्ताया हेतुः। गुरुमत्ता च `आमः' (2.4.81) इति लिटमेव विहन्ति। अथ वा-- गुरुमत इति नित्ययोगे मतुप्, तेन नित्यं यस्य गुरुमा योगस्ततो भवितव्यम्, न चेषेरुषेश्च नित्यं गुरुणा सह योगः। यद्येवम्, `उछी विवासे' (धा.पा.216) -- उच्छाञ्चकारेत्यत्र तुकि कृते न प्राप्नोति ? नैष दोषः; ऋच्छिप्रतिषेधो हि ज्ञापयति-- आगमनिमित्ता गुरुमत्ता यस्य ततोऽपि भवतीति।
`आनर्च्छ' इति। `ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु' (धा.पा.1296), `छे च' (6.1.73) इति तुक्, `ऋच्छत्यृताम्' (7.4.11) इतिगुणः, द्विर्वचनम्, हलादिशेषः, `अत आदेः' (7.4.70) इति दीर्घः, `तस्मान्नुड् द्विहलः' (7.4.71) इति नुट्। ननु च `ऋच्छत्यृताम्'(7.4.11) इति ऋच्छतेरनन्तरे लिटि गुणवचनं ज्ञापकम्-- ऋच्छेराम् न भवति। सति हि तस्मिन्नागमनिमित्ता गुरुमत्ता यस्य ततोऽपि भवतीत्येतज्ज्ञापितं न स्यात्। तस्मादनृच्छ इति प्रतिषेधः कर्त्तव्यः।
`ऊर्णोतेः' इत्यादि। इजादित्वाद्गुरुमत्त्वाच्च प्राप्नोत्याम्। तस्मात् प्रतिषेधो वक्तव्यः, व्याख्येय इत्यर्थः। व्याख्यानं तु-- वक्ष्यमाणस्यान्यतरस्यांग्रहणस्य सिंहावलोकितन्यायेनानुवर्त्तितस्य व्यवस्थितविभाषात्वविज्ञानात् कर्त्तव्यम्। `प्रोर्णुनाव' इति। `अजादेर्द्वितीयस्य' (6.1.2) इति `नु'इत्यस्य द्विर्वचनम्। रेफस्तु न द्विरुच्यते; `न न्द्राः संयोगादयः' (6.1.3) इति प्रतिषेधात्।
`अथ वा' इत्यादि। `णु स्तुतौ' (धा.पा.1-35)। `तेन तुल्यं वर्त्तते' इति नुपवत्, तस्य भावो नुवद्भाव इति. नौतिना तुल्यं वर्त्तत इत्यर्थः। किं पुनस्तस्य प्रयोजनम्, येनासौ तथा वाच्यः ? इत्याह--- `यङप्रसिद्धिः प्रयोजनम्' इति। नुवद्भावे सति यथा नौतेः `धातोरेकाचः' (3.1.22) इतियङ भवति नोनूयत इति, एवमूर्णोतेरपि- प्रोर्णोनूयत इति। `आमश्च प्रतिषेधार्थम्' इति नुवद्भावो वाच्य इत्यपेक्षते। तस्मिन् सति यथा नौतेरनिजादित्वाद्गुमत्ताभावाच्चाम् न भवति, तथोर्णोतेरपि-- प्रोर्णुनावेति। `एकाचश्चेडुपग्रहात्' इति। `नुवद्भावो वाच्यः' इति सम्बध्यते। कर्मणि `ल्यब्लोपे' (वा.127) इति पञ्चमी, यथा-- प्रासादात् प्रेक्षते, आसनात् प्रेक्षत इति। इडुपग्रह इति इट्प्रतिषेधः। एतदुक्तं भवति-- एकाचः' (7.2.10) इत्यनुवर्त्तमाने `श्रयुकः किति' (7.2.11) इति य इडुपगृहः क्रियते तदुद्दिश्य प्रयोजनमूर्णोतेर्नुवद्भावो वाच्य इति। तेन यथा नौतेः `श्रयुकः किति' इतीट्प्रतिषेधः-नुतः, नुतवानिति, तथोर्णोतेरपि-- प्रोर्णुतः, प्रोर्णुतवानिति।
अथ वा-- इडुपग्रहादिति हेतावियं पञ्चमी, यथा-- `तदशिष्यं संज्ञाप्रमाणत्वात्' (1.2.53) इति। एकाचो यत इडुपग्रहो विधीयते तस्मात् प्रयोजनाद्धेतोरूर्णोतेर्नुवद्भावो वाच्य इत्यर्थः। अथ `इजादेश्च' इति किमर्थश्चकारः ? अनुक्तसमुच्चयार्थः , तेन `कास्यनेकाचः' (वा. 205) इति वक्तव्यं न भवति। यथान्यासेऽपि चकारेण चकासाञ्चकारेत्यादेः सिद्धत्वात्। ननु च यदीदं नोच्येत, तदा प्रत्ययान्तोऽपि यो धातुरेकाच् ततोऽपि प्रसज्येत् ? यदि नेष्यते, तदा वक्ष्यमाणमन्तयतरस्यांगर्हणमनुवर्त्यं व्यवस्थितविभाषात्वमङ्गीकर्त्तव्यम्।।

37. दयायासश्च। (3.1.37)

`पलायाञ्चक्रे' इति। परापूर्वस्यायतेः `उपसर्गास्यायतौ' (8.2.19) इति लत्वम्।

38. उषविदजागृभ्योऽन्यतरस्याम्। (3.1.38)

उषजागृभ्यां साहर्याद्विदेरपि परस्मैपदिनो ज्ञानार्थस्य ग्रहणम्, न तु सत्त्ाविचारणार्थं योरात्मनेपदिनोः, नापि लाभार्थस्योभयपदिनः; जागर्त्तिनाऽऽदादिकेन वा साहचर्याद्विदेरादादिकस्यैव ग्रहणमित्याह-- `विद ज्ञाने' इति। विवेदेत्यत्रादन्तत्वाभावाद्गुणो भवत्येव। आम्सन्नियोगेन विदेरदन्तत्वं विज्ञायते, तेन तत्रैव गुणाभावो नान्यत्रेति। अत आह-- `विदेरदन्तत्वप्रतिज्ञानादामि गुणो न भवति' इति।।

39. भीह्रीभृहुवां श्लुवच्च। (3.1.39)
`भीह्रीभृहुवाम्' इति। पञ्चम्यर्थे षष्ठी। सुपां सुपो भवन्तीति। `श्लुवत्' इति। श्लविव श्लुवत्। `तत्र तस्येव' (5.1.116) इति सप्तमीसमर्थाद्वतिः। कार्यातिदेशश्चायम्। अत एवाह--- `श्लुवच्चास्मिन् कार्यं भवति' इति। `द्वित्वमित्त्वञ्च' इति। `श्लौ' (6.1.10) इति द्विर्वचनम्, `भृञामित्' (7.4.76) इतीत्त्वम्। असति ह्यतिदेशे लिडाश्रयं द्विर्वचनमामा व्यवधाने न स्यात्। इत्त्वमपि नैव स्यात्, तद्विधौ हि `णजां त्रयाणां गुणः श्लौ' (7.4.75) इत्यतः श्लावित्यनुवर्त्तते। तस्मात् तस्योभयस्य सिद्धये `श्लुवच्च' इत्यतिदेशः।।

40. कृञ्चानुप्रयुज्यते लिटि। (3.1.40)
`अनुप्रयुज्यते' इति। अनुप्रशब्दौ प्रत्येकं प्रथमान्ते पदे। `युज्यते' इत्यात्ममनेपदे प्रथमपुरुषैकवचनान्तं पदम्। `आम्प्रत्ययस्य' इति। आम् प्रत्ययो यस्मादिति बहुव्रीहिः। पश्चादित्यनेनानुशब्दस्यार्थमाचक्षाणः प्राक् प्रयोगं निराकरोति। सावधारणफलत्वाच्च सर्ववाक्यानामाम्प्रत्ययस्यैव पश्चात् कृञ् प्रयुज्यते-- इत्यवधारणमिहाश्रितम्, तेन व्यवधाने प्रयोगो निराकृतो भवति। न हि व्यवधाने कृञनुप्रयुज्यमान आम्प्रत्ययस्यैवानुप्रयुक्तो भवति, अपि तु शब्दान्तरस्यापि।`लिटि परतः' इत्यनेन प्रत्ययान्तरे परे प्रयोगाभावमाह। ननु च `आमः' (2.4.81) इति लिटो लुका भवितव्यम्, तत्कथं लिटि परतः कृञ नुप्रयुज्यते ? नैष दोषः; न ह्ययमत्रार्थः-- लक्षणान्तरेण यो विहितो लिट्परः कृञनुप्रयुज्यत इति यावत्। ननु च कृञित्युच्यते, पाचयाम्बभूव पाचयामासेति भवतेरस्तेश्चानुप्रयोगो न सिध्यतीत्याह-- `कृञिति प्रत्याहारेण' इत्यादि।`अभूततद्भावे कृभ्वस्तियोगे' (5.4.40) इतीतं कृशब्दं गृहीत्वा `कृञो द्वितीयतृतीयशम्बबीजात् कृषौ' (5.4.58) इति ञकारेण प्रत्याहारग्रहणमेतत्। तेन प्रत्याहारग्रहणेन कृभ्वस्तयस्त्रयो गृह्यन्ते। तत्र च त्रयाणामप्यन्तर्भावादित्यदोषः। एवमप्यस्तेरनुप्रयोगो न सिध्यति, यस्मात् `अस्तेर्भूः' (2.4.52) इति भूभावेन भवितव्यमित्याह-- `तत्सामर्थ्यात्' इति। प्रत्याहेरण कृभ्वस्तीनां ग्रहणसामर्थ्यादस्तेर्भूभावो न भवति। तेषां प्रत्याहारगर्हणस्यैतत् प्रयोजनम्-- अस्तेरनुप्रयोगो यथा स्यात्। यद्यस्तेरनुप्रयोगस्य भूभावः स्यात् निष्फलं प्रत्याहारग्ररहणं स्यात्, `कृभ्वनुप्रयुज्यते लिटि' इत्येवं ब्रूयात्। तत्राप्ययमर्थः-- किमिदं करोतेर्ग्रहणम् ? उत प्रत्याहारस्य ? इति सन्देहः परिहृतो भवति। यदि तर्हि कृञिति प्रत्याहारग्रहणम्, एवं सति `अभिविधौ सम्पदा च' (5.4.53) इति सम्पदानुप्रयोगः प्राप्नोति; तस्य प्रत्याहारेऽन्तर्भूतत्वात् ? नैष दोषः; `सनाद्यन्ता धातवः' (3.1.32) इत्यतो धातुग्रहणमनुवर्त्तते, तेन च कृञ् विशिष्यते--कृञ् यो धातुरिति, न च सम्पदेत्यं धातुः, किं तर्हि ? धातूपसर्गसमुदायः, तस्मान्नानुप्रयुज्यते।
`पाचयाम्बभूव' इति। पचेर्ण्यन्तादाम्। `अयामन्ताल्वाय्येत्न्विष्णुषु' (6.4.55) इति णेरयादेशः। `भवतेरः' (7.4.73) इत्यभ्यासस्यात्त्वम्। `भुवो वुग् लुङलिटोः' (6.4.88) इति वुगागमः।
किमर्थं पुनरिदमुच्यते, यावताऽमन्तमिदम्, अनभिव्यक्तक्रियापदार्थम्। अतो हि क्रियाकालमात्रस्याभिव्यक्तिर्भवति, न साधनपुरुषसंख्यानम्। न हि विना तिङन्तपदेन तासामभिव्यक्तिर्भवति। तस्मादपरिसमाप्त्यर्थत्वादेवामन्तस्यानुप्रयोगो भविष्यति ? कृभ्वस्तीनामनुप्रयोगो यथा स्यात्, `{पचादीनां मा भूत्। पचादीनामिति चेन्न'} इति मुद्रितः पाठः} पचादीनां मा भूदिति चेत्, न; पचादीनां विशेषवाचित्वादनुप्रयोगस्यानुपपत्तेः। विशेषवाची ह्यनुप्रयुज्यमानः सामान्यवाचिनो ह्यामन्तस्यानुप्रयुज्यते ? विशेषवाचिनो वा ? तत्र न तावत् सामान्यवाचिन आमन्तस्य विशेषवाच्यनुप्रयोगमर्हति, तस्यासम्भवात्। कृभ्वस्तयो हि सामान्यवाचिनः, न च तेभ्यः केनचिदाम् विहितः। विशेषवाचिनोऽप्यामन्तस्य विशेषवाची समानार्थोऽनुप्रयुज्येत ? भिन्नार्थो वा ? तत्र समानार्थस्तावन्नानुप्रयुज्यते; उक्तार्थत्वात्। तस्मिंश्चानुप्रयोक्तुमिष्ट आमन्तस्य सकलक्रियाकालाद्यर्थाभिव्यक्तिर्भवति। सामर्थ्यात् स एवानुप्रयोक्तव्यो यत्र सर्वाभव्यक्तिर्भवति। तत्र क्रियामन्तेन समानार्थेन पूर्वेण ! भिन्नार्थोऽपि नानुप्रयोगमर्हति; तदर्थानभिव्यक्तेः। अनुप्रयोगो ह्यामन्तस्यार्थस्याभिव्यक्तये क्रियते, न चात्यन्तभिन्नार्थेनामन्तवाच्यस्यार्थस्य सम्बन्धिनः साधनादयः शक्यन्तेऽभिव्यङ्क्तुम्। सामान्यवाचिना तु शक्यन्तेऽभिव्यङ्क्तुम्। विशेषसन्निधौ हि सामान्यशब्दस्य विशेषेऽवस्थानादामन्तस्य सन्निधौ सामान्यशब्दाः कृभ्वस्तयोऽनुप्रयुज्यमानास्तद्वाच्य एवार्थविशेषे वर्त्तन्ते, तस्मादेषामेव कृभ्वस्तीनामनुप्रयोगो भविष्यतीति नारब्धव्यमिदम् ? नैतदस्ति; यथैव हि कृभ्वस्तयः क्रियासामान्यवचनाः, एवं विद्यतिरपीति तस्याप्यनुप्रयोगः स्यात्। तस्मात् तन्निवृत्त्यर्थमिदमारब्धम्। व्यवहितप्रयोगनिवृत्त्यर्थञ्च, पाचयां देवदत्तश्चकारेति मा भूत्। व्यवहितप्रयोगानिवृत्तिस्त्ववधारणविशेषाल्लभ्यते। अवधारणं तु सर्ववाक्यानां व्यवच्छेदफलत्वात् सावधारणफलत्वाच्चकारस्यानुक्तसमुच्चयार्थत्वाद्वा लभ्यते। विपर्ययनिवृत्त्यर्थश्चारब्धव्यः, विपर्ययनिवृत्तिस्त्वनोः पश्चादर्थत्वाल्लभ्यते।।

41. विदाङ्कुर्वन्त्वित्यन्यतरस्याम्। (3.1.41)
`विदेर्लोट्याम्प्रत्ययः' इति। विदेर्लिट्याम् विहितो लोटि न प्राप्नोतीत्यतोऽपि निपात्यते। अममाश्रित्य लघूपधगुणः प्राप्नोतीति तदभावश्च। `आमः'

(2.4.81) इति लेर्लुग्विधीयमानो लोटो न सिध्यतीत्यतो लोटो लुक्। लिट्परस्य कृञोऽनुप्रयोग उक्तो लोट्परस्य न प्राप्नोति, सोऽपि निपात्यत इति सर्वत्र सम्बन्धनीयम्। `कुर्वन्तु' इति। बहुवचनम्, झेरन्तादेशः, `एरुः' (3.4.86), विकरणमश्रित्य धातोर्गुणः, ` अत उत् सार्वधातुके' (6.4.110) इत्युत्त्वम्, विकरणस्य यणादेशः। `इतिकरणः' इत्यादि। लोड्वचनानामुपलक्षणार्थत्वे सतीतिकरणस्य यदिष्टं तद्दर्शयितुमाह-- `न केवलम्' इत्यादि। `कुरुताम्' इति। `तस्थस्' (3.4.101) इत्यादिना तसस्ताम्। `कुरु' इति. `सेर्ह्यपिच्च' (3.4.87) इति हिः, `उतश्च प्रत्ययात्' (6.4.106) इत्यादिना हेर्लुक्। `कुरुतम्' इति। तसस्तम्।।

42.अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति च्छन्दसि। (3.1.42)

`अभ्युत्सादयाम्' इति। `कुगतिप्रादयः' (2.2.18) इति समासे कृत एकमेवेदं प्रथमान्तम्। एवं `प्रजनयाम्' इत्येतदपि। शेषाण्यप्यामन्तानि प्रथमान्तान्येव। `अकः' इति। करोतेर्लुङ। प्रथमपुरुषैकवचनान्तम्। `अक्रन' इति। प्रथमपुरुषबहुवचनान्तम्। `सदिजनिरमीणाम्' इति। `षद्लृ विशरणगत्यवसादनेषु' (धा.पा.1427), `जनी प्रादुर्भावे' (धा.पा.1449), `रमु क्रीडायाम्' (धा.पा.853)। `ण्यन्तानाम्'इति। हेतुमण्णिजन्तानाम्। `पचतेः' इति। लिटि विहितत्वाल्लिङि न प्राप्नोति, ततो निपात्यते। `अस्य' इति। पुनातेः पवतेर्वा ण्यन्तस्य। `लृङ्याम् निपात्यते' इति। पूर्ववन्न प्राप्नोतीति कृत्वा। `विदेरपि गुणाभावश्च' इति। `पुगन्तलघूपधस्य' (7.3.86)इति गुणः प्राप्नोति, अत्सतदभावो निपात्यते। `अभ्युत्सादयाम्' इति। पूर्ववण्णेरयादेशः। लुङो लुक्। `अकः' इति। करोतेर्लुङ, अडागमः, तिप्, च्लिः, तस्य `मन्त्रे घसह्वर' (2.4.80) इति लुक्, गुणः, रपरत्वम्, `हल्ङ्याब्भ्यः' (6.1.68) इति तिलोपः, रेफस्य विसर्जनीयः। `अभ्युदसीषदत्' इति। `णिश्रि' (3.1.48) इत्यादिना चङ, `णौ चङ्युपधायाः' (7.4.1) इति ह्रस्वः, `चङि' (6.1.11) इति द्विर्वचनम्, हलादिशेषः, `सन्वल्लघुनि' (7.4.93) इति सन्वद्भावे सतीत्त्वम्, `दीर्घो लघोः' (7.4.94) इति दीर्घः। एषा प्रक्रिया यथायोगमुत्तरत्रापि वेदितव्या।

`प्रजनायाम्' इति। `जनीजृष्क्नसुरञ्जोऽमन्ताश्च' (धा.पा.817) इति मित्त्वात् ह्रस्वत्वम्। `चिकयाम्' इति। ककारोऽप्यत्र निपात्यते। गुणायादेशौ। `अचैषीत्' इति। `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्, सिचि वृद्धिः। `रमयाम्' इति। `मितां ह्रस्वः' (6.4.92)। `पावयाम्' इति। `आमः' (2.4.81) इति लिङो लुक्। `क्रियात्' इति। कृञ आशिषि लिङ, तिप्, `इतश्च' (3.4.100) इतीकारलोपः, यासुट्, `रिङ शयग्लिङ्क्षु' (7.4.28) इति रिङादेशः; `स्को संयोगाद्योरन्ते च' (8.2.29) इति सलोपः। `पाव्यात्' इति। पूर्ववल्लिङ, `लिङाशिषि' (3.4.116) इत्यार्धधातुकत्वाच्छपोऽभावः, `णेरनिटि' (6.4.51) इति णिलोपः। `विदाम्' इति। विदेर्लुङ, आम्, गुणाभावः, लुङो लुक्। `अक्रन्' इति। कृञो लुङ, च्लिः, झेरन्तादेशः, `इतश्च' (3.4.100) इतीकारलोपः, संयोगान्तलोपः, च्लेः `मन्त्रे घसह्वर' (2.4.80) इति लुक्, अट, यणादेशः। `अवेदिषुः' इति। सिच इट्, `सिजभ्यस्तविदिभ्यश्च' (3.4.109) इति झेर्जुस्। ` इतिकरणः प्रयोगदर्शनार्थः' इति। अन्येऽप्येवंजातीयाश्छन्दसि वेदितव्या इत्यर्थः।।

43. च्लि लुङि।। (3.1.43)

`इकार उच्चारणार्थः' इति। उच्चारणमेवास्यार्थो नान्यत् किञ्चित् प्रयोजनमित्यर्थः। एतेनेत्संज्ञाकार्यं न भवतीति दर्शयति। `चकारः स्वरार्थः' इति। `चितः' (6.1.163) इत्यन्तोदात्तत्वं यथा स्यात्। अथ `मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः' (2.4.80) इत्येकारः सामान्यग्रहणार्थः, चकारस्तदविघातार्थः कस्मान्न विज्ञायते ? एवं मन्यते-- मन्त्रेघसादिभ्यो नैवाभ्यो लिरस्ति यस्य सामान्यग्रहणार्थोऽयमिकारः स्यात्, तस्मिंश्चासति सामान्यग्रहणार्थे तदविघातार्थतापि चकारस्य नोपपद्यते। `आमः' (2.4.81) इत्यत्र तर्हीकारचकारौ कस्मान्न सामान्यग्रहणाविघातार्थौ भवतः, तत्र हि मन्त्रेघसादि (2.4.80) सूत्राल्लेरित्यनुवर्त्तते, तत्रेकारचकारयोरभावे `निरनुबन्धकग्रहणे न सानुबन्धकस्य' (व्या.प.53) इति तस्यैव ग्रहणं स्यात्, न लिङलिटोः ? नैतदस्ति; अत्र मा भूल्लिग्रहणानुवृत्तिः,अविशेषेणापि प्रत्ययमात्रस्य लुग् भवष्यति; नैवं सति किञ्चिदनिष्टमापद्यते। न हि सोऽस्ति प्रत्ययो यस्य लुकि सति किञ्चिदनिष्टं भवेत्। सत्यामपि लिग्रहणानुवृत्तौ न दोषः, अनेकस्मिन् ग्राह्ये सति सामान्यग्रहणं भवति, न चामः परस्यानेकं ग्राह्यमस्ति। न हि क्वचिदामः परो लिटोन्यः प्रयोगोऽस्ति, तस्मादन्याभावाल्लिट एव ग्रहणम्। तत्र नार्थः सामान्यग्रहणार्थेनेकारेण,नापि तदविघातार्थेन चकारेण। ननु च पावयाङ्क्रियादित्यत्रान्योऽपि लिरस्ति ? नैतदस्ति; निपातनादेव तत्सिद्धम्।तच्चावश्यं निपातनमाश्रयितव्यम्; अन्यथा क्रियमाणेऽपीकारे तदविघात्[एथे च चकारे अब्युत्सादयामिति न सिद्ध्येत्। तस्मात् पूर्वोक्तमेव प्रयोजनं न्याय्यम्। यथोत्तरार्थश्चकारस्तथोत्तरत्र प्रतिपादयिष्यामः।

अथ किमर्थं च्लिप्रत्ययमासज्य तस्य सिजादय आदिश्यन्ते, न सिचमेवोत्सर्गं विधाय तस्य क्सादय आदेशा विधीयेरन्निति ?नैवं शक्यम्; एवं हि `शल इगुपधादनिटः क्सः' (3.1.45) इत्यत्र च्लेरभावादनिङ्ग्रहणं धातोर्विशेषणं विज्ञायेत- धातोरनिट इति। तथा च गुहेर्न सिद्ध्येत-- अघुक्षदिति।तस्य हि ऊदित्त्वात् स्वरत्यादिना (7.2.44) विकल्पेड्विधानान्नास्त्यनिट्त्वम्। च्लौ सत्यनिड्ग्रहणेन स एव विशिष्यते-- च्लेरनिट इति। गुहेश्च परस्य च्लेर्विभाषितेट्त्वात् यदेण् नास्ति तदा च्लेरनिट्त्वात् क्सः सिद्धो भवति।।

44. च्लेः सिच्। (3.1.44)

`इकार उच्चारणार्थः' इति। एतेनेहोच्चारणादन्यप्रयोजनं नास्तीति दर्शयन्नित्संज्ञायां अभावमाह। ननु चासतीकारेऽनुबन्धे `अनिदिताम्' (6.4.24)

इत्यनेनामंस्तेत्यत्रानुनासिकलोपः प्राप्नोति, ततस्तत्प्रतिषेधार्थोऽयमित्संज्ञकः कस्मान्न भवति ? एवं मन्यते-- असत्यपीकारेऽनुबन्धेनैव सिजन्तस्यानुनासिकलोपेन भवितव्यम्; `हन सिच्' (1.2.14) इति कित्करणाज्ज्ञापकात्। तथा हि हन्तेः कित्करणस्यैतत् प्रयोजनम्-- आहतेत्यत्रानुनासिकलोपो यथा स्यात्। यदि सिजन्तस्यानुनासिकलोपः स्यात् हन्ते सिचः कित्करणमनर्थकं स्यात्। `चकारः स्वरार्थः' इति। अन्तोदात्तार्थः। ननु च सिचोऽनच्कत्वाच्चकारस्य स्वरार्थता नोपपद्यते ? इटि कृते साच्को भवतीत्यदोषः। नन्वेवमपि लुङ्यत्राडागमस्योदात्तत्वे सतिशिष्टस्वरेणाद्युदात्तत्वेन भवितव्यम्, किमर्थश्चकारः ? यत्र तर्हि `न माङयोगे' (6.4.74) इत्यडागमः प्रतिषिध्यते तत्र चकारस्य स्वरार्थता भविष्यति। ननु तत्रापि `तिङङतिङः' (8.1.28) इति निघातेन भवितव्यम् ? तर्हि यत्र `हि च' (8.1.34) इति निघातः प्रतिषिध्यते-- मा हि लावीदित्यादौ , तत्र स्वरार्थो भविष्यति। ननु च च्लेस्तत्र स्थानिवद्भावादेव चित्सरो भविष्यतीतिकिमादेशे चकारोऽनुबध्यते ? इत्याह-- `आगमानुदात्तत्वं हि' इत्यादि। यासुट उदात्तवचनेनागमानुदात्तत्वं ज्ञापयिष्यते। तच्च नाप्राप्ते स्वरान्तरे विधीयते। तथा हि-- ये प्रकृतिभक्ता आगमा अडानुकप्रभृततयस्तेषां प्रकृतिस्वरः प्राप्नोति, ये च प्रत्ययभक्ता इडादयस्तेषां प्रत्ययस्वरः; तस्मादगमानुदात्तत्वं सर्वस्य स्वरान्तरस्य बाधकम्। ततश्चैव तद्यथा प्रत्ययस्वरं बाधते तथा चित्स्वरमपि स्थानिवद्भावकृतं बाधेत। तस्मादादेशेऽपि चकारोऽनुबध्यते। हि-शब्दोयस्मादर्थे,इतिशब्दस्तस्मादर्थे। यस्मादेवं चितस्वरमपि बाधेत तस्मात् स्थानिन्यादेशेऽपि द्विश्चकारोऽनुबध्यते. ननु च मा हि लावीत्यादावागमानुदात्तत्वं यदि स्यात् च्लेश्चित्करणमनर्थकं स्यात्, प्रयोजनाभावात्; तस्मात् च्लेश्चित्करणसामर्थ्यादागमानुदात्तत्वेन चित्स्वरो न बाधिष्यते-- इत्यपार्थकं सिचश्चित्करणम् ? नापार्थकम्; पक्षे सार्थकत्वात्. कथम् ? इह हि यथा व्यक्तिपदार्थपक्षमाश्रित्य `सरूपाणामेकशेषः' (1.2.64) इत्येतत्सूत्रमारब्धम्, तथा व्यक्तिपदमार्थक्षाश्रयत्पद्विश्चकारोऽनुबध्यते। व्यक्तौ हि पदार्थे यथा चित्स्वरलक्षमं प्रतिलक्ष्यं प्रवर्त्तते तथागानुदात्तत्वज्ञापकमपि यासुट उदात्तवचनम्। ततश्च मा हि लावीदित्यत्रागमानुदात्तत्वं तेन ज्ञापितमेव। तथा च-- यथेह चित्स्वरो भवति तथागमानुदात्तत्वेनापि भवितव्यम्; अन्यथा ह्येतद्विषयस्य ज्ञापकस्य वैयर्थ्यं स्यात्। न च द्वयोरप्यनुदात्तयोर्यौगपद्यं सम्भवतीति पर्यायः स्यात्। तत्र पक्षे स्थानिनश्चकारस्य पक्षान्तर आगमानुदात्तत्वेन बाध्येत। द्विरनुबध्यमाने तु चकारे यद्यपि पक्षेऽनुदात्तोऽभिनिर्वर्त्तते, तथाप्यभिनिर्वृत्ते तस्मिन् द्विश्चकारा4नुबन्धकरणसामर्थ्यात् पुनश्चित्स्वरोऽभिनिर्वर्त्तते, अतो न दोषः।

`स्पृशमृश' इत्यादि। स्पृशिमृशिकृषिभ्यः `शल इगुपधादनिटः क्सः' (3.1.45) इति क्से प्राप्ते, तृपिदृपिभ्यां पुषादित्वादङि प्राप्ते सिज्वा वक्तव्यः = व्याख्येयः। तत्रेदं व्याख्यानम्--- क्सविधौ `विदांकुर्वन्त्वित्यन्यतरस्याम्' (3.1.41) इत्यतो मण्डूकप्लुतिन्यायेनान्यतरस्यांग्रहणमनुवर्तते, पुषादिसूत्रेऽपि `आत्मनेपदेषु' (3.1.54) इत्यतः। सा च व्यवस्थित विभाषितोभयत एव विज्ञायते। तेन स्पृशिमृशिकृषिभ्यो विकल्पेन क्सो भविष्यति, अन्येभ्यस्तु नित्यम्। तृपिदृपिभ्यामन्यतरस्यामङ् च भविष्यति, अन्येभ्यस्तु पुषादिभ्यो नित्यमेव। तेन यस्मिन् पक्षे क्साङोरभावस्तस्मिन् पक्षे सामान्यविहितः सिजेव भवति। `अस्पृक्षत्' इति। `स्पृश संस्पर्शे' (धा.पा.1422), क्सः, व्रश्चादिना (8.2.36) षत्वम्, `षढोः कः सि' (8.2.41) इति कत्वम्, `आदेशप्रत्ययोः' (8.3.59) इति षत्वम्। `अस्प्राक्षीत्' इति। `अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' (6.1.59) इत्यमागमः; `वदव्रज' (7.2.3) इत्यादिना वृद्धिः, ऋकारस्य यणादेशः। `अस्पाक्षीत्' इति। सिच्। यदाऽमागमो नास्ति तदा ऋकारस्यैव वृद्धिः।एवं `मृश आमर्शने' (धा.पा.1425), `कृष विलेखने' (धा.पा.1286) इत्येतयोरपि रूपद्वयं, वेदितव्यम्। `अतु पत्' इति। `तृप प्रीणने' (धा.पा.1195)। `अत्राप्सीत्, अताप्सीत्' इति। पूर्ववत्। एवं `दुप हर्षणमोचनयोःट (धा.पा.1196) इत्यस्यापि रूपत्रयं वेदितव्यम्।।

45. शल इगुपधादनिटः क्सः। (3.1.45)

`अघुक्षत्' इति। `दुह प्रपूरणे' (धा.पा.1014), `दादेर्धातोर्घः' (8.2.32), `एकाचो बशो भष्' (8.2.37) इत्यनेन दकारस्य भष्भावेन धकारः, धकारस्य `खरि च' (8.4.55) इति चर्त्वम्-- ककारः। `अलिक्षत्' इति। `लिह आस्वादने' (धा.पा.1016), `हो ढः' (8.2.31) इति ढत्वम्, पूर्ववत् षत्वकत्वे। `अधाक्षीत्' इति।` दह भस्मीकरणे' (धा.पा.991), पूर्ववत् ढत्वकत्वषत्वभष्भावचर्त्वानि। `अकोषीत्' इति। `कुष निष्कर्षे' (धा.पा. 1518) लघूपधगुणः।।

46. श्लिष आलिङ्गने। (3.1.46)

`अत्र' इति। आलिङ्गने। `नियमार्थमेतत्' इति। पूर्वेण सिद्धे सत्यारम्भात्। `अश्लिक्षत्' इति। पूर्ववत् कत्वम्।

`समाश्लिषज्जतु काष्ठम्' इति। पुषादित्वादङ्। प्रत्यासत्तिरत्र नैरन्तर्यलक्षणा श्लिषेरर्थः, न त्वालिङ्गनम्। यद्ययं पुषादौ पठ्यते, कथमिदं नियमार्थम्; सिद्धे सत्यारम्भो नियमाय भवति, न च पूर्वेण क्सः सिद्धः, अङा वाधितत्वात् ? मन्यते-- `श्लिषः' इति योगविभागः कर्त्तव्यः। किमर्थम् ? अङ्बाधनार्थम्-- क्स एव भवति, नाङ्। ततः। `आलिङ्गने' इति किमर्थम् ? नियमार्थम्-- आलिङ्गन एव क्सो भवति, अन्यत्राङेवेति। यद्येवम्, `श्लिषः' इत्येवं योगविभागो यथाङं बाधते तथा `चिण्भावकर्मणोः' (3.1.66) इति चिणमपि बाधेत-- उपाश्लेषि कन्या देवदत्तेनेति ? नैतदस्ति; `पुरस्तादप वादा अनन्तरान् विदीन् बाधन्ते नोत्तरान् (व्या.प.9) इत्ययमङं बाधते, न चिणम्। अथ वा-- `चिण्भावकर्मणोः' (3.1.66) इत्यत्र `चिण् ते पदः' (3.1.60) ित्यतश्चिणित्यनुवर्तमाने पुनश्चिण्ग्रहाहणस्यैतत्प्रयोजनम्-- चिणेव यथा स्यात्, यदन्यत् प्राप्नोति तन्मा भूदिति। अथ `श्रिषु श्लिषु प्रुषु प्लुषु दाहे' (धा.पा.701,704) इत्येतस्य श्लिषो ग्रहणं कस्मान्न भवति ? आलिङ्गने तस्य वृत्यसम्भवात्, `अनिटः' (3.1.45) इत्यधिकाराच्च, अस्य सेट्त्वात्।।

47. न दृशः। (3.1.47)
`अदर्शत्' इति। अङ्। `ऋदशोऽङि गुणः' (7.4.16) इति गुणः। अद्राक्षीत्' इति। `सृजिदृशोर्झल्यमकिति' (6.1.58) इत्यमागमः। `वदव्रज' (7.2.3) इत्यादिना वृद्धिः, पूर्ववत् षत्वकत्वे।।

48. णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्। (3.1.48)
`चकारो विशेषणार्थः' इति। `चङि' (6.1.11) इत्यत्राङीत्यच्यमाने `अस्यतिवक्तिख्यातिभ्योऽङ् (3.1.52) इत्यनेनापि विहितेऽङि द्विर्वचनं स्यात्। `अचीकरत्, अजीहरत्' इति। `चङि' (6.1.11) इति द्विर्वचनं कृह्रशब्दयोः उरत्त्वम्, `कुहोश्चुः' (7.4.62) इति चुत्वम्-- ककारस्य चकारः, हकारस्यापि झकारः, `अभ्यासे चर्च' (8.4.54) इति झकारस्य जकारः। शेषमभ्युदसीषददित्यनुसारेण वेदितव्यम्। `अशिश्रियत्' इत्यादि। `श्रिञ् सेवायाम्' (धा.पा.897), `दु द्रु गतौ' (धा.पा.944, 945), `स्रु गतौ' (940), `अचि श्नुधातु' (6.4.77) इत्यादिना यथायोगमियङुवङौ। `अकारयिषताम्' इति। कर्मणि द्विवचनम्, आताम्, इड्गुणायादेशषत्वानि।
`कमेरुपसंख्यानम्' इति। ननु `कमेर्णिङ्' (3.1.30) इति णिङि कृते ण्यन्तत्वादेव कमेश्चङ्, सिद्धः, तत् कथमुपसंख्यायत इत्याह-- `आयादयः' इत्यादि। `अचकमत'इति। अनुदात्तेत्त्वादात्मनेपदम्, पूर्ववदभ्यासस्य कुत्वम्। `णिङ्भावपक्षे सन्वद्भावः' इति। न त्वणिङ्पक्षे इति दर्शयति; यस्मात् `सन्वल्लघुनि चङ् परे' (7.4.93) इत्यस्य चङ् परो यस्माण्णेः स चङ्परो तस्मिन् परतो यदङ्गं तस्याभ्ययासस्य सन्वत् कार्यं भवतीत्येषोऽर्थः, न चायमर्थो णिङभावपक्षे सम्भवति।।

49. विभाषा धेट्श्व्योः।
`अदधत्' इति। `आतो लोप इटि च' (6.4.64) इत्याकारलोपः। पूर्ववदभ्यासस्य जश्त्वं दकारः। `अधासीत्' इति। लुङ्, सिच्, `यमरमनमातां सक् चट (7.2.73) इतीट्, प्रकृतेश्च सगागमः, `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्, `इट ईटि' (8.2.28) इति सिचो लोपः। `अशिश्वियत्' इति। पूर्ववदियङ्। `अङ्प्यत्र विकल्प्यते' इति। `जृस्तम्भु' (3.1.58) इत्यादिसूत्रेण। `अश्वत्' इति। `श्वयतेरः' (7.4.18) इत्यत्वम्, `अतो गुणे' (6.1.97), पररूपत्वम्। `अश्वयीत्' इति। ह्यन्तक्षणाश्वस' (7.2.5) इत्यादिना वृद्धिप्रतिषेधे कृते गुणेऽयादेशः। `अधिषाताम्' इति। कर्मणि द्विवचनम्, आताम्, `स्थाघ्वोरिच्च' (1.2.17) इति कित्त्वमित्त्वञ्च।

50. गुपेश्छन्दसि। (3.1.50)
`यत्रायप्रत्ययो नास्ति तत्रायं विधिः' इति। अनायप्रत्ययान्तकस्योपादानात्। आयप्रत्ययान्तस्य धात्वन्तरत्वात्। `अज्रूगुपतम्' इति। `गुपू रक्षणे' (धा.पा.395), लुङ्, द्विर्वचनम्,थस्, `तस्थस्थ' (3.4.101) इत्यादिना तम् `दुजादीनां दीर्घोऽभ्यासस्य' (6.1.7) इति दीर्घः। `अगौप्तम्' इति। `झलो झलि' (8.2.26) इति सिचो लोपः,तस्यासिद्धत्वात् `वदव्रज' (7.2.3) इत्यादिना वृद्धिः। `अगोपिष्टम्' इति। ऊदित्त्वात् `स्वरति' (7.2.44) इत्यादिना पक्षे इट्, `नेटि' (7.2.4) इति वृद्धौ प्रतिषिद्धायां लघूपधगुणः। `अगोपायिष्टम्' इति। आयप्रत्ययान्तात् सिच्, इट्, `अतो लोपः' (6.4.48)।`रूपत्रयम्' इति। पाश्चात्यम्।।

51. नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः। (3.1.51)
`एभ्यो ण्यन्तेभ्यः' इति। ऊनयत्येलयतिभ्यां चुरादिण्यन्ताभ्यम्। `पूर्वेण' इति। `श्रिणि' (3.12.48) इत्यादिना। `औनयीत्' इति। तिप्, सिच्, `इट ईटि' (8.2.28) इति सिचो लोपः, तस्यासिद्धत्वाद्वृद्धौ प्राप्तायां `ह्म्यन्तलक्षण' (7.2.5) इति प्रतिषेधः, गुणायादेशौ, `आडजादीनाम्' (6.4.72) इत्याट्, `आटश्च' (6.1.90) इति वृद्धिः। `औनिनत्' इति। `अजादेर्द्वितीयस्य' (6.1.2) इति द्विर्वचनम्। णिलोपः। `ध्वनयीत्' इति। ध्वनयीदित्यतदेव निपातनाददन्तत्वम्, `अतो लोपः' (6.4.48), तस्य स्थानिवद्भावात् `अत उपाधायाः' (7.2.116) इति वृद्धिर्न भवति। `बहुलं छन्दत्यमाङ्योगेऽपि' (6.4.75) इत्यड्निषेधः। `अदिध्वनत्' इति। सन्वद्भावादित्त्वम्। `ऐलिलत्' इति। `अजादेर्द्वितीयस्य' (6.1.2) इति लिशब्दस्य द्विर्वचनम्, पूर्ववदाट्। `आर्दिदत्' इति। इहापि द्वितीयस्यैकाचो द्वर्वचनं पूर्ववत्। रेफस्तु न द्विरुच्यते; ` न न्द्राः संयोगादयः' (6.1.3) इति प्रतिषेधात्। आट्, वृद्धिः।।

52. अस्यतिवक्तिख्यातिभ्यऽङ्। (3.1.52)
`ब्रूञादेशो वा' इति। ब्रूवो वचिः' (2.4.53) इति। `चक्षिङादेशो वा' इति। ` चक्षिङः ख्याञ्' (2.4.54) इति। `पर्यास्थत' इति। `उपसर्गादस्यत्यूह्योर्वचनम्' (वा.49) इत्युपसंख्यानात्मनेपदम्। `अस्यतेस्थुक्' (7.1.17)। `अवोचत्' इति। `वच उम्' (7.4.20) `आख्यत्' इति। पूर्ववदाकारलोपः।।

53. लिपिसिचिह्वश्च। (3.1.53)

`अह्वत्' इति। पूर्ववदाकारलोपः। अथ किमर्थो योगविभागः, न `अस्यतिवक्तिख्यातिलिपिसिचिह्वश्च' इत्येक एव योगः कियतामित्याह-- `पृथक्' इत्यादि। उत्तरसूत्रे लिपिप्रभृतिभ्य एवात्मनेपदेष्वङ्विकल्पो यथा स्यादित्येवमर्थो योगविभागः। एक योगे ह्यस्यत्यादीनामप्युत्तरत्रानुवृत्तिः स्यात् तथा च तेभ्योऽपि विकल्पेनाङ् प्रसज्येत।।

54. आत्मनेपदेष्वन्यतरस्याम्। (3.1.54)

`स्वरितञितः' इत्यात्मनेपदम् इति. लिपिसिच्योः स्वरितेत्त्वात्, ह्वयतेस्तु ञित्त्वात्। `अलिप्त, असिक्त' इति। `झलो झलि' (8.2.26) इति सिचो लोपः, तस्या (8.2.26) सिद्धत्वाल्लघूपधगुणः प्राप्तः, स `लिङ्सिचावात्मनेपदेषु' (1.2.11) इति कित्त्वान्न भवति, `चोः कुः' (8.2.30) इति कुत्वम्।।

55. पुषादिद्युताद्य्लृदितः परस्मैपदेषु। (3.1.55)

लृकार इद्येषां ते लृदितः। पुषादिरस्त्येव भावाद्यन्तर्गणः-- पुष पुष्टौ' (धा.पा.700) श्रिषु श्लिषु प्रुषु प्लुषु दाहे' (धा.पा.701-704) इत्येवमादिः, अस्ति च दिवाद्यन्तर्गणः--`पुष पुष्टौ' (धा.पा.1182), `शुष शोषणे' (धा.पा.1183) इत्येवमादिः, अस्ति च क्र्याद्यन्तर्गणः-- पुष पुष्टौ' (धा.पा.1529), `मुष स्तेये' (धा.पा.1530) इत्येवमादिः, तदिह कस्य ग्रहणमित्याह-- `पुषादिर्दिवाद्यन्तर्गणः' इत्यादि. यदि भ्वाद्यन्तर्गणो गृह्यते, पुषाद्यनन्तरं द्युतादीनां पाठात् पृथग्ग्रहणं न कुर्यात्; पुषादिग्रहणेनैव गृहीतत्वात्, तस्मात् स तावन्न गृह्यते। क्र्याद्यन्तर्गणोऽपि नैव गृह्यते, तत्र हि चत्वार एव पठ्यन्ते धातवः-- पूर्वोक्तौ द्वौ `खच भूतप्रादुर्भावे' (धा.पा.1531), `ग्रह उपादाने' (धा.पा.1533) इत्येतौ, यदि चैते जिघृक्षिताः स्यर्लृदित यएवैतान् कुर्यात्, एवं पुषादिग्रहणं न कर्त्तव्यं भवति। तस्मात् पारिशेष्याद् दिवाद्यन्तर्गणानां पुषादीनां ग्रहणं विज्ञायते। अथ पुषादय लृदितः कस्मान्न कृताः ? न; न हि ते लृदितः शक्यन्ते कर्त्तुम्। लृदित्वे हि तेषां उदित आदितश्च पठ
्यन्ते तेषाम् `उदितो वा' (7.2.56) `आदितश्च' (7.2.16) इत्येतयोः कार्ययोरभावः स्यात्। अथ द्युतादयः कस्मात् लृदितो न कृताः ? यत एव हेतोः पुषादय लृदितो न कृतास्तत एव द्युतादयश्च। तेष्वपि हि केचिदुदित आदितश्च पठ्यन्ते। तत्र पुषादय आदिवादि परिसमाप्तेः। यत्तु `ष्णिह प्रीतौ' (धा.पा.1200) इत्यनन्तरं वृदिति वृत्करणं तद् रवादीनां परिसमाप्त्यर्थम्, न पुषादीनामित्याचार्याणां स्मृतिः। द्युतादयस्तु `कृपू सामर्थ्ये' (धा.पा.762) इत्येवंपर्यन्ताः, तदनन्तरं वृत्; `घट चेष्टायाम्' (धा.पा.763) इति वृत्करणात्। `अद्युतत्' इति। `द्युद्भ्यो लुङि' (1.3.91) इति पक्षे परस्मैपदम्। `अश्वतत्' इति। श्विता वर्णे' (धा.पा..742)। `अगमत्, अशकत्' इति। `गम्लृ गतौ' (धा.पा.982), `शक्लृ शक्तौ' (धा.पा.1261)। `व्यद्योतिष्ट' इति। अनुदात्तेत्त्वादात्मनेपदम्। `अलोटिष्ट' इति। `रुट लुट् प्रतीघाते' (धा.पा.747,748)।।

56. सर्त्तिशास्त्यर्त्तिभ्यश्च। (3.1.56)

`असरत्' इति। `ऋदृशोऽङि गुणः' (7.4.16)। `अशिषत्' इति। `शास इदङ्हलोः' (6.4.34) इतीत्त्वम्, `शासिवसि' (8.3.60) इति षत्वम्। `आरत्' इति। पूर्ववद् गुणः, अजादित्वादाट्, सवर्णदीर्घः।

`पृथक' इत्यादि। यदि `पुषादिद्युताद्लृदित्सर्त्तिशास्त्यसर्तिभ्यश्च' इत्येकयोग एव क्रियेत; सर्त्तिप्रभृतिभ्य परस्मैपद एव स्यात्, नात्मनेपदे। तस्मादेभ्य एवात्मनेपदेऽपि यथा स्यादित्येवमर्थं पृथग्योगकरणम्। `समरन्त' इति। सम्पूर्वादर्त्तेः `समो गमि' (1.3.29) इत्यादिनात्मनेपदम्। `बहुलं छन्दस्यमाङ्योगेऽपि' (6.4.75) इत्यडागमाभावः; छान्दसत्वादयस्य प्रयोगस्य। ननु च यद्यात्मनेपदेष्वङ भवत्येव, तत् किं परस्मैपदेष्वित्यनुकर्षणार्थेन चकारेणेत्याह-- `तच्च' इत्यादि। तदिति परस्मैपदेष्वित्येतदपेक्षते। `उत्तरत्रोपयोगं यास्यति' इति। न त्विहैवोपयोगं याति; अन्यथा पृथग्योगकरणमनर्थकं स्यात्।।

57. इरितो वा। (3.1.57)

इश्च रश्च इरौ, इतौ यस्य त इरित्। तत्रेकारस्य `उरजेषेऽजनुनासिक इत्' (1.3.2) इतीत्संज्ञा, रेफस्य `हलन्त्यम्' (1.3.3) इति।अथ वा इरित् यस्यैव समुदायस्य तत्येत्संज्ञा, न प्रत्येकमवयवस्य ? इरित्ययं समुदाय इत्संज्ञको यस्य स इरित्। समुदायस्येत्संज्ञाऽस्मादेव वचनाद्वेदितव्या। न ह्यन्येन केनचित् तस्येत्संज्ञा विहिता। `अभैत्सीत्' इति। `वदव्रज' (7.2.3) इत्यादिना वृद्धिः, `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्। `अरुद्ध, अभित्त' इति। स्वरितेत्त्वादात्मनेपदम्,पूर्ववत् सिचो लोपः।।

58. जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुढञ्चुश्विभ्यश्च। (3.1.58)

स्तम्भेरुदित्करणम् `उदितो वा' (7.2.56) इति विशेषणार्थम्. `अस्तभत्' इति। `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः। `अश्वत्' इत्यादि। रूपत्रयं `विभाषा धेट्श्व्योः' (3.1.49) इत्यत्र व्युत्पादितम्। `ग्लुचुग्लुञ्स्वोरन्यतरोपादाने रूपत्रयं सिध्यति' इति। कथं कृत्वा ? यदि तावत् ग्लुचिरुपादीयेत तस्याङि सिचि चाग्लुचत्, अग्लोचीदित्येतद्रूपद्वयं सिध्यति; ग्लुञ्चेस्तु सिचि तृतीयमग्लुञ्चीदिति। अथ ग्लुञ्चिरुपादीयेत, तस्याङि सिचि चाग्लुचत्, अग्लुञ्चीदिति रूपद्वयं सिध्यति। ग्लुचेस्तु सिचि तृतीयमग्लोचीदिति। यद्येवम्, किमर्थमुभयोरुपादानम्, रूपत्रयं हि साध्यम्, तच्चान्यतरोपादानेऽपि

सिध्यत्येवेत्यत आह-- `अर्थभेदात्' इत्यादि। तुशब्दोऽवधारणे। भिन्नो ह्यनयोरर्थः। तत्रान्यतरस्योपादाने य एव नोपादीयेत तत्रैवार्थेऽग्लुचदिति न सिध्येत्। तस्माद्भिन्नार्थत्वादद्व्योरुपादानम्। `केचित्' इत्यादि। अनेकार्थत्वाद्धातूनामभिन्नार्थता न विरुद्ध्यते। तस्मादुभयोरुपादानग्लुञ्चदिति सिद्ध्य इति।।

59. कृमृदृरुहिभ्यश्छन्दसि। (3.1.59)

`डुकृञ् करणे' (धा.पा.1472), `मृङ प्राणत्यागे' (धा.पा.1403), `दृ विदारणे' (धा.पा.1493), `हुह {बीजजन्मणि प्रादुर्भावे च धा.पा.} जन्मनि' (धा.पा.859)। तत्राद्यानां त्रयाणां सिचि प्राप्ते, रुहेश्च `शल इगुपधादनिटः' (3.1.45) इति क्से प्राप्ते। `अकरत्' इति। पूर्ववद्गुणः। `अमरत्' इति। व्यत्ययेन परस्मैपदम्। भाषायां तु अकार्षीत्, अमृत, अदारीत्, अरुक्षदिति भवति।।

60. चिण् ते पदः। (3.1.60)

`सामर्थ्यात्' इत्यादि। तशब्दो। ञयमस्त्येवात्मनेपदैकवचम्, अस्ति च परस्मैपदमध्यमपुरुषबहुवचनं यस्यस्य स्थाने विधीयते; तत्रास्य धातोरात्मनेपदित्वात् परस्मैपदबहुवचनं न सम्भवति, अतः पारिशेष्यावात्मनेपदैकवचनस्य ग्रहणम्। इयमेव च पारिशेष्यसिद्धिः सामर्थ्यम्। `उदपादि' इति। `चिणो लुक्' (6.4.104) इति तशब्दस्य लुक्। `उदपत्साताम्' इति। आताम्, `खरि च' (8.4.55) इति चर्त्त्वम्। `उदपत्सत' इति। झे `आत्मनेपदेष्वनतः' (7.1.5) इत्यदादेशः। इह वेति निवृत्तम्। उत्तरत्रान्यतरस्यांग्रहणात्।।

61. दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्। (3.1.61)

`जनी प्रादुर्भावे' (धा.पा.1149), `बुध अवगमने' (धा.पा.1172) इति। एतेन `जन जनने' (धा.पा.1105), `{ बुधिर् बोधने धा.पा.875 भ्वादिगतः (858) दिवादिगतश्च (1172) `बुध अवबोधने' इत्येव पठ्यते। `अदुग्ध' इति। `शल इगुपधादनिटः क्सः' (3.1.45) इति क्सः, तस्य `क्सस्याचि' (7.3.72) इत्यतः `क्सस्य' इत्यनुवर्त्तमाने `लुग्वा दुहदिह' (7.3.73) इति लुक्। `दादेर्धातोर्घः' (8.2.32) पूर्ववज्जशत्वम्। `अदोहि' इति। शुद्धे कर्मणि तशब्दः, तेनात्र नित्यं चिण् भवति।।

64. न रुधः। (3.1.64)

कर्मवदित्यतिदेशे प्राप्तस्य चिणोऽयं प्रतिषेधः। `अरुद्ध' इति। `झलो झलि' (8.2.2) इति सिचो लोपः; तस्यासिद्धत्वाल्लघूपधगुणः प्राप्तः `लिङसिचावात्मनेपदेषु' (1.2.11) इति कित्त्वान्न भवति। पूर्ववद्धत्वजश्त्वे।।

65. तपोऽनुतापे च। (3.1.65)

`तपस्तपः कर्मकस्यैव' (3.1.88) इत्यतिदेशात् `चिण् भावकर्मणोः' (3.1.66) इति प्राप्तस्य चिणोऽयं प्रतिषेधः। `अतप्त तपस्तापसः' इति। उपवासादिलक्षणं तपस्तापसं तपति दुःखयतीत्यर्थः। तपसोऽत्र कर्त्तृत्वम्, तापसस्य तु कर्मत्वम्। यदा तु स तापस्त्वगस्थीभूतः स्वर्गाय तपस्तप्यते, तदायं प्रयोगः- अतप्त तपस्तापस इति। इदानां तपसः कर्मत्वं तापसस्य कर्त्तृत्वम्। तपःशब्दश्चेह ज्ञानविशेषे स्वर्गाद्यवाप्तिहेतौ वर्त्तते। तपिरप्यर्जने। अर्जितवान् ज्ञानविशेषं तापस इत्यर्थः। `अन्ववातप्त पापेन कर्मणा' इति। यत् पूर्वं पापकर्म कृतं तेन पश्चात् तप्तोऽभ्याहत इत्यर्थः। कर्मण्यत्र लकारः।।

66. चिण् भावकर्मणोः। (3.1.66)

`भावकर्मणोरर्थयोः' इति। तशब्दस्येदं विशेषणम्। `भावकर्मणोर्यस्तशब्दः' इति। अथ चिण्ग्रहणं किमर्थम् ? यावता `चिण् ते पदः' (3.1.60) इत्यतश्चिण्ग्रहणमनुवर्त्तत एव ? स्यादेतत्-- `दीपजन' (3.1.61) इत्यन्यतरस्यांग्रहणेन `न रुधः' (3.1.64) इति निषेधेन च सम्बद्धं तत्, अतो यदि तदनुवर्त्तेत तत्सम्बद्धमेवानुवर्त्तेतेति, एतच्च नास्ति; अनयतरस्यांग्रहणस्य पूर्वयोरेव योगयोर्निवर्तितत्वात्, प्राप्तिपूर्वकत्वाच्च निषेधस्य। यदि भावकर्मणोश्चिणः प्राप्तिः स्यात्, तदा तत्प्रतिषेधार्थं नेत्यस्यानुवृत्तिः स्यात्। न च तयोस्तस्य केनचित् प्राप्तिः; चिण्विधौ सर्वत्र कर्त्तरित्यनुवृत्तेः। तदपार्थकं पुनश्चिण्ग्रहणमित्याह-- `चिण्ग्रहणं विस्पष्टार्थम्' इति। असति चिण्ग्रहणे मन्दधियः प्रतिपत्तिगौरवं स्यात्, अतस्तमनुग्रहीतुं न्यायप्राप्तस्यैवार्थस्य स्पष्टीकरणाय पुनश्चिण्ग्रहणम्।।

67. सार्वधातुके यक्। (3.1.67)

भावकर्मणोरित्यनुवर्त्तते,तच्चेह सार्वधातुकस्य विशेषणमिति दर्शयन्नाह-- `भावकर्मवाचिनि' इत्यादि। भावकर्मणोरर्थयोर्वर्त्तते यत् सार्वधातुकं तद्भावकर्मवाचि। ताच्छील्य आवश्नके णिनिः। अथैवं कस्मान्न भवति-- भावकर्मणोरभिधेययोः सार्वधातुके परतो यग्भवतीति ? अशक्यमेवं वक्तुम्; सार्वधातुकवाच्यत्वेन भावकर्मणोः शास्त्रे प्रतिज्ञानात्। कुत एतदिति चेत् ? `लः कर्मणि च भावे चाकर्मकेभ्यः' (3.4.69) इति वचनात्। ननु चाकारि कटो भवता, अशायि भवता, अबिभर्भवानित्यादौ सार्वधातुकाभावेऽपि कर्मादीनां प्रतीयमानत्वात् सार्वधातुकार्थता नोपपद्यते; न हि यो यदभावे प्रतीयते स तस्यार्थो युज्यते,

अन्वयव्यतिरेकसमधिगम्यत्वादर्थस्य ? नैष दोषः; न ह्ययं नियमः-- अन्वयव्यतिरेकसमधिगम्यत्वादर्थवत्तया। भवितव्यमिति, किं तर्हि ? प्रतिज्ञा। प्रापिता च सा भवति यथा क्विबादीनाम्। अस्ति च सार्वधातुकस्येति यत्किञ्चिदेतत्। `शय्यते' इति।`अयङयि क्ङिति' (7.4.22) इत्ययङादेशः। `ययग्विधाने' इत्यादि। ननु च कर्मवदित्यतिदेशादेव यग्भविष्यतीति किमुपसंख्यानेनेत्यत आह-- `विप्रतिषेधाद्धि' इत्यादि। `कर्त्तरि शप्' (3.1.68) इत्यस्यावकाशः-- शुद्धः कर्त्ता भवतीति; `सार्वधातुके यक्' (3.1.67) इत्यस्यावकाशः- शुद्धं कर्म, पच्यत ओदन इति। पच्यत ओदनः स्वयमेवेत्यत्र कर्मवद्भावाद्यक् प्राप्नोति, वत्करणात् स्वाश्रयकमपि यथा स्यादिति कर्त्तृत्वस्य सम्भवाच्छबपि, तत्र परत्वाच्छबेव स्यात्। शशास्त्रं यक्शास्त्रात् परं भवति, तस्मात् कर्मकर्त्तरि यक उपसंख्यानम् = प्रतिपादनं कर्त्तव्यम्। प्रतिपादनं त्विदम् -- ज्ञापकात् कर्मकर्त्तर्यपि यग्भविष्यतीति। किं तज्ज्ञापकम् ? `न दुहस्नुनमां यक्चिणौ' (3.1.89) इति प्रतिषेधः। यदि हि कर्मकर्त्तरि यग्न स्यात् प्रतिषेधोऽनर्थकः स्यात्। विप्रतिषेधाद्धि शपो बलीयस्त्वं शास्त्रातिदेशत्वमभ्यपेत्योक्तम्, न त्वसौ शास्त्रातिदेशः, किं तर्हि ? कार्यातिदेशः। कार्यातिदेशसूत्रमेव स्वतन्त्रं यगादेः कार्यस्य विधायकम्, तच्च परम्; अतो विप्रतिषेधाद्यक एव बलीयस्त्वम्।।

68. कर्त्तरि शप्। (3.1.68)
` पकारः स्वरार्थः' इति। `अनुदात्तौ सुप्पितौ' (3.1.4) इत्यनुदात्तत्वं यथा स्यात्। `शकारः सार्वधातुकसंज्ञार्थः' इति। `तिङशित्सार्वधातुकम्' (3.4.113) इति सार्वधातुकत्वं यथा स्यात्। श्यन्प्रभृतीनामपि शकारस्यैतत् प्रयोजनं वेदितव्यम्।।

69. दिवादभ्यः श्यन्। (3.1.69)
`शपोऽपवादः' इति। तत्प्राप्तावेवास्यारम्भात्। `नकारः स्वरार्थः' इति। `ञ्नित्यादिर्नित्यम्' (6.1.197) इति पदस्याद्युदात्तत्वं यथा स्यात्। `दीव्यति' इति। `हलि च' (8.2.77) इति दीर्घः।।

70. वा भ्राशभ्लाशभ्रमुत्रसित्रुटिषः। (3.1.70)
`सनोति, क्षणोति' इति। `षणु दाने (धा.पा.1464), क्षणु हिंसायाम्' (धा.पा.1465)। `नियमार्थम्' इति।एतदेव तनादिकार्यं यथा स्यादित्येष नियमो यथा स्यात्। अन्यत् तनादिकार्यं तदभावम्। असति हि नियमार्थे यथान्येभ्यस्तनादिभ्यो विभाषा सिचस्तथासोर्लुग् भवति-- अतत, अतथाः, अतनिष्ट, अतनिष्ठाः, तथा करोतेरपि स्यात्। अस्मिंस्तु सति न भवति, तदभावे च `ह्रस्वादङ्गात्' (8.2.27) इत्याष्टमिक एव लोपो भवति-- अकृत, अकृथाः। ननु सत्यपि तस्मिंस्तनादिकार्ये नैव किञ्चिदनिष्टमापद्यते, अलुक्पक्षेऽपि `ह्रस्वात्' (8.2.27) इति लोपप्रवृत्तेः ? नैतत्; नाप्राप्ते सिचो लोपे लुगारभ्यमाणस्तस्य बाधकः स्यात्। `पूर्वत्रासिद्धम्' (8.2.1) इत्यासिद्धत्वादयुक्ता लोपबाधेत्येतन्ाशङ्कनीयम्; यस्माद्वक्ष्यत्येतत्-- `नास्त्यपवादेष्वसिद्धत्वम्, अपवादवचनप्रामाण्यात्' इति। यदि तर्हि करोतेरन्यत् तनादिकार्यं नेष्यते, कस्मात् तर्हि भ्वादावेव पठितः ? कः पुनरेवं लाघवकृतो विशेषः। भ्वादावपि पाठे नियोगतोऽस्य विकरणविधौ ग्रहणं कर्त्तव्यमित्यदेश्यमेतत्।।

80. धिन्विकृण्व्योर च। (3.1.80)
भ्वादित्वाच्छपि प्राप्ते वचनम्। `अकारादेशो भवति' इति। अलोऽन्त्यस्य (1.1.52) परिभाषया। `धिनोति' इति। `अतो लोपः' (6.4.48)। अथ लघूपधगुणोऽत्र कस्मान्न भवतीत्याह-- `अल्लोपस्य' इत्यादि। `अचः परस्मिन् पूर्वविधौ' (1.1.57) इत्यल्लोपस्य स्थानिवद्भावनादनुपधत्वादिकारस्य गुणो न भवति। लाघवारथं `धिविकृव्योः' इति वक्तव्ये नुमनुषक्तयोर्ग्रहणं कृतमुपदेशावस्थायामेव नुम्भवतीति ज्ञापनार्थम्। तेन नुम्विधावुपदेशिवद्वचनमिष्टस्वरसिद्ध्यर्थमिति न वक्तव्यं भवति।।

81. क्र्यादिभ्यः श्ना। (3.1.81)

82. स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च। (3.1.82)
चकारः श्नानुकर्षणार्थः। `स्तभ्नाति' इति। आदौ `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः। श्नुश्नाभ्यां सह निर्देशात् तद्विषयतैवैषां धातूनामिति कस्यचिद्भ्रान्ति स्यात्। अतस्तन्निराकर्त्तुमाह-- `उदित्त्वप्रतिपादनात्' इत्यादि। एषां ह्युकार इत्संज्ञकः प्रतिज्ञायते, तस्य क्त्वाप्रत्यय इड्विकल्पः फलम्। यदि त एतद्विकरणविषयाः स्युः, उदित्करणमनर्थकं स्यात्। तस्मादुदित्करणप्रतिज्ञानात् सर्वार्थत्वमेषामवसीयते। अर्थशब्दोऽयं विषयवाची। सर्वविषयत्वमित्यर्थः।।

83. हलः श्नः शानज्झौ। (3.1. 83)
`पुषाण, मुषाण' इति। विध्यादौ लोट्, `सेर्ह्यपिच्च' (3.4.87), क्र्यादित्वाच् श्ना, तस्यानेन शानच्। चकारोऽन्तोदात्तार्थः। `अतो हेः' (6.4.105) इति

हेर्लुक्।

`क्रीणीहि' इति। `ई हल्यघोः' (6.4.113) इतीत्त्वम्। ननु च श्नाप्रत्ययस्य प्रकृतत्वात् स एवेह स्थानित्वेन विज्ञास्यते, तत् किमर्थः `श्नः' इति निर्देश इत्याह-- `श्न इति स्थानिनिर्देशः' इत्यादि। शानच्शब्दोऽयमादेश इत्येष संप्रत्ययो यथा स्थादित्येवमर्थः श्न इति निर्देशः। किं पुनः कारणमसति तस्मिन्नेव संप्रत्ययो न स्यादित्यत आह-- `प्रत्ययान्तरं हि' इत्यादि। सर्वे धातवोऽन्यगणपठिता अपि विषयो यस्य तत्तथोक्तम्।`श्नः' इत्यस्मिन् ह्यसति स्थानिर्देशे श्नाप्रत्ययस्यानुवृत्तिर्न ज्ञायेत्। ततश्च सर्वेभ्यो धातुभ्यो हलन्तेभ्यः शानजपवादः प्रत्ययो भवति तस्य च शानजादेशः, तदा मिदेर्गुणो मा भूत्; इतरथा ह्ययं गुणः प्रतिषेधविषय आरभ्यमाणो यथेह भवति-- मेध्यतीति, तथेहापि स्यात्-- मिदान इति। पुनः शित्करणे तु `सार्वधातुकमपित्' (1.2.4) इति ङित्त्वमपि पुनः प्रवर्त्तते। तेन मिदेः प्रतषेधविषयेऽपि गुण आरभ्यमाण इह न भवति।।

84. छन्दसि शायजपि। (3.1.84)

`अत्रापि चित्-- शित्करणयोः पूर्वोक्तमेव प्रयोजनम्। `{नास्ति काशिकायाम्।} गृहाण्' इति। `ग्रहण उपादाने' (धा.पा.1533) लोट्, सिप्; हिः, ततः श्ना,तस्य शानच्, हेर्लुक् (6.4.105), ग्रह्यादीना (6.1.16) सम्प्रसारणम्। `गृभाय' इति, क्वचित् पाठः। तत्र `हृग्रहोर्भश्छन्दसि' (वा. 8.2.32) इति भत्वम्। `बधान'इति। `बन्ध बन्धने' (धा.पा.1508) `अनिदिताम्' (6.4.24) इति नलोपः। शेषं पूर्ववत्।।

85. व्यत्ययो बहुलम्। (3.1.85)

`यथायथम्' इति. यो यस्यात्मीयो विषयः = यथायथम्। यस्मिन् यस्मिन् विषय इत्यर्थः। किं पुनरयं व्यत्ययो नामेत्याह--- `व्यतिगमनं व्यत्ययः' इति। तमेव व्यत्ययं स्पष्टीकर्त्तुमाह-- `{व्यतिहारः-काशिका} व्यतिकरः' इत्यादि। `क्वचित्' इत्यादिना व्यत्यस्य प्रकारान्तरं दर्शयति। `भेदति' इति। श्नमो विषये शपो विधानम्। `मरति' त्यत्रापि शविषये शप्, परस्मैपदञ्च व्यत्ययेनैव। `म्रियते' इति। पूर्ववद्रिङ, तस्येयङ।

`नेषतु' इति। नयतेर्लोट्, तिप्, `एरुः' (3.4.86) सिप्, तस्मात् परः शप्, धातोर्गुणः, सिपः षत्वम्।

त्रिविकरणतायास्तूदाहरणम्-- `{तरुषेम वृत्रम्' -- काशिका} तरुषेम दृषदम्' इति। तरतेराशिषि लिङ्, मस्, `नित्यं ङित्, (3.4.99) इतिवस्मसोः सलोपः, यासुट्, `छन्दस्युभयथा' (3.4.117) इति सार्वधातुकत्वाल्लिङ उप्रत्ययः, तस्मात् परः सिप्, तस्मादपि परोऽङ, धातोर्गुणः, सिपः षत्वम्, `अतो येयः' (7.2.80)इतीयादेशः। अङा सह `आद्गुणः' (6.1.87), `लिङः सलोपोऽनन्तस्य' (6.1.79) इति सलोपः। `लोपो व्योर्वलि' (6.1.66) इति यलोपः। अथ `व्यत्ययः' इत्येतावत् कतं नोक्तम्,किं बहुलग्रहणेन, पूर्वसूत्राद्ध्यपिशब्दस्यानुवृत्तौ सत्यां छन्दसि व्यत्ययो भवति, अपिशब्दाद्यथाप्राप्तञ्चेति, एवमभिसम्बन्धे क्रियमाणेऽन्तरेणापि बहुलग्रहणं सर्वमिष्टं सिध्ययत्येवेत्यत आह-- ` बहुलग्रहणम्' इत्यादि। सर्वस्य प्रकृतस्याप्रकृतस्य विधेर्व्यभिचारो व्यत्ययलक्षणो यथा स्यादित्येवमर्थ बहुलम्, इतरथा ह्यसति बहुलग्रहणे प्रकृतानामेव स्यादीनां शानच्पर्यन्तानां स्यात्, नान्येषां श्नम्प्रभृतीनाम्, इष्यते च तेषामपि। स बहुलग्रहण एव सति लभ्यते। एतमेवार्थं दर्शयितुमाह--- `सुप्तिङुपग्रह' इत्यादि। ततर् सुपां व्यत्ययः-- धुरि दक्षिणायामिति प्राप्ते सप्तम्या विषये षष्ठी। तिङाम्-- ये यूपाय तक्षति। तक्षन्तीति प्राप्ते। लादेशव्यङ्ग्यक्रियाविशेषो मुख्य उपग्रहः। इह तु तद्व्यक्तिनिमित्तत्वात् परस्मैपदात्मनेदयोरुपग्रहशब्दो वर्त्तते। एतदुक्तं भवति-- आत्मनेपदपरसमैपदयोर्व्यत्यय इति। स ब्रह्मचारिणमिच्छते, प्रतीतमन्यदग्निं युध्यति। इच्छति, बध्यत इति प्राप्ते। लिङ्गस्य-- मधोस्तृप्ता इवासत इति। मधुन इति प्राप्ते। नरस्य = प्रथमपुरुषादेः-- अतोपचारैर्दशभिर्वियूयाय इति। वियूयादिति प्रथमपुरुषविषये मध्यमपुरुषः, `यु मिश्रणे' (धा.पा. 1033), विपूर्वादाशिषि लिङ, सिप्, यासुट्, `अकृत्सार्व धातुकयोः' (7.4.24) इति दीर्घः, `स्कोः संयोगाद्योरन्ते च' (8.2.29) इति सलोपः। कालस्य-- सोऽग्नीनाधास्यमानेन। लुटो विषये लुट्; कालशब्दोऽत्र कालविषयत्वाल्लुडादिप्रत्ययेषु वर्त्तते। न हि मुख्यकालस्य व्यत्ययः शक्यते कर्त्तुम्। हलाम्-- शुफितं मुखबीजम्। शुभितमिति प्राप्ते। `शुभ शुम्भ शोभार्थे' (धा.पा.1321,1322) निष्ठा, इट्, भकारसय् फकारः। अचाम्-- उपगायन्तु मां पत्नयो गर्भिणयः। पत्न्यो गर्भिण्य इति प्राप्ते। ईकारस्य इकारः। स्वराणाम्-- `अन्तोऽवत्या' (6.1.220) इत्यन्तोदात्तत्वं यथेह भवति-- अश्ववतीं सोमवतीं प्रजावतीं सूर्यवतीं दृषदमित, तथेहापि स्यात्-- अश्ववती सोमवती प्रजावती। व्यत्यये तु सत्यश्वशब्दस्य प्रकृतिस्वर एव भवति। कः पुनः प्रकृतिस्वरः ? आद्युदात्तत्वम्। तथा हि ङीपोऽनुदात्तत्वं पित्त्वात्। मतुपोऽप्यत एव। `{अशूप्रुषिप्लुषिलटिकटिकणिखटिविशिभ्यः क्वन्' इति द.उ.सूत्रम्} अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' (द.उ.8.125) इति क्वन्प्रत्ययान्तत्वात् नित्स्वरेणाद्युदात्तोऽश्वशब्दः। कर्तृगर्हणं कारकोपलक्षणार्थम्। कारकाणां व्यत्यय इत्यर्थः। आसादयद्भिरुभयोर्वेदाः। आसादयद्भ्य इति प्राप्ते सम्प्रदानस्य करणत्वम्। `यङ' इति प्रत्याहारग्रहणार्थम्-- `सार्वधातुके यक्' (3.1.67) इति यक आरभ्य `लिङ्याशिष्यङ' (3.1.86) इत्यतो ङकारेण। यगादीनां प्रत्ययानामङपर्यन्तानां व्यत्यय इत्यर्थः। मुण्डा शुष्मस्य भेदतीति। श्नमि प्राप्ते शप्। एषां शप्प्रभृतीनां व्यत्ययमिच्छति शास्त्रकृत्-- पाणिनिः। `सोऽपि च सिध्यति बाहुलकेन' अपिशब्दात् स्यादिव्यत्ययः। बाहुलस्य भावो बाहुलकम्, द्वन्द्वमनोज्ञादित्वाद्वुञ् (5.1.133)। चशब्दो हेतौ। यस्मादेवं प्रकृतानामप्रकृतानाञ्तच बाहुलकेन व्यत्ययः सिध्यति तस्माद्बहुलग्रहणं कृतमिति।।

86. लिङ्याशिष्यङ्। (3.1.86)

`शपोऽपवादः' इति। ननु चाशिषि यो लिङ विहितस्तस्य `लिङाशिषि' (3.4.116) इत्यार्थधातुकसंज्ञा, सार्वधातुके च शब्विहितः, तत्कथं शपोऽपवाद इत्याह-- `छन्दस्युभयथा' इत्यादि।
स्थादिभ्य एवात्र दृश्यते,नान्येभ्य इत्यभिप्रायेणाह-- `स्थागागमि' इत्यादि. `उपस्थेयम्' इति।उपपूर्वात्तिष्ठतेराशिषि लिङ, मिप्, तस्य `तस्थस्' (3.4.101) इत्यादिनाऽमादेशः, यासुट्, उभयसंज्ञात्वेन सार्वधातुकत्वात् `लिङ सलोपोऽनन्त्यस्य' (7.2.79) इति सलोपः। क्वचित् `उपस्थेषम्' इति पाठः। तत्रार्द्धधातुकत्वात् सलोपाभावः, वलि यलोपः। `उपगेयम्' इति। `गै शब्दे' (धा.पा.917) `आदेच उपदेशेऽशिति' (6.1.45) इत्यात्त्वम्। शेषं पूर्ववत्। `गमेम' इति। गमेः परस्य लिङो मस्, `नित्यं ङितः' (3.4.99) इति सलोपः। यासुडादि सर्व पूर्ववत्। `वोचेयम्' इति। `वच भाषणे' (धा.पा.1842)। सिप्, तस्याम्, अङ, अङि परतः `वच उम्' (7.4.20), `या' इत्यस्य इय्, उभयत्र `आद्गुणः' (6.1.87)। `विदेयम्' इति। `विद ज्ञाने' (धा.पा.1064)। `शकेयम्' इति। `शक्लृ शक्तौ' (धा.पा.1261)। `आरुहेयम्' इति। `रुह {बीजजन्मणि प्रादुर्भावे-- धा.पा.} जन्मनि (ध.पा.859) इयादेशादि सर्व पूर्ववत्।
`दृशेरग्वक्तव्यः' इति। अङि हि सति `ऋदृशोऽङि गुणः' (7.4.16) इति गुणः स्यात्। तथा च दृशेयमिति न सिध्येत्। अकि तु सति कित्त्वाद्गुणाभावो भवति। तस्मादग्वक्तव्यः = व्याख्येयः। व्याख्यानं तु बहुलग्रहणानुवृत्तेर्वक्तव्यम्।।

87. कर्मत्कर्मणा तुल्यक्रियः। (3.1.87)
`कर्मवत्' इति। `तेन तुल्यं क्रिया चेद्वतिः' (5.1.115) इति; न तु `तत्र तस्येव' (5.1.116) इति; तुल्यक्रिय इति प्रथमानिर्देशात्। अन्यथा तुल्यक्रिये, तुल्यक्रियस्यति सप्तम्या षष्ठ्या वा निर्देशं कुर्यात्। तुल्याक्रियाऽस्येति तुल्यक्रियः। केन तुल्यक्रियः ? कर्मणा। सापेक्षत्वेऽपि गमकत्वात् समासः। तुल्यशब्दोऽयं सदृशवचनः। न च साधनस्य कर्मणः क्रियया सादृश्यमुपपद्यते; अत्यन्तभेदात्। तथा हि-- कर्म द्रव्यं परिनिषन्नम्। त्दविपरीतस्वभावा क्रिया। तस्मात् कर्मणेति कर्मशब्दोऽयं गौणस्तात्स्थ्यादुपचारेण कर्मस्थायां क्रियायां वर्त्तते, यथा-- मञ्चाः क्रोशन्तीति, अत्र मञ्चशब्दः पुरुषेषु। उपचारस्तु कर्मस्थबावकानां कर्मस्थक्रियाञ्च कर्मवद्भावो यथा स्यात्, कर्तृस्थभावकानां कर्तृस्थक्रियाणां च मा भूदित्येवमर्थः। एतत्सर्व चेतसि कृत्वाह-- `कर्मणि क्रिया कर्म' इति। एतेन कर्मशब्दोऽयं कर्त्स्थक्रियावाचीत्याचष्टे। कर्मस्थक्रियावाचिनि च कर्मशब्दे यः सूत्रार्थः सम्पद्यते तं दर्शयितुमाह-- `कर्मस्थया' इत्यादि। एवं स्थिते सूत्रार्थे तुल्यशब्दोऽयं साधारणवचन इति मन्यमानो यो देशयेत्-- `यदि कर्मस्थया क्रियया तुल्यक्रियः साधारणक्रियः कर्त्ता कर्मवद्भवति तदा पचत्योदनं देवदत्त इत्यत्रापि स्यात्; यस्मादिहापि यासौ प्रधानक्रिया तामुद्दिश्य सर्वाणि कारकद्रव्याणि प्रवर्त्तन्ते, तयाकर्मस्थया प्रवर्त्तन्ते, तयाकर्मस्थया साधारणक्रियः कर्त्ता भवति, यथैव ह्यसावन्येषां कारकाणां सम्बन्धिनी तथा कर्त्तुरपि' इति, तं प्रत्याह-- `यस्मिन् कर्मणि' इत्यादि। तद्वद्यथाशब्दौ सादृश्यार्थौ प्रयुञ्जानः `सदृशवचनोऽयं तुल्यशब्द-,न साधारणवचनः' इत्याचष्टे। यस्मिन् कर्मणि कर्त्तृभूतेऽपि कर्त्रवस्थां प्रतपन्नेऽपि तादृशी क्रिया लक्ष्यते यादृशी कर्मावस्थायां स कर्ता कर्मवद्भवति। सादृश्यञ्च कञ्चिद्भेदाधिष्टानमित्यसाधारण एवाधिश्रयणादिलक्षणः कर्त्तृव्यापारो गृह्यते, न तु साधारणो विक्लेदादिलक्षणः। स चासाधारणः पचच्योदनं देवदत्त इत्यत्र कारकान्तरव्यापारविसदृशो देवदत्तस्य कर्त्तुर्व्यापार इति न भवति कर्मवद्भावः। अथ वा-- कर्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्मवद्भवतीत्युक्ते सदृशवचनस्तुल्यशब्द इति मन्यमानो यो देशयेत्-- `यद्येवम्, भिद्यमानः कुसूलः पात्राणि भिनत्तीत्यत्रापि प्राप्नोति, तथा हि यादृशी पात्रेष्ववयवविभागात्मिका क्रिया तादृश्येव कुसूले कर्त्तरि लक्ष्यते' इत्यस्मिन् पूर्वपक्ष इदमाह-- `यस्मिन् कर्मणि' इत्यादि। स इत्यनेन यस्मिन्नित्यनेन योऽर्थो निर्दिष्टः स एव प्रत्यवमृश्यते। एतेनैकद्रव्याधारयैव कर्मस्थयाक्रियया तुल्यक्रियः कर्त्ता कर्मवद्भवतीति दर्शयन् पूर्वपक्षं प्रतिक्षिपति। एवच्च प्रत्यासत्तेर्न्यायाल्लभ्यते। एकद्रव्यसमवायिनो हि क्रिया प्रत्यासन्ना, द्रव्यान्तरसमवेता तु विप्रकृष्टा।
ननु च शक्तिः कारकमिति दर्शनम्, न च कर्मशक्तिः कदापि कर्त्तृभावमापद्यते, तदयुक्तमुक्तम्-- यस्मिन् कर्मणि कर्त्तृभूतेऽपीति ? शक्तिशक्तिमतोर्भेदस्याविवक्षायां शक्त्याधारं द्रव्यमेवैतदुक्तमित्यदोषः। इदं तर्ह्ययुक्तमुक्तम्-- `तद्वत् क्रिया लक्ष्यते यथा कर्मणि' इति। यस्माद्य एव कर्मावस्थायां व्यापारः स एव कर्त्रवस्थायामपीति सादृश्यं नोपपद्यते, तस्य भेदाधिष्ठाने सति सत्त्वात् ? नैष दोषः; अवस्थाभेदेन क्रियाबेदाद्यद्यप्यवस्थावद्द्रव्यमभिन्नम्, तथाप्यवस्थाभेदोऽस्ति-- अन्यैव हि कर्त्रवस्था,अन्या च कर्मावस्था। अवस्थाभेदेन क्रियाभेद इति तदधिष्ठानं सादृश्यं भवति।
इहातिदेशो निमित्त-- व्यपदेश--शास्त्र-- कार्यभेदादनेकविधः। तत्रेह निमित्तातिदेशो न भवति, न हि कर्मणो यन्निमित्तं कर्त्तुरोप्सिततमत्वं तत् कर्त्तर्यतिदेष्टुं शक्यते; वस्त्वन्तरधर्माणां वस्त्वन्तरेण विरुद्धधर्मिणा सम्बन्धाभावात्। व्यपदेशातिदेशस्तु संज्ञापक्षान्न भिद्यते। संज्ञापक्षे तु वक्ष्यमाणो दोषः, वतिग्रहणञ्चानर्थकं स्यात्। शास्त्रातिदेशपक्षे तु शास्त्रमतिदिश्यते, तस्मिन्नतिदिष्टे तैरेव शास्त्रैर्यगादयः प्राप्यन्ते; ततश्च यद्ययं शास्त्रातिदेशः स्यात् कर्मकर्तरि परत्वाच्छबादयो बाधकाः स्युः, तत्र प्रतिविधेयं स्यात्। कार्यातिदेशे त्वनेनैव यगादयो विधीयन्ते। तेन येन कर्त्राश्रयाः कर्मकर्त्तरि शबादयः प्राप्नुवन्ति ते परत्वाद्यगादिभिर्बाध्यन्त इति न किञ्चित्प्रतिविधातव्यम्। प्रधानं तु कार्यातिदेशः; तदर्थत्वनादतिदेशशास्त्राणाम्। अतः कार्यातिदेशतामस्य दर्शयन्नाह-- `कर्माश्रयाणि' इत्यादि। ननु च `तुल्यक्रियः' इति प्रथमानिर्देशात् तदन्तस्य कर्तुरतिदेशो विज्ञायते, न च सूत्रे कर्त्तृग्रहणमस्ति। यद्यपि च प्रकृतं तदपि सप्तम्यन्तम्, प्रथमानिर्दिष्टेन चेहार्थः तत्कथं प्रथमान्तकर्त्तृग्रहणमन्तरेण शक्यतेऽतिदेशः कर्त्तुमित्याह-- `कर्त्तरि' इत्यादि।
किं पुनरस्यातिदेशस्य प्रयोजनमित्याह-- `यगात्मनेपद' इत्यादि। `भिद्यते' इति यक उदाहरणम्। `अभेरि' इति चिणः। `कारिष्यते' इति चिष्वद्भावस्य।

कर्मणि हि `स्यसिच्सीयुट्' (6.4.62) इत्यादिना चिण्वद्भावो विहितः। आत्मनेपदस्य तु सर्वाण्येवैतान्यदाहरणानि।
`स्वाश्रयमपि' इत्यादि। यद्विनाप्यतिदेशो न भवति तत् स्वाश्रयम्, तद्यथा स्यादित्येवमर्थं वत्करणम्। असति हि तस्मिन् संज्ञासूत्रमिदं स्यात्, ततश्च कर्मणा तुल्यक्रियः कर्त्ता कर्मसंज्ञकः स्यात्। एवञ्च सति सकर्मकत्वात् `लः कर्मणि च भावे चाकर्मकेभ्यः' (3.4.69) इति भावे लकारो न स्यात्। वत्करणे तु सत्यतिदेशो भवति। तेन चाप्राप्तमेव कर्त्तुः कर्म कार्यं भवति, न स्वाश्रयं कर्तृत्वम्। अकर्मकस्वभावत्वमपनीयते, तत्र तस्या व्यापारात्। एतेनाकर्मकाणां भावे लः सिद्धो भवति-- भिद्यते कुसूनेति। अथ भिद्यते कुसूलः स्वयमेवेत्यत्र कुसूलशब्दाद्द्वितीया कस्मान्न भवति, एतदपि कर्म कार्यं भवत्यत आह-- `लिङ्याशिष्यङिति' इत्यादि। द्वौ लकारौ यस्मिन् स द्विलकारो निर्देशः। यदि द्विलकारको निर्देशस्तदा किमित्याह-- `तत्र' इत्यादि। कार्यं प्रतीत्यध्याहार्यम्। द्विलकारनिर्देशे सति `लिङ्याशिष्यङ' (3.1.86) इत्यतो लानुवृत्तेलन्तिस्यैव कार्यं प्रति कर्त्ता कर्मवद्भवति, न तु प्रातिपदिकस्य। इतिकरणो हेतौ। यत एवं तस्मात् कुसूलाद्द्वितीया न भवति।
`करणाधिकरणाभ्याम्' इति। कर्मणेत्यसत्यस्मिन् करणाधिकरणस्थयापि क्रियया तुल्यक्रियः कर्त्ता कर्मवत् स्यात्, अस्मिंस्तु सति न भवति। `साध्वसिश्छिनत्ति' इति। कणस्य कर्तृत्वविवक्षायां करणस्थयापि क्रियया छेद्यद्रव्यान्तःप्रवेशलक्षणया तुल्यक्रियोऽत्रासिः कर्त्ता। `साधु स्थाली पचति' इति। अत्राधिकरणस्य कर्तृत्वविवक्षायामधिकरणस्थया क्रियया सम्भवति धारणात्मिकया तुल्यक्रियः कर्त्ता। अथेह कस्मान्न भवति-- पचत्योदनं देवदत्तः, राध्यत्योदनः स्वयमेवेति; भवति ह्यत्रापि कर्मस्थया क्रियया तुल्यक्रियः कर्त्ता, तथा हि यादृश्योदेने कर्मभूते क्रिया विक्लेदनलक्षणा लक्ष्यते तादृश्येव कर्तृभूतेऽपि, पचतिराध्यत्योरेकार्थत्वादित्याह--- `धात्वधिकारात्' इत्यादि। समानशब्दोऽयमेकपर्यायः, यथा-- देवदत्तयज्ञदत्तयोः समाना मातेति। एका मातेति गम्यते। `धातोरेकाचः' (3.1.22) इत्यतो धातुग्रहणमनुवर्त्तते। कर्मादिशब्दाश्च सम्बन्धिशब्दाः,ये च सम्बन्धिशब्दास्ते प्रकृत्यैव नियतरूपं सम्बन्धिनमुपस्थापयन्ति। तथा हि-- मातरि भक्त्या प्रवर्तितव्यामित्युक्तेऽन्तरेणापि स्वस्यामिति वचनं स्वस्यां मातरीति गम्यते। तेन यं धातुमपेक्ष्य तस्य कर्मणः कर्तृत्वं तमेव धातुं सन्निधापयति, नान्यम्। ततश्च धातुग्रहणेऽनुवर्त्तमाने सत्ययमर्थो लभ्यते। यस्मिन् धातौ कर्मणोपस्थापिते यत् करम तस्मिन्नेव धातौ स यदि कर्त्ता भवत्येवं सत्ययमतिदेशः, नान्यथा। तेन पचत्योदनं देवदत्तः,राध्यत्योदनः स्वयमेवेत्यत्र न भवति, भिन्नयोर्धात्वोरोदनस्य कर्मकर्तृत्वासम्भवात्। अथ वा-- धातोरिति येयमेका संख्या सा विवक्षिता, तेनैकस्मिन्नेव धातौ कर्मवद्भावो भवति।
`कर्मस्थभावकानाम्' इत्यादिना न्यायप्राप्तमेवार्थं दर्शयति।तथा हि-- कर्मस्थया क्रियया तुल्यक्रियस्य कर्त्तुः कर्मवद्भावो भवति। न च कर्त्तृस्थभावकानां कर्त्तृस्थक्रियाणां कर्त्ता तथाविधोऽस्ति। यद्यपि क्रियाप्युपादीयते, `लक्षणहेत्वोः क्रियायाः' (3.2.126) इत्यत्र च भावोऽपि परिगृह्यते; तथापीह द्वयोरुपादानसामर्थ्यादर्थभेदो द्रष्टव्यः।
सा परिस्पन्दनसाधनसाध्या क्रिया क्रियाशब्देनोच्यते, अपरिस्पन्दनसाध्या तु भावशब्देन। येषां कर्मस्थोभावः कर्मस्था च क्रिया; येषां कर्तृस्थो भावः कर्त्तस्था च क्रिया, तेषामुदाहरणं दर्शयितुमाह-- `कर्मस्थः पचतेर्भावः' इति। पच्यते घटः स्वयमेवेत्यत्र यदा तद्देशस्थघटकर्मकपाको निष्पद्यते तदाऽपरिस्पन्दनसाधनसाध्यस्वभावः पाकः कर्त्तस्थो भवति, यदा तु देशान्तरं गच्छतः पाकद्रव्यस्य पाकाभिनिर्वृत्तिर्भवति तदा कर्मस्थैव पचेः क्रिया, यथा -- पच्यत ओदन इत्यत्रोदाहरणे। `कर्मस्था टच भिदेः क्रिया' इति। भिद्यते कुसूलः-- स्वयमेवेति। अवयवविभागलक्षणा हि भिदेः क्रिया,सा च दशान्तरप्राप्तौ सत्यां भवतीति भिद्यते परिस्पन्दः,तेन कर्मस्था क्रिया भवति। `मासासिभावः कर्त्तस्थः' इति। आसेर्धातोर्भाव असिभावः। आसनं हि भावः; तस्याः परिस्पन्दनसाधनसाध्यत्वात्। तथा हि-- व्यापारोपरतावास्त इति प्रयुज्यते। माससहचरित आसिभावः। शाकपार्थिवादित्वात् समासः-- मासासिभावः। कदा स माससहचरित आसिभावो भवति ? यदा मासमास्त इति प्रयुज्यते। मासमिति कर्मणि द्वितीया। कर्मसंज्ञा तु `कालभावाध्वगन्तव्याः क्रमसंज्ञा ह्यकर्मणाम्' (वा.1.4.51) इति वचनात्। मासासिभावः कर्त्तस्थो भवति, आसितरि समवायात्। तेनास्यते मासः स्वयमेवेति न भवति। `कर्त्तृस्था च गमेः क्रिया' िति। गमनं पाद विहरणात्मकम्। तच्च परिस्पन्दनसा नसाध्यत्वाच्च क्रिया, सा च गन्तरि देवदत्तादौ समवेता, न कर्मणि ग्रामादौ। तेन कर्मस्थक्रियाभावाद्गम्यते ग्रामः स्वयमेवेति न भवति।।

88. तपस्तपः कर्मकस्यैव। (3.1.88)
`तपः कर्मकस्यैव' इति। एवकारो विस्पष्टार्थः; व्यवच्छेदफलत्वात्, सर्ववाक्यानामित्येवं तदर्थस्य लब्धत्वात्। यदि ह्यतपःकर्मकस्यापि स्यात्, तपःकर्मग्रहणमनर्थकं स्यात्। `नान्यकर्मकस्य' इत्यवधारणेन यद्व्यवच्छिन्नं तद्दर्शयति। `क्रियाभेदात्' इति। क्रियाविसदृशत्वादित्यर्थः। पूर्वं हि क्रियासादृश्ये कर्मवद्भावो विहित इति वैसदृश्येन प्राप्नोति, अतो विध्यर्थमेतत्। अत एव कर्मस्थया क्रियया तुल्यत्वं न सम्भवतीति `कर्मणा तुल्यक्रियः' (3.1.87) इत्येतन्नानुवर्त्तते। `उपवासादीनि' इत्यादिना तमेव क्रियाभेदं दर्शयति। उपवासादिशब्देन तपः शब्दस्यार्थमाचष्टे। `दुःखयन्तीत्यर्थः' इत्यनेन तापसस्य कर्मावस्थायां तपेर्दुःखनमर्थ इति दर्शयति। `स्वर्गाय तपस्तप्यते' इति। तपःशब्दोऽत्र ज्ञानविषेय स्वर्गाद्यवाप्तिहेतौ वर्त्तते। `अर्जयीत्यर्थः'इत्यनेन तापसस्य कर्त्रवस्थायां तपिरर्जने वर्त्तत इति दर्शयति। निवर्त्तयतीत्यर्थ इति, न दुःखयतीति; तपसोऽचेतनत्वाद्दुःखासम्भवात्।।
`उत्तपति सुवर्णम्' इत्यादौ सुवर्णकर्मकत्वात् तपेः कर्मवद्भावो न भवति।।

89. न दुहस्नुनमां यक्चिणौ। (3.1.89)

`कर्मकर्त्तरि यक्चिणानुपदिष्टौ न भवतः' इति। कर्मकर्त्तरीति विशेषणम्। `कर्मवत् कर्मणा तुल्यक्रियः' (3.1.87) इति प्राप्तयोर्यक्चिणोरयं प्रतिषेधः, न तु चिण्वद्भावकर्मणोः। `सार्वधातुके यक्' (3.1.67) इति च। शुद्धे कर्मणि यौ प्राप्तौ तयोरपीति दर्शनार्थम्। एतच्च `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इति परिभाषया लभ्यते। `दुग्धे' इति। यकि प्रतिषिद्धे शप्, तस्यादादित्वाल्लुक्। पूर्ववद् घत्वघत्वजश्त्वानि। `अदुग्ध' इति। लुङ। चिणि प्रतिषिद्धे क्सः, तस्य `लुग्वा' (7.3.73) इत्यादिना लुक्। `प्रस्नुते' इति। `{ष्णु प्रस्रवणे' धा.पा.} स्नु प्रस्रवणे' (धा.पा.1038), पूर्ववच्छपो लुक्। `प्रास्नोष्ट' इति। लुङ। `नमते' इति। `णम प्रह्वत्वे शब्दे' (धा.पा.981)। अन्तर्भावितण्यर्थोऽत्र नमिः कर्मणि वर्त्तत इति वेदितव्यम्। एवं हि कर्मस्थक्रियो भवति; अन्यथा कर्त्तृस्थक्रियत्वात् प्राप्तिर्नास्त्येवेति प्रतिषेधोऽनर्थकः स्यात्। अन्तर्भावितव्यर्थस्तु कर्मस्थक्रियो भवति-- नमति दण्डं देवदत्तः। `नमते दण्डः स्वयमेव' इति। यथा ण्यन्तावस्थायाम्। `यक्चिणोः प्रतिषेधे' इत्यादि। यक्चिणोः प्रतिषेधे कर्त्तव्ये श्रन्थ्यादीनामपि तस्य प्रतिषेधस्योपसंख्यानम् = प्रतिपादनं कर्त्तव्यमित्यर्थः। प्रतिपादनं तु नेति योगविभागादिष्टसिद्ध्यर्थात् कर्त्तव्यम्। णीति हेतुमण्णिच इतरस्य च णेर्ग्रहणम्। हेतुमण्णिच्। `कारयति' कटं देवदत्तः। कारयते कटः स्वयमेव' इति। यकि प्रतिषिद्धे शप्। `अचीकरत कटः स्वयमेवट इति। चिणि प्रतिषिद्धे `णिश्रि' (3.1.48) इत्यादिना चङ,णौ चङ्युपधाया ह्रस्वः' (7.4.1) इति ह्रस्वः। `चङि' (6.1.11) इति द्विर्वचनम्, अभ्यासकार्यम्। इतरो णिः-- `पुच्छभाण्ड चीवराण्णिङ' (3.1.20)। `उत्पुच्छयते गां गोपः। उत्पुच्छयते गौः स्वयमेव' (इति)। यकि प्रतिषिद्धे शप्। एवमुत्तरत्रापि वेदितव्यम्। `उदपुपुच्छत गौः स्वयमेव' इति। चिणि प्रतिषिद्धे पूर्ववच्चङ। एवमुत्तरत्रापि वेदितव्यम्। `श्रन्थ ग्रन्थ सन्दर्भे' (धा.पा.1512,1513)। चुरादौ ग्रन्थिश्रन्थी पठ्येते (धा.पा.1837,1838)। `आ धृषाद्वा' (धा.पा.1805 अनन्तरम्) इति विभाषाणिचौ। तयोर्यदा णिज् नास्ति तदोदाहरणे; अन्यथा णीत्येवं सिद्धिः। ग्रन्थि ग्रन्थं देवदत्तः। ग्रन्थते ग्रन्थः स्वयमेव। अग्रन्थिष्ट ग्रन्थः स्वयमेव। श्रन्थति मेखलां देवदत्तः। श्रन्थते मेखला स्वयमेव। `श्रन्थ ग्रन्थ सन्दर्भे' (धा.पा.1512,1513) इतिक्र्यादावपि पठ्येते, तयोरप्ययं प्रतिषेधः--- श्रथ्नीते मेखलां देवदत्तः, श्रन्थीते मेखला स्वयमेव। `ई हल्यघोः' (6.4.113) इतीत्त्वम्। अश्रन्थिष्ट मेखला स्वयमेव। ग्रथ्नीते ग्रन्थं देवदत्तः। ग्रन्थीते ग्रन्थः स्वयमेव। अग्रन्थिष्ट ग्रन्थः स्वयमेव। ब्रूते कथां देवदत्तः। ब्रूते कथा स्वयमेव। पूर्ववच्छपो लुक्। अवोचत कथां देवदत्तः। अवोचत कथा स्वयमेव। `ब्रुवो वचिः' (2.4.53) इति वचिरादेशः, `अस्यतिवक्तिख्यातिभ्योऽङ' (3.1.52) इत्यङादेशः; `वच उम्' (7.4.20)। अन्तर्भावितण्यर्थत्वात् कर्मस्थक्रियात्वं वेदितव्यम्। `आत्मनेपदाकर्मकाणाम्' इति। आत्मनेपदविधावकर्मका ये धातवो गृह्यन्ते त आत्मनेपदाकर्मकाः। `विकुर्वते सैन्धवाः स्वयमेव' इति। `आत्मनेपदेष्वनतः' (7.1.5) इत्यदादेशः। `व्यकृषत सैन्धवाः स्वयमेव' इत्यत्रापि कृञो विपूर्वात् `अकर्मकाच्च' (1.3.35) इत्यात्मनेपदविधानादात्मनेपदाकर्मकत्वम्। अत्रापि वल्गने वर्त्तमानः करोतिरन्तर्भावितण्यर्थः कर्मस्थकियो भवति।।

90. कृषिरजोः प्राचां श्यन्परस्मैपदं च। (3.1.90)ट

रञ्जेः कृतानुनासिकलोपनिर्देशो लाघवार्थः। `यगात्मनेपदयोरपवादौ' इति। श्यन् यकोऽपवादः; परस्मैपदं त्वात्मनेपदस्य। `रज्यति' इति। `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः। `प्राचां ग्रहणं विकल्पार्थम्' इति। एतेन पूजार्थतामपनयति। पूजार्थे तस्मिन् विकल्पो न लभ्येत। `कुष्यते' इत्यादिना विकल्पार्थे प्राग्ग्रहणे यदिष्टं सिध्यति तद्दर्शयति। `स्यादिविषये च' इत्यादि। आदिशब्देन तासिप्रभृतीनां ग्रहणम्। `चुकुषे, ररञ्जे' इति। लिट्, आत्मनेपदम्, तप्रत्ययः, तस्यैशादेशः। `कोषिषीष्ट' इति। आशिषि लिङ, सीयुट्, `सुट् तिथोः' (3.4.107) इति सुट्, लघूपधगुणः, षत्वम्, ष्टुत्वञ्च। `रङक्षीष्ट' इति। `एकाचः' (7.2.10) इतीट्प्रतिषेधः, `चोः कुः' (8.3.30) इति कुत्वम्-- गकारः। `खरि च' (8.4.55) इति चर्त्वम्--ककारः। `अकोषि, अरञ्जि' इति। लुङ,चिण्।।

91. धातोः। (3.1.91)

`यङविधौ धातोरित्यधिकारात्' इति। `धातोरेकाचः' (3.1.22) इति यङविधौ यत् धातुग्रहणं तस्येहाधिकारादित्यर्थः। इयञ्च धातुग्रहणस्यानर्थकत्वे युक्तिः। `कृदुपपदसंज्ञार्थं तु' इति। आनर्थक्यमपाकरोति। ननु च पूर्वेणापि धातुग्रहणेन कृदुपपदसंज्ञे सिध्यत स्याताम्, इह करिष्यतीति स्यप्रत्ययस्य `कृदतिङ' (3.1.93) इति कृत्संज्ञा स्यात्। ततश्च `कृत्तद्धितसमासाश्च' (1.2.46) इति प्रातिपदिकसंज्ञा प्रसज्येत, तस्याञ्च सत्यां सुबुत्पत्तिः। `च्लि लुङि' (3.1.43) इत्यत्र च `तत्रोपपदम्' (3.1.92) इति लुङोऽप्युपपदसंज्ञा स्यात्, ततश्च लुङ्युपपदे च्लिरित्ययमर्थश्च सम्भाव्येत। तसमादिह धात्वधिकारे कृदुपपदसंज्ञे यथा स्यातां पूर्वत्र मा भूतामिति पुनर्धातुग्रहणम्। अथाधिकारेणैते संज्ञे विधास्येते प्रत्ययसंज्ञावत्, तेन पूर्वत्र न भविष्यतीति चेत् ? न हि; सिंहावलोकितन्यायोप्यस्ति। अधिकारेण विधाने पूर्वत्रापि सम्भाव्येयाताम्। तत्र व्याख्यानं कर्त्तव्यं भवेत्। व्याख्यानाच्च लघु धातुग्रहणं भवति। अवश्यञ्चान्यार्थं धातुग्रहणं कर्त्तव्यम्, तदन्यार्थं क्रियमाणं कृदुपपदसंज्ञाविधावपि विस्पष्टार्थं भविष्यति। तामेव चान्यार्थतां दर्शयितुमाह--- `आर्धधातुकसंज्ञार्थम्' इत्यादि। चशब्दाद्वाऽसरूपविधानार्थञ्चेत्ययमत्रार्थो वेदितव्यः। `वाऽसरूपोऽस्त्रियाम्' (3.1.94) इत्यस्मिन् धात्वधिकारेऽसरूपोऽपवादो बाधको यथा स्यात्, पूर्वत्र मा भूत्। तेन क्सादिभिः सिचः समावेशो न भवति। ननु च पूर्वेणापि धातुग्रहणेनार्धधातुकसंज्ञा सेत्स्यति, किं द्वितीयधातुग्रहणेन ? इत्यत आह-- `धातोरित्येवम्' इत्यादि। धातोरित्येवं धातुशब्दमुच्चार्य विहितस्यार्धधातुकसंज्ञा यथा स्यादित्येवमर्थं पुनर्धातुकृग्रहणमित्यर्थः। किमर्थं पुनर्धातोरित्येवं विहितस्यार्धधातुकसंज्ञोच्यते ? इत्याह-- `इह मा भूत्' इतति।असति द्वितीये धातुग्रहणे लूभ्याम्, लूभिरित्यत्रार्धधातुकसंज्ञा स्यात्. भवति ह्यत्र धातोः परः प्रत्ययः-- `क्विबन्ता धातुत्वं न जहति' (व्या.प.132) इति कृत्वा। आर्धधातुकत्वे

सत्यार्धधातुकलक्षण इट् प्रसज्येत। द्वितीयं तु धातुग्रहणं क्रियमामं सामर्थ्याद्छबन्दपदात्मकं भवति। तेनायमर्थो लभ्यते-- धातोरित्येवं धातुसंशब्दनेन यो विहितः स अर्धधातुकसंज्ञो भवतीति। तेन लूभ्यामित्यादावार्धधातुकत्वं न भवति। न हीह धातोरित्येवं प्रत्ययो विहितः, किं तर्हि ? प्रातिपदिकादित्येवम्।।

92. तत्रोपपदं सप्तमीस्थम्। (3.1.क92)

`सप्तम्या निर्दिष्टम्' इत्यनेन सप्तमीस्थमित्यस्यार्थमाचष्टे। शब्दस्य हीयं संज्ञा विधीयते, स च कः सप्तमीस्थो भवति ? यस्याः सप्तम्या निर्देशः। `कुम्भकारः' इति। उपपदसंज्ञायां `उपपदमतिङ' (2.2.19) इति समासः, `गतिकारकोपपदात् कृत्' (6.2.139) इत्यत्तरपदस्य प्रकृतिस्वरत्वं भवति। `स्थग्रहणम्' इत्यादि। निर्दिश्यतेऽनेनेति निर्देशः। सप्तमी निर्देशो यस्य स सप्तमीनिर्देशः। तत्प्रतिपत्त्यर्थं स्थग्रहणम्। एतदुक्तं भवति-- सूत्रे यत् सप्तम्या निर्दिष्टं तस्य संज्ञित्वेन प्रतिपत्तिर्यथा स्यादित्येवमर्थं स्थग्रहणम्। यदि पुनः स्थग्रहणं न क्रियते, ततः किं स्यादित्यत आह-- `इतरथा हि' इत्यादि। इतरथा ह्यक्रियमाणे स्थग्रहणे `संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति' (पु.प.वृ.81) इतिसैव सप्तम्युपपदसंज्ञां प्रतिपद्येत। न चासतः संज्ञिनः संज्ञा युक्तेति यत्र श्रूयते सप्तमी-- स्तम्बेरम इत्यादौ तत्रैव स्यात्। स्यादेतत्-- नैतत् प्रत्ययग्रहणम्,किं तर्हि ? सप्तमीशब्दस्य स्वरूपस्य ग्रहणमित्याह-- `यत्र' इत्यादि। गतार्थम्। `स्थग्रहणात्तु' इत्यादि। स्थग्रहणे तु क्रियमाणे ग्रन्थाधिक्यात् सूत्रे यस्य सप्तम्या निर्देशस्तत् संज्ञित्वेन निर्दिश्यते, तेनु सर्वं सिद्धं भवति; येषामियं संज्ञेष्यते तेषां सर्वेषामेव सूत्रे सप्तमीनिर्देशात्। तथा हि-- `स्तम्बकर्णयोः' (3.2.13) इत्यत्र स्तम्बकर्णशब्दौ सूत्रे सप्तम्या निर्दिष्टौ। `सप्तम्यां जनेर्ङः' (3.2.97) इत्यत्राप्युपसरादयः। `कर्मण्यण्' (3.2.1) इत्यत्रापि कर्माभिधायिनः कुम्भप्रभृतयः।

ननु च लाघवार्थं संज्ञाकरणम्, तत्किमर्थं गुर्वी संज्ञा क्रियते ? इत्याह-- `गुरुसंज्ञाकरणम्' इत्यादि। उपशब्दः सामीप्ये। उपोच्चारितं पदमुपपदमित्यन्यर्थसंज्ञाविज्ञाने सति समर्थपरिभाषाव्यापारो यथा स्यादित्येवमर्थं गुरुसंज्ञाकरणम्। समर्थपरिभाषोपस्थाने सति यदिष्टं सम्पद्यते तद्दर्शयितुमाह-- `पश्य कुम्भम्' इत्यादि. अन्वर्थसंज्ञायां हि सत्यामुपपदाश्रयः प्रत्ययः पदविधिर्भवति। यत्र च पदगन्धोऽप्यस्ति तत्र समर्थपरिभाषोपतिष्ठते। तेन पश्य कुम्भं करोति कटमित्यत्र `कर्मण्यण्' (3.2.1) न भवति। न हीह कुम्भस्य करोतिना सामर्थ्यम्, किं तर्हि ? पश्येत्यनेन। पदशब्दोऽप्यत्रान्वर्थ एव, न पारिभाषिकः। तथा हि सुबन्तस्य पदसंज्ञा टचोपपदसंज्ञाविधनकाले सुबन्ततयास्ति; यस्मादुपपदसंज्ञायां विहितायामुपपदाश्रयेऽपि प्रत्यय उपपदसमासोऽपि `गतिरकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेः' (व्या.प.वृ.138) इति सुबुत्पत्त्या भवितव्यः। तस्मादन्वर्थोऽयं पदशब्दः-- पद्यते गम्यतेऽर्थो येन तत् पदमिति। `तत्र' ग्रहणं सप्तमीस्थस्य प्रत्योत्पत्तिं प्रति निमित्तभावे सत्युपपदसंज्ञा यथा स्यादित्येवमर्थम्। असति हि तत्र ग्रहणे कर्मण्युपपदेऽनुपपदेऽपि प्रत्ययः स्यात्। यस्तु कर्मणीति सप्तम्या निर्देशः, स यदा सप्तम्यन्तः सम्भवति, तदा तस्योपपदसंज्ञार्थः स्यात्; न तु तस्मिन् सत्येव प्रत्ययेन भवितव्यमित्येषोऽर्थो लभ्यते। तस्मात् यथोक्तप्रयोजनार्थं तत्रग्रहणम्। ननु चानन्तरस्य धात्वदिकारस्य निर्देशार्थं तत्रग्रहणं कस्मान्न भवति, तत्रैतस्मिन् धात्वधिकारेऽनन्तर उपपदसंज्ञा यथा स्यादिति ? नैतदस्ति; अधिकारादप्येतत् सिद्धम्। उपपदसंज्ञाधिकरिष्यते, तेन वक्ष्यमाणेषु संज्ञिषु संज्ञा भविष्यतीति नार्थ एतदर्थेन तत्रग्रहणेन। `तत्रैतस्मिन्' इत्यादिस्तु वृत्तिग्रन्थ एवमुन्नीयते-- एतस्मिन् धात्वधिकारे यत्सप्तम्या निर्दिष्टं तदुपपदसंज्ञं भवति। तत्र च निमित्ते प्रत्यय इत्येषोऽर्थः सोपस्कारत्वाद्वृत्तिग्रन्थस्य लभ्यते।।

93. कृदतिङ्। (3.1.93)

`कर्त्तव्यम्' इति। कृत्संज्ञायां सत्यां `कृत्तद्धितसमासाश्च' (1.2.46) इति प्रातिपदिकसंज्ञा। `चीयात्' इति। आशिषि लिङ,`लिङाशिषि' (3.4.116) इत्यार्धधातुकसंज्ञा। अतिङिति यदि नोच्येत, तिङोऽपि कृत्संज्ञा स्यात्; ततश्च `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घत्वं न भवेत्। अतिङिति तु सत्यकृद्यकारत्वाद्भवति।।

94. वाऽसरूपोऽस्त्रियाम्। (3.1.94)

अपवादविषयमुत्सर्गो नाबिनिविशत इत्येष उत्सर्गधर्मः, कृताञ्च केषाञ्चिदुत्सर्गाणामपवादविषये प्रवृत्तिरिष्यते, सा च वचनमन्तरेण न सिद्ध्यतीति तदर्थमिदम्। ननु चारभ्यमाणेऽप्येतस्मिन् नैवायमर्थः सम्पद्यते, तथा हि-- अस्योत्सर्गेण वा सम्बन्धः स्यात्, अपवादेन वा, उभाभ्यां वा ? तत्र यदि पूर्वकल्प आश्रीयेत तदा वाशब्देन विकल्पार्थेनोपस्थापितयोर्भावाभावयोरस्यायमर्थः स्यात्-- उत्सर्गोऽसरूपोऽस्त्रियां पक्षे भवतीति, पक्षे न भवतीति। तथा चापवादस्य स्वस्मिन् विषये नित्याप्राप्तिः स्यात्। न ह्यनेनापवादस्य किञ्चित्कृतम्; तेन सहास्यासम्बन्धात्। न च बाधकेऽपवादेऽविकल्पां प्रवृत्तिमनुभवति सति तत्रोत्सर्गः प्रवर्तितुमुत्सहत इति स्वविषय एव विकल्पः प्रवर्तेत। अथ द्वितीयः, तदायमर्थः स्यात्-- असरूपोऽपवादोऽस्त्रियां विकल्पेन भवतीति। एवमपि नैवोत्सर्गस्यापवादविषये प्रवृत्तिर्लभ्यते। उत्सर्गोऽपवादोऽस्त्रियां विकल्पेन भवतीति। एवमपि नैवोत्सर्गस्यापवादविषये प्रवृत्तिर्लभ्यते। उत्सर्गोऽपवादविषयं परिहति, तदापवादस्य बाधकत्वात्। तच्च बाधकत्वमस्मिन्नपि पक्षे तदवस्थमेव, न ह्यनेन तदपनीतम्, किं तर्हि ? स्वस्मिन् विषये तस्य भावाभावौ प्रतिपादितौ-- पक्षे भवति,पक्षे न भवति। न चान्यद्वचनमस्ति; यतोऽपवादविषयमुत्सर्गोऽव्यास्ते। अपवादस्याभावपक्षे प्रापकवचनमन्तरेणापि उत्सर्गो भविष्यति। प्रतिबन्धाभावादिति चेत् ? सत्यमेतत् कार्यबाधायाम्; शास्त्रबाधायान्तु यत् कार्यस्य विधायकं तदपवादेन बाध्यमानं तद्विषपरीहारेणैव प्रवर्तेत, तस्मिन् प्रवृत्ते पश्चापदवादे विकल्पेन प्रवृत्तिमनुबव्लयपि तद्विषय उत्सर्गप्रवृत्तिर्न सम्भवति, सामान्यशास्त्रस्यातद्विषयत्वात्।

अस्तु कार्यवधापक्ष इति चेत्? न; अयुक्तत्वात्। न ह्यबाधिते विधायके शास्त्रे तत्कार्यबाधा युज्यते। निदानोच्छेदेन हि निदानिन उच्छेदः शक्यते कर्त्तुम्,

नान्यथा। न हि प्रदीपेऽनुच्छिन्ने तत्प्रभोच्छिद्यते। तस्मादपवादः शास्त्रमेव बाधते,तस्मिश्च बाधिते सत्यपवादाभावपक्षेऽपि नैवोत्सर्गस्यापवादविषये प्रवृत्तिः स्यात्. अथ तृतीयः पक्षः, तदायमर्थः स्यात्-- उत्सर्गोऽसरूपोऽस्त्रियां वा भवति, अपवादोऽपीति। एवमपि तयोः स्वस्मिन् विषये विकल्पेन प्रवृत्तिः स्यात्, न तूत्सर्गस्यापवादविषये; पूर्वोक्तादेव हेतोः। तस्मात् क्रियमाणेऽप्येतस्मिन् नैवाभिमतोऽर्थः सम्पद्यत इति देशयेत्, तं प्रत्याह-- `असरूपोऽपवादप्रत्ययो वा बाधको भवति' इति। एतेनापवादस्यानेन सम्बन्धः, न तु भावाभावौ विकल्प्येते, किं तर्हि ? पक्षे बाधकत्वमिति दर्शयति। एवञ्च यस्मिन् पक्षेऽपवादो बाधको न भवति, तस्मिन् विषये प्रतिबन्धाभावादुत्सर्गः प्रवर्त्तत इति सिध्यति समावेशः। `स्त्र्यधिकारविहितं प्रत्ययं वर्जत्वा' इति.कथं पुनः `अस्त्रियाम्' इति वचनादेषोऽर्थो लभ्यते ? एवं मन्यते-- `स्त्रीग्रहणमिह स्वर्यते, स्वरितेन चाधिकारावगतिर्भवति; तेन स्त्रयधिकारविहितमाश्रित्य यावुत्सर्गापवादौ विहितौ तद्वि,ये प्रतिषेधो विज्ञायते' इति। अथैवं कस्मान्न विज्ञायते-- स्त्रियामभिधेयायामसरूपोऽपवादो बाधको वा न भवतीति ? एवमशक्यं विज्ञातुम्; एवं हि विज्ञायमाने लव्या लवितव्येति यद्विषये तव्यो न स्यात्। एवं तर्हि कस्मान्न विज्ञायते-- स्तिरयामित्येवं स्त्रीशब्दसंशब्दनेन यः प्रत्ययो विहितः स इह स्त्रीशब्देनोक्तः, तत्र स्त्रियामित्येवं विहितेऽसरूपोऽपवादो बाधको वा न भवतीति ? एवमशक्शं विज्ञातुम्; एवं हि विज्ञायमाने व्यावक्रोशी, व्यावक्रुष्टिरिति णचो विषये क्तिनः प्रवृत्तिर्न स्यात्,; यस्मात् `कर्मव्यतीहारे णच् स्त्रियाम्' (3.3.43) इति णज्विहितः, स्त्रियां क्तिन्नपि; तस्मात् पूर्वोक्त एवार्थः। यद्येवम्, `क्तल्युट्तुमुन्खलर्थेषु' (पु.प.वृ.76) इति परिभाषा न प्राप्नोतिच तेषामस्त्र्यधिकारविहितत्वात् ? `नपुंसके भावे क्तः' (3.3.114), `ल्युट् च' (3.3.115)-- हसितम्, हसनम्, तयोर्विषये `भावे' (3.3.18) इति घञपि प्राप्नोति । `समानकर्तृकेषु तुमुन्' (3.3.158) -- इच्छति भोक्तुम्,तस्य विषये `इच्छार्थेषु लिङ्लोटौ' (3.3.157)अपि प्राप्नुतः ? `आतो युच्' (3.3.128) --ईषत्पानम्, तस्य विषये `ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' (3.3.126) इति खलपि प्राप्नोति ? वावचनस्य व्यवस्थितविभाषात्वान्न भवतीत्यदोषः। `ण्वुल्तृचावित्युत्सर्गा' इति। सामान्यविहितत्वात्। `इगुपधापीकिरः कः इत्यपवादः' इति। विशेषविहित्वात्।

`कर्मण्यण्' (3.2.1) इत्युत्सर्गः, `आतश्चोपसर्गे' (3.1.136) इति कप्रत्ययोऽपवादः। ननु चानुबन्धकृतेनासारूप्येण सोऽप्यसरूप इत्याह-- `नानुबन्धकृतम्' इत्यादि। अत्र `ददातिदधात्योर्विभाषा' (3.1.139) इति विभाषाग्रहणं ज्ञापकम्। यदि ह्यनुबन्धकृतमसारूप्यं स्याद्विभाषाग्रहणमनर्थकं स्यात्. अनुबन्धकृतादसारूप्यादेव हि `श्याऽऽद्व्यध' (3.1.141) इत्यादिसूत्रेण पक्षे णो भविष्यति।।

95. कृत्याः प्राङ् ण्वुलः। (3.1.95)

`कृत्याः' इति बहुवचनेन निर्देशो बहुत्वात् संज्ञिनाम्। अथ वा-- अनुक्तकृत्प्रत्ययसंग्रहार्थं बहुवचनम्। तेन `केलिमर उपसंख्यानम्' (वा.121) इत्येतत् कर्त्तव्यं न भवति। `ण्वुल्तृचाविति वक्ष्यति' इति। अथ रोगाख्यायां ण्वुल् बहुलम्' (3.3.108) इत्यस्य ण्वुलोऽवधित्वं कस्मान्न विज्ञायते ? ज्ञापकात्। यदयम् `अर्हे कृत्यतृचश्च' (3.3.169) इति कृत्यग्रहणं कृत्वा तृज्ग्रहणं करोति, ततो ज्ञायते-- नास्यावधित्वमिति; अन्यथा तृचोऽपि कृत्यत्वाद्भेदेनोपादानमनर्थकं स्यात्। यद्येवम्; प्राग्वचनमनर्थकं स्यात्, अत एव ज्ञापकात् तृच इयं संज्ञा न भविष्यति ? नैतदस्ति; असति ह्येतस्मिन्, ज्ञापकात् तृच एव न स्यात्। ण्वुलस्तु स्यादेव। स्यादेतत्-- योगापेक्षं ज्ञापकम्, एतस्मिन् योगे कृत्यसंज्ञा भवति-- एषोऽर्थस्तृज्ग्रहणेन ज्ञाप्यते, तेन ण्वुलोऽपि न भविष्यतीति ? एवमन्येषामजादीनां स्यात्, प्रतिपत्तिगौरवञ्च स्यात्, योगापेक्षस्य ज्ञापकस्य दुर्विज्ञानत्वात्।।

96. तव्यत्तव्यानीयरः। (3.1.96)

`तकाररेफौ स्वरार्थौ' इति। तकारः `तित्स्वरितम्' (6.1.185) इति स्वरितार्थः। रेफः `उपोत्तमं रिति' (6.1.217) इतिमध्योदात्तार्थः। `वसेस्तव्यत् कर्त्तरि णिच्च' इति।`वस निवासे' (धा.पा.1005) इत्यस्मात् कर्त्तरि तव्यप्रत्ययो भवति, स च णिद्भवतीति। न चैतद्वक्तव्यम्; `कृत्यल्युटो बहुलम्' (3.3.113) इति सिद्धत्वात्। वसतीति वास्तव्यः। णित्त्वाद्वृद्धिः।

`केलिमर उपसंख्यानम'इति। उपसंख्यानशब्दसय् प्रतिपादनमर्थः। प्रतिपादनं तु प्रागेव कृतम्। पुनरपि क्रियते-- `कृत्यल्युटो बहुलम्' (3.3.113) इतिबहुलवचनात् केलिमर्प्रत्ययोऽपि कृत्यो भविष्यति। ककारः कित्कार्यार्थः, रेफः स्वरार्थः। स्वयमेव पच्यन्ते `पचेलिमा माषाः'। शब्दशक्तिस्वाभाव्यादत ए बहुवचनाच्च कर्मकर्त्तर्येव भवति नान्यत्र।।

97. अतो यत्। (3.1.97)

`तकारः `यतोऽनावः' इति {स्वरार्थः-- काशिका} विशेषणार्थः' इति। आद्युदात्तार्थः। `गेयम्' इति। `कै गै शब्दे' (धा.पा.916,917), `आदेच उपदेशेऽशिति' (6.1.45) इत्यात्त्वम्, `ईद्यति' (6.4.65) इतीत्त्वम्, गुणः।

`यावता' इत्यादि। इह द्विविधा धातवः-- हलन्ता अजन्ताश्च; तत्र `ऋहलोर्ण्यत्' (3.1.124) इति ण्यतं हलन्तादिच्छति।अतः परिशेष्यादेवाज्ग्रहणमन्तरेणाप्यजन्तादेव यद्भविष्यतीत्यतोऽज्ग्रहणमपार्थकमित्यभिप्रायः। `अजन्तभूतपूर्वात्' इति। अजन्तश्चासौ भूतपूर्वश्चेति कर्मधारयः। यः प्रागजन्त आसीत् संप्रति तु हलन्तः, ततोऽपि यथा स्यादित्येवमर्थमज्ग्रहणम्। `दित्स्यम्'। `धित्स्यम्' । दाञो धाञश्च सन्, द्विर्वचनम्। `सनि मीमा'

(7.4.54) इतीस्। `अत्र लोपोऽभ्यासस्य' (7.4.58) इत्यभ्यासलोपः। `सः स्यार्धधातुके' (7.4.49) इति तत्त्वम्। अनुत्पन्न एवार्धधातुके विषयभावेन विवक्षिते `अतो लोपः' (6.4.48) इत्यकारलोपः। अस्यामवस्थायामसत्यज्गर्हणे न स्यात्; अनजन्तत्वात्। तस्मिंस्तु सति भूतपूर्वमजन्तत्वमाश्रित्य भवति। पाक्षिकञ्चैतत् प्रयोजनं वेदितव्यम्। क्व तस्मिन्पक्षे ? यदार्धधातुके विषयभावन विवक्षिते `अतो लोपः' (6.4.48) विधीयते। यदाऽऽर्धधातुकः, तदा नेदं प्रयोजनम्। विस्पष्टार्थं त्वज्ग्रहणं वेदितव्यम्।

`तकिशसि' इत्यादि। `तक { सहने इति मुद्रितः पाठः} हसने(धा.पा.117), `शसु हिंसायाम्' (धा.पा.727), `चते चदे याचने' (धा.पा.865,866) , `यती प्रयत्ने' (धा.पा.30), `जनी प्रादुर्भावे' (धा.पा.1149)--एषां यत्प्रत्ययस्योपसंख्यानम् = प्रतिपादनं कर्त्तव्यम्। प्रतिपादनं तु बहुलग्रहणमाश्रित्य कर्त्तव्यम्।

`हनो वा वध च' इति। हन्तेर्धातोर्यत्प्रत्ययो भवति, ण्यतोऽपवादः। वावचनात् पपक्षे ण्यद्भवत्येव। यत्प्रत्ययस्तु तत एव बहुलवचनाल्लभ्यते। यदा यद्भवति तदा हन्तेर्बधादेशः। सोऽपि `हनो वध लिङि' (2.4.42) इत्यत्र `बहुलं छन्दसि' (2.4.39) इत्यतो बहुलग्रहणानुवृत्तेर्लभ्यते। घात्य इति। `हनस्तः' (7.3.32) इति तत्वम्, `हो हन्तेः' (7.3.54) इति कुत्वम्।।

98.पोरदुपधात्। (3.1.98)

`प्राक्यम्। वाक्यम्' इति। `चजोः' (7.3.52) इति कुत्वम्। `कोप्यम्। गोप्यम्' इति. `कुप क्रोधे' (धा.पा.1233), `गुप {गोपने इत्येव-धा.पा.} गोपनकुत्सनयोः' (धा.पा.970), `गुप व्याकुलीकरणे' (धा.पा.1234)। आप्यमिति। `आप्लृ व्याप्तौ' (धा.पा.1260)।।

99. शकिसहोश्च। (3.1.99)

100. गदमदचरयमश्चानुपसर्गे। (3.1.100)

`अनुपसर्गे' इति। सुज्व्यत्ययेन पञ्चम्यर्थे सप्तमी। अत एवाह-- `अनुपसर्गेभ्यः' इति। अविद्यमानोपलसर्गेभ्य इत्यर्थः। अथैवं कस्मान्न विज्ञायते-- उपसर्गादन्योऽनुपसर्ग इति ? अशक्यमेवं विज्ञातुम्; एवं हि विज्ञायमाने केवलेभ्यो न स्यात्। नञिवयुक्त (है.प.94) न्यायेनोपसर्गसदृशस्य सुबन्तस्य ग्रहणे सति `वदः सुपि क्यप् च' (3.1.106) इत्यत्र पुनः सुब्ग्रहणमनर्थकं स्यात्, अस्यैवानुपसर्गस्य तत्रानुवृत्तेः। तस्मात् पूर्वोक्त एवार्थो युक्तः। `नियमार्थम्' इति। अनुपसर्गादेव यथा स्यात्, सोपसर्गानमा भूदिति।

`चरेः' इत्यादि। सोपसर्गार्थमिदम्- चरेर्धातोराङि चोपपदे यद्भवतीति, अगुरावभिधेये। स तु ज्ञापकादेव सिध्यतीति नोपसंख्येयः, यदयम् `आश्चर्यमनित्ये' (6.1.147) `सम्माननोत्सञ्जनाचार्यकरण' (1.3.36) इत्यादि करोति, ततो ज्ञायते-- चरेराङि चागुरौ यद्भवतीति। `आचार्यो देशः' इति गन्तव्य इत्यर्थः। गुरुः= उपनेता।।

101. अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु। (3.1.101)

`अवद्यम्' इति। वदेर्नञ्युपपदे `वदः सुपि क्यप् च' (3.1.106) इति यत्क्यपोः प्राप्तयोर्यदेव निपात्यते। `अनुद्यम्' इति। यजादित्वात् संप्रासरणम्, `नलोपो नञः' (6.3.73), `तस्मान्नुडचि' (6.3.74) इति नुट्। `पण्यम्' इति। पणेर्व्यवहारार्थस्य ण्यति प्राप्ते यन्निपात्यते। `पाण्यम्' इति। स्तोतव्यमित्यर्थः।

`वर्या' इति। वृङो ण्यति प्राप्ते यन्निपात्यते। स्त्रियामित्यनेन सूत्रे लिङ्गनिर्देशस्य तन्त्रतां दर्शयति। `अप्रतिबन्धः' इति। अनेनानिरोधशब्दस्यार्थमाचष्टे। अप्रतिबन्धः प्रसराभिघात इत्यर्थः। `वृत्या' इति। निरोधनीया। प्रसरविघातोऽस्याः कर्त्तव्य इत्यर्थः। एतच्च वृञः `एतिस्तृशासु' (3.1.109) इति क्यपि कृते `ह्रस्वस्य पिति कृति' (6.1.71) इति तुकि च रूपम्। `वार्या ऋत्विजः' इति। वृङ एतद्रूपम्। ऋत्विजो हि धनेन संविभक्तव्या इत्यस्त्यनिरोधः। स्त्रीलिङ्गता तु नास्तीति ण्यदेव भवति। ननु `एतिस्तुशास्वृ' (3.1.109) इति क्यपा भवितव्यम् ? नैतदस्ति; वृञो हि तत्र ग्रहणम्, वृङश्चात्रोदाहरणम्।।

102. वह्यं करणम्। (3.1.102)

103. अर्यः स्वामिवैश्ययोः। (3.1.103)

`वक्तव्यम्' इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- तन्त्रेणेह द्वावर्यशब्दावुच्चारितौ,तत्रैक आद्युदात्तः,अपरोऽन्तोदात्तः। य आद्युदात्तः स वैश्ये निपात्यते, इतरस्तु स्वामिनीति।।

104. उपसर्या काल्या प्रजने। (3.1.104)

`प्राप्तकाला काल्या' इति। `तदस्य प्राप्तस्य' (5.1.104) इत्यनुवर्त्तमाने `कालाद्यत्' (5.1.107) इति यत्। प्रजननम् = प्रजनः, भावे घञ्, `जनिवध्योश्च' (7.3.35) इति वृद्धिप्रतिषेधः। `उपसार्या' इति। उपसंक्रमणीत्येत्यर्थः।

105.अजर्यं सङ्गतम्। (3.1.105)

`जीर्यतेः' इति. `जृष् झृष् वयोहानौ' (धा.पा.1130, 1131)। `सङ्गमन' इति। सङ्गमनम् = सङ्गतिः। `ल्युट् च' (3.3.115) इति ल्युट्। एतेन सङ्तमित्यत्र `नपुंसके भावे क्तः' (3.3.114) इति दर्शयति। `कर्त्तरि यत्प्रत्ययो निपात्यते'इति। तृजादीनामपवादः। `अजरिता' इति। तृच्।।

106. वदः सुपि क्यप् च। (3.1.106)

`अनुपसर्ग इति वर्त्तते' इति। ननु च `सत्सूद्विष' (3.2.61) इत्यादौ सूत्रे वक्ष्यति-- एतदुपसर्गग्रहणं ज्ञापनार्थम्, अन्यत्र सुब्ग्रहण उपसर्गग्रहणं न भवतीति; एवञ्च तत एव ज्ञापकादुपसर्गे न भविष्यतीति किमिहानुपसर्गग्रहणानुवृत्त्या ? विस्पष्टार्थमित्येके। तत्र वाज्ञापनार्थमुपसर्गग्रहणं कर्त्तव्यम्; इह वानुपसर्गमनुवर्त्यमिति विकल्पदर्शनार्थमित्यपरे। `ब्रह्मोद्यम्' इति। ब्रह्मणो वदनमित्यर्थः। भावे क्यप्, पूर्ववत् संप्रसारणम्, `आद्गुणः' (6.1.87), उपपदसमासः।।

107. भुवो भावे। (3.1.107)

`यत् तु नानुवर्त्तते' इति। पूर्वसूत्रे चानुकृष्टत्वात्। `ब्रह्मभूयं गतः' इति। ब्रह्मत्वं प्राप्त इत्यर्थः। ननु च `तयोरेव कृत्यक्तखलर्थाः' (3.4.70) इति भावकर्मणोः कृत्वा विधीयन्ते, अनुपसर्ग इति चानुवर्त्तते, अनुपसर्गश्च भवतिरकर्मक इतिसामर्थ्याद्भाव एव भविष्यति, न कर्मणि, किं भावग्रहणेन ? इत्याह-- `भावग्रहणेन ? इतयाह-- `भावग्रहणमुत्तरार्थम्' इति। एतेन `हनस्त च' (3.1.108) इत्यत्रोपयोगमाह-- तत्र भाव एव यथा स्यात्। `भव्यम्' इति। अचो यत्' (3.1.97), धातोर्गुणः, `धातोस्तन्निमित्तस्यैव' (6.1.80) इत्यवादेशः।।

108. हनस्त च। (3.1.108)

`ब्रह्महत्या' इति। ब्रह्मणो हननमित्यर्थः। `धातः' इति। पूर्ववत् तत्वकत्वे। किमर्थं पुनर्घञ् प्रत्युदाह्रियते, न ण्यदित्याह-- `ण्यत्तु' इत्यादि। तत्रैव युक्तिमाह-- `अनभिधानात्' इति।अबिधानलक्षणा हि कृत्तद्धितसमासा भवन्ति, न च हन्तेर्विहितेन ण्यता भावः शक्यतेऽभिधातुम्। तथा हि धात्य इत्युक्ते कर्मैव प्रतीयते, न भावः।।

109. एतिस्तुशास्वृदृजुषः क्यप्। (3.1.109)

`शिष्यः' इति। `शासु अनुशिष्टौ' (धा.पा.1075),` शास इदङहलोः' (6.4.34) इतीत्त्वम्, `शासिवसि'(8.3.60) इति षत्वम्। `आदृत्यः' इति। `दृङ आदरे' (धा.पा.1141), आङपूर्वः। `जुष्यः' इति। `जुषी प्रीतिसेवनयोः' (धा.पा.1288)। अथ किमर्थं क्यब्ग्रहणम्, यावता `वदः सुपि क्यप् च' (3.1.106) इत्यतः क्यब्ग्रहमनुवर्त्तत एवेत्यत आह-- `क्यबिति वर्त्तमाने' इत्यादि। `बाधकबाधनार्थम्' इति। एतद्विस्पष्टीकर्त्तुमाह-- `ओरावश्यके' इति। स्तुग्रहणस्यावकाशो यत्रावश्यकं न विवक्ष्यते-- स्तुत्य इति, ` ओरावश्यके' (3.1.125) इत्यस्यावकाशोऽन्यो धातुः-- अवश्यलाव्यमिति; इहोभयं प्राप्नोति-- अवश्यस्तुत्य इति, परत्वाद्बाधको ण्यत् स्यात्। पुनः क्यब्ग्रहणात् तमपि बाधित्वा क्यब्भवति। `वृग्रहणेन वृञो ग्रहणमिष्यते, न वृङः' इति। तत्कथम् ? `कृषिरजोः' (3.1.90) इत्यादेः सूत्रादिह परस्मैपदग्रहणमनुवर्त्तते, तेन वृशब्दो विशिष्यते-- परसमैपदंस्य यो वृशब्द इति। कश्च परस्मैपदस्य वृशब्दः ? यस्य परस्मैपदं प्रति निमित्त्भावो दृष्टः। वृञ एवोभयपदिनः स दृष्टः, न वृङः; तस्य नित्यात्मनेपदित्वात्। तेन वृञ एव ग्रहणं भवति, न वृङः। `शंसिदुहि' इत्यादि। एभ्यः शंसिप्रभृतिभ्यो वा क्यब्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु तदेव बहुलग्रहणमाश्रित्य कर्त्तव्यम्। `शस्यम्' इति। `शन्सु स्तुतौ' (धा.पा.728), `अनिदिताम्' (6.4.24) इति नलोपः। `गुह्यम' इति। `गुहू संवरणे' (धा.पा.896)। `अःङपूर्वादञ्जेः' इत्यादि। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तच्च पूर्ववत्। `अञ्जू व्यक्तिभ्रमणकान्तिगतिषु' (धा.पा.1458)। पूर्ववन्नलोपः। इयं च सर्पिषः संज्ञा।

`कथमुपेयम्' इति। इण एतद्रूपमिति मन्यमानस्य प्रश्नः। `ईङ एतद्रूपम्' इति. `ईङ गतौ' (धा.पा.1143) इत्यस्य `अचो यत्' (3.1.97) इति यति सत्येतद्रूपम्, न त्विणः। तस्य हि क्यपि सत्युपेत्यमिति भवितव्यम्।।

110. ऋदुपधाच्चाक्लृपिचृतेः। (3.1.110)

`क्लृपिचृतौ वर्जयित्वा' इति। `कृपू सामर्थ्ये' (धा.पा.762), `चृती {हिंसाश्रन्थनयोः' धा.पा.} हिंसाग्रन्थनयोः' (धा.पा.1324) इत्येतौ त्यक्त्वा। कृपेर्लत्वस्यासिद्धत्वादृदुपधत्वम्। `कल्प्यम्' इति। लत्वस्यामिद्ध्तवादृकारस्यैवाकारो गुणः। `ण्यदेव भवति-- कीर्त्त्यम्' इति। आर्धधातुकविवक्षायां चुरादिणिचः `णेरनिटि' (6.4.51) इति णिलोपे कृ-ते हलन्ततोपजायत इति कृत्वा `ऋहलोर्ण्यत्' (3.1.124) इति ण्यदेव भवति। `हलि च'

(8.2.77) इति दीर्घः। ननु च `अचो यत्' (3.1.97) इत्यत्राज्ग्रहणस्य प्रयोजनमुक्तम्-- अजन्तभूतपूर्वादपि यथा स्यात्, दित्स्यम्, धित्स्यमिति;एवञ्चेहापि णिचि यतैव भवितव्यम् ? एवं तर्ह्यनित्यण्यन्ताश्चुरादय इत्यण्यन्तादेवात्र ण्यद्भवतीत्यदोषः। `वक्तव्यः' इति। व्याख्येय इत्यर्थः। व्याख्यानं तु पूर्ववत्।

पाणिभ्यां स्रष्टव्या `पाणिसर्ग्या रज्जुः' । `उपपदमतिङ्ट (2.2.19) इति समासः।

`समवपूर्वाच्च' इति। सृजेर्ण्यद्भवतीति सम्बध्यते। चकारः समुच्चये।न केवलं पाणावुपपदे ण्यद्वक्तव्यः; अपि तु समवपूर्वाच्च।।

111. ई च खनः। (3.1.111)

`खेयम्' इति। `खनु अवदारणे' (धा.पा.878), नकारस्य ईकारः, `आद्गुणः' (6.1.87)। अथ किमर्थं दीर्घ आदिश्यते, यावता ह्रस्वेऽपि कृते आद्गुणेन भवितव्यम्। न च ह्रस्वस्याद्गुणे कृते कश्चिद्विशेषः ? स्यादेतत्-- एकादेशस्तु तुग्विधावसिद्धो वक्तव्यः, तत्र यदि ह्रस्व आदिश्यते तदा ह्रस्वसयाद्गुणे कृते तुग्विधावसिद्धत्वाद् ह्रस्वाश्रयस्तुक् स्यात्; दीर्घादेशे तु न भवति, अतो दीर्घादेशो वक्तव्य इति ? एतच्च नास्ति; यस्मात् पदान्तपदाद्योयं एवादेशः स तुग्विधावसिद्धो वक्तव्यः, न सर्वत्रेत्याह-- `दीर्घनिर्देशः। किमर्थं पुनर्द्वितीय सवर्णदीर्घत्वेन (6.1.101) द्व्योरिवर्णयोः प्रश्लेषो यथा स्यादित्येवमर्थो दीर्घनिर्देशः। किमर्थं पुनिर्द्वितीय इवर्णः, यावतैकेनैव खेयमिति रूपं सिध्यतीत्यत आह--` तत्र ' इत्यादि। द्वयोरिकारयोः प्रश्लेषनिर्देशः। तत्र यो द्वितीय इवर्णः सः `ये च' (6.4.109) इत्यात्त्वबाधा यथा स्यादित्येवमर्थः। `ये विभाषा' (6.4.43) इत्यस्यावकाशः-- खायते, खन्यते, इसि, अस्यादेशस्यावकाशो यस्मिन् पक्ष आत्त्वं नास्ति; आत्तवपक्षे तूभयं प्राप्नोति। उभयप्राप्तावसतीकारे पर्तवादन्तरङ्गत्वाच्चात्त्वं स्यात्, अस्मिंश्च सत्यात्त्वं बाधित्वेकार एव भवति। अन्तरङ्गत्वं पुनरात्त्वस्य यकारसामान्यमाश्रित्य विधानात्। इत्त्वस्य बहिरङ्गत्वम्; क्यब्विशेषमाश्रित्य विधानात्।।

112. भृञोऽसंज्ञायाम्। (3.1.112)

`भर्तव्या इत्यर्थः' इति। एतेन क्रियाशब्दत्वं भृत्यशब्दस्य दर्शयन् संज्ञाशब्दत्वमपाकरोति। `संपूर्वाद्विभाषा' इति। असंज्ञायामेवायं क्योप नित्यं प्रसक्तस्य क्यपो नित्यं प्रसक्तस्य विकल्पः। एतद्वक्ष्यमाणस्य विभाषाग्रहणस्योभयोरपि योगयोः शेषभूतत्वादव्यवस्थितविभाषाविज्ञानाच्च लभ्यते।

`संज्ञायां पुंसि' इत्यादि। असंज्ञायामित्यस्य प्रतिषेधस्येति शेषः। एतेन पुंसि प्रतिषेधस्य चरितार्थतामाह-- यत एवं पुंसि चरितार्थः प्रतिषेधस्ततो न ते भार्या प्रसिध्यति। भार्याशब्दस्तव सूत्रकारस्य मते न प्रसिध्यतीत्यर्थः। पुंसि प्रतिषेधे हि चरितार्थे स्त्रियां क्यपा भवितव्यम्। ननु चासंज्ञायामित्युच्यते, संज्ञाशब्दश्च भार्याशब्दः, तथा हि अबिभ्रत्यपि देवदत्ते तस्य पत्नी भार्येत्युच्यते, तत्कुतः क्यप्रसङ्गः ? न ब्रूमः-- अनेन सूत्रेण क्यपा भवितव्यमिति किं तर्हि ? `संज्ञायां समजनिषद' (3.3.99) इत्यनेन, तत्र उत्तरमाह-- `स्त्रियां भावाधिकारोऽस्ति' इति। भावाधिकारशब्देनात्र भावस्याभिधेयभावोपगमलक्षणो व्यापारो विवक्षितः, न तु शास्त्रीयोऽधिकारः। स्त्रियाम् = स्त्रीप्रकरणे, `संज्ञायां समजनिषद' (3.3.99) इत्यादिना क्यपि विधीयमाने भावस्याधिकारः, शब्दशक्तिस्वाभाव्यात्। तत्र क्यब्विधीयमानो भाव एव भवति, न कर्मणि। `तेन भार्या सिध्यति' इति। कर्मणीत्यभिप्रायः। यस्मात् स्त्रियां भावाधिकारोऽस्ति। भाव एव वाच्यत्वेन व्याप्रियते, न कर्म,तेन कर्मणि भार्याशब्दः प्रसिध्यति। स्त्रियां भावाधिकारे हि भाव एव क्यपा भवितव्यम्। कर्मणि तु ण्यतैव।।

113. मृजेर्विभाषा। (3.1.113)

ऋदुपधत्वात् प्राप्तविभाषेयम्। `ऋदुधाच्चाक्लृपिचृतेः' (3.1.110) इति क्यपो विधानात्। `परिमार्ग्यः' इति। पूर्ववत् कुत्वम्, `गृजेर्वृद्धिः' (7.2.114)।।

114. राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः। (3.1.114)

`राज्ञा सोतव्यः' इति। वाक्यविशेषेण राजनि तृतीयान्त उपपदे कर्मणि निपातनमिति दर्शयति। `राजा वेह सूयते' इत्यनेनापि राजनि प्रथमान्त उपपदेऽधिकरणे निपातनमिति। `षुञ् अभिषवे' (धा.पा.1247) इत्यस्मात् क्यप्। तत्र चास्य तुगभावो दीर्घत्वञ्च निपात्यते। `सूसर्तिभ्याम्' इति। `षू प्ररणे' (धा.पा.1408), `सृ गतौ' (धा.पा.935)- आभ्यां यथाक्रमं `अचो यत्' (3.1.97) इति यति प्राप्ते `ऋहलोर्ण्यते' (3.1.124) इति च क्यब् निपात्यते। `सुवति' इति। कर्मणि। कार्ये लोकान्' प्रेरयतीति। तस्मिन् ह्युदिते लोकस्य क्रियाप्रवृत्तिः। `पक्षे यति प्राप्ते' इति। `वदः सुपि क्यप् च' (3.1.106) इत्यनेन। मृषाववनम् = मृषोद्यम्। क्यप्, सम्प्रसारणम्; `आद्गुणः' (6.1.87), उपपदसमासः। `रोचतेऽसौ'इति। कर्त्तृप्रत्ययान्तेनार्थमुपदर्शयन् कर्त्तरि निपातनं दर्शयति। तृजादौ प्राप्ते क्यब् निपात्यते। `गुपेः' इति। `गुप गोपने' (धा.पा.970), `गुपू रक्षणे' (धा.पा.395) इत्यस्य वा। `अव्ययः' इति। `व्यण {भयसंचलनयो धा.पा.} भयचलनयोः' धा.पा.764)--अस्मात् कर्त्तरि तृजपवादः क्यब् निपात्यते।।

115. भिद्योद्ध्यौ नदे। (3.1.115)

`उज्झेश्च' इति। `उज्झ उत्सर्गे' (धा.पा.1304)। `कर्त्तरि क्यब् निपात्यते' इति। तृजादेरपवादः।।

116. पुष्यसिद्ध्यौ नक्षत्रे। (3.1.116)

`पुषेः सिद्धेश्च' इति। `पुष पुष्टौ' (धा.पा.1182) `{षिधु धा.पा.}सिधु संराद्धौ (धा.पा.1192)। `अधिकरणे क्यब् निपात्यते' इति। ल्युटोऽपवादः।

117. विपूयविनीयजित्या मुञ्जककल्कहलिषु। (3.1.117)
`विपूर्वात् पवतेः' इति। `पङ पवने' (धा.पा.966)। `नयतेश्च' इति। विपूर्वादित्यपेक्षते। `यति प्राप्ते' इति। त्रयाणामप्यजन्तत्वात्। विपूयते विपूयः। विनीयते = सिद्धत्वं प्राप्यते विनीयः। तैलेन घृतेन वा त्रिफलादिद्रव्यसमवेतेन साध्यः कश्चिदौषधविशेषः कल्क इत्युच्यते। जेतव्यो `जित्यः' । बृहद्धलम् = हलिः।।

118. प्रत्यपिभ्यां ग्रहेश्छन्दसि। (3.1.118)
`प्रतिगृह्यम्' इति। `ग्रहिज्या' (6.1.16) इत्यादिना संप्रसारणम्। `कुगतिप्रादयः' (2.2.18) इति समासः।।

119. पदास्वैरिबाह्यापक्ष्येषु च। (3.1.119)
`अस्वैरी' इति.`ईर {गतौ कम्पने च -- धा.पा.}(धा.पा.1018)। स्वेन स्वयमीरितुं गन्तूं शीलमस्येति ताच्छीलिको णिनिः। निपातनाद्वृद्धिः स्वरी = स्वतन्त्रः। अस्वैरी उच्यते। `बाह्यायाम्' इति। बहिर्भूतायामित्यर्थः। `बहिषष्टिलोपश्च' (वा.378) इत्युपसंख्यानाद्यञ्, तत्र च टिलोपः। `पक्ष्ये चार्थे' इति। पक्ष्यशब्दो वर्गमाचष्टे। पक्षे भवः पक्ष्य इति। दिगादित्वाद्यत्। प्रगृह्यत इति प्रगृह्यं पदम्। असननिकर्षोऽत्र गृह्णातेरर्थः। स्वरा हि तत्र न सन्निकृष्यन्ते सन्निधीयन्त इत्यसन्निकर्षः। अवगृह्यत इत्यवगृह्यम्। `यस्यावग्रहः क्रियते' इति। तत्र समुदायपदेऽवयवपदानि विविधान्यवगृह्य विच्छिद्याख्यायन्ते। तेनावयवानामवगृह्यत्वादवगृह्यमित्युच्यते। `गृह्यकाः' इति। `अनुकम्पायाम्' (5.3.76) इति कन्। `गृहीतकाः' इति। संयताः परतन्त्रीकृता इति यावत्। `अन्यत्र' इति। पुंसि नपुंसके च। `वासुदेवगृह्याः' इति। षष्ठीसमासः।।

120. विभाषा कृवृषोः। (3.1.120)
`वृषेश्च' इति। वृषु {प्लुषु दाहे-धातु पाठः-703} प्लुषु मृषु मेचने' (धा.पा.706,707)।।

121. युग्यं च पत्त्रे। (3.1.121)
`पतन्त्यनेनेति पत्त्रम्' इति। `दाम्नीशस' (3.2.182) इत्यादिना ष्ट्रन्। ` युग्यम्' इति। `युजिर् योगे' (धा.पा.1444)। योजनीर्ये --- युज्यते वाहनेन {गमनमिति इति मुद्रितः पाठः} गवादिकमिति युग्यम्।।

122. अमावस्यदन्तरस्याम्। (3.1.122)
`अमावस्यत्' इति। ण्यत्प्रत्ययान्तमेतन्निपातनम्, न क्यप्प्रत्ययान्तमिति ज्ञापनार्थं तकारानुबन्धोच्चारणम्; अन्यथा क्यपः प्रकृतत्वात् क्यप्रत्ययान्तमेतदिति सम्भाव्येत। स चापि तित्प्रत्ययो ण्यदिहाभिप्रेतः, न यत्; अन्यथा हि निपातनमर्थकं स्यात्। यत्प्रकरणे `अमावसेरन्यतरस्याम्' इत्येव ब्रूयात्। दोषवत्त्वाच्च यत्प्रत्ययान्तनिपातस्य। दोषस्तूत्तरत्राविष्करिष्यते। यश्च यत्प्रत्ययान्तनिपातने दोषः स क्यबन्तेऽपि सम्प्रसारणाभावश्च निपातयितव्यतामापद्येत; तस्माण्ण्यत्प्रत्ययान्तमेतन्निपातनमिति मत्वाह-- `कालेऽधिकरणे ण्यत्प्रत्ययो भवति' इति । एकदेशविकृतत्वादिना ण्यत्प्रत्ययान्तनिपातनस्य गुणं दर्शयति। वृद्ध्यभावो हि ण्यति निपातितोऽमावस्याशब्द एव। अमावस्याशब्दो नात्रोपतिष्ठते वृद्ध्यभावपक्षे। ततश्च `एकदेशविकृतमनन्यवद्भवति' (व्या.प.16) इत्यमावस्याशब्दे गृह्यमाणेऽमावास्याशब्दस्यापि ग्रहणं भवति। तेन `पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्काराद्वुन्' (4.3.28) इत्यनुवर्त्तमाने `अमावास्याया वा' (4.3.30) इत्यमावास्याशब्दे वुन्नणौ विधायमानावमावस्याशब्दस्यापि सिध्यत ः।
`अमावसेः' इत्यादि। एकस्या अपि प्रकृतेर्वृद्धिभाक्त्वावृद्धिभाक्त्वधर्मभेदेन भेदस्य विवक्षितत्वाद्द्विवचने निर्देशः। अहमित्यात्मानं व्यपदेशयन्नपरेऽन्यथा कुर्वन्तीति सूचयति। `ण्यतोः' इति। ण्यत्प्रत्ययान्तयोरित्यर्थः। `निपातयाम्यवृद्धिताम्' इति। अन्यतरस्यामिति शेषः। तेन किं सिध्यीत्याह-- `तथैकवृत्तिता तयोः' इति। प्रसिद्ध्यतीति वक्ष्यमाणेन सम्बन्धः। क्वचित् `तथैकवृत्तिताम्'इति पाठः। तत्र निपातयामीति प्रकृतेन सम्बन्धः। निपातयामीत्यस्य च साधयामीत्येषोऽर्थः। `तयोः' इति। अमावास्याऽमावस्ययोः प्रत्यवमर्शः। वृत्तिः पुनर्वुन्नणोः प्रत्यययोरुत्पत्तिः। एका तुल्या ययोर्वृत्तिस्तावेकवृत्ती,तद्भाव एकवृत्तिता। सा ण्यत्प्रत्ययमुत्पाद्य तत्र वृद्ध्यभावनिपातनेन सिध्यतीति;एकदेशविकृतस्यानन्यत्वात्। `स्वरश्च मे प्रसिध्यति' इति। `तित् स्वरितम्' (6.1.185) इति। अन्तस्वरितत्वचेष्टम्। `सिध्यति' इति। ये त्वमापूर्वस्य वसेर्यतं निपातयन्ति, अन्यतरस्यांग्रहणाच्च पक्षे ण्यतमिच्छन्ति,तेषां यद्यप्यमावस्येति रूपं सिध्यति तथापि यत्प्रत्ययपक्षे स्वरो न सिध्यति; `यतोऽनावः' (6.1.213) इति स्वरितत्वापवाद आद्युदात्तत्वं वस्याशब्दस्य प्राप्नोति। अमाशब्देनापि समासे कृते `गतिकारकोपपदात् कृत्' (6.2.139) इतिकृदन्तस्योत्तरपदस्य प्रकृतिस्वरे कृते वस्याशब्द एवाद्युदात्तः स्यात्। अन्तस्वरितस्त्वेष्यते। एकवृत्तितापि पूर्वोक्ता न सिध्यति;शब्दान्तरत्वात्। एको हि यत्प्रत्ययान्तः अपरश्च ण्यत्प्रत्ययान्त इति ण्यति वृद्ध्यभावो निपात्यते।।

123. छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि। (3.1.123)
`क्यपि प्राप्ते' इति। ऋदुपधत्वात्। `आद्यन्तविपर्ययः' इति ककारस्यादेरन्तत्वं निपात्यते। तकारस्यान्तस्यादित्वम्। `ह्वयतेः' इत्यादि। यदा `ह्वेञ् स्पर्द्धायाम्' (धा.पा.1008) इत्यस्मात् क्यप् तदा यजादित्वात् (6.1.15) सम्प्रसारणम्, `हलः' (6.4.2) इति दीर्घः। यदा तु `{हु दानादनयोः' धा.पा.}हु दाने' (धा.पा.1083) इत्यसमात्, तदा तुगभावो निपात्यते दीर्घत्वं च। देवा हूयन्तेऽस्मिन्निति देवहूवः। `{उच्छिष्यम् इति काशिका} अच्छिव्यः' इति। `शिष्लृ {विशेषणे-धा.पा.} विशरणे' (धा.पा.1451)। `शश्छोऽटि' (8.4.63) इति छकारः, `स्तोः श्चुना श्चुः' (8.4.40) इति श्चुत्वम्। `आभ्यां यत्प्रत्ययः' इति। ऋकारान्तत्वाण्ण्यति प्राप्ते। `स्त्रियामव निपातनम्'इति। अन्यथा स्तर्येति स्त्रीलिङ्गनिर्देशोऽपार्थकः स्यात्। `आपृच्छ्यः' इति। ग्रह्यादिना (6.1.16) सम्प्रसारणम्। `प्रतिषीव्यः' इति। `हलि च' (8.2.77) इत दीर्घः' `वदेर्ण्यत्' इति। `वदः सुपि क्यप् च' (3.1.106) इति क्यपि यति च प्राप्ते। `भाव्यः, स्ताव्यः' इति। भवतेः स्तौतेश्च यदपवादो ण्यत्।
`निष्टर्क्ये' इत्यादि। सुखोपग्रहणार्थौ सङ्ग्रहश्लोकौ। `व्यत्ययम्' इति। आद्यन्तविपर्ययमित्यर्थः। `ण्यदेकस्मात' इति। कर्मणि ल्यब्लोप एषा पञ्चमी। एकं निष्टर्क्यशब्दमुद्दिश्य ण्यद्भवति। एकं शब्दं साधयितुं ण्यद्भवतीति यावत्। `चतुर्भ्यः क्यप्' इति। तादर्थ्य एषा चतुर्थी। ये देवहूयादयोऽनन्तराश्चत्वारस्तदर्थ तत्सिद्ध्यर्थ क्यब् भवतीति। `चततुर्भ्यश्च यतो विधिः' इति। एषापि तादर्थ्ये एव चतुर्थी। तदनन्तरा ये चत्वारो मर्यादयः खान्यपर्यन्तास्तदर्थम् = तत्सिद्ध्यर्थं यतो विधिर्भवति। `णय्देकस्मात्' इति। एषामपि ल्यब्लोपे कर्मणि पञ्चमी। खान्यमेकं शब्दमुद्दिश्य ण्यद्भवति। खान्यशब्दं साधयितुमित्यर्थः। `यशब्दश्च' इति। एकस्मादित्यनुकर्षणार्थः। देवयज्याशब्दमुद्दिश्य यशब्दो भवति। `द्वौ क्यपौ' इति। आपृच्छ्यप्रतीषीव्यशब्दयोः सिद्ध्ये द्वौ क्यपौ भवतः। `ण्यद्विधिश्चुतः' इति। चतुरो वारान् ण्यद्भवतीत्यर्थः। स पुनः परिशिष्टेषु ब्रह्मवाद्यादिषु। अथ वा-- `ण्यदेकस्मात्' इत्येकस्माद्धातोरित्यर्थः। `चतुर्भ्यः क्यप्' इति। चतुरभ्यो धातुभ्यः क्यब् भवतीति। ननु च नयतिरेकएव धातुः, तत्कथं चतुरभ्यो धातुभ्य इत्युच्यते ? उपसर्गभेदादेकस्यापि भेदो विवक्षित इत्यदोषः। `चतुर्भ्यश्च यतो विधिः' इति। तदनन्तरेभ्यश्चतुर्भ्यो धातुभ्यो यतो विधिरित्यर्थः। `ण्यदेकस्मात्' इति. खन एकस्माद्धातोर्ण्यद्विधिः। `यशब्दश्च' इति। देवयज्याशब्द एकस्माद्धातोर्यशब्दो भवति। `द्वौ क्यपौ' इति। आपृच्छ्यप्रतिषीव्यशब्दयोः सिद्ध्य आप्रच्छिप्तिषिवशब्दाभ्यां द्वौ क्यपौ भवतः।।

124. ऋहलोर्ण्यत्। (3.1.124)
`पञ्चम्यर्थे षष्ठी' इति। `व्यत्ययो बहुलम्' (3.1.85) इत्यनेन। कस्याः पुनः पञ्चम्या अर्थे षष्ठी ? दिग्योगलक्षणायाः। प्रत्ययविधौ हि `परश्च' (3.1.2) इति सम्बन्धात् पञ्चम्या भाव्यम्।।

125. ओरावश्यके। (3.1.125)
`अवश्यम्भाव आवश्यकम्' इति। मनोज्ञादित्वाद्वुञ्। एतदेव ज्ञापकम्-- अव्ययानां भमात्रे टिलोपो भवतीति। अत्र द्वयं सम्भाव्यते-- उपपदत्वम्, आवश्यक उपपद इति; उपाधिकत्वञ्च, आवश्यके द्योत्य इति। तत्र यद्येवं ज्ञाप्यते-- आवश्यकउपपद इति, तदोपपदरहितादावश्यके द्योत्ये न स्यात्। `लाव्यं पाव्यम्' इति।
आवश्यके द्योत्य इत्येवं विज्ञायत इत्याह-- `आवश्यके द्योत्ये' इति। एतच्च प्रत्यासत्या लभ्यते। उपाधिर्हि प्रत्ययान्तद्योत्यत्वादन्तरङ्गः, उपपदेन च सम्बन्धो बहिरङ्गः, तदर्थस्य पदान्तरवाच्यत्वात्। `स्वरसमासानुपपत्तिः' इति। उपपदे ह्यावश्यके विज्ञायमाने `उपपदमतिङ' (2.2.19) इति समासो भवति। तस्मिंश्च सति `गतिकारकोपपदात् कृत्' (6.2.139) इत्युपपदाश्रय उत्तरपदप्रकृतिस्वरत्वम्, न तित्स्वरो भवति। द्योत्यपक्षे तु समासो न स्यात्; लक्षणाभावात्। अथापि कथञ्चिदुपपदसमासादन्यः समासः स्यात् ? एवमप्युपपदसमासाश्रयः स्वरो न स्यात्; ततश्च तित्स्वरो न लभ्येत्, समासान्तोदात्तत्वं हि स्यात्। `अवश्यलाव्यम्' इति। `लुम्पेदवश्यमः कृत्ये' इति मलोपः। `मयूरव्यंसकादित्वात्' इत्यादि। मयूरव्यंसकादेराकृतिगणत्वादवश्यलाव्यप्रभृतलाव्यप्रभृतयस्तत्र द्रष्टव्या इति दर्शयति। स्वरः कथमित्याह-- `उत्तरपदप्रकृतिस्वरत्वे च' इत्यादि. तत्रायं यत्नः-- `गतिकारकोपपदात् कृत्' (6.2.139) इत्यत्र `षट् च काण्डादीनि' (6.2.135) इत्यतश्चकारोऽनुवर्त्तिष्यते, स चानृक्तसमुच्चयार्थः। तेनावश्यलाव्यमित्यादावपि प्रकृतिस्वरो भवतीति।।

126. आसुयुवपिरपिलपित्रपिचमश्च। (3.1.126)
`यतोऽपवादः' इति। `षृञ् अभिषवे' (धा.पा.1247), `यु मिश्रणे' (धा.पा.1033) अनयो रजन्त्वात्। `डुवप बीजतन्तुसन्ताने' (धा.पा.1003), `रप लप व्यक्तायां वाचि' (धा.पा.401,402), `त्रपूष् लज्जायाम्' (धा.पा.374), `चमु अदने' (धा.पा.469)--एषामदुपधत्वनात् पवर्गान्तत्वात्। `दाभ्यम्' इति। दभिर्धातुष्वपठित एव प्रकृत्यन्तरमस्ति चुलुम्पवत्।।

127. आनाय्योऽनित्ये। (3.1.127)
`ण्यन्निपात्यते' इति। यति प्राप्ते। यद्यनित्ये निपात्यते घटादिष्वप्यतिप्रसङ्गः, तेषामनित्यत्वादित्याह-- `रूढः' इत्यादि। सत्यपि प्रवृत्तिनिमित्तत्वे रूढ्या

नियतविषयत्वाच्शब्दा विशिष्ट एवार्थे वर्त्तन्ते, नाविशिष्टे, मयूरादिशब्दवत्। न हि मह्यां रौतीति सर्वो मयूर इत्युच्यते, नापि गच्छतीति सर्वो गौरित्युच्यते, किं तर्हि ? विशिष्ट एव प्राणी। तस्माद्रूढिशब्दाद्दक्षिणाग्नावेव वर्त्तते, न घटादिषु। `नित्यमजागरणात्' इति। सततमज्वलनादित्यर्थः। ज्वलनमेव हि तस् जागरणम्। दक्षिणाग्नावपि विशिष्ट एवावतिष्ठते न सर्वत्रेति दर्शयितुमाह-- `यश्च' इत्यादि। किं पुनस्तस्य योनिवकल्पोऽस्ति, येनैवं विशिष्यते ? इत्याह-- `तस्य हि' इत्यादि। योनिः = कारणमित्यर्थः। `वैश्वकृलात्' इत्यादिना योनिविकल्पं दर्शयति।
`आनाय्योऽनित्य इति चेत्' इति। घटादिष्वपि प्राप्नोतीति शेषः। `दक्षिणाग्नौ कृतं भवेत्' इति। `आनाय्यः' इत्येतस्मिन्निपातनं दक्षिणाग्नावेव विशिष्टे कृतं भवेत्, नान्यत्र। लिङ सम्भावनायाम्। एतत् सम्भाव्यते, नान्यथेत्यर्थः। `एकयोनौ च तं विद्यात्' इति। तमानाय्यशब्दमाहवनीयेन य एकयोनिर्दक्षिणाग्निस्तत्र विद्याजानीयादित्यर्थः। चशब्दोऽवधारणे-- एकयोनावेव। `आनेयो ह्यन्यथा भवेत्' इति। घटादावनित्ये दक्षिणाग्नौ चाहवनीयेन भिन्नयोनौ `अचो यत्' (3.1.97) इति यति कृत आनेय इत्येवं भवति।।।

128. प्रणाय्योऽसम्मतौ। (3.1.128)
अविद्यमाना सम्मतिरित्यनेन वाक्यविशेषेण बहुव्रीहिं दर्शयंस्तत्पुरुषाशङ्कां निराकरोति-- `सम्मतिः सम्मतता' इति। सम्मत इति पूजित इत्युच्यते। सम्मतस्य भावः सम्मतता। एतेन सम्मतिशब्देनेह पूजिताभिधेयतेति दर्शयति।
`यद्येवम्' इत्यादि। अविद्यमानपूजे चौरादौ प्रणाय्यशब्दस्यान्तेवासिनि प्रयोगो नोपपद्यते। न हि पूजाऽन्तेवासिनि न विद्यत इत्यभिप्रायः। `ब्रह्म प्रब्रूयात्' इति ब्रह्मशब्देनात्र वेद उच्यते। `सम्मतिरभिलोषोऽप्युच्यते' इति। न केवलं पूजेत्यपिशब्देन दर्शयति। `तदभावेन' इति। अभिलाषाभावेन। `निष्कामतया' इति। भावभोगाभिलाषरहिततयेत्यर्थः।।

129. पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिदेनीषु। (3.1.129)
`पाय्य' इति।` आतो युक्' (7.3.33) `हविर्विशेषेष्वतिष्ठते' इति। यत्रैवायं रूढस्तत्रैवावतिष्ठते। न हविर्मात्रे। `धाय्या' इति । पूर्ववत् युक्। `ऋग्विशेषस्य वाचकः' इति। सर्वा ऋचो न सामिधेनीशब्देनोच्यते, किं तर्हि ? समिदाधानमन्त्रः। तथा हि समिदाधानमन्त्रे सामिधेनीशब्दो व्युत्पाद्यते। सामिधेन्यपि न सर्वा ऋगभिधीयते, किं तर्हि ? काचिदेवेति दर्शयन्नाह-- `तत्र' इत्यादि। कथं पुनः सामान्येन निपातनां क्रियमाणं विशेषविषयं लभत इत्याह-- `रूढिशब्दो ह्यमम् ' इति।धाय्याशब्दो रूढिशब्द ऋग्विशेषस्य वाचकः । सैवानेनोच्यते, नान्या। कथं पुनर्ज्ञायते रूढिशब्दोऽयमित्यत आह-- `तथा च' इत्यादि। यदि रूढिशब्दोऽयं न स्यात् सामिधेन्यां निपातितत्वाद् धाय्याः शंसतित्यत्र ऋग्विशेषे न दृश्येत, दृश्यते चासौ। तसमाद्रूढिशब्दोऽयमित्यवसीयते। यदि तर्ह्यसामिधेन्यामपि दृश्यते, सामिधेनीग्रहणमनर्थकं स्यात् ? नानर्थकम्; रूढिविशेषोपलक्षणार्थत्वात्।।।

130. क्रतौ कुण्डपाय्यसञ्चाय्यौ। (3.1.130)
`पिबतेः' इति। `पा पाने' (धा.पा.925)। `अधिकरमे यत्प्रत्ययः' इति। ल्युटि प्राप्ते। किं पुनः कारणं ण्यतं त्यक्त्वा यत्प्रत्ययान्तः कुण्डपाय्यशब्दो निपात्यते ? अत आह-- `यतोऽनाव इति स्वरः' इति। यत्प्रत्ययान्तत्वे ह्युत्तरपदाद्युदात्तत्वं भवति। ण्यत्प्रत्ययान्तत्वेऽन्तस्वरितत्वं स्यात्। `कुण्डपानम्' इति। क्रतोरन्यत्र ल्युडेव भवति।।

131. अग्नौ परिचाय्योपचाय्यसमूह्याः। (3.1.131)
`संपूर्वाद्वहेः' इत्यादि। हलन्तत्वाण्ण्यत् सिद्ध एव; तस्मिंस्तु सति सम्प्रसारणं न प्राप्नोति; अकित्त्वात्। ण्यतः कृतेऽपि सम्प्रसारणे `हलः' (6.4.2) इति दीर्घत्वं न प्राप्नोति; यसमादङ्गावयवाद्धल उत्तरं यत् सम्प्रसारणं तदन्तस्याङ्गस्य दीर्गत्वं विधीयते; न चायमेवम्प्रकारोऽस्ति,अत उभयं निपात्यते। न सम्पूर्वादूहेः सामान्यविहितेन ण्यतैव सिध्यति। अग्नावेव वहेः सम्पूर्वाण्ण्यद्यथा स्यात्, इह मा भूत्-- संवोढव्यो ब्राह्मण इति।।

132. चित्याग्निचित्ये च। (3.1.132)
`तेनान्तोदात्तत्वं भवति' इति। यत्प्रत्ययान्तनिपातने हि प्रत्ययस्वरेणान्तोदात्तत्वं पदस्य भवति। ण्यति तु सति तित्स्वरितत्वं भवति। तस्मात् प्रकृतं त्यक्त्वा यप्रत्ययो निपात्यत इति भावः।।

133. ण्वुल्तृचौ। (3.1.133)
`चकारः सामान्यग्रहणार्थः' इत्यादि। तृज्तृनोः सामान्यग्रहणं यथा स्यादिति। असति तु तस्मिन् `निरनुबन्धकरणे न सानुबन्धकस्य' (व्या.प.53) इति तृनो ग्रहणं न स्यात्। अथान्तोदात्तार्थः कस्मान्न भवति ? तस्य प्रत्ययस्वरेणैव सिद्धत्वात्।।

134. नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः। (3.1.134)

`प्रत्यासत्त्या पचिनैवादिशब्दस्य सम्बन्धो मा विज्ञायीत्यत आह-- `प्रत्येकम्' इत्यादि।
`नन्दिवाशि' इत्यादि। `टुनदि सममृद्धौ' (धा.पा.67), `वाशृ शब्दे' (धा.पा.1163), `मदी हर्षे' (धा.पा.1208), `दुष वैकृत्ये' (धा.पा.1185), `राध साध संसिद्धौ' (धा.पा.1262,1263), `शुभ शुम्भ शोभायाम्' (धा.पा.1321,1322), `रुच दीप्तौ' (धा.पा.745)-- एभ्यो धातुभ्यो ण्यन्तेभ्यः संज्ञायां ल्युर्भवति। नन्दयतीति। नन्दनमित्येवमाद्युदाहरणम्। `दूषणम्' इति। `दोषो णौ' (6.4.90) इत्यूत्त्वम्। अण्यन्तानां त्वेषामसंज्ञायां संज्ञायां च तृजादय एव भवन्ति। ग्रह्यादीनां नन्द्यादीनाञ्च गणे पाठस्येदमेव प्रयोजनम्-- संज्ञाविशिष्टविषये तेषां साधुत्वं यथा स्यात्। अन्यथा हि प्रकृतीरेव गणे पठित्वेह चादिशब्देन ता उपलक्ष्य प्रत्ययं विदध्यात्। `सहितपि' इत्यादि। `षह मर्षणे' (धा.पा.1809), `तप सन्तापे' (धा.पा.985), `दमु उपशमे' (धा.पा.1203) - एभ्यः संज्ञायामण्यन्तेभ्यो ल्युः। `जल्पनः' इत्यादि। `जप जल्प व्यक्तायां वाचि' (धा.पा.397,398), `रमु क्रीडायाम्' (धा.पा.853), `दृप {हर्षमोहनयोः-धा.पा.} हर्षणमोचनयोः' (धा.पा.1196), `कदि क्रदि आह्वाने रोदने च' (धा.पा.70,71), `कृष विलेखने' (धा.पा.990) ह्रषु अलोके' (धा.पा.709),`अर्द हिंसायाम्' (धा.पा.1828), जनमर्दयतीति जनार्दनः, कर्मण्यणि प्राप्ते ल्युः। `यु {मिश्रणेऽमिश्रणे च-धा.पा.} मिश्रणे' (धा.पा. 1033), `षूद क्षरणे' (धा.पा.1717), मधुं सूदयतीति मधुसूदनः। अत्रापि कर्मण्यणि प्राप्ते ल्युः। `ञिभी भये' (धा.पा. 1084)। विपूर्वात् `हेतुमति च' (3.1.26) इति णिच्; `भियो हेतुभये षुक्' (7.3.40)।`लवणः' इति। `लूञ् छेदने' (धा.पा.1483)। `निपातनाण्णत्वम्' इति। कृतणत्वस्य गणे पाठो निपातनम्। `णश अदर्शने' (धा.पा.1194) विपूर्वः, `दमु उपशमे' (धा.पा.1203)- द्वावप्येतौ हेतुमण्णिजन्तौ। वित्तं विनाशयतीति वित्तविनाशनः। कुलं दमयतीति कुलदमनः। `मितां ह्रस्वः'(6.4.92) इति ह्रस्वः, कर्मण्यणि प्राप्ते ल्युः।
`ग्रह' इत्यादि। `ग्रह उपादाने' (धा.पा.1533), `षह मर्षणे' (धा.पा.1809) उत्पूर्वः। `तसु {उपक्षये--धा.पा.}क्षेपणे' (धा.पा.1212), `दसु च' (धा.पा.1213),दसिवत् पूर्वः। `भस भर्त्सनदीप्त्योः' (धा.पा.1100) उत्पूर्वः। `ष्ठा गतिनिवृत्तौ' (धा.पा.928), `आतो युक्'(7.3.33)। स्थायी। `मत्रि {गुप्तपरिभाषणे' धा.पा.} गुप्तभाषणे' (धा.पा.1679), चुरादिणिजन्तः। `मृद क्षोदे' (धा.पा.1515) संपूर्वः। संमृद्नातीति संपूर्वादेव यथा स्यात्।
`रक्षश्रुवसवपशां नौ' इति। `रक्ष पालने' (धा.पा.658), `श्रु श्रवणे' (धा.पा.942), `डुवप बीजतन्तुसन्ताने' (धा.पा.1003), `शो तनूकरणे' (धा.पा.1145)-- एषां निशब्द उपपदे णिनिः। `निशायी' इति। पूर्ववद्युक्। `याचि' इत्यादि। `टुयाचृ याच्ञायाम्' (धा.पा.863), `ह्रञ् हरणे' (धा.पा.899) , व्याङ्पूर्वः, पुनः स एव संपूर्वः, `वज व्रज गतौ' (धा.पा.252,253), वद व्यक्तायां वाचि' (धा.पा.1009), `वस निवासे' (धा.पा.1005) --एषां प्रतिषिद्धानां णिनिर्भवति। `प्रतिषिद्धानाम्' इति। `प्रतिषिद्धार्थानामित्यर्थः। प्रतिषिद्धार्थतांच नञ्पूर्वाणामेव भवतीति नञ्पूर्वेभ्यो णिनिर्विज्ञायते। कथं पुनः प्रतिषिद्धानां प्रयोगः ? उपचारसत्तयामप्रतिषेधाददोषः। न हि मुख्यैव पदार्थानां सत्ता; किन्तूपचरिताऽपि यथोक्तमर्थद्वारेण पदार्थानामन्या सत्तौपचारिकीति। तत्र मुख्या या सत्ता तस्या एव प्रतिषेधः, न तु बुद्धिस्थाया औपचारिक्या इति तन्निबन्धनप्रयोगो न विरुध्यते। `अचाम्' इत्यादि। अजन्तानां धातूनामचित्तकर्तृकाणां प्रतिषिद्धानां णिनिर्भवति। अविद्यमानं चित्तमस्येति अचित्तः स कर्त्ता येषां ते तथोक्ताः। अर्थद्वारकं चेदं विशेषणम्। अर्थस्य ह्यचित्तकर्तृकत्वात् तदभिधायिनो धातव उपचारेण तथोच्यन्ते। `विशयी विषयी देशे' इति। विशयिविषयिशब्दौ देशेऽभिधेये णिनिप्रत्ययान्तौ साधू भवतः। `शीङ स्वप्ने'((धा.पा.1032), `षिञ् बन्धने' (धा.पा.1477)--एतयोर्विपूर्वयोर्णिनिः। वृद्ध्यभावश्च निपातनात्। अभिभावी भूते' इति। अभिभाविशब्दो भूतकाले णिनिप्रत्ययान्तः साधुर्भवति। भवतेरभिपूर्वात् णिनिः। अभिभूतवानित्यभिभावी। `अपराधी, उपरोधी' इति। `राध साध संसिद्धौ' (धा.पा.1262,1263), `रुधिर् आवरणे' (धा.पा.1438)- आभ्यामपोपपूर्वभ्यां णिनिः। `परिभावी, परिभवी' इति। भवतेः परिपूर्वस्य। पक्षे वृद्ध्यभावः।
`पच' इत्यादि। `डुपचष् पाके' (धा.पा.996), `वच परिभाषणे' (धा.पा.1842), `डुवपबीजतन्तुसन्ताने {छेदनेऽपि--धा.पा.}'(धा.पा.1003), `वद व्यक्तायां वाचि' (धा.पा.1009), `चल कम्पने'(धा.पा.832), `शल गतौ' (धा.पा.843), `पत्लु गतौ' (धा.पा.845)। `नदट्' इति। `{णद' -धा.पा.}नद अवक्ते शब्दे' (धा.पा.54)। टकारानुबन्धो ङीबर्थः। `{भषट्-काशिका} भसट्' इति। `{भष भर्त्सने'} भस भर्त्सनदीप्त्योः' (धा.पा.1100) टकारो ङीबर्थः। `गृ निगरणे' (धा.पा.1410), `मिष स्पर्द्धायाम्' (धा.पा.1352), `कुप क्रोधे'(धा.पा.1233), `मिह सेचने' (धा.पा.992), `तृ प्लवनतरणयोः' (धा.पा.969), `चुर स्तेये' (धा.पा.1534), `गाहू विलोडने' (धा.पा.649), `जृष् झृष् वयोहानौ' (धा.पा.1130,1131), `मृङ प्राणत्यागे' (धा.पा.1403), `क्षमूष् सहने' (धा.पा.442), `तुद व्यथने' (धा.पा.1281), `मृद् क्षोदे' (धा.पा.1515), `दिवु क्रीडादौ' (धापा.1107), `नृती गात्रविक्षेपे' (धा.पा.1116), `व्रण गात्रचूर्णने' (धा.पा.1937) चुरादिः; `दृशिर् प्रेक्षणे' (धा.पा.988)। `डुभृञ् धारणपोषणयोः' (धा.पा.1087)- अस्माज्जारशब्द उपपदेऽच्। जारं बिभर्तीति `जारभरः'। पचेः शुन्युपपदे कर्मण्यणपदादोऽच्-- श्वानं पचतीति `श्वपचः'। `आकृतिगणः' इति। पचादिसम्बन्धिन आदिशब्दस्य प्रकारार्थत्वात्। आकृतिगणत्वे चास्य चक्रधरादयः सिद्धा भवन्ति।।

135. इगुपधज्ञाप्रीकिरः कः। (3.1.135)
`विक्षिपः' इति। कित्त्वाद्गुणाभावः। `ज्ञः' इति। `आतो लोप इटि च' (6.4.64) इत्याकारलोपः। `प्रियः' इति। `प्रीञ् तर्पणे' (धा.पा.1836), इयङ। `किरः' इति। `कृ विक्षेपे' (धा.पा.1409), `ऋत इद्धातोः' (7.1.100) इतीत्त्वम्, रपरत्वम्। अथ कथं देवादयः सिध्यन्ति, यावता दिवादीनामिगुपधत्वात् के कृते दिवः, सिव इत्येवमादिना रूपेण भवितव्यम् ? अत आह-- `देवसेव' इत्यादि। आदिशब्दः प्रकारे।।

136. आतश्चोपसर्गे। (3.1.136)
`णप्रत्ययस्यापवादः' इति। `श्याद्व्यध' (3.1.141) इत्यादिना प्राप्तस्य। `सुग्लः' इति। `ग्लै म्लै हर्षक्षये' (धा.पा.903,904)।।

137. पाघ्राध्माधेट्दृशः शः। (3.1.137)
`पा पाने' (धा.पा.925), `घ्रा गन्धोपादाने' (धा.पा.926), `ष्मा शब्दाग्निसंयोगयोः' (धा.पा.927) `धेट् पाने' (धा.पा.902)- एषामाकारान्तलक्षणे के णे च प्राप्ते शो विधीयते। यद्युपसर्ग इत्यनुवर्त्तते तदा के; अथ निवृत्तम्-- के प्राप्त इत्यनुपसर्गेभ्यो णे। दृशेस्त्विगुपधलक्षणे के। `उत्पिब' इत्यादिषु प्रत्ययस्य शित्त्वात् सार्वधातुकसंज्ञायां `कर्त्तरि शप्' (3.1.68)। प्राघ्रादिना (7.3.78) यथायोगं पिबादयः।
`संज्ञायां प्रतिषेधः' इति। प्रकृतत्वाच्शप्रत्ययस्य। तस्य प्रतिषेधस्य `व्याघ्रादिभिः' (2.1.56) इति वचनं लिङ्गम्।।

138. अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च। (3.1.138)
`अनुपसर्गात्' इति। सुब्व्यत्ययेन बहुवचनस्य स्थान एकवचनम्। `लिम्पः,विन्दः' इत्यादि। `लिप उपदाहे' (धा.पा.1433), `विद्लृ लाभे' (धा.पा.1432)। सनुम्कयोर्ग्रहणमुपदेशावस्थायामेव `नुम्' भवतीति ज्ञापनार्थम्। `धृञ् धारणे' (धा.पा.900), हेतुमण्णिजन्तः। `पारयः' इति। `पार तीर कर्मसमाप्तौ' (धा.पा.1911,1912) चुरादिः। अथ वा `पृ पालनपूरणयोः' (धा.पा.1489) इति हेतुमण्णिजन्तः। `विद {चेतनाख्यान धा.पा.पदमंजरी } वेदनाख्याननिवासेषु' (धा.पा.1708), चुरादिण्यन्तः। अथ वा-- ज्ञानाद्यर्थानां बिदादीनामन्यतमो हेतुमण्ण्यन्तः। `एजृ कम्पने' (धा.पा.234), हेतुमण्णिजन्तः। `चिती संज्ञाने' (धा.पा.39) चुरादिण्यन्सः। `षह मर्षणे' (धा.पा.1809) हेतुमण्ण्यन्तः, चुरादिण्यन्तो वा । `लिम्पः, विन्दः' इति। `तुदादिभ्यः शः' (3.1.77), `शे मुचादीनाम्' (7.1.59) इति नुम्।
`प्रलिपः, {नास्ति-काशिका}प्रविदः' इति। इगुपधलक्षमः क एव।
`नौ लिम्पेः'इत्यादि। निशब्द उपपदे लिम्पेर्धातोः शप्रत्ययो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं त्वत्रस्थस्य चकारस्यानुक्तसमुच्चयार्थत्वात् कर्त्तव्यम्।
`गवादिषु' इत्यादि। गवादिषूपपदेषु संज्ञायां विषये शो भवति। कर्मण्यणोऽपवादःऋ। स च चकारस्यानुक्तसमुच्चयार्थत्वाल्लभ्यते।।

139. ददातिदधात्योर्विभाषा। (3.1.139)
`णस्यापवादः' इति। `श्याद्व्यध' (3.1.141) इत्यादिना प्राप्तस्य। कस्य त्वपवादो न भवति; अनुपसर्गादित्यनुवृत्तेः। `ददः,दधः' इति। शे कृते शप्। तस्य जुहोत्यादित्वात् श्लुः, `श्लौ' (6.1.10) इति द्विर्वचनम्, `श्नाभ्यस्तयोरातः' (6.4.112) इत्याकारलोपः। `दायः' इति। `आतो युक्' (7.3.33)। `प्रदः' इति। `आतश्चोपसर्गे' (3.1.136) इति कः। ननु च `दद दाने' (धा.पा.17), `दध धारणे' (धा.पा.8)- इत्येताभ्यमचि कृते ददो दध इति, दा धा--इत्येताभ्यामपि णे कृते दायो धाय इति भविष्यति, तत्किमित्यनेन सूत्रेण ? नैतदस्ति; अचि हि सति `अच्कावशक्तौ'(6.2.157) इत्यन्तोदात्तत्वं स्यात्। शे तु नञ्स्वर एव भवति-- अददः, अदध इति।।

140. ज्वलितिकसन्तेभ्यो णः। (3.1.140)
`ज्वलिति' इति। ज्वल् इति = आदि येषामिति बहुव्रीहि। विभक्तेस्त्वश्रवणम्, `सुपां सुलुक्' (7.1.39) इति लुप्तत्वात्। `कसन्तेभ्यः' इति। कसोऽन्ता इति तत्पुरुषः, अन्तशब्द समीपवाची। अथ वा -- कसोऽन्त एषामिति बहुव्रीहिः। अन्तशब्दः समीपवाची, मर्यादावाची वा। `ज्वल दीप्तौ' (धा.पा.804,831) इति द्विष्पठ्यते-- घटादिषु , परस्ताच्च। `तेभ्यः' इति। तत्रासत्यस्मिन् विशेषणे सन्देहः स्यात्केभ्यो ज्वलादिभ्य इति ? अतस्तन्निरासार्थं ज्वलादयो विशिष्यन्ते-- कसन्ता ये ज्वलादय इति। न घटाद्यन्तर्गणः पर्युदस्तो भवति। कसेः परत्वाद्ये पठ्यन्ते तन्निवृत्त्यर्थं कसग्रहणं न भवति, कसमधीत्य वृदिति पाठात्। ननु च घटादिषु ज्वलादीनां पाठो मित्संज्ञार्थः, तत्र विनापि कसन्तग्रहणं कसन्ता एव ग्रहीष्यन्ते,तदनर्थकमिदं विशेषणम् ? नैतदस्ति; असति हि तस्मिन् पूर्वेषां ज्वलादीनामुभयार्थः पाठः स्यात्-- मित्त्वार्थः प्रत्ययार्थश्च। इतरेषां तु प्रत्ययार्थ एव। तस्मात् कसग्रहणं कर्त्तव्यम्। `अचोऽपवादः' इति। ज्वलादीनां पचाज्यन्तः पातित्वात्।
`तनोतेर्णस्योपसंख्यानं कर्त्तव्यम्' इति। णे विधातव्ये तनोतेरपि णस्य प्रतिपादनं कर्त्तव्यम्। प्रतिपादनं तूत्तरत्र चकारस्यानुक्तसमुच्चयार्थत्वात् कर्त्तव्यम्।।

141. श्याऽऽद्व्यधास्रुसंस्रवतीणवसावहृलिहश्लिषश्वसश्च। (3.1.141)
`श्यैङ गतौ' (धा.पा.963)। आदित्याकारान्तानां दाधाप्रभृतीनां ग्रहणम्। `व्यध ताडने' (धा.पा.1181), `स्रु गतौ' (धा.पा.940) आङ्पूर्वः, पुनः स एव संपूर्वः। `इण् गतौ' (धा.पा.1045) अतिपूर्वः,`षोऽन्तकर्मणि' (धा.पा.1147) अवपूर्वः। `हृञ् हरणे' (धा.पा.899) अवपूर्वः। `लिह आस्वादने' (धा.पा.1016), `श्लिष आलिङ्गने' (धा.पा.1186), `श्वस प्राणने' (धा.पा.1069)। अत्र ये सोपसर्गाः पठितास्तेभ्यः सोपसर्गेभ्य एव भवति; शेषेभ्यस्तु

सोपसर्गेभ्यः, अनुपसर्गेभ्यश्च। `अनुपसर्गादिति निवृत्तम्' इति। पुनरुत्तरत्रानुपसर्गग्रहणात्। `बिभाषेति च' इति। निवृत्तमिति सम्बध्यते। विभाषाग्रहणं ह्यनुपसर्गेण सम्बद्धम्। अतस्तन्निवृत्तौ तस्यापि निवृत्तिर्भवति। `बाधकबाधनार्थम्' इति। `आतश्चोपसर्गे' (3.1.136) इति विशेषविहितत्वात् कः सामान्यविहितस्य णस्य बाधकः, तस्तद्बाधनार्थम्। अवश्यतेरप्युपादानस्यैतत् प्रयोजनं वेदितव्यम्। अथ वा-- उपसर्गनियमार्मथ तस्य ग्रहणम्, अवपूर्वादेव यथा स्यात्। `अवश्यायः' इति। `आतो युक्' (7.3.33)।।

142. दुन्योरनुपसर्गे। (3.1.142)
`दुन्योः' इति सुब्व्यत्ययेन पञ्चम्यर्थे षष्ठी। `अनुपसर्गे' इत्यपि पञ्चम्यर्थे सप्तमी। अत एवाह-- `दुनोतेर्नयतेश्चानुपसर्गात्' इति। `दावः' इति। `टु दु उपतापे' (धा.पा.1256)। `नायः' इति। `णीञ् प्रापणे' (धा.पा.901)।
`प्रदवः, प्रणयः'इति। पचाद्यच्, `उपसर्गादसमासेऽपि' (8.4.14) इति णत्वम्।।

143. विभाषा ग्रहः। (3.1.143)
`व्यवस्थितविभाषा चेयम्' इति। एतत् `जलचरे' इत्यादिना स्पष्टीकरोति।
`भवतेश्चेति वक्तव्यम्' इति। भवतेश्च विभाषा णो भवतीत्येतदर्थरूपं व्याख्येयम्। व्याख्यानं तु विभाषेति योगविभागात् कर्त्तव्यम्।।

144. गेहे कः। (3.1.144)
`गेहे कर्त्तरि' इति। एतेन `गेहे' इति प्रत्ययार्थस्य कर्त्तुरुपाधिरयम्, न तूपपदमिति दर्शयति। एतच्चाश्वपत्यादौ गृहपतिशब्दपाठाद्विज्ञायते।
`तात्स्थ्याद्दाराश्च' इति। गेहमिति प्रकृतेन सम्बन्धः। एतेन गौणेऽपि गेहे प्रत्ययो भवतीत्याचष्टे। एतच्च तन्त्रेण गेहशब्दस्य द्वितीयस्योच्चारणाल्लभ्यते।
`गृहम्'इति। ग्रह्यादिना (6.1.16) सम्प्रसारणम्।।

145. शिल्पिनि ष्वुन्। (3.1.145)
`शिल्पिनि कर्त्तरि' इति। पूर्ववदुपाधित्वं दर्शयन्नुपपदत्वमपाकरोति। एतच्च रजकस्य वस्त्रं ददातीति भाष्यकारप्रयोगाल्लभ्यते।
`नृतिखनिरञ्जिभ्यः परिगणनम्' इति। एतच्च विभाषेत्यनुवृत्तेर्व्यवस्थितविभाषात्वाल्लभ्यते। `रञ्जेरनुनासिकलोपश्च' इति। एषोऽपि तत एव भाष्यकारप्रयोगाल्लभ्यते। किञ्च `जनीजृष्क्नसुरञ्जोऽमन्ताश्च' (धा.पा.819 तः पश्चात्) इति यद् रञ्जेर्मित्त्वं शास्ति, तज्ज्ञापयति-- अक्ङित्यपि रञ्जेरनुनासिकलोपो भवतीति। मित्त्वस्य ह्येतदेव प्रयोजनम्- `मितां ह्रस्वः' (6.4.92) इति ह्रस्वत्वं यथा स्यात्, न चासत्यस्मिन्ननुसाकिलोपे वृद्धिरस्ति। न चासत्यां वृद्धौ ह्रस्वभाविन्युपधा भवति। तेन णौ रञ्जेर्यथानुनासिकलोपो भवति, तथा ष्वुनि च। परिगणनात् ह्वाता, ह्वायक इत्यत्र न भवति। ष्वुनो नित्करणमाद्युदात्तार्थम्, षकारो ङीषर्थः।।

146. गस्थकन्। (3.1.146)
`गः' इति। `आतो धातोः' (6.4.140) इत्याकारलोपं कृत्वा `गै शब्दे' (धा.पा.917) इत्यस्यायं निर्देशः। अत एवाह-- `गायतेः'इति। ननु च `गामादाग्रहणेष्वविशेषणः' (व्या.प.124) इति `गाङ् गतौ' (धा.पा.950) इत्यास्यपि ग्रहणेन भवितव्यम् ? नैतत्; यस्माद् गाथक इति थकन्प्रत्ययान्तेन गायत्यर्थविशेष एव शिल्पिनि कर्त्तृत्वं विज्ञायते; न तु गाङर्थविषये। थकनो नकार आद्युदात्तार्थः।।

147. ण्युट् च। (3.1.147)
`गायनः' इति। `आतो युक् चिण्कृतोः' (7.3.33) इति युक्। `गायनी'। टित्त्वान्ङीप्। `योगविभाग उत्तरार्थः' इति। उत्तरत्र चकारेण ण्युट एवानुवृत्तिर्यथा स्यात्, थकनो मा भूदिति। `गो ण्युट्थकनौ' इत्येकयोगे थकन्नप्यनुकृष्येत।।

148. हश्च व्रीहिकालयोः। (3.1.148)
`जहातेः' इति। ओहाक् त्यागे' (धा.पा.1090)। `जिहातेश्च' इति। `ओहाङ गतौ' (धा.पा.1089)। अस्यात्र ग्रहणमिष्यते। तयोः सामान्यग्रहणार्थ एव ककारो जहातेर्निर्दिश्यते। असति हि तस्मिन् यदीदमेकानुबन्धग्रहणम्, तदुपादाने द्वयनुबन्धकस्य जिहातेर्न स्यात्। अथ द्वयनुबन्धकस्य जहातेर्न स्यात्। ककारे तु सति द्वयोरपि सानुबन्धकत्वात् सामान्येन ग्रहणमुपपद्यते। `व्रीहौ काले च कर्त्तरि' इति। एतेन व्रीहिकालयोः प्रत्यार्थविशेषणं दर्शयति। उपपदत्वं तु निरस्यति। एतच्च `दामहायनान्ताच्च' (4.1.27) इति निर्देशाद्विज्ञायते। `हायनाः' इति। `आतो युक् चिण्कृतोः' (7.3.33) इति युक्।
`जहत्युदकमिति कृत्वा' इति। व्रीहिषु हायनशब्दस्य प्रवृत्तिनिमित्तं दर्शयति। `जिहीते भावान्' इति। `जिहीते भावान्' इति। एतेनापि संवत्सरे।।

149. प्रसृल्वः समभिहारे वुन्। (3.1.149)
`प्रसृल्वः' इति समभिहारं कृत्वा निर्देशः। नुमागमस्तु सत्यपि नपुंसकत्वे न कृतः, अनित्यत्वादागमशासनस्य। `समभिहारे वुन्' इति। अन्यत्र समभिहारशब्दस्य पौनः पुन्यादिकमर्थ इति, इहापि स एवार्थ इति कस्यचित् भ्रान्तिः स्यात्, अतस्तन्निराकर्त्तुमाह-- `समभिहारग्रहणेन' इत्यादि। लक्ष्यते प्रदर्श्यत इत्यर्थः। एतच्चानेकार्थत्वाद्धातूनां लभ्यते। शिल्पिनीत्यनुवृत्तेरित्यपरे। शिल्पी = साधुकारी। `साधुकारिणि वुन्विधानम्' साधुकारित्वोपलक्षणस्य फलं दर्शयति। `सकृदपि' इत्यादि। अनन्तरस्यैव स्पष्टीकरणम्।।

150. आशिषि च। (3.1.150)
`आशिषि गम्यमानायाम्' इति। न वाच्यायाम्। `कर्त्तरि कृत्' (3.4.67) इति कर्त्तुरेव प्रत्ययान्तवाच्यत्वात्। `धातुमात्रात्' इति। धातुसामान्यविवक्षितत्वात्, प्रुसृल्वाञ्च निवर्तितत्वात्। अन्यस्य चेह धातुविशेषस्यानाश्रयणात्। धातुमात्राश्रयो भवति, न तु कुतश्चिदेव विशेषात्। `जीवतात्, नन्दतात्' इति। आशिषि लोट्प्रयोगेण जीवकनन्दयोस्तत्समानार्थतां दर्शयति। का पुनरियमाशीर्नामेत्याह-- `आशीः प्रार्थनाविशेषः' इति। अप्राप्तस्याभीष्टस्य वस्तुनः प्रार्थना = आशीः। `सा चेह क्रियाविषया'इति। क्रिया विषयोऽस्या इति बहुव्रीहिः। एष चार्थो धातुग्रहणात्, धातोश्च क्रियावाचित्वाद्विज्ञायते। `अमुष्याः क्रियायाः' इति। जीवनक्रियाया नन्दनक्रियायाश्च कर्त्ता भवेदित्येवमाशास्यते-- जीवनं नन्दनञ्च ते भूयादिति।।
इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
तृतीयस्याध्यायस्य
प्रथमः पादः

3.2
अथ तृतीयाध्यायस्य
द्वितीयः पादः
1. कर्मण्यण्। (3.2.1)
`कर्यणि' इति नेदं स्वरूपग्रहणम्; `अशब्दसंज्ञा' (1.1.68) इति प्रतिषेधात्। यदि च कर्मप्रदेशेषु स्वरूपमेव गृह्यते,तदा संज्ञाविधानमनर्थकं स्यात्; नापि क्रियाग्रहणम्, तस्य हि ग्रहणे `कर्त्रभिप्राये' (1.3.72) इति निर्देशो नोपपद्यते, क्रियाकर्मणो हि ग्रहणे क्रियावाच्युपपदे प्रत्ययेन भवितव्यम्, न चेह क्रियावाच्युपपदमस्ति तस्मात् `कर्त्तुरीप्सिततमं कर्म' (1.4.49) इति कर्म गृह्यते। तस्य प्रभेदं दर्शयितुमाह-- `त्रिविधम्' इत्यादि। तत्र निर्वर्त्त्यं यदसदेवोत्पद्यते, तथा--कुम्भं करोति,नगरं करोतीति। कुम्भादिकं ह्यविद्यमानमेवोत्पद्यत इति निर्वर्त्त्यं कर्म। विकार्यम्-- यस्य सत एव कश्चिदद्विकारो विधीयते, तद्यथा-- काण्डं लुनाति, नगरं लुनातीति। सत एव काण्डादेर्लवनेन विकारो विधीयत इति विकार्यं कर्म। प्राप्यम्-- नासत एवोत्पादनं क्रियते, नापि सत एव विकाराधानम्, केवलं क्रियासम्बन्धमात्रं प्रतीयते, तद्यथा-- वेदमधीते, चर्च्चां परयतीति। अत्रह्यध्ययनादिना वेदादेः सम्बन्धमात्रं प्रतीयते, न त्वसत एवोत्पादनम्। नापि सत एवान्यथालक्षणो विकार इति प्राप्यमेतत् कर्म। `सर्वत्र' इत्यादि। त्रप्रकारे विशेषानुपादानात्। `कर्मण्युपपदे' इति नाभिदाने कुतो मा भूत् ? `कर्त्तरि कृत्' (3.4.67) इत्यस्य बाधा इति।
`शीलिकामि' इत्यादि। `{शील उपधारणे इति धा.पा. चुरादौ पठ्यते; `शील समाधौ' इति च धा.पा.भ्वादौ पठ्यते} शील समाधौ' (धा.पा.1878) चुरादिर्ण्यन्तः। `कमु कान्तौ' (धा.पा.443) कमिर्णिङन्तः। `भक्ष अदने' (धा.पा.1557), चुरादिर्ण्यन्तः। `चर गत्यर्थः' (धा.पा.559) आङ्पूर्वः। इकारोऽस्य धातुनिर्देशार्थः। एभ्योऽणि प्राप्ते णो वक्तव्यः = व्याख्येयः। तत्रेदं व्याख्यानम्-- `ज्वलितिकसन्तेभ्यो णः' (3.1.140) इत्यतो मण्डूकप्लुतिन्यायेन णोऽनुवर्त्तते, `विभाषा ग्रहः' (3.1.143) इत्यतश्च विभाषाग्रहणम्, द्वावपीह कर्मण्युपपदे णाणौ विधीयते। अत्र विभाषाग्रहणानुवृत्तेर्व्यवस्थितविभाषाविज्ञानाच्छीलीत्यादिभ्यो ण एव भविष्यतीति, परिशिष्टेभ्यस्त्वणेवेति। एतयोस्तु स्त्रियां विशेषः - अणि हि ङिब् भवति, णे तु टाप्। णकारः `अचो ञ्णिति' (7.2.115) वृद्ध्यर्थः। `पूर्वपदप्रकृतिस्वरत्वञ्च' इति।`गतिकारकोपपदानां कृत्' (6.2.139) इत्युत्तरपदप्रकृतिस्वरत्वे प्राप्ते पूर्वपदप्रकृतिस्वरत्वञ्च वक्तव्यम् = व्याख्येयम्। तत्रेदं व्याख्यान म्-- `{तत्पुरुषे तुल्यादौ' मु.पाठः} तुल्यार्थ' (6.2.2) सूत्रे `तत्पुरुषे'इति योगविभागः कर्त्तव्यः तेन मांसशीलादिभ्यः पूर्वपदप्रकृतिस्वरत्वञ्च भविष्यतीति। मांसशब्दोऽन्तोदात्तः-- `वृतृवदिहनिकमि{कषियुमुचिभ्यः द.उ.} कषिभ्यः सः' (द.उ.9.21) इत्यनुवर्त्तमाने `मनेर्दीर्घश्च' (द.उ.9.23) इति सप्रत्ययान्तत्वात्प्रत्ययस्वरेण। कल्याणशब्दो मध्योदात्तः-`लघावन्ते द्वयोश्च बह्वषो गुरुः' (फिट्. 2.42) इत्यनेन। अस्यायमर्थः-- अन्ते लघौ परतौ द्वयोश्चान्तयोर्लघ्वोः परतो बह्वच्शब्दस्य यो गुरुः स उदात्तो भवति। `बह्वष्' इति बह्वजित्यर्थः। ननु च शील्यादिभ्यः कर्मणि घञं कृत्वा तदन्तेन बहुव्रीहौ कृते सिध्यत्वेव मांसशीलादि, तत्किं णविधानेन ? नैतदस्ति; बहुव्रीहौ सति बहुभक्षा इत्यत्र `वहोर्नञ्चदुत्तरपदभूम्नि' (6.2.175) इत्युत्तरपदान्तोदात्तत्वं स्यात्। अवश्यञ्चाण्बाधनार्थो णो वक्तव्यः, अन्यथा हि यदा `मांसं कामयते'

इतीदं वाक्यं भवति तदाऽणपि स्यात्।
`ईक्षिक्षमिभ्याश्च'इति। `ईक्ष दर्शने' (धा.पा.610), `{क्षमू-धा.पा.}क्षमु सहने' (धा.पा.1206)- आभ्यां णो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु पूर्ववदेव कर्त्तव्यम्।।

2. ह्वावामश्च। (3.2.2)
`ह्वेञ् स्पर्द्धायाम्'। `वेञ् तन्तुसन्ताने' इति। अथ `वा गतिगन्धनयोः' (धा.पा.1050) इत्यस्य ग्रहणं कस्मान्न भवति ? अकर्मकत्वात्। कर्मणि चेहानुवर्त्तते। `माङ माने' इति। ङकारानुबन्धवतो मा इत्यस्योपलक्षणार्थमेतत्। `मेङ प्रणिदाने' (धा.पा.961) इत्यस्यापि ग्रहणमिष्यते; `गामादाग्रहणेष्वविशेषः' (व्या.प.124) इति वचनात्। ननु यदि गामादाग्रहणेष्वविशेषस्तदा `मीञ् हिंसायाम्' (धा.पा.1476), `डुमिञ् प्रक्षेपणे'(धा.पा.1250) इति तयोरप्येज्विषय आत्त्वे कृते मेत्येतद्रूपं सम्पद्यते ? भवत्येवाभ्यामणेवेति पूर्वसूत्रेण प्राप्तस्य। `स्वर्गह्वायः' इति। `आतो युक् चिण्कृतोः' (7.3.33) इति युक्।।

3. आतोऽनुपसर्गे कः। (3.2.3)
`अनुपसर्गे' इति। व्यत्ययेन पञ्चमीप्रसङ्गेऽपि सप्तमी। धातुविशेषणञ्चैतत्। अत एवाह-- `आकारान्तेभ्योऽनुपसर्गेभ्यः'इति च। `गोदः' इति। पूर्ववलदाकारलोपः। `पार्ष्णिम्' इति। `त्रैङ पालने' (धा.पा.965)।।

4. सुपि स्थः। (3.2.4)
सुपीति ग्रहणात् कर्मणीति न सम्बध्यते, तिष्ठतेरकर्मकत्वाच्च। `समस्थः' इत्यादौ सप्तम्यन्त उपपदे `अत्र' इत्यादि। सुपीत्येको योगः, तत्र चात इत्यनुवर्त्तते। `सुपीत्यादिना' अस्य योगस्यार्थमाचष्टे। `ततः स्थ इत' इति। द्वितीयो योग इति। `स्थश्च सुपि' इति विवरणम्।
`किम्'इत्यादि। पूर्वेण सिद्धमिति मन्यमानस्य प्रश्नः। `भावेऽपि यथा स्यात्' इति। आरम्भसामर्थ्यात् कर्त्तरि तावन्न भविष्यति। न चार्थान्तरं निर्दिश्यते, तत्र `अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' (पु.प.पा.90) इति भाव एव स्यात्। स एव हि धातूनां स्वार्थः। `{आखूत्थः-काशिका} आखूत्थम्' इति। `उदः स्थास्तम्भोः पूर्वस्य' (8.4.61) इति पूर्वसवर्णः।।

5. तुन्दशोकयोः परिमृजापनुदोः। (3.2.5)
`परिमृजापनुदोः' इति। सुब्व्यत्येन पञ्चम्यर्थे षष्ठी। `मृजू शुद्धौ' (धा.पा.1066) पूरिपूर्वः। `नुद प्रेरणे' (धा.पा.1426) अपपूर्वः। `आलस्य' इत्यादि। प्रत्ययार्थोपाधिरयम्। अलस एवालस्यम्। चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्। आहरतीत्याहरणः। `कृत्यल्युटो बहुलम्' (3.3.113) इति कर्त्तरि ल्युट्। सुखस्याहरणः सुखाहरणः। आलस्यकर्त्तरि सुखस्याहरणेऽनेन को भवति, नान्यत्रेत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- अत्रापि पूर्ववद्विभाषागर्हणमनुवर्त्तते, सा च व्यवस्थितविभाषा। तेनालस्यसुखाहरणयोरेव कर्त्तोः को भवति, नान्यत्रेति। `तुन्दपरिमार्ज एवान्यः' इति। अनालस्ये त्वण् भवति। `मृजेर्वृद्धिः' (7.2.114)। `शोकापनोदः' इति। यः प्रतिपक्षोपदेशेन शोकं केवलमपनुदति, न तु सुखमुत्पादयति। अत्राणेव तु भवति।
`कप्रकरणे' इत्यादि। मूलविभुजादिब्यस्तदर्थे चतुर्थी। आदिशब्दः प्रकारवचनः। मूलविभुजाद्यर्थ मूलविभुजादयः साधवो यथा स्युरित्येवमर्थ कप्रत्ययस्योपादानं प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्-- `ह्वावामश्च' (3.2.2) इत्यतः `आतोऽनुपसर्गे कः' (3.2.3) इत्यत्र चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, तेन मूलविभुजादिभ्यः कप्रत्ययो भविष्यतीति। मूलं विभुजति। `{भुजो-धा.पा.} भुज कौटिल्ये' (धा.पा.1417)। नखानि मुञ्चन्तीति नखमुचानि। `मुच्लृ मोक्षणे' (धा.पा.1430)। ` काकगृहास्तिलाः' इति। `गुहू संवरणे' (धा.पा.896)। काकेभ्यो गूहितव्याः।तव्यदाद्यपवादः। कर्मणि कः। `कौ मोदते कुमुदम्' इति। तृजाद्यपवादः।।

6. प्रे दाज्ञः। (3.2.6)
`सोपसर्गार्थं आरम्भः' इति। अनुपसर्गात् `आतोऽनुपसर्गे कः' (3.2.3) इत्येवं सिद्धत्वात्। `ददातेः' इति। दारूपाणां धातूनामुपलक्षणमेतत्। अन्येषामपि दारूपाणां ग्रहणमिष्यमे; `गामादाग्रहणेष्वविशेषः' (व्या.प.124) इति वचनात्। `प्रेणोपसृष्टात्' इति। प्रेणोपसर्गेण सम्बद्धादित्यर्थः। सूत्रे `प्रे' इति सुब्व्यत्ययेन तृतीयार्थे सप्तमी वेदितव्या। `पथिप्रज्ञः' इति। पन्थानं प्रजानातीत्यर्थः।।

7. समि ख्यः। (3.2.7)
`गां सञ्चष्टे' इति। वाक्यविशेषेण `चक्षिङः ख्याञ्' (2.4.54) इति ख्याञादेशस्य ग्रहणम्, न `ख्या प्रकथने' (धा.पा.1060) इत्येतस्येति दर्शयति। एतच्च संपूर्वस्य ख्यातेः प्रयोगासम्भवाल्लभ्यते।।

8. गापोष्टक्। (3.2.8)
`लुग्विकरणालुग्विकरणयोर्लुक्विकरणस्यैव ग्रहणम्' (व्या.प.50) इति `पा' इति पानार्थस्य ग्रहणमम्, रक्षणार्थस्य न। यद्यपि `गामादाग्रहणेष्वविशेषः' (व्या.प.124) उच्यते, तथापि पिबतिना साहचर्यात् `गा' इत्यस्यालुग्विकरणस्य ग्रहणम्, न गत्यर्थस्येत्याह--`गायतेः, पिबतेश्च' इति। टकः कित्करणमातो लोपार्थम्। टित्करणं ङीबर्थम्; न तु `आद्यन्तौ टकितौ' (1.1.46) इत्येवमर्थम्। कुत एतत् ? आद्यन्तयोरवयवत्वात्। न च प्रत्ययोऽवयवो युज्यते, `परश्च' (3.1.2) इति वचनात्। ननु च गापोरिति षष्ठी टकोऽवयवत्वञ्च बोधयिष्यते ? नैतदस्ति; पञ्चम्यर्थे त्वेषा षष्ठी, कर्त्तृविशेषणार्था वा-- गापोः कर्त्तरीति। युक्तञ्चैतत्, एवं हि प्रत्ययपरत्वं बाधितं न भवति। किञ्चादित्वे हि टकः कित्करणमनर्थकं स्यात्।
पिबतेरूपपदान्तस्य निवृत्त्यर्थमाह-- `सुराशीध्वोः' इत्यादि। तत्र पिबतेरिह ग्रहणम्, न पातेरित्येतत् प्रागेव व्यवस्थापितम्। इह `विभाषा' (3.1.143) इत्यनुवर्त्तते, सा तु व्यवस्थितविभाषा; तेन सुराशीध्वोरुपपदयोर्भविष्यति, नान्यत्र। `क्षीरपा' इति। स्त्रीलिङ्गोदाहरणं स्त्रियां विशेष इति प्रदर्शनार्थम्।
`बहुलम्' इत्यादि। पिबतेश्छन्दसि बहुलं टग्भवतीत्येदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु -- तस्यैव विभाषाग्रहणानुवृत्तस्य व्यवस्थितविभाषात्वमाश्रित्य कर्त्तव्यम्। तस्य तु फलं सुरापेति पक्षे कप्रत्ययो भवति।।

9. हरतेरनुद्यमनेऽच्। (3.2.9)
`उद्यमनमुत्क्षेपणम्' इति। अधः स्थितस्य वस्तुन ऊर्ध्वं नयनमित्यर्थः। `अंशहरः' इति। अंशं स्वीकरोतीत्यर्थः, न तूत्क्षेपयति।
`अच्प्रकरणे' इत्यादि। `प्रातिपदिकग्रहणे {लिङ्गिविशिष्टस्य' इति मुद्रितः पाठः।} लिङ्गविशिष्टस्यापि ग्रहणम्' (व्या.प.29) इति घटग्रहणेनैव घटीग्रहणे सिद्धे घटीग्रहणमस्याः परिभाषाया अनित्यत्वज्ञापनार्थम्। तस्य तु प्रयोजनम् -- `दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः'(4.1.85) इत्यत्र वक्ष्यते।
उपसंख्यानशब्दस्य प्रतिपादनमित्यर्थः। तत्रेदं प्रतिपादनम्-- उत्तरसूत्रे चकारोऽनुक्तसमुच्चयार्थः, तेन शक्त्यादिषूपपदेषु ग्रहेरज्भविष्यति।
`सूत्रे च' इत्यादि। धारेरर्थो धार्य्यर्थः। तत्र वर्तमानाद्ग्रहेः सूत्रे चोपपदेऽच उपसंख्यानं प्रतिपादनं कर्त्तव्यम्। प्रतिपादनं तावत्तदेव। `सूत्रग्राह एवान्यः' इति। यः सूत्रं केवलमुपादत्ते न धारयति, तत्राणेव भवति।।

10. वयसि च। (3.2.10)
`उतद्यमनार्थोऽयमारम्भः' इति। अनुद्यमने पूर्वेणैव सिद्धत्वात्। `अस्थिहरः'इति। अस्थ्युत्क्षेपणसमर्थे वयसि वर्त्तत इत्यर्थः।।

11. आङि ताच्छील्ये। (3.2.11)
अनुद्यमनमिति निवृत्तम्। तेनाविशेषाल्लभ्यते-- उद्यमने चायं विधिरिति। ननु चानुद्यमने पूर्वेणैव सिद्धम्, परत्वाद्धि तृन् प्राप्नोति, वासरूपविधानादजपि भवति ? नैतदस्ति; वक्ष्यति ह्येतत्-- ताच्छीलिकेषु वासरूपेण तृजादयो न भवन्तीति। `ताच्छील्यं तत्स्वभावता' इति। तत् पुनर्मानसो धर्मः। फलनिरपेक्षया प्रवृत्तिरनुमीयते। `पुष्पाहरः'इत्यादिना ताच्छील्यमुदाहरति।।

12.अर्हः। (3.2.12)
`{स्त्रीलिङ्गे इति मूलपाठः} स्त्रियां विशेषः' इति। अणि हि सति ङीब्भवति, अचि तु सति टाप्।।

13. स्तम्बकर्णयो रमिजपोः। (3.2.13)
`जपेः शब्दकर्मकत्वात्' इति गायत्रीं जपति;अनुवाकं जपतीत्यत्र शब्दकर्मकस्यैव प्रयोगदर्शनात्। `कर्मं न सम्भवति' इति।
कर्णस्याशब्दात्मकत्वादित्यभिप्रायः।इतिकरणो हेतौ। यत एव कर्णशब्दः कर्म न सम्भवति तेन सुपीत्येतदिह सम्बध्यते,न कर्मणीति।
`हस्तिसूचकयोः' इत्यादि। हस्तिसूचकग्रहणं प्रत्ययार्थस्यैव कर्त्तुर्विशेषणम्। `स्तम्बकर्णयो रमिजपोः' इति योऽयमज्विधिः स हस्तिसूचकयोः कर्त्रोर्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु-- तस्यैव विभाषाग्रहणानुवृत्तस्य व्यवस्थितविभाषात्वमाश्रित्य कर्त्तव्यम्। `स्तम्बेरमः कर्णेजपः' इति।
`तत्पुरुषे कृति बहुलम्' (6.3.14) इति सप्तम्या अलुक्। `सूचकः'इति। पिशुनक इत्यर्थः।।

14. शमि धातोः संज्ञायाम्। (3.2.14)
`धातुमात्रात्' इति। धातुमात्रग्रहणेनापवादविषयेऽपि विधानं दर्शयति। एवं हि धातुमात्राद्भवति, यद्यप्यपवादं बाधित्वा तद्विषयेऽपि भवति। एष चार्थो धातुग्रहणाल्लभ्यते। `शमि संज्ञायाम्' इत्यादिना धातुग्रहणस्य प्रयोजनं दर्शयनम्, धातुप्रतिपादितमर्थं स्पष्टीकरोति-- `शमि संज्ञायाम्' इति।
सूत्रोपलक्षणमेतत्। `शमि धातोः संज्ञायाम्' इत्यस्मिन् सूत्र इत्यर्थः। `हेत्वादिषु' इति। आदिशब्देन ताच्छील्यानुलोम्ययोर्ग्रहमम्। शम्युपपदे करोतेः संज्ञायां हेत्वादिषु विवक्षितेषु `कृञो हेतुताच्छील्यानुलोम्येषु' (3.2.20) इति टः प्राप्नोति, अतस्तद्बाधनार्थं धातुग्रहणम्। शमि धातोरित्यस्यावकाशः करोतेरन्यो धातुः

शम्युपपदः सम्भवति-- शंवद इति, `कृञो हेतुताच्छील्यानुलोम्ये' (3.2.20) इत्यस्यावकाशः करोतिः शब्दान्तरोपपदः-- श्राद्धं करोतीति श्राद्धकर इति; करोतेः शम्युपपदे संज्ञायायमुभयमेव प्राप्नोति--शङ्करा नाम शकुनिकेति। सा हि तच्छीला, तत्संज्ञा च, तत्र परत्वाट्टः प्राप्नोति, पुनर्धातुग्रहणाद्धातु मात्राद्विधीयमानं टं बाधित्वाऽजेव भवति।।

15. अधिकरणे शेतेः। (3.2.15)

`सुपीति सम्बध्यते' इति।शेतेरकर्मकत्वात्। अधिकरणस्य चाकर्मकत्वे सम्भवति सुपीतीह सम्बध्यते, न कर्मणीति।

`पार्श्वादिषूपसंख्यानम्' इति। आरम्भोऽयमनधिकरणार्थः। पार्श्वाभ्यामिति तृतीयान्तमुपपदं दर्शयति। उरःशः, पृष्ठशय इत्यत्रापि तृतीयान्तमेवोपपदं वेदितव्यम्।

`दिग्धसहशयः' इति। दिग्धेन सह शेत इति `तृतीया' (2.1.30) इति योगविभागेन समासः। दिग्धस्य सहेन प्राक् प्रत्ययोत्पत्तेः पश्चादुपपदसमासः।

`गिरौ' इत्यादि। गिरावुपपदे शेतेश्छन्दसि विषये डो भवति। `गिरिशः'इति। डित्त्वाट्टिलोपः। एतत् सर्व `व्यत्ययो बहुलम्' (3.1.85) इति बहुलवचनात् सिद्धम्।।

16. चरेष्टः। (3.2.16)

`प्रत्ययान्तरकरणं ङीबर्थम्' इति। टित्त्वान्ङीब्भवति।।

17. भिक्षासेनादायेषु च। (3.2.17)

`अनधिकरणार्थ आरम्भः' इति। अधिकरणे पूर्वेणैव सिद्धम्। भिक्षाञ्चरतीति `भिक्षाचरः' सेनाञ्चरतीति `सेनाचरः'। `आदाय' इति ल्यबन्तमेतत्। आदाय चरतीति `आदायचरः' अत्रादातव्यकर्मणोऽविवक्षितत्त्वात् पूर्वाकालमात्रे विवक्षिते प्रत्ययः। आदानं कृत्वा चरतीति यावत्। तेन सापेक्षत्वादसामर्थ्ये सति प्रत्ययो न सिध्यतीत्येतदचोद्यम्। अथापि कर्मापेक्षते ? एवमपि न दोषः; वचनसामर्थ्यादसामर्थ्येऽपि प्रत्ययो भवति।।

18. पुरोऽग्रतोऽग्रेषु सर्त्तेः। (3.2.18)

पुरःशब्दः `पूर्वाधरावराणामसि पुरधवश्चैषाम्' (5.3.39) इत्यसिप्रत्ययान्तो व्युत्पादितः। अग्रतःशब्दोऽपि `तसिप्रकरण आद्यादिभ्य उपसंख्यानम्' (वा.634) इति तसिप्रत्ययान्तः। `अग्रे' इति। अग्रशब्दस्यैकारान्तत्वं निपात्यते--अग्रेसर इत्येतद्रूपं यथा स्यात्। ननु च सप्तम्या अलुकाप्येतत् सिध्यति ? सत्यम्; यदा सिध्यति तदा सप्तम्यन्त उपपदे प्रत्ययः। यदाग्रः सरतीति, अग्रेण वा सरतीत्यसप्तम्यन्तस्तदा न सिध्यति; तदर्थमेकारान्तत्वं निपात्यते।।

19. पूर्वे कर्त्तरि। (3.2.19)

`पूर्वशब्दे कर्त्तृवाचिन्युपपदे प्रत्ययः' इति। एतेन कर्त्तरीत्यनेनोपपदं विशिष्यते, न कर्त्ता। प्रत्ययार्थो निर्दिश्यत इति दर्शयति; तस्य `कर्त्तरि कृत्' (3.4.67) इत्यनेनैव निर्देशात्। अयुक्तत्वादिह निर्देशस्येत्यभिप्रायः। ननु च पूर्वः सरतीत्यत्रासामर्थ्यमस्ति, तथा हि-- पूर्वशब्दोऽयं व्यवस्थावचनः, अवयववाची वा। तत्र पूर्वस्मिन् कल्पेऽवधिरपेक्षणीय-- अस्मादयं पूर्व इति। इतरस्मिंस्त्ववयवी पदार्थः, यथा -- पूर्व कायस्येति, उभयोरपि सापेक्षितत्वात्, असामर्थ्ये सति प्रत्ययानुत्पत्तिः ? नैष दोषः; पूर्वशब्दः सम्बन्धिशब्दः। सापेक्षेऽपि वृत्तिर्ननु भवत्येव, यथा-- देवदत्तस्य गुरुकुलमिति।।

20. कृञो हेतुताच्छील्यानुलोम्येषु। (3.2.20)

हेत्वादय एते, नोपपदानि। यदि ह्युपपदानि स्युः, `शमि धातोः संज्ञायाम्' (3.2.14) इत्यत्र धातुग्रहणमनर्थकं स्यात्। तद्धि कृञो हेत्वादिषु टप्रतिषेधार्थं कृतम्। यद्येषामुपपदत्वं स्याट्टप्रत्ययस्य प्राप्तिरेव नास्तीति धातुग्रहणमनर्थकं स्यात्।अतो नैवामुपपदत्वम्, नापि प्रत्ययार्थत्वम्; `कर्त्तरि कृत्' (3.4.67) इति कर्त्तुः प्रत्ययार्थत्वात्। न च तैर्बाधा युक्ता, विरोधाभावात्। तस्मात् प्रत्ययार्थविशेषमत्वमेषां युक्तम्। तत्र कर्त्तरि प्रत्ययो भवति यस्मिन्नभिधीयमाने तद्विशेषो हेत्वादयो गम्यन्ते। अत एवाह-- `हेतौ ताच्छील्ये आनुलोम्ये च गम्यमाने' इति। `हेतुरैकान्तिकं कारणम्' इति। एतेन लौकिकहेतोर्ग्रहणम्, न पारिभाषिकस्येति दर्शयति। पारिभाषिको हेतुः स्वतन्त्रस्य कर्त्तुः प्रयोजकः, यदि तस्येह ग्रहणं स्यात कृञ इति नोपपद्यते; न ह्यण्यन्तात् प्रयोजककर्त्तरि प्रयोजक इत्पद्यते, अपि तु ण्यन्तादन्तर्भावितण्यर्थात् प्रत्यय उत्पद्यत इति चेत् ? नैतदस्ति; टप्रत्ययान्तण्ण्यर्थस्याप्रतीतेः। ननु च लौकिकस्य हेतोर्ग्रहणे सति निमित्ततया कर्त्ता विशिष्यते, तच्चायुक्तम्; न हि कर्त्तुरनिमित्वमस्ति यद्विशेषणेन व्यावर्त्त्येत ? नैष दोषः सिद्धे कर्त्तुर्हि निमित्तत्वे पुनर्हेतुशब्द उपादीयमान ऐकान्तिकत्वं बोधयतीति--यः कर्त्ता यस्याः ऐकान्तिको हेतुरिति। अत एवोक्तम्-- `हेतुरैकान्तिकं कारणम्' इति। आनुलोम्यम् = अनुकूलयामीत्याराध्यचित्तानुप्रवर्त्तनम्। `यशस्करी'इति। `अतः कृकमिकंस' (8.3.46) इत्यादिना विसर्जनीयस्य सत्वम्।।

21. दिवाविभानिशाप्रबाभास्करान्तानन्तादिबहुनान्दीकिंकृलिपिलिबिबलिभक्तिकर्त्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु। (3.2.21)

`यथायोगम्' इति। दिवाशब्दस्य सुपीति सम्बन्धः, तस्याधिकरणस्य प्रधानत्वात् कर्मत्वानुपपत्तेः। शेषाणां तु सत्त्वप्रधानत्वात् करोतिसम्बन्धे कर्म चोपपद्यत इति कर्मणीत्यनेन सम्बन्धः। `अहेत्वाद्यर्थ आरम्भः' इति। हेत्वादिषु पूर्वेणैव सिद्धत्वात्। `भास्करः' इति. कथं पुनरत्र सकारः, यावता सकारस्य रुत्वविसर्जनीययोः `कुप्वो क पौ च' (8.3.37) इति विसर्जनीयजिह्वामूलीययोरन्यतरेण भवितव्यमित्याह-- `सकारस्य निपातनात्' इत्यादि। भास्करान्तेति यत्सकारस्योच्चारणं तदेव निपातनम्। `बहुकरः' इति। बहुशब्दो वैपुल्यवाची। `अहस्करः' इति। अहन्नित्यस्य `रोऽसुपि' (8.2.69) इति नकारस्य रेफः, तस्य विसर्जनीयः। तस्य `अतः कृकमि' (8.3.46) इत्यादिना सत्वम्। `धनुष्करः, अरुष्करः' इति। `इसुसोः सामर्थ्ये' (8.3.44), `नित्यं समासेऽनुत्तरपदस्थस्य' (8.3.45) इति षत्वम्। अथानन्तग्रहणं किमर्थम्, अन्तग्रहणादेवानन्तशब्देऽपि तदन्तविधिना भविष्यति ? नैतदस्ति; सर्वस्मिन्नुपपदविधौ न हि तदन्तविधिरिष्यते। तथा हि `{ वार्तिककारः} पदकारः पठति-- `उपपदविधौ भयाढ्यादिग्रहणं तदन्तविधिं प्रयोजयति' (1.1.72 वा.9) इति। एवं तर्हि नानतकरोऽनन्तकर इत्यन्तशब्देनापि नञ्समासो भविष्यति ? नैवं शङ्क्यम्;स्वरे दोषः स्यात्। सति शिष्टे हि `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना प्रकृतिस्वरे हि नञ्स्वरः प्रसज्येत। तथा चानन्तकरशब्द आद्युदात्तः, `निपाता आद्युदात्ताः' (फि.सू.4.80) इति नञ उदात्तत्वात्;इष्यते च `{ गतिकारककोपपदात् कृत् इति सूत्रम्} गतिकारकोपपदानां कृत्' (6.2.139) इत्युत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वम्। तस्मादनन्तग्रहणं कर्त्तव्यम्। `किंयत्तद्बहुष्वज्विधानम्' इत्यादि। किमित्यादिषूपपदेष्वज्विधानं कर्त्तव्यम्, तत्कथमिह टोऽप्यनुवर्त्तते ? माण्डूकप्लुतिन्यायेनाजपि, विभाषाग्रहणमपि। तद्व्यवस्थितविभाषाविज्ञानात् किंयत्तद्बहुषु कृञोऽजेव भवति, शेषेषु दिवादिषु ट एव। अहेत्वाद्यर्थत्वाच्चारम्भस्य यदा हेत्वादयो विशेषा न विवक्ष्यन्तेतदा किंयत्तद्बहुषु कृञोऽज्विधानम्, तेषु विवक्षितेषु पूर्वसूत्रेण ट एव भवति। तथायं प्रयोग उपपन्नो भवति-- जातिरियं किंकरीति। किंकरणशीला किंकरी, न किञ्चिदपि करोति। निष्प्रयोजननेति यावत्।।

22. कर्मणि भृतौ। (3.2.22)

`कर्मणीति स्वरूपग्रहणम्' इति। कुत एतत् ? कर्मग्रहणसमार्थ्यात्। यदि पारिभाषिकस्य कर्मणो ग्रहणमिह स्यात् कर्मग्रहणमनर्थकं स्यात्; कर्माधिकारात्। करोतेश्च सकर्मकत्वात् तेनैव सम्बद्धो भविष्यति। तथा च प्रागुक्तम्-- कर्मणि सुपीति द्वयमप्यनुवर्त्तते, तत्र सकर्मकेषु कर्मणीत्येतदुपतिष्ठते, अन्यत्र सुपीति। तस्मात् स्वरूपग्रहणमेवैतत्। `कर्मनिर्देशः'इति। कर्म व्यापारः, तस्य निर्देशः = मूल्यम्।।

23. न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु। (3.2.23)

`हेत्वादिषु टः प्राप्तः' इति। `कृञो हेतु' (3.2.20) इत्यादिना।।

24. स्तम्बशकृतोरिन्। (3.2.24)

`व्रीहिवत्सयोरिति वक्तव्यम्' इति। कर्त्तृविशेषमं व्रीहिवत्सग्रहणम्। अनेन सूत्रेण य इन् विधीयते स व्रीहिवत्सयोः कर्त्रोर्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- इहापि विभाषेत्यनुवर्त्तते, सा च व्यवस्थितविभाषा। तेन व्रीहिवत्सयोः कर्त्रोरेव भविष्यति, नान्यत्र। नित्यत्वादुत्तरपदादाद्युदात्तत्वम्।।

25. हरतेर्दृतिनाथयोः पशौ। (3.2.25)

`पशौ कर्त्तरि' इति। एतेन पशुग्रहणं प्रत्ययार्थस्य कर्त्तुर्विशेषणमिति दर्शयति। प्रत्ययार्थत्वं तु `कर्त्तरि कृत्' (3.4.67) इति वचनात्। कुतः पुनरेतदवसितम्-- प्रत्ययार्थस्य विशेषणमेवेति, न पुनर्बाधकमेवेति ? तदुच्यते-- धातोः प्रत्ययस्य विधानात् तदर्थस्य येन सम्बन्धस्तत्र वाच्ये प्रत्ययेन भवितव्यम्। धात्वर्थः = क्रिया तस्याश्च साधनेन सम्बन्धः, न वस्तुस्वरूपेण। साधनञ्च शक्तिः, न वस्तुस्वरूपम्। पशुशब्देन वस्तुस्वरूपेण स्वार्थमाचष्टे। न शक्तिस्वरूपेणेति। तेनाशक्तिस्वरूपे प्रत्याय्यमानः पशुर्नार्हति प्रत्ययार्थो भवितुम्। सोऽप्रत्ययार्थः सन्नशक्तित्वात् कथमिमं प्रत्ययार्थ बाधेत। तस्मात् प्रत्ययार्थः, तेन कर्त्तरि विशिष्यत इति युक्तमुक्तम्-- पशौ कर्त्तरीति। एष न्यायोऽन्यत्रापि प्रत्ययार्थविशेषणे द्रष्टव्यः।।

26. फलेग्रहिरात्मम्भरिश्च। (3.2.26)

27. छन्दसि वनसनरक्षिमथाम्। (3.2.27)

`ब्रह्मवनिं त्वा क्षत्रवनिम्'इति। ब्रह्म वनति, क्षत्रं वनतीत्यर्थविवक्षायामिन्प्रत्ययः। तदन्तादिद्वितीया, तस्याः `सुपां सुलुक्' (7.1.39) इति लुक्। युष्मच्छब्दादिद्वतीयादिभक्तेः `त्वामौ द्वितीयायाः' (8.1.23) इति त्वादेशः। `गोसनिम्' इति। गां सनतीत्यर्थ इन्प्रत्ययः। तदन्तादमि परे पूर्वरूपत्वम्। पन्थानं रक्षत इति `पथिरक्षी'। द्विवचनमेतत्। पूर्वसवर्णदीर्घत्वम्। `हविर्मथीनाम्' इति। हविर्मथन्तीति विगृह्य प्रत्ययः। तदन्तात् षष्ठ्या बहुवचनम्।।

28. एजेः खश्। (3.2.28)

ण्यन्तात्' इति। एतेन प्रकृत्यन्तरस्यायमेजेरिका निर्देश इत्याशङ्कां निरस्यति। कुतः पुनर्ण्यन्तमवसितम् ? खशः शित्करणात्। प्रकृत्यन्तरस्य ग्रहणे शित्करणमनर्थकं स्यात्। तद्धि सार्वधातुके सति तदाश्रयस्य शपो विधिर्यथा स्यादित्येवमर्थं क्रियते। न चैजेः प्रकृत्यन्तरस्य सत्यसति वा शपि कश्चिद्विशेषोऽस्ति, ण्यग्रहणे तु सति शित्करणमर्थवद्भवति। असति तस्मिन् णिलोपः स्यात्, तस्मिंस्तु सति सार्वधातुनिबन्धने शपि णिलोपो न भवति। आर्धधातुकत्वं णिलोप इत्येके, एतच्चायुक्तम्; उत्तरार्थं हि शित्करणं स्यात्। असति हि तस्मिन्नुत्तरसूत्रे धेट आत्त्वं स्यात्, ध्मश्च धमादेशो न स्यात्। तथा च स्तनन्धयः, नासिकन्धम इति न सिध्येत्। तस्माद्व्याख्यानादेव ण्यन्तत्वमवसेयम्। `खकारोऽयं मुमर्थः'इति। `खित्यनव्ययस्य' (6.3.66) इत्यधिकृत्य `अरुर्द्विषदजन्तस्य' (6.3.67) इति मुमागमो यथा स्यात्। `शकारः सार्वधातुकसंज्ञार्थः' इति। `तिङशित् सार्वधातुकम्' (3.4.113) इति सार्वधातुकसंज्ञा यथा स्यात्। `अङ्गमेजयः' इति। शप्, गुणायादेशौ।
`खश्प्रकरणे' इत्यादि। वातादिषूपपदेषु `अज गतिक्षेपणयोः' (धा.पा.230), `धेट् पाने' (धा.पा.902), `तुद व्यथने' (धा.पा.1281),`ओहाक् त्यागे' (धा.पा.1090)--इत्येभ्यो धातुभ्यः खश्प्रकरण उपसंख्यानं कर्त्तव्यम्। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम् -- `नाडीमुष्ट्योश्च' (3.2.20) इत्यत्र चकारः, स चानुक्तसमुच्चयार्थः। तेन वातादिषूपपदेष्वजादिभ्यो धातुभ्यः खश् भविष्यति। `शुनिन्धयः' इति। `खित्यनव्ययस्य' (6.3.66) इति ह्रस्वत्वम्। `शर्द्धञ्जहाः' इति। जुहोत्यादिभ्यः शपः श्लुः, `श्लौ'(6.1.10) इति द्विर्वचनम्, `श्नाभ्यसत्योरातः' (6.4.112) इत्याकारलोपः।।

29. नासिकास्तनयोर्ध्माधेटोः। (3.2.29)
`स्तने धेटः' इत्यादिना यथायोगमुपपदसम्बन्धं दर्शयन्नुदाहरणानि दर्शयति। `नासिकन्धमः' इति। पाघ्रादिसूत्रेण (7.3.78) धमादेशः।
`तच्चैतत्' इत्यादि। यथासंख्याभावे हेतुमाह। स्तनशब्दो हि नासिकापेक्षयल्पाच्तरः, तस्य पूर्वनिपाते कर्त्तव्ये योऽयमपूर्वनिपातः कृतः सलक्षमव्यभिचारं सूचयति। यथेह पूर्वनिपातशास्त्रं व्यभिचरति, स्वविषये न प्रवर्तते, तथा यथासंख्यलक्षणमपीति। अतोऽस्माल्लक्षणव्यभिचारचिह्नाद्यथासंख्याभावो लभ्यते।।

30. नाडीमुष्ट्योश्च। (3.2.30)
`अत्रापि'इत्यादिना नाडीमुष्टिशब्दो हि ध्यन्तः तस्य हि `द्वन्द्वे घि' (2.2.32) इति पूर्वनिपाते प्राप्ते योऽयमपूर्वनिपातः कृतः स पूर्वनिपातलक्षणव्यभिचारचिह्नम्, अत इहापि संख्यातानुदेशो न भवितीत्यपि सूचयति। अथ प्रत्येकमुपपदाभ्यां धातोः प्रत्येकं सम्बन्धः। स चोदाहरणेनैव वृत्तावभिव्यक्तः। `अनुक्तसमुच्चयार्थश्चकारः' इति। तेन घटीखारीवातशब्देष्वप्युपपदेषु ध्माधेटोः खश् भवति। यद्येवम्, वैषम्यादेव संख्यातानुदेशो न भविष्यतीति निरर्थकस्तदभावार्थो घ्यन्तस्यापूर्वनिपातः ? उच्यते-- वाक्ये भेदेन द्वे ह्यत्र, एकेन वाक्येन नाडीमुष्टी-- इत्येतयोर्ध्माधेटोः खश् भवतीति। अतः `नाडीमुष्ट्योः' इत्येकं वाक्यम्, चकारस्यानुक्तसमुच्चयार्थत्वात् घटीखारीवातशब्देष्वप्युपपदेषु ध्माधेटोः खश् भवतीति द्वितीयम्। तत्र पूर्वस्मिन् वाक्ये समानत्वमस्तीति स्यादेव संख्यातानुदेशः।।

31. उदि कूले रुजिवहोः।(3.2.31)
`उदि' इति। सप्तमीयम्- उदि सति। तत्रोत्कूलशब्दयोर्विषयव्यवस्था द्रष्टव्या। `ते प्राग्धातोः' (1.4.80) इति वचनाद्धातोरनन्तरमुत्शब्दः, तस्मात् पूर्वः कूलशब्द इति। अथ वा-- `{ उदिति-- मुद्रितः पाठः} उदीति परसप्तमी-- उदि परतः कूलशब्दस्योपपदत्व इति। अथोच्छब्दस्याप्युपपदसंज्ञा कस्मान्न भवति, प्रत्येकं सप्तम्युच्चारणात् ? एषा ह्याचार्यस्य शैली यत्र प्रत्येकमुपपदत्वमस्ति तत्र समुदायात् सप्तमीमुच्चारयति, यथा-- `नाडीमुष्ट्योः (3.2.30) इति। इह तु विपर्ययः कृत इति न भवत्युपपदत्वम्। अपि च रुजिवहोः सकर्मकत्वात् कर्मणीतीहोपतिष्ठते। न चोच्छब्दसय् कर्मत्वं सम्भवति असत्त्ववाचित्वात्। कुतस्तस्योपपदत्वम्। `कूलमुद्रुजः' इति। तुदादित्वाच्छः' `कूलमुद्वहः' इति। शप्।।

32. वहाभ्रे लिहः। (3.2.32)
`वहंलिहः' इति। `लिह आस्वादने' (धा.पा.1016) अदादित्वाच्छपो लुक्, `सार्वधातुकमपित्' (1.2.4) इति ङित्वाद्गुणाभावः।।

33. परिमाणे पचः। (3.2.33)
`प्रस्थम्पचा,द्रोणम्पचा' इति। प्रस्थद्रोणपरिमिते व्रीह्यादौ प्रस्थद्रोणशब्दावुपचारेण वर्त्तेते; न प्रस्थादावेव परिमाणविशेषे काष्ठादिमये। क्लेदवाची ह्यत्र पचिः। न च मुख्यस्य प्रस्थादेर्विक्लेदः सम्भवति, अतो न तस्य सम्बन्ध उपपद्यते। स्वरूपग्रहणमप्यत एव न भवति; न हि स्वरूपप्रधानेन परिमाणेन विक्लेदवचनस्य पचेः सम्बन्धः सम्भवति। यद्यपि हि प्रस्थादिशब्दः परिमेये वर्त्तते, तथापि परिमाणव्यपदेशो न तस्य विरुध्यते, प्रथमं परिमाणवृत्तित्वात्।।

34. मितनखे च। (3.2.34)
`अपरिमाणार्थ आरम्भः' इति। परिमाणे पूर्वेणैव सिद्धत्वात्। मितनखशब्दयोरपरिमाणवचनत्वात्। सर्वदैव हि मितशब्दः परिमेयद्रव्यवचनः , नखशब्दो हि प्राण्यङ्गवचनः।।

35. विध्वरूषोस्तुदः। (3.2.35)
`अरुन्तुदः' इति। अरुश्शब्दस्य `अरुर्द्विषदजन्तस्य' (6.3.67) इत्युकारात् परो मुमागमः, संयोगान्तलोपः (8.2.23), `मोऽनुस्वारः' (8.3.23), `अनुस्वारस्य ययि परसवर्णः'(8.4.58) इतिपरसवर्णः।।

36. असूर्यललाटयोर्दृशितपोः। (3.2.36)
`असूर्यम्पश्याः' इति। प्राघ्रादिसूत्रेण (7.3.78) पश्यादेशः। `दृशिना नञः सम्बन्धात्' इति। असामर्थ्य हेतुः। अत्र हि दर्शनं प्रतिषिध्यते,न तु सूर्य एव। तस्माद्दृशिनैव नञः सम्बन्धः, न सूर्येणेत्यसामर्थ्यम्। `सूर्यं न पश्यन्ति' इति दृशिना नञः सम्बन्धं दर्शयति। यदा सूर्यः प्रतिषध्यते तदा न भवितव्यमेव प्रत्ययेन, अनभिधानात्। समासश्चायमसामर्थ्येऽपि भवति, गमकत्वात्। अस्मादेव वचनाद्वा। ननु च यथा राजदाराः सूर्यं न पश्यन्तीति तथान्यदपि परपुरुषादिकम्, तत्रायुक्तं सूर्येणैकेन विशेषणेनेत्यत आह-- `गुप्तिपरञ्चैतत्' इति। यतेतदसूर्यम्पश्या राजदारा इति वचनमेतद्गुप्तिप्रधानम्; गुप्तिप्रतिपादनाय प्रयुक्तत्वात्। `एवं नाम' इत्यादिना गुप्तिपरत्वमस्य दर्शयति।।

37. उग्रम्पश्येरम्मदपाणिन्धमाश्च। (3.2.37)
`उग्रम्पश्य' इति। `कर्मण्यण्' (3.2.1) इति प्राप्ते दृशेः खश् निपात्यते। पूर्ववत् पश्यादेशः। `इरम्मदः'इति। `इरया माद्यति'इति। `मदी हर्षे' (धा.पा.1208)। तृजादिषु प्राप्तेषु खश् निपात्यते। तत्र दिवादित्वाच्छ्यनि प्राप्ते तदभावो निपात्यते। `पाणिन्धमाः' इति। अधिकरणे ल्युटि प्राप्ते खश् निपात्यते। पूर्ववद्धमादेशः।

38. प्रियवशे वदः खच्। (3.2.38)
`चकारः `खचिह्रस्वः' इति विशेषणार्थः'इति। `खे ह्रस्वः' इत्युच्यमाने खश्यपि स्यात्। ननु चैकानुबन्धकग्रहणे न द्व्यनुबन्धकस्येति (व्या.प.52) न भविष्यति ? एवं तर्हि परिभाषाश्रयणाच्चकारकरणमेव लघ्विति च मन्यते। ननु च प्रियंवदो वशंवद इति खश्यपि सिद्ध्यति, किमर्थं प्रत्ययान्तरकरणमित्याह-- `प्रत्ययान्तरकरणमुत्तरार्थम्'इति। `द्विषत्परयोस्तापेः' (3.2.39) इत्यत्र खचि ह्रस्वस्तापेर्यथा स्यात्। णिलोपश्चेत्याद्यर्थं प्रत्ययान्तरं क्रियते। अथोत्तरत्रैव खच् कस्मान्न क्रियते ? अत्रापि खज्भवतीति विज्ञानार्थम्। तेन गमेरपि सुप्युपपदे खच् सिद्धो भवति। यदि `खच्प्रकरणे गमेः सुप्यपसंख्यानम्' (वा.247), तत्रोपसंख्यानशब्दस्य प्रतिपादनार्थं प्रत्ययान्तरं क्रियते। प्रतिपादनन्त्विदमेव वेदितव्यम्। `विहायसो विह च' इति। गमेर्विहायःशब्द उपपदे खच्प्रत्ययः, तत्सन्नियोगेन विहायःशब्दस्य विहादेशः।
`खच्च डिद्वा वक्तव्यः' इति। डित्त्वाट्टिलोपः स्यात्, `विहायसो विह च' (वा.248) इत्यतोऽस्य भेदेन पाठात्। डित्त्वस्यानित्यत्वज्ञापानार्थम्; अन्यथा विहङ्गम इति न सिध्येत्।
`डे च' इत्यादि। डप्रत्यये च गमेर्विहायसो विहादेशः। `विहगः' इति। न पुनरत्र डप्रत्ययः ? अस्मादेव वचनाद्भवति। अथ वा वक्ष्यत्युत्तरतः `डप्रकरणेऽन्येष्वपि दृश्यते' (वा.256) इति।।

39.द्विषत्परयोस्तापे। (3.2.39)
`द्वयोरपि ग्रहणम्' इति। ण्यन्तावस्थायां विशेषाभावात्। `द्वितकारको निर्देशः'इति। `द्विषत्परयोः'इति निर्देशे द्वौ तकारौ,तत्रैको द्विषच्छब्दस्यावयवः, तेन द्विषच्छब्दो विशिष्यते-- द्विषच्छब्द उपपदे तकारान्त इति। `तेन स्त्रियां न भवति' इति। स्त्रीप्रत्ययान्तस्तकारान्तो न भवति। असति तु द्वितीये तकारे `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' (व्या.प.29) इति स्त्रयियामपि स्यात्। `{द्विषतीकाशिका} द्विषती' इति। `उगितश्च' (4.1.6) इति ङीप्। उगित्त्वन्तु द्विषच्छब्दस्य `द्विषोऽमित्रे' (3.2.131) इति शत्रन्तत्वात्।।

40. वाचि यमो व्रते। (3.2.40)
`शास्त्रितः' इति। शास्त्रे कृत इति विगृह्य शास्त्रशब्दात् प्रतिपदिकाद्धात्वर्थे णिच्, तदन्तात् क्ते विहते शास्त्रित इति। शास्त्रविहित इत्यर्थः। अथ वा शास्त्रिण इतः शास्त्रितः, शास्त्रविद इतः = जातः, प्रवृत्तः। अथ वा-- शास्त्रशब्दस्तारकादिषु द्रष्टव्यः। शास्त्रमस्य सञ्जातमिति शास्त्रितः। `वाचंयमः' इति। वाचं यच्छतीति विगृह्य खचि `वाचंयमपुरन्दरौ च' (6.3.69) इति पूर्वपदस्य मुमभावो निपात्यते। ननु च प्रत्ययोऽपि तेनैव निपातनेन भविष्यति, तत्किमनेन ? नैतदस्ति; यच्छतीति पचाद्यचि विहिते ततश्च `वाचो यमः' इति षष्ठीसमासे कृते वाचंयम इति सिध्यति। सम्पद्यत एव, तत्र तु निपातनमनर्थकं स्यात्। एवञ्च सति नित्यमुपपदसमासो न स्यात्। अतः खच्प्रत्ययो विधेयः, निपातनमपि कर्त्तव्यम्।।

41. पूःसर्वयोर्दारिसहोः। (3.2.41)

`दारि' इति। `दृ विदारणे' (धा.पा.1493) इत्यस्य णिचा निर्देशः। `पुरन्दरः' इति। पूर्वपदे मुम्भावो निपात्यते।
`भगे च दारेरिति वक्तव्यम्' इति। भगे चोपपदे दारेः खज्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`उग्रम्पश्येरम्मदपाणिन्धमाश्च' (3.2.37) इत्यतश्चकारोऽनुवर्त्तते, न चानुक्तसमुच्चयार्थः, तेन भगे चोपपदे दारेः खज्भवतीति।।

42. सर्वकूलाभ्रकरीषेषु कषः। (3.2.42)
`सर्वङ्कषः' इति। `कष खष शिष जष जष {शक इति मु.पाठः} शष वष मष रुष रिष हिंसार्थाः' (धा.पा.685-694)।।

43. मेघर्त्तिभयेषु कृञः। (3.2.43)
`उपपदविधौ' इत्यादि। ननु चाभयशब्दो नञ्समासे सिध्यत्येव ? नैवं शक्यम्, सतिशिष्टत्वाद्धि `तत्पुरुषे तुल्यार्थ' (6.2.2) इति पूर्वपदप्रकृतिस्वराद्युदात्तत्वं स्यात्, `{गतिकारकोपपदात् कृत्' इति सूत्रम्} गतिकारकोपपदानाम्' (6.2.139) इत्यादिनान्तोदात्तत्वं चेष्यते। तस्मात् कर्त्तव्यम्। अपवादत्वात् खजयमणं बाधते, हेत्वादिविवक्षायाञ्च परत्वाट्टप्रत्ययमपि।।

44. क्षेमप्रियमद्रेऽण् च। (3.2.44)
अथ `क्षेमप्रियमद्रे वा' इत्येवं कस्मान्नोक्तम् ? किमण्ग्रहणेन ? खचि विकल्प्यते, `कर्मण्यण्' (3.2.1) इत्यनेनैवाण् भविष्यीत्यत आह-- `वेति वक्तव्ये' इत्यादि। `क्षेमप्रियमद्रे वा' इत्युच्यमाने पक्षे वाग्रहणाद्यथाप्राप्तमपीष्यते। ततो हेत्वादिषु विवक्षितेषु `कृञो हेतुताच्छील्य' (3.2.20) इत्यादिना टः स्यात्; अतस्तद्बाधनार्थम्। तेन हेत्वादिविवक्षायां टप्रत्ययं बाधित्वाऽण् भवति।।

45. आशिते भुवः करणभावयोः । (3.2.45)
अत्र सुपीत्युपतिष्ठते, न कर्मणीति; भवतेरकर्मकत्वात्। `आशितशब्दे सुबन्ते' इत्यादि। अथ विपर्ययः कस्मान्न वति, करणभावयोरुपपदयोराशिते प्रत्ययार्थ इति ? असम्भवात्। आशित इत्यश्नातेः कर्त्तोच्यते, तस्य भवतिना सम्बन्धो नोपपद्यते। न हि योऽश्नातेः कर्त्ता स भवतेः प्रत्ययार्थो भवतुमुत्सहते। तस्मादाशितशब्दस्योपपदत्वम्, इतरयोस्तु प्रत्ययार्थत्वम्। एवञ्च घञ्ल्युटोरपवादो भवति। वाऽसरूपविधिना ल्युडपि भवत्येव-- आशितभवन ओदन इति। घञस्तु स्वरूपत्वाद्बाधख एव।।।

46. संज्ञायां भृतृवृधारिसहितपिदमः। (3.2.46)
`संज्ञावशात्' इति। संज्ञाशब्दा हि द्विविधा भवन्ति-- केचिदवयवार्थानुगताः,यथा-- सप्तवर्ण इति; केचित्तु विपरीताः, यथा तैलपायिकेति। तदिह यत्रावयवार्थानुगमोऽस्ति विश्वम्भरः, शत्रुन्तप इत्यादिषु , तत्र कर्मणीति सम्बध्यते-- विश्वं बिभर्त्तीति विश्वम्भरः। यत्र त्ववयवार्थानुगमो नास्ति, यथा-- रथन्तरं सामेति, तत्र व्यत्पत्त्यर्थं सुपीति सम्बध्यते-- रथेन तरतीति, रथे तरतीति वा। `पतिंवरा' इति। `वृञ् वरणे' (धा.पा.1254), `वृङ सम्भक्त्रौ'(धा.पा.1509)। पतिं वृणीते, पतिं वृणुत इति विग्रहः। शत्रुं जयतीति `शत्रुञ्जयः'। `धारि' इति। धृञो ण्यन्तस्य ग्रहणम्। युगं धारयतीति `युगन्धरः'। पूर्वपदह्रस्वत्वम्। शत्रुं सहत इति `शत्रुंसहः'। शत्रुं तपतीति `शत्रुंतपः'। अरिं दाम्यतीति `अरिन्दमः' । यद्यपि दमिरकर्मकः, तथाप्यन्तर्भावितण्यर्थत्वात् सकर्मको भविष्यति। अरिं दमयतीत्यर्थः।।

47. गमश्च। (3.2.47)
`यस्य सौतङ्गमिः पुत्रः' इति। पुत्रस्य सौतङ्गमित्वव्यपदेशेन पितुः सुतङ्गमसंज्ञानुमीयत इति दर्शयति। सत्यां हि पितुः सुतङ्गमसंज्ञायां तत्पुत्रस्य सौतङ्गमिशब्देनाभिधानं भवति, नासत्याम्। अथ योगविभागः किमर्थः, पूर्वसूत्र एव गमेर्ग्रहणं क्रियातमित्याह-- `योगविभाग उत्तरार्थः' इति। गमेरेवोत्तरत्रानुवृत्तिर्यथा स्यात्, भृञादीनां मा भूत्। एकयोगे हि तेऽप्यनुवर्त्तेरन्।।

48. अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः। (3.2.48)
`डकारष्टिलोपार्थः'इति। डिति `टेः' (6.4.155) इति टिलोपो यथा स्यात्। कथं पुनः सत्यपि डकारे टिलोपो लभ्यते, यावता भसंज्ञकस्य हि टिलोप उच्यते, न चेह भसंज्ञाऽस्तीत्याह-- `डित्यभस्यापि' इत्यादि। यदि सत्यपि डिति टिलोपो मा भूत्, तदा तस्य वैयर्थ्यं स्यादिति भावः। ननु चश्रवणार्थ भविष्यति, तत्कुतो वैयर्थ्यं स्यात् ? एवं मन्यते-- `प्रावृट्शरत्कालदिवाञ्जे' (6.3.15) इति कृतटिलोपस्य जनेर्डप्रत्ययान्तस्यायं निर्देशं करोति, ततोऽवसीयते डकारस्याश्रवणार्थतेति। `सर्वत्र' इत्यादि. उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्-- `गमश्च' (3.2.47) इत्यतश्चकारोऽनुवर्त्तते। तस्यानुक्तसमुच्चयार्थत्वात् सर्वत्रेत्यादानुपपदे डो भविष्यतीति। सर्वत्रशब्दश्चात्र सुपीत्यनेन सम्बध्यते, न तु कर्मणीत्यनेन; तस्याधिकरणशक्तिप्रधानत्वात् कर्मत्वानुपपत्तेः। पन्नशब्दः क्रियाविशेषणत्वात् कर्मणीत्यनेन सम्बध्यते। प्रतिपादितं हि `करणे च स्तोकाल्प' (2.3.33)

इत्यादिसूत्रे क्रियाविशेषणस्य कर्मत्वम्।
`उरसो लोपश्च' इति। `अलोऽन्त्यस्य' (1.1.52) इति सकारस्य।
`सुदुरोरधिकरण' इति। ल्युडपवादो डो विधीयते। वाऽसरूपविधिना सोऽपि भवति-- सुगमनम्, दुर्गमनमिति। अधिकरण इति किम् ? कर्मणि मा भूत्।
`ईषद्दुःसुषु' (3.3.126) इत्यादिना खलेव भवति-- सुगमः, दुर्गम इति।
`निरो देशे' इति। निर्शब्द उपपदे गमेर्डो भवति देशेऽधिकरणे। निर्गम्यतेऽस्मिन् देशे निर्गो देशः। देशादन्यत्र ल्युडेव-- निर्गमनमिति।।

49. आशिषि हनः। (3.2.49)
`आशिषि' इति। प्रत्ययार्थमेतत्। तस्मिन् कर्त्तरि प्रत्ययो भवति यस्मिन् विधीयमान आशीर्गम्यते। `तिमिं वध्यात्' इति। आशीर्लिङ। प्रयोगवतो वाक्यस्योपन्यासस्तु समानार्थत्वात् तिमिहशब्दस्य प्रख्यानार्थः।
`दारावाहन' इत्यादि। टकारादेश एवोपसंख्यायते। अण्प्रत्ययस्तु `कर्मण्यण्' (3.2.1) इत्यनेनैव सिद्धः। अथान्तग्रहणं किमर्थम्, यावता `अलोऽन्त्यस्य' (1.1.52) इत्यन्तस्य भविष्यतीति ? नच षष्ठीनिर्दिष्टस्यालोन्त्यविषयो भवन्ति। न चेह हन्तेः षष्ठ्या निर्देशः, किं तर्हि ? पञ्चम्या। नन्वर्थाद्विभक्तिविपरिणामो भविष्यति-- हन इत्यस्याः षष्ठी सम्पद्यते ? एवं तर्हि विस्पष्टार्थमन्तग्रहणम्। `दार्वाहन्ति' इति।दारुशब्दोऽत्र द्वितीयान्तः।
`स्वमोर्न्पुंसकात्' (7.1.23) इति लुप्तत्वान्न द्वितीया श्रूयते।
`चारौ वा' इति।अत्राऽप्यादेशो विकल्पेन विधीयते। अण् तु `कर्मण्यण्' (3.2.1) इति नित्यमेव सिद्धः। `चार्वाघाटः'इति। `हो हन्तेर्ञ्णिन्नेषु' (7.5.54) इति कुत्वम्। `हनस्तोऽचिण्णलोः'(7.3.32) इति तत्वम्। `कर्मणि समि चि' इत्येतद्वाक्यं कर्मण्युपपद इत्यस्यैव विशेषणम्।।

50. अपे क्लेशतमसोः। (3.2.50)
`उदि कूले रुजिवहोः' (3.2.31) इत्यत्रोच्छब्दस्योपपदत्वे यो न्याय उक्तः स इहाप्यपशब्दस्य वेदितव्यः। `अनीशीरर्थ आरम्भः'इति। आशिषि पूर्वेणैव सिद्धत्वात्।।

51.कुमारशीर्षयोर्णिनिः। (3.2.51)
`कुमारघाती' इति। पूर्ववत् तत्वकुत्वे। `निपातनाच्छिरसः शीर्षभावः' इति। कुमारशीर्षयोरित्यत एव निपातनाच्छिरसः शीर्षभावो भवति, न पुनः `शीर्षश्छन्दसि'(6.1.60) इत्यनेन। तत्र हि शीर्षन्निति शिरःशब्दसमानार्थं शब्दान्तरं निपात्यते,अन्यथा शीर्षघातीति च्छन्दस्येव स्यात्,न भाषायाम्। `कुमारशीर्षयोः' इति च निर्देशो नोपपद्यते, स हि नकारान्तः; अकारान्तेन चायं निर्देशो भवति, न नकारान्तेनेति। णिनेर्द्वितीय इकारो नकारस्येत्संज्ञापरित्राणार्थः, णकारो वृद्ध्यर्थः।।
52. लक्षणे जायापत्योष्टक्। (3.2.52)
लक्ष्यते चिह्न्यतेऽनेनेति लक्षणम्। तदस्यास्तीति तस्मिन् लक्षणवति। एतेन मत्वर्थीयाकारप्रत्ययान्तो लक्षणशब्दः सूत्र उपात्त इति दर्शयति, स च कर्त्तुः प्रत्ययस्य विशेषणमिति दर्शयन्नाह-- `लक्षमवति कर्त्तरि' इति। अथ लक्षणशब्दस्योपपदत्वं कस्मान्न भवति ? केचिदाहुः- `हन्तेः सकर्मकत्वात् कर्मणीतीहोपतिष्ठते;तत्र यदीह लक्षणस्योपपदत्वं स्यात्, तत् कर्मणा विशिष्येत। न च लक्षणं हन्तेः कर्मोपपद्यते, स हि हिंसायां वर्त्तते, हिंसा च प्राणिविषया। जायापत्योः प्राणिधर्मत्वात् कर्मत्वमुपपद्यते'इति, एतच्चानुपपन्नम् ; मत्वर्थीयाकारप्रत्ययान्तस्य लक्षणशब्दस्य प्राणिन्यपि वृत्तेः। व्याख्यानादेव लक्षणस्यानुपपदत्वं विज्ञायते। अनभिधानाद्वा। जायापत्योः कर्त्रोरभिधानं दृष्टम्। `जायाघ्नः'इति। कित्त्वात् `गमहन' (6.4.98) इत्यादिनोपधालोपः, पूर्ववत् कुत्वम्। `पतिघ्नी'इति। टित्त्वान्ङीप्।।

53. अमनुष्यकर्तृके च। (3.2.53)
`अमनुष्यकर्त्तृके' इति। अमनुष्यः कर्त्ता यस्य स तथोक्तः एतच्च धात्वर्थविशेषणम्, धात्वर्थो हन्तेरित्यत आह-- `{ एवंप्रकारा पंक्तिर्मूलपाठे नास्ति} अमनुष्यकर्त्तृके धात्वर्थे' इत्यादि। अथामनुष्यकर्त्तृकग्रहणमुपपदविशेषणं कस्मान्न भवति ? कर्मणीत्यनुवर्त्तते, कर्मणश्चामनुष्यकर्त्रा सह सम्बन्धानुपपत्तेः। साधनस्य हि क्रियायाः सम्बन्धः, न कारकान्तरेण। प्रत्ययार्थस्य कर्त्तृरिदं विशेषणं कस्मान्न विज्ञायते ? तस्यामनुष्यकर्त्तृकत्वाभावात्। न हि कर्त्तुः कर्त्ता सम्भवति, अपि तु क्रियायाः। ननु च कर्त्तृग्रहणं न कर्त्तव्यम्, विनापि हि तेनामनुष्यकर्त्तरि प्रत्ययो लभ्यत एव ? नैवं शक्यम्; कर्त्तृग्रहणमन्तरेणामनुष्यग्रहणं केवलमुपादीयमानमुपपदविशेषणमपि विज्ञायते। तस्मात् कर्त्तृग्रहणं कर्त्तव्यम्। तस्मिन् सत्यमनुष्यकर्त्तृग्रहणं तस्य विशेषणं न सम्भवतीत्यतो धात्वर्थ एव तेन विशेषयितुं युक्तः। `इह कस्मान्न भवति' इति। हस्तिकर्त्तृकत्वादमनुष्यकर्त्तृको धात्वर्थः। एतस्माद्भवतिव्यमेव टक्प्रत्ययेनेति मन्यते।।

54. शक्तौ हस्तिकपाटयोः।(3.2.54)

`शक्तौ गम्यमानायाम्' इति। अनेनोपपदत्वं शक्तेर्निराकरोति। `हस्तिकपाटयोः कर्मणीरुपपदयोः'इत्यनेनापि हस्तिकपाटयोः प्रत्ययार्थविशेषणम्। अथैवं कस्मान्न विज्ञायते-- शक्तावुपपदे हस्तिकपाटयोः कर्त्रोरिति ? आरम्भसामर्थ्यादेव हि विज्ञायमाने हस्तिकपाटयोर्मनुष्यकर्त्तृके धात्वर्थे हन्तिर्वर्त्तते। तथा च पूर्वेणैव सिद्धेऽस्यारम्भवैयर्थ्यं स्यात्। उपपदत्वे तु तयोः शक्तौ गम्यमानायां मनुष्ये कर्त्तरि विज्ञायत इति न भवत्येष दोषः।
`विशेष हस्तिनं हन्ति'इति। विषेणेत्यशक्तिकत्वं दर्शयति। यो हि स्वयं हन्तुं न समर्थः स विषादिनोपायान्तरेण हन्ति।।

55. पाणिघताडघौ शिल्पिनि। (3.2.55)
`पाणिघताडघौ' इति। टप्रत्ययो घत्वं टिलोपश्च निपात्यते।।

56. आढ्यसुभगस्थूलपलितनग्नान्धिप्रयेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्। (3.2.56)
`अच्वौ'इति। बहुव्रीहिः-- न विद्यते च्विर्यस्मिंस्तत्राच्वौ। तत्पुरुषो वा -- च्वेरन्योऽच्विः। अच्व्यन्त इत्यर्थः। अच्वादित्याढ्यादीनां विशेषणम्। एकवचनं तु प्रत्येकं तैरभिसम्बध्यते। `आढ्यादिषु' इत्यादिना कर्त्तृविषषणत्वमाढ्यादीनपाकरोति। `करणे कारके'इत्यनेनापि करणस्योपपदत्वं निरस्यति। अथैवं कस्मान्न विज्ञायते-- करण उपपदे आढ्यादिषु कर्त्तृष्विति ? तत्र केचिदाहुः-- आढ्यादयोऽत्र शब्दप्रधानाः, न च तथाभूतानां कर्त्तृत्वमुपपद्यते। शब्दप्रधानत्वं पुनस्तेषां च्व्यन्तेष्वच्वाविति प्रतिषेधाद्विज्ञायते। शब्द एव हि च्व्यन्तो भवति, नार्थः। च्व्यन्तता शब्दस्यैव विद्यते, नार्थस्य। तत्र यद्येतेऽर्थप्रधानाः स्युः; च्व्यर्थेष्विति विशेषणमनुपपन्नं स्यात्, अच्वाविति च प्रतिषेधोऽनर्थकः स्यात्। पर्युदासोऽप्यनर्थकः स्यात् ; न; त्सयाप्याढ्य इत्येवंशब्दः सुखति, सुभगशब्दः सुखयीत्यादिप्रयोगेषु कर्त्तत्वदर्शनात्। व्याख्यानादेवार्थनिश्चयोऽद्वेष्यः। करणस्य प्रत्ययार्थत्वेन निर्देशात् `कर्त्तरि कृत्' (3.4.67) इति न व्याप्रियते। ननु च नेमे च्व्यर्थाः, ते नियोगत एव च्व्यन्ताः, इह त्वच्व्यन्ता आढ्यादयो न सम्भवन्त्येव, तत्किं पर्युदस्यन्त इत्याह-- `च्वेर्विकल्पेन विधानात्' इत्यादि। विकल्पेन विधानं तु `समर्थानां प्रथमाद्वा' (4.1.82) इत्यतो वाग्रहणानुवृत्तेः।
`आढ्यं तैलेन कुर्वन्ति' इत्यादि। न ह्यसौ प्रागनाढ्यस्तैलेनाढ्यः क्रियते, किं तर्हि ? आढ्यस्तैलेनाभ्यज्यते। अनेकार्थत्वाद्धातूनां करोतिरत्राभ्यञ्जने वर्त्तते। तेनाभूतप्रादुर्भावे नास्तीति भवति प्रत्युदाहरणम्। अथ वा-- भवतु नामाभूतप्रादुर्भावः, तथापि युक्तमेवेदं प्रत्युदाहरणमिति दर्शयितुमाह-- `प्रकृतेरविवक्षायाम्' इत्यादि। न ह्यभूतप्रादुर्भावः इत्येवं सर्वोऽभूतप्रादुर्भावश्च्व्यर्थो भवति, किन्तु विशिष्ट एव; यस्मात् तत्र प्रकृतिग्रहणं दर्शयिष्यते। प्रकृतिः कार्यस्य पूर्वावस्था। तेन यत्राश्रितं कार्यं पूर्वारम्भश्च कार्यसय् भाव्यमानतया विवक्ष्यते तत्र स अभूतप्रादुर्भावः, स एव च्व्यर्थः। एतदुक्तं भवति-- यदा कार्यस्य पूर्वावस्था विवक्ष्यते तदा च्व्यर्थो भवति, नाभूतप्रादुर्भावविवक्षायामिति। इह तु पूर्वावस्थामपरामृश्यानाश्रितपूर्वारम्भे कार्येऽभूततद्भावमात्रं विवक्षितम्। तेन सत्यप्यभूततद्भावे च्व्यर्थो न भवति। अतो भवत्येतत् प्रत्युदाहरणम्-- `आढ्यीकुर्वन्ति' इति। `अभूततद्भावे कृभ्वस्थियोगे' (5.4.50) इत्यादिना च्विः, `अस्य च्वौ'(7.4.32) इतीत्त्वम्। `ल्युटा भवितव्यम्' इति। `करणाधिकरणयोश्च' (3.3.117) इत्यनेन ल्युड्विधानात्। यदि ल्युटा भवितव्यं ततः किमित्याह-- `न च' इत्यादि। उभयत्रापि तदेव रूपम्, स एव स्वरः। रूपं तावदभिन्नम्, उभयत्रापि समासस्य नित्यार्थत्वात्; तथा हि ख्युन्युपपदसमासेन भवितव्यम्, ल्युट्यपि गतिसमासेन ? `अनव्ययस्य' (6.3.66) इति च प्रतिषेधान्मुमा नि भवितव्यमिति रूपभेदो नास्ति। स्वरोऽपि न भवति भेदकः; ख्युनि सति यत्रैव नित्स्वरो भविष्यति, ल्युट्यपि लित्स्वरस्तत्रैव। `प्रतिषेधसामर्थ्यात्' इति। आढ्यीकरणमित्यस्य रूपस्य निरासाय `अच्वौ' (3.2.56) इति प्रतिषेधः क्रियते। एवं तस्य निरासः कृतो भवति यदि ख्युना मुक्ते ल्युडपि भवति, अन्यथा हि स्यादेव। तदेव रूपमिति प्रतिषेधः स्यादिति वैयर्थ्यमिति भावः। `अर्थतः' इति। न शब्दतः। अर्थस्तु प्रतिषेधसामर्थ्यमेव। `उत्तरार्थश्च' इति। उत्तरसूत्रस्योपयोगं दर्शयति। तत्र खिष्णुच्खुकञ्भ्यां मुक्ते तृजादिभिर्भवितव्यमित्यस्ति विशेषः।ख्युनः खकारो मुमर्थः, नकारः स्वरार्थः।।

57. कर्त्तरि भुवः खिष्णुच्खुकञौ। (3.2.57)
`कर्त्तरि कारके' इति। कर्त्तृग्रहणं करणनिवृत्त्यर्थम्। ननु चास्वसितत्वादेवानुवृत्तिर्न स्यात् ? सत्यमेतत्; द्वेष्यमपि कश्चिदविजानीयात्-- यथैवाढ्यादयोऽनुवर्त्तन्ते तथा तत्सम्बन्धकरणमपीति। उत्तरार्थञ्च कर्त्तृग्रहणम्।
`उदात्तत्वात्' इत्यादि। उदात्तादितरोऽनुदात्तः, तेन भवतेर्विहितस्यार्द्धधातुकस्य `एकाच उपदेशेऽनुदात्तात्' (7.2.10) इतीट्प्रतिषेधो न भवति। बलादिलक्षणेटा (7.2.35) भवितव्यम्, ततश्च तेनैवेकारादित्वं सिद्धम्,ततो न कर्त्तव्यं खिष्णुच इकारादित्वमिति भावः। इकारादित्वकरणस्य प्रयोजनमाह-- `नञस्तु' इत्यादि। यदि। खिष्णु च इकारादित्वं न क्रियते ततो यद्यपीटि कृते सतीकारदित्वं तस्य भवति, तथापि तस्य लाक्षणिकत्वात् `कृत्योकेष्णुच्चार्वादयश्च' (6.2.60) इत्यत्रेष्णुज्ग्रहणेन न ग्रहणं स्यात्। ततश्चानाढ्यम्भविष्णुरिति नञ उत्तरस्योत्तरपदस्यान्तोदात्तत्वं न स्यात्,इष्यते च। अतो नञ उत्तरस्योत्तरपदान्तोदात्तत्वंम्, तेनेकारादित्वमिष्णुचः क्रियते। ननु च सत्यपीकारादित्वे अलंकृञादिसूत्रे (3.2.136) विहितस्यैवेष्णुचो ग्रहणेन भवितव्यम्, नेतरस्य , तस्यैकानुबन्धकत्वात्, अस्य द्वयनुबन्धकत्वात् ? इकारोच्चारणसामर्थ्यादस्यापि ग्रहणं भविष्यतीत्यदोषः। खकारो मुमर्थः; चकारः स्वरार्थः, ञकारो वृद्ध्यर्थः।।

58. स्पृशोऽनुदके क्विन्। (3.2.58)
`सुपि स्थः' (3.2.4) इत्यत्रोक्तम्-- `कर्मणि' `सुपि'इति द्वयमनुवर्त्तते, तत्र सकर्मकेषु कर्मणीत्युपतिष्ठते, अन्यत्र सुपीति। स्पृशिरयं सकर्मकः, अतः स्पृशेर्धातोरनुदके सुबन्त उपपद इत्युक्ते पूर्वापरव्याहति मन्यमान आह-- `ननु च' इत्यादि।`नैषः' इत्यादिना परिहारः। कथं पुनः कर्त्तृग्रहणे कर्त्तुश्च प्रचयार्थे विज्ञायमाने सुबन्त उपपदे प्रत्ययो लभ्यत इत्याह-- `सुबन्तमात्रे' इत्यादि। सुबन्तमात्र उपपदे सत्येकः प्रचयार्थः कर्त्ता कर्मण्युपपदे सति भवति, अपरः करणादावुपपदे; तत्र भेदे सति तत्सम्बन्धभेदेन भिद्यमानस्य कर्त्तुः प्रचयो लभ्यते। `घृतस्पृक्' इति। `क्विन्प्रत्ययस्य कुः' इत्यादि। `क्विप्रत्ययस्य कुः' इत्युच्यमाने क्विपोऽपि ग्रहणं स्यात्,अतो नकारोऽनुबध्यते। प्रकृतेराद्युदात्तार्थो नकारो न भवित; स्पृशेरेकाच्त्वात्,तत्स्वरेणैव सिद्धत्वात्। ककारो गुणप्रतिषेधार्थः, वकारः `वेरपृक्तस्य' (6.1.67) इति विशेषणार्थः।।

59. ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च। (3.2.59)
`ऋतौ यजति' इति। वसन्तादिक ऋतौ यजति, यस्मिन् ऋतुर्देवता स याग ऋतुस्तं यजतीति। `ऋतुप्रयुक्तो वा यजति' इति। यस्मिन् याग ऋतुः प्रयोजकस्तमृतुप्रयुक्तो यजतीति। अस्मिन् पक्षे प्रयुक्तमात्रस्य लोपो निपात्यते। `ऋत्विक्'इति। यजादित्वात् (6.1.15) सम्प्रसारणम्। `यथाकथञ्चिदनुगन्तव्या' इति। येन केनचित् प्रकारेण व्युत्पादयितव्यम्, न त्ववयवार्थस्तन्त्रमिति दर्शयति। `अन्तोदात्तत्वं निपात्यते' इति। नियतस्वरबाधनार्थम्। `दधृक्' इति। अभ्यासस्य `उरत्' (7.4.66) इत्यत्त्वम्, हलादिःशेषः, (7.4.60) जश्त्वम्। `षत्वञ्च निपात्यते' इति। `सात्पदाद्योः' (8.3.109) इति प्रतिषेधान्न प्राप्नोतीति कृत्वा। `ष्णिह प्रीतौ' (धा.पा.1200), उत्स्निह्यतीत्युष्णिक्। `निपातनैः' सह निर्देशात्' इत्यादिना निपातनैः सहैषां यो निर्देशः स एषामपि किञ्चिदलाक्षणिकं कार्यं यथा स्यादित्येवमर्थः। तेनैषु किञ्चिदलाक्षणिकं कार्यं भवति। इदं त्वलाक्षणिकम्-- यः सकर्मकस्यापि सुबन्तमात्र उपपदे भवति। `प्राङ' इति। `उगिदचां सर्वनामस्थानेऽधातोः' (7.1.70) इति नुम्, हल्ङ्यादि (6.1.68) संयोगादि (8.2.23) लोपौ,नकारस्य पूर्ववत् कुत्वम्। `केवलात्' इति। सत्यपि कर्मणि सुपीत्यधिकारे निरुपपदादेव भवति; निपातनैः सहेति निर्देशात्। क्विन्विधानसामर्थ्याद्वा। उपपदे हि सदादिसूत्रेण (3.2.61) क्विपा भवितव्यम्। `सोपपदात्' इत्यादि। न च सोपपदाद्युजेः क्विपि क्विना वा विशेषोऽस्ति; `चोः कुः' (8.2.30) इति कुत्वस्य सिद्धत्वात्। अनुपपदत्वे `युजेरसमासे' (7.1.71) इति नुमि कृते नकारस्य कुत्वार्थं क्विनो विधानं सार्थकं भवति।।

60. त्यदादिषु दृशोऽनालोचने कञ्च। (3.2.60)
अनालोचनमिह चक्षुर्ज्ञानमात्रमभिप्रेतम्। यदि तत्र दृशिर्न वर्त्तत एवं प्रत्ययो भवति, नान्यथा। `त्यादृक्, त्यादृशः' इति। `दृक्दृशवतुषु' (6.3.89) इत्यनुवर्त्तमाने `आ सर्वनाम्नः' (6.3.91) इत्यात्वम्। `कञो ञकारः `टिड्ढाणञ' इति विशेषणार्थः इति। यदि कञो ञकारो न कर्त्तव्यसत्दोदात्तार्थो नकारः कर्त्तव्यः। एवञ्च कञ्कन्नित्येवं (4.1.15) कर्त्तव्यम्। ततश्चैवमुच्यमाने `यावादिभ्यः कन्' (5.4.29) यादिकेत्यत्रापि ङीप् प्रसज्यते, अतस्तद्विशेषणार्थो ञकारः कर्त्तव्यः इति। ननु च दृशेर्दर्शनक्रियत्वात् तादृक् तादृश इत्यादिषु दर्शनक्रियाऽस्त्येव, तथा ह्येषां व्युत्पत्तौ तं पश्यत्येवंप्रकारं वाक्यमुपदिश्याचार्याः प्रत्ययं कुर्वन्ति। वाक्यसमानार्था वृत्तिर्भवति, सा च दर्शनक्रिया ज्ञानार्थिका। तत्कथमत्र दृशिरनालोचने वर्त्तत इत्याह-- तादृगादयो हि रूढिशब्दप्रकाराः'इत्यादि। रूढिशब्देषु नावयवार्थेन भवितव्यम्,किं तर्हि ? समुदायार्थेन। अत एवात्रावयवार्थो नोपदीयते। व्युत्पत्त्यर्थस्तु विद्यमानोऽप्यवयवार्थ नोपादत्ते, यथा-- व्याजिघ्रतीति व्याघ्र इत्यादौ। तस्मादिह यद्यपि व्युत्पत्त्यर्थं वाक्यस्य दर्शनक्रियोपादीयते, तथाप्यसौ वृत्तौ नास्त्येव। तथा हि-- तादृक् तादृश इत्यादिभ्यः शब्देभ्यः सदृशवस्तुविषये प्रत्यय उपजायते, न तु दर्शनक्रियाविषय इति युक्तैव दृशेरनालोचने वृत्तिः।
`समानान्ययोश्चेति वक्तव्यम्' इति। समानान्ययोश्च शब्दयोरुपपदयोर्दृशेः क्विन्कञौ प्रत्ययौ भवव इत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--- पू्रवसूत्रादिह चकारोऽनुवर्त्तते, स चानुवतसमुच्चयार्थः। तेन समानान्ययोरुपपदयोर्दृशेः प्रत्ययौ भविष्यतः। `सदृशः' इति। `समानस्य' (6.3.84) इत्यनुवर्त्तमाने ` दृग्दृशवतुषु' (6.3.89) इति सभावः।।

61. सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्। (3.2.61)
`कर्मग्रहणं तु `स्पृशोऽनुदके क्विन्' इत्यतः प्रभृति न व्याप्रतियते' इति। ननु सकर्मका अपि धातवः सन्ति, तत्कथं न व्याप्रियत इति ? एवं मन्यते-- स्पृशोऽनुदके क्विन्' (3.2.58) इत्यादिषु यत् `कर्त्तरि' (3.2.57) इत्यनुवर्त्तते तत् कर्त्तृप्रचयार्थं विज्ञायते, तेन सुपीति व्याप्रियते, न कर्मणीति। एवं हि कर्त्तृप्रचयो लभ्यते, नान्यथा। अथ उपसर्गग्रहणं किमर्थम ? यावतोपसर्गाः सुबन्ता एव, तत्र सुब्ग्रहणेनैवोपसर्गग्रहणं सिद्धमित्याह-- `उपसर्गग्रहमं ज्ञापनार्थम्'इति। `अन्यत्र सुब्ग्रहण उपसर्गग्रहणं न भवति' इति। क्वान्यत्र सुब्रग्रहण उपसर्गग्रहणं न भवतीत्याह-- `वदः सुपि क्यप् च' इति। ननु च `वदः सुपि क्यप् च' (3.1.106) इत्यत्र `गदमदचरयमश्चानुपसर्गे' (3.1.100) इत्यतोऽनुपसर्गग्रहणमनुवर्त्तते। एवञ्चोपसर्गग्रहणं नानुवर्त्तयितव्यमिति वा ज्ञापनार्थमुपसर्गग्रहणम्। विकल्पप्रदर्शनार्थं कर्त्तव्यमित्यन्ये।
`अपूरे त्वाहुः-- ज्ञापकप्रयोजनदिगियमिति वृत्तिकारो दर्शयति। इदं तु स्पष्टं ज्ञापकस्य प्रयोजनम्-- `स्पृशोऽनुदके क्विन्' (3.2.58) इत्यत्र `सुपि' (3.2.4) इत्यधिकारादसति ज्ञापक उपसर्गग्रहणे सुबन्तेऽप्युपसर्गे स्यात्-- उपस्पृशति, संस्पृशतीति; अस्मात् ज्ञापकान्न भवति। `साहचर्यात्'इत्यादि। यदि

`सू'इत्ययं धातुरादादिकत्वं व्यभिचरति `द्विष अप्रीतौ'(धा.पा.1013) इत्येष तु न व्यभिचरति, अतोऽनेन साहचर्यात् `सू' इत्यादादिकस्य `षूङ प्राणिगर्भविमोचने' (धा.पा.3031) इत्यस्य ग्रहणम्, न `षू प्रेरणे' (धा.पा.1408) इत्यस्य तौदादिकस्य । ननु च सदिना तौदादिकसाहचर्यादस्यापि ग्रहणं भवति ? नैतदस्ति; यथैव हि `सू' इत्येष तौदादिकतवं व्यभिचरति,तथा सदिरपि, तस्य भ्वादिषु पाठात्, तत्कथं तेन साहचर्यात् तौदादिकस्येह ग्रहणं स्यात्। `न सुबतेः' इति। अनादादिकसूरूपस्य धातोरुपलक्षममेतत्। `{षूङ्-धा.पा.}षञ् प्राणिप्रसवे' (धा.पा.1132) इत्येतस्यापि दैवादिकस्य ग्रहमं न युक्तम् ; न्यायस्य च तुल्यत्वात्। `द्वयोरपि ग्रहणम्' इति। विशेषानुपादानात्। `न लाभार्थस्य' इति। `विद्लृ लाभे' (धा.पा.1432) इत्येतस्य। `अकारस्य विवक्षितत्वात्' इति। इह लाभार्थस्यानुपादाने हेतुः `विदः' इति सूत्रेऽ
कारान्तोच्चारणं विवक्षितमिति,तेन विदेरकारान्तस्य गणे पाठात् स एव गृह्यते, न लृकारान्तः।
`शुचिषत्' इति। `{षद्लृ-धा.पा.} सद्लृ विशरणार्थः (धा.पा.854)। `मित्रध्रुक्'इति। `द्रुह जिघांसायाम्' (धा.पा.1197) `वा द्रुहमुह' (8.2.33) इति ककारः, `एकाचो बशो भष्' (8.2.37) इत्यादिना भष्भावः। `गोधुक्' इति। ` दुह प्रपूरणे' (धा.पा.1014) `दादेर्धातोर्घः'(8.2.32) इति घत्वम्। `अश्वयुक्' इति। `चोः कुः' (8.2.30) इति कुत्वं गकारः, तस्य पूर्ववत् ककारः। `शत्रुजित्' इति। `ह्रस्वस्य पिति कृति तुक्' (6.1.71)। `कथमत्र णत्वम्' इति। `पूर्वपदात् संज्ञायामगः' (8.4.3) इति संज्ञायां विधीयमानेन णत्वेनासंज्ञायामिह न भवितव्यमिति भावः। `सम्राटः'इति। `राजृ दीप्तौ' (धा.पा.822), `व्रश्चभ्रस्ज' (8.2.36) इति चर्त्वं टकारः, `मो राजिसमः क्वौ' (8.3.25) इति मकारः। क्विपः ककारो गुणवृद्धिनिषेधार्थः। पकारस्तुगर्थः। `वेरपृक्तस्य' (6.1.67) इति वकारलोपः। इकारः `वेरपृक्तस्य' इति सामान्यग्रहणार्थः।।

62. भजो ण्विः। (3.2.62)
`अर्धभाक्' इति। `वेरपृक्तस्य' (6.1.67) इति वकारलोपः। प्रत्ययलोपलक्षणेन `अत उपधायाः' (7.2.116) इति वृद्धिः, `चोः कुः' (8.2.30) इति कुत्वम्। णकारो वृद्ध्यर्थः। इकारः `वेरपृक्तस्य' (6.1.67) इति सामान्यग्रहणार्थः।।

63. छन्दसि सहः। (3.2.63)
`जलाषाट्' इति। `हो ढः' (8.2.31) इति ढत्वम्, तस्य जश्त्वम्-- डकारः,तस्य `वाऽवसाने' (8.4.56) इति टकारः।।

64. वहश्च। (3.2.64)
`पृष्ठवाट्' इति। पूर्ववद्वृद्धिः, ढत्वजश्त्वचर्त्वानि। योगविभागं उत्तरार्थः-- उत्तरत्र बहेनुवृत्तिर्यथा स्यात्, सहेर्मा भूत्। एकयोगे हि सति द्वयोरप्यनुवृत्तिः स्यात्।।

65. कव्यपरीषपरीष्येषु ञ्युट्। (3.2.65)
पूर्वेण च्वौ प्राप्ते ञ्यृड्विधीयते। टकारो ङीबर्थः, ञकारः स्वरार्थो वृद्ध्यर्थश्च। युमात्रं प्रत्ययः, तस्य `युवोरनाकौ'(7.1.1) इत्यनादेशः।।

66.हव्येऽनन्तःपादम्। (3.2.66)
`अनन्तःपादम्' इति। अन्तः शब्दो मध्यशब्देन समानार्थः। अन्तःपादमिति पादस्य मध्य इत्यर्थ-। `अव्ययं विभक्ति' (2.1.6) इत्यादिना विभक्त्यर्थेऽव्ययीभावः-- न अन्तःपादमनन्तःपादमिति। एतच्च वहेः प्रकृतत्वात् तस्यैव विशेषमं विज्ञायत इत्यत आह-- `अनन्तःपादञ्चेद्वहिर्वर्त्तते'इति। छन्दसीत्यनुवृत्तेः पादशब्द ऋक्पादं बोधयति। ऋक्पादमध्ये वहिर्न वर्त्तत इत्यर्थः। प्रत्युदाहरणे पादमध्ये वहिर्वर्त्तत इति तेन `वहश्च' (3.2.64) इति ण्विरेव भवति।।

67. जनसनखनक्रमगमो विट्। (3.2.67)
`द्वयोरपि ग्रहणम्' इति। विशेषानुपादानात्। `तथा' इत्यादि। यथानन्तरयोर्धात्वोरुभयोर्ग्रहणमिति, तथानयोरपि सम्भवत्कार्थयोरित्यर्थः। `टकारः सामान्यग्रहणविघातार्थः'इति। असति टकारे `वेरपृक्तस्य' (6.1.67) इत्यत्रैकानुबन्धपरिभाषया (व्या.प.52) अस्यैवं ग्रहणं स्यात्, न विजादीनाम्। टकारे त्वस्यापि द्वयनुबन्धकत्वात् सर्वेषां ग्रहणमुपपद्यते। `विशेषणार्थश्च' इति। `विड्वनोरनुनासिकस्यात्' (6.4.41) इत्यत्र विशेषणार्थष्टकारः, `विवनोः' इत्युच्यमाने हि क्विबादीनामपि ग्रहणं स्यात्, तथा चाकरोदित्येवमादौ लोपः स्यात्। `अब्जाः' इति। अप्सु जायत इति अब्जाः। एवं `गोजाः'। गां सनोतीति `गोषाः'। `सनोतेरनः' (8.3.106) इति षत्वम्। नरं सनोतीति `नृषाः'। विलं खनतीति `विलखाः'। दधि क्रामतीति `दधिक्राः' । अग्रे गच्छतीति `अग्रेगाः'। `तत्पुरुषे कृति बहुलम्' (6.3.14) इति सप्तम्या अलुक्। सर्वत्र `वेरपृक्तस्य' (6.1.67) इति लोपः, `विड्वनोः' (6.4.41) इत्यात्त्वम्।।

68. अदोऽनन्ने। (3.2.68)

69. क्रव्ये च। (34.2.69)
`पूर्वेणैव सिद्धे' इति। क्रव्यशब्दस्यानर्थकत्वात्।
`कथं तर्हि क्रव्यादः' इति। यदि वचनं वाऽसरूपविधिबाधनार्थमिति भावः। `कृत्विकृत' इत्यादिना कृत्तविकृत्तशब्द उपपदेऽत्राण्, न तु क्रव्यशब्द इति दर्शयति। यदि तर्हि कृत्तविकृत्तशब्द उपपदेऽण्, कथं क्रव्यादशब्दः सिध्यति; कृत्तविकृत्ताद इति भवितव्यमित्याह-- `तस्य च' इत्यादि। ननु च कृत्तविकृत्तशब्दे उपपदेऽणि कृते तत्र चोपपदस्य क्रव्यभाव इति रूपं भवति, क्रव्यशब्द उपपदेऽणि कृते तदेव, क्वात्र विशेषः; यतः क्रव्यशब्द उपपदे।ञण् प्रतिषिध्यते ? इत्यत आह-- `कृत्तविकृत्त' इत्यादि। एतेनार्थभेदं दर्शयति-- यो हि कृत्तविकृत्तशब्देन पक्वमांसभक्षः स एव क्रव्याद उच्यते,यस्त्वपक्वमांसभक्षः स क्रव्यादुच्यते।।

70. दुहः कब्घश्च। (3.2.70)
`कामदुधा' । `घर्मदुघा'। कामं दोग्धीति कामदुघा। गर्मं दोग्धीति घर्मदुधा।।

71. मन्त्रे श्वेतवक्थशस्पुरोडाशो ण्विन्। (3.2.71)
`एतेभ्यः' इति। श्वेतव इत्येवमादिभ्यः प्रकृत्युपपदसमुदायेभ्यः। `धातुपपदसमुदाया निपात्यन्ते' इति। श्वेतवा इत्येवादयः। किं पुनः कारणं धातूपपदसमुदाया निपात्यन्ते, न पुनः पृथगेवोपपदानि धातवश्च निर्दिश्यन्ते ? इत्याह-- `अलाक्षणिककार्यसिद्ध्यर्थम्' इति। श्वेतवा इत्येवमादिषु `अवयाः श्वेतवाः पुरोडाश्च' इति रुत्वं निपात्यते। `उक्थशाः'इति। `ससजुषो रुः' (8.2.66) इतिरुत्वमस्त्येव। `शंसतेः'इति। `{शंसु-धा.पा.} शन्स स्तुतौ' (धा.पा.728) इत्यस्य। ण्विनौ नित्करणमाद्युदात्तार्थम्। णित्करणं वृद्ध्यर्थम्। इकारः `वेरपृक्तस्य' (6.1.67) इति विशेषणार्थः।
`श्वेतवाहादीनाम्' इत्यादि। यदि तर्हीदमुच्यते, नार्थः `अवयाः श्वेतवाः पुरोडाश्च'इत्यनेन वचनेन, रुत्वार्थेन तस्य दीर्घत्वात्त ? ननु च `अत्वसन्तस्य चाधातोः'(6.4.14) इति दीर्घत्वं सिद्धमेव ? यत्र तर्हि तेन न सिध्यति तदर्थं यथा स्यात्। क्व पुनस्तेन न सिध्यति ? सम्बुद्धौ । यदि तर्हि तदुच्यते तदा डस् न वक्तव्यः,तेनैव निपातनेन श्वेतवहादीनामसन्तता निपातयिष्यते ? नैतदस्ति; सम्बुद्धौ दीर्घत्वं न स्यादित्युक्तम्। अथासन्तता निपातयिष्यत इति वक्तव्यम्, तथा च सति श्वेतवोभ्यामित्यत्रोत्वं स्यात्। तस्मात् डस् वक्तव्यः, निपातनमपि कर्त्तव्यम्।।

72. अवे यजः। (3.2.72)
`योगविभाग उत्तरार्थः'इति। उत्तरसूत्रे यजरेवानुवृत्तिर्यथा स्यात्।।

73. विजुपे छन्दसि। (3.2.73)
`उपयड्भीः'इति। `व्रश्चादिना' (8.2.36) षत्वम्, पूर्ववज्जश्त्वम्-- डकारः। `उभयट्त्वम्' इति। त्वप्रत्यये परतः `खरि च' (8.4.55) इति चर्त्वं टकारः। ननु च `मन्त्रे' (3.2.71) इत्यनुवर्त्तिष्यते, मन्त्रश्च च्छन्द एव, तत् किमर्थं छन्दसिग्रहणं क्रियत इत्याह-- `छन्दोग्रहणं ब्राह्मणार्थम्' इति। असति च्छन्दोग्रहणे मन्त्रग्रहणानुवृत्तेरपि ब्राह्मणे न स्यात्, न हि मन्त्रग्रहणेन ब्राह्मणं गृह्यते;तस्य ग्रन्थान्तरत्वात्। मन्त्रव्याख्याने ग्रन्थविशेषे ब्राह्मणशब्दो वर्त्तते, न तु मन्त्रे ; तसमाद्ब्राह्मणेऽपि यथा स्यादित्येवमर्थं छन्दसीत्युक्तम्। `विचश्चित्करणम्' इत्यादि। असति चित्करण एष एकानुबन्धः स्यात्। ततश्च `वेरपृक्तस्य' (6.1.67) इत्यत्रैकानुबन्धकपरिभाषया (व्या.प.52) अस्यैव ग्रहणं स्यात्, न क्विबादीनाम्। चित्करणे तु सत्येकानुबन्धो न कश्चिदस्तीति सर्वे गृह्यन्ते।।

74. आतो मनिन्क्वनिब्वनिपश्च। (3.2.74)
मनिनो नकार आद्युदात्तार्थः। क्वनिब्वनिपोः पकारानुदात्तार्थौ, इकार उच्चारणार्थः। क्वनिपः पकारः पित्कार्यार्थः, चकारो विचोऽनुकर्षणार्थः। शोभनं ददातीति `सुदामा'। `सर्वनामस्थाने च'(6.4.8) इत्यादिना दीर्घः। अश्व इव तिष्ठतीत्यश्वत्थामा। पृषोदरादित्वात् सकारस्य तकारः। शोभनं दधातीति `सुधीवा'। शोभनं पिबतीति `सुपीवा'। धुमादिनेत्त्वम् (6.4.66)। भूरि ददातीति `भूरिदावा' । घृतं पिबतीति `घृतपावा'। कीलालं पिबतीति `कीलालपाः'।।

75. अन्येभ्योऽपि दृश्यन्ते। (3.2.75)
`सुशर्मा' इति। `शृ हिंसायाम्' (धा.पा.1488) शोभनं शृणातीति विग्रहः। `प्रातरित्वा' इति। इणः प्रातः शब्द उपपदे क्वनिप्, `ह्रस्वस्य पिति कृति' (6.1.71) इति तुक्। `विजावा' इति। `जनी प्रादुर्भावे' (धा.पा.1149), विजायत इति वनिप्, `विड्वोरनुनासिकस्य' (6.4.41) इत्यात्त्वम्। `अग्रेगावा'

इति। `ग्म्लृ सृप्लृ गतौ' (धा.पा.982,983) पूर्ववदात्त्वम्। `रेडसि' इति। `रिष हिंसायाम्' (धा.पा.694), पूर्ववज्जश्त्वं डकारः। `दृशिग्रहणं प्रयोगानुसरणार्थम्' इति।तेन प्रयोगे गम्यमाने यत्र दृश्यन्ते मनिन्नादयस्तत्रैवैते साधवः, अतो नापूर्वतमः क्रियते। एतेन `ते न सर्वतो विधेयाः' इत्युक्तं भवति। यद्यन्येभ्योऽपि दृश्यन्ते, पूर्वसूत्रमनर्थकम्, मनिन्नादयः सर्वधातुभ्यो दृश्यन्त इत्येवं वाच्यम् ? नैतदस्ति; आकारान्तेभ्यो धातुभ्यो नियोगतस्ते भवन्ति, अनाकारान्तेभ्यः क्वचिदेय। अपि तु पूर्वयोगश्छन्दसि, वयं तु भाषायामपि।।

76. क्विप् च। (3.2.76)
`निरुपपदेत्रभ्यश्च' इति। एतदपिशब्दस्य सर्वोपाधिव्यभिचारार्थस्यानुवृत्तेर्लभ्यते। `उखास्रत्। प्रर्णध्वत्' इति। `स्रन्सु ध्वन्सु अवस्रन्सने' (धा.पा754,755) , `अनिदिताम्' (6.4.24) इत्यादिनानुनासिकलोपः। `वसुस्रन्सुध्वंस्वनडुहां दः' (8.2.72) इति दत्वम्, `वाऽडवसाने' (8.4.56) इति चर्त्वम्। `वाहाभ्रट्' इति। `भ्रन्शु अधः पतने' (धा.पा.1225), व्रश्चादिसूत्रेण (8.2.36) षत्वम्, पूर्ववज्जश्त्वम्, चर्त्वम्, `अन्येषामपि दृश्यते' (6.3.37) इति दीर्घः।।

77. स्थः क च। (3.2.77)
`बाधकबाधनार्थम्' इत्यादि। कक्विपोर्बाधकोऽच्, तस्यापि बाधनार्थम्। अचस्तु बाधकत्वं `शमि धातोः संज्ञायाम्' (3.2.14) इत्यत्र धातुग्रहणम्। तद्धि यतोऽपवादो विहितस्ततोऽपि शम्युपपदे संज्ञायामजेव यथा स्यादित्येवमर्थं कृतम्। एवञ्च `स्थः क च' इत्येतद्यदि नोच्येत, ततो यथा कृञो हेत्वादिषु टप्रतिषेधार्थं धातुग्रहणं तथा तिष्ठतेरपि कक्विपोर्बाधनार्थं विज्ञायते। तथा च सति शम्युपपदे संज्ञायां तिष्ठतेरजेव स्यात्, न कक्विपौ। अस्मिंस्तु योगे सत्यचं बाधित्वोभावेव भवतः। `शंस्थः' इति। `आतो लोप इटि च' (6.4.64) इत्याकारलोपः।।

78. सुप्यजातौ णिनिस्ताच्छील्ये। (3.2.78)
`ब्राह्मणानामन्त्रयिता' इति। `मत्रि गुप्तभाषणे' (धा.पा.1679), `इदितो नुम् धातोः' (7.1.58) इति नुम्, चुरादिणिच्, ततः `तृन्' (3.2.135) इति ताच्छीलिकस्तृन्। `सुपि' इत्यादि। ननु च `सुपि' (3.2.4) इत्यनुवर्त्तमाने पुनः सुब्ग्रहणमनर्थकम् ?नानर्थकम्; पूर्वकं हि सुब्ग्रहणमुपसर्गेण सम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्। अत उपसर्गनिवृत्त्यर्थं पुनः सुब्ग्रहणं क्रियते।
`उत्प्रतिभ्याम्' इत्यादि। सुब्ग्रहणस्य चोपसर्गनिवृत्त्यर्थत्वादुपसर्गे न प्राप्नोतीति वचनम्। उत्प्रतिभ्यां परो य आङ,तस्मिन्नुपपदे सर्त्तेर्धातोरुपसंख्यानम् = प्रतिपादनं कर्त्तव्यम्। तत्रेदं प्रतिपादनम्-- `अन्येभ्योऽपि दृश्यन्ते' (3.2.75) इत्यतोऽत्रापिशब्दः सर्वोपाधिव्यभिचारार्थोऽनुवर्त्तते, तेन `उदासारिण्यः'इत्यत्रोपसर्गे णिनिर्भवति।
`साधुकारिणि च'इति। अताच्छील्यार्थ आरम्भः। चकारेणोपसंख्यानमित्यनुकृष्यते, तस्य प्रतिपादनमेवार्थः। प्रतिपादनं तु-- पूर्ववदपिशब्दं सर्वोपाधिव्यभिचारार्थमाश्रित्य कर्त्तव्यम्। अथ वा-- यदयम् `तच्छीलतद्धर्मत्साधुकारिषु' (3.2.134) इति तच्छीलेत्यभिधाय तत्साधुकारिग्रहणं करोरति,तज्ज्ञापयति--साधुकारिण्यताच्छील्येऽपि णिनिर्भवतीति।
`ब्रह्मणि वदः' इति। अयमप्यताच्छील्यार्थ आरम्भः, जात्यर्थो वा। ताच्छील्येऽजातौ पूर्वेणैव सिद्धत्वात् वाऽसरूपनिवृत्त्यर्थो न हि भवति। ब्रह्माणं वदित `ब्रह्मवादी'इति। णिनेर्णकारो वृद्ध्यर्थः। द्वितीय इकारो नकारस्येत्संज्ञापरित्राणार्थः।।

79. कर्त्तर्युपमाने। (3.2.79)
धातोः कर्त्तरि प्रत्ययविधानात् तस्यैवोपपदकर्त्तोपमानं विज्ञायत इत्याह-- `उपपदकर्त्ता'इत्यादि। उपपदवाच्यः कर्त्रा = उपपदकर्त्ता, शाकपार्थिवादित्वन्मध्यमपदलोपी समासः। `उष्ट्रक्रोशी' इति। `क्रुश आह्वाने रोदने च'च(धा.पा.856)। `ध्वाङक्षरावी' इति।`रु शब्दे' (धा.पा.1034)। अताच्छील्यार्थ आरम्भजात्यर्थो वेति; ताच्छील्येऽजातौ च पूर्वेणैव सिद्धत्वात्।
`भक्षयति' इति। `भक्ष अदने' (धा.पा.1557) चौरादिकः।।

80. व्रते। (3.2.80)
`समुदायोपाधिश्चायम्' इति। प्रत्ययार्थविशेषणशङ्कां निराकरोति। प्रत्ययार्थविशेषणे हि तस्मिन् व्रत एव कर्त्तरि प्रत्ययः प्रसज्येत,न तद्वति देवदत्ते। `धातूपपद' इत्यादिना समुदायोपाधित्वं व्रतस्य दर्शयति। `कामचारप्राप्तौ नियमः'इति। कामचारः = इच्छाप्रवृत्तिः, तत्प्राप्तौ सत्यां नियमः। अनियमत्वाद्यथेष्टं सामान्येन शयने भोजने च प्रवृत्तौ प्राप्तायामयमर्थान्तराद्व्यावर्त्त्यविशेषे स्थण्डिलादौ न प्राप्नोति, तस्माद्व्यवस्थाप्यते। नियमश्चात्र द्विविधः सम्भवति-- स्थण्डिले शेत एवाश्राद्धं भुङक्तं एवेत्येयंरूपो वा स्यात्, स्थण्डिल एव शेतेऽश्राद्धमेव भुङ्क्ते इत्येवंरूपो वा,तत्र पूर्वके नियमे यदैव स्थण्डिले न शेतेऽश्राद्धञ्च न भुङ्क्ते तदैव व्रतलोपः प्राप्नोति। तस्माद् द्वितीयो नियमो युक्त इति मन्यमान आह-- `सति शयने'इत्यादि।।

81. बहुलमाभीक्ष्ण्ये। (3.2.81)

`आभीक्ष्ण्यं पौनःपुन्यम्' इति। पुनः पुनर्भावः पौनःपुन्यमिति, अव्ययानां भमात्रे टिलोपः। `तात्पर्यमासेवैव' इति। तदेवाभीक्ष्ण्यम्। पर्यायान्तराभ्यां स्पष्टीकरोति-- `{ताच्छील्यादन्यत्--काशिका, पदमंजरी च।} ताच्छील्यादन्यः' इति। एतेन `सुप्यजातौ' (3.2.78) इत्यादिनाऽऽभीक्ष्ण्ये न सिध्यतीत्यसामर्थ्यमुद्भावयन्नस्य योगस्य फलं दर्शयति-- `कषायपायिणः'इति। यत्र देशे कषायं पुनः पुनः पिबतामारोग्यं भवति, अतस्ते कषायं पिबन्तीति, न तु ताच्छील्यात्। `क्षीरपायिणः'इति। तेऽपि तथोक्तादेव कारणात् पानान्तराभावाद्वा ताच्छील्याभावेऽप्यगत्या क्षीरं पिबन्ति। `सौवीरपायिणः' इति। अत्राप्येतदेवानन्तरोक्तं पुनः पुनः सौवीरपानस्य कारणम्। सर्वत्र `आतो युक् चिण्कृतोः' (7.3.33) इति युक्। `प्रातिपदिकान्तनुम्' (8.4.11) इत्यादिना णत्वम्. `कुल्माषखादः' इति। `कर्मण्यण्' (3.2.1)।।

82. मनः। (3.2.82)
`मन्यतेर्ग्रहणम्' इति। `मन ज्ञाने' (धा.पा.1176) इत्येतस्य दैवादिकस्य। `न मनुतेः' इति। `मनु अवबोधने' (धा.पा.1471) इत्येतस्य तानादिकस्य ग्रहणं न भवति। नन ु च यदेव मन्यतेर्णिनिप्रत्यये कृते दर्शनीयमानीति रूपं भवति, तदेव मनुतेरपि,तत् कोऽत्र विशेषो यतो मन्यतेर्ग्रहणमिष्यते,न मनुतेरित्यत आह-- `उत्तरसूत्रे हि' इत्यादि। यद्यपीह विशेषो नास्ति, उत्तरसूत्रे तु विकरणकृतो विशेषोऽस्ति, तत्र हि मन्यतेः खशि कृते दिवादित्वाच्छ्यन् भवति, मनुतेस्तु तनादित्वादुप्रत्ययः।।

83. आत्ममाने खश्च। (3.2.83)
`आत्ममाने' इति। मननम् = मानः, भावे घञ्। आत्मनो मानः आत्ममानः। `कर्तृकर्मणोः कृति' (2.3.65) इति षष्ठी, `कृद्योगा च षष्ठी समस्यते'(वा. 83) इति समासः। अथ कर्त्तरि षष्ठी कस्मान्न भवति ? आत्मग्रहणसामर्थ्यात्। न ह्यात्मनोऽन्यस्य पदार्थस्य मतिः सम्भवति, तस्या आत्मगुणत्वात्। अथात्मशब्दोऽयं न सुखादिगुणमाचष्टे, किं तर्हि ? पराभावम्। परो यो न भवति स आत्मेति, तथाप्यात्मग्रहणमनर्थकम्। एवं हि मन्तुर्या मतिर्या मतिस्तत्र वर्त्तमानादित्येषोऽर्थः स्यात्, स चायुक्तः,क सर्वा हि मतिः परमपि मन्यमानस्य मन्तुरेव भवति, तस्मात् कर्मण्येव षष्ठी। `यदा प्रत्ययार्थः कर्त्ता' इत्यादि। कथं पुनरेष एवार्थः, कर्म कर्त्ता च युज्यते ? शक्तिभेदात्, यथा-- पीयमानं मधु मदयतीति। खशः खकारः `अरुर्द्विषदजन्तस्य' (6.3.67) इति मुमर्थः। शकारः सार्वधातुकसंज्ञार्थः।।

84. भूते। (3.2.84)
भूतशब्दोऽयमतिक्रान्तवचनः, अस्ति च स्वरूपवचनः, तत्र न ज्ञायते-- कस्मिन् भूते प्रत्यय इति ? अतस्तत्पज्ञानायाह-- `धात्वधिकाराच्च'इत्यादि। चशब्दो हेतौ। यस्माद् धातोरिति वर्त्तते तस्माद्धात्वर्थभूत इति विज्ञायते। ननु च धात्वधिकाराद्धातोरेव भूत इत्येतद्विशेषणं युक्तम् ? न; असम्भवात्। धातोर्ह्यस्मिन्नभिधेये गुणीभूतस्य भूत इत्येतद्विशेषणमनुपपन्नम्। अतस्तत्रासम्भवात् तदर्थस्यैव तद्विशेषणं विज्ञायते।।

85. करणे यजः। (3.2.85)
`णिनिरनुवर्त्तते, न खश्'इति। णिनेरेव स्वरितत्वात्। क्व पुनर्यागः करणमित्याह-- `अग्निष्टोमः फलभावनायाम्' इत्यादि। फलं स्वर्गः, तस्य या भावनोत्पादना = यजमानसम्बन्धी व्यापारः, तत्राग्निष्टोमयागः करणं भवति। ननु चाग्निष्टोमव्यतिरेकेण यजमानसय् व्यापारो भावनाख्यो नास्त्येव, यत्र यागः करणमिष्यते, तथाह्यग्निष्टोमाख्येनैव ह्यसौ यागेन स्वर्गाख्यं फलमुत्पादयति ? नैतदेवम्; विशेषव्यापारे हि सामान्यव्यापारोऽस्ति, विक्षेषस्य सामान्यव्यभिचारात्। सामान्यव्यापार एव ह्यादौ फलार्थिनो बुद्धौ सन्निविशते। तथा हि-- प्रतिपत्ता फळं समीहमानः स्वयमेव फलकामः सन् `स्वर्गो मनसि कर्त्तव्यः'इति सामान्यव्यापारं बुद्धावारोपयति, ततः ` अग्निष्टोमेन स्वर्गकामो यजेत'इति शास्त्रस्याग्निष्टोमेन करणेन स्वर्गं भावयेदितीममर्थं प्रतिपाद्य, स्वर्गभावनां प्रति करणत्वेनाग्निष्टोममाश्रयति। तस्मात् सामान्यव्यापारे स्वर्गस्योत्पादो विशेषव्यापारोऽग्निष्टोमाख्यो यागः स्वर्गाभावनायां करणं भवति। ननु चानुष्ठीयमानः कर्मत्वमनुभवति, तथापि तस्य शक्तिभेदात् करणत्वं न विरुध्यते, यथा -- `निपीयमानेन मधुना मत्तः' इत्यत्र कर्मभावमनुभवतोऽपि मधुनः करणभावो भवति। तदेवमग्निष्टोमयाजीत्यस्यायमर्थः-- अग्निष्टोमेन करणेन स्वर्गं भावितवानिति। स्वर्गशब्दस्तु वृत्तादन्तर्हितत्वान्न प्रयुज्यते।।

86. कर्मणि हनः। (3.2.86)
`पितृव्यघाती' इति। `हनस्तोऽचिण्णलोः' (7.3.32) इति तत्वम्। `हो हन्तेर्ञ्णिन्नेषु' (7.3.54) इति घत्वम्, `सौ च' (6.4.13) इति दीर्घत्वम्। `कुत्सितग्रहणं कर्त्तव्यम्'इति प्रत्ययर्थस्य विशेषणम्। गृह्यतेऽनेनेति ग्रहणम्। तत् पुनर्व्याख्यानम्। एतदुक्तं भवति-- येन कुत्सितः कर्त्ता प्रत्ययार्थो गृह्यते तद्व्याख्यानं कर्त्तव्यमिति। तत्रेदं व्याख्यानम्-- वक्ष्यमाणबहुलग्रहणमपकृष्येह सम्बन्धः क्रियते, तेन पितृव्यवधादिकां प्रतिषिद्धां क्रियां कुर्वाणो यः कर्त्ता कुत्स्यते, तत्रव, नान्यत्र।।

87. ब्रह्मभ्रूणवृत्रेषु क्विप्। (3.2.87)

`ब्रह्महः'इति। पूर्ववद्दीर्घत्वम्।

`सर्वधातुभ्यः क्विब्विहित एव' इति। `क्विप् च' (3.2.76) इत्यनेन। `चतुर्विधश्चात्र नियमः' इति। धातुनियः, उपपदनियमः, प्रत्ययनियमः, कालनियमः। चकारोऽवधारणे -- चतुर्विध एव। `ब्रह्मादिष्वेव हन्तेर्नान्यस्मिन्नुपपदे'इति धातुनियमं दर्शयति। अत एव यतएवकारकरणं ततोऽन्यत्रावधारणमिति। उपपदेभ्यः पर एवकारः प्रयुज्यमानो हन्तिं नियमयति। प्रायिकश्चायं नियमः, क्वचिदन्यस्मिन्नुपपदे दृश्यते-- मधुहेतु। प्रायिकत्वञ्च तस्य वक्ष्यमाणबहुलग्रहणस्य पुरस्तादपकर्षाल्लभ्यते। `ब्रह्मादिषु हन्तेरेव नान्यस्मात्' इति उपपदनियमः। अत्र हि हन्तेः एकारः श्रूयमाण उपपदं नियमयति-- ब्रह्मादिषु हन्तेर्भूते क्विबेव। `नान्यः प्रत्ययः' इति कालनियमः। ब्रह्माद्युपपदे हन्तेः क्विपि विहिते भूतकालस्य नियमितत्वात्। यदि ब्रह्मादिषु क्विबेव नान्यः प्रत्ययः इति, तदा निष्ठापि न प्राप्नोति-- ब्रह्माणं हतवानिति ? नैष दोषः; `मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते, नोत्तरान्'(व्या.प.10) इत्यणादय एव बाध्यन्ते, न निष्ठा। एवमपीह वृत्रस्याहन्तुरिति तृज् न प्राप्नोति ? प्रायिकत्वान्नियमस्य न दोषः। `तथा भूतकाल एव नान्यस्मिन्' इति प्रत्ययनियमः, भूतकाले प्रत्ययो नियम्यत इति कृत्वा। कथं पुनरेकदा चत्वारो नियमा लभ्यन्त इत्याह-- `तदेतत्'इत्यादि। `बहुलं छन्दसि' (3.2.88) इति वक्ष्यमाणं बहुलग्रहणं पुरस्तादपकृव्यानेन योगेन सम्बध्यते-- ब्रह्मभ्रूणवृत्रेषु क्विब्बहुलमिति, तेनायं चतुर्विधो नियमो लभ्यते।।

88. बहुलं छन्दसि। (3.2.88)

89. सुकर्मपापमन्त्रपुण्येषु कृञः। (3.2.89)

`सुशब्दं वर्जयित्वा'इति। तस्यासत्त्ववचनात् कर्मत्वानुपपत्तेः। `स्वादिषु कर्मसु' इति। बाहुल्यमाश्रित्योक्तम्, यथा-- `ब्राह्मणग्रामः, भट्टग्रामः' इति। कुत एतत् ? सुशब्दं वर्जयित्वेत्यनन्तराणामेवाभिधानात्।

`त्रिविधश्चात्र नियमः' इति। एतदपि बहुलग्रहणानुवृत्तेर्लभ्यते। `कालोपपदप्रत्यय{नियमः-काशिका}विषयः' इति। कालोपपदप्रत्यया विषया यस्य स तथोक्तः। स पुनः कालनियमः, उपपदनियमः, प्रत्ययनियमश्चेति। तत्र कालनियमः--स्वादिषु कृञो भूत एव क्विबेव बवति, नान्यः प्रत्यय इति; न भवति-- कर्म कृतवान् कर्मकार इति। उपपदनियमः--स्वादिषु कृञ एव, नान्यस्माद्धातोरिति; न हि भवति क्विप्-- मन्त्रमधीतवानिति, अणेव भवति मन्त्राध्याय इति। प्रत्ययनियमः-- स्वादिषु कृञो भूत एव क्विप्, न वर्त्तमाने, भविष्यत् वा, तेन मन्त्रं करोति, मन्त्रं करिष्यतीति वेत्यर्थविवक्षायां मन्त्रकृदिति न भवति।

`शास्त्रकृत्' इति। `क्विप् च' (3.2.76) इति क्विप्।।

90. सोमे सुञः। (3.2.90)

`धातुकालोपपदप्रत्यय विषयः'इति। पूर्ववद्बहुव्रीहिः। कालादिनियमोऽन्यपदार्थः। तत्र कालनियमः-- सोमे सुनोतेः क्विबेव भूते, नान्यः प्रत्ययः; न हि-- सोमं सुतवान् सोमसाव इति। धातुनियमः--सोम एव सुनोतेः क्विप्, नान्यस्मिन्नुपपद इति;इह न भवति--सुरां सुतवान् सुरासुदिति। उपपनियमः--सोमे सुनोतेरेव, नान्यस्माद्धातोरितित;इह न भवति क्विप्-- सोमं क्रीतवानिति , सोमक्राय इत्यणेव तु भवति। प्रत्ययनियमः-- सोमे सुनोतेर्भूत एव क्विप्, नान्यत्रेति;तेन सोमं सुनोति, सोष्यति वेत्यर्थविवक्षायां सोमसुदिति न भवति।।

91. अग्नौ चेः। (3.2.91)

`अत्रापि पूर्ववत्'इत्यादि। तत्र कालनियमः-- अग्नौ चिनोतेर्भूते क्विबव, नान्य इति; तेनाग्निं चितवानित्यर्थविवक्षायामग्निचाय इति न भवति। धातुनियमः-- अग्नावेव चिनोतेर्नान्यस्मिन्नुपपद इति; तेनेष्टकाचिदितति न भवति। उपपदनियमः-- अग्नौ चिनोतेरेव नान्यस्माद्धातोरिति; तेनाग्निकृदिति न भवति। प्रत्ययनियमः-- अग्नौ चिनोतेर्भूत एव क्विप्, नान्यस्मिन् काले; तेन वर्त्तमानभविष्यतोरग्निचिदिति न भवति।।

92. कर्मण्यग्न्याख्यायाम्। (3.2.92)

`कर्मणि हनः' (3.2.86) इत्यत उपपदविशेषमे कर्मग्रहणेऽनुवर्त्तमाने यत् पुनरिह कर्मग्रहणं तस्य प्रत्ययार्थत्वं विज्ञायत इत्याह-- `कर्मण्येव कारके' इति। `धातूपपद' इत्यादिना समुदायोपाधित्क्मेतदग्न्याख्याग्रहणस्य दर्शयति।

`आख्याग्रहणं रूढिसम्प्रत्ययार्थम्' इत्यादि। अग्निशब्दोऽयमग्निसामान्यवाची, अत्रासत्याख्याग्रहणे विशेषो न विज्ञायते-- कस्येह ग्रहणमिति, रूढिसम्प्रत्ययार्थमाख्याग्रहणं क्रियते। किं पुनः कारणं तदर्थमाख्याग्रहणं क्रियत इत्याह-- `अग्न्यर्थो हि' इत्यादि। अग्न्यर्थो य इष्टकानां रचनाविशेषः स श्येनचिदित्युच्यते, तत्रैवायं प्रत्यय इष्यते। स कथं तत्रैव लभ्यते ? यस्य ग्रहणं क्रियते, तस्मिंश्च सति प्रसिद्धो गृह्यमाणोऽग्न्यर्थो य इष्टकानां रचनाविशेषः स एव प्रत्ययार्थो वाच्यतया विज्ञायते, नान्यः।।

94. कर्मणीनिर्विक्रियः। (3.2.93)

`कर्मणीति वर्त्तमाने' इत्यादि। `कर्मणिहनः' (3.2.86) इत्यतः। `पुनः कर्मग्रहणम्' इत्यादि। यत् कर्म क्रियासम्बन्धमनुभवत् कर्त्तुः कुत्सामावहति,तत् कुत्सानिमित्तं कर्म यथा स्यादित्येवमर्थम्। कर्मग्रहणेऽनुवर्त्तमाने पुनः कर्मग्रहणमनन्तरसूत्रे यत् कर्मप्रत्ययार्थत्वेऽनिष्टं कर्मग्रहणं तन्निवृत्त्यर्थम्। कर्मग्रहणं कस्मान्न भवति ? तस्य स्वरितत्वादेवानुवृत्तेः। `सोमविक्रयी' इति। सोमविक्रयणं शास्त्रे प्रतिषिध्यत इति सोमाख्यं कर्म विक्रयणक्रियया सम्बध्यमानं विक्रेतुः कुत्सामावहति। `धान्यविक्रायः' इति। `कर्मण्यण्' (3.2.1)।।

94. दृशेः क्वनिप्। (3.2.94)
`प्रत्ययान्तरनिवृत्त्यर्थम्' इति। प्रत्ययान्तरमणादि, तस्य निवृत्त्यर्थम्। निवृत्ते सत्यपि प्रत्ययः प्रत्ययान्तरत्वे भवत्येव-- परलोकं दृष्टवानिति। अत्र च कारणं `ब्रह्मभ्रूण' (3.2.87) सूत्र एव उक्तम्।।

95. राजनि युधिकृञः। (3.2.95)
ननु च युधिरयमकर्मकः, तत्कथं तस्य कर्मणीत्युपपद्यत इत्यभिप्रायेणाह--`अन्तर्भावितण्यर्थः' इत्यादि। अन्तर्भावितः = तनुप्रवेशितो ण्यर्थो यस्मिन्निति बहुव्रीहिः। राजा युध्यते, तं प्रयुङ्क्ते पुरुषो योद्धुं वेति। तत्रासौ पुरुषस्य व्यापारः प्रेषणादिकोऽर्थो ण्यर्थो यदा बुद्ध्या युध्यतेरन्तर्भाव्यते, तदासौ प्रयोज्यकर्मणा सकर्मको भवति। `योधितवान्' इति। ण्यन्तस्य प्रयोगः। `निष्ठायां सेटि' (6.4.52) इति णिलोपः।।

95. सहे च। (3.2.95)
`असत्त्ववाचित्वान्नोपपदं कर्मणा विशेष्यते'इति। तदर्थस्य कर्मत्वानुपपत्तेः।।

97. सप्तम्यां जनेर्डः। (3.2.97)
सप्तमीति प्रत्ययग्रहणम्।तत्र प्रत्ययग्रहणपरिभाषया तदन्तस्य ग्रहणं भवतीत्याह-- `सप्तम्यन्त उपपदे' इति। स्वरूपग्रहणमत एव न भवति। `उपसरजः' इति। डित्करणसामर्थ्यादभसंज्ञकस्यापि टिलोपः। `मन्दुरजः' इति। `ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (6.3.63) इति ह्रस्वः।।

98. पञ्चम्यामजातौ। (3.2.98)
`बुद्धिजः' इति। `जनिकर्त्तुः प्रकृतिः' (1.4.30) इति बुद्धेरपादानत्वादपादाने पञ्चमी।, तदस्योपपदत्वम्। बुद्ध्यादिशब्दा जातिशब्दा न भवन्ति; बुद्ध्यादीनामात्मगुणत्वात्।।

99. उपसर्गे च संज्ञायाम्। (3.2.99)
`समुदायोपाधिः'इति। धातूपसर्गप्रत्ययसमुदायेन यदि संज्ञा गम्यत इएवं प्रत्ययार्थो भवति, नान्यथेति दर्शयति-- `{प्रजाः- काशिका} प्रजाः' इति। प्राणिसमुदायस्यैषा संज्ञेति। यद्यस्य सूत्रस्य प्रजेत्येतदेवोदाहरणम्, तदा `प्रे जनः संज्ञायाम्'इति वक्तव्ये प्रजेति सिध्यत्येव, किमुपसर्गग्रहणेन ? उपसर्गग्रहणमुत्तरार्थम्; `अनौ कर्मणि'(3.2.100) इत्युपसर्गे यथा स्यात्, कर्मप्रवचीये मा भूत्। अथानन्त्यस्य प्रयोगविषयस्यान्यस्मिन्नुपपदे कदाचित् प्रत्ययो दृश्यते यदि, तदैतदर्थमपि।।

100. अनौ कर्मणि। (3.2.100)
`अनुपूर्वाज्जनेः' इत्यादि। अथानुशब्दस्योपपदत्वं कस्मान्न भवति ? यतो न भवति स हेतुः `उदि कूलेरुजिवहोः' (3.2.31) इत्यत्र व्याख्यात इति पुनर्नाख्यायते। `पुममुजः' इति। लुप्तेऽपि सुपि प्रत्ययलक्षणेन पदत्वम्, तेन संयोगान्तलोपो (8.2.23) भवति।।

101. अन्येष्वपि दृश्यते। (3.2.101)
`अपिशब्दः' इत्यादि। सर्व उपाधय उपपदादयः, तेषां व्यभिचारो यथा स्यादित्येवमर्थोऽपिशब्दः। `धात्वन्तरादपि'इति। `खनु अवदारणे'(धा.पा.878) इत्येतस्मात्। `कारकान्तरेऽपि' इति। कर्त्तुरन्यस्मिन् कारके कर्मणि।।

102. निष्ठा। (3.2.102)
`कृतम्' इति। अत्र कित्वाद् गुणाभावः। `कृतवान्' इति। `उगिदचाम्' (7.1.70) इति नुम्। `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः, हल्ङ्यादि (6.1.68) संयोगान्तलोपौ (8.2.23)।
`निष्ठायाम्' इत्यादि। निष्ठासंज्ञके प्रत्यये विधातव्येऽप्रसिद्धनिष्पत्तिकस्य निष्ठासंज्ञकस्य प्रत्ययस्य निष्ठेति चास्याः संज्ञाया अप्रसिद्धिः, कुतः ?

इतरेतराश्रयत्वात्। कथमितरेतराश्रयत्वमित्याह-- `संज्ञायाम्' इत्यादि। निष्ठेत्येवं संज्ञामुच्चार्य क्तक्तवत्वोरिह भूते विधानम्, विद्यमानयोश्च तयोः संज्ञया भवितव्यमितीतरेतराश्रयत्वम्, `इतरेतराश्रयाणि कार्याणि शास्त्रे न प्रकल्प्यन्ते'(व्या.प.28)। यदितो क्तक्तवतू स्वरूपेण विज्ञातौ भवत एवञ्च `क्तक्तवतू निष्ठा' (1.1.26) इत्यन्यस्य संज्ञा विधातुं शक्यते,नान्यथा। अतः संज्ञाया अप्रसिद्धिः, तस्याश्चाप्रसिद्धौ तयोरप्रसिद्धिः। `भाविनी' इति। भविष्यन्तीत्यर्थः। यथा-- अस्य सूत्रस्य शाटकं वयेति। भाविनीशब्दोऽयम् `गमेरिनिः'(द.उ.6.57) `आङि णित्' (द.उ.6.58) `भुवश्च' (द.उ.6.59) इतीनिप्रत्ययान्तो व्युत्पादितः। स च `भविष्यति गम्यादयः' (3.3.3) इति भविष्यत्काले विहितः। तेन भाविनीत्यस्य भविष्यन्तीत्येवार्थो लभ्यते। `सामर्थ्यात्' इत्यादि। स भूते भवति यस्योत्पन्नस्य निष्ठेत्येषा संज्ञा भवति। न चान्यस्योत्पन्नस्य निष्ठेत्येषा संज्ञा भवति। अपि तु क्तक्तवत्वोरेवेति सामर्थ्यम्।
`आदिकर्मणि' इत्यादि। कर्मशब्दोऽत्र क्रियावाची। आदिभूते क्रियारम्भादिभूते प्रथमे क्रियालक्षण इत्यर्थः। यावत्क्रियालक्षणैः सकलः कटः परिसमाप्तिमुपैति क्रियालक्षणानां तावतामपवर्गे भूतकालो भवति। आद्ये क्रियालक्षणे समुदायस्यापरिनिष्पन्नत्वात् वर्त्तमानकाल एवेति। तत्र वर्त्तमाने निष्ठा न प्राप्नोति, अतो वक्तव्यो व्याख्येयः। तत्रेदं व्याख्यानम्-- यदयं `उदुपधाद्भावादिकर्मणोरन्यतरस्याम्' (1.2.21) इत्यादिकर्मणि कर्मणि निष्ठा विकल्पयति। यद्वा-- `आदिकर्मणि क्तः कर्त्तरि च' (3.4.71) इत्यादि, तज्ज्ञापयति-- आदिकर्मणि निष्ठा भवतीति। `प्रकृतः कटम्' इति। प्रशब्दोऽत्रादिकर्म द्योतयति। य एवार्थः प्रकरोति कटं देवदत्त इति, स एवार्थः प्रकृतः कटं देवदत्त इति।।

103. सुयजोर्ङ्वनिप्। (3.2.103
`सुत्वा' इति। `ह्रस्वस्य पिति कृति' (6.1.71) इति तुक्, `सर्वनामस्थाने च' (6.4.8) इत्यादिना दीर्घः, `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नकारलोपः।।

104. जीर्यतेरतृन्। (3.2.104)
`जरन्' इति। अतृनो नित्त्वादाद्युदात्तत्वं भवति। `उगिदचाम्' (7.1.70) इति नुम्।।

105. छन्दसि लिट्। (3.2.105)
`ददर्श' इति। दर्शेर्लिट, णल्, द्विर्वचनम्, `उरत्' (7.4.66) इत्यत्त्म्, रपरत्वम्, हलादिशेषः (7.4.60), लघूपधगुणः (7.3.86)। `आततान' इति। `तनु विस्तारे' (धा.पा.1463) आङ्पूर्वः, `अत उपधायाः' (7.2.116) इति वृद्धिः। `धातुसम्बन्धे स विधिः' इति। `धातुसम्बन्धे प्रत्ययाः' (3.4.1) इत्यतो धातुसम्बन्धग्रहणानुवृत्तेः। `अयं त्वविशेषणेण' इति। भूतमात्रे। लिट इकारटकारावुत्तरसूत्रे विशेषणार्थौ। `लः कानज्वा' इत्युच्यमाने लकाराणां ग्रहणं स्यात्। टकारष्टेरेत्वार्थः।।

106. लिटः कानज्वा। (3.2.106)
कानचश्चिकरणमन्तोदात्तार्थम्। कित्करणं कित्कार्यार्थम्। तत्पुनः `बन्ध बन्धने' (धा.पा.1508) इत्येवमादयः संयोगान्ताः प्रयोजन्ति,नान्ये। असंयागान्तेभ्यः `असंयोगाल्लिट् कित्' (1.2.5) इति सिद्धः, संयोगान्ता अपि कित्त्वं भाषायां प्रयोजयन्ति, न छन्दसि। तत्राह-- `छन्दस्युभयथा' (3.4.117) इति लिटः सार्वधातुकत्वात् `सार्वधातुकमपित्' (1.2.4) इति ङित्त्वमस्त्येव। न कित्त्वे ङित्त्वे वा च्छन्दसि कश्चिद्विशेषोऽस्ति। भाषायां तु यद्यसंयोगान्तेभ्यः कित्त्वं न स्याद्योऽयं `ऋच्छत्यृताम्'(7.4.11) इति गुणः प्रतिषेधविषय आरभ्यते स यथेह न भवति-- निपपरतुः, निपपरुरिति;तथेहापि स्यात्-- निपपुराण इति; कित्त्वे च सति न भवति। भाषायां तु कित्त्वमर्थवद्भवति। `पृ पालन पूरणयोः' (धा.पा.1086), निपूर्वात् कानच्। द्विर्वचनात् परत्वात् `उदोष्ठ्यपूर्वस्य' (7.1.102) इत्युत्त्वम्, रपरत्वञ्चेति। `द्विर्वचनेऽचि' (1.1.59) इति स्थानिवद्भावात् पृशब्दो द्विरुच्यते। उरत्त्वरपरत्वहलादिशेषाः, अट्कुप्वादिना (8.4.2) णत्वम्। भाषायां कानज्भवीत्यस्मादेव ज्ञापकादवसीयते। `चिक्यानःट इति। अभ्यासादुत्तरस्य चिनोतेश्चकारस्य `विभाषा चेः' (7.3.58) इति कुत्वम्, `एरनेकाचः' (6.4.82) इत्यादिना यणादेशः। `सुषुवाणः' इति। `{सुनोतेरिति-इति मुद्रितः पाठः।} सुनोतेरिति; `अचि श्नुधातु' (6.4.77) इत्यादिनोवङादेशः, `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्। `विभक्तिविपरिणामो भविष्यति' इति। यद्यपि लिडिति प्रथमान्तं प्रकृतं तथाप्यर्थाद्विभक्तिविपरिणामो भविष्यति। आदेशम्बन्धादुत्तरस्य लिटः षष्ठ्यन्तता भविष्यति।तस्मादन्तरेणापि लिड्ग्रहणं प्रकृत्वाल्लिट एव कानजादेशो भविष्यतीति लिड्ग्रहणं न कर्त्तव्यमिति भावः। `योऽपि' इत्यादि। योऽपि `परोक्षे लिट्' (3.2.115) इत्यनेनलिड्विहितस्तस्यापि लिड्ग्रहणे सति कानजादेशो भवति। असति तु तस्मिन् `अनन्तरस्य विधिर्वा प्रतिषेधो वा' (व्या.प.19) इत्यस्यैव स्यात्, न परोक्षे लिटः। अथासति लिड्ग्रहणे प्रत्ययान्तरं कानच् कस्मान्न विज्ञायते ? अशक्यमेवं विज्ञातुम्, प्रत्ययान्तरे हि `न लोकाव्ययनिष्ठाखलर्थतृनाम्' (2.3.69) इति षष्ठीप्रतिषेधो न स्यात्। ततश्चाग्निं चिक्यान इत्यत्राग्निशब्दात् षष्ठी स्यात्।।।

107. क्वसुश्च। (3.2.107)
क्वसोरुगित्करणं नुमर्थम्। कित्करणं कानच इव द्रष्टव्यम्। असति हि तस्मिन् `ऋच्छत्यृनाम्'(7.4.11) इति यथेह गुणो न भवति-- तेरतुः, तेरुरिति;

तथेहापि ततीर्वानिति। `तॄ प्लवनतरणयोः' (धा.पा.969), `ॠत इद्धातोः' (7.1.10) इतीत्त्वम्, `हलि च' (8.2.77) इति दीर्घः, द्विरवचनमभ्यासकार्यम्। `जक्षिवान्' इति। `लिट्यन्यतरस्याम्' (2.4.40) इत्यदेर्घस्लादेशः। `वस्वेकाजाद्घसाम्' (7.2.67) इतीट्, `घसिभसोर्हलि च' (6.4.100) इत्युपधालोपः, `खरि च' (8.4.55) इति घकारस्य ककारः, `शासिवसिघसीनाञ्च'(8.3.60) इति षत्वम्, `कुहोश्चुः' (7.4.62) इत्यभ्यासस्य चुत्वम्---झकारः, `अभ्यासे चर्च' (8.4.54) इति झकारस्य जकारः। `पपिवान्' इति। `पा पाने' (धा.पा.925)। पूर्ववदिट्। `आतो लोप इटि च' (6.4.64) इत्यकारलोपः। `योगविभाग उत्तरार्थः' इति। उत्तरसूत्रे क्वसोरेवानुवृत्तिर्यथा स्यात्, कानचो मा भूत्।।

108. भाषायां सदवश्रुवः। (3.2.108)

ननु चेह प्रकरणे भूतसामान्ये लिड् विहितः, तेनासौ भाषायां नास्त्येव, तदसतस्तस्य कथं क्तसुरादेशः शक्यते विज्ञातुमित्याह-- `आदेशविधानादेव' इत्यादि। यदेतद्भाषायां लिटः क्वसोरादेशविधानमत एव विज्ञानाद् भूतसामान्ये भाषायां लिडित्वनुमीयते; अन्यथा ह्यादेशविधानमनर्थकं स्यात्। न ह्यविद्यमानस्य स्थानिन आदेश उपपद्यते। यदि तर्ह्यादेशविधानाल्लिड् भाषायामनुमीयते, ततश्च सदादिभ्यो भाषायां नित्यं लिट् प्राप्नोति, तस्य `विभाषा क्वसुः' इति पक्षे तिङः श्रवणं प्रसज्येत, लुङादेशश्च स्वविषये पाक्षिको न स्यात्, नित्यत्वाल्लिटः ? नैष दोषः;आदेशेन हि लिङ्गेन लिडनुमीयते, तेन यदादेशो नास्ति तदा तदनुमानमपि नास्त्येव। तदसत्त्वे लिटः कुत आदेशा येषां श्रवणं प्रसज्येत ! यत्र पक्षे लिट् नास्ति तत्र स्वविषये लुङादयो भवन्तः केन निवार्यन्ते !

`उपसेदिवान्' इति। `षद्लृ विशरणे' (धा.पा.854)। `अत एकहल्मध्ये' (6.4.120) इत्यादिनैत्वाभ्यासलोपौ, `वस्वेकाजाद्घसाम्' (7.2.67) इतीट्, नुम्, `सान्तमहतः संयोगस्य' (6.4.10) इति दीर्घः, हल्ङ्यादि (6.1.68) संयोगान्तलोपौ (8.2.23)। `उपासदत्' इति। वाग्रहणाद्यस्मिन् पक्षे लिड् नास्ति तस्मिन् पक्षे भूतसामान्ये लुङ्, तिप्, `इतश्च' (3.4.100) इतीकारलोपः, पुषादिना (3.1.55) च्लेरङ्। `उपासीदत्' इति। `अनद्यतने लङ्' (3.2.111), प्राघ्रादिसूत्रेण (7.3.78) सीदादेशः। `उपससाद' इति। `परोक्षे लिट्' (3.2.115), तिप्, णल्, `अत उपधायाः' (7.2.116) इति वृद्धिः। `अनूविषान्' इति। `वस निवासे' (धा.पा.1005), लिटः क्वसूर्द्विर्वचनम्, वच्यादिसूत्रेण (6.1.15) सम्प्रसारणम्। `लिट्यभ्यासस्योभयेषाम्' (6.1.17) इत्यभ्यासस्य सम्प्रसारणम्, `शासिवसिघसीनाञ्च' (8.3.60) इति षत्वम्, `अकः सवर्णे दीर्घः' (6.1.101) अनुशब्देन सह पुनर्दीर्घः।

`अन्ववात्सीत्'इति। लुङ्, `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्, `एकाचः' (7.2.10) इतीट्प्रतिषेधः, `सः स्यार्द्धधातुके' (7.4.49) इति तत्वम्, `वदव्रज' (7.2.3) इत्यादिना वृद्धिः। `अन्ववसत्' इति। लङ्। `अनूवास' इति। लिट, पूर्ववत् सम्प्रसारणादिकार्यम्। `उपशुश्रुवान्' इति। `श्रु श्रवणे' (धा.पा.942), लिटः क्वसुः, द्विर्वचनम्। `उपाश्रौषीत्' इति। लुङ् `सिचि वृद्धिः परस्मैपदेषु' (7.2.1) इति वृद्धिः, पूर्ववदिट्प्रतिषेधः, `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्, उपसर्गेण `अकः सवर्णे दीर्घः' (6.1.101)। `उपाशृणोत्' इति। लङ्, `श्रुवः शृ च' (3.1.74) इति श्नुप्रत्ययः, शृभावश्च, `सार्वधातुकार्थधातुकयोः' (7.3.84) इति गुणः। `उपशुश्राव' इति। लिट्, तिप्, णल्, `अचो ञ्णिति' (7.2.115) इति वृद्धिः, आवादेशः। इहानेन सूत्रेण यत्कार्यं विधीयते तद्भूतसामान्ये। `{इयं पंक्तिर्मुद्रिते नास्ति} लुङ्' (3.2.110) इत्यनेन लुङ्। `अनद्यतने लुङ्' (3.2.111) इत्यनेन लङ्, `परोक्षे लिट्' (3.2.115) इत्यनेन लिट्, भूतानद्यतनपरोक्षे परौ च लङ्लिटौ भवतः। विशेषविहितत्वाच्च लङलिटोरस्य सदादिकार्यस्य बाधकौ प्राप्नुतः। तस्य कार्यस्य भूतसामान्यमवकाशः; लङलिटोः सदादिभ्योऽन्येभ्यो धातुभ्यः, सदादिभ्यो भूतविशेषे भूतानद्यतनपरोक्षे; भूतानद्यतने चोभयप्राप्तौ यथोक्तकारणद्वयात् लङलिटौ स्याताम्।

न चैतत् सूत्रविहितं कार्यमपीति यश्चोदयेत्, तं प्रत्याह-- `लुङलङविषयेऽपि' इत्यादि। लिड्ग्रहणस्य वाग्रहणस्य चास्य सूत्रस्य पुरस्तात् `अनद्यतने लङ' (3.2.111) , `परोक्षे लिट्' (3.2.115) इत्यत्र चानुवृत्तिः क्रियते। तत्र चानुवृत्तिसामर्थ्यात् लङ्यप्येतत् भवति। अत्रैवं सम्बन्धः कर्त्तव्यः-- अनद्यतने लङ भवति, सदादिभ्यो वा लिट्, लिटश्च क्वसुरादेशो नित्यमिति। परोक्षे लिड् भवति, सदादिभ्यो वा, लिटः क्वसुरिष्यते, सूत्रान्तरविहितश्चायम्।।

109. उपेयिवाननाश्वाननूचानश्च। (3.2.109)

`उपपूर्वादिणः क्वसुः' इति। लिडादेश इति वेदितव्यः। `अभ्यासदीर्घत्वम्' इति। `दीर्घ इणः किति' (7.4.69) इत्यनेन। `तत्सामर्थ्यात्' इत्यादि। दीर्घत्वविधानसामर्थ्यादकः सवर्णे दीर्घ्त्वमेकादेशः प्रतिषिध्यते, प्रवृत्तिविघातोऽस्य क्रियत इत्यर्थः। यदि ह्येकादेशः स्यात्, दीर्घत्वभिधानमनर्थकं स्यात्; एकादेशेनैव दीर्घत्वसिद्धेः। ननु चाभ्यासदीर्घस्येयतुः, इयुरित्ययमवकाशः स्यात्-- यत्र धातुरूपस्य `इणो यण्' (6.4.81) इति यणादेशः क्रियते ? नैषोऽस्यावकाशः, अत्र हि `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावेन भवितव्यम्। कथम् ? सवर्णदीर्घत्वे हि पूर्वापरविधितवात् पूर्वविधिरिति शक्यते व्यपदेष्टुम्। यो ह्युभयस्थानी निष्पद्यते लभतेऽसावन्यतरव्यपदेशम्। न चात्र `न पदान्त' (1.1.58) इत्यादिसूत्रेण दीर्घविधिं प्रति स्थानिवद्भावप्रतिषेधोऽस्ति; यस्मात् `स्वरदीर्घयलोपेषु लोपाजादेशौ न स्थानिवदेव' (काशिका.1.1.58) इत्यादिसूत्रेण दीर्घविधिं प्रति स्थानिवद्भावप्रतिषेधोऽस्ति; यस्मात् `स्वरदीर्घयलोपेषु लोपाजादेशौ न स्थानिवदेव' (काशिका.1.1.58) इति स्थानिवद्भावादकः सवर्णे दीर्घत्वेनात्र भवितव्यम्। तदेतदभ्यासदीर्घत्वमनवकाशत्वात् सवर्णदीर्घत्वं बाधत इति स्थितमेतत्-- सामर्थ्यादेकादेशः प्रतिषिध्यत इति। `तत्र' इत्यादि। एकादेशप्रतिबन्धके हि सत्यनेकाच्त्वं भवति, तेन `वस्वेकाजाद्घसाम्' (7.2.67) इत्यनेनेडागमो न प्राप्नोतीति स निपात्यते। `धातुरूपकस्य यणादेशः' इति। `इणो यण्' (6.4.81) इत्यनेन, तर्दीदं निपातनमेव। सत्यजादावपि परतो वसोः सम्प्रासरणमिति। सम्प्रसारणे कृते सतीट् प्राप्नोति स

`वस्वेकाजाद्घसाम्' (7.2.67) इति प्रतिषिद्धः, स एवानेन निपातनन प्रतिप्रसूयते। प्रतिषिद्धः स पुनः प्रवर्त्तते, न त्वपूर्व विधीयते। `तेनाजादौ न भवति' इति। अपिपूर्वस्य हि विधानेन विशेषानुपादानादजादावपि प्रसङ्गः स्यात्; न तु लक्षणप्रतिषेधस्येटः प्रसवे; तस्य वलादित्वात्। `उपेयुषा' इति। सम्प्रसारणे कृते धातोर्यणादेशः, `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्। `न चात्रोपसर्गस्तन्त्रम्' इति। उपसर्गोऽत्र न प्रधानमित्यर्थः। तन्त्रत्वं तस्य `बहुलं छन्दसि' (3.2.88) इत्यतो बहुलग्रहणानुवृत्तेर्लभ्यते। `उपागात्' इति। लुङ, `इणो गा लुङि' (2.4.45) इति गादेशः। `गातिस्था'( 2.4.77) इत्यादिना सिचो लुक्। `उपैत्' इति। लङ, तिप्, अदादित्वाच्छपो लुक्, `आडजादीनाम्' (6.4.72) इत्याट्, `आटश्च' (6.1.90) इति वृद्धिः। `उपेयाय'इति। लिट्, तिप्, णल्, `अचो ञ्णिति' (7.2.115) इति वृद्धिः, आयादेशः, स्थानिवद्भावादद्विर्वचनमिकारस्येति; `अभ्यासस्यासवर्णे'(6.4.78) इतीयङ, इकारेण सह `आद्गुणः' (6.1.87)। `अनाश्वान्' इति। `अश भोजने' (धा.पा.1523) लिट्, क्वसुः, द्विर्वचनम्, `अश'इत्यस्य `अत आदेः' (7.4.70) इत्यभ्यासस्य दीर्घत्वम्, इडभावश्च,`वस्वेकाजाद्धसाम्' (7.2.67) इत्यनेन प्राप्तस्येटोऽभावो निपात्यते। न आश्वान् अनाश्वान्-- नञ्समासः, `नलोपो नञः' (6.3.73) इति नलोपः;`तस्मान्नुडचि' (6.3.74) इति नुडागमः। `नाशीत्' इति। लुङ, `च्लेः सिच्' (3.1.44), `इट ईटि' (8.2.28) इति सिचो लोपः, पूर्ववदाट्, वृद्धिः, नञा सह सवर्णदीर्घत्वम्। `नाश्नात्' इति। लङ्, कर्यादित्वात् श्ना, आडागमः। `नाश' इति। लिट्, तिप्,णल्, द्विर्वचनम्, पूर्ववदभ्यासदीर्घत्वम्, धातुना नञा सहाकः सवर्णे दीर्घत्वम्।

`वचेः'इत्यादि। `वच परिभाषणे' (धा.पा.1063)-- इत्यस्मात् `ब्रुवो वचिः'(2.4.53) इति वच्यादेशाद्वा वचेरनुपूर्वात्, कानच् कर्त्तर्यात्मनेपदसंज्ञको न प्राप्नोति;परस्मैपदित्वात्, इतरस्मात् कर्त्तरभिप्रायफलस्य विवक्षितत्वात्, अतः स निपात्यते। वच्यादिसूत्रेण (6.1.15) धातोः सम्प्रसारणम्, `लिट्यभ्यासस्योभयेषाम्' (6.1.17) इत्यभ्यासस्य पश्चादनुशब्देन सहाकः सवर्णे दीर्घत्वम्। `अन्ववोचत्' (6.1.87)। `अन्वब्रवीत्' इति। ब्रुवो लङ,शपो लुक्, `ब्रुव ईट्' (7.3.93)। `अनूवाच' इति। लिट्, णल्, `अत उपधायाः' (7.2.116) इति वृद्धिः, पूर्ववदभ्यासस्य सम्प्रासरमेकादेशः।।

110. लुङ्। (3.2.110)

ङकारः `नित्यं ङितः' (3.4.99) इति विशेषणार्थः। उकारः `लुङलङलृङक्ष्वडुदात्तः'(6.4.71) इति विशेषणार्थः। भूतसामान्ये चायं लुङ वेदितव्यः; भूतविशेषणेऽनद्यतन्यां लङलिटोर्विधानात्। `अकार्षीत्' इति। `सिचि वृद्धिः परस्मैपदेषु' (7.2.1) इति वृद्धिः; पूर्ववदीट्।

`वसतेः' इत्यादि। `वस निवासे' (धा.पा.1005) इत्यस्मादनद्यतने लङि प्राप्ते लुङ वक्तव्यः। दिवसः सकलोऽतिक्रान्ताया रात्रेश्चतुर्थो याम आगामिन्याश्च प्रथमो यामः-- इत्येषोऽनद्यतनः कालः। तत्र रात्रिविशेषेऽतिक्रान्ताया रात्रेश्चतुर्थे यामे प्रत्युत्थितः क्व भवानुषितः ? इति केनचित् पृष्टः कश्चित्, स तस्मिन् रात्रविशेषे दिवा वा प्रतिवचनं प्रयच्छन् लुङं प्रयुङ्क्ते-- `अहमत्रावात्सम्' इति। स च न प्राप्नोति; यस्मादसौ ततो रात्रिशेषात् पूर्वभागं प्रहरत्रयलक्षमधिशयितः, सोऽस्यानद्यतनकालः, ततश्चानद्यतने लङ स्यात्; तसमाल्लुङ् वक्तव्यः = व्याख्येयः। व्याख्यानं त्विहापि बहुलग्रहणमाश्रित्य कर्त्तव्यम्। `जागरणसन्ततौ' इति। यद्यसौ रात्रिशेषं सकलं सन्तत्याऽविच्छेदेन जागरितवानेवं लुङ् भवति। मुहूर्त्तमपि यद्यस्मिन् रात्रिविशेषे शयितवांस्ततो लङेव-- आहमत्रावसमिति। `अवात्सम्' इति। लुङ्, मिप्, `तस्थस्थ' (3.4.101) इत्यादिनाम्भावः, `वदव्रज' (7.2.3) इत्यादिना वृद्धिः; `सः स्यार्धधातुके'(7.4.49) इति सकारस्य तत्वम्।।

111. अनद्यतने लङ्। (3.2.111)

`अनद्यतने' इति। यद्ययं तत्पुरुषः स्यात् तदा पर्युदासो वा स्यात्, प्रसज्यप्रतिषेधो वा। तदा पूर्वस्मिन् पक्षेऽद्यतनाद्योऽन्यस्तस्मिन् भवितव्यम्। एवञ्च `अद्य ह्यो वाभुक्ष्महि' इत्यत्राप्यद्यतनव्यामिश्रे प्राप्नोति। अस्ति ह्यद्यतनानद्यतनसमुदायोऽनद्यतनादन्यः, इतरस्त्वद्यतने न भवतीत्येषोऽर्थो जायते, ततश्च भूतसामान्ये स्यात्। अनद्यतन इति अद्यतनभूतविशेषे प्रतिषेधः,न भूतसामान्ये। न हि भूतसामान्यं भूतविशेषः, तस्मात् तत्पुरुषपक्षो दोषवानिति मत्वाऽऽह-- `अनद्यतन इति बहुव्रीहिनिर्देशः' इति। अविद्यमानोऽद्यतनो यस्मिन्निति सोऽनद्यतनभूतधात्वर्थः, अत्र वर्त्तमानाल्लङ भवति, न त्वद्यतनानद्यतनसमुदाये, तत्राद्यतनैकदेशस्य सद्भावात्। भूतसामान्येऽपि न भवत्येव, विद्यते हि सामान्ये विशेषः; तस्यान्तर्भूतविशेषत्वात्। यत्राद्यतनगन्धोऽप्यस्ति तत्र लङा न भवितव्यमित्येषोऽर्थो बुहव्रीहौ सति लभ्यते। यदि तर्हि बहुव्रीहिरयम्, एवं सत्यद्यतनेऽपि प्राप्नोति, न ह्यद्यतने द्वितीयोऽद्यतनोऽस्ति ? नैतदेवम्; अद्यतनसामान्ये मुहूर्त्तादेरद्यतनविशेषस्य विद्यमानत्वात्। तस्मादद्यतनोऽविद्यमानाद्यतन इति न शक्यते वक्तुम्।

`अद्य ह्यो वा भुक्ष्महि' इति। लुङ्, `भुजोऽनवने' (1.3.66) इत्यात्मनेपदम्, महिङ्, `लिङसिचोरात्मनेपदेषु'(7.2.42) इति सिचः कित्त्वाद्गुणाभावः। `चोः कुः' (8.2.30) इति कुत्वम्-- जकारस्य गकारः, तस्य `खरि च' (8.4.55) इति चर्त्त्वं ककारः,पूर्ववत् षत्वम्।

`परोक्षे च' इत्यादि। परोक्षशब्दो रूढिशब्द इन्द्रियातिक्रान्तेऽर्थे वर्त्तते। परोक्षे लोकविज्ञाते = लोकप्रसिद्धे प्रयोक्तुर्दर्शनविषये लङन्तस्य यः प्रयोक्ता तस्य दर्शनविषये लङ् वक्तव्यः = व्याख्येयः। व्याख्यानं तु-- तस्यैव बहुलग्रहणमाश्रित्य कर्त्तव्यम्। ननु च विप्रतिषिद्धमिदमुच्यते-- परोक्षेऽर्थे दर्शनविषय इ ित,परोक्षो ह्यर्थोऽतीन्द्रिय उच्यते, इन्द्रियविषयभावापन्नस्तु दर्शनविषयः, ततो यदि परोक्षः, कथं दर्शनविषयः। यदि दर्शनविषयः कथं परोक्षः ? नैतदस्ति; शक्यदर्शनविषय इत्युक्तम्,अननुभूतत्वात् परोक्ष इत्यविरोधः। अरुणत्'इति। `रुधिर् आवरणे' (धा.पा.1438), रुधादित्वात् श्नम्, तिप्, हल्ङ्यादिना (6.1.68) तिलोपः। साकेतावरोधस्तदानीन्तनप्रयोक्तुर्दर्शनविषयत्वात् लोकप्रसिद्धश्च,कार्यव्यासङ्गदननुभूतत्वात् परोक्षश्च। परोक्ष इति किम् ?

उदगादादित्यः । `गातिस्था' (2.4.77) इत्यादिना सिचो लुक्। पूर्ववदादेशादि कार्यम्। लोकविज्ञात इति किम् ? चकार कटं देवदत्तः। प्रयोक्तुर्दर्शनविषय इति किम् ? जघान कंसं किल वासुदेवः। हन्तेः परोक्षे लिट्; द्विर्वचनम्, `अभ्यासाच्च' (7.3.55) इति कुत्वम्-- हकारस्य घकारः। कंसवधश्चिकारालवृत्तत्वादिदानीन्तनप्रयोक्तुर्दर्शनविषयो न भवति। यस्तु कंसवधेन तुल्यकालः प्रयोक्ता स लङमेव प्रयुक्तवान्--अहन् कंसं वासुदेव इति। मूलोदाहरणेऽपि प्रयोक्ता साकेतावरोधतुल्यकालो वेदितव्यः। तस्यैव ह्यसौ दर्शनविषयः,नान्यस्य।।

112. अभिज्ञावचने लृट्। (3.2.112)

`वत्स्यामः' इति। लृट्, मस्, `स्यतासी लृलुटोः' (3.1.33) इति स्य, पूर्ववत् सकारस्य तत्वम्, `अतो दीर्घो यञि' (7.3.101) इति दीर्घः। `वचनग्रहणम्' इत्यादि। असति हि वचनग्रहणेऽभिज्ञाशब्द एवोपपदे स्यात्। तस्मिंस्तु यावन्तोऽभिज्ञावचनास्तेषु सर्वेषु भवति।।

113. न यदि। (3.2.113)

`यदि' इति। सती सप्तमीयम्। अभिज्ञावचनञ्चानुवर्त्तते। तेन यत्र यच्छब्दोऽस्ति तत्र नियोगतोऽभिज्ञावचनं तत्सहितं न भवतीत्याह-- `यच्छब्दसहिते'इत्यादि। `अवसाम' इति। वसेर्लङ्, `नित्यं ङितः'(3.4.99) इति सलोपः, पूर्ववद्दीर्घः। `वासमात्रम्'इत्यादिना उत्तरसूत्रस्य नायं विषय इति दर्शयति। यदि हि तत्रापरं लक्षणमपेक्ष्यते तदोत्तरसूत्रे पाक्षिको विधिः स्यात्, स नेष्यते, तस्मान्नापेक्षते।।

114. विभाषा साकाङ्क्षे। (3.2.114)

`उभयत्रविभाषेयम्' इति। प्राप्ते चाप्राप्ते च। असति हि यच्छब्दे ` अभिज्ञावचने लुट्' (3.2.112) इति प्राप्ते, सति यच्छब्दे `न यदि' (3.2.113) इति प्रतिषेधादप्राप्ते। आकाङ्क्षणम् = आकाङ्क्षा,आकाङ्क्षया सह वर्त्तते साकाङ्क्षः। आकाङ्क्षा च सम्बन्धज्ञानमुच्यते, तच्चेतनावतो धर्मः, तस्मात् साकाङ्क्ष इति प्रयोक्तुर्विशेषणं विज्ञायत इत्याह-- `साकाङ्क्षश्चेत् प्रयोक्ता'इति। अस्यैवार्थ स्पष्टीकर्त्तुमाह--`साकाङ्क्षश्चेत प्रयोक्ता' इति। अस्यैवार्थ स्पष्टीकर्त्तुमाह-- `लक्ष्यलक्षणयोः' इत्यादि। तत्र यदि ह्येतदपेक्ष्यत एतदुक्तं भवति-- लक्ष्यलक्षणयोर्यः सम्बन्धस्तद्विषयज्ञानं यदि प्रयोक्तुरुपपन्नं भवति। यदि प्रयोक्ता लक्ष्यलक्षणयोः सम्बन्धमपेक्षत इति यावत्। `भोक्ष्यामहे' इति। भुजः पूर्ववदात्मनेपदम्, स्यप्रत्ययश्च, टेरेत्वम्, `चोः कुः' (8.2.30) इति कुत्वम्-- जकारस्य गकारः, `खरि च' (8.4.55) इति चर्त्वम्-- ककारः, सकारस्य षत्वम्। किं पुनर्लक्ष्यं लक्षणञ्च, ययोः सम्बन्धे प्रयोक्तुराकाङ्क्षेत्याह-- `वासो लक्षणम्'इति। परिज्ञातत्वाल्लक्षणम्, तेन हि जनो लक्ष्यते। `भोजनं तु लक्ष्यम्' इति। अपरिज्ञातत्वात्; न तु लक्षणम्। परिज्ञातं लक्षणमिति भवति, यथा-- अग्नेर्धुम इति।।

115. परोक्षे लिट्। (3.2.115)

`ननु च' इत्यादि। धात्वर्थो हि पूर्वापरीभूतावयवा साध्यमाना क्रिया। यच्च साध्यमानं तदसत्। तच्चासदिन्द्रियाणामविषयः, तेषां सद्विषयत्वात्। यच्चेन्द्रियाणामविषयः तत् परोक्षमिति स एव हि धात्वर्थः परोक्षः, ततः परोक्षग्रहणमनर्थकम्, व्यवच्छेद्याभावादिति भावः।

`सत्यमेतत्' इति। यदनन्तरमुक्तम्। यदि सत्यमेतत् तदा कस्य व्यवच्छेदार्थं परोक्षग्रहणं कृतमित्याह-- `अस्ति तु' इत्यादि। यत्र साध्यानि प्रत्यक्षाणि तत्रानिष्पन्ने क्रियात्मनि धात्वर्थे प्रत्यक्षाभिमानो लोकस्य भवति। ननु च सावधानान्यपि नैव प्रत्यक्षाणि;शक्तिस्वभावत्वात्, शक्तेश्च कार्यानुमेयत्वात्, न ह्यशक्तौ कार्यं करोतीति कार्यकरणे शक्तिरनुमीयते; तत् किमुच्यते साधनानि प्रत्यक्षाणि ? नैष दोषः;`द्रव्याश्रिता हि शक्तयः'इति द्रव्यस्य प्रत्यक्षत्वादाश्रयधममाश्रितेषु शक्त्यात्मकेषूपचार्याण्येतान्यपि प्रत्यक्षाणीत्युच्यन्ते। अथ वा-- तदपि साधनाश्रयं द्रव्यशक्तिमतोर्भेदस्याविवक्षितत्वात् साधनशब्देनोच्यते; तदनेन परोक्षग्रहणेन प्रत्यक्षाभिमानोऽस्ति, स एव परोक्ष इच्युच्यते-- तदाह-- `स यत्र नास्त' इति। आत्मविषय उत्तमस्य च धात्वर्थस्य परोक्षत्वं नोपपद्यते; तत्साधनानां प्रत्यक्षत्वात्। तत्र लोकस्य प्रत्यक्षत्वात्, ततश्चोत्तमेन सिध्यतीति चोद्यमाशङ्क्याह-- `उत्तमविषये' इत्यादि। आत्मसाध्या हि क्रिया, यत्र चित्तविक्षेपान्नोपपद्यते, तदासौ परोक्षा भवति, तेनोत्तमविषयेऽपि परोक्षभावः। तद्भवत्येव। `विललाप' इति। लपेर्विपूर्वस्योत्तमे णलि रूपम्। `अत्यन्तापह्नवे' इति। प्रत्यक्षमेतत्। अपह्नवः = अपलापः। स क्विदत्यन्तो भवति यः सर्वापह्नवः, क्वचिदनत्यन्तो य एकदेशापह्नवः। तत्र योऽत्यन्तः स सर्वापह्नवः, तत्र लिड्वक्तव्य, व्याख्येय इत्यर्थः। व्याख्यानं त्विहापि बहुलग्रहणमाश्रित् कर्त्तव्यम्। कश्चित् केनचित् पृष्टः-- `कलिङ्गेषु प्रस्थितोऽसि'इत्यादि। स एवमाह-- `नाहं कलिङ्गान् जगाम्' इति। अत्र केवलं न कलिङ्गविषयस्यापह्नवोऽपि तु गमनस्यापीति विद्यतेऽत्यन्तापह्नवः। यस्तु स्थानमात्रस्यापह्नवो न गमनस्यापि , तदानत्यन्तापह्नवे लङेव भवति-- न हि कलिङ्गेषु प्रत्यतिष्ठ इति। तथा कश्चित् केनचित् पृष्टः दक्षिणापथं प्रविश्य त्वयेदं कार्यं कृतमिति। स एवमाह-- `नाहं दक्षिणापथं प्रविवेश' इति। अत्रापि विद्यतेऽत्यन्तापह्नवः। तथा हि-- न केवलं दक्षिणापथपिषयं कार्यं प्रतिषिध्यते, अपि तु प्रवेशमपि।।

116. हशश्वतोर्लङ च। (3.2.116)

117. प्रश्ने चासन्नकाले। (3.2.117)
`प्रष्टव्यः प्रश्नः' इत्यनेन प्रश्नशब्दं कर्मसाधनं दर्शयति। करणसाधने हि पृच्छ्यतेऽनेनेति शब्दः प्रश्नशब्देनोच्यते। तथा च सति तस्योच्चर्यमाणत्वादात्मलाभस्य सर्वदैवासन्नकाल इत्यासन्नकालग्रहणमनर्थकं स्यात्। भावसाधनेऽप्यर्थान्तरवाचिभ्यो धातुभ्यो न स्यात्। `अगच्छत्'इति। `गम्लृ सृप्लृ गतौ' (धा.पा.982, 983), `इषुगमियां छः' (7.3.77) इति छत्वम्। `इयाज' इति। `लिट्यभ्यासस्योभयेषाम्'(6.1.17) इति सम्प्रसारणम्। `जघान' इति। कंसवधोऽत्र पृच्छमानः। स चेदानीन्तनप्रयोक्तुरपेक्षया विप्रकृष्टकालः। पञ्चवर्षाभ्यन्तरमासन्नकाल इति नैयायिका वर्णयन्ति। पञ्चवर्षातीतस्तु विप्रकृष्ट इति भवति। कंसवधोऽत्र विप्रकृष्टकालः।।

118. लट् स्मे। (3.2.118)
`नडेन स्म पुराधीयते' इति। इङोऽधिपूर्वाल्लट्, `भावकर्मणोः' (1.3.13) इत्यात्मनेपदम्, टेरेत्वम्, `सार्वधातुके यक्' (3.1.67), `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः। उपसर्गेण सहाकः सवर्णे (6.1.101) दीर्घत्वम्। अथ वा-- कर्त्तर्यात्मनेपदम्, अदादित्वाच्छब्दो लुक्, `आत्मनेपदेष्वनतः' (7.1.5) इत्यदादेशः, धातोरियङ यथायोगं पूर्ववत्।।

119. अपरोक्षे च। (3.2.119)
`ब्रवीति' इति। `ब्रुव ईट्' (7.3.93) । `कथयति' इति। `कथ वाक्यप्रबन्धे' (धा.पा.1851), चुरादावदन्तः, तस्माण्णिच्, `अतो लोपः' (6.4.48) , `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावात् `अत उपधायाः' (7.2.116) इति वृद्धिर्न भवति। अथ किमर्थं पुनरिदमारब्धम् ? पूर्वेण परोक्षे विधानादपरोक्षे न प्राप्नोति, अतस्तत्रापि यथा स्यादित्येवमर्थम्। ननु च पूर्वयोगे परोक्षग्रहणं निवर्तिष्यते, तस्मिन् निवृत्ते पूर्वेणैव परोक्षे चापरोक्षे च भविष्यति ? सत्यमेतत्; चोद्यमपि कश्चिद्विजानीयाद्यदि परोक्षग्रहणं निवृत्तं तत्सम्बद्धमनद्यतनग्रहणमपि निवृत्तमिति, तदन्यथा मा विज्ञायीति पूर्वसूत्रे परोक्षग्रहणमनुवर्त्तते, तस्मिंश्चानुवर्त्तमाने कर्त्तव्यमेतत्, अन्यथा ह्यपरोक्षे न स्यात्।।

120. ननौ पृष्टप्रतिवचने। (3.2.120)
`पृष्टप्रतिवचने' इति। प्रश्नः = पृष्टम्, भावे निष्ठा। पृष्टपूर्वकप्रतिवचनं पृष्टप्रतिवचनम्, शाकपार्थिवादित्वन्मध्यमपदलोपी समासः। `अनद्यतने परोक्ष इति निवृत्तम्' इति। अस्वरितत्वात्। `अकार्षीः कटं देवदत्त' इत्येष प्रश्नः। `ननु करोमि भोः'इत्येतत् प्रश्नपूर्वकं प्रतिवचनम्। `अवोचस्तत्र किञ्चिद्देवदत्त'इत्येष प्रश्नः। `ननु करोमि भोः'इत्येतत् प्रश्नपूर्वकं प्रतिवचनम्।
`नन्वकार्षीत्' इति। प्रश्नपूर्वकं प्रतिवचनं न भवतीति लुङेव भवति। ननु च प्रतिवचनं सर्वं प्रश्नपूर्वकमेवु, तदनर्थकं पृष्टग्रहणम्, व्यवच्छेद्याभावात् ? नैतदिष्टम् ;प्रतिवचनशब्दोऽयमस्त्येव पृष्टान्वाख्याने-- यः प्रश्नमन्तरेण न भवति; अस्त्यव्ययीभावे-- वचनं वचनं प्रतिवचनम्, यथार्थे `अव्ययम्' (2.1.6) इति वीप्सायामव्ययीभावः;अस्ति समाधिवचनः-- प्रतिपूर्वस्य वचेः समाधाविति दर्शनात्, तथा हि वक्तारो वदन्ति-- यदननाभिहितं तन्मया प्रयुक्तमिति, परिष्कृतमित्यर्थः; तदेवमनेकार्थे प्रतिवचनशब्द-, यदि पृष्टग्रहणं न क्रियते सर्वेष्वर्थेषु स्यात्। अस्मिंस्तु क्रियमाणे प्रश्नपूर्वो यः प्रतिवचनशब्दः, स एव गृह्यते, नान्य इति न भव्तयानर्थक्यम्।।

121. नन्वोर्विभाषा। 3.2.121)
`नाकर्षम्'इति। पूर्ववदम्भावः।।

122. पुरि लुङ् चास्मे। (3.2.122)
`पुराशब्दे' इति। एतेन पुराशब्द इहोपपदत्वेनोपात्तो न पुरिति दर्शयति। यद्येतदेव, अस्याकारान्तत्वात् पुरीति सप्तम्यन्तो निर्देशो नोपपद्यते ? `आतो धातोः' (6.4.140) इति योगविभागादाकारलोपाददोषः। अथ `पृ पालनपूरणयोः'(धा.पा.1086) इत्येतस्माद्भ्राजादिसूत्रेण (3.2.177) क्विपि विहितः `उदोष्ठ्यपूर्वस्य' (7.1.102) इत्युत्त्वे रपरत्वे च कृते यः पूःशब्द सम्पद्यते तस्येहाप्युपपदत्वेनोपादानमिति कस्मान्न विज्ञायते ? तस्यानद्यतनवृत्त्यसम्भवात्। पुराशब्दस्तु तत्रैव वर्त्तत इति तस्यैव ग्रहणं युक्तम्। `लुङ च' इति चकारेण लडनुकृष्यत इति दर्शयति। `यथाविषयम्' इति। `यथाऽसादृश्ये' (2.1.7) इति वीप्सायामव्ययीभावः। `अन्येऽपि'इति। लङादयः। `वसन्ति' इति। लट्। `अवात्सुः' इति। लुङ, `सिजभ्यस्तविदिभ्यश्च' (3.4.109) इति झेर्जुसादेशः, `वदव्रज' (7.2.3) इत्यादिना वृद्धिः, पूर्ववत् सकारस्य तत्वम्। `अवसन्' इति। लङ। `ऊषुः' इति। लिट्, `परस्मैपदानाम्' (3.4.82) इत्यादिना झेर्जुस्, द्विर्वचनम्, वच्यादिसूत्रेण (6.1.15) सम्प्रसारणम्, `लिट्यभ्यासस्योभयेषाम्' (6.1.17) इत्यभ्यासस्य च; `शासिवसिघसीनाञ्च' (8.3.60) इति षत्वम्।।

123. वर्त्तमाने लट्। (3.2.123)
`प्रारब्धोऽपरिसमाप्तश्च' इति। प्रारब्धो यः साधयितुं प्रस्तुतः, न च समाप्तिमुपगतः स वर्त्तमान इत्युच्यते। वर्त्तमानग्रहणं धात्वधिकारात् तदर्थस्यैव विशेषणं विज्ञायत इत्याह--- `वर्त्तमाने' इत्यादि। न ह्यधात्वर्थे धातोर्वृत्तिः सम्भवति। लटष्टकारः `टित आत्मनेपदानां टेरे' (3.4.79) इति विशेषणार्थः। अकारः `विदो लटो वा ' (3.4.83) इति विशेषणार्थः; इकारे ह्यच्चारिते लिडादीनां ग्रहणं स्यात्।।

124. लटः शतृशानचावप्रथमासमानाधिकरणे। (3.2.124)
शतृशानचोः शकारौ सार्वधातुकार्थौ। ऋकार उगित्कार्यार्थः। अप्रथमासमानाधिकरण इति पर्युदासोऽयम्। प्रथमाशब्दोऽयं विभक्तिविशेषे सोरौजस्परय्न्ते शास्त्रे रूढः। प्रथमाया अन्या द्वितीयादिका विभक्तिः = अप्रथमा। समानशब्दोऽयं साधारणवचनः, यथा-- देवदत्तयज्ञदत्तौ समानधनावित। अधिकरणशब्दोऽयमभिधेयवचनः समानञ्च तदधिकरणञ्चेति कर्मधारयः। अप्रथमया समानाधिकरणम् = अप्रथमासमानाधिकरणम्। `तृतीया' (2.1.30) इतियोगविभागात् समासः। ततः `यस्य च भावेन भावलक्षणम्' (2.3.37) इति सप्तमी। अप्रथमासमानाधिकरणभावेन शतृशानचोर्भावो लक्ष्यते। अप्रथमेति पर्युदासवृत्त्या द्वितीयादेर्विभक्तेर्ग्रहणम्, तेन प्रत्ययग्रहणपरिभाषया तदन्तविधिर्भविष्यतीत्याह-- `अप्रथमान्तेन चेत्' इत्यादि। `तस्य' इति। लटः। सामानाधिकरण्यम्' इति। समानाभिधेयमिति। यदि द्वितीयान्तेन शब्देन सामानाधिकरण्यम् = समानाभिधेयत्वं सम्भवत्येवं शतृशानचौ भवतः, नान्यथेति वाक्यार्थः। एवं विवृम्वताऽप्रथमासमानाधिकरणेऽत्र पर्युदास आश्रितः, न प्रसज्यप्रतिषेध इति दर्श्यते, अन्यथा हि यदि प्रसज्यप्रतिषेध आश्रितः स्यात् प्रथमान्तेन चेत सामानाधिकरण्यं न भवतीत्येवं ब्रूयात्। किं पुनः स्याद्यदि प्रसज्यप्रतिषेध आश्रितः ? अप्रथासमानाधिकरण उत्तरपदे शतृशानचौ न स्याताम्-- भज्यत इति भक्तिः, कुर्वन् भक्तिरस्य कुर्वद्भक्तिः, कुर्वाणो भक्तिरस्य कुर्वाणभक्तिः। ये च प्रथमासमानाधिकरणवृत्तयस्तद्धितास्तेषु न स्याताम्-- `प्रशंसायां रूपप्'(5.3.66) कुर्वद्रूपम्, कुर्वाणरूपमिति; `ईषदसमाप्तौ कल्पशब्देश्यदेशीयरः' (5.3.67) कुर्वत्कल्पः। ननु पर्युदासेऽपि भवत्येव दोषः, न ह्यत्राप्रथमान्तेन क्वचित् प्रथमासमानाधिकरणेऽपि भवत इति। प्रसज्यप्रतिषेधे तु प्रतिषेधं विधाय प्रतिषिद्धस्य च पुर्विधानमयुक्तम्। `पचन्तं देवदत्तं पश्य' इति। द्वितीयान्तेन सामानाधिकरण्यं दर्शयति। `पचता' इति। तृतीयान्तेन। विभक्तेर्विपरिणामं कृत्वा देवदत्तेनेति सम्बन्धात्। ननु च लडादेशस्यात्राप्रथमान्तेन सामानाधिकरण्यम्, न लटः; तस्य प्रयोगाभावात्। आदेशधर्मस्य स्थानिन्युपचारात् लटोऽप्युपचारितं सामानाधिकरण्यं भवतीत्यदोषः।अथ लड्ग्रहणं किमर्थम्, यावताऽनन्तरसूत्राल्लडित्यनुवर्त्तत एव ? स्यादेतत्; प्रथमान्तञ्चैतत्। षष्ठीनिर्देशेन चेहार्थः, तस्मात् षष्ठीनिर्देशार्थ पुनर्लड्ग्रहणं कर्त्तव्यमिति, एतच्चायुक्तम्,प्रथमान्तस्यापि लड्ग्रहमस्यार्थद्विभक्तिविपरिणामो भविष्यतीति षष्ठ्यन्तं विज्ञास्यत इत्यत आह-- `लडिति वर्त्तमाने' इत्यादि। अप्रथमासमानाधिकरणे पुनर्लड्ग्रहणम्। तेन क्वचित् प्रथमासमानाधिकरणे भवतः-- कुर्वन् ब्राह्मणः। `सन् ब्राह्मणः' इति। `अस भुवि' (धा.पा.1065), अदादित्वाच्छपो लुक्। `श्नसोरलोपः' (6.4.111), इत्यकारलोपः। `विद्यमानः' इत्यादौ सर्वत्र ब्राह्मण इत्यपेक्षते। `विद सत्तायाम्' (धा.पा.1171), दिवादिरात्मनेपदी, श्यन्। `जुह्वत्' (7.1.78) इति। `हु {दानादनयोः (आदाने इत्येके प्रीणनेऽपि इति भाष्यम्) -धा.पा.} दाने'(धा.पा.1083), `हुश्नुवोः सार्वधातुके' (6.4.87) इति यणादेशः, `नाभ्यस्ताच्छतुः (7.1.78) इति नुमागमाभावः। `अधीयानः'इति। `इङ अध्ययने' (धा.पा.11046), अधिपूर्वः। पूर्ववत् `अचिश्नु'(6.4.77) इत्यादिना इयङ।
`माङ्याक्रोशे' इति। माङ्युपपद आक्रोशे गम्यमाने लटः शतृशानचौ भवतः। `मा पचन्, मा पचमानः' इति। ननु चात्रैव माङि लुङा भवितव्यम्, एतस्मादेवाधिकविधानात् ? पुनर्लड्ग्रहणादाक्रोशे न भवतीत्यदोषः। `माङि लुङ' (3.3.175) इत्यस्य यत्राक्रोशे नास्ति सोऽवकाशः।
`केचिद्विभाषाग्रहणमनुवर्त्तयन्ति' इति। सन् ब्राह्मणोऽस्ति ब्राह्मण इत्यादौ विकल्पेन शतृशानचौ यथा स्यातामित्येवमर्थम्। केचिदिति वचनात् केचिन्नानुवर्त्तयन्तीत्युक्तं भवति। तेषामयमभिप्रायः-- यदि प्रथमासमानाधिकरणे नित्यं तौ भवतस्तदाऽप्रथमासमानाधिकणग्रहणं न कुर्यात्, `शतृशानचौ'इत्येवं ब्रूयात्। तत्राप्ययमर्थः-- सामान्येन प्रथमासानाधिकरणेऽन्यत्र शतृशानचोर्विधानात् पुनर्ग्रहणं न कर्त्तव्यं भवति।
तस्मादप्रथमासमानाधिकरणग्रहणसामर्थ्यादप्रथमासमानधिकरण एव नित्यौ तौ भवतः, प्रथमासमानादिकरणेष्वन्यथेति। यदि तर्हि विभाषाग्रहणमनुवर्त्तयन्ति, यथा सन् ब्राह्मणः, अस्ति ब्राह्मणः, विद्यमानो ब्राह्मणः,विद्यते ब्राह्मण इत्यादौ विकल्पेन भवतः; तथा कुर्वद्भक्तिः कुर्वाणभक्तिरित्येवमादावपि स्यातामित्यत आह--`सा च' इत्यादि। `तत्र' इति। व्यवस्थितविभाषयां सत्याम्। `यथादर्शनम्' इति। यथा लक्ष्यस्य दर्शनं तदनुरूपाः प्रयोगा उन्नेयाः। एतदुक्तं भवति-- लक्ष्यदर्शनवत् स्यात्। क्वचिन्नित्यं तौ शतृशानचौ वेदितव्यौ, क्वचित् पाक्षिकौ,क्वचिदविद्यमानाविति। तत्र कुर्वद्भक्तिः, कुर्वाणभक्तिः, कुर्वत्तरः, कुर्वत्तम इत्यादौ नित्यम् ; सन् ब्राह्मणः , अस्ति ब्राह्मण इत्यादौ पाक्षिकौ; तरप्तमवादिप्रत्यये परे तावविद्यमानावेव। `पचतितराम' इति। पचतिशब्दात् `तिङश्च' (5.3.56) इति तरप्, `किमेत्'(5.4.11) इत्यादिनामि कृते न भवतः।।

125. सम्बोधने च। (3.2.125)
`प्ऱथमासमानाधिकरणार्थ आरम्भः' इति। अवधारणमिह द्रष्टव्यम्। पूर्वयोगो ह्यप्रथमासमानाधिकरणार्थः, क्वचित् प्रथमासमानाधिकरणार्थश्च; अयं तु प्रथमासमानाधिकरणार्थं एव। यदि तर्हि पूर्वसूत्रं प्रथमासमानाधिकरणार्थमपि, तर्ह्येषंसति तौ यथा अन्यत्र प्रथमासमानाधिकरणेऽपि भवतस्तथा सम्बोधनेऽपि

भविष्यत इत्यपार्थकम् ? नापार्थकम्; तस्यैव प्रपञ्चार्थत्वात्। `हे पचन्' इति। `न ङिसम्बुद्ध्योः' (8.2.8) इति नलोपप्रतिषेधान्नलोपाभावः। `हे पचमान' इति। `एङ ह्रस्वात् सम्बुद्धेः' (6.1.69) इति सुलोपः।।

126. लक्षणहेत्वोः क्रियायाः। (3.2.126)

`धात्वर्थ विशेषणञ्चैतत्' इति। धात्वधिकारात्। अथोपपदे कस्मान्न भवतः ? क्रियाया इति वचनात्। यद्युपपदे स्यातां तदा क्रियाग्रहणमनर्थकं स्यात्। उपपदं हि धातोर्भवति, स च क्रियावचन इत्येन्तरेणापि क्रियाग्रहणं लक्षमहेतू क्रियाविषयौ विज्ञास्येते। तत् क्रियाग्रहणेन धात्वर्थविशेषणत्वे हि तयोः क्वचिद्धात्वर्थो द्रव्यस्य हेतुर्भवति, लक्षणं वा ; क्वचिद्गुणस्य , क्वचित्क्रियायाः। अतो द्रव्यादिनिवृत्यर्थं क्रियाग्रहणं युक्तम्; अतः `क्रियायाः' इति वचनम्। `क्रियाविषयौ' इति। क्रियाया इत्येतद्विवरणम्। क्रिया विषयो यथोस्तौ तथोक्तौ। एतेन `क्रियायाः' इति येयं षष्ठी सा सुब्व्यत्ययेन सप्तम्याः स्थाने विहितेति सूचयति। `शयाना भुञ्जते' इति। शीङोऽपवादित्वाच्छपो लुक्, `शीङः सार्वधातुके' (7.4.21) इति गुणः। अत्र शयनं लक्षणम्, भुजिक्रिया विषयः।तेन हि भुजिक्रिया लक्ष्यते तत्र शीङ वर्त्तते। `तिष्ठन्तोऽनुशासति' इति। तिष्ठतेः पाघ्रादिसूत्रेण (7.3.78) तिष्ठादेशः। अत्रावस्थानं लक्षणम्, तेनानुशासनक्रिया लक्ष्यते। `अर्जयन् वसति' अत्राध्ययनम्।

`पचति, पठति' इति। नात्र क्रियाया लक्ष्यलक्षणभावो विवक्षितः। `यः कम्पतेसोऽश्वत्थः'इति। अत्र हि कम्पनं लक्षणं भवतीति तेनाश्वत्थो लक्ष्यते, न तु क्रियाविषयम्, किं तर्हि ? द्रव्यविषयम्; अश्वत्थस्य द्रव्यविषयत्वात्। `यदुत्प्लवते तल्लघु' इति। अत्रोत्प्लवनेनलघुसंज्ञको गुणो लक्ष्यत इति गु विषयं तत्, न तु क्रियाविषयम्। वर्षतीति धावति, हन्तीति पलायत इत्यत्र यद्यपि वर्षणहननाभ्यां धावनपलायनक्रिये लक्ष्येते, तथापि शतृशानचौ न भवतः; `नन्वोर्विभाषा'(3.2.121) इत्यतो व्यवस्थितविभाषेत्यनुवर्त्तते; इतिकरणेन हेतुभावस्य द्योतितत्वात्। पूर्वनिपातलक्षमव्यभिचारलिङ्गम्' इति। `द्वन्द्वे घि' (2.2.32) इत्यनेन ध्यन्तस्य यः पूर्वनिपातः क्रियते तस्य व्यभिचारः। स्वविषये सत्यपि तस्य क्वचिदभावः। तस्य व्यभिचारस्य लिङ्गमयं निर्देशः।यदि ह्यभिचारी ध्यन्तस्य निपातः स्यात्, `हेतुलक्षणयोः'इति निर्देशं कुर्यात्। व्यभिचारे तु सति धूमाग्नी इत्येवमादय उपपन्ना भवन्ति।।

127. तौ सत्।

ननु च प्रकृतत्वादेव शतृशानचोरियं संज्ञा स्यात्, तत्किं तौग्रहणमित्याह-- `तौग्रहणम्' इत्यादि। उपाधिना विशेषमेनासंसर्गार्थं तौग्रहणमित्यर्थः। उपाधिस्तु वर्त्तमानकालः, तत्र शतृशानचोर्विहित्वात्। उपाध्यसंगर्हार्थे तौग्रहणे सति किं भवतीत्याह-- `शतृशानज्मात्रस्य' इत्यादि। मात्रग्रहणमुपाधिसंग्रहव्यवच्छेदार्थम्। असति हि तौग्रहणे यादृशौ प्रकृतौ तादृशयोरव संज्ञा स्यात्। कीदृशौ च तौ ? वर्त्तमानकलाविहितौ। ततश्च लृडादेशयोर्भविष्यत्कालविहितयोः सदिति संज्ञा न स्यात्। ननु च `लुटः सद्वा' (3.3.14) इति सच्छब्देन तौ विधीयेते, ततो वचनसामर्थ्यात् तु भविष्यतः ? न ब्रूमः-- विधानं तयोर्न सिध्यतीति, किं तर्हि ? विहितयोरुत्तरकालसंज्ञा न सिध्यति। ततश्च ब्राह्मणस्य करिष्यिन्, ब्राह्मणस्य करिष्यमाण इत्यत्र `पूरणगुण' (2.2.11) इत्यादिना षष्ठीसमासप्रतिषेधो न स्यात्। सद्ग्रहणं तु सच्छब्देनैव वर्त्तमानशतृशानजन्ते षष्ठीसमासप्रतिषेधार्थं स्यात्। तौग्रहणे शतृशानचोर्विशेषणमनपेक्ष्य रूपमात्रे संज्ञाऽऽख्यायत इति वर्त्तमानकाले विधानासंसक्तयोरपि संज्ञा सिध्यतीति।।

128. पूङ्यजोः शानन्। (3.2.128)

वर्त्तमानविहिताः शतृशानच्प्रभृतयः। एते लादेशा वा स्युः ? प्रत्यया वा ? तत्र यदि इह लट इत्यनुवर्त्तते तदा लादेशाः, अथ नानुवर्त्तते ततः प्रत्ययाः। तस्यादेशाः क्रियेरंस्तदा `नन्वोर्विभाषा'(3.2.121) इत्यतो विभाषाग्रहणमनुवर्त्तयितव्यं जायेत; अन्यथा पवते देवदत्तः, यजते देवदत्त इति तिङश्रवणं कुर्यात्। प्रत्ययलक्षणे तु वासरूपविधिना यदा लड् भवति तदा प्रत्ययश्रवणं तिङश्रवणमुपपद्यते। किञ्च, आदेशपक्षे `लः कर्मणि च भावे चाकर्मकेभ्यः' (3.4.69) इति भावकर्मणोरपि शानन्नादयः स्युः, कर्त्तर्येव चेष्यन्ते। प्रत्ययपक्षे तु `कर्त्तरि कृत्' (3.4.67) इति कर्त्तर्येव भवन्ति, न भावकर्मणोः, इह कतीह मण्डयमान इत्युत्तरसूत्रे चानशि कृते `तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः' (6.1.186) इतिनिघातः स्यात्, प्रत्ययपक्षे तु न भवति; अलसार्वधातुकत्वात्। चानशः `लः परस्मैपदम्' (1.4.99) `तङानावात्मनेपदम्' (1.4.100) इत्यात्मनेपदसंज्ञा प्रसज्येत, ततश्चात्मनेपदिभ्य एव स्यात्-- कतीह निघ्नाना इति। प्रत्ययपक्षे त्वलादेशान्न भवत्यात्मनेपदसंज्ञाप्रसङ्गः। तदेवमादेशपक्षे बहवो दोषाः प्रतिविधेयाः, प्रततिविधानेऽपि तेषां प्रतिपत्तिगौरवं भवतीति मत्वा प्रत्ययपक्षमाश्रित्याह-- `शानन्प्रत्ययो भवति' इति। शकारः सार्वधातुकसंज्ञार्थः। `पवमानः' इति। `पूङ पवने' (धा.पा.966), शप्, `आने मुक्' (7.2.82)।

`यदि' इत्यादि। `न लोकाव्यय'(2.3.69) इत्यादौ तृन्निति तृन एव प्रत्ययस्य निर्देश इति मन्यमानस्य प्रश्नः। `तृन्निति प्रत्याहारनिर्देशात्' इति। `सोमं पवमानः, नडमाघ्नानः' इति। षष्ठीप्रतिषेध इत्यनेन सम्बन्धनीयम्। यदि तृन्निति प्रत्ययग्रहणं स्यात् तदा शानन्प्रभृतीनां प्रत्ययार्थे सति `सोमं पवमानः' इत्यादौ षष्ठीप्रतिषेधो न स्यात्। न च तृन्निति प्रत्ययस्य ग्रहणम्, किं तर्हि ? प्रत्याहारस्य। तत्र चशानन्नादयोऽन्तर्भूता इति भवत्येव षष्ठीप्रतिषेधः। `द्विषः शतुर्वा वचनम्' इति। `द्विषोऽमित्रे' (3.2.131) इत्यनेन यः {शता'इति मुद्रितः पाठः} शतृ विधीयते तस्य प्रत्याहारेऽस्मिन्नन्तर्भावात् तद्योगे षष्ठीप्रतिषेधः स्यात्, ततश्चौरस्य द्विषन्निति पक्षे न स्यात्। तस्मात् `द्विष अप्रीतौ' (धा.पा.1013) इत्यस्य शत्रन्तस्य प्रयोगे द्वितीयायां प्राप्तायां वा षष्ठी

वक्तव्या।।

129. ताच्छील्यवयोवचनशक्तिषु चानश्। (3.2.129)
`मण्ड्यमानाः' इति। `मडि भूषायाम्' (धा.पा.321), इदित्त्वान्नुम्। हेतुमण्णिच्। `भूषयमाणाः' इति। `भूष अलङ्कारे' (धा.पा.682), चुरादिणिच्। `कवचं पर्यस्यमानाः'इति। दिवादित्वाच्छ्यन्। तदेव वयो गम्यते तत्र स्थिताः कवचं पर्यस्यन्ते। कवचम् = सन्नाहम्। `शिखण्डं वहमानाः'इति। अत्रापि तथाविधं वयो गम्यते यत्र वर्त्तमानाः शिखण्डं वहन्ति। शिखण्ण्टः = चूडा। वचनग्रहणं वैचित्र्यार्थम्, विनापि हि तेन वयसि गम्यमाने प्रत्ययो लभ्यत एव, यथा च `वयसि च' (3.2.10) इत्यत्र । `निघ्नानाः' इति। हननशक्तिरिति गम्यते।।

130. इङ्धार्योः शत्रकृच्छ्रिणि। (3.2.130)
`अकृच्छ्रिणि कर्त्तरि'इति। एतेनाकृच्छ्रिणीति प्रत्ययार्थस्य कर्त्तुरेतद्विशेषणमिति दर्शयति। `अकृच्छ्रः सुखसाध्यो यस्य धात्वर्थः सोऽकृच्छ्री' इति। `अत इनिठनौ' (5.2.115) इतीनिः। `अधीयन्' इति। पूर्ववदियङ। `धारयन्' इति। `धृङ अवस्थाने' (धा.पा.1412) चुरादिणिच्।।

131. द्विषोऽमित्रे। (3.2.131)
`अमित्रः शत्रुः' इति। शत्रादेवामित्रशब्दस्य रूढत्वात्।
`द्वेष्टि' इति। अदादित्वाच्छपो लुक्।।

132. सुञो यज्ञसंयोगे। (3.2.132)
`यज्ञसंयोगः' इति। कर्मसाधनः संयोगशब्दः। अत एव वृत्तावाह-- `यज्ञसंयुक्तेऽभिषवे' इति। संयुक्तः = सम्बद्धः, यज्ञेन संयुक्तो यज्ञसंयुक्तः। कदा चाभिषवो यज्ञसंयुक्तो भवति ? यदा यज्ञाङ्गं भवति। `सुन्वन्तः' इत्यादि। `स्वादिभ्यः शनुः' (3.1.73) । `सर्वे यजमानाः' इति। सुन्वन्त इत्यनेन यजमानाः सत्त्रिणो यज्ञस्य ये स्वामिनस्तेऽभिधीयन्ते, न तु याज्ञिका इति दर्शयति। कथं पुनरेषोऽर्थो लभ्यते, यावता यथाभिषवस्य यजमानाः, कर्त्तारस्तथा याजका अपीत्याह-- `संयोगग्रहणम्' इत्यादि। इह `सुञोयज्ञे' इत्येतद्वेदितव्यम्, एवमपि ह्युच्यमाने यज्ञसंयुक्तताभिषवस्य लभ्यत एव; यज्ञविषयश्चैष सुनोत्यर्थो भवतीत्यर्थस्य प्रतिपत्तेः, तस्मात् संयोगग्रहणमिति न कर्त्तव्यमेतत् ? क्रियते प्रधानकर्तृप्रतिपत्त्यर्थम्। यागस्य ये कर्त्तारो भूत्वा फलं प्राप्नुवन्तः सुन्वन्तस्ते प्रधानकर्त्तारः, ते पुनर्यजमानाः,न याजकाः।।

133. अर्हः प्रशंसायाम्। (3.2.133)

134. आ क्वेस्तच्छीलतद्धर्तत्साधुकारिषु। (3.2.134)
`तच्छीलादिषु कर्त्तुषु' इति। अनेन तच्छीलादीनां प्रत्ययार्थविशेषणतां दर्शयति।`अभिविधौ चायमाङ' इति। अभिविधिः = अभिव्याप्ति-। अत्राङ न मर्यादायाम्, तेन वक्ष्यमाणस्य क्विपोऽप्ययमर्थनिर्देश इति। सोऽपि तच्छीलीदिष्वेव भवति। `तत्'इत्यादि। `धातोः' (3.1.91) इति वर्त्तते,न च धातोः शीलादिविशेषणमुपपद्यते, तस्मात् तस्य योऽर्थः स शीलादीनां त्रयाणां विशेषणभावेन तच्छीलादिशब्देन निर्दिश्यते। स धात्वर्थः शीलं यस्य स तच्छीलः। स एव धर्मो यस्य स तद्धर्मा। साधु करोतीति साधुकारी, तस्य धात्वर्थस्य साधुकारीति यावत्। `स्वभावतः' इति। भवत्यस्मात् फलनिरपेक्षा वृत्तिरिति भावः। स्वभावश्चैतनिको धर्मः, स पुनः शीलमेव।`फलनिरपेक्षः' इति। फलाकाङ्क्षारहितः। `तत्र'इति। धात्वर्थे। `तदाचारः'इति। तच्छीलात् तदाचारस्यान्यथात्वं दर्शयति। `यो धात्वर्थं साधु करोति' इति। अत्रापि विना शीलेनेति सम्बध्यते। `साधु'इति। प्रशस्तमित्यर्थः। क्रियाविशेषणत्वान्नपुंसकत्वम्।।

135. तृन्। (3.2.135)
`मुण्डयितारः' इति। मुण्डां कुर्वन्तीति `मुण्डमिश्र' (3.1.21) इत्यादिना णिच्, इष्ठवद्भावेन टिलोपः। `{मुण्डयितारः श्राविष्ठायना भवन्ति बधूमूढाम्'--काशिका।} वधूमूढां श्राविष्ठायना मुण्डयन्ति' इति। एतेषां कुलधर्मः। `आह्वरकाः श्राद्धे सिद्धेऽन्नमपहरन्ति' इति। एतेषामाचारः। यः कटं साधु करोतीति स कर्त्ता कटमिति। खेटं यो लीलया गच्छति स साधु गच्छति।
`तृन्विधौ' इत्यादि। अताच्छील्यार्थ आरम्भः। अस्मिंस्तृन्विधावनुपसर्गस्य धातोस्तृन् वक्तव्य ऋत्विक्ष्वभिधेयेषु। `होता' इति। `हु {दानादनयोः। आदाने इत्येके।प्रीणनेऽपि इति भाष्यम्-- धा.पा.} दाने' (धा.पा.1083)। `पोता' इति। `पूङ पवने' (धा.पा.966)। `उद्गाता' इति। `कै गै शब्दे' (धा.पा.916,917)।`स्वरे विक्षेषः' इति. तृचि सति `गतिकारकोपपदात् कृत्' (6.2.139) इति प्रकृतिस्वरेणान्तोदात्तत्वं भवति, तृनि तु सति `गतिरनन्तरः' (6.2.49) इत्यनुवर्त्तमाने' `तादौ च निति कृत्यतौ' (6.2.49) इति पूर्ववदस्य प्रकृतिस्वरः प्रसज्येत।

`नयतेः षुक् च' इति। कृते गुणे षुगागमो वेदितव्यः; अन्यथा ह्यलघूपधत्वाद्गुणो न स्यात्। गुणोऽपि वा वक्तव्यः। अत्र ऋत्विगिति वर्त्तते। अयमप्यताच्छील्यार्थ आरम्भः।

`त्विषेःट इत्यादि। `त्विष दीप्तौ' (धा.पा.1001) इत्यस्माद्देवतायामभिधेयां तृन् वक्तव्यः, अकारश्चोपधाया आदेशो भवति। `अनिट्त्वं च'इति। एतस्य सर्वशेषत्वे चास्य पोतेत्यत्रानिट्त्वं सिद्धं भवति।

`क्षदेः'इत्यादि। `क्षद'इति सौत्रो धातुः। `गुधृवीपचिवयियमिसदि क्षदिभ्यस्त्रः'(पं.उ.4.166) इत्याद्युणादिसूत्रपाठात्। उणादिषु निपातितत्वात् होत्रादय इति सिद्धम्। तत्र हि `नप्तृनेष्टृत्वष्टृक्षत्तृपोतृहोतृभ्रातृजामातृपितृदुहितृ' (द.उ.2.3.) इत्येते निपातिताः।।

136. अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्। (3.2.136)

अलम्पूर्वः करोतिः, पुनः स एव निराङ्पूर्वः, `जनी प्रादुर्भावे' (धा.पा.1149) प्रपूर्वः;`{पचि धा.पा.} पच व्यक्तीकरण' (धा.पा.174);`पद गतौ' (धा.पा.1898), पतिमन्ये पठन्ति;`शल हुल पत्लृ गतौ' (धा.पा.843,844,845)। `{मदी हर्षग्लेपनयोः'-धा.पा.)मदी तृप्तिसाधने' (धा.पा.815)-- एते पदादय उत्पूर्वाः। `रुच {दीप्तवभिप्रीतौ च' -धा.पा.} दीप्तौ' (धा.पा.745); `त्रपूष् लज्जायाम्' (धा.पा.374) अपपूर्वः, `वृतु वर्त्तने' (धा.पा.758), `वृधु वृद्धौ' (धा.पा.759), `षह मर्षणे' (धा.पा.1809), `चर गत्यर्थः' (धा.पा.559)-- एभ्य इष्णुज् भवति, {तृणोऽपवादः इति, मु.पाठः} तृनोऽपवादः। यदा त्वलम्पूर्वः करोतिर्मण्डने वर्त्तते, तदा `क्रुधमण्डार्थेभ्यश्च' (3.2.151) इति युच् प्राप्नोति;पूर्वविप्रतिषेधश्च वक्तव्यः; अन्यथा मण्डनादन्यत्र सावकाशमिष्णुचं परत्वाद्बाधते। येऽत्र सोपसर्गाः पठ्यन्ते, तेभ्य एतदुपसर्गपूर्वेभ्य एव भवति, अन्येभ्यस्त्वनियमेन।।

137. णेश्छन्दसि। (3.2.137)

`धारयिष्णवः, पारयिष्णवः'इति। `धृङ अवस्थाने' (धा.पा.1412), `पृ पालनपूरणयोः (धा.पा.1086); हेतुमण्णिच्, `अयामन्त'(6.4.55) इत्यादिनायादेशः।।

138. भुवश्च। (3.2.138)

`योगविभाग उत्तरार्थः' इति। उत्तरसूत्रे भवतरेवानुवर्त्तनं यथा स्यात्; अन्यथा यदि `णिभूभ्याञ्च' इत्येको योगः क्रियते तदा णिग्रहणमप्यनुकृष्येत। `भाजिष्णुना' इत्याद। लौकिकप्रयोगः। तस्योपन्यासो भाषायामपि `भ्राजृ दीप्तौ' (धा.पा.181) इत्येतस्मादिष्णुच्प्रदर्शनार्थः।।

139. ग्लाजिस्थश्च क्स्नुः। (3.2.139)

अथ स्थास्नुरित्यत्र `घुमास्थागापा' (6.4.66) इत्यादिसूत्रेण कस्मादीत्वं भवतीत्याह-- `पिच्चायम्' इत्यादि। ईत्त्वं क्ङिति। तत्र `दीङो युडचि क्ङिति' (6.4.63) इत्यनुवृत्तेः। न चायं कित्, न चायं ङित्; किं तर्हि ? गित्। गकारस्य त्वश्रवणम्,चर्त्वभूतस्य निर्देशात्। यदि तर्हि गिदयम्, जिष्णुरित्यत्र गुणः प्राप्नोति, यस्मात् `क्ङिति च' (1.1.5) इति क्ङिति प्रत्यये गुणः प्रतिषिध्यते, न गितीत्यत आह-- `क्ङिति च' इत्यादि. न हि `क्ङिति च' (1.1.5) इत्यत्र ककारङकारावेव निर्दिश्येते, किं तर्हि ? गकारोऽपि कृतचर्त्वः,तेन गित्यपि गुणो न भवति। भूष्णुरित्यत्र तर्हि श्रयुकः किति' (7.2.11) इट्प्रतिषेध उद्यमानो गिति न स्यादित्यत आह-- `श्रयुकः' किति इत्यादिना गकारश्चर्त्वभूतो निर्दिश्यते' इति प्रकृतेन सम्बन्धः। `तेन' इति। गकारस्य चर्तवभूतस्य निर्देशेनेति।

`कस्नोर्गित्वात्'इत्यादि। गकार इत्संज्ञको यस्य स गित्, तद्भावो गित्त्वम्। तस्मात् गित्त्वान्न स्यास्नुरित्यत्रेकारः। तिष्ठतेरीकारो न भवति। कस्मात् पुनर्गित्तवादीकारो न भवतीत्याह-- `कङितोरित्वशासनात्' इत्यादि। ककारेऽकार उच्चारणार्थः। यस्मात् क्ङितीत्वमुच्यते, अयं तु गित्, तस्मात् क्ङिति विधीयमानमीत्वं गित्वादिह न प्राप्नोति। यद्येवम्, जिष्णुरित्यत्र गुणः प्राप्नोतीत्यत आह-- `गुणाभावः'इत्यादि। त्रिषु ककारगकारङकारेष्वित्संज्ञकेषु यो गुणप्रतिषेधः स स्मर्त्तव्य- = ज्ञातव्यः। `क्ङिति च' (1.1.5) इत्यत्र गकारश्चर्त्वभूतो निर्दिष्टः। यदि तर्हि गिदयम्, `भूष्णुरित्यत्र `श्रयुकः किति'(7.2.11) इत्यीट्प्रतिषेधो न स्यादित्यत आह-- `श्रयुकोऽनिट्चत्वमिट्प्रतिषेधो भवतीति वेदितव्यम्। यदि गकारश्चर्त्वभूतः `श्रयुक किति' (7.2.11) इतीट्प्रतिषेधो न स्यादित्यत आह-- `शयुकोऽनिट्त्वम्' इत्यादि. गकारोऽपि ततश्चर्त्वभूतो निर्दिश्यते। तन ककारगकारयोर्द्वयोरपीत्संज्ञकयोः श्रयुकोऽनिट्त्वमिट्प्रतिषेधो भवतीति वेदितव्यम्। यदिगकारश्चर्त्त्वभूतः `श्रयुकः किति' (7.2.11) इत्यत्र निर्दिश्यते,` हशि च' (6.1.114) इत्युत्वं प्राप्नोति, तस्यासिद्धत्वात् ? सौत्रत्वान्निर्देशश्यासंहितया पाठान्न भविष्यतीत्यदोषः। वामनस्य त्वेतत् सर्वमनभिमतम्। यथा नाभिमतं तथा `क्ङिति च' (1.1.5) इत्यत्र प्रतिपादितम्। `दंशेः'इत्यादि. उपसंख्यानशब्दः प्रतिपादने वर्त्तते। `दन्श दंशने' (धा.पा.898) इत्येतस्मादपि क्स्नुप्रत्ययस्योपसंख्यानम् = प्रतिपादनं कर्त्तव्यम्। तत्रेदं प्रतिपादनम्-- पूर्वसूत्राच्चकारोऽनुर्त्तते, स चानुक्तसमुच्चयार्थः, तेन दंशेरपि भविष्यतीति। `दंक्ष्णवः' इति। व्रश्चादिना (8.2.36) षत्वम्, `षढोः कः सि' (8.2.41) इति कत्वम्। `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपो न भवति, क्स्नोर्गित्वात्। ये तु कित्वमिच्छन्ति, तैरिह नकारलोपप्रतिषेधः `नाञ्चेः पूजायाम्' (6.4.30) इत्यत्र नेति योगविभागेन कर्त्तव्यः। यत्नान्तरं वा तैरास्थेयम्-- नकारस्यानुस्वारः, तस्य परसवर्णः।।

140. त्रसिगृधिधृषिक्षिपेः क्नुः। (3.2.140)
`त्रस {धारणे-- धा.पा.} उद्वेगे' (धा.पा.1741), `गृधु अभिकांक्षायाम्' (धा.पा.1246) , `ञिघृषा प्रगल्भ्ये' (धा.पा.1269), `क्षिप प्रेरणे' (धा.पा.1285)। `त्रस्नुः' इति। `नेड्वशिकृति'(7.2.8) इतीट् प्रतिषेधथः। `गृध्नुः 'इति। `क्ङिति च' (1.1.5) इति गुणाभावः।।

141.शमित्यष्टाभ्यो घिनुण्। (3.2.141)
`शमु उपशमे' (धा.पा.1201), `तमु काङ्क्षायाम्'(धा.पा.1202), `दमु {उपशमे-धा.पा.} उपरमे' (धा.पा.1203), `श्रमु तपसि खेदे च' (धा.पा.1204), `भ्रमु अनवस्थाने' (धा.पा.1205), `क्षमु सहने' (धा.पा.1206), `क्लमु ग्लानौ' (धा.पा.1207), `मदी हर्षे'(धा.पा.1208)। `उत्तरत्र कुत्वार्थः' इति। सम्पर्कीत्यादौ `चजोः कु घिण्यतोः' (7.3.52) इति यथा स्यात्। `उकार उच्चारणार्थः' इति। अनुबन्धत्वमस्य निरस्यति। अनुबन्धत्वे सति शमिनौ शमिन इति `उगिदचाम्' (7.1.70) इति नुम् प्रसज्येत। इह शमिनितराम्, शमिनितमामिति `नद्याः शेषस्यान्यतरस्याम्' (6.3.44) इति वर्त्तमाने `उगितश्च' (6.3.45) इत्यन्यतरस्यां ह्रस्वत्वं स्यात्, अन्यथा ह्यस्यानुबन्धकरणमनर्थकं स्यात्। तस्मदुच्चारणार्थ एवोकारो भवति। ह्रस्वत्वञ्च `घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु' (6.3.43) इत्यनेन नित्यं भवति।
`शमी' इति। `अत उपधाया-' (7.2.116) इति वृद्धिर्न भवति, `नोदात्तोपदेश' (7.3.34) इत्यादिना प्रतिषिद्धत्वात्। `सौ च' (6.4.13) इति दीर्घः। `असिता'इति। `असु क्षेपणे' (धा.पा.1209) तृनि भवति।।

142.
सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च। (3.2.142)
`पृची सम्पर्के' (धा.पा.1462) सम्पूर्वः। `रुधिर् आवरणे' (धा.पा.1438) अनुपूर्वः;`यम उपरमे' (धा.पा.984), `यसु प्रयत्ने' (धा.पा.1210) आङ्पूर्वः,`सृज विसर्गे' (धा.पा.1178), `ज्वर रोगे' (धा.पा.776) सम्पूर्वः;`क्षिप प्रेरणे' (धा.पा.1285), `रट परिभाषणे' (धा.पा.297), `वद वक्ताव्यां वाचि' (धा.पा.1009), `दह भस्मीकरणे' (धा.पा.991), `मुह वैचित्त्ये' (धा.पा.1198) परिपूर्वः, `दुष वैकृत्ये' (धा.पा.1185), `द्विष अप्रीतौ' (धा.पा.1013), `द्रुह जीघांसायाम्' (धा.पा.1197),`दुह प्रपूरणे' (धा.पा.1014), `क्रीडृ विहारे' (धा.पा.350) आङ्पूर्वः, `विजिर् पृथग्भावे' (धा.पा.1094) विपूर्वः, `त्यज {हानौ इत्येव-धा.पा} वयोहानौ' (धा.पा.986), `रञ्ज रागे' (धा.पा.999), `भज सेवायाम्' (धा.पा.998), `चर गत्यर्थ' (धा.पा.559) अतिपूर्वः, स एवानुपूर्वः, `मुष स्तेये' (धा.पा.1530) आङ्पूर्वः, `हन हिंसागत्योः' (धा.पा.1012) अभ्याङ्पूर्वः। शऱेषा वृत्तावेव निर्दिष्टाः। `न त्वदादिः'इति। `गृह्यते'इति सम्बध्यते। आदादिकः कस्मान्न गृह्यत इत्याह-- आदादिकस्तु लुग्विकरणः, तस्मात् स न गृह्यते। `परिदेविर्भ्वादिः' इति। `गृह्यते' इति सम्बन्धः। अथ परिदिवेः क्रीडाद्यर्थस्य ण्यन्तस्य ग्रहणं कस्मान्न भवति ? अण्यन्तैरितरैः साहचर्यात्। `सामान्येन गृह्यते' इति। विशेषाभावात्। `द्वयोरपि ग्रहणम्' इति। तत एव हेतोः। `निपातनादनुनासिकलोपः' इति। `त्यजरज'इति सूत्रे निरनुनासिकस्योच्चारणमेव निपातनम्। `सम्पर्की' इति। लघूपधगुणः। `आयामी' इति। `अत उपधायाः' (7.2.116) इति वृद्धिः। `परिसारी' इति। अत्रापि `अचो ञ्णिति' (7.2.115) इति वृद्धिः। `अभ्याघाती' इति। पूर्ववद्घत्वतत्वे।।

143. वौ कषलसकत्थस्रम्भः। (3.2.143)

144. अपे च लषः। (3.2.144)

145. प्रे लपसृद्रुमथवदवसः। (3.2.145)
`प्रलापी, प्रसारी' इति। `लप व्यक्तायां वाचि'(धा.पा.402), `सृ गतौ' (935)। `प्रद्रावी, प्रमाथी'इति। `दु द्रु गतौ' (धा.पा.944 945), `{मथे विलोडने-धा.पा.} मथ विलोडने' (धा.पा.848)। `नाच्छादनार्थस्य' इति। न `वस आच्छादने' (धा.पा.1023)इत्येतस्य।।

146. निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ्। (3.2.146)
`णिदि कुत्सायाम्' (धा.पा.66), `अर्द हिसि हिंसायाम्' (धा.पा.1828, 1829), `खादृ भक्षणे' (धा.पा.49), `णश अदर्शने' (धा.पा.1194) विपूर्वः, हेतुमण्ण्यन्तः। `क्षिपिः'पूर्वोक्त एव, एवं रटिर्वदिः परिपूर्वो हेतुमण्ण्यन्तः, `भाव व्यक्तायां वाचि (धा.पा.612) व्याङ्पूर्वः। `असूय' इति कण्डवादियगन्तस्य ग्रहणम्। अत्र क्लिशेरुपतापार्थस्य भाषतेश्च `अनुदात्तेश्च हलादेः' (3.2.149) इति युचि प्राप्ते वुञ्विधानम्। शेषेभ्यस्तु तृनि। ननु `परश्च' (3.1.2) इति दिग्योगलक्षणया पञ्चम्या भवितव्यम्, यथा वृत्तौ -- निन्दादिभ्यो धातुभ्यः' इति, तत्कथं सूत्रे प्रथमेत्यत आह-- `पञ्चम्यर्थे प्रथमा' इति। `व्यत्ययो बहुलम्'

(3.1.85) इतिसुब्व्यत्ययेनेति भावः। समाहारद्वन्द्वाच्च प्रथमैकवचनम्, पुंल्लिङ्गं तु व्यत्ययेन। `असूयकः'इति। `अतो लोपः' (6.4.48) इत्यकारलोपः। अथ किमर्थं निन्दादिभ्यो धातुभ्यो वुञ् विधीयते, यावता वाऽसरूपविधिनैव निन्दकादयः,सिद्धाः, तदेव हि रूपम्, स एव स्वरः, इहैवैकत्र स्वरविशेषोऽस्ति-- असूयक इति, अत्र वुञि सति ञित्वादादेरुदात्तत्वं भवति, ण्वुलि तु सति लित्प्रत्ययात् पूर्वस्य स्यात्, तस्मादसूयतेरेवैकस्माद्वुञ्, विधातव्यः, नेतरेभ्यो निन्दादिभ्य इत्यत आह-- `ण्वुलैव सिद्धे'इत्यादि। यदि तच्छीलादिषु वाऽसरूपविधिना तृजादयोऽपि स्युः निन्दादिभ्यो वुञ् न विदध्यात्, विहितश्चासौ, अत एव वुञ्विधानं ज्ञापयति-- तच्छीलादिषु वाऽसरूपविधिर्नास्तीति। तेनालङ्कारकः, निराकर्त्तेत्यादीनां तच्छीलादिषु साधुत्वं न भवति।।

147. देविक्रुशोश्चोपसर्गे। (3.2.247)
`आदेवकः' इति। दिवेः क्रीडाद्यर्थाद् ण्यन्ताद्वुञ्।`आक्रोशकः' इति। `क्रुश {आह्वाने रोदने च- धा.पा.} आह्वाने' (धा.पा.856)। `क्रोष्टा' इति। व्रश्चादिना (8.2.36) षत्वम्।।

148. चलनशब्दार्थादकर्मकाद्युच्। (3.2.148)
चलनं देशान्तरप्राप्तिहेतुः क्रियाविशेषः। शब्दः श्रोत्रविषोऽर्थः। `चलनः, चोपनः' इति। `चल कम्पने' (धा.पा.832),`चुप मन्दायां गतौ' (धा.पा.403)। `शब्दनः' इति. `शब्द {उपसर्गादाविष्कारे भाषणे च'-- धा.पा.}शब्दने उपसर्गा विष्कारे ' (धा.पा.1714) इति चौरादिकः। अथ वा-- `प्रतिपदिकाद्धात्वर्थे बहुलम्' (ग.सू.1860 चुरादिः- 1915) इत्यादिना णिच्, `शब्दवैरकलह' (3.1.17) इत्यादिना णिजन्ताद्युच्। `रवणः'इति। `रु शब्दे' (धा.पा.1034)।।

149. अनुदात्तेश्च हलादेः। (3.2.149)
`एधिता'इति। `एध वृद्धौ' (धा.पा.2)। `जुगुप्सनः,मीमांसनः' इति `गुप्तिज्किद्भ्यः सन्'(3.1.5) `मान्बध' (3.1.6) इत्यादिना सनि दीर्घे च कृते भवतः। अत्र तदन्तौ समुदायावनुदात्तेतौ अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवतीति। तथा च यद्यादिग्रहणं न क्रियते तदा ताभ्यां न स्यात्; यस्मादसत्यादिग्रहणे हला तु तदन्तविधिर्विज्ञायते-- अनुदात्तेतो हलन्तादिति। न च जुगुप्समीमांसशब्दौ हलन्तौ, किं तर्हि ? अजन्तौ। आदिग्रहणे सत्यहलन्तेभ्योऽपि भवतीत्यादिग्रहणं कर्त्तव्यम्। तच्च तदा कर्त्तव्यं यदातो लोप आर्धधातुके परतो भवतीत्ययं पक्षः, न तु यदार्धधातुके विषयभूत इत्येष पक्षः। तदा ह्यार्धधातुकविवक्षायां विज्ञायमाने हलन्तग्रहणमनर्थकं स्यात्; व्यावर्त्याभावात्। तस्माद् हल्ग्रहणसामर्थ्यादादेर्विशेषणं विज्ञास्यत इत्यादिग्रहणं न कर्त्तव्यमेव। अत्रादिग्रहणं विस्पष्टार्थमेव व्याख्येयम्। `वसिता' इति। `वस आच्छादने' (धा.पा.1023)।।

150. जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः। (3.2.150)
`जवनः'इति। `जु' सौत्रौ धातुः; गतौ वर्त्तत इत्येके। विशेषहेतौ वेग इत्यपरे। `चंक्रमणः, दन्द्रमणः'इति। `क्रमु पादविक्षेपे' (धा.पा.473)। `द्रम हम्म गतौ' (धा.पा.466, 467), `नित्यं कौटिल्ये गतौ' (3.1.23) इति यङ्, द्विर्वचनम्, `नुगतोऽनुनासिकान्तस्य' (7.4.85) इति नुक्, `अतो लोपः' (6.4.48) इत्यकारलोपः, `यस्य हलः' (6.4.49) इति यकारलोपः। `ज्वलनः, शोचनः' इति। `ज्वल ह्वल सञ्चलने'(धा.पा.804,805), `शुच शोके' (धा.पा.183)।
ननु चात्र जुचंक्रम्यदंद्रम्यप्रभृतयश्चलनार्थाः,पदिस्त्वनुदात्तेत, हलादिश्च; तस्मादेतेभ्यो यथायोगं पूर्वयोगाभ्यां युच्, सिद्धः, ततः किमर्थमिह ग्रहणमित्याह-- `चलनार्थानाम्' इत्यादि। असति तेषां ग्रहम इह चंक्रमणो ग्रामस्येत्येवमादौ न स्यात्;ग्रामादेः कर्मणो विवक्षितत्वात्। तस्मात् सकर्मकेभ्यो यथा स्यादित्येवमर्थमेषां ग्रहणम्। `ज्ञापकार्थम्' इत्यादिना मतान्तरं दर्शयति। `अलंकृञस्तृन्न भवति' इति। अनेनापि ज्ञापकस्य प्रयोजनम्। अलंकर्त्तेति साधुर्न भवतीत्यध्याहार्यम्। कथं पुनः पदिग्रहणं ज्ञापकमित्याह-- `तथा हि' इत्यादि। विशेषविहितेनोकञा बाधा मा भूत्, समावेश एव यथा स्यादित्येवमर्थमिह पदिग्रहणं क्रियते। यदि ताच्छीलिके वाऽसरूपविधिः स्यात् ततोऽसरूपत्वदेवोकञा समावेशः स्यादिति पदेर्युज्विधानमनर्थकं स्यात्। तस्माज्ज्ञापनार्थमेवैतद्विशेषविहितत्वम्; `अनुदात्तेतश्च हलादेः' (3.2.149) इति सामान्यलक्षणेन विहितत्वात्। यदि तर्हि वाऽसरूपविधेरभावो ज्ञाप्यते, गन्तेति च `अनुदात्तेतश्च हलादेः' (3.2.149) इति युज्न सिध्यति, `वौ कष'( 3.2.143) इत्यादिना धिनुणो विधानादित्यत आह-- `प्रयिकञ्च ' इत्यादि। प्रायिकत्वञ्चोत्तरसूत्रे प्रतिपादयिष्यते।।

151. क्रुधमण्डार्थेभ्यश्च। (3.2.151)
`तृन्' (3.2.135) इति तृनि प्राप्ते युज्विधीयते। इहोत्तरेऽपि प्रत्ययो यत्र विशेषो न विवक्ष्यते, तत्र तृन एवापवादो वेदितव्यः। `रोषणः'इति। `रुष रोषे' (धा.पा.1670)।।

152. न यः। (3.2.152)

`पूर्वेण' इति। `अनुदात्तेतश्च हलादेः' (3.2.149) इत्यादिना सिद्धत्वात्। अथ `अय वय रय णय गतौ'(धा.पा.474,475,482,480) इत्यस्माद्धातोर्युचो विधानार्थञ्चैतत्कस्मान्न विज्ञायते ? अशक्यमेवं विज्ञातुम्;यस्मान्नयतेः `अनुदात्तेतश्च' (3.2.149) इत्यादिनैव सिद्धत्वात्। तस्मात् प्रतिषेधार्थमिदम्। `क्नयिता, क्ष्मायिता' इति। `क्नूयी शब्द {उन्दने च-धा.पा.} उन्दे च' (धा.पा.485), `क्ष्मायी विधूनने' (धा.पा.486)।।

153. सूददीपदीक्षश्च। (3.2.153)
`षूद क्षरणे' (धा.पा.25), `दीपी दीप्तौ' (धा.पा.1150), `दीक्ष {मौण्ड्येज्योपनयननियमव्रतादेशेषु-धा.पा} मौण्ड्ये' (धा.पा.609)। `ननु च' इत्यादि देश्यम्। `वाऽसरूपेण' इत्यादि परिहारः। स्यादेतत्--वाऽसरूपविधिर्नास्तीति ज्ञापितमेतत्। ततो नास्ति युच्प्राप्तिरित्यत आह-- `ताच्छीलिक'इत्यादि। प्रायिकस्य चायमेव लिङ्गम्। यदि हि सर्वत्र वाऽसरूपविधेरभावः स्यात्, ततो विशेषविहितेनैव प्रत्ययेन बाधितत्वादेव युज्न भविष्यीति प्रतिषेधोऽनर्थकः स्यात्। `तथा च' इत्यादिना ताच्छीलिकप्रत्ययेन समावेशं दर्शयन् प्रायिकत्वमेव ज्ञापकस्य द्रढयति। `कम्रा'इति। `नमिकम्पि' (3.2.167) इत्यादिना रप्रत्ययः। `कमना' इति। अनुदात्तेतश्च हलादेः'(3.2.149) इति युच्प्रत्ययः। `कम्प्रा'इति। `कपि चलने'(धा.पा.275)।
`सूदेः' इत्यादि चोद्यम्। `अनित्यम्' इत्यादि परिहारः। `योगविभागादविज्ञायते' इति। अनित्यत्वे साधनं `नयसूददीपदीक्ष' इत्येकयोगे कर्त्तव्ये यद्योगविभागं करोति तज्ज्ञापयति-- पूर्वस्मात् प्रतिषेधादस्य कश्चिद्विशेषोऽस्तीति। स पुवनर्विशेषोऽनित्यत्वमेव। यद्यपि दीपदीक्षतिम्यामपि युच् प्राप्नोति, अनभिधान्न भवति।।

154. लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्। (3.2.154)
`{उपस्थायुकाः-काशिका} उपस्थायुकः' इति। `आतो युक्' (7.3.33) इत्यादिना युक्। `{प्रवर्षुकाः-काशिका} प्रवर्षुकः'इति। `वृषु मृषु सेचने'(धा.पा.706,707) इति. `कामुकाः'इति। `कमु कान्तौ'(धा.पा.443)। `नोदात्तोपदेश'(7.3.34) इत्यादिना वृद्धिप्रतिषेधे प्राप्तेऽनाचमेरित्यत्र `चमिकमिवमीनामिति वक्तव्यम्' (वा.844) इति वृद्धिरेव भवति। `{किंशारुकं-काशिका} शारुकः'इति। `शृ हिंसायाम्' (धा.पा.1488)। अपपूर्वाल्लषेः `अपेै च लषः'(3.2.144) इति धिनुण् भवति। उक्तं हि प्राक्-- ताच्छीलिकेषु `ग्लाजिस्थश्च क्सनुः' (3.2.139) इति वचनसामर्थ्यात्। गमेश्छन्दसि `आदृगम'(3.2.171) इत्यादिना किकिनावपि भवतः। भाषायामपि;`भाषायां धाञ्कृञ्सृजनिगमिनमिभ्यः (वा.284) इत्युपसंख्यानात्। कमेः `नमिकम्पि' (3.2.167) इत्यादिना रप्रत्ययः।।

155. जल्पभिक्षकुट्टलुण्टवृङः षाकन्। (3.2.155)
`जप जल्प व्यक्तायां वाचि' (धा.पा.397,398), `भिक्ष `याच्ञायाम्' (धा.पा.606) `कुट्ट {छेदनेभर्त्सनयोः-धा.पा.} च्छेदने' (धा.पा.1558), `लुण्ट स्तेये'(धा.पा.1563)-- चौरादिकावेतौ। `वृङ सम्भवतौ' (धा.पा.1509)। जल्पेरकर्मकत्वविवक्षया `चलनशब्दार्थादकर्मकाद्युच्' (3.2.148) इति युचि प्राप्ते। भिक्षेरपि `अनुदात्तेतश्च हलादेः'(3.2.149) इति युच्येव। कुट्टिलुण्टिभ्यां `णेश्छन्दसि'(3.2.137) इतीष्णुचि। वृङोऽपि `आदृगमहन' (3.2.171) इत्यादिना किकिनोः प्राप्तयोस्तदपवादः षाकन् विधीयते। `वराकी'इति। षित्वान्ङीष्।।

156. प्रजोरिनिः। (3.2.156)
`जुचंक्रम्य' (3.2.150) इत्यादिना युचि प्राप्त इनिर्विधीयते। इकारो नकारस्येत्संज्ञापरित्राणार्थः।।

157. जिदृक्षिश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च। (3.2.157)
`जि जये' (धा.पा.561), `दृङ आदरे' (धा.पा.1411), `श्रिञ् सेवायाम्'(धा.पा.897) विपूर्वः, `इण् गतौ' (धा.पा.1045), `टुवम उद्गिरणे' (धा.पा.849), `व्यथ {भयसञ्चलनयोः-धा.पा.} भयचलनयोः' (धा.पा.764) नञ्पूर्वः, `अम रोगे'(धा.पा.1720) अभिपूर्वः। `षू प्रेरणे' (धा.पा.1408) प्रपूर्व इत्यस्य ग्रहणम्, न `षूङ प्राणिगर्भविमोचने'(धा.पा.1031) `षूओङ प्राणिप्रसवे'(धा.पा.1132) इत्येतयोः। निरनुबन्धकपरिभाषयेति (व्या.प.53) भावः। इणजिभ्यामित्यत्र `इण्नश्जिसर्त्तिभ्यः क्वरप्'(3.2.163) इति वचनात् क्वरप् भवति।।

158. स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्। (3.2.158)
`चुरादावदन्ताः पठ्यन्ते' इति। तेनातो लोपे कृते `अचः परस्मिन् पूर्वविधौ'(1.1.57) स्थानिवद्भावाद्वृद्धिगुणौ न भवत इत्याभिप्रायः। एतेभ्यश्छन्दसि पूर्ववदिष्णुचि प्राप्ते द्रातेर्दधातेश्च किकिनोः प्राप्तयोरालुज्विधीयते। `स्पृहयालुः'इति। `अयामन्त' (6.4.55) इत्यादिना अयादेशः। `आलुचि' इत्यादि। शीङ गृह्यते। येन तच्छीङग्रहणं तत् पुनर्व्याख्यानमित्येतदुक्तं भवति। तद्व्याख्यानं कर्त्तव्यं येनालुचि विधातव्ये शीङोऽपि ग्रहणं भवति। तत्रेदं व्याख्यानम्-- पूर्वसूत्रादिह चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, तेन शीङपि प्रकृतित्वेन गुह्यत इति।।

159. दाधेट्सिशदसदो रुः। (3.2.159)
`डुदाञ् दाने' (धा.पा.1091), `दो अवखण्डने'(धा.पा.1148), `देङ रक्षणे'(धा.पा.962)--त्रयाणामिह ग्रहणम्; `गामादाग्रहणेष्वविशेषः' (व्या.प.124) इति वचनात्। `धेट् पाने'(धा.पा.902), षिञ् बन्धने' (धा.पा.1477), `शद्लृ शातने' (धा.पा.1428), `षद्लृ विशरणगत्यवसादनेषु' (धा.पा.1427)। अथ `धारुर्वत्सो मातरम्' इति कथमत्र द्वितीया, यावता `कर्त्तृकर्मणोः कृति' (2.3.65) इति षष्ठ्या भवितव्यमित्यत आह-- `न लोकाव्ययनिष्ठा' इति। उको य उकारस्तेन सहाकः सवर्णदीर्घत्वेन प्रश्लिष्टः, तेन तदन्तविधौ विज्ञायमाने उकारान्तस्य प्रत्ययस्य प्रयोगे षष्ठी न भवति, तेन द्वितीयैव भवतीति न षष्ठी। नन्विह तर्हि-- कटं चिकीर्षुरिति प्रतिषेधो न स्यात्, उप्रत्ययस्यानुकारान्तत्वात्। घिनुणपि बवति। छन्दस्युकारान्तत्वात् `आदृगमहन' (3.2.171) इत्यादिना किकिनावपि भवतः।।

160. सृघस्यदः क्मरच्। 3.2.160)

161. भञ्जभासमिदो घुरच्। (3.2.161)
`{भञ्ज आमर्दने'(धा.पा.1453), `भासृ दीप्तौ'(धा.पा.624), `ञिमिदा {स्नेहने-धा .पा.} स्नेहनमोचनयोः'(धा.पा.1243)। `भङगुरम्'इति। `चजोः कु घिण्ण्यतोः' (7.3.52) इति कुत्वम्। `कर्मकर्त्तरि प्रत्ययः' इति। भज्यते स्वयमेवेत्यर्थः। कुतः पुनः कर्मकर्त्तरि प्रत्यो लभ्यत इत्यत आह--`स्वभावात्' इति। प्रकृत्यैव प्रत्ययः कर्मकर्त्तरिमभिधत्ते, न कर्त्तृमात्रम्। अतः कर्मकर्त्तर्येव।।

162. विदिभिदिच्छिदेः कुरच्। (3.2.162)
`ज्ञानार्थस्य विदेर्ग्रहणम्' इति। `विद ज्ञाने' (धा.पा.1064) इत्येतस्य। `न लाभार्थस्य' इति। `विद्लृ लाभे' (धा.पा.1432) इत्येतस्य । अज्ञानार्थस्य विदेरुपलक्षणमेतत्, तेन सत्ताविचारणार्थौ यौ विदी तयोरपि ग्रहणं न भवत्येव। क्वचित्त्वनयोरादिशब्देनोपसंग्रहाय लाभार्थस्येति पाठः। कस्मात् पुनर्ज्ञानार्थस्य ग्रहणमित्याह-- `स्वभावात्' इति। विदेरुत्पन्नेन प्रत्ययेन स्वभाव एव ज्ञानक्रियाया यः कर्त्ता स एव प्रतीयते, नान्यः। तस्माज्ज्ञानार्थस्य ग्रहणम्, नान्यस्य। `कर्मकर्त्तरि प्रत्ययः'इति। स्वयमेव च्छिद्यत इत्यर्थे। तत्र स्वभावादिति पूर्वोक्त एव हेतुः।।

163. इण्नश्जिसर्त्तिभ्य क्वरप्। (3.2.163)
`इत्वरः' इति। `ह्रस्वस्य पिति कृति तुक्' (6.1.71)। `इत्वरी' इति। `टिड्ढाणञ्' (4.1.15) इत्यादिना ङीप्।।

164. गत्वरश्च। (3.2.164)

165. जागरूकः। (3.2.165)
`जागरूकः' इति। `जागृ निद्राक्षये' (धा.पा.1072)। वाऽसरूपविधिना तृन्नपि-- जागरितेति भवति।।

166. यजजपदशां यङः। (3.2.166)
दंशेर्यदि `अनिदिताम्' (6.4.24) इत्यादिनाऽनुनासिकलोपो लुप्तेऽपि यङि प्रत्ययलक्षणेन सिध्यति, तथापि लाघवार्थं कृतानुनासिकलोपो द्रष्टव्यो निर्दिष्टः। `यायजूकः' इति। यजेर्यङ, `दीर्घोऽकितः' (7.4.83) इति दीर्घः, `अतो लोपः' (6.4.48) इत्यकारलोपः। `जञ्जपूकः, दन्दशूकः' इति। `लुपसद' (3.1.24) इत्यादिना यङ, `जपजभ'(7.4.86) इत्यादिनाऽभ्यासस्य नुक्।।

167. नमिकम्पिस्म्यसकमहिंसदीपो रः। (3.2.167)
णम प्रह्वत्वे शब्दे' (धा.पा.981), `कपि चलने' (धा.पा.375), `ष्मिङ ईषद्धसने' (धा.पा.948), `कमु कान्तौ' (धा.पा.443), `{तृह-धा.पा} तृहि हिसि हिंसायाम्' (धा.पा.1455,1456), `दीपी दीप्तौ' (धा.पा.1150)। कपेश्चलनार्थत्वात् कमिदीपिभ्यञ्चानुदा4त्तेत्त्वाद्युचि प्राप्ते रो विधीयते। `क्रियासातत्यम्' इति। क्रियमाणानामविच्छेदेन प्रवृत्तिः = क्रियासातत्यम्। तत्र स्वभाव एव प्रत्ययान्तो वर्त्तते।।

168. सनाशंसभिक्ष उः। (3.2.168)
`सन्प्रत्ययो गृह्यते' इति। `गुप्तिज्किद्भ्यः' (3.1.5) इत्यादिना यो विहितः। `न सनिर्धातुः'इति। `षणु दाने' (धा.पा.1464) ` वन षण सम्भक्तौ' (धा.पा.463,464) इति न गृह्यते। एतच्च गर्गादिषु जिगीषुशब्दपाठाद्विज्ञायते, स हि प्रत्ययग्रहणे चोपपद्यते, न तु धातुग्रहणे। `आङ शासि इच्छायाम्'इत्यादि। एतदप्याङा सह निर्देशाद्विज्ञायते। इच्छार्थो ह्याङसहितः पठ्यते, न स्तुत्यर्थः। `आशंसु, भिक्षुः' इति। अत्र `अनुदात्तेश्च हलादेः'

(3.2.149) इति युचि प्राप्त उप्रत्ययस्य विधानम्।।

169. विन्दुरिच्छुः। (3.2.169)
`विदेः' इति। `विद ज्ञाने' (धा.पा.1064)। इतरेषां त्वनभिधानान्निपातनसामर्थ्याद्वा ग्रहणं न भवति। `इषेः' इति। `{इष-धा.पा.} इषु इच्छायाम्' (धा.पा.1351) इत्येतस्य । `इष गतौ' (धा.पा.1127) इत्यादीनां त्विषीणां पूर्ववद्ग्रहणं न भवति। `इच्छुः' इति। छकारादेशो निपात्यते। `छे च' (6.1.73) इति तुक्, `स्तोः श्चुना श्चुः' (8.4.40) इति श्चुत्वम्।।

170. क्याच्छन्दसि। (3.2.170)
`मित्रयुः' इति। मित्रमिच्छतीति `सुप आत्मनः क्यच्'(3.1.8) इति क्यच्। `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घत्वं प्राप्नोति, `क्यचि च' (7.4.33) इतीत्त्वञ्च, एतदुभयमपि `न च्छन्दस्यपुत्रस्य' (7.4.35) इति प्रतिषेधान्न भवति। `संस्वेदयुः'इति। लोहितादित्वात् (3.1.13) क्यष्। `सुम्नयुः' इति। `देवसुम्नयोः' (7.4.38) इति प्रतिषेधः। सुम्न इवाचरतीति `कर्त्तुः क्यङ सलोपश्च' (3.1.11) इति क्यङ।।

171. आदृगमहनजनः किकिनौ लिट् च। (3.2.171)
परपदार्थेषु प्रयुज्यमानाः शब्दा वतिमन्तरेणापि वत्यर्थं गमयन्ति, यथा-- गौर्वाहीकः, सिंहो माणवक इति। गौर्वाहीक इत्युक्ते गो शब्दोऽर्थान्तरे प्रयुक्तो विनापि वतिना गौरिवायमिति तुल्यशब्दरूपे वाहीके प्रतीयते। इह लिडिति स्वार्थादन्यत्र किकिनोः प्रयुक्तः। तस्मादसत्यपि वतिना योगेऽतिदेशो गम्यत इत्याह-- `लिड्वच्च तौ भवतः'इति। लिटा तुल्यौ = तुल्यधर्माणौ भवत इत्यर्थः। द्विर्वचनादिकं यल्लिटः कार्यं तत् किकिनोर्भवतीति भावः। कार्यातिदेशोऽयम्, न शास्त्रातिदेशः; कार्यातिदेशापेक्षया शास्त्रातिदेशस्याप्राधान्यात्। अप्राधान्यं तु शास्त्रातिदेशस्य कार्यत्वात्। यदि तर्हि कार्यातिदेशोऽयम् `लः परस्मैपदम्' (1.4.99) इति परस्मैपदसंज्ञाऽपि किकिनोः प्राप्नोति, ततश्चात्मनेपदिभ्यस्तौ न स्याताम् ? नैष दोषः; लादेशस्य हि परस्मैपदसंज्ञा, न लकारस्य। `ल' इति ह्यादेशापेक्षया तत्र षष्ठी, लादेशः परस्मैपदसंज्ञको भवतीति यावत्। न च किकिनौ लादेशौ,तत्कृतः परस्मैपदसंज्ञायाः प्रसङ्गः। तिबादयस्तर्हि कस्मान्न भवन्ति ? तयोर्विधानसामर्थ्यात् । यदि तर्हि तिबादयः स्युः, किकिनोर्विधानमनर्थकं स्यात्-- लिटमेव विदध्यादिति, न च तिबादिभिस्तच्छीलादयो विधीयन्ते ? अनभिधानान्न भविष्यन्ति। क्वसुकानचौ कस्मान्न भवतः, न च तयोर्भाव आनर्थक्यं किकिनोरुपपद्यते; `लिटः कानज्वा' (3.2.106) `क्वसुश्च' (3.2.107) इति विकल्पेन क्वसुकानचोर्विधानात् ? अनभिधानादेव तावपि न भविष्यतः; न हि ताभ्यां तच्छीलादयो विधीयन्ते;अत एवानभिधानात्। `लः कर्मणि च भावे चाकर्मकेभ्यः' (3.4.69) इतिभावकर्मणोरपि किकिनौ न भवतः। यथैव हि `भञ्जभासमिदो घुरच्' (3.2.161) इति भञ्जेरुत्पन्नेन च घुरचा स्वभावात् कर्मकर्त्तैवाभिधीयते न कर्त्तृमात्रम्, तथा किकिन्भ्यामपि धातोरुत्पन्नाभ्यां स्वभावादेव कर्त्तैवाभिधीयते, न भावकर्मणी। `आदिति दकारो मुखसुखार्थः'इति। तपरत्वनिरासार्थमेतत्। अत एवाह-- ` न त्वयं तपरः' इति। किं पुनः कारणं तपरो नेष्यत इत्याह-- `मा भूत्' इत्यादि। `तपरस्तत्कालस्य' (1.1.70) इति तादपि पर इति पञ्चमीसमासोऽप्याश्रितः। `वृद्धिरादैच्' (1.1.1) इत्यत्र त्रिमात्रचतुर्मात्रयोरैचां वृद्धिसंज्ञा मा भूदित्येवमर्थम्। ततश्च यद्येवं तपरः स्यात् तदा ऋकारेऽपि तपर एव स्यात्, ततश्च ऋकारेण तत्कालानां मात्रिकाणामेतद्ग्रहणं स्यात्, न पुनर्दीर्घाणाम्। तत्र को दोषः ? दधिश्चक्रिरित्येवमादावेव स्याताम्; ततुरिः, जगुरिरित्येवमादौ च न स्याताम्। तस्मात् मा भूदित्येव दोष इति तपरत्वमत्र नेष्यते। `पपिः सोमम्' इति। `आतो लोप इटि च' (6.4.64) इत्याकारलोपः, द्विर्वचनम्, अभ्यासस्य ह्रस्वः। `न लोकाव्ययनिष्ठा' (2.3.69) इत्यादिना षष्ठीप्रतिषेधः कार्य इति सोमशब्दात् कर्मणि द्वितीयैकवचनं भवति। `ददिः' इति। `डुदाञ् दाने' (धा.पा.1091)। `ततुः' इति। `बहुलं छन्दसि'(7.1.103) इत्युक्तम्, रपरत्वञ्च। `द्विर्वचनेऽचि' (1.1.59) इति स्थानिवद्भावात् तृशब्दो द्विरुच्यते। (धा.पा.7.4.66) इत्यत्त्वम्,रपरत्वम्, हलादिशेषः (7.4.60)। `जगुरिः' इति। `गृ निगरणे' (धा.पा.1410) `जन्मिः, जघ्निः' इति। `गमहन' (6.4.98) इत्यादिनोपधालोपः। जनेर्नकारस्य `स्तो श्चुना श्चुः' (8.4.40) इति श्चुत्वं ञकारः।
`अथ' इत्यादि चोद्यम्। `ऋच्छत्यृताम्' इत्यादिना परीहारः।
`उत्सर्गश्छन्दसि' इत्यादि। सामान्येन विधानम् = उत्सर्गः। एतदुक्तं भवति-- प्रकृतिविशेषमनुपादाय धातुमात्रात् किकिनोरुत्पादौ द्रष्टव्याविति। धातुमात्राद्विधातव्याविति यावत्। कुतो हेतोरित्याह-- `सदादिभ्योऽपि दर्शनात्' इति। सदादिभ्योऽपि सूत्रानुपात्तेभ्यः किकिनौ यस्मादुत्सर्गः कर्त्तव्यः।
`सेदिः,नेमिः'इति। पूर्वदेत्त्वाभ्यासलोपौ। `षद्लृ विशरणगत्यवसादनेषु' (धा.पा.854), `णम प्रह्वत्वे शब्दे' (धा.पा.981), `अत एकहल्मध्येऽनादेशादेर्लिटि'(6.4.120) इत्येत्त्वाभ्यासलोपौ।
`दधिः, चक्रिः' इति। घाञः पूर्ववदाकारलोपः। `चक्रिः, सस्रिः' इति। करोतेः सर्त्तेश्च यणादेशः। `जज्ञिः' इति। जनेः पूर्ववच्चुत्वोपधालोपौ। `नेमिः'इति। पूर्ववदत्त्वाभ्यासलोपौ।
`सहिवहि' इत्यादि। भाषायामपि वर्त्तते। `सासहिः' इत्यादि। सहादिभ्यो यङ, द्विर्वचनम्, पूर्ववदकारयलोपौ।।

172. स्वपितृषोर्नजिङ्। (3.2.172)
`स्वप्नक, तृष्णक्' इति। `ञिष्वप शये' (धा.पा.1068), `ञितृषा पिपासायाम्' (धा.पा.1228), `चोः कुः'(8.2.30) इति कुत्वम्-- गकारः। तस्य `वाऽवसाने' (8.4.58) इति चर्त्वम्-- ककारः। नजिङो ङकारस्तृषेश्च गुणप्रतिषेधार्थः, इकार उच्चारणार्थः।।

173. शृवन्द्योरारुः।(3.2.173)
शृणोतेः `लषपत' (3.2.154) इत्यादिनोकञपि भवति। वन्दतेः `अनुदात्तेतश्च' (3.2.149) इत्यादिना युचि प्राप्ते वचनमिदम्।।

174. भियः क्रुक्लुकनौ। (3.2.174)
`क्रुकन्नपि वक्तव्यम्' इति। क्रुकन्नित्यपरः प्रत्ययो वाच्यः, व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्-- `आदृगमहन' (3.2.171) इत्यादेः सूत्राच्चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, स चानुक्तसमुच्चयार्थः। तेन क्रुकन्नपि भविष्यतीति।।

175. स्थेशभासपिकसकसो वरच्। (3.2.175)
`स्थावरः'इति। `एकाच'(7.2.10) इत्यादिनेट्प्रतिषेधः।`ईश्वरः' इत्यादावपि `नेड् वशि कृति' (7.2.8) इति। तिष्ठतेः पूर्वसूत्रविहितौ क्स्नूकञावपि वचनाद्भवतः। ईशभासोः पूर्ववद्युचि प्राप्त इदं वचनम्।

176. यश्च यङः। (3.2.176)
`यायावरः' इति। पूर्ववदकारयलोपौ।।

177. भ्राजभासधुर्विद्युतोजिपृजुग्रावस्तुवः क्विप्। (3.2.177)
`{भ्राजृ- धा.पा} भ्राज दीप्तौ' (धा.पा.181), `भासृ दीप्तौ' (624), `उर्वी तुर्वी थुर्वी धुर्वी हिंसार्थाः'(धा.पा.569,570,571,573), `द्युत दीप्तौ' (धा.पा.741), `उर्ज बलप्राणनयोः' (धा.पा.1549), `पृ पालनपूरणयोः' (धा.पा.1086), `जु'इति सौत्रो धातुः, `ष्टुञ् स्तुतौ' (धा.पा.1043) ग्रावपूर्वः। `विभ्राट्' इति। व्रश्चादिसूत्रेण (8.2.36) षत्वम्। पूर्ववज्जश्त्वं चर्त्वञ्च। `धूः' इति। `राल्लोपः' (6.4.21) इति वकारलोपः, `र्वोरुपधाया दीर्घ इकः' (8.2.76) इति दीर्घः। `पूः'इति। `उदोष्ठ्यपूर्वस्य' (7.1.102) इत्युत्त्वम्, रपरत्वञ्च, पूर्ववद्दीर्घत्वम्। `जवतेर्दीर्घश्च' इति। कथम् ? केचिदाहुः-- सूत्रे `जू' इति दीर्घः पठितव्य इति। अपरे त्वाहुः- उत्तरसूत्रे दृश्यत इत्युभयोरपि योगयोः शेषः, तच्च विध्यन्तरोपसंग्रहार्थम्, अतोजवतेर्दीर्घो विधीयत इति। ग्रावाणं स्तौतीति ग्रावस्तुत्।`ह्रस्वस्य पिति कृति तुक्' (6.1.71)।
`किमर्थमिदम्' इत्यादि द्योद्यम्। `ताच्छीलिकैर्बाध्यते' इति परीहारः। स्यादेतत्-- वाऽसरूपविधिना क्वचिदपि भविष्यतीत्याह-- `वाऽसरूपविधिश्च' इति। एतत्तु `निन्दहिंस' (3.2.146) इत्यादौ सूत्र उक्तम्। ननु च `सूददीपदीक्षश्च' (3.2.153) इति सूत्रे प्रायिकत्वं ज्ञापकस्य प्रतिपादितम्, वाऽसरूपविधिश्चात्र नास्तीत्याह-- `तस्यैव' इति। `अन्येभ्योऽपि दृश्यते' (3.2.75), `क्विप् च' (3.2.76) इत्यादिना भवति।।

178. अन्येभ्योऽपि दृश्यते। (3.2.178)
ननु चान्यभ्योऽपीत्येतावतैव सिद्धम्, तत्किमर्थं दृशिग्रहणमित्यादि ? क्वचिदित्यादिना येषामुपसंग्रहार्थं दृशिग्रहणं तानि विध्यन्तराणि दर्शयति। यस्मात् विध्यन्तराणामुपसंग्रहार्थं दृशिग्रहणम्,एवञ्च कृत्वा वृत्तिकारः `क्विब्वचिपृच्छि'(वा.288) इत्यादिकं वाक्यं पठति। दृशिग्रहणोपात्तानि तान्येव विध्यन्तराणि दर्शयितुमित्यभिप्राय-। कथं पुनर्दृशिग्रहणेन विध्यन्तरोपसंग्रहः ? दृशिग्रहणे हि सति `यथा दृश्यन्ते क्विबन्ता धातवस्तथैव तेऽनुगन्तव्याः' इत्येषोऽर्थो लभ्यते। तस्मिंश्चार्थे लभ्यमाने द्विर्वचनादिविधयः संगृहीता भवन्ति। एवं हिते यथा दृश्यन्ते तथानुगता भवन्ति। यदि यथायोगं द्विर्वचनादयो विधीयन्ते, तदा क्विबन्तेषु क्वचिद्द्विर्वचनं दृश्यते, क्वचिदपि संप्रसारणमिति युक्तमुक्तम्-- `दृशिग्रहणं विध्यन्तरोपसंग्रहार्थम्' इति।
`वाक्' इति। वचेर्वच्यादिसूत्रेण (6.1.15) प्राप्तस्य सम्प्रसारणस्याभावः क्रियते। `शब्दप्राट्' इति। पृच्छेरपि ग्रह्यादिसूत्रेण (6.1.16) सम्प्रसारणस्य। व्रश्चादिसूत्रेण (8.2.36) षत्वम्, पूर्ववज्जश्त्वं चर्त्वञ्च। आयतं स्तौतीति `आयतस्तूः' । `ष्टुञ् स्तुतौ' (धा.पा.1043)। कटं प्रवत इति `कटप्रूः'। `प्रुङ गतौ' (धा.पा.957)। `श्रीः' इति। `श्रिञ् सेवायाम्' (धा.पा.897)। `दिद्युत्' इति। `जगत्' इति। `गमः क्वौ'(6.4.40) इत्यनुनासिकलोपः। `ददृत्' इति। `उरत्'(7.4.66) इत्यत्त्वम्, रपरत्वम्, हलादिशेषः (7.4.60)।`धीः'इति। `ध्यै चिन्तायाम्' (धा.पा.908) `हलः' (6.4.2) इति दीर्घः।।

179. भुवः संज्ञान्तरयोः। 3.2.179)
`धनिकाधमर्णयोः' इत्यादि। धनिको यस्मै ऋणं धार्यते। अधमर्णो यो धारयति। तदन्तरे मध्ये यस्तिष्ठत्यात्मपक्षपतितः सम्प्रत्ययहेतुः सप्रतिभूशब्देनोच्यते, न सर्वः। तेन ग्रामयोरन्तरे यस्तिष्ठति तत्र प्रत्ययो न वति। एतच्च शब्दशक्तिस्वाभाव्याल्लभ्यते, `दृश्यते' (3.2.178) इत्यस्यानुवर्त्तेर्वा। अस्य ह्यनुवृत्तौ

प्रतिभूरिति संज्ञेयम्, तत् किमन्तरग्रहणेन, संज्ञायामित्येव वक्तव्यम् ? नैतदस्ति; द्रव्यताविघाता हि संज्ञाशब्दा भवन्ति, न चैवं प्रतिभूशब्दः। तथापि सत्यपि देवदत्ते कदाचिदसौ न प्रवर्त्तत एव।।

180.विप्रसंभ्यो ड्वसंज्ञायाम्। (3.2.180)
`विभुः' इति। पूर्वेण क्विबेव भवति।
`मितद्रवादिभ्य उपसंख्यानम्' इति। आविशेषेण-- संज्ञायाम्, असंज्ञायाञ्च। `मितद्रवादिभ्यः'इति तादर्थ्ये चतुर्थी। मितद्रवादयो डुप्रत्ययान्ताः साधवो यथा स्युरित्येवमर्थः। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तच्च प्रतिपादनं प्रकृतत्वाड्डुशब्दस्य । तत्रेदं प्रतिपादनम्-- `अन्येभ्योऽपि दृश्यते' (3.2.178) इत्यतोऽपि शब्दोऽत्रानुवर्त्तते, तेन मितद्रवादिब्यो डुप्रत्ययो धात्वन्तरादपि भवति, पदान्तरे चेति।।

181.धः कर्मणि ष्ट्रन्। (3.2.181)
`धयतेः' इति। `धेट् पाने' (धा.पा.902)। `दधातेः' इति। `डुधाञ् धारणपोषणयोः' (धा.पा.1092)। `कर्मणि कारके' इति। एतेन कर्मणः प्रत्ययार्थतां दर्शयन्नुपपदत्वमपाकरोति। यदि हि कर्मण उपपदत्वं स्यात् `कर्मण्यण्'(3.2.1) इत्यस्मिन्नेव प्रकरणे विदध्यात्। एवं हि द्विः कर्मग्रहणं न कर्त्तव्यं भवति। ननु च यद्यपि द्विः कर्मग्रहणं न कर्त्तव्यं भवति। ननु च यद्यपि द्विः कर्मग्हणं न कर्त्तव्यं भवति, तदाप्युत्तरसूत्रेण ष्ट्रन्ग्रहमं कर्त्तव्यं जायते ? जायतां नाम, लघीयो हि कर्मग्रहणात् ष्ट्रन्ग्रहणम्। नन्विह वर्त्तमान इत्यनुवृत्तेर्वर्त्तमानप्रत्ययो भवति, तत्र तु क्रियमाणे नैतल्लभ्यते ? नैतदस्ति;इहापि क्रियमाणे नैव वर्त्तमाने प्रत्ययो भवति। न हि धात्रीत्युक्ते काप्यविशेषा प्रतीयते, किं तर्हि ? क्रियाकारकसम्बन्धमात्रविशिष्टा स्त्री प्रतीयते-- आमलकी च दधति तां भैषज्यार्थमिति कृत्वा। तस्मात् `कर्मणि' इति प्रत्ययार्थ एव, नोपपदम्।।

182. दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे। (3.2.182)
`दाप् लवने ' इति। यथा `दाधा घ्वदाप्'(1.1.20) इति सूत्रे `दैप् शोधने' (धापा.924) इत्यस्यापि ग्रहणम्। तर्हीहापि कस्मान्न भवति ? अनभिधानात्। प्रकृत्यैव हि दात्रमिति ष्ट्रन्प्रत्ययान्तेन लवनस्य करणमुच्यते, न शोधनस्य। `करणे कारके' इति। एतेन करणप्रत्ययार्थतां दर्शयन्नुपपदत्वं निराकरोति। यद्युपपदत्वमस्यस्यात् तदाजादिषु दंष्ट्राशब्दस्य पाठो नोपपद्यते। `योक्त्रम्' इति। `चोः कुः'(8.2.30) इति कुत्वम्। `मेढ्रम्' इति। `हो ढः' (8.2.31) इति ढत्वम्, `झषस्तथोर्धोऽधः' (8.2.40) इति घत्वम्, `ष्टुना ष्टुः' (8.4.41) इति ष्टुत्वम्, `ढो ढे लोपः' (8.3.13) `दंष्ट्रा'इति। अजादित्वाट्टाप्। `दंशेः'इत्यादि। ननु च यथा `त्यजरज' (3.2.142) इति रञ्जेरनुनासिकनिर्देशे धिनुण्प्रत्यये रागीत्यनुनासिकलोपो भवति, तथा दंशेः ष्ट्रन्प्रत्यये न लोपो भविष्यति,तत्कथमस्य ज्ञापकतोपपद्यते ? नैष दोषः; यद्ययं निर्देशो दंशेः ष्ट्रन्प्रत्ययेऽनुनासिकलोपार्थः स्यात्, तदा दंष्ट्राशब्दस्याजादिपाठो विरुध्यते। तस्माज्ज्ञापकार्थत्वम्। `नद्ध्री'इति। `नहो धः'(8.2.34) इति धत्वम्, `झषस्तथोर्धो।धः' (8.2.40) इति तकारस्य धत्वम्, धकारस्य `झलां जश् झशि' (8.4.53) इति जश्त्वम्, `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीष्। येऽत्र सेटो धातवः शस्प्रभृतयस्तेषां हि `तितुत्रतथ' (7.2.9) इत्यादिनेट्प्रतिषेधः।।

183. हलसूकरयोः पुवः। (3.2.183)
`तच्चेत् करणं हलशूकरयोरवयवो भवति' इति। एतेन हलशूकरयोरित्येषाऽवयवषष्ठी, नत्वभिधेयसप्तमीति दर्शयति। `{मुखमुच्यते-- काशिका, पदमञ्जरी च} मुखमेवोच्यते' इति। नान्यः कर्णाद्यवयवः। एतच्चाभिधानशक्तिस्वाभाव्यात्।।

184. अर्त्तिलूधूसूखनसहचर इत्रः। (3.2.184)
`धू विधूनने' (धा.पा.1398), `षू प्रेरणे' (1408) इत्यनयोर्ग्रहणम्। `धूञ् कम्पने' (धा.पा.1487) ` {षूङ-धा.पा.} षूञ् प्राणिगर्भविमोचने' (धा.पा.1031) `षूङ प्राणिप्रसवे' (धा.पा.1132) इत्येतेषां `निरनुबन्धकग्रहणे न सानुबन्धकस्य' (व्या.प.53) इति परिभाषया ग्रहणं न भवति।।

185. पुवः संज्ञायाम्। (3.2.185)
`बर्हिष्पवित्रम्' इति। पवतेः, पुनातेर्वा। अनेन पवित्रं बर्हिषा कृतम्। बर्हिष्पवित्रम् = कुशविकारः। प्रदेशिन्या अङ्गुलेर्वेष्टनमुच्यते।

186. कर्त्तरि चर्षिदेवतयोः। (3.2.186)

187. ञीतः क्तः। (3.2.187)
`मिन्न' इति। `आदितश्च' (7.2.16) इतीट्प्रतिषेधः। `रदाभ्याम्' (8.2.42) इति नत्वम्। एवं `क्ष्विण्णः' इत्यात्रापि। `अट्कुप्वाङ'(8.4.2) इत्यादिना णत्वम्। `धृष्टः' इति। `धुपिशसी वैयात्ये' (7.2.19) इतीट्प्रतिषेधः, `ष्टुना ष्टुः' (8.4.41) इति ष्टुत्वम्।।

188. मतिबुद्धिपूजार्थेभ्यश्च। (3.2.188)
`मतः' इति। `मन ज्ञाने' (धा.पा.1176)। इट्प्रतिषेधः `एकाचः' (7.2.10) इत्यादिना, `अनुदात्तोपदेश' (6.4.37) इत्यादिनानुनासिकलोपः। `इष्टः' इति। `{इष--धा.पा.} इषु इच्छायाम्'(धा.पा.1351)। `उदितो वा' (7.2.56) इति विभाषितत्वान्निष्ठायां `यस्य विभाषा' (7.2.15) इतीट्प्रतिषेधः। `बुद्धः' इति। `बुध अवगमने' (धा.पा.858)। पूर्ववद्धत्वम्, तकारस्य जश्त्वम्,धकारस्य दकारः। `पूजितः, अर्चितः' इति। `{भ्वादौ नोपलभ्यते;चुरादित्वेनैव प्रसिद्धः।} पूज पूजायाम्' (धा.पा.1642);`अर्च पूजायाम्' (धा.पा.204) भ्वादी। एतौ चारदी च, तत्र यदा चुरादिभ्यां प्रत्ययस्तदा `निष्ठायां सेटि' (6.4.52) इति णिलोपः।
`शीलितः' इत्यादौ `शील समाधौ'(धा.पा.658) `क्षमुष् सहने' (धा.पा.442),`क्रुश {आह्वाने रोदने च- धा.पा}आह्वाने' (धा.पा.856), `जुषी प्रीतिसेवनयोः (धा.पा.1288),` रुष रोषे' (धा.पा.1670), `ह्रञ् हरणे' (धा.पा.899), `ह्रष तुष्टौ' (धा.पा.1229), `ह्रषु अलीके' (धा.पा.709),`तुष {प्रीतौ-धा.पा.} तुष्टौ (धा.पा.1184), `कमु कान्तौ' (धा.पा.443), `यम उपरमे' (धा.पा.984), `कष हिंसायाम्' (धा.पा.685), `मृङ प्राणत्यागे' (धा.पा.1403)-- इत्येतेषां धातूनां यथाक्रमेणैतानि रूपाणि। तत्राद्यौ सेटौ। यश्चात्र कश्चिदुदिदूदिच्च, तस्य निष्ठायां `यस्य विभाषा' (7.2.15) इतीट्प्रतिषेधः। यस्त्वीदित् तस्यापि `श्वीदितो निष्ठायाम्' (7.2.14) इतीट्प्रतिषेधः। ह्रषेरेव `ह्रषेर्लोमसु' (7.2.29) इत्यादिना `रुष्यमत्वरसंघुषास्वनाम्' (7.2.28) इति विभाषितेट्। `{नास्ति-काशिका} कान्तः, क्षान्तः' इति। `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इति दीर्घः। `आक्रुष्टः' इति। व्रश्चादिना (8.2.36) षत्वम्। `संयतः' इति। पूर्ववदनुनासिकलोपः। `अमृतः' इति। गत्यर्थादीनां कर्त्तरि क्तः। `पूर्ववत्' (इति)। यथा शीलादिषु वर्त्तमाने निष्ठा तथाऽमृतशब्दस्यापीत्यर्थः।
`सुप्तः'इति। स्वपेः सम्प्रसारणम्। `शयितः' इति। `निष्ठा शीङ' (1.2.19) इत्यादिना कित्त्वप्रतिषेधाद्गुणः। `आशितः' इति। `अश भोजने' (धा.पा.1523) आङ्पूर्वः, `लिप उपदेहे' (धा.पा.1433), `तृप प्रीणने' (धा.पा.1195)। अत्र अशिशीङौ सेटौ; शेषास्त्वनिटः। `एकाचः' (7.2.10) इत्यादिनेट्प्रतिषेधः। यद्यपि शीलादयो वर्त्तमानकाले व्युत्पाद्यन्ते, तथापि शीलितो देवदत्तेन, रक्षितो देवदत्तेन आक्रुष्टो देवदत्तेनेत्यत्र `क्तस्य च वर्त्तमाने' (2.3.67) इति षष्ठी न भवति। यथा न भवति तथा तत्रैव प्रतिपादितम्।।
इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धपादविरचितायां
काशिकाविवरणपञ्जिकायां
तृतीयस्याध्यायस्य
द्वितीयः पादः।

3.3

अथ तृतीयाध्यायस्य
तृतीयः पादः
<उणादयो बहुलम्। (3.3.1)>
`वर्त्तमान इत्येवे'ति। `वर्त्तमान लट्' (3.2.123) इत्यतो वर्त्तमानग्रहणमनुवर्त्तत इति दर्शयति। `सञ्ज्ञायाम्' इति। वर्त्तत इति `पुवः संज्ञायाम्' (3.2.185) इत्यतः।
`बाहुलकम्' इत्यादि। `ला आदाने' (धा.पा.1058), बहूनर्थाल्लातीति बहुलम्। `आतोऽनुपसर्गे कः' (3.2.3) बहवः पुनरर्थाः क्वचित्प्रवृत्त्यादयः। तथा चोक्तम्-
क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति।। इति।
बहुलस्य भावो बाहुलकम्। `द्वन्द्वमनोज्ञादिभ्यश्च' (5.1.133) इति मनोज्ञादित्वाद्घञ्। बह्वर्थादानं बहुलशब्दस्य प्रवृत्तिनिमित्तमिति तत्रैवायं भावप्रत्ययः। तद्बाहुलकं प्रकृतेस्तनुदृष्टेरुक्तम्। प्रत्ययमनादिं कृत्वा यः पूर्वमुपादीयते शब्दः सा प्रकृतिरित्युच्यते। प्रत्ययात् पूर्वं क्रियत इति प्रकृतिः। प्रकर्षेण नियमेन प्रत्ययः क्रियते तस्या इति वा प्रकृतिः। `प्रकृतेः'इति। जातौ षष्ठ्येकवचनम्। `तनुदृष्टेः' इति। कर्मणि ल्यब्लोपे पञ्चमी। तनुदृष्टिं वीक्ष्य बाहुलकमुक्तमिति। `विभाषा गुणेऽस्त्रियाम्' (2.3.25) इत्यनेन त्विह पञ्चमी न भवति; अस्त्रियामिति प्रतिषेधात्।
अथ वा `विभाषा गुणे' इति योगविभागादिह पञ्चमी वेदितव्या। तनुशब्दः शरीरवचनोऽप्यस्ति, गुणवचनोऽपि; इति तु गुणवचनः प्रकृतेरल्पत्वं नाम यो गुणस्तस्य वाचकः। दर्शनं दृष्टिः = उपलब्धिः, तनोर्गुणस्य दृष्टिस्तनुदृष्टिः। ततो गुणो नित्यं गुणिनमपेक्षत इति गमकत्वात् तनुशब्दस्य

प्रकृतिमपेक्षमाणस्यापि दृष्टिशब्देन समासो भवति। अयं त्वर्थः- प्रकृतेर्गुणस्य, तयोर्दर्शनादिति।
अथ वा तनुर्दृष्टिर्यस्याः प्रकृतेः सा तनुदृष्टिः। अत्र पक्षे यद्यपि तनुगुणो दृष्टेर्विशेषणम्, तथाप्यसौ दृष्टेः प्रकृतेरपि विशेषणत्वेन प्रतीयत एव। प्रकृतेस्तनुत्वादेव हि तद्दृष्टितनुत्वं भवति। उणादिषु पञ्चपाद्यां स्वल्पाः प्रकृतयो दृश्यन्ते, ततोऽन्याभ्योऽपि च प्रकृतिभ्यः प्रत्यया दृश्यन्ते, तस्माद्बहुलग्रहणाद्भवन्ति। यथा हि `ह्वषेरुलच्' (पं.उ.1.98) इति `ह्वषु अलीके' (धा.पा.709) इत्यस्मादुलजुक्तः, तथा `शकि शङ्कायाम्' (धा.पा.86) इत्यतोऽपि भवति- शङ्कुलेति। किञ्च, प्रायसमुच्चयनादपि तेषां तदुक्तमिति सम्बन्धः। तदिति बाहुलकं परामृश्यते। तेषामुणादीनां प्रायेण बाहुल्येन समुच्चयनं ग्रहणं विधानं वा प्रायसमुच्चयनम्। `तृतीया' (2.1.30) इति योगविभागात् समासः। अपिशब्दः समुच्चये। न केवलं प्रकृतेस्तनुदृष्टेस्तद्बाहुलकमुक्तम्, अपि तु प्रायसमुच्चयनादपि तेषामेतदुक्तं भवति। न केवलं प्रकृतस्तन्व्यः पठिताः, अपि तु प्रत्यया अपि प्रायेणसमुच्चिताः, न सर्वे, तदर्थं बाहुलकमिति। बाहुलकाद्व्यवहिता अपि ते चेत् प्रत्यया उन्नीय विधीयन्ते। तथा हि `अर्त्तेः क्युरुच्च'(पं.उ.5.17) इत्यर्त्तिधातुः पठितः,फिडफिड्डौ तु प्रत्ययौ न विहितौ तथापि ऋफिडऋफिड्डशब्दयोर्दर्शनात् तावपि च विधीयेते।
`कार्यसशेषविधेश्च तदुक्तम्' इति। चशब्दः समुच्चये। पूर्वोक्तकारणद्वयादेतस्मात् तद्बाहुलकमुक्तम्। विधानं विधिः = कारणम्, सह शेषेण वर्त्तते यो विधिः स सशेषः, सशेषश्चासौ विधिश्च सशेषविधिः, कार्याणां सशेषविधिः कार्यसशेषविधिः। तस्माच्च बाहुलकमुक्तम्। एतदुक्तं भवति- प्रकृतेः प्रत्ययाश्रितानि कार्याणि न निःशेषाणि पञ्चपाद्यां दर्शितानि, इष्यन्ते चादर्शितान्यपि तानि। अतस्तत्सिद्ध्यर्थं तद्बाहुलकमुक्तम्। तेन ऋफिड, ऋफिड्ड- इत्यत्र गुणप्रतिषेधः सिद्धो भवति। एवमादि तावत् प्रत्ययाश्रितं कार्यं सिद्धं भवति। `षणु दाने' (धा.पा.1464), `ञमन्ताड्डः' (पं.उ.1.113) इति षण्डः। अत्र `धात्वादेः षः सः' (6.1.64) इति सत्वं न भवति। सत्यपि वा सत्वे पुनः षत्वमेव क्रियत इत्येवमादि प्रकृत्याश्रितमपि कार्यं बाहुलकाद्भवति।
`नैगमरूढञिभवं हि सुसाधु' इति। निगमः = छन्दः, तत्र भवा नैगमाः, ऋगयनादिपाठादण्। निगमस्य वेमे नैगमाः। रूढिः = प्रसिद्धिः; भवन्तीति भवाः, रूढौ बवाः। `सप्तमी' (2.1.40) इति योगविभागात् समासः। लोकप्रसिद्धा इत्यर्थः। नैगमाश्च रूढिभवाश्च नैगमरूढिभवम्। `सर्वो द्वन्द्वो विभाषैकवद्भवति' (व्या.प.91) इत्येकवद्भावः, `स नपुंसकम्' (2.4.17) इति नपुंसकलिङ्गता। हिशब्दो यस्मदार्थे। यस्मादेतदेव बाहुलकमनेकार्थस्य साधकम्, तस्मान्नैगमं रूढिभवं सुष्ठु साधु भवति; व्याकरणे बहुलग्रहणेन संस्कृतत्वात्। अन्यथाऽसंस्कृसत्वाद्गाव्यादिशब्दानामिव तस्यासाधुत्वं स्यात्। अन्यैरपि प्रमाणपुरुषैर्नैगमरूढिभवानां व्युत्पाद्यत्वमभ्युपेतमिति दर्शयितुमाह-- `नाम च धातुजम्' इत्यादि। `निरुक्ते' इति। निरुक्ते शास्त्रे। `नाम' इति। प्रातिपदिकम्। तस्य हीयमन्याचार्यसंज्ञा। धातोर्जातत्वाद्धातुजम्। धातुग्रहणमुपलक्षणम्, प्रत्ययागमादयोऽपि गृह्यन्ते। निरुक्तकारः स्वशास्त्रे निरुक्ते प्रातिपदिकं धातुजमाह; धातुप्रत्ययकादिविभागेन व्युत्पादितत्वात्। चशब्दोऽवधारणे, भिन्नक्रमश्च। धातुजमेवेत्येवं द्रष्टव्यम्। शकटस्य पुत्रः शाकटायनः सोऽपि नाम धातुजमेवाह। तदेवं निरुक्तकारशाकटायनदर्शनेन त्रयी शब्दानां प्रवृत्तिः-- जातिशब्दाः, गुणशब्दाः, क्रियाशब्दा इति;न सन्ति यदृच्छाशब्दा इति। अथ वा-- जातिगुणशब्दानामपि क्रियाशब्दत्वमेव; धातुजत्वात्। ततश्चैकैव शब्दानां प्रवृत्तिः-- क्रिया शब्दा इति।
अथ यदि प्रकृतिविशेषं प्रत्ययविशेषञ्चोपादायन व्युत्पादितं शब्दरूपम्, तस्य कथं धातुजत्वं वेदितव्यम्, न हि प्रकृतिप्रत्ययानवधारणे धातुजत्वं शक्यं निश्चेतुमित्यत आह-- `यन्न' इत्यादि। अर्थशब्दः प्रयोजनवाची, परमर्थः प्रयोजनं यस्य प्रकृत्यादेः स पदार्थः। कथं पुनः पदमर्थः प्रकृत्यादेर्भवति ? तदुद्दिश्य तदुपादानात्। पदं हि व्युत्पादयिष्यामीत्येवमर्थं प्रकृत्यादेरुपादानाम्। कस्मात् ? प्रकृतिप्रत्ययश्च पदार्थः, तस्य विशेषः पदार्थविशेषः। समुत्थानं समुत्थः = प्रादुर्भावः;`सुपि स्थः' (3.2.4) इत्यत्र योगविभागेन भाव एव कप्रत्ययः। पदार्थविशेषात् समुत्थः प्रादुर्भावो यस्य तत् `पदार्थविशेषसमुत्थम्'। यदेवंविधं न भवति शब्दरूपं प्रत्यतः प्रकृतिततश्च तदूह्यम्। धातुजत्वेनापि तदुक्तं भवति-- यस्य प्रतिपदोक्ता प्रकृतिप्रत्ययविशेषानासादितात्मा निर्वृत्तिस्तस्य प्रकृतिविशेषात् प्रत्ययविशेषाच्च धातुजत्वं निश्चेतव्यमिति।
ननु च तथाविधस्य प्रकृतिप्रत्ययविशेषस्यापरिज्ञानादेवाशक्यं धातुजत्वं निश्चेतुमिति मत्वा परेण चोदितम्, तत्कथं प्रत्ययतः प्रकृतेश्च तदूह्यमित्युक्तं युज्यते ? नैष दोषः;एवं हि ब्रुवताऽनेन प्रकृतिप्रत्ययावेवं तावद्ध्यूहितव्यौ,ततस्ताभ्यां तच्छब्दरूपमित्येतदप्यर्थादुक्तं भवति। न ह्यनवधारिताभ्यां प्रकृतिप्रत्ययाभ्यां शक्यं धातुजत्वं कस्यचिन्निश्चेतुमिति किमत्रायुक्तम् ? यत्र प्रसिद्धप्रत्ययावयवेन शब्दान्तरेण कस्याचिद्भागस्य सारूप्याधिगमोऽस्ति तत्र प्रत्ययं दृष्ट्वा परिशिष्टो भागः प्रकृतित्वेनोत्प्रेक्षितव्यः। यथा-- `उषिकुषिगर्त्तिभ्यस्थन्' (पं.उ.2.4) इति थन्प्रत्ययान्तमोष्ठादिकं प्रसिद्धप्रत्ययावयवम्। तेन च डित्थवित्थशब्दयोः किञ्चित् सारूप्यमस्ति,ततैषामिव हि तेषां थशब्दोऽवयवो विशिष्टदेशवर्त्ती विद्यते। तत्र थन्प्रत्यान्ते शब्दरूपे यो दृष्टस्थशब्दः प्रत्ययसंज्ञकस्तत्सादृश्यात् डित्थडवित्थशब्दस्थं थशब्दं प्रत्ययमवधार्य ततः परिशिष्टस्तयोर्भागो डिड्डविदिति च धातुत्वेनोह्यः। ततश्चैवं सूत्रं कर्त्तव्यम्-- डीङस्थण् डिड्डविच्चेति। `डीङ विहासा गतौ' (धा.पा.1135) इत्यस्मात् थन्प्रत्ययः, डीङश्च डिड्डविदित्येतावादेशौ भवतः। यत्र तु शब्दरूपे निर्ज्ञातधात्ववयवेन शब्दान्तरेण किञ्चिद्भागगतं सारूप्यमस्ति, तत्र प्रकृतिं दृष्ट्वा परिशिष्टो भागः प्रत्ययत्वेनोहितव्यः, यथा-- ऋतमिति दृष्टं शब्दरूप प्रसिद्धप्रकृत्यवयवम्, तेन ऋफिडशब्दस्य ऋफिड्डशब्दस्य च किञ्चिदभागगतं सारूप्यमस्ति, उभयेषां तेषामुकारादित्वात्। तत्र निष्ठाप्रत्ययान्त ऋतशब्दे य ऋकारावयवो धातुसंज्ञकस्तत्सादृश्यादृफिडऋफिड्डशब्दस्थञ्च ऋवर्णं धातुमवधार्य ततः परिशिष्टस्तयोर्भागः फिड इति फिड्ड इति च प्रत्ययत्वेनोह्यः। ततश्चैवं सूत्रं कर्त्तव्यम्-- `अर्त्तेः फिडफिड्डौ' इति, `ऋ गतौ' (धा.पा.1098) इत्यस्मात् फिडफिड्डौ प्रत्ययौ भवतः। ऋफिडः, ऋफिड्डः। गुणः पूर्वोक्तात् कारणान्न भवति। अथ वा-- कितावेवैतौ प्रत्ययौ विधातव्यौ। एवं प्रकृतिप्रत्ययादूहित्वा तस्य शब्दरूपस्य धातुजत्वमूहितव्यम्। यत् प्रकृतिप्रत्ययविशेषावयवानुगतं न तद्धातुजत्वं व्यभिचरति, यथा-- कर्त्तव्यं करणीयमित्येवमादयः शब्दाः। `ऊह्यम्' इति। अनुज्ञाव्यम्।

न यत्र क्वचिदूहः कर्त्तव्यः,अपि तु विशिष्ट एव विषय इति दर्शयन्नाह-- `संज्ञासु' इत्यादि। य एते निरूढाः साधुत्वेव शब्दरूपास्तेष्वेव संज्ञात) सूहः कर्त्तव्यो, नान्यत्र। `धातुरूपाणि'इति। कल्पयितव्यानीति शेषः। `प्रत्ययाश्च ततः परे' इति। कल्पयितव्या ति शेषः। `कार्यात्' गुणाभावदिकात्। `विद्यात्'जानीयात्। `अनुबन्धं' ककारादिकम्। एतदनन्तरोक्तं `शास्त्रमुणादिषु'। शास्त्रोपनिबन्धनत्वाच्छास्त्रविषयत्वाद्वा शास्त्रमित्युक्तम्। यदि तर्ह्यत्र सूत्रे `संज्ञायाम्' (3.2.185) इत्यनुवर्त्तते `वर्त्तमाने'(3.2.123) इति च, बहुलग्रहणं च क्रियते, तत् किमर्थमुणादिषु `वर्त्तमाने पृषद्वृहज्जगच्छतृवच्च' (द.उ.6.5) इति वर्त्तमानग्रहणम् ? `धृषेर्धिष च संज्ञायाम्'(द.उ.5.27) इति संज्ञाग्रहणम्, `बहुलमन्यत्रापि' (द.उ.5.23) इति बहुलग्रहणञ्च क्रियते ? `भूतेऽपि दृशन्ते' (3.3.2) इति वचनाद्भूतेऽपि पृषदादयो भवन्तीत्याशङ्कानिवृत्त्यर्थम्। वर्त्तमानग्रहणं प्रकृताया एव संज्ञाया अनुवृत्तेर्दृढीकरणार्थम्। पुनः संज्ञाकरणं बहुलवचनादसंज्ञायामपि भवन्तीत्याशङ्कानिवृत्त्यर्थं वा। अस्यैव बहुलस्य स्मरणार्थं पुनर्बहुलग्रहणम्। एवं हि विस्मरणशीलानामनुग्रहः कृतो भवति।।

2.भूतेऽपि दृश्यन्ते। (3.3.2)

`पूर्वत्र वर्त्तमानात्'इति। अथ पूर्वत्र वर्त्तमानग्रहणं कस्मान्न निवर्त्तितम्, युक्तं हि तत् तत्र निवर्त्तयितुम्, तथा हि-- तस्मिंस्तत्र निवृत्ते सतीदं न कर्त्तव्यम् ? नैतदस्ति;अवश्यमैतत् कर्त्तव्यम्,यस्मात् केचिद्भूत एवेष्यन्ते। यदिच पूर्वत्र वर्त्तमानग्रहणानुवृत्तिर्न स्यात्,भविष्यत्यप्युणादयो न स्युः। `भविष्यति गम्यादयः' (3.3.3) इत्येकं तु नियमार्थं विज्ञायेत-- भविष्यत्येव गम्यादयइति। तस्मात् पूर्वत्रानुवर्त्तयितव्यं वर्त्तमानग्रहणम्। `वर्त्म' इति। `आतो मनिम्'(3.2.74) इत्यनुवर्त्तमाने `अन्येभ्योऽपि दृश्यन्ते' (3.2.75) इति मनिन्प्रत्ययः।`नेड् वशि कृति' (7.2.8) इतीट्प्रतिषेधः। `भस्म' इति। `भस भर्त्सनदीप्त्योः' (धा.पा.1100)। `दृशिग्रहणम्' इत्यादि। विशिष्टप्रयोगमनुसृत्य यत्र शिष्टाः प्रयुज्यते तत्र भूते प्रत्ययः कर्त्तव्यः,न तु सर्वत्रेति दृशिग्रहणेनायमर्थः प्रतिपादित इति दर्शयति।।

3.भविष्यति गम्यादयः। (3.3.3)

`प्रत्ययस्यैव' इत्यादि। इदं हि भविष्यति गम्यादयः साधवो भवन्ति,यदि प्रत्ययस्यैव भविष्यत्कालता विधीयते, अथ तु प्रत्ययस्यान्यकालता स्यान्न ते भविष्यति साधवः स्युः।तस्मात् प्रत्ययस्यैवानेन प्रकारेण भविष्यत्कालता विधीयते। `ग्रामं गमी' इति। `गमेरिनिः' (द.उ.6.57) इतीनिप्रत्ययः,`सौ'(6.4.13) इति दीर्घः। `अकेनोर्भविष्यदाधमर्ण्ययोः' (2.3.70) इति षष्ठ्यां प्रतिषिद्धायां ग्रामशब्दात् `कर्मणि द्वितीया' (2.32)। `आगामी' इति। `गमेरिनिः'(द.उ.6.57) इति वर्त्तमाने `आङि णित्' (द.उ.6.58)इतीनिः; णित्त्वादुपधावृद्धिः। `प्रस्थायी'इत्यादि। `ष्ठा गतिनिवृत्तौ' (धा.पा.928) `बुध बोधने' (धा.पा.1172), `युज समाधौ' (धा.पा.1177) `या प्रापणे' (धा.पा.1949) --एभ्यः `सुप्यजातौ णिनिस्ताच्छील्ये'(3.2.78) इति णिनिः।यातितिष्ठत्योः `आतो युक् चिण्कृतोः' (7.3.33) इति युक्। युजः `चजोः कुघिण्ण्यतोः'(76.3.52) इति कुत्वम्। `भावी' इति। `आङि णित्' (पं.उ.4.7) इति वर्त्तमाने `भुवश्च' (पं.उ.4.8) इतीनिः, णित्त्वाद्वृद्धिः।

`अनद्यतन उपसंख्यानम्' इति। किं पुनः कारणं न सिध्यति ? भविष्यतीति लृटायं निर्देशः क्रियते, तेन च लृट एव विषये भविष्यत्सामान्ये स्यात्, न भविष्यदनद्यतने,ततो लुटो न विषयः, लृटा बाधितत्वात्। तस्मादनद्यतन उपसंख्यानं कर्त्तव्यम्। उपसंख्यानशब्दस्य चेह प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्-- बहुलग्रहणमिहानुवर्त्तते,तेनानद्यतनेऽपि भविष्यतीति।

एते च गम्यादयो लुङ्लृटोरुभयोरपि बाधकाः, अपबादत्वात्।अपवादत्वं तु येननाप्राप्तिन्यायेन (व्या.प.49) ननु च वासरूपविधिना लुङ्लृटावपि प्राप्नुतः, तद्विधौ `भविष्यति गम्यादयः' इत्यनुवृत्तेः ? सत्यम्; अस्यामप्यनुवृत्तौ पक्षे एवेति चेत् ? नैतदस्ति;एवं ह्यनुवृत्तिरपार्थिका स्यात्।।

4. यावत्पुरिनिपातयोर्लट्। (3.3.4)

`यावद्भुङ्क्ते' इति। `भुजोऽनवने' (1.3.66) इत्यत्मनेपदम्। `श्नसोरल्लोपः' (6.4.111) त्यकारलोपः।

`यावद्दास्यति तावद्भोक्ष्यते' इति। यत्परिमाणम्सय, तत् परिमाणमस्येति `यत्तदेतेभ्यः परिमाणे वतुप्' (5.2.39) `दृग्दृशवतुषु' (6.3.89) इत्यनुवर्त्तमाने `आ सर्वनाम्नः' (6.3.91) इत्यात्त्वम्। `पुरा व्रजिष्यति'इति। `पृ पालनपूरणयोः' (धा.पा.1489)। `भ्राजभास' (3.2.177) इत्यादिना क्विप्, `उदोष्ठ्यपूर्वस्य' (7.1.102) इत्युत्त्वम्, करणे तृतीयैकवचनम्। ननु चाव्युत्पन्नावेव यावत्पुराशब्दौ निपातौ, तो च व्युत्पादितौ, तो च व्युत्पादितौ, तत्र लक्षणप्रतिपदोक्तपरिभाषयैव (व्या.प.3) तयोर्निपातयोर्ग्रहणं भविष्यति, तत्किमर्थं निपातग्रहणम् ? मन्दबुद्धीनां प्रतिपत्तिगौरवपरिहार्थमित्येके। अस्याः परिभाषाया अनित्यत्वज्ञापनार्थमित्यपरे। अनित्यत्वज्ञापनस्य तु प्रयोजनमुत्तरत्र वक्ष्यते।।

5. विभाषा कदाकह्योः। (3.3.5)

`कदा भोक्ता' इति। लुट्। ननु च भविष्यतीत्यनुवृत्तेर्लृट एव विषये भवितव्यम्, न लुटः। ततो लृडेव पक्षे युक्त उदाहर्तुम्, तत्कथं लुडप्युदाहृतः ? एवं मन्यते-- `अनद्यतने लुट्' (3.3.15) इत्यत्र `विभाषा कदाकर्ह्योः' इत्यस्यानुवृत्तेर्लृटो विषये विभाषा लुटा भवितव्यमिति। `कर्हि भोक्ष्यते' इति। लृट्। ननु च कर्हिशब्दः `अनद्यतने र्हिलन्यतरस्याम्'(5.3.21) इत्यनद्यतने व्युत्पादितः, तदसौ यत्र प्रयुज्यते ततर्ानद्यतन इव कालः सम्भवति, तत्कुतो लृटः

प्राप्तिः, `अनद्यतने लुट्'(3.3.15) इति लुटैव पक्षे भवितव्यम् ? नैतदस्ति; यस्माद्भोक्ष्यत इत्येतत् पदं भविष्यत्काल एव वर्त्तते। अनद्यतनकालावगतिस्तु कर्हिशब्दसन्निधाने सति वाक्याद्भवति। न च वाक्यगम्येऽर्थे लृङ्भवति। तथा हि पदमिह संस्क्रियते, न च पदसंस्कारे वाक्यगम्योऽर्थ उपयुज्यते। तस्माद्भविष्यत्सामान्ये विवक्षिते लृङ्भवति, भविष्यति विशेषेऽप्यनद्यतने विवक्षिते लुडिति।।

6. किंवृत्ते लिप्सायाम। (3.3.6)

`किमो वृत्तम्' इत्यादि। किं पुनःकिमो वृत्तमित्याह-- `वृत्तग्रहणेन ' इत्यादि। तदित्यनेन किंशब्दः सम्बध्यते-- किमेतच्छब्दरूपं विभक्त्यन्तं वृत्तग्रहणेन प्रतीयात्। डतरडतमौ च `किंयत्तदौर्निर्धारणे द्वयोरेकस्य डतरच्'(5.3.92)।`वा बहूनां जातिपरिप्रश्ने डतमच्' (5.3.93) इत्येतौ प्रत्ययौ किंशब्दसम्बन्धिनावेव वृत्तग्रहणेन प्रतीयात्। प्त्ययग्रहणपरिभाषया चेह डतरडतमान्तं प्रतीयादित्येषोऽर्थो वेदितव्यः। `परिसंख्यानम् ' इति। नियम इत्यर्थः। तेन किंतराम्, किंगौः, किंपुरुषः-- इत्यवमादिषु पदेषु न भवति; तेषां किंवृत्तत्वस्य परिगणनेन निरस्तत्वात्। `भोजयन्ति' इति। हेतुमण्णयन्ताल्लट्। `भोजयितारः' इति। `लुटः प्रथमस्य डारौरसः' (2.4.85) इति झे रसादेशः, `रि च' (7.4.51) इति सकारलोपः। `लब्धुकामः पृच्छति' इति। उदाहरणेषु लिप्साया गम्यमानत्वात्।।

7. लिप्स्यमानसिद्धौ च। (3.3.7)

लिप्सायामेव सत्यां सम्भवति, नासत्याम्। अतो यत्र लिप्स्यमानसिद्धिर्गम्यते तत्रावश्यं लिप्सया भवितव्यम्, तथा च पूर्वेणैव सिद्धम्, तत्किमर्थोऽयमारम्भ इत्यत आह-- `अकिंवृत्तार्थोऽयमारम्भः'इति। यद्येवम्, पूर्वसूत्र एव किंवृत्तग्रहणमकृत्वा प्रत्ययो विदेयः, एवं हीदं नारब्धव्यं भवति ? नैतदस्ति; एं हि यथा लिप्स्यमानसिद्धौ गम्यमानायां किंदृत्तं चाकिंवृत्तं च भवति तथा यत्रापि लिप्स्यमानसिद्धिरहितं लिप्स्यमानं गम्यं तत्रापि स्यात्। किंवृत्त एव तत् तत्रेष्यते, तस्मात् पूर्वयोगे किंवृत्तग्रहणं कर्त्तव्यम्। तस्मिंश्च सतीदमप्यकिंवृत्तार्ओथमारब्धव्यम्। `दातारं प्रोत्साहयति' इति। भक्तदानविषयेऽस्य प्रोत्साहं जनयतीत्यर्थः।।

8. लोडर्थलक्षणे च। (3.3.8)

`प्रैषादि'इति आदिशब्देन विधिनिमन्त्रणामन्त्रणाधीष्टादयो गम्यन्ते। `आगच्छति' इति। `इषुगमियमां छः' (7.3.77) इति च्छत्वम्। `अध्ययनप्रैषस्य'इति। अध्ययनविषयः प्रैषोऽध्ययनप्रैषः, शाकपार्थिवादित्वादुत्तरपदलोपी समासः। `अथ त्वं छन्दोऽधीष्व ' इति। अत्र `प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' (3.3.163) इति लोट्। स च प्रैषोऽध्ययनविषयः। तस्योपाध्यायगमनं ह्यपेक्ष्याध्ययने प्रैषतेत्यस्योपाध्यायागमनस्यप्रैषं प्रति निमित्तभावः।।

9. लिङ् चोर्ध्वमौहूर्तिके। (3.3.9)

`निपातनात् समासः' इत्यादि। ऊर्ध्वमौहूर्तिकशब्दस्योच्चारणेव निपातनम्। ऊर्ध्वं मुहूर्त्तादिति विगृह्यास्मादेव निपातनात् समासः। ततः `बह्वचोऽन्तोदात्तात्' (4.3.67) इति ठञ्, तत उत्तदरपदवृद्धिः, सा ह्यत एव निपातनात्। भविष्यतः प्रकृतत्वात् तस्यैवोर्ध्वमौहूर्त्तिकग्रहणं विशेषणं विज्ञायत इत्याह-- `भविष्यतश्चैतत्' इत्यादि। ऊर्ध्वमौहूर्त्तिकशब्दश्चायं वर्त्तमानस्य प्रत्यासन्ने वर्तते। ऊर्ध्वमौहूर्त्तिके वर्त्तमानसमीप इत्यर्थः। `आगच्छेत्' इति। यासुट्, `अतो येयः' (7.2.80) इतीयादेशः, `आद्गुणः' (6.1.87)`लोपो व्योर्वलि' (6.1.66) इति यकारस्य लोपः,सलोपोऽनन्त्यस्य' (7.2.79) इति सकारस्य।।

10. तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्। (3.3.10)

`भिक्षिष्य इत्यस्य जटाः' इति। लृट्, अनुदात्तेत्त्वादात्मनेपदम्,उत्तमपुरुषैकवचनम्, इट्, टेरेत्त्वम्, `अतो गुणे' (6.1.97) पररूपत्वम्। अत्रास्ति भिक्षिक्रियार्थमुपपदं जटाशब्दः, न तु जटाशब्दः क्रियावचनः; जटानां द्रव्यत्वात्। `धावतस्ते पतिष्यति दण्डः'इति। `धाव् गतिशुद्धयोः'(धा.पा.601), लट्, तस्य शत्रादेशः, षष्ठ्येकवचनम्। अथ वा `सृ गतौ' (धा.पा.935)इत्यस्य प्राघ्रादिसूत्रेण (7.3.78) धावादेशः। अस्त्यत्र धावतिक्रियोपपदम्, न तु क्रियार्थः। अर्थशब्दो ह्ययं प्रयोजनवचनः, यच्च यदुद्दिश्य प्रवर्त्तते तत्तस्य प्रयोजनं भवति, न चासौ दण्डपतनमुद्दिश्य धावति, किं तर्हि ? कार्यान्तरार्थम्। `अथ' इत्यादि चोद्यम्। `सामान्येन विहित एव'इति। भविष्यत्यन्यत्र च काले क्रियायां क्रियार्थायामुपपदेऽन्यत्र चाविशेषेण विधानात्। `लृटा' इत्यादि परिहारः। `लृट शेषे च' (3.3.13) इति लृटं वक्ष्यति, तेन विशेषविहितेन लृटा बाध्यते, तन्मा भूतत्तस्य बाधेति पुनरिह विधीयते। अथ तुमुन् क्रियार्थोपपदेन बाध्यत इत्येतत् क्समान्नोक्तम् ? भिन्नार्थत्वात्। न हि भिन्नार्थयोर्बाध्यबाधकभावो भवति, भिन्नार्थो च ण्वुल्तुमुनौ। तथा हि-- कर्त्तरि ण्वुल्, तुमुन् पुनर्भावे। कथं ज्ञायते ? `तुमर्थे सेसेन्' (3.4.9) इत्यत्र तुमर्थग्रहणात्। यदि तुमुन् `कर्त्तरि कृत्' (3.4.67) इत्यतो वचनात् कर्त्तरि स्यात,ततः सेसेन्प्रभृतयोऽपि तत्रैव भविष्यन्तीति तुमर्थग्रहणं न कुर्यात्, कृतवांश्च, ततस्तुमर्थग्रहणादवसीयते-- तुमुन् कर्त्तरि न भवति। न चान्यार्थो निर्द्दिश्यते, तत्र `अनिर्द्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' (पु.प.90) इति भाव एव तुमुन् भवतीति विज्ञायते। यदुक्तम्-- लृटा क्रियार्थोपपदेन बाध्यत इति,तद्विघटयितुमाह-- `वासरूपविधिना'इत्यादि। `एवं तर्हि' इत्यादि। एतेन ज्ञापकार्थतां ण्वुल्विधानस्याचष्टे। यदि हि क्रियायामुपपदे क्रियार्थायां वासरूपेण तृजादयः स्युर्ण्वुलपि

तृजर्थाभिधायित्वाद्वासरूपविधिना भविष्यन्तीति पुनरिह तन्न विदध्यात्, विहितवांश्च;ततस्तेन ण्वुल्विधानेनास्मिन् विषये वासरूपेण तृजादयो न भवन्तीत्येषोऽर्थो विज्ञाप्यते। `तेन' इत्यादिना ज्ञापनस्य प्रयोजनं दर्शयति। `कर्त्ता' इति। तृच्। `विक्षिपः' इति। `इगुपधज्ञाप्रीकिरः कः'(3.1.135)। तुमुनो नकार आद्युदात्तार्थः, उकार उच्चारणार्थः। ण्वुलो लकारो लिति प्रत्ययात् पूर्वस्योदात्तार्थः, णकारो वृद्ध्यर्थः।।

11. भाववचनाश्च। (3.3.11)
`भाववचनाः' इति। ब्रुवन्तीति वचनाः, बहुलचनात् कर्त्तरि ल्युट्। भावस्य वचना भाववचनाः। भाववचनत्वं पुनस्तेषां भावाधिकारे विधानादिति दर्शयितुमाह-- `भावे इति प्रकृत्य'इत्यादि। प्रकृत्य अधिकृत्येत्यर्थः। `घञादयः'इति। आदिशब्देनाजबादीनां ग्रहणम्। `किमर्थम्' इत्यादि चोद्यम्। `क्रियार्थोपपदे विहितेन' इत्यादि परिहारः। स्यादेतत्-- वासरूपविधिना ते भविष्यन्ति। अत आह-- `वासरूपविधिश्च नास्तीत्युक्तम्' इति। एतच्च पूर्वसूत्र उक्तम्।
`अथ ' इत्यादि। भाव इत्येतावद्वक्तव्यम्; एवं ह्युच्यमाने सतीदमेव घञादीनां विधायकं स्यात्,ततश्च ते धातुमात्रादविशेधेम प्रसज्येरन्; विशेधानुपादानात्। वचनग्रहणादयमर्थो लभ्यते-- भावे ये विहिताः प्रत्ययास्ते तथा भवन्ति यथा भावस्य वाचका भवन्तीति। यथा च ते भावस्य वाचका भवन्ति तथा प्रश्नपूर्वकं दर्शयितुमाह--`कथञ्च' इत्यादिना। `नामसामञ्जस्येन' इति। न व्यतिरेकेण,नानियमेनेत्यर्थः।
तत्र केचिदाहुः- वचनग्रहणाद्यैरेव विधिवाक्यैर्भाव एषां विधानं तैरेव क्रियायामुपपदे क्रियार्थायां भवन्ति, एवञ्चते वाचका भवन्ति, नान्यथेति। अन्ये त्वाहुः-- एतदेव सूत्रं विधायकम्; वचनग्रहणसामर्थ्यात्। अनेनापि तथैषां विधानं भवति यथा स्वैर्विधिवाक्यैः। यदि भावे हि तद्विधिः, नान्यस्मिन्नपि विषये भविष्यति। तत् तस्मात् पुनर्विधीयत इति।।

12. अण् कर्मणि च। (3.3.12)
`कर्मण्यण्' इत्यादि। `तुमुनृण्वुलौ' (3.3.10) इत्यादिसूत्रे ज्ञापितमेतत्-- वासरूपविधिरिह नास्तीति। तेन यद्यपि विशेषणेणाण् विहितः, तथापि वासरूपविधेरभावात् क्रियार्थोपपद न ण्वुला बाधितः,तस्मात् पुनर्विधीयते। `सोपऽपवादत्वाण्णवुलं बाधते' इति। नाप्राप्ते ण्वुलीतरस्यारब्धत्वात्, विशेषविहितत्वाच्च। `कादीन्' इति। बाधत इति सम्बन्धः। आदिशब्देन टगादीनां ग्रहणम्। `तेनापवादविषयेऽपि भवति' इति। अपवादाः सामान्यविहितस्याणः कादयः, तद्विषयेऽपि भवति। `अण् कर्मणि च' (3.2.12) इत्यस्याऽनाकारान्तक्रियोपपदोऽवकाश--- काण्टलावो व्रजतीति, `आतोऽनुपसर्गे कः' (3.2.3) इत्यस्याकारान्तः क्रियोपपदोऽवकाशः --गोद इति; इह ह्युभयं प्राप्नोति-- गोदायो व्रजतीति, परत्वादण् भवति। तथा `गपोष्टक्'(3.2.8) इत्यस्यावकाशः--सुरापः,शीधुपः,अणः स एव;इहोभयं प्राप्नोति--सुरापायो व्रजति, शीधुपायो व्रजतीति।।

13. लृट् शेषे च। (3.3.13)
`चकारात्' इत्यादि। एतेन क्रियायां क्रियार्थायामित्यस्यानुकर्षणार्थश्चकार इति दर्शयति। `करिष्यामि' इति। `ऋद्धनोः स्ये' (7.2.70) इतीट्।।

14. लृटः सद्वा। (3.3.14)
`सत्संज्ञौ' इति। `तौ सत्' (3.2.127) इतिसंज्ञाविहितत्वाच्छतृशानचौ सत्संज्ञकौ। कथं पुनर्लृटः शतृशानचौ भवत इत्याह-- `अप्रथमासमानाधिकरणे' इत्यादि। प्रथमासमानाधिकरणे विकल्पेन यथा लटः शतृशानचौ,तथा लृटोऽपि व्यवस्थितविभाषया सत्संज्ञकौ भवतः। अप्रथमासमानाधिकरणादिषु नित्यं भवतः-- करिष्यन्तं पश्य, करिष्यमाणं पश्य, हे करिष्यन्, हे करिष्यमाण, अर्जयिष्यन् वसति, करिष्यद्भक्तिः, करिष्यमाणभक्तिः, करिष्यद्रूपः,करिष्यमाणरूप इत्यप्रथमासमानाधिकरणे।
प्रथमासमानाधिकरणे तु विकल्पः-- करिष्यति देवदत्तः करिष्यन् देवदत्तः; करिष्यते देवदत्तः, करिष्यमाणो देवदत्त इति। लृडिति वर्त्तमाने पुनर्लृड्ग्रहणं स्थानिनिर्देशार्थम्; इतरथा हि प्रत्ययान्तरत्वं सत्संज्ञकयोर्विज्ञायेत। लृण्मात्रस्य यथा स्यादित्येवमर्थं वा। तेन योऽनद्यतने लृट् तस्यापि भवतः-- श्वोऽग्नीनाधास्यमानेनेति। `अभिज्ञावचने लृट्' (3.2.112) इत्यस्य न भवतः; भविष्यतीत्यधिकारात्, अस्य च भविष्यत्कालविहितत्वात्। अनद्यतने पुनर्लृडुत्तरसूत्रेऽनद्यतन इतियोगविभागाद्भवतीति वेदितव्यम्। लृटष्टकारष्टेरेत्वार्थः, ऋकारः `स्यतासी लृलुटोः' (3.1.33) इत्यत्र विशेषार्थः।।

15. अनद्यतने लुट्। (3.3.15)
`अनद्यतन इति बहुव्रीहिनिर्देशः' इति। अद्य भावो नास्यास्मिन्नित्यनद्यतनः। `तेन' इत्यादिना बहुव्रीहिसमासाश्रयणस्य फलं दर्शयति। एतच्च `अनद्यतने लङ्'(3.2.111) इत्यत्र व्याख्यातप्रायमिति तत एवादवगन्तव्यम्। `अद्य श्वो वा गमिष्यति' इति। अद्य श्वश्च गमिष्यतीत्यर्थः।
`परिदेवने' इत्यादि। भविष्यदनद्यतने लुडुक्तो भविष्यत्सामान्ये न प्राप्नोति, इष्यते च, एतदर्थमिदमुच्यते। परिदेवनम् = अनुशोचनम्। `श्वस्तनी' इति. लुट इयमन्याचार्यसंज्ञा। `वक्तव्या' इति। व्याख्येया। तत्रेदं व्याख्यानम्-- `लृट् शेषे च' (3.3.13) इत्यतश्चकारोऽनुवनर्त्तते, स चानुक्तसमुच्चयार्थः। ततः परिदेवने श्वस्तनी भविष्यत्यर्थे भविष्यतीति। अन्यस्त्वयं नु कदा गन्तेत्यादावनद्यतन एव काले लुडिति दर्शयन्नाह-- पदमन्वाख्याने व्याकरणे च, तच्च पदं गन्तेत्यादिकमनद्यतन एव वर्त्तते। तस्य यदाऽनद्यतने भविष्यत्सामान्ये वा वृत्तिः सार्थात् प्रकरणाद्वा भवतीति वाक्यार्मथोऽवतिष्ठते। न च वाक्यार्थः

पदसंस्कारस्य निमित्तम्, किं तर्हि ? पदार्थः। तस्मादनद्यतने लुडित्येष सिद्धमिति। अनेन तु न्यायेन परिदेवने श्वस्तनीत्यादि सम्यगेतत्। लुटोऽपि टकारष्टेरेत्वार्थः; उकारः `लुटः प्रथमस्य डारौरसः' (2.4.85) इति विशेषणार्थः।।

16. पदरुजविशस्पृशो घञ्। (3.3.16)
पदेर्ण्वृल्तृचोरपवादो घञ् विधीयते, रुजिविशिभ्यामिगुपधलक्षणस्य कस्य, स्पृशेश्च पचाद्यचः। `पादः' इति। `अत उपधायाः' (7.2.116) इति वृद्धिः। यद्येवम्, पदमिति न सिद्ध्यति ? न तु खलु न सिद्ध्यति, `अनुदात्तं पदमेकवर्जम् (6.1.158)इति निपातनात्।
`स्पृश उपतापे इति वक्तव्यम्'इति। उपतापः = रोगः, तत्र स्पृशेर्घञ्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- `लृटः सद्वा' (3.3.14) इत्यतो वाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा। तेन स्पृशेरुपात एव कर्त्तरि भवति, नान्यत्रेति। `स्वरे विशेषः' इति। अचि हि सत्यन्तोदात्तत्वं भवति, घञि तु पदस्याद्युदात्तत्वं स्यात्। घञो ञकारो वृद्ध्यर्थः, आद्युदात्तार्थश्च। घकारः `चजोः कुघिण्ण्यतोः' (7.3.52) इति कुत्वार्थः।।

17. सृ स्थिरे। (3.3.17)
`सर्त्तेर्धातोः' इति। `सृ गतौ' (धा.पा.935) इत्यस्माद्धातोः। `स्थिरे कर्त्तरि' इति। एतेन स्थिरग्रहणं प्रत्ययार्थस्य कर्त्तुर्विशेषणं न तूपपदमिति दर्शयति।`घञ्प्रत्ययो भवति' इति। तृजाद्यपवादः। कः पुनरयं स्थिरो नामेत्याह-- `स्थिर इति कालान्तरस्थायी' इत्यादि। तत्रैवोपपत्तिमाह-- `स चिरम्' इत्यादि। सर्त्तेर्धातोर्गतिरर्थः। स च कालान्तरस्थायिन एव कर्त्तुः सम्भवति, नात्मलाभसमनन्तरनाशिनः। तस्मात् कालान्तरस्थाय्येव गतेर्धात्वर्थस्य कर्त्ता युज्यत इत्येवेह स्थिरशब्देनोच्यते। यदि कालान्तरस्थायिन एव गतिः सम्भवति स्थिरग्रहणमनर्थकम्, न ह्यस्थिरः सर्त्त्यर्थस् कर्त्तोपपद्यते ? नानर्थकम्; प्रकर्षेण यः सरति तत्र कर्त्तरि प्रत्ययो यथा स्यादित्येवमर्थत्वात्। अत एव स चिरं तिष्ठन् कालान्तरं सरतीति वृत्तौ चिरग्रहणं कृतम्। `चन्दसारः' इति। षष्ठीसमासः।
`व्याधिमत्स्यबलेष्विति वक्तव्यम्' इति। अस्थिरार्थोऽयमारम्भः। एषु व्याध्यादिषु त्रिष्विपि घञ् भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं त्विहापि चकारानुवृत्तिमाश्रित्य कर्त्तव्यम्। `अतीसारः' इति। `उपसर्गस्य घञ्यमनुष्ये बहुलम्' (6.3.122) इति दीर्घत्वम्।।

18. भावे। (3.3.18)
`रागः' इति। `रञ्जेश्च' (6.4.26) `घञि च भावकरणयोः' (6.4.27)इत्यनुनासिकलोपः। ननु च `भावे' इति भवतिनायं घञन्तेन निर्देशः क्रियत इति भवतिविषय एव प्रत्ययार्थनिर्द्देशः कृतो भवति, ततश्च भवतेर्यो भावस्तस्मिन्नेव वाच्ये प्रत्ययः स्यात्, स च भवतेरेवोत्पद्यमानेन प्रत्ययेन शक्योऽभिधातुम्, अतस्तत एव प्रत्ययेन भवितव्यम्, तत्कथं पाकस्त्यागो राग इति पच्यादिभ्यो भवति ? अत आह-- `क्रियासामान्यवाची' इत्यादि। क्रियासामान्यं हि सर्व धात्वर्थानुगतं भवतेरर्थः। तेन क्रियासामान्यवाचिनाऽर्थनिर्देशः क्रियमाणः सर्वधातुविषयः कृतो भवति, अतः पच्यादिभ्योऽपि प्रत्ययो भवतीत्यभिप्रायः। ननु धात्वर्थः पूर्वापरीभूतोऽपरिनिष्पन्नः, ततो यदि तत्र वाच्ये प्रत्ययो भवति तस्यासत्त्वभूतत्वाल्लिङ्गसंख्याभ्यां प्रत्ययार्थस्य सम्बन्धो न सिद्ध्यति, तत आह-- `धात्वर्थश्च' इत्यादि। एवकारः प्रत्ययव्यवच्छेदार्थः। धातुनैवोच्यते धात्वर्थः, न तु प्रत्ययेन। कथं तर्हि घञादयो विधीयन्त इत्यत आह-- `यस्तस्य' इत्यादि। तस्य धात्वर्थस्य सिद्धता निष्पन्नता नाम यो धर्मस्तत्र घञादयः प्रत्यया विधीयन्ते, ततो युक्तः प्रत्ययार्थस्य लिङ्गसंख्यायोगः। तस्य यो धर्मस्तस्य सत्त्वभूतत्वादित्यर्थः। भाव इति-- इहि पुंल्लिङ्गेनायं निर्द्देश एकवचनेनन च। तेन पुंल्लिङ्ग एव बावे एकवचन एव प्रत्ययाः स्युः। न लिङ्गान्तरयुक्ते नापि वचनान्तरे। एवञ्च सति `स्त्रियां क्तिन्' (3.3.94) इत्यत्र `भावे' `स्त्रियाम्'इति चैतयोः सामानाधिकरण्यं नोपपद्यते, वैयधिकरण्यं हि स्यात्। ततः स्त्रियां भावे क्तिन्प्रत्ययो न स्यात्, अर्थान्तर एव कर्मादौ स्यात्। भावे च पुंल्लिङ्गे पाकौ पाका इत्यत्रैकवचनं स्यात्।
यथाजातीयकं ह्यर्थमुपादातुं समर्थो भावशब्दस्तथाजातीयकेऽर्थे प्रत्ययेन युक्तं भवितुं नान्यत्रेत्यत आह-- `पुंल्लिङ्गमेकवचनं चात्र न तन्त्रम्' इति। सर्वलिङ्गसंख्यासम्बन्धयोग्यं प्रतातिपदिकार्थसामान्यनिमित्तं प्रत्ययनिमित्तत्वेनोपादीयते, तदेव प्रधानम्, न लिङ्गं नापि वचनम्। तत्र प्रातिपदिकार्थसामान्यं विना लिङ्गवचनाभ्यां न शक्यं निर्द्देष्टुमिति नान्तरीयकत्वात् तयोरुपादानम्। प्रतीते तु तस्मिन् प्रातिपदिकार्थसामान्यचरितार्थत्वाल्लिङ्गवचने लिङ्गान्तरे च प्रत्यया भवन्त्येव। `पक्तिः' इति। भावे `स्त्रियां क्तिन्' (3.3.94) । `पक्वम्' इति। `नुपंसके भावे क्तः' (3.3.114)। `पचनम्' इति। `ल्युट् च' (3.3.115) इति ल्युट्। अत्रापि यदि भावे पुल्लिङ्गस्तन्त्रं स्यात्, ततो भावनपुंसकशब्दयोः सामानाधिकरण्यानुपपत्तेर्वैयधिकरण्यं स्यात्, ततश्च भावे नपुंसके ल्युण्न स्यात्, अर्थान्तर एव तु स्यात्। भावे च पुंल्लिङ्गे पचनमित्यस्य तुल्यत्वाच्चोद्यपरिहारस्योपन्यासः, अन्यथा ह्यन्यदेव भावग्रहणमधिकृत्य ल्युटो विधानाददमिहानुपन्यसनीयमेव स्यात्। `पाकौ' इत्यादिकं वचनान्तरे भावप्रत्ययस्योदाहरणम्।।

19. अकर्त्तरि च कारके संज्ञायाम्। (3.3.19)
`प्रासः'इति। `असु क्षेपणे' (धा.पा.1209), `प्रसेवः' इति। `षिवृ तन्तुसन्ताने' (धा.पा.1108), उभयत्राप्यत्र कर्मणि घञ्। `आहारः' इति। `हृञ् हरणे' (धा.पा.899)। `मधुराहारः' इति। कर्मधारयः, षष्ठीतत्पुरुषो वा।

`मेषः' इति। `मिष स्पर्द्धायाम्' (धा.पा.1352), पचाद्यच्। `कर्त्तव्यः' इति। कर्मणि तव्यः।
`चकारः संज्ञाव्यभिचारार्थः' इति। चकारोऽयं भिन्नक्रमः संज्ञायामित्यस्यानन्तरं द्रष्टव्यः, तदनेन चार्थ द्योत्यते। `संज्ञायाञ्च'इति चार्थं द्योतयन्नसौ संज्ञाव्यभिचाराय भवति, तेनासंज्ञायामपि च भवति यद्येवम्, संज्ञाग्रहणमकृत्वा सामान्येनैव प्रत्ययो विधेयः; तत्राप्ययमर्थः-- संज्ञाव्यभिचारार्थश्चकारो न कर्त्तव्यो भवति ? सत्यमेतत् ; तथापि बाहुल्येन संज्ञायां भवति; असंज्ञायां तु क्वचिदेवेत्यमुमर्थं सूचयितुं संज्ञाग्रहणं कृतम्। दीयत इति `दायः' कर्मणि घञ्, पूर्ववद् युक्। `लाभः' इति कर्मण्येव घञ्। `कारकग्रहणम्' इत्यादि। पर्युदासे हि `अकर्त्तरि' इत्युक्ते कारकग्रहणमन्तरेणापि नञिवयुक्तन्यायेन (व्या.प.65) कर्त्तुरन्यत्र तादृशे कारक एव कर्मादौ प्रतीतिर्भवति, यथा-- अब्राह्मण इति ब्राह्मणसदृशे क्षत्रियादौ। तस्मात् पर्युदासे विनापि कारकग्रहणेन कारकएव प्रत्ययो लभ्यतइत कारकग्रहणं न कर्त्तव्यम्। प्रसज्यप्रतिषेधे तु कर्त्तव्यम्, तत्र हि क्रियाप्रतिषेधमात्रं प्रतीयते, न सदृशं वस्त्वन्तरम्। तत्र यदि `अकर्त्तरि संज्ञायाम्' इत्येतावदुच्येत, कर्त्तरि न भवतीत्येषोऽर्थः प्रतीयेत। एवञ्च विधायकस्य वाक्यान्तरस्याभावात् कर्मादिषु प्रत्ययो न स्यात्। क्व तर्हि स्यात् ? `अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति (पुं.प.90) इति स्वार्थे। ननु च विहितः स्वार्थे पूर्वेणेव ? नैतदस्ति;`धात्वर्थस्य हि सिद्धता नाम यो धर्मस्तत्र घञादयो विधीयन्ते' इत्युक्तम्। तस्मात् प्रसज्यप्रतिषेधे कारकग्रहणं क्रियते ? इत्यत आह-- पर्युदासे कारकग्रहणमन्तरेणापि सिध्यति, स एवाश्रयिष्यते, तत्किमर्थमं कारकग्रहणं क्रियते ? इत्यत आह-- `तत्क्रियते' इत्यादि। यदि तर्हि पर्युदास एवैष नञ्समासः स्यात्, कारकग्रहणमनर्थकं स्यात्, विनापि हि तेन कारक एव प्रत्ययो लभ्यते; प्रसज्यप्रतिषेधे तु सति कारकग्रहणमर्थवद्भवति, न हि तत्र विनापि तेन कारके प्रत्ययो लभ्यते। इवञ्चानन्तरमेव प्रतिपादनम्। तस्मात् कारकग्रहणेन प्रसज्यप्रतिषेधेऽपि समासोऽस्तीति ज्ञाप्यते। तेन `आदेच उपदेशेऽशिति' (6.1.45) इत्यत्र प्रसज्यप्रतिषेधे समासो लभ्यते, ततश्च यदुक्तम्--`अनैमित्तिकमात्त्वं शिति प्रतिषेधः' इति, तदुपपन्नं भवति। किं पुनः कारणं तत्र प्रसज्यप्रतिषेध आश्रीयते ? प्रागेव प्रत्ययोत्पत्तेरनिमित्तक आत्त्वे कृते सुग्लः सुम्ल इति `आतश्चोपसर्गे' (3.1.136) इति को यथा स्यात्। पर्युदासे तु तत्राश्रीयमाणे शितोऽन्यत्र तृजादौ प्रत्यये परभूत आत्त्वेन भवितव्यम्, ततश्च ग्लायतिप्रभृतिभ्य आकारान्तलक्षमः प्रत्ययो न स्यात्। ननु चाचार्यप्रवृत्तिर्ज्ञापयति-- भवन्त्येजन्तेभ्य आकारान्तलक्षणः प्रत्यय इति, यदयं कबाधनार्थं `ह्वावामश्च' (3.2.2) इत्यणं शास्ति, तस्मादशितीति पर्युदासेऽप्याश्रीयमाणे ज्ञापकादेजन्तस्याकारान्तलक्षणः प्रत्ययः सिध्यत्येव ? नैतदस्ति; कर्मोपपदविषयमेवैतज्ज्ञापकं विज्ञायते। तस्मादशितीत्यत्र प्रसज्यप्रतिषेध एवाश्रयितुं युक्तः। तस्य चास्तित्वमिह कारकग्रहणेन ज्ञाप्यते। किं पुनः कारणं प्रसज्यप्रतिषेधो न सिध्यति, यतस्तदस्तित्वज्ञापनं प्रतिपन्नं क्रियते ? असामर्थ्यं कारणम्; सामर्थ्ये हि सति समासेन भवितव्यम्,न च तत् प्रसज्यप्रतिषेधे। तथा हि ततर् नञ् क्रियया सम्बद्धः, नोत्तरपदेन।।

20. परिमाणाख्यायां सर्वेभ्यः। (3.3.20)
`एकस्तण्डुलनिश्चायः'इति। `ग्रहवृदृनिश्चिगमश्च' (3.3.58) इत्यपि प्राप्ते धञ्। `द्वौ शूर्पनिष्पावौ' इति। अत्रापि `ॠदोरप्' (3.3.57) इत्यपि प्राप्ते। `इदुदुपधस्य चाप्रत्ययस्य' (8.3.41) इति विसर्जनीयस् षत्वम्। `द्वौ कारौ'इति। `कृ विक्षेपे' (धा.पा.1409)। ननु च द्वौ शूर्पनिष्पावावित्यत्र `निरभ्योः पूल्वोः' (3.3.28) इत्यनेन घञ् सिद्धः, तत्किमर्थमिदमिहोक्तम् ? एवं मन्यते -- अन्यार्ते सर्वग्रहणे क्रियमाणे परिमाणाख्यायां वाऽन्यत्रैव सिद्धम्, निष्पूर्वादपि ह्यप्रत्ययो युक्तः, `निरभ्योः पूल्वोः' (3.3.28) इत्यस्य तु यत्र परिमाणाख्या न गम्यते सोऽवकाश इति। कः पुनस्तेन वानेन वा घञि सति विशेषः ? को न्यायो वाख्ययते ? न कश्चित्। ननु च धातोरिति सामान्यमधिकृतम्, न धातुविशेष इति। अन्तरेणापि सर्वग्रहणं धातुमात्राद्धञ् भविष्यति तत्किमर्थं सर्वग्रहणमित्याह-- `सर्वग्रहणम्' इत्यादि। किं पुनः कारणमसति सर्वग्रहणेऽपो बाधा न सिध्यतीत्याह-- `पुरस्तात्' इत्यादि। `पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' (व्या.प.9) इति। सति सर्वग्रहणे घञमनन्तरमचमेव बाधेत, नापम्। सर्वग्रहणे तु सत्यपमपि बाधते। तस्मादपोऽपि बाधा यथा स्यादिति सर्वग्रहणम्।
न च परिमाणशब्दोऽयं प्रस्थादिषु रूढो न संख्यायाम्, तत्कथं परिमाणाख्यायं प्रत्ययो विधायमान एकस्तण्डुलनिश्चाय इत्यादौ गम्यमानायां भवतीत्यत आह-- `आख्याग्रहणम्' इत्यादि। आख्याग्रहणमिह रूढेर्निरासस्त्यागो यथा स्यादित्येवमर्थं कृतम्। तेन रूढौ त्यक्तायां संख्यापि गृह्यते। आख्याग्रहणसामर्थ्याद्धि परिमाणम्, अतो युक्तं तस्यापि ग्रहणम्। यदि सर्वग्रहणात् परमप्ययं घञ् बाधते, स्थीप्रत्ययानपि बाधेतेत्यत इत्यभिप्रायः। अत एवाह--`स्त्रीप्रत्ययास्तु न बाध्यन्ते' इति। कृतः पुनरयमर्थो लभ्यते ? `सर्वेभ्यः'इति पञ्चम्यन्तेन निर्देशात्। पञ्चम्यन्तनिर्द्देशे हि सर्वशब्दो धातुसमानाधिकरणो विज्ञायते। तेन प्रकृत्याश्रयस्यापवादस्य सर्वग्रहणाद्बाधा भवति, नार्थाश्रयस्य। यदि त्वर्थाश्रयोऽप्यपवादो बाधितुमिष्टः स्यात्, तदा सर्वस्मिन्निति सर्वशब्दं सप्तम्यन्तमुच्चारयेत्। `एका तिलोच्छ्रितिः'इति। श्रिञ उत्पूर्वात् `स्त्रियां क्तिन्' (3.3.94), `स्तोः श्चुना श्चुः' (8.4.40) इति चुत्वम्, `शश्छोऽटि' (8.4.63) इति च्छत्वम्।
`दारजारौ' इत्यादि। दारजारशब्दौ निपात्येते। किमत्र निपात्यते ? `दृ विदारणे' (धा.पा.1493) `जृष् वयोहानौ' (धा.पा.1130) आभ्यां हेतुमण्ण्यन्ताभ्यां कर्त्तरि तृजादिषु घञि णिलुक्। ननु च `णेरनिटि' (6.4.51) इति णिलोपे हि सति `जनीजृष्क्नसुरञ्जोऽमन्ताश्च' (धा.पा.817) इति मित्संज्ञायां सत्यां णिलोपे कृतेऽपि प्रत्ययलक्षणेन जीर्यतेर्मितां ह्रस्वत्वं प्रसज्यते। अस्तु तर्हि मितां ह्रस्वत्वम्, पुनर्घञाश्रया वृद्धिर्भविष्यतीति चेत् ? अयुक्तमेतत्; न हि घञाश्रया वृद्धिः प्राप्नोति, `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावे सति णिचा व्यवहितत्वात्। लुकि तु सति तस्यापरनिमित्तत्वादसति स्थानिवद्भावे घञमाश्रित्य वृद्धिर्भवति। न च प्रत्ययलक्षणेन ह्रस्वत्वं प्रसज्यते; `न लुमताङ्गस्यट (1.1.63) इति

प्रत्ययलक्षणप्रतिषेधात्। तस्माल्लुग्वक्तव्यः।।

21. इङश्च। (3.3.21)

`अचोऽपवादः' इति। `एरच्' (3.3.56) इति प्राप्तोस्योत्तरस्यापीवर्णान्ताद्घञ् विधीयमानोऽच एवापवादो वेदितव्यः। `अध्यायः' इति। कर्मणि घञ्। `तदन्ताच्च वा ङीष्' इति। योऽयमपादाने घञ् तदन्तान्ङीष् प्रतिपाद्यः। तत्रेदं प्रतिपादनम्-- `वोतो गुणवचनात्' (4.1.44) इत्यत्र वेति योगविभाघः कर्त्तव्यः, तेनापादाने स्त्रियामिङो यो घञ् विहितस्तदन्तान्ङीष् भविष्यतीति। यदा च पुंयोगो न विवक्ष्यते तदा ङीष् प्रतिपाद्यः। यदा तूपाध्यायस्य स्त्रीति पुंयोगो विवक्ष्यते तदा `पुंयोगादाख्यायाम्' (4.1.48) इत्येव ङीष् सिद्धः। उपेत्याधीयतेऽस्या उपाध्यायी।

`शृ वायुवर्णनिवृतेषु' इति। `शृ हिंसायाम्' (धा.पा.1488) - अस्माद्वाय्वादिषु वाच्येषु घञ् प्रतिपाद्यः। प्रतिपादनं तु तमेव चकारमनुक्तसमुच्चयार्थम्, `कृत्यल्युटो बहुलम्' (3.3.113) इति बहुलग्रहणं वाऽऽश्रित्य कर्त्तव्यम्। निवृत्तम् = निवारणम्। शीतादिदुःखोपशमहेतुर्निवारणमुच्यते। `अकृतनीशारः' इति। अकृतशीतनिवारण इत्यर्थः। पूर्ववदुपसर्गस्य दीर्घत्वम्।।

22. उपसर्गे रुवः। (3.3.22)

`अपोऽपवादः' इति। `ॠदोरप्' (3.3.57) इति प्राप्तस्य। उत्तरसूत्रेणाप्युवर्णान्ताद्घञ् विधीयमानोऽप एवापवादो वेदितव्यः।।

23.समि युद्रुदुवः। (3.3.23)

24. श्रिणीभुवोऽनुपसर्गे। (3.3.24)

`अनुपसर्गेभ्यः'इति। अविद्यमान उपसर्ग एषामिति बहुव्रीहिः `अनुपसर्गेभ्यः' इति पञ्चम्यन्तेन विवरणं कुर्वन् सूत्रेऽनुपसर्ग इति सुब्व्यत्ययेन एषा सप्तमीति दर्शयति।

`कथं प्रभावो राज्ञः' इति। अनुपसर्गवचनादिह प्रशब्द उपसर्ग उपपदे न भवितव्यमिति भावः। `{कथं च--काशिका} कथं नयो राज्ञः' इति। अनुपसर्गाद्घञात्र भवितव्यमिति मन्यते।।

25. वौ क्षुश्रुवः। (3.3.25)

`विक्षावः'इति। `टुक्षु शब्दे' (धा.पा.1036)।।

26. अवोदोर्नियः। (3.3.26)

`उन्नायः' इति। `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इति वाऽनुनासिकः। `कथमुन्नयः पदार्थानाम्' इति। उच्छब्दोपपदत्वाद्घञात्र भवितव्यमित्यभिप्रायः।।

27. प्रे द्रुस्तुस्रुवः.(3.3.27)

28. निरभ्योः पूल्वोः। (3.3.28)

`सामान्येन ग्रहणम्' इति। विशेषानुपादानात् । `यथासंख्यमुपसर्गसम्बन्धः' इति। निसोपसर्गेण पुवः सम्बन्धः, अभिना लूञः। ननु च पूञ्पूङ्लूञस्त्रयो धातवः, उपसर्गौ द्वौ, अतो वैषम्याद्यथासंख्येन न भवितव्यम् ? पूरूपमुत्सृष्टानुबन्धसामान्यमेकमेव, ततो नास्ति वैषम्यमित्यदोषः।।

29. उन्न्योर्ग्रः। (3.3.29)

`ॠदोरप्'(3.3.57) इतिप्राप्तस्यायमपवादः। उत्तरत्रापि ॠकारान्ताद्घञ् विधीयमानोऽप एवापवादो वेदितव्यः। `द्वयोरपि ग्रहणम्' इति। विशेषानुपादानात्।।

30. कृ धान्ये। (3.3.30)

धान्यमिह प्रकृत्यर्थो वा स्यात् ? प्रत्ययार्थो वा स्यात् ? प्रकृत्यर्थस्तावन्नोपपद्यते;धान्यस्य द्रव्यत्वात् धातोश्च क्रियावाचित्वात्। प्रत्ययार्थस्तूपपद्यते धान्यम्;किन्तु प्रत्ययेनाबिहितत्वादुत्कारो धान्यस्येति धान्यशब्दस्य प्रयोगो न प्राप्नोति। अथापि प्रयोगः स्यात् ? एवमपि प्रत्ययर्थेऽन्तर्भूतत्वात् षष्ठी नोपपद्यते-- उत्कारो धान्यस्येति। सामानाधिकरण्यमेव प्रत्ययान्तेन स्यात्, एवं हि प्रत्ययर्थो भवति यदि प्रत्ययान्तेन सामानाधिकरण्यं भवति, यथा--

दृतिहरिः पशुरिति। तस्मान्नेदं प्रत्ययार्थः,नापि प्रकृत्यर्थः, अपि तु प्रकृत्यर्थविशेषणमिति हिंसार्थस्य' इति। `कृ हिंसायाम्' (धा.पा.1496) इत्यस्य ग्रहणं न भवति। किं कारणमित्याह-- `अनभिधानात्' इति। शब्दशक्तिस्वाभाव्यादुत्कारशब्दाभ्यां धान्यविषयो विक्षेप एवाभिधीयते, न हिंसा। यस्य चार्थः प्रत्ययान्तेनाभिधीयते तस्यैव ग्रहणं युक्तम्, नेतरस्य। `उत्कारो धान्यस्य' इति। विक्षेपो दान्यस्येत्यर्थः।।

31. यज्ञे समि स्तुवः। (3.3.31)
`समेत्य स्तुवन्ति यस्मिन् देशे' इत्यादिना संस्तावशब्दस्याधिकरणसाधनत्वं दर्शयति।।

32. प्रे स्त्रोऽयज्ञे। (3.3.32)
`बर्हिष्प्रस्तरः'इति। `इदुदुपधस्य चाप्रत्ययस्य' (8.3.41) विसर्जनीयस्य षत्वम्।।

33. प्रथने वावशब्दे। (3.3.33)
`तृणविस्तरः' इति। तृणाच्छादनमित्यर्थः।।

34. छन्दोनाम्नि च। (3.3.34)
छन्दःशब्दोऽयमस्त्येव मन्त्रब्राह्मणे, अस्त्यन्यदक्षराणामित्ताविशिष्टवृत्ते यस्य गायत्र्यादयो विशेषाः। तदिह कतरस्तदर्थो गृह्यते ? इत्याह-- `वृत्तम्' इत्यादि। अत्रैवोपपत्तिमाह-- `नामग्रहणात्' इति। यद्यत्र मन्त्रब्राह्मणमिष्टं स्यान्नामग्रहणं न कुर्यात्, छन्दसीत्येव ब्रूयात्। एवमपि ह्युच्यमाने मन्त्रब्राह्मणग्रहणं लभ्यत एव, यथा-- `बहुलं छन्दसि' (2.4.39) इत्यादौ वाक्ये। तस्मन्नामग्रहणाव्वृत्तमिह च्छन्दो गृह्यते। `विष्टारपङ्क्तिः' इति। `छन्दोनाम्नि च' (8.3.94) इति षत्वम्। विष्टारशब्द एवात्र घञन्तश्छन्दोनामेति कस्यचिद्भ्रान्तिः स्यात्, तन्निराकरणायाह-- `विष्टारपङ्क्तिशब्दोऽत्र' इत्यादि। तत्र = विष्टारपङ्क्तिशब्दे । `अवयवत्वेन वर्त्तते'इति। घञन्तं शब्दरूपमिति सम्बन्धनीयम। यदि घञन्तं शब्दरूपं न च्छन्दोनाम, किन्तु विष्टारपङ्क्तिशब्दः, तत्र घञन्तरूपमवयत्वेन वर्त्तते, एवं तर्हि `छन्दोतत्कथमुन्नीयते ? अस्य हि छन्दोनाम्नि गम्यमान इत्येषोऽर्थः,प्रत्ययान्तं छन्दोनाम भवतीति यावत्। एवञ्चार्थ एवं सति नोपपद्यत इत्याह-- `छन्दोनाम्नीत्यधिकणसप्तम्येषा'इति। एतेन च्छन्दोनाम्नि प्रत्ययान्तस्याधिकरणभूते प्रत्ययो भवतीत्ययमत्रार्थो वेदितव्यः,न च्छन्दोनाम्नि गम्यमान इत्येष इति दर्शयति।।

35. उदि ग्रहः। (3.3.35)
`अपोऽपवादः' इति। `ग्रहवृदृनिश्चिगमश्च' (3.3.58) इति प्राप्तस्य।
`{छन्दसि विपूर्वादपीष्यतेस्रुगुद्यमननिपातनयोः'इत्येव वार्त्तिकपाठो मुद्रितो दृश्यते।} छन्दसि तु'इत्यादि। यज्ञपात्रविशेषो येनाहुतिर्दीयते तत्स्रुगुच्यते, तस्योद्यमनम् = ऊर्ध्वलनयनम्, निपातनम् = धस्तान्नयनम्,एतयोरर्थयोर्ग्रहेश्छन्दसि विषये घञिष्यते। स च `कृत्यल्युटो बहुलम्'(3.3.113) इति लभ्यत इति वेदितव्यम्। `निग्राभम्' इति। हृग्रहोर्भश्छन्दस्युपसंख्यानाद्धकारस्य भकारः।।

36. समि मुष्टौ। (3.3.36)
ग्रहेः क्रियावाचित्वात् मुष्टेश्चाक्रियात्मकत्वात् तत्र ग्रहेर्न सम्भवति, तस्मान्मुष्टिग्रहे योऽर्थस्तस्य विषयो विज्ञायत इत्याह-- मुष्टिविषयश्चेद्धात्वर्थो भवति' इति। अस्त्येवायं मुष्टिशब्दः परिमाणे--शाकस्य मुष्टिरिति, अस्त्यङ्गुलीनां रचनाविशेषे, यथा-- हन्ति मुष्टिनेति,ततर् यदीह परिमाणवृत्तेर्ग्रहणं स्यादस्य सूत्रस्य वैयर्थ्यं स्यात्, `परिमाणाख्यायां सर्वेभ्यः' (3.3.20) इत्येव सिद्धत्वात्। तस्मादङ्गुलीनां रचनाविशेषवृत्तेर्ग्रहणं विज्ञायत इत्याह--
`मुष्टिरङ्गुलिसन्निवेशः' इति।सन्निवेशः = रचनाविशेषः। `अहो मल्लस्य संग्रहः'इति। मुष्टेर्दार्ढ्यमित्यर्थः। अत एवाह-- `दृढमुष्टिताऽऽख्यायते' इति।

37. परिन्योर्नीणोर्द्यूताभ्रेषयोः। (3.3.37)
`पदार्थानाम्' इत्यादि। पदार्शब्दो वस्तुवाची। कुत्सितश्चारः = अपचारः।यताप्राप्तस्याकरणमित्यर्थः। यथाप्राप्तस्याकरणमसाध्वेतदितिलोके कुत्स्यते, तस्मादन्यः शान्तश्चारोऽनपचारः। एतमेवार्थं पर्यायान्तरेण व्यक्तीकर्त्तुमाह-- `यथाप्राप्तस्य करणम्' इति। यद्यत् प्राप्तिमिति `यथाऽसादृश्ये'(2.1.7) इतिवीप्सायामव्ययीभावः। करणम् = सम्पादनम्। एतुदुक्तं भवति-- युक्तेरागमाल्लोकप्रसिद्धेर्वा यः पदार्थानां प्राप्नोति तस्य सम्पादनमभ्रेष इति।`{ भ्रेषृ गतौ- धा.पा.} भ्रेष चलने' (धा.पा.884) भ्रेषणम् = भ्रेषः, स्वरूपात् तच्चलनम्। अभ्रेषो भ्रेषस्वरूपादचलनम्। एवं हि पदार्थाः स्वरूपादचलिता भवन्ति यदि प्राप्तं नातिवर्त्तन्ते। `परिमायेन' इति। `उपसर्गादसमासेऽपि णोपदेशस्य' (8.4.14) इति णत्वम्। `हन्ति' इति बाधते। `समन्तान्नयनेन' इति। परिणायेनेत्यस्येदमर्थकथनम्।।

38. परावनुपात्यय इणः। (3.3.38)
`अनतिपातः' इति। अनितक्रम इत्यर्थः।
`अतिपात इत्यर्थः' इति। अतिक्रम इत्यर्थः।।

39. व्युपयोः शेतेः पर्याये। (3.3.39)
पर्यायोऽनुपात्यय एव,तत्रानुपात्ययग्रहणानुवृत्त्यैव सिद्धे पर्यायग्रहणं बाधकबाधनार्थम्। अभिविधिविवक्षायां परिमाणमपि बाधित्वा घञेव यथा स्यात्। एवञ्चार्थे शब्दाधिक्यादर्थाधिक्यं भवतीति लभ्यते, न तु पर्यायशब्दोऽस्यार्थस्य वाचकः।।

40. हस्तादाने चेरस्तेये। (3.3.40)
`हस्तादानग्रहणेन' इत्यादि। हस्तेनोपायान्तरनिरपेक्षेणोपादानम् = प्रत्यासत्तिः, ततएव वस्तुनो भवति, तस्माद्धस्तादानग्रहणेन ग्राह्यस्य वस्तुनः प्रत्यासन्नतोपलक्ष्यते; हस्तादानशब्दाभिधेयस्यार्थस्य प्रत्यासत्तेः साहचर्यात्।
`वृक्षशिखरे' इत्यादि। वृक्षशिखरग्रहणेनादेयस्याप्रत्यासन्नत्वं सूचयति।।

41. निवासचितिशरीरोपसमाधानेषवादेश्च कः। (3.3.41)
`राशीकरणम्' इति। प्रकीर्णस्यैकत्रकरणमित्यर्थः। `चिखल्लिनिकायः' इति। चिखल्लिर्जनपदः, तस्य निकायः = निवासः। अथादिग्रहणं किम् ? अर्थस्य मा भूत्। यद्येवम्, `चः कः' इति वक्तव्यम् ? एवं तर्हि यदा यङ्लुगन्तादुत्पद्यते तदा `{अन्त्याभावे अन्त्यसदेशस्य' शाक.प.}अन्त्यविकारेऽन्त्यसदेशस्य' (शाक.प.56) इति द्वितीयस्य चकारस्य मा भूदित्यवमर्थमादिग्रहणम्।।

42. सङ्घे चानौत्तराधर्ये। (3.3.42)
`एकधर्मनिवेशेन' इति। एकधर्मानुगमनेनेत्यर्थः।।

43. करमव्यतिहारे णच् स्त्रियाम्। (3.3.43)
`दातोः'(3.1.91) इत्यधिकाराद्धातुवाच्यं यत्कर्म तदव गृह्यते,न साधनकर्म। न हि धातोस्तत्र वृत्तिरस्तीति मत्वाऽऽह-- कर्म क्रिया'इति। `चकारो विशेषणार्थः' इति। अन्तोदत्तार्थश्चकारः कस्मान्न भवति ? नार्हत्यन्तोदात्तार्थो भवितुम्; णजन्तादञो विधानात्। सतिशिष्टस्वरेणाद्युदात्तेन भवितव्यम्,तत्र कुतोऽन्तोदात्तस्य सम्भवः। तस्माद्विशेषणार्थ एव चकारः। `स्त्रियाम्' इत्युच्यमाने `प्रज्ञाश्रद्धार्चाभ्यो णः'(5.2.101) इति प्राज्ञेत्यत्रापि स्यात्। `व्यावक्रोशी' इत्यादि। `क्रुश { आह्वाने रोदने च--ध.पा.}, `लिख अक्षरविन्यासे' (धा.पा.1365),`हसे हसने' (धा.पा.721)--एभ्यो णच्, `णचः स्त्रियाम्'(5.4.14) इति स्वार्तेऽञ्, `टिड्ढाणञ्' (4.1.15) इति ङीप्, `न कर्मव्यतिहारे' (7.3.6) इत्यैजागमप्रतिषेधः। आदिवृद्धिरेव भवति।
`व्यतिपाकः' इति। तत्र पुंल्लिङ्गत्वाद्भावस्य घञ् भवति। अथ `स्त्रियां क्तिन्' (3.3.94) इत्यस्मिन्नेव प्रकरणे णच् कस्मान्नोक्तः, कः पुनरेवं सति गुणो भवति, द्विः स्त्रियांग्रहणं न कर्त्तव्यं भवित ? अस्ति गुणः,वासरूपविधिस्तु न स्यात् ; अस्त्रियामिति प्रतिषेधात् । ततश्च क्तिनो णचासमावेशाभावाद्व्यावक्रुष्टिरिति न सिध्येत्। इह तु क्रियमाणे णच् सिध्यति; यस्मात् `वाऽसरूपोऽस्त्रियाम्' (3.1.94) इत्यत्र स्त्रीग्रहणस्य च स्वरितत्वात् स्त्र्यधिकरारविहितप्रत्ययविषय एव `अस्त्रियाम' (3.1.94) इति प्रतिषेधो विज्ञायते,न स्त्रीप्रत्ययमात्रविषये। तस्माद्यथान्यसमेव न्याय्यम्।
`व्यावचोरी, व्यावचर्ची' इति। `चुर स्तेये' (धा.पा.1534), `चर्च अध्ययने' (धा.पा.1712)-- आभ्यां चुरादिणिजन्ताभ्याम् `ण्यासश्रन्थो युच्' (3.3.107) इति युच् प्राप्नोति, स च विशेषविहितत्वात् परवाच्च बाधकः, तथापि तद्विषये तु णजेवेष्यते। `व्यतीक्षा,व्यतीहा' इति। `ईक्ष दर्शने' (धा.पा.610), `ईह चेष्टायाम्' (धा.पा.632) -- आभ्यां `गुरोश्च हलः' (3.3.103) इत्यकारएव प्रत्ययो भवति। न णच् शक्यः कर्त्तुम्;यस्मात् क्वचिद्बाधकविषये स इष्यते, न सर्वत्र। बाधकत्वं त्वकारप्रत्ययस्य पूरववद्वेदितव्यम्। `व्यात्युक्षी'इति। `उक्ष सेचने' (धा.पा.657)। अत्र बाधकस्याप्यकारस्य विषये णजेव भवति। `तदेतद्वैचित्र्यं कथं लभ्यते' इति। न कथञ्चित्। तल्लाभहेतोरभावादिति भावः। `कृत्यल्युटो बहुलम्'(3.3.113) इत्यनेन। अतो हेतोर्वैचित्र्यमेतल्लभ्यत इति दर्शयति।।

44. अभिविधौ भाव इनुण्।(3.3.44)
`सांकूटिनम्' इति। `कूट {परितापे (परिदाहे इत्यन्ये)-धा.पा.} (धा.पा.1890), `अणिनुणः' (5.4.15) इतीनुमन्तात् स्वार्थिकोऽण्। `इनण्यनपत्ये' (6.4.164) इति प्रकृतिभावात् `नस्तद्धिते' (6.4.144) इति टिलोपो न भवति।
`संरावः' इति। `उपसर्गे रुवः (3.3.22) इति घञ्। `संद्रावः' इति। अत्रापि `समि युद्रुदुवः' (3.3.23) इति।
ननु च भाव इति वर्त्तत एव, तत्किमर्थं पुनस्तद्ग्रहमित्याह-- `भावे' इति। `वर्त्तमाने' इत्यादि। भावग्रहणमिहातिरिच्यते, तदितरिच्यमानं वासरूपनिरासार्थं

विज्ञायते। तेन क्तेन सहेनुणः समावेशो न भवति। ननु च कारक इत्यपि वर्त्तते, ततस्तन्निवृत्त्यर्थं भावग्रहणं कस्मान्न भवति ? एवं मन्यते-- भावे कारक इति द्वये प्रकृतेऽपि प्रयोगदर्शनवशाद्व्यवस्था भवति, यथा णचः। स हि द्वथेऽपि प्रकृते लक्ष्यदर्शनानुरोधात् पुनर्ग्रहमन्तरेणापि यथा भाव एव विज्ञायते, न कराके, तथात्रेनुणपि भाव एव विज्ञास्यते। तस्माद्वासरूपविधिनिरासार्थमेव पुनर्भावग्रहणं युक्तमिति। यद्येवम्, तर्हि, यथा घञेनुणः समावेशो न भवति तथा ल्युटापि न स्यादित्यत आह-- `ल्युटा तु' इत्यादि। गतार्थम्। इनुणो णकारो वृद्ध्यर्थः। उकार उच्चारणार्थः।।

45. आक्रोशेऽवन्योर्ग्रहः। (3.3.45)

` ग्रहवृदृ' (3.3.58) इत्यादिना प्राप्ते वचनम्। `दृष्टानुवृत्तिसाम्र्थ्यात्' इति। प्रयोगोपस्थानेन घञोऽनुवृत्तिसामर्थ्य दृष्टम्, इनुणस्तु कल्पयितव्यम्। दृष्टसामर्थ्ययोश्च सन्निधौ दृष्टसामर्थ्यदग्रहणं न्याय्यम्। अतो घञेवानुवर्त्तत इत्येके। एवं तु `ग्रहवृदृ' (3.3.58) इत्यादावपि सूत्रे घञेवानुवर्त्तते, नाप्। तस्मादन्यथा व्याख्यायते-- दृष्टमनुवृत्तिसामर्थ्यमधिकृतस्य यत्र तद्दृष्टानुवृत्तिसामर्थ्यम्, तत्र पुनः स्वरितत्वम्। ततो हि शास्त्रेऽधिकृतस्य शब्दस्यानुवृत्तौ सामर्थ्ये दृश्यते। तदेतदुक्तं भवति-- घञ एव स्वरितत्वं प्रतिज्ञायते, नेनुणः। तस्मात् स्वरितत्वाद्घञेवानुवर्त्तते, नेनुणिति।।

46. प्रे लिप्सायाम्। (3.3.46)

47. परौ यज्ञे। (3.3.47)

48. नौ वृ धान्ये। (3.3.48)

`अपोऽपवादः'इति। `ग्रहवृदृ' (3.3.58) इत्यादिना प्राप्तस्य । `नीवारा नाम व्रीहयो भवन्ति' इति। एतेन यद्यपि धान्यशब्देन सामान्यवाचिनायं व्युत्पाद्यते, तथापि प्रत्ययान्तं शब्दशक्तिस्वाभाव्याद्धान्यविशेष ए वर्त्तत इति दर्शयति। `उपसर्गस्यघञि' (6.3.122) इति दीर्घत्वम्।

`निवरा' इति। निव्रियत इति निवरा। स्वभावेनाबन्तमपि स्त्रियां वर्त्तते। एवञ्च यद् घञबन्तो घाजन्तश्चेति लिङ्गाधिकारेऽबन्तस्य पुंल्लिङ्गताप्रतिपादनं तत् प्रायिकं वेदितव्यम्।।

49. उदि श्रयतियौतिपूद्रुवः। (3.3.49)

`अजपोरपवादः' इति। श्रयतेरिवर्णान्तत्वादचोऽपवादः, यौतिप्रभृतीनां तूवर्णान्तत्वादपः। `कथं पतनान्ताः समुच्छ्रया इति' इति। उच्छब्दोपपदत्वाद्घञात्र भवितव्यमिति भावः। `वक्ष्यमाणम्' इत्यादि परिहारः। यदि तर्हि विभाषाग्रहणमिह सम्बध्यते, यौतिप्रभृतीनामपि विकल्पेन प्रत्ययः प्रसज्यते ? व्यवस्थितविभाषया न प्रसज्यत इत्यदोषः।।

50. विभाषाऽऽङि रुप्लुवोः। (3.3.50)

रौतेः `उपसर्गे रुवः' (3.3.22) इति नित्यं घञि प्राप्ते प्लवतेरप्युवर्णान्तत्वादपि सूत्रारम्भः।।

51. अवे ग्रहो वर्षप्रतिबन्धे। (3.3.51)

`ग्रहवृदृ' (3.3.58) इत्यादिनापि प्राप्ते तदपवादः, पक्षे घञभिधीयते। `कुतश्चिन्निमित्तात्' इति। सत्त्वकर्मापराधाधिकारात्।।

52. प्रे वणिजाम्। (3.3.52)

`वणिक्सम्बन्धन च' इत्यादि। तुलासूत्रं हि प्रायेण वणिजासम्बद्धम् = सहचरम्, ततः साहचर्याद्वणिक्सम्बन्धेन तदुपलक्ष्यते। नात्र वणिजां प्राधान्याम्। तस्मात् तदेव तुलादिसूत्रं तदन्यशब्दस्याभिधेयम्।।

53. रश्मौ च। (3.3.53)

`रथादियुक्तानाम्' इत्यादि। कुतः पुनरेतल्लभ्यते,यावता रश्मिशब्दः सामान्यवचनः, यथैवासावश्वादिसंयमनार्थायां रज्ज्वां वर्त्तते तथा चन्द्रार्कादिसम्बन्धिष्वपि रश्मिषु ? एवं मन्यते- यथा `नौ वृ धान्ये' (3.3.48) इति धान्यशब्दस्यापि धान्यविशेष एव गृह्यते, प्रत्ययान्तेन शब्दशक्तिस्वभाव्याद्धान्यविशेषस्य वाभिधानात्; तथा यद्यपि रश्मिशब्दः सामान्यवाची, तथापि प्रत्ययान्तः स्वभावाद्रज्जुविशेष एव वर्त्तते। तस्मात् युक्तं ग्रहणमिति।।

54. वृणोतेराच्छादने। (3.3.54)

`वृणोतेः'इति। श्नुविकरणेन निर्देशो वृङो निवृत्त्यर्थः। अत्रापि सामान्यवाचित्वे प्राग्वदाच्छादनशब्दादन्यत्र। पक्षे `ग्रहवृदृ' (3.3.58) इत्यादिनाब्भवति।।

55. परौ भुवोऽवज्ञाने। (3.3.55)

56. एरच्। (3.3.56)
`चकारो विशेषणार्थः' इति। विनापि तेन थाथादिसूत्रे (6.2.144) अप्रत्ययादित्यप्रत्ययस्यापि ग्रहणं स्यात्।
`अज्विधौ' इत्यादि। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। प्रतिपादनं तु `कृत्यल्युटो बहुलम्'(3.3.113) इत्येतदाश्रित्य कर्त्तव्यम्। अन्यस्तु `पञ्चमी भयेन' (2.1.37) `वर्षप्रमाण ऊलोपश्चास्यान्तरस्याम्' (3.4.32) इति निपातनाद्भयादीनां सिद्धिमिच्छति, न चासौ युक्ता; किमिदं भयवर्षशब्दयोर्नपुंसकलिङ्गयोरुच्चारणम् ? इत् पुंल्लिङ्गयोः ? इति सन्देहात्। `वक्तयौ'इति। व्याख्येयावित्यर्थः। व्याख्यानं तु तदेव बहुलग्रहणमाश्रित्य कर्त्तव्यम्। `जवः, सवः' इति। `जु' (3.2.150) इत्येस्मात् सौत्राद्धातोः, `षुञ् अभिषवे' (धा.पा.1247) इत्येस्माच्चोत्तरसूत्रेणापि प्राप्तेऽज्भवति। स्वरे विशेषः-- अपि हि स्तामाद्युदात्तं पदं स्यात्, अजन्ते सत्यन्तोदात्तत्वं भवति।।

57. ऋदोरप्। (3.3.57)
`पित्करणं स्वरार्थम्' इति। `अनुदात्तौ सुप्पितौ' (3.1.4) इत्यनुदात्तत्वं यथा स्यात्। `ऋदोरप्' इत्यत्र ऋकारस्तपरः स्यात्। एवं सति तादपि परस्तपरः इत्युकारोऽपि तस्य परः स्यात्। ततश्च `तपरस्तत्कालस्य' (1.1.70) इति परिभाषोपस्थानादिहैव स्यात्-- यवः,स्तव इति; लवः,पव इत्यत्र तु न स्यात्। दकारे तु `अण् सवर्णान् गृह्णाति-- `भुवः गृह्णाति' (व्या.पा.66 ?) इति दीर्घादपि भवति। तस्मादुकारोऽयं सवर्णं गृह्णाति। अत्र च लिङ्गम्-- `भुवः प्रभवः' (1.4.31) इति निर्देशः।तपरे तु भवतेरप् न स्यात्, ततश्च `प्रभवः'इति निर्देशो नोपपद्यते। तस्य तु दकारस्य मुखसुखार्थत्वादन्यत् प्रयोजनं न सम्भवतीत्येतत्सर्वमालोच्याह-- `दकारो मुखसुखार्थः' इति।।

58. ग्रहवृदृनिश्चिगमश्च। (3.3.58)
`वृ' इति वृङ्वृञोः सामान्येन ग्रहणम्। `दृ'इति। `दृङ आदरे' (धा.पा.1411)। `निश्चिनोतेस्तवचोऽपवादः' इति। `एरच्' (3.3.56) इति प्राप्तस्य। अथ निश्चिग्रहणं किमर्थम्, यावता नास्मादच्यपि वा विहिते कश्चिद्विशेषोऽस्ति, तदेव हि रूपमुभयत्रापि समापद्यत इत्याह-- `निश्चिग्रहणं स्वरार्थम्' इति। अनुदात्तार्थमित्यर्थः। ननु च `हस्तादाने चेरस्तेये' (3.3.40) इति चिनीतेर्घञ् विधीयमानो न स्यात्, निष्पूर्वादपि प्राप्नोति, अतस्तद्बाधनार्थमपि निश्चिग्रहणं युक्तम् ? नैतदस्ति; निष्पूर्वादपि हि चिनोतेश्चैष घञ् पूर्वविप्रतिषेधेनेष्यते। ननु च स्वरार्थमपि निश्चिग्रहणं नोपपद्यतएव, तथापि `गतिकारकोपपदात् कृत्' (6.2.139) इत्युत्तरपदप्रकृतिस्वरे प्राप्ते` अन्तः'(6.2.143) , `थाथघञ्क्ताजबित्रकाणाम्' (6.2.144) इत्यन्तोदात्तत्वेनैव भाव्यते। तथा चापि प्रत्ययेऽपि सत्यनुदात्तत्वेनैव भवितव्यम् ? नैष दोषः;निश्चिग्रहणसामर्थ्यात थाथादिस्वरस्तस्मिन् विषये न भवति। तस्मिन्नसत्युत्तरपदे प्रकृतिभावेनावस्थितेऽपोऽनुदात्तत्वाद्धातोश्चान्तोदात्तत्वान्निश्चय इति पदं कृत्स्वरेण मध्योदात्त्ं भवति, अचि सत्यन्तोदात्तं स्यात्।
`वशिरण्योः' इत्यादि। `वश कान्तौ' (धा.पा.1080), `रण' (धा.पा.445) इति शब्दार्थः, अणरणेत्यादयः शब्दार्थाः (धा.पा.444-453) धातवः। तयोर्वशिरण्योरप उपसंख्यानम् = प्रतिपादनं कर्तव्यम्। तत्रेदं प्रतिपादनम् -- चकारोऽत्रानुक्तसमुच्चयार्थः क्रियते, तेन वशिरण्योरप्यब्भविष्यति।
`घञर्थे क' इत्यादि। घञर्थो भावः कर्त्तृवर्जितञ्च कराकम्, तत्र कप्रत्ययस्य विधानं कर्त्तव्यं स्थाद्यर्थम्। एतत्तु `कृत्यल्युटो बहुलम्'(3.3.113) इत्येव सिद्धम्। `पा' इति लुग्विकरणपरिभाषया (व्या.प.50) पानार्थस्य ग्रहणम्, न रक्षणार्थस्य। `प्रस्थः' इति। `आतो लोप इटि च' (6.4.64) इत्याकारलोपः। `प्रश्नः' इति। `ष्णा शौचे' (धा.पा.1052)। `आविधः' इति। `व्यध ताडने' (धा.पा.1181)। `ग्रहिज्या' (6.1.16) इइत्यादिसूत्रेण सम्प्रसारणम्। `विघ्नः'इति। `गमहन' (6.4.98) इत्यादिनोपधालोपः, `हो हन्तेः'(7.3.54) इत्यादिना कुत्वम्। `आयुधम्' इति। `युध सम्प्रहारे' (धा.पा.1173)।।

59. उपसर्गेऽदः। (3.3.59)
`अदेर्धातोरप्प्रत्ययो भवति' इति। घञपवादः। इत उत्तरत्रापि हलन्तादब्विधीयमानो घञोऽपवादो वेदितव्यः। `विघसः, प्रघसः' इति। `घञपोश्च' (2.4.38) इति घस्लादेशः। अथ किमर्थमदेरब्विधीयते, न घसेः प्रकृत्यन्तरादेव विधीयते,कः पुनरेवं सति गुणो भवति ? अदेरपि घस्लुभावो न कर्त्तव्यो भवति ? सत्यमेतत्; तथाप्युत्तरार्थमदेर्विहितम्-- `नौ ण च' (3.3.60) इत्यदेर्यथा स्यात्, घसेर्मा भूदिति।।

60. नौ ण च। (3.3.60)

61.व्यधजपोरनुपसर्गे। (3.3.61)

62.स्वनहसोर्वा। (3.3.62)

63. यमः समुपनिविषु च। (3.3.63)

64. नौ गदनदपठस्वनः। (3.3.64)

65. क्वणो वीणायाञ्च। (3.3.65)
`सोपसर्गार्थं वीणाया ग्रहणम्' इति। यदि वीणाविषयेऽप्यनुसर्गादेव स्यात्, वीणाग्रहणमनर्थकं स्यात्। अनुपसर्गात् सामान्येन विधानाद्वीणायामपि प्रत्ययः सिद्धः।।

66. नित्यं पणः परिमाणे। (3.3.66)
`परिमितः'इति। परिमितो मितः परिच्छिन्नः। द्वयोस्त्रयाणां चतुर्णां वा मूलकादिद्रव्याणां यो मुष्टिः = परिमाणविशेषो बध्यते संव्यवहारार्थः स `मूलकपणः' इत्यादिना शब्देनाभिधीयते।।

67. मदोऽनुपसर्गे। (3.3.67)
`विद्यामदः'इति। विद्यया मदः। `कर्त्तुकरणे' (2.1.32) इत्यादिना समासः। `उन्मादः' इति। अत्रापि `कुगतिप्रादयः' (2.2.18) इति `व्यधजपोरनुपसर्गे' (3.3.61) इत्यत्रैव मदिग्रहणे कर्त्तव्ये `मदोऽनुपसर्गे' इति सूत्रप्रणयनमस्य विधेरनित्यत्वाज्ञापनार्थम्, तेन माद इति सिद्धं भवति।।

68. प्रमदसंमदौ हर्षे। (3.3.68)
ननु च `मदः' (3.3.67) इत्यनुवर्त्तते, तत्र प्रसंभ्यामिति वक्तव्यम्, एवमप्यभीष्टं सिध्यत्येव,तत्किं निपात्यते ? इत्यत आह-- `प्रसंभ्याम्' इत्यादि। रूढिशब्देनेह प्रमदसंमदाभ्यामन्यस्याश्रुतत्वादनयोश्च रूढिशब्दत्वादेतादेव विवक्षितताविति गम्यते। अवधारणञ्चेह द्रष्टव्यम्, सावरधारणत्वात् सर्ववाक्यानाम्। तेन रूढ्यर्थं निपातनम्। प्रमदसम्मदशब्दार्थमेवैषोऽर्थः सम्पद्यते। अनेन सूत्रेण `प्रमदसम्मदौ' इत्यनयोरेव रूढिशब्द्योर्व्युत्पत्तिर्यथा स्यान्न शब्दान्तराणामित्यवमर्थं निपातनमिति यावत्। यदि हि मदिग्रहणमनुवर्त्त्य प्रसंभ्यामित्येतावदुच्येत, तर्हि यदापि प्रसंभ्यां समस्ताभ्यामुत्तरो मदिर्भविष्यति तदापि प्रत्ययः स्यात्। तथा यदा प्रसमावन्यस्मादुपसर्गात् परौ भवतः प्रसंभ्यञ्च परो मदिर्भवति तदापि स्यात्। ततश्च प्रसम्मदः, अभिप्रसम्मदः, प्रनिसम्मदः-- इत्येवमाद्यरूढिशब्दार्थमपि सूत्रं स्यात्, न प्रमदसम्मदार्थमेव। निपातने तु सति नियमो विज्ञायते-- प्रत्येकमेवेतौ;न समस्तौ, नाप्यन्योपसर्गसहिताविति। तेन रूढ्यर्थं सूत्रं सम्पद्यते।।

69. समुदोरजः पशुष। (3.3.69)

70. अक्षेषु ग्लहः। (3.3.70)
`ग्रहेरप् सिद्ध एव' इति। `ग्रहवृदृ' (3.3.58) इत्यादिना। यद्येवम्, किमर्थं निपातनमित्याह-- `लत्वार्थम्' इत्यादि।।

71. प्रजने सर्त्तेः। (3.3.71)

72. ह्वः सम्प्रसारणञ्च न्यभ्युपविषु। (3.3.72)
`निहवः'इति। `ह्वेञ् {स्पर्धायां शब्दे च--धा.पा} स्पर्द्धायाम्' (धा.पा.1008)। सम्प्रसारणे कृते गुणावादेशौ। जुहोतेरेव निप्रभृत्युपसर्गपूर्वस्य `निहवः'इत्यादिके रूपचतुष्टये सिद्धे सति ह्वयसेर्निप्रभृतिपूर्वस्य घञ्निवृत्त्यर्थमेवैतद्वचनम्।।

73. आङि युद्धे। (3.3.73)
`आह्वायः'इति। `आतो युक् चिण्कृतोः' (7.3.33) इति युक्।।

74. निपानमाहावः। (3.3.74)

निपिबन्ति तस्मिन्निति निपानमित्यधिकरणे (3.3.117) ल्युट्। कस्मादाहावशब्द उदकाधारे वर्त्तत इत्याह-- `तत्र हि' इत्यादि। एतेनाहावशब्दस्योदकाधारे प्रवृत्तनिमित्तं दर्शयति।।

75. भावेऽनुपसर्गस्य। (3.3.75)
`भावग्रहणम्' इत्यादि। ननु च यथा `कर्मव्यतिहारे णच् स्त्रियाम्' (3.3.43) इत्यत्र द्वये प्रकृते च लक्ष्यदर्शनवशाद्भाव एव प्रत्ययो विज्ञास्यते, तथेहापि, तत्किं भावग्रहणेन `अकर्त्तरि च कारके' (3.3.19) इत्येतन्निरासार्थेन ? सत्यमेतत्; लक्ष्यदर्शनसामर्थ्यादेव प्राप्त एव एवार्थो भावग्रहणेनाख्यायते मन्दबुद्धीनामनुग्रहाय। अथ यथा `अभिविधौ भाव इनुण्' (3.3.44) इत्यत्र `भावे' इति वर्त्तमाने पुनर्भावगर्हणं वासरूपनिरासार्थं विज्ञायते, तथेहापि कस्मान्न विज्ञायते ? लक्ष्यदर्शनवशात्। दृश्यते हि क्तादयः-- हूतम्, ह्वानम्, हूतिरिति। घञादौ वासरूपेण भावः।।

76. हनश्च वधः। (3.3.76)
`स चान्तोदात्तः' इति। सूत्रे वधशब्दस्यान्तोदात्तस्योच्चारणात्। `तत्र 'इत्यादिनाऽन्तोदात्ते वधादेशे यदिष्टं सिध्यति तद्दर्शयति। अपि कृते `अतो लोपः' (6.4.48) इत्यकारलोपे च `अनुदात्तस्य च यत्रोदात्तलोपः'(6.1.161) इत्यप उदात्तत्वं भवति। `धातः' इति। कर्मादौ कारके घञ्,`हनस्तोऽटिण्णलोः' (7.3.32) इति तत्वम्; `हो हन्तेः' (7.3.54) इत्यादिना कुत्वम्। `चकारो भिन्नक्रमत्वात्' इत्यादि। चकारो नादेशेन सम्बध्यत इति सम्बन्धः।कस्मान्न सम्बध्यते ? भिन्नक्रमत्वात्। यदि `हनो वधश्च' इत्येष चकारस्य क्रमः; आदेशानन्तरमनुच्चारणात्।तस्मात् भिन्नक्रमत्वात् क्रमभेदान्नादेशेन सम्बध्यते।अपि तु प्रकृतेन प्रत्ययेन। एवञ्च प्रकृतेन सम्बन्धं दर्शयितुमाह-- `अप् च' इत्यादि। अप् प्रत्ययो भवति, चकारावृत्तेर्यः प्राप्नोति स च । तेन घञपि भवति।।

77. मूर्त्तौ घनः। (3.3.77)
`अभ्रघनः' इति। षष्ठासमासोऽयम्। अभ्रस्य काठिन्यमित्यर्थः। यदि मूर्त्तावभिधेयायां घनशब्दो व्युत्पाद्यते-- घनं दधीति, मूर्तिमतो दघ्नो नाभिधानं प्राप्नोति, कथं हि नाम मूर्त्तौ व्युत्पादितस्ततोऽन्यत्र वर्त्तते ? इत्यत आह-- `धर्मशब्देन धर्मी भण्यते' इति। मतुबालोपादभेदोपचारः, यथा-- शुक्लः पटः। शुक्लशब्देन शुक्लगुणः पट इति भावः।।

78. अन्तर्घनो देशे। (3.3.78)
`अन्तर्घनः'इति। अन्तर्हण्यन्ते प्राणिनोऽत्रेत्यधिकरणेऽप्। `तवपि ग्राह्यमेव' इति। उभयथा चाचार्ये शिष्याणां प्रतिपादित्वात्।।

79. अगारैकदेशे प्रघणः प्रघाणश्च। (3.3.79)

80. उद्घनोऽत्याधानम्। (3.3.80)
`अत्याधानम्' इति। अतिशब्द उपरिभावे वर्त्तते। आदधातिः स्थापने। य उपरि निधीयते स्थाप्यते तस्मिन् सः, तदस्याधानम्। अधिकरणे ल्युट्। `उद्घनः' इति। उद्धन्यतेऽस्मिन्नित्यधिकरणेऽप्।।

81. अपघनोऽङ्गम्। (3.3.81)
`अपघनः'इति। अपहन्यतेऽनेनेति करणेऽप्।।

82. करणेऽयोविद्रुषु। (3.3.82)

83. स्तम्बे क च। (3.3.83)
`तत्र च' इति। अनन्तरोक्तेऽपि। `घनादेशः'इति। `मूर्त्तौ घनः' (3.3.77) इत्यतः `घनः' इत्यतस्यानुवृत्तेः। `स्तम्बघ्नः'इति। पूर्ववत् कुत्वोपधालोपौ।।

84. परौ घः। (3.3.84)
`वलिघः' इति। `परेश्च घाङ्कयोः'(8.2.22) इति विभाषा लत्वम्।।

85. उपघ्न आश्रये। (3.3.85)
`आश्रयशब्दः' इत्यादि। आश्रयणमाश्रयः = सेवा। सा च यत्र प्रत्यासत्तिस्तत्र भवतीत्याश्रयः प्रत्यासत्तिसहचरः।तस्मादाश्रयशब्दः सामीप्यं

प्रत्यासत्तिमुपलक्षयति; तदर्थस्य प्रत्यासत्तिसाहचर्यात्। `पर्वतोपघ्नः' इति। पर्वतसमीपभूतोऽर्थ उच्यते।।

86. सङ्घोद्घौ गणप्रशंसयोः। (3.3.86)

`सङ्घोद्घौ' इति। संहननं सङ्घः। उत्कटं हन्यते ज्ञायत इति उद्घः। कर्मण्यप्। कथं पुनर्हन्तिर्ज्ञाने वर्त्तते ? गत्यर्थत्वात्। सर्वेषां गत्यर्थानां धातूनां ज्ञानार्थत्वात्।।

87. निघो निमितम्। (3.3.87)

समन्तान्मितमिति ननिमितशब्दः। सर्वत आरोहतः परिणाहतश्च तुल्यमित्यर्थः। एकमेवार्थं प्रसिद्धतरेण दर्शयितुमाह-- `समारोहपरिणाहौ यस्य तत् तथोक्तम्। आरोहः = उच्छ्रायः। परिणाहः = विस्तारः। `निघा वृक्षाः'इति। निविशेषमं हन्यन्ते ज्ञायन्त इति निघाः। कर्मण्यपि समन्तात् तुल्या इत्यर्थः। एवं ते निर्विशेषं ज्ञायन्ते यदि समन्तादारोहतः परिणाहतश्च तुल्या भवन्ति।।

88. ड्वितः क्त्रिः। (3.3.88)

`उप्त्रिमम्' इति। `वचिस्वपि' (6.1.15) इत्यादिना सम्प्रसारणम्। क्त्रेः ककारो गुणप्रतिषेधार्थः।।

89. ट्वितोऽथुच्। (3.3.89)

`वेपथुः' इति। वेपनम् = वेपथुः। स्वभावत एवैतदुभयं भावे भवतीति घञोऽपवादो विज्ञायते। घञ् तु वासरूपविधिनापि न भवति; अनभिधानात्। अथुचश्चकारः।अथुचश्चकारः स्वराथः।।

90. यजयाचयतविच्छप्रच्छरक्षो नङ्। (3.3.90)

`यज देवपूजादौ' (धा.पा.1002), `टुयाच् याच्ञायाम्' (धा.पा.863), `{यती प्रयत्ने-धा.पा} यत प्रयत्ने'(धा.पा.30), `विच्छ गतौ' (धा.पा.1423), `प्रच्छ ज्ञीप्सायाम्' (धा.पा.1413), `रक्ष {पालने-- धा.पा.}रक्षणे' (धा.पा.658)--अत्र स्वाभाविकत्वाद्याचेरन्येषां नङ्प्रत्ययान्तानां पुंसि वृत्तिरिति तेभ्यो नङ् न घञपवादो भवति। यथादर्शनञ्च वासरूपविधना घञपि भवति- याग इति। याचेस्तु नङन्तसय स्वभावात् स्त्रियां वृत्तिरिति ततो नङ् `गुरोश्च हलः' (3.3.103) इति प्राप्तस्याकारप्रत्ययस्यापवादः। `कृत्यल्युटो बहुलम्' (3.3.113) इति वचनाद्वासरूपविधिर्न भवति। `ङकारो गुणप्रतिषेधः' इति। विच्छेर्लघूपधगुणो मा भूदित्येवमर्थः। ननु चान्तरङ्गत्वात् `छे च' (6.1.73) इति तुकैव विच्छेस्तावद्भवितव्यम्, तत्रालघूपधत्वादेव गुणो न भविष्यति, तत्किं तत्प्रतिषेधार्थो ङकारः कर्त्तव्यः। `अनित्यमागमशासनम्'(व्या.प.99) इत्यस्य चैदेव नङो ङिकरणं ज्ञापकम्। यदा तर्ह्यनित्यत्वात्, तुङ्न, तदा `च्छ्वोः शूडनुनासिके च' (6.4.19) इति सतुक्कस्य च्छकारस्य शादेशो विधीयमानः केवलस्य न प्राप्नोति ? नैष दोषः; यस्मात् `च्छ्वोः'इति द्विच्छकारो निर्देशः। तत्रैकः सतुक्कः, द्वितीयः केवल एव, तेन केवलस्यापि शादेशो भविष्यति। यदि तु द्विच्छकारो निर्देशः `च्छ्वोः' इति द्विवचनं न प्राप्नोति,बहुत्वात् स्थानिनाम् ? सौत्रत्वनान्निर्देशस्य बहुवचनस्य व्यत्ययेन द्विवचनं भविष्यतीत्यदोषः। अवश्यं द्विच्छकारो निर्देशः कर्त्तव्यः; अन्यथा `राल्लोपः' (6.4.21) इत्यत्र केवलस्य लोपो न स्यात्, केवलस्य च्छकारस्याप्रकृत्वात्। वचनं तु वकारलोपार्थमेव स्यात्। `यज्ञः, याच्ञा' इति। `स्तोः श्चुना श्चुः' (8.4.40) इति श्चुत्वेन नकारस्य ञकारः। `यत्नः' इति। `नेड् वशि कृति' (7.2.8) इतीट्प्रतिषेधः। `विश्नः, प्रश्नः' इति। `च्छ्वोः'(6.4.19) इत्यादिना च्छकारस्य शकारादेशः। `रक्ष्णः'इति। `ष्टुना ष्टुः' (8.4.41) इति नकारस्य णकारः। अथ प्रच्छेः ग्रहिज्यादिसूत्रेण (6.1.16) सम्प्रसारणं `प्रश्नः' इत्यत्र कस्मान्न भवतीत्यत आह-- `प्रच्छेः' इत्यादि। किं ज्ञापकमित्याह-- `प्रश्ने च' इत्यादि।।

91.स्वपो नन्। (3.3.91)

92. उपसर्गे घोः किः। (3.3.92)

`किप्रत्ययो भवति' इति। घञोऽपवादः। `कित्करणे लोपार्थम्' इति। `आतो लोप इटि च' (6.4.64) इत्याकारलोपो यथा स्यादिति।।

93. कर्मण्यधिकरणे च। (3.3.93)

कर्माधिकरणयोः सप्तम्या भेदेन निर्देशान्नोभयोरुपपदत्वम्, नापि प्रत्ययार्थत्वम्, तस्मात् किञ्चित् तत्रोपपदम्, किञ्चित्प्रत्ययार्थः। कर्म उपपदम्, अधिकरणं प्रत्ययार्थः। एष तु विभागो व्याख्यानास्लक्ष्यदर्शनाच्च विज्ञात इत्याह--`कर्मण्युपपदे इत्यादि। अथाधिकरणग्रहणं किमर्थम्, यावता `अकर्त्तरि च कारके' (3.3.19) इत्यस्यानुवृत्तेरेवाधिकरणे प्रत्ययो लभ्यते ? इत्याह-- `अधिकरणग्रहणम्' इत्यादि। असति ह्यधिकरणग्रहणेरऽर्थान्तरेऽपि भावे करणादौ कारके प्रकृतप्रत्ययः स्यात्, तस्मात् तन्निवृत्त्यर्थमधिकरणग्रहणम्।।

94. स्त्रियां क्तिन्। (3.3.94)

`भावादौ' इति। आदिशब्देनाकर्त्तुः कारकस्योपादानम्। `घञजपामपवादः' इति। य इकारान्तास्तेभ्योऽचोऽपवादः, य ऋकारान्ता उवर्णान्ताश्च, तेभ्योऽपः, शेषेभ्यो घञः।

वक्तव्य इति। व्याख्येय इत्यर्थः। व्याख्यानं तु `कृत्यल्युटो बहुलम्' (3.3.113) इत्येतदाश्रित्य कर्त्तव्यम्। `आप्तिः' इत्यादि। `आप्लृ व्याप्तौ' (धा.पा.1260), `राध साध संसिद्धौ' (धा.पा.1262), `दीपी दीप्तौ' (धा.पा.1150), `स्रन्सु ध्वन्सु अवस्रंसने' (धा.पा. 754,755) `डुलभष् प्राप्तौ' (धा.पा.975)। लभेति षित्त्वात् `षिद्भिदादिभ्योऽङ' (3.3.104) इत्यङि प्राप्ते शेषेभ्यस्तु गुरुत्वात् `गुरोश्च हलः'(3.3.103) इत्यकारे क्तिन विधीयते। `इष्टिः' इति। वच्यादिसूत्रेण (6.1.15) सम्प्रसारणम्।`कीर्णिः,गीर्णिः, शीर्णिः' इति। `ऋत इद्धातोः' (7.1.100) इतीत्त्वम्, रषादिसूत्रेण (8.4.1) णत्वम्। यथा `रदाभ्याम्' (8.2.42) इत्यादिना कीर्ण इति निष्टायास्तकारस्य नत्वं भवति, तथेहापि क्तिनः। यथा `ल्वादिभ्यः'(8.2.44) इति लून इत्यत्र निष्ठातकारस्य नत्वं तथा `लूनिः, यूनिः'इत्यात्रापि क्तिनः।।

95. स्थागापापची भावे। (3.3.95)

`अङोऽपवादस्य बाधकः' इति। स्थादिभ्यः `आतश्चोपसर्गे'(3.3.106) इति प्राप्तस्याङोऽपवादस्य बाधक इत्यर्थः। `पक्तिः' इति। `षिद्भिदादिभ्योऽङ' (3.3.104) इत्यस्य । `प्रस्थितिः' इति। `द्यतिस्यति' (7.4.40) इत्यादिनेत्त्वम्। `सङ्गीतिः'इति। धुमास्यादि (6.4.66) सूत्रेणेत्त्वम्। अत्र च `गामादाग्रहणेष्वविशेषः' (व्या.प.124) इति `गै शब्दे'(धा.पा.917) `गाङ गतौ' (धा.पा.950) इति द्वयोरपि ग्रहणम्। `पा'इति। पूर्ववत् पानार्थस्य ग्रहणम्, न रक्षणार्थस्य । `भावग्रहणम्' इत्यादि। अर्थान्तरम् = कर्त्तृवर्जितं कराकम्, तन्निवृत्यर्थं भावग्रहणम्।

`कथम्' इत्यादि। यद्यङोऽपवादस्यापवादोऽयं क्तिन्प्रत्ययस्तत् कथं `अवस्था संस्था' इति सिध्यति ? न कथञ्चिदित्यभिप्रायः। `व्यवस्थायाम्' इत्यादि। यदिदं व्यवस्थाशब्दस्याङन्तस्य सूत्र उच्चारणमेतदेव ज्ञापकम्, अतः क्तिनात्यन्तबाधा न भवतीति, तेनावस्थेत्याद्यपि सिध्यति। `अत्यन्ताय' इति। चतुर्भ्यन्तप्रतिरूपको निपातोऽयम् यथा- चिरायेति।।

96. मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः। (3.3.96)

`वृषु मृषु सेचने' (धा.पा.706,707), `{इष--धा.पा.} इषु इच्छायाम्'} (धा.पा.1351), `डुपचष् पाके' (धा.पा.996), `मन ज्ञाने' (धा.पा.1176), `विद ज्ञाने' (धा.पा.1064),`भू सत्तायाम्' (धा.पा.1), `वी गतिव्याप्तिप्रजनादिषु' (धा.पा.1048), `रा {दाने -धा.पा.} आदाने' (धा.पा.1057)। `प्रकृतिप्रत्यययोः' इति। प्रकृतिसामान्यविवक्षायां द्विवचनम्, अन्यथा हि बहुत्वात् प्रकृतीनां बहुवचनं स्यात्। `विभक्तिविपरिणामेन सम्बन्धः' इति। वृषादिभ्यो या प्रथमा तस्या अर्थात् पञ्चमीपरिणामः। तेन प्रकृतिप्रत्यययोः सम्बन्धः; अन्यथा सम्बन्धानुपपत्तेः। `मतिः' इति। `अनुदात्तोपदेश' (6.4.37) इत्यादिनाऽनुनासिकलोपः।

`सर्वत्र' इत्यादि। मन्त्रे च, अमन्त्रे च -- सर्वत्र वृषादिभ्यः क्तिन्विहितः। पचेरपि स्थागादि (3.3.95) सूत्रेण। यद्येवम् किमर्थमिदमित्याह-- `उदात्तार्थम्' इति। `इषेस्तु' इत्यादि। इषेरिच्छेति निपातनं वक्ष्यति; तस्मात् क्तिन्विधीयते, अन्यथा निपातनेनैवास्य स्यात्। वृषादिभ्यः क्तिन्प्रत्यय एव विधातव्यः। उदात्तवचनमुत्तरार्थम्। `व्रजयजोर्भावे क्यप्' (3.3.98) इति क्यबुदात्तो यथा स्यात्।।

97. ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च। (3.3.97)

`स्वरार्थं वचनम्' इति। न तु प्रत्ययार्थम्। `स्त्रियां क्तिन्' (3.3.94) इत्येव सिद्धत्वात्। नाप्यूडर्थम्; `ज्वरत्वर' (6.4.20) इत्यादिनैव सिद्धत्वात्। `यौतेः'इति। `यु {मिश्रणेऽमिश्रणे च-धा.पा} मिश्रणे (धा.पा.1033) इत्यस्य। `जवतेश्च' इति। `जु' इत्यस्य सौत्रस्य (3.2.150) धातोः। `दीर्घत्वञ्च' इति। चकारादुदात्तत्वञ्च। क्तिन् सामान्यलक्षणेनैव सिद्धः। `ल्यतेः' इति। `षोऽन्तकर्मणि' (धा.पा.1147) इत्यस्य । `इत्त्वाभावोऽपि निपात्यते' इति। `द्यतिस्यति' (7.4.40) इत्यादिनेत्त्वं प्राप्नोति, ततस्तस्याभावो निपात्यते। `सनोतेर्वा' इति। `षणु दाने' (धा.पा.1464) इत्यस्य। `जनसनखनाम्' (6.4.42) इत्यात्त्वे कृते सातिरिति सिध्यतीति शेष-। यद्येवम्, किमर्थं निपातनमित्याह-- `स्वरार्थम' इत्यादि। असति हि निपातने सातिशब्द आद्युदात्तः स्यात्। अन्तोदात्तो यथा स्यादित्येवमर्थ निपातनम्। `हन्तेर्हितनोतेर्वा' इति। हेतिरिति यदा हन्तेः, तदा हकारस्यैत्त्वं निपात्यते, अनुनासिकलोपस्तु `अनुदात्तोपदेश' (6.4.37) इत्यादिनैव सिद्धः। यदा तु `हि {गतौ बुद्धौ च-धा.पा} (धा.पा.157) इत्स्य, तदा गुणो निपात्यते। `कीर्त्तिः'इति। `कृतं संशब्दने' (धा.पा.1653) इत्यस्माच्चुरादिणिजन्तात् `ण्यासश्रन्थो युच्' (3.3.107) इति युचि प्राप्ते क्तिन्निपात्यते। `उपधायाश्च' (7.1.101) इतीत्त्वम् भवति, `हलि च' (8.2.77) इति दीर्घत्वम्।।

98. व्रजयजोर्भावे क्यप्। (3.3.98)

`इज्या' इति। वच्यादिसूत्रेण (6.1.15) सम्प्रसारणम्। यद्युदात्तं विधीयते पित्करणं किमर्थमित्याह-- `पित्करणमुत्तरत्र' इत्यादि।।

99. संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः। (3.3.99)
`भाव इति न स्वर्यते' इत्यादि। स्थागादिसूत्रे (3.3.95) यद्भावग्रहणं कृतं तस्यैव स्वरितत्वं न क्रियते। `भावे' (3.3.18) `अकर्त्तरि च कारके संज्ञायाम्' (3.3.19) इत्येष एवाधिकारः। `समज्या' इति। `अजेर्व्यघञपोः'(2.4.56) इति वीभावो न भवति; संज्ञायामिति वचनात्। न हि वीभावे कृते संज्ञा गम्यते, नियतवर्णानुपूर्वीका हि संज्ञा भवति। `निपत्या' इति। निपतन्ति तस्यामिति। `षद्लृ विशरणगत्यवसादनेषु' (धा.पा.854)। निषीदन्ती तस्यामिति। `निपत्या' इति। निपतन्ति तस्यामिति। `मत्या' इति। मन्यन्ते तयेति मत्या। पूर्ववदनुनासिकलोपः, ह्रस्वस्य तुक्। विदन्ति तया विद्या। सुन्वन्ति तस्यां सुत्या। शेरते तस्यां शय्या। `अयङ यि क्ङिति'(7.4.22) इत्ययङादेशः। भरणं भृत्या। एति तयेत्या = अयनमिति।
`भृञोऽसंज्ञायाम्' (3.1.112) इत्यत्र---
`संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिध्यति।"
स्त्रियां भावाधिकरोऽस्ति तेन भार्या प्रसिध्यति।।
इत्युक्तम्, इह `भाव इति न स्वर्यते' (का.3.3.98) इत्यभिहितम्, अतः पूर्वोत्ततरवचनं व्याहतमिति मन्यमान आह-- `कथम्' इत्यादि। यदीह `भावे' (3.3.18) इति न स्वर्यते तत्कथं `स्त्रियां भावाधिकारोऽस्ति' इत्युक्तम्, न हि `भावे' इत्यस्वर्यमाणे भावाधिकारस्येहास्तित्वमुपपद्यते ? `भावाधिकारो भाव्यव्यापारः'इत्यादि परिहारः। भावाधिकारशब्देन तत्र व्यापारो वाच्यत्वेन विवक्षितः। स पुनर्भृत्याशब्दाभिधेयभावोपगमनलक्षमः। अत एवैतदुक्तं भवति-- `संज्ञायां समजनिषद' इत्यादिना व्युत्पादितस्य भृत्याशब्दस्य भाव एवाभिधेयमुपयाति, न तु कर्त्तृवर्जितं कारकम्। तेन कर्मणि कारके भार्येति सिध्यीति। न तु शास्त्रीयोऽधिकारोऽयं स्वरितत्वासङ्गात् प्रियोगमुपतिष्ठते, स तत्र भावशब्देन विवक्षितो मा भूत्। समजन्ति तस्यां समज्या, निषीदन्ति तस्यां निषद्या, विदन्त्यनया विद्येत्येवमादीनां कारके करणादिके करणादसाधुत्वमिति न।
कथं पुनः `भावेऽकर्त्तरि च कारके' (3.3.18,19) सर्वस्मिन्ननुवर्त्तमाने क्वचिद्भावः क्यबन्तस्याभिधेयभावमुपयाति ? क्वचिदकर्त्तृकारकमेवेत्येष नियमो लभ्यते ? संज्ञावशात्। यत्रोत्पद्यमानेन प्रत्ययेन संज्ञा गम्यते तत्र भाव एवाभिधेयत्वं प्रतिपद्यते, इतरदुदास्ते। यत्र त्वकर्त्तरि कारके प्रत्ययेनोत्पन्नेन संज्ञा गम्यते तत्र तदभिधेयतामुपयाति, भावस्त्वौदासीन्यमवलम्बते। `अकर्त्तरि च कारके संज्ञायाम्'(3.3.19) इति संज्ञाग्रहणेऽनुवर्त्तमाने पुनः संज्ञाग्रहणं भावार्थम्, पूर्वकं हि संज्ञाग्रहणमकर्त्तृकारकेण सम्बद्धमिति। ततः कर्त्तृवर्जित एव कारके संज्ञायां स्यात्, न भावे। तस्माद्भावेऽपि संज्ञायामेव यथा स्यादित्येवमर्थं पुनः संज्ञाग्रहणम्। अथ कथं भृतिः, मतिः, आसुतिरिति ? निपातनात्। किं पुनर्निपातनम् ? `कर्मणि भृतौ' (3.2.22), `मतिबुद्धिपूजार्थेभ्यश्च' (3.2.188) `रजःकृष्यासुतिपरिषदो वलच्' (5.2.112) ितिि।।

100. कृञः श च। (3.3.100)
`योगविभागोऽत्र कर्त्तव्यः' इति। कृञः क्यबिति भवति, ततः शश्च, यथाप्राप्तञ्चेति, तेन त्रीणि रूपाणि सिध्यन्ति। तत्र `कृञः'इति योगेन कृत्येत्येतद्रूपं सिध्यति, `श च' इत्यनेन क्रिया कृतिरिति चेत्येतद्रूपद्वयं क्रियत इति। यदा भावे शब्दस्तदा `सार्वधातुके यक्' (3.1.67), `रिङ् शयग्लिङक्षु' (7.4.24) इति रिङादेशः। यदा त्वकर्त्तरि कारके तदा यगभावाच्छ एव प्रत्यये परतो धातोरिङादेशे कृते `अचि श्नुधातु' (6.4.77) इत्यादिना तस्येयङ्। शकारः सार्वधातुकार्थः।।

101. इच्छा। (3.3.101)
इषर्भावे शप्रत्ययो भवति; अभिधानशक्तिस्वाभाव्यात्, न कारके। `यगभावश्च' इति। `सार्वधातुके यक्' (3.1.67) इति यक् स्यात्, अतस्तदभावो निपात्यते। `इच्छा' इति। `इषुगमि' (7.3.77) इत्यादिना छत्वम्।
`परिचर्या' इत्यादि। `चर गत्यर्थः' (धा.पा.559), `सृ गतौ' (धा.पा.965), `मृग अन्वेषणे' (धा.पा.1900) चुरादावदन्तः, `अट पट गतौ' (धा.पा.295,296)--एभ्यो भावे शः, पूर्ववद्यक्, सर्त्तेर्गुणः। मृगयतेरकारलोपाभावः, `णेरनिटि' (6.4.51) इति णिलोपः। `अटाट्या' इति। अटतेर्द्विवचनात्त्वञ्चाभ्यासस्य।
`जागर्त्तेरकारो वा' इति। यदा शस्तदा `सार्वधातुके यक्' (3.1.67), `जाग्रोऽविचिण्णल्ङित्सु' (7.3.85) इति गुणः। `जागरा' इति यदा त्वकारः।।

102. अ प्रत्ययात्। (3.3.102)
`धातोः' (3.1.91) इत्यधिकारात् प्रत्ययग्रहणं धातोर्विशेषणं विज्ञायत इत्याह-- `प्रत्ययान्तेभ्यो धातुभ्यः' इति। `चिकीर्षा' इति। चिकीर्षशब्दात् सन्नन्तादपर्त्ययः। `पुत्रीया' इति। `सुप आत्मनः क्यच्' (3.1.8), `क्यचि च' (7.4.33) इतीत्त्वम्। `पुत्रकाम्या' इति। `काम्यच्च' (3.1.9) इति काम्यच्। `लोलूया' इति। `धातोरेकाचो हलादेः'(3.1.22) इति यङ।।

103. गुरोश्च हलः। (3.3.103)

`धातोः (3.1.91) इत्यधिकाराद्गुरुग्रहणं हल्ग्रहणं च तस्यैव विशेषणं विज्ञायत इत्याह-- `गुरुमान् हलन्तो यो धातुः' इत्यादि। कथं पुनर्गुरोरित्युच्यमाने गुरुमान् धातुर्लभ्यते ? सामर्थ्यात्। न हि हलन्तस्य धातोः कस्यचिद्गुरुसंज्ञा विहिता, उच्यते चेदं गुरोरिति, तत्र सामर्थ्याद्गुरुमान् धातुर्गुरुसंज्ञाकेनाभेदोपचारं कृत्वा गुरुशब्देनोक्त इति गम्यते। इष्यते ह्यभेदोपचाराद्विनापि मतुपा तद्वतोरभिधाम्-- यथा-- शुक्लः पट इति। अथ रुधादिभ्य एव यथा स्यात्, कुडिप्रभृतीभ्यो मा भूदित्येवमर्थो विपर्ययः कस्मान्न विज्ञायते `गुर्वन्तो यो धातुर्हल्वान्' इति ? ज्ञापकात्, यदयं `गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि' (2.3.12) इत्यप्रत्ययान्तस्य चेष्टाशब्दस्य `शकि शङ्गायाम्' (धा.पा.86) इति च शङ्काशब्दस्य निर्देशं करोति, ततो ज्ञायते-- नात्र विपर्यय इति। विपर्यये हि न हि चेष्टेति गुर्वन्तः, नापि शङ्केति। `कुण्डा' इत्यादि। `कुडि दाहे' (धा.पा.270), `हुडि सङ्घाते' (धा.पा.269), `ईह चेष्टायाम्' (धा.पा.632) `ऊह वितर्के' (धा.पा.648)-- इत्येषां रूपाणि।।

104. षिद्भिदादिभ्योऽङ्। (3.3.104)

`गणपरिपठितेषु'इत्यादि। भिदादयोऽङन्ता एव गणे पठ्यन्ते, तेभ्योयदि पुनरिहाङ विहितः प्रातिपदिकेभ्यो विहितः स्यात्, तच्चायुकतें स्यात्, धात्वधिकारात्,तस्माते तेषु याः प्रकृतयोऽवयवभूतास्ता निष्कृष्य पृथक्कृत्वा `षिद्भिदादिभ्योऽङ्' इति भिदादिग्रहणेन निर्दिश्यन्ते। ताः पुनः `भिदिर् विदारणे' (धा.पा.1439), `छिदिर् द्वैधीकरणे' (धा.पा.1440), `विद ज्ञाने' (धा.पा.1064), `क्षिप प्रेरणे' (धा.पा.1285), `गुहू संवरणे' (धा.पा.896), `डुधाञ् धारणपोषणयोः' (धा.पा.1092), `{मिदृ मेधाहिंसनयोः'-धा.पा.}{मेदृ सङ्गमे च.धा.पा.} मेधृ हिंसासंक्लेशनयोः'(धा.पा.868,869), `ऋ गतौ' (धा.पा.1098), `हृञ् हरणे' (धा.पा.899) `डुकृञ् करणे' (धा.पा.1472), `क्षि क्षये'(धा.पा.236), अथवा `क्षि निवासगत्योः' (धा.पा.1407), `तृ प्लवनतरणयोः' (धा.पा.969), `धृञ् धारणे' (900), `लिख अक्षरविन्यासे' (धा.पा.1365), `चुद {सञ्चोदने-धा.पा.}समुच्छ्रये(धा.पा.1592), `पीड अवगाहने' (धा.पा.1544), `डुवप {बीजतन्तुसन्ताने, छेदनेऽपि्ृधा.पा.} बीजतन्तुसन्ताने' (धा.पा.1003), `वस निवासे' (धा.पा.1942), `{मृजू-धा.पा.}मृजूष् शुद्धौ' (धा.पा.1066),`क्रप {कृपायां गतौ च-धा.पा.} (धा.पा.771) इत्येते वेदितव्याः। यदि तर्हि प्रकृतयो निर्दिश्यन्ते भिदादीनां गणे पाठोऽनर्थकः ? अथ पाठः क्रियते प्रत्ययविधानमनर्थकम् ? गणे पाठस्तावन्नानर्थकः; प्रसिद्ध्युपसंग्रहार्थत्वात्। प्रसिद्ध्युसंग्रहस्तु यत्र भिदादयः समुदायाः प्रसिद्धास्तत्रैवैषां साधुत्वं यथा स्यात्, अन्यत्र मा भूदित्येवमर्थः। तेन यदुक्तं भाष्ये `भिदा विदारणे' (ग.सू.29) इत्येवमादि, तदुपपन्नं भवति। न च प्रत्ययविधानमनर्थकम्; असन्देहार्थत्वात्। असति हि तस्मिन् सन्देहः स्यात--किमेषु `इगुपधज्ञाप्रीकिरः कः' (3.1.135) इत्येवमादिना लक्षणान्तरेण कप्रभृतादयः प्रत्यया विहिताः ? उताङ्प्रत्यय एव ? इति। ततर् पूर्वस्मिन् पक्षे स्त्रीत्वविवक्षायां क्तिन् प्रसज्यते, कस्मात् ? असन्देहार्थत्वात्। अतः प्रत्ययविधानं नानर्थकम्।

`आरा' इति. `ऋदृशोऽङि गुणः' (7.4.16)। `गुहा गिर्य्योषधयोः'इति। गुहाशब्दो गिर्य्योषध्योरेव साधुर्भवति, नान्यत्र। गिरिशब्दश्चात्र `समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्ते' (व्या.पा.सू.85) इत्येकदेशे वर्त्तते। गुहेति गिरेः कश्चिदेवैकदेश उच्यते। गुहा नामौषधिः। अन्यत्र गुहेः क्तिन् भवति-- गूढिरिति। `हो ढः' (8.2.31), `झतस्तथोर्घोऽघः' (8.2.40), `ष्टुना ष्टुः' (8.4.41) `ढो ढे लोपः' (8.3.13), `ढ्रलोपे पूर्वस्य दीर्घोऽणः' (6.3.111)। `हारा, कारा, धारा'इति। गुणे कृते दीर्घत्वं निपात्यते। `लेखा, रेखा' इति। लिखेर्गुणो निपात्यते। पक्षे लकारसय् रेफश्चादेशः। `चूडा' इति। चोदयतेर्डत्वादेशो निपात्यते, उपधाया दीर्घश्च। `आरा शस्त्र्याम्'इति। आराशब्दः शस्त्र्यां साधुर्भवति, अत्रापि गुणे कृते दीर्घत्वं निपात्यते। `आर्त्तिरन्या' इति। अर्त्तेराङ्पूर्वस्य क्तिन्। `उपसर्गादृति धातौ' (6.1.91) इत्येकादेशः, रपरत्वम्। `धारा प्रपाते' इति। यत्र प्रपातनं तत्र धारेति, यथा-- जलधारा, क्षीरधारेति।।

105. चिन्तिपूजिकथिकुम्बचर्चश्च। (3.3.105)

`चुरादिः'इति। एतत् `चिति स्मृत्याम्' (धा.पा.1535) इत्यादिभिः प्रत्येकमभिसम्बध्यते। `युचि प्राप्ते' इति। `ण्यासश्रन्थो युच्' (3.3.107) इत्यनेन। यस्तु भ्वादौ कुम्बिः पठ्यते ततो `गुरोश्च हलः' (3.3.103) इत्यकारेण भवितव्यम्। न च कुम्बेरकारेऽङि वा सति कश्चिद्विशेषोऽस्तीति नासाविह ग्रहणं प्रयोजयति।।

106. आतश्चोपसर्गे। (3.3.106)

`श्रदन्तरोः'इत्यादि। उपसर्गे इवोपसर्गवत्। यादृश्युपसर्गे वृत्तिः प्रत्ययोत्पत्तिलक्षणा, तादृश्येव तयोरपि भवति। तेन यथा प्रधा, उपधेत्युपसर्गे भवति, तथा श्रदन्तरोरपि श्रद्धा, अन्तर्धेति। न चेयं वृत्तिरुपसंख्यानसाध्या; यतः श्रद्धाशब्दस्तारकादिषु च पाठात् साधुत्वमनुभवति। अन्तर्धाशब्दोऽपि ज्ञापकात्, यदयं `अन्तर्धौयेनादर्शनमिच्छति' (1.4.28) इत्यन्तर्धिशब्दस्य किप्रत्ययान्तस्य निर्देशं करोति, ततो ज्ञायते-- भवत्यन्तःशब्द उपसर्गकार्यस्य निमित्तमिति; अन्यथा हि तस्मिन्नुपपदे `उपसर्गे घोः किः' (3.3.92) इति किप्रत्ययो न स्यात्, ततश्च `अन्तर्धौ' इति निर्देशो नोपपद्यते।।

107. ण्यासश्रन्थो युच्। (3.3.107)

`अकारस्यापवादः' इति। `अ प्रत्ययात्' (3.3.102), `गुरोश्च हलः' (3.3.103) इति द्वाभ्यां यथायोगं प्राप्तस्य।

`कथमास्या' इति। न कथञ्चित्। अः स्यादासेः, अनेन सूत्रेण युज्वा भविष्यति, नान्य इति भावः। `ऋहलोर्ण्यत्' (3.1.124) इत्यादि परिहारः। ननु च वासरूपविधिना ण्यत्प्रत्ययः स्यात्, स च वासरूपविधिः स्त्रियां न भवति, `अस्त्रियाम्' (3.1.94) इति प्रतिषेधात्, तत् किमुच्यते-- `ऋहलोर्ण्यत्' (3.1.124) इति ण्यद्भविष्य(ती)ति ? इत्यत आह-- `वासरूप' इत्यादि। एध चार्थस्तत्रैव प्रतिपादितः।

`उपसंख्यानम्' इति। प्रतिपादनमित्यर्थः। तत्रेदं प्रतिपादनम्--- वक्ष्यमाणं बहुलग्रहणमुभयोरपि योगयोः शेषः, तेन घट्टिप्रभृतिभ्यो भविष्यीति।

`वक्तव्यः'इति। व्याख्येय इत्यर्थः। व्याख्यानं तदेव बहुलग्रहणमाश्रित्य कर्त्तव्यम्। `अन्वेषणा' इति। `इष गतौ' (धा.पा.1127), `इष आभीक्ष्ण्ये' (?) इति वा।।

108. रोगाख्यायां ण्वुल्बहुलम्। (3.3.108)

`क्तिन्नादीनामपवादः' इति। आदिशब्देनाङादीनाम्।`आख्याग्रहणम्' इत्यादि। यदि प्रत्ययान्तं रोगस्य नाम भवत्येवं प्रत्ययो भवति। नान्यथेत्यस्यास्य संवाद्नायाख्याग्रहणम्। ते पदान्तरवाच्ये रोगे न भवति-- बुभुक्षा भस्मकेनेति। `बहुलग्रहणम्' इत्यादि। रोगाख्याया रोगाख्याया अन्यत्रापि ण्वुलो विधानं व्यभिचारः; तदर्थं बहुलग्रहणम्। तेन धात्वर्थनिर्देशेऽपि सिद्धो भवति।

अपरोऽर्थः रोगाख्याया विषयाण्ण्वुलो विधेर्योऽन्यत्राप्यस्य लक्षणस्य विषये वृत्तिर्व्यभिचारः सः, तदर्थं बहुलग्रहणम्। तेन `इक्श्तिपौ धातुनिर्दशे'(वा.319) इत्येवमादि सर्वं संगृहीतं भवति। `प्रच्छर्दिका' इति। `छर्द वमने'(धा.1589) चुरादिः। `प्रवाहिका'इति। `वह प्रापणे'(धा.पा.1004)। `प्रचर्चिका' इति। `चर्च अध्ययने' (धा.पा.1712) चुरादिः। अत्र वहेः क्तिनि प्राप्ते ण्वुल्,इतरयोस्तु युचि। `शिरोऽस्तिः' इति। `अर्द हिंसायाम्' (धा.पा.1828), `अर्द {गतौ याचने च' -धा.पा.} गतौ' (धा.पा.55) इति वा। `खरि च' (8.4.55) इति चर्त्वम्। शिरसा सह षष्ठीसमासः, `ससजुषो रुः'(8.2.66), `अतो रोरप्लुतादप्लुते' (6.1.113) इत्युत्त्वम्, `आद्गुणः' (6.1.87), `एङः पदान्तादति' (6.1.109) इत्येते विधयः कर्त्तव्याः।

`इक्श्तिपौ'इति। ककारः कित्कार्यार्थः, तेन पचतिरिति सार्वधातुकनिबन्धनः शब्भवति। ननु च कर्त्तृवाचिनि सार्वधातुके शब्विधीयते; न चात्र कर्त्ता प्रत्ययार्थः;तत्कुतः शपः सम्भवः ? सार्वधातुकसंज्ञार्थशित्करणसामार्थ्यादकर्त्तृवाचिन्यपि सार्वधातुके शब्भविष्यति;अन्यथा हि शित्करणमनर्थकं स्यात्। यद्येवम्, यगपि स्यात् ? अनभिधानान्न भविष्यति।

`वर्णात्कारः' इति। वर्णादित्युच्यते, तत्रैवकार इति न सिध्यति ? बहुलग्रहणसन्निधौ वचनात् क्वचिदवर्णादपि भविष्यतीत्यदोषः। अथ वा करणं कारः, एवस्य कारइति षष्ठीसमासोऽयम्।

`मत्वर्थाच्छः' इति। अत्राकारलोपश्च वक्तव्यः। अभसंज्ञत्वद्धि न प्राप्नोति। बहुलग्रहणाद्वाकारलोपो भविष्यति। `इणजादिभ्यः' (इति)। `इक् कृष्यादिभ्यः' इति। अधातुनिर्देशार्थमेतत्। आज्यादयः शब्दाः संज्ञाशब्दा द्रष्टव्याः।।

109. संज्ञायाम्। (3.3.109)

`उद्दालकपुष्पभञ्जिका' इति। `नित्यं क्रीडाजीविकयोः' (2.2.17) इति षष्ठीसमासः। षष्ठी पुनरत्र `कर्त्तृकर्मणोः कृति' (2.3.65) इति कृद्योगलक्षणा।।

110. विभाषाख्यानपरिप्रश्नयोरिञ् च। (3.3.110)

इह सूत्रे पूर्वमाख्यानस्य निर्देशः, पश्चात् परिप्रश्नस्य; वृत्तौ तु `परिप्रश्ने चाख्याने च गम्यमाने'इति पूर्व परिप्रश्नसोयपन्यासः,पश्चादाख्यानस्य; तत्र यश्चोदयेत्--किं कारणमेवं वृत्तौ विपर्ययः कृतः ? इति, तं प्रत्याह-- `पूर्वं परिप्रश्नः'इत्यादि। परिप्रश्नपूर्वकं व्याख्यानं भवति, अतो वृत्तौ पूर्वं परिप्रश्नस्य तदुदाहरणस्य चोपन्यासः कृतः, पश्चादाख्यानस्य। क्रमव्यतिक्रमे प्रयोजनाभावादित्याभिप्रायः। सूत्रे तर्हि कस्मात् पूर्वं परिप्रश्नो न निर्दिष्टः, पश्चादाख्यानमित्याह-- `सूत्रे' इत्यादि। `अल्पाच्तरम्' (2.2.34) इति सूत्रेण द्वन्द्वे पदानां क्रमस्य नियत्वादल्पाच्तरस्याख्यानशब्दस्य सूत्रे पूर्वनिपातः कृत इति दर्शयति। `कां कारिम्'इति। इञ्। `कां कारिकाम्' इति। ण्वुल् । `कां क्रियाम्' इति। `कृञः श च' (3.3.100) इति शः। `कां कृत्याम्' इति। तत्र चकारात् क्यप्। `कां कृतिम्' इति। योगविभगात् क्तिन् कृतः। `कां गणिम्' इति। इञ्। `गण संख्याने' (धा.पा.1853) चुरादावदन्तः पठ्यते। `कां गणिकाम्' इति। ण्वुल्। `गणनाम्'इति। युच्। एवम्--`कां पाचिम्' इत्यादि। `कां पाचिमकार्षीः', `कां पाचिकाम्' , `कां पचाम्'। `कां याजिम्' , `कां याजिकाम्' इत्यादि, कामिष्टिम्। `कां पाठिम्' , `कां पाठिकाम्' `कां पठितिम्' इति।।

111. पर्यायार्हणोत्पत्तिषु ण्वुच्। (3.3.111)

`क्तिन्नादीनामपवादः'इति। आदिशब्देनाकारादीनाम्। `अग्रगामिका' इति। अग्रस्य गामिका। कृद्योगलक्षणायाः कर्मणि षष्ठ्याः समासः। `स्वरार्थम्' इति। अन्तोदात्तत्वं यथा स्यादित्येवमर्थम्। ण्वुलि हि सति प्रत्ययात् पूर्वमुदात्तः स्यात्।।

112. आक्रोशे नञ्यनिः। (3.3.112)

113. कृत्युल्युटो बहुलम्। (3.3.113)
`यत्र विहितास्ततोऽन्यत्रापि भवन्ति' इति। यद्येवम्, `तयोरेव कृत्यक्तखलर्थाः' (3.4.70) इत्येवमादेरर्थनिर्देशस्यानर्थकत्वं जायते ? नैतदस्ति; योगतो हि कृत्यादयो भावादिष्वर्थेष्विष्यन्ते, कारकान्तरे त्वल्पः। सा च तथा तेषां वृत्तिरनर्थनिर्देशे सति सिध्यतीति कुतस्तस्यानर्थक्यम् ! `स्नानीयम्' इति। करणे कृत्यः। `दानीयः'इति। दीयते तस्मै इति सम्प्रदाने। `अपसेचनम्' इति। अपसिच्यते तदिति कर्मणि ल्युट्। `अवस्रावणम्' इति। `अवस्राव्यते तदिति `सृ गतौ' (धा.पा.935) इत्यस्माण्ण्यन्तात् कर्मणि ल्युट्। भुज्यतइति `भोजनाः'। आच्छाद्यन्त इति `आच्छादनानि' । कर्मण्येव ल्युट्। राज्ञो भोजना राज्ञ आच्छादनानीति षष्ठीसमासः। `प्रस्कन्दनम्, प्रपतनम्'इति। प्रस्कन्दति, प्रपतत्यस्मादित्यपादाने ल्युट्।
अथ बहुलग्रहणं किमर्थम् ? यावता सूत्रारम्भसामर्थ्यादेव कृत्युल्युटो यत्र विहिता स्ततोऽन्यत्रापि प्रायेण भवन्तीत्येषोऽर्थो विज्ञायत एवेत्यत आह-- `बहुलग्रहणात्' इत्यादि। एतेनान्येऽपि कृतो यत्र विहितास्ततोऽन्यत्राप्यभिधेय इष्यन्ते, तच्च बहुलग्रहणात् सिध्यति। अतो बहुलग्रहणं कृतमिति सूचयति। `पादहारकः'इति। कर्त्तरि ण्वुल् विहितो बहुलग्रहणादिह कर्मणि भवति।।

114. नपुंसके भावे क्तः। (3.3.114)
`तयोरेव कृत्यक्तखलर्थाः ' (3.4.70) इति भावे क्तः सिद्धः। नपुंसके भावेऽपि क्तोऽयं विशेषविहितेन ल्युटा बाध्यत इति योगरम्भः।।

115. ल्युट् च। (3.3.115)
`योगविभाग उत्तरार्थः'इति। उत्तरत्र ल्युट एवानुवृत्तिर्यथा स्यात्, क्तस्य मा भूत्।।

116. कर्मणि चयेन संस्पर्शात्कर्त्तुः शरीरसुखम्। (3.3.116)
`नित्यसमासार्थं वचनम्' इति। नित्यः समासोऽर्थः प्रयोजनं यस्य तत् तथोक्तम्। कथं पुनरेतद्वचनं नित्यसमासार्थं भवतीत्याह-- `उपपदसमासो हि नित्यसमासः' इति। अनेन हि सूत्रेण कर्मण्युपपदे प्रत्ययो विधीयत इति, `उपपदमतिङ्'(2.2.19) इत्युपपदसमासो भविष्यति, स च नित्यः;तद्विधौ `नित्यं क्रीडाजीविकयोः'(2.2.17) इत्यतो नित्यगर्हणानुवृत्तेः। `पयः पानं सुखम्' इति। कथं पुनरेतदस्योदाहरणं भवति ? यावता नात्र संस्पर्शात् सुखमुत्पद्यते, किं तर्हि ? अभ्यवहारात्;नैष दोषः;सर्वे हि तेऽभ्यवहारादयो न विना स्पर्शेन न भवतीति नान्तरीयकत्वात् स्पर्शो नापेक्ष्यते।
`तूलिकाया उत्थानं सुखम्' इति। `उदः स्थास्तम्भोः पूर्वस्य'(8.4.61) इति पूर्वसवर्णः। अस्तीह कर्त्तुः शरीरसुखम्, न तु कर्मणा संस्पृश्यमानस्य, किं तर्हि ? अपादानेन तूलिकाख्येन। `अग्निकुण्डस्योपासनम्' इति। `आस उपदेशने' (धा.पा.1021) उपपूर्वः। अत्रास्पर्शात् सुखं भवति; अग्निकुण्डेनोपास्यमानेनोपस्पृश्यमानस्यैव तदुत्पत्तेः। `गुरोः स्नापनम्' इति। `ष्णा शौचे' (धा.पा.1053), हेतुमण्णिच्। `अर्त्तिह्री' (7.3.36) इत्यादिना पुक्। ननु चात्रापि गुरुः सुखस्य कर्त्ता भवतीत्यस्तीह कर्त्तुः सुखम्। तत्कथमिदं प्रत्युदाहरणं भवतीत्याह--`स्नापयतेर्न गुरुः' इति। अनेनतद्दर्शयति-- नात्र सुखापेक्षं कर्त्तृत्वं विवक्षितम्, किं तर्हि ? क्रियापेक्षम्। न चात्र स्नापनक्रियाया गुरुः कर्त्ता, किं तर्हि ? शिष्यः, तस्य च गुरुः कर्मैव भवति। कर्मसंज्ञा पुनर्गुरोः `गतिबुद्धि' (1.4.52) इत्यादिसूत्रेण; तस्याकर्मके स्नातावण्यन्ते कर्त्तत्वात्। `परिष्वञ्जनम्' इति। `ष्वन्ज परिष्वङ्गे' (धा.पा.976), `उपसर्गात् सुनोति' (8.3.65) इत्यादिना मूर्धन्यः। `मानसी प्रीतिः'इति। तेन पुत्रपरिष्वञ्जनजन्मनः प्रीतिविशेषस्य शरीरसुखत्वं दर्शयति। `मर्दनम्' इति। `मृद क्षोदे' (धा.पा.1515)। `सर्वत्रासमासः प्रत्युदाह्रियते'इति। न तु ल्युडभावः। ल्युटः पूर्वसूत्रेण सर्वत्र भावात्।।

117. करणधिकरणयोश्च। (3.3.117)
`करणेऽधिकरणे च कारके' इत्यनेन करणाधिकरणयोः प्रत्ययार्थत्वं दर्शयति। अत्रोपपदे करणाधिकरणे कस्मान्न भवतः ? `करणाधिकरणयोः'इत्यत एव निर्देशात्। करणाधिकरणशब्दौ हि ल्युडन्तौ करणाधिकरणसाधनौ च। तत्र दद्युपपदत्वमेतयोः स्यादेष निर्देशो नोपपद्यते। यद्येवम्, सति निर्देशे प्रत्ययविधानं च , सति च तस्मिन् निर्देश इतीतरेतराश्रयत्वं प्रसज्येत ? न; नित्यत्वाच्छब्दानाम्। न ह्यपूर्वं किञ्चिदुत्पद्यते; शब्दानां नित्यत्वात्। सत्तामेव तु तेषामन्वाख्यानं क्रियते इति इतरेतराश्रयतायाः प्रसङ्गः। `इध्मप्रव्रश्चनः' इति। `ओव्रश्चूछेदने' (धा.पा.1292), इध्मानां प्रव्रश्चन इति षष्ठीसमासः। `पलाशशातनः' इति। `शद्लृ शातने' (धा.पा.1428), `हेतुमण्णिच, `शदेरगतौ तः' (7.3.42) इति तत्वम्। `गोदोहनी' इति। `टिड्ढाणञ्' (4.1.15) इति ङीप्।।

118. पुंसि संज्ञायां घः प्रायेण। (3.3.118)
`समुदायेण चेत्' इत्यादि। प्रकृतिप्रत्ययसमुदायेन यदि संज्ञा गम्यत एवं प्रत्ययो भवति, नान्यथा। `अकार्त्स्न्यार्थम्' इति। अकार्त्स्न्यम् = असाकल्यम्,

प्रयोजनमर्थो यस्य तत् तथोक्तम्। एतेनाकृत्स्नविषयतां प्रत्ययस्य दर्शयति। `दन्तच्छदः' इति। `छद अपवारणे' (धा.पा.1935), चुरादिणिच्। `छादेर्घेऽद्व्युपसर्गस्य' (6.4.96) इति ह्रस्वः, पूर्ववत् समासः। `प्रसाधनम्'इति। `राध साध संसिद्धौ' (धा.पा.1262), 1263), अस्माद्धेतुमण्ण्यन्तात् पूर्वसूत्रेण करणे ल्युट्, `कुगतिप्रादयः (2.2.18) इति समासः।।

119. गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च। (3.3.119)
`पूर्वस्मिन्नेवार्थे' इति। करणेऽधिकरणे च। ननु पूर्वसूत्रेणैव गोचरादिषु घः सिद्धः, तत्किमित्ययं योग आरभ्यते ? इत्याह-- `हलश्च' इत्यादि। ननु च प्रत्ययग्रहणं तत्रानुवर्तिष्यते, तेन गोचरादिषु घञ् भविष्यति ? प्रतिपत्तिगौरवं तु स्यात; प्रायग्रहणानुवृत्तेरज्ञापकत्वात्।।

120. अवे तृस्त्रोर्घञ्। (3.3.120)
`स्तृणातेः'इति। `स्तृञ् आच्छादने' (धा.पा.1484) इत्यस्मात्। `प्रायानुवृत्तेः' इत्यादि। प्रायशब्दस्यानुवृत्तौ सत्यामेव उपपदे तृस्त्रोर्घञ्प्रत्ययो भवति संज्ञायां प्रायेणोपधिभूतायामित्येषोऽर्थो लभ्यते। `न संज्ञायाम्'इति। अस्योपाधेः प्रायिकत्वात् क्वचिदसंज्ञायामपि भवति।।

121. हलश्च। (3.3.121)
`वेष्टः' इति। `वेष्ट वेष्टने' (धा.पा.255)। `मार्गोऽपामार्गः' इति। `{मृजू-धा.पा.} (धा.पा.1066)। `चजोः (7.3.52) इत्यादिना कुत्वम्, मृजेर्वृद्धिः, (7.2.114) `उपसर्गस्य घञि' (6.3.122) इति दीर्घः।।

122. अध्यायन्यायोद्यावसंहाराधारावायाश्च। (3.3.122)
`अहलन्तार्थ आरम्भः'इति। हलन्तेभ्यः पूर्वसूत्रेणैव सिद्धत्वात्।।

123. उदङ्कोऽनुदके। (3.3.123)
`ननु च' इत्यादि चोद्यम्। `उदकप्रतिषेधार्थं वचनम्'इति परिहारः। यद्येतन्नारभ्येत तदोदकेऽपि पूर्वेण स्यादित्यर्थः। `तैलोदङ्कः'इति। षष्ठीसमासः। षष्ठी पुनः कर्मणि कृद्योगलक्षणा।
`उदकोञ्चनः' इति। करमे ल्युट्। `घः कस्मात्' इत्यादि। एवं मन्यते-- `पुंसि संज्ञायाम्' (3.3.118) इत्यादिना घे प्राप्ते घञ् विहितः, ततश्च तेन मुक्ते विषये घनैव युक्तं भवितुमिति। `विशेषाभावात्' इति। न ह्यत्राञ्चतेर्घञि घे वा सति विशेषोऽस्ति। तत्र यद्युदकेऽपि घः स्यादनुकप्रतिषेधेनार्थो न स्यादित्यभिप्रायः। ननु च घे सति प्रत्ययस्वरेणान्तोदात्त उदङ्कशब्दो भवति, घञढि सति ञित्स्वरेणाद्युदात्तः स्यात्, तत् किमुच्यते विशेषाभावादित्यत आह-- `घञ्यपि' इत्यादि। `थाथादिस्वरेण' इति। थाथघञ्क्ताजबित्रकाणाम्' (6.2.144) इत्येतद्विहितेन।।

124. जालमानायः। (3.3.124)

125. खनो घ च। (3.3.125)
`डो वक्तव्यः'इत्यादि। सर्वत्र वक्तव्यशब्दस्य व्याख्येय इत्येषोऽर्थः। तत्रेदं व्याख्यानम्- चकारोऽत्र क्रियते, स चानुक्तसमुच्चयार्थः, तेन डादयोऽपि प्रत्यया भविष्यन्तीति। ननु च घञनुकर्षणार्थश्चकारः ? नैतदस्ति; स्वरितत्वादेव हि घञपतिष्ठते। अथ किमर्थं खनेर्घः प्रत्ययो विधीयते, यावता कुत्वार्थं तस्य विधानम्, न च खनेः कश्चिदवयवः कुत्वभागस्ति ? एवं तर्ह्येतज्ज्ञापयति--अन्येभ्योऽप्ययं भवतीति। तेन खलः,भगम्, पदमित्येवमादयः सिद्धा भवन्ति।।

126. ईषद्दुःसुषु कृच्छ्रार्थेषु खल्। (3.3.126)
`तदितरयोः'इति। सुशब्देषच्छब्दयोः। कथं पुनः सामान्योक्तेनापि विशेषो लभ्यते ? इत्याह-- सम्भवात्'इति। यत्र यस्य सम्भवस्तत्र तस्य विशेषणं भवति। कृच्छ्रमेव दुःशब्दस्यार्थे वर्त्तते, नाकृच्छ्रम्। इतरयोस्त्वर्थेऽकृच्छ्रमेव वर्त्तते न कृच्छ्रम्। तस्मात् कृच्छ्रं दुर एव विशेषणम्, अकृच्छ्र त्वितरयोरेव। `ईषात्करः कटो भवता' इति। अकृच्छ्रेणायत्नेन क्रियते भवता कट इत्यर्थः। `ईषत्कार्यः'इति। `ऋहलोर्ण्यत्' (3.1.124) इति ण्यत्। ईषच्छब्दोऽत्र मनागित्यस्यार्थे वर्त्ततेत।
`लकारः स्वरार्थः' इति। लिति प्रत्ययात् पूर्वस्योदात्तत्वं यथा स्यात्। ननु च ह्रस्वादिकं खित्कार्यं `खित्यनव्ययस्य' (6.3.66) इत्येवमादिशास्त्रेणानव्ययस्य विधीयते; ईषदादयश्चाव्ययसंसज्ञाः; तत्किमर्थं खलः, खित्करणमित्याह-- `खित्करणमुत्तरत्र मुमर्थम्' इति।उत्तरत्रानव्ययेऽप्युपपदे खल् विधास्यते, तत्र `अरूर्द्विषदजन्तस्य मुम्' (6.3.67) इति मुम् यथा स्यादित्येवमर्थं खित्करणम्।।

127. कर्त्तृकर्मणोश्च भूकृञोः। (3.3.127)
कर्त्तृकर्मणोरुपपदत्वं भवति, न तु प्रत्ययार्थम्। यदि च तयोः प्रत्ययार्थत्वं स्यादीषदादिष्वेवोपपदेषु प्रत्ययः स्यात्, ततश्च खित्करणमनर्थकं स्यात्; अनव्ययस्य खित्कार्यविधानात्। ईषादादीनाञ्चाव्ययत्वात्; तस्मादतोऽपि खित्करणम्। उपपदे कर्त्तृकर्मणी, न तु प्रत्ययार्थावेतावित्यवसीयते। अत्र च कर्त्तृकर्मणी ईषदादयश्च न प्रत्येकं प्रत्ययस्य निमित्तम्, किं तर्हि ? तत्समुदायः। चकारेण ह्यत्र सन्नियोगः क्रियते, तेन कर्त्तृकर्मणोरीषदादीनाञ्च युगपदुपपदत्वं भवति; नान्यथा। यद्येवम्, कथं द्वयोरुपपदयोर्युगपत् समासः ? कः पुनराह-- युगपत् समास इति ? पूर्वं हि परस्योपपदस्य समासं कृत्वा पश्चात् पूर्वस्य समासो भवति। किं पुनरत्र परमुपपदम् ? कर्त्तृकर्मणी। कुत एतत् ? खित्करणसामर्थ्यात्। खित्करणं हि मुमर्थम्, मुमागमश्चानव्ययस्य विधीयते। तत्रेषदादीनां धातोश्चानन्तर्ये खित्करणमनर्थकं स्यात्। `ईषदाढ्यम्भवं भवता' इति। अकृच्छ्रमाढ्येन भयते भवतेत्यर्थः। `ईषदाढ्यङ्करो देवदत्तो भवता' इति। अकृच्छ्रमाढ्यः क्रियते देवदत्तो भवतेत्यर्थः।
`कर्त्तृकर्मणोः'इत्यादि। च्व्यर्थोऽभूततद्भावः। तदर्थयोः कर्त्तृकर्मणोरुपपदयोः खल भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- प्रायग्रहणं मण्डूकप्लुतिन्यायेनानुवर्त्तते, तेन यदा कर्त्तृकर्मणी च्व्यर्थे भवतस्तदैव प्रत्ययो भवति, नान्यदेति। `स्वाढ्येन भूयते' इति। अत्र च्व्यर्थस्याविवक्षितत्वात् प्रत्ययो न भवति।।

128. आतो युच्। (3.3.128)

129. छन्दसि गत्यर्थेभ्यः। (3.3.129)
`सूपसदनम्' इति। `षद्लृ विशरणगत्यवसादनेषु' (धा.पा.854), उपपूर्वः।।

130. अन्येभ्योऽपि दृश्यते। (3.3.130)
`सुदोहनम्' इति। `दुह प्रपूरणे' (धा.पा.1014)। `वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्-- अपिशब्दोऽत्र क्रियते, स च सर्वव्यभिचारार्थः, तेन `शासु अनुशिष्टौ' (धा.पा.1075), `युध सम्प्रहारे' (धा.पा.1173), `दृशिर् प्रेक्षणे' (धा.पा.988), `ञिधृषा प्रागल्भ्ये' (धा.पा.1269), `मृष तितिक्षायाम्' (धा.पा.1164)-- इत्येतेभ्योऽपि भाषायां युज्भवतीति। कथं पुनरेतदवसितम्-- `सर्वव्यभिचारार्थोऽपिशब्द इति ? सूत्रारम्भात्। यदि हि गत्यर्थव्यभिचार एवात्राभिसंहितः स्यात्, सूत्रमिदं नारभेत। पूर्वसूत्र एव च गत्यर्थग्रहणं न कुर्यात्।।

131. वर्त्तमानसामीप्ये वर्त्तमानवद्वा। (3.3.131)
यदि समीपस्य भावोऽभिधीयेत तद्धि स्यात्, एवं सति वर्त्तमानस्य सामीप्येन च समासो न स्यात्; सम्बन्धाभावात्। न हि सामीप्यस्य वर्त्तमानेन सम्बन्धः, अपि तु तत्समीपेन; तस्य तद्गुणत्वात्। तस्मात् स्वार्थ एवायमिह भविष्यतीति मत्वाहऽऽह-- समीपमेव सामीप्यम्' इति। किमर्थं पुनः स्वार्थिकं ष्यञं विधायैवं निर्देशः क्रियते, न वर्त्तमानसमीप एवोच्येत यतो लाघवं भवति ? इत्यत आह-- `ष्यञः स्वार्थिकत्वं ज्ञाप्यते' इति।स्वार्थे ष्यञपि स्यादनेनेति। स्वार्थे ष्यञ् भवतीत्यमुमर्थं ज्ञापयितुं स्वार्थिकः ष्यञ् कृत इति। `चातुर्वर्ण्यादिसिद्ध्यर्थम्' इति। अनेनापि ज्ञापनस्य प्रयोजनमुच्यते। आदिशब्देन चातुराश्रम्यादीनां ग्रहणम्। `अयमागच्छामि' इति। अयमागममित्यस्यार्थ एतद्वर्त्तते। `आगमम्' इति। लुङ, उत्तमैकवचनम्, `तस्थस्थमिपाम्' (3.4.101) इत्यादिना मिपोऽम्भावः, पुषादिसूत्रेण (3.1.55) च्लेरङ। `एष गच्छामि' इति। एष गमिष्यामीत्यस्यार्थ इदं वर्त्तते। `गमेरिट् परस्मैपदेषु' (7.2.58) इतीट्। `गन्तास्मि'इति। लुट्, तासिः, मिप्।
अथ वत्करणं किमर्थम्, यत्वता `वर्त्तमानसामीप्ये वर्त्तमाने' इत्युच्यमाने वर्त्तमानकालविहिताः प्रत्यया वर्त्तमानसामीप्ये भवन्तीत्येषोऽर्थो लभ्यत एवत्यत आह-- `वत्करणम्' इत्यादि। असति वत्करणे वर्त्तमानकालेन रूपमात्रमेषां प्रत्ययानामुपलक्ष्यते, न तु प्रकृत्यादय उपादीयेरन्, ततश्च धातुमात्रात् स्युः। वत्करणे तु सति सर्वसादृश्यं गम्यते; तत्रैव वतेर्विधानात्, तेन सङ्करो न भवति। तमेवन सङ्कराभावं दर्शयितुमाह-- `येन 'इत्यादि। एवं हि सर्वसादृश्यं भवति यदि येन विशेषणेन वर्त्तमाने विहितास्तेनैव वर्त्तमानसामीप्ये भवन्ति, नान्यथा। `प्रकृत्योपपदोपाधिना' इति। आदिश्ब्देनोपाधेरबिधेयस्य च ग्रहणम्। `पवमानः, यजमानः'इति। `पूङ्यजोः शानन्' (3.2.128) विहितः,स वर्त्तमानसामीप्येऽपि ताभ्यामेव भवति, न धात्वन्तरात्। `अलङ्गरिष्णुः' इति। ताच्छील्यादिविशिष्टे कर्त्तर्यलम्पूर्वात् कृञ इष्णुच्विहितः, वर्त्तमानसामीप्येऽपि तत्पूर्वादेव भवति। तस्मिन्नेव चार्थे `परुदगच्छत्' इत्यत्र विप्रकर्षविवक्षायां लङेव भवति। `वर्षेण गमिष्यति' इति। अत्रापि लृडेव भवति।
`यो मन्यते' इत्यादिनापि प्रतिपत्तृविशेषं प्रति सूत्रं प्रत्याचष्टे। `कालान्तरगतिस्तु' इत्यादि। कालान्तरं वर्त्तमानसमीपो भूतो भविष्यंश्च कालः, तस्य या गतिः = प्रतीतिः। आगच्छामीत्यस्य पदस्य वर्त्तमानकालविशेषेऽप्ययं गच्छामीत्यतो वाक्यात् कदा देवदत्त गमिष्यसीत्येद्वाक्यसमनन्तरं प्रयुज्यमानाद्भवति। वाक्यगम्योऽपि कालो यदि पदसंस्कारवेलायामुपयुज्यते युज्येत सूत्रारम्भः, न चासौ तत्रोपयुज्यते; यस्माच्छास्त्रेण पदस्य संस्कारः क्रियते, न वाक्यस्य। पदे संस्क्रियमाणे तद्गम्य एव काल उपयुज्यते, तेन वाक्यगम्य इत्यभिप्रायः। इतिकरणः प्रकृतप्रत्यवमर्शक इति। एवं यो मन्यते = अवगच्छति तं प्रतीदं

नारब्धव्यमेव। यदर्थमारभ्यते तेषां प्रत्ययानां `वर्त्तमाने लट्' (3.2.123) इत्यादिनैव शास्त्रेणासिद्धत्वात्। प्रकरणग्रहणेन केवलमिदं सूत्रं नारब्धव्यम्, अपि तु `अशंसायां भूतवच्च' (3.3.132) इत्येवमादीन्यपि नारब्धव्यनीति दर्शयति। `तादृशम्'इत्यादि। एवञ्च यस्तु तादृशः प्रतिपत्ता न भवति मन्दबुद्धिस्तं प्रत्यारब्धव्यमेवेत्युक्तं भवति। न ह्यसावेवं न्यायेन प्रतिपत्तुं समर्थः। `तथा च' इत्यादि। यस्मात् तत्रैवं वाक्यगम्यः कालः पदसंस्कारवेलायां नोपयुज्यते, एवञ्च सति श्वः करिष्यतीत्येमाद्युपपद्यते। तत्रापि हि करिष्यतीत्येतत् पदं भविष्यत्येव काले वर्त्तत इति `लृट् शेषे च' (3.3.13) इत्येव लृट् सिद्धः। भविष्यदनद्यतनस्तु कालोऽयम्। यद्युत्तरकालः प्रतीयते तथाप्यसौ वाक्यार्थ इति पदसंस्कारे नाश्रीयते। यदि तु वाक्यगम्योऽपि कालः पदसंस्कारे समाश्रीयेत, तदा तु करिष्यतीत्येवमादि नोपपद्येत-- भविष्यदनद्यतने लुटैव भवितव्यमिति कृत्वा।।

132. आशंसायां भूतवच्च। (3.3.132)
`आगमत्' इति। लुङ। आगत इति निष्ठा। `अनुदात्तोपदेश' (6.4.37) इत्यादिनानुनासिकलोपः। `अधीमहे' इति। इङो लुट्, महिङ्, अदादित्वाच्छपो (2.4.72) लुक्। `अध्यगीष्महि' इति। लुङ, `विभाषा लुङलृङोः' (2.4.50) इतीङो गाङादेशः, गाङकुटादिना (1.2.1) सिचो ङित्त्वात् `घुमास्था' (6.4.66) इत्यादिनेत्त्वम्। भूतवच्चेत्यादिदेशे लङलिटावपि प्राप्नुतः, तौ कस्मान्न भवत इत्याह-- `सामान्यातिदेशे' इत्यादि। भतसामान्यातिदेशोऽयम्, भूतविशेषप्रत्ययौ च लङलिटौ। सामान्यातिदेशे विशेषस्यानतिदेशः, तेन ताविह न भवतः।।

133. क्षिप्रवचने लृट्। (3.3.133)
`भूतवच्चेत्यचस्यायमपवादः'इति। न प्राप्ते भूतवच्चेत्यस्मिन्नस्यारम्भात्।
अथ वचनग्रहणं किमर्थम् ? यावता क्षिप्रे लृडित्येनेनैव सर्वं सिद्धमित्यत आह-- `वचनग्रहणं पर्यायार्थम्'इति। असति हि वचनग्रहणे क्षिप्रशब्द एवोपपदे लृट् स्यात्, तस्मिंस्तु सति यावन्तः क्षिप्रवचनास्तेषु सर्वेषु भवति। अथ लृड्ग्रहणंकिमर्थम्, न क्षिप्रवचन इत्येवोच्येत, भूतवच्चेत्यस्यातिदेशस्य भविष्यत्कालविषयत्वात् तस्मिन् प्रतिषिद्ओधे `लट् शेषे च'(3.3.13) इत्येनेनैव सिद्धः? इत्याह--`नेति वक्तव्ये'इत्यादि। नेति वक्तव्ये यल्लृड्ग्रहणं क्रियते तस्यैतत् प्रयोजनम्-- लुटोऽपि विषये भविष्यदनद्यतने काले `लृड् यथा स्यात्, अन्यथा, हि लृडपवादो लुडेव स्यात्।।

134. आशंसावचने लिङ्। (3.3.134)
`आशंसे युक्तोऽधीयीय' इति।इङः लिङः सीयुट, उत्तमपुरुषैकवचनम्, इट्, `इटोऽत्'(3.4.106) इत्यद्भावः `सार्वधातुकमपित्'(1.2.4) इति ङित्त्वाद्गुणाभावः, `लिङ सलोपोऽनन्तस्य'(7.2.79) इति सकारलोपः, धातोरियङ्, उपसर्गेण सह `अकः सर्वणे दीर्घः' (6.1.101)। `आशंसे क्षिप्रमधीयीय'इति । अत्र यद्यपि क्षिप्रवचनमुपपदमाशंसावचनमपि, तथापि परत्वाल्लिङेव भवति, न लृट। तस्य तु यत्राशंसावचनमुपपदं नास्ति सोऽवकाशः-- `क्षिप्रमध्येषामहे'इति।।

135.नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः। (3.3.135)
`कालानां सामीप्यम्'इत्येनेन कालसम्ब्धि सामीप्यमिहाश्रीयत इति दर्शयति। कुतः पुनः सामान्योक्तेन कालसम्बन्धिन एव सामीप्यस्य ग्रहणं लभ्यते ? वर्त्तमानसामीप्य इत्यत आरभ्य प्रायिकत्वादस्य प्रकरणस्य। एतदपि कुतः ? वर्त्तमानादिशब्दानां कालशब्दत्वात्। अपि च लङलुटोः प्रतिषेधः, तौ च कालविहितौ। अतो यत्र हि तौ, तत्र तत्सम्बन्धेनैव कालसामीप्यमिहाश्रीयत इति विज्ञायते। तत्पुनः कीदृशमित्याह-- `तुल्यजातीयेन'इत्यादि। तुल्यजातीयग्रहणं भिन्नजातीयनिवृत्त्यर्थम्। कालमात्रेण व्यवधानेन गृह्यमाणे येयं पौर्णमास्यतिक्रान्ता तस्यामुपाध्यायोऽग्नीनाधितेत्येवमादावुदाहरणे सामीप्यं न स्यात्; अमावास्यया अन्याभिश्च तिथिभ्यर्व्यवधानात्। तस्मात् समानजातीयेनाव्यवधानमश्रीयते। `अदात्' इति। `गातिस्था'(2.4.77) इत्यादिना सिचो लुक्। `अध्यापिपत्' इति। `हेतुमति च'(3.1.26) इति णिच्। `क्रीङजीनां णौ' (6.1.48) इत्यात्त्वम्, `अर्त्तिह्री'(7.3.36) इत्यादिना पुक्, लुङ, च्लेः `णि श्री'(3.1.48) इत्यादिना चङ, `अजादेर्द्वितीयस्य' (6.1.2) इति पीत्येतस्य द्विर्वचनम्, `आडजादीनाम्' (6.4.72) इत्याट्, `आटश्च' (6.1.90) इति वृद्धिः, णिचो लोपः।
`येयं पौर्णमास्यतिक्रान्ता' इति। पौर्णमास्यन्तरेणाव्यवहिता या पौर्णमासी, तामधिकृत्येदमाह। सा हि यद्यप्यमावास्यया अन्याभिश्च तिथिभिर्व्यवहिता, तथापि तुल्यजातीयेन पौर्णमास्याख्येन कालेनाव्यवहितत्वात् सामीप्यं नातिवर्त्तते। `अग्नीनाधित' इति। दधातेराङपूर्वस्य `स्थाघ्वोरिच्च'(1.2.17)इतीत्त्वम्, सिचश्च कित्वम्, `ह्रस्वादङ्गात्' (8.2.27) इति सिचो लोपः। `अदित'इति। ददाते रूपम्। पूर्ववत्। `यक्ष्यते'इति।यजेर्लृट्, स्यः, तस्मिन् परस्तथा षष्वे कृते `षढोः कः सि'(8.2.41) इति कत्वम्। `आधित' इत्यादौ सर्वत्र `स्वरितञितः'(1.3.72) इत्यादिनाऽऽत्मनेपदम्। किमर्थं प्रतिषेधद्व्यमुच्यते, `नाद्यतनवत् क्रियाप्रबन्धसामीप्ययोः'इत्येवोच्येत ? क्रियाप्रबन्धसामीप्ययोर्ह्यद्यतनप्रत्ययौ लुङलृटाविष्येते, नानद्यतनप्रत्ययौ लङलृटौ। तौ च लङलुटावेवमुच्यमाने सिध्यत एवेत्यत आह-- `द्वौ प्रतिषेधौ' इत्यादि। एवं मन्यते-- यदि `नाद्यनवत् क्रियाप्रबन्धसामीप्ययोः'इत्येवोच्येत तदैतदेवं सूत्रं विधायकं स्यात्, ततश्च सङ्करः प्रसज्येत-- लुङोऽपि विषये लृट्, लृटश्च विषये लुङ। न ह्यत्रायं विशेष उपादीयते। भूते लुङ भविष्यति लृडिति

प्रतिषेधविषय उच्यमाने नायं दोषः, ततो नानेन किञ्चिद्विधीयते, केवलमनद्यतनप्रत्ययानां प्रतिषेधः क्रियते, तेषु प्रतिषिद्धेषु स्वैरेव वाक्यैर्विधायकैर्लुङादय उत्सर्गाः स्वे स्वेकालेऽपवादविनिर्मुक्ते भवन्ति। अतो यथाप्राप्ताभ्यनुज्ञापनाय प्रतिषेधद्वयमुच्यते।।

136. भविष्यति मर्यादावचनेऽवरस्मिन्। (3.3.136)
`मर्यादावचने सति' इति। वचनग्रहणमभिविधावपि यथा स्यात्। मर्यादाविशेष एवाभिविधिश्च। सैव मर्यादा यदा कार्येणाभिसम्बद्ध्यते तदाऽभिविधिरित्युच्यते, यदा तु न सम्बद्ध्यते तदा मर्यादेति। तत्रेह वचनग्रहणाद्विशेषो नाश्रीयते, तेन मर्यादाया उक्तिमात्रे भवति। विनापि वचनग्रहणेनाभिविधौ प्रतिषेधो न भवेत्; यस्माद्यत्राभिविधौ कार्यमिच्छति तत्राभिविधिग्रहणं वा करोति, यथा-- `आङ् मर्यादाभिविध्योः' (2.1.13) इतिि; वचनग्रहणं वा, यथा-- `आङ् मर्यादावचने' (1.4.89) इति। तदभिविधावपि यथा स्यादित्येवमर्थं वचनग्रहणं क्रियते। `अवरस्मिन्' इति। अर्वागित्यर्थः। `गन्तव्यः'इति। भविष्यत्कातामध्वनो दर्शयति। `तस्य यदवरम्' इति। अनेनाध्वनो विभागं `द्विः' इति। एतेनापि क्रियाप्रतिबन्धाभावम्। `भोक्ष्यमहे' इति। `भुजोऽनवने' (1.3.66) इत्यात्मनेपदम्, `चोः कुः' (8.2.30) इति गकारः, `खरि च' (8.4.55) इति गकारस्य ककारः।
`अध्यैमहि' इति। महिङ, `आडजादीनाम्' (6.4.72) इत्याट्, `आटश्च' (6.1.90) इति वृद्धिः, उपसर्गस्य (6.1.77) यणादेशः। `अपिबाम' इति। पाघ्रादिसूत्रेण (7.3.78) पिबादेशः, `नित्यं ङितः' (3.4.99) इति सकारलोपः। `भोक्तास्महे' इति। लुट्। `तत्रच विशेषं वक्ष्यति' इति। अनहोरात्राणामित्यनेन (3.3.137)।।

137. कालविभागे चानहोरात्राणाम्। (3.3.137)
`कालमर्यादाविभागे सति' इति मर्यादाविभागशब्दयोः सयाहारे द्वन्द्वः। तेन कालशब्दस्य षष्ठीसमासः। `तेषाञ्च' इति। तैस्तेषाञ्चेति युक्तं यत् तेषां विभागे प्रतिषेधो भवति; तत्सम्बन्धित्वाद्विभागस्य। यदा तैरन्यस्य विभागस्तदा न युक्तम्, न हि तदा तत्सम्बन्धी विभागः। किं तर्हि ? विभज्यमानसम्बन्धी। तथाप्यहोरात्रकृतत्वाद्विभागस्य सम्बन्धित्वमस्त्येव; निमित्तस्य नैमित्तिकसम्बन्धादित्यदोषः। यदि वचनमहोरात्रप्रतिषेधार्थम्, एवं च सामर्थ्यात् कालविभागस्यैव प्रतिषेधो विज्ञास्यते, न देशविभागस्य, न हि देशविभागस्याहौरात्रैः सह सम्बन्धोस्तीत्यत आह-- `योगाविभाग उत्तरार्थः'इति। उत्तरसूत्रे कालविभाग एव यथा स्यादित्येवमर्थम्, देशविभागे मा भूदिति। `अभुञ्ज्महि' इति। `श्नसोरल्लोपः' (6.4.111) इत्यकारलोपः।
`त्रिविधिमुदाहरणम्' इति। तत्र प्रथमे शब्दान्तरवाच्यस्य कालस्याहोरात्रैर्विभागः, द्वितीयेऽहोरात्रवाच्यस्य शब्दान्तरवाच्ययेन कालेन विभागः, तृतीयेऽहोरात्रवाच्यस्य कालस्योरात्रवाच्येन कालेन। `सर्वथा' इति। सर्वेण प्रकारेण। यद्यहोरात्रैरन्यस्य विभागोऽथधाप्यन्येन तेषां यद्यहोरात्रैरेव तेषामेवमपि प्रतिषेध इति सर्वथाशब्दस्यार्थः। `अहोरात्रसंस्पर्शः' इति। अहोत्राणां विभागेन सम्बन्ध = अहोरात्रसंस्पर्श इति।

138. परस्मिन्विभाषा। (138)
`सर्वत्रानद्यतनवत्प्रत्यया उदाहर्त्तव्याः' इति। भूतानद्यतने-- तत्र युक्ता अध्यैमहि, तत्रोदनमभुञ्ज्महीति सर्वत्र लुङदाहर्त्तव्यः। भविष्यदनद्यतने तु-तत्र युक्ता अध्येतास्महे, तत्रौदनं भोक्तास्मह इति सर्वत्र लुडुदाहर्त्तव्यः।।

139. लिङनिमित्ते लृङ् क्रियातिपत्तौ। (3.3.139)
`इत्येवमादिकम्' इति। आदिशब्देन `कथमि लिङ च' (3.3.143) इत्येवमादयो गृह्यन्ते। `कुतश्चिद्वैगूण्यात्' इति। विधुरप्रत्ययोपनिपातात्, कारणान्तरवैकल्याद्वा। `आयास्यत्' इति। `स्यतासी लृलुटोः' (3.1.33) इति स्यप्रत्ययः। `इतश्च' (3.4.100) इतीकारलोपः। `आह्वास्यत्' इति। `ह्वेञ् {स्पर्धायां शब्दे च--धा.पा.} स्पर्धायाम्' (धा.पा.1008)। `{वास्तीदमुदाहरणं काशिकायाम्} पर्यासिष्यत' इति। `आस उपवेशने' (धा.पा.1021), अनुदात्तेत्। {तत्र हेतुभूतम्-- काशिका} तद्धेतुभूतम्' इति। शकटपर्याभवनस्य हेतुभूतम्। एतेन लिङनिमित्तं हेतुहेतुमद्भावं दर्शयति। `लिङ्गिलिङ्गेबुध्वा' इति। असकृत् प्राक् कमलकाह्वाने सति शकटस्यापर्याभवनं दृष्ट्वा भाविनोऽपि कमलह्वानस्य शकटस्यापर्यायभवनस्य हेतुभूतत्वं हेतुभूतत्वं लिङ्गेन बुध्वा। लिङ्गं पुनः कमलकाह्वानसामान्यं धर्मम्। `तदतिपर्त्तिं च' इति। कमलकाह्वानस्य शकटपर्याभवनस्य चातिपत्तिम्। तत्र कमलकाह्वानस्य चातिपत्तिं कमलकस्य देशान्तरगमनादिना लिङ्गेनावगम्यते, शकटपर्याभवनस्यातिपत्तिमत्र शकटस्य गुरुभारारोपणादिना। `इतो वाक्यात्' इति। यदि कमलकमाह्वास्यदित्यादेवर्वाक्यात्।
अथ किमर्थं क्रियाग्रहणम्, न त्वेतद्वक्तव्यम्-- लिङ्निमित्ते लृङतिपत्ताविति, धात्वधिकाराद्विनापि क्रियाग्रहणेन धात्वर्थस्यातिपत्ताविति विशेषोऽर्थो लभ्यते, ततोऽनर्थकं क्रियाग्रहणमिति मन्यते;नैतत्; लिङनिमित्त इति श्रूयते, प्रकृतस्य सम्बन्धाच्छरुक्तस्य सम्बन्धो बलवानिति लिङनिमित्तस्यैवातिपत्तिर्विज्ञायते। ततश्च `उताप्योः समर्थयोः' (3.3.152) इति सामर्थ्यातिपत्तावुताप्योश्चातिपत्तौ लिङ प्रसज्येत। तस्मात् क्रियाग्रहणं कर्त्तव्यम्।।

140. भूते च । (3.3.140)
`उताप्यरित्यारभ्य'इत्यादि। `उताप्योः समर्थययोः' (3.3.152) इत्येतत्प्रभृतिषु लिङ्निमित्तेषु ह्येतल्लृङविधानम्। कुत एतदित्याह-- `प्राक्' इत्यादि।

यस्मात् प्राक् `वोताप्योः' (3.3.141) इति वक्ष्यते, ततश्च पारिशेष्याद्भूते लिङो विधानं `वोताप्योः' (3.3.141) इत्यादिष्वेवावतिष्ठते। `न तु भुक्तवान्' इत्यादि। क्रियातिपर्त्तिं दर्शयति।।

141. वोताप्योः। (3.3.141)
`वा आ उताप्योः' इति। एतेनाङ प्रश्लेषं दर्शयति। यद्योङोऽत्र प्रश्लेषःष वोताप्योरिति न प्राप्नोति, परत्वाद्गुणे कृते पूर्वेण सह वृद्ध्या भवितव्यम् ? सौत्रत्वान्निर्देशस्येत्यदोषः। निपातनत्वात् पूर्वेण सहैकादेशं कृत्वा परेण सहाद्गुणः (6.1.87) करिष्यते। ननु चाङो योगे `पञ्चम्यापाङ्परिभिः' (2.3.10) इति पञ्चम्या न च पदादाङो योगे पञ्चमी भवति; अप्रातिपदिकत्वात्। `मर्यादायाम्' इत्यादि। यद्यभिविधौ स्यात् `उताप्योः समर्थयोः' (3.3.152) इति लिङ् विकल्पेन प्रसज्येत, नित्यञ्चेष्यते। तस्मान्मर्यादायामयमाङ्, नाभिविधौ। `यथाप्राप्तञ्च' इति। लिङादिः; वाग्रहणात्।।
142. गर्हायां लिडपिजात्वोः। (3.3.142)
`कालसामान्ये न प्राप्नोति' इति। एतेन भविष्यतीत्यादेः कालविशेषवाचितोऽनुवृत्तिं सूचयन्नयं कालसामान्ये विधिरिति दर्शयति-- `कालविशेषविहितान्' इति। भूते कालविशेषे लङलिटौ विहितौ, भविष्यति लुङलृटौ च। तान् सर्वान् कालसामान्ये विधीयमानो लट् परत्वाद्बाधते। `याजयति' इति। यजेर्हेतुमण्ण्यन्ताल्लट्। `लिङ्निमित्ताभावात्' इति। हेतुहेतुमदादेरिलङ्निमित्तभावादिह यद्यपि क्रियातिपत्तिर्विवक्ष्यते, तथापि लृङ न भवति।।

143. विभाषा कथमि लिङ् च। (3.3.143)
`विभाषाग्रहणम्' इत्यादि। यस्मिन् काले लृङादयो विहितास्तेषां बाधनं मा भूदित्येवमर्थं विभाषाग्रहणम्। यद्येवम्, अनर्थकश्चकारः, विभाषाग्रहणादेव हि लटोऽप्यबाधित्वात् सिध्यत्येव ? सत्यं सिध्यति वर्त्तमाने, कालान्तरे तु न सिध्यति। न हि तत्र कथमित्युपपदे लटः प्राप्तिरिति तत् कथं विभाषाग्रहणेन सिध्यति ! तस्माल्लडर्थश्चकारः कर्त्तव्यः।`याजयेत्' इति। लिङ। `याजयिष्यति' इति। लृट्। `अयीयजत्' इति। लुङ, च्लेश्चङ, णौ चङि ह्रस्वः, णिलोपः, `चङि' (6.1.11) इति द्विर्वचनम्, `सन्यतः'(7.4.79) इतीत्त्वम्। `अयाजयत्' इति। याजयाञ्चकार' इति। लिट्। `कास्प्रत्ययात्' (3.1.35) इत्याम्, `आमः' (2.4.81) इति लेर्लुक्, तस्याव्ययत्वात् सुबलुक्, `कृञ्च' (3.1.40) इत्यादिना लिट आम्परस्य कृञोऽनुप्रयोगःष णल्, द्विर्वचनम्, अभ्यासकार्यम्, `अयामन्त' (6.4.55) इत्यादिनायादेशः। अत्र लिङ्निमित्तमस्तीति कथमित्येतत् गर्हा च ? तदेतद्गर्हायां लिङो विधानाद्भूतविवक्षायां क्रियातिपत्तौ लृङिति भूते चेति वर्त्तमाने `वोताप्योः' (3.3.141) इति वचनाद्भविष्यद्विवक्षायां सर्वत्र नित्यनैव लृङा भवितव्यमिति; भवितव्यमिति; भविष्यतीति वर्त्तमाने `लिङ्निमित्ते लृङ् क्रियातिपत्तौ (3.3.139) इति वचनात्।।

144. किंवृत्ते लिङ्लृटौ। (3.3.144)
`किंवृत्ते' इति। वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयतते। `डतरतमौ च' इति किंवृत्ते च लृडित्येवं कस्मान्नोक्तम्, प्रकृतो हि लिङ्, ततश्चकारेण तस्यैव समुच्ययो विज्ञास्यते, किं लिङ्ग्रहणेनेत्याह-- `लिङ्ग्रहणम्' इत्यादि। असति हि लिङ्ग्रहणे यथा प्रकृत्वाच्चकारेण लिङ समुच्चीयते, तथा लडपि समुच्चीयेत, सोऽपि हि प्रकृत एव। तस्माल्लटो निवृत्त्यर्थं लिङग्रहणं कृतम्।।

145. अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि। (3.3.145)
अत्र द्वावर्थौ, प्रत्ययावपि द्वावेव, ततश्च यथासंख्येन भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तन्निराकर्त्तुमाह-- `बह्वचः'इत्यादि। अमर्षशब्दो ह्यनवक्लप्तिशब्दापेक्षयाल्पाच्तरः, तत्र `अल्पाच्तरम्' (2.2.34) इति तस्य पूर्वनिपाते कर्त्तव्ये योऽयमिह वह्वचोऽनवुक्लृप्तिशब्दस्य पूर्वनिपातः कृतः स लक्षणव्यभिचारार्थतां दर्शयति। यथेह पूर्वनिपातलक्षणं व्यभिचारात् स्वविषये न प्रवर्त्तते, तथा यथासंख्यलक्षममपीति, तेन यथासंख्यं न भवति। अपिग्रहणं किंवृत्तेऽपि यथा स्यात्,अन्यथा ह्यकिंवृत्तग्रहणे किंवृत्ते न स्यात्। यदि यथा `उपकादिभ्योऽन्यतरस्याम्' (2.4.69) इत्यत्राद्वन्द्वग्रहणं द्वन्द्वाधिकारनिवृत्त्यर्थम्, तथेहाप्यकिंवृत्तग्रहणं किंवृत्ताधिकारनिवृत्त्यर्थं स्यात्, तस्मिन्निवृत्ते किंवृत्तेऽकिंवृत्ते प्रत्ययद्वयं भविष्यतीति व्याख्यायते, तदा शक्यतेऽपिग्रहणमकर्त्तुम्। तर्हि तत् क्रियते विस्पष्टार्थम्।।

146. किंकिलास्त्यर्थेषु लृट्। (3.3.146)
`किंकिलशब्दः समुदायइति। एतेन किंकिलशब्दयोः प्रत्येकमृपपदत्वं निरस्यति, कस्मात् पुनस्तयोश्च प्रत्येकमुपपदत्वं न भवति ? केवलस्य किंशब्दस्यानवक्लप्त्यमर्षयोर्वृत्यसम्भवात्, समुदायस्य च सम्भवात्। `लिङ्गोऽपवादः' इति। पूर्वेण प्राप्तस्य।
`लिङनिमित्तमिह नास्ति' इति। लृट एव विधानात्।।।

147. जातुयदोर्लिङ्। (3.3.147)
`लृटोऽपवादः' इति। अनवक्लृप्त्यादिसूत्रेण (3.3.145) प्राप्तस्य।

`यदायद्योरुपसंख्यानम्' इति। लिङेव यथा स्यात्, लृङ मा भूत्। उपसंख्यानशब्दस्य प्रतिपादनार्थः। तत्रेदं प्रतिपादनम्--अनवक्लप्त्यादि (3.3.145) सूत्रादिहापिशब्दऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, तेन यदायद्योरपि भविष्यति।।

148. यच्चयत्रयो। (3.3.148)
`लृटोऽपवादः' इति। अनवक्लृप्त्यादिसूत्रेण (3.3.145) प्राप्तस्य। अथ पूर्वसूत्र एव यच्चयत्रयोर्ग्रहणं कस्मान्न कृतम्, किं योगविभागेन ? इत्यत आह-- `योगविभाग उत्तरार्थः' इति। उत्तरत्र यच्चयत्रयोरेवानुवृत्तिर्यथा स्यात्, जातुयदोर्मा भूत्। `यथासंख्यमिह नेष्यते' इति। पूर्वोक्तादेव लक्षणव्यभिचारचिह्नात्। स च बह्वचः पूर्वनिपातः सर्वत्रैव चात्र प्रकरणे लक्षणव्यभिचारचिह्नम्, न तु तत्रैव सूत्रे। अथ वा-- यथासंख्यार्थस्य स्वरितत्वस्याभावादिह न भवति यथासंख्यम्। उक्तं हि प्राक्-- `स्वरितेन चिह्नेन यथासंख्यं भवति' इति।।

149. गर्हायां च। (3.3.149)

150. चित्रीकरणे च। (3.3.150)

151. शेषे लृड्यदौ। (3.3.151)
`यच्चयत्राभ्याम्' इत्यादिना यच्चयत्रापेक्षं शेषं दर्शयति। चित्रीकरणापेक्षया शेषो न शक्यते विज्ञातुम्; चित्रीकरणस्येह स्वर्यमाणत्वात्। `आरोक्ष्यति' इति। `रुह बीजजन्मनि प्रादुर्भावे च' (धा.पा.859)। `हो ढः' (8.2.31), `षढोः कः सि' (8.2.41)। `आश्चर्य यदि भुंजीत' इति। अनवक्लृप्रेरत्राश्चर्य गम्यते। तत्राश्चर्यनिमित्ते लृटि प्रतिषिद्धे `जातुयदोर्लिङविधाने यदायद्योरूपसंख्यानम्' (वा.331) इत्यनवक्लृप्तौ लिङ।।

152. उताप्योः समर्थयोर्लिङ्। (3.3.152)
`समर्थयोः' इति। धातुना सामर्थ्यमिह नाश्रीयते। तयोरुपपदत्वेनैव तस्य लब्धत्वात्। तस्मात् परस्परसामर्थ्य समर्थशाब्दादिह गृह्यते। तदपि व्यपेक्षालक्षणमेकार्थीभावलक्षणमुभयमुताप्योर्न सम्भवति; पर्यायेण तयोरुपपदत्वात्, तस्मात् समानार्थलक्षणमिह सामर्थ्य समर्थशब्देन प्रतिपाद्यत इत्यत आह-- `समानार्थत्वमनयोः'इति। `कुर्यात्' एइति। उप्रत्यये कृते गुणो रपरत्वञ्च, `अत उत् सार्वधातुके' (6.4.110) इत्युत्त्वम्, `ये च' (6.4.109) इत्युकारलोपः।।

153. कामप्रवेदनेऽकच्चिति। (3.3.153)
`कामो मे भुञ्जीत भवान्' इति। स्वाभिप्रायं परस्यानेनाविष्कारोति।।

154. सम्भावनेऽलमिति चेत्सिद्धाप्रयोगे। (3.3.154)
`योग्यताध्यवसानम्' इति। योग्यता = सामर्थ्यम्, तस्याध्यवसानम्। सा येनाध्यवसीयते निश्चीयते तद्योग्यताध्यवसानम् = ज्ञानम्, सम्भावनमुच्यते। तमेवार्थं पर्यायान्तरेण विस्पष्टीकर्त्तुमाह-- `शक्तिश्रद्धानम्' इति। शक्तिः = सामर्थ्यम्, सा श्रद्धीयते येन ज्ञानेन तच्छक्तिश्रद्धानम्। `तत्' इति। सम्भावनम्'। `पर्याप्त्या' इति। सामर्थ्येन।एतेन पर्याप्ताविह वर्त्तमानोऽलंशब्दो गृह्यते, न तु भूषणादाविति दर्शयति। `पर्याप्तम्' इति। शक्तम्, स्वकार्यनिर्वर्त्तनक्षममित्यर्थः। स्वकार्यं पुनस्तस्य विपरीतविषयपरिच्छेदः। `अवितथम्' इति। विद्यमानविषयत्वात्। एतेन पर्याप्त्यर्थं एवास्य स्वीकृतिः। एवं हि तद्विपरीतविषयं भवति यदि विद्यमानविषयत्वादवितथं भवति, नान्यथा । `अलमः'इति। अलंशब्दस्य । कुत एतत् ? इतिकरणेनार्थपदार्थकत्वात् प्रच्याव्य शब्दपदार्थकतयाऽलंशब्दस्य व्यवस्थापनात्। अलमर्थः सम्भावनस्य विशेषमं नोपपद्यते, ततश्च यदुक्तम्-- `तदिदानीमलमथन विशेष्यते' इति तद्विघटते ? नैष दोषः'; आवृत्तिरलंशब्दस्य करिष्यते, तत्रैकस्य सूत्रोपात्तस्यार्थपदार्थकता भविष्यति, आवृत्तस्येतिकरणेनाभिसम्बन्धादर्थपदार्थतायाः प्रच्युतस्य शब्दपदार्थकता चात्र गम्यते। `चार्थः' इति। अर्थात्, प्रकरणाद्वा। `{न चासौ प्रयुज्यते-काशिका} न तु प्रयुज्यते' इति।अवगतार्थत्वात्। `{ तदीदृशसंभावनोपाधिकेऽर्थे -- काशिका} क्रियासम्भावनोपाधिके' इति। क्रियासम्भावनमुपाधिविशेषणं यस्यार्3तस्य स तथोक्तः। `अपि पर्वतं शिरसा भिन्द्यात्' इति। पूर्ववत् `श्नसोरल्लोपः'(6.4.111)। अत्र यत् पर्वतभेदनविषयं सामर्थ्यं पुंसः सम्भाव्यते तत् तस्य विद्य एवेत्यवितथत्वात् पर्याप्तं सम्भावनम्। `प्रायेण स गमिष्यति' इति। अस्त्यत्र सम्भावनं प्रायशब्दात् प्रतीयमानम्, अलमर्थस्तु नास्ति; तेन भविष्यत्कालविवक्षायां लृडेव भवति न लिङ।।

155. विभाषा धातौ सम्भावनवचनेऽयदि। (3.3.155)
`{भविष्यति च काले-- काशिका'} भविष्यति काले' इति। इष्यत इत्यपेक्षते। कथं पुनर्विभाषा भविष्यत्कालश्च लभ्यते, यावता नेह सूत्रे विभाषाग्रहणं विनापि

भविष्यत्कालोऽस्ति ? अत आह-- यस्माद्विभाषाग्रहणमनुवर्त्तते' इति। तेन विभाषा लिङप्रत्ययो लभ्यते। यत् `उताप्योः' (3.3.152) इत्यादेः सूत्राल्लिङिति वर्त्तमाने पुनर्लिङग्रहणं क्रियतेऽतोभविष्यत्कालो लभ्यते। पुनर्लिङग्रहणस्यैतत् प्रयोजनम्-- कालविशेषे भविष्यति यथा स्यादिति। तेन हन्तीति पलायत इत्येवमादौ वर्त्तमानविवक्षायां लडेव भवति। अत्र हननं हेतुः, पलायनं हेतुमत्। `पलायते' इति। `उपसर्गस्यायतौ' (8.2.19) इति लत्वम्।।

157. इच्छार्थेषु लिङलोटौ। (3.3.157)
`भुङ्क्ताम्' इति। टेरेत्वे कृत आम्।
`कामप्रवेदन इति वक्तव्यम्' इति। कामस्येच्छायाः प्रवेदने = प्रकाशने इमौ लिङलोटौ भवत इत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- `कामप्रवेदनेऽकच्चिति' (3.3.153) इत्यतः कामप्रवेदनग्रहणमनुवर्त्तते, तेन कामप्रेवदन एव भवतः। अत्र लिङ्ग्रहणं किमर्थम्, न `इच्छार्थेषु लोट् च' इत्येवोच्यत, चकारेण समुच्चीयमानोऽपि प्रकृतो लिङ भविष्यति ?नैतदस्ति; विभाषया हि भविष्यत्काल इत्युक्तम्,ततो यद्यसावनुवर्त्तते विकल्पः स्यात्। तद्बाधनार्थमेव पुनर्लिङग्रहणं क्रियते।।

158. समानकर्तृकेषु तमुन्। (3.3.158)
पूर्वेण लिङ्लोटोः प्राप्तयोस्तुमुन् विधीयते। `तुमुनप्रकृत्यपेक्षमेव'इति। यस्माद् धातोस्तुमुन् , अतः प्रत्यासत्तेस्तदपेक्षमेव समानकर्तृकत्वं ज्ञायते-- तुमुन्प्रकृतेर्यः कर्त्ता स चेदिच्छार्थानामपि भवतीति। `इच्छति भोक्तुम्' इति। योऽत्रेषेः कर्त्ता स एव भुजेरपीत्यस्तीह समानकर्तृकेषु लिङलोटौ च परत्वात् प्राप्नुतस्तौ मा भूतमित्येवमर्थम्, {अर्थः-मुद्रितः पाठः,} ण्वुल् मा भूदित्येव {अर्थश्च-मुद्रितः पाठः} च।
`देवदत्तं भुञ्जानमिच्छति' इति। अत्र भूजेर्देवदत्तः कर्त्ता, इच्छतेस्ततोऽन्य इति नास्ति समानकर्तृकत्वम्, तेन वर्त्तमानविवक्षायां लडेव भवति।
`अनभिधानात्' इति। न ह्यत्र तुमुनोत्पद्यमानेन विवक्षतोऽर्थः शक्यतेऽभिधातुमिति। अबिधानलक्षणाश्च कृत्तद्धितसमासाः। अथ वा-- `अनभिधानात्' इति। इच्छन् कर्त्तुमित्यभिधानस्याभावादित्यर्थः। लोकप्रसिद्धानां हि शास्त्रेऽन्वाख्यानं क्रियते, न त्विच्छन् कर्त्तुमित्यादयो लोकप्रसिद्धाः।।

159. लिङ् च। (3.3.159)
`भुञ्जीयाधीय' इति। `इटोऽत्' (3.4.106)। किमर्थं पुनरिदमुच्यते, यावता वासरूपविधिनैवात्र लिङ् भविष्यति ? नैतदस्ति;लिङलोटोरपवादत्वाद् बाधकयोः प्राप्तयोस्तद्बाधनार्थस्तुमुन्, विधीयते। तेन बाधितत्वाद्यथा लोङ् न भवति, तथा लिङ्गपि न स्यात्। तसमाल्लिङविधानार्थमिदमुच्यते।
`योगविभाग उत्तरार्थः' इति। उत्तरसूत्रे लिङ एवानुवृत्तिर्यथा स्यात्, तुमुनो मा भूत्।।

160. इच्छार्थेभ्यो विभाषा वर्त्तमाने। (3.3.161)
`प्रेरणम्' इति। नियोगः' `निमन्त्रणं नियोगकरणम्' इति। असत्यामपीच्छायामकरणे सत्यधर्मोत्पत्तेर्नियमेनावश्यम्भावेन यत् करणं तन्निमन्त्रणम्।
`कामचारकरणम्'इति। कामचार- = इच्छाप्रचारः। तेन यत्करणं तदामन्त्रणम्। एतदुक्तं भवति-- यदिच्छयैवकरणंनानिच्छया अकरणेऽपि दोषाभावात्,तदामन्त्रमणम्। इहायं विध्यादिरर्थः प्रकृत्यर्थविशेषणं वा स्यात् ? प्रत्ययार्थो वा ? प्रत्ययार्थविशेषणं वा ? तत्र यद्याद्यः पक्ष आश्रीयेत तदा यत्र प्रकृतिरेव विध्यादीनर्थानाचष्टे तत्र न सिध्येत्-- विदध्यान्निमन्त्रयेतामन्त्रयेताधीच्छेदिति, न ह्यत्र प्रकृत्यर्थादन्ये विशेषणभूता विध्यादयः सन्तीत्येष दोषः प्रतिविधेयः स्यात्। प्रतिविधीयमानेऽपि तस्मिन् प्रतिपत्तिगौरवं स्यात्। अथ द्वितीयः ? भावकर्मकर्तृप्रत्ययार्थानां विध्यादयो वाचकाः स्युरित्येवमनयोर्दोषं दृष्ट्वा तृतीयं पक्षमाश्रित्याह-- `विध्यादयश्च' इत्यादि। प्रत्ययार्थास्त एव भावकर्मकर्त्तारः। तेषु `लः कर्मणि च' (3.4.69) इत्यादिना प्रत्ययस्य विधानात् तेषामयं विध्यादिरर्थो विशेषणमिति मत्वाऽऽह-- `विध्यादिविशिष्टेषु' इत्यादि। एतेनादिशब्देन निमन्त्रणादीनां ग्रहणम्। द्वितीयेन भावकर्मणोः। `आसीत्' इति। अदादित्वाच्छपो (2.4.72) लुक्। `अध्यापयेत्' इति। पूर्ववदात्त्वपुकौ।।

162. लोट् च। (3.3.162)
यदि विध्यादिष्वेव लोङ्भवत्येवं योगविभागः किमर्थं क्रियते ? इत्याह-- `योगविभाग उत्तरार्थः' इति। उत्तरसूत्रे लोट एवानुवृत्तिर्यथा स्यात्, लिङो मा भूदिति। `करोतु' इति। `एरुः' (3.4.86) इत्युक्तम्। `अध्यै' इति। `आडुत्तमस्य पिच्च' (3.4.92) इत्याट्, टेरेत्वे कृते `एत ऐ' (3.4.93), `आटश्च' (6.1.90) इति वृद्धिः, प्रकृतेर्गुणायादेशौ।।

163.प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च। (3.3.163)
`कार्यः' इति। `ऋहलोर्ण्यत्' (3.1.124) इति ण्यत्। `कृत्यः' इति। `विभाषा कृवृषोः' (3.1.120) इति क्यप्।
`किमर्थमिदम्' इत्यादि द्वेष्यम्। `विशेषविहित' इत्यादि परीहारः। कृत्या हि सामान्येन विहिताः। लोट् तु प्रैषादिनार्थविशेषेण। अतस्तेन विशेषविहितेन

कृत्याः प्रैषादिविषये बाध्येरन्निति पुनर्विधीयते। `वासरूप'इत्यादीना परीहारं विघटयति। `एवं तर्हि' इत्यादिना प्रेषादिषु कृत्यविधानस्य ज्ञापकत्वं दर्शयति। ननु चाऽसति प्रयोजने ज्ञापकं भवति, इह चास्ति प्रयोजनम्, किं तत् ? प्रैषादि येन नियमेन कृत्या भवन्ति, नान्यत्रेति ? नैतत्; अनिष्टत्वात्। अन्यत्रापि हि कृत्या दृश्यन्ते-- तृणेन शोष्यम्, बुधेन बोध्यमिति। तच्च नियमे सति न सिध्येत्, न ह्यत्र प्रैषादयो गम्यन्ते। तस्मान्नेह नियमोऽभीष्टः, न चानिर्दिष्टार्था प्रक्लृप्तिः शास्त्रे युक्ता (भो.प.सू.107)। ततो युक्तं ज्ञापकमेव;कृत्यविधानस्यावश्यम्भावात्। अवश्यंग्रहणेन न क्वचिदपि भवतीति दर्शयति। एतच्च स्त्रधिकारात् परेणापि वासरूपविधिः क्वचित् स्वरितत्वप्रतिज्ञानाल्लभ्यते। तेन कालादिषूपपदेषु वासरूपविधिना ल्युडपि भवति-- कालो भोजनस्येति। यदि तु सर्वथा वासरूपविधिर्न स्यात् तदा `कालसमयवेलासु तुमुन्'(3.3.167) इति तुमुन्नेव नित्यं स्यात्। `केचिदाहुः'इति वचनादपरे त्वेतयोर्विशेषं नेच्छन्तीत्युक्तं भवति।।

164. लिङ् चोर्ध्वमौहूर्तिके। (3.3.164)
`यथाप्राप्तञ्च' इति। लोट्, कृत्याश्च।।

165. स्मे लोट्। (3.3.165)
`लिङकृत्यानामपवादः'इति। अनन्तर सूत्र विहितानाम्।।

166. अधीष्टे च। (3.3.166)
`लिङोषऽपवादः'इति। विध्यादिसूत्रेण प्राप्तस्य। `अध्यापय'इति। सेर्हिरादेशः (3.4.87), तस्य `अतो हेः' (6.4.105) इति लुक्। `जुहुधि'इति। `हुझल्भ्यो हेर्धिः' (6.4.101) इति धिरादेशः।।

167. कालसमयवेलासु तुमुन्। (3.3.167)
`प्रैषादिग्रहणमिह सम्बध्यते' इति।न चेदिह प्रैषादयो गम्यन्ते, तेन तत्र न भवतीत्यभिप्रायः। कालो भोजनस्येत्युक्ते तस्याद् भङ्क्तां भवानिति प्रैषो गम्यते। ततश्च प्रैषादिग्रहणेऽनुवर्त्तमानेऽपीह प्राप्नोतीत्यभिप्रायेणाह--`इह कस्मान्न भवति' इत्यादि। स्यादेत्-- प्रैषादि कृत्यविधानाज्ज्ञापकात् स्त्र्यधिकारात् परेणापि वासरूपविधिर्नास्तीति, किं तर्हि ? अनित्यः।ततः क्वचिद्भवति। एतच्च `एवं तर्हेतज्ज्ञापयति' (3.3.163 का.वृ) इत्यादिना प्रागेवाभिहितम्।।

168. लिङ् यदि। (3.3.168)
` तुमुनोऽपवादः'इति। पूर्वसूत्रेण प्राप्तस्य।।

169. अर्हे कृत्यतृचश्च। (3.3.169)
`वोढव्यः'इति। `हो ढः' (8.2.31), `झषस्तथोर्धोऽधः' (8.2.40), `ष्टुना ष्टुः'(8.4.41), `ढो धे लोपः' (8.3.13) , `सहिवहोरोदवर्णस्य' (6.3.112) इत्येते विधयः कर्त्तव्याः। `अथ'इत्यादि द्वेष्यम्। `योऽयम्' इत्यादि परीहारः। वासरूपविधिः स्त्र्धिकारात् परेण नावश्यम्भवतीत्युक्तमेव।।

170. आवश्यकाधमर्ण्ययोर्णिनिः। (3.3.170)
`आवश्यकम्'इति। मनोज्ञादित्वाद्वुञ्। `उपाधिरयम्'इति। प्रत्ययार्थविशेषणमित्यर्थः। `नोपपपदम्' इति। उपपदत्वे तु कारी, हारीति रूपं नस्यादित्यभिप्रायः।`ओरावश्यके'(3.2.125) इत्यत्र प्रतिपादितमेवावश्यमुपाधिः, नोपपदमिति;तदिहापि तद्वदेवोपाधिकत्वमावश्यकस्य वदितव्यम्। तेन सह निर्द्देशादाधमर्ण्यमप्युपाधिरेव, नोपपदमिति। यद्यावश्यकमपाधिर्नोपपदम्, `उपपदमतिङ्'(2.2.19) इति समासो न स्यात्, न चान्यल्लक्षणमस्ति येनेह समासः स्यादिति यो मन्येत्, तं प्रत्याह-- `मयूरव्यंसकादित्वात् समासः' इति `सहस्रं दायी'इति।`अकेनोर्भविष्यदाधमर्ण्ययोः' (2.3.70) इति षष्ठ्यां प्रतिषिद्धायां द्वितीयैव भवति।।

171. कृत्याश्च। (3.3.171)
`किमर्थम्'इत्यादि चोद्यम्। `विशेषविहितेन'इति परीहारः।`कर्त्तरि'इत्यादिना परीहारविघटनञ्च। `केचित्'इत्यादिना परकीयमतेन परोहारसमर्थनम्। `भव्यगेयम्'इति। `समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्ते' (शा.प.85) इति भव्यगेयादयः शब्दा अवयवभूतेषु कृत्येष्विह वर्त्तन्ते। `कर्त्तृवाचिनः'इति। भव्यगेयादिसूत्रेणैषां पक्षे कर्त्तरि निपातनात्। योगविभाग उत्तरार्थः।।

172. शकि लिङ् च। (3.3.172)

`प्रकृत्यर्थविशेषणञ्चैतत्' । पूर्वेणाभिप्रायेणोपपदनिरासार्थमिदमुच्यते। `जीव्यात्'इति।`स्कोः'(8.2.29) इति सलोपः। अथ किमर्थं लिङग्रहणम्, `लोट् च'(3.3.162) इत्येव सिद्धम्, चकारेण ह्यनुकृष्यमाणो लिङपि भविष्यति ? नैवं शक्यम्; यथैव हि चकारेण लिङनुकृयते तथा कृत्या अप्यनुकृष्येरन्। ननु निवर्तिष्यन्ते कृत्याः, तेषु निवृत्तेषु लिङ एवानुकर्षणार्थश्चकारो भविष्यति ? सत्यमेतत्; एवं यदि तेषां निवृत्तिर्विज्ञास्यते लिङोऽपि निवृत्तिः स्यात्। व्याख्यानादनुवर्तिष्यत इति चेदेवमपि प्रतिपत्तिगौरवं स्यात्। तस्मात् प्रतिपत्तिगौरवपरीहारार्थं यथान्यासमेव न्याय्यम्। अत्र विध्यादिसूत्रे (3.3.161) एवाशीर्ग्रहणं कस्मान्न कृतम्, एवं हि लिङलोटोर्ग्रहणं न कृतं भवति ? नै शक्यम्; विध्यादिसूत्रे पाठे सति `स्मे लोट्' (3.3.165) इत्येवमादिभिः परत्वाद्बाधा स्यात्। इहतु क्रियमाणे परत्वादेष योगस्तेषां बाधको भविष्यतीति न भवत्येष दोषप्रसङ्ग। अवश्यञ्चोत्तरार्थमाशीर्ग्रहणं कर्त्तव्यम्-- `क्तिच्क्तौ च संज्ञायाम्' (3.3.174) इत्याशिषि यथा स्याताम्। ।।

174. क्तिच्क्तौ च संज्ञायाम्। (3.3.174)
`समुदायेन'इति। प्रकृतिप्रत्ययसमुदायेन। एतेन समुदायोपाधितां संज्ञाया दर्शयति। `तन्तिः'इति। `तनु विस्तारे'(धा.पा.1463), अत्र `अनुनासिकस्य क्विझलोः क्ङिति'(6.4.15) इति दीर्घः प्राप्नोति, `अनुदात्तोपदेश'(6.4.37) इत्यादिनानुसिकलोपश्च; तदुभयं `न क्तिचि दीर्घश्च' (6.4.39) इति निषिध्यते। `सातिः'इति। `षणु दाने'(धा.पा.1464), `जनसनखनां सञ्झलोः'(6.4.42) इत्यात्त्वम्। `देवदत्तः'इति। डुदाञो निष्ठायाम् `दो दद् घोः'(7.4.46) इति ददादेशः, `खरि च'(8.4.55) इति चर्त्वम्।।

175. माङि लुङ्। (3.3.175)
`मा कर्षित्' इति। `न माङ्योगे' (6.4.74) इत्यडागमाभावः।।

176. स्मोत्तरे लङ् च। (3.3.176)
स्मशब्द उत्तरमधिकं यस्य माङः स तथोक्तः।।
इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
तृतीयस्याध्यायस्य
तृतीयः पादः

3.4

अथ तृतीयाध्यायस्य
चतुर्थः पादः
1. धातुसम्बन्धे प्रत्ययाः। (3.4.1)
`धात्वर्थे धातुशब्दः' इति। अभिधेयेऽभिधानोपचारं कृत्वा धात्वर्थोऽत्र धातुशब्देन निर्दिष्ट इति दर्शयति। भ्वादिष्वेवायं धातुशब्दो वर्त्तते, स्वार्थे गुणीभूतस्य धातुशब्दस्य शब्दान्तरेण सम्बन्धो न स्यात्; तस्माद्धात्वर्थ एवायं धातुशब्दो वर्त्तते, न भ्वादिषु। ततश्च धातुसम्बन्ध इत्यस्य धात्वर्थसम्बन्ध इत्येषोऽर्थो विज्ञायत इत्याह-- `धात्वर्थानां सम्बन्धो धातुसम्बन्धः' इति। कथं पुनः सम्बन्ध इत्याह-- `विशेषणविशेष्यभावः' इति। `अयथाकालोक्ता अपि' इत्यादि। यो यस्यात्मीयः कालो यथाकालम्। `यथाऽसादृश्ये'(2.1.7) इति वीप्सायामव्ययीभावः, यथाकाले उक्ता यथाकालोक्ताः, `सप्तमी'(2.1.40) इति योगविभागात् समासः,न यथाकालोक्ताः = अयथाकालोक्ताः। एतदुक्तं भवति-- स्वैः स्वैर्विधायकैर्वाक्यैर्यत्र यस्मिन् यस्मिन् काले ये ये विहितास्ततोऽन्यत्रकालेऽपि प्रयुक्ताः प्रत्ययाः साधवो भवन्तीति। `अग्निष्टोमयाजी' इत्यादीन्युदाहरणानि दर्शयति। सर्वत्र तिङन्तदाच्योऽर्थो विशेष्यः, सुबन्तवाच्यस्तु विशेषणम्। `अग्निष्टोमयाजीति भूतकालः' इति। भूतः कालोऽस्येति बहुव्रीहिः। भूतकालत्वंतु भूताधिकारे `करणे यजः'(3.2.85) इति णिनेर्विधानात्। `जनितेति भविष्यत्कालः' इति। भविष्यन् कालोऽस्येति बहुव्रीहिरेव। भविष्यत्कालत्वं तु भविष्यदनद्यतने लृटो विधानात्। `तत्र'इति। निर्धारणे सप्तमी। तयोर्भूतकालभविष्यत्कालयोर्मध्ये यो भूतकालः स भविष्यत्कालेन सम्बध्यमानः साधुर्भवति। अग्निष्टोमयाजीति भूतकालो जनितेति भविष्यत्कालेनापि सम्बध्यमानो भविष्यत्काल एव सम्पद्यते। द्वितीयेऽप्युदाहरणे `कृतः' इति भूतकालः; भूते निष्ठाविधानात्। `भविता' इति भविष्यत्कालः पूर्ववदेव। तत्र भूतकाल इतरेणापि सम्बध्यमानः साधुर्भवति। तृतीयेऽपि `भावी'इति भविष्यत्कालः; `भविष्यति गम्यादयः'(3.3.3) इति वचनात्। `आसीत्' इति भूतकालः; भूतानद्यतने लङो विधानात्। तत्र भविष्यत्कालो भूतकालेनापि सम्बध्यमानः साधुर्भवति।

इहाग्निष्टोमयाज्यस्य पुत्रो जनितेति भूतकालो भविष्यत्कालेनापि सम्बध्यमानो भविष्यत्कालः सम्पद्यते। तथा ह्ययमत्रार्थः प्रतीयते-- सोऽस्यपुत्रो जनिता योऽग्निष्टोमेन यष्टेति। न च भविष्यत्कालो भूतकालेनाभिसम्बध्यमानो भूतकालतां प्रतिपद्यते, न ह्यत्रायमर्थः प्रतीयते-- सोऽस्य पुत्रो जातो योऽग्निष्टोमेनेष्टवानिति। इतरयोरप्युदाहरणयोर्विशेषणं विशेष्यकालतामापद्यते, यतस्तत्रायमर्थोऽवगम्यते-- स श्वो भविता कटो यः करिष्यते, तत् कृत्यमासीद् यदभूतमिति। तदेतत्कथं भवति ? विपर्ययः कस्मान्न भवति ? इत्याह-- `विशेषणम्'इत्यादि। विशेषणं हि परार्थत्वाद्गुणोऽप्रधानमित्यर्थः। तेन च प्रधानकालस्य विशेष्यस्योपकारः कर्त्तव्यः। न च तत् प्रधानमपरित्यज्य स्वकालं प्रधानकालमप्रतिपद्यमानं प्रधानोपकारक्रियां कर्त्तुं समर्थ भवतीति प्रधानस्य यः कालस्तमुरुध्यते। विशेष्यं तूपकार्यत्वात्प्रधानम्।न च प्रधानस्य गुणकालापत्तिर्युक्ता, अन्यथा यदिगुणकालं प्रधानकालः प्रतिपद्येत तदा तस्य प्रधानत्वं हीयेत। तेन न भवति विपर्ययः।
अथ प्रत्ययग्रहणं किमर्थम्, यावता प्रत्यय इत्यनुवर्त्तत इत्यत आह-- `प्रत्ययाधिकारे'इत्यादि। पूर्वकं प्रत्ययग्रहणं धातुसम्बद्धम्, अतस्तदिहाश्रीयमाणं धात्वधिकारविहितानां प्रत्ययानां साधुत्वे सम्पद्यते। अत्र पुनः प्रत्ययग्रहणे प्रत्ययमात्रं गृह्यते, तदर्थं पुनः प्रत्ययग्रहणम्। `कालभेदे' इति। कालविशेषे,अस्मात्कालादन्यस्मिन् काल इत्यर्थः। `गोमानासीत्'इति । गोमानिति वर्त्तमानकालः, `तदस्य'(5.2.94) इत्यादिना वर्त्तमानकालमस्तीत्युपादाय मतुपो विधानात्। स भूतभविष्यत्कालाभ्यां सम्बध्यमानः साधुर्भवति।।

2. क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः। (3.4.2)
`प्रकृत्यर्थविशेषं चैतत्'इति। एतेनोपपपदत्वं निरस्यति। उपपदत्वे हि केवलाद्धातोर्न स्यादित्यादित्यभिप्रायः। अत्र तिङादेशौ वा हिस्वौ स्याताम्, लोडादेशौ वेति द्वौ पक्षौ। ननु च प्रथमपक्षाशङ्कायाः प्रसङ्ग एव नास्ति; लोट इति वचनात्,तत् कथमसावाशङ्कितः ? लोट्स्थानिकत्वादादेशोऽपि लोड्व्यपदेशमासादयीति युक्तमाशङ्कितुम्। तत्र हि यदि पूर्वकः पक्ष आश्रीयते तदा `भुङ्क्ष्व भुङ्क्ष्वेत्येवाहं भुञ्जे'इति `आडुत्तमस्य पिच्च' (3.4.92) इति, पित्त्वान्ङित्त्वं नास्ति, ततश्च `श्नषोरल्लोपः' (6.4.111) इत्याकारलोपो न स्यात्। उभावपि च परस्मैपदानामात्मनेपदानामनियमेन स्याताम्;नियमहेतोरभावात्। सामान्येन तिङां स्थाने विधीयमानयोः कृत एतल्लभ्यते ! यतः परस्मैपदानां ह्यादेशेन भविव्यम्, इतरेषां स्वादेशेनेति। तस्माद्दुष्टोऽयं पक्ष इति मत्वा द्वितीयपक्षमाश्रित्याह-- `तस्य च लोटः' इत्यादि। यस्मिन् पक्षे दोषः प्रसजति तं प्रतिविधास्यति। `तध्वंभाविनस्तु वा भवतः' इति। लोट इत्यपेक्ष्यते। तश्च ध्वञ्च तध्वमौ, तौ भाविनौ यस्य लोटः स तध्वम्भावी। एतेन तादशार्थो लोडेव स्थानी; तादर्थ्यात्, सूत्रे तशब्देन व्यपदिष्टो ध्वमादेशार्थश्च ध्वंशब्देनेति दर्शयति। अथ तध्वमावेवस्थानिनौ कस्मान्न विज्ञायेते ? अशक्यं हि तौ स्थानित्वेन विज्ञातुम्। तयोरपि स्थानित्वेऽलोडादेशयोरपि हिस्वौ स्याताम्। अथ तध्वमौ विशेषयिष्यामः-- लोटो यौ तध्वमाविति, ततोऽयमदोष इति चेत्; एवमपि प्रतिपत्तिगौरवं स्यात्। तध्वम्भाविनौ लोट एव स्थानित्वं युक्तम्, न तध्वमोः।
यदितर्हि लोटो हिस्वावादेशौ, न तदादेशानां तिङामेव, एवञ्च `लः परस्मैपदम्' (1.4.99) इति तयोः परस्मैपदसंज्ञा स्यात्, ततश्च `शेषात्कर्त्तरि परस्मैपदम्'(1.3.78) इत्युभावपि परस्मैपदिभ्य एव स्याताम्; तिङक्ष्वसन्निवेशाच्च तदन्तस्य तिङन्तता न स्यात्, ततश्च `तिङ्ङतिङः' (8.1.28) इति निघातो न स्यादित्यत आह-- `योगविभागश्च' इत्यादि। `लोडित्येव' इति। एतेन द्वितीये योगे लोडित्यस्यानुवृत्तिं दर्शयति। `लोड्धर्माणौ'इत्यादि। लोट इव धर्मस्तिङत्वादित्वार्ययोस्तौ लोड्धर्माणौ। ननु च लोडादेशानां तिङत्वादि धर्मः, न लोटः ? आदेशद्वारेण स्थानिनोऽपि लोटस्तिङत्वादिधर्मो भवतीत्यदोषः। कथं पुनर्योगविभागे सति लोड्धर्माणौ तौ भवतः ? योगविभागे सति द्वितीये योगे लोटशब्दो योऽनुवर्त्तते तेनार्थाद्विभक्तेर्विपरिणामो भवतीति षष्ठ्यन्ततामापन्नेन हिस्वौ विशेष्येते-- लोटो यौ हिस्वाविति। ततश्च लोडादेशयोः सिप्थासोः स्थाने यौ हिस्वौ `सेर्ह्यपिच्च' (3.2.87) इत्यादिना शास्त्रेण विधास्येते, तावेव यथास्वमुपात्तविशेषाविह लोटः स्थाने विधीयेते, नापूर्वाविति। तेन लोड्धर्माणौ तौ इत्येषोऽर्थो लभ्यत एव। `तेन'इत्यादि। अत एव= यथोक्तेन प्रकारेण, लोड्धर्माणौ हिस्वौ लोटः स्थाने भवतः। तेन परस्मैपदत्वनमात्मनेपदत्वञ्च भेदेन विषयविभागेन व्यवतिष्ठते। तत्र हिशब्दे परस्मैपदत्वं व्यतिष्ठते; लोट्सम्बन्धिनो हेः परस्मैपदसंज्ञकत्वात्। स्वशब्दे चात्मनेपदत्वं व्यवतिष्ठते;स्वशब्दस्य लोट्सम्बन्धिन आत्मनेपदसंज्ञकत्वात्। `तिङत्वञ्च द्वयोरपि भवति' इति। लोट्सम्बन्धिनोस्तयोर्द्वयोरपि तिङन्तत्वात्। ननु च सिप्थासोर्लोडादेशयोस्तौ सम्बन्धिनौ, तदादेशत्वात्, न लोटः, तत्कथं लोट्सम्बन्धित्वेन व्यदिश्येते ? आदेशद्वारेण लोट्सम्बन्धित्वं तयोरप्यस्तीत्यदोषः। यदि तर्हि लोड्धर्माणौ भवतः, एवमेकवचनसंज्ञा स्यात्, मध्यमपुरुषसंज्ञा च, तयोरपि लोड्धर्मत्वात्, ततश्च वचनान्तरभाविनः पुरुषान्तरभाविनश्च लोटो न स्याताम् ? नैष दोषः;यदि ह्येकवचनमध्यमपुरुषसंज्ञे अपि स्यातां वचनमिदमनर्थकं स्यात्, विनाप्यनेन वचनेन मध्यमपुरुषैकवचनयोर्हिस्वयोः सिद्धत्वात्।
`लुनीहि लुनीहि'इति। `क्रियासमभिहारे द्वौ भवतः' (वा.886) इति द्विर्वचनम्।`ई हल्यघोः' (6.4.113) इतीत्त्वम्। `लुनन्ति'इति। `श्नाभ्यस्तयोरातः'(6.4.112) इत्याकारलोपः। `अथ वा' इत्यादिना `वा च तध्वमोः' इति वाग्रहमस्य फलं दर्शयति।
`अलावीत्' इति। `सिचि वृद्धिः परस्मैपदेषु'(7.2.1) इति वृद्धि, `आर्धधातुकस्येड्वलादेः' (7.2.35) इतीट्,`अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्, `इट ईटि' (8.2.28) इति सिचो लोपः। `अलाविष्टाम्' इति। `तस्थस्थ' (3.4.101) इत्यादिना तसस्ताम्। `अलाविषुः' इति। सिजभ्यस्तविदिभ्यश्च' (3.4.109) इति झेर्जुसादेशः। `एवं मध्यमोत्ततयो{अपि नास्ति-काशिका,पदमञ्जरी च}रप्युदाहार्यम्' इति। लुनीहि लुनीहीत्येव त्वमलावीर्युवामलाविष्टं यूयमलाविष्ट। अथ वा-- लुनीत लुनीतेत्येव यूयमलाविष्ट। लुनीहि नीहीत्येवाहमलाविषम्, आवामलाविष्वि, वयमलाविष्म।

`एवं मध्यमोत्तमयो{अपि नास्ति-काशिका}रप्युदाहार्यम्' इति। लुनीहि लुनीहीत्येवं त्वं लविष्यसि, युवां लविष्यथः, यूयं लविप्यथ। अथ वा-- लुनीत लुनीतेत्येव यूयं लविष्यथ। लुनीहि लुनीहीत्येवाहं लविष्यामि, आवां लविष्यावः, वयं लविष्यामः।

`अधीयात्' इति। इयङ। `अधीयते' इति। `आत्मनेपदेष्वनतः' (7.1.5) इत्यदादेशः। `एवं {सर्वेषु लकारेषूदाहार्यम्-काशिका, पदमञ्जरी च}सर्वलकारेषूदाहार्यम्' इति। लङ-लुनीहि लुनीहीत्येवायमलुनात्, इमावलुनीताम्, इमेऽलुनन्। लुनीहि लुनीहीत्येव त्वमलुनः, युवामलुनीतम्, यूयमलुनीत। अथ वा-- लुलीत लुनीतेत्येव यूयमलुनीत। लुनीहि लनीहीत्येवाहमलुनाम्, आवामलुनीव, वममलुनीम। अधीष्वाधीष्वेत्येवायमध्यैत, इमावध्यैयाताम्,इमेऽध्यैयत। अधीष्वाधीष्वेसत्येव त्वमध्यैथाः, युवामध्यैयाथाम्, यूयमध्यैध्वम्। अथ वा-- अधीध्वमधीध्वमित्येव यूयमध्यैध्वम्। अधीष्वाधीष्वत्यवाहमध्यैषि, आवामध्यैवहि, वयमध्यैमहि। अन्येषु लकारेष्वतिग्रन्थविस्तरभयान्नोदाह्रियते।अनया दिशा स्वयमेवाभ्युपगम्योदाहार्यम्।

अथ लुनीहि लुनोहीति कथमत्र द्विर्वचनम्, यावता धातुनैव क्रियासमभिहारोऽवगमितः; तद्विशिष्टक्रियावचनाद्धातोर्लोड्विधानात् ? अथ वा-- अवगमिते सति तस्मिन् द्विर्वचनं भवतीति चेदेवं यङन्तस्यापि द्विर्वचनं स्यात् ? इत्यत आह-- `क्रियासमभिहाराभिव्यक्तौ' इत्यादि। यद्यपि क्रियासमभिहारविशिष्टक्रियाभिधायिनो धातोर्लोड् भवति, तथापि या तस्य क्रियासमभिहारभिव्यक्तिः सा धातुना न क्रियते, किं तर्हि ? लोडैव। स चतां कर्त्तुं द्विर्वचनसहित एव समर्थो भवति, न केवलः; तत्र तस्याविधानात्। स हि लोट `लः कर्मणि च भावे चाकर्मकेभ्यः' (3.4.69) इति कर्मादिषु विधीयते, न क्रियासमभिहारे। तस्मात् तदभिव्यक्तौ कर्त्तव्यायां लोट् स्वयमसमर्थ इति द्विर्वचनमपेक्षते, तेन तदन्तस्य द्विर्वचनं भवतीति भावः। केन पुनर्विधीयमानं द्विर्वचनमपेक्षत इत्याह-- `क्रियासमभिहारे' इत्यादि। `यङप्रत्ययः पुनः' इत्यादि। यङप्रत्ययो हि क्रियासमभिहार एव विधीयते। तेनासौ तत्र विधीयमानस्तदभिव्यक्तौ स्वयमेव समर्थ इति नापेक्षते द्विर्वचनम्। तेन तदन्तस्य द्विर्वचनं न भवतीति भावः।।

3.समुच्चयेऽन्यतरस्याम्। (3.4.3)

`अनेकक्रियाध्याहारः' इति। अनेकासां क्रियाणां चीयमानतेत्यर्थः। एतेन समभिहारात् समुच्चयस्य भेदं दर्शयति। समभिहारोऽपि पौनःपुन्यम्, भृशार्थो वा, स चैकस्या एव क्रियायाः सम्भवः। समुच्चयः पुनरनेकासां क्रियाणाम्।

`भाष्ट्रमट'इति। `अतो हेः' (6.4.105) इति लुक्। अत्र साधनभेदाद्भेदमुपागतानामनकासामटनक्रियाणां समुच्चयः।

`अथ वा' इत्यादि। प्रथमेनाथ वेतिग्रहणेन `वा च तध्वमोः' (3.4.2) इति वाग्रहणप्रतिपादितं विकल्पं दर्शयति, द्वितीयेनान्यतरस्यां (3.4.3) ग्रहणप्रतिपादितम्।।

4. यथाविध्यनुप्रयोगः पूर्वस्मिन्। (3.4.4)

`पूर्वस्मिन लोड्विधाने' इत्यादेर्वाक्यस्य यस्माद्धातोरित्यादिनार्थं स्पष्टीकरोति। `धातुसम्बन्धे' इत्यादि। धातुसम्बन्ध (3.4.1) इत्यनुवृत्तेर्धातुसम्बन्ध एव लोड्विधानम्, अतोऽनु प्रयोगः सिद्धः एव, न हि तेन विना धातुसम्बन्धो भवति; तस्य द्विष्ठत्वात्। यद्येवम्, किमर्थमिदं वचनम् ? इत्याह-- `यथाविध्यर्थं तु' इति। अथ व्यवहितप्रयोगस्य वा पूर्वस्य प्रयोगस्य वा निवृत्त्यर्थं कस्मान्न भवति, यथा-- `कृञ्चानुप्रयुज्यते लिटि' (3.1.40) इति ? न; तयोरपीष्टत्वात्। इष्यते हि व्यवहितप्रोगः- लुनीहि लुनीहीत्यवायं देवदत्तो लुनाति। पूर्वप्रयोगोऽपीष्यते-- लुनाति देवदत्तो लुनीहि लुनीहीति। तस्माद्यथा विध्यर्थमेवेदं युक्तम्। ननु च`समुच्चये सामान्यवचनस्य' (3.4.5) इति धात्वन्तरस्य समानार्थस्य प्रयोगाभ्यनुज्ञानात् क्रियासमभिहारे यथाविध्यनुप्रयोगो भविष्यतीति, तत्किमनेन वचनेन ? नैतदस्ति, समुच्चय एव हि नियमः स्यात्, क्रियासमभिहारे तु यथाविध्यनुप्रयोगः स्यात्, धात्वन्तरस्य च समानार्थस्य। तस्मादारब्धव्यमिदम्।।

5. समुच्चये सामान्यवचनस्य। (3.4.5)

`सर्वविशेषानुप्रयोगानिवृत्त्यर्थम्' इति। यदीदं नारभ्यते तदा यावद्भ्यो धातुभ्यो लोड्विहितस्तावतामेवानुप्रयोगः प्रसज्येत; ततस्तन्निवृत्यर्थमेतत्। ननु चान्तरेणापीदं वचनं लाघवात् सामान्यवचनस्यैवानुप्रयोगो भविष्यति। सर्वविशेषानुप्रयोगे ह्योदनं भुङ्क्ष्व सक्तून् पिब धानाः खाद इत्येवायं भुङ्क्ते पिबति खादतीति सर्वेषु तदा तरुशब्दस्यैव प्रयोगः स्यात्, वनस्पतिशब्दप्रभृतयस्तूच्छिद्येरन्, न चैवम्, तस्मान्नास्ति लौकिकशब्दप्रयोगे गुरुलाघवं प्रत्यादरः। ननु च भ्राष्ट्रमटेत्यादावुदाहरणे कारकस्यैव समुच्चयो भ्राष्ट्रादेः, न क्रियायाः, तस्या एकत्वात्; अनेकाधारत्वञ्च सामान्यम्, एकत्वे क्रियायास्तन्न सम्भवति, तत्कथं सामान्यवचनस्यानुप्रयोग उपपद्यते ? इत्याह-- `भ्राष्टमट'इत्यादि। गतार्थम्।।

6. छन्दसि लुङ्लङलिटः। (3.4.6)

`यथायथम्' इति। यथास्वम्। यो यस्यात्मीयो विषयः स तत्रेत्यर्थः। `अकरत्' इति।`कृमृदृरुहिभ्यश्छन्दसि'(3.1.59) इति च्लेरङ, `ऋदृशोऽङि गुणः' (7.4.16)। `अकरम्' इति। मिपोऽम्। `अवृणीत' इति। वृञो लङ्, क्र्यादित्वात् श्ना, पूर्ववदीत्वम्। `ममार' इति। लिट्, `म्रियतेर्लुङलिङोश्च' (1.3.61) इति नियमात् परस्मैपदम्, णल्, वृद्धिः, रपरत्वम्, `द्विर्वचनेऽचि' (1.1.59) इति स्थाननिवद्भावात् मृ इत्येतद्द्विरुच्यते, `उरत्' (7.4.66) इत्यत्वम्, रपरत्वम्, हलादिशेषः।।

7. लिङर्थे लेट्। (3.4.7)
`नेषत्' । `तक्षिषत्' इति। नयतेस्तक्षते श्च लेट्, तिप्, `इतश्च लोपः परस्मैपदेषु' )3.4.97) इतीकारलोपः, `सिब् बहुलं लेटि'(3.1.34) इति सिप्, `लेटोऽडाटौ' (3.4.94) इत्याट्। तक्षिषदित्यत्र `आर्धधातुकस्य' (7.2.35) इत्यादिनेट्। जोषिषदित्यादीन्युदाहरणानि `सिब् बहुलं लेटि'(3.1.34) इत्यत्र व्युत्पादितानि।।

8.उपसंवादशङ्कयोश्च। (3.4.8)
`उपसंवादः परिभाषणम्; कर्त्तव्ये पणबन्धः' इति। उपसंवादशब्दस्येमौ पर्यायौ। `यदि मे भवान्' इत्यादिनोसवादस्य स्वरूपं दर्शयति। कारणत इत्यादिनाप्याशङ्कायाः। `अनुसरणम्' इति। अनुगमनम्, अनुमानमित्यर्थः। `तर्क उत्प्रेक्षा' इति। आशङ्काया इमौ पर्यायौ। `अहमेव' इत्यादि। देवैः पशुपतिरुक्तस्त्रिपुरं जहीति, तेनोक्तम्-- `अहमेव पशूनामीशै' इति. ब्रह्महत्याभागं गृहाणेत्युक्ते आदित्य इदमुक्तवान् `मदग्रा एव वो ग्रहा गृह्यान्तै। मद्देवतान्येव वः पात्राण्युच्यान्तै। `ईशै'इति-- `ईश ऐश्वर्ये' (धा.पा.1020), उत्तमपुरुषैकवचनम्, इट्, टेरेत्वम्, `एत ऐ' (3.4.93)। `गृह्यान्तै' इति--ग्रह उपादाने' (धा.पा.1533), `झोऽन्तः' (7.1.3), कर्मणि `सार्वधातुके यक्' (3.1.67), ग्रह्यादिसूत्रेण (6.1.16) सम्प्रसारणम्। शेषं पूर्ववत् साधनम्। `उच्यान्तै' इति-- `वच परिभाषणे' (धा.पा.1063), वच्यादिसूत्रेण (6.1.15) सम्प्रसारणम्। शेषं पूर्ववत्। `पताम' इति-- `पत्लृ गतौ' (धा.पा.845), मस्, `लेटोऽडाटौ' (3.4.94) इत्याट्। `जिह्वाचरणेन' इत्यादिना पूर्वोक्तमाशङ्कालक्षणमुदाहरणे दर्शयति। `लिङर्थ एवायम्' इति। हेतुहेतुमद्भावः। कथम् ? उपसंवादे तावत्-- यदि मे भवानिदं कुर्यादहमपि त इदं दास्यामीत्येवंविधं परिभाषणलक्षणम्। तत्र च करणं हेतुः, दानं हेतुमदिति युक्त उपसंवादो लिङर्थः। आशङ्कापि कारणतः कार्यानुसरणम्। तत्रापि कारणं हेतुः, कार्यानुसरणं हेतुमदित्याशङ्कापि लिङर्थ एव। यद्येवम्म, पूर्वेणैव सिद्धम्, तत्किमर्थमिदमुच्यते ? इत्याह-- `नित्यार्थ वचनम्' इति। स्यादेतत् पूर्वेणैव नित्यं भविष्यतीत्याह-- `पूर्वसूत्रे' इत्यादि।।

9. तुमर्थे सेसेनसेअसेन्कसेकसेनध्यैअध्यैकद्यैकध्यैन्शध्यैशद्यैन्तवैतवङ्तवेनः। (3.4.9)
`कथं ज्ञायते' इति। `कर्त्तरि कृत्' (3.4.67) इति वचनात् कर्त्तैव तुमर्थो युक्त इति मन्यते। `वचनसामर्थ्यात्' इत्यादि। यदि कर्त्तैव तुमर्थः स्यात् तुमर्थवचनमर्थकं स्यात्, कृत्त्वादेव हि सयादयः कर्त्तरि भविष्यन्ति। तस्मात् तुमर्थग्रहणाल्लिङ्गात् कर्त्तरि तुमुन्न भवति। `अपकृष्यते' । अपनीयते। कर्त्तरि न भवतीति यावत्। स्यादेतत्, कर्मादिरस्यार्थो भविष्यतीत्याह-- `न च' इत्यादि। `अन्यस्मिन्' इति। कर्मादौ। यथा तर्हि कर्मादावनिर्देशान्न भवति तथा भावेऽपि न स्यात्। भावेऽपि नैव तुमुन्निर्दिश्यत इत्याह-- `अनिर्दिष्टार्थाः' इत्यादि। अर्थान्तरस्य निर्देशाद्या प्रकृतिः प्रत्ययानां निमित्तत्वेनोपादीयते तदर्थस्य प्रत्यासत्तेस्तत्रैवानिनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति, स पुनरिह स्वार्थो भावः। कुत एतत् ? धात्वधिकारात्, धातोश्च भाववचनत्वात्। यद्येवम्, भावग्रहणमेव कुर्यात्, लघुत्वात् ? नैवं शक्यम्; भावग्रहणे सति `कर्त्तरि कृत्' (3.4.67) इति वचनात्तुमुन् कर्त्तर्येव स्यात्। तुमर्थग्रहणे हि तुमुनोऽपि हि भाव एवार्थ इत्येतज्ज्ञापितं भवतीति न कश्चिद्दोष इति। `वक्षे' इति। `वच परिभाषणे' (धा.पा.1063), सेप्रत्ययः, `चोः कुः' (8.2.30) इति कुत्वम्। `एषे' इति। इणः सेन्प्रत्ययः। `जीवसे' इति। `जीव प्राणधारणे' (धा.पा.562)। प्रत्ययद्वयस्याप्येतदेवोदाहरणम्, स्वरस्तु भिद्यते। `प्रेषे' इति। इणः प्रपूर्वात् क्से, `आद्गुणः' (6.1.87)। `श्रियसे' इति। `श्रिञ् सेवायाम्' (धा.पा.897), अस्मात् क्सेन, इयङ्। `उपाचरध्यै' इति। `चर गत्यर्थः' (धा.पा.559), उपाङ्पूर्वः। प्रत्ययद्वयस्यापीदुहारणम्, स्वरभेदात्तु भेदः। `आहुवध्यै' इति। `पा पाने' (धा.पा.925), शध्यै, प्राघ्रादिसूत्रेण (7.3.78) पिबादेशः। `मादयध्यै' इति। `मदी {हर्षग्लेपनयोः-धा.पा.} हर्षे' (धा.पा.815), हेतुमण्णिच्, शध्यैन्, गुणायादेशौ। `पातवै' इति। पिबतेस्तवै। `सूतवे' इति। `षूङ प्राणिगर्भविमोचे' (धा.पा.1031), तवेङ, ङित्वाद्गुणाभावः। `गन्तवे' इत्यादीन्युदाहरणानि गमिकरोतिहरतीनां यथाक्रमेण।।

10.प्रयै रोहिष्यै अव्यथिष्यै। (3.4.10)
`प्रयै' इति। `अतो लोप इटि च' (6.4.64) इत्याकारलोपः।।

11. दृशे विख्ये च। (3.4.11)
`दृशे' इति। दृशेः केप्रत्ययः। `विख्ये' इति। विपूर्वाच्चक्षिङ ख्यातेर्वा केप्रत्ययो निपात्यते।।

12. शकि णमुल्कमुलौ। (3.4.12)
`विभाजमम्' इति। विपूर्वाद्भजेर्णमुल्। `अपलुपम्' इति। `लुप्लृ च्छेदने' (धा.पा.1431), कमुल्।।

13. ईश्वरे तोसुन्कसुनौ। (3.4.13)
अभिचरितोः' इति। चरतेरभिपूर्वात् तोसुन्प्रत्ययः। `विलिखः, वितृदः' इति। लिखतेः, `{उ तृदिर्' धा.पा.}तृदिर् हिंसादानयोः' (धा.पा.1446) इत्येतस्माच्च कसुन्।।

14. कृत्यार्थे तवैकेन्केन्यत्वनः। (3.4.14)
`कृत्यानामर्थो भावकर्मणी' इति। `तयोरेव कृत्यक्तखलर्थाः' (3.4.70) इतिभावकर्मणोः कृत्यानां विधानात्। `अन्तेतवै' इति। अनुपूर्वादिणस्तवै। `परिधातवै' इति। परिपूर्वाद्दधातेः। `परिस्तरितवै' इति। परिपूर्वादेव `स्तृञ् आच्छादने' (धा.पा.1252) इत्यस्मात्। `अवगाहे' इति। `गाहु विलोडने' (धा.पा.649) अक्पूर्वः। `दिदृक्षेण्यः' इति। `दृशः सन्, द्विर्वचनम्, उरत्त्वम्, रपरत्वम्, `सन्यतः' (7.4.79) इतीत्त्वम्, `हलन्ताच्च' (1.2.10) इति गुणाभावः, व्रश्चादिसूत्रेण (8.2.36) षत्वम्,`षढोः कः सि' (8.2.41) इति कत्वम्, दिदृक्ष इति स्थिते केन्यप्रत्ययः, `अतो लोपः' (6.4.48)। `शुश्रूषेण्यः' इति। शृणोतेः सन्, `अज्झनगमां सनि' (6.4.16) इति दीर्घः, द्विर्वचनमभ्यासकार्यम्, शुश्रूष इति स्थिते केन्यप्रत्ययः। `कर्त्त्वम्' इति। करोतेस्त्वम्। `सयादिसूत्रेऽपि तवै विहितः' इति। सयादीनां सूत्रं सयादिसूत्रम्, येन सयादयो विहितास्ततत्रापि तवैप्रत्ययो विहितः। `तस्य तुमर्थात्' इत्यादि। यदि तु तस्य तुमर्थ एव भावे विधिः स्यात् तस्यानर्थक्यं स्यात्; अनेनैव सिद्धत्वात्। तस्माद्यद्यपि तत्र तुमर्थ इत्युच्यते, तथापि ततोऽन्यत्र कर्मकारके कर्तृादौ तवैप्रत्ययविधानं वेदितव्यम्।।

15. अवचक्षे च। (3.4.15)
`एश्प्रत्ययो निपात्यते' इति। शित्करणं सार्वधातुकसंज्ञार्थम्। तेनार्धधातुके विधीयमानः सार्वधातुके `चक्षिङ ख्याञ्' (2.4.54) इति ख्याञादेशो न भवति।।

16. भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्। (3.4.16)
`आसंस्थातोः' इत्यादि। आसंस्थातोः शब्देन समाप्तिरुच्यते, वेद्यां सदनं लक्ष्यते। `पुरा सूर्यस्योदेतोराधेयः' इति। अत्राप्याधानक्रिया सूर्यस्योदयेन। `पुरा वत्सानाम्' त्यादौ वत्सानामपाकरणेनासनम्। `पुरा प्रवदितोः' इत्यादौ प्रवदनेन हवनम्। `पुरा प्रचरितोः' इत्यादौ प्रचरणेन हवनमेव। उत्तरयोरुदाहरणयोराहवनेनासम्भवनम्।।

17. सृपितृदोः कसुन्। (3.4.17)

18. अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा। (3.4.18)
`प्रतिषेधवाचिनोः' इति। प्रतिषेधयोरित्यस्येदं विवरणम्।एतेन प्रतिषेधवाचित्वादलंखलुशब्दौ सूत्रे प्रतिषेधशब्देनोक्ताविति दर्शयति। भवति हि तद्वाचित्वात्ताच्छब्द्यम्; यथा-- `क्षुद्रजन्तवः' (2.4.8) इति, तत्र क्षुद्रजन्तुवाचित्वाद्यूकालिक्षादयः शब्दाः क्षुद्रजन्तुशब्देनोक्ताः।
`अलङ्कारः' इति। भावे घञ्। भूषणवचनोऽत्रालंशब्दः।
`अलं वाले रोदनेन' इति। भावे ल्युट्। `वासरूपविधिरिति चेत्' इति। विनापि प्राग्ग्रहणेन विकल्पो लभ्यत एव। यस्मादसरूपोऽपवादो बाधको भवतीत्येवं चेन्मन्यसे,एवं तर्हि प्राग्ग्रहणम्, पूर्वं स्त्र्यधिकारात्। परेण वासरूपविधिर्नास्तीति चेतसि कृत्वा विकल्पार्थं प्राग्ग्रहणमुक्तम्।।

19. उदीचां माङो व्यतीहारे। (3.4.19)
`अपमित्य' इति। `आदेच उपदेशेऽशिति' (6.1.45) इत्यात्वम्, `कुगतिप्रादयः' (2.2.18) इति समासः, `समासेऽनञ्पूर्वे क्त्वो ल्यप्' (7.1.37) इति ल्यप्, `मयतेरिदन्यतरस्याम्' (6.4.70) इतीत्त्वम्, `ह्रस्वस्य पिति कृति तुक्' (6.1.71)। ननु च `समानकर्त्तृकयोः पूर्वकाले' (3.4.21) इत्यनेनैवात्र क्त्वाप्रत्ययो भवति, अस्ति ह्यत्रापि समानकर्त्तृकत्वम्। तथा हि-- य एवापमयतेः कर्त्ता स एव याचतेः,तत्किमर्थं विधीयते ? इत्याह-- `अपूर्वकालत्वात्' इत्यादि। पूर्वं ह्यसौ याचते पश्चादपमयत इति नास्ति पूर्वकालत्वम्, तस्मादप्राप्त एव क्त्वा विधीयते। विधीयतान्नमाम; अयन्तु दोषः-- यदैवास्माद्वचनान्मयतेः क्त्वा भवति, तदैव समानकर्त्तृकयोरित्यस्माद्वचनाद्याचतेरपि स्यात् ? नैष दोष-; यस्मात् `समानकर्त्तृकयोः' (3.4.21) इत्यत्र `उदीचाम्' (3.4.19) इति वर्त्तते, सा च व्यवस्थितविभाषा,तेन यदा मयतेः क्त्वा भवति तदा याचतेः क्तवा न भविष्यति। `उदीचांग्रहणात्' इत्यादि। उदीचांग्रहणमिह विकल्पार्थम्। तेन यथाप्राप्तमपि पक्षे भवति। याचतेः क्त्वा। मयतेर्लडादिः।
माङिति `माङ माने' (धा.पा.1142) इत्यस्यायं निर्देश इति कस्यचिदाशङ्का स्यात्,अतस्तां निराकर्त्तुमाह-- `मेङ कृतात्त्वस्यायं निर्दशः' इति। कुतः पुनरेतदवगतम् ? व्यतीहारग्रहणात्। मेङेव व्यतीहारे वर्त्तते, न माङ, तस्मान्मेङ एवायं निर्देश इति विज्ञायते। किमर्थं पुनरेवं निर्देशः कृतः,कृते यत्र सति सन्देहः स्यात्, न मेङ इत्येवासन्दिग्धः कर्त्तव्य स्यादित्यत आह-- `ज्ञापनार्थः'इति। मेङ इत्येवं निर्देशे कर्त्तव्ये यः सानुबन्धकस्य कृतात्त्वस्य निर्देशः कृतः स ज्ञापनार्थः। तेनैतज्ज्ञापयते-- `नानुबन्धकृतमनेजन्तत्वम्' इति। `तेन' इत्यादिना ज्ञापनप्रयोजनं दर्शयति। यद्यमर्थो न ज्ञाप्येत ततो हलन्तत्वाद् दैप एजन्तत्वं न स्यात्। तत्र को दोषः ? दाब्ग्रहणेन दैब्ग्रहणं न स्यात्; भिन्नेरूपत्वात्। ततश्च `दाधा घ्वदाप्' (1.1.20) इत्यत्र दैपः प्रतिषेधो न स्यात्। अस्मिंस्त्वर्थे ज्ञापिते सति भवति।।

20. परावरयोगे च। (3.4.20)

इहेमौ परावरशब्दौ सम्बन्धिशब्दौ। पूर्वञ्चापेक्ष्य परो भवति, परञ्चापेक्ष्.यावरः,सम्बन्धिशब्दाश्च नियतमेव प्रतियोगिनमुपस्थापयन्ति, तस्मात् सूत्रे यद्यपि विशिष्टप्रयोगो न मिर्दिश्यते, तथापि पूर्वपरयोरेव परावराभ्यां योगो गम्यत इत्याह-- `परेण पूर्वस्य' इत्यादि। `परनदीयोगेन पर्वतो विशिष्यते' इति। तथा ह्यप्राप्य नदीं पर्वत इत्युक्ते परया नद्या पर्वतस्य यो योगस्तद्विशिष्टः पर्वतः प्रतीयते। `अवरपर्वतयोगेन नदी विशिष्यते' इवि। यस्मादतिक्रम्य पर्वतं नदीत्युक्तेऽवरेण पर्वतेन नद्या च यो योगस्तद्विशिष्ट नदी विज्ञायते।।

21. समानकर्त्तृकयोः पूर्वकालेः। (3.4.21)

धात्वधिकाराद्धात्वर्थस्यैव समानकर्त्तृकत्वं विज्ञायत इत्याह-- `समानः कर्त्ता ययोर्धात्वर्थयोःट इत्यादि। निर्धारणे चेयं षष्ठी। समानशब्दश्चायमेकवाची। ननु शक्ति कारकम्, अन्या च पूर्वकालक्रियायाः, तत्कुतः समानकर्त्तृकत्वं विज्ञायते ? इत्याह-- `शक्तिशक्तिमतोः' इत्यादि। शक्तिः शक्तिमाँश्च शक्तिशक्तिमन्तौ। यश्च शक्त्याधारो या च शक्तिस्तयोरिह भेदो न विवक्षितः। तेन शक्त्याधार एक एव देवदत्तः कर्त्ता, स चोभयोरपि क्रिययोरेक एवेति युक्तं समानकर्त्तृकत्वम्। `पीत्वा' इति। पूर्ववदीत्वम् । इह `समानकर्त्तृकयोः' इति द्विर्वचनेन निर्देशः कृतः तेन द्वे एव क्रिये प्रत्युपस्थास्येते, न बह्व्यः, ततश्च द्वयोरेव क्रिययोः प्रत्युपस्थापितयोः स्यात्, न बह्वीषु ? इत्याह-- `द्विवचनम्' इत्यादि। क्रियाप्रधानत्वादस्य निर्देशस्य। नात्र द्विवचनं प्रधानम्; नान्तरीयकत्वात्। तेन द्विवचनेन निर्देशः कृतः। अवश्यं येन केनचिद्वचनेन निर्देशः कर्त्तव्यः, तस्मादतन्त्रत्वाद्द्विवचनस्य, बह्वीष्वपि क्रियासु भवत्येव। `भुक्तवति ब्राह्मणे व्रजति' ऽइति। अत्र भुजिक्रियाया ब्राह्मणः कर्त्ता, व्रजतिक्रियायास्तु देवदत्त इति समानकर्त्तृकत्वाभावः। `व्रजति जल्पति च' इति। यौगपद्यादिह क्रियायाः पूर्वकालता नास्ति।

`व्यादाय' इति। ददातेर्व्याङ्पूर्वस्य रूपम्। `सम्मील्य' इति। `मील स्मील क्ष्मील निमेषणे' (धा.पा.517,519,520) इत्यस्य सम्पूर्वस्य हेतुमण्ण्यन्तस्य। किं पुनः कारणं न सिध्यीत्याह-- `अपूर्वकालत्वात्'उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्-- पूर्वयोगाच्चकायोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, तेन मुखं व्यादाय स्वपितीत्यादौ पूर्वकालत्वाभावेऽपि भविष्यतीति।।

22. अभीक्ष्ण्ये णमुल् च। (3.4.22)

`द्विर्वचनसहितौ' इत्यादि। आभीक्ष्ण्यं हि द्योतयितुं द्विर्वचनसहितयोरेव क्त्वाणमुलोः सामर्थ्यम्, न केवलयोः; शब्दशक्तिस्वाभाव्यात्। तस्माद्द्विर्वचनं विधेयमिति भावः। केन पुनरत्र द्विर्वचनमित्याह-- `आभीक्ष्ण्ये' इत्यादि। `पायम्पायम्' इति। `आतो युक्' (7.3.33)।।

23. न यद्यनाकाङ्क्षे। (3.4.23)

`अनाकाङ्क्षे' इति। न विद्यत आकाङ्क्षा = अपेक्षा यस्य स तथोक्तः। `क्त्वा तु पूर्वसूत्रविहितोऽपि' इति। अपिशब्दादनन्तरविहितोऽपि युक्तं यदनन्तरसूत्रविहितः प्रतिषिध्यते-- `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या.प.99) इति कृत्वा। पूर्वसूत्रेण विहितस्य तु कथं प्रतिषेधः ? प्रकरणापेक्षया प्रतिषेधविधानात्। पूर्वकालप्रकरणे यत् प्राप्नोति तन्न भवतीत्येवमयं पूर्वकालप्रकरणापेक्षया प्रतिषेधः क्रियते। तस्माद्युक्तः पूर्वसूत्रविहितस्यापि प्रतिषेधः।।

24. विभाषाग्रेप्रथमपूर्वेषु। (3.4.24)

`आभीक्षण्ये' इति नानुवर्त्तते' इति। `अप्राप्तविभाषेयम्' इत्यत्रेयं युक्तिः। ननु च प्रताप्तविभाषेयं युक्ता,णमुल्यप्राप्ते क्त्वाप्रत्यये `समानकर्त्तृकयोः' (3.4.21) इत्यादिना प्राप्ते सत्यारम्भात् ? नैतदस्ति; अनन्तरसूत्रविहितौ हि क्त्वाण्मुलावित्यधिकृत्याप्राप्तविभाषेयमित्युच्यते। यस्तु `समानकर्त्तृकयोः' (3.4.21) इत्यादिना केवलः क्त्वा विहितस्तं प्रति विभाषाग्रहणं न कर्त्तव्यमेव; वासरूपविधिना तत्प्रतिपादितस्यार्थस्य सिद्धत्वात्। `ननु च' इत्यादिनाऽनन्तरोक्तविभाषाग्रहणस्य प्रयोजनं विघटयति । `क्त्वाणमुली यत्र' इत्यादि। वासरूपविधिनैव पक्षे लडादिषु। सिद्धेषु यत् तदर्थं विभाषाग्रहणं क्रियते तेन यत्र क्त्वाणमुलौ युगपद्विधीयेते तत्र वासरूपविधिर्नास्तीत्येषोऽर्थो ज्ञाप्यते। किमेतस्य प्रयोजनं ज्ञापनस्य ? इत्याह-- `तेन' इत्यादि। `उपपदसमासः' इत्यादि। `अमैवाव्ययेन' (2.2.20) इत्युपपदसमासः प्राप्नोति, स कस्मान्न भवतीत्याह-- `उक्तम्' इत्यादि। `अमैव यत् तुल्यविधानमुपपदं तत् समस्यते' (का.व.2.2.20) इत्युक्तं प्राक्। अग्ने भृतीन्युपपदान्यमा चान्येन क्त्वाप्रत्ययेन तुल्यविधानम्, अतो न समस्यन्ते।।

25. कर्मण्याक्रोशे कृञः खमुञ्। (3.4.25)

`चौराङ्कारम्' इति। `अरुर्द्विषदजन्तस्य मुम्' (6.3.67) इति मुम्। `चौरकरणम्' इत्यादि। करोतिरत्रोच्चारणक्रियः। `चौरोऽसि'इत्याक्रोशवाक्ये चौरशब्दस्य यत् करणमुच्चारणं तदाक्रोशस्यैव सम्पादनार्थम्। न हि तेनविनाऽऽक्रोशः शक्यते प्रतिपादयितुम्। `न त्वसौ चौरः क्रियते' इति। अशक्यत्वात्। न च `चौरोऽसीति शतकृत्वोऽपि ब्रुवता पुरुषस्य शक्यते चौरत्वमुत्पादयितुम्।।

26. स्वादुमि णमुल्। (3.4.26)
`स्वादुमीत्यर्थग्रहणम्' इति। ननु च `स्वं रूपं शब्दस्याशब्दसंज्ञा' (1.1.68) इति वचनात् स्वरूपस्यैव ग्रहणेन भवितव्यम् ? नैतदस्ति; शब्दानुशासनप्रस्तावादेव हि शब्दस्येति सिद्धे शब्दग्रहणं यत्र शब्दपरो निर्देशस्तत्र स्वं रूपं गृह्यते नार्थपरनिर्देश इति ज्ञापनार्थं कृतम्, इह चार्थपरो निर्देशः। तस्मादर्थग्रहणमेव युक्तम्। अर्थपरत्वं तु निर्देशस्याविच्छिन्नाचार्यपारम्पर्योपदेशाद्विज्ञायते। अर्थग्रहणे च सति तत्पर्यायेष्वपि प्रत्ययो लभ्यत इत्याह-- `स्वाद्वर्थेषु' इत्यादि। अथ `स्वादुमि' इति किमर्थं मकारान्तत्वं निपात्यते, मान्तस्योपपदस्य श्रवणं यथा स्यादिति चेत् ? न; यद्येतत्प्रोयजनम्, न निपातयितव्यम्, अनन्तरसूत्रे खमुञः प्रकृतत्वात् स एव विधास्यते। अस्मिंश्च विहिते मुमैव मान्तत्वमुपपदस्य भविष्यतीत्येतच्चोद्यमापाकर्त्तुमाह-- `स्वादुमि'इत्यादि। एतेनैतद्दर्शयति--यद्यपि खमुञि सति सिध्यति मकारान्तत्वम्, ईकारप्रतिषेधस्तु न सिध्यति, ततश्च स्वदुशब्दादुपपदात् `वोतो गुणवचनात्' (4.1.44) इति ङीष् प्रसज्येत्, तथा चानिष्टं रूपं स्यात्। माकारान्तत्वनिपातने हि निमित्तस्य विहितत्वान्ङीष्प्रसङ्गो नास्ति। तस्माद्योऽपि खमुञं विदधाति तेनाप्यवश्यमीकारप्रतिषेधार्थं मकारान्तं निपातयितव्यमिति। यद्यपि परस्याभिमतम्-- `खमुञि विहिते मुमैव मकारान्तत्वं भविष्यति' इति, तदपि न सर्वत्रेति सूचयितुमाह-- `च्व्यन्तस्य' इत्यादि। अनेनैतद्दर्शयति-- यदि मकारान्तत्वं न निपात्येत, तदा सत्यपि खमुञि मकारान्तत्वं च्व्यन्तस्योपपदस्य न स्यात्; तस्याव्ययत्वात्। मुम्विधौ च `खित्यनव्ययस्य' (6.3.66) इत्यधिकारात्। तस्माद्योऽपि खमुञं विदधाति तेनापि मकारान्तत्वनिपातनं कर्त्तव्यम्। एवं हि मकारान्तत्वनिपातनमेव क्रियताम्, प्रत्ययस्तु प्रकृतः खमुञेव विधातव्यः ? अशक्यः खमुञ् विधातुम्; खमुञ्प्रत्यये हि मकारान्तत्वनिपातनमव्ययार्थं विज्ञायते,ततश्च `च्वौ च' (6.3.64) इति दीर्घत्वं स्यादेव। णमुलि सति सर्वविधयपवादस्तु विज्ञायेत, तेन दीर्घत्वमपि न भवति। अवश्यञ्चोत्तरार्थं णमुल् विधेयः, न च तस्मिन्नुत्तरत्र विधीयमाने लाघवं भवति, नापीह गौरवम्।
क्व पुनरर्थ एते प्रत्या भवन्तीत्याह-- `तुमर्ओथाधिकाराच्च' इत्यादि।। `एते' इति। ये तुमर्थधिकारे विहिताः। `यद्येवम्' इति। यदि तुमर्थे भवन्तीत्यर्थः। `भुजिप्रत्ययेन' इत्यादि। यद्यपि णमुलाऽनभिहितः कर्त्ता, तथापि भुजिप्रत्ययेन लटाभिहित इति न भवितव्यं तृतीयया। ननु च शक्तिलक्षणः कर्त्ता, अन्या च स्वादुकरणविषया शक्तिः, अन्या च भुजिक्रियाविषया, तत्र लटाभिहितायामपि भुजिक्रियाविषायायां शक्तावितरस्याः शक्तेः कर्तृसंज्ञाया अनभिधानात् {प्राप्नोतीत्येव-मुद्रितः पाठः} प्राप्नोत्येव तृतीयेत्याह-- `न चास्मिन्' इत्यादि। अत्र हि समानकर्त्तृकप्रकरणे शक्तमतः शक्तीनाञ्च भेदो न विवक्ष्यते। तेन शक्तिमान् देवदत्तः कर्त्ता। स चैक एवाभिहितश्चेति कुतस्ततीयाप्रसङ्गः। किं कारणं भेदेनोपादानं न विवक्षितम् ? इत्याह-- `समानकर्त्तृकत्वे हि' इत्यादि। अभ्युपगम्यापि भेदविवक्षाम्, परिहारान्तरमाह-- `प्रधानशक्त्यभिधाने' इत्यादि। किं कृतः पुनरत्र कर्त्तृशक्त्योः प्रधानगुणभावः ? क्रियाकृतः; स्वादुङ्कारं हि गुणभूतम्, भुजिक्रियार्थत्वात्। भुजिक्रिया तु प्रधानम्; तेनोपकार्यत्वात्। क्रियायाश्च गुणप्रदानभावात् तद्विषययोरपि कर्त्तृशक्त्योः प्रधानगुणभावो भवति। तत्र प्रधानशक्तावभिहितायामप्रदानशक्तिरभिहितत्वात् प्रकाशते = प्रतिभासते; प्रधानानुयायित्वाद्गुणानाम्। तेन तृतीया न भवतीति भावः।।

27. अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्। (3.4.27)
`सिद्धाप्रयोगः' इति। सिद्धोऽप्रयोगो यस्य स तथोक्तः। `निरर्थकत्वात्' इत्यादि। अभिधेयाभावात् प्रयोजनाभावाद्वा निरर्थकत्वम्। `एवमेव' इति। निरर्थकत्वमेवेत्यर्थः। `अन्यथा भुङ्क्ते' इत्यादिना तदेवानर्थकत्वं चेतसि कृत्वा सिद्धाप्रयोगतां दर्शयति। अन्यथा भुङ्क्ते इति यावानेवार्थः करोतावप्रयुज्यमाने गम्यते तावानेवार्थः करोतावप्रयुज्यमाने गम्यते तावानेवार्थोऽन्यथाकारं भुङ्क्त इति करोतौ प्रयुज्यमानेऽपि। तस्मादनर्थकः करोतिः। कथं पुनः प्रयुज्यमान एवानर्थको भवति ? अन्यथादयएते प्रकारवचनाः, ते यदानुप्रयोगधातोरर्थस् प्रकारमाचक्षते तदा कृञपि तैर्विशेष्यमाणस्तदीयप्रकारमाचष्टे, गचान्यत एवावगत इत्यनर्थको भवति। यद्येवम्, अवगतार्थत्वात् तस्य प्रयोगो न प्राप्नोति ? नैवम्; अवगतार्थमपि प्रयोगो दृश्यते-- अपूपौ द्वावानय, पचाम्यहमिति। `अन्यथा कृत्वा शिरो भुङ्क्ते' इत्यत्रान्यथाशब्देन पदान्तरस्य शिरसः प्रकारमाख्यायते। स विना करोतिना नावगम्यते। यदि हि करोतिर्न प्रयुज्येत, भुजिक्रियागत एव प्रकारोऽन्यथालक्षणः प्रतीयतेत, न शिरोगतः। शिरसस्तु भुज्यमानतैवावगम्येत। तस्मान्नात्र करोतिः शिद्धाप्रयोगः।।

28. यथातथयोरसूयाप्रतिवचने। (3.4.28)
`असूयाप्रतिवचने' इति। असूयाप्रभवं प्रतिवचनमसूयाप्रतिवचनम्। `यद्यसूयन्' इत्यादि। असूयन्निति शत्रन्तमेतत्। कण्ड्वादियगन्तः। अस्य प्रतिवक्तीत्यनेन सम्बन्धः। प्रतिवक्ति = प्रतिभणति, प्रतिवचनं वदातीत्यर्थः। `पृच्छति' इति। सप्तम्यन्तमेतत्। पृच्छति सति यद्यसूयन् = असूयां कुर्वन् प्रतिवक्ति तदा तत्र पृच्छति यत् प्रतिवचनं तदसूयाप्रतिवचनम्। `यथाकारम्' इत्यादि। कथं भवान् भोक्ष्यते इत्येवं वचनं पृच्छति सत्यसूयाप्रतिवचनम्। `यथाकारम्' इत्यादि। कथं भवान् भोक्ष्यते इत्येवं वचनं पृच्छति सत्यसूयाप्रतिवचनमेतत्। `यथा कृत्वाऽहं भोक्ष्ये तथा द्रक्ष्यसि' इति. नैतदसूयाप्रतिवचनम्। किं तर्हि ? तद्व्याख्यानम्।।

29. कर्मणि दृशिविदोः साकल्ये। (3.4.29)
`कर्मण्युपपदे साकल्यविशिष्टे' इति। एतेन साकल्यग्रहणं कर्मविशेषणमिति दर्शयति। `{यं यं ब्राह्मणं जानाति-- काशिका'} यं यं जानाति लभते विचारयति

वा' इति। एतेन ज्ञानलाभविचारणार्थानां विदीनां ग्रहणमिति दर्शयति। कुतः पुनः सत्तार्थस्य ग्रहणं न भवति ? तस्याकर्मकत्वात्, कर्मणीति चोपादानात्।।

30. यावति विन्दजीवोः। (3.4.30)
`विन्दतेः' इति। `विद्लृ लाभे' (धा.पा.1432) इत्यस्य।।

31. चर्मोदरयोः पूरेः। (3.4.31)
`पूरयतेः' इति। एतेन निर्देशे ण्यन्तस्येदं ग्रहणमित्याचष्टे। इह कर्मणीति वर्त्तते। न चाण्यन्तस्य पूरेः कर्म सम्भवति; अकर्मका हि धातवो ण्यन्ताः सकर्मका भवन्ति। तस्माण्ण्यन्तस्येदं ग्रहणं विज्ञायते।।

32. वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्। (3.4.32)
`समुदायेन' इति। प्रकृतिप्रत्ययोपपदसमुदायेन। एतेन वर्षप्रमाणस्य समुदायोपाधित्वं दर्शयति।
`अस्यग्रहणं किमर्थम्' इति। प्रकृतत्वात् पूरयतेः, अस्येति वचनमन्तरेणापि तस्यैव लोपो विज्ञास्यत इत्यभिप्रायः। `उपपदस्य मा भूत्' इति। यद्यस्येति नोच्येत ततो यथा वर्षप्रमाणं समुदायोपाधिर्विज्ञायते, ऊलोपोऽपि तथा समुदायोपाधिर्विज्ञायेत। प्कृतिप्रत्ययोपपदस्य समुदायस्य य ऊकारान्तस्य लोपो भवतीति, ततश्चोपपदस्यापि स्यात्। तस्मात् मा भूदेष दोष इति `अस्य' इत्युच्यते।।

33. चेले क्नोपेः। (3.4.33)
`ण्यन्तात्' इति। सपुक्कस्यायां निर्देशः। पुक् च `अर्त्तिह्री' (7.3.36) इत्यादिना णावेव परतो भवतीति। तस्मादत एव निर्देशाण्ण्यन्तताऽवगम्यते।
`चेलार्थेषु'इति। चेलमर्थो येषामिति बहुव्रीहिः। एतेन `चेल' इत्यस्यार्थग्रहणतां दर्शयति। अर्थग्रहणे च या युक्तिः सा `स्वादुमि णमुल्' (3.4.26) इत्यत्रोक्ता, सैवेहार्थग्रहणे द्रष्टव्या। `चेलक्नोपम्' इति। वलि यलोपः, `पुगन्तलघूपधस्य' (7.3.86) इति गुणः, णिलोपः।।

34. निमूलसमूलयोः कषः। (3.4.34)
`कषः' इति। `कष शिष' (धा.पा.685,687) इति हिंसार्थधातुवर्गे पठ्यते।।

35. शुष्कचूर्षरूक्षेषु पिधः। (3.4.35)
`पिषः' इति। `पिष्लृ सञ्चूर्णने' (धा.पा.1452)।।

36. समूलाकृतजीवेषु हन्कृञ्ग्रहः। (3.4.36)
`समूलघातम्' इति। `हो हन्तेर्ञ्णिन्नेषु' (7.3.54) इति कृत्वम्, `हनस्तोऽचिण्णलोः' (7.3.32) इति तत्वम्।।

37. करणे हनः। (3.4.37)
`अहिंसार्थोऽयमारम्भःट इति। हिंसायाम् `हिंसार्थानाम्' (3.4.48) इति वक्ष्यमाणेन सिद्धत्वा। `नित्यसमासार्थः' इति। हिंसार्थस्यापीति शेषः।
`उपपदमतिङ्' (2.2.19) इति नित्यसमासो यथा स्यादित्येवमर्थोऽयमारम्भः। तेन तु प्रत्यये सति `तृतीयाप्रभृतीन्यन्यतरस्याम्' (2.2.21) इति विकल्पेन स्यात्। `यथाविध्यनुप्रयोगार्थश्च' इति। `कषादिषु यथाविध्यनुप्रयोगः' (3.4.46) इति। यस्माद्धातोर्णमुल् विहितस्तस्यैवानुप्रयोगो यथा स्यात्, तेन तु प्रत्यये धात्वन्तर्सयानुप्रयोगः स्यात्।
ननु च यता हन्तिहिंसार्थो भवति तदा परत्वात् तेनैव भवितव्यम्, तत्कथं नित्यसमासार्थो यथाविध्यनुप्रयोगार्थश्च हिंसार्थस्य हन्तेरयमारम्भो युज्यते ? इत्यत आह-- `पूर्वविप्रतिषेधेन' इत्यादि।।

38. स्नेहने पिषः। (3.4.38)
`स्नेहनवाचिनि' इत्यनेन `स्नेहने' इत्यस्यार्थमाचष्टे।।

39. हस्ते वर्त्तिग्रहोः। (3.4.39)
`वर्त्तिर्ण्यन्तः' इति। निर्देशादेव वर्तेर्ण्यन्तत्वं प्रतीयते।।

40. स्वे पुषः। (3.4.40)
`स्वपोषम्' इति। आत्मवाचिनी स्वशब्द उपपदे प्रत्ययः। `गोपोषम्' इति। आत्मीयवाचिनि। `धनपोषम्' इति धनवाचिनि। `पितृपोषम्' इति ज्ञातवाचिनि।।

41.अधिकरणे बन्धः। (3.4.41)

42. संज्ञायाम्। (3.4.42)

43.कर्त्रोर्जीवपुरुषयोर्नशिवहोः। (3.4.43)
`नष्टः' इति। नशेर्व्रश्चादिसूत्रेण (8.2.36) षत्वम्, `मस्जिनशोर्झलि' (7.1.60) इत्यागमस्य नुमः `अनिदिताम्'(6.4.24) इत्यादिना लोपः। `पुरुषेणोढः' इति। वहेर्वच्यादिसूत्रेण (6.1.15) सम्प्रसारणम्, `सम्प्रसारणाच्च' (6.1.108) इति परपूर्वत्वम्, `हो ढः' (8.2.31), `झषस्तथोर्धोऽधः' (8.2.40), `ष्टुना ष्टुः' (8.4.41), `ढो ढे लोपः' (8.3.13), `ढ्रलोपे पूर्वस्य दीर्घोऽणः' (6.3.111) इति दीर्घः।।

44. ऊर्ध्वे शुषिपूरोः। (3.4.44)
`ऊर्ध्वं पूर्यते' इति। ऊर्ध्वं पूरितो भवतीत्यर्थः। अनुदात्तेत्त्वादात्मनेपदम्, दिवादित्वच्छ्यन्।।

45. उपमाने कर्मणि च। 93.4.45)
`घृतनिधायम्' इति। पूर्ववद् युक्।।

46. कषादिषु यथाविध्यनुप्रयोगः। (3.4.46)

47.उपदंस्तृतीयायाम्। (3.4.47)
इह `मूलकेनोपदंशं भुङ्क्ते' इत्यादौ करणे तृतीया, तदन्तं मूलकाद्युपपदम्। तच्च करणमुदंशेर्वा स्यात्, भुजेर्वा ? तत्रोपदंशेस्तावन्नोपपद्यते; अन्यस्मिन् {ह्युपदिश्यमाने-मुद्रितः पाठः} ह्युपदंश्यमानेऽन्यत् करणं भवति, इह च तदेव मूलकाद्युपदश्यते, नापरं किञ्चित्। भुजिं तु प्रत्युपपद्यत एव करणभावः, किन्तूपपदसंज्ञा न स्यात्, तदभावदुपपदसमासश्च; यस्मादुपपदमिति महत्याः संज्ञायाः करणं समर्थपरिभाषाया व्यापार्थम्, तेनेह तस्यामुपस्थितायां यमेव प्रति यस्य सामर्थ्यं तमेव प्रति तस्योपपदसंज्ञाया भवितव्यम्। भुजिं तु प्रति तस्योपपदसंज्ञया भवितव्यम्। भुजिं तु प्रति मूलकादेः सामर्थ्यम्, नोपदंशि प्रतीति चोद्यमाशङ्क्याह-- `मूलकादि चोपदंशे' इत्यादि। यद्यपि भुजिं प्रति मूलकादेः करणभावः तथाप्युपदंशिना सह सामर्थ्यमुपपद्यत एव; यतस्तस्य कर्म। न च भुजिना सरह सम्बन्धे सत्युपदंशिना सह सम्बन्धो निवर्त्तते; विरोधाभावात्। तस्मादुपपद्यत एवोपपदत्वम्, तस्मिंश्च सत्युपपदसमासः। `क्रियाभेदे सति'इति। क्रियाभेदग्रहणेन क्त्वाप्रत्ययविषयमुपलक्षयति। यत्र क्रियाणां पौर्वापर्यं समानकर्तृकत्वञ्च स क्त्वाप्रत्ययस्य विषयः। एतच्चोभयं क्रियाभेदे सति भवतीति क्त्वाप्रत्ययस्य विषय उपलक्ष्यते। `मूलकेनोपदश्य भुङ्क्ते' इति। `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः।।

48. हिंसार्थाञ्च समानसकर्मकाणाम्। (3.4.48)
धातुसम्बन्धाधिकारादनुप्रयोगेण भवितव्यम्, द्विष्ठत्वात्। तत्र प्रत्यासत्तेरनुप्रयोगधात्वपेक्षयैव समानकर्मत्वं विज्ञायत इत्याह-- `अनुप्रयोगधातुना' इत्यादि। `कालयति' इति। `{वेल कालोपदेशे (काल इति पृथग्धातुरित्येके)-धा.पा. कल क्षेपे-धा.पा.} काल विक्षेपे (धा.पा.1880)। `दन्तताडम्' इति। `तड आघाते' (धा.पा.1579), चुरादिरेव। `दण्डेनाहत्य' इत्यादि। अत्र हन्तेश्चौरः कर्म , अनुप्रयोगधातोश्च गौरिति समानकर्मकत्वाभावः। तेन क्त्वाप्रत्यय एव भवति। `आहत्य' इति। `अनुदात्तोपदेश' (6.4.37) इत्यादिनाऽनुनासिकलोपः, `ह्रस्वस्य पिति कृति तुक्' (6.1.71)।।

49. सप्तम्यां चोपपीजरुधकर्षः। (3.4.49)
`उपशब्दः प्रत्येकमभिसम्बध्यते' इति। रुधिकषिभ्यामुपपूर्वाभ्यामेव यथा स्यात्। `पार्श्वोपपीडम्' इति। `पीड अवगाहने' (धा.पा.1544), चुरादिः। `कर्षतेः' इत्यादि। `कृष विलेखने' (धा.पा.990, 1286) भ्वादौ तुतादौ च पठ्यते, तत्रेह भौवादिकस्य ग्रहणम्, न तौदादिकस्य; शपा निर्देशात्। शपा निर्देशस्तस्य कृतगुणस्योच्चारणाल्लभ्यते।।

50. समासत्तौ। (3.4.50)
`युद्धसंरभात्' इति। संरम्भः = मनः संक्षोभपूर्वको वाक्कायविकारविशेषः,युद्धाय संरम्भो युद्धसंरम्भः, तस्मादत्यन्तं सन्निकृष्यन्ते, प्तत्यासीदन्तीति यावत्।।

51. प्रमाणे च। (3.4.51)
`प्रमाणमायामः' इति। `आयामस्तु प्रमाणं स्यात्' इति वचनात्। दैर्घ्यमिति प्रसिद्धतरार्थेन शब्दान्तरेण प्रमाणशब्दस्यैवार्थं स्पष्टीकरोति। `द्व्यङ्गुलोत्कर्षम्' इति। द्व्योरङ्गुल्योः समाहारो द्व्यङ्गुलम्, `तत्पुरुषस्याङ्गुलेः' (5.4.86) इत्यादिनाऽच्। तेन द्व्यङ्गुलेन खण्डिकाया देर्घ्यं परिच्छिद्यते।।

52. अपादाने परीप्सायाम्। (3.4.52)
`शय्योत्थायम्'इति। `उदः स्थास्तम्भोः पूर्वस्य ' (8.4.61) इति पूर्वसवर्
णः, `आतो युक्' (7.3.33) एवम्' इत्यादिना परीप्सां दर्शयति। `रन्ध्रापकर्षम्' इति। एवं नाम त्वरते यत् पात्रमपि नापेक्षते, स्तनरन्ध्रादेवापकृष्य मुखेन पयः पिबतीत्यर्थः। `भ्राष्ट्रापकर्षम्' इति। एवं नाम त्वरते यद्भाजनमपि दीयमानं नापेक्षते, भ्राष्ट्रादेवापकृष्य हस्तेन भक्षयति।।

53. द्वितीयायाश्च। (3.4.53)

54. स्वाङ्गेऽध्रुवे। (3.4.54)
स्वाङ्गलक्षणमद्रवादि चतुर्थे वक्ष्यति। `अक्षिनिकाणम्' इति। `कण निमीलने' (धा.पा.1715), चुरादिर्निपूर्वः। `यस्मिन्नङ्गेच्छिन्ने प्राणी न म्रियते तदध्रतम्' इति। पाणिपादादिकम्। अध्रुवत्वं पुनस्तस्य जीवत्यपि प्राणिनि कदाचिदभावात्। यस्मिंस्त्वङ्गे च्छिन्ने प्राणी म्रियते तद्ध्रुवम्, शिरःप्रभृति। ध्रुवत्वं पुनस्तस्य सदा प्राणिनि सन्निवेशात्।।

55. परिक्लिश्यमाने च। (3.4.55)
`परिक्लेशः सर्वतो विबाधनम्' इति। सर्वतःशब्देन परिशब्दस्यार्थमाचष्टे। विबाधनशब्देनापि क्लिशेर्धातोः।।

56. विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः। (3.4.56)
`विश्यादिभिः क्रियादिभिः' इति। आदिशब्देन पत्यादित्रयाणां ग्रहणम्। `अनवयवेन' इति। साकल्येन। `पदार्थानाम्' इति। गेहादीनाम्।`तात्पर्यम्' इति। क्रियाणां पौनःपुन्यमाभीक्ष्यमित्यर्थः। `द्रव्ये व्याप्तिः' इत्यादिना व्याप्यमानासेव्यमानयोर्विषयविभागं दर्शयति। यदि व्याप्यमान आसेव्यमाने चार्थे प्रत्ययो भवति, एवञ्च सति तयोरर्थयोर्नित्यता वीप्सा च विद्यत इति `नित्यवीप्सयोः'(8.1.4) इति द्विवचनेन भवितव्यम्, तत् कस्मान्न भवति ? इत्याह--
`समानेन'इत्यादि। यद्यपि समासस्तयोरर्थयोर्न विधीयते, पुरस्तादेव प्रतिपादितम्। `तथा च वक्ष्यति'इति।भाष्यकारः। `सुप्सु वीप्सा 'इति वचनात्
`व्याप्तमानतायां द्रव्यवचनस्य द्विर्वचनं भवति'इत्युक्तं भवति। `तिङ्क्षु नित्यता'इति वचनात् `आसेध्यमानतायां क्रियावचनस्य द्विर्वचनं भवति' इत्युक्तं भवति।
`गेहंगेहम्'इति। द्रव्यमवचनस्य द्विर्वचमनम्। `गेहमनुप्रवेशमनुप्रवेशम्'इति। क्रियावचनस्य।`ननु च'इत्यादि देश्यं `क्त्वानिवृत्त्यर्थम्'इत्यादिना परमतमाशङ्क्य निराकरोति। स्यादेतत्, `आभीक्ष्ण्ये णमुल् च' (3.4.22) इत्यनेन क्त्वाणमुलौ द्वावपि विहितौ, तत्र यदि विश्यादिभ्यः पुनरासेवायां णमुल् विधीयेत तदा क्त्वाप्रत्ययोऽपि स्यात्। अतस्तन्निवृत्त्यर्थं पुनर्णमुलुच्यत इति ? एतच्च नास्ति; इष्टत्वात्। इष्यते ह्यासेवायां विशिप्रभृतिभ्यः क्त्वा--गेहमनुप्रविश्यानुप्रविश्यास्त इति। तस्मादयुक्तं तन्निवृत्त्यर्थं पुनर्णमुल्ग्रहणम्।
`द्वितीयान्तोपपदार्थम्' इत्यादि। यदि क्त्वानिवृत्त्यर्थं न प्रयुज्यते तदा द्वितीयान्तस्योपपदसंज्ञार्थं पुनर्वचनम्। अनेन `द्वितीयायाञ्च' (3.4.53) इत्यधिकाराद्द्वितीयान्त उपपदे प्रत्ययविधानम्। अतो द्वितीयान्तस्योपपदसंज्ञा लभ्यते। किमर्थं पुनर्द्वितीयान्तस्योपपदत्वमिष्यते ? इत्याह-- `उपपदसमासः' इत्यादि। पक्षग्रहणं `तृतीयाप्रभृतीन्यन्यतरस्याम्' (2.2.21) इति विकल्पेन समासविधानात्। स्यादेतत्--तेनापि णमुल्विधान उपपदसंज्ञा भविष्यतीत्यत आह--`तेन हि'इत्यादि। न हि तेनोपपदसम्बन्धे णमुल् विधीयते; सप्तमीस्थस्य कस्यचिच्छब्दस्याभावात्। तस्मात् तेन णमुल्विधाने सत्युपपदत्वाभाव एव स्यात्।।

57. अस्यतितृषोः क्रियान्तरे कालेषु। (3.4.57)
`अस्यतितृषोः'इति। `असु क्षेपणे' (धा.पा.1209), ञितृषा पिपासायाम्' (धा.पा.1228)। `क्रियामन्तरयति' इत्यादि। अन्तरं करोतीति
`तत्करोति'(वा.200) इत्यादिना णिच्। `क्रियामन्तरयति क्रियान्तरः' (इति) कर्मण्यण्, णिलोपः।अन्तरशब्दश्चायमिह व्यवधाने वर्त्तत इति दर्शयन्नाह--
`क्रियाव्यवधायकः'इति। `पाययति'इति। `पा पाने' (धा.पा.925), णिच्। `शाच्छा'(7.3.37) इत्यादिना युक्। `अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते' इति। यच्चायं पानं यच्च द्व्यहेऽतीते पानं भविता तन्मध्यवर्तित्वादतयसननतर्षणयोः। `अद्य पाययित्वा' इत्यादिना द्व्यहात्यासं गाः पाययतीत्यस्यार्थमाचष्टे। एतदनुसारेणान्यस्याप्यर्थो गम्यत इतिन व्याख्यातः।

`द्व्यहमुपोध्य'इति। `वस निवासे'(धा.पा.1942), वच्यादिना (6.1.15) सम्प्रसारणम्, क्त्वो ल्यबादेशः `शासिवसिघसीनाञ्च' (8.3.60) इति षत्वम्। अत्रोपवसने भुजिक्रियाव्यवधायके वसिर्वर्त्तते। अत्र `अस्यतितृषोः'इति यदि नोच्येत तदेहापि स्यात्। `न गतिर्व्यवधीयते' इति। यथा मलोदाहरणेऽत्यसनेन तर्षणेन च मध्यवर्त्तिना पानक्रिया व्यवधीयते, न तथेह गतिः। तत्र चाहञ्छब्दात् `कालाध्वनोरत्यन्तसंयोगे' (2.3.5) इति द्वितीया। सकलस्याह्न इष्वत्यसनेन व्याप्तत्वादिषुशब्दात् कर्मण्येव। `योजनमत्यस्य गाः पाययति' इति। अत्राध्ववाच्युपपदम्। क्वचित् स्रुध्नादौ पाययित्वा योजनमतिक्रम्य पाययतीत्यर्थः। `अध्वकर्मकम्', `न कालकर्मकम्'इति द्वावपि बहुव्रीही।।

58. नाम्न्यादिशिग्रहोः। (3.4.58)
`आदिशेः' इति। `दिश अतिसर्जने' (धा.पा.1283)), आङ्पूर्वः।।

59. अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ। (3.4.59)
`अयथाभिप्रेताख्याने' इति। यद्यदभिप्रेतमिष्टं यथाभिप्रेतम्, `यथाऽसादृश्ये'(2.1.7) इति वीप्सायामव्ययीभावसमासः, न यथाभिप्रेतमयथाभिप्रेतम्। अप्रियमित्यर्थः। `आचक्षे'इति। आङ्पूर्वाच्चक्षिङो लट्; `थासः से'(3.4.80), `स्कोः संयोगाद्योरन्तेच'(8.2.29) इति ककारलोपः, `षढोः कः सि' (8.2.41) इति कत्वम्,`इण्कोःट (8.1.57) इति षत्वम्।
`उक्तम्' इति। क्वोक्तम् ? `उपदंशस्तृतीयायाम्' (3.4.47) इत्यत्र। उपपदसमासार्थं वचनमिति च। `क्त्वा च' (2.2.22) इत्यनेनोपपदसमासः पक्षे यथा स्यात्। कस्मात् पुनरनेन यः क्त्वा विहितस्तेन समासो भवति ? यस्तु `समानकर्तृकयोः' (3.4.21) इत्यादिना विहितस्तेन न भवति ? इत्याह-- `तथा हि' इत्यादि। `क्त्वा च'(2.2.22) इत्यत्र `तृतीयाप्रभृतीनि' (2.2.21) इत्यनुवर्त्तते। तस्मादनेन यः क्त्वा विहितस्तेनैव पक्षे समासो भवति, न तु तेन, तृतीयाप्रभृतिषूपपदेषु क्त्वा विधीयते। अथ णमुल्ग्रहणं किमर्थम्; यावता णमुलनुवर्त्तत एव,ततः त्तवा चेति वक्तव्यम् ? इत्याह-- `णमुलधिकारे' इत्यादि। तुल्यकक्षत्वं तद्वत् तुल्यबलत्वम्। `तेन' इत्यादि। ज्ञापकस्य प्रयोजनं दर्शयति। यदि `क्त्वा च' इत्युच्येत। चकारेण यत्नादनुकृष्टो णमुलुत्तरत्र नानुवर्त्तेत; यत्नाभावात्। यथा तेन क्त्वाप्रत्ययस्यान्वाचीयमानता विज्ञायेत ततश्चोत्तरत्र तस्याप्रधान्यादनुवृत्तिर्न स्यात्। पुनर्णमुल्ग्रहणे सति सहनिर्देशात् क्त्वाणमुलोर्गुणप्रधानभावो न भवतीति द्वयोरप्यनुवृत्तिर्भवति।।

60. तिर्यच्यपवर्गे। (3.4.60)
`तिर्यक्कृत्वा' इति। तिरोऽञ्चतीति ऋत्विगादिना (3.2.59) क्विन्। `झलां जशोऽन्ते' (8.2.39) इति चकारस्य जकारे कृते `क्विन्प्रत्ययस्य कुः'(8.2.62) इति कुत्वम्--गकारः, तस्यापि चर्त्वम्-- ककारः, `तिरसस्तिर्यलोपे' (6.3.94) इति तिर्यादेशः। `तिर्यक्कृत्वा `{काष्ठं इति मूलपाठः} काण्डं गतः'इति। अनृजु कृत्वा। पार्श्वतः कृत्वेत्यर्थः।
अथ `तिर्यचि' कोऽयं निर्देशः, यावता भसंज्ञायां सत्यां `अचः' (6.4.38) इत्यकारलोपे कृते तिरश्चीति भवितव्यमित्यत आह-- `तिर्यचि' इत्यादि। सर्वत्र ह्यनुकरणभूतशब्दः शब्दस्वरूपस्यैवानुकरणम्। एतावांस्तु विशेषः-- क्वचिच्चब्दपदार्थस्यानुकरणम्, क्वचिदर्थस्येति। तत्रानुकरणमित्येतावपि वक्तव्ये शब्दरूपग्रहणं शब्दरूपमात्रस्यार्थरहितस्यैतदनुकरणमिति ज्ञापनार्थम्। तदेतदुक्तं भवति-- शब्दपदार्थको यस्तिर्यक्छब्दस्तस्येदमनुकरणम्, न तु स एव। तेन शब्दान्तरत्वादकारलोपो न भवतीति भावः। नन्वेवमपि `प्रकृतिवदनुकरणं भवति'(व्या.प.113) इति भवितव्यमेवात्र प्रकृतिकार्येणाकारलोपेन ? इत्यत आह-- `न च' इत्यादि। अत्रैवोपपत्तिमाह--`अनुक्रियमाणरूपविनाशप्रसङ्गात्' इति। यद्यत्र प्रकृतिकार्यं स्यात् ततो यादृशमनुकरणं तिर्यगिति शब्दरूपं तस्य विनाशोऽनुपलब्धिः स्यात्। यादृशमनुकर्त्तुमिष्टमकृताकारलोपं तादृशं न प्रतीयेतेत्यर्थः। यतएवं प्रकृतिवदनुकरणभावे सत्येष दोष आपतति, ततोनेह प्रकृतिवदनुकरणेन भवितव्यम्। `प्रकृतिवदनुकरणं भवति' (व्या.प.113) इत्यस्य तु यत्रार्थपदार्थस्यानुकरणं सोऽवकाशो वेदितव्यः। क्व च यथा प्रकृतिवदनुकरणं भवतीत्याह-- `एतदोऽश्' इत्यादि। एतदोऽदस इत्युभयमप्येतच्छब्दरूपपदार्थकस्यानुकरणम्। यदि च शब्दपदार्थकस्य यदनुकरणं तस्यापि प्रकृतिभावः स्यात्, तदा त्यदाद्यत्वादिके प्रकृतिकार्ये कृते-- एतस्य, अमुष्येति रूपं स्यात्। तस्याद्यथेह प्रकृतिभावो न भवति,तथातिर्यचीत्यत्रापि।।

61.स्वाङ्गे तस्प्रत्यये कृभ्वोः। (3.4.61)
`यथासंख्यमत्र नेष्यते' इति। कथं पुनरिष्यमाणमपि न भवति, यावता द्वे प्रकृती, प्रत्ययावपि द्वावेवेत्यस्ति यथासंख्यप्राप्तिनिमित्तम् ? `कृभ्वोः' इति निर्देशाल्लक्षमव्यभिचारचिह्नात्। इह प्रत्यये विधीयमाने `परश्च' (3.1.2) इति सम्बन्धाद्दिग्योगलक्षणया पञ्चम्या भवितव्यम्, ततर् कृभूभ्यामिति पञ्चमीनिर्देशे कर्त्तव्ये योऽयं `कृभ्वोः' इति निर्देशाल्लक्षणव्यभिचारचिह्नात्। इह प्रत्यये विधीयमाने `परश्च' (3.1.2) इति सम्बन्धाद्दिग्योगलक्षणया पञ्चम्या भवितव्यम्, तत्र कृभूभ्यामिति पञ्चमीनिर्देशे कर्त्तव्ये योऽयं `कृभ्वोः' इति षष्ठीनिर्देशः स लक्षणव्यभिचारचिह्नम्, तेन यथासख्याभाव इति वेदितव्यम्। `मुखतः' इति। `अपादाने चाहीयरुहोः' (5.4.45) इति तसिः।
`मुखीकृत्य' इति। अत्र मुखशब्दश्च्व्यन्तः। `अभूततद्भावे' (5.4.50) इत्यादिना च्विः, `अस्य च्वौ' (7.4.32) इतीत्त्वम्। `मुखे तस्यति' इति। `तसु

उपक्षये', (धा.पा.1212) `अन्येभ्योऽपि दृश्यते' (3.2.178) इति क्विप्, हल्ङ्यादिना (6.1.68) सुलोपः, रुत्वविसर्जनीयौ। धातुरत्र तस्शब्दः, न तु प्रत्ययः। तेन तदन्त ङपदेशे क्त्वाणमुलौ न भवतः, `समानकर्त्तृकयोः' (3.4.21) इति क्त्वैव भवति।।

62. नाधार्थप्रत्यये च्व्यर्थे। (3.4.62)

`नार्थो धार्थश्च' इति। नाप्रत्ययसहचरितोऽर्थो ना इत्युच्यते, धाप्रत्ययसहचरितश्च धा इति। नाऽर्थो यस्य प्रत्ययस्य स नार्थः धाऽर्थो यस्य प्रत्ययस्य स धार्थ इति। `द्विधाकृत्य' इति। `संख्याया विधार्थे धा' (5.3.42)। `द्वैधं कृत्वा' इति। `द्वित्र्योस्च धमुञ्' (5.3.45) इति धमुञ्। `द्वेधाकृत्य' इति। `एधाच्च' (5.3.46) इत्येधाच्।

`हिरुक् कृत्वा, पृथक् कृत्वा' इति। असति प्रत्ययग्रहणे हिरुक्पृथक्शब्दयोरसहार्थत्वात् नार्थत्वनमस्तीति तयोरप्युपपदयोः क्त्वाणमुलौ स्याताम्। पूर्वसूत्रादेव प्रत्ययग्रहणानुवृत्त्या सिद्धे पुनरिह प्रत्ययग्रहणं सुखप्रतिपत्त्यर्थम्। पूर्वकं हि प्रत्ययग्रहणं समासैकदेशत्वाद्यत्नानुवृत्तं स्यात्। `नाना कृत्वा काष्ठानि गतः' इति। च्व्यर्थोऽत्र नास्ति; प्रकृत्यन्यावस्थाया अविवक्षितत्वात्। `धार्थमर्थग्रहणम्' इति। धाप्रत्ययोऽर्थः प्रयोजनं यस्य तत् तथोक्तः। धार्था हि प्रत्यया बहवः,तत्रसत्यर्थग्रहणे धाप्रत्ययस्यैव ग्रहणं स्यात्, नान्येषां तदर्थानाम्। अथग्रहणे तु सति तेषामपि ग्रहणं भवति। अथ नार्थमप्यर्थग्रहणं कस्मान्न भवति ? इत्याह-- `ना पुनरेक एव' इति। अर्थग्रहणं हि तत्र क्रियते यत्र बहवो ग्राह्याः सम्भवन्ति, नाप्रत्ययस्त्वेक एव,तस्य चार्थग्रहणमन्तरेण सिध्यतीति न तदर्थमर्थग्रहणम्। ननु च घमुञादीनामपि स्थानिवद्भावादेव धाग्रहणेन ग्रहणं भविष्यति, अतोधार्थमप्यर्थग्रहणमयुक्तम् ? नैष दोषः; अघादेशोऽपि धार्थप्रत्ययोऽस्ति, `घमुञन्तात् स्वार्थे डदर्शनम्' (व्या.प.610) इति वचनात्। तस्माद्धार्थमर्थग्रहणं कर्त्तव्यम्।

वयं तु ब्रूमः-- नार्थमप्यर्थग्रहणं कर्त्तव्यमेव। तथा हि-- द्वौ नाप्रत्ययौ; एको निरनुबन्धकः, द्वितीयः सानुबन्धकः। तत्रासत्यर्थग्रहणे `निरनुबन्धग्रहणे न सानुबन्धकस्य' (व्या.प.53) इति नाप्रत्ययस्यैव ग्रहणं स्यात्, न सानुबन्धकस्य नाञः। अर्थग्रहणे तु सति तस्यापि ग्रहणं भवति।।

63. तूष्णीमि भुवः। (3.4.63)

ननु च `स्वाङ्गे तस्प्रत्यये कृभ्वोः' (3.4.61) इत्यतो भूग्रहणमनुवर्त्तत एव, तत् किमर्थं भुव इतीहोच्यते ? इत्याह-- `भूग्रहणम्' इत्यादि। पूर्व हि भूग्रहणं कृञा सम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्; अतस्तन्निवृत्यर्थं पुनरिह भूग्रहणम्।।

64. अन्वच्यानुलोम्ये। (3.4.64)

`अन्वचि' इति निर्देशस्तिर्यचीत्यनेन व्याख्यातः। `अन्वग्भूय'इति। पूर्ववत् क्विनि कृते तदन्तस्य जश्त्वे कृते च रूपम्। `अन्वग्भूत्वाट इति। अनुचरो भूत्वा तिष्ठतीत्यर्थः।।

65. शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्। (3.4.65)

ननु च `तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (3.3.10) इत्येवं शकादिषूपपदेषु तुमुन् सिद्धः, तत् किमर्थोऽयमारम्भ इत्याह-- `अक्रियार्थोऽयमारम्भः' इति। अक्रियार्थेष्वपि शकादिषु तुमुन् यथा स्यादित्येवमर्थोऽयमारम्भः। न हि शक्नोति भोक्तुमित्यादौ क्रियार्थोपपदं गम्यते। किं तर्हि ? अर्थान्तरम्, अन्यदेव। इह तावत्-- `शक्नोति भोक्तुम्, उत्सहते भोक्तुम्, जानाति भोक्तुम्' इति प्रावीण्यं गम्यते। `ग्लायति भोक्तुम्' इति तदशक्तता गम्यते, `घटयति भोक्तुम्, अर्हति भोक्तुम्' इति तद्योग्यतामात्रम्। `आरभते भोक्तुम्, प्रक्रमते भोक्तुम्' इति भुजेरेवाद्यावस्थानक्रियान्तरम्। `लभते भोक्तुम्' इति प्रत्याख्यानम्। `अस्ति भोक्तुम्' इत्यादौ सम्भवमात्रम्।।

66. पर्याप्तिवचनेष्वलमर्थेषु। (3.4.66)

`पर्याप्तिरन्यूनता' इति। परिपूर्णतेत्यर्थः। `अलमर्थविशिष्टेषु' इति। यद्यपि भूषणादयोऽलमर्थाः, तथापि पर्याप्तिवचने सामर्थ्येमेव सम्भवतीति तदेव गृह्यते। प्रयोगदर्शनार्थबोधेन व्याख्यानतो वा। तेनालमर्थविशिष्टेष्वित्ययमर्थो भवति। यद्येवम्, सामर्थ्येष्वित्येवं कस्मान्नक्तम् ? नैवं शक्यम् ; एवं ह्युच्यमाने सामर्थ्येन भुङ्क्ते, बलेन भुङ्क्त इत्यादावपि स्यात्। यथान्यासे तु न दोषः; न ह्यत्र पर्याप्तिर्दृश्यते। किं तर्हि ? सौकर्यम्। सुकरमेतदित्यर्थः। यथाविध्यस्य सम्भवमात्रं विवक्षितम्, सम्भवत्येवंविधस्य करणमित्यर्थः।।

67. कर्त्तरि कृत्। (3.4.67)

किमर्थमिदम् ? कर्त्तरि तृजादयो यथा स्युः। क्व तर्हि स्युः ? अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे (पु.प.पा.90)। ननु च स्वार्थे यत्र प्रत्ययमिच्छति तत्र भावग्रहणं करोति, यथा-- घञादिविधौ भाव इति, न चैते घञादयः स्वार्थे भवन्ति, किं तर्हि? तस्य धर्मे सिद्धताख्ये; तथा लकारादिविधौ `लः कर्मणि च भावे चाकर्मकेभ्यः'(3.4.69) इत्यत्र सूत्रे लकारा अपि नैव स्वार्थे विधीयन्ते, किं तर्हि ? तस्य धर्मे साध्यताख्ये ? यद्यपि घञादीनां लकाराणाञ्च भावे विधानम्, तथापि शब्दशक्तिस्वाभाव्यादेष विषयविभागो लभ्यते। घञादीनां हि धात्वर्थस्य सिद्धतामेवाभिधातुं सामर्थ्यम्, लकाराणां साध्यतामेव। तदेवं यदनिर्दिष्टार्थाः

प्रत्ययाः स्वार्थे भवन्ति, तस्मात् तृजादयोऽपि तत्रैव भवेयुः, अतः कर्त्तर्येव ते यथा स्युरित्येवमर्थमिदमारभ्यते।
अत्र च द्वेधम्-- कृदुत्पत्तिवाक्यानामयं शेषो वा स्यात्-- ण्वुल्तृचौ कर्त्तरि, नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः कर्त्तरीति ? अर्थादेशो वा ? निरपेक्षैः स्वैः स्वैर्विधायकैर्वाक्यैर्विहितानां कृतां पश्चादनेनार्थ आदिश्येत-- ये न लक्षणान्तरैः कृतो विहितास्ते कर्त्तरि वाच्ये भवन्तीति। तत्र यदि द्वितीयः पक्ष आश्रीयेत ततो यथा तृजादीनामनेनर्थ आख्यायते, तथा ख्युन्नादीनामपि; विशेषानुपादानात्, ततस्तेऽपि कर्त्तरि स्युः। स्वेषु विधिवाक्येषु करणादीनामुपादानात् कणादिष्वपि। यद्यप्येकस्य प्रत्ययस्य कर्त्तरि करणे च यगुपद्वृत्तिर्न सम्भवति, तथापि वचनसामर्थ्यात् पर्यायेण कर्त्तरि करणे च स्युरिति। तस्माद्दुष्टोऽयं पक्ष इति प्रथमं पक्षमाश्रित्याह-- `कृदुत्पत्तिवाक्यानाम्' इत्यादि। अनेन तेषामस्य चैकवाक्यतामाह। यद्येवम्, ख्युन्नादिवाक्येष्वप्यनेनोपस्थातव्यम्-- तेषामप्ययं शेष इति कृत्वा, ततश्चास्मिन्नपि पक्षे द्वितीये पक्षे भावी दोषः स्यात्? इत्यत आह-- `तत्र येषु' इत्यादि। तत्रैव हे ुतमाह-- `अर्थाकाङ्क्षत्वात्' इति। शेषो हि तेषां भवति यान्यपरिसमाप्तत्वादर्थमाकाङ्क्षन्ति, नान्येषाम्। अतो येषु वाक्येष्वर्थो न ादिश्यते तेषामेव साकाङ्क्षत्वात् शेषोऽयं युक्तः। तृजादीनामेव विधायकानि वाक्यान्यर्थानादशादर्थाकाङ्क्षाणि। तथा हि-- `ण्वुल्तृचौ भवतः' इत्युक्तेऽर्थविशेषाकाङ्क्षा भवति-- क्वेमौ भवत इति। तस्मात् तेषामेवायं शेष इति तेष्वेवोपतिष्ठते। `न ख्युन्नादिवाक्येषु' इति। `उपतिष्ठते' इति। प्रकृतेनैव सम्बन्धः। `साक्षात्' इत्यादि। अनुपस्थाने कारणम्।
ख्युन्नादिवाक्यान्यर्थाकाङ्क्षाणि न भवन्ति, तेषु करणादीनामर्थानां साक्षान्निर्देशात्। तस्यान्न तेषामयं शेष इति न तेषूपतिष्ठते,अतो न भवत्येष दोषप्रसङ्गः।।

68. भव्यगेयप्रवचीयोपस्थानीयजन्याप्लाव्यापात्या वा। (3.4.68)
भव्यादिषु गेयप्रवचनीयोपस्थानीयाः सकर्मकाः। तेन तेषां कर्मणि प्राप्ते कर्त्तरि च निपातनम्। शेषाणामकर्मकाणां भावे कर्त्तरि च। `भव्यः' इति। `अचो यत्' (3.1.97), गुणः, `धातोस्तन्निमित्तस्यैव' (6.1.80) इत्यवादेशः। `गेयः' इति। `ईद्यति' (6.4.65) इतीत्त्वम्,गुणः। `साम्नाम्' इति। कर्मणि कृद्योगलक्षणा षष्ठी। `उपस्थानीयः' इति। अनीयर्। `जन्यः'इति। `अचो यत्' (3.1.97) इत्यत्र `तकिशसियतिचतिजनीनामुपसंख्यानम्' (वा.213) इति यत्। `आप्लाव्यः' इति। प्लवतेः `ओरावश्यके' (3.1.125) ण्यत्,वृद्धिः, पूर्ववदावादेशः। `आपात्यः' इति। `ऋहलोर्ण्यत्' (3.1.124)।।

69. लः कर्मणि च भावे चाकर्मकेभ्यः। (3.4.69)
पूर्वसूत्रेण कृत्संज्ञकत्वाल्लकारः कर्त्तर्येव प्राप्नोति न भावकर्मणोः, अतस्तयोरपि यथा स्यादित्येवमर्थमिदमारब्धम्। `ल इत्युत्सृष्टानुबन्धकम् इत्यादि। लडादीनां दशानां लकारानां विशेषकराननुबन्धानुत्सृज्य `लः' इति सामान्यं गृह्यते। `प्रथमाबहुवचनान्तञ्चैतत्' इति। पञ्चमीषष्ठेकवचनाशङ्कां निराकरोति। पञ्चम्यां ह्यस्यां लकारात् परो यस्तस्यैवार्थो निर्दिष्टः स्यात्, ततश्च कर्त्तर्येव लकारः स्यात्, षष्ठ्यामेवास्यामनन्तर्यलक्षणा विज्ञायेत। तथा च लकारस्य योऽनन्तरस्तस्यैवार्थनिर्देशः स्यात्, ततश्च स एव दोषो यः पञ्चम्याम्। अत्राप्यादेशापेक्षया षष्ठी विज्ञायते ?एवमपि लकारादेशानामनेनामर्थो निर्दिश्यत इत्ययमेव विषयार्थो न निर्दिष्टः स्यात्। ननु च लकारस्य प्रयोग एव नास्ति, तत्कथं तस्यैव कर्मादयोऽर्थाः ? सामर्थ्यात् तदादेशानामेतेऽर्था विज्ञास्यन्त इत्यदोषः। `सकर्मकेभ्यो भावे न भवन्ति' इति। अकर्मकेभ्य इति वचनात्; अन्यथा हि तदनर्थकं स्यात्।।

70.तयोरेव कृत्यक्तखलर्थाः। (3.4.70)
`तयोरेव भावकर्मणोः' इति। एतेन `तयोः' इत्यनेन `भावकर्मणोः' इत्यस्य प्रत्यवमर्श इति दर्शयति। ननु चानन्तरसूत्रे द्वे वाक्ये-- `लः कर्मणि भवन्ति कर्त्तरि च' इत्येकं वाक्यम्, `भावे चाकर्मकेभ्योऽपि भवन्ति कर्त्तरि च' इति द्वितीयम्, तत्रानन्तरवाक्यश्रुतयोः कर्तृभावयोरेव तयोरित्यनेन प्रत्यवमर्शो युक्तः ? नैष दोषः। यदयमुत्तरसूत्रे `कर्त्तरि च' (3.4.71) इति करोति,ततोऽवसीयते--- भावकर्मणोरेव प्रत्यवमर्श इति यदि भावकर्त्रोरेव प्रत्यवमर्शः स्यात्, कर्तृग्रहणमनर्थकं स्यात्; कर्त्तर्यनेनैव सिद्धत्वात्। एवं हि तत्र वक्तुं युक्तं स्यात्-- कर्मणि चेति, कर्मणि केनचिदप्राप्तः स्यात्। यदा पुनरिह भावकर्मणोः प्रत्यवमर्शस्तदा युक्तं कर्त्तरिग्रहणम्, कर्त्तर्यप्राप्ते यथा स्यात्। यथाप्राप्तं भावकर्मणोः। तस्माद्भावकर्मणोरेव प्रत्यवमर्शो युक्तः। `एवकारः' इत्यादिना एवकारस्य व्यवच्छेद्यं अपकर्षणार्थः = निवृत्त्यर्थः।
`शयितम्' इति। `निष्ठा शीङ' (1.2.19) इत्यादिना कित्त्वप्रतिषेधाद्गुणः।
`ईषत्करः,सुकरः' इति। `ईषदुःसुषु' (3.3.126) इत्यादिना खल्।
`ईषदाढ्यंभवम्' इति। अत्रापि `कर्त्तृकर्मणोश्च भूकृञोः (3.3.127)।।

71. आदिकर्मणि क्तः कर्त्तरि च। (3.4.71)
`आदिकर्मणि' इति। आदिश्चासौ कर्म चेति विशेषणसमासः। `क्रियाक्षणः' इति। एतेन कर्मशब्दोक्रियां कर्माचष्टे, न साधनं कर्मेति दर्शयति। कुतः पुनरेतदवसितम्-- `क्रियां कर्माचष्ट इति ? आदिशब्देन विशेषणात्। बहुनां क्रियाक्षणनामादिमध्यान्तभावे सत्यनादिभूतक्रियाक्षमव्यवच्छेदादादिभूतो यः क्रियाक्षणस्तदादिकर्मेति युक्तं प्रतिपादयितुम्। आदिग्रहणेन साधनं कर्म त्वेकमेवेत्यादिशब्देन विशेषयितुं न शक्यते; आदेरनादिभूतत्वापेक्षत्वादादिशब्दस्य तत्राप्रवृत्तिः, व्यवच्छेद्याभावात्। आदिकर्मणि च `भूते' (3.2.84) इत्यनुवर्त्तमाने `निष्ठा' (3.2.102) इत्यनेनैव विहित इति दर्शयतिन्नाह--`तस्मिन्'

इत्यादि। आद्यो यः क्रियाक्षणः स परिनिष्पन्नत्वाद्भूतो भवतीति युक्ता तस्य भूतत्वेन विवक्षितता। `प्रकृतः कटं देवदत्तः' इति। कर्त्तरि क्तः। तेनैव कर्त्ताऽभिहित इति देवदत्तशब्दात् तृतीया न भवति। कर्मणस्त्वनभिहितत्वात् कटशब्दाद्द्वितीया भवत्येव। `प्रकृतः कटो देवदत्तेन' इति। अत्र कर्मणि क्तः। तेनैव कर्णणोऽभिहितत्वाद्द्वितीया न भवति। कर्त्तरनभिहितत्वाद्देवदत्तशब्दात् तृतीया भवत्येव। `प्रकृतं देवदत्तेन' इति। भावे क्तप्रत्ययः। सर्वत्र् प्रशब्द आदिकर्म द्योतयति। ननु चादिभूतक्रियाक्षमकाले कटोऽनभिनिर्वृत्त एव भवति, कटकारणभूता एव पीरणादयस्तदानीं सन्ति, न च तदवस्थः कटः तदवस्थः कटः, तत्कथं प्रकृतः कट इति भूतकालेन प्रकृतशब्देन कटस्य सामानाधिकरण्यम् ? आद्येन क्रियाक्षणेन यो वीरणादीनां विशेष आहितस्तत्र तादर्थ्यात् कटशब्दो वर्त्तते, स च भूत एवेत्यदोषः।।

72. गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च। (3.4.72)

`उपस्थितः' इति। `द्यतिस्यतिमास्थामिति किति' (7.4.40) इत्तीत्वम्। `अनूषितः' इति। वच्यादिना (6.1.15 सम्प्रसारणम्, `वसतिक्षुधोः' (7.2.52) इतीट्, `शासिवसिघसीनाञ्च' (8.23.60) इति षत्वम्। `अनुजातः' इति। `जनसनखनां सञ्झलोः' (6.4.42) इत्यात्त्वम्। `आरूढः' इति। `हो ढः' (8.2.31), `झषस्तथोर्द्धोऽधः' (8.2.40) इति धत्वम्, `ष्टुना ष्टुः' (8.4.41), ` ढो ढे लोपः' (8.3.13), `ढ्रलोपे पूर्वस्य' (6.3.111) इति दीर्घः। `अनुजीर्णः' इति। `जृ वयोहानौ' (धा.पा.1494), `ऋत इद्धातोः' (7.1.100) इतीत्त्वम्, `हलि च' (8.2.77) इति दीर्घत्वम्, `रदाभ्याम्' (8.2.42)इत्यादिना नत्वञ्च।

ननु च श्लिषादीनामकर्मकत्वादेव सिध्यतीति तत्किमर्थमेषां ग्रहणमित्याह-- `श्लिषादयः' इत्यादि। `तदर्थम्' इति। सकर्मकार्थमित्यर्थः।।

73. दाशगोघ्नौ सम्प्रदाने। (3.4.73)

`गोघ्नः' इति। स एव हन्तेः पचाद्यच्। सम्प्रदानेऽच् निपात्यते, उपधालोपश्च। अथ वा-- टक्प्रत्ययो निपात्यते, उपधालोपश्च `गमहन' (6.4.98) इत्यादिनैव सिद्धः, `हो हन्तेः' (7.3.54) इत्यादिना कुत्वम्। यदि सम्प्रदाने `गोघ्नः' इति निपात्यते, ततश्चाण्डालादेरपि तेनाभिधानं प्राप्नोति; यस्मात् तस्मै अपि ये ह्यागताय दातुं घ्नन्ति तेऽपि सुकृत इत्यत आह-- `निपातनसामर्थ्यात्' इत्यादि। यथैव ह्यत्र निपातनसामर्थ्यात् किञ्चिदलाक्षणिकं कार्यं लभ्यते तथाऽर्थविशेषोऽपि। तस्माद्यद्यपि `गोघ्नः' इत्यविशेषेण निपात्यते, तथापि विशिष्टस्यैव। तेन ऋत्विगादेरभिधानम्, नान्यस्य चाण्डालादेः। यदा तर्हि दातुं हन्यते तदा तस्य गोघ्न इत्यभिधां न प्राप्नोतीत्यत आह-- `असत्यपि' इत्यादि। यथा ह्यपचन्नपि योग्यतया पाचक इत्युच्यते, तथाऽसत्यपि गोहनने गोघ्न इति।।

74. भीमादयोऽपादाने। (3.4.74)

`{उणादिप्रत्ययान्ता एते-- काशिका'} ऊणादिप्रत्यया एते'। इति। उणादयः प्रत्यया येषां ते तथोक्ताः। के पुनस्त उणादयः प्रत्ययाः ? इत्यत आह-- `श्याधूसूभ्यो मक्' इत्यादि। आदिशब्देन मङ्क्वन्नादीनां ग्रहणम्। यदि तर्ह्युणादिप्रत्यया एते, एवं सत्युणादिप्रत्ययानां रूढिशब्दात् क्रियाकारकसम्बन्धाभावादपादाने वृत्तिर्न सम्भवत्येव ? नैष दोषः; रूढिशब्देष्वपि केषाञ्चित् क्रियाकारकसम्बन्धोऽस्त्येव, यथा-- तैलपायिकादिषु। अतोऽदेश्यमेतत्। `ताभ्याम्' इत्यादि। ननु चासत्यस्मिन् सूत्रे ताभ्यामित्येष निर्देशो नोपपद्यते; अपादानस्याप्रकृतत्वात्, तत्कुतः पर्युदासस्य प्रसङ्गः ? नैष दोष-; अर्थकत्वमेतत्। अस्मिन् ह्यसति तत्रैवं सूत्रं कर्त्तव्यम्-- ततोऽपादानाच्चान्यत्रोणादय इति। तथा च यदीदं नोच्येत,तदा स्यादेव पर्युदासः।।

75. ताभ्यामन्यत्रोणादयः। (3.4.75)

अथ किमर्थं ताभ्यामित्यनेन सम्प्रदानापादानप्रत्यवमर्शः क्रियते, एतावदेव वक्तव्यम्-- अव्यत्रोणादय इति, प्रकृतत्वादेव हि तयोस्ताभ्यामन्यत्रोणादयो विज्ञास्यन्ते ? अत आह-- `सम्प्रदानप्रत्यवमर्शार्थम्' इत्यादि। `अन्यथा हि' इत्यादि। यदि `ताभ्याम्' इत्यनेन तयोः प्रत्यवमर्शो न क्रियते इत्यर्थः। `अनन्तरत्वात्' इत्यादि। `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इति न्यायादपादानस्यैव पर्युदासः स्यात्, यदि ताभ्यामिति निर्देशो न क्रियेत। `कृषिः' इति। `इक् कृष्यादिभ्यः' (वा.324) इतीक्। `तन्तुः' इति। `सितनिगमिमसिसच्याविधाञ्क्रुशिभ्यस्तुन्' (द.उ.1.122) इति तुन्। `चर्म' इति । मनिन्।।

76. क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः। (3.4.76)

ननु च नेयं लोके प्रसिद्धिः -- ध्रौव्यार्था अकर्मकाः, प्रत्यवसानार्था अब्यवहार्था इति, तत्कथमयमर्थो लभ्यते ? इत्यत आह-- `स्वनिकायप्रसिद्धिः' इति। स्वनिकायः = वैयाकरणसङ्घः, तत्रेयं प्रसिद्धिः। `कर्तृभावाधिकरणेषु' इति। भावकर्मणोः `तयोरेव' (3.4.70) इत्यादिना। `इदमेषाम्' इति। `अधिकरणवाचिनाम्' (2.3.68) इति षष्ठी।

`कथम्' इत्यादि। `भुक्ता ब्राह्मणाः, पीता गावः' इति। कर्त्तरि निष्ठा, अन्यथाऽनभिहितत्वात् कर्त्तुर्ब्राह्मणशब्दाद्गोशब्दच्च कर्त्तरि तृतीया स्यात्। न

प्रत्यवसानार्थेभ्यः केनचित् कर्त्तरि क्तो विहितः, तत्कथमेतौ सूत्रादनन्तरमिदं कस्मान्न पठ्यते, एकः एवं सति गुणो भवति, द्विः क्तग्रहणं न कर्त्तव्यं भवति। तदेवं वक्तव्यम् --आदिर्मणि क्तः कर्त्तरि च, ततः श्लिषशीङस्थासवजनरुहजीर्यतिभ्यश्च, ततोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्य इति, एवञ्च द्विः क्तग्रहणं गत्यर्थाकर्मकग्रहणञ्च न कर्त्तव्यं भवति ? अशक्यमेवं वक्तुम्; एवं ह्युच्यमाने यथा ध्रौव्यार्थेभ्यः कर्त्तरि क्तो भवति, तथा प्रत्यवसानार्थेभ्योऽपि स्यात्, स च नेष्यते। तस्माद्यथान्यासमेवास्तु।।

77. लस्य।

`अकार उच्चारणार्थः' इति। एतेनानुबन्धशङ्कां निराकरोति। अनुबन्धे ह्यस्मिन्नकारानुबन्धविशिष्टयोरेव लङलटोर्ग्रहणं स्यात्, नान्येषां लिडादीनाम्। `अर्थविशेषे'इति। कर्त्तृकर्मादौ' । `कालविशेषे' इति। वर्त्तमानादौ। `अक्षरसमाम्नायवत्' इति। यथाऽक्षरसमाम्नाये प्रत्याहारेऽकारादयो वर्णा आनुपूर्व्या कथ्यन्ते, तद्वदित्यर्थः।

`अथ लकारमात्रस्य ग्रहणं कस्मान्न भवति' इति। विशेषानुपादानामिति भावः। `चूडालः' इति। `प्राणिस्थादातो लजन्यतरस्याम्' (5.2.96) इति लच्। `धात्वधिकारः' इति। `धातोः' (3.1.91) इति पञ्चम्यन्तमनुवर्त्तते, तेन च लकारो विशिष्यते-- धातोर्विहितस् लस्येति। `लः कर्मणि च भावे चाकर्मकेभ्यः' (3.4.69) इत्यादौ प्रकारणे येऽर्थाः कर्त्तृकर्मभावा निर्दिष्टास्त इहानुवर्त्तन्ते, तैश्च लकारो विशिष्यते-- कर्त्रादिषु विहितस्य लस्येति। तेन विसिष्टस्यैव लकारस्य ग्रहणं भवति, न सर्वस्येति भावः।।

78.तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्। (3.4.78)

`पकारः स्वरार्थः' इति। `अनुदात्तौ सुप्तितौ' (3.1.4) इत्यनुदात्तो यथा स्यात्। `इटष्टकारः' इत्यादि। ननु चासत्यप्येतस्मिन् विशेषणार्थे नैवं किञ्चिदनिष्टं प्राप्नोति, `इटोऽत्' (3.4.106) इत्यत्र सूत्रे लिङादेशस्येटोऽद्विधानात्, ततोऽन्यस्य लिङ्गादेशस्येकारस्यासम्भवात्। तिवाद्यवयवोऽस्तीति चेत् ? न; तस्यालादेशत्वात्। तिबादयो हि समुदाया लादेशाः, न च तदवयवा इकारादयः। अर्थवद्ग्रहणे (व्या.प.1) परिभाषयार्थवदिकारस्य ग्रहणे सति कृतस्तबाद्यवयवस्य प्रसङ्गः ! न हि तेऽर्थवन्तः; तिबादीनामेव समुदायानामर्थवत्वात्। तस्मान्न कर्त्तव्य एव टकारः ? सत्यं न कर्त्तव्यं, य एवं प्रतिपत्तुं समर्थस्तं प्रति; यस्त्वसमर्थस्तं प्रति कर्त्तव्य एव। अथ `आद्यन्तौ टकितौ' (1.1.46) इति विशिष्टदेश आगमभूतस्यास्य विधानं यथा स्यादित्येवमर्थष्टकारः कस्मान्न विज्ञायते ? इत्याह-- `तिबादिभिः' इत्यादि। तुल्यत्वम् = सदृशत्वम्, तत्ुपनरेकयोगनिर्दिष्टत्वेन। तस्मिन् सति लस्य (3.4.77) इत्यनया षष्ठ्या सर्वेषं तिबादीनां सम्बन्धो भवति। द्वितीये त्विट एव। तत्र यस्मिन्पक्ष आश्रीयमाणे सर्वेषामनुग्रहो भवति स एवाश्रयितुं युक्त इति स्थानषष्ठीयमङ्गीकर्त्तव्या। इटोऽप्यादेशत्वं तेन भवतीति न भवति देशवनिध्यर्थष्टकारः। अथ वा-- तिबादिभिरेकयोगनिर्दिष्टत्वेन यत् तिबादिभिस्तुल्यत्वं तत् साहचर्योपलक्षमम्। तिबादिभिस्तुल्यत्वात् तत्साहचर्यादित्यर्थः। साहचर्येण सन्दिग्धार्थनिश्चयो भवति, यथा-- सवत्सा धेनुरिति। तथेहापि सन्देहो जायते-- किमयमादेशः ? उतागमः ? इति, तथापि तिबादिभिरसन्दिग्धादेशभावैः साहचर्यादादेशोऽयमिति निश्चीयते। तेन देशविध्यर्थता टकारस्य न भवति। यद्येवम्, `फलिपाटिनमिमनिजनां गुक् पटिनाकिधतश्च' (द.उ.1.103) इत्यत्रापि पट्यादिभिरादेशैस्तुल्यत्वाद्गुगागमोऽप्यादेशः स्यात् ? नैष दोषः; `संज्ञायाम्' (3.2.185) इति तत्रानुवर्त्तते,न चादेशेन संज्ञा गम्यते, किन्त्वागमेन। तस्माद्गुक आगमत्वं वेदितव्यम्। तत्रैकापि षष्ठी यदाऽदेशन सम्बध्यते तदा स्थानषष्ठी भवति, यदा त्वागमेन तदावयवषष्ठी। `महिङो ङकारः' इत्यादि। अथ ङित्वार्थो ङकारः कस्मान्न भवति ? तस्य `सार्वधातुकमपित्' (1.2.4) इत्यनेनैव सिद्धत्वात्।।

7र9. टित आत्मनेपदानां टेरे। (3.4.79)

`इह कस्मान्न भवति' इत्यादि। शानजपि टितो लकारस्य सम्बन्ध्यात्मनेपदसंज्ञकश्च, तस्मात् तस्यापि टेरेत्वेन भवितव्यमित्यभिप्रायः। `प्रकृतैः' इत्यादि। प्रकृतानां तिबादीनां मध्ये `यान्यात्मनेपदानि'--- इत्येवमिहात्मनेपदानि विशिष्यन्ते, तेन न भवत्येष दोषः। न हि शानच् तिबादिषु सन्निविष्टः। लाघवार्थं `टितस्तङाम्' इति वाच्ये `आत्मनेपदानाम्' इति वचनं वैचित्र्यार्थम्। ननु च `तङाम्' इत्युच्यमाने तसस्तकारेण प्रत्याहारग्रहणं स्यात् ? अर्थवद्ग्रहणपरिभाषया (व्या.प.1) न भविष्यति। यस्तर्हि थस्य स्थान आदिश्यते तेन स्यात् ? न; तिबादिषु सन्निविष्टा ये तेषां तिङां ग्रहणं विज्ञास्यते। प्रत्यासत्तेर्वा आत्मपदीयेन तशब्देन प्रत्याहारग्रहणं विज्ञास्यते। व्याप्तेस्त्वनाश्रयः; लक्ष्यस्थित्यनुरोधात्।।

80. थासः से। (3.4.80)

`पेचिषे' इति।लिट्, `अत एकहल्मध्वेऽनादेशादेर्लिटि' (6.4.120) इत्येत्वाभ्यासपोपौ। `पक्तासे' इति। लुट्, तासिः, `तासस्त्योर्लोपः' (7.4.50) इति सकारलोपः। `पक्ष्यसे' इति। लृट्, `चोः कुः' (8.2.30) इति कुत्वम्-- ककारः। अथ थकारमात्रस्यैव सकारादेशः कस्मान्न भवति----थः स इति, थकारस्य सकारे कृते परस्य भागस्य टेरेत्वे सत्यभीष्टं सिध्यत्येव ? नैतच्छक्यम्च एवं ह्यार्थाशब्दस्य यस्थकारस्तस्यापि स्यात्। धात्वधिकाराद्धातोर्यो विहित इति विशेषणान्न भवतीति चेत् ? न; असम्भवात्। न हि तथाविधस्तकारो धातोर्विहितः सम्भवति । अथ धातोरनन्तरस्यैति विशिष्येत ? एवमप्यनादित्व एव

परस्य स्यात्, नेतरेभ्यो विकरणेभ्यः; व्यवधानादिति यथान्यासमेवास्तु। टेरेत्त्वेनैव सिद्ध एकारान्तत्वे यदेकारान्तत्वामादेशस्य क्रियते, तत् `तिङामादेशानां टेरेत्वं न भवति' इति ज्ञापनार्थम्। तेन डारौरस्प्रभृतिषु टेरेत्वं न भवतीति-- पक्ता, पक्तारौ, पक्तार इति।।

81.लिटस्तझयोरेशिरेच्। (3.4.81)

`शकारः सर्वादेशार्थः' इति। असति तस्मिन् धात्वधिकारात् `तस्मादित्युत्तरस्य ' (1.1.67) इत्यादेः परस्य तकारस्य प्रसज्येत। शकारे तु सति `अनेकाल्शित् सर्वस्य' (1.1.55) इति वचनात् सर्वस्य भवति। अथ `शे' इति कस्मान्नोक्तम् ? नैवं शक्यम्; `शे' इति हि प्रगृह्यसंज्ञा स्यात्। इह च व्यतिपप इति पिबादेशः स्यात्। एशि तु सति न भवति, वक्ष्यति ह्येतत्--- `वर्णे यत् स्यात् तच्च विद्यात् तदादौ' इति।।

82. परस्मैपदानां णलतुसुस्थलथुसणल्वमाः। (3.4.82)

`पपक्थ' इति। `उपदेशेऽत्वतः' (7.2.62) इतीडभावः। `पेचिथ' इति क्वचित् पाठः, तत्र हि `ऋतो भारद्वाजस्य' (7.2.63) इति नियमादिट्। `थलि च सेटि' (6.4.121) इत्येवत्वाभ्यासलोपौ। `पेच' इति। `धातोः' (3.1.91) इत्यधिकारात् `तस्मादित्युत्तरस्य' (1.1.67) , `आदेः परस्य' (1.1.54) इति थकारस्याकारादेशः। द्वयोराकारयोः `अतो गुणे ' (6.1.97) पररूपत्वम्। अथ वा-- आन्तरतम्याद्बह्वर्थस्याकारस्य बह्वर्थ एव स्थानी युक्त इति समुदायस्यैव भवति। `पेचिव, पेचिम' इति। क्रादिनियमादिट्।।

83. विदो लटो वा। (3.4.83)

`विद ज्ञाने' इति। एतेन ज्ञानार्थस्य विदेर्ग्रहणम्, नान्येषामिति। एवं मन्यते-- विद इति पञ्चमी, तेन `तस्मादित्युत्तरस्य' (1.1.67) इत्यनन्तराणां तिबादीनामादेशेन भवितव्यम्। न चान्यस्माद्विदेः परस्मैपदान्यनन्तराणि सम्भवति; विकरणैर्व्यवधानात्। विचारसत्तार्थयोश्चात्मनेपदित्वात् परस्मैपदानुपपत्तिः। तस्मात् ज्ञानार्थस्यैव ग्रहणमिति।।

84. ब्रुवः पञ्चानामादित आहौ ब्रुवः। (3.4.84)

`पञ्चैव' इत्यादि। ननु च नेह द्वितीयं पञ्चग्रहणं, नाप्यदिग्रहणमादेशविशेषमम्, तत्र पञ्चानामाद्यानां स्थाने सर्वैरेव णलादिभिः पर्यायेण भवितव्यम्, तत् कथं पञ्चैव णलादय आदेशा भवन्तीत्येषोऽर्थो लभ्यते ? इत्यत आह-- `स्थानिसम्बन्धात् ' इत्यादि। इह हि स्थानिनः पञ्चैवाऽद्या निर्दिष्टाः, तेषाञ्च `स्थानेऽन्तरतमः' (1.1.50) इति परिभाषया पञ्चिरेवाद्यैः सम्बन्धः सम्भवति, नेतरैश्च। तथा हि-- पञ्चानामेवाद्यानामान्तरतम्यमस्ति, तुल्यार्थत्वात्। नान्येषाम्, विपर्ययात्। तस्मात् स्थानिसम्बन्धादादेशेष्वपि पञ्चत्वमादित्वञ्च विज्ञायत इति युक्तम्-- पञ्चैव णलादय आदेशा भवन्तीति। `आत्थ' इति। `आहस्थः' (8.2.35) इति हकारस्य थकारः, तस्य `खरि च' (8.3.55) इति चर्त्वम्-- तकारः। `ब्रवीति' इति। `ब्रुव ईट्' (7.3.93)। `परेषाम्' इति। थादीनाम्। अथ `ब्रुवः' इति किमर्थं पुनरिदमुच्यते, यावता ब्रुव इति यदेतत् पञ्चम्यन्तं तदेवार्थद्विभक्तेर्विपरिणामो भविष्यीति षष्ठ्यन्तं विज्ञास्यत इत्याह-- `ब्रुवः' इति पुनर्वचनम्' इत्यादि। असति हि श्रते सम्बन्धिनि विभक्तिविपरिणामो युक्तः। इह परस्मैपदानामिति प्रकृता एव तिबादयः षष्ठ्यन्ताः सम्बन्धिन इति न युक्तो विभक्तिविपरिणामः। `ब्रुवः' इतियदि पुनर्नोच्येत ततो यथा णलादयः परस्मैपदानां भवन्ति, एवमाहौदेशोऽपि स्यात्। तस्मात् तं प्रति ब्रुवः स्थानित्वं यथा स्यादित्येवमर्थं `ब्रुवः' इति पुनरुच्यते। `परस्मैपदानामेव हि स्यात्' इति। यदि `ब्ुवः' इति पुनर्नोच्येतेति शेषः। अयञ्च `ब्रुवः' इति पूनर्वचनस्य हेतुः। हिशब्दो यस्मादर्थे। यस्मादसति पुनवर्वचने परस्मैपदानामेवाहादेशः स्यात्, तस्मात् `ब्रुवः' इति पुनर्वचनं कर्त्तव्यम्।।

85. लोटो लङ्वत्। (3.4.85)

`तामादयः' इति। येषां `तस्थस्थ' (3.4.101) इत्यादिना विधाननम्। `सलोपश्च' इति। यस्य नित्यं ङितः' ( 3.4.99) इति विधानम्। `अडाटौ इत्यादि। `लुङ्लङ्लृङ्क्षु' (6.4.71)इत्यादिनाट्, `आडजादीनाम्' (6.4.72) इत्याट् लङः कार्य विधास्यते। `लङ शाकटायनस्यैव' (3.4.111) इति झेर्जुसादेशश्च। न चेह कश्चिद्विशेष उपादीयते, ततश्च यस्मादतिदेशात् तामादिकार्यं भवति तथा `आडजादीनाम्'(6.4.72) लङकार्येणापि भवितव्यमित्यभिप्रायः। `इतश्च' (3.4.100) इति लोपः, मिपोऽम्भावश्च। देश्यमेतत्। तयोः `एरुः' (3.4.86) इत्युत्त्वस्य `मेर्निः' (3.4.899) इति निरादेशस्य चापवादस्य विधास्यमानत्वात्। `सा च व्यवस्थितविभाषा' इति। तेन तामादिरेवादेशो भवति, न त्वडादिरिति मन्यते।।

86. एरुः। (3.4.86)

`हिन्योः' इत्यादि। हिश्च निश्च हिनी, तयोरुत्वप्रतिषेधो वक्तव्यः, अन्यथा हि लुनीहि पचानीति न सिध्येत्। `न वोच्चारणसामर्थ्यात्' इति। यदि हीकारे कृते सत्युकारेण भवितव्यं तदोकारमेवोच्चारयेत्। अयं हि लधीयान् शब्दव्युत्पत्तावुपायः। न चेकारोच्चारणे सूत्रस्य लाघवं भवति, तदुकार एवोच्चरयितव्ये यदिकारोच्चारणं करोति, तस्यैतत् प्रयोजनम्-- उत्वं मा भूदिति।।

87. सेर्ह्यपिच्च। (3.4.87)
`लुनीहि' इति। पित्त्वे प्रतिषिद्धे `सार्वधातुकमपित्' (1.2.4) इति ङित्त्वम्, ततस्तन्निबन्धनं `ई हल्यघोः' (6.4.113) इतीत्वं भवति। `राध्नुहि' इति। `राध साध संसिद्धौ' (धा.पा.1262), 1263) स्वादित्वात् श्नुः। अत्रापि पूर्ववन्ङित्वने सति गुणो न भवति। अथ किमर्थं गुरु सूत्रं क्रियते, न `से र्हि ङिच्च' इत्येवोच्येत ? नैवं शक्यम्; ङित्त्वस्य विधाने स्थानिवद्भावातम् पित्त्वं स्यादेव। ततश्च ङित्त्वान्ङित्कार्यं गुणनिषेधादिकं स्यात्, पित्त्वाच्चानुदात्तत्वम्। तस्माद्यथान्यासमेवास्तु।।

88. वा च्छन्दसि। (3.4.88)
`अपित्त्वं विकल्प्यते'( इति)। `लादेशः' इति। तस्यानन्तरत्वात्। आदेशस्तु तेन व्यवहितत्वादनन्तरो न भवति विकल्प्यते। `युयोधि' इति। `यु{मिश्रणेऽमिश्रणे च' धा.पा} मिश्रणे' (धा.पा.1033), `बहुलं छन्दसि' 2.4.76) इति शपः श्लुः, `श्लौ' (6.1.त10) इति द्विर्वचनम्। अत्रापि पित्त्वेन ङित्त्वं नास्ति, तेन गुणो न भवति। `अङितश्च' (6.4.103) इति धिभावः। `प्रीणीहि' इति। `प्रीञ् {तर्पणे कान्तौ च' -धा.पा.}(धा.पा.1474) क्र्यादित्वात् श्ना। अत्राप्यपित्त्वे सति पूर्ववदीत्वम्।।

89. मेर्निः। (3.4.89)
`उत्थलोपयोरपवादः' इति। यथाक्रमं `एरुः' (3.4.86), `लोटो लङ्वत्' (3.4.85) इत्यतिदेशेन प्राप्तयोः। इकारलोपस्य च लङि `इतश्च' (3.4.100) इति विधानादतिदेशेन तस्य प्राप्तिः। `पचानि' इत्यत्र `आडुत्तमस्य पिच्च' (3.4.92) इत्याट्।।

90. आमेतः। (3.4.90)
अत्रैकारेण लोड्विशिष्यते, लोटा वैकार इति द्वौ पक्षौ। तत्र यद्याद्यः पक्ष आश्रीयेत तदैकास्य विशएषणत्वाद्विशेषणेन च तदन्तविधिर्भवतीत्येकारान्तस्य लोट आम् विधीयमानोऽनेकाल्त्वात् सर्वादेशः स्यादित्येष दोषः प्रतिविधेयः। द्वितीये तु पक्ष एकार एव विशेष्यत्वात् प्रधानम्। न च प्रधाने तदन्तविधिरित्येकारस्यैव भविष्यीति न किञ्चित् प्रतिविधेयम्। तेन द्वितीयपक्षमाश्रित्याह-- `लोट्सम्बन्धिन एकारस्य' इत्यादि। `पचताम्' इति। टेरेत्वे कृत आम्। इह पचावेदम्, यजावेदमिति यद्यप्यन्तादिवद्भावाद्गुणो लोड्ग्रहणेन गृह्यते, तथापि बहिरङ्गमन्तरङ्गे' (व्या.प.42) इत्यन्तरङ्ग आमादेशे कर्त्तव्ये बहिरङ्गस्याद्गुणस्यासिद्धत्वादामादेशो न भवति। बहिरङ्गत्वं तु गुणस्य द्विपदाश्रयत्वात्। आमस्त्वन्तरङ्गत्वमेकपदाश्रयत्वात्।।

91. सवाभ्यां वामौ। (3.4.91)
`पचस्व' इति। `थासः से' (3.4.80) इति कृते वकारः। `पचध्वम' इति। टेरेत्वे कृतेऽमादेशः।।

92. आडुत्तमस्य पिच्च। (3.4.92)
`स चोत्तमपुरुषः पिद्भवतिट' इति। अथाट एव पित्त्वं कस्मान्न क्रियते ? निरर्थकत्वात्। पित्त्वं ह्यनुदातार्थं वा स्यात्, गुणवृद्ध्यर्थं वा; तत्राटोऽनुदात्तत्वमागमत्वादेव सिद्धम्, गुणवृद्ध्योस्तु नैवासौ निमित्तम्; अप्रत्ययत्वात्। तस्मादाटं प्रति पित्त्वमनर्थकमित्युत्तमस्यैव विधीयते। `करवाणि' इति। पित्त्वादुत्तमस्य ङित्वं नास्ति, तेन गुणो भवति। `करवै' इति। `एत ऐ' (3.4.93), `आटश्च' (6.1.90) इति वृद्धिः।।

93. एत ऐ। (3.4.93)
`आमोऽपवादः' इति। `आमेतः' (3.4.90) इति प्राप्तस्य। `पचावेदं यजावेदम्' इति। `लोटो लङ्वत्' (3.4.85)इति सलोपे सति `आद्गुणः' (6.1.90) इति वृद्धिः।।

94. लेटोऽडाटौ। (3.4.94)
`पर्यायेण' इति। अथ युगपदेव कस्मान्न भवतः ? एवं मन्यते-- टितावेतौ विधीयेते, टित्त्वञ्चादिविधानार्थम्। न च युगपद्द्वयोरादित्वं भवति, एकेनैवादिदेशस्यावष्टब्धत्वान्न युक्तं यौगपद्यमिति। `जोषिषत्' इत्यादीव्युदाहरणानि `सिब्बहुलं लेटि' (3.1.34) इत्यत्र व्युत्पादितानि। अत्रापि व्युत्पाद्यन्ते। `जोषिषत्' इति-- `जुषी प्रीतिसेवनयोः' (धा.पा.1288), सिप इकार उच्चारणार्थः, अनेनाट्, `इतश्च लोपः परस्मैपदेषु' (3.4.97) इतीकारलोपः `आर्धधातुकस्येड्वलादेः' (7.2.35) इतीट्, लघूपधगुणः, `आदेशप्रत्यययोः' 8.3.59) इति षत्वम्। `तारिषत्' इति-- `तृ प्लवनतरणयोः' (धा.पा.969), `सार्वधातुकार्धधातुकयोः' (7.3.84) इति व्यत्ययेन धात्वकारस्य दीर्घः। शेषं पूर्ववत्। `मन्दिवत्' इति--`मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' (धा.पा.13) इदितो नुम्' (7.1.58)। `पदाति' इति। `पद गतौ' (धा.पा.1169) दिवादावनुदात्तेत् , व्यत्ययेन परस्मैपदम्; शप्प्रत्ययश्च, अटा सहाकः सवर्णे (6.1.101) दीर्घत्वम्, तिप्। इकारलोपोऽत्र न भवति; तद्विधौ `वैतोऽन्यत्र' (3.4.96) इत्यतो वाग्रहणानुवृत्तेः। `च्यावयति' इति। `च्युङ् ज्युङ प्रुङ प्लुङ

गतौ' (धा.पा.955--958), हेतुमण्णिच्।।

95. आत ऐ। (3.4.95)
`मन्त्रयैते' इति। `मत्रि {गुप्तपरिभाषणे-धा.पा.} (धा.पा.1679), चुरादिणिच्, शप्,{गुणायादेशः' इति मु.पाठः।} गुणायादेशौ। `आटः कस्मान्न भवति' इति। पदाति विद्युदित्यादौ। `विधानसामर्थ्यात्' इति। यद्याट ऐत्वं स्यात् ऐडागममेव विदध्यात्, एवं प्रक्रियालाघवं भवतीति मन्यते।।

96. वैतोऽन्यत्र। (3.4.96)
`शासै' इति। उत्तमपुरुषैकवचनमिट्, टेरेत्वम्। `ईशै' इत्यादीनि उदाहरणानि `उपसंवादाशङ्कयोः' (3.4.8) इत्यत्र व्युत्पादितानि। `दधस' इति। `डुधाञ् धारणपोषणयोः' (धा.पा.1092), `थासः से' (3.4.80), शपः श्लु), `श्लौ' (6.1.10) इति द्विर्वचनम्, अट्, `घोर्लोपो लेटि वा' (7.3.70) इत्यकारलोपः।।

97. इतश्च लोपः परस्मैपदेषु। (3.4.97)
`परस्मैपदग्रहणम्' इत्यादि। ननु च टेरेत्वमिडादिषु बाधकं भविष्यति, तत् किं परस्मैपदग्रहणेन ? नैतदस्ति; टेरेत्वस्यावकाश अन्येषु लकारादिषु, इतो लोपस्य च परस्मैपदेषु; उभयप्रसङ्गे परत्वादितो लोपः स्यात्।।

98. स उत्तमस्य। (3.4.98)
`करवाव' इति। `लेटोऽडाटौ' (3.4.94) इत्याट्। `उत्तमग्रहणम्' इत्यादि। यदि तर्हि पुरुषान्तरे मा भूदित्येवमर्थमुत्तमग्रहणं क्रियते ? न ; वस्मसग्रहणमेव कर्त्तव्यम्, अत्राप्ययमर्थः-- सकारग्रहणं कर्तव्यं न भवति, अलोऽन्त्यपरिभाषयैव सकालोपो भवति ? अशक्यं वस्मस्ग्रहणं कर्त्तुम्; तस्मिन् सति यदा व्यत्यनेन पुरुषान्तरस्य स्थाने तौ भवतस्तदापि लोपः स्यात्, यदा चोत्तमपुरुषस्य स्थाने थस् क्रियते तदा लोपो न स्यात्। उत्तमग्रहणे सत्येव दोषो न भवति स्थानिवद्भावेन मध्यमोत्तमसंज्ञयोर्भवन्त्योरेकसंज्ञाधिकारादसति समावेश उत्तमसंज्ञया मध्यमसंज्ञाया निवृत्तिः। सकारग्रहणञ्च यदि न क्रियेत, तदोत्तमस्य व्यत्ययेन वचनान्तरेषु कृतेषु वर्णान्तरस्यापि लोपः स्यात्। तस्माद्यथान्यासमेवास्तु।।

99. नित्यं ङितः। (3.4.99)
`अपचावापचाम' इति। लङ, `अतो दीर्घो यञि' (7.3.101) इति दीर्घः।।

100. इतश्च। (3.4.100)
`अपचात्' इति। लङ। `अपाक्षीत्' इति। लुङ `वदव्रज' (7.2.3) इत्यादिना वृद्धिः, `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्।।

101. तस्थस्थमिपां तान्तन्तामः। (3.4.101)
`अपाक्ताम्' इति। पूर्ववद्वृद्धिः, `झलो झलि' (8.2.26) इति सिचो लोपः।।

102. लिङ सीयुट्। (3.4.102)
`पचेत्' इत्यादौ `विधिनिमन्त्रण' (3.3.161) इत्यादिना लिङ, `लिङ सलोपोऽनन्तस्य' (7.2.79) इति सकारलोपः, शपा सह `आद्गुणः' (6.1.87) वलि लोपः। `पक्षीष्ट' इत्यादौ आशिषि लिङ, चकारस्य `चोः कुः' (8.2.30) इति कुत्वम्, `इण्कोः' (8.3.57) इति षत्वम्।।

103. यासुट् परस्मैपदेषूदात्तो ङिच्च। (3.4.103)
`परस्मैपदविषयस्य' इति। एतेन `परस्मैपदेषु' इत्यस्याः सप्तम्या विषयसप्तमीत्वं दर्शयति, न परसप्तमीत्वम्। परसप्तमीत्वं तु न सम्भवति; लिङः परस्मैपदानामसम्भवात्। `आगमानुदात्तत्वे प्राप्ते' इति। कुतः पुनरागमानुदात्तत्वं भवतीति निश्चितम् ? अत एव यासुट उदात्तवचनात्। यदि ह्यागमा अनुदात्ता न स्युस्तदोदात्तवचनमनर्थकं स्यात्; प्रत्ययभक्तत्वेनैव यासुटः प्रत्ययस्वरेणैवाद्युदात्तस्य सिद्धत्वात्। ननु यानि पिद्वचनानि तदर्थमुदात्तवचनं स्यात्, तेषां ह्यनुदात्तत्वात् तद्भक्तो यासुडनुदात्त एव स्यात्, यद्युदात्त इति नोच्येत ? नैतदस्ति;यद्येतत् प्योजनमभिमतं स्यात्, अपिदित्येवं ब्रूयात्। तदैतदुदात्तवचनमागमानुदात्तस्य ज्ञापकमेव। `तत्र ङित्कार्याणामसम्भवात्' इति। न सर्वेषामित्यभिप्रायः। कुत एतत् ? यावता `उष्यात्' इत्यत्र ग्रहिज्यादिसूत्रेण (6.1.16) यत्सम्प्रसारणं तत् यासुट्यपि ङिति सम्भवति। ङिन्मात्निबन्धनं हि सम्प्रसारणम्; विशेषानुपादानात्। तत्र यदि यासुटो ङित्त्वं विधीयेत तदा ग्रहेः सम्प्रसारणस्यैवैकस्यानुग्रहः स्यात्। लिङस्तु ङित्वे विधाने सर्वस्य ङित्कार्यस्य गुणवृद्धिप्रतिषेधादेवानुग्रहो भवतीति लिङ एव ङित्त्वं

विधीयते। `ङित्कार्याणाम्' इति। ङिति कार्याणामित्यर्थः। `कुर्यात्' इति। विकरणाश्रयो धातोर्गुणः, `अत उत् सार्वधातुके' (6.4.110) इत्युत्वम्, `ये च' (6.4.109) इत्युकारलोपः। `कुर्युः' इति। `उस्यपदान्तात्' (6.1.96) इति पररूपत्वम्। `अचिनवम्' इति। मिपोऽम्। अत्र ङित्त्वाभावाद्गुणः। एतच्च ज्ञापकस्य प्रयोजनम्।।

104. किदाशिषि । (3.4.104)

`प्रत्ययस्यैवेदं कित्त्वम्' इति। यद्येवम्, आशिषि लिङ् विहितस्तस्य यासुट् किद्भवतीत्येतद्विरुध्यते ? नास्ति विरोधः; यासुड्वचनं लिङ एवोपलक्षणम्। तेन लिङवयवद्वारेण लिङ एव कित्त्वमनेन विधीयते; यासुडवयवत्वाल्लिङः। `नागमस्य' इति। `नागमस्य' इति। अत्रापि नागमात्रस्येत्येषोऽर्थो वेदितव्यः। `प्रयोजनाभावात्' इति। न सर्वस्य कित्त्वप्रयोजनस्याभावादिति भावः। कुतः ? वाच्यादिसूत्रेण (6.1.15) यद्वचिस्वप्योः सम्प्रसारणं तस्य यासुट्यपि किति सम्भवात्। किन्मात्रे हि सम्प्रसारणमुच्यते, विशेषापरिग्रहात्। यदि गुणवृद्धिप्रतिषेधस्तुल्य एवेति कस्तर्हि ङित्वात् कित्त्वस्य विशेषो येन तस्मिन् प्राप्ते कित्तवं विधीयेत ? इत्याह-- `सम्प्रसारणम्' इत्यादि। ङित्वे वच्यादिसूत्रेण (6.1.15) किति दिधीयमानं सम्प्रसारणं न स्यात्. `जाग्रोऽविचिण्णल्ङित्सु' (7.3.85) इति विधीयमानो गुणः। `इष्यात्' इति। `स्कोः संयोगाद्योरन्ते च' (8.2.29) इति सकारलोपः।
`वच्यात्' इति। कित्वाभावाद्वचेः सम्प्रसारणं न भवति। `जागृयात्' इति। पूर्वसूत्रेण ङित्वम्, तेन गुणो न भवति। उभयत्रादादिकत्वाच्छपो लुक्।।

105. झस्य रन्। (3.4.105)

`कृषीरन्' इति। आशिषि लिङ्।।

106. इटोऽत्। (3.4.106)

`कृषीय' इति। आशिषि लिङ्। `नैवायमादेशावयवः' इति। अकारमात्रस्यादेशत्वात्। यद्येवम्, अकारोऽयमादेशो विधीयत इति `अणुदित्सवर्णस्य चाप्रत्ययः' (1.1.69) इति सवर्णानां ग्राहकः स्यात् ? `भाव्यमानोऽण् सवर्णान् न गृह्णाति' (व्या.प.35) इति न भविष्यति। सत्यपि वा सवर्णग्रहणे मात्रिकस्यान्तरतम्यान्मात्रिक एव भविष्यति।
अथ लाविषीष्टेत्यत्रागमस्येटः कस्मादकारो न भवतीत्याह-- `आगमस्येटो ग्रहणं न भवति' इति। अत्र कारणमाह-- `अर्थवद्ग्रहणे न' इत्यादि। ननु चागमानामप्यर्थवत्त्वमस्त्येव, तथा हि-- यासुट्सहितेनैव लिङो।ऽर्थोऽविभिधीयते, न केवलेन ? नैतदेवम्; अन्येषु लकारेषु विनापि तेनार्थवत्ता दृष्टा, आगमानां तु न क्वचित्। तेन तेऽर्थवन्तो न भवन्तीति।।

107. सुट् तिथोः। (3.4.107)

अथ तकारथकाराब्यां लिङ विशिष्यते-- तकारथकायोर्यो लिङ स्थानीति ? तेन वा तौ लिङसम्बन्धिनोस्तकारथकारयोरिति ? तत्र यद्याद्यः पक्ष आश्रीयेत, तदा विशेष्यत्वाल्लिङः प्राधान्यम्। ततश्च प्रधाने कार्यसम्प्रत्ययाल्लिङ एव सुडागमः स्यात्। एवञ्च परत्वाद्विशेषविहितत्वाच्च सुटा सीयड् बाध्येत। तस्माद्दुष्टोऽयं पक्ष इति द्वितीयं पक्षमाश्रित्याह-- `लिङ्सम्बन्धिनोः' इति। यदुक्तम्-- तकारथकारयोः सुडागमो भवतीति, तस्यार्थं स्पष्टीकर्त्तुमाह-- `तकारथकारावागमिनौ' इति। विशेष्यत्वेन प्राधान्यादिति भावः। यदुक्तञ्च-- लिङसम्बन्धिनोरिति, तस्यार्थं स्पष्टीकर्त्तुमाह-- `लिङ् तद्विशेषणम्' इति। `सीयुटस्तु लिङेवागमी' इति। तकारथकारावेवकारेण व्यवच्छिद्येते। `तेन' इत्यादि। यत एवं तकारथकारावागमिनौ सुटः, सीयुटस्तु लिङेव, तेन भिन्नदेशत्वात् सुटा सीयुड् न बाध्यते। न च भिन्नदेशयोर्बाध्यबाधकभावो युक्तः; विरोधाभावात्। `कृषीष्ट, कृषीष्ठाः' इति। तथासोरेकवचनयो रूपे। `कृषीयास्ताम्, कृषीयास्थाम्' इति। आतामाथामोः । सर्वत्राशिषि लिङ, `उश्च' (1.2.32) इति कित्त्वाद्गुणाभावः।।

108. झेर्जुस्। (3.4.108)

`पचेयुः' इति। `अतो येयः' (7.2.80) इतीयादेशः, `आद्गुणः' (6.1.87) , पररूपत्वम्।।

109. सिजभ्यस्तविदिभ्यश्च। (3.4.109)

`वेत्तेश्च' इति निर्देशेन लुग्विकरणस्यैवेह ग्रहणमिति दर्शयति। तस्यैव हि झिरनन्तरः सम्भवति,नान्येषां विदीनाम्। विकरणैर्व्यवधानात्। सत्ताविचारणार्थयोरात्मनेपदित्वात् झेरसम्भव एव, तस्माल्लुग्विकरणस्यैव ग्रहणं युक्तम्। `अभ्यस्तविदिग्रहणमसिजर्थम्' इति। यद्यभ्यस्तविदिग्रहणमसिजर्थम्, एवं सति लडादिसम्बन्धिनोऽपि झेः प्राप्नोतीत्यत आह--- `ङित इति चानुवर्त्तते' इति। तेन ङिल्लकारसम्बन्धिन एव झेर्जुस् भविष्यति, नान्येषामित्यभिप्राय-। `अबिभयुः, अजिह्रयुः' इति। `ञि भीभये' (धा.पा.1084), `ह्री लज्जायाम्' (धा.पा.1085), `जुजि च' (7.3.83) इति गुणः, जुहोत्यादिभ्यः शपः श्लुः, `श्लौ' (6.1.10) इति द्विर्वचनम्। `अजागरुः' इति। अदादित्वाच्छपो लुक्; जागर्तेः `जक्षित्यादय षट्' (6.1.6) इत्यभ्यस्तसंज्ञा।।

110. आतः। (3.4.110)
सिचः परस्याकारान्तादुत्तरस्य झेरिति ब्रुवता द्वाभ्यमप्यनन्तरसय् झेरित्युक्तं भवति। उभाभ्याञ्चानन्तर्यं न सम्भवति, आतः सिचा व्यवधानादिति मन्यमानः पृच्छति-- `कथम्' इत्यादि। `सिचो लुकि' इति। `गातिस्था' (2.4.77) इत्यादिना यदा सिचो लुक् क्रियते तदा प्रत्ययलक्षणेन सिचोऽनन्तरः सम्भवति। `श्रुत्या चाकारान्तात्' इति। तदनन्तरश्रूयमाणत्वात्। श्रुत्येति श्रोत्रेन्द्रियसाध्योपलब्ध्येत्यर्थः। तदेवं द्वाभ्यामप्यानन्तर्यस्याश्रयणात् सामर्थ्यादातः सिज्लुगन्ताद् झेर्जुस् भवतीत्युक्तं भवति। न हि श्रूयमाणे सिचि द्वाभ्यामानन्तर्यं सम्भवति। `तकारो मुखसुखार्थः' इति। व्यावर्त्त्याभावात्। न हि ह्रस्वात् प्लुताद्वा वर्णात् परः सिच् सम्भवति।
`पूर्वेणैव सिद्धे' इति। लुप्तेऽपि सिचि प्रत्ययलक्षणेन झेः सिजनन्तरत्वादभूविन्निति नियमस्य व्यावर्त्यं दर्शयति। `भुवो वुग् लुङलिटोः' (6.4.88) इति वुक्। ननु च नैवेह पूर्वसूत्रेण प्राप्नोति, न हीह सिजपेक्षयानन्तर्यं झेर्विद्यते, तत् किं प्रतिषिध्यत इत्याह-- `प्रत्ययलक्षणेन' इत्यादि। लुप्ते हि प्रत्ययलक्षणेनानन्तर्यमस्ति, अतः पूर्वेण प्राप्नोति। जुस् नियमेन प्रतिषिध्यते। यदि तर्हि नियमार्थमिदम्, `अकार्षुः' इत्यत्रापि न स्यात्, न ह्यत्रातः सिज्लुगन्तात्परो झिर्भवतीति ? इत्यत आह--`तुल्यजातीय' इत्यादि। आतः सिज्लुगन्तान्नियमार्थमयं जुस् विधीयते। स च नियमस्तुल्यजातीयापेक्षः, तेन समानजातीयमेव व्यवच्छिनत्ति। कश्च समानजातीयः ? अन्यः {सिजलुगन्तः इति मु.पाठः।} सिज्लुगन्तः। न चाकार्षुरित्यत्र झेः पूर्वः सिज्लुगन्तः इति नायं नियमस्य विषयः, तेन भवत्येव जुस्।।

111. लङः शाकटायनस्यैव। (3.4.111)
`अयुः, अवुः' इति। पूर्ववच्छपो लुक्, पूर्ववच्च पररूपत्वम्।
`लङेव' इत्यादि। यत्सम्बन्धिनो झेर्जुस्भावो विधेयः। तिङत्वमधिकृत्येमुक्तम्। कुतः एतत् ? लङलिङोरप्याकारान्तादनन्तरयोः सम्भवात्। तत्सम्बन्धिनोस्तु `झेर्जुस्' (3.4.108) इत्येवमादिनैव शास्त्रेण जुस्भावो विहित इति न तावदधिकृत्येदमुच्यते। एवकारस्तु लृङ्व्यवच्छेदार्थः, स्यप्रत्ययेन झेर्व्यवधानात्। स चातिदेशद्वारेण यस्य लङ्वद्भावो न भवति स वेदितव्यः। यस्य ह्यतिदेशद्वारेण लङ्वद्भावो विहितः स उपचारेण लङित्युच्यते। परमार्थतस्तु लोडेवासौ, न लङेव। `लङ्वद्भावेन यः' इति। लङिति सम्बध्यते।लङा तुल्यं मा भूदिति मुख्यस्यैव लङो ग्रहणं यथा स्यादित्येवमर्थं लङ्ग्रहणं क्रियते। केन पुनर्लङ्वद्भावो भवतीत्याह-- `लोटो लङ्वत्' इति. अनेन हि सूत्रेण (3.4.85) लोटो लङ्वत् कार्यष्वतिदिष्टेषु लङ्कार्ययोगात् तस्य लङ्वद्भावो भवति। तेन लङसदृशभूत उपचारेण लङिति व्यपदिश्यते। अत्रायमर्थः--यदि मुख्यस्य लङः परिग्रहार्थं लङ्ग्रहणं न क्रियते, ततः `लोटो लङ्वत्' (3.4.85) इत्यतिदेशाद्यथा तामादिकार्यं लोटो भवति, तथेदमपि स्यात्। अतोऽस्य दोषस्य निवृत्यर्थं लङग्रहणं क्रियत इति मा भून्नामायं जुस्; लोटो लङग्रहणाद्यत्नात्।। यस्तु `सिजभ्यस्तविदिभ्यश्च' (3.4.109) इत्यनेन विधीयते स विभ्यतु, जाग्रतु, विदन्त्वित्यादौ कस्मान्न भवति, न हि किञ्चित् तत्र यत्नान्तरमस्ति ? इत्याह-- `सिजभ्यस्त' इत्यादि। कथं पुनर्विना यत्नेन पूर्वको जुस् लोटो न भवतीत्याह-- `जुस्भावमात्रं हि' इत्यादि। न ह्ययमेव जुस् मुख्येन लङा विशिष्यते,किं तर्हि ? जुस्भावमात्रम्। योऽस्मिन् प्रकरणे जुस् विहितः स मुख्यस्यैव लङो भवति, नेतरस्येति। तेन पूर्वकोऽपि जुस् न भवति। `एककार उत्तरार्थः' इति। अथ तदर्थं एवकारः कस्मान् भवति ? विध्यर्थत्वात् तस्य । न हि विध्यर्थवाक्य एवकारस्यार्थवत्वमुपपद्यते। स हि नियमार्थेषूपयुज्यते, न हि विध्यर्थेषु। न चेदं नियमार्थम्; सिद्धे हि विधिरारभ्यमाणो नियमार्थो भवति (का.दु.प.59), न च सिद्धेऽयमारभ्यते। तस्मादुत्तरार्थं एवकारः। ननु शाकटायनस्यैव मतेन यथा स्यादन्येषां मते मा भूदित्येवमर्थमिहैवकारः स्यात् ? न; तेन विनाऽप्यस्य नियमस्य सिद्धत्वात्। यद्यन्येषां मते न स्यात्, शाकटायनग्रहणमनर्थकं स्यात्।।

112. द्विषश्च। (3.4.112)
`अद्विषु' इति. अदादित्वाच्छपो लुक्।।

113. तिङ्शित्सार्वधातुकम्। (3.4.113)
`भवति, नयति' इति। तिङः सार्वधातुकसंज्ञायां तन्निबन्धनः कर्त्तरि शप्, तस्यापि शितः सार्वधातुकत्वात् `सार्वधातुकार्धधातुकयोः' 7.3.84) इति गुणः। `रोदिति' इति। पूर्ववच्छपो लोपः, `रुदादिभ्यः सार्वधातुके' (7.2.76) इतीट्। `पवमानः, यजमानः' इति। `पूङ्यजोः शानन्' (3.2.128) ,तस्य सार्वधातुकत्वात् शप्, तस्यापि सार्वधातुकत्वाद्धातोर्गुणः।।

114. आर्धधातुकं शेष-। (3.4.114)
`लविता' इति। तृच्, `आर्धधातुकस्येड्वलादेः' (7.2.35) इतीट्। `वृक्षत्वम्' इति। `तस्य भावस्त्वतलौ' (5.1.119)। `लूभ्याम्' इति। लुनातेः क्विबन्ताद्भ्याम्। `जुगुप्सते' इति। गुपादिसूत्रेण (3.1.5) सन्। त्वलादीनामार्धधातुकत्वाभावादिडभावः। यत्तं `वृक्षत्वम्' प्रत्युदाहरणम्, त्वप्रत्ययस्य धातोरविधानात्, `लूभ्याम्' इत्याद्ययुक्तम्, `क्विबन्ता धातुत्वं न जहति' (व्या.प.132) इति न्यायात्, म्याम्प्रत्ययो धातोरेव विहितः, सन्प्रत्ययोऽपि धातोः,

गुपादेर्धातुत्वात् ? नैतदस्ति;अस्यैव हि दोषस्य परीहाराय धातुशब्देन यो विहित इत्युक्तम्। तस्य चायमर्थः-- धातोरित्येवं यो विहितः,धातुशब्दमुच्चार्य यो विहित इति यावत्। यस्य विधायकलक्षणे धातुग्रहणमस्ति,न चैवं भ्मांसनौ विहितौ; त्दविधौ धात्वधिकारस्य धातुग्रहणस्य चासम्भवात्। कथं पुनर्धातुसंशब्दनेन यो विहित इत्येषोऽर्थो लभ्यते, यावता धातोरित्येकमेव धातुग्रहणमनुवर्त्तते, तच्चाधातुप्रत्ययनिवृत्तौ चरितार्थत्वान्नापरं किञ्चिद्विशिष्टमभिधातुमुत्सहते ? एवं मन्यते-- यङविधानसूत्रात् (3.1.22) `शमिधातो संज्ञायाम्' (3.2.14) इत्यतो वा द्वितीयदातुग्रहणमनुवर्त्तते, तत्रैकेन धातुना अधातुप्रत्ययो निवर्ततते, अपरेण धातुप्रत्ययो विशिष्यते-- धातोरित्येवं यो विहित इति। शेषग्रहणं किम् ? तिङशितोर्मा भूत्, अन्यथा ह्येकसंज्ञाधिकाराभावात् प्रत्ययादिसंज्ञानामिव समावेशः स्यात्।।

115. लिट् च। (3.4.115)
`शेकिथ' इति। आर्धधातुकत्वाल्लिटः `ऋतो भारद्वाजस्य' (7.2.63) इतीट्। तत्र ऋत एव भारद्वाजस्य नान्येषां धातूनामित्येषोऽर्थोऽभिमतः। `थलि च सेटि' (6.4.121) इत्येत्वाभ्यासलोपौ। `जग्ले, मम्ले' इति। आर्धधातुकत्वात् `आतो लोप इटि च' (6.4.64) इत्याकारलोपः।
`ननु च ' इत्यादिना यदुक्तं `सार्वधातुकसंज्ञाया अपवादः' (का.3.4.115) इति तद्विघटयति। एकसंज्ञाधिकारादन्यत्र समावेशो भवति, यथा--त्ययादिसंज्ञानाम्। न चात्रैकसंज्ञाधिकारोऽस्ति,तदयुक्तमस्याः सार्वधातुकसंज्ञाया अपवादत्वमित्यभिप्रायः।`सत्यमेतत्'इत्यादिना अपवादत्वमेव समर्थयते।।

116.लिङाशिषि। (3.4.116)
`{लविषीष्ठा' इति मु.पाठः} लविषीष्ट' इति। थास् , `सुट् तिथोः' (3.4.107) इति सुट्, षष्वम्, ष्टत्वञ्च।।

117.छन्दस्युभयथा। (3.4.117)
`{अस्तये इति मुद्रितः पाठः} स्वस्तये' इति। `अस भुवि' (धा.पा.1065), स्त्रियां क्तिन्। सार्वधातुकत्वादस्तेर्भूभावो न भवति।
`विशृण्विरे' इति। अत्र लिटः सार्वधातुकत्वात् `श्रुवः शृ च' (3.1.74) इति श्नुप्रत्ययः, शृभावश्च। `सुन्विरे' इति। `स्वादिभ्यः श्नुः' (3.1.73)।
`उपस्थेयाम'इति। तिष्ठतेर्लिङ,यासुट्,मस्, `एतेर्लिङि' (7.4.24)इत्येत्वम्।
ननु `व्यत्ययो बहुलम्' (3.1.85) इत्यनेनैव सिद्धं सर्वमेवेदम्, किमर्थोऽयमारम्भ इत्याह-- `व्यत्ययो बहुलमित्यस्यैव' इति। गतार्थम्।।
इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
तृतीयस्याध्यायस्य
चतुर्थः पादः।
समाप्तश्च तृतीयोऽध्यायः।।

4.1
अथ चतुर्थोऽध्यायः

1. ङ्याप्प्रातिपदिकात्। (4.1.1)
`अधिकारोऽयम्' इति। स्वरितेनासञ्जितत्वात्। `आ पञ्चमाध्यायपरिसमाप्तेः' इति। अनेनाधिकारस्यावधिं दर्शयति। ततः परं नायमनुवर्त्तते; अस्वरितत्वात्। `स्वादिषु कप्पर्यन्तेषु' इति। अधिकारस्य विषमाचष्टे। `ङी इति ङीप्ङीष्ङीनां सामान्येन ग्रहणम्' इत्यादि। `ङी' इति विशेषकराननुबन्धानुत्सृज्य यत् सामान्यं ङीमात्रं तदिह गृह्यते। `टाब्डाप्चापामाप्' इति। सामान्येन ग्रहणमिति प्रकृतेन सम्बन्धः। ननु च ङ्यादीनां बहुत्वाद्बहुवचनेन भवितव्यम्, तत्कथं `ङ्याप्प्रातिपदिकात्' (4.1.1) इत्येकवचनेन निर्देश इत्याह --`तेषाम्' इत्यादि। समाहारद्वन्देनेह ङ्यादीनामयं निर्देशः कृत इत्यर्थः। इतरेतरयोगे हि द्वन्द्वे स्याद्बहुवचनम्। न चायमितरेतरयोगे द्वन्द्वः,किं तर्हि ? समाहारे। तस्य चैकार्थत्वादेकवचनमेव युक्तम्। `समाहारनिर्देशः' इति वचनमितरेतरयोगनिवृत्त्यर्थम्,सामासन्तरनिवृत्त्यर्थञ्च, अन्यथा हि ङ्यापोः प्राप्तिपदिकं ङ्याप्प्रातिपदिकमित्यपि षष्ठीसमास आशङ्क्येत। ततो ङ्यन्तमाबन्तञ्च समासप्रातिपदिकं यत् ततः स्याद् राजकुमार्यादिभ्यः न तु केवलेभ्यः कुमार्यादिभ्यः। ङ्यापोस्तु विधानेनैव प्रातिपदिकं प्रकृतिः स्यात्। तस्मात् समाहार द्वन्द्वेनायं निर्देशः । तत्र तु त्रयं प्रकृतित्वेनाधिक्रियते, तेन सर्वतो भवति।
अथ कथं पुनरत्र विग्रहः ? केचिदाहुः-- `ङीश्च आप्च प्रातिपदिकञ्चेति। ननु च `अप्रत्ययः' (1.2.45) इति प्रातिपदिकसंज्ञाप्रतिषेधाद् ङीश्चेति विभक्त्युत्पत्तिर्न स्यात् ? उच्यते; नायं प्रत्ययः, अपि तु प्रत्ययानुकरणमिदम्। एवमपि `प्रकृतिवदनुकरणं भवति' (व्या.प.113) इति स्यादेव प्रतिषेधः ? नैष

दोषःच अनुकरणं द्वैधम्-- अर्थस्य, शब्दमात्रस्य चेति। ज्ञापितमाचार्येणैतद् द्वेधा निर्देशात् -- `परिव्यवेभ्यः क्रियः' (1.3.18) , `विपराभ्यां जेः' (1.3.19) इतीयङादेशस्य करणाकरणाभ्याम्। अतोऽत्र शब्दमात्रमनुकृतम्, न त्वर्थसहितम्। तेनात्र `अप्रत्ययः' (1.2.45) इति नास्त्येव प्रतिषेधः।
प्रकृतिवदतिदेशस्त्वर्थवत्यनुकरणे। ननु चेवमपि हल्ङ्यादिलोपेन (6.1.68) भाव्यम् ? उच्यते; ङ्यन्तात् सुलोपः, न ङीमात्रात्। व्यपदेशिवद्भावात् स्यादिति चेत् ? न; `व्यपदेशवद्भावोऽप्रातिपदिकेन' (शाक.प.65) इत्युच्यते, प्रातिपदिकञ्चदम्। तस्मात् `ङीश्च' इति। अथ प्रत्ययविधिविषयैषा परिभाषा पूर्वादिनिः' (5.2.86) `सपूर्वाच्च' (5.2.87) इत्यत्र ज्ञापितत्वात् ? न चायं प्रत्ययविधिः, कस्तर्हि ? लोपविधिरिति, अतः परिभाषा न प्रवर्त्तत इत्यस्त्येव व्यपदेशिवद्भाव इति ततः प्रवर्त्तते लोपशास्त्रम्। अतः सुलोपेन भवितव्यम्-- ङी चेति। सामान्येन परिभाषाप्रवृत्तिमाश्रित्य ङीश्चेति विग्रहः।
अन्यस्त्वाह-- `प्रयोगस्य एव कुमारी, गौरीत्यादिषु य ईकारः सोऽत्रानुकृत एव लुप्तविभक्तिकः,तेन ङी इत्येव भवति। यद्येवम्, कुतो ङकारः सामान्यग्रहणार्थ आसज्यते ? ननु चानुक्रियमाणेनार्थेनार्थवत्त्वात् पुनरपि विभक्त्युत्पत्तिः प्राप्नोति, ततश्च ङीश्चेति भवितव्यम् ? नैतदस्ति; प्राक्कालभाविनी या विभक्तिस्तां प्रत्ययलक्षणेनाश्रित्याप्रत्यय (1.2.45) इति प्रतिषेधात्। अथापि स्यात्-- `न ङिसम्बुद्ध्योः' (8.2.8) इति ज्ञापकात् प्रत्ययलक्षणेनाप्रत्यय (1.2.45) इति प्रातिपदिकसंज्ञा न प्रतिषिध्यते' इति। असदेतत्; नलोपविधिविषयमेवैतज्ज्ञापकम्। अतोऽत्र नास्त्येव प्रत्ययलक्षणेन प्रातिपदिकसंज्ञाप्रतिषेध इति स्थितमेतत्।
ननु च प्रत्ययत्वे सति `परश्च' (3.1.2) इति वचनात् परे भवन्तः स्वादयः पूर्वां प्रकृतिमाक्षिप्य भवन्ति, न ह्यन्यथा परत्वमुपपद्यते, तस्य परत्वस्य पूर्वापेक्षत्वात्, न च ङ्यादिभ्योऽन्या प्रकृतिरुपपद्यते। तत्र ङ्याप्प्रातिपदिकग्रहणमन्तरेणापि पारिशेष्यादियमेव प्रकृतिर्लभ्यते तथा हि, प्रकृत्यन्तरं धातुरिति-- तिङन्तञ्च, वाक्यञ्च। प्रत्यया अपि स्वादयः, टाबादयः अणादयश्च। तत्र धातोस्तावत् स्वादिभिर्न भवितव्यम्, ते ह्येकत्वादिष्वर्थेषु विधीयमानास्तद्वन्तं शब्दमाक्षिपन्ति। न च धातुरेकत्वादिमान्। अथाप्यविशेषणोत्पद्यन्ते, उत्पन्नानां तु नियमः क्रियते ? तथापि न ैव तेषां धातोरुत्पत्तिर्युक्ता; सामान्यविहितानां स्वादीनां विशेषविहितैस्तव्यदादिभिर्बाधितत्वात्। टाबादयस्तर्हि धातोर्भवेयुरिति चेत् ? स्यादेतत्। असति ङ्याप्प्रातिपदिकग्रहणेऽकारान्तेभ्यो धातुभ्यो जुगुप्सादिभ्यः `अतः' (4.1.4) इति टाप् स्यात्, अपिद्भ्यो वञ्चुप्रभृतिभ्यः `उगितश्च' (4.1.6) इति ङीप् स्यात्, नकारान्तेभ्यो मन्प्रभृतिभ्यः `ऋन्नेभ्यो ङीप्' (4.1.5) इति ङीप्प्रत्ययः इति ? एतच्च नास्ति ; यतः स्त्रियां टाबादयो विधीयन्ते, क्रियावचनश्च धातुः। क्रियायाश्चासत्त्वभूतत्वाल्लिङ्गेन योगो नास्ति; तस्य द्रव्यधर्मत्वात्। एतेन तिङन्ताद्वाक्याच्च टाबादीनामुत्पत्तिः प्रतिक्षिप्ता; तयोरपि क्रियाप्रधानत्वात्। अणादीनामपि नैव धातोरुत्पत्तिरुपपद्यते। ते ह्यपत्यादिनार्थेन सम्बन्धे सति विधीयन्ते। धातुवाच्यस्यार्थस्यासत्त्वभूतत्वाद्यथा स्त्रीत्वेन योगो न सम्भवति, तथाप्यपत्यादिना ह्यर्थेन। एतेन तिङन्ताद्वाक्याच्चाणादीनामुत्पत्तिर्निरस्ता; तदर्थस्यापि क्रियाप्रधानस्यापत्यादिना सम्बन्धाभावात्। देवदत्तस्य पचति यस्तस्यापत्यमिति सत्यपि सम्बन्धे `तिङश्च' (5.3.56) इति ज्ञापकान्न भवति। येऽपत्यादिनार्थेन सम्बन्धे तद्धिता विधीयन्ते तेऽनन्तरोक्तया नीत्या मा भून्, ये तु स्वार्थे विधीयन्ते तैर्युक्तमेव भवितुमिति चेत् ? वार्त्तमेतत्; यथैव हि स्वादीनां सामान्यविहितानां विशेषविहितैस्तव्यदादिभिर्बाधितत्वात् तदुत्पत्तिर्नोपपद्यते तथा स्वार्थिकानामपि सामान्यविहितानां स्वार्थिकैस्तुमुन्नादिभिर्विशेषविहितैर्बाधितत्वान्नोपपद्यत एव। तिङन्तात् तर्हि के स्युरिति चेत् ? ज्ञापकान्न भविष्यन्ति। यदयं क्वचित् तद्धितविधौ तिङ्गर्हणं करोति-- `अतिशायने तमबिष्ठनौ' (5.3.55) `तिङश्च' (5.3.56) इति, क्वचित् तद्धितविधौ तिङ्ग्रहणं करोति-- `अतिशायने तमबिष्ठनौ' (5.3.55) `तिङश्च' (5.3.56) इति, तज्ज्ञापयति-- तिङन्तात् तद्धिता न भवन्तीति। वाक्यात् तर्हि भवेयरिति चेत् ? अनभिधानान्न भविष्यन्ति। न हि `देवदत्तस्याश्वकः' इत्युक्ते वाक्यार्थगता अज्ञातादयोऽर्थाः कप्रत्ययेन द्योत्यन्ते, किं तर्हि ? अश्वशब्दगता एव।
स्वादिभिरपि नैव तिङन्ताद्भवितव्यम्, तेषां ह्येकत्वादयोऽर्थाः,ते च तिङभिरेवोक्ताः। न चोक्तर्थानां प्रयोगे युक्तः; `उक्तार्थानामप्रयोगः' (व्या.प.60) इति वचना। ननु चोक्तार्थानामपि प्रयोगो दृश्यते, यथा-- एको द्वौ बहव इति चेत् ? युक्तोऽत्र प्रयोगः वचनग्रहणात्। `प्रातिपदिक' इत्यादौ हि सूत्रे वचनग्रहणस्यैतत् तेषां भवति; तत्रास्याः परिभाषाया उपस्थानात्। तेन लिङ्गविशिष्टानामपि सर्वादीनां सर्वनामकार्यमुपपद्यते। यद्येवम्, इममेव न्यायमाश्रित्य शक्यं ङ्याब्ग्रहणमकर्त्तुम् ? नैतदस्ति; न हि प्रातिपदिकसंज्ञा लिङ्गविशिष्टस्यार्थवतः शब्दरूपस्य भवितुमर्हति; `अप्र्तयय' (1.2.45) इति प्रतिषेधात्। न च प्रातिपदिकसंज्ञाविधौ सर्वेऽर्थवन्तः संज्ञिनः स्वरूपेण शक्या दर्शयितुम्; तेषामानन्त्यात्। यद्येवम्, `णाविष्ठवत् प्रातिपदिकस्य' (वा.813) इत्यत्रापि तर्हीयं परिभाषा नोपतिष्ठते; स्वरूपाग्रहणात्, ततश्च लिङ्गविशिष्टेष्विष्ठवद्भावो न स्यात्। तत्र को दोषः ? कुमारीमाचष्टे कुमारीयतीत्यत्र टिलोपो न स्यात् ? नैष दोषः; बहुलमिष्ठवद्भाव इष्यते, तथा च चुरादौ पठ्यते `प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च' (चुरा.ग.सू.186) इति। तस्माद्बहुलवचनाल्लिङ्गविशिष्टस्यापीष्ठवद्भावो भविष्यति।
`किञ्च' इत्यादना प्रयोजनान्तरं समुच्चिनोति। तदिति ङ्यापोः प्रत्यवर्शः। ङ्यन्तादाबन्ताच्च तद्धितविधानं यथा स्यादित्येवमर्थ च ङ्याब्ग्रहणम्। `कालितरा' इति। कालशब्दाज्जनपदादिसूत्रेण (4.1.42) ङीप्, तदन्तात् `द्विवचनविभज्योपपदे' (5.3.57) इत्यादिना तरप्, `घरूपकल्प' (6.3.43) इत्यादिना ह्रस्वः। `हरिणितरा' इति। हरितशब्दात् `वर्णादनुदात्तात् तोपधातो नः' (4.1.39) इति ङीप्, तकारस्य नकारः, `अट्कुप्वाङ्' (8.4.2) इत्यसति ङ्याब्ग्रहणे परत्वादातिशयिकः स्यात्। अस्मिंस्तु सति ङ्यापोस्तद्धितविधाने प्रकृतित्वेनाश्रयणात् पूर्वं ङ्याब्भ्यां भवितव्यमिति तदन्तात् तद्धितविधिः सिध्यति। ननु चान्तरङ्गः स्त्रीप्रत्ययः, बहिरङ्गास्तदिताः, तथा हि-- `समर्थानां प्रथमाद्वा' (4.1.82) इत्यधिकाराद्विभक्त्यन्ताते उत्पद्यन्ते, विभक्तयश्च कर्माद्यपेक्षाः, कर्मादयश्च बाह्यक्रियानिमित्तत्वाद्बहिरङ्गाः ततश्च निमित्तस्य बहिरङ्गत्वात् तद्धिता अपि बहिरङ्गाश्रया एव भवन्ति; लिङ्गस्य तु सम्बन्ध्यन्तरानपेक्षत्वादन्तरङ्गत्वञ्च, अतस्तन्निमित्ता अपि टाबादयोऽन्तरङ्गा भवन्ति, ततश्चान्तरङ्गत्वादेव टाबादिभिस्तावद्भवितव्यम्, पश्चात्

तदन्तात् तद्धितैरित्यपार्थकं ङ्याब्ग्रहणम् ? नैतदस्ति; तदन्तात् तद्धितविमधानार्थं ङ्याब्ग्रहणमित्यत्र हि वाक्ये तद्धितग्रहणेन स्वार्थिका ये तद्धितास्त एव विवक्षिताः। इममेवार्थं सूचयितुं कालितरा, हरिणितरेति स्त्रीप्रत्ययान्तात् स्वार्थिक एव तरप्रत्यय उदाहृतः।
स्वार्थिकेषु च `समर्थानाम्' (4.1.82) इत्येतन्नानुवर्त्तते। तथा हि क्ष्यति वृत्तिकारः-- `स्वार्थिकप्रत्ययावधिश्चायमधिकारः `प्राग्दिशो विभक्तिः' (5.3.1) इति यावत्। स्वार्थिकेषु ह्यस्योपयोगो नास्ति' इति। एवञ्च सति विभक्त्युत्पत्तिमनपेक्ष्य प्रातिपदिकादेव स्वार्थिकैर्भवितव्यमिति कुतस्तेषां बहिरङ्गत्वम् !
नन्वेवमपि कालितरेत्याद्यनुदाहरणम्; तरप्प्रत्ययस्य बहिरङ्गत्वात्। स हि यद्यपि विभक्त्युत्पत्तिं नापेक्षते, प्रतियोगिनं तु बाह्यार्थमपेक्षत एव, स्त्रीप्रत्ययस्य तु न कश्चित् प्रतियोग्यपेक्षेति तस्यान्तरङ्गत्वम् ? नैष दोषः; उदाहरणदिगियं वृत्तिकारेण दर्शिता ।
एतानि त्वत्रोदाहरणानि दर्शयितव्यानि-- एनिका, श्येनिका, रोहिणिकेति। अत्र हि यदि पूर्वं तद्धितः स्यात् तदेतश्यतरोहितशब्देभ्योऽज्ञाताद्यर्थविवक्षायां कप्रत्यये `वर्णादनुदात्तात् तोपधात् तो नः' (4.1.39) इत्यनेन ङीब्नकारौ न स्याताम्। यदि तर्हि ङ्याबन्तात् तद्धितविधानार्थं ङ्याब्ग्रहणम्, समासान्ता अपि तदन्तादेव स्युः, ततश्च बहवो गोमन्तोऽस्यां नगर्यामिति स्यात्, बहुव्रीहौ कृते `उगितश्च' (4.1.6) इति ङीप्, ततश्च `नद्यृतश्च' (5.4.153) इति कपि बहुगोमतीकेति रूपं स्यात्, बहुगोमत्केति चेष्यते ? नैष दोषः; न हि समासान्ताः समासादुत्पद्यन्ते। किं तर्हि ? अकृत एव समासे तदर्थादुत्तरपदात्। तथा हि `न कपि' (7.4.14) इत्यत्र वक्ष्यति वृत्तिकारः-- `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इत्ययमपि ह्रस्वः कपि न भवति, समासार्थे ह्युत्तरपदे कपि कृते पश्चात् समासेन भवितव्यमिति स्त्रीप्रत्ययान्तं समासप्रातिपदिकं न भवति' इति। न च बहवो गोमन्तोऽस्यां नगर्यामित्यत्र वाक्ये समासार्थमुत्तरपदं स्त्रियां वर्त्तत इति प्राक्कपैव भवितव्यम्, पश्चात् समासेन, ततः स्त्रीप्रत्ययेन प्रत्ययानुपूर्व्या बहुगोमत्केति सिद्धं भवति।
यिद तर्ह्यकृत एव समासे तदर्थादुत्तरपदात् समासान्ता भवन्ति, तदा `नञस्तत्पुरुषात्' (5.4.71) इत्यत्र `नञढः परे वक्ष्यमाणा य ऋगादयस्तदन्तात् तत्पुरुषात् समासान्ता न भवन्ति' इत्येष वृत्तिग्रन्थो विरुध्यते, तेब्यस्तत्पुरुषसमासार्थेभ्यः समासान्ता न भवन्तीति वक्तव्यं स्यात् ? नञः प्रकृतत्वात् स एव विज्ञायते । `तत्पुरुषात्' (5.4.71) इत्यत्रापि तत्पुरुषशब्दस्तादर्थ्यात् तत्पुरुषार्थ उत्तरपदे वर्त्तते। तत्र पुनः ऋगादेः श्रुतत्वादृगादिरेव विज्ञायते, तदन्तात् तत्पुरुषादिति च व्यधिकरणे पञ्चम्यौ। ततोऽयमर्थः नञः परे य ऋगादयस्ते समीपभूता यस्य नञस्तस्मात् परं यत्तत्पुरुषार्थमृगादिपदं ततः समासान्तो न भवतीति। अथ वा-- अवयववचनोऽन्तशब्दः, समानाधिकरण एव पञ्चम्यौ; तादर्थ्यात्। ऋगाद्यन्तं तत्पुरुषार्थं युदत्तरपदं तदेव। तदन्तात् तत्पुरुषार्थादित्युक्तम्। ततश्चायमर्थः नञः परे य ऋगादयस्तदन्तात् तत्पुरुषार्थादुत्तरपदात् समासान्ता न भवन्तीति। तत् पुनस्तदन्ततत्पुरुषार्थम्। उत्तरपदं सामर्थ्यादृगाद्येव विज्ञायते। `बहुव्रीहौ संख्येये डजबहुगणात्' (5.4.73) इत्यत्र तर्हि योऽयं वृत्तिग्रन्थः-- `संख्येये योऽयं बहुव्रीहिर्वर्त्तते तस्मादबहुगणान्ताड्डच्प्रत्ययो भवति' इति, तस्य विरोधः ? नास्ति विरोधः; अत्र हि बहुव्रीह्यर्थमुत्तरपदमेव तादर्थ्याद्बहुव्रीहिरित्युक्तं भवति। तदयमर्थः-- संख्येये यद्बहुव्रीह्यर्थमुत्तरपदं वर्त्तते तस्माड्ड्च्प्रत्ययो भवतीति। अनया दिशाऽप्यन्य एवञ्जातीया विरोधाः परिहर्त्तव्याः। तदेवं स्थितमेवैतत्-- तदन्तात् तद्धितविधानार्थं ह्याब्ग्रहणमिति, विप्रतिषेधात् तद्धितविधानार्थं ङ्याब्ग्रहणमिति, विप्रतिषेधात् तद्धितवलीयस्त्वमिति।
यद्येवम्, `युनस्तिः' (4.1.77) `ऊङुतः' (4.1.66) इत्येतयोरपि त्यूङोर्ग्रहणं कस्मान्न विज्ञायते, तदन्तात् तद्धितोत्पत्तिर्यथा स्यात्-- युवतितरा, ब्रह्मबन्धूतरेति ? `नद्याः शेषस्यान्यतरस्याम्' (6.3.44) इत्यूङो विकल्पेन ह्रस्वत्वं न कर्त्तव्यम्; ह्याब्ग्रहणस्योपलक्षणार्थत्वात्। `स्त्रियाम्' (4.1.3) इति प्रकृत्य येषां विधानं तदुपलक्षणार्थमिह ङ्याब्ग्रहमम्। अतस्त्यूङोरपि ग्रहणमिह कृतमेव वेदितव्यम्।
ङ्याब्ग्रहणं यद्युपलक्षणार्थम्, अन्यतरस्यैव ग्रहणं कर्त्तव्यम्, एकेनापि हि स्त्रीप्रत्यया उपलक्ष्यन्त एव ? सत्यमेतत् ; वैचित्र्यार्थं तु द्वयोर्ग्रहणम् ।
`यावादिभ्यः कन्' (5.4.29), `लोहितान्मणौ' (5.4.30), `वर्णे चानित्ये' (5.4.31) इत्यनेन तु विकल्पेन स्वार्थिकेन स्त्रीप्रत्ययस्य बाधनमिष्यते। तत्र यदा बाधा तदा लोहितशब्दात् कनि टापि कृते चेत्वे लोहितिकेति भवितव्यम्; यदा तु न बाधा तदा ` वर्णादनुदात्तात्तोपधात् तो नः' (4.1.39) इति ङीब्नकारयोः कनि च `केऽणः' (7.4.13) इति ह्रस्वत्वे कृते लोहिनिकेति भवितव्यम्। तस्माद्वक्तव्यमेवैतत्-- लोहिताल्लिङ्गबाधनं वेति।।

2. स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोम्ङ्योस्सुप्। (4.1.2)
`उकारादवोऽनुबन्धाः' इत्यादि। तत्र प्रथमैकवचनस्योकार उच्चारणार्थाः। `अनहसौ' (7.1.93) इति विशेषणार्थः कस्मान्न विज्ञायते ? व्यावर्त्याभावात्। जसो जकारोऽसन्दिग्धोच्चारणार्थः, असति हि तस्मिन्नौकारस्यावादेशे कृते सन्देहः स्यात्-- कीदृशस्य प्रत्ययस्योच्चारणमिति, तत्र व्याख्यानं कर्त्तव्यमापद्यते। अथ `जसः शी' (7.1.17) इत्यत्र विशेषणार्थः कस्मान्न विज्ञायते ? `असः शी' (इत्युच्यमानेऽप्यतिप्रसङ्गाभावात्। `औटष्टकारः सुडिति प्रत्याहारग्रहणार्थः' इति। वृत्तौ त्वेष ग्रन्थो नास्ति; भवितव्यं त्वनेन। लेखकप्रमाददोषादिदानीमन्तर्हितः। शसः शकार औटष्टकारस्य `खरि च' (8.4.55) इति चर्त्वेनासन्दिग्धोच्चारणार्थः। शकारः सन्देहनिरासार्थः, इतरथा ह्यौडसित्युच्यमाने सन्देहः स्यात्-- किं टकारस्येदमुच्चारणम्, उत डकारस्येति ?तत्र डकारोच्चारणाट्टिलोपः स्यात्। ननु च सत्यपि शकारे भवितव्यमेव सन्देहेन-- किमिदं कृतचर्त्वस्य डकारस्योच्चरणम् ?टकारस्य वेति ? नैतदस्ति; यदि हि डकारस्य स्यात्, शकारोच्चारणमनर्थकं स्यात्। अथ `तस्माच्छसो नः पुंसि' (6.1.103) इति तत्र विशेषणार्थः `टाङसिङसामिनात्स्याः' (7.1.12) इत्यत्र । `सुपां सुलुक्' (7.1.39) इत्यादौ सुपां सुलुक् पूर्वसवर्ण आ आत् शे इत्याकारप्रश्लेषः, तत्रासति टकारे तस्यापि ग्रहणं स्यात्।
`संख्याकर्मादयश्च' इत्यादि। संख्या स्वादीनामर्थे विहिता `बहुषु बहुवचनम्' (1.4.21) इत्यादिना शास्त्रान्तरेण। कर्मादयश्च `कर्मणि द्वितीया' (2.3.2) इत्येवमादिना। `तेन सहास्यैकवाक्यता' इति। कर्मणि बहुत्वे बहुवचनं शस्। कर्मणि द्वित्वैकत्वयोद्विवचने औडमौ। एवमन्यत्राप्येकवाक्यता वेदितव्या।

यदि तर्हि तेन सहास्यैकवाक्यता , तदा युक्तं `बहुषु बहुवचनम्' (1.4.21) इत्यत्र -- `यत्र च संख्या सम्भवति तत्रायमुपदेशः, अव्ययेभ्यस्तु निःसंख्येभ्यः सामान्यविहिताः स्वादयो विद्यन्त एव' इति, तद्विरुध्यते, एकवाक्यतायां हि विशिष्ट एवार्थे कर्मादिसम्बन्धिन्येकत्वादौ स्वादीनां विधानात् सामान्यविहितत्वं नोपपद्यते।
यदपीदं तत्रोक्तम्- `ङ्याप्प्रातिपदिकात् स्वादयो लस्य तिबादय इति बहुवचनं विहितं तस्यानेन बहुत्वसंख्यावाच्यत्वेन विधीयते' इति, तदपि विरुध्यत एव; न ह्येकवाक्यतायां विहितस्य बहुवचनस्य पश्चाद्बहुत्वसंख्याय वाच्यत्वेन विधानं युक्तम्। तेन शास्त्रान्तेणानेन च संहत्य बहुत्वसंख्यायामेव बहुवचनविधानात् पूर्वकस्तावन्नास्ति विरोधः। एकवाक्यतायामपि हि यथा स्वादीनां सामान्येन विधानमुपपद्यते तथा `बहुषु बहुवचनम्' (1.4.21) इत्त्रैव प्रतिपादितम्। योऽपि द्वितीयो विरोध उद्भावितः सोऽपि न भवत्येव; ह्याप्प्रातिपदिकात् स्वादयो लस्य तिबादय इति बहुवचनं विहितमिति `बहुषु बहुवचनम्' (1.4.21) इत्यनेन सैहकवाक्यतामापन्नेनेत्ययं तत्राभिप्रायो वेदितव्यः। तस्यानेन सूत्रेण बहुत्वसंख्या वाच्यत्वेन विधीयत इत्यत्रापि स्वादिसूत्रेण (4.1.2) `लस्य' (3.4.77) इत्यादिना च शास्त्रेण सहैकवाक्यतां प्रतिपन्नेनेत्येषोऽभिप्रायो द्रष्टव्यः। एवञ्च संहत्यैव बहुवचनं विहितम्। संहत्यैव च तस्य बहुतवसंख्या वाच्यत्वेन विधीयत इति कुतो विरोधः; ननु च `बहुवचनम्' (1.4.21) इत्येकमिदं शास्त्रम्, तस्य दि स्वादिसूत्रेणै (4.1.2)कवाक्यता, ततो `लस्य' (3.4.77) इत्यादिना शास्त्रान्तरेण सा नोपपद्यते ? अथ तेनैकवाक्यता, स्वादिसूत्रेण (4.1.2) सा नोपपद्यते ? नैव दोषः; द्वे ह्येते वचने तन्त्रोच्चारिते, तत्रैकस्य स्वादिसूत्रेणैकवाक्यता, अपरस्य `लस्य' (1.4.21) इत्यादिना शास्त्रान्तरेण।
अथ वा-- अन्यथा विरोधाभावः प्रतिपाद्यते। इह हि स्वादयोऽनेन सूत्रेण `कर्मणि द्वितीया' (2.3.2) इत्येवमादिकं शास्त्रमनपेक्ष्य वा विधीयेरन् ? तद्वापेक्ष्य तेन सहैकवाक्यतामापन्ने ते ? इति द्वौ पक्षौ। तत्राद्ये पक्षेऽविशेषेणैव स्वादयो विधीयन्त इति, तथा विहितानां तु तेषां नियमः क्रियते-- यत्र संख्या सम्भवति तत्रासौ बहुषु बहुवचनम्' (1.4.21) इत्यादिना शास्त्रान्तरेण कर्मादिसम्बन्ध्येकत्वादिसंख्यावाच्यत्वेन विधीयते, यानि तु निःसख्यान्यव्ययानि तेब्यः सामान्यविहिताः स्वादय सन्तीत्येव। द्वितीये तु पक्षे विशिष्ट एवार्थे कर्मादिसम्बन्धिनि बहुत्वादौ स्वादयो विधीयन्ते। तत्र `बहुषु बहुवचनम्' (1.4.21) इत्याद्यः पक्ष आश्रितः, इह तु द्वितीय इति नास्ति विरोधः; पक्षान्तरमाश्रित्य तथाऽभिधानात्। अथ द्वितीये पक्षे कथमव्ययेभ्यः सुबुत्पत्तिः, न ह्येकवाक्यतायां संक्याकर्माद्यर्थरहितेभ्यः स्वाद्युत्पत्तिरुपपद्यते ? नैष दोषः; ज्ञापकाद्भविष्यति। यदयं `अव्ययादाप्सुपः' (2.4.82) इत्यव्ययादुत्पन्नस्य सुपो लुकं शास्ति, तज्ज्ञापयति-- भवत्यव्ययाद्विभक्त्युत्पत्तिरिति।
`कुमारी' इति। `वयसि प्रथमे' (4.1.20) इति ङीप्। `गौरी' इति। `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीष्। `शाङ्र्गरवी' इति `शाङ्र्गरवाद्यञो ङीन्' (4.1.73)। `खट्वा' इति। `अजाद्यतष्टाप्' (4.1.4) इति टाप्। `बहूराजा' इति। `डाबुभाभ्यामन्यतरस्याम्' (4.1.13) इति डाप्। `कारीवगन्ध्याः' इति। करीषस्य गन्ध इव गन्धो यस्येति। `गन्धस्येदुत्पूतिसुसुरभिभ्यः' (5.4.135) , `उपमानाच्च' (5.4.137) इतीत्त्वम्। करीषगन्धेरपत्यमिति `यस्येति च' (6.4.148) इत्यकारलोपः,`तद्धितेष्वचामादेः' (7.2.117) इत्यादि वृद्धिः,`अणिञोरनार्षयोर्गुरुपोत्तमयोः' (4.1.78) इत्यादिना ष्यङादेशः, `यङश्चाप्' (4.1.74) इति चाप्।।

3. स्त्रियाम्। (4.1.3)
`ङ्यापोरनेनैव विधानात्' इति। एतेन `स्त्रियाम्' इत्यधिकृत्य प्रत्ययविधौ ह्याबन्तायाः प्रकृतेरभावमाह। एष च `प्रातिपदिकमात्रमत्र प्रकरणे सम्बध्यते' इत्यत्र हेतुः। यदि हि ङ्याबन्ता प्रकृतिरिह प्रकरणे सम्भवेत् ततो ङ्यापावपि सम्बध्येयातानाम्, सा ङ्याब्रूपा न सम्भवति, अतो न ताविह सम्बध्येते। इह च स्त्रीत्वं प्रत्याचार्याणां दर्शनभेदः, क्वचिच्च दर्शने दोषो दृश्यते। तत्र केषाञ्चिद्दर्शनम्--
`स्तनकशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।
उभयोरन्तरं यच्च तदभावे नपुसंकम्।। इति।
`स्तनकेशवती' इति, भूम्न्यतिशायने वा मतुप्। `लोमशः' इत्यत्रापि लोमादिपामादिसूत्रेण (5.2.100) शप्रत्ययः। `उभयोरन्तरम्' इति, उभयोः स्त्रीपुंसयोः सदृशमित्यर्थः। तत्पुनः सादृश्यं लिङ्गवत्वेन। एवं तर्हि तदुभयं समुदितं यत्र तन्नपुंसकं प्राप्नोति। भवति हि समुदायरूपं समुदायिरूपेण लिङ्गित्वेन सदृशमित्यत आह-- `तदभावे' इति। एतदुभयं यत्र नास्ति तत् `नपुंसकम्' इति। तेन न सम्भवत्येष दोषः। यदि तदभावे नपुंसकमित्येतदुच्यते, ततोऽव्ययानां तिङन्तानाञ्चैव नपुंसकत्वं स्यात्। तथाप्युभयोरन्तरं यदित्येतावदुच्यते, एवमपि कुक्कुटमयूर्यौ इत्येवमादीनां लिङ्गसमुदायमतां समुदायानां नपुंसकत्वं प्रसज्येत। तस्मादुभयोरन्तरं यत् तदभाव इति च द्वयमप्युक्तम्। तदेवं यन्न स्त्री न पुमान् लिङ्गवच्च वस्तु तन्नपुंसकमित्युच्यते, ततोऽव्ययानां तिङन्तानाचञ्च नपुंसकत्वं न भवतीत्युक्तं भवति। अत्र दर्शने भ्रूकुंसे च टाप् प्रसज्यते, तसय् हि स्तनकेशसम्बन्ध उपलभ्यते। भ्रूकुंसः स्त्रीवेशधारी नर्तकः, पुरुष उच्यते। खट्वादीनाञ्च स्तनकेशाभावात् स्त्रीत्वं न स्यात्, वृक्षादीनाञ्च लोमशत्वाभावात् कुंस्त्वाभावः प्राप्नोति, खरकुट्यादीनाञ्च लोमशत्वात् पुंस्त्वम्, ततश्च खरकुटीः पश्येति `तस्माच्छसो नः पुंसि' (6.1.103) इति नत्वमापद्येत।
अन्येषां तु दर्शनम्-- संस्त्यानम्, प्रसवः, स्थितिश्चेति। संस्त्यानम्-- अपचयस्वभावं स्त्रीत्वम्, तद्यत्रास्ति सोऽर्थः स्त्री। प्रसवः = उपचयात्मकः पुंस्त्वम्, तद्यत्रास्ति स पुमान्। उपचयापचयरहिता याऽवस्था तदात्मिका स्थितिर्नपुंसकत्वम्, तद्यत्रास्ति तन्नपुंसकमिति। अत्रापि दर्शने संस्त्यानादेस्त्रयस्य सर्वत्र भावादेकैकं वस्तु स्त्री, पुमान्, नपुंसकञ्च प्रसज्येत। संस्त्यानविवक्ष्यायामेव स्त्रीत्वं भवति, प्रसवविवक्षायामेव पुंस्त्वम्, स्थितिविवक्षायामेव नपुंसकत्वम्,

अतोऽयमदोष इति चेत् ? अयुक्तमेतत्; तथा हि-- उपचीयते कुमारीत्यपि कुमारी स्त्री भवति, न पुमान्। अपचीयते वृक्ष इति संस्त्यानविवक्षायामपि वृक्षः पुमानेव भवति, न स्त्री। ुपचीयते कुण्डमपचीयते वेत्युपचयापचययोरन्यतरविवक्षायामपि कुण्डं नपुंसकमेव भवति, न पुमान् नापि स्त्री। तदेवमाचार्याणां स्त्रीत्वं प्रति दर्शनभेदाद्दोषदर्शनाच्च पृच्छति-- `स्त्रियामित्युच्यते,केयं स्त्री' इत्यादि। वृत्तिकारस्तु विदिताभिप्रायो दर्शनान्तरमाश्रित्याह-- `सामान्यविशेषाः' इत्यादि। सामान्यानि विशेषाश्चेति। तथा सामान्यानि च तानि तुल्यजातीपदार्थसाधारणत्वाद्विशेषाश्च परस्परतो विजातीयेभ्यश्च विशिष्यन्ते = व्यावर्त्यन्त इति सामान्यविशेषाः। `स्त्रीत्वादयो गोत्वादय इव' इति। यथैव हि गोत्वादयः सामान्यविशेषा भिन्नेष्व पि स्वाश्रयेष्वभिन्नाकारबुद्ध्यभिधानहेतवस्तथा स्त्रीत्वादयोऽपि। यथैव हि गोत्वादयस्तुल्यजातीयेषु सर्वेषु वर्त्तन्ते, विजातीयेभ्यस्तु व्यावर्त्तन्ते, तथा स्त्रीत्वादयोऽपि। तस्मात् तद्वदेव तेऽपि सामान्यविशेषाः। ननु च सामान्यविशेषणां सर्वव्यक्त्यनुगतत्वादस्मिन्नपि दर्शने स एव सर्वत्र सर्वलिङ्गताप्रसङ्गः, तत्किमिति दर्शनान्तरमुत्सृज्येदं दर्शनमाश्रितमित्याह--`बहुहप्रकारा व्यक्तयः'इति। व्यजन्त आभिरिति व्यक्तव्यः--- सामान्यविशेषाणामाश्रयाः। बहुप्रकारा व्यक्तयो येषां सामान्यविशेषाणां ते तथोक्ताः। अनेनैतत् सूचयति-- विचित्रत्वात् सामान्यविशेषाश्रयाणां व्यञ्जकानां कश्चिदेव सामान्यविशेषः केनचिदेवाश्रयेण व्यज्यते, न सर्वः सर्वेण। प्रतिनियतविषयत्वात् पदार्थशक्तीनाम्। तत्र येनार्थेन स्त्रीत्वमेव व्यज्यते न पुंस्त्वं नापि नपुंसकत्वम्, सा स्त्र्येव भवति, न पुमान्, नापि नपुंसकम्, येन पुंस्त्वमेव व्यज्यते स पुमानेव, येन नपुंसकत्वं तन्नपुंसकमेव। यस्तु द्वयोस्त्रयाणां वा व्यञ्जकः स द्विलिङ्गस्त्रिलिङ्गो वेष्यते-- अर्धर्चः, अर्धर्चम्; पद्मः, पद्मम्; तटः, कटी,तटमिति। तेन नास्मिन् दर्शने पूर्वदोषावसरः। यस्तर्हि सामान्यविशेषस्याश्रयो व्यञ्जको न भवति स कथं तद्योगात् स्त्री भवति ? पुमान् नपुंसकञ्चेति ?अत आह--क्वचित्' इत्यादि। आशात्माकाशादिषु हि सामान्यविशेषाः स्त्रीत्वादयः क्वचिदुपदेशमात्रव्यङ्ग्या एव, न त्वाश्रयव्यङ्ग्याः, तदाश्रयाणामतीन्द्रियत्वात्। तत्र यस्मिन्नुपदेशेन स्त्रीत्वं व्यज्यते सा स्त्री भवति, यथा -- इयमाशेति। यत्र पुंस्त्वं स पुमान्, यथा--अयमात्मेति। यत्र नपुंसकत्वं तन्नपुंसकमेव, यथा--- इदमाकाशमिति। कथं स्त्रीत्वादयः क्वचिदुपदेशमात्रव्यङ्ग्या भवन्तीत्याह-- `यथा' इत्यादि। ब्राह्मणत्वक्षत्रियत्वादीनां हि तथाविध आश्रयो नास्ति यस्तान्यभिव्यञ्जयेत्; सामान्यविशेषाश्रयाणामाशात्माकाशादीनमतीन्द्रियत्वात्। तदाश्रयणामन्यत्र सादृश्यादुपदेशमात्रादेव तु ब्राह्मणत्वादीनामभिव्यक्तिर्भवति। यथा च तेषां तथा च क्वचित् स्त्रीत्वादीनाम्। किं पुनरिदं स्त्रीत्वम् ? प्रत्ययार्थः ? उत प्रातिपदिकविशेषणम् ? इत्याह-- `स्त्रीत्वञ्च' इत्यादि। यदा स्त्रीशब्दो विनाऽपि भावप्रत्ययेन स्त्रीत्वे वर्त्तते तदा स्त्रियामभिधेयायां टाबादयो भवन्तीति स्त्रीत्वं प्रत्ययार्थो भवति। यथैव हि गोशब्दो जातिपदार्थपक्षे भावप्रत्ययरहितोऽपि गोत्वे वर्त्तते तथा स्त्रीशब्दोऽपि स्त्रीत्वे। यदा तु स्त्रीत्वं विशेषणमुपादाय तद्वति द्रव्ये स्त्रीशब्दोऽपि वर्त्तते तदायं पक्षोऽपि भवति-- स्त्रियां यत् प्रातिपदिकं वर्त्तते तस्माट्टाबादय इति स्त्रीत्वं प्रकृतेर्विशेषणं भवति। `उभयथाऽपि युज्यते' इति। कथं पुनरुभयथा युज्यते, यावता स्त्रीत्वस्य प्रत्ययार्थत्वे स्त्रीत्वं प्रधानमापद्यत इति तत्र व्यतिरेकलक्षणा षष्ठी प्राप्नोति, यथा--स्त्रीत्वं देवदत्ताया इति, ततश्च कुमारी देवदत्तेति सामानाधिकरण्यं न स्यात् ? द्विवचने बहुवचने च कुमार्यौ कुमार्य इति न स्याताम्, एकत्वात् स्त्रीत्वस्य ? अनेकश्च प्रत्ययो नोपपद्यते गार्गायणी, कारीषगन्ध्या,कालितरेति;एकत्वात् स्त्रीत्वस्य, तस्य च प्रथमोत्पन्नेनैव ष्फष्यङादिनाभिहितत्वात् ? स्त्रीति च ईकारो न प्राप्नोति संस्त्याने `{स्त्री इत्येव मुद्रितदशपाद्युणादिसूत्रपाठे दृष्यते} स्त्यायतेर्ड्रट्' (पं.उ.4.165) इति ड्रट्प्रत्ययान्तेनाभिधीयते, यतो व्यतिरेकलक्षणा षष्ठी स्यात्। कस्मात् न हि सामान्यविशेषाणामाश्रयाद्भेदः स्त्रीप्रत्ययान्तेनाभिधीयते, यतो व्यतिरेकलक्षणा षष्ठी स्यात्। कस्मात् पुनर्नाभिधीयते ? शब्दशक्तिस्वाभाव्यात्। द्विवचनबहुवचने अपि चोपपद्यते; यस्मात् सामान्यविशेषाणामेकत्वेऽपुनर्नाभिधीयते ? शब्दशक्तिस्वाभाव्यात्। द्विवचनबहुवचने अपि चोपपद्येते; यस्मात् सामान्यविशेषणामेकत्वेऽप्याश्रयसंख्यास्तद्वाचिन उपाददते, शब्दशक्तिस्वाभाव्यादेव। तेनाश्रयस्यानेकत्वात् द्विवचनबहुवचने भविष्यतः। गार्ग्यायणीत्येवमादौ द्वाभ्यामेव स्त्रीप्रत्ययाभ्यां स्त्रीत्वं व्यज्यते। नैकेन ष्यङादिनेत्यनेकोऽपि प्रत्ययो युक्त एव। अथ वा-- गार्ग्यायणीत्यत्र `प्राचां ष्फ तद्धितः' 4.1.17) इति विहितस्य ष्फस्य षित्करणसामर्थ्यात् ङीष् प्रत्ययो भविष्यति। `कारीषगन्ध्या' इति। ष्यङन्तात् `यङश्चाप्' (4.1.74) इति वचनसमार्थ्यादच्चाब्भविष्यति। `कालितरा' इति। जानपदादि (4.1.42) सूत्रविहितेन ङीषा स्त्रीत्वमप्रकर्षविशिष्टमुक्तम्, न तु प्रकर्षविशिष्टम्, अतस्तस्यानभिहितत्वात् तरवन्तात् टाब्भविष्यति। स्त्रीति `स्त्रियाम्'(4.1.3) इति निर्देशाल्लिङ्गाट्टित्करणसामर्थ्याद्वा ङीब्भविष्यति। प्रकृत्यर्थविशेषणपक्षे तु प्रातिपदिकेन स्त्रीत्वविशिष्टं द्रव्यमेवोच्यते, टाबादयस्तु द्योतका इति। तत्र व्यतिरेकाभावात् षष्ठ्या अप्रसङ्गादेव द्विवचनबहुवचने अपि। अनेकत्वाद्द्रव्यस्य युक्तेऽनेकोऽपि प्रत्ययो युक्त एव। यथैव हि प्रातिपदिकेनोक्तेऽपि स्त्रीत्वे खट्वेत्यादौ टाबादयो भवन्ति, तथा गार्ग्यायणीत्यादावनेकेऽपि ष्फादयो भवन्ति। अनेनैव स्त्रीत्वस्य द्योतितत्वादिति युक्तमुक्तम्-- `उभयथापि युज्यते' इति।।

4. अजाद्यतष्टाप्। (4.1.4)

`अजाद्यतदन्ताच्च'इति। अकारान्तादित्यर्थः। अथ स्वरूपग्रहणं कस्मान्न विज्ञायते ? अच्छब्दान्ताच् शरद्दरदित्येवमादेरिति ? लिङ्गात्। किं लिङ्गम् ? `तदाद्याचिख्यासायाम्' (2.4.21) `यकपूर्वायाः' (7.3.46) इत्येवमादिनिर्देशात्। स्वरूपग्रहणे हि ते नोपपद्येरन्। `पकारः सामान्यग्रहणार्थः' इति। `ङ्याप्प्रातिपदिकात्' (4.1.1) इत्यत्रासति हि पकारेऽस्य ग्रहणं न स्यात्। `टकारः सामान्यग्रहणाविघातार्थः' (इति)। असति हि टकारे `एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य' (व्या.प.52) इतिटापकस्यैव ग्रहणं स्यात्, न डाप्चापोः; द्वयनुबन्धकत्वात्। `शुभंयाः कीलालपाः' इति। `अन्येभ्योथऽपि दृश्यन्ते' (3.2.75) इतिविच्। किं पुनः स्यात्, यद्यत्रापि टाप्स्यात् ? इत्याह-- `हल्ङ्याभ्यः' इत्यादि। `जातिलक्षणे' इति। `जातेरस्त्रीविषयादयोपधात्' (4.1.63) इति। `पुंयोगलक्षणे' इति। `पुंयोगादाख्यायाम्' (4.1.48) इति। `पुष्पफलोत्तरपदलक्षणे'

इति। `पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च' (4.1.64) इति। `वयोलक्षणे' इति। `वयसि प्रथमे' (4.1.20) इति। `टिल्लक्षणे' इति। `टिड्ढाणञ्' (4.1.42) इति।

`शूद्रा चामहत्वपूर्वा' इत्यादि। ननु च `आमन्महतः' (6.3.46) इत्यादिनात्त्वेनात्र भवितव्यम्, अत एवं वक्तव्यम्-- अमहापूर्वेति ? नैतदस्ति; अर्थप्रधानस्य हि तदात्त्वमुच्यते, शब्दप्रधानश्चायम्। महच्छब्दः पूर्वो यस्याः सा महत्पूर्वेति। `महत्पूर्वस्य प्रतिषेधः' इति।अहमत्पूर्वेत्यस्यार्थमाचष्टे। अत्रापि जातिरिति सम्बध्यते, जातिवचनस्य प्रतिषेधो यथा स्यात्। इह मा भूत्-- महती शूद्रा महाशूद्रेति। अत् ह्युत्तरपदं शूद्रशब्दो जातौ वर्त्तते, न समुदायो महतीशूद्रारूपः। कथं पुनर्जातिरित्युच्यमाने महत्पूर्वस्य प्राप्तिः,यतः प्रतिषेध उच्यत इत्याह-- `महाशूद्रशब्दो ह्याभीरजातिवचनः' इति। महाशूद्रशब्दल एव हि समुदायो जातौ वर्त्तते। अत एव महाशूद्रीति `जातेरस्त्री' (4.1.63) इत्यादिना ङीब्भवति। नन्वेवमपि नास्त्येव टापः प्राप्तिः,शूद्रशब्दाद्धि प्रत्यय उत्पद्यमानः कथं महाशूद्रात् प्राप्नोतीत्यत आह--`तत्र तदन्तविधिर्न' इत्यादि। `कथं तदन्तविधिः' इति। न कथञ्चित्। ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधादिति (व्या.प.89) मन्यते। `अतिधीवरी ' इति। `अतिपीवरी' इति। दधातेः पिबतेश्च `आतो मनिन्क्वनिष्वनिपश्च' (3.2.74) इति क्वनिप्, ईत्वं घुमास्थादिसूत्रेण (6.4.66)। धीवानमतिक्रान्ता, पीवानमतिक्रान्तेति `कुगतिप्रादयः' (2.2.18) इति समासः। अत्र तदन्तविधौ ज्ञापिते सति `वनोरच्' (4.1.7) इति ङीब्रौ न भवतः। यदि पुनस्तदन्तविधिर्न ज्ञाप्येत तदा `वनः' इति प्रत्ययग्रहणमेतत्, ततश्च प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहणं भवति' (पु.प.वृ.44) इति वचनादिहैव स्याताम्-- `धीवरी, पीवरीति; अतिधीवरी, अतिपीवरीत्यत्र तु न स्याताम्। `अतिभवती'। अतिमहती' इति। भवतुशब्दः केवल उगित् सर्वादिषु पठ्यते, महदिति गौरादौ, तत्रासत्यस्मिञ्ज्ञापके केवलाभ्यामेव भवन्महच्छब्दाभ्यामुगिद्गौरादिलक्षणौ ङीब्ङीषौ स्याताम्। अतिभवती, अतिमहतीत्यत्र तु न स्याताम्, ज्ञापके तु सति भवतः। यद्येवम्, पञ्चानामजानां समाहारः पञ्चाजीति द्विगोरपि तदन्तविधिना टाप् प्राप्नोति ? नैष दोषः; अजादिभिः स्त्रियामिति विशेषयिष्यामः,`अजाद्यतः' (4.1.4) इति हि षष्ठी,तत्रैवमभिसम्बन्धः कर्त्तव्यः-- अजादीनां या स्त्री, अजादिशब्दानां वाच्येऽर्थे यत् स्त्रीत्वं समवायसम्बन्धेन वर्त्तमानम्, तत्र टाबिति। न च पञ्चाजीत्यत्राजाशब्दस्यार्थे वाच्ये स्त्रीत्वं समवेतम्, किं तर्हि ? समाहारे वाच्ये।

`पूर्वापहाणा। अपरापहाणा। टित्' इति। ल्युडन्तत्वात्।कक

`प्राक्पुष्पा' इति। प्राञ्चन्तीति प्राञ्चि, `ऋत्विग्दधृक् (3.2.59) इत्यादिना क्विन्। प्राञ्चि पुष्पानि यस्याः सा प्राक्पुष्पा।।

5. ऋन्नेभ्यो ङीप्। (4.1.5)

`ङकारः सामान्यग्रहणार्थः' इति। असति हि तस्मिन् `ङ्याप्प्रातिपदिकात्' (4.1.1) इत्यत्र ङीति ङीग्ङीषोरेव ग्रहणं स्यात्। न ङीपः।।

6.उगितश्च। (4.1.6)

`यथाकथञ्चित्' इति। येन केनचित् प्रकारेण। यदि वर्ण उगित् सम्भवति, यदि प्रत्ययः, अथापि प्रातिपदिकम्, सर्वर्था यत्रैषामन्यतमः सम्भवति तत् `उगिच्छब्दरुपम्' इति। अनेनोगिच्छब्दरूपस्य विशेषणं न प्रातिपदिकस्येति दर्शयति। यदि प्रातिपदिकस्यैव विशेषमं स्यादिहैव स्यात्-- भवती, महतीति; अर्वतीत्यत्र तु न स्यात्, `अर्वणस्त्रसावनञः' (6.4.127) इति नकारस्य त्रादेशः कृत इति वर्ण एव तकार उगित्, न प्रातिपदिकम्; गोमतीत्यत्र च न स्यात्, अत्रापि हि मतुप्प्रत्यय एवोगित्, न प्रातिपदिकम्; तस्मादुगिच्छब्दस्यैव विशेषणं युक्तमित्यभिप्रायः। तच्चोगिच्छब्दरूपं प्रातिपदिकस्य विशेषणम्, विशेषणेन च तदन्तविधिर्भवतीत्याह-- `तदन्तात्' इत्यादि। यदि तर्ह्युगिच्छब्दरूपान्तात् प्रातिपदिकान्ङीब्भवत्येवं सति भवतीति न सिध्यति, न ह्यत्रोगिच्छब्दरूपान्तं प्रातिपदिकं भवति, भवच्छब्दान्तादुगितः प्रातिपदिकादन्यस्य तदन्तस्याभावात् ? नैष दोषः; व्यपदेशिवद्भावात् तदन्ताद्भविष्यति। ननु च `व्यपदेशिवद्भावोऽप्रातिपदिकेन' (शाक.प.65) इति व्यपदेशिद्भावेन नात्र भवितव्यम् ? नैतदस्ति; न ह्युगिदिति प्रातिपदिकग्रहणम्, किं तर्हि ? प्रातिपदिकाप्रातिपदिकग्रहणम्; वर्णप्रत्ययोरप्युगितोर्ग्रहणात्। `पचन्ती, यजन्ती' इति। शत्रन्तान्ङीप्।

`धातोरुगितः प्रतिषेधः' इति। प्रतिपाद्यत इति शेषः।

`अञ्चतेश्चोपसंख्यानम्' इति। अञ्चतेर्ङीप्रत्ययस्य प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदमुभयत्र प्रतिपादनम् --- `पादोऽन्यतरस्याम्' (4.1.8) इति सूत्रे `अन्यतरस्याम्' इति योगविभागः करिष्यते, स च `उगितश्च' (4.1.6) `वनो र च' (4.1.7) `पादोऽन्यतरस्याम्' (4.1.8) इत्येषां त्रयाणामपि योगानां शेषः। व्यवस्थितविभाषा च सा। तेन प्रातिपदिकादुगितच्छब्दरूपान्ताद्धातूगिच्चब्दान्तादञ्चतेरेव नित्यं ङीब्भवति, ततोऽन्येभ्यस्तु न भवत्येवेति। अन्ये त्वन्यथा प्रतिपादनं कुर्वन्ति-- उखास्रत्, पर्णध्वदिति। क्रियाकारकसम्बन्धमात्रं विवक्षितम्, न स्त्रीत्वमिति ङीब्न भवति। स्त्रीशब्दसामानाधिकरण्यात्तु स्त्रीत्वप्रतीतिरापद्यते। न च `स्त्रीयाम्' (4.1.3) इत्यत्र स्त्रीसामानाधिकरण्यपक्षः स्थितः। प्राचीत्यादिषु तु स्त्रीत्वं विवक्षितम्, तेनेह भवतीकार इति। `उखास्रत्, पर्णध्वत्' इति। उखेन स्रंसते, पर्णानि ध्वंसत इति `अन्येभ्योऽपि दृश्यन्ते' (3.2.75) इति क्विप्, `अन्येषामपि दृश्यते' (6.3.137) इत्युखस्य दीर्घत्वम्। प्राचीति प्रपूर्वादञ्चतेः क्विन्, `अचः' (6.4.138) इत्यकारलोप), `चौ' (6.3.138) इत्युपसर्गस्य दीर्घत्वम्।।

7. वनो र च। (4.1.7)

`वनः' इति क्वनिब्वनिपोः प्रत्यययोर्ग्रहणम्। अथ `बन षण सम्भक्तौ' (धा.पा.463,464) `वनु याचने' (धा.पा.1470) इत्याभ्यां `अन्येभ्योऽपि दृश्यन्ते' (3.2.75) इति विचि कृते यद्रूपं वन्निति निष्पद्यते तत्कस्मान्न गृह्यते यदि ताभ्यां विज् दृश्येत स तु न दृश्यते; अनभिधानात्। `शर्वरी' इति। `शृ

हंसायाम्' (धा.पा.1488), `अन्येभ्योऽपि दृश्यन्ते' (3.2.75) इति वनिप्,गुणः रपरत्वम्। `परलोकदृश्वरी' इति। दृशस्तेनैव सूत्रेण (3.2.75) क्वनिप्। `वनोन हशः' इति। क्वचिदिति शेषः। हशः परो यो वनिप् हशन्ताद्धातोर्विहितस्तदन्तात् प्रातिपदिकात् क्वचिन्ङीब्रेफश्चान्तादेशो न भवति। `सहयुध्वा' इति। `युध सम्प्रहारे' (धा.पा.1173), `दृशेः क्वनिप्' (3.2.94), `राजनि युधिकृञः' (3.2.95), `सहे च' (3.2.96) इति क्वनिप्, `नोपधायाः' (6.4.7), `सर्वनामस्थाने' (6.4.8) इति दीर्घः, `नलोपः प्रातिपदिकान्तस्य' (8.2.7)। क्वचित्तु प्रतिषेधो न भवत्येव-- शर्वरीति, अतर् रेफाद्धशः परो वनिप्; अवावरीति, अत्रापि हशन्ताद्धातोर्वनिब्विहितः, तथापि प्रतिषेधो न भवति। `ओणृ अपनयने' (धा.पा.454), `अन्येभ्योऽपि दृश्यन्ते' (3.2.75) इति वनिप्, `विड्वनोरनुनासिकस्यात्' (6.4.41) इत्यात्त्वम्, अवादेशः। न च वनो न हश इत्येव {वक्तव्यं कर्त्तव्यम्' इति मुद्रितः पाठः। } वक्तव्यम्; यस्मात् `पादोऽन्यतरस्याम्' (4.1.8) इत्यन्तरस्यांग्रहणमस्यापि योगस्य शेषः। सा च व्यवस्थितविभाषा विज्ञायते। तेन यत्र ङीब्रेफौ नेष्येते तत्र न भविष्यतः।।

8.पादोऽन्यतरस्याम्। (4.1.8)

`पाद इति कृतसमासान्तः पादशब्दो निर्दिश्यते' इति। अथ `पद गतौ' (धा.पा.1169) इत्यस्माण्ण्यन्तात् `अन्येभ्योऽपि दृश्यते' (3.2.178) इति क्विपि कृते यत् पादिति रूपं निष्पद्यते रूपं निष्पद्यते तस्य ग्रहणं कस्मान्न विज्ञायते ? विज्ञायते यदि पादयतेः क्विब् दृश्येत्, स तु न दृश्यते; अनभिधानात्। `द्विपात्, द्विपदी' इति। द्वौ पादादस्या इति बहुव्रीहिः। `पादस्य लोपः' (5.4.138) इत्यनुवर्त्तमाने `संख्यासुपूर्वस्य' (5.4.140) इत्यकारलोपः, `पादः पत्' (6.4.130) इति पद्भावः।।

9. टाबृचि। (4.1.9)

`ऋचीत्यभिधेयनिर्देशः' इति। विषयनिर्देशाशङ्कां निराकरोति। यदि हि विषयनिर्देशः स्यात्, तत ऋचि विषय ऋग्ग्रन्थे यः पाच्छब्दस्तदन्तात् प्रातिपदिकाट्टाब्भविष्यतीत्येषोऽर्थः स्यात्, तथा च ऋग्वेद एव स्यात्, नान्यत्र। अभिधेयनिर्देशे तु सर्वत्र भवतीति भावः।।

10. न षट्स्वस्रादिभ्यः। (4.1.10)

यो यतः प्राप्नोति स सर्वः प्रतिषिध्यते' इति। ङीपोऽनन्तरत्वात् तस्यैवायं प्रतिषेध इत्याशङ्काया निरासार्थमिदमुक्तम्। ननु चात्र `टाबृचि' (4.1.9) इति टाबेवानन्तरः, तत् कुतो ङीपोऽनन्तरत्वम् ? अस्वरितत्वात्। अस्य टापो ङीप एवानन्तर्यं युक्तम्। ननु च षट्संज्ञाः संख्याशब्दाः, संख्याश्च भेदमात्रं द्रव्यस्य प्रत्યयायन्ति, न स्त्रीत्वम्, या तु तस्य स्त्रीत्वप्रतीतिः सा शब्दान्तरेण सामानाधिकरण्याद्भवति, न च स्त्रीसमानाधिकरणपक्षः `स्त्रियाम्' (4.1.3) इति सूत्रे स्थितः, तथा च तेभ्यः स्त्रीप्रत्ययस्य प्राप्तिरेव नास्तीत्यपार्थकः प्रतिषेधः ? नैतदस्ति; संख्या हि गुणः, `संख्या परिमाणानि पृथक्त्वं संयोगविभागौ' इति वैशेषिकाणां (1.1.6) गुणसूत्रे पाठात्। गुणवचनानां चाश्रयतो लिङ्गवचनानि भवन्ति, यथा--शुक्ला शाटी, शुक्लः कम्बलः, शुक्लं वस्त्रम्; शुक्लः शुक्लौ शुक्लाः इति। तथा सति प्रतिषेधे यथा शुक्लादिशब्देभ्यः स्त्रीप्रत्ययो भवति तथा षट्संज्ञकेभ्योऽपीति स्यात्, यथा-- पञ्च ब्राह्मण्य इति। `षड्भ्यो लुक्' (7.1.22) इति जसो लुक्। `स्वसा' इति। `अनङ सौ' (7.1.93) पूर्ववत् `नोपधायाः' (6.4.7) इति दीर्घः। तिसृचतसृशब्दावपि स्वस्रादिषु पठ्येते, तयोः किमर्थः पाठः ? यावता विभक्तौ परतः `त्रिचतुरोः स्त्रियां तिसृचतसृ' (7.2.99) इति तिसृचतसृभ्यां भवितव्यम्, तत्र यदि तावृकारान्तलक्षमं ङीपं प्रति निमित्तभावं प्रतिपद्येयातां विभक्तेरानन्तर्यं ताभ्यां विहन्येत, एतच्च `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या.प.12) इत्युक्तम्। तस्मात् सन्निपातलक्षणपरिभाषयैव ङीब्न भविष्यतीति किं प्रतिषेधेन ? एवं तर्ह्येतज्ज्ञापयति-- अनित्यैषा परिभाषेति। तेन या, सेति सिद्धं भवति। अत्रापि हि विभक्तौ त्यदाद्यत्वमित्यकारष्टापो निमित्तं न स्यात्, टापि हि सति विभक्तेरानन्तर्यं विहन्यते। परिभाषायस्त्वनित्यत्वेनैव टाब्भवति।
`षट्संज्ञानाम्' इत्यादि। पञ्च ब्राह्मण्य इत्यादौ `अवन्तरस्य विधिर्भवति प्रतिषेधो वा' (व्या.प.19) इति ङीपोऽनन्तरस्य प्रतिषेधे कृते `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नकारे लुप्ते सत्याकारान्ततायामुपजातायां टाबुत्पत्तिः कस्मान्न स्यात् ?स्यादेव, निमित्तस्य सविधानात्। नलोपस्यासिद्धत्वान्न स्यादिति चेत् ? नैतदस्ति; `नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' (8.2.2) इति परिगणितेष्वेव विधिषु नलोपस्यासिद्धत्वमुच्यते। न च टाब्विधिस्तत्र परिगण्यते, तत् कुतस्तत्र नलोपस्यासिद्धत्वम् ? टाब्विधिरपि तत्र परिगण्यत एवेति दर्शयन्नाह-- `प्रत्याहारात्' इत्यादि। चाबिति चाप्सम्बन्धिनं पकारमुपलक्षयति । तदेतदुक्तं भवति-- सुबिति। तत्र न सप्तमीबहुवचनसम्बन्धिना सुपः पकारेण प्रत्याहारो गृह्यते,किं तर्हि ? `यङश्चाप्' (4.1.74) इति चाप्सम्बन्धिना। तस्माट्टापो विधिरपि सुब्विधिरेव; टापोऽपि प्रत्याहारान्तर्भावात्। ततश्च टाब्विधावपि नलोपस्यासिद्धत्वेन भवितव्यमिति सिद्धं सर्वमिष्टम्। सिध्यत्येव। `दोषस्त्वित्त्ववे' इति। बहूनि चर्माण्यस्यां नगर्यामिति बहुव्रीहिः। `शेषाद्विभाषा' (5.4.154) इति कप्, टाप्, नलोपः। अत्रेदानीं `प्रत्ययस्थात्कात्' (7.3.44) इत्यनेनेत्त्वमिष्यते बहुचर्मिकेति यथा स्यात्, तच्च न प्राप्नोति, न ह्यत्र कात् पूर्वोऽकारः; सिद्धत्वार्थं सर्वविभक्त्यन्तः समास आश्रितः। सुपो विधिः सुब्विधिः, सुपिवा विधिः सुब्विधिरिति। यदि च टाबपि सुप् स्यात्, ततस्त्रत्रापि परत्रावस्थित इत्त्वमुच्यत इति तदपि सुब्विधिः स्यात्-- सुपि विधिरिति कृत्वा। ततस्तस्मिन्नपि कर्त्तव्ये नलोपस्यासिद्धत्वं स्यात्, तवयुक्तश्चापा प्रत्याहारः। `तस्मान्नोभौ' इति। यस्मादेवं चापा सह प्रत्याहारे दोषस्तमादुभावपि टाब्ङीपौ न भवत इति प्रतिषिद्धौ। कथमिह हि स्त्रियामित्यर्थोऽपेक्षते ? अस्मिन्नर्थे यदुक्तं भवतीति स्त्र्यर्थे चोभौ ङीप्टापावुक्तावित्युभावपि भवतः।।

11. मनः। (4.1.11)
`वामा,पामा' इति। ददातेः पिबतेश्च `आतो मनिन्क्वनिब्वनिपश्च' (3.2.74) इति मनिन्, पूर्ववत् `नोपधायाः' (6.4.7) दीर्घः। अथ समीमा, सीमानौ, सीमानः; अतिमहिमा, अतिमहिमानौ, अतिमहिमान इत्यत्र कतं प्रतिषेधः, यावता मन इत्यर्थवतो मन एतद्ग्रहणम्। न च यथा दामा पामेत्यतर् मनः प्रत्ययार्थेनार्थवत्वं तथा सीमेत्येवमाद न केनचिदर्थेनार्थवत्त्वम्, तथा हि सीमाशब्दस्तावदव्युत्पन्नं प्रातिपदिकम्, तस्यैव चार्थवत्त्वम्, न तदवयवभूतस्य मनः; अतिमहिमेत्यत्रापि नैव मनोऽर्थवत्त्वम्, तथा हि-- `महतो भावः' इत्यर्थविवक्षायां `पृथ्वादिभ्य इमनिच्' (5.1.122) इति मह्छब्दादिमनिज्विहितः, तत्र चेमनिच एवार्थवत्त्वम्, न तदेकदेशस्य मन इत्यत आह-- `अनिनस्मन्ग्रहणानि' इत्यादि। एतद्वाक्यं पठता वाक्यकारेण अन्, इन्,अस्, मन्-- इत्येतेषां ग्रहणेऽर्थवद्ग्रहणपरिभाषा (व्या.प.1) न व्याप्रियते। तेनैषामनर्थकानामपि ग्रहणं भवति, एभिश्चानर्थकैः सार्थकैश्च तदन्तविदिर्भवतीत्युक्तं भवति, ततश्च सीमाऽतिमहिमेत्यादावपि प्रतिषेधः सिद्धो भवति।।

12. अनो बहुव्रीहिः। (4.1.12)
`अनुपधालोपो बहुव्रीहिरिहोदाहरणम्' इति। कथं पुनरेतत्लभ्यते, यावता नात्र विशेष उपात इत्याह-- `उपधालोपिनो हि' इत्यादि। यस्मात् `अन उपधालोपिनोऽन्यतरस्याम्' (4.1.28) इत्युपधालोपिनो विकल्पं वक्ष्यति, तस्मात् पारिशेष्यादनुपधालोपो बहुव्रीहिरस्यावकाश इति। तस्य चोदाहरणम्-- `सुपर्वा' इत्यादि। शोभनमस्याः पर्वं शोभनं चर्मास्या इति बहुव्रीहिः। अयञ्च `न संयोगाद्वमन्तात्' (6.4.1237) इत्यल्लोपो न भवति। `अतिराजी' इति। `अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (वा.91) इति `कुगतिप्रादयः' (2.2.18) इति तत्पुरुषोऽयम्।।

13. डाबुभाभ्यामन्यतरस्याम्। (4.1.13)
इहान्यतरस्यांग्रहमस्य डापः मुक्ते पक्षे प्रतिषेधोऽपि यथा स्यादित्येतद्वा प्रयोजनं स्यात् ? डाप्प्रतिषेधाभ्यां मुक्ते पक्षे ङीबपि यथा स्यादित्येतद्वा ? तत्राद्यं तावदयुक्तम्;डाबपि ह्युच्यते, प्रतिषेधोऽपि, तावुभावपि वचनसामर्थ्याद्भविष्यतः। द्वितीयमप्ययुक्तम्। अन्यतरस्यांग्रहमेन ह्यनुपधालोपिनो वा बहुव्रीहेः पक्षे ङीब्विधीयते ? उपधालोपिनो वा ? तत्र प्रथमस्तावत् पक्षो नोपपद्यते, यदि ह्यत्रानुपधालोपिनःपक्षे ङीब्विधीयेत प्रतिषेधवचनमनर्थकं स्यात्; द्वितीयोऽपि नोपपद्यते, `अन उपधालोपिनोऽन्यतरस्याम्' (4.1.28) इति प्रतिपदं विकल्पेन ङीपो विधास्यमानत्वात्। न च तदन्यतरस्यांग्रहमं न करिष्याम इतीहान्यतरस्यांग्रहणं कर्त्तुं युक्तम्; तद्ध्यवश्यमेव कर्त्तव्यम्, उपधालोपिनो हि ङीपा मुक्ते डाप्प्रतिषेधौ यथा स्याताम्-- बहुराज्ञ्यौ, बहुराजानौ, बहुराजे इति। इतरथा हि डाप्प्रतिषेधौ सुपर्वादिष्वनुपधालोपिषु सावकाशौ परत्वान्ङीपा बाध्येयाताम्। तस्माद्वक्ष्यमाणमप्यन्यतरस्यांग्रहणं कर्त्तव्यमेवेति तत्सर्वं मनसि कृत्वाऽऽह-- `अन्यतरस्यांग्रहणं किमर्थम्' इति। निरर्थकमिति भावः। `बहुव्रीहौ'इत्यादि। `वनो र च' (4.1.7) इत्यनेन यत्कार्यं विधीयते तस्यापि बहुव्रीहौ विकल्पो यथा स्यादित्येवमनर्थकमन्यतरस्यांग्रहणम्। यद्यत्राप्तं तत्तद्विकल्पेन प्रत्युपस्थापयितव्यम्। ङीब्रेफावप्राप्तौ, `अनो बहुव्रीहेः' (4.1.12) इति प्रतिषेधात्। तस्मात् तद्विधानार्थमन्यतरस्यांग्रहणं कर्त्तव्यम्। कथमन्यतरस्यामिति ? योगविभागोऽत्र क्रियते, तत्र बहुव्रीहिग्रहणमनुवर्त्तते, `वनो र च' (4.1.7) इत्येतच्च मण्डूकप्लुतिन्यायेन। तेन वन्नन्ताद्बहुव्रीहेरन्यतरस्यां ङीब्रेफश्चान्तादेशो लभ्यत इति बहुपीवा, बहुधीवा, बहुपीवरी, बहुधीवरीत्यादि सिद्धं भवति। अन्ये त्वाहुः-- उभाभ्यांग्रहमसहितादन्यतरस्यांग्रहणाद्वन्नन्ताद्बहुव्रीहेर्ङीब्रेफौ लभ्येते। `उभाभ्याम्' (4.1.13) इतिनेयं पञ्चमी, कं तर्हि ? तृतीया, वन्नन्ते बहुव्रीहौ स्त्रीत्वमुभाभ्यां ङीब्रेफाभ्यां करणाभ्यां प्रयोक्त्रा प्रत्याययितव्यमिति। ननु च मन्नन्तात् प्रातिपदिकादन्नन्ताच्च बहुव्रीहेर्डाबुभाभ्यामित्यदुभाभ्यांग्रहणस्य प्रयोजनम् ? एवं मन्यते-- स्वरितत्वादेव `उभाभ्याम' (4.1.13) इति वचनमन्तरेणाप्युभाभ्यामेव प्रत्ययो लभ्यत एवेति।।

14. अनुपसर्जनात्। (4.1.14)
इहानुपसर्जनादिति विधिर्वानेनोत्तरत्र क्रियते-- उपसर्जनादन्यस्मादनुपसर्जनान्ङीबादयो भवन्तीति ? प्रतिषेधो वा-- उपसर्जनान्न भवतीति ? तत्र यद्याद्यः पक्ष आश्रीयेत `कुक्कुटीपादः' इति न सिध्येत्; पूर्वपदस्योपसर्जनत्वात्। उपसर्जनत्वं त्वस्य `षष्ठी' (2.2.8) इति समासशास्त्रे प्रथमानिर्देशात्। कुक्कुटीत्येतदपि न सिध्येत्; प्रधानं ह्यनुपसर्जनम्, न चात्र जातिः प्रधानम्, अप्रधानापेक्षया हि प्रधानं भवति, न चात्र किञ्चिदप्रधानमस्ति यदपेक्षया जातेः प्राधान्यं स्यात्। तस्माद्विधिपक्षोऽयं दुष्ट इति मत्वा प्रतिषेधपक्षमाश्रित्याह -- `उत्तरसूत्रेषूपसर्जनप्रतिषेधं करोति' इति। `कुरुचरी' इति। कुरुषु चरतीति `चरेष्टः' (3.2.16) इति टः। `उपपदमतिङ' (2.2.19) इति तत्पुरुषसमास इत्यस्योत्तरपदप्रधानत्वादप्रथमानिर्दिष्टत्वाच्च समासशास्त्रे चरशब्द इहोपसर्जनं न भवतीति। `बहुकुरुचरा' इति। बहवः कुरुचरा अस्यामिति। अस्यान्यपदार्थप्रधानत्वात् प्रथमानिर्दिष्टत्वाच्च शास्त्रे समासपदानामत्रावयव उपसर्जनम्। `{जातेः इति ङीष्--काशिका'} जातेर्ङीष्' इति। `जातेरस्त्रीविषयादयोपधात्' (4.1.63) इत्यनेन। `बहुकुक्कुटा' इति। बहुव्रीहिः। अत्रापि पूर्ववज्जातिशब्द उपसर्जनम्।
ननु च बहुकुरुचरेत्यत्र समुदायः स्त्रियां वर्त्तते, नावयवः न च समुदायष्टित्, किं तर्हि ? अवयवः तत्र टित उच्यमान ईकारः केन पुनः समुदायादटितः स्यात् ? बहुकुक्कुटेत्यत्रापि समुदायः स्त्रियां वर्त्तते, नावयवः। न च समुदायो जातिवचनः, किं तर्हि ; अवयवः। तत्र जातिवाचिन उच्यमानः प्रत्ययः

केनाजातिवाचिनः समुदायात् स्यात्, यत्प्रतिषेधार्थमिदमुच्यत इति मन्यमान आह-- `कथम्' इत्यादि। `तदन्तविधिना' इति। परिहारः। तत्रैतत् स्यात्-- `ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते' (व्या.प.89) इति, अत आह-- `ज्ञापितञ्च' इत्यादि। `शूद्रा चामहत्पूर्वा जातिः' ग.सू.40.4.1.4) इत्यत्र महत्पूर्वेत्यनेनास्मिन् प्रकरणे तदन्तविधिरिति ज्ञापितमेतत्। `तथा च' इति। एवं सतीत्यर्थः यस्मात् पूर्वं तदन्तविधिरिह प्रकरणेऽस्तीति ज्ञापितमेतत्; अनेन च सूत्रेणोपसर्जनेन तदन्तविधिः प्रतिषिध्यते, नानुपसर्जनेन, एवञ्च सति प्रधानेन तदन्तविधिर्भवत्येव। तेन कुम्भकारी, नगरकारीति सिद्धं भवति। तत्र हि कारशब्दोऽणन्तः प्रधानम्। तदन्तात् समासात् `टिड्ढाणञ्' (4.1.15) इतीकारः स्यादेव। ननु चाणित्यत्राणिति कृद्ग्रहमम्, ततश्च `कृद्ग्रहमे गतिकारकपूर्वपदस्यापि ग्रहणम्' (व्या.प.126) इत्यनया परिभाषयैव कुम्भकारशब्दात् कारान्तादीकारः सिध्यति, ततो नेदं तदन्तविधिज्ञापनस्य प्रयोजनमित्यत आह-- `न च' इत्यादि। कथं न ? इत्याह-- `तद्धितोऽप्यणस्ति' इति। तस्याप्यत्र ग्रहणम्, अन्यथा ह्यौपगवीति न सिध्येत्। तस्मान्नेदं कृद्ग्रहणम्, किं तर्हि ? कृदकृद्ग्रहणम्। तत्र यदि तदन्तविधिर्न ज्ञाप्यते, तदाणिति प्रत्ययग्रहणम्, `प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहमं भवति' (पु.प.वृ.44) इतीहैव स्यात्-- औपगवीति, इह तु न स्यात्-- कुम्भकारीति, अत्र हि धातोरण् विहितः, तदन्तश्च स्त्रियां न वर्त्तते; तावन्मात्रस्य कारशब्दस्य प्रयोगाभावात्। या वा स्त्रीयां वर्त्तते सोपपदम्, न तस्मात् प्रत्ययो विहितः। तदन्तविधौ तु ज्ञापिते कारशब्दान्तादपीकारः सिध्यति।।

15. टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञक्वरप्ख्युनाम्। (4.1.15)

`सर्वत्र' इति। स्त्रीप्रकरणे। ननु च `पत्युर्नो यज्ञसंयोगे' (4.1.33) `इतो मनुष्यजातेः' (4.1.65) इत्यादौ नानुवर्त्तते, तस्यात इत्यस्यासम्भवाद्विशेषणं नोपपद्यत इत्याह-- `तत् सति' इत्यादि। यत्र सम्भवति तत्र विशेषणं भवति, यत्र तु न सम्भवति तत्रोत्तरार्थमेवानुवर्त्तते। इह कस्मान्न भवति-- `पचमाना' इति। स्थानिवद्भावेन शानचष्टित्त्वमस्ति, अतस्तदन्तादपि ङीपा भवितव्यमित्यभिप्रायः। `द्वयनुबन्धकत्वाल्लटः' इति। तेन `एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य' (व्या.प.52) इत्येतया परिभाषया लटोऽत्र ग्रहणं नास्तीति दर्शयति, तस्य ह्यकारो द्वितीयोऽनुबन्धोऽस्ति।

`ल्युडादिषु कथम्' इति। ईकारो भवतीति शेषः। आदिशब्देन `गापोष्टक्' (3.2.8) इत्येवमादयो गृह्यन्ते। ल्युडादीनामपि द्व्यनुबन्धकत्वाट्टिद्ग्रहणेन भवितव्यम्, अतस्तदन्तेभ्यो ङीब्न स्यात्, ततश्चक करणी, सामगीत्यादि न सिध्येत्। `टित्करणसामर्थ्यात्' इति। यदि तेषामपि टिद्ग्रहणेन ग्रहणं न स्याट्टित्करणमनर्थकं स्यात्; प्रयोजनान्तरासम्भवात्। तस्मात् सत्यपि द्व्यनुबन्धकत्वे टित्करणसामर्थ्याल्ल्युडादयो गृह्यन्त इत्यदोषः। लटोऽपि तर्हि टित्करणसामर्थ्यादेव ग्रहणेन भवितव्यमित्यत आह--`इतरत्र' इति। लटि हि टित्करमस्य `टित आत्मनेपदानां टेरे' (3.4.79) इति टेरेत्वं फलम्। अतो यद्यपि ग्रहणं न भवति, तथापि नैव टित्करणस्य वैयर्थ्यं प्रसज्येत। तस्मात् टित्करणसामर्थ्याल्ल्युडादयो गृह्यन्त इत्यदोषः। लटोऽपि तर्हि टित्करणसामर्थ्यादेव ग्रहनेन भवितव्यमित्यत आह--`इतरत्र' इति। लटि हि टित्करणस्य `टित आत्मनेपदानां टेरे' (3.4.79) इति टेरेत्वं फलम्। अतो यद्यपि तस्येदं ग्रहणं न भवति, तथापि नैव टित्करणस्य वैयर्थ्यं प्रसज्येत। तस्मात् टित्करणस्य चरितार्थत्वादयुक्तं तस्येदं ग्रहणम्।

`पठिता विद्या' इति। अत्रापि कथमिति सम्बध्यते। इडागमस्य हि प्रत्ययभक्तत्वात् प्रत्ययस्य टित्त्वमस्ति, ततस्च ङीपा भवितव्यम्, तत्कथं पठितेत्येतद्रूपं भवतीति ?`आगमटित्त्वमनिमित्तम्' इति। प्रकृतत्वात् ङीप इति विज्ञायते। कथं ज्ञायतेऽयमनिमित्तमित्याह--`ट्युट्युलौ' इत्यादि। तुड् वेत्यागमटित्त्वेनैव सिद्धे ङीपि `सायंचिरं प्राह्ण' (4.3.23) इत्यादिसूत्रे `ट्युट्युलौ' इति पुनः प्रत्ययोष्टत्करणं ज्ञापकम्--- आगमटित्त्वमनिमित्त्वं ङीप इति।

`सोपर्णेयी,वैनतेयी' इति। सुपर्णीशब्दाज्जातिलक्षमङीषन्ताद्विनताशब्दाच्च टाबन्तात् `स्त्रीभ्यो ढक्' (4.1.120) इति ढक्। आयमन्नादि (7.1.2) सूत्रेणैयादेशः। ननु च `निरनुबन्धकग्रहणे न सानुबन्धकस्य' (व्या.प.53) इति ढको ग्रहणेन न भवितव्यमित्यत आह-- `निरनुबन्धको ढशब्दः' इत्यादि। ननु चायं निरनुबन्धकोऽस्ति `शिलायाः ढः' (5.3.102) इति ? नैतदस्ति; स्वभावत एव ह्ययं नपुसंके वर्त्तते। अयं तर्ह्यस्ति स्वाभाव्यात्-- `{सभाया ढश्छन्दसि इति मुद्रितः पाठः} सभाया यः' (4.4.105) `ढश्छन्दसि' (4.4.106) इति ? अयमपि नैव स्त्रियां वर्त्तते, छन्दसि सभेयीशब्दस्य प्रयोगादर्शनात्। तस्मान्नरनुबन्धको ढशब्द स्त्रियां नास्तीति नेह निरनुबन्धकपरिभाषोपतिष्ठते; अन्यथा हि ढग्रहममनर्थकं स्यात्।

`णेऽपि' इति। अणि यत् कार्यं कृतं तण्णेऽपि क्वचिदिति क्वचिन्न भवतीत्युक्तं भवति। क्व पुनर्णेऽप्यणकृतं कार्यं भवतीति ? ताच्छीलिके । तथा हि `कार्मस्ताच्छील्ये' (6.4.172) इत्यत्र ज्ञापितमेतत्- णेऽप्यण्कृतं कार्यं भवतीति, कथम् ? कार्मशब्दो हि ताच्छील्ये टिलोपार्थं निपात्यते। यदि न णेऽप्यण्कृतं कार्यं न स्यात् निपातनमनर्थकं स्यात्। कर्मशब्दात् कर्म शीलमस्येति `छत्रादिभ्यो णः' (4.4.62) इति णे कृते `नस्तद्धिते' (6.4.144) इत्येवं टिलोपस्य सिद्धत्वात्। `अन्' (6.4.167) इति प्रकृतिभावान्न सिध्यतीति चेत् ? नैतदस्ति; अणि हि प्रकृतिभाव उच्यते, तत्र `इनण्यनपत्ये' (6.4.64) इत्यतोऽणीत्यनुवर्त्तते। तदेवं `ताच्छीलिके णेऽप्यणि कृतं कार्यं भवति' इत्यस्यार्थस्य ज्ञापितत्वात् तत्रैवाण्कृतं कार्यं भवति, नान्यत्र। ` चौरी, तापसी' इति। चुरा शीलमस्यास्तपः शीलमस्या इति `छत्त्रादिभ्यो णः' (4.4.62) णेऽप्यण्कृतं भवतीति ङीप्। `दाण्डा मौष्टा' इति। दण्डः प्रहरणस्याम्, मुष्टिः प्रहरणस्यां क्रीडायामिति `तदस्यां प्रहरणम्' (4.2.57) इति क्रीडायां णः। अथाणित्यकारादारभ्य लणो णकारात् प्रत्याहारग्रहणं कस्मान्न भवति ? टिबादीनां पुनर्ग्रहणात्। प्रत्याहारग्रहणे हि तेषां ग्रहणमनर्थकं स्यात्, अणन्तादेव सिद्धत्वात्।

`औत्सी, औदपानी' इति। उत्सस्योदपानस्येयमिति `उत्सादिभ्योऽञ्' (4.1.86) इत्यञ्। अथ `शाङ्गर्रवाद्यञो ङीन्' (4.1.73) इत्यत्र पुनरञ्ग्रहणं किमर्थं क्रियते, .यावतानेनैव सिद्धम्, तदेव हि रूपं स एव हि स्वरः, तथा हि-- ङीनि सति `ञ्नित्यादिर्नित्यम्' (6.1.197) इत्याद्युदात्तं भवति,औत्सीत्यत्राप्युत्सशब्दादञन्तान्ञित्स्वरेणाद्युदात्तान्ङीपि कृते तदेवाद्युदात्तत्वं भवति ? इत्याह-- `शार्ङ्गर्वाद्यञः' इत्यादि। बिदस्यापत्यं गोत्रं स्त्रीति

`अनृष्यानन्तर्य्ये बिदादिभ्योऽञ्' (4.1.104) इत्यञि कृते तस्य `गोत्रञ्च चरणैः सह' (का.वृ.4.1.63) इति जातित्वात् `जातेरस्त्रीविषयादयोपधात्' (4.1.63) इति ङीष् प्राप्नोति। तद्बाधानार्थं पुनः `शाङ्गर्रवाद्यञो ङीन्' (4.1.73) इत्यत्राञो ग्रहमं क्रियते। यद्येवम्, इहाञ्ग्रहमं न कर्त्तव्यम्, तेनैवोत्सीत्यादेरपि सिद्धत्वात् ? नैतदस्ति; जातिग्रहणं तत्र `इतो मनुष्यजातेः' (4.1.65) इत्यतोऽनुवर्त्तते `पुंयोगादाख्यायाम्' (4.1.48) इत्यादिनाञ् बैदः, तस्य भार्या बैदीति, तस्य पुंयोग ङीषेवेष्यते, तस्मात् तत्र जातिग्रहणमनुवर्त्तनीयम्। तस्मिंश्चानुवर्त्तमान औत्सीत्यत्रोत्सस्येयमित्यर्थविवक्षायामञि कृतेऽजातित्वादीकारस्तत्र न प्राप्नोति,तस्मादिहाप्यञ्ग्रहणं कर्त्तव्यमेव।
द्वयसजादीनामनुबन्धोच्चारणं प्रत्ययपरिग्रहार्थम्। प्रातिपदिकान्यपि द्व्यसजादीनि सन्ति, तत्रासत्यनुबन्धोच्चारणे तेषामपि ग्रहणं विज्ञायेत। तयशब्दोऽपि `अय वय तय {णय-धा.पा.} नय गतौ' (धा.पा.474,485,479,480) इति तयो धातोरजन्तं प्रातिपदिकं सम्भवति, अतस्तन्निवृत्त्यथं पकारोच्चारणम्।
`ऊरुद्वयसी' इत्यादि। ऊरुप्रमाणमस्याः, जानुप्रमाणस्या इति `प्रमाणे द्वयसज्दघ्नञ्मात्रचः' (5.2.37) इति द्वयसजादयः प्रत्ययाः।
`पञ्चतयी' इति।पञ्चावयवा अस्या इति `संख्याया अवयवे तयप्' (5.2.42)।
`आक्षिकी, शालाकिकी' इति। अक्षैर्दीव्यति शलाकाभिर्दीव्यतीति `तेन दीव्यतिखनति' (4.4.2) इत्यादिना ठक्, ठस्येकादेशः।
`लावणिकी' इति। लवणं पण्यमस्या इति `लवणाट्ठञ्' (4.4.52)। अथ किमर्थं ठक्ठञौर्भेदेनोपादानाम् ? न विशेषकरानुबन्धानुत्सृज्य `ठ'इति सामान्येनैव ग्रहणं क्रियेतेत्यत आह-- `भेदेन' इत्यादि। `ठ' इति सामान्येन ग्रहणे सति ठनादीनामपि ग्रहणं स्यात्, अतस्तन्निवृत्त्यै भेदेन ग्रहणम्। आदिशब्दो ञिठादीनां परिग्रहाय, तेन दण्डोऽस्यास्तीति `अत इनिठनौ' (5.2.115) इति ठनि कृते दण्डिकीति न भवति, काशिषु भवेति `काश्यादिभ्यष्ठाञ्ञिठौ' (4.2.116) इति ञिठे प्रत्यये कृते काशिकीति न भवति।
कञोनुबन्धग्रहणं `आतोऽनुपसर्गे कः' (3.2.3) इत्येवादीनां निवृत्त्यर्थम्। `यादृशी, तादृशी' इति। `त्यदादिषु दृशेरनालोचने कञ्च' (3.2.60) इति कञ्, `आ सर्वनाम्नः' (6.3.91) इति यत्तदोरात्त्वम्। क्वरपोऽनुबन्धोच्चारणं `स्थेशभास' (3.2.175) इत्यादिना विहितस्य वरचो निवृत्यर्थम्। यद्येवम्, एक एवानुबन्ध उच्चारणीयः, एकेनापि वरचो निवृत्तिः सिध्यत्येव ? सत्यमेतत्, तथापि मन्दबुद्धीनां सुखप्रतिपत्तयेऽनुबन्धद्वयोच्चारणम्।
`इत्वरी, नश्वरी'इति। `इण्नश्जसर्त्तिभ्य- क्वरप्' (3.2.163) ह्रस्वस्य तुक्।
ख्युनोऽनुबन्धोच्चारणं लाघवार्थम्; अनयथा हि षष्ठीबहुवचने कृते नुटि नामि दीर्घत्वे च गुरुच्चारणं स्यात्। `आढ्यङ्करणी' इति। अनाढ्य आढ्यः क्रियतेऽनयेति `आढ्यसुभग' (3.2.56) इत्यादिना ख्युन्, `अरुर्द्विषदजन्तदस्य मुम्' (6.3.67)।
नञ्स्नञीकक्' इत्यादि। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्-- उत्तरसूत्रे चकारोऽनुक्तसमुच्यार्थः, तेन नञादिभ्योऽपि भविष्यतीति। `स्त्रैणी,पौस्नी' इति। स्त्रिया इयम्, पुंस इयमिति `स्त्रीपुंसाभ्यां नङस्नञौ भवनात्' (4.1.87) इति नञ्सञौ। `शाक्तीकी, याष्टीकी' इति। शक्तिः प्रहरणमस्याक्षितम्। तरुणी सुरा,तलुनी सुरेति-- अत्र सुरादौ विषये तरुणतलुनशब्दाभ्यां ङीब्वेदितव्यः, न हि सुरादीनां वयोऽस्ति,तस्य प्राणिधर्मत्वात्। अभिनत्वमात्रं सुरादीनां तरुणतलुनशब्दाभ्यां गम्यते। यदा तु वयो विवक्ष्यते तदा गौरादिपाठान्ङीषा भवितव्यम्। तत्र स्वरे विशेषः-- तरुणतलुनशब्दौ हि `{कृवृदारिभ्य उनन्' (द.उ.5.52) `त्रो रश्च लो वा' (द.उ.5.56) इत्युननप्रत्ययान्तौ व्युत्पादितौ,अतो नित्स्वरेणाद्युदात्तौ। तत्र ङीपि सत्याद्युदात्तत्वं भवति; ङीषि तु सति प्रत्ययस्वरेणान्तोदात्तत्वम्।।

16. यञश्च। (4.1.16)
`गार्गी। वात्सी' इति। गर्गवत्सशब्दाभ्यां स्त्रियामपत्ये `गर्गादिभ्यो यञ्' (4.1.105) इति यञ्, ङीप्, `यस्येति च' (6.4.148) इत्यकारस्य लोपः, `हलस्तद्धितस्य' (6.4.150) इति यकारस्य च।
`अपत्यग्रहणं कर्त्तव्यम्' इति। अपत्यं गृह्यते येन तदपत्यग्रहमम्। व्याख्यानमेतदुक्तं भवति-- तथा व्याख्यानं कर्त्तव्यं यथा यञो विशेषणमपत्यं गृह्येत्। तत्रेदं व्याख्यानम्-- उत्तरसूत्रे विकल्पार्थं प्राचामिति वचनमनेनापि योगेन सम्बध्यते,व्यवस्थितविभाषा च सा विज्ञायते, तेनापत्येऽर्थे यो यञ् विहितस्तदन्तान्नित्यं भवति, यस्तु द्वीपशब्दाज्जातादावर्थे विहितदन्तान्न भवतीति। अथ योगविभागः किमर्थः ? न पूर्वसूत्र एव अञ्ग्रहणं क्रियेतेत्यत आह-- `योगविभाग उत्तरार्थः' इति। उत्तरसूत्रे यञन्तादेव ष्फो यथा स्यात्, टिदादिभ्यो माभूदिति।।

17. प्राचां ष्फ तद्धितः। (4.1.17)
`षकारो ङीषर्थः' इति। `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीप्यथा स्यात्। ननु च क्रियमाणेऽपि षकारे नैव ङीषा भवितव्यम्, ष्फप्रत्ययेनैव स्त्रीत्वस्याभिव्यक्तत्वादित्यत' आह-- `प्रत्ययद्वयेन' इत्यादि। न हि केवलः ष्फः स्त्रीत्वमभिव्यङ्क्तुं समर्थ इति ङीषमपेक्षते। तेन सहिताभ्यामेव ताभ्यां स्त्रीत्वं व्यज्यत इति ङीषा भवितव्यम्। `तद्धितग्रहणम्' इत्यादि। `कृत्तद्धितसमासश्च' (1.2.46) इति प्रातिपदिकसंज्ञा यथा स्यादित्येवमर्थं तद्धितग्रहणम्। प्रातिपदिकसंज्ञा तु ङीष् यथा स्यादित्येवमर्थम्। ननु च विनापि तया षित्करणसामर्थ्यादेव ङीष् भविष्यति, अन्यथा हि षित्करणमनर्थकं स्यत्, प्रयोजनन्तराभावात्; न च `त्रपूष् लज्जायाम्' (धा.पा.374) इत्यतोऽपि धातोः स्यादित्यतिप्रसङ्ग आशङ्कनीयः, धातोः षित्करणस्य `षिद्भिदादिभ्योऽङ' (3.3.104) इत्यङविधौ चरितार्थत्वात्, अत इति चाधिकारात् ? सत्यमेतत्, प्रतिपत्तिगौरवं तु स्यात्। तस्मात् सुखप्रतिपत्तये

तद्धितग्रहमम्।

`सर्वत्रग्रहणम्' इत्यादि। उत्तरसूत्रे सर्वत्रग्रहणमनर्थकम्। तद्धि सर्वेषामचार्याणां मतेन यथा स्यादित्येवमर्थं क्रियते, एतच्चाप्रयोजनम्, अस्वरितत्वदेव हि प्राग्ग्रहणस्य सर्वेषां मतेन भवितव्यम्। तस्मादुत्तरसूत्रे सर्वत्रग्रहणमनर्थकम्, अतस्तदिहापकृष्यते। किमर्थमित्याह-- `बाधकबाधनार्थम्' इति। `आवट्याच्चापं वक्ष्यति' इत्यादना बाधकबाधनार्थमित्यस्यैवार्थं विस्पष्टीकरोति।अवट्याच्चापोऽवकाशः-- उदीचां मतेन आवट्येति, घवटशब्दाद् गर्गादिञन्ताच्चाप्, `प्राचां ष्फ तद्धितः' (4.1.17) इत्यस्यावकाशः-- गार्ग्यायणीति; आवट्यात् प्राचानुभयप्रसङ्गे परत्वाच्चाप् स्यात्. सर्वत्रग्रहणात् ष्फ एव भविष्यति-- आवट्यायनीति।।

18. सर्वत्र लोहितादिकतन्तेभ्यः। (4.1.18)

`स्वतन्त्रम्' इति। यो ह्यन्यस्यावयवभूतो न भवति केवलः कतशब्दस्तत् स्वतन्त्रं प्रातिपदिकम्। यस्तु कुरुकतशब्दस्यावयवः कतशब्दस्तस्य स्वान्तन्त्र्यं नास्ति; समुदायप्रतिबद्धत्वात्। कः पुनरसौ कतशब्दः स्वतन्त्रं प्रातिपदिकमित्यत आह-- `कपिशब्दात्' इत्यादि। `लौहित्यायनी' । शांसित्यायनी' इति। लोहितशंसितशब्दाभ्यां गर्गादित्वाद्यञ्। `वाभ्रव्यायणी' इति। अत्रापि बभ्रुशब्दात् `मधुबभ्रुवोर्ब्राह्मणकौशिकयोः' (4.1.106) इति यञ् `ओर्गुणः' (6.4.146), `वान्तो यि प्रत्यये' (6.1.79) इति वान्तादेशः, यञन्तेभ्यः ष्फः।

`कण्वात्तु'इत्यादि। कण्वशब्दात् पूर्वः शकलशब्द इष्यते, कतशब्दात्तूत्तरः। किमेवं सति भवतीत्याह-- `पूर्वोत्तरो'इत्यादि। एवं सति पूर्वोत्तरो गणौ तदन्तादी भवतः। तच्छब्देन शकलशब्दः प्रत्यवमृश्यते। शकलशब्दोऽन्त आदिश्च यथाक्रमं ययोः पूर्वोत्तरयोर्गणयोस्तौ तदन्तादी पूर्वोत्तरगणौ। लोहितादिः शकलशब्दान्तो भवति पूर्वो यथः। उत्तर गणः कण्वादिः शकलशब्दादिर्भवति। किं पुनः पूर्वोत्तरयोर्गणयोस्तदन्तादित्वे प्रयोजनमित्याह--`ष्फाणौ तत्र प्रयोजनम्' इति। पूर्वस्य गणस्यशकलान्तत्वे ष्फः प्रयोजनम्। उत्तरस्य शकलादित्वेऽण् प्रयोजनम्।

`प्रातिपदिकेष्वन्यथा पाठः'इति। कपिकत, कुरुकत, अनडुह्, कण्व, शकल -- इत्यनयाऽनुपूर्व्या प्रातिपदिकेषु पाठः। `स एवं व्यवस्थापयितव्यः' इति। कण्वात्तु शकलः पूर्वः'इत्यादिना याऽऽनुपर्वी दर्शिता तया व्यवस्थापयितव्यः। अत एतदुक्तं भवति-- कुरुकत, अनडुह्-- इत्येतावन्यस्मिन् स्थाने पठितव्यौ, शकलशब्दस्तु कतकण्वशब्दयोर्मध्ये पठितव्यः। `मन्यते' इति श्लोवार्त्तिकारः। कथं पुनरेवं पाठे सति शकलशब्दात् ष्फाणौ सिध्यत आह-- `कतन्तेभ्यः' इत्यादि। कतस्यान्तः कतन्त इति तत्पुरुषः `कतन्तेभ्यः'इति निपातनात्पररूपत्वम्। कतशब्दोऽन्ते येषां लोहितादीनां ते कतन्ता इति बहुव्रीहिः। कतन्तश्च शकलशब्दः, कतन्ताश्च लोहितादय इति कतन्तश्च कतन्ताश्चेति सरूपाणामेकशेषः। `तथा' इत्यादिना यथा कतन्तेभ्य इत्यत्र बहुव्रीहितत्पुरुषयोरेकशेषः, तथा कण्वादिभ्य इत्यत्रापीति दर्शयति। कण्वस्यादिः कण्वादिः शकलशब्दः कण्वशब्दः आदिर्येषां गोकक्षादीनां ते कण्वादयः, कण्वादिश्च कण्वादयश्च कण्वादयः, पूर्ववदेकशेषः। `तत्पुरुषवृत्त्यासंगृहीतः'इति। `कतन्तेभ्यः' इत्यत्र `कण्वादिब्यः' (4.2.111) इत्यत्र तत्पुरुषवृत्त्या तत्पुरुषसमासेन। `मध्यापीत' इति। कतकण्वशब्दयोर्गणयोर्वा। `प्रत्ययद्वयम्' इति। ष्फप्रत्ययम्, अण्प्रत्ययञ्च। `प्रतिपद्यते' इति। प्राप्नोति। तत्पुरुषवृत्त्याहि तस्य संग्रहे सत्यस्य सूत्रस्यायमर्थो जायते-- कतन्ताच्छकलशब्दात् तथा यञन्तात् कतन्तेभ्यश्च लोहितादिभ्यो यञन्तेभ्यः स्त्रियां ष्फप्रत्ययो भवतीति। तेन ष्फप्रत्ययं प्रतिपद्यते शकलशब्दः। `शाकल्यायनी' इति। `कण्वादिभ्यो गोत्रे' (4.2.111) इत्यत्रापि तत्पुरुषवृत्त्या शकलशब्दस्य संग्रहे सत्ययमर्थो भवति। कण्वादेः शकलशब्दान्ताद्गोत्रप्रत्ययान्तात् कण्वादिभ्यो गोकक्षान्तेभ्यो गोत्रप्रत्ययान्तेभ्यः शैषिकेष्वर्थेष्वण्प्रत्ययो भवतीति। तेनाण्प्रत्ययमपि शकलशब्दः प्रतिपद्यते-- शाकल्यस्येमे छात्राः शाकला इति।।

19. कौरव्यमाण्डूकाभ्याञ्च। (4.1.19)

`कथं कौरवी'इति। कौरव्यशब्दादेवात्र हीब्विहित इति मन्यमानस्य प्रश्नः। कुरुशब्दादेवात्राणन्तान्ङीब्विहित इति दर्शयन्नाह--`तस्येदम्' इत्यादि। `कौरव्यमाण्डूकयोः' इत्यादि। कौरव्यमाण्डूकयोरनेन सूत्रेण यत्कार्यं विधीयते तस्यासुरेरप्युपसंख्यानम् = प्रतिपादनं कर्त्तव्यम्। आसुरेरपि ष्फः प्रतिपादयितव्य इति यावत्। तत्रेदं प्रतिपादनम्-- चकारोऽत्र क्रियते,स चानुक्तसमुच्चयार्थः तेनासुरिशब्दादपि ष्फो भविष्यतीति। `आसुरायणी'इति। असुरस्यापत्यमिति `अत इञ्' (4.1.95) , तदन्तात् ष्फः। `इञश्चेत्यणि प्राप्ते' इति। तत्र `प्रस्थोत्तरपदपलद्यादिकोपदादण्' (4.2.110) नेति योगविभागः कर्त्तव्यः, तेनासुरिशब्दादपि प्रतिषिद्धे `वृद्धाच्छः' (4.2.114) इति छ एव भविष्यति-- आसुरिणा प्रोक्त आसुरीयः कल्प इति।।

20. वयसि प्रथमे। (4.1.20)

`यौवनादिः' इति। आदिशब्दो वृद्धत्वाद्युपसंग्रहार्थं इति। `श्रुत्या वर्त्तते' इति। यत् प्रातिपदिकं श्रवणमात्रेणैव प्रकरणाद्यनपेक्षं प्रथमं वयः प्रत्याययति तदत्र श्रुत्या वर्त्तते। `कुमारी' इति। ननु च नायं कुमारीशब्दः प्रथमे वयसि वर्त्तते, क्व तर्हि ? पुंयोगाभावे, तथा हि वृद्धायामपि हि प्रयुज्यते-- वृद्धा कुमारीति ? नैतदस्ति;कुमारीशब्दो हि प्रथम एव वयसि रूढः। यस्तु वृद्धायामपि तस्य प्रयोगस्तत्र कुमारीसाधर्म्यात्, न तु पुंयोगाभावात्। भवति हि ताद्धर्म्यात् ताच्छब्द्यम्, यथा --ृ- गौर्वाहीक इति।

`वयस्यचरमे' इति। अचरमे = अनन्त्ये ङीब्भवतीत्येतदर्थरूपमस्य सूत्रस्य व्याख्यानमित्यर्थः। तेत्रेदं व्याख्यानम्-- प्रथमवयोग्रहणमिहाचरमस्य वयस उपलक्षणम्, तेनान्यत्राप्यचरमे वयसि ङीब्भवतीति। किं पुनः कारणं प्रथम एव वयसि गृह्यमाणे न सिध्यति, येनैवं सूत्रार्थो व्याख्येयः ? इत्याह--

`द्वितीयवयोवचनावेतौ' इत्यादि। इह केचिच्चत्वारि वयांसीच्छन्ति --कौमार यौवन मध्यत्व वृद्धत्वानि। तथा चाहुः--

`प्रथमे वयसि नाधीतं द्वितीये नार्जितं धनम्।
तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति।। इति।

अन्ये त्रीणीच्छन्ति--कौमारयौवनस्थाविराणि। तथा चाहुः--

पिता रक्षतिकौमारे भर्त्ता रक्षति यौवने,
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति।।इति।

केचिद्बाल्यमध्यत्ववृद्धत्वानीति त्रीणीच्छन्ति।तथा चाहुः--

आषोडशाद्भवेद्बालो यावत् क्षीरान्नवर्त्तकः।
मध्यमः सप्ततिर्यावत् परतो वृद्ध उच्यते।। इति।

एतेषु सर्वेषु यौवनं द्वितीयं वयो भवति। ननु प्रथमवयोवचनौ तु वधूटीचिरण्टीशब्दावित्यतो न प्राप्नोति, तस्मादचरमस्य वयस इहोपलक्षणं प्रथमं वय इति व्याख्येयमिति केचित्।

यस्तु मन्यते `केचित्तु द्वे एव वयसी इच्छन्तीति, यावत्यो बुद्धिमत्योऽवस्थास्ताः सर्वा राशीकृत्य प्रथमं वयो व्यवस्थाप्यते, यास्त्वपचयवत्योऽवस्थास्ताः सर्वा राशीकृत्य द्वितीयं वयः। तथा चोक्तम्-- `वर्द्धते यावदन्नेन तावद्वर्धितव्यं पश्चदपायेन योक्ष्यते'इति,एतदेव दर्शनमाश्रित्यैतत् सूत्रं प्रणीतम्। इति। तेन वधूटी, चिरण्टीत्यत्रापि ङीब्भवतीति तेन द्वितीयवयोवचनावेतौ। प्राप्तयौवना स्त्र्यभिधीयत इत्यस्य ग्रन्थस्याविरोधाय यतितव्यम्। न ह्यस्मिन्दर्शने यौवनं द्वितीये वयस्यन्तर्भवति;यौवनावस्था वृद्धिमतीत्वात्।

अथ कथमुत्तानशयालोहितपादिकेति, यावता बाल्यमत्र गम्यते, बालैव ह्युत्तानशया लोहितपादिका भवति, तस्माद्भवितव्यमेव ङीपेत्यत आह-- `नैता वयः श्रुतयः' इति। नैते वयोवचनाः शब्दा इत्यर्थः। इह तावदुत्तानशयेति प्रातिपदिकश्रवणमात्रेण क्रियाकारकसम्बन्धमात्रं प्रतीयते-- उत्ताना शेत इत्युत्तानशया। `हरतेरनुद्यमनेऽच्' (3.2.9) इत्यतोऽज्ग्रहणेऽनुवर्त्तमाने `अधिकरणे शेतेः' (3.2.15) इत्यत्रोत्तानादिषु कर्त्तुष्वित्युपसंख्यानादच,`स्त्रियाः पुंवत्'(6.3.34) इति पुंवद्भावः। सर्वैवोत्ताना शेते, उच्यते चेदमुत्तानशयेति;तत्र नियमो गम्यते। अन्यथा शायितुमसामर्थ्यादुत्तानैव या सेते सोत्तानशयेति गम्येति। अवगतेऽप्यस्मिन्नियमे सन्देह एव-- किमसौ बाला ? वृद्धा वा ? इति। वृद्धाऽपि हि कदाचिदन्यथा शयितुमशक्ता स्यात्, उत्तानैव च शेते। तस्माद्यदोत्तानैव शेत इति नियमप्रतीतिर्भवति, वृद्धत्वाभावश्च कुतश्चितप्रकरणादेरवसितो भवति, तदा बाल्यं गम्यते। `लोहितपादिका'इति। अत्रापि लोहितौ पादावस्या इत्यन्यपदार्थमात्रं तावत् तच्छब्दात् प्रतीयते। यदा तु प्रकरणादिना स्वभावत एवास्या रक्तौ पादौ नालक्तकरसादिनेति प्रतीतिर्भवति तदा बालेति गम्यते। इतिशब्दः प्रकारार्थः। एवम्प्रकारा नैता वयः श्रुतय इत्यर्थः। कथं बाला, वत्सेति ? अजादित्वाट्टाब्भविष्यति। ननु वचनसामर्थ्यादनेन ङीबपि प्राप्नोति ? नैतदस्ति;तस्यान्यत्र कुमारी, किशोरीत्यादौ चरितार्थत्वात्।।

21. द्विगोः। (4.1.21)

`पञ्चपूली' इति। पञ्चानां पूलानां समाहार इति। `तद्धितार्थोत्तरपदसमाहारे च' (2.1.51) इति समाहारद्विगुः। `अकारान्तोदत्तरपदो द्विगुः स्त्रियां भाष्यते' (वा. 156) इति स्त्रीलिङ्गता।

`त्रिफला' इति। त्रयाणां फलानां समाहार इति। पूर्ववद् द्विगुः।।

22. अपरिमाणविस्ताचितकम्बल्येभ्यो न तद्धितलुकि। (4.1.22)

`तद्धितलुकि सति'इति। एतेन `तद्धितलुकि' इत्येषा विषयसप्तमीति दर्शयति। परसप्तमीत्येषानोपपद्यते;लुकोऽभावरूपत्वात्, अभावे च पौर्वापर्याभावात्।

`सर्वतो मानं परिमाणम्' इति। परिशब्दः सर्वतो भावे। सर्वत आरोहतः परिणाहतश्च मीयते = परिच्छिद्यते येन तत्परिमाणम्- प्रस्थादिः।

`पञ्चाश्वा' इति। तद्धितार्थे द्विगुः, `तेन क्रीतम्' (5.1.37) इत्यार्हीयष्ठक्, `अध्यर्थपूर्वाद्द्विगोर्लुक्'(5.1.28) । `कालः संख्या च न परिमाणम्' इति। न हि ताभ्यामारोहतः परिणाहतश्च मीयते। ज्ञापकाच्च न तयोः परिमाणत्वमवसीयते। यदयं `परिमाणान्तस्यासंज्ञाशाणयोः' (7.3.17) इति सिद्धायामुत्तरपदवृद्धौ `संख्यायाः संवत्सरसंख्यस्य च'(7.3.15) इति संख्यासंवत्सरग्रहणं करोति, तज्ज्ञापयति--कालः संख्या च न परिमाणं भवतीति। विस्तादि च परिमाणविशेष एव ग्रहीतव्यः। अतो वृत्तिग्रन्थः-- परिमाणार्थं ग्रहणमिति । काण्डस्य वा परिमाणत्वे तूत्तरसूत्रेण नियमार्थता न विरुध्यते। यद्येवं `कालाः परिमाणिना' (2.2.5) इत्यत्र सामर्थ्यात् परिमाणवचनाः कालशब्दाः समस्यन्त इति यदुक्तं तद्विरुध्यते ? नास्ति विरोधः; उपचारेण तथान्यत्र परिमाणिवाचिना सुबन्तेनाभिधानात्। इह हि मुख्यं कालस्य परिमाणत्वे निषिध्यते। तत्र ह्यौपचारिकं कालस्य परिमाणत्वमाश्रित्य परिमाणवचनाः कालशब्दा इत्युक्तम्-- कालाः परिमाणनेति ब्रुवता। परिमाणवचनत्वं कालशब्दानामुपयुक्तं भवति,न हि तेन विना परिमाणापेक्षयोत्तरपदस्य परिमाणिव्यपदेश उपपद्यते। न च कालस्य मुख्यं परिमाणत्वमस्ति। अतः सामर्थ्यादौपचारिकं परिमाणत्वमाश्रितमिति गम्यते। उपचारस्य हेतुः परिच्छेदस्य हेतुत्वमात्रम्, परिमाणस्य साधर्म्यम्। कालो हि मासादिर्जातादिसमबन्धिनीमादित्यगतिं गमयतीति भवति परिच्छेदस्य हेतुः। अतः परिमाणसाधर्म्यादुपपद्यते, तत्र च परिमाणोपचारः।

`द्विवर्षा, त्रिविर्षा' इति। द्वे वर्षे भूतेति `समधीष्टो भृतो भूतो भावी' (5.1.80) इत्यनेन विहितस्य ठकः `वर्षाल्लुक्' (5.1.88)इति लुक् पाक्षिकः।

चित्तवत्त्वे तु प्रत्ययार्थस्य विवक्षिते `चित्तवति नित्यम्' (5.1.89) इति नित्यमेव लुक्। द्वे वर्षे प्रमाणमस्या इति `प्रमाणे लो द्विगोर्नित्यम्' (वा.558,559) इति नित्यमेव लुक्। `द्विशता, त्रिशता' इति। द्वाभ्यां शताभ्यां क्रीतेति `पणपादमाषसशताद्यत्' 5.1.34) इति यति प्राप्ते `शाणाद्वा' (5.1.35) इत्यत्रोपसंख्यानम्-- `शताच्चेति वक्तव्यम्'(वा. 510) इति। तेन शतसशब्दात् पक्षे `संख्याया अतिशदन्तायाः कन्' (5.1.22) इति कन्,तस्य पूर्ववल्लुक्। `द्विविस्ता'इति। द्वौ बिस्तौ पचति। `सम्भवत्यवहरति पचति' (5.1.52) इत्यनेनार्हीयष्ठक्, तस्य पूर्ववल्लुक्। द्वावाचितौ पचति `द्व्याचिता'। `आढकाचितपात्रात्सखोऽन्यतरस्याम्' (5.1.53) इति वर्त्तमाने `द्विगोः ष्ठंश्च' (5.1.54) इति ष्ठन्, तस्य पूर्वल्लुक्। द्वाभ्यां कम्बल्याभ्यां क्रीता `द्विकम्बल्या'। `तेन क्रीतम्' (5.1.37) इति ठक्,तद्वदेव। लुक्।
`द्व्याढकी' इति। द्वावाढकौ पचति। `आढकाचितपात्रात्खोऽन्यतरस्याम्' (5.1.53) इति वर्त्तमाने `द्विगोः ष्ठंश्च' (5.1.54) इतिपक्षे ष्ठन्, तस्या लुक्।
`पञ्चाश्वी' इति। पूर्ववत् समाहारे द्विगुः।
इहेमौ द्वौप्रतिषेधावुच्येते, तत्रैकः शक्यमकर्त्तुम्। कथम् ? एवं सूत्रन्यासः करिष्यते-- परिमाणान्तातद्धितलुकीति। पूर्वेणैव सिद्धे नियमार्थमेतत्-- परिमाणान्तादेव तद्धितलुकि ङीब्भवति, नान्यस्मात्। तेन द्व्याढकीत्यादावेव भवति, न पञ्चाश्वेत्यादौ;ततो विस्ताचितकम्बल्येभ्यो न तद्धितलुकीत्यनुवर्त्तते,बिस्तादिभ्यः परिमाणेभ्योऽपि तद्धितलुकि ङीब्न भवतीति ? नैवं शक्यम्; विपरीतोऽपि नियमः सम्भाव्येत--परिमाणान्तात् तद्धितलुक्येवन भवति, नान्यत्रेति। ततश्च द्वयोः कुडवयोः समाहारो द्विकुडवीत्त्र न स्यात्। तस्माद्यथान्यासमेवास्तु।।

23. काण्डान्तात्क्षेत्रे। (4.1.23)
`नियमार्थम्' इति। क्षेत्र एव यथा स्यात्, अन्यत्र मा भूदिति। अथान्तग्रहणं किमर्थम्, यावता सामर्थ्यादेव तदन्तविधिर्लभ्यत एव, यथा-- पूर्वस्मिन् सूत्रे, न हि केवलस्य काण्डशब्दस्य केनचिद्द्विगुसंज्ञा विहिता ? सत्यमेतत्, किन्त्वसत्यग्रहणे काणडमेव क्षेत्रेण विशिष्येत-- काण्डशब्द एव केवलो यः क्षेत्रे वर्त्तते इति, ततश्चेह प्रतिषेधः स्यात्-- द्वाभ्यां काण्डसंज्ञकाभ्यां क्षेत्राभ्यां क्रीता द्विकाण्डी वडवेति। इह तु न स्यात्-- द्वे काण्डे प्रमाणमस्याः क्षेत्रभक्तेः द्विकाण्डा क्षेत्र भक्तिरिति। अन्तसूत्रे तु सति काण्डशब्दस्य विशेषणं क्षेत्रं न भवति; तस्य द्विगो गुणभूतत्वात्।

24. पुरुषात्प्रमाणेऽन्यतरस्याम्। (4.1.24)
`प्रमणे यः पुरुषशब्दो वर्त्तते'इति। जातिवचनोऽपि पुरुषशब्दः, यदा प्रमाणशब्देनाभिसम्बध्यते तदा पुरुषगते प्रमाणे वर्त्तते। भवति पदान्तरसम्बन्धेन शब्दस्यार्थान्तरे वृत्तिः, यथा-- सिंहो माणवक इति। सिंहशब्दो जातिवचनोऽपि माणवकसान्निध्याच्छौर्यलक्षणं गुणमाचष्टे। `द्विपुरुषी' इति। `प्रमाणे द्वयसच्'(5.2.37) इति विहितस्य द्वयसचः `प्रमाणे लो द्विगोर्नित्यम्'(वा. 558,559) इति लुक्।
`अपरिमाणान्तत्वात् प्रतिषेध प्राप्ते'इति। `अपरिमाणविस्त' (4.1.22) इत्यादिना।
`द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा' इति। पूर्ववदार्हीयस्य ठको लुक्।
`तद्धितलुकि' इत्येव। `पञ्चपुरुषी' इति। प्रमाणार्थवृत्तानामेव समाहारान्नास्ति द्व्यङ्गविकलता।।

25. बहुव्रीहेरूधसो ङीष्। (4.1.25)
`ऊधसोऽनङिति समासान्ते कृते' इति। अकृत एव समासे बहुव्रीह्यर्थं उत्तरपदे पूर्वं समासान्तेन भवितव्यमिति प्राक् ततः समासान्त एव भवति, ततो बहुव्रीहिः ततः स्त्रीप्रत्ययः-- इत्येवैवानुपूर्वी।`अनो बहुव्रीहेः' इत्यादि। इतिशब्द आद्यर्थे। `अनो बहुव्रीहेः' (4.1.12) इत्यादिना शास्त्रान्तरेणेत्यर्थः। तत्र `अनो बहुव्रीहेः' इत्यनेन सूत्रेण प्रतिषेधे प्राप्ते `डाबुभाभ्यामन्यतरस्याम्' (4.1.13) इत्यनेन डाप्। `कुण्डोघ्नी' इति। कुण्डमिवोधोऽस्या इति बहुव्रीहिः,`अल्लोपोऽनः' (6.4.134) इत्यकारलोपः।
`प्राप्तोधाः' इति। `प्राप्तापन्ने च द्वितीयया' (2.2.4) इति तत्पुरुषः, `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः।
`अन उपधालोपिनः'इत्यादि। `अन उपधालोपिनोऽन्यतरस्याम्' (4.1.28) इत्येतेनापि विधीयमानस्य ङीपोऽयं ङीब्बाधक इष्यते। कथं पुनरिहोच्यमानस्तस्य बाधको भवति ? उत्तरसूत्रानुवृत्तेः। असत्यानुत्तरत्रानुवृत्तौ `मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते' (व्या.प.10) इत्येवमयं ङीब्डाप्प्रतिषेधावेव बाधते, नोपधालोपिनो ङीषम्। ततशचोपधालोपिनः परत्वात् स एव पक्षे भवेत्। तस्मात् `अन उपधालोपिनः' (4.1.28) इत्यत्रास्यानुवृत्तिः कर्त्तव्याः। तेनोपधालोपिनोऽप्यूधसन्तान्ङीषेव भवति। `समासान्तश्च स्त्रियामेव' इति। समासान्तविधेरनित्यत्वात्। अनित्यत्वं तु पुनरूधःशब्देन सकारान्तेनासमासान्तेन विशेषणाद्विज्ञायते। यदि हि नित्यः स्यात् `बहुव्रीहेरूघ्नः' इति निर्देशः स्यात्।।

26.संख्याव्ययादेर्ङीप्। (4.1.26)
`द्व्यूघ्नी'इत्यादि। द्वे ऊधसी अस्याः। त्रीण्यूधांस्यस्याः।अबिगतमूधोऽस्याः।निर्गतमूधोऽस्या इति विग्रहः।
`आदिग्रहणं किम्' इति। एवं मन्यते-- संख्याव्ययाभ्यामित्येव वक्तव्यम्, `बहुव्रीहेरूधसः' (4.1.25) इति हि वर्त्तते,, तत्रैवमभिसम्बन्धः करिष्यते---

संख्याव्ययाभ्यामुत्तरो य ऊधःशब्दस्तदन्ताबहुव्रीहेर्ङीब्भवतीति, तथा च निष्पलमादिग्रहणम्, विनापि तेन सिद्धत्वादिति। `द्विविधोघ्नी' इत्यादि। यद्यादिग्रहणं न क्रियेत तदा `संख्याव्ययाभ्याम्' इति पञ्चमीनिर्देशात् संख्याया अनन्तरो य ऊधःशब्दस्तदन्तादेव स्यात्। यत्र तु व्यवधानं तत्र तु न स्यात्, आदिग्रहणात्तु तत्रापि भवति। द्विविधमूधो यस्या इति विग्रहः। अत्रादिग्रहणे सति विधशब्देन व्यवधानेऽपि भवति।।

27.दामहायनान्ताच्च। (4.1.27)

`ऊधसः' इति निवृत्तम्,प्रकृत्यन्तरोपादानात्। `संख्याग्रहणनुवर्त्तते, नाव्ययग्रहणम्' इति। संख्याग्रहणस्यैव स्वरितत्वात्। `डाप्प्रतिषेधविकल्पेषु प्राप्तेषु' इति। `डाबुभाभ्यामन्यतरस्याम्' (4.1.13) इत्यादिना डापि प्राप्ते `अनो बहुव्रीहेः' (4.1.12) इति प्रतिषेध `अन उपधालोपिनोऽन्यतरस्याम्ट (4.1.28) इति विकल्पे च। द्वे दामनी अस्या इति `द्विदाम्नी'। `द्वौ हायनावस्या इति `द्विहायनी'।

`हायनो वयसि स्मृतः' इति। प्रकृतिरिति शेषः। कस्य प्रकृतिः ? ङीपः प्रकृतत्वात् तस्यैव। बहुव्रीह्यधिकारादत्र हायमान्तो बहुव्रीहिरिति गम्यते। एतदुक्तं भवति-- हायमान्तो बहुव्रीहिर्वयसि गम्यमाने ङीपः प्रकृतिराचार्यैः स्मृत इति। तेन यदि वयो गम्यते ततो ङीब्भवति, नान्यथा।

एतच्चोत्तरसूत्रेऽन्यतरस्यांग्रहणस्योभयोर्योगयोः शेषभूतत्वाद्व्यवस्थितविभाषाविज्ञानाच्च लभ्यते। अथ त्रिचतुर्भ्यां हायनस्याप्युपसंख्यानाद्यथा हि त्रिहायनी चतुर्हायणीत्यत्र णत्वं भवति; तथा त्रिहायना शाला, चतुर्हायना शालेत्यत्रापि कस्मान्न भवति ? इत्याह -- `णत्वमपि' इत्यादि। तदपि हि णत्वमौपसंख्यानिकमाचार्यैर्वयस्येव स्मर्यते। न च शालाया वयः सम्भवति, तस्य प्राणिधर्मत्वादिति नेह णत्वं प्रवर्तते।

अन्तग्रहणं विस्पष्टार्थम्। बहुव्रीह्यधिकारादेव हि सामर्थ्यात् तदन्तविधिर्लभ्यते; न हि केवलयोर्दामहायनशब्दयोर्बहुव्रीहिसंज्ञा केनचिद्विहिता।।

28.अन उपधालोपिनोऽन्यतरस्याम्। (4.1.28)

`उपधालोपी'इति। उपधालोपो यस्य ङीपि परतः सम्भवति स उपधालोपी।

`ननु' इत्यादि। `अनो बहुव्रीहेः' (4.1.12) इति प्रतिषेधः सिद्धः, `डाबुभाभ्याममन्यतरस्याम्' (4.1.13) इति डाप्, अनयतरस्यांग्रहणाच्च पक्षे ङीप्। यदि तर्हि `डाबुभाभ्यामन्यतरस्याम्' इत्यनेन ङीबपि विधीयते, तदा दामा पामेत्यत्रापि स्यात् ? अन्यतरस्यांग्रहणस्य व्यवस्थितविभाषात्वान्न भविष्यति।

`अनुपधालोपिनः' इत्यादि। यदीदं नोच्येत, अनुपधालोपिनोऽपि ङीप् स्यात्। तस्मादुपधालोपिन एव ङीब्यथा स्यात्, अनुपधलोपिनो मा भूदित्येवमर्थमिदमुच्यते । `बहुराजा' इति। ङीप्प्रतिषेधः। `सर्वनामस्थाने च' (6.4.8) इति नोपधाया दीर्घः। `बहुराज्ञी' इति। ङीप्, `अल्लोपोऽनः' (6.4.134)। `बहुराजे' इति। डाप्, `औङ आपः' (7.1.18) इति शीभावः, `आद्गुणः' (6.1.97)। द्विवचननिर्देशो डापोऽभिव्यक्तये। एकवचने हि डाप्प्रतिषेधयोर्न कश्चिद्विशेषः; उभयत्रापि तुल्यरूपत्वात्। क्वचित् `बहुराजाः' इति बहुवचनेन निर्देशः, तस्यापि तेदव प्रयोजनम्।

`बहुमत्स्या' इति। `सूर्यातिष्यागस्त्यमस्त्यानां य उपधायाः' (6.4.149) इति लोपविधानादुपधालोपीत्येष बहुव्रीहिः। `सुपर्वा' इति। अयमुपधालोपी न भवति। `न संयोगाद्वमन्तात्' (6.4.137) इत्युपधालोपप्रतिषेधात्।।

29. नित्यं संज्ञाछन्दसोः। (4.1.29)

नित्यग्रहणं विस्पष्टार्थम्। पूर्वणैव हि विकल्पेन ङीप् सिद्धः, तदारम्भसामर्थ्यादेव ङीब्नित्यं भविष्यति, अन्यथा हीदं वचनमनर्थकं स्यात्।।

30. केवलमामाकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च। (4.1.30)

अथ मामकग्रहणं किमर्थम्, यावताऽस्मदः `तस्येदम्' (4.3.120) इत्यणि कृते `तवकममकावेकवचने' (4.3.3) इतिममकादेशेन मामक इति भवति, ततश्च `टिड्ढाणञ्' (4.1.15) इत्येव ङीप्सिद्धेः ? सत्यमेतत्; नियमार्थं तु मामकशब्दस्य ग्रहणम्; संज्ञाच्छन्दसोर्यथा स्यात्, अन्यत्र मा भूदिति।।

31. रात्रेश्चाजसौ। (4.1.31)

`अजसौ' इति । विषयसप्तमीयम्, न परसप्तमी, कुतः ? स्त्रीप्रत्ययस्यान्तरङ्गत्वाज्जसः परत्वाविरोधाद्विषयसप्तमीत्वे न दोष इत्याह-- `जस्विषयत्वात्' इत्यादि।

`अजसादिष्विति वक्तव्यम्'इति।जासादिविषयादन्यत्र रात्रिशब्दान्ङीब्भवतीत्येदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- इह लाघवार्थं `अजसि' इति वक्तव्येऽजसावित्युक्तम्, मात्राधिक्यादर्थाधिक्यसूचनार्थम्, तेनाजसादिषु ङीब्भवतीति। आदिशब्देनामादीनां ग्रहणम्।

`कथम्' इत्यादि। `रात्र्यः' इति। रात्रिशब्दस्य जसन्तस्य प्रयोगः। एवं हि `दीर्घाज्जसि च' (6.1.105) इति सवर्णदीर्घत्वे प्रतिषिद्धे यणादेश उपपद्यते, नान्यथा। यदि तु रात्रिशब्दस्यायं प्रयोगः स्यात्, ततः `जसि च'(7.3.109) इति गुणे कृतेऽयादेशे च रात्रय इति रूपं स्यात्। ईकारान्तश्च रात्रिशब्दो न सम्भवति;अजसाविति ङीप्प्रतिषेधात्। ततश्च रात्र्य इति प्रयोगो नोपपद्यत इत्यभिप्रायः। `ङीषयम्'इत्यादि। ननुच रात्रिशब्दो बह्वादिषु पठ्यते, तत्कथं बह्वादिलक्षणस्ततो ङीष्भविष्यति ? इत्यत आह--`तत्र हि' इत्यादि। `कृदिकारादक्तिनः'इति। कृत इकारः कृदिकारः,तदन्तान्ङीष् भवति।`वृदृभ्यां विन्' (द.उ. 1.23) वर्वी, दर्वी। यस्तु क्तिन्सम्बन्धी तदन्तान्न भवति-- `स्त्रियां क्तिन्' (3.3.94) कृतिः, हृतिः। `सर्वतोऽक्तिन्नर्थादित्येके' इति। एक आचार्या

सर्वतोऽक्तिन्नर्थात् कृदिकारादकृदिकाराच्च ङीष् भवतीत्याहुः, राजिः राजी। राजिशब्दोऽव्ययुत्पत्तिपक्षे कृतिकारान्तो न भवति। अक्तिन्नर्थादिति, न विद्यते क्तिन्नर्थो यस्य सोऽक्तिन्नर्थः, तस्मात् सर्वतो ङीष् भवति। यस्तु क्तिन्नर्थस्तदन्तान्न भवति-- कृतिः हृतिः। `आक्रोशे नञ्यनिः' (3.3.112) -- अकरणिः, अहरणिः। रात्रिशब्दश्चायं व्युत्पत्तिपक्षे कृदिकारान्तो भवति, `रा आदाने' (धा.पा.1057), `राशदिभ्यां त्रिप्' (द.उ.1.36) रात्रिः, तस्मात् पक्षे ङीष् रात्री। अव्युत्पत्तपक्षे तु कृदिकारान्तो न भवति, ततः `सर्वतोऽक्तिन्नर्थात्' (ग.सू.51) इति ङीष्।।

32. अन्तर्वत्पतिवतोर्नुक्। (4.1.32)

`स तु नकारान्तत्वादेव सिद्धः' इति। `ऋन्नेभ्यो ङीप्' 4.1.5) इत्यनेन। `निपातनसामर्थ्यात्' इत्यादि। यथैव हि निपातनसामर्थ्यादन्यत् किञ्चिदलाक्षणिकं कार्यं भवति, तथार्थविशेषेऽपि वृत्तिः। कस्मिन्पुनरर्थविशेषे वृत्तिर्भवति ? इत्यत आह-- `अन्तर्वत्पतिवत्' इत्यादि। यथाक्रममन्तर्वदित्यस्य गर्भसंयोगे वृत्तिः, पतिपदित्यस्य भर्तृसंयोगे। गर्भेण संयोगो गर्भसंयोगः, स कस्या भवति ? यस्याः कुक्षौ गर्भो व्यज्यते। भर्त्रा संयोगो भर्तुसंयोगः, स च कस्या भवति ? यस्याः पतिर्जीवति। भर्त्ता चेह योऽग्निसाक्षिपूर्वकेण पाणिग्रहणनेन सम्बन्धी स एवाभिमतः, नतु यः पृथिवीस्वामी। `{राशतिभ्यां द.उ.} इह तु न भवति इति-- अन्तरस्यां शालायां विद्यते' (इति) शालायां कुक्षिगतेन गर्भेण सम्बन्धाभावात्। `पतिमती' इति। परिरस्या अस्तीति मतुप्, `उगितश्च' (4.1.6) इति ङीप्। अत्र पतिशब्द ईश्वरे स्वमिनि वर्त्तते। तेन संयोगे च न पतिवदिति निपात्यते। येन तु संयोगो निपात्यते स चाख्यात एव।

`मतुब्निपात्यते' इति। अन्तःशब्दस्याधिकरणप्रधानत्वात् प्रथमासमर्थता नास्ति। प्रथमासमर्थाच्चास्तिसमानाधिकरणेन मतुब्विधीयते, न चास्तिनान्तशब्दस्य सामानाधिकरण्यम्, तस्मान्मतुब्न प्राप्नोतीति निपात्यते। `वत्वं न सिद्धम्' इति। `मादुपधायाश्च' (8.2.9) इत्यादिनैवाकारोपधत्वात्। `निपात्यते' इति। केनचिदप्राप्तत्वात्। ` मतुप्सिद्धः'इति। पतिरस्यास्तीति प्रथमासमर्थस्य पतिशब्दस्यास्तिना सामानाधिकरण्यात्। `गर्भिणी' इत्यनेन गर्भसंयोगं दर्शयति। `जीवपतिः'इत्यनेनापि भर्तृसंयोगम्।

`अन्तर्वत्पतिवतोः'इत्यादि। अन्तर्वत्पतिवदित्येतयोः शब्दयोर्निपातनान्मतुबवत्वे भवतः, यथाक्रमं गर्भिण्यां जीवपत्यां च स्त्रियामभिधेयायाम्। गर्भोऽस्या अस्तीति गर्भिणी। जीवतीति जीवः, पचाद्यच्; जीवः गतिर्यस्याः सा जीवपतिः।ननु च `पतिः समास एव' (1.4.8) इति घिसंज्ञोयऽयं पतिशब्दः,तत्र `अच्च घेः' (7.3.119) इत्यात्वौत्वयोः कृतयोः जीवपताविति भवितव्यम्, तदयुक्तो जीवपत्यामिति निर्देशः ? नैतदस्ति; `शेषो घ्यसखि'(1.4.7) इति, सिद्धायामेव घिसंज्ञायां `पतिः समास एव' (1.4.8) इत्यनेन शेषस्यैव पतिशब्दस्य घिसंज्ञा नियमार्थं विधीयते, न चायं शेषः; `ङिति ह्रस्वश्च' (1.4.6) इति नदीसंज्ञासम्भवात्। नदीसंज्ञायां च सत्यां `इदुद्भ्याम्' (7.3.117) इति `ङेराम् नद्याम्नीभ्यः' (7.3.116) इत्याम्, यणादेशे जीवपत्यामिति भवति। `वा च्छन्दसि नुग्विधिः' । छन्दसि विकल्पे तु नुग्विधिर्भवति। स च वक्ष्यमाणस्य विभाषाग्रहणस्य सिंहावलोकितन्यायेनानुवृत्तेर्व्यवस्थितविभाषाविज्ञानाच्च लभ्यते। नुक्पक्षे `ऋन्नेभ्यो ङीप्' (4.1.5) इति ङीप्। `अन्तर्वत्नी' इति। अनुक्पक्षे `उगितश्च' (4.1.6) इति ङीप्--अन्तर्वतीति भवति।।

33. पत्युर्नो यज्ञसंयोगे। (4.1.33)

`यज्ञसंयोगे' इति। यज्ञसम्बन्धे। कस्य पुनर्यज्ञेन संयोगः ? पतिशब्दवाच्यार्थस्य। अथ पतिशब्दस्यैव कस्मान्न भवति ? असम्भवात्। तयोर्हि वाच्यवाचकभावलक्षणः सम्बन्धः स्यात्, न केवलः पतिशब्दो यज्ञस्य वाचकः। कथं पुनर्यज्ञेन संयोग इत्याह-- `तत्साधनत्वात्' इति। तस्य यज्ञस्य साधनं तत्साधनम्, तद्भावो यज्ञसाधनत्वम्। तस्माद्यज्ञेन संयोगो भवति। यजमानस्य या भार्या तस्या यागं प्रति साधनभावोऽस्तीति; विना तया तदनिष्पत्तेः। न हि भार्याविरहितस्त्रैर्णिकः केवलो यज्ञेऽधिक्रियते। तस्मात् स तया करणभूतया यज्ञं निष्पादयतीत्यस्ति तस्या यज्ञेन सह क्रियाकारकलक्षणः सम्बन्धः।

`तत्फलग्रहीतृत्वाद्वा' इति। यज्ञसंयोगे द्वितीयो हेतुः। अनेन तु स्वस्वामिभावलक्षमः सम्बन्धः प्रतिपाद्यते। यज्ञस्य यत्प्रधानं फलं स्वर्गाख्यं तद्यजमानस्य पत्नी परिगृह्णाति। अतो यद्यपि यज्ञं प्रति तस्याः साधनत्वं न विवक्ष्यते, तथापि तत्फलस्य ग्रहणात्, यथा यजमानस्य यज्ञेन हस स्वस्वामिभावसम्बन्धः, तथा तत्पत्न्या अपि। अथ फलग्रहीतृत्वादिति कथमत्र षष्ठीसमासः ? कथञ्च न स्यात् ? `कर्त्तरि च' (2.2.16) इति तृचा सह षष्ठीसमासप्रतिषेधात् ? नैवायं तृजन्तेन षष्ठीसमासः, किं तर्हि ? द्वितीयेति योगविभागात् तृन्नन्तेन द्वितीयासमासः। अथ वा-- याजकादिषु ग्रहीतृशब्दो द्रष्टव्यः, तेन षष्ठीसमासो भविष्यति। अथापि तत्र न पठ्यते ? एवमपि `याजकादिभिश्च' (2.2.9) इति चकारस्यानुक्तसमुचयार्थत्वाद्भविष्यति। `ऋन्नेभ्यो ङीप्' (4.1.5) इति ग्रहीतृशब्दादिह ङीप् न भवति, स्त्रीत्वस्याविवक्षितत्वात्। क्वचित् `फलगृह्णीतत्वात्' इति पाठः।तत्र फलगृहीतशब्दयोर्बहुव्रीहिः। फलशब्दस्य जातिवाचित्वान्निष्ठायाः पूर्वनिपाते प्राप्ते `जातिकालसुखादिभ्यः परवचनम्' (वा.116) इति गृहीतशब्दस्य परनिपातः।

`कथम्' इत्यादि। एं मन्यते-- `शूद्रस्यैव तावद्यज्ञेऽनधिकृत्वाद्यज्ञेन संयोगो नास्ति, किं पुनस्तद्भार्यायाः ? अतः `वृषलस्य पत्नी' इत्येष प्रयोगो नोपपद्यते' इति। `उपमानाद्भविष्यति' इति। पत्नीवद्धि पत्नी। यथैव हि यजमानस्य पत्न्यग्निसाक्षिपूर्वकेण तत्पत्युः सम्बन्धिनी तत्कार्येषु चाधिकृता तथा वृषलस्य भार्याऽपि। तस्मात् पत्नीसमाधर्म्यात् साऽपि पत्नीत्युच्यते।।

34. विभाषा सपूर्वस्य। (4.1.34)

`पतिशब्दान्तस्य'इत्यादि। एतेन पतिशब्दस्य ग्रहणम्, सपूर्वग्रहणम्, अनुपसर्जनग्रहणञ्च -- त्रयमप्येतत् प्रातिपदिकस्य विशेषणमिति दर्शयति।

सहशब्दोऽयमस्त्येव तुल्ययोगे-- सशिष्यो गुरुरागत इति, गुरोः शिष्यस्य चागमनेन तुल्ययोगः प्रतीयते; अस्ति च सत्तावचनः, यथा-- सहैव दशभिः पुत्रैर्भारं वहति गर्दभी' इति, विद्यमनैरेवेत्यर्थः। तदिह सत्तावचनो गृह्यते, सपूर्वस्य विद्यमानपूर्वस्येत्वर्थः। यदि हि तुल्ययोगे वर्त्तमानो गृह्यते, ततोऽयमर्थः स्यात्--- सहपूर्वेण पतिशब्दान्तस्य नकारो भवतीति। ततश्च पतिशब्दात् पूर्वस्यापि वृद्धादिशब्दस्य नकारः स्यात्। एवं हि तुल्ययोगो भवति यदि नकार उभयोरपि भवति। पूर्वशब्दोऽयमस्त्येव व्यवस्थाशब्दः, यथा--पूर्वं मथुरायाः पाटलिपुत्रमिति; अस्त्यवयववचनः, यथा-- पूर्वं कायस्येति। तदिहावयववचनो गृह्यते। सह विद्यमानः पूर्वोऽवयवो यस्य तत् सपूर्वमित्युच्यते। यदि व्यवस्थाशब्दो गृह्येत, तत्रायमर्थः स्यात्-- विद्यमानः पूर्वो यस्मात् तस्य पतिशब्दान्तस्य नकारो भवतीति। ततस्च दृढपत्नीत्यत्र न स्यात्, न हि पतिशब्दान्तादिहकश्चित् पूर्वोऽस्तीति। अथ पतिशब्दस्यैव सपूर्वत्वमनुपसर्जनत्वञ्च विशेषणं कस्मान्न विज्ञायते ? अशक्यत्वात्। स ह्यवयववचनं वा पूर्वशब्दं गृहीत्वा विशिष्येत, व्यवस्थाशब्दं वा। तत्र पूर्वस्तावदयुक्तः कल्पः अव्यभिचारात्, असम्भवाच्च। कथम् ? यदि पकारं पूर्वमभिप्रेत्य विद्यमानः पूर्वोऽवयवो यस्येति विशिष्येत, ततोऽव्यभिचारादयुक्तं विशेषणम्। न हि पकारेण यस्य पूर्वत्वं तत्पतिशब्दो व्यभिचरति। अथ शब्दान्तरम् ? तदसम्भवादयुक्तं विशेषणम्। न हि शब्दान्तरं पतिशब्दस्यावयव उपपद्यते। व्यवस्थाशब्दपक्षे तु विद्यमानः पूर्वो यस्मात् तदिति विशिष्यते। युज्यते च विशेष्यविशेषणभावः। किन्तु वाक्येऽपि नकारः प्राप्नोति---- ग्रामस्य पतिरियं ब्राह्मणीति; अस्ति ह्यत्र पतिशब्दात् पूर्वो ग्रामशब्द-। अनुपसर्जनग्रहणेनापि पतिशब्दे विशिष्यमाने बहुव्रीहौ विकल्पो न प्राप्नोति-- दृढः पतिरस्या दृढपतिः, दृढपत्नीति। न ह्यत्रानुपसर्जनं पतिशब्दः, सर्वोपसर्जनत्वाद्बहुव्रीहेरिति बहुव्रीह्यवयवानामप्युपसर्जनत्वात्। तस्मात् प्रातिपदिकस्यैव विशेषणं युक्तम्।

`पतिरियं ब्राह्मणी ग्रामस्य' इति। ननु च व्यपदेशिवद्भावादिदमपि सपूर्वमिति शक्यते व्यपदेष्टुम्। न च `व्यपदेशिवद्भावोऽप्रतिपदिकेन' (शाक्.प.65) इति व्यपदेशिवद्भावाभावः; प्रातिपदिकत्वात्। यद्येवम्, पतिशब्दान्ततापि नास्तीति, अतो द्व्यङ्गविकलता ? नैतदस्ति; सपूर्वग्रहणे हि क्रियमाणे पतिशब्दान्तस्येत्येषोऽर्थो लभ्यते। अक्रियमाणे तु तस्मिन् शब्दस्यैव शुद्धस्य नकारो विज्ञायते।।

35. नित्यं सपत्न्यादिषु। (4.1.35)

`सपत्न्यादिषु' इति। के पुनः सप्त्नत्यादयः ? ये पठ्यन्ते। तेषु प्रातिपदिकेषु येषां समानादीनि पूर्वपदानि ते सपत्न्यादयः। कुत एतत् ? समानादीनां गणे पाठात्, सपत्न्यादीनां चापाठात्। लाघवार्थं समानार्थं समानादिष्विति प्रवक्तव्ये कृते नकारदेशस्य सप्रत्ययस्य च सपत्न्यादिष्विति समुदायस्योच्चारणम्-- नियोगत एव समुदाय ईकारन्त एव यथा स्यादित्येवमर्थम्। तेन सपत्नी भार्या यस्य स सपत्नीभार्य इति `स्त्रियां पुंवत्' (6.3.34) इति पुंवद्भावो न भवति। `सपत्न्यादिषु नित्यम्' इत्यादि। समानादिषु पूर्वेष्वयवयवेषु सत्सु नित्यं पतिशब्दस्य नकारादेशो भयतीत्यर्थः। यदि पूर्वेण विकल्पे प्राप्त इदं वचनम्, एवं हि नित्यग्राहणयनर्थकम्, आरम्भसामर्थ्यादेव हि नित्यं विधिर्भविष्यतीत्यत आह-- `नित्यग्रहणं विस्पष्टार्थम्' इति।

`दासाच्छन्दसि' इति। दासशब्दात् परो यः पतिशब्दस्तदन्तस्य प्रातिपदिकस्य चछन्दसि विषये नित्यं नकारादेशो भवति। दासः पतिर्यस्याः सा दासपत्नी। भाषायां तु पूर्वेण विकल्पः-- दासपतिः, दासपत्नीति।।

36. पूतक्रतोरै च। (4.1.36)

`ऐकारश्चान्तादेशो भवति' इति। कुतः पुनरेतदवसितम्-- आदेञ्शोऽयमिति, न पुनः प्रत्ययः ? उत्तरसूत्रेऽप्यादेशत्वात्। उत्तरसूत्रे ह्ययमेवैकारोऽनुवर्त्तते, तत्र चास्यादेशत्वम्। अत इहाप्यादेशत्वमवसीयते। उत्तरसूत्रे कुतोऽस्यादेशत्वं निश्चितमिति चेत् ? उदात्तवचनात्। यदि हि प्रत्ययः, तस्याद्युदात्तत्वादुदात्तवचनमनर्थकं स्यात्; प्रत्ययस्वरेणैवोदात्तत्वस्य सिद्धत्वात्।

`त्रय एते योगाः' इति। अयं चैकः, वक्ष्यमाणौ चानन्तरौ-- द्वौ-- एते त्रयो योगाः पुंयोगप्रकणे `पुंयोगादाख्यायाम्' (4.1.48) इत्येवमादौ द्रष्टव्याः; तस्मिन्नेषां स्वरितत्वेनानुवृत्तेः। पूतः क्रतुर्येन पुकषेण स पूतक्रतुः, तस्य स्त्री पूतक्रतायी।।

37. वृषाकप्यग्निकुसितकुसीदानामुदात्तः। (4.1.37)

`वृषाकपिशब्दो मध्योदात्तः' इति। `लघावन्ते द्वयोश्च बह्वषो गुरुः' (फिट्.2.42) इति वनचात्। अस्यायमर्थः-- लघावन्ते परतो द्वयोश्च लघ्वोः परतो बह्वच्शब्दस्य यो गुरुः स उदात्तो भवतीति। `बह्वष्' इति बह्वजित्यर्थः। पाणिनेर्यश्चकारेण प्रत्याहारः सोऽन्येषामाचार्याणां मतेन षकारेण। वृषाकपिशब्दे कपिशब्दसम्बन्धिनोर्लघ्वोः परतः पूर्व आकारो गुरुतर उदात्तो भवति, शेषमनुदात्तम्। तत्र यद्युदात्तग्रहणं न क्रियेतानुदात्तस्य स्थाने य आदेशः स्थानिवद्भावेन सोऽनुदात्त एव स्यात्। तस्माद्वृषाकपि शब्द उदात्तत्वं प्रयोजयति। `अग्न्यादिषु पुनरन्तोदात्तेषु' इति। `फिषः' (फि.सू.1.1) इत्यादिनाग्न्यादीनामन्तोदात्तत्वम्। आदिशब्देन कुसितकुसीदयोर्ग्रहणम्। `फिष्' इति प्रातिपदिकस्यैव पुनरन्याचार्याकृता संज्ञा।।

38. मनोरौ वा। (4.1.38)

`वाग्रहणेन द्वावपि विकल्प्येते' इति। प्रत्येकं वाग्रहणेनाभिसम्बन्धात्। यदा चैकारौकारौ न भवतस्तदा ङीबपि न भवति ; तस्य सन्नियोगशिष्टत्वात्।

`मनुशब्द आद्युदात्तः' इति। एतेनोदात्तग्रहणमनुवर्त्तयितव्यम्; अन्यथा शेषस्यानुदात्तत्वे स्थानिवद्भावेनादेशस्याप्यनुदात्तत्वं स्यादिति भावः। `मन ज्ञाने' (धा.पा.1176) `{भृमृशीतृचरित्सरितनिममस्ज्भ्य उः-- द.उ.}भृमृशीतृचरित्सरितनिधनिमिमस्ज्भ्य उः' (द.उ.1.92) इत्यनुवर्त्तने `धान्ये नित्'

(द.उ.1.94) इति च `शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमानिभ्यश्च' (द.उ.1.95) इत्युप्रत्ययः, नित्वात् `ञ्नित्यादिर्नित्यम्' (6.1.197) इत्याद्युदात्तत्वं भवति मनुशब्दस्य।।

39. वर्णादनुदात्तात्तोपधात्तो नः। (4.1.39)

`वर्णानां तणितनितान्तानाम्' (फि.सू.2.23) इत्यस्यायमर्थः-- वर्णवाचिनां तशब्दान्तानां णकारान्तानां तिशब्दान्तानां निशब्दान्तानां चादिरुदात्तो भवतीति, आदिग्रहणमुदात्तग्रहणं च प्रकृतं तत्रानुवर्त्तते।

`प्रकृता' इति। प्रकर्षेण कृतेति, `कुगतिप्रादयः' (2.2.12) इति समासः। प्रशब्दोऽयं निपातः, `निपाता आद्युदात्ताः' (फि.सू.4.80) `उपसर्गाश्चाभिवर्जम्' (फि.सू.4.81) इत्युदात्तः। समासेऽपि कृते `गितरनन्तरः' (6.2.49) इति पूर्वपदप्रकृतिस्वरेणाद्युदात्त एव भवतीति। सेषमनुदात्तम्। `घृतादित्वादन्तोदात्तः' इति। `घृतादीनाञ्च' (फि. सू.1.21.) इत्यन्तोदात्तत्वविधानात्। एतच्च फिट्सूत्रे पठ्यते। `शिति' इति `वर्णानाम्' (फि.सू.2.33) इत्यादिना शितिशब्द आद्युदात्तः।

`पिशङ्गात्' इत्यादि। पिशङ्गशब्दः `लघावन्ते' (फि.सू.2.42) इत्यादिना मध्योदात्तः, ततः `अन्यतो ङीष्' (41.36) इत्यतश्चकारोऽनुक्तसमुच्चयार्थोऽनुवर्त्तते। तेन पिशङ्गादपि ङीब्भवतीति। `वक्तव्यम्' इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- `मनोरौ वा' (4.1.39) इत्यतो वेत्यनुवर्तते,सा च व्यवस्थितविभाषा। तेनासितपलितशब्दाभ्यां ङीष्न भविष्यत्येवेति। `वर्णानां तणतिनितान्तानाम्' (फि.सू.2.33) इयाद्युदात्तौ असितपलितशब्दौ।

`तयोश्छन्दसि' इत्यादि। असितपलितशब्दयोस्तकारस्य क्नमेक आचार्या इच्छन्ति। स तु `व्यत्ययो बहुलम्' (3.1.85) इत्येव सिद्धः। `भाषायामपीष्यते' इति। एतेन प्रत्याचष्टे। `असिक्निकानाम्' इति। अज्ञातार्थे `प्रागिवात्कः' (5.3.70) इतिकः, `केऽणः' (7.4.13) इति ह्रस्वः।।

40. अन्यतो ङीष्। (4.1.40)

`सारङ्गी, कल्माषी' इति। `लघावन्ते' (फि.सू.2.42) इत्यादिना मध्योदात्तौ सारङ्गकल्मावशब्दौ। `शवली' इति। `शप अक्रोशे' (धा.पा.1000), `कलस्तृपश्च' (द.उ.8.107) इति `शपेर्वश्च' (द.उ.8.108) इति कलप्रत्ययः, पकारस्य बकारः, प्रत्यायाद्युदात्तत्वेन मध्योदात्तः शबलशब्दः। `खट्वा' इति। `खट काङ्क्षायाम् (धा.पा.309), `अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' (द.उ.8.125) इति क्वन्, नित्सर्वेरणाद्युदात्तः खट्वाशब्दाः। `कृष्णा' इति। `कृष विलेखने' (धा.पा.990) `{इण्सिञ्दीङुष्यविभ्यो नक्--द.उ.) इण्सिञ्जिदीङुष्यविभ्यो नक्', `कृषेर्वर्णे' (द.उ.5.35.37) इति नक्, प्रत्ययस्वरेणान्तोदात्तः कृष्णशब्दः। `कपिला' इति। `कमु कान्तौ' (धा.पा.443) `सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्' (पं.उ.155), `कमेः पश्च' (पं.उ.1.56) इति मकारस्य पकारः, चित्स्वरेणाणान्तोदात्तः कपिलाशब्दः।।

41. षिद्गौरादिभ्यश्च। (4.1.41)

`षिद्भ्यः प्रातिपदिकेभ्यः' इति। षकार इद्येषां तानि। कथं पुनः प्रातिपदिकानि षिन्ति भवन्ति, यावता ध्वुनादेः प्रत्ययस्य षकार इत्संज्ञकः,न तु तेषाम् ? नैष दोषः; अवयवगतं हि षित्त्वं समुदायस्य विशेषणं भविष्यति, यथा-- अक्षिगतं काणत्वं पुरुषस्य --काणः पुरुष इति। यद्येवम्, धातुगतमपि षित्त्वं समुदायस्य विशेषणं प्राप्नोति, `त्रपूष् लज्जायाम्' (धा.पा.347), अङ, अपत्रपेति ? नैतदस्ति; यो ह्यनुबन्धोऽवयवे निष्प्रयोजनः स समुदायार्थो विज्ञायते। धातोस्तु विद्यत एव षित्करणस्य नान्यत् प्रयोजनमस्ति, अतः समुदयार्थमेव तद्विज्ञायते। `रजकी' इति। अत्र `रञ्जेश्च' (6.4.26) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वादनुनासिकलोपः।

गौरादिषु गौरशब्दस्य सत्यपि वर्णवाचित्वे प्रातिपदिकस्वरेणान्तोदात्तत्वात् पूर्वेण प्राप्नोतीतीह पाठः। मत्स्यादीनां यकारोपधानाम् `अयोपधात्' (4.1.63) इति जातिलक्षणस्य ङीषः प्रतिषेधे प्राप्ते। शृङ्गशब्दस्य प्राक् श्वञ्शब्दात् पुटादीनाञ्चानन्दवर्ज्जितानां स्त्रीविषयत्वात् शृङ्गशब्दस्य प्राप्ते पुटादीनां चास्त्रीविषया (4.1.63)दिति प्रतिषेधे प्राप्ते। आनन्दशब्दस्याजातिवाचित्वान्ङीष्यप्राप्ते। श्वंस्तक्षन्नित्येतयोः `ऋन्नेभ्यो ङीप्' (4.1.5) इतिङीपि प्राप्ते। अनुडुह्यनड्वाहीत्यनयोरनकारान्तत्वान्ङीप्यप्राप्ते। इकारान्तयोः सप्रत्यययोर्गणे पाठः पुंवद्भावप्रति,ेधार्थः-- अनडुहीभार्यः, अनड्वाहीभार्य इति। एतदेव वचनं ज्ञापकम्-- अनडुहः स्त्रियां विकल्पेनाम्भवतीति। तेन यदुक्तम्-- `अनडुहः {स्त्रियां वेति -- वा.पाठ.} स्त्रियाञ्चेति वक्तव्यम्' (वा.829) इति, तन्न वक्तव्यमिति भवति। `{एषणः का.वृ.}एषणं करणे' इति। एषणशब्दः करणे कारके ङीषमुत्पादयतीति। इष्यतेऽनयेत्येषणी। करण इति किम् ? इष्यतेऽस्यामित्यधिकरणे ङीपि। मेध इत्यस्याजातित्वान्ङीष्यप्राप्ते। गौतमस्य शार्ङ्गरवादित्वान्ङीनि प्राप्ते। पक्षे च वचनात्सोऽपि भवत्येव। आयस्थूणादीनामालिपिशब्दपर्यन्तानां `अणिञोरनार्षयोः' (4.1.78) इति ष्यङि प्राप्ते। आयस्थूणशब्दः शिवाद्यणन्तः। `{भौरि,भौलिकि-गणपाठः} भौरिक्यादयः `अत इञ्' (4.1.95) इतीञन्ताः। आपिच्छिकस्य ङीषि प्राप्ते। आपिच्छिकानां राजानः, तेषामपत्यं स्त्री। `जनपदशब्दात् क्षत्रियादञ्' (4.1.168) इत्यञ्, तस्य `अतश्च' (4.1.177) इति लुकि कृतेप्रत्ययलक्षणेन ङीप्प्राप्नोति। आरटादीनां प्राक् शातनशब्दात् स्त्रीविषयत्वान्ङीष्यप्राप्ते। शातनादीनां ल्युडन्तत्वान्ङीपि प्राप्ते। अधिकरणान्ङीपि। अग्रे हायनमस्य इत्याग्रहायणी। स्वार्थिकोऽण्, णत्वं निपातनात्। अणन्तत्वान्ङीपि प्राप्ते। ईकारान्तस्य पाठः पुंवद्भावप्रतिषेधार्थः-- आग्रहायणीभार्य इति। प्रत्यवरोहणसेवनयोर्ल्युडन्तयोष्टित्वान्ङीपि। केचित्तु पुंद्भावप्रतिषेधार्थं प्रत्यवरोहिणीति

पठन्ति--प्रत्यवरोहिणीभार्य इति। `सुमङ्गलात्संज्ञायाम्' (इति) । `नित्यं संज्ञाच्छन्दसोः' (4.1.29) इति वर्त्तमाने `केवलमामक' (4.1.30) इत्यादिना ङीपि प्राप्ते। पक्षे वचनात् सोऽपि भवति। संज्ञायामिति किम् ? सुमङ्गला। सुन्दरादीनां प्राक् तरुणशब्दात् स्त्रीविषयत्वात् ङीष्यप्राप्ते। तरुणतलुनशब्दयोर्वयोलक्षणे ङीपि प्राप्ते। `नञ्स्नञीकक्तरुणतलुनानामुपसंख्यानम्' (वा.338) इत्यत्र तु वयोग्रहणम्। बृहन्महच्छब्दयोरुगित्वान्ङीपि प्राप्ते। `रोहिणी नक्षणे' इति। नक्षत्र इति किमर्थम् ? रोहिता। `रेवती नक्षत्रे' इति किम् ? येषां रेवतशब्दोऽत्राकारान्त इति दर्शनं तेषां प्रत्युदाहरणं टाप्--रेवतेति। येषां त्विदं वचनम्-- राविद्यतेऽस्या इति रेशब्दान्मतुप्, निपातनाद्वत्वमिति, तेषां प्रत्युदाहरणम् `उगितश्च' (4.1.6) इति ङीप्-- रेवतीति। स्वरे विशेषः। विकलादीनां टापि प्राप्ते। कटशब्दाच्छोण्यभिधाने ङीष्। कटी श्रोणिरित्यर्थः। श्रोणिरिति किम् ? कटा। `पिप्पल्यादयश्च' इति। एतावद्गणे पठ्यते। तांस्तु पिप्पस्यादीन् दर्शयितुं पिप्पली हरीतकीत्यादिकं वृत्तिकावचनम्।
`पृथिवी' इति। ईकारान्तनिपातनं पुंवद्भावनिवृत्त्यर्थम्-- पृथिवीभार्य इति। क्रोष्टुशब्दस्य `स्त्रियां च' (7.1.96) इतितृज्वद्भावः।
`मातरि षिच्च' इति। `पितृष्यमातुलमातामहपितामहाः' (4.2.36) इत्यत्र पितृमातृभ्यां पितरि वाच्ये डामहज्निपातयिष्यते। मातरि डामहजेव। तस्यापि षित्त्वम्। `दंष्ट्रा' इति। `{दन्श धा.पा.} दंश दशने' (धा.पा.989), `दाम्नीशस्' (3.2.182) इत्यादिनाष्ट्रन्। षिल्लक्षणस्यानित्यत्वान् ङीषष्टाब्भवति।।

42.जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनाऽयोविकारमैथुनेच्छाकेशवेशेषु। (4.1.42)
वर्त्तते यया सा वृत्तिरिति जीवनोपायो वृत्तिशब्देनेहोच्यते। जनपदे भावा वृत्तिर्जानपदी। `उत्सादिभ्योऽञ्' (4.1.86) इत्यञ्। `जनापद्यन्या' इति।`टिड्ढाणञ्' (4.1.15) इति ङीबेव भवति। `स्वरे विशेषः' इति। ङीषि सति प्रत्ययस्वरेणान्तोदात्तत्वं भवति। ङीपि तु सत्याद्युदात्तत्वम्; जानपदस्य ञित्स्वरेणाद्युदात्तत्वात्। `अमत्रम्' इति। भाजनम् = पात्रम्। `कुण्डाऽन्या' इति। क्रियाशब्दोऽयमित्याहुः।`कुडि दाहे' (धा.पा.270), `गुरोश्च हलः' (3.3.103) इत्यकारतप्रत्ययः,`अजाद्यतष्टाप्' (4.1.4) । यस्तु द्रव्यवचनः कुण्डशब्दः स नित्यं नुपंसक एव वर्त्तत इति प्रत्युदाहर्त्तुं न युक्त इति। `आवपनम्' इति। भाजनविशेष उच्यते, यत्र धान्यादि प्रक्षिप्य नीयते। `गोणाऽन्या' इति। सा पुनर्यस्या इदं यादृच्छिकं नाम। `अकृत्रिमा' इति। पुरुषव्यापारदिभिर्न निर्वृत्तेत्यर्थः। `स्थलाऽन्या' इति। या पौरुषेयी। `भाजी' इति। `भज विश्राणने' (धा.पा.1733) चुरादिणिच्। `ण्यासश्रन्थो युच्' (3.3.107) इति युच् प्राप्नोति। अस्मादेव निपातनादङ्, अङन्तान्ङीष्। `श्राणा' इति। `श्रा पाके' (धा.पा.810) इत्यस्मात् क्तः। `{संयोगादेरातो धातोर्यण्वतः'इति सूत्रम्'}संयोगादेर्धातोर्यण्वतः' (8.2.43) इतिनत्वम्, `अट्कुप्वाङ्नुम्व्यवायेऽपि' (8.4.2) इति णत्वम्। `नागशब्दः' इत्यादि। नागशब्दो द्विविधः-- जातिवचनः, गुणवचनश्च। ततर् स्थौल्यग्रहणादिह न जातिवचनो ङीषमुत्पादयति, न हि जातिवचनस्य स्थौल्यमभिधेयं सम्भवति; नापि गुणान्तरवचनः; न हि गुणान्तरशब्दान्नागवचनान्ङीषन्ताद्गुणान्तरं प्रतीयते, अपि तु स्थौल्यमेव। तस्माद्यदाऽसौ स्थौल्यं गुणमभिधाय द्रव्ये वर्त्तते तदा ङीषमुत्पादयति, नान्यथा। `अन्यत्र' इत्यादि। स्थौल्यादग्यत्र गुण एव दैर्घ्यादौ वर्त्तमानो नागशब्दो यदा द्रव्यं विशिनाष्टि तदा टापमुत्पादयति। `जातिवचनात्तु' इत्यादि। हस्तित्वादिजातिवचनात् `जातरेस्त्रीविषयात्' (4.1.63) इत्यादिना ङीष्भवति। `वर्णश्चेत्' इति। द्रव्ये वर्त्तमानो यदि वर्णस्तस्य प्रयृत्तिनिमित्तं भवतीत्यर्थः। `कालाऽन्या' इति। यस्या यादृटच्छिकसंज्ञा। `नीलाऽन्या' इति। आच्छादनं शाटिकादि। अनाच्छादने, न सर्वत्र। किं तर्हि ? `नीलादौषदधौ प्राणिनि च' इति। शब्दशक्तिस्वाभाव्यात्,तत्रैव नीलशब्दस्य वृत्तेः। अथ वा `मनोरौ वा' (4.1.38) इत्यतो वाग्रहणमिहानुवर्त्तते, सा च व्यवस्थितविभाषा , तेनानयोरेवार्थयोस्ततो भविष्यति, नान्यत्रेति। `संज्ञायामेव' इति। अनाच्छादन एवायं विकल्पः। एषोऽपि तत एव वाग्रहानुवृत्तेर्लभ्यते। `अयोविकारः' इति। विशिष्ट एव `फालः' इति यस्य नामधेयम्। `कुशाऽन्या' इति। तदाकृतिरेव काष्ठादिमयी। `कामुकाऽन्या' इति। सा पुनर्यस्या मैथुनादन्यद्वस्तु कामयितुं शीलम्। `मैथुनेच्छवती भण्यते' इति। मत्वर्थीयाकारान्तस्य मैथुनेच्छाशब्दस्योपादानात्। `केशवेशः'इति। एतदाख्ये विशिष्ट एव। `कवराऽन्या' इति। वर्णोऽस्या' अस्तीति मतुप्, तस्या लोपादभेदोपचाराद्वा द्रव्ये यो वर्त्तते स वेदितव्यः।।

43. शोणात्प्राचाम्। (4.1.43)
शोणशब्दोऽयं वर्णवचनः। `वर्णानां तणतिनितान्तानाम्' (फि.सू.2.33) इतिवचनादाद्युदात्तः। तत्र `अन्यतो ङीष्' (4.1.40) इति सिद्धे वचनं नियमार्थम्--प्रचामेद यथा स्यात्, अन्येषां मा भूदिति।।

44. वोतो गुणवचनात्। (4.1.44)
`गुणमुक्तवान् गुणवचनः' इति। भूते काले ल्युटो विधानात्। स पुनर्यः प्राग् गुणमभिधाय पश्चान्मतुब्लोपादभेदोपचाराद्वा तद्वद्द्रव्यमभिधत्ते स वेदितव्यः। `पट्वी, मृद्वी' इति। अत्र पटुत्वं मृदुत्वञ्च यताक्रमं गुणमभिधाय पटुमृदुशब्दौ तद्वति द्रव्ये वर्त्तेते इति गुणवचनौ भवतः।
`शुचिः' इति। शुचिशब्दः शुचित्वे गुणे वर्त्तित्वा द्रव्ये वर्त्तत इति गुणवचनः, न तूकारान्तः। `आखुः' इति। जातिवचनोऽयम्, न गणवचनः।
`गुणवचनान्ङीबाद्युदात्तार्थम्' इति। गुणवचनान्ङीब्विधेयः, न ङीष्। स्वरे विशेषः। किमर्थम् ? आद्युदात्तार्थम् । अन्तोदात्तेषु `उदात्तयणो हल्पूर्वात्' (6.1.174) इत्युदात्तत्वमीकारस्य विधीयत इति नास्ति विशेषो ङीब्ङीषोः। आद्युदात्तेषु तु ङीबनुदात्त एवावतिष्ठते, तस्मात् तदर्थं ङीब्विधेयः। ननु च ङीष् प्रकृतः, तत् कथं ङीप् शक्यते विधातुम् ? नैष दोषः; ङीबेव ह्यत्र मण्डूकप्लुतिन्यायेनानुवर्त्तते, न ङीष्; अस्वरितत्वात्। `वस्वी' इति। `वस निवासे'

(धा.पा.1942) `भृमृशीतृचरित्सरितनि{धनि-नास्ति-द.उ.} धनिमिमस्जिभ्य उः' (द.उ.1.92) इति वर्त्तमाने `धान्ये नित्' (द.उ.1.94) इति च शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिवन्धिमनिभ्यश्च' (द.उ.1.95) इत्युप्रत्ययः, निच्च, नित्त्वादाद्यदात्तत्वं भवति। गुणवचनश्चायं वसुशब्दः, वसुत्वे गुणे वर्त्तित्वा तद्वति द्रव्ये वर्त्तत इति कृत्वा। पटुशब्दोऽप्याद्युदात्तत्वान्ङीपं प्रोजयति। `अट पट गतौ' (धा.पा.296,297), हेतुमण्णिच्, `फलिपाटिनमिमनिजनां गुक् पटिनाकिधतश्च' (द.उ.1.103) इत्युप्रत्ययः, पाटेश्च पटिरादेशः, `धान्ये नित्' (द.उ.1.94) इत्यनुवृत्तेर्नत्वादाद्युदात्तत्वम्। मृदुशब्दश्च प्रत्ययस्वरेणान्तोदात्त इति, तत्र ङीपो ङीषो वा विशेषो नास्ति। `म्रद मर्दने' (धा.पा.767), `कुर्भ्रश्च' (द.उ.1.107) इत्यतः कुरित्यनुवर्त्तमाने `प्रथिम्रदिभ्रस्जां सम्प्रसारणं च' (द.उ.1.113) इति कुप्रत्ययः, सम्प्रसारणं च भवति।

`खरुसंयोगोपधप्रतिषेधः' इति। खरुशब्दात् संयोगोपधाश्च प्रतिषेधः। स तु वेत्यस्य व्यवस्थितविभाषाविज्ञानादेव लभ्यत इति वक्तव्यमिति। `उतः' इति तपरकरणं दीर्घनिवृत्त्यर्थम्, तेन पटुरित्यत्र न भवति। पटुमिच्छतीति `सुपः आत्मनः क्यच्' (3.1.8), `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः। पटू य इति स्थिते क्विप्, `अतो लोपः' (6.4.48) इत्यकारलोपः, `लोपो व्योर्वलि' (6.1.66) इति यकारस्य लोपः।

इह `उतः' इति विशेषणोपादनादेव शास्त्रीयगुणस्यापरिग्रहः सिद्धः म ह्येदेङ्गां मध्ये कश्चिदुकारान्तोऽस्ति। लोके तु क्वचिदुपसर्जनं गुण इत्यभिधीयते, यथा-- गुणभूता वयमिति, अप्रधानभूता इति गम्यते। यस्य गुणस्य हि भावात् तद्वति द्रव्यशब्दे निवेशस्तदभिधाने त्वतलावित्यत्र विशेषणमात्रं गुणशब्देनोच्यते, तथा हि, जातावपि भावप्रत्ययो भवति-- इह तु यादृशो गुण इष्यते तादृशं परिभाषितुमाह-- `सत्त्वे निवशतेऽपैति' इत्यादि। व्यवच्छेदफलकत्वात् सर्ववाक्यानां सत्तव एवेत्यवधारणं द्रष्टव्यम्। सत्त्वम् = द्रव्यम्, तत्रैव निविशिते, तदेवाश्रयतीत्यर्थः। अपैति = ततः सत्त्वादपगच्छथि, यथा-- आम्रफले श्यामता पूर्वमुपैति, रक्ततायामुपजातायां ततोऽपैति। `पृथग्जातिषु दृश्यते' (इति)। पृथक् = नाना जातयो येषां ते पृथग्जातयः, अतस्तेषु पृथग्जातिषु दृश्यते। न हि गोत्वमश्वादिषु व्यक्तिषु दृश्यते। गोव्यते। गोव्यक्तौ दृष्टः शङ्खादावपि शुक्लादिर्गुणौ दृश्यते। एतेन सर्वेण जातिर्गुणो न भवतीत्युक्तं भवति। न हि जातिर्द्रव्यमेवाश्रयति। यथा हि सत्ता द्रव्यगुणकर्मसु त्रिष्वपि वर्त्तते, द्रव्यत्वं द्रव्य एव, कर्मत्वं कर्मण्येव, गुणत्वं गुण एव, नापि द्रव्यवर्तिनी जातिः सत्त्वादपैति; जन्मनः प्रभृत्या विनाशात्तस्याधारद्रव्यापरित्यागात् न जातिः पथग्जातिषु दृश्यते। न हि गोत्वमश्वादिव्यक्तिषु दृश्यते, नाप्यश्वत्वं गवादिष्विति नास्ति जातेर्गुणत्वप्रसङ्गः। कर्मणस्तु स्यात्; तदपि हि सत्त्व एव निवशिते यदा सक्रियं द्रव्यं भवति, अपैति च ततो यदा तु निष्क्रियं भवति। `पृथग्जातिषु दृश्यते' इति। घटपटादिषु दृश्यते। अतः रक्तता गुणः, स ह्यग्निसन्नियोगेन निष्पाद्यते। `अक्रियाजश्च' इति। क्रिया = व्यापारः, ततो जातः क्रियाजः, न क्रियाजोऽक्रियाजः = नित्यः, यथा-- आकाशादिषु महत्त्वादिर्गुणः। तदेवं गुणस्योत्पाद्यत्वानुत्पाद्यत्वप्रकारद्वयदर्शनेन कर्मणो गुणत्वनिवृत्तिः कृता भवति। तद्ध्युत्पाद्यमेव, नानुत्पाद्यम्। एवमपि द्रव्यस्य गुणत्वं प्राप्नोति,तस्यापि ह्येते धर्मा विद्यन्ते।तथा हि-- तदपि यदि द्रव्य एवारम्भकेऽवयवभूते निविशते, अपैति च ततः, यथा-- शरीरमवयवीति। तद्धि हस्तपादादिष्ववयवेषु समवैति; तद्विनाशे च विनाशात् ततोऽपैति। पृथग्जातिषु दृश्यते, हस्त्यादिषु दृश्यते। द्रव्यस्यापि पूर्वोक्तं प्रकारद्वयमस्त्येव। अवयविद्रव्यस्योत्पाद्यत्वादाकाशादेस्तद्वदनुत्पाद्यत्वात् ? इत्यत आह-- `सोऽसत्त्वप्रकृतिर्गुणः'इति। प्रकृतिः = स्वभावः। सत्त्वं द्रव्यं प्रकृतिर्यस्य स सत्त्वप्रकृतिः, न सत्त्वप्रकृतिरसत्त्वप्रकृतिः। यथोक्तैर्धर्मैर्युक्तो यो द्रव्यस्वभावो न भवति स गुणः। द्रव्यम् = द्रव्यस्वभावम्, अतो गुणो न भवति।।

45. बह्वादिभ्यश्च। (4.1.45)

बह्वादिषु `शक्तिः शस्त्रे' इति पठ्यते, तस्यायमर्थः-- शस्त्रेऽभिधेये शक्तिशब्दाद्वा ङीष् भवति-- शक्तिः, शक्ती। शस्त्र इति किम् ? शक्तिः,सामर्थ्यम्। अन्ये तु शक्तिशस्त्री इति शब्दद्वयं पठन्ति-- शक्तिः,शक्ती, शस्त्रिः, शस्त्री। `इतः प्राण्यङ्गात्' इति। इकारान्तात् प्राण्यङ्गवाचिनो वा ङीष् भवति-- धमनिः, धमनी। इत इति किम् ? समर्था ग्रीवा। प्राण्यङ्गादिति किम् ? श्रेणिः। `कृदिकारादक्तिनः' (इति)। `सर्वतोऽक्तिन्नर्थादित्येके' (इति)। अस्यार्थः `रात्रेश्चाजसौ' (4.1.31) इत्यत्रैव व्याख्यातः। यदि सर्वतोऽक्तिन्नर्थात् ङीष् भवति, शकट्यादीनां गणेकिमर्थं इकारान्तानां पाठः ? तस्यैव प्रपञ्चार्थः। पद्धतिश्बद्सयाक्तिन्नर्थादिति प्रतिषेधे प्राप्ते पाठः। पादस्य हतिः पद्धतिः, `हिमकाषिहतिषु च' (6.3.54) इति पद्भावः। `चन्द्रभागान्नद्याम्' इति। चन्द्रभागशब्दान्नद्यामभिधेयायां वा ङीष् भवति-- चन्द्रभागी नदी। नद्यामिति किम् ? चन्द्रभागा नाम देवता। `अहन्' इति। अयं शब्दः केवलः स्त्रियां न वर्त्तते। तस्मात् समासे तदन्त उदाहार्यः। दीर्घाण्यहानि यस्यां शरदि सा दीर्घाह्नो। ङीप्रतिषेधावप्यस्माद्भवतः। `अनोः बहुव्रीहेः' (4.1.12) `डाबुभाभ्यामन्यतरस्याम्' (4.1.13) इत्यपि डाब्भवति; `अन उपधालोपिनोऽन्यतरस्याम्' (4.1.28) इति वा ङीप् च। तेन धातुरूप्यं भवति। यदि बहुशब्दो गुणवचनः,तत्किमर्थमस्येह ग्रहणम्,यावता पुर्वेणैव सिद्धो ङीष् ? इत्यत आह-- `तस्य' इत्यादि।।

46. नित्यं छन्दसि। (4.1.46)

अथ नित्यग्रहणं किमर्थम्, यावता पूर्वेणैव सिद्धे विकल्पे सत्यारम्भसामर्थ्यादेव नित्यं भविष्यति ? इत्यत आह-- `नित्यग्रहणमुत्तरार्थम्' इति।।

47. भुवश्च। (4.1.47)

`प्रभ्वी' इत्यादि। `भुवः संज्ञान्तरयोः' (3.2.179) इत्यतः `भुवः' इत्यनुवर्त्तमाने `विप्रंशभ्यो ड्वसंज्ञायाम्' (3.2.180) इतिप्रत्ययः, तदन्तान्ङीष्।

`स्वयम्भूः' इति। भवतेः क्विबन्तस्य रूपम्। ननु च `भुवः' इति भूशब्दाद्दीर्घादियं पञ्चमी, , ततश्च दीर्घादेव प्रत्ययेन भवितव्यम्, न ह्रस्वादित्यत आह-- `ह्रस्वादेवेयं पञ्चमी ' इति। तर्हि `भुवः'इति निर्देशो नोपपद्यते, `घेर्ङिति' (7.3.111) इति गुणे कृते `भोः' इति निर्देशेन भवितव्यम् ? इत्यत आह-- `सौत्रो निर्देशः'इति। छन्दसि वर्णव्यत्यय उक्तः। तेन तस्य गुणेऽकृत उवङादेशः कृत इति दर्शयति।।

48. पुंयोगादाख्याम्। (4.1.48)

`पुंयोगात्' इति। `विभाषा गुणेऽस्त्रियाम्' (2.3.25) इति हेतौ पञ्चमी। योगः = सम्बन्धः। `आख्यायाम्' इति। पञ्चम्यर्थ एषा `व्यत्ययो बहुलम्' (3.1.85) इति सप्तमी। आख्यायतेऽनया प्रातिपदिककार्थ इति श्रुत्याऽऽख्या। `पुंस आख्यायाम्' इति। पुंसो वाचकभूतमित्यर्थः। तद्धि पुंयोगाद्धेतोः सम्प्रति स्त्रियां वर्त्तते; न पुंसि। अतीत ए काले पुंसो वाचकमासीत्, अतो भूतग्रहणम्। एतदुक्तं भवति-- यत् प्रातिपदिकं प्राक् पुंसो वाचकमभूत्, पश्चात्तु पंयोगाद्धेतोः स्त्रियां वर्त्तते तस्मान् ङीष्भवतीति। कथं पुनर्योगे गुणभावमापन्नस्य पुंस आख्याग्रहणं विशेषणं युज्यते, स्त्रियामित्यनुवृत्तेः स्त्रिया एव ? नैतदस्ति; यो हि पुंयोगात् स्त्रियां वर्त्तते सोऽवश्यं स्त्रियमचष्ट इति विसेषणमिदमदनर्थमकमेव स्यात्। पुंयोगस्य तर्हीदं विशेषणम् ? न; असम्भवात्। न सम्भवत्येव हि तत् प्रातिपदिकं यत् पुंयोगाद्धेतोः पूर्वं स्त्रियां वर्त्तते, पुंयोगस्य चाख्याभूतं भवति। गणकादयो हि ये शब्दाः पुंयोगात् स्त्रियां वर्त्तन्ते ते सर्वे एव वाचकाः प्रागभूवन्, न पुंयोगस्य। ये तु पुंयोगादयः शब्दाः पुंयोगस्य वाचकाः, ते पुंयोगात् स्त्रियां न वर्त्तन्त एव। न चेह कश्चित् तथाविधोऽन्य प्रकृतः, नापि श्रूयते, यस्याख्याग्रहणेन सम्बन्धः स्यात्। तस्मादगुणभूतस्यापि पुंस एवानेन सम्बन्धो विज्ञायते। `गणकी' इत्यादि। गणयतीति गणक,ण्वुल्। प्रतिष्ठित इति प्रष्ठः, `आतस्चोपसर्गे' (6.1.136) इति कः। `प्रष्ठोऽग्रगामिनि' (8.3.92) इति निपातनान्मूर्धन्यः। सर्व एते पुंसो वाचकाः। पुंयोगात्तु यदोत्तरकालं स्त्रियां वर्त्तन्ते तदैतेभ्यो ङीष्। `पुंसि शब्दप्रवृत्तिनिमितस्य सम्भवात्' इति। गणनादिक्रियास्वभावं यद्गणकादिशब्दानां प्रवृत्तिनिमित्तं तस्य पुंसि सम्भवः, न स्त्रियाम्, नापि नपंसके। तस्मात् पुंसि शब्दे एते। पुंसो वाचका एते शब्दा इत्यर्थः। कथं तर्हि स्त्रियां वर्त्तन्ते ? इत्याह-- `तद्योगात्' इत्यादि। तद्योगः = तस्यायमिति सम्बन्धः, स्वस्वामिभावलक्षणः। तस्मादेते पुंशब्दा अपि स्वभावतः स्त्रियां वर्त्तन्ते। यथैव तद्योगात् स्त्रियां स्नानोद्वर्त्तनपरिषेकादीन् लभते तथा ताच्छब्द्यमपि।

`देवदत्ता' इति। अत्र देवदत्तशब्दसंज्ञकेन पुरुषेण योगाद्देवदत्तशब्दः स्त्रियां न वर्त्तते। किं तर्हि ? स्वत एव, तस्या हीयं संज्ञा कृता। `परिसृष्टा, प्रजाता' इति। प्रसूतेत्यर्थः। निर्लुठितगर्भेति यावत्। परिसृष्टप्रजातशब्दौ स्त्रियां वर्त्तमानो प्रसवनिमित्तमुपादाय प्रवर्त्तेते। परिसर्गः, प्रजनः, प्रसव इत्येकार्था एते शब्दाः। तस्य च प्रसवस्य पुंयोगो निमित्तम्, तेन विना तदभावात्। तस्मात् पुंयोगाद्धेतोः स्त्रियां वर्त्तत इति। वर्त्तत इति। न तु पुंशब्दाख्य इति ईकारो न भवतीति। `एते शब्दाः' इति। बहुवचनं येऽन्येऽप्येवंजातीयाः शब्दास्तानपेक्ष्य वेदितव्यम्; अन्यथा हि परिसृष्टप्रजातशब्दयोर्द्वित्वदेतौ शब्दाविति वक्तव्यं स्यात्।

`गोपालिकादीनां प्रतिषेधो वक्तव्यः' इति। सिद्ध्ये इति वाक्यशेषः। गोपालिकादीनां शब्दानां सिद्धये ङीब्प्रतिषेधः। स तु `वोतो गुणवचनात' (4.1.44) इत्यतो वेत्यनुवृत्तेस्तस्य व्यवस्थितविभाषात्वमाश्रित्य प्रतिपाद्यः।

`सूर्याद्देवतायां चाव्वक्तव्यः'इति। ननु च ङीष एव प्रतिषेधो वक्तव्यः, ङीषि प्रतिषिद्धे टाब्भविष्यति, टापि च सूर्येति सिध्यत्येव ? नैतदेवम्; यद्यपि हि रूपं सिद्ध्यति, स्वरतु न सिध्यति, यस्मात् सूर्यशब्दोऽयमाद्युदात्तः। तथा हि `राजसूयसूर्यः' (3.1.114) इत्यत्र क्यबन्तो निपातितः, ततः क्यपः पित्त्वादनुदात्तत्वम्। धातोस्तु सुवतेः सर्त्तेर्वा धातुस्वरेणान्तोदात्तत्वम्। तत्र टापि सत्यनुदात्तत्वं स्यात्, तु सत्यन्तोदात्तता भवति। पित्करणं तु `ङ्याप्प्रातिपदिकात्' (4.1.1) इत्यत्र सामान्यग्रहणार्थम्। `सूरी'इति। सूर्यस्य स्त्री मानुषी सूरी, ङीषेव भवति, `सूर्यतिष्यागस्त्यमस्त्यानाम्' (6.4.149) इति यलोपः।।

49. इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयनमातुलाचार्याणामानुक्। (4.1.49)

`येषाम्' इति। इन्द्राणीनाम्। `अन्येषां तु' इति। हिमादीनाम्। अथ किमर्थमानुक् क्रियते, अनुगेव नोच्येत, तेन सवर्णदीर्घत्वेन सिध्यति ? न सिध्यति; `अतो गुणे' (6.1.97) इति पररूपत्वं हि प्राप्नोति। अकारोच्चारणसामर्थ्यान्न भविष्यति, पररूपे हि नुगेव वक्तव्यः स्यात्। एवं तर्ह्यकारोच्चारणसमर्थ्याद्भविष्यति। ल्वरसन्धिरेव न भवतीत्येवमपि विज्ञायते। तस्मान्मैवं विज्ञायीत्यानुगेव वक्तव्यः। अथ वा-- इन्द्रमाचष्ट इति `तत्करोति तदाचष्टे' (वा.200,201) इति णिचि `णाविष्टवत् प्रातिपदिकस्य' (वा.813) इति टिलोपः, इन्द्रयतेः क्विप्, णिलोपः, इन्द्रः स्त्रीन्द्राणीत्यत्र दीर्घघस्याकारस्य श्रवणं यथा स्यादित्येवमर्थमानुको विधानम्। आनुकि हि सति दीर्घो न श्रूयेत। ननु च नैवात्र ङीषा भवितव्यम्, अत इत्यधिकारात् ? दीर्घोच्चारणसामर्थ्याद्भविष्यति।

`हिमारण्ययोर्महत्त्वे' इति। महत्त्वेन युक्ता हिमादयः स्त्रीलिङ्गेनाभिसम्बध्य्नते यदा, तदा स्त्रीत्वविवक्षायामनयोः प्रत्ययागमयोर्विधानमित्येतदनेनाख्यायते, न तु स्त्रीप्रत्ययस्यायमपवाद उच्यते। स्त्रीत्व एव हि प्रत्ययो भवति।

`यथाद्दोषे'इति। यवाद्दोषे गम्यमाने स्त्रियां ङीष् भवति-- दुष्टो यवो यवानी।

`यवनाल्लिप्याम्' इति। `यवनानां लिपिः' इति। `तस्येदम्' (4.3.120) इत्यप्रसङ्गे ङीष् विधीयते, स तु तदर्थस्य ङीषैव द्योतितत्वान्न भवति।

`आचार्यदणत्वञ्च' इति। नेदमपूर्वं वक्तव्यम्, क्षुभ्नादिष्वस्य पाठात्।

`स्वार्थ एवायं विधिः' इति। एवकारेण पुंयोगो व्यवच्छिद्यते। यदि हि पुंयोगे विधिरयं स्यात् शूद्राऽपि क्षत्रियस्य भार्या क्षत्रियाणीति स्यात्। तस्मात् स्वार्थे एवायं विधिः-- क्षत्रियैव क्षत्रियाणीति। `पुंयोगे तु ङीषैव भवितव्यम्' इति। पूर्वसूत्रेण।
`लिच्च'इति। कस्य तल्लित्वम् ? आनुकः। तथा हि-- मुद्गलानीशब्दस् द्वितीय उदात्त आम्याये पठ्यते। ङीषस्तु लित्वे तृतीय उदात्तः स्यात्।।

50. क्रीतात्करणपूर्वात्। (4.1.50)
करणं पूर्वं यस्मिन्नित्यादिना करणपूर्वग्रहणं क्रीतग्रहणञ्च उभयमप्येतत्प्रातिपदिकस्य विशेषणमिति दर्शयति। पूर्वशब्दोऽयमवयववचनः। करणमवयवो यस्मिन्नित्यर्थः। अथ क्रीतशब्दस्यैव करणपूर्वग्रहणं विशेषणं कस्मान्न विज्ञायते ? अशक्यत्वात् । क्रीतशब्दो ह्यवयववाचिनं वा पूर्वशब्दं गृहीत्वा विशेष्येत-- करणं पूर्वस्मिन्निति ? व्यवस्थाशब्दं वा-- करणं पूर्वमस्मादिति ? तत्र प्रथमः पक्षो न सम्भवति; न ह्यत्र क्रीतशब्दस्य करणवाचिशब्दान्तरमवयव उपपद्यते, द्वितीयस्तु सम्भवति, किन्तु वाक्येऽपि स्यात्-- अश्वेन क्रीतेति, अस्ति ह्यत्र क्रीतशब्दात् करणं पूर्वम्। प्रातिपदिके तु विशेष्यमाणे न भवत्येष दोषः। न ह्यश्वेन क्रीतेत्येतत् करणावयवं क्रीतशब्दान्तं प्रातिपदिकम्। किं तर्हि ? वाक्यम्। तस्मात् प्रकृतं प्रातिपदिकं सामान्यमेवावयववाचिना पूर्वशब्देन विशेष्यते। क्रीतशब्देनापि तदेव करणपूर्वं प्रातिपदिकम्। तेन तस्मिन् विशेष्यमाणे सामर्थ्यात् तदन्तविधिः प्रसज्येतेत्याह-- `क्रीतशब्दात् प्रातिपदिकात्' इति।
`वस्त्रक्रीती, वसनक्रीती' इति।
अत्र `गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः' (व्या.प.वृ.138) इति वस्त्रवसनयोः करणयोः क्रीतशब्देन `कर्त्तकरणे कृता बहुलम्' (2.1.32) इति प्रागेव सुबुत्पत्तेः समासः।
`सुक्रीता, दुष्क्रीता' इति। गत्युपपदत्वात् प्रागेव सुबुत्पत्तेः `कुगतिप्रादयःर' (2.2.18) इति समासः। दुष्क्रीतेत्यत्र `इदुदुपधस्य चाप्रत्यय' (8.3.41) इति षत्वम्।
`टाबन्तेन समासः' इति। सुबन्तयोरेवेति वेदितव्यम्। टापि विहिते कृदन्तताया विहितत्वात्। अत्र किं टाप् क्रियताम् ? उत विभक्तिरिति ? अन्तरङ्गत्वाट्टाप्। पश्चाद्बहिरङ्गा विभक्तिरिति विभक्त्यन्तयोः समासः। अन्तरङ्गत्वं बहिरङ्गत्वं तु टाब्विभक्त्योः `ङ्याप्प्रातिपदिकात्' (4.1.1) इत्यत्र प्रतिपादितम्। कृते तर्हि टापि ङीष् कस्मान्न भवतीत्याह-- `अत इति च' इत्यादि। कथं पुनः टाबन्तेन समासः सिध्यति, यावता `गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' (व्या.प.वृ.138) इति प्रागेव कृदन्ततायां समासेन भवितव्यमित्यत आह-- `गतिकारकोपपदानाम्' इत्यादि. कथं पुनर्बहुलं तदुच्यते ? इत्याह-- `कर्त्तृकरणे' इत्यादि। `कर्त्तृकरणे कृता बहुलम्' (2.1.32) इत्यनेन हि गतिकारकोपपदानां कृद्भिः समासो विधीयते। स च बहुलग्रहणात् क्वचित् कृदन्तावस्थायां प्रागेव सुबुत्पत्तेः, क्वचिदन्यथा। तेन `गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः (व्या.प.वृ.138) इति बहुलं तदाचार्यैरुच्यते। ततश्च टाबन्तेनापि क्वचित्समासो लभ्यत इत्यभिप्रायः।।

51. क्तादल्पाख्यायाम्। (4.1.51)
`अभ्रविलिप्ती' इति। `लिप उपदेहे' (धा.पा.1433), अस्मात् क्तः। अल्पैरभ्रैर्विलिप्तेत्यस्यामर्थविवक्षायां पूर्ववत्प्राक्सुबुत्पत्तेः समासः। अल्पशब्दस्तु गतार्थत्वान्न प्रयुज्यते। `चन्दनानुलिप्ता' इति। बहुचन्दनानुलिप्तेत्यर्थः।।

52. बहुव्रीहेश्चान्तोदात्तात्। (4.1.52)
`शङ्खभिन्नी' इति। `रदाभ्याम्' (8.2.42) इति नत्वम्। निष्ठान्तस्य `निष्ठा' (2.2.36) इति पूर्वनिपाते प्राप्ते `जातिकालसुखादिभ्यः परवचनम्' (वा.116) इति स न भवति। शङ्खादिशब्दा हि जातिवचनाः। अत एव हि `जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः' (6.2.170) इत्यन्तोदात्तत्वं भवति। `गलकोत्कृती' इति। `कृती छेदने' (धा.पा.1435) इत्यस्मात् क्तः। `केशलूनी' इति। केशान् लुनातीति। `ल्वादिभ्यः' (8.2.44) इति नत्वं चोदयति।
`पादपतिता' इति। `कर्त्तृकरणे कृता बहुलम्' (2.1.32) इति तत्पुरुषसमासेऽन्तोदात्तत्वम्।
`अन्तोदात्ताज्जातप्रतिषेधः' इति। अन्तोदात्ताद्बहुव्रीहेर्ङीषो विधाने जातशब्दान्तात् प्रतिषेधः, स चान्तग्रहणादेव लभ्यत इति न वक्तव्यम्। इहान्तग्रहणं न कर्त्तव्यमेव, विनाऽपि तेन यथा `वर्णादनुदात्तात्' (4.1.39) इत्यत्रानुदात्तान्तादिति विज्ञायते, तथेहाप्यन्तोदात्तन्तादिति विज्ञास्यते ? तदेवमर्थं क्रियते--- अन्तोदात्त एव यो नित्यं बहुव्रीहिस्ततो यथा स्यात्, विकल्पेन योऽन्तोदात्तस्ततो मा भूदिति। इह च दन्ताजाता, स्तनजातेत्यत्र `वा जाते' (6.2.171) इति विकल्पेनान्तोत्तत्वम्, अतोऽयं विधिर्न भविष्यति। अथ वा-- उत्तरसूत्रे वाग्रहणमुभयोरपि योगयोः शेषः, व्यवस्थितविभाषा च, तेन जातशब्दान्तान्न भविष्यति। अस्मिंस्तु व्याख्यानेऽन्तग्रहणं विस्पष्टार्थमेवेति वेदितव्यम्।
`पाणिगृहीत्यादीनामर्थविशेषे'इति। `सिद्धये' इति शेषः। पाणिगृहीतीत्यादीनां सिद्ध्यर्थं विशेष एव ङीब्भवति, न सर्वत्र। एतदपि व्यवस्थितविभाषया लभ्यते। विशेषस्तु पाणिग्रहणस्य वेदितव्यः। आग्निसाक्षिपूर्वकं भार्यार्थं यस्या पाणिग्रहणं क्रियते सा पाणिगृहीतीति भवति। `यथाकथञ्चित्' इति। यथोक्तात् प्रकारादन्येन केनापि प्रकारेणेत्यर्थः।
`अबहुनञ्' इत्यादि। बह्वादिपूर्वान्ङीष् न भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु तस्यैव वाग्रहणस्य व्यवस्थितविभाषात्वमाश्रित्य कर्त्तव्यम्।

`जातिकालसुखादि' इत्यादि। `बहुकृते' इत्यत्र `बहोर्नञ्वदुत्तरपदभूम्नि' (6.2.175) इत्यन्तोदात्तत्वम्। `अकृता, सकृता' इत्यत्र `नञ्सुभ्याम्' (6.2.1732) इति। `मासजातः' इत्यादिषु `जातिकालसुखादिभ्योऽनाच्छादनात् क्तः' (6.2.170) इति।।

53. अस्वाङ्गपूर्वपदाद्वा। (4.1.53)

`अस्वाङ्गपूर्वपदात्' इति। न स्वाङ्गम् = अस्वाङ्गम्, तत् पूर्वपदं यस्य बहुव्रीहेः स तथोक्त-। `सारङ्गजग्धी' इति। `अद भक्षणे' (धा.पा.1011), `अदो जग्धिः' (2.4.36) इत्यादिना जग्ध्यादेशः, `झषस्तथोर्धोऽधः' (8.2.40) इति तकारस्य घत्वम्, `झरो झरि' (8.4.65) इति घलोपः। `पलाण्डभक्षिती' इति। `भक्ष अदने' (धा.पा.1557), चुरादिणिच्। `सुरापीति' इति। घुमास्थादि (6.4.66) सूत्रेणेत्वम्। सर्वत्र `जातिकालसुखादिभ्यः' (6.2.170) इत्यादिनोत्तरपदान्तोदात्तत्वम्।

`वस्त्रच्छन्ना, वसनच्छन्ना' इति। `छद अपवारणे' (धा.पा.1833) इत्यस्य चुरादिण्यन्तस्य क्तप्रत्यये `वा वान्तशान्तपूर्ण'(7.2.27) इत्यादिना च्छन्नशब्दो निपातितः। `अनाच्छादनात्' (6.2.170) इत्युत्तरपदान्तोदात्तत्वप्रतिषेधे `बहुव्रीहौ प्रकृत्या पूर्वपदम्' (6.2.1) इति प्रकृतिस्वरे कृते `अनुदात्तं पदमेकवर्जम्' (6.1.158) इति शेषस्यानुदात्तत्वादिहान्तोदात्तत्वं नास्ति। पूर्वपदे एवात्राद्युदात्ते--एकं नित्स्वरेण, अपरं लित्स्वरेण। `थस आच्छादने' (धा.पा.1023), ष्ट्रन्प्रत्ययः--वस्त्रम्। धातोर्वसनम्--ल्युट्।

`बहुलम्' इत्यादिना संज्ञायां छन्दसि बहुलं ङीष्भवतीत्येदर्थरूपं व्याख्येयमित्यर्थः। तत्र वाग्रहणस्य व्यवस्थितविभाषात्वादेव बहुलं संज्ञाच्छन्दसोर्भविष्यति। नन्व सूत्रेणैवानेनावस्य बहुव्रीहित्वाद्भविष्यति ङीष्, किमर्थं तर्हीदम् ? इत्याह-- `प्रवृद्धा च'इत्यादि। विग्रहविशेषेण तत्पुरुषं दर्शयति।

54. स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्। (4.1.54)

`चन्द्रमुखी' इति। चन्द्र इव मुखमस्या इति बहुव्रीहिः। अत्र च `प्रथमानिर्दिष्टम्' (1.2.43) इत्यादिना मुखशब्दस्योपसर्जनसंज्ञा। `अतिकेशी' इति। `कुगतिप्रादयः' (2.2.18) इति समासः। `एक विभक्ति च' (1.2.44) इति केशब्दस्योपसर्जनत्वम्।

`अङ्ग' इति। अङ्गादिभ्य उपसर्जनेभ्यो ङीष् भवतीत्येदर्थरूपं व्याख्येयमित्यर्थः। किमर्थम् ? संयोगोपधत्वान्ङीष् न प्राप्नोति, तदर्थमेतदर्थरूपं व्याख्येयम्। तदिदं व्याख्यानम्-- उत्तरसूत्रे चकारोऽनुक्तसमुच्चयार्थः, तेनाङ्गादिभ्यः संयोगोपधेभ्यो ङीब्भवतीति।

`अद्रवम्' इति। मुखनासिकाभ्यां योऽभिनिष्क्रामति वायुः स प्राणः, प्राणोऽस्यास्तीति, प्राणी, तत्र यत्तिष्ठति तत्प्राणिस्थम्; मुखादि स्वाङ्गमुच्यते। यद्येवम्, कफोऽपि स्वाङ्गं स्यात्, ततश्च बहुकफेत्यत्र ङीष् प्रसज्येत ? इत्यत आह-- `अद्रवम्' इति। विशेषणोपादानान्न भवत्ययं प्रसङ्गः, कफस्य द्रवात्मकत्वात्। एवमपि ज्ञानं स्वाङ्गं भवेत्, प्राणिस्थत्वाददव्रत्वाच्च, ततश्च बहुज्ञानेत्यत्रापि ङीष् स्यात् ? इत्यत आह-- `मूर्तिमत्' इति। असर्वगतानि यानि द्रव्याणि तेषां परिमाणं ह्रस्वादिमद्यत् तन्मूर्त्तिः, सा यस्यास्ति तन्मूर्तिमत्। न च तद्ज्ञानेऽस्तीति;निर्गुणत्वात्। गुणानां च ज्ञानस्यात्मगुणत्वान्नास्य स्वाङ्गत्वप्रसङ्गः। येषामपि काठिन्यादिस्पर्शविशेषो मूर्त्तिः, तन्मतेनापि नैव ज्ञां मूर्तिमद्भवति, न हि ज्ञानस्य स्पर्शोऽस्ति। एवमपि शोफस्य श्वयथुसंज्ञकस्य स्वाङ्गत्वं प्राप्नोत्येव; यथोक्तविशेषणविशिष्टत्वात्। ततश्च बहुशोफेत्यत्र ङीष् प्रसज्येतेत्यत आह-- `अविकारजम्' इति। विकारः = धातुवैषम्यम्, भूतप्रक्षोम इत्यर्थः, ततो जातं विकारजम्। न विकारजम् = अविकारजम्। तदेवं विशेषमोपादानसामर्थ्यात्। शोफस्यापि स्वाङ्गत्वं न प्राप्नोति। यदि प्राणिस्थं स्वाङ्गं भवति, एवं तर्हि रथ्यादिपतितानां केशानां स्वाङ्गत्वं न स्यात्, ततश्च दीर्घकेशी रथ्येति न सिध्यतीत्यत आह-- `अतत्स्थम्' इत्यादि। तस्मिन् प्राणिनि तिष्ठतीति तत्स्थम्, न तत्स्थम् अतत्स्थम् = अणिस्थम्। एवमपि केशादि स्वाङ्गं भवति यदि तत्प्राणिनि पूर्वं दृष्टं भवति। प्रतिमावयवानां तर्हि मुखादीनां स्वाङ्गता न स्यात्, अप्राणिस्थत्वात्, ततश्च दीर्घमुखी प्रतिमेति ङीष् न स्यात्? इत्यत आह-- `तस्य चेत्तथा' इति। तस्य प्राणिनस्तत् स्वाङ्गं यथा युतं येन प्रकारेण संस्थानविशेषेण सम्बद्धं तथा तेन प्रकारेणाप्राणिनोऽपि यदि सम्बद्धं भवत्येवमपि तस्य स्वाङ्गत्वं भवति। अथ वा-- तस्य चेदं प्राणिनस्तत् स्वाङ्गं तथा यदि युतं सम्भवति यथा प्राणिनः, एवमपि स्वाङ्गं भवति।

अन्येषां पाठः- `तेन चेतत्तथा युतम्' इति। तेन प्राणिना येन प्रकारेण संस्थानविशेषादिना सम्बद्धं तथा यद्यप्राणिनापि सम्बद्धं भवति, एवमपि स्वाङ्गं भवति। अथ वा--तेनाप्राणिना तन्मुखादि यदि तथा युतम् = सम्बद्धं भवति यथा प्राणिना, एवमपि स्वाङ्गं भवति। अथ वा तेन चेन्मुरवादीनां स्वाङ्गेन तदप्राणिस्थं द्रव्यं तथा यदि युतं भवति यथा प्राणिद्रव्यम्, एवमपि स्वाङ्गं भवतीति। सर्वथाययमर्थः-- यादृशं प्राणिनो मुखादि स्वाङ्गं तादृशमेव यद्यप्राणिनोऽपि भवति स्वाङ्गमेवमेव भवतीति।।

55. नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च। (4.1.55)

`बह्वज्लक्षणे' इत्यादि। नासिकोदरयोः। `न क्रोडादिबह्वचः' (4.1.56) इति बह्वज्लक्षणे प्रतिषेधे प्राप्ते वचनम्। शेषाणाम् `असंयोगोपधात्' (4.1.54) इति संयोगोपलक्षणे। `सहनञ्विद्यमानपूर्वलक्षणनस्तु प्रतिषेधो भवत्येव' इति। नासिकोदरयोस्तावदयं योगः `पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते, नोत्तरान्' (व्या.प.9) इत्यनन्तरमेव बह्वज्लक्षणं प्रतिषेधं बाधते, न सहादिलक्षणम्। ओष्ठादिष्वपि `मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते' (व्या.प.10) इति पूर्वमेव संयोगोपधलक्षणम्, तेनासौ भवत्येवम-- सहनासिका, अनासिका, विद्यमाननासिकेति। `बिम्बोष्ठी' इति। बिम्बमिवोष्ठौ यस्याः सा बिम्बोष्ठी--

`ओत्वष्ठयोः समासे वा पररूपं वक्तव्यम्' (वा.687) इत्यौपसंख्यानिकं पररूपत्वम्। ये तु बिम्बौष्टीत्यौकारं पठन्ति ते `वृद्धिरेचि' (6.1.88) इति वृद्धिं कुर्वन्ति।

`पुच्छाच्चेति वक्तव्यम्' इति। पुच्छान्ताच्च प्रातिपदिकान्ङीष् भवतीत्येदर्थरूपं व्याख्येमित्यर्थः। किमर्थम् ? संयोगोपधादपि पुच्छान्ताद्यथा स्यात्। व्याख्यानं तु चकारस्यानुक्तसमुच्चयार्थत्वमाश्रित्य कर्त्तव्यम्। `कल्याणपुच्छी' इति। कल्याणं पुच्छमस्याः।

`कबर' इत्यादि। कबरादिभ्यो यः पुच्छशब्दस्तदन्तान्ङीष् भवतीति। एषोऽपि तत एव चकाराद्वाग्रहणस्य वा व्यवस्थितविभाषात्वल्लभ्यते। कबरं पुच्छे यस्याः सा कबरपुच्छी। एवं `मणिपुच्छी, विषपुच्छी, शरपुच्छी' इति। `सप्तमीविशेषणे बहुव्रीहौ' (2.2.35) इति पुच्छस्य पूर्वनिपातो न भवति; `सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनम्' (वा. 115) इति वचनात्।

`उपमानात् पक्षात् पुच्छाच्च' इति। नित्यमिति सम्बध्यते। एतदपि पूर्वोक्तात् कारणद्वयाल्लभ्यते। `पुच्छाच्चेति वक्तव्यम्' (वा.364) इत्यनेनैव सिद्धे पुनरिह पुच्छग्रहणं प्रपञ्चार्थम्,नित्यार्थं वा। उलूकस्येव पुच्छं यस्याः सा `उलूकपुच्छी' ।।

56. न क्रोडादिबह्वचः। (4.1.56)

`कल्याणक्रीडा' इति। क्रोडाशब्दः स्त्रीलिङ्गः। `क्रोडाघाटाजिह्वाशिरोधरासङ्गकुलास्पृहामाया' इति लिङ्गकारिकायां पाठात्। कल्याणी क्रोडाऽस्या इति विग्रहः। `स्त्रियाः पुंवत्' (6.3.34) इति पुंवद्भावः। उत्तरपदस्य `गोस्त्रियोः' (1.2.48) इत्यादिना ह्रस्वः। ततः `स्वाङ्गाच्चोपसर्जनात्' (4.1.54) इत्यादिना प्राप्तस्य ङीपोऽनेन प्रतिषेधः ततष्टाप्। `महाललाटा'इति। `आमन्महत्' (6.346) इत्यादिनात्वम्।।

57. सहनञ्विद्यमानपूर्वाच्च। (4.1.57)

`सकेशा' इति। सह केशैर्वर्तत इति। `तेन सहेति तुल्योगे' (2.2.28) इति समासः। `वोपसर्जनस्य' (6.3.82) इति सहस्य सभावः। `अकेशा'इति। अविद्यमानाः केशा अस्येति, `नञोऽस्त्यर्थानां बहुव्रीहिरुत्तरपदलोपश्च' (वा.102) इति विद्यमानशब्दलोपः। अथ पूर्वग्रहणं किम्, सहनञ्विद्यमानादित्येवोच्येत, एतया हि पञ्चम्या स्वाङ्गे विशेष्यमाणे सहादिपूर्वता लभ्यत एव ? नैतदेवम्; पञ्चमी हि परत्वेन स्वाङ्गं विशेषयेत्-- सहादिभ्यः परं यत् स्वाङ्गमिति। ततश्च सहादिभ्यः परेण स्वाङ्गेनान्यस्यापि कल्याणं विद्यमानमुखमस्या इति विग्रहः। अथ वा-- विद्यमानं मुखं यस्य स विद्यमानमुखः, कल्याणो विद्यमानमुखो यस्या इति विग्रहः। पूर्वग्रहणे सति पूर्वशब्दस्यावयववाचित्वात् सहादिपूर्वत्वेन प्रातिपदिकं विशेष्यत इति सहाद्यवयवं यत् स्वाङ्गान्तं प्रातिपदिकं तस्मादिति विज्ञायमाने नात्र प्रतिषेधो भवति, न ह्येतत् सहाद्यवयवमेव। किं तर्हि ? कल्याणशब्दावयवमिति न भवत्यनिष्टप्रसङ्गः।।

58. नखमुखात्संज्ञायाम्। (4.1.58)

`सूर्पणखा' इति। `पूर्वपदात्संज्ञायामगः' (8.4.3) इति णत्वम्। अथ कथं शूर्पनखी राक्षसीति ? असंज्ञात्वात्। संज्ञायामित्युच्यते, न चेयं संज्ञा। तथा हि-- `पूर्वपदात्' (8.4.3) इत्यादिना णत्वं न भवति। यौगिकस्त्वेष तस्या व्यपदेशः; शूर्पाकारनखयोगात्-- शूर्पमिव नखो यस्याः शूर्पनखीति।।

59. दीर्घजिह्वी च च्छन्दसि। (4.1.59)

अथ किमर्थमीकारान्तनिपातनं क्रियते, न `दीर्घजिह्वा च्छन्दसि' इत्येवोच्येत, एवमुच्यमाने प्रतिषेध प्रकरणात् प्रतिषेधो विज्ञायेतेति चेत् ? न; संयोगोपधत्वेन प्राप्त्यभावात्, प्राप्तिपूर्वकत्वाच्च प्रतिषेधानाम्। तस्मात् सामर्थ्याद्विधिरेव विज्ञास्यत इत्याह-- `निपातनं नित्यार्थम्' इति। कल्पितत्वात् प्रकृतस्य ङीष इहापि विकल्पित एवासौ विज्ञायेत, निपातनात् नित्यो भवति।।

60. दिक्पूर्वपदान्ङीप्। (4.1.60)

`विधिप्रतिषेध' इत्यादि। विधिविषयः-- स्वाङ्गमुपसर्जनसंयोगोपधत्वम्, नासिकादि च प्रातिपदिकम्। प्रतिषेधविषयः- संयोगोपधञ्च प्रातिपदिकम्, `न क्रोडादिबह्वचः' (4.1.56) `सहनञ्विद्यमानपूर्वाच्च' (4.1.57) इति। एतेनैतत् सूचयति-- `स्वाङ्गाच्चोपसर्जनासंयोगोपधात्' (4.1.54) इत्यादि विधिशास्त्रमिहानुवर्त्तते, `न क्रोडादिबह्वचः' (4.1.56) इत्यादि प्रतिषेधशास्त्रम्, तेन यत्र विषये ङीष् विहितस्तत्रैव ङीब्विधेयः। यत्र तु विषये ङीष् प्रतिषिद्धस्तत्र ङीबपि प्रतिषिध्यत इति। `यत्र ङीष् विहितः' इत्यादिना विधि विषयापेक्षयाः फलं दर्शयति। कः पुनर्ङीपो वा विशेषः, यावतोभयत्र तदेव रूपम् ? इत्याह-- `स्वरे विशेषः' इति। ङीपो हि पित्त्वादनुदात्तत्वं भवतीति, ङीषस्तु प्रत्ययस्वरेणाद्युदात्तत्वम्। `प्राङमुखी' इति। ऋत्विगादि (3.2.59) सूत्रेणाञ्चतेः क्विन्, `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः, `उगितश्च' (4.1.6) इति ङीप्--प्राची। प्राच्यां दिशि मुखमिति `दिक्शब्देभ्यः सप्तमीपञ्चमी' (5.3.27) इत्यादिनास्तातिः, `अञ्चेर्लुक्' (5.3.30) इति तस्य लुक्, `लुक् तद्धितलुकि' (1.2.49) इति स्त्रीप्रत्ययस्यापि लुक्, `तद्धितश्चासर्वविभक्तिः' (1.1.38) इत्यव्ययत्वम्, `अव्ययादाप्सुपः' (2.4.82) इति सुपो लुक्--- प्राग् मुखं यस्याः सा प्राङमुखी,

`यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इति ङकारः। `प्राङ्मुखा' इति। टाप्। ननु च ङीपा मुक्ते `स्वाङ्गाच्चोपसर्जनात्' (4.1.54) इति ङीषा भवितव्यम् ? नैतदस्ति; आचार्यप्रवृत्तिर्ज्ञापयति--यत्रोत्सर्गापवादयोर्विभाषा तत्रापवादेन मुक्त उत्सर्गो न प्रवर्त्तत इति, यदयं `पीलाया वा' (4.1.118) इति वाग्रहणं करोति। यद्यत्राणा विकल्पितेन मुक्ते `स्त्रीभ्यो ढक्' (4.1.120) (इति) ढकारेण भवितव्यं किं वाग्रहणेन ? तस्मादस्माद्वाग्रहणादिदं ज्ञाप्यते--यत्रोत्सर्गोऽपि विभाषा तत्रापवादेन मुक्त उत्सर्गो न प्रवर्तत इति। कथं पुनरुत्सर्गो विभाषा ? महाविभाषया। `प्राग्दीव्यतोऽण्' (4.1.83) इत्यणुत्सर्गः, `स्त्रीभ्यो ढक्' (4.1.120) इति ढगपवादः; तेन मुक्ते यद्यपि स्यादण्, किं वाग्रहणेन ? नेत्येवं ब्रूयात्, तत्रौत्सर्गिकाणो निवृत्त्यर्थम्।
`इह न भवति' इत्यादिना प्रतिषेधापेक्षायाः फलं दर्शयति। `प्राक्क्रोडा, प्राग्जघना' इति। अत्र हि `न क्रोडादिबह्वचः' (4.1.56) इत्यस्याप्यनुवृत्तेर्ङीष् न भवति। `प्राग्गुल्फा' इति। अत्राप्यसंयोगोपधा (4.1.63), `वहश्च' (3.2.64) इति ण्विः, ण्वेः सर्वापहारी लोपः, प्रत्ययलक्षणेन `अत उपधायाः' (7.2.116) इति वृद्धिः, ङीष्, `वाह ऊठ्' (6.4.132) इति संप्रासरणसंज्ञको वकारस्योठ् भवति; `वसोः सम्प्रसारणम्' (6.4.131) इत्यतः सम्प्रसारणानुवृत्तेः। ठकारः `एत्येधत्यूठसु' (6.1.89) इति विशेषणार्थः। `सम्प्रसारणाच्च' (6.1.108) इति पररूपत्वम्, `एत्येधत्यूठ्सु' (6.1.89) इति पूर्वपदाकारेण सैहकादेशो वृद्धिः।।

62. सख्यशिश्वीति भाषायाम्। (4.1.62)
`सखी' इति। सखिशब्दान्ङीप्। नास्याः शिशुरस्तीति वाक्यशेषेण बहुव्रीहिं दर्शयन्नशिशुशब्दो यो बहुव्रीहिस्तस्याशिश्वीति निपात्यते। न तु तत्पुरुषो यस्तस्येति दर्शयति। तत्पुरुषे हि न शिशुरशिशुरित्येवं भवति। `सखा' इति। `अनङ् सौ' (7.1.93) इत्यनङादेशः, `नोपधायाः' (6.4.7) `सर्वनामस्थाने च' (6.4.8) इति दीर्घः। `सख्यशिशुभ्याम्' इत्येवं वक्तव्ये यन्निपातनं क्रियते, तस्यैतत् प्रयोजनम्-- तुल्यश्रुतेः शब्दान्तरस्यापि यथा स्यात्, सह खेन या वर्त्तते सा सखीति।।

63. जातेरस्त्रीविषयादयोपधात्। (4.1.63)
जासेः प्रातिपदिकादिति सामानाधिकरण्यानुपपत्तेर्जातिवाचि यत् प्रातिपदिकं तदिहाभिधानेऽभिधेयोपचारं कृत्वा जातिशब्देनोक्तम्, अत एव वृत्तावाह--`जातिवाचि यत् प्रातिपदिकम्' इति। `अस्त्रीविषयात्' इति। अनन्यत्राभावेऽपि विषयशब्दो वर्त्तते, अत एव वृत्तावाह-- `न चेत् स्त्रियामेव नियतम्' इति। न स्त्रियामेव यस्य भावः, किन्तु स्त्रियां चान्यत्र च तदस्त्रीविषयम्।
जातिरित्युच्यते, केयं जातिर्नामेति प्रश्नस्योत्तरमाह--`आकृतिग्रहणा' इत्यादि। आक्रियते व्यज्यतेऽनयेत्याकृतिः = संस्थानमुच्यते। तथा हि-- दुराकृतिः दुःसंस्थानमुच्यते, स्वाकृतिश्च सुसंस्थानम्। गृह्यतेऽनेनेतित ग्रहणम्, करणे ल्युट्। आकृतिर्ग्रहणं यस्याः साऽऽकृतिकग्रहणा, संस्थानव्यङ्ग्येति यावत्। ननु चाकृतिशब्दसामानाधिकरण्याद्ग्रहणशब्दस्य स्त्रियां वृत्तिरिति `टिड्ढाणञ्' (4.1.15) इति ङीपा भवितव्यम्, तदन्तेन समासे कृते `नद्यृतश्च' (5.4.153) इति कप्, ततश्चाकृतिग्रहणीकेति प्राप्नोति ? नैष दोषः; ग्रहणशब्दो हि पूर्व करणसामान्ये व्युत्पादितः, पश्चाद्विशेषेणाभिसम्बध्यते। तत्र पदान्तरसन्निधाने यस्तस्य लिङ्गविशेषसम्बन्धः, स च बहिरङ्ग इति सामान्यलिङ्गेनैवान्तरङ्गेण वाक्यं कृत्वा समासः क्रियते, यथा--`मुखनासिकावचनोऽनुनासिकः' (1.1.8) इत्यत्र। तदनेन लक्षणेन सामान्यरूपा गोत्वादिलक्षणा जातिरित्युक्तं भवति। गोत्वादयो हि विषाणादिमत्संस्थानव्यङ्ग्यत्वादाकृतिग्रहणाः। एतेन लक्षणेन ब्राह्मणत्वादयो जातिविशेषा न संगृहीताः। न हि ते संस्थानव्यङ्ग्याः; तदाश्रयस्य संस्थानस्याभिन्नत्वात्। यादृशं हि संस्थानं ब्राह्मणस्य क्षत्रियादेः संस्थानमपि तादृशमेवेत्यतो द्वितीयं लक्षणमाह-- `लिङ्गानाञ्च' इत्यादि। यापि सर्वाणि लिङ्गानि न भजति साप्यसंस्थानव्यङ्ग्यापि जातिः, यथा-- ब्राह्मणत्वादिः। सा हि स्त्रीलिङ्गं पुंलिङ्गं च भजति-- ब्राह्मणएः, ब्राह्मणीति, न तु नपुंसकलिङ्गमित्यसर्वलिङ्गभाग्भवति। ब्राह्मणत्वादिषप्युदेशाभिव्यङ्ग्यताऽश्रयणीया, अन्यथा देवदत्तः, देवदत्तेति लिङ्गद्वयं भजति, अत्रापि जातित्वं स्यात्. न चायं जातिशब्द इष्यते, किं तर्हि ? संज्ञाशब्दः। विध्यर्थञ्चेदम् । अतः सर्वलिङ्गभाजोऽपि पूर्वेण लक्षणेन जातित्वमस्ति, यथा--तटः,तटी, तटमिति। सर्वलिङ्गं भजत इति सर्वलिङ्गभाक्, कर्मण्युपपदे `भजो ण्विः'(3.2.62) इति ण्विः। ननु च लिङ्गापेक्षया सर्वशब्द उपपदे भजो ण्विप्रत्ययो न प्राप्नोति, उपपदाश्रयत्वा, उपपदसमासश्च असमर्थत्वात् ? नैष दोषः; यथैव हि देवदत्तस्य गुरुकुलमित्यत्रासामर्थ्येऽपि समासो भवति, गमकत्वात्; तथैवमुभयमपि भविष्यतीति।
सा च जातिः-- `सकृदाख्यातनिर्ग्राह्या' इति। सकृत् = एकवारम्, आख्याता = उपदिष्टा, निर्ग्राह्या = निश्चयेन ग्राह्या। एतेन जातिधर्मानेकत्वनित्यत्वप्रत्येकपरिसमाप्तित्वलक्षणान् दर्शयति। सकृदेवारं यस्मात् कृष्णे धवले वा गोपिण्ड आख्याता तद्विलक्षणेऽपि गोपिण्डे निर्ग्राह्या, तस्मादेव नित्या प्रत्येकं परिसमाप्ता च। यदि ह्येका न स्यात्, सकृदाख्याता गौरिति पिण्डान्तरे न गृह्येत। यदि च नित्या न भवेत्, पिण्डविनाशे तस्या अपि विनाशात् पिण्डान्तरेण न गृह्येत। यदि च प्रत्येकं सर्वात्मना परिसमाप्ता न स्यात्, तस्मिन्नपि तावत् पिण्डे सर्वात्मना न गृह्येत यत्राख्याता, किं पुनः पिण्डान्तरे ! अंशेन हि परिसमाप्तौ सत्यामंश एव परिगृह्यते, न जातिः। नजात्यंशो जातिर्भवति, अनेकत्वप्रसङ्गात्।
तृतीयं जातिलक्षममाह-- `गोत्रञ्च' इत्यादि। `अपत्यं पौत्रप्रभृति गोत्रम्' (4.1.162) इति गोत्रं पारिभाषिकम्। इह तु लौकिकमपि गोत्रमपत्यमात्रं गृह्यते। चरणमध्ययनभेदेनानेकधा। गोत्रञ्च चरणैः सह जातिर्भवति। गोत्रं नाडायनादि। यद्यपि नाडायनतादि सामान्यं गोत्रवदेव कल्प्यते, तथापि तत्

संस्थानव्यङ्ग्यं न भवति। सर्वलिङ्गभावक्त्वाच्च-- नाडायनः पुमान्, नाडायनी स्त्री, नाडायनं नपुंसकमिति। अतो गोत्रस्य जातित्वप्रतिपादनसिद्धये गोत्रञ्चेत्युक्तम्। चरणशब्दस्त्वध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात्। क्रियाशब्द एव जातिशब्द इत्यतस्तदर्थस्य जातित्वप्तिपादनाय चरणैः सहेत्युक्तम्।
`कुक्कुटी, शूकरी मयूरी' इति। आकृतिग्रहणाया जातेरुदाहरणम्। `ब्राह्मणी, वृषली' इति। असर्वलिङ्गभाजः। `नाडायनी, चारायणी' इति। गोत्रलक्षणायाः। नडचरशब्दयोः `नडादिभ्यः फक्' (4.1.99) इति फगपत्येऽर्थे। `कठी, बह्वृची' इति। चरणलक्षणयाः।
`मुण्डा'इति। मुण्डगुणयोगात्। मुण्डो भवत्येष इत्यस्त्रीविषयः-- मुण्डो देवदत्त इति; पुरुषेऽपि मुण्डशब्दस्य वृत्तेः। न तु जातिशब्दः,किं तर्हि ? गुणशब्दः।`मक्षिका' इति। सर्वदा स्त्रियामेव नियत्वात् स्त्रीविषयो मक्षिकाशब्दः। `क्षत्त्रिया' इति। गोत्रमिह जातिः। `क्षत्त्राद्धः' (4.1.138) इति गोत्रापत्ये घविधानादस्रवलिङ्गभाक्त्वाच्च जातित्त्वम्। `क्षत्त्रियः' इति च पुंस्यपि वृत्तेरस्त्रीविषयः क्षत्त्रियशब्दः।
योपधस्तु-- `योपधप्रतिषेधे हयगवयमुकत्स्यमनुष्याणामप्रतिषेधः' इति। कथं पुनरेष लभ्यते ? उत्तरसूत्रे चकास्यानुक्तसमुच्चयार्थत्वात्। तेन हि हयगवयादिभ्यो ङीष्विधानादयं प्रतिषेधो न प्रवर्त्तते। `मत्सी' इति। `सूर्यतिष्यागस्त्यमत्स्यानाम्' (6.4.149) इत यलोपः। `मनुषी' इति। `मनोर्जातावञ्यतौ षुक् च' (4.1.161) इति यत्प्रत्ययः, षुगागमश्च। जातित्वं च पुरनेषां हयगवयादीनामाकृतिग्रहणाद्वेदितव्यम्।।

64. पाककर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च। (4.1.64)
`ओदनपाकी' इति। ओदनस्य पाक इति षष्टीसमासः। व्युत्पत्तिमात्रार्थं त्वसौ क्रियते, न त्ववयवार्थो विद्यते। समुदाय एव ह्ययं कस्याञ्चिज्जातौ वर्त्तते। एवं `शङ्कुकर्णी' इत्यदिष्वपि वेदितव्यम्।।

65. इतो मनुष्यजातेः। (4.1.65)
`अवन्ती, कुन्ती' इति। अवन्तिकुन्तिशब्दाभ्यामपत्येऽर्थे `वृद्धेत्कोशलाजादाञ्ञ्यङ्' (4.1.171) `स्त्रियामवन्तिकुन्तुकुरुभ्यश्च' (4.1.176) इति तस्य लुक्, ततो ङीष्। `दाक्षी,प्लाक्षी'इति। `अत इञ्' (4.1.95) । सर्वत्र गोत्रं हि जातिः।
`विट्, दरत्' इति। विशोऽपत्येऽर्थे `जनपदशब्दात्क्षत्त्रियादञ्' (4.1.168)। दरदो द्वयञ्मगधादिसूत्रेणाण् (4.1.170), `अतश्च' (4.1.177) इति तयोः स्त्रियां लुक्। इहापि गोत्रं जातिः। `तित्तिरिः' इति। अत्राकृतिग्रहणा जातिः। `उदमेयी' इति। `अत इञ्'(4.1.95) गोत्रमिह जातिः।
`इञ्र उपसंख्यानम्' इति। इञन्तान्ङीष उपसंख्यानं कर्त्तव्यमित्यर्थः। किमर्तम् ? अजात्यर्थम्। अजातिवाचिनोऽपीञन्ताद्यथा स्यात्। तत्रेदं प्रतिपादनम्-- `इतः' इति योगविभागोऽत्र क्रियते, तेनेञन्तादजातिवाचिनोऽपि भविष्यतीति। ततः `मनुष्यजातेः' इत्ययं द्वितीयो योगः पूर्वयोगस्यानित्यत्वज्ञापनार्थः।तेन मुष्यजातौ नित्यम्, अन्यत्र तु यथादर्शनम्। क्वचिदेव न सर्वत्र। `सौतङ्गमी' इत्याद्युदाहरणम्। स्यादेतत्-`अत इञ्' (4.1.95) इति गोत्रापत्य एवात्रेञ् विहितः, गोत्रञ्च जातिरेव, तत् किमुच्यते--इञ्र उपसंख्यानमजात्यर्थमिति ? अत आह-- `सुतह्गमादिभ्यः' इत्यादि। सुतङ्गमेन निर्वृता नगरीति `वुञ्छण्' (4.2.80) इत्यादिना सुतङ्गमादित्वादिञ्। `इतः' इत तपकरणं दीर्घनिवृत्त्यर्थम्। तेन अवन्तीशब्दादयं न भवति। अवन्तिमिच्छति, `सुप आत्मनः क्यच्' (3.1.8), `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः, अवन्ती य इत स्थिते क्विप्, `अतो लोपः' (6.4.48) इत्यकारलोपः। पूर्वं लोपग्रहणादपृक्तलोपात् प्राक् `लोपो व्योर्वलि' (6.1.66) इति यलोपः, पश्चात् `वेरपृक्तस्य' (6.1.67) इति वकारस्य। ततः अवन्ती इति स्थिते यदि तपरकरणं न क्रियेत, ततोऽस्मादपि स्यात, ततः `हल्ङ्याब्भ्यः' (6.1.68) इति सुलोपः प्रसज्येत,ततोऽवन्तीरिति न सिध्येत्।।

66. ऊङुतः। (4.1.66)
`कुरूः' इति। कुरोरपत्यं स्त्री-- कुरुनादिभ्यो ण्यः' (4.1.172), `स्त्रियामवन्ति' (4.1.176) इत्यादिना तस्य लुक्। गोत्रमिह जातिः। `ब्रह्मबन्धूः' इति। ब्रह्म बन्धरस्याः, वीरो बन्धुरस्या इति बहुव्रीहिः। ब्रह्मबन्धूवीरबन्धूशब्दौ कस्याञ्चिदेव जातौ वर्त्तेते। जातित्वं पुनरसर्वलिङ्गभाक्त्वात्। तौ हि स्त्रीलिङ्गपुंल्लिङ्गादेव, न नपुंसकलिङ्गौ। `उतः' इति तपरकरणं मुखसुखार्थम्। न तु दीर्घनिवृत्त्य्रथम्; ऊकारान्तस् मनुष्यजातिवाचिनोऽभावात्। `ङकारः'इत्यादि। ऊङो यदि ङकारो न क्रियेत तदा `नोङ्धात्वोः' (6.1.175) इत्यस्मिन्नपि न कर्त्तव्यः स्यात् ; ङाकारानुबन्धवतोऽन्यस् कस्यचिदूकारस्याभावात्। ततश्च `नोधात्वोः' इत्युच्यमाने यवाग्वा, यवाग्वै इत्यत्रापि `उदात्तयणो हल्पूर्वात्' (6.1.174) इति तृतीयादिविभक्तेरुदात्तत्वस्य प्राप्तस्य प्रतिषेधः स्यात्। ननु चार्थवत ऊकारस्य ग्रहणात् `अर्थवद्ग्रहणे नानर्थकस्य' (व्या.प.1) इत्यनर्थकस्य न भविष्यति, यवागूशब्दो हि `सृयुवचिभ्योऽन्युजागूजक्नुचः' (द.उ.10.4) इत्यागूच्प्रत्ययान्तो व्युत्पादितः, तत्रागूच्छब्द एव प्रत्ययार्थेनार्थवान्, ऊकारस्त्वनर्थक एव ? नैतदस्ति; यस्मान्न वर्णग्रहणेष्वियं परिभाषा व्यवस्थिता, वर्णग्रहणञ्चेदम्, अतो नोपतिष्ठते। अथोपतिष्ठेत ? एवमपि `कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' (द.उ.1.164) इत्यूप्रत्ययस्य ग्रहणं स्यात्। ततश्च खर्ज्वा, खर्ज्वे-- इत्यत्र प्रतिषेधः प्रसज्येत। तस्माद्विशेषणार्थो ङकारः कर्त्तव्यः। अथ दीर्घोच्चारणं किमर्थम्, ननु उङेवोच्येत, `अकः सवर्णे दीर्घः' (6.1.101) इति दीर्घत्वेन हि दीर्धस्य ग्रहणं भवति ? इत्यत आह-- `दीर्घोच्चारणम्' इत्यादि। यदि दीर्घो नोच्चार्येत तदा `शेषाद्विभाषा' (5.4.154) इति परत्वात् पक्षे कप् स्यात्, अतस्तद्बाधनार्थं दीर्गोच्चारणम्। कथं पुनर्दीघोच्चारणेन कपो निवृत्तिः ? ब्रह्मा बन्धूरस्येति समासादनन्तरमूङ् क्रियताम् ?उत कबिति ? तत्र परत्वात् कप् स्यात्; दीर्घोच्चारणेनोकारप्रश्लेषात्। पुनर्विधानं तुल्यकालप्राप्तिकं स्वार्थिकतया

समानजातीयं कब्विधिमेव निवर्तयति, न स्वादिविधिम्। स्वादयस्तूङन्ताद्भवन्त्येव; त्यूङोरपि ग्रहणात्; ज्ञापकाद्वा, `श्वशुरः श्वश्रवा' (1.2.71) इतिनिर्देशात्। तेन ब्रह्मबन्धूरिति नित्यमूकारान्त एव भवति, न तु कदाचित् कबन्तः। `अध्वर्युः' इति। अध्वरमिच्छतीति क्यच्, `क्याच्छन्दसि' (3.2.170) इत्युप्रत्ययः, `कब्यध्वरपृतनस्यर्चि लोपः' (7.4.39) इत्यकारलोपः।

`अप्राणिजातेश्च' इत्यादि। अप्राणिजातिवाचिनश्च प्रातिपदिकादूङ् प्रत्ययो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- `पङ्गोश्च' (4.1.68) इत्यत्र चकारोऽनुक्तसमुच्चयार्थः, तेनाप्रणिजातेश्च रज्ज्वादिवर्जितादभविष्यति। `अलाबूः, कर्कन्धूः' इति। कः पुनरस्योङि सत्यसति वा विशेषः, यावतोभयत्र तदेव रूपं स व स्वरः; तथा हि-- अलाबूशब्द उणादिषूकारप्रत्ययान्त एव व्युत्पाद्यते, `कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' (द.उ.1.164) `{इति वर्त्तमाने णित् इति च (द.उ.1.168) नञि लम्बेर्नलोपश्च' (द.उ.1.170) इतिनञ्पूर्वात् `लबि अवस्रंसने इत्यस्मादूप्रत्ययः' इति पाठेन भवितव्यम्। इति `वर्त्तमाने णित्' इति च `नञि लम्बेर्नलोपश्च' (द.उ.1.170) इति नञ्पूर्वात् `लबि अवस्रंसने' (धा.पा.379) इत्यस्मादूप्रत्यययः, `इदितो नुम्' (7.1.58) इत्यनेन कृतनुमागरूपस्य नकारस् नलोपश्च विहितः; कर्कन्धूशब्दोऽपि `नृतिशृध्योः कूः' (द.उ.1.174) इति वर्त्तमाने `अन्दूदृन्भूजम्बूकफेलूकर्कन्धूदिधिषूः' (द.उ.1.176) इत्यूकारान्त एव व्युत्पादितः, तत्किमर्थमूङ् विधीयते ? अलाब्वा, अलाब्वै-- इत्यत्र `नोङधात्वोः' (6.1.175) इति विभक्त्याद्युदात्तत्वप्रतिषेधो यथा स्यात्। असति हि तस्मिन् यथा खलप्वौ, खलप्वः- इत्यत्र स न भवति तथेहापि न स्यात्।।

67. बाह्वन्तात्संज्ञायाम्। (4.1.67)

68. पङ्गोश्च। (4.1.68)

`श्वशुरस्योकाराकारयोर्लोपश्च' इति। अयं तु `श्वशुरः श्वश्रवा' (1.2.71) िति निपातनादेव सिद्ध इति न वक्तव्यः।।

69.ऊरूत्तरपदादौपम्ये। (4.1.69)

`वृत्तोरुः' इति। वृत्तौ {परिमण्डला ऊरू इति मुद्रितः पाठ।} परिमण्डलाबूरू यस्याः सा वृत्तोरुः। लाघवार्थमूर्वन्तादिति वक्तव्य ऊरूत्तरपदादित्युक्तम्-- यत्र केवल ऊरुब्द उत्तरपदं तत्र यथा स्यादित्येवमर्थम्; अन्यथा हि यद्यर्वन्तादित्युच्येत,तदा स्वामिन ऊरू स्वाम्यूरू, हस्तिन इव स्वम्यूरू यस्याः सा हस्तिस्वम्यूरुरित्यत्रापि स्यात्, भवति ह्येतदूर्वन्तं प्रातिपदिकम्। उत्तरपदग्रहणे तु न दोषः, न ह्येतदूरुत्तरपदं प्रातिपदिकम्, किं तर्हि ? स्वाम्यूरूत्तरपदम्।।

70. संहितशफलक्षणवामादेश्च। (4.1.70)

`संहितोरूः' इति। संहितशब्दः संश्लिष्टवचनः, संश्लिष्टोरुरित्यर्थः।

`सहितसहाभ्याञ्चेति वक्तव्यम्' इति। सहित, सह -- इत्येताभ्यां परो य उरुशब्दस्तदन्ताच्च प्रातिपदिकादूङ् भवीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- घकारोऽत्र क्रियते, स चायुक्तसमुच्चयार्थः, तेन सहितसहाभ्यामपि भविष्यति। सूत्र आदिग्रहणमूरूत्तरपदमित्यस्यानुवृत्तेर्लिङ्गम्। अन्यथा संहितादिप्रातिपदिकेभ्य एव प्रत्ययो भवतीत्येषोऽर्थो विज्ञायेत। सत्यां हि स्वरितत्वादेवानुवृत्तावेभ्यो यत्परमूरूत्तरपदं सत्यप्यस्मिन् मध्यपदे तत्रैव प्रत्ययः प्रसज्यते;संहितस्वाम्यूरुशब्दात्, न संहितोरुशब्दात्। गुणभावादूरुशब्दस्य न स्यादेवेह विशेषणम्।।

71. कद्रुकमण्डल्वोश्छन्दसि। (4.1.71)

कद्रुशब्दो वर्णविशेषवचनः, ततः `वोतो गुणवचनात्' (4.1.44) इति ङीषः प्राप्तस्य `खरुसंयोगोपधयोः' (वा.349) इति प्रतिषेधे कृते प्रातिपदिकेनानभिधाने प्राप्ते वचनम्। कमण्डलुशब्दस्याप्यप्राणिवाचित्वात् `अप्राणिजातेश्चारज्ज्वादीनाम्' (वा.369) इत्यूङ प्राप्ते छन्दसि नियमार्थम्। अथ वा-- अयं रज्ज्वादि,ततः प्रतिषेधे सति प्राप्त्यर्थं वचनम्।।

72. संज्ञायाम्। (4.1.72)

73. शाङ्र्गरवाद्यञो ङीन्। (4.1.73)

`बैदी, और्वी' इति। बिदौर्वशब्दाभ्यां `अनृष्यानन्तर्ये' (4.1.104) इत्यादिनाऽञ्, तदन्ताद्गोत्रत्वाज्जातित्वे जातिलक्षणे ङीषि प्राप्ते ङीन् विधीयते। स्वरे विशेषः।

`अणन्ता एते' इति। गोतमशब्दादपत्येऽर्थे `ऋष्यन्धकवृष्णि' (4.1.114) इत्यादिनाऽण्, शेषेभ्यस्तु तस्यापत्यम्' (4.1.92) इति। गौतमशब्दाद्गौरादिपाठात् ङीषपि भवति। `ढगन्ता एते' इति। शुभ्रादित्वात्। `कामण्डलेयः'इति। `ढे लोपोऽकद्र्वा' (6.4.147) इत्युकारलोपः। एषां `टिड्ढाणञ्' (4.1.15) इति ङीपि प्राप्ते वचनम्। `वात्स्यायन' इति। वत्सशब्दाद्गर्गादियञन्तात् `यञिञोश्च' (4.1.101) इति फक्। `मौञ्जायन'

इति। मुञ्जशब्दात् `नडादिभ्यः फक्' (4.1.99) इति फक्। `जातिः' इति। गोत्रलक्षणा। लौकिकमपि हि तत्र गोत्रं गृह्यते। युवापि च लोके गोत्रमुच्यते, तथा हि वक्तारो वदन्ति-- गार्ग्यायणो गोत्रेणेति। `ढगन्ताः' इति। केकसशब्दस्य शुभ्रादित्वात् अढगन्ताञ्ञ्यङन्तादपि ताविति। कपिशिविशब्दाभ्यामपत्येऽर्थे `वृद्धेत्कोशलाजादाञ्ञ्यङ' (4.1.171) इति ञ्यङ्। `यङश्चाप्' (4.1.74) इति चापि प्राप्ते वचनम्। `एहि, पर्येहि' इति। `ईह चेष्टायाम्' (धा.पा.632) इत्यस्मादाङपूर्वात् पर्याद्याङ्पूर्वाच्च `{इन् इत्येवोणादिसूत्रम्-- वृत्तौ तु सर्वधातुभ्यः इन्प्रत्ययो भवति इति दृश्यते-द.उ.} सर्वधातुभ्यः' (द.उ.1.46) इतीन्प्रत्ययः। बह्वादिषु `कृदिकारादक्तिनः' (ग.सू.50) इति पाठान्ङीषि प्राप्ते वचनम्। `यञन्तः' इति। गर्गादित्वात्। `यञश्च' (4.1.16), `प्राचां ष्फ तद्धितः' (4.1.17) इति ङीपि ष्फे च प्राप्ते वचनम्। `{उदपानः इति मुद्रितः पाठः} औदपानः'इति। उदपानादागत इति `शुण्डिकादिभ्योऽण्' (4.3.76) इत्यण्। उत्सादिष्वयं पठ्यत इति तत्राञि कृते नास्ति विशेषः-- ङीपो वा ङीनो वा, उभयत्रापि हि `ञ्नित्यादिर्नित्यम्' (6.1.197) इत्याद्युदात्तेन भवितव्यमित्येतन्मनसि कृत्वाऽऽह-- `शुण्डिकाद्यणन्तः प्रयोजयति' इति। `जातिः' इति। अरालचण्डालयोरसर्वलिङ्गत्वादिति जातित्वम्। वतण्डस्य गौरादिलक्षणे ङीषि प्राप्ते वचनम्। प्रत्ययलक्षणेन `यञश्च' (4.1.16), `प्राचां ष्फ तद्धितः' (4.1.17) इति ङीष्फयोर्बाधनम्। वतण्डस्यापत्यं स्त्री `वतण्डाच्च' (4.1.108) इति यञ्, तस्य `लुक् स्त्रियाम्' (4.1.109) इति लुक्।

`भोगवद्गौरिमतोः संज्ञायाम्' इति। संज्ञायां गम्यमानायां भोगवद्गौरिमच्छब्दाभ्यां ङीन् भवति। मत्वन्तत्वात् `उगितश्च' (4.1.6) इति ङीपि प्राप्ते वचनम्। ननु च बोगशब्दो घञन्तः, गौरिश्बदः `अत इञ्' (4.1.95) इतीञन्तः, तेन द्वावप्येतौ ञित्स्वरेणाद्युदात्तौ। ताभ्यां मतुप्, पित्त्वादनुदात्तः। तथा च भोगवद्गौरिमद्भ्यां ङीपि ङीनि वा विहिते न कश्चिद्विशेषः, तत्किमर्थं ताभ्यां ङिन् विधीयते ? इत्यत आह-- `घादिषु नित्यं ह्रस्वार्थम्' इति। `घरूपकल्प' (6.3.43) इत्यादिषु नित्यं ह्रस्वो यथा स्यादिति ताभ्यां ङीनो विधानम्-- भोगवतितरा, गौरिमतितरेति। यदि पुनरुगिल्लक्षणो ङीप्क्रियेत,ततः `नद्याः शेषस्यान्तयतरस्याम्' (6.3.44) इत्यनुवर्त्तमाने `उगितश्च' (6.3.45) इति विकल्पेन ह्रस्वत्वं स्यात्। अथानेनापि ङीनि सति कस्मादेव `उगितश्च' (6.3.45) इत्यन्यरस्यां ह्रस्वत्वं न भवति, यावता भोगवद्गौरिमद्भ्यामुगिद्भ्यामेवायं त्सया विकल्पेन ह्रस्वत्वं भवतीति । न चानेन सूत्रेण या विहिता सा नद्युगित्संशब्दनेन विहिता भवति; उगित्त्वानाश्रयणात्। संज्ञायामिति किम् ? भोगवती, गौरिमतीति। `उगितश्च' (4.1.6) इति ङीप्। अत्र च घादिषु विकल्पनैव ह्रस्वो भवति-- भोगवतितरा , भोगवतीतरा, गौरिमतितरा, गौरीमतीतरेति।

`नृनरयोर्वृद्धिश्च' इति। नृशब्दस्य `ऋन्नेभ्यो ङीप्' (4.1.5) इति ङीपि प्राप्ते वचनम्। नरशब्दस्य `अजाद्यतः' (4.1.4) इति टापि प्राप्ते जातित्वान्ङीषि वा। जातित्वं त्वाकृतिग्रहणात्। वृद्धिश्च तयोर्भवति, सा च नृशब्दस्यालोऽन्त्यपरिभाषया (1.1.52) ऋकारस्यस्थाने भवति। नरशब्दस्य `यस्येति' (6.4.148) लोपे कृते सत्यकारस्य। ननु च `अनन्त्यविकारेऽन्त्यसदेशस्य' (व्या.प.63) इति रेफस्यैव भवितव्यम् ? नैष दोषः; वृद्धेर्याऽन्तरमा प्रकृतिस्तत्र षष्ठी, यत्र षष्ठी तत्रादेश इत्यकारः स्थानी ज्ञायते।

पुत्रशब्दमत्र केचित् पठन्ति, न स केवलः स्तियां वर्त्तत इत्ययं समासन्तो गृह्यते। समासान्ते च वर्त्तमानो दुहितृशब्देन समानार्थो भवन् स्त्रीलिङ्गो भवति-- प्रद्योतपुत्त्री, शैलपुत्त्रीति। `यथोयोगम्' इति। यथासम्भवम्।।

74. यङश्चाप्। (4.1.74)

पकारोऽत्र `ङ्याप्प्रातिपदिकात्' (4.1.1) इत्यत्र सामान्यग्रहणार्थः,चकारस्तदविघातार्थः, एवमुभयोरन्यत्र चरितार्थयोः `अनुदात्तौ सुप्पितौ' (3.1.4) इत्येतद्बाधित्वा परत्वात् `चितः' (6.1.163) इत्यन्तोदात्तत्वं चापो भवति। `ञ्यङः ष्यङश्च सामान्यग्रहणमेतत्' इति। विशेषकरानुबन्धानुत्सृज्य यत्सामान्यं यङमात्रं तस्येदं ग्रहणम्। कथं पुनः सामान्यग्रहणं युज्यते; यावता ञ्यङ एव तत्र ग्रहणं युक्तम्, तथा हि-- सोऽपत्ये विधीयमानः स्त्रीत्वं वक्तुमसमर्थ इति स्त्रीप्रत्ययमपेक्षते, न तु ष्यङ, तस्य स्त्रियामेव विधानात् ? नैतदस्ति; यदि हि सामान्यग्रहणं न स्यात् ष्यङो ङित्करणमनर्थकं स्यात्। तस्य ह्यत्र सूत्रे सामान्यग्रहणेव प्रयोजनम्, नान्यत किञ्चित्। तस्मात् ङित्करणसामर्थ्यात् ष्यङोऽपि ग्रहणं भवति। `आम्बष्ठ्या' इत्यादि। आम्बष्ठसौवीरकोसलशब्देभ्योऽपत्येऽर्थे `वृद्धेत्कोसलाजादाञ्ञ्यङ' (4.1.171) इति ञ्यङ्, तदन्ताच्चाप्। `कारीषगन्ध्या' इति। एतत् स्वादिसूत्रे (4.1.2) व्युत्पादितम्। `वाराह्या' इति। वराहशब्दात् `अत इञ्' (4.1.95) । `बालाक्या' इति। बलाकाशब्दाद्बाह्वादिलक्षम इञ्। उभयत्र `अणिञोरनार्षयोः' (4.1.78) इत्यादिना ष्यङादेशः, तदन्ताच्चाप्।

`शार्कराक्ष्या' इत्यादि। शर्कराक्षपूतिमाषगोरक्षशब्देभ्यो गर्गादियञन्तेभ्यश्चाप्।।

75. आवट्याच्च। (4.1.75)

`ङीपि प्राप्ते' इति। `यञश्च' (4.1.16) इत्यनेन।।

76. तद्धिताः। (4.1.76)

`युवतिः' इति। तद्धितसंज्ञायां सत्यां `कृत्तद्धित' (1.2.46) इत्यादिना प्रातिपदिकसंज्ञा भवति। अथ `तद्धिताः' इति न सम्भवति बहुवचननिर्देशः, यथैव हि `प्रत्ययः' (3.1.1) इत्येकवचननिर्देशेऽपि वक्ष्यमाणानां बहूनामपि सन्नादीनां सर्वेषां सा संज्ञा भविष्यति, तथाऽत्राप्येकवचनेनैव निर्देशः कर्त्तव्यः ? इत्यत

आह-- `बहुवचनम्' इत्यादि। एकवचन एव कर्त्तव्ये यद्बहुवचनं क्रियते तस्यैतत्प्रयोजनम्--अनुक्ता ये तद्धिता लक्षणवाक्यैरनभिहितास्तेषामपि परिग्रहो यथा स्यात्। ततः `पृथिव्या ञाञौ' (वा.376) इत्यादि न कर्त्तव्यं भवति। बहुवचननेनैवानुक्ततद्धितपरिग्रहार्थेन तेषां सिद्धत्वे महत्याः संज्ञायाः करण एतत् प्रयोजनम्, अन्वर्थसंज्ञा यथा विज्ञायेत-- तेभ्यो हितास्तद्धिताः। तदित्यनेन लौकिका वैदिकाश्च शब्दाः प्रत्यवमृश्यन्ते; तेषां व्युत्पाद्यत्वेन प्रकृतत्वात् तेन तत्रैव भवन्त्यणादयो यत्र च भवन्तस्तेषामुपकारिणो भवन्ति, नान्यत्रेति। तेनाभिधानलक्षणत्वं तद्धितानामुपपन्नं भवति। अथ तद्धिताधिकारः स्त्रीप्रत्ययानामादित एव कस्मान्न क्रियते ? किमेव सति भवति ? तद्धितानामुपपन्नं तद्धितानन्तत्वात् प्रातिपदिकमिति `ङ्याप्प्रातिपदिकात्' (4.1.1) इत्यत्र ङ्याब्ग्रहमं न कर्त्तव्यं भवति, `प्राचां ष्फ तद्धितः' (4.1.17) इत्यत्र च तद्धितग्रहणम्, `यस्येति च' (6.4.148) इतीकारग्रहणञ्च;तद्धित इत्येवं सिद्धत्वात् ? अशक्यमेवं कर्त्तुम्; एवं हि क्रियमाणे तत्र ङ्याब्ग्रहणस्य यत् पूर्वं प्रयोजनमुक्तं तन्न स्यात्; ङीब्ङीष्ङीनाञ्च ङकारस्येत्संज्ञा `अतद्धिते' (1.3.8) इति प्रतिषेधात्। इह च पट्वीति `ओर्गुणः' (6.4.146) इति गुणः स्यात्। तस्माद्यथान्यासमेवास्तु।।

77. यूनस्तिः। (4.1.77)

`ङीपोऽपवादः' इति। नकारान्तत्वात् `ऋन्नेभ्यो ङीप्' (4.1.5) इति प्राप्तस्य । अथेदन्तात् `इतो मनुष्यजातेः' (4.1.65) इति ङीष् कस्मान्न भवति ? अमनुष्यजातित्वात्। न हि युवतिशब्दो मनुष्यजातिवचनः, किं तर्हि ? वयोवचनः। तथा हि यौवनावस्थायामेव स वर्त्तते, न बाल्यवृद्धत्वावस्थायाम्। न चैवंविधा जातिशब्दाः,ते हि सर्वावस्थासु व्युक्तिषु जातिनिबन्धना वर्त्तन्ते, गोशब्दादिवत्।।

78. अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे। (4.1.78)

इह `अणिञोः' इति प्रत्ययमात्रं वा गृह्यते ? तदन्तो वा समुदायः ? तत्र यद्याद्यः पक्ष आश्रीयेत, `गुरूपोत्तमयोः' इति विशेषणं नोपपद्येत। न ह्यणिञोर्गुरूपोत्तमत्वं सम्भवति, कस्य तर्हि ? तदन्तस्य समुदायस्य। तस्माद्द्वितीयः पक्ष आश्रयितुं युक्त इति मत्वाऽऽह-- `गोत्रे यावणिञौ विहितावनार्षौ तदन्तयोः प्रातिपदिकयोः' इति। यदि तर्हि समुदायस्याणन्तस्येञन्तस्य चेदं ग्रहणम्, `अनार्षयोः' इति विशेषणं न प्रकल्प्येत; समुदायस्य ऋषादेव विधानात्। अणिञोस्तु प्रकल्प्यत एतद्विशेषणम्; तयोर्ऋषादन्यतर् च विधानात्। `गोत्रे' इत्यपि विशेषणमणिञोरेव युक्तम्, न समुदायस्य; तथा हि `अपत्यं पौत्रप्रभृति गौत्रम्' (4.1.162) इति परिभाषिकं गोत्रमिह गृह्यते,तत्र चाणिञावेव विहितौ, न समुदायः ? नैष दोषः; समुदायस्यैते विशेषणे न सम्भवत इति सामर्थ्यादेकदेशयोरणिञोर्विज्ञायेते। अत एव वृत्तावाह-- `गोत्रे यावणिञौ विहितावनार्षौ' इति। इहायं ष्यङादेशो वा स्यात् ? प्रत्ययो वा ? ननु च षष्ठीनिर्देशादादेशेनैवानेन भवितव्यमिति असन्दिग्धमेतत्, तदयुक्ता द्वितीयपक्षाशङ्का ? नैतदस्ति; प्रत्ययविधावपि षष्ठीनिर्देशो दृश्यते, यथा-- `गापोष्ठक्' (3.2.8) `व्रीहिशाल्योर्ढक्' (5.2.2) इति,तस्मात् प्रत्ययपक्षशङ्कापि युक्तैव। तत्र यदि प्रत्ययः स्यात्, औदमेधेय इति न सिध्येत्। उदमेघस्यापत्यं स्त्री-- `अत इञ्' (4.1.95), तदन्तादनेन ष्यङ्, इकारस्व यस्येति (6.4.148) लोप), `यङ्श्चाप्' (4.1.74), औदमेध्या, तस्या अपत्यमिति `स्त्रीभ्यो ढक्' (4.1.120) , एयादेशः। तस्मिन् `आपत्यस्य च तद्धितेऽनाति' (6.4.151) इति यलोप इष्यते, स न प्राप्नोति; अनापत्ययकारत्वात्। ननु च `हलस्तद्धितस्य' (6.4.150) इति चेत् ? न; ईतीत्यत्रानुवर्त्तते। आदेशपक्षे त्वणिञोरपत्यत्वात् तदादेशस्यापि ष्यङः स्थानिवद्भावेनापत्यत्वमिति सिध्यति यलोपः। तस्मादादेशपक्ष एव साधुरित्यभिप्रायेणाह---`ष्यङादेशो भवति' इति। ननु चादेशपक्षेऽप्यौडुलोम्येति न सिध्यति, लोमशब्दो बाह्वादिषु पठ्यते। तस् केवलस्यापत्येन संयोगो नास्तीति तदन्तः समुदायो गृह्यते, तत उडुलोम्नोऽपत्यं स्त्री--बाह्वादित्वादिञि कृते तस्य च ष्यङादेशः। तत्र `नस्तद्धिते' (6.4.144) इति टिलोप इष्यते, स च न प्राप्नोति;`ये चाभावकर्मणोः' (6.4.168) इति प्रकृतिभावात्। प्रत्ययपक्षे त्विञो व्यवहितत्वात् ष्यङः प्रकृतिभावो नास्तीति भयति टिलोपः। नन `यस्येति च' (6.4.148) इति लोपे कृते नास्ति व्यवधानम्। `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति लोपस्य (6.4.148) इति लोपे कृते नास्ति व्यवधानम्। `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति लोपस्य स्थानिवद्भावादस्त्येव। आदेशपक्षेऽप्यदोषः; आनुपूर्व्या सिद्धत्वात्। न ह्यत्राकृते लोपे गुरुपोत्तमत्वं सम्भवति। तत्र प्रागेव ष्यङ इञि तस्यैव टिलोपः, ततो गुरुपोत्तमता। ततः ष्यङित्यानुपूर्व्या सिद्धत्वम्। अयं तर्ह्यादेशपक्ष दोषः-- अनेकाल्त्वात् सर्वादेशः प्राप्नोति, `ङिच्च' (1.1.53) इत्यन्तस्य प्राप्नोतीति चेत् ? नैतदस्ति; अपवादप्रतिषेधाद्धि सर्वादेशः प्राप्नोतीति। `ङिच्च' (1.1.53) इत्यन्तादेशः क्रियताम्, आहोस्विदनेकाल्त्वात् सर्वादेशः, तत्र परत्वात् सर्वादेशः प्राप्नोति, यथा-- `तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' (7.1.35) ? इत्यत आह-- `निर्दिश्यमानस्य' इत्यादि। यथा पाच्छब्दस्य पदित्ययमादेशो विज्ञायते न पाच्छब्दान्तस्य समुदायस्य, तथाऽयमपि निर्दिश्यमानयोरणिञोरेव विज्ञायते। तत् क्व तर्हि सर्वादेशेन भवितव्यम् ? यत्र समुदायात् षष्ठ्युच्चारिता, यथा--तुह्योरिति। `ङकारः सामान्यग्रहणार्थः' इति। असति हि तत्र `यङश्चाप्' (4.1.74) इत्यत्र `वृद्धेत्कोसलाजादाञ्ञ्यङ्' (4.1.171) इत्यस्यैव ग्रहणं स्यात्, न ष्यङः। `षकारस्तदविघातार्थः' इति। तत्र ह्यसत्येकानुबन्धकग्रहणे न द्वयनुबन्धकस्य (व्या.प.52) त्यस्यैव ग्रहणं स्यात्, न ञ्यङः। उत्तमशब्दोऽयमस्त्येव व्युत्पन्नं तमबन्तं प्रातिपदिकम्, अस्त्यव्युत्पन्नम्। तत्र यदि व्युत्पन्नस्येदं ग्रहणं स्याद्वाराह्येति न सिध्येत्; यस्माद्व्युतपत्तिमानुत्तमशब्दश्चतुष्प्रभृतिष्ववतिष्ठते। यथा ह्युच्छब्दादुद्गताभिधायिनस्तमप्प्रत्ययोऽतिशायने विधीयते। अनुद्गतञ्चापेक्ष्योद्गतो भवति। त्रिषु च द्वावुद्गतौ,एकोऽनुद्गतः,न च द्वयोरयं चोद्गत इत्ययमनयोरतिशयेनोद्गत इत्यर्थविवक्षायां तमबुत्पद्यते; तरपा विशेषविहितेन बाधितत्वात्। चतुर्षु तु त्रय उद्गताः, एकोऽनुद्गतः, ततर् त्रीनुद्गतानपेक्ष्यायञ्चोद्गतः। अयं चैषामतिशयेनोद्गत इत्यर्थविवक्षायां तमबुत्पद्यते, तस्माच्चतुर्ष्वेव प्राप्नोति; तत्र

चोत्तमशब्दस्य स्वरूपसिद्धेः, ततश्च वाराह्येति न सिध्येत्। न ह्यत्र चत्वारः सन्तीत्येतदालोच्याव्युत्पन्नोऽयमिहोत्तमशब्दो गृह्यत इति दर्शयन्नाह-- `उत्तमशब्दः स्वभावात्' इत्यादि। अध्युत्पन्न एव ह्युत्तमशब्दः स्वभावात् त्रिप्रभृतीनामन्त्यमाह, न व्युत्पन्नः। स हि चतुष्प्रभृतीनामन्त्यमाह, तस्मात् `उत्तमशब्दः स्वभावात्' इत्यादिना ग्रन्थेनाव्युत्पन्नस्योत्तमशब्दस्येह ग्रहणमिति दर्शितं भवति। तदेवमव्युत्पन्नस्य ग्रहणे वाराहीत्येतदपि सिद्धं भवति।

`टिड्ढाणञिति ङीबेव भवति' इति। प्रमादपाठोऽयम्। यथैव हि बैदीति जातित्वादञन्तात् `शाङ्गर्रवाद्यञो ङीन्' (4.1.73) इति ङीन् भवति, तथेहापि ङीनैव भवितव्यम्। जातित्वं तु गोत्रत्वात्। तस्मात् `शाङ्गर्रवाद्यञो ङीन् इति ङीनेव भवति' इत्ययमेवात्र पाठो द्रष्टव्यः।

`वासिष्ठी, वैश्वामित्री' इति। `ऋष्यन्ध' (4.1.114) इत्यादिनिऽण्। `औपगवी, कापटवी' इति। उपगुकपटुशब्दाभ्यामौत्सर्गिकोऽण्, `ओर्गुणः' (6.4.146)।

`आहिच्छत्री। वैश्वामित्री' इति। `तत्र जातः' (4.3.25) इत्यण्।।

79. गोत्रावयवात्। (4.1.79)

गोत्रञ्च तदवयवञ्चेति गोत्रावयवः। इह त्वभिधानेऽभिधेयोपचारं कृत्वा तदभिधायिप्रातिपदिकं गोत्रावयव शब्देनोक्तम्। ननु चैवं विग्रहे विशेषणत्वादवयवशब्दस्य नीलोत्पल इव नीलशब्दस्य पूर्वनिपातः स्यात्। राजदन्तादेराकृतिगणत्वाद्विशेषणस्य परनिपातो भविष्यति। गोत्रं पुनरिह लौकिकं गृह्यते, न पारिभाषिकम्। लोके च प्रधानभूत आदिपुरुषः स्वप्रभवस्यापत्यसन्तानस्य संज्ञाकारी गोत्रमुच्यते। तथा हि भरतो नाम कश्चिदाद्यः प्रधानः पुरुषोऽभूत्, तेन सर्व एव तत्पूर्वकाः पुत्त्रपौत्त्रादयो भरता इति व्यपदिश्यन्ते। अवयवशब्दोऽयमस्त्येवैकदेशे, तत्सम्बन्धादवयवीति समुदाय उच्यते। अस्ति च पृथग्भावे--अवयुतिः = अवयवः, पृथग्भूत इत्यर्थः। यद्यपि यौतिर्मिश्रणे पठ्यते, तथाप्यनेकार्थत्वाद्धादूनामवपूर्वः पृतघ्भावमाचष्टे। अस्त्यप्रधाने, यथा-- कुलावयवोऽयम्, सङ्घावयवोऽयमिति। कुलसय् सङ्घस्य चाप्रधानभूतोऽयमिति गम्यते। तत्र यदेयकदेशवाची गृह्यते तदुपादानमनर्थकं स्यात्, गोत्रादित्येव वक्तव्यम्। गोत्रादवयवोऽपि हि गोत्रं भवति, यथा-- क्षीरावयवः क्षीरमिति। अथापि पृथग्भावे गोत्रादन्यत्र वर्त्तमानो गृह्यते, एवमपि पुणिकादिभ्यो विहितयोरणिञो विहितौ; अनिष्टञ्चैतत्; तस्यैकदेशवाचिनि पृथग्भाववाचिनि वाक्यशब्दे दोष इत्यत्राप्रधानवाच्येव गृह्यते। `गोत्रावयवाः' इति। पुणिकादिश्रुतीनामेतद्विशेषणम्। अप्रधानगोत्राभिधायिन्य इत्यर्थः। `गोत्रभमताः' इति। गोत्रमित्येवमभिमता गोत्राभिवायिन्य इत्येवं लोके प्रसिद्धाः। न पुनर्गोत्राध्याये पठिता इत्यर्थः। अत एव तासामप्रधान्यम्; गोत्राध्यायेऽपठितत्वात्। `कुलाख्याः' इति। कुलम् = गोत्रम्, आख्यायत आभिरित्याख्याः, गोत्रेणेत्येवमादि। `ततः' इति। यथोक्तविशेषणविशिष्टाभ्यः पुणिकादिश्रुतिभ्यः। यदि तर्हि ततो गोत्रविहितयोरणिञोः ष्यङ् भवत्येवं सत्यपार्थकोऽयं योगः, पूर्वेणैव सिद्धत्वात् ? इत्यत आह-- `अगुरुपोत्तमर्थ आरम्भः'इति। `पौणिक्या' इत्यादि। पुणिकभुणिकमुखरशब्देभ्यः `अत इञ्' (4.1.95) इतीञन्तस्य ष्यङश्चाप्।।

80. क्रोड्यादिभ्यश्च। (4.1.80)

`क्रौजीत्येवमादिभ्यश्च स्त्रियां ष्यङ्प्रत्ययो भवति' इति। ननु चाचेशपक्षः पूर्वमाश्रितः, तत् किमर्थमिह प्रत्ययपक्ष आश्रीयते ? तदाश्रयणेऽप्यत्र दोषो नास्तीति प्रदर्शनार्थः। `अगुरूपोत्तमार्थ आरम्भः' इत्यादि। येऽत्रान्ता इञन्ताश्च पठ्यन्ते तान् त्ययमगुरूपोत्तमार्थ आरम्भः। ये त्वन्ये, तान् प्रत्ययमणिञर्थः। तत्राद्याः क्रौड्यादयः प्राक् चौपयतशब्दादिञन्ताः।चौपयतप्रभृतयस्त्वणन्ताः प्राक् सौधातकिशब्दात्। सौधातकिशब्दस्तु `सुधातोरकङ् च' (4.1.97) इतीञन्तः। `सूत युवत्याम्' इति। सूतशब्दाद्युवत्यां प्राप्तयौवनायां ष्यङ् भवति-- सूत्या, अन्यत्र टाबेव--सूता। `भोज क्षत्त्रिये' इति। भोजशब्दात् क्षत्त्रियजातौ वाच्यायां ष्यङ भवति। जातिलक्षणस्य ङीषोऽपवादः--भोज्या, अन्यत्र टाबेव भवति-- भोजा। तत- परे प्राग्गौकक्ष्यशब्दादिञन्ताः। स पुनर्गर्गादियञन्तः।।

81. दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम्। (4.1.81)

`गोत्रे पूर्वेण नित्यः' इत्यादि। यदा पौत्रप्रभृतावपत्य इञ् विधीयते तदा पूर्वेण `अणिञोः' (4.1.78) इत्यादिना नित्ये प्राप्ते विकल्प्यते। यदा त्वनन्तरापत्ये तदाऽप्राप्त एव पक्षे विधीयते।।

82. समर्थानां प्रथमाद्वा। (4.1.82)

`स्वार्थिकप्रत्ययवधिश्चायमधिकारः'इति। स्वार्थे प्रकृत्यर्थे भवाः स्वार्थिकाः , अध्यात्मादित्वाट्(वा.456) ठञ्। स्वार्थिकाः प्रत्यया अवधिर्मर्यादा यस्य स तथोक्तः। `प्राग्दिशो विभक्तिरिति यावत्' इति। अनेन यतः परेण स्वार्थिकाः प्रत्यया अवधिभूताः प्रवर्त्तन्ते तत्सूत्रं दर्शयन् `प्राग्दिशो विभक्तिः' (5.3.1) इत्येतत्सूत्रात् प्रागयमधिकार इच्याचष्टे। किं पुनः कारणं स्वार्थिकेष्वयमप्यधिकारो न प्रवर्त्तते ? इत्याह-- `स्वार्थिकेषु' इत्यादि। `समर्थानाम्' इति। सम्बद्धार्थानमामित्येषोऽर्थः। सम्बद्धार्थता च द्विष्ठत्वात् प्रतियोगिनि सति भवति, स्वार्थिकानाञ्च प्रकृत्यर्थादर्थान्तरं न सम्भवति यत्प्रत्ययायनाय शब्दान्तरं प्रयुज्येत,यदपेक्षया च समर्थता स्यात्। तस्मात् समर्थतावा अभावात् स्वार्थिकेषु समर्थानामित्येतत् तावन्नोपयुज्यते। अत एव प्रतियोगिनोऽभावात् प्रथमादित्येतदपि नोपयुज्यत एव। यदि हि प्रतियोगिशब्दान्तरं स्यात्, तत आशङ्का स्यात्-- किं प्रथमात् प्रत्ययः ? उत द्वितीयादिति ? ततश्च तन्निवृत्तये प्रथमादिति वचनमनुवर्त्तमानमर्थवत् स्यात्। असति तु द्वितीये प्रतियोगिनि तदनुवृत्तिर्नोपयुज्यते। `विकल्पोऽपि तत्रानवस्थितः'इति। अनियत इत्यर्थः। यतः

केचित् स्वार्थिका नित्यमेव भवन्ति। तथा च `अषडक्षाशितङ्ग्वलंकर्मालम्' (5.4.7) इत्यादौ सूत्रे भाष्यकारः परिगणनं करिष्यति-- `के पुनर्नित्याः प्रत्ययाः ? तमबादयः प्राक् कात्, ञ्यादयः प्राग्वुनः, आमादयः प्राङमयटः, बृहत्या जात्यन्तात् समासान्ताश्च' इति। तत्र `अतिशायने तमबिष्ठनौ' (5.3.55) इति तमप्प्रभृतयो ये प्रत्ययाः `प्रागिवात् कः' (5.3.70) इत्येतस्मात् प्राक् ते नित्याः। तथा `पूगाञ्ञ्योऽग्रामणीपूर्वात्' (5.2.112) इत्यतो ञ्यप्रत्ययात् प्रभृति `पादशतस्य संख्यादेर्वीप्सायां वुन्म लोपश्च' (5.4.1) इत्यतो वुनः प्राग्ये ते नित्याः। तथा `किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' (5.4.11) इत्यत आम्प्रभृति प्राक् तत्प्रकृतवचने मयटो ये प्रत्ययास्ते नित्याः। तथा `बृहत्या आच्छादने' (5.4.6) इति यो विहितः कप्रत्ययः`जात्यन्ताच्छोबन्धुनि' (5.4.9) इति च यश्चप्रत्ययो ये समासान्ता डजादयस्ते सर्वे नित्याः। तस्माद्विकल्पः स्वार्थिकेष्वनवस्थितः। ततश्च वाग्रहणमपि तत्रानवस्थितमेव क्वचिदनुवर्त्तते, क्वचिन्नेत्युक्तं भवति।

इह प्रथमादिति विशेषणं प्रयोगवाक्यस्य ? लक्षमवाक्यस्य वा ? यदि प्रथमः ,ततो लौकिके वाक्ये पदानां प्रयोगे नियमो नास्तीति; पात्रमाहर, आहर पात्रमिति प्रयोगात्। ततश्च यदापत्यमुपगोरिति प्रयुज्यते तदापत्यशब्दात् प्रथमासामर्थ्यात् प्रत्ययः स्यात्। ननु च तस्येतनेन सूत्रोपात्तेनानुकरणपदेन षष्ठ्यन्तेन प्रथमेनालौकिकवाक्यसमवायि पश्चान्निर्दिष्टमपि पदमनुकृतम्, तत् प्रथमत्वात् प्रथमव्यपदेशमासादयति। तेन यदाप्यपत्यमुपगोरिति लौकिकं वाक्यं प्रयुज्यते, तदोपगुशब्दादेव यथोक्तेनैव प्रकारेण लब्धप्रथमव्यपदेशात् प्रत्ययो भविष्यति; नापत्यशब्दात्। तदाद्येऽपि पक्षे समाश्रीयमाणे न दोष इति चेत् ? वार्त्तमेतत्; न हि मुख्ये प्रथमे सम्भवपिसति गौणस्य ग्रहणं युक्तम्। अतः सत्यप्युपगुशब्दस्य गौणेन प्रथमत्वे मुख्यात् प्रथमादपत्यशब्दादेव प्रत्ययः स्यात्, नोपगुशब्दात्। प्रतिपत्तिगौरवञ्च। द्वितीये तु पक्ष एव दोषो नावतरति; लक्षमवाक्येषु पदानां प्रयोगस्य नियत्वात्। अतस्तमाश्रित्याह-- `लक्षणवाक्यानि' इत्यादि। समर्थानां मध्ये प्रथमः प्रत्ययप्रकृतित्वेन निर्धारित इति, यथा-- कृष्णा गवां सम्पन्नक्षीरतमेति, गवां मध्ये कृष्णा गौः सम्पन्नक्षीरतमात्वेन। यदि तर्हि समर्थानां प्रथमात् प्रत्ययो भवति, एवं सति `तस्यापत्यम्' (4.1.92) इत्यत्र तस्येत्येतत्सर्वनाम। सामान्यवाचि प्रथमं निर्दिष्टमिति सामान्यवाचिन एव प्रत्ययः स्यात्, न विशेषवाचिनः; प्रातिपदिकादुपग्वित्यादेः, न हि तल्लक्षमवाक्ये प्रथमं निर्दिष्टम् ? इत्यत आह--`तस्य' इत्यादि। `विशेषलक्षणार्थम्' इति। विशेषोपलक्षणार्थमित्यर्थः। यदि हि तस्येत्येद्विशेषोपलक्षणार्थं न स्यात् तदा समर्थता तस्य न स्यात्। न हि तस्येत्येतत् प्रकरणाद्यनपेक्षं विशेषेष्वतिष्ठछते। न च विशेषेष्वनवस्थितेनानेनापत्यस्य कश्चिदुपकारः कृतो भवति; सम्बन्धिसामान्यस्य सम्बन्धिशब्दत्वात्, अपत्यशब्देनैव गमितत्वात्। ततश्चोपाकारभावात् समर्थता न स्यात्। उच्यतेचेदम्-- तस्येति। तस्मात् सामर्थ्याद्विशेषोपलक्षणार्थत्वं तस्येत्यस्य। तेन ये विशेषा उपलक्षिताः = प्रतिपदितान्ते सम्बन्ध्यन्तरव्यवच्छेदेन विशिष्टं सम्बन्धिनं प्रतिपादयन्त उपकारिणो भवन्तीत्युपपद्यते तैः सह सामर्थ्यम्। तस्मात् तस्येतत् सामान्यं विशेषोपलक्षणार्थं द्रष्टव्यम्। तेन तस्य यत् प्राथम्यं तद्विशेषाणामुपगुशब्दादीनां विज्ञायते। ततश्च तत एव प्रत्ययो भवति, न च सामान्यवाचिनः।

`कम्बल उपगोरपत्यं देवदत्तस्य' इति। अत्रोपगुशब्दः कम्बलेन सह सम्बद्धः, नापत्येन। अपत्यशब्दस्यापि देवदत्तशब्देन, नोपगुशब्देन। तस्मादपत्यशब्देन, सहोपगुशब्दस्य सम्बन्धो नास्तीति न ततः प्रत्ययो भवति।

`वाक्यमपि हि यथा स्यात्' इति। असति हि वाग्रहणे वाक्येनापत्यस्याभिधाने प्राप्तेतस्मिन्नर्थे विधीयमानः प्रत्ययस्तन्निवर्त्तयेत् । ननु च समानेऽर्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्त्तको भवति, यथा-- `गमेर्डोः' (द.उ.2.11) इत्यनेन शास्त्रान्वितो गोशब्दोऽशास्त्रान्वितस्य गावीशब्दस् समानार्थस्यैव, न तु भिन्नार्थस्य डित्थादेः। न च वृत्तिवाक्ययोः समानोऽर्थः, वृत्तौ ह्येकार्थीभावः सामर्थ्यम्, वाक्ये तु व्यपेक्षा ? नैतदेवम्; सत्यपि ह्येतस्मिन्नर्थभेदे प्रधानार्थो न भिद्यते, तथा हि-- उपगोरपत्यमानयेत्युक्ते य एवार्थोऽपत्यात्यवत्सम्बन्धविशिष्टः स आनीयते। औपगवमानयेत्युक्ते स एव। प्रधानापेक्षयैव च समानार्थः शास्त्रन्वितोऽशास्त्रान्वितं निवर्त्तयति, अन्यथा हि गोशब्दोऽपि गावीशब्दं न निवर्त्तयेत्। अस्ति हि तयोरप्यर्थभेदः, तथा हि-- गोशब्दो गोत्वमाचष्टे, गावीशब्दस्तु तथा, अशास्त्रियत्वञ्च। तस्मादसति वाग्रहणे यथा गोशब्दः सत्यप्यप्रधानार्थभेदे प्रधानार्थस्य समानर्थाद्गावीशब्दं निवर्त्तयति, तथा तद्धितोऽपि शास्त्रान्वितोऽशास्त्रन्वितं वाक्यं निवर्त्तयेत्। तस्माद्वाक्यमपि यथा स्यादिति वाग्रहणं करियते। `यद्येवम्' इत्यादि। यदि वाग्रहणेन तद्धितस्य भावाभावौ कुर्वता वाक्यस्य भावः क्रियते, एवं सति यदा वाक्यं नास्ति तदा तद्धितेनैव भवितव्यम्। समासवृत्तिरुपग्वपत्यमित्येषः तद्धितवृत्त्या बाध्येत। `नैष दोषः' इत्यादि। गतार्थम्।।

83. प्राग्दीव्यतोऽण्। (4.1.83)

`प्राग्दीव्यत्' इत्ययुक्तोऽयं निर्देशः , यावता `दीव्यति' (4.4.2) इति वक्ष्यति, न तु दीव्यदिति, तत्र दीव्यतीशब्दस्यावधित्वेनोपादाने दीव्यतेरिति निर्देशेन भवितव्यम् ? इत्यत आह-- `तदेकदेशः'इत्यादि। समस्तस्य दीव्यतिशब्दस्यावधित्वेनोपादानाे सति न युज्येतायं निर्देशः, न तु समस्तस्योपादानम्, अपि तु तदेकदेशस्य दीपव्यच्छब्दस्येत्यदोषः। अथ किमर्थं दीव्यद्ग्रहणं प्राग्ग्रहणञ्चत, नणित्येवाधिकारः क्रियताम् ? नैवं शक्यम्;एवं हि क्रियमाणे `स्त्रीभ्यो ढक्' (4.1.120) इत्येवमादिनाऽधिकारान्तरेण विच्छिननस्याणः `तेन रक्तं रागात्' (4.2.1) इत्येवमादिषु पुनर्ग्रहणं कर्त्तव्यं जायेत। अवधिनाधिकारपरिमाण आख्याते तदवधिकेष्वर्थेषु सर्वेष्वयमभ्यनुज्ञायत इतिपुनरणग्रहणं कर्त्तव्यं न भवति। तस्मादधिकारपरिमाणज्ञापनार्थं दीव्यद्ग्रहणं तावत्कर्त्तव्यम्। प्राग्ग्रहणमपि कर्त्तव्यमेव तस्यैवावधित्वद्योतनार्थम्। असति हि तस्मिन् `दीव्यतोऽण्' इत्युच्यमाने प्रकृतिरणो दीव्यच्छब्दो विज्ञायेत। `त्रिष्वपि दर्शनेषु' इत्यादि। कथं पुनरियमपवादविषयपरिहारेणाणः प्रवृत्तिर्लभ्यते, यावताधिकारे तस्मिन् सति प्रतियोगमुपस्थानादपवादविषयेऽप्यण् प्राप्नोति-- `अत इञ् अण् च' इति, अन्यथा हि तस्य तत्रोपादानमनर्थकं स्यात् ? परिभाषापक्षेऽपि प्राग्दीव्यतोऽर्थेष्वणित्यविशेषेण परिभाषिते सामान्येन परिभाषा प्रवर्त्तमाना केनापवादविषयं परिहरेत् ? विधावपि प्राग्दीव्यतो याः प्रकृतयस्ताः सर्वा इहैकध्यमुपनीयाण् विधीयमानः सर्वतः प्रवर्त्तेत, अन्यथा सर्वतो विधानमनर्थकं स्यात्

? एवं मन्यते-- ज्ञापकादपवादविषये न भविष्यतीति, यदयं क्वचिद्वाग्रहणमन्यतरस्यांग्रहणञ्च करोति-- `पीलाया वा' (4.1.118), `उदश्वितोऽन्यतरस्याम् (4.2.19) इति,तज्ज्ञापयति-- नापवादविषयेऽण् भवतीति। विधौ तु भूयान् परीहारः। न हि प्राग्दीव्यतो याः प्रकृतयस्ताभ्योऽण् विधीयते, किं तर्हि ? प्राग्दीव्यतो येऽर्थास्तेषु। तत्र समानार्थे प्रकृतिविशेषादुत्पाद्यमान इञणं बाधिष्यत इति। अथ किमर्थमियानवधिरुपादीयते, न प्राक् ठक इत्येवोच्येत, `प्राग्वहतेष्ठक्' (4.4.1) इत्येतस्माट्ठकः प्रागित्यर्थः ? नैवं शक्यम्; `दध्नष्ठक्' (4.2.18) इत्येवमादिरपि ठगवधित्वेन विज्ञायते। `प्राक् कंसीयात्' इत्येवं तर्हि वक्तव्यम्-- `कंसीयपरशब्दयोर्यञञौ लुक् च' (4.3.168) इति,तत्र यः कंसीयशब्दस्ततः प्रागित्यर्थः ? एवमप्यशक्यं वक्तुम्; `द्विगोर्लुगनपत्ये' (4.1.88) इत्येतयापि कंसीयादुत्पद्येत, ततश्च द्वयोः कंसीययोर्विकारो द्विकंस इत्यत्र लुङ्न स्यात्। तस्माद्यथान्यासमेवास्तु।।

84.अश्वपत्यादिभ्यश्च। (4.1.84)

85. दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः। (4.1.85)

`पत्युत्तरपदाच्च' इति। एतेनोत्तरपदशब्दः पतिशब्देनैव सम्बध्यते, नान्यैर्दित्यादिभिरिति दर्शयति। एतच्च प्रत्यासत्तेर्व्याख्यानाद्वा लभ्यते।

`यमाच्चेति वक्तव्यम्' इत। यमशब्दाच्च ण्यप्रत्ययो भवीत्येतदर्थरूपं व्याख्येयम्। तत्रेयं व्याख्या-- इह लाघवार्थं पत्यन्तादिति वक्तव्ये पत्युत्तरपदादित वचनमधिकविधानार्थम् । ग्रन्थाधिक्यादर्थाविषयं भवतीति। तेन यमशब्दादपि ण्यो भविष्यतीति। अथ वा--

पूर्वसत्राच्चकारोऽनुवर्त्तते,तस्मादनुक्तसमुच्चतयार्थत्वाद्भविष्यतीति। `वाङमतिपितृमताम्' इत्यादि। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। प्रतिपादनं तु तदेव ग्रन्थाधिक्यादर्थाधिक्यमाश्रित्य चकारस्यानुक्तसमुच्चयार्थस्यानुवृत्तेर्वा कर्त्तव्यम्। याम्यमित्यादिषु यथायोगं प्राग्दीव्यतीयेपत्यादावर्थे ण्यप्रत्ययः।

`पृथिव्या ञाञौ' इति। एते ञादयः-- `तद्धिताः' (4.1.76) इति बहुवचनेनानुक्ततद्धितपरिग्रहार्थेन सिद्ध्यन्तीति न वक्तव्याः। तत्र पृथिवीशब्दाद्यदा ञस्तदा टाप्-- पार्थिवा, यदा त्वञ् तदा `टिड्ढाणञ्' (4.1.15) इति ङीप्--पार्थिवी। `बहिषष्टिलोपश्च' इत्यादि। ननु च `अव्ययानां भमात्रे टिलोपः सायंप्रातिकाद्यर्थः' (वा.802) इत्येनैव टिलोपसिद्धिः, तत्किमर्थं पुनरुच्यते ? इत्यत आह-- `टिलोपपवचनम्' इत्यादि। `आरातीयः' इति। अनित्यत्वाज्ञापनस्य प्रयोजनम्। आराद्भवतीति `वृद्धाच्छः' (4.2.114)।

`स्थाम्नोऽकारः'(इति)। स्थामन्शब्दस्य केवलस्यापत्यार्थे प्रयोगो नास्तीति तदन्तस्याकारप्रत्ययो विज्ञेयः। अश्वस्येव स्थामास्येत्यश्वत्वामा, पृषोदादित्वात् सकारस्य तकारः। अश्वत्थाम्नोऽपत्यमश्वत्थामः, `नस्तद्धिते' (6.4.144) इति टिलोपः।

`लोम्नोऽपत्ये' इति। लोमशब्दो बाह्वादिषु पठ्यते, तस्य केवलस्यापत्येन सम्बन्धो नास्तीति तदन्तविदिर्विज्ञायते। अत्रापत्यविवक्षायां बहुष्विञि प्राप्ते तदपवाद एवाकारो विधीयेते। उडुलोम्नोऽपत्यानि बहून्युडुलोमाः।

`सर्वत्र' इति। अपत्ये च अन्यत्र च।अथ वा-- प्राग्दीव्यतीये चान्यत्र चार्थेऽजादिप्रत्ययप्रसङ्गं इति। अजादेः प्रत्ययस्य प्रसङ्गः = प्राप्तिः। तत्र गोशब्दात् सर्वत्र यद् भवति। यद्येवम्, `उगवादिभ्यो यत्' (5.1.2) इत्यत्र गोग्रहणं किमर्थम् ? अस्यैव प्रपञ्चार्थम्। `गव्यम्' इति। गोरपत्यम्, गवा चरतीति वा। अणष्ठको वाऽजादेर्यत्रार्थे प्रसङ्गस्तत्र यद्भवति, नान्यत्र। `गोरूप्यम्, गोमयम्' इति। `हेतुमनु,येभ्योऽन्यतरस्यां रूप्यः' (4.3.81), `मयट् च' (4.3.82)।

`ण्यादयः' इत्यादि। लक्ष्मशब्दो निमित्तवचनः,चिह्नवचनो वा। अर्थविशेषो लक्षणं यस्य सोऽर्थविशेषलक्षणोऽणपवादः। तस्मात् पूर्वविप्रतिषेधेन ण्यादयो भवन्ति। न चेदं वक्तव्यम्; परशब्दस्येष्टवाचित्वात् तेनैव सिद्धत्वात्। आदिशब्देन `उत्सादिभ्योऽञ्' (4.1.86) इत्येवमादयः प्रत्यया गृह्यन्ते। तत्र ण्यस्यावकाशः भवति-- दैत्यः, वानस्पत्यमिति। ण्यश्चायं सर्वेष्वपत्यादिष्वर्थेषु विधीयत इति सामान्यप्रत्ययो भवतीति, अतो नार्थविशेषलक्षणः। अर्थविशेषलक्षमस्याणपवादस्यावकाशः-- दुलेरपत्यमिति `इतश्चानिञःट (4.1.122) इति ढक्-- दौलेयः, ढगयमपत्य एवार्थवेशेषे विधीयत इत्यर्थविशेषलक्षणो भवति। इहोभयं प्राप्नोति-- दितेरपत्यं दैत्यः, वनस्पतीनां समूहो वानस्पत्यमिति वा, ण्यप्रत्ययो भवति पूर्वविप्रतिषेधेन। अर्थविशेषलक्षणादिति किम् ? योऽणपवादोऽर्थसामान्येनार्थविशेषे विहितः स परत्वाण्ण्यादीन् बाधित्वा भवत्येव। उष्ट्रपतिर्नाम पत्त्रम्। तस्योष्ट्रपतेरिदमिति तस्येदं विवक्षायाम् `पत्त्राध्वर्युपरिषदश्च' (4.3.133) इत्यञ्-- औष्ट्रपत्यम्, तस्येदंलक्षणो ह्ययमञणोऽपवादः, न योऽर्थविशेषलक्षणस्तस्य। अर्थविशेषा ह्यपत्यादयोऽर्थाः। तस्येदमर्थस्तु सामान्यम्, नार्थविशेषः।

`कथं वैतेयः'इति। यदि ण्यादयोऽर्थविशेषलक्षणादणपवादात् पूर्वविप्रतिषेधन भवन्ति, दैतेय इति न सिध्यति। अत्रापि हि ण्यप्रत्ययेनैव भवितव्यमिति भावः। `दितिशब्दात्' इत्यादि। दितिशब्दोऽयं `दो अवखण्डने' (धा.पा.1148) इत्यस्मात् `क्तिच्क्तौ' (3.3.174) इति क्तिच्, `द्यतिस्यति' (7.4.40) इत्यादिनेत्त्वमित्येवं यदा व्युत्पाद्यते तदा `कृदिकारादक्तिनः' (ग.सू.50) इति ङीष्। अथाव्युत्पन्नं प्रातिपदिकं तदा `सर्वतोऽक्तिन्नर्थादित्येके' (ग.सू.51) इति। ननु `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' (व्या.प.29) इति दितिशब्दो गृह्यमाणो दितीशब्दमपि ग्राहयति, ततश्च यथा दितिशब्दाण्ण्यप्रत्ययः पूर्वविप्रतिषेधेन भवति, तथा दितीशब्दादपि तेन भवितव्यमित्यत आह--`लिङ्गविशिष्टपरिभाषाऽनित्या' इति। अनित्यत्वं पुनरस्याः `अच्प्रकरणे शक्तिलाङ्गलांकुशयष्टितोमरघटघटीधनुःषु ग्रहेरुपपसंख्यानम्' (वा.235) इति घटशब्दोच्चोरणाद्वेदितव्यम्।।

86. उत्सादिभ्योऽञ्। (4.1.86)
`तदपवादानाञ्च' इति। इञादीनाम्। `वष्कयाऽसे' इति गणे पठ्यते। तस्यायमर्थः- वष्कयशब्दादञ् भवति, असे असमासे इत्यर्थः। पूर्वाचार्यैः समासस्य `स' इत्येषा संज्ञा कृता। वष्कयस्यापत्यं वाष्कयः। अस इति किम् ? `गौवष्कयिः'। `अत इञ्' (4.1.95) इतीञेव भवति। `उदस्थानाद्देशे' इति। उदस्थानशब्दाद्देशे वाच्येऽञ् भवति। उदस्थाने भवो देश औदस्थानः। देश इति किम् ? उदस्थानो नाम कश्चित्पुरुषः, तस्यापत्यमौदस्थानिः। `पृषदंशे' इति। पृषच्छब्दादंशेऽभिधेयेऽञ् भवति। पृषदोंऽशः पार्षदः। अंश इति किम् ? पार्षदोऽन्यः। अणेव भवति। कुरुशब्दोऽत्र पठ्यते, तस्यापत्यविवक्षायां कौरव इति न सिध्यति,यस्मात् `कुर्वादिभ्यो ण्यः' (4.1.151) `कुरुनादिभ्यो ण्यः' (4.1.172) इतिच ण्यप्रत्ययः प्राप्नोति। अञ्प्रत्ययो हि सामान्यविहितः, ण्यप्रत्ययस्तु विशेषविहितः। सामान्यविहितश्च विशेषविहितेन बाध्यते ? नैष दोषः; अयं योगस्तयोर्योगयोरनुवर्तिष्यते; तत्राप्यपत्येऽर्थे कुरुशब्दोऽनवकाश इत्यञपि ततो भविष्यति। अपत्यार्थस्य `तस्येदम्' (4.3.120) इत्यर्थविवक्षायां वा कौरव इति भविष्यति।
`ग्रीष्मादच्छन्दसीति वक्तव्यम्' (इति)। ग्रीष्मशब्दादच्छन्दस्यभिदेयेऽञ् भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। किमर्थमित्याह-- `इह मा भूत्' इत्यादि। छन्दसि त्रिष्टुवादौ वाच्ये सन्धिवेलादिसूत्रेण (4.3.16) ऋत्वणेव यथा स्यात्, अञ्मा भूदित्येवमर्थम्। तेन ग्रैष्मी त्रिष्टुवित्यञ् न भवति। तत्रेदं व्याख्यानम्-- वेति वर्त्तते, सा च व्यवस्थितविभाषा। तेन ग्रीष्मशब्दाच्छन्दसि वाच्येऽञ् न भवतीति। `वृत्तं गृह्यते' इति। यस्य त्रिष्टुज्जगतीत्यादयो विशेषास्तदिह वृत्तम्; अतश्छन्दो गृह्यते, न वेदः।।

87. स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्। (4.1.87)
`अत्र तावत् स्त्रीशब्दस्य स्वरूपग्रहणम्, न टाबादिस्त्रीप्रत्ययन्तस्य शब्दस्य। ततो हि `स्त्रीभ्यो ढक्' (4.1.120) इति ढकं वक्षति, तत्साहचर्यात् पुंशब्दोऽपि तद्धर्मैव विज्ञायते। तस्यापि स्वरूपग्रहणेव। `पौस्नम्' इति। `संयोगानतस्य लोपः' (8.2.23) इति लोपः।
यदि प्राग्भवनसंशब्दनात् स्त्रीपुंसाभ्यां नञ्सनञौ भवतः, वत्यर्थेऽपि तौ स्याताम्, ततश्च स्त्रीवत्, पुंवदिति न सिध्येदित्याह- `स्त्रियाः पुंवत्' इत्यादि। यदयम् `स्त्रियां पुंवत्' (6.3.34) इति निर्देशं करोति ततो ज्ञायते-- वत्यर्थे नञ्स्नञौ न भवतः। ननु चैतस्मान्निर्देशात् स्नञ्प्रत्ययो वत्यर्थे न भवतीति शक्यं विज्ञातुम्, न तु नञप्रत्ययो न भवतीति, ततश्च स्त्रीवदिति न सिध्यति ? इत्यत आह-- `योगापेक्षञ्च' इत्यादि। `पुंवत्' इति निर्देशादयं योगो वत्यर्थे न प्रवर्त्तते-- इत्यवमर्थमिदं योगापेक्षं ज्ञापकम्, न तु स्नञ्प्रत्ययापेक्षम्। तेन स्त्रीवदित्येतदपि सिध्यति।।

88. द्विगोर्लुगनपत्ये। (4.1.88)
`प्राग्दीव्यतः' इति। तस्य स्वरितत्वात्। `न भवनात्'इति। विपर्ययात्। द्विगोरिति पञ्चमी चेयं स्यात् ? षष्ठी वा ? तत्र यदि पञ्चमी, तदायमर्थः स्यात्-- द्विगोः परस्यानप्रत्यप्रत्ययस्य प्राग्दीयव्यतीयस्य लुग्भवतीति। ततश्च यथा द्विगुसंज्ञानिमित्तस्य लुग्भवति-- पञ्चकपालेषु संस्कृतः पुरोडाशः पञ्चकपाल इति, तथा यो द्विरगोर्निमित्तं न भवति तस्यापि स्यात्-- पञ्चकपालस्य पुरोडाशस्येदं खण्डम्। `तस्येदम्' (4.3.120) इत्यण्-- पाञ्चकपालमिति। तमिमं पञ्चमीपक्षे दोषं दृष्ट्वा, षष्टीपक्षमाश्रित्याह-- द्विगोरिति षष्ठी' इति। `द्विगोर्यः सम्बन्धी' इति। यस्य तद्धितस्यार्थे `तद्धितार्थोत्तरपदसमाहारे च' (2.1.51) इति समाहारद्विगुर्विधीयते स द्विगोः सम्बन्धीति; अर्थद्वारेण तदर्थस्य द्विगुसम्बन्धित्वात्। सोऽपि तद्द्वारेण द्विगुसम्बन्धी। `निमित्तत्वेन'इति। अनेन निमित्तनैमित्तिकभावेन यः सम्बन्धो तस्य लुग्भवति, न तु पौर्वापर्यभावेन यस्तस्येति दर्शयति। एतच्च निमित्तनैमित्तिकभावस्यान्तरङ्गत्वाल्लभ्यते। स हि द्विगोराद्यस्तद्धितेन सम्बन्धः; तस्मात् स गृह्यते। पौर्वापर्यभावस्तूत्तरकालमपि भवतीति बहिरङ्गो भवति, अतो न तस्य ग्रहणम्। `पञ्चकपालः' इति। पञ्चसु कपालेषु संस्कृत इति `तद्धितार्थ' (2.1.51) इति समासः, `संख्यापूर्वो द्विगुः' (2.1.52) इति द्विगुसंज्ञा, `संस्कृतम्' (4.4.3) इत्यण्, तस्य लुक्। `द्विवेदः'इति। द्वौ वेदावधीत इति पूर्ववत्समासः, `तदधीते तद्वेद' (4.1.59) इत्यण्।
`द्वैदेववत्तिः' इति। द्वयोर्देवदत्तयोरपत्यमिति `अत इञ्' (4.1.95)। `पञ्चकपालस्येदमिति पाञ्चकपालम्' इति। अत्र संस्कृतार्थे यः प्रथमः प्रत्यय उत्पन्नः स एव द्विगोर्निमित्तम्, न तु य उत्तरकालं तस्येदमित्यर्थविवक्षायाम्। न हि तस्यार्थे विषयभूते द्विगुर्विहितः, किं तर्हि ? संस्कृतार्थे यो विहितस्तस्य। तेनाद्विगुनिमित्तत्वात् `तस्येदम्' (4.3.1120) इति यो विहितस्तस्येह लुग्न भवति। `अथ वा' इत्यादि। पूर्वं हि द्विगोर्यस्तद्धितो निमित्तं तस्य लुग्विहितः, इदानीं द्विगोरेव विधीयत इत्यस्ति विशेषः। कथं पुनर्द्विगोरेव लुग्भवति ? इत्यत आह-- `द्विगोरिति स्थानषष्ठी' इति।
`ननु च' इत्यादिनानन्तरोकक्तव्याख्यानं विघटयति। `प्रत्ययस्य लुक्श्लुलुपः' (1.1.61) इतिलुगादिकाः प्रत्ययादर्शनस्यैताः संज्ञा विहिताः, ततो लुगुच्यमानोऽनेन न शक्तो द्विगोरेव लुकं विधातुमित्याभिप्रायः। `सत्यमेतत्' इति। यदनन्तरमुक्तम्। यद्येवम्, कथं लुक्संज्ञाया द्विगोर्लुग्लभ्यते ? इत्यत आह-- `उपाचारेण तु' इत्यादि। अतथाभूते वस्तुनि योऽध्यारोपिततथाभावो ज्ञानविशेषः स उपचारः। लक्ष्यतेऽनयेति लक्षणा, सापुनरिहोपचार एव `एतेन ह्यद्विगुरूपस्तद्धितो द्विगुरूपतया लक्ष्यते। यथा मञ्चाः क्रोशन्तीत्यत्रामञ्चरूपा अपि पुरुषा मञ्चरूपतया लक्ष्यन्ते, तथेहाप्यद्विगुरूपस्तद्धितो द्विगुरूपतया। उपचारस्य तु निबन्धनं द्विगुनिमित्तभूतत्वम्, यदाह--- ` द्विगुनिमित्तभूतः प्रत्यय एव द्विगुः' इति। भवति हि कारणे कार्योपचारः, यथा-- आयुर्घृतमिति।
`द्विगुनिमित्तकोऽपि तर्हि' इत्यादि। द्विगुर्निमित्तं यस्य स तथोक्तः। यो धर्म उपचारस्य निबन्धनं स इह गुणशब्देन विवक्षितः। गुणनिमित्ता कल्पना = गुणनिमित्तकल्पना, सा पुनरुपचारात्मिकैव वेदितव्या। यद्युपचारेण द्विगोर्निमित्तं प्रत्ययोऽपि द्विगुरुच्यते, द्विगुर्यस्य निमित्तं सोऽपि गौण्या कल्पनया

कस्माद्द्विगुरिति नोच्यते ? कार्येऽपि हि कारणशब्द उपचारात् प्रयुज्यमानो विद्यत एव, यथा-- पुरातनं सर्वमिदं शुभाशुभं कर्म भुज्यत इति।
`पाञ्चकपालम्' इति। पञ्चकपालस्य पुरोडाशस्येदं खण्डमित्यण्, स च द्विगोरुत्पन्नत्वाद्द्विगुनिमित्तक इत्यभिप्रायः। न तस्य द्विगुत्वं निमित्तमिति निष्पन्नत्वाद्द्वगोस्तद्धितस्योत्पद्यमानस्य न द्विगुत्वं निमित्तं, किं तर्हि ? प्रातिपदिकम्। तथा हि-- नासौ द्विगुरित्येवं विधीयते, किं तर्हि ? प्रातिपदिकादित्येवम्। तस्मात् सन्निहिताऽपि द्विगुता न प्रत्ययस्य निमित्तमिति, न च प्रत्ययो द्विगुरित्युपचारेण व्यपदेष्टुं शक्यत इति। `इतरस्तु' इति। तद्धितप्रत्ययः, यस् मूलोदाहरणे लुग्दर्शितः। `द्विगुत्वस्यैव निमित्तम्' इति। एवकारेण प्रातिपदिकस्य व्यवच्छेदः क्रियते-- द्विगुत्वस्यैव निमित्तम्, न तु प्रातिपदिकत्वस्य; यतस्तदर्थे द्विगुसमासो विधीयते,न तु प्रातिपदिकत्वमित्यस्ति विशेषः। ततश्च द्विगोर्यो निमित्तं तत्रैव द्विगुत्वव्यपदेश उपाचाराद्भवति। न तु निष्पन्नाद्द्विगोर्य उत्पद्यते तत्रापि।
`यद्येवम्'इत्यादि। यदि द्विगोर्यो निमित्तं तद्धितः सोऽत्र निमित्तत्वादुपाचारेण द्विगुरुच्यते तस्य लोपो भथवि। एवं सतीह कथं लोपः-- पञ्चकपाल्यां संस्कृतः पञ्चकपाल इति ? अत्र हि पञ्चानां कपालानां समाहार इति समाहारे द्विगौ निष्पन्ने ततस्तूत्तरकालं तद्धितो विधीयमानो न द्विगोर्निमित्तं भवति। `नैवात्र' इत्यादि परिहारः। कस्मान्नोत्पद्यत इत्याह-- `त्रैशब्द्यं हि' इत्यादि। त्रय एव शब्दाः = त्रैशब्द्यम्। चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्। इहास्माभिस्त्रैशब्द्यं साध्यम्। पञ्चकपालीशब्दस्तद्धितोत्पत्तिमन्तरेणापि सिद्धतीति न तस्मात् तद्धित उत्पद्यते। `पञ्चसु कपालेषु संस्कृतः' इत्यादिना त्रैशब्द्यं दर्शयति। `द्वयोः शब्दयोः' इत्यादि। यश्च समाहारे पञ्चकपालीशब्दः, यश्च तद्धितार्थविषये समासे पञ्चकपालशब्दस्तौ द्वावपि समानार्थौ,तयोरेकेन पूर्वेण विग्रह एवेति तस्मान्न तद्धितोत्पत्तिर्विज्ञेया। `अपरस्मादुत्पत्तिः' इति। पञ्चकपालशब्दात्। अव्यविकन्यायेन। यथाऽवेर्मांसमाविकमित्यविशब्देन विग्रहः,अविशब्दस्तु प्रत्ययमुत्पादयति तद्वदिहापि।
`अथेह कस्मान्न भवति' इत्यादि। रूप्यमयटावपि हि द्विगोर्निमित्तभूतौ, अतस्तयोरपि लुका भवितव्यमिति भावः। `वेत्यनुवर्त्तते' इति `समर्थानां प्रथमाद्वा'(4.1.82) इत्यतः। नन्वेवमपि सर्वत्र विकल्पेन लुक् प्राप्नोतीत्यत आह-- `सा च' इत्यादि। च शब्दो हेतौ। यस्मात् सा व्यवस्थितविभाषा विज्ञायते, तेन पञ्चकपाल इत्यादौ नित्यं लुग्भवति। पञ्चगर्गरूप्यमित्यादौ न भवत्येव।।

89. गोत्रेऽलुगचि। (4.1.89)
`अचि' इति। यद्येषा परसप्तमी स्याच्छविधावितरेतराश्रयता प्रसज्येत। कथम् ? गर्गस्यापत्यानि बहुनि `गर्गादिभ्यो यञ्' (4.1.105), तस्य यदि लुक् स्याच्छो न स्यात्। लुप्तेऽपि तस्मिन् `प्रत्ययलोपे प्रत्ययलक्षणम्' (1.1.62) इति चेत् ? `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलोपप्रतिषेधाद्वृद्ध्यभावेन वृद्धसंज्ञा न स्यात्, ततश्च वृद्धलक्षणच्छो न स्यात्। तस्माद्वृद्धत्वं प्रातिपदिकस्य वाञ्छतोऽलुक् पूर्व स्यात्। स चालुक छे परतो यदि भवति ततश्चालुग्विनिमित्तश्छः, तन्निमित्तश्चालुगितिव्यक्तमितरेतराश्रयत्वम्। तदिमं परसप्तम्यां दोषं दृष्ट्वा विषयसप्तमीयमिति दर्शयन्नाह-- `अजादौ प्राग्दीव्यतीये विषयभूते' इति। विषयभूते = अनुत्पन्न एव बुद्धिस्थ इत्यर्थः। `गार्गीयाः' इति। गर्गस्यापत्यानि बहूनि। गर्गादित्वाद्यञ् (4.1.105) । तस्य गर्गाणाञ्छात्रा इत्यर्थविवक्षायामजादावनुत्पन्ने बुद्ध्यभिमुखीकृते विषयभूते `यञिञोश्च' (4.1.101) इतियो लुक् प्राप्नोति तस्यानेन प्रतिषेधः क्रियते, ततश्चादिवृद्धौ कृतायां तन्निबन्धनायां च वृद्धसंज्ञायाम् `वृद्धाच्छः' (4.1.114) इति च्छः, ईयादेशः, `यस्येति च' (6.4.148) इत्यकारलोपः, `आपत्यस्य च तद्धितेऽनाति' (6.4.151) इत यकारस्य। `वास्तीयाः' इति। पूर्वेण तुल्यम्। `आत्रेयीयाः' इति। अत्त्रेरपत्यानि बहूनि। `इतश्चानिञः' (4.1.122) इति ढक्, तस्य `अत्त्रिभृगुकुत्स' (2.4.65) इत्यादिना लुकि प्राप्तेऽत्रीणां छात्रा इति च्छे विषयभूते तस्य प्रतिषेधः। `खारपायणीयाः' इति। खरपस्यापत्यानि बहूनि। `नडादिभ्यः फक्' (4.1.99), `यस्कादिभ्यो गोत्रे' (2.4.63)इति तस्य प्राप्तस्य लुकः खरपाणां छात्रा इति च्छे विषयभूते प्रतिषेधः।
`कौबलम्, वादरम्' इति। कुबलीवदरीशब्दौ गौरादिङीषन्तौ प्रत्ययस्वरेणान्तोदात्तौ, तयोः शेषमनुदात्तम्। तेन कुबल्या विकारः फलम्, वदर्या विकारः फलमित्यर्थविवक्षायाम्। `अनुदात्तादेरञ्' (4.2.44) तस्य `फले लुक्' (4.3.163) इति तयोर्लुग् यः प्राप्नोति तस्य कुबलस्येदं वदरस्येदमित्यर्थविवक्षायामजादौ छे विषयभूते प्रतिषेधो न भवति; गोत्रग्रहणात्। गोत्रे यः प्रत्ययो वाचकत्वेन वर्त्तते तस्य लुकः प्रतिषेधेन भवितव्यम्। न चायमञ् गोत्रे वाचकत्वेन वर्त्तते, अपि तु विकारे, तेन तस्य लुग्भवत्येव। तस्मिन् सति `लुक्तद्धितलुकि' (1.2.49) इति स्त्रीप्रत्ययस्यापि लुक्। अञि लुप्ते वृद्ध्यभावादवृद्धत्वं नास्तीत्यणेव भवति, न तु च्छः। `गर्गरूप्यम्, गर्गमयम्' इति। पूर्ववद्रूपमयटौ। यद्यत्रालुक् स्याद्गार्ग्यरूप्यं गार्ग्यमयमिति स्यात्। `गार्गीयम्' इति। `तस्मै हितम्' (5.1.5) इति `प्राक्क्रीताच्छः' (5.1.1) इति च्छः, स च प्राग्दीव्यतीयो न भवति; दीव्यतः परेण विधानात्। `गोत्रस्य' इति। गोत्रप्रत्ययस्य । `बहुषु लोपिनः' इति। बहुष्वर्थेषूत्पन्नस्य यस्य लोपो विधीयते स बहुषु लोपी। `बहुवचनान्तस्य प्रवृत्तौ' इति। प्रवृत्तिः = अर्थान्तरसंक्रान्तिः। एतदुक्तं भवति-- बहुवचनान्तस्यार्थान्तरसंक्रान्ताविति। सा चार्थान्तरसंक्रान्ताविति। सा चार्थान्तरसंक्रान्तिस्तदन्ताद्यदा यूनि प्रत्यय उत्पद्यते तदा भवतीति वेदितव्यम्; तदा गोत्रान्तस्य यूनि प्रवृत्तेः। `द्वयेकयोः' इति। यदा गोत्रप्रत्ययान्तादेकस्मिन्नर्थे यूनि द्वयोर्वा यूनोः उत्पद्यते तदाऽर्थान्तरसंक्रान्तौ सत्यामलुग्भवति। बिदस्यापत्यानिबहुनि। `अनुष्यानन्तर्ये बिदादिभ्योऽञ' (4.1.104) इत्यञ्, स च `यञञोश्च' (2.4.64) इति बहुषु लुग्विधानाद्बहुषु लोपी भवति, तदन्ताद्युवविवक्षायामेकस्मिन् यूनि द्वयोर्वा `अत इञ्' (4.195), तस्य ण्यक्षत्त्रियादिसूत्रेण (2.458) लुकि कृते गोत्रप्रत्ययान्तस्य तस्यार्थान्तरसंक्रान्तौ सत्यां गोत्रप्रत्ययस्याञ इहापि बहुषूत्पन्नस्य लग्न भवति। कथं पुनर्न भवति, यावताऽलुको विषयाभावात्

प्राग्दीव्यतीयोऽजातिरिञ् प्रत्यय उपनीतः ? प्रत्ययलक्षणम्' (व्या.प.96) इति च परिभाषा। यथा गवे हितं गोहितमिति चतुर्थीसमासे सुब्लुकि कृते प्रत्ययलक्षणेन चतुर्थीविभक्तिमाश्रित्य गोशब्दस्य `एचोऽयवायावः' इत्यवादेशो न भवति; वर्णाश्रयत्वात्। वर्णाश्रयत्वं तु तस्याचि विधानात्। यथा च `वर्णाश्रये नास्ति प्रत्ययलक्षणम्ट (व्या.प.96) इति परिभाषा, तथा बैदः, बैदौ-- इत्यत्राप्यलुका वर्णाश्रयतया न भवितव्यम् ? नैतदस्ति, न ह्यलुगत्र वर्णाश्रयः, किं तर्हि ? तद्धिताश्रयः। अचीत्येतत् त्विह सूत्रे विशेषणत्वेनोक्तम्। अत एव वृत्तावुक्तम्-- अजादौ प्राग्दीव्यतीये प्रत्यय इति। तस्मात् तस्याः परिभाषाया इहोवस्थानेऽसति `गोत्रेऽलुगचि' इति भवतीति, अनेनैवात्रालुक् सिद्धः। स च बहुषु युवसु मा भूदिति द्वयेकयोरेवेत्युपसंख्यानम्। तत्र बिदा इत्येव भवति। `एकवचनद्विवचनान्तस्य' इत्यादि। एकवचनान्ततस्य गोत्रप्रत्ययस्य द्विवचनान्तस्य च बहुष्वर्थेषु युवसंज्ञकेषु प्रवृत्तौ संक्रान्तौ सत्यां लुग्वक्तव्यः। तत्र बैदस्येत्येकवचनान्तं गोत्रम्, बैदयोरिति द्विवचनान्तम्। अत्र च पूर्ववदञ्, तयोर्युवापत्यबहुत्वविवक्षायाम् `अत इञ्' (4.1.95) । तस्य ण्यक्षत्त्रियादिसूत्रेण (2.4.58) लुकि कृतेऽञोऽपि गोत्रप्रत्ययस्य लुगिष्यते। स च न प्राप्नोति, तस्मादुपसंख्यायते। किं पुनः कारणं न प्राप्नोति ? इत्याह-- `न ह्यत्र' इत्यादि। `यञञोश्च' (2.4.64) इति अनेन हि बहुषूत्पन्नोर्लुग्विधीयते, न चाञ् हुहषूत्पन्न,किं तर्हि ? एकस्मिन् द्वयोश्च, तस्मान्न प्राप्नोतीति। तदेवं सर्वथा बहुषु बिदा इत्येवं भवितव्यमिति स्थितम्।।

90. यूनि लुक्। (4.1.90)

`यूनि' इति। `व्यत्ययो बहुलम्' (3.1.85) इति षष्ठ्यर्थे सप्तमी। अत एव वृत्तावाह--`युवप्रत्ययस्य' इति। अजादौ प्रत्यये विवक्षिते बुद्धिस्य इत्यादिनाऽचीति विषयसप्तमीत्वं दर्शयति। यद्येषां परसप्तमी स्यात्, यत्रापि च्छप्रत्ययो नेष्यते तत्रापि स्यात्। युवप्रत्ययान्तस्य बुद्धत्वादित्यभिप्रायः। `फाण्टाहृतरूप्यम्, फाण्टाहृतमयम्' इति। यद्यत्र लुक् स्यात्, फाण्टाहृतरूप्यं फाण्टाहृतमयमिति न स्यात्। `भागवित्तिकीयम्' इति। प्राक्क्रीतीयच्छः (5.1.1) पूववत्।।

91. फक्फिञोरन्यतरस्याम्। (4.1.91)

`गार्गीयाः, वात्सीयाः' इति। पूर्वपदकारयकारलोपः। `वा' (4.1.82) इति वर्त्तमानेऽन्यतरस्यां ग्रहणं `पूर्वसूत्रे नित्यो विधिः' इति ज्ञापनार्थम्।।

92. तस्यापत्यम्। (4.1.92)

`पूर्वैरुत्तरैश्च प्रत्ययैरभिसंबध्यते' इति। तत्र पूर्वैस्तावदणादिभिः सम्बध्यते; असंयुक्तविधानात्। अस्य यदि पूर्वैरभिसम्बन्धो न भवेत् `तस्यापत्यमत इञ्' इत्येकयोगमेव कुर्यात्। यतस्तु `अत इञ्' (4.1.95) इत्यनेन `तस्यापत्यम्' (4.1.92) इत्येतदसंयुक्तं करोति, ततोऽसंयुक्तविधानात्पूर्वार्थमेतद्विज्ञायत इत्येवं तावत्पूर्वैरभिसम्बध्यते। उत्तरैरप्यभिसम्बध्यते; तेष्वस्य स्वरितत्वात्। `तस्य' इति। पुंल्लिङ्गेन निर्देशः क्रियते, एकवचनेन च। तेन पुंल्लिङ्गादेवोत्पत्तिः स्यात्, एकवचनान्ताच्च। स्त्रीलिङ्गान्नपुंसकाच्च न स्यात्-- देवदत्ताया अपत्यम्, कुलस्यापत्यमेवमादौ न स्यात्। द्विवचनबहुवचनान्ताच्च-- द्वयोर्मात्रोरपत्यम्, तिसृणां मातृणामपत्येवमादौ न स्यात्। अथ नपुंसकलिङ्गेनायं निर्देशः ? स्त्रीलिङ्गात् पुंल्लिङ्गाच्च न स्यात्। अपत्यमित्येकवचनेऽत्र निर्देशः क्रियते, तेनैकस्मिन्नेवापत्ये स्यात्, न द्वयोर्नापि बहुषु-- उपगोरपत्ये औपगवौ; उपगोरपत्यान्यौपगवा इति। एतस्मिन् पूर्वपक्ष इदमाह-- `प्रकृत्यर्तविशिष्टः' इत्यादि। `गृह्यते' इति वक्ष्यमाणेन सम्बन्धः। प्रकृत्यर्थ उपगवादिशब्दानामर्थः,तेन विशिष्टः षष्ठ्यर्थोऽपत्यापत्यवत्सम्बन्धः। ननु च तस्यात्र तच्छब्दस्य सामान्यवाचिनो ग्रहणम्, तस्य कृत उपगवादिरर्थविशेषः, येन षष्ठ्यर्थो विशिष्यते ? तस्येत्यस्य विशेषोपलक्षणत्वाददोषाः। विशेषोपलक्षणत्वं चास्य प्रागेव प्रतिपादितम्। तस्माद्विशेष एवोपग्वादिः प्रकृत्यर्थः। `अपत्यमात्रञ्च' इति । मात्रशब्दोऽधिकस्य लिङ्गादेर्व्यवच्छेदाय। `लिङ्गवचनादिकम्' इति। आदिशब्देन कालस्य ग्रहणम्। वर्त्तमानेन हि कालेनायं निर्देशः क्रियते। यथोक्तम्-- `यत्रापि साक्षादन्यक्रियापदं न श्रूयते तत्राप्यस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति गम्यते' इति। तत्र वर्त्तमानकालविवक्षायां कालान्तरे न स्यात्। किं पुनः कारणं लिङ्गवचनादि न विवक्ष्यते ? तस्याप्रधान्यात्। अवश्यं हि येन केनचिल्लिङ्गादिना निर्देशः कर्त्तव्य इति, नान्तरीयकत्वात्। तस्येहोपादानम्, यथा-- धान्यार्थिनः पलालादेरप्रधानस्यापि।

`तस्येदम्' इत्यादि। `तस्येदम्' (4.3.120) इत्येतत्सूत्रमपत्यार्थेऽपि वर्त्तते। यो ह्युपगोरपत्यमुपगोरसावयमिति शक्यते व्यपदेष्टुम्। तस्येदमित्यस्य विशेषा ह्येते-- अपत्यम्, समूहः, निवासः, विकार इति। ततश्च `तस्येदम्' (4.3.120) इत्यनेनैवापत्यार्थेऽप्यण् सिद्धः, तत् किमर्थं तस्यापत्यमित्येतत् सूत्रं कृतम् ? `बाधनार्थम् कृतं भवेत्' इति। `तस्येदम्' (4.3.120) इत्यनेन विधीयमानस्याणो यो बाधकः `वृद्धाच्छः' (4.2.114) इति च्छः प्राप्नोति, तद्बाधनार्थमिदं कृतम्। एतत्सूत्रविहितेनाणा छप्रत्ययस्य बाधनं यथा स्यात्। कथं पुनरशैषिकः शैषिकं बाधते ? अपत्यादिभ्यश्चतुरर्थीपर्यन्तेभ्योऽन्योषडर्थः शैषिकाणां विषयः। अयं चापत्याच्छविषये नास्त्येव। तदसन्नयं कथं छप्रत्ययं बाधिष्यत इत्यत आह-- `उत्सर्गः शेष एवासौ' इति। असत्यस्मिन् योग इत्यभिप्रायः। असावित्यनेन प्रकृतत्वात् तस्यापत्यमित्येषोऽर्थः प्रत्यवमृश्यते। उत्सर्ग उत्पन्नेनाप्यणा स एवार्थ उत्सर्गसाहचर्यादुच्यते। उत्सर्गसाहचर्यन्तु तस्य तत्रोत्सर्गस्याणादेर्विधानात्। इहापि क्रियमाणे `तस्यापत्यम्' (4.1.92) इत्येतस्मिन् योगे `तस्येदम्' (4.3.120) इत्येतस्मिन्ननुप्रवेशाद्यथान्यस्तद्विशेषः शेषो भवति तथाऽपत्यार्थोऽपि। अस्ति तस्याप्युपयुक्तापेक्षमन्यत्वम्, `चतुरर्थीपर्यन्तेष्वनन्तर्भावात्। ततश्च शेषत्वादपत्यार्थे च्छप्रत्ययः प्राप्नोति। अस्मिंस्तु योगे

`तस्येदम्' (4.3.120) इत्यत्र शेषे नानुप्रविशति; उपयुक्तत्वात्। ततश्चाशेषत्वादपत्ये छप्रत्ययस्य छप्रत्ययस्य प्राप्तिर्नास्त्येव। सैवाप्राप्तिर्बाधनशब्देनोक्ता। अथ बाधनार्थस्यास्य किं प्रयोजनमित्याह-- `वृद्धान्यस्य प्रयोजनम्' इति। वृद्धानि प्रातिपदिकान्यस्य योगस्य प्रयोजनम्। भानोरपत्यं भानवः, श्यामगोरपत्यं श्यामगव इत्यत्राण् सिद्धो भवति। असति त्वस्मिन् योकेऽपत्यार्थः पूर्वोक्तरीत्या शेषः स्यात्। ततश्च तत्र वृद्धेभ्यचः `वृद्धाच्छः' (4.2.114) प्रसज्येत।।

93. एको गोत्रे। (4.1.93)

`कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः'(व्या.प.6) इति परिभाषिकस्यैव गोत्रस्य ग्रहणम्। अपत्याधिकारे गोत्रग्रहणाच्च। अपत्यमात्रं हि लौकिकं गोत्रम्, तस्य यदीह ग्रहणमभिमतं स्यादेक इत्येवं ब्रूयात्, लौकिकस्य गोत्रापत्याधिकारादेव लब्धत्वात्। तस्माद्गोत्रग्रहणाच्च पारिभाषिकस्य ग्रहणमत्याह--`अपत्यं पौत्रप्रभृति गोत्रम्' इति। `भेदेन' इत्यादि। भेदेन = विभागेन, अपत्यमपत्यं प्रति = प्रत्ययत्यम्। यावन्त्यपत्यानि सम्भवन्ति तेभ्योऽपि सर्वेभ्यः प्रत्ययानामुत्पत्तेः प्रसङ्गे प्राप्तौ सत्यामित्यर्थः। सर्वेषामपत्येन योगेन गर्गगार्गिगार्ग्यगार्ग्यायणानामन्यतमस्य यदपत्यं तत्सर्वेषामपत्यं भवतीति परमप्रकृतेरनन्तरगोत्रमुवलक्षणाः प्रत्ययाः प्राप्नुवन्ति। गर्गस्य यदपत्यं तत्सर्वेषां गार्गिगार्ग्यगार्ग्यायणानामपि सम्बन्धि भवति। तथा ह्यत्र यद्यपि गर्गस्यापत्यमिति गर्गशब्देन विग्रहः क्रियते, तथापि नायंनियमो लभ्यते-- गर्गशब्दादेवोत्पत्तिरिति, अपि तु कामचारः। ततश्च यदा गर्गशब्दादुत्पत्तिर्भवति तदा गर्गादित्वाद्यञ् (4.1.105) , यदा गार्गिशब्दात् तदा `यञिञोश्च' (4.1.101) इति फक्, यदापि गार्ग्यशब्दात् तदापि स एव फक्, यदा गार्ग्यायमशब्दात् तदा `अत इञ्' (4.1.95) । एवं प्रत्यपत्यं विभागेन प्रत्ययानामुत्पत्तौ प्रसक्तायामनेन नियमः क्रियते-- `एक एव प्रत्ययो भवति' इति। एतेन प्रत्ययनियम इति दर्शयति। प्रत्ययनियमस्त्वेकस्त्वेकशब्दस्य प्रत्ययशब्दसामानाधिकरण्याल्लभ्यते। एकशब्दश्चास्मिन्नियमे संख्यावचनो वेदितव्यः यथा--एकः,द्वौ, बहव इति। एवकारेण द्वयादिव्यवच्छेदः क्रियते-- एक एव प्रत्ययो भवति,न द्वौ, नापि बहव इति। स चैकः प्रत्ययो भवन्नेकग्रहणात् परमप्रकृतेरेव भवतीति सामर्थ्यादुक्तं भवतीति। यदि हि गार्गिशब्दादुत्पद्येत्, द्वौ स्याताम्-- इञ्फकौ, नैकः ? अथ गार्ग्यशब्दादेवमपि द्वावेव-- यञ्फकौ ? अथ गार्ग्यायणशब्दात्, त्रयः स्युः-- यञ्फगिञः। तस्मान्मूलप्रकृतेरेवोत्पत्तावेकः प्रत्ययः सिध्यतीत्येकग्रहणं कुर्वता सामर्थ्यान्मूलप्रकृतेरेव गोत्रप्रत्ययस्योत्पत्तिरुक्ता भवति। ननु चोत्पादयितैवापत्येन सम्बध्यते, एवं हि लोके दृश्यते-- पितामहस्योत्सङ्गे दारकमासीनं दृष्ट्वा कश्चित् पृच्छति-- कस्यायमिति ? स आह-- देवदत्तस्येति, तेनोत्पादयितारं व्यपदिशति, नात्मानम् ? ततः सर्वेषामपत्येन योगाभावात् प्रत्यपत्यं भेदेन प्रत्ययोत्पत्तिप्रसङ्गो नास्त्येवेति निवर्त्त्याभावादिदं नियमार्थं नारब्धमित्यत आह-- `सर्वेऽपत्येन युज्यन्ते' इति।

अत्रैवोपपत्तिमाह-- `अपतनादपत्यम्' इति। यन्निमित्तं हि यसय् पापेष्वपतनं तदपतनात् तस्यापत्यं भवति। तस्माद्यो व्यवहितेन जनितः सोऽपि परमप्रकृतिवाच्यस्यार्थस्यापत्यं भवति,तस्यापि येनापतनात्। परमप्रकृतिग्रहणञ्चोपलक्षणं वेदितव्यम्। इतरप्रकृतिवाच्यस्यापि ह्यर्थस्याव्यवहितजनितोऽपत्यं भवत्येव। यत्पुनरुक्तम्-- कस्यायमित्युक्ते उत्पादयितारं व्यपदिशति, नात्मानमिति, न तेनोत्पादयितुरेवापत्येन योगः, शक्यते प्रतिपादयितुम्। यस्मान्न तत्र यस्य तेनापतनं स जिज्ञासितः स्यात्, किं तर्हि ? य उत्पादयितारं व्यपदिशति नात्मानम्। यदि यस्य तु तेनापतनं स जिज्ञासितः स्यात्, तदाऽऽत्मानमपि व्यपदिशेदेव। यदि च सर्वेऽपत्येन न युज्येरन्, `अपत्यं पौत्रप्रभृति गोत्रम्' (4.1.162) इति योऽयमपत्यपौत्रप्रभृतिशब्दयोः सामानाधिकरण्येन निर्देशः, स नोपपद्यते; यदपेक्षया पौत्रादिव्यपदेशमासादयन्ति पुमांसस्तं प्रति तेषामनपत्यत्वात्। तस्मादतोऽपि निर्देशात्-- सर्वेऽपत्येन युज्यन्त इति विज्ञायते।

`तत्पुत्रोऽपि गार्ग्यः' इति। अपिशब्दात् तत्पौत्रादिरपि। किं पुनः कारणं तत्पुत्रोऽपि गार्ग्य इत्याह-- `सर्वस्मिन्' इत्यादि। यदपि गार्ग्यायण इत्यत्रैकेन व्यवहितेन जनितं गोत्रापत्यं यस्मात् तत्रापि गर्गशब्दाद्यञेव भवति, तस्मात् तत्पुत्रोऽपि गार्ग्यो भवति। गर्गशब्दादित्यनेन परमप्रकृतेर्भवतीति दर्शयति। एतच्चैकग्रहणाल्लभ्यत इत्युक्तम्।

`अथ वा' इत्यादिना प्रकृतिनियमं दर्शयति प्रकृतिनियमस्त्वेकशब्दस्य प्रकृतिसामानाधिकरण्याल्लभ्यते। एकशब्दोऽत्र प्राथम्यनियमे वर्त्तत इति वेदितव्यम्, यथा-- वर्गाणां प्रथमद्वितीयाः संवृतकण्ठाः श्वासानुप्रदाना अघोषा एकेऽल्पप्राणा इतरे सर्वे महाप्राणा इति। अत्र हि प्रथमेऽल्पप्राणा इति गम्यते। एकशब्दस्येदं विवरणम्-- `प्रथमा प्रकृतिः' इति। का च प्रथमा ? या परमप्रकृतिरप्रत्ययान्ता `गर्ग नड' इत्येवमादिका। `प्रकृतिर्नियम्यते' इति। प्रथमैव प्रकृतिः प्रत्ययमुत्पादयति, नाप्रथमा-- गार्गिगार्ग्यगार्ग्यायणप्रभृतिशब्दाः प्रत्ययान्ताः। गर्गस्यापत्यं गार्ग्यः, तत्पुत्रोऽपि गार्ग्यः। नडस्यापत्यं नाडायनः, तत्पुत्रोऽपि नाडायनः। सर्वत्र व्यवहितजनितेऽपि गोत्रापत्ये प्रथमा प्रकृतिः प्रत्ययमुत्पादयति।।

94. गोत्राद्यून्यस्त्रियाम्। (4.1.94)

`अयमपि नियमः' इति। न केवलं पूर्वः--- इत्यपिशब्देन दर्शयति। सर्वेषां ह्यपत्येन योगे परमप्रकृत्यनन्तरयुवभ्योऽपि युवापत्यविवक्षायां प्रत्ययः प्राप्नोति, अतस्तन्निवृत्त्यर्थं नियमः क्रियते। `गोत्रादेव'इति। गोत्रपत्ययान्तादेवेत्यर्थः। अनेन नियमस्वरूपं दर्शयति। `न परम' इत्यादिना नियमस्य व्यवच्छेद्यम्।

`गार्ग्यायणः, दाक्षायणः' इति। गोत्रे यौ यञिञौ विहितौ तदन्तात् `यञिञोश्च' (4.1.101) इति फक्। `औपगविः' नाडायनिः' इति। गोत्रे यावण्फकौ विहितौ तदन्तात् `अत इञ्' (4.1.95)।

`दाक्षी' इति। वक्षस्यापत्यं चतुर्थ स्त्री। `अत इञ्' (4.1.95), `इतो मनुष्यजातेः' (4.1.65) इति ङीष्।

`किं पुनरत्र प्रतिषिध्यते' इति। सर्वस्मिन् प्रतिषिध्यमाने दोषं मन्यते। तमेव दोषमाविष्कर्तुमाह-- `यदि' इत्यादि। `स्त्रियामनियमः प्राप्नोति' इति।

परमप्रकृत्यनन्तरयुवभ्योऽपि स्त्रियां युवप्रत्ययः प्राप्नोतीत्यर्थः। `गोत्रसंज्ञाया युवसंज्ञया बाधितत्वात्' इति। `जीवति तु वंश्ये युवा' इत्यत्र तुशब्दोऽवधारणार्थः कृतः। तेन अभिधानं न प्राप्नोति। `तस्मात्' इत्यादि। यत एव च नियमयुवप्रत्यययोरुभयोरपि प्रतिषेधे दोषः, तस्मात् तन्निरासाय योगविभागः कर्त्तव्यः। तत्र ` गोत्राद्यूनि' इत्येको योगः, अनेन च नियमः क्रियते, यदाह-- `गोत्राद् यूनि प्रत्ययो भवति' इति. ततः `अस्त्रि याम्' इति द्वितीयो योगः। तेन च यूनीत्यत्र यदुक्तं कार्यं तस्य प्रतिषेधः क्रियते, यदाह-- `यूनि यदुक्तं स्त्रियां तन्न भवति' इति। `युवसंज्ञैव प्रतिषिध्यते' इति। कथम् ? `अस्त्रियाम्' इत्यत्र हि योगे यूनीत्येतदनुवर्त्तते, तेनैवं विज्ञायते-- यूनि यदुक्तं कार्यं स्त्रियां तन्न भवतीति। युवसंज्ञा च यून्येव कार्ययुक्तेत्यतः सैव प्रतिषिध्यते। `युवसंज्ञैव' इति। एवकारेण नियमयुवप्रत्यययोर्व्यवच्छेदः क्रियते। `तेन स्त्री गोत्रपत्ययेनाभिधास्यते' इति। तस्यां युवसंज्ञायां प्रतिषिद्धायां गोत्रसंज्ञाया अविचलत्वात्।।

25. अत इञ्। (4.1.95)

`अतः'इत्यनेन प्रकृतं प्रातिपदिकं विशिष्यते, विशेषणेन च तदन्तविधिर्भवतीत्यत आह-- `अकारान्तात् प्रातिपदिकात्' इति। अथात इति `अत सातत्यगमने' (धा.पा.34) इत्यस्य क्विबन्तस्य ग्रहणं कस्मान्न विज्ञायते ? `शिवादिभ्योऽण्' (4.1.112) इति वचनात्। तद्धीञो बाधनार्थं क्रियते। यदि चेह स्वरूपग्रहणं स्यात्, शिवादिभ्यः प्रसङ्ग एव नास्तीति तेभ्यस्तद्बाधनार्थमण्विधानमनर्थकं स्यात्, क्रौड्यादीनाञ्चेञन्तानां पाठात्। तस्मादकारान्तस्यैवेदं ग्रहणम्। यद्येवम्, अस्यापत्यमिरित्यत्र न प्राप्नोति, अनकारान्तत्वात् ? एतदपि व्यपदेशिवद्भावेनाकारान्तं भवतीत्यदोषः। `शुभंयाः, कीलालपाः' इति। यातेः, पिबतेश्च `आतो मनिन्क्वनिब्वनिपश्च' (3.2.74) इत्यत्र हि `विजुपेश्छन्दसि' (3.2.73) इत्यतश्चकारेण विजप्यनुकृष्यते।

`कथम्' इत्यादि। दशरथशब्दादप्यकारान्तादिञा भवितव्यम्। ततः `दाशरथाय' इत्यणन्तस्य प्रयोगो नोपपद्यत इति भावः। `शेषविवक्षायाम्' इत्यादि। एतेन दशरथस्यायमित्यर्थविवक्षायामत्राण विहितः, न तु `तस्यापत्यम्' (4.1.92) इत्यर्थविवक्षायामिति दर्शयति। यदा तु दशरथस्यापत्यमिति विवक्ष्यते, तदेञ्भवत्येव-- दाशरथिरिति।।

96. बाह्वादिभ्यश्च। (4.1.96)

`बाहविः' इति। `ओर्गुणः' (6.4.146)।

`क्वचित्' इति। अजीगर्त्ताविष्कारान्तेषु। बाहुप्रभृतीनां वटाकुपर्यन्तानामनकारान्तत्वात् प्राप्त्यर्थः पाठः। चूडाशब्दस्य च `द्व्य चः' (4.1.121) इति ढकि प्राप्ते। वृकलादीनां प्राक् पुष्करसच्छब्दात् `अवृद्धाभ्यो नदीमानुषीभ्यः' (4.1.113) इत्यणि प्राप्ते। पुष्करसदित्येवमादीनां लोमशब्दपर्यन्तानां प्राप्त्यर्थः, अनकारान्तत्वात्।

`अमितौजसः सलोपश्च' इति। अमितौजस्शब्दादिञ् भवति, सलोपश्च। आमितौजिः। उदञ्च्विति पठ्यते, तत्राञ्चतेर्धातोश्चकारो वेदितव्यः। नायं पुनरकारान्तः, किं तर्हि ? क्विन्नन्तः, प्रत्ययवेलायां निपातनादनुनासकिलोपो न भवति। उदीचोऽपत्यमौदञ्चिः। शिरः शब्दस्तदन्तविधिं प्रयोजयति, केवलस्य नपुंसकस्यापत्येन सम्बन्धाभावात्। हस्तिशिरसोऽपत्यं हास्तिशीर्षिः, `ये च तद्धिते' (6.1.61) इत्यत्र चकारस्यानुक्तसमुच्चलोम्नोऽपत्यम्-- और्ध्वलोमिः। अजीगर्त्तादीनां प्रागुदङ्कशब्दात् `ऋष्यन्धकवृष्णि' (4.1.114) इत्यादिनाणिबाधके प्राप्ते। `उदङ्कः संज्ञायाम्' इति। उदङ्को नाम कश्चित्, तस्यापत्यमौदङ्किः। `सम्भूयोऽम्भसोः सलोपश्च' (इति)। सम्भूयस्, अम्भसित्येतयोरिञ् भवति, सकारलोपश्च-- साम्भूयिः,आम्भिः।

`बाह्वादिप्रभृतिषु' इति। प्रभृतिशब्देनेत ऊर्ध्वं ये वक्ष्यन्ते ते परिगृह्यन्ते। `येषां दर्शनं गोत्रभावे लौकिके' इति। दर्शनं = प्रसिद्धिः। लौकिके गोत्रे भावः = संज्ञाकारित्वम्। येषां लौकिकगोत्रभावे प्रसिद्धिस्तेषां बाह्वादिषु परिग्रहो द्रष्टव्यः । `ततोऽन्यत्र तेषां प्रतिषेधः' इति। येषां लौकिके गोत्रभावे न दर्शनमपि तु ततोऽन्यत्र दर्शनम्, तेषां प्रतिषेधो वेदितव्यः। तेन बाहुर्नाम कश्चिदादिपुरुषो यः संज्ञाकारित्वेन प्रसिद्धो यदपत्यसन्तानान्तः पातिनः पुमांसो बाहुव्यपदेशमासादयन्ति, तत एवेञ् भवति। यस्त्विदालीन्तनो बाहुर्नाम कश्चित् ततोऽणेव भवति-- बाहव इति। एतच्च वेत्यनुवृत्तेर्व्यवस्थितविभाषाविज्ञानाच्चलभ्यते। सम्बन्धिशब्दानाञ्च श्वशुरादीनाञ्च यत्कार्यमुच्यते तस्य तत्सादृश्यात् प्रतिषेधो भवति। अत्रापि पूर्वोक्त एव हेतुर्वेदितव्यः। राजश्वशुराद्यत्' (4.1.137) इति श्वशुरशब्दाद्यत्प्रत्ययः सम्बन्धिशब्दादेव भवति, न संज्ञाशब्दात्। तेन श्वशुरो नाम कश्चित्, तस्यापत्यं श्वाशुरितीञेव भवति। `संज्ञाश्वशुरस्य' इति। संज्ञया यः श्वशुरः, न सम्बन्धेन स संज्ञाश्वशुरः।।

97. सुधातुरकङ् च। (4.1.97)

`व्यासवरुड' इत्यादि। व्यासादीनामिञ्, तत्सन्नियोगेन चाकङादेशो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- पूर्वसूत्रामिह चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः,तेन व्यासादीनामपि भविष्यति। `वैयासकिः' इति। `न य्वाभ्याम्' (7.3.3) इत्यादिनैज्वृद्धिप्रतिषेधौ। अथ बाह्वादिष्वेव सुधातृशब्दमधीत्य तत्र चाकङादेशः कस्मान्न कृतः, यथा-- अमितौजसः सलोपश्चेति गणे पठ्यते ? सूत्रे वा, न तत्र कश्चिल्लाघवाभावाद्विशेषो लभ्यत इति यत्किञ्चिदेतत्।।

98. गोत्रे कुञ्जादिभ्यश्च्फञ्। (4.1.98)

`इञोऽपवादः' इति। अकारान्तत्वात् कुञ्जादीनाम्। `चकारो विशेषणार्थः'इति। यद्यत्र चकारो न क्रियेत ततः `व्रातच्फञोरस्त्रियाम्' (5.3.113) इत्यत्रापि नैव क्रियते, च्फञ्प्रत्ययस्याभावात्। ततश्च `वातफञोरस्त्रियाम्' इत्युच्यमाने `अश्वादिभ्यः फञ्' (4.1.110) इत्यस्यापि ग्रहणं स्यात्। `कौञ्जायन्यः, कौञ्जायन्यौ' इति। `पूगाञ्ञ्योऽग्रामणीपूर्वात्' (5.3.112) इत्यतः `ञ्यः' इत्यनुवर्त्तमाने `व्रातच्फञोरस्त्रियाम्' (5.3.113) इति स्वार्थ ञ्यः। `कौञ्जायनाः' इति। `ञ्यादयस्तद्राजा-' (5.3.119) इति तद्राजसंज्ञकत्वात् `तद्राजस्य बहुषु' (2.4.62) इत्यादिना लुक्। किं पुनरत्र ञित्वस्वरेण भवितव्यम् ? उत चित्स्वरेण ? इत्यत आह-- `एकवचनद्विवचनयोः' इत्यादि। एकवचनद्विवचनयोस्तावत् सति तस्मिन् चित्स्वरे पश्चाद् ञ्ये विहिते समुपजायमानो ञित्स्वरः सतिशिष्टो भवतीति तेनैव भवितव्यम्। बहुवचने तु ञ्ये निवृत्ते प्राप्ते तं त्यक्त्वा चित्स्वर एवेष्यते। कथं पुनरिष्यमाणोऽपि स लभ्यते, चित्करणसामर्थ्यादिति चेत् न; ञित्करणसामर्थ्याद् ञित्स्वरोऽपि लभ्यते। एवं तर्हि स्वरविधौ योगविभागः करिष्यते,इदमस्ति-- `चितःट (6.1.163) इति; ततः `तद्धिितस्य' (6.1.164) इति, तत्र `चितः' इत्येवानुवर्त्तते। किमर्थमिदम् ? परत्वात् `ञ्नित्यादिर्नित्यम्' (6.1.197) इत्याद्युदात्तत्वं प्राप्नोति, तद्बाधनार्थम्। ततः `कितः' (6.1.165) इति, कितश्च तद्धितस्यान्त उदात्तो भवति।।

99.नडादिभ्यः फक्। (4.1.99)

नडादिषु `शलङ्कु शलङ्कञ्च' इति पठ्यते। तस्यायमर्थः- शलङ्कुशब्दः प्रत्ययमुत्पादयति शलङ्कभावं चापद्यते, तेन शालङ्कायन इति भवति। `पैलादिषु 'इति। पैलादिषु शालङ्किशब्द इञन्तः पठ्यते, तत उत्पन्नस्य युवप्रत्ययस्य लुग्यथा स्यात्-- `शालङ्कि पिता, शालङ्किः पुत्रः' इति। तत्र हि `ण्यक्षत्त्रियार्षञितः' (2.4.58) इत्यादेः सूत्रात् `यूनि लुक्' इति चानुवर्त्तते, तस्य शालङ्गिशब्दस्य तत्र पाठो न युज्यते-- नडादिषु पाठात् फका भवितव्यमिति कृत्वा, तत् कथमिञन्तस्तत्र पठ्यत इति चोद्यम्। तस्य परिहारमाह-- `गोत्रविशेषे' इत्यादि। कौशिकं यद्गोत्रं तत्रैव शलङ्कुशब्दादाचार्यः फकं स्मरन्ति, ततोऽन्यत्र त्विञेव भवतीत्यदोषः। स त्विञ् बाह्वादेराकृतिगणत्वाल्लभ्यते। अभ्युपेत्यापि गोत्रमात्रे फको विधानम्। परिहारान्तरमाह-- `अथ वा' इत्यादि। इञो भाव उपलक्षणम्। शलङ्कभावस्यापि हि पैलादिपाठ एव ज्ञापकम्। पूर्वत्रापि परिहारे तस्य एव ज्ञापकं वेदितव्यम्। `अग्निशर्मन् वृषगणे' इति। अग्निशर्मञ्शब्दाद्वृषगणे गोत्रे फग्भवति-- आग्निशर्मायणः। अन्यत्राणेव-- आग्निशर्मः। `अमुष्य' इति पठ्यते। ततर् निपातनाद्विभक्तेरलुक्-- आमुष्यायण इति। `कृष्णरणौ ब्राह्मणवाशिष्ठयोः' इति। कृष्णरणशब्दौ यथाक्रमं ब्राह्मणे वाशिष्ठे चाभिधेये फकमुत्पादयतः। कार्ष्णायनो ब्राह्मणः। राणायणो वशिष्ठः। वशिष्ठगोत्र इत्यर्थः। अन्यत्रेञेव भवति-- कार्ष्णिः, राणिरिति। `क्रोष्टु क्रोष्टञ्च' इति पठ्यते। क्रोष्टुशब्दः फकमुत्पादयति, क्रोष्टञ्चापद्यते -- क्रौष्टायनः।।

100. हरितादिभ्योऽञः। (4.1.100)

`न च' इत्यादि चोद्यम्। `सत्यमेतत्' इत्यादि परिहार उच्यते। गोत्रे योऽञ् विहितस्तदन्तेभ्यो हरितादिभ्यः फक्। न च गोत्रप्रत्ययादपरो गोत्रप्रत्ययः सम्भवति। तत्र सामर्थ्यादगोत्राधिकारेऽपि यूनि प्रत्ययो विज्ञायते। यद्येवम्, गोत्राधिकारः किमर्थः ? इत्याह-- `गोत्राधिकार उत्तरार्थः' इति।।

101. यञिञोश्च। (4.1.101)

अथ `द्वीपादनुसमुद्रं यञ्' (4.3.10) इति यो यञ् विहितः, यश्च `वृञ्छण्' (4.2.80)इत्यादिना सूत्रेण सुतङ्गमादिभ्य इञिति तदन्तात् कस्मान्न भवति, न ह्यत्र कश्चिद्विशेष उपात्तः ?इत्यत आहः-- `द्वीपादनुसमुद्रं यञ्' इत्यादि। गोत्रग्रहणेन ह्यत्र यञिञौ विशेष्येते-- गोत्रे यौ यञिञाविति। न च `द्वीपात्' (4.3.10) इत्यादिना गोत्रे यञ् विहितः,किं तर्हि ? जातादावर्थविशेषे। नापि सुतङ्गमादिभ्यो गोत्रे इञ् विहितः, किं तर्हि ? तदस्मिन्नस्तीति देशे' (4.2.67,70) इत्येवमादिषु चतुर्ष्वर्थेषु, तेन तदन्तान्न भवति। यदि तर्हि गोत्रग्रहणेनेह यञिञौ विशेष्येते, न प्रत्ययार्थः, एवं सति क्वायं प्रत्ययो भवतीति न विज्ञायत इत्यत आह--`तदन्तात्' इत्यादि। कस्मात् तदित्याह-- `गोत्राद्यूनीति वचनात्' इति।।

102. शरद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु। (4.1.102)

`गोत्र इत्येतत्' इति। यदि तर्हि गोत्र इति वर्त्तते, भुगुवत्साभ्यां मूलप्रकृतिभ्यां प्रत्ययार्थस्य विशेषणं नोपपद्यते, गोत्रप्रत्ययाभ्यामेव हि ताभ्यां गोत्रापत्यं प्रत्ययार्थः शक्यो विशेषयितुम्,अत एव युक्तं स्याद्वक्तुम्-- भार्गववात्स्यायनाग्रायणेष्विति ? नैष दोषः;गोत्राधिकारसामर्थ्याद्धि गोत्रापत्य एव वर्त्तमानाविह गृह्येते, कार्ये कारणोपचारं कृत्वा। तामेव गोत्रापत्ये तयोर्वृत्तिं दर्शयितुं वृत्तावित्युक्तम्-- `शारद्वतायनो भवति भार्गवश्चेत्, शौनकायनो भवति वात्स्यश्चेत्' इति।।

103. द्रोणपर्वतजीवन्तादन्यतरस्याम्। (4.1.103)

`कथम्' इत्यादि। यदि गोत्रापत्ये द्रोणादिभ्यः फग्भवति, तत्कथं द्रौणायनः, द्रोणतः प्रतीत्येवमादिषु प्रयोगेष्वनन्तरोऽश्वत्थामा इत्युच्यते ? `नैवात्र' इति। नात्रेदानीन्तनो द्रोणस्तदनन्तरापत्ये फका द्रोणायन इति, किं तर्हि ? `अनादिः'इति। श्रुतिसम्भवदर्शनार्थमिदमुक्तम्। येन हेतुनाश्वत्थामा द्रौणायन इत्युच्यते तमिदानीन्तनेत्यादिना दर्शयति। `इदानीन्तनात्'इत्यादि। अनादिद्रोणव्यवच्छेदपरमेतद्वेदितव्यम्। न हि तावद्भारतद्रोण इदानीन्तनो भवति; चिरातीतत्वात्।

चिरातीतोऽप्यर्थो बुद्धौ परिभाव्यमानो वर्त्तमानतां प्रतिपद्यते, यथा-- अद्य कंसो हन्यताम्। इदानीन्तनाद् द्रोणादप्यश्वत्थाम्नि द्रोणायन इत्येवं गोत्रप्रत्ययेन यदभिधानं तदध्यारोपेण भवति। अविद्यमानस्यैव तत्रासञ्जनमध्यारोपः। कस्याध्यारोपः ? गोत्रस्य । `श्रुतिसामान्यात्' इति। अध्यारोपे हेतुः। अनादेर्द्रोणस्याश्वत्थानम्नः पितुश्च द्रोण इति समाना श्रुतिः। अतः श्रुतिसामान्यादनादिद्रोणापत्यस्य यो धर्मो गोत्रत्वं तद्भावं भारतद्रोणापत्येऽश्वत्थाम्न्यपि श्रुतिसामन्याच्चलितबुद्धयः प्रतिपत्तार अध्यारोपयन्ति। तेनाध्यारोपेण द्रोणायन इति तत्राभिधां प्रवर्त्तते।।

104. अनृष्यानन्तर्ये बिदादिभ्योऽञ्। (4.1.104)

`ये पुनरत्रानृषिशब्दाः' इत्यादि। ननु च सूत्रे आनन्तर्यशब्दो भावप्रत्ययान्त उपात्तः,तत्रैवं विवरितव्यम्-- ये पुनरत्रानृषिशब्दाः पुत्त्रादयस्तेभ्योऽपत्यानन्तर्य एव भवति ? नैतदस्ति; न ह्ययं भावे ष्यञ् विहितः, किं तर्हि ? स्वार्थ एव, चातुर्वर्ण्यवत्; अन्यथापत्यस्य धर्म आनन्तर्ये प्रत्ययः धर्म आनन्तर्ये प्रत्ययः स्यात्, नापत्ये, तत्रेष्यते च।

कथं पुनर्गोत्राधिकारे सत्यनुषिभ्योऽनन्तरापत्य एव प्रत्ययो लभ्यते ? अत्र गोत्रग्रहणं निवर्त्तते। ऋषिशब्देभ्योऽनन्तरापत्य एव स्वदित्यत आह-- `अनृष्यानन्तर्य इत्यस्यायम्' इत्यादि। `यद्ययमर्थः' इत्यादि। अस्मिन् ह्यर्थे सत्यनृष्यानन्तर्य इत्येतद्विष्यर्थ भवति; अनृषेरनन्तरापत्ये प्रत्ययविधानात्। ततश्च ऋष्यपत्य आनन्तर्येप्रतिषेधो न कृतः स्यादित्याह-- `ऋषिशब्दोऽत्रऋषिजातावृषित्वे वर्त्तते। `अपत्येषु नैरन्तर्यम्' इति। `सप्तमी' (2.1.40) इति योगविभागात्समासः। पश्चादृषेरपत्यनैरन्तर्यमिति षष्ठीसमासः। तदायमर्थो भवति-- ऋषित्वस्यापत्येषु नैरन्तर्यविषयेऽञः प्रतिषेधो न कृतः स्यात्। अथ वा-- ऋषयश्च तेऽपत्यानि च ऋष्यपत्यानि, तेषां नैरन्तर्यं तद्विषये प्रतिषेधोऽञः प्रत्ययस्य न कृतश्च स्यादित्यर्थः। ततर् को दोषः ? इत्याह-- `तत्रेदम्' इत्यादि। सप्त काश्यपा ऋषयोऽपत्यापत्यवत्सम्बन्धेन परसप्रं सम्बद्धाः, येषां मित्त्रहूर्नाम काश्यपः सप्तमः, तेषामुषित्वस्यापत्येषु नैरन्तर्यम्। तत्र ऋष्यपत्यानां वा नैरन्तर्ये विषयेऽञः प्रतिषेध इष्यते,काश्यपानामित्येतद्रूपं यथा स्यात्। अञि सति तस्य बहुषु लोपाभावात् काश्यपानामिति प्राप्नोति। स च प्रतिषएधोऽस्मिन्नर्थे सति न प्राप्नोति, ततश्च काश्यपानामिति न सिध्यति। तस्मात् `अनृष्यानन्तर्ये' इत्यस्य ऋष्यपत्यनैरन्तर्येण न भवतीत्येषोऽर्थो विज्ञायत इत्यभिप्रायः। `अनन्तरापत्यरूपेणैव' इति। न चात्र गोत्रापत्यं विवक्षितम्। किं तर्हि ? किं तर्हि ? अनन्तरापत्यम्। अतोऽनन्तरापत्यरूपेणैव ऋष्यणा ऋष्यन्धकादिषु (4.1.114) विहितेन काश्यपानामित्यभिधानं भविष्यति। एतदेव द्रढयितुमाह-- `अवश्यञ्च' इत्यादि। ऋष्यपत्यं नैरन्तर्यं विषयो यस्य प्रतिषेधस्य स तथोक्तः। ऋषित्वस्यापत्येषु ऋष्यपत्यानां वा यन्नैररन्तर्य तद्विषये प्रतिषेधे विज्ञायमान इत्यर्थः। `कौशिको विश्वामित्र इति दुष्यति' इति। किं कारणम् ? विश्वामित्रस्तपस्तेपे-- नानृषिः स्यामिति, तत्रभवानृषिः सम्पन्नः,स पुनस्तपक्षेपे --नानृषेः पुत्त्रः स्यामिति, तत्रभवान् गाधिरपि ऋषिः सम्पन्नः; स पुनस्तपस्तेपे-- नानृषेः पौत्रः स्यामिति; तत्रभवान् कुशिकोऽपि ऋषिः सम्पन्नः। तदेतद्भवति-- ऋषित्वस्यापत्येषु नैरन्तर्यम्,ऋष्यपत्यानां वानन्तर्यम्। ततश्च ऋष्यपत्यनैरन्तर्ये न भवतीत्येवं विज्ञायमाने कौशिको विश्वामित्र इति न सिध्यति।

`परस्त्री परशुञ्च' इति।परस्त्रीशब्दः प्रत्ययमुत्पादयति परेशुभावञ्चापद्यते। परस्त्रिया अपत्यं पारशवः।।

105. गर्गादिभ्यो यञ्। (4.1.105)

`कथं मानवी प्रजा'इति। गर्गादिषु पाठाद्यञा भवितव्यम्, ततश्च मानवीति न सिध्यतीति। लोहितादिलक्षणे हि यञन्तात्तु ष्फे विहिते मानव्यायनीति भवितव्यमित्यभिप्रायः। गोत्रमित्युच्यते, गोत्रे हि यञ् प्रत्यय उच्यते, नापत्यसामान्ये। तेन तत्रौत्सर्गिकोऽण् मानवीति भविष्यति। `कथम्' इत्यादि। यदि गोत्रमित्युच्यते, ततो यथा गर्गशब्दादनन्तरापत्ये यञ् न भवति, तथा च जमदग्निपराशरशब्दाभ्यामपि न भवितव्यम्, तत्कथमनन्तरो रामो जामदग्न्यः, व्यासः पाराशर्य इत्यत्र यञ् भवति ? `गोत्ररूपाध्यारोपेण भविष्यति' इति। यदानन्तरापत्ययोरपि गोत्ररूपयो रामव्यासयोर्विवक्षितत्वाद्गोत्ररूपाध्यारोपः क्रियते, तदा यञ् भवतीत्यदोषः। असतो न युक्ता विवक्षेत्येतच्च न सम्भावनीयम्; दृश्यते ह्यसतोऽपि विवक्षा, यथा-- विन्ध्यो वर्द्धितकः, समुद्रः कुण्डिकेति। यदा तर्ह्यनन्तरापत्यविवक्षा भवति, तदा केन भवितव्यमित्याह-- `अन्तरापत्यविवक्षायां तु' इत्यादि। `वाजाऽसे'इति। वाजशब्दो यञमुत्पादयति। असे, असमास इत्यर्थः। वाज्यः असमास इति किम् ? सौवाजिः।।

106. मधुबभ्रोर्ब्राह्मणकौशिकयोः। (4.1.106)

यदि तर्हि बभ्रुशब्दस्य गर्गादिपाठादेव सिद्धे कौशिके नियमार्थमिह ग्रहणम्, एवं सति नार्थो गर्गादिषु पाठेन, कौशिके विध्यर्थमेव ग्रहणमस्तु, नास्य ? इत्यत आह-- `गर्गादिषु पाठोऽपि' इत्यादि। गर्गादिषु पाठोऽपि कर्त्तव्यः। `सर्वत्र लोहितर' (4.1.18) इत्यादिनान्तर्गणकार्य ष्फो यथा स्यात्। अथ गण ए कौशिकग्रहणं कस्मान्न कृतम्, कः पुनरेवं सति गुणो भवति, सुत्रे पुनर्बभ्रुग्रहणं न कर्त्तव्यं भवति ? सत्यमेतत्; `अपाणिनीयत्वात्' गणस्य। नैवं चाकरणे पाणिनिरुपालम्भमर्हति। गणकारेणापि हि किं न कृतम् ? वैचित्र्यार्थम्। विचित्रा हि गणस्य कृतिर्गणकारेण।।

107. कपिबोधादाङ्गिरसे। (4.1.107)

`कापेयः'इति। `इतश्चामिञः' (4.1.122) इति ढञक्। यदि कपिशब्दो गर्गादिषु पठ्यते, नियमार्थं त्विह तस्य ग्रहणम्, एवं सत्याङ्गिरसे विध्यर्थमेवास्य

ग्रहणमेवास्तु,नार्थो गर्गादिषु पाठेन ? इत्यत आह-- `लोहितादिकार्यार्थश्च' इत्यादि।।

108. वतण्डाच्च। (4.1.108)
किमर्थमिदम् ? अनर्थकमिदमित्यर्थः। किं कारणमित्याह-- `यावता' इत्यादि। `शिवादिष्वपि' इत्यादिना प्रयोजनं दर्शयति। यदीदं नोच्येत, ततो गर्गादिपाठादाङ्गिरसे यथा यञ् भवति, तथा शिवादिषु पाठादणपि स्यात्। तस्मादाङ्गिरसे यञा शिवाद्यणो बाधनं यथा स्यादित्येवमर्थं पुनर्वचनम्। अथ गर्गादिपाठादेव सिद्धे, आङ्गिरसे नियमार्थमेतदिति कस्मान्नोक्तम् ? अशक्यमेवं वक्तुम्; प्रयोजनाभावे हि नियमार्थं भवति। इह चास्ति प्रयोजनम्, तच्च दर्शितमेव।।

109. लुक् स्त्रियाम्। (4.1.109)
`वातण्ड्यायनी' इति। लोहितादिलक्षणः ष्फः।।

110. अश्वादिभ्यः फञ्। (4.1.110)
`ये त्वत्र' इत्यादि। `एको गोत्रे' (4.1.93) इति वचनाद्गोत्रप्रत्ययान्तादपरो गोत्रप्रत्ययो नोपपद्यते। तत्र सामर्थ्यादगोत्राधिकारेऽपि ये गोत्रप्रत्ययान्ताः पठ्यन्ते तेभ्यः `गोत्राद्यून्यस्त्रियाम्' (4.1.94) इति यूनि प्रत्ययो विज्ञायते। `शप आत्रेये' इति। शपशब्दात् फञात्त्रेयश्चेद्भवति शापायन आत्त्रेयः, अन्यत्र शापिः। वैल्यशब्दो गोत्रप्रत्ययान्तः, तस्माद्यूनि भवति । विलिर्नाम राजर्षिः, तस्यापत्यं गोत्रम्, `वृद्धेत्कोसलाजादाञ् ञ्यङ्' (4.1.171), वैल्यः, तस्यापत्यं वैल्यायनो युवा। आनडुह्यशब्दोऽपि गोत्रप्रत्ययान्तो गर्गादिषु, य़ञन्तत्वात्; तस्मादपि यून्येव फञ्-- आनडुह्यायनो युवा। स्त्रियां ढगेव भवति-- जाताया अपत्यं जातेयः। `आत्त्रेय भारद्वाजे'इति। आत्त्रेयशब्दात् फञ् भारद्वाजश्चेदपत्यार्थो भवति-- आत्त्रेयायणो भारद्वाजः, अन्यत्र आत्त्रेयिः। `भारद्वाज आत्त्रेये' इति। भारद्वाजशब्दात् फञ् आत्त्रेयेऽपत्यविशेषे-- भारद्वाजायन आत्त्रेयः, अन्यत्र -- ऋष्यण्।।

111. भर्गात्त्रैगर्त्ते। (4.1.111)

112. शिवादिभ्योऽण्। (4.1.112)
`यथायथम्' इति। यथास्वम्। यस्य य इञादिरात्मीयप्रत्ययस्तदपदादोऽण् विधीयते। अथाण्ग्रहणं किमर्थम्, न `शिवादिभ्यः' इत्येवोच्येत ? `शिवादिभ्यः' एतावत्युच्यमाने यथाविहितमिञादिरेव प्रत्ययो मा भूत्, अणेव यथा स्यादित्येवमर्थमिति चेत्; नैतदस्ति; यथाविहितमिञादीन् प्रत्ययान् प्रत्येतद्वचनमनर्थकम्; विनाप्यनेन तत्सिद्धेः। तस्मादन्तरेणाप्यण्ग्रहणमणेव भविष्यति। ननु चासत्यण्ग्रहणे फञः प्रकृतत्वात् तस्यैव विधिर्विज्ञायते ? नैतदस्ति; यदि हि शिवादिभ्यः फञ् विधातुमिष्टः स्यात्, ततोऽश्वादिष्वेव तेषां पाठं कुर्यात्। इदं तर्हि प्रयोजनम्-- अयमुष्टिषेणशब्दः शिवादिषु पठ्यते, तस्य `सेनान्तलक्षणकारिभ्यश्च' (4.1.152) इति ण्यप्रत्ययः प्राप्नोति। तत्रासत्यण्ग्रहणे पुनर्विधानमिदं तद्बाधने कृतार्थमिति ततो यथाविहितमिञेव स्यात्, नाण्; ततोऽणेव यथा स्यादित्यण्ग्रहणम्।
`उदीचामिञं बाधितुम्' इति। `उदीचाम्' (4.1.153) इत्यनेनेञ् प्राप्नोति, ततस्तं बाधितुं तक्षन्शब्दोऽतर् पठ्यते। तथा तर्हि तक्षन्शब्दस्यात्र पाठादुदीचामिञ् बाध्यते, तथा `सेनान्तलक्षणकारिभ्यश्च' (4.1.152) इति यो ण्यस्तस्यापि बाधा प्राप्नोति। ततश्च `ताक्षण्यः' इति न सिध्यति ? इत्याह-- `ण्यप्रत्ययस्य तु बाधो नेष्यते' (इति)। कथमनिष्यमाणमपि न भवति ? सुपिष्टशब्दादिभिः साहचर्यात्। इह यस्तक्षञ्शब्दः सुपिष्टमयूरखरदूरतक्षन्नित्येवं सुपिष्टादिभिः सह पठ्यते, यथा तेषाञ्चेञपवादार्थोऽत्र पाठः, तैः साहचर्यादस्यापीञपवादार्थ एव पाठो विज्ञास्यते। तत्र शिवादीनां प्राग् भूरिशब्दादिञपवादार्थं वचनम्। भूरि, सन्धि, मुनि-- इत्येतेषां `इतश्चानिञः' (4.1.122) इति ढकि प्राप्ते। कुठार, अनभिम्लान-- इत्येतयोः ककुत्स्थ-- इत्येमादीनां प्राग् जरत्कारुशब्दादिञो बाधनार्थम्। जरत्कारुप्रभृतीनां प्राक् सुपिष्टशब्दात् `स्त्रीभ्यो ढक्' (4.1.120) इति ढकि प्राप्ते। सुपिष्टादीनां प्राक् तक्षञ्शब्दादिञः। तक्षन्नित्यस्य कारिलक्षणोदीचामिञः। ऋष्टिषेणस्य सेनान्तलक्षमस्य ण्यस्य च बाधनार्थम्। गङ्गादिपाट्शब्दयोर्यस्मिन्नप्राप्त इह पाठः स वृत्तिकारेणैव व्याख्यातः। यस्कादिभ्यः प्राग् भूमिशब्दादिञि प्राप्ते। भूमिशब्दस्य `इतश्चानिञः' (4.1.122) इति ढकि। इलाशब्दस्यापि `{द्व्यचः इति सूत्रम्} द्व्यचश्च' (4.1.121) इति ढकि। एमेव सपत्नीशब्दस्यापि `स्त्रीभ्यो ढक्' (4.1.120) इति ढक्येव। `द्व्यचो नद्याः' इति। नदीवाचका ये द्व्यचस्तेभ्योऽण् भवति, सन्ध्या-- सान्ध्यम्, कुल्या-- कौल्यम्। ननु चात्र तन्नामिकोऽणस्त्येव ? सत्यमस्ति; स तु `द्व्यचः' (4.1.121) इति ढका बाध्यते। तस्मात् तद्बाधनार्थं वचनम्। `त्रिवेणी त्रिवणञ्च' इति। त्रिवेणीशब्दः प्रत्ययमुत्पादयति, त्रिवणञ्चापद्यते। त्रिवेण्या अपत्यं त्रैवणः।।

113. अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः। (4.1.113)
शास्त्रान्तरे परिभाषितमपि वृद्धमस्ति-- अपत्यमन्तर्हितं वृद्धमिति; इह शास्त्रेऽपि परिभाषितं वृद्धमस्ति `वृद्धिर्यस्याचामादिस्तद्वृद्धम्' (1.1.73) इति, अतो वृद्धप्रतिषेधे कस्यचित् सन्देहः स्यात्-- कस्य वृद्धस्यायां प्रतिषेधः, किंस्वित् यदिह परिभाषितं तस्यायं प्रतिषेधः ? उत यच्छास्त्रान्तरेण परिभाषितं तस्येति

? अतस्तन्निरासाय `वृद्धिर्यस्य' 91.1.73) इत्यादिनेह शास्त्रे यत् परिभाषितं तस्यायं प्रतिषेध इति दर्शयति। कुतः पुनरेतदवसितम्-- इह वृद्धं यत् परिभाषितं तस्यायं प्रतिषेध इति दर्शयति। कुतः पुनरेतदवसितम्-- इह वृद्धं यत् परिभाषितं तस्यायं प्रतिषेध इति ? नदीमानुषीनामधेयस्य गोत्रप्रत्ययान्तस्यासम्भवात्। नदीग्रहणे त्विह लौकिक्येव नदी गृह्यते, न तु पारिभाषिकी। कुत एतत् ? लौकिकार्थवृत्तिना मानुषीशब्देन साहचर्यात्। अथ स्वरूपग्रहणमेव नदीमानुषीशब्दयोः कस्मान्न भवति ? वृद्धप्रतिषेधात्। स्वरूपग्रहणे हि वृद्धप्रतिषेधोऽनर्थकः स्यात्; प्रसङ्गाभावात्। बहुवचननिर्देशाच्च न स्वरूपग्रहणम्। स्वरूपग्रहणे ही नदीमानुषीशब्दयोर्द्वित्वाद्द्विचनेनैव निर्देशं कुर्यात्। `अवृद्धाभ्य्इति शब्दधर्मः स्यात्। यदि तर्ह्यर्थधर्मोऽयम्, कथं नदीमानुषीभ्य इत्यनेन प्रकृतयो निर्दिश्यन्ते, अर्थधर्म एव ह्येवं निर्दिष्टो भवति, न प्रकृतयः? इत्यत आह-- `तेन' इत्यादि। तेनार्थभेदोपचारात्। नदीमानुष्यभिधायिन्यः प्रकृतयो निर्दिश्यन्ते। `प्रत्ययप्रकृतिः' इति। प्रत्ययस्य प्रकृतिरिति षष्ठीसमासः। `ढकोऽपवादः' इति। अवृद्धादीनां नदीनां मनुषीणां नामधेयानां स्त्रीप्रत्ययान्तत्वात्। `वैतस्तः, नार्मदः' इति। वितस्तानर्मदाशब्दाभ्यामण्। `शैक्षितः' इति। शिक्षिताशब्दात्।
`सौपर्णेयः, वैनतेयः' इति। सुपर्णाविनताशब्दौ पक्षिणीनामधेये, न नदीमानुष्यौ। `शौभनेय-' इति। शोभनाशब्दो वर्त्तते नदीमानुष्यर्थः, न तु संज्ञात्वेन, किं तर्हि ? विशेषणत्वेन।।

114. ऋष्यन्धकवृष्णिकुरुभ्यश्च। (4.1.114)
`इञोऽपवादः' इति। ननु चानकारान्तेभ्योऽत्स्त्र्यादिभ्यो ये ढगादयः प्राप्नुवन्ति तदपवाद एव युक्त इत्यत आह-- `अत्र्यादिभ्यस्तु' इत्यादि। एकेनादिशब्देन ऋषयो जातसेनादयोऽन्धकादिषु च वर्त्तमाना उग्रसेनादयः, परिगृह्यन्ते, द्वितीयेन ण्यादयः प्रत्ययाः। तत्र ऋष्यणोऽवकाशः-- वासिष्ठः, `इतश्चानिञः' (4.1.122) इति ढकोऽवकाशः--दौलेयः;अत्त्रिशब्दादुभयप्राप्तौ परत्वाद् ढग्भवति-- आत्त्रेयः। ऋष्यणोऽवकाशः स एव, सेनान्तलक्षमस्य ण्यस्यावकाशः-- कारिषेण्यः, हारिषेण्यः;जातसेनो नाम ऋषिः, तस्मादुभयप्राप्तौ परत्वाण्ण्यो भवति--- जातसेन्यः। अन्धकाणोऽवकाशः--वासुदेवः, ण्यस्य स एव; शूरसेनो विष्वक्सेनो नाम वृष्णिः, तस्मादुभ्यप्राप्तौ परत्वाण्ण्यो भवति-- शौरसेन्यः , वैष्वक्सेन्यः। कुर्वणोऽवकाशः--नाकुलः,ण्यस्य स एव; उग्रसेनो नामान्धकः,तस्मादुभयप्राप्तौ परत्वाण्ण्यो भवति-- औग्रसेन्यः। वृष्ण्यणोऽवकाशः-- वासुदेवः, ण्यस्य स एव; शूरसेनो विष्वक्सेनो नाम वृष्णिः, तस्मादुभयप्राप्तौ परत्वाण्ण्यो भवति-- शौरसेन्यः, वैष्वक्सेन्यः। कुर्वणोऽवकाशः--नाकुलः, ण्यस्य स एव; भीमसेनो नाम कुरुः, तस्मादुभयप्राप्तौ परत्वाण्ण्यो भवति-- भैमसेन्यः।
`कथं पुनः' इत्यादि चोद्यम्। `केचिदाहुः' इत्यादि चोद्यपरिहारः। `काकतालीयम्' इति। अबुद्धिपूर्वकमित्यर्थः। `सङ्कलिताः' इति। समुच्चिताः। `नित्या एव' इति। अन्धकादीनां वंशानामनादित्वात्।।

115. मातुरुत्संख्यासम्भद्रपूर्वायाः। (4.1.115)
`द्वैमातुरः'इति। प्राक् तद्धितार्थे विषये द्विकुः, पश्चात् तद्धितः। `साम्मातुरः' इति। पूर्वं प्रादिसमासः, पश्चात् तद्धितः।`भाद्रमातुरः' इति। पूर्वं विशेषणसमासः; ततस्तद्धितः।
अथ प्रत्ययार्थ वचनं कस्मान्न भवति ? इत्याह-- `प्रत्ययः पुनः' इत्यादि। उत्सर्गलक्षणेनैव `तस्यापत्यम्' (4.1.92) इत्यनेन। ननु च संख्यादिपूर्वत्वं मातृशब्दस्य विशेषणम्, तत्र मातृशब्दापेक्षया निर्देशः क्रियमाणः पुंल्लिङ्ग एव दृश्यते, तत्कथं `संख्यासम्भद्रपूर्वायाः' इति स्त्रीलिङ्गेन निर्देशः ? इत्यत आह-- `स्त्रीलिङ्गनिर्देशोऽर्थापेक्षः' इति। मातुः शब्दस्य योऽर्थस्तदपेक्षोऽयं निर्देशः, स चार्थः स्त्रीलिङ्गः। तेन स्त्रीलिङ्गेन निर्देशः कृतः। `तेन' इत्यादिनार्थापेक्षस्य फलं दर्शयति। अर्थापेक्षे हि स्त्रीलिङ्गनिर्देशे स्त्रीलिङ्गो यस्यार्थो मातृशब्दस्य , तस्यैव ग्रहणेन भवितव्यम्, तेन धानयमातुर्ग्रहणं न भवति। न हि तस्य स्त्रीलिङ्गोऽर्थः, किं तर्हि ? पुंल्लिङ्गः। धान्यं मिमीते यो भृतकः स धान्यमातेत्युच्यते।
`सौमात्रः' इति। प्राक् प्रादिसमासः। तत औत्सर्गिकोऽण्।।

116. कन्यायाः कनीन च। (4.1.116)

117. विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्त्रिषु। (4.1.117)
अत्र वत्सभरद्वाजास्त्रिशब्दा वात्स्यभारद्वाजात्त्रेयेषु गोत्रविशेषेषु लब्धवृत्तय उपात्ता इति। अत एवाह-- `वैकर्णो भवति वात्स्यश्चेत, शौङ्गो भवति बारद्वाजश्चेत्, चागलो भवत्यात्त्रेयश्चेत्' इति। सा पुनस्तेषां गोत्रापत्ये वृत्तिः कार्ये कारणीपचाराद्वेदितव्या।
`द्वयमपि चैतत् प्रमाणम्' इति। कथं पुनः परस्परविरुद्धमपि प्रमाणं भवति ? इत्याशङ्क्याह-- `उभयथा ह्येतत् सूत्रमाचार्येण प्रणीतम्, तस्मात् को विरोधः।।

118. पीलाया वा। (4.1.118)

119. ढक्च मण्डूकात्। (4.1.119)

120. स्त्रीभ्यो ढक्। (4.1.120)
`इह स्त्रीग्रहणेन टाबादिस्त्रीप्रत्ययान्ताः शब्दाः गृह्यन्ते' इति। अथ स्वरूपग्रहणं कस्मान्न भवति ? बहुवचननिर्देशात्। स्वरूपग्रहणे हि तस्यैकत्वादेकवचनेनैव निर्देशं कुर्यात्। स्त्र्यर्थमात्रस्य ग्रहणं कस्मान्न भवति ? विमातृशब्दस्य स्त्र्यर्थस्य शुभ्रादिषु पाठात्। यद्यत्र स्त्र्यर्थमात्रस्य स्त्रीशब्दस्य ग्रहणं स्यात्, तस्य शुभ्रादिषु पाठोऽनर्थकः स्यात्, अनेनैव ढकः सिद्धत्वात्। `ऐडविडः दारदः' इति। इडविडोऽपत्यं वरदोऽपत्यमित्यणेव भवति। ढगिति वर्त्तमाने ढकः पुनर्ग्रहणं नित्यार्थम्।
`वडवाया वृष वाच्ये' इति। यस्तस्या गर्भे बीजं प्रक्षिपति स वृषो वाडवेय इत्युच्यते।
`अण्क्रुञ्चाकोकिलात् स्मृतः' इति। वृष इति नापेक्ष्यते। अपत्ये विधिरेवायम्। ढकोऽपवादः।।

121. द्व्यचः। (4.1.121)
`तन्नामिकाणोऽपवादः'इति। ये द्व्यचः स्त्रीप्रत्ययान्ता नदीमानुषीनामधेयभूतास्तेभ्यो विशेषविहितत्वात् तन्नामिकाण् भवति। ततस्तद्बाधनार्थं ढग्विधीयते।।

122. इतश्चानिञः। (4.1.122)

123. शुभ्रादिभ्यश्च। (4.1.123)
`यथायोगम्' इत्यादि। ये तावदकारान्तास्तेभ्य इञोऽपवादः। शलाका, कुरेका,अम्बिका, अशोका, खट्वा, पिङ्गला, खण्डोन्मत्ता-- इत्येतेम्पस्तन्नामिकाणः। विधवाशब्दात् क्षुद्रालक्षणस्य द्रकः। किंकसा, रोहिणी, अजवस्ति, शकन्धि, कृकलास, सुदत्त, परिधि-- एतेभ्यश्चतुष्पाल्लक्षणस्य ढञः। गोधाशब्दाद् गोधाया द्रकः, वचनसामर्थ्यात् सोऽपि भवत्येव। शेषेभ्य औत्सर्गिकोऽण इत्येष यथायोगार्थः। `लक्षणश्यामयोर्वासिष्ठे' इति। लक्षण, श्याम-- इत्येतयोर्वासिष्ठेऽपत्यविशेषे ढग्भवति। लाक्षणेयो वासिष्ठः, लाक्षणिरन्यः। श्यामेयो वासिष्ठः, श्यामायनोऽन्यः। अश्वादित्वात् फञ्।।

124.विकर्णकुषीतकात्काश्यपे। (4.1.124)

125. भ्रुवो वुक्च। (4.1.125)

126. कल्याण्यादीनामिनङ्। (4.1.126)

127.कुलटाया वा। (4.1.127)
कुलन्यटतीति कुलटा। नन्वकः सवर्णे दीर्घत्वे कृते कुलाटेति भवितव्यमित्यत आह-- `पररूपम्' इत्यादि। `पूर्वेणैव' इति।`स्त्रीभ्यो ढक्' (4.1.120) इत्यनेनैव। व्यवहितेऽपि पूर्वव्यपदेशः प्रवर्त्तते, यथा-- मथुरायाः पाटलिपुत्रं पूर्वमिति।
`कौलटेरः' इति। एयादेशे कृते वलि यलोपः।।

128.चटकाया ऐरक्। (4.1.128)
`चटकाया अपत्यं स्त्री चटका' इति। `लुक् तद्धितलुकि' (1.2.49) इति लुकि कृते पुनष्टाप् कर्त्तव्यः। पुंल्लिङ्गादपि स्त्रियामिष्यत एव लुक्। एवम् `चटकादैरक्' इत्येतत् सूत्रमासीत्, इदानीं प्रमादाच्च `चटकायाः' इति पाठः।।

129. गोधाया द्रक। (4.1.129)
`गोधेरः' इति। पूर्ववद्यलोपः।।

130. आरगुदीचाम्। (4.1.130)
`आचार्यग्रहणं पूजार्थम्' इति। ननु चासत्याचार्यग्रहणे नित्य एवायं विधिः स्यात्, तथा चारकः पूर्वेण द्रका समावेशो न स्यात्। तद्विकल्पार्थमेवाचार्यग्रहणं

कस्मान्न भवतीत्याह-- `वचनसामर्थ्यात्' इति। द्रगपि ह्युच्यते, आरगपि, तत्र वचनसामर्थ्यात् समावेशो भविष्यति। तस्मात् पूजार्थमेवाचार्यग्रहणम्। `ज्ञापकं तु' इत्यादि। रका सिद्धे यदारग्वचनं सञ्ज्ञापनार्थम्। तेनैवं ज्ञायते-- अन्येभ्योऽप्ययं भवति;अन्यथा ह्यारग्वचनमनर्थकं स्यात् रकि सिद्धेः। तेन जडस्यापत्यं जाडारः, पाण्डार इति सिद्धं भवति, न ह्येतद्रका सिध्यति।।

131. क्षुद्राभ्यो वा। (4.1.131)
`अर्थधर्मेण' इति। अर्थस्य क्षुद्रत्वात्तदभिधायिन्योऽपि प्रकृतय उपचारेण क्षुद्रा इति निर्दिश्यन्ते।।

132. पितृष्वसुश्छण्। (4.1.132)

133. ढकि लोपः। (4.1.133)
`कथं पुनः' इत्यादि। ढग्विधौ टाबादिस्त्रीप्रत्ययान्तग्रहणात् पितृष्वसृशब्दस्य चास्त्रीप्रत्ययान्तत्वात्। ततो ढको भावमसम्भावयतः प्रश्नः। `एतदेव' इत्यादि। यदेतत् पितृष्वसृशब्दं प्रति ढको निमित्तत्वेनाश्रयणम्, एतदेव पितृष्वसृशब्दत् तस्य भावं ज्ञापायति। न ह्यसतो निमित्तभाव उपपद्यते।।

134. मातृष्वसुश्च। (4.1.134)
`पितृष्वसुरित्येतदपेक्षते'इति। इहापि `अनन्तरस्य पितृष्वसुर्विधिर्वा भवतिप्रतिषेधो वा' इति लोप एवानन्तरः प्राप्नोति, न छण्; व्यवहितत्वात्। उभयमपि चैतदिष्यते, तत्र यतो हेतोरेतद्द्वयमपि लभ्यते तमनेन दर्शयति-- `पितृष्वसुः' इति। एतदिहापेक्ष्यमाणं षष्ठ्यन्तं ज्ञायते यथा लोपविधौ `पितृष्वसुः' (4.1.132) इति च षष्ठी, तेनायमर्थः सम्पद्यते-- पितृष्वसुर्यदुक्तं तन्मातृष्वसुरपि तेन छण् ढकि लोपश्च लभ्यते। उभयमपि ह्येतत् पितृष्वसुरुक्तम्।।

135. चतुष्पाद्भयो ढञ्। (4.1.135)
`चतुष्पाद्भ्यः' इति। चत्वारः पाद आसामिति तास्तथोक्ताः। `पादस्य लोपऽहस्त्यादिभ्यः' (5.4.138) इति लोपः। इहाप्यर्थधर्मेण तदभिधायिन्यः प्रकृतयो निर्दिश्यन्ते। अत एवाह-- `चतुष्पादभिधायिनीभ्यः प्रकृतिभ्यः' इति। बहुवचननिर्देशः स्वरूपविधिनिरासाय। `अणादीनाम्' इति। आदिशब्देन ढगादीनां ग्रहणम्। `कामण्डलेयः' इत्यादि। कमण्डलूशुन्तिबाहुजम्बुशब्दाश्चतुष्पाज्जातिवाचिनः,तेषां `ढे लोपोऽकद्रवाः' (6.4.147) इत्युवर्णलोपः।।

136. गृष्टयादिभ्यश्च। 4.1.136)
अणादीनामपवादः। आदिशब्देन ढकः। बहुवचननिर्देशस्तु प्रकृतिभेदेन तयोर्भेदस्य विवक्षितत्वात्। तत्राजवस्तिमित्रयुशब्दयोरणोऽपवादः, शेषाणां `इतश्चानिञः' (4.1.122) इति ढकः।।

137. राजश्वशुराद्यत्। (4.1.137)
`क्षत्रियजातिश्चेत्' इति। प्रत्ययान्तेन यदि क्षत्रियजातिर्गम्यते एवं यद् भवति। यो ह्यपत्यमेव राज्ञो न क्षत्त्रियजातिस्तत्राणेवौत्सर्गिको भवति। एतच्च `वा (4.1.131) इत्यस्येहानुवृत्तस्य व्यवस्थिविभाषात्वविज्ञानाल्लभ्यते। `राजन्यः' इति। `ये चाभावकर्मणोः' (6.4.168) इति प्रकृतिभावः। `राजनः' इति। अत्रापि `अन्' (6.4.167) इति प्रकृतिभावः।।

138.क्षत्त्राद्घः। (4.1.138)
`घप्रत्ययो भवति' इति। घशब्द एव, न तु तरप्तमपाविति वेदितव्यम्। कथं पुनरेतल्लभ्यते,यावता `घः' इति तरप्तमपोरियं संज्ञा, चोच्चरिता संज्ञिनं सम्प्रत्यययायतीति तयोरेव ग्रहणं युक्तम् ? नैष दोषः; प्रत्ययविधौ यत्र `घः' इति श्रूयते,तत्र स्वरूपस्य ग्रहणं भवति; ज्ञापकात्। यदयं प्रत्ययादेर्घकारस्येयादेशं शास्ति, तज्ज्ञापयति-- यत्र प्रत्ययविधौ घः श्रूयते स्वरूपमेव गृह्यत इति। न हि संज्ञिनोर्ग्रहणेन प्रत्ययादेर्घः सम्भवति।।

139. कुलात्खः। (4.1.139)
`उत्तरसूत्रे' इत्यादि। उत्तरसूत्रे हि पूर्वपदप्रतिषेधाद्यस्यां परिभाषायां प्रातिपदिकश्रुतिरस्ति, साऽत्र नोपतिष्ठत इत्येषोऽर्थो ज्ञायते। यदि ह्युपतिष्ठेत, तदा ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधादेव (व्या.प.89) स पूर्वपदान्न भविष्यतीत्यपूर्वपदादिति प्रतिषेधोऽनर्थकः स्यात्। सामान्यापेक्षञ्च ज्ञापकम्; तेन `व्यपदेशिवद्भावोऽप्रातिपदिकेन' (शाक.प.65), `ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नेष्यते' (व्या.प.89) इत्येतयोरपीह परिभाषयोरुपस्थानं न भवति। ततश्च कुलशब्दान्तं प्रातिपदिकं कुलशब्दो गृह्यते।।

140. अपूर्वपदादन्यतरस्यां यड्ढकञौ। (4.1.140)
ननु पूर्वशब्दोऽवयववचनः; न च कुलशब्दस्य पदान्तरमवयव उपपद्यते; पृथग्भूत्तवात्, अनारम्भकत्वाच्च, ततो व्यपच्छेद्याभावादपूर्वपदादित्युक्तमेतत्कुलशब्दस्य विशेषणम् ? इत्याह-- `समाससम्बन्धि' इत्यादि। समासे सत्येतद्भवति-- पूर्वपदम्, उत्तरपदमिति। तस्मात् समाससम्बन्धिनः पूर्वपद्सयाभावेन कुलशब्दो विशेष्यते-- अविद्यमानं समाससम्बन्धि पूर्वपदं यस्येति। कस्य चाविद्यमानम् ? यः समासस्यान्तभूतो न भवति केवलः कुलशब्दः,तेन केवलात् कुलशब्दादयं विधिरित्युक्तं भवति। अथ व्यवस्थावाच्येव पूर्वशब्दः कस्मान्नाश्रीयते ? अशक्यत्वात्। तत्र ह्याश्रीयमाणेऽविद्यमानं पूर्वपदं यस्मात् कुलशब्दात् सोऽपूर्वपदशब्देनोच्यते। ततश्च देवदत्तः कुल्यो देवदत्तः कौलेयक इति वाक्ये य़ड्ढकञौ न स्याताम्; देवदत्तस्येह पूर्वपदस्य विद्यमानत्वात्। `पदग्रहणं किम्' इति। अपूर्वादित्येवं कस्मान्नोक्तम्, एवमपि हीष्टं सिध्यति, लघु च सूत्रं भवतीति मन्यते। `बहुच्पूर्वपदादपि यथा स्यात्' इति। `अपूर्वात्' इत्युच्यमाने बहुच् पूर्वं यत्प्रतातिपदिकं बहुजस्य पूर्वं इति ततः प्रत्ययो न स्यात्। पदग्रहणे तु सति ततोऽपि भवति; तस्यापूर्वपदत्वात्। `बहुकुल्यः' इति। ईषदसमाप्तं कुलमिति `विभाषा सुपो बहुच् पुरस्तात्तु' (5.3.68) इति बहुच्। बहुकुलस्यापत्यं बहुकुल्यः।।

141. महाकुलादञ्खञौ। (4.1.141)

142.दुष्कुलाड्ढक्। (4.1.142)

143. स्वसुश्छः। (4.1.143)

144. भ्रातृर्व्यच्च। (4.1.144)
`तकारः स्वरार्थः' इति। `तिस्त्वरितम्' (6.1.185) इति स्वरितत्वं यथा स्यात्।

145. व्यन्सपत्ने। (4.1.145)
ननु `नित्यं सपत्न्यादिषु' (4.1.35) इति सपत्नीशब्द एव स्त्रीलिङ्गो व्युत्पादितः, तत्कथं सपत्न इति प्रयोगः पुंलिङ्गस्य युज्यत इत्याह-- `सपत्नशब्दः शत्त्रुपर्यायः' इत्यादि। `इवार्थे' इति। इवार्थः = सादृश्यम्। यथैव हि सपत्नी दुःखहेतुः, तथा शत्त्रुरपीति। यः सपत्नीव सपत्नः स उच्यते।।

146. रेवत्यादिभ्यष्टक्। (4.1.146)
`यथायोगम्' इत्यादि। तत्राद्यानां चतुर्णां स्त्रीप्रत्ययान्तत्वाद् ढकोऽपवादः; वृकञ्चिन्-- इत्यस्याणः, शेषाणामकरान्तत्वादिञः।।

147. गोत्रस्त्रियाः कुत्सने ण च। (4.1.147)
`अपत्यं प्रौत्रप्रभृति गोत्रं गृह्यते' इति। न लौकिकमपत्यमात्रम्, तद्ग्रहणे हि गोत्रग्रहणमनर्थकं स्यात्। अपत्याधिकारादेव तद्ग्रहणस्य लब्धत्वादिति भावः। `पितुरसंविज्ञाने' इति। अप्रसिद्धौ। तस्य पितुरसंविज्ञानप्रदर्शनार्थं मात्रा यो व्यपदेशोऽस्ति तेन कुत्सा स्यात्। `गार्गो जाल्मो गार्गिकः' इति। गर्गशब्दाद्गोत्रे गर्गादियञन्तात् `यञश्च' (4.1.16) इति ङीपि `हलस्तद्धितस्य' (6.4.150) इतिलोपे सति यकारस्य गार्गी इति स्थिते णठकौ। `ग्लौचुकायनः' इत्यादि। ग्लुचकस्यापत्यं गोत्रं स्त्री `प्राचामवृद्धात्' फिन् बहुलम्' (4.1.160) इति फिन्,ततः `इतो मनुष्यजातेः' (4.1.65) इति ङीष्,ततो णठकौ। `कारिकेयः'इति। कारकशब्दाण्ण्वुलन्ताट्टाप्।कारिकाशब्दोऽयं गोत्रे न वर्त्तते,ततो ढगेव भवति। `औपगविः'इति। उपगोरपत्यं गोत्रं पुमान्,अण्, तदन्तादिञेव भवति। अत्र केनचित् प्रतिषिद्धाचरणादिना कुत्सा वेदितव्या।`गार्गेयो माणवकः' इति। अत्र पितरि विज्ञाते मातुः परिज्ञानार्थं तन्मत्रा व्यपदेशः क्रियत इति नास्ति कुत्सा, तेन ढगेन भवति।।

148.वृद्धाट्ठक्सौवीरेषु बहुलम्। (4.1.148)
`सौवीरेष्विति प्रकृतिविशेषणम्' इति। सौवीरेषु यद्वृद्धं सौवीरगोत्राभिधायि यद्वृद्धमित्यर्थः। `भागवित्तेःट इत्यादि। भगवित्तस्यापत्यं गोत्रम्। `अत इञ' (4.1.95) , तदन्तात् ठक्-- `भागवित्तिकः' । `भागवित्तायनः' इति। `यञिञोश्च' (4.1.101) इति फक्। तृणादिबिन्दोरपत्यमौत्सर्गिकोऽण् तार्णबिन्दवः, ततष्ठक्-- `तार्णबिन्दविकः'। पूर्वसूत्रे ठक् चानुकृष्ट इतीह नानुवर्त्तत इति पुनष्ठग्ग्रहणं ण्सय निवृत्त्यर्थम्। वापूर्वकं हि ठग्ग्रहणं णप्रत्ययेन सम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्।
`भागपूर्वपदो वृत्तिः' इत्यादि। येभ्योऽनेन सूत्रेण ठगिष्यते, त एतेन श्लोकेन परिगण्यन्ते। `भाग' इत्येतत् पूर्वपदं यस्य वृत्तिशब्दस्य स तथोक्तः। अयं तावदेको भागवित्तिः, द्वितीयस्तार्णबिन्दवः, तृतीयस्त्वाकशापेयः-- य एते त्रयः शब्दाः ,गोत्रे ठग्बहुलं तत इति। सौवीरगोत्रवचनान्तात् प्रातिपदिकाद्बहुलं

यष्ठगुच्यते स ततस्तेभ्य एव भागवित्तिप्रभृतिभ्यस्त्रिभ्यो भवति, नान्येभ्य इत्यर्थः।

अथ वृद्धग्रहणं किमर्थम्, यावता पूर्वसूत्राद्गोत्रग्रहणमनुवर्त्तते, सौवीरग्रहणेनैव विशेषयिष्यामः; यच्चसौवीरगोत्रे वर्त्तते प्रातिपदिकं भागवित्त्यादिकं तद्वृद्धमेव, ततो निवृत्त्यभावादपार्थकं वृद्धग्रहणम् ? इत्याह -- `वृद्धग्रहणम्' इत्यादि। तद्धि गोत्रग्रहणं स्त्रिया विशेषणम्, अतस्तस्मिन्ननुवर्त्तमाने विशेष्यायाः स्त्रिया अनुवृत्तिः स्यात्। तस्मात् तन्निदृत्त्यर्थं वृद्धग्रहणम्। गोत्रग्रहणमेवानुवर्तिष्यते; तस्यैव स्वरितत्वात्, न स्त्रीति-- एतद्व्याख्येयं भवति। व्याख्यानाच्च लघु वृद्धग्रहणमेव।

`औपगविः' इति। अणन्तादिञ्। ननु च परिगणनं कृतम्,तत्कथमौपगवशब्दात् ठक्प्रसङ्गः ? सौवीरग्रहणे सति तत्परिगणनम्। तथा हि-- भागवित्तिप्रभृतयः सौवीरगोत्राभिधायिन एव परिगणिताः। तत्रासति सौवीरग्रहणे औपगवशब्दादपि प्रसज्यते-- `भागवित्तायनः' इति। पूर्ववत् फक्।

अथ बहुलग्रहणं किमर्थम्,न, वाग्रहणमेव क्रियेत,तेनापि हि भागवित्तिको भाघवित्तिकायन इत्यादि सिध्यत्येव ? इत्यत आह-- `बहुलग्रहणम्' इत्यादि। वाग्रहणाद्विकल्पमात्रं लभ्यते, न तूपाधिवैचित्र्यम्। बहुलग्रहणे तु तदपि। तस्मादुपाधीनां विशेषमानां वैचित्र्यम् = नानाप्रकारता यथा स्यादित्येवमर्थं बहुलग्रहणम्। तदेवोपाधिवैचित्र्यं दर्शयितुमाह-- `गोत्रस्त्रिया इत्यारभ्य' इत्यादि। सुखावबोधम्।।

149.फेश्च च। (4.1.149)

`यमुन्दश्च'इत्यादि। येभ्योऽनेन सूत्रेण छठकाविष्येते, तेषामनेन श्लोकेन परिगणनं क्रियते, तत्तु बहुलग्रहणानुवृत्तेरेव लभ्यत इत्येवं तद्वेदितव्यम्। यमुन्दमुद्दिश्य वृत्तिकारेणैवोदाहरणं दर्शितम्। इतरयोस्तु दर्शयामः-- सुयाम्नोऽपत्यं, फिञ्-- सौयामायनिः,तस्यापत्यं सौयामायनिकः। वृषस्यापत्यं,फिञ्, तस्य वार्ष्यायणिः, तस्यापत्यं वार्ष्यायणीयः,वार्ष्यायणिकः। एते यमुन्दादयः शब्दाः फिञः स्मृताः = फिञन्ता विज्ञाताः। `गोत्रस्त्रियाः कुत्सने ण च' (4.1.147) इत्यादयश्चत्वारो योगाः। तत्राद्यः कुत्सन एव, अन्त्यः सौवीरेष्वेव। मध्यमौ तु द्वौ सौवीरेषु कुत्सायाञ्च शब्दवित्स्मरेत् जानीयात्।।

150. फाण्टाहृतिमिमताभ्यां मफिञौ। (4.1.150)

`आल्पाच्तरस्य' इत्यादि। मिमतशब्दोऽयमल्पाच्तरः, तस्य `अल्पाच्तरम्' (2.2.34) इति पूर्वनिपाते प्राप्ते यः परनिपातः स लक्षमव्यभिचारचिह्नं सूचयति। यथेदं पूर्वनिपातलक्षणं व्यभिचरति = स्वविषये न प्रवर्त्तते, तथा यथासंख्यलक्षणमपीति यथासंख्यं न भवति। अत एवैकैकस्मात् प्रत्ययद्वयं सिद्धं भवति।।

151.कुर्वादिभ्यो ण्यः। (4.1.151)

`कौरव्यः' इति। `ओर्गुणः' (6.4.156), `वान्तो यि प्रत्यये' (6.1.79) इत्यवादशः। `कुरुनादिभ्यो ण्यः' इत्यादि। किमर्थं पुनः कुरुशब्दादपरोऽपि ण्यप्रत्ययो भविष्यति, यावतानेनैव सिद्धम्, तदेव हि रूपम्, स एवच स्वरः ? इत्यत आह-- `स तु क्षत्त्रियात्' इति। अनेनार्थभेदं दर्शयति। स हि `जनपदशब्दात् क्षत्त्रियादञ' (4.1.168)इत्यधिकारात् क्षत्त्रियाद्भवति, अयं तु ततोऽन्यतः। ततश्चैकः क्षत्त्रियापत्यो भवति, अपरस्त्वक्षत्त्रियापत्य इति स्पष्ट एवार्थभेदः। रूपविशेषोऽपि बहुषु विद्यत इति दर्शयन्नाह-- `तद्राजसंज्ञकः' इत्यादि। तस्य हि तद्राजसंज्ञकत्वात् `तद्राजस्य बहुषु' (2.4.62) इत्यादिना बहुषु लुका भवितव्यम् -- कुरव इति। अयं तु श्रूयत एव कौरव्या इति।

रथकारशब्दोऽतर् पठ्यते, तत्र रथकारशब्दश्चास्त्येव जातिवचनः, अस्ति च कारिवचनः, तदिह तयोः कतरः पठ्यते ? इत्याह-- `रथकारशब्दोऽत्र पठ्यते' इत्यादि। अथ कारिवचनोऽपि कस्मान्न पठ्यते ? इत्याह-- `कारिणस्तु' इत्यादि। यो हि वचनो रथकारशब्दः, तत उत्तरसूत्रेणैव ण्यः सिद्धः, तत्किंत्र तस्य पाठेन !

`पुंवद्भावो न भवति' इति। `भस्याऽढ तद्धिते' (वा.731) इति यः पुंवद्भावः प्राप्नोति, स केशिनी शब्दस्य न भवति। यदि स्यात्, `नस्तद्धिते' (6.4.144) इति टिलोपे कृते `कैश्यः' इत्यनिष्टं रूपं स्यात्। कस्मान्न भवति ? इत्याह-- `स्त्रीप्रत्ययस्य निर्देशसामर्थ्यात्' इति।यदि हि पुंवद्भावः स्यात्, स्त्रीप्रत्ययेनास्य निर्देशोऽनर्थकः स्यात्, पुंल्लिङ्गमेवैनं पठेत्। पुंल्लिङ्गस्यापि पाठे लिङ्गविशिष्टपरिभाषया केशिनीशब्दादपि प्रत्ययः सिध्यति। ननु च पुंल्लिङ्गनिवृत्त्यर्थः स्त्रीप्रत्ययान्तस्य पाठः स्यात् ? नैतदस्ति; अभिधानादेव हि पुंल्लिङ्गान्न भविष्यति।

`तस्य कण्वादिवत्'इति। अपत्याधिकारेऽयमतिदेशो भवन् कण्वादिभिरपत्यप्रत्ययान्तैर्विज्ञायते। कण्वादयश्च गर्गाद्यन्तः पातिनः, तेन यञन्तानां कण्वादीनां यत्कार्यं तद्वामरथ्यस्य स्वरवर्जं भवतीत्ययं भवति। `लुगादिकम्' इति। आदिशब्देन ङीबादिकं गृह्यते। कण्वादीनमपत्यप्रत्ययस्य `यञञोश्च' (2.4.64) इति बहुषु लुग्भवति। स्त्रियां `यञश्च' (4.1.16) इति ङीप्। `प्राचां ष्फ तद्धिते' (4.1.17) इतिष्फ प्रत्ययः स्त्रियामेव। `यञिञोश्च' (4.1.101) इति फक्। शैषिकेष्वर्थेषु `कण्वादिभ्यो गोत्रे' (4.2.111) इत्यण् `तस्येदम्' (4.3.120) इत्यर्थविवक्षायाम्। `सङ्घाङ्कलक्षणेष्वञ्यञिञाम्' (4.3.127) इत्यण्। एतानि कार्याणि यथा कण्वादीनां भवन्ति तता वामरथ्यस्यापि। एषां `वामरथा' इत्यादीनि यथाक्रममुदाहरणानि। `नातिदेशिकमाद्युदात्तत्त्वम्' इति। यथा कण्वादीनां यञन्तानां ञित्स्वरेणाद्युदात्तत्वं, न तथा वामरथ्यस्य, किं तर्हि ? प्रत्ययस्वरेणान्तोदात्तत्वमेव भवति। `सम्राजः क्षत्त्रिये' इति। सम्राजः क्षत्त्रिये ण्यो भवति, सम्राजोऽपत्यं साम्राज्यः। अन्यत्राणेव-- साम्राजः।।

152. सेनान्तलक्षमकारिभ्यश्च। (4.1.152)

अत्र ग्रहणवता प्रातिपदिकेन तदन्तविधि (व्या.प.89) प्रतिषेधाल्लक्षणशब्दस्य स्वरूपग्रहणम्। अत एवाह-- `लक्षणशब्दात्' इति। कारीत्यर्थग्रहणम्। तत्रार्थे कार्यस्याभावात् तद्वाचिनः प्रत्ययो विज्ञायत इत्याह-- `कारिवचनेभ्यश्च' इति।यथा लक्षणशब्दस्य स्वरूपग्रहणं तथा कारिशब्दस्य कस्मान्न भवति ? शिवादिषु तक्षन्निति पाठात्। अस्य हि कारिलक्षणमिञं बाधितुं तत्र पाठः। यदि च कारिशब्दस्येह स्वरूपग्रहणं स्यात्, तक्षन्शब्दादिभ्यः प्राप्तेरसम्भवादुत्सर्गेणैवाणा भवितव्यमिति तस्य शिवादिषु पाठोऽनर्थकः स्यात्। अर्थग्रहणे त्वनेन प्राप्तस्येञो बाधनार्थस्तत्र पाठो युज्यते।।

153. उदीचामिञ्। (4.1.153)

`वचनसामर्थ्यात्' इत्यादि। ण्योऽप्युच्यते, इञपि, वचनसामर्थ्यादेवान्तरेणाचार्यग्रहणं तयोः समावेशे सिद्धे तदाचार्यग्रहणं क्रियते तद्वैचित्र्यार्थम्। आचार्यग्रहणस्यातिरिच्यमानत्वादयमर्थो लभ्यते, ग्रन्थाधिक्यादर्थाधिक्यं भवतीति कृत्वा। ननु च पूजार्थमाचार्यग्रहणं स्यात् ? नैतदस्ति; एवं हि प्राचामपि ग्रहणं कर्त्तव्यं स्यात्। तेऽपि हि सेनान्तलक्षणकारिभ्य इञं स्मरन्ति। `तक्षन्शब्दः' इत्यादिना वैचित्र्यं दर्शयति। `ताक्ष्णः' इति। शिवाद्यणि कृते `षपूर्वहन्धृतराज्ञामणि' (6.4.135) इत्यल्लोपः। `ताक्षण्यः' इति। `ये चाभावकर्मणोः' (6.4.168) इति प्रकृतिभावः।।

154. तिकादिभ्यः फिञ्। (4.1.154)

`कौरव्यशब्दः पठ्यते' इत्यादि। कौरव्यशब्दोऽयमस्त्येव क्षत्त्रियगोत्रवचनो यः `कुरुनादिभ्यो ण्यः' (4.1.172) इति ण्यप्रत्ययान्तः; तयोरिह पूर्वो गृह्यते। कुत एतत् ? औरसशब्देन साहचर्यात्। औरसशब्दोऽयं `जनपदशब्दात् क्षत्त्रियादञ्' (4.1.168) इत्यञ्प्रत्ययान्तः, तेनासौ क्षत्त्रियवचनः, तत्साहचर्याच्चकौरव्यशब्दो यः क्षत्त्रियप्रत्ययान्तत्वात् क्षत्त्रियवचनः स एव गृह्यते।

`यस्तु' इत्यादि। यस्तु `कुर्वादिभ्यो ण्यः' (4.1.15)। इति ण्यप्रत्ययान्तो ब्राह्मणादिगोत्रवचनः, तस्मात् `अत इञ्' (4.1.95) इदीञैव भवितव्यम्, तत्रैतत् स्यात् ? स्वमनीषिकेयं भवत इत्याह-- `तथा च' इत्यादि। यत एवं ब्राह्मणादिगोत्रवचनादिञैव भवितव्यम्। तथा हि ण्यक्षत्त्रियादि (2.4.58) सूत्रे पूर्वैरपि वृत्तिकारैः--- कौरव्यः पिता, कौरव्यः पुत्र इत्युदाहृतम्। यदि चातः फिञ् स्यात् तदुदाहरणं न युज्येत।न हि ण्यप्रत्ययान्ताद्विहितस्य फिञो यूनि लुगुच्यते, अपि त्वणिञोः।।

155.कौशल्यकार्मार्याभ्याञ्च। (4.1.155)

`परमप्रकृतेरेवायं प्रत्यय इष्यते' इति। कोशलशब्दात्, कर्मारशब्दाच्च। एवकाः `वृद्धेत्कोशलाजादाञ्ञ्यङ्' (4.1.171) इति ञ्यङन्तो यः कौशल्यशब्दः, यश्च `सेनान्तलक्षणकारिभ्यश्च' (4.1.152) इति कारिलक्षणण्यप्रत्ययान्तः कर्मार्यशब्दः तयोर्व्यवच्छेदाय।

यदि मूलप्रकृतेरेवेष्यते, कथमिदं विकृतं प्रकृतिरूपं श्रयूते ? इत्याह-- `प्रत्ययसन्नियोगेन' इत्यादि। न चेयं स्वमनीषिका, अपि त्वाचार्यणामेव भाष्यकारप्रभृतिीनामिदं मतमिति दर्शयन्नाह-- `तथा च' इत्यादि। कः पुनः परमप्रकृतेः प्रत्ययान्ताद्वत्पत्तौ विशेषः ? परमप्रकृतेरुत्पत्तावपत्यमात्रे प्रत्ययो लभ्यते, प्रत्ययान्तात् तूत्पत्तौ `गोत्राद्यूनि' (4.1.94) इति वचनात् `यून्यपत्ये' इत्येव विशेषः। `युङ् वादिष्टस्य' इति। आदिष्टग्रहणमायन्नादेशए कृते यथा स्यादित्येवमर्थम्; अन्यथा ह्यनादित्वादायन्नादेशो न स्यात्। `दागव्यावनिः' इति। `ओर्गुणः' (6.4.146) कृते `वान्तो यि प्रत्यये' (6.1.79) इत्यवादेशः।।

156. अणो द्व्यचः। 94.1.156)

`कार्त्रायणिः' इति। कर्त्तुरपत्यमित्यण्--- कार्त्रः, ततः फिञ्। ` दाक्षायणः' इति। दाक्षिशब्दादिञन्ताद्यूनि पञिञोश्च' (4.1.101) इति फक्। प्रतिपादनादि सुगमम्।।

157.उदीचां वृद्धादगोत्रात्। (4.1.157)

`वृद्धात्' इति। इहैव यत्पारिभाषिकं वृद्धं तद्गृह्यते, न शास्त्रान्तरप्रसिद्धम्, अगोत्रादिति प्रतिषेधात्। `कारिशब्दात्' इत्यादि। कारिलक्षणस्येञोऽवकाशः-- तान्तुवायिरिति, फिञोऽवकाशः--आम्रगुप्तायनिरिति; इहोभं प्राप्नोति-- नापितायनिरिति, परत्वात् फिञेव भवति।।

158. वाकिनादीनां कुक्च। (4.1.158)

`यदिह वृद्धमगोत्रम्' इति। वाकिनशब्दादिकाकपर्यन्तम्। `इञाद्यपवादो योगः' इति। आदिशब्देनाणो ग्रहणम्। तत्र चर्मिवर्मशब्दयोरणोऽपवादः शेषाणामिञः। `चमिवर्मिणोर्नलोपश्च' इति। चर्मिन्, वर्मिन्-- इत्येतयोः कुक्फिञौ भवतः, नलोपश्चेति। कुकि कृते प्रातिपदिकस्यानकारान्तत्वान्नलोपोऽत्र न प्राप्नोतीति विधीयते-- चार्मिकायणिः,वार्मिकायणिः।।

159. पुत्रान्तादन्यतरस्याम्। (4.1.159)

`तेन' इत्यादि। वचनात् पूर्वसूत्रेणैवोदीचां मतेन यः पक्षे फिञ् विहितस्तस्मिन्ननेनान्यतरस्यां कुगागमोऽपि विधीयते।तेन त्रीणि रूपाणि भवन्ति।।

160.प्राचामवृद्धात्फिन्बहुलम्। (4.1.160)
`विकल्पार्थः' इति। विकल्पप्रयोजनाय। `एकेनैव सिध्यति' इति। विकल्पार्थत्वादिति।प्रकृतत्वाद्विकल्प इति गम्यते। अत्र च किमर्थं सर्वेषां ग्रहणमित्यध्याहार्यम्। तत्रेत्याद्युत्तरम्। यच्चोदीचांग्रहणं यच्च प्राचांग्रहणम्, तदुभयं पूजार्थम्। `बहुलग्रहणं वैचित्र्यार्थम्' (इति)। पारिशेष्यादन्यतरस्यांग्रहणं विकल्पार्थमित्युक्तं भवति। `क्वचित्' इत्यादिना बहुलग्रहणस्य वैचित्र्यार्थतां दर्शयति।।

161. मनोर्जातावञ्यतौ षुक् च। (4.1.161)
`तथा च' इत्यादि । यस्मादपत्यार्थोऽत्र नास्ति, एवञ्च कृत्वा मानुषा इति बहुषु लुग्न भवति। अपत्यार्थे तु सति `यञञोश्च' (2.4.64) इति बहुषु लुक् प्रसज्येत।
`अपत्ये कुत्सिते' इत्यादि। मूर्धन्योपसंख्यानपरोऽयं श्लोकः। अण्प्रत्ययोऽपत्यविवक्षायाम् `तस्यापत्यम्' (4.1.92) इत्येनैव सिध्यति। ननु च मूर्धन्योऽपि च बहुलग्रहणानुवृत्त्या सिध्यत्येव ? एवं तर्हि बहुलग्रहणानुवृत्तेर्लभ्य एवार्थः श्लोकेन कथ्यते। स चापि मूर्धन्यो विशिष्ट एव विषये मूढादावपत्ये भवति, न सर्वत्र। अनधीतवेदत्वदज्ञो मूढः। मूढत्वादेव प्रतिषिद्धाचरणाद्वा कुत्सितो यः स ब्राह्मणजातीयो माणव उच्यते।।

162. अपत्यं पौत्रप्रभृति गोत्रम्। (4.1.162)
प्रभृतिशब्द आदिशब्दस्यार्थे। पौत्रः प्रभृतिर्यस्येति बहुव्रीहिः। यदि पौत्रप्रभृति यदपत्यं तद्गोत्रसंज्ञं भवति, गर्गस्यापि गोत्रसंज्ञा प्राप्नोति, सोऽपि कञ्चित् प्रति पौत्रो भवत्येव। सत्याञ्च गोत्रसंज्ञायां गोत्रशब्दादनन्तरापत्ये प्रत्ययो न प्राप्नोतीति चोद्यमाशङ्क्याह-- `सम्बन्धिशब्दत्वात्' इत्यादि। गोत्रसंज्ञा ह्यपत्यस् पोत्रप्रभृतेर्विधीयते। ते च यस्चापत्यमिति सम्बन्धिशब्दोऽसौ नियोगतोऽपत्यवन्तमपेक्षत। तेन तस्य यदपत्यं तदपेक्षया गोत्रसंज्ञा विधीयते। न च यस्य गर्गः पोत्रस्तस्यासौ गर्गोऽप्तयमिति शक्यते व्यपदेष्टुम् ; अपत्यत्वस्य तत्राप्रतिभासनात्। अप्रतिभासनं पुस्तस्तस्य द्वतोऽविवक्षितत्वात्। यदपि हि तत्रापत्यत्वं तदप्यविवक्षितस्वरूपेण नाख्यातम्, ततोऽपत्यस्य पोत्रप्रभृतेर्विधीयते। अतः स्वरूपेण प्रतिभासमानो न भवति गर्गस्य गोत्रसंज्ञायाः प्रसङ्गः।`गर्गस्य पौत्रप्रभृति' इति। गर्गसम्बन्धि पौत्राद्यपत्यं गार्ग्य इति गोत्रसंज्ञायां सत्यां `गोत्रे कुञ्जादिभ्यश्च्फञ्' (4.1.98) इत्यतो गोत्र इत्यनुवर्त्तमाने `गर्गादिभ्यो य़ञ्' (4.1.105) इतिगोत्रेऽपत्ये यञ् भवति। `अपत्यमिति व्यपदेशोऽयम्' इति। संज्ञिन इति शेषः। तच्चोत्तरसूत्र इत्यभिप्रायः। इह तु पौत्रस्यापत्यत्वाव्यभिचारात् तदपत्यमेव प्रत्ययान्तैः विज्ञायत इति नार्थः संज्ञिव्यपेदशार्थेनापत्यग्रहणेन। उत्तरसूत्रे तु पौत्रप्रभृत्येतत् षष्ठ्यन्तं विपरिणम्य पौत्रप्रभृतेः सम्बन्धिनोऽपत्यस्य युवसंज्ञेष्यते, सा चापत्यग्रहणमन्तरेण न लभ्यते। अन्यदपि ह्यपत्यात् पौत्रप्रभृतेः सम्बन्ध्यस्ति, तत्र न ज्ञायते-- कस्येयं संज्ञेति ? अतस्तत्र संज्ञिनो व्यपदेशाय युक्तमपत्यग्रहणमित्येके।
इह तु संज्ञिव्यपेदशार्थं युक्तमपत्यग्रहणं पश्यामः। असति ह्यपत्यग्रहणे सम्न्बधिशब्दत्वादपत्यशब्दस्येत्यादि यदुक्तं चोद्यनिरासाय तदघटमानं स्यात्। ततश्च गर्गस्यापि गोत्रसंज्ञा स्यादेव। तस्मादिहापि संज्ञिव्यपेशायापत्यग्रहणं कर्त्तव्यमेव, अपत्यरूपेण प्रतिभासमानस्य संज्ञा यथा स्यात्।
`अन्यस्य मा भूत्' इति। ननु च तस्मादेव तत्प्रकृतमपत्यग्रहणं तदेव संज्ञिव्यदेशाय भविष्यति, तत् किमपरेणापत्यग्रहणेन ? नैतदस्ति; तद्धि प्रत्ययार्थतया पकृतं कथं संज्ञिनो व्यपदेशाय स्यात्; स्यादेतत् यद्यपि तत्प्रत्ययार्थे कृतं तथापि तस्येहानुवृत्तस् तत्प्रयोजनं नास्तीत्यतः संज्ञिव्यपदेशाय विज्ञास्यत इति ?एतच्च नास्ति; उत्तरार्थं ह्यधिकाराणामनुवृत्तिर्दृश्यते,व्याख्यानञ्चैवं कर्त्तव्यं स्यात्, व्याख्यानाच्च वचनमेव लघुतरमित्यपत्यग्रहणं कर्त्तव्यम्। `कौञ्जि-, गार्गिःर' इति। अनन्तरस्य गोत्रसंज्ञाया अभावात् `गोत्रे कुञ्जादिभ्यश्च्फञ्' (4.1.98), `गर्गादिभ्यो यञ्' (4.1.105) इति यश्च गोत्रे विधीयमानो न स भवति।।

163. जीवति तु वंश्ये युवा। (4.1.163)
`अभिजनप्रबन्धः' इति। अभजनाः = पितामहादयः, प्रबन्धः = सन्तानः, तत्र भवो वंश्य इति दिगादित्वाद्यत्। `पौत्रप्रभृत्यपत्यम्' इति। षष्ठीसमासः। `पौत्रप्रभृतीति च' इत्यादि। यदि पौत्रप्रभृतीत्येतत् सामानाधिकरण्येनापत्यं विशेषयेत् पौत्रप्रभृति यदपत्यमिति तदारभ्य युवसंज्ञा स्यात्, तच्चानिष्टम्। तस्मान्नैतत् सामानाधिकरण्येनापत्यस्य विशेषणम् किं तर्हि ? अर्थाद्विभवनक्तविपरिणामे कृते षष्ठ्यन्ततामापन्नं वैयधिकरण्येन पौत्रप्रभृर्यदपत्यमिति, तथा सति यदिष्टं सम्पद्यते तद्दर्शयितुमाह-- `तेन' इत्यादि। यत एवं विभक्तिविपरिणामे कृते पौत्रप्रभृतीत्यनेन षष्ठ्यन्तेनापत्यं विशेष्यते तेन चतुर्थादारभ्य युवसंज्ञा विधीयते, तस्य च विभक्तपरिणामस्यापत्यं हेतुः। अपत्यशब्दो हि सम्बन्धिशब्दत्वनाद्धेत्वाद्यपेक्षते,तत्र षष्ठ्या हेतुर्भवति। सन्निहितत्वाच्च। पौत्रप्रभृति तस्येत्येतदेवापेक्षते, ततस्तत्रैव षष्ठीं प्रकल्पयति।यदि तर्ह्यपत्यग्रहमसामर्थ्यात् पौत्रप्रभृतेः षष्ठीविपरिणामो भवति, पूर्वसूत्रेऽपि कस्मान्न भवति ? तत्र प्रथमाया अनवकाशत्वात्। पूर्वसूत्रे ह्यकृतार्था प्रथमा, ततो न शक्यते तस्याः षष्ठीं विपरिणमयितुम्। इह तु कृतार्था शक्यते षष्ठीभावेन विपरिणमयितुम्। `गार्ग्यायणः' इति। इह युवसंज्ञायां सत्यां `गोत्राद्यून्यस्त्रियाम्' (4.1.94) इति गोत्रप्रत्ययान्ताद्यूनि प्रत्ययो भवति। `तु शब्दोऽवधारणार्थः' इति। कः पुनः संज्ञासमावेशे दोषः कथ्यते ? शालङ्केरपत्यं युवा `यञिञोश्च' (4.1.101) इति फक्, पैलस्यापत्यं युवा `अणो द्व्यचः'(4.1.156) इत फिञ्,तयोः

`पैलादिभ्यश्च' (1.4.59) इति लुगुच्यते-- शालङ्किर्युवा, पैलो युवेति। यदि च गोत्रयुवसंज्ञयोः समावेशः स्यात् तदा शालङ्केर्यूनश्छात्रा इत्यर्थविवक्षायां प्राग्दीव्यतीयेऽजादौ प्रत्यये विषयभूते गोत्रादयः `गोत्रेऽलुगचि' (4.1.89) इत्यलुक् स्यात्। ततस्तस्माद्यूनो गोत्रसंज्ञा मा भूदित्यवधारणार्थस्तुशब्दः क्रियते।।

164. भ्रातरि च ज्यायसि। (4.1.164)
भ्रातृशब्दस् सम्बन्धिशब्दत्वाद्यदपेक्षं भ्रातृत्वं मेव भ्रातरं संज्ञित्वेनोपक्षिपति। ज्यायानिति प्रशस्यतरोवृद्धतरश्चाभिधीयते। तस्य च ज्यायस्त्वं गुणैर्वयसा वा। युवानं प्रतियोगिनमपेक्ष्य भवतीति स एव ज्यायसीत्यनेन प्रतियोगी प्रत्युपस्थाप्यते। तेन भ्रातुरेव कनीयसः संज्ञा विज्ञास्यत इति मत्वाह-- `कनीयान् भ्रातः यवसंज्ञो भवति' इति। `पूर्वजाः' इत्यादिना अवंश्यार्थतामारम्भस्य समर्थयते। `अकारणत्वात्' इत्यनेनापि भ्रातुरवंश्यत्वम्। यो हि साक्षात् पारम्पर्येण वा कारणं स वंश्यः, न च भ्राता कारणम्, तस्मादसौ वंश्यो न भवतीति।। गार्ग्ये जीवति भ्रातरि जीवतीत्यर्थः। एवं वात्स्ये जीवति वात्स्यायनोऽस्य कनीयान् भ्राता, दाक्षौ जीवति दाक्षायणोऽस्य कनीयान् भ्राता वेदितव्यः।।

165. वान्यस्मिन् सपिण्डे स्थविरतरे जीवति। (4.1.165)
`सप्तमपुरुषावधयः' इति। सप्तमः पुरुषोऽवधिर्येषां सपिण्डानां ते तथोक्ताः समानपिण्डाः,निपातनात् सभावः, `समानस्य' (6.3.84) इति योगविभागाद्वा। तस्य च योगविभागस्यैतल्लिङ्गम्, तेन सपिण्डाः शास्त्रेष्वा सप्तमात्पुरुषात्। परेण ये ते सपिण्डा नोच्यन्ते। `येषाम्' इत्यत्याधिकार इति परेण सम्बन्धः। `उभयत्र' इति। जन्मनि मरणे च। `इत्येवमादिकायाम्' इति। आदिशब्देन निवृत्त्य्ादिकाः क्रियाश्च गृह्यन्ते। तथा चोक्तम्---
उभयत्र दशाहानि कुलस्यान्नं न भुज्यते।
दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्त्तते।। इति।।
`जीवति' इति। सप्तम्येकवचनमेतत्। प्रथमायाश्च स्थाने सुब्व्यत्ययेन सप्तमी विहिता, अत एवाह-- `जीवदेव' इति। `तरब्निर्देशः' इत्यादि। असति हि तरब्निर्देशे स्थविरशब्दाद्वयःप्रकर्षमात्रं गम्यते, तरपा तु स्थानप्रकर्षोऽपि गम्यते। तस्मादुभयोरुत्कर्षार्थस्तरब्निर्देशः कृतः। `पितृव्ये पितामहे भ्रातरि च' इति । द्वावप्येतौ स्थानत उत्कृष्टौ। स्थानशब्देन चेह सम्बन्धविशेष उच्यते; अनेकार्थत्वाद्धातूनाम्।
`गार्ग्य एव भवति' इति। न गार्ग्यायणः।युवसंज्ञायामसत्यां युवप्रत्ययस्य फकोऽनुत्पत्तेः । `मृते' इति। स्थविरतरे सपिण्डे। `मृतो वा' इति। पौत्रप्रभृतिरप्यत्र मृतोऽर्थः।।

166. वृद्धस्य च पूजायाम्। (4.1.166)
`अपत्यमन्तर्हितम्' इत्यादिना शास्त्रान्तरेण परिभाषितं यद्वृद्धं तत्परिगृह्यते, न तु यदिह शास्त्रे परिभाषितं तदिति दर्शयति। कुतः पुनरेतदवगतम्-- शास्त्रान्तरपरिभाषितमिह वृद्धत्वं गृह्यत इति ? अपत्याधिकारात्। शब्दात्मकस्य वृद्धस्यापत्त्वासम्भवाद्विज्ञायते। `पूजायां गम्यमानायाम्' इति। का पुनरिह पूजा विवक्षिता ? युवत्वमेव। तद्धि लोके सर्वप्राणिनामभिमतम्। ननु च नेह युवशब्दो वयः पदार्थक एवायं युवशब्दो गोत्रे वर्तिष्यते। `संज्ञासामर्थ्यात्' इत्यादिना संज्ञाप्रणयनस्य प्रयोजनं दर्शयति। गोत्रप्रत्ययेनाभिहितमपि गोत्रम्। संज्ञासामर्थ्यात् पुनर्युवप्रत्ययो विधीयते गार्ग्यायण इति। अथ किमर्थं वृद्धस्येति षष्ठ्या निर्देशः क्रियते, न वृद्धमिति प्रथमान्तं निर्दिश्यते,एवं हि लघु सूत्रं भवति ? इत्याह-- `वृद्धस्य' इत्यादि। इतिकरणो हेतौ। यस्माद्विचित्रा सूत्रस्य कृतिः; तस्माद्वृद्धस्येति षष्ठ्या निर्देशः। एवं हि सूत्रे कृते वैचित्र्यं सम्भवतीत्यभिप्रायः।`तत्र भवान् गार्ग्यायणः' इति। तत्रभवच्छब्दस्य पूजावचनस्य प्रयोगेण पूजां गमयतीति।।

167. यूनश्च कुत्सायाम्। (4.1.167)
ननु च युवसंज्ञा पूर्वमेवाभिनिर्वृत्ता,यदाह-- `यूनश्च' इति।न ह्यसत्यां तस्यामयं निर्देश उपपद्यते, तदभिनिर्वृत्तायास्तस्याः पुनर्विकल्पेन विधानमनुपपन्नमित्यत आह-- `निवृत्तिप्रधानो विकल्पः' इति। नायं विधिप्रधानो विकल्पः, किं तर्हि ? प्रतिषेधप्रतिपादनपर इत्यर्थः। सिद्धायां प्रतिषिद्धायां गोत्रसंज्ञा वक्तव्याः; अन्यथा यूनो गोत्रप्रत्ययेनाभिधानं न स्यात् ? इत्यत आह-- `युवसंज्ञायाम्' इत्यादि। गोत्रसंज्ञाया युवसंज्ञा प्रतिपक्षः प्रत्यनीकः। सा चेन्निवृत्ता गोत्रसंज्ञैव प्रवर्त्तते; प्रतिपक्षाभावात्, अतो न वक्तब्गेति भावः। `गार्ग्यो जाल्मः'इति। जाल्मशब्दस् कुत्सावचनस् प्रयोगेण कुत्सां गमयति। कुत्सा पुनरिह यूनो वृद्धतयाभिधानस्यैवानभिमतत्वात्। अत एवाकुत्सिते युवेति वाक्यार्थं पदमन्वाख्यायते। सा च कुत्सा याऽन्या वा ततो वेति विशेषो नाश्रीयते, यथा-- कदन्नादिविषये देवदत्तादीनाम्।।

168. जनपदशब्दात्क्षत्त्रियादञ्। (4.1.168)
जनपदवृत्तिशब्दः पञ्चालादिर्जनपद इत्युक्तः,क्षत्रियवृत्तिः क्षत्रिय इत्यभिधानेऽभिधेयोपचारात्, साहचर्याद्वा। ननु पञ्चालादयः शब्दाः, ते `तस्य निवासः' (4.2.69) इति तद्धिते कृते तस्य `जनपदे लुप्' (4.2.81) इति लुपि च जनपदे वर्त्तन्ते, तत् कथमवरकालया जनपदशब्दतया नित्याः क्षत्रियशब्दा विशेष्यन्ते ? कथं पुनः क्षत्त्रियसम्बन्धादेते जनपदे वर्त्तन्त इत्येतदभिधातुमर्हति विद्वान्। सूत्रकारेण हि `तदशि,यं संज्ञाप्रमाणत्वाल्लुव्योगाप्रख्यानात्'

(1.2.53,54) इतियुक्तवद्भावं लुपञ्च प्रत्यादिशता जनपदे क्षत्त्रियेष्विव स्वत एव पञ्चालादिशब्दस्य वृत्तिरुक्ता। यथा शब्दा नित्यास्तथा पञ्चालादिरपि जनपद इति कुतो जनपदवचनानताया अवरकालता !`पाञ्चालः' इत्यादि। पञ्चालादयः शब्दा देशे सन्तः क्षत्त्रियवाचिनोऽपि भवन्ति स्वभावत एव, तेभ्योऽपत्यार्थेऽञ्। `ऐक्ष्वाकः' इति। इक्ष्वाकुशब्दस्य `दाण्डिनायनहस्तिनायन' (6.4.174) इत्यादौ सूत्रे उकारलोपो निपातितः।
`द्रौह्यवः' इति। द्रह्युशब्दः क्षत्त्रियवचन एव, न जनपदशब्दः, तेनाणेव भवति। `पाञ्चालिर्वैदेहिः' इति। इह पञ्चालविदेहशब्दौ भवतो जनपदशब्दौ, न तु क्षत्त्रियवचनौ। अपि तु ब्राह्मणवचनो, तेनेञेव भवति।
`क्षत्त्रियसमानशब्दात्' इत्यादि। क्षत्त्रियवचन एव शब्द उपचारेण क्षत्त्रिय इत्युक्तः जनपदशब्दो जनपद इति। क्षत्त्रियेण समानः शब्दो यस्य स तथोक्तः। तस्मात् क्षत्त्रियसमानशब्दादस्येति षष्ठीसमर्थाद्राजन्यभिधेयेऽपत्यवत् प्रत्ययोत्पत्तिरिति वक्तव्यम्। `अवृद्धादपि बहुवचनविषयात्' (4.2.125) (इति) प्राप्तस्य वुञोऽपवादः। यथा पञ्चालस्यापत्यमित्यत्र भवति पाञ्चालः, तथा पञ्चालानां राजा पाञ्चाल इत्यत्रापि भवति।`मागधः' इति। मगधशब्दादपत्ये `द्व्यञ्मगध' (4.1.170) इत्यादिनाण् भवति, तथा तस् यराजेत्यत्रापि।।

169. साल्वेयगान्धारिभ्याञ्च। (4.1.169)

170. द्व्यञ्गमधकलिङ्गसूरमसादण्। (4.1.170)

171. वृद्धेत्कोशलाजादाञ्ञ्यङ्। (4.1.171)
वृद्धग्रहणेनेह `वृद्धिर्यस्याचामादिस्तद्वृद्धम्' (1.1.73) इति गृह्यते, तस्यैव हि जनपदशब्दता क्षत्त्रियवाचित्वं च सम्भवति, न शास्त्रान्तरपरिभाषितस्य। `आम्बष्ठ्यः सौवीर्यः' इति। आम्बष्ठसौवीरशब्दाभ्यां ञ्यङ। `आवन्त्यः, कौन्त्यः' इति। अवन्तिकुन्तिशब्दाभ्यां ञ्यङ। `कौमारः' इत्यत्राञ् भवति। `ड्यण् वक्तव्यः' इति। क्षत्त्रियञ्यङोऽपवाद इति, डकारष्टिलोपार्थ इति। स च `वान्यस्मिन् सपिण्डे'(4.1.165) इत्यतो मण्डूकप्लुतिन्यायेन वेत्यनुवृत्तेर्लभ्यते। तथैवमतिप्रसङ्गो भवति ? व्यवस्थितविभाषात्वात् स न भविष्यति। `अन्यस्मात् पाण्डवः' इति। यः पाण्डुशब्दः क्षत्त्रिये वर्त्तते,तस्मादौत्सर्गिकेऽणि कृते पाण्डव इति भवति।।

172. कुरुनादिभ्यो ण्यः। (4.1.172)
अञणोरपवादः। कुरुशब्दस्यतु द्व्यज्लक्षणस्याणः। कुरुशब्दात् `कुर्वादिभ्यो ण्यः' (4.1.151) इति पूर्वमपत्ये उक्तः। तस्य यो जनपदशब्द क्षत्त्रियो न भवति सोऽवकाशः, यस्तु जनपदशब्दः क्षत्त्रियस्तस्मात् परत्वादञि तदपवादो द्व्यज्लक्षणोऽण् स्यात्। अतस्तं बाधितुं पुनर्ण्यो विधीयते।।

173. साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्। (4.1.173)
`अजपीष्यते' इति। तन्नामिकालक्षणः। कुतो विज्ञायते ? साल्व इति निपातनात्। तदवयवा जनपदानां वाचकाः क्षत्त्रियाणां समाना भवन्ति। अतस्तेऽप्यौपचारिकं साल्वापदेशमासादयन्ति।।

174. ते तद्राजाः। (4.1.174)
`गोत्रयुवसंज्ञाकाण्डेन व्यवहितत्वात्' इति।गोत्रयुवसंज्ञाप्रकरणं हि यदन्तरा व्यवधायं कृतं तस्यैतदेव प्रयोजनम्। तेन ये व्यवहिताः पूर्वेऽणादयस्तेषां `ते तद्राजाः' इत्यत्र सर्वनाम्ना प्रत्यवमर्शो मा भूदिति। `तथा चैवोदाहृतम्' (इति)। `तद्राजस्य बहुषु तेनैवास्त्रियाम्' (2.4.62) इत्यत्र कार्याश्रयमुदाहृतम्। इह तु प्रकरणे रूपाश्रयम्।।

175. कम्बोजाल्लुक्। (4.1.175)
`चोलः,शकः' इति। द्व्यञ्मगध (4.1.170) लक्षणस्याणो लुक्। केरल इत्यञः।।

176. स्त्रियामवन्तिकुन्तिकुरुभ्यश्च। (4.1.176)
`अवन्ती। कुन्ती' इति। तद्धितलुकि कृते `इतो मनुष्यजातेः' (4.1.65) इति ङीष् । `कुरूः' इति। `ऊङ्' (4.1.66) इत्यूङ्।।

177. अतश्च। (4.1.177)
`तकारो विस्पष्टार्थः' इति। तकारे ह्यसति `अस्य' इति निर्देशेन भवितव्यम्, ततश्च समानत्वान्निर्देशस्य सन्देहः स्यात्-- किमयवमवर्णस्य निर्देशः ? आहोस्तवित् इदमः ? इति। तकारे तु सत्येष दोषो न भवति; तपरस्य वणष्वेव प्रसिद्धत्वात्। दीर्घनिवृत्त्यर्थस्तु तकारो न भवति, दीर्घस्यासम्भवात्।

`सूरसेनी। मद्री' इति। सूरसेनाशब्दाद्योऽञ्, म्दरशब्दाद्यो द्व्यज्लक्षणोऽण् -- तयोर्लुकि कृते `जातेरस्त्रीविषयादयोपधात्' (4.1.63) इति ङीष्। `दरत्' इति। दरच्छब्दाद् द्व्यञ्मगधलक्षणस्याणो (4.1.170) लुक्।

यदि `अतः' इति वर्णस्येदं ग्रहणम्, एवंसति वर्णग्रहमं तदन्तविधिं प्रयोजयतीतीहापि प्राप्नोति--- आम्बषष्ठ्या, सौवीर्या इति ? अत आह-- `अवन्त्यादिभ्य लुक्' इत्यादि। यद्यत्र तदन्तविधिः स्यादवन्त्यादिभ्यो लुग्वचनमनर्थकं स्यात्; अनेनैव सिद्धत्वात्। तदन्तविधावसत्यकारग्रहणमात्रेण न सिध्यतीत्यवन्त्यादिभ्यो लुग्वचनमनर्थवद्भवति।।

178. न प्राच्यभर्गादियौधेयादिभ्यः। (4.1.178)

`पाञ्चाली, वैदेही'इति। `जनपदशब्दात्' (4.1.168) इत्यादिनाञ्। `शाङ्गर्गरवाद्यञो ङीन्' (4.1.73)। `आङगी। मागधी' इति। `द्व्यञ्मगध' (4.1.170) इत्यादिनाण्। `जातेरस्त्रीविषयादयोपधात्' (4.1.63) इति ङीष्। भर्गशाल्वशब्दाभ्यां द्व्यञ्मगधलक्षणोऽण् (4.1.170)। शेषेभ्यस्त्वञ्। `भार्गी' इत्यादौ पूर्ववत् ङीष्। `यौधेयी, शौक्रेयी, शौभ्रेयी' इति। यौधेय शौक्रेय शौभ्रेयशब्देभ्यः स्वार्थे `पर्श्वादियौधेयादिभ्योऽणञौ' (5.3.117) इत्यण्। भार्गीत्यादौ पूर्ववन्ङीष्।

`कस्य पुनः' इत्यादि।येनाभिप्रायेण पृष्टवान् तं `कथम्' इत्यादिना आविष्करोति। `पर्श्वादि' इत्यादि। पर्शूः = क्षत्त्रियः, जनपदेन समानशब्दः, तस्यापत्यं स्त्रीत्वविशिष्टम्। `द्व्यञ्मगध' (4.1.170) इत्यादिनाण्, तस्य `अतश्च' 4.1.77) इति लुक्। पर्श्वादियौधेयादिभ्योऽणञौ' (5.3.117) इत्यनेनापि यः स्वार्थिकोऽण्, तस्यापि लुक्। एवं `रक्षाः' इति। असूरशब्दाज्जनपदशब्दादित्यादिनाञ्, तदन्तात् पूर्ववत् स्वार्थिकोऽण् तोयर्लुक्। `तथा च' इत्यादिना ज्ञापकमेव भाष्यकारयतेन द्रढयति।।

इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
चतुर्थाध्याये प्रथमः पादः।

4.2

अथ चतुर्थोऽध्यायः
द्वितीयो पादः।

1. तेन रक्तं रागात्। (4.2.1)

रञ्जिरयमस्त्येवानुरागे -- देवे रक्तः, स्त्रियां रक्त इति; अस्ति च वर्णविशेषे -- रक्तो गौरिति, लोहित इत्यर्थः; अस्ति शुक्लस्य वर्णान्तरापादने --रक्तः पट इति, शुक्लमपनीय रक्तादिकं वर्णान्तरमापादित इत्यर्थः। इह तृतीयेऽर्थे वर्त्तमानो गृह्यते, यदाह-- `शुक्लस्य' इत्यादि। रागशब्दोऽयमस्त्येव भावसाधनः, अस्ति च करणसाधनः; तत्रेह द्वितीयो गृह्यते, यदाह-- `रज्यतेऽनेनेति रागः' इति। रागग्रहणेन चार्थस्य ग्रहणम्, न स्वरूपस्य। तेन रागविशेषवाचिनः प्रातिपदिकात् प्रत्ययो विज्ञायते, न तु रागशब्दादेवेत्यत आह-- `रागविशेषवाचिनः प्रातिपदिकात्' इति। अथ स्वरूपग्रहणं कस्मान्न भवति ? अर्थपरत्वान्निर्देशस्य। यत्र शब्दपरो निर्देशस्तत्र स्वरूपं गृह्यते,न यत्रार्थपरो निर्देश इति प्राक् प्रतिपादितमेव। अर्थपरत्वञ्च निर्देशस्याविच्छिन्नाचार्यपारम्पर्योपदेशाद्गम्यते। यदि तर्हि शुक्लस्य वर्णान्तरापादनमित्यभिप्रायेणाह-- `कथम्' इति। `उपमानात्' इत्यादि परिहारः। यथा `गौर्वाहीकः' इत्युपमानाद्गोशब्दोऽर्थान्तरे वाहीके वर्त्तते,तथेहापि काषायादिशब्दो गर्दभकर्णादाविति भावः।।

2. लाक्षारोचनाशकलकर्दमाट्ठक्। (4.2.2)

`शकलकर्दमाभ्यामणपीष्यते' इति। स च `वान्यस्मिन् सपिण्डे' (4.1.165) इत्यतो मण्डूकप्लुतिन्यायेन वाग्रहणानुवृत्तेर्लभ्यते। न चैवं सत्यतिप्रसङ्गो भवति; व्यवस्थितविभाषाविज्ञानात्।।

3. नक्षत्रेण युक्तः कालः। (4.2.3)

इह कालं क्रियात्मानं केचिदिच्छिन्ति, अपरे द्रव्यात्मानमाकाशादिकल्पम्। दर्शनद्वयमपि चैतदिहाश्रयितुमयुक्तम्। पूर्वस्मिन् दर्शने समाश्रीयमाणे सूर्यादिद्रवयान्तर्सयायां वा क्रियाया नक्षत्रेण योगः स्यात् ? आत्मस्थाया वा ? पूर्वस्यास्तावन्न सम्भवति, अर्थान्तरासमवायात्। अन्यथा ह्याकाशादयोऽपि क्रियावन्तः स्यु। न ह्यर्थान्तरसमवायिन्या अपि क्रियाया द्रव्यान्तरेण योगः स्यात्। आत्मस्थायास्तु क्रियाया विद्यते नक्षत्रेण योगः, किन्तु युक्तग्रहणं विशेषणं नोपपद्यते; व्यवच्छेद्याभावात्। न हि पुष्यादिस्थायाः कालस्य पुष्यादिभिः कदाचिद्योगो युज्यते यद्व्यवच्छेदार्थं युक्तग्रहणं क्रियते। एवं तावत् `क्रिया कालः' इत्येतद्दर्सनमत्राश्रयितुमयुक्तम्। द्वितीयमप्ययुक्तमेव; यस्मात् कालविशेषावधारणहेतुरिह योगोऽभिप्रेतः। तथा हि कालविशेषावधारणार्थमेव पौषीत्यादिलोके प्रयुज्यते। स चैवंविधो योगस्तयोरेव भवतीति ययोः सन्निकर्षविप्रकर्षे स्तः, यथा-- पुष्यचन्द्रमसोः। तयोर्हि कदाचित् सन्निकर्षो भवति, तदाचिद्विप्रकर्षः। न च

नक्षत्रकालयोः कदाचित् सन्निकर्षविप्रकर्षैः स्तः,तयोर्नित्यत्वादित्येतच्चेतसि कृत्वाह-- `कथं पुनः' इत्यादि। न कथञ्चिदित्यभिप्रायः। नक्षत्रनिकटवर्तिनि चन्द्रमसि वर्त्तमानः सूत्रे नक्षत्रशब्द उपात्त इत्येतत् सूचयन्नाह-- `पुष्यादिसमीपस्थे' इत्यादि। यतैव हि सामीप्यात् `गङ्गायां घोषः' इति गङ्गासमीपस्थे देशे गङ्गाशब्दो वर्त्तते, तथेहापि पुष्यदयो नक्षत्रविशेषवाचिनः शब्दाः पुष्यादिसमीपस्थे चन्द्रमसि वर्त्तन्ते। तेन तत्रैव वर्त्तमानाः प्रत्ययमुत्पादयन्ति। तेन पुख्यादिसमीपस्थचन्द्रमसा कालस्य विशेषावधारणहेतुर्योग उपपद्यते। तदवस्थस्य चन्द्रमसः कादाचित्कत्वात्। पुष्यसमीपस्थेन चन्द्रमसा युक्त इत्यर्थः; तदवस्थे चन्द्रमसि पुष्यशब्दस्य वृत्तेः। `पौषी' इति। `सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः (6.4.149) इत्यत्र `{तिष्यपुष्ययोर्नक्षत्राणि यलोपः' इति मु.पाठ।} तिष्यपुष्ययोर्नक्षत्राणि' (वा.808) इति वचनाद्यलोपः।।

4. लुबविशेषे। (4.2.4)

यद्यविशेषे लुग्भवति, इहापि प्राप्नोति-- पौषी रात्रिः,पौषमहरिति, अत्राप्यविशेषी गम्यत एव। तथा हि-- पौषीरात्रिरित्युक्ते, अद्य श्वो वेति विशेषो न गम्यत इत्यत आह-- `न चेत् नक्षत्रयुक्तस्य' इत्यादि। एवं मन्यते-- `नक्षत्रेण युक्तः कालः' (4.2.3) इत्यनुवर्त्तते, तेन तद्विशेष एव न भवतीति। `रात्र्यादिविशेषः' इति।आदिशब्देनाह, मुहूर्त्तः, लवः-- इत्येते विशेषा गृह्यन्ते। `यावान्' इत्यादि। अनन्तरोक्तमेवार्थं विस्पष्टीकरोति। कियांश्च कालो नक्षत्रेण युज्यते ? अहोरात्रः। तदेवं यावान् कालो नक्षत्रेण युक्तस्तस्याविशेषे न गम्यते, अपि तु तदेकदेशस्य रात्रेः, अह्नो वेति नायं लुपो विषयः। यद्येवम्, प्रत्ययस्यापि कथमेकदेशो विषयः ?समुदायद्वारेण तदन्तःपातिनो गृह्यन्ते। एकदेशानामपि योगात् पूर्वेण प्रत्ययोत्पत्तिः सिद्धा बवति। पुनरिहावयवस्यैकदेशो लुपो विषय इति। इह तर्हि प्राप्नोति-- पौषोऽहोरात्र इति, अत् यावान् कालो नक्षत्रेण युक्तः, तस्याविशेषो गम्यते, तथा ह्यहोरात्र इत्युक्ते न ज्ञायते-- किमतीतः, अथानागतः,अथ वर्त्तमान इति ? नैष दोषः; अविशेष इति प्रसज्यप्रतिषेधोऽयम्। तेन नक्षत्रयुक्तस्य कालस्य यत्र विशेषो रात्र्यादिस्तत्र न लुग्भवतीति ज्ञायते, न तु यत्राविशेषस्तत्र तु लुब्भवतीति।।

5. संज्ञायां श्रवणाश्वत्थाभ्याम्। (4.2.5)

`लुपि युक्तवद्भावः कस्मान्न भवति' इति। यदि स्यात्, श्रवणशब्दस्य पुंल्लिङ्गता स्यात्। `निपातनात्' इत्यादिना परिहारः। गतार्थः।।

6. द्वन्द्वाच्छः। (4.2.6)

नक्षत्रग्रहणं यत्प्रकृतं तदिहार्थात् षष्ठ्यन्तं विपरिणम्यते।तेन नक्षत्राणां यो द्वन्द्वस्तस्मात् प्रत्ययो विज्ञायत इत्याह-- `नक्षत्रद्वन्द्वात्' इति। `विशेषे चाविशेषे च' इति। अविशेषग्रहणस्य निवृत्तत्वात्। `अद्य राधानुराधीयम्' इति। ननु चाविशेषे लुपा भवितव्यम्, तत्कथं प्रत्ययस्य श्रवणमित्याह-- `लुपं परत्वाद्बाधते' इति।।

7. दृष्टं साम। (4.27)

8. कलेर्ढक्। (4.2.8)

`तीयात्' इति। द्वेस्तीयः' (5.2.54) इति तीयः। `त्रेः सम्प्रसारणञ्च' (5.2.55) इति तीयं वक्ष्यति, तदन्तात् स्वार्थ ईकग्वक्तव्यः।

`न विद्यायाः'इति। विद्याया अभिधाने तीयादीकग्न भवति।

`गोत्रादह्कवत्' इति। यथा तस्याङ्क इत्यत्रार्थे विवनक्षिते गोत्रात् प्रत्ययो भवति, `तेन दृष्टं साम' (4.2.7) इत्यत्रार्थे विवक्षिते तथैवेष्यते। `औपवेन दृष्टं साम' इति। औपगवशब्दः `तस्यापत्यम्' (4.1.92) इतिगोत्रप्रत्ययान्तः। `गोत्रचरणाद्वुञ् भवति' इति। यथौपगवस्यायमङ्क औपगवक इत्यौपगवशब्दाद्गोत्रप्रत्ययान्तादङ्के वुञ्भवति, तथा `तेन दृष्टं साम' इत्यत्रापि। ननु च `गोत्रचरणाद्वुञ्' (4.3.126) इत्यत्र नाङ्कार्थ उपात्तः, तत्कथमनेनाह्कवदित्युच्यमाने वुञ् बवति ? नैष दोषः; तत्राङ्कवदित्यनेन विहितस्येदमर्थो विवक्ष्यते। `तेन गोत्रप्रत्ययान्ताद्यथा `तस्येदम्' (4.3.120) इत्यत्रार्थे प्रत्यय इष्यते, तथा तेन दृष्टं साम' इतत्यत्रापीत्यर्थः। `दृष्टे सामनि' इति सङ्ग्रहः।गतार्थः।।

9. वामदेवाड्ड्यड्ड्यौ। (4.2.9)

`{उदाहरणद्वयं मूले नास्ति, एवमेव वामदेव्य् इति दृश्यते।} वामदेव्यम्, वागमदेव्यम्' इति। एकस्तित्स्वरेणान्तस्वरितः, द्वितीयः प्रत्ययस्वरेणान्तोदात्तः। `ड्त्करणं किमर्थम्' इति। `यस्येति च' (6.4.148) इत्येवं लोपस्य सिद्धत्वाड्डित्करणस्यानर्थक्यं मन्यते-- ड्यड्ड्यावित्यादि। न वामदेव्यमवामदेव्यमिति-- -- अत्र `नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः' (6.2.155) इत्यतो नञ इत्यनुवर्त्तमाने `ययतोश्चातदर्थे' (6.2.156) इत्युत्तरपदस्यान्तोदात्तत्वे विधीयमानेऽनयोर्ग्रहणं मा भूदित्येवमर्थ डित्करणम्। असति च तत्रानयोर्ग्रहणे नञ एव स्वरो भवति, स पुनरुदात्तः। `निपाता आद्युदात्ता भवन्ति' (फिट्.सू.4.80) इति वचनात्। अथ क्रियमाणे डित्करणे कस्मादनयोर्ग्रहणं न भवति ? इत्याह्-- `निरनुबन्धग्रहणे न

सानुबन्धकस्य' (व्या.प.53) इति परिभाषया ङ्यङ्यङ्योरपि निवृत्तिः क्रियते। यद्ग्रहणेऽपि `एकानुबन्धकरणे न द्व्यनुबन्धकस्य' (व्या.प.52) इति परिभाषया यतः। अनयोश्च परिभाषयोरस्तित्व एतदेव ङित्करणं लिङ्गम्।
सङ्ग्रहश्लोके `अतदर्थे' इत्यनेन `ययतोश्चातदर्थे' (6.2.156) इत्येतत् सूत्रं लभ्यते। एतस्मिन् सूत्रे इत्यर्थः। `नञ्स्वरे'इति। नञो यः स्वरः नञ्स्वरः। शेषो गतार्थः।।

10. परिवृतो रथः। (4.2.10)
`चार्मणः'इति। `अन्' (6.4.167) इति प्रकृतिभावे टिलोपो न भवति। `न संयोगा4द्वमन्तात्' (6.4.137) इत्यल्लोपो न भवति।
अथेह कस्मान्न भवति-- छात्त्रैः परिवृतो रथ इति ? अत्राह-- `समन्ताद्वेष्टितः' इत्यादि। वृणोतिरयं वेष्टने वर्त्तते, तस्य परिणा सर्वतो भावो द्योत्यते। तस्माद्यः सर्वतो वेष्ट्यते तत्रैव त्ययेन भवितव्यम्, न तु छात्त्रैः रथः सर्वतो वेष्टितः, ततो न तत्र प्रत्ययस्य प्रसङ्गः। यस्तु छात्त्रैः परिवृतो रथ इति प्रयोगः,सपरिवृतस्याध्यारोपेणौपचारिकः।नच मुख्ये सति परिवृतत्वे गौणस्याध्यारोपितस्य ग्रहणं युक्तम्।।

11.पाण्डुकम्बलादिनिः। (4.2.11)
`पाण्डुकम्बली' इति। `सौ च' (6.4.13) इति दीर्घः।
`मत्वर्थीयेनैव सिद्धे' इति। यद्धि येन सम्न्ताद्वेष्टितं तत् तस्यास्ति। तस्मात् `अत इनिठनौ' (5.2.115) इति म्तवर्थीयेनेनिना सिद्धे यत्तद्वचनं तदणो निवृत्त्यर्थम्। यदि लभ्येत, तन्नारभ्येत। यदि ह्येतद्वचनं न स्यात्, तदा `परिवृतो रथः'(4.2.10) इत्यण्प्रसज्येत्, ततश्च पाण्डुकम्बल इति स्यात्, पाण्डुकम्बलीति चेष्यते। तस्मादण्निनृत्त्यर्थमुच्यते।।

12. द्वैपवैयाघ्रादञ्। (4.2.12)
`द्वीपिव्याघ्रयोर्विकार' इत्यादि। द्वीपिनो विकारश्चर्म, व्याघ्रस्य विकारश्चर्म-- इत्यर्थविवक्षायां `प्राणिरजतादिभ्योऽञ्' (4.3.154) इत्यञ्प्रत्ययान्तत्वात् द्वैपवैयाघ्रशब्दयोः, ताभ्यामिह द्वीपिव्याघ्रविकारत्वाच्चर्मणि अभिधीयेते। चर्मणैव द्वीपिव्याघ्रविकारेण रथस्य परिवृतत्वं सम्भवति, न विकारमात्रेणेति चर्मणी इह द्वैपवैयाघ्रशब्दाभ्यां विवक्षिते इति गम्यते।।

13. कौमारापूर्ववचने। (4.2.13)
`अपूर्ववचने'इति। अपूर्वस्य वचन इति, अपूर्वाभिधान इत्यर्थः। कस्यापूर्ववचनमित्याह--`पाणिग्रहणस्य' इत्यादि। एतच्च सामान्योक्तावपि निपातनसामर्थ्याल्लभ्यते। यथैव हि निपातनसामर्थ्यादन्यदपि किञ्चिदलाक्षणिकं कार्यं लभ्यते,तथेदमपि। `उभयतः स्त्रियाम्' इत्यादि। यदि कौमार इति पुमानभिधीयते, एवमप्यस्यापूर्वत्वं यदा स्त्रिया एव विशेषणं भवति, न पुंसः एवमतन्निपात्यते नान्यथेत्यर्थः। `अपूर्वपतिम्' इति। नास्याः पूर्वः पतिरिति बहुव्रीहिः। पत्या सह यस्याः पाणिग्रहणं निवृत्तं साऽपूर्वपतिः। तां पतिरुपपन्नः प्राप्तवानित्यर्थः। `अपूर्वपतिः' इति। अयमपि बहुव्रीहिः।
`कौमारापूर्ववचने' इत्यादि। कौमार इत्येतन्निपात्यते, अपूर्ववचने। किं पुनरिह निपात्यत इत्याह-- `कुमार्या अण्विधीयते' इति। कुमारीशब्दादण् निपात्यत इत्यर्थः। कदेत्याह-- `अपूर्वत्वं यदा तस्याः' इति। इह हि निपातनेन पुमानभिधीयते, स्त्री वा,तत्र द्वयोरपि पक्षयोरपूर्वत्वम्। यदा तस्याः स्त्रिया विशेषणं भवति, न पुंसः, तदेतन्निपातनम्, नान्यथेत्यर्थः। `कुमार्या भवतीति वा' इति। अनेन योगः प्रत्याख्यायते। यो हि कुमारीं प्राप्तवानसौ तत्र भवति। ततस्च `तत्र भवः' (4.3.53) इति शैषिके भवार्थेऽणन्तं कौमारशब्दं व्युत्पद्येत,ततः पुंयगोलक्षणे ङीषि सति हि कुमारीत्येतत् सिद्धम्। स्वरकृतो विशेषो नास्त्येव। तथा हि अणन्तान्ङीष्यपि कृते `यस्येति च' (6.4.148) इति लोपे च `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इत्युदात्तेन ङीपा भवितव्यम्। ङीष् प्रत्ययस्वरेणाद्युदात्त एव। ननु चैवं सति कौमारस्य याऽन्यापि स्त्रीकौमारव्यपदेशस्य कारणं सापि कौमारीति प्रसज्यते ? नैष दोषः; प्रत्यासत्तेर्हि या तस् प्रत्यासन्ना सैव तस्य कौमारीति भविष्यति। का पुनस्तस्य प्रत्यासन्ना ? या कौमारे व्यपदेशस्य हेतुः। यस्यामसौ भवन् कौमार इत्युच्यते सैव, नान्या। यद्यपि व्यासादयोऽपि कुमार्या भवन्ति तथापि तेष्वण्, न भविष्यति; अनभिधानात्। एतच्चावश्यमनभिधानमाश्रयणीयमिति; इतरथा हि क्रियमाणेऽपि निपातने `तत्र भवः' (4.3.53) इत्यनेनाण् स्यादेव।।

14. तत्रोद्धृतममत्रेभ्यः। (4.2.14)

15. स्थण्डिलाच्छयितरि व्रते। (4.2.15)
`समुदायेन च' इत्यादिना प्रकृतिप्रत्ययोपाधित्वं व्रतस्य दर्शयति। `शास्त्रितः' शब्दः `वाचि यमो व्रते' (3.2.40) इत्यत्र व्युत्पादितः।।

16. संस्कृतं भक्षाः। (4.2.16)

`संस्कृतम्' इति। अत्र सामान्यशब्दत्वात् संस्कृतशब्दस्य नपुंसकलिङ्गत्वम्। एकवचनत्वञ्च । `भक्षाः' इति। विशे शब्दत्वाद्भक्षशब्दस्य पुंल्लिङ्गत्वम्। बहुवचनत्वञ्च। भक्षशब्दोऽयं घञन्त उपात्तः। स च खरविशवाभ्यवहार्य एव रूढ इत्याह-- `खरविशद' इत्यादि। सुबोधम्।।

17. शूलोखाद्यत्। (4.2.18)

18. दध्नष्टक्। (4.2.18)
ठकं वक्ष्यति-- `संस्कृतम्' (4.4.3) इत्यनेन। `तेनैव सिद्धम्' इति।यद् दधिनि संस्कृतं तद् दध्ना हि संस्कृतं भवतीत्यभिप्रायः। `इह रदध्यधिकरणमाधारभूतम्' इति। यथा शूले संस्क्रियमाणस्य मांसस्य शूलम्। न हि शूलेन मांसस्य कश्चित् संस्कार क्रियते, अपि तु लवणादिना। आधारभावमात्रं तु मांसस्य शूलं प्रतिपद्यते। यदि तर्हि दधि केवलमाधारभूतम्, केन तत्र तर्हि संस्कारः क्रियते इत्याह-- `द्रव्यान्तरेण' इत्यादि।

19.उदश्वितोऽन्यतरस्याम्। (4.2.19)
`{ओदस्वित्यम् इति मु.पाठः} औदश्वित्कम्' इति। `इसुसुक्तान्तात् कः' (7.3.51)।।

20. क्षीरादड्ढञ्। (4.2.20)
`क्षैरेयी' इति। `टिड्ढाणञ्' (4.1.15) इति ङीप्।।

21. सास्मिन्पौर्णमासीति संज्ञायाम्। (4.2.21)
`ततश्चेद्विवक्षा भवति' इति। तत इति प्रत्ययान्तो निर्दिश्यते। एतदुक्तं भवति-- यदि प्रत्ययान्ताल्लोकेऽस्य विवक्षा भवत्येवं प्रत्ययो भवति; नान्यथेत्यर्थः। `प्रत्ययान्तेन च' इत्यादिना संज्ञायाः समुदायोपाधित्वं स्पष्टीकरोति। `एषा संज्ञा' इति। या प्रत्ययान्तेन गम्यते। `पौषी' इति। `नक्षत्रेण युक्तः कालः' (4.2.3) इत्यण्, तदन्तान्ङीप्।
`इह न भवति' इति। संज्ञाया अनवगम्यमानत्वात्। न हि दशरात्रस्य प्रत्ययान्ताः संज्ञा, नापि भृतकमासस्य। किं तत् तुल्यं फलमित्याह-- `प्रयोगानुसरणम्' इति। प्रयोगानुसरणं प्रयोगोपलक्षणमित्यर्थः। संज्ञाग्रहणे ह्येतत् क्रियते-- प्रयोगमुपलक्ष्य यत्र प्रयोगो दृश्यते मासार्धमाससंवत्सरेषु तत्र प्रत्यय उत्पादयितुव्यः, न तु भृतकमासादौ। इति करणेनाप्येतदेव क्रियते। तथा हि-- प्रत्ययान्ताद्यदि लोकस्यार्थविवक्षा भवति, एवं हि प्रत्यय उत्पादयितव्यः, नान्यथेति। एवमर्थमितिकरण उपादीयते, ततश्च लोकविवक्षा मासार्धमाससंवत्सरविषया भवति, एवं हि न भृतकमासादिविषया। तस्मात् प्रोयगानुसरणम्, उभयोरपि फलं तुल्यमेव। `संज्ञा' इत्यादि। ननु च यथा संज्ञाशब्दः प्रयोगानुसरणफलतया लोके प्रसिद्धः, तथेतिकरणोऽपि, तत्किमर्थमिह तस्य तेन तुल्यत्वमेव ज्ञायते ? इत्याह--- `न ह्ययम्' इत्यादि। तथा हि-- लोकेऽयं संज्ञाशब्दः प्रयोगानुसरणफलत्वेन यथा प्रसिद्धः, न तथेतिकरणः। तस्मादस्य तेन तुल्यता ज्ञापितेति भावः। `संज्ञार्थत्वेट इत्यादिना ज्ञापनस्य प्रयोजनं दर्शयति। संज्ञया तुल्योऽर्थो यस्य स संज्ञार्थः। समासेन गम्यमानत्वात् तुल्यशब्दो न प्रयुज्यते, यथा `रुच्यर्थानाम्' (1.4.33) इत्यत्र रुचिना समानशब्द इति भावः। संज्ञार्थस्य भावः = संज्ञार्थत्वम्। अर्थशब्दश्चायं प्रयोजनवचनः। `तदुपपन्नं भवति' इति। यत एव संज्ञाशब्देनेतिकरणस्य तुल्यार्थता ज्ञापिता तेन यत्र यत्र प्रयोगानुसारणार्थं इतिकरणः, ततस्ततश्च विवक्षा भवतीत्युच्यते-- तदुपपन्नं भवतीति; इतकरणस्य संज्ञाप्रयोजनत्वात्।
`पूर्णमासादण्' इति। पूर्णो मासो यस्यं तिथाविति तत्रार्थे बहुव्रीहिः। अस्मादेव निपतानादण्। पूर्णमासस्येयं `पौर्णमासी'। `तस्येदम्' (4.3.120) इत्यण्। तिथिविशेषस्येयं संज्ञा। व्यत्पत्तिस्तु यथाकथञ्चित् कर्त्तव्याः।।

22. आग्रहायण्यश्वत्थाट्ठक्। (4.2.22)

23. विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः। (4.2.23)

24. सास्य देवता। (4.2.24)
`तस्मिन्नभिधेये' इति। यागसम्प्रदानभूतदेवतास्वामिनीके पुरोडाशादौ। एष चाभिधेयविशेषः। सामान्योक्तावपीतीत्यस्येहानुवृत्तेर्लभ्यते। `आदियत्यम्, बार्हस्पत्यम्' इति। `दित्यदित्यादित्यपत्युत्तरपदात्' (4.1.85) इत्यादिना ण्यः। यागस्य देवतेहाभिप्रेता।
ऐन्द्रो मन्त्र इति च प्रयोगे कस्यचित् पुरोडाशादिकस्य देयस्याभावादिन्द्रस्य सम्प्रदानत्वं नास्ति। अतो नासौ देवदेति प्रत्ययेनात्र न भवितव्यमिति मन्यते। `मंन्त्रस्तुत्यम्' इति। यथा देवता पूजार्हा तथा मन्त्रस्तुत्यमपि वस्तु, ततो देवतासाधर्म्यात् तदि देवतेत्युपचरन्ति विद्वांसः। इन्द्रश्च मन्त्रस्तुत्यो भवति, तस्मादसम्प्रदानभूतमपि तं देवतेत्युचपरन्ति। दैवतोपचारं तत्र कुर्वन्तीत्यर्थः। नन्वेमपि नैवात्र प्रत्ययेन भवितव्यम्; मुख्ये सति गौणस्याश्रयणस्यायुक्तत्वात् ?

नैष दोषः;यथैव हि कश्चिदेनकेनैव यत्नेन श्वेतो धावतीति तन्त्रेण वाक्यद्वयमुच्चारयति, तथेहाप्याचार्येण द्वे वाक्ये तन्त्रेणोच्चारिते। तत्रैकं मुख्यार्थम्; अपरं गौणार्थं भविष्यति।

`कथम्' इत्यादि। अग्नेर्हि न मुख्यं देवतात्वम्, नापि गौणम्। तत्र मुख्यं तावन्नास्ति;देयाभावेनासम्प्रदानभूतत्वात्। गौणमपि नास्ति; मन्त्रशब्दाभावेन मन्त्रस्तुल्यतथानुपात्तत्वात्। तस्मादत्र प्रत्ययेन न भवितव्यमिति भावः। `उपमानाद्भविष्यति' इति। देवतास्वामिनीक एवात्र प्रत्यय उपपद्यते। यस्त्वर्थान्तरे प्रत्ययान्तप्रयोगः स आग्नेय इवाग्नेय इत्युपमानाद्भविष्यति, यथा-- काषायौ गर्गभस्य कर्णाविति। ननु च सास्मिन् पौर्णमासीति सेति प्रकृतमेव। तत्किमर्थं पुनरिह समर्थविभक्तिर्निर्देश्यत इत्यत आहु-- `सेति प्रकृते' इत्यादि। यदिदं सेति प्रकृतं तत्संज्ञासम्बद्धमिति, तदनुवृत्तौ संज्ञाग्रहणस्याप्यनुवृत्तिः स्यात्। तस्मात् तन्निवृत्त्यर्थं पुनरिह समर्थविभक्तिनिर्दिश्यत इति।।

25. कस्येत्। (4.2.25)

तकारो मुखसुखार्थः, न दीर्घनिवृत्त्यर्थः। भाव्यमानेमाणा सवर्णानामग्रहणात्। सत्यपि सवर्णग्रहण आन्तरतम्याद् ह्रस्वस्य ह्रस्व एव भविष्यति न दीर्घः। `प्रजापतेर्वाचकः' इति। अनेनासर्वनामत्वमस्य दर्शयति। इकारस्य `यस्येति च' (6.4.148) इति लोपो न भवति, विधानसामर्थ्यात्। `कायम्' इति। वृद्ध्यायादेशौ।।

26. शुक्राद्घन्। (4.2.26)

27. अपोनप्त्रपान्नप्तृभ्यां घः। (4.2.27)

अपोनपात्, अपान्नपादिति यद्येते देवतानामधेयेतत् कथमेतद्विलक्षणं प्रकृतिरूपं सूत्रे श्रूयते ? इत्याह--`तयोस्तु प्रत्ययसन्नियोगेन' इत्यादि।।

28. छ च। (4.2.28)

अथ किमर्थं योगविभागः क्रियते, न `अपोनप्तृ-- अपान्नप्तृभ्यां घच्छौ' इत्येकयोग एव क्रियते ? इत्याह-- `योगविभागः' इत्यादि। एकयोगे हि द्वे प्रकृती, प्रत्ययावपि द्वावेव, समसंख्यत्वात् संख्यातानुदेशः स्यात्, अतस्तन्निवृत्तये योगविभागः क्रियते।

`छ प्रकरणे' इत्यादि। पैङ्गाक्षीपुत्रादिभ्यश्छप्रकरणे छस्योपसंख्यानम् = प्रतिपादनं कर्त्तव्यम्। तत्रेदं प्रतिपादनम्-- चकारोऽत्र क्रियते, स चानुक्तसमुच्चयार्थः , तेन पैङ्गाक्षीपुत्रादिभ्यश्छो भवतीति।।

29. महेन्द्राद्घाणौ च। (4.2.29)

अथ `महेन्द्रादण् च' इत्येव कस्मान्नोक्तम् ? चकाराद्घच्छौ भविष्यतः, एवमुच्यमाने द्वेष्यमपि विज्ञायते--अनन्तरं छ एव चकारेणात्र कृष्यत इति। तस्मात् तथा मा विज्ञायीति घग्रहणम्।।

30. सोमाट्ट्यण्। (4.2.30)

`सौमी' इति। `हलस्तद्धितस्य' (6.4.150) इति यलोपः।।

31. वाय्वृतुपित्रुषसो यत्। (4.2.31)

`वायव्यम्। ऋतव्यम्' इति। `ओर्गुणः' (6.4.146),`वान्तो यि प्रत्यये' (6.1.79) इत्यवादेशः। `पित्र्यम्' इति। `रीङृतः' (7.4.27) इति रीङ्, यस्येति (6.4.49) लोपः।।

32.द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च। (4.2.32)

`अणो ण्यस्य चापवादः' इति। वास्तोष्पतिशब्दात् `दित्यदित्यादिभ्य' (4.1.85) इत्यादिना प्राप्तस्य ण्य्स्यापवादः। शेषेभ्यस्त्वौत्सर्गिकस्याणः। वास्तुनः पतिर्वास्तोष्पत्तिः। वास्तुशब्दस्य नपुंसकस्य पुंल्लिङ्गता, षष्ठ्यर्थेऽलुक् च निपातनात्। `षष्ठ्याः पतिपुत्रपृष्ठ' (8.3.53) इत्यादिना षत्वम्।

`द्यावापृथिव्यौ' इति। `दिवो द्यावा' (6.3.29) इति द्यावादेशः। `शुनासीरीयम्' इति। `देवताद्वन्द्वे च' (6.3.26) इत्यानङ्। `अग्नीषोमीयम्' इति। `ईदग्नेः सोमवरुणयोः' (6.3.27) इतीत्त्वम्; `अग्नेः स्तुत्स्तोमसोमाः' (8.3.82) इति षत्वम्।।

33. अग्नेर्ढक्। (4.2.33)

34. कालेभ्यो भववत्। (4.2.34)
बहुवचनग्रहणेन स्वरूपग्रहणे निरस्ते, कालविशेषवाचिभ्यः प्रत्ययो विज्ञायत इत्याह-- `कालविशेषवाचिभ्यः' इत्यादि। `वत्करणम्' इत्यादि। सर्वस्य सादृश्यस्य परिग्रहो यथा स्यादित्येवमर्थ वत्करणम्। `कालेभ्यो भवः' इत्युच्यमाने यदि तावत् कालग्रहणं भवप्रत्ययैः सम्बध्यते ? भवेऽर्थे कालेभ्यो विधास्यन्ते ये प्रत्ययास्ते `सास्य देवता' (4.2.24) इत्येतस्मिन्नर्थे भवन्ति, तदा च देवताप्रकृतिरविशेषिता स्यात्। एवञ्च देवतामात्रवाचिनः प्रातिपदिकादविशेषेण प्रत्ययाः प्रसज्येरन्। अथ देवताप्रकृतिभिः कालग्रहणं सम्बध्यते ? भवे ये विधास्यन्ते ते प्रत्ययाः कालेभ्यो देवताभ्यः प्रसज्येरन्। अथाप्युभयेषां सन्निधानाद्विशेष्यभेदेन वाक्यभेदाच्च प्रत्ययैः प्रकृतिभिश्च सम्बध्यते-- कालेभ्यो भवेऽर्थे विधास्यन्ते ये प्रत्ययास्ते कालेभ्यो देवताभ्यो भवन्तीति ? एवमपि यः कश्चित् कालप्रकृतिः प्रत्ययो यतः कुतश्चित् कालाद्देवतायाः स्यात्, ऋतुभ्योऽण् मुहूर्तादिभ्योऽपि स्यात्। वतौ तु सति तस्य सादृश्यविधानात् सर्वसादृश्यपरिग्रहो भवति। तेन याभ्यः प्रकृतिभ्यो येन विशेषणेन ये प्रत्यया भवार्थे विधास्यन्ते, इहापि ताभ्य ए प्रकृतिभ्यस्तेनैव वििशेषणेन त एव प्रत्यया भवन्तीति न बवत्यनिष्टप्रसङ्गः। `{वासन्तम्--काशिका} वासन्तः'इति। `सन्धिवेलादि'(4.3.16) सूत्रेणाण्। `{प्रावृषेण्यम्--काशिका} प्रावृषेण्यः' इति। `प्रावृष एण्यः' (4.3.17)।।

35. महाराजप्रोष्ठपदाठ्ठञ्। (4.2.35)

36. पितृव्यमातुमातामहपितामहाः। (4.2.36)
`पितामही,मातामही' इति। `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीष्।।

37. तस्य समूहः। (4.2.37)
`काकम्, शौकम्, बाकम्' इति। काकशुकबकशब्दा आद्युदात्ताः।`प्राणिनां कुपूर्वाणाम्' (फि.सू.2.30) इत्यनेन। अस्यायमर्थः-- प्राणिविशेषवाचिनां शब्दानां आदिभूताः कवर्गात् तेषामुदात्तो भवतीति।।

38. भिक्षादिभ्योऽण्। (4.2.38)
अथाण्ग्रहणं किमर्थम्, न भिक्षादिभ्यो यथाविहितमेवोच्येत ? इत्यत आह-- `अण्ग्रहणम्' इत्यादि। भिक्षाशब्दोऽयम् `गुरोश्च हलः'(3.3.103) इत्यकारप्रत्ययान्तत्वादन्तोदात्तः। तत्र `अनुदात्तोदेरञ्' (4.2.44) इत्यञ् अणो बाधकः प्राप्नोति, तस्य बाधकस्य बाधनार्थमण्ग्रहणम्। ननु च यद्यत्राण् स्यात् पुनर्वचनमनर्थकं स्यात् ? नैतदस्ति; परत्वादचित्तलक्षणष्ठक् प्राप्नोति, अतस्तद्बाधनर्थं पुनर्वचनं स्यात्। अञ्प्रत्ययस्तु स्यादेव, अण्ग्रहणात् पुनरणेवेति न भवत्येष दोषः। `गार्भिणम्' इति। गर्भिणीनां समूहो `भस्याऽढे तद्धिते' (वा.731)। `सिद्धत्वात् प्रत्ययविधौ' (4.2.38) पुंवद्भावेन स्त्रीप्रत्ययनिवृत्तिः, ततोऽण्, तस्मिन् `नस्तद्धिते' (6.4.144) इति टिलोपः प्राप्तः, `इनण्यनपत्ये' (6.4.164) इति प्रकृतिभावान्न भवति। `तस्यग्रहण' इति। युवतिशब्दस्य यदि पुंवद्भावो न भवति, तदा तस्य प्रत्ययान्तत्वात् `अनुदात्तादेः' (4.2.44) इत्यञि प्राप्ते तद्बाधनार्थमिहाण्ग्रहममर्थवद्भवति। यदि पुंवद्भावः स्यात् तदा तदनर्थकं स्यात्। तथा हि --`सिद्धश्च' प्रत्ययविधौ' (वा. 4.2.38) इति वचनादनुत्पन्न एव तद्धिते बुद्धिस्थे पुंवद्भावेन भवितव्यम्। युव शब्दस्य `कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः' (द.उ.6.51) इति कनिन्प्रत्ययान्तस्य नित्स्वरेणाद्युदात्तत्वम्। तत्र यदि पुंवद्भावः स्यादुत्सर्गलक्षणेवाण् सिद्ध इतीह ग्रहणमनर्थकं स्यात्। तस्मान्मा भूदस्सयानर्थक्यमिति तस्यग्रहणसामर्थ्यादेव पुंवद्भावो न भवति, तेन यौवतमिति सिद्धं भवति।।

39. गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्। (4.2.39)
`अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यते' इति। यद्येवम्, गोत्रग्रहणेनैतस्य सिद्धत्वाद्राजन्यमनुष्ययोरुपादानमनर्थकम् ? नैतदस्ति; न हि तौ गोत्रप्रत्ययान्तौ, जातेः प्रत्ययार्थत्वात्। यद्येवम्, लोपस्य प्राप्तिरेव नास्ति, तत्र यदुक्तम्-- `प्रकृत्याके राजन्यमनुष्ययुवानः' (वा.814) इति यलोपो न भवतीति, तदनर्थकं स्यात् ? एतत् पुनरेकीयमतमाश्रित्योक्तम्। केचिदाचार्या राजन्यमनुष्ययोरपत्यप्रत्ययान्तत्वमिच्छन्ति, अतस्तन्मतमाश्रित्यैदुक्तमित्यदोषः, तन्मतेन तर्हि राजन्यमनुष्ययोर्ग्रहणमनर्थकं स्यात् ? ज्ञापनार्थत्वात्। तेनैतद्ज्ञाप्यते-- राजन्यमनुष्ययोर्यकारसय् किञ्चिदपत्याश्रितं कार्यं न भवतीति। किं पुनस्तत् ? आपत्यव्यपदेशम्। तेन राजन्यकम्, `मानुष्यकमिति --अत्रापि `आपत्यस्य च तद्धितेऽनाति' (6.4.151) इति यलोपो न भवतीति। तथा सूत्रोपात्त एव राजन्यमनुष्ययोः प्रकृतिभावः `प्रकृत्याके राजन्यमनुष्ययुवानः' (वा.814) इत्यनेनाख्यायत इति वेदितव्यम्।
`वृद्धाच्चेति वक्तव्यम्' इति। वृद्धश्बदाद्वुञ् भवतीत्येदर्थमित्यर्थः। तत्रेदं व्याख्यानम्-- इह पुनरुत्तरसूत्राच्चकारोऽनुवर्त्तते सिंहावलोकितन्यायेन, स चानुक्तसमुच्चयार्थः, तेन वृद्धशब्दाद्वुञ् भवतीति। योगश्चायं यथायोगमणञोरपवादः।।

40. केदाराद्यञ्च। (4.2.40)
`गणिकायाश्च यञ्वक्तव्यः' (इति)। वक्तव्यो व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्-- इहाप्युत्तरसूत्राच्चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, तेन गणिकाशब्दादपि यञ् भवतीति, वुञ् न भवतीति, अनभिधानात्।।

41. उञ् कवचिनश्च। (4.2.41)
कवचिञ्शब्दो मत्वर्थीयेनिप्रत्ययान्तः,प्रत्ययस्वरेणान्तोदात्तः। तस्मादनुदात्तादि (4.2.44) लक्षणेऽञि प्राप्ते वचनम्।।

42. ब्राह्मणमाणववाडवाद्यन्। (4.2.42)
`पृष्टादुपसंख्यानम्' इति। पृष्ठशब्दाद्यन्प्रत्ययस्योपसंख्यानम् = व्याख्यानं कर्त्तव्यमित्यर्थः। तत्रेदं व्याख्यानम्-- पूर्वसूत्रादिह चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, तेन पृष्ठशब्दादपि भविष्यतीति। `अहीनः' इति। `अह्नष्टखोरेव'(6.4.145) टिलोपः। `आह्नः' इति। `अल्लोपोऽनः' (6.4.134) इत्यकारलोपः। ननु चाचित्तलक्षणेन ठका भवितव्यम्, तत्कथमाह्न इति भवति ? इत्याह-- `खण्डिकादिषु ' इत्यादि।
`णस्वक्तव्यः' इति। सकारः `सिति च' (1.4.16) इति विशेषणार्थः। तेन पार्श्वमित्यत्र भत्वाभावात् `ओर्गुणः' (6.4.146) न भवति।।

43. ग्रामजनबन्धुसहायेभ्यस्तल्। (4.2.43)
ग्रामशब्दादचित्तलक्षणे ठकि प्राप्ते। जनशब्दो ञित्स्वरेणाद्युदात्तः; घञन्तत्वात्। तथा बन्धुशब्दोऽपि नित्स्वरेणाद्युदात्त एव। तथा हि स `धान्ये नित्' (द.उ.1.94)इति वर्त्तमाने `{शृस्वृस्निहित्रप्यसि----द.उ.} शृस्वस्निहितप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च' (द.उ.1.95) इत्यनेन व्युत्पादित उप्रत्ययान्तः। आद्युदात्तत्वादणि प्राप्ते। सहायशब्दोऽपि `लघावन्ते बह्वषो गुरुः' (फि.सू.2.42) इति मध्योदात्तः। तत्र अनुदात्तादेरञि प्राप्ते तलो विधानम्। `गजाच्चेति वक्तव्यम्' इति। गजशब्दात् तल् भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं चेह चकारस्यानुवृत्तिमाश्रित्य कर्त्तव्यम्।।

44. अनुदात्तादेरञ्। (4.2.44)
`कापोतम्, मायूरम्' इति। कपोतमयूरशब्दौ `लघावन्ते द्वयोश्च बह्वषो गुरुः' (फि.सू.2.42) इति मध्योदात्तौ' । `तैत्तरम्' इति। तित्तिरिशब्दः कित्' (द.उ.1.48) इति कित्प्रत्ययान्तः। तरतेः {सन्वल्लुक् इति. प्रा.मु.पाठः} सन्वत्तुक् चाभ्यासस्येति प्रत्ययस्वरेणान्तोदात्तः। ननु च सन्वद्भावादाद्युदात्तः प्राप्नोति ? `उणादयो बहुलम्' (3.3.1) इति बहुलवचनात् स्वरे सन्वद्भावो न भविष्यतीत्यदोषः।।

45. खण्डिकादिभ्यश्च। 94.2.45)
`आद्युदात्तार्थमचित्तार्थञ्च वचनम्' इति। असत्येतस्मिन्नाद्युदात्तेभ्योऽण् स्यात्, अचितेभ्योऽचित्तलक्षणष्ठक् प्रसज्येत। `क्षुद्रकाश्चमालवाश्चेति क्षत्तरियद्वन्द्वः' इति।क्षुद्रकस्यापत्यानि बहूनि `जनपदशब्दात् क्षत्त्रियादञ्' (4.1.168), मालवस्यापत्यानि बहूनि। `वृद्धेत्कोशलाजादाञ्ञ्यङ्' (4.1.171) । तयोः `तद्राजस्य' (2.4.62) इति बहुषु लुक्, पश्चाद्द्वन्द्वः। `ततः पूर्वेणाञि सिद्धे' इति। समासान्तोदात्तत्वे कृते द्वन्द्वसमासस्यानुदात्तादित्वात्। वचनं गोत्रवुञो बाधनार्थम्। `गोत्रोक्षोष्ट्रोरभ्र' (4.2.39) इत्यादिना गोत्रलक्षणो वुञ्प्राप्नोति, तद्बाधनार्थं क्षुद्रकलृमालवकस्येह गणे पाठः।
`ननु च' इत्यादि। परत्वादेवाञ् वुञं बाधिष्यत इत्यतो नार्थो वुञो बाधनार्थेनानेन वचनेनेति भावः। एतच्च गोत्रत्वमभ्युपेत्योक्तम्। इदानीं गोत्रत्वमेव न भवतीति दर्शयितुमाह-- `न च' इत्यादि। गोत्रसमुच्चयोऽयम्। न च गोत्रसमुदायो गोत्रग्रहणेन गृह्यते, यथा जनपदसमुदायो न जनपदग्रहणेन। तथा च काशयश्च कोशलाश्च काशिकोशलाः, तेषु भवाः काशिकोशलीयाः। जनपदत्वाभावात् `{जनपदवध्योश्च--मु.पाठः} जनपदतदवध्योश्च' (4.2.124) इति वुञ् न भवति, `वृद्धाश्छः' (4.2.114) एव तु भवति। स्यादेतत्-- यद्यपि गोत्रसमुदायो गोत्रं न भवति, तदवयुस्तु भवति, क्षुद्रकमालवकशब्दोऽवयवो गोत्रम्, अतस्तदन्तविधिना तदन्ताद्गोत्रसमुदःयादपि वुञ् प्राप्नोति ? अत आह -- `न च' इत्यादि। न हि सर्वस्तदन्तविधिर्भवतीति। तथा हि-- `येन विधिस्तदन्तस्य' (1.1.72) इत्यत्रोक्तम्--`समासप्रत्ययविधौ प्रतिषेधः', `उगिद्वर्णग्रहणवर्जम्' (वा.12,13) इति। प्रत्ययविधिश्चायम्। येषु तत्र च तदन्तविधिरिष्यते ते तत्रैव `भयाद्यादिग्रहणम्' (वा.303) इत्यादिना परिगणिताः, न चास्य तत्र परिगणनम्। ततो नास्ति तदन्तविधिः। `एवं तर्हि' इत्यादि। यदयं क्षुद्रमालवकग्रहणं करोति वुञ्बाधनर्थाम्, तज्ज्ञापयति-- वुञि पूर्वविप्रतिषेधो भवति, न परविप्रतिषेधः। `सामूहिकेषु च तदन्तविधिरस्ति' इति। किमेतस्य ज्ञापने प्रयोजनमित्याह-- `औपगवकम्, कापटवकम्' इति। एतद् वुञ्पूर्वविप्रतिषेधज्ञापनस्य प्रोजनम्। असति ह्येतस्मिञ्ज्ञापने परिविप्रतिषेधेन `अनुदात्तादेरञ्' (4.2.44) इत्यञ् स्यात्। वुञस्तु यत्राद्युदात्तत्वं सोऽवकाशः --- ग्लौचुकायनकमिति। ग्लुचुकायनशब्दो हि `प्राचामवृद्धात् फिन् बहुलम्' (4.1.160) इति फिन्प्रत्ययान्तत्वान्नित्स्वरेणाद्युदात्तः।। `वानहस्तिकम्,गोथेनुकम्' इति। तदन्तविधिज्ञापनस्य प्रयोजनम्। असत्येतस्मिञ्ज्ञापने `अचित्तहस्तिधेनोष्ठक्' (4.2.47) इति धेनुहस्तिशब्दाभ्यां विधीयमानष्ठक् न तदन्तात् स्यात्।
`{क्षुद्रकमालवात्-- काशिका, पदमञ्जरी च।} क्षुद्रकमालवकात्' इति। गणे `क्षुद्रकमालवात् सेनासंज्ञायाम्' (ग.सू.82) इति पठ्यते, तत्र यद्ययमेको योगः

स्यात्, एकेन यत्नेन च ज्ञापनं नियमश्च न लभ्यते। तस्मादत्र योगविभागः कर्त्तव्यः। तत्र क्षुद्रकमालवादित्येको योगः, सेनासंज्ञायामिति द्वितीयः। तत्र पूर्वो योगो ज्ञापनार्थः, उत्तरो नियमार्थः। `पुनरस्यैव' इति। क्षुद्रकमालवादित्यस्यैव योगस्य । `क्षौद्रकमालवी' इति। `टिड्ढाणञ्' (4.1.15) इति ङीप्। `क्षौद्रकमालवकमन्यत्' इति। तदन्तविधिनात्र वुञ् भवति।
`अञ्सिद्धेः' इत्यादि। क्षुद्रकमालशब्दात् `अनुदात्तादेरञ्' (4.2.44) इत्यञ् सिद्धः। तत्कोऽर्थः किं प्रयोजनं तस्य गणपाठेन ?न किञ्चिदित्यर्थः। स्यादेतत्--यो गोत्रलक्षणो वुञ् स्यादेतस्तद्बाधनार्थः पाठः ? इत्याह-- `गोत्राद्वुञ् विधीयते' (इति)। न च क्षुद्रकमालवशब्दो गोत्रम्, तत्कुतस्ततो वुञ्प्राप्तिः ? `तदन्तात्' इत्यादि। यद्यपि क्षुद्रकमालवशब्दो गोत्रसमुदायो गोत्रं न भवति, तदवयवस्तु भवति, तेन तदन्तविधिना प्राप्नोत्येव। `न च सर्वतः' इति। न च तदन्तविधिः सर्वत्रैव भवति। परिगणितेष्वेव कार्येषु तदन्तविधिरिष्यते, न चेदं तत्र परिगण्यते, तत्कुतस्तदन्तविधिना वुञ्प्राप्तिः। `ज्ञापकं स्यात्' इत्यादि। इदं हि क्षुद्रकमालवग्रहणं ज्ञापनार्थं भवेत्। एतज्ज्ञापयति-- सामूहिकेषु तदन्तविधिरस्तीति। एवं कृत्वाऽषडपिशलेर्विधिरुपपन्नो भवति। विधीयतेऽनेनेति विधिः, स पुनः `धेनोरनञः' (वा.423) इति, एतद्धि तत्सूत्रम्। अस्यायमर्थः-- धेनुशब्दः समूहेऽर्थे ठकमुत्पादयति, न चेद्धेनुशब्दो नञ उत्तरो भवतीति। नञ्पूर्वपदो न भवतीति यावत्। यदि तत्र सामूहिकेषु तदन्तविधिर्न स्यात् `अनञः' इति वचनं नोपपपद्यते। असति तदन्तविधौ धेनुशब्दादुच्यमानः प्रत्ययः, कः प्रसङ्गो यदधेनुशब्दात् स्यात् ! तदेतदनञिति वचनं परमर्थवद्भवति यदि सामूहिकेषु तदन्तविधिर्भवति, नान्यथा। प्रयोजनान्तरमाह--`सेनायाम्' इत्यादि। सेनासंज्ञायामेव क्षुद्रकमालशब्दादञ् भवतीत्येष नियमो यता स्यादित्येवमर्थस्तस्य गणे पाठ इत्यर्थः। `यथा' इत्यादि। चेति समुच्चये। पूर्वविप्रतिषेधेन वुञाऽञो बाधनं यथा स्यादित्येवमर्थो गणे पाठः।
`{खण्डिका--काशिका} खण्डिक' इति। खण्डिकशब्दो मत्वर्थीयठन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः। `वल { संवरणे सञ्चलने च' -- धा.पा.} संवरणे' (धा.पा.491) इत्यस्मात् `उणादयो बहुलम्' (3.3.1) इत्यवन्प्रत्यये डलयोरेकत्वस्मरणाल्लकारस्य डकारादेशे टापि वडवेति भवति। भिक्षुकशब्दोऽपि कुत्सार्थविवक्षायां कन्नन्तत्वात् पूर्वपदाद्युदात्तः। शुकोलूकयोरपि `प्राणिना कुपूर्वाणाम्' (फि.सू.1.30) इति कुपूर्वादिरुदात्त एव। श्वञ्शब्दः `कनिन् युवृषि' (द.उ.6.51) इत्यतः कनिन्ग्रहणेऽनुवर्त्तमाने `श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्तस्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्' (द.उ.6.55) इति कनिन्प्रत्ययान्तो निपातितः,तेनसावपि पूर्ववदाद्युदात्तः। युगवरत्राशब्दयोरचितार्थः। संहतविगृहीतार्थं युगवरत्राग्रहणं वर्णयन्त-- यौगम्, वारत्रम्, योगवरत्रमिति।।

46. चरणेभ्यो धर्मवत्। (4.2.46)
`गोतर्चरणाद्वुञित्यारभ्य' इति। ननु च तत्र धर्मग्रहमं नास्ति, तत्कथं धर्मवदित्यतिदेशः प्रयुज्यते ? इत्याह-- `तत्रेदम्' इत्यादि। इदमेव धर्मवदिति वचनं लिङ्गभूतं गमयति-- `चरणाद्धर्माम्नाययोः' (वा.476) इत्येतद्वचनं शेषभूतमिति। न हि तेन विनाऽदेश उपपद्यते। `वतिः सादृश्यार्थः' इति। असति हि वतौ यदि चरणग्रहणं धर्मप्रत्ययैरभिसम्बध्यते-- चरणेभ्यो धर्मेऽभ्यो ये प्रत्यया अभिधास्यन्ते ते भवन्ति `तस्य समूह-' (4.2.37) इत्येतस्मिन्नर्थ इति, समूहप्रकृतिर्न विशेषिता स्यात्। एवञ्चेह प्रकृतिमात्राद्धर्मप्रत्ययाः प्रसज्येरन्। अथ प्रकृतिः सम्बध्यते-- धर्मे ये विधास्यन्ते प्रत्ययास्ते भवन्ति। `चरणेभ्यः समूहः' इत्येतस्मिन्नर्थे, एवमपि धर्मप्रत्ययान विशेषिताः स्युः। ततश्चाचरणेभ्योऽपि ये धर्मे विधास्यन्ते प्रत्ययास्तेऽपीह चरणेभ्य आपद्येरन्। अथाप्युभयसन्निधानादुभयं विशेष्यते, तेन वाक्यभेदं कृत्वा प्रत्ययैः प्रकृतिभिः सम्बध्यते-- चरणेभ्यो धर्मेऽथ ये प्रत्यया विधास्यन्ते ते समूहे भवन्ति चरणेभ्य इति ? एवमपि कश्चित् चरणप्रकृतिकः प्रत्ययो यतः कुतश्चिच्चरणात् समूहे स्यात्। `कौपिञ्जलहास्तिपदादण्' (4.3.132) छन्दोगादिभ्योऽपि स्यात्। वतौ तु तस्य सादृश्ये विधानात् सर्वसादृश्यपरिग्रहो भवति। तेन याभ्यः प्रकृतिभ्यश्चरणविशेषणेन ये प्रत्ययाः विहिताः , इहापि ताभ्यः प्रकृतिस्तेनैव विशेषणेन त एव प्रत्यया भवन्तीति न किञ्चिदनिष्टमापद्यते। तस्मात् सर्वसादृश्यपरिग्रहार्थं वत्करणं कर्त्तव्यम्। ` काठकम्, कालापकम्' इति। `गोत्रचरणाद्वुञ्' (4.3.126) । `छान्दोग्यम्, औक्थिक्यम्' इति। `छन्दोगोक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः' (4.3.129) इति ञ्यः। `आथर्वणम्' इति। `कौपिञ्जलहास्तिपदादण्' (4.3.132),`आथर्वणिकस्येकलोपश्च' (4.3.133) इत्यण्, इकलोपश्च। एते प्रत्यया यथा चरणेभ्यो धर्मे भवन्ति, तथा समूहेऽपि।।

47. अचित्तहस्तिधेनोष्ठक्। (4.2.47)
`अचित' इति। अर्थप्रधानत्वान्निर्देशस्यार्थस्येदं ग्रहणम्, न स्वरूपस्य, तेनाचित्तवाचिभ्यष्ठग्विज्ञायत इत्याह-- `अचित्तवाचिभ्यः शब्देभ्यः' इति। हस्तिधेनुशब्दयोश्च शब्दप्रधानत्वान्निर्देशस्य स्वरूपग्रहणम्। अत एव `हस्तिधेनुशब्दाभ्याम्' इति।
`{धेनोरनञ इति वक्तव्यम्-- इति वार्तिकपाठः।} अधेनोरिति वक्तव्यम्' इति। धेनुशब्दादनञ्पूर्वाट्ठग् भवतीत्येदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- वक्ष्यमाणमिहान्यतरस्यांग्रहणमुभयोरपि योगयोः शेषो विज्ञायते, व्यवस्थिविभाषा च।तेन धेनुशब्दादनञ्पूर्वादेव भवतीति, न नञ्पूर्वादिति। `आधेनवम्' इति। `उत्सादिभ्योऽञ्' (4.1.86) । ननु च धेनुशब्दस्तत्र पठ्यते, तत्कथमधेनुशब्दाद्भवतीति ?तत्रापि तदन्तविधेः सम्भवात्। तत् कथं विज्ञायते ? वष्कयास इति वष्कयशब्दस्य समासे प्रतिषेधात्। वष्कयशब्दाद्धि प्रत्ययविधानम्, गोवष्कयशब्दान्न प्राप्नोति,किं समासप्रतिषेधेन ? इतः प्रतिषेधाद्विज्ञायते-- अस्ति तत्र तदन्तविधिरिति।।

48. केशाश्वाभ्यां यञ्छावन्यतरस्याम्। (4.2.48)
केशशब्दादचित्तलक्षमे ठकि प्राप्ते वचनमिदम्। अश्वशब्दादप्यणि सूत्रमिदमारभ्यते। अन्यतरस्यांग्रहमाट्ठगणावपि भवतः।।

49. पाशादिभ्यो यः। (4.2.49)
अचित्तलक्षणके कठि प्राप्ते वचनमिदम्।।

50. खलगोरथात्। (4.2.50)
गोशब्दादणि प्राप्ते, खलरथाब्यामचित्तलक्षणे ठकीदं वचनम्। अत्र पाशादिष्वेव खलादीनां पाठः कस्मान्न कृतः ? इत्याह-- `पाशादिष्वपाठ उत्तरार्थः' इति। उत्तरसूत्र इनित्रकट्यचः खलादिभ्य एव यथा स्युः, पाशादिभ्यो मा भूदिति।।

51. इनित्रट्यचश्च। (4.2.51)
`खलादिभ्य इनिर्वक्तव्यः' इति। वक्तव्यो व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्-- चकारोऽत्र क्रियते, स चानुक्तसमुच्चयार्थः, तेन खलादिभ्य इनिप्रत्ययो भविष्यति। आदिशब्दश्चायं प्रकारे, खलप्रकार इत्यर्थः। किं पुनस्ते खलप्रकाराः ? येब्य इनिर्दृश्यते। यदि तर्हि खलादिभ्य इनिर्भवति, वैषम्याद्यथासंख्यं न प्राप्नोति ? वाक्यभेदाददोः। एकं वाक्यं यथासंख्यं न भवति, इह द्वे वाक्ये इति। इनित्रकट्यचः खलगोरथेभ्यो भवन्तीत्येकं वाक्यम्; चकारश्चानुक्तसमुच्चयार्थः, तः खलादिभ्य इनिर्भवतीति द्वितीयम्। द्वितीये तु वाक्ये खलशब्दस्य तत्र प्रकारोपलक्षणत्वं वेदितव्यम्, न तु प्रकृतित्वम्।।

52. विषयो देशे। (4.2.52)
`योऽसौ विषयो देशश्चेत् स भवति' इति। ननु च यो विषयः स देश एव भवति, किं तद्विशेषणेन देशे ग्रहणेन ? इत्याह-- `विषयशब्दोऽयम्' इत्यादि। `अत्यन्तशीलिते' इति। अत्यन्ताभ्यस्त इत्यर्थः।

53. राजन्यादिभ्यो वुञ्। (4.2.53)
`आकृतिगणश्चायम्' इति। अपरिसमाप्ततां राजन्यादेर्दर्शयति।आदिशब्दश्चायं प्रकारार्थः।।

54. भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ। (4.2.54)

55. सोऽस्यादिरितिच्छन्दसः प्रगाथेषु। (4.2.55)
`छन्दसः' इति। न स्वरूपग्रहणम्, नापि मन्त्रब्राह्मणयोः । कस्य तर्हि ? अक्षराणामियत्तावचनश्छन्दशब्दोऽस्ति, यस्य जगत्यादयो विशेषाः, तस्येदं ग्रहणम्। तस्यैव हि प्रगाथ इत्यादौ सम्बन्धः, नेतरस्य। तेन पङ्क्त्यादिभ्यः प्रत्ययो भवतीत्युक्तं भवति।
`{प्रगथनेन--काशिका} प्रग्रन्थेन' इति। उच्चारणविशेषेण प्रग्रन्थात् प्रकर्षाद्गायनर्थाद्वेति। एतेन यन्निमित्तकः प्रगाथशब्दस्तां क्रियां दर्शयति। प्रगाथशब्दोऽयं यदा `अकर्त्तरि च कारके संज्ञायाम्' (3.3.19) इति कर्मणि घञन्तो व्युत्पाद्यते-- प्रग्रवयतेऽसौ प्रगाथ इति, पृषोदरादिपाठाद्ग्रन्थे रेफानुनासिकयोर्लोपश्च , तदा प्रग्रन्थनक्रियानिमित्तको भवति। यदा तु `कै गै शब्दे' (धा.पा.916,917) इत्यस्मात् `उणादयो बहुलम्' (3.3.1) इति प्रगाथस्थन्प्रत्ययान्तो व्युत्पाद्यते, तदा गायनक्रियानिमित्तो भवति।
`नुपंसके' इत्यादि। नपुंसकलिङ्गे स्वार्थ एव च्छन्दसः प्रत्ययस्योपसंख्यानम्। तत्रेदं व्याख्यानम्-- इति करणो विवक्षार्थः। तेन यत्र प्रत्ययान्ताच्छिष्टानां विवक्षा भवति तत्र प्रत्ययेन भवितव्यम्। नपुंसकलिङ्गे स्वार्थेऽपि च सा भवति, अतस्तत्रापि प्रत्ययो भवति। अवश्यं चैतदेव विज्ञेयम्। यो हि मन्यते-- `सर्वातिप्रसङ्गनिवृत्तिरितिकरणेन क्रियते' इति, तस्यासावनर्थक एव स्यात्; सर्वातिप्रसङ्गानानुपाधिभिर्निरस्तत्वात्।।

56. सङ्ग्रामे प्रयोजनयोद्धृभ्यः। (4.2.56)
अत्र `संग्रामे' इति प्रत्ययार्थ इति, सप्तम्यन्तत्वात्। `प्रयोजनयोद्धृभ्यः' इति पञ्चम्यन्तत्वात् प्रकृतिनिर्देशः, ततश्च `समर्थानां प्रथमाद्वा' (4.1.82) इत्येतद्विरुध्यते; प्रथमस्य प्रत्ययार्थत्वेन द्वितीयस्य प्रकृतित्वेनोपादीयमानत्वादित्यस्य चोद्यस्य निरासायाह-- `सोऽस्येति समर्थविभक्तिः प्रत्ययार्थश्चानुवर्त्तते' इति। एतेनैतद्दर्शयति-- `प्रयोजनयोद्धृभ्यः' इत्येतदेवमर्थं यस्मात् पूर्वसूत्रादेव स इति प्रथमं तदिहानुवर्त्तते, तद्वशेषणं तु प्रयोजनयोद्धृभ्य इति। प्रत्यायाथोऽप्यस्येति पूर्वसूत्रादनुवर्त्तते, तद्विशेषणं संग्रामः, तत्रो नास्ति विरोधः; पूर्वसूत्रे यत् प्रथमानिर्दिष्टं तत एव प्रत्ययविधानादिति।।

57. तदस्यां प्रहरणमिति क्रीडायां णः। (4.2.57)

58. घञः सास्यां क्रियेति ञः। (4.2.58)
`क्रियेति प्रकृतिविशेषणम्' इति। यत्र तद्घञन्तं क्रियावाचि चेद्भवतीति। तेन भावे यो घञ् तदन्तात् प्रत्ययो भवतीत्युक्तं भवति। ननु च भावे यो घञ् तेनैव तदन्तं क्रियावाचि ? यस्माद्धात्वर्थस्य सिद्धता नाम यो धर्मस्तत्र घञादिभिर्भवितव्यमित्युक्तं प्राक्, धर्मधर्मिणोर्भेदस्याविवितत्वात् क्रियाधर्मोऽपि क्रियाशब्दनोक्त इत्यदोषः। `इतिकरणो विवक्षार्थः'इति। ननु च पर्वसूत्रादेवेतिकरणोऽनुवरितिष्यते,तत्किं पुनरिह तस्योपादानम् ? इतिकरणस्येह प्रकरणेऽनधिकारतां दर्शयितुं पुनरुपादानम्। तेन `तद्धीते तद्वेद' (4.2.59) इत्यत्रास्येतिकरणस्याननुवृत्तौ विवक्षानियमाभावादध्येतृवेदितृमात्रे प्रत्ययः सिद्धो भवतीत्येके। वैचित्र्यार्थमितिकरणोपादानमित्यपरे। `श्यैनम्पाता' इति। `शल हुल पत्लृ गतौ' (धा.पा.843, 844,845) भावे घञ्, श्येनस्य पात इति षष्ठीसमासः। ञे विहिते `श्येनतिलस्य पाते ञे' (6.3.71) इत मुम्।
`प्राकारः' इति। करोतेः प्रपूर्वात् `अकर्त्तरि च कारके संज्ञायाम्' (3.3.19) इति कर्मणि घञ्। `उपसर्गस्य घञ्यमनुष्ये बहुलम्' (6.3.122) इति प्रशब्दस्य दीर्घः। भवतीदं घञन्तम्; न तु क्रियावाचि; प्राकारस् द्रव्यत्वात्।
`अथ'इत्यादि चोद्यम्। `क्रीडायामित्यनेन तत्सम्बद्धम्' इत्यादि परिहारः। स्यादेतत्,अनुवर्त्ततां क्रीडा, तस्याञ्चेदं प्रत्यविधानमिष्यत इत्यत आह-- `सामान्येन च' इत्यादि।।

59. तदधीते तद्वेद। (4.2.59)
`वैयाकरणः' इति। `नन य्वाभ्याम्' (7.3.3) इत्यादिना वृद्धिप्रतिषेधः,ऐजागमश्च।
`द्विस्तद्ग्रहणम्' इत्यादि। यदि `तदधीते वेद' इत्येवोच्येत प्रत्ययार्थद्वस्य द्वितीयासमर्थे समुच्चयो विज्ञायते, ततश्च यस्त्वधीते वेत्ति च तत्रैव स्यात्; यस्त्वधीते केवलं न वेत्ति, वेत्ति वा केवलं नाधीते तत्र न स्यात्। द्विस्तद्ग्रहणे तु वाक्यभेदादधीयाने विदुषि च प्रत्येकं प्रत्ययः सिध्यति। तदर्थं द्विस्तद्ग्रहणम्। नैतद्द्विस्तद्ग्रहणस्य प्रयोजनम्, यथैव हि `ते न दीव्यति खनति जयति जितम्' (4.4.2) इत्यत्र सकृत् समर्थविभक्त्युपादानेऽपि प्रत्ययार्थचतुष्टयेन तृतीयासमर्थेन समुच्चयो न विज्ञायते,तथेहापि न विज्ञास्यते। तेन यथा दीव्यतिप्रभृतिषु प्रत्ययो भवति, तथेहापि प्रत्येकमधीयाने विदुषि च भविष्यतीति ? न ब्रूमः-- इहैव द्विस्तद्ग्रहणमधीयानविदुषोः पृथग्विधानार्थमिति। `कुतस्तर्हि ? `क्रतूक्थादिसूत्रान्ताट्ठक्' (4.2.60), `वसन्तादिभ्यष्ठक्' (4.2.63) इत्यत्र च। किं कारणं तत्र न स्यात् ? क्रतुशब्दः कर्मनामधेयः,वसन्तादयोऽप्युतुवचनाः, तेषामध्ययनं नोपपद्यते। तत्सहचरिते ग्रन्थे स्यात्, स च तत्र गोण इति न गृह्यते। मुख्य एवार्थे वेदने सम्भवतीति तेभ्यो विदुष्येण प्रत्ययः स्यात्, नाध्येतरि। पुनर्द्विस्तद्ग्रहणाद्गौणस्यापि ग्रहणं भवतीति प्रत्येकमध्येतृविदुषोरत्र ठक्प्रत्ययो भवति।।

60. क्रतूक्थादिसूत्रान्ताट्ठक्। 94.2.60)
क्रतुशब्दः कर्मनामधेयः, तस्याध्यनवेदने द्वे न सम्भवत इति साहचर्यात् तदर्थो ग्रन्थो गृह्यते, न तु क्रतुनामा क्रतुरस्तीति तद्विशेषा येऽग्निष्टोमादयस्तद्रथो ग्रन्थो गृह्यते, तत्र चाह-- `क्रतुविशेषवाचिभ्यः' इति। अग्निष्टोममधीत इत्यग्निष्टोमेन सहचरितं तदर्थग्रन्थमधीत इत्यर्थः।
`सूत्रान्तादकल्पादेरिष्यते' इति। किमिष्यत एव ? ततो न तत् शस्यते, लभ्यते च । कुतः ? वेत्यनुवृत्तेर्व्यवस्थितविभाषाविज्ञानात्। `किं तर्हि ? सामलक्षण औक्थिक्ये वर्त्तमाने' इति। उक्थसंज्ञकानां साम्नलक्षणं व्याख्याग्रन्थ औक्थिक्यः, `{छन्दोगौक्थिक्य' इतिमु.पाठः ।} छन्दोगौक्थिकय' (4.3.129) इत्यादिना ञ्यः। तत्रौक्थिक्ये सामलक्षणेग्रन्थे वर्त्तमान उक्थशब्दः प्रत्ययमुत्पादयति। कुत एतत् ? गौणेन सह क्रतुशब्देन निर्देशात्। औक्थिक्ये उक्थशब्दस्य वृत्तिस्तादर्थ्याद्भवति। भवति च तादर्थ्यात् ताच्छब्द्यम्, यथा-- प्रदीपार्था मल्लिका प्रदीप इति। औक्थिक्यं योऽधीते कथं तत्र भवितव्यम् ? इत्यत आङ-- `औक्थिक्यशब्दाच्च' इति। तत्रैव कारणमाह-- `अनभिधानात्' इति।
`विद्यालक्षणकल्पसूत्रान्तात्' (ग.सू.84), इत्यस्यातिप्रसक्तस्यापवादमाह-- `विद्या च'इत्यादि। विद्याशब्दोऽनङ्गक्षत्रधर्मसंसर्गत्रिपूर्व एव प्रत्ययमुत्पादयति, नाङ्गादिपूर्व इत्यर्थः। `त्रैविद्यः' इति। त्र्यवयवा विद्या, शाकपार्थिवादित्वादुत्तरपदलोपी समासः। त्रिविद्यामधीते त्रैविद्यः।
यावक्रीतमाख्यानधीते `यावक्रीतिकः'। प्रियङ्गुमधीते `प्रैयङ्गविकः'। वासवदत्तामाख्ययिकामधीते `वासवदत्तिकः'। सुमनोत्तरामधीते `सौमनोत्तरिकः।
`सर्वसादेर्द्विगोश्च लः' इति। सर्वादेः सादेर्द्विगोरुत्पन्नस्य ठको लोपो भवतीत्यर्थः। ननु च `द्विगोर्लुगनपत्ये' (4.1.88) इत्येवं सिद्धः ? सत्यमेतत्; इह तु कैश्चित् `विद्यालक्षणकल्पसूत्रान्तात्' (ग.सू.84) इत्यादिना प्रतिपदं प्रत्ययो विधीयते। तद् द्वेष्यमपि जायेत। प्रतिपदविधानान्न लुक्, ततो लुग्वचनम्।
`अनुसूर्लक्ष्यलक्षणे च' इति। अनुसूशब्दः प्रत्ययमुत्पादयति। लक्ष्यलक्षणे च शब्दरूपे प्रत्ययमुत्पादयतः। `आनुसुकः' इति। `इसुसुक्तान्तात् कः' (7.3.51) इति कः, `केऽणः' (7.4.13) इति ह्रस्वः।
`इकन बहुलं पदोत्तरपदात्' इति। पदशब्द उत्तरपदं यस्य स तथोक्तः।

`शतषष्टेः षिकन् पथः'इति। शतषष्टिशब्दाभ्यामुत्तरस्मात् पथः षिकन् प्रत्ययो भवति। षकारो ङीषर्थः, नकारः स्वरार्थः। एतत्सर्वमुक्थादिषु पाठादेव सिद्धम्। यदपीह किञ्चिन्न पठ्यते, तदपि च बहुलग्रहणेन संगृहीतम्। उक्थादिष्वपि षिकन् बहुलं पदोत्तरपदाच्चेति पठ्यते।।

61. क्रमादिभ्यो वुन्। (4.2.61)

62. अनुग्राह्मणादिनिः। (4.2.62)
`ब्राह्मणसदृसोऽयं ग्रन्थोऽनुब्राह्मणम्' इति। यथार्थऽव्ययीभावं दर्शयति। ननु योऽनुब्राह्मणमधीते तस्यानुब्राह्मणमस्तीति तत्र मत्वर्थीयेनैवेनिना सिद्धम्, तत् किमर्थमिदम् ? अण्बाधनार्थम्। यदीदं नोच्येत `तदधीते तद्वेद' (4.2.59) इत्यण् प्रसज्येत।।

63. वसन्तादिभ्यष्टक्। (4.2.63)
`{वसन्तसहचरितोऽयं गर्न्थो वसन्तः-काशिका} वसन्तसहचरितो ग्रन्थो वसन्तः'इति। यो वसन्ते पठ्यते, नियोगेन यत्र च वसन्तो वर्ण्यते स वसन्त सहचरितो भवति। `वर्षाशरदम्' इति। वर्षाश्च शरच्च वर्षाशरदम्। `द्वन्द्वाच्चुदषहान्तात् समाहारे' (5.4.106) इति टच्। समासान्तेन निर्देशः।।

64. प्रोक्ताल्लुक्। (4.2.64)
युक्तो निर्देशो यदि प्रोक्तनामा ग्रन्थो व्याकरणादिर्भवति, न चासावस्ति; अन्यार्थेन ततः परः सम्भवतीत्येतं दोषमाकर्त्तुमाह-- `प्रोक्तसहचरितः' इत्यादि। साहचर्यात् सोऽयमित्यभेदोपचारेण प्रोक्तार्थे यो वहितः प्रत्ययः स प्रोक्तशब्देनोक्त इति दर्शयति। `पाणिनीयः' इति। `वृद्धाच्छः' (4.2.114) तदन्तात् `तदधीते तद्वेद' (4.2.59) इत्यण्। तस्य लुक् `पाणिनीयः'। आपिशलिना प्रोक्तमित्यण्, तस्य लुक्--- `आपिशलः' । कः पुनरत्र विशेषोऽर्थो लुकि सति, यावता तदेव रूपम् ? इत्याह-- `स्त्रियाम्' इत्यादि। असति लुकि `टिड्ढाणञ्' (4.1.15) इति ङीप् स्यात्, सोऽणः स्वरेणान्तोदात्तः। लुकि हि सति टाब्भवति, स्वरेण तु मध्योदात्तः। आपिशलिशब्दाल्लुकि सति स्वरे नास्ति विशेषः। सत्यपि हि लुक्यन्तोदात्तत्वेन भवितव्यम्। स्त्रियान्तु पूर्वोक्तो विशेषो वर्त्तते--- न हि लुकि सति ङीब्भवति; सत्यप्यणि तत्रैव `अनुपसर्जनात्' (4.1.14) इत्यधिकारात् प्रतिषेधात्, प्रोक्तार्थविहितस्य चाण इहोपसर्जनत्वात्।।

65. सूत्राच्च कोपधात्। (4.2.65)
कोपधादिति वचनात् स्वरूपग्रहणं न भवतीत्यतः सूत्रवाचिनो ग्रहणं विज्ञायत इत्याह-- `सूत्रवाचिनः प्रतिपादिकात्' इति। `अष्टकम्' इति। अष्टावध्यायाः परिमाणमस्य। `तदस्य परिमाणम्' (5.1.57) इत्यनुवर्त्तमाने `संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु' (5.1.58) इति च `सख्याया अतिशदन्तायाः कन्' (5.1.22) इति कन्।
`संख्याप्रकृतेरिति वक्तव्यम्' इति। संख्या प्कृतिर्यस्य प्रत्ययस्य स संख्याप्रकृतिः। तदन्तात् कोपधादुत्पन्नस्य लुब्भवतीत्येतदर्थरूपं वक्तव्यम्, व्याख्येमित्यर्थः। तत्रेदं व्याख्यानम्-- वेति वर्त्तते, सा च व्यवस्थितविभाषा, तेन संख्याप्रकृतेरेव भविष्यति, नान्यस्मादिति।
`{चातुष्टयः-- काशिका, चतुष्टयः-पदमञ्जरी।}चातुष्टयम्' इति। चत्वारोऽवयवा अस्येति `संख्याया अवयवे तयप्' (5.2.42), `ह्रस्वात् तादौ तद्धिते' (8.3.99) इति मूर्धन्यः, षत्वं भवति। एतत् संख्याप्रकृतिप्रत्ययान्तम्, न तु कोपधम्, किं तर्हि ? योपधम्।।

66. छन्दोब्राह्मणानि च तद्विषयाणि। (4.2.66)
`प्रोक्तग्रहणमनुवर्त्तते' इति। तच्चेहार्थात् प्रथमान्तं विज्ञायते छन्दोब्राह्मणानीत्यस्य समानाधिकरणार्थम्, अत आह-- छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानीति भवन्ति' (इति)। स्वरूपग्रहणमिह न भवति। तथा हि -- प्रोक्तग्रहणमिहानुवर्त्तते, न च च्छन्दोब्राह्मणशब्दौ प्रोक्तप्रत्ययान्तौ। तस्माच्छन्दोब्राह्मणवाचिनो ये शब्दाः प्रोक्तप्रत्ययान्तास्ते गृह्यन्ते। किमर्थं पुनरिदमुच्यते ? इह प्रोक्तप्रत्ययान्तस्य बहुप्रकारता लभ्यते। तथा हि क्वचित् तदन्तस्य स्वातन्त्र्यमुपलभ्यते, यता-- पाणिनिना प्रोक्तं पाणिनीयं शास्त्रम्। प्रोक्तार्थ एव वृत्तिः स्वातन्त्र्यम्। पाणिनीय शब्दस्य चात्र प्रोक्तार्थ एव वृत्तिः। क्वचिदुपाध्यन्तयोगः, यथा--- पाणिनीयं महत् भवत्सु विहितमिति। क्वचिद्वाक्यम्-- पाणिनीयमधीत इति। क्वचिद्वृत्तिः। पाणिनीय इति। तदिह छन्दोब्राह्मणानामध्येतृवेदितृविषया वृत्तिर्यथा स्यात्। प्रकारान्तरं मा भूदित्येवमर्थमिदमुच्यते। `अध्येतृवेदितृ' इति। अध्येतृवेदितृप्रत्ययो विषयेषामिति बहुव्रीहिः। `{अनन्यभावो--काशिका, पदमञ्जरी च} अन्यत्रभावो विषयार्थः' इति। यथा मत्स्यानां जलं विषय इत्यत्रानन्यत्रभावे विषयशब्दो वर्त्तते, तथेहापि। एतेन यद्यपि ग्रामसमुदायादिष्वर्थेषु विषयशब्दस्य वृत्तिः, तथापीहानन्यत्रभावे वर्त्तमानः संगृह्यत इति दर्शयति। `तेन'इत्यादिना अनन्यत्रभाववृत्तिशब्दस्य फलं दर्शयति। एवं ह्यत्रन्यत्राभावो भवति यदि स्वातन्त्र्यादि न भवति। उपाध्यन्तरयोगो महत्त्वादिना विशेषेण सम्बद्धः कठ इति। `कठेन प्रोक्तम्' इति। `कलापिश्वैशभ्यायनान्तवासिभ्यश्च' (4.3.104) इति णिनिः, तस्य `कठचरकाल्लुक्' (4.3.107), ततः कठेन प्रोक्तमधीते तद्वेदेति (4.2.59) पुनरण, तस्यापि `प्रोक्ताल्लुक्' (4.2.64) इति लुक्। `मौदाः, पैप्पलादाः' इति। `कलापिवैशम्पायनान्तेवासिभ्यश्च' (4.3.104) इति णिनिः-मोदेन प्रोक्तमिति,

`कलापिनोऽण्' (4.3.108) इत्यण्, तदन्तात् `तदधीते तद्वेद' (4.2.59) इत्यण्, तस्य `प्रोक्ताल्लुक्' (4.2.64) इति लुक्। `आचार्भिनः' इति। ऋचाभेन प्रोक्तमिति `कलापिवैशम्पायनान्तेवासिभ्यश्च' (4.3.104) इति णिनिः, तदन्तात् `तदधीते तद्वेद' (4.2.59) इत्यण्। `वाजसनेयिनः' इति। वाजसनेयेन प्रोक्तमिति। `शौनकादिभ्यश्छन्दसि' (4.3.106) इति णिनिः, तदन्तात् `तदधीते तद्वेद' (4.2.59) इत्यण्, तस्य लुक्। `ताण्डिनः' इति। ताण्ड्यशब्दाद्गर्गादि (4.1.105) यञन्तात् प्रोक्तार्थे `पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' (4.3.105) इति णिनिः, `आपत्यस्य च तद्धितेऽनाति' (6.4.151) इतियलोपः। ततः `तदधीते तद्वेद' (4.2.59) इत्यण्, तस्य लुक्। `भाल्लविनः' इति। भाल्लविशब्दादिढन्तात् प्रोक्तार्थे पूर्ववण्णिनिः,तदन्तात् तद्वेद (4.2.59) इत्यण्, तस्य लुक्। शाट्यायनिनः' इति। शाट्यशब्दाद्गर्गादि (4.1.105) यञन्तात् `यञिञोश्च' (4.1.101) इति फक्,ततः प्रोक्तार्थे पूर्ववण्णिनिः, तदन्तात् `तदधीते तद्वेद' (4.2.59) इत्यण्, तस्य लुक्। `ऐतरेयिणः' इति।ऐतरेयशब्दाच्छुभ्रादिढगन्तात् (4.1.123) पूर्ववण्णिनिः, ततः `तदधीते' (4.2.59) इत्यण्, तस्यु लुक्।

`ब्राह्मणविशेषप्रतिपत्त्यर्थम्' इति। ब्राह्मणविशेषः पुराणप्रोक्तत्वम्। तस्य प्रतीतिः = प्रतिपत्तिर्यथा स्यादित्येवमर्थं ब्राह्मणग्रहणम्। `याज्ञवल्क्यानि' इति। याज्ञवल्क्यशब्दाद्गर्गादि (4.1.105) यञन्तात् प्रोक्तार्थे `कण्वादिभ्यो गोत्रे' (4.2.111) इत्यण्। `सौलभनि' इति सुलभेन प्रोक्तानीति। पूर्ववत् `कलापिनोऽण्' (4.3.108) इत्यण्। अत्र स्वातन्त्र्यं भवति। न हीह पुराणप्रोक्तत्वमस्ति; इदानीन्तेन प्रोक्तत्वात्। `काश्यपिनऋः, कौशिकिनः'इति। कश्यपेन प्रोक्तः कल्पः, कौशिकेन प्रोक्कत इति। ` काश्यपकौशिकाभ्यामृषिभ्यां णिनिः' (4.3.103), तदन्तात् `तदधीते' (4.2.59) इत्यण्, तस्य लुक्। `पारशरिणः, शैलालिनः' इति। पाराशर्येण प्रोक्तं सूत्रम्, शिलालिना प्रोक्तं सूत्रम्-- `पारशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (4.2.59) इत्यण्, तस्य लुक्। `कर्मन्दिनः, कृशाश्विनः' इति। कर्मन्देन प्रोक्तं सूत्रम्, कृशाश्वेन प्रोक्तं सूत्रमिति `कर्मन्दकृशाश्वादिनिः' (4.3.111) तदन्तात् `तदधीते तद्वेद' (4.2.59) इत्यण्, तस्य लुक्।

`पैङ्गी कल्पः'इति। पिङ्गेन प्रोक्तः कल्पः-- `पुराणप्रोक्त' (4.3.105) इत्यादिना णिनिः। तत्र स्वातन्त्र्यमेव भवति, न च तद्विषयता।।

67. तदस्मिन्नस्तीति देशे तन्नाम्नि। (4.3.67)

`प्रत्ययान्तनामा' इति। यदि तर्हि तन्नाम्नि देशे प्रत्ययः, इतिकरणोऽनर्थकः, तन्नामग्रहणादेवातिप्रसङ्गनिवृत्तिः ? नैतदस्ति; द्विविधं हि नाम-- सङ्केतितम्, अनुवृत्तञ्च। सङ्केतितं यदद्यापि व्यवहारपदवीं नानुपतति, तत्रानुवृत्तं यन्नाम तत्रायं योगः। अनुवृत्तञ्च व्यावहारिकम्, तत्प्रतिपत्त्यर्थमितिकरणः क्रियते, ग्रामादिविशेषपरिग्रहार्थश्च। यद्येवम्, इतिकरण एव क्रियताम्, किं तन्नाम्नीत्यनेन ? एतदपि न कर्त्तव्यम्; नामधेयता विरोधिनोऽपि बलीयसोऽपि प्रत्ययान् बाधित्वम्। कथम् ? नाप्राप्ते मतुप्ययं योग आरभ्यमाणे मतुपमवादत्वाद्बाधते। तदपवादैस्त्विनिठनादिभिः सह सम्प्रधारणायामपवादविप्रतिषेधादिनिठनादय एव स्युः। नामग्रहणे तु सति बलीयोभिरपि सम्प्रधारणायाः सम्प्रत्ययो भवति-- यो नामधेयतां गमयति स चातुर्थिक एवेति। अतः स एव भवति।।

68. तेन निर्वृतत्तम्। (4.2.68)

`चतुर्ष्वपि' इति। अनन्तरातीतेऽस्मिन् वक्ष्यमाणयोश्च योगयोः। `कर्त्तरि च'इति। लक्ष्यानुरोधेन क्वचिद्धेतौ क्वचित् कर्त्तरि च-- सहस्रेणेति हेतौ,कुशाम्बेनेति कर्त्तरि। यदा हेतौ तदा वृत्तेरकर्मकत्वान्निर्वृत्त इति कर्त्तरि निष्ठा, यदा कर्त्तरि तदाऽन्तर्भावितव्यमर्थत्वाता कर्मणि। अकर्मका अप्यन्तर्भावितण्यर्थाः सकर्मका भवन्ति।।

69. तस्य निवासः। (4.2.69)

70. अदूरभवश्च। (4.2.70)

71.ओरञ्। (4.2.71)

`यथायथम्' इति। यथास्वम्। तत्र प्रथमे प्रथमासमर्थविभक्तियुक्तात्। द्वितीये तृतीयासमर्थविभक्तियुक्तात्। तृतीयचतुर्थयोः षष्ठीसमर्थविभक्तियुक्तात्। `नद्यास्तु परत्वान्मतुबेव भवति' इति। नद्यां मतुप्' (4.2.85) इत्यनेन।।

72. मतोश्च बह्वजङ्गात्। (4.2.72)

`मालवतम्' इति। यदि बह्वजिति, न भवत्येव दोषः।।

73. बह्वचः कूपेषु। (4.2.73)

74.उदक् च विपाशः। (4.2.74)

75. सङ्कलादिभ्यश्च। (4.2.75)

76. स्त्रीषु सौवीरसाल्वप्राक्षु। (4.2.76)

77. सुवास्त्वादिभ्योऽण्। (4.2.77)
`उवर्मान्तलक्षणस्य' इत्यादि। य उवर्णान्तास्तेभ्यः `ओरञ्' (4.2.71) इति प्राप्तस्याञोऽपवादः। शेषेभ्यश्च `बह्वचः कूपेषु' (4.2.73) इत्यादिना प्राप्तस्य कूपलक्षण्स्य। अथाण्ग्रहणं किमर्थम्, सुबास्त्वादिभ्यो यताविहितमेवोच्येत। पुनर्वचनं यो विहितो न च प्राप्नोति तदर्तं विज्ञायते। अणेव च विहितो न प्राप्नोति; अपवादेन बाधित्वा ।अथ स भविष्यीत्यत आह-- `अण्ग्रहणम्' इत्यादि। असति ह्यण्ग्रहणे `मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' (व्या.प.10) इति नदीमतुपा सह सम्प्रसारणायां परत्वान्नदीपमतुप् स्यात्। अणो ग्रहणादणेव भवति। तस्मान्मतुपो बाधनार्थण्ग्रहणम्।।

78. रोणी। (4.2.78)
`कोऽयं निर्देशः'इति। कुत्सितोऽयं निर्देश इत्यर्थः। कुत्सितं तु लक्षणातिक्रान्तत्वात्। तदेव लक्षणातिक्रान्तत्वं दर्शयितुमाह `यावता'इत्यादि। सर्वावस्था च केवलस्य तदन्तस्य च प्रतिपत्तिः प्रकृतत्वेन यथा स्यादित्येवमर्थमुच्यते। यदि `रोण्याः' इत्यादिनिर्देशः क्रियेत तदा `ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न' (व्या.प.89) इति केवलादेव स्यात, न तदन्तात्। रोणीति शास्त्रानपेक्षेण निर्देशेन शास्त्रनिरपेक्षत्वमिहोच्यते, तदस्याः परिभाषाया अनपेक्षणादिह तदन्तापि प्रत्ययः सिद्धो भवति. ननु च ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते, न चेदं प्रातिपदिकम्; स्त्रीप्रत्ययान्तत्वात्। अथ मतम्-- `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' (व्या.प.29) इति प्रातिपदिकस्य तदन्तविधेः प्रतिषिध्यमानः स्त्रीप्रत्ययान्तस्यापि प्रतिषिध्यत इति,एतच्च यत्र हि प्रातिपदिकस्य स्वरूपग्रहणं तद्विषया परिभाषेति प्राग् ज्ञापितमेतत् ? एवं तर्हि तस्य ज्ञापनस्य प्रायिकत्वं दर्शयति। तेन क्वचिदस्वरूपग्रहणेऽप्येषा परिभाषा प्रवर्त्तते। तेन कुमारीमाचष्टे कुमारयतीत्यत्र `जातिष्ठवत् प्रातिपदिकस्य' (वा.813) इतीष्ठवद्भावः सिद्धो भवति।।

79. कोपधाच्च। (4.2.79)

80. वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः। (4.2.80)
`औत्सिर्गिकोऽपि तत्रेष्यते' इति। यद्येवम्, तस्य श्रवणं प्राप्नोतीत्यत आह-- `तस्य च' इत्यादि। `तथा चोक्तम्' इत्यादि। तदेव द्रढयति-- औत्सर्गिक इत्येव। शिरीषाणामदूरभवो शिरीषाः, तस्य वनं शिरीषवनमिति भाष्यकारवचनाल्लभ्यते। विशेषविहितानांहि लुपा न भवितव्यम्। अत औत्सर्गिकस्य लुब्भवतीति विज्ञायते।।

81. जनपदे लुप्। (4.2.81)

82. वरणादिभ्यश्च। (4.2.82)

83. शर्कराया वा। (4.2.83)
`पाठसामर्थ्यात्'इत्यादि। यदि नित्यो लुप् स्यात्, गणयोरस्य पाठोऽनर्थकः स्यात्। तस्मात् पाठसमार्थ्यादेव पक्षे श्रवणं भविष्यतीत्यत आह। `एवं तर्हि' इत्यादिना वाग्हणस्य ज्ञापकं दर्शयति। `शर्करा' इति। औत्सर्गिकस्य लुप्। `शार्करम्' इति। त्स्यैव पक्षे श्रवणम्। `शर्करकम्' इति। कुमुदादित्वाट्ठच्। `शार्करकम्' इति। वराहादित्वात् कक्। शार्करिकम्, शर्करीयम्' इति। उत्तरसूत्रेण ठक्छौ।।

84. ठक्छौ च। (4.2.84)

85. नद्यां मतुप्। (4.2.85)

`उदुम्बरावती'इति। `मतौ बह्वजोऽनजिरादीनाम्' (6.3.119) इति दीर्घः।।

86. मध्वादिभ्यश्च। (4.2.86)

87. कुमुदनडवेतसेभ्यो ड्मतुप्। (4.2.87)
कुमुदशब्दाट्ठच्ठकोः प्राप्तयोः। नडशब्दादपि `नडशादाड्डवलच्' (4.2.88) इति `नडादीनां कुक्च' 4.2.91) इति। अस्मिंश्च विधौ प्राप्ते वेतसशब्दादपि मतुब् विधीयते। `महिषाच्च' इत्यादि। `महिषशब्दान्मतुब् विधीयते' इत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- पूर्वसूत्राच्चकारोऽनुवर्त्तते, स चानुक्तसमच्चयार्थः। तेन महिषशब्दादपि भविष्यतीति।।

88. नडशादाड्ड्वलच्। (4.2.88)

89. शिखाया वलच्। (4.2.89)

90. उत्करादिभ्यश्छः। (4.2.90)

91. नडादीनां कुक् च। (4.2.91)
`क्रुञ्चाया ह्रस्वत्वञ्च' इति। क्रुञ्चाशब्दस्य कुग्भवति ह्रस्वत्वञ्च-- `क्रौञ्चकीयम्' इति। `तिक्षन्नलोपश्च' इति। तक्षन्नित्यस्य कुगागमो भवति, नलोपश्च-- `तक्षकीयम्' इति।

92. शेषे। (4.2.92)
`उपयुक्तादन्यः शेषः' इत्येतद्ग्रहणकवाक्यम्। तदेव `अपत्यादिभ्यः'इत्यादिना विवृणोति।अपत्यादयो हि चातुरर्थ्यपर्यन्ताः प्रत्ययविधौ विनियुक्ताः, तस्मात् तेभ्यो योऽन्यो जातादिरर्थः,स शेषः। ननु च निवृत्ता अपत्यादयः, तेभ्यश्चान्तरेषु जातादिषि येषु घादयस्ततोऽपत्यादिषु नैव ते प्राप्नुवन्तीति तत्किं तन्निवृत्त्यर्थेन शेषाधिकारेण ? इत्य आह-- `तस्येदम्' इत्यादि। जातादिष्वर्थेषु तस्येदमित्येषोऽर्थः पठ्यते। तच्चापत्यादीनां सामान्यम्। सामान्ये च विधीयमानस्तद्विशेषेऽपि विधीयते। तदुपलक्षणत्वात् सामान्यस्य। अतस्तस्येदं विशेषत्वाज्जाताद्यन्तःपातिष्वपत्यादिषु घादयः प्राप्नुवन्ति। तस्मात् तेषु मा भूवन्निति शेषाधिकारः क्रियते।
`किञ्च' इत्यादिना प्रयोजनान्तरं दर्शयति। असति हि शेषाधिकारे घादीनां प्रथमार्थेनैव सम्बन्धमनुभवतां तत्रैव कृतार्थता विज्ञायेत। तत्र द्वितीयादिष्वर्थेषु प्राग्दीव्यतीया एवाणादयः स्युः, न तु घादयः। शेषशब्दस्तूपयुक्तादन्यतया जातादीनर्थानेकीकृत्य शक्नोत्यभिधातुम्-- `सर्वत्र घादयः सिध्यन्तीति। अतः साकल्यार्थं वा शेषवचनम्। `लक्षमं चाधिकारश्च, इति। इह लक्षणस्य विधायकत्वाल्लक्ष्यतेऽनेनेति लक्षणमिति कृत्वा; उत्तरत्राधिकारः स्वरितत्वात्। तत्र यदाऽस्य लक्षणम्,चाक्षुषादयः सिध्यन्ति। यदा स्वधिकारता, तदा सर्वेषु जातादिष्वर्थेषु घादयो भवन्ति। यदि तर्हि शेष इतिलक्षणमपीदमनेनैव यथा ग्रहणादिष्वर्थेषु प्रत्ययो भवति, तथा जातादिष्वपि भविष्यतीति जाताद्यनुक्रमणमनर्थकम् ? न; अपवादविधानार्थत्वात्। यानि त्वनपवादार्थानि जातनिवृत्तलब्धक्रीतकुशलाः--इत्येवमादीनि तानि शेषग्रहणस्यैव प्रपञ्चो वेदितव्यः।।

93. राष्ट्रावारपाराद्घखौ। (4.2.93)
राष्ट्रशब्दात् `वृद्धाच्छः'(4.2.114) इति च्छे प्राप्ते।अवारपारशब्दादणि घखौ विधीयेते। अवारस्य पारमवारपारमिति षष्ठीसमासः। राजदन्तादिषु दर्शनात् पारावारमित्यपि पक्षे भवति। विगृहीताद्विपरीताच्च लभ्यते। वक्तव्यमेवैतत्। अथ वा-- एकशेषो विज्ञास्यते, तत्रैकः समुदायार्एथः, अपरोऽवयवार्थो भविष्यति। विपरीतस्यापि `एकार्थानां विरूपाणाम्' (1.2.64.वा.23) इत्येकशेषो न विरुध्यते, था-- वक्रदण्डश्च कुटिलदण्डश्च कुटिलदण्डाविति, यथा च यङ्लुकाविति । ननु च तस्यैवं प्रकृतयो भवन्ति, पञ्च राष्ट्रादिशब्दाः,प्रत्ययौ तु द्वौ-- इति वैषम्यात् संख्यातानुदेशो न सिध्यति ? नैष दोषः;निर्देशापेक्षं हि यथासंख्यत्वम्। निर्देशश्च द्वयोरेव तदपेक्षया प्रकृते यथासंख्यत्वम्। एवं पञ्चाद्यभेद उपजायते, न स यथासंख्यं बाधते। यथा वुञादीनाञ्च गणापेक्षया यथासंख्यं प्रवृत्ते तु यथासंख्येन प्रत्ययोत्पत्तिवेलायां गणेषु यद्यपि प्रातिपदिकरूपाण्यसमसंख्यानि भवन्ति, तथात्रापि यथासंख्यं न हीयते। कुतः पुनरवगतम्-- एकशेषोऽयमिति ? व्याख्यानात्।
`प्रकृतिविशेषोपादानमात्रेण' इति। मात्रशब्दो जाताद्यर्थविभक्तिनिर्देशस्य च व्यवच्छेदाय।।

94. ग्रामाद्यखञौ। (4.2.94)
वृद्धलक्षणे छे प्राप्ते वचनम्।।

95. कत्र्यादिभ्यो ढकञ्। (4.2.95)
कत्र्यादिषु यद्वृद्धं पठ्यते ततश्छे प्राप्ते शेषेभ्यस्त्वणीति योगोऽयमारभ्यते। कत्त्रिशब्दश्च तत्पुरुषः-- कुत्सितास्त्रयः, `कोः कत्' (6.3.101) इतियोगविभागात् कद्भावः। अत एव निपातनाद्बहुव्रीहिर्वा-- कुत्सितास्त्रयो यस्याः कत्त्रिः। `कुड्याया यलोपश्च' इति। कुडञ्जाशब्दाड् ढञ् भवति यलोपश्च --कौडेयकः।
ये तु `कुल्याया यलोपश्च' इति पठन्ति तेषां कौलेयकः।।

96. कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु। (4.2.96)
`अणोऽपवादो योगः।।

97.नद्यादिभ्यो ढक्। (4.2.97)
यान्यत्रावृद्धानि तेभ्योऽणि प्राप्तेष वृद्धेभ्यस्तु वाराणसीत्येवमादिभ्यश्छे प्राप्तेऽपवादः। केषाञ्चित् `रोपधेतोः प्राचाम'(4.2.123) इति वुञि प्राप्ते ढगारभ्यते। `पौरेयम्' इति । पुरि भवम्। वने भवं `वानेयम्' । `गैरेयम्' इति। गिरौ भवम्। `तदुभयमपि दर्सनं प्रमाणभूतम् इति। उभयथाऽप्याचार्येण शिष्याणां प्रतिपादित्वात्।
गणे नदीत्येतत् स्वरूपेण ग्रहणम्, न संज्ञाग्रहणार्थम्। संज्ञाग्रहणे हि मह्यदीनां पाठोऽनर्थकः स्यात्।

98. दक्षिणापश्चात्पुरसस्त्यक्। (4.2.98)
पश्चात्पुरसोरव्ययत्वात् साहचर्याद्दक्षिणाशब्दोऽपि `दक्षिणादाच्' (5.3.36) इत्यजन्तमध्ययमेव गृह्यते। एवं च `अव्ययात्त्यप्' (4.2.104) इत्यत्र परिगणनात् त्यपः प्राप्तिर्नास्तीत्यणोऽपवादोऽयं योगः।।

99.कापिश्याः ष्फक्। (4.2.99)
वृद्धा (4.2.114)दिति छे प्राप्ते कापिशीशब्दात् ष्फग्विधीयते।
`बाह्लो' इत्यादि। बाह्लीत्यादिभ्यः ष्फग्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- उत्तरसूत्रादिह चकारः सिंहावलोकितन्यायेनानुवर्त्तते, तस्यानुक्तसमुच्चयार्थत्वात् बाह्ल्यादिभ्योऽपि ष्फग्भवतीति।।

100. रङ्कोरमनुष्ये च। (4.2.100)
`ओर्देशे ठञ्' (4.2.119) इति ठञि `जनपदतदवध्योश्च' (4.2.124) इति जनपदलक्षणे वुञि `कोपधादण्' (4.2.132) इत्यणि प्राप्ते वचनम्। `{कच्छादिपाठादमनुष्येऽणापि--काशिका,पदमञ्जरी च।} कच्छादिपाठादणिप सिद्धः' इति। `कच्छादिभ्यश्च' (4.2.133) इत्यत्र `कोपधादण्' (4.2.132) इत्यण् ग्रहणानुवृत्तेः। `नञिवयुक्तन्यायेन'इति। नञ्युक्ते चेवयुक्ते च तत्सदृशसम्प्रत्ययो भवति। इह च मनुष्यशब्दो नञ्युक्तः, तस्मान्नेह मनुष्यन्नेह मनुष्यप्रतिषेध्यः क्रियते। अपि च मनुष्यसदृशे प्राणिन्येव प्रवृत्तिः, तेन मनुष्यसदृशे प्राणिनि ष्फगणौ भवतः। अप्राणिनि तु कच्छादिपाठादणेव भवति, न ष्फक्-- `राङ्कवः कम्बलः'इति। `विशेष विहितेन' इत्यादि। यदीहाप्यण्न क्रियेत,तदा`{कच्छादिभ्यश्च इत्येव सूत्रम्।} कच्छादिभ्योऽण्' (4.2.133) इत्यणो राङ्कवः कम्बल इत्यत्र सावकाशत्वात् प्राणिनि विशेषविहितेन ष्फका तस्य बाधनं स्यात्। तस्मादेष दोषो मा भूदित्यणपि क्रियते।।

101. द्युप्रागपागुदक्प्रतीचो यत्। (4.2.101)
अणि प्राप्ते यद् विधीयते। प्रागित्यादयः शब्दा अञ्चतेः `ऋत्विक्'(3.2.59) इत्यादिना क्विनि कृते सत्यात्मानं लभन्ते। ते च द्विविधाः-- अव्ययसंज्ञका,अनव्ययसंज्ञकाश्च। यदा त्वस्तातिप्रत्ययान्ता भवन्ति तदा `तद्धितश्चासर्वविभक्तिः' (1.1.38) इत्यव्ययसंज्ञाविधानादव्ययसंज्ञकाः,अन्यदा त्वनव्ययसंज्ञकाः। तेषामिह विशेषस्यानुपादानादुभयेषामपि ग्रहणम्। `प्राच्यम्, `{अवाच्यम्--इतिकाशिकापाठः,पदमञ्जरीपाठश्च। }अपाच्यम्' इति। `अचः' (6.4.138) इत्यकारलोपः, `चौ' (6.3.138) इति दीर्घः। `उदीच्यम्' इति।`उद ईत्' (6.4.139) इतीकारः। `प्राक्तनम्' इति। प्राक्शब्दात् `दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिक्' (5.3.27) इत्यादिनाऽस्तातिः, तस्य `अञ्चेर्लुक्' (5.3.30) इति लुक्, ततोऽनेन यति प्राप्ते `सायञ्चिरम्' (4.3.23) इत्यादिना ट्युट्युलौ भवतः। यतस्तु -- यश्च कालवाची सोऽवकाशः।।

102. कन्थायाष्ठक्। (4.2.102)
अणपवादोऽयं योगः।।

103. वर्णौ वुक्। (4.2.103)
`वर्णुः' इति। नदोऽभिधीयते। स्रोतसि च कन्था न सम्भवीति सामीपिकमधिकरणं विज्ञायते, अत आह-- `तत्समीपो देशो वर्णुः' इति। वर्णुशब्दात् `अदूरभवश्च' (4.2.70) इत्यत्रार्थे `सुवास्त्वादिभ्योऽण्' (4.2.77) इत्यण्, तस्य `जनपदे लुप्' (4.2.81) इति लुपि कृते वर्णुरिति भवति। ननु च प्रतिपदविधानात् प्रत्ययस्य लुब्न भवति ? नैवम्; सुवास्त्वादिपाठो हि जनपदादान्यस्मिन् प्रत्ययार्थे कृतार्थः--`वार्णवो ग्रामो नगरमिति, न तु जनपदे। तत्र तु परत्वाल्लोपेन भवितव्यम्। `तद्विषयार्थ'इति। विषयग्रहणेन वर्णादिति सप्तम्या विषयसप्तमीत्वं दर्शयति। स वर्णुदेशो विषयो यस्य तद्विषयार्थः। सा पुनः कन्थैव।।

104.अव्ययात्त्यप्। (4.2.104)
`अमेह' इत्यादि। परिगणनम्। एतच्चोत्तरसूत्रस्थस्यान्यतरस्यांग्रहणस्यभोर्योगयोः विज्ञायते व्यवस्थितविभाषाविज्ञानाच्च लभ्यते। अमाशब्दः समीवाची, स्वरादिपाठादव्ययत्वम्। इहेत्यादीनां `तद्धितश्चासर्वविभक्तिः'(1.1.38) इति। अमा भवोऽमात्यः।
`औपरिष्टः' इति। उपरिष्टाद्भवतीत्यणि कृते `अव्ययानां भमात्रे टिलोपो वक्तव्यः' (वा.842) इति टिलोपः।परतो भवः `पारस्तः'। परतः शब्दः `विभाषा परावराभ्याम्' (5.3.29) इत्यसुजन्तः। `आरातीयः' इति। अत्र टिलोपो न भवति; `बहिषष्टिलोपश्च' (वा.378) इत्यत्रानित्यत्वस्य ज्ञापितत्वात्।
`त्यब्नेर्ध्रुवे' इति। निशब्दाध्रुवे वाच्ये त्यब्भवति। नियते सर्वकाले भवो नित्यः।
`निसो गते' इति। निःशब्दाद्गते वाच्ये त्यब्भवति। `निष्ट्यः' इति। `ह्रस्वात्तादौ तद्धिते' (8.3.99) इति मूर्धन्यः। एवमादविष्ट्य इत्यत्रापि भवति।।

105. ऐषमोह्यःश्वसोऽन्तरस्याम्। (4.2.105)
ऐषमःप्रभृ-तीनि कालवाचीनि प्रातिपदिकान्यव्ययानि। `सायञ्चिरम्' (4.3.23) इत्यादिना परत्वाट्ट्युट्युलोः प्राप्तयोरिदं वचनम्। `शोवस्तिकम्' इति। `द्वारादीनाञ्च' (7.3.4) इत्यैजागमः।।

106.तीररूप्योत्तरपदादञ्ञौ। (4.2.106)
अथ तीररूप्योत्तरादित्येवं कस्मान्नोक्तम्, एवं हि लघु सूत्रं भवतीति ? अत आह-- `तीररूप्यान्तात्' इत्यादि। यदीह तीररूप्यान्तादित्युज्येत, बहुच्पूर्वादपि स्यात्-- बहुतीरे जात इति, भवति ह्येतत् तीरान्तम्। उत्तरपदग्रहणे ह्येषोऽतिप्रसङ्गो न भवति, न ह्येतत्, तीरोत्तरपदम्, यस्मात् समासे सत्येतद्भवति। पूर्वपदमुत्तरपदमिति न्यायेन नायं समासः।।

107. दिक्पूर्वपदादसंज्ञायां ञः। (4.2.107)
`पौर्वशालः'इति। पूर्वस्यां शालायां भवः पौर्वशालः। `तद्धितार्थः' (2.1.51) इत्यादिना तद्धितार्थे समासः, ततः प्रत्ययः।
अथ पदग्रहणं किमर्थम् ? `न दिक्पूर्वात्' इत्येवोच्येत ? इत्यत आह-- `पदग्रहणम्' इत्यादि। असति हि पदग्रहण स्वरूपग्रहणं स्यात्। तथा च दिग्गजः, दिग्नागः, दिग्दाहः-- इत्येवमादिः प्रकृतिर्विज्ञायते। पदग्रहणे तु सति दिग्विशेषो गृह्यते,कथम् ? पदग्रहणसामर्थ्याद्व्याधिकरणे बहुव्रीहिर्विज्ञायते-- दिशः पूर्वपदं यस्य । दिश इति च वाचकापेक्षया षष्ठी विज्ञायते। तेनेह तदभिधायी पूर्वादिदिक्शब्दो गृह्यते।

108. मद्रेभ्योऽञ्। (4.2.108)
`पौर्वमद्रः' इति। पूर्ववत् तद्धितार्थे (2.1.51) समासः, ततोऽणि प्राप्ते,`अवृद्धादपि बहुवचनविषयात्' (4.2.125) इतिच वृञि, `मद्रवृज्योः कन्' (4.2.131) इति कन्यञ् विधीयते।।

109. उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तौ। (4.2.109)
`शैवपुरम्, माहानगरम्' इति। शिवपुरमहानगरशब्दौ समासस्वरेणान्तोदात्तौ।
`माथुरम्' इति। मथुराशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। मध्यदेशग्रामस्तु, तेनाणेव भवति। `ध्वाजम्' इति। ध्वजीशब्दः पिप्पल्यादित्वान्ङीषन्तः।गौरादिषु हि प्पिल्यादयः पठ्यन्ते,तेनासौ प्रत्ययस्वरेणान्तोदात्तः। उदीच्यग्रामस्य बह्वजन्तो भवति। `धानशब्द उदात्तः' इति। `गतिकारकोपपदात्' (6.2.139) इति धानशब्दस्य ल्युडन्तस्य प्रकृतिभावात्।।

110. प्रस्थोत्तरपदलद्यादिकोपधादण्। (4.2.110)
`उदीच्यग्रामलक्षणस्याञोऽपवादः' इति। प्रस्थोत्तरपदादीनामुदीच्यग्रानत्वात्। `माद्रीप्रस्थः, माहकीप्रस्थः' इति। अत्र प्रकृतिः समासस्वरेणान्तोदात्ता। अथोत्तरपदग्रहणं किमर्थम्, न प्रस्थान्तादित्येवोच्येत ? नैवं शक्यम्; तदिहापि प्रसज्येत--उत्तमकर्णीप्रस्थः। तत्राप्युत्तरपदग्रहणान्न भवति। न ह्यत्र प्रस्थशब्द उत्तरपदम्, किं तर्हि ? कर्णीप्रस्थशब्दः। `ततष्ठञ्ञिठयोरपवादः'इति `वाहीकग्रामेभ्यश्च' (4.2.117) इति प्राप्तयोः। अथ वाहीकशब्दः किमर्तमिह पठ्यते, यावता कोपधत्वादेवाण् सिद्धः ? अत्राह-- `वाहीकशब्दः' इत्यादि। यदि वाहीकशब्द इह न पठ्यते, परत्वात् `वृद्धाच्छः' (4.2.114) इति च्छः स्यात्। कोपधस्य तु निलीक इत्यत्रावृद्धमवकाशः। तस्मात्परमपि च्छं बाधित्वाऽण् यथा स्यादिति कोपधोऽपि वाहीकशब्दः पठ्यते। अथाण्ग्रहणं किमर्थम्, न यावता यथाविहितमेवोच्येत ?न; पुनर्विधानादणेव भवतीति विज्ञायते। अपवादस्य विधाने पुनर्विधानमनर्थकमित्याह--`अजग्रहमम्' इत्यादि। यदत्र वृद्धं वाहीकग्रामः,तस्मात् `प्राग्दीव्यतोऽण्' (4.1.83) इत्यतोऽणि प्राप्ते ` वृद्धाच्छः' (4.2.114) प्राप्नोति, तस्मिन् `वाहीकग्रहामेभ्यश्च' (4.2.117) इति ठञ्ञिठौ, तौ परत्वात् बाधित्वा यद्यत्राण्ग्रहणं न क्रियेत तदा पुनर्विधानाच्छ एव स्यात्। अण्ग्रहणादेव भवति-- गोष्ठ्यां भवं `गौषठ्यम्' इति। तस्मात् बाधकमपि बाधित्वाऽणेव यथा स्यादित्येवमर्थमण्ग्रहणम्। कोपधग्रहणमिहाजनपदार्थम्। जनपदतदवधि'(4.2.124) `कोपधादण्' (4.2.132) इत्यनेन सिद्धः। यकृल्लोमशब्दः पलद्यादिषु पठ्यते, तस्य नलोप निपात्यते,अन्यथा `अन्' (6.4.167) इति प्रकृतिभावे सति यकृल्लोम्नि भवः याकृल्लोम इति न सिध्येत्।।

111. कण्वादिभ्यो गोत्रे। (4.2.111)
`गोत्रग्रहणमिह न प्रत्ययार्थम्' इति। शेषाधिकारात्। यदि हि प्रत्ययार्थः स्यात्, शेषाधिकारो वाच्येत। `{न च--काशिका पदमञ्जरी च} न प्रकृतिविशेषणम्'(इति)। असम्भवात्। न हि कण्वादीनां परमप्रकृतिरूपाणामेव गोत्रार्थत्वं सम्भवति। तर्हि गोत्रग्रहणं सम्बध्येतेत्येवमर्थं पृच्छति। `एवम्' इत्यादिना प्रत्ययविधिविशेषणं गोत्रग्रहणमिति दर्शयित्वा तेन गोत्रप्रत्ययान्तेभ्यः कण्वादिभ्योऽण् भवतीति दर्शयति। `छस्यापवादः' इति। गोत्रप्रत्ययान्तानां कण्वादीनां वृद्धत्वात्। `काण्वाः, गौकक्षाः'इति। कण्वगोकक्षशब्दाभ्यां गोत्रापत्ये गर्गादि (4.1.105) इत्वाद्यञ्, तदन्तादण्, `आपत्यस्य' (6.4.151) इत्यादिना यलोपः। `काण्वः' इति। `सास्य देवता' (4.2.24) इत्यण्।।

112. इञश्च। (4.2.112)
दाक्ष्यादिभ्यः `अत इञ्' (4.1.95) इतीञन्तेभ्योऽण्। `सौतङ्गमीयम्' इति. सुतङ्गमेन निर्वृत्तमिति `वुञ्छण्' (4.2.80) इत्यादिना सुतङ्गमशब्दाच्चातुरर्थिक इञ्।।

113.न द्व्यचः प्राच्यभरतेषु। (4.2.113)
`पैङ्गीयाः, प्रौष्ठीयाः'इति। प्राच्यगोत्रोदाहरणम्। `काशीयाः,पाशीयाः'इति। भरतगोत्रोदाहरणम्। `कथम्' इत्यादि चोद्यम्। `नैतदस्ति' इति परिहारः। उभयञ्चैतत्,तदुदाहरणम्। उभयञ्चैतदनुगतार्थम्। ननु च भरताः प्राच्या एव,ततः प्राच्यग्रहणेनैव तेषां ग्रहणं भविष्यति, तत्किमर्थं तेषांस्वशब्देनोपादानम् ? इत्यत आह-- `ज्ञापकादन्यत्र' इत्यादि। क्वान्यत्र ? `बह्वच इञः प्राच्यभरतेषु' (2.4.66) इत्यत्र।।

114. वृद्धाच्छः। (4.2.114)
`अव्ययतीर'इत्यादि। तत्राव्ययविधिं बाधते-- आराद्भव आरातीयः। तीरोत्तर एव विधिः,तं च वायसतीरे भवो वायसतीरीयः। रूपोत्तरपदात्तु छं बाधित्वा `धन्ययोपधाद्वुञ्' (4.2.121) इति योपधलक्षणो वुञ् भवति--- मणिरूप्ये भवो माणिरूप्यक इति। उदीच्यग्रामविदिं बाधते-- वाडवाक्षे भवो वाडवाक्षीयः, साडलपुरे भवः साडलपुरीयः। कोपधलक्षमम्--औदके भव औदकीयः, चौल्लुके भवः चौल्लुकीयः। तेषां तु विधीनामवृद्धोऽवकाशः।।

115. भवतष्ठक्छसौ। (4.2.115)
`सकारः पदसंज्ञार्थः' इति। `सिति च' (1.4.16) इति पदसंज्ञा यथा स्यात्। तस्याञ्च सत्यां भवदीयमतित्यत्र `झलां जशोऽन्ते' (8.2.39) इति जश्त्वं भवति। `भावत्कः' इति। `इशुसुक्तान्तात् कः'(7.3.51)। `अवृद्धात्तु भवतः' इति। शत्रन्तादिति।।

116.काश्यादिभ्यष्ठञ्ञिठौ। (4.2.16)
काशिचेदिशब्दाभ्यां जनपदलक्षणे (4.2.124) वुञि प्राप्ते साजातेः `इञश्च' (4.2.112) इत्यणि, संवाहादिभ्यो वृद्धच्छे (4.2.114) , हस्तिकर्षूशब्दात् `ओर्देशे ठञ्' (4.2.119) इति ठञि, परिशिष्टेभ्यः `प्राग्दीव्यतोऽण्' (4.1.83) इत्यणीदमारभ्यते। कथं पुनर्ञकार एव विपर्यस्तदेशेऽनुबन्धे क्रियमाणे विशेष इत्यत आह-- `स्त्रीप्रत्यये विशेषः' इति। अन्ते हि ञकारेऽनुबन्धे सति `टिड्ढाणञ्'(4.1.15) इतिङीब्भवति। आदौ हि सति टाबेव भवति। `वृद्धादित्यनुवर्त्तते' इति। यद्येवम्, अत्र ये वृद्धाः पठ्यन्ते तेभ्यः प्त्यये न प्राप्नोति ? इत्याह-- `येत्ववृद्धाः'इत्यादि।

यदि तर्ह्यवृद्धेभ्योऽपि वचनप्रामाण्यात्प्रत्ययो भवति, वृद्धादित्यस्यानुवृत्तिरपार्थिकेत्यत आह-- `देवदत्तशब्दः' इत्यादि। देवदत्तशब्दस्य प्राग्देश एव हि वर्त्तमानेऽस्य वृद्धसंज्ञा, न वाहीकग्रामे। तत्र यदि वृद्धादिति नानुवर्त्तते, वाहीकग्रामवाचिनोऽपि ततष्ठञ्ञिठौ स्याताम्। तस्मात् तन्निवृत्त्यर्थं वृद्धाधिकारोऽर्थवान् भवतीति भावः। `कथम्' इत्यादिना वृद्धसंज्ञायां देवदत्तीया इति भाष्यकारस्योपन्यासे तदुदाहरणं विघटय्य `तत्रैवं वर्णयन्ति' इत्यादिना समर्थयते।

`आपदादिपूर्वपदात्कालात्' इति। आपच्छब्द आदिर्येषां तान्यापदादीनि। तानि पूरर्वपदं यस्य तदापदादिपूर्वपदम्। ततः कालाट्ठञ्ञिठौ भवतः।आदिशब्देनोर्ध्वादयः शब्दा गृह्यन्ते।।

117. वाहीकग्रामेभ्यश्च। (4.2.117)

118. विभाषोशीनरेषु। (4.2.118)

119.और्देशे ठञ्। (4.2.119)

`नैषादकर्षुकः। शावरजम्बुकः' इति। निषादकर्षूवरजम्बूशब्दाभ्यां ठञ्, `इसुसुक्तान्तात् कः' (7.3.51), `केऽणः' (7.4.13) इति ह्रस्वः। ननु च ठञ् प्रकृत एव, स एवेहानुकृष्यते, तत्किं ठञ्ग्रहणेन ? इत्यत आह-- `ठञ्ञिठयोः' इति। यथैव हि ठञ् प्रकृतः, एवं ञिठोऽपि। तत्र द्वयोरपि प्रकरणे ठञ् चानुवर्तिष्यते, नेतर इत्येतन्न लभ्यते। तस्मात् ञिठस्य निवृत्तये पुनष्ठञ्ग्रहणं कृतम्। ननु चास्वरितत्वादेव ञिठो नानुवर्तिष्यते ? सत्यमेतत्; तदेवास्वरितत्वं ज्ञापयितुं ञिठस्य ठञ्ग्रहणं कृतम्। तच्चास्वरितत्वमाख्यायते मन्दबुद्धीनामनुग्रहाय।।

120. वृद्धात्प्राचाम्। (4.2.120)

`आढकजम्बुकः' इति। पूर्ववत् कादेशो ह्रस्वत्वञ्च।।

121. धन्वयोपधाद्वुञ्। (4.2.121)

धन्वनोऽर्थस्य ग्रहणम्, न स्वरूपस्य; वृद्धाधिकारात्। न हि धन्वशब्दो वृद्धः। पारेधन्वनि जातः पारेधन्वकः, `नस्तद्धिते' (6.4.144) इति टिलोपः। ऐरावते जात ऐरावततकः।।

122. प्रस्थपुरवहान्ताच्च। (4.2.122)

`वृद्धादित्येव' इति। यदि तर्हि वृद्धादित्यनुवर्त्तते वृद्धाधिकारादेव स्वरूपग्रहणाभावात् कथं तदन्तविधिर्भवति, नहि प्रस्थादेः केवलस्य वृद्धत्वं सम्भवति, किं तर्हि ? तदन्तस्य, तत्किमन्तग्रहणेन ? मैवम्; सत्यपि वृद्धाधिकारे यथा धन्वेति वृद्धग्रहणं हि देशस्य विशेषणं तथेहापि स्यात्, तन्निवृत्त्यर्थमन्तग्रहणं कृतम्।।

123. रोपधेतोः प्राचाम्। (4.2.123)

`ईकारान्ताच्च' इति।कतं पुनर्ज्ञायते---दीर्घस्येदं ग्रहणम्, न ह्रस्वस्येति ? सामर्थ्यात् । प्राग्ग्रहणं हि देशस्य विशेषणम्। वृद्धादिति वर्त्तते, न च वृद्धमिकारान्तं प्राग्देशवाच्यस्ति, तस्माद्दीर्घस्येदं ग्रहणमिति विज्ञायते। एकचक्राशब्दस्य तु `एङ् प्राचाम्' (1.1.75) इति वृद्धसंज्ञा।

अथ तपरकरणं किमर्थम्, नेह किञ्चित्तस्य व्यावर्त्त्यमस्तीत्यत आह-- `तपरकरणं विस्पष्टार्थम्ट (इति)। असति हि तस्मिन् रोपध इति स्थिते गुणे कृते विभक्तौ च रोपधयोरिति निर्देशः स्यात्। तत्रैव सन्देहः स्यात्--किं रोपधस्येदं ग्रहणम् ? उत रोपधस्यकारान्तस्येति ? तपरकरणे तु सति सन्देहो न भवति। ईरोपधादिति नोक्तम्, वैचित्र्यार्थम्।।

124. जनपदतदवध्योश्च। (4.2.124)

`तदवधेरपि' इत्यादि। `जनपदतदवध्योश्च' इत्यत्र तच्छब्देन सन्निहितत्वाज्जनपद एवपरामृश्यते। न चायं षष्ठीसमासः। षष्टीसमासे ह्यजनपदोऽपि योऽवधिस्ततोऽपि वुञ् प्रसज्येत। छ एव तस्येष्यते-- मौञ्जी नाम वाहीकानामवधिर्ग्रामः, तत्र भवो मौञ्जीय इति। तस्मात् समानाधिकरण एवायं समासः-- सएव जनपदोऽवधिर्मर्यादा तदवधिरिति। तेन जनपदावधिरेव एव गृह्यन्ते, न ग्रामः।

`किमर्थं तर्हि तदवधिग्रहणम्' इति। यदि तदवधिरपि जनपद एव गृह्यते,निरर्थकं तर्हि तस्य ग्रहणम्, `जनपदाच्च' इत्येतावदेव वक्तव्यमित्यभिप्रायः।

`बाधकबाधनार्थम्' इति। गर्त्तोत्तरपदाद्वक्ष्यमाणश्छ एव परत्वाद्विशेषविहितत्वाच्च बाधकः, तस्य बाधनार्थं तदवधिग्रहणम्।तेनहि त्रिगर्त्तेषु भवस्त्रैगर्त्तक इत्यत्रोत्तरसूत्रेण गर्त्तोत्तरपदाच्छं बाधित्वा वुञेव भवति।।

125. अवृद्धादपि बहुवचनविषयात्। (4.2.125)
`अण्छयोरपवादः' इति। अवृद्धादणोऽपवादः, वृद्धाच्छस्य। अथ विषयग्रहणं किमर्थम्, विनापि तेन विशेषो लभ्यत एव। कथम् ? इह जनपदतदवधिशब्दाभ्यां समानाधिकरणत्वाद्बहुवचनशब्दो न पारिभाषिको विज्ञायते,किं तर्हि ? अन्वर्थः-- बहूनामर्थानां वचनो यो जनपदस्तदवधिश्चेति। यश्च बहूनामर्थानां वचनः सोऽर्थान् बहून् ब्रूवन् सामर्थ्यादेव बहुवचनविषयो भवति ? इत्याह-- `विषयग्रहणम्' इत्यादि। अनन्यत्रभावः कथं नाम लभ्यत इत्येवमर्थं विषयग्रहणम्। अनन्यत्रभावः किमर्थमिष्यत इत्याह-- जनपदैकदेशः क्रियते। वर्त्तनी च वर्त्तनी च वर्त्तनी च वर्त्तन्यः,तद्बहूनां वाचको भवति। ततश्च यदि विषयग्हणं न क्रियते ततो वर्त्तनीषु भव इति वुञ् स्यात्। विषयग्रहणे तु सति न भवति, अनन्यत्रभावो विषयः। तेनैवं विज्ञायते-- बहुवचनं न यो व्यभचरति। यश्चैकशेषः स बहूवचनं व्यभिचरति, तस्यहि विवक्षाभावे बहुत्वात्। द्वयोरपि च कदाचिद्वृत्तेः।
`अपिग्रहणम्' इति। अपिग्रहणं हि वृद्धादपि यथा स्यादित्येवमर्थं क्रियते। वृद्धात्पूर्वेणैव सिद्धः प्रत्ययः, तत् किमपिग्रहणेन ? `तक्रकौण्डिन्यायेन' इति। यथा `ब्राह्मणेभ्यो दधि दीयता तक्रं कौण्डिन्याय' इति सामान्येन वृत्तस्य दधिदानस्य विशेषे वर्त्तमानेन तक्रदानेन बाधा क्रियते, तथेहापि बहुवचनविषये च सामान्येन प्रवृत्तस्य पूर्वयोगस्य बहुवचनविषये वर्त्तमानेनानेन योगेन बाधा विज्ञायते। तस्माद्वृद्धादपि यथा स्यादित्यपि शब्देन समुच्चीयते।।

126. कच्छाग्निवक्त्रगर्त्तोत्तरपदात्। (4.2.126)
कच्छशब्दार्थमुत्तरपदग्रहणात्, स हि केवलोऽपि देश वर्त्तते। इतरेषां तु केवलानां देशे वृत्त्यसम्भवात् सामर्थ्यादेव तदन्तविधिर्लभ्यत इतीतरान् प्रत्युत्तरपदग्रहणमनर्थकम्। `कच्छाग्निवक्त्रगर्त्तान्तात्' इति नोक्तम्, बहुच्पूर्वान्मा भूत्। यदा हि कच्छदेशेन देशान्तरन्तरस्य गुणसाम्ये सतीषदसमाप्तः कच्छदेश इति कच्छशब्दाद्बहुच् क्रियते तदा बहुकच्छशब्दो देशवचन इति। अन्तग्रहणे तु सति ततोऽपि प्रत्ययः स्यात्, उत्तरपदग्रहणान्न भवति।
`दारुकच्छः'इति। कच्छशब्दस्योत्तरपदस्य वृद्धस्योदाहरणम्। `पैप्पलीकच्छकः' इत्यवृद्धस्योदाहरणम्, एवमन्याद्युत्तरपदानामपि। एकवृद्धस्योदाहरणम्। अपरं वृद्धस्य वेदितव्यम्।।

127. धूमादिभ्यश्च। (4.2.127)
`अणादेरपवादः'इति। आदिशब्देन कच्छादीनां ग्रहणम्। तत्र देशवचना अवृद्धा येधूमादयस्तेभ्योऽणोऽपवादः। ये तु वृद्धास्तेभ्यश्छस्। य उदीच्यग्रामास्तेभ्योऽणः। ये बाहीकग्रामास्तेभ्यष्ठञ्ञिठयोः। `तस्य योपधत्वादेव वुञि सिद्धे' इति। `धन्वयोपधाद्वुञ्' (4.2.121) इत्यनेन। `जनपदलक्षणे वुञि सिद्धे' इति। `अवृद्धादपि' (4.2.125) इत्यादिना। `कूलात् सौवीरेषु' इति। कुलशब्दाद्वृञ् भवति सौवीरेषु। कौलको भवति सौवीरश्चेत, कौलोऽन्यत्।।

128. नगरात्कुत्सनप्रावीण्ययोः। (4.2.128)
`नागरा ब्राह्मणाः' इति। अण्। ननु च `नगर,माहिष्मती' (4.2.95) इति नगरशब्दः कत्त्र्यादिषु पठ्यते, ततो ढकञा भवितव्यम्, तत्कथं नागरा इति प्रत्युदाह्रियत इत्याह-- `कत्त्र्यादिषु' इति। द्विविधो नगरशब्दः-- जातिवचनः, संज्ञावचनश्च। तयोः कत्त्र्यादिषु माहिष्मतीशब्देन साहचर्यात् संज्ञाशब्दः पठ्यते। तत्र जातिशब्दान्नागरा इति प्रत्युदाहृतम्। संज्ञाशब्दे तु नागरेयक इति प्रत्युदाहर्त्तव्यम्।।

129. अरण्यान्मनुष्ये। (4.2.129)
`औपसंख्यानिकस्य णस्यापवादः' इति। `अरण्याण्यः' (वा.437) इत्युपसंख्यानात्प्राप्तस्य । `पथ्यध्यायन्याय' इत्यादि। एषु पथ्यादिषु वुञ्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- `धूमादिभ्यश्च' (4.2.127) इत्यतश्चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः,तेन पथ्यादिषु वुञ्भवति।
`वागोमयेषु' इति। गोमयेषु वाच्येषु वा वुञ्भवतीति। स तु तस्यैव चकारस्यानुक्तसमुच्चयार्थस्यानुवृत्तेर्वक्ष्यमाणस्य विभाषाग्रहणस्योभयोः शेषभूतत्वाल्लभ्यते। यदि तर्हि वक्ष्यमाणं विभाषाग्रहणमुभयोर्योगयोः शेषभूतं पथ्यादिष्वपि विकल्पेन विधिः स्यात् ? नैष दोषः; व्यवस्थितविभाषा हि सा, तेन गोमयाद्विकल्पेन विधिर्भवति, पथ्यादिषु नित्यमिति।।

130. विभाषा कुरुयुगन्धाराभ्याम्। (4.2.130)
`सैषा युगन्थरार्था विभाषा' इति।न कुरुशब्दार्था। तत्र कच्छादिपाठाद्विनापि विभाषाग्रहणेनाणा भवितव्यम् । ननु युगन्धरशब्दादप्यणि `अवृद्धादपि बहुवचनविषयात्' (4.2.125) इति नित्यएव वुञि प्राप्ते वचननित्यार्थं भविष्यति, नित्ये हि वुञि पुनरारम्भोऽनर्थक- स्यात्, तस्माद्युगन्धरार्थाऽपि विभाषा न प्रसज्येत ? नैतत् पुनरारम्भो विपर्ययेणापि शक्यते समर्थयितुम्। जनपदलक्षणो (4.2.124) यो वुञ् स विभाषा,अयं तु नित्य इति।अस्मात्तु युगन्धरार्थं विभाषाग्रहणं कर्त्तव्यम्। मनुष्यतत्स्थयोस्तु कुरुशब्दान्नित्य एव वुढ्भवति, कच्छादिषु पाठसामर्थ्यात्। अन्यथानयैव विभाषया वुञणोः सिद्धत्वात् कच्चादिपाठोऽर्थकः स्यात्; अनवकाशत्वात्।।

131. मद्रवृज्योः कन्। (4.2.131)

`जनपदवुञोऽपवादः'इति। `अवृद्धादपि' (4.2.125) इत्यादिप्राप्तस्य। मद्रवृज्योः कन्निति ञ्यन्तस्य परनिपातः `द्वन्द्वे घि' (2.2.32) इत्यस्य विधेरनित्यत्वज्ञापनार्थम्। तेन धूमाग्नी इत्येवमादि सिद्धं भवति।।

132.कोपधादण्। (4.2.132)

`जनपदवुञोऽपवादः' इति। पूर्वत्प्रप्तस्य। किं पुनर्देशादन्यत्र वर्त्तमानो नेष्यते, यो देशे वर्त्तते ? इत्याह-- `अन्यत्रेत्यादि पूर्वेण' इति।`प्रस्थोत्तरपदात्' (4.2.110) इति सूत्रेण।

अथाण्ग्रहणं किमर्थम्, न कोपधाद्यथाविहितमेवोच्येत, यथाविहितमुच्यमानेऽणपवादो वुञ् स्यादिति चेत् ? न; वुञ्विधाने हि वचनमनर्थकं स्यात्,तेन विना वुञः सिद्धत्वात्। तस्माद्वचनसामर्थ्याद्विहितोऽणेव प्राप्नोति। अन्येन बाधित्वा अत एवाण् अतएवाण् भविष्यतीति। स हि `प्राग्दीव्यतोऽण्' (4.1.83) इति विहितो बाधितश्च वुञैवेत्यत आह-- `अण्ग्रहणम्' इत्यादि। `इक्ष्वाकुषु जातः'इति। इक्ष्वाकुशब्दादोर्देशे ठञ् (4.2.119) प्राप्तः, तस्मिन् जनपदवुञा बाधिते यदीहाज्ग्रहणं न क्रियते तदा पुनर्वचनाद्वुञेव भवति, अण्ग्रहणादणेव भवति। `ऐक्ष्वाकः' इति। `दाण्डिनायनहास्तिनायन' (6.4.174) इत्यादाविक्ष्वाकुशब्दस्योकारस्य लोपो निपातितः।।

133.कच्छादिभ्यश्च। (4.2.133)

`वुञादेरपवादः' इति। आदिशब्देन ठञः। तत्र ये जनपदबहुवचनविषयास्तेभ्यो वुञः प्राप्तस्यापवादः। सिन्धुवर्णुशब्दाभ्यामोर्देशे ठञः (4.2.119)। `कच्छशब्दो न बहुवचनविषयः' इति। तेन `अवृद्धादपि' (4.2.125) इत्यादिना बाधकस्य वुञोऽप्राप्तावेव सामान्येनाण्सिद्ध एवेति दर्शयति। यद्येवम्, किमर्थं तस्य पाठः ? इत्याह-- `तस्य' इत्यादि। उत्तरसूत्रेण वुञ् मनुष्यतस्त्थयोर्यथा स्यादित्यवमर्थः कच्छस्येह पाठः, न त्वनर्थकः। `कोपधादेवाण् सिद्धः'इति। पूर्वसूत्रेणेति। `इहग्रहणमुत्तरार्थम्' इति। उत्तरसूत्र वुञ् यथा स्यात्।।

134. मनुष्यतत्स्थयोर्वुञ्। (4.2.134)

135. अपदातौ साल्वात्। (4.2.135)

`साल्वः' इति। कच्छादिपाठादण्।।

136. गोयवाग्वोश्च। (4.2.126)

137. गर्त्तोतत्रपदाच्छः। (4.2.137)

अवृद्धार्थ वचनम्। वृद्धात्तु `वृद्धाच्छः' (4.2.114) इत्यनेनैव सिद्धमिति। सति तु वृद्धावपि परत्वादनेनैव भवितव्यम्। `अनोऽपवादः' इति। नाप्राप्ते तस्मिन्नस्यारम्भात्। `वाहीकग्रामलक्षणञ्च' इत्यादि। यद्गर्त्तोत्तरपदं वाहीकवाचि ततो वाहीकग्रामलक्षणौ ठञ्ञिठौ बाधित्तवात् परत्वाच्छ एव भवति, तस्य गर्त्तोत्तरपदमवकाश इति। अथोत्तरपदग्रहणं किमर्थम्, न गर्त्तान्तादित्येवोच्येत ? इत्याह-- `उत्तरपदग्रहणम्' इत्यादि। यदि गर्त्तान्तादित्युच्येत तदा बहुगर्त्त इत्येतस्मादपि बहुच्पूर्वात् स्यात्, भवति ह्येतद्गर्त्तान्तम्। उत्तरपदग्रहणे तु सति न भवति, न ह्येतद्गर्त्तोत्तरपदम्। समासे हि सत्येतद्भवति-- पूर्वपदमुत्तरपदमिति।।

138. गहादिभ्यश्च। 94.2.138)

`अणादेरपवादः' इति। आदिशब्देन वुञः। तत्र कामप्रस्थशब्दात् `प्रस्थपुरवहान्ताच्च' (4.2.122) इति प्राप्तस्य वृञोऽपवादः, शेषेभ्यस्त्वौत्सर्गिकस्याणः। `सम्भवापेक्षं विशेषणम्'इति। सम्भवमपेक्षत इति सम्बवापेक्षम्। येषां देशे चादेशे च वृत्तिः सम्भवति गहादीनां तेषामेवेदं विशेषममिति। एतदुभयमपि विशेषणमेवार्थार्यैः स्मर्यते। `पृथिवीमध्यस्य' इत्यादिना तद्विशेषं दर्शयति। `चरणसम्बन्धेन' इत्यादि। चरणेनार्थेन सम्बन्धश्चरणसम्बन्धः; तेन करणेन वाण् भवति। किंविशिष्टः ? निवासलक्षमः। निवासो लक्षणं यस्य स तथोक्तः। कथं निवासलश्रणः ? यः पृथिवीमध्ये निवासभूते वर्त्तमानात् मध्यशब्दाद्भवति, स हि निवासेन लक्ष्यते। तदेतदुक्तं भवति--पृथिवीमध्यनिवासोऽस्य चरणस्येति। यदायमर्थो विज्ञायते तदाण्भवति, नान्यत्रेति। तेन यदा पृथिवीमध्याद्गतं चरणमिति चरणमिति विवक्ष्यते तदा च्छ एव भवति--मध्यमीय इति। कथं पुनः सामान्योक्तावेव विशेषो लभ्यत इति ? सामान्यभिधानेऽपि विशेषोपस्थानदर्शनात्। घृतक्षरणवच्च स ह्यविशेषेणोपदिष्टो घृतादिष्वेवावतिष्ठते। तस्मात् सामान्योक्तावपि पृथिवीमध्य एव वर्त्तमाने मध्यशब्दो मध्यमभावमापद्यते। चरणे च प्रत्ययार्थे निवासलक्षण एवाण् भवति,न हि सर्वेषु जातादिष्वर्थेषु।

`मुखपार्श्वतसोर्लोपः' इति। मुखपार्श्वशब्दयोस्तसस्तयोः प्रत्ययसन्नियोगेन लोपो भवति। स च अलोऽन्त्यस्य (1.1.52) इति वचनादन्त्यस्य । लोपवचनं

`अव्ययानां भमात्रे टिलोपः' (वा.842) इत्यस्यानित्यत्वज्ञापनार्थम्, तेनारातीय इत्यत्र न भवति। `मुखतीयम्, पार्श्वतीयम्' (इति)। `अपादाने चाहीयरुहोः' (5.4.45) इति मुखपार्श्वशब्दाभ्यां तसिः। `आद्यादिभ्य उपसंख्यानम्' (वा.634) इत्यौपसंख्यानिके सकारस्य लोपे कृतेऽकारस्यापि `यस्येति च' (6.4.148) इति लोपः।
`देवस्य चेति वक्तव्यम्' इति। देवशब्दस्य कुग्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- `{जनपपदयोः कुक्क इति सं. परिषत्काशिकापाठः'}कुग्जनस्य परस्य' (वा.ग.सू.101) इत्यत्र चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, तेन देवदशब्दादपि भविष्यति।।

139. प्राचां कटादेः। (4.2.139)

140. राज्ञः क च। (4.2.140)

141. वृद्धादकेकान्तखोपधात्। (4.2.141)
`कोपधलक्षणस्य च' इत्यादि। अकेकान्तात् `कोपधादण्' (4.2.132) इत्यणि प्राप्तेऽणोऽपवादः। कोपधादपि वाहीकग्रामलक्षणस्य ठ्ञो ञिठस्य च। `रोपधेतोः प्राचाम्' इति। `अकेकान्तग्रहणे कोपधग्रहणम्' इति। इह सूत्रेऽकेकान्तग्रहणमपनीय कोपधग्रहणं कर्त्तव्यम्। कोपधादित्येवं वक्तव्यमित्यर्थः।।

142. कन्थापलदनगरग्रामह्वदोत्तरपदात्। (4.2.142)
`वाहीकग्रामलक्षणस्य' इति। ठञ्ञिठयोश्च। अन्तग्रहणेनैव सिद्ध सत्त्युत्तरपदग्रहणं वैचित्र्यार्थम्।।

143. पर्वताच्च। (4.2.143)

144. विभाषाऽमनुष्ये। (4.2.144)
`पार्वतीयानि फलानि' इति। ननु चामनुष्यशब्दो रक्षःपिशाचादिष्वेव रूढः तथा हि `सभा, राजाऽमनुष्यपूर्वा' (2.4.23) इत्यत्र `इह कस्मान् भवति-- काष्ठसभेति, तत्रेदमुक्तम्--`अमनुष्यशब्दो रूढिरूपेण रक्षः पिशाचादिष्वेव वर्त्तते' इति, तत्कथं `अमनुष्ये' इत्युच्यमाने फलादिष्वभिधेयेषु भवति ?नैष द्वोषः;द्वौ ह्यमनुष्यशब्दौ -- रूढः, व्युत्पन्नश्च। तत्र `सभा राजाऽमनुष्यपूर्वा' (2.4.23) इत्यत्र रूढिशब्दस्य ग्रहणम्, इह त्वितरस्य मनुष्यादन्य वर्त्तमानस्य।।

145. कृकणपर्णाद्भारद्वाजे। (4.2.145)
`भारद्वाजशब्दोऽपि देशवचन एव,न गोत्रशब्दः'इति। देश एव भारद्वाजे कृकणपर्णशब्दवृत्तेः सम्भवात्।।
इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
चतुर्थाध्याये द्वितीयः पादः।
****

4.3

अथ चतुर्थोऽध्यायः।
तृतीयः पादः।
1.युष्मदस्मदोरन्यतरस्यां खञ्च। (4.3.1)
`तत्र वषम्याद्यथासंख्यं न भवति' इति। द्वे हि प्रकृती, प्रत्ययाश्च त्रय इति वैषम्यम्। ननु च ख़ञ्छावेवानेन विधीयेते, अण्प्रत्ययस्त्वन्यतरस्यांग्रहणेन यथाप्राप्तस्याभ्यनुज्ञाने कृते शास्त्रादेव भवति, तत्कृतो वैषम्यम् ? छोऽपि तर्हि तेनैवानेन विधीयते, तस्यापि हि चकारोऽभ्यनुज्ञापक एव। सोऽपि स्वशास्त्रादेव `वृद्धाच्छः‍ट (4.2.114) इत्येतस्माद्भवतीति ? एवमपि वैषम्यम्। सर्वथा नास्ति यथासंख्यप्रसङ्ग।।

2. तस्मिन्नणि च युष्माकास्माकौ। (4.3.2)

`तस्मिन्निति साक्षद्विहितः खञ् निर्दिश्यते' इति। तस्मिन्नित्युक्ते प्रागेव तत्रैव प्रतीत्युत्पत्तेः। तत्र पुनः कारणं साक्षाद्विहित्वम्,आनन्तर्याच्च खञः, तस्यैव युक्तः। ननु च पूर्वसूत्रे ख़ञ्चेति चकारेण च्छोऽनुकृष्यते,वाचकदेशश्च वाच्य इति खञश्छ एवानन्तरो भवति। स्यादनन्तरो यदि चकारस्तस्य वाचकः स्यात्, न चासौ तस्य वाचकः । स हि समीपवर्तिनः पदार्थान्तरस्य सहायतामात्रमाचष्टे। खञः सहायतामाख्याय निवृत्ते चकारे सा सहायता प्रकरणाच्छेनैव विज्ञायते। तस्माच्चकारश्छस्य वाचको न भवतीति नासौ तादृशः।

तत्कृतयोस्तस्यानन्तर्य `निमित्तयोः' इत्यादि। द्वे हि निमित्ते-- खञणौ, निमित्तनावपि द्वावेवादेशौ, ततः समानत्वद्यथासंख्येनात्र भवितव्यमिति मन्यमानस् प्रश्नः। `योगविभागः इत्यादि' परिहारः।

`युष्मदीयः, अस्मदीयः' इति। यदि `तस्मिन्नणि च' इति नोच्येत तो यथा पूर्वसूत्रविहितयोः खञणोरिमावादेशौ भवतस्तथा च्छेऽपि स्याताम्। तस्मिंस्तु सति न भवतः।।

3.तवकममकावेकवचने। (4.3.3)

पूर्वेण युष्माकास्माकयोः प्राप्तयोः `प्रत्ययोत्तरपदयोश्च' (7.2.98) इति त्वमयोरेकवचनेतवकममकावादेशौ विधीयेते। `एकवचनपरयोः' इति। एकवचनं परं याभ्यां ते तथोक्ते। `निमित्तयोस्तु' इत्यादि। यथा पूर्व एव सूत्रे योगविभागान्निमित्तयोरादेशौ प्रति यथासंख्यत्वं न भवति, तथेहापि न भविष्यति। तस्य च यथासंख्याभावस्य पूर्वसूत्र एव योगविभागो हेतुः। तेन हि पूर्वत्र निमित्ते निवृत्ते यथासंख्ये कृते तस्मादिहाप्यनुवर्त्तते। ते निवृत्ते यथासंख्ये एवानुवर्त्तेते; अजहद्धर्मत्वादधिकाराणाम्। तस्मादिहापि पूर्वकयोगविभागाद्यवासंख्यभावः।

इह सर्वविधिभ्यो लुग्विधिर्वलवानित्येकवचनस्य लुकि कृते युष्मदस्मदोरेकवचनपरता न सम्भवतीति प्रत्ययलोपलक्षणेन समर्थयितव्या। तदपि प्रत्ययलोपलक्षमं प्रतिषेधलक्षणं प्रतिषेधयितुमाह-- `ननु च' इत्यादि। `वचनात्' इत्यादि परिहारः। यदि हि प्रत्ययलोपलक्षणं न स्यादिदं वचनमपार्थकं स्यादित्यभिप्रायः। ननु च यस्यैवक वचनपरता सम्भवति तस्य विशेषणार्थमेकवचनं स्यात्, कस्यैकवचनपरता सम्भवति ? निमित्तस्य खञादेः। निमित्ते त्वेकवचनपरत्वेन विशेष्यमाणे सतीहैव स्याताम्-- यौष्माकः पुत्रः, आस्माकः पुत्रः; अत्र ह्येकवचनपरत्वम्, तद्धि तस्योपपद्यते; इह च न स्याताम्-- तावकाः पुत्राः, मामकाः पुत्रा इति। न ह्यत्र निमित्तस्यैकवचनपरता सम्भवतीति ? नैतदस्ति; युष्मदस्मदी पूर्वसूत्रे विशेषे अभूताम्। तथा हि-- खञ्यणि च परतो युष्मदस्मदोरिति खञण्परता तयोः, अत एव युष्मदस्मदी विशेष्येते। तदिहापि तथाभूते एवानुवर्त्तेते; अजहद्धर्मत्वादधिकाराणामिति तयोरेवैकवचनपरत्वं विशेषणं युक्तम्। अथ वा तवकममकयोर्विधेयत्वेन प्राधान्यात् तयोरेवैतद्विशेषणं युक्तम्। तयोरेव तद्विशेषणं भवत् स्थानिद्वारकमेव भवति। यदि स्थानिनोरेकवचनपरता, एवमादेशौ स्थानिवत्त्वादेकवचनपरौ भवतः। तदनेनापि प्रकारेण युष्मदस्मदोरेकवचनविशेषणं युक्तम्। न तु कथञ्चिन्निमित्तस्य खञादेः।

`अथ वा' इत्यादि। पुर्व पारिभाषिकमेकवचनमाश्रित्य व्याख्यातम्, इदानीं त्वर्तमाश्रित्य व्याचष्टे-- एकोऽर्थ उच्यते येन तदेकवचनम्। अत्र तु व्याख्याने `एकवचने' इति नेदं सप्तम्येकवचनम्। किं तर्हि ? प्रथमाद्विवचनान्तम्।।

4. अर्धाद्यत् । (4.3.4)

5. परावराधमोत्तमपूर्वाच्च। (4.3.5)

`ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' (व्या.प.89) इतितदन्तविधिप्रतिषेधात् पूर्वेणाप्राप्तावयमारम्भः। तत्राधमोत्तमशब्दौ निन्दाप्रशंसावचनौ, तत्पूर्वादणि प्राप्ते सत्यमारम्भः। परावरशब्दौ यावदिक्छब्दौ तत्पूर्वादप्यण्येव। यौ तु दिक्छब्दौ तत्पूर्वादुत्तरसूत्रेण ठञि यति च। कथं पुनः `परावराधमोत्तमेभ्यः' इत्युच्यमाने परावरादिपूर्वता शक्या विज्ञातुम् ? इत्याह-- `अर्धादिति वर्त्तते' इत्यादि। इह हि पूर्वसूत्रादर्धादित्यनुवर्त्तते। तत्र परावराधमोत्तमेभ्यः परो योऽर्धशब्दः-- इत्येवं विशेषमाणेऽर्द्धशब्दसामर्थ्यादेव तस्य परावरादिपूर्वता विज्ञास्यते, तत्किं पूर्वग्रहणेन ? `तत्र' इति। परावरयोरदिक्शब्दयोः। `परेण' इति। उत्तरसूत्रेण ठञ्यतौ स्यातामिति। यदि पूर्वग्रहणं न क्रियेतेत्यभिप्रायः। `अस्मात्' इत्यादि। परावरादिपूर्वादेव यथा स्यादित्येतदेव हि पूर्वग्रहणस्य प्रयोजनम्। तेन हि पूर्व कार्यं भवति, न परमित्येषोऽर्थः सूच्यते। तस्मात् दिक्शब्दपक्षेऽपि परावरपूर्वाद्यदेव भवति।।

6. दिक्पूर्वपदाट्ठञ्च। (4.3.6)

`पौर्वार्द्धिकम्' इति। पूर्वस्मिन्नर्थे जातः। ` तद्धितार्थ' (2.1.51) इत्यादिना समासः,ततस्तद्धितः। अथ पदग्रहणं किमर्थम्, दिक्पूर्वादित्येवोच्येत ? इत्याह-- `पदग्रहणम्' इत्यादि। असति हि पदग्रहणे स्वरूपविधिः स्यात्, ततश्च दिगर्द्धे जात इत्यत्रैव स्यात्। पदग्रहणे तु सति यन्नाम किञ्चिद्दिक्सम्बन्धिः पूर्वपदं तस्य ग्रहणमुपपन्नं भवति।।

7.ग्रामजनपदैकदेशादञ्ठञौ। (4.3.7)

`यतोऽपवादौ' इति। पूर्वेण प्राप्तस्य। `पौर्वार्धाः' इति।पूर्ववत्समासः। नन्वत्र पूर्वस्मिन्नर्द्धे ग्रामस्येति ग्राममपेक्षमाणस्यार्धशब्दस्यासामर्थ्यात् समासो

नोपपद्यते ? नैष दोषः; प्रधानमात्रार्द्धं भवति। प्रधानस्य सापेक्षस्यापि समासः-- इत्येतत् `उपमितं व्याघ्रादिभिः सामान्यप्रयोगे' (2.1.56) इत्यत्र ज्ञापितम्।।

8. मध्यान्मः। (4.3.8)
मध्यशब्दो यो गहादिषु पृथिवीमध्यवचनः `मध्यमध्यमञ्चाण् चरणे' (ग.सू,.99) इति पठ्यते, ततस्तु तत एव विधिर्भवति। यस्त्वन्यस्तस्येह ग्रहणं वेदितव्यम्।।

9. अ साम्प्रतिके। (4.3.9)
न्याय्यं युक्तमित्यादिभिः पर्यायैः साम्प्रतिकशब्दार्थमाचष्टे--`{साम्प्रतिकम्--न्याय्यम्, युक्तम्, उचितम्, सममुच्यते--काशिका,पदमञ्जरी च} साम्प्रतिकं न्याय्यमुच्यते' (इति)। तथा हि प्रयोगो दृश्यते न बाह्यं प्राप्तमित्येवं वर्त्तितव्यमसाम्प्रतमिति। अत्र न्याय्यः प्रतिषेधः प्रतीयते। साम्प्रतमेव साम्प्रतिकम्। विनयादेराकृतिगणत्वात् `विनयादिभ्यश्च' (5.4.34) इति ठक्।।

10. द्वीपादनुसमुद्रं यञ्। (4.3.10)
`अनुसमुद्रम्' इति। समुद्रं समयाऽनुसमुद्रम्। `अनुर्यत्समया' (2.1.15) इत्यव्ययीभावः। `अणो मनुष्यवुञश्चापवादः' इति। `कच्छादिभ्यश्च' (4.2.133) इति प्राप्तस्याणः। `मनुष्यतत्स्थयोर्वुञ्' (4.2.134) इति प्राप्तस्य वुञः।।

11. कालाट्ठञ्। (4.3.11)
`कालविशेषवाचिनः' इति। अनेन कालादित्यर्थग्रहणम्, न स्वरूपस्येति। यदि हि स्वरूपगर्हणं स्यात्, सन्धिवेलादि (4.3.16) सूत्रेणाणो विधानमनर्थकं स्यात्; `प्राग्दीव्यतोऽण्' (4.1.83) इत्यनेनैव सिद्धत्वात्। इह त्वर्थग्रहणे ठञ्बाधनार्थत्वात् तस्यानर्थक्यं भवति। तस्मादर्थग्रहणमेतत्।
इह केचिच्छब्दा मुख्यया वृत्त्या काले वर्त्तन्ते-- मासोऽर्धमास इति,केचिद्गौण्या वृत्त्या-- कदम्बपुष्पसाहचर्यात् कालः कदम्बपुष्पः,व्रीहिपलालेन साहचर्यात् कालो व्रीहिपलाल इति; तेषामिहोभयेषामपि ग्रहणम्। अत एवाह-- `यथा कथञ्चित्' इति. येन केनचित्प्रकारेणेत्यर्थः। `गुणवृत्त्याऽपि' इति। अनेन यथाकथञ्चिदित्यस्यार्थं विस्पष्टीकरोति। औपचारिकी, वृत्तिः, अप्रधानभूता वृत्तिरित्यर्थः। अपिशब्दान्मुख्यायपि वृत्त्या। ननु च मुख्ये सति गौणस्य ग्रहणमयुक्तम्, गौणमुख्ययोर्मुख्ये, कार्यसम्प्रत्ययात् (व्या.प.4) ? नैष दोषः; आचार्यप्रवृत्तिर्ज्ञापयति-- गौणस्यापि कालस्य ग्रहणमिति, यदयं सन्धिवेलादिसूत्रे (4.3.16) प्रकृतेन कालग्रहणेन नक्षत्राणि विशिनष्टि। न हि मुख्यार्थः कालो नक्षत्राणां विशेषणमुपपद्यते। तेषु मुख्यस्य कालत्वस्यासम्भवात्।।

12. श्राद्धे शरदः। (4.3.12)
`ऋत्वणोऽपवादः'इति। सन्धिवेलादिसूत्रेण (4.3.16) प्राप्तस्य। `{श्राद्ध इति न कर्म गृह्यते' इत्येव मूलपाठो दृश्यते।`श्राद्ध इति कर्म गृह्यते--पदमञ्जरी।} श्राद्धं इति न कर्म गृह्यते' इति। क्रियाविशेषः कश्चित् शास्त्रोक्तेन विधिना साध्यः श्राद्धग्रहणेन गृह्यते, न तु श्रद्धावान् पुरुषः। कुत एतत् ? तस्य प्रत्ययेनानाभिधानात्। शारदिकशब्देन ह्यभिधानशक्तिस्वाभाव्यात् कर्मण एवाभिधानम्, न पुरुषस्य।।

13. विभाषा रोगातपयोः। (4.3.13)

14. निशाप्रदोषाभ्याञ्च। (4.3.14)

15. श्वसस्तुट् च। (4.3.15)
तस्य {तस्य चेति इति मूलपाठः;पदमञ्जरीश्च।} वेति। ठञः। कुत एतत् ? तस्य विधीयमानतया प्राधान्यात्, प्रधाने च कार्यसम्प्रत्ययात्। स च तुडागम इकादेशे कृते भवतीति वेदितव्यम्। ननु सन्नियोगशिष्टत्वात् तुटस्तेनैव तावद्भवितव्यम्, पश्चादङ्गसंज्ञायामभिनिर्वृत्तायामिकादेशेन ? नैतदस्ति; उपेदशावस्थायामेव हीकादेशे कृते न भवितव्यम्, ज्ञापकात्। यदयं `वुञ्छण्कठच्' (4.2.80) इति प्रत्ययस्वरार्थमनुबन्धं चकारं करोति। प्रत्ययसंज्ञायाः सन्नियोगाद्धि प्रत्ययस्वरे कृते पश्चादिकादेश इति सिद्धमन्तोदात्तत्वम्, किञ्चित्करणेन ? तस्माच्चित्करणाद्विज्ञायते-- सन्नियोगशिष्टेभ्योऽपि पूर्वमिकादेशो भवति। तेन ठग्ग्रहणान्यङ्गसंज्ञाभूतानीकमेव बोधयन्तीति तुडपि तस्यैव भविष्यतीति विज्ञायते। `एताभ्याम्' इत्यादि। श्वःशब्दोऽयमव्ययं कालवाची। तेन यदा ठञ्त्यपौ न भवतः,तदा `सायञ्चिरम्'(4.3.23) इत्यादिना ट्युट्युलौ अपि भवतः।।

16.सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्। (4.3.16)

`ठञोऽपवाद-ट इति। `कालाट्ठञ्' (4.3.11) इति प्राप्तस्य। अथाण्ग्रहणं किमर्थम्, यथाविहितमेवोच्येत,तेनैवमुच्यमाने न प्राप्नोतीत्याशङ्कनीयम्, यदि ठञ् स्यात् पुनर्वचनमनर्थकं स्यात्, तस्माद्वचनप्रामाण्याद्यो विहितो न स प्राप्नोति, ठञ्प्रत्ययेन बाधितत्वात् स एव भविष्यति, स वाच्य ? इत्यत आह-- `अण्ग्रहणम्' इत्यादि। सन्धिवेलादिषु पौर्णमासीशब्दो वृद्धः पठ्यते। स्वातिरिति नक्षत्रशब्दो वृद्धोऽस्ति। तत्र यद्यण्ग्रहणं न क्रियेत, ताभ्यां परत्वाट्ठञा छे बाधिते पुनर्वचनाच्छ एव स्यात्। तस्मात् तनपि बाधित्वा वृद्धादणेव यथा स्यादित्येवमर्थं पुनरण्ग्रहणम्। `तैषम्, पौषम्' इति। तिष्यपुष्पशब्दाभ्यां `नक्षत्रेण युक्तः कालः' (4.2.3) इत्यण्, तस्याणो `लुबविशेषे' (4.2.4) इति लुप्, ततोऽनेनाण्, तिष्यपुष्ययोर्नक्षत्राणि' (वा.808) इति यलोपः। `संवत्सरात्फलपर्वणोः'इति। संवत्सरशब्दादण्भवति फले पर्वणि चाभिधेये। सांवत्सरं फलम्, सावंत्सरं पर्व वा। सांवत्सरिकमन्यत्।।

17. प्रावृष एण्यः। (4.3.17)
अथ किमर्थं प्रत्यये मूर्धन्यः पठ्यते, न `रषाभ्याम्' (8.4.1) इत्येनैव णत्वं भविष्यति ? नैवं शक्यम्, इह हि न स्यात्-- प्रावृषेणिति पदान्तत्वात्।।

18. वर्षाभ्यष्ठक्। (4.3.18)
अथ किमर्थं ठग्विधानम्,कालात् (4.3.11) ठञैव सिद्धत्वात्,उभयत्रापि तदेव रूपमिति ? नैवम्; ठकि सति प्रत्ययस्वरेणान्तोदात्तत्वं स्यात्, ठञि तु सति `ञ्नित्यादिर्नित्यम्' (6.1.197) इत्याद्युदात्तत्वम्।।

19.छन्दसि छञ्। (4.3.19)

20.वसन्ताच्च। (4.3.20)

21. हेमन्ताच्च। (4.3.21)
`योगविभाग उत्तरार्थः' इति। `सर्वत्राण् च तर्लोपश्च' (4.3.22) इति वक्ष्यति, स हेमन्तशब्दस्यैव यथा स्यात्, वसन्तस्य मा भूत्। यदि `हेमन्तवसनताभ्याम्' इत्येकयोगः क्रियेत, ततो वसन्तस्यापि स्यात्; तस्य ह्युत्तरत्रानुवृत्तेः।।

22. सर्वत्राण् च तलोपश्च। (4.3.22)
छन्दसि पूर्वेण ठञि प्राप्ते भाषायामपि ऋत्वणि चैतदुच्यते। `सर्वत्रग्रहणम्' इत्यादिनि सर्वत्रग्रहणस्य प्रयोजनमाचष्टे। `छन्दसि भाषायाञ्च' इत्यादिना छन्दोऽधिकारनिवृत्तेः फलं दर्शयति। `ननु च' इत्यादि। अस्वरित्वादेव च्छन्दसीति नानुवर्तिष्यते, ततो नार्थश्छनदोऽधिकारनिवृत्त्यर्थेन सर्वत्रग्रहणेनेत्यभिप्रायः। `सैव' इत्यादिना यासावस्वरितत्वादननुवृत्तिः सैव सर्वत्रेत्यनेन शब्देनाख्यायते। किमर्थमित्याह-- `प्रयत्नादिक्येन' इत्यादि। प्रत्यत्नाधिक्यमेतदेव शब्देनाख्यातम्। तेन हेतुना पूर्वसूत्रेऽपि सर्वत्रशब्दस्य सम्बन्धो यथा स्यादित्येवमर्थः शब्देनाख्यायते। कस्मात् पुनः पूर्वसूत्रेऽपि सर्वत्रग्रहणस्य सम्बन्ध इष्यते ? इत्याह-- `हैमन्तिकमिति हि' इत्यादि। हिशब्दो हेतौ। आचार्या हि हैमन्तिकमिति भाषायां ठञं स्मसन्ति। स चैवं भाषायामपि सिद्ध्यति, यदि पूर्वसूत्रेऽपि सर्वत्र ग्रहणस्य सम्बन्धो भवति। तत्र हि सति पूर्वसूत्रस्यायमर्थो भवति-- हेमन्ताच्च सर्वत्र च्छन्दसि भाषायामपि ठञ् भवतीति। `कः पुनरनयोरणो विशेषः'इति। न कश्चिदिति भावः। `ऋत्वणि हि' इत्यादिना विशेषं दर्शयति। `हैमन्ती' इति। `टिड्ढाणञ्' (4.1.15) इति ङीप्। `तदेवम्' इत्यादि। यत एव पूर्वसूत्रेण ठञ् भवत्यनेनाण् तलोपसहितः,तेन त्रीणि रूपाणि भवन्ति।।

23.सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च। (4.3.23)
`कालाट्ठञ्' (4.3.11) इति ठञि प्राप्ते सायमादिभ्यः ट्युट्युलौ विधीयेते, तयोश्च तुडागमः। ठञपवादत्वाच्च् ट्युट्युलोः। ठञैव च्छस्य बाधितवादेताभ्यां पुनश्छस्य सम्प्रधारणैव नास्ति। तेन वृद्धादपि ट्युट्युलावेव भवतः-- प्राक्तनमिति। `तयोश्च' इत्यादि। यद्यनादिष्टयोस्तुट् स्यात् तदा युरूपौ प्रत्ययौ न भवत इत्यनादेशो न स्यात्। तस्मादादिष्टयोस्तयोः कृतादेशयोस्तुडागमः। एतच्च `घकालतनेषु काल नाम्नः' (6.3.17) इति निर्देशाल्लभ्यते. न ह्यनादिष्टयोस्तुड्विधानेन तनशब्द उपपद्यते। अथ प्रत्ययोष्टित्करणं किमर्थम्, न तुट एव टित्त्वेन प्रत्यययोरपि टित्त्वं विज्ञास्यत इति, यतस्तद्ग्रहणेन ग्रहणादागमानाम् ? नैतदस्ति; युक्तं यत् प्रत्ययधर्मा आगमे भवन्ति तस्य प्रत्ययभक्तत्वात्, नत्वागयधर्मा प्रत्यये। तस्माट्टित्कार्यार्थं प्रत्यययोरपि टित्त्वमासज्यते। `स्यतेरन्तकर्मणः' इति। `षोऽन्तकर्मणि' (धा.पा.1147) इत्यस्य । `प्राह्णे प्रगे इत्येकारान्तम्' इति। निपात्यत इति सम्बन्धः। ननु च `घकालतनेषु कालनाम्नः' (6.3.17) इति सप्तम्या अलुकैव सिद्धम्, तदपार्थकं निपातनम् ? यत्र तर्हि सप्तम्यर्थो नास्ति तदर्थं निपानम् --- ग्राह्णः सोढोऽस्य प्राह्णेतनः, प्रगः सोढोऽस्य प्रगेतन इति। अत्र हि `तदस्य सोढम्' (4.3.52) इति प्रथमासमर्थात्प्रत्ययविधानात्सप्तम्यर्थो नास्ति। तदभावत्सप्तम्यपि नास्त्येव।

`चिरपरुत्परारिभ्यस्त्नो वक्तव्यः' इति। व्याख्येय इत्यर्थः। व्याख्यानं तु `तद्धिताः' (4.1.76) इत्यत्रैव कृतम्। एवमुत्तरत्रापि वेदितव्यम्। चिरशब्दस्य सूत्रे चोपादानाट्ट्युलावपि भवतः।
`प्रगस्य च्छन्दसि गलोपश्च' इति।वक्तव्य इति सम्बन्धः। वक्तव्यशब्दस्य स एवार्थः। व्याख्यानात् त्विहापि `प्रत्नपूर्वविश्वेमात् थाल् च्छन्दसि' (5.3.111) इतिनिपातनमाश्रित्य कर्त्तव्यम्।

`अन्ताच्चेति वक्तव्यम्' (इति)। अन्तशब्दाड्डिमज्भवतीत्येतदर्तरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु कृतमेव। डिमचो डित्करणं पश्चादित्यस्य टिलोपार्थम्। ननु च `अव्ययानां भमात्रे टिलोपो वक्तव्यः' (वा.842) इत्यनेनैव सिद्धम् ? न सिध्यति; अनित्यत्वात् तस्य। यथा आरातीय इत्यत्र न भवति, तथेहापि न भवतीति कस्यचिद्भ्रानति स्यात्, अतस्तन्निरासार्थं डित्करणम्।।

24. विभाषा पूर्वाह्णापराह्णाभ्याम्। (4.3.24)
`{पूर्वाह्णेतनम्--काशिका} पूर्वाह्णेतनः' इति। अह्नः पूर्वो भाग इति पूर्वादिसूत्रेणै (2.2.1) कदेशिसमासः। `राजहःसखिभ्यष्टच्' (5.4.91) इति टच् समासान्तः, `अह्नोऽह्न एतेभ्यः' (5.4.88) इत्यह्नादेशः,`अह्नोऽदन्तात्' (8.4.7) इति णत्वम्। यदाऽपत्यम्यन्तात् प्रत्ययस्तदा पूर्वाह्णतन इति भवितव्यमिति; सप्तम्यभावात्। सप्तम्यभावस्तु प्रथमासमर्थात् तद्धितोत्पत्तेः।।

25.तत्र जातः। (4.3.25)
`अणादयो घादयश्च' इति। एकेनादिशब्देनाणादीनामिहोत्सर्गाणां ग्रहणम्, द्वितीयेन घादीनां शेषाधिकारविहितानाम्। स्रौघ्नः,माथुरः' इति। `प्राग्दीदीव्यतोऽण्' (4.1.83) । `औत्सः, औदपानः' इति। `उत्सादिभ्योऽञ्' (4.1.86)। `राष्ट्रियः,अवारपारीणः' इति। `राष्ट्रावारपाराद्घखौ' (4.2.93)। `शाकलिकः, मालविकः' इति। `वाहीकग्रामेभ्यश्च' (4.2.117) इति ठञ्ञिठौ। `कात्त्रेयकः, औम्भेयकः' इति। `कत्त्र्यादिभ्यो ढकञ्' (4.2.95)।।

26. प्रावृषष्ठप्। (4.3.26)
`एण्यस्यापवादः' इति। `प्रावृष एण्यः' (4.3.17) इति प्राप्तस्य।।

27. संज्ञायां शरदो वुञ्। (4.3.27)
`समुदायेन चेत्संज्ञा गम्यते' इति। अनेन समुदायोपाधित्वं संज्ञाया दर्शयति।प्रकृतिप्रत्ययसमुदायेन चेत्संज्ञा गम्यते इत्यर्थः। यद्येवम्, शारदका दर्भा इतिदर्भशब्दस्य प्रयोगो न प्राप्नोति, प्रत्ययान्तेनाभिहितत्वात् ? नैष दोषः; यथैव हि शारदकशब्दो दर्भविशेषस्य नामधेयं तथा मुद्गविशेषस्यापि। तत्रासति दर्भशब्दप्रयोगेऽनेकार्थसाधारणत्वात् कस्य नामधेयमिति सन्देहः स्यात्--- कोऽर्थः शारदकशब्दे विवक्षित इति। तस्मादसन्देहार्थो दर्भशब्दो उपादीयते। `संज्ञाधिकारम्' इत्यादि। `केचित्' इति वचनात् केचिन्नानृवर्त्तयन्तीत्युक्तं भवति।।

28. पूर्वाह्णपराह्णार्द्रामूलप्रदोषावस्कराद्वुन्।
`पूर्वाह्णकः,अपराह्णकः' इति। पूर्ववदेकदेशिसमासादिकं कार्यं विधेयम्-- `विभाषा पूर्वाह्णापराह्णाभ्याम्' (4.3.24) इति, तत्र ट्युट्युल्विधिश्च। `आर्द्रकः, मूलकः' इति। `नक्षत्रेण युक्तः कालः' (4.2.3) इत्यागतस्यार्थः `लुबविशेषे' (4.2.4) इति लुप् ततो वुन्। `निशाप्रदोषाभ्याम्'इति। ठञ्विधेः। `ठञादय एव ' आदिशब्देन ट्युट्युलादयो गृह्यन्ते।।

29. पथः पन्थ च। (4.3.29)

30. अमावास्याया वा। 94.3.30)
`एकदेशाविकृतस्य' इत्यादि। `अमावस्यदन्यतरस्याम्' (3.1.122) इत्यत्र ण्यत्यवृद्धिरेव निपात्यते। अवृद्धिस्तु वृद्धेरेकादेशभूततया विकारो भवतीत्येकदेशविवृतममावस्याशब्दस्योपपद्यते। ये तु सन्धिवेलादिषु ह्रस्वोपधमधीयते, तेषां वृद्ध्युपधस्य ग्रहणं न प्राप्नोति, न हि विकृतिः प्रकृतिं गृह्णाति। तस्माद्दीर्घ एव पाठो युक्तः।।।

31. अ च। (4.3.31)
अथ योग विभागः किमर्थः,न `अमावास्या अ च वा' इत्येवोच्येत, चकारो वुनोऽनुकर्षार्थो भविष्यति, वावचनञ्चोभयोर्विकल्पार्थम्, तेन ताभ्यां मुक्कतेऽणपि

भविष्यति ? अस्त्येतत्; किन्त्वेकयोगे सति `सिन्ध्वपकराभ्यां कन्' (4.3.32) इति कन्नेव विकल्पेन कस्यचिद्भ्रान्तिः स्यात्; अतस्तन्निवृत्त्यर्थं योगविभागे हि सति व्यवधानतया विकल्पस्य कन् नित्यो विज्ञायते।।

32. सिन्ध्वपकराभ्यां कन्। (4.3.32)
`अपकरशब्दादौत्सर्गिकेऽणि' इति। प्राप्ते विधानमिति सम्बन्धः।।

33. अणञौ च।(4.3.33)
यथासंख्यार्थो योगविभागः। यदि `सिन्ध्वपकराभ्याञ्च कन्नणञः' इत्येकयोगः क्रियेत,ततो वैषम्यादेकैकस्याः प्रकृतेः प्रत्ययास्त्रयः स्युः।।

34. श्रविष्ठाफल्गुन्यनुरादास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्। (4.3.34)
नक्षत्राणः श्रवणे प्राप्ते लुगुच्यते। ननु च `नक्षत्रेभ्यो बहुलम्' (4.3.37) इत्यनेनैव लुग्भविष्यति ? सत्यमेतत्; तस्यैवायं प्रपञ्चः। उत्तरावपि योगौ प्रपञ्चौ तस्यैव वेदितव्यौ।श्रविष्ठादयश्चैते ` नक्षत्रेण युक्तः कालः' (4.2.3) इत्यनेनानगतस्याणः `लुबविशेषे' (4.2.4) इति कृते लुबन्ता वेदितव्याः।`
स्त्रीप्रत्ययस्यापि' `लुक् तद्धितलुकि' (1.2.49) इति लुग्भवति' इति। ये स्त्रीप्रत्ययान्तास्तेषामुपसंख्यानमिति प्रतिपादनमित्यथः। तच्चोपरिष्टात् करिष्यते। चित्रायाष्टापो लुकि कृते पुनष्टाप् क्रियते।
`गौरादित्वान्ङीष्' इति। रेवतीरोहिणीत्यत्र।
`फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ' इति। स्त्रियामित्यपेक्ष्यते। तयोस्तु विधानसामर्थ्यान्न लुग्भवतिष। टस्य टकारो ङीबर्थः, अनो नकार आद्युदात्तार्थः। वक्तव्यशब्दो व्याख्येये वर्त्तते। व्याख्यानं तु कृतमेव च।
`श्रविष्ठाषाढाभ्यां छणपि वक्तव्यः' इति। अत्र स्त्रियामिति नोपपद्यते। णकारो वृद्ध्यर्थः। वक्तव्यशब्दस्य स एवार्थः। व्याख्यानमपि करिष्यते च। कृतमेव।।

35. स्थानान्तगोशालखरशालाच्च। (4.3.35)
गोशालखरशालयोर्ह्रस्वान्तयोः पाठान्नपुंसकयोर्ग्रहणं विज्ञायते। नपुंसकलिङ्गता तु `विभाषा सेनासुरा' (2.4.25) इत्यादिना। यद्यपि नपुंसकयोर्ग्रहणम्, तथापि प्रतिपदिकग्रगणे लिङ्गविशिष्टस्यापि ग्रहणं भविष्यति इति स्त्रीलिङ्गाभ्यामपि लुग्भवत्येव। उदाहरणेऽप्यौत्सर्गिस्याणौ लुक्।।

36. वत्सशालाभिजिदश्वयुक्त्शतभिषजो वा। (4.3.36)

वत्सशालशब्दो नपुंसकलिङ्गो गृह्यते। कुत एतस्?व्यप्तेर्व्यायात;नपुंसकलिङ्गस्य हि ग्रहणे लिङ्गविशिष्टपरिभाषया स्त्रीलिङ्गादपि लुग्न सिध्यति; न तु स्त्रीलिङ्गस्य ग्रहणे नपुंसकात्।
`बहुलग्रहणस्यायं प्रपञ्चः' इति। वत्सशालशब्दो यद्यपि नक्षत्रवचनो न भवति, तथापि बहुलवचनात् ततोऽपि लुग्भविष्यतीत्यभिप्रायः।।

37. नक्षत्रेभ्यो बहुलम्। (4.3.37)
`रोहिणः'इत्यादौ नक्षत्राणः पक्षे लुक्। `मृगशिराः'इति। `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः।`मार्गशीर्षः'इति। `ये च तद्धिते' (6.1.61) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वाच्छिरसः शीर्षभावः। अथ बहुलग्रहणं किमर्थम् ? नपूर्वसूत्रादेव वाग्रहणमनुवर्तिष्यते ? इदं प्रयोजनम्-- न क्वचिदन्यदेव यथा स्यात्, तेन फल्गुन्यषाढाभ्यां टानौ सिद्धौ भवतः। श्रविष्ठाषाढाभ्याञ्छणपीति।।

38. कृतलब्धक्रीतकुशलाः। (4.3.38)
`ननु च' इत्यादि। जन्मवद्वस्तु जातशब्दस्यार्थः, कृतस्यापि जन्मास्त्येव, तस्माद्यद्यत्र कृतं जातमपि तत्तत्र भवति। `यच्च क्रीतम्' इत्यादि। प्राप्तं लब्धमुच्यते। क्रीतं प्राप्तमपपि तद्भवत्येव, तस्मात् क्रीतं लब्धमपि भवति। `शब्दस्यार्थस्याभिन्नत्वात्' इति।स्वजन्मन्यनुभूतकर्त्तृभावो जातशब्दस्यार्थः। जातशब्दस्यैव विशेषोपलक्षितपरव्यापारो स्वजन्मनिष्पत्तौ कृतशब्दस्यार्थः। प्राप्तिसामान्यं लब्धशब्दस्यार्थः। प्राप्तिविशेषो यस्य मूलहेतुका प्राप्तिः। स क्रीतशब्दस्यार्थः। न च सामान्यविशेषयोरेकार्थता युक्ता। मा भूत्पर्यायप्रसङ्ग इति भिद्यते शब्दार्थः। `वस्तुमात्रेण' इति। क्रीतलब्धयोर्यदाधारभूतं वसतुमात्रं तस्याभिन्नरूपत्वात्क्रीतं लब्धं भवति। मात्रग्रहणं शब्दार्थव्यवच्छेदार्थम्। अत एवाह-- `शब्दार्थस्तु भिद्यत एव' (इति)। न हि येन रूपेण क्रीतशब्देन तत्प्रत्याय्यते तेनैव लब्धशब्देन। एवं जातकृतशब्दयोर्वस्तुत्वेनाभिन्नत्वम्। शब्दार्थद्वारेण तु भिन्नार्थत्वमेव। अन्येनैव हि रूपेण जातशब्देन तद्वस्तु प्रत्याय्यते, अन्येन कृतशब्देन।।

39. प्रायभवः। (4.3.39)

`प्रायभवग्रहणमनर्थकम्' इति। वैचित्र्यादन्यस्यार्थस्याभावादनर्थमित्युच्यते। वैचित्र्येण तु सार्थकमेव। कस्मात् पुनरर्थकमिति ? `तत्र भवेन कृतार्थत्वात्' इति। यत् `प्रायभवः'इत्यस्य साध्यम्, तस्य `तत्र भवः'(4.3.53) इत्यनेनैव साधितत्वादितिभावः। यो हि राज्ये प्रायेण भवति तत्रासौ भवत्येव। ततश्च तत्र भवे तस्यान्तर्भावात् `तत्र भवः' (4.3.53) इत्यनेनैव कृतं सम्पादनम्रिति किं प्रायभवग्रहणेन ? `अनित्यभवः' इत्यादिना परस्योत्तरमाशङ्कते।स्यादेतत्-- अनित्यभवः प्रायभवो नित्यभवस्तत्र भव इति, तस्मात् तत्र भवेन प्रायभव्सयासंग्रहान्न सिध्यति ? इत्याशङ्क्याह-- `मुक्तसंशयेन तुल्यम्' इति। मुक्तस्त्यक्तः संशयो येन तत् मुक्तसंशयम्।
न्याय्यस्तत्र भवोऽयमिति यो निश्चितस्तेन तुल्यं भवति। तथा हि-- स्रघ्ने भवो देवदत्तः स्रौघ्न इत्युच्यते, न चासौ स्रुघ्ने सदा भवति, अवश्यं हि कदाचिदुदग्देसादीनपक्रामति, अथ च तत्रभवप्रत्ययो भवति। यदि च नित्यभवस्तत्र भवः ? जिह्वामूले भवो वर्णः जिह्वामूलीय इत्यत्र `तत्र भवःर' (4.3.53) इत्यधिकारे जिह्वामूलाङ्गुलेश्छः' (4.3.क62) इति च्छो न स्यात्, न हि वर्णो नित्यं जिह्वामूले भवति। तस्मात् प्रायभव ककककककककककस्य तत्रभवान्तर्भवात् ततो न ण्यतिरिच्यित इत्नर्थकं प्रयभवग्रहणम्।।

40. उपजानूपकर्णोपनीवेष्ठक्। (4.3.40)
जानुनः समीपम्, कर्णस्य समीपम्, नाव्याः समीपमिति-- `अव्ययं विभक्ति' (2.1.6) इत्यादिनाऽव्ययीबावः। `{औपजानुकः-- काशिका'} उपजानुकः' इति। `इसुसुक्तन्तात् कः' (7.3.51)।।

41. सम्भूते। (4.3.41)
`अवक्लृप्तिः'इत्यादि। अवक्लृप्ति = सम्भावना। प्रमाणानतिरेकः = आधारप्रमाणादाधेयप्रमाणस्यानतिरिक्तता, यस्यां सत्यां स्रवमाधेयमाधारमनुप्रविशति। `स्रुध्ने सम्भवति' (इति)। यस्तु स्रुध्ने सम्भाव्यते, स्रुघ्नप्रमाणान्नातिरिच्यते, तदनुप्रवशात् स सेनादिकोऽर्थ एवमुच्यते।।

42. कोशाड्ढञ्। (4.3.42)

`कौशेयं वस्त्रम्' इति। ननु च वस्रं कौशेयं न सम्भवति, किन्तु कृमिः, ततश्च कृमावेव स्यात्, न वस्त्रे; अपि च विशेषानभिधानात् खड्गसम्बन्धिनोऽपि कोशात् प्रत्ययः प्रसज्येतेत्याह-- `रूढिरेषा' इत्यादि। रूढिशब्दो हि यथाकथञ्चिदुत्पाद्यते, न तत्रावश्यमवयवार्थोऽपेक्ष्यः, क्वचिदवयवार्थासम्भवात्। तथा हि तैलं पिबतीत्येवं तैलपायिकाशब्दो व्युत्पाद्यते, न तत्रावश्यमवयवार्थोऽपेक्ष्यः, क्वचिवयवार्थासम्भवात्। तथा हि तैलं पिबतीत्येवं तैलपायिकाशब्दो व्युत्पाद्यते, स च तैलपानक्रियारहित एव क्वचित् प्राणिविशेषे वर्त्तते। सस्माद्यद्यपि न कृमौ। अथ खड्गकोशादुत्पत्तौ को दोषः, येन ततः प्रत्ययो नेष्यते ? खड्गस्याबिधानं प्राप्नोति। स हि तत्र सम्भवतीति चेत् ? इतरस्मादपि तर्हि कोशात् प्रत्ययोत्पत्तौ च कृमेरभिधानं प्राप्नोति, स हि तत्र सम्भवति। अथ तत्रापि रूढिवशाद्वस्त्रस्याभिधानम्, न कृमेः। इतरस्मादपि तर्हि कोशादुत्पत्तौ वस्रस्याभिधानं न खड्गस्य ? एवं मनयते-- यद्यपि सम्भूताधिकारे कोशाड्ढञ् विधीयते, तथापि कौशेयशब्दान्न सम्भवोऽर्थ प्रतीयते, अपि तु विकारोऽर्थः; रूढिवशात्। कौशेयं वस्रमितिकोशविकारो वस्रमित्यर्थः। तथा च वार्त्तिककारेणोक्तम्-- `विकारे कोशाड्ढञ्, `{सम्भूतार्थानुपपत्तिः--वा.पाठः'} सम्भूतार्थानुपपत्तेः' (वा. 1,2(4.3.42) इति। विकारस्च कौशेयशब्दात् कृमिकोशस्य प्रतीयते, न खड्गकोशस्य ; रूढिवशात्। तस्माद्यस्य विकारः प्रतीयते तदभिधायिन एव कोशशब्दाद्युक्कतः प्रत्ययः नेतरस्मात्।।

43. कालात्साधुपुष्प्यत्पच्यमानेषु। (4.3.43)
कालादिति स्वर्यते, प्रकृतीरुत्तरा विशेषयितुम्। न च स्वरूपग्रहणे सत्युत्तराः प्रकृतयः शक्या विशेषयितुम्; स्वरूपस्याधारणत्वात्। तस्मादर्थग्रहणमेवैतत्। तेनकालविशेषवाचिभ्यः प्रत्ययो विज्ञायत इत्याह-- `कालविशेषवाचिब्यः' इत्यादि। `हैमनः' इति। `सर्वत्राण् च तलोपश्च' (4.3.22)। `शैशिरः' इत्यादौ सन्धिवेलादिसूत्रेण (4.3.16) ऋत्वण्।।

44. उप्ते च। (4.3.44)
`योगविभाग उत्तरार्थः' इति। उत्तरत्र वुञ् उप्त एव यथा स्यात्; साध्वादिषु मा भूत्।।

45. आश्वयुज्या वुञ्। (4.3.45)
`ठञोऽपवादः' इति। `कालाटठ्ञ्' (4.3.11) प्राप्तस्य। ननु च कालाट्ठञ् विहितः। न चाश्वयुजीशब्दः कालवाची, ततः कुतष्ठञ् ? इत्याशङ्क्य कालवाचित्वमाश्वयुजीशब्दस्य प्रतिपादयितुमाह--- `अश्विनीभ्यां युक्ता' इत्यादि।।

46. ग्रीष्मवसन्तादन्यतरस्याम्। (4.3.46)

47. देयमृमे। (4.3.47)

48. कलाप्यश्वत्थयवबुसाद्वुन्। (4.3.48)
कथं पुनः कलापादयः शब्दाः काले वर्त्तन्ते, यावता मयूरादिषु तेषां वृत्तिः प्रसिद्धेत्यत आह-- `कालाप्यादयः शब्दाः' इत्यादि। एवमेव विषयं स्पष्टीकरोति-- `यस्मिन्काले' इत्यादि। अश्वत्थशब्दोऽत्र वृक्षविशेषे रूढः। तेन सर्व एव कालः सम्बध्यत इति तद्द्वारेण कालविशेषो न संज्ञायते।
तस्मादश्वत्थफलसहचारिणि कालेऽश्वत्थशब्दो वर्त्तत इति दर्शयितुमाह-- `यस्मान्नश्वत्थाः फलन्ति' इत्यादि। अश्वत्थशब्दो यद्यपि वृक्षे वर्त्तते, तथापि फले वर्त्तते एव।।

49. ग्रीष्मावरसाद्वुञ्। (4.3.49)
`अण्ठञोरपवादः' इति। ग्रीष्मशब्दादृत्वणोरपवादः। अनरसमाशब्दात् कालाट्ठञः। अवरा चासौ समा चेत्यवरसमा।।

50. संवत्सराग्रहायणीभ्यां ठञ्च। (4.3.50)
कालाट्ठञि प्राप्ते वचनम्। तेन ठञ् न वक्तव्य इति। वुञि विकल्पिते विनापि ठञ्ग्रहणेन पक्षे यथाप्राप्तं ठञेव भवतीत्यभिप्रायः। `ठञ्ग्रहणम्' इत्यादि। तत्र यद्यत्र ठञ्ग्रहणं न क्रियेत `सन्धिवेला' (4.3.16) इत्यादिषु `संवत्सरात्फलपर्वणोः' (ग.सू.104) इति पाठात् सन्धिवेलाद्यणष्ठञपवादत्वादणत्वेन काले विवक्षिते वुञा मुक्तेऽणेव स्यात्। ठञ्ग्रहणादणमपि बाधित्वा ठञेव भवति।।

51. व्याहरति मृगः। (4.3.51)
`नैशिकः,नैशः। प्रादोषिकः, प्रादोषः' इति। निशाप्रदोषाभ्यां (4.3.14)ठञ्। तेन मुक्ते पक्ष ऋत्वणेव भवति।।

52. तदस्य सोढम्। (4.3.52)
कालादिति वर्त्तते, न च कालो जीयते, तस्मान्निसासहचरितमिहाध्ययनं गौण्या वृत्त्या निशेत्येवमादिभिरभिधीयत इति विज्ञायते। अत एवाह-- `निशासहचरितमध्ययनं निशा' इति।।

53. तत्र भवः। (4.3.53)

54. दिगादिभ्यो यत्। (4.3.54)
`अणश्छस्य चापवादःर' इति। यद्दिगादिषु वृद्धं वाप्यादि ततश्छस्यापवादः, शेषेभ्यस्त्वणः प्राग्दीव्यतीयस्य।
अथ मुखजघनयोश्च किमर्थः पाठो दिगादिषु , यावता शरीरावयवात् ताभ्यामुत्तरसूत्रेणैव (4.3.55) भविष्यति ? इत्याह-- `मुखजघनयोः' इति। सेनावयववाचिनौ हि यौ मुखजघनशब्दौ तौ शरीरवयववाचिनौ न भवतः। पाणिपादाद्यवयवस्वभावं हि शरीरम्, न चैवमात्मिका सेना; किं तर्हि ? रथादिसमुदायात्मिका।
`उदकात्संज्ञायाम्' इति। उदकशब्दात् संज्ञायां गम्यमानायां यद्भवति-- उदक्या स्त्री, रजस्वलोच्यते। न चात्र प्रकृत्यर्थः प्रत्ययार्थो वा विद्यते। सा च तयोरविद्यमानता संज्ञाग्रहणेन विज्ञायते। संज्ञायामन्यत्र-- औदको मत्स्य इति, अत्राणेव भवति।।

55. शरीरावयवाच्च। (4.3.55)
`अणोऽपवादः' इति। नाप्राप्ते तस्मिन्नस्यारम्भात्। यस्तु पादादिवृद्धस्ततः परत्वाद्यत् छं बाधते।।

56. दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्। (4.3.56)
दृतिकुक्षिभ्यां शरीरावयत्वाद्यति प्राप्ते;कुक्षिशब्दो धूमादष्वपि पठ्यते, तस्मात् `धूमादिभ्यश्च' (4.2.127) इति वुञि प्राप्ते; शेषेभ्यस्त्वणि ढञि विधीयते। अस्तिशब्दस्तिङन्तो मा विज्ञायीत्यत आह-- `अस्तिशब्दः' इत्यादि। `विभक्तिस्वरप्रतिरूपकाश्चेति निपाता भवन्ति' इति निपातसंज्ञकं तिङन्तसदृशं प्रातिपदिकमेतत्, न तिङन्तः। एतच्च तिङन्तेन समानार्थम्, यथा-- अस्तिक्षीरा ब्राह्मणीति। भिन्नार्थश्च यथा धने वर्त्तते, यथा--- अस्तिमानिति। धनवानिति गम्यते । तदिह विशेषस्यानभिधानादुभयस्यापि ग्रहणम्।।

57. ग्रीवाभ्योऽण् च। (4.3.57)
बहुवचननिर्देशाद्बहुवचनान्तात् प्रत्ययेन भवितव्यम्, अन्यथा ह्येकवचेनैव निर्देशं कुर्यादिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह-- `ग्रीवाशब्दः' इत्यादि। अर्थविशेषाद्बहुवचननिर्देशः कुतः, न तु बहुवचनान्तादेव यथा स्यादिति दर्शयति।।

58. गम्भीराञ्ञ्यः। (4.3.58)
`बहिर्देव' इत्यादि। बहुर्देवपञ्चजनेभ्यश्च ञ्यो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- चकारोऽत्र वर्त्तते, तेन बहिरादिभ्योऽपि ञ्यो भविष्यतीति।।

59. अव्ययीभावाच्च। (4.3.59)
`किं तर्हि' इत्यादि। कथं पुनरव्ययीभावादिति सामान्येनोच्यमानः प्रत्ययः परिमुखादेरेव ? इत्यत आह-- `परिमुखादीनाञ्च' इत्यादि। चशब्दो हेतौ। न ह्यन्तत् कार्यमस्ति परिमुखादिगणपाठस्य। तत्र यद्यप्येतदपि न स्यात्, विध्यर्थमेव तस्य स्यात्, तस्मात् परिमुखादेरेव भवति, न सर्वस्मादव्ययीभावात्। यद्येवम्, परिमुखादेरित्येवं वक्तव्यमित्याह-- `तेषाम्' इत्यादि। यदि हि परिमुखादेरित्युच्यते, ततोऽसत्यव्ययीभावग्रहणे तत्पुरुषेभ्योऽपि परिमुखादिभ्यः प्रत्ययः स्यात्, तस्मिंस्तु सति न भवति-- परिगतं मुखं परिमुखमिति प्रादिसमासः, तत्र भवः परिमुखः; अणेव भवति। अपि चोत्तरार्धमव्ययीभावग्रहणमवश्यमेव कर्त्तव्यम्-- `अन्तःपूर्वपदाट्ठञ्' (4.3.60) । `ग्रामात्पर्यनुपूर्वात्' (4.3.61) इत्यव्ययीभावाद्यथा स्यात्। `पारिहनव्यम्' इति। `ओर्गुणः' (6.4.146), `वान्तो यि प्रत्यये' (6.1.79) इत्यवादेशः। `औपकूलम्' इति। `अव्ययं विभक्ति' (2.1.6) इत्यादिनाऽव्ययीभावः। एष च परिमुखादिषु न पठ्यत इत्यणेव भवति। अत्र पिरमुखमिति कथमव्ययीभावः ? यावता अपपरिबहिरञ्चवः पञ्चम्या (2.1.12) समस्यन्ते, पञ्चमी च परिणा कर्मप्रवचनीयेन योगे भवति, कर्मप्रवचनीयसंज्ञा तु `अपपरी वर्दने' (1.4.88) इत्यनेन, न च परिमुखे वर्जनं गम्यते, किं तर्हि ? सर्वतोभावः ? एवं तर्हि `अव्ययम्' (2.1.6) इति योगविभागव्ययीभावो भविष्यति।
अन्ये तु येऽत्र परिहनुप्रभृतयोऽव्ययीभावाः, ते `अपपरिबहिरञ्चवः पञ्चम्या' (2.1.12) इत्यनेनैव भवन्ति। अत्र येष्वपि वर्जनं न गम्यते, ततस्तेष्वयि `अव्ययम्' (2.1.6) इति योगविभागेनैव। ये तूपसीरादय उपपूर्वाः, ते सामीप्ये `अव्ययम्' (2.1.6) इत्यादिना। `अनुगङ्गम्' इति। `यस्य चायामः' (2.1.16) इत्यव्ययभावः। अन्ये तु येऽनुसीरादयोऽनुपूर्वास्ते पश्चादर्थेऽव्ययमित्यादिना।।

60. अन्तः पूर्वपदाट्ठञ्। (4.3.60)
`अन्तःशब्दो विभक्त्यर्थे समस्यते' इति। `अव्ययं विभक्ति' (2.1.6) इत्यादिना। विभक्त्यर्थस्त्वधिकरणम्, अन्तःशब्दस्याधिकरणप्रधानत्वात्। समानशब्दाट्ठञ्वक्तव्यः' इति । वक्तव्यशब्दो व्याख्येये। तत्रेदं व्याख्यानम्-- इहान्तःपूर्वादित्येवं सिद्धे यदधिकं पदग्रहणं तदधिकमिह कार्यं भवतीत्येवमर्थं क्रियते, तेन समानशब्दादपि इञ् भवतीति। एतेन शब्दान्तरादेव।
अध्यात्मादिभ्य ऊर्ध्वन्दमादूर्ध्वदेहाल्लोकोत्तरपदाच्च ठञ् भवतीति वेदितव्यम्। `आध्यात्मिकम्' इति। `आध्यात्मिकम्' इति। आत्मन्यधि अध्यात्मम्, विभक्त्यिर्थेऽव्ययीभावः। `अनुशतिकादीनाञ्च' (7.3.20) इत्युभयपदवृद्धिः। `अध्यात्मादिराकृतिगणश्चायम्' इति। यद्येवम्, `समानशब्दाट्ठञ् वक्तव्यः' (वा.454) इत्यद्यनर्थकम्, अध्यात्मादिभ्यश्चेत्यनेनैव सिद्धत्वात् ? नानर्थक्; अस्यैव प्रपञ्चार्थत्वात्। अध्यात्मादिरेव तत् प्रपञ्च्यते। ननु चाकारान्त ऊर्ध्वशब्दः, तत् कुत इह मकारान्तत्वमायातमित्ाह-- `ऊर्ध्वशब्देन' इत्यादि।
`ऐहलौकिकः, पारलौकिकः' इति। पूर्ववदुभयपदवृद्धिः।
`मुखतीयम्, पार्श्वतीयम्' इति। `अपादाने चाहीयरुहोः' (5.4.45) इति तसिः। `आद्यादिभ्य उपसंख्यानम्' (वा.634) इत्यौपसंख्यानिको वा। `अव्ययानां भमात्रे टिलोपः' (वा.842) इत्यनेन टिलोपः।
`मण्नीयौ च प्रत्ययौ वक्तव्यौ' इति। मध्यशब्दादित्यपेक्षते।
`मध्यो मध्यं दिनण् चास्मात्' इति। मध्यशब्दो मध्यम्भावमापद्यते, दिनण् चास्मात् प्रत्ययो भवति। `स्थाम्नः' इति। स्थामशब्दान्तात् प्रातिपदिकात्। अश्वस्येव स्थाम बलमस्येति बहुव्रीहिः, पृषोदरदित्वात् सकारस्य तकारः। अश्वत्थाम्नि भव इत्यण्, तस्य लुक्।
`आजिनान्ताच्च' इति। लुगिति सम्बध्यते। `वृकाजिनः' इति। अणो लुक्।
`समानस्य' इति। आनन्तर्यलक्षणा षष्ठी। समानशब्दादनन्तरष्ठञिष्यत इत्यर्थः।
`समानस्य' इति। आनन्तर्यलक्षणा षष्ठी। समानशब्दादनन्तरष्ठञिष्यत इत्यर्थः। `अध्यात्मादिषु' इति। वैषयिकेऽधिकरणे सप्तमी। अध्यात्मादिविषये ठञिष्यत इत्यर्थः। `कुग्जनस्य परस्य च' इति। चकारादीयश्च प्रत्ययः। `ऊर्ध्वन्दमाच्च देहाच्च' इति। ऊर्ध्वशब्दात् परस्मात् दमशब्दादूर्ध्वशब्दाद्देशशब्दाच्च ठगिष्यत इत्यर्थः। `ईयः कार्योऽथ मध्यस्य' इति। अथशब्दः समुच्चये। मध्यशब्दस्यानन्तर ईयः कार्य इत्यर्थः। `मण्मीयौ प्रत्ययौ तथा' इति। मध्यशब्दादित्यपेक्ष्यते। मण्मीयौ मध्यशब्दस्यान्तरौ कर्त्तव्यौ। `अजिनात्तथा' इति। अजिनान्तात् लुग्वक्तव्य इत्यर्थः।।

61. ग्रामात्पर्यनुपूर्वात्। (4.3.61)
`पारिग्रामिकम्' इति। `{ग्रामशब्दान्तादव्ययीभावात् परि--काशिका।}' ग्रामात् परि' इति। `अपरपरिबहिरञ्चवः पञ्चम्या' (2.1.12) इत्यव्ययीभावः। `आनुग्रामिकम्'इति। अत्रापि `अनुर्यत्समया' (2.1.15)।।

62. जिह्वामूलाङ्गुलेश्छठः। (4.3.62)
`यतोऽपवादः' इति।` शरीरवयवाच्च' (4.3.55) इति प्राप्तस्य।।

63. वर्गान्ताच्च। (4.3.63)

64. अशब्दे यत्खावन्यतरस्याम्। (4.3.64)
`छे प्राप्ते' इति। पूर्वसूत्रेण।।

65. कर्णललाटात्कनलङ्कारे। (4.3.65)
कर्णिकाशब्दश्चाभरणविशेषे रूढः। रूढिशब्देषु च नावश्यमपि कर्णसम्बन्धेन भवितव्यम्।।

66. तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः। (4.3.66)
`{ तस्य व्याख्याने- इति सूत्रभागः}तस्य व्याख्यानम्' इति। व्याख्यायतेऽनेनेति व्याख्यानम्, करणे ल्युट्। चकारात् `तत्र भवे च' इति। ननु च व्याख्यानं प्रत्ययार्थः, तस्य समीपे चकारः श्रूयत इति प्रत्ययार्थमात्रस्यैव समानजातीयस्य तेनानुकर्षणं न्याय्यम्, न तु समर्थविभक्तेरपि; समानजातीयस्य तु चकारः समुच्चयं करोति, यथा-- `केदाराद्यञ्च' (4.2.40) इति; प्रत्ययसमीपवर्त्तिना चकारेण प्रत्यय एव समुच्चीयते, यथा-- `ठञ् कवचिनश्च' (4.2.41) पादानात् पूर्वस्याः समर्थविभक्तेर्निवृतौ सत्यां भवार्थेऽपि षष्टीसामर्थ्यादेव प्रत्ययो युक्तः-- तदयुक्तमुक्तम्; तत्र भवे चेति, तस्य भवे चेति वक्तुं युक्तम् ? इत्यत आङ-- `वाक्यार्थसमीपे' इत्यादि। इहेतिरकरणेन तस्य व्याख्यान इत्येषोऽर्थः प्रत्यवमृश्यते। न तु व्याख्यानप्रत्ययार्थः। तस्मादितिकरणान्ततरमुच्चारितश्चकारस्तत्प्रत्ययवमृष्टस्य वाक्यार्थस्यैव समीपे श्रूयमाणस्तुल्यजातयीमेव वाक्यार्थं समुच्चिनोति। तेन भवार्थे सप्तमीसामर्थ्यादेव एव कृतः; अन्यथा हि `तस्य व्याख्याने च' इत्येवं ब्रूयात्। कः पुनरसौ वाक्यार्थ इत्याह-- `तत्र भवे' इति।
`न तु पाटलीपुत्रशब्दो व्याख्यातव्यनाम' इति। ननु च पाटलिपुत्रः कोशलया व्याख्यायते, नियतं तेन व्याख्यातव्येन भवितव्यम्, अन्यथा तस्य व्याख्यानी सुकोशला न स्यात्। तस्य व्याख्यानस्य पाटलिपुत्रशब्दो व्याख्यातव्यनाम भवतीति भावः ? नैतदस्ति; यदीह व्याख्यातव्यमभिप्रेतम्, न तस्यैतन्नाम भवतीति भावः। किञ्चेह व्याख्यातव्यमभिप्रेतम् ? यद्व्याख्यातव्यतया लोके प्रसिद्धतरम्। कुत एतत् ? व्याख्यातव्यनामग्रहणात्। इह हि व्याख्यातव्यनामग्रहणं व्याख्यातव्यार्थं तु न कर्त्तव्यमेव;विनापि हि तेन व्याख्याव्यनाम्न एव प्रत्ययसिद्धेः। तथा हि `तस्य ' इति तस्य प्रतियोगिव्याख्यानमुपात्तम्। तच्च व्याख्यातव्यस्यैव सम्भवति, नान्यस्य। तस्माद्यद्यत्तसय् व्याख्यातव्यं सामर्थ्यात्तदेव तस्येत्यनेन षष्ठ्यन्तेनोपादीयत इति विज्ञायते। ततश्चान्तरेणापि व्याख्याव्यनामग्रहणं व्याख्यातव्यनामाभिधायिन एव प्रत्ययो भविष्यतीति किं व्याख्यातव्यनामग्रहणेन ? तत् क्रियते व्याख्यतव्यतया लोके यः प्रसिद्धस्तदभिधायिन एव प्रत्ययो यथा स्यादित्येवमर्थम्। व्याकरणादयो ग्रन्थविशेषा लोके प्रसिद्धाः, न ते पाटलिपुत्रादयः। एवमपि नामग्रहणं न कर्त्तव्यम्, वयाख्यतव्यग्रहणसामर्थ्यादेव हि व्याख्यातव्यतया प्रसिद्धतरेभ्यः प्रत्ययो लभ्यत एव ? नैतदस्ति;व्याख्याने हि प्रत्ययार्थे व्याख्यानादेव व्याख्यातव्यवाचिनः प्रत्यये सिद्धे पुनर्व्याख्यातव्यग्रहणसामर्थ्याद व्याख्यातव्यतया ये प्रसिद्धास्तेब्यः प्रत्ययो लभ्यते, न तु तत्र भवे; तत्र सामर्थ्याभावात्। भवेऽपि चार्थे तत्र व्याख्यातया प्रसिद्धतराः, तदभिधायिभ्य एव प्रत्यय इष्यत इति; न तु यतः कुतश्चित्। तस्माद्भवाधिकारे रूढ्युपसंग्रहार्थं नामग्रहणं कर्त्तव्यम्।
अथ किमर्थं भवव्याख्यानयोर्युगपदधिकारः क्रियते ? इत्याह-- `भवव्याख्यानयोः' इत्यादि। ठञादीनपवादानत्राभिधास्यामीत्येवमर्थो युगपदनयोरधिकारः। ननु किमुच्यते-- अपवादविधानार्थं इति; प्रकृतानामणादीनां प्रत्ययानामर्थनिर्देशो यथा स्यात् ? इत्यत आह-- `कृतनिर्दशौ हि तौ' इति। कृतनिर्देशौ हि तावर्थौ। एकः `तत्र भवः' इति, अपरः `तस्येदम्' इति। तस्येदंविशेषत्वाद्व्याख्यानस्य।।

67. बह्वचोऽन्तोदात्ताट्ठञ्। (4.3.67)
`षात्वणत्विकम्' इति। `नातानतिकम्' इति। उभयत्र द्वन्द्वात्प्रत्ययः। `समासस्वरेणान्तोदात्ताः प्रकृतयः'इति। `समासस्य' (6.1.223) इत्यनेन बहुवचननिर्देशश्चैवंजातीयापरप्रकृत्यपेक्षया।
द्व्यचष्ठकं वक्ष्यति-- `द्व्यजृद्ब्राह्मण' (4.3.72) इत्यादिना। `सौपम्' इति। `तैङम्' इति। सुप्तिङ्शब्दौ प्रातिपदिकस्वरेणान्तोदात्तौ। `गतिस्वरेणाद्युदात्तः'इति। `गतिरनन्तरः' (6.2.49) इत्यनेन। अन्तग्रहणं विस्पष्टार्थम्; सर्वोदात्तस्य प्रातिपदिकस्यासम्भवात्। सामर्थ्यादेव

तदन्तविधिर्भविष्यतीति, यथा-- `वर्णादनुदात्तात्तोपधात् तो नः' (4.1.39) इति। अपि चोदात्त इति वर्णग्रहणं सर्व तदन्तविधिं प्रयोजयतीति युक्त एव तदन्तविधिः।।

68. क्रतुयज्ञेभ्यश्च। (4.3.68)
`अनन्तोदात्तार्थ आरम्भः' इति। यद्येवम्, राजसूयिकम्, वाजपेयिकमित्येतदेवोपदाहरणद्वयं युक्तम्। राजसूयवाजपेयशब्दयोः कृदन्तोत्तरपदयोः प्रकृतिस्वरेण मध्योदात्तत्वादुत्तरपदं चाद्युदात्तमत्र। एकं व्याबन्तत्वात् कृत्स्वरेण, अपरं `यतोऽनाचः' (6.1.213) इति। समासे च कृते `गतिरकारकोपपदात् कृत्' (6.2.139) इति प्रकृतिभावेनाद्युदात्तमेवनावतिष्ठते; `{आग्निष्टोमिकः, नावयज्ञिकः--काशिका} आग्निष्टोमिकं नावयज्ञिकम्' इति। एतदुदादहरणद्वयमयुक्तम्, अग्निष्टोमनवयज्ञशब्दाभ्यां प्रत्ययस्वरेणान्तोदात्ताभ्यामनेनाप्राप्तेः ? न हि पूर्वेणानेन वा ठञि विशेषः। क्रतुसाहचर्यादत्रोदाहृतम्। शब्दः साहचर्याद्वर्त्तत इति विज्ञायते।।

39. अध्यायेष्वेवर्षेः। (4.3.69)

70. पौरोडाशपुरोडाशात् ष्ठन्। (4.3.70)
पुरोडाशस्येदमित्यन्तोदात्तः। तस्माद्बह्वचोऽन्तोदात्ताट्ठञि (4.3.67) प्राप्ते। पुरोडाशस्तु `लघावन्ते द्वयोश्च बह्वषो गुरुः' (फि.सू.2.42) इति मध्यादात्तः। अस्मादणि प्राप्ते ष्ठन् विधीयते। वकारो ङीषर्थः, नकार आद्युदात्तार्थः। तेषां संस्कारो मन्त्रः पौरोडाश इति। `पुरोडाशसहचरितःर' इति। सामर्थ्यात् साहचर्याद्वा पुरोडाशा येन मन्त्रण संस्क्रियन्ते पुरोडाशशब्दो वर्त्तते, न पुरोडाशेषु। कृत एतत् ? व्याख्यातव्यनामग्रहणानुवृत्तेः। न हि पुरोडाशा व्याख्यातव्यतया प्रसिद्धतराः।।

71. छन्दसो यदणौ। (4.3.71)

72. द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्। (4.3.72)
`अणोरपवादः' इति। आदिशब्देन ठञः। तत्र य ऋकारान्ता उद्गातृप्रभृतयो बह्वचोऽन्तोदात्तस्तेभ्यष्ठञोऽपवादः। ब्राह्मणप्रथमाध्वरेभ्योऽपि ठञ एव। तेऽपि बर्वचः प्रातिपदिकस्वरेणान्तोदात्ताः। नामाख्यातशब्दादपि समस्तात् तस्यैव। सोऽपि बह्वच्, समासस्वरेणान्तोदात्तश्च। परिशिष्टेभ्योऽणः। `पांशुकम्, पाञ्चहोतृकम्' इति। `इसुसुक्तान्तात् कः' (7.3.51) । पञ्चहोतृचतुर्होतृशब्दाविगन्ते `द्विगौ' (6.2.29) इतिपूर्वपदप्रकृतिस्वरेणाद्युदात्तौ। पूर्वपदं हि `न्रः संख्यायाः' (फि.सू.2.28) इत्युदात्तम्। पुरश्चरणशब्दोल्युडन्तः कृदुत्तरपदप्रकृतिस्वरेण (6.2.139) मध्योदात्तः। आख्यातशब्दः `गतिरनन्तरः' (6.2.49) इत्याद्युदात्तः।
`सङ्गातविगुहीतार्थम्' इति। तच्चैकशेषसमासाश्रयणाल्लभ्यत इति वेदितव्यम्।।

73. अणृगयनादिभ्यः। (4.3.73)
`ठञोरपवादःर' इति। आदिशब्देन ठकश्छस्य च। तत्र ये बह्वचोऽन्तोदात्तस्तेभ्यष्ठञः। विद्यान्यायशिक्षाशब्देभ्यो द्व्यज्लक्षमस्य ठकः। व्याकरणशब्दाद्वृद्धाच्छस्य। अण्ग्रहणं किमर्थम् ? न ऋययनादिभ्यो ता विहितमेवोच्येत, न चैवं सत्यपवादाः ष्ठनादयः स्युरिति सम्भाव्यते; अपवादविधानस्य हि वैयर्थ्यं स्यात्। तस्माद्वचनप्रामाण्यद्यो विहितो न च प्राप्नोत्यन्येन बाधितत्वात् स एव भविष्यति, स चाणेव ? इत्यत आह-- `अण्ग्रहणम्' इत्यादि। तत्र यद्यण्ग्रहणं न क्रियेत्, तदा यदत्र वृद्धमन्तोदात्तं ठञा बाधिते पुर्वचनाच्छ एव भविष्यति। तस्माच्छस्य बाधकसय् बाधनार्थमण्ग्रहणम्। तेन वास्तुविद्य इति सिद्धं भवति। वास्तुविद्याशब्दो वृद्धः,समासस्वेरमआन्तोदात्तश्च।
`ऋगयन' इत्यादि। ऋगयनमिति। ऋगयनशब्दो भावसाधन ऋचामयनम्,यद्यपि भावे ल्युट्, तथाप्यभदोपचारात् तद्वति ग्रन्थे व्याख्यातव्ये वर्त्तते, स च `अनो भावकर्मवचनः' (6.2.150) इत्यन्तोदात्तः। यैस्तु करणे ल्युटं कृत्वाऋगयनशब्दो व्युत्पाद्यते, तेषां स कृदुत्तरपदप्रकृतिस्वरेण मध्योदात्तो न गणे पाठं प्रयोजयति ततः `प्राग्दीव्यतोऽण्' (4.1.83) इत्येव सिद्धः। पदव्याख्यानशब्दः `मन्क्तिन्व्याक्यानशयनासनस्थानयाजकादिक्रीताः' (6.2.151) इत्यन्तोदात्तः। `{नास्ति-- काशिकायां पदमञ्जर्यां च।} मान' इति। मनोर्धातोर्यदा घञ् तदा `थाथषञ्क्ताजवित्रकाणाम्' (6.2.144) इत्यन्तोदात्तः। अथ मिनातेर्ल्युट्,तदा `अनो भावकर्मवचने' (6.2.150) इत्यन्तोदात्तः। `छन्दोभावः' इति। `गतिकारकोपपदात्' कृत्' (6.2.139) इति कृत्स्वरेणान्तोदात्तः। भाषाशब्द `गुरोश्च हलः' (3.3.103)इत्यकारप्रत्ययान्तो व्युत्पादितः। `छन्दोविचिति' इति। `मन्क्तिन्' (6.2.151) इत्यादिनान्तोदात्तः। पुनरुक्तशब्दः `थाथघन्क्ता जवित्रकाणाम्' (6.2.144) इत्यन्तोदात्तः। `{ नास्ति--काशिकायाम्' } निरुक्तः' `संज्ञायामनाचितादीनाम्' (6.2.146) इत्यन्तोदात्तः, व्याकरणशब्दो ल्युडन्तो मध्योदात्तः। निगमशब्दः `गोचरसञ्चर' (3.3.119) इत्यादिसूत्रे घप्रत्ययान्तो निपातितः प्रत्यस्वरेणान्तोदात्तः। वास्तुविद्याशब्दोऽङ्गविद्या {क्षत्त्रविद्या--काशिका पदमञ्जरी च।} क्षत्त्रियविद्येत्येते च समासस्वरेणान्तोदात्ताः। उत्पात्, `{उत्पाद --काशिका' } उदपाद--

इत्येतौ थाथादि (6.2.144) सूत्रेणान्तोदात्तौ। संवत्सर इति। `अशेः सर' (द.उ.8.50) इत्यनुवृत्तौ `वसेः संपूर्वाच्चित्' (द.उ.8.51,52) इत्येवं व्युत्पादतित्वात् संवत्सरशब्दोऽन्तोदात्तः। मृह्यतेर्धातोः क्तः, क्ते ऊरागमः, तेन `मुहूर्त' इत्यन्तोदात्तः। `निमित्त' शब्दोऽपि प्रातिपदिकस्वरेण। `उपनिषत्' इति। उपनिपूर्वात् सदेः क्विप्। कृत्स्वरेणान्तोदात्तः।।

74. तत आगतः। (4.3.74)
अथ `स्रुघ्नादगच्छन् वृक्षमूलादागतः' इति. अत्र वृक्षमूलशब्दात् प्रत्ययः कस्मान्न भवति ? इत्याह-- `मुख्यम्' इत्यादि। मुख्यं प्रधानं विवक्षितम्, तदिह परिगृह्यते; न तु नान्तरीयकप्रधानम्, न हि मुख्ये सतीतरस्याप्रधानस्य ग्रहणं युक्तम्; मुक्ये कार्यसम्प्रत्ययात्।।

75. ठगायस्थानेभ्यः। (4.3.75)

76. शुण्डिकादिभ्योऽण्। (4.3.76)
`आयस्थानठकोऽपवादः' इति। बाहुल्यादेवमुक्तम्; यस्मात् कृकणशब्दोऽत्र पठ्यते। तत्र हि `कृकणपर्णाद्भारद्वाजे' (4.2.145) इति प्राप्तस्य च्छस्यापवादः। तीर्थशब्दश्चेह धूमादिषु पठ्यते, ततः `धूमादिभ्यश्च' (4.2.127) इति प्राप्तस्य वुञोऽपवादः। अथाण्ग्रहणं किमर्थम्, न शुण्डिकादिभ्यो यथाविहितमेवोच्येत, न चैवं पठ्यमानेऽपवाद एव स्यादित्याशङ्कनीयम्; अपवादविधाने हि वचनवैयर्थ्यं स्यात्, तस्मादन्तरेणाप्यण्ग्रहणमणेव भविष्यति ? इत्यत आह-- `अण्ग्रहणम्' इत्यादि। `उदपान' शब्दोऽत्र पठ्यत आयस्थानवचनम्, उत्सादिष्वसौ पठ्यते; तत्रासत्यग्रहण आयस्थानठकं बाधित्वा `उत्सादिभ्योऽञ्' (4.1.86) इत्यञेव स्यात्। तस्मात् तस्य बाधकस्य बाधनार्थमण्ग्रहणम्। तेनोदपान इत्यत्राण्सिद्धो भवति।।

77. विद्यायोनसम्बन्धेभ्यो वुञ्। (4.3.77)

78. ऋतष्ठञ्। (4.3.78)
`तपरकरणं मुखसुखार्थम्' इति। अथ दीर्घनिवृत्त्यर्थं कस्मान्न भवति ? असम्भवात्। न हि विद्यायोनिसम्बन्धिषु किञ्चिद्ऋकारान्तं प्रातिपदिकमस्ति यन्निवृत्त्यर्थस्तकारः स्यात्।।

79. पितुर्यच्च। (4.3.79)
`पित्र्यम्' इति। `रीङ ऋतः' (7.4.27) इत रीङ, यस्यति (6.4.148) लोपः।।

80. गोत्रादङ्कवत्। (4.3.80)
यदि गोत्रादङ्कवत्प्रत्ययविधिर्भवतीत्युच्यतेऽण एवातिदेशः प्राप्नोति, न वुञः। यस्मादण्विधावेवाङ्गग्रहणमस्ति। `सङ्घाङ्कलक्षण' (4.3.127) इत्यादौ सूत्रेण वुञ्विधौ `गोत्रचरणाद्वुञ्' (4.3.126) इत्यत्र ? इत्याह-- `अङ्कग्रहणेन्' इत्यादि। यथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकग्रहणमुपधातसामान्यस्योपलक्षणम्, एवमिहाप्यङ्कग्रहणं `तस्येदम्' (4.3.120) इत्यस्य। तेनायं सूत्रार्थो भवति-- यथा `तस्येदम्' (4.3.120) इत्यत्र प्रत्ययो भवति, तथा `तत आगतः' (4.3.74)इत्यत्रापि। तेन वुञोऽप्यतिदेश उपपद्यते। नन्वेवमप्यणोऽतिदेशो न प्राप्नोति, न हि तद्विधौ गोत्रग्रहणमस्ति ? पूर्वसूत्राद्गोत्रग्रहणमनुवर्त्तत इत्यदोषः। `सङ्घाङ्कलक्षण' (4.3.127) ेइत्यादिना येन सूत्रेणाण् विहितस्तद्दर्शयति।।

81. हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः। (4.3.81)
`समादगतम्' इति। समाद्धेतोरागतमस्यार्थः। केन पुनरिह पञ्चमी ? असमादेव ज्ञापकात्। यदयं पञ्चम्यन्तात् प्रत्ययमाह ततो ज्ञायते-- हेतौ पञ्चमी भवति।।

82. मयट् च। (4.3.82)
`योगविभागो यथासंख्यानिरासार्थः' इति। ननु चान्यतरस्यांग्रहणेनौत्सर्गिकेऽभ्यनुज्ञायमाने वैषम्याद्यथासंख्यस्य प्राप्तेरेव नास्ति ? सत्यमेतत्; यस्तु रूप्यमयटोरपूर्वत्वाद्विधीयमानपेक्षया यथासंख्यत्वं मन्येत,तं प्रति योगविभागः क्रियते।।

83. प्रभवति। (4.3.83)
`{प्रथमतः--काशिका'} प्रथम उपलभ्यत इत्यर्थः' इति। प्रथम इत्यनेन प्रशब्दस्यार्थमाचष्टे। `उपलभ्यते' इत्यनेनापि भवतेः। अनेकार्थत्वाद्धातूनां

भवतिरिहोपलब्धौ भवतिरिहोपलब्धौ वर्त्तते। `हिमवतः प्रभवति' इति। `भुवः प्रभवः' (1.4.31) इति हिमवतोऽपादानसंज्ञा।।

84. विदूराञ्ञ्यः। (4.3.84)

`तत्र तु संस्क्रियते' इति। तुशब्दोऽवधारणे। संस्क्रियते एव च तत्र विदूरे नगरे, न ततः प्रभवति।

`वालवायो विदूरञ्च' इति। वालवायशब्द एव प्रत्ययमुत्पादयति, न विदूरशब्दः। प्रभवतिशब्दस्य प्रथमत उपलभ्यत इत्यर्थः। प्रभवति च वालवाये पर्वते। तस्माद्यतः प्रभवति तद्वाची वालवायशब्दः प्रकृतित्वेनाक्षिप्यते। यथा विश्रवणरवणा इत्यादेशावेव शिवादिषु पठ्येते। अपत्याधिकारात्तु येन तयोरपत्यापत्यवत्ससम्बन्धः स एव प्रकृतित्वेनाक्षिप्यते विश्रवस्शब्दः। विश्रवसोऽपत्यं वैश्रवणः, रावणः।

अथ वा प्रकृत्यन्तरमेव विदूरशब्दो वालवाये वर्त्तते। विदूरात् भवति वालवायात् पर्वतात् प्रभवतीत्यर्थः। एवं स्थिते यो ब्रूयात्-- नैव तत्र वालवाये प्रसिद्धो विदूरशब्द इति,तं प्रत्याह-- `जित्वरीवदूपाचरेत्' इति। यथा वणिज एव वासाणसी नगरीं `जित्वरी' इत्युच्चारयन्ति मङ्गलार्थम्, न लोकाः, एवं वैयाकरणा एव वालवायं विदूरमित्युच्चारयन्ति। नियतदेशपुरुषविषया अपि रूढयो भवन्तीत्येतज्जित्वरीवदित्यनेन कथयति।।

85. तद्गच्छति पथदूतयोः। (4.3.85)

पथो निष्क्रियत्वाद्गमेः कर्त्तत्वं नोपपद्यत इत्याह-- `तत्स्थेषु' इत्यादि। पुरुषवृत्तिर्गमनं पथ्युपचर्यत इति दर्शयति। `अथ वा' इत्यादि। प्राप्तावत्र गमिर्वर्त्तते। अस्ति च प्रत्यक्षगम्यैव स्रुघ्नादीनां पथोऽस्यैवानन्तर्यलक्षणा प्राप्तिः।।

86. अभिनिष्क्रमति द्वारम्। (4.3.86)

कथं पुनः करणत्वेन प्रसिद्धं द्वारं स्वातन्त्रेणैव विवक्ष्यते ?इत्याह-- `यथा' इत्यादि। यथा च्छेदनक्रियायामसिः करणत्वेन प्रसिद्धौऽपि स्वातन्त्र्येण विवक्ष्यते।ननु चेतनावतोऽभिनिष्क्रमणं भवति, चेतनावता प्रयुक्तस्य वा-- देवदत्तोऽभिनिष्क्रामतीति, न च द्वारं चेतनावता प्रयुक्तम्, तस्मान्नोपपद्यते तस्याभिनिष्क्रमणम् ? नैष दोषः; अचेतनेष्वप्यभिनिष्क्रामतीति व्यवहारो दृश्यते, तद्यथा अनेन गुहामुखेन वायुरभिनिष्क्रामतीति। निष्क्रीयत्वात् तर्हि नोपपद्यते ? तत्स्थेषु निष्क्रामत्सु द्वारमभिनिष्क्रमतीत्युपचर्यत इत्यदोषः।।

87. अधिकृत्य कृते ग्रन्थे। (4.3.87)

ननु `कृते' इति कर्मणि निष्ठा, ततश्च तयाऽभिहितत्वात् कर्मणो द्वितीया न प्राप्नोति ? इत्याह-- `अधिकृत्येत्येतपेक्षया द्वितीया' इति। ल्यबन्तेन या क्रियाऽभिधीयते तदपेक्षया द्वितीया, न च तस्या यत्कर्म तत्केनचिदभिहितम्। निष्ठया हि ग्रन्थात्मकमेव कर्माभिहितम्, न तु ल्यबन्तक्रियाया यत्कर्म सुभद्रादिकं तदपि। गिरिमित्त्रमधिकृत्य कृतो `गैरिमित्त्रः'। ययातिमधिकृत्य `यायातः' ।

`लुप्' इत्यादि। आख्यायिकायै इति तादर्थ्ये चतुर्थी। आख्यायिकार्थमाख्यायिकामभिधातुं प्रत्ययस्य लुग्भवतीत्यर्थः।।

88. शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः। (4.3.88)

`यमसभम्' इति। `सभाराजा' (2.4.23) इत्यादिना नुपंसकलिङ्गता।

यदीन्द्रजननादावेव शिशुक्रन्दादयो द्रष्टव्याः,तत्किमर्थं पृथग्ग्रहणम् ? इत्यत आह-- `प्रपञ्चार्थम्' इत्यादि। `एवञ्च सति' इत्यादि। चशब्दो हेतौ। यस्मादिन्द्रजननादेराकृतिगणस्य तदन्तर्भूतानामेव शिशुक्रन्दादीनां प्रपञ्चार्थं ग्रहणम्; तस्मादेवमर्थेऽस्मिन् स्थिते देवासुरादीनां प्रतिषेधो न वक्तव्यः, प्राप्त्यभावात्। येभ्य एव च्छप्रत्ययोऽयं दृश्यते, त एवेन्द्रजननादयः, न च देवासुरादिभ्यो दृश्यते।।

89. सोऽस्ये निवासः। (4.3.89)

90. अभिजनश्च। (4.3.90)

`तत्सम्बन्धाद्देशोऽप्यभिजन उच्यते' इति। यथा यष्टीः प्रवेदशयेति यष्टिसम्बन्धाद्यष्टिशब्दः पुरुषे वर्त्तते, तथाऽभिजनशब्दो देशे वर्त्तते। कः पुनरसौ योऽभिजनसम्बन्धादभिजन उच्यते ? इत्यत आह-- `यस्मिन्' इत्यादि। `इह देशवाचिनः' इत्यादि। कथं पुनर्मुख्येऽभिजने गौणात् प्रत्ययो भवति ? इत्याह-- `निवासप्रत्यासत्तेः' इति। निवासो (4.3.89)ऽनुकृष्यते तेनाभिजनो विशेष्यते निवासो योऽभिजन इति। तस्माद्देशवाचिन एव प्रत्ययो भवति, न बन्धुभ्यः ; तेषामनिवसत्वात्।

निवासाभिजनयोः को विशेषः ? नास्त्येव कश्चिद्विशेषः, अभिजनस्य निवासभूतत्वादिति मन्यते। `यत्र' इत्यादि। विशेषं दर्शयति।

`योगविभाग उत्तरार्थः' इति। उत्तरेषु योगेष्वभिजनप्रत्यया यथा स्युः, निवासे मा भूवन्निति।।

91. आयुधजीविभ्यश्छः पर्वते। (4.3.91)
`आयुधजीविभ्यः' इति। तादभ्य चतुर्थीति पञ्चमीं निराकरोति। यदि ह्येषां पञ्चमी स्यात्, आयुधजीविभ्य एव पर्वतेऽभिधेये छो भवतीत्येष सूत्रार्थः स्यात्, न चेष्यते; तस्मात् एवैषा चतुर्थी, न पञ्चमीति। `साङ्काश्यकाः' इति। `धन्वयोपधाद्वञ्' (4.2.121)।।

92. शण्डिकादिभ्यो ञ्यः। (4.3.92)
`अणादेरपवादः' इति। आदिशब्देन छादेः। अत्र ये शण्डिकादीन् पर्वातनाचक्षते तेषां मतेन पूर्वसूत्रेण प्राप्तस्य छस्यापवादः। ये तु जनपदशब्दाः, तेषां `अवृद्धादपि बहुवचनविषयात्' (4.2.125) इति प्राप्तस्य वुञः। शण्डिकशब्दात् `कोपधादण्' (4.2.132) इति प्राप्तस्याणः।।

93. सिन्धुतक्षसिलादिभ्योऽणञौ। (4.3.93)
`प्रभृतयः' इति। प्रभृतिशब्देन मधु, वसन्त, कम्बोज, साल्व,कश्मीर-- इत्येते गृह्यन्ते। {गन्धार इति मु.पाठः गन्धारि इति प्राचीनमुद्रित पाठः।}किष्किन्धा, `{नास्ति गण पाठे}सारदि, `{उरस काशिका}उरस्, दरत्--- इत्येतेषाम् `अवृद्धादपि' (4.2.125) इत्यादिना वुञि प्राप्ते वचनम्। तक्षशिलादिष्वपि कौमेदुर, काण्डवारण, ग्रामणी-- इत्येतेषां `वृद्धाच्छः' (4.2.114) इति छे प्राप्ते। शेषाणां `प्राग्दीव्यतोऽण्' (4.1.83) इत्यणि।।

94. तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः। (4.3.94)

95. भक्तिः। (4.3.95)
`भज्यते सेव्यत इति भक्तिः' इति। `भज सेवायाम्' (धा.पा.998) इत्येतस्मात् कर्मसाधनः क्तिन्।।

96. अचित्तादेशकालाट्ठक्। (4.3.96)
ननु च देशकालयोरचित्तयोः प्रतिषेधान्नञिवयुक्तन्यायेन (व्या.प.65) प्रकृतिचेतनैव विज्ञास्यते, तत्किमचित्तग्रहणेन ? नैतदस्ति; विना हि तेनादेशकालादिति न ज्ञायते-- किमयं प्रकृतिनिर्देशः, उत देशकालयोः प्रतिषेध इति ? तत्रानिष्टमपि विज्ञायते-- अदेशशब्दात् , कालशब्दाच्चेति। अचित्तग्रहणे तु सति तेनातिप्रसङ्गे सत्यदेशकालादिति प्रतिषेधो विज्ञायते। अस्मादेव च प्रतिषेधादचित्तादिति स्वरूपग्रहणं न भवति। स्वरूपग्रहणे हि देशकालाभ्यां प्रसङ्गो प्रतिषेधं न कुर्यात्।।

97. महाराजट्ठञ्। (4.3.97)
ननु च पूर्वसूत्रादेव ठगनुवर्तिष्यते, तेनापि हि महांराजिक इति सिध्यत्येव, तत्कथं ठञ् प्रत्ययान्तरं क्रियते ? इत्याह-- `प्रत्यययान्तरकरणम्' इत्यादि। ञित्स्वरेणाद्युदात्तत्वं यथा स्यादिति प्रत्ययान्तरकरणम्। ठकि हि सति तद्धितस्य `कितः' (6.1.165) इत्यन्तोदात्तत्वं स्यात्।।

98. वासुदेवार्जुनाभ्यां वुन्। (4.3.98)
वासुदेवशब्दाद्वृद्धाच्छस्यापवादः। अर्जुनशब्दादौत्सर्गिकस्याणः। ननु चार्जुनशब्द क्षत्त्रियाख्यः,तस्मादुत्तरसूत्रेण प्राप्तस्य वुञोऽपवादो युक्तः ? एवं मन्यते-- बहुलग्रहणं तत्र क्रियते, तेनार्जुनशब्दादनुञ्प्रत्ययस्य प्राप्तिरेव नास्ति, तस्मादस्मादणेव स्यात्, अतस्तदपवादो न्याय्यः।
`ननु च' इत्यादि चोद्यम्। स्यादेतत्--- वुञ्वुनोर्विशेषोऽस्ति, अतो वासुदेवशब्दाद्वुन् विधीयते ? इत्याह-- `न चात्र' इत्यादि। वासुदेवशब्दस्य च वुञि वुनि वा सति नास्ति कश्चिद्विशेष इति । तथा ह्युभयत्र तदेवरूपम्, स एव स्वरः। योऽपि वुञि सति पुंवद्भावप्रतिषेधः `वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' (6.3.39) इति,स वुन्यपि लभ्यत एव `न कोपधायाः' (6.3.37) इति। `संज्ञेषः' इत्यादिना, यदुक्तम्-- `ननु च वासुदेवशब्दाद्गोत्रक्षत्त्रियाख्येभ्यः' (4.3.99) इति वुञस्त्येव' इति, तन्निराकरोति। गोत्रक्षत्त्रियाख्येभ्यो वुञ् विधीयते। न च वासुदेवशब्दो गोत्राख्यं प्रातिपदिकम्, नापि क्षत्त्रियाख्यम्, तत्कुतो इत्यनेन `अल्पाच्तरम्' (2.2.34) इत्यनेन वार्जुशब्दस्य पूर्वनिपातमकुर्वतैतद्विज्ञापितम्--अभ्यर्हितं पूर्वं निपतति। तेन मातापितरौ, श्रद्धमेधे, दीक्षातपसी-- इत्यत्र शास्त्रादेवाभ्यार्हितस्य पूर्वनिपातः सिद्धो भवति। अभ्यर्हितत्वं तु वासुदेवशब्दस्य देवताविशेषत्वात्।।

99. गोत्रक्षत्त्रियाख्येभ्यो बहुलं वुञ्। (4.3.99)
`ग्लौचुकायनकः। म्लौचुकायनकः' इति। ग्लुचुकम्लुचुकशब्दाभ्यां `प्राचावृद्धात् फिन्' (4.1.160)तदन्ताद्वुञ्। आख्याग्रहणं किमर्थम् ? न गोत्रक्षत्त्रियेभ्य इत्येवोच्येत ? इत्यत आह-- `आख्याग्रहणम्' इत्यादि। यद्याख्याग्रहणं न क्रियेत, ततो येऽपि यथाकथञ्चित् क्षत्त्रिये वर्तन्ते तेभ्योऽपि स्यात्, नेष्यते; तस्मात् प्रसिद्धक्षत्त्रियपिरग्रहार्थमाख्याग्रहणं क्रियते। तेनह न भवति-- विद्वान् क्षत्त्रियो भक्तिरस्येति। न विद्वच्छब्दः क्षत्त्रियशब्द इति प्रसिद्धः। क्षत्त्रियशब्दस्य तु सामानाधिकरण्यात् क्षत्त्रिये वृत्तिर्गम्यते। `पाणिनीयः' इति। पाणिनोऽपत्यमित्यण्; `गाथिविदथ' (6.4.165) इत्यादिना प्रकृतिभावः, पाणिनो भक्तिरस्येति

`वृद्धाच्छः' (4.2.114) `पाणिनीयः'। पौरवो भक्तिरस्येति `पौरवीयः' ।।

100. जनपदिनां जनषदवत्सर्वं जनपदेन समानशब्दानां बहुवचने। (4.3.100)
`{नास्ति--काशिका}एकशब्दाः' इति। एतेन समानशब्दोऽयमेकवाचीति दर्शयति। `प्रत्ययः प्रकृतिश्च' इति। सर्वशब्देन योऽर्थ उपात्तस्तमाचष्टे। `तद्वत् अङ्गा क्षत्त्रिया भक्तिरस्य' इति। अङ्गादिभ्यः क्षत्त्रियेभ्यो बहुष्वपत्येषु `द्व्यञ्मगध' (4.1.170) इत्यादिना विहितस्याणः `तद्राजस्य' (2.4.62) इत्यादिना लुक् क्रियते। बहुवचनेऽङ्गदयो जनपदिनो जनपदेन समानशब्दा भवन्ति। अत्र जनपदवृत्तिभ्योऽङ्गादिभ्यो यथा `सोऽस्य भक्तिः' (4.3.95) इत्येतस्मिन् विषये `जनपदतदवध्योश्च' (4.2.124) इति वुञ् भवति, तथा जनपदवृत्तिभ्योऽपि --`पञ्चाला ब्राह्मणाः'इति। यदा पञ्चालनिवासिषु साहचर्यात् पञ्चालादिशब्दो वर्त्तते, तदा भवन्ति ब्राह्मणा जनपदेन बहुवचने समानशब्दाः, न तु ते जनपदिनः। तेनातिदेशाभावादणेव भवति-- `पाञ्चालः'। `सर्वग्रहणम्' इत्यादि। यदि सर्वग्रहणं न क्रियते, तदा प्रत्ययस्य विधीयमानतया प्राधान्यात् प्रधाने कार्यसम्प्रत्ययात् तस्यैवातिदेशः स्यात्, न प्रकृतेः। तस्माद्यथा प्रकृतेरप्यतिदेशो भवति तदर्थं सर्वग्रहणं क्रियते। `स च' इत्यादि। स च प्रकृत्यतिदेशः सर्वगर्हणं द्व्येकयोरेव प्रयोजयति, न बहुषु। जनपदशब्दो नात्र वृद्धः, तस्मादवृद्धो जनपदशब्दो दृश्यते। बहुवचने तु `तद्राजस्य बहुषु तेनैवास्त्रियाम्' (2.4.62) इति लुकि कृते विनाप्यतिदेशेनावृद्धः, अत एव भवतीति तत्र प्रकृत्यतिदेशोऽनर्थकः। ततो नेतदर्थं सर्वग्रहणं कर्तव्यम्। `वृद्धिनिमित्तेषु' इत्यादि। वृद्धिनिमित्तेषु वुञादिष्वादिष्टायामवृद्धायां प्रकृतौ पुनर्वृद्धिभावात्। `प्रकृतिनिर्ह्रासेकृते' इति सर्वग्रहणात्प्रकृत्यदेशेन निर्ह्रासः। निर्ह्रासोऽल्पतयाऽपक्षय इत्यर्थः। `माद्रः' इति। एताञ्च प्रकृतिमपेक्ष्य मद्र इत्येषा प्रकृतिरल्पा भवति। `वार्ज्यःर' इत्येताञ्च वृजिरिति। ननु वतेः सर्वसादृशस्यार्थत्वनाद्वतिनिर्देशेनैव प्रकृतेरतिदेशो भविष्वतीति, तत्किं सर्वग्रहणेन ? नैतदस्ति; यतैव तत्र सर्वसादृश्यार्थे वतौ न प्रत्यार्थो देवतार्थेऽतिदिश्यते, तथेहापि जनपदरूपं जनपदिनि नातिदिश्यते। कस्मात् पुनस्तत्र प्रत्ययार्थो नातिदिश्यते ? वतिना तयोर्भेदस्य प्रतिपादितत्वात्। वतिर्हि सादृश्ये रिधीयते, सादृस्यं च भेदाश्रयम्; यदि भवार्थस्यापि देवतार्थतया विपरिणामः स्यात्, तदा वतिरेव न स्यात्। तस्मादन्यस्य कार्यस्य सादृस्यं वतिराचष्टे, प्रत्ययार्थयोस्तु भेदम्, इहापि च जनपदजनपदिनोर्भेदमाचष्ट इति। असति सर्वग्रहणे जनपदरूपं जनपदरूपं जनपदिनि न लभ्यते। तस्मात् सर्वग्रहणं क्रियते।
`बहुलग्रहणम्' इत्यादि। समानशब्दताया विषयप्रदर्शनं लक्षणम्। तदर्थं बहुवचनग्रहणम्। `अन्यथा हि' इत्यादि। बहुवचनग्रहणं न क्रियेतेत्यर्थः। `तत्रैव' इति। बहुवचने। बहुवचन एव तद्राजप्रत्ययस्य लुकि कृते समानशब्दता भवति, यतश्च तत्रैवातिदेशः स्यात्। `एकवचनद्विवचनयोर्न स्यात्' इति। तत्र समानशब्दतया अभावात्। `बहुवचने तु' इत्ादि। बहुवचनग्रहणे तु सति बहुवचने ये जनपदेन समानशब्दास्तेषां यत्र वा तत्र वातिदेशे विज्ञायमाने द्व्येकयोरप्यसौ सिद्धो भवति।।

101. तेन प्रोक्तम्। (4.3.101)
`प्रकर्षेणोक्तम्' इति। प्रकर्षः = अतिशयः,तेन व्याख्यातं तदध्यापितं वा `प्रोक्तम्' इत्युच्यते। `न तु कृतम्' इति। न तु कृतमुत्पादितं प्रोषतमित्युच्यते। कस्मादित्याह-- `कृते ग्रन्थे' (4.3.116) इति गतार्थत्वात्। कथं माथुरीत्यण्, यावता वृ्धाच्छेनैव भवितव्यम् ? नैष दोषः; `कलापिनोऽण्' (4.3.108) इत्यत्राणग्रहणस्यान्येभ्यो भवतीत्येतत् प्रयोजनं वक्ष्यति, तेन माथुरशब्दादप्यण्भवति। `पाणिनीयम्' इति। पाणिशब्दात् `वृद्धाच्छः' (4.2.114) इति च्छः। `आपिशलम्,कालकृत्स्नम्' इति। आपिशलिकाशकृत्स्निशब्दाभ्यां `इञश्च' (4.2.112) इत्यण्।।

102. तित्तिरिवरतन्तुखण्डिकोखाच्छणः। (4.3.102)
`तैत्तिरीयाः' इति। छण्प्रत्ययः, तेभ्यः `तदधीते' (4.2.59) इत्यण्, तस्य `प्रोक्ताल्लुक्' (4.2.64) इति लुक्। `छन्दोब्राह्मणानि च तद्विषयाणि' (4.2.66 इति तद्विषयता।
`छन्दसि' इत्यादि। कथं पुनश्चछन्दसि लभ्यते ? न हि च्छन्दोग्रहणमस्तीत्याह-- `शौनकादिभ्यः' इत्यादि।।

103. काश्यपकौशिकाभ्यामृषिभ्यां णिनिः। (4.3.103)
`णकार उत्तरत्र वृद्ध्यर्थः' इति। उत्तरेषु योगेषु वृद्धिर्यथा स्यात्। इह हि णकारस्य प्रयोजनं नास्ति, तस्य हि वृद्धिरेव प्रयोजनम्। काश्यपकौशिकशब्दौ वृद्धिमन्तौ। `तस्यापि च' इत्यादि। ननु च च्छन्दोब्राह्मणादीनां तद्विषयता युक्ता, तत्कथं कल्पस्यापि सा भवति ? इत्याह-- `शौनकादिभ्यः' इत्यादि। स्यादेतत्-- यद्यपीदं न सिद्ध्यत्येव। न हि शौनकादिभ्यश्छन्दसि' (4.3.106) इत्यत्रानुवर्त्तते, तथापि छन्दोब्राह्मणादीनां तद्विषयतोच्यमाना कल्पस्य न सिध्यत्येव। नहि शौनकादिसूत्रा (4.3.106) नुवृत्तौ सत्यामस्य योगसय् कल्पश्छन्दोभावं ब्राह्मणभावमापद्यत इत्याह-- `छन्दोऽधिकारविहितानञ्च' इत्यादि। कथं पुनरिष्यमाणाऽपि छन्दोऽधिकारविहितानां स्वर्यते। तेन `शौनकादिभ्यश्छन्दसि' (4.3.106) इतीदम्प्रकृतयो विहिताः प्रोक्तप्रत्ययाः, तेषां सर्वेषामेव कल्पादावपि तद्विषयता भवति। अथ गुणकल्पनया कल्पादीनामपि छन्दस्त्वं विवक्ष्यते। ननुच `छन्दोब्राह्मणानि च' (4.2.66) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् तेनैव प्रागेव कल्पादेस्तद्विषयता प्रतिपादिता, तत्किमर्थं पुनरनेन प्रकारेण प्रतिपाद्यते। तत्र वा

कल्पादेस्तद्विषयताप्रतिपादनार्थश्चकारः कर्त्तव्यः, अयं वा प्रकार आश्रयितव्य इति विकल्पप्रदर्शनार्थम्।
`इदानीन्तनेन' इत्यादि। इदानीन्तनो यः काश्यपः स काश्यपगोत्रप्रभवत्वात् काश्यप इत्युच्यते, तथेदानीन्तनो यः कौशिकः स कौशिकगोत्रप्रभवत्वात् कौशिक इत्युच्यते; तत्र यदि ऋषिग्रहणं ऋषिशब्दादेव, तथा हि प्रवराध्याये ये पठ्यन्ते त ऋषय इति, इमावपि तत्र पठ्येते एव ? नैष दोषः; विशेषणोपादानसामर्थ्यादयमृषिशब्दः क्रियाशब्दो विज्ञायते-- ऋषिर्दर्शनादिति। तेन यावनन्यपुरुषसाधारणेनौपदेशिकेन दर्शनेन तद्वन्तौ काश्यपकौशिकशब्दौ तत इदं प्रत्ययविधानम्; न चेदानीन्तनौ काश्यपकौशिकशब्दावेवंविधौ, ताभ्यां छ एव भवति।।

104.कलापिवैशम्पायनान्तेवासिभ्यश्च। (4.3.104)
अभिधानेऽभियोपचारात् कलापिवैशम्पायनान्तेवास्यभिधायिनः शब्दा इह कलापिवैशम्पायनान्तेवासिशब्देन निर्दिष्टाः। अत एवाह-- `कलाप्यन्तेवासिनाम्' इति।
ननु च ये व्यवहिताः शिष्यशिष्याः, ते कलापिवैशम्पायनान्तेवासिन एव भवन्ति, तदयुक्तमुक्तम्-- कलाप्यन्तेवासिनश्चत्वारः,वैशम्पायनान्तेवासिनो नव ? इत्याह-- `प्रत्यक्षकारिणःर' इत्यादि। करोतिरत्राध्ययने वर्त्तते। यैः साक्षादधीतं ते प्रत्यक्षकारिणः। इहान्तेवासिनो गृह्यन्ते चैतावन्त एवेति। किमत्रायुक्तम् ? कुत इह साक्षात्कारिणो गृह्यन्ते, न हि व्यवहिता इत्यत्र हेतुं पृच्छति। `कलापिखाण्डायनग्रहणात्' इति। हेतुनिर्देशः। `{तथा हि--काशिका}तथा च' इत्यादि। अस्यैव विवरणम्। वैशम्पायनसय् कलाप्यन्तेवासी, तस्य येऽन्तेवासिनस्ते वैशम्पायनान्तेवासिनो भवन्त्येव। यदि तत्र ये व्यवहितास्तेऽप्यन्तेवासिनो गृह्येरन् कलापिग्रहणमनर्थकं स्यात्, `वैशम्पायनान्तेवासिभ्यः' इत्येवं ब्रूयात्। तथा वैशम्पायनान्तेवासी खाण्डायनः;तत्र यदि व्यवहिता अपिगृह्येरन्, ततो वैशम्पायनान्तेवासित्वादनेनैव सूत्रेण सिद्धे शौनकादिषु खाण्डायनशब्दस्य पाठो निष्फल एव स्यात्। तस्मादिहापि कलापिग्रहणं शौनकादिषु खाण्डायनशब्दस्य पाठ एतदुभयमपि साक्षात्कारिग्रहणस्य लिङ्गं ज्ञापकम्। `हारिद्रविणः' इत्यादि। हरिद्रुप्रभृतिभ्यः प्रोक्तार्थे णिनिः,तदन्तात् `तदधीते तद्वेद' (4.2.59) इत्यण्, तस्य `प्रोक्ताल्लुक्'
`उलपेन चतुर्थेन' इति। सहार्थे तृतीया। `कालापकम्' इति। कलापिन इदं कालापकम्, `गोत्रचरणाद् वुञ्' (4.3.126)। ननु च `धर्माम्नाययोर्वुञ्' (वा.476), न चेमे शिव्या धर्माम्नायाः,तत्कथं वुञ् ? एवं तर्ह्युपमानाद्भविष्यतीति। कालापकमिव धर्मवच्छिष्या उच्यन्ते। यथा धर्मः कलापिसम्बन्धी, तथा शिष्या इत्युच्यत उपमानार्थः। `आलम्बिर्नाम प्राचां देशः, तत्रोत्पन्नः `चरकः'। एवं `पलङ्गकमलावुभौ' । प्राचामेवत्रयः। एते प्राच्याः वैशम्पायनशिष्याः `ऋचाभारुणिताण्ड्याश्च मध्यमीयास्त्रयोऽपेर' चरकाः। मध्यदेशे भवा मध्यमीयाः। गहादिषु `मध्यमध्यमञ्चाण् चरणे' (ग.सू.99) इति पठ्यते. तस्यायमर्थः-- मध्यशब्दो मध्यमभावमापद्यते, छप्रत्ययश्च ततो भवति, चरणे तु प्रत्ययार्थेऽण् च भवतीति। तत्र यदा ऋचाभादीनां चरणत्वं न विवक्ष्यते,तदा छे कृते मध्यमीया इति भवति। चरणविवक्षायां त्वणि कृते माध्यमा इति भवति। उदक्षु भवा उदीच्याः, `द्युप्रागपाग्' (4.2.101) इत्यादिना यत्। उदीच्येषु मध्ये श्यामायनिश्चरकः।कठकलापिनावप्युदीच्येषु चरकौ, अपरस्याप्युक्तम्-- `कलापिनोऽण्' (4.3.108) इति। ननु च वैशम्पायनान्तेवासिनां कठेनैव चरक इत्येषाख्या, तत्कथं चरक इत्युच्यत ? इत्याह-- `चरक इति वैशम्पायनस्य' इत्यादि। यद्यपि तेषां चरक इत्याख्यानं न भवति, तद्गुरोस्तु वैशम्पायनस्य भवति, तत्सम्बन्धेन तच्छिष्या अपि तथोच्यन्ते।।

105. पुराणप्रोक्तेषु ब्राह्मणकल्पेषु। (4.3.105)
`भाल्लविनः'इति। भाल्लवः, शाट्यायनः,ऐतरेय-- इत्येतेभ्यः प्रोक्तार्थे णिनिः। तदन्तात् `तदधीते' (4.2.59) इत्युत्पन्नस्य `पोक्ताल्लुक्' (4.2.64) `छन्दोब्राहमणानि' (4.2.66) इत्यादिना तद्विषयता। `पैङ्गी' इति। `आरुणपराजी' इति। पिङ्गारुणपराजशब्दाभ्यां णिनिः।
`याज्ञवल्कानि' इति। `आश्मरथः' इति। याज्ञवल्क्यश्वरव्यशब्दाभ्यां गर्गादियञन्ताभ्यां `कण्वादिभ्यो गोत्रे' (4.2.59) इत्युत्पन्नस्य, `आपत्यस्य' (6.4.151) इत्यादिना यलोपः। ननु याज्ञवल्कादीन्यपि पुराणप्रोक्तान्येव ब्राह्मणानि, ब्राह्मणान्तरैः पुराणप्रोक्तेस्तुल्यत्वात् ? इत्याह-- `याज्ञवल्क्य' इत्यादि। आख्यानेषु ह्येषा वार्त्ता -- याज्ञवल्क्यादयोऽपरकालाः प्रवक्तारोऽन्येभ्यः प्रवक्तृभ्यः। तथा च वस्तुत्वमनपेक्ष्य व्यवहरति सूत्रकार इत्यदोषः। `तद्विषयता कस्मान्न भवति' (इति)। `छन्दोब्राह्मणानि' (4.2.66) इत्यादिनेति भावः। `प्रतिपदम्' इत्यादि। लक्षणप्रतिपदोक्तपरिभाषया (व्या.प.3) हि प्रतिपदं विशेषणम्। ब्राह्मणमुच्चार्य ब्राह्मणेषु यः प्रत्ययो विहितस्तस्य तद्विषयता विधीयते। तस्मात् तद्विषयतास्य न भवति। कल्पेषु तर्हि कस्मान्न भवति; यथा-- काश्यपेन प्रोक्तं कल्पमधीयते काश्यपिन इत्यत्र ? `न चायम्' इत्यादि। छन्दोऽधिकारे ये योगस्तद्विहितस्य प्रत्ययस्य तद्विषयता भवति, न चायं योगश्छन्दोऽधिकारमनुवर्त्तते;तेनैतद्विहितस्य प्रत्ययस्याध्येतृवेदितृविषयता कल्पेषु न भवति-- पैङ्गी कल्पः, आरुणपराजी कल्द इति।
पुराण इति कोऽयं शब्दः, यावता `सांयचिरम्' (4.3.23) इत्यादिना ट्युट्युलोः सन्नियोगेन तुटि कृते पुरातनमिति भवितव्यम् ? इत्यत आह-- `पुराण इति निपातनात् तुडभावः (इति)। यद्येवम्, न भवति पुरातनम् ? इत्याह-- `{न वा काशिका}न च' इत्यादि. ननु `बाधकान्यपि निपातनानि' (वी.प.वृ.109) इत्यतो भवितव्यमेव वाचकेनेति ? अवाचकान्यपि (नी.प.वृ.110)। अबाधकान्यपि भवन्ति, एतच्च `शदेरगतौ तः' (7.3.42) इत्यत्र प्रतिपादितम्।।

106. शौनकादिभ्यश्छन्दसि। (4.3.106)

`छाणोरपवादः' इति। ये वृद्धास्तेभ्यश्छस्यापवादः, शेषेभ्यस्त्वणः। `शौनकिनः। वाजसनेयिनः' इति। शौनकेन प्रोक्तं वाजसनेयेन प्रोक्तमिति णिनिः। तदन्तात् (4.2.59) इत्यण्, तस्य `प्रोक्ताल्लुक्' (4.2.64), पूर्ववत् तद्विषयता।
`केवलाद्धि' इत्यादि। तत् संहतार्थमित्यत्रायं हेतुः। यस्मात् केवलात् कठाल्लकं वक्ष्यति, तस्मात् कठशाठ इति यदत्र पठ्यते तत्संहतार्थम्।।

107. कठचरकाल्लुक्। (4.3.107)
`कठाः, चरकाः' इति। प्रोक्तप्रत्ययस्य लुकि कृते यो ह्यध्येतर्यण् भवति तस्यापि प्रोक्ताल्लुक् (4.2.64)। पूर्ववत् तद्विषयता।।

108. कलापिनोऽण्। (4.3.108)
`कालापाः'इति। पूर्ववत् प्रोक्तप्रत्ययान्तादध्येतर्युत्पन्नस्याणो लुक्, तद्विषयता च।
`अथ' इत्यादि। ननु चासत्यण्ग्रहणे यथा प्राप्ते विधीयमाने णिनेरेवापवादः स्यात् ? नैतदस्ति; एवं हि वचनमनर्थकं स्यात्। तस्माद्यो विहितो न च प्राप्नोत्यनेन कबाधितत्वात् स एव भविष्यति, स चाणेव। `एवमादि' इति। आदिशब्देन मौदाः,पैप्पलादाः, शाकलाः, जाजलाः-- इत्येतेषां ग्रहणम्। असत, त्वच्ग्रहणे सर्वमेव न सिध्येत्; `वृद्धाच्छः' (4.2.114) इति छेनाण औत्सर्गिकस्य बाधितत्वात्।।

109.छगलिनो ढिनुक्। (4.3.109)
`छागलेयिनः' इति। इहापि पूर्ववदेवाध्येतर्युत्पन्नस्याणो लुक् च तद्विषयता । एवमुत्तरयोर्योगयोर्वेदितव्यः।।

110. पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः। (4.3.110)
`यथासंख्यम्' इत्यादि। पाराशर्याद्भिक्षुसूत्रे प्रत्ययः शिलालिनो नटसूत्रे। `तद्विषयता चात्रेष्यते' इति। कथं पुनरिष्यमाणापि सा लभ्यते ? इत्याह-- `तदर्थम्' ित्यादि। ननु चानुवर्त्तमानच्छन्दोहणेनैव तद्विषयता प्राप्नोति ? न; भिक्षुवनटसूत्ियोरच्छन्दसत्वादित्याह-- `गुणकल्पनया च' इत्यादि। छन्दसस्तूपचारनिमित्तं यो धर्मः स इह गुणोऽभिप्रेतः, तद्धेतुका कल्पना। यथा छन्दो यदर्थमधीयते तथा सूत्रमपि तद्धेतुं सम्पादयति। भिक्षुनटयोरित्येवमादिकया गुणकल्पनया भिक्षुनटसूत्रयोश्छन्दस्त्वमौपचारिकम्। `पाराशरिणः' इति। पाराशर्यशबिदो गर्गादिषु वञन्तः, `आपत्यस्य च तद्धितेऽनाति' (6.4.151) इति यलोपः। `शैलालिनः' इति। `नस्तद्धिते' (6.4.144) इति टिलोपः।
`पाराशरम्' इति। `कण्वादिभ्यो गोत्रे' (4.2.111) इत्यण्। `शैलालम्' इति। औत्सर्गिकोऽण्, `नान्तस्य टिलोपे सबह्रह्मचारिपीठ' (वा.798) इत्यादिना टिलोपः।।

111. कर्मन्दकृशाश्वादिनिः। (4.3.111)

112. तेनैकदिक्। (4.3.112)
`तेन'इति। `तुल्यार्थैरतुलोपमाभ्याम्' (2.3.72) इति तृतीया। `सौदामनी' इति। `अन्' (6.4.167) इति प्रकृतिभावाट्टिलोपाद्यभावः।
ननु च तेनेति प्रकृतमेव,तत्किमर्थं पुनरिह तृतीया समर्थविभक्तिरुपादीयते ? इत्याह-- `तेनेति प्रकृते' इत्यादि। पूर्वत्र हि तेनेति छन्दोऽधिकारसम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्। तस्माच्छन्दोऽधिकारनिवृत्तयेपुनरिह तृतीया समर्थविभक्तिरुपादीयते। किमर्थः पुनश्छन्दोऽधिकारः पूर्वत्र क्रियते ? इत्याह-- `पूर्वत्र' इत्यादि। पूर्वेषु योगेषु च्छन्दोऽधिकारात् तद्विषयता साध्यते। तस्मात् तत्र च्छन्दोऽधिकारः कर्त्तव्यः। तस्मिंस्तु क्रियमाणे तन्निवृत्त्यर्थं इह च यत्न आस्थेयः छन्दस्येव प्रत्ययः स्यात्।।

113. तसिश्च। (4.3.113)

114. उरसो यच्च। (4.3.114)

115. उपज्ञाते। (4.3.115)
`अकालकम्' इति। कालपरिभाषारहितमित्यर्थः।।

116. कृते ग्रन्थे। (4.3.116)
कः पुनः कृतोपज्ञयोर्विशेषः, येनोपज्ञायत इति प्रकृते सति कृतग्रहणं क्रियते ? इत्याह-- `उत्पादितम्' इत्यादि।।

117. संज्ञायाम्। (4.3.117)

118. कुलालादिभ्यो वुञ्। (4.3.118)

119. क्षुद्राभ्रमरवटरपादपादञ्। (4.3.119)
`स्वरे विशेषः' इति। अणि हि प्रत्ययस्वरेणान्तोदात्तत्वं स्यात्। अञि तु सति ञित्स्वरेणाद्युदात्तत्वं भवति।।

120. तस्येदम्। (4.3.120)
`तस्य' इति। पुंल्लिङ्गेनायं निर्देशः, पुंस्येव स्यात्, न द्विवचनबहुवचनान्तात्; प्रत्यक्षवाचिनश्च स्यात्; नापि विशेषवाचिनः; तच्छब्दस्य परोक्षवस्तुमात्रवाचित्वात्। प्रत्ययार्थोऽपीदमित्येकवचनेन नपुंसकलिङ्गेन निर्दिष्ट इत्येकस्मिन्नर्थे स्यात्-- नपुंसक एव,नान्यत्र; परोक्षे न स्यात्; इदमः प्रत्यक्षवाचित्वात् ? इत्येतत् सर्वमाशङ्क्याह--`प्रकृतिप्रत्ययार्थयोः' इत्यादि। प्रकृतौ षष्ठ्यर्थमात्रं विवक्षितम्। प्रत्ययार्थेऽपि षष्ठ्यर्थसम्बन्धिमात्रम्, येन विना षष्ठ्यर्थो न सम्पद्यते। `यदपरम्' इत्यादिना मात्रशब्देन यद्व्यवच्छिन्नं तद्दर्शयति। आदिशब्देन सामान्यभिधायित्वं गृह्यते। अस्य तु सर्वत्र विवक्षाकारणम् `तस्यापत्यम्' (4.1.92) इत्यत्रैवक्तम्। अथेह कस्मान्न भवति-- देवदत्तस्यानन्तरम्, देवदत्तस्य समीपत्यादि ? `अनन्तरादिषु' इत्यादि। `अनभिधानात्' इति। प्रत्ययान्तेनानन्तरादीनामप्रत्यायनमित्यर्थः।
`संवहेस्तुः'इति। वहेस्त्रन्तादित्यर्थः। `सांवाहित्रम्' इति। सम्पूर्वाद्वहेस्तुरिट् च, यणादेशः। `सिद्ध एवात्राण्' इति। `प्राग्दीव्यतोऽण्' (4.1.83) इत्यनेन। यद्येवं किमर्थमुपसंख्यानम् ? इत्याह-- `इडर्थम्' इत्यादि। उपसंख्याने ह्यसतीडागमो न स्यात्, `एकाच उपदेशेऽनुदात्तात्' (7.2.10) इतीट्प्रतिषेधात्।
`अग्नीधः' इत्यादि। अग्नीध इत्येतस्माच्छरणे गृहे वाच्ये रण् वक्तव्यः, भसंज्ञा च वक्तव्या, भसंज्ञायाञ्च सत्यां पदसंज्ञाभावाज्जशत्वं न भवति।
`समिधाम्' इत्यादि। आधीयन्ते येन मन्त्रविशेषेण समिधस्तस्मिन् सनिधामाधानविशेषे समिच्छब्दात् वण्यण् प्रत्ययो वक्तव्यः = व्याख्येयः। व्याख्यानं तु -- `हविर्निवाससामिधेनीषु' (3.1.129) इत्येतन्निर्देशमाश्रित्य वक्तव्यम्। `सामिधेनी' इति। `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीष्, `हलस्तद्धितस्य' (6.4.150) इति यलोपः।।

121. रथाद्यत्। (4.3.121)
`नान्यत्र' इति। सन्नाहादौ।।

122. पत्त्रपूर्वादञ्। (4.3.122)

123. पत्त्राध्वर्युपरिषदश्च। (4.3.123)
`पत्राद्वाह्ये' (वा.474) इत्यवधारणमत्र द्रष्टव्यम्-- पत्त्राद्वाह्य एवेति। अन्यत्र कस्मान्न भवत ? अनभिधानात्। अथ किमर्थं न पूर्वेण सहैकयोग एव क्रियते-- `पत्त्रपूर्वपत्राध्वर्युपरिषदोऽञ्' इति ? नैवं शक्यम्; एवं हि पूर्वपत्त्रपूर्वात् प्रातिपदिकादन्यतोऽपि प्रसज्येत। योगविभागे पूर्वस्मिन् योगे रथादित्यनुवृत्ते रथ एव पत्त्रपूर्वग्रहणेन विशेष्यत इति न भवत्यतिप्रसङ्गः। एकयोगे तु रथाद्यनुवृत्तौ सत्यां यथा पत्त्रपूर्वतया रथो विशेष्यते, तथा पत्त्रादिभिरपि रथ एव निशेष्यते इत्यनिष्टं स्यात्। तस्माद्योगविभाग एव न्याय्यः।।

124. हलसीराट्ठक्। (4.3.124)

125. द्वन्द्वाद्वुन् वैरमैथुनिकयोः। (4.3.125)
`बाभ्रण्यशालङ्कायनिका' इति। वुन्नन्तः स्वभावादेव स्त्रियां वर्त्तत इति टाप् , `प्रत्ययस्थात्' (7.3.44) इत्यादिनेत्त्वम्।।

126. गोत्रचरणाद्वुञ्। (4.3.126)
वुनि प्रकृते वुञ्विधानं वृद्ध्यर्थम्। तच्चावृद्धा एव गोत्रचरणशब्दाः प्रयोजयन्ति, न वृद्धाः। तेषु हि वुञि वुनि वा सति न कश्चिद्विशेषः। `ग्लौचुकायनकः' इति। `प्राचामवृद्धात् फिन् बहुलम्' (4.1.160) इति फिन्, तदन्ताद्वुञ्।
`चरणात्' इत्यादि। चरणाद्धर्माम्नाययोरेवेष्यते, नान्यत्र; अनभिधानादिति।।

127. सङ्घाङ्कलक्षणेष्वञ्यञिञामण्। (4.3.127)
तेन वैषम्याद्यथासंख्यं न भवति। असति तु घोषग्रहणे, अञादयस्त्रयः सङ्घादयोऽपि तत्र इति समानाद्यथासंख्यं स्यात् ? घोषे च प्रत्ययो न स्यात्। `बैदः' इति। `अनृष' (4.1.104) इत्यादिनाञ्; तदन्तादण्। अङ्कलक्षमयोः को विशेष इति? नास्त्येव कश्चिद्विशेषः। पर्यायत्वादङ्कलक्षमयोरिति मन्यते। `लक्षणम्' इत्यादिना विशेषं दर्शयति। लक्षणं चिह्नं लक्ष्यस्यैव स्वम्, नान्यस्य; यथा विद्या बिदानाम्। बिदानामेव हि लक्षणानां सम्बन्धिनाम् नान्यस्य कस्यचित्। अङ्कस्तु गवादिस्थो न गवादीनां सम्भवति। किं तर्हि ? ततोऽन्येषाम्, गवादिस्वामिनाम्। अथ किमर्थं गित्करणं प्रत्ययस्य, यावताञन्ताद्यञन्ताः प्रकृतयो वृद्धा एव ? अत आह-- `णित्करणम्' इत्यादि। बैदी विद्येत्यत्र ङीब् यथा स्यात्। इह च बैदीविद्य इत्यत्र `वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' (6.3.39) इति पुंवद्भावप्रतिषेधो यथा स्यात्। एवमर्थं णित्करणम्,न वृद्ध्यर्थम्।।

128. शाकलाद्वा। (4.3.128)
`वुञोऽपवादः' इति। चरणलक्षमस्य शाकलशब्दस्य चरणलक्षणत्वात्। `शाकलाः' इति। शाकल्यशब्दाद्गर्गादियञन्तात् `कण्वादिभ्यो गोत्रे' (4.2.111) इति प्रोक्तार्थेऽ ण्। `आपत्यस्य च तद्धितेनाति' (6.4.151) इति यलोपः। शाकल इति स्थिते `तदधीते तद्वेद' (4.2.59) इत्यण्, तस्य प्रोक्ताल्लुक् (4.2.64)--शाकलाः, तेषां सङ्घः शाकलः, शाकलक इति वा।।

129. छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः। (4.3.129)
`वुञणोरपवादः' इति। छन्दोगादिभ्यश्चरणलणस्य वुञोऽपवादः। नटादौत्सर्गिकस्याणः।।

130. न दण्डमाणवान्तेवासिषु। (4.3.130)
`दण्डप्रधाना माणवा दण्डमाणवाः' इति। मद्यमपदलोपिसमासं दर्शयति। स पुनर्मयूख्यंसकादित्वाद्वेतिव्यः। मयूरव्यंसकादेराकृतिगणत्वात्। `वुञ्प्रत्ययो न भवति' इति। एतेन वुञोऽयं प्रतिषेध इति दर्शयति। कथं पुनर्ज्ञायते वुञोऽयं प्रतिषेध ? इत्याह-- `गोत्रग्रहणम्' इत्यादि। इह हि गोत्रग्रहणमनुवर्त्तते `गोत्रचरणाद्वुञ्' (4.3.126) इत्यतः, तेनायमर्थो भवति-- `तस्येदम्' (4.3.120) इत्येतस्मिन्नर्थे यः प्रत्ययो गोत्रात् प्राप्नोति स दण्डमाणवान्तेवासिषु न भवतीति, गोत्रे वुञेव प्राप्नोतीति, अतस्तस्यैवायं प्रतिषेधो विधीयते। गौकक्ष्यशब्दाद्गर्गादियञन्तात् `कण्वादिभ्यो गोत्रे' (4.2.111) इत्यण्, पूर्ववद्यलोपः। `दाक्षाः' इति। दाक्षिप्लाक्षिमाहकिब्यः `इञश्च' (4.2.112) इत्यण् ।।

131. रैवतिकादिभ्यश्छः। (4.3.131)
`पूर्वेण' इति। `गोत्रचरणाद्वुञ्' (4.3.126) इत्यनेन। `रैवतिकीयम्' इति। रेवत्या अपत्यमिति रैवतिकः, ततश्छः। `स्वापिशीयम्' इति। स्वापिशिशब्दादिञन्ताच्छः। अथ च्छग्रहणं किमर्थम्, नानन्तरसूत्राद्विप्रतिषेधोऽनुवर्तिष्यते, तत्र रेवतिकादिभ्यो वुञि प्रतिषिद्धे वृद्धत्वादेषां छ एव भविष्यति ? भवेत् सिद्धं यत्र च्छस्यापवादो नास्ति-- रैवतिकीय इति, ये त्वत्रेञन्ताः पठ्यन्ते--स्वापिशि, औदमेधि, औचदवापि-- इत्येवादयः तेभ्यः यावता गहादिरसौ, गहादित्वाच्छ एव भविष्यति ? न सिध्यति; गहादिपाठस्यान्यस्तद्धितार्थोऽवकाशः, इदमर्थे तु परत्वाद्वुञेव स्यात्। तस्मादिदमर्थे तु स्यादिति युक्तस्तस्येह पाठः।।

132. कौपिञ्जलहास्तिपदादण्। (4.3.132)
`गोत्राधिकारात्' इति। `गोब्रवुञोऽपवादः' इत्यत्रायं हेतुः। अत्र हि गोत्रग्रहणेऽधिक्रियमाणे कौपिञ्जलहास्तिपदशब्दाभ्यां गोत्रवाचकाभ्यामण् विधीयते, स च नाप्राप्ते गोत्रवुञीति, तेन तस्यैवापदवादो विज्ञायते। `कौपिञ्जलः' इति। कुपिञ्जलस्यापत्यमित्येतस्मादेव निपातनादण्, तदन्तात् कौपिञ्जलस्येदमिति पुनरण्। `हास्तिपदः' इति। हस्तिन इव पादावस्येति हस्तिपादस्यापत्यमित्यस्मादेव निपातनादण्, पादस्य पद्भावः, हास्तिपदस्येदमिति पुनरनेनाण्। अथाण्ग्रहणं किमर्थम्, न यथाविहितमेवोच्येत ? ननु चैवमुच्यमाने `वृद्धाच्छः' (4.2.114) स्यात् ? नैतदस्ति; यद्येताभ्यां छोऽभीष्टः स्यात्, रैवतिकादिष्वेतौ पठ्येयाताम्। रैवतिकादिभ्यस्तु पृथगुपादानाद्विज्ञायते--नैताभ्यां छो भवतीति। वुञ् तर्हि स्यात् ? नैतदस्ति; आरम्भो ह्येवमनर्थकः स्यात्, गोत्रादित्येवं वुञः सिद्धत्वात्। नानर्थकः, यत्रासौ प्रतिषिध्यते तत्रारम्भस्य सार्थकत्वात्। क्व चासौ प्रतिषिध्यते ? `न दण्डमाणवान्तवेवासिषु' (4.3.130) तस्मादण्ग्रहणं कर्त्तव्यम्।
णित्करणं कौपिञ्जली क्रियेति ङीष्यथा स्यात्। इह च कौपिञ्जली क्रियाऽस्य कौपिञ्जलीक्रिय इति `वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' (6.3.39) इति पुंवद्भावप्रतिषेधो यथा स्यात्।।

133. आथर्वणिकस्येकलोपश्च। (4.3.133)
`चरणवुञोऽपवादः' इति। आथर्वणिकस्य चरणवाचित्वात्। `आथर्वणः' इति। अथर्वणा प्रोक्तमित्यण् `अन्' (6.4.167) इति प्रकृतिभावः। आथर्वण इति

स्थितेऽव्येतरि `तदधीते तद्वेद' (4.2.54) इत्यनुवर्त्तमाने `वसन्तादिभ्यष्ठक्' (4.2.63) आथर्वणिकः।
अत एव निपातनात् `पोक्ताल्लुक्' (4.2.64) इति लुग्न भवति। `चरणाद्धर्माम्नाययोः' (वा.476) इति पूर्वोक्तमिष्टं स्मारयति।।

134. तस्य विकारः। (4.3.134)
`प्रकृतेरवस्थान्तरम्' इति। प्रकृतेः कारणस्यावस्थान्तरम् = अनयथात्वम्। `अप्राणी' इति। प्राणिनः `प्राणिरजतादिभ्यः' (4.3.154) अञं वक्ष्यति। `आद्युदात्तम्' इति। `अनुदात्तादेश्च' (4.3.140) इत्यञं वक्ष्यति। `अवृद्धम्' इति। वृद्धान्मयटं वक्ष्यति--`नित्यं वृद्धशरादिभ्यः' (4.3.144) इति, यस्य च नान्यत् प्रतिपदं विधानमिति-- गोपयसोर्यत्' (4.3.160) इत्येवमादि। ननु च `अन्' (6.4.167) इति प्रकृतिभावेन भवितव्यम्, तत्कथमाश्म इति भवति ? इत्याह-- `अश्मनो विकार इति टिलोपः' इति। टिलोपार्थमश्वमनो विकार इत्येतदुपसंख्यानं कृतम्। `नित्सरेव्आद्युदात्ता एते' इति। अश्मादयः शब्दाः। तत्राश्मभस्मशब्दौ मनिन्प्रत्ययान्तत्वान्नत्स्वरेणाद्युदात्तौ। मृत्तिकाशब्दोऽपि तिकन्प्रत्ययान्तत्वात् -- `मृदस्तिकन्' (5.4.39) इति।
अथ तस्येति वचनं किमर्थम्, यावता तस्यग्रहणं प्रकृतमेव ? इत्याह-- `{तस्यप्रकरणम्-- प्राचीन मुद्रित वा} तस्य प्रकरणम्' इत्यादि। तद्धि प्रकृतं तस्येति वचनं शैषिकैर्घादिभिः {सम्बद्ध--मु.पाठः} सम्बद्धम्। अतस्तदनुवृत्तौ तेऽप्यनुवर्त्तेरन्। अस्मिंस्तु तस्यग्रहणे क्रियमाणे पूर्वकं तस्येति वचनं निवर्त्तते। तस्मात् प्रकृतेऽपि तस्येति वचने शैषिक निवृत्त्यर्थं पुनस्तस्येत्युच्यत इति। ननु च प्रधानं घादयः, विधीयमानत्वात्; तस्येति तु वचनप्रधानम्, तदर्थत्वात्; तत्रायुक्ता गुणे निवर्त्तमाने प्रधानस्य निवृत्तिः प्रसज्येत, यथैव हि प्रकृतं तस्येति वचनं घादिभिः सम्बद्धं तथा अणादिभिरपि ? नैष दोषः, उभयेषां हि निवृत्ती निष्फलः सूत्रस्यारम्भः स्यात्। विधेयस्य कस्यचिदभावात्, तस्मान्न भवत्युभयेषां निवृत्तिः। ननु चारम्भसामर्थ्यादुभयेषामन्यतमेषां निवृत्तिरित्येतावद्विज्ञायते। तत्किं घादयो निवर्त्तन्ते ? उताणादयः ? सन्देह एव। सन्देहमात्रमेतत्, सर्वसन्देहेष्विदमुपतिष्ठते-- `व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' (व्या.प.75) इति। घादयो निवर्त्तन्त इत्येवं व्याख्यास्यामः, स्वरितत्वादणादीनामनुवृत्तिर्भविष्यति। ननु चास्वरित्वाद्घादीनामनुवृत्तिः, सैव तु तस्येति वचनेनाख्यायते शैषिकनिवृत्त्यर्थम्। `विकारावयवयोः' इत्यादिना विशेषं दर्शयति। केन पुनविकारावयवयोर्घादयः प्राप्नुवन्ति ? `तस्येदम्' (4.3.120) इत्यनेनच तस्येदंविशेषत्वात् तयोः। `हालः,सैरः' इति। यदि शैषिका अनुवर्त्तेरंस्ततो हलसीरशब्दाभ्यां `हलसीराट्ठक्' (4.3.124) इति ठक् स्यात्। तन्निवृत्तौ त्वणेव भवति।।

135. अवयवे च प्राण्योषधिवृक्षेभ्यः। (4.3.135)
`मौर्वं काण्डम्' इति। मूर्वाशब्दादवयवे प्रत्ययः। `मौर्व भस्म' इति। विकारे।
`इत उत्तरम्' इत्यादिना वक्ष्यमाणानां प्रत्ययानां विषयविभागं दर्शयति। `कथम्' इति। केन प्रकारेणायं विभागो लभ्यते। प्रत्यक्षमर्थं पृच्छति--
`द्वयमपि'इत्यादि। यतो हेतोरेष विषयविभागो लभ्यते तद्दर्शयति। ततर् फलपाकान्ता ओषधः,पुष्पवन्तः फलवन्तश्च वृक्षाः, तद्विशेषा वनस्पतयः फलवन्त एव। तत्र वनस्पतिग्रहणेन वृक्षविशेषास्ततोऽन्येन गृह्यन्ते। वृक्षग्रहणे तु वनस्पतेरपि ग्रहणं विज्ञेयम्। `विकारावयवयोः' इत्यादि। युगपदधिकारे ह्यणादीन् वक्ष्यामीत्येवमर्थो युगपदधिकारः। अणादीनामर्थनिर्देशार्थोऽपि कस्मान्न भवति ? इत्याह-- `कृतनिर्देशो हि तौ' इति। कृतनिर्देशो हि तावर्थौ `तस्येदम्' (4.3.120) इत्यनेनैव;तस्येदं विशेषत्वात् तयोः।।

136. बिल्वादिभ्योऽण्। (4.3.136)
`अञ्मयटोरपवादः' इति। यदत्रानुदात्तादि तस्मात् `अनुदात्तादेश्च' (4.3.140) इति प्राप्तस्याञोऽपवादः। यद्वृद्धं ततः `नित्यं वृद्धशरादिभ्यः' (4.3.144) इति मयटः। तत्र बिल्वशब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वे प्राप्ते `बिल्वतिष्ययोर्वान्तस्वरितत्वम्' (फि.सू.1.23) इति स्वरितत्वं भवति, उदात्तो वा। `व्रीहिमुद्ग' शब्दौ घृतादित्वादन्तोदात्तौ। `मसूरगोधूम' शब्दौ `लघावन्ते द्वयोश्च बह्वषो गुरुः' (फि.सू.2.42) इति मध्योदात्तौ। एवं `गवेधुका' शब्दोऽपि। इषेः क्सुः, `इक्षुः' । प्रत्ययस्वरेणान्तोदात्तः। `वेणुः' शब्दोऽपि `विभाषा वेण्विन्धानयोः' (6.1.215) इतिपक्षेऽन्तोदात्त एव। `कर्पासीपाटली' शब्दौ `जातेरस्त्रीविषयादयोपधात्' (4.9.63) इति ङीषन्तौ। ङीष्प्रत्ययान्तत्वान्ङीष्प्त्ययस्वरेणान्तोदात्तौ। `कर्कन्धू' शब्दः `अन्दूदृग्भूजम्बूकफेलूकर्कन्धूदिधिषूः' (द.उ.1.176) इति निपातनान्मध्योदात्तः। `कुटीर' शब्दः `लघावन्ते' (फि.सू.2.42) इत्यादिना मध्योदात्तः। सर्व एते `अनुदात्तं पदमेकवर्जम्' (6.1.158) इत्यनुदात्तादयः। तेनाञ्बाधनार्थं ग्रहणमिति। अथाण्ग्रहणं किमर्थम्, न बिल्वादिभ्यो यथाविहितमेवोच्येत ? नैवं शक्यम्; पाटलीशब्दो ह्यत्र वृद्धः पठ्यते, तस्मादञो बाधके मयटि प्राप्ते पुनर्वचनादञेव स्यात्। अण्ग्रहणात् त्वणेव भवति। तस्मादण्ग्रहणं क्रियते।।

137. कोपधाच्च। 94.3.137)
`यथायोगम्' इति। प्राण्योषधिवृक्षेभ्यो विकारावयवयोः, अन्येभ्यस्तु विकारमात्र इत्येषो यतायोगार्थः। `अञोऽपवादः' इति। `ओरञ्' (4.3.139), `अनुदात्तादेः' (4.3.140) इत्येताभ्यां प्राप्तस्य। `तित्तिडीकमाण्डूक दर्दुरूकमधूक'शब्दाः `लघावन्ते' (फि.सू.2.42) इत्यादिना मध्योदात्ताः,तेनानुदात्तादयो भवन्ति।।

138. त्रपुजतुनोः षुक्। (4.3.138)
`ओरञोऽपवादः' इति। अनुदात्तत्वात्। `अप्राण्यादि' इति। आदिशब्देनौषधित्वमवृक्षत्वं च गृह्यते।।

139. ओरञ्। (4.3.139)
`अनुदात्तादेरन्यदिहोदाहरणम्' इति। अनुदात्तादेरुत्तरसूत्रेणैव सिद्धत्वात्। `दैवदारवम्, भाद्रदारवम्' इति। देवदारुभद्रदारुशब्दौ `पीतद्रवर्थानाम्' (फि.सू.2.37) इत्याद्युदात्तौ। तस्यायमर्थः--पीतद्रुः अर्थो येषां ते पीतद्रवर्थाः, तेषां पीतद्रवर्थवचनानामादिरुदायो भवति।।

140. अनुदात्तादेश्च। 94.3.140)
`दाधित्थम्' इत्यादि। दध्नि तिष्ठतीति, कपौ तिष्ठतीति --सुपि स्थः' (3.2.4) इति कः,`अतो लोपः' (6.4.48) इत्यकारलोपः, पृषोदरादित्वात् सकारस्य तकारः,उपपदसमासः, समासस्वरेणान्तोदात्तौ। तेन दधित्थकपित्थशब्दावनुदात्तादी भवतः।।

141. पलाशादिभ्यो वा। (4.3.141)
`उभयत्रविभाषेयम्' इति। प्राप्ते चाप्राप्ते च। तामेवोभयत्रविभाषां स्पष्टीकर्त्तुमाह-- `पलाशखदिर' इत्यादि। पलाशशब्दो धृतादित्वादन्तोदात्तः,खदिरशब्दोऽपि तित्स्वरेण। `इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिसिमिहिमुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच्' (द.उ.8.26) इत्यनुवर्त्तमाने `अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः' (द.उ.8.27) इति किरच्प्रत्ययान्तो निपातितः। शिंशपाशब्दः `पान्तानां गुर्वादीनाम्' (फिट्.3.55) इति मध्योदात्तः। तस्यायमर्थः-- पाशब्दान्तानां गुर्वादीनां द्वितीयमुदात्तं भवतीति। अथख `द्वितीयं प्रागीषात्' (फि.सू.3.50) इत्यत्रानुवर्त्तते, `स्पदि किञ्चिच्चलने' (धा.पा.14) अस्मात् `अनुदात्तादेश्च हलादेः' (3.2.149) इति युच्-- स्पन्दनः, चित्स्वरेणान्तोदात्तः। `कृशृगृटिपटि{शौटिभ्यः--द.उ.}शटिभ्य ईरन्' (द.उ.8.72) करीर शब्दो नित्स्वरेणाद्युदात्तः। `कृशृगृकटिपटि{शौटिभ्यः द.उ.}शटिभ्य ईरन्' (द.उ.8.72) करीर शब्दो नित्स्वरेणाद्युदात्तः। `कृह्वभ्यामीषन्' (द.उ.9.9), `शृपृभ्यां {कित् --द.उ.}किच्च' (द.उ.9.10) इति शिरीषशब्दोऽपि नित्स्वरेणाद्युदात्तः। विकङ्गतपूलासयवासाश्च `ग्रामादीनां च' (फि.सू. 2.38) इत्याद्युदात्ताः।।

142. शम्याष्ट्लञ्। (4.3.142)
`अञोऽपवादः' इति। शमीशब्दसय् गौरादित्वान्ङीषन्तस्य प्रत्ययस्वरेणान्तोदात्तस्यानुदात्तादित्वात्। टकारो ङीबर्थः।।

143. मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः। (4.3.143)
`एतयोः' इति। `किमनेन'इत्यादि चोद्यम्। `ये विशेषप्रत्ययाः' इत्यादि परिहारः। आदिशब्देन `उष्ट्राद्वुञ्' (4.3.157) इत्येवमादयो गृह्यन्ते। यदि ह्येतयोरिति नोच्येत, ततो य इति उत्तरे विशेषाः प्रत्ययाः अञादयः तैः सह सम्प्रसारणायां परत्वात् त एव स्युः। `एतयोः' इत्युच्यमाने तु विशेषप्रत्ययेष्वपि पक्षे भवन्ति, तेन कपोतमयमित्यादि सिद्धं भवति। अथ क्रियमाणे `एतयोः'इत्येतस्मिन्, कथमवादविषये मयड् भवति ? एतयोरित्यस्य द्वितीयविधानार्थत्वान्मयट्प्रत्ययो विकारावयवयोर्भवति। एकम्-- विधानमेतयोरिति, मयड्भवतीति-- द्वितीयम्। तत्र यद्येतदद्वितीयं विधानं तदा प्रापणार्थम्। तेन यत्रापि विशेषप्रत्ययैर्बाधितो विज्ञायते। तस्माद्वाग्रहणं कर्त्तव्यम्।।

144. नित्यं वृद्धशरादिभ्यः। (4.3.14)
प्राग्दीव्यतीयाणो ह्यपवादो मयडारभ्यते, अणं तु कोपधलक्षणम्, अञमुवर्णान्तलक्षणमनुदात्तादिलक्षणं च परत्वाद्बाधते। `आरम्भसामर्थ्यादेव नित्यं भविष्यति' इति। यदि ह्यनित्यः स्यात्, अस्य सूत्रस्यारम्भोऽनर्थकः स्यात्; पाक्षिकस्य मयटः पूर्वेणैव सिद्धत्वात्। `तदनेन क्रियते' इति। यत् तदेकेषामाचार्याणामिष्टम्। तदनेन नित्यग्रहणेन सफलं क्रियत इत्यर्थः। कथं योगविभागः क्रियते ? तद्यथा द्वारं द्वारमिति शब्दाधिक्यादर्थाधिक्यं भवतीति नित्यग्रहणेनायमर्थः सूच्यते। यद्येवम्, नित्यग्रहणादेव मृच्छशब्दस्यापि नित्योऽयं मयट् सिद्धः, तदपार्थकोऽस्य शरादिषु पाठः ? नानर्थकः; नित्यग्रहणस्यैवोदाहरणप्रदर्शनार्थत्वात्।।

145. गोश्च पुरीषे। (4.3.145)
`गव्यम्' इति। गोरिदमित्यर्थविवक्षायां `सर्वत्र गोरजादिप्रसङ्गे यत्' (वा.383) इति यत्, `वान्तो यि प्रत्यये' (6.1.79) इत्यवादेशः। `पुरीषं न विकारो नाप्यवयवः'इति। प्रकृतत्वाद्गोरिति गम्यते। ततर् विकारस्तावन्न भवति ; प्रकृतेरवस्थान्तरं पुरीषम्; {गोधर्मानन्वयादोदनवस्तूपकास्य --प्रा.मु.पाठः} गोधर्मानन्वयात्। वस्तूपकारस्य समुदायस्यैकदेशो ह्यारम्भकोऽवयवो भवति, यथा--हस्तादि शरीरस्य; न चैवं गोः पुरीषम्। क्व तर्हीदं विधानमित्याह-- `तस्येदं विषये' इति। गवा भावितत्वात् पुरी स्य, तत् तस्याः कार्यमिति तस्येदनर्थो भवति। तस्मात् तत्रैवेदं मयटो विधानम्। विकारावयवयोस्तर्हि केन

भवितव्यम् ? इत्याह-- `विकारावयवोस्तु' इत्यादि।।

146. पिष्टाच्च। (4.3.146)
`अणोऽपवादः' इति। पिष्टशब्दोऽयं `निष्ठा च द्व्यजनात्' (6.1.205) इत्याद्युदात्तः, तेन तस्मादौत्सर्गिकः प्राप्नोति, ततस्तस्यायमपवादः।।

147. संज्ञायां कन्। (4.3.147)
`मयटोऽपवादःरट इति। पूर्वसूत्रेण प्राप्तस्य। ननु च संज्ञायां कनं वक्ष्यत्येव, तदपार्थकं तद्विधानम् ? नैतदस्ति; स ह्यल्पादिष्वर्थेषु, अयं तु विकारे। तदिदं सार्थकम्; अर्थभेदात्।।

148. व्रीहेः पुरोडाशे। (4.3.148)

149. असंज्ञायां तिलयवाभ्याम्। (4.3.149)
`तिलयवशब्दावाद्युदात्तौ' इति। तस्मादणप्राप्नोति, अतस्तस्यायमपवादः। आद्युदात्तत्वं तु तयोः `तृणधान्यानां {गर्मुत्-- द.उ. ग्रो मुट् च' पं.उ.}द्व्यषाम्' (फिट्.2.27) इत्यनेनैव भवितव्यम्। अस्यायमर्थः-- तृणधान्यानां द्व्यचामादिरुदात्तो भवतीति।
`यावकःर' इति। विकारेऽण्। तदन्तात्तु `यावादिभ्यः कन्' (5.4.29) इति कन्।।

150. द्व्यचश्छन्दसि। (4.3.150)

151. नोत्वद्वर्ध्रबिल्वात्। (4.3.151)
`मौञ्जम्' इति। मुञ्जाशब्दस्य पूर्वपदाद्युदात्तत्वेन तस्मादौत्सर्गिक एवाण्। `गार्मुत्म्' इति। `मुग्रोरुतिःट (पं.उ.1.96), `{गर्मुत्-- द.उ. ग्रो मुट् च' (पं.उ.} गोर्मुट् च' (पं.उ.1.97) इति प्रत्ययस्वरेण गर्मुच्छब्दोऽन्तोदात्तः। तस्मात् `अनुदात्तादेश्च' (4.3.140) इत्यञ्। `ब्रार्ध्री'इति । `वृधिवपभ्यां रन्' (द.उ.8.45) ब्रर्ध्रशब्दो नित्स्वरेणाद्युदात्तः, तस्मात् `प्राग्दीव्यतोऽण्' (4.1.83), `टिड्ढाणञ्' (4.1.15) इति ङीप्। `बैल्वम्' इति। `बिल्वादिभ्योषऽण्' (4.3.136)।
अथ मतुषा निर्देशः किमर्थः ? न नोद्वर्ध्रबिल्वादित्येवोच्येतेत्यत आह-- `मतुब्निर्देशः'इति।`नोत्वद्वर्ध्रबिल्वात्' (4.3.151) इत्युच्यमान उदिति वर्णग्रहणं स्यात्। अत्र वर्णग्रहणे सर्वत्र तदन्तविधिं प्रयोजयतीति तस्मात्तन्निषेधाय मतुब्निर्देशः। कः पुनस्तदन्तविधौ सति दोषः स्यादित्यत आह-- `इहै व' इत्यादि। एवकारेण मुञ्जादिभ्यो न स्यादिति दर्शयति। `वैष्णवी' इति। बिल्वादित्वादण्।।

152. तालादिभ्योऽण्। (4.3.152)
`मयडादीनामपवादः' इति। आदिशब्देनाञः।प्रकृतिभेदात् तयोर्बहुत्वस्य विवक्षित्वाद् द्वयोरपि बहुवचनम्। तत्र तालश्यामाकशब्दाभ्यां वृद्धलक्षणसय् मयटोऽपवादः। बर्हिणो विकारोऽवयवो वेति `प्राणिरजतादिभ्योऽञ्' (4.3.154) इत्यनेन बार्हिणशब्दोऽपि विकारावयवप्रत्यान्तः, तेन तस्मादञ् `ञितश्च तत्प्रत्ययात्' (4.3.155) इति प्राप्तस्याञोऽपवादः। शेषेभ्यस्त्विन्द्रालिशादिभ्योऽनुदात्तादिलक्षणस्याञः। लिशिदृशिभ्यामिन्द्र उपपदे `कप्रकरणे मूलविभुजादिब्य उपसंख्यानम्' (वा.232) इति कप्रत्ययः। `अन्येषामपि दृश्यते' (6.3.137) इति दीर्घत्वम्। `गतिकारकोपपदात् कृत्' (6.2.139) इति कृत्स्वरेणान्तोदात्तौ `इन्द्रालिशेन्द्रादृश' शब्दो। `इन्द्रा घु' शब्दः समासस्वरेणान्तोदात्तः। `चप सान्त्वने' (धा.पा.399) `पचाद्यच्' चपशब्दोऽन्तोदात्तः। पीयूक्षाशब्दः `लघावन्ते' (फि.सू.2.42) इत्यादिना मध्यादात्तः। यद्यप्यस्य टापि कृते `लघावन्ते' (फि.सू.2.42) नास्ति, प्राक्तु टापो विद्यत एव, तस्यामेवावस्थायां मध्योदात्तत्वं भवति।
`तालाद्धनुषि' इति पठ्यते। तालशब्दादण् प्रत्ययो भवति धनुष्यभिधेय इति। तालं धनुः, तालमयमन्यत्। अथाण्ग्रहणं किमर्थम्, न यथाविहितमेवोच्येत ? नैवं शक्यम्; बार्हिशब्दाद्वृदिद्धिलक्षणो मयट् `ञितश्च तत्प्रत्ययात्' (4.3.155) इत्यणा बाधितः। तत्रारम्भसामर्थ्यादन्मयडेव स्यात्। `श्यामाक'-शब्दः `लघावन्ते' (फि.सू.2.42) इत्यादिना मध्योदात्तः। तस्मात् `अनुदात्तादेरञ्' (4.2.44)। परत्वाद्वृद्धलक्षणेन मय़टा बाधित इतिपुनरारम्भसामर्थ्यादञेव स्यात्। अण्ग्रहमादणेव भवति।।

153. जातरूपेभ्यः परिमाणे। (4.3.153)
`बहुवचननिर्देशात्' इत्यादि। यदि स्वरूपग्रहणमभीष्टं स्यात् तस्यैकत्वादेकवचनेनैव निर्देशं कुर्यादिति भावः। `मयडादीनाम्' इति। आदि शब्दोनाञो ग्रहणम्। बहुवचनं तु पूर्ववत्। तत्र ये वृद्धा हाटकजातरूपप्रभृतयः, तेभ्यो मयटोऽपवादः। ये तु तपनीयप्रभृतयोऽनुदात्तादयस्तेभ्योऽञः। `तापनीयम्' इति।

तपनीयशब्दः `लघावन्ते' (फि.सू.2.42) इत्यादिना मध्योदात्तः।।

154. प्राणिरजतादिभ्योऽञ्। (4.3.154)
`अणादीनामपवादः' इति। आदिशब्देन मयट् परिगृह्यते। बहुवचनं तु पूर्ववत्। तत्र ये प्राणिशब्दा आद्युदात्तास्तेभ्योऽणपवाद इति। ये तु वृद्धास्तेभ्यो मयट् परिगृह्यते। रजतादिष्वपि यदाद्युदात्तं तस्मादणोऽपवादः। यत्पुनरनुवात्तादि तस्मान्मयटः। ततो हि `अनुदात्तादेश्च' (4.3.144) इत्यनेनैवाञि सिद्धे पुनर्वचनमत्रेव यथा स्यात्, `मयड्वैतयोः' (4.3.143) इत्यादिना मयड् मा भूदित्येवमर्थम्। तत्र `रजतं' घृतादिपाठादन्तोदात्तम्। `सीस, लोह' इति। `नब्विषयस्यानिसन्तस्य' (फि.सू.2.26) इत्याद्युदात्तम्। अस्यायमर्थः-- नपुंसकविषयस्य शब्दस्यानिसन्तस्यादिरुदात्तो भवतीति। नबिति नपुंसकस्य संज्ञा। अन्त्यात् पूर्वमित्यनुवर्त्तमाने `शिशृमानोदुम्बरबलीवर्दोष्ट्रारपुरूरवसां च' (फि.सू.3.64) इत्युदुम्बरेऽन्त्यात् पूर्वमक्षरमुदात्तम्। नीलदारुरोहितबिभीतक-- इत्येतेषां `लघावन्ते' (फि.सू.242) इत्यादिना मध्यादात्तत्वम्। पीतदारुशब्दमपि केचित् पठन्ति। स `नब्विषयस्यानिसन्तस्य' (फि.सू.2.26) इत्याद्युदात्तः। `तरतेर्ड्रिः' (पं.उ.5.66) इति ड्रिप्रत्ययान्तत्वात् त्रिशब्दस्य प्रत्ययस्वरेणाद्युदात्तत्वम्। त्रयः कण्टका अस्येति बहुव्रीहिः। `बहुव्रीहौ प्रकृत्या पूर्वपदम्' (6.2.1) इति त्रिकण्टकशब्द आद्युदात्तः। `{कण्वं प्रा.मु.पाठः} कण्टं करोतीति कर्मण्यण्। `{कण्वकार प्रा.मु.पाठः} कण्टकारशब्दः कृत्स्वरेणान्तोदात्तः।।

155. ञितश्च तत्प्रत्ययात्। (4.3.155)
`मयटोऽपवादः' इति। वृद्धलक्षमस्य सर्वस्य ञित्प्रत्ययान्तस्य वृद्धत्वात्।`एते प्रत्यया गृह्यन्ते' इति। ननु चैकानुबन्धपरिभाषया ष्ट्लञो ग्रहणं न प्राप्नोति ? नैष दोषः; `ञितश्च' इति हि चकारस्तत्समुच्चयार्थः। तेन तस्यापि ग्रहणं भविष्यति। ओरञो (4.3.139) ग्रहणेन `अनुदात्तदेश्च' (4.3.140) `पलाशादिभ्यो वा' (4.3.141) इत्येतत्सूत्रग्रहणं वेदितव्यम्; अभिन्नत्वात्। य एवं `ओरञ्' (4.3.139) इत्यनेनाञ्विहितः स एवास्मिन् सूत्रद्वयेऽनुवर्त्तते। `दैवदारवस्य विकारोऽवयवो वा' इत्यादिना यथायोगमेषां प्रत्ययानामुदाहरणादीनि दर्शयति। `कांस्यम् पारशवम्' इति। कंसाय हितमिति `प्राक् क्रीताच्छ-' (5.1.1) कंसीयः। परशवे हितमित्युगवादित्वा (5.1.2) द्यत्। परशव्यस्य विकारोऽवयवो वेति `कंसीयपरशव्ययोर्यञञौ लुक् च' (4.3.168) इति यथासंख्यं यञञौ भवतः, छयतोश्च लुक्-- कांस्यम्, पारशवः; तयोर्विकारोऽवयवो वेत्येनेनाञ्। `बैल्वमयम्' इति। बिल्वशब्दो `बिल्वादिब्योऽम्' (4.3.136) इत्यणन्तः। ततो वृद्धलक्षमे मयडेव भवति। `वैदमयम्' इति। `अनृष' (4.1.104) इत्यादिनाञ्-- वैदः। भवत्ययमञ्प्रत्ययो ञित्, न तु विकारावयवलक्षमः,तेन मयडेव भवति।।

156. क्रीतत्परिमाणात्। (4.3.156)
`अणादीनामपवादः' इति। आदिशब्देनाञादीनां ग्रहणम्। `संख्यापि परिमाणग्रहणेन गृह्यते' इति। कथं पुनरेतल्लभ्यते, यावता परिमाणशब्दः प्रस्थादिषु रूढः, न संख्यायाम् ? नैष दोषः; यथैव हि प्रस्थादिपरिच्छेदहेतुस्तथा संख्यापि। अत उपमानात् संख्यायामपि परिमाणशब्दो वर्तिष्यते परिमाणमिव परिमाणमिति। नन्वेवं मुख्ये सति गौणग्रहणमयुक्तम् ? अयमत्र दोषः -- इह हि तन्त्रेण द्वौ परिमाणशब्दावुच्चारितौ, तत्र द्वितीयं पदमुदात्तम्, तेन संख्यापि गृह्यते। `नैष्किकम्' इति। प्राग्वतेष्ठञ्' (5.1.18)। `शत्यः, शतिकः' इति। `शताच्च ठन्यतावशते' (5.1.21)। `सहस्रम्' इति। `शतमानविंशतिकसहस्रवतनादण्' (5.1.27)।
`अध्यर्धपूर्व' (5.1.28) इत्यादिना सादृशष्यार्थे वतौ सति यदिष्टं सम्पद्यते तद्दर्शयति। आदिशब्देन प्रकृत्यादिपरिग्रहः। `द्विसहस्रम्' इति। द्वयोः सहस्रयोर्विकार इति तद्धितार्थे द्विगुः। `प्राग्वतेः संख्यापूर्वपदात् तदन्तविधिरलुकि' (5.1.20 वा.) इति तदन्तविधिरभ्यनुज्ञानाद्यथा क्रीतार्थे `शतमानविंशतिसहस्रवसनात्' (5.1.29) इति पक्षे लुग्भवति, ततेहापि। `द्विसाहस्रम्' इति। `संख्यायाः संवत्सरपूर्वस्य' (7.3.15) इत्युत्तरपदवृद्धिः। `दविनिष्कः' इति। यथा क्रीतार्थे निष्कशब्दात् प्राग्वतेष्ठञ् (5.1.18) भवति तस्य `द्वित्रिपूर्वान्निष्कात्' (5.1.30) इति पक्षे लुक्, तथेहापि। `द्विनैष्किकम्' इति। `परिमाणान्तस्यासंज्ञाञ्ञाणयोः' (7.3.17) इत्युत्तरपदवृद्धिर्भवति।।

157. उष्ट्राद्वुञ्। (4.3.157)

158. उमोर्णयोर्वा। (4.3.158)
उमाशब्दस्तृणधान्यमित्याह (फि.सू.2.27) नाद्युदात्तः, ऊर्णाशब्दोऽपि प्रातिपदिकस्वरेणान्तोदात्तः, ताभ्यां यथासंख्यमणञोः प्राप्तयोर्विभाषा वुञारभ्यते।।

159. एण्या ढञ्। (4.3.159)
`पुंसस्त्वञेद भवति' इति। यदिह पुंसो ढञ् स्यात् पुंल्लिङ्गेनैव निर्देशं कुर्यादिति। पुंल्लिङ्ग न हि निर्देशे प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीत्येणीशब्दादपि प्रत्ययो लभ्यत एव। तस्मात् स्त्रीलिङ्गनिर्देशादेव पुंसोऽञ् भवति, न ढञ्।।

160. गोपयसोर्यत्। (4.3.160)
`मयड्विषये तु विधीयते' इति। अजादिप्रसङ्ग इति वचनात्। मयटोऽनजादित्वात् तद्विषये न प्राप्नोतीत्यतस्तत्र गोशब्दाद्विधीयते। पयःशब्दस्तु पिबतेरित्यसुन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः, तस्मात् प्राग्दीव्यतोऽण्' (4.1.83) इत्यण् प्राप्नोति। अतस्तदपवादोऽयं यद्विधीयते।।

161.द्रोश्च। (4.3.161)

162. माने वयः। (4.3.162)

163. कले लुक्। (4.3.164)
`तद्विषये' इति। विकारावयवविषये। `आमलकम्' इति। `नित्यं वृद्धशरादिभ्य-' (4.3.144) इति मयट्, तस्य लुक्। स्त्रीप्रत्ययस्य लुक् पूर्ववत्। ननु च फलं वृक्षस्य न विकारः नाप्यवयवः। विकारो द्वेधा भवति-- यो वा प्रकृतं निगृह्णाति--खदिरं भस्मेति; यो वा प्रकृतिव्यपदेशं करोति-- खादिरो यूप इति। न च फलं वृक्षमपगृह्णाति, नापि फलेन युक्तस्य व्यपदेशान्तरं जनयति, अथ च तस्य दिकारस्तथा फलमपि। स्यादेतत्। पल्लवितावस्थां वृक्षस्यापगृह्णन् पल्लव उपजायते, अतो युक्ता तस्य तद्विकारावयवतेति; फलमपि तस्य फलितावस्थां वृक्षस्यापगृह्णन् फलमुपजायते, तस्यापि युक्त एव तद्विकारभावः। यदप्युक्तम्-- नावयवोऽनारम्भकत्वादिति, तदप्ययुक्तम्; फलं ह्युपजायमानं शाख्याद्यवयवसहायमन्यमेव विशिष्टं वृक्षावयवमारभते। तद्यथा पल्लवो विशिष्टं समुदायान्तरमारभमाणोऽवयवो भवति तथा फलमपीति वेदितव्यम्।।

164. प्लक्षादिभ्योऽण्। (4.3.164)
`अञोऽपवादः' इति। तत्रेक्षुकर्कन्धूशब्दाभ्यामुवर्णान्तलक्षमस्याञोऽपवादः, शेषेभ्यस्त्वनुदात्तादिलक्षणस्य। सर्वे हि तेऽन्तोदात्तत्वादनुदात्तायः। तत्र प्लक्षन्यग्रोधाश्वत्थशब्दाः प्रातिपदिकस्वरेणान्तोदात्ताः। इङ्गुवीबृहतीशब्दौ तु गौरादिङीषन्तत्वात् प्रत्ययस्वरेणान्तोदात्तौ। `विधानसामर्थ्यात्' इत्यादि। यद्यणो लुक् स्याद्वचनमर्थकं स्यात्। न ह्यणो वाञो वा लुकि कृते कश्चिद्विशेषोऽस्ति। `नैयग्रोधम्' इति। `न्यग्रोधस्य च केवलस्य' (7.3.5) इत्यैवागमः।।

165. जम्ब्वा वा। (4.3.165)
`अञस्तु भवत्येव' इति। तस्य लुकि सति विधानमनर्थकं भवति; अश्रूयमाणत्वात्। `जम्बूनि' इति। लुकि कृतेऽभिधेयलिङ्गं नपुंसकं भवति। `ह्रस्वो नुपंसके प्रातिपदिकस्य' (1.2.47) इति, `जशशसोः शिः' (7.120),नुम्, `नोपधायाः'(6.4.7) इति दीर्घः।।

166. लुप् च। (4.3.166)
कः पुनर्लुपि सति विशेषो यतो लुकि प्रकृते स विधीयते ? इत्याह--- `युक्तवद्भावो विशेषः' इति। लुपि सति युक्तवद्भावो भवति `लुपि युक्तवद्व्यक्तिवचने' (1.2.51) इति, लुपि सत्येव विशेष इति। `जम्बूः फलम्' इति। अत्र युक्तवद्भावेन प्रकृतिगतमेव लिङ्गं भवति, तेन नपुंसकलिङ्गं न प्रवर्त्तते।
`लुप्प्रकरणे' इत्यादि। फलपाकेन शुष्यन्तीति फलपाकशुषः। `अन्येभ्योऽपि दृश्यते' (3.3130) इति क्विप्। `व्रीहयः, मुद्गाः' इति। बिल्वादिभ्योऽणो (4.3.136) लुप्। `यवाः, माषाः'इति। अत औत्सर्गिकस्याणः। एते `तृणधान्यानाम्' (फि.सू.2.27) इत्यादिनाद्युदात्ताः।
`पुष्पमूलेषु बहुलम्' इति। पुष्पमूलेषु चाभिधेयेषु बहुलं लुब्भवति। मल्लिका,वनमल्लिका, जातिः, विदारी, अंशुमती, बृहती--अत्रानुदात्तादिलक्षणस्याञो लुप्। मल्लिकानवमल्लिकाशब्दौ `लघावन्ते द्वयोश्च बह्वषो गुरुः' (फि.सू.2.42) इति मध्योदात्तौ। जातिशब्दश्च `क्विच्क्तौ च संज्ञायाम्' (3.3.174) इति क्तिच्प्रत्ययान्तत्वादन्तोदात्तः। बदरीबृहतीशब्दावपि गौरादिङीषन्तत्वादन्तोदात्तावेव। अंशुमतीशब्दः `उगितश्च' (4.1.6) इति ङीबन्तः। अंशुशब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वान्मध्योदात्तः। `पाटलानि' इति। बिल्वादित्वादण्। `शाल्वानि मूलानि' इति। शाल्वानीत्यनुदात्तादिलक्षमोऽढ। शाल्वशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। शाल्व इति =शाक इति यस्य प्रसिद्धिः। `क्वचिदन्यदपि' इति। लुपोऽन्यत्रापि क्वचित् कार्यं भवति। तत्पुर्लुक्लुपोरभावश्च। `कदम्बकम्' इत्यादावनुदात्तलक्षणस्याञो लुक्। कदम्बादयः शब्दा `लघावन्ते' (फि.सू.2.42) इत्यादिना मध्योदात्ताः। `बल्वानि' इति। अत्रोभयाभावः। `बिल्वादिभ्योऽण्' (4.3.136) । एतत्तु सर्व हरीतक्यादिपाठादेव सिद्धमिति नापूर्व वक्तव्यम्। यतो हरीतक्यादिषु `येषाञ्च फलपाक निमित्तः शोषः; पुष्पमूलेषु बहुलम्' (4.3.167) इति पठ्यन्ते।।

167. हरीतक्यादिभ्यश्च। (4.3.167)
हरीतक्यादिषु कण्टकारिका,गर्गारिका, शेफालिका-- इत्येते `संज्ञायां कन्' (5.3.75) इति कन्नन्तत्वान्नित्स्वरेणाद्युदात्ताः। तेनैव तेभ्य औत्सर्गिकस्याणो

लुप्। शेषेभ्यस्त्वनुदात्तादिलक्षणस्याञः, सर्वे तेऽन्तोदात्तत्वादनुदात्तादयः। तत्र काला, द्राक्षा, ध्राक्षा-- इत्येतेभ्यः प्राग्ये पठ्यन्ते ते ङीषन्तत्वादन्तोदात्ताः तत्र श्वेतपाकी, अर्जुनपाकी-- इत्येतौ `पाककर्णपर्ण' (4.1.64) इत्यादिना ङीषन्तौ। शेषेभ्यस्तु गौरादित्वात् `गौरादिभ्यश्च' (4.1.41)। कालाद्राक्षाध्राक्षाशब्देभ्यः प्रातिपदिकस्वरेणान्तोदात्तेभ्यष्टाप्, सवर्णदीर्घत्वम्, `एकादेश उदात्तेनोदात्तः' (8.2.5) इत्युदात्तत्वम्। अतः कालादयोऽप्यन्तोदात्ताः।।

168. कंसीयपरशव्ययोर्यञञौ लुक्च। (4.3.168)
`कंसीयः'इति। उणादौ कंसशब्दः सप्रत्ययान्तो व्युत्पादितः। पशुशब्दोऽपि `पृथिविव्या {धृषिह्वषभ्यः--द.उ.} धृषिभ्यः कुःरक' (द.उ.1.108) इत्यनुवर्त्तमाने `आङ्परयोः खनिशृभ्यां {डिच्च--द.उ., तिच्च इति प्रा.मु.न्यासपाठः} णिच्च' (द.उ.1.118) इति कुप्रत्ययान्तः। तदनयोरपि धातुप्रत्यययोर्लुक्कस्मान्न भवति ? इत्याह-- `प्रातिपदिकाधिकारात्' इत्यादि। प्रातिपदिकादिति वर्त्तते, तेन प्रातिपदिकेभ्यो यो विहितस्तस्य लुग्भवति। ने चेमौ प्रातिपदिकाद्विहितौ, किं तर्हि ? धातोः, अतोऽनयोर्लुग्न प्रवर्त्तते। `अनुदात्तत्वादेव' इति। परशव्यशब्दो हि `तित्स्वरितम्' (6.1.185) इत्यन्तस्वरितः। `तेनानुदात्तादिः' इति। `ईतीति तत्र वर्त्तते' इति। `यस्यते च' (6.4.148) इत्यतः।।
इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां
चतुर्थाध्याये तृतीयः पादः

4.4

अथ चतुर्थोऽध्यायः
चतुर्थः पादः
1. प्राग्वहतेष्ठक्। (4.4.1)
अथ प्राग्ग्रहणं किमर्थम् ? अर्थविशेषे प्रत्ययान्तरेणापवादेन निवर्तितस्य ठक उत्तरस्मिन् ग्रन्थान्तरे पुनरुपस्थानं यथा स्यादित्यवेमर्थम्। तद्यथा-- `संस्कृतम्' (4.4.3) इत्येतस्मिन्नर्थविशेषे `कुलत्थकोपधात्' (4.4.4) इत्यणा निवर्त्तितस्योत्तरत्रार्थान्तरे `तरति' (4.4.5) इत्येतस्मिन्नर्थे पुनरुपस्थानं यथा स्यादिति।
`ठक्प्रकरणे' इत्यादि। तदिति कर्माभिधायिभ्य आहेत्येतस्मिन्नर्थे माशब्दादिभ्यष्ठक उपसंख्यानन्। `वाक्यादेतत् प्रत्ययविधानम्' इति। स एव हि वाक्यार्थ इति नावमृष्टः कर्मबावमुपगतः। तदाहेति निर्दिश्यते--तदभिदायिन एव वाक्यात् प्रत्यय इति। पदसमुदायो हि वाक्यमिति। `मा' इत्येतस्य च `शब्द' इत्येतस्य च पदस्य यः पदस्य यः समुदायस्तद्वाक्यम्। एवमन्यत्रापि वेदितव्यम्।
कथं पुनः प्रातिपदिकाधिकारे वाक्यात्प्रत्ययविधिः ? इत्यत आह--- `प्रभूतादिभ्यः' इति। पुनर्वचनात्। यदि ह्यनेनापि प्रातिपदिकादेव प्रत्ययविधिः स्यादेवं सति `{आहेति प्रभूतादिभ्यः---प्रा.मु.पाठः} आहौ प्रभूतादिभ्यः' (वा.483) इति पुनरुपसंख्यानमनर्थकं स्यात्; अनेनैव सिद्धत्वात्। प्रभूतादयोऽपि हि माशब्दादयो भविष्यन्ति, ते च कर्माभिधायिन एव प्रत्ययमुत्पादयन्ति; क्रियाविशेषणाभिधायित्वात्। क्रियाविशेषणानां हि कर्मत्वं `तत्प्रत्यनुपूर्वमीपलोमकूलम्' (4.4.28) इत्यत्र प्रतिपादयिष्यते-- प्रत्ययार्थोऽप्यहेति। स एव तस्मादाहेति प्रभूतादिभ्य इतिपुनर्वचनाद्वाक्यादेव प्रत्यविधानं विज्ञायते। `क्रियाविसेषणात्' इति। प्रभूतादिशब्दः क्रियाविशेषणाभिधायित्वादभिधानेऽभिधेयोपचारं कृत्वा क्रियाविशेषमशब्देनोक्तः।।

2. तेन दीव्यति खनति जयति जितम्। (4.4.2)
`तेन' इति प्रत्येकमभिसम्बध्यते। `सर्वत्र करणे तृतीया' इति। दीव्यतीत्यादौ कर्त्तरि लकार इति तेनैव कर्त्तुरभिहितत्वात् कर्त्तरि तृतीया नोपपद्यते। तस्मात् करण एव तृतीया। अथ हेतौ तृतीया कस्मान्न भवति ? अनभिधानात्। जितमित्यत्र कर्मणि निष्ठाविधानाद्यद्यपि कर्त्तर्यपि तृतीया सम्भवति, तथापि दीव्यतीत्यादिभिः साहचर्यात् करण एव तृतीया विज्ञायते। देवदत्तेन जितमित्यत्र कर्त्तरि तृतीया; तेन वाक्यमेव भवति; न प्रत्ययः।
इह सूत्रे दीव्यतीत्यादिनैकवचनान्तेनैकसंख्यस्य प्रत्ययार्थस्य वर्त्तमानेन च कालेन निर्देशः। ततश्चैकस्मिन्नेव प्रत्ययार्थे प्रत्यय स्यात्, न द्विबह्वोः। तथा वर्त्तमान एव काले, न भूतभविष्यतोरिति यश्चोदयेत्, तं इत्याह-- `प्रत्ययार्थे संख्याकालयोरविवक्षा' इति। अविवक्षातु तयोर्नान्तरीयकत्वात्। अवश्यं हि यया कयाचित् संख्यया येन केनचित् कालेन निर्देशः कर्त्तव्य इति। न तौ प्रधानम्, न च तयोर्विवक्षेति। यदि तर्हि संख्याकालयोरविवक्षेति साधनस्याप्यविवक्षा प्राप्नोति, एकप्रकरणत्वात् ? नैष दोषः; यस्य हि विवक्षामन्तरेम द्वितीयस्य पदस्योच्चारणमनर्थकं भवति तन्नियोगतो विवक्षितव्यम्। दीव्यतीत्यादिष्वन्वर्थमात्रे विवक्ष्यमाणे द्वितीयस्य पदस्योच्चारणमनर्थकमापद्येतेति न युक्ता साधनस्याप्यविवक्षा।
इह दीव्यतीत्येवमादौ `क्रियाप्रधानमाख्यातम्' इति क्रियैव पदेन प्राधान्येनाख्यायते, कर्त्ता तु गुणीभूतः, तद्धितस्तु--आक्षिक इति प्राधान्येन कर्त्तारमेवात्र

वक्ति, क्रिया तु गुणभावेन, एतच्चायुक्तम्; आख्यातेषूत्पन्नैः प्रत्ययैर्यथाऽसौ तिङन्तेनाभिधीयते, तथैव प्रत्ययान्तेनापि युक्तोऽभिधातुमिति यश्चोदयेत्, इत्याह-- `क्रियाप्रधानत्वेऽपि च' इत्यादि। अभिधानस्वभावश्चायम्, येन क्रियाप्राधान्यस्याप्यनुविधीयमानस्तद्धितः कर्त्तुप्रधानो भवति। तस्मात् कर्त्तृत्वभावोऽत्रापेक्षितव्यः। न हि स्वभावोऽपि न हि स्वाभावोऽपि पर्यनुयोगमर्हति।।

3. संस्कृतम्। (4.4.3)
योगविभाग उत्तरार्थः-- `कुलत्थकोपधादण्' (4.4.4) इत्ययमपवादः संस्कृत एव यथा स्यात्, `दीव्यति' इत्यादौ मा भूदित्येवमर्थो योगविभागः।।

4. कुलत्थकोपधादण्। (4.4.4)

5. तरति। (4.4.5)

6. गोपुच्छाट्ठञ्। (4.4.6)
`स्वरे विशेषः'इति। ठकि हि सति तद्धितस्य `कितः' (6.1.165) इत्यन्तोदात्तत्वं स्यात्। ठञि सति ञित्सरेणाद्युदात्तत्वं भवति।।

7. नौद्व्यचष्ठन्। (4.4.7)
इह प्रकरणे केषुचित् संहितिकः षकारो दृष्टः, केषुचित्प्रत्ययस्यैवानुबन्धः;तदिह ठगधिकारे न ज्ञायते-- कः सांहितिकः ? कः प्रत्ययानुबन्धः ? इति। अतोऽसन्देहार्थं परिगणनं कृतम्। तच्च `आकर्षात्पर्पादिभ्यः' इत्यादिना श्लोकेन करोति। `आकर्षात् ष्ठल्' (4.4.31), `पर्गादिभ्यष्ठन्' (4.4.10), `भस्त्रादिभ्यष्ठन्' (4.4.16), `कसुसीददशैकदशात् ष्ठन्ष्ठचौ' (4.4.31), `आवसथात् ष्ठल्' (4.4.74), `किशरादिभ्यः ष्ठन्' (4.4.53) इति षितः षडेते। ननु च `अन्यतो ङीष्' (4.1.40) इत्यादयोऽन्येभ्योऽपि षितः सन्त्येव। तत्किमुच्यते षडेते ? इत्यत आह-- `ठगधिकारे' इत्यादि। ठकः प्रकृतत्वात् तदधिकारे ये षितः त एव परिगृह्यन्त इति दर्शयति।
नन्वेवमपि सति सप्त भवन्ति, कुसादादि (4.4.31) सूत्रे षित्प्रत्ययद्वयविधानात् ? इत्यत्राह-- `विधिवाक्यापेक्षं तु षट्त्वम्' इति। षितः प्रत्ययानां सप्तत्वात्। एतेनैव योगाः षितः प्रयुक्ताः। षित्प्रत्ययार्थाः षडेते योगा इत्यर्थः।।

8.चरति। (4.4.8)

9. आकर्षात् ष्ठल्। (4.4.9)
`लकारः स्वरार्थः' इति। लिति प्रत्ययात् पूर्वस्योदात्तत्वं यथा स्यात्। `षकारो ङीषर्थः' इति। `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीष् यथा स्यात्। `आकर्षिकी' इति। `स्वर्णपरीक्षार्थो निकषोपल उच्यते' इति। आकृष्यते स्वर्णमिति कृत्वा।

10. पर्पादिभ्यः ष्टन्। (4.4.10)
पर्पादिषु `पादः पच्च' इति पठ्यते, तस्यायमर्थः-- पादशब्दात् ष्ठन् प्रत्ययो भवति तत्सन्नयोगेन चपदित्ययमादेशः पदिकः, पदिकी। यद्येवं `पद्यत्यतदर्थे' (6.3.53) इति `पद्भाव इके चरतावुपसंख्यानम्' (वा.740) इतिकस्मादुपसंख्यायते ? नैष दोषः; `पादः पत्' (6.4.130) इत्यस्यापौराणिकत्वात्।।

11. श्वगणाटठ्ञ्च। (4.4.11)
`ष्वागणिकः'इति। शुनां गणः श्वगणः। ननु च श्वञ्शब्दो द्वारादिषु पठ्यत इति `द्वारादीनाञ्च' (7.3.4) इति वृद्धिप्रतिषेधेनैवागमेन भवितव्यम्, तत्र तदादिविधेरिष्टत्वात्, तत्कथं श्वागणिक इति भवति ? इत्याह-- `श्वादेरिञिट इत्यादि। द्वारादिकार्ये च प्रतिषिद्धे सत्यादिवृद्धिरेव भवति।।

12. वेतनादिभ्यो जीवति। (4.4.12)

13. वस्नक्रयविक्रयाटठन्। (4.4.13)
`क्रयविक्रयग्रहणं सङ्घातविगृहीतार्थम्' इति। इह तन्त्रेण क्रयविक्रयशब्दावुच्चारितौ;तत्रैकस्य सङ्घातार्थं ग्रहणम्, अपरस्य तु विगृहीतार्थं वेदितव्यम्।।

14. आयुधाच्छ च। 94.4.14)

15. हरत्युत्सङ्गादिभ्यः। (4.4.15)

16. भस्त्रादिभ्यः ष्ठन्। (4.4.16)
भस्त्रादिषु `शीर्षभार' इति पठ्यते। तत्रास्मादेव निपातनाच्छिरसः शीर्षभावः, `सप्तमी' (2.1.40) इति योगविभागात्समासः, `तत्पुरुषे कृति बहुलम्' (6.3.14) इति पक्षे सप्तम्या अलुक्।।

17. विभाषा विवधवीवधात्। (4.4.17)
`पर्याहारे' इति। परितः स ह्रियत इति पर्याहारः, मण्डलादिकमुच्यते।।

18. अण् कुटिलिकायाः। (4.4.18)

19. निर्वृत्तेऽक्षद्यूतादिभ्यः। (4.4.19)

20. त्रेर्मम्नित्यम्। (4.4.20)
`डिवतः क्त्रिरित्ययं त्रिशब्दो गृह्यते' इति। संख्याशब्दः कस्मान्न गृह्यते ?ऩभिधानात् । न हि त्रिरित्युच्यते विवक्षितार्थस्य प्रतीतिर्भवति। `उप्त्रिमम्' इति। `वचिस्वपियजादीनां किति' (6.1.15) इति सम्प्रसारणम्।
`नित्यग्रहणं स्वातन्त्र्यनिवृत्त्यर्थम्' इति। केवलस्य त्रिप्रत्ययान्तस्य मप्प्रत्ययरहितस्य प्रयोगः स्वातन्त्र्यम्, तन्निवृत्त्यर्थं नित्यग्रहणम्। स्वातन्त्रनिवृत्त्यर्थे नित्यग्रहणे सति योऽर्थः सम्पद्यते तं `{त्र्यन्तः----मु.पाठः} त्र्यन्तम्' इत्यादिना दर्शयति। `विषयान्तरे' इत्यादिना यदेवकारस्य व्यवच्छेद्यं तदाचष्टे। मप्प्रत्ययविषयार्थादन्यविषये यत्र प्रत्ययो न भवति तद्वि यान्तरम्। नित्यग्रहणं तन्निवृत्तिर्यथा स्यादित्येवमर्थं वेदितव्यम्।.

21.अपमित्ययाचिताभ्यां कक्कनौ। (4.4.21)
`अपमित्य' इति। `उदीचां माङो व्यतीहारे' (3.4.19) इति क्त्वा, तस्य ल्यबादेशे कृते,अपमित्येति भवति। तस्य च `क्त्वासोसुन्कसुनः' (1.1.40) इत्यव्ययसंज्ञा। तेन तृतीयासमर्थविभक्त्याधिकारेऽप्यविभक्तिकादेवास्मात् प्रत्ययविधिः।।

22. संसृष्टे। 4.4.22)
ननु च `संस्कृतम्' (4.4.3) इत्येव संसृष्टे प्रत्ययो भविष्यति, यत् पुनर्येन संसृष्टं तत्तेन संस्कृतं भवति ? नैतत्; सतो ह्युत्कर्षाधानं संस्कारः,एकभावः संसर्गः। न च तत्रोत्कर्षेण भवितव्यम्, स्वशुचिद्रव्यसंसर्गे स्वप्रकर्ष एव भवति, नोत्कर्षः। संसर्गमात्रे प्रत्यय इष्यते; तस्मात् संसृष्ट इति वक्तव्यमेव; एतदेव क्रियताम्; किं `संस्कृतम्' (4.4.3) इत्यनेन ? असत्यपि संसर्गे यत्र संस्कृतमस्ति तत्रापि प्रत्यय इष्यते-- वैद्यिकः, न विद्यया संसर्ग उपपद्यते; संसर्गो द्रव्ययोरेव भवति, यथा--दण्डपुरुषयोः। मूर्तिमतस्तद्धर्मत्वात्, रन तु विद्या मूर्त्तिमती। कुलत्थकोलधादणो (4.4.4) विधानार्थं संस्कृतग्रहणं कर्त्तव्यम्। न हि संसृष्टमात्रे प्रत्यय इष्यते; किन्तु तत्कृतगुणाधाने।।

23. चूर्णादिनिः। (4.4.23)
ननु च चूर्णेन ये संसृष्टास्तेषां चूर्णमस्ति, तत्र मत्वर्थीयेनैवेनिना सिद्धमिति तदपार्थकमिदम् ? नैतत् ; अस्तिविवक्षायां मत्वर्थीयेन सिद्धं स्यात्, संसृष्टविवक्षायां पुनर्न सिध्यति, त हि ठक् स्यात्। ठको बाधनार्थत्वे कुतोऽस्यानर्थक्यम्।।

24. लवणाल्लुक्। (4.4.24)
`द्रव्यवाची' इत्यादि। लवणशब्दोऽयमस्त्येव गुणवचनो यो रसविशेषे वर्त्तते, रसस्य गुणत्वात्। अस्ति द्रव्यवचनः, यथा--पञ्च लवणानीति। तत्र यो गुणवचनः स लुकं न प्रयोजनयति। गुणैर्हि यद्यपि द्रव्यं न संसृज्यते, तथापि गुणशब्दाः `सोऽयम्' इत्यभेदेन सम्बन्धाद्द्रव्ये वर्त्तन्ते, यथा-- शुक्लः पटः, {क्षारम्---मुद्रितः पाठः} क्षौरम्, अम्लं दधीति; तथा लवणशब्दोऽपि वर्तिष्यते, ततः किं लुका ? अवश्यं तदेवं विज्ञायम्, अन्यथा हि मधुरादिभ्योऽपि लुग्वक्तव्यः स्यात्। द्रव्यशब्दास्त्वन्यत्र सोऽयमित्यभेदसमर्थनान्न वर्त्तन्ते। तस्माद्द्रव्यवाची लवणशब्दो लुकं प्रयोजयति।।

25.मुद्गादण्। (4.4.25)

26. व्यञ्जनैरुपसिक्ते। (4.4.26)
`व्यञ्जनैःर' इति। बहुवचननिर्देशः स्वरूपविधिनिरासार्थः। तेनेत्यधिकारादेव तृतीयायां समर्थविभक्तौ वर्त्तमानायां तृतीयानुवादः सुखप्रतिपत्तये। `संसृष्टे' (4.4.22) इति वर्त्तमान उपसिक्तस्यैतत् प्रयोजनम्-- ओदनादौ यथा स्यात्। इह मा भूत्-- सूपेन संसृष्टा स्थालीति। उदकेनोदसिक्त ओदन इति। उदकं व्यञ्जनं न भवति; व्यञ्जनशब्दस्य सूपादावेव रूढत्वात्। ननु यद्व्यञ्जनैरुपसिक्तं तत्तैः संस्कृतं भवति; तत्र संस्कृतमेव सिद्धम् ? न सिध्यति; सतो ह्युत्कर्षावानं संस्कारः, न चासौ सर्वत्रोपसिक्तः सम्भवति। तथा हि-- व्यपगते स्वादुरसै प्रतिभावापन्नैरुपसिक्तेष्वोदनादिष्वपकर्ष एव भवति, नोत्कर्षः। उपसिक्तमात्रेऽपि चेष्यते। तस्मात् प्राक् तस्य पृथगारम्भः।।

27. ओजः सहोम्भसा वर्तते। (4.4.27)
`वर्त्तते' इति। चेष्टत इत्यर्थः। `तत्प्रक्रियाविशेषणम्' इत्यादि। अनेन हि वृत्त्यर्थस्य कर्त्तव्यतामाचष्ट। वर्त्तत इति वर्त्तमानं करोत्यर्थः। स हि वृत्त्यर्थः कर्त्तव्यतया सम्बध्यमानः कर्म सम्पद्यते। तत्सामानादिकरण्याच्च तद्विशेषणमपि कर्त्तव्यतया युज्यते। तदपि कर्म च प्रसक्तम्। क्रियाविशेषणस्यैवाकर्मकेऽपि धातौ कर्मत्वमाख्यातम्। तदित्यनेन द्वितीयासमर्थविभक्तौ लब्धायामपि द्वितीयान्ता इह प्रकृतयो निर्दिष्टा विस्पष्टार्थम्; अन्यथा प्रत्ययविधौ पञ्चमी न्याय्येति तदन्ता एव निर्दिश्येरन्।।

28. तत्प्रत्यनुपूर्वमीपलोमकूलम्। (4.4.28)
`प्रातीपिकः' इति। प्रतिगता आपोऽस्मिन्निति बहुव्रीहिः। `ऋक्पूरब्धूःपथामानक्षे' (5.4.74) इत्यकारः समासान्तः। एवञ्च `द्व्यन्तरुपसर्गेभ्योऽप ईत्' (6.3.97) इतीत्त्वम्। अपरत्र तु `ऊदनोर्देशे' (6.3.98) इति देशादन्यत्रोत्त्वमेव, ततष्ठक्। `{प्रातिलोमिकः, आनलोमिकः--काशिका,पदमञ्जरी च।} प्रातिलोमिकम्, आनुलोमिकम्' इति। प्रतिगतानि लोमान्यस्य , अनुगतानि लोमान्यस्येति बहुव्रीहिः। `अच् प्रत्यनु' (5.4.75) इत्यादिनाऽच् समासान्तः।।

29. परिमुखञ्च। (4.4.29)
`पञ्चम्ययाङ्परिभिः' (2.3.10) इति पञ्चमी। `अपपरिबहिररञ्चवः पञ्चम्या' (2.1.12) इत्यव्ययीभावसमासः, ततष्ठक्। स्वाभिमुखं वर्जयित्वा यः सेवको वर्त्तते स पारिमुखिकः। सर्वतोभावे वा परिः, तस्य `कुगतिप्रादयः' (2.2.18) इति प्रादिसमासः। यतो यतः स्वामिनो मुखं वर्त्तते ततस्ततो यः सेवको वर्त्तते स पारिमुखिकः।।

30. प्यच्छति गर्ह्यम्। (4.4.30)
`द्विगुणम्' इति। तादर्थ्यात् ताच्छब्द्यं दर्शयति। आद्विगुणार्थे वस्तुनि द्विगुणशब्दं वर्त्तयित्वा तत्र प्रत्ययं कुर्वतः कोऽभिप्रायः ? एवं मन्यते-- द्वैगुणिक इति उत्तमर्ण उच्यते, न चासौ द्विगुणं प्रयच्छति, किं तर्हि ? स्कन्दयित्वा द्विगुणं गृह्णाति; अन्यथा हि विपर्यये सति प्रसस्यमेव स्यात्, न तु गर्ह्यम्। यदैकस्मिन्नर्थे तादर्थ्याद्द्विगुणशब्दो वर्त्तते तदैकमेव द्विगुणार्थं प्रयच्छतो द्विगुणमेव भवतीति गर्ह्यमिति। गर्हा पुनरिह प्रतिषिद्धस्य शास्त्रेण दीयमानस्य प्रत्यवायहेतुत्वाद्वेतितव्या। `प्रकृत्यन्तरम्' इत्यापिनोपसंख्यानं प्रत्याचष्टे'। तत्रापि तादर्थ्याद्वृद्ध्यर्थं यद्दीयते तद्वृधुधिशब्देनोच्यते। ननु च तत्प्रत्याख्याने वृद्धिशब्दात् प्रत्यये सति वार्धिक इत्यपि स्यात् ? नैष दोषः; अव्यविकन्यायेन हि वृद्धिशब्देन वाक्यमेव भवति। वृधुषिशब्देन वाक्यं वृत्तिश्च।।

31. कुसीददशैकादशात् ष्ठन्ष्ठचौ। (4.4.31)
तत्रापि कुसीदार्थे वस्तुनि दशैकादशार्थेषु च दशसु दशैकादशशब्दं वर्त्तयित्वा ततः प्रत्ययः। सर्वतः पूर्ववदभिप्रायो वेदितव्यः। दश चैकादश चेति समानाधिकरणसमासः। ननु च भिन्नविषययोः सामानाधिकरण्यं नोपपद्यते ? दशैकादशशभ्दोऽप्येकादशार्थेषु दशस्वेवोपचराद्वर्त्तत इत्यदोषः। यो दश प्रयच्छत्येकादश एव स्युरिति स दशैकादश इत्युच्यते। दशैकादशादिति निर्देशादकारान्तत्वं निपात्यते; किमर्थम् ? वाक्येऽप्यकारान्तत्वश्रवणार्थ दशैकादशान् प्रयच्छतीति।।

32. उञ्छति। (4.4.32)
`उञ्छति' इति। उद्धुनोतीत्यर्थः।।

33. रक्षति। (4.4.33)

34. शब्ददर्दुरं करोति। (4.4.34)
तदित्यनेनैव द्वितीयासमर्थविभक्तौ लब्धायां शब्ददर्दुरमिति द्वितीयानिर्देशो लौकिकवाक्यप्रदर्शनार्थः। शब्ददर्दुरं करोतीत्येद्व्यावहारिकं वाक्यम्। अस्य

प्रतिग्रहो यत्र लोके व्यवहारस्तत्र प्रत्ययो भवति नान्यत्रेत्यर्थ सूचयते, तेन शब्दं करोति रवर इत्यत्र न भवति। लोके स शाब्दिक इत्युच्यते यः शब्दं वेत्ति; वैयाकरण एव शब्दं वेत्ति, तेन तत्रैव प्रत्ययो भवति, न खरे। च असौ वैयाकरणः प्रत्ययप्रकृत्यादिना सर्व शब्दं जानाति।।

35. पक्षिमत्स्यमृगान्हन्ति। (4.4.35)

`स्वरूपस्य पर्यायाणाञ्च तद्विशेषणानाञ्च ग्रहमिष्यते' इति। कथं पुनरिष्यमाणमपि पर्यायादीनां ग्रहणं लभ्यते ? अर्थप्रधानत्वान्निर्देशस्य। शब्दप्रधाने हि निर्देशे स्वरूपस्य ग्रहणं भवति, नार्थप्रधान इति प्रतिपादितमेतत् प्राक्। यदि तर्हि पर्यायाणामपि ग्रहणम्, अजिह्मान् हन्त्यनिमिषान् हन्तीत्यत्रापि प्राप्नोति ? नैष दोषः इह द्वितीयासमर्थविभक्तौ लब्धायां पुनर्दितीयासमर्थविभक्तिनिर्देशो लौकिकवाक्यप्रदर्शनार्थः। असय् परिग्रहः-- यत्र लौकिकवाक्यव्यवहारस्तत्र प्रत्ययो भवति नान्यत्रेत्यस्यार्थस्य सूचनार्थम्, तेनाजिह्मान् हन्तीत्यादौ प्रत्ययो न भवति। अजिह्मान् हन्त्यनिमिषान् हन्तीत्यस्यार्थस्य विवक्षायामाजिह्मिकः, आनिमिषिक इति लोके न व्यवहारोऽस्ति। तत्र पक्षिषु `पाक्षिकःर' इतचि स्वरूपस्योदाहरणम्। `शाकुनिकः' इति पर्यायस्य। `मायूरिकः, तैत्तिरिकः' इति। विशेषस्य। मत्स्येषु `मात्स्यिकःर' इति स्वरूपस्य । `मैनिकःर' इति पर्यायस्य । `शाफरिकःर, शाकुलिकः'इति विशेषस्य। मृगेषु `मार्गिकः' इति स्वरूपस्य। `हारिणिकःर' इति पर्यायस्य। `सौकरिकः, सारङ्गिकः' इति विशेषस्य।।

36. परिपन्थञ्च तिष्ठति। (4.4.36)

यथा परिमुखञ्चेति परिमुखशब्दस्याव्ययीभावत्वं तत्पुरुषत्वञ्च, तथेहापि परिपन्थशब्दस्य तद्द्वयं वेदितव्यम्। `तदिति द्वितीयासमर्थात्' इति। ननु च तिष्ठतिरयमकर्मकः तत्कथं द्वितीयया सह सम्बन्धः ? नैष दोषः; अकर्मणामपि हि {कालभावाध्वनां मुद्रितपाठः} कालभावाध्नः कर्मसंज्ञां प्रतिपद्यन्ते। तथा चोक्तम्-- `कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' (वा.1.3.51) इति। `पारिपन्थिकश्चौरः' इत्यव्ययीभावः। चौरो यः पन्थानं वर्णयित्वा तिष्ठति स पारिपन्थिकशब्देनोच्यते। तत्पुरुषपक्षे तु यश्चौरः पथो व्याप्य तिष्ठति स परिपन्थिक उच्यते।

`चकारः' इत्यादि। तिष्ठति चेत्यत्र प्रत्ययार्थसमनन्तरमेव चकारो द्रष्टव्यः, तेन समानजातीयस्यैव प्रत्ययार्थस्य समुच्चयं करोति। अथ प्रकृतेरेव समुच्चयः कस्मान्न विज्ञायते ? कर्मत्वानुपपत्तेः । तत्र हि द्वितीया समर्थविभक्तिरनुवर्त्तते, तिष्ठतेश्चाकर्मकत्वात् प्रकृताया मत्स्यादेः प्कृतेः कर्मभावो नोपपद्यते। कालभावाध्वनामेव ह्यकर्मकाणां कर्मसंज्ञेष्यते, न मत्स्यादीनाम्।

लौकिकवाक्यप्रदर्शनार्थं तदेतद्द्वितीयोच्चारणं करोतीत्याह-- `{परिपथशब्दपर्यायः---काशिका}परिपथपर्यायः' इति। किमेतस्य ज्ञापने प्रयोजनमित्याह-- `स विषयान्तरे' इत्यादि। असति ह्यस्मिन् ज्ञापने ठक्प्रत्ययसन्नियोगेन प्रकृतिर्निर्दिश्यमाना प्रत्ययाभावेन प्रसज्यते। ज्ञापने तु सति यत्रापि प्रत्ययो न भवति तत्रापि प्रयोग उपपद्यते।।

37. माथोत्तरपदपदव्यनुपदं धावति। (4.4.37)

दण्डभावो माथो दण्डमाथः = ऋजुः पन्था उच्यते, तं धावति `दाण्डमाथिकः'। शुल्कस्य माथः शुल्कमाथः, `शौल्कमथिकः'। पदस्य पश्चादनुपदम्, पश्चादर्थेऽव्यीभावः, अनुपदं धावति-- `आनुपदिकः' । प्रत्यासत्या धावतीत्यर्थः। द्वितीयायां समर्थविभक्तौ लब्धायां पुनर्द्वितीयानिर्देशः `इष्टाद्द्वितीयान्ताद्यथा स्यात्, अनिष्टान्मा भूत्' इत्येवमर्थम्। तेन यः `अनुर्यत्समया' (2.1.15) `यस्य चायामः' (2.1.16) `कुगतिप्रदायः' (2.2.18) इत्यादिभिर्योगैरनुशब्दस्य समासः, ततो न भवति।।

38. आक्रन्दाटठ्ञ्च। (4.4.38)

`आर्त्तायनम्' इति. परित्राणार्थमीयते गम्यत इत्ययनम्, आर्त्तानामयनमार्त्तायनम्। शरणमित्यर्थः।।

39. पदोत्तरपदं गृह्णाति। (4.4.39)

पदग्रहणेन स्वरूपमेव गृह्यते, न सुप्तिङन्तं पदम्। अत एवाह-- `पदशब्द उत्तरपदं यस्य' इति। एतच्च द्वितीयायां लौकिकरवाक्यप्रदर्शनार्थत्वाद्द्वितीयानिर्देशाल्लभ्यते। पदोत्तरपदं गृह्णातीत्येतल्लौकिकं वाक्यम्। अस्य प्रदर्शनेनैतत् सूचितम्-- लौकिकस्य हि पदस्य ग्रहणम्, न पारिभाषिकस्येति।

अथ पदान्तादित्येव कस्मान्नोक्तम् ? इत्याह-- `पदान्तादिति नोक्तम्' इत्यादि। गतार्थम्। पदमेवोत्तरपदं यस्य तस्माद्यथा स्यात्। इह तु श्लोकपादपदं गृह्णातीति भवतीति केचित्।।

40. प्रतिकण्ठार्थललामञ्च। (4.4.40)

कण्ठं कण्ठं प्रति प्रतिकण्ठम्, यथार्थेऽव्ययीभावः, आभिमुख्ये वा ` लक्षणेनाभिप्रती आभिमुख्ये' (2.1.14) इति। कण्ठस्याभिमुख्य इति। कण्ठस्याभिमुख्यं

प्रतिकण्ठम्, प्रातिकण्ठिकः स उच्यते सर्व कण्ठं यो गृह्णाति, यो वा कण्ठमाभिमुख्येन गृह्णाति। द्वितीयासमर्थप्रकरणे पुनर्द्वितीयान्त प्रकृतिनिर्देश इष्टाद्यथा स्यात्, अनिष्टान्मा भूत्। तेन प्रतिगतः कण्ठमिति `कुगतिप्रादयः' (2.2.18) इति तत्पुरुषो यः प्रतिकण्ठशब्दस्ततो न भवति।।

41. धर्मञ्चरति। (4.4.41)
`चरतिरासेवायाम्' इति। आसेवा = पौनःपुन्यम्।
`अधर्माच्च वक्तव्यम्' इति। अधर्मशब्दाच्चरतीत्येतस्मिन्नर्थे ठग्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- पूर्वसूत्रादिह चकारऽनुवर्त्तते, स चानुक्तसमुच्चयार्थो वेदितव्यः, तेनाधर्मादपि भविष्यति।।

42. प्रतिपथमेति ठँश्च। (4.4.42)
`प्रतिपधिकम्' इति। पूर्ववद्वीप्सायाम्, आभिमुख्ये वाऽव्ययीभावः। पन्थानं पन्थानं प्रति प्रतिपथम्। आभिमुख्ये-- पथ आभिमुख्यं प्रतिपथम्। यः सर्वान् पथ एति, आभिमुख्येन वा पन्थानमेति स प्रातिपदिक इति चाभिधीयते।।

43. समवायान् समवैति। (4.4.43)
`समवायः समूह उच्यते, न सम्प्रसारणा' इति। कुत एतत् ? तत्र समवैतीत्यस्य प्रत्ययार्थस्यायोगात्। आगत्य तदेकदेशीभवतीति समवैतिशब्दस्यार्थः। सम्प्रधारणा चामूर्तिः, चैतसिको धर्मः, न च तदेकदेशीभवितुं शक्यते। तस्मात् समूह एव समवायशब्दस्यार्थः, नैतीत्यस्यार्थः। एतीति वर्त्तमाने समवैतीति वचनमर्थविशेषप्रतिपत्त्यर्थम्। एतीति प्राप्तिमात्रं कुर्वन्नुच्यते। समवैतीत्यागत्य तदेकदेशीभवतीति।।

44. परिषदो ण्यः। (4.4.44)

45. सेनाया वा। (4.4.45)

46. संज्ञायां ललाटकक्कुट्यौ पश्यति। (4.4.46)
`अभिधेयनियमार्थः' इति। अभिधेये सेवकविशेषे च प्रत्ययान्तस्य नियमः। तत्रैव वृत्तिर्यथा स्यादित्येवमर्थम्। `न तु रूढ्यर्थम्' इति। लालाटिककौक्कुटिकशब्दयो रूढ्यामेकत्वात्।
`तदनेन' इत्यादि। यत एव सर्वावयवेब्यो ललाटं दूरे दृश्यते, तस्मादनेन ललाटदर्शनेन सेवकस्य स्वामिनं प्रत्यनुपश्लेषो लभ्यते। न त्वत्र ललाटार्थो दर्शनं चास्ति। यादृशश्चानुपश्लेषो विवक्षितः, तं `कार्येष्वनुपस्थायित्वम्' इत्यनेन दर्शयति।
`कुक्कुटीशब्देनापि' इत्यादि। कक्कुट्या ह्यल्पदेशविषयः पातो भवति। तदनेन कुक्कुटीपातदेशस्याल्पता लक्ष्यते। न त्वत्र कुक्कुट्यर्थो देशश्च विद्यते।।

47. तस्य धर्म्यम्। (4.4.47)

48. अण् महिष्यादिभ्यः। (4.4.48)

49. ऋतोऽञ्। (4.4.49)

50. अवक्रयः। (4.4.50)

51. तदस्य पण्यम्। (4.4.51)
अपूपाः पण्यमस्येत्यापूपिकः।
अथ यथा वाक्ये पण्यशब्दो युज्यते तथा वृत्तावपि कस्मान्न युज्यते ? इत्याह-- `पण्यम्' इति। `विशेषणम्' इत्यादि। अथ य एवमवेक्ष्यमाणः पण्यार्थं वृत्तावन्तर्भावयति तेन गतार्थत्वात् पण्यशब्दो न प्रयुज्यते।।

52. लवणाठ्ठञ्। (4.4.52)

53. किशरादिभ्यः ष्ठन्। (4.4.53)

54. शलालुनोऽन्यतरस्याम्। (4.4.54)
`शलालुकः'इति। `इसुसुक्तान्तात् कः' (7.3.51)।।

55.शिल्पम्। (4.4.55)
`शिल्पं कौशलम्' इति। क्रियाभ्यासपूर्वको ज्ञानविशेषः। `मृदङ्गवादनं शिल्पमस्य' इति। मृदङ्गो वाद्यते येन शिल्पेन तन्मृदङ्गवादनम्। ननु च मृदङ्गवादनं शिल्पं यस्येति विगृह्य प्रत्यय उत्पद्यमानो मृदङ्गवादनशब्दादेव प्राप्नोति, न तु मृदङ्गशब्दात्, ततो मार्दङ्गवादनिक इति भवितव्यम्, तत्कथं मार्दङ्गिक इति भवति ? इत्याह-- `मृदङ्गवादनम्' इत्यादि। मृदङ्गशब्द एव प्रत्ययमुत्पदयति, स तु मृदङ्गवादने वर्त्तमानः, न मृदङ्गे। अत्रशब्दशक्तिस्वाभाव्यं हेतुः। न चायं नियमः-- येन विग्रहः क्रियते, तत एव प्रत्ययेन भवितव्यमिति। यथा ह्यवेरिदं मांसमाविकम्, मांसमित्यविशब्देन विग्रहः क्रियतेऽविकशब्दादेव प्रत्ययो भवति, तथेहापि मृदङ्गवादनशब्देन विग्रहः क्रियते, प्रत्ययस्तु मृदङ्शब्दाद्भवति। तेन तत्र गतार्थत्वाच्छिल्पशब्दो न प्रयुज्यत इत्यभिप्रायः।।

56. मड्डुकझर्झरादणन्यतरस्याम्। (4.4.56)

57. प्रहरणम्। (4.4.57)
`धानुष्कः' इति। कादेशः `इणः षः' (8.3.39) इति विसर्जनीयस्य षत्वम्।।

58. परश्वधाट्ठञ् च। (4.4.58)

59. शक्तियष्ट्योरीकक्। (4.4.59)
अथ दीर्घोच्चारणं किमर्थम्, इकगेव नोच्येत, इकक्यपि सवर्णदीर्घत्वे कृते शाक्तीको याष्टीक इति सिध्यत्येव ? न सिध्यति; इकारस्य `यस्येति च' (6.4.148) इति लोपेन भवितव्यम्। तत्कुतः सवर्णदीर्घत्वम् ? इकारोच्चारणसामर्थ्यादेव लोपो न भविष्यति। ननु चावग्रहनिवृत्तिरिकारस्य प्रयोजनं स्यात् ? नैतत्; यदि ह्येतत् प्रयोजनं स्यात् सूत्रारम्भोऽनर्थखः स्यात्; ठकाप्यनवग्रहस्य सिद्धत्वात् ? नानर्थकः ; वाक्यनिवृत्त्यर्थत्वात्। एवमपि प्रत्ययग्रहणमनर्थकं स्यात्, ठक्प्रत्ययो हि प्रकृतः , तत्रैतावदेन वक्तव्यम्-- शक्कतियष्ट्योरिति। एवं पुनर्विधानां वाक्यनिवृत्त्यर्थं भविष्यति, किमीकग्विधानेन ? तस्मादिकग्ग्रहणसामर्थ्याल्लोपो न भविष्यति। एवमपि ठकैव `यस्येति च' (6.4.148) इति लोपाभावेनानवग्रहे सिद्धे हीकग्ग्रहणमधिकविधानार्थं प्रतीयते। तेन `यस्येति च' (6.4.148) इति लोपो न भवति। यथा तस्मादकः सवर्णे (6.1.101) दीर्घोऽपि न स्यादिति विगृहीतमेव श्रूयेत। तस्मादीकग्वक्तव्यः।।

60. अस्तिनास्तिदिष्टं मतिः। (4.4.60)
`किं तर्हि परलोकोऽस्तीति {यस्य मतिः---काशिका} मतिर्यस्य' इति। कथं पुनरसति विशेषोपादान एतल्लभ्यते ? इत्याह-- `तदेतत्' इत्यादि। अभिधानशक्तिस्वाभाव्याल्लभ्यते। ननु चास्तीति तिङन्तम्, नास्तीति वाक्यम्। अत एताभ्यां न प्राप्नोति प्रत्ययः, प्रातिपदिकाधिकारात् (4.1.1.) ? इत्यत आह-- `अस्तिनास्तिशब्दौ' इत्यादि। अभ्युपगम्यापि तिङन्तत्वं वाक्यत्वञ्च परिहारान्तरमाह-- `वचनादाख्याताद्वाक्याच्च प्रत्ययः' इति।।

61. शीलम्। (4.4.61)
`अपूपभक्षणं शीलमस्य' इति। शीलविषयत्वादुपाचारात् तथा व्यपदेशः। भक्षणक्रिया तद्विषयञ्च शीलं तद्धितवृत्तावन्तर्भवति। तेन तत्र प्रतीयमानत्वाद्भक्षणशीलशब्दौ न प्रयुज्येते इति भावः।।

62. छत्त्रादिभ्यो णः। (4.4.62)
छत्त्रशीलत्वं शिष्यस्य प्रतिपादयितुमाह-- `छादनादपवारणाच्छत्त्रम्' इत्यादि। अपवारिणादित्यनेन च्छादनादित्यस्यार्थं व्यक्तीकरोति। आच्छादयति हि यत् तच्छत्रमित्युच्यते , तेन शिष्योऽपि गुरुकार्यतत्परो गुरुर्यानि च्छिद्राणि गोपयति तेषामावरणाय प्रवृत्तस्तत्र युक्तः सच्छत्रसहचरितां क्रियामाचरँश्छत्त्रशीलो भवति।
`स्थाशब्दोऽत्र पठ्यते, स चोपसर्गपूर्वो गृह्यते' इति। ततश्च तस्य `आतश्चोपसर्गे' (3.3.106) इत्यङ्प्रत्ययमुत्पाद्याप्युत्पादितत्वात्। केवलस्य तु पाठः सर्वोपसर्गसंग्रहार्थः।

`चुरा' इति, पठ्यते, तत्र निपातनादकारप्रत्ययो गुणाभावश्च।।

63. कर्माध्ययने वृत्तम्। (4.4.63)
क्रियया यद्व्याप्यमानमीप्सिततममनीप्सिततमं वा तत् कर्म। इह त्वनीप्सिततमं गम्यते। अत एवाह-- `यस्याध्ययनप्रयुक्तस्य' इत्यादि। न हि कस्यचिदध्ययने युक्तस्य परीक्षाकाले पठतः स्खलितपाठरूपमीप्सितं भवति। अध्ययनशब्दो भावसाधनः, कर्मसाधनो वा। अधीतम्, अधीयते, वाऽध्ययनम्। वृत्तं = भूतम्,उत्पन्नमित्यर्थः।
`एकमन्यत्'इत्यादि। सम्यक् पाठापेक्षयान्योऽर्थो वेदितव्यः। `द्वैयन्यिकः; त्रैयन्यिकः' इति। `न य्वाभ्यां पदान्ताभ्याम्' (7.3.3) इत्यैजागमः। `अध्ययने कर्म वृत्तमित्येतत् सर्वं तद्धितवृत्तावन्तर्भवति' इति। तेन तत्राध्ययनवृत्तशब्दोऽवगतार्थत्वान्न प्रयुज्यत इति भावः।।

64. बह्वच्पूर्वपदाट्ठच्। (4.4.64)
`द्वादशान्यिकः' इति। द्वादशशब्दो बह्वच्पूर्वपदम्। द्वौ च दश चेति द्वन्द्वः। `द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः' (6.3.47) इत्यात्त्वम्, ततो द्वादशान्यानीति विगृह्य `तद्धितार्थे' 92.1.51) इति समासः। ननु चैकादेशे कृते पूर्वोत्तरपदाभावात् बह्वच्पूर्वपदं न भवति, न चान्तादिवद्भावोऽस्ति -- `उभयत आश्रये नान्तादिवत्' (व्या.प.51) नैष दोषः; `नेन्द्रस्य परस्य' (7.3.22) इति ज्ञापकादेशादेशात् पूर्वं प्रत्ययः। `त्रयोदशान्यिकः' इति। त्रयश्च दश चेति द्वन्द्वः, `त्रेस्त्रयः' (6.3.48) इति त्रय आदेशः। अन्यशब्दोऽत्र सम्यक् पाठापेक्षयापपाठे वर्त्तत इत्यत आह-- `चतुर्दशापपाठाःर' इत्यादि। कथं पुनर्ज्ञायतेऽपाठेऽन्यशब्दो वर्त्तते ? इत्याह-- `उदात्ते' इत्यादि। उदात्ते कर्त्तव्येऽनुदात्तकरणमपपाठः। तत्र य उदात्ते कर्त्तव्येऽनुदात्तं करोति स यस्मादन्यं करोषीत्युच्यते ततो ज्ञायतेऽन्यशब्दोऽपपाठे वर्त्तत इति।।

65.हितं भक्षाः। (4.4.65)
ननु हितशब्दयोगे चतुर्थ्या भवितव्यम्, `हितयोगे चतुर्थी भवति' (वा. 123) इत्युपसंख्यानात्, `तस्मैहितम्' (5.1.5) इति निर्देशात् ?
`सामर्थ्याद्विभक्तिविपरिणामो भविष्यति' इति। सामर्थ्य पुनस्तदेवोपसंख्यानम्। लिङ्गञ्च----हितार्था क्रिया तद्धितवृत्तान्तर्भवति, तेन न प्रयुज्यत इति।।

66. तदस्मै दीयते नियुक्तम्। (4.4.66)
ननु च `तदसय् पण्यम्' (4.4.51) इत्यतस्तदिति प्रथमा समर्थविभक्तिरनुवर्तिष्यते, तदपार्थकं पुनः प्रथमासमर्थविभक्त्युपादानाम्; `अस्मै' इति प्रत्ययार्थोप्यपार्थक एव। तथा हि `अस्य' (4.4.51) इत्यनुवर्त्तते, तत्र `दीयतौ' इति इत्यभिसम्बन्धात्तु सम्परदानत्वेन भवितव्यम्। ततश्च शेषसम्बन्धे निवृत्ते चतुर्थ्यमत्र विपरिणम्यते, तस्मात् `दीयते नियुक्तम्' इत्येतावदेव वक्तव्यम् ? अत्रोच्यते-- समर्थविभक्त्युपादानं तावत् पूर्वसूत्रे समर्थविभक्तिविशेषः प्रत्ययनुत्पादयतीत्यसय् सूचनार्थम्. तेनेह न भवति-- दुःखमस्याध्यने वृत्तम्, अजयोऽस्याध्ययने वृत्त इति। अपपाठ एव हि वृत्ते प्रत्यय इष्यते। दीयमाने न सर्वस्मात् चतुर्थी-- अरेः पृष्ठं ददातीति। स च षष्ठ्या एव विषयोऽर्थः। षष्ठ्यर्थं एव प्रत्ययो विज्ञायते, चतुर्थ्यन्ताद्यथा स्यात्। एवं `अस्मै' इति प्रत्ययार्थो निर्दिश्यते।।

67. श्राणामांसौदनाट्टिठन्। (4.4.67)
`अथ ठञेव कस्मान्नोक्तः' इति। एव हि लघु सूत्रं भवतीति भावः। स्यादेतत्-- ठञ्टिठनोर्विशेषोऽस्ति, अतष्टिन्नुक्तो न ठञ् ? इत्यत आह--- `न ह्यत्र' इत्यादि। द्व्योरप्यनयोर्वृद्धत्वान्नास्ति विशेषः। योऽपि `वृद्धिनिमित्तस्य' (6.3.39) इत्यादिना ठञि पुंवद्भावप्रतिषेधः, तसय् `न कोपधायाः' (6.3.37) इति टिठ्न्नप्यभावान्नात्र ठञ्टिठनोः कश्चिद्विशेषोऽस्ति। `मांसौदन' इत्यादिना विशेषं दर्शयति।
`केचित्' इति वचनाद्विगृहीतग्रहणं केचिन्नेच्छनतीत्येतदुक्तं भवति। तन्मते ठञेव वक्तव्यः। टिठत्वचनं वैचित्र्यार्थ वेदितव्यम्।।

68. भक्तादणन्यतरस्याम्। (4.4.68)

69. तत्र नियुक्तः। (4.4.69)
अथ `नियुक्तः' (4.4.66) इति वर्त्तमाने पुनर्नियुक्तग्रहणं कस्मात् क्रियते ? अर्थभेदात्। न तस्य ह्यकव्यभिचारलक्षणो नित्यभावोऽर्थः। अस्य तु ततोऽन्य एवार्थो यदाह-- `नियुतोऽधिकृतः' इत्यादि।।

70. अगारान्ताठ्ठन्। (4.4.70)

71. अध्यायिन्यदेशकालात्। (4.4.71)
अध्येतुं शीलमस्येत्यध्यायी, ताच्छीलिको णिनिः। `अध्ययनस्य यौ देशकालौ शास्त्रेण प्रतिषिद्धौ तावदेशकालशब्देनोच्येते' इति। अप्रतिषिद्धाभ्यां देशकालशब्दाभ्यामन्यत्वात् पर्युदासवृत्त्याऽभक्ष्यास्पर्शनीयवदध्ययनस्येति। अत आह--- तस्याध्यायिना प्रत्ययार्थेन सन्निधापितत्वात्। न हि विनाध्ययनेनाध्याय्युपपद्यते।।

72. कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति। (4.4.72)
अल्पाच्तरस्य प्रस्तारशब्दस्य च पूर्वनिपातमकुर्वन्नेतत् सूचयति-- अन्यदपि कार्यं लक्षणप्राप्तं न भवति। तेन कठिनान्तशब्दस्य ग्रहणं न भवतीति कठिनशब्दान्तं प्रातिपदिकं गृह्यते। `{हरतिरयम्-- प्रा.मु. पाठः} व्यवहरतिरयमस्ति पणिना समानार्थः-- यस्य `व्यवह्रपणोः समर्थयोः' (2.3.57) इत्यत्र ग्रहणम्, अस्ति विवादे-- व्यवहारे परिह्वतमिति, अस्ति च विक्षेपे शलाकां व्यवहरतीति, अस्ति च लौकिके क्रियातत्वे-- लौकिको व्यवहार इति। इह तु क्रियातत्त्वे वर्त्तमानस्य ग्रहणमित्येतद्दर्शयितुमाह--`व्यवहारः क्रियातत्त्वम्' इति। क्रियाया अविपरीतस्वभावत्वादि क्रियातत्त्वम्। `यथा' इत्यादि। लौकिको व्यवहार इत्यत्र यथा व्यवहारः क्रियातत्त्वे वर्त्तते, तथेहापि दर्शयति। क्रियातत्त्वे वर्त्तमानस्य ग्रहणम्। `तत्र' (4.4.69) इतिसप्तम्यधिकारे सप्तमीनिर्देशात् प्रसिद्ध्युपसंग्रहणं लभ्यते। `वांशकठिनिकश्छक्रचरः' इति। यश्चक्रचरः सन्ननुष्ठेयां क्रियां शास्त्रोक्तमविगीता वंशकठिनेऽनुतिष्ठति स एवमुच्यते।।

73. निकटे वसति। (4.4.73)
निकटे समीप इत्यर्थः। यत्र शास्त्रतो निकटवासस्तत्रायायं विधिः। एतच्च सप्तम्यां समर्थविभक्तौ लब्धायां पुनः सप्तमीनिर्देशात् प्रसिद्ध्युपसंग्रहणेन लभ्यते। स ह्येवमर्थः कृतः--- इष्टे सप्तम्यन्ते यथा स्यात्, अनिष्टान्मा भूत्। स पुनः शास्त्रतो निकटवास आरण्यकस्य भिक्षोरिति दर्शयति-- `आरण्यकेन भिक्षुणा' इत्यादि।।

74. आवस्थात् ष्ठल्। (4.4.74)

75. प्राग्घिताद्यत्। (4.4.75)

76. तद्वहित रथयुगप्रासङ्गम्। (4.4.76)
तदिति द्वितीयामर्थविभक्तौ लब्धायां रथादीनां द्वितीयानिर्देश इष्टाद्यथा स्यात्, अनिष्टान्मा भूत्। तेनेहव भवति-- गौर्युग्य इति; इह न भवति-- युगं वहति राजा कलिं द्वापरं वेति। तथा प्रासज्यत इति प्रासङ्गः, यत् काष्ठं वहनकाले वत्सानां कण्ठआसज्यते तत्प्रासङ्गः, तं वहति प्रासङ्ग्यः। इह न भवति-- प्रसङ्गादागतं प्रासङ्गम्। `युग्यञ्च पत्त्रे' (3.1.121) इति निपातनाद्युग्यशब्दे सिद्धे युगग्रहणं स्वरार्थम्। न युग्यमयुग्यमित्यत्र नञो गुणप्रतिषेधे `सम्पाद्यर्हहितालमर्थास्तद्धिताः' (6.2.155) इत्यतो नञ इत्यनुवर्त्तमाने `ययतोश्चातदर्थे' (6.2.156) इति नञ उत्तरस्यान्तोदात्तत्वं यथा स्यात्। तेन न ह्येकस्वरो लभ्यते। तस्य क्यबन्तत्वात्।।

77. धुरो यड्ढकौ। (4.4.77)
अथ `धुरो ठक् च' इत्येवं कस्मान्नोक्तम्, चकारः समुच्चयार्थः, यथाभिहिते प्रत्यये विज्ञायमाने यदेव भविष्यति ? नैतदेवम्; यो हि धुरं वहति धुसोऽसौ वोढा भवति।तस्य यथाविहिते प्रत्यये विज्ञायमाने `तस्येदम्' (4.3.120) इत्यणपि स्यात्। यद्ग्रहणात् तस्येदंविवक्षायामपि यदेव भवति।।

78.खः सर्वधुरात्। (4.4.78)
`सर्वधुरम्' इति। सर्वा चासौ धूश्चेति `पूर्वकालैक' (2.1.49) इत्यादिना समासः। `ऋक्पूरब्धूः' (5.4.74) इत्यादिना समासान्तः। `स्त्रीलिङ्गे न्याय्ये' इति। तत्पुरुषस्योत्तरपदार्थप्रधानत्वात् `परवलिह्घं द्वन्द्वतत्पुरुषयोः' (2.4.26) इति धूःशब्दस्य यल्लिङ्गं तदेव न्याय्यमिति। तत्र `सर्वधुरायाः' इति सूत्रे कर्त्तव्ये यतः सर्वधुरादिति नपुंसकलिङ्गेन निर्देशः स शब्दरूपापेक्षः, अर्थापेक्षे हि निर्देशे परवल्लिङ्गता भवति। अयन्तु शब्दरूपापेक्षः,शब्दरूपञ्च नपुंसकमिति नपुंसकेनैव निर्देशो युक्तः। अर्थविवक्षायां तु स्त्रीलिङ्गमेव भवति-- सर्वधुरां वहतीति।।

79.एकधुराल्लुक् च। (4.4.79)
`एकधुरात्' इत्ययमपि शब्दरूपापेक्षया निर्देशः। अर्थापेक्षया हि परवल्लिङ्गता भवति। अत्रापि पूर्ववत् समाससमासान्तौ वेदितव्यौ। वचनसामर्थ्यात्पक्षे लुग्विधीयते। यदि हि नित्यो लुक् स्यात्, खस्य विधानमनर्थकं स्यात्, यत एव हि लुकं विदध्यात्।ननु चैकधुरशब्दात् केनचिद्विहितो न स्यात्, तस्य कथं लुक् शक्यते विज्ञातुम् ? लुग्वचनादेव यतोऽपि विधिरनुगम्यत इत्यदोषः।।

80. शकटादण्। (4.4.80)
रथशकटहलसीरेभ्यः प्रत्ययविधानमनर्थकम्, `तस्येदम्' (4.3.120) इत्यनेनैव सिद्धत्वात्। शब्दभेदाद्विधानमिति चेदन्यो हि शब्दो रथं वहतीति, अन्यो हि रथस्य वोढेति। तदाऽर्थाश्रयत्वात् प्रत्ययविधानस्यार्थसामान्यात् सिद्धम्। न हि कश्चिद्रव्यमित्युक्ते रथस्यायमित्येवावैति, वहत्यर्थः प्रतीयते। तस्मात् स्यादेव रथाद्यत्।।

81. हलसीराट्ठक्। (4.4.81)
शकटादणेवोत्सर्गः कर्त्तव्यः। एवञ्च वाक्यं करिष्यामः; यता--- रथस्य वोञा रथ्य इति। न तत् विधीयते; तत्र प्रत्ययविधाने `द्विगोर्लुगनपत्ये' (4.1.88) इत्यनेन लुक् प्राप्नोति। अनेन पुनर्न प्राप्नोति, कस्मात् ? `प्रागादीव्यतोऽण्' (4.1.83) ित्यधिकारात्। ननु च क्रियामाणेऽपीह द्विगोरण् प्रत्ययो न प्राप्नोति, `ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' (व्या.प.89) इति ? न; एतदेव हि `शकटादण्' (4.4.80) इत्यवमादिकं ज्ञापकं भवति तदन्तविधेरिति। तेन द्वैहलिकः, द्वैशकटः , द्वैसीरिक इत्येवमादिकं सिद्धं भवति।।

82. संज्ञायां जन्याः। (4.4.82)
अस्त्यत्र यर्भ इति `{इन् इत्येव सूत्रम्-- द.उ.} इन् सर्वधातुभ्यः' (द.उ.1.46) जनयतीति वा। `अत्र कृदिकारादक्तिनः' (ग.सू.50) `सर्वतोऽक्तिन्नर्थात्' (ग.सू.51) इति ङीप्-- जनी, तां वहन्ति जन्याः = जामातुर्वयस्याः। विवाहमानिताभिधीयते। केचित्तु कर्त्तरि जायतेऽस्यां गर्भ इति `कृत्यल्युटो बहुलम्' (3.3.113) इति ल्युटि जननशब्दाच्च ङीपि नकाराकारयोर्लोपेन साधयन्ति। ननु च जनीशब्दादेव यद्विधेयः ? सर्वकालार्थं निपातनमित्येके।।

83. विध्यत्यधनुषा। (4.4.83)
`पद्याः' इति। `पद्यत्यतदर्थे' (6.3.53) इतिपादशब्दस्य पद्भावः। `ऊरव्याः' इति। `वान्तो यि प्रत्यये' (6.1.79) इत्यवादेशः।
`ननु च' इत्यादि। धनुरत्र प्रकृत्यर्थः, प्रत्ययार्थेन वाह्यं करणमपेक्ष्यते, तेन सापेक्षमसमर्थं भवतीत्यसामर्थ्यम् ? ननु चट व्यधनमेवात्र सापेक्षम्, क्रियया करणं सम्बध्यत इति कृत्वा, तच्च व्यधनं क्रियाप्रधानत्वादाख्यातस्य प्रधानं बवति, प्रधानस् सापेक्षस्य भवत्येव वृत्तिः, यथा-- राजुपुरषोऽयमभिरूप इति ? नैतदस्ति; यद्यपि क्रियाप्रधानमाख्यातम्, तथापीह प्रत्ययार्थं एव प्रधानम्। प्रत्ययार्थस्य साधनं व्यद्धा। तथा च प्रागुक्तम्---`क्रियाप्रधानत्वेऽपि चाख्यातस्य तद्धितेः स्वभावात् साधनप्रधानः' इति। अथ क्रियाद्वारेण व्यद्धुरपि करणं प्रत्यपेक्षा भवतीति कल्प्यते, तथा च सति प्रकृत्यर्थस्यापि क्रियाद्वारेणैव करणं प्रत्यपेक्षा भवतीति केन वार्यते ! न हि पादौ विध्यति धनुषेति करणविवक्षायां व्यधनमात्रस्य पादौ कर्म धनुष्करणविशिष्टस्य। तस्माद्व्यधनस्यापि क्रियाकरणे प्रत्यपेक्षेत्यसाम्रथ्यात्प्रत्ययो न भविष्यति। `अनभिधानाच्च' इति। अत्रैवोचपपत्त्यनतरम्। कथं पुनरुपपत्त्यन्तरमित्याह--- `न हि' इत्यादि। धनुषा पद्य इत्युक्ते धनुष पद्यं प्रत्युपलक्षणभावः सम्भाव्यते, यथा--शिखया परिव्राजकमद्राक्षीदित्त्र शिखया परिव्राजकं प्रति। धनुषा सह दृष्टः पद्य इत्येषोऽप्यर्थश्चाशङ्क्यते। न तु पादौ विध्यति धनुषेत्ययमर्थो विवक्षितः प्रतीयते। `एवं तर्हि ' इत्यादिना क्रियाविशेषणपरो धनुषेति निर्देशः; न धनुषः करणत्वप्रतिषेधः। प्रतिषेधे प्रधानमिति दर्शयति--`तेन' इत्यादिना। क्रियत एव धनुषः प्रतिषेधः, तेन क्रिया विशेष्यते। तेन चौरं विध्यतीत्यादौ न भविष्यति। सम्भाव्यते हि चौरादिव्यधनक्रियया धनुषः करणत्वम्।।

84. धनगणं लब्धा। (4.4.84)
कथं पुनरत्र द्वितीया समर्थविभक्तिः, यावता `कर्त्तृकर्मणोः कृति' (2.3.65) इति षष्ठ्या भवितव्यम् ? इत्याह-- `लब्धेति तृन्नन्तम्' इत्यादि। तृन्नन्तस्य हि प्रयोगे `न लोकाव्ययनिष्ठाखलर्थतृनाम्' (2.3.69) इति षष्ठीप्रतिषेधेन द्वितीया भवति।।

85. अन्नाण्णः। (4.4.85)

86. वश गतः। (4.4.86)
वशः = कामः, इच्छा। वसेर्धातोरत एव निपातनादप्रत्ययः। द्वितीयासमर्थविभक्तौ प्रकृतायां वशमिति द्वितीयानिर्देश इष्टे विषये द्वितीयान्ताद्यथा स्यात्, अनिष्टान्मा भूत्। तेनेहैव भवति-- वशं गतः, इच्छाप्राप्तः, विधेय इत्यत्रैव भवति।।

87. पदमस्मिन् दृश्यम्। (4.4.87)
कर्मणः कृतैवाभिहितत्वाद्द्वितीया न सम्भवति। न च द्वितीयाप्रथमाभ्यामन्यत्र विभक्तौ पदमिति रूपमुपपद्यते। तस्मात् प्रथमान्तमेवैतदिति निश्चित्याह-- `निर्देशादेव' इत्यादि।।

88. मूलमस्यावर्हि। (4.4.88)

आवर्हणमावर्हः, उत्पादनमित्यर्थः। वृहेराङ्पूर्वाद्भावे घञ्, आवर्होऽस्यास्तीत्यावर्हीति। द्वितीयाविभक्तिरिह नास्ति। न च प्रथमाद्वितीयाभ्यामन्यस्यां विभक्तौ मूलमित्येतद्रूपमुपपद्यते। तस्मात् प्रथमान्तमेवैतत्। निर्देशादेव प्रथमा समर्थविभक्तिरुपपद्यते इति मत्वाह-- `मूलशब्दात् प्रथमासमर्थात्' इति।।

89. संज्ञायां धेनुष्या। (4.4.89)

`यश्च प्रत्ययः' इति। किमर्थं पुनर्यप्रत्ययो निपात्यते ? इत्याह-- `अन्तोदात्तो ह्ययमपीष्यते' इति। यति सति तित्स्वरेणान्तस्वरितत्वात्। अन्तोदात्तश्चेष्यते। तस्माद्यप्रत्यय एव न्याय्यः। न केवलं संज्ञाविषय एवेष्यते; अपि त्वन्तोदात्तोऽपीत्येषोऽपिशब्दस्यार्थः।।

90.गृहपितना संयुक्ते ञ्यः। (4.4.90)

`संयुक्ते' इति। सम्बद्ध इत्यर्थः।

`अन्यस्यापि' इत्यादि। यथैव हि गृहपतिर्यजनमानो गार्हपत्ये कार्यं करोति, तथा दक्षिणाग्नावाहवनीये च। तस्मादन्यस्यापि दक्षिणादेर्गृहपतिना संयोगोऽस्ति। यद्येवम्, अतिप्रसङ्गोऽन्यत्र प्राप्नोति ? इत्याह-- `तत्र् संज्ञाधिकारात्' इत्यादि। अभिधेयनियमार्थं संज्ञाग्रहणमनुवर्तते, तेनेह न भवत्यतिप्रसङ्गः।।

91. नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवद्ध्यानाम्यसमसमितसम्मितेषु। (4.4.91)

कथं पुनरिहापि समर्थविभक्तिर्लभ्यते ? यावता नेहोपात्ता, नाप्यनुवर्त्तत इत्याह--`प्रत्ययार्थद्वारेण' इत्यादि। द्वारम् = उपायः, कारकमित्यर्थः। इह तार्यादयः प्रत्ययार्थाः। तत्सम्बन्धे कर्त्तरि करणे हेतौ तुल्यार्थयोगे च यथासम्भवं तृतीयैव भवति। ततः समर्थविभक्तिर्लभ्यते। `नाव्यम्' इति। `वान्तो यि प्रत्यये' (6.1.79) इत्यवादेशः। अत्र नावस्तरणक्रियायां कर्त्तृत्वं करणत्वञ्च विवक्षावशाद्भवतीति करणे कर्त्तरि वा तृतीया । एवमन्यत्रापि यथायोगं वेदितव्यम्। `धर्मेण प्राप्यं धर्म्यम्' इति। तत्पुनर्धर्मस्य फलं स्वर्गाद्युच्यते। `ननु च' इत्यादि। ननु च धर्मेण यत्प्राप्यं तद्धर्मादनपेतं भवतीति भावः।

`विध्यः' इति। विषेण वधमर्हतीत्यर्थः। वध्यशब्दस्य `दण्डादिभ्यो यः' (5.1.66) इत्यर्हार्थे व्युत्पादितत्वात्।

`आनाम्यमभिभवनीयम्' इति। अनेकार्थत्वाद्धातूनामत्र नमिरभिभवे वर्त्तते। `पटादीनामुत्पत्तिकारणं मूलम्' इति। दत्तेन हिरण्येन पटादीनामुत्पत्तिर्भवति। `तेन' इति। मूलेन। `तत्' इति। मूल्यम्' । `शेषीक्रियते' इति। अनेनाभिभूयत इत्यस्यार्थमाचष्टे। शेषीक्रियते = गुणभावमापाद्यते, अप्रधानीक्रियत इत्यर्थः। अप्रधानीकरणेव अभिभवः। कथं पुनस्तेन तच्छेषीक्रियते ? इत्याह-- `मूल्यं हि' इत्यादि। हिशब्दो हेतौ। मूल्यमिह कर्त्तृ, मूलं कर्म। तत्प्रणयेन हिरण्येन पटादयो विक्रीयन्ते। तत्र यन्मूलातिरिक्तं हिरण्यं लाभः, तन्मूल्यं गुणो भावः। सह तेन वर्त्तत इति सगुणः। गुणः पुनरिह तदेव मूल्यं वेदितव्यम्। तदेतदुक्तं भवति-- यस्मान्मूल्यभागेनैव भागभूतेन सभागं मूलं करोति न न्यूनं तन्मूल्यमभिधीयत इति। मूल्ये सति तत् तत्र द्विगुणं करोतीत्युच्यते। का पुनरियं युक्तः, यदि नाम सगुणं मूलं करोतीत्युच्यते तत् कथं मूल्यमभिभूयते ? यतेयं युक्तिस्तदाख्यायते-- इह हि शास्त्रे यत्सिद्धमुपकारि तदङ्गमप्रधानम्, यच्चोपकारसाध्यमनुपकारकं तदङ्गि प्रधानमित्येषा व्यवस्था। तथा चोक्तम्---

शास्ते द्व्यमेवेह स्यादङ्गमथ वा भवेदङ्गि तत्र।

उपकारि सिद्दमङ्गं साध्यानुपकारकमङ्गीति।। इति।।

एवञ्च मूल्येन मूलं सगुणं क्रियामाणमुपकार्यत्वात् प्रधानं सम्पद्यते, मूल्यं त्वनुपकार्यत्वादप्रधानं सम्पद्यते। तन्मूलेन मूल्यमभिभूयते, तदपेक्षया तस्याः प्रधानभावापत्तेः।

`तुलया सम्मितं तुल्यम्' इति। अत्र तुल्यार्थयोगे तृतीया। यद्यपि तुल्यार्थयोगे षष्ठ्यपि विधीयते,तथापि नौप्रभृतिभ्यस्तृतीयासमर्थेभ्यः प्रत्ययविधानात् तुलाशब्दादपि तृतीयासमर्थादेव प्रत्ययो विज्ञायते। `यथा' इत्यादिना तुलया सादृश्यं दर्शयति। ननु च `तुल्यास्यप्रयत्नम्' (1.1.9) इति निपातनादेव तुल्यशब्दस्य साधुत्वं भविष्यति, स च सदृश एव लोके प्रसिद्ध इति नार्थस्तुलाशब्दात् सम्मिते प्रत्ययविधानेन ? स्वरार्थं तु प्रत्ययविधानात्। `यतोऽनावः' (6.1.213) इत्याद्युदात्तत्वं यथा स्यात्। न हि निपातने सत्याद्युदात्तत्वं तुल्यशब्दस्य शक्यते विज्ञातुम्।।

92. धर्मपथ्यर्थन्यायादनपेते। (4.4.91)

`निर्देशादेव पञ्चमी समर्थविभक्तिः' इति। यद्येवम्, `धुरो यड्ढकौ' (4.4.77) इत्येवमादावपि निर्देशादेव समर्थविभक्तिर्विज्ञेया ? नैष दोषः; तत्र हि द्वितीया समर्थविभक्तिः। एवं ज्ञानं स्यात्--- द्वितीयानुवृत्तिरपार्थिका स्यात्। इह तु न काचिद्विभक्तिरनुवर्त्तते, पञ्चमी च सूत्रे श्रूयते। तस्मात् सैव समर्थविभक्तिरनुकल्पयितुं युक्ता।। (4.4.92)

93. छन्दसो निर्मिते। (4.4.93)

प्रत्ययार्थसामर्थ्यलभ्या' इति। `निर्मिते' इति प्रत्ययार्थः। तत्र च्छन्दसः करणत्वमिति सामर्थ्यात् तृतीया समर्थविभक्तिर्लभ्यते। छन्दःशब्दोऽयं वेदे त्रिष्टुवादौ, इच्छायाश्च वर्त्तते; इह त्विच्छायां वर्त्तमानो गृह्यते, अत एवाह-- `इच्छाया कृतः' इति। इच्छावृत्तिस्तु संज्ञाग्रहणस्याभिधेयनियमार्थस्यानुवृत्तेर्लभ्यते।।

94. उरसोऽण् च। (4.4.94)
`संज्ञाधिकारादभिधेयनियमः' इति। तेनोरसा निर्मितं सुखमित्यादौ न भवतीति भावः।।

95. हृदयस्य प्रियः। (4.4.95)
`हृद्यः' इति। `हृदयस्य हृल्लेख' (6.3.50) इत्यादिना हृद्भावः।।

96. बन्धने चर्षौ। (4.4.96)
ऋषिशब्दोऽयमस्त्येव गुणवति पुरुषविशेषे, अस्ति च वेदे;इह संज्ञाधिकारादेव न मनुष्यग्रहणमिति दर्शयति-- `ऋषिर्वेदो गृह्यते (इति)।।

97. मतजनहलात् करणजल्पकर्षेषु। (4.4.97)
`{प्रत्ययार्थसामर्थ्याल्लब्धा--मुद्रितः पाठः।} प्रत्ययार्थसामर्थ्यालभ्या' इति. करणादयः प्रत्ययार्थाः। तत्र करणादयः शब्दा भावे करणे च व्युत्पाद्यन्त इति सामर्थ्यादेवोपलभ्यमाना षष्ठीविभक्तिर्विज्ञायते। यद्यपि कर्षशब्दः परिमाणवचनोऽप्यस्ति, तथापि करणादीनां साहचर्यात् क्रियाशब्द एव गृह्यते। करणशब्दो भावसाधनः। यदा तु करणसाधनः, तदा क्रियतेऽनेनेति करणम्, `रथसीताहलेभ्यो यद्विधौ' (वा.473) इति तदन्तविधिरत्रेष्यते। तस्योदाहरणम्---`द्विहल्यः' इति दर्शयति। `भावसाधनञ्च' इति। अत्रापि पूर्ववद्विभागो वेदितव्यः।।

98. तत्र साधुः। (4.4.98)
`सामन्यः' इति। `ये चाभावकर्मणोः' (6.4.168) इति प्रकृतिभावः। साधुरिह निपुणः, योग्य इति भावः।।

99. प्रतिजनादिभ्यः खञ्। (4.4.99)
जनं जनं प्रति प्रतिजनम्, `यथार्थेऽव्ययम्' (2.1.6) इत्यव्ययीभावः। `परस्यकुलम्, अमुष्यकुलम्' इति। निपातनादलुक्। `षष्ठ्या आक्रोशे' (6.3.21) इति वा यदा परकुलत्वेनाक्रुश्यते।
`यत्र' इत्यादि। `प्रतिजन' , `सर्वजन' इत्येवमादिषु केषुचिद्धितार्थ एव प्रतियते, न तु प्रवीणो योग्यशब्दस्यार्थः। तेन तत्र वचनसामर्थ्यात् परेऽपि प्राक्क्रीतीयाः प्रत्यया बाध्यन्ते। अन्यथा हि वचनमनर्थकं स्यात्।।

100. भक्ताण्ण। (4.4.100)

101. परिषदो ण्यः। (4.4.101)

102.कथादिभ्यष्ठक्। (4.4.102)

103. गुडादिभ्यष्ठञ्। (4.4.103)

104. पथ्यतिथिवसतिस्वपतेर्ढञ्। (4.4.104)

105. सभाया यः। (4.4.105)
`स्वरे विशेषः' इति। यति सति `यतोऽनावः' (6.1.213) इत्याद्युदात्तं स्यात्, ये तु सति प्रत्ययस्वरेणान्तोदात्तं स्यात्।।

106. ढश्छन्दसि। (4.4.106)

107. समानतीर्थे वासी। (4.4.107)
वसतीति वासी। निपातनादेव णिनिः, ग्रहादिलक्षणो वा। अथ वा--- वसनं वासः, सोऽस्यास्तीति वासी, मत्वर्थीय इति। अथ `तत्र' (4.4.98) इति वर्त्तमाने पुनः `समानतीर्थेट इति सप्तम्युपादानं किमर्थम् ? प्रकृतित्वेनेष्ठात् सप्तम्यन्ताद्यथा स्यात्; अनिष्टान्मा भूत्। एतेन गुरुवचनो यस्तीर्थशब्दस्तदन्तात् सप्तमीसमर्थात् प्रत्ययो भवति, न तु यः प्रयोगादिवचनस्तदन्तात्। अमुमेवार्थं चेतसि कृत्वाऽऽह-- `तीर्थशब्देन गुरुरुच्यते' इति।।

108. समानोदरे शयित ओ चोदात्तः। (4.4.108)
`ओकारश्चोदात्तः' इति। यतः स्वरे प्राप्त ओकारस्योदात्तत्वं विधीयते। `शयितः स्थित इत्यर्थः'(इति)। अनेकार्थत्वात् तस्य स्थितावपि वृत्तेः; तथा हि --- जलाशय इति। समानोदर्यः' इति। समानञ्च तदुदरञ्चेति समानाधिकरणसमासं कृत्वा ततः प्रत्ययः।।

109. सोदराद्यः। (4.4.109)
एकदेशविकृतस्यानन्यत्वात् सोदर्शशब्दादपि पूर्वेण यत्येव प्राप्ते यो विधीयते। `विभाषोदरे' (6.3.88) इति विषयसप्तमीति मत्वाऽऽह--- `यकारादौ प्रत्यये' इत्यादि। `ओ चोदात्त इति नानुवर्त्तते' इति। प्रत्यय विधानसामर्थ्याद्य उदात्तः।।

110. भवे छन्दसि। (4.4.110)
`अणादीनां घादीनाञ्चापवादः' इति। `तत्र भवः' (4.3.53) इति प्राप्तानाम्। यद्येवम्, यता बाधितत्वाच्छन्दसि तेषामभावः स्यात्, ततश्च मुञ्जावत्यं मौञ्जावतं वेत्येवमादि न सिध्यति ? इत्याह--- `सति दर्शने' इत्यादि। कथं पुनरेवं लभ्यते ? इत्याह---`सर्वविधीनाम्' इत्यादि। सर्वविधिव्यभिचारस्तु `बहुलं छन्दसि' (3.2.88) इति बहुलग्रहणाल्लभ्यते। मुञ्जावान् नाम पर्वतः, तत्र भवोऽसौ मौञ्जावतः।।

111. पाथोनदीभ्यां ड्यण्। (4.4.111)

112. वेशन्तहिमवद्भ्यामण्। (4.4.112)

113. स्रोतसो विभाषा ड्यड्ड्यौ। (4.4.113)
ड्यड्यड्ययोः स्वरे विशेषः। ड्यति हि सति `तित् स्वरितम्' (6.1.185) इत्यन्तस्वरितः स्यात्, ड्ये तु प्रत्ययस्वरेणान्तोदात्तत्वं भवति।।

114. सगर्भसयूथसनुताद्यन्। (4.4.114)
समानो गर्भः, समानो यूथ इति कर्मधारयः। `णु स्तुतौ' (धा.पा.1035) , भावेक्तः, समानं नुतमस्येति बहुव्रीहिः। समानञ्च तन्नुतञ्चेति कर्मधारयो वा। `स्वरे विशेषः' इति। यति सति `स्वरितम्' (6.1.185) इत्यन्तस्वरितत्वं स्यात्, यनिसति नित्स्वरेणाद्युदात्तत्वं स्यात्। `सर्वत्र समानस्य च्छन्दसि' इति। `समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु' (6.3.84) इत्यस्योपलक्षणपर एकदेश उपात्तः।।

115. तुग्राद्घन्। (4.4.115)

116. अग्राद्यत्। (4.4.116)
`सामान्येन यद्विहितः' इति। `भवे च्छन्दसि' (4.4.110) इत्यनेन। अथ यद्ग्रहणं किमर्थम्, न यथाविहितमेवोच्येत ? नैवं शक्यम्; `अग्रश्चाड्डिमच्' (वा. 448) इत्येवामग्रशब्दाड्डिमजप्युक्तः, तत्र यथा विहिते प्रत्यय उच्यमाने डिमचपि स्यात्। तस्माद्यद्ग्रहणं कर्त्तव्यम्।।

117. घच्छौ च। (4.4.117)
`स्वरे विशेषः' इति। घे विहितेऽन्तोदात्तत्वं स्यात्, घनि तु सत्याद्युदात्तत्वं भवति।।

118. समुद्राभ्राद्घः। (4.4.118)
ननु च `अजाद्यन्तम्' (2.2.33) `अल्पाच्तरम्' (2.2.34) इत्यभ्रशब्दस्य पूर्वनिपातेन भवितव्यम्, तत्कथमपूर्वनिपातः ? इत्याह---- `अभ्रशब्दस्य' इत्यादि।।

119. बर्हिषि दत्तम्। (4.4.119)

120. दूतस्य भागकर्मणी। (4.4.120)
भावे `तस्येदम्' (4.3.120) इत्यणि प्राप्ते `गुणवचनब्राह्मणादिभ्यः' (5.1.124) इति ष्यञि यतो विधाम्। येषां `सख्युर्यः' (5.1.126) इत्यत्र `दूतवणिग्भ्याञ्च' (वा.540) इत्युपसंख्यायते, तेषां कर्मणि ये प्राप्ते।।

121. रक्षोयातूनां हननी। (4.4.121)
`निर्देशादेव समर्थविभक्तिः' (इति)। सा पुनः षष्ठी `कर्त्तृकर्मणोः कृति' (2.3.65) इति कर्मणि द्रष्टव्या। योग्यतामात्रे विवक्षिते हन्यतेऽनयेति हननी, करणे ल्युट्, `टिड्ढाणञ्' (4.1.15) इति ङीप्। ननु च रक्षीयातुशब्दयोर्द्वित्वाद्द्विवचनेन भवितव्यम्, तत्कथमिदमुक्तम् ? वचनसामर्थ्यात् सम्भावनमेव स्तुतिरिति दर्शयितुमाह---`बहुवचनम्' इत्यादि। योगश्चायं `तस्येदम्' (4.3.120) इत्यणि प्राप्ते वेदितव्यः।।

122. रेवतीजगतीहविष्याभ्यः प्रशस्ये। (4.4.122)
`षष्ठीसममर्थेभ्यः' इति। सामर्थ्याद्धि षष्ठयेव समर्थविभक्तिर्विज्ञायते। यथा हि-- `{शंस----प्रा.मु.पाठ}शंसु स्तुतौ' (धा.या.728) इत्यतोऽस्मादेव निपातनाद्भावे क्यप्प्रत्ययः; `कृत्यल्युटो बहुलम्' (3.3.113) इति बहुलवचनात्। तत्रावश्यं कृद्योगलक्षणया षष्ठ्या भवितव्यम्। अयमपि योगः पूर्ववदणि प्राप्ते वेदितव्यः।।

123. असुरस्य स्वम्। (4.4.123)
`षष्ठीसमर्थात्' इति। `असुरस्य' इति निर्देशादेव षष्ठी समर्थविभक्तर्लभ्यते। `स्वम्' इति। आत्मीयमित्यर्थः। `अणोऽपवादः' इति। `तस्येदम्' (4.3.120) इति प्राप्तस्य।।

124. मायायामण्। (4.4.124)
मायायां नेति वक्तव्येऽण्ग्रहणं विस्पष्टार्थम्।।

125. तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः। (4.4.125)
स विवक्षितोऽवयवोऽस्मिन्निति तद्वान्। कः पुनरसौ ? समुदायः। अत एवाह-- `तद्वानित्यवयवेन समुदायो निर्दिश्यते' इति। एतेनैकदेशादिदं प्रत्ययविधानमित्युक्तं भवति. ` वर्चःशब्दोऽस्मिन् मन्त्रेऽस्ति' इत्यादिना तत्समुदायं प्रदर्शयति। `चयनवचनः' इति। चिनोतेरेव करणे लुप्। `तेजस्या'इति। तेजःशब्दोऽस्य मन्त्स्यास्तीति तेजस्वानुपधानमन्त्रः। शेषं विग्रहवाक्यादि पूर्ववत्। मन्त्रादेव, समुदायान्मा भत्। यद्यपि समुदायः प्रातिपदिकमं न भवति, तथापि वचनसामर्थ्यापि स्यात्। किं तर्हि वचनान्न लभ्यत इत्यभिप्रायः।
`इतिकरणो नियमार्थः' इति। असतीहेतिकरणे मन्त्रे बहूनां सम्भवे सर्वेण पदेन तद्वान् मन्त्रो गृह्यते। अस्मिंस्तु सति तेन नियमार्थेन येनैव पदेन तद्वता मन्त्रेणेष्टकोपलक्ष्यते,तेनैव सर्वो मन्त्रो गृह्यत इत्येतदुपपन्नं भवति।
अथ मतुब्ग्रहणं किमर्थम्, यावता मतुबन्तादयं विधीयते, तत्र प्रत्ययस्य लुग् विज्ञायमानो विधानसामर्थ्याच्च मतुप एव भविष्यतीत्यपार्थकं मतुब्ग्रहणं ? नैवम्; उत्तरत्र `अश्विमानण्' (4.4.126) इत्यतर् ह्युपवानमात्रावयवे द्वौ मत्वर्थीयौ-- इनिमतुपौ, तत्रासति मतुब्ग्रहणे लुक् स्यात्; अस्मिन् सति मतुप एव भवति।।

126. अश्विमानण्। (4.4.126)
`आश्विनीः' इति। `टिड्ढाणञ्' (4.1.15) इति ङीप्।।

127. वयस्यासु मूर्ध्नो मतुप्। (4.4.127)
`मूर्धन्वतीः' इति । `उगितश्च' (4.1.6) इति ङीप्। वयस्यास्ता मूर्धन्वत्यश्चेति वयस्वामनुपधानो मन्त्रः, तासामिति वयस्याः। मूर्धन्वानुपधानो मन्त्रः, तासामिति मूर्धन्दत्यः।
`यत्रि' इत्यादि। न ह्येवंविधो यासामुपधानो मन्त्रस्ततो वयस्यात्विति वचनात्। अत्र मूर्धशब्द एवास्ति, न वयः शब्दः, ततो न भवति--मूर्धन्वत्य इति।
`वक्तव्ये' इति। तद्वानित्यधिकारान्मतुबन्तान्मर्धशब्दात्प्रत्ययेन भवितव्यम्। अतः `मूर्धन्वतःर' इति युक्तं वक्तुम्, तन्मतुपो भाविनं लुकं चेतसि कृत्वा। एवंलघु सूत्रं भवति।।

128. मत्वर्थे मासतन्वोः। (4.4.128)

मत्वर्थे मासतन्वोरिति प्रत्ययार्थविशेषणम्। मत्वर्थग्रहणादेव प्रथमा समर्थविभक्तिरस्त्युपाधिका लभ्यते ? इत्याह-- `प्रथमसमर्थादस्त्युपाधिकात्' इति। `{अनन्तरार्थेव वा-- काशिका} अनन्तरार्थे च' इति। न केवलं मत्वर्थ एव त्ययो वक्तव्यः।

`ननु च तप) प्रभृतीनां प्रत्ययार्थमासादिवचनानामभिधेयलिङ्गवचनानि भवन्तीति पुंल्लिङ्गता प्राप्वोति, तस्याञ्च सत्यां `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घेण भवितव्यम्; तत्कथं तपश्च सहश्च नभश्चेति प्रयोगः ? इत्यत आह--`नपुंसकलिङ्गं छान्दसत्वात्' इति। अयं हि च्छान्दसः प्रयोगः। तत्रेति पुंल्लिङ्गेऽभिधेये नपुंसकलिङ्गमुपपद्यते। `व्यत्ययो बहुलम्' (3.1.85) इति लिङ्गव्यत्ययस्य च्छन्दसि विधानात्। इडस्मिन्मासेऽस्तीति `इषः' । ऊर्घस्मिन् मासेऽस्तीति `ऊर्जःर'। शुगस्मिन् मासेऽस्तीति `शूचिः' शुग् वास्मिन् मासेऽस्तीति `शुक्रः'। `चोः कुः' (8.2.30) इति कुत्वम्। अर्थग्रहणं किमर्थम्, यावता `मतौ छः सूक्तसाम्नोः' (52.59) इत्यत्र यथा `मतौ' इत्युच्यमानो मत्वर्थे प्रत्यय उच्यते, तथेहापि लभ्यते, तस्मात् `मतौ' इत्येवं कस्मान्नोक्तम् ? सत्यमेतत्; विस्पष्टार्थमर्थग्रहणम् ।।

129. मधोर्ञ च। (4.4.129)

130. ओजसोऽहनि यत्खौ। (4.4.130)

असन्तत्वात् `अस्मायामेधास्रजो विनिः' (5.2.121) इति विनिप्रत्यये प्राप्ते मतुपोऽपवादैः सह समावेशात् मतुपि यत्खौ विधीयेते। अथ यद्ग्रहणं किमर्थम्, ननु `ओजसोऽहनि ख च' इत्येवोच्येत, चकारेण यथाविहिते प्रत्यये विज्ञायमाने यदिति च भविष्यति ? नैवं शक्यम्; चकारेण हि सन्देहः स्यात्-- किमनेनानन्तरसूत्रविहितो ञोऽनुकृष्यते ? अथ प्रकृतो यदिति ? तस्मादसन्देहार्थं यद्ग्रहणं कर्त्तव्यम्।।

131. वेशोयशादेर्भगाद्यल्। (4.4.131)

लित्करणं स्वरार्थम्।।

132. ख च। (4.4.132)

`योगविभागः' इत्यादि। यदि पूर्वसूत्र एव खग्रहणं क्रियते; द्वे प्रकृती प्रत्ययावपि द्वावेवेति सामर्थ्याद्यथासंख्यं प्रसज्येत। तस्मात् तन्निरासार्थो योगविभागः।ननु `यथासंख्यमनुदेशः समानाम्' (1.3.10) इत्यत्र इह कस्मान्न भवति---`वेशोयशञादेर्भगाद्यल् ख च' इति दर्शयितवा स्वरितेन लिङ्गेन यथासंख्यमित्युक्तम् ? तदेकयोगतामभ्युपेत्य। भवतु नामैकयोगः, तथापि यथासंख्यं न भवतीति दर्शनार्थम्, तत कुतो यथासंख्य निरासार्थो योगविभाग ? अत आह--- `उत्तरार्थश्च' इति।।

133. पूर्वैः कृतमिनयौ च। (4.4.133)

`पूर्वः कृत मिनयौ च' इति। ख एव यथा स्यात्, यन्मा भूत्। `पूर्वैरिति बहुवचनान्तेन ' इत्यादि। `पथिभिः पूर्वैःर' इत्येवमादिभिर्वेदवाक्यैः पूर्वपुरुषकृतत्वेनयदा प्रशंसां प्रतिपादयितुं निष्ठा साध्वेव शक्यते विज्ञातुम्, तदा पूर्वपुरुषाभिधायिनः पूर्वशब्दात् प्रत्यय उपपद्यते। तस्मात् पूर्वैरिति बहुवचनान्तेन पूर्वपुरुषा अभिधीयन्ते। छन्दसामर्थपरत्वाद्बहुवचनस्य।तेन पूर्वपुरुषाणां पन्था आस्थितः सम्पद्यत इति दर्शयितुमाह-------`तत्कृताः पन्थानःर' इति।।

134.

135.

136. मतौ च। (4.4.136)

शब्दे कार्यासम्भवात् मतुप्शब्देन मत्वर्थो लक्ष्यत इत्याह---`मत्वर्थे' इत्यादि। मत्वर्थे च प्र प्रथमासमर्थादस्त्युपाधिकात् प्रत्ययो विज्ञायत इत्याह-- `सहस्रमस्य विद्यते' इति।।

137. सोममर्हति यः। (4.4.137)

`तदर्हति' (5.1.63) इत्यर्हार्थे ठकि प्राप्ते यो विधीयते। `स्वरे विशेषः' इति। यत्याद्युदात्तत्वं स्यात्। यप्रत्यये तु सत्यन्तोदात्तत्वं भवति।।

138. मये च। (4.4.138)
`{नास्तीयं पंक्तिः-- काशिका, पदमञ्जरी च}रूप्यमयटोऽपवादो योगः' इति। `मय इति मयडर्थो लक्ष्यते' इति। शब्दे कार्यासम्भवादिति भावः। `तत्र यथायोगं समर्थविभक्तिः' इति। तत्रागतार्थ पञ्चमी, विकारावयवयोः षष्ठी। प्रकृतवचने प्रथमेति यथायोगार्थः।।

139. मधोः। (4.4.139)
मयडर्थ आगते प्रकृतवचने यथायोगं रूप्यमयटोः प्राप्तयोर्यद्विधीयते। तत्र मयटो हि `द्व्यचश्छन्दसि' (4.3.150) इति प्राप्तस्य `नोत्वद्वर्धविल्वात्' (4.3.151) इति प्रतिषेध उच्यते।।

End of the page is not found

5.1
श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचिता
न्यासापरपर्याया
काशिकाविवरणपञ्जिकाख्या
काशिकाव्याख्या - द्वितीयो भागः
पञ्चमोऽध्यायः
प्रथमः पादः

1. प्राक् क्रीताच्छः। (5.1.1) [`अव्ययम्'--इति मुद्रितः पाठः (चौखा)-1967)
विधिः, अधिकारः, परिभाषा वेति त्रयमत्र सम्भाव्यते। यथा चैतत् त्रितयमपि निर्दोषम्, तथा `प्राग्दीव्यतोऽण्' (4.1.83) इत्यत्र दर्शतम्। यद्येवम्, काशिकाकारेण कस्मान्न सूचितम्? एकदेशानुस्मरणेन सर्वस्य सूचितत्वादित्यभिप्रायः। अथ प्रागिति कोऽयं निर्देशः, यावता प्रपूर्वस्याञ्चतेः क्विनि नलोपादिके विहिते `उगिदचाम् (7.1.70) ति नुमि, संयोगान्तलोपे च, `क्विन्प्रत्ययस्य कुः' (8.2.62) इति नकारस्य ङकारे प्राङिति भवितव्यम्? अथेदृशी व्युत्पत्तिराश्रीयेत, यावता `अञ्चतेश्चोपसंख्यानम् (वा.336) इति कृते ङीपि प्राच्यां दिशि वसतीति `दिक्शब्देभ्यः सप्तमी' (5.3.27) इत्यादिना अस्तातिः, तस्य `अञ्चेर्लुक्' (5.3.30) इति लुक्, `लुक्तद्धितलुकि' (1.2.49) इति ङीपोऽपि `तसिलादिस्तद्धित एधाच्पर्यन्तः' इत्यव्ययत्वे `अव्ययात्' (2.4.82) इति सोर्लुकि `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणप्रतिषेधात् सर्वनामस्थानाभावे नुमोऽप्यभावः, ततः कुत्वे सति प्रागिति सम्पद्यते? यस्तु मन्यते--"आद्येऽपि पक्षे क्रियाविशेषणत्वान्नपुंसकत्वम्, क्रियाविशेषणानां यथा नपुंसकत्वम्, कर्मभावश्च; तथा `करणे च स्तोकाल्पकृत्छ्र' (2.3.33) इत्यत्र प्रतिपादितम्, तत्र कर्मणि द्वितीयायाः `स्वमोर्नपुंसकात्' (7.1.23) इति लुकि कृते पूर्ववन्नुमभावः" इति, तन्मते द्वितीयैकवचनान्तं पदं सञ्जायते। तदेवमितरस्मिन् पक्षे `षष्ठ्यतसर्थप्रत्ययेन' (2.3.30) इति षष्ठ्या भवितव्यम्, तत्कथं `क्रातात्' इति पञ्चमीनिर्देशः? नै तदस्ति; यावता `अन्यारादितरर्त्तेदिक्शब्दः' (2.3.29) इत्यत्रेदमुक्तम्दिक्शब्दत्वादेव सिद्धेऽञ्चूत्तरपदग्रहणं `षष्ठ्यतसर्थ' इत्यनेन प्राप्तां षष्ठीमपि बाधित्वा पञ्चम्येव यथा स्यादिति कुतः षष्ठीप्रसङ्गः। अतो व्यवस्थितमिदम्--प्रक् क्रीतादिति।
अथ प्राग्वचनं किम्, न `क्रीताच्छः' इत्येवोच्येत? नैतदस्ति; एवं ह्यु च्यमाने क्रीतशब्द एव प्रकृतित्वेन ज्ञायेत, ततश्च क्रीतशब्दादेव प्रत्ययः स्यात्। तस्मात् क्रीतादित्यवधिद्योतनार्थं प्रागिति वक्तव्यम्। तर्ह्ययमर्थः `प्राग्घितात्' (4.4.75) इत्यतः प्रकृतेन प्राग्ग्रहणेन हि सम्बध्यते। एवं तत्रैतत् स्यात्--तद्धि `भवे च्छन्दसि' (4.4.110) इति, तेन च्छन्दोऽधिकारसय निवृत्तेः। तर्हि हि `प्राग्दीव्यतः' (4.1.83) इत्यतः प्रकृतत्वात् तेनापि च वहतेरित्येवमादिकं सम्बध्येत, यथा--`स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' (4.1.87) इति? नैतदस्ति; एवं हि `सोमाट्ट्यण्' (4.2.30) इत्यादौ यत्र पञ्चमी श्रूयते तत्र सर्वत्र प्राग्वचनेन सम्बन्धे न ज्ञायते--को विधिः, का च प्रकृतिरिति स्यात्। येषामवधित्वमिष्यते, तेषामेव प्राक्शब्दमधीतवानिति। इह तु प्रकृतेन प्राग्वचनेन सम्बध्यते। तननु च विपर्ययः कसमान्न भवति--भवनादिति प्रकृतिः स्त्रीपुंसाभ्यामित्यवधिनिर्देश इति? नैतदस्ति; अवदेरकत्वादेकवचनेन निर्देसो न्याय्यः प्रकृतिनिर्देशे तु द्वे एव प्रकृती परस्परापेक्षे इति द्विवचनमुपपद्यते। ननु च विशदमिदमुदितमप्यर्थज्ञानम्। स्वरित लिङ्गादधिकाराणामासङ्ग इत्येतद्भवता विस्मृतम्, तदेवम् `सोमाट्ट्यण्' (4.2.30) इत्यादौ कः प्राग्वचनसम्बन्धप्रसङ्ग इति नार्थः प्राग्ग्रहणेन? सत्यमेतत्; किन्तु स्वरितत्वास्वरितत्वख्यापनपरम्परया मन्दधियो मोहमासादयन्तीति तत्प्रतिपत्त्यर्थं प्राग्ग्रहणं कर्त्तव्यम्।
`अवत्सीयः' इति। विकल्पनात् त्रयमत्र सम्भवति--अनुत्पन्ने प्रत्यये नञास्य सम्बन्ध इति, उत्पन्ने वा संसर्गः, उत्पत्तिकाल एवेति। तत्राद्ये पक्षे वत्सदन्यस्मै हितमितौष्टाभिधानं न प्राप्नोति। न चापि चतुर्थी; हितार्थस्य प्रतिषिध्यमानत्वत्। तृतीये तु पक्षे यता दोषो न भवति तथा प्रतिविधीयते। तत्र

वत्सहितशब्दयोः पदान्तरनिरपेक्षयोः क्रियापदेन भवतिनानुगम्मानत्वात्, न च ब्राह्मसम्बन्धोऽन्तरङ्गसम्बन्धं निवर्त्तयितुं शक्नोति। अत एव न देवदत्ताय गां ददातीति सम्प्रदाने चतुर्थी भवति; कर्मणाभिप्राप्तेरन्तरङ्गत्वादिति। तथानेन च क्रमेण यत्रापि प्राप्तिर्न विद्यते, केवलं त्विच्छामात्रमेव, अत्रापि कर्मसंज्ञा प्रवर्तते, तद्यथा-ग्रामं गन्तुमिच्छामि न कश्चित् सहायोऽस्तीति।

यदप्युच्यते-असामर्थ्यात्तद्धितेन न भवितव्यमिति, तदेतदप्यसारम्; यदयम्, `नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः' (6.2.155) इति तदन्तान्युत्तरपदानि नञो गुणप्रतिषेधे वर्त्तमानानि पराण्यन्तोदात्तानि भवन्तीति तद्धितग्रहणमनर्थकं स्यात्।

अथ किमर्थमियानवधिरुपादीयते, न हि तत्र तावदस्य व्यापारोऽस्ति; प्रत्ययान्तरैर्बाधितत्वात्। लघुत्वात् `प्राक्ठञश्छः' इति वक्तव्यम्? इत्यत आह- `अर्थोऽवधित्वेन' इत्यादि। कः पुनरर्थमवधित्वेनाङ्गीकुर्वतो गुण इति चेत्? अयमभिप्रायः-`प्राक्ठञश्छः' इत्युच्यमाने प्राक् ठञो याः प्रकृतयस्ताभ्यश्छो भवतीत्यर्थः स्यात्। ततश्चाधिकारस्य प्रतियोगोपस्थानादपवादविषये छप्रत्ययः प्रसज्येत। अर्थे त्ववधित्वेनोपादीयमाने प्राक् क्रीताद्येऽर्थास्तेषु च्छो भवतीत्ययमर्थः सम्पद्यते, ततोऽतिप्रसङ्गो न भवति। तेन समानेऽर्थे प्रकृतिविशेषादुत्पद्यमानोऽपवादश्छं बाधते। ननु च `प्राक् ठञः' इत्युच्यमानेऽपवादविषयेऽपि च्छो न भविष्यत्येव; ज्ञापकात्, यदयं `विभाषा हविरपूपादिभ्यः' (5.1.4) इति विभाषाग्रहणं शास्ति; इतरथा ह्यधिकाराच्छोऽपि लभ्ध एवेति विभाषाग्रहणमनर्थकं स्यात्? सत्यमेतत्; किन्तु ज्ञापकद्वारेणार्थप्रतिपत्तौ सत्यां प्रतिपत्तिगौरवं स्यात्। तस्मात् सुखप्रतिपत्त्यर्थमर्थोऽवधित्वेनोक्तः। अन्ये पुनराहुः--गृहीत इति `आशंसायां भूतवच्च' (3.3.132) इत्यनेन भविष्यति निष्ठाप्रत्यय इति। तेनायमर्थः सम्पद्यते-वत्सीयादिरूपसिद्ध्यर्थमर्थमवधिं ग्रहीष्यामीति। अतः शालातुरीयेण `प्राक् ठञश्छः' इति नोक्तम्; अन्यथा हि प्रत्ययावधित्वे प्रतिपदोक्ता अन्तरङ्गा इत्युपात्ताभ्यः प्रकृतिभ्य एव प्रत्ययः स्यादित्याशंक्येत।

अन्ये पुनरन्यथा वर्णयन्ति-`परिखया ढञ्' (5.1.17) इत्यत्र `छयतोः पूर्णोऽवधिः' इत्यभिधास्यति; ततश्च तेन क्रीतमिति वक्ष्यतीत्युच्यते, ततश्चेदं विरुद्धमित्याह-`अर्थोऽवधित्वेन' इत्यादि। गतार्थम्। नैयायिक इत्याह-"क्वचिदथोऽवधित्वेन गृह्यते, यता-`आर्हात्' (5.1.19) `भवनात्' (4.1.87)। इति, क्वचित् प्रत्ययः प्राग्वहतेः--`आ च त्वात्' (5.1.120) इति, क्वचित् प्रकृतिः--`आकडारात्' (1.4.1) `प्राक्कडारात्' (2.1.3) इति, क्वचिदेकदेशः-- `प्राग्दीव्यतोऽण्' (4.1.83) इति, क्वचिन्निरवधिः प्रत्ययः--`ङ्याप्प्रातिपदिकात्' (4.1.1) इति; तेनायमात्मनो वैचित्र्यमाचार्यो दर्शयतीत्यवसीयते" इति। अथ क्रीतशब्दादेव पूर्वेण च्छप्रत्ययो भवतीत्येवं कस्मान्न विज्ञायते, यथा-`विभाषा सुपो बहुच् पुरस्तात्तु' (5.3.68) इति? अनभिधानात्। न हि क्रीतशब्दात् पुरस्तादुत्पद्यमानेन प्रत्ययेन कस्यचिदर्थस्याभिधानमस्ति। न चापि `तेन क्रीतम्' (5.1.37) इति निर्देश उपपद्यते। तत्रैवमपि प्राक् क्रीतशब्दादेव प्रत्ययो भवतीत्येव कस्मान्न विकल्प्यते? अनभिधानादेव। न हि तत उत्पन्नेन प्रत्ययेन विवक्षितोऽर्थोऽवगम्यते। अर्थान्तरं भवादिकम्, तत्र च वृद्धलक्षणश्छ एव सिद्ध इत्यनर्थकमिदं स्यात्। तस्मात् प्रागुदितमेव प्रयोजनं न्याय्यम्।।

2. उगवादिभ्यो यत्। (5.1.2)

उगिति प्रत्याहारग्रहणं वा स्यात्? उवर्णग्रहणं वा? तत्राद्ये पक्षेऽयं वाक्यार्थो जायते-उगन्तेभ्यः प्रातिपदिकेभ्योऽवादिभ्योऽवकारादिभ्योऽवसुप्रभृतिभ्य इति। वकारादीन् वर्जयित्वेत्यर्थः। ननु चैवं सति पञ्चम्या निर्देशः स्यात्? नैष दोषः; `सुपां सुलुक्' (7.1.39) इति लुका निर्दिष्टत्वात्। एवं तर्हि प्रातिपदिकेषु गवादिपाठसामर्थ्यात् प्रत्याहारग्रहणं न भवति; अन्यथा हि गवादीनां पाठोऽनर्थकः स्यात्। एतत् सर्वं मनसि कृत्वाऽऽह-`उवर्णान्तात्' इति। सर्वत्रग्रहणे तदन्तविधेरभ्युपगमादित्यभिप्रायः। `शङ्कव्यम्' इति। `ओर्गुणः' (6.4.146) `वान्तो यि प्रत्यये' (6.1.79) इत्यवादेशः। `सनङ्गुः' इत्यादि। चर्मविकारलक्षणस्याञोऽव काशाः--वार्ध्रम्, वारत्रम्, उवर्णान्तलक्षणस्य यतोऽवकाशः--शङ्कव्यम् पिचव्यमिति; सनङ्गुर्नाम चर्मविकारः, तत्रोभयप्राप्तौ परत्वात् `चर्मणोऽञ्' (5.1.15) इत्यञ् प्राप्नोति `तथा' इत्यादि।

`अन्नविकारेभ्यश्च' इति। अपूपादिलक्षणास्य प्क्षीकस्य यतोऽवकाशः--अपूप्यास्तण्डुलाः, अपूपीया इति, उवर्णान्तलक्षणस्य स एव; चरुर्नाम हविर्विशेषः; सक्तुश्चान्नविकारः, तत उभयप्रसङ्गे परत्वात् `विभाषा हविरपूपादिभ्यः' (5.1.4) इति हविर्लक्षणोऽन्नविकारलक्षणश्च विधिः प्राप्नोति। तदेवं सनङ्गुशब्दादञ् प्राप्तः, चरुसक्तुशब्दाभ्यां विकल्पेन यत्, नित्यश्चेष्यते, तदर्थं पूर्वविप्रतिषेधो भाषितव्य इति। `ओर्गुणः' (6.4.146), `वान्तो यि प्रत्यये' (6.4.79) इत्यवादेशः। `सनङ्गव्यम्' इत्यादि। एतच्चेष्टवाचित्वात् परशब्दस्य लभ्यत इत्यवगन्तव्यम्।

`गवादिषु नाबि नभञ्चेति पठ्यते' इति। अत्र कस्यचिदियमाशङ्का स्यात्--भसंज्ञाप्रतिषेदो विधियत ति, ततश्च यस्येति लोपेन भवितव्यमित्यत आह-- `नाभिशब्दो यत्प्रत्ययम्' इति। शरीरावयवो यो नाभिशब्दस्तत्र कथं भवितव्यमित्याह--`यस्तु' इत्यादि। ततः शरीरावयवाद्यति कृते परत्वात् `नाभ्यं तैलम्' इति। ननु च शरीरावयवलक्षणे यति सति नभभावः कस्मान्न भवतीतियाह-`गवादिषु यता' इत्यादि। स हि गवादियता सह विहितः। तेन `सन्नियोगशिष्टानामन्यतराबाव उभयोरप्यभावः' (व्य.प.48) इति नभभावो न भवति।

`शुनः' इत्यादि। श्वन्नित्येतस्य सम्प्रसारणे कृतेऽन्नन्तताऽस्तीति `नस्तद्धिते' (6.4.144) इति टिलोपेन भाव्यमेवेति। एवं तर्हि सम्प्रसारणसामर्थ्यान्न भवति? नैतदस्ति; `यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, यस्तु विदेर्निमित्तमेव नासौ बाध्यते' (व्या.पा.56) इति तदवस्थो दोषः। दीर्घविधानसामर्थ्यादिति चेत्? एवमपि पक्षे स्यात्।

एवं तर्ह्यन्यथा व्याख्यायते। इह चकारद्वयं पठ्यते--सम्प्रसारणञ्ज, वा दीर्घत्वञ्चेति। द्वितीयश्चकारी भिन्नक्रमः सम्प्रसारणसमीपे द्रष्टव्यः। स च

समुच्यार्थोऽन्यस्य समुच्चेतव्यस्याभावात् तदेव समुच्चिनोति। तत्र सम्प्रसारणमेकेन क्रियते द्वितीयेन तद्रूपस्यैवावस्थितिरिति। `तत्सन्नियोगेन' इत्यादि। तदित्यनेन दीर्घत्वं प्रत्यवमृश्यते। तेन दीर्घत्वेन यत एवान्तोदात्तत्वं भवति; अन्यथा `यतोऽनावः' (6.1.213) इत्याद्युदात्तत्वं स्यात्। `ऊधसोऽनङ् च' इति। ऊधःशब्दस्यानङादेशो भवति, चकाराद्यच्य। `ऊधन्यः'। पूर्ववत् प्रकृतिभावः।।

3. कम्बलाच्च संज्ञायाम्। (5.1.3)
ननु `अपरिमाणविस्ताचितकम्बल्येभ्यः' (4.1.22) इति निपातनादेव कम्बल्य इति सिध्यति कम्बल्यं हि परिंमाणविशेषः, इतरथा हि कम्बल्यशब्दस्य तत्र ग्रहणमनर्थकं स्यात्, परिमाणविशेषस्य कम्बल्यशब्दो नामदेयम्; अयमपि प्रत्ययः संज्ञायां विधीयमानस्तत्रैव भवति, नान्यत्र; नह्यत्र कम्बल्यशब्दः संज्ञा, तस्मान्नार्थोऽनेन? नैतदस्ति; निपातनेन हि कम्बल्यशब्दः परिमाणे साधुरित्येतावत् प्रतीयते, न तु यदन्तोऽयमिति। ततश्चान्तस्वरितत्वं न स्यात्। तस्मात् स्वरितत्वपरिज्ञानार्थमिदं कर्त्तव्यम्। अनन्तरश्रुतस्य यतोऽनुकर्षणार्थश्चकारः। ननु स्वरितत्वादेव यद्भविष्यति? छोऽपि तर्हि स्यात्। ननु च च्छस्य सन्निधाने प्रकृतिमात्राच्छ उक्त इति नियमार्थमिदं स्यात्, तच्चानिष्टम्, यत् पुनर्नियतविषय इति तत्सम्बन्धे विध्यर्थता, विधिनियमयोश्च विधेरेव ज्यायान्? नैतदस्ति; छस्यापि सम्बन्धे विध्यर्थता सम्भवति। कथं संज्ञायामित्युच्यते, संज्ञा चानुपात्तावयवार्थापि भति, तत्रानवयवार्थानामप्राक्क्रीतीयत्वाद्धिताद्यर्थाभावे छप्रत्ययार्थमेतत् स्यात्, तस्माच्चकरो यत्प्रतययानुकर्षणार्थः कर्त्तव्यः? न कर्तव्यः; इष्टतोऽप्यधिकाराणां प्रवृत्तिनिवृत्ती भवत इति यत एवानुवृत्तिर्भविष्यति, न तु च्छस्य। एवं तर्हि चकार उगवादिभ्य इत्यनुकर्षणार्थः। किमर्थमिदम्? सनङ्गवादिभ्यः परत्वादञादयः प्राप्नुवन्ति तद्बाधनार्थमिति। अथ गवादिष्वेव `कम्बलाच्च संज्ञायाम्' इति कस्मान्न पठति? तत्र पाठे न कश्चिद्गुरुलाघवकृतो विशेष इति यत्किञ्चिदेतदिति।।

4. विभाषा हविरपूपादिभ्यः। (5.1.4)
हविःशब्दो गवादिषु पठ्यते, तेन तस्मान्नित्यं यता भवितव्यम्। अत्र हविर्विशेषाणां ग्रहणम्, नस्वरूपस्येति; उगवादिसूत्रे स्वरूपपरिभाषाया उपस्थानात्। न हि तत्र सोपतिष्ठमाना केनचिन्निवार्यते, तेन स्वरूपस्यैव ग्रहणम्। तत्र स्वरूपग्रहणे सतीह स्वरूपपरिभाषा नोपतिष्ठते; अन्यथा हि यद्यत्रापि स्वरूपग्रहणं स्यात्, ततः स्वतन्त्र एकस्मात् शब्दात् नित्यश्च यतो विधिः स्यादनित्यश्चेत्युभयमेकत्र नोपपद्यत इति न भवति विपर्ययः। अथ वा-हविःशब्दस्येहि पृथगुपादानादर्थप्रधानत्वमवसीयते, अन्यथा ह्यपूपादिष्वेव पठेदिति। `अन्नविकारेभ्यश्च' इति। अन्नविकाराः=अन्नप्रकाराः, ते च प्रतययमुत्पादयन्ति विभाषा-उदन्याः, उदनीया इति। यद्येवम्, अपूपादीनां किण्वपर्यन्तानामत्र विकारत्वादेव सिद्धत्वात् पाठोऽनर्थको जायते? यदा तर्हि केनचिदाकारसादृश्येनापूपादयोऽर्थान्तरे उपचर्यन्ते, तदर्थमेषां पाठः। किंञ्चान्नविकारग्रहणेनापूपादिषु प्रत्यमिच्छत इहापि स्यात्--यवापूपाः, व्रीहितण्डुला इति। प्रतिपदपाठे तु ग्रहणवत्त्वात् तदन्दविधिः पर्युदस्तो भवति। ननु च 'असमासे निष्कादिभ्यः' (5.1.20) इत्यसमासग्रहणाद्भवितव्यमेवात्र तदन्तविधिना, एतेनासमासग्रहणेन पूर्वत्र तदन्तविधिरस्तीत्येषोऽर्थः प्रतिपाद्यते? सत्यमेतत्; अपूपादिषु प्रतिपदपाठसामर्थ्यान्न भविष्यति।।

5. तस्यै हितम्। (5.1.5)
एतदेव ज्ञापकम्-हितयोगे चतुर्थ्यस्तीति। तेन यदुक्तम्-`हितयोगे चतुर्थी वक्तव्या' (वा. 123) इत्येतदुपपननं भवति।।

6. शरीरावयवाद्यत्। (5.1.6)
शीर्यत इति शरीरम्, तेन घटादेरपि ग्रहणं भविष्यतीत्यत आह--`शरीरं प्राणिकायः' इति। एतेन रूढिरियमिति दर्शयति। गवादावेति शरीरावयववाचिनः। तत्र तु याः प्रकृतयस्ताभ्योऽनेनापि पूर्वेणापि वा यति विशे षो नास्त्येव। यत्र विशेषः--`नाभि नभञ्च' (ग.सू.106) इति, स विशेषस्तत्रैव वेदितव्य एव।।

7. खलयवमाषतिलवृषब्रह्मणश्च। (5.1.7)
खलादीनां वृषपर्यन्तानां `यस्येति' (6.4.148) लोपः। `ब्रह्मण्यम्' इति। `न संयोगाद्वमन्तात्' (6.4.137) इति प्रतिषेधात् `अल्लोपोऽनः' (6.4.134) इत्यकारलोपो न भवति। `नस्तद्धिते' (6.4.144) इति टिलोपोऽपि न भवित; `ये चाभावकर्मणोः' (6.4.168) इति प्रकृतिभावात्। वृषशब्दोऽयमत्राकारान्तो गृह्यते, न तु ब्राह्मणशब्दोऽकारान्त इति। ननु चाशङ्का वृषशब्दे युक्ता-नलोपे सति किमयमकारान्तः? आहोस्विन्नकारान्तः? इति, ब्रह्मन्शब्दाच्च यतो निवृत्तिप्रसङ्गाद् ब्रह्मञ्शब्दादपि यचच प्रत्ययो निवर्त्तत इति भावः। अत एवाह--`छप्रत्ययोऽपि' इत्यादि। यत्प्रत्ययापेक्षयापिरयम्--न केवलं यत्प्रत्ययो न भवति, अपि तु च्छप्रत्ययोऽपीति। ब्राह्मणशब्दाच्छप्रत्ययाभावो योज्यः। ननु चाभ्यामिहानुपादनाद् यत्प्रत्ययो न भवति, `तस्मै हितम्' (5.1.5) इति च्छप्रत्ययस्तु कस्मान्न भवति? इत्याह-`अनभिधानात्' इति। न हीह वृषीयम्, ब्राह्मणीयमित्युक्ते विवक्षितोऽर्थः प्रतीयते; यतोऽर्थप्रतिपादनं प्रति नियता एव शब्दशक्तयो भवन्तीति क्वचित् प्रत्ययान्तेनार्थस्याभिधानम्ष क्वचिद्वाक्येनेति। अतो वाक्यमेवावतिष्ठते-`वृष्णे हितम्, ब्राह्मणेभ्यो हितम्' इति। वाक्यसमधिगम्यस्यार्थस्य तद्धितेनानभिधानादितदि यावत्।।

8. अजाविभ्यां थ्यन्। (5.1.8)
अजशब्दोऽयमिह पुंल्लिङ्ग उपात्तः; अविशब्दस्य ध्यन्तशब्दस्यापूर्वनिपातात्। आबन्तस्य ग्रहणे ह्यदिशब्दस्य पूर्वनिपातः स्यात्। अदन्तस्य ग्रहणे `द्वन्द्वे घि' (2.2.32) इत्येतस्य बाधितत्वात् `अजाद्यदन्तम्' (2.2.33) इत्यजब्दस्य पूर्वनिपातो युज्यते। तस्मात् पुंल्लिङ्गस्य ग्रहणम्। तथा व `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' (व्या.प.29) इति स्त्रीलिङ्गादपि प्रत्ययो भवत्येव-अजाभ्यो हितमजथ्यम्। `तसिलादिष्वाकृत्वसुचः' (6.3.35) इति पुंवद्भावः। परिसंख्यायन्ते हि तत्र तसिलादयः, तेषाञ्च मध्ये परिसंख्यातौ --------ग्रहणे शब्दान्तरतवादिकरान्तात् पुंल्लिङ्गान्न स्यात्।।

9. आत्मन्विश्वजनबोगोत्तरपदात् खः। (5.1.9)
अयात्मन्नित्यत्र नलोपः कस्मान्न कृतः, यावता द्वन्द्वेनायं निर्देशः क्रियते, तत्र `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नलोपः प्राप्नोति? इत्यत आह-`आत्मन्' इत्यादि। आत्मन्नित्येव भवत्येषा प्राकृतिरिति ज्ञापनार्थं नलोपो न कृतः। कः पुनरेवं सति विशेषः? इत्याह-`तेन' इत्यादि। गतार्थम्। यद्येवम्, विश्वजनशब्देन ह्युत्तरपदस्य सम्बन्धः प्राप्नोति? एवं मन्यते-आत्मन्निति नलोपाबावेन प्रत्येकं वाक्यपरिसमाप्तेर्व्यभिचारस्य दर्शितत्वात् ततः प्रत्यासतेर्भोगशब्देनैव सम्बध्यते, न तु विश्वजनशब्देनेति नासति दोषः। `कर्मधारयादेवेष्यते' इति। वार्यपारम्पर्योपदेशात्। विभावाग्रहणानुवृत्तेर्व्यवस्थितविबाषाविज्ञानाद्वेदं वेदितव्यम्। विश्वस्य जनो विश्वजनः, विश्वो जनोऽस्येति विश्वजन इति समासेन भवितव्यम्। यथा खो न भवति तथा च्छोऽपि न भवतीत्याशङ्क्याह-`बहुव्रीहिस्तु' इत्यादि।
`उपसंख्यानम्' इति। प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्-इह हि भोगसमासादिति वाक्तव्ये उत्तरपदग्रहणमधिकविधानार्थम्। न चैवं सति बहुपूर्वादीषदसमाप्तौ भोगो बहुभोग इत्यस्मात् खः स्यादित्याशङ्कनीयम्; बहुच्प्रत्ययस्य समासाबावात्। ततोऽत्रि छेनैव भवितव्यम्--बहुभोगीय इति। तेन पञ्चजनादपि भविष्यति। संज्ञाशब्दश्चायम्; `दिक्संख्ये संज्ञायाम्' (2.1.50) इति समासः। तथा सर्वजनादपि वेदितव्यः। `तत्पुरुषादेव' इति। विशेषानभिधानेऽपि महाजनादिति निर्देशादेव समानाधिकरणादेव भोगशब्दोऽयं भावसाधनः--भुक्तिर्भोग इति, कर्मसाधनो वा--भुज्यत इति भोग इति। अयमव्युत्पन्नः शरीरवाचीस, तस्येह ग्रहणमित्याह--`भोगशब्दः' इत्यादि। भोगशब्दः शरीरमेव प्रतिपादयतीत्यर्थः। यत्र वर्त्तमानोऽयं साक्षात् सम्बन्धमाह, तत्रैव खप्रत्ययमासादयति। वर्त्तते च क्रियायां द्रव्ये च। तथा हि--यद्यपि भुजिक्रियया द्रव्येण च सम्बन्धोऽस्ति, तथापि शरीरेण मुख्यः सम्बन्ध इति ततो भवति प्रत्ययः। यथा राजाचार्याभ्यां वाक्यमेव भवति, तथेहापि भवितव्र्यामिति यश्चोदयेत्, तं प्रत्याह--`आचार्यादणत्वम्' इति। क्षुभ्नादिपाठात्। `केवलाभ्यां वाक्यमेव भवत‍ि' इति। छप्रत्ययो न भवति, अनर्भिधानादेव।।

10. सर्वपुरुषाभ्यां णढञञौ। (5.1.10)
`सर्वाणस्य वावचनम्' इति। अभिधानेऽभिधेयोपचाराद्वेति विकल्पमाह। इहापि विभाषाग्रहणानुवृत्तेरेव वेदितव्यम्। न च सर्वपुरुषाभ्यां विकल्प आशङ्का; व्यवस्थितविभाषात्वात्।
'पुरुषाद्वध' इति। तत्र वधे--`तस्येदम्' (4.3.120) इत्यणोऽपवादः, विकारे--`प्राणिरजतादिब्योऽञ्' (4.3.154) इत्यञः, समूहेऽपि--`तस्य समूहः' (4.2.37) इत्यणः। `तेन कृते ग्रन्थे' [`कृते ग्रन्थे' इत्येव पाणिनीयं सूत्रम्] (4.3.116) इत्यण एव।।

11. माणवचरकाभ्यां खञ्। (5.1.11)
उभयस्मिन् ञित्करणं स्वरार्थम्। चरके वृद्ध्यर्थं च। माणवे तु `वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' (6.3.39) इति पुंवद्भावप्रतिषेधार्थम्। माणवीना बार्या यस्य स माणवीनाभार्य इति।।

12. तदर्थं विकृतेः प्रकृतौ। (5.1.12)
तस्मै इदं तदर्थम्, `चतुर्थी तदर्थ' (2.1.36) इत्यादिना समासः। एतदेव वचनं ज्ञापकम्--अर्थोत्तरपदे समासे समुदायार्थस्य लिङ्गं भवति, न च परवल्लिङ्गतेति। एतेन यदुक्तं--`अर्थेन नित्यसमासः सर्वलिङ्गता च वक्तव्या' (वा.78) इति सा सिद्धा भवति। `प्रकृतिरुपादानकारणम्' इति। समानजातीयमभिन्नसन्तानवृत्ति कारणमुपादनकारणमित्युच्यते। उपादीयत इत्युपादानम्, बहुलवचनात् कर्मणि ल्युट्, तस्य कारणमिति षष्ठीसमासः। `तस्यैव व' इत्यादि। तस्यैवोपादानकारणस्योत्तरभाव्यस्थाविशेषो विकृतिः। `विकृतिवाचिनः' इत्यादि। ननु च `समर्थानां प्रथमाद्वा' (4.1.82) इति वचनात्तदर्थमिति प्रथमं निर्दिष्टत्वात् प्रकृतेश्च तदर्थत्वात् तद्वाचिन एव प्रत्ययः प्राप्नोति? नैष दोषः; प्रथमस्य चाप्रथमस्य च कार्यप्राप्तौ प्रथमादेव यथा स्यादित्येवमर्थं प्रथमग्रहणं नियमार्थं कृतम्। इह तु प्रथमात् प्राप्तिरेव नास्ति। `प्रकृतौ' इति। सप्तम्या प्रकृतेः प्रत्ययार्थत्वेन सम्पादितत्वात्। `विकृतेः' इति। पञ्चम्या विकृतेः प्रकृतित्वेन तस्मान्नायमस्य विषय इति विकृतिवाचिन एव प्रत्ययो भवति। `विकृत्यर्थायाम्' इति। अनेन तदर्थमित्यत्र सुब्व्यत्ययेन सप्तम्याः स्थाने प्रथमा, लिङ्गव्यत्ययेन च स्त्रीलिङ्गस्य स्थाने नपुंसकलिङ्गं कृतमिति दर्शयति। ननु च छन्दसि व्यत्यय उक्तः, नेदं छन्दः, तत्कुतो व्यत्ययः? `छन्दोवत्सूत्राणि भवन्ति' (म.भा.1.1.1) इत्यदोषः। `तदर्थग्रहणेन' इत्यादि। इह प्रकृत्यन्तरनिवृत्तिः--यवानां धानाः, धानानां सक्तव इति।

क्वचिद्विकारस्य प्रकृतिसम्बन्धः--धानानां यवाः, सक्तूनां धाना इति। क्वचित् प्रकृतेरनन्यार्थता, यथा--काष्ठानामङ्गाराः। प्रकृतेरनन्यार्थताख्यानार्थेन यदिष्टं सम्पद्यते, तद्दर्शयति--`प्रत्ययार्थस्य च' इत्यादि। इह विकृत्यर्थायां प्रकृतौ प्रत्यय उच्यते। तस्य तस्मात् तादर्थ्ये चतुर्थ्येव शक्यते प्रतिबोधयितुम्। अतः प्रत्ययार्थस्य तदर्थत्वेन सामर्थ्याच्चतुर्थी समर्थविभक्तिर्लभ्यते। `केचित्तु' इत्यादि। तेषां वचनलभ्यैवु चतुर्थी समर्थविभक्तिः।

`तदर्थम्' इति। किमिति षष्ठी प्रत्युदाह्रियते? षष्ठ्यति तादर्थ्यं ब्रूते, यथा--गुरोरिदं गुर्वर्थमिति। तथा सति षष्ठ्यपि समर्थविभक्तिर्भवति। अङ्गाराणां काष्ठानीति प्रत्युदाहरणं तु प्रकृत्यन्तरनिवृत्त्या, तया यवादेः समर्थ्येते। अङ्गारेभ्यः काष्ठानि, प्राकारेभ्य इष्टका इति। इदमसति तदर्थग्रहणे न ज्ञायते किमर्थं विवक्षितमिति। तस्मादनन्यार्थता प्रकृतेर्विवक्षितेति। एतत् प्रयोजनं प्रतिपादयितुं तदर्थग्रहणं कृतमिति भावः। तथा च प्रकृत्यन्तरनिवृत्या प्रकृतिरेव सम्बध्यमाना व्यतिरिच्यत इति यवादेरेव व्यतिरेकविभक्तिर्भवति। ये तु चतुर्थीमनुवर्त्तयन्ति, तेषां तदरथग्रहणं चतर्थीविशेषणं विज्ञायते--तादर्थ्ये चतुर्थीति। तत्र मूत्राय कल्पते यवागूरिति प्रत्युदाहरणम्। तेषां चतुर्थ्यनुवृत्तिरपार्थिका; तदर्थग्रहणेनैव गतार्थत्वात्। तथा च या तादर्थ्यसमानार्था षष्ठी सा चासत्यां विशेष्यते। `या काचित्' इतचि। न तूपादानकारणभूतापीत्यर्थः। स्यादेतत्--कूपः प्रकृतिरुदकस्य न भवत्येव; ततस्तन्निवृत्त्यर्थं विकृतिग्रहणं न कर्त्तव्यमित्यत आह--`भवति च' इत्यादि। चशब्दोवधारणे। ननु चान्येभ्य एव स्वकारणेभ्य उदकमुत्पाद्यते, तत्कथं कूपस्तस्य प्रकृतिः? इत्याह--`तत्रोत्पादनात्' इति। यथैव हि प्रयाजादीनां धर्माणामुत्पत्त्याधारभूतौ दर्शपौर्णमासौ प्रकृतौ भवतः, एवमुदकस्योत्पत्त्याधारभूतत्वात् कूपः प्रकृतिर्भवति। यद्येवम्, उदकमपि तस्य विकृतिः? इत्याह--`ननु' इत्यादि। अत्रैवोपपत्तिमाह--`अत्यन्तभेदात्' इति। विकारो हि प्रकृतेरुत्तरमवस्थान्तरमिति ततो नात्यन्तभिन्नो भवति, यथा--काष्ठानामङ्गाराः। ते हि पार्थिवेनाभिन्नसन्तानवर्त्तित्वेन काष्ठेभ्यो नात्यन्तं भिद्यन्ते। उदकं तु भिन्नस्वभावत्वाद्भिन्नसन्तानवर्त्तित्वाच्च कूपादत्यन्तं भिन्नम्। अतो न तस्योत्तरमवस्तान्तरमिति न भवति विकृतिः।

`न तु कोशी तस्य प्रकृतिः' इति। अतत्कारणत्वात्, अनुत्पत्त्याधारभूतत्वाच्च। ननु च प्रकृतिर्विकृतिरिति सम्बन्धिशब्दावेतौ। सम्बन्धिशब्दश्च नियत एव प्रतियोगिनि प्रतीतिमुपजनयति, यथा हि--`मातरिवर्त्तितव्यम्' इत्युक्ते न चोच्यते `स्वस्यां मातरि' इति, या यस्या माता तस्यामिति प्रतीयते। एवं सति कूपलक्षणायां प्रकृतौ विकृत्यर्थायां प्रत्ययार्थत्वेन विवक्षितायामसत्यपि विकृतग्रहणे तस्यैव कूपस्य या या विकृतिस्तत एव प्रत्ययो विज्ञायते। तथा च विकारवाचिनोऽसिशब्दात् प्रत्यये विधित्सिते यस्यासौ प्रकृतिस्तस्यामेव तदर्थायां प्रकृतावसत्यपि प्रकृतिग्रहणे प्रत्ययो विज्ञायते। तस्मादन्यतरोपादानेऽपि सर्वमिष्टं सम्पद्यते। न किञ्चिदनिष्टमापद्यत इत्याह--`तदर्थं द्वयोरपि' इत्यादि। अनेनैवं मन्यते--स्यादेतदेव यदासौ प्रकृतिविकृतिशब्दौ नियोगतः सम्बन्धिशब्दौ, न चेमौ नियोगतः सम्बन्धिशब्दौ। तथा हिं, विपूर्वस्तावदयं करोतिंरस्त्येवापकारे--देवदत्तोऽस्थित्यै विकरोतीति; अस्ति चेष्टानानात्वे--विकुर्वते च्छात्रा इति; अस्त्यनौचित्ये--विकृतिरेषा स्त्रीणां यत् स्वातन्त्र्यमिति। अस्ति कार्ये--तन्तुनां पटो विकार इति। तता प्रपूर्वोऽप्ययमस्ति कारणे--तन्तवः प्रकृतिः पटस्येति; अस्तिं चौदासीन्ये--सत्त्वानां प्रकृतिरिति। तान्युच्यन्ते यान्यनारम्भकाणि; अस्ति दोषापगमे--प्रकृतिस्तोऽयमिति। अस्ति स्वभ्वे-प्रकृत्याऽभिरूप इति; अस्ति धर्माणामुत्पत्त्याधारे, यथा-दर्शपौर्णमासौ धर्माणां प्रकृतिस्थोऽयमिति। असति स्वभावे-प्रकृत्याऽभिरूप इति; अस्ति धर्माणामुत्पत्त्याधारे, यथा-दर्शपौर्णमासौ धर्माणां प्रकृतिरिति। तदेवमर्थबहुत्वादनयोः सर्म्बान्धत्वमनैकान्तिकमिति, अतोऽन्यतरग्रहणे न सिध्यति। न चान्यतरेण शक्यते वक्तुं विवक्षितः प्रकृतिविकारभावः। अयमुपादानकारणस्य तदुत्तरावस्थाभूतस्य च यो विकारः स इह वेदितव्यः। यदि तु विपूर्वः करोतिरनेकार्थः, `तस्य विकारः' (4.3.134) इत्यत्रापि सन्देहापगमाय तर्हि प्रयतितव्यम्? सत्यमेतत्; शैलीयमाचार्यस्य यस्य क्वचिदभिधानमाश्रयति, क्वचन्न्यायम्, क्वचिद्वचनमिति तत् सर्वमुच्यते। तेन सर्वं प्रत्याय्यते।।

13. छदिरुपधिबलेर्ढञ्। (5.1.13)

यदा छदिश्चर्मविकारो विवक्ष्यते तदापि ढञेवेष्यते--छादिषेयं चर्मेति। ननु च परत्वात् `चर्मणोऽञ्' (5.1.15) इत्यञ् प्राप्नोति? नैष दोषः; `चर्मणोऽञ्' इत्यत्र छदिषो ढञनुवर्त्तिष्यते।

यथा छदिःशब्दाद्बलिशब्दाच्चतुर्थीसमर्थात् प्रकृतिविकारभावे प्रत्यय उपजायते, तथोपधिंशब्दादपि भवतिव्यमित्याशङ्क्याह--`उपधिशब्दात्' इत्यादि। अत्र युक्तिमाह--`उपधीयते' इत्यादि। तेन `कर्मण्युपसर्गे घोः किः' इति दर्शयति। तेन च द्रव्यस्यानासादितोत्तरावस्थस्याभिधानम्। यद्युपधिंशब्दाद्विकृतिवाचिनः स्यात्, एवमर्थान्तरे स्यात्। न चासौ प्रकृतिविशेषे भवति। न तूपधिशब्दाद्वाच्यस्य प्रत्यान्तरस्य प्रकृतिविकारभावोऽस्ति, अबेदात्। तथा हि--यदेव रथाङ्गमुपधिशब्देनोच्यते तदेवानासादितोत्तरावस्थमौपधेयशब्देनापि। स्यादेतत्--यदा भावसाधन उपधिंशब्द उपधानमुपधिरिति तदा नास्ति भेदः, क्रियाभिधानात्; यदाप्युपधिशब्देन क्रियाद्रव्यस्य विकार उच्यते तदौपधेयशब्देन च तत्प्रकृति द्रव्यम्, अतः प्रकृतिविशेषे परप्रत्ययौ भविष्यतीति? एतच्चायुक्तम्; न हि क्रियाद्रव्यस्य विकारो युज्यते; अत्यन्तभेदात्। तस्मात् स्थार्थ एवोपधिंशब्दात् प्रत्ययो विज्ञायते।।

14. ऋषभोपानहोर्ञ्यः। (5.1.14)

`चर्मण्यपि' इत्यादि। ञ्यस्यावकगाशः--औपानह्यो मुञ्जः, अञोऽवकाशः--वार्ध्रम्, वारत्रम्; चर्मणि प्रकृतित्वेन विवक्षिते सत्युभयप्राप्तौ पूर्वविप्रतिषेधेन ञ्य एव भवति--औपानह्यं चर्मेति।।

15. चर्मणोऽञ्। (5.1.15)

`चर्मणः' इति पञ्चमी वा स्यात्? षष्ठी वा? यदि पञ्चमी, चर्मण एव प्रत्ययो भवेत्, न चर्मविकारवाचिभ्यः। एतच्च कुतो लभ्यते? अनभिधानात्। तथा हि प्रकृतिविशेष एव प्रत्यय इष्यते। न च चर्मशब्दादुत्पन्ने प्रत्यये विवक्षितार्थस्याभिधानमस्ति। तस्मान्नेयं पञ्चमी, अपि तु षष्ठी।।

16. तदस्य तदस्मिन् स्यादिति। (5.1.16)
द्वितीयाशङ्कामपनिनीषुराह--`तत्' इत्यादि। अस्तेरकर्मकत्वादित्यभिप्रायः। अवयवार्थपूर्वत्वादवयव्यर्थस्येत्याह--`अस्य' इत्यादि। करोतीति करणः। कर्त्तरि बहुलवचनाल्लयुट्। इतिश्चासौ करणश्चेति कर्मधारयः। `सम्भावनेऽलमिति चेत्सिद्धाप्रयोगे' (3.3.154)।
ननु च प्राकारीया इष्टकाः, प्रासादीयं दार्विति च पूर्वेणैव सिद्धम्, तथा हि--यासामिष्टकानां यस्य च दारुणो बहुत्वेन प्राकारः प्रासादश्च सम्भाव्यते, तासामिष्टकानां तस्य च दारुणो यथासंख्येन प्राकारप्रासादौ विकारौ भवतः, तादर्थ्याच्चेष्टकानां दारूणाञ्चास्तीवेत्यत आह--`प्रकृतिविकार' इत्यादि। गतार्थम्।
`द्विस्तद्ग्रहणम्' इत्यादि। इत्येष न्यायोऽनेन प्रदर्श्यते। `तदस्यास्त्यस्मिन्निति मतुप्' (5.2.94) इत्यादौ नैकः प्रत्ययार्थः। तत्र तत्समुदायेन समर्थविभक्तेः सम्बन्धो विज्ञायते। ततश्च यत्र द्वाभ्यां प्रत्ययार्थाभ्यां समर्थविभक्तेः सम्बन्धः सम्भवति--शाखावान् वृक्ष इत्यादौ, तत्रैव तत् स्यात्। यत्र त्वन्यतरेणैव सम्बन्धः--गोमान् देवदत्तः, वृक्षवान् पर्वत इत्यादौ, तत्र न स्यात्। अस्मिंस्तु न्याये प्रदर्शिशते सर्वत्र भवति।।

17. परिखाया ढञ्। (5.1.17)
परिखाशब्देन चात्र खेयमुच्यते।।

18. प्राग्वतेष्ठञ्। (5.1.18)
प्राग्वचनं `शीर्षच्छेदाद्यच्च' (5.1.65), `दण्डादिभ्यो यः' (5.1.66) इत्येवमादिनाधिकारवता ठञि विच्छिन्ने `पारायणतुरायणचान्द्रायणं वर्त्तयति' (5.1.72) इत्येवमादावर्थनिर्देशे ठञेव यथा स्यादित्येवमर्थम्।।

19. आर्हादगोपुच्छसंख्यापरिमाणाठ्ठक्। (5.1.19)
`तदर्हति' (5.1.63) इत्येको विधिः, `तदर्हम्' (5.1.117) इति द्वितीयः, तत् कस्येहावधित्वेनोपादानम्? इत्याह--`तदर्हति' इत्यादि। इतरस्य ग्रहणं कस्मान्न भवति? एवं मन्यते यदि तस्य ग्रहणभिप्रेतं स्यात् 'प्राग्वतेः' (5.1.18) इत्यनेनैव सम्बन्धं कुर्यात्, न `आर्हात्' इत्यनेन। ननु च वत्यर्थेऽपि नैतदस्ति; यद्यपि वत्यर्थेऽपि ठगधिक्रियते, तथापि तत्र तेन न भवितव्यम्; प्रतिपदविहितेन वतिना बाधितत्वात्, अनभिधानाद्वा।
तस्मादर्हतिशब्दैकदेशस्यैवार्हशब्दस्यावधित्वं न्याय्यम्। `गोपुच्छादीन् वर्जयित्वा' इति। कथं पुनरेतज्ज्ञायते--अगोपुच्छादिति प्रतिषेधोऽयमिति? अन्यस्यार्थस्येहासम्भवात्। ननु चायमर्थः स्यात्--अगोपुच्छशब्दात् संख्यायाः परिमाणाच्चेति? अशक्योऽयमर्थं इह सम्भावयितुम्। यदि ह्ययमर्थः स्यात्, निष्कादिभ्यः परिमाणादेव सिद्धत्वात् पुनर्वचनमनर्थकं स्यात्। ननु च नियमार्थं पुनर्वचनं स्यात्--असमास एव यथा स्यादिति? नैतदस्ति; न हि विधौ सति नियमार्थता युक्ता। नियमे हि सत्यवक्तव्यस्य त्यागाच्छब्दबाधनम्। किञ्च, सिद्धञ्च पुनर्वचनमुपादीयत इति, उक्तानुवादे दोषश्च। विधौ तु न शब्दबाधनम्, नानुवादोष इतदि। विधिनियमसम्भवविचारे विधिनैव युक्तं भवितुम्। तस्मादन्यस्येहार्थस्यासम्भवात् `अगोपुच्छात्' इति प्रतिषदोऽयमिति विज्ञायते। ज्ञापकात्प्रकृतरतर न विवक्ष्यते, यदयम् `लोकसर्वलोकाट्ठञ्' (5.1.44) इति ठको निवृत्त्यर्थं ठञं करोति। `अभिविधावयमाकारः' इति। मर्यादायां हि वर्त्तमानस्याकारस्यात्र ग्रहणमनर्थकं स्यात्, प्राग्ग्रहणानुवृत्त्यैव सिद्धत्वात्। अभिविधिवृत्तेराकारस्य ग्रहणे सत यदिष्टं सम्पद्यते, तद्दर्शयितुमाह--`अर्हत्यर्थेऽपि ठग्भवति' इति।
`भेदगणनं संख्या' ति। भिद्यन्त इति भेदाः, भिन्नाः पदार्थाः, ते गण्यन्ते संख्यायन्ते परिच्छिद्यन्ते येन तद्भेदगणनम्, एकत्वादि। संख्याभेदे हि सति पदार्थनुसङ्कल्पनमेकत्वादिभिः क्रियते। एकत्वसंख्याऽपि बहुषु सन्निवेशितेषु भेदमेकमसहायमाह। `गुरुत्वमानमुन्मानम्' इति। सुवर्णादेर्वस्तुनो गुरुत्वमुत्क्षिप्यते, येन तदुन्मानं तुलादि। `आयाममानं प्रमाणम्' इति। तिर्यगभिमुखस्य वस्तुनो येनायामपरिच्छेदः क्रियते तत् प्रमाणम्, वितस्त्यादि।
`आरोहपरणाहमानं परिमाणम्' इति। आरोहतः परिणाहतश्च मीयते व्रीह्याद्यर्थो येन तत्परिमाणम्। आरोहः उच्छ्रायः, परिणाहः विस्तारः।
संख्यापरिमाणयोर्भेदे पृष्टे यदुन्मानादीनां विशेषप्रदर्शनं तत्प्रसङ्गेन तद्विषयस्याज्ञानस्यापनयनार्थम्। संग्रहेण किलशब्द एवमादिमतमाचार्याणामित्यर्थं सूचयति। `सर्वतः' इति। आरोहतः परिणाहतश्चेत्यर्थः। `संख्या बाह्या तु सर्वतः' इति। उन्मानात् परिमाणात् प्रमाणाच्च संख्या बाह्या; तत्रानन्तर्भावात्।।

20. असमासे निष्कादिभ्यः। (5.1.20)
'ठञोऽपवादः' इति। येन नाप्राप्तित्यायेन (व्या.प.49)। निष्कादिभ्यो द्रोणपर्यन्तेभ्यः परिमाणशब्दत्वात् षष्ठिशब्दस्य संख्याशब्दत्वाट्ठकि पर्युदस्ते ठञेव प्राप्नोति, अतस्तस्यैवायमपवादः। `तेदन्ताप्रतिषेधस्य' इति तदन्तविधेरप्रतिषेधस्येत्यर्थः। यदि तर्हि तदन्तात् प्रत्ययो विज्ञायते, एवं तर्हि `व्यपदेशिवद्भावोऽप्रातिपदिकेन' (शा.प.65) इति केवलेभ्य- प्रत्ययो नोपपद्यते? नैष दोषः; असमासगरहणेन हि ग्रहणवत्परिभाषाया (व्या.प.89)

निवृत्तिराख्याता, निवृत्तायाञ्च `ये नविधिस्तदन्तस्य' (1.1.72) इति तदन्ताद्भवति। तत्र च `स्वस्य च रूपस्य' (काशिका.1.1.72) इति प्रकृतत्वात् केवलादपि भवति। यत्तु मन्यते-`अपूर्वोपादानसामर्थ्यात् केवलादिदिति लाघवार्थ केवलानां पाठः स्यात्' इति, यत्किञ्चदेतत्।

`इत उत्तरञ्च' इत्यादि। कथं पुनरिष्यमाणोऽपि तदन्तविधिर्लभ्यते, यावता `ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न' (व्या.प.89) इति प्रतिषिध्यते? अस्याः परिभाषाया अनित्यत्वात्। अनित्यत्वं तु तस्या गर्गादिषु `वाजासे' इति समासे प्रत्ययप्रतिषेधाद्गम्यते। नित्यत्वे हि वाजशब्दादुत्पद्यमानस्य प्रत्ययस्य समासे प्राप्तिरेव नास्तीति प्रतिषेधं कुर्यात्। `द्विशूर्पम्' इति। द्वाभ्यां शूर्पाभ्यां क्रीतमिति तद्धितार्थे द्विगुं कृत्वा। न तावदेषा लुगन्ता प्रकृतिरिति संख्यापूर्वपदादपि `शूर्पादञन्यतरस्याम्' (5.1.26) इत्यञेव क्रियते, तस्य `अव्यर्द्धपूर्वद्विगोर्लुगसंज्ञायाम्' (5.1.28) इति लुक्। `द्विशौर्पिकम्' इति। `परिमाणान्तस्यासंज्ञाशाणयोः' (7.3.17) इत्युत्तरपदवृद्धिः। यदुक्तम्--`संख्यापूर्वपदानां तदन्तविधिरितीष्यते' इति, यच्चोक्तम्--`लुगन्तायास्तु प्रकृतेर्नेष्यते' इति, तदुभयमाप्तागमेन स्थिरीकर्त्तुमाह--`तथा चोक्तम्' इत्यादि।।

21. शताच्च ठन्यतावशते।

`कनोऽपवादः' इति। उत्तरसूत्रेण प्राप्तस्य। `शतिकम्' इति। `तदस्य परिमाणम्' (5.1.57) इति वर्त्तमाने `संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु' (5.1.58) इति सङ्घे प्रत्ययार्थे विवक्षित उत्तरसूत्रेण कन्नेव भवति।

`प्रत्ययार्थोऽत्र सङ्घः' इति। शतमध्यायानां परिमाणं यस्य निदानख्यग्रन्थस्य, स चेह प्रत्ययार्थः। स च शतसंख्याव्यवच्छिन्नाव्यायसमुदायात्मक इति सङ्घ एव परत्ययार्तो भवति। `शतमेव वस्तुतः' इति। अव्यायशतस्यानन्यार्थत्वात् ततस्च प्रकृत्यर्थात् न भिद्यते। तदेव ह्यध्यायानां शतं प्रकृत्याभिधीयते, प्रत्ययान्तेनापि तदेवेति नेह प्रकृत्यर्थात् प्रत्ययार्थभेदः। तदेतेन यत्र चाव्यतिरिक्तः प्रकृत्यार्थात् प्रत्ययार्थस्तत्र प्रतिषेधो भविष्यति। न च व्यतिरिक्त इत्येतदाख्यातम्। ननु च `सङ्घे चानौत्तराधर्ये' (3.3.42), `संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु' (5.1.58) इत्यत्र च प्राणिसमूहे सङ्घशब्दो गृह्यते, ततर कथं ग्रन्थविषयो गृह्यते/ उपचारेणेत्यदोषः। यदि वा संख्यासूत्रे संज्ञाशब्दसाहचर्याद्विशिष्टः सङ्घो गृह्यते। `सङ्घे चानौत्तराधर्ये' इत्यत्रापि `छन्दोनाम्नि च' (3.3.34) इत्यतो नामग्रहणानुवृत्तेः प्राणिसङ्घो गृह्यते। इह तु यत्वाभावाद् गन्थस्यापि ग्रहणमित्यविशेषः। `इह तु' इत्यादि। ननु च शतेऽभिधेये प्रतिषेधेन भवितव्यम्, इह च शतद्यं शाटकशतम्, शतिकं शाटकशतमित्युक्ते शतं प्रतीयत एव, तत्किमिति प्रतिषेधो न भवति? इत्याह--`वाक्येन' इत्यादि। शत्यशतिकशब्दौ हि सायान्यशब्दौ, सामान्यशब्दाश्च न प्रकरणादिकमन्तरेण विशेषे वर्त्तन्ते। तेन यावच्छाटकशतिमित्येतत्पदान्तरं न प्रयुज्यते, तावत् प्रत्ययार्थस्य शतत्वं नावसीयते। तस्मात् पदान्तरसन्निधौ गम्यमानत्वात् पदान्तरार्थो भवति, न प्रत्यायार्थः। `न श्रुत्या' इति। गम्यत इति सम्बन्धः। यत्र प्रत्ययान्तेन पदान्तरनिरपेक्षेण प्रत्ययार्थस्य शतताऽऽख्यायते, तत्र श्रुत्या प्रत्ययान्तश्रवणमात्रेणैव गम्यते, यथा--प्रत्युदाहरणे शतं परिमाणमस्य शतकमित्युक्ते गम्यत एवैतत्--प्रत्ययार्थोऽपि शतमेवेति। इह तु वाक्याच्छतत्वं प्रतीयते। न च पदसंस्कारकाले वाक्यार्थस्तयाङ्गभावोऽस्ति। तदा तस्योपसर्जनत्वात् प्रकृत्यर्थादतिरिक्ते प्रत्ययार्थे प्रतिषेधो भवति, न तु व्यतिरिक्तवाक्यगम्य इति। तदाप्तवचनेन द्रढयितुमाह--`तथा चोक्तम्' इत्यादि। शतप्रतिषेधे कर्त्तव्ये प्रकृत्यर्थादन्यस्य प्रत्ययार्थस्य शतत्वेऽप्रतिषेध इत्येतदुक्तं भवति। तत्रान्यत् प्रकृत्यर्थः शतम्, अन्यत् प्रत्ययार्थः शतम्। तत्र विधिरेव भवति; न प्रतिषेध इति।

केन पनः समासे प्राप्नोति, यतस्तत्प्रतिषेदार्थोऽसमासानुकर्षणार्थश्चकारः क्रियते? इत्याह--`प्राग्वतेः' इत्यादि।।

22. संख्याया अतिशदन्तायाः कन्। (5.1.22)

`पञ्चकः पटः' इति। लौकिक्याः संख्याया उदाहरणम्। `बहुकः' इत्यादि। परिभाषितायाः। `चत्वारिंशत्कः' इति। `इसुसुक्तान्तात् कः' (7.3.51)। `अर्थवर्तास्तशब्दस्य ग्रहणात्' इति। अर्थवद्ग्रहणपरिभाषया (व्या.प.1.)। `डतेः पर्युदासो न भवति' इति। शब्दापेक्षयाऽवयवषष्ठीति। प्रत्ययस्य य एकदेशस्तिशब्दस्तस्य पर्युदासो न भवति, न ह्ययमर्थवान्। `कतिकः' इति। किं परिमाणमेषामिति `किमः संख्यापरिमाणे डति च' (5.2.41) इति डतिः, `टेः' (6.4.143) इति टिलोपः। कतिभिः क्रीतमिति विगृह्य कन्। यद्यर्थवतस्तिशब्दस्य ग्रहणम्, नवतेर्यस्तिशब्दस्तस्यापि पर्युदासो न प्राप्नोति; नवतिशब्द एव हि समुदायः संख्याविशेषेणार्थवान्, न तदेकदेशस्तिशब्दः? नैष दोषः; नवतिशब्दे यो नवशब्दः सोऽनेकार्थः। तथा च संख्याविशेषावगतमतो नवशब्दात् परो यस्तिशब्दस्तत एत विज्ञायते; तद्भावे भावात्। अशीतिशब्दस्य तर्हि तिशब्दस्य पर्युदासो न प्राप्नोति, नासावर्थवान्? नापि ततः पूर्वो योऽशीशब्दस्तस्य कश्चिदर्थोऽस्ति, समुदाय एव तु संक्याविशेषेणार्थवान्? नैतदस्ति; यद्यप्यशी-इतिशब्दस्य न कश्चनार्थः प्रकाशते, तथापि प्रतिज्ञायते। अशीतिशब्दो ह्येवं व्युत्पाद्यते--अष्टानां दशानामशीभावः, तिशब्दश्च प्रत्ययः। य एवाष्टानां दशानामार्थः सोऽशीशब्दस्य, यस्तु संखघ्याविशेषः सोऽयं तिशब्दस्यैवेति, ततस्तस्य नानर्थक्यम्। एवमपि विशतेः प्रतिषेधो न सिध्यति? स ह्येवं व्युत्पाद्यते--द्वयोर्दशतोर्विन्भावः, शतिंश्च प्रत्यः। तत्र शतिप्रत्ययात् पूर्वस्य भागस्य द्वयोर्दशतोर्योऽर्थः स एव प्रतिज्ञायते शतिप्रत्यस्य, संखायविशेषः, तिशब्दस्य न कश्चित्। इष्टमेव तत्। संग्राहितः कन् विंशतेः--`तद्विंशतिकम्' इति। अथ `अतिशदन्तायाः' इत्यत्रान्तग्रहणं किमर्थम्, अतिशच्छब्दस्य न प्राग्वतीयत्वात् प्रत्ययग्रहणपरिभाषयैव (पु.प.ल.वृ.44) तदन्तविधिर्भविष्यति/ एवदेव तर्हि प्रयोजनम्--अनयचा परिभाषया तदन्तविधिर्मा भूदिति। किञ्च स्यात्? इहैकसप्तत्या क्रीत इति प्रतिषेधो न स्यात्; एकसप्तदशतस्तिप्रत्ययस्याविधानात्। अन्तग्रहणे तु क्रियमाणे सति समुदायस्यान्ते तिशब्दः श्रुयत इत्यत्रापि प्रतिषेधः सिद्धो भवति।।

23. वतोरिड् वा। (5.1.23)
`वत्वन्तस्य संख्यात्वात्' इति। बहुगणसूत्रेण (1.1.23) संख्यासंज्ञाविधानत्। `तस्य' इत्यादि। कथं पुनस्तस्यानेनागमः शक्यो विज्ञातुम्, यावता नेह कन्ग्रहणम्? यदपि प्रकृतं तदपि प्रथमानिर्दिष्टम्, षष्ठीनिर्दिष्टेन चेहार्थः? नैष दोषः, `वतोः' इति पञ्चमी `कन्' इति प्रथमायाः षष्ठीं प्रकल्पयिष्यति `तस्मादित्युत्तरस्य' (1.1.67) इति। `तावत्कः' इति। तत्परिमाणमस्येति `यत्तदेतेभ्यः परिमाणे वतुप्' (5.2.39), `आ सर्वनाम्नः' (6.3.91) इत्यात्वम्।।

24. विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम्। (5.1.24)
`विंशकः' इति। `ति विंशतेर्डिति' (6.4.142) इति तिशब्दस्य लोपः, अतो गुणे (6.1.97) पररूपत्वम्। यस्येति (6.4.148) लोपो न भवति; `असिध्दवदत्रा भात्' (6.4.22) इति लोपस्यासिद्ध्त्वात्। नन्विहान्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदसंज्ञा, तत्कथं पररूपत्वम्? एवं तर्ह्यसिद्धत्वस्यानित्यत्वाद् यस्येति लोपो भविष्यतीत्यदोषः।
`कथं पुनरत्र कन्' इति। त्रिंशत्क इत्यधिकृत्य प्रश्नः विंशतिक इत्यत्रार्थवतस्तिशब्दस्य ग्रहणात् पर्युदासो न प्रवर्त्तत इति तमधिकृत्यास्य प्रश्नस्योपन्यासो नोपपद्यते। `योगवभागः करिष्यते'इति। त्रिंशदर्थमित्यभिप्रायः।।

25. कंसाट्टिठन्। (5.1.25)
`ठञोऽपवादः' इति। न ठकः, कंसशब्दस्य परिमाणवाचित्वात्।।

26. शूर्पादञन्यतरस्याम्। (5.1.26)
`ठञोऽपवादः' इति। न ठकः, शूर्पशब्दस्य परिमाणवाचित्वात्।।

27. शतमानविंशतिकसहस्रवसनादण्। (5.1.27)
`ठक्ठञोरपवादः' [`ठञोऽपवादः' इति मुद्रितः पाठः] इति। शतमानं परिमाणम्, सहस्रं संख्या, तेनैताभां ठग्न प्राप्नोतीति ठञोऽपवादः। विंसत्या क्रीतं `विंशातिकम्' इति। तच्च परमाणमपि सम्भवति। तत्र परिमाणाट्ठञोऽपवादः, अपरिमाणट्ठकः, वसनशब्दाट्ठगपवादः।।

28. अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्। (5.1.28)
`अध्यरधकसम्' इति। अध्यर्धेन कंसेन क्रीतमिति तद्धितार्थे समासः। `प्राग्वतेः संख्यापूर्वदपानां तदन्तविधिरलुकि' (म.भा. 2.346) इति `कंसाट्टिठन् (5.1.25) इति टिठन्, तस्य लुक्। `द्विकंसम्' इति। `अध्यर्धशूर्पम्' इति। शूर्पादञन्यतरस्याम्' (5.1.26) इत्यञ्; ठञन्यतरस्याम्, तस्य लुक्। यद्यतिर द्विगोः परस्यार्हीयस्य लुग्विधीयते, विशेषानुपादनात् तद्धितलुगन्तादपि द्विगोः परस्य प्राप्नोति--द्वाब्यां शूर्पाभ्यां क्रीतः पटो द्विशूर्पः पटः, द्विशूर्पेण पटेन क्रीतमिति द्विशौर्पिकमिति? नैष दोषः; वक्ष्यमाणं विभाषाग्रहणं पूर्वेणापि सम्बध्यते। व्यवस्थितविभाषा सा। तेन तद्धितलुगन्ताद्द्विगोः परस्य न भविष्यति--द्विशौर्पिकमिति। प्राग्वतीये ठञि कृते `परिमाणान्तस्यासंज्ञाशाणयोः' (7.3.17) इत्युत्तरपदवृद्धिः।
`पाञ्चलोहितिकम्, पाञ्चकलापिकम्' इति। कस्याचित् परिमाणविशेषस्य नामधेये एते। पञ्च लोहिन्यः परिमाणमस्येति, पञ्च कपालाः परिमाणमस्येति विगृह्य तद्धितार्थे समासः, `तदस्य परिमाम्' (5.1.57) इति ठञ्, `भस्याऽढे तद्धिते' (वा.731) इति पुंवद्बावाल्लोहिनीशब्दस्येकारनकारनिवृत्तिः।
`अध्यर्धशब्दः संख्यैव' इति। अभिधानेऽभिधेयोपचारं कृत्वा, `अध्यर्धशब्दः संख्यैव' इत्युक्तम्। यथैव ह्येकादिका लौकिकसंख्या, एवमध्यर्धशब्दोऽपि। `स किमर्थं भेदनोपादीयते' [`सः' नास्ति--कासिका] इति। संख्याया इति शेषः. इह हि द्वगोरध्यर्धपूर्वस्य भेदेनोपादनादध्यर्धपूर्वस्य भेदेन संख्याया उपादानं भवतीति। अतस्तस्याध्यर्धशब्दस्य भेदेनोपादानस्य प्रयोजनं दर्शयितुं पृच्छति। `ज्ञापकार्थम्' इत्यादिना प्रयोजनमाचष्टे। किं पुनरस्य संख्याकार्यं न भवतीत्याह--`संख्यायाः' इत्यादि।।

29. विभाषा कार्षापणसहस्राभ्याम्। (5.1.29)
`अध्यर्धसहस्रम्' इति। `शतमानविंशतिक' (5.1.27) इत्यादिना विहितस्याणो लुक्। `अध्यर्धसाहस्रम्' इति। `संख्यायाः संवत्सरसंख्यस्य च' (7.3.15) इत्युत्तरपदवृद्धिः।
`सुवर्णशत्मानयोरुपसंख्यानम्' इति। उपसंख्यानं प्रतिपादनमित्यर्थः। तत्रेदं प्रतिपादनम्--`विस्ताच्च' (5.1.31) इत्यतः सिंहावलोकितन्यायेन चकारोऽत्रोपतिष्ठते, स चानुक्तसमुच्चयार्थः, तेन सुवर्णशतमानयोरपि विष्यति। `अध्यर्धसुवर्णम्' इति। ठञो लुक्, `अद्यर्धशतमानम्' इति। `शतमान' (5.1.27) इत्यादि-विहितस्याणः। `अध्यर्धशतमानम्' इति। `परिमाणान्तस्य' (7.3.17) इत्यादिनोत्तरपदवृद्धिः। ननु च सुवर्णमुन्मानम्, न परिमाणम्,

तत्कुतस्तस्य बुद्धिः? नैष दोषः; उत्तरपदवृद्धौ हयुन्मानमपि परिमाणमिति गृह्यते। कगुतो ज्ञायते? `असंज्ञाशाणयोः' (7.3.17) इति शाणशब्दस्य प्रतिषेधात्। यदि तर्हि तत्रोन्मानं न गृह्येत, तदा शाणस्योन्मानार्थस्य प्राप्तिरेव नास्तीति प्रतिषेधं न कुर्यात्। अध्यर्धपूर्वद्विगुभ्यां कार्षापणसहस्रयोर्यथासंख्यं कस्मान् भवति? लक्षणव्यभिचारेण तदभावस्य सूचितत्वात्।
इह तावत् `अध्यर्धपूर्वद्विगोः' (5.1.28) इति निर्देशेऽल्पाच्तरत्वाद् ध्यन्तत्वाच्च द्विगुशब्दस्य पूर्वनिपातः प्राप्नोति, `कार्षापणसहस्राभ्याम्' इत्यत्राल्पाच्तरत्वात् सहस्रशब्दस्य? तावेतौ निर्देशौ लक्षणान्तरनिरपेक्षतां बोधयन्तौ यतासंख्यपरिभाषाया अप्यभावं बोधयत इति न भवति यथासंख्यपरिभाषा।।

30. द्वित्रिपूर्वान्निष्कात्। (5.1.30)
अध्यर्धपूर्वग्रहणमस्वरितत्वान्नोपतिष्ठते। `द्विनिष्कम्' इति। द्वाभ्यां निष्काभ्यां क्रीतमिति असमाने ठको विधानादत्र ठञ्, तस्य लुक्। `द्विनैष्किकम्' इति। `परिमाणान्तस्य' (7.3.17) इत्यादिनोत्तरपदवृद्धिः। `बहुपूर्वाच्च' इति। बहुपूर्वद्द्विगोर्निष्कशब्दान्तादार्हीयस्य प्रत्ययस्य विभाषा लुग्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`द्वित्रिभ्यां निष्कात्' इत्येव सिद्धे पूर्वग्रहणमधिकं कुर्वतै तत् सूचितम्--`अन्यदप्यधिकं किञ्चिदस्ति' इति। तेन बहुपूर्वादपि भवति।।

31. विस्ताच्च। (5.1.31)
`द्वित्रिपूर्वादिति चकारेणानुकृष्यते' इति। ननु च स्वरितत्वादेव द्वित्रिग्रहणमनुवर्त्तिष्यते, स्वरितत्वे सत्यधिकारपरिमाणं न ज्ञायत इति चेत्? वार्त्तमेतत्। व्याख्यानतोऽदिकारपरमाणं विज्ञास्यते? एवं तर्हि स्वरितत्वादेव द्वित्रिपूर्वग्रहणस्यानुवृत्तौ सिद्धायां यत्तदनुकर्षणार्थं चकरमधिकं करोति, तेनैतत् सूचयति--अन्यदप्यत्र किञ्चिदधिकं भवतीति। तेन बहुपूर्वादपि विभाषा लुक् सिद्धो भवति। `बहिबिस्तम्' इति। `द्विबिस्तम्' इति द्वौ विस्तो परिमाणमस्येति ठञ्, तस्य लुक्। `द्विबैस्तिकम्' इति। उत्तरपदवृद्धिः।।

32. विंशतिकात्खः। (5.1.32)
`द्वित्रिपूर्वग्रहणं निवृत्तम्; पूर्वत्र चानुकृष्टत्वात्, अस्वरितत्वाद्वा। शतमानादिसूत्रेण (5.1.27) अणि प्राप्ते तस्य लुकि खो विधीयते। `विधानसामर्थ्यादस्य लुग्न भवति' इति। यदि लुक् स्यात्, खविधानमनर्थकं स्यात्। न ह्यणः खस्य च लुकि सति कश्चिद्विसेषोऽस्ति।।

33. खार्या ईकन्। (5.1.33)
खारीशब्दस्य परिमाणवाचित्वाट्ठञि प्राप्ते तस्येकन् विधीयते।

`केवलायाश्चेति वक्तव्यम्' इति। केवलो योऽसमस्तः खारीशब्दस्ततश्चेकन् भवतीत्ये तदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--इकन्निति वक्तव्ये यदिकनोमात्राधिकस्य विधानं तदन्यदप्यत्र किञ्चद्भवतीति सूचयति, तेन केवलादपि खारीशब्दादीकन् भवतीति। कथं पुनरिकनि रूपं सिध्यति? सवर्णदीर्घत्वेन। ननु च यस्येति लोपः (6.4.148) प्राप्नोति? नैतदस्ति; यदि हि यस्येति लोपः स्यात्, टनमेव ब्रूयात्।
`काकिंण्याश्चोपसंख्यानम्' इति। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। प्रतिपादनं तु तस्यैवाधिकसूचनार्थस्येकनो विधानमाश्रित्य कर्त्तव्यम्।
`केवलायाश्चेत्युपसंक्यानम्' [`केवलायाश्च' इत्येव-काशिका] इति। उपसंखयनशब्दस्य प्रतपादनमर्थः। पूर्ववत् प्रकृतेन सम्बन्धः।।

34. पणपादमाषशताद्यत्। (5.1.34)
पणपादमाषेभ्यः `असमासे निष्कादिभ्यः' (5.1.20) इति असमासे ठको विधानाट्ठञि प्राप्ते तस्य लुकि शतशब्दादप्यसमासे `शताच्च ठन्यतावशते' (5.1.21) इति ठन्यतोर्विधानात् समासे संख्यालक्षणे कनि यद् विधीयते। `द्विपाद्यम्' इत्यादि। ननु पद्भावः कस्मान्न भवति `पद्यत्यतदर्थे' (6.3.53) इति? सत्यम्; `पादस्य पदाज्याति' (6.3.52) इत्यत्र प्राण्यङ्गस्यैव पद्भावविधानात्। कृत एतत्? `आज्याति' इत्यादिना गतिवचनेन सम्बन्धस्तस्यैवोपपद्यते; न परिमाणशब्दस्य। स एव प्राण्यङ्गवाच्युत्तरसूत्रेऽप्यनुवर्तिष्यत इति तस्यैव पद्भाव इष्यते। स्यादेतत्--अयमपीह पादशब्दः प्राण्यङ्गवाची, अतो भवितव्यमेवेह पद्भावेन? इत्यत आह--`पद्भावो न भवति' इति। `पद्यत्यतदर्थे' (6.3.53) इति पद्भावः प्राप्नोति, स न भवति। किं कारणमित्याह--`प्राण्यङ्गस्य' इत्यादि। `पादस्य पदाज्यातिगोपहतेषु' (6.3.52) इत्यत्र प्राण्यङ्गस्य पादस्य ग्रहणम्। `इदं तु परिमाणग्रहणम्' [`परिमाणम्-काशिका] इति। पणादिभिः परिमाणैः साहचर्यात् परिमाणं पादो गृह्यते, न प्राण्यङ्गमिति पद्भावस्याप्रसङ्गः।।

35. शाणाद्वा। (5.1.33)
`ठञोऽपवादः' इति। न ठकः; शाणस्य परिमाणत्वात्।

`शताच्चेति वक्तव्यम्' इति। शताच्चाध्यर्थपूर्वाद्द्विगोश्च यत्प्रत्ययो भवतोत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्यख्यानम्--पूर्वसूत्रादिह शतशब्दोऽनुवर्त्तते, तेन तदन्तादपि यद्भवतीति। यद्येवम्, पूर्वसूत्रे तस्य पाठोऽनर्थक इति, इहैव शतशाणाब्याञ्चेति वक्तव्यम्? नैवं शक्यम्; एवं ह्युच्यमाने `द्वित्रिपूर्वादण्च' (5.1.36) इत्यनेनापि शतात् प्रसज्येत। पूर्वसूत्रे तु पाठसामर्थ्यादण्विधौ नानुवर्त्तते। शतशब्दः स्वरितत्वाच्चेहानुवर्त्तमानो वा यतमुत्पादयति।।

36. द्वित्रिपूर्वादण्च। (5.1.36)
`तेन त्रैरूप्यं सम्पद्यते' इति। एकं रूपं सूत्रनिर्दिष्टेऽणि, द्वितीयं चकारसमुच्चिते यति, तृतीयं वाशब्दप्रापितस्य ठञो लुकदि। `द्विशाणम्' इति। ठञो लुक्।।

37. तेन क्रीतम्। (5.1.37)
`साप्ततिकम्, आशीतिकम्' इति। `प्राग्वतेष्ठञ्' (5.1.18) `नैष्किकम्'; पाणिकम्' इति। `असमासे निष्कादिभ्यः' (5.1.20) इति ठक्। `शत्यम्, शतिकम्' इत। `असमासे निष्कादिभ्यः' (5.1.20) इति ठक्। `शत्यम्, शतिकम्' इति। `शताच्च ठन्यतावशते' (5.1.21) इति। `द्विकम्, त्रिकम्' इति। `संख्याया अतिशदन्तायाः कन्' (5.1.22)।
सामान्यार्थाभिधाने तेनेति तृतीयोपादनादिह कस्मान्न भवति--देवदत्तेन क्रीतम्, पाणिना क्रितम्? इत्यत आह--`तेन' इत्यादि। करणे तृतीया। परिमूल्यात् ततः प्रत्ययेन भवितव्यम्। `अन्यत्र' इति। अन्यतर मूल्यात् करणे तृतीया भवति। `अनभिधानात्' इति। न हि या कर्त्तरि तृतीया याप्यमूल्यात् करणे तृतीयोत्पद्यते, तदन्तादुत्पन्नः प्रत्यायो विवक्षितं वस्तु प्रतिपादयितुमलं सम्भवति। तथा ह--दैवदत्तिकं पाणिकमिति चोक्ते, देवदत्तेन कर्त्रा क्रीतम् पाणिना करणेन क्रीतमित्येषोऽर्थो नावसीयते। देवदत्तेनेति कर्त्तरि तृतीया, पाणिनेति करणे। तदेतदुक्तं भवति--प्रगत्यासन्नविनिमयद्रव्यसम्बन्धानभिधानादिति। `अनभिधानादेव' इति। न हि प्रास्थिकमित्युक्ते, प्रस्थाभ्यां क्रीतं प्रश्थैर्वा क्रीतमित्येषोऽवगम्यते। तत्र पुनरभिधाने को हेतुः? शब्दशक्तिरीदृशी, किमत्रान्येन हेतुना! अपि च प्रस्थादयः शब्दा अर्थतस्तु परिमाणानामर्थानां वाचका इति तेषामभिधेयस्य प्रचये प्रवृत्तिसम्भवे को हेतुः? नन्वेवं वाक्येऽपि प्रचयो नोपपद्येत? नैष दोषः; वाक्ये हि प्रचयस्य वाचिका विभक्तिरस्तीति प्रचयाभिधानं न विरुध्यते। वृत्तौ तु न कश्चित् प्रचयमाचष्ट इति नासौ वृत्तिविषये युज्यते। यदि तर्हि द्विवचनबहुवचनान्तात् प्रत्ययेन न भवितव्यम्, एवं सति द्वाभ्यां क्रीतं द्विकम्, त्रिभिः क्रीतं त्रिकमित्येवमादि न सिध्यतीत्यत आह--`यत्र तु' इत्यादि। अनभिधानं द्विवचनान्तात् प्रत्ययानुत्पत्तेर्हेतुः। तच्चाभिधानं क्व न भवति? यत्र प्रकृत्यर्थस्य संख्याभेदावगमो नास्तीति; प्रमाणाभावात्। इह तु प्रमाणमस्त्येव किञ्चित्। द्व्यादय एव शब्दाः प्रकृतित्वेनोपात्ताः। ते हि स्वप्रवृत्तिनिमित्तभूतयैव संख्ययाऽवच्छिन्नं वस्तु प्रतिपादयन्ति। अतः स्वार्थस्य संख्याविसेषावगमे प्रमाणम्। तेनात्रानभिधानादित्येष हेतुनस्तिति भवति प्रत्ययः। `तथा' इत्यादि। यथा त्रिकमित्यादौ प्रकृत्यर्थसंख्यानभावोपगमे प्रमाणसम्भवाद्बहुवचनान्तादपि प्रत्ययो भवति, तथा मौद्गिकमित्यादावपि मुद्गादिशब्दप्रकृतिरत्र स्वार्थस्य संख्यावगमे प्रमाणमित्येतद्दर्शयितुमाह--`न ह्येकेन' इत्यादि। मुद्गादिनैकय व्यक्त्या क्रयो न भवतीति विनापि विभक्त्या मुद्गादिशब्दानुवृत्तौ बहुत्वं गम्यते। तत्र प्रमाणं भवति। एकग्रहण त्रयानुपयोगिनोर्द्वयोरप्युपलक्षणं वेदितव्यम्।।

38. तस्य निमित्तं संयोगोत्पातौ। (5.1.38)
`महाभूतानाम्' [महाभूतपरिणामः=उत्पात्तः--काशिका] इति। पृथिव्यप्तेजोवाय्वाकाशानाम्। `साहस्रम्' इति। शतमानादिसूत्रेण (5.1.27) अण्।।

39. गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्। (5.1.39)
`ठञादीनामपवादः' इति। अदिशब्देन ठगादीनां ग्रहण्। ननु च संख्यापरिमाणयोः पर्युदासात् कनष्ठकोऽपवाद इति वक्तुं शक्यते, तत्कस्माट्ठञादीनामित्युच्यते? ठञादीनामित्ययमतद्गुणसंविज्ञानो बहुव्रीहिर्द्रष्टव्यः। अनयैवापेक्षयोक्तम्--अश्वस्य निमित्तमाश्विकमिति। ठक्, प्रत्युदाहृतः। सर्वप्रत्ययसम्भवः, तद्बाधनार्थमिदमुक्तम्। `पञ्चकम्, अष्टकम्' इति। संख्यालक्षणः कन् (5.1.22)। `प्रास्थिकः' इति। प्राग्वतीयष्ठञ्, (5.1.18)।।

40. पुत्राच्छ च। (5.1.48)

41. सर्वभूमिपृथिवीभ्यामणञौ। (5.1.41)

42. तस्येश्वरः। (5.1.42)
`तस्य निमित्तम्' (5.1.38) इत्यतस्तस्यग्रहणमनुवर्त्तते, तत्किमर्थं पुनस्तस्यनिर्देशः? इत्याह--षष्ठीप्रकरणे पुनः षष्ठीसमर्थविभक्तिनिर्देशः' इत्यादि। `प्रत्ययार्थस्य' इति। निमित्तस्य। `अन्यथा' इति। यदि षष्ठीनिर्देशः प्रत्ययार्थे निवृत्त्यर्थो न क्रियते, ततो यथा संयोग उत्पातश्च प्रत्ययार्थविशेषणम्,

तथेश्वरोऽपि तस्यैव विशेषणं सम्भाव्येत। तथा चेश्वरविशिष्टे निमित्त एव प्रत्ययः स्यात्।।

43. तत्र विदिति इति च। (5.1.43)
ईश्वरानुकर्वणार्थश्चकारः। इतिकरणो विवक्षार्थः।।

44. लोकसर्वलोकाट्ठञ्। (5.1.44)
सर्वत्र ठञ्ग्रहणं ठको निवृत्त्यर्थम्, अन्यथा हि प्रकृतिमात्रनिर्देशे क्रियमाणे `आर्हात्' (5.1.19) इति ठक्प्रसज्येत।।

45. तस्य वापः। (5.1.45)
`अप्यतेऽस्मिन् वापः' इति। अधिकरणसाधनः `हलश्च' (3.3.121) इति घञ्।।

46. पात्रात् ष्ठन्। (5.1.46)
`पात्रशब्दः परिमाणवाची' इति। `ठञोऽपवादः' इति। अत्रेयं युक्तिः--यदि ह्यपरिमाणवाची स्यात् तदार्हीयस्य ठकोऽपवादः, न ठञः। `पात्रिकी' इति। `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीष्।।

47. तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते। (5.1.47)
ननु च वृद्ध्यादीनां बहुत्वाख्यानेनैव बहुवचनं तेन भवितव्यमितित कथं दीयत इत्येकवचनान्तेन तस्य निर्देशः? इत्याह--`दीयत इत्येकवचनम्' इत्यादि। यदि समुदितैर्वृद्ध्यादिभिः सम्बन्धः क्रियते तर्हि स्याद्बहुवचनम्। न च तैः समुदितैःस क्रियते, किं तर्हि? प्रत्येकम्, अत एकवचनमेव। वृद्धिशब्द इह लौकिको धनविशेषवाची गृह्यते, न च संज्ञापदम्, आयादिभिर्धनविशेषवाचिभिः सह निर्देशात्। अत एवाह--`तत्र' इत्यादि। उत्तमर्णस्य यद्धनं तस्मादतिरिक्तमधिकं धनमधमर्णेन यद्दातव्यं तद्वृद्धिः। `ग्रामादिषु' इति। आदिशब्देन क्षेत्रादि। `पटादीनाम्' इत्यादि। पटादीनां व्यवह्रियमाणानामुपादानं सूत्रादि। तस्य यन्मूल्यं तस्मादतिरिक्तं द्रव्यं पटादिविक्रयेण यल्लभ्यते स लाभ-। `रक्षानिर्वेशः' इति। वणिजां रक्षाकारी राज्ञो भागो रक्षानिर्वेश इत्युच्यते। ननु चासावपयायः, तदपार्थकं शुल्कस्य पृथगुपादानम्? नैतदस्ति; पञ्चास्मिन् ग्राम आय इत्यायं प्रति ग्रामस्याधिकरणभावः; उत्पद्यमानस्यायस्याधेयबावात्। शुल्के तु न सम्भवति। पञ्चास्मिन् शते शुल्का इति शतं न शुल्कस्याधिकरणम्, किं तर्हि? इयतापरिच्छेदः शतेन शुल्कस्य क्रियते। तस्मादस्य भिन्नत्वात् शुल्कः पृथगुक्तः।
`सिद्धं तु' इत्यादि। विवक्षातः कारकाणि भवन्तीति सम्प्रदानाख्ये चाधिकरणत्वेन विवक्षेत्याह--`समम्' इत्यादि। गतार्थम्।।

48. पूरणार्द्धाट्ठन्। (5.1.48)
`पूरणवाचिनः' इति। पूर्यते येनार्थेन स पूरणः, तद्वाचिनः प्रातिपदिकात्। एतेन `पूरण' इत्यर्थस्य ग्रहणम्, न प्रत्ययस्येति दर्शयति। कथञ्च प्रत्ययस्य ग्रहणं स्यात्? यदि पूरणग्रहणं स्वर्येत। तस्मिन् हि स्वर्यमाणे `तस्य पूरणे डट्' (5.2.48) इत्यधिकृत्य ये प्रत्यया विहितास्ते गृह्येरन्। किञ्च स्यात्? `पूरणाद्भागे तीयादन्' (5.3.48) इत्यन्नन्ताट्ठन् न स्यात्; अपूरणप्रत्ययान्तत्वात्। तस्याग्रहणे तु सति स्वार्थिकः स्यादन्। तस्मिन्नप्युत्पन्ने पूरण एवार्थे तदन्तमपि वर्तत इति ततोऽपि ठन् सिद्धो भवति। `ठक्ठनोरपवादः' इति। पूरणादार्हीयस्य ठकोऽपवादः. अर्धादपि `अर्द्धाच्चेति वक्तव्यम्' (वा.502) इत्यौपसंख्यानिकस्य टिठनः। ठकि टिठनि च सति ङीप् स्यात्; ठनि तु टाब्भवति। `द्वितीयिकः' इति। द्वयोः पूरण इति `द्वेस्तीयः' (5.2.54) इति तोयप्रत्ययः। `तृतीयिकः' इति। `त्रेः सम्प्रसारणञ्च' (5.2.55)। `पञ्चमिकः, सर्प्तामकः' इति। `तस्य पूरणे डट्' (5.2.48) इति डट्प्रत्ययः, तस्य `नान्तादसंखयादेर्मट्' (5.2.49) इति मडागमः।।

49. भागाद्यच्च। (5.1.49)
`ठञोऽपवादः' इति। न ठकः; भागशब्दस्य परिमाणत्वात्। ननु चाङ्गमात्रवचनोऽपि भागशब्दोऽस्ति? सत्यमस्ति; न तु तस्येह ग्रहणम्। तस्य हि ग्रहणे वृद्ध्यादिभिः सम्बन्दो नोपपद्यते। परिमाणवचनस्तु प्रसिद्धो रूपकांशे वर्त्तत इति वृद्ध्यादिभिः सम्बन्धः उपपद्यते।।

50. तद्धरपि वहत्यावहति भाराद्वंशादिभ्यः। (5.1.50)
`प्रकृतिविशेषणम्' इत्यादि। प्रकृतेः प्रातिपदिकस्य। `भाराद्वंशादिभ्य इत्यर्थः' इति। अत्रार्थे वंशादय एव शुद्धाः प्रत्ययमुत्पादयन्ति।
ननु च वंशादयः शब्दाः, भार इत्यपि शब्द एव; न च शब्द शब्दान्तरस्य समानाधिकरणं विसेषणमुपपद्यते, तत्कथं भारभूतेभ्यो वंशादिभ्य इत्येषोऽर्थो

भवति? इत्याह--`भारशब्दोऽर्थद्वारेण' इत्यादि। वंशादीनांमर्थस्य भारशब्दस्यार्थो मुख्यं विशेषणम्, अर्थद्वारेण तु वंशादीनां भारशपब्दस्य चोपचरितम्। अर्थधर्मेण शब्दोऽपि तथा व्यपदिश्यत इत्यर्थः।।

51. वस्नद्रव्याभ्यां ठन्कनौ। (5.1.51)
पूर्वेण ठकि प्राप्ते तदपवादौ ठन्कनौ विधीयते।।

52. सम्भवत्यवहरति पचति। (5.1.52)
`प्रमाणानतिरेकः' इति। प्रमाणादनाधिक्यमित्यर्थः। `ननु च' इत्यादि। तथा हि--सक्थालीप्रस्थं पचति; तत्रावश्यं प्रस्थस्य सम्भवेन भवितव्यम्; न ह्यन्यथा शक्यते पक्तुमित्यभिप्रायः। `नास्त्यत्र नियोगः' इति। व्यभिचारमाह--`प्रस्थं पचति ब्राह्मणी' इति। अत्र हि पाक एव गम्यते, न सम्भवः।।

53. आढकाचितपात्रात् खोऽन्यतरस्याम्।
`ठञोऽपवादः' इति। आञकादीनां परिमाणकत्वात् पूर्वेम प्राप्तस्य।।

54. द्विगोष्ठँश्च। (5.1.54)
पूर्वेण ठन्खयोः प्राप्तयोस्ततश्च लुकीदमुच्यते। `विधानसामर्थ्यादनयोर्लुग्न भवति' इति। यदि ह्यत्रापि लुक् स्यात्, विधानमनर्थकं स्यात्। `ठञस्तु पक्षेऽनुज्ञातस्य' इति। अन्यतरस्यांग्रहणेन। `द्व्याढकी' इति। ठञो लुक्पक्षे `द्विगोः' (4.1.21) इति ङीप्। `द्व्याचिता' इति। `अपरिमाण' (4.1.22) इत्यादिना ङीप्प्रतिषेधे टाप्।।

55. कुलिजाल्लुक्खौ च। (5.1.55)
`चातूरूप्यम्' इति। एकं खे रूपम्, ष्ठनि द्वितोयम्, लुकोऽपि विकल्पितत्वाट्ठञोऽलुकि तृतीयम्, लुकि चतुर्थम्।
ननु च कुलिजशब्दसय परिमाणवाचित्वात् `परिमाणान्तस्य' (7.3.17) इत्युत्तरपदवृद्धिः कस्मान्न भवति? इत्यत आआह--`परिमाणान्तस्य' इति। `परिमाणान्तस्यासंज्ञाशाणकुलिजात्' इत्येवैतत् सूत्रं प्रत्येतव्यमिति दर्शयति।।

56. सोऽस्यांशवस्नभृतयः। (5.1.56)
`वस्नद्रव्याभ्याम्' (5.1.51) इत्यत्रापि वस्नशब्देन मूल्यमुच्यते।।

57. तदस्य परिमाणम्। (5.1.57)
`प्रास्थिको राशिः' इत्यादौ सर्वत्र ठञ्। `द्विषाष्टिकः' इत्यादि। `संख्यायायाः संवत्सरसंख्यस्य च' (7.3.15) इत्युत्तरपदवृद्धिः।
`पुनर्विधानसामर्थ्यात्' इत्यादिना पुनर्विधानफलं दर्शयति। `द्विषाष्टिकः' इत्यादौ द्विः प्रत्यविधानम्, तत्र पूर्वसूत्रात् समर्थविभक्तेः प्रत्यायार्थसयानुवृत्तेः प्रथमं प्रत्ययो विधीयते, तस्य `अध्यर्धपूर्व' (5.1.28) सूत्रेण लुग्भवति। नन्विह च यः सूत्रे समर्थविभक्तेः प्रत्ययार्थस्य चोपादनात् पुनर्विधीयते तस्यापि पुनर्विधानमनर्थकं स्यात्।।

58. संख्यायाः संज्ञासह्घसूत्राध्ययनेषु। (5.1.58)

`परिमाणोपाधिकात्' इति। परिमाणमुपाधिर्विशेषणं न सम्भवति, न हि शब्दः परिमाणं शब्दस्य सम्भवतीति? तदर्थस्य विसेषणं विज्ञास्यत इत्यदोषः। ननु चार्थस्यापि न सम्भवति, संख्या हि नैव परिमाणम्? नैष दोषः; नात्र रूढः परिमाणशब्दो गृह्यते, किं तर्हि? क्रियाशब्दः--परिमायते येन तत् परिमाणमिति। संख्यायापि च परिमीयत इति सापि परिमाणम्। नन्वेवमपि विशेषणमनर्थकम्; न ह्यपरिच्छेदिका संख्यास्ति, सञ्चक्षाणा हि संख्योच्यते? सतद्यम्; परिच्छेदिकैव संख्या, सा तु स्वस्याभिदेयं परिच्छिनत्तीति षष्ठ्यर्थमवश्यं न परिच्छिनत्ति। पञ्चास्य सङ्घस्य पुत्रा इति नात्र सह्घस्येयत्ता प्रतीयते। इह तु पञ्चसंख्या परिमाणमस्य सङ्घस्येति भवतीयत्ताप्रतीतिः सङ्घस्य। तस्मादुपपन्नं संख्यायाः परिमाणं विशेषणम्।
`तत्र' इत्यादि। पञ्चशब्दोऽयं संख्येय एव वर्त्तते, न कदाचिदपि संख्यानमात्रे। ततश्च य एव संख्येयाः पञ्चत्वसंख्ययावच्छिन्नाः पञ्चशब्देनोच्यन्ते, प्रत्ययान्तेनापि त एव न हि तेषां भिन्नानामत्र संख्येयान्तरं परिमाणं प्रत्ययवाक्यं सम्भवपति। तस्मात् संज्ञायां स्वार्थं एव प्रत्ययो वाच्यः। तथा चाह वार्त्तिककारः--`संज्ञायां स्वार्थे उत्पद्यते' इति।
`पञ्चकोऽधीतः' इति पाठापेक्षया पुंल्लिङ्गः। `अधीतिरध्ययनम्' इति। अनेन भावसाधनमध्ययनशब्दं दर्शयति। यद्यधीयत इत्यध्ययनं कर्मसाधनोऽद्ययनशब्दः स्यात्, सूत्रग्रहणं पृथग्वक्तव्यं न स्यात्; अध्ययनग्रहणेनैव सिद्धत्वात्, सूत्रमप्यधीयत एव। `पञ्चावृत्त्यः' इति पाठे पुनः

क्रियात्मिकाः पञ्च वारा इत्यादिना पर्यायान्तरेण पञ्चावृत्य इत्यस्यैवार्थं व्यक्तीकरोति।
`स्तोमे डविधिः' इति। अत्रापि च्छन्दसीति सम्बध्यते। मन्त्रसमुदायः स्तोमः। `एकविंशः' इति। `अतो गुणे' (6.1.97) पररूपत्वं च, `ति विंशतेर्डिति (6.4.142) इति तिशब्दलोपः।
`शन्शतोः' इत्यादि। शन्नित्येवमन्ताच्छन्दसि डिनिर्वक्तव्यः।।

59. पंक्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्। (5.1.59)
`अपदत्वं च' इति। पदनिबन्धनस्य जशत्वादेः कार्यस्य प्रतिषेधार्थमिहैते विंशत्यादयः परिमाणे निपात्यन्ते। `तदस्य परिमाणम्' (5.1.57) इत्यधिकारे निपातनात्। एवञ्च गवां विंशतिरिति षष्ठी व्यतिरेकनिबन्धना न प्राप्नोति।
विंशतिशब्देन हि तान्येव गोद्रव्याणि गृह्यन्ते, न तदधिकं किञ्चिदर्थान्तरम्। बहुवचनं प्रसजति तेषां बहुत्वादिति यश्चोदयेत्, तं प्रत्याह--`विंशत्यादयः' इत्यादि। यथाकथञ्चित्प्रकारेण। विनाप्यवयवार्थेनेति यावत्। रूपमात्रं प्रधानम्, नावयवार्थः। यस्त्वेषामर्थः स लोकत एव व्यवतिष्ठत इत्यभिप्रायः।
`नात्राभिनिवेष्टव्यम्' इति। संख्यापरिमाणोपाधिकः प्रकृत्यर्थः। `परिमाणमात्रं प्रत्ययाः' इति नायमत्राभिनिवेशः कर्त्तव्य इत्यर्थः। अनभिनिवेशस्य कारणमाह--`तथा हि' इत्यादि। स्यादेतत्--`अत्राप्यवयवार्थोऽस्ति' इत्यत आह--`न च' इत्यादि। ब्राह्माणानां पंक्तिरित्युक्ते संख्यापरिमाणोपाधिकः प्रकृत्यर्थः, परिमाणो वा कश्टचित्; प्रत्ययार्थो हि न गम्यते, किं तर्हि? सन्निवेशविशेषः संस्थानात्मको गुण एव प्रतीयते। तथा हि--तस्य सन्निवेशविशेषस्यानवगमे तावत्स्येव ब्राह्मणेषु पंक्तिरिति न प्रयुज्यते। तदेवं गुणशब्दत्वाद्विंशत्यादीनां गवां विंशतिरिति सिध्यति षष्ठी; विंशतिशब्दस्य संख्यानवृत्तित्वात्।
यदि तर्हि गुणशब्दा एते, विंशतिगवि इति द्रव्यशब्देन सामानाधिकरण्यं न प्राप्नोति? गुणिन्यत्र वृत्तिः, गुणमात्रे न ततोऽयमदोष इति। वक्तव्यः स हेतुः यत एतेषा क्वचिद्गुणमात्रे वृत्तिर्भवति, क्वचिद्गुणिनि। बहुवचनप्रसङ्गाच्च गुणिनि वृत्तिरित्येतदेव दुःस्थम्; बहुत्वाद्गुणिनाम्। इह च विंशतिः कुण्डानीति नपुंसकलिङ्गं प्राप्नोति, विंशतिर्ब्राह्मणा इति पुंल्लिङ्गम्, गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति, यथा--शुक्लः कम्बलः, शुक्लं वस्त्रम्, शुक्ला शाटीति। यदासौ द्रव्यमाश्रित्य भवति गुणः, तस्य लिङ्गवचनं यत् तद्गुणवचनस्यापि भवति, यथा--गुणशब्दत्वेऽप्येषामाश्रीयमाणे न भवत्येव दोषप्रसङ्गान्मुक्तिः? इत्यत आह--`या चैषाम्' इत्तयादि। न केवलमर्थाभिदानं स्वाभाविकम्, किन्त्वेतदपीत्यपिशब्देन दर्शयति। यत्र द्रव्येण गुणिनैषामभिधेयो गुणो विशेष्यते, तत्र स्वभावादेव गुणमात्रे वृत्तिः। यत्र त्वेत उपसर्जनीभूतस्वार्थास्तेन स्वार्थेन द्रव्यं विशेषयन्ति तत्रैषां स्वभावत एव गुणिनि वृत्तिः।
`स्वलिङ्गसंख्यानुविधानं च' इति। गुणिन्यणि वर्त्तमानानां ययोर्लिङ्गसंख्ययोर्यदनुविधानमनुवर्त्तमानमेतदपि सर्वं स्वाभाविकम्। अन्येषामपि, गुणशब्दानामपि क्वचित् स्वभावत एव गुणिनि वृत्तिर्भवति, तद्यथा-शुक्लः पट इत्यत्र शुक्लशब्दस्य। क्वचिद्गुणमात्रे, यथा--अस्यैव शुक्लो गुणः पटस्येत्यत्र। अन्येषामपि केषाञ्चित् शब्दानां स्वाभाविकं स्वलिङ्गसंख्यानुविधानं दृश्यत एव, तद्यथा--वेदाः प्रमाणम्, श्रुतयः प्रमाणमिति। तस्मात् स्वाभाविकत्वाद्गुणमात्रे गुणिनि च वृत्तेः स्वलिङ्गसंख्यानुविधानस्य च न भवति यथक्तदोषप्रसङ्गः। यदा हि स्वभावत इति संख्यानमात्रे गुणे गुणमात्रे वृत्तिः तदा व्यतिरेकनिबन्धना षष्ठी भवति। यदा तु गुणिनि, तदा तयोरपि च द्रव्यशब्दत्वाकत् सामानाधिकरण्यमपि भवति। द्रव्येऽपि वर्त्तमानानां स्वाभाविकं स्वलिङ्गसंख्यानुविधानम्।
अथ सहस्रादयोऽपि कस्मान्न व्युत्पाद्यन्ते? इत्याह--`सहस्रादयोऽपि' इत्यादि। एवञ्जातीयका एवम्प्रकारा विंशत्यादिभिः सदृशा इत्यर्थः। तेषामपि गुणवत्त्वात् तद्वदेव विंशात्यादिवदेव द्रष्टव्याः। विंशात्यादय इव तेऽपि प्रकृत्यादिविभागेन व्युत्पाद्यन्त इत्यर्थः। यद्येवम्, किमर्थं विंशत्यादय एव सूत्रे उपात्ताः? इत्याह़ृ`उदाहरणमात्रम्' इत्यादि। उदाहरणमात्रं विंशत्यादिग्रहणम्, अन्येऽप्येवञ्जातीयाः सहस्रादयस्तथैव व्युत्पाद्याः।।

60. पञ्चद्दशतौ वर्गे वा। (5.1.60)
ननु च `सङ्घ' इत्यनुवर्त्तिष्यते, किं वर्गग्रहणेन? नैतदस्ति; सङ्घशब्दो हि प्राणिसमुदाये रूढः। वर्गशब्दस्तु समूहमात्रे इति वर्गग्रहणं कर्त्तव्यम्।।

61. सप्तनोऽञ् छन्दसि। (5.1.61)
संख्यालक्षणे कनि प्राप्ते सप्तञ्शब्दाच्छन्दस्यञ्विधानम्।।

62. त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्। (5.1.62)
त्रिंशच्छब्दात् `विंशतित्रिंशद्भ्याम्' (5.1.24) इति योगविबागेन कनि प्राप्ते चत्वारिंशच्छब्दादपि `प्राग्वतेष्ठञ्' (5.1.18) इति ठञि प्राप्तेऽयमारभ्यते।
`अभिधेये सप्तम्येषा' इत्यादि। विषयसप्तम्यामस्यां ब्राह्मणविषयश्चेत् प्रयोगो भवतीत्येषोऽर्थः स्यात्, तथा चान्यत्र प्रत्ययान्तस्य प्रयोगो न स्यात्, तस्मान्न विषयसप्तम्येषा। एतच्च संज्ञाग्रहणादेव विज्ञायते। न हि ब्राह्मणग्रहणात् त्रिंशच्चत्वारिंशतौ डण्णन्तौ कस्यचित् पदार्थस्य संज्ञिनौ स्तः, ब्राह्मणानां तु विद्यते।।

63. तदर्हति। (5.1.63)
`श्वैतच्छत्रिकः, वास्त्रयुग्मिकः' इत्यादिषु ठक्। `आर्हात् (5.1.19) इत्यभिविधौ चायमाकार इति।।

64. छेदादिभ्यो नित्यम्। (5.1.64)
`नित्यग्रहणम्' इति। अथ विभाषाया निवृत्त्यर्थं नित्यग्रहणेन कस्मान्न विज्ञयते? अशक्यं तन्निवृत्त्यर्थं विज्ञातुम्। विनापि नित्यग्रहणेन महाविभाषानिवृत्तिः शक्यते विज्ञातुम्। तथा हि--छेदादिभ्यः पूर्वेणैव ठकि सिद्धे पुनर्वचनादेव नित्यविधिर्भविष्यति, किं नित्यग्रहणेन? ततो नित्यग्रहणमहन्यहन्यर्हत्वात् `तदर्हति' (5.1.63) इत्यस्यार्थस्य विशेषणं विज्ञायते। तथा च जातमारम्भस्य प्रयोजनमिति वाक्यं न निवर्तते।
`विरागो विरङ्गञ्च' इति। विरागशब्दष्ठकमुत्पादयति विरङ्गादेशं चापद्यते। नित्यं विरागमर्हति वैरङ्गिकः। प्रत्ययसन्नियोगेन चायसादेश इति प्रत्ययाभावाद्वाक्ये न भवति।।

65. शीर्षच्छेदाद्यच्च। (5.1.65)
प्रत्ययसन्नियोगेन शीर्षभावः, तेन वाक्ये प्रत्ययाभावान्न भवतीति भावः।।

66. दण्डादिभ्यो यः। (5.1.66)
दण्डशब्दोऽयमस्ति क्रियावचनः--द्डनं दण्ड इति, अस्ति द्रव्यवचनः; विशेषाभावाद्द्वयोरपि ग्रहणम्।।

67. छन्दसि च। (5.1.67)
यदनुवर्त्तते, नानन्तरो यः; यत एव स्वरितत्वात्।।

68. पात्राद्घँश्च। (5.1.68)
`ठक्ठञोरपवादः' इति। ननु च पात्रं भाजनम्, न परिमाणम्, अतस्तद्वाचिनष्ठक् प्राप्नोति, तस्यैवापवादो युक्तः, तत्किमुच्यते ठक्ठञोरपवादः? इत्याह--`पात्रं परिमाणमप्यस्ति' इति। न केवलं भाजनमित्यपिशब्देन दर्शयति। तत्र यदा परिमाणे पात्रशब्दो वर्त्तते, तदा ठञोऽपवादः; यदा भाजने, तदा ठकः। पात्रं स्थाल्यादि। कोऽर्थः? चण्डालादिर्बाह्यश्च पात्रं परिमाणमर्हति। येन भुक्ते पुनर्न संस्कारेण भाजनं शुध्यति स पात्रियः, पात्र्य इति चोच्यते।।

69. कड्ङ्गरदक्षिणाच्छ च। (5.1.69)
`चकाराद्यच्च' इति। अथानन्तरस्य यतः समुच्चयः कस्मान्न भवति? एवं मन्यते--स्वरतत्वं प्रतिज्ञातमिति। अनन्तराच्च स्वरित आसन्नतरः। स च प्रतियोगमुपतिष्ठमानो वाक्यशेष एव भवति। तस्माद्यत एव समुच्चयो युक्त इति। यो गौर्निर्गुणत्वात् खलकणाद्यनर्हः स कडङ्गर्यः कडङ्गरीय इति चोच्यते। माषादीनां खलेष्ववस्करनालकाष्ठमतिदुर्जरं बुसाद्यपि कडङ्गरमुच्यते।
अथात्र यथासंख्यं कस्मान्न भवति, अस्ति हि तस्य प्राप्तिः, प्रकृतिप्रत्ययानां साम्यात; तथा हि--द्वे प्रकृतौ, द्वौ प्रत्ययौ? इत्यत आह--`अल्पाच्तरस्य' इत्यादि। दक्षिणशब्दस्याल्पाच्तरस्य पूर्वनिपाते प्राप्ते योऽयमिह परनिपातः स लक्षणानपेक्षतां निर्देशस्य दर्शयन् लक्षणव्यभिचारस्यचिह्नं भवति। अतस्तेन चिह्नेन यथा-संख्याभावं सूचयति सूत्रकारः। तेन न भवति यथासंख्यम्।।

70. स्थालीबिलात्। (5.1.70)
`छयतावनुवर्तेते' इति। ननु चानुकृष्टमुत्तरत्र नानुवर्त्तत इति चानुकृष्टस्य यतः पुनरिह चकारेणानु-वृत्तिर्नोपपद्यते? नैष दोषः; अनित्या ह्येषा परिभाषा। कथं ज्ञायते? `एकाजुत्तरपदे णः' (8.4.12) इत्यत्र णे प्रकृते पुनर्णग्रहणात्। तद्धि `वा भावकरणयोः' (8.4.10) इत्यनुवर्त्तमानस्य विकल्पस्य निवृत्त्यर्थं क्रियते। यदि चेयं नित्या स्यातद्, पूर्वसूत्रे चानुकृष्टत्वादेव हि तस्यानुवृत्तिर्न भवति। अथ वा--चकारोप्यत्रानु-वर्त्तते यतोऽनुकर्षणार्थः। तेन पूर्वत्र चानुकृष्टस्यापि तस्य पुनरिह चकारेणानुकृष्यमाणस्यानुवृत्तिर्भविष्यति। `स्थालीबिलकडङ्गरदक्षिणाच्छ च' इत्येकयोगे कर्त्तव्ये यदिदं योगविभागकरणं तत्स्थालीबिलाद्विशेषे वर्त्तमानात् प्रत्ययो यथा स्यादित्येवमर्थम्। तेन स्थालोमुख एव वर्त्तमानः स्थालीविलशब्दः प्रत्ययमुत्पादयति। न तु स्थालीसम्बन्धिनि च्छिद्रमात्रे वर्त्तमानः।।

71. यज्ञर्त्विग्भ्यां घखञौ। (5.1.71)

72. पारायणतुरायणचान्द्रायणं वर्तयति।
द्वितीयाप्रकरणे पुनर्द्वितोयोच्चारणमिष्टविषये द्वितीयान्ताद्यथा स्यादित्येवमर्थम्। तेन यद्यपि पारायणं गुरुणा शिष्येण च गम्यते तथापि शिष्य एव प्रत्ययो भवति, न गुरौ। तथा तुरायणो यागो यद्यपि यजमानेन याजकैश्च वर्त्त्यते तथापि यजमान एव प्रत्ययो भवति, न याजके।।

73. संशयमापन्नः। (5.1.73)
अत्रापि द्वितीयाप्रकरणे पुनर्द्वितीयोच्चारणमिष्टविषये द्वितीयान्ताद्यथा स्यादित्येवमर्थम्। तेन यद्यपि द्वे अपि कर्तृकर्मणी संशयमापन्ने, तथापि यद्विषयः संशय उत्पद्यते तत्रैव कर्मणि स्थाण्वादौ प्रत्ययो भवति, न तु संशयस्य कर्त्तरि पुरुषे; अनभिधानात्।।

74. योजनं गच्छति। (5.1.74)
`क्रोशशतयोजनशतयोरुपसंख्यानम्' इति। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तथा ततोऽभिगमन-मर्हतीति चेत्यादावपि वाक्ये। तत्रेदं प्रतिपादनम्--इह द्वितीयाधिकारे पुनरद्वितीयोच्चारणमधिकं तु कुर्वतैतत् सूचितम्--अन्यदप्यत्र किञ्चिदधिकं भवति। तेन सर्वमेतद्गदितं कार्यमुपपन्नं भवति।।

75. पथः ष्कन्। (5.1.75)

76. पन्थो ण नित्यम्। (5.1.76)
`नित्यग्रहणम्' इत्यादि। अथ वाक्यनिवृत्त्यर्थं कस्मान्न भवति? पन्थशब्दस्य वाक्यासमवायित्वात्। स हि प्रत्ययसन्नियोगेन विधीयते, न वाक्येन समवैति। ननु च पथिन्शब्देन वाक्यं मा भूदित्येवमर्थं नित्यग्रहणं स्यात्? नैतदस्ति; यदि तदेवमर्थ स्यात् पूर्वसूत्र एव कृतं स्यात्--यत्र पथिन्शब्दः श्रुयते। इह तु करणे प्रत्ययार्थविशेषणं विज्ञायते।।

77. उत्तरपथेनाहृतञ्च। (5.1.77)
`चकारः प्रत्ययार्थ' इति। प्रत्ययार्थसमीपे श्रूयमाणत्वात्। गच्छतीत्यत्र पूर्वं द्वितीयान्तात् प्रत्यय उत्पन्नः। तदिहापि तत एव प्रत्ययेन भवितव्यमिति भ्रान्तिः स्यात्। अतस्तां निराकर्त्तुमाह--`अत्रापि' इत्यादि। चकारो ह्यर्थात् परः श्रूयमाणोऽत्रार्थमात्रस्यैव गच्छतोत्यस्यानुकर्षकः प्रतीयते, न तु विभक्तेरपि; सम्बन्धाभावात्। तस्मात् स इहानुवृत्तः सन्निहितया समर्थविभक्त्या सम्बध्यमानस्तृतीयासमर्थादेव प्रत्ययमुत्पादयतीति भावः।
`वारिजङ्गल' इत्यादि। वार्यादयः पूर्वपदं यस्य तत् तथोक्तम्। एतयोरेवार्थयोरुपसंक्यानम्।
`मधुकमरिचयोः' इत्यादि। मधुकमरिचयोरभिधेययोः स्थलात् परो यः पथिन्शब्दः, तदन्तादाहृते वक्तव्यः।।

78. कालात्। (5.1.78)
कालादिति स्वरूपग्रहणं न भवति, कुतः? पृथगस्य योगस्यारम्भात्। कालशब्दस्यापि यदि स्वरूपग्रहणम भीष्टं स्यादिमं पृथग्योगमकृत्वोत्तरसूत्रे कालशब्दादेव तृतीयामुच्चारयेत्--कालेन निर्वृत्तमिति। एवं हि निर्देशादेव तृतीयासमर्थात् प्रत्ययो विज्ञायते। उत्तरसूत्रे च कालशब्दः स्वरितत्वादनुवर्त्तिष्यत इति सिद्धमिष्टम्। अतो न कर्त्तव्य एवायं पृथग्योगः। स एव क्रियतेऽर्थग्रहणं तदिति दर्शयितुम्।।

79. तेन निर्वृत्तम्। (5.1.79)
`आह्निकः' [आह्निकम्-काशिका] इति। `अल्लोपोऽनः' (6.4.134) इत्यकारलोपः। टिलोपस्तु `अह्नष्टखोरेव' (6.4.145) इति नियमादिह न भवति।।

80. तमधीष्टो भृतो भूतो भावी। (5.1.80)
`कालाध्वनोरत्यन्तसंयोगे' (2.3.5) इति द्वितीया। `तमधीष्टः' इत्यादौ कर्मणि द्वितीया नोपपद्यते; अध्येष्यमाणादि हि पुरुषादिकर्मानयानिष्टयाभिहितम्, न चान्या क्रियाऽस्ति यस्यां मासादि कर्म स्यात्।
`ननु च' इत्यादिना, यदुक्तम्--`कालाध्वनोरत्यन्तसंयोगे' (2.3.5) द्वितीयेति तद्विघटयति। तेन कथं मासो व्याप्यत इति? न कथञ्चित्। विघटत इत्यर्थः। यद्धि मुहूर्त्तं क्रियते, तेन मुहूर्त्तेन मासैकदेशो व्याप्यते, न तु सकलो मासः। `क्रियार्थे' इति। अध्ययनादिक्रियार्थे। तदर्थं हि ते क्रियेते। `फलभूतया क्रियया' इति। अध्ययनादिकया। `ताभ्यामेव व्याप्त इत्युच्यते' इति। तदन्यव्यापारस्य तत्रोपचारात्। यथा `चौरेण ग्रामो दग्धः' इत्युक्ते न चौरेण ग्रामो दह्यते, अपि तु तदाहृतेनाग्निना। उपचारेण तु तथा व्यपदेशः।।

81. मासाद्वयसकि यत्खञौ। (5.1.81)
`सामर्थ्याद्भूत् एवात्राभिसम्बध्यते' इति। वयसि भूतार्थस्यैव सम्भवादिति भावः। भाव्यर्थोऽपि तत्र सम्भवतीति चिन्त्यमेतत्। अथ तु नेष्यते, पुनरभिधानं शरणमाश्रयितव्यम्। खञो ञित्करणं स्वरार्थम्, वृद्ध्यर्थञ्च। ननु च वृद्ध एव मासशब्दः? सत्यं वृद्धोऽयम्, तथापि वृद्धस्यापि वृद्धिरेषितव्या। मासीनाभार्य इति `वृद्धिनिमितस्य च तद्धितस्यारक्तविकारे' (6.3.39) इति पुंवद्भावप्रतिषेदो यथा स्यात्।।

82. द्विगोर्यप्। (5.1.82)
`प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' इति (काशिका. 5.1.20) तदन्तविदेरभ्यनुज्ञानाद्द्विगोरपि ----। ययः पित्करणननुदात्तार्थम्। अन्यथा मासशब्दान्तात् प्रत्यये विहिते सिति शिष्टत्वात् `इगन्तकाल' (6.2.29) इति द्विगावेवेति स्वरबाधनात् प्रत्ययस्वरः स्यात्, ---- स्यात्। प्रत्ययेऽनुदात्तार्थे पिति `इगन्त' (6.2.29) इति पूर्वपदप्रकृतिस्वरः सिद्धो भवति।।

83. षण्मासाण्ण्यच्च। (5.1.83)
षण्मासशब्दो द्विगुः। तस्मात् पूर्वेण यपि प्राप्ते वचनम्। `स चकारेण समुच्चेतव्यः' इति। यद्येवम्, कथमनन्तरो यब्भवति? इत्याह--`स्वरितत्वाच्चानुवर्त्तिष्यते' इति। तेनानुवृत्तिसामर्थ्यादनन्तरो यब्भवतीति मन्यते।।

84. अवयसि ठँश्च। (5.1.84)

85. समायाः खः। (5.1.85)

86. द्विगोर्वा। (5.1.86)
`पूर्वेण' इत्यादि। कथं पुनः समाशब्दाद्विधीयमानः प्रत्ययस्तदन्ताद्द्विगोः प्राप्नोति? इत्यत आह--`प्राग्वतेः' इत्यादि। गतार्थम्।।

87. रात्र्यहस्संवत्सराच्च। (5.1.87)
`द्व्यहीनः' इति। `अह्नष्टखोरेव' (6.4.145) इति टिलोपः। विभाषानुवर्त्तते, तेन व्यवस्थितविभाषात्वान्न टज्भविष्यति। `द्वैयह्निकः, त्रैयह्निकः' इति। `न य्वाभ्याम्' (7.3.3) इत्यादिनैजागमः, वृद्धिप्रतिषेधश्च।।

88. वर्षाल्लुक् च। (5.1.88)
`भाविनि तु त्रैवर्षिकः' इति। तत्र हि `अभविष्यति' (7.3.16) इति वचनात्। इहादिवृद्धिरेव भवति।।

89. चित्तवति नित्यम्। (5.1.89)
यदि चित्तवति प्रत्ययार्थे नित्यं लुग्भवति, `वर्षस्याभविष्यति' (7.3.16) इत्यत्र यद्वक्ष्यति--`द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतोति द्विवार्षिको मनुष्यः' इत, तद्विरुध्यते; न हि नित्ये लुक्यधीष्टभृतयोरुत्पन्नस्य प्रत्ययस्य चित्तवत्यभिधेय एवं रूपमुपपद्यते? नैष दोषः; भूत एवास्योत्पन्नस्य प्रत्ययस्य चित्तवति नित्यं लुगिष्यते, न सर्वत्र। कुत एतत्? नित्यग्रहणात्। इह नित्यग्रहणमनर्थकमेव। आरम्भसामर्थ्यादेव नित्यो लुग्भविष्यतीति किं नियमग्रहणेन? तत् क्रियते विशिष्टेऽर्थे नित्यो लुग्यथा स्यादित्येवमर्थम्। स पुनर्विशिष्टो भूत एव।।

90. षष्टिकाः षष्टिरात्रेण पच्यन्ते। (5.1.90)
`बहुवचवान्तस्य निर्देशाद्बहुवचन एव षष्टिकशब्दस्य साधुत्वम्, नान्यत्र' इति यश्चोदयेत्, तं प्रत्याह--`बहुवचनमतन्त्रम्' इति। अप्रधानमित्यचर्थः। अप्रधानत्वं तु तस्य नान्तरीयकत्वात्। अवश्यं हि येन केनचिद्वचनेन निर्देशः कर्त्तव्यः। यद्येवम्, एकवचनेन निर्देशः कस्मान्न कृतः, एवं हि लघुर्भवति? सत्यम्; वैचित्र्यार्थं बहुवचनेन कृतः। यदि `षष्टिरात्रेण पच्यन्ते' इत्यस्मिन्नयं एतन्निपातनं, मुद्गादिष्वतिप्रसङ्गः, तेऽपि हि षष्टिरात्रेणपच्यन्ते? इत्यत आह--`संज्ञैषा' इत्यातदि। धान्यविशेष एव हिं षष्टिकशब्दः संज्ञात्वेन रूढः। तेनाभिधानाम्मुद्गादिष्वतिप्रसङ्गो न भवति।।

91. वत्सरान्ताच्छश्चन्दसि। (5.1.91)

92. संपरिपूर्वात्ख च। (5.1.92)

93. तेन परिजय्यलभ्यकार्य्यसुकरम्। (5.1.93)
`परिजय्यः' इति। परिः सर्वतोभावे। शक्यार्थे कृत्यः। सर्वतः शक्यो जेतुं `परिजय्यः' `लभ्यः' इति, `कार्य्यः' इति। अत्रापि शक्यार्थ एव कृत्यौ। मासेन

शक्यो लब्यो मासिकः पटः। मासेन शक्यं कर्तु सुकरं वा मासिकं चान्द्रायणम्। `तेन निर्वृत्तम्' (5.1.79) `तमधीष्टः' (5.1.80) इति विभक्तितद्वये प्रकृते पुनस्तेनेति तृतीयोपादनां द्वितीयानिवृत्त्यर्थम्।।

94. तदस्य ब्रह्मचर्यम्। (5.1.94)
`द्वाभ्यामपि सम्बध्यते' इति। समर्थविभक्त्या, प्रत्ययार्थेन च। कथं सम्बध्यते? इत्याह--`कालस्य' इत्यादि। इह हि द्वितीयाऽत्यन्तसंयोगे।सा हियः कालस्य व्यापकस्तमपेक्षते, नान्तरयकत्वात्। न हि तेन विनाऽत्यन्तसंयोग उपपद्यते। ब्रह्मचर्यं च `कालस्य व्यापकम्' इति। `व्यापकम्' इति। व्यापकमपेक्षमाणायां विभक्तौ ब्रह्मचर्यसम्बन्धो भवति। कथं प्रत्ययार्थेन सम्बध्यते? इत्यत आह--`प्रत्ययार्थस्य च स्वम्' इति। प्रत्ययार्थः प्रतियोगि वसक्तु स्वमपेक्षते।प्रकृतत्वाच्च ब्रह्मचर्यस्यैव प्रतियोगित्वं विज्ञायते, तद्धि तस्य स्वं भवति। अतः प्रतियोग्यपेक्षायां प्रत्ययार्थस्यापि ब्रह्मचर्येण सम्बन्धो भवति।
`पूर्वत्र' इत्यादिना पूर्वोत्तरयोर्वृत्त्योर्विशेषं दर्शयति। किं पुनरत्र प्रमाणमित्याह--`द्वयमपि' इत्यादि। कथं पुनर्द्वयमपि प्रमाणमित्याह--`उभयथा' इत्यादि। उभयस्मिन्नपि ह्यत्रार्थे सूत्रमेतदाचार्येण प्रणीतम्। द्वयमपि प्रमाणम्।
`महानाम्न्यादिभ्य' इति। ब्रह्मचर्यं एवार्थ इदमुपसंख्यानाम्। `तच्चरति' इत्यादि। तदिति द्वितीयासमर्थेभ्यो महानाम्न्यादिभ्यः शब्देभ्यः `चरति' इत्येतस्मिन्नर्थे इदं ठञ उपसंख्यानम्। `तत्सहचरितं व्रतं तच्छब्देनोच्यते' इति। भवति हि साहचर्यात् ताच्छब्द्यम्, यथा--यष्टीः प्रवेशयेति। अथ ऋच एवोच्यन्त इत्येवं कस्मान्न विज्ञायेते? चरणार्थस्यायोगात्। ब्रह्मचर्य हि चर्यते। `चतुर्मासाण्ण्यो यज्ञे' इत्यादि। चतुमसिशब्दात् तत्रेति सप्तमीसमर्थाद्भव इत्येतस्मिन्नर्थे यज्ञे विषये ण्यो वक्तव्यः।
`संज्ञायामण्वक्तव्यः' इति। चतुर्मासाद्भव इत्येतदपेक्षते। इदञ्च यज्ञादन्यत्रोपसंख्यानम्। ननु च `तत्र भवः (4.3.53) इत्यनेनाणअभवत्येव, किमर्थमुपसंख्यायते? सत्यमस्ति; तस्य तु द्विगोर्लुगनपत्ये' (4.1.88) इति लुक्प्रप्नोति। अतो लुग्बाधनार्थं तस्योपसंख्यानम्।।

95. तस्य च दक्षिणा यज्ञाख्येभ्यः। (5.1.95)
अथाख्याग्रहणं किमर्थम्? न यज्ञेब्य इत्युच्येत? इत्यत आह--`आख्याग्रहणम्' इत्यादि। यज्ञानमधेयमात्रादकालवाचिनोऽपि प्रत्ययो यथा स्यादित्येवमर्थमाक्याग्रहणमिति। `इतरथा हि' इत्यादि। यद्याख्याग्रहणं न क्रियोतेत्यर्थः। ननु चैकाहद्वादशाहादयो नैव कालशब्दाः, तत्कुतस्तेषामेवात्रग्रहणप्रसङ्गः? अथाकालवाचिनामप्येषां ग्रहणं सम्भवति? एवं सत्यग्निष्टोमादीनामपि भविष्यतीत्यपार्थकमाख्याग्रहणम्? इत्यत आह--`प्राग्वतेः' इत्यादि। यद्यप्येते कालशब्दा न भवन्ति, तथापि प्राग्वतेः संख्यापूर्वपदानां तदन्तविधिरभ्यनुज्ञातः। तेन सत्यपि कालाधिकारेऽप्यस्ति तेषु ग्रहणप्रसङ्गः। तथा च तत्र वचनस्य चरितार्थत्वादग्निष्टोमादिभ्यो न स्यात्, तेभ्योऽपि यथा स्यादित्याख्याग्रहणम्।
ननु चैवमपि सूत्रमनर्थकम्, या ह्यग्निष्टोमस्य दक्षिणा साप्यग्निष्टोमे भवति। तत्र `बह्वचोऽन्तोदात्ताट्ठञ्' (4.3.67) `क्रतुयज्ञेभ्यश्च' (4.3.68) इत्येव ठञ् सिद्धः। इदमपि सूत्रं ठञर्थमेवारभ्यते? सत्यमेतत्, किन्तु भावर्थे `तस्येदम्' (4.3.120) इति विवक्षिते तदा परत्वादणादयः स्युरिति युक्तं विधानम्। अपि च यज्ञाख्येभ्यस्तेन ठञिष्यते। ग्रहणवता प्रातिपदिकेन तदन्तविध्यभावात् संख्यापूर्वपदेभ्यष्ठञ् न लभ्येत--द्वयोर्वाजपेययोर्भवा दक्षिणा द्वैवाजपेयिकीति। अनेन च विधानेन `प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' (काशिका. 5.1.20) इति ठञ् सिद्धो भवति। अथापि कथञ्चित् तदन्तविधिर्भवार्थे लभ्यते, तथापि `द्विगोर्लुगनपत्ये' (4.1.88) इति लुक्प्रसज्येत। तस्माद्युक्तः सूत्रारम्भः।

96. तत्र च दीयते कार्यं भववत्। (5.1.96)
`यथा मासे भवं मासिकम्' इत्यादि। `कालाट्ठञ्' (4.3.11) इति। `प्रावृषेण्यम्' इति। `प्रावृष एण्यः' (4.3.17)। `वासन्तं शारदम्' इति। सन्धिवेलादिसूत्रे (4.3.16) णाण्। `हैमनम्' इति। `हेमन्ताच्च' (4.3.21) इति, `सर्वत्राण्च तलोपश्च' (4.3.22) इति। वतिः सादृश्यार्थः। `कालेभ्यो भववत्' (4.2.34) इत्यत्रैतद्व्याख्यातम्। तत एवानुगन्तव्यम्।
चकारः कालादित्यनुकर्षणार्थः, तेन चानुकृष्टत्वादुत्तरत्र नानुवर्त्तते, अत आह--`कालाधिकारस्य पूर्णोऽवधिः' इत्यादि। ननु च यन्मासे दीयते कार्यं च तन्मासे भवति; मासाधारत्वात् तत्सत्तायाः। अतः `तत्र भवः' (4.3.53) इत्यनेनाणैव सिद्धमिति किमतिदेशेन? एवं तेन सत्यपि भवत्यर्थे कार्यदीयमानयोः कार्यतां दीयमानताञ्च कालान्तात् तैः प्रत्ययैरपि ख्यापयितुमतिदेशः। किञ्चानेन च तत्र भवानामपि न । तेन सति तस्मिन् तदन्तविधेरिष्टत्वाद्द्वयोर्मासयोर्दीयते कार्यं वा--द्वैमासिकमिति। अथापि कथञ्चिद्भवार्थेऽपि तदन्तविधिर्गृह्यते, एवमपि `द्विगोः' (4.1.88) इति लुक् स्यात्। ननु चात्रापि विधाने सत्यतिदेशादेव लुक् प्राप्नोति? वचनसामर्थ्यान् प्रत्ययमात्रस्यातिदेशो विज्ञास्यते, न सर्वकार्याणामित्यदोषः।।

97. व्युष्टादिभ्योऽण्। (5.1.97)
व्युष्टशब्दोऽयं कालशब्दः। तत्साहचर्यान्नित्यशब्दोऽपि कालशब्द एव गृह्यते। नाकाशादिवचनः। तेन तत्र सप्तम्यपवादः `कालध्वनोरत्यन्तसंयोगे' (2.3.5) इति द्वितीया भवति। तेन सप्तम्यधिकारेऽपि नित्यशब्दाद्द्वितीयासमर्थादेव प्रत्ययः। नित्यं दीयते `नैत्यम्'। सर्वकाले दीयते इत्यर्थः।
`अण्प्रकरणे' इत्यादि। पदेतत् कात्यायनेनोक्तम् `अण्प्रकरणे अग्निपदादिभ्य उपसंख्यानम्' (वा.532) इत्येतन्न वक्तव्यम्। कथं तर्ह्यण् स्यात्? व्युष्टादिष्वेवाग्निपदादयः पठितव्या। अथाण्ग्रहणं किमर्थम्, यावता भववत्' (5.1.96) इत्येतदिहानुवर्त्तते, तेनैवात्राणपि भविष्यति? नैवं शक्यम्; एवं हि सति व्युष्टनित्यशब्दाभ्यां `कालाट्ठञ्' (4.3.11) इति ठञ् स्यात्; नैष दोषः; तत्र पुनरारम्भसामर्थ्याद्यष्ठञा बाधितः स एव भविष्यति। कः पुनरसौ? अणेव। एवमपि तीर्थशब्दात् द्व्यजृद्ब्राह्मणादि(4.3.72)सूत्रेण ठग्विहित इति ततष्ठगेव स्यात्। ये चात्र प्रवेशनादयोऽन्तोदात्ताः; तेभ्यष्ठञ् स्यात् `ब्रह्वचोऽन्तोदात्ताट्ठञ्(4.3.97)इति; तेभ्यो भवार्थे ठञो विहितत्वात्। तस्मादण्ग्रहणं कर्त्तव्यम्।।

98. तेन यथाकथाचहस्ताभ्यां णयतौ। (5.1.98)
`यथासंख्यं नेष्यते' इति। अल्पाच्तरस्य हस्तशब्दस्य परनिपातो लक्षणव्यभिचारस्य वचनहेतुः। `तृतीयार्थमात्रञ्चात्र सम्भवति' इति। तृतीयार्थस्य गम्यमानत्वात्। तथा हि--यथाकथाच दत्तमित्युक्ते, अनादरेण दत्तमिति गम्यते। `न तृतीयासमर्थविभक्तिः' इति। यथाकथाचशब्दसय वाक्यत्वात्। प्रत्यस्तु वचनसामर्थ्याद्वाक्यादपि भवत्येव।।

99. सम्पादिनि। (5.1.99)
`गुणोत्कर्षः सम्पत्तिः' इति। सम्पादिनीत्यत्र प्रकृतिभागस्यार्थमाचष्टे। पूर्वावस्थाया गुणातिरेको गुणोत्कर्षः। `आवश्यके णिनिः' इति। अवश्यं सम्पद्यत इति `आवश्यकाधमर्णयोर्णिनिः' (3.3.170)। `विशेषतशोभते' इति। शोभनाख्यस्य गुणस्य पूर्वावस्थाया उत्कर्षादतिरिच्यमानत्वात्।।

100. कर्मवेषाद्यत्। (5.1.100)
`कर्ण्यम्' इति। `ये चाभावकर्मणोः' (6.4.168) इति प्रकृतिभावः।।

101. तस्मै प्रभवति सन्तापादिभ्यः। (5.1.101)
`सक्तुमांसौदनाद्विगृहीतादपि' इति। अपिशब्दात्, सङ्घातादपि। साक्तुमांसौदनिकः। साक्तुकः। मांसिकः। औदनिकः।।

102. योगाद्यच्च। (5.1.102)

103. कर्मण उकञ्। (5.1.103)

104. समयस्तदस्य प्राप्तम्। (5.1.104)
अथ किमर्थं तदिति समर्थविभक्तिर्निर्दिश्यते; यावता समय इति निर्देशादेव सा दृश्यते? इत्यत्राह--`समर्थविभक्तिनिर्देश उत्तरार्थः' इति। `ऋतोरण्' (5.1.105) इन्येवमादौ प्रथमासमर्थाद्यथा स्यादिति उत्तरार्थञ्च क्रियमाणोऽत्रापि विस्पष्टार्थो भविष्यतीत्यत्रैव कृतः; नोत्तरत्र।।

105. ऋतोरण्। (5.1.105)
वसन्तोऽस्य पुष्पदेर्ऋतुः प्राप्तः, स तस्य जनकत्वात् प्रयोजको भवतीति `प्रयोजनम्' (5.1.109) इति ठञि प्राप्ते सत्ययमारभ्यते।।

106. छन्दसि घस्। (5.1.106)
घसः सकारः `सिति च' (1.4.16) इति पदसंज्ञार्थः। तेन पदत्वेन भत्वे निरस्ते `ऋत्विय' इति। अत्र `ओर्गुणः' (6.4.146) इति गुणो न भवति।।

107. कालाद्यत्। (5.1.107)

108. प्रकृष्टे ठञ्। (5.1.108)
`प्रकृष्टम्' इति। `नपुंसके भावे क्तः' (3.3.114)। कालस्य दीर्घत्वमिह प्रकृष्टशब्देनोच्यते। अथ ठञ्ग्रहणं किमर्थम्, यावता प्रकृत एव ठञ्, तत्र प्रकृष्टमित्येतावदेव वक्तव्यम्? इत्याह--`ठञ्ग्रहणं विस्पष्टार्थम्' इति। असति हि ठञ्ग्रहणे यतोऽनन्तरत्वात् स एव विधीयत इति कस्यचिद्भ्रान्तिः स्यात्।

तस्मान्मन्दबुद्धि प्रवक्तारं प्रति विस्पष्टार्थं ग्रहणम्।।

109. प्रयोजनम्। (5.1.109)
प्रयोजयतीति प्रयोजनम्। `कृत्यल्युटो बहुलम्' (3.3.113) इति कर्त्तरि ल्युट्।।

110. विशाखाषाढादण्मन्थदण्डयोः। (5.1.110)
ठञपवादो योगः। मन्थोऽवक्षारो विलोडनदण्डो वा।।

111. अनुप्रवचनादिभ्यश्चः। (5.1.111)
`विशिपूरी' इत्यादि। `विश प्रवेशने' (धा.पा.1824), `पूरी आप्यायने' (धा.पा.1803), `पत्लृ गतौ' (दा.पा. 845) `रुह बीजजन्मनि' (धा.पा. 859)--एताः प्रकृतयो यस्यानस्य `युवोरनाकौ' (7.1.1) इति युस्थाने विहितस्यानः, तस्माद्विद्यमानपूर्वपदाच्छ उपसंख्येयः। केवलस्यानस्य सपूर्वपदत्वं न सम्भवतीति तस्य शब्दस्येदं विशेषणं विज्ञायते। गृहप्रवेशनं प्रयोजनं यस्य तत्र गृहप्रवेशनशब्दो विशिप्रकृत्यनन्तः, गृहशब्देन च सपूर्वपदः। यदि तर्हि विश्यादिप्रकृत्यनन्ताच्छशब्दाच्छ उपसंख्यायते, अनुप्रवचनादिषु संवेशनारोहणादीनां पाठोऽनर्थकः; तस्यैव प्रपञ्चार्थत्वात्।।

112. समापनात्सपूर्वपदात्। (5.1.112)
अथ पदग्रहणं किमर्थम्, सपूर्वादित्येवोच्येत? इत्यत आह--`पदग्रहणम्' इत्यादि। असति हि पदग्रहणे, ईषदसमाप्तं समापनं बहुसमापनं तत् प्रयोजनमस्येति तत्रापि प्राप्नोति; भवति ह्ययं समापनशब्दः सपूर्वः। पदग्रहणे तु सति न भवति; बहुचप्रत्ययस्यापदत्वात्।।

113. ऐकागारिकट् चौरे। (5.1.113)
`चौरे नियमार्थम्' इति। प्रकृतत्वाच्च ठञ एव। एवं ब्रुवता ठञान्तमेतन्निपात्यत इत्युक्तं भवति।
ननु च टकारानुबन्ध एवमर्थमासङ्ग्यते, ङीव्यता स्यादिति, स चात्र ठञन्तत्वादेव सिद्धः, तत् किमर्थं टकारः? इत्यत आह--`टकारः' इत्यादि। असति हिटकारे, यथा ङीब्भवति तथा ञित्स्वरोऽपि--आद्युदात्तत्वं स्यात्। `कार्यावधारणार्थष्टकारः' क्रियते, तेन ङीबेव भवति, न ञित्स्वरः। `अपर इकट्प्रत्ययं वृद्धिं च निपातयन्ति' इति। तेषां ङीबर्थ एव टकारः। एकश्बदोऽसहायर्थः, स चासहायवाची द्रष्टव्यः। असहयग्रहणं चौरस्य स्वार्थे, न तूपलक्षणं प्रयोजनम्।।

114. आकालिकड्द्येन्तवचने। (5.1.114)
आदिः=जन्म, अन्तः=विनाशः, तयोर्वचनमाद्यन्तवचनम्। तस्मिन् सत्येतन्निपातनम्। `समानकालावाद्यन्तावस्य' इति। ननु चोत्पदनविनाशयोरयौगपद्यात् समनकालत्वं न सम्भवति, न ह्यनेन जन्मनाशयोरेककालता प्रतिपद्यते, किं तर्हि? विद्युदादेरनवस्थायित्वप्रदर्शनपरत्वादस्येत्यत आह--`उत्पादानन्तरं विनाशिनीत्यर्थः' इति।
`आकालाट्ठंश्च' इति। यदा ठन् तदा--आकालिका। यदा ठञ् तदा--आकालिकी। आकालशब्दश्चायं `आङ् मर्यादाभिविध्योः' (2.1.13) इत्यव्ययीभावः। आ कालादाकालम्--`कुगतिप्रादयः' (2.2.18) इति, तत्पुरुषो वा--आवृत्तः काल आकाल इति।।

115. तेन तुल्यं क्रिया चेद्वतिः। (5.1.115)
`तुल्यम्' इति। कर्मपदमेतत्, क्रियाविशेषणत्वात्। प्रतिपादितं हि प्राक् क्रियाविशेषणानां कर्मत्वम् `स्तोकान्तिकदूरर्थाकृच्छ्राणि क्तेन' (2.1.39) इति सूत्रे। `ब्राह्मणेन तुल्यं वर्त्तते ब्राह्मणवत्' इति। का पुनरत्र क्रिया? ब्राह्मणेन तुल्यं वर्त्तते क्षत्रियादिगता अध्ययनादिका। ननु च तस्या ब्राह्मणनिष्ठयाऽध्ययनादिक्रिययैव तुल्यता। न च तां ब्राह्मणशब्द आह। किं तर्हि? जातिं द्रव्यं वा। न च ताभ्यां क्रियया तुल्यत्वम्; स्वभावभेदात्। यत्र हि किञ्चित् सामान्यम्, कश्चिद्विशेषः, स विषयस्तुल्यतायाः इह त्वत्यन्तभेद एव? नैष दोषः; यद्यपि ब्राह्मणादिशब्दैः क्रिया नोच्यते, तथाप्यभिधेयसम्बन्धेन प्रतीयते, यथा--`गुडः' इत्युक्ते गुडेनानभिधीयमाना अपि माधुर्यादयः। तत्र ब्राह्मणादिशब्देन योऽर्थ उच्यते तेन तुल्यत्वं क्रियाया न सम्भवति। उच्यते चेदं वचनसामर्थ्यात्। यासावभिधेयन ब्राह्मणेन क्रिया गम्यते तया तुलप्याता विज्ञास्यते। ननु च तृतीयासमर्थविभक्तिवाच्यया क्रिययैव प्रत्ययार्थक्रियायास्तुल्यता, तस्याश्च घञन्तोऽवकाशः--तैलपाकेन तुल्यो घृतपाक इत्यादि? नैषोऽस्त्यवकाशः; घात्वर्थो हि क्रिया, सा च पूर्वापरीभूता। अथ वा--असत्त्वभूता। न च तस्यां घञादयो भवन्ति, क्व तर्हि? तस्यैव धात्वर्थस्य धर्मे सिद्धतायामेव। घात्वर्थस्यापि घञादिस्थाया भिद्यते। तत्कथं घञादीनामर्थः क्रियेति शक्यते वक्तुम्? न च तया घञादिवाच्यसिद्धतया द्रव्यगतायास्तुल्यता। न हि द्रव्यभूतेनासत्त्वभूतस्य वस्तुतुल्यतोपपद्यत इत्यतो नास्ति वचनस्यावकाशः। यदि तर्हि क्रिया घञादिभिर्नाभिधीयते--कर्तुं गमनम्, भोक्तुं पाकः, करकस्य व्रजतीति `तुमुण्णवुलौ क्रियायं क्रियार्थायाम्' (3.3.10) इति तुमुण्ण्वुलौ न प्राप्नुतः? नैष

दोषः; यदत्र प्रकृतिरूपं तस्य क्रियैवार्थ इति तदाश्रयौ तुमुण्ण्वुलौ भविष्यत इत्यलमतिप्रसङ्गेन।।

116. तत्र तस्यैव। (5.1.116)
अथ कियर्थमिवेत्युच्यते, न वत्यर्थे सादृश्ये भविष्यति? भविष्यति? नैतदस्ति; न हि तुल्यग्रहणं शक्यमिहानुवर्त्तयितुम्। तद्धि क्रियाविशेषणत्वात् कर्म, तत्र यदीह तस्यानुवृत्तिः स्यात् तथाभूतस्यैव स्यात्। ततश्च कर्मण्येव तुल्ये प्रत्ययः स्यात्, तथा च--मथुरायामिव मथुरावत् स्लुध्ने प्रासाद इत्यादि न सिध्येत्। तस्मादिवेति वक्तव्यम्। अक्रियार्थश्चायमारम्भः।।

117. तदर्हम्। (5.1.117)
अरहतीत्यर्थः। क्रियाग्रहणमिहानुवर्त्तते, ततोऽस्यामेवर्हणक्रियायां कर्तृभूतायां प्रत्ययो विधीयत इति। यत्रासौ प्रत्ययार्थत्वेन विवक्ष्यते, तत्र वाक्यमेव भवति--ब्राह्मणमर्हतीति।।

118. उपसर्गाच्छन्दसि धात्वर्थे। (5.1.118)
उपसर्गाः प्रादयः, ते चैवमात्मकाः। यत्र क्रियावाची शब्दः प्रयुज्यते, तत्र क्रियाया विशेषका भवन्ति--आगच्छति, प्रगच्छतीति। यत्र न प्रयुज्यते, तत्र समाधनक्रियावाचकाः--सङ्कटः, उत्कट इति। क्रियावाची शब्दः प्रादीनां वत्यन्तानां प्रयोगे न प्रयुज्यते। तेन साधनो धात्वर्थेः स्वार्थः। तेन साधने धात्वर्थे वर्त्तमानादुपसर्गात् प्रत्ययो विज्ञायति इत्याह--`समाधने धात्वर्थे' इति। यदि ह्येवमात्मका उपसर्गाः, धात्वर्थग्रहणं न कर्त्तव्यम्? सत्यमेतत्; तत् क्रियते विस्पष्टार्थम्। `उद्वतः, निवतः' इति। उच्छब्दात् निश्बदात् समाधने धात्वर्थे वतिः। ननु च वतेरव्ययसंज्ञकत्वाद्विभक्तेर्लुक् प्राप्नोति, स कस्मान्न भवति? अव्ययसंज्ञाया अनित्यत्वात्। अनित्यत्वं तु तस्याः `सत्यमेतत्; तत् क्रियते विस्पष्टार्थम्। `उद्वतः, निवतः' इति। उच्छब्दात् निशब्दात् समाधने धात्वर्थे वतिः। ननु च वतेरवययसंज्ञकतवाद्विभक्तेर्लुक् प्राप्नोति, स कस्मान्न भवति? अव्ययसंज्ञाया अनित्यत्वात्। अनित्यत्वं तु तस्याः `सर्वमिदं काण्डं स्वरादावपिं पठ्यते' इत्यादिनाऽव्ययसंज्ञाप्रकरण एव प्रतिपादितम्।।

119. तस्य भावस्त्वतलौ। (5.1.119)
भवतेरनेकार्थत्वाद्भवाशब्दोऽयमभिप्रायादिष्वनेकेषु वर्त्तते। तत्र न ज्ञायते-कोऽत्रार्तो भावशब्देन विवक्षितः? इत्यतस्तत्परिज्ञानार्थमाह--`भवतोऽस्मात्' इति। यस्माद्गोत्रादेर्विशेषणत्वाद्विशेष्ये गवादौ गौरित्येवमादिकः शब्दो भवति, गोत्वाकारवती च बुद्धिस्तेन योऽर्थो गवादेः शब्दस्य प्रवृत्तनिमित्तं स भावशब्देनोच्यते। तथा चोक्तम्--`यस्य गणस्य भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ' इति। गुण इति विशेषणमिहोच्यते, द्रव्यं विशेष्यम्। यस्य विशेषणस्य भावाद्विद्यमानत्वाद्विशेष्ये शब्दस्य निवेशः प्रवृत्तिर्भवति, तदभिधाने त्वतलादयः प्रत्यायः भवन्ति। तत् पनः शब्दानां प्रवृत्तिनिमित्तमनेकप्रकारम्; जातिशब्दानां जातिः--अश्वत्वमिति, गुणशब्दानां गुणः--शुक्लत्वमिति, क्रियाशब्दानां क्रिया-पाचकत्वमिति। केचित्तु क्रियाकारकसम्बन्धं क्रियाशब्दानां प्रवृत्तिनिमित्तमिच्छन्ति। यदृच्छाशब्दानां संज्ञासंज्ञिसम्बन्धित्वमिति संक्षेपेणैतदुक्तम्। विस्तरेण तु भाष्यादावुक्तमिति तत एवानुगन्तव्यम्। अथ नानात्वमित्यादौ कथं प्रत्ययो भवति? कथङ्कारं न भवितव्यम्? षष्ठीसमर्थात् प्रत्ययविधानात्, नानेत्येवमादीनाञ्चाव्ययानां षष्ठ्यर्थेनायोगात्, अयोगास्तु तेषामसत्त्ववाचित्वात्? नैष दोषः; ससत्त्वभूतोऽप्यर्थः शब्दान्तरेण प्रत्यवमृष्टः षष्ठ्यरेथेन प्रयुज्यते--नानेत्यस्य भाव इति। तञ्च प्रत्यवमृष्टार्थं वृत्तिरेव गमयतीति नानुपपन्ना षष्टीसमर्थता।।

120. आ च त्वात्। (5.1.120)
`प्रथिमा' इति। `तुरिष्टेमेयस्सु' (6.4.154) इति, `टेः' (6.4.155) इति टिलोपः। `र ऋतोहलादेर्लघोः' (6.4.161) इति ऋकारस्य रेफः, `सर्वनामस्थाने चासम्बुद्धौ' (6.4.8) इति दीर्घः। `पार्थवम्' इति। `इगन्ताच्च लघुपूर्वात्' (5.1.131) इत्यण्।
`अपवादैः' इत्यादि। इमनिच्प्रभृतीनपवादस्त्वितलोर्वक्ष्यति, तैः सह तयोः समावेशः। एकविषयता यथा स्यादित्येवमर्थमिदम्। ननु च स्वरितत्वादनुवर्त्तमानावनुवृत्तिसामर्थ्यादेवापवादविषयेऽपि भविष्यतः? नैतदस्ति; अस्ति ह्यनुवृत्तेः प्रयोजनम्, किंम्? `गुणवचनब्राह्मणादिभ्यः कर्मणि च' (5.1.124) इति कर्मण्यपि यथा स्याताम्; इतरथा हि भावे विधीयमानौ कर्मणि न स्याताम्। `कर्मणि च' इत्यादि। ननु चानुवृत्तिसामर्थ्यादेव कर्मण्यपि भविष्यतः? नैतदस्ति; अस्ति ह्यन्यदनुवृत्तेः प्रयोजनम्, किम्? अपवादविषयेऽपि यथा स्याताम्। तस्मिंसत्वसति न स्याताम्, अस्मिंस्तु सत्येतदुभयमपि लभ्यते। `चकारः' इत्यादि। यदि चकारो न क्रियेत ततोऽत्रैव प्रकरणे येऽपवादास्तैरेव समावेशः स्यात्, न नञ्स्नञ्भ्याम्; तयोरन्यतर विहितत्वात्। चकारे त्वपवादसमुच्चयार्थे सति सर्वापवादविषये त्वतलौ लभ्येते। तेन स्त्रीपुंसाभ्यामपि सिद्धौ भवतः। यद्येवम्, अन्येष्वर्थेषु सावकाशौ नञ्स्नञौ भावे न सिध्यतः, त्वल्लभ्यां बाध्यमानत्वात्? नैषः दोषः; `भवनात्' इत्यवध्युपादानसामर्थ्याद्भावेऽपि भविष्यतः; इतरथा हि भावमेव विधित्वेनोपाददीत।।

121. न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवटबुधकतरसलसेभ्यः। (5.1.121)

अधिकारोऽयम्। तेनोत्तरेषां भावप्रत्ययानां प्रतिषेधो विज्ञायते; न त्वतलोरिति मत्वाऽऽ-`इत उत्तरे ये भावप्रत्ययाः' इत्यादि। न तु `पृथ्वादिभ्य इमनिज्वा' (5.1.122) इत्येवमादिंभिर्योगैः परिगणिताभ्य एव प्रकृतिभ्यः प्रत्ययो विधीयते। न च तत्र काचित् प्रकृतिर्नञ्पूर्वा गृह्यते, न च तदन्तविधिरस्ति; ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात्। तस्मात् तत्र नञ्पूर्वात् प्राप्तिर्नास्तीति नास्त्यस्योपयोगः? सत्यम्; यत्र त्वन्तग्रहण्--`पत्यन्तपुरोहितादिभ्यो यक्' (5.1.128) इत्येवमादिषु योगेष्वस्ति, यत्र च स्वरूपग्रहणं नास्ति `योपधाद्गुरूपोत्तमाद्वुञ्' (5.1.132) इत्येवमादिषु, तत्र नञ्पूर्वादपि प्राप्तिरस्तीति प्रतिषेधः क्रियते। `अपतित्वम्' इति। नञ्समासे कृत उत्तरकालं पत्यन्तादभावविवक्षायां `पत्यन्त' (5.1.128) इत्यादिना यग्न भवति। `अपटुत्वम्' इति। `इगन्त' (5.1.131) इत्यण् न भवति। `अरमणीयत्वम्' इति। `योपदात्' (5.1.132) इत्यादिना वुञ् न भवति। नास्य पटवः सन्तीत्यपटुरिति बहुव्रीहिरयम्, तेनास्मादिगन्तलक्षणोऽण् भवति--`आपटवम्' इति।
`आचतुर्यम्' इति। ब्राह्मणादित्वात् ष्यञ्। ननु च नञ्समासा ब्राह्मणादिषु न षठ्यन्ते, तत्कुतस्तेन ष्यञ्? नैष दोषः; आ
कृतिगणो हि ब्राह्मणादिरिष्यते। अचतुरादिप्रतिषेध एवाकृतिग्रहणस्य ज्ञापकम्।।

122. पृथ्वादिभ्य इमनिज्वा। (5.1.122)
पृथ्वादिषु य इगन्ता लघुपूर्वाः पृथुमृदुप्रभृतयः, तेषामणि प्राप्ते; ये गुणशब्दाः खण्ड चण्ड--इत्येवमादयः, तेषां ष्यञि; ये वयोवचनाः--बाल वत्स--इत्येवमादयः, तेषां `प्राणभृज्जाति' (5.1.129) इत्यादिनाञि सर्वेषामपवाद इमनिज्विधीयते। `वावचनम्' इत्यादि। आदिशब्देनष्यञादीनामुपसंग्रहः। वाक्यार्थं तु वावचनं न भवति; महाविभाषयैव वाक्यस्य सिद्धत्वात्।।

123. वर्णदृढादिभ्यः ष्यञ्च। (5.1.123)
बहुवचनं प्रतेयकमभिसम्बध्यते--वर्णेभ्यो दृढादिभ्यश्चेति; तेन बहुवचननिर्देशाद्वर्णशब्देन वर्णवाचिनां ग्रहणमिति विज्ञायते, न स्वरूपग्रहणे तु वर्णशब्दमपि दृढादिषु एवाधीयीत। वर्णशब्दश्च गुणविशेषस्य वाचकः; न ब्राह्मणादीनाम्। कुतः? दृढादिभिर्गुणवचनैः साहचर्यात्। अत एवाह-दृढादिभिः साहचर्याद्रूपविशेषा एव शुक्लादयः प्रत्ययमुत्पादयन्ति, न तु स्वरूपशब्दाः, नापि तत्पर्यायाः। कथम्? दृढादयो हि गुणा उपसर्जनं द्रव्ये वर्त्तन्ते। तत्साहचर्याद्वर्णशब्दा अपि तत्सदृसा एव गृह्यन्ते। न वर्णश्बदस्य तत्पर्यायाणां वा तादृशी वृत्तिरस्ति; गुणमात्रवचनत्वात्। वर्णदृढादीनां गुणवचनत्वादेव सिद्धे पुनर्वचनमिमनिजर्थम्। यद्येवम्, ष्यञ्ग्रहणनर्थकम्, इमनिजेव विधेयः, स च विभाषयैव प्रकृतः? तदुच्यते; अवस्यं ष्यञ्ग्रहणमुत्तरार्थं कर्त्तव्यम्। तत्र वा क्रियत इह वेति नास्ति विशेषः। `शुक्लिमा' इति। पूर्ववट्टिलोपः। `द्रढिमा' इति। पूर्वदृकारस्य रभावः।
`औचितो, यथाकामी' इति। `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीष्। `हलस्तद्धितस्य' (6.4.150) इति यलोपः।
`वेयतिलाभमतिमनःशारदानाम्' इति पठ्यते। तस्यायमर्थः--विशब्दादुत्तरेषां यातादीनां प्रत्ययाभवन्तीति। वियातत्वम्, वियातता, वियातिमा, वैयात्यम्। विलाभता, विलाभत्वम्, वैलाभ्यम्, विलाभिमा। विमतित्वम्, विमतिता, वैमत्यम्, विमतिमा, `इगन्तात्' (5.1.131) इत्यण्, वैमतम्। विमनसत्वम्, विमनस्ता, विमनिमा, वैमनस्याम्। विशारदत्वम्, विशारदता, वैशारद्यम्, विशारदिमा। `समो मतिमनसोः' इति। सम उत्तरयोर्मतिमनसोः प्रत्ययो भवति। संमतिता, संमतित्वम्, संमतिमा, सांमत्यम्। संमनस्त्वम्। संमनस्ता, संमनिमा, सांमनस्यम्।।

124. गुणवचनब्राह्मणादिभ्यः कर्मणि च। (5.1.124)
`तस्येदम्' (4.3.120) इति शैषिकेषु प्राप्तेषु कर्मणि ष्यञ्विधानम्, चकारद्भावे च। `कर्मशब्दः क्रियावचनः' इत। साधनकर्मवचनशङ्कामपाकरोति। ये हि जडादिशब्दाः गुणशब्दाः, गुमवचनाः, ब्राह्मणादयश्च तेषां साधनकर्मणा सम्बन्दो न सम्भवति; क्रियावाचकत्वाभावात्। तस्मात् क्रियाशब्द एव कर्मशब्दः। `ब्राह्मणादिराकृतिगणः' इति। अवृत्कृतत्वात्। `आदिशब्दः प्रकारे' [`प्रकारवचनः'--काशिका, पदमञ्जरी च] इति। एवं प्रकारेभ्यः ष्यञ्
भवतीत्येवमर्थमादिशब्दः प्रकरवचनत्वं बोधयति। यद्येवम्, गुणवचनग्रहणं प्रातिपदिकेषु च ब्राह्मणादीनामनुक्रमणमनर्थकं स्यात्? नानर्थकम्; प्रपञ्चार्थ हि तत् स्वार्थे विधानार्थञ्च। तत्र ब्राह्मणशब्दात् `प्राणभृज्जाति' (5.1.129) इति जातिवचनत्वादञि प्राप्ते तद्बाधनार्थं ष्यञ्विधीयते। माणववाडवाभ्यां गोत्रलक्षणे वुञि।
`अर्हतो नुम् च' इति। अस्य नुमर्थः पाठः--अर्हन्त्यम्। चोरधूर्त्ताभ्यां मनोज्ञादित्वाद्वुञि प्राप्ते। आराधय, विराधय, अपराधय--इत्येतेभ्योऽपत्यविवक्षायां `जनपदशब्दात् क्षत्रियादञ्' (4.1.168), तस्य `कम्बोजाल्लुक्' (4.1.175) इति लुक्। ततो गोत्रवुञि प्राप्ते पाठः। एकभवादीनामन्यभावपर्यन्तानां स्वार्थे विधानार्थम्। अक्षेत्रज्ञशब्दस्य ` नञ्पूर्वात्' (5.1.121) इति प्रतिषेधे प्राप्ते। प्राग्बालिशशब्दात् कुशलादीनां युदादित्वादणि प्राप्ते। बालिशशब्दो वयोवचनः, तस्माद्वयोलक्षणेऽञि प्राप्ते। अनीश्वरशब्दस्य `न नञ्पूर्वात्' (5.1.121) इति प्रतिषेधे प्राप्ते। `अलस' इति बहुव्रीहिः ष्यञमुत्पादयति, तत्पुरुषात्तु, `न नञ्पूर्वात्' (5.1.121) इति प्रतिषेधेन भवितव्यम्; तस्य प्रपञ्चार्थः पाठः। राजन्शब्दस्य पुरोहितदित्वाद्यकि प्राप्ते। `संवादिन्' `संवेशिन्', `बहुभाषिन्, `शीर्षधातिन्', `सयस्थ', `परमस्थ', `दुष्पुरुष'--इत्येवमादीनां नञ्पूर्वार्थः पाठः। `गणपति', `अधिपति'--इत्येतयोः पत्यन्तलक्षणे यकि प्राप्ते। `गडुल', `दायाद', `विशस्ति'--इत्येतेषां त्वतलोर्निवृत्त्यर्थः। शेषाणां प्रपञ्चार्थः। गुणवचना एके राशिः, ब्राह्मणादयो द्वितीयः, ताभ्यां भावे कर्मणि यथासंख्यं

प्राप्नोति, तत् कस्मान्न भवति? ब्रह्मणादिशब्दस्याल्पाच्तरस्य परनिपातात्। स हि लक्षणे निरपेक्षतां निर्देशस्य ज्ञापयन् यथासंक्यलक्षणानपेक्षतामपि बोधयति, तेन यथासंख्यं न भवति।।

125. स्तेनाद्यन्नलोपश्च। (5.1.125)

126. सख्युर्यः। (5.1.126)
`दूतवणिग्भ्याञ्च' इत्यादि। दूतवणिग्भ्यां यो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-पूर्वसूत्रादिह चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः--`दूतवणिग्भ्याञ्च' इत्यादि। दूतवणिग्भ्यामपि भवति।।

127. कपिज्ञात्योर्ढक्। (5.1.127)
कपिशब्दात् `इगन्ताच्च लघुपूर्वात्' (5.1.131) इत्यणि प्राप्त इदं विधीयते। `यथासंख्यम्' इत्यादि। तत्र `गुणवचनब्रह्मणादिभ्यः' (5.1.124) इत्यत्र यतासंख्याभावः प्रतिपादितः। इहापि प्रतिपाद्यते। तत्रेदं प्रतिपादनम्--अत्र चकारोऽनुवर्त्तते, स चैकस्याः प्रकृतेर्भावे कर्मणि च ढग्विधिं समुच्चिनोति। तेन यथांसंख्यं न भवति; अन्यथा हि समुच्चयो नोपपद्यते। अस्वरितत्वाद्वा यथासंख्यं न भविष्यति, प्रतिपादितं हि पूर्वम्--`स्वरितत्वेन यथासंख्यं भवति' इति। न चेह यथासंख्यार्थं स्वरितत्वं प्रतिज्ञायते।।

128. पत्यन्तपुरुहितादिभ्यो यक्। (5.1.128)
पत्यन्तात् पूर्ववदणि प्राप्ते, पुरोहितादिषु राजशब्दराद्ब्राह्मणादिपाठात् ष्यञि, शेषेब्यस्त्वतलोर्यग्विधीयते। `राजासे' इति। राजशब्दादसे=असमासे यग्भवति--राज्यमिति। समासे तु ब्राह्मणादित्वात् ष्यञेव भवति--आधिराज्यमिति। ननु च केवलो राजशब्दो ब्राह्मणादिषु पठ्यते, तेत्कथमधिराजशब्दात्? तदन्तविधिना; एतदेव ज्ञापकमस इति वचने--अस्तौहि प्रकरणे राजशब्देन तदन्तविधिरिति। इह पत्यन्तपुरोहितादी इति द्वौ राशी, अर्थावपि भावकर्मणी द्वावेवेति साम्याद्यथासंख्यं प्राप्नोति; तदस्वरितत्वात् पूर्ववन्न भवति।।

129. प्राणभृज्जातिवयोवचटनोद्रगात्रादिभ्योऽञ्। (5.1.129)
प्राणबृतः प्राणिन उच्यन्ते, तेषां जातिः प्राणभृज्जातिरित्यर्थः। तद्वाचिनो यतासम्भवं त्वतलादिष्वञ्विधीयते। प्राणभृद्ग्रहणात् तृणादिशब्देभ्यो न भवति-तृणत्वम्, तुणतेति। जातिग्रहणाद्देवदत्तादिशब्देभ्यो न भवति--देवदत्तत्वम्, देवदत्तता। यदिगन्तं लघुपूर्वं च तस्मात् परत्वादण्भवति। `तैत्तिरम्' इति। वयोवचनादपि यथायोगं त्वतलादिष्वेव प्राप्तेष्वञ्विधानम्।
वचनग्रहणं स्वरूपविधिनिरासार्थम्; अन्यथा वयःशब्दादेव स्यात्। तत्रोद्गात्रादिषु `उद्गात्, उन्नतृ, अध्वयुइत्येतेषामृत्विग्वचनात् `होत्राभ्यश्छः' (5.1.135) इति च्छे प्राप्ते सत्यञर्थः पाठः। सुष्ठु, दुष्ठु, वधू--इत्येतेषां लघुपूर्वलक्षणेऽपि प्राप्ते। `सुभगमन्त्रे' इति। सुभगशब्दो मन्त्रविषयेऽञमुत्पादयति--महते सौभागाय। `सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पु.प.वृ. 56) इति। `ह्रद्भगसिन्ध्वन्त' (7.3.19) इत्युत्तरपदवृद्धिर्न भवति। मन्त्र इति किम्? सौभाग्यम्, ब्राह्मणादित्वात्। शेषणामिह पाठस्त्वतलोः प्राप्तयोः।।

130. हायनान्तयुवादिभ्योऽण्। (5.1.130)
हायनान्तात् त्वतलोः प्राप्तयोरण्विधानम्। ननु च `तस्येदम्' (4.3.120) इत्यनेन हायनान्तादण सिद्धः? न सिध्यति; परत्वात् त्वतल्भ्यां बाध्यते--आषाढहायणस्य भावः कर्म वा आषाढहायण इति `वृद्धाच्छः' (4.2.114) प्रसज्येत। तस्माद्युक्तं हायनान्तादण्विधानम्। `यौवनम्' इति। `अन्' (6.4.167) इति प्रकृतिभावः। युवादिषु युवशब्दस्य वयोलक्षणं बधित्वा मनोज्ञादित्वाद्वुञि प्राप्ते पाठः। स्थविरशब्दस्य वयोलक्षणेऽञि होतृशब्दस्याप्युद्गात्रादित्वादञेव।
`पुरुषासे' इति। पुरुषशब्दादसमासेऽण्। भवति--पौरुषम्। अस इति किम्? राजपुरुषत्वम्। अस्य `प्राणभृज्जाति' (5.1.129) इत्यप्राप्ते पाठः। कमणअडलुशब्दस्येगन्तत्वादेवाणि सिद्धे त्वतलोर्बाधनार्थः पाठः। `ह्रदयासे' इति। ह्रदयशब्दादसमासेऽण् भवति। हार्दम्, `ह्रदयस्य ह्रल्लेखयदण्लासेषु' (6.3.50) इति ह्रद्भावः। अस इति किम्? ह्रदयशब्दादसमासेऽण् भवति। हार्दम्,`ह्रदयस्य ह्रल्लेखयदण्लासेषु' (6.3.50) इति ह्रद्भावः। अस इति किम्? परमह्रदयत्वम्। कुशलादीनां क्षेत्रज्ञपर्यन्तानां ब्राह्मणादित्वात् ष्यञि प्राप्ते पाठः, शेषाणां तु त्वतलोः। ननु च ग्रहणवता प्रातिपदिकेन तदन्तविधेरभावात् समासादण्प्राप्तिरेव नास्ति, तदपर्थकः `पुरुषासे', `ह्रदयासे' इति च प्रतिषेधः? नापार्थकः, एषा हि विषयसप्तमी--समासे चिकीर्षिते विषयभूत एव पुरुषशब्दह्रदयशब्दाविति। यदि प्रतिषेधो नोच्येत, ततो नञ्समासस्य भावप्रत्ययस्य चाणो युगपत्प्रसङ्गे परत्वादणेव स्यात्। प्रतिषेधात्तु समास एव तावद्भवति। ततो यस्य भावप्रत्ययस्य निमित्तमस्ति स उत्पद्यते। कश्चासौ? त्वतलौ--अपुरुषत्वम्, अपुरुषता; अह्रदयत्वम्, अह्रदयता। इह हायनान्त एकरशिः, युवादिर्द्वितीयः; अर्थावपि द्वावेव--भावकर्मणी, तेन सामर्थ्याद्यथासंख्यं प्राप्नोति; तदल्पाच्तरस्य युवादिशब्दस्य

परनिपातलक्षव्यभिचारचिह्नान्न भवति। अस्वरितत्वाद्वा।।

131. इगन्ताच्च लघुपूर्वात्। (5.1.131)
`इगन्तात्' इति। इक् अन्तो यस्येति बहुव्रीहिः। प्रातिपदिकमन्यपदार्थः। `लघुपूर्वग्रहणे' इत्यादि। अथेगेव कस्मान्न विशेष्यते? तस्य बहुव्रीह्यर्थे गुणभूतत्वाद्विसेषणेन सम्बन्धस्य कर्त्तुमशक्यत्वात्। पूर्वशब्दोऽयं व्यवस्थाशब्दत्वादपरमपेक्षते। इह चापरस्यानिर्दिष्टत्वान्न ज्ञायते--कुतो लघुः पूर्वः? तत्परिज्ञानाय पृच्छति--`कुतः पुनरसौ लघुः पूर्वः' इति। प्रत्यासत्तिन्यायमाश्रित्याह--`सन्निधानात्' इत्यादि। सन्निधानं त्विह सूत्रे इकः; श्रुतत्वात्। `तेन' इति। अन्तभूतेन लघुपूर्वेणेकान्तग्रहणमितिरिच्यत इति; निष्फलत्वात्। यतो हि `लघुपूर्वात्' इत्युक्ते च प्रातिपदिकस्य तदन्तविधो सति सामर्थ्यादेव तस्यान्तत्वं लभ्यत इत्यपार्थकमन्तग्रहणमस्मिन् व्याख्याने। पूर्वके तु विधाने, अन्तग्रहणेऽसति `लघुपूर्वेग्वतः' इत्येव विधिनिर्देशो विज्ञायते, ततश्चानन्तस्यापीको विधित्वं स्यात्। तदा लशुनलकुटप्रभृतिभ्योऽपि प्रत्ययप्रसङ्ग इत्येवमर्थमन्तग्रहणम्।
`कथं काव्यम्' इति। अन्यथा भवितव्यम्; कविशब्दस्य लघुपूर्वोगन्तत्वादित्यभिप्रायः।।

132. योपधाद्गुरूपोत्तमाद्वुञ्। (5.1.132)
त्वतलादिषु प्राप्तेषु वुञ्विधीयते। उत्तमशब्दोऽयमिहाव्युत्पन्नं प्रातिपदिकं गृह्यते; तत्स्वभावात् त्रिप्रभृतीनामन्त्यमाहेति मत्वाऽऽह--`त्रिप्रभृतीनामन्त्यम्' इत्यादि। तमप्रत्ययान्तस्य तु ग्रहणे सति `अणिओरनार्षयोः' (4.1.78) इत्यादौ सुतारे यो दोष उक्तः, स इहापि तदनुसारेण वेदितव्यः। उत्तमस्य समीपमुपोत्तमम्, `अव्ययं विभक्तिसमीप' (2.1.6) इत्यव्ययीभावः।।

133. द्वन्द्वमनोज्ञादिभ्यश्च। (5.1.133)
द्वन्द्वात् त्वतलादिषु प्राप्तेषु वुञ्विधीयते। मनोज्ञादिषु यो गुणवचनस्तस्मात् ष्यञि, चौरधूर्त्तशब्दाभ्यामपि ब्राह्मणादित्वात् ष्यञ्येव; युवशब्दाद्यवादित्वादणि, शेषेभ्यस्त्वतलोः। `अमुष्यपुत्रः' इति। निपातनाद्विभक्तेरलुक्। इह द्वन्द्वमनोज्ञादी द्वौ राशी, प्रत्ययार्थावपि भावकर्मणी द्वावेव--इति यथासंख्यं प्र्प्नोति, तत्पूर्ववदस्वरितत्वान्न भवति।
अथ वा--चकारोऽत्र समुच्चयार्थः क्रियते। तस्य चान्यत्समुच्चेतव्यं नास्तीति वुञ्विधिमेव प्रत्येकं भावकर्मणोः समुच्चिनोति। तेनैकस्माद्राशेर्भावे कर्मणि च वुञ् भवति, न तु यथासंख्यम्; अन्यथा हि समुच्चयो नोपपद्यते।।

134. गोत्रचरणाच्छलाघात्याकारतदवेतेषु। (5.1.134)
अपत्यनिमित्ता समाख्या गोत्रख्या, सा च प्रवराध्याये पठ्यते। या च वेदाध्ययनप्रयुक्तान् पुरुषानाचष्टे सा चरणशब्दस्याख्या। `गोत्रञ्च चरणैः सह' (म.भा., 2.225) इति पारिभाषिकं गोत्रचरणयोर्जातित्वमिति `प्राणभृज्जाति' (5.1.129) इत्यादिनाऽञि प्राप्ते वुञो विधानम्। इह गोत्रचरणवाचिनी द्वे प्रातिपदिके, अर्थावपि द्वावेव--तत्र यथासंख्यं प्राप्नोति, तत् पूर्वपदस्वरितत्वान्न भवति। अत एवाह--`प्रत्येकं भावकर्मणोरर्थयोः' इति। `श्लाघादिषु विषयभूतेषु' इति। तथा हि न भावः श्लाघादीनामन्यतमोऽपि भवितुमर्हति। शब्दप्रवृत्तिनिमित्तं भावः। न च गोत्रचरणशब्दानां श्लाघादयः प्रवृत्तिनिमित्तं भवति। कर्मापि नैव श्लाघादिस्वभावं भवति। न हि गोत्रचरणानां श्लाघादयः कर्मतया रूढाः, यथा--अग्नेस्तापादयः; क्रियारूपत्वात्तेषाम्। साध्यतया भावकर्मणोः प्रत्ययार्थतया विषयभूतेषु वुञ् भवति। `तदवेतस्तत्प्राप्तः' इति। इणोऽत्र गत्यर्थत्वात्। `तज्ज्ञातो वा' इति। अवपूर्वस्येणो ज्ञानेऽपि वृत्तिसम्भवात्। तच्छब्देन चेह गोत्रचरणयोः सम्बन्धिनी भावकर्मणई प्रतिनिर्दिश्येते। `गार्गिकया' इति। `आपत्यस्य च तद्धितेऽनाति' (6.4.151) इति यलोपः।।

135. होत्राभ्याश्छः। (5.1.135)
त्वतलोः प्राप्तयोश्छो विधीयते।।

136. ब्रह्मणस्त्वः। (5.1.136)
`नेति वक्तये' इति। छप्रत्ययेऽप्यपवादे प्रतिषिद्धे त्वप्रत्ययः। `तस्य भावस्त्वतर्लौ (5.1.119) इत्येव सिध्यति। तस्मान्नेत्येव वक्तव्ये यदेतद्वचनं तत्त्वेन तलो बाधनं यथा स्यादित्येवमर्थम्। यदि नेत्युच्यते; तदा च्छे प्रतिषिद्धे यथा त्वो भवति तथा तलपि स्यात्। त्ववचने तु तलो बाधा सिद्धा भवति।।

इति बोधिसत्त्वदेशीयाचार्यश्रीजिनेन्द्रबुद्धिपादविरचितायां

काशिकाविवरणपञ्चिकायां पञ्चमाध्यायस्य

प्रथमः पादः।।
- - -

5.2
अथ पञ्चमोऽध्यायः

द्वितीयः पादः

1. धान्यनां भवने क्षेत्रे खञ्। (5.2.1)
`भवन्ति जायन्तेऽस्मिन्निति भवनम्' इति। अधिकरणे ल्युट्। जायन्त उत्पद्यन्त इत्यर्थः। एतेनोत्पत्तिवचनो भवतिरत्र गृह्यते, न सत्तावचनः तस्य हि ग्रहणे सत्यन्यत्र चोत्पन्नानां यत्र स्थापनं पश्चाद्यत्र स्थाप्यन्ते तत्रापि प्रसज्येत। यदि तद्ध्युत्पत्तिवचनो भवतिर्गृह्यते, क्षेत्रग्रहणमनर्थकं स्यात्। तत्र मुद्गानां भवनं कुसूल इत्यत्र मा भूदित्येवमर्थं क्रियते। न चोत्पत्तिवचनस्य भवतेर्ग्रहणे सति कुसूले प्रसङ्गः, न ह्यसौ मुद्गादीनामुत्पत्तेरधिकरणम्, किं तर्हि? सत्तायाः; नैतदस्ति; सति हि क्षेत्रग्रहणे भवतिरत्रोत्पत्तिवचनो भवति। कथम्? क्षेत्रशब्दो ह्ययंधान्यानामुत्पत्त्याधारमाचष्टे। तेन तस्य ग्रहमे सति सत्तां प्रति न भूमिः क्षेत्रव्यपदेशमासादयतीति युक्तं तदुत्पत्तौ भवतिर्वर्त्तत इति। क्षेत्रग्रहणे त्वसति, भवतिः सत्तावचनोऽपि गृह्यते। तथा कुसूलेऽपि प्रसज्येत। अपि च--भवनशब्दो रूढ्या गृहवचनोऽपयस्ति, सोऽपि क्षेत्रशब्देन निवर्त्यत इति। अथ कथं षषठी समर्थविभक्तिरुपादीयते, यावता `तस्य भावस्त्वतलौ' (5.1.119) इत्यतः षष्ठीसमर्थविभक्तिरनुवर्त्तत इति ततैव सिद्धम्। एवं तर्ह्येतज्ज्ञापयति--पूर्वे प्रत्ययि नावश्यं षष्ठीसमर्थाद्भवन्तीति। तेन `होत्राभ्याश्छः' (5.1.135) इति। होत्रायाः प्रथमासमर्थयाः स्वार्थे च्छः सिद्धो भवति--होत्रैव होत्रीयमिति। एवञ्च चतुर्वर्णादिभ्यः प्रथमासमर्थेभ्यः स्वार्थेष्यञ् सिद्धो भवति।।

2. व्रीहिशाल्योर्ढक्। (5.2.2)

3. यवयवकषष्टिकाद्यत्। (5.2.3)

4. विभाषा तिलमाषोमाभङ्गाणुभ्यः। (5.2.4)
`खञि प्राप्ते वचनम्, पक्षे सोऽपि भवति' इति। युक्तं यत् पक्षे तिलमाषाणुभ्यः खञ् भवतीति; तेषां धान्यत्वात्। उमाभङ्गयोस्त्वधान्यत्वात् खञ् पाक्षिको न युक्तः। यदेव हि `तिलाश्च मे यवाश्च मे' इत्यादिषु वेदवाक्येषु पठ्यते तदेव धान्यम्। यावादय एवु मन्त्रे पठ्यन्ते, नोमाभङ्गे। यदि तयोरपि धान्यत्वं स्यात् ते अपि पठ्ययाताम्, ततोऽवगम्यते न तयोर्दान्यत्वाम्, एवञ्च न खञस्ताभ्यां प्राप्तिरस्ति, यतः सोऽपि पक्षे स्यादित्येवाह--`उमाभङ्गयोः' इत्यादि। शणसप्तदशमुद्गानि धान्यानीति स्मृतिः। तत्र शणादिषु मध्य उमाभङ्गे अपि धान्यत्वेन संख्यायेते इति तयोर्धान्यत्वमाश्रितमेव। यस्तु पुनर्वेदे तयोरपाठः; स वैदिककर्मण्यनुपयोगात्। अतो न तत्रापाठादधान्यत्वमित्यभिप्रायः।।

5. सर्वचर्मणः कृतः खखञौ। (5.2.5)
इह कृतः प्रत्ययार्थः। तत्र चर्मणः करणत्वं स्यात्, कर्तृत्वं वा। तत्र यदि करणत्वं तदा नियतं करणलक्षणया तृतीयया भवितव्यम्। अथ कर्त्तृत्वमेव `न लोक' (2.3.69) इत्यादिना षष्ठ्यां प्रतिषिद्धायां कर्त्तृलक्षणा तृतीयैव। तस्मात् प्रत्ययार्थसामर्थ्यालभ्या तृतीया समर्थविभक्तिरिति मत्वाऽऽह--`तृतीयासमर्थात्' इति। स च सर्वचर्मण इति निर्देशः सर्वशब्दस्य चर्मशब्देन समासं कृत्वा कृतः। ततः `चर्मणैवास्य सम्बन्धो न हयन्यता समास उपपद्यते' इति यो मन्यते, तं प्रत्याह--`सर्वशब्दश्चात्र' इत्यादि। यद्येवम्, असामर्थ्यात् समासो न प्राप्नोति? इत्यत आह--`तत्रायम्' इत्यादि। अस्मादेव निपातनादित्यभिप्रायः। अथ चर्मणैवभिसम्बन्धः कस्मान्न विज्ञायते? इत्याह--`सर्वश्चर्मणा कृतः' इति। अत्र हि वाक्यार्थे तद्धितवृत्तिरिष्यति। तथा ह्ययमेव वाक्यार्थस्तद्धितानुगतः प्रतीयते। अस्मिंश्चार्थे वाक्यार्थ एवं तद्धितवृत्तिर्लभ्यते, यदि सर्वशब्दः कृतेन सम्बध्यते न चर्मणा। यदि सर्वशब्दश्चर्मणा सम्बध्यते, सर्वचर्मणा इति षष्ठीसमासो वा स्यात्, कर्मधारयो वा; तत्र षष्ठीसमासे तद्धितान्तात् सर्वसम्बन्धिना चर्मणा कृत इत्येषोऽर्थः प्रतीयते। कर्मधारये तु सर्वचर्मणा कृत इत्येषोऽर्थः। न चायं द्विष्प्रकारो यस्तद्धितान्तादवसीयते, अपि तु सर्वचर्मणा कृत इत्ययमेव। तस्मादशक्यः सर्वशब्दस्य चर्मणा सम्बन्धो विज्ञातुमिति कृतेनैव सम्बन्धो युक्तः।।

6. यथामुखसम्मुखस्य दर्शनः खः। (5.2.6)

`दृश्यतेऽस्मिन्निति दर्शनः' इति। अधिकरणे ल्युट्। `यथामुखम्' इति। `यथाऽसादृश्ये' (2.1.7) इत्यव्ययीभावः। मुखस्य सदृशं यथामुखम्। किं पुनस्तत्? आदर्शाश्रयं प्रतिबिम्बम्। ननु च `असादृश्ये' इति प्रतिषेधान्नात्र समासेन भवितव्यम्? इत्यत आह--`निपातनात्' इत्यादि। समासश्चायं पूर्वपदार्थप्रधानः। पूर्वपदं चासत्त्ववचनमिति प्रथमासमर्थादेव प्रत्यय उपपद्यते। अथ वा--`नाव्ययीभावादतोऽम्त्वपञ्चम्याः' (2.4.83) इति ज्ञापकादव्ययीभावाद्द्वितीयादयो भवन्तीत्यतो द्वितीयासामर्थ्यात् प्रत्य उपपद्यते। `यथामुखं यतामुखीनः' इति। मुखसदृस्य दर्शनः' इति। कर्मणि षष्ठी। यत्राऽऽदर्शादौ सर्व मुखं दृश्यते स एवमुच्यते।।

7. तत्सर्वादेः पथ्यङ्गकर्मपत्त्रपात्रं व्याप्नोति। (5.2.7)

अथ सूत्र द्वितीयान्तप्रकृत्युच्चारणं किमर्थम्? तदिति द्वितीयासामर्थ्यात् प्रत्ययो यथा स्यात्। अथ वा--पथ्यङ्गकर्मपत्त्रपात्रमिति नैवेयं द्वितीया, न हि व्याप्नोतिक्रियया पथ्यादयः सम्बध्यन्ते, किं तर्हि? सर्वादि। तस्मात् तस्यैव कर्मत्वम्, न पथ्यादीनां तदवयवानाम्। तत् कुतः? न सा द्वितीया, सुब्व्यत्ययेन पञ्चम्याः स्थाने प्रथमा त्वेषा। तस्मात् समाहारद्वन्द्वस्य नपुंसकलिङ्गत्वात् `अतोऽम्' (2.4.83) इत्यम्भावः कृतः। `परिशिष्टम्' इति। `सर्वादेः पथ्यङ्गकर्मपत्त्रपात्रम्' इत्येतच्च। सर्वादेः प्रातिपदिकस्य पथ्यादयश्चादौ न भवन्ति। ततः सामर्थ्यात् तदन्तविधिर्विज्ञायत इत्याह-- `पथ्यङ्गकर्मपत्त्रपात्रान्तात्' इति। `सर्वपथीनः' इति। सर्वश्चासौ पन्थाश्चेति `पूर्वकाल' (2.1.49) इत्यादिना समासः, `ऋक्पूरब्धूःपथामानक्षे' (5.4.74) इत्यकारः समासान्तस्तदतः। ननु च समासान्ते कृते पथ्यन्तमेव न भवति? यदत्र पथ्यन्तं तदाश्रयो विधिरर्भवतीत्यदोषः। ननु च व्यवधानान्न प्राप्नोति? अन्तग्रहणात् समासान्ताः समासग्रहणेन गृह्यन्त इति नास्ति व्यवधानम्।।

8. आप्रपदं प्रप्नोति। (5.2.8)

`तयोरव्ययीभावः' इति। `आङ्मर्यादाभिविध्योः' (2.1.13) इत्यनन। `शरीरेणासम्बद्धस्यापि पटस्य प्रमाणमाख्यातम्' इति। प्राप्तियोग्यतामुपादाय हि योग्योऽसावाप्रपदाच्छरीरं प्राप्तुम्। अथ व्याप्तिप्राप्त्योः को विशेषः, येन व्याप्नोतीति कृते प्राप्नोतीत्युक्तम्? सम्बन्धमात्रं प्राप्तिः, सम्बन्ध एव साकल्येन व्याप्तिरित्येव विशेषः।।

9. अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु। (5.2.9)

`अनुरायामे' इत्तयादि। यदायामे तदा `यस्य चायामः' (2.1.16) इति समास-। यदा सादृश्ये तदा `यतार्ते यदव्ययम्' तेन `अव्ययं विभक्ति' (2.1.6) इत्यादिना । यता पदमायतं तथा च `बद्धोपानदनुपदीना'। सादृश्ये यथानुपदं तता बद्धाऽनुपदीना। `पदप्रमाणेत्यर्थः' इति। यदाप्यनु सादृश्ये, तदाप्ययमर्थ वेदितव्यः, तुल्यप्रमाणतयैव सादृश्यम्। `अयः प्रदक्षिणम्' इति। अयनमयः, गमनमित्यर्थः। प्रदक्षिणं गमनमय इत्युच्येत। `अनयः प्रसव्यम्' इति। अयविपरीतं प्रसव्यमनय इत्युच्यते। एवमवयवार्थं दर्शयित्वा समुदायार्थं दर्शयितुमाह--`प्रदक्षिणप्रसव्यगामिनाम्' इत्यादि। बहुवचनमयानयनिमित्तप्रदर्शनार्थम्। यदि शाराः प्रदक्षिणं प्रसव्यं च गच्छन्त्येवमयानयौ भक्तः, नान्यथा। तत्रात्मोयाः शाराः प्रदक्षिणं गच्छन्ति, परकीयाः प्रसव्यम्। तेषामेवङ्गामिनां यानिस्थानानि तेषां यस्मिन् प्रदक्षिणप्रसव्यगमनात्मके गतिविशेषे सति परैर्विपक्षभूतैः शारैरसमावेशः=अनध्यासनमनाक्रमणं सोऽयानय इत्युच्यते; न तु प्रदक्षिणप्रसव्यगमनमात्रे स एवायम्। एवंरूपोऽयानयो यदा समहायैः शारौः पदान्यधिष्ठीयन्ते तदा वेदितव्यः। ससहायानामेव हि शाराणां पदानि परैर्न शक्यन्तेऽध्यासितुम्। असहायानां तु शक्यत एव। `फलकशिरसि स्थितः' इति। यत्र फलकेऽङ्कऽक्षैर्दीव्यन्ति तस्य शिरोभूतं यत्र स्थानं किंतवानां प्रसिद्धं तत्र स्थितः शारः `अयानयीनः' इत्युच्यते; तत्रैवायानयीनशब्दस्य रूढत्वात्।

अपरे तु, नेयो नेतव्यः, न नोतस्ततः। तत्र `शिरसि स्थितः' इत्यर्थानुपपत्तेः `फलकशिरसि स्थाप्यते' इत्यर्थ इति ग्रन्थेन भवितव्यमित्याहुः। नीतो वा नेयः; तदुपलक्षणत्वात्। भाविन्यावस्थयोक्तः। अयानयसम्बन्धित्वेऽपि सर्वेषां विशेष्यादेव प्रत्ययोत्पत्तिरुक्तैव। सत्यपि द्वितीयाधिकारे पुनर्द्वितीयोच्चारणं दृष्टाद्द्वितीयान्ताद्यथा स्यादित्येवमर्थम्। तेन विशिष्टार्थनेयवचनादयानयशब्दाद्द्वितीयान्तातद् प्रत्ययो भवति, न नेयवचनमात्रात्। स एव विशिष्टो यो नयः प्रदक्षिणप्रसव्यगामीत्यादिना ग्रन्थेन दर्शितः।

अथायान्य इति कोऽयं शब्दः, यदि ह्ययं समाहारे द्वन्द्वः, तस्य नपुंसकत्वादयानयमिति भवितव्यम्? अथेतरेतरयोगे, द्व्यर्थत्वादयानयाविति भवितव्यम्? नायं द्वन्द्वः, किं तर्हि? मयूरव्यंसकादित्वात् तत्पुरुषः--अयसहितोऽनयोऽयानय इति। अथ बद्धाभक्षयतिनेयेष्विति कथं तिङन्तस्य द्वन्द्वः? कः पुनराहायं द्वन्द्व इति? यदि न द्वन्द्वः, कथं नेयेष्विति बहुवचनम्? सौत्रत्वान्निर्देशस्य। सुब्व्यत्ययेन वा च्छन्दस्येकवचनस्य स्थाने बहुवचनमुपपन्नम्। ननु च्छन्दसि सुब्व्यत्यय उक्तः, नेदं छन्दः? `छन्दोवत्सूत्राणि भवन्ति' (म.भा. 1-1-1) इत्यदोषः। अथ वा; द्वन्द्व एवायम्, न तु तिङन्तस्य। न हि भक्षयतिशब्दोऽयं तिङन्तः। किं तर्हि? तिङन्तप्रतिरूपको निपातस्तिङन्तेन समानार्थः, यथा--अस्तिक्षीरा ब्राह्मणीत्यत्रास्तिशब्दः।।

10. परोवरपरम्परपुत्रपौत्रमनुभवति। (5.2.10)

कथं पुनरप्रत्ययसन्नियोगेन निपातनस्य विना प्रत्ययेन दर्शनमुपपद्यते? इत्याह--`तच्छब्दान्तरमेव द्रष्टव्यम्' इति।।

11. अवारपारात्यन्तानुकामं गामी। (5.2.11)
`गामी' इति। `आवश्यकाधमर्ण्ययोर्णिनिः' (3.3.170) इत्यावश्यकार्थे णिनिः। भविष्यति चायं काले गामिशब्दो वर्त्तते, यदाह--`गमिष्यतीति गामी'। सा च भविष्यति वृत्तिः `भविष्यति गम्यादयः' (3.3.3) इति वचनाल्लभ्यते; इत्याह--`भविष्यति' इत्यादि। `अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीप्रतिषेधः' इति। तेन द्वितीयासमर्थतोपपद्यत इत्यभिप्रायः। कृद्योगा हि षष्ठी द्वितीयाया अपवादः, तेन षष्ठीप्रतिषेधे हि सति द्वितीययैव भवितव्यम्। `अवारपारम्' इति। अवारस्य पारमिति षष्ठीसमासोऽयम्। वा च षष्ठ्याः पूर्वनिपातो वक्तव्यः। तेन पक्षे पारावारमित्यपि भवति।
`विगृहीतादपि' इति। [`भवति'-मुद्रितः पाठः] `विपरीताच्च' इति। कथं पुनरधिकारादेव द्वितीयासमर्थविभक्तौ लब्धायामिहाधिकं द्वितीयोपादानं कृतम्? एतेन तदधिकस्य विधिर्भवतीति सूचितम्। तेन विगृहीताद्विपरीताच्च प्रत्यय उपपद्यते। `अत्यन्तम्' इति। अन्तस्याभावोऽत्ययो वेति। `अव्ययं विभक्ति' (2.1.6) इत्यादिनाऽव्ययीभावः। अथ वा--अन्तमतिक्रान्तमिति `कुगति' (2.2.18) इत्यादिना तत्पुरुषः। क्रियाविशेषणञ्चैतत्। `भृशं गन्तेत्यर्थः' इति। भृशार्थत्वेन लोकेऽत्यन्तशब्दस्य प्रसिद्धत्वात्। `अनुकामम्' इति। कामसदृशमनुकामम्। कामनुरूपमित्यर्थः। यथार्थेऽव्ययीभावः। इदमपि क्रियाविशेषणमेव।।

12. समांसमां विजायते। (5.2.12)
`समां समास' इति। `नित्यवीप्सयोः' (8.1.4) इति वीप्सायां द्विर्वचनम्। अत आह--`समांसमामिति वीप्सा' इति। `सुबन्तसमुदायः प्रकृतिः' इति। प्रातिपदिकाधिकारे वचनसामर्थ्यात्। `गर्भं धारयतीत्यर्थः' इति। अनेकार्थत्वाद्धातूनाम्।
`पूर्वपदे सुपोऽलुग्वक्तव्यः' इति। तद्धित उत्पन्ने `कृत्तद्धितसमासाश्च'(1.2.46) इति प्रातिपदिकसंज्ञायां सत्यां `सुपो धातुप्रातिपदिकयोः' (2.4.71) इति सुब्लुक् प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः।

`गर्भविमोचनेऽपि विजनिर्वर्त्तत इत्याहुः' इति। तदेवं मन्यते--यदा गर्भधारणे वर्त्तते तदत्यन्तसंयोगे द्विकतीयैवात्र, न सप्तमी। गर्भविमोचने विजनावुपपद्यते सप्तमी। `यलोपमात्रम्' इति। न हि गर्भविमोचनेन सकला समा व्याप्यत इति मात्रशब्देन सर्वस्या विभक्तेर्लोपो न भवतीति दर्शयति। `परिशिष्टस्य' इति। आम्शब्दस्य।
`अनुत्पत्तौ' इति। तद्धितस्य। `उत्तरपदस्य च' इति। चकारात् पूर्वपदस्य लोपो वक्तव्य इति यकारस्य प्रत्ययसन्नियोगेन विधीयमानो लोपस्तदभावे न प्राप्नोतीति पक्ष उपसंख्यायते।।

13. अद्यश्वीनावष्टब्धे। (5.2.13)
`अवष्टब्धे विजन आसन्ने प्रसवे' इति। अत्र पूर्वयोः पदयोरुत्तराभ्यां यथाक्रममर्थाख्यानम्।।

14. आगवीनः। (5.2.14)

15. अनुग्वलङ्गामी। (5.2.15)

16. अध्वनो यत्खौ। (5.2.16)

17. अभ्ययित्राच्छ च। (5.2.17)
`अभ्यमित्रात्' इति। अमित्रस्याभिमुखमभ्यमित्रम्। `लक्षणेनाभिप्रती आभिमुख्ये' (2.1.14) इत्यव्ययीभावः। क्रियाविशेषणञ्चैतत्। तेन द्वितीयैव समर्थविभक्तर्भवति।।

18. गोष्ठात्खञ् भूतपूर्वे। (5.2.18)
`भूतपूर्वं चरट्' (5.3.53) इति प्राप्ते खञ् विधीयते। `गावस्तिष्ठन्त्यस्मिन्निति गोष्ठम्' इति। `सुपिस्थः' (3.2.4) इति कः, `अम्बाम्बगोभूमि' (8.3.97) इत्यादिना मूर्धन्यः।
`भूतपूर्वे' इति। पूर्वं भूत इति भूतपूर्वः। `सुप्सुपा' (2.1.4) इति समासः। `भूतपूर्वग्रहणं तस्यैव विशेषणम्' इति। अर्थद्वारकं वेदितव्यम्, यथा--`धातोः कर्मणः समान' (3.1.7) इत्यादिसूत्रे कर्मत्वम्, समानकर्त्तृकत्वञ्च।।

19. अश्व्स्यैकाहगमः। (5.2.19)
`एकाहेन गम्यत इति एकाहगमः' इति। `अकर्त्तरि च' (3.3.19) इत्यादिना घञ्, निपातनान्न वृद्धिः। `कर्त्तृकरणे कृता बहुलम्' (2.1.32) इति समासः। `आश्वीनानि शतं पतित्वा' इति। एकाहेन यानि गम्यन्ते योजनानि तेषां शतं गत्वेत्यर्थः। शतं संख्येये वर्त्तमानं स्वसंख्योपादान एव स्वभावाद्वर्त्तते। तेनाश्वीनानि शतमित्याश्वीनशब्देन बह्वर्थप्रवृत्तिसामानादिकरण्येऽप्येऽप्येकवचनान्तमेव प्रयुज्यते।।

20. शालीनकौपीने अधृष्टाकार्ययोः। (5.2.20)
`यथाकथञ्चित्' इति। येन केनचित् प्रकारेण। नावयवार्थे प्रत्यभिनिवेशः कर्त्तव्य इति दर्शयति--`उत्तरपदलोश्च' इति। उत्तरपदं प्रवेशनशब्दोऽवतरणशब्दश्च, तस्य लोपः। `शालीनो जडः' इति। स हि जाड्यात् प्रतिवचनमपि दातुं शक्तोऽप्यार्यैराद्रियमाणो न शक्नोति तत्र स्थातुम्--जनता पश्यतीति, अतः शालाप्रवेशनमर्हति। शालाशब्दोऽयमिहि कुटीरवचनः। `कौपीनं पापम्' इति। तद्धि लोके निन्द्यत्वादकार्य्यत्वाच्चाकार्य्यम्, तल्लोके कूपेऽवतरणं प्रवेशनमर्हतीत्युच्यते। तत्सामर्थ्याच्छरीरावयवः कश्चित्कौपीनशब्देनोच्यते। यदपि तस्य शरीरावयवस्याच्छादनार्थं वासः, तदपि तत्सम्बन्धात् प्रव्रजितादीनां कौपीनमित्युच्यते।।

21. व्रातेन जीवति। (5.2.21)
`नानाजातीयाः' इति। अनेकजातीयाः। `अनियतवृत्तयः' इति। अनियतक्रियाः। `तेषां कर्म व्रातम्' इति। व्रातसाहचर्यात् तदपि व्रातमित्युच्यते। अथ वा--व्रातानामिदमित्यर्थविवक्षायां छे प्राप्ते, अस्मादेव निपातनादण् भवति। तत्पुनः कर्म भारवहनादि। `तत्र नेष्यते' इति। कथं पुनरिष्यमाणोऽपि न भवति प्रकृतायां महाविभाषायां व्यवस्थितविभाषात्वात्।।

22. साप्तपदीनं सख्यम्। (5.2.22)
`साप्तपदीनमिति निपात्यते' इति। किं पुनरत्र निपात्यते? प्रत्ययः प्रत्ययार्थश्च प्रकृतः। खञ्प्रत्ययार्थश्चावाप्तिः। सप्तभिः पदैरवाप्यत इति तद्धितार्थे समासः। ततः सप्तपदशब्दात्खञ्।
`कथम्' इत्यादि। सख्युभविः कर्म वा सख्याम्। तत्र यदि साप्तपदीनमिति निपत्यते, सखिशब्देन सामानादिकरण्यं न प्राप्नोति, न हि सख्यमेव सखा भवतीति प्रष्टुरभिप्रायः। `गुणप्रधानः' इत्यादि। गुणो भावः कर्म वा प्रधानं यस्य स तथोक्तः। स यदा च गुणमात्रे मुख्यया वृत्त्या वर्त्तते तदा गुणप्रधानो वेदितव्यः। `तदा सख्यशब्देन सामानाधिकरण्यं भवति' इति। द्वयोरप्येकार्थवृत्तित्वात्। `यदा तु' इत्यादि। लक्षणा उपचारः। धर्मधर्मिणोरभेनोपचारेण गौण्या वृत्त्या तद्विति संख्यावति पुरुषे वर्त्तते तदानेनैव समानाधिकरणो भवति। यथा यदा शुक्लशब्दो गुणमात्रे वर्त्तते तदा द्रव्यशब्देन समानाधिकरणो न भवति--पटस्य शुक्ल इति, यदा त्वसौ त्वमित्यभिसम्बन्धात् पटे वर्त्तते तदा सामानाधिकरण्यं भवति--शुक्लः पद इति; तथेहापि वेदितव्यम्।।

23. हैयङ्गवीनं संज्ञायाम्। (5.2.23)
`ह्योगोदोहस्य हियङ्ग्वादेशः' इति। ह्योगोदोहस्य हियङ्गशब्द आदेश इत्यर्थः। ह्यौ गोदोहनं ह्योगोदोहः, `सुप्सुपा' (2.1.4) इति समासः। `विकारे खञ्प्रत्ययः' इति। `तस्य विकारः' (4.3.134) इति प्राप्तसयाणोऽपवाद इति।।

24. तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ। (5.2.24)
अणोऽपवादौ। `तस्येदम्' (4.3.120) इत्यणि प्राप्ते कुणबदयो विधीयन्ते। जकारस्य प्रयोजनाभावात् `धुटू' (1.3.7) इतीत्संज्ञा न भवति।।

25. पक्षात्तिः। (5.2.25)
`एकयोगनिर्दिष्टानाम्' इति। स्वरितत्वेनादिशब्दानामनुवृत्तिर्भवति। स्वरितत्वप्रतिज्ञाप्रतिबद्धत्वात्। एकयोगनिर्दिष्टानामपि यत्र प्रतिज्ञायते स्वरितत्वं तत्रैव भवति, नान्यत्र। तेनैकयोगनिर्दिष्टनामप्येकदेशस्यानुवृत्तिरुपपद्यते।।

26. तेन वित्तश्चुञ्चुप्चणपौ। (5.2.26)
`विद्याचुञ्चुः, विद्याचणः' इति। अथ `चुटू' (1.3.7) इति चकारस्येत्संज्ञा कस्मान्न भवति? उक्तोऽस्य हेतुस्तत्रैव--पृथग्योगकरणमस्य विधेरनित्यत्वज्ञापनार्थमिति।।

27. विनञ्भ्यां नानाञौ नसह। (5.2.27)
`स्वार्थे नानाञौ प्रत्ययौ भवतः' इति। `अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' (सी.प. 125) इति कृत्वा। ञकारस्त्वाद्युदात्तार्थः।।

28. वेः शालच्छङ्कट्चौ। (5.2.28)
`ससाधनक्रियावचनात्' इत्यादि। उक्तमेतत्--उपसर्गा ह्येवमात्मका भवन्ति यत्र कश्चित् क्रियावाची शब्दः प्रयुज्यते तत्र क्रियाविशेषणमाहुः। यत्र न प्रयुज्यते तत्र ससाधनक्रियामिति। इह न कश्चित् क्रियावाची शब्दः प्रयुज्यते, तस्मात् ससाधनक्रियावाचिन उपसर्गात् प्रत्ययो भवति। स च भवन् `अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' (सी.प. 125) इत्यनिर्दिष्टार्थत्वात् स्वार्थे भवति। `विगते शृङ्गे' इति। एतेन विगमनक्रियायां शृङ्गसाधनायां विशब्दो वर्त्तत इति दर्शयति।
यदि ससाधनायां क्रियायां प्रत्ययः, विशालो गौर्विशङ्कटो गौरिति न सिध्यति, न हि गौरिह विगमनस्य साधनम्, किं तर्हि? शृङ्गे? इत्यत आह-- `तद्योगात्' इत्यादि। यथा सास्नाद्यवयवयोगादवयवधर्मेण गौः सास्नेत्युच्यते, तथा विशालविशङ्कटशृङ्गयोगाद्गौस्तथेत्युच्यते। `परमार्थतस्तु' इत्यादि। समुदायो व्युत्पत्यर्थः। अतोऽत्र न केवलं ससाधनक्रिया नास्ति, अपि च साधनमिपि नास्ति। तस्माद्गुणशपब्दा विशालादयः परमार्थतो लोके प्रसिद्धाः यथा--शुक्लादयः शब्दाः। तेन नात्र विशालीदिषु प्रकृतिप्रत्ययार्थयोरभिनिवेशः कर्त्तव्यः। तदेवं परमार्थतोऽनर्थकाः। वेः शालच्छङ्कटचावप्यनर्थकावेव विधीयते इत्युक्तं भवति। `एते' इति। व्युत्पादयिष्यमाणान् सङ्कटादीन् बुद्धौ कृत्वा बहुवचनं कृतम्, तेऽपि हि गुणशब्दा एव।।

29. संप्रोदश्च कटच्। (5.2.29)
ससाधनक्रियावचनादुपसर्गात् स्वार्थे प्रत्यय इति सर्वं पूर्ववदेव वेदितव्यम्।
`अलाबूतिलोमा' इत्यादि। अलाबूप्रभृतिभ्यो रजस्यभिधेये कटच्प्रत्ययस्योपसंख्यानं कर्त्तव्यम्। विकारप्रत्ययानामपवादः; अलाबूप्रभृतीनां यद्रजस्तस्य तद्विकारत्वात्।
`गोष्ठादयः' इत्यादि। आदिशब्दः प्रकारे। पशुनामानि गोशब्दादीनि, तेभ्यः स्थानादिष्वभिधेयेषु गोष्ठजादयः प्रत्यया वक्तव्याः। `तस्येदम्' (4.3.120) इत्यर्थविवक्षायां स्थानादिषु गोष्ठजादयो विधीयन्ते। ननु `तद्धिताः' (4.1.76) इति बहुवचनेनैव संगृहीतं सङ्घाते कटजित्यादि सर्वम्? सत्यम्; अनन्तरोक्तस्यैव वाक्यस्य प्रपञ्चोऽयम्। `अविकटम्' इति। अत्र `तस्य समूहः' (4.2.37) इति सामूहिके प्रत्ययो कटट्।

`अविपटम्' इति। प्रकीर्णानामवीनां विस्तार उच्यते।

द्वावुष्टौ `उष्ट्रगोयुगम्'। षङ् हस्तिनो `हस्तिषङ्गवम्'

इङ्गुदस्य स्नेह `इङ्गुदतैलम्'। तिलस्य `रसास्तिलतैलम्'।

`भवने क्षेत्रे' इत्यादि। इक्षूणां भवनं क्षेत्र `मिक्षुशाकटम्' । `इक्षुशाकिनम्'। मूलस्य भवनं क्षेत्रं `मूलशाकटम्'। मूलशाकिनम्।।

30. अवात्कुटारच्च। (5.2.30)

31. नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः। (5.2.31)
`नमनं नतम्' इति। भावे निष्ठां दर्शयति। `नासिकायाः सम्बन्धिनी' इति। अनेनापि नासिकाया इत्यपि सम्बन्धलक्षमा षष्टी। यदि नासिकायाः सम्बन्धिनि नते वाच्य एते प्रत्ययाः, कथं तदेतेन नासिका पुरुषश्चाभिधीयते? इत्याह--`तद्योगात्' इति।।

32. नेर्बिडज्बिरीसचौ। (5.2.32)
`कथं निबिडाः' इति। तद्योगोऽत्र नास्ति। अतस्तद्योगाभावात् तथाभिधानं नोपपद्यत इत्यभिप्रायः। `उपमानाद्भविष्यति' इति। निविडतया नासिकया तुल्याः केशा वस्त्राणि च निबिडतया। तेनोपमानात् तदुभयं निबिडशब्दवाच्यं भविष्यति।।

33. उपाधिभ्या त्यकन्नासन्नारूढयोः। (5.2.33)
`संज्ञाधिकाराच्च' इति। `नते नासिकायाः' (5.2.31) इत्यादिसूत्रात् संज्ञाधिकारानुवृत्तेः। `नियतविषयम्' इति। पर्वतविषयमेवासन्नारूढं गृह्यते। तेन वृक्षस्यासन्नम्, प्लक्षस्यारूढमित्यतर न भवतीति भावः। अथोपत्यका, अधित्यकेत्यत्र `प्रत्ययस्थात् कात् पूर्वस्य' (7.3.44) इत्यनेनेत्त्वं कस्मान्न भवति? इत्यत आह--`प्रत्ययस्थात् कात्' इति। यद्यत्रेत्त्वं स्यात् संज्ञारूपं न सिध्येत्; नोपत्यिकाधित्यिकेत्येवंरूपा संज्ञा। तस्मात् संज्ञाधिकारादित्त्वं न भवति।।

35. कर्मणि घटोऽठच्। (5.2.35)

`कर्मणि' इत्यनेन कर्मणीति स्वरूपग्रहणं दर्शयिति। अथ पारिबाषिकस्य कर्मणो ग्रहणं कस्मान्न भवति? असम्भवात्। असम्भवस्तु घटतेरकर्मकत्वात्।
`अठच्प्रत्ययेऽकारोच्चारणं ठस्येकादेशनिवृत्त्यर्थम्।।

36. तदस्य सञ्जातं तारकादिभ्य इतच्। (5.2.36)
तारकादिषु `बुभुक्षापिपासा' शब्दौ पठ्येते, तयोः किमर्थः पाठः, यावता सन्नन्ताभ्यां निष्ठायामिटि च कृते बुभुक्षितः, पिपासितो देवदत्त इति भवति? सत्यम्; भूते विधानाद्वर्त्तमाने न सिध्यति। अनेन तु वर्त्तमानेऽपि सिध्यति। तस्माद्युक्तस्तयोः पाठः। `गर्भादप्राणिनि' इति। गर्भशब्दादप्राणिन्यभिधेय इतच्प्रत्ययो भवति। गर्भिताः शालयः। अप्राणिनीति किम्? गर्भः सञ्जातोऽस्या गर्भिणी गौः।।

37. प्रमाणे द्वयसज्दघ्नञ्मात्रचः। (5.2.37)
प्रमाणशब्दस्य सम्बन्धिशब्दत्वात्प्रत्ययार्थो विज्ञायते।

`प्रथमश्च द्वितीयश्च' इत्यादि। द्वयसज्दघ्नचौ ऊर्ध्वमान इष्येते। उपरि निक्षिप्य यत्र मीयते, न तिर्य्यक् समन्ततो वा, तदूर्ध्वमानम्। `अविशेषेण' इति। प्रमाणे परिमाण उन्माने वाऽविशेषेण सर्वत्र मात्रज्भवतीति। `प्रस्थमात्रमित्यपि भवति' इति। अपिशब्दाद्वितस्तिमात्रमित्यपि भवतीति।
`प्रमाणे लोः' इति। लुकश्चायं पूर्वाचार्यविहिता संज्ञा। अयं मात्रच उत्पन्नस्य लुगुच्यते; न द्वयसज्दघ्नयोः। तयोरूर्ध्वमाने विधानात्। अस्मिन्नर्थ उत्पत्तिरपि नास्ति।
`द्विगोर्नित्यम्' इति। द्विगोरप्रमाणत्वात्। सत्यपि च प्रमाणान्तत्वे तदन्तविदेरभावात्। पूर्वेण प्राप्त एव लुगुच्यते। `नित्यग्रहणं किम्' इति। न हि विकल्पः प्रकृतो यन्निवृत्त्यर्थं नित्यग्रहणं क्रियते। न च पूर्वस्य विधेर्विकल्पेन प्रवृत्तिं ज्ञापयितुमिह नित्यग्रहणं कर्तुं युक्तम्। न ह्यसौ विबाषयेष्यत इत्यभिप्रायः।
`संशये', इत्यादिना नित्यग्रहणस्य प्रयोजनमाह। श्रवणं प्रादः, `कृत्वल्युटो बहुलम्' (3.3.113) इति भावे घञ्' श्रावोऽस्यास्तीति श्रावी, स पुनर्वक्ष्यमाणो मात्रच्प्रत्ययः प्रमाणसम्बन्धेनोच्यते।
`स्तोमे डट्' इत्यादि। पञ्चदशाहानि परिमाणमस्य यज्ञस्य `पञ्चदशः'। `पञ्चदशी' इति। टित्त्वान्ङीप्।
`शन्शतोर्डिनिः' इति। स्तोमे चान्यत्राविशेषेणायं विधिः। `विं शिनः' इति। डिनिः, `ति विंशतेर्डिति' (6.4.142) इति तिलोपः, यस्येति लोपश्च। `शममात्रं दिष्टिमात्रमिति। प्रमाणस्योदाहरणद्वयम्। `प्रस्थामात्रम्, कुडवमात्रमिति' परिमाणस्य। पञ्चमात्रम्, दशमात्रमिति संख्यायाः। यत्रैतन्न निर्णीयते शमं स्याद्वा न वेति तत्र शममात्रमिति प्रयुच्यते। एवमन्यत्रापि यथायोगं वेदितव्यम्।।

38. पुरुषहस्तिभ्यामण् च। (5.2.38)
`हास्तिनम्' इति। `हनण्यनपत्ये' (6.4.164) इति प्रकृतिभावः। `द्विपुरुषी इति। `पुरुषात् प्रमाणेऽन्यतरसयाम्' (4.1.24) इति ङीप्। `द्विहस्तिनो इति। अत्र ऋन्नेभ्यो ङीप्' (4.1.5) इति ङीप्।।

39. यत्तदेतेभ्यः परिमाणे वतुप्। (5.2.39)
`यावान्' इति। `आ सर्वनाम्नः' (6.3.91) इत्यकारः। उगिदचाम्' (7.1.70) इति नुम्, `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः, हल्ङ्यादिसंयोगान्तलोपौ। प्रमाणपरिमाणशब्दौ पर्यायाविति मत्यमानो पश्चोदयेत्--अत्र कस्मात् परिमाणग्रहणं क्रियते, यावता प्रमाणग्रहणमनुवर्त्तत एवेति? तं प्रत्याह--`प्रमाणे इति वर्त्तमाने' इत्यादि। स पुनरनयोः प्रमाणपरिमाणयोर्भेदः `परिमाणं तु सर्वतः, आयामस्तु प्रमाणं स्यात्' इति प्रागेव व्याख्यातः।
`डावतावर्थवैशेष्यात्' इति। `डावतौ' इति पूर्वाचार्यसंज्ञाप्रतिपादितापेक्षोऽयं निर्देशः, ते हि यत्तदेतेब्यो डावतुमेव प्रत्ययं कृतवन्तः। विशिष्यत इति विशेषः, विशेषस्य भावो वैशेष्यम्। अर्थस्य वैशेष्यमर्थस्य विशिष्टत्वमित्यर्थः। प्रमाणशपब्दस्यान्योऽर्थः, परिमाणशब्दस्य चान्योऽर्थ इति भिन्नार्थत्वमनयोः; तस्मादर्थवैशेष्याड्डावतौ विधातव्ये परिमाणशब्दस्य निर्देशः पृथगुच्यते। उच्यत इति क्रियत इत्यर्थः। किमर्थः पृथिग्निर्देशः क्रियते? इत्याह-
`मात्राद्यप्रतिघाताय' इति। पृथिग्निर्देशेनार्थबेदे सिद्धे सति मात्रजादीनां बाधा मा बूदित्येवमर्थः पृथग्निर्देशः क्रियत इत्याह। अथैकत्वे तु प्रकृतिसामान्ये मात्रजादयो विधीयमाना उत्सर्गा भवन्ति, प्रकृतिविशेषात् तु वतुब् विधीयमानोऽपवादौ भवति, `अपवादेनोत्सर्गो बाध्यते' इति यत्तदेतेभ्यो मात्र जादयो न स्युः, ततश्च तत्प्रमाणमस्य तन्मात्रमित्यादि न सिध्येत्, अर्थभेद्युत्सर्गापवादभावो नास्तीति न भवत्येष दोषप्रसङ्गः। किञ्च--`भावः सिद्धश्च डावतोः' इति। `डावतोः' इति पञ्चमी। अर्थभेदे सति वतुप्प्रत्ययान्तान्मात्रजादीनामुत्पत्तिश्च सिद्धा भवति। परिमाणे वतुब् भवति--यत् परिमाणमस्य यावानिति। तदन्तात् परिमाणे मात्रजादयो भवन्ति--यावत् परिमाणमस्य यावन्मात्रम्। अथैकत्वे तु `उक्तार्थानामप्रयोगः' (व्या.प.60) ति मतुपाऽबिहितत्वादस्यार्थस्य तदन्तान्मात्रजादयो न स्यु-।
`त्वावतः, मावतः' इति। मपर्यन्तयोर्युष्मदस्मदोः `प्रत्ययोत्तरपदयोश्च' (7.2.98) इति त्वामादेशौ पूर्ववदात्त्वम्।।

40. किमिदम्भ्यां वो घः। (5.2.40)

`कियान्। इयान्' इति। `इदंकिमोरीश्की' (6.3.90) इति किमः की। `इदम ईश्' इति। `यस्येति' (6.4.148) लोपः। केन पुनः किमिदम्भ्यां विहितस्य वतुपो वकारस्य घत्वं विधीयते? इत्याह--`अथ वा' इत्यादि। `योगविबागेन वा' इति। `किमिदम्भ्याम्' इत्येतावता योगेन वतुपं विधाय ततः `वो घः' इत्यनेन वतुपो वकारस्य घत्वं विधीयते।

अथ वग्रहणं किमर्थम्, यावता `आदेः परस्य' (1.1.54) इति वकारस्यैव घो विधीयते, ननु चानेकाल्त्वात् सर्वादेशः प्राप्नोति? नैष दोषः, अकारो ह्यत्रोच्चारणार्थो वर्णमात्रमेव, न त्वादेशः। कुतः पुनरेतद्विज्ञेयम्? व्याख्यानात्। तर्हि वकार एवं लघीयानिति युक्तं तस्य स्थानित्वेनोपादनम्। वकारे त्वस्थानिन्युपात्तै यद्यपि समुदायादेशः, तथापि न दोषः; द्वयोरकारयोः पररूपं भविष्यति।।

41. किमः संख्यापरिमाणे डति च। (5.2.41)

`संख्यायाः परिमाणम्' इति। कृद्योगलक्षणा कर्मणि षष्ठी। परिमितिः परिमाणम्। संख्यापरिच्छेद इत्यर्थः। परिच्छेद ति भावे घञ्। `संख्यापरिच्छेदे वर्त्तमानात्' इति। परिच्छेदोपाधिकायां संख्यायां वर्त्तमानादित्येषोऽर्थो विवक्षितः। यथा ह्ययमेवार्थोऽस्य वचनस्योत्तरत्र तथा व्यक्तीकरिष्यते। तस्य वकारस्य घत्वमिति; `वो घः' इत्यनुवृत्तेः। `पृच्छ्यमानत्वात्' इति। यदा संख्यायाः परिच्छेदे किंशब्दो वर्त्तते। कदा च वर्त्तते? यदा संख्या परिपृच्छ्यमाना भवति। न ह्यपरिपृच्छ्यमानायाः परिच्छेद उपपद्यते। यदा च परिपृटच्छ्यमाना भवति, तदा च किंशब्दः परिच्छेदविशिष्टायां वर्त्तत इति पृच्छ्यमानत्वात् `परिच्छेदोपादिकायां संख्यायां वर्त्तमानात् किमः प्रत्ययो भवतीति विज्ञायते। परिच्छेद उपाधिविशेषणभूतो यस्याः सा परिच्छेदोपाधिका। परिचछेदविशेषणेति यावत्। तदनेन संक्यापरिच्छेदे वर्त्तमानात् किम इत्यस्य योऽर्थोऽभिमतः स व्यक्तीकृतः। `कति' इति। जसः `षड्भ्यो लुक्' (7.1.22) इति लुक्। `अथ वा' इत्यादि। अत्र च व्याख्याने `संख्यापरिमाणे' इति कर्मधारयः, निपातनादुपसर्जनस्यायं परनिपातः। परिमाणशब्दश्च परिमीयतेऽनेनेति करणसाधनः। `एवमात्मिकैव' इति। अस्यार्थं परिच्छेदस्वभावेत्यनेन विस्पष्टीकरोति। परिच्छिद्यतेऽनेनेति परिच्छेदः, स स्वभावो यस्याः सा तथोक्ता। `यत्र' इत्यादिना यदर्थं परिमाणग्रहणेन संख्या विशेष्यते तद्दर्शयति। स्यादेतत्--नास्त्येव स विशेषो यत्र संख्यायाः परिच्छेदस्वभावो नास्ति, तदपार्थकं विशेषणमिति? अत आह--`क्षेपे हि' इत्यादि। `केयमेषां संख्या दशानाम्' इति। नात्र संख्या परिच्छेदकत्वेन विवक्षिता। न ह्यत्र परिच्छेदोऽस्ति; क्षेपपरत्वाद्वाक्यस्य। किंशब्दोऽत्र क्षेपे वर्त्तते, न प्रश्ने।।

42. संख्याया अवयवे तयप्। (5.2.42)

`चतुष्टयी' इति। चतुरो रेफस्य `विसर्जनीयस्य सः' (8.3.34) इति सः; तस्यापि `ह्रस्वात्तादौ तद्धिते' (8.3.99) इति मूर्धन्यः, `टिड्ढाणञ्' (4.1.15) इत्यादिना ङीप्।।

43. द्वित्रिभ्यां तयस्यायज्वा। (5.2.43)

तयप्रत्ययग्रहणं किमर्थम्, यावता प्रकृत एवासावनुवर्त्तिष्यते? इत्याह--`तयग्रहणम्' इत्यादि। यदि तयब्ग्रहणं न क्रियते, तदा तयप्रत्ययादन्य एवायमयच् प्रत्ययो विज्ञायेत, न तयबादेशः। किं पुनः स्याद्यदि प्रत्ययान्तरं स्यात्? तयष्कार्य्यमयचो न स्यात्। किं तत्? `प्रथमचरम्' (1.1.32) इत्यादिना जसि विभाषा सर्वनामसंज्ञा--द्वये, द्वयाः; `टिड्ढाणञ्' (4.1.15) इति ङोप्--द्वयो। ननु च पूर्वसूत्रेणैव विहितस्य तस्य इह चादेशार्थानुवृत्तिर्विज्ञायते। प्रयोजनान्तराभावात्, `द्वित्रिभ्याम्' इति। पञ्चमीनिर्देशः `तस्मादित्युत्तरस्य' (1.1.67) इति षष्ठ्यन्तं सम्पादयिष्यते, अतोनेनान्तरेणापि तयब्ग्रहणं तयप्स्थानित्वं लभ्यत एव? नैतदस्ति; यद्यनुवृततिस्तयपोऽन्यार्या न स्यात्, ततोऽनुवृत्तिसमर्थ्यात् तयपः स्थानित्वं विज्ञायेत। तस्य त्वनुवृत्तिरुत्तरार्थिपि भवति। `उभादुदात्तो नित्यम्' (5.2.44) इत्यव योगविबागेन तयब्विधातव्यः। न चानुवर्त्तमानः शक्यते विधातुम्। अत उत्तरार्थायामनुवृत्तौ सत्यां तयप्स्थानित्वमयुक्तमिति तयब्ग्रहणं क्रियते।।

44. उभादुदात्तो नित्यम्। (5.2.44)

`वचनसामर्थ्यात्' इत्यादि। यद्यन्तोदात्तः स्यादुदात्तवचनमनर्थकं स्यात्। अयचि च कृते चित्स्वरेणैव `सतिशिष्टस्वरो बलीयान्' (वा. 6.1.158) इत्यन्तोदात्तत्वस्य सिद्धत्वात्। आद्युदात्तत्वं ह्यन्यथा न सिध्यतीति तद्रथं क्रियसाणमर्थबद्वचनं भवतीति। `यदि लौकिको संख्या' इति। द्वित्रादिवत्। पूर्वेण योगेन तययो विधानम्, तस्यापरेण योगेन नित्यमयजादेशो विधीयते। `उभये देदमनुष्याः' इति। उभाववयवौ येषामित्युभये। कथं बहुत्वे देवमनुष्याणां द्वाववयवौ भवतः? यद्यप्यत्र बहुत्वमस्ति, द्वित्वमपि तु प्रातिपदिकयोरस्त्येव; अत्र हि द्वौ राशी समुदायस्यावयवौ--एको देवनां राशिः, अपरो मनुष्याणामित्यदोषः।।

45. तदस्मिन्नधिकमिति दशान्ताड्डः। (5.2.45)

`प्रत्ययार्थेन च' इत्यादि। यथाजातीयः प्रत्ययार्थस्तथाजातीय एव यदि प्रकृत्यर्थो वति एवं प्रत्यय इत्यते, नान्यथा। प्रत्ययार्थेन प्रकृत्यर्थस्य तुल्यजातीयत्वं

दर्शयितुमुदाहरणमुपन्यस्यति--`एकादश कार्षापणाः' इति। प्रकृत्यर्थोऽप्येकादश कार्षापणा एवेति प्रकृत्यर्थः प्रत्ययार्थेन समानजातीयः। `इह तु न' इत्यादि। अत्र हि कार्षापणशतं प्रत्ययार्थः। प्रकृत्यर्थस्त्वेकादश माषाः। ते च कार्षापणेभ्यो विजातीया इति न भवति प्रत्ययः। `शतसहस्रयोश्चैवेष्यते' इति। यत् `तदस्मिन्' तस्मिंश्च शते सहस्रे वा प्रत्यय इष्यते; नान्यतर त्रिंशत्यादौ।

कथं पुनरनुपात्तमेव सूत्रे लभ्यते? इत्याह--`इति करणो विवक्षार्थः' इत्यादि। `कथम्' इत्यादि। यदि शते सहस्रे वाधिकिनि प्रत्ययेन भवितव्यम्, इह प्रत्ययो न प्राप्नोति--एकादशं शतसहस्रमिति। अत्र हि शतसहस्रं संख्यान्तरञ्चाधिकम्, न शतं नापि सहस्रमित्यभिप्रायः। `शतानाम्' इत्यादि। अनेन शतसहस्रस्य संख्यान्तरं निरस्याति। यदा शतशब्दः षष्ठ्यन्तः सहस्रशब्देन समस्यते तदा शतानां सहस्रं शतसहस्रशब्देनोच्यते। यदा तु सहस्रशब्दः षष्ठ्यन्तशब्देन समस्यते, तदा सहस्राणआं शतं शतसहस्रशब्देनोच्यते। ननु च सहस्रशब्दस्य पष्ठ्यन्तस्य समासे सहस्रशतमिति भवितव्यम्? राजदन्तादिषु दर्शनात् तस्य परनिपातो भविष्यतीत्यदोषः। `तत्र शतसहस्रयोरित्येव सिद्धम्' इति। शतसहस्रवाच्यस्यार्थस्य शतसहस्रयोरेवान्तर्भावात्।

`अधिके' इत्यादि। लोके प्रत्ययार्थेन समानजातावधिके शतसहस्रयोरेव प्रत्ययाख्यं कार्यमिष्टम्। यदा त्वसमानजात्यधिकं भवति, न च शतं सहस्रं वा प्रत्ययार्थेन विवक्षितम्, तदा नेष्यते। अथैकादशं शतसहस्रमित्यत्र कस्याधिक्ये सति डः कर्त्तव्यः? इत्याह--`यस्य' इत्यादि। संख्या संख्यानम्, गणनमित्यर्थः। यस्य संख्या, तस्याधिक्ये डः कर्त्तव्यः। कस्य च संख्या भवति? अधिकत्वं संख्यायते यस्य। यदा शतानि संक्यायते तदा--शतानां सहस्रमिति शतसहस्रम्, तदा शताधिक्ये डः कर्त्तव्यः। एकादशाधिकान्स्मिन् सहस्र एकादशं शतसहस्रमिति। यदा तु सहस्राणि संख्यायते--सहस्राणां शतं सहस्रशत्मिति, तदा सहस्राधिक्ये डः कर्त्तव्यः। एकादशसहस्राण्यधिकान्यस्मिन्नेकादशं शतसहस्रमिति। अथ किमर्थं तदिति प्रथमासमर्थविभक्तिरुपादीयते? यावता `तदस्य सञ्जातम्' (5.2.36) इत्यनुवर्त्तत एव, तत्र प्रत्ययार्थ एवास्मिन्निति निर्देष्टव्यः? नैवं शक्यम्; तदनुवृत्तौ हि तत्सम्बन्धस्यास्येति प्रत्यार्थस्याप्यनुवृत्तिः प्रसज्येत। न च षष्ठीसप्तम्यर्थयोर्विरोधः; ततोऽस्मिन्निति निर्देशात् पूर्वः प्रत्ययार्थो न निवर्त्तते, तस्यां त्वनुवृत्तौ षष्ठ्यर्थेऽपि प्रत्ययः स्यात्। तस्मादस्येति निवृत्त्यर्थं पुनस्तदिति प्रथमासमर्थविभक्तिरुपादीयते। यद्येवम्, अस्येति प्रत्ययार्थस्य निवृत्तत्वात् `संख्याया गुणस्य निमाने मयट्' (5.2.47) इत्यत्र षष्ठ्यर्थे प्रत्ययो न प्राप्नोति। इह निवृत्तस्यापि मण्डूकप्लुतिन्यायेनानुवृत्तिर्भविष्यतीत्यदोषः। अन्ये तु ज्ञापकं तदित्यस्य वर्णयन्ति। तदिति प्रकृते यत् तदित्याह, तज्ज्ञापयति--`तदस्य सञ्जातम्' (5.2.36) इत्यादौ सूत्रे यन्निर्दिष्टं तदिहानुवर्त्तमानमप्यङ्गभावं न यातीति षष्ठ्यर्थे प्रत्ययो न भवति।।

46. शदन्तविंशतेश्च। (5.2.46)

ननु च `पङ्क्ति' (5.1.59) इत्यादौ सूत्रे त्रिंशदादयः शब्दाः शत्प्रत्ययान्ताः, ततश्च प्रत्ययग्रहणपरिभाषयैव तदन्तात् प्रत्ययो लभ्यते, तत् किमन्तग्रहणेन? इत्याह--`शद्ग्रहणेऽन्तग्रहणम्' इत्यादि। यद्यन्तग्रहणं न क्रियेत, तदा प्रत्ययग्रहणपरिभाषया यस्मात् स विहितस्तदादेरेव स्यान्; नाधिकात्। अतोऽधिकादपि यथा स्यादित्येवमर्थमन्तग्रहणम्। यदि तर्हि यस्मात् प्रत्ययो विहितस्तदादेरधिकार्थमन्तग्रहणं केवलान्न प्राप्नोति? नैष दोषः; चकारोऽत्र क्रियते, स चानुक्तसमुच्चयार्थः, तेन केवलादपि भविष्यति। `संख्याग्रहणञ्च कर्त्तव्यम्' इति। संख्या गृह्यते येन तत् संख्याग्रहणं कर्त्तव्यम्। किं पुनः कर्त्तव्यम्? व्याख्यानम्। तत्रैवं व्याख्यानम्--`संख्याया अवयवे तयप्' (5.2.42) इत्यतः संख्याया इत्यनुवर्त्तते, तेन संख्याधिकादेव भविष्यति, नान्याधिकात्।

`विंशतेश्च' इत्यादि। विंशतिशब्दाच्च तदन्ताच्च प्रातिपदिकाड्डप्रत्ययो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रैदं व्याख्यानम्--विंशतिशब्दात्तावत् साक्षात् सूत्रोपात्तात प्रत्ययो भवति, तदन्तादपि; चकारस्यानुक्तसमुच्चयार्थत्वादिति।

`संख्याग्रहणं च' इत्यादौ पूर्व एवार्थः। व्याख्यानमपि पूर्वकमेव।।

47. संख्याया गुणस्य निमाने मयट्। (5.2.47)

`गुणो येन निमीयते' इति। परिवर्त्यते, विक्रीयत इत्यर्थः। `सोऽपि' इत्यादि। न हि तस्य भागत्वमन्तरेण निमेयस्य गुण इत्येव निर्दिष्टस्य भागत्वमध्यवसातुं शक्यम्। यदा हि मूलस्य भागत्वं नास्ति, भागव्यपदेशो न प्रवर्त्तत एव। तेन यद्यपि निमानस्य भागता नोक्ता, तथापि सामर्थ्यात् सा प्रतीयते। `यवानां द्वौ भागौ निमानमस्य' इति। ननु चोभयत्रापि परिवर्त्तनम्, तथापि मूल्य एव निमानशब्दो रूढ इति यन्मूल्यत्वेन विवक्षितं तदेव निमानं भवति, नेतरत्। `यवानाम्' इति। भागापेक्षया षष्ठी। यद्येवम्, परापेक्ष उदश्विच्छब्दे तद्धितस्य वृत्तिर्विरुध्यते। ननूदश्विद्भागे प्रत्ययः, नोदश्विति, तत्कथं द्विमयमुदश्विदिति प्रत्ययान्तस्योदश्विच्छब्देन सामानाधिकरण्यम्? इत्यत आह--`भागेऽपि तु' इत्यादि। अत्र पुनरभिधानशक्तिस्वाभाव्यं हेतुः। यथैवाणादयोऽपत्यापत्यवत्सम्बन्धेऽपि विधीयमाना अभिधानशक्तिस्वाभाव्यात् प्राधान्येन सम्बन्धिनमाचक्षते--औपगवो दाक्षिरिति, तथायमपि भागे विधीमानो भागवन्तमुदश्विदादिकमाचष्टे। `गुणस्येति चैकत्वं विवक्षितम्' इति। गुणस्येति यैकसंख्या सा विवक्षिता। ननु च `तद्धिताः (4.1.76) इति निर्देशेऽपि बहुवचनमप्रमाणम्, तस्याविवक्षितत्वात्' इत्युक्तम्, तत्कथमिहैकत्वविवक्षा युज्यते? नैष दोषः; इह हि षष्ठीसमासं कृत्वा गुणनिमान एव कर्त्तव्यम्, एवं हि लघु सूत्रं भवति। सोऽयमेवं वक्तव्ये सति यद्गुणस्येत्येकवचनमुच्चारयति, तेनैतत् सूचयति--विवक्षितमत्रैकत्वमिति तेनेत्यादिनैकत्वविवक्षायाः फलं दर्शयति।

एकत्वविवक्षायां ह्येतत् प्रयोजनम्--एकस्य गुणस्य निमाने वर्त्तमानाद्यथा स्यात्। `द्वौ भागौ यवानां त्रय उदश्वितः' इति। अत्र त्रयाणां भागानां निमाने द्विशब्दो वर्त्तत इति न भवति प्रत्ययः।

ननु च सत्यामप्येकत्वविवक्षायां नैवात्र प्रत्ययेन भवितव्यम्, यतः `भूयसश्च वाचिकायाः संख्यायाः प्रत्यय इष्यते' इति वचनम्। न ह्यत्र द्विशब्दो भूयसो वाचकः? एवं तर्हि यवानां यौ द्वौ भागौ, ताविह निमेयत्वेन विवक्ष्येते। ये त्रय उदश्वितो भागास्ते निमानत्वेन। तत्र यद्येकत्वविवक्षा न स्यात् तदा त्रिषूदश्विद्गुणेषु वर्त्तमानात् प्रत्ययः स्यात्। भूयसश्चेत्यपि प्रत्ययार्थात् प्रकृत्यर्थस्य भूयसो वाचिकायाः प्रत्यय इष्यते, नान्यतः। `इह न भवति' इति। अनभिषानात्। `तदस्मिन्नधिकम्' (5.2.45) इत्यादेः सूत्रादितिकरणानुवृत्तेर्वा। यदि भूयसो वाचिकायाः संख्याया इष्यते यवानां द्वौ भागौ निमानमस्येत्यत्र न प्राप्नोति? इत्यत आह--`भूयस इति च' इत्यादि।

एवमपि हि प्राप्नोति--द्वौ यवानामष्यर्द्ध उदश्वित इति, अस्ति ह्यत्र प्रत्यर्थात् प्रकृत्यर्थस्याधिक्यम्? इत्यत आह--`गुणशब्दः' इत्यादि। गुणशब्दो ह्ययं भागवचनोऽपि समतामपि तस्य भागस्य ब्रूते, न चाष्यर्द्धशपब्देन समभाग उच्यते।

`निमेये चापि दृश्यते' इति। केन पुनर्विहितो दृश्यते? अनेनैव। कथम्? द्वे अत्र वाक्ये; तत्रैकस्मिन् वाक्ये निमानशब्दः करणसाधनः--निमीयतेऽनेनेति निमानम्; द्वितीये तु कर्मसाधनो निमीयत इति निमानम्; `कृत्यल्युटो बहुलम्' (3.3.113) इति कर्मणि ल्युट्। यदा करणसाधनस्तदा गुणस्येति कर्मणि षष्टी, यदा तु कर्मसाधनस्तदा कर्त्तरि। गुणो हि निमानक्रियाकरणमिति कर्त्तृत्वेन विवक्ष्यते। भवति हि करणस्य कर्त्तृत्वेन विवक्षा, यथा--साध्यसिश्छिनत्तीति। तत्रैकेन वाक्येन निमाने पर्त्तमानायाः संख्याया निमेयेऽभिधेये प्रत्ययो विधीयते। अपरेण निमेये वर्त्तमानाया निमानेऽभिधेयेऽपि प्रत्ययोऽभिधीयते। वाक्यभेदस्य च संख्याग्रहणं निबन्धनम्--`संख्याया अवयवे तयप्' (5.2.42) इत्यतः। एवञ्च संख्याग्रहणमनुवर्त्तते। इदमिह द्वितीयम्। तत्र यद्यत्रैकं वाक्यं स्याद्द्वितीयं संख्याग्रहणमनर्थकं स्यात्, सौत्रानुमिताभ्यां तु द्वे वाक्ये क्रियमाणे तदर्थवद्भवति। तस्माद्द्वे अत्र वाक्ये।

`द्वौ व्रीहियवौ' इत्यादि। अत्र नोदश्विद्भागस्य द्वौ व्रीहियवौ निमानत्वेन विवक्षितौ, किं तर्हि? उदश्वितः। एवं `द्वौगुणौ' इत्यादि। अत्र प्रथमासमर्थो गुणस्य निमानेन वर्त्तते। न हि क्षीरस्य भागद्वयेन तैलस्य भागो निमीयते। मयटष्टित्करणं ङीबर्थम्--द्वौ गुडस्यैको द्राक्षाया द्विमयी द्राक्षेति।।

48. तस्य पूरणे डट्। (5.2.48)

इह द्वे संख्याग्रहणे अनुवर्त्तते, तत्र चैकेन `संख्यावाचिनः प्रातिपदिकात्' इति ब्रुवता प्रकृतिर्विशेषिता। द्वितीयेन तु प्रत्ययार्थ विशेषयितुमाह--`येन' इत्यादि। संख्यानशब्दं समुच्चारयन् संख्नावचनः संख्यानशब्देन प्रत्ययार्थो विशेष्यते इति दर्शयति। द्विविधो हि संख्याशबदः--संख्यानवचनः, संख्येयवचनश्च। तत्र यदि संख्येयवचनेन प्रत्ययार्थो विशेष्यते, तदायमर्थः स्यात्--संख्येयं मुष्ट्यादिकं येन पूर्यते द्रव्यान्तरेणातिरिक्तं क्रियते स च पूरण इति, ततश्च पञ्चानां मुष्टिकाणां घट इत्यत्रापि स्यात्। तस्मात्संख्यावचनेनैव प्रत्ययार्थो विशेषयित्तुं युक्तः। `सम्पद्यते' इति। पूर्य्यत इत्यस्यार्थमाचष्टे। एतेनैतद्दर्शयति--संख्यावचनेन प्रत्ययार्थो विशेष्यते। न मुष्टिकाणामिव द्रव्याणां द्रव्यान्तरेणातिरिक्तकरणं संख्यायाः पूरणम्, किं तर्हि? सम्पत्तिरेवेति। `इह न भवति' इत्यादि। न हि घट उपजाते पञ्चत्वसंख्या मुष्टिकाणा सम्पदयते। किं तर्हि? तत्र पञ्चसंख्यकानामेव द्रव्यान्तरेणातिरिक्तता।।

49. नान्तादसंख्यादेर्मट्। (5.2.49)

`डटो मडागमो भवति' इति। अथ प्रत्यय एव नान्तात् मट् कस्मान्न भवति? नर्हति प्रत्ययो भवितुम्। प्रत्यये हि तस्मिन् सति डटोऽनुवृत्तिरपार्थिका स्यात्, स हि पूर्वमेव विहितः, न च विहितस्यानुवृत्तिर्विधानार्थोपपद्यत इति। आगमार्थे च सा विज्ञायते। ननु च पञ्चम इत्यादौ न कश्चिद्विशेषः--मट आगमत्वे, प्रत्ययत्वे वा; तदेव हि रूपम्, स एव हि स्वरः, किञ्चानुवृत्तेन, मट एव प्रत्ययत्वमस्तु? सत्यम्, इह नास्ति विशेषः; विंशतितम इत्यादौ तु विद्यते। तथा हि `विशत्यादिभ्यस्तमडन्यतरस्याम्' (5.2.56) इति मट्प्रत्ययः स्यात्। [`मयट्' मुद्रितपाठः] विंशतितमप्रभृतयः शब्दाः प्रत्ययस्वरेण मध्योदात्ताः स्युः। डटि तु प्रत्यये सति तस्याद्युदात्तत्वे कृते ततश्चागमानुदात्तत्वे चान्तोदात्ता भवन्ति। तस्मादुतरार्थेऽनुवर्त्तमानस्येहापि डट एव प्रत्ययत्वं विज्ञायते। कथं पुनर्डटो मडागमः शक्यो विधातुम्, यावता प्रथमानिर्दिष्टं प्रकृतं डड्ग्रहणम्, षष्ठीनिर्दिष्टेन चेहार्थः? इत्यादि--`नान्तात्' इत्यादि। यद्यपि प्रथमान्तं डड्ग्रहणं प्रकृतम्, तथापि डट आगमसम्बन्धेन `तस्मादित्युत्तरस्य' (1.1.67) इति नान्तादित्येषा पञ्चमी डडिति प्रथमायाः षष्ठीं प्रकलपयतत्यदोषः। `पञ्चमः' इति। टिलोपोऽत्र न भवति; मटि कृते सत्यभसंज्ञकत्वात्। ननु च परत्वाट्टिलोपेनैव तावद्भवितव्यम्? नैतदस्ति; अन्तरङ्गो ह्यागमः, स हि प्रत्ययसन्नियोगेनोच्यते। टिलोपस्तूत्पन्ने प्रत्यये भसंज्ञाया सत्यां प्रकृतिप्रत्ययावाश्रित्य भवतीति बहिरङ्गो भवति।

`एकादशानां पूरणा एकादशः' इति। कथं पुनरस्मात्प्राप्तिः, यावता संख्याग्रहणमनुवर्त्तते, संख्यासम्दायोऽपि हि संख्याग्रहणेन गृह्यते--संख्यायतेऽनयेति कृतवा। अवश्यं चैतदेवं विज्ञेयम्; अन्यथाऽदशतया न स्यात्।।

50. थट् च च्छन्दसि। (5.2.50)

51. षट्कतिकतिपयचतुरां थुक्। (5.2.51)

`तदिह सप्तम्या' इत्यादि। पूरणाधिकारे ह्ययं विधीयमानो डट्सन्नियोगन विधीयते। तत्र यद्यपि सप्तमौ नास्ति, तथापि डटि परतो विज्ञायते।

तेनार्थाद्विभक्तिविपरिणामो भवतीति डडिति यद्वत्तेत तदिह सप्तम्या विपरिणम्यते। `कतिपयशब्दो न संख्या' इति। लौकिकत्वाभावात् संख्या न भवति; लोकेऽस्य संख्यात्वेनाप्रसिद्धत्वात्। शास्त्रीयोऽपि न भवति; शास्त्रे संख्यासंज्ञाऽविधानात्। यदि न संख्या, कंथमस्य डट्, यत्र परतस्थुग्विधीयते? इत्याह--`तस्य' इत्यादि। यदेतड्डटि परतः कतिपयशब्दस्य थुग्विधानं तत एव ज्ञापकाड्डट्प्रत्ययोऽस्य भवतीत्यवसीयते। `षष्ठः' इति। ष्ट्त्वम्। टिलोपोऽत्र न भवति। थुग्विधानसामर्थ्यात्। आगमस्य पूर्वान्तकरणं भसंज्ञार्थम्। यदि परादिः क्रियते ततो भसंज्ञा न स्यात्, तथा चासत्याम्, `स्वादिष्वसर्वनामस्थाने' (1.4.17) इति पदसंज्ञा स्यात्। ततश्च षष्ठ इत्यत्र जश्त्वं प्रसज्येत। `चतुर्थः' इति। अत्र रेफस्य `विसर्जनीयस्य सः' (8.3.34) इति सत्वम्। पूर्वान्ते तु संज्ञायां सत्यां न भवति।।

52. बहुपूगगणसङ्खसय तिथुक्। (5.2.52)

`पूगसङ्घयोरसंख्यात्वात्' इति। अत्र कथं प्रत्यय इति, पूगसङ्घशब्दौ हि न लौकिकी संख्या, नापि शास्त्रीया, तत्कथं ताभ्यां डट्प्रत्ययः, यत्र परतस्तयोस्तिथुग्विधीयते, डटि च विधानम्? अथात्रोत्तरमाह--`इदमेव' इत्यादि। यदेतड्डटि परतस्तयोस्तिथुको विधानमेतदेव ज्ञापयति--भवति ताभ्यां डट्प्रत्यय इति। न ह्यसतस्तिथुगागमं प्रति निमित्तभाव उपपद्यते।।

53. वतोरथुक्। (5.2.53)

`यावतिथः' इति। `यत्तदेतेभ्यः परिमाणे वतुप्' (5.2.39), `आ सर्वनाम्नः' (6.3.91)।।

54. द्वेस्तीयः। (5.2.54)

`द्विशब्दात् तीयप्रत्ययो भवति' इति। अथ द्विशब्दादुत्तरस्य डटस्तीयादेशः कस्मादेव न भवति? ज्ञापकत्वात्। यदयम् `कर्मणि द्वितीया' (2.3.2) इति टापा निर्देशं करोति, तज्ज्ञापयति--नायमादेश इति। यद्येवमनेनैव सिद्धत्वात् प्रत्ययविधानमनर्थकम्? न; स्वरार्थत्वात्। निपातनाद्धि प्रातिपदिकस्वरेणान्तोदात्तः स्यात्। तीयप्रत्यये तु प्रत्ययस्वरेण मध्योदात्तो भवति। किञ्च, यदि प्रत्ययो न विधीयते `बाधकान्यपि निपातनानि भवन्ति' (नी.प.बृ. 109) इति डडपि स्यात्। यदि पुनरयं डडादेशः स्यात्, तर्हि किं स्यात्? डट्स्वरेण तीयशब्दोऽन्तोदात्तः स्यात्, स्त्रियां च टित्त्वान्ङीप्, ततश्च द्वितीयेति निर्देशो नोपपद्यते।।

55. त्रेः सम्प्रसारणञ्च। (5.2.55)

`अण इति तत्र वर्त्तते' इति। `ढ्रूलोपे पूर्वस्य दीर्घोऽणः' (6.3.111) इत्यतः। ननु च परेण णकारेणाण्ग्रहण ऋकारोऽप्यण् भविष्यति? इत्यत आह--`पूर्वेण च' इत्यादि।

अत्र `त्रेस्तु च' इत्येवं कस्मान्नोक्तम्? अशक्यमेवं वक्तुम्, एवं ह्युच्यमाने सन्देहः स्यात् - किमयमादेशः, उत्त प्रत्यय? इति।।

56. विंशत्यादिभ्यस्तमडन्यतरस्याम्। (5.2.56)

`विंशत्यादिभ्यः परस्य' इत्यादि। ननु च तीयप्रत्ययेन डड् व्यवहितः, तत्कथं तमडागमः शक्यो विज्ञातुम्? अत आह--`पूरणाधिकारात्' इति। पूरणार्थे यो विहितसतस्य विंशत्यादिभ्यः परस्य तमड्विधीयते, स नान्यो डटः सम्भवतीति डडेव विज्ञायते।

`विंशात्यादयो लौकिकाः संख्याशब्दा गुह्यन्ते' इति। व्याप्तेर्न्यायात्। ते पुनर्विंशत्येकविंशतिप्रभृतयः संगृहीता भवन्ति। किं पुनः स्याद्यदि पङ्क्त्यादिसूत्रे (5.1.59) तेषामसन्निविष्टत्वात्।

57. नित्यं शतादिमासार्धमाससंवत्सराच्च। (5.2.57)

`शतादिग्रणम्' इत्यादि। संख्यादिभ्यः शतादिभ्यो यथा स्यादित्येवमर्थं शतादिग्रहणम्। अथ नित्यग्रहणं किमर्थम्, यावताऽऽरम्भसामर्थ्यादेव नित्यो विधिर्भविष्यति? भवेच्छतादिभ्य आरम्भसामर्थ्यादित्येवम्। मासादिभ्यस्त्वन्यतरस्यांग्रहणातुवृत्तेर्विभाषा स्यात्। ननु चास्वरितत्वादेव निवर्त्तिष्यतेऽन्यतरस्यांग्रहणम्? विस्पष्टार्थ तर्हि नित्यग्रहणम्।।

58. षष्ट्यादेश्चासंख्यादेः। (5.2.58)

प्राक्शतात् षष्ट्यादायो विज्ञेयाः। शतादीनां स्वशब्देन तमटो विधानात्।।

59. मतौ छः सूक्तसाम्नोः। (5.2.59)

`मतौ' इति मत्वर्थ उच्यते; साहचर्यात्। `मत्वर्थेन' इत्यादि। समर्थविभक्तिः प्रथमा, प्रकृतिविशेषणम्--अस्तित्वम्, प्रत्ययार्थः--अस्यास्मिन्निति च, सर्वमेतन्मत्वर्थग्रहणेन `आक्षिप्यते' इति। सन्निधाप्यते, उपस्थाप्यत इत्यर्थः। युक्तं यन्मतुब्ग्रहणे प्रत्ययार्थ आक्षिप्यते; तस्य तद्विषयत्वात्। समर्थविभक्त्यादि

कथमाक्षिप्यते? अर्थसाहचर्यात्।।

अथ वा प्रधानानुवृत्तित्वाद्द्गुणानाम्, प्राधान्येन प्रत्ययार्थ उपस्थापिते प्रत्ययसामर्थ्यात् तदपि गुणभूतमुपस्थाप्यत एव।

इहास्यवामादिशब्दोऽनेकपदान्तत्वाद्वाक्यम्। वाक्यस्य चार्थवत्समुदायानां समासग्रहणं नियमार्थमिति प्रातिपदिकसंज्ञा नास्ति, अतस्तेभ्यो न प्राप्नोति; अप्रातिपदिकत्वादिति यश्चोदयेत्, तं प्रत्याह-`अनुकरणशब्दाश्च' इत्यादि। अनुकरणग्रहणेन च वाक्यत्वमस्यवामप्रभृतीनां निरस्यति। न ह्यनुकरणशब्दानामवयवभूतानि पदानि सन्ति, तत्कुतस्तेषां वाक्यत्वम्? यतः प्रातिपदिकसंज्ञा न स्यात्। `स्वरूपमात्रप्रधानाः' इत्यनेनार्थवत्त्वं तेषां दर्शयति। अनर्थकत्वे ह्यर्थवतः प्रातिपदिकसंज्ञाविधानात् प्रातिपदिकत्वं न स्यात्। तथा च स एव प्रत्ययाभावः प्रसज्येत। मात्रशब्दोऽर्थान्तरव्यवच्छेदाय। स्वरूपमात्रं प्रधानमभिधेयं येषां ते तथोक्ताः। चशब्दो यस्मादर्थे। यस्मादनुकरणशब्दाः स्वरूपमात्रप्रधानाः प्रत्ययमुत्पादयन्ति, तेनानेकदादपि प्रत्ययाख्यं कार्यं सिद्धम्; तस्य प्रातिपदिकत्वात्। अप्रातिपदकत्वञ्च वाक्यत्वादनर्थकत्वाद्वा भवेत्। न चास्यवामप्रभृतीनां वाक्यत्वम्; अनुकरणशब्दत्वात्। नाप्यनर्थकत्वम्; स्वरूपमात्रेणार्थवत्त्वात्। यदि ह्यस्यवामेत्यादावनुकरणशब्देनानेकानि पदान्यस्यावयवभूतानि सन्ति तत्कथं तेनानेकपदादपि सिद्धमित्युक्तम्? परप्रसिद्ध्या पदस्य। अस्यवामादयोऽप्येवम्। एषामनेकावयवाः प्रसिद्धाः; तस्मात् तत्प्रसिद्ध्यैवमुक्तम्; न तु विद्यमानानेकपदत्वात्।

अथ कथमनुकरणशब्दाः स्वरूपमात्रप्रदाना भवन्ति, यावतानुकार्यमेव तेषामभिधेयम्, अतस्तदेव प्रधानस्वरूपम्? नैतदस्ति; इह हि प्रथमासमर्थादस्तिना समानाधिकरणात् प्रत्ययो विधीयते। अनुकरणशब्दाश्चानुक्रियमाणेनार्थेनार्थवन्तोऽपि प्रत्यवमृष्टा इतिकरणेन शब्दशब्देन वा प्रथमासमर्थास्तिसमानाधिकरणा भवन्ति। अर्थे हि गुणीभूतानां प्रथमासमर्थत्वमस्त्युपाधिकत्वञ्च नोपपद्यते। तथा ह्यस्यवामोऽस्मिन्नस्तीत्युक्तेऽनुकरणप्रत्यायितस्यानुकार्यस्यैव शत्दस्य प्रथमासमर्थत्वमस्त्युपाधिकत्वञ्च गम्यते, न त्वनुकरणशब्दस्य। तस्मादितिकरणेन शब्दशब्देन वाऽवश्यम्भावो प्रत्यवमर्शः। अस्यवाम इत्यस्मिन्नस्त्यवामशब्दो वास्मिन्नस्तीति भेदानुक्रियमाणपदार्थता निवर्त्तते, स्वरूपपदार्थतैवानुजायते। नन्वेवं सति मत्वर्थो नोपपद्यते, अनुकार्या ह्याम्नायशब्दाः सूक्तसाम्नोः सन्ति, न तु तदनुकरणशब्दा लौकिकादयः? नैष देषः; वाक्य स्वातन्त्र्यहेतोरितिकरणादेः सन्निधौ तेन प्रत्यवमृश्यमाना अनुकरणशब्दाः स्वरूपेणार्थवन्तो भवन्ति, वृत्तौ त्वनुकार्येणैव; तत्र स्वातन्त्र्यहेतोरितिकरणादेरभावात्। वृत्तावेव सूक्तसामनी समत्वर्थवत्तया वक्तुमिष्टे, न वाक्य इति किमत्र नोपपद्यते! अस्यवामशब्दोऽस्मिन्नस्त्यस्यवामीयम्। कयाषुभाशब्दोऽस्मिन्नस्ति `कयाषुभीयम्'। योगश्चायं मत्वर्थीयानामपवादः।।

60. अध्यायानुवाकयोर्लुक्। (5.2.60)

अनन्तरसूत्रे सूक्तसाम्नोरेव च्छस्य विहितत्वात् प्रकरणान्तरे च क्वचिदध्यायानुवाकयोश्छस्याविधानात् पृच्छति--`केन पुनः' इत्यादि। न ह्यसतस्तस्य लुगुपपद्यते, आह एवायं लुकम्। अत एतदेव लुग्वचनं ज्ञापयति--अध्यायानुवाकयोश्छस्य विधानमस्तीति। `विकल्पेन च' इत्यादि। चशब्दोऽवधारणे, विकल्पेनैवेत्यर्थः। कथं पुनर्विकल्पेन लभ्यते? `विंशत्यादिभ्यस्तमडन्यतरस्याम्' (5.2.56) इत्यन्यरस्यांग्रहणानुवृत्तेः। यद्येवम्, पूर्वत्रापि विकल्पेन विधिः प्राप्नोति? भण्ड्कप्लुतिन्यायेनानुवृत्तिर्भविष्यतीत्यदोषः।।

61. विमुक्तादिभ्योऽण्। (5.2.61)

पूर्वेण च्छे तस्य च पक्षे लुकि प्राप्ते विमुक्तादिभ्योऽण्विधीयते।।

62. गोषदादिभ्यो वुन्। (5.2.62)

`अध्यायानुवाकयोर्लुक्' (5.2.60) इति च्छस्य च लुकि प्राप्ते गोषदादिभ्यो वुनारभ्यते।।

63. तत्र कुशलः पथः। (5.2.63)

`कृतलब्धक्रीतकुशलाः' (4.3.38) इत्यणि प्राप्ते वुन् विधीयते।।

64. आकर्षादिभ्यः कन्। (5.2.64)

आकर्षादिषु यद्वृद्धं ततश्छे प्राप्ते शेषेभ्यस्त्वणि कन्विधीयते। प्रत्ययान्तरकरणम्--यदत्रोकारान्तं तस्यात्र गुणो मा भूत्, यच्चेकारान्तं तस्य `यस्येति' (6.4.148) लोपो मा भूदित्येवमर्थम्। वुनि तु सति तदुभयं प्रसज्येत। तत पुनरिहाशिष्टं प्रसज्येत। तस्य पुनर्वनि कनि वा सति न कश्चिद्विशेष इति न तत्प्रत्ययान्तरं प्रयोजयति।।

65. धनहिरण्यात्कामे। (5.2.65)

`धने कामः' इति। धनविषय इच्छेत्यर्थः।।

66. स्वाङ्गेभ्यः प्रसिते। (5.2.66)

`प्रसिते' इति। यद्यपि सिनोतिरयं `षिञ् बन्धने' (धा. पा. 1477) इति बन्धने पठ्यते, तथाप्यनेकार्थत्वादिहासक्तौ वर्त्तते। `केशेषु प्रसितः' इति।

`प्रसितोत्सुकाभ्यां तृतीया च' (2.3.44) इति सप्तमी। आसक्तिश्च क्रियाविषयो धर्म इति केशादिस्थानबला क्रिया केशादिशब्देनोच्यते। अत एवाह--`केशादिरचनायां प्रसक्त एवमुच्यते' इति।
`बहुवचनं स्वाङ्गसमुदायादपि यथा स्यात्' इति। असति हि तस्मिन्, यथा जनपदसमुदायो जनपदग्रहणेन न गृह्यते, तथा स्वाङ्गसमुदायोऽपि स्वाङ्ग्रहणेन नेति स्वाङ्गसमुदायान्न स्यात्, तस्मिंस्तु सति भवति; अन्यथा तस्य प्रयोजनाभावात्। स्वरूपविधिनिरासस्तस्य प्रयोजनमिति चेत्? न; `अद्रवम्' (काशिका 4.1.54) इत्यादिना स्वाङ्गस्य परिभाषितत्वेन स्वरूपविधेरसम्भवात्।।

67. उदराट्ठगाद्यूने। (5.2.67)
पूर्वेण कनि प्राप्ते ठग्विधीयते। `आद्यूनोऽविजिगीषुः' इति। `विवोऽविजिगीषायाम्' (8.2.49) इत्यविजिगीषायामेव विवो निष्ठातकारस्य नत्वविधानात्। `उदरकः' पूर्वेण कनेन भवति।।

68. सस्येन परिजातः। (5.2.68)
`सस्येन इति सहयोगलक्षणे तृतीया, इत्थम्भूतलक्षणे वा। `सस्यशब्दोऽयं गुणवाची' इति। सस्यशब्दो ह्ययं धान्यवचनोऽप्यस्ति, यथा--शालिः सस्यम्, यवाः सस्यमिति; तस्य ग्रहणं मा विज्ञायीत्येवमर्थमिदमुक्तम्--`इदमभिधानम्' इति। सस्यक इत्येतत् कन्प्रत्यान्तम्।।

69. अशं हारी। (5.2.69)
`कर्मणि द्वितीयैव भवति' इति। कर्मणि द्वितीयायां प्राप्तायां कृद्योगलक्षणा तदपवादा षष्ठ्यारभ्यते। तस्याश्चावश्यके णिनिप्रत्यये `अकेनोर्भविष्यदाधमर्ण्ययोः' (2.3.70) इति प्रतिषेधः। तेन निरपवादाद्द्वितीयैव भवति।।

70. तन्त्रादचिरापहृते। (5.2.70)
`अचिरापहृतम्' इति। अचिरशब्दोऽल्पकालवचनः, तस्यापहृतशब्देनापहृतो गतः कालोऽस्येति `कालाः परिमाणिना' (2.2.5) इति समासः। `पञ्चमीसमर्थात्' इति। निर्देशादेव। न हीह काचित् प्रकृता विभक्तिरनुवर्त्तते, पञ्चमीनिर्देशश्च श्रुयते, तस्मान्निर्देशादेव पञ्चमीसमर्थात् प्रत्ययो विज्ञायते। सा पुनः पञ्चम्यपहरतेरपायवचनत्वात् तद्योगेन तन्त्रमपादानमेव भवतीत्यपादानलक्षणा वेदितव्या।।

71. ब्राह्मणकोष्णिके संज्ञायाम्। (5.2.71)
किमर्थं पुनरिवम्, यावता संज्ञायां व्युत्पाद्यते, संज्ञायामेव तु ब्राह्मणकोष्णिके? न; विषयान्तरेऽपि। तमेव विषयं दर्शयितुमाह--`यत्र' इत्यादि। गतार्थम्।।

72. शीतोष्णाभ्यां कारिणि। (5.2.72)
`क्रियाविशेषणात्' इति। क्रियाविशेषणस्य हि कर्मत्वं प्रतिपादितम्। `कारिणि' इति। ताच्छील्ये णिनिः। तस्य च प्रयोगे षष्ठी प्रतिषिद्धा, तस्मात् कर्मणि द्वितीययैव भवितव्यम्। क्रियाविशेषणाच्छीतादिशब्दाद्द्वितीयासमर्थात्प्रत्ययो विज्ञायते। तेन नेह शोतोष्णशब्दो स्पर्शविषये वर्त्तमानौ प्रत्ययमुत्पादयतः। क्व तर्हि? मान्द्ये, शैघ्र्ये च; यस्मादावश्यके णिनिः। न स पदार्थोऽस्ति यः शीतोष्णस्पर्शौ नियोगतः करोति। तुषारातपावपि हि नावश्यं कुरुतः; प्रतिबन्धसम्भवात्। कर्त्तृशक्तिस्तु पदार्थानां नियतेति सा शक्तिः कर्त्तृत्वे कश्चिन्नियोगतो मन्दं करोति, कश्चित् शीघ्रमिति युज्यत एवावश्यकत्वम्।।

73. अधिकम्। (5.2.73)
`अध्यारूढशब्दस्योत्तरपदलोपः' इति। उत्तरपदमारूढशब्दस्तस्य लोपो निपात्यते। कथं पुनरधिको द्रोणः खार्यामित्यस्य प्रथमान्तस्य द्रोणशब्दस्य प्रयोगः, अधिका खारी द्रोणेनेति तृतीयान्तस्य च? इत्यत आह--`कर्त्तरि कर्मणि च' इत्यादि। `गत्यर्थकर्मकश्लिष' (3.4.72) इत्यादिना सूत्रेण रुहेः कर्त्तरि कर्मणि च क्तो विहितः, तेन कर्त्तरि कर्त्तरि कर्मणि चाध्यरूढशब्दो वर्त्तते, ततश्च तस्यार्थे व्युत्पाद्यमानोऽधिकशब्दोऽपि तत्पर्यायो भवंस्तयोरेवार्थयोर्भवति। तत्र यदा कर्त्तरि वर्त्तते तदा द्रोणशब्दात् प्रथमा भवति, न तृतीया। यदा कर्मणि वर्त्तते तदा कर्त्तुरनभिहितत्वादधिकशब्देन द्रोणशब्दात् तृतीया भवति। कर्मणस्त्वभिहितत्वात् खारीशब्दात् प्रथमैव भवति, न द्वितीया। `अधिका खारी द्रोणेन' इति। ननु चाधिको द्रोणः खार्यामस्यामित्यत्र कर्मणोऽनभिहितत्वात् खारीशब्दाद्द्वितीया प्राप्नोति? नैष दोषः; यदयम् `यस्मादधिकम् (2.3.9) `तदस्मिन्नधिकम्' (5.2.45) इति च निर्देशं करोति तज्ज्ञापयति--अधिकशब्देन योगे पञ्चमीसप्तम्यावेव विभक्ती भवत इति।।

74. अनुकाभिकाभीकः कमिता। (5.2.74)
`अनुकः' इति। अनुशब्दात् कन्। `अभिकोऽभीकः' इति। अत्राप्यभिशब्दात्।।

75. पार्श्वेनान्विच्छति। (5.2.75)
निर्देशादेव तृतीयासमर्थविभक्तिर्लभ्यत इत्याह---`पार्श्वशब्दात् तृतीयासमर्थात्' इति।।

76. अयःशूलदण्डाजिनाभ्यां ठक्ठञौ। (5.2.76)
`अयःशूलदण्डाजिनाभ्याम्' इति। तृतीयान्तनिर्देशादेवार्थात् तृतीया समर्थविभक्तिलंभ्यत इत्याह--`तृतीयासमर्थातभ्याम् इति।।

77. तावतिथं ग्रहणमिति लुग्वा। (5.2.77)
पूरणप्रतययान्तानां सामान्यनिर्देशोऽयम्। अथ स्वरूपग्रहणं कस्मान्न भवति? अर्थप्रधानत्वान्निर्देशस्य। शब्दप्रधाने हि निर्देशे स्वरूपग्रहणं भवतीत्युक्तम्। कथं प्रत्ययः स्वार्थे भवतीति? अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति (पु. प. पा. 90) कृत्वा। `द्विकं, त्रिकम्' इति। तीयस्य लुक्। `चतुष्कम्' इति। पूरणप्रत्ययस्य डटः सथुकश्च लुक्, चतूरेफस्य `विसर्जनीयस्य सः (8.3.34), तस्य `इदुपधस्य चाप्रत्ययस्य' (8.3.41), इति षत्वम्। `तावतिथेन' इत्यादि। पूरणप्रत्यान्तात् प्रातिपदिकात् तृतीयासमर्थाद्गृह्णातीत्येतस्मिन्नर्थे कन्प्रत्ययो भवतीति वक्तव्यम्। पूरणप्रत्ययस्य च नित्यं लुक्। `षट्कः' इति। षकारस्य जश्तवं डकारः, तस्यापि चर्त्व टकारः। अत्र च डटः सथुको लुक्। `पञ्चकः' इति। अत्रापि डटः। अथेह कस्मान्न भवतीति-- द्वितीयेन हस्तेन दण्डं गृह्णाति? इत्याह--`इतिकरणो विवक्षार्थः' इत्यादि। सुबोषम्।।

78. स एषां ग्रामणीः। (5.2.78)

79. शृङ्खलमस्य बन्धनं करभे। (5.2.79)
ननु च न शृङ्खलमात्रेण करभो बध्यते, किं तर्हि? रज्जवादिकेन च, तत्कथं शृङ्खलं बन्धनमुच्यते? इत्याह--`यद्यपि' इत्यादि। यद्यपि तत्र रज्ज्वादिकमप्यपरमस्ति, तथापि शृङ्खलमस्य तन्त्रीकरणं प्रति साधनं भवत्येव, न हि तेन तद्भवति। ततः शृङ्खलं बन्धनमुच्यते। रज्ज्वादिकमपि यदि बन्धनं भवति, भवतु! न ह्यत्रावधार्यते--शृङ्खलमेवेति।।

80. उत्क उन्मन्गः। (5.2.80)
`ससाधनक्रियावचनात्' इति। साधनम्=मनः; क्रिया=गमनम्; सह तेन गमनक्रिया। तद्वचनात् ससाधने गमने वर्त्तमानादित्यर्थः। `तद्वति' इति। तच्छब्देन क्रिया प्रत्यवमृश्यते। ससाधनक्रियावतीत्यर्थः। `उत्सुकः' इति। उत्कष्टित इत्यर्थः।।

81. कालप्रयोजनाद्रोगे। (5.2.81)
`अर्थलभ्या' इत्यादि। अर्थोऽधिकरणादिः। तेनात्र सप्तमीप्रभृतिरनुक्तापि समर्थविभक्तिर्लभ्यते। `प्रयोजनं कारणशब्देनोव्यते कालग्रहणं पृथङ्न कर्तव्यम्, कालोऽपि रोगस्य कारणं भवति? नैतदस्ति; न ह्यवश्यं कालो रोगस्य कारणं भवति। तत्र यदा ह्यसौ रोगस्य कारणं न भवति, तथापि ततो यथा स्यादित्येवमर्थं कालग्रहणम्। `द्वितोयेऽह्नि भवो द्वितीयकः' इति। तत्र कारणान्तराद्वातादेः कुतश्चिद्भवतो ज्वरस्य कालः केवलमधिकरणभावेन विवक्षितः, न तु हेतुभावेन। कथं पुनः कालादन्यतः प्रत्ययो द्वितीयादिभ्यः शब्देभ्यो भवति, न ह्येते कालशब्दाः प्रसिद्धाः, सामान्यशब्दा ह्येते, शब्दान्तरसन्निधानात् तु काले वृत्तिरेषां गम्यते? नैष दोषः; वाक्ये ह्येषां शब्दान्तरसन्निधौ कलि वृत्तिः, वृत्तिगतश्च प्रकृत्यर्थः प्रत्ययानां विशेषणम्; सन्निहितत्वात्। न वाक्यगतः; विप्रकर्षात्। `विषपुष्पैर्जनितः' इति। तृतीया। `उष्णं कार्यमस्य' इति। अत्र कार्यकारणसम्बन्धो विवक्षितः। स चेदंशब्दादेवोत्पन्नया षष्ट्याभिहित इत्युष्णशब्दात् प्रथमैव भवति। इह कालप्रयोजनविशेषवाचिभ्यः प्रत्ययोऽभिहितः, न कालप्रयोजनशब्दाभ्याम्; कालविशेषवाचिभ्यो भवन् क्रियायाः कर्तरि ज्वरे प्रयोजनविशेषवाचिभ्यः प्रयोजनमिति; कार्यकारणविवक्षायाञ्च कार्यसम्बन्धिनि। न चायं प्रकारनियमः सूत्रे उक्तः, तत्कथं लभ्यते? इत्यत आह-- `उत्तरसूत्रादिह संज्ञाग्रहणमपकृष्यते' इति। तेन तस्मिन् सत्ययमर्थो भवति--प्रत्ययान्तश्चेत् संज्ञा भवति, तस्मिंश्चार्थे सति प्रत्ययान्तं यदि संज्ञा भवत्येवं प्रत्य उत्पद्यते, नान्यथेति। संज्ञाग्रहणसन्निधानादिह सर्वप्रकारोऽयं नियमो लभ्यते। न हि विना तेन प्रकारेम प्रत्ययान्तं संज्ञा भवति। ननु चोत्तरसूत्रे संज्ञाग्रहणं तस्यैव शेषभूतम्, तत्कथं ततोऽपक्रष्ट शक्यते? नैष दोषः; उभयोरपि योगयोस्तच्छेषभूतम्। कथम्? योगविभागः करिष्यते-- `तदस्मिन्नन्नं प्राये' ततः `संज्ञायाम्' इति; तेन संज्ञाग्रहणमुभयेषां शेषो विज्ञास्यते।।

82. तदस्मिन्नन्नं प्राये संज्ञायाम्। (5.2.82)
`अन्नं चेत्प्रायविषयम्' इति। प्रायो विषयो यस्य तत्तथोक्तम्। विषयग्रहणे `प्राये' इति सप्तम्या विषयसप्तमीत्वं दर्शयि। `प्रत्ययो भवति' इति। अन्यथा

गुडापूपाः प्रायेणान्नमिति ववक्षायाः कारकाणि भवन्तीतिप्रायस्य विषयभूतस्य करणत्वेन विवक्षितत्वात् तृतीया। `गुडापूपिका' इति `प्रत्ययस्थात् कात् पूर्वस्यातः' (7.3.44) इतीत्त्वम्।
`वटकेभ्य इनिर्वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--इह संज्ञाग्रहणस्य प्रत्ययान्तोपाधिकत्वाद्यत्र प्रत्ययान्तं संज्ञा भवति तत्र प्रत्ययेन भवितव्यम्। न च वटकशब्दः कन्प्रत्ययान्तः कस्यचित् संज्ञा, तेन ततः कन् न भविंष्यति तर्स्मिश्चासति मत्वर्थीय इनिर्भविष्यतीति। `वटकिनो' इति। `ऋन्नेभ्यो ङीप्' (4.1.5)।।

83. कुल्माषादञ्। (5.2.83)
संज्ञाग्रहणेन पूर्वेण कनः प्राप्तावसत्यां वाक्येनाभिधाने प्राप्ते मत्वर्थीये मतुबादाविदमुच्यते। `व्कौल्माणी' इति। `टिड्ढाणञ्' (4.1.15) इति ङीप्।।

84. श्रोत्रियँश्छन्दोऽधीते। (5.2.84)
`नकारः स्वरार्थः' इति। ननु च नकार इद् यस्य तर्स्मिन्निति परतः स्वर उच्यते, न च समुदायानुबन्धे नकारे नित्परत्वमस्ति? नैष दोषः; न एवेत् नित्, तत्पुरुषोऽयम्। तेन नकार इत्संज्ञे परतः पूर्वस्य स्वरो भविष्यति। किं पुनरत्र निपात्यते? इत्याह--`छन्दोऽधीते' इति। अस्य वाक्यस्यार्थे श्रोत्रिंयन्निति निपात्यते। `छन्दसो वा' इत्यादि। पूर्वत्र वाक्यार्थे पदमविद्यमानप्रकृतिप्रत्ययविभागं निपातितम्; इदानीं तु प्रकृतिप्रत्ययौ निपात्येते तदवीत इत्यस्मिन्नर्थे। अत्र यद्यपि निदित बहुव्रीहिः, तथापि स्वरः सिध्यत्येव; घन्प्रत्ययस्य नितः परस्य विद्यमानत्वात्।
`कथम्' इत्यादि। यदि च्छब्दःशब्दस्य श्रोत्रशब्द आदेशो घंश्च प्रत्ययः `तदधीते' इत्यस्मिन्नर्थे निपात्यते, निपातनेन बाधितत्वादत्रार्थे च्छान्दस इति न सिष्यतीत्यभिप्रायः।।

85. श्राद्धमनेन भुक्तमिनिठनौ। (5.2.85)
`श्राद्धशब्द' इत्यादि। शास्त्रोक्तेन विधिना निष्पाद्यस्य कस्यचिवेव क्रियाविशेषस्य श्राद्धशब्दः संज्ञा। कर्मशब्दोऽयं क्रियावाची। श्रद्धा यत्र कर्मष्यस्ति तच्छ्राद्धम्, `प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (5.2.101) इति णप्रत्ययः। `तत्साधने' इत्यादि। भूक्तत्वं कर्मणो विशेषणं न सम्भवतीति तत्साधने भवतादौ वर्तित्वा श्राद्धं प्रतययमुत्यादयतीति विज्ञायते। तत्साधाने तु तस्य वृत्तिः, तादर्थ्यात्; यथा--प्रदीपार्थायां मल्लिकायां प्रदीयपशब्दस्य। `समानकालग्रहणम्' इति। समानः कालो गृह्यते येन तत्समानकालग्रहणम्। व्याख्यानं कर्त्तव्यमित्यर्थः। किमर्थम्? इत्याह--`अद्य भुक्ते' इत्यादि। यस्मिन्नहनि श्राद्धमनेन भुक्तं तस्मिन्नेव श्राद्धिक इति स्यात्ष अद्य भक्ते श्वो मा भूदित्येवमर्थम्। तत्रेदं व्याख्यानम्--इहापि वेत्यनुवर्त्तते, सा च व्यवस्थितविभाषा, तेन यस्मिन्नेवाहनि श्राद्धं भुक्तं तस्मिन्नेवेष्यते; नान्यत्रेति।।

86. पूर्वादिनिः। (5.2.86)
`पूर्व गतं पीतं भूक्तम्' इति। पूर्वशब्दोऽत्र क्रियाविशेषणत्वात् कर्म भवतीति द्वितीयासमर्थात् प्रत्ययो विज्ञायते। `पूर्वो' इति। `सौ च' (6.4.13) इति दीर्घः।।

87. सपूर्वाच्च। (5.2.87)
सहशब्दो विद्यमानवचनः। अत एवाह--`विद्यमानं पूर्वम्' इति। `वोपसर्जनस्य' (6.3.72) इति सहस्य सभावः। `कृतपूर्वो कटमिति' ननु च निष्ठ्या कर्मणोऽभिहितत्वाद्द्वितीयाऽतर न प्रापनोति? नैष दोषः; नेयं कर्मणि निष्ठा, किं तर्हि? भावे। यदापि कर्मणि तदापि न दोषः; निष्ठया हि सामान्यं कर्माभिहितम्, न विशेषकर्म। तस्माद्विशेषकर्मणोऽनभिहितत्वाद्द्वितीया भविष्यति। ननु च पूर्वं कृतमित्यनेकपदावयवत्वाच्च वाक्यमिदम्। वाक्यस्य चार्थवत्समुदायानां समासग्रहणं नियमार्थमिति प्रातिपदिकसंज्ञा नास्ति। तत्कथमतः प्रत्ययः? इत्याह--`सुप्सुपा' इत्यादि।
`योगद्वयेन च' इत्यादि। यदि `व्यपदेशिवद्भावोऽप्रातिपदिकेन' (शाक. प. 65) इत्येषा परिभाषा न स्यात् तदा `सपूर्वात्पूर्वादिनिः' इत्येकयोगं कुर्यात् किं योगविभागेन! एकयोगे हि सति केवलादपि व्यपदेशिवद्भावेन प्रत्ययो भविष्यति। तदेवमेकयोगेन सिद्धे यत् `पूर्वादिनिः' (5.2.86) इति पृथग्योगं करोति, तज्ज्ञापयति--अस्तीयं परिभाषा `व्यपदेशिवद्भावोऽप्रातिपदिकेन' (शाक. प. 65) इति। यदि वा `ग्रहणवता' (व्या. प. 89) इत्यादिका परिभाषा न स्यात् `सपूर्वाच्च' इतीमं योगं न कुर्यात्। `पूर्वादिनिः' (5.2.86) इत्यनेनैव हि कृतपूर्वीत्यादावपि भविष्यति तदन्तविधिना। तदेयं पूर्वयोगेणैव पूर्वशब्दादपि सिद्धे प्रत्यये यत् `सपूर्वाच्च' इतीमं योगं करोति तज्ज्ञापयति---अस्तीयं परिभाषा `ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न भवति' (व्या. प. 89) इति।।

88. इष्टादिभ्यश्च। (5.2.88)
`इष्टो यज्ञे' इति। कथं पुनरत्र सपतमी; यावता यज्ञस्य कर्मतायां द्वितीयया भवितव्यम्? इत्याह--`क्तस्येन्विषयस्य' इत्यादि।

89. छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि। (5.2.89)
किं पुनरत्रेवं निपात्यते? पर्यवस्थातृशब्दं व्यवस्थाप्य तदवयवस्यावस्थातृशब्दस्य पम्थ आदेश एकत्र क्रियते, अपरत्र तस्यैव परिशब्दः, पश्चादिनिप्रत्ययः।।

90. अनुपद्यन्वेष्टा। (5.2.90)
`अनुपदी' इति। पश्चात् पदस्यानुपदम्, पश्चादर्थेऽव्ययीभावः। तस्मादिनिप्रत्ययो निपात्यते।।

91. साक्षाद्द्रष्टरि संज्ञायाम्। (5.2.91)
`संज्ञाग्रहणम्' इत्यादि। विशिष्ट एवाभिधधेये प्रत्ययान्तस्य वृत्तिरभिधेयनियमः' (वा. 802) इति टिलोपः। `संज्ञग्रहणम्' इत्यादि। असति हि संज्ञाग्रहणे यथोग्रहणे यथोपद्रष्टा साक्षिशब्देनोच्यते, तथा दाता ग्रहीता चोच्येयाताम्, एतावपि हि द्रष्टारौ भवत एव। संज्ञाग्रहणादुपद्रष्टैवोच्यते। दातृग्रहीतृभ्यां योऽन्यो द्रष्टा समीपे स उपद्रष्टा। ननु च `स्वामीश्वराधिपतिदायादसाक्षि' (2.3.39) इति निपातनादेव साक्षिशब्दः साधुर्भाविष्यति, अभिधेयनियमोऽपि लौकिकत्वादस्य पदस्य लोकोक्त एव विज्ञास्यते, तदपार्थकमिदम्? नैतदस्ति; न हि तस्मिन् निपातने साक्षिशब्दस्य नकारान्तता शक्यते व्यवसातुम्, प्रमाणाभावात्। लोके न स्वाभिधेये प्रतीयमाने प्रतिपत्तिगौरवं स्यात्। तस्मान्नकारान्तताप्रतिपत्तिगौरवपरिहारार्थं चेदमुच्यते।।

92. क्षेत्रियच् परक्षेत्रे चिकित्स्यः। (5.2.92)
चिकित्स्य इति शक्यार्थे कृत्यः। `वाक्यार्थे' इत्यादि। `परक्षेत्रे चिकित्स्यः' इत्यस्य वाक्यस्यार्थे क्षेत्रिय इत्येतत् पदवचनमविद्यमानप्रकृतिप्रत्ययविभागं निपात्यते। चकारोऽन्तोदात्तार्थः। `परक्षेत्राद्वा' इत्यादि। वाशब्दः प्रकारान्तरं द्योतयति। अथ वा--परक्षेत्रशब्दात् तत्रेति सप्तमीसमर्थात् चिकिस्य इत्यत्रार्थे प्रत्ययो निपात्यते, परशब्दस्य च लोपः। `परक्षेत्रं जन्मान्तरशरीरम्' इति। इहत्याच्छरीरादन्यत्वादसाध्य इत्यनेन परशब्दस्यार्थं दर्शयति।
सस्यार्थं हि यत् क्षेत्रं संस्कृतं तदनुत्पाद्यत्वात् तृणानां परक्षेत्रं भवति।
`सर्वं चैतत् प्रमाणम्' इति। सर्वस्याचार्येण प्रतिपादितत्वतात्।।

93. इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा। (5.2.93)
`रूढिरेषा' इत्यनेनानावयवार्थं त्याजयति। कथं पुनर्जायते रूढिरेषा? इत्याह--`तथा च' इत्यादि। यद्येषा रूढिर्न स्यात्, व्युत्पत्तेरनियमो न स्यात्; अरूढिशब्देषु नियतत्वादेव तदर्थस्य। रूढिशब्दे त्वस्मिन् युज्यते व्युत्पत्तेरनियमः। रूढिशब्दानां हि यथाकथञ्चिद्व्युत्पत्तिः क्रियते परिकल्पितेनावयवार्थेन। कथं पुनरात्मा चक्षुरादिना करणेन शक्योऽनुमातुम्? इत्याह--`नाकर्त्तृकम्' इत्यादि। अनेनाविनाभावं दर्शयति। इतिकरणओ हेतौ। यस्मात् करणादीनां प्रवृत्तिर्निवृत्तिर्वा कर्त्रधीना, तस्माद्यत्र तानि तत्रावश्यं कर्त्रा भवितव्यम्। चक्षुरादिना करणेनाविना भावेनालिङ्गेनात्माऽनुमीयते। कथं पुनस्तदात्मना सेवितम्? इत्याह--`तद्द्वारेण' इत्यादि। द्वारेम हि विषयेष्वात्मनो ज्ञानमुत्पद्यते। तस्माद्विषयान् ज्ञातुमात्मा चक्षुरादीनद्रियं सेवते। `यथायथम् इति। यथास्वम्। यो यस्येन्द्रियस्य विषयस्तत् तस्मै दत्तम्।
`इतिकरणः प्रकारार्थः' इति। एवं प्रकारान्तरेणापि व्युत्पत्तिः कर्त्तव्येत्येतदितिकरणः प्रकारर्थं द्योतयति अत एवाह--`सत् सम्भवे' इत्यादि। इन्द्रेण विषया नीयन्ते सम्बध्यन्त इतीन्द्रियमित्येवमादिका सति सम्भवे तथा व्युत्पत्तिः कर्त्तव्या।
`वाशब्दः' इत्यादि। असति हि वाशब्दे `इन्द्रलिङ्गम्' इत्येवमादीनां विकल्पप्रकाराणा पारतन्त्र्यं विज्ञायेत। परस्परापेक्षाया समुच्चिताया एव व्युत्पत्तेः कारणमिति। वाशब्दस्तविन्द्रलिङ्गमितीन्द्रदृष्टमिति चेत्येवं सम्बध्यमानस्तेषां स्वातन्त्र्यं दर्शयति। तेनैकैकः प्रकारः प्रकारान्तरनिरपेक्षो व्युत्पत्तादङ्गभावमुपयाति।।

94. तदस्यास्त्यस्मिन्निति मतुप्। (5.2.94)
`प्रत्ययार्थो' इति। ननु च यद् यस्य भवति तत तस्मिन्नस्ति, यद्यस्मिन्नस्ति तत् तस्य भवति, यथा--वृक्षे शाखा, वृक्षस्य शाखेति; तत्रान्यतरनिर्देशेनैव सिद्धम्, तत्किमर्थं द्वौ निर्दिश्येते? नैतदस्ति; न हि षष्ठीसप्तम्यर्थयोरवश्यम्भावो समावेशः, तथा हि गावो गङ्गायां भवन्ति, न च ते तस्याः; तथा देशान्तरगतोऽपि पुत्रो देवदत्तस्य च भवति, न चासौ तत्र। तस्मादुभावपि निर्देष्टव्यौ। `अस्तीति प्रकृतिविशेषणम्' इति। ननु च सम्भवे व्यभिचारे च विशेष्यविशेषणभावो भवति नीलोत्पलवत्, न चास्तित्वस्य व्यभिचारोऽस्ति, यथोक्तम्--`न सत्तां पदार्थो व्यभिचरति' इति। तस्या व्यवच्छेद्याभावादपार्थकमिदं विशेषणम्? नैतदस्ति; विशेषणोपादानसामर्थ्यादेव विशिष्टैव सत्ता विशेषणत्वेनोपात्ता, न सत्तामात्रमिति प्रतीयते। सा पुनर्विशिष्टसत्ता सप्रतिसत्तैव। अस्ति च तस्या व्यभिचार इति प्रसज्यत एव विशेष्यविशेषणभावः। किं पुनः सम्प्रतिसत्ता विशेषणत्वेनोपात्ता? तस्यामेव प्रत्ययो यथा स्यात् भूतभविष्यत्सत्तायां मा भूदित्येवमर्थम्। तेन गावोऽस्यासन्, गावोऽस्य भवितार इत्यतर् न भवति। ननु च गोमानासीत, गोमान् भवितेति भूतभविष्यत्सत्तायांां मतुपं विधाय कथं प्रयुज्यते? नैष दोषः, धातुसम्बन्धेऽयथाकालोक्तानामपि प्रत्ययानां साधुत्वविधानादेवं प्रयुज्यचे; न भूतभविष्यत्सत्तायां प्रत्ययविधानात्। `अस्त्यर्थोपाधिकं चेद्भवतीत्यर्थः' इति। वर्त्मानसत्ताविशिष्टं यदि तत्र भवतीत्यर्थः। `गोमान्' इति। `उगिदचाम्' (7.1.70) इति नुम्।

हल्ङ्यादिसंयोगान्तलोपौ। `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्धः। `वृक्ष वान्' इति `मादुपधायाश्च' (8.2.9) इत्यादिना वत्वम्।
`विषयनियमः' इति। विषये प्रत्ययस्य भावो विषयनियमः।
स पुनर्विशिष्टविषयो भूमादिरिति दर्शयन्नाह--`भूमनिन्दा' इत्यादि। बहोर्भावो भूमा। `पृथ्वादिभ्य इमनिच्' (5.1.222) इतीमनिच्। `बहोर्लोपो भू च वहोः' (6.4.158) इति भूभावः, इकारलोपश्च। गावो बहवोऽस्य सन्तीति गोमान्। एकस्य द्वयोर्वा विद्यमानत्वेऽपि गोमानिति न व्यपदिश्यते। निन्दायां- ककुदावर्त्तीति। निष्फलत्वान्निन्दितः। प्रशंसायाम्--प्रशस्तं रूपं यस्यास्ति रहूपवानित्युच्यते। नित्ययोगे-क्षीरमेषामस्तीति क्षीरिणो वृक्षाः। नित्यः क्षीरसम्बन्धो येषां त उच्यन्ते। `अतिशायने उदरिणी कन्या' इति। यस्या अतिशयेनोदरमस्ति सैवमुच्यते। `संसर्गे दण्डी' इति। दण्डसंसर्ग उच्यते। तेनेह गृहस्थिते विद्यमानेऽपि दण्डे दण्डीति नाभिधीयते।।

95. रसादिभ्यश्च। (5.2.95)
`अन्यनिवृत्त्यर्थम्' इति। अन्यस्येनिप्रभृतेर्मत्वर्थीयस्य निवृत्तिरर्थः प्रयोजनं यस्य तत्तथोक्तम्। `कथम्' इत्यादि। रसादिभ्यः पुनर्वचनमन्यनिवृत्त्यर्थम्। ततो रूपिणी कन्येत्यादि न सिध्यतीति भावऋः। `प्रायिकम्' इत्यादि। अन्यनिवृत्तेर्बाहुल्येनार्थः--सोऽस्यास्तीति प्रायिकमेव युक्तं भवतीति।
बाहुल्येनास्यान्यनिवृत्तित्वेन रूपणीत्यादौ क्वचिदन्योऽपि भवतीति कथं पुनरस्य प्रायिकत्वं लभ्यते? इत्याह--`इतिकरणः' इत्यादि। इतिकरणश्चेह विवक्षार्थोऽनुवर्त्ते। तेन यतद्र तु मतुबन्तादेव लोकस्य विवक्षा भवति, तत्र तेनान्यनिवृत्तिः क्रियते; न सर्वत्र।
`अथ वा' इत्यादि। परिहारान्तरम्। आदिशब्देन चक्षुरादीन्द्रियपरिग्रहः। गुणादिति गणे पठ्यते। च गुणग्रहणं सर्वेषामेव रसादीनां विशेषणम्। तेन ये रसनादीन्द्रियग्राह्याः। `तेषामेवायं पाठः' इति। गुणवचनान्तेभ्यो रसनादीन्द्रियग्राह्येभ्योऽन्यनिवृत्तिरनेन क्रियते, नान्येभ्य-। स्यादेतत्-- रूपिणीत्यादावपीन्द्रियग्रह्या ये गुणास्तेभ्यो मत्वर्थीय उत्पन्नः? इत्याह--`रूपिणो, रूपिकः` इत्यादि। रूपिणी, रूपिक इत्यत्र शोभागुणो गम्यते, न चक्षुर्ग्राह्येण रूपेण। `रसिको नटः' इत्यत्रापि भावगुणो गम्यते, न तु रसनेन्द्रियग्राह्येण गुणेन। भावाः शृङ्गारवीरबीभत्सादयो रचनाधर्माः।
`एकाचः' इति। एकाक्षरादिति। एकोऽज् यस्य तस्मान्मतुबेव भवतीति--धीमान्, स्ववानिति।।

96. प्राणिस्थादतो लजन्यतरस्याम्। (5.2.96)
`कणिकालः' इति। कणिकादिशब्दोऽयं प्राण्यङ्गस्य वाचकः, नालङ्कारविशेषस्य।
प्राण्यङ्गादेव हीष्यते, अत आह--`प्राण्यङ्गादिति वक्तव्यम्' इति। प्राण्यङ्गत्वादेवाकारान्तल्लज्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्-- इतिकरणो विवक्षार्थोऽनुवर्त्तते। तेन प्राण्यङ्गदेव भविष्यतीति, नान्यस्मात्। अनभिधानाद्वाऽप्राण्यङ्गान्न भविष्यतीति।
ननु चैकाचो लचः प्रत्ययस्वरेणान्तोदात्तत्वं सिद्धम्, तत्किमर्थं चकारः? इत्याह--`प्रत्ययस्वरेणैव' इत्यादि। चूडालशब्दात् प्रथमैकवचनान्तात् परतोऽसिशब्दे व्यवस्थिते तस्य `तिङ्ङतिङः' (8.1.28) इति निघातः, सोः `ससजुषो रुः'
(8.2.66) इति रुत्वम्, `अतो रोरप्लुतादप्लुते' (6.1.113) इत्युत्वम्,`आद्गुणः' (6.1.87), तस्य च `एकादेश उदात्तेनोदात्तः' (8.2.5) इत्युदात्तत्वम्, `एङः पदान्तादति' (6.1.109) इति पररूपमेकादेशः। असति तु वकारे `स्वरितो वानुदात्तेऽपदादौ' (8.2.6) इति स्वरितः स्यात्। अतस्तद्बाधनार्थ चकारः क्रियते।।

97. सिध्मादिभ्यश्च। (5.2.97)
यद्यन्यतरस्यांग्रहणेन लज्विकल्पेत, तेन पक्षे यथाप्राप्तमेव स्यादित्यकारान्तात् सिध्मादेरिनिठनौ स्याताम्। अत इमं दोषं परिहर्तुमाह--`अन्यतरस्यांग्रहणेन' इत्यादि। अनेकार्थत्वान्निपातानामन्यतरस्यामिह समुच्चते वर्त्तते। तथा च वार्तिककारेणोक्तम्--`अन्यतरस्यामिति समुच्चयः' इति। मतुबिह स्वरितत्वात् सन्निहित इति स एव समुच्चीयते, न तु यथाप्राप्तं प्रत्ययान्तरमित्येके। अन्ये त्वाहुः---`अन्यतरस्यांग्रहणं विकल्पार्थमेव। न चेनिठनावुभौ क्रियेते; तयोर्महाविभाषयैव सिद्धत्वात्। तर्हि प्रत्ययान्तरं पक्षे विधीयते? तदपि न; यथाप्राप्तमापादयित्तुं सन्निहितप्रत्यासत्तेः मतुबेव। तदेवमन्यतरस्यांग्रहणे सति मतुबेव विकल्प्यत इत्यभिप्रायेणान्यतरस्यांग्रहणेन समुच्चीयत इत्युक्तम्' इति।
`न तु प्रत्ययो विकल्प्यते' इति। ननु च लचो भावाभावौ क्रियेते इत्यर्थः। `तस्मात्' इत्यादि। यत एवमन्यतरस्यांग्रहणेन मतुप् समुच्चीयते, न तु प्रत्ययो विकल्प्यते, तस्माद्येऽत्राकारान्ताः पठ्यन्ते तेभ्य इनिठनौ न भवतः।
`पार्ष्णिश्रमन्योर्दीर्घश्च' इति। पार्ष्णि, धमनि इति शब्दाभ्यां लज्भवति, तयोश्च दीर्घः--पार्ष्णीलः, धमनीलः। `वातदन्तबलललाटानामूङ् च' इति। वातादीनां, तस्य च लच ऊङगगमः। वातूलः। दन्तूलः। बलूलः। ललाटूलः। `जटाघटाकलाः क्षेपे' गम्यमाने। जटालः, घटालः, कलालः। क्षेप इति किम्? जटावान्। `क्षुद्रजन्तूपतापाच्च' इति। क्षुद्रजन्तूपतापाच्च' इति। क्षुद्रजन्तुः=नकुलादिः। उपतापः=रोगः।।

98. वत्सांसाभ्यां कामबले।

`कामवति बलवति चार्थे' इति। मत्वन्तयोर्निर्देशेन कामबशब्दावर्शआद्यकारान्तावुपात्ताविति दर्शयति।
ननु च वत्सांसशब्दौ नैव कामबलयोर्वर्तेते, किं तर्हि? वयोविशेषे प्राण्यङ्गविशेषे च, तत्कथं ताभ्यां कामवान् बलवांश्चोच्यते? इत्याह--`वृत्तिविषये' इत्यादि। कथमेतज्ज्ञायते? इत्याह--`न ह्यत्र' इत्यादि। वत्सशब्दस्य वाक्ये यो वयोविशेषलक्षणोऽर्थः प्रसिद्धः, अंसशब्दस्य च यः प्राण्यङ्गलक्षणविषयः स यस्मादत्र वृत्तौ न विद्यते न ज्ञायत इत्यर्थः। अथ वा--न विद्यत इति नास्तीत्यर्थः। अनेन वाक्ये यौ तयोरथा प्रसिद्धौ वयःप्राण्यङ्गविशेषात्मकौ, तयोर्वृत्तावभावो दर्शितः। इदानीं यौ तयोरभिमतावर्थो तयोर्भावं दर्शयितुमाह--`वत्सलः' इत्यादि। `स्नेहवान्' इति। कामवानित्यर्थः। तदेवं यस्माद्वत्सांसशब्दयोर्वाक्ये वयःप्राण्यङ्गलक्षणोऽर्थो न विद्यते, ततश्चवत्सलांसलशब्दाभ्यां यथोक्तः स्नेहवान् बलवांश्चोच्यते, ततो ज्ञायते--वत्सांसशब्दौ वृत्तिविषये कामबलयोर्वर्त्तमानौ तद्वति प्रत्ययमुत्पादयत इति।
अन्यतरस्यांग्रहणं सर्वत्र चात्र प्रकरणे मतुप्समुच्चयार्थे वर्त्तते। ततो मतुपा भवितव्यमिति यो मन्यते, तं प्रत्याह---`न चायम्' इत्यादि। अनेनैव च हेतुना वाक्यमपि न भवतीति वेदितव्यम्। व्काये हि नैवायमर्थः सम्भवति

99. फेनादिलच्च। (5.2.99)

100. लोमादिपामादिपिच्छादिभ्यः शनेलचः। (5.2.100)
पामादिषु `अङ्गात्' इति पठ्यते, तत्र कल्याणग्रहणमङ्गविशेषणम्। कल्याणानि शोभनान्यङ्गान्यस्याः सन्तीत्यङ्गना। कल्याम इति किम्? अङ्गवती। `शीकीपलालीदद्रवां ह्रस्वत्वञ्च' इति। शाक्यादीनाञ्च प्रत्ययो भवति ह्रस्वत्वञ्च---शाकिनः, पलालिनः दद्रुणः। महच्छाकं शाकी, महापलालं पलालौति केचित्। नानाजातीयानां शाकानां समाहारः शाकी, पलालानां समाहारः पलालीति। `विष्वक्' इत्यादि। विष्वक्शब्दान्न प्रत्ययो भवति, उत्तरपदलोपश्च। स चाकृतसन्धेः अकृतयणादेशस्य। विष्वञ्चतीति विषुशब्द उपपदेऽञ्चते; `ऋत्विक्' (3.2.59) इत्यादिना क्विन्, अनुनासिकलोपः, ततो विषु+अच् इति स्थिते विष्वञ्चो यस्य सन्तीति न प्रत्ययः, अकृतयणादेशस्योत्तरपदलोपः--विषुण इति भवति। विषुणशब्दोऽयं निपात्यते। नानार्थे वर्त्तते। `लक्ष्म्या अच्च' इति। लक्ष्माशब्दान्नप्रत्यो भवति, अकारश्चान्तादेशः लक्ष्मीरस्यास्तीति लक्ष्मणः। `जटा घट' इत्यादि। जटादिभ्यः क्षेपे गम्यमान इलच्प्रत्ययः। जटिलः, घटिलः, कलिलः। क्षेप इति किम्? जटावान्, घटावान्, कलावान्।।

101. प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः। (5.2.101)
प्रज्ञाशब्दान्मतुपि पिच्छादिपाठादिलचि च प्राप्ते, इतरेभ्यस्तु मतुपि णो विधीयते।।

102. तपः सहस्राभ्यां विनीनी। (5.2.102)
अत्र सूत्रे द्वे प्रकृती उपात्ते, प्रत्ययार्थावपि द्वावेव प्रकृतावनुवर्त्तेते। तथा च `वत्सांसाभ्यां कामबले' (5.2.98) `सिकताशर्कराब्याञ्च' (5.2.104) इत्येवमादिष्वपि केषुचिद्योगेषु यथासंख्येन भवितव्यमिति यो मन्यते, तं प्रत्याह--`प्रत्ययार्थयोस्तु' इति। कस्मात् पुनरिष्यमाणमपि न भवति? `वत्सांसाभ्यां कामबले' (5.2.98) इत्यत्रांशशब्दस्य परनिपाताल्लक्षमव्यभिचारचिह्नात्। अंसशब्दस्य हि `अजाद्यदन्तम्' (2.2.33) इति पूर्वनिपाते बलशब्दस्यापि `लध्वक्षरं पूर्वं निपतति' (वा. 108) इत्यस्मिन् प्राप्ते योऽयं परनिपातः स लक्षणान्तरनिरपेक्षतां दर्शयन्निह मतुप्प्रकारणे यथासंख्यं लक्षणस्य व्यभिचारयति। तेन प्रत्ययर्थयोः सर्वत्र मतुप्प्रकरणे यथासंख्यं न भवति। प्रकरण इत्येतत् कुतः? प्रकरणापेक्षत्वाल्लक्षणव्यभिचारचिह्नस्य। एतदपि कुतः? व्याख्यानात्। द्वयोर्लक्षणव्यभिचारचिह्नयोरुपादानाद्वा योगापेक्षतायां त्वन्यतरस्यैवोपादानं कुर्यात्। `असन्तत्वात्' इति। तपःशब्दादसन्तत्वात् `अस्मायामेषास्रजो विनिः' (5.2.121) इत्येवमादिना विनिप्रत्यये सिद्धे सहस्रशब्दाच्चाकारान्तत्वात् `अकत इनिठनौ' (5.2.115) इतीनिप्रत्यये सिद्धे, पुनरिवं विधानं वक्ष्यमाणेनाणा बाधा मा भूदित्येवमर्थम्। `सहस्रात्तु' इत्यादि। `अत इनिठनौ' (5.2.115) इति ठन्नपि प्राप्नोति, सोऽपि बाध्यते। एतन सहस्रशब्दात् ठनो बाधानमिति पुनर्वचनमिति दर्शयति।।

103. अण् च। (5.2.103)
`अण्प्रकरणे' इत्यादि ज्योत्स्नादिराकृतिगणः। येभ्यो मतुबर्थेऽण् दृश्यते ते ज्योत्स्नादयो द्रष्टव्याः। उपसंख्यानशब्दश्चायं प्रतिपादने वर्त्तते। तत्रेदं प्रतिपादनम्--उत्तरसूत्रे चकारोऽनुक्तसमुच्चयार्थः, तेन ज्योत्स्नादिब्योऽपि भविष्यतीति। `कौण्डलः' इति। कुण्डले योर्हति स एवमुच्यते। अन्यस्तु कुण्डलीत्येव भवति।।

104. सिकताशरह्कराभ्याञ्च। (5.2.104)
`आदेश इहोदाहरणम्' इति। देश उत्तरसूत्रेण लुबिलचोर्विधास्यमानत्वात्।।

105. देशे लुबिलचौ च। (5.2.105)

106. दन्त उन्नत उरच्। (5.2.106)
अकारान्तत्वादिनिठनोः प्राप्तयोः `तुन्दादिषु' (5.2.117) `स्वाङ्गात्' इति पाठादिलचि दन्तशब्दादुरज्विधीयते।।

107. ऊषसुषिमुष्कमधो रः। (5.2.107)
यथासम्भवं मतुपीनिठनोश्च प्राप्तयोरूषादिभ्यो रो विधीयते। `मधुरः' इति। मधुशब्दोऽत्र रसविशेषे वर्त्तते।
`रप्रकरणे' इत्यादि। उपसंख्यानशब्दः प्रतिपादने वर्त्तते। तत्रेदं प्रतिपादनम्--`देशे लुबिलचौ च' (5.2.105) इत्यतश्चकारोऽत्र वर्त्तते, स चानुक्तसमुच्चयार्थः। तेन मुखप्रभृतिभ्योऽपि रो भवति। `नगपाण्डुपांशु' [`नगपांशुपाण्डुभ्यः काशिका] इत्यादि। नगपांशुप्रभृतिभ्यश्च रो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु तामेव चकारस्यानुवृत्तिमाश्रित्य कर्त्तव्यम्।।

108. द्युद्रुभ्यां मः। (5.2.108)
द्यौश्च द्रुश्च द्युद्रू, ताभ्यां मतुपि प्राप्ते मो विधीयते। धौरस्यास्तीति द्युमः, `दिव उत्' (6.1.131) इत्युत्त्वम्। केचित्--`द्युशब्द प्रकृत्यन्तरमह्नो नामधेयम्, तत इदं प्रत्ययविधानम्' इत्याहुः। `रूढिषु मतुप् पुनर्न विकल्प्यते' इति। रूढिशब्दार्थस्य मतुपाऽनभिधानात्।।

109. केशाद्वोऽन्यतरस्याम्। (5.2.109)
इनिठनोः प्राप्तयोर्मतुपि चेदमारभ्यते। ननु च प्रकृतमन्यतरस्यांग्रहणमस्त्येव, तत्किमर्थं पुनरिवं क्रियते? इत्याह--`ननु च प्रकृतम्' इत्यादि। `वप्रकरणे' इत्यादि। इतिकरणो हेतौ। केशशब्दाद्यथा वप्रत्ययः, एवमन्येभ्योऽपि तथा वप्रत्ययो दृश्यते, तस्माद्वक्तव्यं व्याख्येयम्। तथा व्याख्यानं कर्त्तव्यं यथासावन्येभ्यो भवतीत्यर्थः। तत्रेदं व्याख्यानम्--इहापि स एव चकारोऽनुक्तसमुच्चयार्थोऽनुवर्त्तते, तेनान्येभ्योऽपि भवतीत्यर्थः।

110. गाण्ड्यजगात्संज्ञायाम्। (5.2.110)
`ह्रस्वादपि भवति' इति। कथं पुनर्दीर्घस्य ग्रहणे ह्रस्वादपि भवतीति? `तत्र तुल्या हि' हत्यादि। यादृशी दीर्घस्येह संहिता ह्रस्वग्रहणेऽपि तादृश्येव दृश्यते। तस्मात् ह्रस्वस्यापि ग्रहणमिह न विरुध्यत इति भावः। तत्र चैतत् स्यात्--यद्यपि तुल्या संहिता, तथापि कृतयणादेशोऽयमेक एव शब्दः, तस्य स्वरूप इत्यन्यतरस्य परिग्रहणेन भवितव्यम्। तत्र यदि दीर्घत्य ग्रहणं ह्रस्वान्न प्राप्नोति, अथ ह्रस्वस्य ग्रहणं दीर्घन्न प्राप्नोतीत्यत आह--`उभयथा' इति। उभयप्रकारं ह्याचार्येण प्रणीतं सूत्रम्। तस्मादुभयोरपि ग्रहणमित्यदोषः।
अथ संज्ञाग्रहणं किम्, यावतेतिकरणस्य चानुवृत्तेरसंज्ञायां न भविष्यति, यथा द्युद्रभ्यां मप्रत्ययः? एवं तर्हि तस्यैवेतिकरणस्य प्रपञ्चः संज्ञाग्रहणमिति द्रष्टव्यम्।।

111. काण्डाण्डादीरन्नीरचौ। (5.2.111)
इनिठनोरपवादोऽयम्।।

112. रजः कृष्यासुतिपरिषदो वलच्। (5.2.112)
रजःशब्दात् `अस्मायामेधास्रजो विनिः' (5.2.121) इति विनौ प्राप्ते, इतरेभ्यस्तु मतुपि वलज्विधीयते।
`वलच्प्रकरणे' इत्यादि। वप्रत्ययस्य व्याख्यानेनेदमपि व्याख्यातप्रायम्। अत्र `वले' (6.3.118) इति दीर्घत्वं कस्मान्न भवति? `वनगिर्योः संज्ञायाम्' (6.3.117) इत्यतः संज्ञाग्रहणानुवृत्तेः।।

113. दन्तशिखात्संज्ञायाम्। (5.2.113)
दन्तशब्दादिनिठनोः प्राप्तयोर्वलज्विधीयते। शिखाशब्दादिनिप्रत्ययो वक्ष्यते `व्रीह्यादिभ्यश्च' (5.2.116) इत्यत्र `शिखादिभ्य इनिर्वाच्यः' (म. भा. 2.398) इति। अदेशार्थं शिखाग्रहणम्, शिखावला स्थूणेत्यत्र यथा स्यात्। देशे तु `शिखाया वलच्' (4.2.89) इत्यनेनैव चातुरर्थिक एव सिद्धः। यद्येवम्, इदमेव वक्तव्यम्, किं तेन? नैतदस्ति; तदपि हि वक्तव्यमेव--निर्वृत्तादिष्वर्थेषु यथा स्यात्। अत्रापि संज्ञाग्रहणं तस्यै वार्थस्यानुवादार्थम्। इतिकरणानुवृत्त्यवाभिधेयनियमसिद्धेः।।

114. ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः। (5.2.114)

`स्त्रीत्वमतन्त्रम्' इति। अप्रधानम्, अविवक्षितत्वात् स्त्रीलिङ्गनिर्देशस्तु वैचित्र्यार्थः।।

115. अत इनिठनौ। (5.2.115)
अत इत्यकारस्तपरो गृह्यते। अत एवाह--`अकारान्तात्' इत्यादि। अथाच्छब्दस्य स्वरूपग्रहणं कस्मान्न विज्ञायते--अच्छब्दात् प्रातिपदिकादिति? अदित्ययुक्तं स्वरूपग्रहणं भवितुम्; स्वरूपग्रहणे हि रसादिभ्यो मतुपो विधानमनर्थकं स्यात्। स हीनिठनोर्बाधनार्थं विधीयते। न चेह स्वरूपग्रहणे तेभ्यस्तौ प्रत्ययौ प्राप्नुत इति किं तद्विधानार्थेन मतुपो विधानेन!
`तपरकरणं किम्? श्रद्धावान्' (इति)। ननु च व्रीह्यादिषु मालादय आकारान्ताः पठ्यन्ते, ते च नियमार्था भविष्यन्ति--एतेब्य एवाकारान्तेभ्य इति? नैतदस्ति; तुल्यजातीयस्यैवं नियमः स्यात्, डाप्चाबन्ताभ्यां स्यातामेवेतीनिठनौ। तस्मादकारस्तपरः कर्त्तव्यः।
`कार्यी, इति। कृत इनिः। `तण्डुलिकः' इति। जातेरिनिठनौ।।

116. व्रीह्यादिभ्यश्च। (5.2.116)
`शिखादिभ्यः' इत्यादि। उभयत्रादिशब्दः प्रकारे। शिष्टप्रयोगे येभ्य इनिरेव दृश्यते, ते शिखादयो द्रष्टव्याः, ते हि तेभ्यष्ठनं विहितवन्तः। एष तु विषयविभाग इतिकरणानुवृत्तेरेव गृह्यते। `वाच्य' इति। अस्य तु व्याख्येय इत्यर्थः। `यवखदादिषु' इति विषयसप्तमी।
`एवं तर्हि' इत्यादि। तुन्दादिषु व्रीहिशब्दस्य स्वरूपग्रहणे सतीह तस्य ग्रहणमनर्थकं ज्ञायत इति सामर्थ्यात् तत्र व्रीहिग्रहणेनार्थग्रहणं विज्ञायते। अर्थग्रहणे सति यदिष्टं सिध्यति तद्दर्शयितुमाह--`शालयोऽस्य सन्ति शालिकः' इत्यादि।
`शीर्षान्नञः' इति। नञ उत्तरलस्य शीर्षन्नित्येतस्य प्रत्ययो भवति। निपातनाच्छिरसः शीर्षभावः---अशीर्षी, अशीर्षिकः। अन्ये तु शीर्षन्निति शब्दान्तरं पठन्ति। तस्य तु पाठो भाषायामपि यथा स्यादित्येवमर्थः। अन्यथा `शीर्षंश्छन्दसि' (6.1.60) इति विधानात् भाषायाम् अशीर्षिकः, अशीर्षवानिति न स्यात्।।

117. तुन्दादिभ्य इलच्च। (5.2.117)
यथासम्भवं मतुबादिषु प्राप्तेष्विदमारभ्यते। `चकारादिनिठनौ मतुप्च' इति। एतेन प्रत्ययचतुष्टयं तुन्दादिभ्यस्त्विनिठनावपि।
`स्वाङ्गाद्विवृद्धौ' इति। स्वाङ्गद्विवृद्धौ वर्त्तमानात् प्रत्ययो भवति। वृद्धौ महान्तौ कर्णावस्य स्तः--कर्णिलः, कर्णिकः, कर्णी, कर्णवान्।।

118. एकगोपूर्वाट्ठञ् नित्यम्। (5.2.118)
मतुबादिषु प्राप्तेषु ठञ्विधीयते। स च समानाधिकरणतत्पुरुषादेकपूर्वाद्भवति, न तु सर्वत एकपूर्वात्। एतच्चेतिकरणातुवृत्तेर्लभ्यते। एकञ्च तच्छतं चैकशतम्, तदस्यास्तीति ऐकशतिकः। षष्ठीतत्पुरुषे--एकशतवान्।
`कथम्' इत्यादि। यदि `अतः' (5.2.115) इत्येतदनुवर्त्तते, गोशकटीशब्दान्न सिध्यति, तस्यानकारान्तत्वादिति भावः। `ततो भविष्यति' इति। तदन्ताद्भविष्यतीत्यभिप्रायः। एषोऽर्थः--एकगोपूर्वाददन्तात्। प्रातिपदिकाट्ठञ् विधीयत इति सामर्थ्याल्लभ्यते। अथ वा--ततो हेतोर्भविष्यतीत्यदोषः।
`अवश्यं च' इत्यादिः असत्यां ह्यत इत्यनुवृत्तौ द्वन्द्वोपतापगर्ह्यादिषु (5.2.128; 5.2.115) योगेषु चित्रकललाटिकादिशब्देभ्योऽपि प्रत्ययः स्यात्।
`नित्यग्रहणम्' इत्यादि। असति हि नित्यगरहणेऽन्यतरस्यांग्रहणं मतुप्समुच्चयार्थं सर्वत्रानुवर्त्तत इति मतुबति स्यात्। तस्मादबाधनार्थं नित्यग्रहणम्।
`कथमेकद्रव्यवत्त्वात्' इति। यदि नित्यग्रहणं मतुब्बाधनार्थम्, एवम्, न ह्येक द्रव्यवत्त्वादित्यत्रैकपूर्वाद्द्रव्यशब्दान्मतुप् सिध्यतीति मन्यते। `एकेन' इत्यादि। एकशब्दस्य द्रव्यवत्त्वादित्यनेन `सुप्सुपा' (2.1.4) इति समासं कृत्वा साधुत्वमस्य प्रतिपादनीयमित्यर्थः।।

119. शतसहस्रान्ताच्च निष्कात्। (5.2.119)

120. रूपादाहतप्रशंसयोर्यप्। (5.2.121)
`तदाहतमुच्यते' इति। आहतम्=आहननम्, ताडनमित्यर्थः। अतो निष्पन्नं पुरुषादिरूपम्, तदपि कार्यं कारणोपचारादाहतमित्युच्यते।
`यप्रकारणे' इति। यप्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यमिति। अनेनास्य तु तुल्यत्वात् तद्वदेव व्याख्यानं कर्त्तव्यम्। चकारस्त्विह `शतसहस्रान्ताच्च निष्कात्' (5.2.119) इत्यतोऽनुवर्त्तते।।

121. अस्मायामेधास्रजो विनिः। (5.2.121)
`यशस्वी'। `तपस्वी'। `पयस्वी'। `तसौ मत्वर्थे' (1.4.19) इति भत्वम्, अतो भत्वाज्जशत्वं न भवति। जश्त्वेन सकारस्य दकारः प्राप्नोति, स न भवति।।

122. बहुलं छन्दसि। (5.2.122)

`द्वयोभयहृदयानि' इत्यादि। अवधारणमिह द्रष्टव्यम्। द्वयादीन्येव दीर्घत्वं प्रयोजयन्ति, नेतराणि; स्वत एव दीर्घत्वात्। `तदेतत्सर्वं बहुलग्रहणेन सम्पद्यते' इति। वक्तव्यशपब्दस्तु व्याख्याने वर्त्तते इत्यभिप्रायः।।

123. ऊर्णाया युस। (5.2.123)
`ऊर्णायुः' इति। पदत्वेन भसंज्ञाभावाद्यस्येति लोपो न भवति।।

124. वाचो ग्मिनिः। (5.2.124)
अथ मिनिरेव कस्मान्नोच्यते? जश्त्वे कृते वाग्ग्मीति सिध्यति; ननु च `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इत्यनुनासिकः प्राप्नोति? नैष दोषः; व्यवस्थितविभाषां विज्ञास्यते। एवं तर्हि गकारमधिकं कुर्वन्नेतत् सूचवति--ग्मिनिरयमिति।
यः सम्यग्बहु भावते तत्रापि वक्ष्यमाणावालजाटचौ बाधित्वा ग्मिनिरेव भवति। एवं ह्यषिकं भवति यद्यपवादविषयेऽपि क्वचिद्भवति, नान्या। एवञ्चा लजाटचौ कुत्सितं यो बहु भावते तत्रैव पारिशेष्याद्भवत इति वेदितव्यम्।।

125. आलजाटचौ बहुभाषिणि। (5.2.125)
`कुत्सिते' इति। वक्तव्यशब्दस्तु व्याख्याने वर्त्तत इत्यभिप्रायः। `वक्तव्यम्' इति। कुत्सितं यो बहुभाषते तत्रालजाटचौ भवत इत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं पूर्वसूत्र एव कृतम्।।

126. स्वामिन्नैश्वर्ये। (5.2.126)
`एकाचः' इति रसादिषु (5.2.95) पाठान्मतुपि प्राप्त इदमारभ्यते। `ऐश्वर्यवाचिनः इति। धनवचनोऽयं स्वशब्द ऐश्वर्यवाची। तथा च-धनयोगादैश्वर्यं तदुच्यते।
`स्ववान्' इति। आत्मादावर्थान्तरे स्वशब्दो वर्त्तते।।

127. अर्शआदिभ्योऽच्। (5.2.127)
यथासम्भवं मतुबादिष्वज्विधीयते। `आकृतिगणश्चायम्' इति। अवृत्कृतत्वात्। आदिशब्दश्चायं प्रकारे। `स्वाङ्गाद्धीनात्' इति। हीनस्वाङ्गवृत्तेः प्रातिपदिकादज्भवति--खञ्जः पादोऽस्तीति शुक्लम्। ननु च शुक्लशब्दो गुणवचनः, तत्राभेदोपचारेणाप्येतत् सिध्यति? एवं तर्हि द्रव्यवृत्तेरपि वर्णवाचिनः प्रातिपदिकाद्यथा स्यादित्येवमर्थं वर्णग्रहणं कृतम्। शुक्लगुणयुक्ताः प्रासादाः शुक्लाः, तेऽस्मिन् सन्ति शुक्लं नगरम्। प्रत्ययस्वरेणैवान्तोदात्तत्वे सिद्धे चकारोऽर्शोऽस्यास्तीति `स्वरितो वानुदात्तेऽपदादौ' (8.2.6) इति स्वरितबाधनार्थः।।

128. द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः। (5.2.128)
`तद्विषयेभ्यः' इति। तच्छब्देनोपतापगर्हाविव परामृश्येते। ते उपतापगर्हे विषयो येषामिति बहुव्रीहिः। प्राणिस्थवाचिनां सर्वेषामेव द्वन्द्वादीनामिवं विशेषणम्। `प्राण्यङ्गान्नेष्यते' इति। कथं पुनरिष्यमाणोऽपि न भवति? चकारानुवृत्तेः। `सिद्धे प्रत्यये' इति। `अत इनिठनौ' (5.2.115) इत्यनेनैव। `ठनादिबाधनार्थम्' इति। इनिरेव यता स्यात्, ठनादिर्मा भूदित्येवमर्थं पुनर्वचनम्। आदिशब्देन मतुब् गृह्यते। इत उत्तरे योगा नियमार्था वेदितव्याः।।

129. वातातिसाराभ्यां कुक् च। (5.2.129)
`वातातिसाराभ्याम्' इति। यद्यपि पञ्चमी, तथाप्यर्थाद्विभक्तिविपरिणामो भवति। आगमसम्बन्धे षष्ठीभावेन विपरिणम्यते। अत एवाह--`तस्यन्नियोगेन च तयोः कुगागमः' इति। अथ प्रत्ययस्यैवागमः कस्मान्न भवति? कुगागमवता प्रत्ययेनार्थस्यानभिधानात्। स्वरूपं न सिध्यतीति च।
`पिशाचाच्चेति वक्तव्यम्' इति। पिशाचशब्दादिनिप्रत्ययो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`बहुलं छन्दसि' (5.2.122) इत्यतो बहुलग्रहणमनुवर्त्तते, तेन पिशाचशब्दादपि भविष्यति।।

130. वयसि पूरणात्। (5.2.130)
`वयसि द्योत्ये' इति। कथं पुनर्वयो द्योत्यते, यदि पञ्चमादयः शब्दाः काले वर्त्तमानाः प्रत्ययमुत्पादयन्ति। अत एव तेषां काले वृत्तिं दर्शयितुमाह--`पञ्चमो मासोऽस्यास्ति' इति। `सिद्धे सति' इत्यादि। पूरणप्रत्ययानामकारन्तत्वादिनिः सिद्ध एव, तस्मिन् सिद्धे पुनरिवं वचनं नियमार्थं ज्ञायत इति। `इनिरेव भवति' इति। नियमस्य स्वरूपं दर्शयति।।

131. सुखादिभ्यश्च। (5.2.131)

`इनिप्रत्ययो नियम्यते' इति। पूर्ववन्नियमो वेदितव्यः।
`तदिह' इत्यादि। यतो व्रीह्यदिषु मालाशब्दः पठ्यते, तस्माद्यदिह क्षेपे मालाशब्दस्य पुनर्वचनं तन्मतुपो बाधनार्थम्, न तु ठनः। सुखादिभ्य इति नोच्यत इति; अनेनैव निवर्त्तितत्वात्। मालाशब्दो हि शिखादिषु, तत्रान्तर्भाविनः क्षेपादन्यत्रेनिर्भवत्येव। शिखादित्वान्मतुप् च; मतुपस्तस्यान्यतरस्यांग्रहणेन समुच्चितत्वात्--माली, मालावानिति।।

132. धर्मशीलवर्णान्ताच्च। (5.2.132)

133. हस्ताज्जातौ। (5.2.133)
हस्तेन हस्तमात्रं प्रतीयते, न त जातिः। पुरुषशब्दप्रयोगात् पुरुषजातिर्गम्यते।।

134. वर्णाद्ब्रह्मचारिणि। (5.2.134)
`समुदायेन चेद्ब्रह्मचारी भष्यते' इति। एतेन समुदायोपाधित्वं ब्रह्मचारिणो दर्शयति। विद्याग्रहणार्थ यदोपनीयते ततः सेवितव्यो यो नियमविशेषस्तद्ब्रह्मा, तच्चरति ब्रह्मचारी, आवश्यके णिनिः। तत्र नियमविशेषचरणे ब्राह्मणादीनामेव त्रयाणां वर्णानामधिकारः, न शूद्रस्येत्याह--`ब्रह्मचारीति त्रैवर्णिकोऽभिप्रेतः' इति। त्रिषु वर्णेषु भवः, तत्रान्तर्भूतत्वात् त्रैवणिकः। किं पुनः कारणं स एवाभिप्रेत इत्याह--`स हि' इत्यादि।।

135. पुष्करादिभ्यो देशे। (5.2.135)
इह कस्मान्न भवति--पुष्कराणि पद्मान्यस्मिन् देशे सन्तीति? इतिकरणानुवृत्तेः।
`अर्थाच्चासन्निहिते' इति। असन्निहितग्रहणे तस्य चास्तित्वेन विरोधः। यदि ह्यसन्निहितोऽर्थः, न नाम विद्यते; यदि विद्यते, कथमसन्निहितः? तस्माद्विशेषणोपादानादस्तोत्येतद्विशेषणमुत्सृज्यासन्निधानोपाधिकादर्थात् प्रत्ययो विधीयते। अभिधानशक्तिस्वाभाव्याच्च। `अर्थी' इति। अभिलाषवानेवोच्यते। न सर्वोऽसन्निहितोऽर्थः प्रत्ययान्तेन तद्विमर्शादसन्निहितवान्, अतः प्रत्ययो वक्तव्यः? न वक्तव्यः, कथं पुनरनुच्यमानो लभ्यते? `बहुलं छन्दसि' (5.2.122) इत्यतो बहुलग्रहणेन यथा `अष्ट्रामेखलाद्वयोभयरजाहृदयादीनां दीर्घश्च' (बा. 586) इत्येवमादिकं कार्यं सम्पाद्यते, तथेदमपि।
`तदन्ताच्च' इत्यादि। असन्निहितमित्यनुवर्त्तते, असन्निहितोपाधिकादर्थादिनिप्रत्ययो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु कृतप्रायम्।

136. बलपादिभ्यो मतुबन्यतरस्याम्। (5.2.136)
`यद्यन्यतरस्यांग्रहणेन प्रत्ययो विकल्प्यते--बलादिभ्यो मतुब्विकल्पो भवतीति, ततो मतुपा मुक्ते यथाप्राप्तमिनिठनावपि स्याताम्, इनिरेव चेष्यते, स कथमिनिरेव लभ्यते, यद्यन्यतरस्यांग्रहणेनेनिः समुच्चीयते, न मतुबिति विकल्पेन? इत्येवं चेतसि कृत्वाह--`अन्यतरस्यांग्रहणेन' इत्यादि। ननु यदीनिटनौ द्वावपि स्याताम्, सूत्रारम्भोऽनर्थकः स्यात्, विनाऽप्यनेन प्रत्ययस्य सिद्धत्वात्, तस्मान्मतुपोऽपि विकल्पस्यानेन दोषः? नैतदस्त; आरम्भसामर्थ्यादिनिठनोरन्यतरो भवतीत्येषोऽर्थो लभ्यते, न त्विनिरेव। तस्मादिनिसमुच्चयार्थमेवान्यतरस्यांग्रहणं कर्त्तव्यम्।।

137. संज्ञायां मन्माभ्याम्। (5.2.137)
`प्रथिमिनी, दामिनी' इति। प्रथिमिन्, दामिन्--इत्येताभ्यामिनिः, `नस्तद्धिते' (6.4.144) इति टिलोपः, `ऋन्नेभ्यो ङीप्' (4.1.5) इति ङीप्। अत्रापि संज्ञाग्रहणमितिकरणस्यैव प्रपञ्चः।।

138. कंशंभ्यां बभयुस्तितुतयसः। (5.2.138)
`उदकसुखयोर्वाचको' इति। यथासंख्यं कमित्युदयकस्य वाचकः, शमिति सुखस्य। `शंयुः' इति। `मोऽनुस्वारः' (8.3.33), तस्य `वा पदान्तस्य' (8.4.59) इति परसवर्णः, मस्यानुनासिको यकारः।
तेनानुस्वारपरसवर्णौ सिद्धौ भवतः' इति। तयोः पदाधिकारे विधानात्। यदि पुनः पदसंज्ञा न स्यात्, ततस्तस्यामसत्यां पदनिबन्धनयोरनुस्वारपरसवर्णयोरभावात्--कम्युः, शम्युरित्यनिष्टं रूपं सम्पद्यते।।

139. तुन्दिबलिवटेर्भः। (5.2.139)
तुन्दिशब्दात् तुन्दादिषु `स्वाङ्गाद्विवृद्धौ' (5.2.117) इति पाठादिलचीनिठनोर्मतुपि प्राप्ते, बलेः पामादिपाठान्ने मतुपि, वटेर्मतुप्येव बो विधीयते।।

140. अहंशुभमोर्युस्। (5.2.140)

`अहमिति शब्दान्तरम्' इति। अस्मदः `त्वाहौ सौ' (7.2.94) इति, त्यदाद्यत्वे च कृते यच्छब्दरूपं सम्पद्यते, तस्मादन्य एवाहमव्युत्पन्नः शब्दः, न तु तदित्येवं शब्दान्यत्वं दर्शयित्वाऽर्थान्तरं दर्शयितुमाह--`अहङ्कारे वर्त्तते' इति। `अहंयुः, शुभंयुः' इति। पूर्ववदनुस्वारपरसवर्णौ।।

इति श्रीबोधिसत्त्वदेशीयाचार्यश्रीजिनेन्द्रबुद्धिपादविरचितायां काशिकाविवरणपञ्चिकायां पञ्चमाध्यायस्य
द्वितीयः पादः
* * *

5.3
अथ पञ्चमोऽध्यायः

तृतीयः पादः

1. प्राग्दिशो विभक्तिः। (5.3.1)
`विभक्तिसंज्ञास्ते वेदिव्याः' इति। विभक्तिरित्येष शब्दः संज्ञा येषां ते तथोक्ताः। ननु च विभक्तिशब्दः सुप्तिङां संज्ञा, संज्ञा च प्रदेशवाक्येषूच्चारिता संज्ञिनं प्रत्याययतीति सुप्तिङां विभक्तिसंज्ञाविधानमनर्थकं स्यात्। यथा वृद्धिशब्दः स्वाभिधेये लौकिकेऽर्थे गुणीभूतोऽप्यादैच् प्रति संज्ञात्वमनुभवति, तथा विभक्तिशब्दोऽपि तसिलादीन् प्रति संज्ञात्वेन वेदितव्यः। अथ तत्रैव कस्मान्नोच्यते--`सुपो विभक्तिश्च प्राग्दिशश्च' इति, एवं सति पुनर्विभक्तिग्रहणं कर्त्तव्यं न भवति? नैवं शक्यम्; एवं हि न्यासे सति `कुत आरब्य प्राग्दिशीयाः? इति न ज्ञायते। किञ्च `दिगादिभ्यो यत्' (4.3.54), `तेनैकदिक्' (4.3.112) इति चानेकं शास्त्रे दिग्ग्रहणमित्यवधिरपि सन्दिह्येत। `किंसर्वनामबहुभ्यः' (5.3.2) इत्येवमादेश्च कारह्यस्यावधिदर्शनार्थं पुनरिह `प्राग्दिशः' इति वाच्यमेव स्यात्। तस्माद्यथान्यासमेव साध। `ततः, यतः' इति। `अष्टन आ विभक्तौ' (7.2.84) इत्यनुवर्त्तमाने `त्यदादीनामः' (7.2.102) इत्यत्वम्, `न विभक्तौ तुस्माः' (1.3.4) इति सकारस्येत्संज्ञाप्रतिषेधः, `तद्धित श्चासर्वविभक्तिः' (1.1.38) इत्यव्ययत्वाद्विभक्तेर्लुक्। `कुतः' इति। `कि तिहोः' (7.2.104) इति किमः कुभावः।
`त्यदादिविधयः' इति। त्यदादयोऽत्र दिभक्तिनिबन्धनाः। `ततः' इति। त्यदादिविधेरत्वस्योदाहरणम्। `इह इति। इदमो विभक्तिस्वरस्य। इदमः सप्तम्यन्तात् `इदमो हः' (5.3.11) इति हप्रत्ययः, `इदम इश्' (5.3.3) इतीशादेशः। `ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः' (6.1.171) इति इदमः परस्योदातत्वं विभक्तित्वे सति सिद्धं भवति। अत्र तु प्रत्ययस्वरेणैव सिद्धमाद्युदात्तत्वम्। तस्माच्चोदाहरणदिगियं प्रदर्शित। इदं त्वत्रोदाहारणं युक्तम्--`इतः' इति। इवमस्तसिल्, पूर्ववदिश्। अतन्न ह्यसति विभक्तित्वे लिति प्रत्ययात् पूर्वपदाद्युदात्तत्वं [`पूर्वमाद्युदात्तत्वं'-मुद्रितपाठः (वाराणसी-1967)] स्यात्। तस्मिंस्तु `ऊडिदम' (6.1.171) इत्यादिनेदमः परस्य तस आद्युदात्तत्वं सिद्धं भवति। ननु च सत्यपि विभक्तित्वे परत्वाल्लित्स्वरेण भवितव्यम्? नैष दोषः; `लिति' (6.1.193) इत्यत्र हि `ऊजिदम्' (6.1.171) इत्यादिकं सूत्रमनुवर्त्तिष्यते लित्स्वरबाधनार्थम्। नन्वेवमपि नैव विभक्तेरुदात्तत्वं सिध्यति? तत्र हि `सावेकाचस्तृतीयादिविभक्तिः' (6.1.168) इत्यतस्तृतीयादिग्रहणमनुवर्त्तते, न च तसिलादयस्तृतीयादिगरहणेन गृह्यन्ते। तृतीयैकवचनमारन्य आ पञ्चमाध्यायपरिसमाप्तेर्यावान् प्रत्ययो विभक्तिसंज्ञः सर्वोऽसौ तृतीयादिः।
`अतः परम्' इत्यादि। सामर्थ्यं हि नाम सम्बन्धार्थता; सा च प्रतियोगिनमपेक्षत एव यन सहैकार्थीभावो भवति तस्मिन् प्रतियोगिनि सति, नान्यथा। प्राथम्यमपि प्रतियोग्यपेक्षमेव। द्वितीयं हि प्रतियोगिनमपेभ्य प्रथममित्युच्यते। इत उत्तरं प्रत्ययाः प्रकृत्यर्थ एव भवन्तीति, न तद्विषौ द्वितीयस्य प्रतियोगिनः सम्भवः; तदभावात् सामर्थ्यप्राथम्ययोरपि नास्त्येव सम्भवः; तयोः प्रतियोग्यपेक्षत्वात्। यतश्चैतदेवम्, ततः `सामर्थ्याधिकारः प्रथमग्रहणञ्च नोपयुज्यते' इति द्वयमपि निवृत्त्म्। यद्येवम्; वावचनस्यापि निवृत्तिः प्राप्नोति, एकयोगनिर्दिष्टत्वात्? इत्याह--`वावचनं तु वर्त्तत एव' इति। तस्य स्वरितत्वादिति भावः। `तेन विकल्पेन' इत्यादि। तेनोत्तरसूत्रे वाग्रहणानुवृत्तेः फलं दर्शयति।।

2. किंसर्वनामबहुभ्योऽद्व्यादिभ्यः। (5.3.2)
`कुत्र' इति। `सप्तम्यास्त्रल्' (5.3.10), पूर्ववत् कुभावः। `प्रकृतिपरिसंख्यानम्' इति। प्रकृतिपरिगणनम्। `वैयाकरणपाशः' इति। `याप्ये पाशप्' (5.3.47)। अयं चावधेः परो व्य इत्यन्याभ्योऽपि प्रकृतिभ्यो भवति। `सर्वनामत्वादेव सिद्धे' इति। सर्वनामत्वं किमः सर्वादिषु पाठात्। `किमो ग्रहणम्' इत्यादि। किंशब्दोऽयं द्व्यादिषु पठ्यत इति तस्य `द्व्यादिभ्यः' इति पर्युदासः क्रियते। तस्मात् सर्वनाम्नोऽपि स्वशब्देनोपादानम्। यद्येवं द्विशब्दात् पूर्वं किंशब्दः पठितव्यः, एवं हि तस्य पृथग्ग्रहणं न कर्त्तव्यमेव भवति? सत्यमेतत्; न सूत्रकारस्येह गणपाठ इति नासावुपालम्भमर्हति। अपि च त्यदादीनां यद्यत्परं तत्तच्छिष्यत इति किमः सर्वैरेव त्यदादिभिः सह विवक्षायां शेय इष्यते--`त्वञ्च कश्च' कौ, भवांश्च कश्च कौ; स चैवं पाठे न सिध्यतीति यथान्यासमेवास्तु।

`बहुग्रहणे संख्याग्रहणम्' इति। कथमिह सर्वनामसंज्ञया सर्वादयः संज्ञिनो निर्दिश्यन्ते? तस्मात् तैः सह निदेशाद्बहुशब्दस्यापि बहुगणादि (1.1.23) सूत्रेण यस्य संख्यासंज्ञा विहिता तस्यैव संज्ञिता तस्यैव संज्ञिनो ग्रहणं विज्ञायते। `बहोः सूपात्' इति। अत्र वैपुल्यवाची बहुशब्दः।।

3. इदम इश्। (5.3.3)
`शकारः सर्वादेशार्थः' इति। असकति हि तस्मिन् `अलोऽन्त्यस्य' (1.1.52) स्यात्। ततश्चेद्रूपस्य हलि लोपे (7.2.113) कृते, `आद्गुणे' (6.1.87) चैतः, एहेत्यनिष्टं रूपं स्यात्। ननु चेदमस्त्यदाद्यत्वे (7.2.102) कृतेऽतो गुणे (6.1.97) पररूपत्वे चेद्रूपलोपे चान्त्यस्याप्यादेश इतः, इहेति सिध्यत्येव? सिध्येद्यदि प्राक् त्यदाद्यत्वं लभ्येत; न तु तल्लभ्यम्, इत्वमेव हि तावदन्तरङ्गं स्यात्। इत्वं हि तसिलादिप्रत्ययंमात्रमपेक्षत इत्यन्तरङ्गम्, त्याद्यत्वमङ्गसंज्ञां परस्य प्रत्ययस्य विभ्कितत्वं चापेक्षत इति बहिरङ्गम्, तस्माच्छाकरः कर्त्तव्यः।।

4. एतेतौ रथोः। (5.3.4)
`रथोः' इति वर्णयोरिवं ग्रहणम्। तत्र `यस्मिन् विधिस्तदादावल्ग्रहणे' (वा. 14) इति रेफादौ थकारादौ च कार्यं विज्ञायत इत्यादि--`रेफादौ' इत्यादि। रेफस्याकार उच्चारणार्थ इति कथं ज्ञायते? इदमः परस्य प्राग्दिशीयस्याकारवतो रेफस्याभावात्।।

5. एतदोऽश्। (5.3.5)
`शकारः सर्वादेशार्थः' इति। ननु चान्त्यस्य स भवन् यदि तावदकृते त्यदाद्यत्वे भवति ततो दकारस्य भवन्ननर्थकः प्रसज्येत, त्यदाद्यत्वेनापि हि तस्याकारो लभ्यत एव; अथ त्यदाद्यत्वे कृतेऽकारस्य स्थाने भवन्ननर्थक एव प्रसज्यते न ह्यकारस्याकारवचने प्रयोजनमस्ति, कृतवांश्च; तत्र वचनादसत्यपि शकारे सर्वादेशो भविष्यति? नैतदस्ति; अस्ति ह्यकारस्याकारवचने प्रयोजनम्। किम्? अतः, अत्रेत्यत्र योऽन्यः प्राप्नोति स मा भृदिति। कः पुनरसौ? लिति प्रत्ययात् पूर्वस्योदात्तः। तस्माच्छकारः कर्त्तव्यः।
`थमुः [थमुप्रत्ययः पुनरेतद उपसंख्येयः---काशिका] पुनरुपसंख्येयः' इति। तस्याविद्यमानत्वत्। उपसंख्येय इति प्रतिपाद्य इत्यर्थः। तत्रेदं प्रतिपादनम्--एत एव थकारादावादेशवचनं ज्ञापयति--भवत्येतदस्थमुरिति। कुतो नु खल्वेतत्? ज्ञापकात्। थमु भैविष्यति, न पुनर्थं एवासौ `प्रकारवचने थाल्' (5.3.23) इत्यविशेषविहितस्थकारादिस्तस्मिन्नेवादेशः स्यात्? नैष दोषः; इदमस्थकारादिविशेष इष्यते। `एतदः' इत्यत्त्रापि ह्येदम इत्यनुवर्त्तते, तच्च नादेशविधानार्थम्; आदेशस्य पूर्वमेव विहितत्वात्। तस्मात् प्रत्यविशेषणं विज्ञायते। तत एतेन थकारादि विशेषयिष्यामः--इदम इत्येवं यो विहित इदंशब्देनैव यो विहितस्थकारादिरिति, थमुरेव चैवं विहितः, न थालिति युक्तमुक्तमादेशवचनं ज्ञापयति--भवत्येवैतदस्थमुरिति।।

6. सर्वस्य सोऽन्यतरस्यां दि। (5.3.6)
`दीति' दकारादियं सप्तमी। तत्र दकारमात्रस्य प्राग्दिशीयस्याभावात् `यस्मिन्विधिस्तदादावल्ग्रहणे' (वा. 14) इत्यतो दकारादौ विधिर्ज्ञायत इत्याह--`प्राग्दिशीये दकारादौ' इत्यादि। `सर्वदा ब्राह्माणी' इति। `आतोऽनुपसर्गे कः' (3.2.3), ततष्टाप्।।

7. पञ्चम्यास्तसिल्। (5.3.7)
`तसिल प्रत्ययो भवति' इति। आदेशा एवामी तसिलादयः पञ्चम्यादीनां स्थाने कस्मात्र क्रियन्ते, एवं हि विभक्तितसंज्ञा न कर्त्तव्या भवति? अशक्या एत आदेशाः कर्तुम्; आदेशत्वे ह्येषामव्यायात् त्यपि (4.2.104)--ततस्त्यः, यतस्त्य इत्यत्र `सुपो धातुप्रातिपदिकयोः' (2.4.71) इति लुक्। लभन्ते हि स्थानिवद्भावेन सुबादेशाः सुबाश्रयं कार्यम्। तत इति, `अनुदात्तौ सुप्पितौ' (3.1.4) इत्यनुदात्तः। कुत इति, `धेङिति' (7.3.111) इति गुणः। एतर्हीति, `सुपि च' (7.3.102) इति दीर्घः। तत्रेति, `बहुवचनेझल्येत् (7.3.103) इत्येत्वम्। कुत्रेति, `अच्च घेः' (7.3.119) इत्यौत्त्वम्। ततः, तत्रेति, `ङसिङ्योः स्मात्स्मिनौ' (7.1.15) इति स्मात्स्मिनौ। तस्मान्नादेशा अमी क्रियन्ते। यद्येवम्, `तसु उपक्षये' (धा. पा. 1212) इत्यस्मात् तस्यन्नित्यत्र धातुरूपस्य पञ्चम्याः परस्य `तसेश्च' (5.3.8) इति तसिलादेशः प्राप्नोति? नैष दोषः; स्वार्थिकविज्ञानान्न भविष्यति। स्वार्थिका ह्येते तसिलादयः, तन्मध्ये तसिलादेशो विधीयमानस्तथा विज्ञायते यथा स्वार्थे क्रियामाणः, स्वार्थिकत्वं नातिक्रामति। `अपादाने चाहीयरूहोः' (5.4.45) इत्यनेन विहितस्तस्य स्वािर्थिकस्य साथाने भवंस्तसिलपि स्वार्थिक एव भवति। धातुस्तु प्रातिपदिकादर्थान्तरे वर्त्तत इति तदादेशो भवंस्तसिल् स्वार्थिको न भवति।।

8. तसेश्च। (5.3.8)
`कुत आगत' इति। `अपादाने चाहीयरुहोः' (5.4.45) इति परत्वात् तसौ कृते तस्यानेन तसिल्। ननु च कृतेऽपि तसिलि तदेव रूपम्, तत्किमर्थमादिश्यते? इत्याह--`तसेस्तसिल्ववचनम्' इत्यादि।।

9. पर्यभिभ्याञ्च। (5.3.9)

`सर्वोभयार्ते वर्त्तमानाभ्यामिष्यते' इति। तेनेह न भवति--परिषिञ्चिति, अभियातीति। अत्र चानभिदानं हेतुः.य अत वा--`सर्वस्य' (5.3.6) इत्यादेः सूत्रादन्यतरस्यांग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा। तेन सर्वोभयार्थ एव वर्त्तमानाभ्यां भवति, नान्यत्र।।

10. सप्तम्यास्त्रल्। (5.3.10)

11. इदमो हः। (5.3.11)

12. किमोऽत्। (5.3.12)
`क्व' इति। `क्वाति' (7.2.105) इति किमः क्वादेशः `न विभक्तौ तुस्माः (1.3.4) इति प्रतिषेधस्य `इवमस्थमुः' (5.3.24)) इत्युकारेणानित्यत्वस्य ज्ञपितत्वादित्संज्ञा तकारस्य। दानीमस्तु प्रतिषेधान्नास्तीत्संज्ञा; प्रयोजनाभावाच्च।।

13. वा ह च च्छन्दसि। (5.3.13)

14. इतराभ्योऽपि दृश्यन्ते। (5.3.14)
`पञ्चमीसप्तम्यपेक्षमितरत्वम्' इति। तदनन्तरमितरशब्दस्य ज्ञातत्वात्। अथ दृशिग्रहणं किमर्थम्, यावता `इतराभ्योऽपि' इत्येतावतैव सिद्धम्? इत्याह--`दृशिग्रहणम्' इत्यादि। प्रायिको विधिर्यता स्यादित्येवमर्थं वृशिग्रहणम्। तस्मिस्तु सति शिष्टप्रयोगेऽनुगम्यमाने यत्र दृश्यते तत्र भवति, नान्यत्रेत्येषोऽर्थो लभ्यते। तेन प्रायिकत्वं विधेः सिध्यति। `तेन' इत्यादि। दृशिग्रहणे तु सति यत्रेतराभ्यः शिष्टप्रयोगो दृश्यते ताभ्य एव तसिलादिभिर्भवितव्यम्। भवदादियोग एवेतराभ्यो दृश्यन्ते, तेनेतरत्रैव तद्विधानम्। यदि ह्यन्येभ्योऽपि तसिलादयो भवन्ति, पूर्वं पञ्चमीसप्तमीभ्यां विधानमनर्थकम्? नैतदस्ति; नियोगतो हि ताभ्यामिष्यते, इतराभ्यो भवदादियोगे। एतच्च पूर्वस्मिन् विधावस्मिश्च सत्युभयं लभ्यत इति कुत आनर्थक्यम्!।।

15. सर्वैकान्यकिंयत्तदः काले दा। (5.3.15)
`सप्तम्या इत्यनुवर्त्तते' इति। तस्याः स्वरितत्वात्। `न त्वितराभ्यः' इति। तद्विफर्ययात्। `त्रलादेरपवादः' इति। यतासम्भवम्। तत्र किंशब्दात् `किमोऽत्' (5.3.12) इति प्राप्तस्यात्प्रत्ययस्यापवादः। केषाञ्चिन्मतेन तरलोऽपि। तच्छब्दादपि `तयोदर्दाहिलौ च च्छन्दसि' (5.3.20) इति। शेषेभ्यस्तु त्रलः। `कदा' इति। किमः कादेशः।।

16. इदमो हिल्। (5.3.16)
`हस्यापवादः' इति। `इदमो हः' (5.3.11) इति प्राप्तस्य। `लकारः स्वरार्थः' इति। `लिति'(6.1.193) प्रत्ययात् पूर्वस्योदात्तत्वं यथा स्यात्। ननु च यथा इत इत्यत्र--`ऊडिदम्' (6.1.171) इत्यादिना विभक्तिस्वरो भवति, तथेहापि तेनैव भवितव्यम्? नैतदस्ति; तथा हि युक्तमित इत्यत्र यद्विभक्तिस्वरो भवतीति; तसिलो लित्त्वस्य परितः, अभित इत्यतर चरितार्थत्वात्, अस्य तु हिलो लित्करणमकृतार्थम्। तद्यदि विभक्तिस्वरेम बाध्येत तस्यानर्थक्यं स्यात्। तस्माल्लित्स्वर एव भवति।।

17. अधुना। (5.3.17)

18. दानीञ्च। (5.3.18)
दानीञ्चेति योगविभाग उत्तरार्थः--`तदो दा च' (5.3.19) इत्यत्र दानीमेव यथा स्यात्, पूर्वसूत्रविहितः प्रत्ययो मा भूदिति।।

19. तदो दा च। (5.3.19)
`अनर्थकम्' इति। वैचित्र्यार्थम्। अन्यस्याभावादनर्थकं वैचित्र्येण सार्थकमेव। `विहितत्वात्' इति। `सर्वैकान्य' (5.3.15) इत्यादिना।।

20. तयोर्दार्हिलौ च च्छन्दसि। (5.3.20)
`इदा'। `इदम इश्' (5.3.3)। तथा वर्णव्यत्ययेन दकारस्य धकारः। `इदानीं, तदानीं इति। दानीम्प्रत्ययस्योदाहरणम्।।

21. अनद्यतने र्हिलन्यतरस्याम्। (5.3.21)

तसिलादिषु प्राप्तेषु हिल्प्रत्ययो विधीयते। `कहि' इति। `किमः कः' (7.2.103)। `कदा, यदा, तदा' इति। `सर्वैकान्यकियत्तदः काले दा' (5.3.15)।।

22. सद्यः परुत्परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्यरपरेद्युरधरेद्युरुभयेद्युरुत्तेरद्युः। (5.3.22)
`समानेऽहनि सद्यः' इति। निमित्तनिमित्तिनोः समाने साधारणेऽहनि निपातनमेतत्। तद्यथा--सद्यः प्राणहरणं मर्मणि ताडनमिति । यस्मिन्नेवाहनि मर्मणि ताडनं तस्मिन्नेवाहनि प्राणरणमित्यर्थः।
`उदारी च' इति। उच्च आरिश्चेति उदारी।
`परस्मादेद्यवि' इति। परशब्दादेद्यविप्रत्ययो भवत्यहन्यभिधेये।।

23. प्रकारवचने थाल्। (5.3.23)
`सामान्यस्य [`सायास्य विशेषो भेदकः=प्रकारः'-काशिका]

24. इदमस्थमुः। (5.3.24)

25. किमश्च। (5.3.25)
`योगविभाग उत्तरार्थः' इति। `था हेतौ च' (5.3.26) इति वक्ष्यति, स किम एव यथा स्यात्, इदमो मा भूदिति।।

26. था हेतौ च च्छन्दसि। (5.3.26)

27. दिक्शब्देभ्यःसप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः। (5.3.27)
`दिग्देशकालेषु वर्त्तमानेभ्यः' इति। कथं पुनर्थे दिशां शब्दास्ते देशे काले वर्त्तन्ते? स्वभावात्। यथैव हि ते दिश स्वबावादेव वर्त्तन्ते, न हेत्वन्तरात्,; तथा देशकालयोरपि। यद्यवम्, त्रिषु वर्त्तमानाः कथं दिशा व्यपदिश्यन्ते--दिक्शब्देभ्य इति? कथं तर्हि व्यपदेष्टव्यम्, दिग्देशकालशब्देभ्य इति? नैतदस्ति; एवं हि व्यपदेशस्यैतत् फलम्--ऐन्द्र्यां दिशि निवसतीत्यत्र मा भूदिति। एतच्चान्यतमेनापि लभ्यत इत्यनेनैव व्यापदेशो युक्तः, येन व्यपदेशाल्लधु सूत्रं भवति। दिशा च व्यपदेशे लघु भवति, दिक्शब्दस्याल्पाच्तरत्वादिति दिशां तेन व्यपदेशः। एवमपि दिक्शब्दस्य दिशि वृत्तेः विशेषणमयुक्तम्, अवस्यं हि दिक्शब्दो दिशि वर्त्तते, तत्रैवं कर्त्तव्यम्--देशकालयोरिति? नैतदस्ति; एवं ह्यु च्यमाने सत्युपलक्षणमेव हि दिक्शब्दः स्यात्, प्रत्यस्तु देशकालवृत्तिभ्य एव स्यात्, न दिग्वृत्तिभ्यः। दिग्ग्रहणे तु तेभ्योऽपि भवति।
इह तिस्रो विभक्तयः, त्रयश्चार्था दिगादयः, तत्र साम्याद्यथासंख्येन भवितव्यम्--इति कस्यचिद्भ्रान्तिः स्यात्, अतस्तामपाकर्तुमाह--`यथासंख्यमत्र नेष्यते' इति। तत्कथमिहेकवचननिर्देशे कर्त्तव्ये बहुवचननिर्देशः? प्रत्येकं दिगादिवृत्तेर्बहुलविभक्त्यन्तात् प्रत्ययः कर्त्तव्य इति सूचनार्थः। एवञ्चायं बहुलविभक्त्यन्तात् प्रत्ययः कृतो भवति, यदि दिग्वृत्तेरपि सप्तमीपञ्चमीप्रथमान्तादेव भवति--देशवृत्तेरपि, कालवृत्तेरपि। अथ वा-`था हेतौ च' (5.3.26) इत्यतश्चकारोऽनुवर्त्तते, स च श्रुतिमेव समुच्चिनोति। तेन दिगादिवृत्तेः प्रत्येकं सप्तमीपञ्चमीप्रथमान्तात् प्रत्ययो भवति, न यतासंख्यम्! यथासंख्यं हि समुच्चयो विरुध्यतेत। अथ वा--`स्वरितत्वे सति यथासंख्यं भवति' इत्युक्तम्, न चेह यथासंख्यार्थं स्वरितत्वं प्रतिज्ञायेत, तेन यथासंक्यं न भविष्यति।
`पुरस्तावधस्तात्' इति। पूर्वाधरशब्दाभ्यामस्तातिः। `अस्ताति च' (5.3.40) इति वक्ष्यमाणेन यथासंख्यं पुर्, अध--इत्येतौ पूर्वाधरशब्दयोरादेशौ।
`ऐन्द्र्यां दिशि वसति' इति। ऐन्द्रीशब्दः सामान्येनेन्द्रसम्बन्धिवस्तुमात्रमाचष्टे, दिक्शब्दसन्निधौ तु दिशि वर्त्तते, तेन दिक्शब्द इति लोके न प्रसिद्ध इतदि न भवत्यतः प्रत्ययः। `पूर्वं ग्रामं गतः' इति। पूर्वशब्दोऽत्र ग्रामस्य देशात्मकत्वाद्देशे वर्त्तते, न त्वत्र सप्तम्यादिविभक्त्यन्तः, किं तु द्वितीयान्त। `पूर्वस्मिन् गुरौ वसति' इति पूर्वशब्दोऽत्र दिगाद्युपलक्षिते गुरौ वर्त्तते, न दिगादिषु।।

28. दक्षिणोत्तराभ्यामतसुच्। (5.3.28)
`अकारो विशेषणार्थः' इति। यद्यत्राकारो न क्रियते, तदा `षष्ठी तसर्थप्रत्ययेन' (2.3.30) इति सूत्रं कर्त्तव्यम्, एवञ्च सति तसिलोऽपि ग्रहणं स्यात्। ततश्च ततो हेतुनेत्यत्रापि तृतीयां बाधित्वा षष्ठी स्यात्। तस्मादकारो विशेषणार्थः कर्त्तव्यः। अथ यदा दक्षिणोत्तरशब्दौ दिशि वर्त्तेते, तदा टाप्श्रवणं मा भूदित्येवमर्थोऽकारः कस्मान्न भवति? `सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' (वा. 104) इति पुंवद्वचनेनैव टापो निवर्त्तितत्वात्। ननु चासत्यकारे प्रत्ययस्वरेम सिद्धत्वाच्चकारोऽपि नैव कर्त्तव्यः, तत्र, `एकानुबन्धकग्रहणे तु न द्व्यनुबन्धकस्य' (व्या. प. 52) इति तसिलो ग्रहणं न भविष्यति? एवमपि `प्रतियोगे पञ्चम्यास्तसिः' (5.4.44), `तेनैकदिक्'(4.3.112), `तसिश्च' (4.3.113) इत्यन्यतरग्रहणं स्यात्। तस्माद्विशेषणार्थश्चकारः कर्त्तव्यः।।

29. विभाषा परावराभ्याम्। (5.3.29)

30. अञ्चेर्लुक्। (5.3.30)
दिक्शब्दादित्यधिकारात्केवलस्य चाञ्चतेरदिक्शब्दत्वात् `अञ्चेः' इत्यञ्चूत्तरपदस्य निर्देशोऽयं विज्ञायते, अत एवाह--`अञ्चत्यन्तेभ्यः' इति। `दिक्शब्देभ्यः' इति। `प्राग्वसति' इति। प्रपूर्वादञ्चतेः `ऋत्विक्' (3.2.59) इत्यादिना सूत्रेण क्विन्, `अञ्चतेश्चोपसंख्यानम्' (वा. 336) इति ङीप्, `अचः' (6.4.138) इत्यल्लोपः, `चौ' (6.3.138) इति दीर्घः--प्राची इति स्थिते, अस्तातिः, तस्य लुक्, क्विन्प्रत्ययस्य कुः' (8.2.62) इति कुत्वम्। `प्रत्यक्' इति। प्रतीचीशब्दात् प्रत्ययः, स तु पूर्ववदुपपाद्यः।।

31. उपर्युपरिष्टात्। (5.3.31)
`रिल्रिष्टातिलौ च प्रत्ययौ निपात्येते' इति अस्तातेरपवादौ।।

32. पश्चात्। (5.3.32)
`आतिश्च प्रत्ययः' इति। अयमप्यस्तातेरपवादः। `दक्षिणपश्चादुत्तरपश्चात्' इति। दक्षिणापरस्यां दिशि वसतीति दक्षिणपश्चात् एवमुत्तरपश्चात्।
`अर्धोत्तरपदस्य च' इति अपरस्येति सम्बध्यते।
`विनापि पूर्वपदेन पश्चभावो वक्तव्यः' इति। अपरस्यार्द्धोत्तरपदस्येति प्रकृतेन सम्बन्धनीयम्। अत्र सर्वत्र वक्तव्यशब्दो व्याख्याने दर्त्तते। तत्रेदं व्याख्यानम्--उत्तरसत्रात् सिंहावलोकितेन चकारोऽत्रावतिष्ठते, स चानुक्तसमुच्चायार्थः। तेन दिक्पूर्वपदस्यापरशब्दस्य पश्चभाव इत्येवमादिकं कार्यं सिद्धं भवति।।

33. पश्च पश्चा च च्छन्दसि। (5.3.33)

34. उत्तराधरदक्षिणादातिः। (5.3.34)
उत्तरदक्षिणाभ्यां `दक्षिणोत्तराभ्यामतसुच्' (5.3.28) `एनबन्यतरस्यामदूरेऽपञ्चम्याः' (5.3.35), `दक्षिणादाच्' (5.3.36), `आहि च दूरे' (5.3.37), `उत्तराच्च' (5.3.38) इत्येभिर्योगैरतसुजादिषु प्राप्तेष्वधरादप्यस्तातावातिर्विधीयते, तस्यास्तातिर्बाध्यत एव। अतसुजादयस्तु वचनात्पक्षे भवन्त्येव। अत्र च यद्यप्युत्तरादीनां सप्तम्यादीनां च विभक्तीनां दिगादीनां चोपाधीनां त्रित्वम्, तथापि यथासंख्यं न भवति। कुतः? तदर्थस्य स्वरितत्वस्याप्रतिज्ञानात्। लध्वक्षरस्याधरशब्दस्यापूर्वनिपाताल्लक्षणव्यभिचारचिह्नाद्वाऽस्य लक्षणान्तरनिरपेक्षतां दर्शयन् यथासंख्यलक्षणमिह नापेक्ष्यत इति सूचयति। तेन विभक्तिभिस्तावद्यथासंख्यं न भवति। उपाधिभिस्तु दक्षिणशब्दस्य काले वृत्त्यसम्भवाच्च।।

35. एनबन्यतरस्यामदूरेऽपञ्चम्याः। (5.3.35)
`अदूरे चेदवधिमानवधेर्भवति' इति। कथं पुनरेवं विशेषो लभ्यते, यावता सूत्रेऽवधिशब्दो न श्रूयते, नाप्यवधिमान्? दिकशब्दानामवध्यपेक्षा प्रवृत्तिर्भवति। अवधिमानप्यवधिमपेक्ष्य भवतीति सामर्थ्यादनुक्तीऽप्येष विशेषो लभ्यत इति। `अधस्ताद्वसति' इति। `अस्ताति च' (5.3.40) इति वक्ष्यमाणेनास्तातौ परतोऽधरशब्दस्यादेशः।
`प्रागसेः' इति। `असि पुरधवश्चैषाम्' (5.3.39) इति वक्ष्यमाणः। केचिद्दिक्शब्दमात्रात् प्रत्ययं मन्यन्त इति तेषां मतेन पूर्वेण वसतीत्याद्यपि भवति। यदि दिक्शब्दमात्रात् प्रत्यो भवतीत्यञ्चात्यन्तादपि स्यात्? भवतु, `अञ्चेर्लुक्' (5.3.30) इति लुम्भविष्यति? नैतदस्ति; `मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते' (व्या. प. 10) इत्यस्तातेरेवात्रानेन लुक्, नान्यस्य। एवं तर्ह्यन्यतरस्यामिति व्यवस्थितविभाषेयम्। तेनाञ्चत्यन्तान्न भविष्यति।
पकारः `एनपा द्वितीया' (2.3.31) इति विशेषणार्थः, स्वरार्थश्च।।

36. दक्षिणादाच्। (5.3.36)
`चकारो विशेषणआरहथः' इति। असति हि तस्मिन् पश्चाशब्द आकारान्तो निपातित इति तेनापि योगे पञ्चमी स्यात्। स्वरार्थस्तु चकारो नोपपद्यते; प्रत्ययस्वरेणैव सिद्धत्वात्।।

37. आहि च दूरे। (5.3.37)

38. उत्तराच्च। (5.3.38)
`आजाही प्रत्ययौ भक्तः' इति। ननु चानन्तर्यादाहिरेव प्राप्नोति? नन; चकारोऽत्र क्रियते, स हि व्यवहितमप्याचं समुच्चिनोति। तेनाऽऽजपि भविष्यतीति।।

39. पूर्वाधरावराणामसि पुरधवश्चैषाम्। (5.3.39)
पूर्वादस्तातौ प्राप्तेस्तातावववारादपि विभाषातसुचीदमारभ्यते। अथ `एषाम्' इति किमर्थमिदमुच्यते, यावता येयं पूर्वादिषु षष्ठी सैव प्रत्ययं विधाय स्थाने षष्ठी विज्ञायते, सम्बन्धभेदाच्च षष्ठ्यर्थभेदः? सत्यमेतत्; तथापि सुखप्रतिपत्त्यर्थमेषामित्युक्तम्।।

40. अस्ताति च। (5.3.40)
ननु चासिना बधितत्वात् पूर्वादिभ्योऽस्तातिना न भवितव्यम्? इत्याह--`इदमेव' इत्यादि। गतार्थम्।।

41. विभाषाऽवरस्य। (5.3.41)

42. संख्याया विधार्थे धा। (5.3.42)
`प्रकारवचने च जातीयर्' (5.3.69) इति, तस्यायमपवादः। `विधा=प्रकारः' इत्यक्तः `प्रकारवचने थाल्' (5.3.23) इत्यत्र, स च द्रव्यगुणविशेषोऽप्यस्ति; तत्र यदि सोऽपि गृह्येत द्रव्यगुणयोर्लिङ्गसंख्याभ्यां यीगाद्वा प्त्ययान्तमलिङ्गमसंख्यं च न स्यात्। एवञ्च तस्याव्ययत्वं न स्यात्, तच्चेष्टम्; तथा हि--धाप्रत्ययोऽव्ययेषु पठ्यते--तसिलादिस्तद्धित एधाच्पर्यन्त इति। क्रियाविषये तु तस्मिन् गृह्यमाणे न दोषः; क्रियायाः सर्वदा लिङ्गसंख्याभ्यामयोगादित्येतत् चेतसि कृत्वाऽऽह--`स च' इत्यादि। क्रियाधातुवाच्यो विक्लेदनादिरर्थः, स च विषयोऽस्य स तथोक्तः. कथं पुनः सामान्योक्तौ विशेषस्य ग्रहणं लभ्यते? अर्थग्रहणस्य ह्येतदेव प्रयोजनम्--प्रकारविशेषणं यथा स्यादिति, अन्यथा हि `विधायाम्' इत्येवं हि ब्रूयात्। यदि तर्हि प्रकारः क्रियाविषयो गृह्यते, नवधा द्रव्यम् नदधा गुण इत्यत्र न प्राप्नोति? नैष दोषः? अत्रापि क्रियाऽव्याहर्त्तव्या। नवधा द्रव्यम्, नवधा गुण उपपाद्य विगृह्यते चेति।।

43. अधिकरणविचाले च। (5.3.43)

44. एकाद्धो ध्यमुञन्यतरस्याम्। (5.3.44)
`ऐकध्यं कुरु' इति। अधिकरणविचाल उदाहरणम्। ऐकध्यं भुङ्क्ते' इति। विधार्थे।
अत्र धाग्रहणमनुवर्त्तते, न च तत्र विध्यर्था वृत्तियुक्ता; पूर्वमेव विहितत्वात्। तस्मादनुवृत्तिसामर्थ्यात् स्थानित्वं धाप्रत्ययस्य विज्ञायत इत्याह--`प्रकरणादेव लब्धे' इति। धाप्रत्ययस्य स्थानित्व इति शेषः। किं पुनः कारणमसति धाग्रहणे विधार्थे विहितस्य न भवति? इत्याह--`अनन्तरस्यैव हि' इत्यादि। असति हि पुनर्धाग्रहणे `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या. प. 19) इत्यधिकरणविचालार्थे यो विहितस्तस्यैव स्यात्, न तु विधार्थे यो विहितस्तस्य। पुनर्धाग्रहणे तु सति धामात्रस्यादेशः सिद्धो भवति।।

45. द्वित्र्योश्च धमुञ्। (5.3.45)
`मतिद्वैधानि' इति। ननु च स्वार्थिकाः प्रकृतिधरह्यानानुवर्त्तन्त इति लिङ्गसंख्याभ्यामत्र न भवितव्यम्? नैव दोषः; अतिवर्त्तन्ते हि कदाचित् स्वार्थिकाः प्रकृतिधर्मान् यथा--चत्वार एव वर्णाश्चातुर्वर्ण्यमिति।।

46. एधाच्च। (5.3.46)

47. याप्ये पाशप्। (5.3.47)
याप्यशब्दोऽयं गमयितव्ये वर्त्तते--ग्रामान्तरात् याप्य इति; अस्त्यशक्यप्रतीकारे--याप्यो रोग इति, अस्ति कुत्सिते--याप्योऽयमिति, कुत्सित इति गम्यते। पाशप्प्रत्ययान्तात् कुत्सित एव प्रतीयत इति तदभिधायिन एव याप्यशब्दस्येवं ग्रहणं युक्ततम्। अत एवाह--`याप्यः कुत्सित इत्युच्यते' इति याप्यन्ते=अपनीयन्ते तस्माद्गुणा इति याप्यः, `कृत्यल्युटो बहुलम्' (3.3.113) इत्यपादाने कृत्यः।
`तत्र कस्मान्न भवति' इति। यद्यप्यसौ व्याकरणे प्रवीणः तथापि दुःशीलत्वाद्भवितव्यमेव तत्रेत्यभिप्रायः। `यस्य' इत्यादि। गुणो विशेषणम् द्रव्यं विशेष्यम्, तत्र द्रव्ये यद्यपि बहवो गुणाः सन्ति, तथापि यस्य गुणस्य भावे द्रव्ये शब्दो निविशते वर्त्तते प्रत्यासत्तेस्तस्यैव कुत्सायां शब्देन भवितव्यम्; न तु वैयाकरणस्य दुःशीलत्वं प्रवृत्तिनिमित्तम्। किं तर्हि? व्याकरणस्य परिज्ञानम्, अध्ययनं वा। न चेह दुःशीलत्वेन भवितव्यं प्रत्ययेन।।

48. पूरणाद्भागे तीयादन्। (5.3.48)
`पूरणप्रत्ययो यस्तीयः' इति। `तस्य पूरणे डट्' (5.2.48) इति पूरणाधिकारे विहितत्वात्, पूरणाभिधेयत्वाद्वा। उपचारेम प्रत्योऽपि तीयः पूरण इत्युच्ये।

`भागे' इति। अंश इत्यर्थः। किमर्थं पुनरिदम्, यावता कृतेऽप्यनि रूपं तदेव? इत्याह--`स्वरार्थं वचनम्'इति। विभागे नित्स्वरेणाद्युदात्तं यथा स्यात्। `पूरणग्रहणमुत्तरार्थम्' इति। उत्तरत्र पूरणप्रत्ययान्तात्प्रत्ययो यथा स्यात्। तस्य च व्यवच्छेदाय क्रियमाणं पूरणमिहाप्यर्थवत् स्यात्, स च नास्तीति नेहार्थता तस्योपपद्यते। ननु च `मुखपार्श्वतसेरीयः', (वा. 460) `पार्श्वतीयः' इत्यपूरणोऽपि सोऽस्ति? इत्यत आह--`मुखतीयादिरनर्थकः' इति। अर्थवद्ग्रहणपरिभाषया (व्या.प. 1) अर्थवानिह तीयो गृह्यते, न च मुखतीयादिरनर्थवान्। अतः सत्यपि पूरणग्रहणे तस्य ग्रहणंन भविष्यतीति भावः।।

49. प्रागेकादशभ्योऽच्छन्दसि। (5.3.49)

50. षष्ठाष्टमाभ्यां ञ च। (5.3.50)
यथासंख्ये हि षष्ठादन्यथा प्राप्तं चेत्यन्। न च पूर्वेणैव सिद्ध इति षष्ठग्रहमनर्थकं स्यात्। तस्मादुभयाभ्यामुभयं भवति।।

51. मानपश्वङ्गयोः कन्लुकौ च। (5.3.51)
चकाराद्यथाप्राप्तं चेति।।

52. एकादाकिनिच्चासहाये। (5.3.52)
`आकिनिचः कनो वा लुग्विज्ञायते' इति। प्रत्यासत्तेः। न तु प्रकारणान्तरविहितस्य; विप्रकर्षात्। `स च' इत्यादि यदि नित्यः स्यात् तद्विधानमनर्थकं स्यात्। तस्माद्विधानसामर्थ्यात् पक्षे भवति।
किं पुनः कारणमसहायग्रहणं संख्याशब्दनिरासार्थं क्रियते? इत्याह--`तदुपादाने हि' इत्यादि। असत्यसहायग्रहणे संख्यावाचिनोऽप्येकशब्दस्य ग्रहणं स्यात्। तस्मिंस्तु सति द्विबह्नोर्न स्यात्। न हि द्वयोर्बहुषु वा चैकत्वसंख्या विद्यते। असहायता तु शतस्यापि भवति; तुल्यजातीयान्यस्याभावात्--शतमसहायमिति। तेना सहायार्थस्य ग्रहणे द्विबह्वोरपि प्रत्ययः सिध्यति। अथ कस्मादाकिनिज्वधीयते, न अकनिजित्येवोच्येत, अत्रापि सवर्णदीर्घत्वेनेष्टं सिध्यत्येव? न सिध्यति; `अतो गुणे' (6.1.97) पररूपत्वम्, यस्येति (6.4.148) लोपश्च प्राप्नोति। अकारोच्चारणसामर्थ्यान्न भविष्यति? नैतदस्ति; अस्ति ह्यकारोच्चारणस्य प्रयोजनम्। किम्? भसंज्ञायामन्यः पदसंज्ञानिबन्धनोऽवग्रहो मा भूदिति। तस्मादाकिनिजेव विषेयः।।

53. भूतपूर्वे चरट्। (5.3.53)
किमर्थं पुनरेतौ समानार्थो शब्दावुपदिश्येते, नान्यतर एवोपदिश्येत? नैवं शक्यम्; इह ह्यतिक्रान्तकालविशिष्टेऽर्थे वर्त्तमानात् प्रत्यग्रहमिष्यते, स चातिक्रान्तः कालोऽन्यतरोक्तौ नैव गृह्यते। तथा हि--भूतशब्दो वर्त्तमानेऽप्यर्थे वर्त्तते, यथा--भूतवानिति, पूर्वशब्दस्तु दिग्देशयोरपि। तस्मादन्यतरोक्तावतिक्रान्तकालो न प्रतीयते। अत एवाऽऽह--`भूतपूर्वशब्दोऽतिक्रान्तकालवचनः' इति। अथ चकारस्य `चुट्' (1.3.7) इतीत्संज्ञा कस्मान्न भवति? अनित्यत्वात्तस्य विधेः। अनित्यत्वं तु तत्रैव प्रतिपादितम्।।

54. षष्ठ्या रूप्य च। (5.3.54)
इह षष्ठ्यन्तं यत्तद्विशेषणं परार्थत्वादप्रधानम्, इतरत् पुनस्तेनैवोपक्रियमाणत्वाद्विशेष्यं प्रधानम्। प्रधानेन च कार्यसम्प्रत्यय इतदि यता षष्ठ्यन्तात् प्रत्यविधाने सम्प्रतति षष्ठ्यन्तप्रतियोगिनि प्रधाने प्रत्ययो विज्ञायतो, म प्रकृत्यर्थे; तथा भूतपूर्वग्रहणं तस्यैव ज्ञायते, न प्रकृत्यर्थस्येत्येतदालोच्याऽऽह--`षष्ठ्यन्तात्' इत्यादि। प्रत्ययार्थस्तु षष्ठ्यन्तस्य यः प्रतियोगी स वेदितव्यः।।

55. अतिशायने तमबिष्ठनौ। (5.3.55)
`अतिशायनम्' इति। ल्युट्। यद्यपि शेतिः केवलः स्वप्ने वर्त्तते, तथाप्यतिपूरह्वस्य प्रकर्षे वृत्तिः, अत एवाऽऽह--`प्रकर्षः' इति। ननु चातिशयनमिति भवितव्यम्? इत्याह--`निपातनाद्दीर्घत्वम्' इति। निपातनं त्वतिशायनशब्दस्य कथम्? साधुत्वं विज्ञायते इत्येवमर्थम्। `प्रकृतिविशेषणं चैतत्' इति। प्रत्ययाशङ्कां निराकरोति। प्रकृत्यर्थविशेषणं स्वार्थिकानां द्योत्यं भवतीति न वाच्यम्; तस्य प्रकृतिवाच्यत्वाकत्।
`पटिष्ठः, लघिष्ठः' इति। `तुरिष्ठेमेयस्सु' (6.4.154) इति टिलोपः। `गरिष्ठः' इति। `प्रियस्थिरस्फिरोरुबहुलगुरु' (6.4.157) इत्यादिना गुरुशब्दस्य गरादेशः।
`प्रकर्षप्रत्ययान्तादपरेण प्रत्ययेन न भवितव्यम्, एकेनैव प्रत्ययस्य द्योतितत्वात्' इति यो मन्यते, तं प्रत्याह--`यदा च' इति। यत्र प्रथमे प्रकर्षे आतिशायनिको विहितः'; तत्र तेनैव द्योतितत्वाद्द्वितीयो मा भूत प्रकर्षप्रत्ययः। प्रकर्षान्तरत्वे आतिशायनप्रत्ययान्ताद्युक्तमेवापरेणातिशायिकेन प्रत्ययेन भवितुम्, तदद्योतितत्वादिति भावः। इष्ठनि परतः `प्रशस्यस्य श्रः' (5.3.60), पूर्वेण सह `आद्गुणः' (6.1.87)। इष्ठन्प्रत्यान्तात् तमप्प्रकर्षप्रत्ययः। अत्र प्रतियोग्यपेक्षो यः प्रकर्षः पूर्वस्मात् प्रकर्षात् स प्रकर्ष इष्ठन्प्रत्ययेन द्योतितः। ननु च नास्यातिशायिकस्य विधायकं वाक्यमस्ति, येन तस्मिन् विहिते

तदन्तादपरः प्रकर्ष आतिशायानिको विधीयेत, इदमेव ह्येकं वाक्यम्, तत्रानेनैव विधीयमाने प्रकर्षप्रत्ययो तदन्तायाः प्रकृतेरसम्भव इत्ययुक्त आतिशायिकादपरस्यातिशायिकस्य भावः? नैष दोषः; इह विधीयमानप्रतत्ययभेदाद्द्वे एते वाक्ये, तत्रैकेनेष्ठन् विधीयते, अपरेण तु तदन्तात् तमप्।।

56. तिङश्च। (5.3.56)

`पचतितमाम्' इति। `किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' (5.4.11) इत्याम्।

`गुणवचने' इत्यादि। इष्ठनोऽनुदाहरणे हेतुः। `अजादी गुणवचनादेव' (5.3.58) इति नियम इति, तत एव तेन भवितव्यम्। न च तिङन्तो गुणवचनः, अतो नासावुदाह्रियते।।

57. द्विवचनविभज्योपपदे तरबीयसुनौ। (5.3.57)

`द्वयोरर्थयोर्वचनं द्विवचनम्' इति। एतेनान्वर्थस्य द्विवचनस्य ग्रहणम्, न पारिभाषिकस्येति दर्शयति यदि हि पारिभाषिकं द्विवचनं, गृह्येत, `अस्माकं च देवदत्तस्य देवदत्तोऽभिरूपतरः इत्यत्र प्रत्ययो न स्यात्; पारिभाषिकतस्य द्विवचनस्याभावात्। अन्वर्थस्य तु ग्रहणे सति भवति द्व्यर्थतोपपदस्य। तथा हि--अस्माकमित्यनेनैकोऽर्थ उच्यते, एकस्मिन्नेवार्थे `अस्मदो द्वयोश्च' (1.2.59) इति बहुवचनस्य विधीनात्। देवदत्तस्येत्यनेनापि द्वितीयोऽर्थ उच्यत इति भवत्येव तदन्वर्थद्विवचनमुपपदम्। तदेवमन्वर्थस्य ग्रहणे सर्वत्र सिध्यतीति तस्येदं ग्रहणं युक्तमिति मन्यते। `विभक्तव्यः' इति। पृथक् कर्त्तव्य इत्यर्थः। यः पुनरतिशय्यमानस्तस्योपपदत्वम्, नातिशयितुः; ततः प्रत्यविधानात्। ननु च `ऋहलोर्ण्यत्' (3.1.124) इति ण्यति कृते विभाग्य इति भवितव्यम्, कथं विभज्य इति निर्देश उपपद्यते? इत्याह--`निपातनाद्यद्भवति' इति। इह द्वे उपपदे, एवं प्रकृती च प्रत्ययावपि द्वावेव, ततश्च यथासंख्येन भवितव्यमिति कस्यचिद्भान्तिः स्यात्, अतस्तन्निरासार्थमाह--`यथासंख्याम्'चारचिह्नात्। स हि लक्षणान्तरनिरपेक्षतां दर्शयन् यथासंख्यलक्षणमपीह नापेक्षेतेति सूचयति।

`पटीयान् इति। पूर्ववट्टिलोपः, `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः, हल्ङ्यादिसंयोगान्तलोपौ। (6.1.68; 8.2.23)।

`माथुराः पाटलिपुत्रकेभ्य आढ्यतराः' इति `पञ्चमी विभक्ते' (2.3.42) इत्यनेन पञ्चमी। पाटलिंपुत्रकेभ्य इत्येदत्र विभज्योपपदम्, पाटलिपुत्रका हि माथुरेभ्यो विभज्यन्ते=पृथक् क्रियन्ते।

ननू चैतदपि `द्विवचनोपपदे' इत्येव सिद्धम्, अस्ति ह्यत्र द्विवचनमुपपदम्, तथा हि--माथुराणामेको राशिः, अपरः पाटलिपुत्रकाणाम्, तौ च द्विवचनेनोच्येते, तस्माद्विभज्यग्रहणमनर्थकम्? नैतदस्ति; यद्यप्यत्र राश्यपेक्षा द्व्यर्थताऽस्ति, तथापि नासौ शब्देनोपादीयते। किं तर्हि? अवयवभेदः। अत एव माथुराः पाटलिपुत्रकेभ्य इति बहुवचनम्। इह राश्यपेक्षापि द्व्यर्थता नास्तीति--साङ्काश्यकेभ्यः पाटलिपुत्रकेभ्यश्च माथुराः सुकुमारतरा इति। तस्माद्विभज्यग्रहणमपि कर्त्तव्यम्।।

58. अजादी गुणवचनादेव। (5.3.58)

`पाचकतरः' इति। कर्तृशक्तिमतो द्रव्यस्याभिधानाद्द्रव्यवचनोऽयं पाचकशब्दः।

अथैवकारः किमर्थः, यावता सिद्धे विधिरारभ्यमाणो विनापि तेन नियमार्थो भवति?इत्याह-`एवकारः' इत्यादि। असति ह्येवकारे विपरीतमवषारणं विज्ञायते--अजादी एव गुणवचनादिति, ततश्च यत एवकारस्ततोऽन्यत्रावधारणमिति प्रकृतिनियमः स्यात्। एवं च गुणवचनस्याजाद्योनियतत्वात् ततस्तरबादिर्न स्यात्। एवकारे तु प्रकृत्यनन्तरमुच्चार्यमाणे सति प्रत्ययार्थनियमोऽयं भवति न प्रकृतिनियम इति पटुतरः, पटुतम इति सिद्धं भवति। एतयोरपि सिद्ध्यर्थं `गुणवचनादिष्ठन्नीयसुनौ' इति सूत्रं न कृतम्। तदा विध्यर्थत्वादेतौ तरप्तमपोरपवादत्वाद्बाधकाविति तयोरभावे पटुतरः, पटुतम इति न सिध्येत्।।

59. तुच्छन्दसि। (5.3.59)

`करिप्ठः' इति। कर्त्तृशब्दात् तृन्नन्तादिष्ठन्, `तुरिष्ठेमेयस्सु' (6.4.154) इति तृशब्दलोपः। `दोहीयसी' इति। दोग्ध्रीशब्दात् तृन्नन्तादीयसुन्, तृशब्दस्य लोपे कृते निमित्ताभावाद्घत्वादिनिवर्त्तते, `उगितश्च' (4.1.6) इति ङीप्।।

60. प्रशस्यस्य श्रः। (5.3.60)

ननु चाजीदी इति प्रथमान्तम्, तत्कथमजाद्योः परत आदेशो लभ्यते? इत्याह--`अजादी' इतचि। `तद्विषयः' इति। स प्रशस्यशब्दो विषयो यस्य स तद्विषयः। `अजादी गुणवचनादेव' (5.3.58) इतत्यनेन यो नियमः स तद्विषये न प्रवर्त्तत इति दर्शयति।

`एवमुत्तरेष्वपि' इति। `वृद्धस्य च' (5.3.62) इत्येवमादिषु। अयमनयोः अयमनयोः श्रेयानिति द्विवचनोपपद ईयसुन् अयमस्मात् श्रेयानिति विभज्योपपदे। पूर्वत्र निर्धारणे षष्ठी (2.3.41), उत्तरत्र `पञ्चमी विभक्ते' (2.3.42) इति पञ्चमी।।

61. ज्य च। (5.3.61)

योगविभागो यथासंख्यनिवृत्त्यर्थः, उत्तरार्थश्च। उत्तरत्र वृद्धशब्दस्य ज्यादेश एव यथा स्यात्, श्रादेशो मा भूविति।।

62. वृद्धस्य च। (5.3.62)
`वृद्धशब्दस्य' इति। `वृद्ध' इत्येतस्य शब्दस्येत्यर्थः। एतेन `वृद्धस्य' इति स्वरूपग्रहणं दर्शयति। ननु च वृद्धशब्दश्च संज्ञा कृता--
`वृद्धिर्यस्याचामादिस्तद्वृद्धम्' (1.1.73) इति, अतस्तत्प्रत्यायितस्यैव संज्ञिनो ग्रहणं न स्वरूपस्य, `स्वं रूपं शब्दस्याशब्दसंज्ञा' (1.1.68) इति वचनात्? नैष दोषः, `प्रशस्यस्य' इत्येतदिहानुवर्त्तते, तेन वृद्धशब्दो विशेष्यते--प्रशस्यस्य वृद्धस्येति। स्वरूपग्रहणे वयोऽधिके च शब्दार्थे प्रशस्यता युज्यते, न पारिभाषिकग्रहणे। अथ वा--स्थानेऽन्तरतमपरिभाषया (1.1.50) ज्यशब्दस्य योऽन्तरतमः स एव स्थानो विज्ञायते, अन्तरतमश्च तस्य वृद्धशब्द एव, तेन तस्यैव ग्रहणं युक्तम्। `तयोश्च' इत्यादि। यथा `प्रशस्यस्य श्रः' (5.3.60) इत्यत्र नियमाभावेनाजाद्योः प्रत्यययोः सत्त्वं ज्ञापितम्, तथेहापि ज्ञाप्यते। नियमाभावस्त्वजाद्योः परतः पूर्ववदादेशविषानादेव वेदितव्यः।।

63. अन्तिकबाढयोर्नेदसाधौ। (5.3.63)
`निमित्त्योः' इत्यादि। निमित्तौ प्रत्ययौ, तयोः परत आदेशविधानात्। कस्मात् पुनरिष्यमाणो न भवति? अल्पाच्यतस्य परनिपातात्। स हि लक्षणान्तरानपेक्षतामाचष्टे। तेन यथासंख्यलक्षणमपीह नापेक्ष्यते। यद्येवम्, स्थान्यादेशयोरपि यथासंख्यं न प्राप्नोति? मा भूद्यथासंख्यम्, आन्तरतम्याद्व्यवस्था भविष्यति। ननु च व्यवस्थाकारि चेल्लक्षणान्तरं नापेक्ष्यते, स्थानेऽन्तरतमपरिभाषापि (1.1.50) न प्राप्नोति? नैतदस्ति; निर्वेशान्यथात्वं हि निर्देशकृता व्यावस्था नास्तीत्येतदेव बोधयति, या त्वर्थकृता व्यवस्था तां न निवर्त्तयति। अपि चादेशप्रतिपत्तये `षष्ठी स्थाने योगा' (1.1.49) इत्येषा परिभाषा नियोगतोऽपेक्षणौया। तच्छेषभूता `स्थानेऽन्तरतमः (1.1.50) इति परिभाषा कथं शक्या नापेक्षितुम्।।

64. युवाल्पयोः कनन्यतरस्याम्। (5.3.64)
अत्रापि निमित्तयोर्यथासंख्यं नेष्यते, तस्य ह्यभावः `अजाद्यदन्तम्' (2.2.33) इत्यल्पशब्दास्य पूर्वनिपाते परनिपाताल्लक्षणानपेक्षाच्चिह्निल्लभ्यते, युवेति स्वरूपगरहणमिष्यते, न जीवत्त्वं वंशस्य। कस्मात्? इहापि `प्रशस्यस्य' (5.3.60) इत्येतदनुवर्त्तते, तेन युवशब्दो विशेषयितव्यः--प्रशस्यस्य यून इति। स्वरूपग्रहणे सर्वलोकाभिमतयौवनाख्यवयःसम्बन्धे शब्दार्थे प्रशंसोपपद्यते, न पारिभाषिकग्रहणे। अथ वा--स्थानेऽन्तरतमपरिभाषया (1.1.50) कन्नित्यादेशस्य योऽन्तरतमः स एव स्थानिति विज्ञायते, अन्तरतमश्च युवशब्द एव। तस्मात् स्वरूपस्यैव ग्रहणं युक्तम्। `अन्यतरस्यां' ग्रहणमिहाल्पशब्द एव प्रयोजयति, न युवशब्दः, तस्य विनापि तेन विकल्पः सिद्ध एव; `स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः' (6.4.156) इति वचनात्। न हि नित्य आदेशे यणादेः परस्य लोपः सम्भवति, नापि पूर्वभागो गुणभाक्। `यविष्ठः, यवीयान्' इति। स्थूलदूरादिसूत्रेण (6.4.156) यणादेः परं लुप्यते, पूर्वस्य च गुणो भवति।।

65. विन्मतोर्लुक्। (5.3.65)
मतुपा साहचर्यात् मत्वर्थीय एव विनिप्रत्ययो गृह्यते--`तपः सहस्राभ्यां विनीनी' (5.2.102), `अस्मायामेधास्रजो विनिः' (5.2.121) इति; आभ्यां चैतदेव लुग्वचनमजाद्योभविं ज्ञापयति। `स्रग्विणौ'। इति। अस्मायादिसूत्रेम (5.2.121) विनिः। `स्रजिष्ठः' इति। `प्रकृत्यैकाच्' (6.4.163) इति प्रकृतिभावाट्टिलोपाभावः।।

66. प्रशंसायां रूपप्। (5.3.66)
`स्वार्थिकाश्च' इत्यादि। प्रकृत्यर्थविशेषणं प्रसंसादि, तस्य द्योतकाः स्वार्थिका भवन्ति, न त्वथन्तिरस्य वाचकाः।
यदि प्रशंसायां वर्‌त्मानाद्रूपब्विधीयते, निन्दायां वर्त्तमानान्न प्राप्नोति-वृषषलरूपोऽयम्, चौररूपोऽयमिति। वृषलादयो हि शब्दाः सदा निन्दावचनाः; न कदाचित्प्रशंसायां वर्त्तन्ते, यथा काकादयः शब्दाः? इत्यत आह--`प्रकृत्यर्थस्य' इत्यादि। प्रकृत्यर्थस्य वैशिष्ट्यं परिपूर्णत्वम्, तस्मिन् सति प्रशंसा भवति। एवञ्च यदा वृषलादिशब्दानामपि पदार्थस्य परिपूर्णता भवति, तदा ते प्रशंसायां वर्त्तन्ते इति तेभ्योऽपि प्रत्ययो भवति। पलाण्डुभक्षणेन सुरापाणेन च प्रकृत्यर्थस्य परिपूर्णता भवति, तदा ते प्रशंसायां वर्त्तन्ते इति तेभ्योऽपि प्रत्ययो भवति। पलाण्डुभक्षणेन सुरापाणेन च प्रकृत्यर्थस्य परिपूर्णतां दर्शयति। वृषलशब्दस्य हि शूद्रो वाच्यः। स यदा पलाण्ड्वादिकमपि साधुजनगहितमभ्यवहरति तदा प रपूर्णत्वं तस्य शूद्रत्वम्। शूद्रः=सर्वाशी, सर्वविक्रयीति। चौरशब्दार्थस्यापि सुगुप्तवस्त्वपहारेण परिपूर्णता भवति।
ननु च `स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्त्तन्ते' (व्या.प.74) इति प्रकृत्यर्थस्य ये लिङ्गवचने ते स्वार्थिकप्रत्ययान्तस्यापि भवत इति भावः। ततश्च पचतोरूपम्, पचन्तिरूपमित्यत्र द्विवचनबहवचनाभ्यां भवितव्यम्? इत्यत आह--`क्रियाप्रधानम्' इत्यादि। आख्यातस्य यद्यपि क्रिया साधनञ्चोभयं वाच्यम्, तथापि तस्य क्रियैव प्रधानमर्थः। यश्च प्रधानं प्रकृत्यर्थस्तस्यैव लिङ्गवचनं स्वार्थिकैरनुवर्त्तयितुं युक्तम्। क्रियाप्रधानमेकैव च क्रिया। तेन रूपप्रत्ययान्तादाख्याताद्द्विवचनबहवचने न भवतः। नपुंसकलिङ्गमपि तर्हि न स्यात्, क्रियाया अलिङ्गत्वात्? इत्यत आह--`नपुंसकलिङ्गं तु' इत्यादि। तत्रैव हेतुमाह--`लोकाश्रयत्वाल्लिङ्गस्य' इति। यदि तर्हि ह्योका क्रिया, पचतः, पचन्तीति द्विवचनबहुवचने न सिध्यतः? नैष दोषः; यद्यपि ह्येका क्रिया,

साधनं ह्यनेकम्, अतस्तदाश्रये द्विवचनबहुवचने भविष्यतः। रूपप्रत्ययान्तात् तर्हि स्याताम्? तिङन्तेनोक्तत्वान्न भविष्यतः। एकवचनं तु भविष्यति; तस्यौत्सर्गिरकत्वात्, `एकवचनमुत्सर्गतः करिष्यते' इति वचनात्।।

67. ईषदसमाप्तौ कल्पब्देश्यदेशीयरः। (5.3.67)

68. विभाषा सुपो बहुच् पुरस्तात्तु। (5.3.68)
विभाषाग्रहणेनेह बहुच् सम्बध्यते, न पुरस्तादित्येतत्; तेन बहुचः पूर्वत्वं न विक्ल्प्यत इति नित्यमेव तद्भवति, अत एवाह--`स तु पुरस्तादेव' इति। एवकारेम तुशब्दस्यावधारणार्थतां दर्शयति। यदि पुनस्तुशब्दोऽ वधारणार्थो न क्रियते, ततो न ज्ञायते--किं विभाषाग्रहणेन बहुच् सम्बध्यते, अथ पुरस्तादितयेतदिति! तु शब्देन त्ववधारणार्थेन पुरस्तादितत्येतस्मिन् नियमिते पारिशेष्याद्विभाषावचने बहुजेवाभिसम्बध्यत इति विज्ञायते।
`चित्करणमन्तोदात्तार्थम्' इति। कस्य पुनरन्तोदात्तत्वं चित्कराद्भवति? सप्रकृतेः समुदायस्य;`चितः सप्रकृतेर्ब ह्वकजर्थम्' (वा.6.1.163) इति वचनात्। यद्येवम्, पटव इति सुबन्तादुत्पत्तौ जस उदात्तत्वं प्राप्नोति? नैष दोषः; बहुच्युत्पन्ने सति `अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (1.2.45) इति प्रातिपदिकसंज्ञायां कृतायाम्, `सुपो धातुप्रातिपादिकयोः' (2.4.71) इति सुब्लुक् तावत् क्रियते, तस्मिन् कृते पश्चादुदात्तत्वं क्रियमाणं पटुशब्दे य उकारस्तस्य भवति। यस्तु पुनः प्रातिपदिकसंज्ञायां कृतायां सुब्लुकि च कृते अन्यो जस् उत्पद्यते, तस्योदात्तत्वं नाशह्कनीयम्, न ह्यसौ प्रकृत्येकदेशः। ननु चार्थवत्समुदायानां समासग्रहणं नियमार्थमिति बहुच्पूर्वस्य प्रातिपदिकसंज्ञया न भवितव्यम्? नैष दोषः; तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः? यथाजातीयकानां समासः। कथञ्जातीयकानां समासः? भदसंसर्गवताम्। भेदसंसर्गौ च पृथगर्थानामेव भवतः। द्योतकानाञ्च पृथगर्थवत्ता न सम्भवति। अथ कस्मात् सुब्लुक् तावत् क्रियते, पश्चादन्तोदात्तत्वम्, यावता परत्वादन्तोदात्तत्वे नै व पूर्वं युक्तं भवितुम्? नैतदस्ति; नित्यो हि लुक्, कृताकृतप्रसङ्गित्वात्। स हि कृतेऽप्यन्तोदात्तत्वे प्राप्नोति, अकृतेऽपि; अन्तोदात्तत्वं त्वन्यस्य लुकि कृते प्राप्नोति। अन्यस्याकृते शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति, तस्माल्लुगेव तावत् क्रियते।
`बहुगुडा द्राक्षा' इति। कथं पुनरत्रेषदसमाप्तिः, यावता गुडशब्देन गुडजातिरुच्यते, तदाधारो वा द्रव्यम्। तत्र जातिस्तावदेका, निरवयवा चेति सर्वस्मिन्नाश्रये समाप्ता, द्रव्यमपि यत् तया सम्बद्धं तत् सर्वतः पूर्णत्वात् समाप्तमेव। तस्मादीषदसमाप्तिरयुक्तमिह विशेणम्, असम्भवात्? सामानाधिकरण्यं च बहुगुडा द्राक्षेति द्राक्षाशब्देन न प्राप्नेति, तस्यार्थान्तरत्वात्? स्त्रीलिङ्गमपि `स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्त्तन्ते' (व्या. प. 74) इति नोपपद्यते? नैष दोषः; इह शब्दादुच्चारितादद्वयं प्रतीयते--शब्दोऽर्थः, जातिर्द्रव्यञ्च; अभिधेयसम्बन्धेनाशब्दार्थभूता अपि गुणाः, यत्रैतदुभयमस्ति तत्र समाप्तिः। यत्र त्वन्यतरन्नास्ति तत्रेह गुडशब्दो गुडजातिहीने माधुर्यादिगुणहीने वा द्रव्ये वर्त्तते इत्युपपद्यत ईषदसमान्तिः सामानाधिकरण्यमप्युपद्यत एव। कथम्? यदा तावज्जातिहीने केनचित् साधर्म्येण द्राक्षादिशब्दाभिधेये वर्त्तित्वा गुडशब्दः प्रत्ययमुत्पदयत, तदा द्राक्षाशब्देन सामानाधिकरण्यं भवति; उभयोरेकार्थवृत्तित्वात्। यदा तु गुणहीने गुडजीतीय एव, तदापि सामानाधिकरण्यम्, गौर्वाहीक इति यथा, तथा भविष्यति गुणहीनोऽपि गुडशब्दः। गुडो बहुगुडशब्देनोत्त्यते, तेन च तुल्या द्राक्षेति साऽपि बहुगुडशब्देनाभिदायिष्यते। स्त्रीलिङ्गमपि चोपपद्यते; तस्य लोकाश्रयत्वात्। अपि च `स्वार्थिकाः प्रकृतेलिंङ्गवचनान्यनुवर्त्तन्ते (व्या. प. 74) इति प्रायिकमेतत। तेन कदाचिदतिवर्त्तन्तेऽपि, यथा कुटीरः, शमीर इति। `कुटीशमीशुण्डाभ्यो रः' (5.3.88) इति स्वार्थिकश्च।
`विभाषावचनात्' इत्यादिना विभाषाग्रहणस्य प्रयोजनमाचष्टे। असति हि विभाषाग्रहणे तिङन्तेषु कृतावकाशाः कल्पबादयो बहुचा सुबन्ताद्विशेषविहितेन बाध्येरन् तस्मिस्तु सतदि पक्षे तेऽपि भवन्ति। ननु च भिन्नदेशेन बहुचा नास्ति तेषां विरोधः, तत्कुतो बाधा? असत्यां वा बाधायां कृतेऽपि बहुचि तैर्भवितव्यमेव, परदशस्यानवष्टब्धत्वात्? नैतदस्ति; न ह्यवश्यं देशकृत एव सामान्यविशेषयोर्विरोधो भवति, किं तर्हि? अर्थकृतोऽपि। बहुचश्च कल्पबादिभिः समानोर्थ इति बहुचा द्योतितत्वात् तस्यार्थस्य कल्पबादयो न भवविष्यन्ति। न हि द्योतिते पुनर्द्योतनमस्ति, यथाभिहिते नाभिधातव्यम्।
अथ सुब्ग्रहणं किमर्थम्, यावता प्रातिपदिकग्रहणमनुवर्त्तते, न च प्रातिपदिकात् सुबन्ताद्वा बहुच उत्पत्तौ कश्चिद्विशेषोऽस्ति? अत आह--`सुब्ग्रहणम्' इत्यादि। असति हि सुब्ग्रहणे `तिङश्च' (5.3.56) इति प्रकृतत्वात् ततो हि प्रत्ययः स्यात्। अतस्तन्निवृत्त्यर्थं सुबग्रहणम्।।

69. प्रकारवचने जातीयर्। (5.3.69)
`तस्य वचने' इति। उक्तौ, द्योतन इत्यर्थः। `प्रकारवति चायम्' इत्यादिना थाल्जातीयरोर्विषयभेदं दर्शयति। विषयभेदे सति विशेषविहितेनापि ताला जातीयरो बाधनं न भवति। थाल्प्रत्यान्तात् जातीयर् सिद्धो भवति--कथञ्जातीय इति।।

70. प्रागिवात्कः। (5.3.70)
तिङन्तादयं प्रत्ययो नेष्यते। `अकजिष्यते' इति। कथं पुनरेतयोर्भावाभावौ लभ्येते? इत्याह--`तिङश्चेत्यनुवृत्तम्' इत्यादि। उत्तरत्रैवेत्यवधारणेन त्विहानुवृत्तमपि कप्रत्ययेन सम्बन्धनीयमिति दर्शयति। तच्च पूर्वसूत्राद्वचनग्रहणेऽप्यनुवर्त्तमाने यत उत्पद्यमानेन प्रत्ययेनाज्ञातादेरर्थस्य वचनं भवति, तत्रैव तेन भवितव्यम्। न च तिङन्तादुत्पद्यमानेनापि कप्रत्ययेन सोऽर्थः शक्यते द्योतयितुं, अकचा तु शक्यते। तस्मात् `तिङ्श्च' (5.3.56)

इत्येतदनुवृत्तमुत्तरसूत्रेणाकचा सम्बन्धनीयम्, नेह कप्रत्ययेन। प्राग्ग्रहणमपिद्योतनार्थम्, इवग्रहणमवध्यर्थम्; अन्यथाधिकारपरिमाणं न ज्ञायते।।

71. अव्ययसर्वनाम्नामकच्प्राक् टेः। (5.3.71)

`कस्यापवादः' इति। ननु च भिन्नदेशत्वात् काकचोर्विरोधो नास्ति, न चासति विरोधे बाध्यबाधकभावः, ततः कथं कस्यापवादः? नैष दोषः; नैवावश्यं देशकृत एव विरोधो भवति, अपि त्वर्थकृतोऽपीत्युक्तम्---`अकच्प्रत्ययेन समानोर्थः' इति। अकचा द्योतिततवात् तस्यार्थस्य कप्रत्ययो न भविष्यति।

यद्यत्र प्रातिपदिकादित्यनुवृत्तेः प्रातिपदिकस्य प्राक् टेरकज्विधीयते, त्वयका मयकेत्यादि न सिध्यति? अथ सुप इति प्राक् टेर्विधीयेत, एवमपि युष्मकाभिरिति न सिष्यति? इत्यत आह--`प्रातिपदिकात्सुपः' इति। `द्वयमपि' इत्यादि। ननु च द्वयानुवृत्तावपि क्वचित् सुबन्तस्यैव प्राक्टेर्भवति, क्वचित् प्रातिपदिकस्य--इत्येषा व्यवस्था न लभ्यते? इत्याह--`तत्र' इत्यादि। वचनग्रहणं व्यवस्थार्थमिहानुवर्त्तते। तेन यत्र प्रातिपदिकस्य प्राक्टेरुत्पद्यमानेनार्थद्योतनं शक्यते कर्तुम्, तत्र प्रातिपदिकस्य प्राक् टेर्भवति; यत्र सुबन्तादुत्पन्नेनार्थद्योतनं शक्यं सम्पादयितुं, तत्र सुबन्तस्यैव।

अकचश्चित्करणमन्तोदात्तार्थम्। तद्धि सप्रकृतेः समुदायस्य। तथा च वक्ष्यति--`चितः सप्रकृतेर्बह्वकजर्थम्' (वा. 6.1.163)।

`तूष्णीमः काम्प्रत्ययो वक्तव्यः' इति। यथासम्भवं कुत्सादिष्वर्थेषु। चकारो देशविध्यर्थः।

`शीले को मलोपश्च' इति। शीलमिति न स्वभाव एवोच्यते, किं तर्हि? नियमोऽपि। तथा हि--शीलवान् भिक्षुरित्यभिधीयते, यः सम्यङ्नियममनुपालयतीति। तेन योऽपि नियमपरतया वाचं नियमयति सोऽपि तूष्णीक उच्यते।।

72. कस्य च दः। (5.3.72)

`अकच्सन्नियोगेन' इत्यादि। कथं पुनरकच्सन्नियोगेनेत्येष विशेषो लभ्यते, यावता न सूत्रे तदुक्तम्? इत्याह--`चकारः' इत्यादि। चकारस्यैतदेव प्रयोजनम्--अकच्सन्नियोगेन ककारस्य दकारो यथा स्यादिति भावः।।

73. अज्ञाते। (5.3.73)

`अज्ञातविशेषोऽज्ञातः' इति। यदि यस्यात्यन्तमज्ञानं सोऽज्ञातः स्यात्, एवं सति सर्वथा वस्तुविज्ञाना भावे प्रकृतिरेव न स्यात्, न हि सर्वथाऽविज्ञातोऽर्थः प्रयोगमर्हति; तस्मात् स्वेन रूपेण ज्ञातस्य यस्य धर्मान्तरत्वमज्ञातं स इहाज्ञातोऽभिमत इति ज्ञायते--अविज्ञातविशेषोऽज्ञात इति। अस्यैवार्थं विस्पष्टीकर्त्तुमाह--`स्वेन' इत्यादि। स्वरूपमश्वत्वादि, विशेषरूपं स्वस्वामिसम्बन्धादि।।

74. कुत्सिते। (5.3.74)

75. संज्ञायां कन्। (5.3.75)

76. अनुकम्पायाम्। (5.3.76)

`कारुण्येन' इत्यादि। अभ्युपपत्तिरनुग्रह एव। `स्वपितकि, श्वसितकि' इति। `रुदादिभ्यः सार्वधातुके' (7.2.76) इट्, अदादित्वाच्छपो लुक्।।

77. नीतौ च तद्युक्तात्। (5.3.77)

`सामदानादिरूपायो नीतिः' इति। आदिशब्देन भेददण्डयोर्ग्रहणम्; तौत्वनुकम्पायां न सम्भवत इति सामदानादिरेकैव नीतिर्गृह्यते, `एहकि' इति। इण आङ्पूर्वाल्लोण्मध्यमपुरुषैकवचनस्य `सेर्ह्यपिच्च' (3.4.87) इति हिरादेशः। ननु पूर्वेणैवात्रापि प्रत्ययः सिद्धः, अत्रापयनुकम्पा गम्यत एव, तत किमर्थम् इत्याह--`पूर्वेणैव' इत्यादि। प्रत्यासन्नोऽनुकम्पासम्बन्धो यस्यानुकम्पयमानस्य स तथोक्तः। प्रत्यासन्नत्वं तु सम्बन्धसर्यानुकम्प्यानंप्रति; तदाश्रयत्वादनुकम्पायां विधीयमानः प्रत्यासत्तेर्यस्यानुकम्पया प्रत्यासन्नः सम्बन्धस्ततः एव युक्तो विधातुमिति पूर्वेमानुकम्प्यमानादेव प्रत्यो विहितः, न तु व्यवहितात् पुनर्घानादेः। अतः सम्प्रति ततोऽपि यथा स्यादित्येवमर्थमिदम्। `व्यवहितात्' इति। विप्रकृष्टादित्यर्थः। विप्रृष्टत्वमतदाश्रयत्वादनुकम्पायाः। न हि तस्यां धानादिराश्रयः, किं तर्हि? अनुकम्प्यमानो देवदत्तादिः।।

78. बह्वचो मनुष्यनाम्नष्ठज्वा। (5.3.78)

`देविकः' इति। `यज्ञिकः' इति। `ठाजावूर्ध्वं द्वितीयादचः' (5.3.83) इति दत्तशब्दस्य लोपे कृते `यस्येति च' (6.4.148) इत्यकारलोपः।

प्रत्युदाहरणे सर्वत्र क एव वेदितव्यः। `मद्रबाहुकः' इति। मद्रौ बाहू यस्य स मद्रबाहुः। नेदं मनुष्यनाम, किं तर्हि? विशेषणम्।

मनुष्यग्रहणं किमर्थम्? देवहस्तको हस्तीत्यत्र मा भूत्। नाम ग्रहणं किमर्थम्? मृगकः, मत्स्यक इत्यत्र मा भूत्।।

79. घनिलचौ च। (5.3.79)
`देवियः' इति। घन् पूर्ववल्लोपः। `देविलः' इति इलच्। `देविकः' इति। ठन्। `देवदत्तकः' इति कः।।

80. प्राचामुपादेरडज्वुचौ च। (5.3.80)
उपड इत्यादौ उपेन्द्रदत्तशब्दात्प्रत्ययः। विकल्पार्थं प्राग्ग्रहणं कस्मान्न भवति? इत्याह--`वेत्येव हि' इत्यादि। अत्र हे वेत्यनुवर्त्तते, तस्मात्तेनैव विकल्पस्य सम्पादितत्वात् तदर्थग्रहणं नोपपद्यते।।

81. जातिनाम्नः कन्। (5.3.81)
`नामग्रहणम्' इति। असति हि नामग्रहणे जातिस्वरूपग्रहणं स्यात्। अतः स्वरूपग्रवणं मा भूदित्येवमर्थं जातिग्रहणम्।।

82. अजिनान्तस्योत्तरपदलोपश्च। (5.3.82)
`व्याघ्राजिनो नाम कश्चित्' इति। व्याघ्रस्याजिनम्, व्याघ्राजिनमिवाजिनं यस्येति व्याघ्राजिनः। `सप्तम्युपमानपूर्वस्य बहुव्रीहिरुत्तरपदलोपश्च' (वा. 99) इति बहुव्रीहावुत्तरपदलोपे कृते व्याघ्राजिन इत्येष शब्दः सम्पद्यते। अथाजिनलोपश्चेत्येवं कस्मान्नोक्तम्, किमुत्तरपदग्रहणेन? नैवं शक्यम्; व्याघ्रमहाजिनौ नामकश्चित्, सोऽनुकम्पितः--वमाघ्रक इत्यत्राजिनशब्दस्य लोप उच्यमाने महच्छब्दस्य निवृत्तिर्न स्यात्। उत्तरपदस्यतु लोपे विधीयमाने भवति। तस्माद्यथान्यासमेवास्तु। महदजिनं महाजिनम्, व्याघ्रस्य महाजिनमिव महाजिनमस्येति पूर्ववदुत्तरपदलोपी बहुव्रीहिः, ततः कन्।।

83. ठाजादावूर्ध्वं द्वितीयादचः। (5.3.83)
`अस्मिन् प्रकरणे' इत्यादि। अनेनास्मिन् प्रकरणे यौ विहितौ ठाजादी तत्र लोपी भवति, यौ तु प्रकरणान्तरे तत्र न भवतीति दर्शयति। एतच्चैतत्प्रकरण विहितयोष्ठाजाद्योरिहानुवृत्तेर्लभ्यते। अथोर्ध्वग्रहणं किमर्थम्, यावता `द्वितीयादचः' इति पञ्चमी, तस्मादन्तरेणाप्यूर्ष्वग्रहणम्, `तस्मादित्युत्तरस्य' (1.1.67) इत्यूर्ध्वं यच्छब्दरूपं तस्यैव लोपो भविष्यति? इत्यत आह--`उर्ध्वग्रहणम्' इत्यादि। असत्यूर्ध्वग्रहणे `आदेः परस्य' (1.1.54) इति द्वितीयादचो यः परस्तस्यादेर्लोपः स्यात्, तस्मिंस्तदु सति सर्वे निवर्त्तते। अतः सर्वस्य लोपो यथा स्यादित्येवमर्थमूर्ध्वग्रहणम्।
अथ ठग्रहणं किमर्थम्, यावता ठस्येकादेशे कृतेऽजादावित्येव सिद्धम्? इत्यत आह--`ठग्रहणम्' इत्यादि। उको द्वितीयत्वे सत्यकृत एवेकादेशे ठावस्थायामेव द्वितीयादूर्ध्वस्य लोपे कृते `इसुसुक्तान्तात् कः' (7.3.51) इति कविधिर्यथा स्यादित्येवमर्थं ठग्रहणम्। तत्रैतत् स्यात् चोद्यम्--इकादेशे कृतेऽजादिलक्षते च द्वितीयादूर्ध्वस्य लोपे स्थानिवद्भावाट्ठग्रहणेन ग्रहणात् कादेशो भविष्यति? इत्याह--`अजादिलक्षणे हि' इत्यादि। इहादेशविधौ तत्र ठग्रहणं वर्णग्रहणं स्यात्, सङ्घातग्रहणं वा; तत्र वर्णग्रहणेऽल्विधित्वात् स्थानिवद्भावो नोपपद्यते। सह्घातग्रहणे यद्यप्युपपद्यते, तथापि `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या.प.12) इत्यजादित्वसन्निपातकृतमुकः ठप्रत्ययेनानन्तर्य्यमिति तदजादित्वविघातं न कुर्यात्। ततश्च यथा--मथितं पण्यमस्य माथितिक इत्यत्र यस्येति (6.4.148) लोपे सत्यपि तकारेण ठस्यानन्तर्य्ये कादेशो न भवति, तता वायुदत्तो वायुक इति न स्यात्। तस्मादुको द्वितीयत्वे कविधानार्थं ठग्रहणम्।
`उवर्णाल्लः' इति। तस्य च लोप इत्यर्थः। स चादेरेव भवति, न सर्वस्य। अथवा--ल इत्यादेशएवायं सर्वे लस्य विधीयते। च चानेकाल्त्वात्सर्वस्यैव भवति।
`द्वितीयादचः' इति। द्वितीयलोपे कर्त्तव्ये सन्ध्यक्षरस्य द्वितीयत्वं भवति यदा, तदादेः शब्दरूपस्य लोपो भवतीति वक्तव्यम्। सन्ध्यक्षरादूर्ध्वस्य लोपोऽपि प्राप्ते सन्ध्यक्षरस्यैकाक्षरपूर्वपदानामित्यादि द्वितीयादच ऊर्ष्वस्य लोपः उक्तः, तदपवादः।
`एकाक्षर' इति। अक्षरशब्दश्चायमच्यपि वर्त्तते। एकाक्षरमेकाच पूर्वपदं येषां ते, तेषामुत्तरपदलोपो वक्तव्यः। `वागाशीः' इति। वाच्याशीरस्येति कृत्वा वैयधिकरण्ये बहुव्रीहिः। अनुकम्पितो बागाशीरिति विगृह्यठचि कृते द्वितीयादच ऊर्ध्वस्य लोपः स्यात्। तस्मिन् सति वाच्+आ+इक इति स्थिते यस्येति (6.4.148) लोपे कृते `अचः परस्मिन् पूरवविधौ' (1.1.54) इति स्थानिवद्भावात्पदसंज्ञा न स्यात्। तस्मात् तस्यान्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदसंज्ञा, `चोः कुः' (8.2.30) इति कुत्वम्--वागिक इति स्यात्। आशीःशब्दस्य तस्य परलोपे कृते तस्यानजादेशात्वात् स्थानिवद्भावो नास्तीति भसंज्ञा भवत्येव, ततस्तया पदसंज्ञाया निषिद्धायां पदनिबन्धनकुत्वादि न भवतीति वाचिक इति सिध्यति।
`कथम्' इत्यादि। यद्येकाक्षरपूर्वपदानामुत्तरपदस्य लोप उच्यते, षडिक इति न सिध्यति। अत्राप्युत्तरलोपे कृते भसंज्ञायानुपजातायां पदसंज्ञायां बाधितायाम् `झलां जशोऽन्ते' (8.2.39) इति षषः षकारस्य जश्त्वे कृते षडिक इति न सिध्यति।।

84. शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्। (5.3.84)
`स चाकृतसन्धीनाम्' इति। यद्यस्वरसन्धौ लोपो भवत्येवं सिध्यति, नान्यथा। तस्मादकृतस्वरसन्धीनामेव शेवलादीनां लोपो भवतीति वक्तव्यम्।।

85. अल्पे। (5.3.85)

86. ह्वंस्वे। (5.3.86)
`दीर्घप्रतियोगी ह्रस्वः' इति। स पुनर्यमपेक्ष्य दीर्घो भवति स वेदितव्यः। ननु च दीर्घत्वापचये सति ह्रस्वो भवति; यत्र दीर्घत्वापचयस्तत्राल्पतास्तीति पूर्वेणैव सिद्धम्? न सिध्यति; न ह्ययं नियोगः--यत्र दीर्घस्यापचयस्तत्राल्पत्वेन भवितव्यमिति, तथा हि--सत्यप्यपचये महत्त्वगुणयुक्तं यद्वस्तु तदमहदेव भवति, न चाल्पम्।।

87. संज्ञायां कन्। (5.3.87)

88. कुटीशमीशुणअडाभ्यो रः। (5.3.88)
`कुटीरः। शमीरः' इति। स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनृवर्त्तते इति प्रकृतिगतेनैव स्त्रीलिङ्गेन भवितव्यम्, न पुल्लिङ्गेन? इत्यत आह--`स्वार्थिकत्वेऽपि' इत्यादि।।

89. कुत्वा डुपच्। (5.3.89)

90. कासूगोणीभ्यां ष्टरच्। (5.3.90)

91. वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे। (5.3.91)
यदि तनुत्वे वत्सादिशब्देभ्यः प्रत्ययो विधीयते, ये शरीरे कृशा वत्सादयस्तत्राप्यविशेषेण प्रत्ययः प्रसज्येत, विशेषानुपादानात्? इत्यत आह--`यस्य गुणस्य' इत्यादि। गुणो विशेषणम्, विशेष्यं द्रव्यम्। वत्सादिशब्दानां प्रवृत्तिनिमित्तं वयोविशेषादि। यस्मिन् सति वत्सादयः शब्दा द्रव्ये विशेष्ये निविशन्ते=प्रवर्त्तते, तस्यैव वत्सादिशब्दस्य प्रवृत्तिनिमित्त्स्य तनुत्वे प्रत्यो भवति, न तनुत्वमात्रे; तत् पुनः प्रत्यासत्तेः। वत्सादिभ्यः प्रकृतिभ्यः प्रत्यये विधीयमाने अन्यत् प्रवृत्तिनिमित्तं न प्रत्यासन्नम, ततस्तस्यैव तनुत्वे युक्तं प्रत्ययेन भवितव्यम्।
`तस्य तनुत्वं द्वितीयवयसः प्राप्तिः' इति। तृतीयवयःप्राप्तिकाले द्वितीयस्य वयसः। उक्षशब्दस्य प्रवृत्तिनिमित्तस्य निश्चितं तनुत्वमवशिष्यते। `तस्य तनुत्वमन्यपितृकता' इति। गर्दभपितृक्तेत्यर्थः। तर्हि गर्दभादश्वायामुत्पन्नोऽश्वतर इत्युच्येते। `तस्य तनुत्वं भारोद्वहर्ने मन्दशक्तिता' इति। भारोद्वहनं प्रति यःसमर्थो न स्यात् स ऋषभतर इत्युच्यते। यदा तु तस्य भारोद्वहने सामर्थ्यं मन्दं भवति=हीयते, तदा तनुत्वं भवति।।

92. किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच्। (5.3.92)
`निर्धार्यमार्णेभ्यः प्रत्ययः' इति। `निर्धार्यमाणवाचिभ्यः इत्येतत् कुतो लभ्यते? तत एवोत्पन्ने प्रत्यये निधरिणस्य गम्यमानत्वत्।
`महाविभाषा' इत्यादि। `समर्थानां प्रथमात्' (4.1.82)
`निषरिणे' इचि। विषये प्रत्ययो यथा स्यात्। `द्वयोरिति समुदायान्निर्धारणविभक्तिःः' इति। षष्ठी, सप्तमी वा। सा पुनस्तस्य `यतश्च निर्धारणम् (2.3.41) इत्येनेन। `ेकस्येति निर्देशः निर्धार्यमाणनिर्देशः' इति। एकस्मिन्निर्षार्यमाणे यथा स्यात्। ननु च समुदायादेकदेशस्य पृथक् करणं निर्धारणम्, द्वयोरित्यवयवसमुदायो निर्दिष्टो यत एकदेशो निर्धारयितव्यः, स चैकदेशे निर्धारयितव्ये एक एव सम्भवति; अतोऽन्तरेणाप्येकग्रहणमेकस्यैव निर्धारणं भविष्यतीति निष्फलमेकग्रहणम्? नैतदेवम्; असति हि तस्मिन् द्वयोरिति कर्मणि षष्ठी विज्ञायते, द्वौ चेन्निर्षार्येते कुतश्चिदिति, ततश्चेहापि प्रत्ययः स्यात्--अस्मिन् ग्रामे कौ देवदत्तयज्ञदत्ताविति। तस्मादेकग्रहणं कर्त्तव्यम्।।

93. वा बहूनां जातिपरिग्रश्ने डतमच्। (5.3.93)
`जातिपरिप्रश्नविषयेभ्यः' इति। जातिपरिप्रश्नो यथासम्भवं येषां ते तथोक्ताः। `कतमो भवतां कटः' इति। "गोत्रञ्च चरणैः सह" (म. भा. 2.225) इति तस्य जातित्वम्। सा च कठजातिः किं शब्देन परिपृच्छ्यते। किंशब्दोऽत्र जातिपरिप्रश्नविषयो भवति। `यतमो भवतां कठस्ततम आगच्छतु' इति। यत्तच्छब्दाविह जातिविषयावेव, न परिप्रश्नविषयो भवति। `यतमो भवतां कठस्ततम आगच्छतु' इति। यत्तच्छब्दाविह जातिविषयावेव, न परिप्रश्नविषयौ; असंभवात्, न हि ताभ्यां परिप्रश्नः क्रियते, किं तर्हि? किंशब्देन। अत एव वक्ष्यति--`परिप्रश्नग्रहणं किम एव विशेषणम्, न यत्तदोः, असम्भवात्' इति।
`वावचनमकजर्थम्' इति। पक्षेऽकजपि यथा स्यात्। यद्येवम् वाक्यं न सिध्यति, यदा हि डतमज् न भवत्यकचैव भवितव्यम्? इत्यत आह--`महाविभाषा' इत्यादि। अत्र च महीविबाषा प्रत्ययविकल्पार्थाऽनुवर्त्तते, तया प्रत्यये विकल्पिते पक्षे वाक्यमपि भविष्यति। `जातिग्रहणं तु सर्वैः सम्बध्यते' इति। जातिः सवत्रैव भवति, तत्र जात्यादिना किं शब्दे विशेष्यमाणे सामर्ध्यादेव तस्य परिप्रश्नविषयत्वं लभ्यते? नैतदस्ति; स हि क्षेपेऽपि वर्त्तते। तत्रासति परिप्रश्नग्रहणे

यदा आतौ क्षेपे वर्त्तते, तदा प्रत्ययः स्यात्।।

94. एकच्च प्राचाम्। (5.3.94)
`स्वस्मिन् विषये' इति। आत्मीये विषये। तत्र द्वयोरेकस्य निर्वारणं डतरचो विषयः बहूनामेकस्य निर्धारणे डतमचः। चकारोऽनुकर्षणार्थः। असति हि तस्मिन् `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या. प. 19) इति डतमजेव स्यात्; द्वयोनिर्धारणे द्वयोरेकस्य डतरजित्यनुवृत्तेः, बहूनां निर्धारणे डतमजित्यनुवृत्तेः। विकल्पार्थं प्राग्ग्रहणं कस्मान्न भवति? इत्याह--`विकल्पोऽनुवर्त्तत एव' इति। अनन्तरसूत्राद्वेत्यनुवर्त्तत एवेति विक्लप इत्युक्तम्, तेनैव प्रत्ययविकल्पः सिद्धः। तसमात् पूजार्थमेव प्राग्ग्रहणम्, न दिकल्पार्थम्।।

95. अवक्षेपणे कन्। (5.3.95)
`व्याकरणकेन' इत्यादि। कथं पुनर्व्याकरणमवक्षेपणम्, तस्याध्ययनं शास्त्रविहितम्, वेदाङ्गत्वात्? तथापि यत्राञये तदवक्षेपणमुपसंहरति, तं प्रति तस्यावक्षेपणत्वमुपपद्यते; दोषहेतुत्वात्।
`परस्य' इत्यादिना `कुत्सिते' (5.3.74) इत्यवक्षेपणे कन्नित्यस्य विभागं दर्शयति।।

96. इवे प्रतिकृतौ। (5.3.96)
`तद्विशेषणं प्रतिकृतिग्रहणम्' इति। प्रतकृतिविषयं यत्र सादृश्यं तत्र प्रयोगो यथा स्यात्। गौरिवगवय इत्यत्रास्ति सादृश्यम्, न तु प्रतिकृतिविषयम्; न हि गौर्गवयप्रतिकृतिः। काष्ठादिमयं हि यत् प्रतिच्छन्देकं तत् प्रकृतिच्यते।।

97. संज्ञायाञ्च। (5.3.97)

98. लुम्मनुष्ये। (5.3.98)
चञ्चे इति तृणपुरुष उच्यते। सादृश्याच्च मनुष्यश्चञ्चा। `लुपि युक्तवद्व्यक्तियचने' (1.2.51) इति प्रकृतिगतमेव लिङ्गं भवति। ननु च `मनुष्यलूपि प्रतिषेधः' (वा.21) इति वचनाद्युक्तवद्भावो न प्राप्नोति? नैतदस्ति; विशेषणानां प्रतिषेधः, न लुबन्तस्य।।

99. जीविकार्थे चापण्ये। (5.3.99)

100. देवपथादिभ्यश्च। (5.3.100)
`देवपद्यः' इति। देवानां पन्था इति षष्ठीसमासः। `ऋक्पः (5.4.74) इत्यादिनाकारः समासान्तः, कन्, तस्य सुप्।।

101. वस्तेर्ढञ्। (5.3.101)
`इतः प्रभति' इत्यादि। तत्र प्रतिकृतौ `इवे प्रतिकृतौ' (5.3.96) इति कनि प्राप्ते, इतः प्रभृति प्रत्यया भवन्ति। अप्रतिकृतौ तवसंज्ञायां वाक्येनैवाभिधाने प्राप्ते। संज्ञायां तु प्रतिकृतावप्रकृतौ च ढञेव; वस्तिः=वृतिविकारः। `वास्तेयी' इति `टिड्ढाणञ्' (4.1.15) इति ङीप्।।

102. शिलाया ढः। (5.3.102)

103. शाखादिभ्यो यत्। (5.3.103)

104. द्रव्यञ्च भव्ये। (5.3.104)

105. कुशाग्राच्छः। (5.3.105)

106. समासाच्च तद्विषयात्। (5.3.106)
`इदार्थविषयात् समासात्' इति। इवशब्दस्यार्थ इवार्थः=सादृश्यं विषयो यस्य स तथोक्तः। यदि इवार्थविषयात् समासाच्छो विधीयते, शस्त्रोश्यामा, पुरुषव्याघ्र इत्यत्रापि प्रप्नोति? नैष दोषः, न ह्यत्र समास इवार्थे वर्त्तते, किं तर्हि? पूर्वपदमुत्तरपदं वा--शस्त्रीव श्यामा, पुरुषोऽयं व्याघ्र इवेति।

अथाप्येकदेशस्येवार्थे वर्त्तमानत्वात् समासोऽणीवार्थं उच्यते, तथापि समासेनैवोक्तत्वान्न भविष्यति, यस्तु समासः स क इवार्थे वर्त्तेते? समासार्थावपर इवार्थो यत्रास्ति तत्रायं प्रत्य उक्तः। `परस्मिन्निवायं एव' इति। `इव' इत्यभिकारात्।
`अतर्कितोपनतम्' इति। अबुद्धिपूर्वमुपस्थितमित्यर्थः। `चित्रिकरणम्' इति।विस्मयकरणमित्यर्थः। `तत्कथम्' इति। केन प्रकारेणातर्कितोपनतं चित्रीकरणमिति? -- इममर्थं पृच्छति--तत्कमित्यादि।
`समासश्चायम्' इत्यादि। यदेतदिवार्थविषयात् समासात् प्रत्ययविधानम्, अत एव ज्ञापकादवसीयते--समासो भवति। कथं पुनरेतज्ज्ञापकमिति? आह--`न ह्मस्य' इत्यादि। इवार्थविषयस्य समाससामान्यस्य लक्षणं नास्तीति। तस्माद्यदेतत् ततः प्रत्ययविधानम्, एतदेव तद्भावस्य ज्ञापकमुपपद्यते।
अथ वा--किं पुनः कारणं ज्ञापकेन तद्भावः प्रतिपाद्यत इति? आह--`न ह्मस्य' इत्यादि। `स चैवं विषय एव' इति। इवार्थविषय एवेत्यर्थः।।

107. शर्करादिभ्योऽण्। (5.3.107)

108. अङ्गुल्यादिभ्यष्ठक्। (5.3.108)

109. एकशालायाष्ठजन्यतरस्याम्। (5.3.109)
`अन्यतरस्यांग्रहणेन' इत्यादि। पूर्वसूत्रेण (5.3.108) विहितत्वाट्ठगेवानन्तरः। अन्यतरस्यांग्रहणं समुच्चयार्थम्। अतस्तेन `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इति स एव प्राप्यते।।

110. कर्कलोहितादीकक्। (5.3.110)

111. प्रत्नपूर्वविश्वेमात्थाल् छन्दसि।
`इमथ' इति। इमेतीदमा समानार्थं प्रकृत्यन्तरमस्ति। तत इदं प्रत्ययविषानम्।।

112. पूगाञ्ञ्योऽग्रामणीपूर्वात्। (5.3.112)
`पूर्वात् इति। पूर्वशब्दोऽवयववाची। ग्रामणीः पूर्वो यस्य तत् ग्रामणीपूर्वम्। प्रतिषेधेन च स्वरूपग्रहणं भवतीति विज्ञायते। पूगशब्देन स्वरूपे गृह्यमाणे ग्रामणीपूर्वतः प्राप्तिरेव नास्ति; ग्रहणवता प्रातिपादिकेन (व्या.प.89) तदन्तविधः प्रतिषेधात्। `लोहष्वजाः' इति कन्। अत्र देवदत्तशब्दः पूर्वग्रामणीरवयव इति न प्रत्ययः।।

113. व्रातच्फञोरस्त्रियाम्। (5.3.113)
`व्रातवाचिभ्यः' इति। अथ स्वरूपस्यैव ग्रहणं कस्मान्न भवति? च्फञोरल्पाच्तरस्य परनिपातात्; स हि लक्षणान्तरानपेक्षतामाचष्टे। तेन `स्वं रूपं शब्दस्य (1.1.68) इत्येतदपीह नापेक्ष्यत इति न भवति स्वरूपग्रहणम्। `कौञ्जायान्यः' इति। `गोत्रे कुञ्जादिभ्यश्च्फञ्' (4.1.98) `कौञ्जायनो' इति। `जतेरस्त्रीविषयात्' (4.1.63) इति ङीष्। जातित्वं तु `गोत्रं च चरणैः सह' (मा.भा. 2 225) इति।।

114. आयुधजीविसङ्घाञ्ञ्यङ्वाहीकेष्वब्राह्मणराजन्यात्। (5.3.114)
`वाहीकेषु' इति। निर्धारणे (2.3.41) सप्तमी। `वाहोकेषु मध्ये य आयुधजीविसङ्घः' इति। निधरिम्ञ्च समानजातीयस्यैव भवतत्यायुधजीविसङ्घोऽपि वाहीक एव विज्ञायते। अथ वा--देशवाचिनो वाहोकशब्दादधिकरण एवैषा सप्तमी; वाहिकदेशविशेष आयुधजीविसङ्घो वसतीति।
`ब्राह्मणे तद्विशेषग्रहणम्' इति। अथ स्वरूपग्रहणं कस्मान्न भवति? अत एव प्रतिषेधात्। यदि स्वरूपग्रहणं स्यात्, ब्राह्मणप्रतिषेधोऽनर्थकः स्यात्। प्राप्तिपूर्वको हि प्रतिषेधो भवति। ब्राह्मणशब्द आयुधजीविसङ्घो वाहीकेषु न विद्यत इति किं ब्राह्मणप्रतिषेधेन! ब्राह्मणविशेषवाचितस्तु ये गोपालप्रभृतयः शब्दास्तद्वाच्या आयुध जीविङ्घा वाहीकेषु भवन्ति; तत्र यदि प्रतिषेधो न क्रियेत, तदा तेभ्योऽपि स्यात्। अतस्तन्निवृत्त्यर्थोऽर्थवान् विशेषग्रहणे प्रतिषेधो भवति। तस्मात्--`ब्राह्मणे तद्विशेषग्रहणम्, राजन्ये तु स्वरूपाग्रहणमेव' इति। तद्वाच्यस्यायुधजीविसङ्घस्य वाहीकेषु सत्त्वात्; `स्व रूपं शब्दस्याशब्दसंज्ञा' (1.11.68) इति वचनाच्च। `तेन' इत्यादि। यस्माद् ङीबर्थोत्र टकारः कृतस्तेन `अस्त्रियाम्' (5.3.113) इति नानुवर्त्तते। तदनुवृत्तौ ञ्यट्प्रत्ययान्तं स्त्रियां न भवतीति ङीबर्थं टित्करणनर्थकं स्यात्। तस्मादस्त्रियामिति निवृत्तम्, अतः स्त्रियामपि भवति। `कौण्डीबृसी' `क्षौद्रकी' इति। `हलस्तद्धितस्य' (6.4.150) इति यकारलोपः।।

115. वृकाट्टेण्यण्। (5.3.115)

यदि वाहीकेषु वृकशब्दस्य वाच्य आयुधजीविसङ्घो भवति, ततो ञ्यटि प्राप्तेऽन्यत्राप्ताप्त एव कस्मिश्चित् प्रत्ययविधानं वेदितव्यम्। `वृकाविव' इति। वृकशब्दोऽत्र जातिवचनः।।

116. दामन्यादित्रिगर्तषष्ठाच्छः। (5.3.116)
`तेषु चेयं स्मृतिः' इति त्रिगर्त्तषष्ठाः स्मर्य्यन्ते ज्ञायन्तेऽनयेति स्मृतिः। सा पुनः--`आहुस्त्रिगर्त्तषष्ठान्' इति। अयमेवाप्तप्रणीतश्लोकः एषु च त्रिगर्त्तषष्ठेषु प्रथमपञ्चमौ शिवाद्यणन्तौ, शेषास्त्विञन्ताः। केचिदतद्धितान्तमेव पञ्चमं पठन्ति। तेषां ब्रह्मगुप्तशब्दादेव च्छो भवति।।

117. पर्श्वदियौर्धयादिभ्यामणञौ। (5.3.117)
किमर्थ पुनरिह यौधेयादयः पठ्यन्ते, यावता लुक्प्रतिषेधार्थं चतुर्थे यौधेयादयः समाम्नाता एव, त एव चेह गृह्यन्ते? सत्यमेतत्; विचित्रा हि गणानां कृतिर्गणकारेस्येति पुनः पठिताः। पर्श्वादिषु सत्वच्छशब्दो पठ्यते। स च सत्वच्छब्दपरकृतिर्मतुप्प्रत्ययान्तो वेदितव्यः।।

118. अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ्। (5.3.118)
`अभिजितोऽपत्यमित्यण्' इति। `प्राग्दीष्यतोऽण्' (4.1.83) इत्यौत्सर्गिकः। एवमुत्त्रत्रापि।
`गोत्रप्रत्ययस्याणो ग्रहणमिष्यते' इति। तत्कथं जातिनाम्न इत्यनुवर्त्तते? तेनाणन्तं यज्जातिनाम तदेव ग्रहीष्यते। यश्च गोर्त्रेऽण् विहितस्तदन्तमेव जातिनाम भवति; `गोत्रं च चरणैः सह' (म. भा. 2.225) इति आतित्वात्। `आभिजितो मुहूततत्ꣳः, आभिजीतः स्थालीपाकः' इति। एकत्र `नक्षत्रेण युक्तः कालः' (4.2.3) इत्यण्, अपरत्र `सास्य देवता' (4.2.24) इति।।

119. ञ्यादयस्तद्राजाः। (5.3.119)

इति श्रीबोधिसत्त्वदेशीपाचार्यश्रीजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्चिकायां पञ्चमस्याध्यायस्य
तृतीय पादः।।
* * *

5.4
अथ पञ्चमोऽध्यायः

चतुर्थः पादः

1. पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च। (5.4.1)
प्रतिपदिकादिति वर्त्तते, तस्य विशेषणं पादशतस्यग्रहणम्, विशेषणेन तदन्तविधिर्भवतदीत्याह--`पादशतान्तस्य' इति। आदिशब्दोऽवयववचनः। न च संख्याशब्दः पदशतशब्दयोरवयव उपपद्यते; पृथाग्भावादनारंभकत्वात्। न हि पृथग्भूतमनारम्भकं शब्दान्तरस्यावयवो युज्यते, यथा घटशब्दः पटशब्दस्य। विपरिते तु युज्यते, यथा--पटस्य समुदायात्मनः तन्त्वादिकारणं समदेशमवयदमाहः। तस्मात् `संख्यादेः' इत्येतदपि प्रातिपदिकस्य विज्ञायते, न पादशतशब्दयोरित्याह--`संख्यादेः' इत्यादि। आनन्तर्य्यलक्षणा चेयं षष्ठो, यथा--गापोष्टकं (3.2.8) इति गापोष्टक्प्रत्ययो भवतीत्यनन्तरमिति शेषः।
`तत्सन्नियोगेन च' इति। चकारस्य सन्नियोगार्थत्वात्। `अन्तस्य' इति। अलोऽन्त्यपरिभाषया (1.1.52)।
`पुनः' इत्यादि। निमित्ते भवो नैमित्तिकः, अध्यात्मादित्वाट्ठञ् (वा. 456), न नैमित्तिकोऽनैमित्तिकः। लोपः स्यावित्येवमर्थं पुनर्लोपवचनम्। वुनापि सह लोपो विधीयमानः परनिमित्तं नापेक्षत इत्यनैमित्तिको भवति। यस्येति (6.4.148) लोपः। `परनिमित्तकः' इति। इति तद्धिते च परस्मिन्निमित्ते विधानात् तस्य स्थानिवद्भावात्, `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति लोपस्य स्थानिवद्भावेन पाच्छब्दरूपस्य विहितत्वात्। अनच्को हि पाच्छब्दः स्थान्युपात्तः, तस्य चानच्कत्वं स्थानिवद्भावे सति हीयते। अस्य त्वनैमित्तिकत्वान्न स्थानिवद्भाव इति पद्भावो भवतीति भावः।
`द्वौ द्वौ पादौ' इति। पीप्सायां द्विर्वचनं भवति।।

2. दण्डव्यवसर्गयोश्च। (5.4.2)
`दमनं दण्डः' इति। ननु दण्डशब्दोऽयं यष्ट्यादावपि वर्त्तते? सत्यम्; तथापीह दमने वर्त्तमानस्य ग्रहणं युक्तम्, दमनस्यैव प्रत्ययान्तेन गम्यमानत्वात्। `दानं

व्यवसर्गः' इति। यद्येवम्, तत् पूर्वयोग उदाहृतं दत्तं तदा चोपपद्यते यद्ययं योगोऽधिकविधानार्थो भवति; न त्वपवादः; तस्मान्नार्थोऽनेन योगेन? इत्यत आह--`अवीप्सार्थः' इत्यादि। तेन दानमात्रेऽनेन वुन्। दानवीप्सायां पूर्वयोगेन पुनर्भवत्येव।।

3. स्थूलादिभ्यः प्रकारवचने कन्। (5.4.3)

`जातयरोऽपवादः' इति। एतेन यथा प्रकारवचने विधीयमानो जातीयर् प्रकारवति न प्रकारमात्रे, तथायमपीति दर्शयति; अन्यथा हि जातीयरोयं विषयभेदादपवादो नोपपद्यते, अथ किमर्थ `प्रकारवचने जातीयर्' (5.3.69) इत्यस्यैवानन्तरं स्थूलादिभ्यः कन् न विधीयते? किं कृतं भवति? कन् प्रकारवचनं न वक्तव्यं भवति? नैवं शक्यम्; स्थूलादीनां हि प्रकारस्याज्ञातादीनां च युगपद्विवक्षायां परत्वात् के कृते कन्न स्यात्; शब्दान्तरत्वात्। अथापि स्यात्? एवमपि स्थूलक इत्याद्युदात्तत्वं स्यात्, इह तु कनो विधाने परत्वात् परत्वात् कनि कृति ततः क इत्यन्तोदात्तत्वं सिद्धं भवति।

`चञ्चद्बृहतोः' इत्यादि। स्थालादिषु चञ्चद्बृहतोरपाठात् तन्न प्राप्नोति। तस्मादुपसंख्यानं प्रतिपादनं कर्त्तव्यम्। तत्रेदं प्रतिपादनम्--पूर्वसूत्रादिह चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः। तेन चञ्चद्बृहतोरपि भविष्यतीति।

`स्थालाणुमाषेषु' इति। केचिदेताश्चतस्रः प्रकृतस्य इति वर्णयन्ति। स्थूलकः अणुकः। माषकः। इषुकः। अपरे तु स्थूलाणुशब्दौ प्रकृती, माषेष्वित्ययं तपाधिनिर्देश इत्याहः। अन्ये त्वानन्तर्य्यादणुशपब्दस्यैव माषग्रहणं विशेषणमाचक्षते। आद्यमेव दर्शनं न्याय्यम्; तथा हि--स्थूलकादयः तद्विशेषमम्। कृष्णकास्तिलाः। `यव व्रीहिषु' इति। यव इति प्रकृतिः, व्रीहिष्विति तद्विशेषणम्। यवको व्रीहिः। `पाद्यकालवदाताः सुरायाम्' इति। अपरे पुनरानन्तर्य्यदवदातशब्दस्य सुराग्रहणं विशेषणं पाद्यकालयोर्न विशेषणत्वं भवतीत्याहुः। `गोमूत्रादाच्छादने' [`गोमूत्र आच्छादने'-काशिका] इति। गोमूत्रशब्दः प्रकृतिः, आच्छादने इति तद्विशेषणम्। गोमूत्रप्रकारकमाच्छादनं गोमूत्रकम्। `सुराहौ' [`सुराया अहौ'-काशिका] इति। सुरेति प्रकृतिः अहाविति विशेषणम्। सुरावर्णोऽहिरिति सुरकः। `जीर्णशालिषु' इति। पत्रमूले इत्येते शब्दरूपे समस्तव्यस्ते प्रत्ययमुत्पादयतः--पत्रकम्, मूलकम्।।

4. अनत्यन्तगतौ क्तात्। (5.4.4)

`अशेषसम्बन्धः' इति। अशेषस्य स्वेन सम्बन्धिना भेदनादीनां व्याप्तिरित्यर्थः। `भिन्नकम्' इति। न तु यस्याशेषस्य भेदेन सम्बन्धः, अपि त्वेकदेशस्य तद्भिन्नकमित्युच्यते। भिन्नमित्यत्राशेषसम्बन्ध एव गम्यते। यद्यशेषं भिदिक्रियाव्याप्तं घटादि तद्भिन्नमित्यभिधीयते।।

5. न सामिवचने। (5.4.5)

`सामिवचने' इति। साम्युच्यते येन तत् सामिवचनम्। `सामिकृतम्' इति। बहुव्रीहिः, विशेषणसमासो वा। `प्रकृत्याभिहितत्वात्' इति। प्रतिषेधानर्थस्ये हेतुः। अनत्यन्तगतिं गमयितुं कन् विधीयते। सा च सामिशब्देनैव गमितेति कनः प्राप्तिरेव नास्ति। अतोऽनर्थकः प्रतिषेधः। स्वार्थमात्रेणैव कनो विधायकं लक्षणमस्तीति मन्यमान आह--`केन पुनः' इत्यादि। यदेतत् प्रतिषेधवचनम्, एतदेव ज्ञापयति---भवति स्वार्थे कन् इति, अन्यथा प्रतिषेषवचनमनर्थकं स्यात्। अर्धकृतम्। नेमिकृतम्।।

6. बृहत्या आच्छादने। (5.4.6)

`कन्ननुवर्त्तते' इति। स्वरितत्वात्। `न प्रतिषेधः' इति। विपर्ययात्। `बृहतिका' इति। केऽणः' (7.4.13) इति ह्रस्वः।।

7. अषडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात् रवः। (5.4.7)

`अविद्यमानानि षडक्षीण्यस्मिन्निति बहुव्रीहिः' इति। ततः `बहुव्रीहौ सक्थ्यक्ष्णोः (5.4.113) इति षच्।

राजशब्दात् सप्तमी। राजन्यथीति विगृह्य `सप्तमी शौण्डैः' (2.1.40) इति समासः।

`तमबादयः' इति। `अतिशायेन तमबिष्ठनौ' (5.3.55) इत्येवमादयः। `प्राक् कनः' इति। `युवाल्पयोः कनन्यतरस्याम्' (5.3.64) इत्ययम्। `ञ्यादयः' इति। `पूगाञ्ञ्योऽग्रामणीपूर्वात् (5.3.112) इत्यादयः। `प्राग्वृनः' इति। `पादशतस्य' (5.4.1) इत्यादिसूत्रेण विहितत्वात्। `आमादयः' इति। `किमेत्तिङव्ययघात्' (5.4.11) इत्येवमादयः। `प्राङ्मयटः' इति। `तत्प्रकृतवचने मयट्' (5.4.21) इत्यतः। `बृहतीजात्यन्ताः' इति। `बृहत्या आच्छदने' (5.4.6) इत्येतत् सूत्रं कनमुपलक्षयति। जात्यन्तशब्देनापि `जात्यन्ताच्छ बन्धुनि' (5.4.9) इत्येतत्। बहुवचननिर्देशोऽषडक्षादिसूत्राविहितस्य परिग्रहार्थः।।

8. विभाषाञ्चेरदिक्स्त्रियाम्। (5.4.8)

9. जात्यन्ताच्छ बन्धुनि। (5.4.9)

10. स्थानान्तद्विभाषा सस्थानेनेति चेत्। (5.4.10)

`सस्थानेन' इति। करणे तृतीया। स्थानेन स्थानवाच्येनार्थेन तुल्यपर्यायेण स्थानान्तं यद्यर्थवद्भवत्येवं प्रत्ययो भवति, नान्यथा। कथं पुनः स्थानशब्देन

तुल्यत्वमुच्यते? इत्याह--`समानम्' इत्यादि। यस्य समानं स्थानं स सस्थान इत्युच्यते। यश्चैवंविधं स यदपेक्षं तस्य समानं स्थानं स तेन तुल्यो भवतीति। `पितृस्थानीयः' इति। पितृस्थानमिव स्थानं यस्येति `सप्तम्युपमान' (वा. 99) इत्यादिनोत्तरपदलोपो बहुव्रीहिः।
`गोस्थानम' इति। षष्ठीतत्पुरुषोऽयम्। भवति ह्येतत् स्थानान्तं प्रातिपदिकम्, न तु स्थानेन तुल्यार्थेनार्थवत्तः। यथा स्थानान्तात् प्रत्ययो भवति, तथा तत्पुरुषेणापि स्वस्थानशब्देनार्थ उपस्थापिते तेनार्थेनार्थवतः स्थानात् प्रत्ययेन भवितव्यम्; विशेषानुपादानात्। ततश्च तुल्यञ्च तत् स्तानान्तं प्रतिपदिकं स्थानवाच्येनार्थेनार्थवदितियश्चोदयेत् तं प्रत्याह--`इतिकरणो विवक्षार्थः' इति। इतिकरणो ह्यत्र विवक्षार्थः क्रियते, तेनायमर्थो लभ्यतेततश्चेद्विवक्षा भवतीति। बहुव्रीह्यर्थेनार्थवतः स्थानात् प्रत्ययोत्पत्तौ लोकस्य विवक्षा भवति, न तत्पुरुषार्थेनार्थवतः। तस्मात् स्थानान्तस्यार्थमुत्पादयितुं बहुव्रीहिरेव स्थानशब्दार्थमुत्पादयति; न तु तत्पुरुषः। तेन न भवत्यतिप्रसङ्गः। `चच्छब्दः स्मबन्धार्थः' इति। स्थानान्तस्य सस्थानसम्बन्धो यथा स्यादित्येवमर्थं चेच्छब्दः; अन्यथा प्रत्ययं प्रति पञ्चस्या स्थानान्तस्य निर्देशात् स्थानान्तस्य सस्थानेन सम्बन्धो न स्यात्। न हि पञ्चम्यन्तेन तस्य सम्बन्धः शक्यते कर्त्तुम्। चेच्छब्दे तु स चेत् स्थानेनार्थवद्वतीत्युपपद्यते, न तु सम्बन्धः। `द्वयोर्विभाषयोर्मध्ये नित्यविधयः' इति। यदि नित्या न स्युः, पूर्वैव विभाषोत्तरत्रानुवर्त्तिष्यत इत्युत्तरं विभाषाग्रहणमनर्थकं स्यात्।।

11. किमेत्तिङ्व्ययघादाभ्वद्रव्यप्रकर्षे। (5.4.11)
`अद्रव्यप्रकर्षे' इति। ननु च द्रव्यस्य न प्रकर्षोऽस्ति; तथा च भाष्ये उक्तम्--`न वै द्रव्यस्य प्रकर्षोऽस्ति' इति, अतः प्रतिषेधोऽनर्थकः? इत्यत आह--`यद्यपि' इत्यादि। दृश्यते चाधेयधर्मस्याधार उपचारः, यथा--मञ्चाः ऋशन्तीति। तस्मादाधाराधेययोः क्रियागुणयोर्धर्मः प्रकर्षः। स यदाधारद्रव्य उपचर्यते तदासौ द्रव्यधर्मत्वादुपचारेण द्रव्यधर्मो भवति। अतोऽयं प्रतिषेधः क्रियते। `क्रियागुणयोरेव' इत्यादि। क्रियाया गुणस्य प्रकर्षो यदा द्रव्ये नोपचयंते क्रियागुणयोरेव प्रकर्षः, तत्रैव प्रत्ययः। यदि तु द्रव्ये उपचर्यते ततो द्रव्यप्रकर्ष इति वचनात्। `किन्तराम्' इति। वस्तुनो बहवो विशेषाः, तत्र प्रश्नः किंशब्दार्थः। `पूर्वाह्णेतराम्' इति। `घकालतनेषु कालानाम्नः' (6.3.17) इति सम्पम्या अलुक्। ननु च पूर्वाह्णः कालः, कालश्च द्रव्यम्, द्रव्यप्रकर्षे प्रत्ययेन न भवित्व्यम्; अद्रव्यप्रकर्ष इति प्रतिषेधात्? नैव दोषः; न ह्यत्र प्रातिपदिकार्थः प्रकर्षे वर्त्तते, किं तर्हि? विभक्त्यर्थः, स च गुम एव; द्रव्यशक्तिस्वरूपत्वात् कारकाणाम्। अथ वा--वचनसामर्थ्यात् कालप्रकर्षे भवति। न हि कालादन्यस्यस्मादेकारात् परो घो भवति। `कालनाम्नः' इति परतः सप्तम्या अलुग्विधानात्। `उच्चैस्तराम्' इति।।

12. अमु च च्छन्दसि। (5.4.12)

13. अनुगादिनष्ठक्। (5.4.13)
`अनुगदतीत्यनुगादी' इति। ग्रहादित्वाण्णिनिः। आवाश्यके वा, ताच्छील्ये वा, अस्मादेव निपातनाच्च।।

14. णचः स्त्रियामञ्। (5.4.14)
`व्यावक्रोशी' इति। `क्रश आह्वाने' (धा. पा. 856) इत्यस्माण्णच, लघूपधगुणः, णजन्तादञ्। स च कृदग्रहणपरिभाषया (व्या. प. 126) सगतिकाद्बवति। तेन सगतिकमेवेह प्रतिपदिकसंज्ञां प्रतिपद्यते, न कर्मव्यतिहार इति प्रतिषेधादेव वृद्धिप्रतिषेधयोरादिवृद्धिरेव भवति। `टिड्ढाणञ्' (4.1.15) इति ङीप्। `व्यावहासी' इति। `अत उपदायाः' (7.2.116) इति वृद्धिः।
`ततः' इति। णजन्तादिति यावत्। `स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्त्तन्ते (जै.प.वृ. 95) इति कृत्वा। `एवं तर्हि' इत्यादिना स्त्रीग्रहणं ज्ञापकं दर्शयति। `तेन' इत्यादिना ज्ञापकस्य प्रयोजनम्। `अतिवर्तन्तेऽपि' इति। व्यभिचरन्त्यपीत्यर्थः। अपिशब्दादनुवर्त्तन्तेऽणीति। यदि स्वार्थिकानां प्रकृतितो लिङ्गवचनानुवृत्तिव्यभिचारो ज्ञाप्यते, ततो गुडादिभ्यः पुंलिङ्गाद्यनुगतेभ्यश्च स्वार्थे कल्पबादयो भवति, तेषां पुंल्लिङ्गवचनं च तदैव भवेत् ततश्च गुडकल्पा द्रक्षेत्येवमादि नोपपद्यते। तस्मिंस्तु ज्ञापिते लिङ्गान्तरञ्च भवतीति। तेन सर्वमेतदुपपन्नं भवति। आदिशब्देनापि तैलकल्पा, चातुर्वर्ण्यम्, त्रैलोक्यमित्येवमादीनां ग्रहणम्।।

15. अणिनुणः। (5.4.15)
`सांराविणम्' इति। `रु शब्दे' (धा. पा. 1034) इत्येतस्मादिनुण्, `अचो ञ्णिति'(7.2.115) इति वृद्धिः, इनुणन्तादण्। स च पूर्ववत् सगतेरेव भवति। `इनण्यनपत्ये' (6.4.164) इति प्रकृतिभावः। `सांकूटिनम्' इति। `कूट दाहे' (धा. पा। 1890) इति, `मृजूष् शुद्धौ' (धा. पा. 1066), `मृजेर्वृद्धिः' (7.2.114), `शमित्याष्टाभ्यो घिनुण्' (3.2.141)। घकारे लुप्ते यद्यपीनुण् भवति, तथापि तस्मादण् न भवति; `स्थानान्ताद्विभाषा' (5.4.10) इत्यतो विवक्षार्थस्येतिकरणस्यानुवृत्तेः।।

16. विसारिणो मत्स्ये। (5.4.16)

`विसारी' इति। पूर्ववण्णिनिः। `वैसारिणः' इति। पूर्ववत्प्रकृतिभावः।।

17. संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्। (5.4.17)

`पौनःपुन्यमभ्यावृत्तिः' इति। पौनः पुन्येनात्र साहचर्यादेककर्त्तृकाणां तुल्यजातीयानां सोपलक्ष्यते, अत एवाह--`एककर्त्तृकाणाम्' इत्यादि। एककर्त्तृकाणामित्यत्र हि संख्येयानुकृष्ट उपसंख्यातगुणस्तन्मात्रे वर्त्तते। संख्याशब्देऽत एव व्यतिरेकनिबन्धना षष्ठी भवति। क्रियागणनमभ्यावृत्तिर्भवत्येव। `पञ्चकृत्वो भुङ्क्ते' इति। क्रियायाः पञ्चोत्पत्तीः करोतीत्यर्थः।

`भूरीन् वारान् भुङ्क्ते' इति। यदि संख्याग्रहणं न क्रियते, ततो यथा पञ्चादिभ्यः संख्याशब्देभ्यः प्रत्ययो भवति, तथा भूर्य्यादिभ्योऽपि स्यात्; संख्याग्रहणान्न भवति।

`अभ्यावृत्तिः क्रियाया एव सम्भवति' इत्यादी। ननु च द्रव्यगुणयोरपि सम्भवति--पुनः पुनर्दण्डी, पुनः पुनः स्थूल इत्यादि? नैतदस्ति; अत्र सामर्थ्यात् क्रियाभ्यावृत्तिः--पुनः पुनर्दण्डी भवति, पुनःपुनः स्थूलो भवतीति। तस्मादभ्यावृत्तिः क्रियाया एव सम्भवति, न द्रव्यगुणयोरपि। पुनः पुनर्दण्डीति--अत्र सामर्थ्याल्लभ्या क्रियेति क्रियाग्रहणं न कर्त्तव्यम्।

`एकस्य सकृच्चेत्यत्र' इत्यादि। एकशब्देन ह्येकैव क्रियाव्यक्तिराख्यायते। न चैकस्यां क्रियाव्यक्तावभ्यावृत्तिः सम्भवति, किं तर्हि? अनेकासु क्रियाव्यक्तिषु। तथा च प्रागुक्तम्--एककर्त्तृकाणामित्यादि। तस्मादेकस्य सकृच्च क्रियैव गण्यते, नाभ्यावृत्तिः। तस्मादसति क्रियाग्रहणे एकशब्दात् क्रियागणने प्रत्ययो न लभ्यते। तस्मादुत्तरार्थं क्रियाग्रहणं कर्त्तव्यम्।

`पञ्चपाकाः' इति। `क्रियागणने' इत्येतावत्युच्यमानेऽत्रापि स्यात्, अस्ति ह्यत्र क्रियागणनम्। अभ्यावृत्तिर्हि भिन्नकालानां क्रियाणां भवति, इह त्वभिन्नकाला एव पाका गण्यन्ते, अतस्तद्व्यावृत्तिः। ननु च क्रियाप्यत्र नास्त्येव, धात्वर्थस्य सिद्धताख्यो यो धर्मस्तस्मिन् घञो विधानात्? नैष दोषः; सापि सिद्धता क्रियाप्रदेशेषु क्रियागरहणेन गृह्यत एव; धर्मधर्मिणोर्भेदस्याविवक्षितत्वात्। अन्यथा कारकस्य गतिः, कारकस्य व्रज्येत्यत्र `तुमुन्ण्वुणौ क्रियायां क्रियार्थायाम्' (3.3.10) इति ण्वुल् न स्यात्। `अक्रियमाणे' इत्यादि। द्विविधाः संख्येयेवर्त्तमानेभ्यः संख्येयवचनेभ्य एव प्रत्ययः स्यात्। `शतं वारान् भुङ्क्ते शतकृत्वो भुङ्क्ते' इति। अत्र सोऽयमित्यभिसम्बन्धेन क्रियाभ्यावृत्तौ संख्येये शतशब्दो वर्त्तते। अत एव सामानाधिकरण्यम्। शतं वारानिति संख्याने पर्त्तमानेभ्यो न स्यादिति दर्शयितुमाह--`इह न स्यात्' इति। कुत एतदित्याह--`संख्यानमात्रवृत्तित्वात्' इति। मात्रशब्दः संख्येयं विहाय शतं वाराणामिति स्यात्।।

18. द्वित्रिचतुर्भ्यः सुच्। (5.4.18)

`चतुर्भुक्तम्' इति। `रात् सस्य' (8.2.24) इति सकारलोपः। `चकारः स्वरार्थः' इति। प्रकृतेरन्तोदात्तत्वं यता स्यादिति। प्रत्ययस्य तु चकारः स्वरार्थं नोपपद्यते; तस्यानच्कत्वात्। चतुःशब्दमेव प्रकृतं प्रति चकारस्य स्वरार्थत्वम्, नोत्तरयोः; तयोरुदात्तत्वात्। चतुःशब्दस्तु `चतेरुरन्' (द.उ.8.78) इत्युरन्प्रत्ययान्तत्वान्नित्स्वरेणाद्युदात्तः।।

19. एकस्य सकृच्च। (5.4.19)

`सकृद्भुक्तम्' इति। `संयोगान्तस्य' (8.2.23) इति प्रत्ययसकारलोपः। चकारोऽन्तोदात्तार्थः। असति तु तस्मिन `इण्भीकापाशल्यतिमर्चिभ्यः कन्' (द.उ. 3.21) इति कन्प्रत्ययान्तत्वान्नित्स्वरेणैकशब्द आद्युदात्त इति स्थानिवद्भादादेशोऽप्याद्युदात्त एव स्यात्, चित्त्वादन्तोदात्तो भवति। अथैकः पाक इत्यत्र कस्मान्न भवति, अस्ति ह्यत्र क्रियागणनम्? इत्याह--`एकः पाकः' इत्यादि।।

20. विभाषा बहोर्धाऽविप्रकृष्टकाले।

बहुशब्देऽपि सामान्य एव; प्रकारेऽपि वृत्तेः। तत्रानेकक्रियाभ्यावृत्तेरविप्रकर्ष एव तावन्न्याय्यः, प्रकरणाद्यपेक्षश्च। कृत्वसुजापि न शक्नोत्यस्मिन् विषये वर्त्तितुम्। तस्माद्विभाषाग्रहणं न कर्त्तव्यम्।।

21. तत्प्रकृतवचने मयट्। (5.4.21)

`प्राचुर्येण प्रस्तुतं प्रकृतम्' इति। कृतः पुनरयं विशेषो लभ्यते, यावता प्रस्तुतमात्रवचनः प्रकृतशब्दः वचनग्रहणादिह प्रकृत इति वक्तव्ये वचनग्रहणम्--यादृशस्य लोके प्रकृतस्य मयटो वचनं प्रत्ययान्तेन दृष्टं तत्रैव मयड्यथा स्यादित्येवमर्थम्। लोके च मयट्प्रत्ययान्तं रन्नमयादिशब्दैः प्रकृतस्य प्राचुर्यमुच्यत इति वचनग्रहणादेव विशेषो लभ्यते।

`अपरे तु' इत्यादि। अत्र प्रकृत्यर्थादर्थान्तर एव प्रत्ययः। प्रकृतशब्देन प्रस्तुतमात्रमुच्यते। न तु प्राचुर्य्यविशिष्टं प्रकृतमित्येष विशेषः।

`उभयथा' इत्यादि। उभयथाप्यस्मिन्नर्थे सूत्रस्य प्रणयनादित्यर्थः।।

22. समूहवच्च बहुषु। (5.4.22)

`मौदकिकम्' इति। यथा समूहे `अचित्तहस्तिधेनोष्ठक्' (4.2.47) इति ठग् मोदकादिभ्यो भवति; तथेहापि च मोदकशब्दात्, स्वार्थवाचिनः पुंल्लिङ्गाच्च।

स्त्रीलिङ्गादिभ्यः स्वार्थे ठग्विहितः, ततश्च `स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्त्तन्ते' (व्या.प. 74) इति प्रकृतिगतेनैव लिङ्गादिना भवितध्यम्; तत्कथमिदं प्रत्ययान्तरस्य नपुंसकलिङ्गं वचनान्तरं च? इत्यत आह--`अतिवर्त्तन्तेऽपि' इत्यादि। एतच्च `णचः स्त्रियाम्' (5.4.14) इत्यत्र ज्ञापितम्।।

23. अनन्तावसथेतिहभेषजाञ्ञ्यः। (5.4.23)
`उपदेशपारम्पर्ये वर्त्तते' इति। ह स्मोपाध्यायः कथयति, इति ह स्म पिता कययतीत्यत्रैवा प्रयोगदर्शनात्।।

24. देवतान्तात्तादर्थ्ये यत्। (5.4.24)
`चतुर्थोसमर्थात्' इति। तादर्थ्ये चतुर्थी; उपसंख्यानात्। `चतुर्थी तदर्थार्थ' (2.1.36) इति चतुर्थे भवतीति ज्ञापकाद्वा। `तादर्थ्ये चतुर्थ्या भवितव्यम्' इति चतुर्थीसमर्थात् प्रत्ययो विज्ञायते। तदर्थ एव तादर्थ्यमिति स्वार्थे ष्यञं दर्शयति। कथं पुनः स्वार्थे ष्यञ्? इत्याह--`चातुर्व र्ष्यादि' इत्यादिना। चातुवैर्ण्यादिसिद्ध्यर्थ स्वार्थे ष्यज उपसंख्यानं कृतम्, अयं तु चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ। `अग्निदेवतायै' इति। अग्निश्चासौ देवतः चेति विशेषणसमासः।।

25. पादार्घाभ्याञ्च। (5.4.25)
`छब्दस्यः' इति। सप्तवशाक्षरसमाहाराभिषायिनश्छप्दःशब्दात् स्वार्थे यत्प्रत्ययो भवति।
`द्वितीयाबहुवचनस्यालुक्' इति। अप्शब्दाद्द्वितीयाबहुवचनान्ताद्यति कृते `सुपो धातुप्रातपदिकयोः' (2.4.71) इति सुपो लुकि ------ , `सर्वे विषयश्छन्दसि विकल्प्यन्ते' (पु.प.वृ. 56) इति कृत्वा।
`आमुष्यायणामुष्यपुत्रिकेत्युपसंख्यानम्' इति। विभक्तेरलुगर्थमेतदुपसंख्यानान्तरम्, न प्रत्ययार्थम्। आमुष्यायणमित्यमुष्यशब्दो नडादिषु पठ्यते, ततः फकि कृते विभक्तेर्लुकि प्राप्तेऽलुग्वक्तव्यः। नडादिषु सविभक्तिकस्य पाठसामर्थ्याद्ध्यलुग्भविष्यति। अमुष्यपुत्रिकेत्यत्र त्वमुष्यपुत्रशब्दो मनोज्ञादिषु पठ्यत इति विभ्केर्लुकि प्राप्तेऽलुग्वक्तव्यः। मनोज्ञादिषु पाठाद्वा सिद्धमिति न वक्तव्यम्। उभयत्र `अदसोऽसेर्दादु वो मः' (8.2.80) इति मत्वोत्वे।।

26. अतिथेर्ञ्यः। (5.4.26)

27. देवात्तल्। (5.4.27)

28. अवेः कः। (5.4.28)

29. यवादिभ्यः कन्। (5.4.29)
`ऋतौ' इत्यादि। उष्णशीते शब्दरूपे कनमुत्पादयत ऋतावभिधेये--उष्णक ऋतुः शीतक ऋतुः। अन्यत्र उष्णः, शीत इत्येव भवति। `पशौ लुनवियाते' इति। लूनवियाते शब्दरपे कनमुत्पादयतः पशावभिधेये--लूनकः पशुः, वियातकः पशुः। पशोरन्यत्र लूनम्, वियातम्। `अणु निपुणे' इति। अणुशब्दो निपुणार्थः कनमुत्पादयति--पुत्रकः। अन्यत्र पुत्रः। `स्नात वेदसमाप्तौ' इति। स्नातशब्दः कनमुत्पादयति वेदसमाप्तौ विवक्षितायाम्। यस्य वेदः समाप्तः स स्नातक इत्युच्यते। वेदसमाप्तावपिति किम्? नद्यां स्नातः। `शून्य रिक्ते' इति। शून्यशब्दः कनमुत्पादयति रिक्ते तच्छेऽभिधेये--शून्यकः, तुक्छ इत्यर्थः। अन्यत्र शून्यम्। `दान कुत्सिते' इति। दानशब्दः कुत्सिते कनमुत्पादयति--कृत्सितं दानं दानकम्। अन्यत्र तु दानम्। `तेनु सूत्रे' इति। तनुशब्दः प्रत्यमुत्पादयति सूत्रे--तनुकम्। अन्यत्र तनुः। `ईयसश्च' इति। ईयस्प्रत्यान्तात् कन् भवति--शेयस्कः। `कुमारीक्रीडनकानि च' इति। कुमारीणां यानि क्रीडनकानि तानि कनमुत्पादयन्ति--कन्दुकम्।।

30. लोहतान्मणौ। (5.3.30)

31. वण चानित्ये। (5.3.31)
लोहितकः कोपेन' इति। लोहितशब्दवाच्यो वर्णः कोपे सति भवति। स्थित एव च देवदत्ते कोपविगमे गच्छतीत्यनित्यो भवति। अथ वर्णग्रहणं किमर्थम्, यावता लोहितशब्दो वर्ण एव वर्त्तते? नैतदस्ति; मणिनिमित्तोऽप्ययं द्रव्येऽपि वर्त्तत एव, तत्रासति वर्णग्रहणे द्रव्यस्याप्यनित्यग्रहणं विशेषणं विज्ञायेत, ततश्च लोहितकाः पार्थिवाः परमाणव इति प्रत्ययो न स्यात्; तेषां नित्यत्वात्। वर्णग्रहणे तु सति वर्णस्यैवानित्यग्रहणं विशेषणं भवतीति नित्ये प्रत्ययः सिद्धो भवति। अपि च--लोहितशब्दो वर्मनिमित्त एव रुधिराख्ये वर्त्तते। तच्च सर्वत्रैवानित्य इति विशेषणोपादानसामर्थ्यादनित्ये कार्यविशेष उच्यते। स पुनः सत्येवाश्रये कदाचिद्भवति, कदाचिन्नेति। तेन यदेतत् स्त्रोणामार्त्तवं लोहितं तत्रैव स्यात्। तस्माद्वर्णग्रहणं कर्त्तव्यम्।

`लोहितो गौः, लोहितं रुधिरम्' इत्यत्र यावदाश्रयस्तावदवस्थानादनित्यो वर्णो न भवति। ननु चायमप्याश्रयविनाशेन विनाशादनित्य एव? सत्यमेतत्; सर्व एव हि वर्ण ईदृशः। उच्यते चेदमनित्य इति विशेषणोपादानसामर्थ्यात्। तेन प्रकर्षेण योऽन्त्य इति विज्ञायते, स पनः सत्येवाश्रये, अभूत्वा भवतीति यो भूत्वा प्रतिगच्छति स एव भवितुमर्हति।

`लोहिताल्लिङ्गबाधनम्' इत्यादि। लिङ्गधिकारे यो विहितः प्रत्ययः स उपचारालिङ्गशब्देनोक्तः, तस्य लोहितशब्दाद्बाधनं भवतीति वक्तव्यम्; अन्यथा स्त्रीत्वस्य वर्णानित्यस्य युगपद्विक्षायां लोहितशब्दात् `वर्णादनुदात्तात्तोपधात्तो नः' (4.1.39) इति यो ङीप् प्राप्नोति, स कना नित्यं बाध्येत। तस्य हि हरित वर्णादिरवकाशः प्राप्नोति, तत्र कनि कृते तदन्ताट्टापि लोहितकेत्येव स्तात् लोहिनिकेत्येवं तु न प्राप्नोति। `तस्माद्धि लिङ्गबाधनं कर्त्तव्यम्। एवं लोहितशब्दात् `वर्णादनुदात्तात्' (4.1.39) इत्यादिना ङीपि तकारस्य नकारे ततोऽनेन कन्। `केऽणः' (7.4.13) इति ह्रस्वत्वे कृते लोहिनिकेति भवति।।

32. रक्ते। (5.4.32)

`लाक्षादिना रक्ते' इति। ननु च लाक्षादिना य आधीयते लोहितो वर्णः, तस्यानित्यत्वात् पूर्वसूत्रेणैव सिद्धम्? यदा हि ते योगविशेषेण तथाविधं स्थैर्यमुत्पद्यते; यतः स्वाश्रयं न जहाति तदा नित्यत्वान्न प्राप्नोति, तदर्थमिदमुच्यते।।

33. कालाच्च्। (5.4.33)

34. विनयादिभ्यष्ठक्। (5.4.34)

`उपायाद्ह्रस्वत्वञ्च' इति। उपायशब्दठकमुत्पादयति, ह्रस्वत्वञ्च प्रतिपद्यते--औपयिकः।।

35. वाचो व्याहृतार्थायाम्। (5.4.35)

`व्याहृतः' इति। उक्त इत्यर्थः। `अन्येन' इति। सन्देष्ट्रा। न हि पूर्वं सा वाक् संदिष्टा। तेन हि पूर्वं सन्दिशता सन्देशवाक् भवति। यया सन्दिष्टोऽर्थोऽभिधीयते, सा च सन्देशवागुच्यते।।

36. तद्युक्तात्कर्मणोऽण्। (5.4.36)

`कर्मशब्दात्' इति। एतेन कर्मण इति स्वरूपस्य ग्रहणम्, नेप्सिततमस्येति दर्शयति। ननु च कर्मशब्दस्य संज्ञाशब्दत्वादीप्सिततमस्यैव ग्रहणं युक्तम्, न स्वरूपस्येति? नैतदस्ति; इह हि `स्थानान्तात्' (5.4.10) इत्यादेः सूत्रादितिकरणोऽनुवर्त्तते, तेनायमर्थो लभ्यते--ततश्चेद्विवक्षा भवतीति। कर्मशब्दाच्च प्रत्ययोत्पत्तौ लोके विवक्षा भवति, नेप्सिततमात्। न हि तत उत्पन्नेनाणा व्याहृतार्थवाचा युक्तं कर्म शक्यते द्योतयितुम्, कर्मशब्दात्तूत्पन्नेन शक्यते। तस्मात् स्वरूपस्यैव ग्रहणं युक्तम्। `कार्मणम्' इति। `अन्' (6.4.16) इति प्रकृतिभावः। `तथैव' इति। यथैव व्याहृतार्थया वाचा प्रतिपादितम्--एवं कर्त्तव्यमिति, तेनैव प्रकारेणेत्यर्थः।

`अण्प्रकरणे' इत्यादि। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेवं प्रतिपादनम्---प्रज्ञादेराकृतिगणत्वात् कुलालादयस्तत्रैव द्रष्टष्याः। तेन `प्रज्ञादिभ्यश्च' (5.3.38) इत्यण् भविष्यतीति। यद्येवम्, भाषायामपि स्यात्? नैष दोषः; `विभाषा बहोः' (5.4.20) इत्यादिसूत्राद्विभाषेत्यनुवर्त्तते, सा च व्यवस्थितविभाषा छन्दस्येव भविष्यति, न भाषायामिति।

`सान्नाय' [सान्नय्य-काशिका, पदमञ्जरी च] इत्यादि। सान्नायानुजावरानुषूकानुष्टुभचातुष्प्राश्यराक्षोध्ववैयातवैकृतवारिवस्कृताग्रायणाग्रहायणसान्तपनाश्छन्दसि भाषायाञ्चेष्यन्ते। तस्मात्सान्नायादयः। एषां प्रकृतयः प्रज्ञादिष्वेव द्रष्टव्याः। अत्र चाग्रायणाग्रहायण--
इत्यत्रेकारान्ताभ्यामाग्रायण्यग्रहायणीशब्दाभ्यामन्यत्राकारान्तेभ्योऽनुजावरादिभ्यः प्रत्ययः। सान्नाय्यशब्दस्य चेहान्तोदात्तार्थ ग्रहणम्। रूपं तु `पाय्यसान्नाय्य' (3.1.129) इति निपातनादेव सिद्धम्।।ष

37. ओषधेरजातौ। (5.4.37)

`औषधं पिवति' इति। फलादौ वर्त्तमानादोषधिशब्दात् प्रत्ययः, स च जातिर्न भवति; `आकृतिग्रहणा जातिः' (काशिका. 4.1.63) इत्यादेर्लक्षणस्याभावात्। ओषधयः क्षेत्रे रूढा भवन्ति। अत्र फलपाकान्ता जातिः, तत्रौषधिशब्दो वर्त्तते।।

38. प्रज्ञादिभ्यश्च। (5.4.38)

`प्रजानातीति प्रज्ञः' इति। `इगुपधज्ञाप्रीकिरः कः' (3.1.135)। ननु च यः प्रजानाति तस्य प्रज्ञास्तीति `प्रज्ञश्रद्धार्चावृत्तिभ्योऽण्' (5.2.101) इति

मत्वर्थेनैव णेन सिद्धम्, तत् किमर्थं प्रज्ञाशब्दादण् विधीयत इति? अस्य चोद्यस्य निराकरणाय स्त्रियां विशेषं दर्शयन्नाह--`स्त्रो प्राज्ञी' इत्यादि। `विदेः शत्रन्तस्य ग्रहणम्' इति। न तु `विदेः शतुर्वसुः' (7.1.36) इत्यादि।
`श्रोत्र शरीरे' इति। शरीरे यः श्रोत्रशब्दो वर्त्तते तस्मादण् भवति-श्रौत्रम्। अन्यत्र शोत्रम्। `जुह्वत्' इति। जुह्वच्छब्दात् कृष्णमृगे वर्त्तमानादण भवति--जौह्वतः। जुह्वदित्येवान्यत्र। अन्ये `कृष्ण मृगे' इति पृथक् पठन्ति। कृष्णशब्दादण् भवति मृगेऽभिधेये---कार्ष्णो मृगः, कृष्ण एवान्यत्र। जुह्वच्छबदादविशेषेणास्मिन् पाठे प्रत्ययः। `सत्वन्तु' इति। सच्छब्दो यो मतुप्प्रत्ययान्तः सः सत्वानेव सात्वतः।
`प्रज्ञादिरयमाकृतिगणः। तामेवास्याकृतिगणतां बोधयितुमनुक्तसमुच्चयार्थश्चाकाः कृतः। तेन कुलालकुक्कुटादिभ्योऽण् सिद्धो भवति।

39. मृदस्तिकन्। (5.4.39)

किमर्थं पुनस्तिकन् विधीयते, न तकन्नेव विधीयेत, नित्यश्च स्त्रीप्रत्ययोऽयम्, तत्र टापि कृते `प्रत्ययस्थात् कात्' (7.3.44) इतीत्त्वेनैव सिद्धम्? यत्र तर्हि लुग्भावः क्रियते, तत्र न सिद्ध्येत्--पञ्चभिर्मृत्तिकाभिः क्रीतः पञ्चमृत्तिक इति। तत्र हि `अध्यर्द्धपर्वद्विगोः' (5.1.28) इत्यादिनाऽऽर्हीयस्य ठ को लुकि कृते `लुक् तद्धितलुकि' (1.2.49) इति स्त्रीप्रत्ययस्यापि लुक्। तत्र यदि तकन् विधीयते, तदा टापोऽभावादिकारो न न श्रूयेत, प्रक्रयागौरवं स्यात्; इकगारस्य शास्त्रान्तरेण विधीयमानत्वात्।।

40. सस्नौ प्रशंसायाम्। (5.4.40)

41. वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि। (5.4.41)

42. बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्। (5.4.42)

`इत्येवमादीनि' इति। आदिशब्देनापादानादिकरणविषयोदाहरणपरिभाषाग्रहणम्--बहुभ्यो ह्यत्रागच्छति बहुश आगच्छतति, अल्पश आगच्छतीति। बहुशो निदधाति।
`बहूनां स्वामी' इत्यत्र शेषस्य विवक्षितकारकाभिधायी बहुशब्दो न भवति।
`अर्थग्रहणात्' इत्यादि। असति ह्यर्थग्रहणे बहवल्पशब्दाभ्यामेव प्रत्ययः स्यात् । तस्मिंस्तु सति पर्यायेभ्योऽपि भवति।
`बह्वल्पार्थात्' इत्यादि। वह्वल्पार्थात् प्रत्यये विधातव्ये मङ्गलवचटनं कर्त्तव्यम्। भङ्गलवचनेन चेह व्याख्यानमुच्यते, व्याख्यायते तेनेति कृत्वा। कथं पुनः कारणस्य मङ्गलवचनं कर्त्तव्यम्? इत्याह--`यत्र' इत्यादि। तत्रेदं व्याख्यानम्--इह प्रशंसाग्रहणमनुवर्त्तते, प्रशंशायां प्रत्ययेन भवितव्यम्, तच्छाभ्युदयिकेषु। बहुशो ददाति, नाल्पशः--एवं प्रशंसा भवति। इदमेव वचनमाभ्युदयिकेषु बहुशो लोके दानविषयेषु; अन्यता तेनास्य ग्रहणानुवृत्तेर्मङ्गले गम्यमाने प्रत्ययो न भवतीति।
अथ वा--इहापीतिकरणानुवृत्तेर्मङ्गल एव भवति, नान्यत्रेति। शसः सकारस्येत्संज्ञा न भवति; प्रयोजनाभावात्।।

43. संख्यैकवचनाच्च वीप्सायाम्। (5.4.43)

`नित्यवीप्सयोः' (8.1.4) इति द्विर्वचनेन तदपवादः शस्विधीयते।

`एकोऽर्थ उच्यते येन तदेकवचनम्' इति। एतेन सहार्थेकवचनान्तादित्यभिप्रायः। ननु चान्वर्थग्रहणेन च प्राप्नोत्येव, भवति ह्येकवचनम्, एकार्थवृत्तित्वात्? नैषः, न हि वाक्यस्यैकार्थता प्रत्ययविदावाश्रीयते। किं तर्हि? वृत्तिस्था। न वृत्तौ च निवृत्तायां विभक्तौ घटादय एव शब्दा एकवचनान्ता भवन्ति; जातिशब्दत्वात्। जातिशब्दा हि नैकस्यामेकजात्याधारभूतायां व्यक्तौ वर्त्तन्ते, किं तर्हि? अनेकस्यामपि। तदेषामेकार्थवृत्तित्वं वाक्य एव विभक्तिसंख्याश्रयणे प्रतीयते, न वृत्तौ; विभक्तेर्निवृत्तत्वात्। `कार्षापणादयश्च' इत्यादि। `कार्षापणादयः शब्दाः परिमाणाः' इत्युक्तम्। परिमाणस्य विसेषस्य वाचका इत्यर्थस्याधिक्ये तेषां वृत्तिर्न सम्भवति। वाक्ये तु तेषां प्रयोगेऽनेकार्थप्रतीतिः--कार्षापणौ, कार्षापणा इति, सा विभक्तिर्न तेभ्यः। वृत्तौ तु सा विभक्तिर्नास्तीति तेनैकार्था भवन्ति। वृत्तिस्थैकार्थता प्रत्ययविधावाश्रीयते, न वाक्यस्थेत्युक्तमेतत्।
`घटं घटं ददाति' इति। घटादयः सब्दा वृत्तावेकार्था न भवन्ति। एतच्च प्रतिपादितम्। यदान्वर्थाः प्रकरणादिसहिता घटादयोऽपि जातिशब्दा एकार्था भवन्ति, तदा भवितव्यमेव शसा; अन्यथा `जश्शसोः शिः' (7.1.20) इत्यत्र यद्वक्ष्यति--जसा सहचरितस्य शसो ग्रहणमित्यत्र न भवति--`कुडवशो ददाति, शतशः प्रविशति' इति, तद्व्याहन्यते; कुडवादिशब्दस्यापि जातिशब्दत्वात्।।

44. प्रतियोगे पञ्चम्यास्तसिः। (5.4.44)

`प्रद्युम्नो वासुदेवतः प्रति' इति। `प्रतिनिधिप्रतिदाने च यस्मात्' (2.3.11) इति पञ्चमी, ततस्तसिः। तसेरिकारो मुखमुखार्थः। ननु च सकारस्येत्संज्ञा मा

भूदित्येवमर्थः स्यात्? नैतदस्ति; प्रयोजनाभावादेव हि तस्येत्संज्ञा न भविष्यति।

`आद्यादिभ्य उपसंख्यनम्' इति। आद्यादिभ्यसतसेरुपसंख्यानमिति प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्--उत्तरसूत्रे चकारोऽनुक्तसमुच्चयार्थः, तेन आद्यादिभास्तसिर्भविष्यतीति। अनुक्तसमुच्चयार्थत्वे चकारस्य `तस्यादित उदात्तमर्धह्रस्वम्' (1.2.32) इति निर्देशः।।

45. अपादाने चाहीयरूहोः। (5.4.45)

`ग्रामादागच्छति' इति। `ध्रुवमपायेऽपादानम्' (1.4.24) इत्यपादानसंज्ञा। `चौरेभ्यो बिभेति' इति। `भित्रार्थानां भयहेतुः' (1.4.25) इति। `अध्ययनात् पराजयते' इति। `पराजेरसोढः' (1.4.26) इति।

`सार्थाद्धीयते' इति। `ओहाक् त्यागे' (धा. पा. 1090), लः कर्मण्यात्मनपदम्, यक्, `घुमास्था' (6.4.66) इत्यादिसूत्रेणेत्त्वम्। ननु चाकर्त्तृकं कर्म नास्ति, `कर्त्तुरीप्सिततमं कर्म' (1.4.49) इति वचनात्; सार्थश्चात्र न कर्म, किं तर्हि? अपादानम्? नैष दोषः; कर्मसंज्ञायां हि कर्त्तृग्रहणं स्वातन्त्र्योपलक्षणार्थम्। कृत एतत्? क्रियाविशेषणत्वात्। कर्त्तरि च द्वयमस्ति--स्वातन्त्रयम्, कर्तृसंज्ञा च। तत्र संज्ञायाः क्रियाविशेषणत्वं नोपपद्यते। यद्धि तस्याः कारणं तेनैव सा युक्ता विशेषयितुम्। न च तस्याः कर्त्तृसंज्ञा कारणम्, किं तर्हि? स्वातन्त्र्यम्;तस्य कर्त्तृस्वरूपत्वात्। भवति क्रियां प्रति यदा कारणभावः; कर्मणा च नैव क्रिया विशेष्यते, तदायमर्थो भवति---स्वातन्त्र्यस्य क्रियाया यदीप्सिततमं तत्कर्मसंज्ञं भवतीति। सार्थस्यापि देवदत्तेन तस्याभिधानम्। तस्य तस्मिंस्त्वसत्यपादानमपि न स्यादेव। तस्माद्देवदत्तः कर्म। जहातेरेव सार्थस्यापादानेन भवितव्यम्। तत्रापादानस्यापि सतः सार्थस्य हानक्रियायां यत् स्वातन्त्र्यं तत्क्रियाविवक्षयैव देवदत्तस्य कर्मसंज्ञा भवति।

अथ किमर्थं यका निर्देशः क्रियते, न `हारुहोः' इत्येवोच्येत? इत्यत आह--`विकारनिर्देशः' इत्यादि। विक्रियते तस्मिन् रूपमिति विकारः, स पुनरिह यगेव--हीयेति। तत्र हि धुमास्तादिसूत्रेमेकारस्य (6.4.66) विधानात् विक्रियते जहाते रूपम्। अथ वा--विकृतिः=विकारः, तेन विकारेण निर्देशः. कथं नाम? जहातेः प्रतिपत्तिर्यथा स्यात्, जिहीतेर्मा भूदित्येवमर्थम्; अन्यथा हि जीहीतेरपि ग्रहणं स्यात्। विकारनिर्देशे तु यस्येदृशं रूपं तस्यैव ग्रहणं भवतीति न भवत्येष प्रसङ्गः। `भूमित उज्जिहोते' इति। जिहीतेरिहाग्रहणात् तत्सम्बन्धिनोऽपादानाद्भवत्येव। हाङो ङित्वादात्मनेपदम्, `भृजामित्' (7.4.76) इत्यभ्यासस्येत्त्वम्, `ई हल्यघोः' (6.4.113) इति धातोरीत्त्वम्।

`कथं मन्त्रो हीनः स्वरतो वर्णतो वा' इति? यदाह--जहातेः प्रतिषेधः क्रियते ततस्तस्मिन्न प्राप्नेती त्यभिप्रायः। `नैषा पञ्चमी' इति। पञ्चम्या अविहितत्वा।, उपचारेण तसिः, नैषा पञ्चमीत्युक्तम्। किं तर्हि? तृतीयेति। अत्रापि तृतीयाया विहितत्वात्। तृतीयेत्युक्तस्तसिः। तेनैतत् सूचयति--नायमिह तसिरनेन सूत्रेण पञ्चम्या विहितः, किं तर्हि? `अतिग्रहाव्यथनक्षे पेष्वकर्त्तरि तृतीयायाः' (5.4.46) इत्यनुवर्त्तमानं `हीयमानपापयोगच्च' (5.4.47) इति तृतीयाया इति। सा च तृतीया हेतौ करणे वा द्रष्टव्या।।

46. अतिग्रहाव्यथनक्षेपेष्वकर्त्तरि तृतीयायाः। (5.4.46)

`अतिक्रम्य' इति। अनेनातिशब्दोऽत्रातिक्रमे वर्त्तत इति दर्शयति। `अचलनमध्यथनम्' इति। `व्यथभयचलनयोः' (धा.पा. 764) इति पठ्यते, तस्येह चलने वृत्तिमाचष्टे। वृत्तेनेति हेतौ करणे वा तृतीया।।

47. हीयमानपापयोगाच्च। (5.4.47)

`वृत्तेन हीयते, वृत्ततः पापः' इत्यत्र वृत्तस्य हीयमानेन पापेन योगे तृतीया हेतौ, करणे वा।

क्षेपविवक्षायामिदमुदाहरणं कस्मान्न भवति? इत्याह--`क्षेपस्य च' इत्यादि।।

48. षष्ठ्या व्याश्रये। (5.4.48)

49. रोगाच्चापनयने। (5.4.49)

`प्रवाहिकातः' इति। प्रवाहिकाशब्दात् प्रतीकारापेक्षया षष्ठी, ततस्तसिः।।

50. अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः। (5.4.50)

`कारणस्य विकाररूपेणाभूतस्य' इति। कारणम्=प्रकृतिः, तस्यैवोत्तरमवस्थान्तरम्=विकारः। तेन विकाररूपेणाभूतस्याजातस्येत्यर्थः। कुतः पुनरयमभूततद्भावविशेषो लभ्यते? अभूतग्रहणादिह हि भावः=जन्म, सत्ता वा। यदि हि सत्ता भावः स्यात्, भ्वस्तिभ्यामेव सम्बन्धः स्यात्, न करोतिना। न हि यत् क्रियते सा सत्ता। धातुत्रयोपादाने च सति यस्मिन्नर्थे गृह्यमाणे त्रिभिरपि धातुभिर्योगोऽस्ति स एवाश्रयितुं युक्तः; स च जन्मैव, न सत्ता । कृगरहणादेष विशेषो लभ्यते। `तदात्मना भावः' इति। तच्छब्देन विकारः परामृश्यते, स एव विकारः; आत्मा=स्वभावः, तेन विकारात्मा=अभूततद्भावः। अपि तु लब्धसत्ताकस्यैव कारणस्य प्रागप्रतिपन्नविकारस्योत्तरकालविकारभूमावाप्तिरभूततद्भाव इत्युक्तं भवति। तेन यत्र प्रकृतिर्न विवक्ष्यते, तत्र प्रत्यो न भवति, यथाशुक्लं करोतीति प्रत्युदाहरणे। न हि प्रकृतावत्र विवक्षितायामेवंविधोऽभूततद्भावो गम्यते। तच्छब्देन प्रकृतिविकारयोरभेदविवक्षा प्रतिपाद्यते। तेन

यत्र प्रकृतिविकाररूपमापद्यमाना तस्मादभिन्ना विवक्ष्यते, तत्रैव प्रत्ययो भवति; न तु यत्र कारणतः कार्यस्य भेदो विवक्ष्यते। यत्र तु भेवः, यथा--पटं करोतीति, न तत्र। `सम्पद्यतेः कर्त्ता सम्पद्यकर्त्ता' इति। कथं पुनस्तिङन्तेन समासः? कथं च तिङो लोपः? सौत्रत्वात्? निर्देशस्य सत्त्वात् सर्वमिदमुपपद्यते। अथ वा--सम्पूर्वात् पदेरत एव निपातनाद्यत्प्रत्ययः, तदन्तस्यायं विशेषमसमासः। तत् तिङन्तस्य वृत्तिकरणे त्वर्थप्रदर्शनमात्रं कृतम्; न पुनरेतद्विग्रहवाक्यम्। `सम्पत्तिः' इति वक्तव्ये, `सम्पद्यकर्त्तरि' इत्युक्तं वैचित्र्यार्थम् `शूक्लीकरोति' इति। `अस्य च्वौ' (7.4.32) इतीत्त्वे `च्वौ' (7.4.26) इति दीर्घत्वम्। चव्यन्तस्याव्ययत्वात् सोर्लोपः।
`नात्र प्रकृतिविवक्षिता' इति। विकारमात्रस्य विवक्षितत्वात्। यत्र च प्रकृतिर्न विवक्ष्वते, नात्राभूततद्भावो गम्यत इति न भवति प्रत्ययः। `अभूततद्भावसामर्थ्याल्लब्धमेव' इत्यादि। यो ह्यविकाररूपेण भूतो विकारात्माना भवति, स नियोगतस्तेन रपेण सम्पद्यमानः सम्पद्यकर्त्ता भवतीत्येतत् सामर्थ्यात् स्वरूपान्तरेण सम्पद्यते। तत् कर्तृसंज्ञकमेव भवतीति नायं नियोगत इत्यभिप्रायेणाह--`कारकान्तरसम्पत्तौ मा भूत्' इति। `अदेवगृहे' इत्यादि। अत्र देवगृहस्य देवताराधनत्वेनाभूतस्य प्रागुत्तरकालं देवतादेयसम्बन्धेन तदात्मकत्वमापद्यमानस्य भवत्ययमभूततद्भावः; स त्वधिकरणस्य, न कर्त्तुः। तथा हि--तद्रूपान्तरमापद्यमानमपि न कर्त्तृसंज्ञम्, किं तर्हि? अधिकरणसंज्ञमेव; अन्यथा सप्तमी न स्यात्। च्वौ इकार उच्चारणार्थः। चकारः प्रकृतदेरन्तोदात्तार्थश्च्रः। वकारस्य `वेरपृक्तस्य' (6.1.67) इति लोपः।।

51. अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च। (5.4.51)
`अत्र विशेषणसम्बन्धात्' इत्यादि। अभूततद्भावादीनि सर्वाणि विशेषणानीह पूर्वसूत्रादनुवर्त्तन्ते। तस्मात् सर्वविशेषणसम्बन्धात् पूर्वेणैवारुःप्रभृतिभ्यः प्रत्ययः सिद्ध इति नासौ दिधीयते, लोपमात्रं तु न प्राप्नोति। अतस्तदर्थ वचनम्। यदि पुनरनेनैव प्रत्ययविधिः स्यातद्, दुर्मनीकरोतीत्यादौ प्रत्ययो न स्यात्; ग्रहणवता प्रातिपदिकेन तदन्तविधेः प्रतिषेधात् (व्या.प. 89) पूर्वेण तु तदन्तादपि भवति; तत्र ग्रहणवत्प्रातिपदिकस्याभावात्। `उन्मनीकरोति' इत्येवमादौ बहुव्रीहेः प्रत्ययः।।

52. विभाषा साति कार्त्स्न्ये। (5.4.52)
`विभाषाग्रहणं च्वेः प्रापकम्' इति। समुच्चयार्थत्वात्। समुच्चयार्थत्वं त्वनेकार्थत्वान्निपातस्य। यद्येवम्, चकार एव कस्मान्नोह्यः? वैचित्र्यात् सूत्रकृतेः। अथ प्रत्ययदिकल्पार्थमेवेति विभाषाग्रहणं कस्मान्न भवति? इत्याह--`प्रत्ययविकल्पस्तु' इत्यादि।।

53. अभिविधौ सम्पदा च। (5.4.53)
`स तु कृभ्वस्तिभिरेव योगे भवति' इति। कृभ्वस्तिभिरित्येव योग इत्यनेन सम्बन्धस्यव तस्येहानुवृत्तेः। अभिविधेः कार्त्स्न्यस्य चावश्यं विशेषेण भवितव्यम्; अन्यथा सूत्रद्वयारम्भो निष्फलः स्यात्, एकेनैव सिद्धत्वात्।
स च विशेषो न ज्ञायते, इत्यतस्तत् पृच्छति--`अताभिविधेः' इत्यादि। `यथास्यां सेनायाम्' इत्यादि। अथ शेषाणां शस्त्राणामेकदेशेन ह्यात्मना सम्बन्धमात्रं विवक्षितम्, न सर्वात्मना विकाररूपापत्तिः। `वर्षासु सर्व लवणमुदकसात्सम्पद्यते' इति। अत्रापि सर्वासां लवणव्यक्तीनामेकदेशेनोदकात्मताविकारेण सम्बन्धमात्रं विवक्षितम्। न त्वेकस्य सर्वात्मना विकाररूपापत्तिः। `कात्स्न्यं तु' इत्यादि। यत्र ह्येकस्यापि द्रव्यस्य सर्वात्मना विकाररूपापत्तिः, न त्वेकदेशेन, तत्र कार्त्स्न्य भवति। तत्र यदि पूर्वो योगो नारब्येत, यत्रैकद्रव्यविशेषविषयं कात्स्न्यं तत्र प्रत्ययोगो न स्यात्; अभिविधेरभावात्। अथायं नारभ्येत? यत्र सर्वाः प्रकृतय एकदेशेन विकारमापद्यन्ते न स्यत्। तस्मादुभयमारब्धध्यम्।।

54. तदधीनवचने। (5.4.54)
`तदधीनं तदायत्तम्' इति। तस्यायत्तं तदायत्तम्। तच्छब्देन स्वामिसामान्यमुच्यते। अधीनशब्देनापीशितव्यसामान्यम्। अनन्तरोक्तमेवार्थं विस्पष्टीकर्त्तुमाह--- `तत्स्वमिकमित्यर्थः' इति। स स्वामी यस्य तत् तत्स्वामिकम्। अत्राप्यन्यपदार्थप्रधानत्वादृबहुव्रीहिः। ईशितव्यस्य चान्यपदार्थत्वात् तस्य प्रधानभावः। स्वामिनस्तु तदुपलक्षणत्वाद्गुणभावः। `स्वामिसामान्यम्' इत्यादि। स्वामिसामान्यम्=ईश्वरसामान्यम्, ईशितव्यसामान्यमितततततत्येतदुभयं तदधीनशब्देनोच्यते। कथं कृत्वा? इह `अधिरीश्वरे' (1.4.97) इत्यधिशब्दस्य कर्मप्रवचनीयसंज्ञा, तेन योगे `यस्मादधिकं यस्य चेश्वर' (2.3.9) इति च सप्तमी। स चेश्वर ईशितव्यापेक्षित इति सामर्थ्यादीशितव्याभिधानमधिशब्देन योगे भवति। अदिशब्दश्चायं शौण्डादिषु पठ्यते, तत्र `सप्तमी शौण्डैः' (2.1.40) इति समासे कृते पूर्वपदस्य स्वाभिसामान्यमर्थो भवति, उत्तरपदस्य चेशितव्यसामान्यम्। अवडक्षादिसूत्रेण (5.4.7) खप्रत्यये कृते स एवायमर्थो भवति, तस्य तत्स्वामिकत्वादित्येवं च कृत्वा। स्वामिसामान्यमीशितव्यासामान्यं तदधीनशब्देनोच्यते। तत्र स्वामिसामान्यं प्रकृत्यर्थः, ईशितव्यसामान्यं तु प्रत्यायर्थ इत्यत आह--`स्वामिविशेषवाचिनः' इत्यादि।।

55. देये त्रा च। (5.4.55)

`राजसाद्भवति राष्टम्' इति। पूर्वेण सातिरेव भवति।।

56. देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्। (5.4.56)
अथ बहुलग्रहणं किमर्थम्, यावता `दिभाषा साति कार्त्स्न्ये' (5.4.52) इत्यत्र विभाषाग्रहमनुवर्त्तिष्यत एव, विकल्पेन प्रत्ययो भविष्यति? इत्याह--
`बहुलग्रहणादन्यत्रापि लभ्यते' इति। तस्माद्विभाषायां प्रकृतायां यद्बहुलवचनं कृतम्, तदन्यत्रापि यथा स्यादित्यभिप्रयः।।

57. अव्यक्तानुकरणाद्द्व्यजवरार्द्धदनितौ डाच्। (5.4.57)
`अव्यकतस्यानुकरणमव्यक्तानुकरणम्' इति। यद्यप्यनुकरणे वर्णविशेषो रूपेण न प्रकाशते, तथापि ध्वनेः समानतया तन्मात्रसादृश्येन स तवनुक्रियत इति तस्याप्यनुकरणमित्युच्यते। द्व्यजरर्द्धं भवति तस्मात् प्रत्ययो भवति, यस्य न ततोऽपि न्यूनतरमेकाज्भवति। यद्यकृते द्विवचने यस्य द्व्यजवरार्द्धता ततो डाज्भवतीति ज्ञायते, ततः पटदित्यादेर्न स्यात्; न ह्यत्र द्व्यजवरमर्द्धं भवतीत्येतच्छेतसि कृत्वाऽऽह--`यस्य च' इत्यादि। नन्वेवं सति डाचि परभूते तदाश्रये द्विर्वचने कृते द्व्यजवरार्द्धता भवति, तस्याञ्च सत्यां डाजितीतरेतराश्रयः प्रसजति। इतरेतराश्रयाणि कार्याणि शास्त्रे न प्रकल्पन्ते? इत्याह---
`डाचि बहुलम्' इत्यादि। यद्येषा परसप्तमी स्यात्, स्यादेष दोषः; न चैषा परसप्तमी, किं तर्हि? विषयसप्तमी। `पटपटाकरोति' इति। पटच्छब्दाड्डाचि विवक्षिते विषयभूते बुद्धिस्थेऽनुत्पन्न एव पूर्वं तावद्द्विवैचनं पटच्छब्दस्य क्रियते, तस्मिन् कृते द्व्यजवरार्द्धतायामुपजातायां डाचि टिलोपः, `नित्यमाम्रेडिते डाचि' (6.1.100) इति पूर्वस्य तकारस्य पररपत्वलम्, `दमदमाकरोति' इति। वमच्छब्दस्य पूर्ववद्द्विर्वचनम्, ततो डाच्।
`दृषत्करोति' इति। अत्रापि द्विर्वचने कृते द्व्यजवरार्द्धत भवतीति। नाव्यक्तस्येदमनुकरणम्। `श्रत्करोति' इति। भवत्येतदव्यक्तानुकरणम्, न द्व्यजवरार्द्धम्। कृतेऽपि ह्यत्र द्विर्वचने एकाजवरमर्द्धं सम्पद्यते। `खरटखरटाकरोति' इति। खरटवित्येतस्यानुकरणस्यात्र पटदित्येतस्यानुकरणस्येव पूर्ववद्द्विर्वचनम्, ततो डाच्। यदि `द्व्यजर्द्धम्' एतावदुच्येत, इह प्रत्ययो न स्यात्, न ह्यत्र द्व्यजर्द्धतास्ति। अवरग्रहणे तु सतीहापि भवति। तत्र हि द्व्यचोऽर्द्धाद्यस्य न्यूनतरमर्द्ध तत एव प्रत्ययेन भवितव्यम्, अन्यतस्तु सर्वतो भवितव्यमेव; अन्यथाऽवरग्रहणमनर्थकमेवेति द्व्यजर्द्धादित्येवं ब्रयात्। `पटिति करोति' इति।
`अध्यक्तानुकरणस्यात इतौ' (6.1.98) इत्यच्छब्दस्य पररूपत्वम्। यद्यत्र डाच् स्यात्, तस्य डाजन्तस्य परमिति शब्दमुच्चार्य करोतिरनन्तरः स्यादिति, न च तत्परम्; तच्चानिष्टम्।
अथ चकारः किमर्थः, यावलतान्तोदात्तत्वं कृत्वादस्य प्रत्ययस्वरेणैव सिद्धम्? इत्यत आह--`चकारः' इत्यादि। पटपटा असि इति स्थिते `तिङ्ङतिङः' (8.1.28) इत्यसिशब्दस्य निघाते कृते `स्वरितो वानुदात्तेऽपदादौ' (8.2.6) इति स्वरित एकादेशः प्राप्नेति, न च स्वरित इष्यते, तदर्थ चकारः।
`स्वार्थिको विज्ञेयः' इति। व्यतिरिक्तस्यार्थस्याभावात्। केन पुनः स्वार्थिको यकारः? अनेनैव निपातनेन।।

58. कृञो द्वितीयतृतीयशभ्बवीजात् कृषौ। (5.4.58)
ननु कृभ्बस्तियोग इत्यतः करोतिरनुवर्त्तते, तत् किमर्थं कञ्ग्रहणम्? इत्यादि। धातुत्र्यं प्रकृतम्, तत्रासति कृञ्ग्रहणे यथा कृञो भवति, तथा भ्वस्त्योरपि स्यात्। तस्मात् कृञो ग्रहणं भ्वस्तिनिवृत्त्यर्थम्।।

59. संख्यायाश्च गुणान्तायाः।
`संक्यायाः' इति सामीप्यसम्बन्धे षष्ठी। `गुणान्तायाः' इति प्रत्ययविधौ संख्यावाचिनः शब्दस्येत्यनेन संख्याशब्दस्य षष्ठ्यन्ततां दर्शयति।
अन्तशब्दोऽवयववचनोऽप्यस्ति, तस्येह ग्रहणे संख्याशब्देन सम्बन्धो न स्यात्, न हि संख्याशब्दस्य गुणशब्दोऽवयव उपपद्यते--इति मत्वा
सामीप्यवचनोऽयमन्त शब्द इति दर्शयन्नाह--`गुणशब्दोऽन्ते समीपे' इति। `यत्र' इति। अनेन प्रकृतिनिर्दिश्यते। `सा' इत्यादि। सा प्रकृतिः संख्या
गुणान्तेनाभिधीयत इत्यर्थः। गुणशब्दोऽन्ते यस्य स तथोक्तः। `तादृशात्' इत्यादिना तथाभूतात् संख्याशब्दात् सामीप्यवर्त्तिगुणशब्दादित्यर्थः। ननु च
सामीप्यवचनान्तशब्दे संख्यायाः पूर्वः परो वा गुण इति विशेषो नावधार्य्यते, तथा च यत्राप्यसौ पूर्वस्तत्रापि स्यात्? नैष दोषः; सामीप्येऽयं वर्त्तमानो
नियतदेशमेव पराश्रयं वा यत् सामीप्यं तदाचष्टे, न सामीप्यमात्रम्; यथा--अवयवे वर्त्तमानो नावयवमात्रमभिधत्ते, किं तर्हि? विशिष्टवेशमेवादयवम्--`द्विगुणं विलेखनं करोति' इति।।

60. समयाच्च यापनायाम्। (5.4.60)

61. सपत्तनिष्पत्त्रादतिव्यथने (5.4.61)
सह त्पत्रेण सपत्त्रः। निर्गतं पत्त्रं यस्मान्निष्पत्त्रः। अतिपीडनम्=अतिबाधनम्।।

62. निष्कुलान्निष्कोषणे (5.4.62)

`निकुष्लान् करोति' इति। निर्दिष्टं कुलं यस्येति स निष्कुलः। कुलशब्दोऽत्र बन्धुषु वर्त्तते।।

63. सुखप्रियादानुलोभ्ये
`आराध्यचित्तानुवर्त्तनम्' इति। स्वाम्यादेरनभिमतानुष्ठानेनाभिमताननुष्ठानेन वा चित्तस्य पीडनं दुःखम्=प्रातिलोम्यम्। तदपि प्राणिधर्म एव।।

64. दुःखात्प्रातिलोम्ये। (5.4.64)
`स्वाम्यादेश्चित्तपीडनम्' इति। स्वाम्यादेरनभिमतानुष्ठानेनाभिमताननुष्ठानेन वा चित्तस्य पीडनं दुःखम्=प्रातिलोम्यम्। तदपि प्राणिधर्म एव।।

65. शूलात्पाके। (5.4.65)
`शूलाकरोति मांसम्' इति। पचतीत्यर्थः।।

66. सत्यादशपथे। (5.4.66)

67. मद्रात्परिवापणे। (5.4.67)
`मद्राकरोति' इति। मङ्गलपूर्वं मुण्डनं करोतीत्यर्थः।

`भद्राच्चेति वक्तव्यम्' इति। भद्रशब्दाच्च डाज्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`समयाच्च यापनायाम्' (5.4.60) इत्यतश्चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, तेन भद्रादपि भविष्यतीति।।

68. समासान्ताः। (5.4.68)
"समासान्ताः" इत्ययमधिकारः' इति। वक्ष्यमाणेन `बहुव्रीहौ संख्येये डजबहुगणात्' (5.4.73) इत्यादिना बहुव्रीह्यादित्वेन समासविशेषाद्विधास्यन्ते; यत्रापि बहुव्रीह्यादिग्रहणं नास्ति, तत्र सङ्घातः प्रकृतित्वेन निर्दिश्यते। यता--`अच् प्रत्यन्ववपूर्वात् सामलोम्नः' (5.4.75) इति, ततश्च सामर्थ्यादेव समासान्ताः प्रत्याय विज्ञास्यन्ते, तत्किं समासग्रहणेन? यत्रैतदुभयं नास्ति--यथा--`ऋक्पूरब्धूःपथामानक्षे' (5.4.74) इति, तदर्थं समासान्तग्रहणं क्रियते। अन्तशब्दोऽयं सामीप्यवचनोऽप्यस्ति, यदि तस्येह ग्रहणं स्यात् प्रत्ययपरत्वेनैव डजादीनां सामीप्यस्य सिद्धत्वादन्तशब्दोऽनर्थकः स्यादिति मत्वाऽऽह--अवयववचनोऽयमन्तशब्दो गृह्यत इति दर्शयन्नाह--अवयवा इति अस्य पर्यायेण वृत्तिं कर्तुमाह--`एकदेशाः' इति। एकदेशशब्दमिहाश्रयता प्राक्समासविधेः समासार्थादुत्तरपदात् वक्ष्यमाणाः प्रत्यया भवन्ति, पश्चात् समासः--इत्युक्तं भवति। एवं हि ते समासस्यैकदेशा भवन्ति यदि प्राक् समासवृत्तेः स्यात्। समासान्तान् कृत्वा पश्चात् तदन्तेन समासः क्रियते। एवञ्च तैः सह समाससंज्ञा बवतीत्युपपद्यते डजादीनां समासावयवत्वम्। अतश्चैतदेवं विज्ञेयम्। योऽभिमन्यतेसमासे कृते डजादिभिर्भवितव्यमिति, तस्य `न कपि' (7.4.14) इत्यत्र यद्वक्ष्यति वृत्तिकारः--`समासार्थे ह्यु त्तरपदे कपि कृते पश्चात् समासेन भक्तिव्यम्' इति, तद्विरुध्यते। ननु च समासार्थादुत्तरपदाड्डजादिषु कृतेषु पश्चात् तदन्तेन समासः क्रियते--इत्यस्मिन्नपि पक्षे समानो दोषः, यतः `पथो विभाषा' (5.4.72) इत्येवमादिषु नञः परो यः पथिन्शब्दस्तदन्तात् तत्पुरुषाद्विभाषा समासान्तो भवतीत्येवमादयो निर्देशा विरुध्यन्त एव? नैतदस्ति; तदविरोधस्य `ङ्याप्प्रातिपदिकात्' (4.1.1) इत्यत्र प्रतिपादितत्वात्। `तद्ग्रहणेन गृह्यन्ते' इति तच्छब्देन समासः प्रत्यवमृश्यते। समासावयवत्वे सति तेषामपि तदनुप्रदेशो भवति। अतस्ते। समासग्रहणेन गृह्यन्त इति। अथ समासावयवत्वे प्रत्ययस्य किं प्रयोजनम्? इत्याह--`प्रयोजनम्' इत्यादि। `अधिराजम्, उपराजम्' इति। यताक्रमं विभक्त्यर्थे सामीप्येऽव्ययीभावः। `अव्ययीभावे शरत्प्रभृतिभ्यः' (5.4.107), `अनश्च' (5.4.108) इति टजन्तस्याव्ययीभावग्रहणेन ग्रहणात् `नाव्ययीभावादतोऽम्त्वपञ्चम्याः' (2.4.83) इति विभक्तेरलुक्, अमन्तभावश्च भवति।
द्वे पुरी समाहृते इति `तद्धितार्थोत्तरपदसमाहारे च' (2.1.51) इति समातः। स च `संख्यापूर्वो द्विगुः' (2.1.52) इति द्विगुसंज्ञः, `ऋक्पूरब्धूःपथाम्' (5.4.74) इत्यकारप्रत्ययान्तस्य द्विगुग्रहणेन ग्रहणावकारान्तात् `द्विगोः' (4.1.21) इति ङीप् सिद्धो भवति।
कोशनिषदिनीति। कोशश्च निषच्चेति समाहारद्वन्द्वः, `द्वन्द्वाच्चुदषहान्तात् समाहारे' (5.4.106) इति टच् तस्य द्वन्द्वग्रहणेन ग्रहणात् कोशनिषदमस्या अस्तीति `द्वन्द्वोपतापगर्ह्यात' (5.2.128) प्राणिस्थादिनिर्भवति, `ऋन्नेभ्यो ङीप्' (4.1.5) इति ङीप्। स्रक्त्वचिनीति। पूर्वेण तुल्यम्।
`विधुरः' प्रधुरः' इति। विगतो धुरः, प्रगतो धुर इति `कुगतिप्रादयः' (2.2.18) इति प्रादितत्पुरुषसमासः। पूर्ववदकारस्येह तत्पुरुषग्रहणेन ग्रहणात् `तत्पुरुषे तुल्यार्थतृतीया' (6.2.2) इत्यादिना पूर्वपदप्रकृतिस्वरः सिद्धो भवति। पूर्वपदं पुनरतर निपात आद्युदात्तः। असति तु समासान्तत्वे प्रत्ययस्वरेणान्तोदात्तता स्यात्। `उच्चैर्धुरः, नीचैर्धुरः' इति। उच्चैर्धूरस्येति नीचैर्धूरस्येति बहुव्रीहिः। पूर्ववदकारप्रत्ययः, तस्य बहुव्रीहिग्रहणेन ग्रहणात् `बहुव्रीहौ प्रकृतया पूर्वपदम्' (6.2.1) इति पूर्वपदप्रकृतिस्वरो भवति। पूर्वपदप्रकृतिस्वरस्त्विहान्तोदात्तः।

सनुतर्, उच्चैस्, नीचैस्, शनैस, ऋधक्, ऋते, युगपत्, आरात्, पृथगित्येते सनुतर्प्रभृतयोऽन्तोदात्ताः, स्वरादिषु पाठात्।।

69. न पजनात्। (5.4.69)
`सुराजा, अतिराजा' इति। शोभनो राजा, अतिशयितः राजेति विगृह्य `कुगतिप्रादयः (2.2.18) इति समासः। `सुगौः' इति। पूर्ववत्समासः। अत्र `गोरतद्धितलुकि' (5.4.92) इति टच् प्राप्नोति; अस्माद्वचनान्न भवति।
`परमराजः, परमगवः' इति। `सन्महत्' (2.1.64) इति समासः। `सुसक्थः' इति। `बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' (5.4.113) इति षच्।।

70. किमः क्षेपे। (5.4.70)
`किंराजा' इति। निन्दितो राजेति विगृह्य `किं क्षेपे' (2.1.64) इति समासः। किंराज इत्यत्र प्रश्ने किंशब्दः, न क्षेपे, षष्ठीसमासः। ननु `लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' (व्या.प.3) इति प्रतिपदोक्तो यः किमः समासः `किं क्षेपे'(2.1.64) इत्यनेन विहितः स एव ग्रहीष्यत इति क्षेपग्रहणमनर्थकम्? एवं तर्हि क्षेपग्रहणेनै तदेव ज्ञापयति--इयं परिभाषा नावतिष्ठत इति। तेन बहुव्रीहावपि प्रतिषेधः सिद्धो भवति--निन्दिता धूरस्य किन्धुरं शकटम्, निर्धरं शकटमिति।।

71. नञस्तत्पुरुषात्। (5.4.71)
`अराजा' इति। तत्पुरुषऽयम्।

`अनृचो माणवकः, अधुरं शकटम्' इति। द्वावपि बहुव्रीहि। पूर्ववदकारः।।

72. पथो विभाषा। (5.4.72)
अपथम्' इत्यत्र पूर्ववदकारः। `अपथं नपुंसकम्' (2.4.30) इति नपुंसकलिङ्गता।।

73. बहुव्रीहौ संख्येये डजबहुगणात्। (5.4.73)
बहुव्रीहाविति सुब्व्यत्ययेन पञ्चम्यर्थे सप्तमी। `संख्याव्ययासन्न' (2.2.25) इत्यादिना यो बहुव्रीहिः, तस्येदं ग्रहणमिति। तस्यैव संख्येये वृत्तिः। यत्तर्हि वार्थे वर्त्तते--द्वित्राः, पञ्चषा इति, यश्च सुजर्थे--द्विदशाः, त्रिदशा इति, तत्र न प्राप्नोति? नैष दोषः; तावपि संख्येये वर्त्तत एव; संख्येयतयैव वार्थस्य सुजर्थस्य चाभिधानात्। दशानां च समीपे उपदशाः। विशतेः समीपे उपविंशाः। विशतेः समीपे उपविंशाः। `तिविंशतेडिति' (6.4.142) इति तिलोपः, द्वयोरप्यकारयोः `अतो गुणे' (6.1.97) पररूपत्वम्। दशानामासन्ना `आसन्नदशाः'। दशानामदूरा `अदूरदशाः' दशानामधिका `अधिकदशाः' द्वौ वा त्रयो वा `द्वित्रा'। पञ्च वा षड्वा `पञ्चषाः'। सर्वत्र `संख्याव्ययासन्न' (2.2.24) इत्यादिना बहुव्रीहिः।
`चित्रगुः इति। `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति ह्रस्वः। ननु च नञिवयुक्तन्यायेन (व्या.प.65) बहुगणपरतिषेधात् तत्सदृशविज्ञानेन संख्योत्तरपद एव बहुव्रीहिविज्ञास्यते, एवञ्च चित्रगुप्रभृतिषु प्राप्तिरेव नास्तीति किं संख्याग्रहणेन? स्यादेतदेवं यदि बहुशब्दः संख्येयपदमेव स्यात्; स च वैपुल्यवचनोऽप्यस्ति, तेनासति संख्येयग्रहणे संख्योत्तरपदग्रहणं न स्यात्। `उपबहवः, उपगणाः' इति पूर्ववद्बहुव्रीहीः। `अत्र' इत्यादि। उपगणा इत्यत्र सत्यसति वा डाचि रूपं प्रति विशेषो नास्तीति। स्वरे तु विद्यते--डचि हि सत्यन्तोदात्तत्वं स्यात्, तस्मिन्नसति पूर्वपदप्रकृतिभावेनाद्युदात्तं भवति।
`संख्यायाः' इत्यादि। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्पुरुषस्य संख्यावाचि यदुत्तरपदं ततो डचः प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्--`संख्यायाश्च गुणान्तायाः' (5.4.59) इत्यतश्चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः तेन संख्यायास्तुत्पुरुषस्य डज्भविष्यतीति। `निस्त्रिंशाद्यर्थम् इति। आदिशब्दः प्रकारे। `निस्त्रिशाः'[`निस्त्रिंशानि, निस्त्रिंशः' इत्येव मूलोपात्ते पदे] इति। `कुगतिप्रादयः' (2.2.18) इति तत्पुरुषः। डचश्चित्करणमन्तोदात्तार्थम्। अन्यथा हि प्रत्ययस्य समासैकदेशत्वात् प्रत्यस्वरो बहुव्रीहिस्वरेण बाध्यते।।

74. ऋक्पूरब्धूःपथामानक्षे। (5.4.74)
`सामर्थ्यात्' इति। यस्य येन सम्बन्धोऽस्ति तत् तस्य विशेषणं भवति; धुर ेव चाक्षेम सम्बन्धोऽस्ति, नेतरेषाम्। अतः समर्थ्यात् तस्यैवानक्ष इत्येतद्विशेषणं विज्ञायते, न ऋगादीनाम्। `अनक्षे' इति च षष्ठ्यर्थे सप्तमी सुब्व्यत्ययेन। अत एवाह--`अनक्षसम्बन्धिनी' इत्यादि। अक्षेण सम्बन्धोऽवयवावयविलक्षणः, सोऽस्या अस्तीत्यक्षस्मबन्धिनी। सा धूर्यस्यां तस्या न भवति। अथैवं कस्मान्न विज्ञायते--अक्षेऽभिधेये न भवतीति? अशक्यमेवं विज्ञातुम्; एवं हि विज्ञायमान इहैव प्रतिषेधः स्यात्--दृढा धूरस्याक्षस्य दृढधूरक्ष इति। इह तु न स्यात्--अक्षस्य धूरक्षधूरिति, एवं तर्हि विज्ञायते--अक्षे पूर्वपदे न भवतीति? एवमप्यशक्यं विज्ञातुम्; तथा ह्येवं विज्ञायमान इहैव प्रतिषेधः स्यात्--अक्षधूरिति। इह तु न स्यात्--दृढधूरक्ष इति। यथा वृत्ति कारेम व्याख्यातं तथोभत्रापि भवति। अक्षसम्बन्धिनी या धूः, तदन्तत्वात् समासस्य। `अर्द्धर्चः' इति। ऋचोर्द्धमिति `अर्धं नपुंसकम्' (2.2.2) इति समासः। `अर्द्धर्चा पुंसि च (2.4.31) इति

नपुंसकलिङ्गता च। `बहवृचः' इति। बहव ऋचोऽस्य सन्तीति बहुव्रीहिः। `ललाटपुरम्' इति। षष्ठीतत्पुरुषोऽयम्। अथ वा--ललाटं पूरिवेति `उपमितं व्याघ्रादिभिः' (2.1.56) इत्यादिना समासः। `नान्दीपुरम्' इति। षष्ठीसमासः। यद्यप्यकारान्तेन पुरशब्देन समासे कृत एतत् सिध्यति, तथापि व्यञ्जनान्तेन पूःशब्देन यदि समासः क्रियते, तदा व्यञ्जनान्तस्य श्रवणं मा भूदित्येवमर्थ पुरो ग्रहणम्। `द्वीपम्' इति `अन्तरीपम्' इति `समीपम्' इति। द्विर्गता आपोऽस्मिन्, अन्तर्गता आपोऽस्मिन्, सङ्गता आपोस्मिन्निति बहुव्रीहिः। `द्व्यन्तरुपसर्गेभ्योऽप ईत्'(6.3.97) इतीत्त्वम्। `राजधूरा' इति। षष्ठीसमासः। `महाधुरः' इति। बहुव्रीहिः, `आन्महतः' (6.3.46) इत्यात्त्वम्, `स्त्रियाः पुंवत्' (6.3.34) इत्यादिना पुंवद्भावः। `स्थलपथः, जलपथः' इति षष्ठीसमासः। सप्तमीति (2.1.40) योगविभागात् सपतमीसमासो वा।

ऋगन्तस्य यो बहुव्रीहिर्नञ्पूर्वपदः, तस्य माणवक एवाभिधेये प्रत्यय इष्यते, यो बहुपूर्वपदो बहुव्रीहिर्ऋगन्तः, तस्य चरणा ख्यायामेव इष्यत इति दर्शयति--`अनृचो माणवको ज्ञेयः' इत्यादि। एतच्च `पथो विभाषा' (5.4.72) इत्यतो विभाषाग्रहानुवृत्तेर्व्यवस्थितविभाषात्वं चोपलभ्यमिति वेदितव्यम्। `अनृक्कः, बहवृक्कः' इति। `शेषाद्विभाषा' (5.4.154) इति कप। `चोः कुः' (8.2.30) इति कुत्वम्--चकारस्य ककारः।।

75. अच् प्रत्यन्वपूर्वात्सामलोम्नः। (5.4.75)

`प्रतिसामम्' इति। प्रतिगतं साम प्रतिसामम्। प्रादिसमासः। प्रतिगतं वा सामास्येति बहुव्रीहिः। गतशब्दो गतार्थत्वाद्वृत्तौ न प्रयुज्यते। अथ वा--साम प्रतीति यथार्थे `अव्ययं विभक्ति' (2.1.6) इत्यादिनाव्ययीभावः। अनुगतं सामानेनेति बहुव्रीहिर्वा। `अवसामम्' इति। पूर्वेण तुल्यम्। `अनुलोमम्' इत्यादौ पूर्वेण तुल्यम्। `्वलोमम्' इत्यादि पूर्ववतप्रादिसमासादयो वेदितव्याः।

`कृष्णोदक्पाण्डुपूर्वायाः' इति। कृष्णोदक्पाण्डुशब्दाः पूर्वे यस्या भूमेस्तस्या अच्प्रत्ययः स्मृतः। कृष्णा भूमिरस्मिन् देशे कृष्णभूमो देशः। उदीची भूमिरस्मिन् देश उदग्भूमः। पाण्डुर्मूमिरस्मिन् पाण्डुभूमः। गोदावर्य्याश्च नद्याश्चाच्प्रत्ययः स्मृतः ते चेन्नदगोदवर्यौ संख्याया उत्तरे भवतः। पञ्चानां गोदावरीणां समाहारः; `नदीभिश्च' (2.1.20) इति समाहारेऽव्ययीभावः--पञ्चगोदावरम्, पञ्चनदम्।

`भूमेरपि' इत्यादि। न केवलं नदीगीदावरीभ्याम्, अपि तु भूमेरपि संख्यापूर्वाया इष्यते। `द्विभूमः' इत्यादौ सर्वत्र बहुव्रीहिः।

`तत्' इत्यादि। एतत् कृष्णभूमाद्यपि योगविभागं कृत्वाऽऽचार्याः साधयन्ति।।

76. अक्ष्णोऽदर्शनात्। (5.4.76)

`अदर्शनात्' इति प्रतिषेधः क्रियते। `कबराक्षम्, गवाक्षम्' इति। रूढिउब्दावेतौ, नात्रावयवार्थेऽभिनिवेशः कार्यः। कबराक्षं गवाक्षमिति न सिध्यतीत्यभिप्रायः। स्यादेतत्--दर्शनप्रतिषेधात् सिद्धमेतत्, दृश्यतेऽनेनेति; न दर्शनम्, न च कबराक्षेम दृश्यते, नापि गवाक्षेण? इत्यत आह--`तेनापि' इत्यादि। दर्शनश्ब्दोऽयं चक्षुषि प्राण्यङ्गे प्रसिद्धः। तथा हि दर्शनं प्रयुङ्क्ते चक्षुर्ग्राह्यमपि। तस्मात् प्रसिद्धिवशेन चक्षुष्पर्यायो दर्शनशब्दः, स इहाश्रीयते।।

77.

अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिवरात्रिन्दिवाहर्दिवसरजसनिश्श्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः। (5.4.77)

`समासे व्यवस्थाऽपि' इत्यादि। समासव्यवस्था=समासनियमः--क्वचिद्बहुव्रीहिरेव, क्वचिद्द्वन्द्व इत्येवमादिका निपातनादेव वेदितव्या; व्यवस्थाभेदस्यान्यस्याभावात्। अपिशब्दादन्यदपि टिलोपादि कार्यं निपातनादेव वेदितव्यम्।

`सप्तम्यर्थवृत्तयोः' इत्यादिना हि सप्तम्यर्थवृत्तयोरव्यययोराधेयप्रधानयोः समासो विद्यते। तस्मान्निपातनादेव च भवतीति वेदितवयम्। अपिशब्दात् समासोऽपि निपातनादेव। `अहर्दिवम्' इति। `रोऽसुपि' (8.2.69) इति नकारस्य रेफः। `ननु च' इत्यादि। अर्थगत्यर्थो हि शब्दप्रयोगः।

पर्यायणाञ्चंकेनैवार्थस्योक्तत्वात् द्वितीयस्य प्रयोगो न सम्भवति। अहर्दिवाशब्दौ पर्यायौ, तत् कथमनयोर्द्वन्द्वः! न कथञ्चिदिति भावः।

वीप्साद्योतनार्थमुक्तस्यापि प्रयोगो न विरुध्यत इति मन्यमान आह--`वीप्सायाम्' इत्यादि। चार्थ उत्पद्यमानो द्वन्द्वो वीप्सायां न प्राप्नोतीत्यतो निपात्यते। एको। एकोऽव्ययीभावः।

`साकल्ये' इति। `अव्ययं विभक्ति' (2.1.6) इत्यादिना। `सरजसम्' इति। `अव्ययीभावे चकाले' (6.3.81) इति सहस्य सभावः।

`निःश्रेयसम्' इति। प्रादिसमासः। `निश्रेयस्कः' इति। निश्चितं श्रेयोऽनेनेति बहुव्रीहिः, `शेषाद्विभाषा' (5.4.154) इति कप्।

`ऋग्यजुरुन्मुग्धः' इति। य उन्मुग्धत्वादृचो यजूंषि मन्यते स ऋग्यजुरिति बहुव्रीहिणोच्यते। `ततोऽव्ययीभावः' इति। `अव्ययं विभक्ति' (2.1.6) इत्यादिना सामीप्ये। `टिलोपाभावः' इत्यादि। उपशुन इत्यत्र `नस्तद्धिते' (6.4.144) इति टिलोपाभावो निपातनादेव। श्वयुवमघोनामतद्धिते' (6.4.133) इति तद्धितादन्यत्र सम्प्रसारणमुच्यमानं तद्धिते न प्राप्नोतीति तदेव निपातनादेव भवतीति।

`चतुरोच्प्रकरणे' इत्यादि। त्रिशब्दादुपशब्दात् परो यश्चतुरशब्दस्तस्मादच उपसंख्यानं प्रतिपादनं कर्त्तव्यमित्यर्थः। तत् पूर्वमिव योगविभागमाश्रित्य कर्त्तव्यम्। त्रयो वा चत्वारो वा `त्रिचतुराः' इति। चतुर्णा समीपे `उपचतुराः'। `संख्याव्ययासन्न' (2.2.25) इत्यादिना बहुव्रीहिः। तत्र `बहुव्रीहौ संख्येये डजबहुगणात्' (5.4.73) इति डचि प्राप्तेऽज्विधीयते।।

78. ब्रह्महस्तिभ्यां वर्चसः। (5.4.78)
`ब्रह्मवर्चसम्, हस्तिवर्चसम्' इति। षष्ठीसमासौ। वर्चःशब्दोऽयं दीप्तिवचनः।
`पल्यराजशब्दाभ्याञ्चेति वक्तव्यम्' [`पल्यराजभ्याम्--काशिका] (इति)। पल्यशब्दाद्राजशब्दाच्च परो यो वर्चस्शब्दस्तस्माच्चाज्भवतीत्येवमर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं चास्य पूर्वमेव योगविभागमाश्रित्य कर्त्तव्यम्।।

79. अवसमन्धेभ्यस्तमसः। (5.4.79)
`अवतमसम्' इति। अवहीनं तमसा, अवहीनं वा तम इति प्रादिसमासो वाऽयम्। एवं सङ्गतं तमसा, सङ्गतं तमः--`सन्तमसम्'। अन्धं करोतीति णिच्, तदन्तात्, अन्धयतीत्यन्धम्। अन्धञ्च तत् तमश्चेति `अन्धतमसम्'। यदन्धं तमः करोतीति तदेवमुच्यते।।

80.श्वसो वसीयःश्रेयसः। (5.4.80)
`श्वोवसीयम्। श्वःश्रेयसम्' इति। श्वोवसीयः, श्वः श्रेय इति विगृह्य मयूरव्यंसकादित्वात् समासः। `स्वभावाच्च' इत्यादि। यद्यपि श्वःशब्दोऽन्यत्र कालविशेषे वर्त्तते, तथापीह समास उत्तरपदार्थस्य प्रशंसां स्तुतिमाशीर्विषयां प्रतिपादयति। कुतः? स्वभावात्। शब्दानां ह्यर्थाभिधानं स्वाभाविकम्। तत्र स्वभाव एवात्र हेतुः। `श्वोवसीयसमित्यस्यैवायं पर्यायः' इति। अस्येत्यनेन च श्वःश्रेयसमित्येष शब्दो निर्दिश्यते।।

81. अन्ववतप्राद्रहसः। (5.4.81)
`अनुरहसम्' इति। रहःशब्दोऽयमप्रकाशे वर्त्तते। अनुगतं रहसः, अनुगतं रह इति वा प्रादिसमासः। अनुगतं रहोऽस्मिन्निति बहुव्रीहिर्वा। `अवरहसम्' इति। अवहीनं रहसाऽवहीनं रह इति वा प्रादिसमासः। अवहीनं वा रहोऽस्मिन्निति बहुव्रीहिः। तप्तञ्च तद्रहश्चेति `तप्तरहसम्' विशेषणसमासः। यदुत्पन्नं रहो लोते न केनचिदवगम्यते, तत् तप्तरहसमित्युच्यते। तपतमिव तप्तम्, यथैव ह्यग्निना तप्तं न केनचिदवगम्यते, तथेदमिति।।

82. प्रतेरुरसः सप्तमीस्थात्। (5.4.82)
`सप्तमीस्थात्' इति। सप्तम्यां तिष्ठतीति सप्तमीस्थः, `सुपि स्थः' (3.2.4) इति कप्रत्ययः। यश्च सप्तम्यर्थे वर्त्तते, एवं सप्तमीस्थो भवतीत्याह--`सप्तम्यर्थे वर्त्तते' इति। `प्रतिगतमुरः प्रत्युरः' इति। `अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (वा. 91) इति समासः।।

83. अनुगवमायामे। (5.4.83)
`आयामेऽभिधेये' इति। आयामः=दैर्घ्यम्। मत्वर्थीयाकारान्तश्चायम्। आयामे चेत्यभिदेय इत्यर्थः। अन्यताऽनुगवं यानमिति सामानाधिकरण्यं न स्यात्। यानम्=आयामः। `अनुगवं यानम्' इति। गावो यथा तथा यानमायातमित्यर्थः।
`गवां पश्चात्' इति। `अव्ययं विभक्ति' (2.1.6) इत्यादिनाव्ययीभावः पश्चादर्थे च। पूर्ववद्गोशब्दस्य ह्रस्वः। अनुशब्दात्प्रत्यये विधातव्ये यदनुगवमिति निपातनं तत्प्रसिद्ध्युपसंग्रहार्थम्। तेन यद्गवा बाह्यं गोभिश्च तुल्यामामं तत्रैव भवति, नान्यत्र।।

84. द्विस्तावा त्रिस्तावा वेदिः। (5.4.84)
द्विस्तावा त्रिस्तावा वेदिः। (6.4.148) लोपे कृते तावच्छब्शदस्य टिलोपो निपात्यते। `समासश्च' इति। द्वित्रिशब्दयोर्निपात्यते। `यावतो प्रकृतौ' इत्यादिना नपातनस्य फलं दर्शयति। प्रकृतिविकृतिशब्दौ कार्यविशेषवचनौ। कर्मविशेषे हि कश्चित् यागाख्यः प्रकृतिशब्देनोच्यते, कश्चिद्विकृतितश्बदेन।।

85. उपसर्गादध्वनः। (5.4.85)
`प्राध्वम्' इति। प्रादिसमामः। तत्र प्राध्वमिति `अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (वा.91) इति समासः। निष्क्रान्तमध्वन इति `निरादयः क्रान्ताद्यर्थे पञ्चम्या' (वा.95)`अत्यध्वम्' इति। प्राध्वमित्यनेन तुल्यमेतत्। उपसर्गश्चात्र न गत्युपलक्षणम्। कुत एतत्? क्रियायोगाभावात्।।

86. तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः। (5.4.86)
`मात्रचो लोपः' इति। `प्रमाणे द्वयसच्' (5.2.37) इत्यादिना विहितस्य। `निरङ्गुलम्' इति। निरध्वमित्यनेन तुल्यमेतत्। `अत्यङ्गुलम्' इति। एतदप्यत्यध्वमित्यनेन तुल्यम्। `पञ्चाङ्गुलिः' इति बहुव्रीहिः।।

87. अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः। (5.4.87)

`अहर्ग्रहणं द्वान्द्वार्थम्' इति। इष्टिरियम्। न तत्पुरुषार्थम्; मुख्यार्थे तत्पुरुषस्यासम्भवात्। द्वन्द्वार्थे पदार्थं प्रत्याश्रयः। तथा हि--यद्यहर्गुणा रात्रिरहः शब्देनीच्यते, रात्रिगुणं वाहो रात्रिशब्देन गौण्या कल्पनया, तदाहश्च रात्रिश्चेति समानाधिकरणस्तत्पुरुषः सम्भवत्येव। तस्मादिष्टिरियम्। एतावदुक्तं स्यात्--द्वन्द्व इष्यत इति। अत्र च ज्ञापकम्--`हेमन्तशिशिरावहोरात्रे च च्छन्दसि' (2.4.28) इति द्वन्द्वे समासन्तस्य रात्रिशब्दस्य निपातनम्। `अहोरात्रः' इति। `रात्राह्नाहाः पुंसि' (2.4.29) इति पुंल्लिङ्गता। `अहन्' (8.2.68) इति `रूपरात्रिरथन्तरेषूपसंख्यानम्' (वा. 924) इति नकारस्य रुत्वाद्गुणः। `सर्वरात्रः' इति। `पूर्वकालैक सर्व' (2.1.49) इत्यादिना समानाधिकरणस्तत्पुरुषः। `द्विरात्रः' इति `तद्धितार्थोत्तरपद' (2.1.51) इत्यादिना समाहारे द्विगुः, `द्विगुश्च' (2.1.23) इति तत्पुरुषसंज्ञा। `अतिरात्रः' इति। अत्यध्वमित्यनेन तुल्यमेत्। `नीरात्रः' इति। `रोरि' (8.3.14) इति रेफलोपः। `ढ्रलोपे पूर्वस्य' (6.3.111) इति दीर्घः।।

88. अह्नोऽह्न एतेभ्यः। (5.4.88)

`राजाहःसखिभ्यष्टच् इति टच्प्रत्ययं वक्ष्यति' इति। अथ परकृत एवाचि कस्मादादेशो न विज्ञायते? अशक्यस्तत्रायं विज्ञातुम्, न ह्यहःशब्दातात् तत्पुरुषात् केनचिदज्विहितः, तत् कथमादेशस्य निमित्तं स्यात्। अथ `अच् (5.4.75) इति योगविभागेनाज्विधीयते? एवमप्येतद्वचनेमनर्थकं स्यात्; अचि कृते `अल्लोऽपोनः' (6.4.134) इत्यनेनाह्नादेशस्य सिद्धत्वात्। न च टिलोपः प्राप्नोतीति मन्तव्यम्; `अह्नष्टखोरेव' (6.4.134) इति नियमात्। तस्मादच्येव टिलोपापवादोऽयम्। आदेशोऽयमयुक्तः। किं पुनस्तत् सामर्थ्यम्, यतोऽहःशब्दः पूर्वत्वेन नाश्रीयते? इत्याह--`न ह्यहःशब्दात्'--इत्यादि। `द्व्यह्नः' इति। द्वयोरह्नोर्भव इति `तदधितार्थ' (2.1.51) इत्यादिना समासः, `तत्र भवः (4.3.53) इत्यण्, तस्य `द्विगोर्लुगनपत्ये' (4.1.88) इति लुक्। `आत्यह्नः' इति। अत्यध्ववत्समासः। `निरह्नः' इति। अत्रापि निरध्ववत् समासः। `सर्वाह्णः' इति। विशेषणसमासः। प्रतिषेधं वक्ष्यतीति। `उत्तर्मकाभ्याञ्च' (5.4.90) इति।।

89. न संख्यादेः समाहारे। (5.4.89)

`द्व्यहः' इति। `अह्नष्टखोरेव' (6.4.145) इति टिलोपः।।

90. उत्तमैकाभ्याञ्च। (5.4.90)

`पुण्याहम्' [`पुण्याहः'--काशिका] इति। विशेषणम् (2.1.57) इत्यादिना समासः। `एकाहः' इति। अत्रापि `पूर्वकालैक' (2.1.49) इत्यादिना। कथं पुनः `उत्तमैकाभ्याम्' पुण्यशब्दात् प्रतिषेधो लभ्यते? इत्यत आह--`उत्तमशब्दोऽन्त्यवचनः' इत्यादि। `अहःसर्वेकदेश' (5.4.87) इत्यादौ सूत्रे पुण्यशखब्दस्यान्ते नदिष्टत्वात्। `अग्त्यः' इति। उत्तमशब्देऽपि प्रतिषेधार्थ इहान्त्यवचन उपात्तः। तस्मात् पुण्यशब्दमाचष्टे। अथ पुण्यग्रहणमेव कस्मान्न कृतम्, लरघु ह्येवं सूत्रं भवति? इत्याह--`पुण्यग्रहणमेव' इत्यादि। वैचित्र्यं हि सूत्रकृतेरिष्यते, तच्चोत्तमग्रहणे सति सम्पद्यते। यस्माद्वैचित्र्यार्थमुत्तमग्रहणं कृतम् न पुण्यग्रहणम्।

`केचि' इत्यादि। पुण्यग्रहणे कर्त्तव्ये यदुत्तमग्रहणं कृतं तत्प्रयोजनम्--उत्तमशब्दस्यापि संखक्यातस्य प्रतिषेधप्रतिपत्तिर्यथा स्यादित्येवं केचिद्वर्णयन्ति। भवति तत्सामीप्यात् ताच्छब्द्यम्--गङ्गायां घोष इत्यादि। तस्माच्छक्त उत्तमशब्दः सामीप्यादुपोत्तमशब्दमभिधातुमिति तेषामभिप्रायः। `तेन' इत्यादिना प्रतिषेधस्योपोत्तमशब्दप्रतिपत्तेः पलं दर्शयति।।

91. राजाहस्सखिभ्यष्टच्। (5.4.91)

`परमाहः, उत्तमाहः' इति `सन्महत्' (2.1.61) इत्यादिना कर्मधारयः। `मद्रराजः' इति। षष्ठीतत्पुरुषः। कथं पुना राजशब्दग्रहणे राज्ञीशब्दस्य प्राप्नोति? इत्यत आह--`लिङ्गविष्टिपरिभाषया' इत्यीदि। `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' (व्या.प.29) इत्येवा लिङ्गविशिष्टपरिभाषा। `लध्वक्षरस्य' इति। सवर्णदीर्घोऽर्थः प्रयोजनं यस्य प्रथमप्रयोगसर्य स तथोक्तः। अत्रह लध्वक्षरं पूर्व निपततीति सख्युरह्नो वा पूर्वानिपाते प्राप्ते योऽहशब्दस्य परनिपातः स राजशब्दस्य सवर्णदीर्धार्थः। प्रयोगस्तु क्वचिन्नैतज्ज्ञापयति--अकारवत एव राजशब्दाट्टज् भवति। ईकारान्तान्न, ईकारस्याकारेण सवर्णदोर्घान्तस्या सम्भवात्।।

92. गोरतद्धितलुकि। (5.4.92)

पञ्चगवमिति। `तद्धितार्थ' (2.1.51) इति समाहारे द्विगुः। `पञ्चगुः' इत्यत्रापि तद्धिनार्थे। `राजगवम्' इति। षष्ठीसमासः। `सुपो धातुप्रातिपदिकयोः' (2.4.71) इति सुपो लुक्। `राजगवीयति' इति। `सुप आत्मनः क्यच्' (3.1.8), सुब्लुक्, `क्यचि च' (7.4.33) इतीत्त्वम्। अस्त्यत्र लुक्, स तु सुपः; न तद्धितस्य। परव्यत्ययेनात्र पञ्चम्यर्थे सप्तमी। कुत एतत्? पञ्चम्यन्तेन गोशब्देन सामानाधिकरण्यात्।।

93. अग्राख्यायामुरसः। (5.4.93)
स चेदुरःशब्दोऽग्रस्याख्या भवतीत्येनेन दर्शितम्। `अश्वोरसम्' इति। षष्ठीसमासः। अश्वानां प्रधानमित्यर्थः। `हस्त्युरसम्, रथोरसम्' इति।।

94. अनोऽश्मायस्सरसां जातिसंज्ञयोः। (5.4.94)
`उपानसम्' इति। उपगतमन इति प्रादिसमासः। `महानसम्' इति। महदन इति `सन्महत्' (2.1.61) इत्यादिना कर्मधारयसमासः। `अमृताश्मः, पिण्डाश्मः' इति। विशेषणसमासौ। एवं `कालायसम्' `लोहितायसम्' इति। `मण्डूकसरसम्, जलसरसम्' इति। षष्ठीसमासौ।
`सदनः' इति। महानसवत्समासः।।

95. ग्रामकौटाभ्याञ्च तक्ष्णः। (5.4.95)
`बहूनां साधारण इत्यर्थः' इति। ग्रामशब्दस्य जनपदसमुदाये वृत्तेः। `कौटतक्षः' इति। पूर्ववत्समासः।।

96. अतेः शुनः। (5.4.96)
`अतिश्वः' इति। प्रादिसमासः।।

97. उपमानादप्राणिषु। (5.4.97)
`आकर्शश्वः' इति। अत्र श्वा उपमानम्।

`अश्वा लोष्टः' इति। अत्राश्वशब्दोऽप्राणिनि लोष्टे वर्त्तते, न तूपमानम्। `वानरश्वा' इति। उपमितं व्याघ्रादिभिः' (2.12.56) इति समासः। अत्र प्राणिनि वानरश्वेति शब्दो वर्त्तते।।

98. उत्तरमृगपूर्वाच्च सक्थ्नः। (5.4.98)
`उत्तरसक्थम्' इति। उत्तरं सक्थ्न इति पूर्वापरादिशूत्रेण (2.1.58) समासः। अथ वा--उत्तरं सक्थीति विशेषणसमासः। `मृगसक्थम्' इति। षष्ठीसमासः। `पूर्वसक्थम्' इति। उत्तरसक्थमित्यनेन तुल्यमेतत्। `फलकसक्थम्' इति। `विशेषणम्' (2.1.57) इत्यादिना समासः।।

99. नावो द्विगोः। (5.4.99)
`द्विनावम् त्रिनावम्' इति। `तद्धितार्थोत्तरपद' (2.1.51) इत्यादिना द्विगुः। `द्विनावधनः' इति। द्वे नावौ धनं यस्येति बहुव्रीहौ कृते पूर्वयोः पदयोस्तेनैव सूत्रेणोत्तरपदे द्विगुः। पञ्चनावप्रियम् इति। पूर्वेण तुल्यमेतत् द्विनावरूप्यम्, द्विनावमयम्' इति। तेनैव सूत्रेम तद्धितार्थे द्विगुः। पूर्ववद्रूप्यमयटौ।
`राजनौः' इति। षष्ठीसमासः। `पञ्चनौः' इति आर्हीयस्य (5.1.19) ठकः `अध्यर्धपूर्वं' (5.1.28) इत्यादिना लुक्।।

100. अर्धाच्च। (5.4.100)
`अर्धनावम्' इति। ननु च `परवल्लिङ्गं द्वन्दतत्पुरुषयोः' (2.4.26) इति स्त्रीलिङ्गेनात्र भवितव्यमिति? अत आह--`परवल्लिह्गं न भवति' इत्यादि।।

101. खार्याः प्राचाम्। (5.4.101)
`द्विखारि' इति। `त्रिखारि' इति। पूर्ववदुपसर्जनह्रस्वः। क्वचिदर्धखारीति पाठः। अत्रैचोरुपसर्जनह्रस्वत्वे कृते `सर्वतोऽक्तिन्नर्थादित्येके' (ग. सू.51) इति बह्वादिपाठान् ङीष।।

102. द्वित्रिभ्यामञ्जलेः। (5.4.102)
`द्वाब्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिः' इति। पूर्ववदर्हीयस्य लुक्। `द्व्यञ्जलिप्रियः' इति। पूर्ववदुत्तरपदे द्विगुः।।

103. अनसन्तान्नंपुसकाच्छन्दसि। (5.4.103)
`हस्तिचर्म' इत्यादयः षष्ठीसमासाः।

`सुत्रामाणम्' इति। शोभनस्त्रामा इति प्रादिसमासः, `अन्येषामपि वृश्यते' (6.3.137) इति पूर्वपदस्य दीर्घः, द्वितीयै कवचनम् `सर्वनामस्थाने च' (6.4.8) इत्यादिनोपधादीर्घत्वम्, `अट् कुप्वाङ्' (8.4.2) इत्यादिना णत्वम्। `अनेहसाम्' इति। अनेहःशब्दात् पुंल्लिङ्गात् षष्ठीबहुवचनम्।

वावचनमित्यनुवर्त्तत इति शेषः। वावचनशब्देनेह प्राग्ग्रहणं विवक्षितम्; तेन विकल्प्य उच्यन्ते, प्रत्याय्यते प्रत्ययोऽनेनेति कृत्वा। तदेतदुक्तं भवति--" `खार्याः प्राचम्' (5.4.101) इत्यतः प्राग्ग्रहणमनुवर्त्तते" इति।
प्राग्ग्रहणानुवृत्तौ तु यदिष्टं सिध्यति तद्दर्शयति---`ब्रह्मसाम' इति। `देवच्छन्दः' इति। उभयत्र षष्ठीसमासः।।

104. ब्रह्मणो जानपदाख्यायाम्। (5.4.104)
`जानपदाख्यायाम्' इति। भावप्रधानोऽत्र जानपदशब्दः। अत एव वृत्तावाह--`समासेन चेद्ब्रह्मणो जानपदत्वमाख्यायते' इति। भवति हि भावप्रत्ययमन्तरेणापि भावप्रधानो निर्देशः, यथा--`द्व्येकयोर्द्विवचनैकवचने' (1.4.22) इति। कथं पुनर्ब्रह्मणो जानपदत्वं शक्यं विशेषयितुम्, यावतैकमिह ब्रह्मग्रहणम्, तेन च समासो विशेषितः? नैतदस्ति; तन्त्रेण द्वौ ब्रह्मशब्दावृच्चरितौ--तत्रैकेन समासो विशेष्यते, अपरेण जानपदत्वम्, यस्य तत्पुरुषस्य जनपदशब्दः पुर्वपदम्। पूर्ववत् समासः।।

105. कुमहद्भामन्यतरस्याम्। (5.4.105)

106. द्वन्द्वाच्चुदषहान्तात्समाहारे। (5.4.106)
`वाक् च त्वक् च वाक्त्वचम्' `स्रुक् च त्वक् च स्रुक्त्वचम्'। `श्रीश्च स्रुक् च श्रीस्रजम्। `वाक् च ऊर्क्च वागूर्जम्। `समिच्च दृषच्च समिद्दृषदम्' `सम्पच्च विपच्च सम्पद्विपदम्' `वाक् च त्विट् च वाक्त्विवम्। `वाक् च विप्रुट् च वाग्विप्रुषम्'। `छत्त्रञ्च उपानच्च छत्त्रोपानहम्'। `धत्त्रञ्च उपानच्च छत्त्रोपानहम्'। `श्रेनुश्च गोधुक् च धेनुगोदुहम्'।
`पञ्चवाक्' इति समाहारे द्विगुः। `वाक्समित्' इति। धकारान्तोऽयम्। धकारस्य `झलां जशोऽन्ते' (8.2.39) इति जश्त्वम्--दकारः; `वाऽवसाने' (8.456) इति चर्त्वम्--तकारः।।

107. अव्ययीभावे शरत्प्रभृतिभ्यः। (5.4.106)
`उपशरदम्' इति। सामीप्येऽव्ययीभावः। शरद आभिमुख्ये `प्रतिशरदम्' `लक्षणेनाभिप्रती आभिमुख्ये'(2.1.14) इत्यव्ययीभावः। `उपविपाशम् परतिविपाशम्' इति। पूर्ववत्।
अत्र ये झयन्ताः पठ्यन्ते तेषां किमर्थं ग्रहणम्, यावता `झयः' (5.4.111) इति वक्ष्यमाणेन तदन्तात् प्रत्ययः सिध्यति? इत्यत आह--`ये त्वत्र' इत्यादि। यद्यत्र ते न गृह्येरंस्ततः `झयः' (5.4.111) इति विकल्पेन टच्प्रसज्येत। तस्मान्नित्यं यथा स्यादिति--एवमर्थं झयन्तानां पृथग्ग्रणम्।
`जराया जरश्च' इति। जराशब्दाट्टज् भवत्यव्ययीभावे, जरसादेशश्च--जरायाः समीपमुपजरसमिति। प्रतिपरसमनुभ्योऽक्ष्यणः' इति। अक्षिशब्दात् प्रति, पर सम्, अनु--इत्येतेभ्यः परस्माट्टज् भवति--`प्रत्यक्षम्। परोक्षम्'--`परोक्षे लिट्' (3.2.115) इति निपातनादुत्वम्। `समक्षम्। अन्वक्षम्'।।

108. अनश्च। (5.4.108)
`उपराजम्, प्रतिराजम्' इति। उपशरदं प्रतिशरदमितिवदव्ययीभावः। `अव्यात्मम्' इति। आत्मन्यधीति विभक्त्यर्थे। `प्रत्यात्मम्' इति। पूर्ववदाभिमुख्ये।।

109. नपुंसकादन्यतरस्याम्। (5.4.109)

110. नदीपौर्णमास्याग्रहायणीभ्यः। (5.4.110)
नदीग्रहणेन स्वरूपं गृह्यते, न संज्ञा। यदि संज्ञा गृह्येत, पौर्णमास्याग्रहायणीग्रहणं न कुर्यात्। ननु च नियमार्थमेतत् स्यात् ईकारान्तस्यापि नद्योः पौर्णमास्याग्रहायण्योरेव भवतीति? नैतदस्ति; यद्येतत् प्रयोजनं स्यात् "पौर्णमास्याग्रहायणी" इत्येवं ब्रूयात्। `तस्मात्' स्वरपग्रहणमिति। `उपनदि' इति `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति ह्रस्वः।।

111. झयः। (5.4.111)

112. गिरेश्च सेनकस्य। (5.4.112)
`अन्तगिरम्' इति। गिरेरन्तरित विभक्त्यर्थेऽव्ययीभावः। अन्तः शब्दो हि सप्तम्यर्थवृत्तित्वाद्विभक्त्यर्थे वर्त्तते। विकल्पार्थमेव सेनकग्रहणं कस्मान्न भवति? इत्याह--`विकल्पोऽनुवर्त्तत एव' इति। विकल्पार्थत्वात्। विकल्प्यते वानेन सः। अन्यतरस्यांग्रहणं विकल्प इत्युक्तम्, तदिह `नपुंसकादन्यतरस्याम्' (5.4.109) इत्यतोऽनुवर्त्तते। तस्मात् तेनैव विकल्पस्य सिद्धत्वात् पूजार्थमेव सेनकग्रहणमुक्तम्, न विकल्पार्थम्। ननु च `विभाषयोर्द्वयोर्मध्ये नित्या विधयो

भवन्ति' (का. प. वृ. 11) इति पूर्वस्य विधेनित्यतां सम्पादयितुं विकल्पार्थमेव सेनकग्रहणं स्यात् ? नैतदस्ति; यदि हि पूर्वो विधिनित्यः स्यात्, झयन्तानां शरत्प्रभृतिषु पाठोऽनर्थकः स्यात्, `झयः' (5.4.111) इत्यनेनैव सिद्धत्वात्। तस्मान्न विकल्पार्थं सेनकग्रहणम्; पूजार्थमेव।।

113. बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गत् षच्। (5.4.114)

`अद्रवं मूर्त्तिमत्' (म. भा. 2.222 का. 4.1.554) इत्यादिना प्रारिभाषिकं यत् स्वाङ्गं तदिह गृह्यते। `दुःश्लिष्ट विभक्तिनि' इति। दुःखेन कष्टेन श्लिष्टाः सम्बद्धा विभक्तयो येषु तानि दुःश्लिष्टविभक्तीनि। तथा च--प्रत्ययसम्बन्धेन षष्ठ्या भवितव्यम्, यथा `तत्पुरुषस्याङ्गुलेः' (5.4.86) इति। सक्थ्यक्षिप्रगहणेन चेह तदन्ततया बहुव्रीहेर्विशेषयितुमिष्टत्वात्। बहुव्रीहौ यद्विभक्तिवचनं ततोऽपि तेनैव भवितुं युक्तम्। इह तु बहुव्रीहौ सप्तम्येकवचनम्। सकव्यक्षिशब्दाभ्यां तु षष्ठीद्विवचनम्, सप्तमीद्विवचनं वा। स्वाङ्गग्रहणं सक्थ्यक्ष्णोरिह समानाधिकरणं विशेषणम्, ततश्च सक्थ्यक्षिशब्दाभ्यां या विभक्तिस्तद्विभतिकं समानाधिकरणविशेषणमुपपद्यते। एवं विधविभक्तिभिः पदैः कश्चिद्दुःखेन कृच्छ्रेण युक्तो यामाश्रित्य विभक्तिमेवार्थं प्रतिपद्यते। तस्मात् तानि दुःश्लिष्टविभक्तीनि। किमर्थं पुनस्तानि पदानि कृतानि? वैचित्र्यार्थम्।

`दीर्घसक्थि शकटम्, स्थूलाक्षिरिक्षुः' इति। अत्र सक्थ्यक्षिशब्दौ स्वाङ्गं न भवतः। शकटस्य कश्चिदवयवस्तथेक्षोश्च तथाऽभिधीयते। न तु तत्र `अद्रवं मूर्त्तिमत् (म. भा. 2.222) इत्यादिकं स्वाङ्गलक्षणमस्ति।

ननु च टचापि प्रकृतेन सर्वमेतत् सिध्यति, तत् किमर्थं षजिति प्रत्ययान्तरमुपात्तम्? इत्याह--`टचि प्रकृते' इत्यादि। दीर्घसक्थी स्त्री--टचि ङीबनुदात्तः स्यात्, षचि तु सति `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीषुदात्तः सिद्धो भवति। ननु च ङीप्यनुदात्त उदात्तनिवृत्तिस्वरेणोदात्त एव भवति। अतः स्वरार्थमपि नैव प्रत्ययान्तरमुपादेयम्? इत्याह--`सकथ्ञ्चाक्रान्तात्' इति। `विभाषोत्पुच्छे' (6.2.106) इत्यतो विभाषेत्यनुवर्त्तनमाने `सक्थञ्चाक्रान्तात्' (6.2.198) इति विकल्पेनोत्तरपदस्यान्तोदात्तत्वं विधीयते। यस्मिन् पक्ष उदात्तं भवति, तत्र ङीपि परतः, `यस्येति च' (6.4.148) इत्यकारस्योदात्तस्य लोपे कृते `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इति ङीप्युदात्तत्वेन भवितव्यम्, अतो नास्ति ङीपि विरोधः। यस्मिन् पक्ष उदात्तं न सम्भवति तस्मिन् ङीपि स्त्युदात्तनिवृत्तिस्वरो नास्ति, उदात्तश्चाश्रीयते। ङीषि तु सति सर्वत्रोदात्तः सिद्धो भवति; ङीष्प्रत्ययस्वरेणान्तोदात्तत्वात्।।

114. अङ्गुलेर्दारुणि। (5.4.114)

द्वे अङ्गुली यस्य तत्। दारुणि समासार्थे मुख्याभिरङ्लीभिः सम्बन्धस्तत्र नोपपद्यते। तस्मात् सामर्थ्यात् द्व्यङ्गुलीसदृशेषु दार्ववयवेष्वङ्गुलिशब्दो वर्त्तमानः समास आश्रीयत इति मत्वाऽऽह--`अङ्गुलिसदृशावयवम्' इत्यादि।

`ननु च द्वे अङ्गुली प्रमाणमस्य दारुण इत्यादौ मुख्याभिरङ्गुलीभिः सम्बन्धः, तत्र मुख्याङ्गुलीभिः सम्बन्ध इति मुख्ये सम्भवति, अतो गौणस्य ग्रहममयुक्तम्? इत्याह--`यस्य तु' इत्यादि। बहुव्रीहिग्रहणानुवृत्तेरिह बहुव्रीहेः प्रत्ययो विधीयते। द्वे अङ्गुली प्रमाणमस्येत्येकार्थविवक्षायां तद्धितार्थे तत्पुरुषः कर्त्तव्यः। तस्मिस्तु कृते `तत्पुरुस्याङ्गुलेः संख्याव्ययादेः' (5.4.86) इत्यचा भवितव्यमेव। यश्च गौणोऽङ्गुलिशब्दः स एवं समामर्थ्यादेव योगस्य विषय इत्युक्तं भवति।।

115. द्वित्रिभ्यां ष मूर्ध्नः। (5.4.116)

अथ किमर्थं षः प्रत्ययान्तरं विधीयते, न प्रकृतः षजेव विधीयते? विकल्पेनान्तोदात्तत्वं यथा स्यात्। `विभाषोत्पुच्छे' (6.2.196) इत्यतो विभाषेत्यनुवर्त्तमाने `द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ' (6.2.197) इति नकारान्तस्य मूर्धन्शब्दस्य निर्देशाद्द्वित्रिभ्यामुत्तरो यत्र नकारान्तो मूर्धन्शब्दस्तत्र बहुव्रीहेरन्तोदात्तत्वं पाक्षिकं विधीयते; अन्यथाऽकारान्तमुर्धशब्द उत्तरपदोदात्तत्वं विधीयते, कृतसमासान्तमेव निर्दिशेत्। तत्र यदि षच्प्रत्ययो विधीयते, ततः पाक्षिकमन्तोदात्तत्वं बाधित्वा चित्करणसामर्थ्यान्नित्यमन्तोदात्तत्वं स्यात्। विभाषान्तोदात्तवचनस्य तु यत्र समासान्तो नास्ति सोऽवकाशः। अस्मिंस्तु प्रत्ययान्तरसमासान्ते कृते विकल्पेनान्तोदात्तत्वं सिध्यति। ननु च नकारान्तनिर्देशान्नकारान्त एव हि मूर्धन्शब्दः, उत्तरपदे विभाषान्तोदात्तेन भवितव्यम्, तत्कथं समासान्ताद्भवेत्? नैष दोषः; वक्ष्यति--`यत्रापि समासान्तः क्रियते तत्रापि बहुव्रीहिकार्यत्वात् तदेकदेशत्वाच्च समासान्तोदात्तत्वं भवत्येव' इति। अथ किमर्थं बहुव्रीहौ द्वित्रिभ्यामुत्तरो मूर्धन्शब्दो नकारान्तः सम्भवति, यावता नित्यं समासान्तेन भवितव्यम्, न हि सूत्रे विभाषाग्रहणस्ति? नैष दोषः; स एव हि नकारान्तनिर्देशो ज्ञापयति--विकल्पेन समासान्तो न भवतीति।।

116. अप्पूरणीप्रमाण्योः। (5.4.116)

`पूरणाप्रत्ययान्ताः' इति। `तस्य पूरणे डट्' (5.2.48) इत्यवमादिना प्रकरणेन ये पूरणार्थे विहितास्ते तत्साहचर्यात् पूरणशब्देनोच्यन्ते। पूरणप्रत्ययोन्ते येषां ते पूरणप्रत्ययान्ताः।

`अपि प्रधानपूरणीग्रहणम्' इति। अपि प्रत्यये विधातव्ये प्रधाना या पूरणी तस्या ग्रहणं कर्त्तव्यम्--तत एव प्रयोगो यथा स्यात्, अन्यतो मा भूत्। क्व पुनरस्याः प्रधान्यम्? इत्यत आह--`यत्र' इत्यादी। यत्राभिधेयत्वेनान्यपदार्थेन पूरण्यनुप्रविशति न केवलं वर्त्तिपदार्थस्यैव समासावयवभूतस्य पदार्थः, तत्र पूरण्याः प्राधान्यम्, यथा--कल्याणीपञ्चमा रात्रय इति। अत्र हि न केवलमवयवेन विग्रहः क्रियते, रात्रय एव प्रत्ययेनाख्यायन्ते, सहपञ्चमीकाः। सह

पञ्चम्या समुदितोऽन्यपदार्थः, न तु ताभिराब्धमर्थान्तरम्। यथा--कल्याणपञ्चमीकः पक्ष इति। न भिन्नावयवः समासार्थः, किं तर्हि? तदारब्धः समुदायः पक्षाख्यः। पूरणी--कल्याण पञ्चमीकः पक्ष इति। न भिन्नावयवः समासार्थः, किं तर्हि? तदारब्धः समुदायः पक्षाख्यः। पूरणी तु समासावयवभूता नाभीधीयत इति, अन्यपदार्थेनानुप्रवेशादप्राधान्यमिह तस्याः। `पुंवद्भावप्रतिषेधेऽपि' इत्यादि। न केवलमिहापि, अपि तु "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्" (6.3.34) इत्यादिना सूत्रेण पुंवद्भावप्रतिषेधेऽपीत्यादि। न केवलमिहाप्यपि तु स्त्रियाः पुंवद्भाषितपुंस्कादनुङ्" (6.3.34) इत्यादिना सूत्रेण पुंवद्भ ावपरतिषेधेऽपीत्यादि। न केवलमिहाप्यपि तु स्त्रियामिति प्रधानपूरण्येव गृह्यते। `इह तु' इत्यादि। अप्रत्ययः पुंबद्भावप्रतिषेधः कल्याणपञ्चमीकः पक्षः इत्यत्र न भवति। `शेषाद्विभाषा' (5.4.154) इति कप्।

`नेतुः' इत्यादि। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। नक्षत्रे यो नेतृशब्दो वर्त्तते तदन्ताद्बहुव्रीहेरपः प्रतिपादनं कर्त्तव्यमित्यर्थः। प्रतिपादनं तूत्तरसूत्रे चकारस्यानुक्तसमुच्चयार्थमाश्रित्य कर्त्तव्यम् `देवदत्तनेतृकाः' (इति) `नद्यृतश्च' (5.4.153) इति कप्।

`छन्दसि' इत्यादि। `मासात्' इत्यादि। भृत्यर्थे यो विहितः प्रत्ययः स भृतिसाहचर्याद्भृतिरित्युच्चते। भृतिः प्रत्ययो यस्य तत्। भृतिप्रत्ययं पूर्वपदं यस्य बहुव्रीहेः स भृतिपूर्वपदः। तस्मान्मसशब्दाट्ठचो विधिः चित्करणं बहुव्रीहिस्वरबाधनार्थम्। पञ्चास्य मासस्य भृतयः `सोऽस्यांशवस्नभृतयः' (5.1.56) इति `संख्याया अतिशदन्तायाः कन्' (5.1.22) पञ्चकः, पञ्चको मासोऽस्य पञ्चकमासिकः।

`अपः पित्करणं यत्र बहुव्रीहावुत्तरपदान्तोदात्तत्वमारभ्यते तत्र तद्बाधनार्थम्--शोभना पञ्चमी आसां रात्रीणां सुपञ्चमाः, अविद्यमाना पञ्चमी आसां रात्रीणामपञ्चमा इति। अत्र ह्यसति पित्करणे `नञ्सुभ्याम्' (6.2.172) इत्युत्तरपदान्तोदात्तत्वं स्यात्।।

117. अन्तर्बहिर्भ्यां च लोम्नः। (5.4.117)

118. अञ्नासिकायाः संज्ञायां नसं चास्थूलात्। (5.4.118)

`संज्ञायामिति समुदायोपाधिः' इति। एतेन यदि प्रकृतिप्रत्ययसमुदायः कस्याचित् संज्ञा भवत्येवं प्रत्ययो भवति, नान्यथेति दर्शयति। `द्रुणसः' इति। `पूर्वपदात् संज्ञायामगः' (8.4.3) इति णत्वम्। वर्ध्रे भवा स्त्री वार्ध्री, सा नासिका यस्य स `वार्ध्रीणसः' इति। `वृद्धिनिमित्तस्य च तद्धितस्यरक्तविकारे' (6.3.39) इति पुंवद्भावप्रतिषेधः। गौरिव नासिकास्य गोनसः। अच श्चित्करणं बहुव्रीहिस्वरबाधनार्थम्।

`खरणाः खुरणाः' इति। `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः।

शितर्नासिकास्य `शितिनाः'। अहिरिव नासिकास्य `अहिनाः'। अर्चेव नासिकास्य `अर्चनाः'। `ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (6.3.63) इति ह्रस्वः।।

119. उपसर्गाच्च। (5.4.119)

उपसर्गग्रहणं प्राद्युपलक्षणार्थम्; नासिकां प्रति क्रियायोगाभावात्।

`वेर्ग्रो वक्तव्यः' इति। विशब्दात् परस्य नासिकाया ग्रशब्द आदेशो भवतीति वक्तव्यम्। विग्रः। प्रत्ययोऽजेव।।

120. सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रौणीपदाजपदप्रोष्ठपदाः। (5.4.120)

`टिलोपादिकम्' इति। आदिशब्देन सुशब्दश्च कर्मविशेषणं गृह्यते। `शोभनं प्रातरस्य' इति। शोभनमित्येतदिह कर्मणो विशेषणम्। शोभनं प्रातःकाले कर्मास्येत्यर्थः। एवमुत्तरत्रापि शोभनमित्येतत्कर्मणो विशेषणं वेदिव्यम्।

121. नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम्। (5.4.121)

`अकारान्तोऽपि हलशब्दोऽस्ति; तत्र यदा तेन समासः तदा हल इति भविष्यति, यदा त्विकारान्तेन तदा हलिरिति, तदनर्थकं हलिग्रहणम्? नानर्थकम्; भिन्नार्थत्वात्। तेन यो महद्धलं हलिः, तस्मिन् विषये विवक्षिते, अहल इति न सिध्यति, अहल इति यदाकारान्तेन समासः क्रियते, पूर्ववत् प्रकृतेभावेनाद्युदात्तत्वं चेष्यते, `शेषाद्विभाषा' (5.4.154) इति कप् प्रसज्येत। तस्माद्युक्तं हलिग्रहणम्।।

122. नित्यमसिच प्रजामेधयोः। (5.4.122)

`एवं तर्हि नित्यग्रहणेनान्यत्रापि सूच्यते' इति। ग्रन्ताधिक्यादर्थाधिक्यं भवतीति कृत्वा। असिचश्चित्करणं दुष्प्रजाः, दुर्मेधा इत्यन्तोदात्तत्वं यथा स्यात् अप्रजाः, इत्यादौ तु नार्थश्चित्करणेन; `नञ्सुभ्याम्' (6.2.162) इत्यनेनैवोत्तरपदान्तोदात्तत्वस्य सिद्धत्वात्।।

123. बहुप्रजाश्छन्दसि। (5.4.123)

124. धर्मादनिच् केवलात्। (5.4.124)

`असमस्तः' [नास्ति--काशिकायाम्] इति। असमासः क्रियत इत्यर्थः। `परमस्वधर्मः' इति। स्वश्चासौ धर्मश्चेति स्वधर्मः, परमश्चासौ स्वधर्मश्चेति परमस्वधर्मः। `यद्येवम् इत्यादि। यदि केवलग्रहणेन धर्मो विशेष्यते परमस्वधर्मश्चेति न, परमस्वधरह्मेति स्यात्। `केवलात् पूर्वपदात्' इति। धर्मस्य असहायात् पूर्वपदादित्यर्थः। `न पदसमुदायात्' इति। परमो धर्म इति प्रकृतेन सम्बन्धः। अत्र व्याख्याने त्रिपदे बहुव्रीहौ न भवति प्रसङ्गः, पदसमुदायाद्धि परमो धर्मशब्दो न केवलात् पूर्वपदात्। अनिचश्चित्करणं पूर्वपदप्रकृतिस्वरं बाधित्वाऽन्तोदात्तमेव यथा स्यात्।।

125. जम्भा सुहरिततृणसोमेभ्यः। (5.4.125)

जम्भवचनेन तृणमिव जम्भोऽस्य, सोम इव जम्भोऽस्येति विग्रहीतव्यमिति। ननु तृणं जम्भोऽस्य, सोमो जम्भोऽस्येत्येवं विग्रहीतव्यम्, न हि तृणं जम्भः, न च सोमः। अभ्यवहारह्यवचने तु--तृं जम्भोऽस्य, सोमोजम्भोऽस्येत्यवमेव विहग्रहः कार्यः; तृणसोमयोरभ्यवहारह्थत्वात्।।

126. दक्षिणर्मा लुब्धयोगे। (5.4.126)

127. इच् कर्मव्यतिहारे। (5.4.127)

`तत्र तेनेदमिति सरूपे' इत्ययं बहुव्रीहिर्गृह्यते' इति। अस्यैव कर्मध्यतिहारे वृत्तेः `केशाकेशि' (इति) `अन्येषामपि दृश्यते' (6.3.137) इति दीर्घः। तिष्ठद्गुप्रभृतिष्विच्प्रत्यस्य पाठादव्ययीभावसंज्ञा, अव्ययीभावश्च समासोऽव्ययसंज्ञो भवतीति। तेन सुब्लुग्भवतीति भावः। इचश्चित्करणं विशेषार्थम्। यदि ह्यत्र चकारो न क्रियते, तदा तिष्ठद्गुप्रभृतिष्वपीकारमात्रं पठ्येत, तदेकारमात्रस्यापि ग्रहणं स्यात्।।

128. द्विदण्ड्यादिभ्यश्च। (5.4.128)

`द्विदण्ड्यादिभ्य इति तादर्थ्य एषा चतुर्थी' इत्यादि। द्विदण्ड्यादयो हि प्रतपदिकेष्विच्प्रत्ययान्ता एव पठ्यन्त इति तेभ्यः पुनरिज्विधातुं न शक्यते, विधीयमानोऽपि निष्प्योजनः स्यात्, तस्मान्नेयं पञ्चमी, किं तर्हि? तादर्थ्ये चतुर्थी। द्विदण्ड्याद्यर्थमिच्परत्ययो भवतीत्यनेन तादर्थ्यं दर्शयति। अस्यैवार्थं विस्पष्टीकर्त्तुमाह--`तत्तथा भवति' इत्यादि। एवं ब्रुवाणेन `द्विदण्ड्यादिभ्यः प्रत्ययो भवति, न द्विदण्डादिभ्यः' इत्युक्तम्। एवं ते सिध्यन्ति; नान्यथा। अथ किमर्थं समुदायानां निपातनशुद्धा एव प्रकृतीः प्रातिपदिकेषु पठित्वा ततः प्रत्ययो दिधीयते? इत्यत आह--`समुदायनिपातनाच्च' इत्यादि। प्रातिपदिकेषु प्रकृतीः पठित्वा ताभ्यः प्रत्ययमात्रं विधीयते, ततो नियमः स्यात्--समुदायनिपातनाद्यत्रारथविशेषे ते प्रसिद्धास्तत्रैव विशेष्यन्ते। तत्रैव भवन्तीत्यर्थः। `द्विदण्डि प्रहरति' इति। द्वौ द्डौ यस्मिन् प्रहरणे। `इह भवति' इति। द्विदण्डीत्येतच्छब्दरूपमत्रार्थे साधुर्न भवतीत्यर्थः। `बहुव्रीह्येधिकारात् तत्पुरुषान्न क्वचित् प्रत्ययविधानं स्यात्। समुदायनिपातनात् तु क्वचित् तत्पुरुषादपि भवति। यदा प्रत्यस्य लोपो भवत्यव्ययोभावसंज्ञा, तदा न प्रप्नोतीत्यत आह--`प्रत्ययलक्षणेन' इत्यादि।।

129. प्रसम्भ्यां जानुनोर्ज्ञुः। (5.4.129)

`जानुशब्दस्यादेशो भवति' इति। कथं पुनर्ज्ञायते--आदेशोऽयम् न प्रत्यम इति? यदि प्रत्ययः स्यात्, `जानुनः' इत्येकवचनेनैव निर्द्देशं कुर्यात्; षष्ठीद्विवचनेनैव निर्देशः कृतः। तस्मादावेशोऽयं न प्रत्यय इति विज्ञायते। षष्ठीद्विवचनेन निर्देशोऽसन्देहार्थः कृतः--स्थानषष्ठीत्वमसन्दिग्धं यता विज्ञायेतेति। जानुन इत्युच्चमानं सन्देहः स्यात्--किमियं षष्ठी, उत पञ्चमीति।।

130. ऊर्ध्वाद्विभाषा। (5.4.130)

131. ऊधसोऽनङ्। (5.4.131)

`अनङादेशोऽयं भवति' इति। कथं पुनर्विज्ञायते---आदेशोऽयं न प्रत्यय इति ? यद्येष प्रत्ययः स्यात् ङित्करणमनर्थकं स्यात् आदेशो ह्यस्मिन्नन्त्यादेशार्थं ङित्त्वमर्थवद्भवति। तस्मान्ङित्त्वादेवायमादेशो भवतीति विज्ञायते। `कुण्डोध्नी' इति। अनङि कृते `अतो गुणे' (6.1.97) पररूपत्वम्, `बहुव्रीहेरूधसो ङीष्' (4.1.25) इति ङीष् `अल्लोपोऽनः' (6.4.134)।

`स्त्रीग्रहणं कर्त्तव्यम्' इति। स्त्री गृह्यते येनाभिधेयनित्यत्वेन ततः स्त्रीग्रहणं कर्त्तव्यम्। एतदुक्तं भवति--तथा व्याख्यानं कर्त्तव्यं यथा स्त्रियामभिधेयायामनङ् भवतीति। तत्रेदं व्याख्यानम्--`ऊर्ध्वाद्विभाषा' (5.4.130) इत्यतो विभाषाग्रहणमनुवर्त्तते, सा च व्यस्थितविभाषा, तेन स्त्रियामेव भवति, नान्यत्रेति। अनङ्ऽकारादित्वमुत्तरार्थम्। इह विनापि तेन सिध्यत्येव।।

132. धनुषश्च। (5.4.132)

`शाङ्गधन्वा' इति। अनङि कृते यणादेशः, `सर्वनामस्थाने च' (6.4.8) इति दीर्घः।।

133. वा संज्ञायाम्। (5.4.133)

134. जायाया निङ्। (5.4.134)
`निङादेशो भवति' इति। आदेशत्वमस्य पूर्ववद् ङित्त्वादेव विज्ञायते। `युवजानिः' इति। लोपो व्योर्वलि' (6.1.66) इति यलोपः। `स्त्रियाः पुंवत्' (6.3.34) इति पुंवद्भावः।।

135. गन्धस्येदुत्पूतिसुसुरभिभ्यः। (5.4.135)
`इका आदेशो भवति' इति। कथं पुनर्ज्ञायते--आदेशोऽयं न प्रत्यय इति? `गन्धस्य' इति षष्ठ्या निर्देशात्। यदि हि प्रत्ययः स्यात् असन्दिग्धार्थं `गन्धात्' इति पञ्चम्या निर्देशं कुर्यात्, षष्ठ्या तु निर्देशः। तस्मादादेशोऽयमिति विज्ञायते।
`गन्धस्येत्त्वे' इत्यादि। गन्धो द्विविधः। गुणो गन्धः, सोऽन्यपदार्थस्यैकान्तो न भवति। यस्तु शोभनो गन्दोऽस्येति सुगन्ध आपणिक इति तत्र द्रव्यगन्धो गन्धशब्देनोच्यते, तच्चापणिकस्यैकदेशो भवति। तत्र गुणगन्धे यथा स्यात्, द्रव्यगन्धे मा भूदित्येवमर्थं गन्धस्येत्त्वे विधेये तदेकान्तग्रहणं कर्त्तव्यम्। तदित्यनेन बहुव्रीह्यर्थः सामर्थ्यान्निर्दिश्यते। तस्यैकान्त एकदेशो वा धर्मोऽवयवस्तदेकान्तः संगृह्यते। येन तदेकान्तग्रहणं कर्त्तव्यम्। एतदुक्तं भवति--तादृशं व्याख्यानं कर्त्तव्यं येनेत्त्वविधाविह गन्धोऽन्यपदार्थस्यैकदेशात् तत आश्रयितव्य इति। तत्रेदं व्याख्यानम्--`वा संज्ञायाम्' (5.4.133) इत्यतो वाग्रहममनुवर्त्तते, सा च व्यवस्थितविभाषा। तेन यत्र गन्धोऽन्यपदार्थस्यैकदेशभूतस्तत्रैवेत्त्वं भवति, नान्यत्रेति। अथ वा--अस्त्ययं गन्धशब्दो द्रव्यवचनः---गन्धान् विक्रीणीत इति। अस्ति गुणवचनो यथा--गन्धवती पृथिवी। तत्र गुणवचनस्येदं ग्रहणम्, न द्रव्यवचनस्य। तस्माद्द्रव्यवचनो बहवचनान्त एव द्रव्ये वर्त्तते--गन्धान विक्रीणीते, गन्धाः पण्यमस्येति। इह गन्धस्येत्यकवचनेनैव निर्देशः। तस्मादवसीयते--गुणवचनस्येदं ग्रहणमिति। गुणवचनस्य तु ग्रहणे तत्र गुणो गन्धोऽन्यपदार्थस्यैकदेशो भवति, तेन तदेकान्तभूतस्यैव गन्धस्येत्त्वं भवति।।

136. अल्पाख्यायाम्। (5.4.136)

137. उपमानाच्च। (5.4.137)

138. पादस्य लोपोऽहस्त्यादिभ्यः। (5.4.138)
`लोपो भवति समासान्तः' इति। किं पुनः स्यात् समासान्तो न स्यात्? `आदेः परस्य' (1.1.54) इत्यादेरेव स्यात्। समासान्तत्वे सत्यन्तशब्दोऽयं नियतदेशमेवावयवमाचष्ट इत्यन्तस्यैव भवति। एवञ्च समासान्तो भवति यद्यन्तस्य भवति, नान्यथा। ननु च लोपस्याभावरूपबत्वात् समन्सान्तो नोपपद्यते? इत्याह--`स्थानिद्वारेण' इत्यादि। स्थानिनोऽकारस्य समासान्तत्वादुपचारेण लोपोऽपि समासान्त उच्यत इति दर्शयति।।

139. कुम्भपदीषु च। (5.4.139)
`कुम्भपदीप्रभृतयः कृतपादलोपाः समुदाया एव पठ्यन्ते' इति। यद्येवम्, कथमिदं नेतव्यम्? इत्याह--`तत्रैवम्' इत्यादि। तत्र तेषु कुम्भपदीप्रभृतिषु कृतपादलोपेषु पठितेष्वेवं व्याख्येयमित्यर्थः। कुम्भपद्यादिविषयेय यथा कुम्भपद्यादयः सम्भवन्तीति। किमर्थं पुनः समुदाया एव पठ्यन्ते, न कुम्भपदादीन् शब्दान् प्रातिपदिकेषु पठित्वा तेभ्यः परस्य पादशब्दस्य लोपो विधीयेत? इत्याह--`समुदायपाठस्य च' इत्यादि। यदि कुम्भादिभ्यः परस्य पादस्य स लोप उच्येत, `कृतपादलोपाः समुदाया एव न पठ्येरन्' इति नियमो न लभ्येत। ततस्त्रिष्वपि लिङ्गेषु स्युः, स्त्रियामेव चेष्यन्ते। समुदायपाठे सति स्त्रियां ङीप्रत्यय एव विषयभूते भवति। `नान्यदा' इति। `कुम्भपदी' इति। `पादोऽन्यतरस्याम्' (4.1.8) इति ङीपि विषयभूते पादस्य लोपः ततो ङीप्, तस्मिन् `पादः पत्' (6.4.130) इति पद्भावः।
`यच्चेहोपमानपूर्वम्' इति--कुम्भपदी, जालपदीत्येवमादि। `संख्यापूर्वपदञ्च' इति--एकपदी शतपदीत्येवमादि। `तस्य सिद्धे' इति। उपमानपूर्वस्य पूर्वेणैव सिद्धे संख्यापूर्वस्य तूत्तरेण।
`अष्टापदी' इत्यस्मिन् पठ्यते। तत्र निपातनं दीर्घत्वार्थम्। `अष्टनः संज्ञायाम्' (6.3.125) इति वा।।

140. संख्यासुपूर्वस्य। (5.4.140)
अनुपमानार्थमिदम्।।

141. वयसि दन्तस्य दतृ। (5.4.141)

`द्विदन्' इति। ऋकारस्योगित्कार्यार्थत्वात् `उगिदचाम् (7.1.70) इति नुम्; हल्ङ्यादिसंयोगान्तलोपौ (6.1.68, 8.2.23) `सुदन्तो दाक्षिणात्यः' ति। शोभनत्वमिह गम्यते, न वयः।।

142. छन्दसि च। (5.4.142)
अवयोऽर्थम्, असंख्यापूर्वपदार्थञ्च वचनम्। `उभयतोदतः' इति। शासन्तमेतत्।।

143. स्त्रियां संज्ञायाम्। (5.4.143)
अच्छन्दोऽपर्थमेतत्। अय इव दन्ता अस्या `अयोदती' इति। शासन्तमेतत्।।

`समदन्ती' इति। `नासिकोदर' (4.1.55) इत्यादिना ङीष्।।

144. विभाषा श्यावारोकाभ्याम्। (5.4.144)
`स्त्रियाम्' इति निवृत्तम्। रोकः=रोचनम्, दीप्तिः। `रुच दीप्तौ' (धा. पा.745), भावे घञ्, `चजोः कुघिण्ण्यतोः' (7.3.52) इति कुत्वम्। अविद्यमानो रोकोऽस्येत्यरोकशब्दस्य व्युत्पत्तिं हृदि कृत्वा तस्यार्थं दर्शयितुमाह--`अरोको निर्दीप्तिः' इति।।

145. अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च। (5.4.145)

146. ककुदस्यावस्थायां लोपः। (5.4.146)
`कालादिकृता' इति। आदिशब्देनाहारादयो गृह्यन्ते।।

147. त्रिककुत्पर्वते। (5.4.147)
अनवस्थार्थमिदम्। पर्वतेऽन्यपदार्ते मुख्यं ककुटं न सम्भवति; उच्यते चेदम्--त्रिककुत् पर्वत इति। तत्र सामर्थ्यात्ककुदाकारे पर्वतशिखरे सादृश्यात् ककुदशब्दो वर्त्तते, तस्येदं ग्रहणं ककुदाकाराणि श्रृङ्गाणि तस्य सर्वस्य त्रिककुदभिधानं प्राप्नोति? अत--`न च' इत्यादि। `उच्यते' इति प्रकृतेन सम्बन्धः। `संज्ञैषा' इत्यादि। एतेन यस्यैषा संज्ञा त्रिककुच्छब्देनोच्यत इति तद्दर्शयति। एतच्च निपातनात् `स्त्रियां संज्ञायाम्' (5.4.143) इत्यतः संज्ञाग्रहणानुवृत्तेर्लभ्यते। ननु चाभिधेयनियमोऽपि तत एव लभ्यत इति पर्वतग्रहणं न कर्त्तव्यम्? नैतदस्ति; शैलीयमाचार्यस्य यत् प्रसद्धेष्वपि नित्यरेष्वभिधेयनिमित्तमाचष्टे, यथा--`पुष्यसिद्ध्यौ नक्षत्रे' (3.1.116) इति,किं पुनर्यत्र प्रसिद्धिर्नास्ति! सा तु लौकिकी।।

148. उद्विभ्यां काकुदस्य। (5.4.148)
`उत्काकुत्, विकाकुत्' इति। अन्त्यस्य लोपे कृते `वाऽवसाने' (8.4.56) इति चर्त्वम्। ननु च `आदेः परस्य' (1.1.54) इत्यादिलोपेन भवितव्यम्, तत्कथमन्त्यस्य भवति? अन्त्यवचनो ह्यवयववचनोऽपि, स नियतदेशावयवमाचष्ट इत्युक्तम्। तत्र यद्यादेः स्यात्, समासान्तता नोपपद्यते।।

149. पूर्णाद्विभाषा। (5.4.149)

150. सुहृद्दुर्हृदौ मित्त्रामित्रयोः। (5.4.150)

151. उरःप्रभृतिभ्यः कप्। (5.4.151)
`शेषाद्विभाषा' (5.4.154) इति कपि सिद्धे नित्यार्थं वचनम्। `प्रियसपिष्कः' इति। `इणः षः' (8.3.39) इति विषर्सनीयस्य षकारः। अवमुक्ते उपानहौ येन स `अवमुक्तोपानत्कः' इति। `नहो धः' (8.2.34) इति विहितस्य धकारस्य `झलां जशोऽन्ते' (8.2.39) इति जश्त्वम्--दकारः, तस्य `खरि च' (8.4.55) इति चर्त्वम्--तकारः।
किं पुनरेतद्विभक्त्यन्तानां पाठे प्रयोजनम्? इत्याह--`तत्र' इत्यादि। तत्त्रेत्यनेन विभक्त्यन्तानां पाठः प्रत्यवमृश्यते।
`अर्थान्नञः' इति। नञ्परो योऽर्थशब्दस्तदन्ताद्बहुव्रीहेः कब्भवति। नास्त्यर्थोऽस्येति अनर्थकः।।

152. इनः स्त्रियाम्। (5.4.152)

`इदमपि पूर्ववत् कपि सिद्धे नित्यार्थमेव। `बहुदण्डिकः' इति। `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नलोपः।।

153. नद्यृतश्च। (5.4.153)

154. शेषाद्विभाषा। (5.4.154)
शेषः कबपेक्षो वा स्यात्---यस्माद्बहुव्रीहेः कब्न विहितः स शेष इति? समासान्तापेक्षो वा--यस्माद्बहुव्रीहेः समासान्तो न विहितः स शेष इति? तत्र यदि कबपेक्षः शेषः स्यात्---अनृचः, व्याघ्रपात्, सुगन्धिरित्यत्रापि स्यात्। न ह्यतः केनचित् कब्विहित इति कबपेक्षे शेषे दोषं दृष्ट्वा समासान्तापेक्षया शेष इति दर्शयन्नाह--`यस्माद्बहुव्रीहेः समासान्तो न भवति स शेषः' इति। कथं ज्ञायते--समासान्तापेक्षः शेष इति? शेषग्रहणात्। तत्र यदि कबपेक्षः शेषः स्यात्, शेषग्रहणनर्थकं स्यात्। आरम्भसामर्थ्यादेव हि शेषविषय एव विकल्पो भविष्यति; अन्यथा यदि यतोऽपि पूर्वविधिवाक्यैः कब्विहितस्ततोऽप्यनेन विभाषा विधीयते, विधिवाक्यानामानर्थक्यमापद्येत। तस्माच्छेषग्रहणात् समासान्तापेक्षः शेषो विज्ञायते. `बहूखट्वकः' इति `आपोऽन्यतरस्याम्' (7.4.15) इति ह्रस्वः। `बहुखट्वः' इत्यत्रापि `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति।
`कथम्' इत्यादि। यदि समासान्तापेक्षः शेषः; अनृक्कं साम, बह् वृक्कं सूक्तमित्यत्र कब्न सिध्यतीत्यभिप्रायः। `विशेषे स इष्यते' इति। स ह्यकारः समासान्तो विशेषे माणवे चरणाख्यायां चेष्यत इति तत्राकारो विहितः। न चापि तत्रैव विशेष कब्विहितः, किं तर्हि? विषयान्तरे--सामनि, सूक्ते च। तत्र बहुव्रीहेः समासान्तापेक्षः शेषः। तेन च प्रियपथः, प्रियमधुर इति `ऋक्पूरब्धूः' (5.4.74) इत्यादिनाऽकारः समासान्तः। अथ किमर्थं शेषग्रहणम्, यावता याभ्यः प्रकृतिभ्यः समासान्ता विहिताः, ताभ्यस्त एव बाधका भविष्यन्ति? नैतदस्ति; निरवकाशा हि विषयो बाधका भविष्यन्ति, सावकाशाश्च समासान्ताः। कोऽवकाशः? प्रतिपदोपात्तप्रकृतयः; याभ्यः समासान्ता अर्थविशेषे समासविशेषं प्रति प्रतिपदमुपादाय विहिताः सोऽवुकाशः; विशेष प्रकृतिभ्यः प्रसङ्गे सत्युभयप्राप्तौ परत्वात् कप्रत्ययः स्यात्। तस्माच्छेषग्रहणं कर्त्तव्यम्।।

155. न संज्ञायाम्। (5.4.155)

156. ईयसश्च। (5.4.156)
`सर्वा प्राप्तिः प्रतिषिध्यते' इति। ननु `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या. प. 19) इति शेषलक्षणस्यैव कपः प्रतिषेधः प्राप्नोति? नैष दोषः; कबत्रानुवर्त्तते, न शेषादिति। तेनायं कब्मात्रस्य प्रतिषेधो भविष्यति। `बहवः श्रेयांसः' इति। `द्विवचनविभज्योपपदे' (5.3.57) इत्यादिनेयसुन्, `प्रशस्यस्य श्रः' (5.3.60) इति श्रः। `ह्रस्वत्वमपि न भवति' इति। `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति ह्रस्वत्वं प्राप्नोति, तदपि न भवति। कस्मान्न भवति? इत्याह--`ईयसो बहुव्रीहेः' इत्यादिना। नात्र पुंवद्वचनेन स्त्रीप्रत्ययस्य निवृत्तिरभिप्रेता, किं तर्हि? ह्रस्वत्वप्रकरणात् तदभावः। एतदुक्तं भवति---यथा पुंवद्भावे सतीकारस्य ह्रस्वोनभवति एवमीयसः परस्य स्त्रीप्रत्ययस्यापि न भवति।।

157. वन्दिते भ्रातुः। (5.4.157)
`नद्युतश्च' (5.4.153) इति प्राप्तस्य कपोऽयं प्रतिषेधः। `वदि अभिवादनस्तुत्योः' (धा.पा.11) इति यद्यपि वदिरभिवादने वर्त्तते, तथापीह स्तुतावेव वर्त्तमान आश्रीयते, अत एवाह--`वन्दितः स्तुतः' इति।।

158. ऋतश्छन्दसि। (5.4.158.)
`अयमपि पूर्ववत् प्राप्तस्य कपः प्रतिषेधः।।

159. नाडतन्त्र्योः स्वाङ्गे। (5.4.151)
अयपपि `नद्यृतश्च' (5.4.153) इति प्राप्तस्य कपः प्रतिषेधः। स्वाङ्गमिह पारिभाषिकं गृह्यते। `बहुनाडिः' इति। पूर्ववदुपसर्जनह्रस्वत्वम्। `बहुतन्त्रीः' इति। अत्र ह्रस्वत्वं न भवति; `कृतः स्त्रियाः प्रतिषेधो वक्तव्यः' इति चचनात्। तथा चोक्तम् `स्त्रीग्रहणं स्वरयिष्यति' (म.भा.1.2.48) इति।।

160. निष्प्रवाणिश्च। (5.4.160)

इति बोधिसत्त्वदेशीयाचार्य श्रीजिनेन्द्रबुद्धिपादविरचितायां

काशिकाविवरणपञ्चिकायां पञ्चमाध्यायस्य

चतुर्थः पादः।।

समाप्तश्चायं पञ्चमोऽध्यायः
* * *

6.1
षष्ठोऽध्यायः

प्रथमः पादः

1. एकाचो द्वे प्रथमस्य। (6.1.1)
इह केचित् स्वार्था एव विधयो भवन्ति, न पदार्थाः, तद्यथा--`अण्कुटिलिकायाः' (4.4.18) इति कुटिलिकाशब्दादण् विधीयमानः स्वार्थो भवति। केचित् पुनः स्वार्थाः, परार्थश्च तद्यथा--`पदरुजविशस्पृशो घञ्' (3.3.16) इति पदादिभ्यो घञ् विधीयमानः स्वार्थो भवति, स्वरितलिङ्गासङ्गादुत्तरेषु योगेष्वनुवर्त्तमानः परार्थश्च। केचित् पुनः परार्था एवाधिकारा भवन्ति, न स्वार्थाः, यथा--`समर्थानां प्रथमाद्वा' (4.1.82) इति; तत् किमयं स्वार्थ एव? अथोभयार्थ एवाधिकारः? उत परार्थ एवेति सन्देहापनयनाय परार्थतामेवास्य दर्शयितुमाह--`एकाच इति च' इत्यादि। एतद्ग्रहणकं वाक्यम्, अस्य च `इत उत्तरम्' इत्यादि। विवरणम्। सिंहावलोकितन्यायेन पूर्वत्राप्यधिकाराणामनुवृत्तिर्भवति, अतस्तन्निवृत्तिरस्वरितत्वाद्विज्ञेया। कस्य पुनः `एकाचो द्वे भवतः' इत्येवं तद्वेदितव्यम्? इत्यत यद्येषा धातोरेव् समानाधिकरणा षष्ठी स्यात्, तदा पचादीनामेव द्विर्वचनं स्यात्, न जागर्त्त्यादीनाम्, न हि तत्रैकाच इति मन्यमानो नैषैकाच इति सामानाधिकरणा षष्ठी--धातोरेकाच इति, अपि त्ववयवयोगा--धातोर्योऽवयव एकाच इति दर्शयितुमाह--`धातोरवयवस्य' इति। `जजागार' इत्यत्र जागित्येतद्द्विरुच्यतदे, `पपाच' इत्यत्र पच्छब्दः; पूर्वत्र `अचो ञ्णिति' (7.2.115) इति वृद्धिः, उत्तरत्र `अत उपधायाः' (7.2.116) इति। `इयाय' इति। `इण् गतौ (धा.पा.1045) `अचो ञ्णिति'(7.2.115) इति वृद्धौ कृतायां `द्विर्वचनेऽचि' (1.1.59) इति स्थानिवद्भावादिकारो द्विरुच्यते, आयादेशः, `अभ्यासस्यासवर्णो' (6.4.78) इतीयङ्। `आर इति। `ऋ गतौ' (धा. पा. 1098) ऋ इत्येतस्य द्विर्वचनम्, `उरत्' (7.4.66) इत्यत्त्वम् रपरत्वम्, `अत आदेः' (7.4.70) इति दीर्घः, सवर्णदीर्घत्वञ्च।
एकाच इति तत्पुरुषोऽयं वा स्यात् एकश्चासावच्चेति एकाच्, बहुव्रीहिर्वा एकोऽञ् यस्येति? तत्र यद्ययं तत्पुरुषः स्यात्, इणादीनामेव द्विरुक्तिः स्यात्--इयाय आरेत्येवमादौ; पचादीनां तु पपाचेत्यादौ न स्यात्, तेषामज्झल्समुदायात्मकत्वादित्येतन्मनसि कृत्वाऽऽह--`एकाच इति बहुव्रीहनिर्देशोऽयम्' इति। बहुव्रीहिणा विवक्षितस्यार्थस्य निर्देशः=कथनम्। बहुव्रीहेर्निर्देशः=कथनम्, उच्चारणं वा बहुव्रीहिनिर्देशः। कुतः पुनरेतदवसितम्--बहुव्रीहेनिर्देशोऽयमिति? `हलादिः शेषः', (7.4.60) `शर्पूर्वाः खयः' (7.4.61) इत्येवमादिलिङ्गात्। ननु च तत्पुरुषस्यापि लिङ्गमस्ति--`दीर्घ इणः किति' (7.4.69) इतीणोऽभ्यासस्य दीर्घविधानम्? नैतदस्ति; बहुव्रीहावपि ह्यस्मिन् व्यपदेशिवद्भावादिणो द्विर्वचनेऽभ्यासस्य दीर्घविधानमुपपद्यत एव, न तु तत्पुरुषेऽस्मिन् हलादिशेषादिकार्यमुपपद्यतेः पचादीनामज्झल्समुदायानां द्विर्वचनानुपपत्तेः। तस्माद्बहुव्रीहेरेव लिङ्गमस्ति, न तत्पुरुषस्येति बहुव्रीहिनिर्देश एवायम्। यद्येवम्; बहुव्रीहेरेवान्यपदार्थप्रधानत्वादुपलक्षणविनिर्मुक्तस्य शुद्धस्यैवान्यार्थस्य बहुव्रीहिणाभिधानादचावयवेन य उपलक्षितोऽन्यपदार्थस्तस्यैवानच्कस्य द्विर्वचनं प्राप्नोति, न तूपलक्षणभूतस्यापि। न ह्युपलक्षणं कार्योपयोगि भवति। तथा हि यथा चित्रगुरानीयतामित्युक्ते यस्य चित्रागावः सन्ति स एव आनीयते, न तूपलक्षमभूता गावोऽपि। अत एव तस्य निरासाय तद्गुणसंविज्ञानोऽयं बहुव्रीहिरिति दर्शयन्नाह--`तत्र' इत्यादि। `समुदायः समासार्थः' इति। सह तेनोपलक्षणभूतेनाचावयवेन समुदाय एवान्यपदार्थ इत्यर्थः। `उभ्यन्तरश्च' इति। तदन्तर्भूत इत्यर्थः। चशब्दोऽवधारणे। अभ्यन्तर एवेत्यर्थः। इतिकरणो हेतौ। यस्मात् समुदाये समासार्थेऽवयवोऽभ्यन्तरो भवति, तस्मात् साच्कस्यैव द्विर्वचनं भवति। लोकेऽपि क्वचिदुपलक्षणस्य समासेऽन्तर्भावात् कार्योपयोगित्वं दृष्टमेव, यथा शुकलवाससमानयेत्युक्ते सहैव शुक्लेन वाससानीयते। पचित्यत्र यनैवाचा समुदाय एकाच् तेनैव तदवयवोऽप्यच्छब्दः पशब्दश्चेति, ततश्चावयवानिमपि प्रत्येकं द्विर्वचनं प्राप्नोति। यथा यनैव हस्तेनावयवेन बाहुर्हस्तवान् भवति, तेनैव देवदत्तोऽपि हस्तवान् भवति; तथा पचतौ घातौ येनैवाकारेम पच्छब्दः समुदाय एकाच् तेनैव तदवयवोऽप्यच्छब्दः पशब्दश्तेति। ततश्चावयवानमपि प्रत्येकं द्विर्वचनं प्राप्नोत्येव। द्विर्वचनञ्च कायिण एकाचः, सामान्येन निर्देशात्। एवञ्च समुदायस्य तदवयवनाञ्चैकाचां पृथग्द्विर्वचने कृतेऽनष्यटं रूपं स्यात्, अत एतद्द्वेष्यमपाकर्तुमाह--`तत्र' इत्यादि। तेषु समुदायेष्वेकाक्षु मध्ये पृथगवयवैकाचो न द्विरुच्यन्ते। किं तर्हि? समुदायैकाजेव। अवयवैकाजिति कर्मधारयः। `समुदायैकाच्' इति। अयमपि कर्मधारय एव। कुतः पुनरयं सामान्याभिधाने विशेषो लभ्यते? इत्यत आह--`तथा हि' इत्यादि। यद्यपि समुदायीऽवयवश्चैकाच्, तथापि यस्य द्विर्वचने कृते सर्वेषामनुग्रहो भवति तस्यैव द्विर्वचनं युक्तम्। एवं शास्त्रहानिनं भवति; सर्वेषामेव शास्त्रविहितकार्यस्य निष्पत्तेः। अयमेवानुग्रहो या शास्त्रविहितकार्यस्य निष्पत्तिः। समुदायस्यैव द्विर्वचने कृते सर्वेषामनुग्रहो भवति। यथा वृक्षः प्रचलन् सहावयवैः प्रचलति, तथैकयैव शास्त्रप्रवृत्त्या समुदायो द्विरुच्यमानः सहावयवैद्विरुच्यते,

न हि विनावयवैः समुदायो द्विर्वक्तुं शक्यते; तस्य तदात्मकत्वात्। अवयवानां तु द्विर्वचनं नैकया प्रवृत्त्या सर्वेषां कर्त्तु शक्यते। न तद्द्विरुक्तौ सर्वेषामनुग्रहो भवति। कथम्? सर्वेषां हि तेषामेकाज्व्यपदेश एकोऽजिति हेतुः; तत्र यदा येनाचैकोऽवयव एकाजिति व्यपदिष्यते, तदा तेनैव तस्याक्षिप्तत्वान्न शक्यतेऽपर एकाजिति व्यपदेष्टुम्। ततश्चैकस्य द्विर्वचने विधित्सिते तदेदानीं तेनाचा य एकगाच् कश्चिदवयवस्तस्यैव द्विर्वचनं स्यात्, नेतरस्य; अनच्कत्वात्। अत्रैतत् स्यात् "एकाचः' (6.1.1) इति सर्वेषां पष्ठ्या निर्दिष्टत्वात् सर्वेषामेव तेषां द्विर्वचनं कर्तव्यम्, न च तद्युगपत् सम्भवति, अत एकस्य तावत् क्रियते। एकस्मिन् कृते पुनः प्रवृत्त्यन्तरेणापरस्यापि करिष्यत" इति? एतच्च न; यस्य ह्यवयवस्य पूर्वं द्विर्वचनं कृतं तेनैव सहाचो द्विरुक्तत्वान्न युज्यते पुनस्तस्यावयवान्तरेम द्विर्वचनं कर्त्तुम्। अकृतद्विरुक्तस्य हि द्विर्वचनं क्रियते, न द्विरुक्तस्य; अन्यथा ह्यनवस्था स्यात्। `अनभ्यासस्य' (6.1.8) इति वचनाच्चायुक्तमेवैकस्मिन्नवयवे द्विरुक्तेऽपरस्य द्विर्वचनं कर्तुम्। अतो नावयवद्विर्वचने सर्वेषामनुग्रहः सम्भवति। तत्र यसय द्विर्वचनं न सम्भवति तस्य शास्त्रहानिः स्यात्। तदयुक्तमवयवानां प्रत्येकं द्विर्वचनम्।

अथैषां युगपदवयवानां द्विर्वचनं न सम्भवतीति प्रयोगान्तरे पर्यायेण करिष्यते पूर्वोक्तदोषपरिहारार्थम्? एवमपि यदा पचेरच्छब्दस्य द्विर्वचनं स्यात्, तदा पपाचेत्येवमादि न सिध्येत्। किञ्च `णिजिर् शौचपोषणयोः' (धा.पा.1093) इत्यस्त्राल्लट्, झि, शप्, तस्य जुहोत्यादित्वात् श्लुः, `श्लौ' (6.1.10) इति द्वर्वचनम्। तत्र यदि निशब्दमात्रस्य द्विर्वचनं क्रियते तदा `णिजां त्रयाणाम्' (7.4.75) इति गुणः। अत्रेदानीम् `अदभ्यस्तात्' (7.1.4) इत्यदादेश इष्यते--तेनिजतीति रूपं यथा स्यादित्येवमर्थम्, स च न प्राप्नोति; जकारेण व्यवहितत्वात्। न हि जकारस्याभ्यस्तसंज्ञा, किं तर्हि? निशब्दस्य; द्विरुक्तत्वात्, जकारस्य चाद्विरुक्तत्वात्। अनेनिजुरिति--अत्र लङादेशस्य झेः `सिजभ्यस्तविदिभ्यश्च' (3.4.109) इति जुस् न प्राप्नोति; पूर्वस्मादेव हेतोः। नेनिजदित्यत्र `नाभ्यस्ताच्छतुः' (7.1.78) इति नुम्प्रतिषधो न स्यात्, अत एव हेतोः। न च शक्यते वक्तुम्--वचनसामर्थ्याद्व्यवधानेऽपि भविष्यतीति; यदा समुदायस्य द्विर्वचनं तदा वचनस्य सावकाशत्वात्। यदा त्विकारसहितस्य जकारसय द्विर्वचनं तदा नेनिजतीत्यादिकं रूपमेव न स्यात्। तस्मादयुक्तमवयवानां द्विर्वचनम्। अतः समुदाय एव द्विर्वक्तव्यः।

अथ पपाचेत्यत्र कथं द्विर्वचनम्, यावता `एकाचो द्वे प्रथमस्य (6.1.1) इत्युच्यते, न चात्रैकाचः प्रथमव्यपदेशोऽस्ति, प्रथमशब्दो ह्यप्रथमापेक्षो भवति, सम्बन्धिशब्दत्वात्; सत्स्वनेकेषु यस्मात् पूर्वो नास्ति स प्रथमः, यः पुनरेक एव नासौ प्रथमव्यपदेशं लभते, एकश्चात्रैकाच्। तेनात्र द्विर्वचनं न स्यात्, जजागारेत्यादावेव स्यात्? इयाय, आरेत्यत्रापि कथं द्विर्वचनम्, यावतैकाचस्तदुच्यते, न चैकाच्त्वमस्ति, अज्व्यतिरिक्तस्यानच एकाज्व्यपदेशहेतोरभावात्? इत्यत आह--`पपाचेत्यत्र' इत्यादि। एकसंख्याव्यवच्छिन्नस्वरसम्बनधहेतुको व्यपदेशः, स यस्यास्ति स व्यपदेशी। जागर्त्त्यादिषु धातुषु जागित्येवमादिः। `तेन तुल्यं वर्त्तते'(5.1.115) इति व्यपदेशिवत्, तस्य भावो व्यपदेशिवद्भावः। एकाच्त्वमपीत्यपिशब्दादद्वितीयत्वमपीति। ततोऽनेन जजागारेत्यत्र यथा वास्तवे प्रथमत्वे जाग् इत्येतस्य प्रथमस्यैकाचो द्विर्वचनं भवति, तथा परमार्थतो सत्यपि प्रथमत्वे प्रथमस्यैकाचो द्विर्वचनं भवति व्यपदेशिवद्भावेन पपाचेत्यत्र पच्छब्दस्य। इयाय, आरेत्यत्राप्यसति वास्तव एकाच्त्वे द्वितीयत्वे च व्यपदेशिवद्भावेन द्विर्वचनं भवति; यथा--अटिटिषतीत्यत्र वस्तुत एवैकाचो द्वितीयस्य टिशब्दस्येति।

न चै तद्वक्तव्यम्--`यस्मादप्रथमस्यापि पच् इत्येवम्प्रकारस्य व्यपदेशिवद्भावेन द्विर्वचनं भवति' इति। अत्र `लिट्यभ्यासस्योभयेषाम्' (6.1.17) इति वचनं ज्ञापकम्, असत्यपि वास्तव एकाच्त्वे द्वितीयत्वे च पुनर्व्यपदेशिवद्भावेन चेण्प्रभृतनां द्विर्वचनं भवतति। अत्राभ्यासस्य दीर्घविधानार्थम् `दीर्घ इणः किति' (7.4.69) इति वचनं ज्ञापकम्। इह `आदशभ्यः संख्याः संख्येये वर्त्तन्ते न तु संख्यानमात्रे' इति द्विशब्दोऽत्र संख्येये वर्त्तते। तच्च संख्येयं शब्दरूपं वा स्यात्? उच्चारणं वा? तत्र यदि शब्दरूपं संख्येयं स्यात् तदा `द्वे' इत्यनेन द्विशब्दरूपे भाव्यमानतया निर्दिश्येते इति। अत एकाच इत्यस्य च स्चाने योगलक्षणः सम्बन्धो भवति, अतः `स्थाने द्विर्वचनम्' इत्येष पक्षो भवति। तदैकाच इति स्थानषष्ठी जायते।

अथ पुनरुच्चारणं सख्येयं तदा स्थान्यादेशसम्बन्धो न भवति। उच्चारणं नाम शब्दानुगतो धर्मः। यद्यसावदेशो विदीयते तदा निवृत्तिधर्मा स्थानी भवतीति शपब्दस्य स्थानिनो निवृत्त्या भवितव्यम्, ततश्चोच्चारणमपि न स्यात्; तस्य तद्धर्मत्वात्। तस्मादुच्चारणे संख्येये स्थाने द्विर्वचनं न सम्भवतीति `द्विष्प्रयोगो द्विर्वचनम्' इत्येष पक्षो भवतीति। तदैकाच इति `कर्त्तृकर्मणोः कृति' (2.3.65) इति कर्मणि षष्ठी, सा ह्यैकाजुच्चारणक्रियया व्याप्तुमिष्टतमत्वात् कर्म भवति। तत्र यदि `स्थाने द्विर्वचनम्' इत्येष पक्ष आश्रीयेत, तदा जिघांसतीत हन्तः कुत्वं न स्यात्। समुदायस्य हि सन्नन्तस्य समुदायः सन्नन्त आदेशः, तत्र कृत आश्रीयेत, तदा जीघांसतीति हन्तेः कुत्वं न स्यात्। समुदायस्य हि सन्नन्तस्य समुदायः सन्नन्त आदेशः, तत्र कृत एतन्नास्ति। अयं प्रत्ययः इयं प्रकृतिरिति सन्दिग्धत्वात् प्रकृतिप्रत्ययस्य हन्तिर्नष्टो भवतीति `अभ्यासाच्च' (7.3.55) इति कुत्वं हन्तिहकारस्य न स्यादितीमं स्थानेद्विर्वचनपक्षे दोषं दृष्ट्वा द्विष्प्रयोगो द्विर्वचनमिति पक्षमाश्रित्याह--`द्विष्प्रयोगश्च' इत्यादि। चकारोऽवधारणे। द्विष्प्रयोग एवेत्यर्थः। न स्थाने द्विष्प्रयोग इत्यर्थः। अथ द्विष्प्रयोगद्विर्वचने कथमयं दोषो न भवति? इत्याह--`आवृत्तिसंख्या हि' इत्यादि। पुनः पुनरुच्चारणम्=आवृत्तिः। तत् पुनः संख्याव्यवस्थितस्यैव धातोर्विधीयते। `तेन' इत्यादि। यस्मादावृत्तिः सख्याव्यवस्थितस्यैव धातोर्विधीयते, तेन स एव शब्दो व्यवस्थित एव द्विरुच्चार्यते, न तु तस्य स्ताने शब्दान्तरं विधीयत इति कुतः पुनः पूर्वोक्तदोषाव सरप्रसङ्गः!

यदि तर्ही द्विष्प्रयोगो द्विर्वचनमित्येष पक्ष आक्षीयते, एवं च सति `वस्वेकाजाद्घसाम्' (7.2.67) इत्यत्रादिवान्, आशिवान्, पेचिवान्, शेकिवान्, इत्युदाहृत्य यद्वक्ष्यति--`धात्वभ्यासयोरेकादेशे कृत एवाभ्यासलोपयोः कृतयोः कृतद्विर्वचना एत एकाचो न भवन्ति' इति, तन्न युज्यते; अकृतेऽपि धात्वभ्यासयोरेकादेशेऽकृतयोरपि चैत्वाभ्यासलोपयोः कृतद्विर्वचनानामप्येषामेकाच्त्वात्। स्थाने द्विर्वचने हि शब्दान्तरमेवा नेकाजादिश्यत इति स्यादेषां कृतद्विर्वचनानामनेकाच्त्वम्, न तु द्विष्प्रयोगपक्षे। तत्र हि स एव शब्दो द्विरुच्चार्यते। न चासौ शतकृत्वोऽप्युच्चार्यमाम एकाच्त्वं जहाति, किं

पुनर्द्विरुच्यमानः।

यदपि नियमस्य व्यवच्छेद्यचं दर्शयितुं बिभिद्वानित्यादि तत्रोपन्यसिष्यति, तदप्ययुक्तमेव; भिविप्रभृतीनामेव यथोक्तादेव हेतोः कृतद्विर्वचनानामप्येकाच्त्वात्। यदप्याद्ग्रहणमनेकाजर्थमित्यभिधास्यति, तदप्ययुक्तमेव; तत एव हेतोराकारान्तानां कृतद्विर्वचनानामप्यनेकाच्त्वानुपपत्तेः। तस्मात् स्थाने कृतद्विर्वचनपक्षोऽप्यङ्गीकर्त्तव्यः। एवं तर्ह्यन्यथा व्याख्यायते। इह पक्षद्वयं पूर्वोक्तं, सम्भवति। तत्र किं द्विष्प्रयोगो द्विर्वचनमित्येष पक्ष आश्रीयते? उत स्थाने द्विर्वचनपक्षः?--इति प्रश्नावसर इदमाह--`द्विष्प्रयोगश्च द्विर्वचनम्' इति। चकारः स्थाने द्विर्वचनमित्यमुमर्थं द्योतयति। ननु च `षष्ठी स्थानेयोगा' (1.1.49) इति वचनात् स्थाने द्विर्वचनपक्षेमात्र [द्विर्वचनपक्षे नात्र--मुद्रितः पाठः] भवितुं युक्तम्, तत् कथं द्विष्प्रयोगपक्षोऽप्युपपद्यत इत्यत आह--`आवृत्तिसंख्या हि' इत्यादि। यदि शब्दान्तरं तस्य स्थाने विधीयते तदा स्थान्यादेशसम्बन्धे प्रतिस्थाने द्विर्वचनमित्येष पक्षो जायत इत्यक्तम्। यदा त्वावृत्तिसंख्या विधीयते तदेतरः पक्षो भवतीति। एदपि प्रतिपादितं प्राक्। तस्मात् द्विष्प्रयोगपक्षो यदाङ्गीकर्तुमिष्यते, तदावृत्तिसंख्या द्वे इति विधीयते, तेन स एव शब्दो द्विरुच्चार्यते, न तु शब्दान्तरं तस्य स्थाने विदीयते। तस्माद्द्विष्प्रयोगद्विर्वचनपक्षोऽप्यङ्गीकर्त्तव्यः।

अथ कथं स्थाने द्विर्वचनमित्येषोऽपि पक्ष आश्रीयते, यावता जिघांसतीत्यत्र हन्तेर्हकारस्य कुत्वं न प्राप्नोतीत्युक्तम्? नैष दोषः; उच्यते चेदम्--अब्यासाच्च (7.3.55) हन्तेः कुत्वं भवतीति। न च तस्य स्थाने शब्दान्तर एवादेशे कृते हन्तिरस्ति। तत्र वचनसामर्थ्यादादेशैकदेशे हन्तिप्रतिरूपके हन्तिशब्दो विज्ञास्यते।

अन्ये त्वनयोः पक्षयोर्दोषा य आशङ्क्यन्ते ते भाष्य एवोत्क्षिप्य प्रतिक्षिप्ताः। इह त्वतिविस्तरग्रन्थभयान्न लिख्यन्ते।।

2. अजादेर्द्वितीयस्य। (6.1.2)

`प्रथमद्विर्वचनापवादोऽयम्' इति। ननु च `एकाचो द्वे प्रथमस्य' (6.1.1) इत्यनेन प्रथमस्यैकाचो द्विर्वचनं विधीयते, `अजादेर्द्वितीयस्य' (6.1.2) इत्यनेन तु द्वितीयस्य; तत् कथमन्यस्योच्यमानमिदमन्यस्य बाधकं स्यात्? सति खलु सम्भवे बाधकं भवति, अस्ति च सम्भवो यदुभयं स्यात्। स्यादेतत्--घातोरित्येषा षष्ठी, तसया द्वितीयेनैकाचा प्रथमेन च सम्बन्धो नोपपद्यते, अतो नास्त्युभयसम्भव इति? एतच्च नास्ति; अन्यद्धि वाक्यं प्रथमद्विर्वचनस्य विधायकम्, अन्यचच द्वितीयद्विर्वचनस्य। तत्र वाक्यबेदे च सति किमिति सम्बन्धो नोपपद्यते, तस्मात् कृतेऽपि द्वितीयद्विर्वचने प्रथमद्विर्वचनं सम्भवत्येवेत्युक्तं बाधनम्? नैष दोषः; इह द्वीपम्, अन्तरीपमित्यत्र `द्व्यन्तरुपसर्गेभ्योऽप ईत्' (6.3.97) इतीत्त्वम्, `अलोऽन्त्यस्य' (1.1.52) इत्यनैनान्तस्यालः प्राप्तम् `आदेः परस्य' (1.1.54) इत्यनेनादेर्विधीयते, तत्र यथा सत्यपि सम्भवेऽनन्त्यविकारोन्त्यविकारं बाधते, तथा द्वितीयद्विर्वचनं प्रथमद्विर्वचनं बाधिष्यते। यदि तर्हि प्रथमस्यैकाचो द्विर्वचनमनेन बाध्यते, व्यञ्जनस्यापि प्रथमद्विवचनसम्बन्धिनो द्विर्वचनं बाध्येत। तद्यथाभूतस्यैव प्रसङ्गस्तथाभूतस्यैव द्विर्वचननिवृत्तिर्भवति। किम्भूतस्य च प्रथमद्विर्वचनस्य प्रसङ्गः? सव्यञ्जनस्य। तत्र यथा प्रथमस्यैकाचो द्विर्वचनं न भवति, एवमेकाज्व्यपदेशिनो व्यञ्जनस्यापि न स्यात्? नैष दोषः; यदयं `न न्द्राः संयोगादयः' (6.1.3) इति प्रतिषेधं शास्ति, तज्ज्ञापयति--व्यञ्जनस्य द्विर्वचननिवृत्तिर्न भवति। अन्यता हि नदराणां द्विर्वचनप्रतिषेधोऽनर्थकः स्यात्, प्राप्त्यभावात्।

`अटिटिषति; अशिशिषति' इति। अटेरशेश्च सनीटि कृते टिष्शबदः, शिष्शब्दश्च द्विरुच्यते। `अरिरिषति' इति अर्त्तेः सन्निङ्गुणरपरत्वेषु कृतेषु रिष्शब्दो द्विरुच्यते। `स्थानिवद्भावः प्राप्नोति' इति। `सन्यङोः' (6.1.9) इत्यनेन सन्नन्तस्य द्विर्वचनमुच्यते, इट् च सम्भक्तः। तस्मादसौ द्विर्वचनस्य निमित्तमित्यभिप्रायः। स्थानिवद्बावे च सति रेफरहितस्येषो द्विर्वचने कृते सवर्णदीर्घत्वे चारीषतीत्यनिष्टं रूपं स्यात्।

`कार्यी' इति। द्विरुक्तिरेव कार्यम्, तदस्यास्तीति कार्यी। स्यादेतत्--यद्यप्यसौ कार्यी तथापि कार्ये। स्यादेतत्--यद्यप्यसौ कार्यी तथापि कार्यं प्रति निमित्तमेवेत्यादह--`न च' इत्यादि। कथं पुनर्ज्ञायते एतत् कार्यी निमित्तत्वेनाश्रीयते इति? अत आह--`तथा हि' इत्यादि। तथा हीति यस्मादित्यर्थे। इतिकरणः प्रकारे। यस्मात् क्ङिन्निमित्तयोः गुणवृद्ध्योः `क्ङिति च' (1.1.5) इति प्रतिषेधो विधीयमानः शयितेत्येवम्प्रकारविषये न भवति, ततो ज्ञायते--न हि कार्यी निमित्तत्वेनाश्रीयत इति। यदि ह्याश्रीयेत, तदा शीङो ङित्वात् तन्निमित्ताच्च गुणवृद्ध्योः `क्ङिति च' (1.1.5) इति विधीयमानः शयितेत्यत्र गुणप्रतिषेधश्च स्यात्, शायक इत्यत्र वृद्धिप्रतिषेधश्च। ननु च येन विना यन्न भवति तत् तस्य निमित्तम्, यथा--वृष्टेर्मेघः। यथा च प्रत्ययेन विना गुणवृद्धी न भवतस्तथा कार्येणापि; तत् कथं शीङो गुणबुद्धिप्रतिषेधो नेह भवति? इत्यत आह--`न हि कार्यिणः' इत्यादि। अत्राश्रीयत इत्यध्याहर्यम्। सत्यम्, कार्यपि शीङ्निमितम्, तस्य गुणं प्रति वृद्धिं द्रष्टव्यम्। इतिकरणोऽनन्तरोऽस्यप्रतिविधानस्य स्वरूपं दर्शयति। कथं पुनर्ज्ञायते--न हि कार्यी निमित्तत्वेनाश्रीयत इति? `दीधीवेवीटाम्' गुणवृद्ध्योः `क्ङिति च' (1.1.5) इति फार्यो प्रतिषेधः सिद्ध ेवेति तयोर्गुणप्रतिषेधोऽनर्थकः स्यात्।

`अत्र केचिदजादेरिति कर्मधारयात् पञ्चमीमिच्छन्ति' इति। `अच्चासावादिश्चेत्यजादिः, तस्मादजादेः' इति। एवं वर्णयन्तः कर्मधारयात् पञ्चमीमिच्छन्ति। यदि तर्हि कर्मधारयादियं पञ्चमी तेषां द्वितीयग्रहणमनर्थकम्; यस्मात् तृतीयस्य प्राप्तिरेव नास्ति। येषां बहुव्रीहेरियं षष्ठ्यभिमता, तेषामक्रियमाणे द्वितीयग्रहणे तृतीयस्यापि द्विर्वचनं प्राप्तिरेव नास्ति। येषां बहुव्रीहेरियं षष्ठ्यभिमता, तेषामक्रियमाणे द्वितीयग्रहणे तृतीयस्यापि द्विर्वचनं प्राप्नोतीति तन्निवृत्त्यर्थं युक्तं द्वितीयग्रहणम्। येषां च कर्मधारयादियं पञ्चम्यभिमता तेषां द्वितीय ग्रहणमनर्थकम्; `तस्मादित्युत्तरस्य' (1.1.67) इत्यनेनानन्तरस्यैव द्वितीयस्य भविष्यति, न तृतीयस्य, व्यवहितत्वात्? इत्यत आह--तेषाम्' इत्यादि।।

3. न न्द्राः संयोगादयः। (6.1.3)

`तदन्तर्भावात्' इति। अवयवानां समुदायाभ्यन्तरत्वात् तदन्तभविः। `अवयवभूताः' इति। आदिशब्दस्य नियतदेशावयववाचित्वाद्विशिष्टदेशावयवभूता इत्येषोऽर्थो वेदितव्यः। `अन्दिविषति' इति। `उन्दी क्लेदने', (धा.प.1457) सनीट च कृते दिषशब्दस्य द्विर्वचनम्। `अड्डिडिषति' इति। `अद्ड अभियोगे (धा.पा.348) इत्यत्र यः संयोगः स दकारादिः, तस्य ष्टुत्वेन दकारस्य डकारः, ष्टुत्वञ्च द्विर्वचनेऽसिद्धम्, तेन सनीटि कृते विषशब्दो द्विरुच्यते ततः ष्टुत्वम्। `अर्चिचिषति' इति `अर्च पूजायाम्' (धा.पा.204), चिष्शब्दस्य द्विर्वचनम्। `ईचिक्षिषते' इति। `ईक्ष दर्शने' (धा.पा.610) सनीटि च कृते क्षिष्शब्दस्य द्विर्वचनम् `हलादिः शेषः' (7.4.60), `कुहोश्चुः' (7.4.62) इति चुत्वम्। `प्राणिणिषति' इति। `श्वस प्राणने' (धा.पा.1069), `अन च' (धा.पा.1070) प्रपूर्वः। `दिद्रासति' इति। `द्रा कुत्सितायाङ्गतौ' (धा.पा.1054)।

`केचिदजादेः' इत्यादि। तेषां मतेनाजादेरुत्तरे ये नकारादयः संयोगादिभूतास्ते न द्विरुच्यन्त इति शूत्रार्थः। किं पुनस्तदनुवर्तनस्य प्रयोजनम्? इत्यत आह--`तस्य' इत्यादि। दकारस्तु द्विरुच्यत एवेति कर्मधारयपञ्चम्यन्तानुवृत्तौ हि `तस्मादित्युत्तरस्य' (1.1.67) इत्यनन्तराणामेव नकारादीनां द्विर्वचनप्रतिषेधेन भवितव्यम्; निर्दिष्टग्रहणस्यानन्तर्यार्थत्वात्। दकारस्तत्र यद्यपि रेफदकारयोर्यः संयोगस्तदादिभूतः, तथापि नकारेण व्यवहितः। तस्माद्दकारोऽपि द्विरुच्यत एव। `इन्दिद्रीयिषति' इति। इन्द्रशब्दात् क्वचि कृते `क्यचि च' (7.4.33) इतीत्त्वम्, क्यजन्तात् सन्, इट्, `अतो लोपः' (6.4.48) इत्यकारलोपः। `उब्जिजिषति' इति। `उब्ज आर्जवे' (धा.पा.1303)। `यदा बकारोपध उब्जरुपदिश्यते तदायं प्रतिषेधो वक्तव्यः। दकारोपदेशे तु न वक्तव्यः `न न्द्राः' इत्यनेनैव सिद्धत्वात्। `बत्वं तु तदा दकारस्य विधातव्यम्' इति। उब्जित, उब्जिजिषतीति यथा स्यात्। तदपि बतद्वमकुत्वविषये विधातव्यम्; अन्यथाऽभ्युद्गः, समुद्ग इति न सिध्येत्। दकारोपधस्यैव युक्तः पाठः। बत्वमात्रं वक्तव्यम्? तदपि न वक्तवयम्; तत्र `भुजन्युब्जौ पाण्युपतापयोः' (7.3.61) इति निपातनादेव लिङ्गाव् बत्वं लभ्यते। न चाभ्युद्गः, समुद्ग इत्यत्रापि प्रसज्येत, अकृत्वविषयत्वान्निपातनस्य; यत्र कुत्वं नास्ति तत्रैव बत्वं विज्ञायते, न तु कुत्वविषये।

`यकारपरस्य' इत्यादि। यकारः परो यस्मात् तस्य प्रतिषेधो न स्यादित्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्र कैश्चिदेवं व्याख्यायते--बहिरङ्गो रेफः, `गुणोऽर्त्तिसंयोगाद्योः' (7.4.29) `यङि च' (7.4.30) इति गुणोऽङ्गस्य विधीयमानो यङि भवति बहिरङ्गः, तदाश्रितो रेफोऽपि बहिरह्ग एव, ततश्च सोऽन्तरङ्गे प्रतिषेऽसद्धः। तस्मात् तसय द्विर्वचनप्रतिषेधो न भवतीति। यद्येवम्, इन्दिदिषतीति नुमोऽपि प्रतिषेधो न प्राप्नोतीति? नैष दोषः; वक्ष्यति ह्येतत्--नुम्विषावुपदेशिवद्वचनमिति।

नैयायिकास्त्वन्यथा वर्णयन्ति--`न न्द्राः संयोगादयः' (6.1.3) इति। तैः किमुक्तम्? संयोगात् पूर्वे नकारादयो न द्विरुच्यन्ते स चेद्भवति यकारान्तः संयोगः' इति तेनारार्य्यत इत्यत्र संयोगस्य यकारान्तत्वात् प्रतिषेधो न भवतीति । `अरार्य्यते' इति। `यङि च' (7.4.30) इति गुणे रपत्वे च र्यशब्दस्य द्विवचनम्, हलादिशेषः (7.4.60) `दीर्घोऽकितः' (7.4.83) इति दीर्घः। ननु चार्तेरहलादित्वाद्यङा न भवितव्यम्, स हि `धातोरेकाचः' (3.1.22) इत्यादिना हलादेरेव धातोर्विधीयते? इत्याह--`अर्त्तेः' इत्यादि।

`व्यञ्जनस्य' इति। ईर्ष्यतेर्व्यञ्जनं यदेकाच् द्विर्वचनं कर्त्तव्यम्। तच्च व्यञ्जनं यकारः, तस्येटि कृते साच्कस्यैव द्विर्वचनं कर्त्तव्यमम्।

`एकाचः' इति। सनः। स हीटि कृते तृतीय एकाज् भवति। तस्य द्विर्वचने कृते `सन्यतः' (7.4.79) इतीत्त्वम्। पूर्वं पूर्वमिणमाश्रित्य सर्वसकाराणां षत्वम्।

`कण्डूयियिषति' इति। `असूयियिषति' इति। `कण्डूञ्', `असूञ्' इति कण्ड्वादिषु पठ्येते, ततः `कण्ड्वादिभ्यो यक्' (3.1.27)।

`वा नामधातूनाम्' इति। सुब्धातुर्नामधातुरभिधीयते। `अश्वीयियिषति' इति। अश्वशब्दात् क्यजन्तात् सनीटि च कृते यिष्शब्दस्य द्विर्वचनम्।

`आशिश्वीयिषति' इति। श्वीशब्दस्य द्विर्वचनम्, ह्रस्वत्वम्, हलादिशेषः (7.4.60)।

`यथेष्टम्' इति। प्रथमादीनामन्यतरस्य यस्येष्यते तस्य कर्त्तव्यमिति।।

4. पूर्वोऽभ्यासः। (6.1.4)

अभ्यासशब्दोऽयमावृत्तिवचनो लोके प्रसिद्ध एव। सा चावृततिः प्रथमस्य नास्तीत्यभ्यासप्रदेशेषु परस्य ग्रहणे प्राप्ते पूर्वस्य ग्रहणं यथा स्यावित्येवमर्थं तस्याभ्याससंज्ञा विधीयते। पूर्वशब्दोऽवयववचनः, यथा--पूर्वं कायस्य पशोरिति। अवयवाश्चावयविनो भवन्ति, स चेह यद्यपि न निर्दिश्यते, तथापि `द्वे' (6.1.1) इत्युनुवृत्तेस्तद्वाच्यस्यैवार्थस्य पूर्वो विज्ञायत इत्याह--`द्वे इति प्रथमन्तं यदनुवर्त्तते' इत्यादि। ननु च `द्वे' इति प्रथमन्तमनुवर्त्तते, षष्ठ्यन्तेन चेहार्थः, न ह्यटन्यथा पूर्वशब्देन सम्भन्धः शक्यते दर्शयितुमित्यत आह--`तदर्थात्' इत्यादि। अर्थाद्विभक्तिविपरिणामो भवतीति। तदिह षष्ठ्यन्तं जयत इत्यर्थः। अथ पुनरत्रावयवावयविलक्षणा षष्ठी भवति, यथा वृक्षस्य शाखेति? एवमपि यदि `द्वे' इत्यनुवृत्तेर्द्वयोर्यः पूर्वस्तस्याभ्याससंज्ञा विधीयते तदा `सर्वस्य द्वे' (8.1.1) इत्यत्रापि प्रकारणे ये द्वे विहिते तयोर्यः पूर्वस्तस्याप्यभ्याससंज्ञा प्राप्नोतीत्यत आह--`तत्र' इत्यादि'। `पूर्वोऽवयवः' इति। पूर्वशब्दो व्यवस्थावचनोऽप्यस्ति, अतस्तद्व्यवच्छेदार्थमवयवग्रहणम्, पपाचेत्यत्राभ्याससंज्ञायां सत्यां `ह्रस्वः (7.4.59) इत्यभ्यासस्य ह्रस्वत्वम्, हलादिशेषः (7.4.60), प्रकृतिचरां प्रकृतिचरो भवन्तीति चर्त्वम्। `पिपक्षति' इति। `जुहोति' इति पूर्ववद्धकारस्य चुत्वम्, तस्य `अभ्यासे चर्च' (8.4.54) चकारः। `अपिपचत्' इति। पचेर्ण्यन्ताच्च्लेश्चङ्, णिलोपः, `णौ चङ्युपधाया ह्रस्वः' (7.4.1) द्विर्वचनम्, `सन्वल्लघुनि' (7.4.93) इतीत्त्वम्, `दीर्घो लघोः' (7.4.94) इति दीर्घः। सर्वाण्यभ्याससंज्ञायाः प्रयोजनान्येतानि।।

5. उभे अभ्यस्तम्। (6.1.5)

इह उभेग्रहणं संज्ञिनिर्देशार्थं क्रियते। स च संज्ञिनिर्देशः `द्वे' (6.1.1) इत्यनुवृत्तेरन्तरेणाप्युभेग्रहणं प्रकल्प्यत एव, तत् किमर्थं द्वे इत्यनुवर्त्तमान उभेग्रहणं क्रियते? इत्यत आह--`द्वे इत्यनुवर्त्तमाने' इत्यादि। यद्युभेग्रहणं न क्रियेत, तदा प्रत्येकमभ्यस्तसंज्ञा प्रवर्तते। प्रत्येकमपि हि तयोः प्रवर्तमानासौ प्रवृत्तैव भवति। तथा हि द्वावानीयेयातामित्युक्ते प्रत्येकमप्यानयनेन तावानीतौ भवतः। तस्मात् समुदाये संज्ञायाः प्रवृत्तिर्यथा स्यादेकैकस्य मा भूदित्येवमर्थमुभेग्रहणम्। `समुदिते' इति। सहिते समुदाभूते इत्यर्थः। ननु च यत्राभ्यासः श्रूयते तत्रैव यथा स्यात्, यत्र तु न श्रूयते तत्र मा भूत। ईप्सन्ति, ईप्सन्, ऐप्सन्नित्यादौ विषये मा भूदित्येवमर्थमुभेग्रहणं स्यात्? नैतदस्ति; अभ्यासग्रहणं ह्यनुवर्त्तते, तत्रैवमभिसम्बन्धः क्रियते---द्वे अभ्यस्तसंज्ञे भवतः, अभ्यासश्चेदस्तीति। एवञ्च सति विनाप्यभेग्रहणं यत्राभ्यासः श्रूयते, तत्रैव भविष्यति, नान्यत्र। तस्माद्वृत्तिकारोपदर्शितमेवोभेग्रहणस्य प्रयोजनं युक्तम्। `ददति' इति। ददातेर्लट्, झि, शप्, `जुहोत्यादिभ्यः श्लुः' (2.4.75) `श्लौ' (6.1.10) इति द्विर्वचनम्। अत्राब्यस्तसंज्ञायां सत्यां `श्नाभ्यस्तयोरातः' (6.4.112) इत्याकारलोपः, `अदभ्यस्तात्' (7.1.4) इति झेरदादेशः। `दधातु' [`दधतु'--काशिका] इति। लोट्, `एरुः' (3.4.86) `समुदाय उदात्तत्वं यथा स्यात्' इति। उभेग्रहणे ह्यसति प्रत्यकमभ्यस्तसंज्ञा स्यात्। तस्मात् `अभ्यस्तानामादिः' (6.1.189) इत्याद्युदात्तमपि प्रत्येकं स्यात्। अथपि `अनुदात्तं पदमेकवर्जम्' (6.1.158) इति नास्ति यौगपद्यसम्भवः, एवमपि पर्यायेण स्यात्? तस्मात् `अम्यस्तानामादिः' (6.1.189) इत्येतत् कार्यं समुदाये यथा स्यात्, प्रत्येकं पर्यायेण वा मा भूदित्येवमर्थमुभेग्रहणम्। ।

6. जक्षित्यादयः षट्। (6.1.6)

`जक्षित्यादयः' इति। एष निदशो जक्षेः श्तिबन्तस्यादिशब्देन बहुव्रीहावपि कृते भवति, द्वन्द्वेऽपि--यदा जक्षेरनजन्तस्येत्यादिशब्दस्य च द्वन्द्वः क्रियते। वाक्येऽपि यदानयोरनन्तरोक्तयोरुभयोरपि प्रयोगो भवति, तदा तत्र बहुव्रीहौ गृह्यमाणे यदि तद्गुणसंविज्ञानोऽयं बहुव्रीहिराश्रीयेत, तदा वेवीङो ग्रहणं न स्यात्; अथातद्गुणसंविज्ञानोऽयम्, तदा जक्षेर्न स्यादितीमं बहुव्रीहेराश्रयणे दोषं दृष्ट्वेतरयोः पक्षरोरन्यतरमाश्रित्याह--`जक्षित्ययं धातुरित्यादयश्च' इत्यादि अत्रेतिशब्देऽतिक्रान्तप्रत्यवमर्शी। जक्षित्ययं धातुरनन्तरमतिक्रान्त इति स एव तेन प्रत्यवमृश्यते। इति आदिर्येषां त इत्यादयः, जक्षादय इत्यर्थः। ते पुनर्जागृप्रभृतयो वेवीङ्पर्यन्ताः। `सेयं सप्तानां धातूनामभ्यस्तसंज्ञा' इति। जक्षित्येतदुपलक्षितानां जागर्तिप्रभृतीनां षण्णां जक्षितिरित्येतस्य च सप्तमस्य तेभ्यः पृथग्निर्दिष्टस्य।

ननु च दीध्यते, वेव्यत इत्यत्रादादेशः `आत्मनेपदेष्वनतः' (7.1.5) इत्यनेनैव सिद्धः, शेषं चाभ्यस्त कार्यमाकारलोपादिकम् तच्च दीधीवेव्योर्न सम्भवत्येव, तत्राकारलोपस्तावदाकारस्याभावान्न सम्भवति; जुस्भावोऽपि झेरभावात्, नुम्प्रतिषेधोऽपि ङित्वादात्मनेपदित्वाच्छतुः, तत् किमर्थमनयोरभ्यस्तसंज्ञा विधीयते? इत्याह--`दीध्यते वेव्यते' इत्यादि। `दीष्यदिति च शतरि' इत्यादिना प्रयोजनान्तरमपि दर्शयति। आत्मनेपदित्वादनयोर्व्यत्ययेन विना शता न सम्भवतीति व्यत्यग्रहणम्।।

7. तुजादीनां दीर्घोऽभ्यासस्य। (6.1.7)

आदिशब्दोऽयमस्त्येव व्यवस्थायाम्, अस्ति च प्रकारे, तत्र यदि व्यवस्थायां वर्त्तमानो गृह्येत, तदा `तुज पिज हिंसायाम्' (धा.पा.1566,1567) इत्यत आरभ्य ये पठितास्तेषामेव ग्रहणं स्यात्; एवञ्च सौत्राणां गणान्तरपठितानाञ्च दीर्घो न स्यादित्येतदालोच्याह--`तुजादीनाम्' इत्यादि। `प्रकार आदिशब्दः' इति। स च प्रकारोऽनिर्दिष्टत्वान्न ज्ञायत इति पृच्छति--`कश्च प्रकारः' इति। तुजो दीर्घत्वमित्यादिना प्रकारार्थत्वं दर्शयति। `ये तथाभूताः' इति। अनन्तरोक्तप्रकारमापन्ना इत्यर्थः। `दीर्घः साधुर्भवति' इति। एतेन सत एव दीर्घस्य साधुत्वमात्रमनेन क्रियते। न त्वपूर्वो दीर्घ इति दर्शयति। `तूतुजानः' इति। लिट्। एतच्च प्रकारवाचिन आदिशब्दस्य परिग्रहाल्लभ्यते, तस्य कनाच्। `मामहानः' इति। `मह पूजायाम्' (धा.प.730) शेषं पूर्ववत्। `दधान' [उदाहरणमिदं नास्ति--काशिका] इति। `डुधाञ् धारणपोषणयोः' (धा.पा.1092)। `मीमाय' इति। `डुमिञ् प्रक्षेपणे', (धा.पा.1250) लिट् णल्। `दधार' इति। `धृञ् धारणे' (धा.पा.900) `तूनाव' इति। `तु' इति सौत्रो धातुः; `तुरुस्तुशम्यम' (7.3.95) इत्यादिसूत्रे पठितत्वात्।

`दीर्घश्चैषाम्' इत्यादिना यस्य सत एव साधुत्वमनेन क्रियते, स च दीर्घश्छन्दस्येव दृश्यते, न भाषायाम्। तत्रापि च्छन्दसि विषये प्रत्ययविषये कानजादौ, न प्रत्ययमात्रे। `ततोऽन्यत्र न भवति' इति। यथोक्ताद्विषयादन्यत्र न भवतीत्यर्थः। तुजेश्छन्दसि कानचि दृष्टः, ततोऽन्यत्र भाषायां छन्दस्यपि कानजादौ प्रत्ययान्तरे न भवति। यच्चैवं तेनास्यान्यत्राव्यापारः। सत एव दीर्घस्य साधुत्वमात्रमनेन विधीयते। न चान्यत्र दीर्घोऽस्ति यस्यानेन विधीयेत साधुत्वम्। एतच्च प्रकारवाचिन आदिशब्दाल्लभ्यत इति। `तुतोज' इति। भाषायां प्रयोगः। यदि तर्हि च्छन्दसि सत एव दीर्घस्य साधुत्वमनेन विधीयते, `व्यत्ययो बहुलम्' (3.1.85) इत्यनेन सुब्व्यत्ययस्य विहितत्वादपार्थकमेतत्? नापार्थकम्; तस्यैव प्रपञ्चार्थत्वात्।।

8. लिटि धातोरनभ्यासस्य। (6.1.8)

`एकाचो द्वे प्रथमस्य' (6.1.1) इति, `अजादेर्द्वितीयस्य' (6.1.2) इति चानुवर्त्तते। धातोरित्यवयवयोगा षष्ठी। सामानादिकरण्ये हि प्रथमस्य द्वितीयस्येति च सम्बन्धो नोपपद्यते। `अनभ्यासस्य' इति च प्रतिषेधाच्च। सामानाधिकरण्ये हि प्रतिषधोऽनर्थकः स्यात्, न ह्यभ्यासवानेकाज धातुः सम्भवति। `यथायोगम्'

इति। हलादेः प्रथमस्यैकाचोऽवयवस्य, अजादेस्तु द्वितीयस्येत्येष यथायोगार्थः। `प्रोर्णनाव' इति। `ऊर्णुञ् आच्छादने' (धा.पा.1039) `अजादेर्द्वितीयस्य' (6.1.2) इति नुशब्दस्य द्विर्वचनम्। रेफस्य तु `न न्द्राः' (6.1.3) इति प्रतिषेधान्न भवति। ननु चोर्णोतेरिजादित्वात् `इजादेश्च गुरुमतोऽनृच्छः' (3.1.36) इत्यामि कृते `आमः' (2.4.81) इति लेर्लुक्, `कृञ्चानुप्रयुज्यते लिटि' (3.1.40) इति कृञो लिट्परस्यानुप्रयोगः, ततश्च प्रोर्णुवाञ्चकारेति भविष्यति, तत्कथं प्रोर्णनावेति? अत आह--`वाच्य ऊर्णोः' इत्यादि। नुवद्भावेन यथा नौतेराम् न भवति, तथोर्णोतेरपीति दर्शयति।
`विश्रृण्विरे' इति। `श्रु श्रवणे' (धा.पा.942) `लिटस्तझयोरेशिरैच् (3.4.81) इति इरेच्। `छन्दस्युभयथा' (3.4.117) इति लिटः सार्वधातुकत्वम्, ततः `श्रुवः शृ च' (3.1.74) इति श्नुः श्रृभावश्च। `हुश्नुवोः सार्वधातुके' (6.4.87) इति यणादेशः। `सुन्विरे' इति। `षुञ् अभिषवे' (धा.पा.1247)। धातुग्रहणादिह विकरणस्य द्विर्वचनं न भवति। यतस्तत्र धातुस्तस्य विकरणेन व्यवहितत्वान्न भवतीत्येके। छन्दसत्वादित्यपरे, `सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पु.प.पा.35) इति। एतच्च `व्यवहितत्वान्नभवतीत्येके। छन्दसत्वादित्यपरे, `सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पु.प.पा.35) इति। एतच्च `व्यत्ययो बहुलम्' (3.1.85) इत्यस्माद्बहुलग्रहणाल्लभ्यते। एवञ्च कृत्वा `द्विर्वचनप्रकरणे छन्दसि वा' (वा. 656) इत्येतन्न कर्त्तव्यं भवति। `नोनाव' इति। `णु स्तोतौ' (धा.पा.1035), यङ्, द्विर्वचनम्, `गुणो यङ्लुकोः (7.4.82) इति गुणः, `नोनूय' इति गुणः, `नोनूय' इति स्थिते `यङोऽचि च' (2.4.74) इति यङो लुक्, लिट्। `अमन्त्रे' (3.1.35) इति निषेधाद्न भवति। `सस्मिमिक्षुः' इति। `मिह सेचने' (धा.पा.992), अतः सम्पूर्वात् सन् `हो ढः' (8.2.31) इति ढत्वम्, `षढोः कः सि' (8.2.41) इति कत्वम्, `एकाचः' (7.2.10) इत्यादिनेट्प्रतिषेधः `हलन्ताच्च' (1.2.10) इति कित्वाद्गुणः, द्विर्वचनम्, षत्वम्; सम्मिमिक्ष इति स्थिते लिट्, `अमन्त्रे' (3.1.35) इति प्रतिषेधादाम्, न भवति। झि, तस्य उस्, अतो लोपः' (6.4.48)। `जागार' इति। लिट्। `दाति' इति। श्लुः। वेति वचनात् पक्षे जजागार, ददातीत्यपि भवति।।

9. सन्योरिति सप्तम्यन्तमिदं वा स्यात्? षष्ठ्यन्तं वा? तत्र यदि सप्तम्यन्तं स्यात् तदायमर्थः स्यात्--सन्यङोः परत इति, ततश्चेटः सन्भक्तत्वात् सन्ग्रहणेनेन ग्रहणात्, सनश्चेह द्विर्वचननिमित्तत्वान्निमित्तस्य च कार्यिणोऽयोगादिटो द्विर्वचनं न स्यात्, ततश्चाटिटिषतीत्यादि न सिद्ध्येत्। षष्ठ्यन्ते त्वस्मिन् प्रत्ययग्रहणपरिभाषया (भो.पसू.7) तदन्त उपस्थापिते सत्ययमर्थो जायते--सनन्तस्य यङन्तस्य च यः प्रथम एकाज् द्वितीयो वा तेनेटो द्विर्वचनं भवतीति। तथा चाटिटिषतीत्यादि सिध्यतीत्यतदालोच्याऽऽह--`सन्यङोरिति षष्ठ्यन्तमेतत्' इति। अत्र च ज्ञापको योगविबाग इति। यदि हि `सन्यङोः' इति सप्तम्यन्तं स्यात् `श्लुसन्यङः' इत्येकमेव योगं कुर्यात्। ननु चासत्यपि प्रयोजने ज्ञापकमस्ति, अस्ति चेह योगविभागस्य प्रयोजनम्, किं तत्? सामर्थ्याद्यथासंख्यं यथा स्यात्--सनि प्रथमस्य, यङि द्वितीयस्येति? नैतदस्ति; यदि ह्यत्र यथासंख्यमभिप्रेतं स्यात् तदा `नीग्वञ्चु' (7.4.84) इत्यादिना वञ्चप्रभृतीनामभ्यासस्य यङ्लुको नीगागमविधानं नोपपद्यते। यथासंख्ये हि सति यद्येषां द्विर्वचनं नास्तीति नीगागमं न विदध्यात्। तस्माद्योगविभागात् षष्ठ्यन्तमेतदित्यवसीयते।
`अटाट्यते' इति। यङ्विधौ `सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनामुपसंख्यानम्' (वा.198) ति यङ्। `र्प्रोर्णोनूयते' इति। `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः। `जुगुप्सिषते' इति। गुपेः `गुप्तिज्किद्भ्यः सन्' (3.1.5) ति सन् तदन्तात् `धातोः कर्मणः समानकर्तृकात्' (3.1.7) इत्यादिनेच्छायां पुनः सन्। `लोलूयिषते' इति। यङन्तात् सन्।।

10. श्लौ। (6.1.10)
`श्लौ परतः' इति। ननु च प्रत्ययादर्शननं श्लुः, तच्चाभावरूपम्, न चाभावे पौर्वापर्यमस्ति, तदुयुक्तमुक्तम् श्लौ परत इति? स्थानिनः परत्त्वात्त्स्यापि तद्द्वारेण पौर्वापर्यमौपचारिकं गृहीत्वैव युक्तमुक्तमित्यदोषः।।

11. चङि। (6.1.11)
`अपीपचत्' इत्यादि। पचादिभ्यो ण्यन्तेभ्यो लुङ्, अडागमः, च्लिः, `णिश्रि' (3.1.48) इत्यादिना च्लेश्चङ्। अत्रेदानीं द्विर्वचनं प्राप्नोति णिलोपश्च; द्वयोरपि कृताकृतप्रसङ्गित्वान्नित्यत्वम्, ततश्चोभयोस्तुल्यबलत्वात् परत्वाण्णिलोपः। `आटिटत्' इति। अत्रापि णिलोपे कृते णिलोपस्य स्थानिवत्वादद्विर्वचनं भवत्येव। स्थानिवद्भावस्तु `द्विर्वचनेऽचि' (1.1.59) इत्यनेन।
णिलोपोऽपि नित्यः, अकृतेऽपि द्विर्वचने तेन भवितव्यम्, कृतेऽपि। न च शब्दान्तरप्राप्तिः, द्विष्प्रयोगो द्विर्वचनं भवतीति कृत्वा। स्थाने द्विर्वचनं त्वत्र न स्वीक्रियते; लक्ष्यानुरोधात्। ततश्चोभयोस्तुल्यबलयोः परत्वाणिणलोपः। तत्र कृते द्विर्वचनं प्राप्नोत्युपधाह्रस्वश्च; तयोरपि कृताकृतप्रसङ्गित्वान्नित्यत्वम्। द्विर्वचनमपि ह्यकृते ह्रस्वत्वे प्राप्नोति, कृतेऽपि। न च शब्दान्तरप्राप्तिः; `एकदेशविकृतमनन्यवद्भवति' (व्या.प.16) इति वचनात्। ह्रस्वत्वमपि कृते द्विर्वचने प्राप्नोत्यकृतेऽपि। न च शब्दान्तरप्राप्तिः, स एव शब्दो द्विरुच्यत इति कृत्वा। स्थाने द्विर्वचनं त्वत्र नाश्रीयते; लक्ष्यानुरोधात्। तत्रोभयोस्तुल्यबलयोः परत्वाद् ह्रस्वत्वम्, ततो द्विर्वचनेन `सन्वल्लघुनि' (7.4.93) इति सन्वद्भावादित्वम्, `दीर्घो लघोः' (7.4.94) इति दीर्घः--इत्येतानि कार्य्याणि कर्त्तव्यानि। अत एवाह वृत्तौ--`पचादीनाम्' इत्यादि। किं पुनः कारणं तथा शास्त्रप्रवृत्तिः क्रियते, यथैषां कार्याणामयं प्रवृत्तिक्रमो भवति? इत्याह--`तथा च' इत्यादि। `ह्रस्वस्य स्थानिवद्भावान्न प्रतिषिध्यते' इति। तस्याभावादिति भावः। हेतौ चेयं पञ्चमी। यथा--`तदशिष्यं संज्ञाप्रमाणत्वात्' (1.2.53) इति। अत्र हि

`सन्वल्लधुनि' (7.4.93) इत्यादिना लघुनि धात्वक्षरे परे सन्दद्भावो विधीयमानो ह्रस्वस्य स्थानिवद्भावाद्धेतोः प्रतिषिष्यते, तस्मिन् सति लघुता निवर्त्तत इति कृत्वा। स चास्मिन् क्रमे सति स्थानिवद्भावो न सम्भवतति सन्वद्भावो न प्रतिषिध्यते; प्रतिबन्धहेतोरभावात्।

कथं पुनरस्मिन् क्रमे सति कार्याणां स्थानिवद्भावो न सम्भवतीत्याह--`यो ह्यनादिष्टात्' इत्यादि। `अचः परस्मिन् पूर्वविधौ" (1.1.57) इत्यत्र यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावो भवतीत्येष सूत्रार्थो व्यवस्थितः। न चास्मिन् क्रमे सत्यत्राभ्यासोऽनादिष्टदचः पूर्वो भवति, किं तर्हि? आदिष्टादेव। तेन तस्य विधौ कर्त्तव्ये ह्रस्वस्य स्थानिवद्भावो न भवतीति लघुत्वं न निवर्त्तते। ततश्च `सन्वत्' (7.4.93) इत्यादिना लघुनिमित्तकः सन्वद्भावो विधीयमानो न व्याहन्यते। यदि पुनर्द्विर्वचनं कृत्वा ह्रस्वादिकार्यं विधीयते ततोऽनादिष्टादचः पूर्वोऽभ्यासः स्यात्, ततश्च तस्य विधौ कर्त्तव्ये ह्रस्वस्य स्थानिवद्भावः स्यादेव । एवं `दीर्घञ्च' (1.4.12) इति लब्धस्वभावया गुरुसंज्ञया लघुसंज्ञायां निस्तायां सन्वद्भावोऽयन्त्र सावकाश इह न स्यात्। कः पुनस्तस्यावकाशः? अशीशमदित्यादि। अत्र हि णौ परभूते प्रागेव `मितां ह्रस्वः' (6.4.92) विधीयते।

यदि तर्ह्ययं कार्यक्रमः, आटिटदित्यत्र णिलापे कृते द्वितीयस्यैकाचष्टिशब्दस्य द्विर्वचनं न प्राप्नोति; तदभावात्? इत्यत आह--`आटिटदित्यत्र द्विर्वचनेऽचि' इत्यादि। अथ किमर्थमेतानि त्रीणि सूत्राणि पृथक् क्रियन्ते--`लिटि धातोरनभ्यासस्य', `श्लौ', `चङि' इति, न `लिङ्श्लुचङ्क्षु' इत्येक एव योगः क्रियताम्; तत्रायमप्यर्थः--पुनः पुनर्विभक्तिर्नोच्चार यितव्या, लिटि श्लौ च द्विर्वचनम्? तदनित्यमिति ज्ञापनार्थं पृथग्योकरणम्। तेन `यो जागार तमृचः कामयन्ते' `दाति प्रियाणि' `धाति प्रियाणि' इत्यत्र न भवति द्विर्वचनम्, ततश्च `द्विर्वचनप्रकरणे छन्दसि वा' (वा.656) इत्येतन्न कर्त्तव्यं भवति।।

12. दाश्वान् साह्वान् मीढ्वांश्च। (6.1.12)

`अविशेषेण निपात्यन्ते' इति। विशेषानुपादानात्। `अनिट्त्वं च' इति। `वस्वेकाजाद्घसाम्' (7.2.67) इतीट् प्राप्नोति, अतस्तदभावो निपात्यते। ननु च कृतद्विर्वचनानामेकाचामिङ् विधास्यते, अयंचाकृतद्विर्वचनमेकाज् भवति; अकृतद्विर्वचनत्वात्, तदयुक्तमनिट्त्वनिपातनम्? नैतदस्ति; लिटि हि श्रूयमाणैकाजुपलक्षणार्थं तत्र कृतद्विर्वचनग्रहणं कृतम्। अस्ति चात्र लिटि श्रूयमाणैकाच्त्वमिति कात्रायुक्तता? `परस्मैपदम्' इति। सहेरात्मनेपदित्वात् परस्मैपदं न प्राप्नोतीत्यतस्तन्निपात्यते।

किं पुनः समार्थ्यमित्याह--`हलादिशेषः' इत्यादि। यदि हलादिशेषः स्यात्, एवञ्च सत्यामाकारादेशमेव कुर्यात्, न हि हलादिशेषे सत्यागमस्यादेशस्य वा विशोषोऽस्ति।

णिलुक्चेति। `णेरनिटि' (6.4.51) इति णिलोपे सिद्धे लुग्वचनं प्रत्ययलक्षणेनोपधावृद्धिर्माभूदित्येवमर्थम्। लोपे हि सति प्रत्यलक्षमेनोपधावृद्धिः स्यात्, लुकि तु `न लुयताङ्गस्य' (1.1.63) इति प्रतिषेधान्न भवति।।

13. ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे। (6.1.13)

सम्प्रसारणमिति यण्स्थानिकस्येक एषा संज्ञा विहिता, वाक्यार्थस्य च। `इग्यणः' (1.1.45) इति योऽयं वाक्यार्थः स्थान्यादेशसम्बन्धलक्षणस्तस्य तत्र चेदमुक्तमनुवादे वर्ण उपतिष्ठते, विधौ तु वाक्यार्थ इति; विधिश्चायम्, अतो वाक्यार्थस्यैवोपस्थानमित्याह--`यणः स्थाने' इत्यादि। `ततश्चापि विहिते' इति। `यङश्चाप्' (4.1.74) इत्येनेन। `इभ्यापुत्रः' इति। इभमर्ईतीति `दण्डादिभ्यो यः' (5.1.66)। `क्षत्रियापुत्रः' इति। क्षतत्रस्यापत्यमिति `क्षत्रात् धः' (4.1.138) इति धः।

`ष्यङः' इति प्रत्ययग्रहणमिदम्, तत्र प्रत्यग्रहणपरिभाषाया (पु.प.वृ.44) अपस्थानाद् यस्मात् स विहितस्तदादेस्तदन्तस्येति तदादितदन्तग्रहणमिहैव स्यात्--कारीषगन्धीपुत्र इति, इह तु न स्यात्--परमकारोषगन्धीपुत्र इति; कारीषगन्धशब्दाद्धि ष्यङ् विहितः, न परमकारीषगन्धशब्दात्? अत इदं द्वेष्यमपाकर्त्तुमाह--`ष्यङिति स्त्रीप्रत्ययग्रहणम्' इति `स्त्रियाम्' (4.1.3) इत्यधिकृत्य विहितत्वात्। स्त्रीत्वं स्थानिवद्बावेन च प्रत्ययत्वं ष्यङः, न हि तस्यान्यथा स्त्रीप्रत्ययत्वमुपपद्यते; आदेशपक्षस्य च तत्राश्रितत्वात्। यदि स्त्रीप्रत्ययग्रहणमेतत्; ततश्च किमिति? तदादिनियमो न भवति; यतोऽधिकस्याप्यत्र ग्रहणं स्यात्, अतिप्रसङ्गो वा। असति हि नियमे यथेह भवति--परमकारीषगन्धीपुत्र इति, तथेहापि स्यात्--अतिकारीषगन्ध्यापुत्र इति, अत आह--`नस्त्रीप्रत्यये च' इत्यादि। प्रत्यग्रहणपरिभाषाया `न स्त्रीप्रत्यये चानुपसर्जने' (पु.प.वृ.45) इत्ययमपवादः कृतः। तेन यत्रानुपसर्जनः स्त्रीप्रत्ययस्तत्रैषा प्रत्ययग्रहणपरिभाषां न प्रवर्त्तत इति तदादिनियमो नास्ति, तेन परमकारीषन्धीपुत्र इत्यत्र भवत्येव। अत्र हि परमाचासौ कारीषगन्ध्या चेति `सन्महत्' (2.1.61) इत्यादिना समासः, स्त्रीप्रत्ययस्य प्राधान्यम्, `स्त्रियाः पुंवत्' (6.3.34) इत्यादिना पुंवद्भावः। यत्र तूपसर्जनं स्त्रीप्रत्ययस्तत्रानुपर्जन इति वचनादुपतिष्ठत एवैषा परिभावा। तेन भवत्येवात्र तदादिनियमः। तेनेह न भवति--अतिकारीषन्ध्यापुत्र इति। अत्र हि कारीषगन्ध्यामतिक्रान्त इति प्रादिसमासः। अत्र योसावतिक्रान्तः स प्रधानम्, कारिषगन्ध्या तूपसर्जनम्। अत एव `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति ह्रस्वो भवति। पुत्रपत्योः सम्प्रससारणे तदादावतिप्रसङ्गः। इहापि प्राप्नोति--कारीषगन्ध्यापुत्रकुलमिति। तथा हि--पुत्रपत्योरिति सप्तमी कार्यिण आनन्तर्यमाचष्टे, ततश्च शुद्धयोस्तदादौ चाविशिष्टम्। अथापि कथञ्चित् तदादौ न स्यात्, एवमपि `येन विधिस्तदन्तस्य' (1.1.72) इति तदन्तेऽतिप्रसङ्ग इहापि प्राप्नोति--करीषगन्ध्या परमपुत्र इति।

विधिविधानविधिभाजां त्रयाणां सन्निधाने तदन्तर्विधिर्भवति। ते चेह सन्ति--विधिः सम्प्रसारणम्, विधिभाक् ष्यङ्, विधानं पतिपुत्रशब्दौ। इह च

तत्पुरुषेमाव्यभिचारात् सन्निधापितं यदुत्तरपदं तत् पुत्रपतिशब्दाभ्यां विशेष्यते, विशेषणेन च तदन्तर्विधिर्भवतीति पुत्रशब्दान्ते पतिशब्दान्ते चोत्तरपदे सम्प्रसारणं भवतीति कस्यचित् भ्रान्तिः स्यात्, अस्तां निराकर्त्तुमाह--`पुत्रपत्योः' इत्यादि। एवं मन्यते--तत्पुरुषोऽत्र पुत्रपत्योः ष्यङश्चाधिकरणभूतो निर्दिश्यमानस्तत्पुरुषावयवत्वं पुत्रपत्योः ख्यापयति, तद्यथा--वृक्षे शाखेति। वृक्षः शाखाया अधिकरणत्वेन निर्दिश्यमानः शाखायाः वृक्षावयवत्वं बोधयति; तत्र प्रत्यासत्तेः। यत्र तत्पुरुषे ष्यङ् कार्यभागवयवः स्थितः, तस्यैव तत्पुरुषस्य यावव्ययवौ पुत्रपती तयोरेव ग्रहणम्, न तु पुत्रपत्यादावुत्तरपदे यौ पुत्रपतिशब्दौ तौ तस्यैव ष्यङः पूर्वपदस्य तत्परुरुषस्यावयवौ। अति तु तत्पुरुषान्तरस्यापि पुत्रकुलशब्दस्य पतिकुलशब्तदस्य च। तस्मात् तदादौ तावन्न भवत्यतिप्रसंगः। तदन्तेऽपि न भवत्येव; यस्मादिह पुत्रपतिग्रहणं यच्च ततपुरुषेण सन्धापितमुत्तरपदं तयोर्विशेषणविशेष्यभावं प्रति कामचारः। तत्र यदीहोत्तरपदं पुत्रपतिशब्दाभ्यां विशिष्येत तदा स्यात् तदन्तविधिः, विशेषणेन तदन्तविधिर्भवतीति कृत्वा। न चेह ताभ्यां तद्विशिष्यते, अपि तु तावेव तेन; ततश्च तदन्तरविधेरभावात् केवलयोरेवेदं विशेषणं भवतीति कुतस्तदन्तोऽतिप्रसङ्ग? ननु च यद्युत्तरपदेन पुत्रपती विशिष्येते तेन तयोस्तदन्तता विज्ञायते, ततश्चोत्तरपदपदान्तयोरेव ग्रहणं, न केवलयोः, एवञ्च तदादावतिप्रसङ्गः? नैतदस्ति; न हि पुत्रपतिशब्दावुत्तरपदान्तौ सम्भवतः। यस्मादयमन्तशब्दोऽवयववचनः। न च पुत्रपतिशब्दयोरहुत्तरपदमवयवः। किं तर्हि? समासस्य, न च तौ समासौ। तस्माननैवं विज्ञायते---उत्तरपदान्तयोःस पुत्रपतिशब्दयोरिति, किं तर्हि? पुत्रपत्योरेवोत्तरपदयोः केवलयोरिति।

`येन विधिस्तदन्तस्य' (1.1.72) इति तदन्तविधिनाऽत्र ष्यङन्तस्य सम्प्रसारणं विज्ञायते, ततश्च वाराहीपुत्र इत्यत्र वकारसयापि सभ्प्रसारणं प्राप्नोतीत्यत आह--`ष्यङ्न्ते च' इत्यादि। तत्रैव कारणमाह--`निर्दिश्यमानस्य' इत्यादि। सम्प्रसारणगरहणमुत्तरार्थम्। अति हिकारग्रहणेनापि सिध्यत्येव। तां चोत्तरार्थतां तत्रैव दर्शयिष्यामः। तामेवोत्तरार्थतां सूचयन्नाह--`सम्प्रसारणम्' इत्यादि।।

14. बन्धुनि बहुव्रीहौ। (6.1.14)

`बन्धुनीति नपुंसकनिर्देशः' इत्यादि। बन्धुनीति शब्दरूपापेक्षया नपुंसकलिङ्गन निर्देशः कृत इत्यर्थः। किं पुनः कारणमेवं व्याख्यायते? इत्याह--`पुलिङ्गाभिधेयोऽयम्' इत्यादि। ननु बन्धाविति पुलिङ्गेनैव निर्देशः कस्मान्न कृतः/ पर्यायेषु मा भूत्। एवं हि क्रियमाणेऽर्थप्रधानोऽयं निर्देश इत्यादिः स्यात्, ततश्च पर्यायेष्वपि प्रसज्येत। अर्थप्रधाने निर्देशे स्वरूपपरिभाषा नोपतिष्ठत इत्युक्तम्।

`मातच्' इत्यादि। ननु च मातजिति शब्दरूपं नास्त्येव, न ह्यस्य स्वतन्त्रस्य क्वचित् प्रयोगो लभ्यते, कथं तत्र सम्प्रसारणं कर्त्तं शक्यम्? इत्यत आह `अस्मादेव' इत्यादि। `तत्र' इत्यादि। यदि च `बहुव्रीहौ प्रकृत्या पूर्वपदम्' (6.2.1) इति बहुव्रीहिस्वरः स्यात्, चित्करणमनर्थकं स्यात्। तस्मान्मा भूत् तस्यानर्थक्यमिति चित्कारणसामर्थ्याम् बहुव्रीहिस्वर' `चितः' (6.1.163) इत्यन्तोदात्तत्वं विधीयमानं बाधते।

ननु च मातृशब्दो बहुव्रीहावुत्तरपदं न सम्भवत्येव, `नद्युतश्च' (5.4.153) इति नित्यं कपा भवितव्यम्, तत् कथं तत्रोत्तरपदे बहुव्रीहौ ष्यङः सम्प्रसारणमुपपद्यते? इत्याह--`मातृमातृकयोश्च' इत्यादि। यदि च नित्यं कप् स्यात् मातृमातृकयोर्भेदेनोपादानं न कुर्यात्, कृतञ्च। तस्माद्भेदेनोपादानात् कब् विकल्पेन क्रियते, न केवलं मातजादेश इत्यपिशब्दस्यार्थः।।

15. वचिस्वपियजादीनां किति। (6.1.15)

आदिशब्दोऽयं यजिनैव सम्बध्य इति, न वच्यादिभिः प्रत्येकम्। यदि हि प्रत्येकमभिसम्बन्धोऽभिमतः स्यात् `वच भाषणे' (धा.पा.1063) इत्यधीत्य `ञिष्वप् शये' (धा.पा.1068) इत्यधीयताम्, तत्र वच्यादीनामित्येवं स्वपेरपि सिध्यतीति पृथगुपादानं न कर्त्तव्यं जायते। नन्वेवम्, `रुदश्च पञ्चभ्यः' (7.3.98) इत्यत्र स्वपेर्ग्रहणं च स्यात्? नैष दोषः; शक्यते हि रुदादीनामादौ स्वपिमधीत्य `स्वपश्च पञ्चभ्यः' इत्येवं सूत्रं प्रणेतुम्। तस्माद्युक्तमुक्तम्---यजिनैव सम्बध्यत इति। वचेः स्वपिना साहचर्य्याद्धातुनिर्देशार्थ इकारः, न विशेषणार्थः। तेन च ब्रञादेशस्यैव ग्रहणं भवतीत्याह--`वच परिभाषणे, ब्रुवो वचिरिति च' इति। `उक्तः' इति। `सम्प्रसारणाच्च' (6.1.108) इति परपर्वत्वम्। `इष्टः' इति। व्रश्चादिना (8.2.36) षत्वम्, ततः ष्टुत्वम्। `ऊढः' इति। `हो ढः' (8.2.31) इति ढत्वम्, `ष्टुना ष्टुः' (8.4.41) इति ष्टुत्वम्, `ढो ढे लोपः' (8.3.13) इति ढकारलोपः, `ढ्रलोपे पूर्वस्य दीर्घोऽणः' (6.3.111) इति दीर्घत्वम्। `उषितम्' इति। `शासिवसिघसीनाञ्च' (8.3.60) इति षत्वम्। `संवीतः आहूतः, शूनः' इति। `हलः' (6.4.2) इती दीर्घः। `शूनः' इत्यत्र `ओदितश्च' (8.2.45) निष्ठानत्वम्।

अथेह कस्मान्न भवति--वाचमिच्छति वाचा तरतीति ठक् वाच्यति वाचिक इति? यद्यपि वचेः `क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसप्रसारणञ्च' (वा.288) इति वा दीर्घः कृतः, तथापि `एकदेशविकृतमनन्यवद्भवति' इत्यस्ति प्राप्तिरित्याह--`धातोः' इत्यादि। यत्र धातुः सामान्यवाचिना धातुशब्देन नोपादीयते, अपि तु स्वशब्देनैव, तत्र तत्प्रत्यये दातोरित्येवं यो विहितः प्रत्ययस्तत्रैव कार्य विज्ञायते। एतच्च भ्रौणहत्येति निपातनं कुर्वन् ज्ञापयति--तद्धितत्वार्थ निपातनम्। यदि च धातोः स्वरूपग्रहणे तत्प्रत्यय एव कार्यं न विज्ञायेत, तत्वनिपातनमनर्थकं स्यात्। `हनस्तोऽचिण्णलोः' (7.3.32) इत्यनेनैव तत्वस्य सिद्धत्वात्। `वाच्यति वाचिकः' इत्यत्र यद्यपि `विवबन्ता धातुत्वं न जहति' (व्या.प.132) इति, तथापि धातोरित्येवं नासौ प्रत्ययो विहितः। तथा ह्येकत्र सुप इत्येवं प्रत्ययो विहितः--`सुप आत्मनः क्यच्' (3.1.8) इति, इतरत्र च `प्रातिपदिकात्' इत्येवं ङ्याप्प्रातिपदिकाधिकारात् (4.1.1.)। तस्मादिह वचेः स्वरूपग्रहणात् तत्प्रत्यय एव कार्यसंविज्ञानं न भवति।।

16. ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च। (6.1.16)

`गृहीतम्' इति। `ग्रहोऽलिटि' (7.2.37) इति दीर्घः। `जरीगृह्यते' इति। यङि सम्प्रसारणं द्विर्वचनम्। `रीगृदुपधस्य' (7.4.90) इति रीगागमः। वयिरयमस्त्येवात्मनेपदी--`अय वय गतौ (धा.पा.474,475) अस्ति च परस्मैपदी--`वेञो वयिः' (2.4.42) इति; तत्र ग्रह्यादिभिरनात्मनेपदिभिः साहचर्यादनात्मनेपदी गृह्यते? इत्याह--`वयिर्लिटि' इत्यादि। तस्माच्च परस्य लिटः `असंयोगाल्लिट् कित्' (1.2.5) इति कित्त्वेन भवितव्यम्? इत्यत आह--`तस्य' इत्यादि। `यद्येवम्' इति। यदि वेञादेशस्य वयेर्ग्रहणमित्यर्थः. `यजादिषु वेञ् पठ्यते' इति। ततश्च पूर्वसूत्रेणैव तस्य स्थानिवद्भावात् सम्प्रसारणं सिद्धमित्यभिप्रायः। `नैवं शक्यम्' इति। विज्ञातुमिति शेषः। नानयोपपत्त्या वयिग्रहणमनर्थकं शक्यं विज्ञातुमित्यर्थः। किं कारणम्? इत्याह--`लिटि तस्य' इत्यादि। स्यादेतत्--विधिप्रतिषेधयोर्विरोधादेकत्र विधिरेव भविष्यति, न प्रतिषेध इति? अत आह--`अत्र यतैव' इत्यादि। स्यादेतत्--विधिप्रतिषेधयोर्विरोधादेकत्र विधिरेव भविष्यति, न प्रतिषेध इति? अत आह--`अत्र यथैव' इत्यादि। यदि विरोधादेकत्रासम्भवः, पर्यायोऽस्तु, न तु द्वयोरन्यत्र चरितार्थत्वादेकेनैव भवितव्यम्। नापरेणेत्येषोऽर्थो लभ्यत इति भवाः। `नैष दोषः' इति। कथं नैष दोषः? इत्यत आह--`लिटि' इत्यादि। `लिटि वयो यः' इति यकारस्य सम्प्रसारणप्रतिषेधो लिङ्गम्--विधो वेञोग्रहणेन वयिग्रहणं भवतीत्यस्यार्थस्य। असति विधौ ग्रहणे प्राप्तेरसम्भवात् प्रतिषेधोऽनर्थकः स्यात्। वेञ इत्यत्र प्रतिषेधे वयेर्ग्रहणं न भवतीति अत्राप्येतदेव प्रतिषेधवचनं लिङ्गम्। सति हि वेञ्ग्रहणे वेञ इत्यनेनैव प्रतिषेधस्य सिद्धत्त्वात्, पनः `लिटि वयो यः' (6.1.38) इति। अनन्तरोक्तमर्थमभ्यनुजानाति। यदि सत्यमेतत्, तर्हि किमर्थं वयिग्रहणम्? इत्याह--`एष एव' इत्यादि। तेन स्पष्टीकरणार्थं वयिग्रहणमित्याचष्टे। `विध्यति' इति। दिवादित्वाच्छ्यन्। `उष्टः' इति। तसन्तमेतत्, अदादित्वाच्छपो लुक् व्रश्चादिसूत्रेण (8.2.36) षत्वम्, ष्टुत्वम्। `विचति' इति। तुदादित्वाच्छः।

वृक्ण इति पूर्ववन्नत्वम्, `स्कोः' (8.2.29) इति सलोपः। `झलादिर्निष्ठा न भवति' इति। तेनात्र षत्वं न भवतीति भावः। झलाचौ हि तद्विधीयते; `झलो झलि' (8.2.26) इत्यतो झल्ग्रहणानुवृत्तेः। `कृत्वे तु कर्त्तव्ये तदसिद्धमेव' इति। न हि यथा षत्वादौ निष्ठादेशस्य सिद्धत्वमुच्यते, तथा कुत्वेऽपि, तेन तत् प्रवर्तत एव। `वृश्चति' इति। पूर्ववच्छः। `वरीवृश्च्यते' इति। `रीगृत्वत इति वक्तव्यम्' (वा.880) इति रीगागमः। `पृष्टः' इति। पूर्ववत् षत्वम्। `यजयाच' (3.3.90) इत्यादिना नङि विहिते प्रश्न इत्यत्र सम्प्रसारणं कस्मान्न भवति? इत्यत आह--`नङि' इत्यादि। `भृष्टः' इति। पूर्ववत् षत्वम्। `भृज्जति' इति। पूर्ववच्छः। `बरीभृज्यते' इति। पूर्ववद् रीक्। `सकालस्य' इत्यादि। ननु स्खोः संयोगाद्योरन्ते च' (8.2.29) इति तस्य लोपेन भवितव्यम्? नैतदस्ति; झलि पदान्ते च स उच्यत इति।।

17. लिट्यभ्यासस्योभयेषाम्। (6.1.17)

`उवयिथ' इति। क्रादिनियमादिट् प्राप्तः `उपदेशेऽत्वतः' (7.2.62) इति प्रतिषिद्धः `ऋतो भारद्वाजस्य' (7.2.63) इति नियमात् पुनर्भवति। `ग्रहेरविशेषः' इति। यस्मात् सति सम्प्रसारणे हलादिशेषेण (7.4.60) रेफनिवृत्तौ जग्राहेति ग्रहेर्यद्रूपं भवति, सत्यपि सम्प्रसारण उरत्वरपरत्वहलादिशेषेष्वपि कृतेषु तदेव भवति। `जिज्यौ' इति। `आत औ णलः' (7.1.34)। `जिज्यथ' इति। `आतो लोप इटि च' (6.4.64) इत्याकारलोपः. `वृश्चतेः सत्यसति वा योगे नास्ति विशेषः' इति। यद्यन्यार्थो योग आरभ्यते न वृश्चत्यर्थः, ततो वृश्चत्यर्थमेतद्वचनं न भवतीति सत्यप्येतस्मिन्नन्यार्थवचने वृश्चतेरभ्यासस्य नैव सम्प्रसारणेन भवितव्यम्। न ह्यसति तदर्थे वचने केनचित् प्रकारेण सम्प्रसारणमुपपद्यत इत्यभिप्रायः ततश्चासत्यस्मिन् योगे वव्रश्चेति यद्रूपं भवति सत्यपि तदेवेति नास्ति वृश्चतेर्विशेषः। एतच्च वृत्तिकारमतेनोक्तम्। भाष्यकारमतेन त्वाह--`योगारम्बे' इत्यादि। तस्यायं भावः--सति वचऽनेन्यार्थो क्रियमाणे तस्य वृश्चत्यर्थतापि भवति; वृश्चतेरहपि ग्रह्यादिष्वन्तर्भावात्। ततश्च तदर्थोऽप्ययं योगारम्भ इति तदभ्यासस्यापि सम्प्रसारणेन भवितव्यमिति तुशब्दो वृत्तिकारमताद्विशेषं दर्शयति। `यदि सम्प्रसारणमकृत्वा' इत्यादि। ननु चोभयग्रहमस्य प्रयोजनं वक्ष्यति--हलादिशेषं (7.4.60) परमपि बाधित्वा सम्प्रसारणमेव यथा स्यादितदि, तत् कुतोऽस्य पक्षस्य सम्भवः? उभयग्रहणरहिते योगे सतीत्यभिप्रायः। `अथ रेफस्य' इत्यादि। उभयग्रहणसहिते योगे सतीति भावः। `उरदत्वस्य स्थानिवद्भावात्' इति। केन पुनः स्थानिवद्भावः? `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति। कः पुनरसौ? प्रत्ययोऽचः परः, यन्निमित्तमोरत्वं स्यात्। अङ्गस्य योऽभ्यास इति विज्ञायमाने सामर्थ्यात् प्रत्यय आश्रितो भवति; विना तेनाङ्गव्यपदेशाभावात् वृत्तिकारमतं चेषितव्यम्; अन्यथा तत्रोभयग्रहणाभावात् हलादिशेषेण (7.4.60) प्रागेव सम्प्रसारणाद्रेफे निवर्त्तिते वकारस्य सम्प्रसारणं स्यात्। ततश्च उव्रश्चेत्यनिष्टं रूपं स्यात्।

`पृच्छतिभृज्जत्योरविशेषः' इति। ग्रहेरिव वेदितव्यः। `अकिदर्थम्' इत्यादि। किं पुनः कारणमकिदर्थं मिदं व्याख्येयम्? इत्यत आह--`किति' इत्यादि। यस्मात् किति परत्वात् सम्प्रसारण कृते कृतसम्प्रसारणस्य पुनः प्रसङ्गविज्ञानाद्द्विर्वचने कृतेऽन्तरेणाप्येतद्वचनम्, ऊचतुरित्यादि सिद्ध्यत्येव। तस्मान्नेदं किदर्थम्, अपि त्वकिदर्थमेवेति।

अथ किमर्थमुभयेषामित्युच्यते, यावता स्वरितलिङ्गासङ्गादेवोभयेषामित्यस्यानुवृत्तिर्भविष्यति? न चानुवृत्तौ सत्यां ङिति वच्यादीनामपि सम्प्रसारणं प्राप्नोतीत्येतच्च नाशङ्कनीयम्; यदि वच्यादीनामपि ङिति सम्प्रसारणं स्याद्योगविभागोऽनर्थकः स्यात्; मण्डूकप्लुतिन्यायेन वा व्रच्यादीनामनुवृत्तिर्भविष्यति, तत्कुतोऽस्य दोषस्यावसरः? इत्याह--`अधिकारादेव' इत्यादि। अधिकारादेवोभयग्रहणे सिद्धे पुनरुभयेषांग्रहणात् पुनःश्रुतिर्भवति। तस्याश्चैतदेव प्रयोजनम्---

यत्र सम्प्रसारणं चान्यच्च प्राप्नोति तत्र सम्प्रसारणमेव यथा स्यात्, मा भूदन्यदिति। तेन विव्याध, विव्यधिथ इत्यत्र हलादिशेषं (7.4.60) परमपि बाधित्वा सम्प्रसारणमेव भवति; अन्यथात्र परत्वात् प्राक् प्रवर्तमानेन हलादिशेषेण यकारस्य निवृत्तौ कृतायां वकारस्य सम्प्रसारणमापद्येत, ततश्च--उव्याध उव्यधिथेत्यनिष्टं रूपं स्यात्।।

18. स्वापेश्चङि। (6.1.18)

`स्वापेः' इति। `आप्लृ व्याप्तौ' (धा.पा. 1260) इत्यस्यापि सुपर्वस्येका निर्देशः सम्भवति, अतस्तद्ग्रहणाशङ्कानिराकरणायाह--`स्वपेर्ण्यन्तस्य ग्रहणम्' इति। ण्यन्तस्य ग्रहणं चङ्ग्रहणाद्विज्ञायते, न ह्यण्यन्ताच्चङ् सम्भवति। `असूषुपत्' इति। `हेतुमति च' (3.1.26) इति णिच्। `द्विर्वचनात् पर्वमत्र सम्प्रसारणम्' इति। परत्वात्। `स्वाप्यते' इति। कर्मणि लकारः, `सार्वधातुके यक्' (3.1.67)। `स्वापितम्' इति। `निष्ठायां सेटि' (6.4.52) इति णिलोपः। ननु च ग्रह्यादि (6.1.16) सूत्रात् ङितोत्यनुवर्त्तते, न च स्वापेश्चङोऽन्यो ङिदस्ति, तत्र सामर्थ्याचचङ्येव भविष्यतीति न कर्त्तव्यमेव चङ्ग्रहणम्? इत्यत आह--`ङितिति केवलम्' इत्यादि। ग्रह्यादिसूत्रे ह्युभयं सन्निहितम्--किद्ग्रहणम्, ङिद्ग्रहणञ्च, तत्रोभयोरविशेषेण सन्निधाने ङिद्ग्रहणमेवानुवर्त्तते, न किद्ग्रहणमिति मन्दधिया दुर्बोधम्। अतः सुखप्रतिपत्त्ये मन्दबुद्धेश्चङ्ग्रहणं क्रियत इति भावः।।

19. स्वपिस्यमिव्येञां यङि। (6.1.19)

`स्वप्नक्' इति। `स्वपितृषोर्नजिङ्' (3.2.172)।।

20. न वशः। (6.1.20

21. चायः की। (6.1.21)

अथ किमर्थं दीर्घोच्चारणम्, यावता ह्रस्वादेशेऽपि `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घत्वेन चेकीयत इति सिद्धत्येव? इत्याह--`दीर्घोच्चारणम्' इत्यादि। कथं पुनः `यङि च' (7.4.30) इत्युच्यमाने आदेशो यङ्लुकि स्यात्? प्रत्ययलक्षणेन स्यात्। अथापि `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणं प्रतिषिध्यते? एवमप्यस्मादेव दीर्घोच्चारमाद्यङ्लुकि भवतीति विज्ञायते, अन्यथा तदपार्थकं स्यात्!
`चेकीतः' इति। तसन्तमेतत्। `यङोऽचि च' (2.4.74) इति यङो लुक्।।

22. स्फायः स्फी निष्ठायाम्। (6.1.22)

`स्फातिः' इति। `स्त्रियां क्तिन्' (3.3.94) वलि (6.1.66) यलोपः। `स्फातीभवति' इति। स्फायतेर्निष्ठान्ताच्च्वौ कृते `अस्य च्वौ (7.4.32) इतीत्वे सतीदं रूपं भवतीति मन्यमानो यश्चोदयेत्--अथ कथं स्फातीभवतीत्येतद्रूपम्, यावताऽत्रापि निष्ठायामस्मिन्नादेशे स्फीतिभवतीत्येवं भवितव्यमिति? तं प्रत्याह--`स्फातीभवतीत्येतदपि' इत्यादि। एतदपि स्फातिशब्दात् क्तिन्नन्ताच्च्वौ कृते `च्वौ च' (7.4.26) इति दीर्घत्वे च क्तिन्नन्तस्यैव रूपम्। अतो न भवत्येष दोषप्रसङ्गः।।

23. स्त्यः प्रपूर्वस्य। (6.1.23)

`सामान्येन ग्रहणम्' ति। द्वयोरप्यात्त्वे कृते पूर्वस्य `धात्वादेः षः सः (6.1.64) इति सत्वे समानत्वाद्रूपस्य। लक्षणप्रतिपदोक्तपरिभाषा (व्या.प.3) च नेहोपतदिष्ठते; उभयोलक्षिणिकत्वात्। अथात्र--`संयोगादेरातो धातोर्यण्वतः' (8.2.43) इति निष्ठानत्वं कस्मान्न भवति? इत्यत आह--`सम्प्रसारणे' इत्यादि। न त्वस्य पूर्वत्रासिद्धत्वात् पूर्वं सम्प्रसारणं क्रियत इति, तत्र कृते च यण्वत्ता नास्तीति नत्वं न भवति।
`प्रस्त्य इत्येवं सिद्धे' इति। ननु चैवमुच्यमाने प्रशब्दस्यापि सम्प्रसारणं स्यात्, ततश्च प्रस्तीत इति रूपं स्यात्, तत् किमुच्यते--प्रस्त्य इत्येवं सिद्ध इति? `अनन्त्यविकारेऽन्त्यसदेशस्य' (व्या.प.63) इति न भवत्येष दोष इति मन्यते। `इहापि यथा स्यात्' इति। कस्मात् पुनर्न प्राप्नोति? संशब्देन व्यवहितत्वात्। किं पूर्वग्रहणे क्रियमाणे शब्दार्थं एव तथाविदो भवति येनात्रापि भवति? अथ ग्रन्थाधिक्यादर्थाधिक्यं सूचयतीत्याभिप्रायेणाह--`तत् कथम्' इति। प्रथमकल्पं दर्शन्नाह--`प्रपूर्वस्य' इति। `षष्ठ्यर्थे बहुव्रीहिः' इति। पूर्वशब्दोऽयमवयववचन इति षष्ठ्यर्थे बहुव्रीहिर्भवति। अवयववाचिनि पूर्वशब्दे धातुरन्यपदार्थो नोपपद्यते। न हि धातोः प्रशब्दोऽयमवयवो भवति, अपि तु धातूपसर्गसमुदायस्य। तस्मात् स एवान्यपदार्थो युक्त इत्याह--`प्रः पूर्वो यस्य' इत्यादि।
`तदवयवस्य' इति। तस्यावयवस्तदवयव इति षष्ठीसमासः। तच्छब्देन धातूपसर्गसमुदायः परामृश्यते। `व्यधिकरणषष्ठ्यौ' इति। `प्रपूर्वस्य' इति। स्त्यावयवापेक्षया योऽयमवयवावयविसम्बन्धस्तत्र षष्ठी, `स्त्यः' इत्येषा तु यणवयवापेक्षया यः सम्बन्धस्तत्र। तेन भिन्नाभिदेयत्वात् `सत्यः', `प्रवूर्वस्य' इति व्यधिकरणे षष्ठ्यौ। स्यादेवम्, प्रसंस्तीत इत्यत्र प्रपूर्वसमुदायावयवः स्त्याशब्दो न सम्भवति इत्यत आह--`तत्र' इत्यादि।।

24. द्रवमूर्त्तिस्पर्शयोः श्यः। (6.1.24)

`द्रवमूर्त्तौ द्रवकाठिन्ये' इति। अनेन द्रवमूर्त्तिशब्दस्यार्थमाचष्टे। द्रवावस्थाया उत्तरोऽवस्थाविशेषः काठिन्याख्योऽत्र द्रवमूर्त्तिशब्देनोच्यते।
`स्पर्शे च' इति। रूपादिसहचरितो गुणः स्पर्श इत्युच्यते। `शीतमुदकम्' इति। कथं पुनरत्र सामानाधिकरण्यम्, यावता शीतशब्देन गुणविशेषोऽभिधीयते। वाय्वादिशब्देन तु द्रव्यविशेष इत्यत आह--`गुणमात्रे' इत्यादि। यथा--शुक्लादिशब्दा कदाचिद्गुणमात्रे वर्त्तन्ते, यता--पटस्य शुक्ल इति; कदाचित्तु तद्वति द्रव्ये सोऽयमित्यभेदसम्बन्धतद्वान्मतुब्लोपान्मत्वर्थीयाकारप्रत्ययान्तत्वाद्वा शुक्लः पट इति, तथा शीतशब्दोऽपि। तेन यदा तद्वति द्रव्ये वर्त्तते, तदोभयोरेकद्रव्ये निवेशितत्वादुपपद्यते सामानाधिकरण्यमिति भावः। `संश्यानः' इति। `संयोगादेः' (8.2.43) इत्यादिना नत्वम्।।

25. प्रतेश्च। (6.1.25)

26. विभाषाऽभ्यवपूर्वस्य। (6.1.26)
`सेयमुभयत्र विभाषा' इति। द्रवमूर्त्तिस्पर्शविषये पूर्वेण प्राप्ते, अन्यत्राप्राप्ते। अथ पूर्वग्रहणं किमर्थम्, न `विभाषाऽभ्यवाभ्याम्' इत्येवोच्येत? अत आह--`पूर्वग्रहणस्य' इत्यादि। क्रियमाणे पूर्वग्रहणे कस्मादेवात्र न भवतीत्याह--`न किल' इत्यादि। अयं हि द्विविधोऽपि समुदायो नाभिपूर्वः; नाप्यवपूर्वः, किं तर्हि? सम्पूर्वः। तेन पूर्वग्रहणादत्र न भवति। क्रियमाणेऽपि पूर्वग्रहणे प्राप्नोत्येवेति मन्यमानः किलशब्दमरुचिसूचनार्थं प्रयुक्तवान्। तामेव प्राप्तिं दर्शयन्नाह--`योऽत्र' इत्यादि। समूशब्दात् परो यो धातूपसर्गसमुदायस्तदाश्रयो विकल्पः कस्मान्न भवति, भवति ह्यसावब्यवपूर्व इत्यस्ति प्राप्ति? अत आह--`यत्नान्तरमास्थेयम्' इति। विभाषाग्रहणमिह क्रियते, सा च व्यवस्थितविभाषा विज्ञायते, तेनेह न भवतीति यतनान्तरम्। `पूर्वग्रहणस्य चान्यत्प्रयोजनं वक्तव्यम्' इति। तत् पुनरभिसंशीनम्, अभिसंश्यानम्, अवसंशीनम्, अवसंश्यानम्--इत्यत्रापि विकल्पो यथा स्यादित्येवं तद्वेदितव्यम्। एतच्च पूर्वग्रहणए क्रियमाणे यतोपपद्यते तथा `स्त्यः प्रपूर्वस्य' (6.1.23) इत्यत्र `प्रपूर्वस्येति षष्ठ्यर्थे बहुव्रीहिः' इत्यादिना व्याख्यातम्।।

27. श्रुतं पाके। (6.1.27)
``श्रा पाके' इत्यस्य धातोः' इति। `श्रा पाके' (धा.पा.1053) इत्यदादौ पठ्यते घटादौ (धा.पा.810) च मित्संज्ञार्थम्। कैश्चिच्चुरादावपि, `श्रै पाके' (धा.पा.919) इति भ्वादौ, तत्रेहाविशेषेण ग्रहणं प्राप्तम्। श्रायतेरपि हि कृतात्त्वस्यैतद्रूपं भवत्येव। निपातनाच्च लक्षणप्रतिपदोक्तपरिभाषा (व्या.प.3) प्रतिबन्धं न करोति। `ण्न्तस्याण्यन्तस्य च' इति। विशेषानुपादानात्। तथा चोक्तम्--श्राश्रप्योः श्रृतमिति।
यदि विभाषेत्यनुवर्त्तते क्षीरहविषोरपि पक्षे श्राणम्, श्रपितमिति स्यात्; ताभ्यामन्यत्रापि पक्षे श्रृतमिति प्रसज्येत? इत्यत आह--`व्यवस्थितविभाषेयम्' इति। `यदापि' इत्यादि। प्रयोजकव्यापारः प्रेषणाध्येषणादिः कार्ये कारणोपचारं कृत्वा प्रयोजकशब्देनोक्तः। स हि प्राकृतादर्थाद्बाह्यो भवति, तत्र तस्यानन्तर्भावात्। तत्र यदा `हेतुमति च' (3.1.26) इति द्वितीयो णिजुत्पद्यते, तदापि क्षीरहविषोरपि निपातनमेतन्नेष्यते; व्यवस्थितविभाषाविज्ञानादेव। तथा चोक्तम्--श्रपेः शृतमन्यत्र हतोरिति। हेतुमाण्णिचोऽन्यत्रेत्यर्थः। द्वितीयग्रहणं यदैकमेव भवति, तदेष्टत्त्वाच् श्रपितं क्षीरं देवदत्तेन यज्ञदत्तेनेति तत्प्रयोजको हेतुश्च' (1.4.55) इति चकाराद्देवदत्तयज्ञदत्तयोः कर्त्तृ संज्ञाविधानादुभयत्रापि कर्त्तरि तृतीया। `श्रपितम्' इति। श्रातेर्णिच कृते `अर्त्तिह्री' (7.3.36) इत्यादिना पुक्, `मितां ह्रस्वः' (6.4.92) क्षीरं स्वयमेव श्राति स्म--तद्यदा देवदत्तदेन प्रयुज्यते स्म तदा `हेतुमति च (3.1.26) इति प्रथमो णिच्। सोऽपि श्रपयन् यदा यज्ञदत्तेन प्रयुज्यते स्म तदा द्वितीयः। `णेरनिटि' (6.4.51) इति पूर्वस्य णेर्लोपः, ततः क्षीरे प्रयोज्ये कर्मणि निष्ठा--श्रृतमिति।
`ण्यन्तस्याण्यान्तस्य च निपात्येते' इति प्रतिज्ञाते सति युक्तं ण्यन्तस्याप्येतन्निपातनम्--येषां श्रातिश्चुरादावपि पठ्यते इत्यभ्युपगमः। ये तु चुरादावस्य पाठं न प्रतिजानते तेषां कथं ण्यन्तस्येतन्निपातनं युज्यते, न च शक्यते वक्तुम्--तेषामपि हेतुमण्ण्यन्तरयैतन्निपातनं युज्यते; `श्रपेः शृतमन्यत्र हेतोः' इति भाष्यकारवचनादिति यश्चोदयेत्, तं प्रत्याह--`श्रातिरयम्' इत्यादि। कर्मभावापन्नेऽपि योऽर्थः सौकर्य्यात् स्वातन्त्र्येण विवक्ष्यते स कर्मकर्त्ता, कर्म कर्ता भवतीति कृत्वा। कर्म चासौ कर्त्ता चेति विशेषणसमासः, स यस्य विषयः स कर्मकर्त्तृविषयः। अर्थद्वारकं चेदं विशेषणं पचेः कर्मकर्त्तृविषयत्वं वेदितव्यम्। तस्य योऽर्थः पच्यमानकर्त्तृकत्वं विक्लेदनमात्रं तत्रायमकर्मकः--श्रातिर्वर्त्तते। यदा तु स ण्यन्तो भवति तदा प्राकृतं पच्यर्थमाह। प्रकृतौ भवः प्राकृतः, स पुनर्यः प्रकृत्यन्तस्य पचेरर्थः पक्तृकर्त्तृको विक्लेदनोपसंहारादिः स इह वेदितव्यः। देवदत्तादिपक्तृकर्तृकं प्राकृतं पाकाख्यं पच्यर्थमाहेत्यर्थः। तत्र द्वयोरपि शृतमिष्यत इति योऽण्यन्तः श्रातिः कर्मकर्तृविषयेण पचिना समानार्थस्त्रत्रापीष्यते। योऽपि ण्यन्तः प्राकृतं पच्यर्थमाह तत्रापीष्यते। तत्र शृतं क्षीरं स्वयमेवेति प्रथमस्योदाहरणम्। शृतं क्षीरं देवदत्तेनेति द्वितीयस्य। ननु च `श्रपेः शृतमन्यत्र हेतोः' इति भाष्ये उक्तम्, तत् कथं द्वयोरपीष्यते? एवं मन्यते--यदिदं भाष्ये उक्तम्--`श्रपेः शृतमन्यत्र हेतोः' इति, तत्र `अन्यत्र हेतोः' इत्यनेन सर्वस्य हेतुमण्णिचः पर्युदासो न विधित्सितः अन्यथा विप्रतिषिद्धमिदं स्यात्, असति हि श्रातेश्चुरादौ पाठे यदि श्रपेः शृतमिति निपात्यते, कथमन्यत्र हेतोरिति पर्युदासः! अथान्यत्र हेतोरिति पर्युदासो न तर्हि श्रपेः शृतमिति निपातनमुपपद्यते। न हि श्रातेश्चुरादावसत पाठे श्रातेर्हेतुमण्णिचं त्यत्क्वाऽन्यस्ततो णिजस्ति। तस्माद्यस्य हेतुमण्णिचो न केनचित् प्रकारेण स्वार्थिकत्वमुपपद्यते स एव भाष्यकारस्य पर्युदासविषयत्वेनाभीष्टः। स पुनर्यो बाह्ये प्रयोजके द्वितीयो णिजुत्पद्यते स विज्ञेयः। यस्य तु केनचित् प्रकारेण स्वार्थिकत्वमुपपद्यते, स एव भाष्यकारस्य पर्युदासविषयत्वेन न प्रकल्प्यते, तस्यैतन्निपातनमिष्टमेव। स पुनर्यस्मिन्नुत्पन्ने श्रातिः प्राकृतं पच्यर्थमाह स विज्ञेयः, शक्यते हि तस्य पचिना प्रकृत्यर्थेन समानार्थत्वात् स्वार्थिकत्वमुपचारेणाभिधातुमिति। तदेवमिह पाठेऽपि चुरादौ श्रातेर्ण्यन्तस्याप्येतन्निपातनं युज्यत एवेति।।

28. प्यायः पी। (6.1.28)
`पीनम्' इति। `ओदितश्च' (8.2.45) इति निष्ठानत्वम्।
`इत्यमपि' इत्यादि। अपिशब्देन न केवलं पूर्वसूत्रे या विभाषा सैव व्यवस्थितविभाषा, अपि त्वेषापीति दर्शयति। तेन किं सिद्धं भवति? इत्याह--`तेन' इत्यादि। सोपसर्गस्य तु नैव भवतीत्यस्यापवादमाह--`आङ्पूर्वस्य' इत्यादि। नित्यश्चायमन्धूधसोः पीभावः। व्यवस्थितविभाषैव।।

29. लिङ्यङोश्च। (6.1.29)
`विभाषेति निवृत्तम्' इति। उत्तरसूत्रे पुनर्विभाषाग्रहणात्। अन्यथापीदमेव तत्रानुवर्त्तिष्यत इति तन्न कुर्यात्। अत एवोच्यते--द्वयोर्दिभाषयार्मध्ये ये विधयस्ते नित्या भवन्तीति। `प्यायः पीत्येतच्चशब्देनानुकृष्यते' इति। इतरथा हि सम्प्रसारणस्य प्रकृतत्वाल्लिङ्यङोः प्यायः सम्प्रसारणं विज्ञायेत। चशब्दे तु सत्यनन्तरेणैवपीभावेन सम्बन्धः सुखमवसीयते। नाप्राप्ते द्विर्वचने पीभावो विधीयते। तेन तस्य बाधकं प्राप्नोतीति कस्यचिदाशङ्का स्यात्। अतस्तां निराकर्त्तुमाह--`परत्वात्' इत्यादि। विरोधे हि सति बाधा स्यात्, इह तु विरोधो नास्ति। अतः परत्वात् पीभावे कृते पुनःप्रसङ्गवज्ञानात् सिद्धमिति द्विर्वचनं भवतीति।।

30. विभाषा श्वेः। (6.1.30)
`शुशाव' इति। लिटि णलि सम्प्रसारणे कृते वृद्ध्यावादेशौ। `शिश्वाय' इति। यदा न सम्प्रसारणं तदा वृद्ध्यायादेशौ। `शुशुवतुः, शिश्वियतुः, इति। यदा सम्प्रसारणं तदोवङ्, अन्यदेयङ्। `अप्राप्तम्' इति। केनचिवविहितत्वात्।
`लिट्यभ्यासस्योभयेषाम्' (6.1.17) इत्युभयत्रोभयग्रहणादन्यत् कार्यं प्रवर्तमानमपास्याभ्यासस्य सम्प्रसारणमेव यथा स्यादित्येतदुभयेषांग्रहणस्य प्रयोजनमुक्तम्। ततश्चेयमपि विकल्पं बाधित्वा नित्यं सम्प्रसारण मेव स्यादिति कस्यचिद्भ्रान्तिः स्यात् अतस्तां निराकर्त्तुमाह--`यदा च' इत्यादि। अत्र श्वयतेर्विभाषा सम्प्रसारणमुच्यते, यदि कदाचिद्धातोर्न सम्प्रसारणं भवति तदाब्यासस्य स्यात् ततश्च श्वयतेः सम्प्रसारणं पाक्षिकं न कृतं स्यात्। स्यादेतत्--लिट्परस्य शक्यतेरिदं विकल्पेन कार्यं विधीयते, तस्य च तदस्त्येवेति? असम्यगेतत्; द्विष्प्रयोगे हि द्विर्वचने क्रियामात्रं भिद्यते, न धातुरूपमिति कुतः पूर्वपरयोः कार्यसम्बन्धं प्रति भेदः? तस्माद्यदा धातोर्न भवति तदाभ्यासस्यापि न भवत्येव।।

31. णौ च संश्चङोः। (6.1.31)
`णौ च संश्चङोः' इति भिन्नाधिकरणे सप्तम्यौ---संश्चङोः परतो यो णिस्तस्मिंण्णौ परतो यः श्वयतिरिति। `शुशावयिषति' इति। श्वयतेर्णिच्, सन्, सम्प्रसारणम्, वृद्धिरावादेशः `शु' इत्येतस्य द्विर्वचनम्। `अशूशवत्' इति। लुङ्, च्लेश्चङ, सम्प्रसारणादिकम्, पूर्ववण्णिलोपः, `णौ चङि' (7.4.1) इति ह्रस्वः, द्विर्वचनम्, `दीर्घो लघोः' (7.4.94) इति दीर्घः। ननु च श्वयतेर्णिचि तदन्ताच्च सनि कृते चङि चान्तरङ्गत्वात् पूर्ववृद्ध्यायादेशाब्यां भवितव्यम्, ततः सम्प्रसारणेन। तथा च सति शुशुययिषतीति सन्परे णौ भवितव्यम्, चङ्परे तु--अशूशुयदिति, तत् कथं शुशावयिषति, अशूशवदिति चोदाहृतम्? इत्याह--`सम्प्रसारणम्' इत्यादि। आदिशब्देनायावेशः परिगृह्यते। सम्प्रसारणाश्रयं पुनरत्र `सम्प्रसारणाच्च' (6.1.108) इति परपूर्वत्वम्। `तेनापि वृद्ध्यादिकं बाध्यते' इति। नन्वेवमपि वृद्ध्यावादेशयोः कृतयोः शावित्यस्य द्विर्वचनं प्राप्नोति न केनचित् णौ स्थानिवद्भावो विहितः? इत्यत आह--`ओः पुयण्ज्यपरे' इत्यादि। यत्र चैतज्ज्ञापकं तथा तस्यैव वृत्तावुपपादयिष्यामः।।

32. ह्वः सम्प्रसारणम्। (6.1.32)
`जुहावयिषति' इति। अत्रापि पूर्ववद्बलीयस्त्वाद्बृद्ध्यादेः प्राक् सम्प्रसारणं भवति, अभ्यासस्य `कुहोश्चुः' (7.4.62) इति चुत्वम्--हकारस्य झकारः। तस्य `अभ्यासे चर्च' (8.4.54) इति जश्त्वम्--जकारः। अथात्र कस्मात् `साच्छाशाह्वा' (7.3.37) इत्यादिना प्रागेव सम्प्रसारणाद्युगागमो न भवति? इत्याह--`सम्प्रसारणस्य' इत्यादि।
ननु च सम्प्रसारणग्रहणमनुवर्त्तत एव, तत् किमर्थं पुनः सम्प्रसारणमित्युच्यते? इत्याह--`सम्प्रसारणमिति' इत्यादि। पूर्वकं हि सम्प्रसारणग्रहणं विभाषेत्यनेन सम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्। तस्माद्विभाषेत्यस्य निवृत्तये पुनः सम्प्रसारणमित्युक्तम्।
अथ कस्माद्योगविभागः क्रियते, यावता `ह्वः सम्प्रसारणमभ्यस्तस्य च' इत्येकयागेऽपि जुहावयिषतीत्यादि सिद्ध्यत्येव, अत्रापि ह्वयतरभ्यस्तस्य कारणत्वेन सम्बन्धी भव्त्येव, तथा च`एकाचो द्वे प्रथमस्य' (6.1.1) इति स एव द्विरुच्यमानोभ्यसतस्य कारणं भवत्येव? इत्याह--`ह्वः सम्प्रसारणम्' इत्यादि। एकयोगेनैव सिद्धे पृथग्योगकरणेनायमर्थो न ज्ञाप्येत, तदा स्यादेवात्र सम्प्रसारणम्। भवति ह्यत्रापि ह्वपतिरभ्यस्तस्य निमित्त्म्। ह्वायकशब्दाण्ण्वुलन्तात् क्यच्, `क्यति च' (7.4.33) इतीत्त्वम्, क्यजन्तात् सन्, इट्, `अतो लोपः (6.4.48) द्विर्वचनम्।।

33. अभ्यस्तस्य च। (6.1.33)
चकारः `ह्वः' इत्यनुकर्षणार्थः, अत एवाह--`ह्व इत्यनुवर्त्तते' इति। यदि `ह्वः' इत्येतन्नानुवर्त्तते ततोऽभ्यस्तमात्रस्य स्यात्। तत्र `ह्वः'

इत्यनुवर्त्तमानस्याभ्यस्तस्येत्यनेन यदि समानाधिकरण्यं स्यात्, तदा द्विर्वचने कृतेऽभ्यस्तसंज्ञायामुपजातायां सम्प्रसारणं स्यात्। एवञ्च `न सम्प्रसारणे सम्प्रसारणम् (6.1.37) इत्यभ्यासस्य सम्प्रसारणं न स्यात्। यद्यपि परेण हरूपेण व्यवधानम्, तथापि समानाङ्गग्रहणात् तस्य व्यवधानेऽपि प्राप्नोत्येवात्र प्रतिषेधः, यथा यूनेत्यत्र--इतीमं पक्षे सामानाधिकरण्ये दोषं पश्यन्नाह--`तदभ्यस्तस्येत्यनेन व्यधिकरणम्' इति। भिन्नाभिधेयमित्यर्थः। `अब्यस्तस्य यो ह्वयतिः' इत्यादिना सम्बन्धलक्षणां षष्ठीं ख्यापयंस्तदेव वैयधिकरण्यं दर्शयति। तेन किं सिद्धं भवति? इत्याह--`तेन' इत्यादि। `जुहाव' इति। सम्प्रसारणे वृद्ध्यावादेशयोः स्थानिवद्भावेन हु इत्यस्य द्विर्वचनम्।।

34. बहुलं छन्दसि। (6.1.34)

35. चायः की। (6.1.35)
`निचिक्यु' इति। `एरनेकाचः' (6.4.82) इत्यादिना यणादेशः। `निचाय्य' इति। ल्यबन्तमेतत्। दीर्घोच्चारणं चिकीवानित्यत्र दीर्घस्य श्रवणार्थम्। इदं क्वसौ रूपम्।।

36. अपस्पृधेथामानृचुरानृहुश्चिच्युषेतत्याजश्राताः श्रितमाशीराशीर्त्ताः। (6.1.36)
`अकारलोपश्च' इति। धातोरवयवो योऽकारस्तस्य निपातनाल्लोपः। `अपास्पद्धैथाम्' इति। अपाकारस्य `आटश्च' (6.1.90) इति सवर्णदीर्घत्वम्। `विषयविभागमिच्छति' इति। स च निपातनसामर्थ्यालल्लभ्यत इति वेदितव्यम्। यदिक्वचिदप्येकस्मिन् श्राभावो दृश्यते, तदर्थं तर्हि यत्नान्तरमास्थेयम्। न हि श्राता इत्यनेनैतदपि सिद्धयति; सूत्रे बहुवचननिर्देशात्। अत आह--`तस्य' इत्यादि।।

37. न सम्प्रसारहणे सम्प्रसारणम्। (6.1.37)
येषां सम्प्रसारमुक्तं तेषां यावन्तो यणः सम्भवन्ति तेषां सर्वेषां सम्प्रसारणं प्राप्तमिति प्रतिषेधोऽयमारभ्यते। ननु चालोऽन्त्यपरिभाषया (1.1.52) अन्त्यस्यैव भविष्यति, नानन्त्यस्य? नैतदस्ति; न ह्यनया परिभाषया शक्यमिहोपस्थातुम्। विचस्वपियजादीनामन्त्यस्य यणोऽसम्भवात्। एवं तर्हि
`अनन्त्यविकारेऽन्त्यसदेशस्य'
(व्या.प.63) इत्यन्त्यसदेशस्य कार्यं भविष्यति--अन्त्यसदेशो यो यण् तस्यैव कार्यं भविष्यति, नैतरस्य? नैषास्ति परिभाषा; प्रयोजनाभावात्। यदाह--तस्याः परिभाषाया सन्ति प्रयोजनातीति। तस्मात् कर्त्तव्यमेतत् सूत्रम्।
ननु च पूर्वपरयोरेकयोगलक्षणं सम्प्रसारहणम्, ततो यदि तत् परस्याभिनिर्वृत्तं तदा पूर्वस्याप्यभिनिर्वृत्तमेव, न चाभिनिर्वृत्तस्य निवृत्तिः शक्यते कर्त्तुम्, नाप्यनभिनिर्वृत्तस्य निमित्तत्वेनाश्रयणं युज्यते, ततोऽस्मादेव प्रतिषेधवचनात् तत् परस्य तावत् क्रियते; तत्र कृते तु पूर्वस्यापि प्राप्तं प्रतिषिध्यते। अथ सम्प्रसारणमित्यनुवर्त्तमाने पुनः सम्प्रसारणं किमर्थम्? इत्याह--`सम्प्रसारणम्' इत्यादि। असति पुनः सम्प्रसारणग्रहणे `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या. प.19) इति प्रकृतस्यैव सम्प्रसारणस्य प्रतिषेधः स्यात्, न विदेशस्थस्य। तस्माद्विदेशस्थस्यापि भिन्नप्रकारणविहितस्य प्रतिषेधो यथा स्यादित्येवमर्थं पुनः सम्प्रसारणग्रहणम्। `यूनो यूना' इति। सम्प्रसारणे कृते परपूर्वत्वे कृते च `अकः सवर्णे दीर्घः' (6.1.101)। ननु च क्रियमाणेऽपि पुनः सम्प्रसारणग्रहणे तत्र प्रतिषेधो न स्यात्, सवर्णदीर्घत्वस्य पूर्वविधौ स्थानिवद्भावे सत्युकारव्यवहितत्वात्? अत आह--`सम्प्रसारणग्रहणसामर्थ्यदेव' इत्यादि। यदि स्थानिवद्भावः स्यात्, अनर्थकं पुनः सम्प्रसारणग्रहणं स्यादित्यभिप्रायः। अभ्युपेत्य पुनः परिहारान्तरमाह--`सति वा' इत्यादि।
सम्प्रसारणग्रहणसामर्थ्यादेवात्राश्रूयमाणोऽपिशास्तरान्तरेण स्थानिवद्भावमापन्नो योऽज् व्यवधानं करोति, तन्मात्रेण व्यवधानं नाश्रयिष्यते--मा भूत् सम्प्रसारणग्रहणमनर्थकमिति। ननु च `यूनश्च कुत्सायाम् (4.1.167), `वृद्धो यूना' (1.2.65) इति निपातनादेव यूनः, यूनेत्यत्र सम्प्रसारणं न भविष्यति, तत् किमेतन्निवृत्त्यर्थेन पुनः सम्प्रसारणग्रहणेन? नैतदस्ति; अबाधकन्यपि निपातनानि भवन्तीत्युक्तम्। अपि चैतद्विषयमेव निपातनं विज्ञायते, तथा च--यूनः, यूना यूनीत्यत्र सम्प्रसारणं स्यादेवेति। `आरेवान्' इति। रयिरस्यास्तीति मतुप्। सम्प्रसारणे कृते `आद्गुणः'; (6.1.87), `छन्दसीरः' (8.2.15) इति वत्वम्।।

38. लिटि वयो यः। (6.1.38)
वयेर्द्वौ यणौ, तत्र पूर्वण वकारस्य सम्प्रसारणप्रतिषेधे प्राप्ते यकारस्यानेन सम्प्रसारणं लिटि प्रतिषिद्ध्यते। तत्र प्रतिषिद्धे यकारः सम्प्रसारणभाग्न भवतीति वकारस्य सम्प्रसारणं भवति धातोरभ्यासस्य च; तत्र धातोर्ग्रह्यादिसूत्रेण (6.1.16) अभ्यासस्य `लिट्यब्यासस्योभयेषाम्' (6.1.17) इत्यनेन। अथ किमर्थं लिड्ग्रहणम्, यावता वयेरादेशस्य लिटोऽन्यत्र सम्भवो नास्ति, तद्विधौ `लिट्यन्यतरस्याम्' (2.4.40) इत्यतो लिङ्ग्रहणानुवृत्तेः, तत्सामर्थ्यादेव लिटि भविष्यति? इत्यत आह--`लिङ्ग्रहणमुत्तरार्थम्' इति। `वेञः' (6.1.40) इति प्रतिषेधो लिटि यथा स्यादित्येवमर्थं लिङ्ग्रहणम्।।

39. वश्चास्यान्यतरस्यां किति। (6.1.39)

40. वेञः। (6.1.40)

41. ल्यपि च। (6.1.41)

42. ज्यश्च। (6.1.42)

43.व्यश्च। (6.1.43)
`योगविभाग उत्तरार्थः' इति। उत्तरत्र व्येञ एव विभाषा सम्प्रसारणं यथा स्यात्, `ज्या' इत्यस्य मा भूदित्येवमर्थो योगविभागः।।

44. विभाषा परेः। (6.1.44)

45. आदेच उपदेशेऽशिति। (6.1.45)
`धातोरिति वर्त्तते' इति। `लिटि धातोरनभ्यासस्य' (6.1.8) इत्यत; तस्य च धातोरेवैच इति विशेषणम्, विशेषमेन च तदन्तविधिर्भवतीत्याह--`एजन्तो यो धातुः' इति। `उपदेशे' इति। आद्युच्चारणे गणपाठ इत्यार्थः। `चेता, स्तोता' इति। ननु च लक्षणप्रतिपदोक्तपरिभाषयैवात्र (व्या.प.3) न भविष्यति, तत् किमुपदेशग्रहणेन? एवं तर्हि उपदेशग्रहणमतेतज्ज्ञापयति--अनित्यैषा परिभाषेति। एतेन `अर्त्तिह्री' (7.3.36) इत्यादिसूत्रे लाक्षणिकस्याप्याकारस्य ग्रहणे सति क्रापयतीत्यादावपि पुक् सिद्धो भवति। `श इद् यस्य सोऽयं शित्' इति। यश्च `लिटस्तझयोरेशिरेच्' (3.4.81) इत्येशादेशः स शिद्भवति, ततश्च शिति प्रतिषेधे क्रियमाण एश्यप्यात्त्वं न प्राप्नोति। अत्रायादेशे कृते स्थानिवद्भावेन `ग्लै' इत्यस्य द्विर्वचने `जग्लाय' इत्यनिष्टं रूपं स्यात्--इति मन्यमान आह--`कथम्' इत्यादि। `ग्लै इत्यादौ `आतो लोप इटि च' (6.4.64) इत्याकारलोपः। `नैवम्' इत्यादिना परिहारः। श एव इत् शिदिति विज्ञायमाने सत्यल्ग्रहणमेव भवति। तत्र `यस्मिन् विधिस्तदादावल्ग्रहणे' (व्या.प.127) परिभाषया शिदादौ प्रत्यये प्रतिषेधेन भवितव्यम्, न चैश् शिदादिः; किं तर्हि? शिदन्तः शिदन्तस्यैवोच्चारणात्। तस्मादत्रैशि प्रतिषेधो न भवति। अशितीति पर्युदासो वा? प्रसज्यप्रतिषेधो वा? तत्र यदि पर्युदासः, तदा शितोऽन्यदात्त्वनिमित्तमाश्रितं स्यात्। एवञ्च यावदात्त्वस्य निमित्तं न भवति तावदात्त्वेन भवितव्यमिति; अनाकारान्तत्वात्। `सुगलः' इत्यादावाकारान्तलक्षणः कप्रत्ययो न स्यादित्येच्चेतसिकृत्वाऽऽह--`अशति' इत्यादि। तेन किं सिद्धं भवति? इत्याह--`तेन' इत्यादि। प्रसज्यप्रतिषेधे ह्यात्त्वस्य शिति प्रतिषेधः क्रियते, न तु किञ्चिन्निमित्माश्रीयत इति तदनैमित्तिकं भवति। अतः प्रागेव प्रत्ययोत्पत्तेरात्त्वं भवतीत्याकारान्तलक्षण) प्रत्ययः सिद्ध्यति, तेन `सुग्लः' इत्यादि। सिद्धं भवति। आदिशब्देन सुग्लः, सुग्ला--इत्यादेर्ग्रहणम्। तत्र हि स्त्रियाम् `आतश्चोपसर्गे (3.3.106) इत्यङ्।।

46. न व्यो लिटि। (6.1.46)
`व्येञ् संवरणे' (धा.पा.1007)। अथालिटीति कस्मान्न ज्ञायते, तुल्या हि संहिता? नैतदस्ति; यदि ह्येवं स्यात्, `लिटि व्यः' इति नियम एव कृतः स्यात्--लिट्येवात्त्वम्, नान्यत्रेति। लक्ष्यस्थित्या च विपरीतनियमो भविष्यति। द्विवचनबहुवचनयोः सम्प्रसारणे पूर्वरूपत्व आत्त्वे च सत्यसति वा नास्ति विशेष इत्येकवचनान्तमुदाहृतम्। `संविव्ययिर्थः' इति। थलि वलादिलक्षणस्येटः `एकाचः' (7.2.10) इत्यादिना प्रतिषेधः। पुनरपि क्रादिनियमार्थः प्राप्तः, सोऽपि `अचस्तास्वत् (7.2.61) इत्यादिना प्रतिषिद्धः, पुनः `ऋतो भारद्वाजस्य' (7.2.63) इति नियमाद्विकल्पे प्राप्ते `इडर्त्तिव्ययतीनाम्' (7.2.66) इति नित्यं क्रियते।।

47. स्फुरतिस्फुलत्योर्घञि। (6.1.47)
`विस्फारः, विस्फालः' इति। भावे घञ्, `हलश्च' (3.3.121) इति करणाधिकरणयोर्वा।।

48. क्रीङ्जीनां णौ। (6.1.48)
`डुक्रीञ् द्रव्यविनिमये' (धा.पा.1473) `इङ् अध्ययने' (धा.पा.1046) `जि जये' (धा.पा.561)। अनुपदेशार्थ आरम्भः। क्रापयतीत्यादावात्वे कृते `अर्त्तिह्री' (7.3.36) इत्यादिना पुक्। किमर्थमिदमुच्यते, न `क्रप कुत्सायां गतौ' (धा.पा.771), `जप जल्प व्यक्तायां वाचि' (धा.पा.397,398), `आप्लु व्याप्तौ (धा.पा.1260) इत्यस्य चाधिपूर्वस्य णिचि कृते क्रापयतीत्यादिकं रूपं सिद्धम्, अनेकार्थत्वाद्धातुनां क्रोणात्याद्यर्थे क्रपादयो वर्त्तिष्यन्ते? उच्यते; क्रीणात्यादीनां णिचि प्रयोगान्तरनिवृत्त्यर्थम्। अथ करोतेः` ईङ् गतौ' (धा.पा.1143) इत्यस्य ग्रहणं कस्मान्न विज्ञायते? उच्यते; करोतेस्तावन्न सम्भवति, एच इत्यधिकारात्। अत एव वृत्तिकृता `एचः' इत्यनुवर्त्तितम्। वचनसामर्थ्याद्वा तस्य हि वृद्ध्यैवात्त्वं सिद्धम्? नैतदस्ति; नियमार्थहि स्यात्--आत्त्वमेव, न

पुना रपरत्वामिति? नैतदस्ति; `विधिनियमसम्भवे विधिरेव ज्यायान्' (व्या.प.130) इति क्रीणातेरेव ग्रहणम्। न करोतेः, तस्य नियमार्थत्वात्। क्रीणातेस्तु विध्यर्थत्वात्। `ईङ् गतौ' (धा.पा.1143) इत्यस्यापि ग्रहणं न सम्भवति; जयतिना हरस्वान्तेन साहचर्य्यात्। इङ् ह्रस्वान्तो ग्रहीष्यते, न दीर्घान्तः; शब्दपरविप्रतिषेधात्। जयतिना साहचर्य्यम्, न क्रीणातिना। व्याख्यानतो वा विशेषोऽवसेयः..

49. सिध्यतेरपारलौकिके। (6.1.49)
`अन्नं साध्यति' इति। अन्नं निष्पादयतीत्यर्थः। अत्र हि सिधिः पारलौकिकेर्थे ज्ञानविशेषे वर्त्तत इति। अस्यार्थं--`तापसः सिध्यति' इत्यादिना स्पष्टीकरोति। `उपसंहारन्' इति। निष्पादयन्नित्यर्थः।
`इह कस्मान्न भवति' इत्यादि। एवं मन्यन्ते--ब्राह्मणेभ्यो दास्यामीत्यनेनाभिप्रायेण योऽन्नं साधयति स जमान्तरे भवन् फलमभ्युदयलक्षणं प्राप्नोति, तस्मात् पारलौकिकेऽर्थे सिधिरत्र वर्त्तत इति पर्युदासेन भवितव्यमिति। सिध्यतेरत्रार्थो निष्पत्तिरित्यादिनेहलोकार्थतां त्वस्य दर्शयति। `तस्याः प्रयोजनमन्नम्' इति। अन्नमुद्दिश्य प्रवृत्तत्वात्। `तस्य' इति। अन्नस्य। `न पुनः सिद्धिरेवेति' इति। अर्ताल्लिङ्गविपरिणामं कृत्वा न पुनः सिद्धिरेव पारलौकिकीति सम्बन्धनीयम्। सिद्धिर्निष्पत्तिरित्यर्थः। इतिकरणो हेतौ। यस्मात् सिद्धो धातुर्वर्त्तते। अत्र सिद्धिः पारलौकिकी न भवति, तस्मान्नात्रात्वं पर्युदस्यते। स्यादेतत् यद्यपि साक्षाद्धातुः परलोकार्थो न भवति, पारम्पर्येण तु भवत्येव, तस्माद्भवितव्यमेव प्रतिषेधेन इत्याह--`साक्षात्' इत्यादि। यदि साक्षादव्यवधानेन परलोकार्थो यः सिद्ध्यतेरर्थः, तत्रापि पारलौकिक इतीदं वचनं न कृतार्थं स्यात्, तदा पारम्पर्येणापि यः परलोकार्थस्तत्र व्याप्रियेत--मा भूद्वचनवैयर्थ्यमिति। इदं तु ज्ञानविशेषे साक्षात् परलोकार्थे सिध्यत्यर्थे चरितार्थम्, ततो नोत्सहत एवंविधविषयमवगाहितुम्। न शक्नोत्येवम्प्रकारे विषये नि,ेधः प्रवर्त्तितुमित्यर्थः। अथ सिद्ध्यतेः श्यना निर्देशः किमर्थः, न सिधेरित्येवोच्येत, एवं हि लघु सूत्रं भवति? इत्याह--`सिद्ध्यतेः' इत्यादि।।

50. मीनातिमिनोतिदीङां ल्यपि च। (6.1.50)
`उपदेश' (6.1.45) इत्यनुवृत्तेः प्रागेव प्रत्ययोत्पत्तेरात्त्वेन भवितव्यमिति, अत आत्वविधानकाले ल्यपः परत्वं न सम्भवतीति तस्माल्ल्यपीति विषयसप्तमीयं विज्ञायत इत्याह--`ल्यपि विषये' इति। एच इति यद्यपि प्रकृतविशेषणं प्रागासीत्, तथापीहोपदेशाधिकारान्मीनातिप्रभृतीनां चोपदेशावस्थायामेचोऽसम्भवात् सामर्थ्याद्विषयविशेषणं विज्ञायत इत्याह--`एचश्च विषये' इति। `उपदेशे' इत्यस्य प्रागित्यादिनार्थमाचष्टे। `प्रमाय' इति। `समासेऽनञ्' (7.1.37) इति ल्यप्।
कः पुनरुपदेशावस्थायामेवात्त्वविधानेऽर्थः सम्पद्यते, यदर्थमुपदेशावस्थायामात्त्वं क्रियते? इत्याह--`उपदेश एव' इत्यादि। इवर्णान्तलक्षणः `एरच्' (3.3.56) इत्यच, आकारान्तलक्षणः `आतो युच्' (3.3.128) `उपदायः' इति। उपदेश एवात्त्वे कृते सत्यचो निमित्तं विहितमित्युसर्ग एव `भावे' (3.3.18) इति घञ् सिद्धो भवति। `आतो युक् चिष्कृतोः' (7.3.33) इति युक्। `ईषदुपदानम्' इति। उपदेशावस्थायामात्त्वे खलपवादो युच् सिद्धो भवति।।

51. विभाषा लीयतेः। (6.1.51)
`तयोरुभयोरपि यका निर्देशः स्मर्यते' इति। आचार्यैः। अथ दैवादिकस्यायं श्यना निर्देशः कस्मान्न विज्ञायते? अत एव निर्देशात्। यदि दैवादिक एवात्र निर्देष्टुमभीष्टः स्यात्, अनुबन्धेन लीङ इति निर्देशं कुर्यात्। तस्मात् साधारणेनागन्तुकेन यकायमुभयोर्निर्देशः। `ईषत्प्रमयः' इति। `ईषद्दुःसुषु' (3.3.126) इत्यादिना खल्। `निमयो वर्त्तते' इति। `एरच्' (3.3.56) इत्यच्।
`अत्र तु लियो व्यवस्थितविभाषया विज्ञानात् सिद्धम्' इति। `लियः' इत्युपलक्षणमात्रम्, इतरयोरपि सिद्ध एव; विभाषाग्रहणस्य पूर्वेणापि सूत्रेण सम्बन्धात्। व्यवस्थितविभाषाविज्ञानात् प्रलम्भनशालीनीकरणयोश्च णौ नित्यमात्त्वं भवति। व्यवस्थितविभाषाविज्ञानादेव। `उल्लापयते, अपलापयते' इति। `लियः सम्माननशालीनीकरणयोः' (1.3.70) इत्यात्मनेपदम्।।

52. खिदेश्छन्दसि। (6.1.52)
`चिखाद' इति। `पुगन्तलघूपधस्य' (7.3.86) इति गुणे कृत आकारः। यदि खादिरपि खिदेरर्थे वर्त्तते, ततोऽयं योगः शक्योऽकर्त्तुम्; खादेस्तु--चखादेति भविष्यति, खिदेस्तु--चिखेदेति।।

53. अपगुरो णमुलि। (6.1.53)
`अपगारमपगारम्' इति। `आभीक्ष्ण्ये द्वे भवतः' (वा.887) इति द्वित्वम्।।

54. चिस्फुरोर्णौ। (6.1.54)
`क्रीङ्जीनां णौ' (6.1.47) इत्यत्र प्रदेश इदं नोक्तम्; नित्यं मा भूदित्येवमर्थम्।।

55. प्रजने वीयतेः। (6.1.55)
यदि `वा गतिगन्धनयोः (धा.पा.1050) इत्ययं धातुः प्रजने वर्त्तते, ततः शक्यतेऽपि योगोऽवक्तुम्; वातेर्हि--वापयतीति भविष्यति, वीयतेस्तु--वाययतीति।।

56. बिभेतेर्हेतुभये। (6.1.56)
`हतुभये' इति। `पञ्चमी भयेन' (2.1.37) इति पञ्चमीसमासोऽयमित्याह--`ततो यद्भयम्' इति। किं पुनस्ततो भयम्? इत्याह--`स यस्य भयस्य' इत्यादि। अथात्त्वपक्षे षुगागमः कस्मान्न भवति? अस्ति ह्यत्रापि प्राप्तिः--`एकदेशविकृतमनन्यवद्भवति' (व्या.प.16) इत्यत आह--`स च' इत्यादि। `भियो हेतुभये षुक्' (7.3.40) इत्यत्र हि भी+ई इ त ईकारेण प्रश्लिष्टस्य निर्देशः कृतः--ईकारान्तस्यैव षुग् यथा स्यात्, आकारान्तस्य मा भूदीति। तथा लियो ग्रहणम्, तस्याप्यात्त्वपक्षे `लीलोर्नुक्लुकावन्यतरस्यां स्नेहविपातने' (7.3.39) इति नुग्न भवति। ईकारप्रश्लेषनिर्देशादेवेति प्रसङ्गेन व्युत्पादितम्।।

57. नित्यं स्मयतेः। (6.1.57)
`भयशब्देन धात्वर्थसाम्यात्' इत्यादि। यश्च बिभेतरर्थो यश्च स्मयतेः, तौ द्वापि सदृशौ; चित्तविकार स्वभावतया। द्वावपि तौ चित्तसंक्षोभलक्षणौ, अतो द्वयोरपि यत् सामान्यं तत् सादृश्यम्। तस्माद्भयशब्देनात्र स्मयतेरर्थोऽभिधीयते। दृश्यते हि सादृश्यादर्थान्तरेऽपि शब्दानां वृत्तिः, यथा--सिंहो माणवक इति। किं पुनः कारणमेवं व्याख्यायते? इत्याह--`न हि' इत्यादि। `हेतुभये' (6.1.56) इत्यनुवर्त्तते। उच्यते चेदं विशेषणम्। न च मुख्ये भये स्मयतेर्वृत्तिस्ति। तत्र सामर्थ्यात् केनचित् सादृश्येन स्मयत्यर्थ एव भयशब्देनात्राभिधीयत इति विज्ञायते।।

58. सृजिदृशोर्झल्यमकिति। (6.1.58)
`स्रष्टा, द्रष्टा' इति। उमागमे कृते यणादेशः, व्रश्चादि (8.2.36) सूत्रेण षत्वम्। `लघूपधगुणापवादौऽयम्' इत्यादि। ननु चासति सम्भवे बाधनं भवति, अस्ति च सम्भवो यदुभयं स्यादिति, तत्र गुणे कृतेऽमागमो भविष्यति? नैतदेवम्; सामान्यविहितो गुणः विशेषविहितस्त्वमागमः, सामान्यविहितस्य च विशेषविहितो बाधको भवति, यथा--ब्राह्मणेभ्यो दधिदीयतां तक्रं कौण्जन्यायेति। यथा सामान्यविहितस्य दधिदानस्य विशेषविहितं तक्रदानं बाधकं भवति तथेहापि युक्ताऽमागममेन गुणस्य बाधा। `अस्राक्षीत्, अद्राक्षीत्' इति। `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्, `अस्ति सिचोऽपृक्ते' (7.3.96) इतीट्, `वदव्रजहलन्तस्याचः' (7.2.3) इति वृद्धिः, `षढोः कः सि' (8.2.41) इति कत्वम्। `वृद्धिरमिकृते भवति' इति। अथ प्रागेव वृद्धिः कस्मान्न भवति? इत्याह--`पूर्वन्तु बाध्यते' इति। यथैव हि विशेषविहितत्वादमागमेन सामान्यविहितो गुणो बाध्यते, तथा वृद्धिरपि सामान्यविहितैवामागमे कृते पश्चात् पुनःप्रसङ्गविज्ञानात् सिद्धमिति सापि भवति। गुणस्त्वमागमे कृते न भवति; निमित्तस्य विहितत्वात्। न ह्यमागमे कृत उपधा लघ्वी गुणभाविन्युपपद्यते। अथेह कस्मान्न भवति--रज्जुसृड्भ्याम्, देवदृग्भ्यामिति; सत्यपि धात्वधिकारे `क्विबन्ता धातुत्वं न जहति (व्या.प.132) इति भ्याम्प्रत्ययमकितमाश्रित्यामागमः प्राप्नोति? इत्यत आह--`धातोः' इत्यादि।।

59. अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्। (6.1.59)
`उपदेश इति वर्तते' इति। अनुदात्तस्य विशेषणार्थम्। तेन त्रप्तेत्यत्र यद्यपि तृनि विहिते नित्स्वरेण धातोरुदात्तत्वम्, तथाप्युपदेशावस्थायामनुदात्त इत्यमागमः सिद्धो भवति; इह च वर्ढेति यद्यपि तृचि कृते धातुरनुदात्तो भवति, तथाप्युपदेशावस्थायान्नायमनुदात्त इत्यमागमो न प्रवर्तते; किमर्थं पुनरनुदात्तस्येत्युच्यते, अनिट इत्येव नोच्येत, एवं हि लघु सूत्रं भवति? इत्याह--`तृप प्रीणने' इत्यादि। तृप्यतिदृप्यत्योः `रधाधिभ्यश्च' (7.2.45) इतीट् विकल्प्यते, ततो यद्यनिट एवोच्येत, तदा पाक्षिकेणेटा नैतावनिटाविति तयोरमागमो न स्यत्। अथ पाक्षिकेणेङ्भावेन तयोर्निट्त्वादमागमो भवति, तथा च सति `वृहू उद्यमने (धा.पा.1347) इत्यस्यापि स्यात्, अयमप्यूदित्त्वात्, पाक्षिकेड्भावादनिड्भवति। तस्मान्न शक्यतेऽनिट इति वक्तुमित्यभिप्रायः। यदि तर्ह्यनयोरिड्विकल्प्यते, तदानुदात्तोपदेशः किमर्थः? स ह्येवमर्थः क्रियते--`अनुदात्तात्' (7.2.10) इतीट्प्रतिषेधो यथा स्यात्। यदि तर्ह्यनयोरिड्विकल्प्यते, किं तेन? इत्यत आह--`अनुदात्तोपदेशः पुनरमर्थ एव' इति। `वर्ढा' इति। `होः ढः' (8.2.31), `ष्टुना ष्टुः', (8.4.41) `ढो ढे लोपः' (8.3.13)। यदाप्युदात्तोपदेशस्तदेडत्र प्राप्नोति? इत्याह--`उदित्त्वात्' इत्यादि। `स्वरतिसूति' (7.2.44) इत्यादिनास्योदित्त्वादिड्विकल्प्यते, ततस्तेन सत्युदात्तत्वे पक्ष इडभावो न भवति। चकारोऽपमनुकर्षणार्थः। तेनोत्तरत्र तस्यानुवृत्तिर्न भवति।।

60. शीर्षंश्छन्दसि। (6.1.60)
किं पुनः कारणमादेशो नेष्यते? इत्याह--`सोऽपि हि' इत्यादि। यतः शिरःशब्दोऽपि च्छन्दति प्रयुच्यते, ततो नायमादेशः प्रयुज्यते। आदेशे हि सति शिरःशब्दस्य च्छन्दसि विषये प्रयोगो न स्यात्, निवृत्तिधर्मत्वात् स्थानिनः। यद्यन्यतरस्यांग्रहणमिहानुवर्त्तते तदादेशेऽप्यदोषः। `शीर्षा' इति। `नोपधायाः' (6.4.7) इति दीर्घः। क्वचित् शीर्ष्णेति पठ्यते, तत् तृतीयान्तं द्रष्टव्यम्। `अल्लोपोऽनः' (6.4.134) इत्यकारलोपः। `शीर्ष्णः' इति। षष्ठ्येकवचनान्तमेतत्।।

61. ये च तद्धिते। (6.1.61)

यदि यकारादावपि तद्धिते प्रकृत्यन्तरं विज्ञायते ततो यदि शिरःशब्दाद्यकारादिस्तद्धित उत्पद्यते, तदा तस्य श्रवणमापद्येत, न चेष्यते इत्यत आह--`आदेशोऽयमिष्यते' इति। स्वानिनोऽनुपादानादिहाप्यादेशी न युज्यत इत्यभिप्रायेणाह--`स कथम्' इति। `तद्धित इति हि' इत्यादि। यस्मादिह यकारादिस्तद्धितः परनिमित्तमुपा दीयते, न चानुपादाय प्रकृतिं तद्धित उत्पद्यते, न च शीर्षञ्शब्द एव प्रकृतिर्युक्ता; तस्य भाषायामसम्भवात्। स हि च्छन्दसि निपातितः, भाषायाञ्चेदम्। तस्मात् प्रकृत्यन्तरादुत्पन्ने यकारादौ तद्धिते विधीयमाने या तेन प्रकृतिराक्षिप्ता तस्या आदेशोऽयं विज्ञायते। आदेशोऽपि हि विज्ञायमानो न यस्य कस्यचिद्विज्ञायते, अपि तु शिरःशब्दस्यैव। यतः स तद्धितस्तदनुरूपां तस्यादेशस्य शब्दतश्चार्थतश्चान्तरतमां प्रकृति शिरःशब्दमेवाक्षिपति। `शीर्षण्यः' इति। अट्कुप्वादिना (8.4.2) णत्वम्।

`शिरस्यति' इति। `सुप आत्मनः क्यच्' (3.1.8)।

`वा केशेषु' इति। केशेष्वभिधेयेषु शिरशब्दस्य शीर्षन्नित्यादेशी वा वक्व्यो व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--अन्यतरस्यांग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञायते। तेन शिरसः केशेषु वा शीर्षन्नादोशो भविष्यतीति।।

62. अचि शीर्षः। (6.1.62)

`स्थौलशीर्षम्' इति। `तस्येदम्' (4.3.120) इत्यण्। किमर्थं पुनरादेशान्तरं विधीयते, न प्रकृत एव शीर्षन्नादेशो विधीयताम्? तत्रापि `नस्तद्धिते' (6.4.144) इति टिलोपे कृते सिध्यत्येवेष्टमित्याह--`शीर्षम्भावे' इत्यादि।

`ष्यङादेशे' कृते' इत्यादि। `अणिञोरनार्षयोः' (4.1.78) इत्यादिना, तस्य शीर्षस्य शिरःशब्दग्रहणेन ग्रहणादिति स्थानिवद्भावेन शीर्षन्नादेशः प्राप्नोतीति। `ये च तद्धिते' (6.1.61) इत्यनेनैव। `तत्र' इत्यादि। प्रकृतिभावप्राप्तिस्तु `ये चाभावकर्मणोः' (6.4.168) इत्यनेन। `हास्तिशीर्षण्या, हास्तिशीर्ष्या' इति। `यङश्चाप्' (4.1.74) इति चाप्। तत् कथमिति हास्तिशीर्ष्येति। कथमिष्टं सिध्यतीत्यर्थः। `कर्त्तव्योऽत्र यत्नः' इति। स पुनर्यत्नः--शिरस्याः केशा इत्यसय सिद्धये य एव प्रकृतः स ेव वेदितव्यः। व्यवस्थितविभाषयैव हि शीर्षशब्दस्य शिरःशब्देन ग्रहणाच्शीर्षन्नादेशो न भविष्यतीति; तेन हास्तिशीर्ष्येत्येवं भवति, न हास्तिशीर्षण्येति। `अणिञन्ताद्वा' इत्यादि। `अणिञोरनार्षयोः' (4.1.78) इत्यत्र सूत्रे द्वौ पक्षौ--अणिञोः स्थान आदेश ष्यङ् विधीयत इत्येकः पक्षः, अणिञन्तात् परः ष्यङ्प्रत्ययो भवतीति द्वितीयः तत्रादेशपक्षेऽयं दोषः आपततीत्यणिञन्तात् परः ष्यङाश्रयितव्य इति प्रत्ययपक्ष आश्रायितव्य इत्यर्थः। आदेशपक्षे `येत्नो वा कर्त्तव्यः' इति। विकल्पार्थो वा वाशब्दः। अथ तत्रापि प्रत्यपक्ष आश्रीयमाणे शीर्षस्य शीर्षन्नादेशः कस्मान्न भवति? इत्याह--`तत्र' इत्यादि। यदा प्रत्ययः ष्यङ् तदा तस्मिन् परतो योऽसाविञः `यस्येत च' (6.4.148) इति लोपस्तस्य पूर्वविधौ कर्त्तव्ये स्थानिवद्भावाद्व्यवधानम्। अतो यकारादेः शीर्षन्नादेशनिमित्तस्य तद्धितस्य व्यवधानादादेशो न प्राप्नोतीति भावः।।

63. पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु। (6.1.63)

इहापि शस्प्रभृतयो निमित्तत्वेनोपादीयन्ते, ते च प्रकृत्या विना नोपपद्यन्त इति भावः। तेषु प्रकृत्यन्तराद्विहितेषु विधीयमानाः पदादय आदेशा विज्ञायन्ते। न च स्थानिनोऽनुपादानादियमेनादेशप्रसङ्गः, यतस्तेष्वादिश्यमानेषु शस्प्रभृतयोऽनुरूपमेव पादादिकां स्वार्थिकीं प्रकृतिमाक्षिपन्तीत्याह--`पाददन्तनासिका' इत्यादि। पदित्याद्युदाहरणेषु पदो दत इति शसन्ते। `यूष्णः, दोष्णः, यक्नः, शक्नः' ति षष्ठ्येकवचनान्तानि। `अल्लोपोऽनः' (6.4.134) इत्यकारलोपः। `मासि, निशि, आसनि' इति सप्तम्येकवचनान्तानि। आसनीत्यत्र `विभाषाङिश्योः' (6.4.136) इति पक्षेऽकारलोपो न भवति। शेषाणि तृतीयैकवचनान्तानि। `पादौ, नासिके' इति प्रथमाद्विवचनान्ते।

कस्मात् पुनरन्यतरस्यामित्येतदनुवर्त्तयन्ति? इत्याह--`तेन पादादयोऽपि' इत्यादि। यस्मात् पादादयोऽपि प्रयुज्यन्ते तस्मादन्यतरस्यामित्यनुवर्त्तयन्ति। व्यवस्थावाचिनि प्रभृतिशब्द आश्रोयमाणे शस्प्रभृतिभ्योऽन्यत्रादेशो न सिध्यतीत्यभिप्रायेणाह--`प्रकारार्थे प्रभृतिशब्दः' इति। `दोषणी' इति। केचिदाहुः--प्रथमाद्विवचने दोषन्नादेशः, औङः शीभावः। अन्ये त्वाहुः--दोषणीति ङीबन्तमेतत्, ङीपि विषयभूते दोषन्नादेशः, ततः `ऋन्नेभ्यो ङीप्' (4.1.5)।

`नस्यम्' इति। हितार्थे `शरीरावयवाद्यत्' (5.1.6)। `नस्तः' इति। `अपादाने चाहीयरुहोः' (5.4.45) तसिः। `नःक्षुद्रः' इति। नासिका क्षुद्रा यस्येति बहुव्रीहिः।

`नासिक्यो वर्णः' इति। भवार्थे `शरीरावयवात्' (5.1.6) इति यत्। नासिक्यं नगरमिति अत्र हितार्थे यत्।।

64. धात्वादेः पः सः। (6.1.64)

`सिञ्चिति' इति। `शे मुचादीनाम्' (7.1.59) इति नुम्।

`षोडश' इति। षट् वा दश वास्येति `संख्यायाव्यय' (2.2.25) इत्यादिना बहुव्रीहिः, `संख्येये ङच्' (5.4.73) इत्यादिना समासान्तो ङच्। `षोडन्' इति। षट् दन्ता अस्येति बहव्रीहिः, `वयसि दन्तस्य दतृ' (5.4.141) इति दन्तशब्दस्य दत्रादेशः। `षष उत्त्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च' (वा.765) इति षष उत्वम्, उत्तरपदादेश्च ष्टुत्वम्--डकारः। `षण्डः' इति। प्रातिपदिकान्तमेतदव्युत्पन्नम्। `षडिकः इति। अनुकम्पितः षडङ्गुलिदत्त इति `बह्वचो

मनुष्यनाम्नष्ठच्' (5.3.78) इति ठच् ठाजादावूर्ध्वं द्वितीयादचः' (5.3.83) इत्यङ्गुलिदत्तशब्दस्य लोपः। ननु च `लिटि धातोः' (6.1.8) इत्यतोऽत्र धातुग्रहणमनुवर्त्तिष्यते, तदिह किं पुनर्धातुग्रहणेन? एवं तरह्हि एतज्ज्ञापयति--तन्निवृत्तमिति। तस्य ह्यनुवृत्तौ `लोपो व्योर्वलि (6.1.66) इत्ययमपि लोपो धात्ववयवस्यैव विज्ञायते। क्नूयी (धा.पा485), क्तः--क्नूतः क्ष्मयी (धा.पा.486), क्तः--क्ष्मात इत्यत्रैव स्यात्; गौधरः, पचेरन्नित्यत्र न स्यात्। नन्वेवमपि धातुग्रहणमनर्थकमेव, यस्मादुपदेश इति वर्त्तत एव, न च प्रातिपदिकानामुपदेशः, केषां तर्हि उपदेशः? धातूनाम्? नैतदस्ति; उपदेशाधिकारो.1युपदेशग्रहणेन षकारो विशिष्यते, षषश्च षकार उपदेशो भवति। `षष उत्त्वं दतृदशधासूत्तरपदादेः (वा.765) इति सूत्रे पाठात्। तस्मात् धातुग्रहणं कर्त्तव्यम्। `कषति' इति। भ्वादौ कषसिधेत्यादिहिसार्थो धातुवर्गे पठ्यते। `लषति' इति। `लष कान्तो'(धा.पा.888) अनयोरादिगारहणस्य भवति। ननु चोपदेशसामर्थ्यादेवात्र न भविष्यतीति, अन्यथा ह्युपदेशस्य वैयर्थ्यं स्यात्? नैतस्ति; अस्ति ह्यन्यतूपदेशस्य प्रयोजनम्। किं तत्?--`शेषे विभाषाऽकखादाववान्त उपेदेशे' (8.4.17) इत्यत्र केषेर्ग्रहणं मा भूत; लेषतुः, लेषुरिति षत्वं यथा स्यात्।

किमर्थं पुनः षादयो उपद्ष्टाः, न सादयो ह्युपदिश्येरन्, एवं ह्येतत् सूत्रं न कर्त्तवयं भवति? इत्यत आह--`आदेशप्रत्ययोः' इत्यादि। षत्वव्यवस्थां=षत्वनियमः। `आदेशप्रत्यययोः' (8.3.59) इत्यनेन सहादीनामेव षत्वव्यवस्था यथा स्थादित्येवमर्थम्। षादपः केचिदुपदिष्टाः अन्यथा सहादीनां षत्वार्थ यत्नान्तरं कर्त्तव्यं स्यात्। तच्च गुरु भवतीत्यभिप्रायः। यद्यपि षकारादिषु सन्देहो न भवति, सकारादिषु च भवत्येव। अत्र हि न ज्ञायते--किं षोपदेशा एव सन्तः `धात्वादेः षः सः' (6.1.64) इत्यनेन कृतसत्वा उच्चारिताः? उत सकारादय एव? इति सन्दिह्य पृच्छति--`के पुनस्ते' इति। `ये यथा पठ्यन्ते' इति। षादयो ये यथा पठ्यन्ते सन्निधानात् त एव षोपदेशा अवगन्तव्याः। `अज्दन्त्यपराः' इत्यादि। अज्दन्त्यौ परौ येषामिति तेऽब्दन्त्यपराः। परशब्दोऽत्रावयवे वर्त्तते। तच्चाच्दन्त्ययोः परत्वमवयवान्तरापेक्षं विज्ञायमानं सन्निधानात् सकारापेक्षं विज्ञायते। `स्मिस्विदिस्वञ्जिस्वपयश्च' इति। `ष्मिङ्ईषद्धमने' (धा.पा.948), `ञिष्विदा गात्रप्रक्षरणे' (धा.पा.1188), `ष्वन्ज परिष्वङ्गे' (धा.पा.976) `ञिष्वप् शये' (धा.पा.1068) एते स्वरूपेणाख्यायन्ते; मकारवकारयोरज्दन्त्यत्वाभावात्। केचित् स्मिस्वदिस्वदिस्वञ्जिस्वपयश्चेति स्विदिस्थाने स्वदिं पठन्ति, तेषां `तेषां स्वद [`ष्वद'--धातुपाठः ] स्वर्द आस्वादने' (धा.पा.18,19) इति स्वदिरपि षोपदेश एव। `सृपिसृजिस्तृस्त्यासेकृसृवर्जम्' इति। `गम्लु सुप्लृ गतौ (धा.पा.982,983), `सृज विसर्गे (धा.पा.1178), `स्तृञ् आच्छादने' (धा.पा.1252), `ष्टय स्त्यै शब्दसङ्घातयोः', (धा.पा.911,910) `सेक [सेकृ, स्रेक--धा.पा.] सेकृ श्रकि श्लकि गत्यर्थाः' (धा.पा.81,82,84,85), `सृ गतौ' (धा.पा.935) एतान् वर्जयित्वा येऽन्येऽज्दन्ततत्यपरास्ते षोपदेशाः।

`सुब्धातु' इत्यादि। सुब्धातुः क्यजाद्यन्तः। `ष्ठिच् निरसने' (धा.पा.560), `ष्वक्क [अत्रत्याःधातवः केचन धातुपाठे न सन्ति] वुक्क मक्कतिक्क टिक्क टीक्क वगि लगि गत्यर्थाः--एषां प्रतिषेधो वक्तव्यो व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--सुब्धातौतावत् षोडीयतीत्यादौ नैव धात्वादिः षकारः, तथा ह्यादिरवयवः। आरम्भकश्चावयवो भवति, सुब्दातुः सबन्तेन क्यचा चारभ्यते। न च षकारेणापि वर्णान्तरेणेति कुतस्तस्य षकारादित्वम्? सहादयस्तु षकारादिभिरेव वर्णेरारभ्यन्त इति युक्तं तेषां षकारादित्वम्। ष्ठिवेरपि निपातनान्न भवति, किं तन्निपातनम्? `ष्टिवुक्लमुचमां शिति' (7.3.75) इति। यस्य हि सत्वं भवति तमयं प्रदेशेषु कृतसत्बमेवोच्चारयति यथा प्रदेशे--`स्थाध्वोरिच्च' (1.2.17) इति। ष्वक्केरप्यज्दन्त्यपरा इत्यनेन निवर्त्तितत्वान्न भवति। वकारस्य दन्त्यौष्ठ्यत्वादज्दन्त्यग्रहणेन न गृह्यते। अथ वा यादित्यात् ष्ठिवुष्वक्कोर्न भविष्यति, यकारस्तु लुप्तनिर्दिष्टत्वान्न श्रूयते। अथ वा--अन्यतरस्यांग्रहणमत्रानुवर्त्तते सा च व्यवस्थितविभाषा विज्ञायते, तेन सुब्धात्वादीनां न भवतीति। `ष्ठीवति' इति। `ष्ठिवुक्लमुचमां शिति' (7.3.75) इति दीर्घः। `ष्वक्कते' इति। अनुदात्तेत्त्वादात्मनेपदम्। अथ ष्ठिवो द्वितीयवर्णः किं ठकार इष्यते? उत थकारः? यदि ठकारस्तदा सिद्धम्--टेष्ठीष्यत इति, न सिध्यति--तेष्ठीव्यत इति, `अभ्यासे चर्च्च' (8.4.54) इति टकार एवान्तरतमष्ठकारस्य स्थाने प्राप्नोतीति कृत्वा; अथ थकारस्तदा सिद्धम्--तेष्ठीव्यत इति, एतन्न सिध्यति--टेष्ठीव्यत इति, आन्तरतम्याद्विधीयमानस्थकारस्य स्थाने तकार एव प्राप्नोतीत्यत आह--`ष्ठिवु इत्येतस्य' इत्यादि। ब्यासस्य द्वैरूप्यं यथा स्यादिति। केचिदाचार्येम शिष्या `ठकारोऽयम्' इत्युपदिष्टाः। अपरे पुनः `थकारोऽयं ष्टुत्वेन ठकारः श्रूयते' इतीममर्थं ग्राहिताः। उभयं चैतत् प्रयोजनम्। अन्ये पुनरहुः--ष्ठिवुर्दिवादिष्वपि पुनरधीयते, तत्रैकस्य द्वितोयस्थाकारः, अपरस्य तु ठकार इति। तेष्ठीव्यत इति `शर्पूर्वाः खयः' (7.4.61) शेषः।।

65. णो नः। (6.1.65)

`सुब्धातोरयमपि नेष्यते' इति। पूर्वस्मदेव हेतोः। `उपसर्गादसमासेऽपि' इत्यादि। अत्र पूर्वानुसारेण पूर्वपक्षो विज्ञेयः। `नृतीनन्दि' इत्यादि। `नृती गात्रविक्षेेपे' (धा.पा.1116), `टुनदि समृद्धौ' (धा.पा.67), `नर्द गर्द शब्दे' (धा.पा.56,57), `नक्क वक्क [`धक्क'--घातुपाठः] नाशने' (धा.पा.1593,1594), `नट अवस्यन्दने' [अवस्पन्दने--घातुपाठः] (धाचपा.1545) चुरादिणिजन्तः, `नाथृ नाधृ याञ्चोपतापैश्वर्याशीःषु' (धा.पा.6.7), `नृ नये' (धा.पा.809,1495)।।

66. लोपो व्योर्वलि। (6.1.66)

`लिटि धातोः' (6.1.8) इत्यस्य धातुग्रहणस्य दृष्टानुवृत्तिसामर्थ्यादिहाप्यनुवृत्तिरिति मन्यमानस्य धातोरेवायं वलि व्यलोपो विधीयत इति कस्याचिद्भ्रान्तिः स्यात्, अतस्तं निरकर्त्तुमाह--`धातोरिति यत् प्रकृतम्' इत्यादि। `दिदिवान्' इति। दिवेः क्वसौ रूपम्। `ऊयी' इति। `ऊयी तन्तुसन्ताने (धा.पा.483)

`क्नूयो' इति। `क्नूयी शब्दे' (धा.पा.485) `गौदेरः' इति। `गोधाया ढ्रक्' (4.1.129) ढस्यैयादेशः, यकारलोपः। `पचेरन्' इति। सीयुड्यकारस्य लोपः। `जीवेः' इति। `जीव प्राणधारणे' (धा.पा.562) इत्यस्य। `स्रिवेः' इति। `स्रिवु गतिशोषणयोः' (धा.पा.1109) इत्येतस्य। `आस्रेमाणम्' इति। औणादिकोऽयं मनिन्। कथं पुनरेतदिहोदाहरणम्, यावता परत्वात् `वार्णादाङ्गं बलीयो भवति' (व्या.प.39) इति बलीयस्त्वात् `च्छ्वोः शूडनुनासिके च' (6.4.19) इत्यादिनोठादेशेनात्र भवितव्यम्? इत्यत आह--`उणादयो बहुलम्' इत्यादि। बहुलग्रहणस्य सर्वविधिव्यभिचारार्थत्वान्न भवत्येष दोषप्रसङ्ग इति।

पश्चाल्लोपग्रहणे क्रियमाणे पकारात् परेणाध्यर्धमात्रोच्चारयितव्या भवति, अकगारो हि मात्रा, विसजं नीयस्त्वर्धमात्रः। पूर्वं तु लोपग्रहणे क्रियमाणे मात्राद्वयमुच्चारयितव्यं जायते; ओकारस्य द्विमात्रिकत्वात्। तत्र लाघवार्थं पश्चादेव लोपग्रहणं कर्त्तु युक्तम्, तत् किं पूर्वं क्रियते? इत्यत आह--`पूर्वम्' इत्यादि। अन्यस्तु पूर्व कार्यिनिर्देशो युक्तः, पश्चात् कर्यनिर्देश इति पूर्व व्योर्ग्रहणे कर्त्तव्ये किमर्थ लोपग्रहणं क्रियत इति पूर्वपक्षं वर्णयति, स चायुक्तः `लुगणिञोः' (2.4.58) इत्यत्र कार्यस्यापि पूर्व निदशात्। `वेरपृक्तलोपात्' इत्यादि। कण्डूयतेर्लोलूयतेश्च क्विपि कृते वलि लोपात् परत्वात् कृताकृतप्रसङ्गित्वेन नित्यत्वाच्च पूर्वं वेरपृक्तलोप एव स्यात्। अस्मिंश्च सति निमित्ताभावात् वर्णाश्रये प्रत्ययलक्षणाभाद्ववलि लोपो न स्यात् तस्मात् पूर्वं लोपग्रहणं क्रियते--वलि लोप एव पूर्वं यथा स्यात्। पूर्वं लोपग्रहणे ह्ययमर्थः सूच्यते--वेरृक्तलोपत् पूर्व वलि लोप एव कर्त्तव्यमिति। `कण्डूः' इति। `अतो लोपः' (6.4.48) इत्यकारलोपः। क्विलुगुपधात्वचङ्गपरनिह्रसिकुत्वेषु न स्थानिवत्' (1.1.58 वा.2) इत्यकारस्य स्थानिवद्भावो न भवति वलि लोपः। अथ व्रश्चकः, व्रश्चन इत्यत्र रेफे वलि परतो वकगारलोपः कस्मान्न भवति? इत्याह--`व्रश्चादीनाम्' इत्यादि। यद्येषामपि लोपः स्यात्, वकारोच्चारणमनर्थकं स्यात्। अतश्चोच्चारणसामर्थ्याद्व्रश्चादीनां वलि लोपो न भवति। स्यादेतत्--वृश्चति, वव्रश्चेत्यत्र सम्प्रसारणे हलादिशेषे च वकारस्य श्रवणं यथा स्यात्, तत् कुत उपदेशस्य वैयर्थ्यम्? अत आह--`वृश्चति' इत्यादि। यथा व्रश्चक इत्यादौ लोपस्य प्राप्तिः, एवं वृश्चतीत्यादावपि सम्प्रसारणादौ कार्ये कृतेऽपि; तस्य बहिरङ्गत्वेनासिद्धत्वात्। तत्र सम्प्रसारणं ङित्प्रत्ययापेक्षत्वात् बहिरङ्गम्। हलादिशेषेऽभ्यासापेक्षत्वाद्बहिरङ्गः, वलि यलोपस्तु वर्णमात्राश्रयत्वादन्तरङ्गः। तस्मात् सर्वत्रैव व्रश्चेर्वकारलोपः प्राप्नोति। क्रियते चास्यो पदेशः, अत उपदेशसामर्थ्यान्न भविष्यतीति तदेवावस्थितम्।।

67. वेरपृक्तस्य। (6.1.67)

`वेः' इत्यादि। क्विबादेरन्यस्य वेरपृक्तसंज्ञकसयाभावात् क्विबादय एव गृह्यन्ते, कथं पुनर्वेरित्युच्यमाने क्विबादीनां सामान्येन ग्रहणमुपपद्यते, यावता प्रकारादयस्येषां विशेषा अनुबन्धाः सन्ति? इति चोद्यनिरासाये दमुक्तम्--`विशेषाननुबन्धानुत्सृज्य' इति। `ब्रह्महा, भ्रूणहा' इति। `सौ च' (6.4.13) इति दीर्घः `घृतस्पृक्' इति। `क्विन्प्रत्ययस्य कुः' (8.2.62) इति कुत्वम्। `अर्धभाक्'
इति। `चोः कुः' (8.2.30) इति कुत्वम्।
दर्विरित्यादौ `उणादयो बहुलम्' (3.3.1) इति बहुलग्रहणादेव लोपो न भवतीति शक्यते वक्तुम्, अतः प्रपञ्चार्थम्। वैचित्र्यार्थं वाऽपृक्तग्रहणम्।।

68. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्त हल्। (6.1.68)

यदि लोप इति इहानुवर्त्तमानं शास्त्रीयेणार्थेनैवार्थवत् स्यात् तदा तेन हलित्यस्य प्रथमान्तस्य सामानाधिकरण्येन सम्बन्धो नोपपद्यते। शास्त्रीयस्य हि लोपशब्दस्यार्थः---दर्शनाभावः=आदर्शनम्, न च हलदर्शनं भवति। न च `हल्ङ्याब्भ्यः' इति पञ्चमी हलिति प्रथमायाः षष्ठीत्वं प्रकल्पयिष्यति। सामर्थ्याद्वा हलित्यस्य षष्ठ्यन्ततया विपरिणामो भविष्यति, अतः षष्ठ्यन्तस्य लोपशब्देन सम्बन्धो भवष्यतीति शक्यं प्रकल्पयितुम्; अकृतार्थत्वात् प्रथमायाः षष्ठीभावस्यानुपपत्तेरित्येतदालोच्याह--`तदिह' इत्यादि। `लुप्यत इति लोपः'। कर्मणि घञ्। एतेन लौकिकार्थेनार्थवत्त्वं लोपशब्दस्य दर्शयति। लुप्यत इति निरुध्यत इत्यर्थः। लौकिकेनार्थेनार्थवता कर्मसाधनेन लोपशब्देन हलित्येतस्य विशेषणविशेष्यबाव उपपद्यते। लोपशब्देन हि लुप्यमानं वर्णमात्रमुच्यते। `सुतिस्यपृक्तं हल्' इति। अनेन च तदेव विशिष्यते। `दीर्घात्' इति। एतच्च ङ्यापोरेव विशेषणम्; सम्भवाव्यभिचारात्, न तु हलन्तस्य; असम्भवात्। `उखास्रत्; पर्णध्वत् इति। `स्रन्सु ध्वन्सु अधःपतने;, (धा.पा.754,755) उखायां स्रंसते पर्णानि ध्वंसत इति क्विप् `अनिदिताम्' (8.4.56) चर्त्वम्--तकारः। `कुमारी' ति। `वयसि प्रथमे' (4.1.20) इति ङीष्। `गौरी' इति। `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीष्। `शाङ्र्गरवी' इति। `शाङ्र्गरवाद्यञो ङीन्' (4.1.13) इति डाप्। `कारीषगन्ध्या इति। `यङ्श्चाप्' (4.1.74)।
`हलन्तादेव तिलोपः सिलोपश्च' इति। ननु ङ्याबन्तादित्येकारेण दर्शयति, न हि ङ्याबन्तात् परौ तिसी सम्भवतः, धातोरेव परस्य लकारस्य तयोर्विधानात्। `अबिभर्भवान्' इति। गुणे रपरत्वे च कृते तिलोपः। `अजागर्भवान्' इति। `जाग्रोऽविचिण्णल्ङित्सु' (7.3.85) इति गुणः। भवानित्यनुप्रयोगस्तिशब्दाभिव्यक्तये। `अभिनः' इति। भिदेर्लङ् `दश्च' (8.2.75) इति रुत्वम्, `अतो रोरप्लुतादप्लुते' (6.1.113) इत्युत्त्वम्, इनमोऽकारेण सह `आद् गुणः, (6.1.87) `एङः पदान्तादति' (6.1.109) इति पूर्वरूपत्वम्। `ग्रामणीः' इति। ग्रामं नयतीति `सत्सूद्विष' (3.2.61) इत्यादिना क्विप्। `निष्कौशाम्बिः' इति निर्गतः कौशाम्ब्या इति प्रादिसमासः, `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति ह्रस्वत्वम्। `अतिखटवः' इति। खट्वामतिक्रान्त इति पूर्ववत् समासे कृते ह्रस्वः। `अभैत्सीत्' इति। `वदव्रज' (7.2.3) इति वृद्धिः, अपृक्त इट्। ननु सीति सामान्येन निदशात् सिचोऽपि गरहणम्, अतो न युक्तमिदं प्रत्युदाहरणम्? अत आह--`तिसहचरितस्य' इत्यादि। तिङ्तिशब्देन साहचर्यात् तिङ् एव सेर्ग्रहणम्, न सिच इति

किमत्रायुक्तम्। `बिभेद' इति। णलोऽकारोऽत्र भवत्यपृकतः, न तु हल् इति नासौ लुप्यते।

`संयोगान्तलोपेनैव सिद्धम्' इति। राजेत्यादिकमुदाहरणमिति शेषः। कथं पुनर्न सिध्यति? इत्यत आह--`राजा, तक्षा' इत्यादि। यथा पचन्नित्यत्र संयोगान्तलोपस्यासिद्धत्वान्नलोपो न भवति; तथा राजा, तक्षेत्यादावपि न स्यात्। संयोगान्तलोपासिद्धत्वं चात्र पारम्पर्येण हेतुः। तस्मिन् सति हि सौ परतः पूर्वस्य पदसंज्ञा न भवति; `असर्वनामस्थाने' (1.4.17) इति प्रतिषेधात्। तस्यां चासत्यां पदस्येत्युच्यमानो नलोपो न स्यात्, नलोपे चासति राजेत्यादिकं रूपं न सिध्येत्। `दत्वम्' इति। न स्यादिति प्रकृतेन सम्बन्धनीयम्। दत्वमपि हि संयोगान्तलोपस्यासिद्धत्वादसत्यां पदसंज्ञायां न स्यात्। अथ वा--संयोगान्तलोपोऽत्र न प्रवर्त्तत एव, तस्य `स्कोःसंयोगाद्योरन्ते च' (8.2.29) इति संयोगादिलोपोऽपवादभूत इति स एव स्यात्, यथा--काष्ठं तक्ष्णोतीति काष्ठतङित्यत्र। तस्मिंश्च सति विभक्तिसकारस्य रुत्वविसर्गौ स्यातामिति कुतो दत्त्वम्! `उत्त्वम्' इति। न स्यादित्यपेक्षते, एतदपि संयोगान्तलोपस्यासिद्धत्वात्। अलब्धपदव्यपदेशस्य न स्यात्। `रात्सस्य' (8.2.24) इति `नियमात्' इति। `संयोगान्तस्य लोपः' (8.2.23) इत्यनेनैव सिद्धेः। `रात्सस्य' (8.2.24) इति `नियमात्' इति। `संयोगान्तस्य लोपः' (8.2.23) इत्यनेनैव सिद्धेः। `रात्सस्य' (8.2.24) इति नियमार्थमिदम्--रात्सस्यैव लोपो यथा स्यात्, नान्यस्येति। ततश्चाबिभर्भवानित्यत्र तकारस्य लोप एव न स्यात्। तस्मात् संयोगान्तलोपेन न सिध्यतीति हलन्ताल्लोप उच्यते।

अस्यैवार्थस्य सुखोपग्रहणार्थं `संयोगान्तस्यलोपे हि' इत्यादि। सङ्ग्रहश्लोकस्योपन्यासः। हिशब्दो हेतौ। यस्मात् संयोगान्तलोप आश्रीयमाणे नलोपादिकं कार्यं न सिध्यतीति। किञ्च--ते=तव, भवतः संयोगान्तलोपवादिनः रात्तु रेफात्तु परस्य तकारस्याबिभर्भवानजगर्भवानित्यत्र नैव लोपः स्यात्। तस्माद्दलन्तात् सुतिसीनां लोपो विधीयते।।

69. एङ्ह्रस्वात्सम्बुद्धेः। (6.1.69)

`हलिति च' इति। वर्त्तत इत्यपेक्षते। यदि हलिति नानुवर्त्तेत, तदा हे कुण्ड+सु इति स्थिते लोपात् परत्वादम्भावे कृते `आदेः परस्य' (1.1.54) इत्यकारलोपे `सुपि च' (7.3.102) इति दीर्घत्वे च हे कुण्डमित्यनिष्टं रूपं स्यादित्यभिप्रायः। `अपृक्तमिति नाधिक्रियते' इति। यदि ह्यपृक्तमिहानुवर्तेत, तर्हि हे कुण्डेत्यत्र लोपो न स्यात्; अपृक्तसंज्ञाया अभावादिति भावः। कथं पुनर्ज्ञायते--अपुक्त इह नानुवर्त्तते? इत्याह--`तथा च' इत्यादि। तथा चेति हितौ। यस्मात् पूर्वसूत्रेऽपृक्तग्रहणं कृतमतोऽवसीयते--नात्र प्रकरणेऽपृक्तग्रहणस्यानुवृत्तिरस्तौति; अन्यथा हि `वेरपृक्तस्य' (6.1.67) इत्यत एवापृक्तग्रहणमनुवर्त्तिष्यत इति पुनरपृक्तग्रहणं पूर्वसूत्रे न क्रियेतेति। `स चेत् सम्बुद्धेर्भवति' इति। यदि सम्बुद्धेः सम्बद्धो भवतीत्यर्थः। एतेन सम्बुद्धेरित्यस्यावयवषष्ठ्यन्ततां दर्शयति। `हे अग्ने, हे वायो' इति। `ह्रस्वस्य गुणः' (7.3.108)। `हे नदि, हे वधु' इति। `अम्बार्थनद्योर्ह्रस्वः' (7.3.107) इति ह्रस्वत्वम्। `हल्मात्रस्य मकारस्य लोपः' इति। हलित्यनुवृत्तेः।

हे कतरदित्यत्रैकादेशे कृते ह्रस्वात् सम्बुद्धेर्हल् भवतीति तस्य लोपः कस्मान्न भवति? इत्याह--`हे कतरत्' इत्यादि। `अद्ड्डतरादिभ्यः' (7.1.25) इत्यत्र द्विडकारनिर्देशात् डिच्छब्द आदेशो भवतीति डित्वाट् टिलोपे ह्रसवो नास्तीति न भवति लोपः।

अथैङ्ग्रहणं किमर्थम्, यावता हे अग्ने इत्यादावपि प्रागेव सम्बुद्धिगुणाद् ह्रस्वादित्येवं लोपे न भवितव्यम्? इत्यत आह--`एङ्ग्रहणम्' इत्यादि। नित्यत्वात् परत्वाच्च सम्बुद्धिगुमो बलीयानिति तनैव तावत् भवितव्यम्, तत्र कृते ह्रस्वात् परः सम्बुद्धेर्हल् न सम्भवतीति लोपो न प्राप्नोति, अत एङ्ग्रहणं क्रियते। ननु च विहितविशेषणं विज्ञास्यते--ह्रस्वाद्विहितायाः सम्बुद्धेरिति? नैतदस्ति; एका हीयं पञ्चमी, तत्र यदि ह्रस्वाद्विहिति विशेषणं विज्ञायते तदैङन्तादपि विज्ञायेत। तथा च --हे गौरित्यत्रापि स्यात्। तस्मादेङ्ग्रहणं कर्त्तव्यम्।।

70. शेश्छन्दसि बहुलम्। (6.1.70)

`जस्शसोः शिः' (7.1.20) इति यः शिरादेशस्तस्यायं लोपो विधीयते। `या क्षेत्रा, या वना' इति। शेर्लोपे कृते प्रत्यलक्षणेन `नपुंसकस्य झलचः' (7.1.72) इति नुम्, `सर्वनामस्थाने चासम्बुद्धौ' (6.4.8) इति दीर्घः, `नलोपः प्रातिपदिकान्तस्य (8.2.7) इति नलोपः।

वेति कर्त्तव्ये बहुलग्रहणं सर्वविधिव्यभिचारार्थम्। `तेन सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पु.प.वृ.56), इत्युपपन्नं भवति।।

71. ह्रस्वस्य पिति कृति तुक्। (6.1.71)

कृतात्र प्रत्ययेन धातुरुपस्थाप्यते, ह्रस्वेन च स एव विशेष्यते, च तदन्तविधिर्भवतीत्यतो ह्रस्वान्तो धातुरागमी विज्ञायत इत्याह--`ह्रस्वान्तस्य धातोः' इत्यादि। `अग्निचित्' इति। `अग्नौ चेः' (3.2.91) इति क्विप्। `सोमसुत्' इति। `सोमे सुञः' (3.2.90) इत्युभयत्रोपपदसमासः। `प्रकृत्य'इत्यादौ प्रादिसमासः। `समासेऽनञ्पूर्वे क्त्वो ल्यप्' (7.1.37) इति ल्यप्।

अथ ग्रामं नयतीति--ग्रामणि ब्राहमणकुलमित्यत्र नपुंसकह्रस्वत्वे कृते ह्रस्वाश्रयस्तुक् कस्मान्न भवति? इत्याह--`ग्रामणि ब्राह्मणकुलम्' इत्यादि। ह्रस्वत्वं हि नपुंसकार्थवृत्तिप्रातिपदिकमपेक्षत इति बहिरङ्गम्, अन्तरङ्गस्तु तुक्; वर्णमात्रापेक्षतावत्। `आसिद्धं बहिरङ्गमन्तरङ्गे (व्या.प.42) इति तुग्नात्र भवति।।

72. संहितायाम्। (6.1.72)
`संहितायाम्' इति विषयसप्तमीयम्। तेन यदि कार्यिनिमित्तयोः संहिता विषयभूता भवति, तर्ह्येवं वक्ष्यमाणं कार्यं भवति; नान्यर्थेति वेदितव्यम्।

73. छे च। (6.1.73)
`छे' इति यद्यप्यकारवतश्छकारादेषा सप्तमी तथापि च्छकार एव केवलस्तुको निमित्तम्, अकारस्तूच्चारणार्थः। एतच्च `इजादेश्च गुरुमतोऽनृच्छः' (3.1.36) इत्याम्प्रतिषेधादवसीयते। यदि ह्यकारसहितश्छकारस्तुको निमित्तं स्यात्, तदा ऋच्छेस्तुगभावादसति गुरुमत्वं आमः प्रसङ्गो नास्तीति प्रतिषेधं न कुर्यात्। `इच्छति' इति। `इषुगमियमां छः' (7.3.77) तुक् चुत्वम्।
पूर्वस्मिंस्तुग्विधौ ह्रस्वान्त आगमी, अतः स एवात्रागमीति कस्य चिद् भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह--`ह्रस्व एव' इत्यादि। एवं मन्यते--ह्रस्वानुकर्षणार्थश्चकारोऽत्र क्रियते--ह्रसव एवागमी यथा स्यात्, तदन्तो मा भूदित्येवमर्थम्'; अन्यथा स्वरितत्वादनन्तरत्त्वाच्च पूर्वसूत्रे य आगमी, स एवेहापि विज्ञास्यत इत्यनर्थकश्चकारः स्यात्, ह्रस्व एवागमिनि सति किमिष्टं सिध्यति, यतस्तदर्तोऽयं यत्नः क्रियते? इत्याह--`तेन' इत्यादि। यदि ह्रस्वान्तस्य तुक् स्यात् तदा चिच्छिदतुरित्यादौ तस्याभ्यासग्रहणेन ग्रहणाद्धलादिशेषेण निवृत्तिः स्यात्। ह्रस्वे त्वागमिनि नायमभ्यासस्य हलिति न भवत्येव दोषः।
कथं पुनर्ह्रस्व आगमिनि तुगब्यासग्रहणेन गृह्यते? इत्याह--`नावयवावयवः' इत्यादि। इतिकरणो हेतौ। यस्मादवयवस्य योऽवयवः स समुदायस्यावयवो न भवति। तस्मात् ह्रस्व एवागमिनि तुकोऽभ्यासग्रहणेन न ग्रहणं भवति। नावयवावयवः समुदायस्यावयवो भवतीत्यत्र चैतत् सूत्रविहितस्तुगित्याभिप्रायो वेदितव्यः। यदि ह्यविशेषेणावयवावयवः समुदायावयवो न स्यात्, एवं सति `शेरते' इत्यत्र रुडागमः सावैधातुकस्याव्यवस्य झादेशस्यातोऽवय इति सोऽपि समुदायस्य सार्वधातुकस्यावयवो न स्यात्। ततः `शीङः सार्वधातुके गुणः' (7.4.21) इति गुणो न स्यात्; रुटा सार्वधातुकस्य व्यवहितत्वात् स ह्यवयव उक्तस्तमेव व्यवदध्यात्, स समुदायं तु न व्यवदधात्येव। तस्मात् पूर्वोक्त एवाभिप्रायो वृत्तिकारस्य वेदितव्यः।
कस्मात् पुनरेतत् सत्रविहितोऽवयवावयवः समुदायस्यावयवो न भवति? ह्रस्वानुकर्षणार्थचकारकरण सामर्थ्यात्। स हि चकारो ह्रस्वानुकर्षणार्थ एवमर्थः क्रियते--ह्रस्वमात्र आगमिनि तुकोऽभ्यासग्रहणेनाग्रहणाद्धलादिशेषेण निवृत्तिर्मा भूदिति। यदि चैतत्सूत्रविहितोऽप्यवयवायवः समुदायावयवः स्यात्, तदा ह्रस्वेऽप्यागमिनि तुकस्तु तदवयवयस्याप्यभ्यासग्रहणेन ग्रहणाद्धलादिशेषेण निवृत्त्या भवितव्यमिति चकारो ह्रस्वानुकर्षणार्थो निष्फलः स्यात्। तस्मादयमेव तुगवयवावयवः समुदायावयवो न भवति, अन्यस्तु भवत्येव। युक्तं चैतत्। तथा हि बाहोर्योऽवयवो हस्तः स देवदत्तस्याप्यवयवो भवत्येव, अन्यथा हस्तावन् देवदत्त इति प्रयोगो न स्यात्।

74. आङ्माङोश्च। (6.1.74)
अत्राकारो ङिदुपात्तः स चेषदादावर्ते वर्त्तत इत्याह--`आङ्' [`अङः' काशिका, पदमञ्जरी च] इत्यादि। माशब्दोऽपि ङिदुपात्तः, सोऽपि निषेधे वर्तत इत्याह--`माङश्च प्रतिषेधवचनस्य' इति। `आच्छादयति' इत्यादि। `छद अपवारणे' (धा.प.1935)
चौरादिकः। अत्र `छादनक्रियाङा विशिष्यत इति स क्रियायोगे वर्त्तते। `आच्छायायाः' इति। मर्यादायामङ्। छायाम्=मर्यादां परिवृत्त्येत्यर्थः. `आङ् मर्यादावचने (1.4.89) इत्याङश्च कर्मप्रवचनीयसंज्ञकस्य योगे `पञ्चम्यपाङ्परिभिः' (2.3.10) इति पञ्चमी। `आच्छायम्' इति। छायामभिव्याप्येत्यर्थः। `आङ्मर्यादाभिविव्योः' (2.1.13) इति पञ्चम्यन्तेनाव्ययीभावः, `नाव्ययीभावादतोऽम्त्वपञ्चम्याः' (2.4.83) इति विभक्तेर्लुगम्भावश्च। `मा च्छिदत् इति। इरित्त्वाच्चलेरङ्।
`आछाया, आच्छाया' इति। अत्राकारः स्मरणए वर्त्तते, तत्र चास्य ङित्त्वं नास्ति; `वाक्यस्मरणयोरङित्' इति वचनात्। तेनात्र `पदान्ताद्वा' (6.1.76) इति विकल्पो भवति।
`प्रमाछन्दः' इति। `माङ् माने' (धा.पा.1142) प्रपूर्वः `आतश्चोपसर्गे' (3.3.106) इत्यङ्, स्त्रियाम् `अजाद्यतष्टाप्' (4.1.4)। ननु च लाक्षणिकत्वादेवात्र न भविष्यति? नैतदस्ति; `गामादाग्रहणेष्वविशेषः' (व्या.प.124) इति वचनात्।।

75. दीर्घात्। (6.1.75)
`उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' (शाकटायन.प.97) दीर्घादिति पञ्चम्याश्छे इत्यस्याः सप्तम्याः षष्ठ्यां प्रकल्पितायाम् `तस्मादित्युत्तरस्य' (1.1.67) इति च्छकारस्यैव तुक् प्राप्नोतीति कस्याचिद्भ्रान्तिः स्यत्त, अतस्तां निराकर्त्तुमाह--`दीर्गात् परो यश्छकारः तस्मिन् परतः पूर्वस्य' इत्यादि। एवं मन्यते--`तस्मादित्यत्तरस्य' (1.1.67) इत्यत्र तस्मादिति योगविभागः कर्त्तव्यः, `पूर्वस्य' इति पूर्वसूत्रादनुवर्त्तते, तेन दीर्घादित्यादौ सत्यपि पञ्चमीनिर्देशे पूर्वस्यैव कार्यं भवति, नोत्तरस्य। न चातिप्रसङ्गः योगविभागादिष्टसिद्धेरिति। `ह्रीच्छति' इति। `ह्रीच्छ लज्जायाम्' (धा.पा.210)।
`म्लेच्छति' इति। `म्लेच्छ अव्यक्तायां वाचि' (धा.पा.1662)। `अपचाच्छायते' इति। `छो छेदने' (धा.पा.1146), `आदेच उपदेशेऽशिति' (6.1.45) इत्यात्वम्, यङ् `दीर्घोऽकितः' (7.4.83) इत्याभ्यासस्य दीर्घः।।

76. पदान्ताद्वा। (6.1.76)

`कुटीछाया' इति। षष्ठीसमासः, असमासो वा।
`दिश्वजनादीनाम्' इत्यादि। `विश्वजन' इत्येवमादीनां छन्दसि विषये विकल्पेन तुग्भवतीत्येतदर्थरूपं व्याख्येमित्यर्थः। तत्रेदं व्याख्यानम्--`सर्वे विधयश्चन्दसि विकल्प्यन्ते' (पु.प.वृ.56) इति प्राक् प्रतिपादितमेतत्। तेन विश्वजनादीनां छन्दसि वा तुग्भवतीति।।

77. इको यणचि। (6.1.77)
`इको यणादेशो भवति' इति। इकां यणां च साम्यात् यथासंख्यं भवतीति वेदितव्यम्। यश्च सवर्णोऽच् तत्र दीर्घविधानसामर्थ्यात् असवर्णेऽचि यणादेशो विज्ञायत इति। इक इति किम्? वागत्रेत्यत्र कुत्वादेव सिद्धत्वाद्यणादेशो मा भूदिति। अचीति किम्? दधि करोति।
`प्लुतपूर्वस्य' इति। प्लुतः पूर्वो यस्मात् स प्लुतपूर्वः। वक्तव्यः=व्याख्येयः। तत्रेदं व्याख्यानम्--`इको यणचि' इत्यत्र तन्त्रेण द्वौ योगावृच्चारितौ; तत्रैको यणादेशार्थः, अपरस्त्विकः प्लुतपूर्वस्य सवर्णदीर्घबाधनार्थो भविष्यतीति। भो यिदम्--भो+इ+इदमिति स्थिते `गुरोरनृतोऽनन्तस्याप्येकैकस्य प्राचाम्' (8.2.86) इत्यनेन दूराद्धूतेऽर्थे भोशब्दस्य प्लुतः कृतः, ततः सवर्णदीर्घत्वे प्राप्ते यणादेशः।।

78. एचोऽयवायावः। (6.1.78)
`कयेते, ययेते' इति। के+एते, ये+एत इति स्थितेऽयादेशः. `वायाववरुणद्धि' इति। वायौ+अवरुणद्धीति स्थित आवादेशः।।

79. वान्तो यि प्रत्यये। (6.1.79)
यीति दर्णग्रहणम्, तेन `यस्मिन् विधिस्तदादावल्ग्रहणे' (व्या.प.127) इति यकारादौ प्रत्यये कार्यं विज्ञायत इत्यत आह--`यकारादौ प्रत्यये' इति। यद्यपीह स्थानी न निर्दिष्टः, तथाप्यावादेश ओकारस्य स्थाने, आवादेशोऽयौकारस्थ स्थाने भवतीति वेदितव्यम्। कथम्? पूर्वयोगे हि यद्धर्मा वान्त आदेशो दृष्टः, इहापि तदद्धर्मेवानुवर्त्तते। कश्च पूर्वयोगे तद्धर्मा दृष्टः? अवादेशस्यौकारस्य स्थानित्वम्। आवादेशस्याप्यौकारस्य स्थानित्वम्, अत इहापि स्वधर्ममजहतोऽनुवृत्तस्य वान्तादेशस्य पूर्वक एव स्थानि विज्ञायते। `बाभ्रव्यः' इति। बभ्रूशपब्दादपत्येऽर्थे `मधूबभ्रवोर्ब्राह्मणकौशिकयोः (4.1.106) इति यञ् `ओर्गुण-' (6.4.140) इति गुणः। `माण्डव्यः' इति। `गर्गादिभ्यो यञ्' (4.1.105) इति यञ्। `शङ्कव्यम्' इति। शङ्कुशब्दात् `तस्मै गुणः।
`माण्डव्यः' इति। `गर्गादिभ्यो यञ्' (4.1.105) इति यञ्। `शङ्कव्यम्' इति। शङ्कुशब्दात् `तस्मै हितम्' (5.1.5) इति `उगवादिभ्यो यत्' (5.1.2) इति यत्। `नाव्यः' इति। नावा तर्यत इति `नौवयोधर्मविष' (4.4.91) इत्यादिना यत्।
`रैयति' इति। `सुप आत्मनः क्यच्' (3.1.8) इति क्यच्। `गोयानम्' इति। षष्ठीसमासः।
`गोर्यूतो छन्दसि' इत्यादि। वक्तव्यशब्दस्य व्याख्येय इत्येषोऽर्थो वेदितव्यः। तत्रेदं व्याख्यानम्--`वान्तो यि' इति योगविभागोऽत्रि क्रियते तेन गोशब्दस्य यूतौ परतश्चन्दसि विषयेऽवादेशो भवति।
`अध्वपरिमाणे च' इति। `गौर्यूतौ' इति वर्तते। तत्रापि वक्तव्यशब्दस्य स एवार्थः। व्याख्यानमपि तदेव। इदं च सामान्येन वचनम्, तेन भाषायामध्वपरिमाणे भवति।।

80. धातोस्तन्निमित्तस्यैव। (6.1.80)
पूर्वेणैव सिद्धे नियमार्थं वचनम्। `तन्निमित्तस्य' इति। तच्छब्देन यकारादिप्रत्ययः प्रत्यवमृश्यते, स निमित्तं यस्य स तथोक्तः। `लव्यम्' इति। `अचो यत्' (3.1.97) इति यत् तमेव वकारमाश्रित्य `सार्वधातुकार्थधातकयोः' (7.3.84) इत्योकारो विधीयमानस्तन्निमित्तो भवति। `अवश्यलाव्यम्' इति। `ओरावश्यके' (3.1.125) इति ण्यत्, `मयूरव्यंसकादयश्च' (2.1.72) इति समासः, `लुम्पेदवश्यमः कृत्ये' (काशिका.6.1.144) इति मकारलोपः। अत्रापि ण्यतमाश्रित्य `अचो ञ्णिति' (7.2.115) इति विधीयमान औकारस्तन्निमित्तो भवतति।
`प्रातिपदिकसय नियमो मा भूत्' इति। असति हि धातुग्रहणे प्रातिपदिकस्यापि नियमः स्यात्। ननु च प्रातिपदिकस्यापि नियम एतन्निमित्त्स्यैव भवति, नातनिमित्तस्येत्यर्थः स्यात, तथा च--पूर्वसूत्रस्यारम्भोऽनर्थकः स्यात्, निर्विषयत्वात्? नैष दोषः; यो हि धातोरिति किमिति पृच्छति स पूर्वयोगस्यारम्भं पृथङ् नेच्छत्येव। स ह्येवं मन्यते--`वान्तो यि प्रत्यये' (6.1.79) तन्निमित्तस्यैवेत्येको योगः कर्त्तव्य इति। तत्र को दोष इति प्रातिपदिकनियमे सति यदि कश्चिद्दोष आपद्येत ततस्तन्निवृत्तये क्रियमाणं धातुग्रहणं शोभत इत्यभिप्रायः। `बाभ्रव्य इत्यत्रैव स्यात्' इति। एतस्तन्निमित्तत्वात्। `इह तु न स्यात्--गव्यम्, नाव्यम्' इति। अतन्निमित्तत्वादेचः।
`उपोयते' इति। वेञ एच आत्वे कृत उपपूर्वाल्लट्, `भावकर्मणोः' (1.3.13) इत्यात्मनेपदम्, `सार्वधातुके यक्' (3.1.67) इति यक्, यजादित्वात् सम्प्रसारणम्, `अकृत्सार्वधातुकयोर्दीर्घः' (7.4.25) इति दीर्घः, उपाकारेण सह `आद्गुणः' (6.1.87) `औयत' इति। तस्यैव धातोर्लङ्, पूर्ववदात्मनेपदादि, आडजादीनाम्' (6.4.72) इत्यट्, `आटश्च' (6.1.90) इति वृद्धिः। अयमौकारः पूर्वक ओकारश्च एतदुभयमप्यतन्निमित्तम्, एतस्य मा भूदित्येवमर्थं तन्निमित्तगर्हणम्। ननु चान्तरङ्गो यणादेशो वर्णमात्राश्रयत्वात्, बहिरङ्गस्त्वेकादेश उभयपदाश्रयत्वात्, ततश्च `असिद्धं बहिरङ्गमन्तरङ्गे'

(व्या.प.42) इत्यसिद्धत्वादेवात्र न भविष्यति? एवं तर्ह्येतज्ज्ञापयति--नेयमिह परिभाषोपतिष्ठत इति। तेनाक्षद्यूरित्यत्र बहिङ्गोऽप्यूडादेशोऽन्तरङ्गे यणादेशे कर्त्तव्ये नासिद्धो भवति। अन्यथा यद्ययमर्थो न ज्ञाप्येत तदाक्षैर्दीव्यतति क्विपि कृते `च्छ्वोः शुड--नुनासिके च' (6.4.19) इत्यूडादेशे कृते तस्यासिद्धत्वात् यणादेशो न स्यात्। `लौयमानिः' इति। लूयमानस्यायत्यमित्यर्थे `अत इञ्' (4.1.95) इतीञ् `तद्धितेष्वचामादेः' (7.2.117) इति वृद्धिः, सा च तद्धितनिमित्ता, न तु यकारादिप्रत्ययनिमित्ता।
सिद्धे हि विधिरारभ्यमाणः विनाप्येवकारकारणं नियमार्थो भविष्यतीत्यभिप्रायेणाह--`एवकारः किम्' इति। इष्टतोऽवधारणार्थमेवकारकारणं क्रियत इति दर्शयन्नाह--`धात्ववधारणम्' इत्यादि। एवकारे तन्निमित्तशब्दानन्तरमुच्चार्यमाणे यत एवकारकारणं ततोऽन्यत्रावधारणार्थमिति धात्वधारणं भवति। असति ह्येवकारकारणे धातेरेव तन्निमित्तस्येति तन्निमित्तावधारणमप्यनिष्टं विज्ञायेत। तस्माद्धात्ववधारणं यथा स्यात्, तन्निमित्तावधारणं मा भूदित्येवमर्थमेवकारकारणम्। किं पुनर्धात्ववधारणे सतीष्टं रूपं सिध्यति यतस्तदिष्यते? इत्यत आह--`तन्निमित्त्स्य हि' इत्यादि। धात्ववधारणे हि सति तन्निमित्त्स्यानियतत्वादधातोश्च भवति बाभ्रव्य इति धातोश्च भवति--लव्यम्, अवश्यलाव्यमिति। यदि तन्निमित्तावधारणं कृतं स्यात् तदा धातोरेव तन्निमित्तस्येति। ततो बाभ्रव्य इत्यत्र न स्यात्, न हि बभ्रूशब्दो धातुः। तस्माद्धात्ववधारणमितीष्यते।।

81. क्षय्यजय्यौ शक्यार्थे। (6.1.81)

``क्षि' `जि' इत्येतयोर्धात्वोः' इति। क्षिग्रहणेन `क्षि क्षये' (धा.पा.236) `क्षि वासगत्योः' (धा.पा.1407) क्षिष् [`क्षीष हिंसायाम्'--धातुपाठः। `क्षि हिंसायाम्' (1276)--धातुपाठः] हिंसायाम् (धा.पा.1506) इत्येषां ग्रहणम्, जिग्रणे तु `जि जये (धा.पा.561) इत्येतस्य। ननु च `निरनुबन्धकग्रहणे न सानुबन्धकस्य' (व्या.प.53) इत्यनया परिभाषया `क्षिष् हिंसायाम्' इत्यस्य ग्रहणं न प्राप्नोति? नैष दोषः निपातनात् भविष्यति। किं हि निपातनान्न लभ्यते? यथैव हि ततोऽन्यदलाक्षिकं कार्यं किञ्चिद्भविष्यति, तथेदमपि स्यात्। अर्थग्रहणं कर्मण्यपबि यता स्यात्; अन्यथा शकेरकर्मकत्वात् भाव एव निपातनं विज्ञायते--क्षय्यं देवदत्तेनेति। कर्मणि तु न स्यात्--क्षय्यो व्यधिरिति, न ह्यकर्मकेभ्यः कर्मणि कृत्यप्रत्यय उपपद्यते। अर्थग्रहणेन तु कृत्यार्थ उपलक्ष्यते। कृत्याश्च कर्मण्यपि विहिताः, तेन तत्रापि निपातनाद्विज्ञायते।।

82. क्रययस्तदर्थे। (6.1.82)

`क्रय्यः' इति। अत्र प्रत्ययार्थश्च कर्म विदयते; कर्मणि कृत्यविधानात्। प्रकृत्यर्थश्च विनिमयः, क्रीणातेर्विनिमयार्थत्वात्। तत्र प्रतययार्थः प्रधानम्, `प्रकृतिप्रत्यौ प्रत्ययार्थं सह ब्रूतः' इति कृत्वा। प्रकृत्यर्थस्तूपसर्जनम्, प्रतत्ययार्थविशेषणमिति कृत्वा। तत्र यदि प्रधानत्वात् तदित्यनेन प्रत्यार्थो निर्दिश्येत तदायमर्थः स्यात्--स क्रय्योऽर्थो यस्य शब्दस्य स तदर्थः, तस्मिन्नभिधेये ऋय्य इत्येष शब्दो निपात्यत इति? अयुक्तश्चायम्; न ह्यत्र क्रय्यशब्दस्य क्रय्यार्थः कश्चिच्छब्दोऽभिधेयोऽस्ति, ततस्तस्याप्रतीतेः। अथैवं विज्ञायेत--स एवार्थस्तदर्थ इति? एवमपि तदर्थग्रहणमनर्थकम्। अवश्यमेव हि क्रय्यशब्दो यत्प्रतययान्तस्तस्मिन् यत्प्रत्ययार्थे वर्त्तते। तस्मात् तच्छब्देन प्रधाननिर्देशे सति तदर्थग्रहणस्यानर्थक्यम्। अतो गुणभूतोऽपि प्रकृत्यर्थो निर्दिश्यत इति मत्वाऽऽह--`तदर्थे क्रयार्थं यत् तस्मिन्नभिधेये' इति। तस्मै इदं तदर्थम्। क्रयार्थमित्यनेन क्रीणात्यर्थस्तच्छब्देन निर्दिश्यत इति दर्शयति। क्रयणं क्रयः, विनियम इत्यर्थः। क्रयार्थमित्यत्रापि चतुर्थीसमास एव--क्राय इदं क्रयार्थम्। `क्रायार्थ यः प्रसारितः' इति। विनिमयार्थं य उपन्यस्त इत्यर्थः। `क्रेयं नो धान्यम्' इति। क्रेतव्यम्=ग्रहीतव्यम्, स्वीकर्त्तव्यमितद्यर्थः। `न चास्ति क्रय्यम्' इति। न चात्र क्रयार्थमुपन्यस्तं धान्यमस्तीत्यर्थः।

83. भय्यप्रवय्ये च च्छन्दसि। (6.1.83)

`वी इत्येतस्य' इति। गतिप्रजनादिषु यो वी पठ्यते तस्य, `अजेर्व्यघञपोः' (2.4.56) इत्यजेर्यो वी आदेशस्तस्य वा।
`ह्रदय्या आप उपसंख्यानम्' इति। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। ह्रदय्या हत्यस्य प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्--चकारोऽत्र क्रियते, स चानुक्तसमुच्चयार्थः, तेन ह्रदय्या इत्यपि भविष्यतीति।।

84. एकः पूर्वपरयोः। (6.1.84)

अथ पूर्वपरग्रहणं किमर्थम्, यावता `आद्गुणः' (6.1.87) इत्यादादादित्येषा पञ्चमी अचीत्यस्याः सप्तम्याः षष्ठीत्वं प्रकल्पयिष्यति; `तस्मादित्युत्तरस्य' (1.1.67) इति वचनात्। तथाचीत्येषा सप्तम्यादित्यस्याः पञ्चम्याः षष्ठीत्वं प्रकल्पयिष्यति; `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इति वचनात्। तत्रान्तरेणापि पूर्वपरग्रहणं पूर्वपरयोर्द्वयोरपि भविष्यति? इत्याह--`पूर्वपरग्रहणम्' इत्यादि। किं पुनः कारणमसति पूर्वपरग्रहणे द्वयोरपि युगपदादेशो न सिध्यति? इत्यत आह--`एकस्यैव हि' इत्यादि। एवं मन्यते--अचत्येषा सप्तमी यणादेशादिविधौ चरितार्था; आदित्येषां तु पञ्चमी न क्वचिच्चरितार्था, अतः सा सप्तम्याः षष्ठीत्वं प्रकल्पयेत्। तत्रासति पूर्वपरग्रहणेऽच एव स्थाने गुणः स्यत्। `बृद्धिरेचि' (6.1.88) इत्यत्र च गणविधावादिति पञ्चमी कृतार्थे ति तस्या एचीति सप्तम्यकृतार्था षष्ठीत्वं प्रकल्पयेत्। एवं च वृद्धिरवर्णस्यैव प्रसज्येत। `उपसर्गादृति धातौ' (6.1.91) इत्यतर द्वयोरपि पञ्चमीसप्तम्योरकृतार्थत्वात् पर्यायेण परस्परं षष्ठीपरकल्पनेति पर्यायेणैव वृद्धिः स्यात्। यत् पुनः परस्याभिमतं पञ्चमी सप्तम्याः षष्ठीत्वं प्रकल्पयिष्यति,

सप्तम्यपि पञ्चम्याः, ततोऽन्तरेणापि पर्वपरग्रहणं द्व्योरप्यादेशो भविष्यतीति? तन्निरासायाह--`नोभे' इत्यादि। निवृत्तिधर्मा हि स्थानी भवति, श्रूयमाणस्य च षष्ठीप्रकल्पनं प्रति निमित्तभावः। कथं पूर्वपरौ निवर्त्तेयाताम्? षष्ठीप्रकल्पनं च प्रति निमित्तभावमुपगच्छेतातम्? अत एवानिवृत्तेर्निमित्तभावस्य चासम्भवान्नोभे सप्तमीपञ्चम्यौ युगयत्प्रकल्पिके भवतः। तस्मादेकस्यैव स्यात्, नोभयोः।
अथैकग्रहणं किमर्थम्, यावता `भ्रस्जो रोपधयो रमन्यतरस्याम्' (6.4.47) इत्यत्र विनाप्येकग्रहणमेक एव सम्भवति, तथाप्यत्रैकग्रहणेन विनाप्येक एव भवष्यतीत्याह--`एकम्' इत्यादि। रमागमेन हि मित्वात् `मिदचोन्त्यात्परः' (1.1.47) इत्यचोऽन्त्यात् परेण भवितव्यम्। न च द्वयो रमोर्भृज्जातवचोऽन्त्यात् परेण सम्भवोऽस्ति। ततो युक्तं तद्विनाप्येकग्रहणम्। एक एव रम् भवतीति गुणादिस्त्वादेशः। सम्भवति च स्थानिभेदे सत्येकैकस्य स्थानिनो गुणादिः पृथगादेशः तत्रासत्येकग्रहणे पृथगादेशः स्यात्। तस्मात् पूर्वपरयोर्द्वयोः स्थानिनोः पृथगदेशो मा भूदित्येवमर्थमेकग्रहणम्। असति पुनरेकग्रहम आदेशश्च द्वयं प्राप्नोतीत्यमुमर्थं सोपपत्तिकं प्रतिपादयितुमाह--`स्थानिभेदाद्धि' इत्यादि। यता `रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (8.2.42) इति स्थानिभेदाद्धेतोर्भिन्नं छिन्नमित्येवमादिषु द्वावेवादेशौ भवतः, तथा खट्वेन्द्र इत्येवमादिष्वपि द्वावादेशौ स्याताम्।।

85. अन्तादिवच्च। (6.1.85)

अन्तादिवदित्युक्ते न ज्ञायते--कोऽस्यातिदेशस्यार्थ इत्यतस्तत्परिज्ञानायाह--`यथा' इत्यादि। `इत्येषोऽतिदेशस्यार्थः' इति। इतिशब्द्वोऽतिक्रान्तप्रत्यवमर्शी- अतिदिश्येऽनेनेत्यतिदेशः, स पुनः `अन्तदिवच्च' इत्येष एव योग इत्येषोऽनन्तरोक्तोऽस्यातिदेशस्यार्थ इत्यर्थः।
`वर्णाश्रयविधावयमन्तादिवद्भावो नेष्यते' इति। कथमेतज्ज्ञायते? इत्याह--`तथाहि' इत्यादि। `ओभिस ऐस् (7.1.9) इत्यकारवर्णाश्रयो विधिः; तत्र कर्त्तव्ये खट्वाभिरित्यत्र सवर्णदीर्घत्वं पूर्वस्यानतवन्न भवति। `आत औ णलः' (7.1.34) इत्याकारवर्णाश्रयोऽयं विधिः। तत्र कर्त्तव्ये वर्णाश्रये जुहावेत्यत्र `अभ्यस्तस्य च' (6.1.33) इति ह्वयतेः सम्प्रसारणे कृते यत् पूर्वरूपत्वमाकारस्य तन्नादिवद्भवकति। एङः पदान्तादति' (6.1.109) इत्येष विधिरेङ्वर्णाश्रयः। तत्र कर्त्तव्ये--अस्यै अश्व इत्यत्र `आटश्च' (6.1.90) इति वृद्धिः परस्यादिवन्न भवति, तदभावादायादेशः, `लोपः शाकल्यस्य' (8.3.19) इति यकारलोपः, तत् किमेतद्वक्तव्यम्--वर्णाश्रये नान्तादिवदिति? न वक्तवयम्। कथम्? अताद्रूप्यातिदेशात्। नेह ताद्रूप्यमतिदिश्यते, रूपाश्रयाश्चैते विषयः, तेनाताद्रूप्यान्न भविष्यन्ति।
किमर्थं पुनरयमन्तादिवद्भावो विधीयते, यावता पूर्वपरावुक्तावेकादेशस्य स्थानिनौ, अत्र स्थानिवद्भावादेव तदाश्रयं कार्यं भविष्यति? इत्यत आह--`पूर्वपरसमुदाय एकादेशस्य स्थानी' इति। कथं ज्ञायते? इत्याह--`स हि' इत्यादि। येन हि यो निवर्त्त्यत आदेशेन स तस्य स्थानीति, तद्यथा--`अस्तेर्भूः' (2.4.52) इति। अत्र भूवोऽस्तिः, समुदायश्चेहैकादेशेन निर्वर्त्त्यत इति स एव तस्य स्थानी, न पूर्वपरौ समुदायिनौ। स्यादेतत्--अवयवस्य समुदायाभ्यान्तरत्वात् समुदाय आदेशेन निवर्त्त्यमानेऽवयवावपि निवर्त्त्येते, तस्मात् तयोरपि स्थानित्वम्? इत्यत आह--`तत्र' इत्यादि। इतिकरणौ द्वावपि हेतौ। तत्र समुदाये स्थानिन्यवयवयोर्यत् स्थानित्वं तदानुमानिकम्, समुदाय एकादेशस्य आदेशेन निवर्त्त्यमाने तयोरपि निवर्त्तनं नान्तरीयकमिति कृत्वा। न हि विनावयवनिवर्त्तनेन समुदायः शक्यते निवर्तयितुम्, तस्य तदात्मकत्वात्। समुदायस्य तु प्रत्यक्षंस्थानित्वम्। `पूर्वपरयोः' इति स्थानषष्ठ्यन्तस्य साक्षाच् श्रवणात् `श्रुतानुमितयोः श्रौतः सम्बन्धो गरीयान्' (चां.प.पा.49) इति `स्थानिवदादेशोऽनल्विधौ' (1.1.56) इत्यनेन यस्य प्रत्यक्षं साक्षात् श्रुतम्, स्थानित्वं तदाश्रयमेव कार्यमादेशे विधीयते। अवयवयोश्चानुमानिकं स्थानित्वं न प्रत्यक्षम्, अतस्तदाश्रयं कार्यं नातिदिश्यते। तेन तदाश्रयं कार्यं स्थानिवद्भावादेशे न प्राप्नोति, इष्यते च। तदर्थमयमन्ताविवद्बावो विधीयते।।

86. षत्वतुकोरसिद्धः। (6.1.86)

इहासिद्धवचनेनकादेशस्याभावो वा क्रियते? तत्कार्यसामर्थ्य वा प्रतिपाद्यते? सिद्धमपि हि वस्तु सिद्धकार्यं कर्तुमसामर्थ्यादसिद्धमित्युच्यते, यथा--पुत्रकार्यकरणेऽसामर्थ्यात् पुत्रोऽप्यपुत्र इति। तत्र यद्यनेनैकादेशस्याभावः क्रियते तदाधीत्येत्यत्र तुग्न स्यात्, न हीह ह्रस्वोऽस्ति; एकादेशेन निवर्त्तितत्त्वात्। न चासिद्धवचनेनैकादेशे निवर्त्तिते ह्रस्वस्य प्रादुर्बावो भवति, न हि देवदत्तस्य हन्तरि हते पुनर्देवदत्तस्य प्रादुर्भावो भवतीतिममाद्ये पक्षे दोषं दृष्ट्वा कार्यसामर्थ्यमेकादेशस्यासिद्धत्वश्रुत्या प्रत्याख्यत इति दर्शयन्नाह--`सिद्धकार्यं न करोतीत्यर्थः' इति। सिद्धस्य निष्पन्नस्य यत् कार्यं तदेकादेशः सिद्धो निष्पन्नोऽपि न करोतीत्ययमस्य वचनस्यार्थः। `असिद्धवचनम्' इत्यादिना सूत्रस्य प्रयोजनमाचष्टे। आदेशे च कृते यत्कार्यं तद्धेतुकं प्राप्नोति तदादेशलक्षणम्, आदेशो लक्षणं निमित्तमस्येति कृत्वा। तस्य प्रतिषेधो यथा स्यादित्येवमर्थमसिद्धवचनम्। उतसृज्यते निवर्त्त्यत इत्युत्सर्गः, स्थान्यभिधीयते। उत्सर्गो लक्षणं यस्य तदुत्सर्गलक्षणम्, तद्भावो यथा स्यादित्येवमर्थञ्चासिद्धवचनम्। `कोऽसिचत्' इति। सिचेर्लुहि च्लिः, `लिपिसिचिह्वश्च' (3.1.53) इति च्लेरङ्, किंशब्दात् परस्य सकारस्य रुत्वम् `अतो रोरप्लुतादप्लुते' (6.1.113) इत्युत्त्वम्, `आद्गुणः' (6.1.87) इति गुणः, `एङः पदान्तादति'(6.1.109) इति परपूर्वत्वम्, `परं प्रत्यादिवद्भावात्' इत्यादि। असिचदित्यत्र योऽकारस्तं प्रत्येकादेशस्य `अन्तादिवच्च' (6.1.85) इत्यनेनादिवद्भावः। अयञ्चापदादित्वे हेतुः। `असिद्धत्त्वान्न भवति' इति। असिद्धत्त्वे हि सति सकारोऽत्रादिरेव पदस्य भवति, तेन `सात्पदद्योः' (8.3.109) इति षत्वप्रतिषेधो भवति। `कोऽस्य' इति। इदमः षष्ठ्येकवचनम्, `त्यदादीनामः'(7.2.102) इत्यत्वम्, `टाङसिङ्सामिनात्स्याः' (7.1.12) इति स्यभावः `हलि लोपः' (7.2.113) इतीद्रूपस्य लोपः। शेषं पूर्ववत्। एतदादेशलक्षणप्रतिषेधस्योदाहरणम्। उत्सर्गलक्षणभावस्य तु `अधीत्य, प्रेत्य'

इति। ननु च बहिरङ्ग एकादेशो द्विपदाश्रयत्वात्; अन्तरङ्गादेव षत्वतुकौ, एकपदाश्रयत्वात्, तत्र `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इत्यनया परिभाषयैवात्रासिद्धत्वं भविष्यतीति निरर्थकमिदं वचनम्? एवं तर्हि सैव परिभाषाऽत्र प्रकरणे षत्वतुकोनियम्यते। तेनाक्षद्यूरित्यत्र बहिरङ्गलक्षणोऽप्यूडादेशोऽन्तरङ्गयणादेशे कर्त्तव्ये नासिद्धो भवति।

`सम्प्रसारण' इत्यादि। सम्प्रसारणे ङौ इटि च य एकादेशस्तस्यासिद्धत्वपरतिषेदो वक्तव्यः। `ब्रह्महूषु' इति। ब्रह्माणं ह्वयतीति क्विप्, यजादित्वात् सम्प्रसारणम्, `सम्प्रसारणाच्च' (6.1.198) ति परपूर्वत्वम्, `हलः' (6.4.2) इति दीर्घः। सप्तमीबहुवचनम्। `परिवीषु' इति वेञः परिपूर्वसय पूर्ववत् क्विदादिषु कृतेषु रूपम्। `अपचेच्छत्रम्' इति। पचेर्लङ्युत्तमपुरुषैकवचनमिट्, `कर्त्तरि शप्' (3.1.68) इति शप; `आदगुणः' (6.1.87) इति गुणः।।

87. आद्गुणः। (6.1.87)

`तवल्कारः; खट्वल्कारः' इति। कथं पुनरत्र लपरत्वम्? इत्याह--`लृकारस्य स्थाने' इत्यादि। एतच्च `लृकारऋकारयोः सवर्णसञ्ज्ञा वक्तव्या' (वा.3) इत्युपसंख्यानात् `उरण् रपरः' (1.1.51) इत्यत्र रप्रत्याहारग्रहणाल्लभ्यते। उक्तं ह्यक्षरसमम्नाये--`हकारादिषु वर्णोष्वकार उच्चारणार्थः, लकारे त्वनुनासिक इत्संज्ञकः प्रतिज्ञायते' इति। तत्र रेफादारभ्य लणकारेण प्रत्याहारे सति लृकारस्य ऋकारग्रहणेन गृहीतस्य स्थानेऽण् विधीयमानो लपरः सम्पद्यते।।

88. वृद्धिरेचि। (6.1.88)

89. एत्येधत्यूदसु। (6.1.89)

सम्भवे व्यभिचारे च सति विशेषणविशेष्यभावो भवति, तौ च सम्भवव्यभिचारावेतादेव धातौ स्तः, नेतरत्रेत्याह--`तदेतदेज्ग्रहणम्' इत्यादि। `प्रष्ठौहः' इति। प्रष्ठं बहतीति `छन्दसि सहः' (3.2.63) इति `वहश्च' (3.2.64) इति ण्विप्रत्ययः `वाह ऊठ्' (6.4.132) इत्यूठ् सम्प्रसारणसंज्ञकः, `सम्प्रसारणाच्च' (6.1.108) इति परपूर्वत्वम्, ततो वृद्धिः। `एत्येधत्योरेङि पररूपापवादः' इति वृद्धिर्विधीयत इति प्रकृतेन सम्बन्धः।

अथ `ओमाङोश्च' (6.1.95) इत्यस्याप्याङि पररूपापवादो वृद्धिः कस्मान्न भवति, नाप्राप्ते हि पररूप इयं वृद्धिरारभ्यत इति मा यथैङि पररूपं बाधते तथाङि पररूपमपि बाधेत, ततश्चेहापि स्यात्--आ+इतः=एतः, उप+एतः=उपेतः? इत्यत आह--`ओमाङोश्चेत्येतत्' इत्यादि। अत्रैव कारणमाह--`येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति' (इति)। नाप्रप्त एङि पररूपे इयं वृद्धिरारभ्यत इति युक्तं यत् तस्य बाधिका भवति। आङि पररूपे तु प्राप्ते चाप्राप्ते चैषा वृद्धिरारभ्यते। आ+इतः=एतः, प्र+एतः=प्रेतः, परेतः इत्यत्र प्राप्त आङि पररूपे तु प्राप्ते चाप्राप्ते चैषा वृद्धिरारभ्यते। आ+इतः=एतः, प्र+एतः=प्रेतः, परेतः इत्यत्र प्राप्त आङि पररूपे उप+एति=उपैतीति--अत्र त्वप्राप्ते। तस्मादेषा वृद्धिराङि पररूपत्वं न बाधते। `पुरस्तादपवादाः' इत्यादिना परीहारान्तरमाह--`पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' (व्या.प.9) इति, इयं च वृद्धिः पुरस्तादपवादः, अस्याश्चैहि पररूपमेवानन्तरम्, अतस्तदेव तया बाध्यते, नाङि पररूपम्, तस्यान्तरत्वात्।

`अक्षात्' इत्यादि। `वक्तव्या' इति। व्याख्येयेत्यर्थः। तत्रेदं व्याख्यानम्--उत्तरसूत्रे चकारोऽधिकविधानार्थः। तेनाक्षशब्दादूहिनीशब्दे परतो वृद्धिर्भविष्यतीति। एवमुत्तरत्रापि वक्तव्यशब्दस्यार्थः, व्याख्यानमप्येवमेव वेदितव्यम्। अक्षाणामूहः, सोऽस्यास्तीति मत्वर्थीयः इनिः। `ऋन्नेभ्यो ङीप्' (4.1.5) इति ङीप्--`अक्षौहिणो'।

`स्वैरम्' इति। `ईर गतौ' (धा.पा.1018) ईरणमीरः, भावे घञ् स्वस्य ईरः स्वैरः। क्रियविशेषणत्वात् स्वैरमिति वृत्तौ नपुंसकलिङ्गेन निर्देशः। क्रिया तु काचिदत्राध्याहर्त्तव्या। अथ वा स्व ईरो यस्य कुलस्य तत् स्वैरं कुलम्। नपुंसकस्य कुलादेरन्यपदार्थत्वान्नपुंसकलिङ्गत्वम्। `स्वैरी' [स्वैरिणी--काशिका] इति। स्वमीरितुं शीलमस्येति `सुप्यजातौ णिनिस्ताच्छील्ये' (3.2.78) इति णिनिः।

ऊढ, ऊढिरिति शब्दौ निष्ठाक्तिन्नन्तौ। `प्रैषः' इति। `इष गतिरहिसादानेषु' (धा.पा.1127) `इषु इच्छायाम्' (धा.पा.1351) इति वा, अभ्यां प्रपूर्वाभ्यां यदा घञ् तदा प्रैषः, यदा तु ण्यत् तदा प्रैष्य इति।

`सुखार्त्तः' इति। `कर्तृकरणे कृता बहुलम्' (2.1.32) इति समासः।।

90. आटश्च। (6.1.90)

`एक्षत' इति। `ईक्ष दर्शने' (धा.पा.610) इति लङ्। `ऐक्षिष्ट' इति। लुङ्। `ऐक्षिष्यत' इति। लृङ्। `औम्भीत्' इति। `उभ उम्भ पूरणे' (धा.पा.1319,1320) इति लुङ्, इट्, अस्तिसिचोऽयुक्ते' (7.3.96) इतीट्। `ईटि' (8.2.28) इति सिचो लोपः। `औब्जीत्' इति। `उब्ज आर्जवे' (धा.पा.1303)। `आर्ध्नोत्' इति। `ऋधु वृद्धौ' (धा.पा.1271) इति लङ्, `स्वादिभ्यः श्नुः' (3.1.73) इति श्नुः।

`चकारोऽधिकविधानार्थः' इति। न तु वृद्धेरनुकर्षणार्थः; तदनुवृत्तेः स्वरितत्वादेव सिद्धत्वादित्यभिप्रायः। अधिकविधानार्थ इत्यस्यार्थं वाक्यान्तरेण त्रिस्पष्टीकर्त्तुमाह--`उस्योमाङोश्चेति पररूपबाधनार्थः' इति। उसिओमि आङि च यत् पररूपं प्राप्नोति तद्बाधनार्थ इत्यर्थः। चकारेम हि द्विर्वृद्धिविधानं

विज्ञापयति। तत्र यद्द्वितीयं विधानं तद् बाधकबाधनार्थं भवति। तेन `उस्यपदान्तात्' (6.1.96) इति यत्पररूपं प्राप्नोति, यच्च `ओमाङोश्च' (6.1.95) इति तदपि बाधित्वा वृद्धिरेव भवति। `औस्रीयत्' `औङ्कारीयत्' इति। उस्रशब्दादोङ्कारशब्दाच्च `सुप आत्मनः क्यच्' (3.1.8), `क्यचि च' (7.4.33) इतीत्त्वम्, क्यजन्ताल्लुङ्, आट् `उस्यपदान्तात्' (6.1.96) इति पररूपे बाधके प्राप्ते चकारस्याधिकविधानार्थत्वाद्वृद्धिरेव भवति। `औढीयत्' इति। ओढाशब्दात् क्यजन्तल्लुङ्, आडागमे कृते `ओमाङोश्च' (6.1.95) इति पररूपे बाधके प्राप्ते चकारस्याधिकविधानार्थत्वाद्वृद्धिरेव भवति।।

91. उपसर्गादृति धातों। (6.1.91)

`उपार्च्छति' इति। `ऋच्छ गतन्द्रियप्रलयमूर्तिभावेषु' (धा.प.1296) `प्रगता ऋच्छका अस्मादेशात् प्रच्छको देशः' इति। अत्र `यं प्रति क्रियायुक्ता प्रादयस्तं प्रत गत्यपसर्गसंज्ञका भवन्ति' इति गमिं प्रति प्रशब्दो गत्युपसर्गसंज्ञकः, न ऋच्छतिं परतीति भवति प्रत्युदाहरणमिदम्।

`वा सुप्यापिशलेरिति विकल्पः स्यत्' इति। एतेनोत्तरार्थतां तपरकरणस्य दर्शयति। अथ धातग्रहणं किमर्थम्, यावत सम्बन्धिशब्दा हि नियतं प्रतयोगिनमुपस्थापयन्ति, तद्यथा--पुत्रादशब्दाः, उपसर्गश्चायं धात्वपेक्षत्वात् सम्बन्धिशब्दः तत्रोपसर्गग्रहणादेव धातुग्रहणं सिध्यति? अत आह--

`उपसर्गग्रहणादेव' इत्यादि। यदि धातुग्रहणं न क्रयेत, तदा पराच्र्छतीत्यत्र `ऋत्यकः' (6.1.128) इति परत्वात् शाकल्यस्य मतेन परकृतवद्भावः ल्यात्। तस्मात् तस्य शाकल्यस्य प्रकृतिवद्भावस्य निवृत्त्यर्थं धातुग्रहणं क्रियते। कथं पुनः क्रियमाणे धातग्रहणे शाकल्यस्य प्रकृतवद्भावनिवृत्तिर्लभ्यते? योगविभागकारणात्। सति हि धातुग्रहणे योगविभागः क्रियते--उपसर्गावृत्ति वृद्धिर्भवतीति; ततो धाताविति, इहोपसर्गादिति वर्त्तते। ततो द्वितीयो योगो बाधकबाधनार्थो विज्ञायते। अथ `उपसर्गाच्छन्दसि धात्वर्थे' (5.1.118) इत्यत्र यथा प्राद्युपलक्षणार्थमुपसर्गग्रहणं विज्ञायते, तथेहापि कस्मान्न विज्ञायेत? अशक्यत्वात्। `उपसर्गाच्छन्दसि धात्वर्थे' इत्यत्र हि धातोरुपस्थानं न सम्भवतीति युक्तं प्राद्युपलक्षणार्थमुपसर्गग्रहणम्। इह हि धातोरुपस्थानं सम्भवतीत्ययुक्तम्।।

92. वा सप्यापशलेः। (6.1.92)

धातावित्यनुवर्तते, सुपीति चोच्यते, न च सुबन्तो धातुरस्ति, तत्र समर्थ्याद्धात्वेकदेशे वर्त्तमानं सुपत्येतदिह विशेषणं विज्ञायते, इत्याह--`सुबन्तावयवे धातौ' इत्यादि। `उपाल्कारीयति' इति। कथं पुनरऋतीतयुच्यमाने लुकारे वृद्धिः प्रवर्त्तते? इत्याह--`ऋकारलृकारयोः' इत्यादि। ऋकारलृकारयोः सवर्णसंज्ञा विहितेति ऋकारो गृह्यमाण लृकारमपि ग्राहयतीति तत्रापि वृद्धिर्भवति।

`आपिशलिग्रहणं पूजार्थम्' इति। अथ विकल्पार्थं कस्मान्न भवति? इत्याह---`वेत्युच्यत एव' इति। यद्यप्याचार्यग्रहणेनैव पूजा, विकल्पश्चोभयं सम्पद्यते; तथाप्याचार्यग्रहणस्य प्राधान्येन पूजां ख्यापयितुं वाग्रहणं कृतमिति भावः।।

93. औतोऽम्शसोः। (6.1.93)

`गाम्पश्य' इति। कथं पुनरेतदुदहृतम्, यावता `गोतो णित्' (7.1.90) इति णित्त्वे सति परत्वात् वृद्ध्यात्र भवितव्यम्? इत्यत आह--

`द्योशब्दोऽप्योकारान्तः' इत्यादि। तपरकरणं हि वर्णनिर्देशेषु प्रसिद्धमिति `गोतः' इति तपरनिर्देश ओकारान्तोपलक्षमार्थो विज्ञायते, ततश्च द्योशब्दादपि परं सर्वनामस्थानं णिद्वद्भवति। यद्येवम्, तत् किमिति वृद्धर्नात्र भवति? इत्याह--`तेन' इत्यादि। यदि द्योशब्दात् परस्य सर्वनामस्थानस्य णित्त्वं न स्यात्, ततो द्यां पश्येत्यत्र सावकाशमात्वं गां पश्येत्यत्र परत्वाद्वृद्ध्या बाध्येत। यदि तु द्योशब्दादपि परं सर्वनामस्थानं णिद्भवतीति, तदा द्यां पश्येत्यत्र वृद्धिः प्राप्नोत्येव। ततो नाप्राप्तायां वृद्धाविदमात्वं विधीयमानमनवकाशत्वाद्वृद्धिं बाधते। ततश्च युकतमेव गां पश्येत्येतदुदाहरणम्।

अथेहाप्यचिनवम्, असुनवमित्यत्र चिनोतेः सुनोतेश्च लङि मिपि विकरणस्य गुणे कृते मिपः `तस्थस्थमिपाम्' (3.4.101) इत्यादिनाम्भावे चौकारस्यात्वं कस्मान्न भवति? इत्याह--`अमि' इत्यादि। शसा साहचर्यात् सुबधिकाराद्वा सुप एवाम इदं ग्रहणम्। अतो नात्रात्वस्य प्रसङ्गः। चित्रगुं पश्येत्यत्र तु ह्रस्वत्वे कृत ओकाराभावात् `अनल्विधौ' (1.1.56) इति स्थानिवद्भावप्रतिषेधादात्वं न भवति।।

94. एङि पररूपम्। (6.1.94)

`उपेलयति' इति। `इल प्रेरणे' (धा.पा.1660) चुरादिणिच्। `प्रोखति इति। `उख नख' (धा. पा. 128,134) इत्युखिर्गत्यर्थो भ्यादौ पठ्यते। यदि `वा सुपि' (6.1.92) इत्यनुवर्त्तयन्ति, एवं सति तेन सहास्यैकवाक्यतायां सुबधातोरेवानेन विकल्पेन पररूपं क्रियते, असुपि तु पररूपं न स्यादेवेत्याह--`तच्च' इत्यादि। एकवाक्यत्वे हि सत्येष दोषः स्यात्। न चात्रैकवाक्यता, किं तर्हि? वाक्यभेदः। तेन तदिहानुवर्त्तमानं सुब्धातावेव विकल्पं करोति, इतरतर तु नित्यमेव पररूपं प्रवर्त्तते। तत्रावर्णान्तादुपसर्गादसुबन्तावयवे धातावेङादौ पूर्वपरयोः पररूपमेकादेशो भवतीत्येकं वाक्यम्, अवर्णान्तादुपसर्गात् सुबन्तावयवे धातावेङादौ पूर्वपरमोर्वा पररूपमेकादेशो भवतीति द्वितीयम्। तत्र पूर्वेण वाक्येनासुबन्तावयवे धातावुपेलयतत्यादौ नित्यं पररूपं दिधीयते। द्वितीयेन तु सुबन्तावयवे धातावुपेङकीयतीत्येवमादौ विकल्पेन पररूपं विधीयते। वाक्यभेदस्तु `एङि पररूपम्' इति तन्त्रेण सूत्रद्वयोच्चारणाल्लभ्यते। सूत्रद्वये तूच्चार्यमाणे सत्येक एव `वा सुप्यापिशलेः' (6.1.92) इत्येदनुवर्तमानमपि लभ्यानुरोधान्नाभिसम्बध्यते, द्वितीये तु सम्बध्यत एव। तेन वाक्यद्वयं पूर्वोक्तं सम्पद्यते।

`वक्तव्यम्' इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानाम्--उत्तरसूत्रे चकारोऽधिकविधानार्थः, तेन शकन्ध्वादिषु पररूपं भविष्यतीति। उत्तरत्राप वक्तव्यशब्दस्यायमर्थो व्याख्यानं चैतददेव वेदितव्यम्।

`एवे चानियोगे' इति। नियोगः=नियोजनम्, व्यापारणमित्यर्थः। न नियोगोऽनियोगः=अनवक्लृप्तिः। तत्रैवशब्दे पररूपं वेदितव्यम्। एवशब्दोऽनियमे वर्तते। यदा तमेव केवलं नियमं व्यापारेणाविशिष्टं ब्रूते तदा पररूपं भवति। यदा तु व्यापारेम विशिष्टं तदा वृद्धिरेव।

`बिम्बोष्ठी' इति। `नासिकोदरौष्ठ' (4.1.55) इति ङीष्। `तिष्ठ देवदत्तौष्ठं पश्य' इति वाक्यमेतत् न तु समासः। देवदत्तशब्दात् `एङ् ह्रस्वात् सम्बुद्धेः' (6.1.69) इति सोर्लोपः।।

95. ओमाङोश्च। (6.1.95)

`अद्योढा' इति। अद्य+ओढा। ननु च `आदगुणः' (6.1.87) इत्यनेनाङो निवर्त्तितत्वादिदमाङ उदाहरणं युज्यते? आङ्माङोरेकादेशस्त्वाङ्ग्रहणेन गृह्यत इत्यदोषः। पूर्वमेव हीदमुक्तम्--`द्वयोः षष्ठीनिर्दिष्टयोः स्थाने यो भवति लभतेऽसावन्यतरव्यपदेशम्' इति। किमर्थं पुनराङो ग्रहणम्, यावता प्रागेवाङः पूर्वेम सह `अकः सवर्णे दीर्घः' (6.1.101) इति दीर्घत्वे कृते ततः परेण सह `आद्गुणः' (6.1.87) इति गुणे चाद्योढेत्यादि सिद्धमेव? न सिध्यति, यतः `धातूपसर्गयोः कार्यमन्तरङ्गम्' (व्या.वृ.37) इति पूर्वमाद्गुणेन भवितव्यम्, तथा च सति वृद्धिः स्यात्। अत आङोऽपि ग्रहणं कर्त्तव्यम्।

`इह त्वकः सवर्णे दीर्घत्वं बाध्यते' इति। अस्य विधेरविशेषविहितत्वात्, अकः सवरणे दीर्घस्य च सामान्यविहितत्वात्। विशेषविहितोऽपि सामान्यविहितस्य बाधको भवतीति प्रतिपादितमेतत्।।

96. उस्यपदान्तात्। (6.1.96)

`भिन्द्युः' इति। भिदेर्लिङ्, झि, यासुट् `झेर्जुस्' (3.4.108) इति जुस्, श्नम्, `श्नसोरल्लोपः' (6.4.111) इत्यकारलोपः, `लिङः सलोपोऽनन्तयस्य' (7.2.79) इति सकारलोपः, भिन्द्या+उसिति स्थितेऽनेन पररूपत्वम्। `अदुः' इति। ददातेर्लुङ्, झि, `आतः' (3.4.110) इति झेर्जस्, `गातिस्थाट (2.4.77) इति सिचो लुक्, अदा+उसिति स्थितेऽनेन पररूपत्वम्।

`कोस्त्रा, कोषिता' इति। ननु चात्रैकस्मिन् प्रत्युदाहरणे `अर्थवद्ग्रहणे नानर्थकस्य' (व्या.प.1) इत्यनया परिभाषयैव न भविष्यति, उस्राशब्दो हि समुदायोऽर्थवान्, न तूसित्येष तदवयवः। द्वितीये तु `लक्षणप्रतपदोक्तयोः प्रतपदोकतस्यैव ग्रहणं न तु लाक्षणिकस्य' (व्या.प.3) इत्यनया परिभाषयाऽपि न भविष्यति, लाक्षणिको हि तत्रोस् तथा हि वसेर्निष्ठायां `वसतिक्षुधोरिट्' (7.2.52) यजादित्वात् सम्प्रसारणे कृते--उषितेति, तत्र पररूपं न सम्पद्यते, तत् किमपदान्तादित्यनेन? एवं तर्ह्येतदतिरिच्यमानमपदान्तग्रहममर्थवदनर्थवत्त्वादिकं विशेषमनपेक्ष्योस्मात्रे पररूपं भवतीत्यमुमर्थं द्योतयति। तेन नानर्थके `उस्यपदान्तात्' इत्येतद्भवति। भिन्द्युरित्यत्र हि यासुडादिः समुदायोऽर्थवान्, न तु तदवयव उस्। लाक्षणिकेऽपि भवतीति--बभुषः पश्येति। `भा दीप्तौ', (धा.पा.1051) लिटः क्वसुः; शस्, `वसोः सम्प्रसारणम्' (6.4.131) इति सम्प्रसारणम्; `सम्प्रसारणाच्च' (6.1.108) इति पूर्वरूपम्, बभा उस अस् इति स्थितेऽनेन पररूपत्वम्। एतत् सार्वधातुकपक्ष उदाहरणं वेदितव्यम्। अर्धधातुकपक्षे ह्यकारलोपेनैव सिद्धम्। सानुबन्धकेऽपि भवति--अधुरिति। क्व तर्हि स्यात्? बभूरिति। ननु चानर्थक्ये सत्यपदान्तग्रहणस्यायमर्थः परिकल्प्येत, अस्ति चास्योक्तसूत्रे प्रयोजनम्, किं तत्? अपदान्ताद्यथा स्यादिह मा भूदिति--दण्डाग्रमिति? नैतदस्ति; यद्येतदेव प्रयोजनमभिमतं स्यात्, तदोत्तरसूत्र एवेदं कुर्यात्। इह करणात्तु यथोक्तार्थप्रतिपादनपरतैव तस्यावगम्यते। अधिकाराच्चोत्तरार्थतापि भवत्येव। कोषितेत्यत्र `वसतिक्षुधोः' (7.2.52) इतीट्, `शासवसिघसीनां च' (8.3.60) इति षत्वम्, तस्य चासिद्धत्वात् पररूपत्वप्राप्तिर्वेदितव्या।

`चक्रुः' इति। कृत्रो लिट्युसि रूपम्। `अबिभयुः' इति। `ञिभी भये' (धा.प.1084) लङ्, शप्, `जुहोत्यादिभ्यः श्लुः' (2.4.75) इति श्लुः, द्विर्वचनम्, `सिजभ्यस्तविदिभ्यश्च' (3.4.109) इति झेर्जुस् `जुसि च' (7.3.83) इति गुणः।।

97. अतो गुणे। (6.1.97)

`पचे, यजे'- इत्यत्र `वृद्धिरेचि' (6.1.88) इति वृद्धिः प्राप्नोति, तेन तस्या एव पररूपत्वमपबाद इत्यभिप्रायः।

`आद्गुमः' (6.1.87) इत्यत आदित्यनुवर्त्तत एवेति मन्यमान आह--`अत इति किम्' इति। दीर्घनिवृत्यर्थ इह तपरस्याकारस्य निर्देशः क्रियत इति दर्शयितुमाह--`यान्ति, वान्ति' इति।

`अपचे' इति। लङ्यात्मनेपदोत्तमपुरुषैकवचन इट्, अतर `आद्गुणः' (6.1.87)। पररूपे तु सति स गुणो न लभ्यते।।

98. अव्यक्तानुकरणस्यात इतौ। (6.1.98)

`अव्यक्तमपरिस्फुटवर्णम्' इति। अपरिस्फुटा=अव्यक्ता, अनभिव्यक्ता अकारदयो वर्णा यत्र तत् तथोक्तम्। यद्येवम्, तदनुकरणेनापि तथाविधन भवितव्यम्, सदृशं ह्यनुकरणं भवति न त्वसदृशम्, ततश्चानुकार्य इवानुकरणेऽपि नैवाच्छब्दोऽवधार्यते, अनवधारितस्य च कथं शक्यते पररूपतवं विधातुम्? इत्यत आह--`तदनुकरणम्' इत्यादि। यदि तर्हि तदनुकरणं परिस्फुटवर्णम्, एवं सति तत् तस्यानुकरणमेव न स्यात्, न हि विसदृशमनुकरणं भवति,

तेनानुकर्त्तुमशक्यत्वात्, अतिप्रसङ्गो वेत्यत आह--`केनचित्' इत्यादि। तत् पुनः सादृश्यं ध्वनेसतुल्यता, उभयोरपि तयोः समानो ध्वनिः। तेन यद्यप्यनुकरणे वर्मविशेषा अवधार्यन्ते, तथापि ध्वनेः समानतया तदवयक्तमप्यनुकार्यमनुकरोति। `पटिति' इति। ननु च `अलोऽन्त्यस्य' (1.1.52) इत्यनया परिभाषयान्त्यस्य भवितव्यम्, तत्कथं सर्वस्यैवाच्छब्दस्य भवति? नैष दोषः; `नानर्थकेऽलोन्त्यविधिः' (व्या.प.62) इति। अथ वा--यदयम् `नाम्रेडितस्यान्त्यस्य तु व' (6.1.99) इत्यत्रान्त्यगरहणं करोति, ततोऽवसीयते--नात्रालोऽन्त्यस्येत्येषा परिभाषा प्रवर्त्तत इति। कथं पुनः पररूपे कृते तदनुकार्यस्य प्रतिपादनं भवति, कुतश्च न भविष्यति? न्यूनत्वात्? नैष दोषः; यथैव हि व्यकतवर्ममपि तस्य केनचित्साधर्म्येण प्रतिपादकं भवति तथा न्यूनमपि भविष्यतीति।

`अनेकाच इति वक्तव्यम्' इति। अनेकाचोऽव्यक्तानुकरणस्य पररूपं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--उत्तरसूत्रे वाग्रहममुभयोरपि योगयोः शेषः। सा च व्यवस्थितविभाषा विज्ञायते। तेनानेकाच एव भविष्यति, न त्वेकाच इति। `कथम्' इति। तकरान्तमेतदव्यकतमनुकरणमिति मन्यमानस्य प्रश्नः।।

99. नाम्रेडितस्यान्त्यस्य तु वा। (6.1.99)

`यदा तु' इत्यादि। पटत्पटदित्येष शब्दः समुदाय एवानुकरणम्, तदा तस्याद्विरुक्तत्वातपरस्यावयवस्य पटच्छब्दस्याम्रेडितसंज्ञा नास्तीति पूर्वेम पररूपं भवत्येव।।

100. नित्यमाम्रेडिते डाचि। (6.1.100)

`डाचपरम्' इति। डाच् परो यस्मात् तत् तथोक्तम्।

`डाचि विहिते' इत्यादि। विहित इति `हि गतौ (धा.पा.1257) इत्यस्य विपूर्वस्य रपमिदम्। असय च `सर्वे गत्यर्था ज्ञानारथाः' इति विहिते=विज्ञाते बुद्धिस्थ एवेत्येषोऽर्थो वेदितव्यः। तेनायमर्थो भवति--डाचि विहिते बुद्धिस्थविषयभूत एवानुत्पन्ने `डाचि बहुलं द्वे' (वा.888) इति द्विर्वचनमिति। अवश्यञ्चैतदेवं विज्ञेयम्; अन्यथा हि यदि डाचि विहिते कृत इत्येषोऽर्थः स्यात, तदा डाच परभूते `डाचि बहुलं द्वे' (वा.888) इत्यनेन द्विर्वचनं विधीयते। तथा च यद्वक्ष्यति--`डाचीति विषयसप्तमीयम्' इति तद्विरुध्यते। किं पुनः कारणम्--डाचि विहिते बुद्धिविषयीभूत एवानुत्पन्ने द्विर्वचनं विधीयते? इत्याह--`तच्च' इत्यादि। चशब्दो हेतौ। यस्माद्द्विरवचनं टिलोपात् पूरवमिष्यते तस्माड्डाचि विहिते बुद्धिस्थे विषयभूते एवानुतपन्ने द्विर्वचनं विधीयते न परभूते। एवं तट्टिलोपात् पूर्वं सिध्यति; नान्यथा। यदि हे डाचि परभूते द्विर्वचनं न क्रियते, तदान्तरङ्गत्वाट्टिलोपे कृते पश्चाट्टकारान्तस्य द्विर्वचनमापद्येत, तथा च पटपटेति न सिध्येत्। न च शक्यते वक्तुम्--`नित्यमाम्रेडितं डाचि' इत्येतद्वचनं ज्ञापकं पूर्वं द्विर्वचनं भवति ततष्टिलोपः' इति; यस्मात् पटदित्यादिकं टिलोपे कृते द्विरुच्यमानं यच्छब्दान्तं भवति तदर्थमेवेदं स्यात्--पटपटाकरोतीति।

अथ वा--डाचीति डाचि विहिते सति परसप्तम्यामदोष इति मन्यमानेन `डाचि विहिते' इत्युक्तम्। डाचि विहिते सति `डाचि बहुलं द्वे' (वा.888) इत्यनेनोपसंख्यानेन दविर्वचनम्। ननु चैवं सति `सर्वविधिभ्यो लोपविधिरबलीयान्' (व्या.प.70) इति द्विर्वचनात् प्राक् टिलोपः स्यात्, तथा चानिष्टं रूपं प्रसज्येत? इत्यत आह--`तच्च' इत्यादि। कथं पुनष्टिलोपात् पूर्वमिष्यमाणमेतल्लभ्यते? बहुलग्रहणात्। अस्मिस्तु व्याख्याने विहित इति दधातेरेव तद्रूपं तद्रूपं वेदितव्यम्।।

101. अकः सवर्णे दीर्घः। (6.1.11)

`अग्नये' इति। परत्वात् `घेङिति' (7.3.111) इति गुणे कृतेऽगभावादत्र न भवति।

`दध्यत्र' इति। ननु च यणादेशोऽत्र बाधको भविष्यति, तत् किमेतन्निवृत्यर्थेन सवर्णग्रहणेन? इहापि तर्हि बाधकः स्यात्--दधीन्द्रः, मधूष्णमिति। तस्माद्विषयविभागार्थ सवरणग्रहणं कर्त्तव्यम्।

`कुमारी शेते' इति। अत्र `इचुयशास्तालव्याः' इति, `विवृत्तं करणमूष्मणां स्वराणां च' इतीकारस्य सवर्णः शकारो यद्यपि भवति, तथाप्यज्ग्रहणानुवृत्तेर्न भवति। न च सावर्ण्यमप्यत्र नास्ति। `नाज्झलौ' इत्यत्र `अणुदित् सवर्णस्य चाप्रत्ययः' (1.1.69) इत्येतत् ग्रहणकशास्त्रमभिनिर्वृत्तं स्यात्, एवमिकारो गुह्यमाण ईकारस्यापि ग्राहको भवति, ततश्च हि शास्त्रस्य सवर्णसंज्ञाङ्गं निमित्तम्, ततो यावत् सा न प्रवर्त्तते तावदङ्गवैकल्याद्ग्रहमकशास्त्रमनभिनिर्वृत्तम्, एवं सवर्णसंज्ञापि यावदपवादो नाभिनिर्वृत्तो भवति, तावत् क्व मया प्रवर्त्तितव्यमिति स्वविषयमजानाना न प्रवर्तते, ततो `नाज्झलौ' इत्यस्यापवादस्यानाभिनिर्वृत्तत्वात् सवर्णसंज्ञा न प्रवर्तते। तेनाङ्गवैकल्याद्ग्रहणकशास्त्रमपरिनिष्पन्नम्, अतोऽकः सवर्णा गृह्यन्ते, तेनागृहीतसवर्णानामेव प्रत्यहारसन्निविष्टानामयं प्रतिषेधः। न चायमीकरोऽक्षु सन्निविष्ट ि ति नासौ `नाज्झलौ' इत्याजिति प्रत्याहारग्रहणेन गृह्यते। तेन सवर्णत्वमीकारशकारयोरप्रतिषिद्धम्।

`होल्ल्लृकारः, होतृकारः' इति। कथं पुनरत्र दीर्घत्वम्, यावता ऋकारलृकारयोर्भिन्नस्थानत्वात् सवर्णसंज्ञा नास्ति? इत्यत आह--`ऋकारलृकारयोः सवर्मसंज्ञाविधिरुक्तः' इति। ननु च ऋकारलृकारसमुदायोऽत्र स्थानीति तस्यैव योऽन्तरतमसतेनैव युकतमादेशेन भवितुम्, न च ऋकारसतस्यान्तरतमस्तत् कथं स भवति? इत्यत आह--`दीर्घपक्षे तु' इत्यादि। समुदायान्तरतमस्याभावादिति। ऋकारलृकारसमुदायोऽत्रि स्थानी, तस्य चान्तरतमो दीर्घो न

सम्भवतीत्यवयवस्य योऽन्तरतस्तेनैव युक्तमादेशेन भत्रितुम्। तत्रापि लृकारस्य दीर्घो न सम्भवतीति ऋकारस्य योऽन्तरतमो दीर्घः स एव ऋकारो भवति।।

102. प्रथमयोः पूर्वसवर्णः। (6.1.102)

प्रथमशब्दोऽयं सन्निवेशविशेषापेक्षेऽभिधेये वर्त्तते। परेष्वभिसमीक्षितेषु यस्मात्पूर्वो नास्ति स प्रथमशब्दाभिधेयः। इह च `प्रथमयोः' इति सामान्येन निर्देशान्न ज्ञायते--कयोः प्रथमयोरिवं ग्रहणमित्यतस्तत्परिज्ञानायाह--`प्रथमाशब्दः' इत्यादि। प्रथमशब्दोऽयमिह शास्त्रे विभक्तिविशेष रूढः, सुपां यदाद्यं त्रिकं तत्र प्रसिद्धः। तथा हि--`सपूर्वयोः प्रथमयोर्विभाषा' (8.1.26), `सप्तमीपञ्चमीप्रथमाभ्यः' (5.3.27) इत्येवमादिषु निर्देशेषु प्रथमाशब्देन स एव विभक्तिविशेषो निर्दिष्टः। तस्माद्रूढिशब्दत्वादिह प्रथमाशब्दो विभक्तिविशेषे वर्त्तत इति विज्ञायते।

ननु च स्त्रीलिङ्गो यः प्रथमाशब्दः स इह शास्त्रे विभक्तिविशेषे रूढः, अस्य च स्त्रीलिङ्गतैव सन्दिग्धा? नैतदस्ति; प्रथमशब्दोपादानादेव स्त्रीलिङ्गोऽयमुपात्त इत्यवसीयते। यदि हि पुंल्लिङ्गस्येदमुपादानं स्यादेयं सति प्रत्ययग्रहणेव स्यात्। यदि च प्रत्ययग्रहणमभीष्टं स्यात् तदौजसोरित्येवं ब्रूयात्। न चैवमुच्यमाने द्वितीयासम्बन्धिनोऽप्यौकारस्य ग्रहणप्रसङ्गः; इह जसा साहचर्यात् प्रथमासम्बन्धिन एवौकारस्य ग्रहणं विज्ञास्यते। तस्मात् स्त्रीलिङ्गस्येदं ग्रहममित्यसन्दिग्धमेतत्। ननु च यदि प्रथमाशब्दोऽयमिह शास्त्रे विभक्तिविशेषे रूढः, एवं सति विभक्तिविशेष एक इत्येकवचनेनैव भवितव्यम्, तत् कथं प्रथमयोरिति द्विवचनम्? इत्यत आह--`तत्साहचर्यात्' इत्यादि। तेन प्रथमाख्येन विभक्तिविशेषेण साहचर्याद्द्वितीयापि विभक्तिः प्रथमेत्युक्ता, ततश्च द्वित्वाद्द्विवचनमेव न्याय्यम्। तदेतेन प्रथमयोरिति विभक्त्योरिदं गरहणं न प्रतद्ययोरिति दर्शयति। `वृक्षाः `लक्षाः' इति। कथमिदमुदाहृतम्? यावता `अतो गुणे' (6.1.97) इत्यनेन पररूपेणात्र भवितव्यम् तद्धि नाप्रापते वभक्त्यन्तर आरभ्यमाणं यथाऽकः सवर्णे दीर्घत्वं बाधते, तथा `प्रथमयोः पूर्वसवर्णः' इति दीर्घत्वमपि बाधेत? इत्यत आह--`अतो गुणे' इत्यादि। अत्रैवोपपत्तिमाह--`पुरस्तात्' इत्यादि। इतिकरणो हेतौ। यस्मात् `पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' (व्या.प.9) इति तस्मात् `अतो गुणे' (6.1.97) पररूपम् `अकः सवर्णे दीरघः' (6.1.101) दीर्घत्वं बाधते; तस्यैव तदनन्तरत्वात्। `प्रथमयोः पूर्वसवर्मः' इति दीर्घत्वं तु न बाध्यते; विपर्ययात्। `अग्नी इत्यत्र' इत्यादि। असति पूर्वगरहणे अग्नी इतयत्र पर्वपरसमुदयः स्थानी, तस्य चान्तरतमो दीर्घ आदेशो नास्तीत्यवयवान्तरतमो यस्तेन भवितव्यम्। अवयवौ चात्र द्वौ--पूर्वः, परश्चेति; तत्र च पूर्वस्यैव भवितव्यमिति नियमो न लभ्यते, नियमकरणाभावादिति तयोः पर्यायेण भवन्नादेशः पक्षे परसवर्णो वा स्यात्। अतस्तन्निवृत्यर्थं पूर्वग्रहणम्। सवर्णग्रहणं तु विप्रतिषेधनिरासार्थम्। असति हि तस्मिन् दीर्घ इत्यनुवर्त्तमानेऽग्नी इत्यत्र विप्रतिषिद्धित्वमापद्येत यदि पूर्वो न दीर्घः; अथ दीर्घो न पूर्वः। यदि पूर्वो न दीर्घः; अथ दीर्घो न पूर्वः। यदि च पूर्वशब्देन पूर्वाकृतिरुच्येत्, दीर्घादनुवृत्तेः पूर्वस्येति षष्ठी वा क्रियेत। तथा च सवर्णग्रहणं शक्यमकर्त्तम्। क्रियमाणं वा तत् सुखप्रतिपत्यर्थ वेदितव्यम्।

`दीर्घग्रहणं त्रिमात्रे स्थानिनि' इत्यादि। अग्नि औ+इति स्थिते, असति दीर्घग्रहण एकादेशः क्रियमाणः स्थानिन आन्तरतम्यात् त्रिमात्रः प्राप्नोति; स्थानिनस्त्रिमात्रकत्वात्। तथा हि--अग्निशब्दस्येकार एकमात्रः औकारो द्विमात्र इत्येतत्समुदायात्मकश्चात्र स्थानी। तस्मात् त्रिमात्रे स्थानिन्यन्तरतमस्त्रिमात्र आदेशो मा भूदित्येवमर्थं दीर्घग्रहणम्। दीर्घग्रहणे हि सति तेनादेशे विशिष्यमाणे त्रिमात्रस्यादेशप्रसङ्गो न भवति; द्विमात्रस्यैव दीर्घसंज्ञाविधानात्।।

103. तस्माच्छसो नः पुंसि। (6.1.103)

`तस्मात् पूर्वसवर्णदीर्घात्' इति। एतेन तस्मादित्यनेनान्तरः पूर्वसवर्णदीर्घो निर्दिष्ट इति दर्शयति। `शसोऽवयवस्य सकारस्य' इति। अनेन शस इति सकारावयवापेक्षयावयवषष्ठीति पुंसीति प्रत्ययार्थस्येदं वा विशेषणम्--`पुंसां [पुंसि--मु. पाठः] चेद्बहुत्वे शसुत्पन्न इति। प्रकृतिविशेषणं वा--पुंशब्दाच्चेत् परः शसिति। तत्र यदा प्रत्ययार्थस्य विशेषमं तवा `सर्व एते' इत्यादेरयं पूर्वपक्षः--वृक्षान्, अग्नीनित्यादिकं युक्तमुदाहरणम्; पुसां बहुत्वेऽत्र शस उत्पन्नत्वात्। षण्डकान् पण्डकानिति--एतदुदाहरणद्वयमयुक्तम्, न ह्यत्र पुंसां बहत्वे शस् उत्पन्नः, किं तर्हि? नपुंसकानामित्यत आह--`सर्व एते' इत्यादि। सर्वग्रहणेन न केवलं वृक्षादयः शब्दा पुंल्लिङ्गेन सामान्यविशेषेण विशिष्टं स्वार्थं प्रतिपादयन्ति, अपि तु षण्डकपण्डकशब्दावपीति दर्शयति। स्वार्थः पनरेषा पुंस्त्वेन सामान्यविशेषेणावच्छिन्नं वृक्षादिकं द्रव्यम्। तदेवं यतः सर्व एते पुंल्लिङ्गविशिष्टार्थाभिधायिनः, तेनैतेभ्य उत्पद्यमानः शस् पुंसामेव बहुत्वे उत्पद्यत इति पूर्वपक्षो निराकृतो भवति। यदा तु प्रकृतिविशेषणं तदायं पूर्वपक्षः--वृक्षानित्यादिकमित्युदाहरणमुपपद्यते, तत्र हि पुंशब्दात् परः शस् भवति; स्थूरान्, अररकानिति इदमुदाहरणद्वयं नोपपद्यते; तथा हि स्थूराया अपत्यानि अररकाया अपत्यानीति `गर्गादिभ्यो यञ्' (4.1.105) इति यञ्, `यञञोश्च' (2.4.64) इति लुकि कृते स्त्रीप्रत्ययस्यापि `लुक् तद्धितलकि' (1.2.49) इति लुक्--स्थूर, अररक, इत्येताभ्यां स्त्रीशब्दाभ्यामुत्पन्नोऽत्रि शस् स्त्रीशब्दाभ्यां परो भवति, न नपुंसकशब्दाभ्याम्? इत्यत आह--`सर्व एते' इत्यादि। प्रकृतिरेव ह्यत्र तद्धितलुगन्ता प्रत्ययार्थे वर्त्तते, स च प्रत्ययार्थः, पुंल्लिङ्गेन विशिष्टः। तस्मान्न केवलं वृक्षादयः शब्दाः पुंल्लिङ्गेन विशिष्टं वृक्षादिकं स्वार्थं प्रतिपादयन्ति, अपि तु स्थूराररकशब्दावपीति पूर्वपक्षः प्रतिक्षिप्तो भवति।

अयं तर्हि प्रत्ययार्थविशेषणपक्षे दोषः--चञ्चेव चञ्चा पुमांस इति। `इवे प्रतिकृतौ' (5.3.96) कन् `लुम्मनुष्ये' (5.3.98) इति लुप्; यदा लुबन्ताच्चञ्चाशब्दात् पुसां बहुत्वे शस् उत्पद्यते तदा चञ्चाः पश्येत्यत्र नत्वं प्राप्नोति? इत्यत आह--`इह तु' इत्यादि। नैव ह्यत्र पुंबहुत्वे शस् उत्पन्नः, किं तर्हि? स्त्रीबहुत्वे; पुंसोऽपि युक्ततद्भावेन स्त्रीत्वातिदेशात्। ततोऽत्र नत्वं न भवति।

दीर्घग्रहणं प्रकृतम्, तस्य चेहार्थवशेन पञ्चम्यन्तस्योपस्थाने सत्यन्तरेणापि तस्मादित्येतद्ववचनं दीर्घादेवोत्तरस्य शसो नत्वं भविष्यतीत्यभिप्रायेणाह--`इह तु' इत्यादि। नैव ह्यत्र पुंबहुत्वे शस् उत्पन्नः, किं तर्हि? स्त्रीबहुत्वे; पुंसोऽपि युक्तवद्भावेन स्त्रीत्वातिदेशात्। ततोऽत्र नत्वं न भवति।
दीर्घग्रहणं प्रकृतम्, तस्य चेहार्थवशेन पञ्चम्यन्तस्योपसथाने सत्यन्तरेणापि तस्मादित्येतद्ववचनं दीर्घादेवोत्तरस्य शसो नत्वं भविष्यतीत्यभिप्रायेणाह--
`तस्मादिति किम्' इति। `एतान् गाश्चरतः पश्च' इति। `औतोऽम्शसोः' (6.1.93) इत्यात्वम्। यद्यनन्तरदीर्घप्रत्यवमर्शी तच्छब्देनोपादीयेत, तदाऽविशेषेण दीर्घमात्रान्नत्वं विधीयमानम्--एतान् गाश्चरतः पश्येत्यत्रापि स्यात्, भवति ह्ययमाकारो दीर्घः। तस्मात् तच्छब्दे तु न दोषः; न ह्ययमननतरसूत्रविहित आकारः।।

104. नादिचि। (6.1.104)
`खट्वे' इति। `औङ आपः' (7.1.18) इति शीभावः। `कुण्डे' इति। अत्रापि `नपुंसकाच्च' (7.1.19) इति, तत्र कृते `आद्गुणः' (6.1.87) इति गुणः।।

105. दीर्घाज्जसि च। (6.1.105)
`आत्' इति नानुवर्त्तते, तेनाऽयं दीर्घामात्रात् पूर्वसवर्णस्य प्रतिषेधः। अथ खट्वा इत्यत्र कथं `प्रथमयोः पूर्वसवर्णः' (6.1.102) इति दीर्घत्वम्? दीर्घादिति वचनं स्पष्टार्थम्। ननु चासति तस्मिन् वृक्षा इत्यत्रापि स्यात्? नैतदस्ति; यदि ह्यत्रापि स्यात्, तदा पूर्वसत्रे `इचि' इत्येतदपार्थकं स्यात्। इह तर्हि स्यात्--अग्नये इति? इष्टत्वाददोषः। अत्र हि परत्वात् `जसि च' (7.3.109) इति गुण एव भवति। उत्तरार्थ तर्हि स्यात्--`वा छन्दसि' (6.1.106) इति दीर्घाद्यथा स्यात्? नैतदस्ति; वाग्रहणस्य तत्र व्यवस्थितविभाषाविज्ञानात्--दीर्घादेव भविष्यति न ह्रस्वात्। `जसि च' (7.3.109) इत्येतदपि स्पष्टार्थमेव। ननु चासति `जसि च' इत्येतस्मिन् युवतीः पश्य, पद्धतीः पश्येत्यादौ शस्यपि प्रतिषेधः स्यात्? ज्ञापकान्न भविष्यति, यदयं `तस्माच्छसो नः पुंसि' (6.1.103) इति पुंग्रहणं करोति, तज्ज्ञापयति--शसि प्रतिषेधो न भवतीति। तद्धि नपुंसके पूर्वसवर्णदीर्घत्वासम्भवात् स्त्रीनिवृत्त्यर्थमेव क्रियते। यदि च स्तिरियामप्ययं युवतीः पश्येत्यादौ प्रतिषेधः स्यात्, तदा पूर्वसवर्णदीर्घत्वाभावान्नत्वस्य प्रतिप्तिरेव नास्तीति किं पुंग्रहणेन? उत्तरार्थं तर्हि जस्ग्रहणम्? नैतदस्ति; वाग्रहणस्य तत्र व्यवस्थितविभाषात्वविज्ञानादेव जसोऽन्यत्र न भविष्यति।।

106. वा छन्दसि। (6.1.106)
`मारुतीः' इति। मरुद्देवता आसामिति `सास्य देवता' (4.2.24) इत्यण् `टिड्ढाणञ्' (4.1.15) इति ङीप्; सवर्णदीर्घत्वम्। `वाराहीः' [वाराही--काशिका पदमंजरी च] इति। वराहस्य विकार ति `अवयवे च प्राण्योषधिवृक्षेभ्यः' (4.3.135) इत्यण्, पूर्ववन्ङीप्। `उपानही' इति। `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीष्।।

107. अमि पूर्वः। (6.1.107)
पूर्वसवर्णदीर्घत्वे प्राप्ते वचनमिदम्। दीर्घ इति चेहानुवर्त्तते, अन्यथा हीदं वचनमनर्थकं स्यात्।
अथ पूर्वग्रहणं किमर्थम्, यावता प्रकृतं यत् पूर्वग्रहणं तदेवेहानुवर्त्तिष्यत इति? अत आह--`पूर्वग्रहणम्' इत्यादि। यथाजातीयकः पूर्वस्तथाजातीयक एव यथा स्यादित्येवमर्थं पूर्वग्रहणम्। एवकारेण यद्व्यवच्छिन्नं तद्दर्शयितुमाह--`पूर्वसवर्णान्तरतमो मा भूत्' इति। पूर्वसवर्णश्चासावन्तरतमश्चेति कर्मधारयः। असति हि पूर्वग्रहणे यत् पूर्वकं पूर्वग्रहणं तेनैवानुवर्त्तितव्यम्, तस्मिश्चानुवर्तमाने ततसम्बद्धं सव्रणग्रहणपि अनुवर्त्तेत, तथा च `स्थानेऽन्तरतमः' (1.1.50) इत्यनया परिभाषया पूर्वस्य यः सवर्णः स एव परसज्येत। किं पुनरेवं सत्यनिष्टं स्यात्, वृक्षमित्यादौ द्विमात्रस्य स्थानिनो द्विमात्र एव स्यादिति चेत्? नैतदस्ति; एवं हि वचनमिदमनर्थकं स्यात्, `प्रथमयोः पूर्वसवर्णः' (6.1.102) इत्यनेन सिद्धत्वादित्यत आह--`कुमारिमित्यत्र हि' इत्यादि। कुमारीशब्दस्येकारो द्विमात्रः, अमोऽकारो मात्रिकः; तत्समुदायात्मकश्चात्र स्थानी, तत्र पूर्वसवर्णो विधीयमानस्त्रिमात्रलस्य स्थानिनोऽन्तरतमस्त्रिमात्र एव स्यात्, पूर्वग्रहणे तु सति यथाजातीयक एव पूर्वः, तथाजातीयक एव द्विमात्रो भवति।
`वा छन्दसीत्येव' इत्यादि। यदि तरहि `वा छन्दसि' (6.1.106) इत्यनुवर्त्तते, तेन सहास्यैकवाक्यतायां भाषायां परपूर्वत्वं न सिध्यति? नैतदस्ति; यस्मात् तदिहानुवर्तमानं पूर्ववद्वाक्यभेदेन च्छन्दस्येव विकल्पं करोति, न भाषायाम्।।

108. सम्प्रसारणाच्च। (6.1.108)
सम्प्रसारणस्य यणादेशो मा भूदित्येवमर्थमिदं परपूर्वत्वं विधीयते। यदि चात्र यणादेशः स्यात्, तदा संप्रसारणविधानामनर्थकं स्यात् तस्मात्।
सम्प्रसारणविधानसामर्थ्यादेव यणादेशो न भविष्यति, तत् किमर्थमिदं विधीयते? इत्याह--`सभ्प्रसारणविधानसामर्थ्यात्' इत्यादि।
सम्प्रसारणविधानसामर्थ्याद्यणादेशो न भवतीति विगृहीतस्याकृतसंहिताकार्यस्य श्रवणं प्राप्नोति, तस्मान्मा भूदेष दोष इति परपूर्वत्वं विधीयते।
`वा च्छन्दसीत्येव' इत्यादि। अत्रापि पूर्ववद्वाक्यभेदो द्रष्टव्यः; अन्यथा भाषायां न स्यात्। `यज्यमानः' [यज्यमानौ--काशिका] इति। परपूर्वत्वाभावपक्षे

यणादेशः। कथं पुनरत्र यणादेशः, यावता विगृहीतस्यैव ग्रहणेन भवितव्यम्, इदानीमेव ह्युक्तम्--सम्प्रसारणविधानसामर्थ्याद्विगृहीतस्यैव श्रवणे प्राप्ते परपूर्वत्वं विधीयते? इत्यत आह--परपूर्वत्वविधाने' इत्यादि। अनारब्धे हि परपूर्वत्वे विगृहीतस्यैव श्रवणं प्राप्नोति, मा भूत् सम्प्रसारणस्य वैय्यर्थ्यमिति कृत्वा। सति तु परपूर्वत्वे यत्र परपूर्वत्वम्--इष्टमित्यादौ, तत्रार्थवत् सम्प्रसारणम्। अतः परपूर्वत्वाभावपक्षे यणादेशो भवत्येव। अथेह कस्मान्न भवति--शकह्वौ शकह्वर्थमिति; अत्र हि शकं ह्वयतीति क्विप्, यजादित्वात् सम्प्रसारणम्, परपूर्वत्वम्, तस्य `अग्तादिवच्च' (6.1.85) इति सम्प्रसारणग्रहणेन ग्रहणात् सम्प्रसारणासम्प्रसारणयोरेकादेशस्य सम्प्रसारणस्य व्यपदेशभावत्वात्, औकारेऽर्थशब्दे च परतो व्यवस्थिते `सम्प्रसारणाच्च' (6.1.108) इति परपूर्वत्वं प्राप्नोति? इत्यत आह--`अन्तरङ्गे चाचि' इत्यादि। योऽयं ह्वयतेरेचः स्थाने विहित आकारः स सम्प्रसारणस्यान्तरङ्गः प्रत्यासन्नः; उभयोरप्येकधात्वन्तर्गतत्वात्। औकारोऽर्थशब्दाकारश्च विप्रकृष्टः। विप्रकृष्टस्तु देशतः कालतश्च, यदाह--`ब्राह्ये' इति। यस्य धातोः सम्प्रसारणमवयवः, तत्रानन्तर्भावाद्बाह्यः। कालतश्च, यदाह--`पश्चात् सन्निपतिते' इति। पूर्वरूपविधानकालादुतरकालं सन्निहित इत्यर्थः। तत्र सन्निकृष्टविप्रकृष्टयोरचोः प्रत्यासत्तेरन्तरङ्गो योऽच् तत्रेदं वचनं प्रवर्त्तते, ततर चरितार्थमिति विप्रकृष्ट औकारादौ पश्चात् सन्निहते न भवति।।

109. एङः पदान्तादति। (6.1.109)
`अग्नेऽत्र' इति। `सम्बुद्धौ च' (7.3.106) इति गुणः।।

110. ङसिङसोश्च। (6.1.110)
`एङ उत्तरयोः' इत्यादि। एङ उत्तरौ यौ ङसिङसौ तयोः सम्बन्ध्यवयवो योऽत् तस्मिन् परत इत्यर्थः। `अग्नेरागच्छति' इति। `घेङिति' (7.3.111) इति गुणः। अथ कस्मादत्र यथासंख्यं न भवति, एङावपि हि द्वौ, ङसिङसावपि द्वावेवेति प्राप्नोति? नैष दोषः, न ह्यत्र ङसिङसोः परतः कार्यं विधीयते, किं तर्हि? तत्सम्बन्धिन इति, स चैक एव। अथापि सम्बन्धिभेदेन भेदः स्यात्? एवमप्यदोषः, चकारोऽत्र समुच्चायर्थः क्रियते। एवं च समुच्चयो भवति यद्यकैकस्यैङो ङसिङसोः प्रत्येकमपि परतः परपूर्वत्वं भवति; नान्यथा। `ईदग्नेः सोमरुणयोः' (6.3.27), `ओरावश्यके' (3.1.125) इति च निर्देशस्तदभावं ज्ञापयति। लक्षणव्यभिचारचिह्नेन वा। अल्पाच्तरस्य ङसः परनिपातेन यथासंख्याभावोऽवसीयते।।

111. ऋत उत्। (6.1.111)
`द्वयोः षष्ठीनिर्दिष्टयोः स्थाने' इत्यादि। किं पुनर्होतुरित्यादावनिष्टं स्याद्यदि रपरत्वं न क्रियेत? न किञ्चित्; न्यायतस्तु प्राप्नोति रपरत्वमपि, तदवश्यं कर्त्तव्यम्। तमेव न्यायं न्यां दर्शयितुम्--`द्वयोः षष्ठीनिर्दिष्टयोः स्थाने' इत्युक्तम्। ऋत इति तपकरणं दिर्घनिवृत्त्यर्थम्। तेन `उन्योर्ग्रः' (3.3.29) `प्रे स्त्रोऽयज्ञे' (3.3.32) इत्यादौ न भवति। उदित्येतदपि तपरकरणं दीर्घनिवृत्त्यर्थमेव, आन्तरतम्याद्द्विमात्रस्य स्थाने द्विमात्र एव प्राप्नोति। ननु च `भाव्यमनोऽण् सवर्णान् न गृह्णाति'(व्या.प.35) इति सवर्णानां ग्रहणं न भविष्यतीति तत् किमेतन्निवृत्यर्थेन तपरकरणेन? एवं तर्ह्येतज्ज्ञापयति--भवत्यत्र ह्युकरेम भाव्यमानेन सवर्णस्य ग्रहणमिति। तेनामू, अमूभ्यामित्यत्र `अदसोऽसेर्दादु दो मः' (8.2.80) इति दीर्घस्य स्थाने दीर्घ ऊकारो भवति।।

112. ख्यत्यात्परस्य। (6.1.112)
`ख्यत्यादिति खिशब्दखीशब्दयोस्तिशब्दतीशब्दयोश्च कृतयणादेशयोरिदं ग्रहणम्' इति। यमादेशे कृते तुल्यं रूपमिति विशेषाभावात्। अथ कस्मादत्राकारान्तयोरेव ख्यशब्दत्यशब्दयोरिदं ग्रहणं न भवति? केवलस्य ख्यशब्दस्य त्यशब्दस्यासम्भवादिति चेत्? न; यदि केवलौ न स्तः, तदन्तानां तर्हि मुख्यगोसंख्यादीनामपत्य गार्हपत्यादीनाञ्च ग्रहणमस्तु? नैतदस्ति; एवं हि--`सख्युरसम्बुद्धौ' (7.1.92), `पत्युर्नो यज्ञसंयोगे' (4.1.33) इति निर्देशौ नोपपद्येयाताम्।
`सह खेन वर्त्तत इति सखः' इति। `तेन सहेति तुल्ययोगे' (2.2.28) इति बहुव्रीहिः, `वोपसर्जनस्य' (6.3.82) इति सहस्य सभावः। `सखीयति' इति। `क्यचि च' (7.4.33) इतीत्त्वम्। `सखीः' इति। क्विप् `अतो लोपः' (6.4.48) इत्यकारलोपः `लोपो व्योरवलि' (6.1.66) इति यकारस्य च। `लुनम्' इति। `ल्वादिभ्य' (8.2.44) इति निष्ठानत्वम्। ननु च नायं तीशब्दः, तत्कथं तस्योदमुदाहरणमित्यत आह--`निष्ठानत्वम्' इत्यादि।
अथेह कस्मान्न भवति--अतसखेरागच्छति, सेनापतेरागच्छतीति, असति ह्यत्रापि खिशब्दः तिशब्दश्च? इत्यत आह--`विकृतनिर्देशात्' इत्यादि। योऽयं ख्यत्यादित्यागन्तुकेनाकारेम यणादेशं कृत्वा विकृतनिर्देशः कृतस्तस्यैतदेव प्रयोजनम्--यत्र यणादेशः, तत्रैव यथा स्यात्। न चात्र यणादेशोऽस्ति, अतो न भवति, अन्यथा हि विकृतनिर्देशोऽनर्थकः स्यात्। ननु च लध्वर्थः स्यात्, अन्यथा हि `खितिखीतीभ्यः' इत्युच्यमाने गौरवं स्यात्? एवं मन्यते--यदि यतर यण् न भवति, तत्रापि भवितव्यम्, तदा खीतीभ्यामित्येवं ब्रूयात्। न चैवमुच्यमाने ह्रस्वन्ताभ्यान्न प्राप्नोति; खिशब्दात् `सख्युर्यः', (5.1.126) तिशब्दात् `पत्युर्नो यज्ञसंयोगे' (4.1.33) इति निर्देशाभ्यामेव सिद्धेः अत्र हि सखिपतिशब्दयोर्ग्रहणम्, न सखीपतीशब्दयोः। न हीह पतीशब्दस्य यज्ञेन संयोगोऽस्ति, नापि `सह खेन वर्त्तते' इत्यादिना प्रकारेम व्युत्पादितो यः सखीशब्दस्तत उत्पन्नो यः प्रत्ययः स प्रकृत्यर्थाभिधाने समर्थो भवति; यतोऽभिधानलक्षणा हि कृत्तद्धितसमासा भवन्ति। तस्माद्विकृतनिर्देशस्य पूर्वोक्तमेव प्रयोजनमिति।

अथ स यणादेशोऽतर कस्मान्न भवति यस्मिन् सत्युत्त्वेन भवितव्यम्? `घेङिति' (7.3.111) इति गुणेन बाधितत्वादिति चेत्? न; `शेषो ध्यसखिः (1.4.7) इति धिसंज्ञाप्रतिषेधादिति चेत्यत आह--`सखीशब्दस्य' इत्यादि। अत्र च `ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' (व्या.प.89) इति प्रतिषेधो हेतुः।
परस्येति किमर्थम्? पूर्वपरयोर्मा भूत्। इतश्चारभ्य पूर्वपरयोरित्येतन्नानुवर्त्तते।।

113. अतो रोरप्लुतादपलुते। (6.1.113)
`उकारानुबन्धकस्य' इति। यदि रुशब्दः समुदायः स्थानो स्यात्, तदा महातरुवनमित्यत्रापि `हशि च' (6.1.114) इत्युत्वं प्रसज्येत। किञ्च `ससजुषो रुः' (8.2.66) इत्युकारानुबन्धकरणमनर्थकं स्यात्। तत्र ह्यु कारोऽस्य सूत्रसय विशेषणार्थः क्रियते, स इह समुदाये स्थानिन्यनर्थको जायते। तस्मादुकारानुबन्धवत इदं ग्रहणम्। ननु चोत्त्वे कर्त्तव्ये `पूर्वत्रासिद्धम्' (8.2.1) इति रुत्त्वमसिद्धम्, तदसतो रोः कथमुत्त्वं शक्यते विधातुम्? इत्यत आह--`रुत्वमप्याश्रयात् सिद्धम्' इति। यदि रुत्वमसिद्धं स्यात्, तदा स्थानित्वेन रोराश्रयणमनर्थकं स्यात्; कस्यचिदुकारानुबन्धविशिष्टस्य रोरसम्भवात्। तस्मादाश्रयादेव रोरसिद्धत्वं नास्तीति।
`तस्यापि' इति। यत्रापि परतो रोरुत्त्वमुच्यते तस्य `सुस्रोता 3 अत्र' इति `दूराद्धूते च' (8.2.84) इति प्लुतः। `देवदत्ता 3 अत्र' इति। अत्रापि `गुरोऽनृतोऽनन्तस्याप्येकैकसय प्राचाम्' (8.2.86) इत्यनेन।
अथ किमर्थं `अप्लुतादप्लुते' इत्युच्यते? न ह्यतोऽतीति च तपरकरणस्य वर्णस्य निर्देशे क्रियमाणे प्लुतात्परस्य प्लुते वा परतः प्राप्नोति? इत्यत आह--`प्लुतस्य' इत्यादि। ननु च सिद्धः प्लुतः स्वरसन्धिषु, यदयम् `प्लुतप्रगृह्या आचि' (6.1.125) इति प्रकृतिभावं शास्ति? एवं मन्यते--प्रकृतिभाव एवैतज्ज्ञापकं स्यात्। अथापि कथञ्चित् स्वरसन्धिविषयं ज्ञापकं स्यात्, तथा रोदत्त्वं स्वरसन्धिर्न भवति। अथापि संहिता कार्य्यविषयं ज्ञापकं स्यात्, तथापि रोरुत्त्वं मंहिताकार्य्यं न भवति। येन हि वर्णाः सन्धीयन्ते तत् संहिताकार्यम्, न चोत्त्वेन वर्णाः संहिता भवन्ति; पुनरप्याद्गुणाद्यपेक्षणादिति।।

114. हशि च। (6.1.114)
पूर्वत्रातीत्यनुवृत्तेर्हश्युत्त्वमप्राप्तमेवानेन विधीयते। चकारः `अप्लुतात् (6.1.113) इत्यस्यानुकर्षणार्थः। तेनेह न भवति--सुस्रोता 3 वेहीति।।

115. प्रकृत्याऽन्तःपादमव्यपरे। (6.1.115)
`प्रकृत्या' इति। करणे तृतीया। `अन्तःपादम्' इति। सप्तम्यन्तमेतत्। विभक्त्यर्थेऽव्ययीभावं विधाय ततः सप्तमी, तस्याः `तृतीयासप्तम्योर्बहुलम्' (2.4.84) इत्यम्भावः कृतः। `एङः' इत्यादि। पञ्चम्यन्तस्यैङः प्रकृत्या भवतीत्यनेन सम्बन्धो नोपपद्यते। तस्मादिहार्थादेङ्ग्रहणं प्रथमान्तमुपजायते। `प्रकृतिः' इत्यादिना प्रकृतिशब्दस्यामाचष्टे। प्रकृतिशब्दो हि लोके स्वभावे प्रयुज्यते, यता--दुस्त्यजा प्रकृतिरिति, कारणेऽपि यथा--दध्नः क्षीरं प्रकृति रति, तदिहापि स एवार्थस्तस्य विज्ञायते। अन्तरित्यव्ययमधिकरणभूतमिति। अत एवान्तः-पादमित्यव्ययीभावो भवति। `पादशब्देन' इत्यादि। कथं पुनरृक्पादस्यैव ग्रहणं लभ्यते, यावता पादशब्दः सामान्यवाची? एवं मन्यते---`वा छन्दास' (6.1.106) इत्यतः छन्दोग्रहणमिह मण्डूकप्लुतिन्यायेनानुवर्त्तते, तेन ऋक्पादस्यैव ग्रहणं विज्ञायते। अथ `सर्वत्र विभाषा गोः' (6.1.122) इत्यतः सूत्रात् प्राक्छन्दस्येव कार्यं विज्ञायते। एवं हि तत्र सर्वत्रगरहणमर्थवद्भवति यदि च्छन्दसि पूर्वं विधानं भवति। एवमवयवानापर्थमाख्याय `अवकारयकार' इत्यादिना समुदायस्यार्थमाचष्टे। अविद्यमानौ वकारयकारौ यस्य स तथोक्तः। `स्वभावेन' इत्यादि। यदा प्रकृतिशब्दः स्वबावे वर्त्तमानो गृह्यते, तदायमर्थः--एङ् स्वभावेन भवति। स्वभावपरत्यागेन संहिताकार्यं नोपपद्यत इति। यदा तु कारणे वर्त्तमानस्य प्रकृतिशब्दस्य परिग्रहस्तदायमर्थः--एङ् कारणात्मना भवतीति। कारणं परपूर्वत्वादेः कार्यस्यैङ, तस्य य आत्मा स्वरूपं तेनैवात्मनैङ् भवतीत्येतदुक्तं भवति--प्राक् संहिताकार्याद्यदेङो रूपं तेनैव तदवतिष्ठत इति। अनन्तरोक्तमेवार्थद्वयं स्पष्टीकर्त्तुमाह--न `विकारमापद्यते' इति। एवं हि स्वभावेन भवति, यदि स्वभावादन्दथालक्षणा विकारावस्था नोत्पद्येत। तदेवं कारणात्मनापि भवति, यदि विकारभावं नोत्पद्यते। यदि कार्यात्मना न विपरिणमतीत्यर्थः। `नो चेन्निमित्तकायणौ' इति। निमित्तं परत्वविशिष्टोऽकारः। तत्र हि परतः प्रकृतिभावो विधीयते। कार्यी त्वेङ्, तस्य हि कार्यं प्रकृतिभावोऽस्ति। `ते अग्रे अश्चमायुञ्जन्' इति। अस्य ऋक्पादस्य मध्ये य एङ् एकारस्तेशब्देऽग्रेशब्दे च तसय तदनन्तरे प्रकृतिभावत् `एङः पदान्तादाति' (6.1.109) इति पूर्वरूपं न भवति, अयादेशश्च। `उपप्रयन्तो अध्वरम्' इति। अत्रापि प्रयन्त इति शब्दौकारस्यैङोऽध्वरशब्दस्यानन्तरे प्रकृतभावात् पूर्वरूपं न भवति, अवादेशश्च। एवं `सुजाते अश्व' इत्यादावपि प्रकृतिभावात् पूर्वरूपा दकार्यस्याभावो वेदितव्यः।
`एतेऽर्चयन्ति' इति। अत्रेते शब्दे य एङ् एकारः स पदान्ते वर्त्तते। तदनन्तरस्त्वकारः पादादौ, न पादमध्ये। `तेऽवदन्' इति। अत्र तेशब्दे य एङ् तस्य प्रकृतिभावो न भवति; तदनन्तरस्यातो वकारपरत्वात्। `अवदन्' इति। वदतेर्लङि प्रथमपुरुषबहुवचनान्तम्। `तेऽयजान्' इति। अत्रापि तेशब्दे य एङ् तस्य प्रकृतिभावो न भवति। तदनन्तरस्यातो यकारपरत्वात्। `अन्वग्नि' इत्यादि। सर्वमत्रास्ति, न त्वनुशब्द उकार एङ् भवति, नास्य प्रकृतिभावः।
`केचित्' इत्यादि। यदि तर्हि `नान्तःपादमव्यपरे' इति सूत्रं पठन्ति, एवं सति परपूर्वस्यैव प्रतिषेधः कृतः स्यात्, नायवोः; तथा हि--

परपूर्वत्वमेङोऽनन्तरविहितम्? इत्यत् आह--`ते संहितायाम्' इत्यादि। यदि परपूर्वत्वं संहिताकार्यं विशेषणमपेक्ष्यायं प्रतिषेधः क्रियते, तदायं दोषः स्यात्। यदा तु संहिताधिकारविहितं कार्यमात्रमपेक्ष्य प्रतिषेधो विधीयते, तदा सर्वस्यैव संहिताधिकारविहितस्य कार्यस्य प्रतिषेधो युक्त इति तेषां भावः।।

116. अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च। (6.1.116)
`नो अव्यात्' इति। अस्मादो द्वितीयबहुवचनान्तस्य `बहुवचनस्य वस्नसो' (8.2.21) इति नसि रुत्वे `अतो रोरप्लुतादप्लुते' (6.1.113) इत्युत्त्वे `आद् गुणः' (6.1.87) इति गुणे कृते `नो' इति भवति। `अव रक्षणे' (धा.प.600) इत्यस्मादाशिषि लिङि यासुटि तिपि `इतश्च' (3.4.97) इतीकारलोपे `स्कोः संयोगाद्योरन्ते च' (8.2.29) इति सकरलोपे च कृते `अव्यात्' इति भवति। `अवद्यात' इति। अवद्यशब्दोऽयं पञ्चम्येकवचनान्तः। `अवक्रमुः' इति। अवपूर्वात् क्रमेर्लिट्युसि रूपमेतत्। अन्ये तु लुङि वर्णयन्ति--`बहुलं छन्दसि' (2.4.76) इति च्लेः श्लुः, `श्लौ' (6.1.10) इति द्विर्वचनम्, जुस्भावश्छान्दसः। `अवन्तु' इति। अवतेर्लोट्, झेरन्तादेशः, `एरुः' (3.4.76) इत्युत्त्वम्। `अवस्यवः' इति। अवतेः `सर्वधातभ्योऽसुन्' (द.उ.9.49) इति असुन्--अवस् इति, ततः `सुप आत्मनः क्यच्' (3.1.8) इति क्यच्, तदन्तात् `क्याच्छन्दसि' (3.2.170) इत्युप्रत्ययः, ततो जस्, `जसि च' (7.3.109) इति गुणः--ओकारः, `एचोऽयवायावः' (6.1.78) इत्यवादेशः।।

117. यजुष्युरः। (6.1.117)
`उरो अन्तरिक्षम्' इति। उरःशब्दस्योत्त्वम्, `आद् गुणः' इति गुणः। `ओकारान्तमुरोशब्दं [`उकारान्तमुरुशब्द'--काशिका] सम्बुद्ध्यन्तमधीयते' इति। उरुशब्दस्य `सम्बुद्धौ च' (7.3.106) इति गुणे कृते `उरो' इति भवति।।

118. आपोजुषाणोवृष्णोवर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे। (6.1.118)
आपो--इत्येवमादीनि सर्वाण्येतान्यनुकरणान्यविभक्तिकानि; `सुपां सुलुक्' (7.1.39) इत्यादिना तेभ्य उत्पन्नाया विभक्तेर्लुप्तत्वात्। अत्रापो इति प्रथमाबहुवचनान्तस्यानुकारणम्। `जुषाणो' इति। प्रथमैक वचनान्तस्य। `वृष्णो' इति। षष्ठ्येकवचनान्तस्य। `वषिष्ठे' इति। सप्तम्येकवचनान्तस्य। `अम्ब, अम्बाले' इत्येतयोर्विशेषणम्। अम्बिकेशब्दात् पूर्वे अम्बिकेपूर्वे, अस्मादेव निपातनात् समासः। ननु च `अम्बे' इति सम्बुद्ध्यन्तस्यानुकरणम्? ततश्च `अम्बार्थनद्योर्ह्रस्वः' (7.3.107) इति ह्रस्वेनैत्त्वापवादेन भवितव्यम्, तत् कथमम्बे इत्यत्रैत्त्वम्? इत्यत आह--`अस्मादेव' इत्यादि। अम्बाले अम्बिके--इत्येतयोस्तु युक्तमेवैत्त्वम्। वक्ष्यति हि ह्रस्वविधाने--`अम्बार्थं द्व्यक्षरं यदि' (वा.7.3.107) इति।।

119. अङ्ग इत्यादौ च। (6.1.119)
`अङ्ग इत्यादौ च' इति। इतिकरणेनान्तरोक्तोऽङ्गशब्दः प्रत्यवमुश्यते। `तदादौ चाकारे' इति। समानाधिकरणे सप्तम्यौ। तच्छब्देनातिक्रान्तप्रत्यवमर्शिनेतिकरणस्यार्थमाचष्टे--तदादाविति। अङ्गशब्दादावित्यर्थः। `यः पूर्वः' इति। `एङ्' इति सम्बध्यते। चकारोऽङ्गशब्दस्यादौ योऽकारसतत्राप परतः पूर्वस्यैङः प्रकृतिभावो यथा स्यादिति समुच्चयार्थः क्रियते। तत्र ह्यसत्यङ्गशब्दाकारे परतोऽङ्गशब्दस्य य एङ् तस्यैव प्रकृतिभावः स्यात्। यस्त्वङ्गशब्दे परतोऽनङ्गशब्दस्यैङ् तत्र न स्यात्। `प्राणो अङ्गे' इत्यादि। अत्र प्राणो-शब्दे य एङ् अङ्गशब्दादावकारे प्रकृत्या भवति। `अङ्ग अङ्गे अदीध्यत्' इति। अत्राङ्गशब्दे य एङ् तस्याङ्गशब्दादावकारेऽदीध्यच्छब्दादौ प्रकृतिभावो भवति।।

120. अनुदात्ते च कुधपरे। (6.1.120)
`कुधपरे' इति। अकारविशेषममेतत्। कुधौ परौ यस्मात् स तथोक्तः। धकारेऽकार उच्चारणार्थः। `अयं सो अग्निः' इति। अग्निशब्दः `अङ्गेर्निर्नलोपश्च' [अङ्गेर्नलोपश्च--द.उ.] (द.उ.1.20) इति निप्रत्ययान्तो व्युत्पादित इति प्रत्ययस्वरेणान्तोदात्तः, शषोऽनुदात्त इत्यकारस्यानुदात्तत्वम्। `अयं सो अध्वरः' इति। अध्वरशब्दोऽपि प्रातिपदिकस्वरेणान्तोदात्तः, तदादिरप्यकारोऽनुदात्त एव। `आद्युदात्तो निपात्यते' इति। ऋडज्त्रेन्द्राग्रवज्रविप्रकुव्रचुव्रक्षुरखुरभद्रोग्रभेरभेलशुकरशुक्लगौरवनरेरामलाः (द.उ.8.46) इत्यनेन। `सोऽयम्' इति। अयंशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, तस्यादिरनुदात्तः।।

121. अवपथासि च। (6.1.121)
`यद्रुद्रेभ्योऽवपथाः' इति। अटः स्वरेणाद्युवात्तोऽयमवपथाःशब्दः।।

122. सर्वत्र विभाषा गोः। (6.1.122)

123. अवङ् स्फोटायनस्य। (6.1.123)

`अतीति निवृत्तम्' इति। यद्यपीत्यनुवर्त्तेत तदा गवौदनादौ न स्यात्, तस्मादतीत्येतदस्वरितत्वा न्निवृतम्। हल्यपि तर्हि प्राप्नोति? इत्यत आह--`अचीत्येतत्पुनरनुवर्त्तते' इति। `इको यणचि' (6.1.77) इत्यतः; सा पुनस्तस्यानुवृत्तिर्मण्डूकपलुतिन्यायेन वेदितव्या। न हि `सम्प्रसारणाच्च' (6.1.108) इत्यतः परेण ये योगा अस्माद्योगात् पूर्वं तेषु `अति' इत्यस्यानुवृत्तिरस्ति। तथा च पूर्वमुक्तम्--`अचीति चायमधिकारः `सम्प्रसारणाच्च' (6.1.108) इति यावत' इति। `गवाग्रहम्, गवाजिनम्' इति। बहुव्रीहिः, तत्पुरुषो वा। `गवोष्ट्रम्' इति द्वन्द्वः। `आद्युदात्तश्चायम्' इत्यादि। इह गावोऽग्रमस्येति बहुव्रीहौ कृते पूर्वपदप्रकृतिस्वरत्वं च च प्राप्नोति, अवङादेशश्च, तत्रान्तरङ्गत्वादवङ्भवति, स च भवन् प्रातिपदेकस्वरेणान्तोदात्तस्य गोशब्दस्य स्थान आन्तरयतोऽन्तोदात्त एव स्यात्। तस्मिन् सति पश्चात् प्रकृतिस्वरे कृतेऽन्तोदात्तत्वं पूर्वपदस्यापद्येत, आद्युदात्तश्चेष्यते, तस्मादाद्युदात्तोऽयमादेशो निपात्यते। यद्येवम्, तत्पुरुषादावपि स एव निपातनस्वरः प्राप्नोति? इत्यत आह--`अन्यत्र तु' इत्यादि। अन्यत्रेति--तत्पुरुषे, द्वन्द्वे च। गोशब्दस्यायमादेश इति तत्सम्बन्ध्येव शब्दान्तरं निपातनस्वरेण बाध्यते, न समासस्वरः। तस्माद्बहुव्रीहेरन्यत्र तत्पुरषादौ समासान्तोदात्तत्वेन निपातनस्वरो बाध्यते, `स्फोटायनग्रहणं पूजार्थम्' इति। किं पुनः कारणं विकल्पार्थं न भवति? इत्याह--विभाषेत्येव हि वर्त्तते' इति। किमर्थं पुनरवङ् विधीयते? अगेव न विधीयेत, तत्रापि ह्यवादेशेन सिध्यत्येव? सिध्यति; `एङः पदान्तादति' (6.1.109) इति पूर्वरूपत्वं प्राप्नोति। ननु चाकि विहिते सति तदन्तो न भवति? आगमस्य तद्ग्रहणेन ग्रहणात्।न ह्योकारस्य प्राक् प्रवृत्ता पदान्तता नास्तीति शक्यं वक्तुम्।।

124. इन्द्रे च नित्यम्। (6.1.124)

`इन्द्रशब्दस्थे' इति। य इन्द्रशब्दे तिष्ठति स इन्दरशब्दस्यः, स पुनर्य इन्द्रशब्दस्थावयवः स वेदितव्यः। पूर्वेण विकल्पः सिद्ध एव, तत्रारम्भसामर्थ्यादेव नित्ये विधावस्मिंल्लब्धे नित्यग्रहणमुत्तरार्थम्।।

125. प्लुतपृगृह्या अचि। (6.1.125)

`देवदत्ता 3 अत्र त्वसि' इति। `दूराद्धूते च' (8.2.84) इति प्लुतः। ननु च `पूर्वत्रासिद्धम्' (8.2.1) इत्यसिद्धः प्लुतः, तदसतसतसय कथं शक्यते परकृतिभावो विधातुम्? इत्यत आह--`आश्रयात्' इत्यादि। आश्रयणमाश्रयः। तदेतत् प्रकृतिभावकार्यं विधातुं प्लुतस्य कार्यिण आश्रयणम्। अस्मादेवात्र प्रकृतिभावे कर्त्तव्ये सिद्धः प्लुतः, अन्यथा तस्य कार्यित्वेनाश्रयणमनर्थकं स्यात्। `अग्नी' इत्यादि। `ईदूदेद्द्विवचनम्' (1.1.11) इत्यादिना अत्र प्रगृह्यसंज्ञा। अथाचीति किमर्थम्, यावताऽचीत्यनुवर्त्तत एव? इत्यत आह--`अचीत्यनुवर्त्तमाने' इत्यादि। आदेशस्य निमित्तं योऽच् तस्य परकृतिभावनिमित्तत्वेन परिग्रहो यथा स्यादित्येवमर्थं पुनरज्ग्रहणम्। आदेशस्त्वत्र यत्राचि प्रकृतिभावः--जानु+उ अस्य रुजति जानू अत्य रुजतीति। न हि ज नुशब्दे य उकारो यश्च तदनन्तरः प्रगृह्यसंज्ञकस्तयोः सवर्णदीर्घत्वं प्रति प्रगृह्यसंज्ञकादुकारात परस्याकारस्य निमित्तभावः। इह च न भवति--जान्वस्य रुजतीति। तेन पूर्वपरयोरुकारयोर्य एकादेशः, स यद्यपि `अन्तादिवच्च' (6.1.85) इत्यादिवद्भावात् प्रगृह्यसंज्ञकोकारग्रहणेन गृह्यते, तथापि यणादेशोऽकारे परतो भवत्येव। न ह्यत्राप्यकार एकादेशनिमित्तम्। यदि तु विशिष्टाच्परिग्रहार्थं पुनरज्ग्रहणं न क्रियते, तदाऽज्मात्रे प्रकृतिभावो विधीयमान इहापि स्यादेव। प्रगृह्यसंज्ञा पुनरकारपूरवस्योकारस्य `निपात एकाजनाङ्' (1.1.14) इत्यनेन।

`नित्यगरहणम्' इत्यादि। यदि नित्यग्रहणमिहानुवर्त्तते, तदाग्नी+इतीत्यादौ अस्य विधेः कृतार्थत्वात्त वायू+अत्रेत्यादौ परत्वाच्छाकलौ विधिः प्रसज्येत। तस्मात् प्रकृतिभाव एव यथा स्यात्--इत्येवमर्थं नित्यग्रहणमिहानुवर्त्तते।।

126. आङोऽनुनासिकश्छन्दसि। (6.1.126)

`आङः' इति। ङिद्विशिष्टस्याकरस्योपादानम्। ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः'--तस्यैव ग्रहणं यथा स्यात्, वाक्यस्मरणयोर्यः तस्य मा भूदित्येवमर्थम्। असति प्रकृतिभावे विहितेऽप्याङोऽनुनासिकत्वे स्यादेव स्वरसगधिः। अनुनासिकविधानं त्वादेशस्य सानुनासिकत्वार्थं स्यादित्येतन्मनसि कृत्वाऽऽह--`न च प्रकृत्या भवति' इति। `आतरत्' इति। तरतेराङपूर्वाल्लङ्, अडागमः, अटा सह सवर्णदीर्घत्वम्।।

127. इकोऽसवर्णे शाकलयस्य ह्वस्वश्च। (6.1.127)

`ह्रस्वश्च तस्येकः स्थाने भवति' इति। यद्येवम्, `प्रकृत्या' (6.1.115) इत्यस्यानुकर्षणार्थश्चकारो न कर्त्तव्यः, ह्रस्वविधानसामर्थ्यादेव हि स्वरसन्धिर्न भविष्यति? अत्रैतत् स्यात्--दीर्घाणामेव ह्रस्वविधानसामर्थ्यात् स्वरसन्धिर्न स्यात्। ह्रस्वानां तु स्यादेव, न हि तेषां ह्रस्वा भवन्ति। प्रयोजनाभावादित्येतच्च नास्ति; ह्रस्वानामपि हि स्वरसन्धिबाधनार्थं ह्रस्वो भवत्येव। कृतकारि खल्विदं शास्त्रम्, पर्जन्यवत्; नाकृतकारि दहनवत्। एवं तर्हि चकारेणैतदाख्यायते--क्वचिद् ईषा+अक्षादौ प्रकृतिभाव एव भवति, न ह्रस्वत्वमिति। तेन यदुक्तामीषा अक्षादौ प्रकृतभावमात्रमिति, तन्न वक्तव्यं भवति।

यणादेशेन सह विकल्पार्थं शाकल्यग्रहणं कस्मान्न भवति? इत्याह--`आरम्भसामर्थ्यादेव हि' इत्यादि। यणादेशस्य ह्यसवर्ण एवाज्विषयः; सवर्णे तु `अकः सवर्णे दीर्घः' (6.1.101) इति दीर्घविधानात्। अयमपि च शाकलो ह्रस्वो विधीयते। अत एवास्मिन् विषय आरम्भसामर्थ्यादेवास्य विधेर्यणादेशेन सह विकल्पः सिद्ध इति न तदर्थमाचार्यग्रहणम्।

`सिन्नित्यसमासयोः' इत्यादि। एकापि सप्तमी द्विधा भिद्यते; अपेक्षाभेदात्। सिदपेक्षया परसप्तमी, नित्ससमासापेक्षया विषयसप्तमी। सिच्च

नित्यसमासश्चेति द्वन्द्वः--स इद्यस्य स सित्। नित्याधिकारे विहितः समासो नित्यसमासः। शाकल्यस्यायं विधिः शाकलः--`कण्वादिभ्यो गोत्रे' (4.2.111) इत्यण् `यस्येति च' (6.4.148) इत्यकारलोपः, `आपत्यस्य च तद्धितेऽनाति' (6.4.151) इति यकारलोपः। शाकलस्य प्रतिषेधः शाकलप्रतिषेधः। `वक्तव्य' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्, `सर्वत्र विभाषा गोः' (6.1.122) इत्यतो विभाषाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञायते। तेन सिन्नित्यसमासयोः शाकलप्रतिषेधो भविष्यति। `ऋत्वियः' इति। ऋतुः प्राप्तोऽस्येति `ऋतोरण्' (5.1.105) `छन्दसि घस्' (5.1.106) इति घस्। `व्याकरणम्' इति। `कुगतिप्रादयः' (2.2.18) इति समासः। अत्र हि `नित्यं क्रीडाजीविकयोः' (2.2.17) इत्यतो नित्यग्रहणानुवृत्तेर्नितयसमासोऽयम्। `कुमार्यर्थम' इति। कुमार्या इदं कुमार्यर्थमिति। `अर्थशब्देन सह' समासवचनं सर्वलिङ्गता च' (वा.78) इत्ययमपि नित्यसमास एव। सर्वत्र शाकलविधौ प्रतिषिद्धे यणादेशो भवत्येव।।

128. ऋत्यकः। (6.1.128)

`सवर्णार्थमनिगर्थञ्च वचनम्' इति। अन्यत्र पूर्वेणैव सिद्धत्वात्। यदि सवर्णार्थं वचनम्, कथं तर्हि खट्वर्श्य इत्युदाहरणम्, न ह्यत्र सवर्णोऽच्परः नैतदस्ति; `अनिगर्थञ्च' इति यदुक्तं तस्योदाहरणम्। अत एवाक इत्युपात्तं सूत्रे; अन्यथेक इत्यनुवर्त्तनीयं स्यात्। सत्यस्मिन् योगे सवर्णार्थेऽप्यकोऽनेनैव युक्तो ह्रस्वप्रकृतिभावो परत्वादत्यस्योदाहरणस्योपन्यासः।।

129. अप्लुतवदुपस्थिते। (6.1.129)

ऋषौ=वेदे भव आर्षः, तस्मादन्यो लौकिकोऽनार्षः। `समुदायात्' इति। वाक्यादित्यर्थः। कुत एतत? पदरहितस्य वक्यस्याप्रयोगात्। वाक्यस्य च समुदयात्मकत्वात्। `अवच्छिद्य' इति। पृथक् कृत्वेत्यर्थः। `स्वरूपे व्यवस्थाप्यते' [स्वरूपेऽवस्थाप्यते--काशिका] इति। शब्दपदात्मकतायां व्यवस्थाप्यत इत्यर्थः। `अप्लुतवत्' इति। अप्लुतेन तुल्यं वर्त्तत इत्यप्लुतवत्। येन साधर्म्येणाप्लुतवद्भवति तद्दर्शयितुमाह--`प्लुतकार्यम्' इत्यादि। तदनेन प्लुतकार्यस्यार्थं प्रतिषेधः, न तु प्लुतस्येति दर्शितं भवति। `सुश्लोका 3' इति। `दूराद्धूते च' (8.2.84) इति प्लुतः। `सुश्लोका' इति। प्लुतकार्यस्याकरणादेकादेशो भवत्येव। ननु चैकादेशेनापि न भवितव्यम्, तस्यापि प्लुतकार्यत्वात्? नैतदस्ति; एवं हि वचनस्य वैयर्थ्यं स्यात्। तस्मात् प्लुतसंशब्दनेनैव प्लुतस्य यत्कार्यं विहितं तस्यैव प्रतिषेधः, न सर्वस्य प्लृतकार्यस्य। न चैकादेश एवं विहितः।

`वत्करणं किम्' इति। कार्यमात्रस्य प्रतिषेधे सति प्लुतस्य धवणं यथा स्यादित्येवमर्थं वत्करणं स्यात्। सत्यपि च कार्यमात्रस्य प्रकृतिभावस्य प्रतिषेधेनैव प्लुतश्रुत्या भवितव्यम्; एकदेशेन निवर्त्तितत्वात्। तत् कस्मात् प्लुतस्यैव प्रतिषेधो न क्रियत इत्यभिप्रायः। प्लुतप्रतिषेधे वक्ष्यमाणं दोषं चेतसि कृत्वाऽऽह-- `प्लुत इत्युच्यमाने' इत्यादि। `तत्र को दोषः' इति। यो वत्करणे सति न भवतीति भावः। `प्रगृह्याश्रये' इत्यादि। प्रगृह्य आश्रयो यस्य तस्मिन् प्रतिभावे सति प्रगृह्यसंज्ञको यः प्लुतस्तस्य श्रवणं न स्यात्, यदि प्लुत एव प्रतिषिध्येत। वत्करणे तु सति प्लुतकार्यस्यायं प्रतिषेधो भवति न प्लुतस्यैव। तत्र प्लुताश्रये प्रकृतिभावे प्रतिषिद्धेऽपि प्रगृह्याश्रयस्याप्रतिषिद्धत्वादसत्येकादेश एव दोषो न भवति। `अग्नी इति'। `इदूदेद्द्विवचनम्' (1.1.11) इत्यादिना प्रगृहयसंज्ञा, `गुरोरनृत' (8.2.86) इत्यादिना प्लुतः।।

130. ई 3 चाक्रवर्मणस्य। (6.1.130)

`अचि परतः' इति। एतेन `उपस्थिते' इत्येतन्निवृत्तम्; अस्वरितत्वादिति सूचयति। `अस्तु ही 3' इति। `असु क्षेपणे', (धा.पा.1209) लोट्, सिप्। `सेर्ह्यपिच्च' (3.4.87) इति सेहिः, व्यत्यनेन श्लुः। `क्षियाशीः-प्रैषेषु तिङाकाङ्क्षम्' (8.2.104) इति प्लुतः।

`तदुपस्थिते निवृत्त्यर्थम्' इति। तत्र पूर्वेणाप्लुतवद्भावस्य नित्यं प्रापतत्वात्। `अनुयस्थिते प्राप्त्यर्थम्' इति। तत्र केनचिदप्राप्तत्वात्।

`ईकारात्' इत्यादि। कथं पुनरिकारादन्यत्रापीष्यमाणोऽप्येषोऽप्लुतवदभावो लभ्यते? `इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' (6.1.127) इत्यतोऽनुवृत्तस्य चकारस्यानुक्तसमुच्चयार्थत्वात्।।

131. दिव उत्। (6.1.131)

`सानुबन्धकत्वात्' इति। कस्य धातोरनन्तरम्? प्रकृतत्वात् तस्यैव। दीव्यतिर्धातुः सानुबन्धः, प्रतिपदिकं तु दिवित्येतन्निरनुबन्धकम्, निरनुबन्धकस्य च सूत्र उपादानम्; तस्मात् `निरनुबन्धकस्य ग्रहणे न सानुबन्धकस्य' (व्या.प.53) इति प्रातिपदिकस्येदं ग्रहणम्, न धातोरिति। `द्युकामः' इति। दिविकामोऽस्येति बहुव्रीहिः, दिवं कामयत इति वा। `शीलिकामिभिक्षाचरिभ्यो णो वक्तव्यः' (वा.229) इति णप्रत्ययः। `द्युमान' इति। द्यौरस्यास्तीति `तदस्यास्त्यस्मिन्निति मतुप्' (5.2.94)। `विमलद्यु दिनम्' इति। विमला द्यौरस्मिन्निति बहुव्रीहिः। `अक्षद्यूभ्याम्, अक्षद्यूभिः' इति। अक्षशब्द उपपदे दीव्यतेर्धातोः क्विप्, `च्छ्वोः शूडनुनासिके च' (6.4.19) इत्यूठ्।

अथ तपकरणं किमर्थम्, यावता यद्यपि `ऋत उत्' (6.1.111) इत्यत्र तपकरणेन `भाव्यमानोऽप्युकारः सवर्णान् गृह्लाति' (चां.प.पा.44) इति ज्ञापितम्, तथाप्यत्रान्तर्यतोऽर्द्धमात्राकालस्य व्यजञ्जनस्य मात्रिक एव भविष्यति; न दीर्घः? इत्यत आह--`तपकरणम्' इत्यादि। यद्यप्यनेन दीर्गो न प्राप्नोति,

लक्षणान्तरेण तु द्युभ्यां द्युभिः--इत्यत्रोठ् प्राप्नोति, अतः स मा भूदित्येवमर्थं तपरकरणम्। स्यादेतत्। ननु चोठ्प्राप्तिरेव नास्ति, किं तन्निवृत्त्यर्थेन तपरकरणेन? इत्यत आह--`द्युभ्याम्, द्युभिः' इति। `अत्र हि' इत्यादि। उत्त्वस्यावकाशो यत्र झलादिः क्विप्परो न विद्यते--विमलद्यु दिनमिति, ऊठोऽवकाशः--अक्षद्यूभ्यामिति; द्युभ्यामित्यादावुभयप्रसङ्गे परत्वादूठ् प्राप्नोति, तपरकरणादुत्त्वमेव भवति। यदि तर्हि प्राप्तस्योठो निवृत्त्ये तपरकरणं क्रियते, एवं सति `चछ्वोः शूडनुनासिके च' (6.4.19) इत्यतर कथं `द्युभ्याम् द्युभिः' इति परेण चोदिते यद्वक्ष्यति--"ऊठि कृते `दिव उत्' इति परत्वान्मात्राकालो भविष्यति" इति, तद्विरुध्यते; तस्योठि कृतेऽभिनिवृत्ते तस्य स्थाने मात्राकाल उकारो भविष्यतीत्ययमर्थः? नास्ति विरोधः; `ऊठि कृते' इत्यस्य हि ग्रन्थस्य पूर्वेण चोद्यग्रन्थेन सह सम्बन्धः, नेतरेण परिहारग्रन्थेन। तत्र `केचिदत्र क्ङितीति नानुवर्त्तयन्ति' इत्यस्मिन् दर्शनान्तरे उपन्यस्ते `कथं द्युभ्यां द्युभिरित्यूठि कृते' इति देश्यम्। तत्रायं चोदयितुरभिप्रायः--यदि क्ङितीति नानुवर्त्तेत, तदा द्युभ्यां द्युभिरितयतराप्यूडेव कर्त्तवयः, ततश्चोठि कृते कथं द्युभ्यां द्युभिरिति सिध्यति, यावता द्यूभ्यां द्यूभिरिति भवितव्यमित्यस्य देश्यस्य `दिव उत्' इति तपरत्वान्मात्राकालो भविष्यतीत्येष परिहारः। अत्राप्ययं परिहर्त्तरभिप्रायः--तपरकरणस्यैतदेव प्रयोजनम्--ऊठ् मा भूदति; अन्यथा तदनर्थकं स्यात्, तस्मादुत्त्वमेव कर्त्तव्यम् न तूड्भाव इति। ये तु `क्ङिति' इत्यनुवर्त्तयन्ति, तेषां तपरकरणं विस्पष्टार्थम्।।

132. एतत्तदोः सुलोपोऽकोऽनञ्समासे हलि। (6.1.132)

`नञ्समासे न वर्त्तते' इति। अनेन क्रियासम्बन्धं दर्शयन् `अनञ्समासे इति प्रसज्यप्रतिषेधोऽयमिति दर्शयति। पर्युदासे हि सति नञिवयुक्तन्यायेन (व्या.प.65) नञ्समासादन्यस्मिन् समासे वर्तमानयोः स्यात्--परमैष ददाति, परमस ददातीति; एष ददाति, स ददातीत्यत्र न स्यात्। अथ `स सम्प्रदानम्' (1.4.32) इत्यादिको निर्देशो ज्ञापयति--असमासेऽपि भवतीति? उच्यते; एवमप्येतच्छब्दस्य न स्यात्, योगापेक्षे तु ज्ञापक आश्रीयमाणे प्रतिपत्तिगौरवं स्यादित्यभिप्रायः। `तयोर्यः सुशब्दः' इति। एतेन `एतत्तदोः' इति सुशब्दापेक्षया सम्बन्धलक्षणेयं षष्ठीत्याचष्टे। यद्यवम्, सुशब्दस्य सापेक्षत्वादसामर्थ्ये सति लोपशब्देन सह समासो नोपपद्यते। गमकत्वत् सापेक्षस्यापि समासो भविष्यतीत्यदोषः। अथ वा--असमाननिर्देश सति लोपशब्देन सह समासो नोपपद्यते। गमकत्वाकत् सापेक्षस्यापि समासो भविष्यतीत्यदोषः। अथ वा--असमाननिर्देश एवायम्, षष्ठी तु `सुपां सुलुक्' (7.1.39) इत्यनेनैव लुप्तत्वान्न श्रूयते। `कश्च तयोः सुशब्दः' इति। एवं मन्यते--आनन्तर्यलक्षणेन वा सम्बन्देनैतत्तदोः सुशब्दः सम्बन्धी स्यात्, अर्थद्वारेण वा; तत्र हि पूर्वस्मिन् पक्षे सप्तमीबहुवचनस्यापि ग्रहणं स्यात्। भवति हि तदेतदोरानन्तर्यलक्षमेन सम्बन्धेन सम्बन्धी। इतरस्मिन् `अनञ्समासे' इति प्रतिषेधस्यैव वैयर्थ्य स्यात्--अनेषो ददाति, असो ददातीति। अत्र हि समासद्वारेण सुशब्दः समासत्यैव सम्बन्धी, न त्वेतत्तदोरिति। ननु च सानुबन्धकत्वात् सप्तमीबहुवचनं नाशङ्कनीयमेव? नैतदस्ति; प्रथमैकवचनमपि हि तद्गणसंविज्ञाने बहुव्रीहौ सानुबन्धकमेव। तद्गुणसंविज्ञान इति `एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य' (व्या.प.52) इत्यतर यदस्त्येकानुबन्धग्रहणं तदपेक्ष्य बोध्यम्। तत्रातद्गुणसंविज्ञानेऽङ्गीकृत एतद्वचनं न घटते; अनुबन्धं त्यक्त्वा सुशब्दो नास्ति, किं तर्हि? सशब्दः। इयाँस्तु विशेषः--एकसय पकारोऽनुबन्धः, अपरस्य तूकार इति। तस्माद्द्वयोरपि सानुबन्धकत्वात् सपतमीबहुवचनमपि युक्तमाशङ्कितुम्। द्वितीये तु पक्षे यो दोषः, तमुत्तरत्र परिहरियिष्यामीति चेतसि कृत्वाऽऽह--`यस्तदर्थेन सम्बन्धः' इति। एवं ब्रुवता प्रथमैकवचनं तयोः सम्बन्धीत्युक्तं भवति। कथं कृत्वा? एतत्तच्छब्दौ हि प्रातिपदिके। `त्रिकश्च प्रातिपदिकार्थः' इतीदमत्र दर्शनमाश्रितम्। तथा हि `बहुषु बहुवचनम्' (1.4.21) इत्यत्र बहुषु बहवचनं भवति। बहुत्वमससय वाच्यं भवतीत्यर्थः। `कर्मादयोऽप्यपरे विभक्तीनां वाच्यास्तदीये' (1.4.21) इत्यत्र ब्रुवाणेन संख्यायाः कर्मादीनां च विभक्ति वाच्यत्वमिति दर्शितम्, अर्थाच्च त्रिकत्वम्, `स्वार्थद्रव्यलिङ्गात्मकं प्रातिपदिकार्थः' इति तस्य प्रातिपदिकार्थस्य यदेकत्वं तत्र प्रथमैकवचनमेव भवति, न सप्तमीबहुवचनम्। तद्व्यधिकरणस्यैव बहुत्वे भवति। तस्मादेतत्तदोरर्थद्वारकेण प्रथमैकवचनमेव सम्बद्धम्, न सप्तमीबहुवचनम्।

`एष ददाति' इति। `तदो सः सावनन्त्ययोः' (7.2.106) इति सत्वम्, त्यदाद्यत्वम्, `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्।

`एषकः' इति। `अव्ययसरवनाम्नामकच् प्राक् टेः' (5.3.71) इत्यकच्। ननु साकच्कावेतौ भिन्नरूपत्वादेतत्तदौ न भवतः, तत् किम् `अकोः' इति प्रतिषेधेन? इत्यत आह--`तन्मध्ययतितः' इत्यादि। तस्माश्च परिभाषाया (व्या.प.21) अस्तित्व एष एव `अकोः' इति प्रतिषेधो ज्ञापकः, `नेदमदसोरकोः' (7.1.11) इति च।

ननु च नञ्समासे कृते शब्दान्तरस्य सम्बन्धी सुर्भवति, नैतत्तदौः, ततश्च प्रसङ्गो नास्तीति किम् `अनञ्समासे इति परतिषेधेन? इत्यत आह--`उत्तरपदार्थप्रधानत्वात्' इत्यादि। यद्यपि शब्दान्तरं नञ्समासः, तथापि तस्योत्तरपदार्थप्रधानत्वादेतत्तदोश्चोत्तरपदत्वात् तत्सम्बन्धिन्यामेव संख्यायां सुशब्द उत्पन्न इति तयोरेव सुर्भवति। तस्मादस्ति प्राप्तिरिति प्रतिषेधः। क्रियते। समास इति किम्? वाक्ये प्रतिषेधो मा भूत्--नैष ददाति, न स पश्यतीति।।

133. स्यश्छन्दसि बहुलम्। (6.1.133)

`स्यः' इति त्यदः प्रथमैकवचनम्, तस्यानुकरणम्। तस्माच्च या षष्ठ्युत्पन्ना तस्याः `सुपां सुलुक्' (7.1.39) इत्यादिना लुक्। अनुत्पत्तिरेव तस्याः, अनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात्, यथा--गवित्ययमाहेति। उदाहरणे तु पूर्ववत् सत्वादि कार्यम्।।

134. सोऽचि लोपे चेत्पादपूरणम्। (6.1.134)

सोऽचीति पूर्ववत् तस्य प्रथमैकवचनान्तस्यानुकरणम्। पादपूरणम्=पादनिष्पत्तिः।
ननु चारम्भसामर्थ्यादेवाचि विज्ञायते, हलि हि पूर्वोणैव सिद्धत्वात्, तत् किमर्थमचीति क्रियते? इत्याह-`अचीति विस्पष्टार्थम्' इति।
`केचिदिच्छन्ति' इति। ते च्छन्दोग्रहणं नानुवर्त्तयन्तीति।।

135. सुट् कात्पूर्वः। (6.1.135)
`संस्कार्त्ता' इति। `सम्पुंकानां सत्वम्' (वा.936) इति वचनात् `समः सुटि' (8.3.5) इति निर्देशाद्वा समो मकारस्य सकारः, `अत्रानुनासिकः पूर्वस्य तु वा' (8.3.2) इति पूर्वाकारस्यानुनासिकः।
अथ कात्पूर्वग्रहणं किमर्थम्, यावता सुडयमादिलिङ्गः, करोतिश्च ककारादिः, तत्रान्तरेणापि कात्पूर्वग्रहणं `आद्यन्तौ टकितौ' (1.1.46) इति कात्पूर्वं एव सुङ्भविष्यति? इत्यत आह--`कात्पूर्वग्रहणम्' इत्यादि। किं पुनरभक्तत्वे सतीष्टं सिध्यतीति, अतस्तज्ज्ञापकं प्रति यत्नः क्रियते? इत्याह--`तथा हि' इत्यादि। `किं पुनरभक्तत्वे सतीष्टं सिध्यतीति, अतस्तज्ज्ञापकं प्रति यत्नः क्रियते? इत्याह--`तथा हि' इत्यादि। `संस्कृषीष्ट' इति। आशिषि लिङ् सीयुट् आमनेपदम्, `उश्च' (1.2.12) इति कित्त्वाद्गुणाभावः, `सुट्तियोः' (3.4.107) इति तकारसय सुडागमः, कात्पूर्वः सुट्, स यदि करोतेर्भक्तः स्यात् ततस्तस्य करोतिग्रहणेन ग्रहमात् कृञः संयोगादित्वं जातमिति `ऋतश्च संयोगादेः' (7.2.43) इतीट् प्रसज्येत। `संस्क्रियते' इति। लट् कर्मण्यात्मनेपदम्, यक्, `रिङ् शयग्लिङ्क्षु' (7.4.28) इति रिङादेशः। तत्र यदि करोतिभक्तत्वं सुटः स्यात्, ततश्च संयोगादित्वं करोतेर्जातमिति `गुणोऽर्त्तिसंयोगाद्योः' (7.4.29) इति गुणः स्यात्। अभक्तत्वे तु सुटः संयोगादित्वादिङ्गुणौ न भवतः। `तिङ्ङतिङः' इत्यादि। यद्यभक्तः सुट्, तदा संस्क्रियत इत्यत्र समः पदस्य सुटा व्यवहितत्वात् `तिङ्ङतिङः' (8.1.28) इति निघातो न सिध्यति। न च सुट एव पदस्य तिङो लभ्यते; `पदात्' (8.1.17) इत्यधिकारात् सुटश्चापदत्वात्। `स्वरविधौ' इत्यादि परिहारः।
`ऋतश्च संयोगादेः' (7.2.43) इत्यनेन ऋकारान्तस्याङ्गसय संयोगादेर्लिटि गुणो विधीयते, स चाभक्ते सुटि करोतेरसंयोगादित्वान्नोपपद्यत इति मन्यमान आह--`सञ्चस्करतुः' इत्यादि। गुणः कथम्? न कथञ्चिदित्यर्थः। `तन्मध्य' इत्यादि। द्विर्वचने कृते द्वौ करोती भवतः तन्मध्ये चायं वर्तते सुट्, अतः `तन्मध्यपतितस्तद्ग्रहणेन गृह्यते'(व्या.प.29) इति करोतिग्रहणेनैव गृह्यते, ततो नास्त्यसंयोगादित्वं कृञ इति भावः।
ननु च `द्विष्प्रयोगो द्विर्वचनम्' इत्यस्मिन् पक्ष उच्चारणमात्रं भिद्यते, धातुस्त्वेक एव, तत्कथं करोतेर्द्वित्वम्? नैष दोषः, यद्यपि धातुरभिन्नः तथाप्युच्चारणभेदाद्भेदस्तस्याश्रित इति; `अङभ्यासव्यवायेऽपि' (6.1.136) इति वचनात्। अभेदे हि व्यवाय एव नास्तीत्यभ्यासग्रहणमनर्थकं स्यात्। अथापि कथञ्चित् स तद्ग्रहणेन गृहयते, एवमपि गुणो भवत्येवेति दर्शयन्नाह--`संयोग' इत्यादि। संयोगोपधग्रहणे हि सति संयोग उपधा यस्येति संयोगोपधत्वेन--ऋकारं विशेष्य पश्चात् तेनाङ्गं विशिष्येत--तदन्तस्याङ्गस्येति। तत्र यद्यपि करोतेरङ्गं संयोगोपधं न भवति, ऋकारस्तु भवतीति गुणो भवत्येव। तर्ह्यभक्तः सुट्।
टित्करणं किमर्थम्? तद्धि तदादित्वात् तद्भक्तता यथा स्यादित्येवमर्थं क्रियते। अभक्तश्चेत् सुट् तदा टित्करणस्य वैयर्थ्यमेवापन्नमित्यत आह--`टित्करणम्' इत्यादि। `सुट्स्तुसवञ्जाम्' इत्युच्यमाने सुरेत्यादौ यः सुशब्दो यश्चोपसर्यस्तस्यापि ग्रहणं स्यात्। ततश्चातिसुस्थिरः, अतिसुस्थित इत्यादावपि षत्वं प्रसज्येत। तस्माद्विशेषणार्थं टित्करणम्।।

136. अडभ्यासव्यवायेऽपि। (6.1.136)
`अङ्व्यवायेऽभ्यासव्यवायेऽपि' इति। व्यवायः=व्यवधानम्। अपिशब्दादव्यवायेऽपि। असत्यपिशब्दे व्यवाय एव स्यात्। `समस्करोत्' इति। लङ्।
`समस्कार्षीत्' इति। लुङ्, च्लिः, तस्य सिच्, `सिचि वृद्धिः' (7.2.1) इत्यादिना वृद्धिः, `इतश्च' (3.4.100) इतीकारलोपः, `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्। `सञ्चस्करतुः' इति। लिट्।
यदि पूर्वं धातुः साधनेन युज्यते, तदा साधनाभिधायिनि प्राग्लकारे कृते तन्निमित्ताभ्यामडभ्यासाभ्यां भवितव्यम्, ततश्च तद्व्यवधाने सति सुङ्न प्राप्नोतीति तदर्थं युज्यतेऽस्यारम्भः। न च पूर्वं धातुः साधनेन युज्यते, किं तर्हि? उपसर्गेण। यदि हि पूर्वं धातुः साधनेन युज्येत पश्चादुपसर्गेण, ततोऽनुभूयते कम्बलो देवदत्तेनेत्यत्र कर्मणि लकारो न स्यात्; भवतेरकर्मकत्वात्। उपसर्गेण पूर्वं धातौ सम्बन्ध्यमाने न भवत्येव दोषः; अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्तीति। तस्मात् पूर्व धातुरुपसर्गेण युज्यते, ततश्च धातूपसर्गयोः कार्यमन्तरङ्गम्; तन्निमितयोर्धातूपसर्गयोरडभ्यासनिमित्तात् प्रत्यविशेषात् प्रागेव संविधानात्। अडभ्यासौ तु बहिरङ्गौ; उत्तरकालभाविप्रत्ययविशेषापेक्षत्वात्। धातूपसर्गकार्यञ्च सुट्, तन्निमितत्वात्।
अतस्तेनान्तरङ्गत्वाद्धातूपसर्गयोरुपादनमनन्तरमेव भवितव्यम्। न ह्यसावुपजातनिमित्तो लकारस्य तावदुत्पत्तिं प्रयोक्षते। कुतः पुनरडभ्यासौ? इत्यभिप्रायेणाह--`किमर्थं पुनरिदमुच्यते' इत्यादि। इतरस्तु नैवेदमप्राप्तस्य सुटः प्रापणार्थमारभ्यते। किं तर्हि? कृतयोरडभ्यासयोस्तद्व्यवाये कत्पूर्वः सुङ्यथा स्यात्, अकृतयोर्मा भूदित्येवमर्थमिति दर्शयितुमाह--`पूर्वम्' इत्यादि। इतिकरणो हेत्वर्थः। तत्र धातोः पूर्वमुपसर्गेण योगः सुटोऽन्तरह्गतायां हेतुः पूर्वं सुट्करणस्य, तदपि `पश्चादडभ्यासौ' इति। कर्त्तव्याविति शेषः। यतो धातुः पूर्वमुपसर्गेण युज्यते, तेन धातूपसर्गयोः कार्यं नैव किञ्चिद निष्टमापद्यते? इत्याह--`उभक्तश्च सुडित्युक्तम्, इत्यादि। पूर्वमेव ह्यभक्तत्वं सुटः प्रतिपादितम्, अतस्तस्य करोतिग्रहणेनाग्रहणे सति पश्चाद्भवन्तौ सकारात्

परावडभ्यासावनिष्टे देशे स्याताम्, ततश्चेष्टरूपं न सिध्यतीत्यभिप्रायः। अथ सत्यप्यस्मिन् कथमयं दोषो न भवतीत्याह--`एतस्मिंस्तु सत्यत एव' इत्यादि। अत्र तु सुत्रे सत्यत एव यावदडभ्यासव्यवायो न भवति तावत् सुटा भवितव्यमेव। तस्मात् पूर्वमडभ्यासौ कर्त्तव्यौ, ततस्तद्व्यवाये सति कात् पूर्वं सुडिति सर्वमिष्टं सिध्यति।।

137. सम्पर्युपेभ्यः करोतौ भूषणे। (6.1.137)

`सम्पूर्वस्य क्वचिदभूषणेऽपीष्यते' इति। कथं पुनरिष्यमाणो लभ्यते? `संस्कृतं भक्षाः' (4.2.16) इत्याचार्यप्रवृत्तेलिङ्गात्।।

138. समवाये च। (6.1.138)

`समवायः समुदायः' इति। समवपूर्वादिमो भावे `एरच्' (3.3.56) इत्यच्। समवाय इति सङ्घात् इत्यर्थः। `समुदित इत्यर्थः' इति। भावे निष्ठा।।

139. उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु। (6.1.139)

`सतः' इत्यादि। लब्धसत्ताकस्यार्थस्य पुर्वोत्पन्नोभ्यो गुणेभ्यो योऽन्यो गुणस्तद्गुणान्तरम्, तदाधीयत उत्पाद्यते येन तद्गुणान्तराधानम्। तत्पुनः किमर्थम्? इत्याह--`आधिक्याय' इत्यादि। किं तत्? इत्याह--`समीहा' इति। तदेवं विद्यमानस्य वस्तन आधिक्याय वृद्धये वृद्धस्य चैव तादवस्थ्याय तस्या वृद्धावस्थाया अपरिहाणाय गुणान्तराधानं ययाधीयते समीहयां चेष्टया स प्रतियत्न इत्युच्यते। `विकृतम्' इति। जातविक्रियमित्यर्थः। `गम्यमानार्थस्य वाक्यस्य स्वरपेण' इति। `समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्त्तन्ते' (व्या प.सू.85) इति प्रतीयमानोऽर्थः प्रकरणादिवाक्यस्यैकदेशो वाक्यशब्देनोक्तः। गम्यमानार्थस्यापि सुखप्रतिपत्तये स्वरूपेणोपादानं वाक्याध्याहारः।।

140. किरतौ लवने। (6.1.140)

`लवनविषये' इत्यादि। अनेन लवनं किरतेर्नाभिधेयतया विशेषणम्, अपि तु तदर्थस्य विषयभावनेति दर्शयति। केन पुनरत्र णमुल्, यावता `आभीक्ष्ण्ये णमुल् च' (3.4.22) इत्यादिना शास्त्रेण स आभीक्ष्ण्यादावप्यर्थे विधीयते। न चात्र सोऽर्तो विवक्षितः, नापि प्रतीयत इत्याह--`णमुलत्र' इत्यादि। `वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेव व्याख्यानम्--`कृत्यल्युटो बहुलम् (3.3.113) इत्यतो बहुलवचनात् भविष्यति।।

141. हिंसायां प्रतेश्च। (6.1.141)

`हिंसायां विषये' इति। एतेन किरतेर्नाभिधेयत्वेन हिंसा विशेषणम्। अपि तु तदर्थस्य विषयभावेनेति दर्शयति। `प्रतिस्कीर्णम्' इति। `ऋत इद्धातोः' (7.1.100) इतीत्त्वम्, रपरत्वञ्च, `रदाभ्याम्' (8.2.42) इत्यादिना निष्ठानत्वम्, `हलि च' (8.2.77) इती दीर्घत्वम्। `तथा' इत्यादिना किरतेरर्थस्य हिंसाविषयतां दर्शयति। `अनुबध्नाति' इति। अनुगच्छतीत्यर्थः।।

142. अपाच्चतुष्पाच्छकनिष्वालेखने। (6.1.142)

`तस्मिन् विषये' इत्यादि। अनेनाप्यालेखनं किरतेर्नाभिधेयतया विशेषणम्, अपि तु तदर्थस्य विषयभावेनेति दर्शयति। `अपस्किरते' इति। `तुदादिभ्यः शः' (3.1.77) इति शः, पूर्ववदित्वं रपत्वम्। `आलिख्य' इत्यादिना लेखनस्य किरत्यर्थस्य विषयतामुद्भावयति। आलिख्येति आकृष्येत्यर्थः। चतुष्पाच्छकुनिसाधनस्य लेखनस्य सामान्येनोपादानादिहापि प्राप्नोति--अपकिरति श्वौदनपिण्डमाशित इति, अत इदमालेखनविशेषणमाह--`हर्षजीविका' इत्यादि। हर्षः=प्रमोदः। जीविका=प्राणधारणोपायः। कुलायः=आश्रमः।

किं पुनः कारणं हर्षादष्वात्मनेपदं भवति, न त्विह प्रत्युदाहरणे? इत्याह--`हर्षजीविकाकुलायकरणेष्वेव' इत्यादि।

143. कुस्तुस्बुरूणि जातिः। (6.1.143)

ननु च सूत्रे नपुंसकलिङ्गेन निर्देशान्नपुंसकलिङ्गतायां फलजातावेव भवितव्यम्, नान्यलिङ्गतायाम्, औषधजातौ बहुवचन एव भवितव्यम्, नान्यत्र, बहुवचनेन निर्देशात्; तत् कथं कुस्तुम्बुवरित्यत्र पुल्लिङ्गतयामेकवचने च भवति? इत्यत आह--`सूत्रनिर्देशे' इत्यादि। नपुंसकग्रहणमुपलक्षणमात्रम्। बहुवचनमपि ह्यतन्त्रमेव सूत्रे। तथा चोक्तम्--`सूत्रे [सूत्रनिर्देशे नपुंसकलिङ्गमविवक्षितम्--काशिका. पदमंजरी च] लिङ्गवचनमतन्त्रम् `तस्याविवक्षितत्वात्' [नास्ति--काशिका] इति।।

144. अपरसपराः क्रियासातत्ये। (6.1.144)

`अपरस्पराः' इति। अपरे च परे चेति द्वन्द्वः। सन्ततशब्दाद्भावप्रत्यय उत्पन्ने सान्तत्यमिति भवितव्यमित्यभिप्रायेणाय--`किमिदम्' इत्यादि। सततशब्दादेवायं भावप्रत्य उत्पन्न इति दर्शयन्नाह--`सततस्य भावः' इत्यादि। `कथं सततम्' इति। एवं मन्यते--समो मकारलोपस्य लक्षणं तावदिह शास्त्रे नास्ति। अथ सातत्य इत्येतदेव निपातनम्, ततशब्दे परतः समो मकारस्य लोपो भविष्यतीत्यस्यार्थस्य ज्ञापनं कल्प्येत, एवं सति सन्ततमिति न सिध्यति? इत्यत आह--`समस्तते विकल्पेन' इत्यादि। अयमभिप्रायः--सातत्यशब्दं पूर्वाचार्यलक्षणप्रसिद्धमुच्चारयता पूर्वाचार्यलक्षणमप्याश्रितम्। अतस्तेन समो

मकारस्यात्र लोपो विधीयते। एतञ्च कृत्वाऽवश्यम्प्रभृतीनामपि कृत्यादिषु लोपः सिद्धो भवति। अतस्तदेव पूर्वाचार्यलक्षणं दर्शयति--`लुम्पेत्' इत्यादि। अन्त्यमिति शेषः। अवश्यंशब्दस्य कृत्यप्रत्ययान्ते परतो लुम्पेत् अन्त्यलोपमस्य कुर्यादित्यर्थः। अवश्यकर्त्तव्यम्। तुमुन्प्रत्ययान्तस्याप्यान्त्यं लुम्पेत्, काममनसोश्च शब्दयोः परतः--कर्त्तुं कामोऽस्येति कर्त्तुकामः, हर्त्तु मनोऽस्येति हर्त्तुमनाः।
सम्शब्दस्य चान्त्यं लुम्पेद्विकल्पेन हिततयोः शब्दयोः परतः--सहितम्, सततम्, सन्ततम्। `कुगतिप्रादयः' (2.2.18) इति समासः।
मांसशब्दस्यान्त्यं लुम्पेत्, क्व? पचि। `डुपचष् पाके' (धा.पा.996) इत्येतस्मिन् धातौ। किं विशिष्टे? `युङ्घञोः' इति। ल्युटि घञि च प्रत्यये परतो यः पचिस्तस्मिन्नित्यर्थः। अत्रापि वाग्रहणं सम्बध्यते। मांस्पचनम्, मांसपचनम्। मांस्पाकः, मांसपाकः। `कृद्योगा च षष्ठी समस्यते' (वा.86) इति समासः। समासेऽयं लोपः पूर्वाचार्याणामभिप्रायः, संहितायां च। तेन वाक्ये विच्छिद्यपाठे न भवति।।

145. गोष्पदं सेवितासेवितप्रमाणेषु। (6.1.145)
`तस्य च षत्वम्' इति। अनादेशप्रत्ययसकारत्वात् सुटः षत्वं न प्राप्नोतीत्यतस्तदपि निपात्यते। `गावः पद्यन्ते' इत्यादिना देशस्य सेवितत्वं दर्शयति। `असेविते' इत्यादि। ननु च गोष्पदशब्दः सूत्र उपात्तः, तत् कस्मादसेवितेऽगोष्पदादीनीत्याद्युदाह्रियते? इत्याह--`असेविते' इत्यादि। ननु च गोष्पदशब्दः सूत्र उपातः, तत् कस्मादसेवितेऽगोष्पदादीनीत्याद्युदाह्रियते? इत्याह--`असेविते' इत्यादि। क्रियते चेदमसेवितग्रहणम्, न च तत्र गोष्पदशब्दः सम्भवति; तस्मादसेवितेऽगोष्पदार्थं निपातनं विज्ञायते। `यद्येवम्' इति। यद्यसेवितेऽगोष्पदार्थं निपातनमित्यर्थः। `नार्थ एतेन' इति। असेवितग्रहणेन। कथं तेन विना सिध्यति? इत्याह--`गोष्पदप्रतिषेधात्'त्यादि। `सत्यमेवैतत्' इति। गोष्पदपरतिषेधादित्यादि यदुक्तं तस्य सत्यतामाह, न तु `नार्थं एतेन' इत्यस्यार्थः। यदि तर्हि सत्यमेवैतत्' तत् किमर्थं सेवितग्रहणमिह क्रियते? इत्याह--`यत्र तु' इत्यादि। नञ्समासेऽगोष्पद इत्येष तत्पुरुषः स्वभावादुत्तरपदर्थसदृशमर्थमाचष्टे' अब्राह्मणवत्। ततश्च न गोष्पदमगोष्पदमिति तत्पुरुषे कृते यत्र सेवितसय सेवनस्य प्रसङ्गोऽस्ति तत्रैवागोष्पदमित्येतत् तथापि भवति' इति। अपिशब्दो न केवलं यत्र सेवतप्रसङ्गोऽस्ति तत्रैवागोष्पदमित्यमुमर्थं द्योतयति। कस्मात्? पुनरत्रासेवितग्रहणात्। तत्राऽपि भवतीत्यत आह--`यानि हि' इति। `एवम्' इति। असेवितग्रहणार्थकः प्रकारः प्रत्यवमृश्यते। असेवितग्रहणे हि सति मा भूत् तस्य वैयर्थ्यमित बहुव्रीहिरयं भावसाधनेनासेवितशब्देन विज्ञास्यते। अविद्यमानं सेवितमस्मिन्निति बहुव्रीहिश्चात्यन्ताभावेऽपि भवतीति येषु गवामत्यन्तासम्भवस्तान्यरण्यान्यासेवितशब्देनोच्यन्ते। ततश्च तत्राप्यगोष्पदमिति भवति।
`गोष्पदपूरम्' इति। `वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्' (3.4.32) इति णमुल्। ननु च गोष्पदमिति षष्ठीसमासोऽयम्, तस्य च गोसम्बन्धि पदमर्थः, न तु प्रमाणम्, तत् कथं गोष्पदमात्रं क्षेत्रमित्यादि उदाहरणं प्रमाणे युज्यतदे? इत्यत आह--`नात्र' इत्यादि। न ह्यत्र स्वार्थप्रतिपादनार्थमेव गोष्पदमित्युपादीयते। किं तर्हि? क्षेत्रादेरियत्तां परिच्छेत्तुम्। तस्मात् क्षेत्रादेरियत्ता तेन परिच्छिद्यते= प्रमीयत इति भवति प्रमाणम्। न चात्र प्रमाणशब्देनायाम उच्यते, किं तर्हि? परिच्छेदमात्रम्। कुत एतत्? निपातनसामर्थ्यात्। निपातनं हि वस्त्वप्रसिद्धमप्युपादत्ते।।

146. आस्पदं प्रतिष्टायाम्। (6.1.146)
`आत्मयापनाय' इति। आत्मयापनम्=प्राणधारणम्। तदर्थं यत् स्थापनं तत् प्रतिष्ठेत्युच्यते। `आसपदम्' इति। आङः परस्य पदस्य सुट् निपात्यते। `आपदम्' इति। `आङ् मर्यादावचने' (1.4.89) इत्याङः कर्मप्रवचनीयत्वम्, तद्योगे `पञ्चम्यपाङ् परिभिः' (2.3.10) इति पञ्चमी, तदन्तेन `आङ् मर्यादाभि विध्योः' (2.1.13) इत्यव्ययीभावसमासः।।

147. आर्श्चयमनित्ये। (6.1.147)
यद्यनित्येऽशाश्वतिक आश्चर्यमिति निपात्यते, ततो, घटादिष्वपि स्यादित्येतं दोषं परिजिहीर्षुराह--`अनित्यतया' इत्यादि। अद्भुतम्=चित्रमित्युच्यते। यल्लोकेऽद्भुतं तच्चित्रम्, तस्य भावोऽद्भुतत्वम्। तस्य चान्यत्राभावादनित्यता विषयभूता, न हि तत्र ततोऽन्यत्र सम्भवति। तस्मात् तया विषयभूतयाऽद्भुतत्वमुपलक्ष्यते। `आशस्चर्यं यदि स भुञ्जीत' इति। `अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि' (3.3.145) इत्यनवक्लृप्तावसम्भावनायां लिङ्। भोजनं कस्यचिद्विशिष्टकालादावदृष्टपूर्वम्। अतस्तत्र भवत् तदद्भुतं भवति।।

148. वर्चस्केऽवस्करः। (6.2.148)
`कुत्सितं वर्चः वर्चस्कम्' इति। `कुत्सिते' इति कना निर्देशो दीप्तौ मा भूदित्येवमर्थः। दीप्तादपि हि वर्चःशब्दो वर्त्तत इति तत्रापि स्यात्। यदि वर्चस्केऽवस्करशब्दो निपात्यते तदा तत्सम्बन्धिदेशे न प्राप्नोति। तत्रापि च लोकेऽवस्करशब्दः प्रयुज्यत इत्यत आह--`तत्सम्बन्धात्' इत्यादि। यथा यष्टीः प्रवेशयेति यष्टिसम्बन्धात् पुरुषा अपि यष्टिशब्देनोच्यन्ते, तथा अवस्करसम्बन्धादवस्करशब्देन देशः।।

149. अपस्करो रथाङ्गम्। (6.1.149)
`रथावयवः' इति। अनेनादिशब्दस्थावयववचनमाचष्टे।।

150. विष्किरः शकुनिर्विकिरो वा। (6.1.150)
ननु च `विष्किरः शकुनौ वा' इत्येतावतैव सुङ्विक्लपः सिद्धः, तत्र किमर्थं विकिरग्रहणम्? इत्यत आह--`शकुनावेव विकिरशब्दस्य प्रयोगो यथा स्यादन्यत्र मा भूदित्येवमर्थं विकिराग्रहणम्' (इति)।।

151. हवस्वाच्चन्द्रोत्तरपदे मन्त्रे। (6.1.151)
पूर्वं कात्पूर्वग्रहणादभक्तः सुडित्युक्तम्। इह कात् पूर्वत्वं न सम्भवति, आगमलिङ्गं चास्य टित्त्वमस्ति, तत आगम एव सुङ् विज्ञायत इत्याह--`सुडागमो भवति' इति। स च भवन् `उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' (शाक.प.प.97) इति ह्रस्वादिति पञ्चम्याः, चन्द्रोततरपद इति च सप्तम्याः षष्ठ्यां प्रकल्पितायां चन्द्रशबदस्यैव भवति। `सुश्चन्द्रः' इति। प्रादिसमासः। `सूर्याचन्द्रमसौ' इति। द्वन्द्वः `देवताद्वन्द्वे च' (6.3.26) इत्यानङ्। अथेह कस्मान्न भवति--शुक्लमसि, चन्द्रमसीति, अत्रापि ह्रस्वात् परश्चन्द्रशब्द उत्तरपदमस्ति? इत्यत आह--`उत्तरपदम्' इत्यादि। शुक्लमसि, चन्द्रमसति वाक्ये। तस्मादिह चन्द्रशब्द उत्तरपदग्रहणेन न गृह्यत एव। यस्मादुत्तरपदं समास एव प्रसिद्धम्।।

152. प्रतिष्कशश्च कशेः। (6.1.152)
`प्रतिगतः कशां प्रतिकशोऽश्वः' इति। प्रादिसमासः। ननु च कशाशब्दोऽपि कशेरेव धातोः पचाद्यचमुत्पाद्य साध्यते, तदिहापि सुटा भवितव्यम्? इत्यत आह--`यद्यपि' इत्यादि। कशेरेव धातोर्यदुपादानं तत् तस्यैव कशेर्य उपसर्गः परतिशब्दस्तस्य प्रतिपत्तिर्यथा स्यादित्येवमर्थम्। न च कशेः प्रतिरुपसर्गः, किं तर्हि? गमेः।

153. प्रस्कण्वहरिश्चन्द्रावृषी। (6.1.153)
`प्रस्कण्वहरिश्चन्द्रौ' इति। प्रकृष्टः कण्वोऽस्येति प्रसकण्वः। हरिश्चन्द्रोऽस्येति हरिश्चन्द्रः। व्युत्पत्तिमातरमेतत् कृतम्, न त्वत्रावयवार्थोऽस्ति। रूढिशब्दौ ह्येतौ प्रत्यस्तमितावयवार्थौ क्वचिदेव ऋषिविशेषे वर्तेते। ननु च हरिश्चन्द्रे `ह्रस्वाच्चन्द्रोत्तरपदे' (6.1.151) इत्यनेनैव सुट् सिद्धः, तत्किमर्थं हरिश्चन्द्रग्रहणम्? इत्यत आह--`हरिश्चन्द्रग्रहणम्' इत्यादि।
`प्रकण्वः' इति। प्रगतः कण्वोऽस्मादिति प्रकण्वः। हरिरिव चन्द्रोऽस्येति हरिचन्द्रः।।

154. मस्करमस्करिणौ वेणुपरिव्राजकयोः। (6.1.154)
`परिव्राजके तविनिरपि' इति। निपात्यत इत्यपेक्षते। किं पुनः कारणम्? न प्राप्नोतीति, मात्वार्थामावात्। अविद्यमानमस्करोऽपि परिव्राजको मस्करीतयुचयते; मस्करिशब्दस्य तत्रैव रूढत्वात्। `अच्प्रत्ययमपि निपातयन्ति' इति कर्त्तर्युच्यमानः करणे न प्राप्नोतीत्यच्प्रत्ययमपि निपातयन्ति। यदि चेह वेणौ मस्करशब्दो निपत्यते तदा दण्डे न प्राप्नोति, तत्रापि चासौ लोके प्रयुज्यते? इत्याह--`वेणुग्रहणम्' इत्यादि। येन निवार्यते तदपलक्षणार्थं वेणुग्रहणम्। दण्डेनापि निवार्यत इत्यत्रापि भवत्येव। `कमपिवादित्वात्' इति। सांसारिकं फलं कर्मं। तदपददितुं प्रतिषेद्धं शीलं यस्य स कर्मापवादी, तस्य भवाः कर्मापवादित्वम्। `स हि' इत्यादिना तदेव कर्मापवादित्वं दर्शयति।।

155. कास्तीराजस्तुन्दे नगरे। (6.1.155)

156. कारस्करो वृक्षः। (6.1.156)
`केचित्' इति। यदि तर्हि सूत्रमेतत् केचिन्नाधीयते तत् कथं तेषां कारस्कशब्दो वृक्षे सिध्यति? इत्याह--`पारस्करप्रभृतिष्वेव' इत्यादि।।

157. पारस्करप्रभृतीनि च संज्ञायाम्। (6.1.157)
पारस्करप्रभृतयो रूढिशब्दा यथाकथञ्चिद्व्युत्पाद्याः। नात्रावयवार्थं प्रत्यभिनिवेष्टव्यम्। पारं करोतीति परस्करः `कृञो हेतुताच्छील्यानुलोम्येषु' (3.2.20) इति टः। रयं पातीति `रथस्पा'। `आतोनुपसर्गे कः' (3.2.3)। कार्य करोतीति करोतेःर्डुः, कार्यस्य च किरादेशः--`किष्कुः'। किमप्यन्तर्दघातीति दधातेः पूर्ववत् कः, किमो द्विर्वचनम्, पूर्वस्य च मकारस्य लोपः--`किष्किन्धा'।
`तद्बृहतोः' इत्यादि। तत्, बृहत्--इत्येतयोर्यथाक्रमं करपतिशब्दयोः परतश्चोरे देवतायाञ्चाभिधेयायां सुङ् भवति, अन्त्यस्य च तकारस्य लोपः। तत् करोतीति `किं यत्तद्बहुषु' (वा.242) इत्यज्विधानम्, तसकरश्चौरः, तत्करोऽन्यः। बृहतां पतिर्बृहस्पतिर्देवता, बृहत्पतिरन्यः। अथ किमर्थं चौरदेवतयोरित्युपाधिरुपादीयते, यावता संज्ञाग्रहणादेव तत्परिग्रहः सिद्धः, न ह्यन्यस्य तस्करबृहसपतिशब्दौ संज्ञा? इत्यत आह--`संज्ञाग्रहणम्' इत्यादि।
`प्रात्तुम्पतौ' इत्यादि। `तुप तुम्प तृप्तौ' (धा.पा.1309,1360?) इति परतः प्रशब्दात् परस्य सुङ्भवति गवि कर्त्तरि। `प्रस्तुम्पति गौः'। प्रतुम्पत्येवान्यः

`यदुक्तम्' इति भाष्ये। यदि तर्हि पारस्करपरभृतिराकृतिगणः, `प्रतिष्कशश्च कशेः' (6.1.152) इत्यारभ्य पूर्वं सूत्रं न पठितव्यम्, तस्याप्यनेनैव सङ्ग्रहात्? सत्यमेतत्; प्रपञ्चार्थं तु पठितव्यम्।।

158. अनुदात्तं पदमेकवर्जम्। (6.1.158)

`एकवर्जम्' इति। एकं वर्जयित्वेत्यर्थः। `द्वितीयायाञ्च' (3.4.53) इति णमुल्प्रत्ययः। यद्ययमधिकारार्थः स्यात्, तत् षाष्ठिक एव स्वरः सङ्गृहीतः स्यात्। ये त्वन्ये स्वराः `समानोदरे शयित ओ चोदात्तः' (4.4.108), `अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' (7.1.75) इत्येवमादयः सप्ताध्याय्याम्, ते न संगृहीता स्युः। परिभाषायां त्वस्यां तेऽपि संगृहीता भवन्ति। सा ह्येकदेशे स्थितापि सकलं शास्त्रमभिज्वलयति, यथा वेश्म प्रदीप इवेत्यालोच्याह--`परिभाषेयम्' इति। विध्यङ्गशेषभूता चेयम्। परिभाषा हि कार्यवाक्यानां शेषभावगता। यस्य पदादयवस्य स्वरित उदात्तो वा विधीयते तत्र शेषमनुदात्तं भवति। `स्वरविधिविषया' इति। स्वरविधिर्विषयोऽस्या इति विग्रहः। `यत्रान्यः' इति। अनुदात्तापेक्षमन्यत्वम्। `तत्रानुदात्तं पदम्' इति। ननु च `नीचैरनुदात्तः' (1.2.30) इत्यनुदात्तशब्दो विशिष्टगुणेऽवसङ्गीतः, तत्राज्झललक्षणञ्च पदम्, पदशब्दस्यार्थस्तत् कथमत्र सामानाधिकरण्यम्? नैष दोषः; अनुदात्ताच्कमनुदात्तं पदमिहाभिमतम्, तेन पद एवानुदात्तशब्दो वर्त्तते। कथम्? मत्वर्थीयाकारान्तत्वात्। अनुदात्ता अस्य सन्तीत्यनुदात्तम्। अर्श आदेराकृतिगणत्वादत्राच्। एकवर्जमित्युक्तम्, स त्वेको न ज्ञायते यो वर्जनीयः, तस्याभिव्यक्तये पृच्छति--`कः पुनः' इत्यादि। यस्य चोदात्तः स्वरतो वा विधीयते स एवाको वर्ज्यते। यदि ह्यसावपि न वर्ज्यते तस्य तत् स्वरविधानमनर्थकं स्यात्। `गोपायति, धूपायति' इति। `गुपू रक्षणे' (धा.पा.395) `धीप सन्तापे' (धा.पा.396) `गुपूधूप' (3.1.28) इत्यादिनाऽऽयपरत्ययान्तस्य `सनाद्यन्ता धातवः (3.1.32) इति धातुसंज्ञा, `धातोः' (6.1.162) इति धातोश्चान्तोदात्तत्वम्, आयप्रत्ययान्तस्यान्त्ययकाराकारस्य धातुस्वरत्वम्। `धातुस्वरं श्नास्वरो बाधते' इति। सतिशिष्टस्वरत्वात्, सतिशिष्टसय वलीयस्त्वात्। तथा ह्यु कतम्--`सतिशिष्टस्वरो बलीयानिति वक्तव्यम्'। (वा.6.1.168) इति। `लुनाति, पुनाति' इति। `प्वादीनां ह्रस्वः' (7.3.80) इति ह्रस्वः। श्नाप्रत्ययसय च प्रत्ययस्वरेणाद्युदात्तत्वम्। `श्नास्वरम्' इति। बाधत इति सम्बध्यते। ननु परत्वात् तिबादिषु कृतेषु विकरणैर्भवितव्यम्, अतः सति सार्वधातुकस्वरे श्नास्वरस्य शिष्यमाणत्वात् तस्य सतिशिष्टत्वम्; एवञ्च श्नास्वरेणैव बाधा युक्ता ततस्वरस्य? एवं मन्यते यत् `तास्यनुदात्तेन्ङिदुपदेश' (6.1.186) इत्यादिना तासेः परस्य लसार्वधातुकत्वं शास्ति तज्ज्ञापयति--शिष्टोऽपि विकरणस्वरः सार्वधातुकस्वरेण बाध्यत इति। `लुनीतः, पुनीतः' इति। `ई हल्यधोः (6.4.113) इतीत्वम्। `तस्स्वरमाम्स्वरः' इति। बाधत इति सम्बन्धः. बाधकत्वे तस्य हेतुः सतिशिष्टत्वमेव। `लुनीतस्तराम्' इति। `तिङ्श्च' (5.3.56) इति तसन्तात्तरप्, तदन्तात् `किमेतिङ्व्यय' (5.4.11) इत्यादिनाऽऽमुप्रत्ययः।

किमर्थं पुनरयमेकवर्जपदस्वरो विधीयते? इत्याह--`आगमस्य' इत्यादि। आगमादीनां पृथक् स्वरो मा मुदित्येवमर्थमेकं वर्जयित्वा पदानुदात्त्वं विधीयते। `आगमस्वरः प्रकृतिस्वरं वाधते' इति। सत्यस्मिन्नेकवर्जं पदं स्वरे। असति तवस्मिन् परकृतेरागमस्य च पृथगेव स्वरः स्यात्। `चत्वारः' इति। प्रकृतिस्वरः पुनराद्युदात्तत्वम्। तथा हि `चतेरुरन' (द.उ.8.78) इत्युरन्प्रत्ययान्तश्चतुःशब्दो व्युत्पाद्यत इति स नित्स्वरेणाद्युदात्तो भवति। `अनड्वाहः' इति। अनुडुहोऽप्येवं व्युत्पत्तिः क्रियते। `अन प्राणने' (धा.पा.1070) अस्मात् `सर्वधातुभ्योऽसुन्' (द.उ.9.49) इत्यसुन्प्रत्ययान्ततवादनःशब्दो नित्स्वरेणाद्युदात्तः। अनो बहतोत्यनसि वहेः क्विप् `उश्चानसः' (द.उ.9.49) इत्यसुन्परतययान्तत्वादनःशब्दो नित्स्वरेणाद्युदात्तः। अनो बहतोत्यनसि वहेः क्विप् `उश्चानसः' (द.उ.9.107) इत्यनस्युपपदे वहेर्धातोः क्विप्, अनश्चोकारादेशः। वहेर्यजादित्वात् सम्प्रसारणम्, उपपदसमासः, `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना पूर्वपदप्रकृतिस्वरत्वम्। तस्मादनुडुहोऽप्येवं व्युत्पादितस्य स्यादाद्युदात्तत्वम्। विकारः=आदेशः। `अनङ्स्वरः प्रकृते' इति। दध्यसथिशब्दावाद्युदात्तौ। तथा हि `असु क्षेपणे' (धा.पा.1209) `असिसञ्जिभ्यां क्थिन्' (द.उ.1.10) इति क्थिन्प्रत्ययान्तत्वान्नित्स्वरेणास्थिशब्द आद्युदात्तः। दधिशब्दोऽपि किन्प्रत्ययान्तत्वादाद्युदात्त एव। धाधातोः `आदृगमहनजनः किकिनौ लिट् च' (3.2.171) इति किन्प्रत्ययः, तत्र द्विर्वचने कृत आकारलोपे च दधीति भवति। `अस्थिदधि' (7.1.75) इत्यादिनाऽनङि कृते तस्य यः स्वरः स च कर्त्तवयः, तस्याप्यसत्यस्मिन्नस्थिदधिशब्दयोरनङश्च प्रथगेवोदात्तत्वं तु स्यात्। अस्मिंस्तु सत्यनङ एव भवति। `प्रकृतेः' इत्यादि। `गोपायति, धूपायति' इति। अत्र प्रकृतेर्गुपेर्धूपेश्च `धातोः' (6.1.162) इत्यन्तोदात्त्वे आयप्रत्ययादेरप्याकारस्य प्रत्ययाद्युदात्तत्वम्। गोपायधूपायशब्दयोरपि `सनाद्यन्ता धातवः' (3.1.32) इति धातुसंज्ञायां कृतायाम् `धातोः' (6.1.162) इत्यन्तोदात्तमेव प्राप्नोति। एवं पृथक् स्वरप्रसंगे यकाराकारस्यैव धातुस्वरो भवति, न गुपिधूप्योः, नापि प्रत्ययाकारस्य। `कर्त्तव्यम्' इति। धातोरन्तोदात्तत्वे प्रत्ययस्याद्युदात्तत्वे च प्राप्ते प्रत्ययाद्युदात्तत्वमेव भवति, न तु धातुस्वरः। अथानियमेनैकस्वरस्य वर्जयमानता कस्मान्न भवति, न ह्यत्र सूत्रे कश्चिद्व्यवस्थाहेतुरुपात्तः, न च विना व्यवस्थाहेतुना सा लभ्यते? इत्याह--`परनित्यान्तरङ्ग' इत्यादि। यत्र परादिस्वराः प्राप्नुवन्ति, तद्विपक्षाश्च, तत्र परादीनां बलीयस्त्वात् तत एव वर्जयं न, इतरे तु निवर्त्त्यन्ते। यत्र तु परनित्यान्तरङ्गापवादेऽपि क्वचिदिष्टं न सिध्यति, तत्र सतिशिष्टेन व्यवस्था भवति, तस्य हि वलीयसत्वमुक्तम्। अतः सतिशिष्टेतरस्वरप्राप्तौ सतिशिष्ट एव वर्ज्यते, मेतरः। कथं पुनः सतिशिष्टे न व्यवस्था? इत्यत आह--`यो हि' इत्यादि। कथमेतज्ज्ञायते? इत्याह--`तथा हि' इत्यादि। `गोपायति' इति। अत्रायप्रत्ययस्य प्रत्ययस्वरेणाद्युदात्तत्वम्। स च स्वरो धातुस्वरस्यापवादोऽपि सन्नायप्रत्ययान्तस्य धातुसंज्ञायां कृतायां पुनस्तेन धातुस्वरेण सतिशिष्टेन बाध्यते।

`कार्ष्णोत्तरासङ्गपुत्रः' इति। बहुव्रीहिं कृत्वा तत्पुरुषः कर्त्तव्यः। `बहुव्रीहिस्वरः' इति। `बहुव्रीहौ प्रकृत्या' (6.2.1) इत्यादिनोक्तः। पूर्वकं ज्ञापकं चेतस कृत्वाऽऽह--`विकरणस्वरस्तु' इत्यादि।

`विभक्तिस्वरात्' इत्यादि। `निपाता आद्युदात्ताः' (फि.सू.4.80) इति नञुदात्तः। तत्र तत्पुरुष समासे कृते `तत्पुरेषे तुल्यार्थ' (6.2.2) इत्यदिवा प्रकृतस्वरादुदात्तत्वमेव भवति। यदा तु नञ्स्वराद्विभक्तिसवरः प्राप्नोति नञ्स्वरश्चेष्यते, तस्माद्विभक्तिस्वरो `बलीयानिति वक्तव्यम्। बलीयस्त्वे सति किं भवति? इत्याह--`अतिस्तर इत्यत्र' इत्यादि। `तिसृभ्यो जसः' (6.1.166) इत्यनेन विभक्तेरुदात्तत्वं विधीयते। तद्बलीयस्त्वात् सतिशिष्टमपि नञ्सवरेण बाध्यते। विभक्तस्वरस्य तु--तिस्रः, त्रिसृष्वित्येषोऽवकाशः।
`विभक्तिनिमित्तस्वराच्च' इत्यादि। विभक्तिर्निमित्तं यस्य स स्वरो विभक्तिनिमित्तस्वरः। `यस्य विभक्तिर्निमित्तमामः' इति। आमो विभक्तिनिमित्तत्वं, `पथमथोः सर्वनामस्थाने' (6.1.199) इत्यतः सर्वनामस्थानग्रहणानुवृत्तेः। तस्य `यदुदात्तत्वम्' इत्यादिना बलीयस्त्वस्य फलं दर्शयति। विभक्तिनिमित्तस्वरस्य--चत्वारः, अनड्वाह इतत्येषोऽवकाशः।
`वाक्ये हि' इत्यादि। देवदत्तशब्द आमन्त्रितस्वरेणाद्युदात्तत्वम्, गोशब्दो हि प्रातिपदिकस्वरेणान्तोदात्तः, तस्य `औतोऽम्शसोः' (6.1.93) इत्याकारोऽपि स्थानिवद्भावेनोदात्त एव। तथा विभक्त्या सहैकादेशेऽपि `एकादेश उदात्तेनोदात्तः' (8.2.5) इति वचनात्। अभिशब्दोऽन्तोदात्तः, तस्य `निपाता आद्युदात्ताः' (फि.सू.4.80), `उपसर्गाश्चाभिवर्जम्' (फि.सू.4.81) इत्याद्युदात्तविधाने वर्जितत्वात् प्रातिपदिकस्वर एव भवति। आङुपसर्गस्वरेणाद्युदात्तः। अजित्येष तु लोडन्तः `तिङ्ङतिङ' (8.1.28) इति निघातेनानुदात्तः। शुक्लशब्दो हि प्रातिपदिकस्वरेणान्तोदात्त इति तस्य `एकादेश उदात्तेनोदात्तः' (8.2.5) इति टापा सहैकादेशे कृतेऽन्तोदात्त एव भवति। एवममिपूरवत्वे कृते वेदितव्यम्।
तदेवं पदग्रहणाद्वाक्य एकैकस्मिन् पदे पृथगेव स्वरो भवति। यद्यनुदात्तं पदमेकवर्जं भवति, एवं सति यावत् पदसंज्ञा न भवति तावदेकं वर्जयित्वा परिशिष्टस्यानुदात्तत्वेन भवितव्यम्, ततश्च कुवल्या विकारः, कौवलमित्यत्र `अनुदात्तादेश्च' (4.2.140) इत्येनेनाञ्प्रत्ययो न स्यात्। यत कुवलशब्दोयं `ग्रामदीनाञ्च' (फि.सू.2.38) इत्याद्युदात्तः, गौरादित्वान्ङीषि विहतेऽपि पदव्यपदेशाभावादाद्युदात्तत्वं न परित्यजतीत्याह--`परिमाणार्थं चेदम्' इत्यादि। पदमत्र गौणमभिप्रेतम् न मुख्यम्; अन्यथा पदाधिकारे सति पुनः पदग्रहणमनर्थकं स्यात्। तस्मादुत्तरकालं यस्य पदसंज्ञा भविष्यति, तदिह पदमभिप्रेतमिति वेदितव्यम्। असति पदग्रहणे न ज्ञायते--कियतामचामनुदात्तत्वं भवतीति। पदग्रहणे तु सत्येकस्मिन् पदे यावन्तोऽचस्तावतामनुदात्तत्वं भवतीत्येषोऽर्थो ज्ञायते, तस्मात् परमाणार्थमिति। नतु सुबन्तस्य तिङन्तस्य वा प्रतिपादनार्थम्। तेन प्रागेव पदव्यदैशादनुदात्तत्वेन भवितव्यमिति न भवति पूर्वोक्तदोषप्रसङ्गः। स्यादेतत्--यद्यपि पदमित्यनेन मुख्यं पदं न प्रत्याय्यते, तथापि पदाधिकारेण तदिह सन्निधाप्यत इति तदवस्थ एव स दोषः? इत्यत आह--`पदाधिकारस्य निवृत्तिं करोति' इति। एतत् पदग्रहणं गौणमर्थं प्रतिपादयन् मुख्यपदधिकारं निवर्त्तयति। तेन किमिष्टं भवति? इत्याह--`तेन' इत्यादि। `तथा च' इति। एवं च सतीत्यर्थः प्रागेव पदवयपदेशात् स्वरविधानतुल्यकालमेव परिशिष्टतस्यानुदात्तत्वं भवतीति। अमुमेवार्थं द्रढयितमाह--`गर्भिणी' इत्यादि। गर्भोऽस्या अस्तीतीनिः, `ऋन्नेभ्यो ङीप्' (4.1.5) इति ङीप्। गर्भशब्दोऽयं कुवलशब्दवदाद्युदात्तः। तत्र यदीनिप्रत्ययस्योदात्तत्वसमकालमेवानुदात्तत्वं भवति ततो गर्भिणीशब्दस्यानुदातत्तादित्वात् `अनुदाततादेरञ् (4.2.44) इत्यञ् प्राप्नोतीति तद्बाधनार्थं युज्यते तस्य भिक्षादिषु पाठः। तस्य तूत्तरकालं पदसंज्ञायामुपजातायामवशिष्टस्यानुदात्तत्वं स्यात्। एवं सति गर्भिणी शब्द आद्युदात्तः स्यात्। ततश्चाणो बाधनार्त भिक्षादिषु न पठ्येत, पठ्यते च। तस्मात् ततो विज्ञायते--प्रागेव पदव्यपदेशात् स्वरविधिसमकालमेवावशिष्टस्यानुदात्तत्वं भवतीत्यभिप्रायः। किं पुनः कारणं लब्धायां पदसंज्ञायामवशिष्टस्यानुदात्त्वे विधीयमाने कुवलशब्दावञ् न सिध्यति, कथञ्च गर्भिणीशब्दस्यानुदात्तादिलक्षमस्याओ बाधनार्थो भिक्षादिषु पाठः प्रागेव पदवयपदेशात् स्वरविधिसमकालमेवावशिष्टस्यानुदात्तत्वं भवतीत्यस्यार्थस्य ज्ञापकः? इत्याह--`कुवलगर्भशब्दौ' इत्यादि। आद्युदात्त्वे ह्यनयोर्यदि पदसंज्ञायां सत्यामवशिष्टस्यानुदात्तत्वं स्यात्, कुवलीशब्दस्य च स्यात् ततश्च कुवलीशब्दाद्विकारेऽर्थेऽञ् न स्यात्।
गर्भिणीशब्दस्याद्युदात्तत्वादञ् प्राप्नोति, ततस्तद्बाधनर्थं भिक्षादिषु न पठ्येत, पठ्यते च, तस्मादवसीयते--प्रागेव पदव्यपदेशादवशिष्टस्यानुदात्तत्वं भवति।।

159. कर्षात्वतो धञोऽन्त उदात्तः। (6.1.59)
`कर्षात्वतः' इति। कर्षश्चात्वांश्चेति कर्षात्वत्--समाहारद्वन्द्वः। आकारोऽस्यास्तीत्यात्वान्। `कर्षतेर्धातोः' इति। `कृष विलेखने' (धा.पा.1286) इत्यस्याकारवतश्चेति सम्बध्यते। कर्षतिना दातुना साहचर्यदात्वोऽपि धातोरेव ग्रहणम्। `धञः' इति प्रत्ययग्रहणम्, अतः प्रत्ययग्रहणपरिभाषया तदन्तस्य कार्यं ज्ञायत इत्याह--`घञन्तस्य' इति। एतच्च कर्षतेरात्वतश्च समानाधिकरणं विशेषणम्। `पाकः' इत्यादि। `अत उपधायाः' (7.2.116) इति वृद्धौ कृतायां धातोराकारवत्त्वम्। `दायः धायः' इति। `आतो यक् चिण्कृतोः' (7.3.33) इति युक्।
किमर्थं पनः प्रकृते विकृतसय ग्रहणं क्रियते न `कृषातः इत्येवोच्यते? इत्यत आह--`कर्ष इति विकृतिनिर्देशः' इत्यादि। कृषिर्विलेखनार्थो भ्वादौ तुदादौ च पठ्यते, तत्र यस्य विकरणे परतो गुणात्मको विकारो भवति तस्यैव भौवादिकस्य ग्रहणमिष्यते, नेतरस्य। एतच्च विकृतनिर्देशे सति लभ्यते। तस्मात् कृषतेस्तौदादिकस्य निवृत्तिर्यथा स्यदित्येवमर्थो विकृतिर्देशः। कस्मात् पुनस्तौदादिकसय निवृत्तिरिष्यते? इत्यत आह--`तौदीदिकस्य' इत्यादि।
अथ किमर्थं मतुपा निर्देशः क्रियते, न कर्षात इत्योवोच्येत? नैवं शक्यम्, विहितविशेषणस्याकारस्य ग्रहणं विज्ञायते--आकारान्ताद्यो विहित इति। तथा च दाय इत्यादादेव स्यात्, पाक इत्यादौ न स्यात्। मतुब्ग्रहणे तु सति न दोषः।
अन्तग्रहणमुत्तरार्थम्, इह हि `अलोऽन्त्यस्य' (1.1.52) इति भविष्यति।।

160. उञ्छादीनां च। (6.1.160)
`उञ्छः, म्लेच्छः, जञ्जः, जल्पः' इति। `उछि उञ्छे (धा.पा.295) `म्लेच्छ अव्यक्तायां वाचि' (धा.पा.1662), `जज जजि युद्धे' (धा.पा.242,243), `जप जल्प व्यक्तायां वाचि' (धा.पा.397,398)। जञ्जेः कुत्वाभावो निपातनात्। `जपो व्यध इत्यवन्तौ' इति। तत्र `व्यघजपोरनुपसर्गे' (3.3.61) इत्यबन्तत्वम्। बधशब्दो हि `हनश्च वधः' (3.3.76) इति। `तयोर्धातुसवरः प्राप्तः' इति। `धातोः' (6.1.162) इत्युदात्तत्वम्। `व्यधः' इति। `व्यध ताडने' (धा.पा.1181)। अत्रापि व्यधजपोरित्यबन्तत्वम्, पूर्ववद्धातुस्वरः प्राप्तः। `कालविशेषे' इति। कृतद्वापरादौ। `रथाद्युपकरणे च' इति। आदिशब्देन हलादेर्ग्रहणम्। `गरः' इति। `गृ निगरणे' (धा.पा.1410)। `ऋदोरप्' (3.3.57) इत्यबन्तः। `विषम्' इत्यनेन दूष्यशब्दस्य विशेषे वृत्तिं दर्शयति। `अन्यत्राद्युदात्त एव' इति। धातुस्वरेण। `वेदवेगवेष्टबन्धाः' इति। `विद ज्ञाने (धा.पा.1064) `विचिर् पृथगभावे' (धा.पा.1442) `वेष्ट वेष्टने' (धायपा.255) `बन्ध बन्धने' (धा.पा.1508)। एभ्यो यथायोगं पर्याद्युपसर्गपूर्वेभ्यः क्विप्, प्रादसमासः। `अन्यत्र मध्योदात्तः' इति।
वर्त्तनिशब्दो हि `अर्त्तिसृघृ' (द.उ.1.2) इत्यतोऽनिप्रत्ययेऽनुवर्त्तमाने `वृतेश्च' (द.3.1.6) इत्यनेन `वृतु वर्त्तने (धा.पा.758) इत्येतस्मादनिप्रत्ययमुत्पाद्य व्युत्पाद्यते। तस्मात् प्रत्ययस्वरेण मध्योदात्तो भवति। `दरः' इति। `दृ विदारणे' (धा.पा.1493) ऋकारान्तत्वादबन्तः।
`साम्बतापौ भावग्रर्हायाम्' इति। सहाम्बया वर्तत इति साम्बः, `बहुव्रीहौ प्रकृत्या पूर्वपदम्' (6.2.1) इति प्रकृतिस्वरेण सहशब्दस्य `निपाता आद्युदात्ताः' (फि.सू.4.80) इत्युदात्तत्वे प्राप्ते भावगर्हायामन्तोदात्तत्वं विधीयते। साम्बो भिक्षते। भिक्षणमत्र भावग्रर्हा। तपनं तापः `तप सन्तापे' (धा.पा.985) इत्यस्माद्घञ्। आद्युदात्तत्वे प्राप्ते वचनम्। तापो दस्यूनां धार्मिकेषु भावगर्हायामिति किम्? साम्बस्तिष्टति, तापो महान् ग्रीष्मस्य। अनयोराद्युदात्तत्वमेव।
`उत्तमशश्वत्तमौ' इति। एतौ तमप्रत्ययान्तो। पित्त्वात् प्रत्ययस्यानुदात्तत्वे उच्छब्दस्य `निपाता आद्युदात्ताः' (फि.सू.4.80) इत्युदात्तत्वमित्यत आद्युदात्तत्वे प्राप्तेऽन्तोदात्तार्थमुत्तमशब्दः पठ्यते। शश्वच्छब्दोऽपि प्रतिपदिकस्वरेणान्तोदात्तः, ततो मध्योदात्तत्वे प्राप्तेऽन्तोदात्तार्थमेव पठ्यते। `सर्वत्र' इति। भावगर्हायाम्, अन्यत्र च।
`भक्ष--मन्थ' इत्यादि। `भक्ष भक्षणे' (धा.पा.1557), [भक्ष अदने--धा.पा.] `मन्थ विलोडने' (धा.पा.42) `भुजकौटिल्ये' (धा.पा.1417), [भुजो--धा.पा.] `दिह उपचये' (धा.पा.1015)। ननु भक्षिश्चुरादित्वाण्ण्यन्त इति तत् `एरच्' (3.3.56) इत्यचा भवितव्यम्, तत् कथमसौ घञन्तः? इत्याह-- `भक्षिर्ण्यन्तोऽपि' इत्यादि। अत्रैव कारणमाह--`एरजण्यन्तानाम्' इति।।

161. अनुदात्तस्य च यत्रोदात्तलोपः। (6.1.161)
`कुमारौ' इति। `वयसि प्रथमे' (4.1.20) इति ङीप्, `यस्येति च' (6.4.148) इत्यकारलोपः। `कुमारशब्दोऽन्तोदात्तः' इति। प्रातपदिकस्वरेण। एवमुत्तरत्राप्यन्तोदातततता वेदितव्या। `ङीप्' इति। `अनुदात्तः' इति। पित्त्वात्।
`प्रासङ्ग्यः' इति। `तद्वहति' (4.4.76) इत्यादिना प्राग्घितीयो यत्। `प्रसङ्गशब्दः' इत्यादि। `षन्ज सङ्गे' (धा.पा.987) इत्यस्माद्घञमुत्पाद्य प्रासङ्गशब्दो व्युत्पाद्यते, तस्य `गतिकारकोपपदात्' (6.2.139) इति `तत्पुरुषे' (6.2.123) इति वरत्तमाने `थाथघञ्क्ताजबित्रकाणाम्' (6.2.144) इत्यन्तोदात्तत्वं विहितम्, अतो।सावन्तोदात्तः। `नैतदस्ति' इति। `उदात्तो लुप्तते' इति यदुक्तं तस्य प्रतिषेधः। कस्मान्नैतदस्तीत्याह--`स्वरिते हि' इत्यादि। स्वरविधिसमकालमेव शिष्टस्यानुदात्तत्वं भवतीति प्रातिपदिकमेतत्। तस्मात् स्वरिते विधीयमाने परिशिष्टस्यानुदात्तत्वेन भवितव्यम्। तत् कुत उदात्तलोपः? न कुतश्चिदित्यर्थः। `तदेतत्' इत्यादि। यस्मादेवमनुदात्तग्रहणस्य प्रत्युदाहरणं न सम्भवति, तस्मादनुदात्तग्रहणमेतदादेरनुदात्तस्योदात्तत्वं यथा स्यादित्येवमर्थम्; अन्यथा ह्यस्यानर्थक्यमेव स्यात्।
किं पुनः कारणमादेरनुदात्तस्योदात्तो न सिध्यति, यतस्तदर्थमनुदात्तग्रहणं क्रियते? इत्यत आह--`अन्त इति हि' इत्यादि। अवधारणमात्रं द्रष्टष्यम्। अन्तस्यैव स्यात्, नादेरित्यर्थः। क्व पुनरादेरुदात्तार्थमनुदात्तग्रहणं क्रियते? इत्याह--`मा हि धुक्षाताम्' इत्यादि। दुहेर्लुङ्, आत्मनेपदमातामाथाम्, ततश्च `शल इगुपधादनिटः क्सः' (3.1.45) इति च्लेः क्सादेशः, `तास्यानुदात्त' (6.1.186) इत्यादिना लसार्वधातुकस्यानुदात्तत्वम्, `क्सस्याचि' (7.3.72) इत्यकारलोपः, क्सस्याकारः प्रत्ययस्वरेणोदात्तः, `दादेर्धातोर्घः' (8.2.32) `खरि च' (8.4.55) इति चर्त्वम्, घकारस्य ककारः, षत्वम्। अत्रासत्यनुदात्तग्रहण आतामाथामाकारस्यादिभूतस्यानुदात्तत्वं न स्यात्, सति त्वस्मिन्नाकारस्यादिभूतस्योदात्तत्वं स्यात्। हिशब्दस्य प्रयोगे `हि च' (8.1.34) इति निघातप्रतिषेधो न स्यात्। निघाते हि तिङन्तस्यासत्युदात्तलोपो न स्यात्। माङ्प्रयोगोऽप्यटः `न माङ्योगे' (6.4.74) इति प्रतिषेधो यथा स्यात्। अटि हि तस्योदात्तत्वाच्छेषस्यानुदात्तत्वं स्यात्, तथा च सत्यनुदात्तस्थाकारलोपः स्यात्, नोदात्तस्य।
`भृगवः' इति। भृगोरपत्यानि `ऋष्यन्धकवृष्णि' (4.1.114) इत्यादिना ऋष्यण, तस्य `अत्रिभृगुकुत्स' (2.4.65) इत्यादिना बहुषु लुक्। ननु चात्रापि विभक्तावुत्पन्नायामुदात्तस्य लोपः, तस्मादिहापि भवितव्यमेव? इत्यत आह--`प्राक् सुबुत्पत्तेः' इत्यादि। न हि गोत्रप्रत्ययसय लुग्विधौ विभक्तिर्निमित्तत्वेनाश्रीयते। तस्मात् प्रागेव गोत्रप्रत्ययस्य लुक्, ततो नात्रानुवात्तत्वम्। `बैदी, और्वी' इति। विदस्यापत्यम्, उर्वस्यापत्यमिति `अनृष्यानन्तर्य्ये बिदादिभ्योऽञ्' (4.1.104) इत्यञ्, ञित्स्वरेणाद्युदात्तः `टिढ्ढाणञ्' (4.1.15) इति ङीप्।।

162. धातोः। (6.1.162)

`ऊर्णोति' इति। अदादित्वाच्छपो लुक्।।

163. चितः। (6.1.163)
`भङगुरम्' इत्यादौ प्रत्ययस्वरस्यापवादोऽन्तोदात्तत्वं विधीयते। `कुण्डिनाः' इति। अत्र तु स्थानिवद्भावः स्वरस्य। कुण्डिनोशब्दस्यायमादेशः, स च प्रतययस्वरेण मध्योदात्त इति तदादेशोऽपि मध्योदात्त एव सात्। कुण्डमस्यास्तीतीनिः, तदन्तात् स्त्रियां `ऋन्नेभ्यो ङीप्' (4.1.5) इती ङीप्। कुण्डिन्या अपत्यानि बहुनीति गर्गादित्वात् यञ् (4.1.105), तस्य बहुषु लुक्। परिशिष्टस्य कुण्डिनजादेशः।
`चिति प्रतयये' इत्यादि। कथं पुनः प्रकृतिप्रत्ययसमुदायस्यान्तोदात्तत्वं लभ्यते? यथा लभ्यते तथाख्यायते--इह चित इति समुदायसम्बन्धेऽवयवादेषा षष्ठी। चितोऽवयवस्य सम्बन्धी यः समुदायः तस्यान्तोदात्तत्वं भवतीत्यर्थः। अथ वा चित इति मत्वर्थीयाच्प्रत्ययान्तमेतत्--चिदस्यास्तीति चितः, तस्यान्तोदात्तत्वं भवतीत्यर्थः। तेन प्रकृतिप्रत्ययसमुदायस्यान्तोदात्तत्वं सिध्यति। यदि तर्हि चित इति मत्वर्थीयाकारप्रत्ययान्तमेतत्, तर्हि सुब्व्यत्ययेन षष्ठ्याः प्रसङ्गे प्रथमा भविष्यति। `बहुपटवः' इति। ईषदसमाप्ताः पटव इति `विभावा सुपो बहुच् पुरस्तातु' (5.3.68) इति बहुच्। `उच्चकैः' इति। `अव्ययसर्वनाम्नामकच् प्राक्टेः (5.3.72) इत्यकच्।।

164. तद्धितस्य। (6.1.164)
`कौञ्जायनाः' इति। `कुञ्जादिभ्यश्च्फञ्' (4.1.98) इति च्फञन्तात् `व्रातच्फञोरस्त्रियाम्' (5.3.113) इत्यागतस्य अप्रत्ययस्य `तद्राजस्य बहुषु' (2.4.62) इत्यादिना लुक्।
`किमर्थम्' इति। पुर्वेणैव सिद्धमिति मन्यमानस्य प्रश्नः। `परमपि' इत्यादि। च्फञो हि चकारः `व्रातच्फञोरस्त्रियाम्' (5.3.113) इत्यत्र विशेषणेन चरितार्थः। ञकारोऽपि वृद्धौ। यद्येवं नोच्येत तदा परत्वान्ञित्स्वरः स्यात्। तस्मात्तमपि बाधित्वान्तोदात्तत्वमेव यथा स्यादित्येवमर्थं क्रियते।।

165. कितः। (6.1.165)
प्रत्ययस्वरस्यापवादोऽयम्। `आक्षिकः, शालाकिकः' इति। `तेन दीव्यति' (4.4.2) इत्यर्थे ठक्।।

166. तिसृभ्यो जसः। (6.1.166)
`तिस्रस्तष्ठन्ति' इति। `त्रिचतुरोः स्त्रियां तिसृचतसृ' (7.2.99) इति तिस्रादेशः, `अचि र ऋतः' (7.2.100) इति ऋकारस्य रादेशः। `उदात्तस्वरितयोः' इत्यादि। त्रिशब्दः प्रातपदिकस्वरेणान्तोदात्त इति तदादेशोऽपि तिसृशब्दोऽन्तोदात्त एव। तत्र ऋकारस्यान्तोदात्तस्य स्थाने विहितो रफ उदात्तयण् न भवति। ततः परस्य जसः `उदात्तस्वरितयोः' (8.2.4) इत्यादिना स्वरितः प्राप्नोति, अतोऽस्यायमपवादः।
अथ जस्ग्रहमं किमर्थम्, तिसृकेऽप्यत्र मा भूदिति चेत्? स्यादेतत्--त्रिशब्दात् संज्ञायां कनि कृते तत्र च `तिसृभावे कन्युपसंख्यानम्' (वा.837) इति तिस्रादेशे तिसृकेत्यत्रापि स्यात् असति जस्ग्रहण इति नैतदस्ति; नित्स्वरोऽत्र बाधको भविष्यति। नाप्रापते स्वरान्तरे तिसृस्वर आरभ्यते, स यथैव `अनुदात्तौ सुप्तितौ' (3.1.4) इत्येतत्स्वरं बाधते तथा नित्स्वरमिति चेत्? नैतदस्ति; यस्माद्येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते `अनुदात्तौ सुप्तितौ' (3.1.4) इत्येतस्मिन् तिसृस्वर आरभ्यते, नित्स्वरे पुनः प्राप्ते चाप्राप्ते च। अथ वा मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते' (व्या.प.10) इत्येव तिसृस्वरे `अनुदात्तौ सुप्तितौ' (3.1.4) एत्येतं बाधिष्यते, न नित्स्वरम्। शसादिनिवृत्त्यर्थं तर्हि जस्ग्रहणमिति चेत्? एतदपि नास्ति; शसि तावद्भवितव्यमेवान्तोदात्तेन--`उदात्तयणो हल्पूर्वात् (6.1.174) इति। अन्यानि सर्वाणि बहुवचनानि हलादीनि, तत्र `षट्त्रिचतुर्भ्यो हलादिः' (6.1.174) इति। अन्यानि सर्वाणि बहुवचनानि हलादीनि, तत्र `षट्त्रिचतुर्भ्यो हलादिः' (6.1.179) इति `झल्युपोत्तमम्' (6.1.80) इत्युदात्तत्वेन भविितव्यम्। बहुवचनविषयत्वाच्च तिसृशब्दसय द्विवचनैकवचने न स्तः। तत्रान्तरेण जस्ग्रहणं जस एव भविष्यतीत्यत आह--`जस्ग्रहणम्' इत्यादि। एके भाष्यकारादयः। असति जस्ग्रहणे तिसृ अतिक्रान्ताविति प्रादिसमासे कृते अतितिस्राविर्यत्रापि स्यात्, तन्मा भूदित्येष दोष इत्युपसमस्तार्थं जस्ग्रहणमिच्छन्ति।।

167. चतुरः शसि। (6.1.167)
`चतेरुरन्' (द.उ.8.78) इत्युरन्प्रत्ययान्तत्वाच्चतुःशब्द आद्युदात्तः, तस्य हि शसि परतोऽनेनान्तो दात्तत्वं विधीयते।
अथेह कस्मान्न भवति--चतस्रः पश्येति, चतस्रादेशेऽपि चतुरः कृते स्थानिवद्भावेन न प्राप्नोति? इत्यत आह--`चतस्रादेश' इत्यादि। चतस्रादेश कृत आद्युदाततनिपातनं करिष्यते, स निपातनस्वरः शसि स्वरस्य बाधक इत्याद्युदात्तत्वनिपातनाच्यतन्नः पश्येत्यत्रायं स्वरो न भवति। अथ वा पुरावात् `अचि र ऋतः' (7.2.100) इति रादेशे कृत ऋकारसय तावन्न भवितव्यम्। अकारस्यापि "अचः परस्मिन् पूर्वविधौ" (1.1.57) इति यणादेशस्य स्थानिवद्भावदृकारेम व्यवधाने सति न भवितव्यमेव। ननु च `न पदान्तद्विर्वचन' (1.1.58) इत्यादिना स्वरविधौ प्रतिषिध्यते स्थानिवद्भावः? नैतदस्ति; उक्तं हि तत्र `स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत्' (का.वृ.1.1.58) इति, न चायं लोपाजादेशः।।

168. सावेकाचस्तृतीयादिर्विभक्तिः। (6.1.168)

साविति प्रथमैकवचनस्येदं ग्रहणं स्यात्? सप्तमीबहुवचनस्य वा? उभयोर्वा? तत्र यदि प्रथमैकवचनस्य ग्रहणं स्यात्, त्वाया त्वयि इत्यत्रापि स्यात्। भवति हि युष्मच्छब्दसय `त्वाहौ सौ' (7.2.94) इति त्वादेशे कृते प्रथमैकवचने परत एकाच्त्वम्। सामान्येनोभयग्रहणेऽप्येष दोषः। सप्तमीबहुवचनस्य ग्रहणे नायं दोषः प्रसज्येत्, युष्मास्वित्यत्र युष्मच्छब्दस्यानेकाच्त्वमित्येतत् सर्वं हृदि कृत्वाऽऽह--`साविति सप्तमीबहुवचनस्य ग्रहणम्' इति। `याद्भ्याम्' इति। याच्छब्दाच्छत्रन्तात् तृतीया। `राज्ञे' इति। भवति राजञ्शब्दो भसंज्ञके परतो लोपे कृत एकाच्, न तुल सौ राजस्विति; तत्रानेकाच्त्वात् `वात्तरा, वात्तमा' इति। तरप्तमबिति भवति वा तृतीयादिः, न तु विभक्तिः।

अथ कस्मात् सप्तमीबहुवचनग्रहणम्? इत्याह--`सप्तमीबहुवचनस्य' इत्यादि। `त्वया त्वयि' इति। युष्मदस्मदोः `मपर्यन्तस्य' (7.2.91) `त्वमावेकवचने' (7.2.97) इति त्वादेशः। परिशिष्टस्य `योऽचि' (7.2.89) इति यकारः।।

169. अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे। (6.1.169)

यदि विग्रहाभावेन यो नित्यसमासः स इह नित्यसमासग्रहणेन गृह्येत् ततोऽवाचा, सुवचा ब्राह्मणेनेत्यत्रापि विकल्पेन स्यादित्येतच्चेतसि कृत्वाऽऽह-- `नित्यशब्दः स्वर्यते' इति। स्वरितत्वमस्य क्रियत इत्यर्थः। तेन किं भवति? इत्याह--`तेन' इत्यादि। स्वरितत्वेन ह्यधिकारगतिर्भवति। तेन नित्याधिकारो यो विहितः समासः। स च नित्याधिकारविहितसमासो न भवतीत्यनित्यसमासः। `सुवाचा' इति। `कुगति' (2.2.18) इत्यादिना समासः।

`अव्ययपूर्वपदप्रकृतिस्वरः' [`तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्यय' इति पूर्वपदप्रकृतिस्वरः--काशिका] इति। स पुनरुदात्तः; `निपाताश्चाद्युदात्ताः', `उपसर्गाश्चाभिवर्जम्' (फि.सू.4.80,81) इति वचनात्। यथात्रोत्तरपदस्यान्तोदात्तत्वं नास्ति, एवमनित्यसमासत्वमपि; `कुगति' (2.2.18) इत्यादावपि नित्यग्रहणानुवृत्तेः। एवं सति `मयूरव्यंसकादयश्च' (2.1.72) इत्यनेनात्र समासो द्रष्टव्यः; मरव्यूयंसकादेराकृतिगणत्वात्।

`अन्यथा हि' इति। यद्युत्तरपदग्रहणं न क्रियेत, तदैकाज्ग्रहणं समासविशेषणं स्यात्। तत्र को दोषः स्यात्? इत्याह--`तत्र' इत्यादि। ऊर्क्शब्दः सम्पदादित्वात् क्विबन्तः।

`अग्निचिता, सोमसुता' इति। `अग्नौ चेः' (3.2.91) `सोमे सुञः' (3.2.90) इति क्विप्। `अयं नित्याधिकारे समासो विधीयते' इति। तत्र `नित्यं क्रीडाजीविकयोः' (2.2.18) इत्यतो नित्यग्रहणानुवृत्तेः। `तत्र' इत्याद्। `गतिकारकोपपदात्' कृत् (6.2.139) इत्यनेनोत्तरपदस्य प्रकृतिस्वरो विधीयते। उत्तरपदं च धातुस्वरेणान्तोदात्तम्, तेन चिच्छब्द उदात्तो भवति। एवं सोमसुच्छब्दोऽपि।

`यस्तु' इत्यादि। `नित्यशब्दः स्वर्य्यते' (का.6.1.169) इति यदुक्तम्, तस्यानेन प्रयोजनं दर्शयति। `अवाचा, सुवाचा' इति। अत्राकारेण पूर्वपदेन सुशब्देन च विग्रहो नोपपद्यते, तयोरिह प्रयोगाभावान्नत्यसमासावेतौ, न तु नित्याधिकारविधानात्।।

170. अञ्चेश्छन्दस्यसर्वनामस्थानम्। (6.1.170)

`इन्द्रो दधीचः' इति। दध्यञ्चतीति `ऋत्विक्' (3.2.59) इत्यादिना क्विन् अनुनासिकलोपः, षष्ठ्येकवचनम्, `अचः' (6.4.138) इत्यकारलोपः, `चौ' (6.3.138) इति दीर्घः।

`तृतीयादिः' इत्यादि। यदि सर्वनामस्थानग्रहणं क्रियते तदा शसो न स्यात्; तस्यातृतीयादित्वात्। अथापि तृतीयादिग्रहणं निवर्त्त्यत, एवमपि सर्वनामस्थानेऽपि स्यात्। `प्रतीचः' इति। पूर्वेण तुल्यम्।।

171. ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः। (6.1.171)

`प्रष्ठौहः' इति। `वहश्च' (3.2.64) इति ण्विः, `वाह ऊठ्' (6.4.132) इत्यूठ्, `एत्येधत्यूठ्सु' (6.1.89) इति वृद्धिः।

`ऊठ्युपधाग्रहणम्' इति। उपदाभूत ऊड् गृह्यते येन तदुपधाग्रहणम्' इति व्याख्यानं कर्त्तव्यमित्यर्थः। किमर्थम्? इत्यत आह--`इह मा भूत्' इति। तत्रैदं व्याख्यानम्--`अन्तोदात्तात्' (6.1.169) इत्यादिसुत्रादिहान्यतरस्यांग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञायते, तेनोपधाभूतादेव भवितव्यमिति तस्यैव ग्रहणं युक्तमिति। `अक्षद्युवा' इति। अक्षैर्दीष्यतीति क्विप् `च्छ्वोः शूडनुनासिके च' (6.4.19) इति वकारस्योठ्, यणादेशः।

`आभ्याम्' इति। इदमस्त्यदाद्यत्वम्, `हलि लोपः' (7.2.113) इतीद्रूपस्य लोपः। `अथो आभ्याम्' इति। `इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ' (2.4.32) इत्यशादेशः।

`निशपर्यन्ता इह गृह्यन्ते' इति। एतदपि पूर्ववद्व्यवस्थितविभाषया लभ्यते, तस्यां हि सत्यां निशपर्यन्तेभ्य एव भवितव्यम्। तेषामेव ग्रहणं युक्तमिति त एव गृह्यन्ते। `निपदः' इति। शसि परतः पादस्य पदादेशः। `दतः' इति। अत्रापि दन्तशब्दस्य ददादेशः। `आसन्' इति। अत्रासन्शब्दस्य सप्तम्येकवचनेऽसन्नित्ययमादेशः। `उदन्' इति। अत्रापयुदकशब्दस्योदन्नादेश-। `अद्भिः' इति। पकारस्य तकारः, तस्य जश्त्वम्--दकारः। `राभ्याम्' इति। `रायो हलि' (7.2.85) इत्यात्त्वम्।।

172. अष्टनो दीर्घात्। (6.1.172)

`अष्टाभिः' इत्यादि। `अष्टन आ विभक्तौ' (7.2.84) इत्यात्त्वम्।

`अष्टसु' इति। ननु चात्रापि भवितव्यमेवात्वेन, न हि तद्विधौ विकल्पप्रतिपादकं वचनमस्ति, नापि प्रकृतम्? इत्यत आह--`इदमेव' इत्यादि। यदि हि नित्यमात्वं स्यादिह दीर्घग्रहणमनर्थकं स्यात्, व्यावर्त्त्याभावात्, कृतात्वस्य च षट्संज्ञामिति? इदमेव हि दीर्घग्रहणमष्टनो ज्ञापयतीति सम्बन्धनीयम्। कथं पुनर्ज्ञापयति? इत्याह--`अन्यथा हि' इत्यादि। दीर्घग्रहणं ह्येवमर्थं क्रियते--यत्रात्वं नास्ति तत्रायं स्वरो मा भूदिति। यदि कृत्वपात्वसयाष्टनः षट्संज्ञा न स्यात्, तदात्वपक्षे षट्संज्ञायामसत्यां सावकाशोऽष्टनः स्वरः, तत्रापि षट्स्वरः प्राप्नोतीति कृत्वा। ततश्च यदि दीर्घग्रहणं न क्रियेत, तदानवकाशत्वाद्यदात्वपक्षेऽष्टनः स्वरो न भवति, तदेतरस्मिन्नपि पक्षे स्यात्। अतस्तन्निवृत्त्ये दीर्घग्रहणं क्रियमाणमर्थवद्भवति। कृतात्वस्याष्टनः षट्संज्ञायाम्--अष्टानामित्यत्र `षट्चतुर्भ्यश्च' (7.1.55) इति नुट् सिद्धो भवति।।

173. शतुरनुमो नद्यजादी। (6.1.173)

`तुदति, नुदति' इति। तुदादित्वाच्छः। `लुनती, पुनती' इति। `श्नाभ्यसतयोरातः' (6.4.112) इत्याकारलोपः। प्रतययस्वरेण शत्रन्तमिहान्तोदात्तं वेदितव्यम्। `तस्य' इत्यादि। कथं पुनरिष्यमाणमपि न भवति? `न मु ने' (8.2.3) इत्यत्र नेति योगविभागात्।

`बृहन्महतोः' इत्यादि। उपसंख्यानशब्दस्य प्रतिपदनमर्थः। तत्रेदं प्रतिपादनम्--`ङ्याश्छन्दसि' (6.1.178) इत्यतः सिंहावलोकितन्यायेन बहुलग्रहणमुपतिष्ठते, तेन बृहन्महद्भ्यामपि भवतीति।।

174. उदात्तयणो हल्पूर्वात्। (6.1.174)

`उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (8.2.4) इति प्राप्ते वचनम्। `तृन्नन्तोऽयमाद्युदातः' इति। नित्स्वरेण। `बहुतितवा' इति। वहवस्तितवो यस्या इति बहुव्रीहिः, तया बहुतितवेति। तितउशब्दोऽयं `बहोर्न ञ्चदुत्तरपदभूम्नि' (6.2.175) इत्यन्तोदात्तः।

`नकारग्रहणं कर्त्तव्यम्' इति। नकारो गृह्यते येन तन्नकारग्रहणं व्याख्यानं कर्त्तव्यमित्यर्थः। तत्रेदं व्याख्यानम्--इहापि पूर्ववद्बहुलग्रहणमनुवर्त्तते। तेनोदात्तस्य स्थाने यो नकारस्ततोऽपि न भविष्यतीति। अथ वा--नकारस्यात्र प्रश्लेषः--हल्पूर्वात् `नोङ्धात्वोः' (6.1.75) इति, तथा चायमर्थो भवति--उदात्तयण उदात्तनकारच्चेति। तेनोदात्तनकारादपि भविष्यतीति। `वाक्पत्नी' इति। पतिशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। तत्र `विभाषा सपूर्वस्य' (4.1.34) इति नकारान्तादेशः, `ऋन्नेभ्यो ङीप्' (4.1.5) इति ङीप्।।

175. नोङ्दात्वोः। (6.1.175)

`ब्रह्मबन्ध्वा' इति। ब्रह्मा बन्धुरस्या इति विगृह्य बहुव्रीहिः। तस्मात् `ऊङुतः' (4.1.66) इत्यूङ्। `तेन सह य एकादेशः सोऽप्युदात्तः' इति। `एकादेश उदात्तेनोदात्तः' (8.2.5) इति वचनात्। `स्वर्यते' इति। स्वरितः क्रियत इत्यर्थः। `कुदुत्तरपद' इत्यादि। ऊकारोऽत्र दातुस्वरेणान्तोदात्तः। सः `गतिकारकोपपादात्' (6.2.139) इत्युदाततस्तिष्ठति प्रकृतिस्वरेण।।

176.ह्रस्वनुड्भ्यां मतुप्। (6.1.176)

पित्वान्मतुपोऽनुदात्तत्वे प्राप्तेऽयं विधिरारभ्यते। `अक्षण्वता' इति। अक्षमस्यास्तीति मतुप्, `छन्दस्यपि दृश्यते' (7.1.76) इत्यनङ्, `अनो नुट्' (8.2.13) इति नुडागमः, पूर्वसय नकारस्य `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति लोपः। `शीर्षण्वता' इति। शीर्षन्निति `शीर्षञ्शब्दः' शीर्षश्चन्दसि' (6.1.60) इति निपातितः।

`वसुशब्द आद्युदात्तः' इति। स हि `भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः' (द.उ.1.92) इति वर्तमाने `धान्ये नित्' (द.उ.1.94) इत्यतो निद्ग्रहणे `शृस्वृस्विहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च' (द.उ.1.95) इति व्युत्पाद्यते। तेन नित्स्वरेणाद्युदात्तो भवति।

अथेह कस्मान्न भवति--मरुतोऽस्य सन्ति मरुत्वानिति, मरुच्छब्दोऽपि `मृग्रेरुतिः (द.उ.6.1) इत्युतिप्रत्ययान्तत्वात् प्रत्ययस्वरेणान्तोदात्त इत्यस्त्यत्र प्राप्तिः, अतो नकारेम व्यवधानान्न भवतीति चेत्? न; तस्य लुप्तत्वात्। अथापि स्वरसिद्धौ नलोपस्यासिद्धत्वम्? एवमपि `स्वरविधौ व्यञ्जनमविद्यमानवत्' (व्या.पा.37) इति नास्ति व्यवधानम्? इत्यत आह--`स्वरिविधौ' इत्यादि। कथं पुनर्ज्ञायते--नाश्रीयत इति? नुङ्ग्रहणात्। नुडागमो ह्ययं मतुप एव भक्त इति तद्ग्रहणेनैव गृह्यते। यद्येषा परिभाषाऽऽश्रीयेत, तदा नकारस्य व्यञ्जनस्याविद्यमानत्वाद् ह्रस्वादित्येव सिध्यति नुङ्ग्रहणं न कुर्यात्, कृतं च। ततो ज्ञायते--नेयमिह परिभाषाश्रीयत इति।

`वक्तव्यः' इति। व्याख्येय इत्यर्थः। उत्तरत्रापि वक्तव्यशब्दस्यायमेवार्थः। व्याख्यानं तु पूर्ववद्बहुलग्रहणानुवृत्तिमाश्रित्य कर्त्तव्यम्।।

177. नामन्यतरस्याम्। (6.1.177)

`नाम्' इति। सनुट्कस्य षष्ठीबहुवचनस्य ग्रहणम्।
किं पुनः कारणं मतुपा ह्रस्वो विशेष्यते? इत्याह--`अन्यथा हि' इत्यादि। सम्प्रति भवः साम्प्रतिकः, अध्यात्मादित्वट्ठञ्। `तिसृणाम्' इति। अत्र `न तिसृचतसृ' (6.4.4) इति दीर्घत्वप्रतिषेधात् साम्प्रतिकः, अध्यात्मादित्वट्ठञ्। `तिसृणाम्' इति। अत्र `न तिसृचतसृ' (6.4.4) इति दीर्घत्वप्रतिषेधात् साम्प्रतिक एव ह्रस्वो विद्यते। न तु साम्प्रतिके सति भूतपूर्वगतिर्युक्ता। अत्र यदि मतुपा ह्रस्वो न विशेष्येत? इह नैव स्यात्--अग्नीनामिति। `नामि' (6.4.3) इति दीर्घत्वे कृते न स्यात्; ह्रस्वाभावात्। तस्माद्भूतपूर्वेऽपि ह्रस्वो यथा स्यादित्येवमर्थं मतुपा ह्रस्वो विशेष्यते। `धेन्वाम्, शकट्याम्' इति। यदि सनुट्कस्य ग्रहणं न क्रियेत तदानीं सप्तम्यादेशस्याप्यामो ग्रहणं स्यात्, ततश्च धेन्वामित्यादावपि स्यात्। सनुट्कस्य ग्रहणे तुन भवति, तस्मिन्नसति धेनुशकटिशब्दयोः प्रातिपदिकस्वरेणान्तोदात्तयोरन्त्यस्य यणादेशे कृते `उदात्तयणः' (6.1.174) इत्यादनान्तोदात्तो नित्यो भवति।
`त्रपूणाम्' इति। त्रपुशब्दो वसुशब्दवदाद्युदात्तः।।

178. ङ्याश्छन्दसि बहुलम्। (6.1.178)

179. षट्त्रिचतुर्भ्यो हलादिः। (6.1.179)
`अन्तोदात्तादित्येतन्निवृत्तम्' इति। यद्येतदनुवर्त्तेत, पञ्चानाम्, सप्तानाम्, चतुर्णामित्यत्र न स्यात्। पञ्चादीनां शब्दादीनां `न्रः संख्यायाः (फि.सू.2.28) इत्युदात्तत्वात् `न्रः' इति रेफनकारान्तयोः संख्याशब्दयोर्ग्रहणम्।।

180. झल्युपोत्तमम्। (6.1.180)
`त्रिप्रभृतीनामन्त्यमुत्तमम्' इति। उत्तमशब्दस्याव्युत्पन्नस्येह ग्रहणम्। स च स्वभावात् त्रिप्रभृतीनामन्त्यमाहेति कृत्वा। `तत्समीपे यत् तदुपोत्तमम्' इति। `अव्ययं विभक्ति' (2.1.6) इत्यादिनाऽव्ययीभावः।।

181. विभाषा भाषायाम्। (6.1.181)
पूर्वेण नित्ये प्राप्ते विकल्पार्थं वचनम्।।

182. न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः। (6.1.182)
`सौ' इति। प्रथमैकवचनस्य सुशब्दस्य ग्रहणं वा स्यात्? सप्तमी बहुवचनस्य वा? तत्र यदि सप्तमीबहुवचनस्य ग्रहणं स्यात्, केभ्यः, तेभ्य इत्यत्र न स्यात्, किंतच्छब्दयोः सप्तमीबहुवचने परतो नावर्णान्तत्वमुपपद्यते; कृतेऽपि त्यादाद्यत्वे `बहुवचने झल्येत् (7.3.103) इत्येत्त्वविधानात्। प्रथमैकवचनस्य तु ग्रहणे सत्यत्रापि भवति। तस्मादसप्तम्यां एव ग्रहणं युक्तमिति मत्वाऽऽह--`प्रथमैकवचने यदवर्णान्तम्' इति। अनन्तरमिह प्रतिषेध्यं न भवतीति सर्वस्य षाष्ठिकस्वरस्य प्रतिषेधोऽयं विज्ञायत इतत्याह--`इत्येतेभ्यो यदुक्तं तन्न भवति' इति। शोभना गावोऽस्येति सुगुः, `गोस्त्रियोः' (1.2.48) इत्यादिना ह्रस्वः, `नञ्सुभ्याम्' (6.2.172) इत्युत्तरपदस्यान्तोदात्तत्वम्।
`शुना' इति `श्वयुवमघोनामतद्धिते' (6.4.133) इति सम्प्रसारणम्। `पूर्ववत् प्राप्तिः' इति। शुना, श्वभ्यामित्यत्र `सावेकाचः' (6.1.168) इत्यादिना प्राप्तिः। `परमशुना' इति। अत्राति `अन्तोदात्तादुत्तरपदात्' (6.1.169) इत्यन्तोदात्तत्वं तु समासस्वरेण।
`राजा, परमराजः' इति। अत्रापि पूर्ववत्प्राप्तिः।
`अञ्चतिः क्विन्नन्तः' इति। यद्येवम्, तर्हि तत्र नकारलोपेन न भवितव्यं तस्यैव सनकारस्य ग्रहणं कर्त्तव्यम्। किमर्थं सनकारस्य ग्रहणम्? इत्याह--`तस्य' इत्यादि। एतदपि किमर्थम्? इत्याह--`यत्रास्य' इत्यादि। ननु च सर्वत्रैव लोपेन भवितव्यम्, तत् कथं नलोपस्याभावः इत्याह--`नाञ्चेः' इत्यादि। `प्राञ्चा' इति। पूर्ववत् प्रापतिः। प्राञ्चतीति क्विन्। `प्राचा' इति। पूर्ववल्लोपदीर्घत्वे।
`क्रुञ्चा' इति। `क्रुच क्रुञ्च कौटिल्याल्पीभावयोः' [कुत्व क्रुच्च कौटिल्याल्पीभावयोः--धा.पा.] (धा.पा.185,186), क्विन् क्रुञ्चेति निपातनान्नलोपाभावः। `परमक्रुञ्चा' इति। समासस्वरेणान्तोदात्तत्वम्। `परमकृता' इति। अत्रापि। `कृतिर्वा' इति। `कृती छेदने' (धा.पा.1435) इत्येषः।।

183. दिवो झल्। (6.1.183)

184. नृ चान्यतरस्याम्। (6.1.184)
नृशब्दात् `सावेकाचः' (6.1.168) इति, `न गोश्वन्सावर्ण'(6.1.182) इति नित्ये प्रतिषेधे च प्राप्ते विभाषेयमारभ्यते।।

185. तित्स्वरितम्। (6.1.185)
`चिकीर्ष्यम्, जिहीर्ष्यम्' इति, `न गोश्वन्सावर्ण' (6.1.182) इति नित्ये प्रतिषेधे च प्राप्ते विभाषेयमारभ्यते।।

186. तास्यनुदात्तेन्ङिददुपदेशाल्लसर्वधातुकमनुदात्तमहन्विङोः। (6.1.186)
तासिप्रभृतीनां समाहारद्वन्द्वेन निर्देशः। `अद्रुपदेशात्' इति। उपदिश्यत इत्युपदेशः, शास्त्रवाक्येषु खिलपाठे च यः प्रथममुच्चार्यते स इत्यर्थः। अच्चासावुपदेशश्चेत्यदुपदेशः। कर्मसाधनस्योपदेशशब्दस्याश्रयणम्, भावसाधनस्य वा, नानेन सामानाधिकरण्यानुपपत्तेः। `लसार्वधातुकम्' इति। षष्ठीसमासः। `अदुपदेशात्' इति। पूर्ववत् कर्मसाधनेनोपदेशशब्देन कर्मधारयः। वर्णग्रहणं सर्वत्र तदन्तविधिं प्रयोजयतित्यकारन्तोपदेशादित्यर्थः। `कर्त्ता' इति। करोतेर्लुट्, आत्मनेपदपरथमपुरुषः, तस्य डारौरसः। एकवचने टेर्लोपः। द्विवचनबहुवचनयोः `रि च' (7.4.51) इति सकारस्य। `आस्ते' इत्येवमादिषु `शेते' इत्येवंपर्यन्तेष्वदादित्वाच्छपो लुक्। `वस्ते' इति। `वस आच्छादने' (धा.पा.1023)।
`सूते' इति। `षूङ् प्राणिगर्भविमोचने' (धा.पा.1031)। `शेते' इति। शीङः सार्वधातुके गुणः' (7.4.21) इति गुणः।
`तुदतः नुदतः' इति। तसन्ते एते। एवं `पचतः, पठतः' इत्येते अपि। ननु च व्यञ्जनान्तोऽयमुपदेशे शप्, नकारान्तः, तत् कथमिहानुदात्तत्वं भवति? इत्याह--`अनुबन्धस्य' इत्यादि। एकान्तः=एकदेशः; नैकान्तोऽनेकान्तः, तद्ग्रहणेन गृह्यत इति यावत्, अनेकान्तस्य भावोऽनेकान्तत्वम्। ततो हेतोरकारान्तोपदेश एव शप्, न व्यञ्जनान्तः। तेन पचते--इत्यादावनुदात्तत्वं भवतीति भावः। अकारान्तत्वं तु शबकारस्य व्यपदेशिवद्भावात्। `पचमानः, यजमानः' इति। शानच्। कथं पुनरिहानुदात्तत्वम्, यावता मुकाऽत्र व्यवधानम्? इत्याह--`यद्यत्र' इत्यादि। मुगागमोऽयमकारमात्रस्य वा स्यात्? अकारान्ताङ्गस्य वा? तत्र यद्यकारमात्रस्य तदाऽदुपदेशग्रहणेनैव तस्य ग्रहणमिति लसर्वधातुकमदुपदेशादनन्तरमेव भवति, व्यवधानाभावात्, न हि स्वावयवो व्यवधायको भवति। तेनान्तरङ्गत्वात् सिद्धो निघातः। `अथ' इत्यादिना द्वितीये पक्षे निधातस्यासिद्धत्वात् प्रतिपादयति--`तथापि' इति। एवमपीत्यर्थः। लसर्वधातुकस्येत्यस्य सिद्धो निघात इति वक्ष्यमाणेन सम्बन्धः। `असिद्धः' इत्यस्यापि मुगित्यनेन प्रकृतेन। इतिकरणो हेतौ। तदयमर्थः--यस्माल्लसार्वधातुकानुदात्ते बहिरङ्गत्वान्म्ुगसिद्धः, तस्मादेवमपि सार्वधातुकस्यानुदात्तत्वम्। बहिरङ्गत्वं तु मुको बह्वपेक्षत्वात्। स ह्यकारान्तविशिष्टमङ्गमाश्रयति, आनञ्च प्रत्ययविशेषम्। अङ्गावयवमदुपदेशं लसार्वधातुकामात्रं निधातः। तस्मादसावन्तरङ्गः। स्वरविधित्वाच्च, उकग्तं हि स्वरविधेर्भाव्येऽन्तरह्गत्त्वम्। ननु चाद्ये पक्षे मुकि कृते निघातो न सिध्यति, अदुपदेशादिति तपरकरणात्, मुकि च कृते कालस्यातिरिच्यमानत्वात्? नैष दोषः; यद्यवमपि कृतेऽर्धमात्राधिका भवति, तथाप्युपदेशग्रहणात् सिध्यत्येव, उपदेशे मात्रिकस्यैवोच्चारणात्। `चित्स्वरोऽप्यनेन' इत्यादि। चित्स्वरस्यावकाशः--`चलनशब्दार्थादकर्मकाद्युच्' (3.2.148) चलनम्, चोपनमिति, तास्यादिभ्योऽनुदात्तस्यावकाशः--आस्ते, शेत इति; इहोभयं प्राप्नोति--पचमानो यजमान इति परत्वाल्लसार्वधातुकानुदात्तत्वमेव चित्स्वरं बाधित्वा प्रवर्त्तते।
`चिनुतः, चिन्वन्ति' इति। नु `सार्वधातुकमपित्' (1.2.4) इति श्नुरपि ङिदेव, तत्कथमिदं प्रत्युदाहरणमुपपद्यते? इत्याह--`ङिदयम्' इत्यादि। `सार्वधातुकमपित्' (1.2.4) इत्यनेन पूर्वस्य कार्यमतिदिश्यते, न परस्य। तथा चोक्तम्--सिद्धं तु पूर्वस्य कार्यातिदेशादिति। तस्मात् पूर्वस्य कार्यं प्रति ङित्वं भवति, न तु परस्येत किमत्र नोपपद्यते। `इह च' इत्यादि। पचावः पचामः इत्यत्र हि `अतो दीर्घो यञि' (7.3.101) इति दीर्घत्वे कृते न स्यात् असत्युपदेशग्रहणे। तस्मिंस्तु सति शबकारोऽपि मात्रिक एवोपदिष्ट इति यद्यप्युत्तरकाल दीर्घत्वं भवति तथापि निघातो न भवतीति। `इह च मा भूदिति--हतः; हथ' इति। अत्र `अनुदात्तोपदेश' (6.4.37) इत्यादिनाऽनुनासिकलोपे सत्युपदेशात्परं लसार्वधातुकं भवति, तत्रासत्युपदेशग्रहण इहापि स्यात्। अस्मिस्तु सति न भवति, न हि हन्तिरवर्णान्त उपदिश्यते। किं तर्हि? व्यञ्जनान्तः। `पचमानाः' इति। `ताच्छील्यवयोवचनशक्तिषु चानश्' (3.2.129) न च स लादेशः, अपि तु प्रत्ययः। लसर्वधातुकत्वं त्वस्य न विद्यते। `शिश्ये' इति। शीङो ह्यात्मनेपदे रूपम्, `एरनेकाचः' (6.4.82) इत्यादिना यणादेशः। `लिट् च' (3.4.115) इत्यार्धधातुकमेतत्। `शिश्याते' इति। लिट्यातामि रूपम्। नानुदात्तत्वम्, असार्वधातुकसंज्ञाविधानात्। `ह्नु ते, यदधीते' इति। `ह्नु ङ् अपनयने' (धा.पा.1082) `इङ् अध्ययने' (धा.पा.1046) यच्छब्दस्य प्रयोगः `निपातैर्यद्यदि' (8.1.30) इति निघातप्रतिषेधो यथा स्यात्।।

187. आदिः सिचोऽन्यतरस्याम्। (6.1.187)
`मा हि कार्ष्टाम्' इति। हेः, माङश्च प्रयोगो प्रयोजनं पूर्वमेवोक्तम्। `अपरोऽन्तोदात्तः' इति। प्रत्ययस्वरेण। `अपरो मध्योदात्तः' इति। प्रत्ययस्वरेणैव। ननु च वलादिरिह प्रत्ययः, इट् चागमः, आगमानां चानुदात्तत्वं भवति, तस्मादिहाप्यन्तोदात्तेनैव भवितव्यम्, तत् कथं मध्योदात्तत्वम्? इत्याह--
`सिचश्चित्कारणात्' इत्यादि। सिचश्चित्करणेनानुदात्तत्वे बाधिते चित्स्वर एव भवतीति युक्तं मध्योदात्तत्वम्। `सिच आद्युदात्त' इत्यादि। सिच आद्युदात्तत्वे कर्त्तव्येऽनिटो विद्यमानो सिचः परो यश्चित्प्रत्ययस्तस्योदात्तत्वं वक्तव्यम्। `मा हि कार्षम्' इति। पक्षे सर्वानुदात्तं पदं मा भूदित्येवमर्थमिदम्। पक्षे तूदात्तत्वेन मुक्ते सर्वानुदात्तमेव पदं भवति।।

188. स्वपादिहिंसामच्यनिटि। (6.1.188)
`सार्वधातुकग्रहणम्' इत्यादि। `अचि' इत्येतत् सप्तम्यन्तं लसार्वधातुकस्य समानाधिकरणं विशषणम्, न च प्रथमान्तस्य सप्तम्यन्तेन

सामानाधिकरण्यमुपपद्यते। तस्मात् `अचि' इत्यनेन सम्बन्धाद्विविशेषणविशेष्यलक्षणाल्लसार्वधातुकग्रहणादित्याह--`सप्तम्यन्तमुपजायते। `स्वपादिरा वृत्करणात्' इति। यद्यप्येतदेवम्, तथापि `ञिष्वप् शये' (धा.पा.1068) `श्वस प्राणने' (धा.पा.1069), `अन च' (धा.पा.1070) इत्येत एव ये, ते इह स्वपादिग्रहणेन गृह्यन्ते। परेऽपि ये जक्षित्यादयोऽभ्यस्तसंज्ञाः, तेषु परत्वात् `अभ्यस्तानामादिः' (6.1.189) इत्यनेन नित्यमाद्युदात्तत्वं भवति। `हिंसन्ति' इति। `तृह हिसि हिंसायाम्' (धा.पा.1455,1456), रुधादित्वाच् श्नम्, `श्नसोरल्लोपः' (6.4.111) इत्यकारलोपः `श्नान्नलोपः' (6.4.23) इति परस्य नकारस्य। `स्वप्यात्' इति। लिङ् अदादित्वाच्छपो लुक्। `स्वपितः' इति। `रुदादिभ्यः सार्वधातुके' (7.2.76) इतीट्।।

189. अभ्यस्तानामादिः। (6.1.189)
प्रत्ययस्वरेण प्राप्ते तदपवादोऽभ्यस्तानां धातूनामादेर्विधीयते। दधतीत्यादौ "श्नाभ्यस्तयोरातः" (6.4.112) इत्याकारलोपः, `उभे अभ्यस्तम्' (6.1.5) इत्यभ्यस्तसंज्ञा। `जक्षति, जाग्रति' इति। अत्रापि `जक्षित्यादयः षट्' (6.1.6) इति सर्वत्र `अदभ्यस्तात्' (7.1.4) इति झेरदादेशः। `जक्षितः' इति। पूर्ववदिट्। अथादिग्रहणं किमर्थम्, यावता `आदिः सिचोन्यतरस्याम्' (6.1.187) इत्यत आदिरित्यनुवर्त्तते? इत्यत आह--`आदिरिति वर्त्तमाने इत्यादि। पूर्वकं ह्यादिग्रहणमन्यतरस्यांग्रहणेन सम्बद्धम्, अतस्तनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्। तस्मान्नित्यर्थं पुनरादिग्रहणं क्रियते।।

190. अनुदात्ते च। (6.1.190)
अनजाद्यर्थमिदम्। अजादौ त्वनुदात्ते पूर्वणैव सिद्धम्। `जिहीते, मिमीते' इति। अत्र `तास्यनुदात्तेत्' (6.1.186) इत्यादिना लसार्वधातुकस्यानुदात्तत्वम्। `भृञामित्' (7.4.76) इत्यभ्यासस्येत्त्वम्।
`अनुदात्ते' इति शास्त्रीयस्यानुदात्तस्यायं निर्देश इति कस्यचिद्भ्रान्तिः स्यात् अतस्तन्निरासार्थमाह--`अनुदात्त ति बहुव्रीहिनिर्देशः' इति अविद्यमानमुदात्तमस्मिन्नित्यनुदात्तम्। किमर्थं पुनर्बहुव्रीहिनिर्देशः? इत्याह--`लोपपणादेशार्थः' इति। लोपयणादेशयोः कृतयोरप्याद्युदात्तत्वं यथा स्यात्। `मा हि स्म दधात्। दधात्यत्र' इति। स्मशब्दस्य प्रयोगः स्मोत्तरे लङ् यथा स्यात्। अत्र यदि शास्त्रीयस्यायं निर्देशः स्यात्, `इतश्च' (3.4.100) इतीकारलापे कृते यणादेशे चोदात्तं न स्यात्, शास्त्रीयस्यानुदात्तस्याभावात्। बहुव्रीहिनिर्देशे चात्रापि भवति; उदात्तस्येहाविद्यमानत्वात्।।

191. सर्वस्य सुपि। (6.1.191)
`इष्शीभ्यां वन् (द.उ.8.126) इति प्रकृत्य `सर्वनीधृधरिष्वलष्वशिवपट्वप्रेष्वा अस्वतन्त्रे' [`सर्वनिधृष्वरिष्वलिष्वशिपह्वस्वपद्वप्रहेष्वा अतन्त्रे'--द.उ.] (द.उ.8.127) इति सर्वशब्दोऽन्तोदात्तो निपातितः। तेन तस्य सुप्याद्युदात्तत्वं विधीयते। अन्तोदात्तत्वनिपातनं तु सर्वस्य विकारः सार्वं इत्यत्र `अनुदात्तादेरञ्' (4.2.44) यथा स्यात्।
`प्रत्ययलक्षणेनापि' इत्यादि। कथं पुनरिष्यमाणोऽपि लभ्यते, यावता सर्वस्तोम इत्यत्र `सुपो धातुप्रातिपदिकयोः' (2.4.71) इति लुमता लुप्तम्, ततश्च `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षलस्य प्रतिषेधेन भवितव्यम्? नैष दोषः; पूर्वसूत्राच्चकारोऽनुवर्त्तते, स च समुच्चयार्थः। तेन प्रतिषेधविषयेऽप्येष स्वरो भविष्यति। `सर्वस्वरोऽनकच्कस्य' इत्यादि। योऽयं सर्वशब्दस्य स्वरो विधीयते स तस्याविद्यमानाकच्कस्य भवतीत्येतदर्थरूप् व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`आदिः सिचोऽन्यतरस्याम्' (6.1.187) इत्यतोऽन्य तरस्यांग्रहणमिह मण्डूकप्लुतिन्यायेनानुर्त्तते, सा च व्यवस्थितविभाषा, तेनानकच्कस्य भवति।।

192. भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति। (6.1.192)
`अनुदात्ते च' (6.1.190) इत्याद्युदात्ते प्राप्ते प्रत्ययात् पूर्वस्य भीह्रप्रभृतीनामुदात्तो विधीयते।

193. लिति। (6.1.193)
`लकारेत्संज्ञके' इति। लकार इत्संज्ञको यस्य स तथोक्तः। `चिकीर्षकः' इति। सन्नन्ताण्ण्वुल्। तत्र `अतो लोपः' (6.4.48) इत्कारलोपे कृते ण्वुलः पूर्वस्येकारस्योदात्तत्वम्। `भौरिकविधम्' इति `भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ' (4.2.54) इति विधल्प्रत्ययः। भौरिकिर्विषयो देश इति `ऐषुकारिभक्तम्' ऐषुकारिर्विषयो देश इति। पूर्वसूत्रेणैव भक्तल्प्रत्ययः।।

194. आदिर्णमुल्यन्यतरस्याम्। (6.1.194)
लित्स्वरे प्राप्ते णमुलि परत आद्युदात्तत्वं विकल्पेन विधीयते। तेन मुक्ते पक्षे लित्स्वरोऽपि भवत्येव। अनेकाचश्च धातवो विकल्पं प्रयोजयन्तीति। ये त्वेकाचस्तेषां लित्स्वरेणानेन वा विशेषो नास्ति। `लोलुयं लोलूयम्, `पोपूयम्पोपूयम्' इति। यदन्ताण्णमुल्, तस्य `आभीक्ष्णे द्वे भवतः' (वा.887) इति द्विर्दचनम्। `अनुदात्तं च (8.1.3) इत्याम्रेडितस्यानुदात्तत्वम्।।

195. अचः कर्तृयकि। (6.1.195)
`कर्तृयकि' इति। सार्वधातुकं कर्तृशब्देनोक्तम्। अभिधानेऽभिधेयोपचारात्। तत्र यः कर्त्तरि यक् स कर्तृयक्, `सप्तमी' (2.1.40) इति योगविभागात् समासः। `लूयते केदारः स्वयमेव' इति। लुनाति केदारं देवदत्तः, केदारो लवनक्रियया व्याप्तुमिष्टतमत्वात् कर्म। यदा तु सौकार्यात् तस्यैव कर्त्तृत्वं विवक्ष्यते तदाऽसौ कर्त्ता भवति; `कर्मवत् कर्मणा तुल्यक्रियः' (3.1.87) इत्यतिदेशात् यगात्मनेपदञ्च। `स्तीर्यते' इति। `स्तृ आच्छादने' (धा.पा.1252) [स्तृञ् आचछादने--धा.पा.] `ॠत इद्धातोः' (7.1.100), `हलि च' (8.2.77) इती दीर्घः। `लसार्वधातुकनिघाते कृते' इति। `अदुपदेशभक्तयक एव स्वरो भवति' इति। प्रत्ययलक्षणः।
अथेह कथं भवति--जायते स्वयमेव, सायते स्वयमेव, खायते स्वयमेवेति, यावता `ये विभाषा' (6.4.43) इत्यात्वे कृते सत्युत्तरकालं जनादयोऽजन्ता भवन्ति, न तूपदेश? इत्याह--`जनादनाम्' इत्यादि। जनादीनां ह्यात्वविधावनुदात्तोपदेशग्रहणमनुवर्त्तते। तेन तेषामुपदेश एवात्त्वं द्रष्टव्यम्। `जायते स्वयमेव' इति। कथं पुनरकर्मकर्त्ता, यावता जनिरकर्मकः? अन्तर्भावितण्यर्थं सकर्मको भवतीत्यदोषः।
`लूयते केदारो देवदत्तेन' इति। अत्र शुद्धकर्मण्यात्मनेपदविधानात् कर्तृयग्न भवति।।

196. थलि च सेटीडन्तो वा। (6.1.196)
`अन्यतरस्याम्' (6.1.194) इत्यनुवर्त्तमाने वाग्रहणं कार्यिणो विकल्पार्थम्। अन्यतरस्यांग्रहणेन कार्यं विकल्प्यते वाग्रहणेन तु कार्यिणः। तेनेडादयः पर्यायेण कार्य प्रतिपद्यन्ते। `लुलविथ' इति। क्रादिनियमादिट्। `ययाथ' इति। `अचस्तास्वत्थल्यनिटो नित्यम्' (7.2.61) इतीटो वा प्रतिषेधः।।

197. ञ्नित्यादिर्नित्यम्। (6.1.197)
`वासुदेवकः' इति। वासुदेवे भक्तिरस्येत्यर्थे वुन्।
अथेह गर्गा, विदा इति `यञञोश्च' (2.4.64) इति बहुषु लुकि कृते, चञ्चेव चञ्चेत्यत्र च `इवे प्रतिकृतौ' (5.3.96) इत्युत्पन्नस्य कनः `लुम् मनुष्ये' (5.2.98) इति लुपि कृते कस्मान्न भवति, लुप्तेऽपि प्रत्यये `प्रत्ययलोपे प्रत्ययलक्षणम् (1.1.62) इत्यस्ति प्राप्ति? इत्यत आह--`प्रत्ययलक्षणमत्र नेष्यते' इति। तत् कथं पुनरिष्यमाणो न भवति? `संज्ञायामुपमानम्' (6.1.204) इत्यत्र वक्ष्यमाणाज्ज्ञापकात्। अथ वा `न लुमताङ्गस्य' (1.1.63) इत्यनेन यन्नाम किञ्चिदङ्गस्य कार्यमङ्गाधिकारे विहितमेव, तेन प्रतिषेधादिह प्रत्ययलक्षणं स्वीकार्यं न भविष्यति। एवमुत्तरात्रापि प्रत्ययलक्षणाभावो वेदितव्यः।
`यञि कनि च लुप्ते' इति। चकाराद्विदाधञि च।।

198. आमन्त्रितस्य च। (6.1.198)
`देवदत्' इति। ददातेः `क्तिच्क्तौ च संज्ञायाम्' (3.3.174) इत्याशिवि क्तः, `वो वद् घोः' (7.4.46) इति धातोर्ददादेशः। दत्तशब्दस्य देवशब्देन `कर्त्तृकरणे कृता बहुलम्' (2.1.32) इति समासः। `सपिरागच्छ' इति। `स्वमोर्नपुंसकात्' (7.1.23) इति विभक्तेर्लुक्। `सप्तागच्छत' इति। अत्रापि `षड्भ्यो लुक्' (7.1.22) इति च।।

199. पथिमथोः सर्वनामस्थाने। (6.1.199)
`पथिमथिशब्दो' इत्यादि। `गमेरिनिः' (द.उ.6.57) इत्यत इनिप्रत्यये वर्त्तमाने `मन्थः' (द.उ.6.62) इतीनिप्रत्ययः, अतो मथिञ्शब्दो व्युत्पाद्यते, `परमे कित्' (द.उ.6.61) इत्यतः किद्ग्रहणानुवृत्तेर्मनथेरनुनासिकलोपः। `पतस्थ च' (द.उ.6.63) इति पथिञ्शब्दोऽपीनित्प्रत्ययान्त इति तेनेतौ प्रत्ययस्वरेणान्तोदात्तौ। `पन्थाः' इति। `पथिमथ्युभुक्षामात्' (7.1.87) इत्यकरान्तादेशः। `इतोऽत् सर्वनामस्थाने' (7.1.86) इतीकारस्यात्त्वम्, `थो न्थः' (7.1.87) इति थस्य न्थादेशः।
`पथः पश्य' इति। `भस्य टेर्लोपः' (7.1.88) इति टिलोपः। तत्र कृते `अनुदात्तस्य च यत्रोदात्त लोपः' (6.1.161) इत्यन्तोदात्तत्वम्। `पथिप्रियः' इति। पन्थाः प्रियो यस्येति बहुव्रीहिः। `वा प्रियस्य' (वा.114) इति प्रियशब्दस्य पक्षे परनिपातः।।

200. अन्तश्चे तवै युगपत्। (6.1.200)
`कर्त्तवा' [`कर्त्तवै' इति काशिका, पदमञ्जरी च] इति। `कृत्यार्थे तवैकेन्केन्यतावनः' (3.4.14) इति तवैप्रत्ययः। किं पुनः कारणं पर्यायनिवृत्तये यत्नः क्रियते? इत्याह--`एकवर्जम्' इत्यादि।।

201. क्षयो निवासे। (6.1.201)
`क्षयः' इति। `क्षि निवासगत्योः' (धा.पा.1407) इत्यस्येदं रूपमिति।।

202. जयः करणम्। (6.1.202)
`जयः' इति। `जि ज्रि अभिभवे' (धा.पा.946,947) इत्यस्य जयते रूपमेतत्। `जयो ब्राह्मणानाम्' इति। भावे `एरच्' (3.3.56)।।

203. वृषादीनां च। (6.1.203)
`वृषः, जनः, ज्वरः, ग्रहः, हयः, गयः' इति। `वृषु मृषु सेचने' (धा.पा.706,707) `जनी प्रादुर्भावे' (धा.पा.1149) `ज्वर रोगे' (धा.पा.776) `ग्रह उपादाने' (धा.पा.1533) `हि गतौ' (धा.पा.1257) `कै गै' शब्दे' (धा.पा.916,917) `सर्व एतेऽच्प्रतययान्ताः' इति। पचादित्वात्। एतेन चित्स्वरे प्राप्ते पाठ एषामिति दर्शयति।
`नयः, तयः, अयः, अंशः, वेदः, सूदः, अशः' इति। `णीञ् प्रापणे' (धा.पा.901) `तायृ सन्तानपालनयोः' (धा.पा.489) क्वचित् `तयः' इत्यस्य स्थाने `चयः' इति पठ्यते, स चिनोतेर्द्रष्टव्यः। `इण् गतौ' (धा.पा.1045)। अथ वा अय वय मय चय (धा.पा.474)-478) इत्यादेः। `अंश समाधाने' (धा.पा.1918), `विद ज्ञाने' `(धा.पा.1064) `षूद रक्षणे' (धा.पा.1717) `अश भोजने' (धा.पा.1523)। `सूदः--इगुपधेति कप्रत्ययान्तः' इति। `एतेऽपि' इति यदुक्तम्, तस्यायमपवादः। `गुह' इति। `गुहू संवरणे' (धा.पा.896)।
`शमरणौ संज्ञायाम्' इति। `शम् उपशमे' (धा.पा.1201) `अण रण' (धा.पा.444,445) इति शब्दार्थः। संज्ञाया अन्यत्रान्तोदात्तादेव भवतः। `सम्मतौ भावकर्मणोः' इति। शमरणादिति वर्त्तते। सम्मतावर्थे विवक्षिते शमरणौ भावकर्मणोर्यथाक्रममाद्युदात्तौ भवतः। `मन्त्रः' इति। `मत्रि गुप्तभाषणे' (धा.पा.1679) केचित्तु--`सम्मतौ भावकर्मणोर्मणोर्मन्त्रः' इति पठन्ति। तस्य मन्त्रे विषयीभूत इत्येषोऽर्थो वेदितव्यः। `शान्तिः' इति। `शमु उपशमे' (धा.पा.1201) `क्तिच्क्तौ च संज्ञायाम्' (3.3.174) इति क्तिच्। `कामः, यामः' इति। `कमु कान्तौ' (धा.पा.443) `यम उपरमे' (धा.पा984)। `घञन्तौ' इति। `कर्षात्वतो धञोऽन्त उदात्तः' (6.1.159) इत्येतस्मिन् प्राप्तेऽस्य पाठः।
`कल्पः' इति। `कृपू सामर्थ्ये' (धा.पा.762)। `पादः' इति। `पद गतौ' (धा.पा.1169)। `वृषादिराकृतिगणः' इति। तदेव चाकृतिगणत्वं ज्ञापयितुं चकारः कृतः।।

204. संज्ञायामुपमानम्। (6.1.204)
`यद्येवम्' इति। यदि कनो लुबित्यर्थः, कनोऽपु लुपि सत्यपि प्रत्ययलक्षणेनैव सिद्धमेषां हि नित्स्वरेणाद्युदात्तत्वम्, तदपार्थकमित्यभिप्रायः। `एतदेव' इत्यादि। यदि हि क्वचित् स्वरविधौ प्रत्ययलक्षणं स्यात्, कर्त्तव्यमेवेदं वचनं स्यात्। प्रत्ययलक्षणेन सिद्धत्वात्, कृतञ्च। तस्मादेतज्ज्ञापयति--प्रत्ययलक्षणं स्यात्, कर्त्तव्यमेवेदं वचनं स्यात्। प्रत्ययलक्षणेन सिद्धत्वात्, कृतञ्च। तस्मादेतज्ज्ञापयति--प्रत्ययलक्षणमिह स्वरविधौ न भवतीति। क्वचिद्ग्रहणं क्वचित्तु भवतीति प्रदर्शनार्थम्, तथा हि `सर्वस्य सुपि' (6.1.191) इत्यत्रोक्तम्--प्रत्ययलक्षणेनाप्ययं स्वर इष्यत इति। `तथा च' इत्यादिना ज्ञापनस्य प्रयोजनमाह। `अग्निर्माणवकः' इति। भवत्यग्निशब्द उपमानम्। तथा ह्यग्निरेवेति गम्यते, नासौ माणवकस्य संज्ञा।।

205. निष्ठा च द्व्यजनात्। (6.1.205)
`गुप्तः' इति `गुपू रक्षणे' (धा.पा.395)। `बुद्धः' इति। `बुध अवगमने' (धा.पा.858)। `देवः' इति। देवशब्दः पचाद्यजन्तत्वादन्तोदात्तः। भीमशब्दोऽपि मगन्तत्वात् प्रत्यस्वरेण। `इषियुधि' (द.उ.7.31) इत्याद्यधिकृत्य `भियः षुग्वा' (द.उ.7.35) इति मक्प्रत्ययान्तो व्युत्पाद्यते। `चिन्तितः' इति। `चिति स्मृत्याम्' (धा.पा.1535), चौरादिकः, `निष्ठायां सेटि' (6.4.52) इति णिलोपः। `रक्षितः' इति। `रक्ष पालने' (धा.पा.658)। `त्रातः, आप्तः' इति। `त्रैङ पालने' (धा.पा.965), `आप्लृ व्याप्तौ' (धा.पा.1260)।।

206. शुष्कधृष्टौ। (6.1.206)
`शुष्कः' इति। `शुष शोषणे' (धा.पा.1183) `शुषः कः' (8.2.51) इति क्तस्य कादेशः। `धृष्टः' इति। ञिधृषा प्रागल्भ्ये' (धा.पा.1269) ष्टुत्वम्। कत्वष्टुत्वयोरसिद्धत्वादिह निष्ठान्तत्वं वेदितव्यम्।
`असंज्ञार्थ आरम्भः' इति। संज्ञायां पूर्वेणैव सिद्धत्वात्।।

207. आशितः कर्त्ता। (6.1.207)
`अशेः' इति। `अश भोजने' (धा.पा.1523) इत्यस्मात् कर्त्तरि क्तो निपात्यते। `गत्यर्थाकर्मक' (3.4.72) इत्यादिना। `पूर्ववत् कर्मणि क्तः' [`पूर्वत्र'--काशिका] इति। `तयोरेव' (3.4.70) इत्यादिना। `उत्तरत्र भावे' इति। `नपुंसके' `भावे क्तः' (3.3.114) इति।।

208. रिक्ते विभाषा। (6.1.208)
`रिक्तः' इति। `रिचिर् विरेचने' (धा.पा.1441)। प्रत्ययस्वरे प्राप्त आदेर्विभाषोदात्तत्वं विधीयते। `संज्ञायाम्' इत्यादि। `निष्ठा च द्व्यजनात्'

(6.1.205) इत्यस्यावकाशः--दत्तः, गुप्त इति। अस्यावकशोऽसंज्ञायाम्--रिक्तो घट इति; यदा तु रिक्तशब्दः कस्यचित् संज्ञा भवति तदोभयोः प्राप्तौ पूर्वविप्रतिषेधेन `निष्ठा च द्व्यजनात्' (6.1.205) इति नित्यमाद्युदात्तो भवति। न च पूर्वविप्रतिषेधो वक्तव्यः, परशब्दस्येष्टवाचित्वात्।।

209. जुष्टार्पिते च च्छन्दसि। (6.1.209)

`जुष्टः' इति। `जुषी प्रीतिसेवनयोः' (धा.पा.1288)। `अर्पितः' इति। अर्त्तेर्णिच, `अर्त्तिह्री' (7.3.36) इत्यादिना पुक्।।

210. नित्यं मन्त्रे। (6.1.210)

`केचिदत्र' इत्यादि। किं पुनः कारणं जुष्टशब्द एवावनुवर्त्तयन्ति? इत्याह--`अर्पितशब्दस्य' इत्यादि। अत्रापि किं कारणम्? इत्याह--`अन्तोदात्तोऽपि' इत्यादि। तमेवान्तोदात्तस्य पाठमन्त्रं दर्शयितुमाह--`तस्मिन् साकं त्रिशता' इत्यादि। आरम्भसामर्थ्यादेव नित्यत्वे सिद्धे नित्यग्रहणं विस्पष्टार्थम्, उत्तरार्थं च।।

211. युष्मदस्मदोर्ङसि। (6.1.211)

`युष्मदस्मदी मदिक्प्रत्ययान्ते' इति। `युष्यसिभ्यां मदिक्' (द.उ.6.50) मदिक्प्रत्ययमुत्पाद्य तयोर्व्युत्पादनात्। एतेन युष्मदस्मदोः प्रत्ययस्वरेणआन्तोदात्तत्वं दर्शयति। `तव ममौ ङसि' (7.2.96) इति युष्मदस्मदोर्मपर्यन्तस्य तवममौ, शेषे लोपे (7.2.90) कृते `अतो गुणे' (6.1.97) पररूपत्वम्। युष्मदस्मदोरादेशस्य स्थानिवद्भावादन्तोदात्तत्वम्। एवं च यो ह्यशादेशेन सहैकादेशः, सोऽपि `एकादेश उदात्तेनोदात्तः' (8.2.5) इत्युदात्त एवेत्यनेन क्रमेण विभक्तिस्वरे प्राप्त इदमुच्यते।।

212. ङयि च। (6.1.212)

`तुभ्यम्, मह्यम्' इति। `ङे प्रथमयोरम्' (7.1.28) इत्यम्भावः, `तुभ्यमह्यौ ङयि' (7.2.95) इति युष्मदस्मदोस्तुभ्यमह्यावादेशौ। किमर्थं पृथगयं योगः क्रियते? इत्यत आह--`पृथग्योगकरणम्' इत्यादि। एकयोगे हि कार्यिणोः, निमित्तयोश्च समानत्वाद्यथासंख्यमत्र भवितव्यमिति कस्यचिदाशङ्का स्यात्। अतः पृथग्योगकरणं यथासंख्यनिरासार्थमिति प्रदर्शनार्थम्। ततश्चास्वरितत्वादेव यतासंख्यं न भविष्यति। आशङ्कातः कस्यचिन्मन्दबुद्धेः स्यादिति तन्निरासार्थं पृथग्योगकरणम्। अयमपि पूर्ववदेव विभक्तिस्वरापवादः।।

213. यतोऽनावः। (6.1.213)

`कण्ठ्यम्, ओष्ठ्यम्' इति। भावार्थे तद्धितः। `नाव्यम्' इति। नावा तार्यमित्यस्मिन्नर्थे `नौवयोधर्म' (4.4.91) इत्यादिना यत्। अत्र `वान्तो यि प्रत्यये' (6.1.79) इत्यवादेशे कृते व्यञ्जनस्य स्वरविधावविद्यमानत्वात् ततः पूर्वस्य स्यादिति नावः प्रतिषेधः क्रियते। `ललाट्यम्' इति। `शरीरावयवाद्यत्' (5.1.6) इति यत्।।

214. ईडवन्दवृशंसदुहां ण्यतः। (6.1.214)

`ईड स्तुतौ' (धा.पा.1667) `वदि अभिवादनस्तुत्योः' (धा.पा.11) `वृङ् सम्भक्तौ' (धा.पा.1509) `शंस स्तुतौ' (धा.पा.728) [शंसु--धा.पा.] `दुह प्रपूरणे' (धा.पा.1014)--एतेभ्यो धातुभ्यः `ऋहलोर्ण्यत्' (3.1.124) इति ण्यत् प्रत्ययः। कस्मिन् पुनः प्राप्त इदमारभ्यते? इत्याह--`द्व्यनुबन्धकत्वात्' इत्यादि। अथ कथं पुनर्वार्यमित्यत्र ण्यत्प्रत्ययः, यावता `एतिस्तुशासु' (3.1.109) इत्यादिना विशेषविहितेन क्यपा भवितव्यम्? इत्याह--`वार्यम्' इत्यादि। ननु च वृङोऽपि क्यपैव भवितव्यम्। `वृ' इति सामान्यनिर्देशात्? इत्याह--`क्यब्विधौ हि' इत्यादि।।

215. विभाषा वेण्विन्धानयोः। (6.1.215)

`णुप्रत्ययान्त' इति। तद्विधौ `स्थो णुः' (द.उ.1.147) इत्यतो णुग्रहणानुवृत्ते। `यदि चानशन्तः' [`यदा--काशिका] इति। `ताच्छील्यवयोवचनशक्तिषु चानश् (3.2.129) इत्यनेन। `अथ शानजन्तः' इति। `लट) शतृशानचो' (3.2.124) इत्यादिना। `लसार्वधातुकनिघाते कृते' इति। `तास्यनुदात्तेत्' (6.1.186) इत्यादिना। इन्धाने' इति। अस्यानुदात्तत्वात्। `उदात्तनिवृत्तिस्वरेण' इति। `अनुदात्तस्य च यत्रोदात्तलोपः'(6.1.161) इत्यनेन। `वेणुः' इत्यादि। `संज्ञायामुपमानम्' (6.1.204) इत्यस्यावकाशः--चञ्चा, वध्रिकेति, अस्या विभाषाया अवकाशः--अनुपमानो वेणुशब्दः शुष्को वने वेणुरिति वेति, यदा वेणुरिवेत्युपमानवेणुशब्दः कस्यचित् संज्ञा भवति तदा `संज्ञायामुपमानम्' (6.1.204) इति तस्याद्युदात्तत्वमिष्यते, तच्च पूर्वविप्रतिषेधाल्लभ्यते।।

216. त्यागरागहासकुहश्वठक्रथानाम्। (6.1.216)

`कुह विस्मापने', (धा.पा.1901) `शठ श्वठ सम्यगवभाषणे' (धा.पा.1854,1855)--एतौ चौरादिकौ। `श्रथ श्लथ क्रथ क्लथ हिंसार्थाः'

(धा.पा799,801,802)।।

217. उपोत्तमं रिति। (6.1.217)

218. चङ्यन्यतरस्याम्। (6.1.218)
`मा हि चीकरताम्' इति। `सन्वल्लघुनि चङ्परेऽनग्लोपे' (7.4.93) इत्यभ्यासस्येत्त्वम्। `अटि प्रतिषिद्धे' इति। यद्यटः प्रतिषेधो यस्य तस्यैव स्वरः स्याद्धात्वकारस्य। `हि च' इति `निघातः' इति। प्रतिषिद्ध इत्यपेक्षते। यदि निघातो न प्रतिषिध्येत, तदा चङन्तस्योदात्तस्याभाव एव स्यात्।
`मा हि दधत्' इति। `विभाषा धेट्श्व्योः' (3.1.49) इति च्लेश्चङ्।।

219. मतोः पूर्वमात्संज्ञायां स्त्रियाम्। (6.1.219)
`उदुम्बरावती' इति। उदुम्बरा अस्यां सन्तीति चातुरर्थिको मतुप्, `मतौ बह्वचोऽनजिरादीनाम्' (6.3.119) इति दीर्घत्वम्। `शरावती' इति। अत्र `शरादीनाञ्च' (6.3.120) इति। `मतोरिति किम् गवादिनी' इति। `मतोः' इत्यस्मिन्ननुच्यमाने तत्सम्बद्धं पूर्वग्रहणमपि नोच्येत, संज्ञाशब्दस्याकारमात्र स्योदात्तत्वं प्रसज्येत। पूर्वग्रहणं मतोरनन्तरस्यास्य यथा स्यात्। इह मा भूत्--सानुमतीति। लक्षणप्रतिपदोक्त परिभाषया (व्या.प.3) चेहैव स्यात्--श्यमावती, उदुम्बरावतीत्यादि न स्यात्। पूर्वग्रहणात् पूर्वमात्रस्य भवति।।

220. अन्तोऽवत्याः। (6.1.220)
`अजिरवती' इत्यादि। पूर्ववन्मतुप्। `पित्त्वादनुदात्तत्वं प्राप्तम्' इति। अतसतस्यायमपवाद इति शेषः। अथावत्या इत्युच्यमाने राजवतीत्येतस्मान्न भवति, अस्ति ह्येतदपि नलोपे कृतेऽवतीशब्दान्तम्? इत्याह--`स्वरविधौ' इत्यादि। कथमुदाहरणम्, यावत मतोर्वत्वस्यासिद्धत्वादत्रादतीशब्दान्तत्वं नास्ति? इत्याह--`वत्वं पुनः'--इत्यादि। पुनःशब्देन नलोपाद्विशेषं दर्शयति। लोपो ह्यसिद्धः, वत्वं पुनः सिद्धम्। कुतः? आश्रयात्। आश्रयः स्वरविधौ निमित्तत्वेनोपादानमित्यर्थः। अवतीशब्दस्यान्तोदात्तत्वं ब्रुवता वत्वमाश्रितम्, तस्मादाश्रयात्तस्य सिद्धत्वम्, अन्यथैव वचनमनर्थकं स्यात्। न हि वत्वस्य सिद्धत्वमन्तरेणावतीशब्दान्तं किञ्चिदस्ति।।

221. ईवत्याः। (6.1.221)
अयमपि पित्त्वानुदात्तस्यैवापवादः `अहीवती' इत्यादि। `शरादीनाञ्च' (6.3.120) इति दीर्घः, `संज्ञायाम्' (8.2.11) इति च वत्वम्।।

222. चौ। (6.1.222)
`उदात्तनिवृत्तिस्वरापवादोऽयम्' इति। `दधीचः' इति। दध्यञ्चतीति क्विन्, `गतिकारकोपपदात्' (6.2.139) इत्युत्तरपदप्रकृतिस्वरेणाञ्चेरकार उदात्तः। विभक्तावजादावसर्वनामस्थाने `अचः' (6.4.138) इत्यकारलोपे कृते `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इत्युदात्तनिवृत्तिस्वरः प्राप्नोति, अतस्यस्याय मपवादः।
`चावतद्धिते' इत्यादि। यदिदमञ्चेः पूर्वस्यान्तोदात्तत्वं विधीयते, तदा तद्धितं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानञ्चेदम्--अन्यतरस्यांग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा, तेन तद्धिते न भविष्यतीति।।

223. समासस्य। (6.1.223)
`राजपुरुषः' इत्यादिषूदहरणेषु समासपदानां तस्मिंस्तस्मिन् स्वरे प्राप्ते सतीदमारभ्यते, स आख्यायते। राजशब्दे तावत् `कनिन् युवृषितक्षिराजि' (द.उ.6.51) इति कनिन्प्रत्ययान्तत्वात् नित्स्वरेणाद्युदात्तत्वम्। एवं पुरुषेऽपि, स हि `पुरः कुषन्' (द.उ.6.51) इति कुषन्प्रत्ययान्तो व्युत्पाद्यते। ब्रह्मण इदमिति `तस्येदम्' (4.3.120) इति ब्राह्मणशब्दोऽणन्तः प्रत्ययस्वरेणान्तोदात्तः। `कलस्तृपश्च' (दा.उ.8.107) इति `बृषादिभ्यश्चित्' (द.उ.8.109) बहुलवचनात् `कमेर्बुक्' (द.उ.8.114?) इति कम्बलशब्दो व्युत्पाद्यते, तेनायं चित्स्वरेणान्तोदात्तः। कन्यशब्दोऽन्तस्वरित; `अध्न्यादयश्च' (द.उ.8.14) इति निपात्यते। अथ वा--`कनी [`कन'--धा.पा.] दीप्तिकान्तिगतिषु' (धा.पा.460) इत्यस्मात् `ऋहलोर्ण्यत्' (3.1.124) इति ण्यत्, `कन्यायाः कनीन च' (4.1.116) इति निपातनात् वृद्ध्यभावः। तित्स्वरेणायमन्तस्वरितः सम्पद्यते। स्वनशब्दः `स्वनहसोर्वा' (3.3.62) इत्यबन्तत्वात् धातुस्वरेणाद्युदात्तः। पटत् पटद् ष्यन्यत इति पटहशब्दः पृषोदरादित्वादन्तोदात्तः। शब्दशब्दः `शाशपिभ्यां ददनौ' (द.उ6.48) इति दन्प्रत्ययान्तत्वान्नित्स्वरेणाद्युदात्तः। पचादिषु `नदट्' इति पठ्यते, तेन `टिड्ढाणञ्' (4.1.15) इति ङीपि कृते तत्र च `यस्येति च' (6.4.148) इत्यकारलोपे कृत उदात्तनिवृत्तिस्वरेणान्तोदात्तो नदीशब्दो भवति। घोशब्दो घञन्तत्वान् ञित्स्वरेणाद्युदात्तः। पृषत्समिच्छब्दौ प्रातिपदिकस्दरेणान्तोदात्तौ।
अथ राजपृषत्, ब्राह्मणसमिदित्यत्र कथमन्तो भवति, यावता योऽत्र समासस्यान्तो नासौ स्वरभाक् यस्तु तस्मात् पूर्वः स तकारेण व्यवहितः? इत्याह--

`स्वरविधौ' इतद्यादि। `हलन्तेऽपि' इति। समासस्येदं विशेषणम्। `अन्तोदात्तत्वम्' इति। समासे येऽचः पूर्वे तदपेक्षया परस्याचोऽन्तत्वं वेदित्वयम्। तेन `नानपदस्वरस्यापवादः' इति। समासे हि पदानां पृथक् स्वरो भवति। यदिवं नोच्येत ततो नानापृथक्पदानां स्वरः प्राप्नोति। अतस्तदपवादोऽयमुच्यते।।

इति बोधिसत्त्वदेशीयाचार्य श्रीजिनेन्द्रबुद्धिपादविरचितायां

काशिकाविवरणपञ्चिकायां षष्ठाध्यायस्य

प्रथमः पादः।।

- - -

6.2

अथ षष्ठोऽध्यायः

द्वितीयः पादः

1. बहुब्रीहौ प्रकृत्या पूर्वपदम्। (6.2.1)

`पूर्वपदग्रहणम्' इत्यादि। प्रकृतिभावो ह्यत्र तस्य यूज्यते विधातुम्, यस्यानुदात्तलक्षणो विकारः प्राप्नोति। नच पूर्वपदस्याज्झल्समुदायस्यासौ प्राप्नोति, किं तर्हि? स्वरितस्य, उदात्तस्य वा। तत्र यदीह पूर्वपदग्रहणं पूर्वपद एव वर्त्तते, अपार्थकमेवेदं वचनं स्यात्! तस्मात् पूर्वपदस्ये स्वर उदात्ते स्वरिते वा पूर्वपदग्रहणं वर्तत इति विज्ञायते। भवति हि तात्स्थ्यात् ताच्छब्द्यम्, यथा--`मञ्चाः क्रोशन्ति' इति। `स्वभावेनावतिष्ठते' इति। अनेन प्रकृत्या भवतीतयस्यार्थमाचष्टे। तमेव वाक्यान्तरेण स्पष्टीकर्त्तुमाह--`विकारमनुदात्तत्वमापद्यते' इति। कथं पनरनुदात्तलक्षणो विकारः प्राप्नोति, यन्निवृत्तये प्रकृतिभावोऽयमारभ्यते? इत्याह--`समासान्तोदात्तत्वे हि सति' इत्यादि। `समासान्तोदात्तत्वापवादोऽयम्' इति। नाप्राप्ते तस्मिन्नारम्भात्। `कृष्णो मृगः' इति। कृष्णगृणत्वात्। `आद्युदात्तः' इति। ञित्स्वरेण।
`तत्र च' इत्यादि। तत्र `स्तुवो दीर्घश्च' (द.उ7.4) इति दीर्घग्रहणमनुवर्त्तते। `सुशृभ्यां निच्च' (द.उ.7.6) [सृशृभ्यामूर्च--द.उ.] इत्यतो निच्चेति च। `तेनाद्युदात्तः' इति। नित्स्वरेण। `कृदुत्तरपद' इत्यादि। ब्रह्मचारीति `व्रते' (3.2.80) इति णिनिः, उपपदसमासः। तत्र `गतिकारकोपपदात् कृत्' (6.2.139) इति ब्रह्मचारीति शब्दः कृत्स्वरेणान्तोदात्तः।
`स्नातकशब्दः कन्प्रत्ययान्तः' [स्नातशब्दः--मुद्रितः पाठः---काशिका] इति। क्षोत्रियँश्छन्दोऽदीते' (5.2.74) इति निपात्यते, तेन नित्सवरेणाद्युदात्तः।
`मनुष्यशब्दस्तित्स्वरितमिति' इति। `मनोर्जातावञ्यतौ षुक्च' (4.1.161) इति यत्प्रत्ययान्तत्वात्। `उदात्तग्रहणम्' इत्यादि। तत्रोदात्तग्रहणम् `कर्षात्वतो घञोऽन्त उदात्त' (6.1.159) इत्यतोऽनुवर्तते। `स्वरितग्रहणम्' इति। `तित् स्वरितम्' (6.1.1.85) इत्यतः। ततः किं सिद्धं भवति? इत्याह--`तेन' इत्यादि। उदात्तसरितानुवृत्तेर्ह्येतदेव प्रयोजनम्--यत्रोदात्तः स्वरितो वास्ति तत्रैव यता स्यात्।
समशब्दो हि `सुनोतेर्डमप्' (?) इति डमप्प्रतययान्तो व्युत्पाद्यते, तेन धातोष्टिलोपे कृते प्रत्यस्य पित्त्वात् सर्वानुदात्तो भवति।।

2. तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः। (6.2.2)

`यतोऽनाव इत्याद्युदात्तः' इति। `नौवयोधर्म' (4.4.91) इत्यादिना यत्प्रत्ययान्तस्य तुल्यशब्दस्य व्युत्पादितत्वात्--तुलया सम्मितं तुल्यमिति। `सदृक्शब्दः' इत्यादि। `त्यादादिषु दृशोऽनालोचने कञ्च' (3.2.60) इत्यत्र `समानान्ययोश्चेति वक्तव्यम्' (वा.261) इत्युपसंख्यानं कृतम्, तेन सदृक्छब्दः कन्नन्तः.
`दृग्दृशतुषु' (6.3.89) इति समानस्य सभावः। `सदृशशब्दोऽपि' इत्यादि। कृदुत्तरपदप्रकृतिस्वरेणेत्यपेक्षते।
`इकारः प्रत्ययः' [इकारप्रत्ययः--काशिका] इति। तत्र `अत्र इः' (द.उ.1.67) इत्यत इकार प्रत्ययानुवृत्तेः। `कित्' इति। `भुजेः किच्च' (द.उ.1.71) इत्यतः किद्ग्रहणानुवृत्तेः।
`सप्रत्ययान्तोऽक्षशब्दः' इति। `अशेर्देवने' (द.उ.9.24) इत्यत्र `वृतृवदिहनिकमिकषिभ्यः सः' (द.उ.9.21) [`कमिकषियुमुचिभ्यः'--द.उ.] इत्यतः सप्रतययानुवृत्तेः।
`नब्विषयस्य' इति। नपुंसकलिङ्गविषयस्येत्यर्थः। `मध्योदात्तत्वञ्च' इति। `न्यग्रोधस्य च केवलस्य' इति। निपातनादित्यनेन सम्बन्धः।
`अब्राह्मणः' इति। नञ्समासः। `कुब्रह्मणः' इत्यादौ `कुगतिप्रादयः' (2.2.18) इति। `एतान्यव्ययान्याद्युदात्तानि' इति। `निपाता आद्युदात्ताः' (फि.सू.80) इति वचनात्, एषां च निपातत्वात्। तत्र न्कुशब्दयोः `चादयो।सत्वे' (1.4.57) इति चादिषु पाठान्निपातत्वम्, निरतिशब्दयोस्तु `प्रादयः' (1.4.58) इति, तयोः प्रादिषु पाठात्।

`अव्यये' इत्यादि। अव्यये पूर्वपदे प्रकृतिभावे कर्त्तव्ये नञ्प्रभृतीनामेव भवतीत्येतदर्थरूपं व्याख्येयम्। तत्रेदं व्याख्यानम्--`चङ्यन्यतरस्याम्' (6.1.218) इत्यतोऽनयतरस्यांग्रहणमनुवर्तते; सा च व्यवस्थितविभाषा, तेन नञ्कुनिपातानामेव भविष्यतीति। `स्वात्वाकालकः' इति। `मयूरव्यंसकादित्वात्' (2.1.72) समासः `क्त्वातोसुन्कसुनः' (1.1.40) इति पूर्वपदस्याव्ययत्वम्।
`मुहूर्त्तसुखम्' इत्यादौ `कालाध्वनोरत्यन्तसंयोगे' (2.3.5) इति द्वितीया। `सर्वरात्रशब्दोऽप्यच्प्रत्यान्तः' इति। सर्वा च रात्रिश्चेति `पूर्वकालैक' (2.1.49) इत्यादिना समासे `अहः सर्वैक' (5.4.87) इत्यादिनाचप्रत्ययविधानात्।।

3. वर्णौ वर्णोष्वनेते। (6.2.3)
`रुहे रश्च लो वा' इति। अत्र `हृश्याभ्यामितन्' (द.उ.6.12) इतीतनोऽनुवर्तनात्। `परमकृष्णः' इति। अत्र समासान्तोदात्तत्वमेव।।

4. गाधलवणयोः प्रमाणे। (6.2.4)
`शम्बगाधम्' इति। गाध्यत इति गाधः, `गाधृ `प्रतिष्ठालिप्सयोः' (धा.पा.4) [प्रतिष्ठालिप्सयोर्ग्रन्थे च--धा.पा.] अर्धर्चादित्वात् (2.4.31) पक्षे नपुंसकत्वम्। `अर्तिलूधूसू' इति। अनेन सूत्रैकदेशेन `अर्तिलूधूसूखनसहचर इत्रः' (3.2.184) इत्येतत्सूत्रमुपलक्ष्यते। `मध्योदात्तः' इति। प्रत्ययस्वरेण। `अशूप्रुषि' इति। `अशूप्रुषिलटिकणिघटिविशिभ्यः कन्' (द.उ.8.125) [अशूप्रुषिप्लुषिलटिकटिकणिखटिविशिभ्य) क्वन्--द.उ.] इति सूत्रमुपलक्षयति। ननु चायामः=प्रमाणम्, `आयामस्तु प्रमाणं स्यात्' इति वचनात्; न च शम्बगाधमित्यादिस्तत्पुरुषः प्रमाणवाची, किं तर्हि, इयत्तावाची? इत्याह--`प्रमाणम्' इत्यादि। इयतो भाव इयत्ता, सा परिच्छिद्यते येन स इयत्तापरिच्छेदः, स एवात्र प्रमाणं वेदितव्यम्। न पुनरायाम एव। तत् कथम्? प्रमीयतेऽनेनेति प्रमाणमिति क्रियाशब्दोऽत्र प्रमाणशब्दो गृह्यते, न तु रूढिशब्दः; लक्ष्यानुरोधात्। तेन येनेयत्ता परिच्छिद्यते तत् सर्वं प्रमाणम्। `स्वरव्यङ्ग्यं च' इति। अस्य स्वरे योऽयं प्रकृतिभावो विधीयते तेन व्यङ्ग्यं द्योत्यमित्यर्थ-. `एतेषाम्' इति। शम्बगाधादीनाम्।।

5. दायाद्यं दायादे। (6.2.5)
दायः=भागः, अंश इत्यर्थः। दायमादत्त इति दायादः। मूलविभुजादित्वात् कः (वा.232)। दायादस्य कर्म दायाद्यम्। किं पुनस्तत्? दाय एव। स हि दायादिरादीयमानः कर्म भवति। `उदात्त इति च तन्न वर्तते' इति। `मन्त्रे वृष' (3.3.96) इत्यादेः सूत्रात्। ननु च निपूर्वः सूत्रे धातुरुदात्तः तत् कथं केवलाद्भवति? इत्याह--`बहुलवचनात्' इत्यादि। यदि `स्वामीश्वराधिपति' (2.3.39) इत्यादिना षष्ठी विधीयते। सप्तम्येव हि विधातव्या, न षष्ठी, तस्याः `शेषे' (2.3.50) इत्येव सिद्धत्वात्? इत्यत आह--`तस्यास्तु' इत्यादि। यदि सप्तम्येव विधीयते, ततोऽसौ विशेषविहितत्वात् षष्ठ्या बाधिका विज्ञायेत, न त्वेवं विज्ञायेतेति पुनरनयैव शेषलक्षणषष्ठ्यभ्यनुज्ञायते, न त्वपूर्वा विधीयते। तेनाप्रतिपदविहितत्वाद्भवत्येव समासः। `परमदायादः' इति। अत्र पूर्वपदं पूजावाचि, न दायाद्यवाचि।।

6. प्रतिबन्धि चिरकृच्छ्रयोः। (6.2.6)
कार्यसिद्धिं प्रतिवध्नाति विहन्तीति प्रतिबन्धि। ताच्छील्य आवश्यके वा णिनिः। `विशेषणसमासे कृते' इति। ननु च विशेषणसमासः सामानाधिकरण्ये भवति; न चेदं सामानाधिकरण्यम्, कथं पुनरत्र पूर्वपदं प्रतिबन्धि भवति? इत्याह--`गमनम्' इत्यादि। अचिरकालभाविनि गमने कार्यसिद्धिर्निष्पद्यते। `कृच्छ्रयोगि च' इति। कृच्छ्रम्=दुःखम्, तद्योगिनि गमने गन्ता प्राप्यमर्थं दुःखेनाभिहन्यमानो न प्राप्नोति तस्माच्चिरकालभावि कृच्छ्रयोगि वा यद् गमनं तत् कार्यसिद्धेः प्रतिबन्धि जायते।।

7. पदेऽपदेशे। (6.2.7)
`व्याजः' इति। छद्मेत्यर्थः। `मूत्रपदेन' इति। मूत्रव्याजेनेत्यर्थः। `ष्ट्रन्प्रत्ययान्तः' इति। `सिविमुच्योष्टेरूच्च' (द.उ.8.83) [षिविमुच्योष्टेरू च-द.उ.] इत्यत्र ष्ट्रन्नित्यस्यानुवृत्तेः। `मूत्रयतेः' इति। `मूत्र परस्रवणे' (धा.पा.1909)। उच्चारशब्दोऽपि घञन्तः। ``थाथादि' इत्यादि। `घञन्तत्वात्।।

8. निवाते वातत्राणे। (6.2.8)
`कुड्यादिहेतुके' इत्याद। कुड्यादिहेतुके वर्तन्ते; कार्ये कारणोपचारात्। भवति कारणे कार्योपचारः, यथा--`सर्वमिदं पुरातनं कर्म भुजयते' इति। `कवतेः' इति। `कु शब्दे (धा.पा.1042)। `आद्युदात्तः' इति। `यतोऽनावः' (6.1.213) इत्यनेन। `ड्यक्प्रत्ययांन्तोऽन्तोदात्त इत्यपरे' इति। ते `कवतेर्ड्यक्' (द.उ.8.20) इति सूत्रमधीयते।।

9. शारदेऽनार्तवे। (6.2.9)
`रज्जुशारदम्, `दृषच्छारदम्' [दृषच्छारदाः--काशिका] इति। योगविभागात् समासः। `शारदशब्दोऽय प्रत्यग्रवाची' इति। प्रत्यग्रम्=अभिनवम्,

अचिरकालभावीत्यर्थः। एतेन नानार्थवाचित्वं शारदशब्दस्य दर्शयति। `नित्यसमासः' इति। महाविभाषायाः प्रकृताया व्यवस्थितविभाषात्वात्। `अनुपहतम्' इति। रजोभिः। अनुपहतत्वं तु सद्यउद्धृतत्वात्। `उप्रत्ययान्तः' इति। `सृजेरसुं च' (द.उ.1.100) इत्यत्र `भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः' (द.उ.1.92) [भृमृशीतृचरित्सरितनिमिमस्जिभ्यः उः--द.उ.] इत्यत उकारप्रत्ययानुवृत्तेः। `अदिप्रत्ययान्तः' [अदिक्प्रत्ययान्तः--मुद्रितकाशिका, आदिप्रत्ययान्तः--मुद्रितन्यासः] इति। `दृणातेः षुग् ह्रस्वश्च' (द.उ.6.45) इत्यत्र `शृदृभसोऽदिः' (द.उ.6.42) इत्यतोऽदिप्रत्ययानुवृत्तेः। `परमशारदम्' इति। शरदि भवं शारदम्। `सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' (4.3.16) इति सूत्रेणोत्पन्नोऽयं शब्दः।।

10. अध्वर्युकषाययोर्जातौ। (6.2.10)

`जातिवाचिनो नियतविषयाः' इति। नियतो विषयो येषामिति विग्रहः। नियतविषयत्वं तु जातिविशेषत्व एव वर्तमानत्वात्। अध्वर्युप्रभृतीनाम् `गोत्रञ्च चरणैः' (का.वृ.4.1.63) इति चरणत्वाज्जातित्वम्। `यत्प्रत्ययान्तः' इति। `द्युप्रागपागुदक्प्रतीचो यत्' (4.2.101) इति। `कठशब्दः पचाद्यचि व्युत्पादितः' इति। `कठ कृच्छ्रजीवने' (धा.पा.333) इत्यस्मात्। `तदेवम्' इति। यस्मादेदं कालापशब्दोऽणन्तः, तस्मात् प्रत्ययस्वरेणान्तोदात्तः। `ठकि सत्यन्तोदात्तः' इति। `कितः' (6.1.165) इत्यनेन।।

11. सदृशप्रतिरूपयोः सादृश्ये। (6.2.11)

`पितृसदृशः' इति। `तुल्यार्थैः' (2.3.72) इत्यादिना षष्ठी, तृतीया च, `पूर्वसदृश' (2.1.31) इत्यादिना समासः। `पितृमातृशब्दावुणादिष्वन्तोदात्तौ निपातितौ' इति। `नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृपितृदुहितृ' (द.उ.2.3) इत्यत्र।

अथ सदृशग्रहणं किमर्थम्, यावता मातृसादृश पितृसदृश इत्यत्र `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्येव सिद्धम्? इत्यत आह--`षष्ठीसमासार्थञ्च' इत्यादि। तुल्यार्थे हि प्रयोगे षष्ठ्यपि विधीयते। तत्र यदा मातृसदृश इति षष्ठीसमासः क्रियते, तदपि यथा स्यादित्येवमर्थं सदृशग्रहणम्। सति त्वस्यारम्भे तृतीयासमानसेऽपि सदृशग्रहणं कर्त्तव्यमित्यत आह--`इह' इत्यादि। `दास्याः सदृशः, वृषल्याः सदृस' इति अत्र `षष्ठ्या आक्रोशे' (6.3.21) इत्यलुकि कृते षष्ठीसमासस्तत्सदृशग्रहणं प्रयोजयति; अलुकि सति रूपविशेषस्य विद्यमानत्वात्। यदि षष्ठीसमासार्थं सदृशग्रहणमिह क्रियते, तृतीयासमासो न कर्तवयः; विशेषाभावात्? नैतदस्ति; तत्रापि हि कर्त्तव्य एव यत्र षष्ठ्यर्थे नास्ति तदर्थः, यथा--विद्यया सदृशो विद्यासदृश इति, न ह्यत्र षष्ठ्यर्थो विद्यते, किं तर्हि? तृतीयार्थः, विद्यया हेतुना सदृश इत्यर्थः। `अत्र' इत्यादि। तत्र दासीशब्दस्य ङीबुदात्तनिवृत्तिस्वरेणान्तोदात्तार्थः। `दशि सेवने' (धा.पा.1786) [दसि आप्यायने--धा.पा] इति, `दंशेष्टटनौ न आ च' (द.उ.9.103) इति टप्रत्ययान्तो नकारस्य चाकारादेशः। `टिड्ढाणञ्' (4.1.15) इति ङीप्, `यस्येति' (6.4.148) लोपः `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इत्युदात्तत्वम्। वृषलीशब्दः `जातेरस्त्रीविषयात्' (4.1.63) इति ङीषन्तोऽन्तोदात्तो भवति प्रत्ययस्वरेण।।

12. द्विगौ प्रमाणे। (6.2.12)

`प्राच्यसप्तशमः' इति। षष्ठीसमासः। `प्राच्यशब्द आद्युदात्तः' इति। यत्प्रत्ययान्तत्वात् `यतोऽनावः (6.1.213) इति। `गान्धारिशब्दः कर्दमादित्वादाद्युदात्तो मध्योदात्तो वा' इति। `कर्दमादीनाञ्च' (फि.सू.3.10) इत्यत्रादिग्रहणं चानुवर्तते, तत्र यदादेरुदात्तो विधीयते तदाऽऽद्युदात्तो भवति; यदा तु द्वितीयस्य तदा मध्योदात्तः।

13. गन्तव्यपण्यं वाणिजे। (6.2.13)

गमनीयम्=गन्तव्यम्। पण्यम्=व्यवहर्त्तव्यमिति। `मद्रवाणिजः' इति। मद्रेषु यो व्यवहरति स एवमुच्यते। `सप्तमीसमासः' [सप्तमीसमासाः--काशिका] इति। `सप्तमी' (2.1.40) इति योगविभागात्। `रक्प्रत्ययान्तत्वात्' इति। `स्फयितञ्चि' (द.3.8.31) इत्यादिना मदे रकं विधाय व्युत्पादितत्वात्।।

14. मात्रोपज्ञोपक्रमच्छाये नपुंसके। (6.2.14)

`तुल्यप्रमाणे वर्तते' [तुल्यप्रमाणं--मुद्रिपाठः] इति। तुल्यं प्रमाणं यस्येति विग्रहः। `अस्वपदविग्रहः' इति स्वपदविग्रहः कस्मान्न भवति? ताशं हि--वाक्यं कर्तव्यं यथा समासार्थः प्रतीयते। `भक्षामात्रम्' इति। अस्य च भिक्षायास्तुल्यप्रमाणमित्येषोऽर्थः। न चायं स्वपदविग्रहेण शक्यः प्रतिपादयितुम्; मात्रशब्दस्य तुल्यप्रमाणवृत्तित्वात्। स हि समास एव तुल्यप्रमाणे वर्तते, न वाक्ये। अत एवोक्तम्--`मात्रशब्दोऽयं वृत्तिविषयः' इत्यादि। वृत्तिरिह समासवृत्तिरेव विषयः। `अप्रत्ययाऽन्तोदात्तः' [अप्रत्ययान्तोदात्तः--काशिकामुद्रितः पाठः] इति। टापा सहैकदेश उदात्तनोदात्तत्वात्।

15. सुखप्रिययोर्हिते। (6.2.15)

`तत्र सुखप्रियशब्दौ' इत्यादि। तच्छब्देन सुखप्रिययोः प्रत्यवमर्शः, तयोः सुशप्रिययोः हेतुरायत्याम्=जन्मान्तरे प्रीतिकरः। तत्र सुखप्रियशब्दौ वर्त्तते। किं कारणमेवं व्याख्यायते? इत्याह--`तद्धि हितम्' इत्यादि। हि तदा चेत्यर्थः। तत्पुरुषे प्रकृतिभावोच्यं विधीयते। एष हि तत्पुरुषो हितवाची भवति, यदि

सुखप्रियशब्दावृत्तरपदे हितहोतौ वर्त्तते। हितञ्च किम्? यदायत्यां प्रीति करोति। कथं पुनः सुखाप्रियशब्दौ तद्धेतौ वर्त्तते कारणे कार्योपचारात्, यथा --नड्वलोदकं पादरोग इति।।

16. प्रीतौ च। (6.2.16)
अथ प्रीतौ चेतीदं ग्रहणं किमर्थम्, यावता सुखप्रिययोः प्रीत्यव्यभिचारात्। एवं प्रीतौ गम्यमानायां भविष्यति? इत्यत आह--`सुखप्रिययोः प्रीति' [प्रीत्येत्यादि--मुद्रितः पाठः] इत्यादि। प्रीतिग्रहणमन्तरेणापि सिद्धे सुखप्रिययोः प्रीत्यव्यभिचाराद्यदिह प्रीतिग्रहणं क्रियते, तदतिशयिता या प्रीतिस्तस्या यथा स्यादित्येवमर्थम्। `ब्राह्मणच्छात्रशब्दौ प्रत्ययस्वरेणान्तोदात्तौ' इति। ब्राह्मणशब्दोऽणन्तः। छात्रशब्दः `छत्त्रादिभ्यो णः' (4.4.62) इति णप्रत्ययान्तः। `कन्याशब्दः स्वरितान्तः' इति। अध्न्यादिषु (द.उ.8.14) तथा भूतस्यैव पाठात्।
`राजसुखं राजप्रीयम्' इति। अत्र यद्यपि सुखप्रिययोः प्रीत्यव्यभिचारित्वात् प्रीतिर्गम्यते, तथाप्यतिशयेन या प्रीतिः सा न गम्यत इति भवति प्रत्युदाहरणम्।।
17. स्वं स्वामिनि। (6.2.17)

18. पत्यावैश्वर्ये। (6.2.18)
`धान्यमन्तःस्वरितम्' इति। ण्यदन्तत्वात् तित्सवरेण। `वृषल्या भर्त्तेत्यर्थः' इति। वृषल्याः कामयितेति यावत्।।

19. नभूवाक्चिद्दिधिषु। (6.2.19)
`भुवः संज्ञान्तरयोः' (3.2.179) इति क्विपा भूशब्दो धातुस्वरेणान्तोदात्तः। एवं वाक्शब्दः, वचः `क्विब्वचिप्रच्छि' (द.उ.10.2) इत्यादिना क्विप्। `चित्' इति। `चितौ संज्ञाने' (धा.पा.39) इत्यस्मात् `अन्येभ्योऽपि दृश्यते' (3.2.187) इति क्विप्। `नृतिशृध्योः कूः' (द.उ.1.174) इत्यधिकृत्य `अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः (द.उ.1.176) दिधिषूशब्दः कूप्रत्ययान्तोऽन्तोदात्त इति।।

20. वा भूवनम्। (6.2.20)

21. आशङ्काबाधनेदियःसु सम्भावने। (6.2.21)
`शकि शङ्कायाम्' (धा.पा.86) इत्येतस्मात् `गुरोश्च हलः' (3.3.103) इत्यकारप्रत्ययः। केचित्तु घञन्तसय शङ्कशब्दस्य ग्रहणमिति वर्णयन्ति। `बाधु लोडने' (धा.पा.5) इत्यस्मादाङ्पूर्वात् धञि `आबाधः'। अत्यर्थमन्तिकं `नेदीयः'। अन्तिकशब्दस्य `अन्तिकबाढयोर्नेदसाधौ' (5.3.63) इतीयसुनि परतोनेदादेशः। `अस्तित्वाध्यवसायः' इति। असतित्वनिश्चय इत्यर्थः. `गमनाशङ्कम्' इति। षष्ठीसमासः। क्रियाविशेषणत्वान्नपुंसकलिङ्गम्, लोकाश्रयत्वाद्वा लिङ्गस्य।।

22. पूर्वो भूतपूर्वे। (6.2.22)
`आढ्यो भूतपूर्वः' इति। यः पूर्वमाढ्य आसीत् स एवमुच्यते। समासे गम्यमानार्थत्वाद्भूतशब्दो न प्रयज्यते, यथा--दध्योदन इत्यत्रोपसिक्तशब्दः। `परमपूर्वः' इति। अत्र `सन्महत्' (2.1.61) इत्यादिना समासः। `अत्र परमश्चासौ पूर्वश्चेति समासः' इति। इतिकरणोऽर्थनिर्देशार्थः। परमश्चसौ पूर्वश्चेति योऽयं वाक्यार्थः पूज्यमानतालक्षणः, तस्मिन्निह प्रत्युदाहरणे समास इत्यर्थः। `न तु परमो भूतः' इति। तुशब्दोऽवधारणे। परमो भूतपूर्व इति योऽयं वाक्यार्थः परमपूर्वकाललक्षणः, तस्मिन्नेवातर समास इत्यर्थः। किं कारणम्? इत्याह--`तथा च' इत्यादि। चशब्दो हि हीत्यर्थे। अयं समासो न भवति। एवं सत्यदाहरणमेवेदं भवति, न प्रत्युदाहरणम्, पूर्वशब्दस्य भूतपूर्ववाचित्वात्। यस्तु प्रायेण पुस्तकेषु पाठोऽत्र `परमश्चासौ भूतपूर्वश्चेति विग्रहो न तु परमो भूतपूर्वः' इति; स प्रमादपाठो वेदितव्यः; वाक्यद्वयेऽपि भूतपूर्वयोर्गम्यमानत्वात्।।

23. सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये। (6.2.23)
सह विषया सविधः, `तेन सहेति तुल्ययोगे' (2.2.28) इति बहुव्रीहिः, `वोपसर्जनस्य' (6.3.82) इति सहसय सभावः। एवं सनीडादिष्वपि बहुव्रीहिः सभावश्च वेदितव्यः। मद्रसविधमित्यादयः षष्ठीसमासाः।
ननु च सह विषयेत्येवमादावर्थे सविधादयः शब्दा व्युत्पाद्यन्ते, तत् कथमेषां सामीप्ये वृत्तिः? इत्याह--`सह विषयेत्यवमादिका' इत्यादि। आदिशब्देन सह नीडेन सह मर्यादयेत्येवमादीनां ग्रहणम्। एवकारोऽवधारणार्थोऽभिधेयव्यवच्छेदं करोति--व्युत्पत्तिनिमित्तमेव, नाभिधेयमिति। `समीपवाचिनस्त्वेते' इति। अत्रापि तुशब्दोऽवधारणार्थ एव। वसमीपवाचिन एव, न तु सह विधयेत्येवमादिवाक्यार्थवाचिन इति।।

24. विस्पष्टादीनि गणवचनेषु। (6.2.24)

`विस्पष्टकटुकम्' इति। कटुशब्दात् `संज्ञायां कन्' (4.3.147)। `सुप्सेति समासः' इति।

अथ `विशेषणं विशेष्येण बहुलम्' (2.1.57) इति विस्पष्टकटुकमित्यत्र विगृह्य कस्मात् कर्मधारय एव न क्रियते? इत्याह--`विस्पष्टादयो ह्यत्र' इत्यादि। कर्मधारयो हि सामानाधिकरण्ये सति भवति। न चेह सामानाधिकरण्यमस्ति। तस्माद्विस्पष्टादयोऽत्र कटुकादेः शब्दस्य यत् प्रवृत्तिनिमित्तं कटुकत्वादि तस्य विशेषणम्, न तद्वतो द्रव्यस्य। कटुकादिभिश्च शब्दैः कटुकत्वलक्षणो [कटुकस्यास्तिलक्षणो यस्यास्ति--इति मुद्रितः पाठः] गुणो यस्यास्ति तद्गुणवद्द्रव्यमभिधीयते। ततो वैयधिकरण्ये नास्ति कर्मधारायः। तस्माद्यथोक्तेन विधिना समासोऽत्रि कर्त्तव्यः।

`विस्पष्टः' [विस्पष्टशब्दः--काशिका] इति। `स्पश बाधनस्पर्शनयोः' (धा.पा.887) इत्यस्य निष्ठायाम् `दस्तस्पष्टच्छन्नज्ञप्ताः' [वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः--पा.सू.] (7.2.27) इति स्पष्टशब्दो निपतितः, तस्य विशब्देन गतसमासः। `विचित्रशब्दः' इत्यादि। `चित्र चित्री करणे' (धा.पा.1917) चुरादि, तस्माद्घञ, विशेषेण चित्रं विचित्रम्, प्रादिसमासः। `अव्ययस्वरेण' इति। `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना विहितेन। अवययं पुनरत्र विशब्दः, तस्य च `निपाता आद्युदात्ताः' (फि.सू.4.80) इत्याद्युदात्तत्वम्। `विचित्तशब्दम्' इति। चिती संज्ञाने' (धा.पा.39) इत्यस्य निष्ठायां चित्तम्। विगतं चित्तमस्येति बहुव्रीहि। `बहुव्रीहिस्वरेण' इति। `चिती संज्ञाने' (धा.पा.39) इत्यस्य निष्ठायां चित्तम्। विगतं चित्तमस्येति बहुव्रीहि। `बहुव्रीहिस्वरेण' इति। `बहुव्रीहौ प्रकृत्या' (6.2.1) इति विहितेन। `व्यक्तशब्दः' इत्यादि। अञ्जेर्विपूर्वस्य निष्ठायां गतिस्वर उदात्तः, तत्रेकारस्य स्थाने यो यण् स उदात्तयण् भवति, ततः परस्यकारस्यानुदात्तस्य स्वरितः। `सम्पन्नशब्द' इत्यादि। पदेः सम्पूर्वस्य निष्ठायां सम्पन्नशब्दः कर्त्तरि चेति।

`पटुपण्डितशब्दौ प्रत्ययस्वरेण' इति। अन्तोदात्तग्रहणमेकवचनान्तं यत् प्रकृतं तस्य विपरिणामं कृत्वाऽन्तोदात्ताविति सम्बन्धः कर्त्तव्यः। पाटयतेः `फलिपाटिनमिजनीनां गुक् पाटिनाकिधश्च' [फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च--द.उ.] (द.उ.1.103) इत्युप्रत्ययः, पटिशब्दश्चादेशः--पटुः। `पडि गतौ' (धा.पा.281) अस्मान्निष्ठायां `पण्डितः'। `कुशलः' इति। कुशाँल्लातीति `लाऽऽदाने' (धा.पा.1058) इत्यस्मात् `आतोऽनुपसर्गे कः' (3.2.3) इति कः, उपपदसमासः, `गतिकारकोपपदात् कृत्' (6.2.139) इत्युत्तरपदप्रकृतिस्वरः। `चपलशब्दश्चित्स्वरेण' इति। अन्तोदत्त इत्यपेक्षते। कथमयमन्तोदात्तश्चित्स्वरेण? इत्याह--`कलस्तृपश्च' (द.उ.8.107) इत्यतः कलप्रत्ययान्तो व्युत्पाद्यते। तत्र `बृषादिभ्यश्चित्' (द.उ.8.109) इत्यतश्चिद्ग्रहणमनुवर्त्तते। तेन चित्स्वरेणान्तोदात्तः। `निपुणशब्दः' इत्यादि। `अन्तोदात्तः' इति। प्रकृतेन सम्बन्धः। `पुणेः' इति `पुण कर्मणि शुने' (धा.पा.1333) इत्यस्मात् `इगुपधाज्ञाप्रीकिरः कः (3.1.135) इति कप्रत्ययः।।

25. श्रज्यावमकन्पापवत्मु भावे कर्मधारये। (6.2.25)

`गमनश्रेष्ठम्' इति। `ल्युट् च' (3.3.115) इति ल्युट्; विशेषणसमासः। अतिशयेन प्रशस्यः श्रेयः। दृष्ठन्नीयसुनोः `प्रशस्यस्य श्रः' (5.3.60) इति श्रादेशः। `वचनज्येष्ठम्' इति। अत्रापि। तयोरेव प्रत्यययोः परतः प्रशस्यशब्दस्य ज्यादेशः। `गमनकनिष्ठम्, गमनकनीयः' इति। इष्ठन्नीयसुनोः परतो युवशब्दस्याल्यशब्दस्य च `युवाल्पयोः कनन्यतरस्याम्' (5.3.64) इति कनादेशः। ननु च `श्रज्यकनाम्' इति कथम्? इतिकरणो हेतौ। यस्माच्छ्रज्यकनामिहादेशानां ग्रहणं ते चाजादौ प्रत्यये प्रशस्यादीनां विधीयन्त इति केवलानामसम्भवः। तस्मात् सामर्थ्यात् तद्वदुत्तरपदं गृह्यते।।

26. कुमारश्च। (6.2.26)

`कुमारश्रमणा' इति। `प्रातपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (व्या.पा.21) इति कुमारीशब्दोऽत्र समस्यते। एवं हि श्रमणशब्देन स्त्रीलिङ्गेन सामानादिकरण्यमुपपद्यते; नान्यथा। `कुमारशब्दोऽन्तोदात्तः' इति। `कुमार क्रीडायाम्' (धा.पा.1877) इत्यस्मात् पचाद्यचि व्युत्पादितत्वात्। `केचित् पुनः' इत्यादि। कथं पुनर्लक्षणप्रतिपदोक्तपरिभाषायां (व्या.प.3) सत्यामविशेषेणेति लभ्यते? एवं मन्यते--चकारोऽत्र क्रियते। स चास्यैव विधेः समुच्चयार्थः. तेन सर्वत्राविशेषेण भवति। एवं हि समुच्चयो भवति, नान्यथेति। ये तु `कुमारः श्रमणादिभिः' (2.1.70) इत्यत्रैव समासमिच्छन्ति, ते पूर्वविध्यपेक्षया चकारमिह समुच्चयार्थं वर्णयन्ति।।

27. आदिः प्रत्येनसि। (6.2.27)

`प्रतिगत एनसा' इति। अनेन `अवादयः क्रुष्टाद्यर्थे तृतीयया' (वा.92) इति तत्पुरुषत्वं प्रत्येनःशब्दस्य दर्शयति। `प्रतिगतमेनो वा यस्य' इति। अनेन बहुव्रीहित्वम्। `कुमारप्रत्येनाः' इति। `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः।

ननु च नेह सूत्र उदात्तग्रहणमस्ति, तत् कथमुदात्तस्वरो लभ्यते? इत्याह--`उदात्त इत्येतदिह' इत्यादि। किं पुनस्तत्सामर्थ्यम्? इत्याह--`पूर्वपद' इत्यादि। न हि प्रकृतिस्वरादन्य एव स्वर उच्यते। किं तर्हि? प्रकृतिस्वर एव; यतः प्रकृत्येति वर्तते। तत्रैवमभिसम्बन्धः क्रियते--प्रकृतिभावेन कमारशब्दस्य यः स्वरः प्राप्तः स आदेर्भवतीति। एवञ्च सामर्थ्यादुदात्तो लभ्यते। स एव हि कुमारशब्दस्य प्रकृतिभावेन स्वरः।।

28. पूगेष्वन्यतरस्याम्। (6.2.28)

29. इगन्तकालकपालभगालशरावेषु द्विगौ। (6.2.29)

`तद्धितार्थे द्विगोर्यप्' इति। `मासाद्व्यसि' (5.1.81) इत्यनुवर्त्तमाने `द्विगोर्यष्' (5.1.82) इति यप्। `ठञो लुक्' इति। प्राग्वतीयस्य। `पञ्चकपलः' इति। पञ्चसु कपालेषु संस्कृतः पुरोडाश इति `संस्कृतं भक्षाः' (4.2.16) इत्यण, तस्य `द्विगोः' (4.1.88) इत्यादिना लुक्।
`एते समासाः' इति। पञ्चकपाल इत्येवमादयो दशशरावपर्यन्ताः। `कृताष्प्रत्ययलोपा' इति। कृतोऽण्प्रत्ययलोपो येषां ते तथोक्ताः। पञ्चदशशब्दावत्र `ग्रः संख्यायाः' (फि.सू.2.28) इत्युदात्तौ।
`पञ्चाश्वः' इति। तद्धितार्थे समासः। `आर्हादगोपुच्छ' (5.1.19) इत्यादिना ठक्। `अध्यर्धपूर्व' (5.1.28) इत्यादिना लुक्। पञ्च शरावाण्यस्मिन्निति बहुव्रीहिः।
अथेह कथं भवति?--पञ्चारत्न्यो दशारत्न्य इति, यवाता यणादेशे कृते गुणे च नात्रेगन्तमुत्तरपदम्? इत्याह--`पञ्चारत्न्यः' इत्यादि। यद् यण्गुणौ ह्यजादौ विभक्तौ परत इति ताविह बहिरङ्गौ, स्वरस्त्वन्तरङ्ग; प्राग्विभक्त्युत्पत्तेर्भावात्, `असिद्धं बहिरङ्गमन्तरङ्गे' (व्य.प.42)। तेन पञ्चारत्न्य इत्यत्रापि द्विगुस्वर इगन्तलक्षणः प्रवर्त्तते। `स्थानिवद्भावाद्वा' इति। `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति पूर्वस्वरे कर्त्तव्यो यो गुणः स्थानिवद्भावेनेगन्तलक्षणः प्रवर्तते। ननु च स्वरविधौ `न पदन्त' (1.1.58) इत्यादिना स्थानिवद्भावः प्रतिषिध्यते? नैतदस्ति; `स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत्' इत्युक्तत्वात् (का.1.1.58) न चैवमिको यण्गुणौ लोपाजादेशौ। `पञ्चारत्न्यः' इति। अरत्निशब्दोऽत्र `कृदिकारादक्तिनः' (ग.सू.50) `सर्वतोऽक्तिन्नर्थादित्येके' (ग.सू.51) इति बह्वादिषु पाठान्ङीषन्तः। इहापि पूर्ववत् तद्धितार्थे द्विगुः, मात्रचस्तु लोपः।।

30. बह्वन्यतरस्याम्। (6.2.30)

पूर्वोणेगन्तादिषूत्तरपदेषु बहुशब्दस्यापि नित्यं प्रकृतिस्वरे प्राप्ते विकल्पोऽयमुच्यते। `बहुरत्निः' इति। पूर्ववत् समासादि। `बहुमास्यः' इति। पूर्ववद्यप्। बहुकपालादयः समासाः, इहपि `संस्कृतं भक्षाः' (4.2.16) इत्यत्रापि तद्धितार्थे कृतेऽण्प्रत्ययलोपा द्रष्टव्याः। `बहुशब्दोऽन्तोदात्तः' इति। स हि `कुर्भ्रश्च' (द.उ.1.107) इत्यनुवर्त्तमाने `बहि महि वृद्धौ' (धा.पा.633,634) इत्यस्मात्। `लन्घिर्ब्रह्योर्नलोपश्च' (द.उ.1.114) इति कुप्रत्ययं विधाय व्युत्पाद्यते, तेन प्रत्ययस्वरेणान्तोदात्तः। `यत्र यणादेशः' इति। बह्वरत्निरित्यत्र।।

31. दिष्टिवितस्त्योश्च। (6.2.31)

अबह्वर्थोऽयमारम्भः. `पञ्चदिष्टिः' इति। पञ्चारत्निरित्यनेन तुल्यम्।।

32. सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्। (6.2.32)

`साङ्काश्यसिद्धः' इति। `सिद्धशुष्कपक्वबन्धैश्च' (2.1.41) इति समासः। `साङ्काश्यकाम्पिल्यशब्दौण्यप्रत्ययान्तत्वात्' इति। `वुच्छण्' (4.2.80) इत्यादिना सङ्काशादिलक्षणं चातुरार्थिकप्रत्ययं विधाय व्युत्पादितत्वात्।
`ऊकशब्दः' इत्यादि। `कृदाधारार्चिकलिभ्यः कः (द.उ.3.18) इत्यधिकृत्य `सृदृभूशुषिमुषिभ्य कक्' [कित्--द.उ.मुद्रितः पाठः] (द.उ.उ.19) इति कक्प्रत्ययः किद् विधीयमानोऽवतेरपि भवतीति। तनोकशब्दः कक्प्रत्ययान्तः। `ज्वरत्वर' (6.4.20) इत्यादिना वतेरूठ्। `निधनशब्दो निघाञः क्युप्रत्यये मध्योदात्तः' इति। निधनशब्दोऽयं `कृपृवृजिमन्दि निधाञः क्युः' (द.उ.5.26) [`निधाञ्भ्यः' मुद्रितः पाठः--द.उ. सप्तम्येकवचने `इकोऽचि विभक्तौ' (7.1.73) इति नुमं कृत्वा शब्दरूपापेक्षया नपुंसकलिङ्गं वेदितव्यम्। क्युरित्येतस्मिन् शब्दरूपे प्रत्ययसंज्ञकं इत्यर्थः। `कुम्भीकलसीशब्दौ ङीपन्तौ' इति। तेनान्तोदात्ताविति भावः। ङीषन्तता तु `जातेरस्त्रीविषयात्' (4.1.63) इत्यादिना विहितेन ङीषा वेदितव्यमा। `भ्राष्ट्रशब्दः ष्ट्रन्प्रत्ययान्तः' इति। `ष्ट्रन्' (द.उ.8.79) इति वर्त्तमाने `भ्रस्जिगमिनमिहनिविष्यशां वृद्धिश्च' [`विश्यशां' इति मुद्रितन्यासपाठः]

34. राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु। (6.2.34)

राजन्यवाचीनि यान्यसमस्तानि बहुवचनान्तानि तदवयवको यो द्वन्द्वः स राजन्यबहुवचनद्वन्दव इत्युक्तः। `श्वाफल्कचैत्रकरोधकाः' इति। श्वाफल्काश्च चैत्रकाश्च रोधकाश्चेति द्वन्द्वः। तत्र रोधकशब्दमपेक्ष्य चैत्रकशब्दस्य पूर्वपदत्वम्, चैत्रकशब्दमपेक्ष्य श्वाफल्कशब्दस्य, तयोरपि प्रकृतिभावः। अत एव तयोर्द्वयोरपि स्वरं दर्शयितुमाह--`श्वाफल्कशपब्दश्चैत्रकशब्दश्च' इत्यादि। `शिनिशब्द आद्युदात्तः' इति। स हि--`वीज्याज्वरिभ्योनिः' (द.उ.1.18) इति निप्रत्ययेऽनुवर्तमाने `वहिश्रिश्रुद्रुग्लाहात्वरिभ्यो नित्' (द.उ.1.21) [वहिश्रियुश्रुग्लाहात्वरिभ्यो--द.उ.] इति विधीयमाने शीङोऽपि भवति। बहुलवचनाद् ह्रस्वत्वं च तत एव। तेनाद्युदात्तो भविता नित्स्वरेण। `तदपत्येषु' इति। तस्य शिनेः श्रत्त्रियस्य यान्यपत्यानि तेष्वित्यर्थः। `अभेदेन' इति। उपचरेणेत्यर्थः। `हैमायनाः' इति। `यञिञोश्च' (4.1.101) इति फक्। ननु च राजन्यशब्दोऽयं क्षत्रियजातिवचनः, तथा चोक्तम्--`राज्ञोऽपत्ये जातिग्रहणम्' (वा.392) इति; राजन्यो भवति क्षत्रियश्चेत्' इति। यश्चान्धकवृष्णिषु वर्तते द्वन्द्वः स तु क्षत्रियवाचिनामेव भवति; अन्धकवृष्णीनां क्षत्रियत्वात्। ततश्च द्वैप्यहैमायना इत्युक्तं प्रत्युदाहरणम्। अयमपि हि राजन्यवाचिनामेव द्वन्द्वः; अन्धकवृष्णिषु वर्तमानत्वदित्यत आह--`अन्धकवृष्णयः' इत्यादि। `अन्धकवृष्णिषु' इत्येतावतैव क्षत्रियग्रहणे सिद्धे यद्राजन्यग्रहणं क्रियते, तस्यैतत् प्रयोजनम्--विशिष्टा येऽभिषित्तवंश्यास्तेषां ग्रहणं यथा स्यादित्येवमर्थम्। विद्यया जन्मना वा

प्राणिनामेकलक्षणः सन्तानः=वंशः, इह तु जन्मना य एकलक्षणः सोऽभिप्रेतः, तत्र भवो वंश्यः, दिगादित्वात् (4.3.54)। यत्। तत्रैतत् स्यात्। द्वैप्यहैमायना अप्यभिषिक्तवंश्य एव क्षत्त्रियाः? इत्यत आह--`एते च' इत्यादि।

`सङ्कर्षणवासुदेवौ' इति। सङ्कर्षणश्च वासुदेवश्चेत्येकवचनान्तयोरयं द्वन्द्वः। `वृष्णिकुमाराः' इति। तत्पुरुषोऽयम्। `कुरुपाञ्चालाः' इति। अत्र सर्वमस्ति, तथाप्यन्धकवृष्णिग्रहणान्न भवति; तत्रावृत्तेः।।

35. संख्या। (6.2.35)

`एकादश' इति। एकश्च दश चेति द्वन्द्वः। `द्वादश' इति द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः (6.3.47) इत्यात्त्वम्।।

36. आचार्योपसर्जनश्चान्तेवासी। (6.2.36)

आचार्य उपसर्जनं प्रधानं यस्य स ततोक्तः। अन्ते वसतीत्यन्तेवासी। गौणश्चायं निर्देशः। द्वन्द्वस्य यान्यवयवभूतानि तान्याचार्योपसर्जनवाचीनि। तस्मादन्तेवासिवाचित्वाच्चाभिधेय उपचारेण तान्याचार्योपसर्जनान्तेवासिशब्दाभ्यामुच्यन्ते। तदवयवोऽपि द्वन्द्वावयवधर्मेणाचार्योपसर्जनान्तेवासीति चोच्यते।

`आपिशलिराचार्यः' इति। `अत इञ्' (4.1.95)। `आपिशलिरेव वा छात्रा आपिशालाः' इति। पूर्ववदण्। `उभयथा' इत्यादि। उभयप्रकारेणापि व्युत्पत्तावचार्योपसर्जनश्चान्तेवासी भवति। तथा हि--उभयतर शिष्या एव प्रधानभूता एवमुच्यन्ते, आचार्यस्तु तद्विशेषणत्वादुयसर्जनीभूतः। आपिशलशब्दोऽणन्तत्वात् प्रत्ययसवरेणान्तोदात्तः। पाणिनिना प्रोक्तमिति `वृद्धाच्छः' (4.2.114) `तदधीते' (4.2.59) इत्यण्, तस्य लुक्। पाणिनीयशब्दः प्रत्ययस्वरेण मध्योदात्तः।

`पाणिनीयरौढीयाः' इति। रोढस्यापत्यं रौढिः, `अत इञ्' (4.1.95) रौढेराचार्यस्य च्छात्रा इति `इञश्च' (4.2.112) इत्यणः प्रापतस्य `न द्व्यचः' (4.2.113) इति प्रतिषेधे कृते `वृद्धाच्छः' (4.2.114)। अथ वा--रौढिना प्रोक्तं रौढियम्, ततश्च `तदधीते' (4.2.59) इत्यण्, तस्य पूर्ववल्लुक्--रौढीयाः। रौढीयशब्दोऽपि पूर्ववन्मध्योदात्तः। काशकृत्स्नेन प्रोक्तमित्यण् तदधीयते काशकृत्स्नाः, पूर्ववदणो लुक्।

`छान्दसवैयाकरणाः' इति। भवत्ययमन्तेवासिना द्वन्द्वः, न त्वाचार्योपसर्जनः। त्र ह्यन्तेवासिन एव छान्दसवैयाकरणाभ्यामुच्यन्ते, न त्वाचार्योपसर्जनीभूताः। छन्दोऽधीयते च्छान्दसाः, व्याकरणमधीयत इति वैयाकरणाः। तत्र ते च यत आचार्यादधीयते तस्यान्तेवासिनः। `आपिशलपाणिनीये शास्त्रे' इति। आपिशलिना प्रोक्तमापिशलम्। पाणिनिना प्रोक्तं पाणिनीयम्। यत्र शास्त्रे प्राधान्येनोच्येत तत्र प्रत्ययस्य विधानादाचार्यः प्रधानभूतः; तद्विशेषणत्वात्। आचार्यत्वं तस्येह शास्तरापेक्षम्। न ह्याचार्यतान्तेवास्यपेक्षैव भवति, अपि तु शासत्रापेक्षापि।।

37. कार्तकौजपादयश्च। (6.2.37)

`अणन्तावेतौ' इति। तेन प्रत्ययस्वरेणान्तोदात्ताविति भावः। उत्तरत्राप्यणन्तस्यानोदात्तता वेदितव्या।

`सौवर्णिरिञन्तः' [`सावर्णिः--काशिका] इति। ञित्स्वरेणाद्युदात्त इत्यभिप्रायः। एवमुत्तरत्रापीञन्तस्याद्युदात्तत वेदितव्या। माण्डूकेयशब्दः `ढक् च मण्डूकात्' (4.1.119) इति ढगन्तः।

`अवन्तेः' इत्यादि। अवन्तेरपत्यानि बहुनीति `बृद्धेत्कोशलाजादाञ्ञ्यङ्' (4.1.171) इति ञ्यङ्, तस्य `तद्राजस्य' (2.4.62) इत्यादिना लुक्। अवन्तीनां निवासो जनपदः `तस्य निवासः' (4.2.69) इति चातुर्थिकोऽण्। तस्य `जनपदे लुप्' (4.2.81) इति लुप्। `अवन्तयः, तथाश्मकाः' इति। यथावन्तय इति कृतस्तथाश्मका इत्यत्रापि। अत्र क्षत्त्रियवाचिनो जनपदवाचिनश्च शब्दाः। तद्धितेऽपत्येषु यो बहुषत्पद्यते तदन्ताचच निवासे चातुरर्थिकः। तस्य लुप् कृतः। तथाश्मका इत्यत्रापि। एतावन्मात्रमतिदिश्यते। अश्मकस्यापत्यानि बहूनि, `साल्वावयव' (4.1.173) इत्यादिनेञ्, तस्य लुक् पूर्ववत्, तेषां निवासेऽण्, तस्य पूर्ववल्लुप्। अवन्तिशब्दो घृतादित्वादन्तोदात्त इत्येके। चित्स्वरेणेत्यपरे, ते हि `भुवो झिच्' (पं.उ.330) बहुलवचनादवतेरपि झिज्भवतीति वर्णयन्ति।

`युवद्वन्द्वोऽयम्' इति युदसंज्ञकप्रत्ययान्तयोरयं द्वन्द्व इत्यर्थः। `फैलः' इति। `पीलाया वा' (4.1.118) इत्यण्। `श्यायर्णशब्दो बिदादिः' इति तेन ततोऽप्यविवक्षायामञ् भवतीति भवाः। `स्त्री' इति। `शाङ्गर्रवाद्यञो ङीन्' (4.1.73)। `श्यापर्णेयः' इति। `स्त्रीभ्यो ढक्' (4.1.120)।

`बहुचचनमतन्त्रम्' इति। अविवक्षितत्वात्। `तेन' इत्यादिना बहुवचनाविवक्षायाः फलं दर्शयति।

`कपिरन्तोदात्तः' इति। प्रातिपदिकस्वरेण। `तेन' इत्यादि। यस्मात् कपिशब्दोऽयं लुगन्त; तेन बहुवचनमत्राश्रीयत एव। `ऋष्यण्' इति। `ऋष्यन्धक' (4.1.114) इत्यादिना। `यूनि य इञ्' इति। `अत इञ्' (श्र4.1.95) इत्यनेन। `पाञ्चाली' इति। `जनपदशब्दात् क्षत्रियादञ्' (4.1.168) इत्यञ्। तदन्तात् पूर्ववन्ङीप्। `पाञ्चालेयी' [पाञ्चालेयः--काशिका] पूर्ववड्ढक्। एवं `वार्चलयी' इत्यत्रापि। `शाकल्यः' इति। गर्गादित्वात् (4.1.195) यञ्। शाकल्यशब्दो ञित्स्वरेणाद्युदात्तः।

`शणकबाभ्रवाः' इति। शणं करोतीति `कै गै शब्दे' (धा.पा.916,917) इत्यस्माद्धात्तोः `आतोऽनुपसर्गे कः' (3.2.3), तेन प्रत्ययस्वरेण शणकशब्दोऽन्तोदात्तः। `बाभ्रवः' इति। `ओर्गुणः' (6.4.146)।

`आर्चाभिनः' इति। प्रोक्तार्थे णिनिः, तस्मादध्येतर्यण्, तस्य `प्रोक्ताल्लुक्' (4.2.64) इति लुक्। एवमुत्तरत्रापि प्रोक्तप्रत्ययान्तादध्येतृप्रत्ययस्य लुग्वेदितव्यः।

`मुद्गलः कण्वादिः' इति। गर्गाद्यन्तर्गणः। `तदपत्यस्य' इति। मौद्गलाः' इति। मौद्गल्यशब्दात् `कण्वादिभ्यो गोत्र' (4.2.111) इत्यण्, `यस्येति च' (6.4.148) इत्यकारलोपः। `आपत्यस्य च तद्धेतेऽनाति' (6.4.151) इति यकारस्य। आर्चाभिशब्दः प्रत्ययस्वरेणान्तोदात्तः।

`कुन्ते सुराष्ट्रस्य' इत्यादि। `कमु कान्तौ' (धा.पा.443) इत्यस्मात् पूर्ववत् क्तिच्, बहुलवचनादुत्त्वम्। कुन्ति शोभनं राष्ट्रमस्येति सुराष्ट्रः। कुन्तेरपत्यानि बहूनि `वृद्धेत्कोशलाजादञ्ञ्यङ्' (4.1.171); सुराष्ट्रस्यापत्यानि बहूनि, जनपदशब्दादिना (4.1.168) अण्, तयोः `तद्राजस्य' (2.4.62) इत्यादिना बहुषु लुक्। ततः कुन्तीनां निवासो जनपदः `तस्य निवासः' (4.2.69) इति चातुरर्थिकोऽण्, `तस्य जनपदे लुप्' (4.2.81) इति लुप्। कुन्तयश्च सुराष्ट्राश्च कुन्तिसुराष्ट्राः। एवं कुन्तेः सुराष्ट्रस्य चापत्येषु बहुषु तन्निवासे जनपदद्वन्द्वादयं भवति। कुन्तिशब्दाश्चित्स्वरेणान्तोदात्तः। `चिन्तिसुराष्ट्राः' इति। चिन्तिशब्दोऽप्यान्तोदात्त एव। सोऽपि `चिति समृत्याम्' (धा.पा.1535) इत्यस्मात्। क्तिच्प्रत्ययान्तः। केचिदवन्तिकुन्तिशब्दौ `क्तिच्क्तौ च संज्ञायाम्' (3.3.174) इति क्तिच्प्रत्ययान्तौ व्युत्पादयन्ति।

`पचाद्यन्प्रत्ययान्तौ' इति। `तडि हर्षे' (धा.प.280) इत्यस्मात् केवलादवपूर्वाच्च पचाद्यच्। `वष्टि भागुरिरल्लोपमवाप्योरुपसरगयोः' इत्यवशब्दाकारस्य लोपः। `यञो लुक् क्रियते' इति। `यञञोश्च' (2.4.64) इति।

`अविमत्तकामविद्धा' इति। `मदी हर्षे' (धा.पा.1208) इत्यस्माद्विपूर्वान्निष्ठा--विमत्तः, न विमत्तोऽविमत्त इति। `तत्पुरुषे तुल्यार्थ' (6.2.2.) इत्यादिना पूर्वपदसय प्रकृतिभावे कृते नञ्स्वरेणाद्युदात्तः। `बह्वचः' इति। अनेन सूत्रैकदेशेन `बह्वच इञः प्राचयभरतेषु' (2.4.66) इत्येतत् सूत्रमुपलक्षयति।

`शलङ्कु शलङ्कञ्च' इति। नडादिष्वेतत् पठ्यते। अस्यायमर्थः--शलङ्कुशब्दः फकमुत्पादयति शलङ्कादेशञ्चापद्यत इति।

`बाभ्रवदानच्युताः' इति। ब्रभ्रोरपत्यं बाभ्रवः, अणन्तः। दानच्युतशब्दादिञो बह्वचो लुगिति पूर्ववत्। `कठकालपाः' इति। कठशब्दः पचाद्यचि व्युत्पादितत्वादन्तोदात्तः। लोकाक्षस्यापत्यं `लौकाक्षि)' तसय च्छात्रा `लौकाक्षाः'। `स्त्रीकुमाम्' इति। `सत्यायतेर्ड्रट्' (पं.उ.4.165) तदन्तात् `टिड्ढाणञ्' (4.1.15) इति ङीप्, तत्र प्रतद्ययस्वरेणान्तोदात्ताकारस्य `यस्येति च' (6.4.148) इति लोपः, `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इति ङीप उदात्तत्वे कृते स्त्रीशब्दो ह्युदात्तः।

`तस्य च्छात्रा मीदाः' इति। `इञश्च' (4.2.112) इत्यण्। `तथा पैप्पलादाः' इति। पिप्पलावस्यापत्यं पौप्यलादिः, तस्य च्छात्राः पैप्पलादाः। `वत्सजरत्' इति। `वृतॄवदिहनिकमिकषिभ्यः सः' (द.उ.9.21) [वृतॄवदिहिनिकमिकषियुमुचिभ्यः सः--द.उ.] इति वदेः सः, अनेन वतसशब्दोऽन्तोदात्तः, `जीर्यतेरतृन्' (3.2.104)। जरत्, तयोर्द्वन्द्वः। `सौश्रुतपर्थवाः' इति। सुश्रुतस्य छात्राः सौश्रुताः। `पृथोश्छात्राः पार्थवाः' इति। उभयत्र `तस्येदम्' (4.3.120) इत्यण्। `जरामृत्यु' इति। जृषित्येतस्मात् `षिद्भिदादिभ्योऽङ्' (3.3.104) इत्यङ्, जरा, तस्य प्रत्ययस्वरेणान्तोदात्तत्वम्। म्रियतेः `भृजडिमृङ्भ्यां युक्त्युकौ' (द.उ.1.135) इति त्युक्, मृत्युः।।

38. महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु। (6.2.38)

`महच्छब्दोऽन्तोदात्तः' इति। `वर्त्तमाने पृषद्बृहन्महत्' (द.उ.6.5) इत्यन्तोदात्तस्य तस्योणादिषु निपातनात्। अथेह कस्मान्न भवति। महतो व्रीहिर्महद्व्रीहिः? इत्यात आह--`तस्य' इत्यादि। एतच्च लक्षणप्रतिपदोक्तपरिभाषया (व्या.प.3) लभ्यते। अथ किमर्थं प्रवृद्धशब्द इह पठ्यते, यावता निष्ठान्तोऽसौ, तत्र `कर्मधारयेऽनिष्ठा' (6.2.46) इति वक्ष्यमाणेनैव सिदधम्? इत्यत आह--`कर्मधारयेऽनिष्ठ' इत्यादि। तथैव हि परिभाषया `श्रेण्यादयः कृतादिभः' (2.1.59) इति तेन प्रतिपदोक्तेनायं समासः। तत्र `कर्षारयेऽनिष्ठा' (6.2.46) इत्यनेन प्रकृतिबावस्याविधिः। न च महाप्रवृद्ध इत्ययं प्रतिपदोक्तेन निष्ठान्तेन कर्मधारयः; तत्र यदि प्रवृद्धशब्दोऽत्र न पठ्यते, तत्र परतः प्रकृतिभावो न स्यात्। तस्मात् तस्येह पाठः क्रियते। योगश्चायं समासस्वरस्यापवादः।।

39. क्षुल्लकश्च वैश्वदेवे। (6.2.39)

`क्षुधं लातीति क्षुल्लः' इति। `आतोऽनुपसर्गे कः' (3.2.3) इति कप्रत्ययः। `तोर्लि' (8.4.60) इति परसवर्णः।।

40. उष्ट्रः सादिवाम्योः। (6.2.40)

`सर्वधातुभ्यः ष्ट्रन्' (पं.उ.4.158) इत्यस्मात् ष्ट्रन्नितयनुवरतमाने उषिखनिभ्यां कित् (पं.उ.4.161) इत्येवं व्युत्पादितत्वात्।।

41. गौः सादसादिसारथिषु। (6.2.41)

`गोः सादः' इत्यनेन वाक्यशेषेण गोसादशब्दस्य षष्ठीसमासत्वं दर्शयति। `गां सादयतीति च' [वा--काशिका] इति। एतेनाप्युपदसमासत्वम्; सवेर्विशरणार्थत्वात् गोशब्दे कर्मण्युपपदे कृते गोसाद इति भवति। गोशब्दः `गमेर्डोस्' (द.उ.2.11) [गमेर्डोः--पं.उ;द.उ.] इति डोस्प्रत्ययान्तत्वात् प्रत्ययसवरेणान्तोदात्तः।।

42. कुरुगारहपतिरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च। (6.2.42)

अत्र `कुरुगार्हपत' इत्येवमादयः पण्यकम्बलपरयन्ताः समस्ता-। तत्र कुरुगार्हपत--रिषतगुरु--इत्येताववभक्तिकौ। इतरे तु असूतजरतीतयेवमादयः प्रथमैकवचनान्ताः। सा च प्रथमा सुबध्यत्ययेन षष्ठ्याः स्थाने वेदितव्या। `दासीभाराणाम्' इति बहुवचनं गणस्य सूचनार्थम्। अत एवाह--`दासाभारादीनां च' इति। `कुरुशब्दः कुप्रत्ययान्तः' इति। `कुर्भ्रश्च' (द.उ.1.107) इत्यतः `कु' इत्यधिकृत्य `कृग्रोरुचच' (द.उ.1.109) इति कुप्रतययान्तत्वेन व्युत्पादितत्वात्।

`कुरुवृज्योर्गार्हपत इति वक्तव्यम्' इति। कुरुवृजिशब्दयोर्गार्हपतशब्द उत्तरपदे प्रकृतिभावो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--कुरुशब्दस्य तावत् `कुरुगार्हपत' (6.2.42) इति सूतद्र एवोपादानाद्भविष्यति। वृजिशब्दस्यापि चकारस्येहानुक्तसमुच्चयार्थत्वादिति। `वृजिशब्द आद्युदात्तः' इति। वृजेरिन्। `इगुपधात् किच्च' (द.उ.1.48) इत्येवं व्युत्पादितत्वात्।

`रिक्तगुरुः' इति। रिक्तगुरुशब्दस्य समानाधिकरणसमासतां दर्शयति। एवं `असूता जरती' इत्यनेनाप्यस्यासूतजरतीशब्दस्य। `अश्लौला दृढरूपा' इत्यनेनाश्लीलदृढरूपशब्दसाय। न सूतेत्यसूताशब्दोऽपि नञ्स्वरेणाद्युदात्तः। एवमश्लीलाशब्दोऽपि। न श्लीलाऽश्लीला। `सिध्मादेराकृतिगणत्वाल्लच्' इति। `सिध्मादिभ्यश्च' (5.2.97) इति `प्राणिस्थादातो लजन्यतरसयाम्' (5.2.96) इत्यतो लजितयस्यानुवृत्तेः। `कपिलकादित्वाच्च लत्वम्' इति। `कृपो रो लः' (8.2.18) इत्यत्र `कपिलकादीनाञ्चोपसंख्यानम्' (वा.915) इति लत्वस्योपसंख्यानात्। कथं पुनर्ज्ञायते---श्रीर्यस्यास्ति तच्श्लीलशब्देनीच्यते? इत्याह--`अश्लीलदृढरूपा' इत्यादि। न श्लीलमश्लीलमिति अश्लोलशब्दस्यार्थः प्रतिषिध्यते। तत्र यदि श्लीलशब्दस्य श्रीर्यस्यास्ति स इत्यर्थो न स्यादश्लीलदृढरूपेत्यत्र निःश्रीका नोच्येत, उच्यते च, ततो ज्ञायते श्रीमदद्वस्तु श्लीलशब्देनोच्यत इति। `संख्थानमात्रेण शोभना' इति। दृढत्वाच्च संस्थानस्य। श्रीरहितत्वाच्च संस्थानमात्रेण शोभना। मात्रशब्दः श्रीमत्ताया व्यवच्छेदकः। `लावण्यरहिता' इत्यनेन निःश्रीकेत्यस्यार्थं विस्पष्टीकरोति।

`पारे वडवेव पारेवडवा' इति। केन पुनरत्र समासः? न हीवार्थे समासस्य किञ्चिल्लक्षणमस्ति। अथापि कथञ्तित् समासः स्यात्। एवमपि `सुपो धातुप्रातिपदिकयोः' (2.4.71) इति विभक्तिलोपः कस्मान्न भवति? इत्याह--`निपातनादेव' इत्यादि। `तितिलिनोऽपत्यम्' इति एतेनापत्यार्थे तितिलिञ्शब्दात् तद्धितोत्पत्तिमिह दर्शयति। `छात्त्रा वा' [छात्त्रो वा तैतिलः--काशिका] इति। तितिलिन इत्यपेश्रते। एतेनापि `तस्येदम्' (4.3.120) इत्यर्थे तैतिला इति। पूर्ववदुपसंख्यानाट्टिलोपः। `यदन्तत्वात्' इति। `अवद्यपण्य' (3.1.101) इति यदन्तस्य निपातनात्। `आद्युदात्तः' इति। `यतोऽनावः' (6.1.213) इत्यनेन।

`पण्यकम्बलः संज्ञायामिति वक्त्व्यम्' [`संज्ञायां वक्तव्यम्' इति मुद्रितः पाठः] इति। पण्यकम्बलशब्दः संज्ञायां पूर्वपदप्रकृतिसवरो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः, तत्रेदं व्याख्यानम्--`पूगेष्वन्यतरस्याम्' (6.2.28) इत्यतो मण्डूकप्लुतिन्यायेनान्यतरस्यांग्रहणमनुवर्तते, सा च व्यवस्थितविभाषा। संज्ञायामेव पण्यकम्बलशब्दः पूरग्वपदप्रकृतिस्वरो भवति, नान्यत्रेति। `अन्यत्र समासान्तोदात्तत्वमेव' इति। ननु च पण्यशब्दोऽयं कृत्यप्रत्ययान्तः `तत्पुरुषे' (6.2.2) इत्यादिना तवस्मिन् पणितव्ये पूर्वपदस्य प्रकृतिसवरेणैव भवितव्यम्, तत् कथं समासन्तोदात्तत्वम्? इत्याह--`प्रतिपदोक्ते हि' इत्यादि। `कृत्यतुल्याख्या अजात्या' (2.1.68) इति यः कृत्यसमासः प्रतिपदोक्तः तत्र `द्वितीयाकृत्याः' (6.2.2) इति पूर्वपदस्य प्रकृतिभावो विहितः। न चायं प्रतिपदोक्तः समासः। `विशेषणं विशेष्येण (2.1.57) इति समान्येन विहितत्वात्। कुत एतत्? कम्बलशब्दस्य जातिशब्दत्वात्। `द्वितीयाकृत्या' इत्यनेन सूत्रैकदेशेन `तत्पुरुषे तुल्यार्थ' इत्यादिकं सूत्रमुपलक्षयति।

`दासीभारः' इति। दासीशब्दः पूर्वमुक्तस्वर। `देवहूतिः' इति। पचाद्यजन्तत्वादन्तोदात्तः। `ओषशब्दो घञन्तत्वात्' इति। `उष दाहे' (दा.पा.696) इत्यस्य घञि व्युत्पादितत्वात्। `चन्द्रे माङो डित्' [चन्द्रे मो डित्--द.उ.,पं.उ.--`चन्द्रे मोऽसिः'--काशिकामुद्रितः पाठः] (द.उ.9.88) इत्यसिपरत्ययान्तोऽयम्। `मिथुनेऽसिः पूर्ववच्च सर्वम्' (द.उ.9.82) इत्यतोऽसिप्रत्ययस्यानुवृत्तेः। `चन्द्रशब्दस्तु रक्प्रतययान्तत्वात्' इति। `स्फायितञ्चि' (द.उ.8.31) इत्यादिना सूत्रेण रक्प्रत्ययान्तत्वेन व्युत्पादितत्वात्। `स सर्वो दासीभारादिषु द्रष्टव्यः' इति। दासीभारादेराकृतिगणत्वात्।।

43. चतुर्थी तदर्थे। (6.2.43)

`तदर्थे' इति। तस्मै इदम्, चतुर्थ्यन्तम्, तस्य योर्थस्तदर्थ इत्यर्थः। कथं पुनर्यूपशब्द आद्युदात्त? इत्याह--`कुसुयुभ्याञ्च' इत्यादि। `पानीविषिभ्यः पः' (द.उ.7.2) इत्यतः `पः' इत्यनुवर्त्तमाने `कुसुयुभ्याञ्च' (द.उ.7.5) [कुयुभ्याञ्च--मुद्रितः पाठः] इति यूपशब्दः पप्रत्ययान्तो व्युत्पाद्यते। तत्र `सुशृभ्यां निच्च' (पं.उ.3.26) इत्यतो निदिति वर्तते, तेनादयुदात्तो भवति। दीर्घत्वं तु `स्तुवो दीर्घश्च' (पं.उ.3.25) इत्यतो दीर्घग्रहणानुवृत्तेः। `कलप्रत्ययान्तः' इति। `वृषादिभ्यश्चित् (द.उ.8.109) इत्यत्र `कलस्तृपशच' (द.उ.8.107) इत्यतः कलप्रत्ययानुवृत्तेः। `रथशब्द आद्युदात्तः' इति। हनिकुषिनीरमिकाशिभ्यः क्थन्' (द.उ.8.107) इत्यतः कलप्रत्ययानुवृत्तेः। `रथशब्द आद्युदत्तः' इति। `हनिकुषिनीरमिकाशिभ्यः क्थन्' (द.उ.8.107) इत्यतः कलप्रत्ययानुवृत्तेः। `रथशब्द आद्युदात्तः' इति। `हनिकुषिनीरमिकाशिभ्यः क्थन्' (द.उ.6.27) इति कथन्प्रत्ययान्तत्वात्। `वल्लीशब्दो ङीषः स्वरेणान्तोदात्तः' इति। ङीष्प्रत्ययस्तु गौरादित्वात्। (4.1.41) वेदितव्यः। `प्रकृतिविकारभावे' इत्यादि। कथं पुनः सामान्येनोच्यमानः प्रकृतिविकारभावे लभ्यते? पूर्ववदन्यतरस्यांग्रहणानुवृत्तेः। तस्य च व्यवस्थितविभाषात्वाद्वक्ष्यमाणज्ञापकात्।।

44. अर्थे। (6.2.44)
`मातृपितृशब्दावन्तोदात्तौ' इति। `नप्तृनेष्ट्ट' (द.उ.2.3) इत्यादौ तृजन्तयोस्तयोर्निपातितत्वात्। `लित्स्वरेण मध्योदात्तः' इति। `देवात् तल्' (5.4.27) इति तल्प्रत्ययन्तत्वात्। किमर्थं पुनरेतत्, न `चतुर्थी तदर्थे' (6.2.43) इत्येवं सिद्धम्, अर्थशब्दोऽपि तदर्थमेवोत्तरपदं भवति? इत्याह--`तदर्थविशेषा एव' इत्यादि। एवं मन्यते--अर्थशब्दोऽपि वृत्तौ विशेषवाची भवतीति। युक्तञ्चैतत्। तदा मात्रर्थमित्युक्ते मात्रादिभ्यो व्यावृत्तरूपं विशिष्टमेव मात्रर्थं वस्तु प्रतीयते। `अश्वधासः' इत्यादिना ज्ञापकस्य प्रयोजनं दर्शयति।।

45. क्ते च। (6.2.45)
`अश्वशब्द आद्युदात्तः' इति। क्वन्परत्ययान्तत्वत्। `मनुष्यशब्दोऽन्तस्वरितः' इति। `मनोर्धातावञ्यतौ षुक्च' (4.1.161) इति यत्प्रत्ययान्तत्वात्। `परिशिष्टमन्तोदात्तम्' इति। तत् पुनर्गोशब्दः, तापसशब्दश्च। तत्र `गमेर्डोस्' (द.उ.2.11) [गोमर्ड्डोः--द.उ; पं.उ.] इति डोस्प्रत्ययान्तत्वाद्गोशब्दः प्रत्ययस्वरेणान्तोदात्तः। तापसशब्दोऽपयण्प्रत्ययान्तत्वात्। स हि `तपःसहस्राभ्यां विनीनी' (5.2.102) `अण् च' (5.2.103) इत्यण्प्रत्ययान्तो व्युत्पाद्यते। अथ `गोरक्षितम्' इति कथमिदमस्योदाहरणम्, यावता गोभ्यो रक्षिमिति तादर्थ्ये चतुर्थी, तत्र हि योगत उत्तरपदेन भवितवयम्? इत्यत आह--`गोभ्यो रक्षितम्' इत्यादि। न ह्यत्र गवार्थं रक्षित इत्येषोऽर्थो विवक्षितः, किं तर्हि? गोभ्यो रक्षितं दीयते इत्येतदध्याहार्यम्। तस्मात् सम्प्रदान एषा चतुर्थी, तत् कुतस्तादर्थ्यम्!।।

46. कर्मधारयेऽनिष्ठा। (6.2.46)
`श्रेणिकृताः' इत्यादि। `श्रेण्यादयः कृतादिभिः' (2.1.59) इति समासः। `श्रेणिशब्द आद्युदात्तः' इति। नित्स्वरेण। स हि `वीज्याज्वरिभ्यो निः' (द.उ.1.18) इत्यतो निरिति वर्त्तमाने `वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' (द.उ.1.21) [`वहिश्रियुश्रुग्लाहात्वरिभ्यो नित्' द.उ.] इत्येवं व्युत्पाद्यते, तेनाद्युदात्तः। `पूगशब्दोऽन्तोदात्तः' इति। `मुदिग्रोर्गग्गौ' (द.उ.3.66) इति बहुलवचनात् पूञोऽपि गक्। तेन प्रत्ययस्वरेणान्तोदात्तः। `कृताकृतम्' इति। कृतञ्च तदकृतं चेति `क्तेन नञ्विविशिष्टेनानञ्' (2.1.60) इति समासः। एकदेशस्य कृतत्वात् कृतम्, तदैवैकदेशस्याकृतत्वादकृतम्।।

47. अहीने द्वितीया। (6.2.47)
हीनम्=त्यक्तम्, न हीनमहीनम्। `कष्टशब्दोऽन्तोदात्तः' इति। क्तप्रत्ययान्तत्वात् प्रत्ययस्वरेण। `कृच्छ्रगहनयोः कष' (7.2.22) इतीट्प्रतिषेधः। `बहुविरीहिस्वरेणाद्युदात्तः' इति। त्रिशब्दो हि प्रातिपदिकस्वरेणान्तोदात्तः। तत्र `बहुव्रीहौ प्रकृत्या' (6.2.1) इति प्रकृतिस्वरे कृते बहुव्रीहिस्वरेण त्रिशकलशब्द आद्युदात्तः। ग्रामशब्दोऽपि आद्युदात्त एव। तथा ह्यसौ `अर्तिस्तुसुहुसृधुक्षि' (द.उ.7.26) इत्यतो मन्परतययेऽनुवर्तमाने `अवतेष्टिलोपश्च' (द.उ.7.27) `ग्रसतेरा च' (द.उ.7.28) इति मन्प्रत्ययान्तो व्युत्पाद्यते। `कान्तारातीतः' इति। कान्तारमतीतवान्, त्यक्तवानित्यर्थः। कान्तारातीतशब्दोऽत्रि हीनशब्दवची।
`द्वितीयानुपसर्ग इति वक्तव्यम्' इति। द्वितीयान्तमनुपसर्गे क्तन्ते प्रकृतिस्वरं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं त्विहापि तस्यैवान्यतरस्यांग्रहणस्यानुवृत्तिं व्यवस्थितविभाषात्वं चाश्रित्य कर्तव्यम्।।

48. तृतीया कर्मणि। (6.2.48)
`तत्पुरुषे तुल्यार्थ' (6.2.2) इत्येव सिद्धे पूर्वपदप्रकृतिस्वरे च कृत्सवरेण थाथादिस्वरेण (6.2.144) बाधिते तत्प्रतिपादनार्थ वचनम्। `अहिहतः' इति। `कर्त्तृकरणे कृता बहुलम्' (2.1.32) इति समासः। `अहिरन्तोदात्तो व्युत्पादतः' इति। आङ्पूर्वाद्धन्तेः `जनिघसिभ्यामिण्' (द.उ.1.58) इति वर्तमाने `वातेर्डिचच' इति डिदिति च `आङिश्रिहनिभ्यां ह्रस्वश्च' (द.उ.1.66) इत्यनेनाहिरिणन्तो व्युत्पादितः। `केचिदादयुदात्तमिच्छन्ति' इति। ते `समाने ख्यः स चोदात्तः' (पं.उ.4.136) इत्युदात्तग्रहणमप्यनुवर्तयन्ति। `रक्प्रत्ययान्तः' इति। `स्फायितञ्चि' (द.उ.8.31) इत्यादिना रक्प्रत्ययान्तत्वेन व्युत्पादितत्वात्। `महाराजष्टच्प्रत्ययान्तः' इति। `स्फायितञ्चि' (द.उ.8.31) इत्यादिना रक्प्रत्ययान्तत्वेन व्युत्वादितत्वात्। `महाराजष्टच्परत्ययान्तः' इति। `राजाहःसखिभ्यष्टच्' (5.4.91) इति टच्प्रत्ययान्तत्वात्। `दात्रलूना' इति। `धः कर्मणि ष्ट्रन्' (3.2.181) इत्यनुवर्त्तमाने `दाम्नीशस्' (3.2.182) इत्यादिना ष्ट्रन् प्रत्ययान्तो दात्रशब्दो व्युत्पाद्यते, तेनाद्युदात्तः। सर्वत्र `तयोरेव कृत्यतखलार्थाः' (3.4.70) इति कर्मणि क्तः।।

49. गतिरनन्तरः। (6.2.49)
`प्रकृतः' इति। कुगतिप्रादयः' (2.2.18) इति समासः। प्रादयोऽबिवर्जिता आद्युदात्तगणे निपात्यन्ते, तेन प्रशब्द आद्युदात्तः। `अभ्युद्धृतः' इति। अत्र अभिशब्दस्यानन्तरस्य न भवति; अत्रोच्छशब्दस्य क्तान्तेन समासं कृत्वा पश्चादभिशब्दस्योद्धृशब्देन समासः कर्त्तव्यः। अथ वा--`कुगतिप्रादयः' (2.2.18) इत्यत्र सुब्ग्रहणस्य निवर्तितत्वादनेकसर्यापि समासो भवति। `समुदाहृतः' इति। अत्रापि समुदोरन्तरयोर्न भवति। `कारकपूर्वस्य ति' इत्यादि। दूरादागत

इत्यत्राङी गतिसमासे कृते सत्यनेन प्रकृतिस्वरः, तत उदात्तो भवति। ततो दूरादागत इति `स्तोकान्तिक' (2.1.39) इत्यादिना पञ्चमीसमासः, तस्मिन् कृते `गतिकारकोपपदात् कृत्' (6.2.139) इति वर्तमाने `थाथघञ्' (6.2.144) इत्यादिनोततरपदस्यान्तोदत्तत्वं विधीयते। स च गतिस्वरे सति विधीयत इति शिष्टत्वेन स एव भवति। `पञ्चम्याः स्तोकादिभ्यः' (6.3.2) इत्यलुक्।

अथ कथं `समुद्घृतः' इत्यादि प्रत्युदाहरणमुपपद्यते, यावता `कृद्ग्रहणे गतकारकपूर्वस्यापि ग्रहणम्' (व्या.प.126) इति गतिरिह निष्ठाग्रहणेनैव गृह्यते, एवञ्चानन्तर एव समुद्धृत इत्यत्र सम्शब्दः, समुदाहृत इत्यत्रापि समुच्छब्दौ? इत्यत आह--`अनन्तरग्रहणसामर्थ्यात्' इति। अनन्तरगरहणेन ह्येवमर्थः क्रियते--समुद्धृतमित्यादौ मा भूदिति। यदि परिबाषेयमिहश्रीयतेत, तदा हि उद्धृत इत्यादौ गतिरनन्तर एवेति व्यावर्त्याभावादनन्तरग्रहणमपार्थकं स्यात्। `प्रकृतः कटं देवदत्तः' इति। `आदिकर्मणि क्तः कर्त्तरि च' (3.4.71) इति करत्तरि हि क्वप्रत्ययः।।

50. तादौ च निति कृत्यतौ। (6.2.50)

`प्रकर्तुम्' इति। तुमुन्। `प्रकर्तेति तृन्नन्तः' इति। तृजन्ताशङ्कां निराकरोति। `कृत्स्वरबाधनार्थम्' इत्यादि। अव्ययस्वरापवादः `गतिकारकोपपदात् कृत्' (6.2.139) इति कृत्स्वरः प्राप्नोति, अतस्तद्बाधनार्थं वचनम्। `प्रजल्पाकः' इति। `जल्पभिक्ष' (3.2.155) इत्यादिना षाकन्। `तृजन्तः' इति। तृन्नन्ताशङ्कां निराकरोति। अथ निद्ग्रहणं किमर्थम्? प्रकृष्टमृष्टमृत्तिका प्रभृत्तिका इत्यतर मा भूदिति चेत्? नैतदस्ति; तथा हि--यत्क्रयायुक्ताः प्रादयः तं प्रति गत्युपसर्गसंज्ञकाः भवन्ति, (जै.प.वृ.99) मृत्तिकाशब्दश्चायं नामधेयत्वात् क्रियावची न भवति, तेन तं प्रत्युपसर्गसंज्ञा नास्त्येव? इत्यत आह--`कृद्ग्रहणम्' इत्यादि। `कृति' इत्यनेन संज्ञासम्बन्धकालो लक्ष्यते, तेन कृत्संज्ञावेलायां यस्तादिरित्येषोऽर्थः सम्पद्यत इति कृद्ग्रहणमुपदेशे ताद्यर्थं भवति; कृत्संज्ञाप्रतिपत्तिकालस्योपदेशकालत्वात्। तस्मात् पुनरुपदेशे यस्तादिस्तदर्थं यत्नः क्रियत इत्याह--`इह' इत्यादि। यदि तदुपदेशग्रहणं ताद्यर्थ न क्रियेत, तदा प्रलपितेत्यत्र न स्यात्; इटा तादिताया विहतत्वात्। यस्मिंश्च सतद्युपदेश एव तादिर्भतीति यद्यप्युत्तरकालं तादिता विहन्यते, तथापि भवत्येव। `आगन्तुः' इति। `सितनिगमिमसि' (द.उ.1.122) इत्यादना तन् प्रत्ययः।।

51. तवै चान्तश्च युगपत्। (6.2.51)

`अन्त उदात्तो भवति' इति। कथं पुनरुदात्तो भवतीत्येषो लभ्यते, नेहोदात्तग्रहणमस्ति? न ह्यत्रापूर्व एव स्वरो विधीयते, किं तर्हि? `तिकारकोपपदत् कृत्' (6.2.139) इति प्रकृतिभावेनादेर्यः स्वरः प्राप्नोति न एव, तत् कथं प्रकृत्येति वर्तते? तत्रैवमभिसम्बन्धः क्रियते--तवापरत्ययान्तस्य यः प्राप्नोति सोऽन्त्यस्य भवतीति। स चोदात्त एवेति समार्थ्यादुदात्तो लभ्यते। युगपद्ग्रहणं पर्यायनिवृत्त्यर्थम्। `अन्वेतवा' [आम्वेतवै--काशिका] इति। अनुपूर्वादेतेः `कृत्यार्थे `तवैकेन्केन्यत्वनः' (3.4.14) इति तवैप्रत्ययः, गुणः। `परिपातवा' [परिपातवै--काशिका] इति। परिपूर्वात् विबातेः। `अभिचरितवा' [अभिचरितवै--काशिका] इति। अभिपूर्वाच्चरतेः। `अभिरन्तोदात्तः' इति। प्रातिपदकस्वरेण।

52. अनिगन्तोऽञ्चतौ वप्रत्यये। (6.2.52)

`वप्रत्यये' इति। वकारः प्रत्ययो यस्य स तथोक्तः। `प्राङ्' इत्यादि। प्राञ्चीतीति `ऋत्विक्' (3.2.59) इत्यादिना क्विन्प्रत्ययः, स च वकारमात्र एव; ककारादीनामनुबन्धत्वात्; तेषां चानैकान्तत्वात्। `उगिदचाम्' (7.1.70) इति नुम्, एकवचने हल्ङ्यादि (6.1.68) संयोगान्तलोपौ (8.2.23), `क्विन् प्रत्ययस्य कुः' (8.2.62) इति नकारस्य कुत्वं ङ्कारः। द्विवचनबहुवचनयोस्तु `स्तोश्चुना श्चुः' (8.4.40) इति श्चुत्वं ञकारः। उपसर्गाकारेण सह `अकः सवर्णे दीर्घः' (6.1.101)। `पराङ्' इत्यादि। पराशब्द आद्युदात्तः। तेन `स्वरितो वानुदात्ते पदादौ' [`स्वरिते वाऽनुदातेऽपदादौ' इति मुद्रितः पाठः--न्यासः काशिका, पदमंजरी च] (8.2.6) इत्येष विधिर्न भवति।

`प्रत्यङ्' इति। अत्र प्रतिशब्दस्येगन्तत्वात् परकृतिभावो न भवति। ननु च यणादेशे कृते सोऽप्यनिगन्त एष? स्थानिवद्भावादिगन्तव्यपदेशः कृतेऽपि यणादेशे भविष्यतीत्यदीषः। स्वरविधौ स्थानिवद्भावः प्रतिषिध्यत इति चेत्? नैतदस्ति; `स्वरदीर्घयलोपेषु लोपाजादेशौ न स्थानिवत्, अन्यस्तु स्थानिवदेव' (का.वृ.1.1.58) इत्युक्तमेतत्। `उदञ्चनः' इति। ल्युट्। अत्राप्युत्तरपदप्रकृतिस्वर एव भवति। `चोरनिगन्तोऽञ्चतौ' इत्यादि। चोरित्यनेन `चौ' (6.1.222) इत्यनेन यदन्तोदात्तत्वं विधीयते तदुपलक्षयति। चोरितयस्यावकाशः--दधीचः, यत्र गतिर्न भवति; अनिगन्तसवरस्यावकाशो यत्राञ्चतेरकारनकारौ न लुप्येते--पराङ्, पराञ्चादिति; इहोभयं प्राप्नोति--पराचः पराचेति अनिगन्तः स्वरो वति विप्रतिषेधेन। प्रतिषेधशब्दस्तत्राध्याहार्यः।।

53. न्यधी च। (6.2.53)

इगन्तार्थोऽयमारम्भः। `उदाततसवरितयोः' इत्यादि। निरुदात्तः `उपसर्गाश्चाभिवर्जम्' (फि.सू.4.81) इति, तेन तदकारस्थाने यो यणादेशः स उदात्तयण्। तेन `उदात्तस्वरितयोः' (8.2.4) इत्यादिना ततः परमञ्चतेरकारः स्वरितो भवति। अध्यङित्यादौ तु न भवति; आदेशाद्युदात्तत्वात्, यणादेश उदत्तयण् न भवतीति कृत्वा।।

54. ईषदन्यतरस्याम्।
समासस्वरापवादोऽयं योगः। `ईषत्कडारः' इति। `ईषदकृता' (2.2.7) इति समासः। यदायं प्रकृतिभावो न भवति, तदा समासान्तोदात्तत्वमेव भवति।
`ईषद्भेद इत्येवमादौ कृत्स्वर एव भवति' इति। परत्वादिति भावः। आदिशब्देन ईषत्कर इत्यादीनां ग्रहणम्। `ईषद्दुःसुषु' (3.3.126) इत्यादिना खल्।।

55. हिरण्यपरिमाणं धने। (6.2.55)
हिरण्यपरिमाणं परिमाणवद् हिरण्यमित्यर्थः। इह तु तद्वाचिशब्दरूपं गृह्यते। `द्विसुवर्णधनम्' इति। सुवर्णशब्दो हिरण्यपरिमाणविशेषवाची। द्वे सुवर्णे परिमाणमस्येति `तद्धितार्थ' (2.1.51) इति समासः। `तदस्य परिमाणम्' (5.1.57) इति `प्राग्वतेष्ठञ्' (5.1.18) `अध्यर्धपूर्व' (5.1.28 इत्यादिना लुक्, ततो धनशब्देन सह कर्मधारयः। द्विसुवर्णशब्दः समासस्वरेणान्तोदात्तः। `बहुव्रीहावपि' इत्यादि। यद्वा--द्विसुवर्ण धनं यस्येति बहुव्रीहिः; तदपि परत्वाद्विकल्प एव भवति; न तु `बहुव्रीहौ प्रकृत्या' (6.2.1) इत्येष नित्यो विधिः।
`प्रस्थधनम्' इति। अयमपि कर्मधारयः। बहुव्रीहिर्वा। प्रस्थशब्दो भवति परिमाणं, न तु हिरण्यसय, किं तर्हि? धान्यादेः। `काञ्चनधनम्' इति। यदि परिमाणग्रहणं न क्रियेत, तदा `हिरण्यम्' इत्येतादद्च्यमान इहापि स्यात्; काञ्चनशब्दस्य हिरण्यवाचित्वात्। हिरण्यवाच्यपि परिमाणवाची न भवतीति न भवत्येष प्रसङ्गः। अयमपि समासस्वरापवादो योगः।।

56. प्रथमोऽचिरोपसम्पत्तौ। (6.2.56)
`अचिरोपश्लेषः' इति। अचिरकालसम्बन्ध इत्यर्थ-। अस्यैवार्थ प्रसिद्धतरार्थेन प्रदर्शयतुमाह--`अभिनवत्वम्' इति। `प्रथमवैयाकरणः' इति। प्रथमश्च वैयाकरणश्चेति `पूर्वापर' (2.1.58) इत्यादिना समासः। तत्र यत्तद्वैयाकरणत्वं व्याकरणस्याध्येतृत्वम्। अनेनाचिरकालसम्बन्धोऽध्येतुर्गम्यते। अभिनववैयाकरणादिनाऽचिरकालोपसम्पत्तिमुदाहरणे दर्शयति।
`आद्यो मुख्यो यः सः' इति। अनेनापि प्रत्युदाहरणविषयस्य प्रथमशब्दस्यान्यार्थतां च पक्षेऽचिरोपसम्पत्तेरभावं च। अयमपि समासस्वरापवादो योगः. एवमुत्तरेऽपि।।

57. कतरकतमौ कर्मधारये। (6.2.57)
`किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच्' (5.3.92) `वा बूनां जातिपरिप्रश्ने डतमच्' (5.3.93) इति कतरकतमशब्दौ व्युत्पाद्येते, तेन तौ चित्स्वरेणान्तोदात्तौ। `कतरकठः' इति। `कतरकतमौ जातिपरिप्रश्ने' (2.1.63) इति समानाधिकरणसमासः। एतदर्थमपि कर्मधारयग्रहणं कस्मान्न भवति? इत्याह--`इह तु' इत्यादि। कतरकतमशब्दयोर्हि यः प्रतिपदसमासः स एव लक्षणप्रतिपदोक्तपरिभाषया (व्या.प.3) विज्ञायते। स च कर्मधारय एव। तस्मात् प्रतिपदोक्तत्वादेवैतत्समासस्य कर्मधारयत्वम्। तस्मन्नैतदर्थं कर्मधारयग्रहणमुपपद्यते।।

58. आर्यो ब्राह्मणकुमारयोः। (6.2.58)
`आर्यब्राह्मणः' इति। आर्यश्चासौ ब्राह्मणश्चेति विशेषणसमासः। `आर्यशब्दो ण्यदन्तः' इति। `ऋहलोर्ण्यत्' (3.1.124) इति ण्यति व्युत्पादितत्वात्। `अन्तस्वरितः' इति। तित्स्वरेण। प्रत्युदाहरणे तु समासान्तोदात्तत्वमेव भवति।।

59. राजा च। (6.2.59)
राजब्राह्मणम्' [`राजब्राह्मणः'--काशिका] इति। पूर्ववत् समासः। प्रत्युदाहरणेऽपि पूर्ववत्। राजशब्दः क्वनिन्प्रतययान्तत्वादाद्युदात्तः। `पृथग्योगकरणमुत्तरार्थम्' इति। उत्तरो विधी राजशब्दस्यैव यथा स्यात्। आर्यशब्दस्य मा भूदिति।।

60. षष्ठी प्रत्यनसि। (6.2.60)
`राज्ञ) प्रत्येनाः' इति। `षष्ठ्या आक्रोशे' (6.3.21) इति विभक्तेरलुक्।।

61. क्ते नित्यार्थे। (6.2.61)
नित्यशब्द आभीक्ष्ण्ये, न कूटस्थे। कुत एतत्? क्त इत्युच्यते, क्तश्च धातोर्विधीयते, धातुश्च क्रियावचनः। क्रियापाश्च कौटस्थ्यं नोपपद्यते; क्षणिकत्वात् क्रियायाः। तस्यास्तु पौनःपुन्याद्यपेक्षया युक्तमाभीक्ष्ण्यम्। `कालाः (2.1.28) इति द्वितीयासमासोऽयम्' इति। द्वितीया तु `कालाध्वनोरत्यन्तसंयोगे' (2.3.5) इति। अथ वा--कर्मण्येव। कर्मसंज्ञा तु `कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' (म.भा.1.4.51) इति वचनात्। `नित्यशब्दः' इत्यादि। अनेन `ध्रुव उपसंक्यानम्' (वा.434) इति नेर्नित्यशब्दो व्युत्पाद्यते त्यदन्तः। ततश्च त्यपः पित्त्वेनानुदात्तत्वान्नेश्चोदात्तत्वादाद्युदात्तो भवति। `सततमिति यदा कर्मणि क्तस्तदा थाथादिस्वरेणान्तोदात्तः' इति--अयुक्तोऽयं पाठः। यदा हि कर्मणि क्तस्तदा `गतिरनन्तरः' (6.2.49) इति गतेः प्रकृतिभावे

सत्याद्युदात्तेन सततशब्देन भवितव्यम्। तस्मात् `सततमिति यदा भावे क्तस्तदा थाथादि (6.2.144) स्वरेणान्तोदात्तः' इत्ययं तत्रानवद्यः पाठो वेदितव्यः। तथा हि सततशब्दोऽपि थाथादिस्वरेणान्तोदात्तः (6.2.144)। भावे हीयं निष्ठेति गतिस्वरो न भवतीत्युक्तम्। यदा तु क्रमणि क्तस्तदा तु गतिस्वरेण सततशब्द द्युदात्त एव भवति। `समो वा हिततततयोः' (वपा.6.1.144) इति समो मकारलोपः।
`मुहूर्तप्रहसितः' इति। अत्र थाथादिस्वर (6.2.144) एव भवति प्रहसित इति हसेरकर्मक्तावत् कर्तरि क्तः। समासस्वरे द्वितीयापूर्वपदप्रकृतिसवरेण बाधिते सति थाथादिस्वरः प्राप्नोति। अतस्तदपदादो योगः।।

62. ग्रामः शिल्पिनि। (6.2.62)
सप्तमीनिर्दिष्टग्रहणमनुवर्तते। तेन शिल्पिनीत्यर्थग्रहणम्। ग्राम इति स्वरूपग्रहणमेव।
`ग्रामनापितः' इति। षष्ठीसमासः समासस्वरापवादो योगः। एवमुत्तरोऽपि।।

63. राजा च प्रशंसायाम्। (6.2.63)
`कर्मधारये' इत्यादि। राजनापितः' इति। कर्मधारयोऽयं वा स्यात्, षष्ठीतत्पुरुषो वा? तत्र यदा कर्मधारयस्तदा राजशब्दस्य नापित उपचारेण वृत्तिः। उपचारस्तु राजगुणारोपनिबन्धनः, अतस्तेनैवोत्तरपदस्य प्रशंसा भवति। कथं पुनर्नापितः षष्ठीसमासेन राजनापितशब्देनोच्यते? इत्याह `राजयोग्यतया तस्य' इत्यादि। स हि स्वकर्मणि प्रवीणत्वाद्राजानं प्रति योग्यो भवति। अतोऽपि राजनापित इति षष्ठीसमासेनोच्यते। अत्र पक्षे तस्यैव योग्यतयोत्तरपदस्य प्रशंसा वेदितव्या।।

64. आदिरुदात्तः। (6.2.64)
`अदिः' इत्यादिनाद्यधिकारस्यावधिं दर्शयति। `उदात्तः' इत्यादिनाप्युदात्ताधिकारस्य।।

65. सप्तमीहारिणौ धर्म्येऽहरणे। (6.2.65)
हारीत्यावश्यके णिनिः। सप्तमीत्यनेन साहचर्याद्हारीति स्वरूपग्रहणं न भवति। अत एवाह--`हारिवाचि पर्वपदम्' इति। `धर्म्ये' इत्यत्रापि स्वरूपग्रहणं न भवति; अहरण इति प्रतिषेधात्। अत एवाह--`धर्म्यवाचिनि' इति। `आचारनियतम्' इति। आचारे नियतमिति; ततोऽन्यत्राभावत्. आचारे नियतम्, आचारेण वा नियतमाचारनियतम्। यदाचारवशादवश्यकर्त्तव्यं तदाचारनियतं भवति। कथं पुनराचारनियतं धर्मयमुच्यते? इत्याह--`धर्मो ह्यनुवृत्तः' इत्यादि। अनुवृत्त इति व्यवस्थित इत्यर्थः। `तस्मात्' इति। धर्मादनपेतमिति। अनुगतमित्यर्थः। `तेन' इति। धर्मेण। `प्राप्तम्' इति। लभ्यमित्यर्थः। उभयथाप्यर्थे `नौवयोधर्म' (4.4.91) इत्यादिना यत्। इतिकरणो हिशब्दश्च हेतौ। यस्मादाचारविशेषो धर्म उच्यते, यच्च तस्माद्धर्मादनपेतम्। यद्वा तेन प्राप्यं तद्धर्म्यम्। तेनाचारनियतं धर्म्यमित्युच्यते। `संज्ञायाम्' (2.1.44) इति सप्तमीसगासः' इति। यद्येवम्, विभक्तेर्लुक् प्राप्नोति? इत्यत आह--`कारनाम्नि च' इत्यादि। `याज्ञिकाश्वः' इत्यादौ तु षष्ठीसमासः।
`क्वचित्' इत्यादिना स्तूपेशाण इत्याद्युदाहरणेषु शाणादेर्यस्याचारनियततां दर्शयत् उत्तरपदस्य धर्म्यवाचित्वं दर्शयति--`याज्ञिकादीनामश्वादि' इति। क्वचिदयमाचारे व्यवस्थित इत्यनेन दातव्यमित्यनेन च सम्बन्धः। याज्ञिकादयो हि हारिणः, ते देयमश्वादिकं स्वीकुर्वन्ति।
`स्तम्बेरमः' इति। म्तम्बकर्णयो रमिजपोः' (3.2.13) इत्यच्, उपपदसमासः, `तत्पुरुषे कृति बहुलम्' (6.3.14) इति विभक्तेरलुग्भवति। अत्र स्तम्बेरम इत्यत्र स्तम्ब इत्येत् सप्तम्यन्तम्, न तु रमशब्दो धर्म्यवाची। `कर्मकरवर्द्धितकः' इति। अत्र कर्मकरो हारी भवति, स हि वर्द्धितकं स्वीकरोति। न तु वर्द्धितकशब्दो धर्म्यवाची। न हि क्वचिदयमाचारो व्यवस्थितः कर्मकराय वर्द्धितको दातव्य इति। `वडवाया अयं वाडवः' इति। `तस्येदम्' (4.3.120) इत्यण्। `बीजनिषेकात्' इति। गर्भाधानम्=बीजनिषेकः। अत्र वाडवोऽश्वो हारी स हि हरणं देयं स्वीकरोति। हरणम्=देयं धर्म्यम्। क्वचिदयमाचारो व्यवस्थितः--येनाश्वेन वडवायां गर्भ आधीयते तस्य बीजनिषेकादुत्तरकलं शरीरपुष्ट्यर्थं योग्याशनादिकं दातव्यमिति। तेन हरणशब्दो धर्म्यवाची भवति। तथाप्यहरण इति प्रतिषेधान्न भवति। ततश्च कृत्स्वरे प्राप्ते `अनो भावकर्मवचनः' (6.2.150) इत्युत्तरपदं ल्युडन्तमन्तोदात्तं भवति। ननु च परत्वादेवायं स्वरो भविष्यति, तत् किमहरण इति प्रतिषेधेन? इत्यत आह--`परोऽपि' इत्यादि। तेनेत्यादिना ज्ञापनस्य प्रयोजनं दर्शयति। `वाडवहार्यम्' इति। `ऋहलोर्ण्यत्' (3.1.124) इति हरतेर्ण्यत्--हार्यम्, तत् पुनस्तदेव ग्रहणम्। वाडवस्य हार्यं वाडवहार्यम्। तत्र यदि ज्ञापनार्थमनन्तरोक्तस्यार्थस्य हरणप्रतिषेधो न क्रियेत, तदा परत्वात् `गतिकारकोपपदात् कृत् (6.2.139) इति कृत्स्वरेणोत्तरपदस्यान्तस्वरितत्वं स्यात्। अस्मिंस्तु सत्ययमेव हारिस्वरो भवति। स्तूपेशाण इत्यादौ यत्र सम्पम्यन्तं पूर्वपदं तत्र `समासस्य' (6.1.223) इत्यस्यापवादे `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना पूर्वपदप्रकृतित्वरे प्राप्ते पूर्ववदाद्युदात्तमिदमुच्यते।
पूर्वपदानि च प्रायेणान्तोदात्तानि, तथा हि--`स्टूप समुच्छ्राये' (धा.पा.1672) इत्यस्य चौरादिकस्य पचाद्यचि स्तूपशब्दो व्युत्पाद्यते, तेनाऽसावन्तोदात्तः। सप्तम्या सहैकदेशे विकृतेऽन्तोदात्त एव भवति। `एकादेश उदात्तेनोदात्तः' (8.2.5) इति। `मकि मण्डने' (धा.पा.89) इत्येतस्मात् `उणादयो बहुलम्', (3.3.1) इत्युणादित्वम्, नलोपश्च, तेन मकुटशब्द आद्युदात्तः। `हल विलेखने' (धा.पा.837) इत्येतस्मात् `खनो घ च' (3.3.125) इति

घित्करणेनान्यतोऽदि घो भवतीति ज्ञापितत्वाद्घप्रत्ययः। तेन हलशब्दोऽन्तोदात्तः। `दृ विदारणे' (धा.पा.1493) इत्यस्मात् `शृदृभसोऽदिः' (द.उ.6.42) इति, `दृणातेः षुग् ह्रसवश्च' (द.उ.6.45) इति दृषच्छब्दो व्युत्पाद्यते, तेन सोऽप्यन्तोदात्तः।
`याज्ञिकाश्वः' इत्यादयः षष्ठीसमासाः। तत्र समासस्वरे प्राप्ते हारिवाचिनः पूर्वपवस्याद्युदात्तत्वं यथा स्यादित्येवमर्थमिदम्। अत्र च पूर्वपदानामुत्तरपदानां चासमासावस्थायां यः स्वरः स नाऽऽख्यायते; समासे कृते तस्य प्रयोगसमवायित्वात्। नापि समासे कृते तस्य प्राप्तिरसति। स `प्रकृतिभावेन तस्मिन् प्राप्ते सतीदमारभ्यते' इत्यस्यार्थस्य प्रदर्शनार्थमाख्यायते। अत एव च पूर्वत्रापि नाख्याताः।।

66. युक्ते च। (6.2.66)
युक्तः=समाहितः, कार्ये तत्पर इत्युच्यते। `गोबल्लवः' इति। अधिकारनाम, सोऽस्यास्तीति `वप्रकरणेऽन्येभ्योऽपि दृश्यते (वा.580) इति वप्रत्ययः, गवां बल्लव इति षष्ठीसमासः। अत्रापि समासस्वर एव प्राप्ते पूर्वपदाद्युदात्तत्वं विधीयते। `गोमणिन्दः' इति। मणिं ददातीति `आतोऽनुपसर्गे कः' (3.2.3), `तत्पुरुषे कृति बहुलम्' (6.3.14) इति विभ्क्तेरलुक्, ततो गवां मणिन्द इति षष्ठीसमासः। अत्रापि समासस्वर एव प्राप्तेऽयं विधिः। `गोसंख्यः' इति। गां सञ्चष्ट इति `समि ख्यः' (3.2.7) इति कः, उपपदसमासः `गतिकारकोपपदात्' (6.2.139) इति कृत्स्वरे प्राप्ते पूर्वपदस्योदात्तार्थमिहापि वचनम्! ननु च परत्वात् थाथादिस्वरः (6.2.144) प्राप्नोति, तस्माद्गोबल्लवादौ कथमिदं वचनमिति, युक्तस्वरं कृत्सवर एव बाधेत? एवं तर्हि पूर्वविप्रतिषेधो वक्तव्यः; परशब्दस्येष्टवाचित्वात्।
गोबल्लव इत्येवमादयः समासाः सर्वे युक्तवाचिन इति दर्शयन्नाह--`युक्त इति समाहितः' इत्यादि। अनेन `युज समाधौ' (धा.प.1177) इत्यस्य निष्ठायां युक्त इत्येतद्दर्शयति।।

67. विभाषाऽध्यक्षे। (6.2.67)
अध्यक्षशब्दोऽपि समासे युक्तवाच्येव, तत्र पूर्वेण नित्यमाद्युदात्तत्वे प्राप्ते विभाषेयमारभ्यते। आद्युदात्तत्वेन मुक्ते समासान्तोदात्तत्वमेव भवति। गवामध्यक्ष इति षष्ठीसमासः।।

68. पापं च शिल्पिनि। (6.2.68)
पापमिति स्वरूपग्रहणम्। शिल्पिनीत्यत्रार्थग्रहणम्। अर्थग्रहणं किमर्थम्, ग्रामशिल्पिनीत्यत्र शिल्पिग्रहणादर्थग्रहणं प्रसिद्धम्, अत इहाप्यर्थग्रहणं विज्ञायते? नित्यं समासस्वरे प्राप्ते विकल्पेन पूर्वपदस्याद्युदात्तत्वं विधीयते, तेनमुक्ते समासस्वर एव भवति। अथेह कस्मान्न भवति--पापस्य नापित इति? अत आह--`पापशब्दस्य प्रतिपदोक्तः' इति। `तस्मात् षष्ठी समासे न भवति' इति। प्रतिपदोक्ते हि समासे सति लक्षण प्रतिपदोक्तपरिभाषया (व्या.प.3) तस्यैव ग्रहणं भविष्यति; नान्यस्य।।

69. गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे। (6.2.69)
`गोत्राधिकारादन्यत्र गोत्रग्रहणे लोकिकं गोत्रं गृहते' (का.वृ.4.2.39) इत्युक्तम्। लोके चापत्यमात्रे प्रसिद्धम्, तेनेह तस्यैव ग्रहणम्, न तु पारिभाषिकस्य। अन्तेवासी=शिष्यः। तत्रान्तेवसिग्रहणादर्थग्रहणं प्रसिद्धम्। अत इहाप्यर्थ एव गृह्यते, न स्वरूपम्। माणवब्राह्मणयोः स्वरूपमेव। मनोरयं माणवः, अस्मादेव निपातनाणत्वम्। `अबाधकान्यपि निपातनानि भवन्ति' (पु.प.वृ.99) इति पक्षे मानव इत्यपि भवति। ब्रह्मणोऽयं ब्राह्मणः। यस्तु `अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः' (का.वृ.4.1.161) इति माणवकशब्दो व्युत्पाद्यते, यश्च ब्रह्मणोऽपत्यं ब्राह्मण इत्यर्थे ब्राह्मणशब्दः तयोर्गोत्रग्रहणेनैव सिद्धम्। क्षेपः निन्दा। `जङ्घावात्स्यः' इति। `सुप् सुपा' (2.1.4) इति समासः। कथं पुनरत्र क्षेपः? इत्याह--`यो जङ्घादानम्' इत्यादि। जङ्घादानं किमप्याचारनियतं देयमुच्यते, तद्ददान्यहमित्यतोऽभिप्रायेण वात्स्यः सम्पद्यते। वात्स्योऽहमित्यभ्युपगच्छति यः सः जङ्घावात्स्य इत्येवं निन्द्यते। अवात्स्यस्यापि सतो जङ्घादानं प्रति वात्स्यत्वाभ्युपगमात्। वात्स्यशब्दोऽयं गर्गादिः। `भार्यासौश्रुतः' इति। सुश्रुतोऽपत्यं सौश्रुत इत्यण्, भार्याप्रधानः सौश्रुतो भार्यासौश्रुतः। `समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च' (वा.83) इति समासः। सुश्रुतस्य भार्याप्रधानतयेत्यनेन समानाधिकरणेनात्र समास इति दर्शयति। सुश्रुतोऽपत्यमित्यनेनापि सौश्रुतस्याण्प्रतययान्तत्वम्। `वशाब्राह्मकृतेयः' इति। तेनैवोपसंख्यानेन समासः। अत्रापि वशाप्रधानतया ब्रह्मकृतापत्यस्य क्षेपः।
`कुमारीदीक्षाः' इति। `सुप् सुपा' (2.1.4) इति समासः। एवं `कम्बलचारायणीयाः' इत्यत्रापि। दाक्षिणा प्रोक्तं दाक्षं शास्त्रम्। `इञश्च' (4.2.112) इत्यण्, दाक्षमधीयते तद्वेत्तीति वा पुनरण्, तस्य `प्रोक्ताल्लुक्' (4.2.64) इति लुक्। चरशब्दो नडादिः, चरस्यापत्यं चारायणः, तेन प्रोक्तं चारायणीयम्। `वृद्धाच्छः' (4.2.114), `तदधीते' (4.2.59) इति पूर्ववदण्। पाणिना प्रोक्तं पाणनीयम्, ततः पूर्ववदध्येतर्यण् तस्य च लुक्। `कमार्यादिलाभकामाः' इति। आदिशब्देन कम्बलौदनादीनां ग्रहणम्। अत्रापि `सुप् सुपा' (2.1.4) इति समासः। तेनैवोपसंख्यानेन वा कुमारीलाभकामा दाक्षाः कुमारीदाक्षाः।
`भिक्षामाणवः' इति। पूर्ववत् समासः। भिक्षालाभकामो माणवो भिक्षामाणवः। `दासीब्राह्मणः' इति। दास्याः कामयिता ब्राह्मणो दासीब्राह्मणः। एवं `वृषलीब्राह्मणः' इति। `कर्त्तृकरणे कृता बहुलम्' (2.1.32) इति बहुलवचनादकृतापि समासः। `तृतीया' (2.3.18) इति योगविभागाद्वा।

`दासीश्रोत्रियः' इति। दासीब्राह्मण इत्यनेन तुल्यम्। समासस्वरापवायो योगः।।

70. अङ्गानि मैरेये। (6.2.70)
अङ्गशब्दोऽयं कारणवाची। आरम्भकं यत् तदङ्गमुच्यते। अङ्गानीति बहुवचनं स्वरूपविधिनिरासार्थम्। सुरावर्ज्यं मद्यम्=मैरेयमित्यभिधीयते। `गुडमैरेयः, मधुमैरेयः' इति। ष्ठासमासः। `गुडविकारस्य मैरयस्य गुडोऽङ्गम्' इति। तत्कारणत्वात्। अयमपि समासस्वरापवादो योगः।।

71. भक्तख्यास्तदर्थेषु। (6.2.71)
आख्याग्रहणं स्वरूपविधिनिरासार्थम्। ननु च बहुवचनादेव स्वरूपविधिर्न भविष्यति? नैतदस्ति; बहुवचनं ह्येतदर्थस्यैव बहुत्वमाचक्षीत--बह्वर्थवृत्तिर्यो भक्तशब्द इति। अपि च बहुवचनेन स्वरूपविधौ बाधितेऽन्नादय एव ये भक्तशब्देन समासार्थपर्यायास्ते गृह्येरन्, न तु भकतविशेषवाचिनो भिक्षादयः। आख्याग्रहणे तु स्वरूपविदौ बाधिते बहुवचनेन तद्विशेषाणां ग्रहणं सम्पद्यते। तस्मा इदं तदर्थम्। तच्छब्देन भक्ताख्यानामर्थो निर्दिश्यते। `भिक्षाकंसः' इत्येवमादयः `चतुर्थी तदर्थार्थ' (2.1.36) इति चतुर्थीसमासाः। ननु च प्रकृतिविकृतिग्रहणं तत्र चोद्यते, न चेह प्रकृतिविकारभावः? सत्यमेतत्; इदमेव तु वचनं ज्ञापकम्--भक्ताख्यायां तादर्थ्यमात्रे चतुर्थी समस्यत इति।
`समशनं समाशः' इति। `अशू भोजने' (धा.पा.1523) [अश भोजने--धा.पा] इत्यस्मात् सम्पूर्वाद्भावे घञ्। `क्रियामात्रमुच्यते' इति। मात्रशब्देन भक्तव्यवच्छेदं करोति। `अत्र पूर्वपदमन्तोदात्तम्' इति। भिक्षाशब्दः `गुरोश्च हलः' (3.3.103) इति भिक्षेरप्रत्ययं कृत्वा व्युत्पाद्यते, श्राणाशब्दोऽपि `श्रै पाके' (धा.पा.919) इत्यस्मात् क्तप्रत्ययम्। तेन द्वावपि प्रत्ययस्वरेणान्तोदात्तौ। `बहुव्रीहौ प्रकृत्या' (6.2.1) इति प्रकृतिभावेनान्तोदात्तादेव भवतः। समाससवरापवादो योगः।।

72. गोबिडालासिंहसैन्धवेषूपमाने। (6.2.72)
उपमानशब्दोऽयं गवादिभिः प्रत्येकमभिमसम्बध्यते; अन्यथैकवचनान्तस्य बहुवचनान्तैः समानाधिकरणेन विशेष्यविशेषणभावो न स्यात्। थ वा सुब्व्यत्यये बहुवचनस्यैव स्थान इदमेकवचनं द्रष्टव्यम्। `धान्यगवः' इति। `गोरतद्धितलुकि' (5.4.91) टच समासान्तः। अत्र चित्स्वरे प्राप्ते पूर्वपदस्याद्युदात्ततवं विधीयते। `भिक्षाबिडालः' इत्येवमादौ समासस्वरे। उपमानार्थोऽपि' इत्यादि। योऽयमत्रोदाहरणे उपमानार्थः सम्भवति, स तत्र योजयितव्यः। `यथाप्रसिद्धि च' इति। यस्योपमानस्यार्थस्य च लोके प्रसिद्धिः स तथा योजयितव्यः। तत्र दिङ्मात्रमुपमानार्थयोजनस्य दर्शयितुमाह--गवाकृतिः=गोसंस्थानम्, तया सन्निवेशितं गोर्यत्संस्थानं तेन सन्निवेशितं व्यवस्थापितं धान्यगवशब्देनोच्यते; तुल्याकृतित्वात्। एवमन्यत्रापि यत् किञ्चित् सादृश्यं योज्यम्। यथा गोरचनाविशेषावयवानामेवं यस्य हिरण्यस्य तद्धिरण्यं हिरण्यगवशब्देनोच्यते। यथा बिडाला अल्पप्रमाणास्तथा हि भिक्षा, यथा वा बिडालाः क्वचिद्भवन्ति न सर्वत्र तथा भिक्षापि। एवं श्राणाबिडालयोः सादृश्यमेवञ्जातीयकं योजयितव्यम्। सिंहाकृत्या सन्निविष्टं तृणं तृणसिंहः। यथा सैन्धवं शुक्लमेवं सक्तुः सक्तुसैन्धवः। एवं पानसैन्धवः।।

73. अके जीविकार्थे। (6.2.73)
`अके इति प्रत्ययग्रहणम्। तत्र प्रत्ययग्रहणपरिभाषया (नी.प.वृ.31) तदन्तस्य ग्रहणं विज्ञायत इत्याह--`अकप्रत्ययान्त उत्तरपदे' इति। `जीविकावाचिनि' इति। जीविका=जीवकः तद्वाचिनीत्यर्थः। जीविकाशब्दो ह्यर्शआदेराकृतिगणत्वान्मत्वर्थीयाकारान्तः सूत्र उपात्तः। अत एव वृत्तौ दन्तलेखनादिभिर्येषां जीविका त एवमुच्यन्त इत्याह--`दन्तलेखलः' इति। लिकेर्ण्वुल्, षष्ठीसमासः। षष्ठी पुनः `कर्तृकर्मणोः कृति' (2.3.65) इति कर्मणि। `अवस्करशोधकः' इति। `शुध शौचकर्मणि' (धा.पा.1191) [`शौचे'--धा.पा.] इत्यस्माण्ण्यन्ताण्ण्वुल्। `रमणीयकारकः' इत्यत्रापि करोतेः।
`रमणीयकर्त्ता' इति। पूर्ववत् समासः। अत्र `गतिकारकोपपदात् कृत्' (6.2.139) इति प्रकृतिभावेनोत्तरपदमन्तोदात्तम्। `इक्षुभक्षिकाम्' इत्यादि। `पर्यायर्हणोत्पत्तिषु ण्वच्' (3.3.111) इति भक्षयतेर्ण्वुच्। अत्र `षष्ठी' (2.2.8) इति समासलक्षणेनैव समासः। अत्रापि पूर्ववदुत्तरपदमन्तोदात्तम्। कृत्स्वरापवादो योगः। एवमुत्तरत्रापि योगाः।
`युक्तारोह्यादयश्च' (6.2.81) इत्यतः प्राक् कृत्स्वरापवादो वेदितव्यः।।

74. प्राचां क्रीडायाम्। (6.2.81)
`प्राग्देशवर्त्तिनां या क्रीडा' इति। एतेन प्राग्ग्रहणमिह न विभाषार्थम्, किञ्च क्रियाविशेषणमिति दर्शयति। `उद्दालक्पुष्पभञ्जिका' इत्यादि। उद्यालकपुष्पादिषु कृद्योगे कर्मणि षष्ठी। `जीवपुत्रप्रचायिका' इति। अत्रापि प्रपूर्वाच्छिनोतेः संज्ञायां ण्वुल्। पूर्ववत् समासः। लित्स्वरेणोत्तरपदं मध्योदात्तम्। `तव पुष्पप्रचायिका' इति। `षष्ठी' (2.2.8) इत्यनेनैवात्र समासः। चित्स्वरेरेणोत्तरपदं मद्योदात्तम्।।

75. अणि नियुक्ते। (6.2.75)

`छत्त्रधारः' इति। `कर्मण्यण्' (3.2.1)।..
किमर्थं पुनरिदम्, यावता युक्तोऽभिमतः, तद्वाची न भवति? `नियुक्तोऽधिकृतः' इत्यादि। `युक्ते च' (6.2.66) इत्यनेन हि यः कर्तव्ये युक्तः समाहितः तस्य पूर्वपदस्याद्युदात्तत्वम्, तेनाधिकृतवाचिनि न सिध्यति। तस्मादधिकृतच्छत्त्रादिषु यः सहिनियुक्तोऽभिप्रेतः, स च कस्मिंश्चिच्छत्त्रधारणे तत्परो न भवति तेन च्छत्रधार इत्यादिसमासो यादृशः `युक्ते च' (6.2.66) इत्यत्र युक्तोऽभिमतस्तद्वाची न भवति। `नियुक्तोऽधिकृतः' इत्यनेन `युजिर् योगे' (धा.पा.1444) इत्यस्य निष्ठायां नियुक्त इत्येतद्रूपमिति दर्शयति।
`काण्डलावः' इति। अत्र काण्डलवनक्रियां प्रति कर्तृत्वमात्रं गम्यते, नादिकृतत्वम्। तेनेष स्वरो न भवति।।

76. शिल्पिनि चाकृञः। (6.2.76)
अनियुक्तार्थं वचनम्। `अकृञः' इति। शिल्पिवशेषे प्रतिषेधं वक्ष्यामीत्येवमर्थञ्च। `तन्तुवायः' इति। `वेञ् तन्तुसन्ताने' (धा.पा.1006) इति। तन्तून् वयतीति ह्वावामश्च' (3.2.2) इत्यण्, `आतो युक् चिण्कृतोः' (7.3.33) इति युक्।
`अयस्कारः' ति। `अतः कृकमि' (8.3.46) इत्यादिना विसर्जनीयस्य सकारः। प्रत्युदाहरणेषु कृत्स्वर एव भवति।।

77. संज्ञायां च। (6.2.77)

78. गोतन्तियवं पाले। (6.2.78)
`गोपालः' इति। `पा रक्षणे' (धा.पा.1056), पूर्ववदण्। `अनियुक्तार्थ आरम्भः' इति। नियुक्ते `अणि नियुक्ते' (6.2.75) इत्यनेनैव सिद्धत्वात्। `गोरक्षः' इति। `रक्ष पालने' (धा.पा.658)।।

79.णिनिः। (6.2.79)
`पूष्पहारी' इति हरतेः `व्रते' (3.2.80) `बहुलमाभीक्ष्ण्ये' (3.2.81) इति वा णिनिः।।

80. उपमानं शब्दार्थप्रकृतावेव। (6.2.80)
`शब्दार्थप्रकृतौ' इति। शब्दार्थः प्रकृतिर्यस्मिन्निति बहुव्रीहिः। `उपमानं नियम्यते' ति। यत एवकारस्ततोऽन्यत्रावधारणं भवति। इह च शब्दार्थप्रकृतेरेवकारः, तस्मादुपमाननियमो भवति, अतस्तन्नियम्यते। `उष्ट्रकोशी' इति। `क्रुश आह्वाने' (धा.पा.856) [आह्वाने रोदने च--धा.पा.] इत्यस्मात् `कर्त्तर्युपमाने' (3.2.79) इति णिनिः। णिनिनैव सादृश्यस्योक्तत्वाद्वृत्ताविवशब्दो न प्रयुज्यते। `ध्वाङ्क्षरावी' इति। `रु शब्दे' (धा.पा.1034) पूर्वलक्षणाण्णिनिः। `खरनादी' इति। `णद अव्यक्ते शब्दे' (धा.पा.54)।
`उपमानग्रहणम्' इत्यादि। यद्युपमानग्रहणं न क्रियते, तदा पूर्वस्य योगस्यास्य च विषयविभागो न ज्ञायेत। यदि योगविभागकरणसामर्थ्याद्विषयान्तरम्य कल्प्येत, तथापीष्टो विषयविभागो न ज्ञायेत। उपमानग्रहणे तु सति पूर्वस्य सामान्यं विषयः, अस्य तु विशेष उपमानमिति विषयविभागो निश्चीयेत। तेन विषयविभागार्थमुपमानग्रहणम्।
`वृकवञ्ची' इति। `वञ्चु प्रलम्भने' (धा.पा.1703)। `वृकप्रेक्षी' इति। `ईक्ष दर्शने' (धा.पा.610) प्रपूर्वः। अत्र कृत्स्वर एव भवति। `प्रकृतिरेव' इत्यादि। यदि प्रकृतिग्रहणं न क्रियेत, तदा शब्दार्थात् परो यो णिनिस्तदन्त उत्तरपद इत्येवं विज्ञायेत? ततश्च गर्दभोच्चारी कोकिलाभिव्याहारीत्यस्यापि स्यात्; भवति ह्यत्रापि धातूपसर्गसमुदायाच्छब्दार्थात् परो णिनिः, अतस्तदन्तमुततरपदम्। तस्मादिह मा भूदिति प्रकृतिग्रहणं क्रियते, तेनेह न भवति। प्रकृतिग्रहणे सति यत्रोपसर्गनिरपेक्षा गत्यर्थत्वात्, हरतेश्च हरणार्थत्वात्। यद्वा--योऽत्र शब्दार्थो धातूपसर्गसमुदायः, न तस्माण्णिनेर्विधानम्।
यदि पूर्वेणैव सिद्धे नियमार्थं वचनम्, एवं सिद्धे विधिरारभ्यमाणो नियमाय भवतीत्यनर्थकमेवकारकरणम्? इत्याह--`एवकारकरणम्' इत्यादि। असति ह्येवकार उपमान एव शब्दार्थप्रकृतावित्येवमवधारणं स्यात्, ततश्च शब्दार्थप्रकृतिरेव नियम्येत--शब्दार्थप्रकृतौ यदि भवत्युपमान एव भवति, नानुपमान इति। ततश्चानुपमाने न स्यात्। तस्मादुपमानावधारणं यथा स्यादित्येवमर्थमेवकारः क्रियते। किं कारणम्? इत्याह--`शब्दार्थप्रकृतौ तु' इत्यादि। तुशब्दो हेतौ। तस्मात् शब्दार्थप्रकृतावुपमानमनुपमानं चाद्युदात्तं भवति। तस्मादुपमानावधारणार्थमेवकारकरणम्। उपमाननियमे हि सति शब्दार्थप्रकृतेरनियतत्वात् तत्राविशेषेण सर्वस्याद्युदात्तत्वं लभ्यते। `सिंहविनर्दी' इति। उपमानस्योदाहणम्। `पुष्कलजल्पी' इति। अनुपमानस्य। पुष्कलजल्पीत्यत्र `व्रत्ते' (3.2.80) `बहुलमाभीक्ष्ण्ये' (3.2.81) इति वा णिनिः।।

81. युक्तारोह्यादयश्च। (6.2.81)
`युक्तारोहि' इत्यादिषु यत्र कृदन्तमुत्तरपदं तत्र कृत्स्वरापवादो योगः। अन्येषु तु समासस्वरापवादः। युक्तारोहीत्येवमादिषु आगतप्रहारीत्येवम्पर्यन्तेषु `रुह जन्मनि' (धा.पा.859), [रुह बाजजन्मनि प्रादुर्भावे च--धा.पा.] `युध सम्प्रहारे (धा.पा.1173), `वञ्चु प्रलम्भने' (धा.पा.1703), `टुणदि समृद्धौ'

(धा.पा.67) [टु नदि समृद्धौ--धा.पा.] `हृञ् हरणे' (धा.पा.899) प्रपूर्वः--इत्येभ्यो धातुभ्यो यथायोगं युक्तागतपूर्वभ्यः `सुप्यजातौ णिनिस्ताच्छील्ये' (3.2.78) इति णिनिः। यद्येते णिन्यन्तास्तत् किमर्थमिह पठ्यन्ते यावता `णिनि' (6.2.79) इत्यनेनैव सिद्धम्? इत्यत आह--`णिनीत्यस्यैवोदाहरणार्थं पठ्यन्ते' इति।

`पूर्वोत्तरपद' इत्यादिना केषांचिन्मतेन तेषामिह पाठस्य प्रयोजनान्तरं दर्शयति। पूर्वोत्तरपदयोनिर्यमोऽर्थो येषां ते तथोक्ताः। यत्र युक्तादीन्येव पूर्वपदान्यारोह्यादीन्येव चोत्तरपदानि तत्रैव यथा स्यादिति, इह मा भूत्--ध्वाङ्क्षारोही, वृक्षारोहीति, अत्रान्यत्पूर्वपदम्। युक्ताध्यायीत्यत्रान्यदुत्तरपदम्। `इङ् अध्ययने' (धा.पा.1046) इत्यस्माण्णिनिः। `आगतमतस्या' इति। विशेषणसमासः। `क्षीरहोता' इति। क्षीरस्य होता। अस्मादेव निपातनात् षष्ठीसमासः। याजकादित्वाद्वा (2.2.9) `हु' इत्येतस्मात् तृच्। `भगिनीभर्ता' इति। अयमपि पूर्ववत् षष्ठीसमासः। भृञस्तृच्।

`ग्रामगोधुक्' इति। दुहेः क्विप्, `दादेर्धातोर्घः' (8.2.32)। `एकाचो बशो भष्' (8.2.37) इत्यादिना दकारस्य धकारः, `झलां जशोऽन्ते' (8.2.39) इति घकारस्य गकारः, तस्य `वाऽवसाने' (8.4.56) इति चर्त्वम्--ककारः।

`त्रिरात्रः' इति। तिस्रो रात्रस्यः समाहृताः इति समाहारे द्विगुः। `अहःसर्वैकदेश' (5.4.87) इत्यादिनाऽच् समासान्तः।

`एकशितिपात्' इति। `पादस्य लोपोऽहस्त्यादिभ्यः' (5.4.138) इत्यकारलोपः। ननु चैकशब्दोऽयम् `इष्भीकापाशल्पतिमर्चिभ्यः कन्' (द.उ.3.21) इति कन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः। तत्रैकः शितिः पादोऽस्येति बहुव्रीहिः। तत्र कृते प्रकृतिभावेनैव सिद्धमिहाद्युदात्तत्वम्, ततो नार्थ इहास्य पाठेन? इत्यत आह--`एकः शितिः पादोऽस्य' इति। द्विपदे बहुव्रीहावेषे दोषः स्यात्, न चायं द्विपदः, किं तर्हि? त्रिपदः। अत्र पादशब्द उत्तरपदे परतः `तद्धितार्थोत्तरपद' (2.1.51) इति पूर्वपदयोरेकशितिशब्दस्यान्तोदात्तत्वं प्राप्तमिति `समासस्य' (6.1.223) इत्यनेन। इतिकरणो हेतौ। यस्मात् तस्यान्तोदात्तत्वं प्राप्तं तस्मात् तस्याद्युदात्तत्वं विधीयते। ततो नापार्थक एकशितिपाच्छब्दस्य पाठ इत्यभिप्रायः। कस्मात् पुनस्तस्यान्तोदात्तत्वं प्राप्नोति, बहुव्रीहिस्वरेणैव हि परत्वादन्तोदात्तत्वं बाधित्वा युक्तं भवितुम्? इत्याह--`निमित्तस्वरबलीयस्त्वात्' इति। निमित्तपदं द्विगोस्त्रिपदबहुव्रीहिः। तत्र हि कृते द्विगुत्तरपदे परतः पूर्वपदयोर्भवति। यच्च यस्मिन् सति भवति तत् तस्य निमित्तम्, तस्य निमित्तस्य बहुव्रीहिस्वरो निमित्तस्वरः, तस्माद्बलीयस्त्वं निमित्तस्वरबलीयस्त्वम्। `पञ्चमी' (2.1.37) इति योगविभागात समासः। तदेतदुक्तं भवति--तस्माद्बहुव्रीहिस्वरात् समासान्तोदत्तत्वमस्य बलीयस्त्वम्, तस्मात् तत् प्राप्नोतीति। बलीयस्त्वं तु तस्य सतिशिष्टत्वात्। तद्धि बहुव्रीहोराद्युदात्तत्वे सति भवति। तस्मात् सतिशिष्टस्य बलीयस्त्वमुक्तम्। वक्ष्यमामज्ञापकाद्वा निमित्तस्वरबलीयस्त्वम्।

`एवमपि' इत्यादि। एवमपि त्रिपदे बहुव्रीहौ कल्प्यमानेऽपि। `नार्थ एतेन' इति। एकशितिपाच्छब्देनेह भवति नार्थः। कस्मात्? इत्याह--`इगन्त' इत्यादि। त्रिपदे हि बहुव्रीहावेकशितिशब्दयोरुत्तरपदे यः समासः `संख्यापूर्वो द्विगुः' (2.1.52) इति द्विगुसंज्ञः स इगन्तश्च भवति। ततश्च `इगन्त--द्विगौ' (6.2.29) इत्याद्युदात्तत्वं सिद्धम्, ततो नार्थ एतेन। `एवं तर्हीत्यादिनैकशितिपाच्छब्दपाठस्य ज्ञापकत्वं दर्शयति। किं पुनस्तज्ज्ञापयति? इत्याह--`एतत्' इत्यादि। `तेन' इत्यादिना प्रयोजनं दर्शयति। यद्येषोऽर्थो न ज्ञाप्यते, तेन द्वौ शिति पादावस्येति त्रिपदे बहुव्रीहौ कृते, तत्र चोत्तरपदे परतः पूर्वपदयोर्द्विगौ सति `इगन्त--द्विगौ' (6.2.29) इति पूर्वपदप्रकृतस्वरे कृते तिशब्दो द्विशितिपादित्यत्रोदात्तः स्यात्। अस्मिस्त्वर्ये ज्ञापिते `इगन्त--द्विगौ' (6.2.29) इत्येष स्वरो न भवति। तस्मिंश्चासति समासस्वरेण तिशब्द उदात्तो भवति, निमित्तस्वरबलीयस्त्वं न स्यात्। ततक्च त्रिपदे हि बहुव्रीहौ परत्वात् समासस्वरं बाधित्वा बहुव्रीहिस्वर एव भवति, ततस्तेनैव सिद्धत्वादेकशितिपाच्छब्दस्येह पाठो न क्रियेत, कृतश्च। तस्मात् स एव ज्ञापयति--निमित्तस्वरबलीयस्त्वमिति।।

82. दीर्घकाशतुषभ्राष्ट्रवटं जे। (6.2.82)

कृत्स्वरापवादो योगः। `कृटीजः' इति। कुट्यां जात इति `सप्तम्यां जनेर्डः (3.2.97) इति डप्रत्ययः।।

83. अन्त्यात्पूंर्व बह्वचः। (6.2.83)

अयमपि कृत्स्वरपबादो योगः।

`दग्धजानि' इति। अत्र कृत्स्वर एव भवति।।

84. ग्रामेऽनिवसन्तः। (6.2.84)

`निवसन्तशब्दोऽयमौणादिको गृह्यते। `जृविशिभ्यां झच्' (द.उ.6.17) इति वर्तमाने `तृभूवहिवसिभासिसाधिगतिमण्डिजिनन्दिभ्यश्च' (द.उ.6.19) [तृभृवहिवसिभासिसाधिगाडिमण्डिजिवन्दिभ्यश्च--द.उ.] इति वसेर्निपूर्वाज्झच्। निवसतीति निवसन्तः। केचिच्छन्नन्तस्य वसच्छब्दसय ग्रहणं वर्णयन्ति। `मल्लग्रामः' इति। षष्ठीसमासः। `देवग्रामः' इति। वाटकपरिक्षिप्ते गृहसमुदाये ग्रामशब्दो वर्तते। तस्माद्देवस्वामिक इत्यर्थः। एतेन स्वस्वामिभावसम्बन्धा या साऽत्र षष्ठी समस्यते, न तु क्रियावाससम्बन्धेति दर्शयति; अन्यथा देवशब्दः पूर्वपद निवसन्तवाच्येव स्यादित्यभिप्रायः।

`दाक्ष्यादयो निवसन्ति यस्मिन्' इत्यादिना प्रत्युदाहरणे पूर्वपदस्य निवसन्तवाचित्वं दर्शयति।।

85. घोषादिषु च। (6.2.85)

समाससवरापवादो योगः। एवमुत्तरेऽपि। `न भूताधिकसञ्जीव' (6.2.91) इत्यादेः सूत्राद्ये योगास्त समासस्वरापवादा द्रष्टव्याः। `दाक्षीघोषः'इत्येवमादयः षष्ठीसमासाः। `यानयत्र' इत्यादि। कथं पुनरेतललभ्यते, यावताऽनिवसन्त इति प्रकृतम्? इत्यत आह--`अनिवसन्तः' इति। `अपरे' इत्यादि। तेषां मतेन यान्यत्र निवासनामधेयानि तेषु निवसद्वाचीन्यप्युदात्ता भवन्ति।।

86. छात्त्र्यादयः शालायाम्। (6.2.86)

`यदा शालान्तः' इत्यादि। `विभाषा सेनासुरा' (2.4.25) इत्यादिना शालान्तस्य तत्पुरुषस्य विभाषा नपुंसकत्वमुक्तम्? इह च शालाशब्दस्य स्त्रीलिङ्गस्य ग्रहणम्। तत्र यथा समासो नपुंसकलिङ्गो न भवति तथा `तत्पुरुषे शालायां नपुंसके' (6.2.123) इत्यनेन परत्वादुत्तरपदाद्युदात्तत्वेन भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्। अतस्तन्निरासाय `यदा शालान्तः' इत्यादेर्ग्रन्थस्योपन्यासः। यो नपुंसकलिङ्गः शालान्ततत्पुरुषो न भवति सोऽस्यावकाशः--छात्त्रिशाला, ऐलिशालेति। यस्तु नपुंसकलिङ्गो न छात्त्रादिपूर्वपदस्तत्पुरुषः स `शालायां नपुंसके' (6.2.123) इत्यस्यावकाशः--ब्राह्मणशालम्, क्षत्त्रियशालमिति; इहोभयं प्राप्नोति--छात्त्रिशालमिति, पूर्वविप्रतिषेधेनायमेव स्वरो भवति।।

87. प्रस्थेऽवृद्धमकर्क्यादीनाम्। (6.2.87)

प्रस्थशब्दो यदि व्युत्पाद्यते `घञर्थे कविधानं स्थास्नपाव्यधिहनियुध्यर्थम्' (वा.306) इति, तदा थाथादिस्वरे (6.2.144) प्राप्ते। अथ न व्युत्पाद्यते, तदा समासान्तोदात्तत्वे। `इन्द्रप्रस्थः' इत्यादयः षष्ठीसमासाः।।

88. मालादीनां च। (6.2.88)

89. अमहन्नवं नगरेऽनुदीचाम्। (6.2.89)

`सुह्मनगरम्' इत्यादयोऽपि षष्ठीसमासा एव। किमर्थं प्राचामित्येवं नोच्यते, [नोच्येत--मुद्रितः पाठः] लधु हि प्राचामिति वचनमनुदीचामिति वचनात्? नैवं शक्यम्; मध्यदेशनगरे विराटनगरमित्यत्र न स्यात्। पूर्वपदाद्युदात्तत्वे प्राप्ते प्रतिषेधोऽमुच्यते, न समास एव भवति।।

90. अर्मे चावर्णं द्व्यच्त्र्यच्। (6.2.90)

91. न भूताधिकसञ्जीवमद्राश्मकज्जलम्। (6.2.91)

`मद्राश्मग्रहणम्' इत्यादि। उभयत्रापि द्व्यच् त्र्यजिति च प्राप्तिरस्ति। तस्मात् सङ्घातार्थं विगृहीतार्थञ्च वचनम्। कथं पुनः संघातविगृहीतार्थत्वं लभ्यते? एकाशेषं कृत्वा मद्राश्म इति निर्देशात्। मद्राश्मा च मद्राश्मानौ चेत्येकशेषः। एकशेषे सति मद्रशब्दस्य केवलस्य, मद्रशब्दस्य च सङ्घातस्य प्रतिषेध उपपद्यते।

आद्युदात्तस्य प्रकरणमित्याद्युदात्तप्रकरणम्, प्रकान्तम्। तत्र दिवोदासा दीनां छन्दस्याद्युदात्तो भवतीत्येत दर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानां तु--`युक्ते च' (6.2.66) इत्येवमादौ येऽस्मिन् प्रकरणे चकाराः, तेषामन्यतमस्यानुक्तसमुच्चयार्थतामाश्रित्य कर्त्तव्यम्।।

92. अन्तः। (6.2.92)

93. संर्व गुणकार्त्स्न्ये। (6.2.93)

`गुणकार्त्स्न्ये' इति। गुणकार्त्स्न्य गुणस्य सर्वत्राभावः। `सर्वश्वेतः' इति। `पूर्वकालैक' (2.1.49) इत्यादिना समानाधिकरणसमासः। अत्र समुदायगुणस्य सर्वत्र भावः। न तु तदवयवे तत्र सर्वशब्दो वर्तत इति गुणकार्त्स्न्यस्य वृत्तिर्भवति। `परमश्वेतः' इति। कथं पुनरत्र गुणकार्त्स्न्ये परमशब्दो वर्तते, यावतासौ प्रकर्षवाची, अन्यश्च प्रकर्षः, अन्यच्च गुणकार्त्स्न्यम्? इत्यत आह--`आश्रयव्याप्त्या' इत्यादि। इतिकरणो हेतौ। यस्मादाश्रयव्याप्त्या परमत्वमुत्कर्षे भवति, नान्यथा। एवं हि तस्योत्कर्ष उपपद्यते यदि सर्वमाश्रयं व्याप्नोति। तस्माद्गुणकार्त्स्न्यं इह परमशब्दो वर्तते। `सर्वसौवर्णः, सर्वराजतः' इति। सुवर्णस्य विकारः सौवर्णः, रजतस्य विकारो राजतः--नात्र गुणकार्त्स्न्यम्, किं तर्हि? जातियुक्तस्य विकारवषयं कार्त्स्न्यम्। सर्व हि विकारद्रव्यं प्रकृतिभावेन व्याप्नोतीति द्रव्यकार्त्स्न्यमिह, तत्र च सर्वशब्दो वर्तते। `सर्वेषां श्वेततरः सर्वश्वेतः' इति। अत्र गुणकार्त्स्न्ये। कथं पुनरत्र समासः, यावता `पूरणगणसुहित' (2.2.11) इत्यादिना गुणवचनेन षष्ठीसमासः प्रतिषिद्धः? अथापि कथञ्चित् समासः स्यात्, एवमपि श्वेततरशब्देन समासे कृते सर्वश्वेततरमिति वक्तव्यम्? इत्यत आह--`गुणात् तरेण समासः' इत्यादि। औपसंख्यानिकाविह समासतरलोपाविति दर्शयति। समासस्वरापवादो योगः। एवमुत्तरेऽपि योगाः। `न हास्तिनफलकमार्देयाः' (6.2.101) इत्यतः प्राक् समासस्वरापवादो वेदितव्यः।।

94. संज्ञायां गिरिनिकाययोः। (6.2.94)
`अञ्जनागिरिः' इत्येवमादयः षष्ठीसमासाः। अञ्जनभञ्जनशब्दयोः `वनगिर्योः संज्ञायाम्' (6.3.117) इति दीर्घत्वम्। `शापिण्डिमौण्डिशब्दौ' इञन्तौ। `चिखिल्लिशब्दः' मत्वर्थीयेनिप्रत्ययान्तः।।

95. कुमार्यां वयसि। (6.2.95)
`वृद्धकुमारी' इति। `विशेषणं विशेष्येण' (2.1.57) इति समासः। `जरत्कुमारी' इति। जरती चासौ कुमारी चेति `पूर्वकाल' (2.1.49) इत्यादिना समासः। उभयत्र `पुंवत् कर्मधारय' (6.3.42) इत्यादिना पुंवद्भावः।
ननु च कुमारीशब्दः प्रथमे वयसि वर्तते, तथा हि `वयसि प्रथमे' (4.1.20) इति ङीबत्र विहितः, वृद्धाजरतीशब्दौ चरमे वयसि वर्तते, तत्कथमिह सामानाधिकरण्यम्? इत्यत आह--`कुमारीशब्दः पुंसा सहासम्प्रयोगमात्रं प्रवृत्तिनिमित्तमुपादाय प्रयुक्तः' इति। असम्प्रयोगः=असम्बन्धः। तन्मात्रप्रवृत्तिनिवृत्तिसमुदायावयवः सामान्ये प्रवृत्तः। कुमारीशब्दो यथा वृद्धादिभिः वयोविशेषवचनैर्विशेष्यते तदा तैः समानाधिकरणो भवति। वयोविशेषोऽन्त्यं वयः। कथं पुनर्विशेषवचनं सामान्ये वर्तते? वयोग्रहणसामर्थ्यात्। यदि वृद्धकुमारीशब्दः प्रथमे वयसि वर्तते वयोग्रहणमनर्थकं स्यात्। यतर कुमारीशब्दः प्रयुज्यते प्रथमवयोवाची, तत्र नियोगतो वयो गम्यत एवेति किं वयोग्रहणेन! तस्माद्वयोग्रहणसामर्थ्यात् यथोक्तेन प्रकारेण वयःसामान्ये प्रवर्तते। वयोग्रहणेन हि तस्माद्विशेषादपनीयासौ सामान्यवृत्तिराश्रीयते। `तच्च वय इह गृह्यते' इति। यत्र वर्त्तमानो विशेषवचनैः सह समानाधिकरणो भवति, तच्च वयो गृह्यते। चशब्दादन्यच्च यौवनादीनकुमारत्वमेवेति, न प्रथमवय इत्यर्थः।
`परमकुमारी' इति। अत्र समासात् पूज्यमानता; पूज्यमानत्वं तु दर्शनीयत्वात्। दर्शनीया कन्येत्यर्थः। न ह्यत्र समासो वयोऽभिधानपरः। नापयुत्तरपदं वयःसामान्ये वर्तते।।

96. उदकेऽकेवले। (6.2.96)
`मिश्रम्' इति। द्रव्यान्तरसम्पृक्तमित्यर्थः। `गुडमिश्रम्' इति। शाकपार्थिवादित्वा(वा.83)दुत्तरपदलोपिसमासः।
`शीतोदकम्' इति। विशेषणसमासः। पूर्वपदमत्र गुणोपसर्जनमुदकं ब्रूते। उत्तरपदमपि जात्युपसर्जनम्। तथैव तेनैकमेव वस्तु जातिगुणाब्यामुच्यत इति केवलोदकवाचिसमासः।।

97. द्विगौ क्रतौ। (6.2.97)
`गर्गत्रिरात्रादयः' षष्ठीसमासाः। तिसृणां रात्रीणां समाहारस्त्रिरत्रः। `अहःसर्वैकदेश (5.4.87) इत्यादिनाच् समासान्तः। `अतिरात्रः' इति। रात्रिमतिक्रान्त इति प्रादिसमासः।।

98. सभायां नपुंसके। (6.2.98)
`गोपालसभम्' इत्येवमादयोऽपि षष्ठीसमासाः, `सभाराजाऽमनुष्यपूर्वा' (2.4.23) इति नपुंसकत्वम्। `राजसभा, ब्राह्मणसभा' इत्यत्र `अमनुष्यपूर्वा' इति प्रतिषेधान्नपुंसकता न भवति।
अथेह कस्मान्न भवति--रमणीया सभाऽस्य ब्राह्मणकुलस्य रमणीयसभम्? इत्यत आह--`प्रतिपदोक्तम्' इत्यादि। लक्षणप्रतिपदोक्तपरिभाषया (व्या.प.3) यत् प्रतिपदोक्तं नपुंसकं तदिह गृह्यते। न चेह तथाविधं नपुंसकत्वम्। अत्र तु `अभिधेयवल्लिङ्गवचनानि भवन्ति' (व्या.प.73) इति ब्राह्मणकुलस्याभिधेयसय नपुंसकत्वात्। न तत् प्रतिपदोक्तम्।।

99. पुरे प्राचाम्। (6.2.99)
`ललाटपुरम्' इत्येवमादयः षष्टीसमासाः।।

100. अरिष्टगौडपूर्वे च। (6.2.100)
`अरिष्टपुरम् गौडपुरम्' इति। एतावपि षष्ठीसमासावेव। `पूर्वग्रहणं किम्' इति। एवं मन्यते--अरिष्टगौडयोरिति वक्तव्यम्, एवमप्युच्यमानेऽरिष्टगोडयोः पुरशब्द उत्तरपदेऽन्तोदात्ततवं सिध्यत्येवेति। `इहापि यथा स्यात्' इति। यदि पूर्वग्रहणं न क्रियेत् तदारिष्टं श्रितस्तस्य पुरमरिष्टश्रितपुरमिति। गौडानां भृत्या गौडशब्दौ। पूर्वग्रहणे तु सति बहुव्रीहिर्लभ्यते--अरिष्टगौडौ पूर्वौ यस्मिन् समासे सोऽरिष्टगौडपूर्व इति। तेनारिष्टश्रितपुरम्, गौडभृत्यपुरमित्यत्रापि यदुत्तरपदं तस्याप्यन्तोदात्तत्वं भवत्येव। अत्रापि ह्यरिष्टशब्दो गौडशब्दश्च पूर्वः। पूर्वश्चायमवयववचनः।।

101. न हास्तिनफलकमार्देयाः। (6.2.101)

102. कुसूलकूपकुम्भशालं बिले। (6.2.102)
`कुसूलबिलम्' इत्येवमादयः षष्ठीसमासाः। समासस्वरापवादो योगः। एवमुत्तरेऽपि `बहुव्रीहौ विश्वं संज्ञायाम्' (6.2.106) इत्यतः प्राग्योगाः समासस्वरापवादाः वेदितव्याः।।

103. दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु। (6.2.103)
`पूर्वेषुकामशमी' इति। `दिक्संख्ये संज्ञायाम्' (2.1.50) इति समासः। एवं `अपरेषुकामशमी' इत्यत्रापि। `पूर्वकृष्णमृत्तिका' इति। पूर्वा चासौ कृष्णमृत्तिका चेति `पूर्वापर' (2.1.58) इत्यादिना समासः। एवं `अपरकृष्णमृत्तिका' इत्येवमादावपि। अधिराममधिकृत्य कृतो ग्रन्थ आधिरामम्। `अधिकृत्य कृते ग्रन्थे' (4.3.87) इत्यण्। अथ यता--चानराटे रूपग्रहणं तथा ग्रामादिष्वपि कस्मान्न भवति? अर्थप्रधानत्वान्निर्देशस्य। शब्दप्रधाने हि निर्देशस्य स्वरूपग्रहणं भवतीत्युक्तम्। इह चानराट एव शब्दप्रधानो निर्देश, ग्रामादिष्वर्थप्रधान एव।
अथ शब्दग्रहणं किमर्थम्, न दिगित्येवोच्यते? इत्यत आह--`शब्दग्रहणम्' इत्यादि। असति हि शब्दग्रहणे पूर्वाधिरामम्, पूर्वयायातमित्यत्र न स्यात्। कस्मात्?इह कालवाची पूर्वशब्दः। दिग्वाचिशब्दग्रहणे सति दिक्शब्दमात्रग्रहणं भवति। तस्मात् कालवाचिनोऽपि दिक्शब्दस्य परिग्रहो यथा स्यादित्येवमर्थं शब्दग्रहणम्।।

104. आचार्योपसरजनश्चान्तेवासिनि। (6.2.104)
`आचार्योपसर्जनश्च' इति। सुपां सुर्भवतीति सप्तम्येकवचनस्य स्थाने प्रथमैकवचनम्, एतच्चान्तेवासिविशेषणम्। `आचार्योपसर्जनान्तेवाचिन्युत्तरपदे' इति। आचार्य उपसर्जनम्=अप्रधानं यस्य अन्तेवासिनः स तथोक्तः। आचार्योपसर्जनश्चान्तेवासी चाचार्योपसर्जनान्तेवासी, तं वक्तुं शीलं यसयोत्तरपदस्य तदाचार्योपसर्जनान्तेवासिवाचि। `पूर्वपाणिनीयाः' इति। `पूर्वापर' (2.1.58) इत्यादिना समासः पाणिनेराचार्यस्यान्तेवासिनः पाणिनीयाः, अत्रान्तेवासिनः प्राधान्येनोच्यन्ते प्रत्ययान्तेन; आचार्यस्तु तद्विशेषणत्वादुपसर्जनभावेनेत्याचर्योपसर्जनान्तेवासिवाच्युत्तरपदं भवति। `पूर्वकाशकृत्स्नाः' इति। काशकृत्स्नस्येमे काशकृत्स्नाः, औत्सर्गिकोऽण्।
`पूर्वपाणिनीयं शास्त्रम्' इति। पाणिना प्रोक्तं पाणिनीयम्, अत्राचार्योपसर्जनशास्त्रवाच्युत्तरपदम्, न त्वाचार्योपसर्जनान्तेवासिवाचि।।

105. उत्तरपदवृद्धौ सर्वं च। (6.2.105)
`उत्तरपदवृद्धौ' इति। उत्तरपदाधिकारविहिता वृद्धिरुत्तरपदवृद्धिः, इह तु तद्वदुत्तरपदं गृह्यते। तमेवार्थं दर्शयितुमाह--`उत्तरपदस्योत्येवम्' इत्यादि। कथं पुनरुत्तरपदवृदधावित्युच्यमान एषोऽर्थः शक्यते विज्ञातुम्? तदुच्यते; उत्तरपदं स्वर्यते, स्वरितेनाधिकारो लक्ष्यते, तेनोत्तरपदस्येत्यधिकृत्य या विहिता वृद्धिस्तास्यास्तावद्ग्रहणं विज्ञायते। पूर्वपदस्येदमन्तोदात्तत्वं विधीयते। पूर्वपदं च सम्बन्धिशब्दत्वादुत्तरपदमुपस्थापयति। न च वृद्धिमात्र उत्तरपदमुपपद्यत इति सामर्थ्याद्वृद्धिशब्दसाहचर्यादुत्तरपदं वृद्धिमुपलक्षयति। तेनोत्तरपदाधिकारे वृद्धिमत्युत्तरपद एष स्वरो भवतीति विज्ञायते। `सर्वपाञ्चालकः' इति। `पूर्वकालैक' (2.1.49) इत्यादिना समासः। `पूर्वपाञ्चालकः' इत्यादौ `पूर्वापर' (2.1.58) इत्यादिना।
`जनपदलक्षणो वृञ्प्रत्ययः' इति। `धन्वयोपधाद्वुञ्' (4.2.121) इत्यनुवर्त्तमाने `जनपदतदवध्योश्च' (4.2.124) इत्यतो जनपदग्रहणे च `अवृद्धादपि बहुवचनविषयात्' (4.2.125) इत्यनेन वञ्।
`सुसर्वार्द्धात्' इत्यादि। `सर्वपाञ्चालकः' इति। `सुसर्वर्धाज्जनपदस्य' (7.3.12) इत्युत्तरपदवृद्धिः। `पूर्वपाञ्चालकः' इत्यादौ तु `दिशोऽमद्राणाम्' (7.3.13) इति। एषा चोत्तरपदाधिकारविहिता, तत्र चोत्तरपदस्येत्यनुवृत्तेः।
किं पुनः कारणमुत्तरपदाधिकार उत्तरपदग्रहणेन लक्ष्यत इत्येवं विज्ञायते? इत्याह--`अधिकार लक्षणात्' इत्यादि। यद्युत्तरपदग्रहणेनोत्तरपदाधिकारो लक्ष्येत, तदा वृद्धिमात्रवत्युत्तरपदे वैतद्वुञो ह्यु वात्तत्वं भवतीत्युक्तं स्यात्। तथा च सर्वभासः, सर्वकारक इत्यत्रापि स्यात्। अधिकारलक्षणे तु न भवति, न ह्युदात्तत्वं भवतीत्युक्तं स्यात्। तथा च सर्वभासः, सर्वकारक इत्यत्रापि स्यात्। अधिकारलक्षणे तु न भवति, न ह्युत्तरपदाधिकारविहिता वृद्धिः। `भासृ दीप्तौ' (धा.पा.624) भासत इति भासः, पचाद्यच्। करोतीति कारकः, ण्वुल्, `अचो ञ्णिति' (7.2.115) इति वृद्धिः, सा चोत्तरपदाधिकारविहिता न भवति।।

106. बहुव्रीहौ विश्वं संज्ञायाम्। (6.2.106)
`पूर्वपदकृतिस्वरत्वेनाद्युदात्तत्वं प्राप्तम्' इति। `बहुव्रीहौ प्रकृत्या' (6.2.1)। इत्यादिना विश्वे च ते देवा विश्ववेवा इति विशेषणसमासः, तत्पुरुषोऽयम्। अत्र समासान्तोदात्तत्वमेव भवति। `विश्वदेवः' इति। अत्र पूर्वपदप्रकृतिस्परत्वेनाद्यदात्तत्वमेव भवति। विश्वशब्दसय क्वन्प्रतययन्तस्य नित्स्वरेणाद्युदात्तत्वम्।
`विश्वामित्रः' इति। `बहुवरीहौ विश्वं संज्ञायाम्' (6.2.106) इति पूर्वपदान्तोदात्तस्यावकाशः--विश्वदेवः, विश्वयशा इति। `संज्ञायां मित्त्राजिनयोः' (6.2.165) इत्युत्तरपदान्तोदात्तत्वस्यावकाशः--कुलमित्त्रम्, कुलाजिनमिति; विश्वामित्त्रः, विश्वाजिन इत्यत्रोभयं प्राप्नोति, `संज्ञायां मित्राजिनयो' (6.2.165) इत्येतत्तु भवति विप्रतिषेधेन।।

107. उदराश्वेषुषु। (6.2.107)
वृकस्येवोदरमस्य `वृकोदरः'। दाम उदरे यस्येति `दामोदरः'। हरिरश्वो यस्येति `हर्यश्वः'। यौवनमेव अश्वो यस्य स `यौवनाश्वः'। शोभनो वर्णो येषां ते सुवर्णाः पुङ्खां येषामिषूणां ते सुवर्णपुङ्खाः, सुवर्णपुङ्खा इषवो यस्य सः `सुवर्णपुङ्खेषुः'। महान्त इषवो यस्य स `महेषुः'। `आन्महतः' (6.3.46) इत्यात्त्वम्। अत्र पूर्वपदानाम् `बहुव्रीहौ प्रकृत्या' (6.2.1) इति प्रकृतिभावः। यतर स्वरे प्राप्तेऽयं विधिरारब्धः स आख्यायते। `कृदाधारार्चिकलिभ्यः कः' (पं.उ.3.40) इत्यतः `कः' इत्यानुवर्तमाने `अजिवृरीभ्यो निच्च' (पं.उ.3.38) इत्यतो निद्ग्रहणे `सृवृभूशुषिमुषिभ्यः कक्' (पं.उ.3.41) इति ककपरत्ययान्तो वृकशब्दो व्युत्पाद्यते, तेनायमाद्युदात्तः। एवं दामन्शब्दोऽपि; मनिन्प्रत्ययान्तत्वात्। हृञित्येतस्मात् `सर्वधातुभ्य इन्' (पंउ.4.117) इति हरिशब्द आद्युदात्तः।।

108. क्षेपे। (6.2.108)
`कुण्डोदरः' इति। `शकिशम्योर्नित्' (पं.उ.1.111) इति वर्तमाने `क्वादिभ्य कित् (पं.उ.1.114) इत्यतः किद्ग्रहणे च `कुडि दाहे' (धा.पा.270) इत्येतस्मात् `अमन्ताड्डः' (पं.उ.113) इति डप्रत्यये कुण्डमाद्युदत्तम्। `घटोदरः' इति। घटशब्दोऽयम् `घट चेष्टायाम्' (धा.पा.763) इत्यस्य पचाद्यचि व्युत्पादितत्वादन्तोदात्तः। तस्मात् पूर्वपदप्रकृतिस्वरेणैव सिद्धे सति त्वस्यान्यार्थ आरम्भेऽपवादत्वात् पचाद्यजन्तादनेनैवान्तोदात्तत्वं युक्तमिति मन्यमानो वृत्तिकार एतदप्युदाहरति। `कटुकाश्वः' इति। कटुकोऽस्वो यस्य स कटुकाश्वः। कटुशब्दात् `संज्ञायां कन्' (5.3.87) इति कन् ते न कटुकशब्द आद्युदात्तः। स्पान्दितोऽश्वोऽस्य `स्पन्दिताश्वः'। `स्पदि किञ्चिच्चलने' (धा.पा.14) इत्यस्मात् क्तः। तेन स्यन्दितशब्दः प्रत्ययस्वरेणान्तोदात्तः। अनिघात इषुरस्येति `अनिघातेषुः'। निहन्यतेऽनेनेति निघातः, `हलश्च' (3.3.121) इति घञ्, न निघातोऽनिघातः `तत्पुरेषे तुल्यार्थ' (6.2.2) इत्यादिनाऽव्ययप्रकृतिभावादनिघातशब्द आद्युदात्तः। चलाचल इषुरस्य `चलाचलेषुः'। `चल कम्पने' (धा.पा.832) तस्य पचाद्यचि `चरिचलिपतिवदीनां वा द्वित्वमच्याक्चाभ्यासस्य' (वा.658) इति द्विर्वचनम्, अभ्यासस्यागागमश्च। एतेन चलाचलशब्दोऽन्तोदात्तः।
`अनुदरः' इत्यादि। `उदराश्वेषुषु' (6.2.107) `क्षेषे' (6.2.108) इत्यस्यावकशः--कुण्डीदरः, घटोदर इति, `नञ्सुभ्याम्' (6.2.172) इत्युत्तरपदान्तोदात्तस्यावकाशः--अयवः, सुयव इति; इहोभयं प्राप्नोति--अनुदरः सूदर इति। `नञ्सुभ्याम्' (6.2.172) इत्येतद्भवति विप्रतिषेधेन।।

109. नदी बन्धुनि। (6.2.109)
`बन्धुनि' इति। शब्दरूपापेक्षया नपुंसकलिङ्गनिर्देशः, अन्यथा बन्धुशब्दस्य पुंल्लिङ्गत्वात् `बन्धौ' इति निर्देशं कुर्यात्। `गार्गीबन्धुः, वात्सीबन्धुः' इति। गर्गवत्सशब्दाभ्यां गर्गादित्वात् (4.1.105) यञ् तदन्तात् `यञश्च' (4.1.16) इति ङीप्। गार्गीवात्सीशब्दौ ञित्स्वरेणाद्युदात्तौ।
`ब्रह्मबन्धुः' इति। अत्र प्रकृतिभाव एव भवति पूर्वपदस्य। ब्रह्मशब्दश्चायं `मनिन्' (द.उ.6.73) इत्यनुवर्त्तमाने `बृहेर्नोऽच्च' (द.उ.6.74) इति भनिन्प्रत्ययान्तो व्युत्पाद्यते, तेनाद्युदात्तः। `गार्गीप्रियः' इति। गार्गीशब्दोऽपि प्रकृतिभावेनाद्युदात्त एव भवति।।

110. निष्ठोपसर्गपूर्वमन्यतरस्याम्। (6.2.110)
`प्रक्षालितपादः' इति। `क्षल शौचकर्मणि' (धा.पा.1597) अस्माण्णयन्तात् क्तः। पक्षालितशब्दः `गतिरनन्तरः' (6.2.49) इत्याद्युदात्तः। `प्रधौतमुखम्' इति। `धावु गतिशुद्ध्योः' (धा.पा.601) अस्मात् क्तः। `च्छ्वोः शूडनुनासिके च' (6.4.19) इत्यूठ्, `एत्येधत्यूठ्सु' (6.1.89) इति वृद्धिः।
`यदि मुखशब्दः' इत्यादि। मुखशब्दोऽयं स्वाङ्गवाच्यपि। तत्र यद्ययमिह स्वाङ्गवाची तदानेन पूर्वपदान्तोदात्तत्वमेव। मुक्ते पक्षे `मुखं स्वाङ्गम्' (6.2.167) इत्युत्तरपदाद्युदात्तत्वं भवति। अत्र निष्ठोपसर्गपूर्वमन्यतरस्यांग्रहणानुवृत्तेर्यदाऽन्तोदान्तत्वं भवति तदा `गतिरनन्तरः' (6.2.49) इत्येतत्। तेन स्वाङ्गवाचिनि मुखशब्दे त्रयः स्वरा भवन्ति। अनेन पूर्वपदान्तोदात्तत्वम्, `मुखं स्वाह्गम्' (6.2.167) इत्यनेनोत्तरपदन्तोदात्तत्वम्, `गतिरनन्तरः' (6.2.49) इति प्रकृतिभावात् पूर्वपदस्याद्युदात्तत्वम्। `न चेत्' इत्यादि। यदि मुखशब्दोऽत्र स्वाङ्गावची न भवति तदा `मुखं स्वाङ्गम्' (6.2.167) इत्यस्यायं विषयो न भवतौति `गतिरनन्तरः' (6.2.49) इति विधिना मुक्ते प्रवर्तते। तेन स्वाङ्गवाचिनि मुखशब्दे द्वौ स्वरौ भवतः--पूर्वपदस्याद्युदात्तत्वम्, अन्तोदात्तवञ्च।
`प्रसेचकमुखम्' [प्रसेचकमुखः--काशिका] इति। अत्र पूर्वपदप्रकृतिस्वर एव भवति। प्रसिच्यत इति प्रसेचकः `कृत्यल्युटो बहुलम्' (3.3.113) इति कर्मणि ण्वुल्, `कुगतिप्रादयः' (2.2.18) इति समासः, `तत्पुरुषे तुल्यार्थे' (6.2.2) इत्यादिनाऽव्ययप्रकृतिभावः। तेन प्रसेचकशब्द आद्युदात्त इति। `शुष्कमुखः' इति। `शुषः कः' (8.2.51) इति निष्ठायां कादेशः। प्रत्ययस्वरेण शुष्कशब्दोऽन्तोदात्तः। बहुव्रीबौ प्रकृतिभावेन नित्यमेवान्तोदात्तो भवति।।

111. उत्तरपदादिः। (6.2.111)

112. कर्णौ वर्णलक्षणात्। (6.2.112)

वर्णम्=शुकलादि, लक्ष्यतेऽनेनेति लक्षणम्=चिह्नम्, वर्णञ्च लक्षणञ्च वर्णलक्षणम्। द्वन्द्व एकवद्भावः। अर्थग्रहणं चेह वर्णलक्षणयोः; अर्थप्रधानत्वान्निर्देशस्य। `श्वेतकर्णः कृष्णकर्णः' इति। श्वेतकृष्णशब्दावन्तोदात्तौ। तथा हि--`शिता वर्णे' (धा.पा.742) इत्यस्मात् पचाद्यचि श्वेतशब्दो व्युत्पाद्यते। कृष्मशब्दोऽपि `इण्सिञ्चिदीङ्युष्यविभ्यो नक्' (द.उ.5.35) [इण्सिञ्दीङुष्वविभ्यो नक्--द.उ.] इत्यनुवर्तमाने `कृषेर्वर्णे' (द.उ.5.37) इति नक्प्रत्यये। `दात्राकर्णः' इति। `धः कर्मणि ष्ट्रन्' (3.2.181) इति वर्तमाने `दाम्नीशस्' (3.2.182) इत्यादिना ष्ट्रन्प्रत्ययः, तेन दात्रशब्द आद्युदात्तः। `शङ्कूकर्णः इति। `कृग्रोरुच्च' (द.उ.1.109) [कृग्रोरुच्च--द.उ.] इत्यनुवर्तमाने `खरुशङ्कुपीयुनीलङ्गुलिगु (द.उ.1.120) इति कुप्रत्ययान्तः शङ्कुशब्दोऽन्तोदात्तो निपात्यते। `धापृवस्यज्यतिभ्यो नः' (द.उ.5.39) इत्यधिकृत्य `कृवृच्छसिद्रूपन्यनिस्वपिभ्यो नित्' (द.उ.5.42) [कृवृजृसिद्रुपन्यनिस्वपिभ्यो नित्--द.उ] इति कर्णशब्दो व्युत्पाद्यते, भिन्नच्छिन्नद्रस्रुवस्वस्तिकस्य' (6.3.115) इति सूत्रमुपलक्षयति।

`श्वेतपादः' इत्यादि। पूर्वपदस्य प्रकृतिस्वर एव भवति।

अथेह कस्मान्न भवति--स्थूलकर्ण इति, स्थूलेनापि हि कर्णेन लक्ष्यत एव ततश्च लक्षणादित्येव सिद्धम्? इत्यत आह--`पशूनां विभागज्ञापनार्थम्' इत्यादि। तेन स्थूलकर्ण इत्यत्र न भवतीति भावः। कथं पुनः सामान्येनोक्तौ विशेषसय ग्रहणं लभ्यते? वर्णग्रहणाज्ज्ञापकात्। यदि लक्षणमात्रस्येह ग्रहणभिमतं स्याद्वर्णग्रहणं न क्रियेत, वर्णो हि लक्षणं भवत्येव। तेनापि लक्ष्यत इति कृत्वा, कृतश्च। तस्मात् तदेव ज्ञापयति--विशिष्टमिह लक्षणं गुह्यत इति। यत् पुनर्विशिष्टं व्याख्यानात् तद्विज्ञेयम्।

`श्वेतपादः' इति। `श्विता वर्णे' (धा.पा.742) इत्यस्मातद् पचाद्यचि श्वेतशब्दो व्युत्पाद्यते, तेनान्तोदात्तोऽयम्। `कूटशृङ्गः' इति। `कूट दाहे' (धा.पा.1890) [कूट परितापे (परिदाहे इत्यन्ये) धा.पा.] इति, अस्मादिगुपधलक्षणः (3.1.135) कः, तेन कूटशब्दोऽप्यन्तोदात्त एव। `शोभनकर्णः' इति। `शुभ शुम्भ शोभार्थे' (धा.पा.1321,1322) अस्मात् `अनुदात्तेतश्च हलादेः' (3.2.149) इति युच्। चित्स्वरेण शोभनशब्दोऽप्यन्तोदात्तः। पूर्वपदप्रकृतिस्वरापदादो योगः। एवमुत्तरेऽपि योगाः प्रागव्ययीभावसंशब्दनात्। तेन सर्वत्र प्रत्युदाहरणेषु पूर्वपदप्रकृतिस्वरः प्रत्युदाहार्यः।।

113. संज्ञौपम्ययोश्च। (6.2.113)

`कुञ्चि कर्णः, मणिकर्णः' इति। `कुचि शब्दे तारे' (धा.पा.184) [कुच--धा.पा.] `अण रण वण भण मण' (धा.पा.444.448) इति मणिर्भ्वादौ पठ्यते आभ्याम् `सर्वधातुभ्य इन्' (पं.उ.4.117) `इगुपधात् कित्' (पंउ.4.119) इतीन्प्रत्ययः, किच्च। तेन कुञ्चि। तेन कुञ्चिमणिशब्दावाद्युदात्तौ। `गोकर्णः' इति। गौरिव कर्णोऽस्येति विग्रहः। गोशब्द उक्तस्वरः। `खरकर्णः' इति। खरस्येत्यादि विग्रहः। खमस्यास्तीति `रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम् (वा.577) इति रप्रत्ययः, तेन खरशब्दोऽन्तोदात्तः।।

114. कण्ठपृष्ठग्रीवाजङ्घं च। (6.2.114)

`कणेष्ठः' (पं.उ.1.105) इति ठप्रत्ययान्तत्वात् कण्ठशब्दोऽन्तोदात्तः। `डित्यपृष्ठगूथयूथप्रोथाः' (द.उ.6.37) [तिथ--द.उ; पं.उ.] इति पृष्ठशब्दोऽन्तोदात्तो निपात्यते। `इण्शीभ्यां वन्' (द.उ.8.126) इत्यतो वन्प्रत्ययेऽनुवर्तमाने `शेवयह्वजिह्वाग्रीवाप्वमावाः' (द.उ.8.128) इति ग्रीवाशब्दोऽन्तोदात्तो निपात्यते। अत्यन्तं हनित गच्छतीति हन्तेर्यङ्, द्विर्वचनम्, नुगतोऽनुनासिकान्तस्य' (7.4.85) इति नुक्, `अभ्यासाच्च' (7.3.55) इति कुत्वम्, जङ्घन्य इति स्थिते पचाद्यच् `यङोऽचि च' (2.4.74) इति यङो लुक्; टाप्, चित्स्वरेण जङ्घाशब्दोऽन्तोदात्तः। अथ वा--`हन्तेरच् जङ्घ च' (2.4.74) इति यङो लुक्; टाप्, चित्स्वरेण जङ्घाशब्दोऽन्तोदात्तः। अथ वा--`हन्तेरच् जङ्घ च' (पं.उ.5.31) [`अच् तस्य जङ्घ च--पं.उ.] इति हन्तेरच्प्रत्ययो जङ्घ इत्ययमादेश इत्येवं वा जङ्घशब्दो व्युत्पाद्यते। एषां कण्ठादीनां समाहारे द्वन्द्वः।

`शितिकण्ठः' इति। `सर्वधातुभ्य इन्' (पं.उ.4.117) इति वर्तमानं `क्रमितमिशाडिस्तम्भामत इच्च' (पं.उ.4.121) [शति--पं.उ.] इति शितिशब्द आद्युदात्तः। `नीलकण्ठः' इति। `नील वर्णे' (धा.पा.522), [`नील वर्णे--धा.प.] अस्मात् घञ्, तेन नीलशब्दोऽप्याद्युदात्तः। `खरकण्ठः' इति। खरस्येव कण्ठोऽस्येति विग्रहः। खमस्यास्तीति `रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानात् (वा.577) रप्रत्ययः, तेन खरोऽन्तोदात्तः। `उष्ट्रकण्ठः' इति। उष्ट्रस्येव कण्ठोऽस्येति `ष्ट्रन्' (द.उ.8.79) इति वर्तमाने `उषखनिब्यां कित्' (द.उ.8.82) इति `उष दाहे' (धा.पा.696) इत्यस्मात् ष्ट्रन्, किच्च। तेनोष्ट्रशब्द आद्युदात्तः।

`काण्डपृष्ठः' इति। काण्डं पृष्ठमस्येति काण्डशब्दः `नब्विषयस्यानिसन्तस्य' (फि.सू.2.26) इत्युदात्तः। `नाकपृष्ठम्' इति। नास्याकमस्तीति `न भ्राट्' (6.3.75) इत्यादिना प्रकृतिभावान्नलोपाभावः। `नञ्सुभ्याम्' (6.2.172) इत्युत्तरपदान्तोदात्तविधानान्नाकशब्दोऽन्तोदात्तः `गोपृष्ठम्' इ। गोरिव पृष्ठमस्येति। गोशब्द उक्तस्वरः। `अजपृष्ठम्' इति। अजस्येव पृष्ठमस्येति `अज गतिक्षेपणयोः' (धा.पा.230) अस्मात् पचाद्यच्। अजादिष्वजाशब्दस्य पाठाद्दीभावो न भवति। चित्स्वरेणाजशब्दोऽन्तोदात्तः।

`सुगरीवः' इति। शोभना ग्रीवाऽस्येति `निपाता आद्युदात्ताः' (फि.सू.4.80) इति सुशब्द आद्युदात्तः। `नीलग्रीवः' इति। नीला ग्रीवाऽस्येति `नील वर्णे' (धा.पा.522) [`नील वर्णे--धा.प.] अस्मात् घञ्। तेन नीलशब्द आद्युदात्तः। `दशग्रीवः' इति। दश ग्रीवा अस्येति दशशब्दः `न्रः संख्यायाः' (फि.सू2.28) इत्याद्युदात्तः। `अश्वग्रीवः' इति। अश्वस्येव ग्रीवाऽस्येति। गोशब्दोऽश्वशब्दश्चोक्तस्वरः।

`नारीजङ्घः' इति। नारी जङ्घा यस्येति। शङ्र्गरवादिषु `नृनरयोश्च' (ग.सू.57) इति पठयन्ते, तेनाद्युदात्तः। `तालजङ्घः' इति। तालो जङ्घा यस्येति `तल प्रतिष्ठाकरणे (धा.पा.1598) [प्रतिष्ठायाम्--धा.पा.] चुरादिः, तस्मात् वचाद्यच्। तेन तालशब्दोऽन्तोदात्तः। `गोजङ्घः' इति। एण्या इव जङ्घा यस्येति। एणीशब्दः `जातेरस्त्रीविषयात्' (4.1.63) इति ङीषन्तः। तेनान्तोदात्तः।।

115. शृङ्गमवस्थायां च। (6.2.115)

`उद्गतशृङ्गः' इति। `गन्गम्यद्योः' (पं उ.1.122) इत्यधिकृत्य `भृञः किन्नुट् च' (पं.उ.1.124) इति च `शृणातेर्ह्रस्वश्च' (पं.उ.1.125) इति गन्प्रत्ययान्तः शृङ्गशब्दो व्युत्पाद्यते। तेनायमाद्युदात्तः। उद्गतशब्दस्थाथादि(6.2.144)स्वरेणान्तोदात्तः। `द्व्यङ्गुलशृङ्गः' इति। द्वे अङ्गुली प्रमाणमस्येति तद्धितार्थे द्विगुः `प्रमाणे द्वयसच्' (5.2.37) इत्यादिना विहितस्य मात्रच आगतस्य लोपः। `प्रमाणे लो द्विगोर्नित्यम्' (वा.558,559) इति `तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (5.4.86) इत्यच् समासान्तः। तेन द्व्यङ्गुलशब्दोऽन्तोदात्तः। द्व्यङ्गुलं शृङ्गमस्येति। `त्ऱङ्गुलशृङ्गः' इति। पूर्वेण तुल्यम्। `अत्र' इत्यादि। आदिशब्देन द्व्यङ्गुलाविग्रहणम्। `ऋष्यशृङ्गः' इति। ऋष्यं शृङ्गंयस्येति। `अर्ध्यादयश्च' इत्याद्युदात्त ऋष्यशब्दो निपात्यते। `मेषशृङ्गः' इति। मेषस्येव शृङ्गो यस्येति `मिष स्वर्धायाम्' (धा.पा.1352), अस्मात् पचाद्यच्। तेन मेषशब्दोऽन्तोदात्तः।
`स्थूलशृङ्गः' इति। स्थूलशब्दः प्रातिपदिकस्वरेणान्तोदात्तः।।

116. नञो जरमरमित्त्रमृताः। (6.2.116)

`अजरः' इति। जरणं जरः `ऋदोरप्' (3.3.57)। तेनायं धातुस्वरेणाद्युदात्तः। अविद्यमानो जरोऽस्येति। `अमरः' इति। मरणं मरः, `कृत्यल्युटो बहुलम्' (3.3.113) इत्यप्। तेनायमपि पूर्ववदाद्युदात्तः। `अमित्त्रः' इति। `अमिचिमिदिशसिभ्यः क्त्रः' (द.उ.8.86) इदि मिदेः क्त्रः। तेन मित्त्रशब्दोऽन्तोदात्तः। `अमृतः' इति। `मृङ् प्राणत्यागे' (धा.पा.1403) मरणम्=मृतम्। `नपुंसके भावे क्तः' (3.3.114)। तेन मृतशब्दोऽन्तोदात्तः।
`ब्राह्मणमित्त्रः' इति। ब्राह्मणशब्दोऽणन्तत्वादन्तोदात्तः। अत्र पूर्वपदप्रकृतिस्वर एव भवति। `अशत्रुः' इति। `रुशातिभ्यां (द.उ.1.159) इति क्रुन्नन्तः शत्रुशब्द आद्युदात्तः। `नञ्सुभ्याम्' (6.2.172) इत्युत्तरपदान्तोदात्ततवापवादो योगः। एवमुत्तरेऽपि योगः प्राक् `कूलतीरतूल' (6.2.121) इत्यतः द्रष्टव्याः।।

117. सोर्मनसी अलोमोषसी। (6.2.117)

`सुकर्मा' इति। `कृदृचरिभ्यो मनिन्' (द.उ.6.73) [`मनिन्' इत्येव द.उ.पाठः; `सर्वधातुभ्यो मनिन्' इति.पं.उ.पाठ--4.144] `सर्वनामस्थाने च' (6.4.8) इति दीर्घः। `सुप्रथिमा' इति। पृथोर्भावः प्रथिमा, `पृथ्वादिभ्यः' (5.1.122) इतीमनिच्। `र ऋतो हलादेर्लघोः' (6.4.161) इति ऋकारस्य रेफः। `सुपयाः' इति। `असुन्' (द.उ.9.49) इति वर्त्तमाने `पिबतेरिच्च' (द.उ.9.50) [पिबतेरि च--द.उ.] इति पयःशब्दो व्युत्पाद्यते। तेनायमाद्युदात्तः। `अत्वसन्तस्य'(6.4.14) इति दीर्घः। `सुयशाः' इति। `अश भोजने' (धा.पा.1523) [`अशू भोजने'--मुद्रितः पाठः] `अशर्देवने युट् च' (द.उ.9.24;पं.उ.3.65) [पंचपारिवशपाद्युणाद्योरुभयत्रापि `यूट् च' इति नास्ति] इत्यसुन्येव यशःशब्दो व्युत्पाद्यते। तेनायमाद्युदात्तः, पूर्ववद्दीर्घः। `सुस्रोताः' इति। `सर्वधातुब्योऽसुन् (पं.उ.4.188) इति वर्त्तमाने `स्रूरिभ्यां तुट् च' (द.उ.9.62) [स्रूरीभ्यां--पं.उ.द.उ.] इति। `सुस्रत् सुध्वत्' इति। स्रन्सुध्वनसुभ्यां क्विप् `वसुस्रंसु' (8.2.72) इत्यादिना दत्त्वम्, तस्यासिद्धत्वादवासन्तत्वम्।
`सुराजा, सुतक्षा' इति। राजन्, तक्षन्निति कनिन्नन्तः। `सुलोमा' इति। लुनातेर्मनिनि लोमेति। `सुधा' इति। `उष दाहे' (दा.पा.696) `मिथुनेऽसिः' (पं.उ.4.222) इति वर्तमाने `उषः कित्' (पं.उ.4.234) इति कित्। अथ कथं सुप्रथिमेत्यतर सुस्रोताः, सुस्रत्, सुध्वदित्येतेषु चोत्तरपदमाद्युदात्तं भवति, यावतार्थवतोर्मनसोरर्थवद्ग्रहणपरिभाषयेह ग्रहणम्, न चेह तावर्थवन्तौ? इत्यत आह--`अनिनस्मन्' इत्यादि। `अनिनस्मन् ग्रहणान्यनर्थवता चानर्थकेन च तदन्तविधि प्रयोजयन्ति' (व्या.पा.129) इति ब्रुवता वाक्यकारेणानिनस्मन्प्रभृतीनामनर्थकानामपि ग्रहणं भवतीत्युक्तं भवति। अन्यथाप्येतत् तदन्तविधेः प्रदर्शनार्थं स्यात्।
`कपि तु परत्वात्' इत्यादि। `सोर्मनसी' (6.2.117) इति सूत्रस्यावकाशः--सुकर्माः, सुवयाः, `कपि पूर्वम्' (6.2.173) इत्यस्यावकाशः--अयवकः, सुयवक इति, `शेषाद्विभाषा' (5.4.154) इति कप्। इहोभयं प्राप्नोति--सुकर्मकः, सुस्रोतस्क इति, `कपि पूर्वम्' (6.2.173) इत्येतद्भवति विप्रतिषेधेन।।

118. क्रत्वादयश्च। (6.2.118)

कृञः क्रतुः, तेन नित्स्वरेण क्रतुराद्युदात्तः। दृशीकप्रतीकशब्दौ `अर्ध्यादयश्च' इत्याद्युदात्तौ। सूपूर्वस्यत्वरतेः क्तिन्। `तादौ च निति कृत्यतौ' (6.2.50) इति गतिस्वरेम प्रतूर्तिशब्द [`प्रपूर्त्ति' क्रत्व दिषु पठ्यते--काशिका] आद्युदात्तः, `ज्वरत्वर' (6.4.20) इत्यादिनोठ्। जुहोतेः `अचो यत्' (3.1.97) `यतोऽनावः' (6.1.213) इत्याद्युदात्तो भवति हव्यशब्दः। भजेः `खनो घ च' इति घः। अत्र हि घित्करणेन ज्ञापितम्--अन्येभ्योऽपि धो भवतीति। वृषादित्वाद्भगशब्द आद्युदात्तः।

119. आद्यदात्तं द्वयच्छन्दसि। (6.2.119)
`नित्स्वरेणाश्वरथशब्दावाद्युदात्तौ' इति। अश्वशब्दस्य `अशिपुषि' (पं.उ.1.151) [`अशूप्रुपि....'पं.उ.] इत्यादिना क्वन्प्रत्ययान्तस्य व्युत्पादितत्वात्। रथशब्दस्यापि `हनिकुषिनीरमिकाशिभ्यः क्थन्' (द.उ.6.27) इति क्थन्प्रत्ययान्तस्य।
`बाहुशब्दः प्रत्ययस्वरेणान्तोदात्तः' इति। `कुर्भ्रश्च' (द.उ.1.107) इत्यतः कुरिति वर्तमाने `अर्जिदृशिकम्यमिपशिबाधामृजिपसितुग्दीर्घहकारश्च' (द.उ.1.112) [अर्जिदृशिकम्यमिपशिबाधामृजितुग्धुग्दीर्घहकारश्च--द.उ.] इति कुप्रत्ययान्तस्य व्युत्पादितत्वात्। `सुहिरण्यः' इति। हिरण्यशब्दः `नब्विषयस्यानिसन्तस्य' (फि.सू.2.26) इत्याद्युदात्तः।।

120. वीरवीर्यौ च। (6.2.120)
`स्फायितञ्चि' (द.उ.8.31) इत्यादिनाऽजे रकिप्रत्यये वीरशब्दो व्युत्पाद्यते। तेनान्तोदात्तः। अथ वा--`वीर विक्रान्तौ' (धा.पा.1903) इत्यस्य पचाद्यचि व्युत्पादितत्वात्। `वीर्यमिति यत्प्रत्ययान्तम्' इति। वीरे साधुः, `तत्र साधुः' (4.4.98) इति प्राग्घितीयो यत्। अथ वा--वीर इत्यसमाच्चौरादिकादस्मादेव निपातनात् `अचो यत्' (3.1.97), तेन वीर्यमिति यत्प्रत्ययान्तम्। एवं सति `यतोऽनावः' (6.1.213) इत्याद्युदात्तत्वं प्राप्नोति? इत्यत आह--`तत्र' इत्यादि। कथं पुनर्वीर्यग्रहणं ज्ञापकम्? इत्याह--`तत्र हि' इत्यादि। यद्याद्युदात्तं स्यात् तदा `आद्युदात्तं द्व्यच्छन्दसि' (6.2.119) इत्यनेनैव सिद्धं स्यात्। ततश्चेह वीर्यग्रहणं न कुर्यात्, कृतञ्च; तस्मात् तदेव ज्ञापयति--वीर्यशब्दस्य यदन्तस्याप्याद्युदात्तत्वं न भवतीति। तस्मिन्नसति `तित्स्वरितम्' (6.1.185) इत्यन्तस्वरितमेव भवति।।

121. कूलतीरतूलमूलशालाक्षसममव्ययीभावे। (6.2.121)
`कूल संवरणे' (धा.पा.525), [`कूल आवरणे--धा.पा.] `पार तीर कर्मसमाप्तौ' (धा.प.1911,1912), `तूल निष्कर्षे' (धा.पा.527), `मूल प्रतिष्ठायाम्' (धा.पा.529)--एभ्यो घञ्, तेनैते कूलादय आद्युदात्तः। `शुल हुल पत्लृ गतौ'--(धा.पा.843,844,845) अस्माद्घञ्। शालाप्याद्युदात्ता। स्त्रीत्वम् `तत्पुरुषे शालायाम्' (6.2.123) इति निपातनात्। `तृवदिहनिकमिकसिभ्यः सः' (द.उ.9.21,पं.उ.3.62) [वृतृवदिहनिकमिकषियुमुचिभ्यः सः--द.उ; वृतृवदिनिकमिकषिभ्यः सः--पं.उ.] इति `अशेर्देवने' (द.उ.9.24) इति च सप्रत्ययान्तत्वादक्षशब्दोऽन्तोदात्तः। योऽपि `अक्ष्णोऽदर्शनात्' (5.4.76) इत्यचि समासान्ते कृतेऽक्षशब्दः सम्पद्यते, सोऽप चित्स्वरेणान्तोदात्तः, तस्यापीह ग्रहणम्। `षमु वैकल्ये'--(धा.पा.829) [षम अवैकल्ये--धा.पा.] अस्मात् पचाद्यच्, तेन समोऽन्तोदात्तः। यस्तु सर्वादिषु समशब्दः सोऽनुदात्तस्तत्रैव पठ्यते, तस्यापीह ग्रहणम्। `उपकूलम्' इति। कूलस्य समीपमिति `अव्ययं विभक्ति' (2.1.6) इत्यादिनाव्ययीभावः। `परिकूलम्' इति। `उपपरी वर्जने' (1.4.88) इति परिशब्दः कर्मप्रवचनीयसंज्ञ)। तेन योगे `पञ्चम्यपाङ्परिभिः' (2.3.10) इति क ूलात् पञ्चमी। `अपपरिबहिरञ्चवः पञ्चम्या' (2.1.12) इत्यव्ययीभावः। `सुषमम्' इत्यादौ `सुषमादिषु च' (8.3.98) इति षत्वम्, तस्यासिद्धत्वात् समशब्द एवायम्। `तिष्ठद्गुप्रभृतिष्वेते पठ्यन्ते' इति। तेन `तिष्ठद्गुप्रभृतीनि च' (2.1,17) इत्येतेऽव्ययीभावा इति दर्शयति। `उपकुम्भम्' इति। अत्र समासान्तोदात्तत्वमेव। `परमकूलम्, उत्तमकूलम्' इति। परमं कूलमस्योत्तमं कूलमस्येति बहुव्रीहिः। अत्र पूर्वपदप्रकृतिस्वर एव भवति। यौ तु तत्पुरुषौ परमकूलोत्तमकूलशब्दौ, तत्र बहुव्रीह्यधिकारादेव न भविष्यतीति तन्निवृत्त्यर्थमव्ययीभावग्रहणमयुक्तम्।
`पर्यादिभ्यः' इत्यादि। `परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु' (6.2.33) इत्यस्यावकाशो यत्र कूलादयो न सन्ति। परिंत्रिगर्तमिति, कूलादीनामाद्युदात्तस्यावकाशो यत्र पर्यादयो विद्यन्ते---अपकूलमिति; परिकूलमित्यत्र तूभयं प्राप्नोति, तत्र विप्रतिषेधेनेदमेवाद्युदात्तत्वं भवति। समासस्वरापवादो योगः। एवमुत्तरेऽपि `नाचार्यराज' (6.2.133) इत्यादे सूत्रात् प्राक्।।

122. कंसमन्थशूर्पपाय्यकाण्डं द्वीगौ। (6.2.122)
`वृतृवदिहनिकमिकषिभ्यः सः' (पं.उ.3.62) इति कमेः सः, तेन कंसोऽन्तोदात्तः। `मन्थ विलोड्ने' (दा.पा.42) अस्मात् `अकर्त्तरि च कारके संज्ञायाम्' (3.3.19) इति घञ्, तेन मन्थ आद्युदात्तः। `पानीविषिब्यः पः' (पं.उ.3.23) इति वर्तमाने `सुशृब्यां निच्च' (पं.उ.3.26) इति शृणातेः पः निच्च। बाहुलकादूत्त्वं च। अथ वा--`शूर्प माने' (धा.पा.1612) असमाद्घञ्, तेन शूर्पशब्द आद्युदात्तः। पाय्यशब्दो ण्यति `पाय्यसान्नाय्य' (3.1.129) इति निपात्यते तेनायमन्तस्वरितः। कुण्डशब्दः पूर्वमेवोक्तस्वरः। `द्विकंसः' इति। द्वाभ्यां कंसाभ्यां क्रीत इति तद्धितार्थे समासः, ततः प्राग्वतेः संख्यापूर्वपदानां तदन्तविधेरभ्युपगमात् `कंसाट्टिठन्' (5.1.25) इति टिठन्, तस्य चापि `अध्यर्द्धपूर्व' (5.1.28) इत्यादिना लुक्। `त्रिकंसः' इति। पूर्वेण तुल्यम्। `द्विमन्थः' इति। `आर्हादगोपुच्छ' (5.1.19) इत्यादिना ठक्। शेषं समासादि पूर्ववत्। `द्विशूर्पः' इतिष `शूर्पादन्यतरस्याम्' (5.1.26) इत्यञ्। शेषं पूर्ववत्। `द्विपाय्यः' इति। प्राग्वती यष्ठञ्। शेषं पूर्ववत्। `द्विकाण्डम्' [द्विकाण्डः--काशिका] इति। द्वे काण्डे प्रमाणमस्येति `प्रमाणे द्वयसच्' (5.2.37) इत्यादिना मात्रजादयः, तेषाम् `प्रमाणे लो द्विगोर्नित्यम्' (वा.558, 559) इति लोपः, समासः पूर्ववत्।
`परमकंसः' इति। अत्र समासस्वर एव भवति।

123. ततपुरुषे शालायां नपुंसके। (6.2.123))
शालशब्दः `कूलतीर' (6.2.121) इत्यत्रोक्तस्वरः। `ब्राह्मणशालम्, क्षत्त्रियशालम्' इति ब्राह्मणशब्दोऽणन्तत्वादन्तोदात्तः। क्षत्त्रियशब्दस्तु मध्योदात्तः, `क्षत्राद् धः' (4.1.138) इति घप्रत्ययान्तत्वात्। `दृढशालम्' इति। बहुव्रीहिरयम्, तेन पूर्वपदप्रकृतिस्वर एव भवति। पूर्वपदं च निष्ठान्तत्वादन्तोदात्तम्। ननु च लक्षणप्रतिपदोक्तपरिभाषया (व्या.प.3) `विभाषा सेना' (2.4.25) इति प्रतिपदोक्ता या नपुंसकलिङ्गता सैव ग्रहिष्यते। न हि दृढशालमित्यत्र प्रतिपदोक्ता नपुंसकता, किं तर्हि? अभिधेयवशेन लक्षणोक्ता `अभिधेयवल्लिङ्गवचनानि भवन्ति' (व्या.प.73) इति। तत् किमेतन्निवृत्यर्थेन तत्पुरुषग्रहणेन? एवं तर्ह्यु त्तरार्थं तत्पुरुषग्रहणम्। `चेलखेट कटुककाण्डं गर्हायाम्' (6.2.126) इत्यनेन दधि च तत् कटुकं चेति दधिकटुकमित्यत्रैव यथा स्यात्। दधिकटुकम्, `उदश्वित्कटुकम्' इति। उत्तरार्थं तु तत्क्रियमाणं विस्पष्टार्थत्वमुपपादयतीत्येतदर्थमपि भवति। लक्षणप्रतिपदोक्तपरिबाषा (व्या.प.3) चेह नाश्रयितव्या भवति--एतदर्थं तत्पुरुषग्रहणस्य दृढशालमित्येतत् प्रत्युदाहरणमुपन्यस्तम्।।

124. कन्था च। (6.2.124)
कथि `क्लेशने' (?) अस्मात् `गुरोश्च हलः' (3.3.103) इत्यकारः, तेन कन्थान्तोदात्ता। `सौशमिकन्थम्' इति। शोभनः शमोऽस्य शुशमः `तस्यापत्यम्' (4.1.95) इत्यत इञ्। तेनाद्युदात्तः सौशमिशब्दः। `आह्वकन्थम्' इति। आङ्पूर्वस्य ह्वयतेः `आतश्चोपसर्गे' (3.1.136) इति कः, तेनाह्वशब्दस्याथादिस्वरेणा (6.2.144) न्तोदात्तः। `चप्पकन्थम्' इति। `चप सान्त्वने' (धा.पा.399), अस्मात् `पानी विषिभ्यः पः' (द.उ.7.2) इति बहुलवचनाच्चपोऽपि भवति। तेन चप्पशब्दोऽन्तोदात्तः।।

125. आर्दिश्चहणादीनाम्। (6.2.125)
पूर्वेणोत्तरपदस्य सिद्धेऽयं पूर्वपदस्याद्युदात्तत्वार्थ आरम्भः। चिनोतेः क्विप् चित्। हन्तेः पचाद्यच् हनः। निपातनात् तलोपो णत्वं च चिहणः। `मल मल्ल धारणे'--(दा.पा.493,494) आभ्यां रप्रत्ययः, लस्य निपातनात् तलोपो णत्वं च चिहणः। `मल मल्ल धारणे'--(धा.पा.493,494) आभ्यां रप्रत्ययः, लस्य निपातनात् डत्वम्। मडरमड्डरशब्दौ मद्योदात्तौ। विगता तुला तस्य स वितुलः, तस्यायं वैतुलः। अणन्तत्वादन्तोदात्तः। पटदिति कायतीति `कै गै शब्दे' (धा.पा.916,917) `आतोऽनुपसर्गे कः' (3.1.136) पटत्कोऽन्तोदात्तः। चित्तमादत्त इति `ला आदाने' (धा.पा.1058) इत्यस्मादाङ्पूर्वादस्मादेव निपातनात् कः--चित्तालः, तस्यापत्यमिति `अत इञ् (4.1.95) चैत्तालिः, स कर्मावस्य चैत्तालिकर्णः। बहुव्रीहिरयं पूर्वपदप्रकृतिस्वरेणाद्युदात्तः। पूर्वपदं हि ञित्स्वरेणाद्युदात्त्म्। अन्ये त्विञन्तं चैत्तालिकर्णिरिति समुदायमधीयते। `कुक वृक आदाने' (धा.पा.91,92) अस्मात् क्विप्--कुक्; `कुट कौटिल्ये' (धा.पा.1366) इत्यस्मादिगुपधलक्षणः कः, कुटः, कुकः, कुटः, कुक्कुटः। समासस्वरेणान्तोदात्तः। चिनोतेः क्विप्, चित्, कणतेः पचद्यचि कणः, चितः कणाश्चिक्किणः, तकारस्य ककारो निपातनात्। चित्करण इत्यपरे पठन्ति। चिहणादयश्चैते मुष्यनामधेयानि चेति स्मर्यते।
अथादिग्रहणं किमर्थम् यावतादिरनुवर्तत एव? इत्यत आह--`आदिरिति वर्तमाने' इत्यादि। पूर्वकं ह्यादिगरहणमुत्तरपदाभिसम्बद्धम्। पूर्वपदानां चिहणादीनामाद्युदात्तत्वमिष्यते। तस्मात् पूर्वपदभूतानां तेषामाद्युदात्तत्वं यथा स्यादित्येवमर्थं पुनरादिगरहणम्।।

126. चेलखेटकटुककाण्डं गर्हायाम्। (6.2.126)
`वेलृ चेलृ केलृ चलने' (धा.पा 535,536,537) अस्मात् संज्ञायां घञ्, चेलम्=वस्त्रमुच्यते। `खिट उत्त्रासने' (धा.पा.302) [त्रासे-धा.पा.] अस्मादपि भावे घञ्--खेटः, तृणनामैतत्। ञित्स्वरेण चेलखेटशब्दावाद्युदात्तौ। कटुशब्दात् संज्ञायां कन् (4.3.147), गुणवचनमेतदाद्युदात्तम्। काण्डमप्याद्युदात्तमेवेत्युक्तम्।
`चेलादीनां सादुश्येन पुत्रादीनां गर्हा' इति। यता चेलमकुलीनेन तन्तुवायेनोपजनितमेवं पुत्रोप्यकुलीनजो यः स `पुत्रचेलम्' इत्युच्यते। यथा काण्डं सत्वपीडाकरमेवं भूतमपि। तत्र पुत्रशब्दः प्रत्ययस्वरेणान्तोदात्तः। स हि `अमिचिमिदिशसिभ्यः क्त्रः (द.उ.8.86,पं.उ.4.163) इत्यनुवर्तमाने `पुरो ह्रस्वश्च (द.उ.8.87,पं.उ.4.164) [पूञो ह्रस्वश्च--द.उ.,पुवो ह्रस्वश्च--पं.उ.] इति पुत्रशब्दः क्तप्रत्ययान्तो व्युत्पाद्यते। भार्याशब्दः `ऋहलोर्ण्यत्' (3.1.124) इति ण्यदन्तत्वादन्तस्वरितः। `णह बन्धने' (दा.पा.1166) अस्मादुपपूर्वात् क्विप् `नहिवृति' (6.3.116) इत्यादिना पूर्वपदस्य दीर्घत्वम्, `नहो धः' (8.2.34) इति नकारस्य धकारः, तस्य चर्त्वम्--तकारः। उपानच्छब्दः कृत्स्वरेणान्तोदात्तः। नगा अस्मिन् विद्यन्त इति `नगरात् कुत्सनप्रावीण्ययोः' (4.2.128) इत्यस्मादेद निपातनाद्रप्रत्ययः, तेन नगरमन्तोदात्तम्। दधीति `आदृगम' (3.2.171) इत्यादिन क्विन्प्रत्ययान्तो दधातेर्व्युत्पाद्यते, तेनाद्युदात्तः। उदकेन शूयत इत्युदश्वित्, क्विप्। `क्विब्वचिप्रच्छि' (द.उ.10.2) इत्यादिना बहुलवचनाद्दीर्घोऽस्य न भवति। `उदकस्योदः संज्ञायाम्' (6.3.57) इत्युदभावः, कृत्स्वरेणान्तादात्तः। बूतशब्दोऽपि निष्ठान्तत्वादन्तोदात्तः। प्रजाशब्दः `उपसर्गे च संज्ञायाम्' (3.2.99) इति डप्रत्ययान्तः,--कतेन कृत्स्वरेणान्तोदात्तः।
`परमचेलम्' इति। अत्र पूजा गम्यते, न गर्हा।।

127. चीरमुपमानम्। (6.2.127)
`सुसूदागृधिभ्यः क्रन्' (द.उ.8.42,पं.उ.2.25)[सुसूदाञ्गृधिब्यः क्रन्--द.उ.,पं.उ.] इति वर्तमाने--`शुसिचिमीनां दीर्घश्च' (द.उ.8.43,पं.उ.2.26) इति क्रन्प्रत्ययान्तश्चीरशब्दः, तेनाद्युदात्तः। `वस्त्रचीरम्' इति। पूर्ववद्व्याघ्रादित्वात् समासः. वसेराच्छादनार्थात् ष्ट्रन् वस्त्रम्, तेनाद्युदात्तम्। `कम्बलचीरम्' इति। `घृतादीनाञ्च' (फि.सू.1.21) इति कम्बलशब्दोऽन्तोदात्तः।।

128. पललसूपशाकं मिश्रे। (6.2.128)
`पल रक्षणे' (धा.पा.839), [पल गतौ--धा.पा.] `कलस्तृपश्च' (द.उ.8.107) इति वर्तमाने `वृषादिभ्यश्चित्' (द.उ.8.109) इति कलप्रत्ययस्य चित्वात् पलशब्दोऽन्तोदात्तः। `रोदेर्णिलुक् च' (द.उ.8.39) इति विद्यमाने `बहुलमन्यत्रापि संज्ञाच्छन्दसोः (द.उ.8.40) इति बहुलवचनाण्णिलुक्, च। `पानी विषिभ्यः पः' (द.उ.7.2) इत्यधिकृत्य `स्तुवो दीर्घश्च' (द.उ.7.4) इति च `सुशृभ्यां निच्च' (द.उ.7.6) [मुशृम्यामूर्च--द.उ.] इति सूपशब्दः पप्रत्ययान्तो व्युत्पाद्यते, तेनाद्युदात्तः। `इण्भीकापाशल्यतिमर्चिभ्यः कन्' (द.उ.3.21) इति बहुलवचनात् `शो तनूकरणे' (धा.पा.1270) अस्मादिगुपधलक्षणः कः, तेन गुडशब्दोऽन्तोदात्तः। `धृ `क्षरणे' (धा.पा.1096) इत्यस्मात् `अञ्चिघृसिभ्यः क्तः' (द.उ.6.9) ति क्तः, तेन घृतमन्तोदात्तम्। `मुदिग्रोर्गग्गौ' (द.उ.3.66) इति मुदेर्गक् तेन मुद्गोऽन्तोदात्तः।।

129. कूलसूदस्थलकर्षाः संज्ञायाम्। (6.2.129)
कूलशब्द उक्तस्वरः, `षूद क्षरणे' (धा.पा.1717) इत्यस्मात् `इगुपदात् कः' (3.1.135), तेन सूदोऽन्तोदात्तः। `स्थल स्थाने' (?) इत्यस्मात् पचाद्यच्, तेन स्थलमन्तोदात्तम्। कर्षशब्दः `कर्षात्वतो धञोऽन्त उदात्तः' (5.1.159) इत्यन्तोदात्तः। `दाक्षिकूलम्' इत्यादि। दाक्षिमाहकिशब्दाविञन्तावाद्युदातौ। देवशब्दः पचाद्यजन्तत्वादाद्युदात्तः। भाजीशब्दो जानपदादिसूत्रेण (4.1.42) ङीषन्तत्वादन्तोदात्तः। दाण्डायनशब्दो नडादित्वात् (4.1.99) फगन्तः, तेन `कितः' (6.1.165) इत्यन्तोदात्तः।
ननु च सूत्रे स्थलशब्द उपात्तः, तत्कथं स्थलीशब्द उत्तरपदमाद्युदात्तं चोदाह्रियते? इत्याह--`स्थलग्रहणम्' इत्यादि।।

130. अकर्मधारहये राज्यम्। (6.2.130)
राज्ञो भावः, कर्म वा राज्यम्, ष्यन्तत्वादाद्युदत्तम्। ब्राह्मणक्षत्रियशब्दौ उक्तस्वरौ।
`चेलराज्य' इत्यादि। चेलराज्यस्वरस्यावकाशः--भार्याचेलम्, ब्राह्मणराज्यमिति, `तत्पुरुषे तुल्यार्थ' (6.1.2) इत्यादिना विहितस्य स्वरस्यावकाशः--निष्कौशाम्बिरिति; इहोभयं प्राप्नोति--कुचेलम्, कुराजयमिति, अव्ययस्वरो भवति पूर्वप्रतिषेधेन। आदिशब्देन वर्ग्यादिस्वरपरिग्रहः।।

131. वर्ग्यादयश्च। (6.2.131)
वर्ग्यादयो दिगादियदन्ताः। तेषु ये द्व्यचस्ते `यतोऽनावः' (6.1.213) इत्याद्युदात्ताः। परिशिष्टास्तु `तित् स्वरितम्' (6.1.185) इत्यन्तस्वरिताः। वसुदेवस्यापत्यम् `ऋष्यन्धक' (4.1.114) इत्यादिनाण्, तेन वासुदेवशब्दोऽन्तोदात्तः। `अरज अर्जने' (धा.पा.224) इत्यस्माच्चुरादिणिजन्तात् `अजेर्णिलुक् च' (द.उ.5.57) इत्युनण्प्रत्ययः। तेनार्जुनो मध्योदात्तः। `इत्येवमादयः' इति। आदिशब्देन पक्षशब्दात् परे ये पठ्यन्ते तेषां ग्रहणम्।।

132. पुत्रः पुम्भ्यः। (6.2.132)
`कौनटिपुत्रः' इति। पुत्रशब्द उक्तस्वरहः। कुनटस्यापत्यं कौनटिः, तेनायमाद्युदात्तः। दामकमाहिषकशब्दावपि कन्नन्तावाद्युदात्तौ।
`गार्गीपुत्रः, वात्सीपुत्रः' इति। गार्गयवात्स्यशब्दाभ्याम् `यञश्च' (4.1.16) इति ङीप्। तेन गार्गीवात्सीशब्दौ ञित्स्वरेणाद्युदातौ।
सर्वत्रास्मिंस्तत्पुरुषाधिकारे प्रत्युदाहरणे `समासस्य' (6.1.223) इत्यन्तोदात्तत्वं वेदितव्यम्।।

133. नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः। (6.2.133)
पूर्वेणाचार्यादिभ्योऽपि परस्य पुत्रशब्दस्याद्युदात्तत्वे प्राप्ते प्रतिषेधोऽयमुच्यते। तथा च समासान्तोदात्तत्वमेव भवति। `आख्याग्रहात्' इत्यादि। आख्याग्रहणमाचार्यादिभिः प्रत्येकमभिसम्बध्यते। तथा चाख्याग्रहणेऽनिरस्ते तस्याचार्यादेः पर्यायाणां विशेषणाञ्च ग्रहणं भवति। `आचार्यपुत्रः' इति स्वरूपस्योदाहरणम्। `उपाध्यायपुत्रः' इति पर्यायस्य। `शाकटायनपुत्रः' इति विशेषस्य। `राजपुत्रः' इति स्वरूपस्य। `ईश्वरपुत्रः' इति पर्यायस्य। `नन्दपुत्रः' इति विशेषस्य। `ऋत्विक्पुत्रः' इति स्वरूपस्य। `याजकपुत्रः' इति पर्यायस्य। `होतुःपुत्रः' इति विशेषस्य। `संयुक्तपुत्रः' इति स्वरूपस्य। `सम्बन्धिपुत्रः' इति पर्यायस्य। `स्यालपुत्रः' इति। विशेषस्य। `ज्ञातिपुत्रः' इति स्वरूपस्य। `भ्रातुष्पुत्रः' इति विशेषस्य। `कस्यादिषु च' (8.3.48) इति षत्वम्। तत्राचार्यशब्दः कृत्स्वरेणान्तस्वरितः। स हि चरेराङ्पूर्वस्य ण्यति व्युत्पाद्यते। उपाध्यायशब्दोऽन्तोदात्तस्थाथादिस्वरेण (6.2.144), स `इङश्च'

(3.3.21) इति घञन्तो व्युत्पाद्यते। राजशब्द आद्युदत्तः, कनिन्प्रत्ययान्तत्वात्। ईश्वरशब्दोऽन्तोदात्तः; `स्थेशभास' (3.2.175) इत्यादिना वरच्प्रत्ययान्तत्वात्। नन्दशब्दोऽप्यन्तोदात्तः; अजन्तत्वात्। ऋत्विक्शब्दः `ऋत्विग्दधृक्' (3.2.59) इत्यादिना क्विन् प्रत्ययान्तः। कृत्स्वरेणान्तोदात्तः। याजकशब्दो ण्वुलन्तः, तेन लित्स्वरेणाद्युदात्तः। होतृशब्दस्तृन्नन्तत्वादाद्युदात्तः। संयुक्तशब्दः `गतिरन्तरः' (6.2.49) इत्याद्युदात्तः। `स्यल वितर्कगे' (?) अस्माच्चुरादिदिणिजन्तात्त् पचाद्यचि स्यालशब्दोऽन्तोदात्तः। `ज्ञा' इत्यस्मात् `क्तिच्क्तौ च संज्ञायाम्' (3.3.174) इति ज्ञातिशब्दोऽन्तोदात्तः। `तृन्स्तृचौ शंसिक्षदादिभ्यः' (द.उ.2.1) इति प्रकृत्य भातृशब्दस्तृन्नन्तो व्युत्पाद्यते, तेनाद्युदात्तः। संयुक्तशब्दोऽयमस्त्येव रूढिशब्दो यो विवाहकृतेन सम्बन्धेन स्यालश्वशुरादिषु वर्तते, अस्ति क्रियाशब्दो यः सर्वत्र केनचित् सम्बन्धेन वर्तते; तत्रेह रूढिशब्दस्य ग्रहणम्। कुत एतत्? आचार्यानीनां पृथग्ग्रहणात्। यदि हि क्रियाशब्दस्य ग्रहणं स्यात्, तदा संयुक्तग्रहणेनैव निषिद्धत्वादाचार्यादीनां पृथग्ग्रहणं न कुर्यात्। तेऽपि हि विद्यादिकृतेन सम्बन्धेन संयुक्ता भवन्त्येव। तस्माद्रूढिशब्दस्य ग्रहणम्। तेन क्रियाशब्दो यः संयुक्तशब्दस्तस्मात् प्रतिषेदो न भवति।।

134. चूर्णादीन्यप्राणिषष्ठ्याः। (6.2.134)

`चूरी दाहे' (धा.पा.1158), अस्मान्निष्ठा, ते चूर्णमन्तोदात्तम्। करिणः पातीति `आतोऽनुपसर्गे कः' (3.2.3) पकारस्य पक्षे वकारो निपात्यते--करिपः, करिवः। कृत्स्वरेण थाथादिस्वरेण वान्तोदात्तः। `महेरितण् च' (द.उ.5.19) बहुलवचनाच्छकेरपि भवति, शाकिनम्, प्रत्ययस्वरेण मद्योदात्तम्। `शकादिभ्योऽटच्' (द.उ.5.2;पं.उ.4.81) [शकादिभ्योऽटन्--.दउ;पं.उ.] शकटम्। तद्वहतीति शकटवण् शाकटम्। प्रत्ययस्वरेणान्तोदात्तः। द्रागद्रूतं क्षीयत इति द्राक्षा, पृषोदरादित्वात्। अन्तोदात्तोऽयं शब्दः। `तुस ह्रस ह्लस रसशब्दे' (धा.पा.710, 711,712,713), ततो बहुलवचनात् `हसिमृग्रिणवामिदमिलूपूधुर्वीभ्यस्तन्' (द.उ.6.7,पं.उ.3.86) [हसिमृग्रिण्वमिदमितमिलूपूधूर्विभ्यस्तन्--द.उ; हसिमृगरण्वामिदमूलपूर्विभ्यस्तन्--पं.उ.] इति तन्, निपातनाद्दीर्घश्च। तूस्तमाद्युदात्तम्। `कुत्सितं दुनोतीति `क्विबवचिप्रच्छि' इत्यादौ सूत्रे (वा.288) क्विबिति योगविभागः। `दुदु उपतापे' (दा.पा.1256) इत्यस्मादपि क्विप्, `बहुलवचनात् अनित्यत्वाद्वागमशासनस्य' (व्या.प.99) तुगभावः, पूर्वपदस्य च बहुलवचनादेव मुम्--कुन्दु, तन्मिमीत इति `माङ्माने' (दा.पा.1088) इत्यस्मात् कः, कुन्दुमोऽन्तोदात्तः। `उषिकुटिदलिकचिखजिभ्यः कपन्' (द.उ.7.9) तेन दलप आद्युदात्तः। `अत्यविचमितमिनमि' (द.उ.9.44) इत्यादिनाऽसच्--चमसः, ततो जातिलक्षणो ङीष् (4.1.63) चमसी। `चक तृप्तौ' (धा.पा.783) इत्यस्मात् कविप्, चक्। `कनी दीप्तिकान्तिगतिषु' (धा.पा.460) [कन दीप्तिकान्तिगतिषु--धा.पा.] तस्मादच्, कनः। चककनः। चोलस्यापत्यं चौलः, `द्व्यञ्मगध' (4.1.170) इत्यादिनाऽण्। एते चूर्णादयः। `मुद्गचूर्णम्' इति। `मुदि ग्रोर्गग्गौ' (द.उ.3.66) इति मुद्गोऽन्तोदात्तः। `मसूरचूर्णम्' इति। `मसेरूरन्' (द.उ.8.95) मसूर आद्युदात्तः। `मत्स्यचूर्णम्' इति। मत्स्यः प्रातिपदिकस्वरेणान्तोदात्तः।

`तत्रोयग्रह इति षष्ठ्यन्तमेव' इति। अनेन तुल्यार्थतां सूत्रयोर्दर्शयति। कथं पुनरुपग्रहः षष्ठ्यन्तमेव गृह्यते? इत्याह--`पूर्वाचार्योपचारेण' इति। पूर्वाचार्या हि षष्ठ्यन्तमुपग्रह इत्येवमुपचरन्ति स्म। तेनेह पूर्वा चार्योपचारेण हेतुना षष्ठ्यन्तमेवोपग्रह इति गृह्यते। समासस्वरापवादो योगः एवमुत्तरेऽपि त्रयः।।

135. षट् च काण्डादीनि। (6.2.135)

`चेलखेटकटुककाण्डम्' (6.2.126) इत्यादिषु चतुर्षु योगेषु सन्निविष्टानि काण्डादीनि षट् गृह्यन्ते। यद्येवं तैरेव योगैरेषामाद्युदात्तत्वं सिद्धम्, तत्किमर्थमिदम्? यत्र तैर्विहित ततोऽन्यत्रापि यथा स्यात् प्राणिषष्ठ्याश्च मा भूदित्येवमर्थञ्च। `दर्भकाण्डम्' इति। `दृदलिभ्यां भः' (पं.उ.3.151) इति भप्रत्ययान्तो दर्भशब्दोऽन्तोदात्तः। `तृणधान्यानाञ्च द्व्यषाम्' (फि.सू.2.27) इति वा। `शरकाण्डम्' इति। शरशब्दोऽप्यनन्तरेणैव `द्व्यषाम्' इत्याद्युदात्तः। एवं कुशशब्दोऽपि। तथा तिलशब्दोऽपि। पललमूलकशब्दावुक्तस्वरौ। नदडति पचादिषु पठ्यते, तेन टित्त्वान्नदशब्दान्ङीप् `यस्येति च' (6.4.148) इत्यकारलोपः, `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इति ङीप उदात्तत्वम्। तेन नदीशब्दोऽन्तोदात्तः। `पाटलापालङ्काम्बासागरार्थानाम्' (फि.सू.1.2) इति फिषा समुद्रशब्दोऽन्तोदात्तः। `राजसूदः' इति। शूदशब्दः षङ्भ्यः परः पठ्यते। तेनात्र समासान्तोदात्तत्वमेव भवति। सर्वे च ते दर्भकाण्डादयः षष्ठीसमासाः।।

136. कुण्डं वनम्। (6.2.136)

`कुण्डशब्देऽत्रि कुण्डसादृश्येतन वने वर्त्तते' इति। यथा कुण्जं कस्यचिदुदकादेराश्रयस्तथा वनमपि। अतः कुण्जसादृश्येनात्र कुण्डशब्दो वने वर्तते। भवति हि सादृश्येन ताच्छब्द्यं यथा--अग्निमणिवक इति। `मृत्कुण्डम्' इति। अत्र कुण्ड आकारविसेषो मृद्विकारे वर्तते, न वने। तेन समासान्तोदात्तत्वमेव भवति।।

137. प्रकृत्या भगालम्। (6.2.137)

भगालमित्यर्थग्रहणम्; अर्थप्रधानत्वान्निर्देशस्य, अर्थप्रधाने हि निर्देश स्वरूपग्रहणं न भवतीत्युक्तम्। अर्थग्रहणे च सति तद्वाचिनामेतत् कार्यं विज्ञायते। अत एवाह--`भगालवाचि' इत्यादि। `कुम्भीभागालम्' इति। कुम्भीशब्दः `जातेरस्त्रीविषयादयोषदात्' (4.1.63) इति ङीषन्तत्वादन्तोदात्तः। `भगालादयो मध्योदात्ताः' इति। `लगावन्ते द्वयोश्च बहवषो गुरुः' (फि.सू.2.42) इति फिषैषामाकारस्योदात्तत्वविधानात्।।

138. शितेर्नित्याबह्वज् बहुव्रीहावभसत्। (6.2.138)
`शितिपादः' इति। शितिशब्दः `वर्णानां तणतिनितान्तानाम्' (फि.सू.2.33) इति फिषाद्युदात्तः। `अंसौष्ठशब्दौ' इत्यादि। `अम रोगे' (धा.पा.1720) इत्यस्मात् `अमः सन्' (पं.उ.5.21) इति सन्प्रत्ययार्न्तोऽसशब्दो व्यत्पाद्यते। ओष्ठशब्दोऽपि `उषिकुषिगर्त्तिभ्यस्थन्' (द.उ.6.29) इति थन्प्रत्ययान्तः। तेनैतौ प्रत्ययस्य नित्वादाद्युदात्तौ।
`दर्शनीयपादः' इति। दर्शनीयशब्दोऽनीयर् प्रत्ययन्तः। तेन `उपोत्तमं रिति' (6.1.217) इति मध्योदात्तः। ततोऽत्र पूर्वपदस्य प्रकृतिस्वर एव भवति। एवमुत्तरेष्वपि प्रत्युदाहरणेषु। कथं पुनः ककुदशब्दो नित्यं बह्वज् न भवति? इत्याह--`ककुदस्यावस्थायां लोपः' इत्यादि। `शितिललाटः' इति। `लल ईप्सायाम्' (धा.पा.1687), अस्मात् `उणादयो बहुलम्' (3.3.1) इत्याटप्रत्ययः, तेन ललाटशब्दो मद्योदात्तः। `शितिपादः' इति। शितेः पाद इत्यत्र समासस्वर एव भवति। `शितिभसत्' इति `शृदृभसोदिः' (द.उ.6.42) इति भसच्छब्दो व्युत्पाद्यते। ततोऽयमन्तोदात्त-।।

139. गतिकारकोपपदात्कृत्। (6.2.139)
`प्रकारकः, प्रहारकः' इति। ण्वुल्। `प्रकरम्' इत्यादिषु ल्युट्। `ईषत्करः' इत्यादिषु `ईषद्दुःसुषु' (3.3.926) इति खल्। यदत्राव्ययपूर्वपदं तत्र `तत्पुरुषे तुल्यार्थ' (2.2.17) इति समासः। `कारकात्' इति। षष्ठी तु `कर्त्तुकर्मणोः कृति'
(2.3.65) इति कर्मणि कारके वेदितव्या। इध्मादयो हि व्रश्चनक्रियाया व्याप्तुमिष्टतमत्वात् कर्मबावमनुभवन्ति। `ईषत्करः' इत्यादौ तु `उपपदमतिङ्' (2.2.19) इति समासः। तत्र प्रशब्दः `उपसर्गाश्चाभिवर्जम्' (फि.सू.4.81) इत्याद्युदात्तः। इध्मशब्दो हि `इषियुधीन्धि' (द.उ.7.31) इत्यादिना मक्प्रत्ययान्तत्वादन्तोदात्तः। `शो तनूकरणे' (दा.पा.1145), पलं श्यतोति [श्यतोति--मुद्रीतः पाठः] `आतोऽनुपसर्गे कः' (3.2.3)। पलाशः कृत्स्वरेणथाथादिस्वरेण (6.2.144) वान्तोदात्तः। शदेर्णिजन्तस्य `शदेरगतौ तः (7.3.42) इति तकारे कृते ल्युटि `शातनः' इति भवति। `श्मनि श्रयतेर्डन्' (द.उ.1.161) इति लत्वे कृते `कल्पनः' इति भवति। ईषच्छब्दोऽन्तोदात्तः; स्वरादिषु तथाभूतेषु तथांभूतस्यैव पाठात्। सुदुरावाद्युदात्तौ; प्रादिषु तथाभूतयोः पाठात्। `सर्वत्रैवात्र लित्स्वरः' इति। स पुनः प्रत्ययात् पूर्वस्योदात्तत्वम्।
`देवदत्तस्येति सेषलक्षणा षष्ठी' इति। कर्मणि षष्ठीत्वं निराकरोति। कर्मषष्ठ्यां ह्यस्यां कारकमेव देवदत्तः स्यात्, तथा च प्रत्युदाहरणं नोपपद्यते। अथ कारकग्रहणं किमर्थम्, निर्गतः कौशाम्ब्या निष्कौशाम्बिरित्यत्र मा भूदिति चेत्? नैतदस्ति; तथा हि--यात्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा भवन्ति (जै.प.वृ.99), न हि कौशाम्बीशब्दः क्रियावाची, तत् कुतस्तं प्रति निसोऽत्र गतिसंज्ञा? इत्यत आह--`कृद्ग्रहणं विस्पष्टार्थम्' इति। यदि तर्हि कृद्ग्रहणं क्रियते, प्रपचतितरामित्यत्र परकृतिसवरो न प्राप्नोति। ततश्च समाससवरं बाधित्वाव्ययस्वर एव स्यात्? इत्यत आह--`प्रपचतितराम्' इत्यादि। अत्र हि पचतिशब्दादतिशयविवक्षायां तरप्तपमौ। ततसतरबाद्यन्ते `कुगतिप्रादयः' (2.2.18) इति प्रशबदस्य समासः। समासे तु कृते पूर्वपदस्य `तत्पुरुषं तुल्यार्थ' (6.2.2) इत्यादिना प्रकृतिस्वरः। पश्चात् `किमेत्तिङ्व्यय' (5.4.11) इत्यादिनामुः। आमन्तसय च `आद्युदात्तश्च' (3.1.3) इति प्रत्ययसवरः प्राप्रः, सोऽव्ययसवरे सति सतिशिष्टः, सतशिष्टस्य च बलीयस्त्वमुक्तम्। तेन यद्यप्यनेनामन्तस्य कृद्ग्रहणे क्रियमाणे सति प्रकृतिस्वरो भवति, तथाप्याम्स्वरो भवत्येव; तस्य सतिशिष्टत्वात्। अथ कथं तरवाद्यन्तेन समासः? कथं च न स्यात्? `गतिकारकोपपदादीनां कृद्भिः सह समासवचनं प्राक्सुब्ुत्पत्तेः' (है.प.पा.88) इति वचनात्? नैष दोषः; अत्र हि द्वे दर्शने गतिकारकोपपदात् कृद्भिरेव समासो भवति, स च प्राक् सुबुत्पत्तेरित्येकं दर्शनम्; गतिकारकोपपदानामविशेषेण समासो भवति, कृद्भिस्तु प्राक् सुबुत्पत्तेरिति द्वितीयम्। तत्र द्वितये दर्शने युज्यत एव तरबाद्यन्तेन समासः। तत्र कृद्ग्रहणं विस्पष्टार्थमित्यनेन सम्बद्धम्। एक आचार्याः कृद्ग्रहणं विस्पष्टार्थमित्येव व्याचक्षत इत्यर्थः।
`प्रपचति देश्याद्यर्थ तु' इत्यादि। तुशब्दः पूर्वस्माद् व्याख्यानाद्विशेषद्योतनाय। प्रपचतिदेश्य आदिर्यस्य स प्रपचतिदेश्यादिः। आदिशब्देन प्रपचतिदेशीय इत्यस्य ग्रहणम्। प्रपचतिदेश्यादावर्थः प्रयोजनं यस्य तत् प्रपचतिदेश्याद्यर्थम्। `कृद्ग्रहणं दृश्यते' इति। एवं `ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' (5.3.67) इत्यत्र `तिङ्श्च' (5.3.56) इत्यनुवृत्तेः प्रपचतिशब्दाद् देश्यदेशीयरौ। तदन्तेन च प्रशब्दस्य गतिसमासे कृद्ग्रहणं न क्रियेत। तथा प्रपचतिदेश्यः, प्रपचति वेशीय इत्यत्राप्युत्तरपदस्य प्रकृतिस्वरः स्यात्, न चेष्यते। तस्मादिह मा भूदित्येवमर्थं कृद्ग्रहणं दृश्यत एव। तस्मादेतन्न विस्पष्टार्थम्। तदपि तु प्रपचतिदेश्य इत्यादौ विषये मा भूदित्येवमर्थ मित्यभिप्रायः।।

140. उभे वनस्पत्यादिषु यूगपत्। (6.2.140)
वनशब्दः `नब्विषयस्यानिसन्तस्य' (फि.सू.2.26) इत्याद्युदात्तः। पतिशब्दोऽपि प्रत्ययस्वरेण। स `पातेर्डतिः' (द.उ.1.27) इति डतिप्रत्ययान्तः।
`बृहदित्यन्तोदात्तम् इत्यादि। बृहच्छब्दः `वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' (द.उ.65) इति केवलमन्तोदात्तो यदयपि निपात्यते, तथापि बृहस्पतिरित्यत्राद्युदात्तत्वं निपातयति।
`तनोतेरौणादिक ऊप्रत्ययः' इति। `कषिचमितनिषनिसर्जिखर्जिभ्यऊः' (पं.उ.1.82) इत्यनेन तनू शब्दोऽन्तोदात्तः। न पाति न पालयतीत्यनेन `पा रक्षणे' (धा.पा.1056) इत्यसमान्नपादित्येतन्निपात्यत इति दर्शयति। न पातयतीत्यनेनापि। `नलोपो नञः' (6.3.73) ति नलोपः प्राप्नोति, `नभ्रान्नपात्'

(6.3.75) इत्यादिना प्रकृतिभावान्न भवति। `नरा अस्मिन्नासीनाः शंसन्ति' इति। एतेनाधिकरणसाधनं शंसशब्दं दर्शयति। एवं शंसन्तीत्यनेनापि कर्मसाधनम्। `शंस स्तुतौ' (धा.पा.728) इत्यस्मात् `अंकर्त्तरि च कारके' (3.3.19) इति घञ्। `अबन्तः' इति। `ऋदोरप्' (3.3.57) इत्यनेन। `शुनःशेपः' इति। बहुव्रीहिरयम्। तेनात्र पूर्वपदस्य प्रकृतिभावे प्राप्ते वचनम्। `उभावाद्युदात्तौ' इति। तत्र श्वञ्शब्दः `श्वन्नुक्षन्' (द.उ.6.55) इत्यादिना कनिन्प्रत्ययान्तो व्युत्पाद्यते। शेपशब्दो `वृङ्शीङभ्यां रूपस्वाङ्गयोः पुट् च्' (द.उ.9.61) इत्यसुन्प्रत्ययान्तो व्युत्पाद्यते, तेन द्वावपि तावाद्युदात्तौ। `शण्डपर्कशब्दौ' इति। `शडि रुजायाम्' (धा.पा.279) इत्यस्य घञि शण्ड इति भवति। `पृची सम्पर्के' (धा.पा.1462) इत्यस्यापि तत्रैव परक इति भवति।

`तृष्णाशब्द आद्युदात्तः' इति। स हि तृषेर्निष्ठायां व्युत्पद्यते। तेन `निष्ठा च द्व्यजनात्' (6.1.205) इत्याद्युदात्तः।

`वम्बशब्दः' इति। `लवि अवस्रंसने' (धा.पा.379) [लबि अवस्रंसने च--धा.पा.] अस्य पचाद्यचि व्युत्पादित्वादस्मादेव निपातनाद्वत्त्वम्। `विश्ववयःशब्दः' इति। विश्वं वयो यस्येति बहुव्रीहिः। तत्र `बहुव्रीहौ विश्वं संज्ञायाम्' (6.2.106) इति विश्वशब्दोऽन्तोदात्तः। `तयोः' इति। वम्बविश्वयःशब्दयोः।

`मृङो विच्प्रत्ययः' [मृञः--काशिका. मृङः--पदमञ्जरी] इति। `विजुपे छन्दसि' (3.2.73) इत्यतो विजित्यनुवर्तमाने `अन्येभ्योऽपि दृश्यते' (3.2.75) [दृश्यन्ते--काशिका.] इति विच्। `मृत्युशब्दोऽन्तोदात्तः' इति। `भुजीमृङ्भ्यां युक्त्युकौ' (द.उ.1.135) इति त्युक्प्रत्ययान्तत्वात्।

`द्वन्द्वानाम्' इत्यादि। येऽत्र द्वन्द्वाः, तेषामदेवताद्वन्द्वार्थः पाठः। देवताद्वन्द्वे हि `देवताद्वन्द्वे च' (6.2.141) इत्यनेनैव सिद्धम्। `अनुदत्ताद्युत्तरपदार्थश्च' इति। द्वन्द्वानां पाठः। यदि हि तेषामिह पाठो न स्यात्, तदा `नोत्तरपदेऽनुदात्तादौ' (6.2.142) इति प्रतिषेदादन्तोदात्तत्वं स्यात्।।

141. देवताद्वन्द्वे च। (6.2.141)

`इन्द्रासोमौ' इति। `देवताद्वन्द्वे च' इति पूर्वपदस्यानङ्। `ऋज्रेन्द्र' इत्यादि। `वृधिवपिभ्यां रन्' (द.उ.8.45), इत्यतो रन्नित्यनुवर्तगाने `ऋज्रेन्द्रः' (द.उ.8.46) इतीन्द्रशब्दो रन्प्रत्ययान्तो निपात्यते, तेनाद्युदात्तः। `सोम इति मन्प्रत्ययान्तः' इति। तेन सोऽप्याद्युदात्त एवेत्यभिप्रायः। मन्प्रत्ययान्तत्वं च तस्य `षुञ् अभिषवे' (धा.पा.1247) इत्यस्मात् `अर्त्तिस्तुसुहुसृ' (द.उ.7.26) इत्यादिना मन्प्रत्ययमुत्पाद्य व्युत्पादितत्वात्। `वरुण उनन्प्रत्ययान्तः' इति। `कृवृदारिभ्य उनन्' पं.उ.3.53) इति। बृहस्पतिशब्दो हि वनस्पत्यादिषु पठ्यते, तत्र च पूर्वोत्तरपदयोर्युगपदाद्युदात्तत्वं विधीयते, तेन द्वावुदात्तौ। `तेनेन्द्राबृहस्पती इत्यत्र तत्र उदात्ताः' इति। इन्द्रशब्दादयः। `प्लक्षन्यग्रोधौ' इति। अत्र समासान्तोदात्तत्वमेव भवति। एवं `अग्निष्टोमः' इत्यत्रापि। षष्ठीसमासश्चायम्। समासस्वरापवादो योगः।।

142. नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु। (6.2.142)

`अग्निवायुशब्दावन्तोदात्तौ' इति। अग्निशब्दः `वीज्याज्वरिभ्यो निः' (द.उ.1.18) इति वर्तमाने `अङ्गेर्नलोपश्च' (द.उ.1.20) इति निप्रत्ययान्तः। वायुशब्दोऽपि `कृवापाजि' (द.उ.1.86) इत्यादिनोण्प्रत्ययान्तः, तेन प्रत्ययस्वरेण द्वावप्यन्तोदात्तौ।

अथोत्तरपदग्रहणं किमर्थम्, यावता `अनुदात्तादौ' इति सप्तम्येवात्रानुदात्तादेरपदत्त्वं बोधयिष्यति? इत्यत आह--`उत्तरपदग्रहणम्' इत्यादि। इह हि प्रकरणे द्वन्द्वः सप्तम्या निर्दिष्टः, नोत्तरपदम्। तत्रानुदात्तादाविति सप्तमी द्वग्द्वस्यैव विशेषणमापद्यते--अनुदात्तादौ द्वन्द्वः। उत्तरपदग्रहणे तु सति द्वन्द्वे सप्तम्यांविहितायामनुदात्ता(दा) वित्येतदुत्तरपदस्य विशेषणं सम्पद्यते। तस्मादुत्तरपदविशेषणमेतद्यथा स्तात्, द्वन्द्वविशेषणं मा भूदित्येवमर्थमुत्तरपदग्रहणम्। `अनुदात्तादौ' इति। असत्येतस्मिन्नविशेषणे विधिरपि देवताद्वन्द्व उच्यते, प्रतिषेधोऽपि, ततश्च तयोर्विषयविबागो न स्यात्; एवञ्च समानविषयत्वाद्विकल्पः प्रसज्येत। अनुदत्तादावित्यस्मिंस्तु सति यत्रानुदात्ताद्युत्तरपदो देवताद्वन्द्वस्तग्त्र प्रतिषेधः स्यात्, ततोऽन्यस्तु विधिरिति विधिप्रतिषेधयोर्विषयविभागो भवति। अतो विषयविबागार्थमनुदात्तादावित्युच्यते।

`पृथिवीशब्दो ङीष्प्रत्ययान्तः' इति। गौरादिषु पाठात्।

`रोदेर्णिलुक् च' इति। `रुदिर् अश्रुविमोचने' (धा.पा.1067) इत्यस्माण्ण्यन्तात् `स्फायितञ्चि' (द.उ.8.31) इत्यादि--सूत्रद्रगित्यनुवर्तमाने `रोदेर्णिलुक् च' (द.उ.8.39) इति रक्, तेन रुद्रोऽन्तोदात्तः।

`शुक्रामन्थिनौ' इति। शुक्रशब्दः `ऋजेन्द्रः' (द.उ.8.46) इत्यादिना रन्प्रत्ययान्तः, तेनाद्युदात्तः।।

143. अन्तः। (6.2.143)

144. थाथघञ्क्ताजबित्रकाणाम् (6.2.144)

`अत्र कृदुत्तरपदप्रकृतिस्वरत्वेनाद्युदात्तमुत्तरपदं स्यात्' इति। यदीदं नारभ्येतेति भावः।

`उपसर्गे वसेः इत्यथप्रत्ययः' इति। तत्र `शीङ्शपिरुगमिवञ्चि' (द.उ.6.38) इत्यादिनाऽथप्रत्यया नुवृत्तेः कृदुत्तरपदप्रकृतिसवरत्वेन मध्योदात्तमुत्तरपदं स्यात्।

`दूरादागतः' इति। गमेः क्तः, `अनुदात्तोपदेश' (6.4.37) इत्यादिनाऽनुनासिकलोपः, आगतशब्देन `स्तोकान्तिकार्थ' (2.1.39) इत्यादिना समासः, `पञ्चम्याः स्तोकादिभ्यः' (6.3.2) इत्यलुक्। `शुष्कः' [विशुष्कः--काशिका, पदमञ्जरी च] इति। `शुषः कः' (8.2.51) इति कादेशः। उभयत्रात्र कर्मणि निष्ठा। तत्र `गतिरनन्तरः' (6.2.49) इति प्राप्ते तदपवाद उत्तरपदान्तोदात्तत्वं विधीयते। यदा तु कर्तरि क्तः, तदा तु कृत्स्वरेणोत्तरपदस्य प्रकृतिभावे सत्यन्तोदात्तत्वं सिद्धमेव। ननु च शुषिरकर्मकः, तस्य कुतः कर्मणि निष्ठा? अन्तरभावितण्यर्थः सकर्मको भवतीत्यदोषः। `आतपशुष्कम्' [आतपशुष्कः--काशिका, पदमञ्जरी च] इति। `कर्तृकरणे कृता बहुलम्' (2.1.32) इति समासः। अत्र `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना पूर्वपदं पूर्वपदप्रकृतिस्वरं स्यात्। पूर्वपदं पुनरत्र पचाद्यजन्तत्वात् कृत्स्वरेणान्तोदात्तः।
`प्रक्षयः, प्रजयः' इति। `एरच्' (3.3.56) ननु च कृदुत्तरपदप्रकृतिस्वरत्वेनैवात्रोत्तरपदान्तोदात्तत्वं भविष्यति? इत्यत आह--`क्षयो निवासे' इत्यादि। यदा `क्षयो निवासे' (6.1.201) `जयः करणम्' (6.1.202) इति चादयुदात्तौ क्षयजयशब्दौ भवतः, तदा कृत्स्वरेण मध्योदात्तत्वं स्यात्।
`प्रलवित्रम्, प्रसवित्रम्' इति। `अर्तिलूधूसूखन' (3.2.184) इत्यादिनेत्रः। अत्र कृत्स्वरे सति प्रत्ययस्वरं स्यात्। तेनोत्तरपदं मध्योदात्तं स्यात्।
`गोवृषः' इति। `पृषु वृषु मृषु सेचने' (धा.पा.705,706,707), अत्र `उपपदमतिङ्' (2.2.19) इति समासः `गतिकारकोपपदात् कृत्' (6.2.139) इत्युत्तरपदाद्युदात्तत्वं स्यात्।
`सुस्तुतम्' इति। `सुः पूजायाम्' (1.4.94), `अतिरतिक्रमणे च' (1.4.95) इति स्वती कर्मप्रवचनीयसंज्ञौ। `अत्राव्ययस्वर एव भवति' इति। `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना।।

145. सूपमानात् क्तः। (6.2.145)
`सुपीतम्' इति। `घुमास्था' (6.4.66) इत्यादिसूत्रेणेत्त्वम्। `वृकावलुप्तम्' इति। `लुप्लृच्छेदने' (धा.पा.1431)। `शशप्लुतम्' इति। `च्युङ् जयुङ् प्रुङ् प्लुङ् गतौ' (धा.पा.955,956,957,958)। `सिंहविनर्दितम्' इति। `नर्द शब्दे' (धा.पा.56) सर्वत्र `कर्तृकरणे कृता बहलम्' (2.1.32) इति समासः। वृकैरिवावप्लुतमित्यादिर्विग्रहः।।

146. संज्ञायामनाचितादीनाम्। (6.2.146)
`उपहूतः' इति। ह्वेञो निष्ठा, `वचिस्वपि' (6.1.15) इत्यादिना संप्रसारणम्, `हलपः' (6.4.2) इति दीर्घः। `परिजग्धः' इति। `अदो जग्धिर्ल्यप्ति किति' (2.4.36) इत्यदेर्जग्धिरादेशः। `झषस्ततोर्धोऽधः' (8.2.40) इति घत्वम्। `कर्मणि क्तः' इति। भवतेरकर्मकत्वात् कर्मनिष्ठा नोपपद्यत इति सम्भूत इति कर्तरीयं निष्ठेति कस्यचिद्भ्रमः स्यात्, अतस्तन्निराकरणायाह--`सम्भूतः' इति। अनेकार्थत्वाद्धातूनां भवतिरत्र प्राप्तौ वर्तते। ये च प्राप्त्यर्थास्ते नियोगतः प्राप्त्यैव कर्मणा सकर्मका सकर्मका भवन्ति। यथा--`णीञ् प्रापणे' (धा.पा.901) इत्येवमादयः। तास्मात् प्राप्त्यर्थाद्भवतेः सम्भूत इत्यत्र कर्मणि क्त-। किं पुनः कारणं कर्मणि क्त इष्यते? इत्याह--`गतिरनन्तर इत्यत्र कर्मणीत्यनुवर्तते' (इति। ततः किम्? इत्याह--`तद्बाधनार्थं चेदम्' इति। `गतिरनन्तरः' (6.2.49) इत्यत्र हि कर्मणीत्यनुवर्तते। इदं च सूत्रं, तत् `गतिरनन्तरः' (6.2.49) इत्यस्यैव बाधनार्थम्। एवं चैतद्गतिस्वरस्य बाधकं भवति, यदि कर्मणि क्तो विहितः। तदन्तस्योत्तरपदस्यानेनान्तोदात्तत्वं विधीयते, नान्यथा। तस्मात् सम्भूत इत्यत्र कर्मणि क्तो द्रष्टव्य इत्यभिप्रायः। `धनुष्खाता' इति। `खन् अवदारणे' (धा.पा.878) `जनसनखनाम्' (6.4.42) इत्यात्तवम्। `कर्तृकरणे कृता बहुलम्' (2.1.32) इति समासः। एवं `कुद्दालखाता' इत्येवमादादपि। धनुःशब्दः `नब्विषयस्यानिसन्तस्य' (फि.सू.2.26) इत्याद्युदातद्तः। कुद्दालशब्दः `लघावन्ते' (फि.सू.2.42) इत्यादिना मध्योदात्तः। `हस्तिमृदिता' इति। `मृद क्षोदे' (धा.पा.1515), हस्तिशब्द `हस्ताज्जातौ' (5.2.133) इतीनिपरतययान्ततवादन्तोदात्तः।
`आस्थापितम्' इति। तिष्ठतेर्णिटच्, `अर्तिह्री' (7.3.36) इत्यादिना पुक्। `परिगृहीतम्' (इति। `ग्रहोऽलिटि दीर्घः' (6.2.37)। `निरुक्तम्' (इति)। `वच परिभाषणे' (धा.पा.1842), `वचिस्वपि' (6.1.15) इत्यादिना सम्प्रसारणम्, `चोः कुः' (8.2.30)। `प्रतिपन्नम्' इति। `पद गतौ' (धा.पा.1169), `रदाभ्याम्' (8.2.42), इति नत्वम्। `प्रश्लिष्टम्' इति। `ष्लिष आलिङ्गने' (धा.पा.1186)। `उपद्रुतम्' इति। `दु द्रु गतौ' (धा.पा.944),945) `स्थितम्' इति। `द्यतिस्यति' (7.4.40) इत्यादिनेत्त्वम्। `संहिता' इति। दधातेर्हिरादेशः।।

147. प्रवृद्धादीनां च। (6.2.147)
गतिस्वरे प्राप्त इदं वचनम्। `प्रवृद्धम्' इति `वृधु वृद्धौ' (धा.पा.759) `प्रयुता' [प्रयुंक्ताः--काशिका] इति। `युमिश्रणे' (धा.पा.1033)--`अवहितम्' इति। पूर्ववद्दधातेर्हिरादेशः। `खट्वारूढः' इति। `रुह बीजजन्मनि' (धा.पा.859), `झषस्ततोर्धोऽधः' (8.2.40), `ढो ढे लोपः' (8.3.13) `द्रलोपे पूर्वस्य दोर्घोऽणः' (6.3.111), `खट्वा क्षेपे' (2.1.26) इति समासः। असय `अहीने द्वितीया' (6.2.47) इति पूर्वपदप्रकृतिस्वरे प्राप्त इह पाठः। `कविशस्तः' इति। `शसु हिंसायाम्' (धा.पा.727), `कर्तृकरणे कृता बहुलम्' (2.1.32) इति समासः। अस्यापि `तृतीया कर्मणि' (6.2.48) इति पूर्वपदप्रकृतिस्वर एव।
`यानादीनाम्' इति। आदिशब्देन वृषादीनां ग्रहणम्। यानादीनामर्थानां य इह पाठः, स प्रवृद्धादीनांयानादिष्वर्तेषु प्रायो बाहुल्येन या वृत्तिस्तस्याः

प्रदर्शनार्थम्। न तु प्रवृद्धस्य यानवृषलयोरवार्थयोरन्तोदात्तत्वं भवति। प्रयुक्तशब्दस्य सक्तुष्वेवतीत्येवमादिषु विषयियमार्थः। तेन किं भविष्यति? इत्याह--`यानादिभ्योऽन्यत्रापि' इत्यादि। `विषयनियमार्थ इत्येके' इति। तेषामनेन यानादिभ्योऽन्यत्र न भवितव्यम्।

`असंज्ञार्थोऽयमारम्भः' इति। संज्ञायां पूर्वेणैव सिद्धत्वात्।

`आकृतिगणश्च प्रवृद्धादिर्द्रष्टव्यः' इति। कुत एत्? अकृतिगणतां तस्य सूचयितुमनुक्तसमुच्चयार्थस्य चकारस्येह करणात्; आकृतिगणत्वे यत् सिद्धं भवति, तद्दर्शयितुमाह--`पुनरुत्स्यूतं वासः' इत्यादि। `षिवु तन्तुसन्ताने' (धा.पा.1108) `चछ्वोः शूडनुनासिके च' (6.4.19) इत्यूठ्, यणादेशः। `पुनर्निष्कृतः' इति। `इदुदुपधस्य चाप्रत्यस्य' (8.3.41) इति विसर्जनीयस्य षत्वम्।।

148. कारकाद्दत्तश्रुतयोरेवाशिषि। (6.2.148)

`देवदात्तः' इति। `आशिषि लिङ्लोटौ' (3.3.163) इति वरतमाने `क्तिच्क्तौ च संज्ञायाम्' (3.3.174) इति क्तः। `दो दद् घोः' (7.4.46) इति ददादेशः, पूर्ववत् तृतीयासमासः। देवशब्दः पचादयजन्तत्वाच्चित्स्वरेणान्तोदात्त-। विष्णुशब्दोऽपि प्रातिपदिकस्वरेण। ब्रह्मशब्दो मनिन्प्रतययान्तत्वादाद्युदात्त इत्युक्तम्।

`सम्भूतो रामायणः' इति। कारकादित्यनुच्यमाने `गतिकारकोपपदात् कृत्' (6.2.139) इत्यधिकाराद्यतैव कारकान्नियमो भवत्येवं गतेरपि स्यात्, कारकग्रहणे तु सति न भवति। तेन गतेः परस्य `संज्ञायामनाचितादीनाम्' (6.2.146 इत्यनेन) अन्तोदात्तत्वं भवेदेव। अस्मिंस्तूच्यमाने सत्येष विषयो न भवति; नियमेन व्यावार्तितत्वात्। `तृतिया कर्मणि' (6.2.48) इति पूर्वपदप्रकृतिस्वर एव भवति।

`एककारकरणं किम्' इति। सिद्धे विधिरारब्यमाणोऽन्तरेणाप्येवकारकरणं नियमार्थो भविष्यतीत्यभिप्रायः। `कारकावधारहणम्' इत्यादि। असति ह्येवकारे कारकादेवेत्येषोऽपि नियमः स्यात्। तता चैवकारन्ततोऽन्यत्रावधारणमिति दत्तश्रूतावदारणं स्यात्--कारकादेव दत्तश्रुतयोरिति। एवं च कारकाद्दत्तश्रुतयोरनन्तरं क्रियमाणे कारकावधारणमिष्टं भवति, न दत्तश्रुतावदारणमिष्टम्। तेनैवकारः कृतः। किं पुनः कारणं कारकावधारणमिष्यते, न दत्तश्रुतावधारणम्? इत्याह--`अकारकादपि हि' इत्यादि। `देवैः खाता देवखाता' इति। नात्राशीर्विद्यते, तेनाशिषीति वचनान्नियमो न भवति। ततश्च `संज्ञायाम्' (6.2.146) इत्यादिनान्तोदात्तत्वं भवत्येव।

`कारकाद्दत्तश्रुतयोराशिष्येवेत्ययमप्यत्र नियमः' इति। कथं पुनरेकेन योगेन हि नियमद्वयं लभ्यते, एकः पुनरत्र योग इति? यतैव हि श्वेतो धावतीति कश्चित् तन्त्रेण वाक्यदवयमुच्चारयति तथेहाप्याचर्यस्तन्त्रेण वाक्यमुच्चारितवान्। तत्रैकेन योगेन कारकाद्दत्तश्रुतयोरेवाशिषीत्येव नियमो भवति, अपरेण तु कारकाद्दत्तश्रुतयोराशिष्येवेत्येष-. तेनाहतो नदति देवदत्त इत्यत्रानाशिषि न भवति। `देवदत् इति कस्यचिच्छङ्खस्य नाम' इति यदृच्छाशब्दतां देवदत्तस्य दर्शयन्नाशीरिह न दत्त इति प्रकाशयति।।

149. इत्थम्भूतेन कृतमिति च। (6.2.149)

इतिकरणोऽर्थनिर्देशार्थः। `आपन्नः' इति। प्राप्त इत्यर्थः। `सुप्तप्रलपितम्' इति। `रप लप व्यक्तायां वाचि' (धा.पा.401,402), अत्र सुप्तत्वं प्रकारमापन्नम्, तेन प्रलपितं कृतम्, तत्र समासो वर्तते। `उन्मत्तप्रलपितम्' इति। अत्राप्युन्मत्तत्वं प्रकारमापन्नं तेन प्रलपितं कृतम्। `प्रमत्तगीतम्' इति। अत्रापि प्रमत्तत्वं प्रकारमापन्नं तेन गीतं कृतम्। `कै गै शब्दे' (धा.पा.916,917), `घुमास्था' (6.4.66) इत्यादिसूत्रेणेत्त्वम्। `विपन्नश्रुतम्' इति। अत्रापि विपन्नत्वं प्रकारमापन्नं तेन श्रुतं कृतम्। सर्वत्र `कर्त्तृकरणे कृता बहुलम्' (2.1.32) इति समासः। तत्र सुप्तशब्दः प्रत्ययस्वरेणान्तोदात्तः। प्रलपितशब्दो यदि कर्मणि निष्ठा, ततः `गतिरन्तरः' (6.2.49) इति गतिस्वरेणाद्युदात्तः; अथ भावे, ततस्थाथादि (6.2.144) स्वरेणान्तोदात्तः। एवमुत्पन्नप्रकारा आपन्नविपन्नादिशब्दा अपि थाथादिस्वरेणै(6.2.144) वान्तोदात्ताः। `गतिरनन्तरः'(6.2.49) इत्येतत्त्विह न प्रवर्तते; तत्र कर्मणीत्यनुवृत्तेः. इहाकर्मकाद्धातोः कर्मणि क्तप्रत्ययस्यानुपपत्तेः। गीतश्रुतशब्दौ सुप्तशब्दवदन्तोदात्तौ। अथ कथमेतान्युदाहरणाध्युपलभ्यन्ते, यावतेत्यम्भूतेन कृतमित्येतस्मिन्नर्थ एतत् कार्यमुच्यते, न चायमत्रार्थः सम्भवति, प्रलपितादीनामकृतार्थत्वात्? प्रकृते प्रलपनादौ करोतेरप्रवृत्तेः। अभूतप्रादुर्भाव एव हि करोतिर्वर्तते, न प्रलपनादौ। कस्मान्न प्रलपनादिकृतम्? इत्येतच्चोद्यमपाकर्त्तुमाह--`कृतमिति क्रियासामान्याम्' इत्यादि। न हि करोतिरभूतप्रादुर्भाव एव वर्तते? किं तर्हि? क्रियासामान्येऽपि। तच्च क्रियासामान्यं प्रलपनादप्यस्ति। तेन तेन प्रलपनाद्यपि कृतं भवति। `तृतीया कर्मणीत्यस्य' इति। पूर्वपदप्रकृतिस्वरभाव इति। यदीत्यादिना यदा भावे निष्ठा, तदास्यानुपयोगं दर्शयति।।

150. अनो भावकर्मवचनः। (6.2.150)

`कारकात्' (6.2.148) इति वर्तते, `अनः' इति प्रत्ययग्रहणपरिभाषया (पु.प.वृ.44) तदन्तस्य ग्रहणं विज्ञायते? इत्याह--`अनप्रत्ययान्तम्' इत्यादि। `ओदनभोजनम्' इत्यादौ सर्वत्र षष्ठीसमासः। षष्ठी तु कृद्योगलक्षणा कर्मणि। `राजभोजनाः' इत्यादौ तु कर्तरि। ओदनशब्दः `लघावन्ते' (फि.सू.2.42) इत्याद्युदात्तः। भोजनमित्यादिकं तूत्तरपदं लित्स्वरेणाद्युदात्तम्। पयःशब्दः `नब्विषयस्य' (फि.सू.2.42) इत्याद्युदात्तः। भोजनमित्यादिकं तूत्तरपदं लित्स्वरेणाद्युदात्तम्। पयःशब्दः `नब्विषयस्य' (फि.सू.2.26) इत्याद्युदात्त एव। चन्दनप्रियङ्गुकाशब्दो द्वन्द्वः, तेन समासस्वरेणान्तोदात्तः। `लेपनम्' इति।

`लिप उपदाहे' (धा.पा.1433) [लिप उपदेहे--धा.पा.] इत्यस्यैवं रूपम्। राजशब्द उक्तस्वरः। आच्छादनशब्दः `छद अपवारणे' (धा.पा.1935) इत्यस्य रूपम्।
`कर्मणि च येन' इत्यादिनैकेनैव योगेन भाववचनः कर्मवचनश्च ल्युङ्भवतीति दर्शयति।
`हस्तहार्यम्' इति। हस्तशब्दः `हसिमृग्रिणवामिदमिपूधुर्वीभ्यस्तन्' (द.उ.6.7.;पं.उ.3.86) [हसिमृग्रिण्वमिदमितमिलूपूधूर्विभ्यस्तन्--द.उ; हसिमृग्रिण्वामिदमलूपूधूर्विभ्यस्तन्--पं.स.] इति स्तत्प्रत्ययान्तः, तेनाद्युदात्तः,। हार्यशब्दस्तु `ऋहलोर्ण्यत्' (3.1.124) इति ण्यदन्तस्तित्स्वरेणान्तस्वरितः।
`दन्तधावनम्' इति। `धावु गतिशुद्धोः' (धा.पा.601) इत्यस्मात्करणे ल्युट्। दन्तशब्दः `स्वाङ्गशिटाम्' फि.सू.2.29) इत्याद्युदात्तः।
`निदर्शनम्' इति। दृशेर्भावे ल्युट्। `अवलेखनम्' इति। अत्रापि लिखेः।
`सर्वेषु प्रत्युदाहरणेषु' इत्यादि। एतेन `गतिकारकोपपदानां कृत् (6.2.139) इत्यस्यायमपवाद इति दर्शयति।।

151. मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः। (6.2.151)

मन्क्तिन्निति प्रत्ययग्रहणम्। तत्र प्रत्ययग्रहणपरिभाषया (पु.प.वृ.44) तदवतस्य ग्रहणं विज्ञायते, इत्याह--`मन्नन्तं क्तिन्नन्तञ्च' इति। रथवर्त्मेत्यादयः षष्ठीसमासाः। रथशब्दः क्थन्प्रत्ययान्त आद्युदात्त इत्युक्तम्। `वृतु वर्तने' (धा.पा.748) इत्यस्मान्मनिन्। तेन वर्त्मशब्द आद्युदात्तः। शकटशब्दः पयःशब्दश्च नित्त्वादाद्युदात्तः. पाणिन्यापिशलिशब्दाविञन्तत्वात्। कृतिशब्दोऽपि क्तिन्नन्तत्वात्। करणसाधनश्चायं व्याख्यानशब्दो ल्युङन्तः। कृत्स्वरेण मध्योदात्तः। छन्दःशब्दः `सर्वधातुब्योऽसुन्' (पं.उ.4.188) [`असन्' इत्येव सूत्रम्--द.उ.] इति प्रत्ययग्रहणम्। तत्र कृते `चन्देरादेश्च च्छः' (पं उ.4.218) इत्यसुन्प्रत्ययान्तत्वादाद्युदात्तः। अयन्त्यनेनेत्ययनम्, ऋचामयनम्। ऋचामिति कर्णि षष्ठी। ऋगयनशब्दः कृत्स्वरेण मद्योदात्तः। `राजशयनम्' इत्यादि। सेरतेऽस्मिन्निति शयनम्, आसतेऽस्मिन्नित्यासनम् ताभ्यां राजब्राह्मणशब्दयोः षष्ठीसमासः। राजब्राह्मणशब्दाबुक्तस्वरौ। शयनासनशब्दौ लित्स्वरेणाद्युदात्तौ। अत्र कृद्योगलक्षणा पूर्ववदेव कर्त्तरि षष्ठी। एवं `गोस्थानमश्वस्थानम्' इत्यत्रापि। गवाश्वशब्दावुक्तस्वरौ। तिष्ठत्यस्मिन्निति स्थानम्, लित्स्वरेणाद्युदात्तम्।
`ब्राह्मणयाज्यः' इत्यादौ कृद्योगलक्षणा कर्मणि षष्ठी। याजकादिषु ये ण्वुलन्ताः पठ्यन्ते, तेषु येऽनुपसर्गाः--याजकपूजकस्नापका इति, त आद्युदात्तः। ये तु सोपसर्गाः--परिवेषकाध्यापकोद्वर्त्तकोत्सादका इति, ते कृत्स्वरेण मध्योदात्ताः। होतभर्तृशब्दो तृन्नन्तौ प्रयोजयतः। यौ तु तृजन्तौ तयोः कृत्स्वरेणान्तोदात्त्वं सिद्धम्। `गोक्रीतः, अश्वक्रीतः' इत्यादि। `कर्तृकरणे कृता (2.1.32) इति समासावेतौ। क्रीतशब्दः प्रत्ययस्वरेणान्तोदात्तः।
`कृत्स्वरापवादो योगः' इति। क्रीतशब्दादन्येषु मन्क्तिन्व्याख्यानादिषु। क्रीतशब्दे तु `तृतीया कर्मण' (6.2.48) इत्यस्येति पूर्वपदप्रकृतिस्वरस्य।
`व्याख्यानशयनासनस्थानानामभावकर्मार्थ ग्रहणम्' इति। भावकर्मवचनस्यानन्तस्य `अनो भावकर्मवचनः' (6.2.150) इत्यनेनैव सिद्धत्वात्। `प्रकृतिः, प्रहृतिः' इति। अत्र `तुल्यार्थ' (6.2.2) इत्यादिना पूरवपदस्य प्रकृतिस्वरत्वमेव भवति। गतिसमासावेतौ।।

152. सप्तभ्याः पुण्यम्। (6.2.152)

`अध्यनपुण्यम्' इत्यादि। अध्ययनशब्दो ल्युडन्तः कृत्स्वरेण मध्योदात्तः। पुण्यम् `नब्विषयस्य' (फि.सू.2.26) इत्याद्युदात्तम्। विद्यतेऽनेऽनेति वेदः, घञ्। तेन वेदशब्दश्चाद्युदात्तः।
`तत्पुरुषे तुल्यार्थ' इत्यादि। एतत् `उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' (है.प.पा.103) इत्येवं पक्षमाश्रित्योक्तम्। इदानीं व्युत्पत्तिलक्षणमाश्रित्याह--
`उणादीनां तु' इत्यादि। व्युत्पत्तिपक्षे हि पुण्यशब्दः `पुञो यण्णुग् ह्रस्वश्च' (पं.उ.5.15) इति यत्प्रत्ययान्तो व्युत्पाद्यते। तत्र यदीद नारभ्येत तदा `गतिकारक' (6.2.139) इति कृत्स्वरेणाद्युदात्तोऽध्ययनमित्यादौ पुण्यशब्दस्य स्यात्। तस्मात् तदपदादोऽयमन्तोदात्तविषिरित्यभिप्रायः।
`वेदेन पुण्यं वेदपुण्यम्' इति। व्युत्पत्तिपक्षे `तृतीया' (2.1.30) इति योगविभागात् समासः। पूर्वपदपरकृतिस्वरत्वञ्च। अव्युत्पत्तिपक्षे `कर्तृकरणे कृता' (2.1.32) इति समासः, कृत्स्वरेण पुण्यशब्दस्याद्युदात्तत्वं च।।

153. ऊनार्थकलहं तृतीयायाः। (6.2.153)

`माषोनम्' इति। `पूर्वसदृश' (2.1.31) इत्यादिना तृतीया समासः। एवं `कार्षापणोनम्' इत्यादावपि। `कष खष शिष जष झष शष वष मष' (धा.पा.685-692) इत्यस्माद्घञ्, तेन माषशब्द आद्युदात्तः। `इण्सिञ्जिदीङुष्यविभ्यो नक्' (द.उ.5.36) इति, तेनोनशब्दोऽन्तोदात्तः। कार्षस्यापणः कार्षापणः। कार्षापणशब्दः समासस्वरेणान्तोदात्तः। विगतः कलोऽस्येति विकलः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन विकलशब्द आद्युदात्तः। `असिकलहः' इति। `अच इः' (द.उ.1.67) इति वर्तमाने `खनिकष्यञ्ज्यसि' (द.उ.1.68) इत्यादिना सिन्तोदात्तः `कल गतौ' (धा.पा.1865), अस्मात् पचाद्यच्। कलयतीति कलः, कलं हन्तीति `अन्येष्वपि दृस्यते' (3.2.101) इति डः। तेन कलहशब्दोऽन्तोदात्तः।
`अत्र केचित्' इत्यादि। तर्ह्यर्थ इति स्वरूपग्रहणम्, एवं सत्यूनशब्देऽपि स्वरूपग्रहणं प्रसज्येत्, ततश्च तदर्थानामन्येषां ग्रहणं न स्यात्? इत्यत आह--
`उनशब्देनैव' इत्यादि। ऊनशब्दोऽन्यमतानां विशेषं दर्शयति। अन्ये हि--अर्थग्रहणे नानर्थकानां ग्रहणं भवतीति मन्यन्ते। केचित्तु-
ऊनशब्देनैवार्थनिर्देशार्थेनार्थनिर्देशः प्रयोजनं यस्य स तथोक्तः। शब्दप्रधाने हि निर्देशे स्वरूपग्रहणं [स्वरूपं ग्रहणम्--इति मुद्रितः पाठः] भवतीत्युक्तम्। इह

चोन इत्यर्थप्रधाननिर्देशः। तेनोनशब्दोऽर्थनिर्देशार्थः' इत्याहुः। तस्मात् तत्रैव तदर्थानां ग्रहणम्। इतिकरणो हेतौ। यस्मादूनशब्देनैवार्थनिर्देशार्थन तदर्थानां ग्रहणम्, तस्मादत्र केचिदर्थ इति स्वरूपग्रहणमिच्छन्ति। `धान्यार्थः' इति। `तृतीया तत्कृतार्थेन' (2.1.30) इति समासः। `धने धान्ये' (धा.पा.1104), अस्माण्ण्यत्। धान्यमन्तस्वरितम्। अथ धाने साधु धान्यम्, `प्राग्घिताद्यत्' (4.4.75) तेन `यतोऽनावः' (6.1.213) इति धान्यमाद्युदात्तम्। अत्रार्थशब्दः `प्रामादीनाञ्च' (फि.सू.2.38) इत्याद्युदात्तः।

तृतीयाग्रहणं किमर्थम्? अनूनम्, अकलह इत्यत्र मा भूदिति चेत्? नैतदस्ति;इह हि प्रतिपदोक्तपरिभाषयो(व्या.प.3)नार्थकलहादीनां प्रतिपदोक्तो यः समासः स एव परिगृह्यते। तत् किमनूमकलह इत्येतन्निवृत्यर्थेन तृतीयाग्रहणेन? इत्यत आह--`प्रतिपदोक्तम्' इत्यादि। गतार्थम्।

154. मिश्रं चानुपसर्गमसन्धौ। (6.2.154)

`गुडमिश्राः' इति। पूर्ववत् `पूर्वसदृश' (2.1.31) इत्यादिना समासः। गुडशब्दः `इगुपध' (3.1.135) इति `गुड रक्षायाम्' (दा.पा.1370) इत्यस्मात् कः, तेनान्तोदात्तः। `स्फायितञ्चि' (द.उ.8.31) इत्यादिना रग्विधीयमानो बहुलवचनान् मिशेरपि रग्भवति, तेन मित्रशब्दोऽन्तोदात्तः। तिलशब्दः `तृणधान्यानाञ्च द्व्यषाम्' (फि.सू.2.27) इत्याद्युदात्तः।

प्रमिश्रम्, सन्मिश्रमित्यस्य प्राप्नोति, अतस्तन्निवृत्तयेऽनुपसर्गग्रहणं क्रियते? इत्याह--`इह' इत्यादि। अथ वा--मिश्रशब्देन तृतीयासमास उच्यमानः कथं सोपसर्गे लभ्यते? इत्याह--`इह' इत्यादि। यदि तदिहानुपसर्गग्रहणं क्रियते, तर्ह्यन्यत्र मिश्रशब्दग्रहणे सोपसर्गस्य ग्रहणं नास्तीतीहानुपसर्गग्रहणमनर्थकं स्यात्। `तेन' इत्यादि। ज्ञापनस्य प्रयोजनं दर्शयति।

`ब्राह्मणमिश्रो राजा' इति। `पूर्वसदृश'(2.1.31) इत्यादिनैव समासः। `ब्राह्मणैः सह संहितः' इत्यनेन प्रत्युदाहरणे सन्धिं दर्शयति। `ऐकार्थमापन्नः' इति। अनन्तरोक्तमेवार्थं विस्पष्टीकरोति। एकः=अभिन्नोऽर्थो यस्य स एकार्थः, तद्भाव ऐकार्थ्यम्। तदापन्नः प्राप्त इत्यर्थः।

कथं पुनर्ज्ञायते--सन्धिशब्दस्यायमर्थः? इत्याह--`सन्धिः' इत्यादि। पणबन्धः=परिभाषणम्--यदि मे भवानिदं कुर्यात् ततोऽहमपि भवत इदं करिष्यामीत्येवञ्जातीयकम्। तेन पणबन्धेन यदैकार्थ्यं तत् सन्धिरुच्यते। तस्मात् प्रत्युदाहरणे सन्धौ सति ब्राह्मणैः सह संहित ऐकार्थ्यमापन्नः--इत्येषोऽर्थो विज्ञायते। `केचित् पुनराहुः' इत्यादि। गृह्यमाणो विशेषो यस्यां प्रत्यासत्तौ सा गृह्यमणविशेषा सन्धिरिति केचिदेवमाहुः, तत्रैव स्यात्। एवंविधः सन्धिः प्रत्युदाहरणे नास्तीत्यत आह--`अत्र राज्ञो ब्राह्मणौ सह' इत्यादि। यद्यपि राज्ञा ब्राह्मणैः सह प्रत्यासत्तिः=देशसामीप्यमस्ति, तथापि सत्यामपि तस्यां मूर्तिविभागो मूर्तिविशेषो राज्ञो ब्राह्मणानाञ्च गृह्यत इत्येव। इतिकरणो हेतौ। यत एवम्, तेन ब्राह्मणैः सह मिश्रो राजेति प्रतयुदाह्रियते।

`उदाहणेष्वविभागापत्तिरेव' इति। एतेन गृडमिश्रा इत्यादौ तु सन्धेरभावं दर्शयति। यथा हि विलीनेन मिश्रा धानादयो भवन्ति, तथास्य गुडाः, तेषां च मूर्त्तिविभागो न गृह्यते; न तत्र सन्धेरविभागापत्तिरिति। न विभागोऽविभागः, तस्यापत्तिः=प्राप्तिः। यदा पणबन्धेनैकार्थ्यं सन्धिस्तदोदहरणेषु तस्याभावो वेदितव्यः स हि परिभाषणविशेषणलक्षणः। न चासौ गुडमिश्रेषु धानास्वचेतनेषु विद्यते; तस्य प्राणिधर्मत्वात्।।

155. नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः। (6.2.155)

`सम्पाद्याद्यर्थास्तद्धिताः' इति। तद्धितप्रत्ययाः। तस्मात् प्रत्ययग्रहणपरिभाषया (पु.प.वृ.44) तदन्तविधिर्ज्ञायते। `गुणप्रतषेधे' इति। यस्मिन् वाक्यार्थे तद्धित उत्पद्यते स तद्धितस्य प्रवृत्तिनिमित्तं विधीयते--यथोक्तम्--`उपकारि सिद्धमङ्गम्, साध्योऽनुपकारकस्त्वङ्गी' इति। अङ्गी, गुण इति पर्यायावेतौ। गुणस्य प्रतिषेधो गुणप्रतिषेधः। एतचच नञो विशेषणम्, गुणप्रतिषेधे चेन्नञ्वर्तत इत्यर्थः। `कार्णवेष्टकिकम्' इति। कर्णवेष्टकभ्यां शोभत इत्यर्थः। `सम्पादिनि' (5.1.99) इति `प्राग्वतेष्ठञ्' (5.1.18), न कर्णवेष्टकिकमकार्णवेष्टकिकमिति। अत्र कर्णवेष्टकाभ्यां सम्पद्यत इति वाक्यार्थे तद्धितान्तस्य प्रवृत्तिनिमित्तं यो गुणस्तस्य प्रतिषेन नञ्वर्तते। तत् पुनः प्रवृत्तिनिमित्त्वम्। `छैदिकः' इति। छेदमर्हतीति `आर्हादगोपुच्छ' (5.1.19) इत्यादिनां ठक्। `वत्सीयः' इति। `प्रक्क्रीताच्छः' (5.1.1)। `सान्तापिकः' इति। `तस्मै प्रभवति सन्तापादिभ्यः' (5.1.101) इति `प्राग्वतेष्ठञ्' (5.1.18)। `विगार्दभरथिकः' इति। `तदर्हति' (5.1.63) इत्यार्हीयष्ठञ्। विशब्देन प्रादिसमासः। विशब्दोऽयमिह गार्दभरथिक इत्यस्य गुणप्रतिषेधे वर्तते। अत्र `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना पूर्वपदस्य प्रकृतिस्वर एव भवति। एवमुत्तरत्रापि। नञ्यसति, अस्मिन् प्रत्युदाहरणेऽपि यत् पूर्वपदं प्रकृतिस्वरः प्रत्युदाहार्यः।

`गार्दभरथिकदन्योऽगार्दभरथिकः' इति। अत्र गार्दभरथिकादन्यत्र नञ्वर्तते, न तु गार्दभरथिकत्वस्य प्रतिषेधे; पर्युदासत्वादस्य। `गुण इति तद्धितार्थप्रवृत्तिनिमित्तम्' इत्यादि। तद्धितार्थः--कर्णवेष्टकाभ्यां सम्पादीत्येवमादिवाक्यार्थः, तत्र यत् प्रवृत्तिनिमित्तं तद्धितान्तस्य शब्दस्य सम्पादित्वादि तत् गुण इत्युच्यते। आदिशब्देन तदर्हत्वादेर्ग्रहणम्। तद्धितान्तमलमर्थञ्च परिग्रह्यते। `तत्प्रतिषेधः' इत्यादि। तस्य प्रतिषेधो यत्र समास उच्यते तत्रायं विधिः। कथं तसय गुणस्य प्रतिषेध उच्यते? इत्याह--`कर्णवेष्टकाभ्यां न सम्पादि मुखम्' इति। एतेन सर्वेण प्रसज्यपरतिषेधेऽयं विधिः, न पर्युदास इति दर्शयन्नगार्दभरथिक इत्यतर प्रत्युदाहरणेऽस्य विधेरभावं दर्शयति।

`पाणिनीयम्' इति। `वृद्धाच्छः' (4.2.114। `अपाणिनीयः' इति। अत्राध्येतर्यर्थे यस्तद्धितस्तदन्तमुत्तरपदम्। न सम्पाद्यर्हहिताद्यमलमर्था ये तद्धितास्तदन्तम्। `वोढा' इति। पूर्ववद् धत्वढत्वष्टुत्वढलोपा विधेयाः, `सहिवहोरोदवर्णस्य' (6.3.112) इत्योत्त्वम्। `अवोढा' इति। अत्राहार्थो य कृदतः स उत्तरपदम्। तेन तद्धितगरहणादन्तोदात्तत्वमुत्तरपदस्य न भवति। अव्ययपूर्वपदप्रकृतिस्वर एव भवति। पूर्वपदप्रकृतस्वरापवादो योगः। एवमुत्तरेऽपि योगा

द्रष्टव्याः। `प्राग्बहुव्रीहाविदमेतत्' (6.2.162) इत्यादियोगात्।।

156. ययतोश्चातदर्थे। (6.2.156)
`पाश्या' इति। प्रत्ययस्वरेणान्तोदात्तत्वम्। `अदन्त्यम्' इति। `यतोऽनावः' (6.1.213) इत्याद्युदात्तत्वम्। एवम्--`अकर्ण्यम्' इत्येतदपि तद्वदेवाद्युदात्तम्। `पाद्यम्' इति। `पादार्धाभ्याञ्च' (5.4.25) इति यत्।
`दन्त्यादन्यददनत्यम्' इति। अत्र दन्त्यादन्यत्र नञ् वर्तते, न तु तदन्तस्य प्रतिषेदे। `अदेयम्' इति। `अर्हे कृत्यतृचश्च' (3.3.169) इत्यत्रार्हार्थे यत्, `ईद्यति' (6.4.65) इतीत्त्वम्। अथेह कस्मान्न भवति--वामदेवेन दृष्टं साम वामदेव्यम्? इत्यत आह--`निरनुबन्धक' इत्यादि। गतार्थम्।।

157. अच्कावशक्तौ। (6.2.157)
`अपचः' इति। पचाद्यच्। `अविक्षिपः' इति। `इगुपधज्ञाप्रीकिरः कः' (3.1.135) `अपचोऽदीक्षितः' इत्यादि। दीक्षितपरिव्राजकौ शास्त्रे प्रतिषिद्धत्वान्न पचतः; न त्वशक्तत्वात्। तेनात्र व्रतं गम्पते, न त्वशक्तिः।।

158. आक्रोशे च। (6.2.158)
अत्राक्रोशे दोषवचनमाक्रोशः। अगम्यमानायामप्यशक्तौ यथा स्यादिति वचनम्।।

159. संज्ञायाम्। (6.2.159)
`अदेवदत्तोऽपज्ञदत्तः' इति। देवदत्तयज्ञदत्तशब्दावन्तोदात्तौ। प्रातिपदिकस्वरेण। यो देवदत्तः सन् तत् कार्य न करोति स एवमाक्रुश्यते। एवं `अविष्णुमित्त्रः' इत्यत्रापि वेदितव्यम्।।

160. कृत्योकेष्णुच्चार्वादयश्च। (6.2.160)
कृत्य, उक, इष्णुजिति प्रत्ययग्रहणम्। तत्र प्रत्ययग्रहणपरिभाषया (पु.प.वृ44) तदन्तोपस्थापनं भवति। चार्वादीनि प्रातिपदिकान्येव। `अकर्त्तव्यम्' इति। यदा तव्यदन्तस्तदा कर्तव्यशब्दोऽन्तस्वरितः। यदा तव्यान्तस्तदा मध्योदात्तः। `अकरणीयम्' इति। अनीयर्प्रत्ययान्तत्वात् `उपोत्तमं रिति' (6.1.217) इति रित्स्वरेण मध्योदात्तः करणीयशब्दः। `अनागामुकम्, अनपलाषुकम्' इति। `लषपतपद' (3.2.154) इत्यादिनोकञ्। आगामुकापलाषुकशब्दौ कृत्स्वरेण मध्योदात्तौ। `अनलङ्करिष्णुः' इति। `अलंकृञ्' (3.2.136) इत्यादिनेष्णुच्। अलङ्करिष्णुशब्दश्चित्स्वरेणान्तोदात्तः। एवं `निराकरिष्णु' शब्दोऽपि। एकानुबन्धकग्रहणपरिभाषया(व्या.प.42)इष्णुज्ग्रहणे द्व्यनुबन्धकस्य खिष्णुचो ग्रहणेन न भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्त्तुमाह--`इष्णुज्ग्रहणे कर्तरि भुवः' (3.2.57) खिष्णुजित्यस्य द्व्यनुबन्धकस्यापि ग्रहणं भवति' इति वक्ष्यमाणेन सम्बन्धः। अत्रैव कारणमाह--`इकारादेर्विधानसामर्थ्यात्' इति। खिष्णुच इकारादेर्विधानस्यैतदेव प्रयोजनम्--इह सूत्रे सामान्येन ग्रहणं यथा स्यात्, अन्यथा तदपार्थकं स्यात्, उदात्तत्वाद्भवतेः ततः परस्य खिष्णुच इटैवेकारादित्वत्।
`अचारुः' इत्यादि। `दृसनिजनिचरिभ्यो ञुण्' (द.उ.1.88) [दृसनिजनिचरिचटिरहिभ्यो ञुण्--द.उ; दृ.उ; दृसनिजनिचरिचटिभ्यो ञुण्--पंउ.] तेनाद्युदात्तश्चारुशब्दः। साद्युशब्दोऽन्तोदात्त; `कृवापा' (द.उ.1.86) इत्यादिनोण्प्रत्ययान्तत्वात्। युधा चरति यौधिकः, `प्राग्वहतेष्ठक्' (4.4.1) `कितः' (6.1.165) इत्यन्तोदात्तः। `अनङ्गमेजयः' इति। अव्ययस्वरेणाद्युदात्तः। अत्र द्वितोये नञ्समासे समासान्तोदात्तत्वमिति नञ्समासः स्यात्। `अत्रापि' इत्यादि। कस्माच्छब्दस्य नञ उत्तरस्याद्युदात्तत्वविधानात्। अत्रापि द्वितीयेन नञ्समासेनान्तोदात्तत्वमिति। वर्तमान, वर्धमान--इत्येदमादयः शानजन्तत्वादन्तोदात्ताः। विकारसदृशशब्दः समासस्वरेणान्तोदात्तः। गृहपतिकशब्दः `संज्ञायां कन्' (5.3.87) इति कन्नन्तत्वादाद्युदात्तः। `वदेरान्यः' (द.उ.8.9), वदान्यशब्दः प्रत्ययस्वरेण मध्योदात्तः।।

161. विभाषा तृन्नन्नतीक्ष्णशुचिषु। (6.2.161)
तृन्निति प्रत्ययग्रहणम्, तेन पूर्ववत् तदन्तस्योपस्थानम्। अन्नादीनि प्रातिपदिकानि। `अकर्त्ता' इति। ताच्छीलिकस्तृन्। तेन नित्स्वरेणाद्युदात्तः कर्त्तृशब्दः। अन्नशब्दोऽपि `नब्विषयस्य' (फि.सू.2.26) इति। `कृत्यसूभ्यां क्स्नः' (द.उ.5.49) इति `तिजेर्दीर्घश्च' (द.उ.5.50) इति तीक्ष्णशब्दोऽन्तोदात्तः। `इन्' (द.उ.1.46) इति वर्त्तमाने `इगुपधातु कित्' (द.उ.1.48), तेन शुचिशब्द आद्युदात्तः।।

162. बहुवरीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने। (6.2.162)
`प्रथमपूरणयोः' इति। प्रथमे स्वरूपग्रहणम्। पूरणग्रहणे पूरणेऽर्थे ये प्रत्यया विहितास्ते गृह्यन्ते, प्रथमसाहचर्यात्। अथ वा--पूरणग्रहणं स्वर्य्यते, स्वरितेन चाधिकारगतिर्भवति। तेन `तस्य पूरणे डट्'(5.2.48) इत्यधिकृत्य ये प्रत्यया विहितास्तेषां ग्रहणं भवति। `इदम्प्रथमः' इति। प्रथमोऽन्तोदात्तः। `प्रथेरमत्'

(द.उ.7.46) इत्यमच्परत्ययान्तत्वात्। इदमादयस्त्यदादिष्वन्तोदात्ता निपात्यन्ते; `इदन्द्वितीयः इदन्तृतीयः' इति। द्वेस्तीयः' (5.2.54) `त्रेः सम्प्रसारणं च' (5.2.55) इति तीयप्रत्ययान्तत्वान्मध्योदात्तौ द्वितीय तृतीयशब्दौ।
`अनेन प्रथम इदं प्रथमः' इति। अत्र `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना पूर्वपदप्रकृतिस्वर एव भवति। `यत्प्रथमः' इति। यत् प्रथममेषामिति बहुव्रीहरिः। अत्र `बहुव्रीहौ प्रकृत्या' (6.2.1) इति पूर्वपदप्रकृतिस्वर एव भवति। एवमुत्तरेष्वप्यस्मिन् बहुव्रीह्यधिकारे प्रत्युदाहरणेषु वेदितव्यम्। `इदं प्रधाना इत्यर्थः' इति। एतेनान्तरोक्ते प्रत्युदाहरणे प्रथमशब्दः प्रधानवचनः, न त्वेकसंख्यावचन इति दर्शयन् गणानाभावं दर्शयति।
`उत्तरपदस्य' इत्यादि। इह सूत्रे `प्रथमपूरणयोः' इति त्वन्यविभक्त्योरुत्तरपदनिर्देशः कृतः, न बहुव्रीहिनिर्देशः कृतः। तेनोत्तरपदस्यैव कार्यित्वम्, न बहुव्रीहेः। ततश्च यदा कबुत्पद्यते तदा `कपि पूर्वम्' (6.2.173) अन्तोदात्तं भवति। कप्प्रत्ययो हि [`कप्रत्ययो हि'--मुद्रितः पाठः] समासाधिकारे विहितत्वात् समासस्यैवान्तौ भवति, नोत्तरपदस्य। न ह्युत्तरपदं समासः, तेन `कबुत्तरपदक्रमेण गृह्यते' इत्युत्तरपदस्यान्तोदात्तत्वं विधीयमानं कपो न भवति, किं तर्हि? पूर्वस्य। `इदम्प्रथमकाः' इति। `शेषाद्विभाषा' (5.4.154) इति कप्। `बहुव्रीहौ परकृत्या' (6.2.1) इति पूर्वपदप्रकृतिस्वरापवादौ योगः। एवमुत्तरेऽपि बहुव्रीह्यधिकारेऽस्मिन् योगा द्रष्टव्याः।।

163. संख्यायाः स्तनः। (6.2.163)
`द्विस्तना, त्रिसतना' इति। द्वित्रिशब्दौ प्रातिपदिकस्वरेणान्तोदात्तौ। `स्तनगदी देवशब्दे' (धा.पा.1859,1860) चुरादिरदन्तः, तस्माद्घञ्, तेन स्तनशब्द आद्युदात्तः। `चतुःस्तना' इति। `चरेरुरन्' (द.उ.8.78) इत्युरन्प्रतययान्तत्वाच्चतुःशब्द आद्युदात्तः।
दर्शनीयशब्दोऽनीयर्प्रत्ययान्तः `उपीत्तमं रिति' (6.1.217) इति मध्योदात्तः। `द्विशिराः' इति। शिरःशब्दः `नब्विषयस्य' (फि.सू.2.26) इत्याद्युदात्तः।।

164. विभाषा छन्दसि। (6.2.164)

165. संज्ञायां मित्त्राजिनयोः। (6.2.165)
`देवमित्त्रो ब्रह्ममित्त्रः' इति। देवब्रह्मशब्दावुक्तस्वरौ। `अमिचिमिदिशसिभ्यः क्त्रः' (द.उ.8.86) इति मित्त्रशब्दोऽन्तोदात्तः। `वृकजिनः' इति। प्रकृतिविकारयोर्भेदस्याविवक्षितत्वाद्वृकविकारे वृकशब्दोऽत्र वर्तते। वृकमजिनमस्य वृकाजिनः। वृकशब्दः `प्राणिनां कुपूर्वाणाम् (फि.सू.2.30) [`प्राणिनां कुपूर्वम्'--फि.सू.] इत्याद्युदात्तः। `श्यास्त्याह्वेञविभ्य इनच्' (द.उ.5.12) इत्यधिकृत्य `अजेरज च' (द.उ.5.14) इतीनजादेशश्च। तेनाजिनमन्तोदात्तम्। `कूलाजिनः' इति। कु इति निपातः, तस्मिन्नुपपदे `ला आदाने' (धा.पा.1058) इत्येतस्मात् `अन्येष्वपि दृश्यते' (3.2.101) इत डः, `अन्येषामपि दृश्यते' (6.3.137) इति पूर्वपदसय दीर्घत्वम्। तेन कूल इत्यन्तोदात्तः। `कृष्णाजिनः' इति। `इण्सिञ्जिदीङुण्यविभ्यो नक्'(द.उ.5.35) इत्यधिकृत्य `कृषेर्वर्णे' (द.उ.5.37) इति नक्। तेन कृष्णोऽन्तोदात्त-।
`प्रियमित्त्रः' इति। प्रीणातीति प्रियः, `इगुपध' (3.1.135) इत्यादिना कः। तेन प्रियोऽन्तोदात्तः। `महाजिनः' इति। `नर्त्तमाने पृषद्बृहन्महजजगच्छतृवच्च' (द.उ.6.5) इत महच्छब्दोऽन्तोदात्त।।

166.व्यावायिनोऽन्तरम्। (6.2.166.)

167.मुखं स्वाङ्गम्। (6.2.167)
`गौरमुखः' इति। `गुरी उद्यमने' (धा.पा.1396) एतस्मादच्। तदन्तदपि प्रज्ञादेरवृत्करणात् `परज्ञादिभ्यश्च' (5.4.38) इत्यण्, तेन गौरोऽन्तोदात्तः। `उदि दृणातेरजलौ [दृणातेरजलौ--मुद्रितः पाठः] पूर्वपदान्त्यलोपश्च' (पं.उ.5.19) इति प्रकृत्य `डित् खनेर्मुट् स चोदात्तः' (पं.उ.5.20) इति खनेरजलावित्येतौ प्रत्ययौ भवतः, तौ च डितौ, मुट् चोदात्तः। तेन मुखशब्द आद्युदात्तः। `भदरमुखः' इति। `ऋजेन्द्र' (द.उ.8.46) इत्यादिसूत्रेण भद्रशब्दो व्युत्पाद्यते। तेन भद्र इत्यन्तोदात्तः।
`दीर्घमुखा शला' इति। मुखशब्देनात्र द्वारप्रदेशः शालाया उच्यते। `स्वाङ्गमद्रवलक्षणमिह गृह्यते' इति `अद्रवं मूर्तिमत् स्वाङ्गम्' (का.वृ.4.1.54) इत्यादि यत्परिभाषितं स्वाङ्गमद्रवादिलक्षणं तदिह गृह्यते। तेन दीर्घमुखा शालेत्यत्र न भवतीति भावः।।

168. नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः। (6.2.168)
पूर्वेण प्राप्तस्यान्तोदात्तत्वादयं प्रतिषेध उच्यते। `उच्चैर्मुखः' इति। उच्चैरित्येते स्वरादौ पठ्यन्ते, तेऽन्तोदात्ता इति निपात्यन्ते। `प्राङ्मुखः' इति। प्राङित्येतत् क्विन्नन्तमाद्युदात्तम्, तत्र `अनिगन्तोऽञ्चतौ वप्रत्यये' (6.2.52) इति पूर्वपदसय प्रकृतिस्वरः। `प्रत्यङमुखः' इति। अत्र कृदुत्तरपदप्रकृतिस्वरः। `गोमुखः महामुखः' इति। गोमहच्छब्दावन्तोदात्तावित्युक्तम्। `स्थूलमुखः' इति। `स्थूल परिबृंहणे' (धा.पा.1904), चुरा्दिः, तस्मात् पचाद्यच्। तेन

स्थूलशब्दोऽन्तोदात्तः। `मुष्टिमुखः' इति। मुषेः क्तिच्। तेन मुष्टिशब्दोऽन्तोदात्तः। `पृथुमुखः' इति। `कुर्भ्रश्च' (पं.3.1.23) इत्यधिकृत्य प्रथिम्रदिभ्रस्जां सम्प्रसारणं `सलोपश्च' (पं.उ.1.29) इति कुप्रत्ययः। तेन पृथुरन्तोदात्तः। `वत्समुखः' इति। `वृतृवदिनि' (द.उ.9.21) इत्यादिना सः। तेन वत्सोऽन्तोदात्तः। `गोमुष्टि' इत्यादि। उत्तरसूत्रेण निष्ठादिपूर्वपदस्योपमानलक्षणोऽपि यः प्राप्नोति सोऽप्यनेन बाध्यते। अस्य प्रतिषेधस्यावकाशो यत्र गवाद्युपमानं न; गौर्मुखमिव यस्य, मुष्टिर्मुखमिव यस्य, वत्सो मुखमिव यस्येति सर्वत्र गवाद्युपमेयम्, नोपमानम्। उत्तरसूत्रेण निष्ठादिपूर्वपदस्योपमानलक्षणस्य विकल्पस्यावकाशो यत्र गवादेरन्यदुपमानम्--सिंहमुखः, व्याघ्रमुख इति। यत्र गवाद्युपमानं तद् यत्र पूर्वपदं तत्रोभयप्राप्तावुपमानलक्षणं बाधित्वाऽयमेव प्तिषेधो पूर्वप्रतिषेधेन।।

169. निष्ठोपमानादन्यतरस्याम्। (6.1.169)
`मुखं स्वाङ्गम्' (6.2.167) इति नित्ये प्राप्ते विकल्पवचनमेतत्। `यदैतदुत्तरपदान्तोदात्तत्वम्' इत्यादि। अन्यतरस्यांग्रहणाद्विकस्पेनैतदुत्तरपदान्तोदात्तत्वं विधीयते। तेन यदैतन्न भवति तदा निष्ठोपसर्गपूर्वपदस्यान्यतरस्याम्' (6.2.110) [निष्ठोपसर्गपूर्वमन्यतरस्याम्--पा.सू.] इति पक्षे पूर्वपदान्तोदात्तत्वं भवति। तस्यापि विकल्पेन विधानाद्यादास्याभावस्तदा `गतिरनन्तरः' (6.2.49) इति पूर्वपदस्य प्रकृतिभावविधानाद्गतिस्वर एव। तेनाद्युदात्तत्वं भवति। यत एवं ततस्त्रीण्युदाहरणानि भवन्ति--एकमनेन सूत्रेणोत्तरपदस्यान्तोदात्तत्वविधानम्, द्वितीयं `निष्ठोपसर्गपूर्वादन्यतरस्याम्' (6.2.110) [निष्ठोपसर्गपूर्वमन्यतरस्याम्--पा.सू.] इत्यादिना पूर्वपदान्तोदात्तत्वविधानम्, तृतयं `गतरनन्तरः' (6.2.49) इति गतेः प्रकृतिस्वरविधानम्। `सिंहमुखः' इति। सिंहशब्दः पचाद्यजन्तत्वादन्तोदात्तः। `तृहि हिसि हिंसायाम्' (धा.पा.1455,1456), [`तृह'--धा.पा.] हिनस्तीति सिंहः--पृषोदरादित्वाद्वर्णव्यत्ययः। `व्याघ्रमुखः' इति। `घ्रा गन्धोपादाने' (धा.पा.926) इत्यस्माद्व्याङ्पूर्वात् `आतश्चोपसर्गे कः', (3.1.136), तेन व्याघ्रशब्दोऽप्यन्तोदात्त एव।।

170. जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः। (6.2.170)
`शाङ्गरजग्धः' इति। गुणातेरितेर्वा `शमि धातोः संज्ञायाम्' (3.2.14) इत्यच् शङ्गरः, ततोऽपि प्रज्ञादेराकृतिगणत्वादण्। तेन शाङ्गरशब्दोऽन्तोदात्तः। `पलाण्डुभक्षितः' इति। `पल गतौ' (धा.पा.839) `उणादयो बहुलम्' (3.3.1) इत्याण्डुप्रत्ययः तेन पलाण्डुशब्दो मध्योदात्तः। `सुरपीतः' इति। `सुसूधागुधिभ्यः क्रन्' (द.उ.य8.42) इति सुराशब्द आद्युदात्तः। `मासजातः' इति। `मसी परिमाणे' (धा.पा.1221) [`परिणामे'धा.पा.] अस्माद्घञ्, तेन मास आद्युदात्तः। `संवत्सरजातः' इति। `अशेः सरः' (द.उ.8.50) [`सरन्'--द.उ.प.उ. (3.70)] इत्यधिकृत्य `वसेश्च' (द.उ.8.51) `सम्पूर्वाच्चित्' (द.उ.8.52) इति। तेन संवत्सरोऽन्तोदात्तः। `द्व्यहजातः। त्र्यहजातः' इति। द्वित्रिशब्दावन्तोदाततावित्युकतम्। `सुखजातः' इति। खनतेः सुपूर्वात् `अन्येष्वपि दृश्यते' (3.2.101) इति डः। तेन सुखशब्दोऽन्तोदात्तः। एवं दुःखशब्दोऽपि वेदितव्यः। तेन तृप्रशब्दोऽन्तोदात्तः। `कृच्छ्रजातः' इति। `कृतेच्छः क्रू च' (द.उ.8.38,पं.उ.2.21) [`कृते च्छक् च--द.उ. `कृतेश्छक्रू च'--पं.उ.] इति कृच्छ्रशब्दोऽन्तोदात्तः। `असु क्षेणपे' (धा.पा.1209) अस्माद् `बहुलमन्यत्रािऽपि' (द.उ.8.40) इति रक्, तेनास्लमन्तोदात्तम्। `वृतृवदहनिकमिकषिब्यः सः' (द.उ.9.21) [कषियुमुचिभ्यः--द.उ.] इति बहुलवचनादमेरपि भवति। अंसो वृषादित्वादाद्युदात्तः। `अलकम्' इति। अलतेः `पुंसि संज्ञायां घः प्रायेण' (3.3.118), ततः कन्निति कन्नन्तोऽप्लकशब्दः। तेनाद्युदात्तः। `कृवृदारिभ्य उनन्' (पं.उ.3.53), तेन करुणशब्द आद्युदात्तः। `रञ्जेः क्वुन्' (?) इति बहुलवचनात् कृपेरपि भवति। तेन कृपणमाद्युदात्तम्। `सोढः' इति क्तान्तम्। तेनैतदन्तोदात्तम्। पूर्ववद्घत्वढत्वादयः कर्त्तव्याः। `प्रतीयम्' इति। प्रतिगता आपोऽस्मिन्निति बहुव्रीहिः। `ऋक्पूः' (5.4.74) इत्यादिनाऽकारः समासान्तः, `द्व्यन्तरुपसर्गेभ्योऽपि ईत्' (6.3.97) इतीत्त्वम्। `पुत्रजातः' इति। अत्र बहुव्रीहिस्वर एव भवति। `अमिचिमिदिशसिभ्यः क्त्रः' (द.उ.8.86) `पुवो ह्रस्वश्च' (पं.3.4.164) तेन पुत्रशब्दोऽन्तोदात्तः।
कथं पुनर्जातशब्दस्य परनिपातः, यावता `निष्ठा' (2.2.36) इति पूर्वनिपातेनात्र भवितव्यम्? इत्यत आह--`आहिताग्न्यादित्वात्' इत्यादि। पुत्रजातशब्दोऽयमाहितागन्यादिषु षठ्यते, तेन `वाऽऽहितागन्यादिषु' (2.2.37) इति जातादिशब्दसय परनिपातः। `वस्त्रच्छन्नः' इति। वस्त्रम्=आच्छादनम्, आच्छाद्यतेऽनेनेति कृत्वा। वस्त्रशब्द उक्तस्वरः। छन्नशब्दः `छद अपवारणे' (धा.पा.1833) इत्यस्य ण्यन्तस्य निष्ठायां `वा दन्तशान्त' (7.2.27) इत्यादिना निपातितः। `वसनच्छन्नः' इति। वसेराच्छादनार्थाल्ल्युट्। तेन वसनमाद्युदात्तम्। `कुण्डलकृतः' इति। कुण्डशब्दोऽयं `नब्विषयस्य' (फि.सू.2.26) इत्याद्युदात्तः। `कुण्डमितः' इति। `माङ् माने' (धा.पा.1142), `द्यतिस्यति' (7.4.40) इत्यादिनेत्त्वम्।
अथ कथमेतेषु बहुव्रीहिषु `निष्ठा' (2.2.36) इत्यनेन निष्ठान्तस्य पर्वनिपातो न भवति? इत्याह--`एतेषु' इत्यादि। यस्मादेतत् कृतम्, तस्माज्जात्यादिभ्यः परस्यान्तोदात्तत्वबिधानाम्। एतस्मादेव ज्ञापकान्निष्ठान्तस्य पूर्वनिपातो न भवति; अन्यथा ह्येतदन्तोदात्तत्वविदानं नोपपद्यते।।

171. वा जाते। (6.2.171)
जातशब्दोऽपि क्तान्त इति तस्यापि जात्यादिभ्यः परस्य पूर्वेण नित्यमन्तोदात्तत्वे विकल्पोऽयमुच्यते। `दन्तजातः' इति। `हसिमृग्रिण्वमिदमि'(द.उ.6.7) इत्यादिना तन्--दन्तः। तेनायमाद्युदात्तः। `स्तनजातः' इति। स्तनशब्द उक्तस्वरः।

172. नञ्सुभ्याम्। (6.2.172)

`अयवो देशः' इत्यादि। यवव्रीहिमाषाः `तृणधान्यानाञ्च द्व्यषाम्' (फि.सू.2.27) इत्याद्युदात्तः।

`समासस्य' इत्यादि। इह समासः प्रकृत उत्तरपदं च। तत्र यद्युत्तरपदस्यैतदन्तोदात्तत्वं स्यात् अनृचो बह्वृच इत्यत्र `ऋक्पूरब्धूः' (5.4.74) इत्यादिनाकारे समासान्ते कृते ततः पूर्वस्य ऋक्शब्दस्योत्तरपदस्यान्तोदात्तत्वं प्रसज्येत। समासस्य त्वन्तोदात्तत्वं विधीयमानमकारस्यैव भवति; तस्य समासावयवत्वात्। समासावयवत्वं तु `समासान्ताः' (5.4.68) इत्याधिकृत्य विधानात्। तस्मात् समासावयवस्यैतदन्तोदात्तत्वमिष्यते। कथं पुनरिष्यमाणमुपि लभ्यते? `कपि पूर्वम्' (6.2.173) इत्यत्र पूर्वग्रहणात्। तद्धि पूर्वग्रहणमनेन समास्सयान्तोदात्तत्वं विधीयमानं समासावयवस्य कप एव मा भूदित्येवमर्थं क्रियते। यदि तूभयपदस्यैतदन्तोदात्तत्वं स्यात्, तदान्तरेणापि कपिपूर्वग्रहणं कपिपूर्वस्योत्तरपदस्य सात्, न कपः; न हि कबुत्तरपदस्यावयवः, ततश्च पूर्वग्रहणनर्थकम्। इदं तावत्--`समासान्ताःप्रत्ययाः समासस्यैवावयवाः, नोत्तरपदस्य' इत्येतद्दर्शनमङ्गीकृत्योक्तम्। इदानीं `उत्तरपदस्यापि तेऽवयवाः, इत्येतद्दर्शनमाश्रित्याह--`समासान्ताश्च' इत्यादि। उत्तरपदं चेति शेषः। एतदन्तोदात्तत्वमिष्यत इति प्रकृतेन सम्बन्धः। इतिकरणो हेतौ। अथ वा--उत्तरपदस्यैवैतदन्तोदात्तत्वमिष्यते। कुतः? समासान्ता उत्तरपदावयवा भवन्तीत्यतो हेतोः। तेनानुचः बह्वृच इत्यत्र कृते समासान्तेऽन्तोदात्तत्वं भवति, तच्चोत्तरपदस्य भवेत्। तस्यैव समासान्तस्य भवति, तस्योत्तरपदावयवत्वादिति भावः। सान्तेऽन्तोदात्तत्वं भवति, तच्चोततरपदसय भवेत्। तस्यैव समासान्तस्य भवति, तस्योत्तरपदावयवत्वादिति भावः। यदि हि समासान्ता उत्तरपदावयवा न स्युः, तत उत्तरपदावयवस्यन्तोदात्तत्वं विधीयमानं समासान्तस्य न स्यात्। उत्तरपदावयवत्वे हि समासान्तानां तस्यैव समासान्तस्य भवति। कथं पुनः समासान्तानामुत्तरपदावयवत्वम्? समासार्थादुत्तरपदात् पूर्वं समासान्तं विधाय पश्चात् तदन्तेन समासविधानात्। तथा हि `न कपि' (7.4.14) इत्यत्र वक्ष्यति "`गोस्त्रियोरुपसर्जनस्य' (1.2.48) इतययमपि ह्रसवः कपि न भवति। समासार्थे ह्युत्तरपदे कपि कृते पश्चात् कबन्तेन सह समासेन भवितव्यममिति स्त्रीप्रत्ययान्तं समासप्रातिपदिकं न भवति" इति। समासान्तप्रत्ययान्तेन च पदेन यदि समासः क्रियते, तदा `तन्मध्ये पतितास्तद्ग्रहणेन गृह्यन्ते' (व्या.प.21) इति समासान्तः प्रत्ययः उत्तरपदावयवा भवन्ति। यद्यवम्, समासावयवत्वं तेषां नोपपद्यते? नैतदस्ति; अवयवावयवोऽपि हि समुदायावयवो भवति, तथा हि--`देवदत्तायाः सर्वेऽवयवा अलङ्क्रियन्ताम्' इत्युक्ते देवदत्तावयकस्य येऽवयवा अङ्गुल्यादयस्येऽप्यलङ्क्रियन्ते।।

173. कपि पूर्वम्। (6.2.173)

पूर्वेण कप एवान्तोदात्तत्वे प्राप्ते कपि पूर्वस्योदात्तत्वमनेन विधीयते। `अकुमारीकः' इत्यादि। `शेषाद्विभाषा' (5.4.154) इति कप्। कुमारीशब्द उदात्तनिवृत्तिस्वरेणान्तोदात्तः। वृषलीशब्दोऽपि जातिलक्षणेन ङीषा। ब्रह्मबन्धूरप्यूङन्तत्वात् प्रत्ययस्वरेण।।

174. ह्वस्वान्तेऽन्त्यात्पूर्वम्। (6.2.174)

`ह्रस्वोऽन्तोऽस्य' इत्यादि। अनेन ह्रस्वान्त इत्यस्यैव बहुव्रीहेरन्यपदार्थ उत्तरपदं समासो वेति दर्शयति। `अयवको देशः' इति। अत्र कपि परतो यव इत्येतत् ह्रस्वान्तमुत्तरपदम्, अयव इत्ययं वा समासः। तत्रान्त्याद्वकारात्, पूर्वमक्षरं यकाराकार उदात्तो भवति। अनया दिशान्यत्रापरि वेदितव्यम्। अथ पूर्वग्रहणं किम्, यावता `कपि पूर्वम्' (6.2.173) इत्यतः पूर्वमिति वर्तत एव? इत्यत आह--`पूर्वमिति वर्तमाने' इत्यादि। द्वितीये हि पूर्वग्रहणे क्रियमाणे वाक्यभेदेन प्रवृत्तिभेदो भवति; पूर्वग्रहणसामर्थ्यात्, अन्यथा हि तदपार्थकं स्यात्। तत्रैकय प्रवृत्त्या ह्रस्वन्तेऽन्त्यात् पूर्वमन्तोदात्तं विथधीयते। अपरया तु ह्रस्वान्तेऽन्त्यात् पूर्वमन्तोदात्तं न भवतीति नियमः। तेन कपि पूर्वमन्तोदात्तं न भवति। `तेन' इत्यादिना नियमो न स्यात्, तदात्रान्त्यात् पूर्व उदात्तभावो नास्तीति कपि पूर्वमन्तोदात्तं स्यात्। `कपि पूर्वम्' (6.2.173) इत्यनेन नियमे तु सति न भवति। तेन `नञ्सुभ्याम्' (6.2.172) इति कबन्तस्यैवान्तोदात्तत्वं भवति। यथा च स भवति तथात्रैवोपपादितम्।।

175. बहोर्नञ्वदुत्तरपदभूम्नि। (6.2.175)

`नञ्सुभ्याम्' (6.2.172) इत्यादिभिर्योगैर्नञ उत्तरस्य यत् स्वरवनिधानं तद्बहोरपि यथा स्यादित्येवमर्थमिदम्। नञ इव नञ्वत्। बहोर्भावो भूमा, पृथ्वादित्वादिमनिच्, `बहोर्लोपो भू च बहोः' (6.4.158) इति भूभावः। उत्तरपदस्य भूमेति षष्ठीसमासः। अथातिदेशः किमर्थः, न `नञ्सुबहुभ्य उत्तरपदभूम्नि' इत्येवोच्येत; न चैवं योगे क्रियमाणे नञ्स्वोरप्युत्तरपदभूम्नीत्येतद्विशेषणमापाद्यते; सम्भवापेक्षत्वादस्य, यथैव हि' हल्ङ्याब्भ्यो दीर्घात्' (6.1.68) इत्यत्र दीर्घग्रहणं सम्भवापेक्षं विशेषणं ङ्यापोरेव भवति न हलः; तथैतदपि बहोरेव भविष्यति न नञ्स्वोः, न हि तयोरुत्तरपदार्थबहुत्वे बृत्तिः सम्भवतीति? एवं तर्हि यदपि विदेशस्थं नञोपलक्षितं बहुव्रीहेः स्वरविधानम्, तदप्यस्मादतिदेशाद्यथा स्यादित्येवमर्थोऽयमतिदेशः क्रियते। तेन `नञो जरमरमित्त्रमृताः' (6.2.116) इत्युत्तरपदाद्युदात्तत्वमपि बहोरतिदिश्यते। `बहुमनाः' इति। अत्रोत्तरपदबहुत्वे बहुशब्दो न वर्तते।।

176. न गुणादयोऽवयवाः। (6.2.176)

पूर्वोणातिप्रसक्तोऽतिदेश इति गुणादिना प्रतिषिध्यते--`बहुगुणा रज्जुः' इति। बह्ववयवा इत्यर्थः। `गुण आमन्त्रणे' (धा.पा.1894) चुरादिः, तस्माद्घञ्। तेन गुणशब्द आद्युदात्तः। `अशेः सरः' (द.उ.8.50) [`सरन्'--द.उ.(पं.उ.-3.70)] इत्यनेनाक्षरशब्दोऽन्तोदात्तः। छन्दो मीयतेऽनेनेति च्छन्दोमानम्।

कृत्स्वरेण छन्दोमाने मानशब्द आद्युदात्तः; तस्य घञन्तत्वात्। शोभनमुक्तं सूक्तम्। प्रादिसमासः। थाथादिस्वरेण (6.2.144) सूक्तशब्दोऽन्तोदात्तः। अधीयतेऽस्मादित्यध्यायः। `इङश्च' (3.3.21) इति घञ्। सूक्तवदध्यायोऽन्तोदात्तः।।

177. उपसर्गात् स्वाङ्गं ध्रुवमपर्शु। (6.2.177)
उपसर्गात् प्राद्युपलक्षणं वेदितव्यम्। स्वङ्गं प्रति क्रियायोगाभावात्। प्रादिग्रहणमेव तु न कृतं वैचित्र्यार्थम्। ध्रुवशब्दोऽयमवयवेप्यस्ति, यथा `ध्रुवमपायेऽपादानम्' (1.4.24) इति, एकस्वरूपेप्यस्ति, यथा ध्रुवमस्य शीलमिति; तदिहैकस्वरूपे वर्तमानो गृह्यत इति दर्शयितुमाह-- `ध्रुवमित्येकरूपमुच्यते' इत्यादि। `सततम्' इत्यादिना ध्रुवत्वं पृष्ठस्य दर्शयति। पृष्ठशब्दोऽन्तोदात्तः। `पृषु मृषु वृषु सेचने' (धा.पा.705.706,707) इत्यस्य थकि व्युत्पादितत्वात्।
`दर्शनीयललाटः' इति। दर्शनीयशब्दः `उपोत्तमं रिति' (6.1.217) इति मध्योदात्तः। `लल ईप्सायाम्' (धा.पा.1687) इत्यस्मात् `उणादयो बहुलम्' (3.3.1) इत्याटप्रत्ययः। तेन ललाटशब्दो मध्योदात्तः। `प्रशाखो वृक्षः' इति। `उणादयो बहुलम्' (3.3.1) इति वचनात् `शो तनूकरणे' (धा.पा.1145) इत्यस्मात् खः, टाप्, सवर्णदीर्घत्वम्, `एकादेश उदात्तेनोदात्तः' (8.2.5)। तेन शाखाशब्दोऽन्तोदात्तः। उद्बाहुः क्रारीशति' इति। अत्र बाह्नोरेकरूपता नास्तीत्युध्रुवत्वम्। न ह्यसौ नित्यमूर्ध्वबाहुरेव क्रोशति, अपि तु कदाचिदधो बाहुरपि। `उत्पर्शुः' इति। `स्वृशेः श्वण्शुनौ पृ च'(पं.उ.5.27) [श्वण् शुनो पृ च--मु.पाठः] इति शुन्प्रत्ययान्तः पर्शुः। तेनायमाद्युदात्तः।।
178. वनं समासे। (6.2.178)
`समासमात्रे' इति। मात्रग्रहणेन बहुव्रीहेर्निवृत्ति सूचयति। `प्रवणे' इति। यदायं बहुव्रीहिस्तदा प्रकृष्टं प्रकृतं वा वनमस्येति विग्रहः। यदा तु तत्पुरुषः, तदा प्रकृष्टं वनं प्रगतं वा वनमिति विग्रहः। `निर्वणे' इति। अत्रापि यदा बहुव्रीहिः, तदा निर्गतं वनमस्येति विग्रहः। यदा तु तत्पुरुषस्तदा निरगतो वनादिति तत्पुरुषस्तु `कुगतिप्रादयः' (2.2.28) इति। किं पुनः स्याद्यदि समासमात्रपरिग्रहार्थं समासग्रहणं न क्रियेत? इत्यत आह--`बहुव्रीहावेव हि स्यात्' इति। `रञ्जेः क्युन्'(द.उ.5.24-पं.उ.2.80)। [`रजेः'--द.उ.] बहलवनात् `वनु याचने' (धा.पा.1470) इत्यस्मादपि भवति। तेन वनमाद्युदात्तम्।।

179. अन्तः। (6.2.179)
`अन्तः' इति स्वरादिष्वन्तोदात्तो निपात्यते। `अन्तर्वणो देशः' इति। अन्तर्वनं यस्मिन्निति बहुव्रीहिः, `वनेऽन्तः' इति शौण्डादिपाठात् (2.1.40) सप्तमीसमासो वा। `प्रनिरन्तरः' (8.4.5) इत्यादनना णत्वम्।
`अनुपसर्गार्थ आरम्भः' इति। उपसर्गात् पूर्वेणैव सिद्धत्वात्।।

180. अन्तश्च। (6.2.180)
अन्तःशब्दः `हसिमृग्रिण्वमिदमिलूपूधुर्विभ्यस्तन्' (द.उ.6.7) इति तन्प्रत्ययान्तत्वादाद्युदात्तः।।

181. न निविभ्याम्। (6.2.181)
पूर्वेण निविभ्यामप्युततरसयान्तोदात्तत्वे प्राप्ते प्रतिषेधोऽयमुच्यते। `पूर्वपदप्रकृतिस्वरतवे कृते' इति। यदा बहुव्रीहिस्तदा `बहुव्रीहौ प्रकृत्या पूर्वपदम्' (6.2.1) इति प्रकृतिस्वरत्वम्। यदा तु तत्पुरुषस्तदा `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना।।

182. परेरभितोभावि मण्जलम्। (6.2.182)
`परिकूलम्, परितीरम्' इति। कूलतीरशब्दावुक्तस्वरौ `कूलतीरतूलमूल' (6.2.121) इत्यादौ सूत्रे। `परिमण्डलम्' इति। परितः=सर्वतो मणअडलं परिमण्डलम्। `मणि भूषायाम्' (धा.पा.321)--अस्मात् `कलस्तृपश्च' (द.उ.8.107) इति बाहुलकात् कलप्रत्ययः, `वृषादिभ्यश्चित्' (द.उ.8.109) इति च। तेन मण्डलमन्तोदात्तम्। `बहुव्रीहिरयम्' इत्यादि। यदा बहुव्रीहिस्तदा--परितः कूलमस्य, परितस्तीरमस्येति तेन मण्डलमन्तोदात्तम्। `बहुव्रीहिरयम्' इत्यादि। यदा बहुव्रीहिस्तदा--परितः कूलमस्य, परितस्तीरमस्येति विग्रहः। यदा तु प्रादिसमासस्तदा परिगतं कूलम्, परिगतं तीरमिति। यदा पुनरव्ययीभावस्तदा--परि कूलात्, परि तीरादिति। अव्ययीभावस्तु `अपपरिबहिरञ्चवः पञ्चम्या' (2.1.12) इत्यनेन। परि कूलादिति पञ्चमी `पञ्चम्यपाङपरिभिः' (2.3.10) इति कर्मप्रवचनीययोगे। कर्मप्रवचनीयत्वं तु परेः `अपपरी वर्जने' (1.4.88) इति। युक्तं यद्बहुव्रीहौ तत्पुरुषे चेदमन्तोदात्तत्वं विधीयते; तत्र हि समासान्तोदात्तत्वस्यापवादः, पूर्वपदप्रकृतिस्वरः प्राप्नोति। अव्ययीभावे त्वयुक्तम्; तत्र हि समासान्तोदात्तत्वेनैव सिद्धम्। न हि तस्यापवादः पूर्वपदप्रकृतिस्वरः केनचित् प्राप्त इत्यत आह--`अव्ययीभावपक्षेऽपि हि' इत्यादि। यदाप्यव्ययीभावपक्षः, तदापि `परिप्रत्युपपा' (6.2.33) इत्यादिना पूर्वपदप्रकृतिस्वरः प्राप्तोनेनान्तोदात्तत्वविधानेन बाध्यत इति किमत्रायुक्तम्। `यच्चैवंस्वभावम्' इत्यादि। अभितो भवनं यस्य स्वभावस्तदभितोभाविग्रहणेन गृह्यते, न तु तद्विपरीतस्वभावम्।।

183. प्रादस्वाङ्गं संज्ञायाम्। (6.2.183)
`प्रकोष्ठम्' इति। `उषिकुषिगार्तिभ्यस्थन्' (द.उ.6.29) इति कुषेस्थन्। तेन क्रोष्ठशब्द आद्युदात्तः। `प्रगृहम्' इति। `गेहि कः' (3.1.144) इति कप्रत्ययः। तेन गृहमन्तोदात्तम्। `प्रद्वारम् इति। `नब्विषयस्यानिसन्तस्य' (फि.सू.2.26) इति द्वारमाद्युदात्तम्। `प्रपदम्' इति। पदं द्वारवदेवाद्यटुदात्तम्। `प्रहस्तम्' इति। `हसिमृग्रिण्वमिदमि' (द.उ.6.7) इत्यादिना हसेस्तन्। तेन हस्तशब्द आद्युदात्तः।।

184. निरुदकादीनि च। (6.2.184)
`निरुदकम्' इति। निष्क्रान्तमुदकमस्मादिति बहुव्रीहिः, निष्क्रान्तमुदकादिति वा प्रादिसमासः। उदकं कायतीति `आतोऽनुपसर्गे कः' (3.2.3), `उदकस्योदः संज्ञायाम्' (6.3.57) इत्युदभावः। तेनोदकमन्तोदात्तम्। `निरुपलम्' इति। `विटपविष्टपविशिपोलपाः' (द.उ.7.12) इत्युपलशब्दोऽन्तोदात्तो निपात्यते। `निरुपलमित्यन्ये' इति। उपपूर्वाल्लातेः `आतश्चोपसर्गे' (3.1.136) इति कः। तेनोपलशब्दस्थाथादि (6.2.144) स्वरेणाद्युदात्तः। `निर्मक्षिकम्, निर्मशकमित्यदीनाम्' इति। मशकमक्षिकाशब्दा(वा)द्युदात्तान्तोदात्तौ। तत्र हि `अथादिः, प्राक्, शकटेः'(फि.सू.2.24), `अथ द्वितीयः प्रादीषात्' (फि.सू.3.50) [`द्वितीयं'--फि.सू.] इति वर्तते। `एषाम्' इत्यादि। यदि प्रादिसमासस्तदा निर्गतमुदकं निर्गतं वोदकादिति विग्रहः। यदा तु बहुव्रीहिस्तदा निर्गतमुदकमस्मादिति। अथाव्ययीभावोऽप्येषां कस्यान्न भवति? इत्याह--`अव्ययी भावे तु' इत्यादि। बहुव्रीहिप्रादिसमासयोस्तु समासान्तोदात्तत्वेन न सिध्यति। तथा हि--`बहुव्रीहौ प्रकृत्या पूर्वपदम्' (6.2.1) इति समासस्वरापवादः पूर्वपदप्रकृतिस्वरो बहुव्रीहावुक्तः। प्रादिसमासेऽपि `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना।
`निष्कालकः' इति। कालशब्दः कन्प्रत्ययान्तत्वादाद्युदात्तः। `निष्कालिकः' इति। निष्क्रान्तः कालिकाया इति प्रादिसमासः। कालीति जानपदादिसूत्रेण (4.1.42) [`द्वितीयं'--फि.सू.] ङीषान्तत्वादन्तोदात्तः, ततः स्वार्थिके कनि कृतेऽप्याद्युदात्त एव भवति।
`निष्पेषः' इति। `विष्लृ सञ्चूर्णने' (धा.पा.1452) अस्माद्घञ्। तेन पेषशब्द आद्युदात्तः। `तरीं पाति' इति। `आतोऽनुपसर्गे कः' (3.2.3) इति तरीपशब्दोऽन्तोदात्तः। कुत्सितस्तरीप इति कुत्सितग्रहणेन दुस्तरीपशब्दे दुःशब्दः कुत्सायां वर्तत इति दर्शयति। `निस्तरीप इति केचित्' इति। ते च निर्गतस्तरीप इति विगृह्य प्रादिसमासं कुर्वन्ति। `अपरे निस्तरीक इति' इति। पठन्तीति सम्बन्धः।
`निरजिनम्' इत्यादि। `अजिनमन्तोदात्तम्' इत्युक्तम्।
`परेः' इत्यादि। हस्तपादकेशाः `स्वाङ्गशिटामदन्तानाम्' (फि.सू.2.29) इत्याद्युदात्ताः। शिटाम्=सर्वनाम्नामित्यर्थः। कर्षशब्दः `कर्षात्वतो घञोऽन्त उदात्तः' (6.1.159) इत्यन्तोदात्तः।।

185. अभेर्मुखम्। (6.2.185)
`अभिमुखः' इति। मुखशब्द उक्तस्वरः। अभिशब्दोऽन्तोदात्तः। `बहुव्रीहिरयम्'
इत्यादि। यदा बहुव्रीहिस्तदा--अभिगतं मुखमनेनेति विग्रहः। यदा तु प्रादिसमासस्तदा अभिगतो मुखम्, अभिगतो वा मुखेनेति। कस्मादयमव्ययीभावो न भवति? इत्याह--`अव्ययीबावे तु' इत्यादि।
`वचनमिदमबहुव्रीह्यर्थम्' इति। यदा मुखं ध्रुवं भवति तदाऽध्रुवार्थम्, अस्वाङ्गार्थ चेति। अध्रुवमस्वाङ्गञ्च मुखं बहुव्रीहावपि यदा भवति। `अभिमुखा शाला' इति। अभिगतं मुखं यस्या इति बहुव्रीहिः। अत्र `उपसर्गात् स्वाङ्गम्' (6.2.177) इति न सिध्यति; मुखशब्दस्यास्वाङ्गवाचित्वात्।।

186. अपाच्च्। (6.2.186)
`अव्ययीभावोऽप्यत्र प्रयोजयति' इति। न केवलं बहुव्रीहितत्पुरुषावित्यपिशब्दार्थः। तत्र यदा बहुव्रीहिस्तदा--अपगतं मुखमस्मादिति विग्रहः। यदा तु प्रादिसमासस्तदा अपगतं मुखमिति। यदा पुनरव्ययीभावस्तदा--अपमुखादिति, मुखं वर्जयित्वेत्यर्थः। अव्ययीभावस्तु `अपपरिबहिरञ्चवः वञ्चम्या' (2.1.12) इत्यनेन। कथं पुनरव्ययीभावः प्रयोजयति, यावता समासान्तोदात्तत्वेनैव सिद्धम्? इत्याह--`तत्रापि हि' इत्यादि। प्रकृतिस्वरत्वमित्यत्राध्याहार्यम्। तत्राप्यव्ययीभाव `परिप्रत्युपापा' (6.2.33) इत्यादिना पूर्वपदस्य प्रकृतिस्वरत्वमुक्तं समासस्वरापवादः। तस्मादव्ययीभावोऽपि प्रयोजयति।
`योगविबाग उत्तरार्थः' इति। `उत्तरसूत्रेऽपादित्यस्यैवानुवृत्तिर्यथा स्यात्, अभेर्मा भूत्। अव्ययपूर्वादपि प्रकृतिस्वरापवादो योगः। एवमुत्तरेऽपि योगाः `द्वित्रिभ्यां पद्दन्मूर्धसु बहुव्रीहौ' (6.2.197) इत्यतो योगात् प्राग्वेदितव्याः।।

187. स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनाम नाम च। (6.2.187)
स्फिगदीनां नामपर्यन्तानां समाहारे द्वन्द्वः। `सीरनामानि च' इति। हलादीनि। `अपस्फिगम्, अपपूतम्' इति। प्रादिसमासः, बहुव्रीहिर्वा। स्फिगपूतशब्दौ `स्वाङ्गशिटामदन्तानाम्' (फि.सू.2.29) इत्याद्युदात्तौ। केचित्तु स्फिगशब्दं धृतादित्वा(फि.सू.1.21)दन्तोदात्तमिच्छन्ति। `रास्नासास्नास्थूणावीणाः'

(द.उ.5.47) इति वीणाशब्द आद्युदात्तो निपात्यते। `अञ्जू' इत्येतदस्मादसुन्। तेनञ्ज आद्युदात्तः। `शीङ्क्रुशिरुहिजिक्षिसृधृभ्यः क्वनिप्' [क्वन्--इति मु. पाठः,] इत्यधिकृत्य `अदेर्धच' [अदेर्धश्च--द.उ.] इत्यध्वा। तेनायमाद्युदात्तः। `उपसर्गादध्वनः' इत्यादि। `अच्प्रत्यन्ववपूर्वात् सामलोभ्नः' (5.4.75) इत्यतोऽज्हणेऽनुवर्तमाने `उपसर्गादध्वनः' (5.4.85) इत्यनेनाच् समासान्तो विधीयते। तेन तस्मिन् समासान्तेऽच्प्रत्ययस्य चित्त्वादेव सिद्धमन्तोदात्तत्वम्। ननु च नित्यः समासान्तः, तत् किमुच्यते--यदा समासान्तो नास्तीति? अत आह--`अनित्यश्च' इत्यादि। यदि नित्यः समासान्तः स्यादध्वग्रहणमिह न कृतं स्यात्; अच्प्रत्ययस्य चित्त्वादेवान्तोदात्तस्य सिद्धत्वात्; कृतं च, तस्मादेतदेव ज्ञापयति--`समासान्तविधिरनित्यः' इति। तेन `तत्रोपासितलोकभर्त्तरि' इत्येवमादयः प्रयोगा उपपन्ना भवन्ति।
`प्लुषिकुषिशुषिभ्यः क्सिः' (द.उ.1.11) [`प्लुषिशुषिकुषिभ्यः क्सिः'--द.उ.]

189. अनोरप्रधानकनीयसी। (6.2.189)
`अनुज्येष्ठः' इति। `वृद्धस्य च' (5.3.62) इतीष्ठनि परतो वृद्धस्य ज्ज्यादेशः। जेष्ठशब्दो नित्सवरेणाणाद्युदात्तः। `अनुमध्यमः' इति। `मध्यान्मः' (4.3.8) इति मध्यमः, प्रत्ययस्वरेणान्तोदात्तः। `पूर्वपदार्थप्रधानः प्रादिसमसोऽम्' इति। अत्र हि योऽसौ ज्येष्ठमनुगतो मध्यमञ्च स प्राधान्येन प्रादिसमासेनोच्यते, ज्येष्ठमध्यमौ तु गुणभावेन। तस्मात् पूर्वपदार्थप्रधानोऽयम्। `अनुकनीयान्' इति। ईयसुनि परतो युवशब्दस्य `युवाल्पयोः कनन्यतरस्याम्' (5.3.64) इति कनादेशः। कनीयशब्दो नित्स्वरेणाद्युदात्त-।
`अनुगतो ज्येष्ठोऽनुज्येष्ठः' ति। उत्तरपदार्थप्रधानोऽयम्। तेन प्रधानवाचित्वं ज्येष्ठशब्दस्यास्ति।।

190. पुरुषश्चान्वादिष्टः। (6.2.190)
`पृ पालनपूरणयोः' (दा.पा.1489)--अस्मात् `पुरः कुषन्' (द.उ.9.14) इति कुषन्प्रत्ययः. तेन पुरुषशब्द आद्युदात्तः। `अन्वादिष्टोऽन्वाचितः' इति। अप्रधानशिष्ट इत्यर्थः। यथा भिक्षामट गाञ्यानयेत्यत्र गोरानयनम्, यथा वा--`करत्तुः क्यङ् सलोपश्च' (3.1.11) इत्यत्र सलोपः. `कथितानुकथितो वा' इति। यः कथितात् पश्चात् कथितः स कथितानुकथितः। यो वा किञ्चित् पाक् कथयित्वा पश्चात् कथ्यते कथ्यते स कथितानुकथित इत्युच्यते। `अनुगतः पुरुषोऽनुपुरुषः' इति। यः पश्चाद्भवः पुरुष स एवमुच्यते।।

191. अतेरकृत्पदे। (6.2.191)
`अकृत्पदे' इति। अकृच्च पदं चाकृत्पदे--प्रथमाद्विवचनान्तमेतत्। `अत्यङ्कुशो नागः' इति। अङ्कुशशब्दः `सानसिपर्णसि' (द.उ.10.17) [सानसिधर्णसिपर्णसि--द.उ. सानासिवर्णसिपर्णसि--पं.उ.पं.उ.4.107) इत्यादिना `अकि लक्षणे' (धा.पा.1024) अस्मात् पचाद्यच्, टाप्, `एकादेश उदात्तेनोदात्तः' (8.2.5)। तेन कशान्तोदात्ता। `अतिपदा शक्वरी' इति। `खनो घ च' (3.3.125) इति पदेर्घः। घित्करणेन हि ज्ञापितम्--तत्र घोऽन्यस्मादपि भवतीति। तेन पदमन्तोदात्तम्।
`अतिकारकः' इति। करोतेर्ण्वुल्। अत्र `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना पूर्वपदस्याव्ययस्वरो भवति।
`अतेर्धातुलोपः' इति। यत्र धातोर्लोपस्तत्रातेरुत्तरपदमन्तोदात्तं भवतीति वक्तव्यम्। किमर्थम्? इत्याह--`इह' इत्यादि। यद्यतेर्धातुलोप इति नोच्येत, तदिहापि स्यात्--शोभनो गार्ग्योऽतिगार्ग्य इति। भवति ह्यत्रातेरुत्तरपदमकृदन्तम्। इह च न स्यात्--अतिक्रान्तः कारकादतिकारक इति। `निरादयः क्रान्ताद्यर्थे पञ्चम्या' (वा.94) इति प्रादिसमासः। अत्र हि कृदन्तः कारकशब्दः उत्तरपदम्। तत्र यद्यतेर्धातुलोप ति नोच्यते तदिहापि न स्यात्। एवं तूच्यमान इहापि भवति, अस्ति ह्यत्र क्रमेर्धातोर्लोपः। लोपः पुनस्तस्य समासे गम्यमानार्थत्वादप्रत्युज्यमानस्यादर्शनम्।।

192. नेरनिधाने। (6.2.192)
`निधानमप्रकाशता' इति। न निधानमनिधानम्। `निर्मूलम्, न्यक्षम्' इति। `मूल प्रतिष्ठायाम्' (धा.पा.529)-अस्मात् पचाद्यच्। तस्मान्मूलशब्दोऽन्तोदात्तः। `वृतृवदिहनि कमिकषिभ्यः सः' (द.उ.9.21) [कमिकषियुमुचिभ्यः--द.उ.] इत्यधिकृत्य `अशेर्देवने' (द.उ.9.24) इति सप्रत्ययान्तत्वादक्षशब्दोऽप्यन्तोदात्तः। `नितृणम्' इति। `नब्विषयस्य' (फि.सू.2.26) इति तृणमाद्युदात्तम्। `बहुव्रीहिरयम्' इत्यादि। यदा बहुव्रीहिस्तदा--निगतानि मूला न्यस्येति विग्रहः। यदा प्रादिसमासस्तदा निगतं मूलमिति। अव्ययीभावः कस्मादयं न भवति? इत्याह--`अव्ययीभावे तु' इत्यादि। बहुव्रीहौ तु समासान्तोदात्तत्वापवादः `बहुव्रीहौ प्रकृत्या' (6.2.1) इत्यादिना पूर्वपदस्य प्रकृतिस्वर उक्तः। तत्पुरुषेऽपि `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना; तेन तयोर्विनाऽनेन वचनेनान्तोदात्तत्वं न सिध्यति। अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिदधम्, न हि तत्र तस्यापवादः उक्तः।
`निवाग्वृषलः; निदण्डः' इति। अत्र पूर्वपदस्य प्रकृतिस्वर एव भवति। वाक्शब्दः `क्विब्वचिप्रच्छि' (द.उ.10.2) इत्यादिना क्विबन्तो व्युत्पादित आद्युदात्तः। `दमु उपशमे' (धा.पा.1203)--अस्मात् `ञमन्ताड्डः' (द.उ.5.7) इति। तेन दण्डशब्दोऽप्यन्तोदात्तः। `निशब्दोऽत्रि निधानार्थं ब्रवीति' इति। अप्रकाशतां ब्रतीतीत्यर्थः। कथं पुनरत्र निशब्दो निधानार्थं ब्रवीति? इत्याह--`प्रादयो हि' इत्यादि। वृत्तिशब्देनेह समासवृत्त्यादिर्गृह्यते। प्रादयो हि स्वभावेनैव वृत्तिविषये

ससाधनां क्रियामाहुः। तस्मादिह समासवृत्तौ विषयेयासावप्रकाशनात्मिका क्रिया निधानशब्दवाच्या वाक्साधना, दण्डसाधना च तां निशब्दो ब्रवीति।।

193. प्रतेरंश्वादयस्तत्पुरुषे। (6.2.193)
पूर्वपदप्रकृतिस्वरापवादो योगः। `प्रत्यंशुः' इति। प्रादिसमासः। `कुर्भ्रश्च' इत्यधिकृत्य `मुगय्वादयश्च' (द.उ.1.121) इत्यंशुशब्दो निपातितः। तेनान्तोदात्तः। जनेर्घञ्। तेन जन आद्युदात्तः। राजञ्शब्दोऽपि कनिन्प्रत्ययान्तत्वात्। `राजशब्दः' इत्यादि। `राजाहःसखिभ्यष्टच्' (5.4.91) इति यदाऽनित्यत्वाट्टज् नास्ति, तदा राजशब्द इह पाठे प्रयोजयति। अथ तस्मिन् समासान्ते सति कस्मान्न प्रयोजयति? इत्याह--`तस्मिन् हि सति' इत्यादि। अनित्यत्वं तु समासान्तविधेः पूर्वमेव ज्ञापितम्। राजशब्दस्य चेह पाठः समासान्तविधेरनित्यत्वं ज्ञापयति। `उष दाहे' (धा.पा.696)--इत्यस्मात् ष्ट्रन्। तेन उष्ट्रशबद आद्युदात्तः `शिट सन्तापे' [`खिट त्रासे'--धा.पा.] (धा.पा.302)--अस्माण्वुल्। तेन खेटकशब्दोऽप्याद्युदात्तः। `अजिरशिशिर' (द.उ.8.27) इत्यादिना किरच्प्रत्ययान्तोऽजिरशब्दो निपातितः। तेनान्तोदात्तः। `द्रो कुत्सायां गतौ' (धा.पा.1054)--अस्मादाङ्पूर्वात् `आतश्चोपसर्गे' (3.3.106) इत्यङ् निपातनात् पूर्वपदस्य रेफान्तता। ततश्चाव्ययरूपहानादसत्यस्मात् पूर्वपदप्रकृतिस्वरत्वे आर्देत्यन्तोदात्ता भवति। `श्रु श्रवणे' (धा.पा.942) इत्यस्माल्ल्युट्। तेन श्रवणशब्दो लित्स्वरेणाद्युदात्तः। `वृतेस्तिकन्' (द.उ.3.28) इति प्रकृते `कृतिभिदिलतिभ्यः कित्' (द.उ.3.29) इति तिकन्, टाप्। तेन कृत्तिकाशब्द आद्युदात्तः। `ऋध'--इत्येतस्मादच्, घञ् वा। तेनार्धशब्दोऽन्तोदात्तः, आद्युदात्तो वा। `पुर अग्रगमने' (धा.पा.1346)--अस्मादिगुपधलक्षणः (3.1.135) कः। तेन पुरशब्दोऽन्तोदात्तः।
`प्रतिगता अंशवोऽस्य' इत्यादि। अत्र बहुव्रीहौ पूर्वपदप्रकृतिस्वरो भवति।।

194. उपाद्द्व्यजजिनमगौरादयः। (6.2.194)
`उपदेवः' इति। प्रादिसमासोऽयम्। देवशब्दः पचाद्यजन्तत्वादन्तोदात्तः। `उपसोमः' इति। अतिस्तुसुहुसृ' (6.4.149) इत्यादिना मन्। तेन सोमशब्द आद्युदात्तः। `हुडृ हुडृ गतौ' (धा.प.352,353) अस्मात् पचाद्यच्। तेन होडशब्दोऽन्तोदात्तः। अजिनमन्तोदात्तमित्युक्तम्, अद्व्यजर्थं चास्य ग्रहणम्। गौरशब्दः प्रज्ञाद्यणन्तत्वादाद्युदात्तः। तिष्येण युक्तः कालस्तैषः, `प्राग्दीव्यतोऽण्' (4.1.83)। `सूर्यतिष्य' (6.4.149) इति यलोपः। नैषतैटावणन्तौ। तेनान्तोदात्तो। `रट परिभाषणे' (धा.पा.297)--अस्मादच्। रलयोरेकत्वाद्रेफस्य लकारः। लटः। `लुट विलोडने' (धा.पा.314)--अस्मात् पचाद्यच्। तेन लटलोटावप्यन्तोदात्तौ। `शवयह्वजिह्वाग्रीवाप्वामीवाः' (द.उ.8.128) इति जिह्वान्तोदात्ता निपत्यते। `इण्सिञ्जि' (द.उ.5.35) [इण्सिञ्--द.उ.पं.उ.(3.2)] इत्यधिकृत्य `कृषेर्वर्णे (द.उ.5.37) इति कृषेर्नक्, टाप् सवर्णदीर्घत्वम्, `एकादेश उदात्तेनोदात्तः (8.2.5)। तेन कृष्णाशब्दोऽन्तोदात्तः। `अध्न्यादयश्च' (द.उ.8.14) इति कन्याशब्दोऽन्तस्वरितो निपात्यते। `गुड घनत्वे' [`गुड रक्षायाम्'--धा.पा.] (धा.पा.1370)--अस्मादिगपधलक्षणः(3.1.135) कः। तेन गुडोऽन्तोदात्तः। कल्पवाहशब्दौ वृषादित्वादन्तोदात्तौ।।

195. सोरवक्षेपणे। (6.2.195)
`सुस्थण्डिलः' इति। स्थानं स्थिरमस्मिन्निति स्थण्डिलम्। पृषोदरादित्वादाद्युदात्तः। `सुस्फिगाभ्याम्' इति। स्फिगशब्दः आद्युदात्तः। `सुप्रत्यवसितः' इति। प्रत्यवसितशब्दस्थाथादि(6.2.144)स्वरेणान्तोदात्तः। ननु च सुशब्देनापि सह समासे कृते थाथादिस्वरेणैवान्तोदात्तत्वं भविष्यति, तत् किमर्थमुदाहृतम्? एवं मन्यते--सत्यन्यार्थेऽस्यारम्भे परत्वादनेनैवात्राप्यन्तोदात्तत्वं युक्तमिति। यदि सुशब्दोऽत्र पूजायामेव वर्तते, अवक्षेपणं तर्हि कस्यार्थः? इत्याह--`वाक्यार्थस्त्ववक्षेपणम्' इति। अत्रैव कारणमाह--`असूण्या तथाभिधानात्' इति। इह खल्विदानीं `अस्स्व सुस्थण्डिलः' इत्येवम्प्रकारं वाक्यं यस्मादसूयया प्रयुज्यते, तस्माद्वाक्यार्थस्यैवावक्षेपणम्। `सुतृणेषु' इति। अत्र गुणोद्भावनेच्छयाभिधानम्, नासूयया। तेनावक्षेपणं नास्ति, पूजैव तु विद्यते।।

196. विभाषोत्पुच्छे। (6.2.196)
`उत्पुच्छः' इति। पुच्छशब्दः `नब्विषयस्य' (फि.सू.2.26) इत्याद्युदात्तः।
`सेयमुभयत्र विभाषा भवति' इति। यदोत्पुच्छशब्दोऽच्प्रत्ययान्तो न भवति तदा समासान्तोदात्तत्वम्। यदा समासान्तोदात्तत्वापवादः `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना पूर्वपदस्याव्ययस्य प्रकृतिस्वरः, तदा तेनाप्राप्तेस्मिन्नन्तोदात्तत्वे विभाषेयम्। यदा तु पुच्छमुदस्यतीत्यस्यार्थस्य विवक्षायां `पुच्छभाण्डचीवराण्णिङ्' (3.1.20) ति णिङं विदाय तदन्तादुत्पुच्छयतेः पचाद्यचि कृते उत्पुच्छ इत्येतच्छपब्दरूपं भवति, तदा थाथादिस्वरेण (6.2.144) नित्यमन्तोदात्तत्वे प्राप्तेऽयं विकल्पः। तेन प्राप्ते विभाषेयम्।
`उदस्तं पुच्छमस्योत्पच्छः' इति। बहुव्रीहिप्रकृतिस्वर एव भवति।।

197. द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ। (6.2.197)
`द्वित्रिभ्याम्' इति। दिग्योगलक्षणा(2.3.29)पञ्चमी। `पाद्दन्मूर्धसु' इति। `यस्य च भावेन भावलक्षणम्' (2.3.37) इति भावलक्षणा सप्तमी। बहुव्रीहीः कार्यी। अत आह--`द्वि त्रि इत्येताभ्याम्' इत्यादि। `द्विपात्, त्रिपात्' इति। `पादस्य लोपोऽहस्त्यादिभ्यः' (5.4.138), `संख्यासुपूर्वस्य' (5.4.140)

इत्यकारलोपः। पादशब्दो घञन्तत्वादाद्युदात्त इति पाच्छब्दश्चाद्युदात्तः एव भवति। `द्विदन्' इति। `वयसि दन्तस्य' (5.4.141) इति दत्रादेशः। दन्तशब्द आद्युदात्त इत्युक्तम्। तेन दत्रादेशोऽपि स्थानिवद्भावेनाद्युदात्त एव भवति। `द्विमूर्धा' इति। मूर्धशब्दः `श्वन्नुक्षन्पूषन्प्लीहन्' (द.उ.6.55) इत्यादिना रन्प्रत्ययान्तो निपात्यते। तेनाद्युदात्तः। `मूर्धन्' इत्यादि। `द्वित्रिभ्यां ष मूर्ध्नः' (5.2.115) [`षो' इति मु. पाठः] इति षः समासान्तः प्राप्नोति, स न कृतः। तेनात्र नान्त एव मूर्धशब्दः। किं पुनः कारणमकृतसमासान्त एव मूर्धञ्शब्द उपात्तः? इत्यात आह--`तस्य' इत्यादि। यदि कृतसमासान्त उपादीयेत तदा सत्येव समासान्तेऽन्तोवात्तत्वं स्यात्, असति न स्यात्। तस्मादसत्यपि समासान्तेऽन्तोदात्तत्वं यथा स्यादित्येतत् प्रयोजनमकृतसमासान्तनिर्देशस्य। ननुच नित्यमेव समासन्तेन भवितव्यम्, तत् कुतस्तस्यासत्त्वम्? इत्यत आह--`एतदेव' इत्यादि। यदिदमस्य प्रयोजनस्य सम्पादनारथमकृतसमासान्तस्य मूर्धन्शब्दस्योपादनाम्, एतदेव ज्ञापकम्--अनित्यः समासान्तो भवतीति। तेन द्विमूर्धत्यादिप्रयोग उपपन्नो भवति। यदि तर्ह्यकृतसमासान्त इह मूर्धन्शब्द उपात्तः, एवं सति यदा समासान्तः क्रियते तदान्तोदात्तेन न भवितव्यम्। कृतसमासान्तस्य शब्दान्तरत्वादित्यत आह--`यद्यपि' इत्यादि। इह हि बहुव्रीहिः कार्यी, तदेकदेशित्वं च समासान्तस्य। एकदेशोऽस्यासतीत्येकदेशी, स बहुव्रीहिरेकदेशी यसय समासान्तस्य स तदेकदेशी, तद्भावसतदेकदेशित्वम्। एतेन बहुव्रीह्यवयवत्वं समासान्तस्य दर्शयन् कृतसमासान्तस्य शब्दान्तरत्वं निरस्यति। तदेवं यस्मादिह बहुव्रीहिः कार्यी तदेकदेशित्वञ्च समासान्तस्य, तस्माद्यदापि समासान्तः क्रियते तदापि पक्षेऽन्तोदात्तत्वं भवत्येव। `कल्याणमूर्धा' इति। कल्याणशब्दः `नब्विषयस्य' (फि.सू.2.26) इत्याद्युदात्तः। `द्वयोर्मूर्धा' इति। अत्र नित्यमेव समासान्तोदात्तत्वं भवति।।

198. सक्थं चाक्रान्तात्। (6.2.198)

`सक्थमिति' इति। `बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' (5.4.113) इत्यनेन षच् समासान्तो यस्य स सक्थिशब्दोऽत्र गृह्यते। `अक्रान्तात्' इति। क्रशब्दो अन्तो यस्य सः क्रान्तः। न क्रान्तोऽक्रान्तः। `गौरसक्यः' इति। गौरशब्दः प्रज्ञाद्यणन्तत्वादन्तोदात्तः। `श्लक्ष्णसक्थः' इति। `कृत्यशूभ्यां क्स्नः' (द.उ.5.49) इति प्रकृते `श्लिषेरच्चोपधायाः' (द.उ.5.51) क्स्नप्रत्ययान्तः श्लक्ष्मशब्दः। तेनान्तोदात्तः।
`चक्रसक्थः' इति। `करोतेः किन् द्वे च' (द.उ.8.103) [`करोतेर्द्वे च'--द.उ.] इति चक्रशब्द आद्युदात्तः।।

199. परादिश्छन्दसि बहुलम्। (6.2.199)

`परशब्देनात्र सक्थशब्द एव गह्यते' इति। प्रत्यसत्तेः, स हि पूर्वसूत्रे सन्निहितत्वात् प्रत्यासन्नः। यद्येवुम्, परशब्दग्रहणमनर्थकम्, सक्थशब्द एव ह्यत्रानुवर्त्तिष्यते? नैतदस्ति; बहुव्रीहिग्रहणप्यत्रानुवर्तत इति तस्याप्याद्युदात्तत्वमाशङ्क्येत। `अञ्जिसक्थम्' इति। अञ्जिशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। अथाप्यञ्जशब्दाग्मत्वर्थ इनिः क्रियते, एवमप्यन्तोदात्त एव। `लोमशसक्थम्' इति। `लोमादिपामादिपिच्छादिभ्यः शनेलचः' (5.2.100) इति शप्रत्ययान्तत्त्वाल्लोमशशब्दोऽन्तोदात्तः। `ऋजुबाहुः' इति। `कुर्भ्रश्च' (द.उ.1.107) इत्यधिकृत्य `अर्जिदशिकम्यमिपशिबाधामृजिपसितुग्धुग्दीर्घहकाराश्च' (द.उ.1.112) इति कुप्रत्ययान्तौ ऋजुबाहुशब्दौ। तेनान्तोदात्तौ। `वाक्पतिश्चित्पत्तिः' इति। षष्ठीसमासावेतौ। अत्रोत्तरपदमाद्युदात्तं भवति; बहुलग्रहणात्। विभाषाग्रहणे हि प्रकृते बहुलग्रहणेन यत् सिध्यति तद्दर्शनार्थमुपन्यस्तः।
`व्यत्ययो बहुलं ततः' इति। यत एवं बहुलग्रहणेनानेन कार्य सिध्यति, तेन व्यत्ययो बहुलं भवति। ननु च पूर्वमेव स्वराणां व्यत्ययो विहितः? सत्यमेतत्; तस्यैव तु प्रपञ्चोऽयम्। `परादिरुदाहृतः' इति। वाक्पतिश्चित्पत्तिरिति। अत्र च परग्रहणेनोत्तरपदमुक्तम्। `अन्तोदात्तप्रकरणे' इति। `अन्तः' `थाथघञ्क्ताजबित्रकाणाम्' (6.2.44) इत्यादौ। `पूर्वपदान्तोदात्तप्रकरणे' इति। `अन्तः' (6.2.92), `सर्वं गुणकार्त्स्न्ये (6.2.93) इत्यादौ। `पूर्वपदाद्युदात्तप्रकरणे' इति। आदिरुदात्तः--`सप्तमीहारिणौ धर्म्यऽहरणे' (6.2.65) इत्यादौ। `एवमादि सर्व संगृहीतं भवति' इति। बहुलग्रहणेन। यतस्तेन विभाषाग्रहणे प्रकृते बहुलग्रहणं कृतमित्यभिप्रायः। त्रिचक्रादीनां पूर्वमेव पूर्वोत्तरपदस्वर उक्त इति पुनरिह नोच्यते।।

इति बोधिसत्त्वदेशीयाचार्य श्रीजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां षष्ठाध्यायस्य
द्वितीयः पादः।।
- - -

6.3

अथ षष्ठोऽध्यायः

तृतीयः पादः

1. अलुगुत्तरपदे। (6.3.1)

`स्तोकान्मुक्तः, अल्पान्मुक्तः' इति। `करणे स्तोकाल्पकृचछ्रकतिपयस्यासत्ववचनस्य' (2.3.33) [`करणे च'--पा.सू.] इति पञ्चमी, `स्तोकान्तिकदुरार्थकृच्छ्राणि क्तेन' (2.1.39) इति समासः। ननु च `वनं समासे' (6.2.178) इत्यतः समासगरहणमनुवर्तिष्यते, समासे च नियतं सन्निहितमुत्तरपदम्, अतोऽन्तरेणाप्युत्तरपदग्रहणमुत्तरपदं लभ्यत इत्यभिप्रायेणाह--`उत्तरपदमिति किम्' इति। `निःस्तोकः' इति। `निरादयः क्रान्ताद्यर्थे पञ्चम्या' (वा.94) इति प्रादिसमासः। एवं मन्यते--असत्युत्तरपदग्रहणे समासे ये स्तोकादय उत्तरपदभूताः पूर्वपदभूता वा, तेभ्य उत्तरस्याः पञ्चभ्या अलुग्भवतीत्येतावन्मात्रं लभ्यते, न तूत्तरपदे परतो ये स्तीकादय इत्येष विशेषः। ततश्च निःस्तोक इत्यत्राप्यलुक् स्यात्। भवति ह्यत्रापि समासवर्तिनः स्तोकादेः शब्दादुत्तरा पञ्चमीति।

नन्वेवमपि न कर्त्तव्येमेवोत्तरपदग्रहणम्, लक्षणप्रतिपदोक्तपरिभाषया(व्या.प.3) प्रतिपदं `स्तोकादिभ्यः करणे च' (2.3.33) इत्यादिसूत्रेण या पञ्चमी विहिता, तस्या एव ग्रहणम्। नतु `अपादाने पञ्चमी' (2.3.28) इत्यनेन सामान्यलक्षणेन या पञ्चमी विहिता, तस्या एव ग्रहणम्। न तु `अपादाने पञ्चमी' (2.3.28) इत्यनेन सामान्यलक्षणेन या पञ्चमी विहिता त्सयाः। अवश्यञ्च सलक्षमप्रतिपदोक्तपरिभाषाऽश्रयितव्याः; अन्यथा हि स्तोकादपेतः स्तोकापेत इत्यत्राप्यलुक्, स्यात्, एवं सति निःस्तोक इत्यत्रालुक्प्राप्तिरेव नास्ति, न ह्यत्र स्तोकशब्दात् प्रतिपदिविहिता पञ्चमी, किं तर्हि? सामान्यलक्षणविहिता। तत किं तन्निवृत्त्यर्थेनोत्तरपदगरहणेन? इत्याह--`अन्यार्थम्' इत्यादि। आनङाद्यर्थमिदमुत्तरपदगरहणम्। असति चैतस्मिन् `आनङ् ऋतो द्वन्द्वे' (6.3.25) इत्यानङ्, `होतापातृभ्याम्' इत्यत्र यथा पूर्वपदस्य भवति, तथोत्तरपदस्यापि स्यात्। तथा `इकोह्रस्वोऽङयो गालवस' (6.3.61) इति ह्रस्वो यथेह भवति--`ग्रामणिपुत्रः' इति, तथेहापि स्यात्--`ग्रामणीः' इति। ननु यद्यनुत्तरपदेऽपि ह्लस्वः स्यात्, तदा `ह्रस्वो यथेह भवति--`ग्रामणिपुत्रः' इति, तथेहापि स्यात्--`ग्रामणीः' इति। ननु यद्यनुत्तरपदेऽपि ह्रस्वः स्यात्, तदा `ह्रस्वो यथेह भवति--`ग्रामणिपुत्रः' इति, तथेहापि स्यात्--`ग्रामणीः' इति। ननु यद्यनुत्तरपदेऽपि ह्लस्वः स्यात्, तदा `ह्रस्वो नपुंसके प्रातिपदिकस्य' इति, तथेहापि स्यात्, `ग्रामणीः' इति। ननु यद्यनुत्तरपदेऽपि ह्रस्वः स्यात्, तदा `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति वचनमनर्थकं स्यात्; अनेनैव सिद्धत्वात्? नानर्थकम्; अनिगन्तार्थत्वान्नित्यार्थत्वाच्च। किञ्च, असत्युत्तरपदग्रहणे कृतम्। यद्येवम्, यदर्थमिदं तद्विधावेव कर्त्तव्यम्, इह किमर्थ क्रियते? इत्याह--`इहाप्यलुको निवृत्तिम्' इत्यादि। इतिकरणो हेतौ। अन्यार्थं तावदवश्यमिदमुत्तरग्रहणम्। इह तु क्रियमाणे सत्ययं विशेषः--निःस्तोक इत्यतराप्यलुग् निवृत्तः क्रियते। तेन लक्षणप्रतिपदोक्तपरिभाषा(व्य.प.3) नाश्रयितव्या भवति।

अथ कुतः प्रातिमावधिकारौ? इत्याह--`अलुगधिकारः' इत्यादि। विधेयान्तरं विधेयान्तरस्य निवर्तकं भवतीत्यानङ् विधीयमान उततरपदेऽलुकं निवर्त्तयति, तस्मात्--`अलगधिकारः प्रागानङः'। उत्तरपदाधिकारः `प्रागङ्गाधिकारात्' इति। उत्तरपदे परतो यत् कार्यं वीधीयते तस्य सम्बन्धिशब्दत्वात् पूर्वपदं विधिभाक्। अतोऽङ्गं विधिभाक्त्वेन विज्ञायमानमुत्तरपदाधिकारं निवर्तयति। अङ्गस्य हि यत् कार्यं तत् प्रत्यये परतो विधीयते, नोत्तरपदे। न ह्युत्तरपदेऽङ्गसंज्ञा भवति। अथ वा--उत्तरपद इति सप्तमीनिर्देशादनन्तर एवोत्तरपदे भवितव्यमानङा। यदि चात्र विभक्तेरलुक् स्यात् तदा व्यवधानादानन्तर्यं न स्यात्। न च व्यवधानेऽपि वचनसामर्थ्यादानङ्स्यादिति शक्यते परिकल्पयितुम्। एवं हि `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इति निर्दिष्टग्रहणमानन्तर्यार्थं बाध्येत, अनिष्टं च रूपमापद्येत। न चानिष्टार्था शास्त्रे प्रक्लृपतिर्युक्ता। तस्मादलुगधिकारः प्रागानङः। अङ्गस्य प्रत्यये परतोऽभावादुत्तरपदे परतस्तन्न भवत्येव, अत उत्तरपदाधिकारः प्रागङ्गाधिकारात्।।

2. पञ्चम्याः स्तोकादिभ्यः। (6.3.2)

स्तोकादय इति प्रातपदिकगणेषु न पठ्यन्ते। तस्मात् सूत्रपरिपठिता एवेह ग्रहीतव्या इति दर्शयन्नाह--`स्तोकान्तिकदुरार्थकृच्छ्राणि' इत्यादि। अथ `करणे' च' (2.3.33) इत्यादौ सूत्रे ये परिपठिताः स्ताकादयस्ते कस्मान्न गृह्यन्ते? एवं मन्यते--`ङसेः स्तोकादिभ्यः' इति वक्तव्ये `पञ्चम्याः' इति बहुतराक्षरनिर्देशेनैतत् सूचितम्--येषु स्ताकादिषु गृह्यमाणेषु बहुतरलक्ष्यसंग्रहो भवति ते ग्रहीतव्याः' इति। स्तोकान्तिकदूरार्थकृच्छ्राणीत्येतेष्वेव [`दूरार्थ' इति नास्ति मुद्रिते न्यासपाठे] गृह्यमाणेषु बहुतरलक्ष्यसंग्रहो भवति, तत्रार्थग्रहणात्; न त्वितरेषु। तस्मादेषामेव ग्रहणं न्याय्यमिति। कथं पुनरत्र लुक् प्राप्नोति, यस्मिन् प्राप्ते प्रतिषेधोऽयं क्रियते? इत्याह--`समासे कृते' इत्यादि। समासे कृते सति तस्य `कृत्तद्धितसमासाश्च' (1.2.46) इति प्रातिपदिकत्वम्, अतः 'सुपो धातुप्रातिपदिकयोः' (2.4.71) इति सुपो लुकि प्राप्ते प्रतिषेधोऽयमुच्यते।

किं पुनः कारणमेकवचनान्तानां स्तोकादीनामलुगुदाह्रियते, न द्विवचनबहुवचनान्तानाम्? इत्याह--`द्विवचनबहुवचनान्तानाम्' इत्यादि। वृत्तौ हि विशेषणपदान्येकत्वादिकां संख्यां विहायाभेदैकत्वसंख्यां प्रतिपद्यन्ते। सा पुनः सख्यानमात्रमनुपात्तसंख्याविशेषं सामान्यभूतम्; यत एवमतो विवक्षितार्थानभिधानादद्विवचनबहुवचनान्तनां समासो न भवत्येव। अभिधानलक्षणा हि कृत्तद्धितसमासा भवन्तीति। `तेन' इत्यादि। यत एवं द्विवचनबहुवचनान्तानां स्तोकादीनां समासो न भवति, तेन स्तोकाभ्यां मुक्तः, स्तोकेभ्यो मुक्त इत्यत्र न कदाचिदैकपद्यमैकस्वर्य च भवति। स्तोकाभ्यामित्यस्माद्धि पदान्मुक्त इत्येतत् पदमन्यदेवात्यन्तभिन्नम्, तथा स्तेकेभ्य इत्यस्मान् मुक्त इत्येतत्। स्वरोऽप्यत्रानेक एव। तथा हि--`स्तोकाभ्याम्' इत्येतत् प्रातिपदिकस्वरेम मध्योदात्तम्, `मुक्तः' इत्येतत् प्रत्ययस्वरेणान्तोदात्तम्। एवम् `स्तोकेभ्यो मुक्तः' इत्यत्रापि नानास्वरता वेदितव्या। मूलोदाहरणे तु समासे सत्येकपद्यं भवति, स्वरोऽप्येक एव। तथा हि--थाथादि(6.2.144)सूत्रेणात्रान्तोदात्तत्वम्।

यदि द्विवचनबहुवचनान्तानां समासो न भवतीह तर्हि कथं भवति--गोषुचरः वर्षासुज इति? विवक्षितार्थाभिधानात्। अनभिधानं ह्यसमासे हेतुरुक्तः, इह तु

विवक्षितार्थस्यार्थस्य बहुवचनस्याभिधानमस्त्येव। यत्र ह्यभेदैकत्वसंख्योपजायते, तत्र संख्याविशेषस्याभिधानं न भवति, न चात्राभेदैकत्वसंख्योपजायते। ततश्च विवक्षितार्थाभिदानादभेदैकत्वसंख्या नोपपद्यते। तथा हि--गोषुचर इत्यत्र गोशब्दोऽप्सु वर्तते, स चापोऽभिदधानो बहुत्वसंख्याविशिष्ट एवाभिदधाति, अप्शब्दवत्। वर्षासुज इति--वर्षाशब्दोऽपि कालविशेषे बहुत्वसंख्याविशिष्ट एव वर्तते। अतः प्रापिपदिकेनैव बहुत्वसंख्याया आश्रितत्वान्नात्राभेदैकत्वसंख्योपजायते। यदि तु जायेत, तदा बहुत्वसंख्या निवर्तेत, ततश्च गोशब्दस्य वर्षाशब्दस्य च यः प्रातिपदिकार्तोऽभिप्रेतः स इह न गम्येत। तस्मान्माभूद्गोशब्दवर्षाशब्दयोरभिप्रेतस्यार्थस्यानवगतिरिति नात्राभेदैकत्वसंख्योपजायते। ततश्च विवक्षितार्थाभिधानाद् गोषुचरः, वर्षासुज इत्यत्र भवत्येव समासः।

`ब्राह्मणाच्छंसिन उपसंख्यानं कर्तव्यम्' इति। ब्राह्मणाच्छंसीति योऽयं शब्दस्तस्योपसंख्यानं प्रतिपादनं कर्तव्यमित्यर्थः। किं पुनरत्र न सिध्यति? पञ्चमीति। ब्राह्मणशब्देनात्राध्ययनविशेष उच्यते, तं शंसति=कथयति यः सः ब्राह्मणाच्छंसीति ताच्छिलिको णिनिः। अत्र ब्राह्मणशब्दात् `कर्मणि द्वितीया' (2.3.2) इति द्वितीयायां प्राप्तायां पञ्चम्युपसंख्येया। अलुक्पुनः `तत्पुरुषे कृति बहुलम्' (6.3.14) इत्येव सिद्धः। यदा तु ब्राह्मणादाकृष्यावयवमर्थं वा शंसतीति विवक्ष्यते, तदा पञ्चम्यपि नोपसंख्येया। `अपादाने पञ्चमी' (2.3.28) इत्येवमेव तस्याः सिद्धत्वात्। कथं पुनरत्रासता पञ्चम्यर्थेन व्युत्पत्तिः क्रियते? इत्याह--`क्रत्विग्विशेष' इत्यादि। रूढिः=प्रसिद्धिः, संज्ञेति यावत्। तस्या इत्यनेन रूढिमात्रं प्रत्यवमृश्यते, न तु ब्राह्मणाच्छंसीत्ययं रूढिशब्दः। रूढिशब्दः कस्याचिदेव ऋत्विग्विशेषस्य वाचकः, तत्रैव तस्य संज्ञात्वेन प्रणीतत्वात्। तस्मात् तस्याप्यसता सता वावयवार्थेन व्युत्पत्तिः क्रियते। तत्र यदि ब्राह्मणं शंसतीत्ययमर्थो विवक्ष्यते, तदा पञ्चम्यर्थस्यापादानस्याभावादसतावयवार्थेन व्युत्पत्तिः क्रियते। यद ा तु ब्राह्मणादवयबार्थं वा गृहीत्वा शंसतीत्ययमर्थो विवक्ष्यते, तदा पञ्चम्यर्थस्य भावात् सता।।

3. ओजःसहोम्भस्तमसस्तृतीयायाः। (6.3.3)

ओजसाकृतमित्यादौ `कर्तृकरणए कृता बहुलम्' (2.1.32) इत्यनेन समासः।

`अञ्जस उपसंख्यानम्' इति। अञ्जस उत्तरस्यास्तृतीयाया अलुक् उपसंख्यानम्=प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्--`आज्ञायिनि च' (6.3.5) इत्यत्र चकारोऽनुक्तसमुच्चयार्थः, तेनाञ्जःशब्दादुत्तरस्यास्तृतीयाया अलुग्भवतीति। अन्यदपि चात्र प्रत्पादनमुत्तरत्र करिष्यामः।

`पुंसानुजः' इत्यादि। पुंसानुजो जनुषान्ध इत्यत्रापि तृतीयाया अलुक्प्रतिपादनं कर्त्तव्यमित्यर्थः। प्रतिपादनं पूर्ववत्। पुंसा हेतुनानुजः पुंसानुजः। जनुषा हेतुना अन्धः जनुषान्धः। `तृतीया' (2.1.30) इति योगविभागात् समासः। जनुरिति जन्मनो नामधेयमेतत्।।

4. मनसः संज्ञायाम्। (6.3.4)

5. आज्ञायिनि च। (6.3.5)

`मनसाज्ञायी' इति। तच्छिलिको णिनिः, `आतो युक् चिण्कृतोः' (7.3.33) इति युगागमः, उपपदसमासः।।

6. आत्मनश्च पूरणे। (6.3.6)

पूरणगरहणिह स्वर्यते, स्वरितेन चाधिकारावगतिर्भवति। तेन पूरणग्रहणधिकृत्य पूरणग्रहणमधिकृत्य पूरणप्रत्यया विहितास्त एव पूरणग्रहणेन गृह्यन्ते, न तु स्वरूपम्। `उत्तरपदे' (6.3.1) इत्यनुवर्त्तते च, ततः प्रत्ययग्रहणपरिभाषया (भो.प.सू.7) पूरणप्रत्ययान्त उत्तरपदे कार्यं विज्ञायत इत्यालोच्याह--`पूरणप्रत्ययान्त उत्तरपदे' इत्यादि। `पञ्चमः' इति। पञ्चानां पूरणः `तस्य पूरणे डट्' (5.2.48) इति डट्, तस्य `नान्तादसंख्यादेर्मट्' (5.2.49)। `षष्ठः' इति। षण्णां पूरण इति `षट्कतिकतिपयचतुरां थुक्' (5.2.51), ष्टुत्वम्। `आत्मनापञ्चमः' इत्यादौ केन तृतीया, न ह्यत्र करणादिस्तृतीयार्थोऽस्ति, करणादि हि कारकम्, क्रियायाश्च कारक्रं भवति, न चेह काचित् क्रिया विद्यते? इत्याह--`तृतीयाविधाने' इत्यादि। भवत्वेवम्, तृतीयासमासास्तु कथम्, न ह्यत्र समासलक्षणमस्ति? इत्यत आह--`तृतीयाविधाने' इत्यादि। भवत्वेवम्, तृतीयासमासस्तु कथम्, न ह्यत्र समासलक्षणमस्ति? इत्यत आह--`तृतीयेति च' इत्यादि। अथ वा--`कर्तृकरणयोस्तृतीया' (2.3.18) इत्यनेनैवात्र तृतीया, `कर्तृकरणे कृता बहुलम्' (2.1.32) इति समास इति दर्शयन्नाह--`आत्मना वा' इत्यादि। अत्र कर्तर करणे वैषा तृतीया--कृतः पञ्चम इति। कृते समासे कृतशब्दो न प्रयज्यते; तदर्थस्य वृत्तावन्तर्भावात्। `कथम्' इत्यादि। अत्राप्यात्मना चतुर्थ इति भवितव्यमिति भावः। `बहुव्रीहिरयम्' इत्यादि परिहारः। तत्पुरुषे ह्यात्मनाचतुर्थ इति स्यात्, न चायं तत्पुरुषः। किं तर्हि? बहुव्रीहिः। स च प्रथमान्तयोरेव पदयोरिति न भवत्यनिष्टप्रसङ्गः। ननु चान्यपदार्थे बहुव्रीहिरुच्यते, अन्यपदार्थश्च व्यतिरिक्तो भवति। यथा चित्रा--गावो यस्य सः चित्रगुरिति, न चेह कश्चिद्व्यतिरिक्तोऽन्यपदार्थोऽस्ति? नैष दोषः; अव्यतिरक्तोऽप्यन्यपदार्थो भवति वयपदेशिवद्भावेन। यथा--शोभनशरीरः शिलापुत्रक इति।।

7. वैयाकरणाख्यायां चतुर्थ्याः। (6.3.7)

`वैयाकरणानाम्' इति। व्याकरणमधीयते विदन्ति वा वैयाकरणा। का पुनर्वैयाकरणानामाख्येत्याह--`यया' इत्यादि। अथैवं कस्मान्न व्याख्यायते--व्याकरणे भवा वैयाकरणी, `अणुगयनादिभ्यः' (4.3.73) इत्यण्, वैयाकरणी चासावाख्या चेति वैयाकरणाख्या `पुंवत् कर्मदारय' (6.3.42) इत्यादिना पुंवद्भवः, तस्यां वैयाकरणाख्यायामिति? अशक्यमेवं व्याख्यातुम्, इह हि न स्यात्--आत्मनेभाषः, परस्मैभाष इति। व्याकरणे हि का भाषा? या व्याकरणे कृता। न चैते क्वचित् व्याकरणे कृते। पूर्वत्र व्याख्याने सतीहापि भवति, एते अपि वैयाकरणानामाख्ये, तथा ह्याभ्यामपि वैयाकरणा व्यवहरन्त्येव। `आत्मनेपदम्' इति। आत्मार्थ पदम्। तादर्थ्ये `चतुर्थी' (2.1.36) इति योगविभागात् समासः। ननु `चतुर्थी तदर्थ' (2.1.36) इत्येवं समासः सिद्धः? न सिध्यति; प्रकृतिविकारभावे हि स इष्यते।।

8. परस्य च। (6.3.8)

9. हलदन्तात्सप्तम्याः संज्ञायाम्। (6.3.9)
`युधिष्ठिरः' इति। `संज्ञायाम्' (2.1.44) इति समासः, `गवियुधिभ्यां स्थिरः' (8.3.95) इति षत्वम्। अथ गविष्ठिर इत्यत्र कथमलुक्, न हि गोशब्दो हलन्तः, नाप्यदन्तः? स्यादेतत्--गो+इ+स्थिर इति स्थितेऽन्तरङ्गत्वादवादेशे कृते हलन्तत्वाद्भविष्यति, एतच्च नास्ति; यतः `अन्तरङ्गानपि विधीन् वहिरङ्गो लुग् बाधते' (व्या.प.128) इति, अवश्यं चैतदभ्युपेयम्; अन्यथा हि नद्यां कुक्कुटिका नदीकुक्कुटिक, भूम्यां पाशो भूमिपाश इत्यत्रापि यणादेशे कृतेऽलुक् प्रसज्येत? इत्यत आह--`गविष्ठिर इत्यत्र तु' इत्यादि।
`हृद्द्युभ्याम्' इति। असंज्ञार्थमिदम्। वक्तव्यमिति व्याख्येयमित्यर्थः। व्याख्यानं चोत्तरत्र करिष्यते। अथ वेहापि क्रियते--इहान्तग्रहणं न कर्त्तव्यम्, विनापि तेन सपतम्या प्रातिपदिके सन्निधापिते हलदन्तता लभ्यत एव, तसमादधिकमिहान्तग्रहणं क्रियते, तदधिकं क्रियमाणमेतत् सूचयति--अधिकेनायमलुग्भवतीति। तेन क्वचिदसंज्ञायामलुग्भवतीति। `हृदिस्पृग्दिविस्पृक्' इति। `स्पृशोऽनुदके क्विन्' (3.2.58) `क्विन्प्रत्यस्य कुः' (8.2.62) ति शकारस्य खकारः, तस्य `झलां जशोऽन्ते' (8.2.39) इति जश्त्वम्--गकारः, तस्यापि `वाऽवसाने' (8.4.56) इति चर्त्वम्--ककारः। अत्र चायमर्थः--हृदयं स्पृशति, दिवं स्पृशतीति। तथा हि भाष्ये उक्तम्--`द्वितीयार्थे सप्तमी चैषा द्रष्टवया, हृदयं स्पृशति, दिवं स्पृशतीति `हृविस्पृक्, दिविस्पृक' इति। कथं पुनः द्वितीयार्थे सा भवति? अत एव भाष्यकारवचनात्। अथ वा--हृदयं यः स्पृशति स हृदये स्पृशत्येव, दिवं यः स्पृशति स दिवि स्पृशत्येव अत्र `अधिकरणे' (2.3.36) इत्येवं भविष्यति सप्तमी।
आख्याग्रहणे प्रकृते पुनः संज्ञाग्रहणं विस्पष्टार्थम्।।

10. कारनाम्नि च प्राचां हलादौ। (6.3.10)
वणिग्भिः कर्षकैः पशुपालैश्च राज्ञे देयो भागो रक्षानिबन्धनः=कारः, तस्य नाम कारनाम। `कूपेशाणम्' इत्यादौ `र्संज्ञायाम्' (2.1.44) इति समासः। `हलेद्विपदिका' इति। द्वौ द्वौ पादौ देयौ द्विपादिका, `पादशतस्य' (5.4.1) इत्यादिना वुन्, अलोन्त्यलोपश्च, `पादः पत्' (6.4.130) इति पदादेशः। `कारविशेषस्य' इत्यादिनास्य सूत्रस्य नियमार्थतां दर्शयति। नियमविकल्पाः--नियमविशेषा इत्यर्थः। `कारनाम्नि च' इत्यादिना तेषां नियमविकलपानां स्वरूपं दर्शयति। एते च नियमविकल्पाः कारनाम्नि, प्राचाम्, हलादावित्येषां पदानामिह नियमवाक्य उपादानाललभ्यन्ते। यद्याद्यो नियमो नाभिप्रेतः स्यात् तदा `कारनाम्नि' इति न ब्रूयात्। एवं यदि द्वितीयो नियममो नाभिप्रेतः स्यात् तदा `प्राचाम्' इत्येवं नोक्तं स्यात्। तथा यदि तृतीयो नियमो नाभीष्टः स्यात् `हलादौ' इत्येवं नोक्तं स्यात्। अथ किमर्थं नामग्रहणम्, न पूर्वयोगात् संज्ञाग्रहणमनुवर्त्तते? पूर्वयोगे संज्ञाया उपाधेः प्रायिकत्वसूचनार्थं नामग्रहणम्। तेन हृदिस्पृक्, दिविस्पृगित्यत्रासंज्ञायामप्यलुक्सिद्धो भवति।।

11. मध्याद्र गुरौ। (6.3.11)
`अन्ताच्चेति वक्तव्यम्' इति। अन्तशब्दाच्चोत्तरस्याः सप्तम्या अलुग्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--पूर्वयोगाच्चकारोऽनुवर्त्तते, स चानुक्तसमुच्चार्थः। तेनान्तशब्दादप्युत्तरस्याः सप्तम्या अलुग्भवतीति।।

12. अमूर्द्धमस्तकात् स्वाङ्गादकामे। (6.3.12)
स्वाङ्गमद्रवादिलक्षणं पारिभाषिकं यत् तदिह गृह्यते। `कण्ठेकालः' इति बहुव्रीहिः। `व्यधिकरणानामपि `बहुव्रीहिर्भवत्येव' इति बहुव्रीहिः। `समानाधिकरण' (वा.97) इत्येतत् प्रायकम्। `अक्षशौण्डः' इति। `सप्तमी शौण्डैः' (2.1.40) इति समासः। `अङ्गुलित्राणजङ्घावलो' सप्तमीतत्पुरुषौ।।

13. बन्धे च विभाषा। (6.3.13)
`स्वाङ्गात्' (6.3.12) इति निवृत्तम्, सामान्येन विधिः। `बन्धे' इति। बध्नातेरेतद्रूपम्। `नेन्त्सिद्धबध्नातिषु च' (6.3.19) इत्यनेन तत्पुरुषे बध्नातौ प्रतिषेधं वक्ष्यन्ति। तत्र विषयविभागो न ज्ञायते--तत्पुरुषे क्व च प्रतिषेधः? इत्यतस्तत्परिज्ञानार्थमाह--`बन्ध इति धञन्तो गृह्यते' इति। बन्धनं बनधः, भावे

घञ्। अनेन धञन्ते बध्नातौ विभाषा। प्रत्ययान्तरे तु प्रतिषेध इति दर्शितं भवति। कथं पुनर्ज्ञायते--घञन्तोऽयमिति? आद्युदात्तत्वात्। `हस्तेबन्धः' इति। तत्पुरुषः, बहुव्रीहिर्वा। `उभयत्र' इति। प्राप्ते चाप्राप्ते च कथं पुनरुभयत्र विभाषेयम्? इत्याह--`स्वाङ्गाद्धि' इत्यादि।।

14. तत्पुरुषे कृतिबहुलम्। (6.3.14)
`स्तम्बेरमः, कर्णेजपः' इति। `स्तम्बकर्णयो रमिजपोः' (3.2.13) इत्यच्, `उपपदमितङ्' (2.2.19) इति तत्पुरुषः।
`कुरुचरः, मद्रचरः' इति। `चरेष्टः' (3.2.16) विभाषायां प्रकृतायां बहुलग्रहणं क्वचित्प्रवृत्त्यादीनामर्थानां संग्रहार्थम्। तेनालुक्प्रवृत्तिः क्वचिदेव भवति--`स्तम्बेरमः' इत्यादौ। क्वचिदप्रवृत्तिरेव--`कुरुचरः' इत्यादौ। क्वचिदुभयम्--`सरसिजम्, सरोजम्' इत्यादौ। क्वचिदन्यदेव--`ब्राह्मणाच्छंसी' इत्यादौ। सप्तम्या अलुगुक्तः पञ्चम्या अपि भवति। तथा कृदन्त उत्तरपदेऽलुगुक्तस्तद्धितेऽपि भवति--अप्सु भवोऽप्सव्य इति। दिगादित्वाद्यत्--`ओर्गुणः' (6.4.146) इति गुणः, `वान्तो यि प्रत्य' (6.1.79) इति वान्तादेशः।
तदेवं सर्वत्र बहुलग्रहणेन सिद्धमिति `ब्राह्मणाच्छंसिन उपसंख्यानम्' (वा.716) इत्यादि। यदुक्तम्, यच्च वक्ष्यते--`अपोयोनियन्मतुषु सप्तम्या अलुक्' (वा.721) इत्यादि, तत् सर्व न वक्तव्यं भवतीति। यद्येवम् स्तोकान्मुक्त इत्यादपि सर्वमनेनैव सिद्धमिति `पञ्चम्याः स्ताकादिभ्यः' (6.3.2) इति न वक्तव्यं भवति? सत्यमेतत्; अस्यैव प्रपञ्चार्थं तद्वेदितव्यम्। एवञ्च सति सुसंगृहीतं लक्ष्यं भवति। तथा चाह--त एव विषयाः सुसंगृहीता भवन्ति येषां लक्षणं प्रपञ्चश्च।।

15. प्रवृट्शरत्कालदिवां जे। (6.3.15)
`प्रावृषिजः' इति। `सप्तम्यां जनेर्डः' (3.2.97), `टेः' (6.4.143) इति टिलोपः, `अपपदमतिङ' (2.2.19) इति समासः।।

16. विभाष वर्षक्षरशरवरात्। (6.3.16)

17. घकालतनेषु कालनाम्नः। (6.3.17)
`घ' इति तरपतमपोर्गहणम्, `काल' इति कालवाचिनः शब्दस्य, `तन' इति ट्युट्युलोरनादेशस्य सतुट्कस्य। `पूर्वाह्णेतराम्' इति। अह्नः पूर्वमिति विगृहय `पूर्वापर' (2.2.1) इत्यादिनैकदेशिसमासः। `राजाहः--सखिभ्यष्टच्' (5.4.91) इति टच् समासान्तः, `अह्नोऽहन एतेभ्यः' (5.4.88) इत्यह्नादेशः। `अह्नोऽदन्तात्' (8.4.7) इति णत्वम्। अस्मिंश्च पूर्वाह्णे अस्मिंश्च पूर्वाह्णे, अस्मिस्त्वनयोरतिशयेन पूर्वाह्णे पूर्वाह्णेतर इति। `द्विवचन' (5.3.57) इत्यादिना तरप्। `पूर्वाङ्णेतमाम्' इति। `अतिशायने' (5.3.55) इत्यादिना तमप्, `कृत्तद्धितसमासाश्च' (1.2.46) इति प्रादिपदिकत्वे सति सुब्लुक् प्राप्तः पक्षे प्रतिषिध्यते। `पूर्वाह्णेतने' इति। `पूर्वाह्णेतरे' इत्यत्रार्थे `विभाषा पूर्वाह्णापराह्णाभ्याम्' (4.3.24) इति ट्युट्युलौ तुडागमश्च, `युवोरनाकौ (7.1.1) इत्यटनादेशः।
`रात्रितरायाम्' इति। अस्याञ्च रात्रावस्याञ्च रात्रावनयोरतिशयेन रात्राविति विग्रहः। ननु च `प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य' (पु.प.वृ.44) इति तदन्तग्रहणं भवतीति घसंज्ञकप्रत्ययान्ते तनप्रत्ययान्ते चोत्तरपदे परतोऽलुगुदाहर्त्तवयः, तत् कस्मात् प्रत्ययमात्रे स उदाहृतः? इत्याह--`उत्तरपदाधिकारे' इत्यादि। कुतः पुनरेतदित्याह--`लेखग्रहणात्' इत्यादि। `हृदयस्य हृल्लेखयदण्लासेषु' (6.4.50) इत्यत्राणो लेखशब्दस्य चाणन्तस्य भेदनोपादनम्। तत्र यद्युत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तरविधिरिष्यते तदा लेखग्रहणं न कुर्यात्; अण्ग्रहणेनैव तद्ग्रहणस्य सिद्धत्वात्, क्रियते च। तस्माल्लेखग्रहणाद्विज्ञायते--`उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्नेष्यते' (पु.प.26) इति। `तेने' इति। तदन्तविधेरिहानिष्टत्वेन। `काल इति न स्वरूपग्रहम्' इति। नामग्रहणात्। तस्य ह्येतदेव प्रयोजनम्।।

18. शयवासवासिष्वकालात्। (6.3.18)
`खेशयः' इति। `अधिकरणे शेतेः' (3.2.15) इत्यच्। `ग्रामेवासः' इति। वसनं वासः, भावे घञ्। `ग्रामेवासी' इति। ताच्छीलिको णिनिः, व्रते वा।
`पूर्वाह्णशयः' इति। ननु च स्वरूपग्रहणे सति कालशय इति प्रत्युदाहार्यम्, नैवेदं स्वरूपग्रहणम्। किं तर्हि? अर्थग्रहणम्। अत एव वृत्तावुक्तम्--`अकालवाचिनः' इति। कथं पुनरर्थग्रहणं लभ्यते? पूर्वसूत्रादिह नामग्रहणानुवृत्तेः। यद्येवम्, तदा नार्थः कालग्रहणेन `कालनाम्नः' (6.3.17) इत्येतदनुवर्तिष्यते, तस्य च नञा सह सम्बन्धं करिष्यामः--कालनाम्नो नेति, तत्रायमर्थः--`नेन्सिद्धबध्नातिषु च' (6.3.19) [`नेन्सिद्ध' इति प्राचीनमुद्रितपाठः] इत्यत्र नेति वक्तव्यं न भवति, नेत्येतदेव ह्यनुवर्त्तिष्यते? नैवं शक्यम्; `न शयवासवासिषि' इत्युच्यमाने ह्यलुक एवायं प्रतिषेधो विज्ञायेत, तस्यात्र विधेयतया प्रस्तुतत्वात्। तस्मात् कालस्यैव प्रतिषेधो यथा स्यादित्येवमर्थं कालग्रहणं कर्त्तव्यम्। वक्तव्यमिति व्याख्येयमित्यर्थः। व्याख्यानं तु पूर्वमेव कृतम्।।

19. नोन्त्सिद्धबध्नातिषु च। (6.3.19) [`नेन्सिद्ध' इति प्राचीनमुद्रितपाठः]

`तत्पुरुषे कृति बहुलम्' (6.3.14) इति प्राप्तस्यालुकोऽयं प्रतिषेधः। `इन्नन्त उत्तरपदे' इति। ननु च `उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्नष्यते' (पु.प.26) इति ज्ञापितमेतत्, तत्कथमिह तदन्तमुत्तरपदं गृह्यते? सप्तम्याः परस्येन्प्रत्ययस्यासम्भवात्। द्विविध एव हीन्प्रत्ययः--कृत् तद्धितश्च। तत्र कृद्धातोरेवोत्पद्यते इति न सप्तम्याः परस्येन्प्रत्ययस्यासम्भवात्। द्विविध एव हीन्प्रत्ययः--कृत् तद्धितश्च। तत्र कृद्धातोरेवोत्पद्यते इति न सप्तम्याः परः सम्भवति। तद्धितोऽपि नैव कश्चित् सप्तमीसमर्थादुत्पद्यत इत्यसावपि नैव सप्तम्याः परः सम्भवति। तस्मादिन्नन्तमेव गृह्यत युक्तमुक्तमेतत्। `स्थण्डिलवर्त्ती' इति। `व्रते' (3.2.80) इति णिनिः; `उपपदमतिङ्' (2.2.19) इति समासः। `साङ्काश्यसिद्धः' इति। `सिद्धशुष्क' (2.1.41) इत्यादिना समासः। `चक्रबद्धः' इति। बद्धशब्दो निष्ठान्तः, `सप्तमी' (2.1.40) इति योगविभागात् समासः।
बन्धशब्देन `चक्रबन्धः' इति। `सिद्ध' (2.1.41) इत्यादिना समासः। `तत् पचाद्यचप्रत्ययान्तं द्रष्टव्यम्' इति। अथ बन्ध इत्येतच्छब्दरूपं घञन्तं कस्मान्न गृह्यते? इत्याह `घञन्ते हि' इत्यादि।।

20. स्थे च भाषायाम्। (6.3.20)
अयमपि `तत्पुरुषे' (6.3.14) इत्यादिना प्राप्तस्यालुकः प्रतिषेधः। `समस्थः' इति। समे तिष्ठतीति कः `आतो लोप इटि च' (6.4.64) इत्यकारलोपः। `कृष्णोऽस्याखरेष्ठः' [`कृष्णोऽस्याखरेष्ठा' इति मुद्रितः पाठः `कृष्णोऽस्याखरेष्ठः' काशिका मुद्रितः पाठः--वाराणसी. `कृष्णोभ्यारेष्ठः'--काशिका--सं.प.पाठः] इति। `स्थः कः च' (3.2.77) इति क्विप्प्रत्ययः।।

21. षष्ठ्या आक्रोशे। (6.3.21)
`चौरस्यकुलम्' इति। आक्रोशप्रतिपादनपरमेतत्, न त्वनेन तस्य सम्बन्धो विवक्षितः। `वक्तव्यः' इति। व्याख्येय इत्यर्थः। व्याख्यानं तु पूर्वमेव कृतम्। `पश्यतोहरः' इति। पश्यत इति `षष्ठी चानादरे' (2.3.38) इति षष्ठी। हरतीति हरः पचाद्यच्।
`अमुष्य' इति। अदसस्त्यदाद्यत्वम्, `अदसोऽसेर्दादु दो मः' (8.2.80) इत्युत्त्वमत्वे, उत्त्वस्यासिद्धवात्' टाङसिङसामिनात्स्याः' (7.1.12) इति ङसः स्यादेशः। तथा `अमुष्यकुलिकेति' (इति)। यथा अमुष्यपुत्रिकेत्यत्र भनोज्ञादित्वात् (5.1.133) वुञ्, तथात्रापीत्यर्थः।
`देवानाम्प्रियः' इति। प्रीणातीति प्रियः, `इगुपधज्ञाप्रीकिरः कः' (3.1.135) इति कप्रत्ययः इयङादेशः। `शुनःशेपः' इति। `श्वयुवमघोनामतद्धिते' (6.4.133) इति सम्प्रसारणम्।।

22. पुत्रेऽन्यतरस्याम्। (6.3.22)

23. ऋतो विद्यायोनिसम्बन्धेभ्यः। (6.3.23)
विद्या च योनिश्चेति विद्यायोनी, तत्कृतः सम्बन्दो येषां ते विद्यायोनिसम्बन्धाः। कृतशब्दस्य वृत्तावप्रयोगः; गम्यमानार्थत्वात्, यथा--गुडधाना इत्यत्र मिश्रशब्दस्य।
`ऋतो विद्यायोनिसम्बन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणं कर्तव्यम्' इति। तदित्यनेन विद्यायोनिसम्बन्धा उभयेऽपि निर्दिश्यन्ते, तेषां पूर्वपदबूतानामुत्तरपदभूतानां च ग्रहणं कर्त्तव्यम्। गृह्यते येन तत् ग्रहणम्, येन ते गृह्यन्ते तादृशं व्याख्यानं कर्त्तव्यमित्यर्थः। किं पुनस्तद्व्याख्यानम्? किमर्थं तत्कर्त्तव्यम्? इत्याह--`विद्यायोनिवाचिन्येव' इत्यादि। तत्रेदं व्याख्यानम्--इहोङ्गितेनोन्मिषितेन महता सूत्रप्रबन्धेनाचार्याणामभिप्राया लक्ष्यन्ते, `ऋतो विद्यायोनिसम्बन्धेभ्यः' इत्येष महान् सूत्रप्रबन्धः, यदि ह्यविद्यायोनिसम्बन्धवाचिन्युत्तरपदेऽलुगभीष्टः स्यात्, एवं सत्यविद्यायोनिसम्बन्धादित्येवं ब्रूयात्। अथ वा--सम्बन्धग्रहणमपि न कुर्यात्, न हि किञ्चिदृकारान्तं विद्यावाचि योनिवाचि वाऽसम्बन्धमस्ति, तत्रान्तरेणापि सम्बन्धग्रहणं विद्यायोनिसम्बन्धवाचिन इति विज्ञास्यते, तत् किं सम्बन्धग्रहणेन! तदेतस्मान्महतः सूत्रप्रबन्धाद्विद्यायोनिसम्बन्धवाचिन्युत्तरपद आचार्यस्यायमलुगभीष्ट इति लक्ष्यत इति। `होतुः' इति। `ऋत उत्' (6.1.111) इत्युत्त्वम्, रपरत्वम्, `रात्सस्य' (8.2.24) इति सकारलोपः।।

24. विभाषा स्वसृपत्योः। (6.3.24)

25. आनङ् ऋतो द्वन्द्वे। (6.3.25)
`ऋकारान्तानां विद्यायोनिसम्बन्धवाचिनां यो द्वन्द्वः' इत्यादि। अथ ऋकारान्तसय द्वन्द्व आनङ् भवतीत्येवं कस्मान्न विज्ञायते? अशक्यमेवं विज्ञातुम्; इहापि प्रसज्येत--पितृपितामहाविति। ङकारोऽन्त्यादेशार्थः।
इह हि वर्णानामुपदेशः--कार्यार्थः, श्रवणार्थो वेति, नकारश्चायं न क्वचित् श्रूयते, सर्वत्रैव ह्यस्य `नलोपः प्रातपदिकान्तस्य' (8.2.7) इति लोपेन भवितव्यम्, नापि किञ्चित् कार्यमस्योपलभ्यते, तत् किमर्थं नकारस्योच्चारणम्? इत्याह--`नकारोच्चारणम्' इत्यादि। असति नकार ऋकारस्या स्थानेऽणेव

शिष्यते, ततश्च `उरण् रपरः' (1.1.51) इति रपरत्वं स्यात्। नकारे तु सति नायमणेव शिष्यते, अपि तवण् चानङ् चेति न भवति रपत्वप्रसङ्गः। न हि यत्राण् अनण् चेति शिष्यते तत्र रपरत्वं भवति। यथा `सुधातुरकङ् च' (4.1.97) इति सौधातकिरित्यत्र। तस्मादत्र रपरत्वनिवृत्त्यर्थ नकारोच्चारणम्। अथ पितापुत्रौ, मातापुत्रौ इत्यतर कथमानङादेशः, न ह्यत्र ऋकारान्तानां द्वन्द्वः? इत्याह--`पुत्र इत्यत्रानुवर्त्तते' इति। `पुतरेऽन्यतरस्याम्' (6.3.22) इत्यतः पुत्र इत्येतदत्रानुवर्त्तत इत्यभिप्रायः। यदि तु पुत्र इत्यनुवर्तते, तदा `विभाषा स्वसृपत्योः' (6.3.24) इत्यत्र पुत्रेऽपि विभाषा प्राप्नोति? नैष दोषः; मण्डूकप्लुतिन्यायेन तदनुवर्त्तते। अत एवात्रेत्युक्तं तत्रैवानुवर्त्तते, न पर्वत्रेति प्रतिपादनार्थम्। नन्वेवमपि पुत्रशब्द उत्तरपदे पूर्पदमात्रस्यानङ् प्राप्नति; कार्यिणेहानिर्देशादुत्तरपदशब्वेन च पूर्वपदमात्रस्याक्षिप्तत्वात्, न च शक्यते वक्तुम्--ऋत इति वचनादृकारस्य भविष्यतीति, तस्मादेकमिह ऋत इति वचनं द्वन्द्वस्य विशेषणम्, न कार्यिणः? इत्याह--`ऋत इति च' इति। अत्रानुवर्त्तत इति सम्बन्धः। `ऋतो विद्यायोनिसम्बन्धेभ्यः' (6.3.23) इत्यत ऋत इत्यनुवर्त्तते, तत् कार्यिणो विशेषणं भविष्यति। ननु तत् पञ्चमीनिर्दिष्टम्, षष्ठीनिर्दिष्टेन चेहार्थः? नैषदोषः; पुत्र इत्येषा सप्तमी ऋत इत्यस्याः पञ्चम्याः षष्ठीत्वं प्रकल्पयिष्यति--`तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इति। नन्वेवमपि विरोधः, तथा हि--यदि पुत्रशब्द उत्तरपदम्, कथं तदा ऋकारान्तानां द्वन्द्वः, ऋकारान्तानां द्वन्द्वो न तर्हि पुत्रशब्द उत्तरपदमिति? नैतदस्ति; अन्य एव हि स द्वन्द्वो यस्य ऋत इत्येतद्विशेषणम्। अन्यशाच स यस्य पुत्रशब्द उत्तरपदमिति कोऽत्र विरोधः।।

26. देवताद्वन्द्वे च। (6.3.26)

अनुकारार्थमविद्यायोनिसम्बन्धार्थ च वचनम्। ननु च `आनङृतो द्वन्द्वे' (6.3.25) इत्यतो द्वन्द्वगरहणमनुवर्त्तत एव, तत् किमर्थमिह पुनर्द्वन्द्वग्रहणम्? इत्याह--`द्वन्द्व इत्यनुवर्त्तमाने' इत्यादि। पूर्वकं हि द्वन्द्वग्रहणं समासविशेषप्रतिपत्त्यर्थम्, इदं तु प्रसिद्धसाहचर्यार्थम्--येषां लोके वेदे च प्रसिद्धं साहचर्यमेषां पुनः--परिग्रहो यता स्यादित्येवमर्थम्। अथ क्रियमाणेऽपि पुनर्द्वन्द्वग्रहणे कथमयमर्थो लभ्यते? इत्याह--`अत्यन्तसहचरिते' इत्यादि। `द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमण' (8.1.15) इत्यत्रेदमुच्यते। `अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्येतन्निपात्यते' इति। तेनायमर्थो लभ्यत इति दर्शयति। `वेदे च ये सहवापनिर्दिष्टाः' इति। सहवापः=सहदानम्, तत्र निर्दिष्टाः सहवापनिर्दिष्टाः के पुनरेकहविसम्बन्धिनः? य एकं हूयमानं हविः प्रति सम्प्रदानत्वेन निर्दिष्टा एकत्र मन्त्रे--इन्द्रावरुणाभ्यां छागं हविर्निर्वपामीत्यादौ, ते वेदितव्याः।

`उभयत्रि' इत्यादि। पूर्वपदत्व उत्तरपदत्वे च सति वायोरानङादेशस्य प्रतिषेधो वक्तव्यो व्याख्येयः। तत्रेदं व्याख्यानम्--`विभाषा स्वसृपत्योः' (6.3.24) इत्यतो विभाषाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा। तेन वायोरुत्तरपदत्वे पूर्वपदत्वे च सति न भविष्यतीति।।

27. ईदग्नेः सोमवरुणयोः। (6.3.27)

आनङादेशापवादोऽयमीकारो विधीयते। तकार उच्चारणार्थः।।

28. इद्रवृद्धौ। (6.3.28)

`अग्नेः' (6.3.27) इत्यनुवर्त्तते, `देवताद्वन्द्वे' (6.3.26) इति च। `सोमवरुणयोः' (6.3.27) इति निवृत्तम्। वृद्धिशब्देन साहचर्यात् कृतवृद्ध्युत्तरपदं गृह्यते। अत एवाह--`कृतवृद्धावुत्तरपदे' इति। `आग्निवारुणीम्' इति। औत्सर्गिकेऽणि कृते `टिड्ढाणञ्' (4.1.5) इति ङीप्। अत्रापि तकार उच्चारणार्थः।।

29. दिवो द्यावा। (6.3.29)

`देवताद्वन्द्व उत्तरपदे' इति। देवताद्वन्द्वे यदुत्तरपदं तत्र परत इत्यर्थः।।

30. दिवसश्च पृथिव्याम्। (6.3.30)

आनङोपवादः। अथाकारः किमर्थमुच्चार्यते, सकारस्येत्संज्ञापरित्राणार्थ इति चेत्? न; प्रयोजनाभावादेवेत्संज्ञा न भविष्यतीत्याह--`अकारणोच्चारणम्' इत्यादि। असति ह्यकारेऽन्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदसंज्ञायां सत्यां सकारस्य `ससजुषो रुः' (8.2.66) इति रुत्वं विकारः स्यात्, तस्यापि `खरवसानयोर्विसर्जनीवः' (8.3.15) तस्यापि `कुप्वोः क पौ च' (8.3.37) इत्युपध्मानीयः स्यात्। अकार स्योच्चारणे तु सति न भवति, कथम्? अकारस्योच्चारणेन यद्विकृतस्य सकारस्योपादानं तस्यैतदेव प्रयोजम्--अविकृतस्यास्य प्रयोगो यथा स्यादिति--द्यावा दिवसमित्यादिकम्। वाक्मेतत्। इह च सूत्रे द्वन्द्वग्रहणम्, उत्तरपदग्रहणं चानुवर्त्तते। द्यावा इत्ययमादेशो वाक्ये न प्राप्नोतीत्याह--`कथम्' इत्यादि। `कर्त्तव्योऽत्र यत्नः' इति। तत्रायं यत्नः--`तत्पुरुषे कृति बहुलम्' (6.3.14) इत्यतो बहुलग्रहणमनुवर्त्तते तेन द्यावा इत्ययमादेशश्छन्दसि वाक्येऽपि भविष्यतीति।

अथ वा-चकारोत्र क्रियते, तस्यानुक्तसमुच्चयार्थत्वाद्भविष्यति। द्यावाशब्दस्तु स्वरितत्वादेवानुवर्त्तिष्यत इति नार्थस्तदनुकर्षणार्थेन चकारेण।

अथ वा--दिक्शब्देन समानार्थो द्यावाशब्दः प्रकृत्यन्तरमस्ति, तस्यायं प्रयोगः। आदेशवचनं तु दिवः प्रयोगनिवृत्त्यर्थमिति।।

31. उपासोषसः। (6.3.31)
`आनङोऽपवादः' [नास्तीदं वाक्यं काशिकायाम्] इति एवमुत्तरावपि योगौ। उषासानक्तम्' इति। उषांश्च नक्तञ्चेति विग्रहः।।

32. मातरपितरावुदीचाम्। (6.3.32)

33. पितरामातरा च च्छन्दसि। (6.3.33)

34. स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु। (6.3.34)
अत्र त्रयः पक्षाः सम्भाव्यन्ते--`स्त्रियाः' इति स्त्रीशब्देन प्रत्ययग्रहणं वा, अर्थग्रहणं वा, शब्दग्रहणं वेति। तत्र यदि `स्त्रियाः' इति। स्त्रीप्रतययग्रहणं स्वर्यते, तदा स्वरितेनाधिकारावगतिः (1.3.11) भवतीति स्त्र्यधिकारविहिताः प्रत्यया गृह्यन्ते, यथा--`गोस्त्रियोरुपसर्जनस्य' (1.2.48) इत्यत्र। अथ तु `स्त्री' इत्यनेन स्त्रीत्वविशिष्टं द्रव्यमभिधीयते, तदार्थग्रहणम्। यदि तु स्त्र्यर्थवाची शब्दः स्त्रीत्यनेनोच्यते, तदा शब्दग्रहणम्। तत्राद्यपक्षेऽयं सूत्रार्थः--
भाषितपुंस्कात्परः स्त्रीप्रत्ययोऽनूङुत्तरपदे पुंपद्भवति, निवर्त्तत इति यावत्, तदा `स्त्रियाः' इति प्रथमार्थे षष्ठा। कथं पुनः पुंवदित्यनेन स्त्रीपरतययस्य निवृत्तिः शक्यते विज्ञातुम्? भवतीति वाक्यशेषाध्याहारात्। अत्र च पक्षे पट्वी भार्याऽस्येति पटुभार्यं इत्यत्र स्त्रीप्रत्ययनिवृत्तेरुत्तरपदनिमित्तायाः पूर्वस्मिन् यणादेशे विधातव्ये सति `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावे सति यणादेशः स्यात्। इह च--गार्ग्यो वृन्दारिका गर्गवृन्दारिका इत्यत्र `तद्राजस्य बहुषु तेनैवास्त्रियाम्' (2.4.62) इत्यनुवर्तमाने `यञञोश्च' (2.4.64) इति यञो लुग्न प्राप्नोति। पुंवद्भावेन हि स्त्रोप्रत्ययस्य निवृत्तिः क्रियते, न त्वर्थस्य स्त्रीत्वस्य; ततश्चार्थस्यानिवर्तितत्वात् केन पुनर्यञ्न श्रूयेत--इत्येवमादयः प्रत्ययपक्षे दोषा भाष्ये विस्तरेणोक्ताः। इह चातिग्रन्थविस्तरभयान्नोच्यन्ते।
अर्थपक्षे तूत्तरपदे परतो भाषितपुंस्कस्यानूङ्प्रत्ययान्तस्य स्त्रीशब्दस्य योर्थस्तस्य पुमर्थोतिदिश्यते। भाषितपुंस्कादिति पञ्चमी षष्ठ्यर्थे--स्त्र्यर्थः पुंवद्भवतीति। पुमर्थे चातिदिष्टे तद्वचनः शब्दः प्रवर्तते। अत्र पक्षे `खित्यनव्ययस्य' (6.3.66) इति ह्रस्वत्वस्यास्य च पुंवद्भावस्य विप्रतिषेधो न प्राप्नोति; भिन्नविषयत्वात्। तथा हि--शब्दस्य ह्रस्वत्वम्, अर्थस्य पुंवद्भावः; ततश्च कालिम्मन्येत्यत्र `विप्रतिषेधे परं कार्यम्' (1.4.2) इति ह्रस्वत्वं न प्राप्नोति, इष्यते च विप्रतिषेधः। तथा हि--पुंवद्भावस्य विप्रतिषेधो न प्राप्नोति; भिन्नविषयत्वात्। तथा हि--शब्दस्य ह्रस्वत्वम्, अर्थस्य पुंवद्भावः; ततश्च कालिम्मन्येत्यत्र `विप्रतिषेधे परं कार्यम्' (1.4.2) इति ह्रस्वत्वं न प्राप्नोति, इष्यते च विप्रतिषेधः। तथा हि--पुंवद्भावस्यावकाशो यत्र खिदन्तमुत्तरपदं नास्ति--दर्शनीयभायं इति, ह्रस्वस्यावकाशो यत्र पुंवद्भावो नास्ति--कालिम्मन्यः पुमानिति; कालिम्मन्या स्त्रीत्यत्रोभयं प्राप्नोति, तत्र परत्वात् ह्रस्वत्वं भवति। तदेवमाद्ययोः पक्षयोर्दोषवत्तां मन्यमानस्तृतीयपक्षमाश्रित्याह--`भाषितः पुमान् येन' इत्यादि। यो ह्यविशेषेण क्वचिद्भाषितपुंस्कः शब्दः स इहाश्रीयेत, तदा द्रोणीभार्य इत्यत्रापि पुंवद्भावः स्यादिति मनसि कृत्वाऽऽह--`समानायमाकृतौ' इत्यादि। `एकस्मिन् प्रवृत्तिनिमित्ते' इति। अनेन समानायामाकृतावित्यस्यार्थं विस्पष्टीकरोति। आक्रियते=गृह्यते, परिच्छिद्यते येनार्थस्तत् शब्दस्य प्रवृत्तिनिमित्तं जात्यादिकमिहाकृतिशब्देनोच्यते।
`भाषितपुंस्कात्' इत्येतावत्युक्ते `समानायामाकृतौ' इत्येष विशेषो न शक्यो लब्धुमित्यभिप्रायेणाह--`तदेतदेवम्' इत्यादि। तदिति वाक्योपन्यासे। एतस्य वचनस्यार्थरूपमेवम्प्रकारम्। कथं भवति? नैवं कथंचिदित्यर्थः। यदि भाषितपुस्कशब्दस्य बहुव्रिहेः शब्दोऽन्यपदार्थत्वेनाश्रीयेत--भाषितः पुमान् येन शब्देन स भाषितपुंस्कः शब्द इति, तदा समानायामाकृतावित्येष विशेषो न लभ्यते, सर्व एव हि शब्दः क्वचदाकृतौ पुमांसं भाषित्वाऽऽकृत्यन्तरे स्त्रियं भाषत इति कृत्वा। अर्थे त्वन्यपदार्थत्वेनाश्रीयमाणे लभ्यत एव इत्येष विशेष इत्यालोच्याह--`भाषितः पुमान् यस्मिन्नर्थे' इत्यादि। शब्दस्य यत् प्रवृत्तिनिमित्तं जात्यादिकं तदन्यपदार्थः। केन पुनः शब्देन तत्र भाषितः पुमान्? प्रत्यसत्तेर्यत् तस्य प्रवृत्तनिमित्तं तेनैवेति विज्ञायते; अन्यथा हि भाषितपुंस्कग्रहमनर्थकं स्यात्, व्यवच्छेद्याभावात्। सर्वत्रैवाभिधेये।र्थे येन केनचित् शब्देन पुमान् भाष्यते। अन्ततोऽर्थशब्देनापि तस्यार्थस्य भाषितपुंस्कस्य यः प्रातपदिकः शब्द सोऽप्यभिध्यधर्मस्याभिधान उपचरद्भाषितपुंस्क इत्युच्यते। स पुनः प्रत्यासत्तेर्यस्य योऽर्थः प्रवृत्तिनिमित्तं ततर येन पुमान् भाषत इति स एव वेदितव्यः। यश्च भाषितपुंस्कस्य प्रवृत्तिनिमित्तस्य वाचकः स नियोगत एकस्मिन् प्रवृत्तिनिमित्ते पुमांसं भाषित्वा स्त्रियं भाषते। यथा मूलोदाहरणेषु--दर्शनीयादयः शब्दा इति, समार्थ्याद्येन शब्देन समानायामाकृतौ पुमान् भाषित इत्येष विशेषो लभ्यते।
`अनूङ्' इति यद्ययं पर्युदासः स्यात्, ऊङोऽन्योऽनूङिति--ततो नञिवयुक्तन्यायेन (व्या.प.65) तत्सदृशानां टाबादीनां प्रत्ययानां ग्रहणे सति तदन्तस्यैव पुंवद्भावः स्यात्, ऐडविडवृन्दारिका, दारदवृन्दारिकेत्यत्र न स्यात्। इडविडोऽपत्यं स्त्रीति `जनपदशब्दात् क्षत्रियादञ्' (4.1.168) इत्यत्र्प्रत्ययः। दरदोऽपत्यमिति `द्व्यञ्मगध' (4.1.179) इत्यादिनाण् तयोः `अतश्च' (4.1.177) इति लुक्, तत इडविट् चासौ वृन्दारिका चेति, दरच्चासौ वृन्दारिका चेति `वृन्दारकनागकुञ्जरैः' (2.1.62) इति समासः, तत्रेदानीं `पुंवत्कर्मधारय' (6.3.42) इत्यादिना पुंवद्भावो न प्राप्नोति; ऊङ्सदृशप्रत्ययानतराभावात्, ततश्चेडविट्शब्दस्यैडविडशब्दो दरच्छब्दस्य दारदशब्दो न स्यात्। प्रसज्यप्रतिषेधे सति तु भवति; अत्राऽप्यूङभावस्य भावादित्यालोच्य प्रसजयप्रतिषेधोऽयमिति दर्शयन्नाह--ऊङोऽभावोऽनूङिति।
`भाषितपुंस्कादनूङ्' इति। यद्ययमसमासः स्यान्न बहुव्रीहिः, तदायमर्थः स्यात्--भाषितपुस्कादुत्तरस्याविद्यमानोङः स्त्र्यर्थवृत्तेः शब्दस्योत्तरपदे परतः

पुंवद्भवतीति। एवञ्च सति यथाभूतार्थवाची स्त्रीशब्दस्तथाभूतार्थवाच्येव पुंशब्दस्यादेशो भवतीति सामर्थ्यादुक्तं भवति, ततश्चानिष्टप्रसङ्गः--अङ्गारका नाम शकुनयः तेषां कालिका नाम स्त्रियः, तत एताश्च कालिकावृन्दारिकाश्चेति समासे कृते सत्येतच्छब्दो भा,िषतपुंस्क इति तस्मादुत्तरस्य कालिकाशब्दस्यानूङोऽर्थतोऽन्तरतमोऽङ्गरकशब्दः पुंशब्दादेशः प्रसज्येत; अन्यस्यान्तरतमस्याभावात्। ततश्चैतदङ्गारकवृन्दारिका इति हि स्यात्, एतत्कालिकावृन्दारिका इतीष्यते। बहुव्रीहौ तु सत्यनिष्टप्रसङ्गो न भवति, तत्र हि भाषितपुंस्कस्य शब्दस्यानूङः पूंवद्भावेन भवितव्यम्, न च कालिकाशब्दो भाषितपुंस्कः--इत्येतत्सर्वमालोच्य बहुव्रीहिरयमिति दर्शयन्नाह--`भाषितपुंस्कादनूङ् यस्मिन् स्त्रीशब्दे' इति। `यदि बहुव्रीहिरयम्' [`यदि--नास्ति काशिकायाम्] इति। एवं सति `सुपो धातुप्रातिपदिकयोः' (2.4.71) इति पञ्चम्या लुक् प्राप्नोति? अत आह--`अलुग्निपातनात्' इत्यादि। ननु चालौकिकत्वादस्य वाक्यस्य निपातनादित्ययमपरीहारः, निपातनं हि लौकिकं भवति, तर्ह्येवं लुकाप्यत्र न भाव्यम्? अथ लुग्भविष्यतीत्येवावसीयतेऽलुगपि भवतीत्यवसीयताम्।

`दर्शनीयभार्यः' इति। दर्शनीया भार्याऽस्येति बहुव्रीहिः। `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति ह्रस्वत्वमुत्तरपदस्य। दर्शनीयत्वं नामात्र सामान्ये विशेषो दर्शनीयशब्दस्य प्रवृत्तिनिमित्तम्। तमेकमेवार्थमुपादायासी पुंसि स्त्रियां च वर्त्तते--दर्शनीयो देवदत्तः; दर्शनीया भार्येति। तस्मात् समानायामाकृतौ दर्शनीयशब्दो भाषितपुंस्को भवति; स्त्रियाञ्च वर्त्तते, न चास्मादूङ्। अतो भार्याशब्दे स्त्रीलिङ्ग उत्तरपदेऽस्य स्त्रीशब्दस्य `पुंशब्दस्येव रूपं भवति। [`पुंशब्दस्यैव'--मुद्रितः पाठः] एवं `श्लक्ष्णचूडः' इत्यादावपि योजनीयम्।

`ग्रामणिदृष्टिः' इति। अत्र सर्वमस्ति, न तु ग्रामणीशब्दः स्त्रियां वर्तते, किं तर्हि? नपुंसक इति न भवति पुंवद्भावः। `द्रोणीभार्यः' इति। द्रोणशब्देन भाषितः पुमान्, न तु समाने प्रवृत्तिनिमित्त। यस्मात् परिमाणविशेषं प्रवृत्तिनिमित्तमुपादाय पुंसि परिमाणिनि वर्तते। जातिविशेषं तूपादाय स्त्रियां गवादन्यां वर्तते। यत्र गावोऽदन्ति सा गवादनी द्रोणीशब्देनोच्यते। तस्मान्न द्रोणशब्दः समानायामाकृतौ भाषितपुंस्कः।

`कथम्' इत्यादि। यदि समानायामाकृतौ यो भाषितपुंस्कस्तस्य पुंवद्भाव उच्यते, एवं च `गर्भिभार्यः' इत्यादौ पुंवद्भावो न प्राप्नोति। गर्भप्रभृतीनां शब्दानां भिन्नायामाकृतौ भाषितपुंस्कत्वादित्यभिप्रायः। अनवयवभूतान्तर्वर्तिवस्तुविशेषसम्बन्धे हि सति स्त्री गर्भिणीत्युच्यते। व्रीहिस्त्वन्तर्वर्त्त्यवयवस्तुविशेषसम्बन्धे सति गर्भीत्युच्यते। तस्मात् पुंसि स्त्रियां च वर्तमानस्य गर्भिशब्दस्य प्रवृत्तिनिमित्तं भिद्यते। प्रसूतप्रजातशब्दयोरपि प्रवृत्तिनिमित्तं क्रियकृतिर्भिन्ना। स्त्रियां हि वर्तमानौ तौ गर्भविमोक्षणं प्रवृत्तिनिमित्तमुपादय वर्त्तते, पुंसि तु गर्भाधानम्। `कर्त्तव्योऽत्र प्रयत्नः' इति। केचिद्व्याचक्षते--उपसंख्यानं कर्तव्यमिति। अपरे पुनराहुः--स्त्रिया पुंवदिति योगविभागः कर्तव्यः। अथ वा--`कर्तव्योऽत्र यत्नः' इत्यनेनेदं दर्शयति--यद्यपि स्त्रियां व्रीहौ च गर्भत्वभेदः, तथापि स नाश्रयितव्यः। यत्तु तत्रावयवानवयवभेदमुत्सृज्य सामान्येनान्तर्वर्त्तिवस्तुविशेषसम्बन्धमात्रम्, तदेवाश्रयितव्यम्। अतस्तदपेक्षया स्त्रियां व्रीहौ च वर्तमानस्य गर्भिशब्दसय तुल्यमेव प्रवृत्तिनिमित्तमिति। एवं प्रसूतप्रजातशब्दयोरप्यपत्याधानविमोक्षणभेदं त्यक्त्वाऽयमपत्यवानियमपत्यवतीत्यपत्यवत्सम्बन्धमात्रमाक्षितमित्येतद्व्याख्यानमिीति प्रत्यन्तः कर्त्तव्य इति।

`ब्रह्मबन्धूभार्यः' इति। ब्रह्मबन्धूशब्दात् `ऊङुतः' (4.1.66) इत्यूङ्। `कल्याणीपञ्चमाः' इति। `अप् पूरणीप्रमाण्योः' (5.4.116) इत्यप्समासान्तः, पञ्चानां पूरणीति डट्, तस्य `नान्तादसंख्यादेर्मट्' (5.2.49), ततः `टिड्ढाणञ्' (4.1.15) इति ङीपि कृते पञ्चमी भवति। `प्रधानपूरणीग्रहणं कर्त्तव्यम्' इति। प्रधानं पूरणी गृह्यते येन व्याख्यानेन तद्व्याख्यानं प्रधानपूरणीग्रहणम्, तत् कर्त्तव्यम्--प्रधानं या पूरणी तस्यां प्रतिषेधो यथा स्यात्, अप्रधानभूतायां तस्यां मा भूदिति। तत्रेदं व्याख्यानम्--इह `द्वन्द्वे घि' (2.2.32) इति प्रियादिशब्दस्य पूर्वनिपाते प्राप्ते परनिपातलक्षणव्यभिचारचिह्नेन सूचितं व्यभिचार्ययं प्रतिषेधः क्वचिदेव वर्त्तते, न सर्वत्रेति। तेन यत्रैव प्रधानभूता पूरणी तत्रैव भवति, नान्यत्रेति। तेन यत्रासौ भवति तत्र तस्या एव प्रधानभूताया पूरण्या ग्रहणं युक्तम्। क्व पूरण्याः प्राधान्यम्? यत्र तस्याः समासेऽभिधेयत्वेनान्तर्भावः, यथानन्तरोक्तप्रत्युदाहरणे। तत्र ह्यवयवेन विग्रहः। समुदायस्त्ववयवभेदादभिन्नः, समासार्थ एव। `तत्र' इति। यथैवं प्रथमा, द्वितीया, तृतीया, चतुर्थी चाभिधीयते, तथा पञ्चम्यपि। `कल्याणपञ्चमीकः पक्षः' इति। अत्र तु तिरोहितावयवभेदः पक्ष एवान्यपाद्रथः प्रधानम्, पञ्चमी तु रात्रिः। अस्मिन् पक्षेऽन्यपदार्थोऽनुमेयैव, न त्वभिधेया। यथा वृक्षशब्दे मूलादयः, ततस्तद्वदर्थमप्यनभिधेयत्वादर्थोऽप्रधानम्। अथाप् समासान्तः कस्मान्न भवति? इत्याह--`अप्पूरणीप्रमाण्यो' इत्यादि।

अथ दृढभक्तिः, शोभनभक्तिरित्यादौ कथं पुंवद्भावः यावता प्रियादित्वात् प्रतिषेधेन भवितव्यम्? इत्याह--`दृढभक्तिरित्येवमादिषु' इत्यादि। अस्त्रीवाचिनः पूर्वपदस्य विवक्षितत्वाद्दृढभक्तिरित्येवमादि लक्ष्यं सिद्धमित्येवं समाधेयम्। द्वेष्यं परिहर्त्तव्यमित्यर्थः। दृढशब्दोऽत्रादाढर्चनिवृत्तिपरः प्रयुक्तः। अत्रादाढर्चनिवृत्तिपरायां चोदनायां लिङ्गविशेषोपादानमनुपकारकमेवेति। अतः स्त्रीत्वमिह न विवक्षितम्। तस्मादस्त्रीलिङ्गस्य दृढशब्दस्यायं प्रयोग इत्यभिप्रायः।।

35. तसिलादष्वाकृत्वसुचः। (6.3.35)

अनुत्तरपदार्थोऽयमारम्भः। `ततः' इति। `पञ्चम्यास्तसिल्' (5.3.7)। तस्य `प्राग्दिशो विभक्तिः' (5.3.1) इति विभक्तिसंज्ञकत्वात् त्यदाद्यत्वम् टाप्, अनेन पुंवद्भावः। `तत्र' इति। `सप्तम्यास्त्रल्' (5.3.10)। शेषं पूर्ववत्।

`तसिलादिषु' इत्यादि। `तसिलादिष्वाकृत्वसुचः' इत्युच्यमाने तसिलादिष्वनन्तर्भूतेष्वपि क्वचित् पुंवद्भाव इष्यते, स न प्राप्नोति। तत्रान्तर्भूतेऽपि क्वचिन्नेष्यते, एवं सत्यनिष्टमपि प्राप्नोति। तस्मात् परिगणनं कर्त्तव्यम्। तत्र ततसोरुदाहरणमुक्तम्। शेषाणां तूच्यते--इयं षट्वी, इयं पट्वी इयमनयोरतिशयेन पट्वी--`द्विवचन' (5.3.57) इत्यादिना तरप्--पटुतरा। इयमासमतिशयेन पट्वी--`अतिशायने' (5.3.55) इत्याना तमप्--पटुतमा।

पट्वी भूतपूर्वा--`भूतपूर्वे चरट्' (5.3.53) ङीप्, पटुचरी। पट्वीप्रकारा--प्रकारवचने जातीपर् (5.3.69)--पटुजातीया। ईषदसमाप्ता पट्वी--`ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' (5.3.67) पटुकल्पा पटुदेश्या, पटुदेशीया। प्रशस्ता पट्वी--`पशंसायां रूपप्' (5.3.66)--पटुरूपा। याप्या पट्वी--`याप्ये पाशप्' (5.3.47)--पटुपाशा। अजायै हिता--`अजाविम्यां थ्यन्' (5.1.8) अजथ्या। थ्यंस्तसिलादिभ्यः पूर्वं पठ्यते। सर्वप्रकरैः सर्वथा, `प्रकारवचने थाल्' (5.3.23)। तस्यां रात्रौ तदा--`सर्वैकान्यकिंयत्तदः काले दा' (5.3.15)। अस्यां रात्रौ एतर्हि--`इदमोर्हिल्' (5.3.16)। तत्रेदमः `एतेतौ रथोः' (5.3.4) इत्येतादेशः, प्रशस्ता वृकी वृकतिः। प्रशस्ता ज्येष्ठा ज्येष्ठतातिः--`वृकज्येष्ठाभ्यांतिल्तातिलौ च च्छन्दसि' (5.4.41) इति तिल्लातिलौ। एतौ च कृत्वासुचः परो पठ्येति।

तसिलादिषु परिगणनं कर्त्तव्यमिति भाव्यकारस्य मतमेतत्, न तु सूत्रकारस्य। न चासति परिगणने किञ्चिदनिष्टमापद्यते। येषु हि तसिलादिष्वनन्तर्भूतेषु पुंवद्भाव इष्यते, तेषूततरसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वाद्भविष्यति। येषु तसिलादिष्वन्तर्भूतेषु नेष्यते, तत्र `न कोपधायाः' (6.3.37) इति नेति योगविभागन्न भविष्यतीति।

दोषः खल्वपि परिगणने--दरच्छब्दात् कप्रत्यये दारदिकेत्यत्र पुंवद्भावो न प्राप्नोति; कप्रत्ययस्यापरिगणितत्वात्।

`शसि बह्वल्पार्थस्य' इति। शसि प्रत्यये परतः बह्वर्थस्याल्पार्थस्य च पुंवद्भावो वक्तव्यः, व्यख्येय इत्यर्थः। व्याख्यानं तु तस्यैव चकारस्यानुक्तसमुच्चयार्थत्वामाश्रित्य कर्त्तव्यम्।

`भस्याढे तद्धिते' इत्यादि। `हास्तिकम्' इति। `अचित्तहस्तिधेनोष्ठक्' (4.2.47) इति ठक्। यद्यत्र पुंवद्भावो न स्यात् तद यस्ये (6.4.148) तीकारलोपे कृते तस्य `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावात `नस्तद्धिते' (6.4.144) इति टिलोपो न स्यात् पुंवद्भावे तु सति हस्तिशब्द एवायं भवति। ननु च ठक्छसो (वा.732) रित्यनेनैवात्र सिध्यति पुंवद्भावः? न सिध्यति; न सिध्यति; छसा साहचर्यात् `भवतष्ठक्छसोः' (4.2.115) [`भवतष्ठक्छसौ'--इति सूत्रम्] इत्यनैव विहितस्य तत्र ठको ग्रहणात्, न सर्वस्य।

`कथम्' इत्यादि। यदि च ढे परतः पुंवद्भावस्य प्रतिषेधः क्रियते, तदाग्नायी देवतास्येति `अग्नेर्ढक्' (4.2.33) इति ढकि कृत आग्नायेय इति भवितव्यम्, तत्कथमाग्नेय इति भवतीत्यभिप्रायः। अग्नेः स्त्रीत्यस्यां विवक्षायां `वृषाकप्यग्निकुसितकुसीदानामुदात्तः' (4.1.37) इत्यनेनाग्निशब्दान्ङीपि कृत ऐकारे चान्तादेशेऽग्नायीति भवति। `कर्त्तव्योऽत्र यत्नः' इति। यत्नः केन पुनः कर्त्तव्यः? यः `भस्याढे तद्धिते' (वा.731) इत्युपसंख्यानमिच्छति। न तु यश्चकारमनुक्तसमुच्चयार्थमुत्तरसूत्रे करोति। स ह्येवमाह--यत्रैवेष्यते तत्रैव चकारः पुवद्भावं समुचचिनोति, नान्यत्रेति। कः पुनरसौ यत्न इति? कश्चिदाह--`अपत्यग्रहणं ढस्य विशेषणं कर्त्तव्यम्--योऽपत्येऽढे' इति। तेनायमर्थो भवति--ढस्य तद्धेते पुंवद्भावो भवत्यपत्यार्थप्रत्ययं वर्जयित्वा। न चाग्नेयः, स्थालोपाक इत्यपत्यार्थे ढप्रत्ययः, किन्तु सास्य देवतेत्यर्थे, अतोऽत्र भवत्येव पुंवद्भाव इति।

अन्यस्त्वाह--`भस्याढे तद्धिते' (वा.731) इति व्यधिकरणे सप्तम्यौ। यश्चात्र नञ् सोऽल्पार्थे वर्त्तते, यथा अल्पलवणा यवागूरलवणेत्युच्यते। तत्रायमर्थो भवति--भस्य तद्धिते पुंवद्भावो वक्तव्योऽल्ये ढप्रात्यय इति। तेनाग्नेयः, स्थालीपाक इत्यत्र पुंवद्भावो भवति। श्यैनेय, रोहिणेय इत्यत्र तु न भवतीति।

`ठक्छसोश्च' इत्यादि। अथ ठग्ग्रहणं किमर्थम्, यावता ठस्येकादेशे कृते `भस्याढे तद्धिते' (वा.731) इत्यनेनैव सिद्धः। ठावस्थायामेव यथा स्यादित्येवमर्थम्। किमेवं सति भवति? `इसुसुक्तान्तात् कः (7.3.51) इति कः सिद्धो भवति; अन्यथा हि यदीकादेशे कृते पुंवद्भावः स्यात् ततो यथा माथितिक इत्यत्रेकादेशो न भवति, तथा भावत्का इत्यत्रापि न स्यात्। `भावत्काः, भवदीयाः' इति। `भवतष्ठक्छसौ' (4.2.115) इति ठक्छसौ।।

36. क्यङ्मानिनोश्च। (6.3.36)

`एतायते, श्येतायते' इति। एतश्येतशब्दाभ्यां `वर्णादनुदात्तात् तोपधात् तो नः' (4.1.39) [`एतश्वेतशब्दाभ्याम्'--मुद्रितः पाठः] इत्यनेन ङीप्, तकारस्य नकारः। एनीवाचरति, श्येनीवाचरति--`कर्त्तुः क्यङ् सलोपश्च' (3.1.11) इति क्यङ्, `अकृत्सार्वधातुकयोः(7.4.25) इति दीर्घत्वम्। `अयमस्यां दर्शनीयमानी' [`दर्शनीयमानी अयमस्याः'--काशिका] इति। दर्शनीयामिमां मन्यतेऽयमिति। `मनः' (3.2.82) इति णिनिः। `दर्शनीयमाननीयमस्याः' इति। दर्शनीयामिमां मन्यत इति पूर्ववण्णिनिः `ऋन्नेभ्यो ङीप्। (4.1.5) इति ङीप्।

किं पुनः कारणं स्त्रियां समानाधिकरण इत्यनुवर्त्तमानेऽस्त्रियामसमानाधिकरणे च मानिन्युत्तरपदे पुंवद्भाव उदाह्रियत इत्याह--`मानिनो ग्रहणम्' इत्यादि। कथमेतज्ज्ञायते? इत्याह--`इह तु' इत्यादि। यद्युत्तरपदं स्त्रियां वर्तते समानाधिकरणं च भवति--दर्शनीयामात्मानं मन्यते दर्शनीयमानिनीत्येवमादौ। तत्र यस्मात् `स्त्रियां पुंवत्' (6.3.34) इत्यनेनैव सिद्धम्, अतो मानिनो गरहणमस्त्र्यर्थम्। असमानाधिकरणाच्चेत्येतदवसीयते; अन्यथा हि तदनर्थकं स्यात्।।

37. न कोपधायाः। (6.3.37)

पुर्वेण प्रकारेण प्राप्तस्य पुंवद्भावस्यायं प्रतिषेधः। `पाचिकाभार्यः, कारिकाभार्यः' इति। पाचककारक शब्दभ्यां ण्वुलन्ताभ्यां टाप्। `प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः' (7.3.44) इतीत्त्वम्। अत्र `स्त्रियाः पुंवत्' (6.3.34) इत्यादिना प्राप्तिः। `मद्रिकाभार्यः वृजिकाभार्यः' इति। मद्रेषु भवा, वृजिषु भवेति `मद्रवृज्योः कन् (4.2.131) इति कन्। अत्रापि `स्त्रियाः पुंवत् (6.3.34) इत्यादिना प्राप्तिः। `मद्रिकाकल्पा; वृजिकाकल्पा' इति। अत्र `तसिलादिष्वाकृत्वसुचः' (6.3.35) इत्यनेन प्राप्तिः। `मद्रिकायते' इत्यादौ `क्यङ्मानिनोश्च' (6.3.36) इति प्राप्तिः। `विलेपिकाया धर्म्यम्' इति। `लिप

उपदेहे' (धा.पा.1433) इत्यस्माण्ण्वुल्। `वैलेपिकम्' इति। `अण् महिष्यदिभ्यः' (4.4.48) इत्यण्। अत्र `भस्याढे तद्धिते' (वा.731) इति वा प्राप्तिः। `कोपधप्रतिषेधे' इत्यादि। अस्मिन् कोपधप्रतिषेधे तद्धितवुग्रहणं कर्त्तव्यम्। तद्धितसम्बन्धी वुसम्बन्धी ककार उपधा यस्य तत्रैव प्रतिषेधो यथा स्यात्। इह मा भूत्--`पाकभार्यः' इति। पाकशब्दोऽयं `अर्भकपृथुकपाका वयसि' (द.उ.3.50) इत्यनेन कन्प्रत्ययान्तो निपातितः। अत्रासति वुग्रहण इहापि प्रतिषेधः स्यात्।
यदि तद्धितवुग्रहणं क्रियते, तर्हि `पूर्वत्रासिद्धम्' (8.2.1) इत्यत्र यद्वक्ष्यति--"शुष्कजङ्घ" इत्यत्र--`शुषः कः' (8.2.51) इत्यस्यासिद्धत्वात् `न कोपधयाः' (6.3.37) इति प्रतिषेधो न प्राप्नोतीत्यसिद्धाधिकारस्य प्रयोजनम्' इति तन्नोपपद्यते, असत्यपि `शुषः कः' इत्यस्यासिद्धत्वेनैवात्र `न कोपधायाः' (6.3.37) इति प्रतिषेधेन भवितव्यम्, न ह्यत्र तद्धितसम्बन्धो ककारः नापि वुसम्बन्धी? दर्शनभेदमाश्रित्य तथाऽभिधानाददोषः। इदं हि वार्तिककारमतमाश्रित्योक्तम्। तत् पुनः श्लोकवार्तिककारस्य सूत्रकारमतानुसारिणो दर्शनमाश्रित्य वक्ष्यति।।

38. संज्ञापूरण्योश्च। (6.3.38)
कथं पुनः संज्ञाशब्दस्य पुंवद्भवस्य प्राप्तिः, यावता भाषितपुंस्कस्य पुंवद्भाव उक्तः, न च यः संज्ञाशब्दः स्त्रियां वर्तते स भाषितपुंस्को भवति, एकद्रव्यनिवेशित्वात् संज्ञाशब्दानाम्? नैतदस्ति; न ह्ययं नियोग एकद्रव्यनिवेशित्वात संज्ञाशब्दानाम्? नैतदस्ति; न ह्यं नियोग एकद्रव्यनिवेशिभिरेव संज्ञाशब्दैर्भवितव्यमिति। तथा हि--देवदत्तादिशब्दोऽनेकद्रव्यदानक्रियादिसम्बन्दान्नैकवस्तुसंज्ञाभूत एव लरोके प्रयुज्यमान उपलभ्यते, शास्त्रेष्वपि स्वादिशब्दः। या त्वेकद्रव्यनिवेशिनी संज्ञा तां प्रति नैवायं प्रतिषेधः क्रियत इत्यसारं चोद्यम्। ननु भवन्तु संज्ञाशब्दा अनेकार्थवृत्तयः भाषितपुंस्कास्त्वेकस्यामाकृतौ, कथं तर्हि तेषां किञ्चित् प्रवृत्तिनिमित्तमस्ति, यदृच्छाशब्दत्वात्? एतदप्यसारम्; यतस्तेषामपि केषांचित् किञ्चित् प्रवृत्तिनिमित्तमस्त्येव, सप्तपर्णादिशब्दवत्। यत्राप्येतन्नास्ति, तत्रापि स्वरूपमेव प्रवृत्तिनिमित्तमुपादायाभिधेये वर्त्तन्ते। तत्राभिन्ने प्रवृत्तिनिमित्ते यैर्भाषितः पुमान् ते भाषितपुंस्का इति किमत्रानुपपन्नम्? `दत्ताभ्र्यः' इति। अत्र यासौ दानक्रियाकृतिस्तस्यामेव दत्ताशब्दो भाषितपुंस्कः। `गुप्ताभार्यः' इति। अत्रापि गुप्ताशब्दो गोपनक्रियाकृतौ स्वरूपे वा प्रवृत्तिनिमित्ते। उभावपि भाषितपुंस्कशब्दौ `दत्तायते गुप्तायते' इति। कथमेते प्रतिषेधस्योदाहरणे उपन्यस्ते, यावता सत्यपि पुंवद्भावे `अकृत्सार्वधातुकयोदीर्घः' (7.4.25) इति दीर्घत्वेनोभयमप्येतत् सिद्धम्? एवं मन्यते `संज्ञापूर्वो विधिरनित्यः' (व्य.प.64) इति, तत्र यदि पुंवद्भावप्रतिषेधो न स्यात्, तदा दीर्घत्वाभावोऽनुमीयते। तस्मिन् पक्षे दत्तयते गुप्तयत इत्यपि स्यादिति। `न कोपधासंज्ञापूरणीनाम्' इत्येकस्मिन्नेव योगे कत्तव्ये योगविभागः `न कोपधायाः' (6.3.37) इत्यस्य प्रतिषेधस्यानित्यत्वज्ञापनार्थः कृतः। तेन यदुक्तम्--`कोपधप्रतिषेधे तद्धितवुग्रहणं कर्त्तव्यम् (वा.733) इति, तन्न कर्त्तव्यं भवति।।

39. वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे। (6.3.39)
वृद्धिनिमित्तं ञणकाः। `स्रौघ्नीभार्यः' इति। स्रुघ्ने भवा, `तत्र भवः' (4.3.53) इत्यण्। `टिड्ढाणञ्' (4.1.15) इति ङीप्। एवं `माथुरीभार्यः' इत्यत्रापि। `मध्यमभार्यः' इति। मध्ये भवा, `मध्यान्मः' (4.3.8) इति मप्रत्ययः। `काण्डलावभार्यः' इति। काण्डं लुनातीति `कर्मण्यण्' (3.2.1) पूर्ववन्ङीप्। `तावद्भार्यः' इति। तावच्छब्दात् तत्परिमाणमस्या इति `यत्तदेतेभ्यः परिमाणे वतुप्' (5.2.39) `आ सर्वनाम्नः' (6.3.91) इति दकारम्याकारः, `उगितश्च' (4.1.6) इति ङीप्। तावती भार्याऽस्य तावद्भार्यः, यदि वृद्धिनिमित्तस्येति तत्पुरुषो गृह्येत तदात्रापि प्रतिषेधः स्यात्, भवति हि वतुब् वृद्धेराकारास्य निमित्तम्। बहुव्रीहिपरिग्रहे तु न दोषः; न हि वतुपि ञकारादिकं वृद्धेर्निमित्तमस्ति। `काषायी' इति। `तेन रक्तम्' (4.2.1) इत्यण्। `लौही' इति। `प्राणिरजतादिभ्योऽञ्' (4.3.154) इत्यञ्, पूर्ववन् ङीप्। `खादिरेषः' इति। `पलाशादिभ्यो वा' (4.3.141) इत्यञणोरन्यतरः। खादिरी ईषा यस्य स खादिरेषः।।

40. स्वङ्गाच्चेतोऽमानिनि। (6.3.40)
`दीर्घकेशी' इति। `स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' (4.1.54) इति ङीष्। `षट्वी' इति। पटुशब्दात् `वोतो गुणवचनात्' (4.1.44) इति ङीष्। `अकेशभार्यः' इति। अविद्यमानाः केशा अस्या अकेशा `सहनञ्विद्यमानपूर्वाच्च' (4.1.57) इति ङीपि प्रतिषिद्धे टावेव भवति।।

41. जातेश्च। (6.3.41)
`कठीभार्यः' इति। कठशब्दात् `जातेरस्त्रीविषयादयोपधात् (4.1.63) इति ङीष्। जातित्वं त्वस्य `गोत्रञ्च चरणैः सह' (4.1.63; मा. भा.2.225) इति लक्षणेन।
`अयम्' इत्यादि। `भस्याढे तद्धिते' (वा.731) इत्यौपसंख्यानिको यः पुंवद्भावस्तस्यायं प्रतिषेधो नेष्यते। यस्मादस्य प्रतिषेधस्य बाधनार्थमुत्तरसूत्रे पुंवदिति योगविभागः कर्त्तव्य इत्यभिप्रायः।।

42. पुंवत्कर्मधारयजातीयदेशीयेषु। (6.3.42)

ननु च कर्मधारये `स्त्रियाः पुंवत्' (6.3.34) इत्यादिना पुंवद्भावः सिद्धः, जातीयदेशीयशब्दयोरपि `तसिलादिष्वाकृत्वसुचः' (6.3.35) इत्यादिना, तत् किमर्थोऽयमारंभः? इत्यत आह--`प्रतिषेधार्योऽयमारमभः' इति। परतिषेधविषयः प्रतिषेधशब्देनोक्तः। साहचर्यात् प्रतिषेधोऽर्थः प्रयोजनं यस्येति स तथोक्तः। यत्र विषये प्रतिषेध उक्तस्तत्र पुंवद्भावः प्रयोजनमित्यर्थः। अथ वा--अर्थशब्दो निवृत्ताविह--वर्त्तते, यथा--मशकार्थो धूम इति। तेनायमर्थो भवति--प्रतिषेधनिवृत्यर्थोऽयमारम्भ इति।

`भाषितपुंस्कादित्येव' इति। यदि `भाषितपुंस्कादनूङ्' (6.3.34) इति च नानुवर्त्तते, तदाऽभाषितपुंस्कार्थमनूङर्थञ्चेदं वचनं स्यात्, न प्रतिषेधार्थम्। एवं च खट्वावृन्दारिका, ब्रह्मबन्धूवृन्दारिकेत्यात्रापि पुंवद्भावः स्यात्। तस्माद्भाषितपुंस्कादनूङित्यनुवर्त्तनीयम्।

`कुक्कुट्यादीनाम्' इत्यादि। उत्तरपदस्यान्तादेरस्त्रीत्वादसामानाधिकरण्याच्च पुंवद्भावो न प्राप्नोतीत्युपसंख्यायते। `न वा' इत्यनेनोपसंख्यानं प्रत्याचष्टे--न वा वक्तव्यः, कस्मात्? अस्त्रीपूर्वपदस्य विवक्षितत्वात्। अस्त्रीलिङ्गस्य पूर्वपदस्य विवक्षितत्वादित्यभिप्रायः। अस्यैवार्थं विस्पष्टीकर्त्तुमाह--`स्त्रीत्वेन विना' इत्यादि। अत्र हि मयूरादिजात्यन्तरस्या निवृत्तिर्विवक्षिता। जात्यन्तरनिवृत्तिपरायां देशनायां लिङ्गविशेषोपादानमनुपकारकमेव। विनापि तेन जात्यन्तरनिवृत्तिः शक्यत एव कर्त्तम्। तथा हि--मृगमांसमित्युक्ते अन्तरेणापि लिङ्गविशेषोपादानं जात्यन्तरसय व्यवच्छेद उपपद्यते--मृगजातिसम्बन्धि मांसम्, नान्यजातिसम्बन्धीति। तस्मात् स्त्रीत्वमत्रानुपकारित्वान्न विवक्षितम्, अतः स्त्रीत्वेन विना पूर्वपदस्यार्थोऽत्रि कुक्कुटाण्डादौ जातिसामान्येन स्त्रीत्वदविशेषविहितो विवक्षित इत्यर्थः। ततश्चास्त्रीलिङ्गा एवात्र कुक्कुटादयः शब्दा अण्डादिभिः शब्दं समस्यन्त इति भावः. कः पुनरसौ पूर्वपदार्थः? कुक्कुटादिजात्या व्यवछिन्नं द्रव्यमात्रम्।

`पुंवद्भावात्' इत्यादि। अत्र खिति पुंवद्भावाद्घ्रस्वत्वं विप्रतिषेधेन भवतीति पूर्वमेव व्याख्यातम्। घादिषु तु व्याख्यायते। घादिषु ङ्यो ह्रस्वो भवतीत्यस्यावकाशः--नर्त्तकितरा, नर्त्तकितमा, नर्त्तकिरूपा, नर्त्तकिकल्पेति; पुंवद्भावस्यावकाशः--दर्शनीयतरा, दर्शनीयतमां, दर्शनीयरूपा, दर्शनीयकल्पेति; इहोभयं प्राप्नोति---पट्वितरा, पट्वितमा; पट्विरूपा, पट्विकल्पेति; विप्रतिषेधेन ह्रस्वत्वं भवति। `केऽणः' (7.4.13) इति ह्रस्वस्यावकाशः--नर्तकिकेति; अज्ञातादावर्थे `प्रागिवात् कः' (5.3.70) पूर्वद्भावस्यावकाशः--दारदिकेति। दरच्छब्दस्यात्र के परतः `तसलादिष्वाकृत्वासुचः' (6.3.35) इति पुंवद्भावेन दारदशब्दो भवति। अतष्टापि कृते `प्रत्ययस्थात् कात्' (7.3.44) इत्यादिनेत्त्वमिहोभयं प्राप्नोति। `पट्विका' इति। अत्र विप्रतिषेधेन ह्रस्वत्वं भविष्यति। केन पुनः पुंवद्भावः, यावता तसिलादिषु परिगणनं कृतम्, न च ततर कप्रत्ययः परिगणितः? एतत् भाष्यकारः प्रष्टव्यो यः परिगणनं करोति, न तु सूत्रकारः।

पूर्व यस्य सिद्धयेऽनूङिति प्रसज्यप्रतिषेध आश्रितस्तद्दर्शनार्थमाह--`इह' इत्यादि। `तत्र तद्राजप्रत्ययस्य' इत्यादि। तत्रेडविट्, पृथु इत्येताभ्यां `जनपदशब्दात् क्षत्रियादञ्' (4.1.168) इति विहितस्याञस्तद्राजप्रत्ययस्य `अतश्च' (4.1.177) इति लुक्। दरद् उशिजित्येताभ्यां तु `द्व्यञ्मगध' (4.1.170) इत्यादिना विहितस्याणः। इडविट् चासौ वृन्दारिका चेति विगृह्य समास इति। `विशेषण' इत्यादिना, `अत्रैडविडादयः' [नास्ति--काशिका] इति आदिशब्देन दारदः, पारथः, औशिज इत्येते गृह्यन्ते।।

43. घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्वस्वः। (6.3.43)

चेलडब्रुवगोत्रशब्दानां कुत्सार्थत्वात् `कुत्सितानि कुत्सनैः (2.1.53) इति समासः। मतहतशब्दाभ्यां तु `विशेषणं बहुलम्' (2.1.57) इत्यनेन। चेलडिति पचादौ पठ्यते, टकारो ङीबर्थः। यदि `ब्रुवः' इति पचाद्यजन्तमेतत् एवं सति `ब्रुवो वचिः' (2.4.53) इति वच्यादेशो गुणश्च प्राप्नोति, स कस्मान्न भवतीति? यश्चोदयेतत्, तं प्रत्याह--`वच्यादेशो गुणश्च निपातनान्न भवति' इति।

`आमकलकीतरा, कुवलीतरा' इति। आमलककुवलशब्दौ वृक्षे नित्यं स्त्रीलिङ्गै। फले तु नपुंसकलिंगावित्युभावप्यभाषितपुंस्कौ, ताभ्यां गौरादित्वान्ङीष्।।

44. नद्याः शेषस्यान्यतरस्याम्। (6.3.44)

`भाषितपुंस्कादनूङ्' (6.3.34) इति निवृत्तम्। `कश्च शेषः' इति। यदि पूर्वसूत्रेण यस्य ह्रस्वो न विहितः स शेषः, ततो यद्भाषितपुंस्कं यच्च भिन्नायामाकृतौ भाषितपुंस्कं नैचाच् तस्यापि शेषत्वं स्यात्, ततश्चामलकीतरा, द्रोणीतरेत्यत्रापि विकल्पेन ह्रस्वत्वपं स्यात्। न ह्यत्र ह्रस्वत्वं पूर्वसूत्रेण विहितमित्यभिप्रायेणाऽऽह--`अङी च या नदी ङ्यन्तश्च यदेकाच्' इति। एतेन श्रुतापेश्रयाऽत्र शेषत्वामाश्रीयते, न तु यस्य ह्रस्वो न विहितः, तदपेक्षयेति दर्शयति। कथं पुनरेतल्लभ्यते? शेषग्रहणात्। अन्तरेणापि शेषग्रहणं शेषस्यैव विकल्पेन ह्रस्वत्वं भविष्यति। तथा हि यदि ङ्योऽनेकाचो भाषितपुंस्कस्यापि विभाषा ह्रस्वः स्यात्, तदा पूर्वयोग एवेदमन्यतरस्यांग्रहणं कुर्यात्। इह कारणाद्यस्य पूर्वेण ह्रस्वो न विहितस्तस्यैव पाक्षिकं ह्रस्वत्वमन्तरेणापि शेषग्रहणं शेषस्यैव भविष्यतीत्यवसीयत इति किं शेषग्रहणेन? तत् क्रियते `ङ्योऽनेकाचः' (6.3.43) इति पूर्वसूत्रे योऽच् श्रूयते तदपेक्षया शेषो विज्ञायत इत्येवमर्थम्। न चमलकीतरा, द्रीणीतरेत्यत्र श्रुतापेक्षया शेषत्वमुपपद्यते; ङ्योऽनेकाच्त्वात्। तस्मान्न भवत्यत्र ह्रस्वत्वप्रसङ्गः। `स्त्रीतरा' इति। स्त्यायतेर्डट् डित्वाट्टिलोपः, वलिलोपश्च (6.1.66), टित्वान् ङीप्।

वक्तवयः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--अन्यतरस्यांग्रहणस्य व्यवस्थितविभाषाविज्ञानात् कृन्नद्या न भविष्यतीति। `लक्ष्मीतरा' इति। `अवितृस्तृतन्त्रिभ्य ईः' (द.उ.1.82) `र्लक्षेर्मुट् च', (द.उ.1.84) इतीकारप्रतययान्तो लक्ष्मीशब्दो व्युत्पादितः। कृन्नद्ययं भवति।।

45. उगितश्च। (6.3.45)

`श्रेयसितरा' इति। ईयसुनि परतः `प्रशस्यस्य श्रः' (5.3.60) इति प्रशस्यशब्दस्य श्रादेशः, `उगितश्च' (4.1.6) इति ङीप्। `विदुषीतरा' इति। विदेः परस्य लटः शत्रादेशः, तस्य `विदेः शतुर्वसुः' (7.1.36) इति वस्वादेशः, `वसोः सम्प्रसारणम्' (6.4.131) परपूर्वत्वम्, पूर्ववन्ङीप्।

`पुंवद्भावोऽप्यत्र पक्षे वक्तव्यः' इति। श्रेयस्तरा, विद्वत्तरेति पक्षे यथा स्यात्। `विद्वत्तरा' इति। `वसुस्रंसु' (8.2.72) इति सकारस्य दकारः `खरि च' (8.4.55) इति तकारः।

`प्रकर्षयोगात्' इत्यादिनोपसंख्यानं प्रत्याचष्टे। शब्दानां व्युत्पत्तौ प्रवृत्तौ च न वस्तुसन्निधानं प्रधानं कारणम्, अपि तु विवक्षैव। न चैवं पूर्वं प्रकर्षयोगात् स्त्रीत्वं विवक्षितम्। तस्मादस्त्रीप्रत्ययान्तादेवातिशायिकेन भवितव्यम्। आतिशायिकप्रत्ययान्तात्तु स्त्रीप्रत्ययेनेति सिद्धं श्रेयस्तरेत्यादि रूपम्। ननु च ङ्याब्ग्रहणं तदन्तात् तद्धितविधानार्थमित्युक्तम्, तत्कथमस्त्रीप्रत्ययान्तात् तद्धितप्रकर्षप्रत्ययो युज्यते? नैतत; अत्र विषये स्त्रोत्वतद्धितार्थयोर्युगपद्विवक्षामभिप्रेत्य तदुक्तम्, न तु यत्र विषये प्राक् प्रकर्षार्थेन सम्बन्धात् स्त्रीत्वस्य विवक्षा नास्ति तमभिप्रेत्येति किमत्र न युज्यते।।

46. आन्महतः समानाधिकरणजातीययोः। (6.3.46)

`महादेवः, महाब्राह्मणः' इति। `सन्महत्' (2.1.61) इत्यादिना कर्मधारयः। `महाबाहुः' इति। बहुव्रीहिः।

`लक्षणोक्तत्वात्' इत्यादिना परमतमाविष्कृत्य निराकरोति। स्यादेतत्--उत्तरपदेन समासः सन्निधापितः, समासे हि सत्युत्तरपदं भवति, स च समासो लक्षणप्रतिपदोक्तपरिभाषया (व्या.प.3) महतो यः प्रतिपदोक्तः `सन्महत्' (2.1.61) इत्यादिना साक्षाद्विशेषविहित स एव गृह्यते, न तु यो लाक्षणिकः सामान्यलक्षणोक्तश्च समासः--महत्पुत्र इति? अत्र `षष्ठी' (2.2.8) इति सामान्यलक्षणेन विहितत्वात्, तस्मादत्र न भविष्यतीति। यद्येवम्, बहुव्रीहावपि न स्यात्; तस्यापि लाक्षणिकत्वात्। `तदर्थम्' इत्यादि। बहुव्रीहावप्यात्त्वं यता स्यादित्येवमर्थं समानाधिकरणग्रहँ कर्त्तव्यम्। तत्र सतद्येषा परिभाषा नोपतिष्ठते। यद्युपतिष्ठते समानाधिकरणमनर्थकं स्यात्; महतो यः प्रतिपदोक्तः समासस्तस्य समानाधिकरणपदत्वात्। तस्याश्चानुपस्थाने सति बहुव्रीहावप्यात्त्वं भवति। असति तु समानाधिकरणग्रहणे तया परिभाषयेहोपस्थातव्यम्। ततश्च यता महत्पुत्र इत्यत्र न भवति, तथा बहुव्रीहावपि महाबाहुरित्यत्र न स्यात्।

`अमाहन् महान् सम्पन्नो महद्भूतश्चन्द्रमा इति यत्रार्थे च्व्यन्तो महच्छब्दो वर्त्तते तत्रैव भूतशब्दोऽपि, तस्मात् सामानाधिकरण्ये सतद्यात्त्वेन भवितव्यम्'--इति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकत्तुमाह--`अमहान् महन्' इत्यादि। `महद्भूतः' इति। महच्छब्दात् `अभूततद्भावे' (5.4.50) इत्यादिना च्विः, तस्य `ऊर्यादिच्विडाचश्च' (1.4.61) इति गतिसंज्ञकत्वाद्भूतशब्देन `कुगतिप्रादयः' (2.2.18) इति समासः। `गौणत्वात्' इत्यादि। लोके हि शब्दादुच्चरिताद्गौणमुख्यार्थसम्भवे सति मुख्यार्थएवं सम्प्रत्ययो भवति, न तु गौणेऽप्रदाने। तथा हि--`गौरानीयताम्' इत्युक्ते सास्नादिमानेवानीयते, न तु बाहीक इति। तस्मादिहापि महच्छब्दादुच्चारितान्मुख्य एव महदर्थे सम्प्रत्ययो भवति, न गौणे। गौणश्चात्र महदर्थः। तदभिधानाच्च महच्छब्दोऽपि गौण इति न भवत्यात्त्वम्। ननु च महत्त्वेन युक्तश्चन्द्रमा महानेव, तदयुक्तं महदर्थस्य गौणत्वम्? नैतदस्ति; सर्वत्रैव हि च्व्यन्तेनार्थ आश्रितपूर्वावस्थ उपचरितोत्तरावस्थ उच्यते, तस्मादिहापि चन्द्रमा अमहत्त्वपूर्वावस्थो महच्छब्देनोच्यमान उपचरितमहत्त्वानुगतोत्तरावस्थ एव उच्यत इति युक्तास्य गौणता।

यदि गौणत्वान्महच्छब्दस्यात्त्वमिह न भवति, तदा पुंवद्भावोऽपि न स्यात्, अमहती ब्राह्मणी महती सम्पन्ना महद्भूतेति; वृद्ध्यात्त्वे च गौणस्य गोशब्दख्य न स्याताम्, गौर्वाहीकस्तिष्ठतीति वृद्धिर्न स्यात् `गौतो णित्' (7.1.99) इति गौणाद् गोशब्दात् परस्य सर्वनामस्थानस्य णित्त्वेऽसति गां वाहीकमानयेत्यत्र `औतोऽम्शसोः' (6.1.93) इत्यात्त्वं न स्यात्? नैष दोषः; पुंवद्भावस्तावत् `स्त्रियाः पुंवत्' (6.3.34) इति योगविभागाद्भविष्यति। योगविबागश्चावश्यं कर्त्तव्यो गर्भिभार्य इत्याद्यर्थः, महत्या घासो महाघास इत्याद्यर्थश्च; सोऽन्यार्थः क्रियमाण एतदर्थोऽपि भविष्यति। ननु च क्रियमाणेऽपि योगविभागे नैवात्र पुंवद्भावः प्राप्नोति, महदर्थस्य गौणत्वात्, योगविभागस्य चान्यत्र चरितार्थत्वात्? एवं तर्हि `पुंवत्कर्मधारय' (6.3.42) इति सूत्रे द्वितीयः पुंवदिति योगविभागः किष्यते, स गौणार्थो भविष्यति। वृद्ध्यात्त्वाभावदोषोऽपि न प्रसजति; यस्माद्वाक्यात् तत्र गौणत्वं प्रतीयते। पद्सय तु मुख्य एवार्थः, न च पदसंस्कारवेलायां वाक्यार्थोऽपेक्ष्यते।

`महादात्त्वे' इत्यादि। समानाधिकरण आत्त्वपुंवद्भावौ विधीयमानौ व्यधिकरणे न प्राप्नुतः। तस्माद्वयधिकरणेऽप्युत्तरपदे घासादौ महदात्तवस्योपसंख्यानं कर्त्तव्यम्। उपसंख्यानमित्यस्य प्रतिपादनमित्यर्थः। तत्रेदं प्रतिपादनम्--`आन्महतः' (6.3.46) इत्यत्रापि `आत्' इति योगविभागं करिष्यति, तेन महत्या घासो महाघास इत्यादावात्त्वं भविष्यतीति। स चावश्यं योगविभागः कर्त्तव्यः--अष्टाकपालमित्याद्यर्थम्, सोऽन्यार्थं क्रियमाण एतदर्थोऽपि भवति। `पुंवद्वचनं च' इत्यादि। घासकरविशिष्टेष्वित्यपेक्ष्यते। पुंवद्भावस्य वचनं व्याख्यानं कर्त्तव्यम्, तच्च पूर्वमेव कृतम्।

`अष्टनः कपाले' इत्यादि। अत्राप्युपसंख्यानशब्दस्य प्रतिपादनमर्थः। तच्च प्रतिपादनं पूर्वमेव कृतम्। `अष्टाकापालम्' इति। अष्टसु कपालेषु संस्कृतमिति `तद्धितार्थ' (2.1.51) इत्यादिना समासः, `संस्कृतं भक्षाः' (4.2.16) इत्यण्, तस्य `द्विगोर्लुगनपत्ये' (4.1.88) इति लुक। `अष्टकपालं ब्राह्मणस्य' इति। अष्टानां कपालानां समाहारोष्टकपालम्, समाहारे द्विगुः। अत्र पात्रादित्वात् (वा.159) स्त्रियां न भाष्यते। तेन `द्विगोः' (4.1.21) इति ङीब् न भवति।

`गवि च युक्ते' इत्यादि। गोशब्दे चोत्तरपेद युक्तार्थे गम्यमानेऽष्टन्शब्दस्यात्त्वस्य प्रतिपादनं कर्त्तव्यम्। तच्च प्रतिपादनं पूर्वमेव कृतम्। `अष्टागवेन शकटेन'

इति। अष्टौ गावो युक्ता अस्मिन्निति त्रिपदोऽयं बहुव्रीहिः। युक्तशब्दस्तु गम्यमानत्वाद्वतौ न प्रयुज्यते, यथा दध्योदन इत्यत्रोपसिक्तशब्दः। यदि च बहुव्रीहिरयम्, तदा `गोरतद्धितलुकि' (5.4.92) इति टच् समासान्तो न प्राप्नोति; तत्पुरुषाधिकारात्? मा भूत् टच् `अच् प्रत्यन्ववपूर्वात्' (5.4.75) इत्यत्र अजिति योगविभागात् भविष्यति, यथा--कृष्णभूमः, पद्मनाम इत्यादौ। अथ वा--अष्टानां गवां समाहारोऽष्टगवम्, अष्टगवेन युक्तमष्टागवम्। न चैवं युक्तशब्दस्य प्रयोगः प्रसजति; पदैकदेशस्य प्रयोगात्, यथा--सत्यभामा भामा, भीमसेनो भीमः, बलभद्रो बल इति।

`एकादश' इत्यत्रापि तत एव योगविभागादात्त्वं वेदितव्यम्। योगविभागस्य च लिङ्गम्--`प्रागेकादशभ्यः' (5.3.49) इति निर्देशः।

`तपकरँ विस्पष्टार्थम्' इति। अथ भिन्नकालानां निवृत्त्यर्थ कस्मान्न भवति? भाव्यमानेनाणा सवर्णानामग्रहणात्। गुणान्तरभिन्नानां तर्हि ग्रहणं कस्मान्न भवति? गुणानामभेदकत्वात्।।

47. द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः। (6.3.47)

संख्यातानुदेशोऽत्र न भवति। यदि हि स्यादष्टनोऽशीतौ प्रतिषेधः स्यात्, तथा च तस्य वैयर्थ्यं स्यात्। प्रतिषिद्धे ह्यात्त्वे सवर्णदीर्घत्वेन भवितव्यम्। अल्पाच्तरत्वाच्चाशीतिशब्दस्य पूर्वनिपातेकर्त्तव्ये परनिपातेन लक्षणव्यभिचारचिह्नेन सख्यातानुदेशाभावः सूचितः। `द्वादश' इति। द्वौ च दश चेति द्वन्द्वः। अथ वा द्वाभ्यामधिकादशेति समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च' (वा.83) इत्युत्तरपदलोपी तत्पुरुष समासः। एवं `द्वाविंशतिः' इत्यादावपि वेदितव्यम्।

`द्वैमातुरः' इति। द्वयोर्मात्रोरपत्यमिति विगृह्य तद्धितार्थे समासः, ततः `मातुरुत्संख्यासम्भद्रपूर्वायाः' (4.1.115) इत्यण्; उकारश्चान्तादेशः। `द्वित्राः' इति। द्वौ वा त्रयो वेति विगृह्य `सङ्ख्ययाव्यय' (2.2.25) इत्यादिना बहुव्रीहिः, `बहुव्रीहौ संख्येये' (5.4.73) इत्यादिना डच् समासान्तः, टिलोपः। `द्विदशाः' इति। पूर्ववड्डच्, बहुव्रीहिः। द्विर्दशेति विग्रहः। सुबर्थेऽयं समासः। अत्र हि दशसम्बन्धिन्यावृत्तिर्दशशब्देन लक्ष्यमाणा द्विशब्देन संख्यायते। तेन द्वौ दशकावित्ययमर्थो वेदितव्यः। समासः सुबर्थं गमयितुं समर्थ इति वृत्तौ सुज् न प्रयुज्यते। `द्व्यशीतिः' इति। पूर्ववद्द्वन्द्वः; उत्तरपदलोपी वा तत्पुरुषः।

`प्राक् शतात्' इत्यादि। शतात् प्रागया संख्या तद्वाचिन्युत्तरपदे द्व्यष्टन आत्त्वं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`विभाषा चत्वरिंशत' (6.3.49) इत्यत्र वक्ष्यमाणविभाषाग्रहणं सिंहावलोकिनतन्यायेनेहाप्युपतिष्टते, सा च व्यवस्थितविभाषा। तेन प्राक् शताद्या संख्या तद्वाचिन्यत्तरपदे भविष्यति। शतादिवाचिनि तु न भविष्यति। एवमुत्तरयोरपि योगयोः प्राक्शतात् कार्यं भवतीति वेदितव्यम्।

48. त्रेस्त्रयः। (6.3.48)

`त्रयः' इति। सकारान्तोऽयमादेशः। कुत एतत्? सन्धिवेलादिषु त्रयोदशीशब्दपाठात्। अकारान्ते हि सति त्रयदशीति पाठः स्यात्। `त्रयोदश, त्रयोर्विंशतिः' इति। `ससजुषो रुः' (8.2.66) इति रुत्वम् `हशि च' (6.1.114) इत्यत्त्वम्, `आद्गुणः' (6.1.87) त्रिर्दश इति पूर्ववत् सुजर्थे बहुव्रीहिः, डच् समासान्तः।।

49. विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्। (6.3.49)

सर्वग्रहणं द्व्यष्टनोरपि यथा स्यादित्येवमर्थम्; इतरथा हि `अनन्तरस्या विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इति त्रेरेव स्यात्। मण्डुकप्लुतिन्यायेन द्व्यष्टन इत्येतदपीहानुवर्तिष्यते, ततोऽयमदोष इति चेत्? एवं तर्हि विस्पष्टार्थं सर्वग्रहणमिति।।

50. हृदयस्य हृल्लेखयदण्लासेषु। (6.3.50)

`हृल्लेशः'। `कर्मण्यण्' (3.2.1) `हृद्यः' इति। `प्राग्घिताद् यत्' (4.4.75)। `हार्दम्' इति। `तस्येदम्' (4.3.120) इति प्राग्दीव्यतोऽण्। `हृल्लासः' इति। लसनं लासः, भावे घञ्। `कृद्योगा च षष्ठी समस्यते' (वा.86) इति षष्ठीसमासः।

`लेख इत्यणन्तस्य ग्रहणम्' इति। एतच्च कात्ययनप्रभृतीनां प्रमाणभूतानां वचनाद्विज्ञायते। कात्यायनेनोक्तं यत्--`अण्ग्रहणे स्वरूपग्रहणं द्रष्टव्यम्, कृतः? लेखग्रहणात्' इति। भाष्यकृताप्युक्तम्--`सर्वत्रैवोत्तरपदाधिकारे प्रत्ययग्रहणे स्वरपग्रहणं द्रष्टव्यम्, कुतः? लेखगरहणात्' इति। एतच्च वचनद्वयं कथमुपपद्यते? यदि लेख इत्यणन्तस्य ग्रहणं भवति, नान्यथा। अथ घञन्तस्यापि लेखशब्दस्य ग्रहणं कस्मान्न विज्ञायते? इत्याह--`घञि तु' इत्यादि।

`एतदेव' इत्यादि। अण्ग्रहणादेव तदन्तस्य लेखशब्दस्य ग्रहणे सिद्धे तस्य पृथग्ग्रहणं क्रियणाणमेतज्ज्ञापयति--उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तं न गृह्यत इति। तेनेह यदण्ग्रहणे घरूपादिसूत्रे च (6.3.43) घादिप्रत्ययग्रहणे प्रत्ययमात्रं गृह्यते, न तदन्तविधिरिति भावः।।

51. वा शोकष्यञ्रोगेषु। (6.3.51)

`सौहार्द्यम्' इति। शोभनं हृदयमस्येति बहुव्रीहिः। ततः ष्यञ्।

`हृदयशब्देन' इत्यादि। हृदयशब्देनेह समानर्थे हृच्छब्दे सति यदा हृच्छबदस्य प्रयोगः, तदा हृच्छोक इति भविष्यति, यदा हृदयशब्दसय तदा हृदयशोक

इति, ततश्च तेनैव प्रकृत्यन्तरेण सिद्धे विकल्पविधानमिदं न कर्त्तव्यम्। एतत् क्रियते तु प्रपञ्चार्थम्। स एव सिद्धप्रयोगोऽनेन सूत्रेण कथ्यत इति।।

52. पादस्य पदाज्यातिगोपहतेषु। (6.3.52)
`पदाजिः' इति। `अज गतिक्षेपणयोः' (धा.पा.230)। `पदातिः' इति। `अत सातत्यगमने' (धा.पा.38)। `अज्यतिभ्याञ्च पादे च' इत्यौणादिक इण्प्रत्ययः' इति। अत्र `जनिघसिभ्यामिण्' (द.उ.1.58) इत्यत इष्ग्रहणानुवृत्तेः। यदौणादिक इण्प्रत्ययः, एवं सति तत्र `अजेर्व्यघञपोः' (2.4.56) इति वीभावः कस्मान्न भवति? इत्याह--`तत्र' इत्यादि। `पदगः' इति। `अन्तात्यन्ताध्वदूरपार' (3.2.48) इत्यादौ सूत्रे `डप्रकरणऽन्यत्रापि दृश्यते इति वक्तव्यम्' (वा.256) इत्युक्तम्। तेन पादशब्देऽप्युपपदे गमेर्डप्रत्ययः। `पदोपहतः' इति। `कर्त्तृकरणे कृता बहुलम्' (2.1.32) इति समासः, पूर्वत्र तूपपदसमासः। अकारान्तोऽयमादेशः। प्रथमायाश्च लुकं कृत्वा निर्देश। `पादशब्दोऽयम्' इत्यादि। `कर्षात्वतो घञोऽन्त उदात्तः' (6.1.159) इत्यन्तोदात्तत्वे प्राप्ते पादशब्दस्य वृषदित्वादाद्युदात्तत्वं विधीयते, ततश्च तस्य स्थाने पदादेशो विधीयमान आन्तरतम्यादाद्युदात्त एव स्यात् अन्तोदात्तश्चेष्यते। तस्मादान्तोदात्तो निपात्यते उपदेशावस्थायामेव। `तेन' इत्यादिनान्तोदात्तनिपादनस्य फलं दर्शयति। `पदाजिः, पदातिः' इत्यादिनाप्युपदेशग्रहणस्य। यदि `गतिकारकोपपदात् कृत्' (6.2.139) इति प्रकृतस्वरे कृते पदशब्दस्यान्तोदात्ततवं निपात्यते, तदा तस्य सतिशिष्टत्वं स्यात्, ततश्च पदाजिः पदातिः पदग इत्येषु कृत्स्वरो बाध्यते; सतिशिष्टस्वरस्य बलीयस्त्वात। उपदेशावस्थायांत्वन्तोदात्तत्वनिपातने कृत्स्वर एव सतिशिष्टो भवति। अतस्तेन समासस्यैवान्तोदात्तत्वं भवति न पदशब्दस्य।।

53. पद्यत्यतदर्थे। (6.3.53)
`पद्याः' इति। `विध्यत्यधनुषा' (4.4.83) इति यत्।
`पाद्यम्' इति। पादशब्दात् `तादर्थ्ये यत्' (5.4.24) इत्यनुवर्तमाने `पादार्घाभ्याञ्च' (5.4.25) इति यत्।
`पद्भावे' इत्यादि। पद्भावे कर्त्तव्येऽस्मिंश्चरत्यर्थे य इक् तस्मिन् कृते पद्भावस्योपसंख्यानम्=प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्--पदिति योगविबागात् सिद्धमिति। पर्पादिष्वेव `पादः पच्च्' (4.4.10) इति पाठात् सिद्धमिति वा।
`शरीरावयवस्य' [`शरीरावयववचनस्य--काशिका] इत्यादि। कुतः पुनरेतल्लभ्यते? केचिदाहुः--पूर्वसूत्रे सामर्थ्याच्छरीरावयवसय पादशब्दस्य ग्रहणम्। तत्राज्यातिप्रभृतीनि त्रीण्युत्तरपदानि गमनार्थानि, चतुर्थं तु हननार्थम्। तेषु गमनाधिषु प्राण्यङ्गस्यैव पादशब्दस्य करणभावः सम्भवति, नैतरस्य। तस्मात् तत्र प्राण्यह्गवाचिनः पादशब्दस्य ग्रहणम्, इहपि तदेवानुवर्त्तत इति युक्तम्--शरीरावयवस्य ग्रहणमिति। यद्येवम्, तदा `ऋचः शे' (6.3.55) इत्यत्रापि शरीरावयवस्य ग्रहणं स्यात्? नैष दोषः; ऋक्सम्बन्धिन शरारावयववचनस्यासम्भवात्। चतुर्थभागवचनः पादशब्दोऽत्रि ग्रहिष्यते। `तेन' इत्यादि। यत एवं शरारावयववचनपादशब्दस्येह ग्रहणम्, तेन `पणपादमाष' (5.1.34) इत्यादो सूत्रे यः पादशब्दस्तस्य न पदादेशो भवति; न ह्यसौ शरीरावयववचनः, कि तर्हि? परिमाणवचनः। कुत एतत्? पणादिभिः परिमाणवचनैः साहचर्यात्। `द्विपाद्यम्, त्रिपाद्यम्' इति। `तेन क्रीतम्' (5.1.37) इत्यर्थे यत्प्रत्ययः।।

54. हिमकाषिहतिषु च। (6.3.54)
`पद्धिमम्' इति। षष्ठीसमासः। `पत्काषिणः' इति। `सुप्यजातौ णिनिस्ताच्छील्ये' (3.2.78) इति णिनिः, उपपदसमासः। `पद्धतिः' इति। पादाभ्यां हन्यत इति पद्धतिः। क्तिन्नन्तेन हतिशब्देन `कर्तृकरणे कृता बहुलम्' (2.1.32) इति समासः।।

55. ऋचः शे। (6.3.55)
`शे' इति तद्धितस्य शस्प्रत्ययस्यावयवभूतो यः शशब्दस्तस्येह ग्रहणम्; ऋक्पादात् परसयासम्भवात्। ननु च पादे शेते इति `अधिकारणे शेतेः' (3.2.15) इत्यचि कृते पादश इतयत्र शीङ्सम्बन्धी शशब्दः सम्भवति? नैतदस्ति; न हि ऋक्पाद उपपदे शेतेर्धातोरचा भवितव्यम्; तत्र तु शयनग्सम्भवत्, अनभिधानाद्वा। योऽपि `लोमादिपामादिपिच्छादिब्यः सनेलचः' (5.2.100) इति शो विधीयते, सोऽपि नैव ऋक्पादत् परः सम्भवति; तत्रानभिधानात्। लोमादिषु तस्यापाठाच्च।।

56. वा घोषमिश्रशब्देषु। (6.3.56)
घोषशब्दशबदशब्दाब्यां [`घोषशब्दशब्दाभ्यां--मुद्रितः पाठः] षष्ठीसमासः, मिश्रशब्दे च `पूर्वसदृश' (2.1.31) इत्यादिना तृतीयासमासः।
`निष्के चेति वकतव्यम्' इति। निष्कशब्दे चोत्तरपदे पादशब्दस्य पदित्ययमादेशो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`हिमकाषिहतिषु च' (6.3.54) इत्यतश्चकारोऽत्रानुवर्त्तते, स चानुक्तसमुच्चयार्थः। अथ वा--सूत्रे `वा' इति योग विभागः क्रियते तेन निष्के चोत्तरपदे भविष्यतीति।।

57. उदकस्योदः संज्ञायाम्। (6.3.57)
`उदमेघो नाम यस्योदमेधिः पुत्रः' इति। पितुरप्रसिद्धत्वादुदमेघस्य तदपत्येन समाख्यातुं यस्योदमेधिः पुत्र इत्युक्तम्। एतेन यस्यौदमेघिरपत्यं स उदमेघो

वेदितव्यमिति दर्शयति। एवम्--`उदवाहो नाम यस्यौदवाहिः पुत्रः' इत्यत्रापि वेदितव्यम्। उदमेघ इति षष्ठीसमासः, उदकपूर्णो वा मेघः--शाकपार्थिवादित्वा(वा.83) न्मध्यमपदलोपी तत्पुरुषः, उदकं बहतति उदवाहः--`कर्मण्यण्' (3.2.1)।
`वक्तवयः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--इहापि स एव चकारोऽनुवर्त्तते अनुक्तस मुच्चयार्थः, न चान्यत् समुच्चेतव्यमस्तीति। उदभावमेवासावुदकशब्दस्य संज्ञायां समुच्चिनोति। तत्र कस्य समुच्चिनोति? यस्य न प्राप्नोति। कस्य न प्राप्नोति? उत्तरपदभूतस्य। तेन संज्ञायामुत्तरपदस्याप्युदकशब्दयोद इत्ययमादेशो भवति। `लोहितोदः, क्षीरोदः' इति बहुव्रीहि-।।

58. पेषंवासवाहनधिषु च। (6.3.48)
`उपदेषम्' इति। `पिष्लृ सञ्चूर्णने' (दा.पा.1452) `उदधिः' इति। `कर्मण्यधिकरणे च' (3.3.93) इति क्रिप्रत्ययः। `आतो लोप इटि च' (6.4.64) इत्याकारलोपः।
असंज्ञार्थमिदं वचनम्; तेनोदधिरिति घटादिरिह वेदितव्यः, न समुद्रः; तत्र पूर्वेणैव सिद्धत्वात्--उदधिशब्दे समुद्रस्य संज्ञेति कृत्वा।।

59. एकहलादौ पूरयितव्येऽन्यतरस्याम्। (6.3.59)
यद्येकशब्दः सुख्यावचन इह गृह्यते, तदानर्थकं तस्य ग्रहणं स्यात्। न हि क्वचित् द्वौ बहवो वा हल आदिभूताः सम्भवन्ति, यद्व्यवच्छेदार्थमेकग्रहणं क्रियते। तस्मादसहायवचनोऽयमेकशब्दः। एवमपि यः कश्चिदविशिष्ट एकोऽसहायो हल् आदिर्यस्य तदेकहलाद्युत्तरपदं गृह्येत, तदोदकस्थानमित्यत्रापि स्यात्। अत्रापि हि सकारोऽसहाय एव एकहल्। यद्यनेके वर्णा युगपदुच्चार्येरन्, उच्चरिता वा वर्णा न प्रध्वंसेरन्, तदा ससहायस्यापि स्यादादित्वम्। न चैवम्; यतो वर्णा न युगपदुच्चार्यन्ते, ते चोच्चारितप्रध्वसिनः। तस्मान्नास्त्येव क्वचित् किंचिदनेकहलादित्वं यद्व्यवच्छेदार्थमेकहलादावित्युच्यते। उक्तं चेदम्। अतोऽस्मादेव वचनाद्विशिष्टमात्रैकहलादित्वं विवक्षितमित्येतत् सर्वं चेतसि कृत्वा तदेव विशिष्टं दर्शयितुमाह--`एकोऽसहायः' इत्यादि।
यश्चातुल्यजातीयेनाप्यचा विनैको हल् स आदिर्यस्येति तदेकहलादि। तुल्यजातीयेन चव्यवहितेनापि यस्य तदेकहलादीहाश्रीयेत तदा न क्वचित् स्यात्; तथाविधस्योत्तरपदस्य पूरयितव्यवाचिनोऽभावात्, उच्यते चेदम्। तस्माद्वचनप्रामाण्यात् तुल्यजातीयेन हलाऽनन्तरेणाव्यवहितेन विना यो वर्त्तते सोऽसहाय एवैकशब्देनासहायवाचिना विवक्षित इति गम्यते। एवंविधो हलादिर्यस्य तदेकहालादि। न चैवंविधः स्थानशब्दस्यादिर्हलस्तीत्येकहलादिगरहणेन स्थानशब्दो निवर्त्तते। `पूरियतव्यवाचिनि' इति। उदकादिना द्रव्येणान्तर्व्याप्तव्यः पूरयितव्य इत्युच्येत। तद्वक्तुं शीलमस्येति ताच्छीलिको णिनिः।।

60. मन्थैदनसक्तुबिन्दुजरभारहारवीवधगाहेषु च। (6.3.60)
द्रवद्रव्यसंपृक्ताः सक्तवो मन्थ इत्युच्यते। तत्र मन्थशब्दोऽयं यद्यव्युत्पन्नं प्रातिपदिकम्, तदोदकेन मन्थ इति `तृतीया' (2.1.30) इति योगविभागात् समासः। अथ व्युत्पाद्यते--मध्यत इति मन्थः, तदा `कर्त्तृकरणे कृता बहुलम्' (2.1.32) इति समासः। सकत्वोदनाभ्यां `अन्नेन व्यञ्जनम्' (2.1.34) इति समासः। बिन्दुवज्रवीवधैः `षष्ठी' (2.2.8) इति भारहारगाहैरणन्तैः `उपपदमतिङ्' (2.2.19) इति।।

61. इको ह्वस्वोऽङ्यो गालस्य। (6.3.61)
`ग्रामणिपुत्रः' इति। ग्रामं नयतीती `सत्यूद्विष' (3.2.61) इत्यादिना क्विप्। `अग्रग्रामाभ्याञ्च नयतेः' (कात्या.वा.5064) इति णत्वम्। `गार्गीपुत्रः' इति। `यञश्च' (4.1.16) इति गार्ग्यशब्दान्ङीप्, `यस्येति च' (6.4.148) इत्यकारस्य लोपः, `हलस्तद्धितस्य' (6.4.150) इति यकारस्य च।
अथ दिकल्पार्थमेव गालवग्रहणं कस्मान्न भवति? इत्याह--`अन्यतरस्याम्' इत्यादि। `कारीषगन्धीपुत्रः' इति। करीषगन्ध्यायायः पुत्र इति षष्ठीसमासः `ष्यङः सम्प्रसारणम्' (6.1.13) इत्यादिना सम्प्रसारणम्, `सम्प्रसारणाच्च' (6.1.108) इति परपूरवत्वम्, `हलः' (6.4.2) (इति) सम्प्रसारणस्य दीर्घः।
`इयङुवङ्भाविनाम्' इत्यादि। इयङुवङौ भाविनौ येषां ते तथोच्यन्ते। `श्रीकुलम्' इति। इयङ्भाविन उदाहरणम्। `भ्रूकुलम्' इति। उवङ्भाविनश्च।
`कण्डीभूतम्, वृषलीभूतम्' इति। अवप्ययानाम्। काण्डवृषलशब्दाभ्यां `अभूततद्भावे' (5.4.50) इत्यादिना च्विः, `अस्य च्वौ' (7.4.32) इतीत्वम्।
`भ्रूकुंसः' इति। भ्रूश्चासौ कुंसश्चेति विशेषणसमासः। एवं `भ्रुकुटिः' इत्यत्रापि। `वक्तव्यम्' इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--पृषोदरादित्वाद्भ्रुकुंसादीनामकारो भविष्यतीति।।

62. एक तद्धिते च। (6.3.62)
`एकरूप्यम्' इति। `हेतुमनुष्यभ्योऽन्यतरस्यां रूप्यः' (4.3.81) इति रूप्यः। `एकमयम्' इति। `मयट् च' (4.3.82) इति, मयट्। `एकत्वम्, एकता' इति। ` तस्य भावसत्वतलौ' (5.1.119) इति त्वतलौ। यदैकशब्दः संख्यापरो भवति तदैतदुदाहरणम्। यदा संख्येयपरो भवति। तदा `त्वलोर्गुणवचनस्य' (वा.730) इति पुंवद्भावेनैव सिद्धम्। ननु च गुणमुक्तवान् गुणवचनः, यश्च गुणमात्रमभिधाय तद्विशिष्टं द्रव्यमाह स गुणवचनो भवति। तद्यथा--कृष्णः पटः, शुक्लः पट इति; अयं पुनरेकशब्दो न क्वचिदपि द्रव्यव्यतिरिक्तं गुणमाह, सर्वदा संख्येये द्रव्ये वर्तत इति कृत्वा, तत् कुतोऽसय पुंवद्भावः? अयुक्तमिदमभिधीयते; तथा हि--प्रसिद्धमामाश्रित्यैकादयः संख्येयवचना इत्युच्यन्ते, न त्वेषां संख्याने वृत्तिर्नाभ्युपेयेति। तथा हि--`द्व्येकयोर्द्विवचनैकवचने'

(1.4.22) इत्यत्र त्वेकशब्दः संख्यायामेव प्रयुक्तो न संख्येये द्रव्ये।

`लिङ्गविशिष्टस्य' इत्यादि। पुंल्लिङ्गो य एकशब्दः स स्वभावत एव ह्रस्वान्त इति न तद्ग्रहणं प्रयोजयति, अपि तु स्त्रीलिंगविशिष्टस्यैव। तस्यैव हि ह्रस्वत्वं विधीयमानमर्थवद्भवति। ननु नैतस्याप्येकशब्दस्य य एकारस्तस्य ह्रस्वत्वं विधीयमानमर्थवद्भवति, तत् किमुच्यते लिङ्गविशिष्टस्यैकशब्दस्य ग्रहणं प्रयोजयति? इत्याह--`अचा गृह्यमाणम्' इत्यादि। विशेषणविशेष्यभावं प्रति कामचारः। तथा ह्युक्तम्--विशेषणविशेष्यभावयोर्यथेष्टत्वादिति। तत्र यदि गृह्यमाणेनैकशब्देनाज्विशिष्यते--एकशब्दस्य योऽजिति, तदैकसम्बन्धिन एकारस्य हरस्वत्वं विधीयमानमर्थवद्भवति। पुंल्लिङ्गस्याप्येकशब्दस्य ग्रहणं प्रयोजति। न चात्र गृह्यमाणेनाज्विशिष्यते; एकारस्य ह्रसवस्यानिष्टत्वात्। न ह्यनिष्टार्था शास्त्रे प्रक्लृप्तिर्युक्ता (भो.प.सू.107), तस्मादाचा गृह्यमाण एकशब्दोऽत्र विशिष्यते। तेन लिङ्गविशिष्टस्य ग्रहणम्। एकशब्दस्य ह्रस्वो भवति, किं विशिष्टस्याचः? अजन्तस्येत्यर्थः। तत्रालोऽन्त्यस्यैव ह्रस्वत्वेन भवितव्यम्, तच्च टाबन्तस्यैव सार्थकम्, न पुंल्लिङ्गस्य; न हि ह्रस्वस्यैव ह्रस्वे विधीयमाने कश्चिदर्थः सिध्यति। इतिकरणो हेतौ। यत एवाचा गृह्यमाण एकशब्दोऽत्र विशिष्यते, तेन लिङ्गविशिष्टस्य ग्रहणमेकशब्दस्य प्रयोजयति।।

63. ङ्यापोः संज्ञाछन्दसोर्बहुलम्। (6.3.63)

`रेवतिपुत्रः' इति षष्ठीसमासः। एवं `रोहिणिपुत्रः' इत्यादावपि। कुमारीं ददातीति `कुमारिदा'। उर्वी ददातीति `उर्विदा'। `आतोऽनुपसर्गे कः' (3.2.3)। `फाल्गुनी' इत्यादि। फाल्गुनी चासौ पौर्णमासौ चेति फाल्गुनी पौर्णमासौ, `विशेषणम्' (2.1.57) इत्यादिना समासः। एवं `जगतीच्छन्दः' इत्यत्रापि। `शिलवहम्, शिलप्रस्थम्' इति। शिलाशब्दसय वहप्रस्थशब्दाभ्यां `षष्ठी' (2.2.8) इत्यनेन समासः। `लोमकागृहम्, लोमकाषण्डम्' इति। अत्रापि लोमकाशब्दसय गृहषण्डशब्दाभ्याम्। `अजक्षीरेण इति। अत्राप्यजाशब्दस्य क्षीरशब्देन। `ऊर्णमृत्' [`ऊर्णमृदा'--काशिका. ऊर्णम्रवा--पदमञ्जरी] इति। ऊर्णासहिता मृद् ऊर्णमृत्। शाकपर्थिवादित्वादुत्तरपदलोपी समासः।।

64. त्वे च। (6.3.64)

`संज्ञायामसम्भवाच्छन्दस्येवोदाहरणानि भवन्ति' इति। एवकारेण संज्ञाया व्यवच्छेदः क्रियते। न हि त्वप्रत्यये ङ्यापोर्ह्रस्वत्वे कृते कस्यचित् संज्ञा गम्यते। तेन संज्ञायामसम्भवाच्छन्दस्येवोदाहरणानि भवन्ति।।

65. इष्टकेषीकामलानां चिततूलभारिषु। (6.3.65)

`इष्टकचितम्' इति। `कर्तृकरणे' (2.1.32) इत्यादिना समासः। `इषीकतूलम्' इति। षष्ठीसमासः। `मालभारिणी' इति। मालां भर्त्तुं शीलमस्या इति ताच्छील्ये णिनिः (3.2.78), `उपपदमतिङ्' (2.2.19) इति समासः।

`इष्टकादिभिस्तदन्तस्यापि ग्रहणं भवति' इति। बहुलग्रहणानुवृत्तेरित्यभिप्रायः।।

66. खित्यनव्ययस्य। (6.3.66)

`कालिम्मन्या, हरिणिम्मन्या' इति। कालीमात्मानं मन्यते हरिणीमात्मानं मन्यत इति `आत्ममाने खश्च' (3.2.83) इति खश्, दिवादित्वाच्छ्यन्, अनेन ह्रस्वत्वम्, उत्तरसूत्रेण मुम्। इहाजन्तस्य ह्रस्वत्वमभ्युपगम्यम्; अन्यथा वाङ्मन्य इत्यत्रापि स्यात्। अजन्तस्य ह्रस्वविधाने सति परत्वान्मुमि कृतेऽनजन्तत्वाद्ह्रस्वो न प्राप्नोतीति यो मन्येत तं प्रत्याह--`मुमा ह्रस्वो न बाध्यते' इति। अत्रैव हेतुमाह--`अन्यथा हि' इत्यादि। ह्रस्वः शिष्यते=विधीयते येन तत् ह्रस्वशासनं `खित्यनवययस्य ' इत्येतद्ववचनम्। यदि हि मुमा ह्रस्वो बाध्येत, ततो ह्रस्वशासनामिदमनवकाशं स्यात्, ततस्तस्यानर्थक्यमेव स्यात्। तस्मान्मा भूदेष दोष इति मुमा ह्रस्वो न बाध्यते। तेन विरोधाभावादुभयं भवति--ह्रसवः, मुम् च। कथं पुनर्मुमा ह्रस्वसय बाधा शङ्किता? कथं वा ह्रस्वशासनस्यानवकाशत्वम्, यावता खित्यजन्तस्याविशेषेण मुम् विधीयते, ह्रस्वत्वं बाधा शङ्किता? कथं वा ह्रस्वशासनस्यानवकाशत्वम्, यावता खित्यजन्तस्याविशेषेण मुम् च। कथं पुनर्मुमा ह्रस्वस्य बाधा शङ्किता? कथं वा ह्रस्वशासनस्यानवकाशत्वम्, यावता खित्यजन्तस्याविशेषेण मुम् विधीयते, ह्रस्वतवं तु सामर्थ्याद्दीर्घस्य, न हि ह्रसवस्य ह्रस्वविधानमर्थवद्भवति, एवं च स्तनन्धयादिषु कृतार्थत्वान्मुमेव ह्रस्वेनापवादेन कालिम्मन्यादिषु बाध्येत? एवं मन्यते--अपवादविषयेऽपि मुमा विधानार्थं मुम्शास्त्रस्यावश्यमावृत्तिः कर्तत्व्या; अन्यथा कालिम्मन्येत्यतर मुम् न स्यात्। ततश्चापवादविषयेऽपि मुमा प्रवर्त्तमानेन ह्रसवस्य बाधा सम्भाव्येत। अनवकाशत्वं चातएवापवादविषयेऽपि मुम्प्रवृत्तेरिति। अथ कथमत्र खिदन्तस्य गरहणम्, यावता ज्ञापितमेतदुत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधीर्नास्ति? (पु.प.पा.26) त्यत आह--`अनवययस्येत्येतदेव' इत्यादि। यद्यत्र खित्प्रतययमात्रं गृह्येत न तदन्तम्, ततोनव्ययस्येति प्रतिषेधोऽपार्थकः स्यात्। न ह्यव्ययात् परः खित् प्रतययः सम्भवति; धातोरेव तस्य विधानात्। ततश्चानर्थकत्वादनव्ययस्येत्येतन्नोक्तं स्यात्। उक्तञ्च--तस्मादेतदेवै तज्ज्ञापयति--खिदन्तस्यात्र ग्रहणमिति।।

67. अरुर्द्विषदजन्तस्य मुम्। (6.3.67)

`अरुन्तुदः' इति। अरुस्तुदतीति `विष्वरुषोस्तुदः' (3.2.35) इति खश् संयोगान्तलोपः, तुदादीत्वाच्छः, अतो गुणे (6.1.97) पररूपत्वम्। `द्विषन्तपः' इति। द्विषन्तं तापयतीति `द्विषत्परयोस्तापेः' (3.2.39) इति खच्, `खचि ह्रसवः' (6.4.94) इति ह्रस्वत्वम्।
`विद्वन्मन्यः' इति। विद्वांसमात्मानं मन्यत इति, `आत्ममाने खश्च' (3.2.83) इति खश्, `वसुस्रंसुध्वंस्वनडुहां दः' (8.2.72) इति सकारस्य दकारः, `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इति तस्य नकारः। अथान्तग्रहणं किमर्थम्, यावता `येन विधस्तदन्तस्य' (1.1.72) इत्यनेन तदन्तस्यैव भविष्यति? इत्याह--`अन्तग्रहणम्' इत्यादि। कृतमजन्तकार्यं यस्य स कृताजन्तकार्यं आगमी, तस्यैवविधस्य प्रतिपत्तिः प्रतीतिर्यथा स्यादित्येवमर्थमन्तग्रहणम्। अन्तग्रहणेन हि कार्यान्तरस्यान्तेऽवसाने मुम् कर्तवय इत्येषोऽर्थः सूच्यते। अतोऽजन्तकार्ये ह्रसवत्वे कृते पश्चान्मुम् भवति। ननु च मुमा ह्रस्वो न बाध्यत इत्यनेनैव भविष्यतति सोपपतिकोऽयमर्थः प्रतिपादितः, तत् किमर्थमेतदन्तग्रहणम्? नैतदस्ति; तेन हि निरवकाशाद् ह्रस्वशासनस्य मुमा ह्रस्वो न बाध्यत इत्येतावन्मात्रं प्रतपादितम्, न तु कृताजन्तकार्यस्य मुम् भवतीत्येषोऽर्थः, ततः परत्वान्मुमि कृत सत्यनजन्तस्यापि ह्रस्वत्वं प्रसज्येत। अत्र को दोषः? खित्यन्तहरसवभावी नास्तीति। यथा कालिम्मन्य इत्यत्र मुमि कृते सत्यनजन्तस्यापि ह्रस्वत्वं भवति, तथा वाङ्मन्य इत्यत्र स्यादिति। तस्मादन्तग्रहणं कर्त्तव्यम्।।

68. इच एकाचोऽम्प्रत्ययवच्च। (6.3.68)
अत्र यदि `प्रत्ययवच्च' इत्येतावदुच्येत, तदा गाम्मन्य इत्यत्र `औतोऽम्शसोः' (6.1.93) इत्यात्त्वं न सात्, इह च स्त्रीम्मन्य इति--अत्रापि `अमि पूर्वः' (6.1.107) इति पूर्वसवर्णः, इह च नरम्मन्य इति नृशब्दस्य `ऋतो ङिसर्वनामस्थानयोः' (7.3.110) इति गुणः। सामान्यातिदेशे विशेषस्यानतिदेशाद्वचनं त्वियङुवङर्थमेव केवलं स्यात्, इयङुवङावजादौ प्रत्ययमात्रसामान्येन विधीयमानौ सामान्यातिदेशेऽपि भवत इति कृत्वा। `अम्प्रत्ययवच्च' इत्येवमुच्यमाने सत्यात्त्वादयो भवन्ति, तेषामप्यम्प्रत्यय इष्टत्वात्। एतत् सर्वं बुद्धौ कृत्वाह--`अम्प्रत्ययवच्च' इति। एतदेव विवृणोति--`द्वितीयैकवचनवच्च' इति। कथधं पुनरयमर्थो लभ्यते, यावतैकमम्ग्रहणम्, तेन चाभागमो निरदिश्यते, प्रत्ययवच्चेत्येतदनिष्टं स्यात्। अथ प्रत्ययस्तेन विशिष्यत आगमो न निर्दिष्टः स्यादित्यत आह---`अमिति हि' इत्यादि। एकमपयम्ग्रहणमारभ्यमाणं यस्मादुभयमेतत् सम्पादयति तस्मादयमर्थो लभ्यत इत्यभिप्रायः। `श्रियम्मन्यः; भ्रूवम्मन्यः' इति। `अचिं श्नुधातु' (6.4.77) इत्यादिने यङ्वङौ। `लेखाभ्रुम्मन्यः' इति। पूर्वसूत्रेण मुमागमः।
`अथेह' इत्यादि। श्रियमात्मानं ब्राह्मणकुलं मन्यत इत्युपक्रम्य=प्रस्तुत्य खश्प्रत्यये विहिते कथं भवितव्यम्--किं श्रियम्मन्यमति भवितव्यम्, उत श्रिमन्यमिति ? कथं पुनरेततपक्षद्वयं सम्भाव्यते, यत एवं पृच्छति? शब्दानां द्विधा प्रवृत्तिदर्शनात्। तथा हि--केषाञ्चित् स्वलिङ्गापरित्यागेणाप्यर्थान्तरे प्रवृत्तिर्दृष्टा, यथा भूतशब्दस्य--भूतमिथं ब्राह्मणीति; केषाञ्चित् स्वलिङ्गपितयागेनाऽपि सा दृष्टा, यथा प्रष्ठशब्दस्य--प्रष्ठीति। तत्र श्रीशब्दो ब्राह्मणकुले वर्त्तमानो यद स्वलिङ्गं न परत्यजति, तदा श्रियम्मन्यमिति भवितव्यम्; अथ स्वलिङ्गं परित्यजय नपुंसकलिङ्गं गृह्णाति तदा `स्वमोर्नपुंसकात्' (7.1.23) इत्यमो लुकि कृते `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति ह्रस्वत्वे च श्रिमन्यमिति भवितव्यमिति--एवमिमौ द्वावपि पक्षौ सम्भाव्येते। अत उभयपक्षसम्भवे न ज्ञायते--कथं भवितव्यम्? अतस्तत्परिज्ञानार्थं प्रश्नः। `श्रिमन्यमिति भवितव्यमिति भाष्ये व्यवस्थापितम्' [`स्थितम्'--काशिका] इति। ननु च श्रीशब्दोऽयं स्त्रीलिङ्गोऽर्थान्तरेऽपि वर्तमानः स्वलिङ्गमजहदेव वर्त्तते, तथा च प्रयोगोऽपि दृश्यते--शिरो मे श्रीः, यशो मे श्रीरिति; तत् कथं श्रिमन्यमिति भाष्ये व्यवस्थापितम्? इत्याह--`तत्र' इत्यादि। यथा प्रष्ठादयः शब्दाः पुंयोगात् स्त्रियां वर्तमानाः परत्यकतस्वलिङ्गा एव वर्तन्ते--प्रष्ठी, प्रवरी, गणकीति; तथा श्रीशब्दोऽप्यत्र कुलविषये वर्तमान इति भाष्यकारस्य मतम्। अतसतन्मतेन `स्वमोर्नपुंसकात्' (7.1.23) इत्यमो लुकि कृते--श्रिमन्यमिति। ननु च नाप्राप्ते लुक्ययमारभ्यते, यथैव `सुपो धातुप्रातिपदिकयोः' (2.4.71) इतीमं लुकं बाधते, तथा `स्वमोर्नपुंसकात्' (7.1.23) इतीममपि लुकं बाधेत? अपि च लुगेकपदाश्रयत्वादन्तरङ्गो विपर्ययाच्चामागमो बहिरङ्गः, ततः `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इत्यन्तरङ्गे लुकि कर्त्तव्ये बहिरङ्गोऽमागमो नास्त्येव, तत् कुतोऽत्र लुक्? नैष दोषः; `मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' (व्या.प.10) इति। एवमयममागमः `सुपो धातुप्रातिपदिकयोः' (2.4.71) इतीमं लुकं बाधिष्यते, न `खमोर्नपुंसकात्' (7.1.23) इतीमम्। बहिरङ्गपरिभाषाप्यत्राशक्याऽऽश्रयितुम्, इह हि दोषः स्यात्--अरुन्तुद इति। तदाश्रयणे तु संयोगान्तलोपो न स्यात्। संयोगान्तलोपे चान्तरङ्गे कर्त्तव्ये बहिरङ्गस्य मुमागमस्यासिद्धत्वेन संयोगान्ततानुपपत्तेः। तस्मात् प्राप्तनिमित्ता सतीयमिह नाश्रीयते। दोषा एव हि तस्या एवमादयः।।

69. वाचंयमपुरन्दरौ च। (6.3.69)
`वाचंयमः' इति। वाचं यच्छतीति `वचि यमो व्रते' (3.2.40) इति खच्। तत्र वाक्शब्दसयामन्तता निपात्यते। `पुरन्दरः' इति। `पूःसरवयोर्दारिसहोः' (3.2.41) इति खच्, `खचि ह्रस्वः' (6.4.94) इति ह्रस्वत्वम्। अत्रापि पूःशब्दस्यामन्तता निपात्यते। चाकारोऽनुक्तसमुच्चयार्थः। तेन `अस्तुसत्यागदसय कारे' (वा.744) इति सर्वं न वक्तव्यं भवति।।

70. कारे सत्यागदस्य। (6.3.70)
`सत्यं करोति' इत्यनेन कर्मण्यणं सूचयति। `सत्यस्य कारः' इत्यनेनापि घञम्। एवं `अगदङ्कारः' इत्यत्राप्यणघञौ वेदितव्यौ।

`अस्तुङ्कारः' इति। भावे घञ्। अस्तुशब्दो विभक्तिप्रतिरूपको निपातोऽभ्युपगमे वर्तते। अस्त्वित्यभ्युपगमस्य करणस्तुङ्कारः।
`भक्षङ्कारः' इति। भावे घञ्।
`धेनुम्भव्या' इति। `भव्यगेय' (3.4.68) इत्यादिना कर्तरि कृत्यः। धेनुश्चासौ भव्या चेति धेनुम्भव्या।
`लोकम्पृमः' इति। `पृण प्रीणने', (धा.पा.1329) लोकं पृणतीति मूलविभुजादित्वात् कः।
`अनभ्याशमित्यः' [`अनम्याशमित्यम्'--मुद्रितः पाठः] इति। अनभ्याशं दूरमित्यं गन्तव्यमस्येत्यनभ्याशमित्यः। इन्धनमिन्धः, भावे घञ्। भ्राष्ट्रस्येन्दो `भ्राष्ट्रमिन्धः'। अग्नेरिन्धोऽग्निमिन्धः। `तिमिङ्गिलः' इति। `गृ निगरणे' (धा.पा.1410)। तिमिं गिलतीति पर्ववत् कः, `ऋत इद्धातोः' (7.1.100) इतीत्त्वम्, रपरत्वम्, `अचि विभाषा' (8.2.21) इति लत्वम्। `गिलिगिलः' इति। गिलं गिलतीति पूर्ववत् कः, इत्त्वादि च।
`गिलगिले च' इति। गिलं गिलतीति गिलगिलः। `आतश्चोपसर्गे' (3.1.136) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् कः। पूर्वत्राप्येवं कविधाने न दोषः। तिमीनां गिलगिल इत्यस्मिन्नर्थे विवक्षित इदं वक्तव्यम्। अथ तिमिं गिलतीति तिमिङ्गिलः, तिमिङ्गलं गिलतीत्येधोऽर्थो यदा विवक्ष्यते तदा पूर्वेणैव सिद्धमिति नार्थ एतेन।
`उष्ट्रङ्करणम्, भद्रङ्करणम्' इति। षष्ठीसमासौ। `पुत्रट्' इति। टकारो ङीबर्थः।
केचित्तु शाङ्र्गरवादिषु पुत्रशब्दं पठन्ति' इति। तान् प्रति नेदमुपसङ्ख्यानं कर्त्तव्यम्।

`अन्यत्रापि दृश्यते' इति। अनेन शाङ्र्गरवादिषु पुत्रशब्दस्य पाठं द्रढयति।।

71. श्येनतिलस्य पाते ञे। (6.3.71)
`ञप्रत्यये परे' इति। ञः प्रत्ययो यस्मादुत्तरपदात् तत् तथोक्तम्। `श्यैनम्पाता' इति। पतनं पातः, भावे घञ्, श्येनस्य पातः श्येनपातः। `कृद्योगा च षष्ठी समस्यते' (वा.86) इति समासः, `घञः सास्यां क्रियेति ञः' (4.2.58)।।

72. रात्रेः कृति विभाषा। श्र(6.3.72)
`कृदन्त उत्तरदे' इति। कथं पुनस्तदन्तविधिर्लभ्यते, यावता ज्ञापितमेतत्--`उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्नास्ति' (पु.प.पा.26) इति। रात्रिशब्दादनन्तरस्य कृतयप्रत्ययस्यासम्भवात् तदन्तविधिरविज्ञायत इति चेत्? अयुक्तमेतत्; सम्भवति हि रातरेरनन्तरः कृत्प्रत्ययः। रात्रिरिवाचरतीति `अचारे सर्वप्रातिपदिकेभ्यः क्विव् वा' (वा.187) इति क्विप्, `सनाद्यन्ता धातवः' (3.1.32) इति धातुसंज्ञा, तृच्, इट्, गुणायादेशौ--रात्रयितेति। तदेवं सम्भवत्यनन्तरे कृत्प्रत्यये तत्रैव स्यात् न तदन्ते? नैष दोषः; `अरुर्द्विषदजन्तस्य' (6.3.67) इत्यतोऽन्तग्रहणमनुवर्तते, तेन तदन्त एव कार्यं विज्ञायत इति। एवं तर्ह्यचारक्विबन्तस्यापि रात्रिशब्दस्य कृदन्त उत्तरपदे स्यात्। भवतु। अथ तु नेष्यते? व्यवस्थितविभाषाऽङ्गीकर्त्तव्या। गौणत्वाद्वा रात्रिशब्दस्य न भविष्यति। गौणत्वं पुनः प्राथमकल्पिकादर्थदपेतत्वात्, यथा--वाहीको गौरित्यत्र गोशब्दस्य। `रात्रिञ्चरः' इति। रात्रौ चरतीति `चरेष्टः' (3.2.16) इति टः, उपपदसमासः। `रात्रिमटः' इति। अटतीत्यटः, पचाद्यच्, `रात्र्यटः' [`रात्रावटः' इति मुद्रितः पाठः] इति। `सप्तमी' (2.1.40) इति योगविभागात् समासः। `अप्राप्तविभाधेयम्' इति। ननु च खिदपि कृदस्ति--रात्रिम्मन्यमिति, अत्र हि `अरुर्द्विषदजन्तस्य' (6.3.76) इति नित्यं प्राप्नोति, `रात्रिञ्चरः' इत्यादौ न केनचित् प्राप्नोति; एवञ्च प्राप्ते चाप्राप्त इयं विभाषा युक्तेत्यत आह--`खिति हि नित्यं मुम् भवति' इति। पूर्वविप्रतिषेधेनेत्यभिप्रायः। अत्र हि पूर्वविप्रतिषेध आश्रीयते, खिति पूर्वेण नित्यं मुम्भवति। एवञ्च खितोऽन्यदेव कृदन्तमस्य वचनस्यावकाशः। न च केनचित् तत्र प्राप्नोतीति युक्तमस्याप्राप्तविभाषात्वम्।।

73. नलोपो नञः। (6.3.73)
सानुबन्धकग्रहणमिह मा भूत्--`पामनपुत्रः' इति। पामान्यस्य सन्तीति `लोमादिपामादि' (5.2.100) इत्यादिना नप्रत्ययः। तदन्तस्य पुत्रशब्देन षष्ठीसमासः। अथ क्रियमाणे सानुबन्धकग्रहणे स्त्रिया अयमिति `स्त्रिपुंसाभ्याम्' (4.1.87) इत्यादिना नञ्--स्त्रैणः, स्त्रैणश्चासावर्थश्चेति स्त्रैणार्थ इत्यत्र कस्मान्न भवति? पूर्वपदभूतस्य नञो ग्रहणात्। कुत एतत्? उत्तरपदस्य सम्बन्धिशब्दत्वात्। पूर्वपदं ह्यपेक्ष्योत्तरपदं सम्भवति। अत उत्तरपदाधिकारात् पूर्वपदभूतस्यात्र नञो ग्रहणम्। अथ वा--विभाषाग्रहणमनुवर्त्तते, तस्य व्यवस्थितविभाषात्वविज्ञानान्न भविष्यति। यद्येवम्, पामनपुत्र इत्यत्राप्यत एव न भविष्यतीति नार्थः सानुबन्धकग्रहणेन? एवं तर्हि विस्पष्टार्थं सानुबन्धकग्रहणम्। न च `नस्य' इत्युच्यमाने कश्चिल्लाघवकृतो विशेषो भवति।
`अवक्षेपे तिङ्युपसंख्यानं कर्त्तव्यम्' इति। अवक्षेपः=निन्दा। उत्तरपदे नलोपो विधीयमानस्तिङन्ते न प्राप्नोति, तस्मात् तस्योपसंख्यानां कर्त्तव्यम्। ननु चास्त्येवाकारः परतिषेधवाची, `अ मा नो नाः प्रतिषेधवचनाः' इति वचनात्, ततश्च तस्यैवाक्षेपे तिङि प्रयोगो भविष्यतीति किमुपसंख्यानेन? नञोऽपि तर्ह्यवक्षेपे तिङि परतः प्रयोगः प्राप्नोति। तस्मादवक्षेपे नञोकृतनलोपस्य प्रयोगनिवृत्त्यर्थमुपसंख्यानं कर्त्तव्यमिति। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्--`वाचंयमपुरन्दरौ च' (6.3.69) इत्यतश्चकरोऽनुवर्त्तते, स चानुक्तसमुच्यार्थः। तेन तिङन्तेऽप्यवक्षेपे गम्यमाने नञो नलोपो भविष्यति।।

74. तस्मान्नुडचि। (6.3.74)

`नञ एव हि स्यात्' इति। अचीति सप्तमीनिर्देशात्, `तस्मिन्निति निर्दिष्टे पूर्वसय' (1.1.66) इति दतनात्। नञो नुडागमे सत्यनिष्टं रपं स्यात्। तस्माद्ग्रहणे तु सति `उभयनिर्देशे पञ्चमीनिर्देशी बलीयान्' (शाक.प.97) इत्युत्तरपदस्यैव भवति, अतो न भवत्यनिष्टप्रसङ्गः। ननु च यदि नञो नुट् स्यात्, नलोपवचनमनर्थकं स्यात्? नानर्थकम्; अब्राह्मणः, अवृषल इत्यनजादौ नकारश्रवणं माभूदित्येवमर्थत्वात्।

यदि नञो मा भूदित्येवमर्थ `तस्मात्' इत्युच्यते, तर्हि न वाच्यम्, पूर्वान्तो ह्ययं नुक् करिष्यते? इत्याह--`पूर्वान्ते हि' इति। पूर्वान्ते नुटि क्रियमाणे ङमन्तस्य पदस्य विधीयमानः `ङमो ह्रस्वादचि ङमुण् नित्यम्' (8.3.32) इति नुट् प्राप्नोति, ततश्च स एवानिष्टप्रसङ्गः। तस्मान्नुडेव कर्त्तव्यः। अस्मिस्तु क्रियमाणे नञ एव मा भूदित्येवमर्थ तस्माद्ग्रहणम्।।

75. नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या। (6.3.75)

`नभ्राट्' इति। `भ्राजृ दीप्तौ' (धा.पा.181) अस्मात् `भ्राजभ्रास' (3.2.177) इत्यादिना क्विप्, जकारस्य `व्रश्च' (8.2.36) इत्यादिना षकारः, तस्य जशत्वम्--डकारः, तस्यापि चर्त्वम्--टकारः। `नपात्' इति। नपुंसकत्वादसत्यां सर्वनामस्थानसंज्ञायामुगिल्लक्षणो नुम् न भवति। `नवेदाः' इति। `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः। `सत्सु साधवः सत्याः' इति। अनेन `तत्र साधुः' (4.4.98) इति सच्छब्दात् प्राग्घितीयं यतं दर्शयति। `औणादिकः किप्रत्ययः' इति। `इगुपधात् कित्' (द.उ.1.48) इति किप्रत्ययः। `क्षियः' इति। `क्षिष् हिंसायाम्' (धा.पा.1506), [`क्षीष्'--धा.पा.] `क्षि निवासगत्योः' (धा.पा.1407) इति। `क्षरतेर्वा' इति। `क्षर संञ्चलने' (धा.पा.851)। नक्षत्रमिति निपात्यते। किमत्र निपात्यते? यदि क्षियः, तदा त्रप्रत्यय इकारस्यात्त्वम्; यद क्षरतेस्तदापि त्रप्रत्ययो रेफलोपश्च। `नास्मिन्नकमस्तीति नाकम्' इति। कमिति सुखमुच्यते। न कम्=दुःखम्। नास्मिन्नकमस्ति इति नाकः=स्वर्गः। रूढिशब्दा ह्यते यथाकथञ्चित् व्युत्पाद्यन्ते।।

76. एकादिश्चैकस्य चादुक्। (6.3.76)

एकादिरिति बहुव्रीहिः। `एकान्नविंशतिः' इति। पूर्वं नञो विंशतिशब्देन समासं कृत्वा ततस्तृतीयसमासः कर्त्तव्यः।

किमर्थं पुनरयं पूर्वान्त आदुक् क्रियते, न परादिरेवादुट् क्रियेत? तत्राण्यमर्थः--एकस्य चेत्येष आगमिनो दिर्देशो न कर्त्तव्यो भवति। परादौ हि क्रियमाणे नञेवागमो भवति, स च प्रकृतत्वादेव लक्ष्यते; तत्रायं वक्यार्थो भवति--`एकादिश्च नञ् प्रकृत्या भवति, आदुट् च तस्यागमो भवति' इति सिद्धमिष्टम्? इत्याह--`पूर्वान्तोऽयम्' इत्यादि। `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इत्यत्र हि `न पदान्ताट्टोरनाम्' (8.4.42) इत्यतः पदन्तादित्यनुवर्त्तते। तत्र यदि परदिः क्रियते पदान्तताऽस्य न स्यात्, ततश्च पदान्तलक्षणोऽनुनासिकविकल्पो न स्यात्, इष्यते च। तस्माद्विकल्पेन यथा स्यादित्येवमर्थं पूर्वान्त आदुक् क्रियते।

अथ किमर्थमादुक् क्रियते? आदुगेव नोच्येत, अदुक्यपि क्रियमाणेऽकः सवर्णो दीर्घत्वेन (6.1.101) सिध्यति? न सिध्यति; `अतो गुणे' (6.1.97) पररूपत्वं प्राप्नोति, तदपयकारोच्चारणसामर्थ्यान्न भविष्यति, यदि ह्यत्र पररूपत्वं स्याद्दुकमेव विदध्यात्, तर्हि सवर्णदीर्घत्वमप्यकारोच्चारणसामर्थ्यान्न स्यात्? नैतदस्ति; तथा हि--यं विधिं प्रत्युपदेशोऽनर्थकः स्यात् स विधिर्बाध्यते (व्या.प.56) यस्य तु विधेस्तदेव निमित्तं नासौ विधिर्बाध्यते। पररूपत्वं च प्रत्यकारोच्चारणमनर्थकम्, सवर्मदीर्घत्वं तु प्रति निमित्तमेव। एवं तर्ह्यदुगेवायम्। तुल्या हि संहिता।।

77. नगोऽप्रणिष्वन्यतरस्याम्। (6.3.77)

`गमेर्डप्रत्ययः' इति। `डप्रकरणे अन्यत्रापि दृश्यते' (वा.256) इति वचनात्।।

78. सहस्य सः संज्ञायाम्। (6.3.78)

`साश्वत्थम्' इति। सहाश्वत्थेनेति `तेन सहेति तुल्ययोगे' (2.2.28) इति बहुव्रीहिः। `सहयुध्वा, सहकृत्वा' इति। `दृशेः क्वनिप्' (3.2.94) इत्यनुवर्त्तमाने `राजनि युधि कृञः' (3.2.95), `सहे च' (3.2.96) इति क्वनिप्, उपपदसमासः, `सर्वनामस्थाने; (6.4.8) इति दीर्घः।

किं पुनः कारणं सादेश उदात्तो निपात्यते? इत्यत आह--`उदात्तानुदात्तवतो हि' इत्यादि। निपाता आद्युदाता भवन्ति' (फि.सू.4.80) इति सहशब्द आद्युदात्त एव, शेषमनुदात्तम्। तेनासावुदात्तानुदात्तवान्, ततश्चान्तर्यतस्तस्य स्थाने सशब्दः स्वरितः। तस्मान्मा भूदेष दोष इत्युदात्तो निपात्यते। यद्येवम्, अव्ययीभावेऽपि उदात्त एव स्वरः प्राप्नोति? इत्यत आह--`स च निपातस्वरः' इत्यादि। `यत्र' इत्यादि। बहुव्रीहौ तत्पुरुषे वा। `बहुव्रीहौ प्रकृत्या पूर्वपदम्' (6.2.1) इति सहेत्येतस्य समासान्तोदात्तत्वापवादः प्रकृतिस्वरत्वं भवति। तत्पुरुषेऽपि `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना। तस्मात् तत्रैव स निपातस्वरः प्रसज्यते। अव्ययीभावे तु समासान्तोदात्तत्वापवादः प्रकृतिस्वरो न केनचिद्विहित इति ततर समासान्तोदात्तत्वेनैव भवितव्यम्। अतस्तेन बाध्यत एव। `सेष्टि, सपशृबन्धम्' इति। इष्टिरन्तो यस्य पशुबन्धोऽन्तो यस्येति, `अव्ययं विभक्ति' (2.1.6) इत्यादिना समासः, अन्तवचने। अत्र परत्वात् प्रथमसतावन्नपतस्वरः, ततः समासान्तोदात्तत्वम्। तच्च सति निपातस्वरे शिष्यत इति सतिशिष्टम्, अतस्तेन निपातस्वरो बाध्यते; सतिशिष्टस्वरस्य वलयस्त्वात्।।

79. ग्रन्थान्ताधिके च। (6.3.79)

`सकलम्' इति। कला=कालविशेषः, तत्सहचारितो ग्रन्थस्तथोच्यते। सह कलया वर्त्तत इति सकलम्। एवं `समुहूर्त्तम्' इत्येतदपि वेदितव्यम्। `ससंग्रहम्' इति। एतदुदाहरणं प्रमादादिदानीन्तनैः कुलेखकैर्लिखितम्, तत्र हि `अव्ययीभावे चाकाले' (6.3.81) इत्येवं सभावः सिद्धः? इत्याह--तत्र' इत्यादि। कथं पुननं प्राप्नोति, यावता कालमुहूर्तशब्दौ तावत् साहचर्यादत्र ग्रन्थे वर्त्तते? एवं मन्यते--प्रकरणादिना वाक्येन ग्रन्थविषयता तयोर्गम्यते। मुख्यस्तु काल एवाभिधेय इति।

`सद्रोणा खारी' इत्यादि। `तेन सह' (2.2.28) इत्यादिना बहुव्रीहिः।।

80. द्वितीये चानुपारव्ये। (6.3.80)

`द्वयो सहप्रयुक्तयोरप्रधानो यः स द्वितीयः' इति। प्रधानेतरसन्निपाते सत्यप्रधान एव द्वितीयशब्दस्य प्रयोगात्। तथा हि--स्वामिभृत्ययोः सहयुक्तयोर्भृत्य एव स्वामिनं प्रति द्वितीय उच्यते, न तु भृत्यं प्रति स्वामी। `उपाख्यायते यः स उपाख्यः' इति। `आतश्चोपसर्गे' (3.1.136) इति कः, स च भवन् `कृत्यल्युटो बहुलम्' (3.3.113) इति कर्मणि भवति। `साग्निः कपोतः' इति। पूर्ववद्बहुव्रीहिः। अत्रागनिसहयुक्तः कपोतः, तयोर्हि साहचर्य लोके प्रसिद्धम्। तत्राग्निरप्रधानः। तथा ह्यग्निः कपोतमनुविधत्ते--यत्र हि कपोतस्तत्राग्निनाऽवश्यं भवितव्यम्, न तु यत्राग्निस्तत्र कपोतेनेति नासावग्निमनुविधत्ते, तेन कपोतस्य प्राधान्यम्। अग्न्यादयः पुनरप्रधाना एव। `अग्न्यादयः' इति। अत्रादिशब्देन पिशाचदयो गृहयन्ते। तेन हि क्वचित् प्रत्यक्षेण उपलभ्यन्ते, अपि तु कपोतादिभिरविनाभाविभिरनुमीयन्त इत्यनुपाख्या भवन्ति।।

81. अव्ययीभावे चाकाले। (6.3.81)

`अकालवाचिनि' इति। अनेन `काले' इति नेह सवरूपस्य ग्रहणम्, अपि तु कालविशेषवाचिनां पूर्वाह्णादिशब्दानामिति दर्शयति। कुत एतत पुनरवसितम्? `ग्रन्थान्ताधिके च' (6.3.79) इत्यत्र ग्रन्थान्तग्रहणात्। अनेन हि कालवाचिन्युत्तरपदे प्रतिषेधः परप्नोति, स मा भूदिति। तत्र ग्रन्थान्तग्रहणं क्रियते, यदि चात्र `काले' इति स्वरूपग्रहणं स्यात्। ततस्तेनैव सकलम्, समुहूर्त्तमित्यत्र सभावः सिद्ध इति तत्र ग्न्थान्तग्रहणमनर्थकं स्यात्। `सचक्रम्' इति। `अव्ययं विभक्ति' (2.1.6) इत्यादना यौगपद्येऽव्ययीभावः। `सधुरम्' इति। `ऋक्पूरब्धूः पथामानक्षे' (5.4.74) इत्यकारः समासान्तः।

`सहपूर्वाह्णम्' इति। तेनैव सूत्रेव साकल्येऽव्ययीभावः।।

82. वोपसर्जनस्य। (6.3.82)

यदि `उपसर्जनस्य' इत्येतत् सहशब्दसय विशेषणं स्यात् तदाऽतिप्रसङ्गः स्यात्। विशेषानुपादानादिहापि स्यात्--सहयुध्वा, सहकृत्वेति। अत्रापि सहशब्द उपसर्जनम्; `उपपदमतिङ्' (2.2.19) इति प्रथमा निर्देशात्, अप्राधान्याच्च। अनर्थकञ्च विशेषणं स्यात्; सर्वत्रैव हि समासे सहशब्दस्योपसर्जनत्वात्। समासश्चेहोत्तरपदेन सन्निधापितः, यस्मात् समासे ह्युत्तरपदं भवति, अतसतस्यैवेदं विशेषणमिति मन्यमान आह--`उपसरजनसर्वावयवः' इति। उपसर्जनं सर्वोऽवयवो यस्य स तथोक्तः; अवयवधर्मेण समुदायधर्मस्य तथा निर्देशात्, यथा--आढ्यमिदं नगरमिति। यदि कस्यचित्कश्चिदुपसरजनमवयवः कश्चिदनुपसर्जनं सोऽप्युपसर्जनमित्युच्यते, तदाऽतिप्रसङ्गदोषस्तदवस्थः स्यादिति सर्वग्रहणम्। कः पुनरसौ सर्वोपसजेनावयवः समासः? बहुव्रीहिः। ननु द्वन्द्वोऽप्युपसर्जनसर्वावयव एव, तस्यापि ग्रहणं प्राप्नोति? नैष दोषः; न हि सहपदेन तु गुणभावस्तत्रैव प्रयुज्यते। अथ वा--उभयगतिरिह शास्त्रे सम्भवतति लौकिकमप्युपसर्जनमिह गृह्यते। तेन शास्त्रीयोपसर्जनेन लौकिकेन चोपसर्जनीभूताः सर्वोऽवयव यस्य स एवोपसर्जनशब्देन विवक्षित इति विज्ञायते। न चैवंविधो द्वन्द्वः। तस्य ह्यवयवानां शास्त्रीयेणैवोपसर्जनेनोपसर्जत्वम्, न तु लौकिकेन। बहुव्रीहिस्तु लौकिकेनापि। तस्मात् तस्यैवोपसर्जनग्रहणेन ग्रहणम्। `तदवयवस्य' इति। अनेनोपसर्जनस्येत्येषाऽवयवषष्ठीति दरिशयति। `सपुत्रः' इति। पूर्ववद्बहुवरीहिः।

`सहयुष्वा, सहकृत्वा' इति। तत्पुरुषोऽयमुत्तरपदार्थप्रधानः।

अथेह कस्मान्न भवति--सहकृत्वप्रियः, प्रियसहकृत्वेऽति, भवति ह्यत्रापि सहशब्दो बहुव्रीह्यवयवः? इत्याह--`इह' इत्यादि। `वा प्रियस्य' (वा.114) इति प्रियशब्दस्य विकल्पेन पूर्वनिपतः। उत्तरपदाधिकारादिह बहुव्रीह्याश्रयणाच्च बहुव्रीहौ यदुत्तरपदं तत् परं यस्मात् सहशब्दात् तसय सभावेन भवितव्यम्। न चेह बहुव्रीहौ यदुत्तरपदं तत् सहशब्दात् परम्, शब्दान्तरेण व्यवधानादिति न भवति सभावः।।

83. प्रकृत्याशिष्यगोवत्सहलेषु। (6.3.83)

पूर्वेणातिप्रसक्तस्य सभावस्य प्रकृतिभावेन निवृत्तिः क्रियते। नेति वक्तव्ये प्रकृत्येति वचनं वैचित्र्यार्थम्।।

84. समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु। (6.3.84)

`सगर्भः, सपूथ्यः' इति। समानो गर्भः, समानं यूथमिति विगृह्य `पूर्वापरप्रथम' (2.1.58) इत्यादिना कर्मधारयः। `साधर्म्यम्' इति। बहुव्रीहेर्भावप्रत्ययः।

`सजातीयः' इति। अत्रापि बहुव्रीहेरेव `जात्यन्ताच्छ बन्धुनि' (5.4.9) इति च्छः। `सस्थानीयः' इति। `स्थानान्ताद्विभाषा सस्थानेनेति चेत्' (5.4.10) इति च्छप्रत्ययः।।

85. ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु। (6.3.85)
`सज्योति' इति। समानं ज्योतिरस्येति बहुव्रीहिः। एवं सजनपदादयो वेदितव्याः। तत्पुरुषेऽपि भवितव्यमेव; विशेषानुपातानात्। `सनामा' इति। `सर्वनामस्थाने च' (6.4.8) इत्यादिना दीर्घः। `सवयाः' इति। अत्रापि `अत्वसन्तस्य' (6.4.14) इति दीर्घ।।

86. चरणे ब्रह्मचारिणि। (6.3.86)
चरणशब्दोऽयमध्ययननिमित्तमुपादाय पुरुषादिषु वर्त्तते। ब्रह्मा चरतीति ब्रहमचारी, `व्रते' (3.2.80) इति णिनिः। `सब्रह्मचारी' इति। पूर्ववत् कर्मधारयः। सब्रह्मचारीत्यस्यायमर्थोऽभिमतः--समाने ब्रह्मणि व्रतं चरतीति। एष चात्रार्थो यथोपपद्यते, तथा दर्शयितुमाह--`ब्रह्म वेदः' इत्यादि। तदध्यनार्थ यद्व्रतं तदपि ब्रह्मेति। तादर्थ्यात् ताच्छब्द्यम्, यथा--इन्द्रार्था स्थूणा इन्द इति। तच्चरतीति तत् सम्पादयति, परिपालयतीत्यर्थः। केन पुनरसौ समानः? इत्याह--`समानस्तस्यैव' इत्यादि। तस्यैवेति वेदाख्यस्य ब्रह्मणः। इतिकरणो हेतौ। यत एव मुपचारेण लब्धब्रह्मव्यपदेशं व्रतं यश्चरति ब्रह्मणश्च समानत्वादयः समानः स सब्रह्मचारी। तेन सबह्मचारीत्यस्यायमर्थो भवति--समाने ब्रह्मणि व्रतचारीति। यदि ह्यसमाने ब्रह्मणि व्रतं चरेत् तदा समानत्वं न स्यात्। तथापि ब्रह्माख्यं व्रतं न चरेदेवमपि ब्रह्मचारित्वं न स्यात्। तस्माद्यः समाने ब्रह्मणि ब्रह्मचारी, सोऽवश्यं समाने ब्रह्मणि व्रतचारीति भवति। सब्रह्मचारीत्ययमस्यर्थः सम्पदयते--समाने ब्रह्मणि व्रतचारीति। अथ वा--तस्यैवेत्युपचारेण लब्धब्रह्मव्यपदेशस्य व्रतस्यात्र पक्षे परमर्शः। समाने ब्रह्मणि इत्यत्र ब्रह्मशब्दो वेदे वर्त्तते, प्रतिवेदं हि भिद्यते, तदध्ययनार्थं यद्व्रतं तत्र यः समाने वेदेऽध्येतव्ये व्रतं चरति स एव सब्रह्मचारीत्युच्यते।।

87. तीर्थे ये। (6.3.87)
`सतीर्थ्यः' इति। पूर्ववत् कर्मधारयं कृत्वा तद्धितः कर्त्तव्यः। समाने तीर्थे वसतीति सतीर्थ्यः।।

88. विभाषोदरे। (6.3.88)

89. दृग्दृशवतुषु। (6.3.89)
समानमात्मानं पश्यतीति सदृक्, उपपदसमासः, `क्विन्प्रत्ययस्य कुः' (8.2.62) इति कुत्वम्। कथं पुनरिह कञ्क्विनौ, यावता त्यदादिषूपपदेषु तौ विहितौ, न च समानशब्दस्त्यदादिषु पठ्यते? इत्यत आह--`त्यदादिषु' इत्यादि।
`वृक्षे चेति वक्तव्यम्' इति। दृक्षशब्दे चोत्तरपदे समानस्य सभावो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्---पूर्वकाद्योगविभागाद् दृक्षिऽपि भविष्यतीति। अत एव तत्र (6.3.84) वृत्ति कृतोक्तम्--एवमादयः सिद्धा भवन्तीति।
केन पुनरतर दृशेः क्सप्रत्ययो विहितो येन दृक्षशब्द उत्तरपदं भवति? इत्यत आह--`दृशेः क्सप्रत्ययोऽपि' इत्यादि। `तत्रैव' इति। `त्यदादिषु' (3.2.60) इत्यादौ सूत्रे। अथ वतुग्रहणं किमर्थम्, यावता समानशब्दादुत्तरो वतुप् न सम्भवत्येव, स हि `यत्तदेतेभ्यः परिमाणे वतुप्' (5.2.39) इति यदादिभ्य एव विहतः? इत्याह--`वतुब्ग्रहणमुत्तरार्थम्' इति।।

90. इदंकिमोरीश्की। (6.3.90)
शकारः सर्वादेशार्थः। इदमिव पश्यतीति `ईदृक् इदृशः'। पूर्ववत् कञ्किवनौ। किमिव यश्यतीति `कीदृक् कीदृशः'। व्युत्पत्तिमात्रार्थो विग्रहः कृतः। नात्रावयवार्थो विग्रहवाक्योपदर्शितो विद्यते। तथा हीदृग् ईदृश इत्यनेन तुल्य इत्येषोऽर्थः समुदायादेव प्रतीयते। कीदृक्, कीदृश इत्यत्रापि केन तुल्य इति। किं परिमाणमस्येति `कयान'। इदं परिमाणमस्येति `इयान्'। `किमिदंभ्यां वो घः' (5.2.40) इति वतुपो घत्वम्, तस्येयादेशे कृते `यस्येति च' (6.4.148) इतीकारलोपः। ननु च वतुपो वकारस्येयादेशोऽनेन विधीयते, न तु वतुप् किमिदंभ्यां विधीयते? एवं मन्यते--वतुबस्मादादेशवचनाद्विज्ञायते, न ह्यन्यद्वतुपो लक्षणमस्ति। न चासतो वतुपो घादेशः शक्यो विज्ञातुमिति।।

91. आ सर्वनाम्नः। (6.3.91)
`दृक्षे चेति वक्तव्यम्' इति। दृक्षशब्दे परतः सर्वनाम्न आत्वं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--उत्तरसूत्रादिह सिंहावलोकितन्यायेन चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः। तेन दृक्षशब्दे चोत्तरपदे भविष्यतीति। अथ किमर्थो दीर्घो विधीयते, न, ह्रस्व एव विधीयताम्, ह्रस्वेऽप्यादेशे सवर्णदीर्घत्वेन सिध्यति? न; यस्मात् `अतो गुणे' (6.1.97) पररूपत्वं प्राप्नोति। न च शक्यते वक्तुम्--अकारोच्चारणसामर्थान्न भविष्यतति; अकारविधेर्दकारनिवर्त्तनार्थत्वात् लोपविधौ हि गौरवं स्यात्। किञ्च--त्वादृक्, त्वादृश इत्यत्र दीर्घश्रवणं न स्यात्। तस्माद्दीर्घ एव विधेयः।।

92. विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये। (6.3.92)
`विष्वद्र्यङ्' इति। विष्वगञ्चतीति ऋत्विगादिसूत्रेण (3.2.59) क्विन्, `उगिदचाम्' (7.1.70) इति नुम्, हल्ङ्यादिसंयोगान्तलोपौ, `क्विन्प्रत्ययस्य कुः' (8.2.62) इति कुत्वम्।
`अद्रिसध्र्योरन्तोदात्तनिपातम्' इत्यादि। विष्वद्र्यङित्यत्रानेनाद्र्यादेशे कृते सध्र्यङित्यत्र सहस्य सध्र्यादे देशे च `गितकारकोपपदात् कृत्' (6.2.139) इति प्रकृतिस्वरेणोत्तरपदसर्यान्तोदात्तत्वं प्राप्नोति, स्वरितत्वं चेष्यते। तस्मादुत्तरपदान्तोदात्ततवविधानार्थमिहाद्रिसध्र्यारेन्तोदात्तत्वं निपात्यते। तेन शेषं भवत्यनुदात्तम्। तत्र यणादेशे कृते सति `उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (8.2.4) इति स्वरितत्वमुत्तरपदस्य सिद्धम्।
अथ वप्रतययगरहणं किमर्थम्, यावता `अञ्चतौ' इत्युक्ते केवल एवाञ्चतावुत्तरपदे कार्येण भवितव्यम्। वप्रत्ययान्त एवाञ्चतिः केवलमुत्तरपदं भवति। तत्रैतद्वक्तव्यमञ्चतावित्याह--`वप्रत्ययग्रहणम्' इत्यादि। अन्यत्र धातुग्रहणे, धात्वादेः प्रकृतिपरतययसमुदायस्य प्रतिपत्तिः=प्रतीतिर्यथा स्यादित्येवमर्थं वप्रत्ययग्रहणम्। अनेन ह्ययमर्थो विज्ञाप्यते--इतोऽन्यत्र धातुगरहणे सति न केवलं धातुरेव गृह्यते, अपि तु धात्वादिः शब्द इति। तेनायस्कृतम्, अयस्कार इत्यत्र `अतः कृकमि' (8.3.46) इत्यादिना विसरजनीयस्य सकारः सिद्धो भवति। यदि पुनरयमर्थो न विज्ञाप्येत, तदा करोतेरेव केवलस्य ग्रहणं स्यात्; ततो यत्र करोतेः केवलस्य प्रत्ययरहितस्य प्रयोगस्तत्रैव स्यात्--अयस्कृदिति। अत्र तुगागमः करोतेरेव भकतत्वात् तद्ग्रहणेनैव गृह्यत इति करोतेरेव केवलस्य प्रयोगः। `अश्वाची' इति। अश्वमञ्चति इति क्विन्, `अञ्चतेश्चोपसंख्यानम्' (वा.336) इति ङीप्, `अचः' (6.4.138) इत्यकारलोपः `चौ' (6.3.138) इति दीर्घः। `विष्वग्युक्' इति। विष्वगयुनक्तीति `सत्सूद्विष' (3.2.61) इत्यादिना क्विप्। `विष्वगञ्चनम्' इति। `ल्युट् च' (3.3.115) इति ल्युट्।
`छन्दसि' इत्यादि। छन्दसि विषये स्त्रियामभिधेयायां बहुलमद्र्यादेशे भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`विभाषोदरे' (6.3.88) इत्यतो विभाषाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा। इह वा चकारोऽनुक्तसमुच्चयार्थः, तेन च्छन्दसि विषये विष्वगावेरन्यत्रापि क्वचिदद्र्यादेशो भवतीति, क्वचिन्न भवत्येव। ननु च सर्वनाम्नोऽनुकर्षणार्थश्चकारः? नैतदस्ति; स्वरितत्वादेव हि सर्वनाम्नोऽनुवृत्तिर्भविष्यति। `विश्वाची' इत्यादि। विश्वघृतकिंशब्देषूपपदेष्वञ्चतेः पूर्ववत् क्विन्, ङीबादिकार्यञ्च।।

93. समः समि। (6.3.93)

94. तिरसस्तिर्यलोपे। (6.3.94)

95. सहस्य सध्रिः। (6.3.95)
`सध्रीचा' इति। पूर्ववदकारलोपः, दीर्घत्वं च।।

96. सध मादस्थयोश्छन्दसि। (6.3.96)
`सधमादः' इति। सह मादेन वर्त्तत इति `तेन सह' (2.2.28) इत्यादिना बहुव्रीहिः, मादशब्दो घञन्तः। ननु च `मदोऽनुपसर्गे' (3.3.67) इत्यपा भवितव्यम्? नैष दोषः; तत्र हि `स्वनहसोर्वा' (3.3.62) इत्यतो वाग्रहणमनुवर्तते, सां च व्यवस्थितविभाषा। तेन छन्दसि घञेव भविष्यति। अथ एव निर्देशाद्वा। `सधस्थः' [`सधस्थाः'--काशिका मुद्रितः पाठः, `सधस्था'--(काशिका) सं.पं. मुद्रितपाठः] इति। सह तिष्ठीति `सुपि स्थः' (3.2.4) इति कः।।

97. द्व्यन्तरुपसर्गेभ्योऽप ईत्। (6.3.97)
`द्वीपम्' इति। द्विर्गता आपोऽस्मिन्नित्यस्वपदविग्रहो बहुव्रीहिः। यथा--शोभनं मुखमस्याः सुमुखीति। `ऋक्पूरब्धूः' (5.4.74) इत्यादिनाऽकारः समासान्तः। अन्तर्गता आपोऽस्मिन्नित्यन्तरीपम्। सङ्गता विगता निर्गता आपोऽस्मिन्निति सपीपम्, वीपम्, नीपम्।
`वक्तव्यम्' इति। व्याख्येयमित्यर्थः। उत्तरत्रापि वक्तवयशब्दस्यायमेवार्थः। व्याख्यानं त्विहापि पूर्ववत् `विभाषोदरे' इत्यतो विभाषाग्रहणानुवृत्तेर्व्यवस्थितविभाषात्वाल्लभ्यते। अन्यदपि चत्र व्याख्यानं करिष्यामः।
`अप्शब्दं प्रति' इत्यादि। इह यं प्रति क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञका भवन्तीति अप्शब्दसय तु क्रियात्वं न सम्भवति; द्रव्यवचित्वात्। तस्मात् तं प्रति नास्ति कस्यचिदुपसर्गसंज्ञेति। क्रियते चेदमुपसर्गग्रहणम्। तत्सामर्थ्याद्यत्र प्रादेरन्यत्रोपसरगतवं दृष्टं तदुपलक्षणार्थमुपसर्गग्रहणं विज्ञायते। यद्येवम्, अन्तशब्दस्य ग्रहणं न कर्त्तव्यम्, यथैव हि प्रादय उपसर्गग्रहणेन लक्ष्यन्ते तथान्तःशब्दोऽपि, तस्याङ्कविधिणत्वेपूपसर्गत्वं दृष्टमेव? एवं तर्ह्यन्तर्ग्रहणेन ज्ञाप्यते--उपसर्गग्रहणोपलक्षितमीत्त्वमनित्यमिति। तेन समापम्, परापम्, प्रापमिति सिद्धं भवति।।

98. ऊदनोर्देशे। (6.3.98)
`अनूपः' इति। अनुगता आपोऽस्मिन्निति विग्रहः, पूर्ववत् समासान्तः, सवर्णदीर्घः। अथ दीर्घोच्चारणं किमर्थम्, यावता ह्रस्वोऽपि विहितेऽकः सवर्णे दीर्घत्वेनानूप इति सिध्यत्येव? अत आह--`दीर्घोच्चारणम्' इत्यादि। असति दीर्घोच्चारणे संहितायामेव दीर्घत्वं स्यात्, नावग्रहे। तस्मादवग्रहेऽपि यथा स्यादित्येवमर्थ दीर्घोच्चारणम्।।

99. अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सकोतिकारकरागच्छेषु। (6.3.99)
`अन्याशीरन्यदाशीः' इत्यादि। विग्रहविशेषेण सर्वत्र विशेषणसमासं दर्शयति `अन्येनास्थितोऽन्यदस्थितः' इति। `कर्तृकरणे कृता बहुलम्' (2.1.32) इति समासः।
`दृगागमोऽविशेषेण' इत्यादि। कारकशब्दे छप्रत्यये परतोऽविशेषेण सामान्येन दुगागमः कर्त्तव्यः। अन्येष्वाशीरादिषु सप्तसूत्तरपदेषु षष्ठीतृतीयास्थयोर्नेष्टो नाभिमतः।
किं पुनरस्यार्थस्य लिङ्गं यतोऽयमवसीयते? इत्यत आह--`अस्य च' इत्यादि। अषष्ठीतृतीयास्थस्येत्येवं सिद्धे द्विर्नञुपादानमस्य प्रतिषेधस्यानित्यत्वे लिङ्गम्। तेन क्वचित् षष्ठीतृतीयास्थस्यापि समासे दुगागमो भवत्येव।।

100. अर्थे विभाषा। (6.3.100)
`अन्यार्थः' इति। अन्यस्मै इदमिति `चतुर्थी तदर्थार्थ' (2.1.36) इत्यादिना समासः।।

101. कोः कत्तत्पुरुषेचि। (6.3.101)
`कदजः' इति। कुत्सितोऽज इति `कुगतिप्रादयः' (2.2.18) इति समासः कूष्ट्रो राजेति बहुव्रीहिः।
`कद्भावे' इत्यादि। अजादावत्तरपदे कद्भाव उच्यमानस्त्रिशब्द उत्तरपदे न प्राप्नोति। तस्मात् त्रिशब्दादुत्तरपदात् पूर्वो यः कुशब्दः, तस्य कद्भावस्योपसंख्यानम्=प्रतिपादनं कर्त्तव्यम्। तत्रेदं प्रतिपादनम्--उत्तरसूत्रे चकारः क्रियते, सचानुक्तसमुच्चयार्थः। तेन त्रिशपब्देऽप्युत्तरपदे परतः कद्भावो भविष्यतीति।।

102. रथवदयोश्च। (6.3.102)
अनजाद्यर्थोऽयं योगः। एवमुत्तरत्रापि।।

103. तृणे च जातौ। (6.3.103)

104. का पथ्यक्षयोः। (6.3.104)
अनीषदर्थ आरम्भः। `कापथः' इति। कुत्सितः पन्थाः कापथः, `ऋक्पूः' (5.4.74) इत्यादिनाकारः समासान्तः। `काक्षः' इति। कुत्सितोऽक्ष इति तत्पुरुषः। अथ वा--कुत्सिते अक्षिणी अस्येति बहुव्रीहिः, `बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' (5.4.113) इति षच् समासान्तः।।

105. ईषदर्थे च। (6.3.105)
ईषन्मधुरं `कामधुरम्' इति। `कुगतिप्रादयः' (2.2.18) इति समासः। `कुशब्दः पापार्थः' इत्येतत्तु प्रायिकमुपाधिवचनमित्युक्तम्। तत्र प्रायिकत्वे चैतदेव कादेशवचनं ज्ञापकम्। `काम्लम्' इति। ननु चात्र `कोः कत्तत्पुषे' (6.3.101) इति कदादेशेन भवितव्यम्? इत्यत आह--`अजादावपि' इत्यादि।।

106. विभाषा पुरुषे। (6.3.106)
`अप्राप्ते विभाषेऽयम्' इति। ईषदर्थस्य निवृत्तत्वात्। ननु चानीषदर्थे केनचिदप्राप्ते, ईषदर्थे पूर्वेण प्राप्त इत्युभयत्र विभाषेऽयं युक्तेत्याह--`ईषदर्थे तु पूर्वविप्रतिषेधेन' इत्यादि। `ईषदर्थे च' (6.3.105) इत्यस्यावकाश ईषन्मधुरं कामधुम्, `विभाषा पुरुषे' इत्यस्यावकाशः--कुत्सितः पुरुषः कापुरुष इति; इह चोभयं प्राप्नोति--ईषत्पुरुषः कापुरुष इति। अत्रेषदर्थ इत्यनेनैव भवति पूर्वविपरतिषेधेन।।

107. कवञ्चोष्णे। (6.3.107)

108. पथि च च्छन्दसि। (6.3.108)

109. पृषोदरादीनि यथोपदिष्टम्। (6.3.109)

`आदिशब्दः प्रकारवचनः' इति। यद्यत्रादिशब्दो व्यवस्थावचन आश्रीयेत, ततो, यान्येव गणे पठ्यन्ते तेषामेव साधुत्वं स्यात्, नान्येषाम्। प्रकारवचन आदिशब्द आश्रीयमाणे सत्यपरिपठितानामपिमपि साधुभावो भवतीत्येतत् सर्व चेतसि कृत्वाऽऽविशब्दोऽयं प्रकारवचन इति दर्शयन्नाह--`पृषोदरप्रकाराणि' इत्यादि। प्रकारः=सादृश्यम्। अतस्तद्दर्शयितुमाह--`येषु' इत्यादि। यथा पृषोदरशब्दे लोपकार्यं शास्त्रेणाविहितं दृश्यते, तथान्यत्रापि लोपादिकार्यं शास्त्रेणाविहितं दृश्यते। तानि च पृषोदरप्रकाराणि भवन्ति। `यथोपदिष्टम्' इति। `यथाऽसादृश्यते' (2.1.7) इति वीपसायामव्ययीभावः। अत एवास्य विवरणं करोति--`यानि यान्युपदिष्टानि' इत्यादि। दिशिस्त्रोच्चारणक्रियः। उपदिष्टान्युच्चारितानीत्तयर्थः। कैः पुनरुपदिष्टानि? शिष्टैः। शिष्टाः पुनराचारनिवासादिना वेदितव्याः। `तानि तथैवानुमन्तव्यानि' इति। यथा तैः प्रयुक्तानि तथैव तानि साधुत्वेनानुमन्तव्यानीत्यर्थः। यदि शिष्टाः शब्देषु प्रमाणं तद किमनयाऽष्टाध्याय्या, शिष्टवचनादेव हि शब्दानां साधुत्वं विज्ञास्यते? उच्यते; शिष्टपरिज्ञानार्थाऽष्टाध्यायी। अष्टाध्यायीमधीयानोऽनधीताष्टाध्यायीकमपि येऽस्यामष्टाध्याय्यां विहिताः शब्दास्तान् प्रयञ्जानं पश्यन्नेवमध्यवस्यति--शिष्टोऽयमिति, न चासावष्टाध्यायीमधीतवान्, अथ च तस्यां ये व्युत्पादिताः शब्दास्तान् प्रयुङ्क्ते, नूनमयमन्यानपि जानाति---इत्येषा शिष्टपरिज्ञानार्थाऽष्टाध्यायी।

`एवमन्येऽपि' इत्यादि। कप्यश्वमहीशब्देपूपपदेषु `सुपि स्थः' (3.2.4) इति तिष्ठतेः कप्रत्ययः। सकारस्य तकारः क्रियते। महीशब्दस्यापि ह्रस्वत्वम्।

`दक्षिणतारम्' इति। षष्ठीसमासः। `सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्यः' (वा.104) इति पुंवद्भावः। अथ वा--दक्षिणशब्दस्यायं तीरशब्देन षष्ठीसमासः।

`वाचोवादे' इति। वाक्यशब्दस्य वादशब्द उत्तरपदे परतो डकारादेशो भवति। उत्तरपदस्य च वादशब्दस्य वल इत्ययमादेशो भवतीञि प्रत्यये परत इति। वाचं वदतीति `कर्मण्यण्' (3.2.1)--वाग्वाद, तस्यापत्यम् ' अत इञ्' (4.1.95) वाङ्वलिः।

`षष उत्वम्' इत्यादि। षष्शब्दस्योत्वं भवति दतृ, दश-इत्येतयोरुत्तरपदयोः, उत्तरपदादेः ष्टुत्वं च। षङ् दन्ता यस्येति बहुव्रीहिः। `वयस दन्तस्य दतृ' (5.4.141) इति दत्रादेशः--षोडन्। षट् च दश चेति द्वन्द्वः--षोडश।

`धासु वा' इति। उत्वत्यैवायं विकल्पः। ष्टुत्वं तु नित्यमेव भवति। `षोढा, षड्धा' इति। `अधिकरणविचाले च' (5.3.43) इति धाप्रत्ययः। अथ किमर्थं धास्विति बहुवचननिर्देशः क्रियते? इत्याह--`बहुवचननिर्देशः' इत्यादि। `षड्धा' इति। धाञो धेटो वा स्त्रियां `आतोऽनुपसर्गे कः' (3.2.3) इति कप्रत्ययः।

`दाश्यते' इतिष `दाशृ दाने' (धा.पा.882), नाश्यते' इति, `णश अदर्शने' (धा.पा.1194), `दभ्यते' इति, `दम्भ [`दम्भु दम्भने' (1270) इति धातु पाठः] दम्भे--एतेभ्यः कर्मणि घञ्। दुर्शशब्दस्य दाशशब्दादिभिः प्रादिसमासे--दूडाशः दूणाशः, दूडभः। `दम्भेरनुनासिकलोपः' इत्यादि। यदेतत् `दाशनाशदभध्येषु' (काचवृ.6.3.109) इत्यत्र कृतानुनासिकलोपस्य दम्भेरुच्चारणं तन्निपातनम्, तत एवात्र दम्भेरनुनासिलोपो भवति।

पीद उपवसनं येषां ते `पीवोपवसनाः' एवं `पयोपवसनाः'। उभयत्र सकारलोपः।

`वर्णागमः' इति। निरुक्तशास्त्रे ये शब्दा व्युत्पाद्यन्ते तेषां पूषोदरादित्वादेव साधुत्वमिष्यति इतीमं श्लोकमाह--`वर्णागमः' इत्यादि। अपूर्वस्य वर्णस्यागमो वर्णागमः--नकारादेरपूर्वस्य वर्णस्य प्राप्तिः, यथा--को जीर्यते कुञ्जर इति। अत्र कुशब्दसय नुगागमः क्रियते। वर्णविपर्ययः--वर्णस्थानव्यत्यासः, यथा `हिसि हिंसायाम्' (धा.पा.1456), हिनस्तीति सिंह इत्यत्र पचाद्यचि कृते हकारसकारयोः स्थानव्यत्यासः। वर्णविकारः--वर्णस्य रूपान्तरापत्तिः, यथा--षोडन्निति। अत्र ,खारस्योत्वरूपापत्तिः। दकारस्य च डकाररूपापत्तिः। वर्णनाशः--वर्णस्य लोपः, यथा पृषोदर इति। अत्र तकारस्य लोपः। अर्थातिशयः=अर्थविशेषः, प्रसिद्धादर्थादर्थान्तरम्, तेन धातोर्योगः=सम्बनधः, यथा मह्यां रोतीति मयूरः। अत्र रौते रमणेनार्थेनातिशयेन योगः। एतत् पञ्चविधं पञ्चप्रकारं निरुक्तम्, निश्चयेनोच्यतेऽर्थोऽनेनेति निरुक्तम्।।

110. संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ङौ। (6.3.110)

`द्व्योरह्नोर्भवः' इति। भवार्थविवक्षायां `तद्धितार्थ' (2.1.51) इति समासः, ततः `कालाट्ठञ्' (4.3.11) इति ठञ्, तस्य `द्विगोर्लुगनपत्ये' (4.1.88) इति लुक्, `राजाहःसखिभ्यष्टच्' (5.4.91) इति टच् समासान्तः, `अह्नोऽह्न एतेभ्यः' (5.4.88) इत्यह्नादेशः। `द्व्यह्नि' इति। विभाषा ङिश्योः' (6.4.136) इत्यकारलोपः पाक्षिकः। `द्व्यह्नः' इति। `आद् गुणः' (6.1.87)। `व्यह्नः' इति प्रादिसमासः। शेषं पूर्ववत्। `सायाह्नः' इति। एकदेशिसमासोऽयम्। तत्रेदं चोद्यमाशङ्क्यते--ननु च `पूर्वापराधरोत्तरम्' (2.2.1) इत्यादिना समासो विहितः, न च सायंशब्दस्तत्र पठ्यते, तत्कथमिह सायंशब्दसायहःशब्देन समासः सम्भवतीति? एतन्निराकर्तुमाह--`एकदेशिसमासः पूर्वादिभ्योऽन्यस्यापि' इत्यादि। तत्पुरुषसमासे `अह्नोऽह्न एतेभ्यः' (5.4.88) इत्यनेनाह्नादेशो विधीयते, `एतेभ्यः' इत्यनेन च `तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः? (5.4.86) इति, तथा `अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः' (5.4.87) इति प्रक्रान्ताः संख्याव्ययादयः प्रत्यवमृश्यन्ते। तत्र यदि पूर्वादय एवैकदेशिना समस्येरन्, तदा न सायंशब्दः `एतेभ्यः' इत्यनेन प्रत्यवमृश्येत; तस्य संख्यादिष्वपरिपठितत्वात्। ततश्च सायंशब्दात् परस्याह्नादेशो न स्यात्। एवञ्च सायम्पूर्वस्याह्नशब्दस्याभावात् तस्येह ग्रहणं न क्रियेत, कृतञ्च, तस्मादेतदेव सायम्पूर्वस्याह्नशब्दस्य ग्रहणं ज्ञापयति--पूर्वादिभ्योऽन्यस्याप्येकदेशिसमासो भवतीति। तेन `मध्यमह्नो मध्याह्नः' इति सिद्धं भवति। `पूर्वाह्णे' इति। `अह्नोऽदन्तात्' (8.4.7) इति णत्वम्। `संख्याविसायेभ्यः' इत्येव वक्तव्ये पूर्वशब्दस्याधिकस्य ग्रहणं तदधिककार्यवधानसूचनार्थम्। तेन सायाह्न इत्यत्र मकारलोपः सिद्धो भवति।।

111. ढ्रलोपे पूर्वस्य दीर्घोऽणः। (6.3.111)

`ढ्रलोपे' इति तत्पुरुषोऽयं वा स्यात्, बहुव्रीहिर्वा? तत्र यदि तत्पुरुषः स्यात्--ढ्रयोर्लोपो ढ्रलोप इति, तदाणः पूर्वत्वं नोपपद्यते; लोपस्याभावरूपत्वात्, अभावे च पौर्वापर्यासम्भवात्। अथापि स्थानिद्वारकं पोर्वापर्यमाश्रित्य पूर्वत्वमुच्यते, करणीयः--इत्यत्रापयनीयरो रेफस्य लोपे कृते पूर्वस्य दीर्घत्वं स्यादितीमं दोषं दृष्ट्वा बहुव्रीहिरयमिति दर्शयन्नाह--`ढकाररेफयोर्लोपो यस्मिन्' इत्यादि। गमकत्वाद्वैयधिकरण्येऽपि बहुव्रीहिर्भवत्येव, यथा--काण्ठेकाल इति। `लीढम्' इति। `लिह आस्वादने', (धा.पा.1066) `निष्ठा, `हो ढः' (8.2.31) `झषस्तथोर्दोऽधः' (8.2.40) ष्टुना ष्टुः' (8.4.41) `ढोढे लोपः' (8.3.13)--इत्येतो विधयः कर्त्तव्याः। `मीढम्' इति। `मिह सेचने' (धा.पा.992)। `उपगूढम्' इति। `गुहू संवरणे (धा.पा.896)। `मूढः' इति। `मुह वैचित्ये' (धा.पा.1198)। `नीरक्तम्' इति। `कुगतिप्रादयः' (2.2.18) इति समासः, `रो रि' (8.3.14) इति रेफस्य लोपः।

अथ पूर्वग्रहणं किमर्थम्, यावता `ढ्रलोपे' इति। सप्तम्या निर्देशः, तत्रान्तरेणापि पूर्वग्रहं `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इति पूर्वस्यैव भविष्यति? इत्यत आह--`पूर्वग्रहणम्' इत्यादि। असति पूर्वग्रहणे, उत्तरपदाधिकारादुत्तरपद एव स्यात्--`नीरक्तम्' इत्यादौ, अनुत्तरपदे न स्यात्--`लीढम्' इत्यादौ। यद्यपि ढलोपस्योत्तरपदेऽसम्भवादनुत्तरपदेऽपि वचनप्रामण्याद्दीर्घत्वं स्यात्, रलोपे त्वनुत्तरपदे न प्राप्नोति; उत्तरपदे रलोपस्य सम्भवात्। तस्मादनुत्तरपदेऽपि पूर्वमात्रस्याणो दीर्घो यथा स्यादिति पूर्वग्रहणम्। `आतृढम्' इति। `तृहू तृन्हू हिंसार्थौ' (धा.पा.1348,1350)। `आदृढम्' इति क्वचित् पाठः। `दृह दृहि दृहि वृद्धौ' (धा.पा.733-736) इत्यस्य निष्ठायां किलेदं रूपम्, एतत्तु नोपपद्यते; दृहेः सेट्त्वात् तस्येटा भवितव्यम्। अथापि कथञ्चिन्न स्यात्, एवमपि `दादेर्धातोर्घः' (8.2.32) इति घत्वेन भवितव्यम्। स्थूलबलवद्विवक्षायां `दृढः स्थूलबलयोः' (7.2.20) इति निर्देशादुभयं न भविष्यतीति चेत्? दीर्घत्वमप्यत एव तर्हि न स्यात्। केचिदत्रानित्यत्वादागमशासनस्याभावमिटो वर्णयन्ति। `वा द्रुह' (8.2.33) इत्यादौ सूत्रे `वा' इति योगविभागात् पक्षे घत्वस्याभावः। `आवृढम्' इति। वृहू उद्यमनs (धा.पा.1347)।।

112. सहिवहोरोदवर्णस्य। (6.3.112)

`ऊढः, ऊढवान्' इति। यजादित्वात् सम्प्रसारणम्। `सम्प्रसारणाच्च' (6.1.108) इति परपर्वत्वम्, दीर्घत्वं च। तत्रेदानीमसत्यवर्णग्रहणे ऊकारस्याप्योत्त्वं स्यात्। ननु च सम्परसारणादिभ्यः परत्वादोत्त्वेन भवितव्यम्, तथा च भाव्ये `उभयोर्नित्ययोः परत्वादोत्त्वेन भवितव्यम्, आत्वे कृते सम्प्रसारणम्, सम्प्रसारणे कृते सम्परसारणपरपूर्वत्वम्, कृतकार्यत्वात् पुनरोत्त्वं न भविष्यति' इति। तस्माद्भवितव्यमेवौत्त्वेन, तस्मिन् सति पश्चा सम्प्रसारणादिभिः। न चैवं किञ्चिदनिष्टमापद्यत इति नार्थो वर्णग्रहणेन। एवं तर्ह्यवर्णग्रहणं कुर्वन्नेतज्ज्ञापयति--क्वचित् `सम्प्रसारणं तदाश्रयञ्च कार्यं बलीयो भवतीति। तेन यदुक्तम्--`सम्प्रसारणं सम्प्रसारणाश्रयञ्च कार्य बलीयो भवति' (पु.प.वृ.103) इति तदुपपन्नं भवति।

`वर्णग्रहणं किम्' इति। `ओदस्य' इतावत्यपि सति सोढा, सोढुमित्यादि सिध्यत्येवेत्यभिप्रायः। `कृतायामपि' इत्यादि। उत्पूर्वाद्वहेर्लृङि च्लिः, `च्लेः सिच्' (3.1.44)तसस्ताम्, थसस्तम् अडागमः, ढत्वादेरसिद्धत्वात् ततः पूर्वम् `वदव्रज' (7.2.3) इत्यादिना वृद्धिः, ततो ढत्वादि। अथेदानीमसति वर्णग्रहणे मात्रिकस्याकारस्योच्यमानमोत्त्वं दीर्घस्य न स्यात्, वर्णग्रहणाद्वर्णमात्रस्य भवतीति सिद्धम्--उदवोढाम्, उदवोढमिति? ननु च `अणुदित् सवर्णस्य चाप्रत्ययः' (1.1.69) इत्यकारो गृह्यमाण आकारमपि ग्राहयिष्यति, तत् किं वर्णग्रहणेन? इत्यत आह--`तादपि परः' इत्यादि। `तपरस्तत्कालस्य' (1.1.70) इत्यत्र तादपि परस्तपर इत्ययमपि समास आश्रितः खट्वैडका, खट्वैतिकायनः--इत्येवमादिषु त्रिमात्रिके चतुर्मात्रिके वर्त्तमानस्यैकारस्य वृद्धिसंज्ञा मा भूदित्येवमर्थम्। तत्रासति वर्णग्रहणेऽकरस्य तपरत्वादाकारो न गृह्येत् ततश्च तस्योत्त्वं न स्यात्। तस्मादवर्णमात्रस्य यथा स्यादित्येवमर्थ वर्णग्रहणं कर्त्तवयम्। तादपि परस्तपरः--इत्यस्य च समासस्यैतदेव वर्णग्रहणं ज्ञापकं वेदितव्यम्।।

113. साढ्यै सढ्वा साढेति निगमे। (6.3.113)

साढ्वेत्यादौ ओत्त्वाभावो निपात्यते। दीर्घस्तु `ढ्रलोपे' (6.3.111) इत्यादिनैव सिद्धः।।

114. संहितायाम्। (6.3.114)

`उत्तरपदे' (6.3.1) इति वर्त्तते उत्तरपदं च समासे भवति, तत्र चान्तरेणापि वचनं नित्यमेव संहितया भवितव्यम्, तस्मादुत्तरपदे परतो वक्ष्यमाणानां यत् कार्य न तदर्थताधिकारस्योपपद्यत इति यदनुत्तरपदे कार्यं तदर्थमेवायमधिकारः। तेन यैर्योगैरुत्तरपदे कार्यं विधीयते तानुल्लङ्घ्य तेन योगेनानुत्तरपदे कार्यं विधीयते तत्रास्योपयोगं दर्शयन्नाह--`वक्ष्यति द्व्यचोऽतस्तिङः' इत्यादि। `विद्मा हि त्वा' इत्यादि। विदेर्लोटि मसः `स उत्तमस्य' (3.4.98) इति सकारलोपः, अदादित्वाच्छापो लुक्।।

115. कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य। (6.3.115)

लक्ष्यतेऽनेन स्वामिविशेषस्य सम्बन्ध इति लक्षणम्=चिह्नम्। `दात्राकर्णः' इति। दात्रमिव दात्रम्, सादृश्यात्तदाकारं चिह्नमुच्यते। दात्रं कर्णे यस्य स दात्राकर्णः। एवमुत्तरत्रापि बहुव्रीहिरेव वेदितव्यः। द्वौ गुणौ यस्य स द्विगुणः। तदाकरमपि चिह्नं द्विगुणम्। गुणशब्दोऽयं बन्धनवचनः। द्वयोरङ्गुल्योः

समाहारो द्व्यङ्गुलम्, `तत्पुरुषस्याङ्गुलेः' (5.4.86) इत्यादिना च समासान्तः, द्व्यङ्गुलाकारमपि चिह्नं द्व्यङ्गुलम्। `तदिह लक्षणं गृह्यते' इति। कुत एतत्? लक्षणग्रहणाद्यदिह सामान्येन येन केनचिल्लक्ष्यते तललक्षणं गृह्येत चिह्नस्येत्येवं ब्रूयात्, लघु ह्येवं सूत्रं भवति। तस्माच्चिह्नग्रहणे कर्त्तवये यल्लक्षणग्रहणं कृतं तेन लक्षणविशेषोऽत्र ग्राह्यः, न तु लक्षणमात्रमित्यस्यार्थस्य प्रतिपादनं कृतमिति लक्ष्यते। तथा चोक्तम्--इङ्गितेनोन्मिषितेन महता सूत्रप्रबन्धेन वेहा चार्याणामभिप्राया लक्षन्त इति। ननु च लक्षणग्रहणेन लक्षणविशेषोऽत्राभिमतः, न तु लक्षणमात्रमित्येतावन्मात्रं गम्यते, स तु विशेषो न वृत्तिकारेणोपदर्शितः कुतोऽवसेयः? आचार्याणं स्वीकरणात्। `शोभनकर्णः' इति। यद्यप्यनेनापि लक्ष्यते, न त्वेवंविधस्य लक्षणस्येह ग्रहणम्। नापि शोभनत्वं लोके लक्षणत्वेन प्रतीयत इति भवत्येतत्प्रत्युदाहरणम्।।

116. नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ। (6.3.116)

`णह बन्धने' (धा.पा.1166)। उपनह्यत इति `उपानत्' सम्पदादित्वात् क्विप् `नहो धः' (8.2.34) इति धत्वम्, ततो जश्त्वम्, चर्त्वञ्च। परिणह्यतीति `परिणत्'। `उपसर्गादसमासे' (8.4.14) इत्यादिना णत्वम्। निवर्त्तत इति `नीवृत्'। `अन्येभ्योऽपि दृश्यते' (3.2.178) इति क्विप्। एवमुत्तरत्रापि क्विबेव वेदितव्यः। `वृषु सेचने' (धा.पा.706) प्रवर्षतीति `प्रावृट्'। षकारस्य जश्त्वम्--डकारः, तस्य चर्त्वेटकारः। `व्यध ताडने' (धा.पा.1181), मर्माणि विध्यतीति `मर्मावित्' ग्रह्यादिसूत्रेण (6.1.16) सम्प्रसारणम्। `रुच दीप्तौ' [`रुच दीप्तावभिप्रीतौ च'--धा.पा.] (धा.पा.745), निरोचणं `नीरुक्'। `चोः कुः' (8.2.30) इति कुत्वम्। ऋतिं सहत इति `ऋतीषट्'। `सहेः पृतनर्त्ताभ्याञ्ज' (8.3.107) इत्यत्र `सहेः' इति योगविभागादनुक्तसमुच्चयार्थत्वाद्वा चकारस्य षत्वम्। परितनोतीति `परीतत्'। अनुनासिकलोपे कृते तुक्।
केन पुनरत्रानुनासिकलोपः? इत्याह--`गमः क्वौ' इत्यादि। गतिकारकयोरेवेष्यत इति। तदर्थम् `विभाषा पुरुषे' (6.3.106) इत्यतो विभाषाग्रहणनुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञेया।।

117. वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम्। (6.3.117)

`कोटरावणम्' इति। षष्टीसमासः। `वनं पुरुगा' (8.4.4) इत्यादिना णत्वम्।।

118. वले। (6.3.118)

`वलच्प्रत्ययो गृह्यते, न प्रातिपदिकम्' इति। एतच्च वक्ष्यमाणस्येह बहुलग्रहणस्य सिंहावलोकितव्यायेनोपस्थानाल्लभ्यत इत्येके। अनन्तरं वक्ष्यमाणेन मतुपा प्त्ययेन साहचर्याच्चेत्पपरे।।

119. मतौ बह्वचोऽनजिरादीनाम्। (6.3.119)

`व्रीहिमती' इत्यादौ पूर्ववन्मतुप्। `वलयवती' इत्यत्र तु `तदस्यास्त्यस्मिन्निति मतुप्' (5.2.94)।।

120. शरादीनां च। (6.3.120)

अबह्वर्थोऽयमारम्भः। `शरावती' इति। `नद्यां मतुप्' (4.2.85) इति मतुप्।।

121. इको वहेऽपीलोः। (6.3.121)

`ऋषीवहः' [`ऋषीवहम्'--काशिका] इति। षष्ठीसमासः। वहशब्दः पचाद्यजन्तः।

`अपील्वादीनाम्' इत्यादि। यदेतदिको दीर्घविधानं तत् पील्वादीनां न भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--इहापि तदेव बहुलग्रहणं पूर्ववदुपतिष्ठते, तेन पीलुशब्दादन्येषामपि केषाञ्चिद्दीर्घत्वं न भविष्यतीति।।

122. उपसर्गस्य घञ्यमनुष्ये बहुलम्। (6.3.122)

उपसर्गात् केवलं घञ्प्रत्ययो न सम्भवति, अतो घञन्त उत्तरपदे कार्यं वज्ञायत इत्याह--`घञन्त उत्तरपदे' इत्यादि। `वीक्लेदः' इति। `क्लिद आर्द्रीभावे' (धा.पा.1242), [`क्लिदू'--धा.पा.] `अकर्तरि च कारके' (3.3.19) इत्यादिना घञ्। `वीमार्गः' इति। `मृजू' शूद्धौ' (धा.पा.1066), `मृजेर्वृद्धिः' (7.2.114), `चजोः कु घिण्यतोः' (7.3.52) इति कुत्वम्। `प्रसेवः' इति। `षिवु तन्तुसन्ताने' (धा.पा.1108)।
`कृत्रिमम्' इति। करणेन निर्वृत्तं कृत्रिमम्। पुरुषव्यापारादिभिर्निर्वृत्तमित्यर्थः।
`निषादः' इति। `षद्लृ विशरणगत्यवसादनेषु' (धा.पा.854), निषीदत्यस्मिन् पापमिति निषादः। `हलश्च' (3.3.121) इति घञ्।।

123. इकः काशे। (6.3.123)
`नीकाशः' इति। `कासृ दीप्तौ' (धा.पा.647)। `पचाद्यजन्तोऽयं काशशब्दः न तु घञन्तः' इति। तत्र पूर्वेणैव सिद्धमित्यभिप्रायः। `पूर्वेणैव सिद्धे नियमार्थमेतत्--इक एव काशे नान्यस्य' इति क्वचिद् ग्रन्थः, एष तु नोपपद्यते; घञि पूर्वेण दीर्घविधानात्, एतस्य च काशशब्दस्य पचाद्यजन्तत्वात्। अथ बहुलग्रहणात् पचाद्यजन्तेऽपि पूर्वेणैव सिद्धमित्युच्यते, तथा च तत एव बहुलग्रहणादिकोऽन्यस्यन भविष्यतीति न करत्तव्यमेवेदं सूत्रम्। क्रियमाणञ्च पूर्वस्यैव प्रपञ्चार्थ द्रष्टव्यम्।।

124. दस्ति। (6.3.124)
`दा' इत्येतस्य यस्तकारादिरादेशः' इति। एतेन स्थान्यादेशसम्बन्धे `दः' इत्येषा षष्ठीति विज्ञायते। `वीत्तम्' इति। ददातेर्निष्ठायां रूपम्। ननु चत्र तकारादिरादेशः परो न सम्भवत्येव, तथा हि--यस्तावत् `अच उपसर्गात्तः' (7.4.47) इति तकार सः `अलोन्त्यस्य' (1.1.52) इति वचनादन्त्यस्य क्रियते, स च वर्णान्तरो व्यवधानादनन्तरस्तकारः परो न सम्भवति; योऽपि `खरि च' (8.4.55) इति दकारसय तकारो विधीयते, सोऽपिन सम्भवत्येव; दीर्घत्वे कर्त्तव्ये चर्त्वस्यासिद्धत्वेनाविद्यमानत्वादित्यत आह--`अच उपसर्गात्तः' इत्यादि। आश्रयणमाश्रयः=अङ्गीकरणम्। `दा' इत्यत्र यसतकारादिरादेशः, तस्मिन् परत इगन्तस्योपसर्गस्य दीर्घो भवतीति ब्रुवता चर्त्वमाश्रितम्, न ह्यन्यथा तकारादिरादेशः परः सम्भवति। तस्मात् चर्त्वस्याश्रयणात् सिद्धम्। अतस्तकारादिरादेशो भवतीति। `नितीर्णम्' इति। `तृ प्लवनतरणयोः' (दा.पा.969) `ऋत इद् धातोः' (7.1.100) इतीत्त्वम्, `हलि च' (8.2.77) इति दीर्घः। `अट्कुप्वाङ्' (8.4.2) इत्यादिना णत्वम्। `सुदत्तम्' इति। `दो दद्घोः' (7.4.46) इत्यत्र--
`अवदत्तं विदत्तं च प्रादत्तं चादिकर्मणि।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते'।।
त्यनयेष्ट्या ददातेर्ददादेश-।।

125. अष्टनः संज्ञायाम्। (6.3.125)
`अष्टावक्रः' इति। अष्टौ वक्राण्यस्येति बहुव्रीहिः।।

126. छन्दसि च।
`अष्टाकपालम्' इति। अष्टसु कपलेषु संस्कृतमिति `संस्कृतम्' (4.4.3) इत्यण्, तस्य `द्विगोर्लुगनपत्ये (4.1.88) इति लुक्। `अष्टाहिरण्या' इति। बहुव्रीहिः। `पादस्य लोपे कृते' इति। `पादस्य लोपोऽहस्त्यादिभ्यः' (5.4.138) इत्यनेन।
`गविच युक्ते' इत्यादि। `वक्तव्यम्' इति। अस्य व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--चकारोऽत्रक्रियते, सचानुक्तसमुच्चयार्थः। तेन गवि च युक्ते भाषायामप्यष्टनो दीर्घो भवति।।

127. चितेः कपि। (6.3.127)
`एकचितीकः' इति। एका चितिरस्येति बहुव्रीहिः, ततः `स्त्रियाः पुंवत्' (6.3.34) इत्यादिना पुंवद्भावः, `शेषाद्विभाषा' (5.4.154) इति कप्।।

128. विश्वस्य वसुराटोः। (6.3.128)
`विश्वावसुः' इति। विश्वं वसु यस्येति बहुव्रीहिः। `विश्वाराट्' इति। विश्वस्मिन् राजत इति `सत्सूद्विष' (3.2.61) इत्यादिना क्विप्, व्रश्चादिसूत्रेण (8.2.36) षत्वम्, तस्य `झलां जशोन्ते' (8.2.39) इति जश्त्वम्--डकारः, डकारस्यापि चर्त्वम्--टकारः।
`यत्रास्यैतद्रूपम्' इति। क्व पुनरस्यैतद्रूपम्? यत्र पदसंज्ञा; पदाधिकारे षकारादीनां विधानात्। `विश्वराजौ, विश्वराजः' इति। अत्र पदसंज्ञा नास्ति, `असर्वनामस्थाने' (1.4.17) इति प्रतिषेधात्।।

129. नरे संज्ञायाम्। (6.3.129)

130. मित्रे चार्षौ। (6.3.130)

131. मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ। (6.3.131)

132. ओषधेश्च विभक्तावप्रथमायाम्। (6.3.132)

133. ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्। (6.3.133)
तङिति प्रत्याहिराग्रहणम्--लोष्मध्यमपुरुषबहुवचनादारभ्य महिङो ङकारेण। `आ तू न इन्द्र वृत्रहन्' इति। आ तु न इति प्राप्ते। एवमुत्तरत्रापि ह्रस्वप्रयोगे प्राप्ते दीर्घो वेदितव्यः। `लस्यात्' इति। `लस श्लेषणक्रीडनयोः' (दा.पा.714) इत्यस्याशिषि लिङि रूपमेतत्। अथ घग्रहणेनात्र तरप्तमपोः प्रत्यययोर्ग्रहणं कस्मान्न भवति? तदन्तस्य कृतदीर्घस्य ऋग्विषये प्रयोगासम्भवात्। `भरता' इति। `भृ भरणे (धा.पा.898) [`भृञ् भरणे' धा.पा; `भृ भर्त्सने' (भरणेऽपीत्येके)--धा.पा.1492] इत्यस्माद्धातोर्लोण्मध्यमपुरुषस्य बहुवचने रूयमेतत्। `श्रृणोत ग्रावाणः' इति। अत्र तु न भवति; `सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पु.प.वृ.56) इति वचनात्। `अत्रा' इति। त्रलन्तमेतत्। `सप्तम्यास्त्रल्' (5.3.10) इति त्रलि कृते `एतदोऽश्' (5.3.5) इत्यनेनैतदोशादेशः। `उरुष्या णः' इति। आत्मन उरुमिच्छति `सुपआत्मनः क्यच्' (3.1.8) इति क्यच् ततः सर्वप्रातिपदिकेभ्यो लालसायामसुग्वक्तव्यः' (वा 824) इत्यौपसंख्यानिकोऽसुक्, `सुषमादिषु च' (8.3.98) इति षत्वम्, लोण्मध्यमपुरुषस्यैकवचनम्, `अतो हेः' (6.4.105) इति हेर्लुक्। `न' इति। `बहुवचनस्य वस्नसौ' (8.1.21) इत्यस्मदादेशोऽयम्। णत्वं तु वर्णव्यत्ययेन। `उपसर्गाद्बहुलम्' (8.4.28) इति बहुलवचनाद्वा। अन्ये तु--`उरुष्य इति निपातः' इत्याचक्षते।।

134. इकः सुञि। (6.3.134)
सुञिति निपातस्य ग्रहणम्। `अभि षु णः' इति। अभिशब्दस्य दीर्घत्वम्। `सुञः (8.3.105) इति षत्वम्। `नः' इत्ययमस्मदादेशः, तस्य `नश्च धातुस्थोरुषुभ्यः' (8.4.27) इति णत्वम्। `ऊर्ष्व ऊ षु णः' इति। उकारस्य दीर्घः।

135. द्व्यचोऽतस्तिङः। (6.3.135)
`अश्वा भरत वाजिनः' इति। `भृ' इत्येतस्य लोण्मध्यमपुरुषस्य बहुवचने रूपमेतत्। `दक्षि पक्षि' इति। वचेर्यजेश्च परस्य लेटः सिप्, `कर्त्तरि शप्' (3.1.68)। वचेरदादित्वाच्छपो लुक्। यजेरपि `बहुलं च्छन्दसि' (2.4.76) इति।।

136. निपातस्य च। (6.3.136)
`एवा ते, अच्छा ते' इति। एवाच्छशब्दौ निपात्तौ; चादिषु पाठात्।।

137. अन्येषामपि दृश्यते। (6.3.137)
ऋचीति निवृत्तम्। `केशाकेशि' इति। केशेषु केशेषु गृहीत्वेदं युद्धं वृत्तमिति `तत्र तेन' (2.2.27) इत्यादिना बहुव्रीहिः `इच् कर्मव्यतिहारे' (5.4.127) इतीच् समासान्तः। `जलाषाट्' इति। जलं सहत इति `छन्दसि सहः' (3.2.63) इति ष्विः, `सहेः षाडः षः' (8.3.56) इति षत्वम्। `श्वादन्तः' इति। शुनो दन्त इति षष्ठीसमासः। `श्वादंष्ट्रः' इति। शुन इव दंष्ट्रा अस्येति बहुव्रीहिः। `श्वाकर्णः' इत्यादयः षष्ठीतत्पुरुषाः, बहुव्रीहयो वा।।

138. चौ। (6.3.138)
`दधीचः' इति। दध्यञ्चतीति ऋत्विगादिना (3.2.59) क्विन्, ततः, शस्, `अचः' (6.4.138) इत्यकारलोपः। ननु चान्तरङ्गत्वाद्यणावेशेनात्राकारलोपादीर्घाच्च प्राग् भवितव्यम्, स हि वर्णाश्रयत्वादन्तरङ्गः, इतरौ तु बहिरङ्गौ, अकारलोपो हि तस्य विधीयते, भसंज्ञा च यकारादावजादौ च स्वादौ विधीयते, दीर्घत्वमप्युत्तरपदे परतः पूर्वपदस्य विधीयमानं द्विपदाश्रयत्वत्द्बहिरङ्गम्, ततश्चान्तरङ्गे यणादेशे कृते पूर्वं चौ दीर्घत्वं न सिध्यति? इत्यत आह--`अन्तरङ्गोऽपि' इत्यादि। यदि यणादेश एव प्रवर्त्तते, तदा दीर्घवचनमनर्थकं स्यात्। तस्माद्दीर्घवचनसामर्थ्याद्यणादेशो न प्रवर्त्तते।
ननु च कृते यणादेशेऽनन्तरो दीर्घभावो नास्तीत कृत्वा व्यवहितस्यापि दीर्घत्वं भविष्यति, यथा--`शमामष्टानां दीर्घः श्यनि' (7.3.74) इति शमादीनां श्यनि दीर्घत्वम्, तस्माद्भवितव्यमेवात्र यणादेशेन, तथा च व्यवहितस्य दीर्घत्वे कृतेऽनिष्टं रूपं स्यात्? नैतदस्ति; इदं च तावद्विचार्यताम्। किं तत्? `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इत्येषा परिभाषा बाध्येत, आहोस्विदन्तरङ्गपरिभाषेति? तत्रान्तङ्गपरिभाषाया लिङ्गादनुमानाद्वा सिद्धा, तस्या हि `वाह ऊठ् (6.4.132) इत्यूङ्वचनं लिङ्गम्। यथा चैतल्लिङ्गं तथा तत्रैव वृत्तिकारो दर्शयिष्यति। इतरा तु परिभाषा साक्षात् श्रुता। तत्र युक्तं यदनुमितोऽर्थो बाध्यते, न तु साक्षाद्दृष्ट इत्यन्तरङ्गपरिभाषा बाध्यते, नेतरेति। तथा चानन्तरस्यैव दीर्घत्वेन भवितव्यमिति यणादेशो न प्रवर्त्तते।।

139. सम्परसरणस्य। (6.3.139)
`कारीषागन्धीपुत्रः' इति। कारीषगन्धेरपत्यमिति `तस्यापत्यम्' (4.1.92) इत्यण्, `अणिञोरनार्षयोः' (4.1.78) इत्यादिना ष्यङादेशः, ततः `यङश्चाप्' (4.1.74) इति चाप्रत्ययः, ततः करीषगन्ध्यायाः पुत्र इति षष्ठीसमासः, ततः `ष्यङः सम्प्रसरणम्' (6.1.13) इत्यादिना सम्प्रसारणम्, अनेन दीर्घत्वम्।

`व्यवस्थितविभाषा हि सा' इति। इको ह्रस्वादौ (6.3.61) सूत्रे `एक हलदौ' (6.3.51) इत्यतः सूत्रादन्यतरस्यांग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञायते। तेन कारीषगन्धीपुत्र इत्यत्र न भवति। `अकृत एव' इत्यादि। अथ वा--अकृत एव सम्प्रसारणदीर्घत्वे कारीषगन्धिपुत्र इति स्थिते ह्रस्वत्वं प्राप्नोति, सम्प्रसारणदीर्घत्वं च; उभयं चैतत् सावकाशम्, इको ह्रस्वतवस्यावकाशः--ग्रामणिपुत्र इति, सम्प्रसारणस्यावकाशः--ह्रस्वाभावः; पक्षे तूभयं प्राप्नोति। तत्र यद्यपि ह्रस्वाभावपक्षे कृतार्थ दीर्घत्वम्, तथापि तेन परत्वाद् ह्रस्वो बाध्यते। अथ कृते दीर्घत्वे कस्मात् पुनःप्रसङ्गविज्ञानान्न भवति? अत आह--`पुनःप्रसङ्गविज्ञानञ्च' इत्यादि। गतार्थम्।।

इति बोधिसत्त्वदेशीयाचार्यश्रीजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां षष्ठाध्यायस्य
तृतीयः पादः।।

- - -

6.4

अथ षष्ठोऽध्यायः

चतुर्थः पादः

1. अङ्गस्य। (6.4.1)

`अधिकारोऽयम्' इति। स्वरितलिङ्गासङ्गात्। इह केचित् प्रागभ्यासविकारेभ्योऽयमङ्गाधिकारो युक्त इति मन्यन्ते। एवं हि `गुणो यङ्लुकोः' (7.4.82) इत्यस्मिन् सत्रे लुग्ग्रहणं न कर्त्तव्यं भवति; यङ्लुक्यापि प्रत्ययलक्षणेन गुणस्य सिद्धत्वात्। यदि पुनरा सप्तमाध्यायपरिसमाप्तेरयमङ्गाधिकारः स्यात्, ततोऽवश्यं लुग्ग्रहणं कर्त्तव्यम्, न ह्यन्यथा यङ्लुकि गुणः सिध्यति; `न लुमताङ्गस्य' (1.1.63) इति प्रतिषेधादित्येदं तेषामभिप्रायः। वृत्तिकारस्तु--यदि प्रागभ्यासविकारेभ्योऽयमङ्गाधिकारः स्यात्, ततो वव्रश्चेत्यत्र वृश्चतेर्लिटि द्विर्ववचने कृते हलादिशेषात् प्राक् सम्प्रसारणं पूर्वप्रतिषेधेन, `उभयेषाम्' इति वचनसामर्थ्याद्वापरमपि हलादिशेषं बाधित्वा सम्प्रसारणं स्यात्, ततश्च `सम्प्रसारणाच्च' (6.1.108) इति पूर्वरूपत्वे `उरत्' (7.4.66) इत्यत्त्वे रपरत्वे हलादिशेषे च कृते वकारस्यापि सम्प्रसारणं प्रसज्येत। आ सप्तमाध्यायपरिसमाप्तेः पुनरङ्गाधिकारे सति `उरत्' (7.4.66) इत्यस्य परनिमित्तत्वात् प्रत्ययो निमित्तत्वेनाश्रीयते। तेन परनिमित्तत्वादुरदत्तवस्य सम्परसारणम्' (6.1.37) इति वकारस्य सम्प्रसारणं प्रतिषिध्यते। प्रागभ्यासविकारेभ्यः पुनरङ्गाधिकारे सत्यपरनिमित्तत्वा दुरदत्त्वसय स्थानिवद्भावो न स्यात्, ततश्च `न सम्प्रसारणे सम्प्रसारणम्' (6.1.37) इत्यस्य प्रतिषेधस्याभावाद्वकारसय समप्रसारणं स्यादेव। ततश्चोव्रश्चेत्यनिष्टं रूपं स्यात्। तस्मादा सप्तमाध्यायपरसमाप्तेरङ्गाधिकारो युक्तः, न तु प्रागभ्यासविकारेभ्य इति मन्यमान आह--`आ सप्तमाध्यायपरिसमाप्तेः' इति। सप्तमाध्यायपरिसमाप्तेस्तु परेण `पदस्य' (8.1.16) इत्यधिकृतय कार्यं विधीयते। तेन तत्राङ्गाधिकारो नानुवर्त्तते। `ह्वेञ् स्पर्धायाम्' [ह्वेञ् स्पर्धायां शब्दे च--धा.पा.] (धा.पा.1008) निष्ठा, यजादीत्वात् सम्प्रसारणम्। `जीनः' इति। ` ज्या वयोहानौ' (धा.पा.1499) ग्रह्यादिसूत्रेण (6.1.16) सम्प्रसारणम्, `ल्वादिभ्यः' (8.2.44) इति निष्ठानत्वम्। `संवीतः' इति। `व्येञ् संवरणे' (धा.पा.1007) वच्यादिना (6.1.15) सम्प्रसारणम्।

`निरुतम्, दुरुतम्' इति। `वेञ् तन्तुसन्ताने' (धा.पा.1006) पूर्ववत् सम्प्रसारणम्। असत्यङ्गाधिकारे निर्दुरोरवयवो यो हल् ततोऽप्युत्तरस्य सम्प्रसारणस्य दीर्घः स्यात्। अङ्गाधिकारे पुनरङ्गावयवो यो हल् तदुत्तरं यत् सम्प्रसारणं तदन्तस्याङ्गस्य दीर्घत्वं विज्ञायत इति न भवति दीर्घत्वप्रसङ्गः। न ह्यत्राङ्गावयवाद्धल उत्तरं सम्प्रसारणम्। `अग्नीनाम्' इति। `ह्रस्वनद्यापो नुट्' (7.1.54)। `क्रिमिणां पश्य पामनां पश्य' इति। क्रियमोऽस्यां सन्तीति, पामानोऽस्यां सन्तीति `लोमादि' (5.2.100) इत्यादिना नप्रत्ययः, ततष्टाप्, द्वितीयैकवचनम्। `अमि पूर्वः' (6.1.107) इति पूर्वरूपत्वम्। यद्यङ्गस्येति नाधिक्रियते, ततोऽत्रापि क्रिमिशब्दस्य पामशब्दसय च नामि परतो दीर्घत्वं स्यात्। अङ्गाधिकारे तु न दोषः, न ह्यत्र क्रिमिपामशब्दयोर्नामि परतोऽङ्गत्वमस्ति, अपि तु नप्रत्यये `ब्राह्मणभिस्सा, ओदनभिस्सिटा' इति। भिस्साभिस्सिटाशब्दौ टाबन्तौ। तत्रैक ओदनस्य वाचकः, अपरस्तु तद्दग्धिकायाः। ताभ्यां यथाक्रमं ब्राह्मणौदनशब्दयोः षष्ठीसमासः। तत्रासत्यङ्गाधिकारे अनङ्गाब्यामपि ब्राह्मणौदनशब्दाभ्यां परस्य भिस ऐस्भावः प्रसज्येत।

ननु च `तर्थवद्ग्रहणे नानर्थकस्य' (व्या.प.1) इति वचनाद्यथा क्रिमिणां पश्य, पामनां पश्येत्यत्र दीर्घत्वं न भविष्यति, तथा ब्राह्मणभिस्सौदनभिस्सिटेत्यत्राप्यैसभावः, न ह्यत्र नामोऽर्थवत्त्वम्, नापि भिसः, तत् किं तन्निवृत्यर्थेनाङ्गाधिकारेण? इत्याह--`अङ्गाधिकारः' इत्यादि।

`नामिदीर्घत्वाद्यपि' इत्यादि। आदशब्देन `अतो भिस ऐस्' (7.1.9) इत्यैस् गृह्यते। इतिकरणो हेतौ। यस्मादसत्यङ्गाधिकारे `हलः' (6.4.2) इति दीर्घत्वं यथा हूतः जीन इत्यत्र भवति, तथा निरुतम्, दुरतमित्यत्रापि स्यात्। `अज्झनगमां सनि' (6.4.16) इति दीर्घत्वं यथा चिकीर्षतीत्यत्र भवति, तथा दधि सनोति, मधु सनोतीत्यत्रापि स्यात्। `एर्लिङि' (6.4.67) `वान्यसय संयोगादेः' (6.4.68) इत्येत्त्वं यथा ग्लेयादित्यत्र भवति, तथा निर्यायात् निर्वायादित्यत्रापि भवेत्। तस्मादेवमाद्यर्थोऽवश्यकर्त्तव्योऽङ्गाधिकारः। सोऽन्यार्थः क्रियमाणो नामि दीर्घत्वाद्यपि व्यवस्थापयति=विषयान्तराद्व्यावर्त्त्याभिमते विषये नियमति। तेन तदर्थमेषा परिभाषा नाश्रयितव्या भवति। अगत्या हि खलु परिभाषाऽऽश्रीयत इति भावः।
ननु `षष्ठी स्थानेयोगा' (1.1.49) इति वचनादङ्गस्येति स्थानषष्ठीयम्, ततश्च `अतो भिसऐस' (7.1.9) इत्येतत् पञ्चम्यन्तेनाङ्गस्येत्येतत्षष्ठ्यन्तस्य समानाधिकरणत्वं न स्यात्; भिन्नविभक्तिकत्वात्। तथा च सत्यकारान्तात् परस्य भिस्सेत्यत्रस्यैस्भावः प्रसज्येत `ऊदुपघाया गोहः' (6.4.89) इत्यत्र `गोहः' इत्यस्याः स्थानषष्ठ्या `अलोऽन्त्यस्य' (1.2.52) इत्यन्तेऽल्युपसंहारादुपधागरहणसामर्थ्याच्छ गोहश्चान्त्यस्य स्यादूत्त्वम्। उपधामात्रस्य च `शास इदङ्हलोः' (6.4.34) इत्यत्रापि शास इति स्थानषष्ठीत्वेन विज्ञातायाः षष्ठ्या अन्तेऽल्युपसंहारादुपधाग्रहणानुवृत्तिसामर्थ्याच्च शासश्चान्त्यस्येत्त्वम्, उपधामात्रस्य चेत्येतद्देश्यमपाकर्त्तुमाह--`अङ्गस्येति सम्बन्धसामान्य एषा षष्ठी' इत्यादि। सम्बन्धसामान्ये=अविशेषितसम्बन्धमात्रे।
तत्रानेकसम्बन्धानुग्रहार्थमनाश्रितविशेषं सम्बन्धसामान्यमुपादाय प्रवृत्ता सत्युत्तरेषु भिन्नार्थेषु लक्षमवाक्येषु यथायोगं विशेषेष्ववतिष्ठते। सा क्वचित् स्थाने योगा भवति, यथा `हन्तेर्जः' (6.4.36) इत्येवमादौ। क्वचिन्निमित्तनिमित्तिसम्बन्धविषया, यथा--`युवोरनाकौ' (7.1.1) इत्यादौ। यथैव हि देवदत्तस्येत्येका षष्ठ्यभेदेन प्रवृत्ता ज्ञात्यवयवादिषु सम्बन्धभेदैर्भिद्यमाना जन्यजनकभावाद्यैः सम्बन्धविशेषे यथायोगमुपतिष्ठते--देवदत्तस्य पुत्रः पाणिः कम्बल इति, तथाङ्गस्येत्येषापि। तत्र यस्मिन् वाक्ये `शास इदङ्हलोः' (7.4.34) इत्येवमादौ सम्बन्धिविशेषो विद्यते--अवयवोऽन्यो वा, तत्र यथायोगमवयवादिसम्बन्धे षष्ठी वेदतव्या। यत्र न विद्यते तत्र स्थाने षष्ठी, यथा--`हन्तेर्जः' (6.4.36) इतयवमादौ। कथं पुनरेषा सम्बन्धसामान्ये षष्ठीति लभ्यते, यावता `षष्ठी स्थानेयोगा' (1.1.49) इत्युक्तम्? एवं मन्यते--न हि सर्वा षष्ठी स्थानेयोगा भवति, अपि तु यस्याः कलादिकं लिङ्गं प्रतिज्ञायते; अन्यथा हि `उदीचामातः साथाने' (77.3.46) इति स्थानग्रहणमनर्थकं स्यात्। तस्माद्विशिष्टैव या षष्ठी यस्याः कलादिकं लिङ्गं प्रतिज्ञायते सा स्थानेयोगेत्युक्तम्। न चास्याः कलादिकं लिङ्गं प्रतिज्ञायते। ततो नेयं स्थानेयोगा भवितुमर्हति।
`अथ वा' इत्यादि। अङ्गशब्दस्य प्रातिपदिकस्य योऽर्थस्तन्मात्रधिक्रियते, न त्वेङ्स्येत्येतच्छब्दरूपम्। मात्रशब्दो विभक्त्यर्थव्यवच्छेदाय। अत एवाह--`अविवक्षितविभक्त्यर्थम्' इति। न विवक्षितो विभक्त्यर्थो यस्मिन्नर्थमात्रे तत् तथोक्तम्। यतश्चेतदेवं तेन षष्ठी स्थानेयोगेति। नात्रेयं परिभाषोपतिष्ठते। अनेकसम्बन्धप्रसङ्गे हि सम्बन्धान्तरव्यवच्छेदार्थमेषा प्रणीता। ततो यत्र सम्बन्धो विवक्ष्यते तत्रैव नियमार्थमुपतिष्ठते, न चात्र कश्चित् सम्बन्धः षष्ठ्या विवक्षितः केवलं निर्देशार्थ एवास्याः प्रयोगः। अवश्यं हि यथा कयाचिद्विभक्त्या निर्देशः कर्त्तव्य इति षष्ठ्यां निर्देशः कृतः। ननु च स्वरितेनाधिकारः, स च शब्दधर्मः, नार्थधर्मः, तत् कथं स्वरितरहितोऽर्थः शक्यतोऽधिकर्त्तुम्? नैष दोषः; अङ्गशब्दप्रतिपादितो योऽर्थः स शब्दात्मक एव। तथा हि यस्मात् प्रतययविविस्तदादेः शब्दस्याङ्गसंज्ञा विहिता। `तदुत्तरत्र यथायोगं विपरिणम्यते' इत्यादि। अर्थवशात् क्वचित् षष्ठ्यन्तत्वेनैव क्वचिद्विभक्त्यन्तरत्वेन, यथा--आढ्यो बंधवेयो देवदेत्तः, उच्चान्यस्य गृहाणि, आमन्त्रयस्वैनं देवदत्तमिति। तेन `अतो भिस ऐस् (7.1.9) इत्यत्र पञ्चम्यन्ततया विभक्तिविपरिणामे हि सत्यकारान्तादङ्गादुत्तरस्य भिस ऐसादेशो भवतीत्येवमाद्यर्थरूपं सम्पन्नं भवति। आदिशब्देन युष्मदस्मद्भ्यामुत्तरस्य ङसोऽश् भवतीति परिगृह्यते। पिशब्दादवयवषष्ठ्यादयोऽपि परिसम्पन्ना भवन्ति। पूर्वत्र तु परिहारे `अतो भिस् ऐस्' (7.1.9) इत्यत्रात् इत्येषा निमित्तनिमित्तिसम्बन्दे षष्ठी द्रष्टव्या। तत्रायं सूत्रार्थः--अकारान्तस्याङ्गस्य यी भिस् तस्यैस्भवतीति। तेन ब्राह्मणभिस्सेत्येवमादौ न भवति। अङ्गस्य हि को भिम्? यस्तस्य निमित्तम्। कस्तस्य पुनर्निमित्तम् भिस्? परभूते यस्मिन्नङ्गमित्येषं भवति। कस्मिंश्चैतद्भवति? प्रत्यये। न च ब्राह्मणभिस्सेत्येवमादौ भिस्प्रत्यय इति कुतस्तस्यैस्प्रसङ्गः।।

2. हलः (6.4.2)
अणग्रहणं सम्प्रसारणग्रहणं दीर्घग्रहणञ्चैतत् तरयमनुवर्त्तते। कुतः पुनः प्रकृतमणग्रहणम्? `ढ्रलोपे पूर्वस्य दीर्घोऽणः' (6.3.111) इत्यतः। ननु तत् `इकः काशे' (6.3.123) इतीगग्रहणेन व्यवच्छिन्नम्, तत् कथमिहानुवर्त्तते? नैष दोषः, इग्ग्रहणेन ह्यणेव विशिष्यते--अण्णिगित। ततो विरोधाभावन्नेग्ग्रहणेनाणग्रहणं व्यवच्छिद्यते। ननु च यदीग्ग्रहणेनाणग्रहणं विशिष्यते, तदा--`अवाचा, स्वराचा' इत्यत्र दीर्घत्वं न स्यात्। `चौ' (6.3.138) इत्त्राणग्रहणमेवात्रानुवर्त्तिष्यते, इग्ग्रहणं तु निवृत्तमित्येषोऽपयदोषः। अथ वा--यद्यपीग्ग्रहणेनाणग्रहणं व्यवच्छिन्नम्, तथापीह मण्डूकप्लुतिन्यायेनानुवर्त्तते। ननु यथा `शेषे' (4.2.92) इत्येतल्लक्षणं विधिरधिकारश्च, तथा `अङ्गस्य' (6.4.1) इत्येतदपि, ततश्चानेनैव हूतः, जीन इत्यादेः सिद्धत्वादपार्थकं `हलः' इत्येतद्वचनम्। अतो न कर्त्तव्यमेवेति मन्यमान आह--`हल इति किम्' इति। किमर्थं `हलः' इत्येतत् सूत्रमारभ्यत इत्यर्थ। `उतः, उतवान्' इति। असत्यस्मिन् सूत्रे सन्प्रसारणान्तस्याङ्गस्य दीर्घो भवतीत्युच्यमान इहापि दीर्घत्वं स्यात्। भवति ह्येतदपि व्यपदेशिवद्भावेन सम्प्रसारणान्तमङ्गम्, तस्मात् `हलः' इति सूत्रं कर्त्तव्यम्। `विद्धः' विचितः' इति। `व्यध ताडने' (धा.पा.1181) `व्यच व्याजीकरणे' (दा.पा.1293) निष्ठा, ग्रह्यादिसूत्रेण (6.1.16) सम्प्रसारणम्। सम्प्रसारणान्तस्याङ्गस्य ग्रहणादिह न भवति दीर्घः। यद्यपि `विध्यत्यधनुषा' (4.4.83) `ग्रहिज्यावयिव्यधिवष्टिविचति' (6.1.16) इति निर्देशात् हलन्तस्य यत् सम्प्रसारणं तस्य दीर्घो न भविष्यतीति विज्ञायते, तथापि ज्ञापकद्वारेणास्मिन्नर्थे प्रतिपाद्यमाने प्रतिपत्तिगौरवं स्यादित्येतत्परिहारार्थं सम्प्रसारणान्तस्येत्युक्तम्। `तृतीयः' इति। `द्वेस्तीयः' (5.2.54) इति `त्रेः सम्प्रसारणञ्च' (5.4.55) इति तीयप्रत्ययः सम्प्रसारणञ्च। सर्वमात्रास्ति, न

त्वण्? कस्मान्नास्त्यण्? यस्मात् `ढ्रलोपे' पूरवस्य दीर्घोऽणः' (6.3.111) इत्यत इहाण्ग्रहणमनुवर्त्तते, तत्र च पूर्वेणैव णकारेण प्रत्याहारग्रहणम्, न च तत्र ऋकारः सन्निविष्ट इति भवत्येव प्रत्युदाहरणम्। `तृतीयेति वा' इत्यादि। अथ वा `अण' इत्येतन्निवृत्तमेव। तथाप्यत्र न भवत्येव दीर्घः;
`कर्त्तुकरणयीस्तृतीया' (2.3.18) इति निपातनात्।
`हलः' इत्येतसय त्रयोऽर्थाः सम्भाव्यन्ते, हल उत्तरस्य सम्प्रसारणान्तस्याङग्सय् दीर्घो भवति--अयमेकोऽर्थः, अङ्गवयवाद्धल उत्तरस्य सम्प्रसारणस्य दीर्घो भवति--इति द्वितीयः, तृतीयस्तु वृत्तिकारेणैव दर्शितः। तत्र यदि प्रथमः पक्ष आश्रीयते, तदा निरुतम्, दुरुतमित्यत्रापि स्यात्। भवति ह्येतदपि हल उत्तरं समप्रसारणान्तमङ्गम्। अथ द्वितीयस्तदा विद्धः, विचित इत्यत्रापि स्यात्। अत्राप्याङ्गवयवाद्धल उत्तरं सम्प्रसारणमिति। अथ `विध्यत्यधनुषा' (4.4.83), `ग्रहिज्यावयिव्यधिवष्टिविचति' (6.1.16) इति निर्देशान्न भविष्यति? ततश्च ज्ञापकद्वारेणैवंविधे दीर्घत्वाभावे प्रतिपत्तिगौरवं स्यादेव। तस्मादेतस्यैव दोषस्य परिजिहीर्षया तृतीयोऽर्थो वृत्तिकारेण द्रशितः। अत्रापि देश्यमिदमाशङ्क्यते--ननु चायमर्थोऽस्य सूत्रस्य नोपपद्यत एव, यस्मादङ्गस्येत्येकमङ्गग्रहणं प्रकृतम्। तच्च हलो विशेषणं वा स्यात्, अङ्गस्य कार्यप्रतिपत्त्यर्थं वा। तत्र यदि पूर्वकः पक्ष आश्रीयते तदाङ्गविशिष्ट सम्प्रसारणान्तस्याङ्गस्येति यावद्दीर्घो न लभ्यते। अथ द्वितीयस्तदा हल् विशेषितो न स्यात्। तस्माद्द्वितीयमङ्गग्रहणं कर्त्तव्यं स्यात्। न ह्यॆकेन शक्यमेतदुभयं प्रतिपादयितुम्। अतोऽस्य देश्यस्य निरासायाऽऽवृत्तिन्यायमाश्रित्याह--`अङ्गग्रहणम्' इत्यादि। एकमपि हि वस्त्वावर्त्त्यमानमनेकत्रोपयुज्यते। यथैकं भाजनमसहभुजामनेकेषां भुजिक्रियायाम्, तथेदमङ्गग्रहणमावर्त्त्यते। तत्रानावृत्तेन हल् विशिष्यते, आवृत्तेन त्वङ्गस्य दीर्घत्वं भवतीत्युभयथार्थप्रतिपत्तिर्भवति।।

3. नामि। (6.4.3)

अणग्रहणं सम्प्रसारणग्रहँ दीर्घग्रहणञ्चैतत् त्रयमनुवर्त्तते। कुतः पुनः परकृतमणग्रहणम्? `ढ्रलोपे पूर्वस्य दीर्घोऽणः' (6.3.111) इत्यतः। ननु तत् `इकः काशे' (6.3.123) इतीग्ग्रहणेन व्यवच्छिन्नम्, तत् कथमिहानुवर्त्तते? नैष दोषः, इग्ग्रहणेन ह्यणेव विशिष्यते--अण्णिगिति। ततो विरोधाभावान्नेग्ग्रहणेनाण्ग्रहणं व्यवच्छिद्यते। ननु च यदीग्ग्रहणेनाण्ग्रहणं विशिष्यते, तदा--`अवाचा, स्वराचा' इत्यत्र दीर्घत्वं न स्यात्। `चौ' (6.3.138) इत्त्राण्ग्रहणमेवात्रानुवर्त्तिष्यते, इग्गरहणं तु निवृत्तमित्येषोऽप्यदोषः। अथ वा--यद्यपीग्ग्रहणेनाण्ग्रहणं व्यवच्छिन्नम्, तथापीह मण्डूकप्लुतिन्यायेनानुवर्त्तते।
ननु यथा `शेषे' (4.2.92) इत्येतल्लक्षणं विधिरधिकारश्च, तथा `अङ्गस्य' (6.4.1) इत्येतदपि, ततश्चानेनैव हूतः, जीन इत्यादेः सिद्धत्वादपार्थकं `हलः' इत्येतद्वचनम्। अतो न कर्त्तव्यमेवेति मन्यमान आह--`हल इति किम्' इति। किमर्थं `हलः' इत्येतत् सूत्रमारभ्यत इत्यर्थः। `उत्तः, उतवान्' इति। असत्यस्मिन् सूत्रे सन्प्रसारणान्तस्याङ्गस्य दीर्घो भवतीत्युच्यमान इहापि दीर्घत्वं स्यात्। भवति ह्येतदपि व्यपदेशिवद्भावेन सम्परसारणान्तमङ्गम्, तस्मात् `हलः' इति सूत्रं कर्त्तव्यम्। `विद्धः, विचितः' इति। `व्यघ ताडने' (धा.पा.1181) `व्यच व्याजीकरणे' (धा.पा.1293) निष्ठा, ग्रह्यादिसूत्रेण (6.1.16) सम्प्रसारणम्। सम्प्रसारणान्तस्याङ्गस्य ग्रहणादिह न भवति दीर्घः। यद्यपि `विध्यत्यधनुषा' (4.4.83) `ग्रहिज्यावयिव्यधिवष्टिविचति' (6.1.16) इति निर्देशात् हलन्तस्य यत् सम्प्रसारणं तस्य दीर्घो न भविष्यतीति विज्ञायते, तथापि ज्ञापकद्वारेणास्मिन्नर्थे प्रतिपाद्यमाने प्रतिपत्तिगौरवं स्यादित्येतत्परिहारार्थं सम्प्रसारणान्तस्येत्युक्तम्। `तृतीयः' इति। `द्वेस्तीयः' (5.2.54) इति `त्रेः सम्प्रसारणञ्च' (5.4.55) इति तीयप्रत्ययः सम्प्रसारणञ्च। सर्वमात्रास्ति, न
त्वण्? कसमान्नास्त्यण्? यस्मात् `ढ्रलोपे' पूर्वस्य दीर्घोऽणः' (6.3.111) इत्यत इहाण्ग्रहणमनुवर्त्तते, तत्र च पुर्वेणैव णकारेण प्रत्याहारग्रहणम्, न च ततर ऋकारः सन्निविष्ट इति भवत्येव प्रत्युदाहरणम्। `तृतीयेति वा' इत्यादि। अथ वा `अण' इत्यतन्निवृत्तमेव। तथाप्यत्र न भवत्येव दीर्घः;
`कर्त्तुकरणयोस्तृतीया' (2.3.18) इति निपातनात्।
`हलः' इत्येतस्य त्रयोऽर्थाः सम्भाव्यन्ते। हल उत्तरस्य सम्प्रसारणान्तस्याङ्गस्य दीर्घो भवति--अयमेकोऽर्थः, अङ्गावयवाद्धल उत्तरस्य सम्प्रसारणस्य दीर्घो भवति--इति द्वितीयः, तृतीयसतु वृत्तिकारेणैव दर्शितः। तत्र यदि प्रथमः पक्ष आश्रीयते, तदा निरुतम्, दुरुतमित्यत्रापि स्यात्। भवति ह्येतदपि हल उत्तरं सम्प्रसारणान्तमङ्गम्। अथ द्वितीयस्तदा विद्धः, विचित इत्यत्रापि स्यात्। अत्राप्याङ्गावयवाद्धल उत्तरं सम्प्रसारणमिति। अथ `विध्यत्यधनुषा' (4.4.83), `ग्रहिज्यावयिव्यधिवष्टिविचति' (6.1.16) इति निर्देशान्न भविष्यति? ततश्च ज्ञापकद्वारेणैवंविधे दीर्घत्वाभावे प्रतिपत्तिगौरवं स्यादेव। तस्मादेतस्यैव दोषस्य परिजिहीर्षया तृतीयोऽर्थो वृत्तिकारेण दर्शितः। अत्रापि देश्यमिदमाशङ्क्यते--ननु चायमर्थोऽस्य सूत्रस्य नोपपद्यत एव, यस्मादङ्गस्येत्येकमङ्गग्रहणं प्रकृतम्। तच्च हलो विशेषणं वा स्यात्, अङ्गस्य कार्यप्रतिपत्त्यर्थं वा। तत्र यदि पूर्वकः पक्ष आश्रीयते तदाङ्गविशिष्टस्य सम्प्रसारणान्तस्याङ्गस्येति यावद्दीर्घो न लभ्यते। अथ द्वितीयस्तदा हल् विशेषितो न स्यात्। तस्माद्द्वितीयमङ्गगरहणं कर्त्तव्यं स्यात्। न ह्येकेन शक्यमेतदुभयं प्रतिपादयितुम्। अतोऽस्य देश्यस्य निरासायाऽऽवृत्तिन्यायमाश्रित्याह--`अङ्गग्रहणम्' इत्यादि। एकमपि हि वस्त्वावर्त्त्यमानमनेकत्रोपयुज्यते। यथैकं भाजनमसहभुजामनेकेषां भुजिक्रियायाम्, तथेदमङ्गग्रहणमावर्त्त्यते। तत्रानावृत्तेन हल् विशिष्यते, आवृत्तेन त्वङ्गसय दीर्घत्वं भवतीत्युभयथार्थप्रतिपत्तिर्भवति।।

3. नामि। (6.4.3)

अङ्गाधिकारान्नामि परतोऽङ्गस्य दीर्घो विधीयते। अङ्गञ्च प्रत्यये परतो भवति। न चेह शास्त्रे क्वाचिन्नाम्प्रत्ययो विहितः, ततो न ज्ञायते--नामीति कस्येदं ग्रहणमिति? अतस्तत्परिज्ञानार्थमाह--`नामीति षष्ठीबहुवचनम्' इत्यादि। आगतः प्राप्तो नुड् येन तदागतनुट्कम्। अथ वा आगतः= प्राप्तो नुड् यतर तदागतनुट्कम्। `कर्तृणम्' इति। कथं पुनरत्र दीर्घत्वम्, यावताऽण्ग्रहणमत्रानुवर्त्तते? अत माह--`अण इत्येतन्निवृत्तम्' इति। `न तिसृचतसृ' (6.4.4) इति तुसृचतस्रोर्दीर्घत्वप्रतिषेधादीत्यभिप्रायः।
`उत्तरार्थम्' इति। `नोपधायाः' (6.4.7) इति। अत्र नामि परतो नोपधाया दीर्घत्वं यथा स्यात्, आमि मा भूदिति--एवमर्थमागतनुट्कग्रहणम्। तेन वर्मणामित्यत्र दीर्घो न भवति। कृते च नुटु दीर्घत्वप्रतिपत्त्यर्थमित्यागतनुट्कस्य ग्रहणमिति परकृतेन सम्बन्धः। `अन्यथा हि' इत्यादि। अन्यथा यद्यागतनुट्कस्यामो ग्रहणं न क्रियते तदा नुट आम्भक्तत्वादाम्ग्रहणेन ग्रहणे कृते सति नुटि दीर्घत्वेन भवितव्यम्, अकृतेऽपि। ततश्च कृताकृतप्रसङ्गो यो विधिःस नित्य इति नित्यत्वात् परमपि नुटं बाधित्वा दीर्घत्वमेव स्यात्। एवञ्च सति ह्रस्वान्तमङ्गं न भवतीति नुडेव न स्यात्। ननु न नुडु ह्रस्वान्ताद्विधीयते, न च नित्यत्वाद्दीर्घत्वे कृते ह्रस्वान्तमङ्गमास्ति, तत्र वचनसामर्थ्याद्भूतपूर्वगतिर्भविष्यति, भूतपूर्वगत्या ह्रस्वान्तादङ्गादुत्तरस्यामो नुङ्भवतीति, न च शक्यते वक्तुम्; तिसृणाम्, चतसृणामित्यत्र `न तिसृचतसृ' (6.4.4) इति प्रतिषेधात्। ह्रस्ववचनं सावकाशमिति। यस्मात् `ह्रस्वनद्यापो नुट्' (7.1.54) इत्यतर--`त्रेस्त्रयः' (6.3.48) इत्यतस्त्रिग्रहणमनुवर्त्तते, तेन त्रिग्रहणानुवृत्तेरेव स्थानिवद्भवेन तिसृणामित्यत्र नुङ्भविष्यतिि। तथा चतसृणामित्यत्रापि `षट् चतुर्भ्यश्च' (7.1.55) इत्यनेन स्थानिवद्भावादिति। नापि शक्यते वक्तुम्--नृणामित्यत्र `नृ च' (6.4.6) इति पक्षे दीर्घत्वाभावात् ह्रस्ववचनस्य सावकाशत्वमिति। न ह्येकमुदाहरणं प्रति ह्रस्ववचनं प्रयोजयति। यदि ह्येतावत् प्रयोजनं स्यात् `नृनद्यापो नुट्' इत्येवं ब्रूयात्। तदेवं ह्रस्ववचनमनवकाशम्। अतः कृतेऽपि दीर्घत्वे अग्नीनामित्यादौ भूतपूर्वगत्या नुङ् भविष्यति; ह्रस्वग्रहणसामर्थ्यात्। तस्मादयुक्तमिदमुक्तम्--अन्यथा हि नुडेव न स्यादिति।
एवं तर्ह्यन्यथा व्याख्यायते वृत्तिग्रन्थे--`आगतनुट्कस्य ग्रहणमुत्तरार्थम्' इत्युक्ते चोदक आह--`कृते च नुटि' इत्यादि। कस्मान्न भवतीति वाक्यशेषः। कृते च नुटि दीर्घस्य प्रतिपतिर्यथा स्यादित्येवमर्थमागतनुट्कस्य ग्रहणं कस्मान्न भवतीति। युक्तं चैतत्, तथधा हि यद्यागतनुट्कस्य ग्रहणं न स्यात् ततो नित्यत्वाद्दीर्घत्वे कृते ह्रस्वाभावादग्नीनामित्यादौ नुड् न स्यात्। सनुट्कस्य ग्रहणे तु भवतीत्येवं चादकेनोक्ते सतीदमाह--`अन्यथा हि' इत्यादि। हिशब्दोऽयमपिशब्दार्थे वर्त्तते। नशब्दोऽपि नन्वित्यर्थे वर्त्तते। अनेकार्थत्वा न्नेपातानाम्। एवकारो भिन्नक्रमः, स्यादित्यस्यानन्तरं द्रष्टव्यः। तदयमत्रार्थः--अन्यथापि ननु नुट् स्यादेव, न केवलं सनुट्कसय ग्रहणे सत्यग्नीनामित्यादौ नुङ् भवति, अपि त्वन्यथाप्यनागतनुट्कस्यापि ग्रहणे नुट् स्यादेवेति। अथ किमर्थमागतनुट्कसय ग्रहणम्, `आमि दीर्घः' इत्येव नोच्येत? अस्मिन् पर्यनुयोगे सति `नामि दीर्घः' इत्यादेः श्लोकस्योपन्यासः। योऽयं नामि दीर्घ उक्तः स यद्यामि भवेदामीत्येवं सूत्रप्रणयने सति कृताकृतप्रसङ्गित्वेन नित्यत्वात् परमपि नुटं बाधित्वा दीर्घत्वमेव स्यात्, ततश्च नुङ् न स्यादेव, अह्रस्वान्तत्वादङ्गस्य? नैष दोषः; `वचनात्' इति। वचनान्नुडु भविष्यति। यदि दीर्घत्वे नुड् न स्यात्, तदा `ह्रस्वनद्यापो नुट्' (7.1.54) इत्यत्र ह्रस्ववचनमनर्थकं स्यात्; अनवकाशत्वात्। तस्माद् ह्रस्ववचनसामर्थ्यादसति साम्प्रतिके ह्रस्वान्तेऽङ्गे भूतपूर्वगत्या कृतेऽपि दीर्घत्वेऽङ्गस्य नुङ भविष्यति। यत्र तन्नास्तीति तत्र वचनस्यावकाश इति वाक्यशेषः। यत्र दीर्घत्वं नास्ति--तिसृणाम्, चतुसृणामिति तत्र ह्रस्ववचनस्यावकाशः। अतोऽग्नीनामित्यादौ दीर्घत्वे कृते भूतपूर्वगत्या नुडागमो न लक्ष्यते। साम्प्रतिकाभावे हि भूतपूर्वगतिर्भवति। ननु तिसृणामित्यादावपि नैव ह्रस्ववचनस्यावकाशः। अन्यथैवात्र नुटः सिद्धत्वादिति भावः। ह तावत् तिसृणामिति विनापि ह्रसवग्रहणेनानेनैव सूत्रेण नुङ् भविष्यति, त्रिग्रहणानुवृत्तेः। चतसृणामित्यत्र `षट्चतुर्भ्यश्च (7.1.55) इत्यनेनैव नृणामित्यत्र यद्यपि ह्रस्वान्तमङ्गं तथापि नैकमुदाहरणं प्रति ह्रस्ववचनं प्रयोजयति, अन्यथा हि नृग्रहणमेव कुर्यात्, न ह्रस्वग्रहणम्। तस्मन्नास्त्येव ह्रस्ववचनस्यावकाशः। तदेतदपार्थकं मा भूदिति ह्रसववचन सामर्थ्यात् कृतेऽपि नुङ् भवतीतयविचलमेतत्। एवमक्रियमाणेऽपि सनुट्कस्य ग्रहणे दीर्घत्वे कृतेऽपि नुङ भविष्यतीति परमतमाशङ्क्य प्रयोजनान्तरमाह--`नोपधायाश्च' इत्यादि। चशब्दस्तर्ह्यर्थे। एवं तर्हि `नोपधायाः' (6.4.7) इति दीर्घत्वं नामि परभूते या नोपधा तस्या यथा स्यात्--पञ्चानाम्, सप्तानामित्यादौ। अत्र हि `षट्चतुर्भ्यश्च' (7.1.55) इत्यनेन पञ्चनामित्येवमादेर्नान्तादङ्गादामो नुटि कृते नामि परतो नोपधा भवति। यदि पुनः `आमि' इत्येवोच्येत, तदा वर्मणामित्यादावपि दीर्घत्वं प्रसज्येत। सनुट्कस्य ग्रहणे सति न भवति, नुटो लक्षणाभावात्। अत्र हि केवल आमि नोपधा, न तु सनुट्के। तदेवं वर्मणामित्यत्र `नोपधायाः' (6.4.7) इति दीर्घत्वं मा भूदित्येवमर्थं नामीत्युक्तम्।।

4. न तिसृचतसृ। (6.4.4)

`तिसृ, चतसृ' इति `सुपां सुलुक्' (7.1.39) इति षष्ठीद्विवचनस्य लुकं कृत्वा निर्देशः कृतः। `तिसृणाम्, चतसृणाम्' इति। `त्रिचतुरोः स्त्रियां तिसृचतसृ' (7.2.99) इति तिसृचतस्रादेशौ भवतः। ननु चात्र दीर्घत्वस्य प्राप्तिरेव नास्ति। तत् किं प्रतिषेधेनेति? तथा ह्यत्रादेशयोः कृतयोरुभयं प्राप्नोति--नुडागमः, `अचि र ऋतः' (7.2.100) इति रेफादेशश्च, तत्र परत्वाद्रेफादेशे सत्यनजन्तमङ्गं भवति। अजन्तस्य दीर्घत्वेन भवितव्यम्, दीर्घग्रहणेन `अचश्च' (1.2.28) इत्यस्या उपस्थापितत्वादित्यत आह--`इदमेव' इत्यादि। यद्यत्र रेफादेशः स्यादयं प्रतिषेधो न कृतः स्यात्, कृतश्च, तस्मादयं प्रतिषेधो ज्ञापयति--`अचि र ऋतः' (7.2.100) इत्यस्मात् पूर्वविप्रतिषेधेन नुडागमो भवतीति। तेन `नुमचिरऋत ज्वद्भावेभ्यो नुड् भवति पूर्वविप्रतिषेधेन' इत्येतदुक्तं भवति।।

5. छन्दस्युभयथा। (6.4.5)

वेति वक्तव्ये `उभयथा' इति वचनं वैचित्र्यार्थम्।।

6. नृ च। (6.4.6)
`केचिदेतचछन्दसीति नानुवर्त्तयन्ति' इति। त एवं मन्यन्ते--यद्ययं योगश्चन्दस्येव स्यात् `छन्दसि नृ चोभयथा' इत्येकयोगमेव कुर्यात्। चकारो हि तिसृचतस्रोरनुकर्षणार्थः। तत्रैकयोगेनैव सिद्धे पृथग्योगकरणान्निश्चीयते--भाषायामप्येष योग इति।।

7. नोपधायाः। (6.4.7)
अनजन्तार्थ आरम्भः। न इति षष्ठ्येकवचनान्तम्, सौत्रत्वन्निर्देशस्य यकारलोपस्यासिद्धत्वमनाश्रित्य `आद्गुणः' (6.1.87) कृतः। न इति वर्णग्रहणम्, तत्र वर्णग्रहणे सर्वत्र तदन्तविधिं प्रयोजयन्तीति नकारान्तस्याङ्गस्योपधायाः तस्या दीर्घत्वं विज्ञायत इत्याह--`नकारान्तस्याङ्गस्य' इति। `पञ्चानाम्' इति। `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नकारलोपः।।

8. सर्वनामस्थाने चासम्बुद्धो। (6.4.8)
`सामानि' इति। `जस्शोः शिः' (7.1.20) इति शिभावः। `राजनि' इति। सपतम्येकवचनान्तम्। चकारः `नोपधायाः' (6.4.7) इत्यनुकर्षणार्थः। यद्येवम्, `चानुकृष्टं नोत्तरत्रामिसम्बध्यते' (व्या.प.76) इत्येतदनुवृत्तिर्न प्राप्नोति? एवं तर्ह्यतदसन्देहार्थश्चकार इति। असति हि चकारे सर्वनामस्थाने सम्बुद्धावित्युच्यमाने सन्देहः स्यात्--किमयसम्बुद्धावथ सम्बुद्धाविति। यद्येतत् प्रयोजनं स्यात् `असम्बुद्धौ सर्वनामस्थाने' इत्येवं ब्रूयात्। एवं तर्हि वैचित्र्यार्थश्चकारः।।

9. वा षपूर्वस्य निगमे। (6.4.9)
अत्र दीर्घग्रहणेन `अचश्च' (1.2.28) इत्यस्याः परिभाषाया उपस्थाने सत्यच् सन्निधापितः। `नोपधायाः' (6.4.7) इत्यधिकारादुपधापि। `षपूर्वस्य' इति। षः पूर्वो यस्मादिति बहुव्रीहिः। तत्र यद्युपधाऽन्यपदार्थत्वेनाश्रीयेत, `षपूर्वस्य' इत्यस्त्रीलिङ्गेन निर्देशो नोपपद्यते, तस्मादजत्रान्यपदार्थत्वेनाश्रीयत इत्याह--`षपूर्वस्याचः' इत्यादि। `उपधायाः' इत्येतदचः समानाधिकरणं विशेषणम्। ऋभुक्षाणाम्' इति। ऋभृक्षोऽस्यास्तीति द्वितीयैकवचनम्, `पथिमथ्यृभुक्षाणाम्' (7.1.85) इत्यनुवर्त्तमाने `इतोऽत्सर्वनामस्थाने' (7.1.86) इत्यत्त्वम्। पूर्वग्रहणमुत्तरार्थम्। इह तु `वा षो निगमे' इत्येतावत्युच्यमाने षकारात् परस्याचः `नोपधायाः' (6.4.7) इति विकल्पेन दीर्घत्वं लक्ष्यत एव।।

10. सान्तमहतः संयोगस्य। (6.4.10)
सकारेऽकार उच्चारणार्थः। सोन्तोऽस्य स तथोक्तः। `सान्त' इत्यविभक्तिकोऽयं निर्देशः, तत्रोत्पन्नायाः षष्ठ्या लुप्तत्वात्। `सकारान्तस्य संयोगो नकारो महतश्च' इति। तत्रापि नकार इत्यपेक्षते। सकारान्तस्य महतश्चेति द्वे अप्यवयवषष्ठ्यौ, सान्तसंयोगो यो नकारोऽवयवो महच्छब्दस्य च योऽवयव इत्यर्थः। एतेन सान्तसंयोगो महच्छब्दश्चोभयमप्येतन्नकारस्य विशेषणमिति दर्शयति। `तस्योपधायाः' इति। तस्येत्यनेन नकारः प्रत्यवमृश्यते। तस्य नकारस्य सम्बन्धिन्या उपधाया इत्यर्थः। एतैनापि नकार उपधाया विशेषणमित्याचष्टे। कः पुनर्नकारस्योपधायाश्च सम्बन्धः येनासौ तस्येति व्यपदिश्यते? निमित्तनिमित्तिभावः। अन्तयनकारापेक्षया हि पर्वत्वे सत्यन्तनकारात् पूर्वो वर्ण उपधा भवति। तस्मान्नकारो निमित्तम्, उपरधा निमित्तनौ। अथ वा--समीपसमीपिलक्षणः सम्बन्धः, एतेन नकारसमीपवर्त्तिन्या उपधाया इत्यर्थः। `श्रेयान्' इति। प्रशस्योऽयम्, प्रशस्योऽयम्, अनयोरयम्प्रकर्षेण प्रशस्य इति `द्विवचनविभज्योपपदे तरबीयसुनौ' (5.3.57) इतीयसुन्, `प्रशस्यस्य श्रः' (5.3.60) इति श्रादेशः, `प्रकृत्यैकाच्' (6.4.163) इति प्रकृतिवद्भावाट्टिलोपः, `यस्येति च' (6.4.148) इति लोपश्च न भवति। `उगिदचाम्' (7.1.70) इत्यादिना नुम्, हल्ङ्यादि (6.1.68) संयोगान्त (8.2.23) लोपौ। `श्रेयांसि, पयांसि' इति। पूर्ववज्जसः शिभावः `नपुंसकस्य झलचः' (7.1.72) इति नुम्। कथं पुनरत्र नकारात् पूर्वस्योपधात्वम्, यावता `अलोन्त्यात्पूर्व उपधा' (1.1.65) इत्यलां सन्निविष्टानां योऽन्त्योऽल् ततः पूर्वस्योपधासंज्ञा विहिता। न चात्र नकारोऽन्त्यः, किं तर्हि? सकारः? नैष दीषः; अपेक्षितं ह्यन्त्यत्वम्। तत् सकारात् पूर्वे ये वर्णास्तेषां नकारोऽन्त्य इति। ततः पूर्वो वर्ण उपधा भवति। यद्येवम्, तक्षको रक्षक इत्यत्रापि सकारात् पूर्वे ये वर्णास्तेषां ककारोऽन्त्य इति, ततः पूर्वोऽवर्ण उपधा स्यात्, ततश्च `अत उपधायाः, (7.2.116) इति वृद्धिः स्यात्? नैतदस्ति; अङ्गस्य योऽकार उपधा तस्या वृद्धिर्विधीयते। न चात्राकारोऽङ्गस्यीपधा, अतो न भविष्यतीति--एतचचाशक्यं वक्तुम्, अकारस्याङ्गावयवत्वात्। पाचक इत्यादावप्यङ्गावयवत्वादकारोऽङ्गस्योपधेत्युच्यते, तस्मात् प्राप्नोत्येव वृद्धिः? नैष दोषः, `अत उपधायाः' (7.2.116) इत्यत्र हि 'ञ्णिति' (7.2.115) इत्यनुवर्त्तते, तेनोपधा विशिष्यते--ञिति प्रत्यये परतो योपधेति, तत्र `येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या.प.49) इत्येकेन वर्णेन व्यवधानमाश्रोयते, न पुनरनेकेन। तक्षकः, रक्षक इत्यत्रानेकेन वर्णेन व्यवधानम् अतो न भवति वृद्धिप्रसङ्गः।
इह तु सूत्रेन सर्वनामस्थानेनोपधा विशिष्यते, किं तर्हि? संयोगः--तेन सर्वनामस्थाने परतो यः संयोग इति। तेन यत्र संयोगादनन्तरं सर्वनामस्थानं तत्र

यद्युपधायाः सर्वनामस्थानस्य चानेकवर्णकृतं व्यवधानम्, तथापि दीर्घत्वं भवत्येव। अत एव सर्वनामस्थानं तत्र यद्युपधायाः सर्वनामस्थानस्य चानेकवर्णकृतं व्यवधानम्, तथापि दीर्घत्वं भवत्येव। अत एव सर्वनामस्थानेन संयोगसय विशेषणात् हंसौ, हंसा इत्यत्र दीर्घत्वं न भवति। न ह्यत्र संयोगादनन्तरं सर्वनामस्थानमस्ति, अकारेण व्यवधानात्। अथेह कस्मान्न भवति--हंसमाचष्ट इति, `तदाचष्टे' (वा.201) इति णिच् णाविष्ठवत् कार्यं प्रातिपदिकस्य (वा.813) इति टिलोपः, हंसयतेः क्विप्--हन्, हंसौ हंस इति? `वा षपूर्वस्य निगमे' (6.4.9) इत्यतो वाग्रहणानुवृत्तेः। न चैवं सति सर्वत्र विकल्पप्रसङ्गः; व्यवस्थितविभाषात्वात्। एतेन `हिसि हिंसायाम्' (धा.पा.1829) इत्यस्य क्विबन्तस्य सुहिन् सुहिंसौ सुहिंस इत्यत्र दीर्घत्वाभावो वेदितव्यः।
यस्त्वाह--`इदितो नुम् धातोः' (7.1.58) इत्यनेन नित्यो नुम्; नुम्विधावुपदेशिवद्वचनात्, ततो नुमः पृथक्सिद्धत्वं नास्ति, अत्र तु सिद्धानां सम्बन्धः समवायो भवति, न तु संयोगः। तेन संयोगाभावादिह दीर्घत्वं न भवति तन्मतेन संयोगान्तलोपोऽपि सुहन्नित्यत्र न स्यात्। नेह वैशेषिकशास्त्रप्रसिद्धोऽयं संयोगो गृह्यते अपि तु `हलोऽन्तराः संयोगः' (1.1.7) इति हलान्नैरन्तर्यलक्षण इह शास्त्रे प्रसिद्धः संयोग एव। स चेहास्त्येवेत्यसारः परिहारः। `महान्' इति। `वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' (द.उ.6.5) इति निपातनसूत्रेण शतृवदित्यतिदेशादुगित्कार्यं नुम्। सान्तमहत इति किम्? बृहन्ति।।

11. अप्तृन्तृच्स्वसृनप्तृनेष्ट्ट्क्षत्तृहोतृपोतृप्रशास्तृणाम्। (6.4.11)
`आपः' इति। अप्शब्दस्य बहुत्वादेकवचनद्विवचने न सम्भवत इति बहुवचनमुपन्यस्तम्। `बह्वाम्पि' इति। बहव आप एष्विति बहुव्रीहिः। तदन्तविधेरिष्टत्वात् तदन्तस्यापि दीर्घत्वं भवति। तथा हि `येन विधिस्तदन्तस्य' (1.1.72) इत्यत्र सूत्रे `कानि पुनरत्र प्रयोजनानि' इति प्रश्ने इदमुक्तं प्रयोजनम्--महदपस्वसृनप्तृनेष्टृत्वष्टृ इति। कथं पुनरिष्यमाणोऽपि तदन्तविधिर्लभ्यते यावता `ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते' (व्या.पा.89)? नैष दोषः; `सर्वनामस्थाने चासम्बृद्धौ' (6.4.8) इत्यतश्चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः। तेन तदन्तस्यापि दीर्घत्वं भविष्यति। `केचित्' इति वचनात् केचिन्नेच्छन्तीत्युक्तम्। तन्मतेन बह्वम्पीत्येवं भवति। कस्मात् पुनरत्र `ऋक्पूरब्धूःपथामानक्षे' (5.4.74) इत्यनेनाकारः समासान्तो न क्रियते? इत्याह--`तत्र समासान्तो विधिरनित्यः' इत्यादि। इयञ्च परिभाषा `स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनाम नाम च' (6.2.187) इत्यत्राध्वग्रहणेन ज्ञापिता। यथाध्वग्रहणं ज्ञापकं तथा तत्रैदोक्तम्। नन्वेवमपि बह्वाम्पीति नैव सम्भवति, तथा हि--बह्वप्+शि इति स्थितेऽनेन दीर्घत्वं प्राप्नोति, `नपुसकस्य झलचः' (7.1.72) इति नुम् च, तत्र कृतकृतप्रङ्गित्वेन नित्यत्वात् परत्वाच्च नुम् कर्त्तव्यः, तस्मिन् कृत उपधाया अदीर्घभाविनीत्वाद्दीर्घत्वं न प्राप्नोति? इत्यत आह--`नित्यमपि च' इत्यादि। नित्यमपीत्यपिशब्दात् परमपि। कथं पुनरिष्यमाणं नुममकृत्वा दीर्घत्वं लक्ष्यते? `वा षपूर्वस्य निगमे' (6.4.9) इत्यतः पूर्वग्रहणानुवृत्तेः। तस्यैतदेव प्रयोजनम्--यदन्यत् कार्यं प्राप्नोति तदकृत्वा दीर्घत्वमेव पूर्व कर्त्तव्यमिति।
अन्यस्त्वाह--`नपुंसकस्य झलचः' (7.1.72) इति नुम् विधीयते, नपुंसकञ्चार्थधर्मः, अर्थे च शब्दानुशासनेऽस्मिन् कार्याभावान्नपुंसकामिधायी शब्दो नुम्विधावाश्रयणीयः। तञ्च शब्दं ग्रहीतुं प्रयोगोऽनुगमनीय इति नुमो बहिरङ्गत्वम्। अयं तु दीर्घः साक्षादप्शब्दमुच्चार्य विधीयमानो यथोच्चारितस्यैव क्रियमाणोऽल्पाश्रयत्वादन्तरङ्ग इति पूर्वं दीर्घः प्रवर्त्तते, पश्चान्नुमिति। एतच्चायुक्तम्, अनेन हि न्यायेन बह्वाम्पीति न सिध्येत्। एवदपि कैश्चिदिष्यते--अस्य च न्यायस्य साधारणत्वादिहापि पर्वमेव दीर्घत्वेन भवितव्यम्, पश्चान्नुमा। पूर्वस्मिंस्तु परिहारे न दोषः। ये हि बह्वम्पीतीच्छन्ति ते पूर्वग्रहणमिह नानुवर्त्तयन्ति।
`कर्त्तारः' इति। तच्छीलादावर्थे तृन्निति `ऋतो ङिसर्वनामस्थानयोः' (7.3.110) इति गुणः। `जनापवादान्' इति। द्वितीयान्तस्यानुप्रयोगस्तृन्नन्ततां दर्शयितुम्। तृनो हि प्रयोगे `न लोकाव्ययनिष्ठा' (2.3.69) इत्यादिना षष्ठ्यां प्रतिषिद्धायाम्, द्वितीयैव भवति। एकवचनं नोदाहृतम्। तत्र `ऋदुशनस्पुरुदंशोऽनेहसाञ्च' (7.1.94) इत्यनङादेशे कृते `नोपधायाः' (6.4.7) `सर्वनामस्थाने च' (6.4.8) इत्यादिना दीर्घस्य सिद्धत्वात्। `कटस्य' इति षष्ठ्यन्तस्यानुप्रयोगस्तृचोऽभिव्यक्तये। तस्य प्रयोगे कर्मणि षष्ठी भवति `कर्तृ कर्मणोः कृति' (2.3.65) इत्यनेन। अथ यथा `तुरिष्ठेमेयस्सु' (6.4.154) इत्यत्र तुरिति तृंस्तृचोर्यत् समानं रूपं तस्यैव ग्रहणं कृतम्, न तु तयोर्भेदेन, ततेहापि किमर्थं न कृताम्? `अर्वणस्त्रसावनञः' (6.4.127) इत्यर्वादेशस्य तृशब्दस्य ग्रहणं मा भूदित्येवमर्थमिति चेत्, नैतत् प्रयोजनम्; अर्थवद्ग्रहणपरिभाषयैव (व्या.प.1) हि तस्य ग्रहणं न भविष्यति। एवं तृंस्तृचोर्भेदेनोपादानमस्याः परिभाषाया अनित्यत्वज्ञापनार्थम्। तेन `अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च प्रयोजयन्ति' (व्या.प.129) इत्युपपन्नं भवति। अथ वा--`सामान्यनिर्देशे क्वचिद्विशेष एव गृह्यते' इति ज्ञापनार्थम्। तेन `न कोपधायाः' (6.3.37) इत्यत्र सामान्योक्तावपि तद्धितवुसम्बन्ध्येव ककारो गृह्यते, न ककारमात्रम्।
अथ नप्त्रादीनां ग्रहणं किमर्थम्, यावता ते हि केचित् तृजन्ता व्युत्पाद्यन्ते केचित् तृन्नन्ताः। तत्र तृस्तृज्ग्रहणेनैव सिदधम्? इत्याह--`नप्त्रादीनाम्' इत्यादि। केचिदार्या नप्त्रादीन्यक्ष्युत्पन्नानि प्रातिपदिकानीच्छन्ति, केचिद्व्युत्पन्नानि। तत्रैषा व्युत्पत्तिः--नप्त्रिति नमेस्तृचि मकारस्य पकारो निपात्यते। नेष्ट्रिति--नयतेस्तृचि षुक् च। त्वष्ट्रिति--त्विषेस्तत्रैवाकार उप(धाया अनिट्त्वञ्च। क्षित्रिति--क्षदेस्तृच्। होतृपोत्रिति-जुहोतेः पुनातेश्च स एव। प्रशास्त्रिति--शासेः [तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ--पं.उ.2.94] प्रपूर्वाच्छसिक्षदादिभ्यः संज्ञायां चानिट्त्वञ्चेति तृन्ननिट्त्वञ्च। तत्राव्युत्पत्तिपक्ष एषां तृन्तृजन्तत्वाभावात् तृंस्तृज्ग्रहणेन ग्रहणं न भवतीति विध्यर्थ पृथगुपादानम्। व्युत्पत्तिपक्षे तु तृंस्तृजन्तादेव सिद्धे नियमार्थम्--एषामेव संज्ञाशब्दानां यथा स्यात्, अन्ये य एवम्भूताः संज्ञाशब्दास्तेषां मा भूदिति। तेन मातरौ मातरः इत्यादौ न भवति। अथ प्रशास्तृणामित्यत्र केन णत्वम्, `रषाभ्याम्' (8.4.1) इत्यादिनेति चेत्? न; यस्मात् `रषाभ्याम्' इत्युच्यते, न चात्र रषौ स्तः। एवं तर्ह्येष निर्देशी ज्ञापयति--यतो विहितं णत्वं ततोऽन्यत्रापि भवतीति। तेन

मातृणाम् पितृणाम्, ग्रामणीः अग्रणोरित्यादौ णत्वं सिद्धं भवति। ततश्च रषाभ्यां णत्वे `ऋवर्णाच्चचेति वक्तव्यम्' (वा.946) न वक्तव्यं भवति।।

12. इन्हन्पूषार्यम्णां शौ। (6.4.12)

`अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' (व्या.प.129) इतीन्ग्रहणेन तदन्तं गृह्यते। इतरेभ्योऽपि केवलेभ्यः शिनं भवतीति। तथा हि--हन्निति हन्तेः क्विबन्तस्येदं ग्रहणम्, न च केवलस्य हन्तेः क्विब्दृश्यते। इतरौ तु पुंल्लिङ्गौ। नपुंसकादुत्तरयोः जस्शसोः शिर्विधीयते। तस्मात् तैरपि सामर्थात्तदन्तविधिर्विज्ञायत इत्याह--`इन्, हन्, पूषन्, अर्यमन् इत्येवमन्तानामङ्गानाम्' इति। `बहुदण्डीनि' इति। दण्ड एषामस्तीति मत्वर्थीय इनिः, बहवो दण्डिनः एषां सन्तीति बहुव्रीहिः, ततो जश्शसौ, तयोश्च पूर्ववच्छिभावः, अनेन दीर्घत्वम्। ननु चेन्निति प्रत्ययग्रहणम्, तत्र `प्रत्ययग्रहणे यस्मात् स विहितस्तदादेसतदन्तस्य च ग्रहणं भवति' (भो.प.सू.7) इति दण्डिनीत्यत्रैव दीर्घत्वेन भवितव्यम्, न तु बहुदण्डीनीत्यत्र? नेतदस्ति; यत्र हि प्रत्यस्यैव ग्रहणं तत्रैवेयं परिभाषा, नेदं प्रत्ययस्यैव ग्रहणम्, अपि तु प्रस्ययाप्रत्यययोः; अन्यथा वाच एषां सन्तीति `वाचो ग्मिनः' (5.2.124) वाग्मीनि, स्रज एषां सन्तीति `अस्मायामेधास्रजो विनिः' (5.2.121) `स्रग्विणीत्येवमादौ न स्यात्। तस्मान्नात्रासौ परिभाषोपतिष्ठते। `बहुबृत्रहाणि' इति। बृत्रं हतवन्तः `ब्रहमभ्रुणवृत्रेषु क्विप्' (3.2.87) बहवो वृत्रहणो येषु तानि बहुवृत्रहाणि। `प्रातपदिकान्तनुम्विभाक्तिषु च (8.4.11) इति णत्वम्। बहवः पूषणो येषु तानिबहुपूषाणि। बहवोऽर्यमणो येषु तानि बह्वर्यमाणि।

ननु `सर्वनामस्थाने चासम्बुद्धौ' (6.4.8) इत्यनेन दीर्घत्वं सिद्धम्, तत् किमर्थोऽयमारम्भः? इत्यत आह--`सिद्धे सत्यारम्भः' इत्यादि।

युक्तोऽसय नियमार्थः आरम्भः, किन्त्वारभ्यमाणेऽप्येतस्मिन् नियमर्थे भ्रूणहनीत्यत्र `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इति दीर्घत्वं प्राप्नोत्येव, तथा ह्ययं शौ सर्वनामस्थाने नियम आरभ्यते। अत्र यथा विशिष्टायाः प्रकृतेर्नियम आरभ्यमाणः प्रकृत्यन्तरस्य न भवति--प्रतामौ, प्रताम इति, तथा सर्वनामसंज्ञाविशिष्टे शित्प्रत्यय आरभ्यमाणः सर्वनामस्थान एव स्यात्, अन्यत्र न स्यात्; तुल्यजातीयापेक्षत्वान्नियमस्य। ततश्चासरवनामस्थाने नियमाभावाद्दीर्घत्वं स्यादेवेत्यत आह--`दीर्घविधिः' इत्यादि श्लोकम्। य इह शास्त्र इन्नन्तादीनां दीर्घत्विवधानं तं विनियम्य तस्य नियमं कृत्वा। कव विनियम्य? सुटि। सर्वनामस्थानोपलक्षणमेतत् सङ्ग्रहणम्। सर्वनामस्थान इत्यर्थः। ततः किं कुर्यात्? इत्यत आह--`शौ नियमम्' इत्यादि। सर्वनामस्थाने नियमं कृत्वा पुनः शौ नियमं कुर्यात्। एवकारोऽवधारणार्थः, स तु भिन्नक्रमः, विदध्यादित्यस्यानन्तरं द्रष्टव्यः सुविद्वान्=सुपण्डितः। कथं पुनरेकेन योगेन द्वौ नियमौ शक्येते कर्त्तुम्? एवं मन्यते--इमं योगं विभज्य द्वौ योगौ कर्त्तव्याविति। `इन्हन्पूषार्यम्णाम्' इत्येको योगः, ततः `शौ' इति द्वितीयः। सर्वनामग्रहणं चात्रानुवर्त्तते। तत्र पूर्वयोगः--दर्घविधिर्य इहेन्प्रभृतीनां तं विधिं विनियम्य सुटीत्यनेन दर्शितः। द्वितीयस्तु `शौ नियमं पुनरेव विदध्यात्' इत्यनेन। तत्र पूर्वेण योगेन दीर्घत्वं भवेत्। `सर्वनामस्थाने चासम्बुद्धौ' (6.4.8) इत्यनेन `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इत्यनेन वा दीर्घत्वं विनियम्यते--इन्प्रभृतीनां सर्वनामस्थान एव दीर्घत्वम्, नान्यत्र। तेन सप्तम्यां दीर्घो न भवति--वृत्रहणि, भ्रूणहनीत्यत्र। द्वितीयेन तु शौ नियम्यते, तत्रापि सर्वनामस्थाने शावेव दीर्घो भवति, नान्यत्रेति। तेन बहुवृत्रहाणीत्यत्र भवति, वृत्रहण इत्यत्र न भवति। एवं योगद्वयेन नियमद्वये क्रियमाणे सति योऽर्थः सम्पद्यते तं दर्शयितुमाह--`भ्रूणहनि' इति। `तथास्य न दुष्येत्' इति। तथैवं योगद्वये कृतेऽस्य पाणिनेः भ्रूणहनीत्येतच्छब्दरूपं नैव दुष्येन्नासिद्धत्वदोषवद्भववतीत्यर्थः। इतिकरणो हेतौ। यस्मादेवं योगद्वयेन नियमद्वये क्रियमाणे भ्रूणहनीत्येतन्न दुष्येत; तस्माद्दीर्घविधिर्य इहेन्प्रभृतीनां तं विनियम्य सुटि शौ नियमं सुविद्वान् पुनर्विदध्यात्। द्वितीयस्त्वितिकरणो भ्रूणहनीत्येतस्य स्वरूपपदार्थकतां द्योतयति।

एवं योगद्वयेन भ्रूणहनीत्यत्र दीर्घत्वं परिहृत्यैकस्मिन् योगे परिहर्त्तुमाह--`शास्मि' इत्यादि। शास्मि=उपदशामि तमपरमुपायम्, येनैकस्मिन् योगे सति भ्रूणहनौ, भ्रूणहन इति न दुष्यति। नापि भ्रूणहनीत्येतत्। कः पुनरसावुपायः? इत्याह--`निवर्त्त्य' इत्यादि। सुटीत्येकयोगेन सर्वनामस्थानं लक्ष्यते। `सर्वनामस्थाने' इति यदेतत्प्रकृतं तं निवर्त्त्य। `अविशेषे' इति। नास्य विशेषो विद्यत इत्यविशेषः; तस्मिन्नविशेषे=अनाश्रितविशेषे प्रत्ययमात्रे शौ इत्येवं तं नियमं कुरु। एवं वा नियमं कुर्वित्यर्थः। वाशब्दः पक्षान्तरत्वमस्य परीहारस्य द्योतयति। अपिशब्दो भ्रूणहनीत्यत्रापि पक्षान्तर आश्रीयमाणे न दुष्यति? शावेव दीर्घत्वस्य नियतत्वात्। इन्प्रभृतोनां यदि दीर्घत्वं भवति तदा शावेव प्रत्यये, नान्यत्रेति। निवर्त्त्य सुटीत्यनेन शास्त्रीयस्याधिकारस्य निवृत्तिर्दर्शिता। निवृत्ते तु तस्मिन् यदि लौकिकोऽधिकारोऽपेक्षालक्षण आश्रीयते तदा पूर्ववत् भ्रूणहनीत्यत्र स्यादेव दीर्घत्वम्। अतो लौकिकाधारनिरासायाह--`असमीक्ष्य' इति। सुटीत्यनेनास्य सम्बन्ध-। सर्वनामस्थानमपेक्ष्येत्यरेथः। एवं सर्वनामस्थानग्रहणनिवृत्तेऽनपेक्षिते च प्रत्ययमात्रापेक्षया शावित्ययं नियमः प्रत्ययमात्रं नियमयति, न तु तुल्यजातीयं सर्वनामस्थानमेव। तेन न केवलमन्यत्र सर्वनामस्थाने दीर्घो न भवति, अपि तु भ्रूणहनीत्यत्रापि।

यदि तर्हि प्रत्ययमाश्रित्य सर्वनामस्थानविषयमनपेक्ष्य शौ नियमः, एवं हि सति दीर्घत्वस्य शावेव नियतत्वाद्यथा भ्रूणहनीत्यत्र न भवतिष तथाचारे क्यङ्यपि `अकृत्सार्वधातुकयोर्दीर्घः' (7.4.25) इति दीर्घत्वं न स्यात्, ततश्च भ्रूणहेवाचरतीति `कर्त्तुः क्यङ् सलोपश्च' (3.1.11) इति क्यङि विहिते भ्रूणहयत इत्यनिष्टं रूपमापद्येतेत्यत आह--`दीर्घविधेः' इत्यादि। `नोपधायाः' (6.4.7) इत्यत उपधाग्रहणमनुवर्त्तते, तेन न सर्वस्य दीर्घविधेरयं नियमः, अपि तूपधादीर्घविधेः। न च `अकृत्सार्वधातुकयोः' (7.4.25) इत्युपधादीर्घविधिः, किं तर्हि? अजन्तदीर्घविधिः। तस्मादयमत्र प्रवर्त्तत एव। हन्त! `यि दीर्घविधौ च न दोषः' इति। यकारादौ प्रत्यये क्यङि दोषो न भवतीत्यर्थः। हन्तेति निपातो वचनारम्भेऽभिमुखीकरणे वा वर्त्तते। अन्ये तु `हन्तयि दीर्घविधौ च न दोषः' इति पठन्ति। त एवं व्याचक्षते--हन्तर्यो हन्तियः, `पञ्चमी' (2.1.37) इति योगविभागात्समासः, तस्मिन् हन्तियि। सप्तम्येकवचनमेतत्।

हन्तेर्धातोर्यकारादिर्यः प्रत्य इति। तत्र दीर्घविधौ न दोषः। चकारः पूर्वत्र परीहारे वक्ष्यमाणे च। अत एवोपधानियमाद्धन्तेर्यकारादौ प्रत्यये न दोष

इत्यस्यार्थस्य द्योतनाय।
सम्प्रति सर्वनामस्थानग्रहणेऽनुवर्त्तमाने, असति च योगविभागे भ्रूणहनीत्यत्र यथा दीर्घत्वं न भवति तथा तद्दर्शयितुमाह--`सुट्यपि वा' इत्यादि। वाशब्दोऽत्र पक्षान्तरं द्योतयति। अपिशब्दो भिन्नक्रमः `अप्रकृतप्रतिषेधे' इत्यस्यानन्तरं द्रष्टव्यः। अत्रापि सुटीत्येतत् सर्वनामस्थानोपलक्षणार्थं वेदितव्यम्। नास्य विद्यतेऽवकाशः। व्यावृत्तिविषयो व्यवच्छेद्य इत्यनवकाशः। प्रकृतात् सर्वनामस्थानदन्यदप्रकृतम्। सर्वनासस्थानव्यतिरिक्तं प्रत्ययान्तरमप्रकृतम्, तत्र दीर्घत्वस्य प्रतिषेधोऽप्रकृतप्रतिषेधः। अप्रकृते प्रतिषेधोऽप्रकृतप्रतिषेधः। `सप्तमी' (2.1.40) इति योगविभागात्समासः। `अप्रकृतप्रतिषेधे' इति। विषयसप्तमीयम्। अयं तादत् पूर्वार्धस्यावयवार्थः। समुदायार्थस्तूच्यते--अथ वाऽनुवर्त्तमानेऽपि सर्वनामस्थानग्रहणे तत्र शावित्यस्य नियमस्य किञ्चिद्व्यावर्त्त्यमस्तीत्यनवकाशः सन् सामर्थ्याद कृतप्रतिषेधेऽपि कर्त्तव्यता विषयभूते प्रवर्त्तते=व्याप्रियते। अपिशब्दादन्यत्रापि सर्वनामस्थाने। कथं पुनरवकाशः? इत्याह--`यस्य हि' इत्यादि। यस्येति शावित्यपेक्षया षष्ठी। हिशब्दो यस्मादर्थे। द्विविधं हि सर्वनामस्थानम्--सुट्, शिश्च। तयोः पूर्वं स्त्रीपुंसयोः सम्बन्धि, न नपुंसकस्य; `सुडनपुंसकस्य' (1.1.43) इति वचनात्। इतरत् पुनर्नपुंसकस्य; तत एव तस्य विधानात्। तत्र यत्सम्बन्धिनि शौ सर्वनामस्थाने शावित्ययं नियमः क्रियते, सुटि नैतत्। सुटि सर्वनामस्थाने परतस्तन्नपुंसकं न भवतीत्यर्थः। अनेन सुटः सर्वनामस्थानस्यानपुंसकसम्बन्धित्वमाख्यातम्। तेन न तत्र भवेद्विनियम्यम्। यस्मादेव सुट् सर्वनामस्थानं नपुंसकस्य सम्बन्धि न भवति, तेन कारणेन तत्रानपुंसकसम्बन्धिनि सर्वनामस्थाने शावित्यस्य नियमस्य विनियम्यं व्यावर्त्त्यं नास्तीति नपुंसकसम्बन्धिनि हि क्रियमाणो नियमो युक्तः। अनपुंसकसम्बन्धिन्येवास्मिन् सर्वनामस्थाने तुल्यजातीये निवृत्तिं कुर्यात्। न च शिव्यतिरिक्तं नपुंसकसम्बन्धि सर्वनामस्थानमस्ति, ततो नास्ति तुल्यजातीये व्यावर्त्त्यम्। शौ नियमस्येति तस्यानवकाशत्वम्। तस्मादप्रकृतप्रतिषेधेऽपि व्याप्रियते। `हन्तेरनुनासिकस्य' इत्यादिना कारिकात्रयस्यापि यथाप्रधानमर्थमाचष्टे। तत्र हन्तेरनुनासिकस्येत्यादिना `भ्रूणहनीति तथास्य न दुष्येत्' इत्यस्यार्थ आख्यातः। `योगविभागः' इत्यादिना `दीर्घविधिर्य इहेन्प्रभृतीनां तं विनियम्य सुटि' इत्यस्य। `ततः' इत्यादिना `शौ नियमं पुनरेव विदध्यात्' इत्यस्य। `सर्वनामस्थान' इत्यादिना द्वितीयश्लोकपूर्वार्धस्य। `यस्तु' इत्यादिनोत्तरार्धस्य।
`अथ वा' इत्यादिना `सुट्यपि वा प्रकृतेरनवकाशः' इत्यस्य। `सामर्थ्यात्' इति। सामर्थ्याम्=अनवकाशत्वम्। `अविशेषेण नियमः' इत्यनेन `शौ नियमोऽप्रकृतप्रतिषेधे' इत्यसय। अविशेषेणेति सामान्येन, न प्रकृत एव, अपि तु प्रत्ययमात्र इत्यर्थः। यस्त्वप्रकृतपरतिषेधारथतामेवास्य नियमस्य व्याचष्टे तस्यैव तद्वचनमविशेषेणेत्यनेन वृत्तिकारवचनेन विरुध्यते। एवं ह्यविशेषेण नियमो भवति यदि सर्वत्र प्रकृते चाप्रकृते च प्रत्ययमात्रे भवति। अथ तु प्रकृतं परितयज्याप्रकृत एव स्यात् ततो विशेषेणैव स्यात्, नाविशेषेण। अविशेषेण वास्मिन्नियमे सत्यनेनैव सर्वत्र दीर्घत्वस्य निवर्त्तितत्वात् `सौ च' (6.4.13) इत्ययं योगो विध्यर्थो वेदितव्यः। सामर्थ्यादविशेषेण नियम इत्युक्तम्। अतस्तत्सामर्थ्यं दर्शयन् `शिशब्दे हि' इत्यादिना `यस्य हि शौ नियमः' इत्यस्यार्थमाचष्टे। यत्र शिशब्दे नियमः क्रियते स यस्मान्नपुंसकस्य सर्वनामस्थानं न स्त्रीपुंसयोः; नपुंसकादुत्तरयोर्जश्शसोः व्यादेशस्य विधानात्। `न च तस्यान्यत् सर्वनामस्थानमस्ति' इति। अनेन सुटः सर्वनामस्थानस्य नपुंसकसम्बन्धित्वं दर्शयति। इतिकरणो हेतौ। यत एवं नियमो विधीयते नपुंसकसम्बन्धिनि शौ सर्वनामस्थाने तज्जातीयमन्यत् सर्वनामस्थानं हि नास्ति। तस्मात् तुल्यजातीयव्यवचछेद्यस्यासम्भवादविशेषेम नियमः।
`तत्र तु' इत्यादि। तुशब्दोऽवधारणार्थो भिन्नक्रमश्च नेत्यस्यानन्तरं द्रष्टव्यः। तत्रैतस्मिन्नियमे क्रियमाण इन्नादीनां नपुंसकस्येत्येतद्विशेषणं नैवाश्रीयते। अनाश्रीयमाणे च तस्मिन्नेषोऽर्थः सम्पद्यते--इन्नादीनां शावेव दीर्घो भवति, नान्यत्रेति। तेनानपुंसकस्यापि भ्रूणहनीत्यत्र नियमेन व्यावर्त्तितत्वाद्दीर्घो न भवति। यदि नपुंसकस्येत्येतद्विशेषमं तेषामाश्रीयते, ततोऽयमर्थः स्यात्--इन्प्रभृतीनां नपुंसकानां शावेव दीर्घो भवति, नान्यत्रेति। ततश्च नपुंसक एव नियमः स्यात्। तत्र को दोषः? भ्रूणहनि ब्राह्मणकुले इत्यत्रैव दीर्घनिवृत्तिः स्यात्, भ्रूणहनि ब्राह्मणे इत्यत्र न स्यात्। तस्मात् तद्दोषपरिजिहीर्षया नपुंसकस्येत्येतद्विशेषणं नाश्रीयते। यद्येवम्, यदुक्तम्--`अनवकाशः शौ नियमः' इति, तन्नोपपद्यते, अनाश्रिते ह्येतस्मिन् विशेषणे तेषामनाश्रितविशेषणानां नपुंसकानामनपुंसकाताञ्च सम्बन्धिनि शौ सर्वनामस्थाने नियमः स्यात्, तथाभूतानाञ्च तेषामन्यदपि सुट्सर्वनामस्थानमस्त्येव, ततश्च तुल्यजातीयवयवच्छेदविषये सति कुतो नियमस्यानवकाशत्वम्? नैतदस्ति; नियमविधानवेलायां तेषां नपुंसकत्वं विशेषणं यद्यपि नाश्रीयते, तथापि तेषां नपुंसकादेव शेर्विधानान्नपुंसकस्य निमित्तभावः, शेस्तु निमित्तिभाव इति निमित्तनिमित्तिभावलक्षणेन सम्बन्धेन शेः सर्वनामस्थानस्य नपुंसकसम्बन्धित्वं विद्यत एव। न चान्यन्नपुंसकसम्बन्धि सरवनामस्थानं विद्यत इत्युपपन्नमेतत्--अनवकाशः शौ नियम इति।
ननु चात्र नपुंसकस्येति न प्रकृतम्, नाप्युपात्तम्, ततश्च तदाश्रयणशङ्का नास्त्येवेति तन्निवृत्तये न युक्तमिदम्, तत्र तु `नपुंसकस्य' इत्येतन्नाश्रीयते? इत्यत आह--`सर्वनामस्थानसंज्ञाविधाने तु' इत्यादि। तुशब्दो हेतौ। यतो नपुंसकेनोत्पादितस्य विशब्दस्य `शि सर्वनामस्थानम्' (1.1.42) इति सर्वनामस्थानसंज्ञा विधीयते, तस्मात् सर्वनामस्थानसंज्ञाविधानं प्रति नपुंसकमिति निमित्तभावमापद्यते। तदेवं निमित्तभावोपयमनं नपुंसकस्य सर्वनामस्थानसंज्ञाविधाने व्यापारः। तस्माद्यत्र शिशब्दः सर्वनामस्थानसंज्ञकस्तत्रावश्यं नपुंसकेनोपस्थातव्यम्। इह तु सर्वनामस्थानग्रहणानुवृत्तेः सर्वनामस्थानसंज्ञकस्य शिशब्दस्य ग्रहणम्। ततो नपुंसकं सामर्थ्यात् सन्निहितम्। तेन सम्भाव्यते तदाश्रयणमित्यभिप्रायः।।

13. सौ च। (6.4.13)
पूर्वेण नियमेन सौ दीर्घत्वं न प्राप्नोतीति विध्यर्थोऽयमारम्भः। चकार इन्प्रभृतीनामनुकर्षणार्थः।।

14. अत्वसन्तस्य चाधातोः। (6.4.14)

`अत्र कृते दीर्घत्वे नुमागमः' इति। कथं पुनरेतल्लभ्यते, यावता कृताकृतप्रसङ्गित्वात् परत्वाच्च नुमैव भवितव्यं पूर्वमित्याह--`यदि हि' इत्यादि। इह दीर्घग्रहणेन `अचश्च' (1.2.28) इत्युपस्थापिते सत्यज्लक्षणाया उपधाया दीर्गो विधीयते। यदि च परत्वान्नित्यत्वान्नुम् प्राग्विधीयते, अच उपधात्वं विहन्येत। तस्माद्वचनसामर्थ्याद्दीर्घः प्राग्भवति, ततो नुमागमः। `सुपयाः, सुयक्षाः, `सुस्रोताः' [`सुश्रोताः--काशिका] इति। `असुन्' (द.उ.9.49) इति वर्त्तमाने `पिबतेरिच्च' (द.उ.9.50) [`पिबतेरि च'--द.उ.] इति, `अशेर्देवने युट् च' (द.उ.9.51) [`अशेर्धने'--द.उ.] `स्रुरिभ्यां तुट् च' (द.उ.9.62) [स्त्रीभ्यां--द.उ.] इति--एते यथाक्रममसुन्परत्ययान्ता पयोयशःस्रोतःशब्दा व्युत्पद्यन्ते।
`पिण्डग्रः, चर्मवः' इति। `ग्रसु ग्लसु अदने' (धा.पा.630,631), `वस आच्छादने' (धा.पा.1023), `अन्येभ्योऽपि दृश्यते' (3.2.178) इति क्विप्। ननु चार्थवद्ग्रहणपरिभाषया(व्या.प.1)ऽर्थवानेवासित्ययं गृह्यते, यथा मूलोदाहरणेषु, पयःप्रभृतीनामसुन्प्रतययान्तत्वात् प्रत्ययार्थेनार्थवानसौ, न तथा प्रत्युदाहरणयोः, धातववयवस्तत्र दोर्घत्वस्यापरसङ्गादपार्थकोऽदातोरिति प्रतिषेधः? इत्यत आह--`अनर्थकोऽपि' इत्यादि। कथमेतल्लभ्यते? इत्याह--`अनिनस्मन्ग्रहणानि' इत्यादि। अथेह कथं दीर्घत्वम्--गोमन्तमिच्छति गोमत्यति, `सुपआत्मनः क्यच्' (3.1.8) गोमत्यतेरप्रत्ययो गोमानिति, कथञ्च न स्यात्? अधातोरिति प्रतिषेधात् अस्य `सनाद्यन्ता धातवः' (3.1.32) इति धातुत्वात्? नैतदस्ति; `अधातोः' इति प्रतिषेध आनन्तर्य्यादनन्तरस्यैव, नान्तरस्य। अथ वा चकारोऽत्र क्रियते, स चानुक्तसमुच्चयार्थः, तेनेह धातोरपि भविष्यते। अथान्तग्रहणं किमर्थम्, यावता `अङ्गस्य' (6.4.1) इत्यनुवर्त्तते, तत्र गृह्यमाणेनातुशब्देनासशब्देन च प्रकृतेऽङ्गे विशिष्यमाणे विशेषणेन च तदन्तविधिर्भवतीत्यन्तरोप्यन्तग्रहणं तदन्तस्यैव दीर्घत्वं भविष्यति? इत्यत आह--`अन्तग्रहणम्' इत्यादि। उपेशः=लक्षमदाक्यानि, गणपाठः, प्रातिपदिकपाठ। प्रयुज्यत इति प्रयोगः, कर्मणि घञ्। उपदेशे प्रयोग उपदेशप्रयोग इति। `सप्तमो' (2.1.40) इति योगविभागात् समासः। तदयमस्य वाक्यस्यार्थः--उपदेशे प्रयुज्यते यच्छब्दरूपं तदेकदेशस्याप्यत्वन्तस्य परिग्रहो यथास्या दित्येवमर्थमन्तग्रहणमिति। कस्य पुनरसत्यन्तग्रहण उपदेशे प्रयोगैकदेशस्य ग्रहणं न स्यात्, यतस्तत्परिग्रहार्थमन्तग्रहणं क्रियते? इत्याह--`अन्यथा हि' इत्यादि। किं कारणं न स्यात्? इत्याह--`उपदेशे रूपनिर्ग्रहहेतौ' इत्यादि। निर्ग्रहणं निग्रहः=निश्चय इत्यर्थः। रूपस्य स्वरूपस्य शब्दस्य निर्ग्रहो निश्चयनो रूपनिर्ग्रहः, तस्य हेतू रूपनिर्ग्रहहेतुः। उपदेशग्रहणमुपलक्षममात्रम्। लौकिकोऽपि हि प्रयोगो गृह्यते। उपदेशाद्धि शब्दरूपं निश्चीयते, लौकिकाद्वा प्रयोगात्। मतुप्चायं लौकिके प्रयोगे नात्वन्तः श्रयते, नाप्युपदेशे, अतोऽत्वन्ततया नावधार्यते। ततश्चानवधार्यमाणत्वान्न गृह्यते। अन्तग्रहणे च सत्यन्तग्रहण सामर्थ्यादत्वन्तमात्रग्रहणे विज्ञायमाने यो ह्युपदेशे प्रयोगैकदेशभूतस्तस्यापि ग्रहणं भवतीत्युपपद्यते मतुपो ग्रहणम्।।

15. अनुनासिकस्य क्विझलो क्ङिति। (6.4.15)
`क्विप्रत्यये परतो झलादौ च क्ङिति' इति। अत्र `क्ङिति' इत्येतज्झलादावित्यनेनैव सम्बध्यते, न तु क्विप्रत्ययेन; यतः सम्भवव्यभिचारे हि विशेष्यविशेषणभावो भवति। कित्त्वङित्त्वयोस्तु सम्भव्यभिचारा वुभावपि झलादौ स्तः, न तु क्वौ। तथा हि कित्त्वस्य क्वावव्यभिचारः, ङित्त्वस्य तवसम्भवः। `प्रशान् प्रतान् प्रदान्' इति। `शमु उपशमे' (धा.पा.1201), `तमु कांक्षायाम्' (धा.पा.1202), `दमु उपशमे' (धा.पा.1203)--एतेभ्यः प्रपूर्वेभ्यः क्विपि `मो नो धातोः' (8.2.64) इति नत्वम्। `शंशान्तः' इति। शमेर्यङः, द्विवचनम्, `नृगतोऽनुनासिकान्तस्य' (7.4.85) इति नुक्, `यङोऽचि च' (2.4.74) इति यङो लुक्, लट्, तस्, तस्य `सार्वधातुकमपित्' (1.2.4) इति ङित्त्वम्, `चर्करीतञ्च' (धा.पा.1081) इत्यदादौ पाठाददादित्वाच्छपो लुक्।।

16. अज्झनगमां सनि। (6.4.16)
`उपधायाः' (6.4.7) इति निवृत्तम्, अत एव वृत्तौ `उपधायाः' इति नोक्तम्। कः पुनस्तदनुवृत्तौ दोषः स्यात्? व्यञ्जनस्यापि दीर्घत्वं प्रसज्येत। चिकीर्षति, तुष्टूषतीत्यत्र हि यथा `अचः' (1.2.28) इति वचनादचो भवति, तथा `उपधायाः' इति वचनादनचोऽपि स्यात्। यद्येवम्, हनिगम्योरच्युपधाया दीर्घत्वं न स्यात्, कस्य तर्हि स्यात्? `अलोऽन्त्यस्य' (1.1.52) इत्यन्त्यस्य? नैतदस्ति; अत्र हि दीर्घग्रहणेन यत् `अचः' (1.2.28) इत्युपस्थापितं तद्धनिगमिभ्यां विशेषयिष्यामः--अचो दीर्घो भवति स चेद्धनिगम्योरिति। यद्येवम्, अभ्यासस्यापि स्यात्? नैतत्; कृतदीर्घस्यैव द्विर्वचनविधानात्। कुत एतत्? द्विर्वचनात् दीर्घस्य परत्वात्। `तुष्टूषति' इति। `शर्पूर्वाः खयः शेषः' [`शेषः' इति सूत्रे नास्ति--7.4.61] (7.4.61)। `चिकीर्षति' इति। `ॠत इद्धातोः' (7.1.100) इतीत्त्वम्, रपरत्वम्, `हलि च' (8.2.77) इति दीर्घः, अभ्यासस्य `कुहोश्चुः' (7.4.62) इति चुत्वम्। `जिघांसति' इति। `अभ्यासाच्च' (7.3.55) इति हन्तेः कुत्वम्--घकारः, अभ्यासस्य पूर्ववच्चुत्वम्--झकारः, तस्य `अभ्यासे चर्च' (8.4.54) इति जकारः। `अधिजिघांसते' इति। `इङश्च' (2.4.48) इतीङो गमिरादेशः, `पूर्ववत्सनः' (1.3.62) इत्यात्मनेपदम्। `सञ्जिगांसते' इति। अत्रापि `पूर्ववत्सनः' (1.3.62) इति तङ। गमेर्ह्यसनन्तात् `समो गम्युच्छि' (1.3.29) इत्यादिनात्मनेपदं विहितम्। इङोऽपि `अनुदात्तङितः' (1.3.12) इत्यादिना। यदि गमेरिङादेशस्येति वचनं, तत्कथं छन्दस्यनिङादेशस्यापि स्वर्गं लोकं समजिगांसदित्यत्र दीर्घत्वं दृश्यते? इत्याह--छन्दसि यदनिङादेशस्यापि' इत्यादि। `समजिगांसत्' इति। गमेः सनन्ताल्लुङ, `गमेरिट् पस्मैपदेषु (7.2.58) इतीडागमो न भवति; `न वृद्भ्यश्चतुर्भ्यः' (7.2.59) इत्यत्र नेति योगविभागात्।
`इह' इत्यादिना यदुक्तं `गमेरिङादेशस्य' (वा.775) इति, तत्प्रत्याचष्टे। `सनि' इति प्रथमो योगः, हनिगम्योस्तु दीर्घविधानाय `हनिगम्योः' इति द्वितीयो योगः कत्तव्य इत्यभिप्रायः। कथं पुनरेतावति योगे क्रियमाणेऽजन्तस्यैव दीर्घत्वं सिध्यति? इत्यत आह--`तत्र' इत्यादि। `गृह्यमाणस्य' इति। कृद्योगे कर्मणि षष्ठी। `विशेषणे'इति। भावे ल्युट्। विशेषणमनजनतव्यवच्छेदाय। यत्र ह्रस्वदीर्घप्लुताः शिष्यनेते तत्र `अचश्च' (1.2.28) इत्येतदुपतिष्टते, तत्राङ्गस्य

दीर्घो भवति, किंविशिष्टस्याचः? एवमचा गृह्यमाणस्याङ्गस्य विशेषणे व्यवच्छेदे सति विनाऽप्यज्ग्रहणेनान्तस्यैव दीर्घत्वं सिद्धम्, यथा--
`अकृत्सार्वधातुकयोः' (7.4.25) इत्यत्र। तस्मादपार्थकत्वान्न कर्त्तव्यमेव। किमर्थं तद्धि क्रियते? इत्याह--`तत्क्रियते' इति। प्रवर्त्तनं प्रवृत्तिः=व्यापारः, तस्य भेदो नानात्वम्। प्रवृत्तिभेदश्चैकस्यां सत्यामावृत्तो न सम्भवतीत्यावृत्तिरभ्युपगन्तव्या। ननु च `अचश्च' (1.2.28) इत्यस्योपश्ताने सति द्वे अज्ग्रहणे भवत इति किमित्यावृत्तिराश्रीयते? नैतदस्ति; असति ह्यजग्रहणे `अचश्च' (1.2.28) इत्यस्योपस्थानं भवति। अत्राजग्रहणे तु सति निर्दिष्टस्थानिकत्वात् `अचश्च' (1.2.28) इत्येतन्नोपतिष्ठते, यथा `अचो ञ्णिति' (7.2.115) इत्यत्रेक्परिभाषा `अजन्तस्याङ्गस्य' इत्यादिना प्रवृत्तिभेदेनाङ्गमचा गमिञ्च विशेषयति। `ततो न वक्तव्यमिदम्' इति। अज्गरहणेनैवैतत्प्रतिपाद्यसयार्थस्यासिद्धत्वात्। न हीङादेशमुक्त्वाऽन्यो गमिरचः स्थाने सम्भवति।।

17. तनोतेर्विभाषा। (6.4.17)
`तनोतेरुपसंख्यानात्' इति। `तनिपतिदरिद्राणाम्' (कात्या.वा.5059-7.2.49) इत्यस्मात्। श्तिपा निर्देशो यङ्लुग्निवृत्त्यर्थः। प्रकृतिगरहणपरिभाषाया (व्या.प.77) तदन्तादपि विकल्पः सम्भवेत्--तन्तंसति।।

18. क्रमश्च क्त्वि। (6.4.18)
`अनुनासिकस्य क्विझलोः' (6.4.15) इत्यादिना नित्ये प्राप्ते विकल्पार्थ वचनम्। `उपधायाः' इति। कुत एतत्? `अचश्च' (1.2.28) इत्यस्योपस्थानादुपधाया एव क्रमोऽच्त्वात्।
`क्रमित्वा' इति। `उदितो वा' (7.2.56) इति पक्ष इडागमः। `प्रक्रम्य' इति। `समासेऽनञ्पूर्वेक्त्वो ल्यप्' (7.1.37)। ननु दीर्घत्वं कत्वाप्रत्ययमपेक्षत इत्यन्तरङ्गम्। ल्यबादेशस्त्वनेकपदाश्रयत्वात् समासमपेक्षमाणो बहिरङ्गो भवति। तत्रान्तरङ्गत्वाल्लयबदेशात् प्रागेव झलादौ दीर्घत्वं कस्मान्न भवति? इत्याह--`बहिरङ्गोऽपि' इत्यादि। `अदो जग्धिर्ल्यप्ति किति' (2.4.36) इत्यत्र ज्ञापितमेतत्--`बहिरङ्गो ल्यबादेशोऽन्तरङ्गान् विधीन् बाधते' इति।।

19. च्छ्वोः शूडनुनासिके च। (6.4.19)
यदि केवलस्य च्छकारमात्रस्य ग्रहणं क्रियते, तदा `प्रच्छ ज्ञीप्सायाम्' (धा.पा.1413) इत्यस्य क्तप्रत्यये कृतेऽन्तरङ्गत्वात् `च्छे च' (6.1.73) इति तुकि कृते छकारमात्रस्य शकारादेशे कृते पृट्ष्ट इत्यनिष्टं रूपं स्यात्। सतुक्कसय ग्रहणे तु सति स्थान्यन्तर्भावात् तुगप्यादेशेन निवर्त्यत इति न भवत्येव दोषप्रसङ्ग इत्येतदालोच्य सतुक्कस्य ग्रहणमिति दर्शयितुमा--``छ' इत्येतस्य सतुक्कस्य' इति। सतुक्कस्य ग्रहणं `यजयाचयतविच्छप्रच्छिरक्षो नङः' (3.3.90) इति ङित्करणादवगम्यते। तस्य हि ङित्करणस्यैतत्प्रयोजनम्--विश्न इत्यत्र `पुगन्तलघूपधस्य' (7.3.86) इति गणो मा भूदिति; यदि चात्र तुग्रहितः केवल एव च्छकारः स्थानित्वेन परिगृह्यते तदा तुकि कृते छकारमात्रस्य सकारे कृते गुरूपधत्वादेव गुणोन भविष्यतीति ङित्करणमनर्थकं स्यात्। सतुक्कस्य तु ग्रहणे कृते तुकि सतुककस्यैव शकारादेशः क्रियते, ततश्च लध्व्यामुपधायां समुपजातायां गुणः प्राप्नोतीति तत्प्रतिषेधार्यं ङित्करणं क्रियमाणमथवद्भवतीत्येके वर्णयन्ति, एतच्चायुक्तम्; सतुपजातायां गुणः प्राप्नोतीति तत्प्रतिषधार्थं ङित्करणं क्रियमाणमथवद्भवतीत्येके वर्णयन्ति, एतच्चायुक्तम्; सतुपजातायां गुणः प्रप्नोतीति तत्प्रतिषेधार्थं ङित्करणं क्रियमाणमथवद्भवतीत्येके वर्णयन्ति, एतच्चायुक्तम्; सतुक्कस्याप्यादेशे कृते निष्ठितमङ्गं भवति, प्रयोगार्हत्वात्। तत्र `अङ्गवृत्ते पुनरङ्गवृत्तावविधिर्निष्ठितस्य' (व्या.प.38) इत्यनया परिभाषया गुणो न भविष्यतीति। तस्मात् सतुक्कस्याप्यादेशे क्रियमाणे सति ङित्करणमनर्थकमेव, कथं तेन सतुक्कस्य ग्रहणमवसीयते? एवं तर्हि `ननौ पृष्टपरतिवचने (3.2.120) इति निर्देशात् सतुक्कस्य ग्रहणमवसीयते। तुग्रहितस्य ग्रहणे पृट्ष्टेत्येवं यथोक्त प्राक्। नङस्तु ङित्करणं `अनित्यमागमशासनम्' (व्या.प.99) इति ज्ञापनार्थम्। अनित्यत्वे हि तस्य यदा तुगभावस्तदाऽसति ङित्करणे गुणः प्रसज्येत। ननु चासति प्रयोजने ज्ञापकं भवति, अस्ति च तस्य ङित्करणस्य प्रयोडजनम्, किं तत्? ग्रह्यादिसूत्रेण (6.1.16) प्रच्छेः सम्प्रसारणं यथा स्यादिति? नैतदस्ति; न हि प्रच्छेर्नङि सम्प्रसारणमिष्यते। कथमेतज्ज्ञायते? `प्रश्ने चासन्नकाले' (3.2.117) इति निर्देशात्। तदेतत् ङित्करणम् `अनित्यमागमशासनम्' (व्या.प.99) इत्यस्य ज्ञापकमेव। अथ तु सतुक्कस्यापि ग्रहणे कथं सतुक्कस्यादेशो भवति, यावता `अलोऽन्त्यस्य' (1.1.52) इति वचनादन्त्यस्यैव स्यात्? नैतदस्ति; सतुक्कस्य ग्रहणसामर्थ्यान्न भविष्यति। एवमपि तदन्तस्याङ्गस्य स्यात्। `निर्दिश्यमानस्यादेशा भवन्ति' (व्या.प.106) इति तदन्तस्य न भविष्यति। `प्रश्नः' विश्न' इति। `प्रच्छ ज्ञीप्सायाम्' (धा.पा.1413) `विच्छ गतौ' (धा.पा.1423) `यजयाच' (3.3.90) इति नङ्।
`अन्तरङ्गत्वात्' इत्यादि। `छे च' (6.1.73) इति ह्रस्वस्य वर्णस्य तुग्विधीयत इति वर्णाश्रयत्वात् तुगन्तरङ्गः, शकारस्त्वङ्गाश्रयः। तत्राङ्गस्यैव तावद् प्रत्ययाश्रयत्वाद्बहिरङ्गत्वम्। किं पुनस्तदाश्रयस्य शकारस्य। ननु च `वार्णादाङ्गं बलीयः' (व्या.प.39) इति शकारस्यैव बलीयस्त्वम्? नैतदस्ति; यत्र ह्याङ्गवार्णयोर्युगपदेकनिमित्तमाश्रित्य प्राप्तिस्तत्रास्या उपस्थानं भवति। यथा `इयाय' इत्यत्र यमेवाकारमाश्रित्य `इको यणचि' (6.1.77) इत्यभ्यासेकारकस्य यणादेशः प्राप्नोति, तमेवाकारमाश्रित्य `अभ्यासस्यासवर्णे' (6.4.78) इतीयङपि। तत्र युगपदेकत्रोभयप्राप्तौ `वार्णादाङ्गं बलीयः' (व्या.प.39) इत्यस्या उपस्थाने सत्यङ्गकार्यमिङेव भवति। इह तु प्रागेव नङुत्पत्तेश्छकारमाश्रित्य तुक्प्राप्नोति, उत्तरकालं नङि विहिते तदाश्रः शकार इति भिन्नाश्रयत्वम्, अतो नेयमुपतिष्टते।

`सिदेः' इति। `षिवु तन्तुसन्ताने' (धा.प.1108) इत्यस्य। `औणादिके नप्रत्यये' इति। `धापृवस्यजतिभ्यो नः' (द.उ.5.39) इति वादिभ्यो विधीयमानो नप्रत्ययो बहुलवनात् सिवेरपि भवति। केनचित्`सिवेष्ठेर्यू च' (द.उ.4.5) [`सिवेष्टेरूच'--इत्युत्त्वम्] इत्यनेन सूनशब्दस्य व्युत्पत्तये नकारो विधीयते, दीर्घोच्चारणसामर्थ्यात् तत्र गुणो न भवति। ये तु स्योनशब्दव्युत्पत्तय एवेदं सूत्रं वर्णयन्ति, तेषां दीर्घोच्चारणमनर्थकं स्यात्। त न हि ह्रस्वस्य दीर्घस्य वा गुणे कृते कश्चिद्विशेषोऽस्ति। `लघूपधगुणात् पूर्वमूठ् क्रियते' इति। `अन्तरङ्गत्वात्' इति। वक्ष्यमाणो हेतुरिहापि द्रष्टव्यः। गुणो ह्यार्द्धधातुकमङ्गसम्बन्धिनीञ्चोपधां लध्वीमिग्लक्षणां विशिष्टामेवाश्रयति। ऊडादेशस्त्वनुनासिकादिं प्रत्ययमङ्गसम्बन्धिताविशिष्टं वकारमात्रम्। तस्माद्गुणो बहिरङ्गः। ऊडादेशस्त्वन्तरङ्गः। अतोऽन्तरङ्गत्वाल्लधूपधगुणात् पूर्वमेवोठ् क्रियते। ततर कृतेऽन्तरङ्गत्वाद्यणादेश इति लघूपधगूणात् पूर्व क्रियत इति प्रकृतेन सम्बन्धः। अन्तरङ्गत्वं तु वर्णाश्रयत्वाद्यणादेशस्य। ननु च `वर्णादाङ्गं बलीयः' (व्या.प.39) इत्याङ्गस्य गुणस्यैव बलीयस्त्वम्, ततः स एव यणादेशात् पूर्वं कस्मान्न क्रियते? इत्याह--`नानाश्रयत्वात्' इत्यादि। यत्र ह्युभावप्याङ्गवार्णौ विधी एकं निमित्तमाश्रित्य प्राप्नुतस्तत्रेयमुपतिष्ठत इत्युक्तम्। इह तु यणादेश ऊडाश्रयः, गुणस्त्वार्द्धधातुकाश्रय इति भिन्नाश्रयत्वम्। अतो नैयं परिभाषोपतिष्ठते।

`शब्दप्राट्' इति। शब्दं पृच्छतीति `क्विब्वचि' (वा.288) इत्यादिना क्विप्, दीर्घश्च, वश्चादिसूत्रेण (8.2.36) शकारस्य षकारः, तस्यापि जश्तवं डकारः, तस्यापि चर्त्वं टकारः। `गोविट्' इति। `विच्छ गतौ' (दा.पा.1423) गां विच्छतीति क्विप्। `क्विप्च' (3.2.76) इत्यनेन। तथा `अक्षुद्यः, हिरण्यष्ठ्यूः' इत्यत्रापि दिविष्ठिविभ्याम्। ननु यणादेशोऽन्तरङ्गो वर्णाश्रयत्वात्। ऊडादेशस्तु प्रत्ययाश्रयत्वाद्बहिरङ्गः, तत्र `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इति यणादेशनात्र न भवितव्यम्? इत्यतद आह--`असिद्धं बहिरङ्गमन्तरङ्गे' इत्यादि। यत्र द्वयोरचोरानन्तर्य्यं तत्रैषा प्रतिषिध्यते `नाजानन्तर्ये बहिष्ट्वपरक्लृप्तिः' (व्या.प.44) इति। अस्या अयमर्थः--अचोरानन्तर्ये सति बहिरङ्गपरिभाषा न प्रकल्पते, न भवतीत्यर्थः। अत्रार्थे ज्ञापकम्--`षत्वतुकोरसिद्धः' (6.1.86) इति तुकि कर्त्तव्येऽसिद्धवचनम्। तस्य ह्येतदेव प्रयोजनम्--अधीत्येत्यत्र सवर्णदीर्घस्यासिद्धत्वाद्ध्रस्वलक्षणस्तुग्यथा स्यादिति। यदि चाचोरानन्तर्ये बहिरङ्गपरिभाषा स्यात् तदैकपदाश्रयत्वादन्तरङ्गे तुकि कर्त्तव्ये पदद्वयाश्रयत्वाद्बहिरङ्गस्यैकादेस्यासिद्धत्वं भविष्यतीति किमसिद्धवचनेन? तदैकपदाश्रयत्वादन्तरङ्गे तुकि कर्त्तव्ये पद्द्वयाश्रयत्वाद्बहिरङ्गस्यैकादेस्यासिद्धत्वं भविष्यतीति किमसिद्धवचनेन? तत्क्रियतेजानन्तर्ये बहिरङ्गपरिभाषा नास्तीति ज्ञापनार्थम्। `हिरण्यष्ठ्यूः' इत्यत्र `धात्वादेः षः सः' (6.1.64) इति सत्वं न भवति; `सुब्धातुष्ठिवुष्वष्कतीनं प्रतिषेधो वक्तव्यः' (वा.671) इति वचनात्।

`पृष्टः' इति। ग्रह्यादिसूतद्रेण (6.1.16) सम्प्रसारणम्, पूर्ववत् षत्वं ष्टुत्वञ्च। `द्युभ्याम्' इति। `दिव उत्' (6.1.131) इत्युत्तवम्।

`येऽत्र क्ङितीति नानुवर्त्तयन्ति तेषामन्यत्राप्यनेन विधिना भवितव्यम्, ततः द्युभ्याम्, द्युभिरिति न सिध्यतीति मन्यमान आह--`कथं द्युभ्याम्, द्युभिरिति ऊठि कृते' इति। ऊठि कृते न किञ्चित् सिध्यतीत्यर्थः। `दिव उदिति तपरत्वान्मात्राकालो भविष्यति' इति। `दिव उत्' (6.1.131) इत्यत्र तपरकरणं न कर्त्तव्यम्। यद्यपि हि `भाव्यमान उकारः सवर्णान् गृह्णाति' (चान्द्र प.44), तथाप्यान्तरतम्यादर्धमात्राकालस्य व्यञ्जनस्य मात्राकाल एवोकारो भविष्यति। न दीर्घ इति किं तन्निवृत्त्यर्थेन तपरकरणेन? तक्रियते लक्षणान्तरेणापि यो दीर्घः प्राप्नोति स मा भूदित्येवमर्थम्। तेनात्र `दिव उत्त' (6.1.131) इत्यनेनैव तपरत्वान्मात्राकालो भविष्यति, अन्यथा यदि `च्छ्वोः शूडनुनासिके च' (6.4.19) इत्यनेन दीर्घः स्यात् ततो निष्फलं `दिव उत्' (6.1.131) इत्यत्र तपरकरणं स्यात्; व्यावर्त्त्याभावात्।

अथ वा `ऊठि कृते' इत्युत्तरेण परिहारग्रन्थेन सम्बध्यते। तत्रायमर्थः--क्रियतां नाम सामान्येन क्ङिति चाक्हिति चोठ्। कृतेऽपि तत्र `एकादेशविकृतमनन्यवद्भवति' (व्या.प.16) इति तस्यैव स्थाने `दिव उत्' (6.1.131) इत्यनेन तपरत्वाद्ध्रस्वो भविष्यति। एतदेव हि तस्य प्रयोजनम्--ऊठ्स्थाने भवन् मात्रिको यथा स्यात्, आन्तरतम्याद्दीर्घो मा भूदिति। अस्मिंश्च व्याख्याने यदुक्गतम्--`दिव उदिति तपकरणमूठो निवृत्त्यर्वम्, द्युभ्याम्, द्युभिरित्यत्र परत्वादूठ् प्राप्नोति' इति तद्विरुध्यते। न हि तेनोत्त्वस्योठः स्थान्यादेशभाव उपपद्यते, किं तर्हि? बाध्यबाधकभावः। तथा हि तस्यायम्रथो वर्ण्यते--ऊठो निवृत्त्यर्थ बाधनार्थ तपरकरणम्। असति हि तस्मिन् परत्वाटूठ् प्राप्नोति, तस्मात् तद्बाधनार्थं तपरकरणम्। परमप्यूठं बाधित्वाऽनेनैवमात्रिक उकारो यथा स्यादिति नास्ति विरोधः। ये हि स्थान्यादेशभावमिच्छन्ति त एवं ग्रन्थं व्याचक्षते। ऊठो निवृत्त्यर्थ स्थानिभूतस्योठो निवृत्त्यर्थमित्यर्थः। ऊडादेशे कृत ऊठ्स्थितिमतो निवृत्तिर्यथा स्यादित्येवमर्थं तपरकरणमित्यर्थः। परत्वादूठ् प्राप्नोतीत्यत्र विहितश्च। श्रुतिमानित्यध्याहार्य्यम्। तदेतदुक्तं भवति--अत्र हि परत्वादूड्विहितः सन् श्रतिमानेव प्राप्नोति, निवृत्तिमांश्चेष्यते। तस्मात् तस्य निवृत्तये तपरत्वमिति। अतपरेऽप्यादेशे विधीयमाने सत्यूठो निवृत्तिर्भवत्येव; निवृत्तिधर्मत्वात् स्थानिनः। उच्यते चेदं तपरकरणसूठो निवृत्त्यर्थमिति। तत्र वचनसामर्थ्याद्यस्यां निवृत्तौ सत्यां विशेषो भवति तदर्थं तपरकरणमिति विज्ञायते। ततश्च सामर्थ्यादिदमुक्तम्--भवत्यूठो ह्रस्वादेशार्थं तपरकरणमिति। यतस्तपर आदेशे सत्यूठो या निवृत्तिः क्रियते तस्यां सत्यां विशेषो भवति। नातपरे। अतपरे ह्यादेशे सत्यान्तरतम्याद्दीर्घस्य दीर्घ एव स्यादिति कुतो विशेषः।

किं पुनः किद्ग्रहणे निवृत्ते सतीष्टं सिध्यति, यदर्तं केचिदत्र क्ङितीति नानुवर्त्तयन्तीत्याह--`छशां षः इत्यत्र' इत्यादि। क्ङिद्ग्रहणे निवृत्ते सत्यविशेषेण क्ङिति चाक्ङिति चानेने च्छकारस्य शकारो विधीयते, तेन व्रश्चादिसूत्रे (8.2.66) छग्रहणं न कर्त्तव्यं भवेत्। शकारस्य षत्वविधानेनैव सर्वस्य षत्वस्याभावाच्छकारस्य षत्वविधानार्थं व्रश्चादिसूत्रे (8.2.36) छग्रहणं कर्त्तव्यमेव। अथ तेषां कथं प्रष्टेति सिध्यति, यावता तुकि कृते छकारमात्रस्य षत्वे प्रट्ष्टेत्यनिष्टं रूपं प्राप्नोति? नैष दोषः, ते हि व्रश्चादिसूत्रे (8.2.36) सतुक्कस्य च्छकारस्य ग्रहणमिच्छन्ति।

ऊडयं यदि टित् स्यात् `आद्यन्तौ टकितौ' (1.1.46) इत्यादौ स्यात्। तत्र यद्यपि वकारस्य वलि लोपे कृते सत्यक्षद्यूरित्यादि सिध्यति, जूरित्यादि तु न

सिध्ये। टित्त्वे हि सति ज्वरत्वरादि (6.4.20) सूत्रेणैको वकारात् पूर्वमूडपरोऽकारादिति द्वावूठौ स्याताम्। तस्मादूठष्ठित्त्वमङ्गीकर्त्तव्यम् न टित्त्वम्। तस्यापि ठित्त्वस्य यदि प्रयोजनं न स्याद्वैयर्थ्य स्यादित्येतच्चेतसि कृत्वोडादेशस्य यट्ठित्त्वं तस्य प्रयोजनं दर्शयितुमाह--`ऊठष्ठित्करणम्' इत्यादि। एवं ब्रूवता `एत्येधत्यूठ्सु' (6.1.89) इत्यत्रापि ठित एव ग्रहणं भवति। एवं ह्यूठष्ठित्करणस्य विशेषणार्थतोपपद्यते, यदि तत्रापि ठित एव ग्रहणं भवति, नान्यथा। यद्यत्र ठकारोऽनुबन्धो न क्रियते तदा `एत्येधत्यूठ्सु' (6.1.89) इत्यत्रापि न कर्त्तव्यम्; ठकारानुबन्धवत ऊकारस्य क्वचिदसम्भवात्। एवञ्चोच्यमाने प्रऊहते, प्रोहत इत्यत्रापि वृद्धिः स्यात्। तस्माद्विशेषणार्थं ठित्करणं क्रियते। ठकारस्य तु श्रवणं न भवति; कृतचर्त्वस्य निर्देशात्। यदि तर्हि ठिदयम्, `एत्येधत्यूठ्सु' (6.1.89) इत्यत्रापि ठित एव ग्रहणम्, एवं सति `वाह ऊठ्' (6.4.132) इत्यस्य तत्र ग्रहणं न स्यात्, ततश्च प्रष्ठौह इत्यत्र वृद्धिर्न स्यादित्यत आह--`वाह ऊठित्ययमपि' इत्यादि। ठकारस्यापि पूर्ववदेवाश्रवणम्।।

20. ज्वरत्वरस्रिव्यविमवामुपधायाश्च। (6.4.20)

स्रिव्यविमवां वकारसय पूर्णेणैव सिद्धम्। उपधायास्तु न सिध्यतीति तदर्थमेषां ग्रहणम्। ज्वरत्वरयोस्तु वकारस्यापि पूर्वेण न सिध्यति; अनयोरकाररेफाभ्यां झलादेः क्विपश्च व्यवधानात्। तस्मात् तयोर्वकारार्थमुपधार्थञ्च ग्रहणम्। `जूः, जुरौ, जुरः' इति। `ज्वर रोगे' (धा.पा.776) वकारस्योपधायाश्चोठि कृते `सम्प्रसारणाच्च' (6.1.108) इति पूर्वरूपत्वम्। `जर्त्तिः' इति। क्तिन्। `तूः' इति। `त्रि त्वरा सम्भ्रमे' (धा.पा.775) `तूर्णः'[`तूर्त्तिः--काशिका-`तूर्णः' इति नास्ति] इति। `रदाब्यां निष्ठातो नः' (8.2.42) इति नत्वम्। `स्रूः इति। `स्रिवुगतिशोषणयोः' (धा.पा.1109)। सवरणदीर्घः। `स्रुवौ, स्रुवः' इति। `अचि श्नुधातु' (6.4.77) इत्यादिनोवङ। `ऊः' इति। `अव रक्षणे' [रक्षण कान्तिप्रीतितृपत्यवगमप्रवेशश्रवणस्वणस्वम्यर्थयाचनक्रियेच्छादीप्त्यवापत्यालिङ्गनहिंसादानभागवृद्धिषु--धा.पा] (धा.पा.600)। `मूः' इति। `मव बन्धने' (धा.पा.599)।

इह ज्वरादिसम्बन्धिन्या उपदाया ऊङ्विधीयते, उपधा चालोऽन्त्यात्पूर्वो वर्णः, अन्त्यत्वञ्चापेक्षितम्; तत्र यथा--श्रेयान्, श्रेयांसावित्यत्र सकारात् पूर्वे ये वर्णास्तेषामन्त्यो यो नकारस्तस्मात् पूर्वो वर्ण उपदा, तथा ज्वरादीनामपि यो पूर्वौ वर्णौ तयोर्योऽन्त्यो वर्णस्तस्मात् पूर्व उपधा, सा च ज्वरादीनां सम्बन्धिनी; तदवयवत्वात्, ततश्च तस्या अप्युपदाया ऊठा भवितव्यमिति कस्याचित् भ्रान्तिः स्यात्। अतस्तां निराकर्तुं यस्या उपदाया ऊठा भवितव्यं तां दर्शयितुमाह--`ज्वरत्वरयोरुपधा वकारात्परा' इत्यादि। यस्या उपधाया ऊठा भवितव्यम्, सोहोपधाशब्देन विवक्षिता। किं पुनः कारणस्या वृत्तिकारोपदर्शिताया उपधाया ऊङ्भवति, नान्यस्याः? क्वझल्भ्यां क्ङिता चोपधाविसेषणात्। अत्र क्विप्प्रत्ययेन झलादिना क्ङिता चोपधा विशिष्यते--ज्वरादीनां योपधा क्वौ झलादौ च परतस्तस्या उपधाया ऊङ्भवतीति। अत्र `येन नाव्यवधानं तेन व्यवहितेऽपि' (व्या.प.46) इत्यादिना यत्रैकेन वर्णेन व्यवधानं वृत्तिकारेणोक्ताया उपदायाः सम्भवति, तस्या एवोङ्भवति,

21. राल्लोपः। (6.4.21)

`मूर्छा' इति। `मुर्छा मोहसमुच्छ्राययोः' (धा.पा.212)। `हूर्छा' इति। `हुर्छा कौटिल्ये' (धा.पा.211) कथं पुनरत्र च्छकारलोपो भवति, यावता नात्र सूत्रे छकार उपात्तः; योऽपि प्रकृतः सोऽपि सतुक्कः, नात्र तुगस्ति, न हि रेफस्य च्छे क्वचित् तुग्विहितः? इत्याह--`राल्लोपे सतुक्कस्य' इत्यादि। उत्तरत्रानुवृत्तिर्यथा स्यादिति पूर्वसूत्रे च्छकारस्य स्वरितत्वं प्रतिज्ञातम्, न च रः परः सतुक्कः सम्भवति। तत्र समार्थ्यात् तुग्रहित एवानुवर्त्तते। अथ वा--पूर्वसूत्रे द्विच्छकानिर्देशः; तत्रैकः सतुक्कः, परस्तुग्रहितः। सम्भवति चागमशासनस्यानित्यत्वाद्धा तुग्रहितश्छकारः। एवञ्च कृत्वा यदुक्तम्--नङो ङित्त्वं गुणप्रतिषेधार्थमिति, तदुपपन्नं भवति। तदेवं यद्यपि पूर्वसूत्रे छकारौ प्रकृतौ, तथापि रेपात् परः सतुक्को न सम्भवति। केवलो यस्तुग्रहितः स एवानुवर्त्तते। `तूः, धूः' इति। `तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः' (धा.पा.570-573)।।

22. असिद्धवदत्रा भात्। (6.4.22)

`असिद्धवद्भवतीत्येवं वेदितव्यम्' इति। सिद्धशब्दोऽयं परिनिष्पन्नवचनः। यथा--`सिद्ध ओदनः' इति। न सिद्धमसिद्धम्, सिद्धकार्याकरणसाधर्म्येणासिद्धेन तुल्यं वर्त्तत इत्यसिद्धवत्। किं पुनस्तत्? प्राधान्यात् कार्यमित्येके; शास्त्रं हि कार्यार्थम्, अतः शास्त्रापेक्षया कार्यस्य प्राधान्यम्; व्याप्तेर्न्यायात्। शास्त्रस्यावधित्वेनोपादानाच्च शास्त्रस्यासिद्धवदभावो युक्तः, अन्यथा हि कार्यमेव किञ्चिदवधित्वेनोपादीयेत। अथाभाट्ग्रहणं किमर्थम्, यावता स्वरितलिङ्गासङ्गादन्तरेणाप्याभाद्ग्रहणमा पादपरिसमाप्तेरसिद्धवदित्यनुवर्त्तिष्यते? इत्याह--`आ भादिति विषयनिर्देशः' इति। असति ह्या भाद्ग्रहणे न ज्ञायते--कस्मिन् कर्त्तव्य इदं प्रकरणमसिद्धवद्भवति; तस्मादा भादिति विषयनिर्देशः क्रियते--आ भसंशब्दनाद्यद्वक्ष्यते तस्मिन् कर्त्तव्यतया विषयभूतेऽसिद्धवद्भवतीत्यस्यार्थस्य परिज्ञानाय। यद्येवम्, अत्रेत्येतपदार्थकलमेतद्विषयनिर्देशार्थं क्रियते, स च विषय आ भादित्यनेनैव निर्दिष्टः? इत्यत आह--`अत्र' इत्यादि। समान एव आश्रयो निमित्तं यस्य तत् समानाश्रयम्, तस्य भावः समानाश्रयत्वम्। तस्य प्रसिद्धये परिज्ञानायात्रग्रहणम्, तच्चेदत्रेति भवतीति वाक्शेषः। तदित्यनेन यस्यासिद्धवद्भावो विधीयते तन्निर्दिश्यते। अत्रेत्यनेनापि यत्र ततोऽन्यदाभाच्छास्त्रीयं तत् तदाश्रयमेव भवतीति। असिद्धवदिति वक्ष्यमाणेनाभिसम्बध्यते। तदित्यनेन यत्रा भाच्छास्त्रीयं विधीयते तस्य परामर्शः। स आश्रयो निमित्तं यस्य तत् तदाश्रयम्।

एवकारोऽवधारणार्थः। तदेवासिद्धवद्भवतीति यावत्। `व्याश्रयस्तु नासिद्धवद्भवति' इति। एवकारेण यद्व्यवच्छिन्नं तद्दर्शयति। यत्र तदाभाच्छास्त्रोयं कार्यं विधीयते ततो भिन्नोऽर्थान्तरभूत आश्रयो यस्य तत् तथोच्यत इत्यर्थ इति। इतिकरणेनानन्तरं व्याख्यातोऽर्थः प्रत्यवमृश्यते। अत्रग्रहणे समानाश्रयत्वप्रसिद्ध्यर्थे सतद्येषोऽस्य सूत्रस्यार्थः सम्पद्यत इति यावत्।

किमर्थं पुनरसिद्धवद्भवतीत्यत आह--`असिद्धवचनम्' इत्यादि। उत्सर्गशब्देन स्थान्यत्रोपदिश्यते, उत्सृजयत आदेशेन निवर्त्यत इति कृत्वा। उत्सर्गसाधर्म्याद्वोत्सर्गः। यथा ह्युत्सर्गस्य सामान्येन प्रवृत्तस्य सतः कुतश्चिद्विसेषान्निवृत्तिर्भवति, एवं स्थानिनोऽप्यादेशात्। उत्सर्गौ लक्षणम्=निमित्तं यस्य तदुत्सर्गलक्षणम् आदेशो लक्षणं निमित्तं यस्य तदादेशलक्षणम्, तयोर्यथाक्रमं भावप्रतिषेधौ यथा स्यातम्--इत्येवमर्थमसिद्धवचनम्। `एधि, शाधि' इति। उत्सर्गलक्षणभावस्योदाहरणम्। `अस भूवि' (धा.पा.1065), `शास अनुशिष्टौ' (धा.पा.1075), [`शासु' धा.पा.] लोट्, सिप्, `सेर्ह्यपिच्च' (3.4.87) इति हरादेशः, अदादित्वाच्छपो लुक्, श्नसोरल्लोपः' (6.4.111) इत्यकारलोपः। परत्वान्नित्यत्वाच्च धिभावात् पूर्वं `ध्वसोरेद्धावभ्यासलोपश्च' (6.4.119) इत्येत्त्वम्। शासेरपि नित्यत्वात् `शा हौ' (6.4.35) इति शादेशः पूर्वं धिभावात् तयोरेत्त्वशाभावयोः `हुझल्भ्यो हेर्धिः' (6.4.101) इति झलन्तलक्षणं धित्वं न प्राप्नोति, निमित्ताभावात्। असिद्धत्वाद्भवति। `आगहि, जहि' इति। आदेशलक्षणप्रतिषेधस्योदाहरणम्। अगाहीति--गमेराङपूर्वाल्लोट्, सिप्, तस्य हिरादेशः, `बहुलं छन्दसि' (2.4.76) इति शपो लुक्, `अनुदात्तोपदेश' (6.4.36) इत्यादिनानुनासिकलोपः। जहीति--हन्तेरलोडादि पूर्ववत्, अदादित्वाच्छपो लुक्, `हन्तेर्जः' (6.4.36) इति जभावः। अत्रेदानीमनुनासिकलोपजादेशयोरुत्तरकालं `अतो हेः' (6.4.105) इति हेर्लोपः प्राप्नोति; असिद्धत्वान्न भवति।

`अभाजि' इति। `भन्जो आमर्दने' (धा.पा.1453) लुङः, कर्मण्यात्मनेपदम्, `चिण्बावकर्मणोः' (3.1.66) इति च्लेश्चिण्, `चिणो लुक्' (6.4.104) इति तकारलोपः, `भञ्जेश्च चिणि' (6.4.33) इत्युनुनासिकलोपः। तस्य समानाश्रयस्यापि वृद्धावनाबाच्छास्त्रीयायां कर्त्तव्यायामा भादिति वचनादसिद्धत्वं न भवति। `रागः' इति। रञ्जेर्घञ्, `घञि च भावकरणयोः' (6.4.27) इत्यनुनासिकलोपः। तस्यापि समानाश्रयायमपि साप्तमिक्यां वृद्धौ कर्त्तव्यायामा भादति वचनादसिद्धत्वं न भवति। `पपुषः चिच्युषः लुलुवुषः' इति। पातेश्चिनोतेर्लुनातेश्च लिटः क्वसुः, द्विर्वचनम्, `वसोः सम्प्रसारणम्' (6.4.131) तस्य व्याश्रयत्वात् इति। पातेश्चिनोतेर्लुनातेश्च लिटः क्वसुः, द्विर्वचनम्, `वसोः सम्प्रसारणम्' (6.4.131) तस्य व्याश्रयत्वात् `आतो लोप इटि च' (6.4.64) इत्यकारलोपः, `एरनेकाचोऽसंयोगपूर्वसय' (6.4.82) इति यणादेशे `अचि इन् धातु' (6.4.77) इत्यादिनोवङादेशे च कर्त्तव्येऽसिद्धवत्त्वं न भवति। ननु च `उस्यपदान्तात्' (6.1.96) इत्यनेनैव पररुपेण सरवं सिद्धम्? नैतदस्ति; प्रतिपदोक्तस्य ह्युस्शब्दस्य तत्र ग्रहणम्, लाक्षणिकोश्चात्रोस्।

कथं पुनरत्र व्याश्रयत्वमित्याह--`आल्लोपादीनि हि' [`हि'--नास्ति काशिकायाम्] इत्यादि। हिशब्दो यस्मादर्थे। इतिकरणस्तस्मादर्थे। नन्वेवमपि `असिद्धं बहरङ्गमन्तरङ्ग' (व्या.प.42) इति अन्तरङ्गेष्वाल्लोपादिषु बहिरङ्गस्य समप्रसारणस्यासिद्धत्वादाल्लोपादयो न प्राप्नुवन्त्येव। तत्र हि विभक्तेः, पूर्वो वसवन्तो भागः, तदाश्रया लोपादय इति, सम्प्रसारणं तु विभक्त्याश्रयम्, प्रकृत्याश्रयञ्चान्तरङ्गम्, प्रत्ययाश्रयं च बहिरङ्गमित्याह--`असिद्धं बहिरङ्गम्' इत्यादि। `एतदपि' इति। एतदपीति वचनापेक्षया नपुंसकेन निर्वेशः। `एषा हि' इत्यादिना परिभाषाया अप्रवृत्तौ कारणमाह।

यत्रान्तरङ्गबहिरङ्गयोर्युगपदुपस्थानं तत्रैषा परिभाषा प्रवर्त्तते, अन्तरङ्गे कर्त्तव्ये बहिरङ्गस्यासिद्धतामापादयितुम्। इयञ्च परिभाषा `वाह ऊठ्' (6.1.132) इत्यत्राभाच्छास्त्रे ज्ञापितत्वादाभाच्छास्त्रीया। अतोऽस्यां कर्त्तव्यायां `असिद्धवदत्रा भात्' (6.4.22) इति `वसोः सम्प्रसारण' (6.4.131) स्याल्लोपादीनाञ्चासिद्धत्वादन्तरङ्गबहिरङ्गयोर्युर्गपदुपस्थानं नास्तीति न प्रवर्त्तते। तदप्रवृत्तौ नास्ति बहिरङ्गसम्प्रसारणस्यासिद्धत्वम्। तेन भवन्त्येवाल्लोपदयः।

`वुग्युटौ' इत्यादि। वुग्युडित्येतौ यथा क्रममुवङि यणि च कर्त्तव्ये सिद्धौ भवत इत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--इह वतिग्रहणं न कर्त्तव्यम्, विनापि तेनातिदेशः सिद्ध एव, यथा--`षत्वतुकोरसिद्धः' (6.1.86), `पूर्वतरासिद्धम्' (8.2.1) इति च। तत् क्रियते क्वचित् स्वाश्रयमपि सिद्धं यथा स्यादित्येवमर्थम्। तेन वुग्युटावुवङ्यणोः सिद्धौ भविष्यतः। `बभूव' इति। `भवतेरः' (7.4.73) इत्यभ्यासस्यात्वम्, `भुवो वुग्लुङलिटोः' (6.4.88) इति वुक्। तत्र यद्यसिद्धं स्यात् `अचिश्नुधातु' (6.4.77) इत्यादिना उवङ स्यात्, तस्य सिद्धत्वान्न भवति। `उपदिदीये' इति। `दीङः क्षये' (धा.पा.1134) लिट् तस्य `लिटस्तझयोः' (3.4.81) इत्यादिनेशु, `दीङो युडचि क्ङिचि' (6.4.63) इति युट्। तस्यापि यद्यसिद्धत्वं स्यात् `एरनेकोचोऽसंयोगपूर्वस्य' (6.4.82) इति यणादेशः स्यात्। सिद्धत्वान्न भवति।

आ भादित्याङ मर्यादायां वा स्यात्? अभिविधौ वा? तत्र यद्याद्य पक्ष आश्रीयत भाधिकारीयस्यासिद्धत्वं न स्यात्। ततश्च `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इत्यस्याः परिभाषाया अनाभाच्छास्त्रीयत्वादस्थां प्रवर्त्तमानायां वसोः सम्प्रसारणस्याल्लोपादीनां चासिद्धत्वं न स्यात्। एवमपि वसोः सम्प्रसारणस्य बहिरङ्गस्यान्तरङ्गाणाञ्चालोपादीनां युगपदुपस्थाने सति तया परिभाषया प्रवर्त्तमानया वसोः सम्प्रसारणस्य बहिरङ्गस्यान्तरङ्गाणाञ्चालोपादीनां युगपदुपस्थाने सति तया परिभाषया प्रवर्त्तमानया वसोः सम्प्रसारणस्यासिद्धत्वे उत्पादितेऽन्तरङ्गत्वादल्लोपादयः पपुषः, चिच्युषः, लुलुवष इत्यत्र न स्युः? इतोमं मर्यादापक्षे दोषं वृष्ट्वा द्वितीयं पक्षमाश्रित्याह--`आ भादित्ययमभिविधावाङ्' इति। गतार्थश्च।।

23. श्नान्नलोपः। (6.4.23)

अन्यस्य श्नशब्दस्यासम्भवादसत्यपि श्नमो मकारस्य श्रवणे सामर्थ्यात् श्नम एव ग्रहणं विज्ञायते, इत्यत आह--`श्नमयमुत्सृष्टमुकारः' इति। उत्सृष्टः=परित्यक्तो मकारो यस्य स तथोक्तः। `अनक्ति' इत्यादि। `अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' (धा.पा.1458) `भन्जो आमर्दने' (धा.पा.1453)

`हिसि हिंसायाम्', (धा.पा.1456) अस्योदित्त्वान्नुम्, रुधादित्वात् श्नम्।

शकारवतोग्रहणमेतदर्थं क्रियते--`नन्दिता, नन्दकः' इत्यत्र मा भूदिति, एतच्चाप्रयोजनम्; `प्रत्ययाप्रतयययोः प्रत्ययस्यैव ग्रहणम्' (व्या.प.72) इत्यनया परिभाषयाऽत्र न भविष्यति। ज्ञापकाच्च, यदयं नन्दिनन्दनशब्दौ क्षुभ्नादिषु पठति, तज्ज्ञापयति--नन्देर्नकारलोपो न भवतीति। सामान्यापेक्षञ्च ज्ञापकम्, तेन `नन्दिता, नन्दकः' इत्यत्रापि न भविष्यति। तस्मात् `नान्न लोपः' इत्येवं वक्तव्यमित्यभिप्रायेणाह--`शकारवतो ग्रहणं किम्' इति। `यज्ञानाम्, यत्नानाम्' इति। `यजयाच' (3.3.90) इति नङ्, तदन्तात् षष्ठीबहुवचनम्, नुट्। यदि शकारवतो ग्रहणं न क्रियेत तदा तत्र नलोपः स्यादेव। स्यादेतत्--दीर्घे कृते `नात्' इति व्यपदेशाभावान्न भविष्यतीति? अत आह--`सुपि च' इत्यादि। `सुपि च' (7.3.102) इत्यर्थ दीर्घोऽजादेशः, तस्य नकारलोपपूर्वविधौ कर्त्तव्ये `अचः परस्मिन् पर्वविधौ' (1.1.57) इति स्थानिवद्भावेन तद्रूपतामापन्ने परात्वाद्दीर्घत्वे यदि कृतेऽपि शकारविशिष्टस्य ग्रहणं न क्रियते तदा स्यादेवात्र नलोपः। कृताकृतप्रसङ्गित्वाच्च। दीर्घत्वं तु नकारलोपे कृते निमित्तविहितत्वान्न प्राप्नोतीति तदनित्यम्। ननु च पूर्वविधौ स्थानिवद्भाव उक्तः, न चायं पूर्वविधिः? नैष दोषः; अयमपि पूर्ववधिरेव। `पूर्वस्माद् विधिः पूर्वविधिः' इत्यस्यापि समामस्य तत्राश्रयणात्।

अथ क्रियमाणेऽपि शकारवतो ग्रहणे कस्मादिह न भवति--`विश्वानाम्, प्रश्नानाम्' इति, भवति ह्यत्रापि शकारवान्नकारः? इत्याह--`विश्नानां प्रश्नानामित्यत्र' इत्यादि। इह हि लक्षणप्रतिपदोकतपरिभाषया (व्या.प.3.) प्रतपदोक्तो यः साक्षान्निर्दिष्टः श्नशब्दस्तस्य ग्रहणम्, न तु लाक्षणिकस्य। `विश्नानाम्, परश्नानाम्' इत्यत्र हि `च्छ्वोः शूडनुनासिके च' (6.4.19) इति शकारे कृते श्नशब्दः सम्पद्यते, स च लाक्षमिकः। तस्मात् ततः परस्य लोपो न भवति। `राल्लोपः' (6.4.21) इत्यतो मण्डूकप्लुतिन्यायेन लोपग्रहणानुवृत्तौ सत्यां सिद्धायां यत् पुनर्लोपग्रहणं क्रियते तद् योग वेभागार्थम्। `श्नान्न' इत्येको योगः, अत्र च नेत्यविभक्तिकोऽयं निर्देशः, लोपग्रहणञ्चानुवर्तते, तेनायमर्थो भवति--श्नादुत्तरस्य नकारस्य लोपो भवतीति; ततः `लोपः' इति द्वितीयो योगः, ततः `श्नान्न' इत्यतो नेत्यनुवर्तते--इष्टे विषये नकारलोपो यथा स्यादिति। तेन लङ्गिकम्पिप्रभृतीनामुपतापशरीरविकारादिषु नलोपः सिद्धो भवति।।

24. अनिदितां हल उपधायाः क्ङिति। (6.4.24)

इद् इद् येषां त इदितः, न इदितोऽनिदित इति षष्ठीबहुवचनस्य स्थाने सुब्व्यत्येनैकवचनम्, तच्चानिदितां विशेषणम्, विशेषणेन च तदन्तविधिर्भवतीत्यत आह--`हलान्तानाम्' इत्यादि। `उपधाया नकारस्य' इति। उपधाया इत्येतन्नकारस्य विशेषणम्। `स्रस्तः, ध्वलस्तः' इति। `स्रन्सु ध्वन्सु अधः [`अवन्रंसने'--धा.पा] पतने (धा.प.754,755) निष्ठा। `स्रस्यते, ध्वस्यते' इति। भावे कर्मणि वा लकार। `सनीस्रस्यते दनीध्वस्यते' इति। यङन्ते एते। `नीग्वञ्चु' (7.4.84) इत्यादिनाभ्यासस्य नीगागमः।

`नन्द्यते' इति। `टु णदि समृद्धौ' (धा.पा.67) [`टु नदि'--धा.पा.] `नानन्द्यते' इति। यङन्तम्। `दीर्घोऽकितः' (7.4.83) इत्यभ्यासस्य दीर्घः। `नेनीयते' इति। नयतेः `गणो यङ्लुकोः' (7.4.82) इति गुणोऽभ्यासस्य। `नह्यते' इति। `णह बन्धने' (धा.पा.1166)।

`लङ्गिकम्प्योः' इत्यादि। लङ्गिकम्प्योरिदित्वान्नलोपो न प्राप्नोति, अतस्तयोरुपतापशरीरविकारयोरुपसंख्यानं कर्तव्यम्। उपसंख्यानाम्=प्रतिपादनम्। उत्तरत्राप्युपसंख्यानशब्दस्य प्रतिपादनमर्थः। प्रतिपादनन्तु कृतमेव। उपतापः=व्याधिः। शरीरविकारः=शरीरस्यान्यथात्वम्। स पुनरिहोपतापादनयो गृह्यते, अन्यथा `उपताप' इत्येवं सिद्धे शरीरविकारग्रहणमनर्थकं स्यात्। `विलगितः' इति। `अगि वगि लगि' गत्यार्थाः। (धा.पा.146,147,145)। `उपतापे विलङ्गितः' इत्येव प्रयोगो मा भूदित्येवमर्थं लङ्गर्ल्लोपो विधीयते, न तु रूपसिद्ध्यर्थम्; `लगे सङ्गे' (धा.पा.786) इत्यस्य प्रकृत्यन्तरस्य तस्य सिद्धत्वात्।

`रञ्जेर्णौ' इत्यादि। अक्ङिदर्थं वचनम्। मृगरमणम्=मृगक्रीडा। `रजयतिः मृगान्' इति। रममाणान् मृगान् प्रयुङ्क्ते इत्यर्थः।

`रजनरजकरजःसूपसंख्यानम्' इति। अत्र भूयः प्रतिपादनं क्रियते। `घञि च भावकरणयोः' (6.4.27) इत्यत्र चकारोऽनुक्तसमुच्चयार्थः, तेन रजकादिषु प्रतिपाद्येषु रञ्जेः ष्वुन्नादिप्रत्यये परतो नलोपो भवति। `रजकः' इति। `शिल्पिनि ष्वुन्' (3.1.145)। `रजनम्' इति। ल्युट्। `रजः' इति। `सार्वधातुभ्योऽसुन्' (द.उ.9.49)[`असुन्'--द.ु.] इत्यसुन्।

`घिनुणि च' इत्यादि। `रागी' इति। सम्पृचान्वादिसूत्रेण(3.2.142) घिनुण्, `चजो कु घिण्ण्यतोः' (7.3.52) इति कुत्वम्। `त्यज रज भज' इति निपातनात् सिद्धम्' इति। यतोऽयमक्ङिति निमित्ते सम्पृचादिसूत्रे (3.2.142) रञ्जेरनुनासिकलोपं कृत्वा निर्देशं करोति, तज्ज्ञापयति--घिनुण्यति नलोपो भवतीति। ननु च `रञ्जेश्च' (6.4.26) इति लक्षणेनैव शपि नलोपोऽभिनिर्वृत्तः? न तदस्ति; यथैव `इन्धिभवतिभ्याञ्च' (1.2.6) इत्यागन्तुकेनेकारेणेन्धेर्निर्देशः, तथेहाप्यागन्तुकेनाकारेण, न तु शपा। न हि `इन्धिभवतिभ्याञ्च' (1.2.6) इत्यत्रेका निर्देशः, अन्यथा हि `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः स्यात्।।

25. दंशसञ्जस्वञ्जां शपि। (6.4.25)

`दंश दंशने' (धा.प.989), `ष्वन्ज परिष्वङ्गे (धा.पा.976)। `परिष्वजते' इति। `उपसर्गात् सुनोति' (8.3.65) इत्यादिना षत्वम्।।

26. रञ्जेश्च। (6.4.26)

अथ पृथग्योगकरणं किमर्थम्, न पूर्वयोग एव रञ्जेर्ग्रहणं क्रियते? इत्याह--`पृथग्योगकरणम्' इत्यादि। उत्तरसूत्रे रञ्जेरेवानुवृत्तिर्यथा स्यात् दंशप्रभृतीनां मा भूदिति।।

27. घञि च भावकरणयोः। (6.4.27)
`रज्यतेऽनेनेति रागः' इति। `हलश्च' (3.3.121) इति घञ्। एवं `रङ्गः' इत्यत्रापि।।

28. स्यदो जवे। (6.4.28)
जवः=वेगः, गतिविशेषः। `वृद्ध्यभावश्च' इति। `अत उपधायाः' इति। नलोपे कृते `अत उपधायाः' (7.1.116) इति वृद्धिः प्राप्नोति, अतस्तदभावो निपात्यते। ननु च `न धातुलोप आर्धधातुके' (1.1.4) इत्यनेनैव वृद्धिप्रतिषेधः सिद्धः, तत् किमर्थं वृद्ध्यभावो निपात्यते? इत्याह--`इक्प्रकरणात्' इत्यादि। तत्र `इको गुणवृद्धी' (1.1.3) इत्यत `इक्' इति परकृतमनुवर्तते, तेनेग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चेयमिन्लक्षणा वृद्धिः, किन्तूपधालक्षणा। न चेयमुपधालक्षणा वृद्धिरिग्लाक्षणा भवति, निर्दिष्टस्थानिकत्वात्। तेन नास्त्यत्र तस्याः प्रतिषेधः। `गोस्यदः' इति। भावे धञ्। गवां स्यद इति गोस्यदः, `कृद्योगा षष्ठी समस्यते' (धा.86) इति समासः। `तैलस्यन्दः' इति। तैलस्य स्रवणमित्यर्थः। `स्यन्दू स्रवणे'[`प्रस्रवणे' धा.पा.] (धा.पा.761)।।

29. अवोदैधोद्मपरश्रथहिमश्रथाः। (6.4.29)
`अवोदः' इति। उपसर्गेण सह `आद्गुणः' (6.1.87)। `न धातुलोपः' (1.1.4) इत्यादिना प्रतिषेधो न भवति; अनिग्लक्षणत्वाद्गुणस्य। `गुणश्च निपात्यते' इति। ननु च `पुगन्तलधूपधस्य' (7.3.86) इत्येवं गुणः सिद्धः। तत् किमर्थं निपात्यते? इत्याह--`न धातुलोपः' इत्यादि। `औणादिके मन्प्रत्ययः' इति। `अर्त्तिसतुसुहुसृधृक्षिक्षुभायावापदयक्षिनौब्यो मन्' (द.उ.7.26) [अर्त्तिस्तुसुहुसृधृक्षिक्षुभायापदियक्षिनीभ्यो मन्--द.उ.] इत्यर्त्यादिभ्यो विधीयमानो बहुलवचनादुन्देरपि भवति। `श्रन्तेः' इति। `श्रन्थ मोचनप्रतिहर्षणयोः' (धा.प.1510) इत्यस्य।।

30. नाञ्चेः पूजायाम्। (6.4.30)
`अनिदिताम्' (6.4.24) इत्यनेन प्राप्तस्य नलोपस्यायं प्रतिषेधः। एतस्मादेव प्रतिषेधान्नकारोऽयं इतचुत्वो निर्दिश्यत इति गम्यते। अथ `नाञ्चेरिटि' इत्येव कस्मान्नोक्तम् एवमपि ह्युच्यमाने पूजायमेव प्रतषेधो लभ्येत, तथा हि--पूजायामेवाञ्चतेरिङ् विहितः? अशक्यमेवं वक्तुम्, `अञ्चेः पूजायाम्' (7.2.53) इत्यनेन क्त्वानिष्ठयोर्नित्यमिङ विहितः। यस्तु क्त्वाप्रत्ययः `उदितो वा' (7.2.56) इति पाक्षिक इडागमः, स पूजायामपि भवति, तत्रैवमुच्यमाने यदा क्त्वाप्रत्ययस्य पूजायामिण्न स्यात्, तदा प्रतिषेधो न स्यात्। `गुरुमङ्क्त्वा' इति। `न' इत्येतत्प्रतिषेधवचनमुत्तरार्थम्। इह `अञ्चेरपूजायाम्' इत्युच्यमाने सतीष्टं सिद्ध्यत्येव। `अञ्चिता अस्य गुरवः' इति। `मतिबुद्धि' (3.2.188) इत्यादना क्तः। `क्तस्य च वर्तमाने' (2.3.67) इति षष्ठी। `यस्य विभाषेतीट्प्रतिषेधः' इति। अञ्चितेः `उदितो वा' (7.2.56) इति विकप्लेनेङविधानात्।।

31. क्त्वि स्कन्दिस्यन्दोः। (6.4.31)
`स्कन्त्वा' इति। `स्कन्दिर गतिशोषणयोः' (धा.प.979) `पक्षे इडागमः' इति। `स्वरति' (7.2.44) इत्यादिना। `कित्त्वप्रतिषेधान्नलोपभावः' इति। `अनिदिताम्' (6.4.24) इत्यादिना हि क्ङिति नलोपो विधीयते। सेट्क्त्वाप्रत्ययस्य `न क्त्वा सेट्' (1.2.18) इति कित्त्वप्रतिषेधः कृतः, ततश्चेडागमपक्षे कित्त्वाभावादेव नलोपाभाव इति नासाविमं योगं प्रयोजयति। तेन न सेट्क्त्वापरत्ययस्योदाहरणं प्रदर्शितमित्यभिप्रायः।।

32. जान्तनशां विभाषा। (6.4.32)
`नष्ट्वा, नंष्ट्वा' इति। नशेः व्रश्चादि (8.2.36) सूत्रेण षत्वम्, ष्टुत्वम्। `मस्जिनशोर्झलि' (7.1.60) इति मुमागमः। `ज' इति वर्णग्रहणम्, तत्र वर्णग्रहणे सर्वत्र तदन्तविधिं प्रयोजयतत्यन्तरेणाप्यन्तग्रहणेन तदन्तविधौ सिद्धे, यदिहान्तग्रहणं क्रियते तद्विस्पष्टार्थम्, यत्त्वाह--अनुपधाया अपि पक्षे लोपस्य प्रतिषेधार्थमन्तग्रहणम्, तद्यथा--`भक्त्वा, भङ्क्त्वा' इति, तन्न; केन पुनरनुपधाभूतस्य नकारस्या लोपः प्राप्नोति, यतोऽसौ पक्षे प्रतिषिध्यते। उपधानकारस्य लोप उक्तः, न चायमुपधानकारः। एवं तर्हि विधि विषयादन्यत्रापि क्वचिल्लोपो नकारस्य भवतीति ज्ञापयति। तेनैतत् सिद्धं भवित--`मग्नः, मग्नदान्' इति। ततश्चैतद्रथं `मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गलोपार्थम्' इत्येतन्न वक्तव्यं भवति। तत्र यदीदं नोच्येत, तदा यस्मिन् पक्षे क्त्वाप्रत्ययेन लोपो न भवति, तस्मिन् पक्षे `स्कोः संयोगाद्योरन्ते च' (8.2.29) इति सलोपोऽपि न स्यात्; असंयोगादित्वात्। तस्माद्वक्तव्यमेवेदम्--`मस्जेरन्त्यात्पूर्वं नुममिच्छन्ति' इति। ततश्चानुपधाभूतस्य नकारस्य लोपभाविनोऽसम्भवादनुपधाभूतस्य नकारस्य लोपप्रतिषेधो यथा स्यादेवमर्थमन्तग्रहणं न युज्यते।।

33. भञ्जेश्च चिणि। (6.4.33)
चकारः `विभाषा' (6.4.32) इत्यनुकर्षणार्थः। `अभाजि' इति। पूर्वमेव व्युत्पादितम्।

`अप्राप्तोऽयं नकारलोपः' इति। क्ङिति नलोपविधानात्, चिणश्चाक्ङित्वात्। अतः प्रतिषेध्याभावान्नेति नानुवर्तते। तेन विधिरेवायमित्यभिप्रायः।।

34. शास इदङ्हलोः। (6.4.34)
`अन्वशिषत्' इति। `सर्त्तिशास्त्यर्तिभ्यश्च' (3.1.56) इति च्लेरङादेशः `शिष्वः, शिष्मः' इति। वस्मसोरुदाहरणे, अदादित्वाच्छपो लुक्। `शासति' इति। `जक्षित्यादयः षट्' (6.1.6) इत्यभ्यस्तसंज्ञा, `अदभ्यस्तात्' (7.1.4) इति झेरदादेशः। `शशासतुः, शशासुः' इति। लिट्यतुस्युसि रूपे।
`क्वौ च शासः' इति। क्वौ परतः शासेरित्त्वं भवतीत्येतदर्थरूपं व्याख्येमित्यर्थः। तत्रेदं व्याख्यानम्--यद्यपि कृताकृतप्रसङ्गित्वेन नित्यत्वादत्र पूर्वमित्त्वात् क्विब्लोपस्य विधानम्, तथापि लुप्तेऽपि तस्मिन् प्रत्ययलक्षणेनात्रेत्त्वं भविष्यति।
`वर्णाश्रये प्रत्ययलक्षणं नास्ति' (व्या.प.96) इत्येतत्तु प्रायिकम्। तथा हि--वर्णश्रयेऽपि क्वचिद्भवति। तद्यथा--`अतृणेट्' इति। अत्र `तृ ह इम्' (7.3.92) इतीमागमः। अथ वा वर्णाश्रयमेवेदमित्त्वं न भवति। कथम्? अङ्गग्रहणेनात्र प्रत्ययः सन्निधापितः। स हल्ग्रहणेन विशिष्यते। अत एव वृत्तावुक्तम्--`हलादौ क्ङिति' इति। तेन यद्यपि क्विब् वर्णात्मकः प्रत्ययः, तथापि नासौ वर्णरूपत्वेनाश्रीयते, किं तर्हि? प्रत्ययरूपत्वेन।
`आर्यशीः' इति। सकारस्य रुत्वे कृते `र्वोरुपधाया दीर्घः' (8.2.76) इति दीर्घः।
अथ `आशास्ते, आशास्यमानः' इत्यत्र कथमित्त्वं न भवति? इत्याह--`यस्माच्छासेः' इत्यादि द्वाविमौ शासी--एकः परस्मैपदी, अपरस्त्वात्मनेपदी, तत्र यस्मात् शासेरङ् विहितं तस्येवं ग्रहणम्। स च `शासु अनुशिष्टौ' (धा.पा.1075) इत्यस्य `सत्तिशास्त्यर्त्तिभ्यश्च' (3.1.56) इति विधीयते, तत्र `परस्मैपदेषु' (3.1.55) इत्यनुवर्तते, अस्यैव परस्मैपदे सम्भवात्। कथं पुनः सामान्येनोपादाने परस्मैपदिन एव विज्ञायते? अङः संसर्गात्। संसर्गे हि सति विशेषपरिच्छेदो भवति, तथा हि--`सकिशोरा धेनुरानीयताम्' इत्युक्ते किशोरेण संसर्गाद् वडवायामेव सम्प्रत्ययो भवति। इह शासेरित्त्वं प्रत्यङ निमित्तत्वेनोपात्तः, अतस्तेन संसर्गाद् विशिष्ठ एव परस्मैपदी शासिः प्रतीयते। ननु चाङेवात्र केवलो निमित्तत्वेन नोपात्तः, किं तर्हि? हलपि, स चात्मनेपदिनोऽपि सम्भवति, तत् कुतोऽङ्संसर्गाद् विशिष्टस्य शासेः प्रतीति? नैतदस्ति; साधारणासाधारणसम्बन्धिसन्निपाते यस्यासाधारणः सन्निहितः सम्बन्धी तत्रैव प्रत्ययो जायते। तथा हि `वृद्धानां किशोरणाञ्च मध्ये धेनवोऽनुबध्यन्ताम्' इत्युक्ते बडवा एव प्रतीयन्ते। तस्मादङहलोरुपदानेऽपि यस्मादङ विहितस्तस्यैव ग्रहणं युक्तम्।
यदि तर्हि यतोऽङ विहितस्तस्येदं ग्रहणम्, एवं सति यथाशास्ते, आशास्यमान इत्यत्र न भवति, तथा क्विप्प्रत्ययेऽपि न स्यात्? इत्यत आह--`क्विप्प्रत्यये ति' इत्यादि। `क्षियासीः' इत्यादि। अथ वा नैव तस्या ह्यपि क्विष्प्रत्यय इत्येवं वक्तव्यमिति। विक्लपर्थो वाशब्दः। अथ तशब्दः किमर्थः, आन्तरतम्याद्दीर्घो मा भूदिति चेत्? नैतदस्ति; `भाव्यमानोऽण् सवर्णान्न गृह्णाति' (व्या.प.35) इति न भविष्यति? एवं तर्हि विस्पष्टार्थः। अथासन्देहार्थः कस्मान्न भवति? `शास यङङलोः' इत्युच्यमाने सन्देहः स्यात्--किमयमिकारः कृतयणादेशो निर्दिष्टः? आहोस्विदीकारः? अथ वा यकार इति? नास्ति सन्देहः, यदयम् `तदशिष्यं संज्ञाप्रमाणत्वात्' (1.2.53) इति निर्देशं करोति, ततो निश्चीयते--इकारोयम्, न हीकारः, नापि यकार इति।।

35. शा हौ। (6.4.35)
यद्यत्र `उपधायाः' (6.4.24) इति वर्त्तते, ततो यथा पूर्वसूत्रे `शासः' (6.4.34) इत्यवयवभूता षष्ठी, तथेहापि स्यात् एवञ्चोपधाया एवायमादेशः, प्रसज्येत, सर्वादेशश्चेष्यत इति मनसि कृत्वाह--`उपधाया इति निवृत्तम्' इति। तद्धि उपधागरहणं क्ङिद्ग्रहणेन सम्बद्धम्, इह च क्ङिद्ग्रहणं निवृत्तम्। तस्मात् `उपधायाः' (6.4.24) इत्यस्यापि निवृत्तिर्भवति। `क्ङिति' इत्येतदपि निवृत्तम्' इति। `अनुदात्तोपदेश' (6.4.37) इत्यादौ सूत्रे पुनः क्ङिद्ग्रहणात्। `तेन' इत्यादिना क्ङिद्ग्रहणे निवृत्ते यदिष्टं सम्पद्यते तद्दर्शयति--यद्यत्र `क्ङिति' (6.4.24) इत्येतदनुवर्त्ततततो `वा च्छन्दसि' (3.4.88) इति यसमिन्पक्षे हेरपित्त्वं न भवति तस्मिन् पक्षे `सार्वधातुकमपित्' (1.2.4) इति वचनात् ङित्त्वं नास्तीति शाभावो न स्यात्। क्ङिद्ग्रहणे तु निवृत्तेऽपित्त्वपक्षेऽपि भवत्येव। स्यादेतत्--व्यवस्थितविभाषाविज्ञानाच्छास उत्तरस्य हेः पित्त्वं न भविष्यति, ततो नार्थः क्ङिद्ग्रहणेन निवर्त्तितेन? इत्यत आह--`शाधीत्येतत्' इत्यादि। यदि शास उत्तरस्य हेः पक्षे पित्त्वं न स्यात्, तदा शाधीत्येतत् सतिशिष्टत्वेन प्रत्ययस्वरेणान्तोदात्तमेव स्यात्। आद्युदात्तमपि च्छन्दसीष्यते। तच्च हेः पित्त्वे सति धातुस्वरेण सम्पद्यते, नान्यथा। तस्मादवश्यं च्छन्दसि यक्षे पित्त्वं विधेयम्।
अथ `आ हौ' इत्येवं कस्मान्नोक्तम्, अकोरेऽपि हि `अलोऽन्त्यस्य' (1.1.52) इति सकारस्य विहिते सवर्णदीर्घत्वेन शाधीत्येतत् सिद्धं भवति? न सिद्ध्यति; पूर्वसूत्रेणोपधाया इत्त्वं स्यात्। न चायं तस्य बाधको युज्यते; असति च सम्भवे बाधनं भवति, अस्ति च सम्भवो यदुभयं स्यात्, अत्रास्ति सम्भवः। तस्मादकारेऽन्त्यसय विहित उपधाया इत्त्वं स्यादेव।।

36. इन्तेर्जः।
`हन्तेः' इति। स्पिपा निर्देशो यङलुग्निवृत्त्यर्थः--`जङ्घहि'।।

37. अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति। (6.4.37)

`अनुनासिक' इति षष्ठ्या बहुवचनस्य लुकं कृत्वाऽविभक्तिकोऽयं निर्देशः। अत एवाह--`अनुनासिकान्तानाम्' इति। `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इति दीर्घत्वे प्राप्ते लोपोऽयं विधीयते। अत्र लोपे कृते दीर्घत्वं न प्राप्नोति; विहितनिमित्तत्वात्। `यमि रमि गमि नमि हनि मन्यतयः' इति--`यम उपरमे' (धा.पा.984) `रमु क्रीडायाम्' (धा.पा.853) `गन्लृ सृप्लृ गतौ' (धा.पा.982,983) `णम पह्वत्वे' (धा.पा.981) [प्रह्वत्वे शब्दे च--धा.पा] `हन हिंसागत्योः' (धा.पा.1012) `मन ज्ञाने' (धा.पा.1176)।
`वतिः' इति। `वन षण सम्भक्तौ' (धा.पा.463,464)। `तितुत्रतथ' (7.2.9) इत्यादिनेट्प्रतिषेधः। `क्तिनि' इत्यनेन क्तिन्येव वनतेरुदाहरणं सम्भवति, नान्यत्रेति दर्शयति। किं कारमम्? इत्याह--`क्तिचि तु' इत्यादि। क्तिचि तु `न क्तिचि दीर्घश्च' (6.4.39) इति प्रतिषेधं वक्ष्यति। ये त्वन्ये झलादयः प्रत्ययास्तेष्वपीटा भवितव्यम्, ततो झलादित्वाभावाद्वनतेरनुनासिकलोपं प्रति ते निमित्तभावं नोपयान्तीति पारिशेष्यात् क्तिन्येव वनतेरनुनासिकलोपेन भवितव्यम्।
`सनोतेरात्त्वं वक्ष्यति' इति। तेन तस्यानुनासिकलोपोदाहरणं न भवतीति भावः। आत्त्वं पुनः `जनसनखनाम्' (6.4.42) इत्यादिना वक्ष्यति। `क्षतः' इति। `क्षणु हिंसायाम्' (धा.पा.1465)। `ऋतः' इति--`ऋणु गतौ' (धा.पा.1467)। `तृतः' इति। `तृणु दाने' [`अदने' धा.पा.] (धा.पा.1468)। `घृतः' इति। `घृणु दीप्तौ' (धा.पा.1469) `वतः' इति। `वनु याचने' (धा.पा.1470) `मतः' इति। `मनु अवबोधने' (धा.पा.1471) `अतत, अतथा' इति। तनोतेर्लुङ। आत्मनेपदप्रथममध्यमैकपुरुषवचने। `तनादिभ्यस्तथासोः' (2.4.79) इति सिचो लुक्।
`शान्तः, तान्तः, दान्तः' ति। शमितमिदमीनां रूपाणि। एते नानुदात्तोपदेशाः। `इह च' इत्यादि। गमिरमिभ्यां क्तिनि कृते तयोर्नित्स्वरेणाद्युदात्तत्वेऽनुदात्तत्वाभावादसत्युपदेशग्रहणे लोपो न स्यात्, अस्मिंस्तु सति भवति। किञ्च--असत्युपदेशग्रहणे शान्तः, दान्त इत्यत्रापि स्यात्। भवति हि शमिः सतिशिष्टप्रत्ययस्वरे कृते `अनुदात्तं पदमेकवर्जम्' (6.1.158) इति शेषस्यानुदात्तत्वेऽनुदात्तः। उपदेशग्रहणात्तु न भवति, न ह्यमुपदेशेऽनुदात्तः।।

38. वा ल्यपि। (6.4.38)
अझलाद्यर्थ आरम्भः। `प्रयत्य' इति। प्रादसमासे कृते `समासेऽनञ्पूर्वे क्त्वो ल्यप् (7.1.37) `ह्रस्वसय पिति कृति तुक्' (6.1.71)।।

39. न क्तिचि दीर्घश्च। (6.4.39)
`यन्तिः' इत्यादि। `क्तिच्क्तौ च संज्ञायाम्' (3.3.174) इति क्तिच्। अत्र चानुदात्तोपदेशादिप्रहणमनुवर्तते, तेन `कान्तिः शान्तिः' इत्यत्र धीर्घप्रतिषेधो न भवति। अनुनासकलोपस्य त्वत्र प्राप्तिरेव नास्ति; उदात्तोपदेशत्वात्।
`अनुनासिकलोपे प्रतिषिद्धे' इत्यादिना दीर्घग्रहणस्य प्रयोजनमाचष्टे। ननु च प्रकरणापेक्षया यदस्मिनप्रकरणे विहितं तन्न भवतीति विज्ञायमानेऽन्तरेणापि दीर्घग्रहणं दीर्घस्यापि प्रतिषेधो भविष्यति, तत् किं दीर्घग्रहणेन? एवं तर्ह्येतज्ज्ञापयति--अस्तीयं परिभाषा `अनन्तरसय विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इति।।

40. गमः क्वौ। (6.4.40)
अयमप्यझलाद्यर्थ आरम्भः। `अध्वगतो हरयः' इति। अध्वानं गच्छन्तीति क्विप्, तदन्तज्जस्।
`गमादीनाम्' इत्यादि। गमादीनामनुनासिकलोपः क्वौ भवतीत्येतदर्थरूपं व्याख्येमित्यर्थः। तत्रेदं व्याख्यानम्--पूर्वसूत्राच्चकारोऽनुवर्तते, स चानुक्तसमुच्चयार्थः, तेन गमादीनां भविष्यति, न तु गमेरेव केवलस्येति। `संयत्' इति। संपूर्वाद् यमेः क्विप्। `परितत्' इति। परिपूर्वात् तनोतेः, `नहिवृति' (6.3.116) इत्यादिना दीर्घः।
`ऊ च' इत्यादि। चकारादनुनासिकलोपः। क्वचिद् `ऊङ च' इति पठ्यते, तत्र ङकारस्य प्रयोजनं चिन्त्यम्। अलोऽन्त्यपरिभाषयैवात्र भविष्यति। `अग्रेगूः' इति। गमेः, भ्रमेश्चानुनासिकलोपे कृतेऽकारस्योकारः।।

41. विड्वनोरनुनासिकस्यात्। (6.4.41)
`अब्जाः' इति। अप्सु जायत इत्युपपदसमासः, पकारस्य जश्त्वम्--बकारः। `गोषा' इति। `षणु दाने' (धा.पा.1464) `विजवा' इति। `जन जनने' (धा.पा.1105), `जनी प्रादुर्भावे' (धा.पा.1149) इति वा। `अग्रेगाव' [`अग्रेजावा' इति काशिका पाठः] इति। `तत्पुरुषे कृति बहुलम्' (6.3.14) इति सप्तम्या अलुक्।
अथानुनासिकग्रहणं किमर्थम्, यावतानुदात्तोपदेशेत्यादेः (6.4.37) सूत्रादनुनासिकगरहणमनुवर्तत एव? इत्याह--`अनुनासकस्येति वर्तमाने'--इत्यादि। तद्धि प्रकृतमनुनासिकग्रहणमनुदात्तोपदेशग्रहणेन सम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्। तस्माददमन्यदनुनासिकग्रहणं क्रियते--अनुनासिकमात्रस्य यथा स्यात्। अथेह दीर्घोच्चारणं किमर्थम्? ह्रस्व एवोच्येत, ह्रस्वेऽपि कृते सत्यकः सवर्णे दीर्घत्वेन सिद्ध्यत्येव; `अतो गुणे' (6.1.97) पररूपत्त्वं प्राप्नोति, अतो न सिद्धयतीत्येतन्नाशङ्कनीयम्, अकारविधानसामर्थ्यात्; यदि हि `अतो गुणे' पररूपत्वं स्यात्, तदा प्रकृतं लोपग्रहणमेव विदध्यात् ततो ह्रस्व एव

कर्तर्व्यः। नैतदस्ति; ह्रत्वे हि सति `घुण धूर्णने' (धा.पा.437) [`भ्रमणे'--धा.पा.] इत्यस्माद्वनिपि विहिते `ध्वावा' इति न सिद्ध्येत्? ततो दीर्घस्यैव विधानं युक्तम्।।

42. जनसनखनां सञ्झलोः। (6.4.42)
`झलि क्ङिति चानुवर्तते' इति। यथाक्रमं सनो झलश्च विशेषणम् सूत्रोपात्तेन तु झल्ग्रहणेन न शक्यते सन् विशेषयितुम्, विशेषणं ह्यप्राधानं भवति, विशेष्यन्तु प्रधानम्। `सञ्झलोः' इति चार्य द्वन्द्वः। तत्र सर्वेषां द्वन्द्वपदानां प्राधान्यादन्योऽन्यं प्रधानगुणभावो नोपपद्यते। सन्ग्रहणञ्चाक्ङिदर्थम्। `तदिह' इत्यादि। यस्मात् सनोतेः पक्ष इडागमस्तस्मात् तत एव परो झलादिः सन् सम्भवतीति तदर्थमेव सन्ग्रहणम्, न तु जनखनार्थम्। न हि ताभ्यां परो झलादिः सन् सम्भवति, तयोर्नित्यं सेट्त्वात्। यद्येवं, सनोतेः सनि कृतार्थत्वादात्त्वं न स्यात्, अन्यत्र निष्ठादौ झलादौ क्ङितिप्रत्यये `अनुदात्तोपदेशः' (6.4.37) इत्यादिना नलोपः स्यात्? इत्यत आह--`अन्यत्र' इत्यादि। सनोतेस्तनोत्यादिषु पाठस्यावकाशोऽन्यत् तनादिकं कार्यम्--`तनादिभ्यस्तथासोः' (2.4.79) इत्यादि, आत्त्वविधौ च सन्ग्रहणस्यावकाशः--सन्, सिषासतीति; इहोभयं प्राप्नोति--सातः, सातवानिति। अत्रानुनासिकलोपं बाधित्वाऽऽत्त्वं भवति विप्रतिषेधेन। ननु चोभयः सिद्धयोर्विप्रतिषेधो भवति, इह च `असिद्धवदत्रा भात्' (6.4.22) इत्युभयमप्यसिद्धम्, तत् कुतो विप्रतिषेधः? इत्यत आह--`घुमास्थागा' इत्यादि। कथं कृत्वा ज्ञापकम्? हल्ग्रहणस्यैतदेव प्रयोजनम्--हलादावीत्त्वं यथा स्यात्, इह मा भूत्--`आतोऽनुपसर्गे कः' (3.2.3) गोदाः, कम्बलद इति यदि चात्र विप्रतिषेधः? इत्यत आह--`घुमास्थागा' इत्यादि। कथं कृत्वा ज्ञापकम्? हल्ग्रहणस्यैतदेव प्रयोजनम्--हलादावीत्त्वं यथा स्यात्, इह मा भूत्--`आतोऽनुपसर्गे कः' (3.2.3) गोदः, कम्बलद इति। यदि चात्र विप्रतिषेधो न स्याद् हल्ग्रहणमनर्थकं स्यात्। अस्त्वत्रेत्त्वम्, तस्यासिद्धत्वाल्लोपो भविष्यत। पश्यति त्वाचार्यः--भवतीह प्रकरणे विप्रतिषेध इति; यतो हल्ग्रहणं करोति। ननु चासति हल्ग्रहणेऽजादावपीत्त्वं स्यात्, ततश्चेपङः प्रसज्येतेत्यनिष्टं रूपमापद्येत। तस्मादनिष्टनिवृत्त्यर्थत्वाद्धल्ग्रहणस्य न युज्यते ज्ञापकत्वम्? नैष दोषः; असिद्धत्वादेवेत्त्वस्येयङादेशो न भविष्यति। व्यवस्थार्थं तर्हि हल्ग्रहणं स्यात्, असति हि तस्मिन्नीत्त्वस्यासिद्धत्वा दाल्लोपः, आकारलोपस्यासिद्धत्वादीत्त्वमीति चक्रवद्व्यवस्था स्यात्? एतदप्यप्रयोजनम्, यदि व्यवस्थार्थं हल्ग्रहणं स्यात्, नैवायं हल्ग्रहहँ कुर्वीत। अविशेषेणेकारमुक्त्वा तस्याजादौ लोपमपवादं विदध्यात्। तत् कथमिदमस्तु `आतो लोप इटि च' (6.4.64) इति? ततः `धुमास्थागापाजहातिसाम्' (6.4.66) आकारलोपो भवतीटयजादौ च क्ङिति। किमर्थमिदम्? प्रत्ययमात्रे ध्वादीनां यदीत्त्वं वक्ष्यते, तस्यायमिट्यजादौ च क्ङित्यपदादः, ततः `ईत्' (6.4.68) इतीत्त्वं भवति घादीनामनचि क्ङिति, ततः `एर्लिङि' (6.4.37) `दान्यस्य संयोगादेः' (6.4.68) `न ल्यपि' (6.4.69), `मयतेरिदन्यतरस्याम्' (6.4.70); ततो यतीत्त्वं भवति--सोऽयमेव लगीयसा न्यासेन सिद्धे यद्धल्ग्रहणं करोति, तज्ज्ञापयत्याचार्यः--`भवतीह विप्रतिषेधः' इति।।

43. ये विभाषा। (6.4.43)
असज्झलाद्यर्थ आरम्भः। `जायते, जन्यते' इति। भावे लकारः। `जाजायते' इति। यङ्, `दीर्घोऽकितः' (7.4.83) इत्यभ्यासस्य दीर्घत्वम्। `जञ्जन्यते' इति। `नुगतोऽनुनासिकान्तस्य' (7.4.85) नुगागमः `सायते, सन्यते' इति। भावे कर्मणि वा लकारः। जनेः श्यन्यपि विभाषाऽऽत्त्वेन भवितव्यमिति कस्यचिद् भ्रान्ति स्यात्, अतस्तां निराकर्तुमाह--`जनेः श्यनि' इत्यादि। जनेर्दिवादित्वात् श्यनि विहिते सत्युमयं प्राप्नोति, अनेन विभाषाऽऽत्त्वम्, `ज्ञाजनोर्जा' (7.3.79) इति जाभावश्च, तत्र जादेशस्यानवकाशत्वात् स एव नित्यं भवति। तेन श्यनि `जायते' इत्येवं नित्यं भवति, न तु कदाचित् `जन्यते' इति।।

44. तनोतेर्यकि। (6.4.44)

45. सनः क्तिचि लोपश्चास्यान्यतरस्याम्। (6.4.45)
अस्यग्रहणमनन्तरस्य क्तिचो लोपो मा भूत; व्यवहितस्यापि नलोपो यथा स्यादित्येवमर्थम्। अथ क्रियमाणेऽप्यस्यग्रहणे कस्मादेव क्तिचो लोपो न भवति? अस्यग्रहणसामर्थ्यात्। अथान्यतरस्यांग्रहणं किमर्थम्, यावता `विभाषा' (6.4.46) इत्यनुवर्तते? इत्याह--`अन्यतरस्यांग्रहणम्' इत्यादि। कथं पुनर्विभाषाग्रहणस्य निवृत्तिराशङ्क्यते, यतो विस्पष्टार्थमन्यतरस्यांग्रहँ कृतम्? इत्याह--`यकारसम्भन्धं हि' [ये सम्बबद्धं हि--काशिका] इत्यादि। तद्विभाषाग्रहणं यकारादिप्रत्ययस्य सम्बन्धेन। इह च `ये' इत्येतस्मिन् निवृत्ते क्तिचो निमित्तान्तरस्योपादानातदतस्तान्निवृत्तौ विभाषाग्रहणमपि निवृत्तमिति कस्यचिदाशङ्का स्यात्, अतो विस्पष्टार्थमन्यतस्यांग्रहणं क्रियते।।
46. आर्धधातुके। (6.4.46)
`चिकीर्षिता' इति। सन्नन्तात् तुच्। `भवति, भवतः' इति। `आर्धधातुके' इत्यधिकारात् सार्वधातुकेऽत्र शपो लोपो न भवति। यद्यत्र शपो लोपो मा भूदित्येवमर्थ आर्धधातुकाधिकारः क्रियते, तर्हि न कर्तव्यः, ज्ञापकादेव शपो लोपो न भविष्यति, आचार्यप्रवृत्तिर्ज्ञापयति--`नानेन शपो लोपो भवति' इति यदयम् `अदिप्रभृतिभ्यः शपः' (2.4.72) इति शपो लुकं शस्ति? इत्यत आह--`अदिप्रभृतिभ्यः' इत्यादि। इतिकरणो हेतौ। असति हि प्रयोजने ज्ञापकं

भवति। अस्ति चादिप्रभृतिभ्यः शपो लुग्वचनस्य प्रयोजनम्। किं तत्? `वित्तः' इत्यत्र गुणो मा भूत्। यदि `वित्तः' इत्यत्र लोपः स्यात्, प्रत्ययलक्षणेन `पुगन्तलघूपधस्य' (7.3.86) इति गुणः स्यात्। `मृष्टः' इत्यत्र `मृजेर्वृद्धिः' (7.2.114) लुकि तु सति न भवति, `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणप्रतिषेधात्। तस्माददिप्रभृतिभ्यः शपो लुग्वचनं प्रत्ययलक्षमप्रतिषेधार्थं स्यादिति न ज्ञापकं शपो लोपाभावस्य।
`बेभिदिता' इति। यङो लोपः। `बेभिद्यते' इत्यत्र शपि सार्वधातुके न भवति।
`कारणा' इति। `ण्यासश्रन्थो युच्' (3.3.107)। `कारयति' इति शपि सार्वधातुके न भवति।
`पपतुः, पपुः'। `ववतुः' ववुः' इति। अतुसुसौ। पातेर्वातेश्च `आतो लोप इटि च' (6.4.64) इत्यकारलोपः।
`दीयते धीयते' इति। आर्धधातुके यकीत्त्वम्। `अदाताम् अधाताम्' इति। लुङ, `तस्थस्थ' (3.4.101) इति तसस्ताम्; `गातिस्था' (2.4.77) इत्यादिना सिचो लुक्। `स्नायात्, स्नेयात्' इति। स्नातेराशिषि लिङ, तस्य `लिङाशिषि' (3.4.116) इत्यार्धधातुकसंज्ञा, यासुट्, `स्कोः संयोगाद्योः' (8.2.29) इत्यादिना सकारलोपः। `आशीर्लिङोऽक्यत्र न भवति' इति। आशीर्लिङोऽन्यद् विष्यादिलिङः, तत्र न भवति; तस्य सार्वधातुकसंज्ञकत्वात्। तेन तत्र नित्यं `स्नायात्' इत्येवं भवति। अत्र `लिङः सलोपोऽनन्त्यस्य' (7.2.79) इति सकारलोपः।
`कारिषीष्ट' इति। आशिषि लिङः, सीयुट्, `भावकर्मणोः' (1.3.13) इत्यात्मनेपदम्, `सुट् तिथोः' (3.4.107) इति सुट् चिण्वद्भावाद्वृद्धिः। `क्रियेत' इति। विष्यादिलिङः। पूर्ववदात्मनेपदम्, सार्वधातुके यक्, सीयुडीकरेण सह `आद्गुणः' (6.1.87) `लोपो व्योर्वलि' (6.1.66) इति यकारलोपः, `रिङशयग्लिङ्क्षु' (7.4.28) इति रिङादेशः। अत्र चिण्वद्भादेन यो दोषः स्यात् तं `यगन्तस्य' इत्यादिना दर्शयति। यद्यत्र चिण्वद्भावात् वृद्धिः स्यात्, ततश्च `आतो युक् चिण्कृतोः' (7.3.33) इति युक् प्रसज्येत।
`अतो लोपो यलोपश्च' इत्यादि। आर्धधातुकाधिकारप्रयोजनसंग्रहश्लोकः। गतार्थः।
नन्वत्र `भ्रस्जो रोपधयो रमन्यतरस्याम्' (6.4.47) इति रम्, `दीङो युडचि क्ङिति' (6.4.63) इति युडार्धधातुकाधिकार एव विधास्यते, तत् कस्मात् तौ तत्र प्रयोजनत्वेन नोपात्तौ? एवं मन्यते--भ्रस्जो रम्भाव आर्धधातुकाधिकारं न प्रयोजयति, स, तु तुदादौ पठ्यते, ततः सार्वधातुके परतः शेन भवितव्यम्। शे च सति पूर्वविप्रतिषेधाद् ग्रहिजयादि (6.1.16) सूत्रेण सम्प्रसारणेन भवितव्यम्। युडपि नैव प्रयोजयति, दीङो हि दिवादित्वात् सार्वधातुके श्यना भवितव्यम्। ततोऽजादित्वाभावादेव युडागमस्याभाव एव। `आर्धधातुके' इति यदार्धधातुकसामान्यं विवक्ष्यते, तदा सामान्ये पौर्वापर्यासम्भवात् विषयसप्तमीयम्। यदार्धधातुकव्यक्तिस्तदा परसप्तमी। प्रतिपादितञ्चास्मभिः `न धातुलोपः' (1.1.4) इत्यत्र ज्ञापकद्वारेण परसप्तमीत्वं विषयसप्तमीत्वञ्चास्येति।।

47. भ्रस्जो रोपधयो रमन्यतरस्याम्। (6.4.47)
रमयं यदि रेफोपधयोः स्थाने स्यात् मित्त्वमनर्थकं स्यात् अथायं रमागमोऽचोऽन्यात् परो भवति रेफोपधयोः अवणमापद्येत? इत्येतच्चोद्यमाशङ्क्याह--`रोपधयोः' इत्यादि। मित्त्वाद्रमनेनावश्यमचोऽन्त्यात् परेण भवितव्यम्, अन्यथा तदनर्थकं स्यात्। तत्र यदि रेफोपधयोः श्रवणं स्यात् `रोपधयोः' इति षष्ठीनिर्देशोऽनर्थकः स्यात्। तस्मात् षष्ठीनिर्देश एव तयोर्निवृत्तिमाचष्टे। तस्या ह्येतदेव प्रयोजनम्--षष्ठ्या निर्दिरुयमानस्य यो धर्मो निवृत्तिः, सा यथा स्यात्। न ह्यन्यत् षष्ठीनिर्देशस्य प्रयोजनमस्ति। तस्मान्मित्त्वादचोऽन्त्यापरो भवति रम। षष्ठीनिर्देशसामर्थ्याद् रेफोपधे स्थानिधर्मनिवृत्तिं प्रतिपद्येते। `भ्रष्टा' इति। `भ्रस्ज पाके' (धा.पा.1284) व्रश्चादिसूत्रेण (8.2.36) षत्वम्। `भ्रज्जनम्' इति। सकारस्य जश्त्वम्--दकारः, तस्यापि श्चुत्वम्--जकारः। अथेह कस्मान्न भवति--भृष्टः, भृष्टवान्? इत्याह--`भृष्टः, भृष्टवान्' इत्यादि। रमोऽवकाशः--भरष्टा, भ्रष्टाः सुम्प्रसारणस्यावकाशः--`भृज्जति' इति, इहोभयं प्राप्नोति--भृष्टा, भृष्टवानिति, ग्रह्यादिसूत्रेण (6.1.16) सम्प्रसारणमेव भवति पूर्वविप्रतिषेधेन। पूर्वविप्रतिषेधश्चेष्टवाचित्वात् परशब्दस्य लभ्यते। `बरीभृज्यते' इति। यङ्। `रीगृदुपधस्य' (7.4.90) इति रोगागमः। `अत्र उपदेश' (6.4.45) इत्यतो हि यदन्तरस्यांग्रहणं प्रकृतं, तत् सनादिसम्बद्धम्, इह च सनादेर्निवृत्तिः। अतस्तन्निवृत्तौ तस्यापि निवृत्तिराशङ्क्येत। अनन्तरयोगस्य चान्यार्थत्वात्, तत्रान्यतरस्यांग्रहणस्य प्रयोजनाभावात्। अथ भ्रस्जो भर्जेत्येवं कस्मान्नोक्तम्? अशक्यमेवं वक्तुम्। एवं ह्युच्यमाने `प्रकृतिग्रहणे यङलुगन्तस्यापि ग्रहणं भवति' (व्या.प.77) इति यङ्लुगन्तादार्धधातुक उत्पन्ने सत्यभ्यासस्य भ्रस्जो भर्ज्जादेशः स्यात्? नैष दोषः; उपदेशग्रहणेन भ्रज्जिं विशेषयिष्यामः--`उपदेश यो भ्रज्जिः' इति। श्तिपा निर्देशोऽत्र वा करिष्यते--भृज्जतेर्भजं इति; तेन यङःलुगन्तस्य ग्रहणं न भविष्यति। एतमपि `भुज्जयते' इत्यत्र प्राप्नोति, भवति ह्यत्रोपदेशे भ्रस्जिरिति? नैतदस्ति; अत्र हि पूर्वविप्रतिषेधात् सम्प्रसारणेन भवितव्यम्, यथा--भृष्ट इत्यत्र। एवं तर्हि वैचित्र्यार्थ तथा नोक्तम्।।

48. अतो लोपः। (6.4.48)
`धिनुतः, कृणुतः' इति। `हिवि दिवि धिवि प्राणनार्थाः' (धा.पा.591,592,593), `कृवि हिंसाकरणयोः' (धा.पा.598) इदित्वान्नुम्, लट्, तस्, `धिन्विकृण्व्योर च' (3.1.80) इत्युप्रत्ययः, अकारश्चान्तादेशः, तस्यानेन लोपः। अथ तपकरणं किमर्थम्, यावता धातेत्यत्र मा भूत्? ननु च `आतो लोप इटि च' (6.4.64) इति नियमार्थ भविष्यति--आकारस्येट्येवाजादौ क्ङिति लोपो भवति? नैतद्सित; विपरीतनियमोऽपि सम्भाव्येत--आत एवेटि क्ङिति नान्यस्येति। तथा च चिकीर्षितेत्यत्र न स्यात्। तस्माद् विपरीतनियमसम्भावनानिवृत्त्यर्थ तपरकरणम्। विस्पष्टार्थं वा।

`वृद्धिदीर्धाभ्याम्' इत्यादि। `अचो ञ्णिति' (7.2.115) इत्यस्यावकाश--कारयति, हारयति, अतो लोपस्यावकाशः--चिकीर्षिता, जिहीर्षितेति; इहोमयं प्राप्नोति--चिकीर्षकः, जिहीर्षक इति, अतो लोप एव भवति पूर्वविप्रतिषेधेन। `अकृत्सार्वधातुकयोर्दीर्घः' (7.4.25) इत्यस्यावकाशः---चीयते, लूयत इति, अतो लोपस्यावकाशः स एव; इहोभयं प्राप्नोति--चिकीर्ष्यते, जिहीर्ष्यत इति, लोप एव भवति पूर्वविप्रतिषेधेन।।

49. यस्य हलः। (6.4.49)

`बेभिदिता' इति। यङन्तादार्धधातुकं तृच्, तस्मिन् परतो यशब्दस्य लोपः। `यस्य' इतीदं वर्णनिर्देशो वा स्यात् यकाराकारग्रहणं वा? तत्र यद्याद्यः पक्ष आश्रीयेत तदोर्ष्यिता, मव्यितेत्यत्रापि स्यादिति द्वितीयं पक्षमाश्रीत्याह--`यस्येति सङ्घातग्रहणम्' इति। कुत एतत्? निर्देशात्। यदि वर्णग्रहणं स्यात्, तदा `यो हलः' इत्येवं ब्रूयात्। यदि तर्हि सङ्घातग्रहणम्? एवं तर्हि `अलोऽन्त्यस्य' (1.1.52) इत्यन्त्यस्य स्यादित्यत आह--`तत्रालोऽन्त्यस्य' इत्यादि। कस्मान्न प्रवर्तते? इत्याह--`अतो लोपः' इत्यादि। पूर्वेणाप्यलोऽन्त्यस्य लोपः सिद्धः, तत्रारम्भसामर्थ्यात् सर्वस्य भवति।

`हल इति वा' इत्यादिना परीहारान्तरमाह। `हलः' इति पञ्चमीनिर्देशः, तत्र `हल उत्तरो यो यशब्दस्तस्य लोपः' इत्युच्यमाने `आदेः परस्य' (1.1.54) इति वचनाद् यकारस्यैवनेन लोपो भवति। अकारस्य तु `अतो लोपः' (6.4.48) इत्यनेन।

`ईर्ष्यिता, मव्यित'[`भव्यिता' इति न्यासमद्रितपाठः] इति। `सूर्क्ष्य इक्ष्यं ईर्ष्य ईर्ष्यार्थाः' (धा.पा.509,510,511), `मव्य बन्धने' (धा.पा.508)। अत्र सङ्घातात्मको यशब्दो न भवतीति न प्रवर्तते लोपः। `लोलुयिता' इति। यङः, `गुणो यङलुकोः' (7.4.82) इति गणः।।

50. क्यस्य विभाषा। (6.4.50)

`क्य' इति क्यच्क्यङोरुत्सृष्टानुबन्धयोः सामान्येन ग्रहणम्; विशेषानुपादानात्। `समिधमिवात्मानमाचरति' इति। वेति वाशब्दः समुच्चये वर्त्तमानः समिदिवाचरतीत्यमुमर्थं ग्राहयति। `यथायोगम्' इति। यदात्मनः समिधमिच्छतीत्यर्थो विवक्ष्यते, तदा `सुप आत्मनः क्यच्' (3.1.8) इति क्यच् कर्त्तव्यः, यदा समिधमिवात्मानामाचरतीति तदा `उपमानादाचारे' (3.1.10) इति क्यजेव, यदा समिदिवाचरतीति तदा `कर्तुः क्यङ् सलोपश्च' (3.1.11) इति क्यङ्--इत्येष यथायोगशब्दार्थः।।

51. णेरनिटि। (6.4.51)

`णेः' इति। णिङणिचोर्विशेषकरावनुबन्धावुबन्धावुत्सृज्य यत् समान्यं णिमात्रं तस्य ग्रहणम्। इयङादिभिः सर्वस्य विषयस्यावष्टब्धत्वादनवकाशीऽयं णिलोपस्तेषामपवादोऽयं विज्ञायत इत्यत आह--`इयङ्यण्' इत्यादि। `अततक्षत्, अररक्षत्' इति। तक्षिरक्षिभ्यां हेतुमण्णिच्, तदन्तालुङ् `णिश्रिदुस्रुभ्यः (3.1.48) इत्यादिना च्लेश्चङ्, ङित्त्वाद् गुणस्य प्रसङ्ग एव नास्तीतीयङादेशः स्यात्। अतस्तस्यापवादो णिलोपः। `आटिटत्, आशिशत्'। अट्यशिभ्यां पूर्वं णिजादिषु कृतेषु `अजादेर्द्वितीयस्य' (6.1.2) इति टिशब्दशिशब्दौ द्विरुच्येते। अत्र `एरनेकाचः' (6.4.82) इत्यादिना प्राप्तस्य यणादेशस्यायमपवादः। `कारणा, हारणा' इति। अत्र `सार्वधातुकार्धधातुकयोः' (7.3.84) इति प्राप्तस्य गुणस्य। `कारकः, हारकः' इति। अत्र `अचो ञ्णिति' (7.2.115) इति वृद्धेः। `कार्यते, हार्यते' इति। अत्र `अकृत्सार्वधातुकयोः' (7.4.25) इति प्राप्तस्य दीर्घस्य। `ज्ञीप्सति' इति। `अज्झनगमां सनि' (6.4.16) इति प्राप्तस्य दीर्घस्यैव। जानातेर्णिचि `अर्त्तिह्री' (7.3.36) इत्यादिना पुक्, `मारणतोषणनिशामनेषु ज्ञा' (धा.पा.811) इति घटादिपाठात् `घटादयो मितः' (ग.सू.धा.पा.817) इति मित्संज्ञा, `मितां ह्रस्वः' (6.4.92) इति ह्रस्वत्वम्, `अत्र लोपोऽभ्यासस्य' (7.4.58) इत्यभ्यासलोपः।

`कारयिता, हारयिता' इति। `अनिटि' इति वचनादिह न भवति। `अनिटि' इति शक्यमकर्तुम्। कथम्? `निष्ठायां सेटि' (6.4.52) इति नियमार्थं भविष्यति--निष्ठायामेव सेटि, नान्यत्रेति? अयुक्तमेतत्, विपरीतनियमोऽप्याशङ्क्येत--`सेट्येव निष्ठायाम्' इति। तथा च सति `कारयिता' इत्यत्र स्यादेव णिलोपः। तस्माद्विपरीतनियमाशङ्कानिरासार्थं `अनिटि' इत्युक्तम्।।

52. निष्ठायां सेटि। (6.4.52)

`गणितम्, लक्षितम्' इति। `गण संख्याने' (धा.पा.1853) `लक्ष दर्शनाङ्कनयोः' (धा.पा.1538)।

`संज्ञपितः पशुः' इति। ननु चात्र यदि `सेटि' इति वचनादनेन न भवितव्यम्, तदा पूर्वसूत्रेण कस्मान्न भवति? इत्याह--`सेङ्ग्रहणसामर्थ्यात्' इत्यादि। यदि ह्यनिटि पूर्वेण णिलोपः स्यात् सेङ्ग्रहणमनर्थकं स्यात्, `निष्ठायाम्' इत्येवं ब्रूयात्, आरम्भसामर्थ्यादेव हि सेडर्थो भविष्यति। तस्मात् सेङ्ग्रहणसामर्थ्यात् पूर्वेणापि `संज्ञापितः पशुः' इत्यत्र णिलोपो न भवति। कथं पुनरत्र सेङ् निष्ठा न भवति? इत्याह--`सनीवन्तर्ध' इत्यादि। `अथ' इत्यादि। अथ `यस्य विभाषा' (7.2.15) इत्यत्र `एकाच उपदेशेऽनुदात्तात्' (7.2.10) इत्यत्र एकाज्ग्रहणमनुवर्तते, ततोऽनेकाच्त्वाज्ज्ञपेः प्रतिषेधाभावाद् भवितव्यमिडागमेन निष्ठायाम्। तस्मात् सेङ्ग्रहणमनर्थकं स्यात्; व्यावर्त्त्याभावात्। ननु च `ज्ञप्तः' इत्यत्र मा भूदित्येवमर्थं सेङ्ग्रहणं भविष्यति? नैतदस्ति; क्रियमाणेऽपि सेङ्ग्रहणे `वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः' (7.2.27) इति निपातानादत्र भवितव्यमेव णिलोपेन।

यदि तर्ह्यनर्थकं सेङ्ग्रहणम्, तत् किमर्थं क्रियते? इत्याह--`तत् क्रियते' इत्यादि। पूर्वमिडागमे कृते सेटि निष्ठायां जातायां पश्चाण्णिलोपो यथा स्यादित्येवमर्थं सेङ्ग्रहणं कृतम्। कः पुनरकृत इटि णिलोपे सति दोषः स्यात्, यन्निवृत्त्यर्थं पूर्वमिडागम इष्यते? इत्याह--`अकृते हि' इत्यादि। असति सेङ्ग्रहणे कारित इति स्थिते णिलोपः प्राप्नोति, इट् च, तत्र कृताकृतप्रसङ्गित्वेन णिलोपेनैव भवितव्यम्; णिलोपे च सत्येकदेशविकृतसयानन्यत्वात् स एवायं करोतिरिति `एकाच उपदेशेऽनुदात्तात्' (7.2.10) इतीट्प्रतिषेधः प्रसज्येत, ततश्च `कारितम्' इत्येतन्न सिद्ध्येत्। तस्मात् सेङ्ग्रहणं कर्त्तव्यम्।।

53. जनिता मन्त्रे। (6.4.53)

`इङादौ णिलोपो निपात्यते' इति। `जनिता' इति तृजन्तम्, तत्र `अनिटि' इति प्रतिषेधादिडादौ न न प्राप्नौति, अतो निपात्यते। ह्रसवत्वन्तु `जनीजृष्क्नसुरञ्जोऽमन्ताश्च' (ग.सू.धा.पा.817) इति मित्संज्ञकत्वात् `मितां ह्रस्वः' (6.4.92) इत्यनेनैव सिद्धम्।।

54. शमिता यज्ञे। (6.4.54)

`शमितः' इत्यत्र पूर्धवद् ह्रस्वत्वम्। `ऋतो ङिसर्वनामस्थानयोः' (7.3.110) इति गुणः, हल्ङ्यादिना (6.1.68) सुलोपः, रेफस्य विसर्गः। `तृचि सम्बुद्ध्यन्तमेतत्' इति। निष्ठान्तमेतदिति कस्यचिदाशङ्का स्यात्, अतस्तां निराकर्तुमिदमुक्तम्। `शमयितः' इत्येतदपि तृचि सम्बुद्ध्यन्तम्।।

55. अयामन्ताल्वाय्येन्विष्णुषु। (6.4.55)

`कारयाञ्चकार' इति। `कास्प्रत्ययात्' (3.1.35) इत्यादिनाम्, `आमः' (2.4.81) इति लेर्लुक्, `कृञ्च' (3.1.40) इत्यादिना लिट्परस्य कृञोऽनुप्रयोगः द्विर्वचनमब्यासकार्यम्। `गण्डयन्तः, मण्डयन्तः' इति। `गडि सेचने' (धा.पा.777) [`गड' धा.पा.(गडि वदनैकदेशे--धा.65,361)] `मडि भूषायाम्' (धा.पा.321), हेतुमण्णिच्, गडेर्घटादित्वाम्मित्त्वे सति पूर्ववद् ह्रस्वत्वम्। `जृवृषिब्यां झच्' (द.उ.6.17)[`जृविशिभ्यां--द.उ.] इत्यनुवर्त्तमाने `तृभूवहिवसभासिसाधिगमिमण्डिजिनन्दिभ्यश्च' (द.उ.6.19) [तृभूवहिवसिभासिसाधिगडिमण्डिजिवन्दिभ्यश्च--द.उ.] इति झच्, अन्तादेशः। `स्पृहयालुः, गृहयालुः' इति। `स्पृह ईप्सायाम्' (धा.पा.1871) `गृह ग्रहणे' (धा.पा.1899) चौरादिकावदन्तौ, `अतो लोपः' (6.4.48) इत्यकरलोपः, तस्य स्थानिवत्त्वाल्लधूपधगुणाभावः, `स्पृहि गृहि' (3.2.158) इत्यादिनाऽऽलुच्। `स्पृहयाय्यः' इति। `तनुदक्षिस्पृहिगृहिभ्य [श्रुदक्षिस्पृहिगृहिभ्य आय्यः--पं.उ.] आय्यः' (पंउ.3.96) इति आय्यप्रत्ययः। `स्तनयित्नुः' इति। `स्तत गदी देवशब्दे' (धा.पा.1859,1860) चुरादावदन्तः, `अतो लोपः' (6.4.48)। तत्रकारलोपस्य स्थानिवद्भावात् `अत उपधायाः' (7.2.116) इति वृद्धिर्न भवति। `स्तनिह्रषिपुषिगदिमदिभ्यो णेरित्नुच्' [स्तनिह्रषिपुषिगदिमदिधुषिगन्धिमडिजनिनदिभ्यो णेरित्नुच्--द.उ.] (द.उ.1.140) इतीलुष्प्रत्ययः। `पोषयिष्णवः, पारयिष्णवः' इति। `पुष पुष्टौ' (धा.प.700) हेतुमाण्णिच्, `पार तीर कर्मसमाप्तौ' (धा.पा.1911,1912), चुरादिणिच्, `णेश्छन्दसि' (3.2.137) इतीष्णुच्।
अथ `न' इत्येवं कस्मान्नोक्तम्, णिलोपे हि प्रतिषिद्धे गुण एव स्यात्, तत्र `एचोऽयवायावः' (6.1.78) इत्ययादेशो भविष्यति; लघु चैवं सूत्रं भवति, `अय' इत्युच्यमाने मात्राधिक्येन सूत्रं गुरु भवतीति मत्वाऽऽह--`न इतिवक्तव्ये' इत्यादि। `ल्यपि लघुपूर्वात्' (6.4.56) इत्यत्र गुणाभावादयादेशो न स्याद्यदि नेत्युच्यते। तस्मादुत्तरार्थमयादेशवचनम्।।

56. ल्यपि लघुपूर्वात्। (6.4.56)

`लघूपूर्वात्' इति। लघुः पूर्वो यस्मादिति बहुव्रीहिः। वर्णोऽन्यपदार्थः। `प्रणमय्य, प्रतमय्य, प्रदमय्य, प्रशमय्य' इति। अत्र नमादीनां मित्त्वात् पूर्ववद् ह्रस्वत्वे कृते मकारो लघूपूर्वः। `प्रवेभिदय्य गतः' इति। भिदेर्यङन्ताण्णिच्। `यस्य हलः' (6.4.49) इति यकालोपः। अत्रापि दकारो लघूपूर्वः। `प्रगणय्य' इति। `गण संख्याने' (धा.पा.1853), चुरादावन्तः पूर्धवदल्लोपः। अत्रापि णकारो लघूपूर्वः।
ननु ह्रस्वादय एवा भाच्छास्त्रीयाः, अयादेशोऽपि; तत्र `असिद्धवदत्रा भात्' (6.4.22) इति ह्लस्वादीनामसिद्धत्वाल्लधुपूर्वत्वं मकारादेर्वर्णस्य नोपपद्यते? इत्यत आह--`ह्रस्वयलोपाल्लोपानाम्' इत्यादि। कथमसमानाश्रयत्वम्? इत्याह--`ह्रस्वादयो हि' इत्यादि।
अथ पूर्वग्रहणं किमर्थम्, न लघोरित्येवोच्येत? अशक्यमेवं वक्तुम्; एवमुच्यमाने लघोरुत्तरस्य णेर्ल्यप्ययादेशो भवतीत्येष वाक्यार्थः। तथा च `प्रतमय्य' इत्यादौ न स्यात्, हला व्यवधानात्। क्व तरहि स्यात्? `प्रगणय्य' इत्यादौ। ननु चात्राप्यतो लोपे कृते लघोरुत्तरो णिनं सम्भवत्येव, तत्र वचनसामर्थ्याद्ध्यवधानमाश्रयिष्यते? नैतदेवम्; वचनसामर्थ्याद्भूतपूर्वगतिराश्रायिष्यते। कृत एतल्लभ्यते--वचनसामर्थ्याद्ध्यवधानमाश्रयितव्यम्, न तु भूतपूर्वगतिरिति? भूतपूर्वगतावाश्रीयमाणायां `प्रगणय्य' इत्यादादेव स्यात्, `प्रणमय्य गतः' इत्यादौ तु न स्यात्। तस्मात् पूर्वग्रहणं कर्त्तव्यम्।।

57. विभाषाऽऽपः। (6.4.57)

`प्रापय्य' इति। `आप्लृ लम्भने' (धा.प.1839), `आप्लृ व्याप्तौ' (धा.पा.1260) द्वयोरपि ग्रहणम्। पूर्धकश्चुरादिः, अपरः स्वादिः।
अथ `अध्याप्य गतः' इत्यतर कस्मान्न भवति, अत्रापि `क्रीङजीनां णौ' (6.1.48) इतीङ आत्त्वे कृते `अर्त्तिह्री' (7.3.36) इत्यादिना पुक्याप उत्तरो

णिर्भवति? इत्यत आह--`इङादेशस्य' इत्यादि। यद्येवम्, `अप आचष्टे' इत्यप्शब्दाण्णिचि कृते `प्रापय्य' इत्यादि न स्यात्, लाक्षणिकत्वादेव मा भूदनेन, पूर्वेण सूत्रेण भविष्यति, ननु चैकादेशे कृते सत्यलघुपूर्वत्वान्न प्राप्नोति? एकादेशस्यासिद्धत्वान्न दोषः। कथम्? `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.पा.42) इति बहिरङ्गत्वन्त्वेकादेशस्य द्विपदाश्रयत्वात्। अयादेशस्य पुनर्णिमात्राश्रयत्वादन्तरङ्गत्वम्।।

58. युप्लुवोर्दीर्घश्छन्दसि। (6.4.58)

`यु मिश्रणे' (धा.पा.1033) [मिश्रणेऽमिश्रणे च--धा.पा.] `प्लुङः गतौ' (धा.पा.958) अनयोर्धात्वोस्तुकि प्राप्ते दीर्घार्थं वचनम्।।

59. क्षियः। (6.4.59)

`छन्दसि' इति निवृत्तम्। `क्षियः' इति `निरनुबन्धकग्रहणे न सानुबन्धकस्य' (व्या.प.53) इति `क्षि क्षये' (धा.पा.236) `क्षि निवासगत्योः' (धा.पा.1407) इत्यनयोर्ग्रहणम्, न `क्षिष् हिंसायाम्' (धा.पा.1506) [`क्षीष्'--धा.पा.] इत्यसय।।

60. निष्ठायामण्यदर्थे। (6.4.60)

`ष्यतः कृत्यस्यार्थो भावकर्मणी' इति। तयोरेव कृत्यक्तखलर्थाः' (3.4.70) इति वचनात्। `ताभ्यामन्यत्र' इति। कर्त्तर्यधिकरणे च। `आक्षीणः' इति। `क्षियो दीर्घात्' (8.2.46) इति निष्ठानत्वम्। `अकरमकात् क्षियः कर्तरि क्तप्रत्ययोऽयम्' इति। `गत्यर्थ'(3.4.72) इत्यादिना।

`प्रक्षीणमिदं देवदत्तस्य' इति। `अधिकरणवाचिनश्च' (2.3.68) इति कर्त्तरि षष्ठी। `अधिकरणे' इति। क्तप्रत्ययोऽयमिति प्रकृतेन सम्बन्धः। प्रक्षीयतेस्मिन्निति प्रक्षीणम्--अधिकरणभूतं द्रव्यमुच्यते। `क्षितमिति भावे' इति। अस्यापि पूर्ववत्सम्बन्धः। कर्मणि न प्रत्युदाहरति; क्षियोऽकर्मकत्वात्।।

61. वाऽऽक्रोशदैन्ययोः। (6.4.61)

`क्षितायुः' इति। पूर्ववत् कर्तरि क्तः। एवमुतरत्रापि। `क्षितकः' इति। अनुकम्पायां कन्। आकोशदैन्याभ्यामन्यत्र पूर्वेण नित्यं भवति। अण्यदर्थ इति किम्? क्षितं जाल्मस्य, क्षितकमस्य तपस्विनः।।

62. स्यसिच्सीयुद्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च। (6.4.62)

`स्यसिच्सीयुट्तासिषु' इति सप्तम्या प्रतियोगिनो निर्देशाच्चिणीव चिण्वदिति सप्तमीसमर्थाद्वतिर्विज्ञायते, यथा--मथुरावत् पाटलिपुत्रे प्रकार इति। `भावकर्मविषयेषु' इति। अनेन `भावकर्मणोः इत्यस्य विषयसप्तमीत्वं दर्शयति। भावकर्मणी विषयौ येषान्ते तथोक्ताः के पुनः स्यादयो भावकर्मविषयाः? ये स्यादयो लादेशेन भावकर्मणोर्विवक्षितयोर्भवतन्ति। चकारोऽत्र सन्नियोगार्थः क्रियते। तेन यदा चिण्वद्भावो इत्यादि। `कस्य' इति। षष्ठीनिर्दिष्टस्य ह्यागमा भवन्ति, स्यादयश्चेह सप्तम्या निर्दिष्टाः; न चान्य आगमीश्रूयत इति प्रश्नः। यद्यपि ते सप्तम्या निर्दिष्टाः, न चान्य आगमी श्रूयत इति प्रश्नः। यद्यपि ते सप्तम्या निर्दिष्टाः, तथापि यथा `हनश्च वधः' (3.3.76) इति पञ्चमी निर्दिष्टोऽपि हन्तिः प्रत्ययमुत्पाद्यदेशेन सम्बन्धमनुभवन् षष्ठ्यन्ततां प्रतिपद्यते तथा स्यादयोऽपि यदागमेन सम्बन्धमनुभवन्ति तदा षष्ठ्यन्ततां प्रतिपद्यन्त इत्यभिप्रायेणाह--`स्यसिच्' इत्यादि। अत्रैव हेतमाह--`ते हि प्रकृताः' इत्यादि। इडयमागमलिङ्गः, तस्यावश्यमागमिना भवितव्यम्, तत् किमश्रुतानामागमित्वं परिकल्प्य, तस्यैव विधीयतामुत प्रकृतानामेव स्यादीनामििति? युक्तं यत् प्रकृतानामेव विधीयते; अश्रुतप्रकल्पनाया गरीयस्त्वात्। ननु चाङ्गमपि प्रकृतम्, तस्य कस्मान्न क्रियते? इत्यत आह--`अङ्गस्य' इत्यादि। अङ्गस्य न क्रियते, लक्ष्यविरोधात्। यद्यङ्गस्य स्यात्, तदेटि कृते लक्ष्यावरधादनिष्टं स्यात्। न ह्यनण्टार्था शास्त्रे प्रक्लृप्तिरयुक्ता। तस्मान्मा भूल्लक्ष्यविरोध इति यद्यप्यङ्गमपि प्रकृतम्, तथापि स्यादीनामेव क्रियते, नाङ्गस्य।

इह द्वौ पक्षौ सम्भवतः--चिण्निमित्तं यत्कार्यं, यदाहत्य चिणि विधीयते तद्वातिदिश्यते। यद्वा चिणियद्दृष्टं चिण्णिमत्तमचिण्णिमित्त्ञ्च तत् सामान्येन। तत्र यदि पर्वकः पक्ष आश्रीयेत, तदा `आतो युक् चिण्कृतोः' (7.3.33) इति युगागमः। `विण्णमुलोर्दोर्घोऽन्यतरस्याम्' (6.4.93) इति दीर्घत्वञ्च--एते द्वे एवाङ्गकार्येऽतिविश्ये स्याताम्। नान्यात् वृद्ध्यादिकम्, न हि तदाहत्य चिणि विधीयते। आहत्य=उच्चार्येत्यर्थः। यद्धि साक्षाच्चिणं निमित्तमुपादाय विधीयते तच्चिण्याहत्य विधीयते, न चैवं वृद्ध्यादिकं विधीयते। अथ द्वितीयस्ततो न भवत्येष दोषप्रसङ्गः; वृद्ध्यादीनामपि चिणि दृष्टत्वात्।

यदि चिणि यद्दृष्टं तदतिदिश्यते, तर्हि हनिणिङामादेशा अपि प्राप्नुवन्ति, तेषामपि तत्र दृष्टत्वादिति? अनेनाभिप्रायेणाह--`कानि पुनः' इत्यादि।

द्वितीये पक्षे यो दोषस्तमुत्तरत्र परिहरिष्यामीति चेतसि कृत्वा चिणि यद्दृष्टं कार्यं तन्निमित्तमितरद्वा तदिह सामान्येन निर्दिश्यत इति दर्शयन्नस्य योगस्य यानि प्रयोजनानि तेषां संग्रहश्लोकसमाह--`वृद्धिश्चिण्वत्' इत्यादि।

`चायिष्यते' इत्यत्र वृद्धिः प्रयोजनम्। चिनोतेर्लुट्, स्यप्रगतययः। `भावकर्मणोः' (1.3.13) इत्यात्मनेपदम्, अत्रेदानीं चिण्वद्भावाद् वृद्धिर्भवति यथा--चिणि `अचो ञ्णिति' (7.2.115) इति वृद्धिर्भवत्य चायीति, एवमुत्तरत्रापि चिण्वदित्येतस्य प्रत्येकमभिसम्बन्धं कृत्वा यथायोगमतिदेशो योजनीयः। `अचायिष्यते' इति। लुङः, शेषं पूर्ववत्। युक् च प्रयोजनम्--`दायिष्यते' इत्यत्र। दीर्घश्चोक्तो यो मितां वा चिणोति स च। प्रयोजनं शमिष्यते, शामिष्यत इत्यत्र। शमेः

`जनिजृष्क्नसुरञ्जोऽमन्ताश्च' (धा.पा.817) इति मित्संज्ञा, स च ण्यन्तः `सनाद्यन्ता धातवः' (3.1.32) इत्यत्रोपदिष्ट इत्युपदेशेऽजन्तो भवति। यत्तु हन्तेः `हो हन्तेञ्ञिन्नेषु' (7.3.54) इति कुत्वं विधास्यते, तच्च प्रयोजनं `घानिष्यते' इत्यत्र। हनिष्यत इत्यत्र तु `ऋद्धनोः स्ये' (7.1.70) इतीट्। सन्त्येतानि प्रयोजनानि, किन्त्वनेनेटि कृते शमिष्यते, शमिष्यत इत्यत्र `णेरनिटि' (6.4.51) इति णिलोपो न सिद्ध्यतिः सेट्त्वात्। अत आह--`इट् चासिद्धः' इत्यादि। `असिद्धवदत्रा भात्' (6.4.22) इत्यसिद्धेऽयं चिण्वदिट्, तेन णिलोपो भविष्यति। स्यादेतत्--येऽनुदात्तोपदेशाश्चिनोत्यादयस्तेभ्यः परेषां स्यादीनामनेनेड्विधीयत इति युक्तमसिद्धत्वम्, ये तूदात्तोपदेशाः शमिप्रभृतयस्तेम्यः परत्वात् `आर्धधातुकस्येड्वलादेः' (7.2.35) इति वल्निमित्तेनेटा भवितव्यम्, स च सिद्ध एव; तस्मिंस्तु तदवस्थ एव दोषः? इत्यत आह--`नित्यश्चायम्' इत्यादि। कृताकृतप्रसङ्गी यो विधिः स नित्यः--इत्येतदाश्रित्यायं चिण्वदिण्नित्यः। कृतेऽपि हि वलादित्वस्य विहितत्वात्। `वल्निमित्तो विधाती' इति। वल् निमित्तं कारणं यस्य स तथोक्तः। विघातोऽस्यास्तीति विघाती। विघातः=निमित्ताभावादप्रवृत्तिः। तदेवं नित्यत्वादुदात्तेभ्योऽप्यनेनैव चिण्वदिटा भवितव्यम्, अयञ्चासिद्ध इति न भवति णिलोपाभावप्रसङ्गः।
`ग्राहिष्यते' इति। `अत उपधायाः' (7.2.116) इति वृद्धिः प्रयोजनम्। अथेह `ग्रहोऽलिटि दीर्घः' (7.2.37) इति दीर्घः कस्मान्न भवति? इत्याह-- `ग्रहोऽलिटि' इत्यादि। वलादिलक्षणस्तत्रेट् प्रकृत इति तस्यैव दीर्घो विज्ञायते, नान्यस्य। `द्रक्ष्यते' इति। `सृजिदृशोर्झल्यमकिति (6.1.58) इत्यमागमः, व्रश्चादिना (8.2.36) षत्वम् `षढोः कः सि' (8.2.41) इति कत्वम् `इण्कोः (8.3.57) इति षत्वम्। `दर्शिष्यते' इति। `पुगन्तलघूपधस्य' (7.3.86) इत्यनेनात्र गुणः सिद्ध्यत्येव। इडर्थस्तु चिण्वद्भावो विधीयते।
`अचेषाताम्' इति। आताम्, सिचि रूपम्। `अदिषाताम्' इति। `स्थाध्वोरिच्च' (1.2.17) इतीत्त्वम्, सिचश्च कित्वम्। `अवधिषाताम्' इति। `आत्मनेपदेष्वन्यतरस्याम्' (2.4.44) इति वधादेशः। `अदृक्षाताम्' इति। `लिङसिचावात्मनेपदेषु' (1.2.11) इति कित्त्वम्। तेनामागमगुणौ न भवतः, षत्वादि पूर्ववत्।
`चेता' इति। लुट्, तासिः, `लुटः प्रथमस्य डारौरसः' (2.4.85) इति डादेशः, टिलोपः। `द्रष्टा' इति। पूर्ववदमादिः। `चेतव्यम्' इति। कर्मणि तव्यः। `चेष्यति' इति। अत्र कर्तुर्लादेशेन विवक्षित्वात् कर्तृविषयः स्यप्रत्ययः।
`गुणे कृते रपरत्वे च न प्राप्नोति' इति। कृ ष्यत इति स्थिते गुणः प्राप्नोति, चिण्वद्भावश्च; तत्र परत्वाद्गुणः, तत्र कृते रपरत्वम्। यद्युपदेशग्रहणं न क्रियेत ततोऽनजन्तत्वादिह न स्यात्। उपदेशग्रहणाद्भवति। यद्यपि करोतिरुत्तरकालमनजन्तः, उपदेशे त्वजन्त एव।
यदि चिणि यद्दृष्टं कार्यं तदतिदिष्टं हनिणिङादेशा अपि प्राप्नुवन्ति। तेषामपि तन्न दृष्टत्वात्? इत्यत आह--`अङ्गाधिकारविहितम्' इत्यादि। `अङ्गस्य' इत्यधिकारे सति प्रत्यसत्तेरङ्गाधिकारे विहितं कार्यं यच्चिणि दृश्यते सामान्येन तदतिदिश्यते, न तु यद्विप्रकृष्टं प्रकरणान्तरविहितम्। न च हनिणिङामादेशा अङ्गाधिकारे विहिताः, अपि तु प्रकरणान्तरे। तस्मान् तेऽतिदिश्यन्त इति न भवन्ति तत्र। `धानिष्यते' इत्यत्र `लुङि च' (2.4.43) इत्यनेन विहितो वधादेशो न भवति। `आयिष्यते' इति। `इणो गा लुङि' (2.4.45) इत्यनेन विहितो गादेशः। `अध्यायिष्यते' इति। अत्र `विभाषा लुङ्लृङोः' (2.4.50) इत्यनेन विहितौ गाङादेशः। एवमपि स्यादिभ्यः परस्य प्रत्ययसय लुक् प्राप्नोति; अङ्गाधिकारे चिण उत्तरसय प्रत्ययस्य `चिणोलुक्' (6.4.104) इति लुग्विधानात्? नैष दोषः; इह हि सप्तमीसमर्थाद्विहितस्य वतेराश्रयणम्। तेन चिणि यद्दृष्टं कार्यं पूर्वस्य सम्भवति तदतिदिश्यते, न तूत्तरस्य यत् कार्यं तदपि।।

63. दीङो युडचि क्ङिति। (6.4.63)

`उपदिदीये' इति। `दीङ क्षये' (धा.पा.1134), `असंयोगाल्लिट् कित्' (1.2.5) इति कित्त्वम्, लिटस्तझयोरेशिरेचौ।
`दीङः' इति षष्टीयं वा स्यात्, पञ्चमी वेति द्वौ पक्षौ। तत्र यद्याद्यः पक्ष आश्रीयेत, तदा `आद्यन्तौ टिकितौ' (1.1.46) इत्यादौ युटि कृते धातोरनिष्टं रूपमापद्यते; अत इदं षष्ठीपक्षे दूषणमालक्ष्य पञ्चमीपक्षं पुरस्कृत्याह--`दीङ इति पञ्चमीनिर्देशात्' इत्यादि। पञ्चमीनिर्देशे हि सति `उभयनिर्देश पञ्चमनिर्देशो बलीयान्' (शाक.प.97) इति `दीङः' इति पञ्चम्याः `अचि' इति सम्पम्याः षष्ठीत्वे प्रकल्पते `तस्मादित्युत्तरस्य' (1.1.67) इत्यजादेरादिर्युडागमो भवति। `अचि' इति सप्तमीनिर्देशस्तूत्तरार्थः। ननु चात्र `एरनेकाचः' (6.4.82) इति यणादेशे कर्तव्ये युडसिद्ध इति यणादेशेन भवितव्यम्, ततश्चोपदिदीय इति न सिद्ध्येत्, `उपदिद्ये' इत्यनिष्टं रूपं प्राप्नोति, अत आह--`विधानसामर्थ्यात्' इत्यादि। यदि यणादेशे कर्त्तव्ये युटोऽसिद्धत्वं स्यात्, तदा युटो विधानमनर्थकं स्यात्; विशेषाभावात्। कथं पुनर्विशेषाभावः, यावताऽसति हि युट्येकस्य यकारस्य श्रवणं भवति, सति तु द्वयोः? नैषोऽस्ति विशेषः; न हि व्यञ्जनपरस्यैकस्यानेकस्य वा हलः श्रवणं प्रति विशेषोऽस्ति। ये तु विशेषमिच्छन्ति, तन्मतेनास्माभिः पूर्वमेव यणादेशे युटः सिद्धत्वमन्यथा प्रतिपादितम्।
`उपदेदीयते' इति। `दीङ क्षये' (धा.पा.1134), `असंयोगाल्लिट् कित्' (1.2.5) इति कित्त्वम्, लिटस्तझयोरेशिरेचो।
`दीङः' इति षष्टीयं वा स्यात्, पञ्चमी वेति द्वौ पक्षौ। तत्र यद्याद्यः पक्ष आश्रीयेत, तदा `आद्यन्तौ टकितौ' (1.1.46) इत्यादौ युटि कृते धातोरनिष्टं रूपमापद्येत; अत इदं षष्ठीपक्षे दूषणमालक्ष्य पञ्चमीपक्षं पुरस्कृत्याह--`दीङ इति पञ्चमीनिर्देशात्' इत्यादि। पञ्चमीनिर्देशे हि सति `उभयनिर्देश पञ्चमीनिर्देशो बलीयान्' (शाक.प.97) इति `दीङः' इति पञ्चम्याः `अचि' इति सप्तम्याः षष्ठीत्वे प्रकल्पिते `तस्मादित्युत्तरस्य' (1.1.67) इत्यजादेरादिर्युडागमो भवति। `अचि' इति। सप्तमीनिर्देशस्तूत्तरार्थः। ननु चात्र `एरनेकाचः' (6.4.82) इति यणादेशे कर्त्तव्ये युडसिद्ध इति यणादेशेन

भवितव्यम्, ततश्चोपदिदीय इति न सिद्ध्येत्, `उपदिद्ये' इत्यनिष्टं रूपं प्राप्नोति। अत आह--`विधानसामर्थ्यात्' इत्यादि। यदि यणादेशे कर्त्तव्ये पुटोऽसिद्धत्वं स्यात्, तदा युटो विधानमनर्थकं स्यात्; विशेषाभावात्। कथं पुनर्विशेषाभावः, यावताऽसति हि युट्येकस्य यकारस्य श्रवणं भवति, सति तु द्वयोः? नैषोऽस्ति विशेषः; न हि व्यञ्जनपरस्यैकस्यानेकस्य का हला श्रवणं प्रति विशेषोऽस्ति। ये तु विशेषमिच्छन्ति, तन्मतेनास्माभिः पूर्वमेव यणादेशे युटः सिद्धत्वमन्यथा प्रतिपादितम्।

`उपदेदीयते' इति। यङः। `उपदानम्' इति। ल्युट्, `मीनातिमिनोतिदीङीं ल्यपि च' (6.1.50) इत्यात्त्वम्। `दीङ' इत्यनुबन्धनिर्देशो यङ्लुकि मा भूदित्येवमर्थः--देद्यतु, देद्युरिति। ननु चात्र `कास्प्रत्ययादाममन्त्रे' (3.1.35) इत्यामा भवितव्यम्, तेनाक्ङित्वादेव न भविष्यति? सत्यमेतत्; अमन्त्रे न भविष्यति, मन्त्रे तु स्यादेव; तत्रामोऽभावात्। अथ यङ्लुगन्तस्य मन्त्रे प्रयोगो न दृश्यते, तदा विस्पष्टार्थम्।।

64. अतो लोप इटि च। (6.4.64)

`इट्यजादावार्धधातुके क्ङिति च' इति। `अजादावार्धधातुके' इति प्रत्येकमभिसम्बध्यते--इट्यजादावार्धधातुके, क्ङिति चाजादावार्धधातुक इति। इङ्ग्रहणमक्ङिदर्थम्। `पपिथ' इति। पातेः विबतेर्वा लिट्, सिप्, `परस्मैपदानाम्' (3.4.82) इत्यादिना तस्य थल् `ऋतो भारद्वाजस्य' (7.2.63) इति नियमादिट्। `गोदः' इति। `आतोऽनुपसर्गे कः' (3.2.3)।

`व्यत्यरे, व्यत्यले' ति। `कर्त्तरि कर्मव्यतीहारे' (1.3.14) इत्यात्मनेपदम् उत्तमपुरुषैकवचनम्--इट्, तस्य `सार्वधातुकमपित्' (1.2.4) इति ङित्त्वम्। तत्रार्धधातुकत्वं नास्तीति न भवति लोपः।

`ग्लायते' इति। भावे लकारः। `दासीय' इति। आशिषि लिङः, आत्मनेपदोत्तमैकवचनम्, तस्य `इटोऽत्' (3.4.106) इत्यदादेशः। अत्र सीयुटस्तद्भक्तत्वादिटोजादित्वं नास्तीति सत्यपयार्धधातुकाजादीत्वे लोपाभावः।।

65. ईद्यति। (6.4.65)

`क्ङिति' इत्युत्तरार्थमनुवर्तमानमपीह नाभिसम्बध्यते; यत क्ङित्त्वासम्भवात्। तकार उच्चारणार्थः; अनण्त्वादेव हि सवर्णग्रहणं न भविष्यति। असत्यपि वा जातिपक्षे सवर्णग्रहण आन्तरम्याद्दीर्घ एव भविष्यति; न ह्रस्वः। दीर्घोच्चारणमुत्तरार्थम्। इह तु गुणेन भवितव्यम्। न चात्र दीर्घस्य ह्रस्वस्य वा गुणे कृते कश्चिद्विशेषोऽस्ति। `देयम्' इति। `अचो यत्' (3.1.97)।।

66. घुमास्थागापाजहातिसां हलि। (6.4.66)

`दीयते' इति। कर्मणि लकारः। `देदीयते' इति। यङः। अथ मेति कस्येदं ग्रहणम्, किम् `मेङ् प्रणिदाने' (धा.पा.961) इत्यस्य भौवादिकस्य? उत्त `माङ् माने' (धा.पा.1088) [`माने शब्दे च'--धा.पा.] इत्यस्य जौहोत्यादिकस्य? आहोस्वित् `मा माने' (धा.पा.1062) इत्यस्यादादिकस्य? तत्र केचिदाहुः--`निरनुबन्धकग्रहणे न सानुबन्धकस्य' (व्या.प.53) इत्यादादिकस्य ग्रहणम्। अन्ये त्वाहुः--`लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्' (व्या.प.50) इत्यलुग्विकरणयोर्माङमेङोरिति। अपरे ब्रुवते--`गामादाग्रहणेष्वविशेषः' (व्या.प.124) इति त्रयाणामपीति; एतदेव वृत्तिकारस्याभिमतमिति लक्ष्यते। तथा हि--`पातेरिह ग्रहणं नास्ति, लुग्विकरणत्वात्' इति। ब्रुवता `पा रक्षणे (धा.पा.1056) इत्यस्य ग्रहणाभावः स्वयमेवोक्तः। यदि चात्रालुग्विकरणयोर्लुग्विकरणस्य वा ग्रहणमभिमतं स्यात्, तदपि प्रतिपादयेत्, न च प्रतिपादितम्, अतोऽवगम्यते--त्रयाणामापि ग्रहणमभिमतमिति। `गा' इति। `गाङ गतौ' (धा.पा.950) `के गै शब्दे' (धा.पा.916,917) एतौ भौवादिकौ; `गा स्तुतौ छन्दसि' (धा.पा.1106) [`छन्दसि' नास्ति--धापा.] इति जौहोत्यादिकः, `इणो गा लुङि' (2.4.45) इतीणो गादेशः, `इण्वादिक इति वक्तव्यम्' (वा.167) इतीको गादेशः `गाङ् लिटि' (2.4.49), `विभाषा लुङ्लृङो (2.4.50) इति चेङो गाङादेशः--एषां पूर्ववत् सर्वेषामविशेषेण ग्रहणम्। सत्यपि सर्वेषां ग्रहणे यस्य क्ङिदार्धधातुकपरं सम्भवति तस्यैवेत्त्वं भवति, नेतरस्य; निमित्ताभावात्।

`गीयते, जेगीयते' इति। भौवादिकयोरुदाहरणे। `अध्यगीष्ट' इत्यादि। इङो गाङ्, गाङ्कुटादि(1.2.1) सूत्रेण सिचो ङित्त्वम्, `आत्मनेपदेष्वनतः' (7.1.5) इत्यदादेशः।

अथ किमर्थं `जहाति' इति स्तिपा सिर्देशः क्रियते, न हेत्येवोच्येत? इत्यत आह--`जहातेः' इत्यादि। यदि हेति निर्देशः क्रियते, तदा जिहातेः `ओ हाङ गतौ' (धा.पा.1089) इत्यस्यापि स्यात्, जहातीति निर्देशे तु न भवति। अत्र हिनिर्देशे सात यस्यैतद्रूपं भवति तस्यैव ग्रहणेन भवितव्यम्। कस्य चैतद्रूपम्? `ओ हाक् त्यागे' (धा.पा.1090) इत्यस्य, इतरसय `भृञामित्' (7.4.76) इत्यभ्यालस्येत्त्वे कृते जिहातीति रूपं भवतीति। कामं हागित्यपि निर्देशे न भवति जिहीतेः प्रसङ्गः, वैचित्र्यार्थस्तु न तथा निर्देशः कृतः।

`अवसीयते' इति। `षोऽन्तकर्मणि' (धा.पा.1147)।

`ददतुः' इत्यादि। ननु चात्र `आतो लोपः' (6.4.64) इत्यादिनाकारलोपो भविष्यति, तत् किमेतन्निवृत्त्यर्थेन हलीत्यनेन? इत्यत आह--`आतो लोपाद्धि' इत्यादि। आतो लोपस्यावकाशः--ययतुः, ययुरिति, ईत्त्वस्यावकाशः---दीयते, धीयत इति; इहोभय प्राप्नोति--ददतुः ददुरिति। तत्र यदि हल्ग्रहणं न क्रियेत, तदा परत्वादीत्त्वं स्यात्। ननु सिद्धयोर्द्वयोर्विप्रतिषेध उपपद्यते, इह तु `असिद्धवदत्रा भात्' (6.4.22) इति द्वयोरप्यसिद्धत्वम्, तत् कुतो

विप्रतिषेधः, अस्मिंश्च सति परत्वादीत्त्वं स्यादिति न युक्तं वक्तुम्, तथा हि--`विप्रतिषेधे परं कार्यम्' (1.4.2) इत्युक्तम्? अत आह--`एतदेव' इत्यादि। यद्यत्र विप्रतिषेधे कर्त्तव्येऽसिद्धत्वं स्यात्, हल्ग्रहणमनर्थकं स्यात्। भवत्वत्रेत्त्वम्, तस्यासिद्धत्वात `आतो लोपः' (6.4.64) भविष्यति, तत् किं हल्ग्रहणेन? तदेतत्कथमर्थवद्भवति? यदि विप्रतिषेधे कर्त्तव्ये सिद्धत्वं स्यात् नान्यथा।।

67. एर्लिङि। (6.4.67)
`पूर्वेणेत्त्वे प्राप्त एत्वं विधीयते। `मेयात्' इति। `मा माने' (धा.पा.1062) इत्यस्येदम्दाहरणम्, न तु माङ् मेङोः, तयोर्ह्यात्मनेपदित्वात्परस्मैपदं न सम्भवति। `गेयात्' इति। `कै गै' (धा.पा.916,917) इत्यस्योदाहरणम्, न तु गाङः; तस्य परस्मैपदासम्भवात्। नापीणिगिङादेशानाम्; तेषामपि लिङ्यसम्भवात्। इङादेशस्य तु पूर्वस्माच्च हेतोः।।

68. वाऽन्यस्य संयोगादेः। (6.4.68)
`अन्यस्येति किं? `स्थेयात्' इति। यद्यन्यस्येति न क्रियेत, तदा पूर्वयागोऽन्येषु ध्वादिषु सावकाशः, अयमपि ग्लायादित्यादिषु; स्थेयादित्यत्रोभयप्राप्तौ परत्वादनेन विकल्पः स्यादित्यन्यग्रहणम्।
यदि पूर्वयोगस्तिष्ठ्यत्यर्थोऽप्यारभ्येत तदा तदर्थस्य तस्यारम्भसामर्थ्यात् पूर्वेण नित्यमेत्त्वं भविष्यति, अन्यथां तदर्थस्य तस्यारम्भो निष्फलः स्यादिति शक्यमन्यग्रहणमकर्तुम्। तत् क्रियते विस्पष्टार्थम्।।

69. न ल्यपि। (6.4.69)
वेति निवृत्तम्; उत्तरसूत्रे पुनरन्यतरस्यांग्रहणात्। `यदुक्तम्' इति। ईत्त्वम्, न पुनरनन्तरमेत्त्वम्; तस्य ल्यपि प्राप्त्यभावात्। प्रतिषेधस्य च प्राप्तिपूर्वकत्वात्।।

70. मयतेरिदन्यतरस्याम्। (6.4.70)
`न ल्यपि' (6.4.69) इति प्रतिषेधादाकारस्य श्रवणे प्राप्ते सतीत्त्वमारभ्यते। `अपमित्य' इति। `मेङ् प्रणिदाने' (धा.पा.961)। `उदीचां माङो व्यतीहारे' (3.4.19) इति क्त्वा, इत्त्वे कृते तुक्। ननु च `अपमित्ययाचिताभ्यां कक्कनौ' (4.4.21) इति निपातनात् सिद्धमेतत् तदपार्थकोऽयमारम्भः? नैतदस्ति; `चाधकान्यपि निपातनानि भवन्ति' (नी.प.वृ.109) इति पक्षे अपमायेति न स्यात्। `माङ् माने' (धा.पा.1088) [`माने शब्दे च'--धा.पा.] इत्यस्य भविष्यतीति चेत्? न; अर्थभेदात्। अथापि `अबाधकान्यपि निपातनानि' (नौ.प.वृ.110) स्युः? एवमप्यारब्धव्यमेवेदमसन्देहार्थम्? असति ह्यस्मिन् सन्देहः स्यात्--किं मयतेरिदं निपातनम्, अथ धात्वन्तरस्येति। उपसर्गनियमश्च विज्ञायेत--अपपूर्वस्यैवेति। अस्मिंस्तु सत्यन्योपसर्गस्यापि भवतीत्येतदर्थो युक्त आरम्भः।।

71. लुङ्लङ्लृङ्क्ष्वडुदात्तः। (6.4.71)
`उदात्तश्च स भवति' इति। आगमानुदात्तत्वे प्राप्त उदात्तत्वं विधीयते। एतच्चोदात्तवचनम् अभेदका इह शास्त्रे गुणाः` (पु.प.वृ.57) इत्यस्यार्थस्य ज्ञापकम्। कथं कृत्वा? यदि च भेदका गुणाः स्युः, तदोदात्तयुक्तेनैवाटं समुच्चारयेत्। पश्यत्वाचार्यः--`अभेदका इह शास्त्रे गुणाः' इति, यतः स्वरान्तरनिवृत्त्यर्थमुदात्तवचनं कृतवान्। किमेतस्य ज्ञापनेन प्रयोजनम्? `वृद्धिरादैच्' (1.1.1) इत्यत्रोदात्तादिभेदभिन्नानामपि वृद्धिसंज्ञा सिध्यतीति।।

72. आडजादीनाम्। (6.4.72)
`ऐक्षिष्ट, ऐहिष्ट' इति। `ईक्ष दर्शने' (धा.पा.610) `ईह चेष्टायाम्' (धा.पा.632)--अनुदात्तेतौ, `आटश्च' (6.1.90) इति वृद्धिः। `औब्जीत् `औम्भीत्' इति। `उब्ज आर्जने' (धा.पा.1303), `उभ उन्भपूरणे' (धा.पा.1319,1320), `आर्धधातुकस्येट्' (7.2.35), `अस्ति सिचोऽपृक्ते' (7.3.96) इतीट् `इट ईटि' (8.2.28) इति सिचो लोपः।
अथैज्यत, औप्यत, औह्यतेत्यत्र कथमाट्; यतो यजिवपिवहिभ्यो लङः विहितः कर्मणि, ते च हलादयः, नाजादयः। न च शक्यते वक्तुम्--सम्प्रसारणे कृतेऽजादित्वं भविष्यतीति। यस्मात् प्रागेव लादेशात् परत्वादडागमेन भवितव्यम्, ततो लादेशेन, ततो यका, ततः सम्प्रसारणेन? इत्यत आह--`इह' इत्यादि। यद्यप्यडागमः परः, तथाप्यन्तरङ्गत्वादादेशस्य पूर्व स एव क्रियते। लादेशो हि धातोर्विहितं लकारमात्रमपेक्ष्य भवतीत्यन्तरङ्गः। अडागमस्तु लकारविशेषम्; अङ्गस्य विधीयमानत्वात्। अङ्गञ्च प्रत्ययमपेक्षत इति बरिरङ्गः। पूर्वोत्पत्तिनियित्तोपलक्षणमात्रं चेहान्तरङ्गत्वम्, तेन नित्यत्वमप्युक्तं भवति। लादेशो हि नित्यः, कृतेऽप्यटि प्राप्नोति, अकृतेऽपि; अडागमस्त्वनित्यः, शब्दान्तरप्रप्तेः। कृते हि लादेशे नित्यत्वाद्विकरणेन भवितव्यम्। विकरणे च कृते विकरणान्तरस्याङ्गस्य तेन भवितव्यम्, अकृते तु धातुमात्रस्य। तस्मादन्तरङ्गत्वान्नित्यत्वाच्चाडागमात्पूर्वं लादेशः क्रियते। `तत्र कृते' इति। लादेशे कृते। `विकरणः' इति। यक्। `नित्यत्वात्' इति। कृताकृतप्रसङ्गित्वेन विकरणस्य नित्यत्वम्। स हि कृतेऽप्यटि प्राप्नोति, अकृतेऽपि। स्यादेतत्--अडागमोऽपि कृते विकरणे प्राप्नोति अकृतेऽपि, अतस्तस्यापि नित्यत्वम्, तत्रोभयोर्नित्यत्वे परत्वादडागम एव पूर्वं भविष्यति? इत्यत आह--`शब्दान्तरप्राप्तिः'

इत्यादि। कथं पुनः शब्दान्तरप्राप्तिः? इत्याह--`कृते हि' इत्यादि। अङ्गस्याडागमो विधीयते; कृते च विकरणे तदादिग्रहणस्य स्यादिति नुमर्थत्वाद्विकरणान्तमङ्गे भवति, अकृते तु धातुमात्रम्। अन्यच्च विकरणान्तादङ्गाद्धातुमात्रमङ्गम्, अतोऽन्यसय कृते प्राप्नोति, अकृते त्वन्यस्य इति स्फुटैव शब्दान्तरप्राप्तिः, तत्रैतत्स्यात्। विकरणस्यापि शब्दान्तरप्राप्तेरेवानित्यत्वम्, तथा हि--तेनापि कृते सत्यडागमे तदादेर्धातोर्भवितव्यम्; अकृते धातुमात्रादित्यत आह--`शब्दान्तरस्य च' इत्यीदि। यद्यप्यटः कृताकृतयोरेवावस्थयोर्विकरमः शब्दान्तरात् प्राप्नोति, तथापि न तस्यानित्यत्वमुपपद्यते, यस्मात् `शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति' (व्या.प.100) इत्येषा हि शास्त्रव्यवस्था; न तु `शब्दान्तरात् प्राप्नुवन् विधिरनित्यः' इत्येषा। न च विकरणः कस्यचिच्छब्दस्यागम आदेशो वा विधीयते; यतः `शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः' स्यात्। तथा हि--सार्वधातुके परे धातोः परः प्रत्ययो विधीयते, न तु तस्यागमः, आदेशो वेति कुतो विकरणस्यानित्यत्वम्।

विकरणे तर्हि कृते सम्प्रसारणात्पूर्वमाडागमो भविष्यति? इत्यत आह--`विकरणे कृते सम्प्रसारणम्' इत्यादि। नित्यत्वन्तु सम्प्रसारणस्य पूर्ववत्; कृताकृतप्रसङ्गित्वात्। आडागमस्तु कृते सम्प्रसारणे प्राप्नोति, कृते हि सम्प्रसारणेऽजादित्वादाटा भवितव्यमित्यनित्योऽयमाडागमः।।

73. छन्दस्यपि दृश्यते। (6.4.73)

`यतो विहितस्ततोऽन्यत्रापि भवति' इति। अपिशब्दात् तत्रापि। `आवः' इति। गुणे रपरत्वपे च कृते तिपो हलङ्यादिना (6.1.68) लोपः, रेफस्य विसर्जनीयः। `तथा' इत्यादि। यथा `आवः' इति `मन्त्रे घसह्वर' (2.4.80) इत्यादिना लेर्लुकि कृते भवति, तथानगिति लेर्लुकि कृते नशेर्भवतीत्यर्थः। तत्र `नर्शर्वा' (8.2.63) इति कुत्वम्। `आयुनक्' इति। `युजिर् योगे' (धा.पा.1444) रुधादित्वात् श्नम्, `चोः कुः' (8.2.30) इति कुत्वम्--गकारः, तस्य चर्त्वम्--ककारः। `बहुलं छन्दस्यामाङ्योगेऽपि' (6.4.75) इति वक्ष्यति, तस्यैवायं प्रपञ्चः।।

74. न माङ्योगे। (6.4.74)

`अनन्तरस्य वा विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इत्याट एवायं प्रतिषेध इति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्त्तुमाह--`माङ्योगे लुङलङलृङक्षु परतो यदुक्तं तन्न भवति' इति। एतोनोभयोरप्यडाटोः प्रतिषेध इति दर्शयति। उभावपि तौ लृङ्लङ्लृङ्क्षूक्तौ। कथं पुनर्द्वयोरपि प्रतिषेधो लभ्यते? आटाप्यत्रानुवृत्तेः। न च तस्मिन्ननुवर्तमाने सत्यजादीनामष्यट् प्राप्नोतीत्येष दोषः प्रसज्यते; मण्डूकपलुतिन्यायेनात्राटोऽनुवृत्तेः। योगविभागाद्वा, अयमटोऽपि प्रतिषेध इत्यवसीयते; यदि ह्याट एव प्रतिषेधोऽभिमतः स्यात् तदा `आडजादीनां न माङ्योगे' इत्येकमेव योगं कुर्यात।

अथ वा--`लुङ्लङ्लृङ्क्षु' (6.4.71) इत्येतावन्मात्रमनुवर्तते, तेन लुडादिषु यदुक्तं तस्य सर्वस्य प्रतिषेधो न विज्ञायते। न चैवमतिप्रसङ्ग; यतः प्रत्यागन्तेरस्मिन्नेव लुङलङ्लृङ्प्रकरणे यत् कार्यं विहितं तस्यैव प्रतिषेधो लभ्यते, न सर्वस्य प्रकरणान्तरविहितस्य। अत्र तु प्रकरणेऽडाटावेव विहितौ, अतस्तयोरेव प्रतिषेधः।

`मा भवान् कार्षीत्' इति। `माङि लुङ', (3.3.175) इति लुङः। `मा स्म करोत्' इति। `स्मोत्तरे लङः च' (3.3.176) इति लङः। `माङ्' इति ङ्कारानुबन्धवत उपादानम्--अस्मादादेशी यो माशब्दस्तस्य ग्रहणं मा भूदित्येवमर्थम्; अन्यथा `भवान् सुखिनं मात्राकार्षीत्' इत्यत्रापि प्रतिषेधः स्यादिति केचित्। लाक्षणिकत्वादेवास्मदादेशस्याग्रहणमित्ययुक्तमेतत्। निपात एव त्वनयोऽङिन्माशब्दोऽस्ति--`मा बालिपथमन्वगाः'। `मा भवतु तस्य पापम्' इति तु यस्य प्रयोगस्तद्योगे प्रतिषेधो मा भूदित्येवमर्थं ङिद्विशिष्टस्य ग्रहणम्। योगग्रहणन्तु--योगमात्रे प्रतिषेधो यथा स्यादिति, तेन व्यवहितेऽपि भवति।।

75. बहुलं छन्दस्यामाङ्योगेऽपि।

`अमाङ्योगेऽपि न भवतः' इत्यादिना माङ्योगेऽपीत्यस्यार्थमाचष्टे। अत्र च वाक्यद्वयेऽपि `बहुलं छन्दसि' इत्येतत्सम्बध्यते। `बहुलं छन्दसि' इत्येतावतैव सिद्धेऽमाङ्योगेऽपीति वचनं विस्पष्टार्थम्। अनुच्यमाने ह्येस्मिन् माङ्योगसय प्रकृतत्वात् तत्रैव छन्दसि बहुलमडाटौ न भवत इत्याशंक्येत। `जनिष्ठाः' इति। जनेर्लुङ्, थास, इट्, षत्वम् ष्टुत्वञ्च। `ऊनयीत्, अर्दयीत्' इति। `ऊन परिहाणे' (धा.पा.1888) `अर्द्द हिंसायाम्' (धा.पा.1828) चुरादी। `ह्यन्तक्षण' (7.2.5) इत्यादिना वृद्धिप्रतिषेधः। `इट ईटि' (8.2.28) इति सिचो लोपः, गुणायादेशौ । `अवाप्सुः' इति। `आप्लु व्याप्तौ' (धा.पा.1260) अवपूर्वः। `सिजभ्यस्तविदिभ्यश्च' (3.4.109) इति झेर्जुसादेशः। `मा अभित्थाः' इति। भिदेस्थास्, `झलो झलि' (8.2.26) इति सिचो लोपः। `माऽऽवः' इति। पूर्वमेव व्युत्पादितम्।।

76. इरयो रे। (6.4.76)

`दध्रे' इति। दधातेर्लिट्, `लिटस्थझयोरेशिरेच्' (3.4.81) इतोरेच्। तस्यानेन रयादेशः `आतो लोपः' (6.4.64) इत्याकारलोपः। `परिददृश्रे' इति। दृशः परिपूर्याल्लिडादिरातोलोपदर्ज विधेयः। अथ `दध्रे इत्यत्र कथमातो लोपः? यावता `दवा+हरे' इति स्थित आकारलोपः प्राप्नोति? रेभावश्च, तत्र परत्वाद्रेभावः; तस्मिन् कृतेऽनजादित्वादाकारलोपो न प्राप्नोति? अत आह--`धाञो रेभावस्यासिद्धत्वात्' इत्यादि असिद्धत्वन्तु `्सिद्धवदत्रा भात्' (6.4.22) इत्यनेन।

`चक्रिरे' इति। कृञो रूपम्। ननु च रेभावे कृते दृशिप्रभृतयो ये लिटि सेटो धातवः, क्रादिमियमात् तेभ्यो र इत्यस्येटि कृते ददृश्रे इति रूपं न सिद्धयेत्

ददृशिर इत्यादिना रूपेण भवितव्यम्, न च शक्यते वक्तुम्--रेभावविधानसामर्थ्यादिङ् न भविष्यति; रेभावस्थ क्रादिषु चारितार्थत्वात् तेब्यो हि परस्य लिटः `कृसृ' (7.2.13) इत्यादिनेट्प्रतिषेधः? इत्यत आह--`अत्र' इत्यादि। कथं पुना रेभावो लभ्यते? इत्याह--`तदर्थञ्च' इत्यादि। इटि कृते पुना रेभावो यता स्यादित्येवमर्थमिरेश्च इरेश्चेत्येकशेषं कृत्वेरयोरिति द्विवचनेन निर्देशः। तेन यश्च झस्थान इरेच् शब्दः क्रियते, यश्चेरे इत्यस्येटि कृते सत्युत्तरकालमिरेशब्दः सम्पद्यते, तयोरपि रेभावः सिद्धो भवति।।

77. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ। (6.4.77)

`आर्धधातुके' इति निवृत्तम्। कुतः? `समः कृष्णुवः' (1.3.65), `क्षियः (6.4.59) इति निर्देशात्। ह्रस्वयोरिवर्णोयोरिदं ग्रहणम्। कु एतत्? तत एव निर्देशात्। अत्राण् गृह्यमाणः सवर्णान् ग्राहयतीति ह्रस्वौ गृहयमाणौ दीर्घावपि ग्राहयतः, तेन तदन्तस्यापि भवतः। `अचि' इति वर्णग्रहणम् तत्र `यस्मिन्विधिस्तदादावलगरहणे' (व्या.प.127) इत्यजादौ विज्ञायत इत्याह--`अजादौ प्रत्यये' इति। प्रत्यय इत्येतत् कृतो लभ्यते, अङ्गधिकारात्। अङ्गाधिकारो ह्यस्ति, प्रत्यसन्निधापितत्वात्। प्रत्यये हि परतोऽङ्गसंज्ञा विधीयते। यद्यजदौ प्रत्यय इयङुवङौ भवतः, नियौ, लुवौ--इत्यतर न प्राप्नुतः। अत्र ह्यजेव प्रत्ययः, न त्वजादिः? अत्रापि व्यपदेशिवद्भावे, नाजादित्वमस्तीत्यदोषः। `इवर्णोवर्णान्तस्य' इति। धातोरेवेदं विशेषणम्, नेतरयोः; व्यभिचाराभावात्, असम्भवाच्च। इवर्णोवर्णान्तता चाङ्गस्य ताभ्यां विशेषणाल्लभ्यते। इयङुवङोङकारोऽन्तादेशार्थः। असति त्वस्मिन्ननेकाल्वात् सर्वस्याङ्गस्य स्याताम्। ननु च `निर्दिश्यमानस्यादेशा भवन्ति' (व्या.प.106) इत्यन्तरेणापि ङकारमन्तवस्यैव भवतः? एवं तर्हि विस्पष्टार्थम्। `आप्नुवन्ति, राध्नुवन्ति' इति। `आप्लु व्याप्तौ' (धा.पा.1260), `राध साध संसिदौ' (धा.पा.1262,1263) स्वादित्वाच्श्नुः। शकारवतो ग्रहणं किमर्थम्? `दभाभ्यां नुः' (द.उ.य1.143) दानुः, भानुरित्यत्र मा भूत्। `चिक्षियतुः, चिक्षियुः' इति। त्रयाणामपि क्षिधातूनामन्यतमस्य रूपम्। `नियौ, नियः, `लुवौ, लुवः' इति। अत्र `क्विदन्ता धातूत्वं न जहति' (व्या.प.132) इति धातुत्वं वेदितव्यम्। तत्र नयतेः `सत्यूद्विष' (3.2.61) इत्यादिना क्विप्। लुनातेस्तु `अन्येभ्योऽपि दृश्यते' (3.2.178) इत्यनेन।

`इयङुवङ्भ्याम्' इत्यादि। गुणस्यावकाशः--चेतव्यम्, स्तोतव्यमित्यादि, इयङ्वङोः--चिक्षियतुः, चिक्षियुः, लुलुवतुः, लुलुवुरिति; इहोभयं प्राप्नोति--चयनम्, लवनमिति। विप्रतिषेधेन गुण एव भवति। वृद्धेरवकाशः--सखायौ, सखायः, गावौ, गाव इति; इयङुवङोः स एव; इहोभयं प्राप्नोति--चायकः, लावक इति। वृद्धिरेव भवति विप्रतिषेधेन।

`इयङुवङ्प्रकरणे' इत्यादि। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्--`बहुलं छन्दसि' (6.4.75) इत्यादेः सूत्राद्बहुलग्रहणमनुवर्तते। तेन तन्वदीनां छन्दसि विकल्पेनेयङुवङौ भविष्यतः। `तन्वम्' इति। यत्रोवङ् नास्ति, तत्रामि परपूर्वत्वमपि नास्ति; बहुलवचनादेव। `विध्वम्, विषुवम्' इति। सूधातोः क्विप्; `उपसर्गा सुनोति' (8.3.65) इत्यादिना षत्वम्। `स्वर्गः, सुवर्गः' इति। `सु' इत्येतस्मादर्गशब्दे परत उवङादेशः। योगश्चायं यणादेशापवादः।।

78. अभ्यासस्यासवर्णे। (6.4.78)

`इयेष, उवोष' इति। `इषु इच्छायाम्' (धा.पा.1351) [`इष'--धा.पा.] `उष दाहे' (धा.पा.696)--आभ्यां लिट् णल्। अत्र च द्विर्वचनं प्राप्नोति, `पुगन्तलघूपधस्य च' (7.3.86) इति गुणश्च, तत्र परत्वाद्गुणः--एष, ओष इति स्थिते `द्विर्वचनेऽचि' (1.1.59) इति स्थानिवद्भावादिषुषित्येतयोर्द्विर्वचनम्, तत इयङ्वङौ। ननु च तयोः कर्तव्ययोः `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावात्सवर्णता नास्ति? नैतदस्ति; यो ह्यनादिष्टादचः पूर्वस्तस्य विधी कर्तव्ये स्थानिवद्भावेन भवितव्यम्, आदिष्टाच्चात्राचः पूर्व एषोऽभ्यासः, तत् कुतेऽत्र स्थानिवद्भावः। `इयर्ति' इति। `ऋ गतो' (धा.पा.1098) जुहोत्यादित्वाच्छपः श्लुः, अभ्यासस्य `उरत्' (7.4.66) इत्यत्त्वम्, `अर्तिपिपर्त्योश्च' (7.4.77) इतीत्त्वम्, तत इयङादेशः।

`ईयतुः, ईयुः' इति। `ऊवतुः उवुः' इति। `असंयोगाल्लिट् कित्' (1.2.5) इति। कित्त्वाद्गुणाभावः, तेन सवर्णोऽज्न भवति।

`इयाज' इति। `उवाप' इति। यजिवप्योः `लिट्यभ्यासस्योभयेषाम्' (6.1.17) इति सम्प्रसारणम्।।

79. स्त्रियाः। (6.4.79)

`स्त्रियाः' इति। `आण्नद्याः' (7.3.112), `जातेरस्त्रीविषयादयोपधात्' (4.1.63) इति निर्देशान्नेदं स्त्रीप्रत्ययानां ग्रहणम्, नापि स्त्र्यर्थवृत्तेः शब्दस्येति निश्चित्य स्त्रीशब्दस्यैव स्वरूपेण ग्रहणमिति दर्शयितुमाह--`स्त्री इत्येतस्य' इत्यादि। इतिकरणः स्त्रीशब्दस्य स्वरूपपदार्थता दर्शयति। अथ षष्ठीबहुवचने कस्मान्न भवतीत्याह--`स्त्रीणाम्' इत्यादि। परत्वात् षष्ठीबहुवचने नुटा भवितव्यम्, तस्मिंश्च सत्यजादिः परः प्रत्ययो न भवतीतीयङ न प्रवर्तते। अथ किमर्थं पृथग्योगः क्रियते? न, `अचि श्नुधातुस्त्रीभ्रुवाम्' इत्येक एव योगः क्रियेतेति? अत आह--`प्रथग्योगकरणम्' इत्यादि। `वाऽम्शसोः' (6.4.80) इत्यत्र स्त्रीशब्दस्यैव विकल्पो यथा स्यात्, धातुभ्रुवोर्माभूदित्येवमर्थं पृथग्योगकरणम्।।

80. वाऽम्शसोः। (6.4.80)

81. इणो यण्। (6.4.81)

अत्र पक्षद्वयं सम्भाव्यते--`इणः' इति प्रत्याहारग्रहणं स्यात्, धातुग्रहणं वा? तत्र `एरच्' (3.3.56) इति, `ओरावश्यके' (3.1.125) इति, `उरत्' (7.4.66) इत्यवमादिभ्यो निर्देशेभ्य एव नेदं प्रत्याहारग्रहणम्। अतः परिशेष्याद्धातुग्रहणमेवेदं विज्ञायते। णकारोच्चारणमिगिङोर्निवृत्त्यर्थम्। ये तु `इण्वदिकः' (वा.167) इति सामान्येनातिदेशमिच्छन्ति, तेषामिङ एव निवृत्त्यर्थम्। इकस्त्वधियन्तीति भवितव्यमेव यणा। अथ `नेणः' इत्येव कस्मान्नोक्तम्, इयङादेशेऽचि प्रतिषिद्धे सति `इको यणचि' (6.1.77) इति यण् भविष्यति? सत्यमेतत्; उत्तरार्थन्तु यणग्रहणम्। `यन्ति' इत्यद्युदाहरणेष्वदादित्वाच्छपो लुक्। `आयन्' इति। लङ् झोऽन्तादेशे संयोगान्तलोपः, असिद्धत्वादजादित्वादाट्। अथेह कस्मान्न भवति--अयनम् आयक इति? अत आह--`इयङादेशापवादोऽयम्' इति। ननु यथेयङि प्राप्तोऽयमारभ्यते, तथा गुणवृद्ध्योरपि, तत् कुत एतल्लभ्यते--अयमियङोऽपवादः, न गुणवृद्ध्योरित्याह--`मध्येऽपवादाः' इत्यादि। इतिकरणो हेतौ। यस्मात् `मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरान्' (व्या.प.10), तस्मादियङ एव पूर्वस्य विधेरयमपवादः, न तु परयोर्गुणवृद्ध्योः यतश्चैतदेवं तेन गुणवृद्धिभ्यां तु परत्वाद्बाध्यते। अस्यावकाशः--यन्ति, यन्त्विति। `गुणवृद्ध्योः--चयनम्, चायक इति; अयनम्, आयक इत्यत्रोभयं प्राप्नोति। परत्वाद्यणं बाधित्वा गुणवृद्धी भवतः।।

82. एरनेकाचोऽसंयोगपूर्वस्य। (6.4.82)

`तेन संयोगो विशेष्यते' इति। ननु चान्यपदार्थे गूणीभूतत्वादुपसर्जनमत्र संयोगः। नचोपसर्जनं विशेषणेन सम्बन्धमनुभवति। तथा हि शोभनो राजपुरुष इत्युक्ते पुरुषस्येव प्रधानस्य शोभनत्वेन योगो गम्यते, नोपसर्जनस्य राज्ञः; नैतदस्ति; धातोरित्यनुवृत्तिसामर्थ्यादुपसर्जनमपि संयोगविशेषणेन सम्बन्धमनुभविष्यति, अन्यथा धात्वानुवृत्तिरपार्थिका स्यात्। न त्विवर्णविशेषणार्थं धातुग्रहणमिहानुवृत्तं स्यात्? नैतदस्ति; यदधातोरिवर्णान्तं तस्य हि भवितव्यमेव यणादेशेन `इको यणचि' (6.1.77) इत्यनेनेन। `निन्यतु; निन्युः' इति। नयतोर्लिट्। इयङादेशे प्राप्ते यणादेशः। `उन्न्यौ उन्न्यः' इति। उन्नयतीति `सत्सूद्विष' (3.1.61) इत्यादिना क्विप्। एवं `ग्रामण्यौ, ग्रामण्यः' इत्यत्रापि। `अग्रग्रामाभ्याञ्च' (वा?) इति णत्वम्।

`असंयोगपूर्वग्रहणम्' इत्यादि। यद्येरिति। नोच्येत, ततोऽसंयोगपूर्वङ्गस्य विशेषणं स्यात्, एवञ्च यवक्रियौ, यवक्रिय इत्यत्रापि स्यात्। भवति ह्येतदंसयोगपूर्वमङ्गम्, तस्मात् `एः' इत्युच्यते। असंयोगपूर्वग्रहणमिकारस्य विशेषणं यथा स्यादङ्गस्य मा भूदित्येवमर्थम्। ननु च `य्वोः' इति प्रकृतम्, तत्र यद्येरिति नोच्येत, तदोवर्णान्तस्यापि स्यात्; ततश्च लुलुवतुः, लुलुवुरिति न सिद्ध्येत्। तस्मादुवर्णान्तस्य मा भूदित्येवमर्थमेरिति स्यादित्यत आह--`लुलुवतुः, लुलुवुः' इत्यादि। इहैरोरित्युच्यमाने, अनेनैवोवर्णस्यापि सिद्धे सति `ओः सुपि' (6.4.83) इति नियमर्थं स्यात्--उवर्णान्तस्य यदि भवति तदा सुप्येव, नान्यत्रेति। ततश्चास्मादेव नियमात् ल्लुलुवतुः, लुलुवुरिति सिद्ध्यतीति एरित्येतदुवर्णान्तनिवृत्त्यर्थं नोपपद्यते। तस्मात् पूर्वोक्तमेवास्य प्रयोजनं युक्तम्। `यवक्रियौ यवक्रियः" इति। यवान् क्रीणातीति `अनेयभ्योऽपि दृश्यते' (3.2.187) इति क्विप्। अत्रेकारस्य धात्ववयवसंयोगपूर्वत्वान्न भवति। `इहापि न स्यात्' इति। यदि धातुना संयोगो न विशिष्येतेति शेषः। क्वचिदिहापि यथा स्यादिति पाठः। तत्र प्रकृतत्वाद्यणादेश इति विज्ञायते। यदि धातुनासंयोगो न विशिष्येत, तदा धात्ववयवोऽधात्ववयवो वा संयोगः पूर्वो यस्माद्भवति तदन्तस्य न भवतीति विज्ञायते। ततश्चोन्न्यौ, उन्न्य इत्यत्रापि न स्यात्; संयोगपूर्वत्वादिवर्णस्य। धातुना संयोगे विशेषिते तु भवति। न ह्यत्रेवर्णो धात्ववयवसंयोगपूर्वः। तस्मादिहापि यथा स्यादिदि धातुना संयोगो विशिष्यतदे।

`गतिकारकाभ्याम्' इत्यादि। अथ कथमिदं पुनरिष्यमाणमपि न भवति? पूर्वग्रहणात्। इह पूर्वग्रहणं न कर्त्त्यम्, `एरनेकाचोऽसंयोगात्' इत्येवोच्येत। तत्र, धात्ववयवसंयोगाद्य इवर्णः परो न भवति तदन्तस्याङ्गस्य यण्भवति--इत्येवं विज्ञायमाने सिद्ध्यत्येवेष्टमिति किं पूर्वग्रहणेन? तत् क्रियते पूर्वाचार्यैः--यस्य विहितोऽयं यण् तस्यैव कर्तव्यो नान्यस्येत्यस्यार्थस्य सूचनार्थम्। पूर्वाचार्याश्च क्विबन्तस्य गतिकारकपूर्वस्यैव कृतवन्तः, नान्यस्येति। तस्मादिहापि गतिकारकाभ्यामन्यपूर्वस्य न क्रियते। अथ वा `वाम्शसोः' (6.4.80) इत्यतो मण्डूकप्लुतिन्यायेन `वा इत्यनुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञायते। तेन गतिकारकाभ्यामन्यपूर्वस्य न भविष्यतीति। अस्मिंश्च व्याख्याने पूर्वग्रहणं विस्पष्टार्थं वेदितव्यम्। `परमनियौ' इति। `सन्महत्' (2.1.61) इत्यादिना समासः। अत्र परमशब्दो न गतिः, न च कारकमिति तत् पूर्वस्य न भवति।।

83. ओः सुपि। (6.4.83)

`खलप्वौ' इति। खलं पुनातीति `अन्येभ्योऽपि दृश्यते' (3.2.178) इति क्विप्। `शतस्वौ' इति। अत्रापि शतं सूत्र इति `सत्सूद्विष' (3.1.61) इत्यादिना क्विप्। `सकृल्ल्वौ' इति। `तोर्लि' (8.4.60) इति परसवर्णः। `कटप्रुवौ' इति। `प्रूङ् गतौ' (धा.पा.957), [`प्रुङ्'--धा.पा.] `क्विब् वचप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणञ्च' इति क्विप्, दीर्घत्वञ्च।

`ओः' इति स्पष्टार्थम्। अनुकारान्तनिवृत्यर्थन्तु न युज्यते; `य्वोः इत्यनुवृत्तेः। इकारस्य च पूर्वेणैव सिद्धो यण्--उन्न्यौ; ग्रामण्याविति।।

84. वर्षाभ्वश्च। (6.4.84)

`न भूसुधियोः' (6.4.85) इति प्रतिषेधे प्राप्ते तदपवादोऽयमारभ्यते। `वर्षाभ्यौ' इति। वर्षाशब्दाद्भवतेः क्विप्।
`पुनर्भ्वश्चेति वक्तव्यम्' इति। `नपुनर्भ्वित्येतस्याचि सुपि यणादेशो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--चकारोऽत्रि क्रियते, स चानुक्तसमुच्चयार्थः। तेन पुनर्भ्वित्यस्यापि भविष्यतीति। `कारापूर्वस्यापीष्यते' इति। सोऽपि तत एव चकाराद्भवतीति वेदितव्यम्।।

85. न भूसुधियोः। (6.4.85)
भ्रूग्रहणेन तदन्तस्य ग्रहणम्, न केवलस्य। केवलस्य ह्येकाचो यणादेशप्रापत्यसम्भवादनर्थकं वचनं स्यात्। उवङादेशप्रतिषेधार्थत्वान्नानर्थकमिति चत्? न; एवं हि `वर्षाभ्वश्च' (6.4.84) इति यणादेशविधानमनर्थकं स्यात्, यदि ह्ययं यणादेशस्य प्रतिषेधः स्यात्--एवं हि तत् सर्थकं भवति, नान्यथा? नैतदस्ति; उवङपरतिषेधार्थेऽपि ह्यस्मिंस्तन्नियमार्थं स्यात्। एवं तर्हि यणो यत्रानुवृत्तिस्तस्यैवायं प्रतिषेधो युज्यते। स चानेकाचो विहित इति केवलस्य ग्रहणं न प्राप्नोतीति युक्तमुक्तम्--भूग्रहणेन तदन्तस्य ग्रहणमिति।
`प्रतिभुवौ, प्रतिभुवः' इति। `भुवः संज्ञान्तरयोः' (3.2.179) इति क्विप्। `सुधियौ' इति। शोभनं ध्यायतीति `अन्येभ्योऽपि दृश्यते' (3.2.178) इति क्विप्, `ध्यायतेः सम्प्रसारणञ्च' (वा.292) इत्युपसंख्यानात् सम्प्रसारणम्।।

86. छन्दस्युभयथा। (6.4.86)

87. हुश्नुवोः सार्वधातुके। (6.4.87)
`यण्' (6.4.81) इति, `अनेकाचोऽसंयोगपूर्वस्य' (6.4.82), `ओः' (6.4.83) इति चानुवर्त्तते। ननु च `हुरित्येतत् श्नुप्रतययान्तञ्चाङ्गमुकारान्ततां न व्यभिचरत्येव, तत् किमर्थम् `ओः' इतीहानुवर्तते? असंयोगपूर्वग्रहणमुकारस्य विशेषणं यथा स्यादित्येवमर्थम्; अन्यथा `हुश्नुवोरेवैतद्विशेषणं विज्ञायेत। ततश्च `तक्ष्णुवन्ति' इत्यादावेव प्रतिषेधो विज्ञायेत। `राध्नुवन्ति' इत्यादौ तु यणादेशः स्यादेव। जुहोतेरपि--`जुह्वति' इत्यत्र संयोगपूर्वत्वाद्यणादेशो न स्यात्। ननु च धातुग्रहणमनुवर्त्तते, तत्रैवं विज्ञास्यते--धात्ववयवः संयोगः पूर्वः `क्विबन्ता धातुत्वं न जहति' (व्या.प.132) इति कृत्वा। अन्यथाप्यवयववचनं पूर्वशब्दमाश्रित्यैवं विज्ञायते--धात्ववयवः संयोगो यस्य पूर्वो न भवतीति? एवमपि राध्नुवन्तीत्यत्र यणादेशः स्यात्, न ह्यत्र श्नुप्रत्ययस्य धात्ववयवः संयोगपूर्वः। तस्मात् `ओ' इत्येतदनुवर्तनीयम्, तद्विशेषणे हुश्नुवौ। तत्रासंयोगपूर्वग्रहणं श्नुप्रत्ययस्यावयवस्योकारस्य विशेषणं वेदितव्यम्, जुहोत्यवयवस्य; तस्याव्यभिचारात्। `श्नुप्रत्ययान्तस्यासंयोगपूर्वस्य' इति। व्यधिकरणे षष्ठ्यौ। श्नुप्रत्ययान्तस्याङ्गस्य योऽवयवोऽसंयोगपूर्व उकारः, तस्येत्यर्थः। `अनेकाचः' इत्येतज्जुहोतेः श्नुप्रत्ययान्तस्य समान्धिकरणं विशेषणं वेदितव्यम्। `सार्वधातुके' इति जुहोत्यर्थम्, न श्नुप्रत्ययान्तार्थम्; अव्यभिचारात्। `जुह्वति' इति। `अदभ्यस्तात्' (7.1.4) इत्यदादेशः। `योयुवति, रोरुवति' इति। `यु' `रु' इत्येताभ्यां यङ, तस्य `यङोऽचि च' (2.4.74) इति लुक्, `गुणो यङ्लुकोः' (7.4.82) इत्यभ्यासस्य गुणः, पूर्ववज्झेरवादेशः।
`इदमेव' इत्यादि। कथं पुनरिदं ज्ञापकम्? इत्याह--छन्दसि' इत्यादि। यदि च्छन्दस्येव यङ्लुक् स्यात्, तदा `चन्दस्युभयथा' (6.4.86) इत्यार्धधातुकत्वादेव योयुवति, रोरुवतीत्यत्र न भविष्यतीत्यनर्थकमेव हुश्नुग्रहणं स्यात्। यदा तु भाषायामपि यङ्लुगस्ति, तदार्धधातुकत्वाभावादसति हुश्नुग्रहणे योयुवतीत्यदौ प्राप्नोतीति तन्निवृत्त्यर्थमुपपद्यते हुश्नुग्रहणम्। तस्मादेतदेव ज्ञापयति--भाषायमपि यङ्लुङस्तीति। तेन बेभिदीति, चेच्छिदीतीत्यादि भाषायामप्युपपन्नं भवति। स्यादेतत्--यङ्लुगान्तादन्यत् यदुवर्णान्तमनेकाच् संयोगपूर्वं तन्निवृत्त्यर्थमेतद्भविष्यतीति? नेदं ज्ञापकमित्यत आह--`न च' इत्यादि। ननु चेदं विद्यते--युवन् अरुवन्निति? नैतदस्ति; यद्यप्येतदसंयोगपूर्वम्, अनेकाज्न भवति; अटोऽसिद्धत्वात्।।

88. भुवो वुग्लुङ्लिटोः। (6.4.88)
`अभूवन्' इति। `गातिस्था' (2.4.77) इत्यादिना सिचो लुक्। झेरन्तादेशे कृते संयोगान्तलोपः। `अभूवम्' इति। `तस्थस्थ' (3.4.101) इत्यादिना मिपोऽम्भावः। `बभूव' इत्यादि। `भवतेरः' (7.4.73) इत्यभ्यासस्यात्त्वम्। `इन्धिभवतिभ्याञ्च' (1.2.6) इति लिटः कित्त्वम्, तेन गुणबुद्धी न भवतः। किमर्थं पुनर्भवेतेः परस्य लिटः कित्त्वमारभ्यते, यावता `एकदेशविकृतमनन्यवद्भवति' (व्या.प.16) इति कृतयोरपि गुणवृद्ध्योर्वुक् प्राप्नोत्यकृतयोरपि, वुकि कृतेऽनिगन्तत्वादलघूपधत्वादनजन्तत्वाच्च नास्ति गुणवृद्ध्योः प्राप्तिः, ततः कृताकृतप्रसङ्गित्वेन नित्यत्वाद्वुकि कृते गुणवृद्ध्योः प्राप्तिरेव नास्तीत्यनर्थकं कित्त्वम्? नैतदस्ति; वुगप्यनित्य एव, न ह्यसौ कृतयोर्गुणवृद्ध्योः प्राप्नोति, ओरित्यनुवृत्तेरुवर्णान्तस्य वुका भवितव्यमिति कृत्वा। अत्रोभयोरनित्ययोः परत्वात् गुणवृद्धी स्याताम्। तस्मात् कित्त्वमारब्धव्यम्। किमर्थं पुनः ओरित्यनुवर्तते? बोभाव, बोभवेति गुणवृद्ध्योः कृतयोर्वृङ मा भूदित्येवमर्थम्। ननु च कित्त्वे सत्यत्रापि गुणवृद्धिभ्यां न भवितव्यम्? नैतदस्ति; न हि यङलुगन्ताद् भवतेः परस्य लिटः कित्वं भवति, `इन्धिभवतिभ्याञ्च' (1.2.6) इत्यत्र भवतीति श्तिपा निर्देशात्।।

89. ऊदुपधाया गोहः। (6.4.89)

`निगूहयति' इति। `गुहू संवरणे' (धा.पा.896), हेतुमाण्णिच्। `निगूहकः' इति। ण्वुल्। `साधुनिगूहि' इति। `सुप्यजातौ णिनिस्ताच्छील्ये' (3.2.78) इति णिनिः। `निगूहं निगूहम्' इति। `आभीक्ष्ण्ये णमुल् च' (3.4.22) इति णमुल्, `आभीक्ष्ण्ये द्वे भवतः' (वा.887) इति द्विर्वचनम्। `निगूहः' इति। भावे घञ्। `अलोऽन्यस्य मा भूत्' इति। उत्तरत्र इत्यभिप्रायः। इह त्वोरित्यनुवर्त्य विनाप्युपधाग्रहणेन शक्यत एवायमर्थः प्रतिपादयितुमित्येतदेव मनसि कृत्वा परं पृष्टवान्--`उपधाग्रहणं किं? इति; इत्तरार्थञ्चोपधाग्रहणं क्रियमाणमत्राप्यलोऽन्त्यस्य विधिं निवर्त्तयति। तेन प्रयोजनाभावात् ओरित्येतन्नानुवर्तते।
अथ किमर्थम् `गोहः' इति विकृतनिर्देशः क्रियते, न `गुहः' इत्येवोच्येत, लघु ह्येवं सूत्रं भवति? इत्याह--`गोह इति विकृतग्रहणम्' इत्यादि। ऊत्त्वस्य विशिष्टविषयो यथा स्यादित्येवमर्थम्। `गोह' इति विकृतस्य कृतोकारस्थ ग्रहणमित्यर्थः। एतदेव व्यक्तीकर्त्तुमाह--`यत्र' इत्यादि। अस्य कश्चिदमुमर्थमाचष्टे। एतदुक्तं भवति--गुणे कृते ऊत्त्वेन भवितव्यमिति लक्ष्यते; एतच्चायुक्तम्; एवं हि व्याख्यायमाने `अयादेशप्रतिषेधार्थं `निगूह्य गतः' इति `केचिदिच्छन्ति' इत्युक्त्वा यद्वक्ष्यति--"उत्त्वस्यासिद्धत्वात् `ल्यपि लघूपूर्वात्' (6.4.56) इति णेरयादेशः स्यात्" इति, तन्नोपपद्यते। यदि गूणं कृत्वोकारस्योत्त्वं विधीयते, ततश्च सत्यूकारस्यासिद्धत्वेनैव लघुपूर्वत्वमुपपद्यते, ओकारपूर्वत्वात्; तत् कुत ऊकारस्यासिद्धत्वेऽयादेशप्रसङ्गः? तस्मादयमत्रार्थः--यस्मिन् विषये गुहेर्गोह इत्येतद्रूपं सम्भाव्यते तत्र यथा स्यात्। यत्र प्रत्यये गुणः सम्भवति तस्मिन् कृतेऽकृत एव गुणे यथा स्यात्, अन्यत्र मा भूदिति। तस्माद्विकृतनिर्देशस्य विशिष्टविषयोपलक्षणार्थत्वात् गुणविषये सम्मुखीभूत एवाकृत एव गुण ऊत्वेन भवितव्यम्। एवञ्च सति `ऊत्तवस्यासिद्धत्वात्' इत्यादिकः प्रसङ्गग्रन्थो युज्यते, नान्यथा। ननु च गुणनिमित्ते प्रत्यय उत्पन्ने परत्वाद् गुणेनैव भवितव्यम्, तत्कथमकृत एव गुण ऊत्त्वं भवेत्? कृताकृतप्रसङ्गित्वात्। तद्धि कृते गुणे प्राप्नोत्यकृतेऽपि, विकृतनिर्देशस्य विशिष्टविषयोपलक्षणार्थत्वात्। न तूत्त्वे कृते गुणः प्राप्नोति, अलघूपधत्वात्। तस्माद् गुणात् पूर्वमूत्त्वेन नित्यत्वाद्भवितव्यम्। अत एव दीर्घोच्चारणमर्थवद्भवति, नान्यथा। यदि गुणे कृते सत्ययमादेशः स्यात्, दीर्घोच्चारणमनर्थकं स्यात्। आन्तरतम्यादेव दीर्घस्य दीर्घो भविष्यति। ज्ञापितं हि `दिव उत्' (6.1.131) इति तपकरमेन--`भाव्यमानोऽप्युकारः सवर्णान् गृह्णति' (चान्द्र.प.44) इति। यदन्यत् प्राप्नोति तन्निवृत्त्यर्थं दीर्घोच्चारणमिति चेत्? स्यादेतत्--`अजुगूहत्' इत्यत्र `णौ चङ्यपधायाः' (7.4.1) इति ह्रस्वो मा भूदित्येवमर्थं दीर्घोच्चारणमिति। कुतः पुनरेष नियमोऽत्र ह्रस्वत्वेन न भवितव्यमिति? न हीह कात्यायनस्य भाव्यकारस्य वा वचनमस्ति, नापि शिष्टप्रयोगः, यत एष निश्चयः स्यात्। `यथालक्षणमप्रयुक्तेषु' इति चोच्यत। तस्मात् `अजूगुहत्' इत्येवं भवितव्यम्। यदि गुणे कृतेऽयमादेशः क्रियेत, ततः किमनिष्टं स्यात्? दीर्घोच्चारणमनर्थकं स्यात्। अत्रापि दीर्घोच्चारणं वैचित्त्र्यार्थं प्रकल्प्येत? एवमपि प्रक्रियागौरवं स्यात्। तस्माद्दीर्घोच्चारणसामर्थ्यादकृत एव गुण ऊत्वेन भवितव्यम्। `निगूह्य गतः' इति। ण्यन्तात् क्त्वा, प्रादिसमासः। `समासोऽनञ्पूर्वे' (7.1.37) इत्यादिना क्त्वो ल्यप्। `तत्र व्याश्रयत्वात्' इत्यादि। एतेनायादेशप्रतिषेधार्थतां विकृतिनिर्देशस्य प्रत्याचष्टे। कथं पुनर्व्याश्रयत्वम्? इत्याह--`णावूत्त्वम्' इत्यादि।
`निगोढा' इति। तृच्। `हो ढः' (8.2.31), `झषस्तथोर्धोऽधः' (8.2.40) इति धत्वम्, `ष्टुना ष्टुः' (8.4.41) इति ष्टुत्त्वम्, `ढो ढे लोपः' (8.3.13)।।

90. दोषो णौ। (6.4.90)
`दीषयति' इति। `दुष वैकृत्ये' (धा.पा.1185)।
अथ किमर्थम् `दोषः' इति विकृतस्य ग्रहणम्, न `दुषः' इत्येवोच्येत, विषयावधारणार्थमिति चेत्? न; णाविति साक्षाद्विषयस्य निर्देशादित्यत आह--`विकृतग्रहणम्' इत्यादि पूर्वसूत्रे हि `गोङः' इत्युक्तम्, अत्र यदि `दूषः' इत्येवोच्येत, प्रक्रमस्यारम्भस्य भेदः स्यात्, अभेदश्चेष्यते। अतदस्तदर्थं विकृतस्य ग्रहणम्। किमर्थं पुनः प्रक्रमस्याभेद इत्यते? अत्यल्पमिदं पृच्छ्यते, वैचित्त्र्यस्यापि नाम प्रयोजनं प्रष्टव्यम्। वैचित्त्र्यस्य ह्ययं प्रकारः--प्रक्रमाभेद इति, किं तदर्थेन प्रश्नपरिश्रमेण!।।

91. ना चित्तविरागे। (6.4.91)
पूर्वेण नित्ये प्राप्ते विकल्पोऽयमारभ्यते। `चित्तविरागे' इति। चित्त्स्याप्रीतता। `चित्तं दोषयति' इति। चित्तदमप्रीतं विमुखं करोतीत्यर्थः।
`चित्तविराग इति किम्? साधनं दूषयत--अत्र पूर्वेण नित्यं भवति। णावित्येव--चित्तस्य दोषः। भावे घञ्।।

92. मितां ह्वस्वः। (6.4.92)
`एवमादिना' इति। आदिशब्देन `जनीजृष्कनसुरञ्जोऽमन्ताश्च' (धा.पा.817) इत्येवमादिग्रहणम्। `घटयति' व्यथयति' जनयति' इति। `घट चेष्टायाम्' (धा.पा.763) `व्यथ भयचलनयोः (धा.पा.764) `जनौ प्रादुर्भावे' (धा.पा.1149)। ननु च जनेः `जनिवध्योश्च' (7.3.35) इति वृद्धिः प्रतिषिध्यते, तदयुक्तमिदमुदाहरणम्, मित्सञ्ज्ञाप्यापार्थिका? नैतदस्ति; चिण्कृतोर्हि स वृद्धिप्रतिषेधः, तत्र हि `आतो युक् चिण्कृतोः' (7.3.33) ित्यनुवर्त्तते। `रजयित' इति। `रञ्जेर्णौ मृगरमण उपसंख्यानम्' (वा.778)। इत्यनुनासिकलोपे कृते `अत उपधायाः' (7.2.116) इति वृद्धिः। तस्यानेन ह्रस्वः। `शमयति' इति। शमेरमन्तत्वान्मित्त्वम्। अस्यापि `नोदात्तोपदेश' (7.3.34) इत्यादिना वृद्धिप्रतिषेधश्चिण्कृतोरेव। `ज्ञापयति' इति। `ज्ञा अवबोधने' (धा.पा.1507) इत्यस्य क्र्यादिपरिपठितस्य `मारणतोषणनिशामनेषु (धा.पा.811) ज्ञा, मिच्च' इति मित्संज्ञा, `अर्तिह्री' (7.3.36) इत्यादिना पुकि कृते ह्रस्वः।
`केचिदत्र' इत्यादि। `क्रमु पादविक्षेपे' (धा.पा.437)इत्यस्यामन्तत्वान्मित्संज्ञा, तस्य च ह्रस्वत्वे संक्रामयति, उत्क्रामयतीति न सिद्ध्येत्। तस्मादेतत्सिद्धये

`वा चित्तविरागे' (6.4.91) इत्यतो वाग्रहणमनुवर्तयन्ति। तस्मिंश्चानुवर्त्तमाने सर्वत्र विकल्पः प्रसज्येतेत्यतिप्रसङ्गपरिहारार्थं `सा च व्यवस्थितविभाषा' इति। व्याचक्षते। अथ `मितामत्' इत्येवं कस्मान्नोक्तम्, लघु ह्येवं सूत्रं भवति? अशक्यमेवं वक्तुम्, `वेष्ट वेष्टने' (धा.पा.255) इति घटादौ पठ्यते, तत्रैवमुच्यमाने तस्याप्कारः प्रसज्येत्, `ह्रस्वः' इत्युच्यमाने `एच इग् ह्रस्वादेशे' (1.1.48) इतीकारः सिद्धो भवति।।

93. चिण्णमुलोर्दीर्घोऽन्यतरस्याम्। (6.4.93)

`णौ' इति वर्त्तते, चिण्णमुलौ च तद्विशेषणे। `अशमि' इति। शमेर्ण्यन्ताल्लुङ, `चिण् भावकर्मणोः' (3.1.66) इति च्लेश्चिण्, `चिणो लुक्' (6.4.104) इति तशब्दस्य लुक् णेरनिटि' (6.4.51) इति णिलोपः। `शर्मशममम्, शामंशामम्' इति। पूर्ववण्णमुल्दिविर्वचने।

`दीर्घग्रहणं किम्' इति। एवं मन्यते--ह्रस्वस्यैवानन्तरसय प्रकृतस्य विकल्पमात्रं विषेयम्, एवमप्यभीष्टं सिद्ध्यत्येव। तथा हि--यस्मिन् पक्षे ह्रस्वो विधीयते, तस्मिन्नशमीत्यादि सिद्ध्यति। यस्मिंस्तु ह्रस्वो न विधीयते, तत्र `अत उपधायाः' (7.2.116) इति दीर्घे वृद्धिसंज्ञके विहिते तेनैव रूपेणावस्थानात् `अशामि' इत्यादि सिद्ध्यतीत्यभिप्रायः। इतरस्तु दीर्घग्रहणमन्तरेण यन्न सिद्ध्यति, तद्दर्शयति--`शमयन्तं प्रयुङ्क्ते' इत्यादिना। शमेर्ण्यन्तात् पुनः प्रयोजकविवक्षायां द्वितीयो णिच्, तत्र पूर्वस्य णेर्लोपः, लुङ, चिण्। पक्षे दीर्घत्वम्।

`अशमि, अशामि, शमंशमम्, शामंशामम्' इति। द्वितीयणिजन्तण्णमुलि कृते पक्षे दीर्घत्वम्। `शंशमयतेः' इत्यादि। अत्यर्थं शाम्यतीति यङ्, द्विर्वचनम्, `नुगतोऽनुनासिकान्तस्य' (7.4.85) इति नुक्--`शंशम्य' इति। स्थिते हेतुमण्णिच्, `अतो लोपः' (6.4.48) इत्यकारस्य लोपः, `यस्य हलः' (6.4.49) इति यकारस्य, शंशमीति स्थिते यदा ततः परश्चिण्भवति, तदा पक्षे दीर्घत्वे कृतेऽशंशम्यशंशामीति भवति। यद तु णमुल् तदा शंशमंशंमम् शंशामंशंशाममिति, तत्र योऽसो णौ णिर्लुप्यते, यश्च यङोऽकारस्तयोर्दीर्धग्रहणे सति `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावो न भवति; `न पदान्त' (1.1.58) इत्यादिना प्रतिषेधात्। तेनासति व्यवधाने दीर्घः सिद्धो भवति। स्यादेतत्--ह्रस्वविकल्पे विधीयमाने यस्मिन् पक्षे ह्रस्वो नास्ति तस्मिन्पक्षे स्वरूपेणैवावस्थितो दीर्घः स्यात्? इत्यत आह--`ह्रस्वविकल्पे तु' इत्यादि। न हि ह्रस्वे विधातव्ये केनचित् स्थानिवद्भावः प्रतिषिध्यते। तत्र ह्रस्वविकल्पे विधीयमाने णेर्लोपस्य यङ्कारस्य च स्थानिवद्भावः स्यादेव। ततश्च स्थानिवद्भावाद्विकल्पेन ह्रस्वत्वं न स्यात्। चिण्णमृल्परे हि णौ परतो मितामङ्गानां ह्रस्वत्वं विधेयम्। यश्चात्र णिश्चिण्णमुल्परो न तत्र मिदङ्गम्; पूर्वेम णिचा व्यवधानात्। यस्मिंश्च णौ मिदङ्गं नासौ चिण्णमुल्परः; परेण चिणा व्यवधानात्। तस्मान्नायमस्य योगस्य विषय इति पाक्षिकं ह्रस्वत्वमनेन न स्यात्। पूर्वेणैव योगेन नित्यं स्यात्, ततश्च दीर्घो न स्यात्।

`णिण्यन्ते' इत्यादि। णेणिरन्तः समीपो यस्मिन् स णिण्यन्तः। अथ वा णेणिः णिणिः सोऽन्तो यस्य स णिण्यन्तः। अस्मिन् पक्षेऽन्तशब्दोऽवयववचनः। `यङण्यन्ते त्वसिद्धिरेव' इति। यङ्ण्यन्तशब्दस्यापि पूर्ववद् द्विधा व्युत्पत्तिः। कस्यासिद्धिः? प्रकृतत्वाद्दीर्घस्येति वेदितव्यम्। एवकारेणैतद्दर्शयति--णिण्यन्ते स्यादपि केनचित् प्रकारेण दीर्घस्य सिद्धिः, यङ्ण्यन्ते त्ववसिद्धिरेव। न केनचित् प्रकारेण सिद्धिरित्यर्थः। कथ पुनर्णिण्यन्ते सिद्धिर्भवति? णिजातेराश्रयणात्। णिजातिविवक्षायां हि यद्यपि णिलोपस्य स्थानिवद्भावः, तथापि नास्तिव्यवधानम्; जातेरेकत्वात्। न हि तत्रैव तस्या व्यवधानमुपपद्यते। तेन व्यवधानाभावाण्णिण्यन्ते दीर्घस्य सिद्धिः। अथ वैतदेवकारेण दर्शयति--णिण्यन्ते पूर्वं णिचमाश्रित्य `अत उपधायाः' (7.2.116) इति वृद्धि विधानादस्ति दीर्घस्य सिद्धिः, तस्यास्तु ह्रस्वत्वेन निवृत्तिः क्रियते, न तु सर्वथा नास्त्येव। यङ्ण्यन्ते तु सर्वथैव दीर्घसिद्धेरभावः, तत्र वृद्धेरसम्भवादिति। स्यादेतत्--विक्लपे दीर्घत्वे विधीयमानेऽपि नैवाऽत्र दीर्घः सिध्यति। `असिद्धवदत्रा भात्' (6.4.22) इति णियङोर्लोपस्यासिद्धत्वादित्यत आह-- `व्याश्रयत्वात्' इत्यादि। कथं पुनर्ध्याश्रयत्वम्? इत्याह--`णौ हि' इत्यादि।

अन्यतरस्यांग्रहणं विस्पष्टार्थम्; शक्यते हि `वा चित्तविरागे' (6.4.9) इत्यतो मण्डूकप्लुतिन्याथेन वाग्रहणमनुवर्त्तयितुम्।।

94. खचि ह्वस्वः। (6.4.94)

`द्विषन्तपः, परन्तपः' इति। `द्विषत्परयोस्तापे' (3.2.39) इति खच्, `अरुर्द्विषदजन्तस्य' (6.3.67) इति मुम्। `पुरन्दरः' इति। `पूःसर्वयोर्दारिसहोः' (3.2.41) इति खच्, `वाचंमपुरन्दरौ च' (6.3.69) इति निपातनान्मुमागमः।

ह्रस्वग्रहणं विस्पष्टार्थम्, शक्यते `मितां ह्रस्वः' (6.4.92) इत्यतो मण्डूकप्लुतिन्यायेन ह्रस्वग्रहणमनुवर्त्तयितुम्।।

95. ह्लादो निष्ठायाम्। (6.4.95)

`प्रह्लन्नः' इति। `ह्लादी सुखे च' (धा.पा.27) `रदाभ्याम्' (8.2.42) इत्यादिना नत्त्वम्। `प्रह्लादयति' इति हेतुमण्णिच्।।

96. छादेर्घेऽद्व्युपसर्गस्य। (6.4.96)

`उरश्छदः' इति। `छद अपवारणे' (धा.पा.1935), चुरादिणिच्, `पुंसि संज्ञायां घः प्रायेण' (3.3.118) इति घः। `उरसश्छदः' इति विगृह्य `कृद्योगा च षष्ठी समस्यते' (वा.86) इति समासः।

ननु च णिलोपस्य `असिद्धवदत्रा भात्' (6.4.22) इत्यसिद्धत्वात् `अचः परस्मिन्पूर्वविधौ' (1.2.57) इति स्थानिवद्भावाद्वा ह्रस्वभाविन्यज्लक्षणोपधा न

सम्भवति, तत् कथं ह्रस्वत्त्वं प्रवर्त्तते? इत्याह--`णिलोपस्य' इत्यादि। यद्यत्र णिलोपस्यासिद्धत्वं स्थानिवद्भावो वा स्यात्, तदा वचनमनर्थकं स्यात्। तस्माद्वचनसमर्थ्यादुभयमपि न भवति, तेन ह्रस्वभाविन्युपधा भवति।

`अद्विप्रभृत्युपसर्गस्येति वक्तव्यम्' इति। ननु च त्रिप्रभृतयो यत्र सन्ति तत्र द्वावपि स्तः, ततश्चाद्व्युपसर्गस्येत्येवं सिद्धम्? इत्यत आह--`उत्तरा हि' इत्यादि। यद्यपि त्रिप्रभृतिषु द्वावपि स्तः, तथापि न ताविह द्विशब्देनोपात्तौ; यत उत्तरा हि संख्या पूर्वसंख्याया यः कृतो व्यपदेशस्तदभिधानं निवर्त्तयति। कथं ज्ञायते? इत्याह--`न हि' इत्यादि। यद्युत्तरा संख्या पूर्वसंख्याकृतव्यपदेशं न निवर्त्तयेत्, तदा त्रिपुत्रोऽपि लोके द्विपुत्र इत्यभिधीयेत, न चाभिधीयते। तथा हि `द्विपुत्रः आनीयताम्' इत्युक्ते नैव त्रिपुत्र आनीयते, अपि तु यस्यं द्वादेव पुत्रौ स एव। अद्विप्रभृतीत्यादेश्च वाक्यस्यायमर्थः--अद्विप्रभृत्युपसर्गस्य छादेर्ह्रस्वत्वं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--द्विशब्दोऽत्रानेकोपलक्षणार्थम्, द्व्युपसर्गस्यानेकोपसर्गस्येति यावत्। अद्व्युपसर्गस्येते च प्रसज्यप्रतिषेधोऽयम्। तेनायमर्थो भवति--छादेरङ्गस्यानेकोपसर्गस्य घप्रत्यये परत उपधाह्रस्वो न भवतीति। केन पुनः प्राप्तस्य ह्रस्वस्यानेन प्रतिषेधः क्रियते? एतस्मादेव प्रतिषेधाद्विधायकं वाक्यमनुमीयते। योगविभागाद्वा--`छादेर्घे' इति। यदि च द्विशब्दोऽत्रानेकोपलक्षणार्थः, योगविभागश्चाभ्युपेयेतैवं तदा पर्युदासेऽप्यदोषः। कथम्? द्व्युपसर्गादनेकोपसर्गादन्योऽद्व्युपसर्गः=एकोपसर्गः, तस्य ह्रस्वत्वं भवति। किमर्थमिदम्, न `छादेर्घे' इत्यनेनैव सिद्धम्? सिद्धे सत्यारम्भो नियमार्थः--एकोपसर्गस्यैव भवति, नान्यस्येति। यद्येदम् `उरश्छदः' इत्यत्र न प्राप्नोति? नैष दोषः, एवं हि योगविभागोऽनर्थकः स्यात्। तुल्यजातीयापेक्षत्वान्नियमस्य, सोपसर्गस्य नियमः क्रियमामः सोपसर्गस्येव ह्रस्वत्वं निवर्त्तयति, नानुपसर्गस्य। तेन `उत्तरश्छदः' इत्यत्र प्रवर्तत एव।।

97. इस्मन्त्रन्क्विषु च। (6.4.97)

चकारश्चादेरनुकर्षणार्थः। `छदिः' इति। `अचिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः' (द.उ.9.30) इतीसिप्रत्ययः। `छद्म' इति। `सर्वधातुभ्यो मनिन्' (पं.उ.4.156) इति मिन्। `छत्त्रम्' इति। `सर्वधातुभ्यः ष्ट्रन्' (द.उ.8.79) इति ष्ट्रन्। योगविभागोऽनेकोपसर्गस्यापि यथा स्यात्--समुपातिच्छदिरिति।।

98. गमहनजनखनघसां लोपः क्ङित्यनङि। (6.4.98)

`अनङि' इति अजादावयं प्रतिषेधः, तेन तत्तुल्येऽजादावेव प्रत्यये कार्यं विज्ञायते, इत्याह--`अजादौ प्रत्यये' इति। `जघ्नतुः, जघ्नुः' इति। `अभ्यासाच्च' (7.3.55) इति कुत्वम्। `जज्ञतुः, जज्ञुः' इति। `जन जनने' (धा.पा.1105), परस्मैपदी जौहोत्यादिकः, `स्तोः श्चुना श्चः' (8.4.40) इति श्चुत्वम्। `जज्ञे' इति। `जनि प्रादुर्भावे' (धा.पा.1149) आत्मनेपदी दिवादिः, `लिटस्तझयोरेशिरेच्' (3.4.81) इत्येश्। `जक्षतुः' इति। अदेः `लिट्यन्यतरस्याम्' (2.4.40) इति घस्लादेशः, `खरि च' (8.4.55) इति घकारस्य ककारः, `शासिवसिघसीनाञ्च' (8.3.60) इति षत्वम्। अथ वा--`घस्लृ अदने' (धा.पा.715) इत्यस्यैतद्रूपम्। `अक्षन्' इति। लुङ्, `लुङ्सनोर्घस्लृ' (2.4.37) इति घस्लादेशः, `मन्त्रे घसह्वर' (2.4.80) इत्यादिना लेर्लुक्, झेरन्तादेशः, संयोगान्तलोपः। शेषं पूर्ववत्। `अधसत्, अगमत्' इति। पुषादिसूत्रेण (3.1.55) अङ।।

99. तनिपत्योश्चन्दसि। (6.4.99)

`वितत्निरे' इति। अत्र यद्युपधालोपस्यासिद्धत्वम् तथापि लोपविधानसामर्थ्यात् `अत एकहल्मध्ये' (6.4.120) इत्यादिनैत्वाभ्यासलोपौ न भवतः। `पप्तिमा' इति। लिट् क्रादिनियमादिट्।।

100. घसिभसोर्हलि च। (6.4.100)

`धत्वं तकारस्य' इति। `झषस्तथोर्धोऽधः' (8.2.40) इति। `जश्त्वं धकारस्य' इति। `झलां जश् झशि' (8.4.53) इति। `समासे कृते' इति। `पूर्वापरप्रथम' (2.1.58) इत्यादिना। `समानस्य सभावः' इति। `समानस्य च्छन्दसि' (6.3.84) इत्यादिना।

यदि द्विर्वचनात्पूर्वमुपधालोपः क्रियते, तदैकाच्त्वाभावाद्द्विर्वचनं न प्राप्नोति? इत्यत् आह--`छान्दसत्वात्' इत्यादि। `बन्धाम्' इति। छान्दसमेतत्। तत्र `बहुलं छन्दसि' (2.4.39) इति वचनाद्बहुलं विषयो भवन्ति। तेन यद्यपि परत्वान्नित्यन्तावच्च द्विर्वचनात् पूर्वमुपधालोपः प्रप्नोति, तथापि स तथा न क्रियते। द्विर्वचनात् पूर्वं न क्रियत इति भावः। `बप्सति' इति। भसेः परस्य झेरदादेशः, शपः श्लुः, `श्लौ' (6.1.10) इति द्विर्वचनम्, अभ्यासकार्यम्, उपधालोपे कृते भकारस्य चर्त्वम्--पकारः। `बस्ति' इति। तिपि रूपम्।।

101. हुझल्भ्यो हेर्धिः। (6.4.101)

`हलादेः' इति। कुतः पुनर्हल्ग्रहणं प्रकृतं येन हिशब्दो विशिष्यते? अनन्तरसूत्रादिति चेत्? न; तद्धि सप्तमीनिर्दिष्टम्, षष्ठीनिर्दिष्टेन चेहार्थः। `हुझल्भ्यः' इत्येषा पञ्चमी `हलि' (6.4.100) इत्येतस्याः सप्तम्याः षष्ठीत्वं प्रकल्पयिष्यति। `तस्मादित्युत्तरस्य' (1.1.67) इति वचनादित्यदोषः। `भिन्धि' इति। `श्नसोरल्लोपः' (6.4.111) इत्यकारलोपः। `क्रीणीहि' इति। `सेर्ह्यपिच्च' (3.4.87) इति हिरादेशः `ई हल्यघोः' (6.4.113) इत्तीत्त्वम्। `जुहुताम्' इति। लोट्, तसस्ताम्। `रुदिहि, स्वपिहि' इति। अदादित्वाच्छपो लुक्, `रुदादिभ्यः सार्वधातुके' (7.2.76) इतीट्।

अथेह कस्मान्न भवति--`जुहुतात् त्वम्' इति? आह--`इह' इत्यादि। धिभावस्यावकाशोऽनाशिषि--झुहुधीति। तातङोऽवकाशः--जीवतात् त्वमिति; आशिषि लोटि उभयप्राप्तौ परत्वात्तातङेव भवति। अथ कृतेऽपि तस्मिंस्तस्य स्थानिवद्भावात् पुनः प्रसङ्गविज्ञानाद्धिभावः कस्मान्न भवति? इत्याह--`तत्र' इत्यादि। यद्येवम्, भिन्धकि, छिन्धकीत्यत्र परत्वाद्धिभावे सत्यनन्तरोक्तादेव हेतोरकज्न स्यात्? इत्यत आह--`भिन्धकि, छिन्दकि' इत्यादि। व्यक्तौ हि पदार्थे `सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' (व्या.प.40) इत्येतत् प्रवर्त्तते। जातौ च `पुनःप्रसङ्गविज्ञानात् सिद्धम्' (व्या.प.41) इति `विप्रतिषेधे परं कार्यम्' (1.4.2) इत्यत्र प्रतिपादितम्। पाणिनेस्तूभयं मतम्, लक्ष्यानुरोधात्क्वचित् किञ्चिदाश्रीयते। तत्र तातङविधौ व्यक्तिपदार्थस्याश्रयणात् `सकृद्गतौ विप्रतिषेधे यद् बाधितं तद्बाधितमेव' इत्यस्या उपस्थानम्; अकज्विधौ तु जातेः पदार्थस्याश्रयणात् `पुनःप्रसङ्गविज्ञानात्सिद्धम्' इत्यस्याः। `भिन्धकि' इति। `अव्ययसर्वनाम्नाम्' (5.3.71) इत्यादिनाकच्। तत्र `तिङश्च' (5.3.56) इत्यनुवर्त्तते।।

102. श्रुशृणुपृकृवृभ्यश्छन्दसि। (6.4.102)
`श्रुणुधी' इति। `श्रुवः शृ च' (3.1.74) इति श्नुप्रत्ययः, शृभावश्च। `पूर्द्धि' इति। `पृ पालनपूरणयोः' (धा.पा.1086), `उदोष्ठ्यपूर्वस्य' (7.1.102) इत्युत्त्वम्, `हलि च' (8.2.77) इति दीर्घः। `उपरुणस्कृधि' इति। उरु अस्माकं कृधीति स्थिते `बहुवचनस्य वस्नसौ' (8.1.21) इत्यस्मदो नसादेशः, `नश्च धातुस्थोरुषुभ्यः' (8.4.27) इति णत्वम्, सकारस्य रुत्वम्, विसर्जनीयः। तस्य `अतः कृकमि' (8.3.46) इत्यादिना सत्वम्। `अपावृधि' इति। वृङो वृञो वा रूपम्। वृङोऽपि हि `व्यत्ययो बहुलम्' (3.1.85) इति च्छन्दसि परस्मैपदं भवत्येव।
अथ श्रृणुधीत्यत्र `उतश्च प्रत्ययादसंयोगपूर्वात्' (6.4.106) इत्यनेन लुक् कस्मान्न भवति? इत्याह--`श्रृणुधीत्यत्र' इत्यादि। यद्यत्र लुक् स्यात् धिमावस्यानर्थस्यं स्यादिति भावः। `अन्येषामपि दृश्यते' (6.3.137) इति दीर्घत्वमपावृधीत्यत्र। ननु च श्रुधत्यत्र `श्रुवः श्रृ च' (3.1.74) इति शृभावेन इनुप्रत्ययेन च भवितव्यम्, पूर्धीत्यत्र क्र्यादित्वात् श्नाप्रत्ययेन, उरुणस्कृधीत्यत्र `तनादिकृञ्भ्यः उः' (3.1.79) इत्युप्रत्ययेन; अपावृधीत्यतत्र यदि वृङ तदा क्र्यादित्वात् श्नाप्रत्ययेन, अथ वृञ् तदा स्वादित्वात् श्नुप्रत्ययेन; एवञ्चैतानि रूपाणि न सिध्यन्ति? इत्यत आह--`अतोऽन्यतर' इत्यादि। श्रृणुधीत्येतस्मादुदाहरणादन्येषूदाहरणेषु `व्यत्ययो बहुलम्' (3.1.85) इति शप्, तस्यापि `बहुलं छन्दसि' (2.4.73) इति लुक्।।

103. अङितश्च। (6.4.103)
`वा छन्दसि' इत्यादि। `सार्वधातुकमपित्' (1.2.4) इत्यपितः सार्वधातुकस्य ङित्त्वं विधीयते, छन्दसि विषये `वा छन्दसि' (3.4.88) इत्यनेन हेर्यदपित्त्वं तद्विकल्प्यते। तेन पक्षे तस्य ङित्त्वं न भवति।
अथ रारन्धीति कथं परस्मैपदम्, यावता रमिरयमात्मनेपदी? कथं वात्र शपः श्रवणं न भवति? कथञ्चाब्यासस्य दीर्घत्वम्, कथञ्च `अनुदात्तोपदेश' (6.4.37) इत्यादिना मकारलोपो न भवति? इत्याह--`रारन्धि' इत्यादि। `शपः श्लुः' इति ब्रुवामेन `श्लौ' (6.1.10) इति द्विर्वचनमित्युक्तं भवति। मकारलोपाभावस्त्वङित्त्वादे सिद्ध इति नासौ यत्नसाध्य इत्यभिप्रायः। `यमेः शपः' इति। `बहुलं छन्दसि (2.4.73) इत्यनेन। `योतेः शपः श्लुः' इति। `बहुलं छन्दसि' (2.4.76) इत्यनेन।।

104. चिणो लुक्। (6.4.104)
`चिण उत्तरस्य प्रत्ययस्य' इति। अथ प्रत्ययस्यैतत्कुतो लभ्यते? `अङ्गस्य'(8.4.1) इत्यनेन प्रत्ययस्य सन्निधापितत्त्वात्।
यदि चिण उत्तरसय प्रत्ययस्य लुग्भवति, अकारितराम्, अकारितमामित्यत्र तरप्तममोर्लुक् कस्मान्न भवति? इत्याह--`अकारितराम्' इत्यादि। योऽसौ तशब्दस्य लुक्, तस्य तरप्तमपोर्लुकि कर्त्तव्ये `असिद्धवदत्राभात्' (6.4.22) इत्यसिद्धत्वम्। अतस्तशब्देन व्यवदानाच्चिणोऽनन्तरौ तरप्तमपौ न भवत इति तयोर्लुग्न भवति। ननु चान्यस्यान्यास्मेन्नसिद्धवचनादेकस्य तत्रैवासिद्धत्वं नोपपद्यते? इत्यत आह--`चिणो लुगित्येतत्' इत्यादि। `चिणो लुक्' इत्यभेदेनापि श्रुतमिदं लक्षणं विषयस्य लक्ष्यस्य भेदाद्भिद्यते, व्यक्तौ पदर्थे प्रतिव्यक्ति लक्षणं भिद्यत इति कृत्वा, तेन भेदे सत्युपपद्यत एवासिद्धत्वम्। अकारि, अहारीति स्थिते अतिशयविवक्षायां तरप्तमपौ `तिङश्च' (5.3.56) इत्यनेन, तदन्तात् `किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' (5.4.11) इत्यामौ कृते, अकारितमाम्, अकारितमामिति भवति।।

105. अतो हेः। (6.4.105)
`गच्छ' इति। गमेर्लोट्, `इषुगमियमां छः' (7.3.77) इति छत्वम्। `धाव' इति। `धावु गतिशुद्ध्योः' (धा.पा.601) अथ वा सर्त्तेः `पाघ्रा' (7.3.78) इत्यादिना धावादेशः। `युहि, रुहि' इति। अदावित्वाच्छपो लुक्। `लुनोहि, पुनीह' इति। `प्वादीनां ह्रस्वः' (7.3.80) इति ह्रस्वत्वम्, `ई हल्यधोः' (6.4.113) इतीत्त्वम्।
ननु चेत्त्वे कृते सत्यनकारान्तत्वान्न भविष्यति, ततः किमेतन्निवृत्त्यर्थेन तपरकरणेन? इत्यत आह--`ईत्वसय' इत्यादि। असिद्धत्वान्तु पूर्ववत्।।

106. उतश्च प्रत्ययादसंयोगपूर्वात्। (6.4.106)
`उकारो योऽसंयोगपूर्वः' इति। अविद्यमानः संयोगः पूर्वो यस्मास्त तथोक्तः। एतेनासंयोगपूर्वग्रहणमकारविशेषणमिति दर्शयति। स एवं विध उकारः प्रत्ययस्य विसेषणम्, विशेषणेन च तदन्तविधिर्भवतीत्याह--`तदन्तात्' इत्यादि। किमर्थं पुनस्तदन्तदिधिरब्युपगम्यते? `सुन् चिन्वित्यत्र यथा स्यात् अस्त्वेतत् प्रयोजनम्, अयं तु दोषः--तनु, कुर्वित्यत्र न प्राप्नोति, अत्र ह्युकार एव प्रत्ययः न तदन्तः? अत्रापि व्यपदेशिवद्भावेन तदन्तत्त्वं प्रत्ययस्यास्तीत्यदोषः। `कुरु' इति। धातोर्गुणे रपरत्वे च कृते `अत उत्सार्वधातुके' (6.4.110) इत्युत्त्वम्।
`तरुणुहि' इति। `तूनूकरणे तक्षः' (3.1.76) इति श्नुः।
`च्छन्दोवावचनम्' इति। अभिधानेऽभिधेयोपचाराद्वार्थो विकल्पो वाशब्देन विवक्षितः। उच्यते व्याख्यायतेऽनेनेति वचनम्, वार्थस्य वचनं वावचनम्, छन्दसि वावचनं छन्दोवावचनमिति `सप्तमी' (2.1.40) इति योगविभागात् समासः। `छन्दसि वेति वक्तव्यम्' इति। छन्दसि विषये विकल्पेनायं विधिर्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--उत्तरसूत्रेऽन्यतरस्यांग्रहणमुभयोर्योगयोः शेषः, सा च व्यवस्थितविभाषा। तेन छन्दसि विषये विकल्पेनायं विधिर्भवतीति। `धिनुहि, कृणुहि' इति। `हिवि दिवि, धिवि, प्रीणनार्थाः' (धा.पा.591-593), `कृवि हिंसाकरणयोः' (धा.पा.598) इदित्वान्नुम्, `धिन्विकृण्व्योर च' (3.1.80) इत्युप्रत्ययः, अकारश्चान्तादेशः, तस्य `अतो लोपः (6.4.48) इति लोपः।।

107. लोपश्चास्यान्यतरस्यां म्वोः। (6.4.107)
`योऽयमुकारोऽसंयोगपूर्वः' इति। एतेनास्येत्यनेन प्रकृत उकारः प्रत्यवमृश्यत इति दर्शयति। ननु च `अतः' (6.4.106) इत्यनुवृत्तेरुकारस्यैव लोपो विज्ञास्यते, तत्किम् `अस्य' इत्यनेन? षष्ठीप्रक्लृप्त्यर्थमस्येत्येतदिति चेत्? न; `म्वोः' इत्येषैव हि सप्तम्यकृतार्था `उतः' इत्यस्याः पञ्चम्याः पूर्वयोगे कृतार्थायाः षष्ठीत्वं प्रकल्पयिष्यति, `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इति वचनात्। स्यादेतत्। यदि `म्वोः' इत्येषा सप्तमी विज्ञायते, एतदेव तु न विज्ञायते--किमियं षष्ठी उत सप्तमीति? तस्मात् षष्ठीप्रक्लृप्त्यर्थमस्येत्युक्तम्। `लुगित्यनुवर्त्तमाने' इत्यादि। यदि प्रकृत एव लुक् क्रियते तदा सर्वस्यैव प्रत्ययस्य लुक् स्यात्, नान्त्यस्य; यतः प्रत्ययादर्शनस्य लुगित्येषा संज्ञा विहिता, न तु प्रत्ययावयवस्यादर्शनस्य। सर्वस्य तु लुकि कृते `सुन्वः सुन्मः' इति न सिध्यति? लोपग्रहणाददोषः. तत्र ह्युकारमात्रस्य लोपः `अलोऽन्त्यस्य' (1.1.52) इति वचनात्। तस्मादन्त्यस्य लोपार्थं लोपग्रहणम्। किञ्च कुर्वः कुमं इत्यत्र गुणो लुकि सति न स्यात्; `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणाप्रतिषेधात्। लोपे तु सति भवति। ततो गुणार्थमपि लोपग्रहणं कर्त्तव्यम्।।

108. नित्यं करोतेः। (6.4.108)
`करोतेरुकारप्रत्ययस्य' इति। ननु चकारेण पूर्वसूत्र उकारोऽनुकृष्टः, `चानुकृष्टञ्चोत्तरत्र नानुवर्त्तते' (व्या.प.76) तत् कथमुकारस्य लोपो लभ्यते? नैवम्; पूर्वसूत्रे ह्युकारस्य सन्निधानमस्येत्यनेनैव लभ्यत इति तत्र तस्य चकारेण याऽनुकृष्टिः सैतदर्थैव वेदितव्या। `उकारलोपस्य' इत्यादिना कुर्वः कुमं इत्यत्र सोपपत्तिकां दीर्घप्राप्तिं दर्शयति, `न भकुर्छुराम्' (8.2.79) इत्यनेन च तत्प्रतिषेधम्। नित्यग्रहणं विस्पष्टार्थम्। आरम्भसामर्थ्यादेव हि नित्यो विधिर्भविष्यति।।

109. ये च। (6.4.109)
`चकारो लोपस्यानुकर्षणार्थः।।

110. अत उत्सार्वधातुके। (6.4.110)
`उकारप्रत्ययान्तस्य' इत्यादि। उकारः प्रत्ययोऽन्तो यस्य स तथोक्तः। उकारप्रत्ययान्तश्च करोतिः सार्वधातुकत्त्वं न व्यभिचरति, अनेनाभिप्रायेणाह--`सार्वधातुकग्रहणं किम्' इति? `भूतपूर्वेऽपि' इत्यादि। असति सार्वधातुकग्रहणे करोतेरुकारप्रत्ययान्तस्य क्ङिति प्रत्यये परत उत्त्वमुच्यमानं यत्र क्ङित् सार्वधातुकं परभूतं तत्रैव स्यात्--कुरुतः, कुर्वन्तीत्यादिषु; कुर्वित्र हेर्लुकि कृते क्ङित्प्रत्ययस्याभावात् `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणप्रतिषेधात्तु न स्यात्। तस्माद्भूतपूर्वेऽपि सार्वधातुके यथा स्यादित्येवमर्थं सार्वधातुक्ग्रहण्।
अथ तपरकरणं किमर्थम्, यावता यद्यपि भाव्यमान उकारः सवर्णानां ग्राहको भवति, तथाप्यान्तरतम्यान्मात्रिकस्थ स्थाने मात्रिक एव भविष्यति? इत्यत आह--तपरकरणम्' इत्यादि। असति हि तपरकरण उकारप्रत्ययमाश्रित्य `सार्वधातुकार्धधातुकयोः' (7.3.84) इति गुणे कृते रपरत्वे च यदुत्त्वं तस्योकारस्य `पुगन्तलघूपधस्य च' (7.3.86) इति गुणः स्यात्। तस्मात् तपरकरणं क्रियते--ह्रस्वस्यैव श्रवुणं यथा स्यात्, लक्षमान्तरेण यो दीर्घः। प्राप्नोति स मा भूदिति।।

111. श्नसोरल्लोपः। (6.4.111)
`रुन्धः' इति। `झषस्तथोर्धोऽधः' (8.2.40) इति तकारस्य धकारः। `स्तः' इति। अदादित्वाच्छपो लुक्।

अथ श्नसोरिति कोऽयं निर्देशः, यावता `अकः सवर्णे दीर्घः' (6.1.101) इति दीर्घत्वे कृते `श्नसोः' इति निर्देशेन भवितव्यम्? इत्याह--
`श्नसोरित्याकारस्य पररूपत्वम्' इत्यादि।
अत्र तपरकरणं किमर्थम्, आस्ताम्, आसन्नित्यत्राडागमस्य मा भूदिति चेत्? नैतदस्ति; इह हि लङि कृते लावस्थायामाडागमात्पूर्वमन्तरङ्गत्वाल्लादेशः क्रियते। तत्र कृते विकरणः कृताकृतप्रसाङ्गित्वादाडागमं बाधते। आडागमस्य त्वशब्दान्तरप्राप्तेरनित्यत्वम्। तथा हि कृते विकरणे विकरणान्तस्याङ्गस्य तेन भवितव्यम्, अकृते धातुमात्रस्य। कृते विकरणे यद्यप्याडागमाकारलोपयोर्द्वयोरपि कृताकृतप्रसङ्गित्वेन नित्यत्वम्, तथापि परत्वादकारलोपः क्रियते, तस्मिन् कृते तस्यासिद्धत्वादाट्, तस्यासिद्धत्वादेव च लोपो न भविष्यतीति किं तपरकरणेन? एवं तर्ह्येतज्ज्ञापयति--`आबाच्छास्त्रीयमसिद्धत्वमनित्यम्' इति। तेन `वुग्युटावुवङयणोः सिद्धौ भवतः' इत्येतद्वक्तव्यं न वक्तव्यं भवति।।

112. श्नाभ्यास्तयोरातः। (6.4.112)
`लुनते' इति। `आत्मनेपदेष्वनतः' (7.1.5) इत्यादेशः। `लुनताम्' इति। लोट् `आमेतः' (3.4.90)। `अलुनत' इति। लङ। मिमते' इति। `माङ माने' (धा.पा.1088) [`माने शेब्दे च'--धा.पा.] अभ्यासस्य `भृञामित्' (7.4.76) इतीत्त्वम्। एवं `सञ्जिहते' इत्यत्रापि `ओहाङ गतौ' (धा.पा.1089) इत्यस्य। `बिभ्रति' इति। पूर्वादित्वम्। `अलुनात्' इति। ननु चासति क्ङितीत्यस्मिन्नीत्वेनात्र भवितव्यम्, तत् कुतो लोपस्य प्रसङ्ग? नैतदस्ति; ईत्त्वमपि हि क्ङितीत्यनुवर्त्यम्, तत्र यदि `क्ङिति' इति नानुवर्त्तते तदा स्यादेव लोपः।
नन्वाद्ग्रहणं किमर्थम्, `श्नाभ्यस्तयोरतः' इत्येवोच्येत, एवं ह्येकमात्रया लघु भवति? इत्यत आह--`आद्ग्रहणं स्पष्टार्थम्। जगर्तेः `जक्षित्यादयः षट्' (6.1.6) इत्यभ्यस्तसंज्ञायामपि ऋकारलोपो न भवति--जाग्रतीति। एतच्च श्नेत्यकारान्तेन साहचर्यादभ्यस्तस्याकारान्तस्यैव ग्रहणाल्लभ्यते।।

113. ई हल्यघोः। (6.4.113)
`लुनीतः, पुनीतः; `लुनीथ, पुनीथ' इति। तस्थसौ। `मिमीते' इति। आत्मनेपदैकवचनम्। `मिमीषे' इति। `थासः स' (3.4.80)। `मिमीध्वम्' इति। ध्वम्। `लुनन्ति, पुनन्ति' इति। झिप्रत्ययः।
ननु च यद्यप्यजादावपीत्त्वं स्यात्, लोपोऽनवकाशः स्यात् अतोऽनवकाशत्वाल्लोप ईत्त्वं बाधिष्यते, तत् किं `हलि' इत्यनेन? नैतदस्ति; असति हल्ग्रहणे वचनादुभयं स्यात्। घुसंज्ञकेष्वाल्लोपः प्रसज्येत। तस्मात् `हलि' इति वक्तव्यम्। `दत्त्ः' इति। `खरि च' (8.4.55) इति चर्त्त्वम्। `धत्तः' इति। धाञो द्विर्वचने कृते `अभ्यासे चर्च्च' (8.4.54) इत्यभ्यासस्य जशत्वे च `दधस्तथोश्च' (8.2.38) इति भष्भावेन दकारस्य धकारः, धातोस्त्वाकारलोपे कृते जश्त्वचर्त्त्वे।।

114. इद्दरिद्रस्य। (6.4.114)
`दरिद्रति' इति। `जक्षित्यादयः षट्' (6.1.6) इत्यभ्यस्तसंज्ञा, तेनाभ्यस्तलक्षण आकारलोपो भवति।
`वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--`श्नसोरल्लोपः' (6.4.111) इत्यतो मण्डूकप्लुतिन्यायेन लोपग्रहणमनुवर्त्य सार्वधातुके, हलि, क्ङितत्येतान् विशेषान् निवर्त्य दरिद्रातेः सामान्येनेत्वलोपौ विधातव्यौ। न चैवं सति तौ सङ्करेम प्रसजतः, यस्माद्वक्ष्यमाणमन्यतरस्यांग्रहणमुभयोर्योगयोः शेषभूतम्। सा च व्यवस्थितविभाषा। तेन यत्रैवेष्यते यत् तत् तत्रैव भविष्यति, नान्यत्रेति।
`सिद्धश्च प्रत्ययविधौ' इति। तथासौ कर्त्तव्यौ यथा प्रत्ययविधौ=प्रत्ययविधानकाले, सिद्धः=निष्पन्नो भवति। एतदुक्तं भवति--आर्धधातुके प्रत्यये विषयभूतेऽनुत्पन्ने एव लोपः कर्त्तव्य इति। एवं ह्यसौ प्रत्ययविधौ सिद्धो भवति, नान्यथा। `सिद्धश्च प्रत्ययविधौ' इत्यस्योपादाने यत् फलं तद् `आकारान्तलक्षणः' इत्यादिना दर्शयति। यद्यार्धधातुक उत्पन्ने सति लोपः क्रियते, तदा `श्याद्व्यधास्रु' (3.1.141) इति सूत्रेण णप्रत्ययः स्यात्; दरिद्रातेराकारान्तत्वात्। ततश्च `आतो युक् चिण्कृतोः' (7.3.33) इति युकि कृते, `दरिद्राय' इत्यनिष्टं रूपं स्यात्। `सिद्धश्च प्रत्ययविधौ' इत्युच्यमाने तु प्रागेव प्रत्ययोत्पत्तेर्लोपः, तस्मिन् स्यनाकारान्तत्वात् पचाद्यजेव भवति। तेन `दरिद्रः' इतीष्टं सिद्धं भवति।
`न दरिद्रायके लोपः' इत्यादिना श्लोकेन यत्रार्द्धधातुके लोपो नेष्यते यत्र विकल्पेन चेष्यते कैश्चित्, तद्दर्शयति। `दरिद्रायके' इत्यत्र ण्वुलन्ते शब्दे सिसाधयिषिते लोपो नेष्यते। दरिद्रातीति दरिद्रायाक इति। पूर्ववद्युक्। `दरिद्राणे' इति। अत्रापि ल्युङन्ते लोपो नेष्यते। `दिदरिद्रासतीत्येके' इति। सनि कृते द्विर्वचनम्, अभ्यासकार्यम्। `दिदरिद्रिषतीति वा' इति। `सनीवन्तर्ध' (7.2.49) इत्यत्र `तनिपतिदरिद्राणाम्' इत्युपसंख्यानाद्विकल्पेनेट्।
`अद्यतन्याम्' इति। लुङीत्यर्थः `लुङोऽद्यतनि' इति पूर्वाचार्यसंज्ञा। `अदरिद्रासौत्' इति। `यमरमनमातां सक् च' (7.2.73) इति सगिटौ, `अस्ति सिचोऽपृक्ते' (7.3.96) इतीट्, `इट ईटि' (8.2.28) इति सिचो लोपः। ननु च `आतो धातोः' (6.4.140) इत्याकारालोपे कृते दरिद्र इति निर्देशेन भवितव्यम्, तत् कथं दरिद्रस्येति निर्देश इत्याह--`दरिद्रस्येति निर्देशः' इत्यादि। `छन्दोवत्सूत्राणि भवन्ति' इत्यतः `ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (6.3.63) इति बहुलवचनाच्छान्दसमिह ह्रस्वत्वम्।
तपकरणं विस्पष्टार्थम्। भाव्यमानतया सवर्णाग्रहणादेव दीर्घो न भविष्यति।।

115. भियोऽन्यतरस्याम्। (6.4.115)
`हलादौ सार्वधातुके क्ङिति परतः' इति। यद्यप्येते विशेषाः पूर्वस्मिन्निवर्तिताः, तथापीह मण्डूकप्लुतिन्यायेनानुवर्त्तन्त इत्यभिप्रायः। `बिभीतः' इति। `ञि भी भये' (दा.पा.1084) जुहोत्यादित्वाच्छपः श्लुः। हलादावित्येव--बिभ्यतीति। इत्त्वविधानसामर्थ्यादेव `एरनेकाचः' (6.4.82) इति यणादेशो न स्यात्। सार्वधातुक इत्येव--भीतः, भीतवान्। क्ङितीति किम्? बिभेति।।

116. जहातेश्च। (6.4.116)
ईत्त्वापवाद इत्त्वमारभ्यते; अन्यतरस्यांग्रहणानुवृत्तेः। पक्षे तदपि भवत्येव। सार्वधातुक इत्येव--हीनः, हीनवान्। इह केचित् `सार्वधातुके' (6.4.110) इत्यस्यानुवृत्तिं प्रत्याचक्षते। कथम्? `हलि परत ईत्त्वेत्त्वे प्राप्नुतः, द्विर्वचनं च; तत्र यदि परत्वादीत्त्वेत्त्वे स्यातां ततश्चेवर्णन्तताभ्यासस्य स्यात्; तस्मादभ्यस्त ग्रहणमनुवर्त्तनीयम्, तस्मिंश्चानुवर्त्तमाने सार्वधातुकानुवृत्तिरपार्थिका' इति। एतच्चायुक्तम्; अन्तरङ्गत्वात्। `द्विर्वचनेनैव प्रागीत्त्वेत्त्वाभ्यां भवितव्यम्, तत् कुतोऽभ्यासस्येवर्णान्तताप्रसङ्गः! अन्तरङ्गत्वन्तु द्विर्वचनस्याल्पापेक्षत्वात्। तद्धि श्लुमात्रमपेक्षते। इत्त्वेत्त्वयोश्च बह्वपेक्षत्वाद्बहिरङ्गता, बहवपेक्षा च; तयोः पुनरङ्गस्य हलादौ क्ङिति सार्वधातुके विधानात्। जहातेरिति निर्देशात् जिहीत इत्यतद्र जिहातेर्न भवति।
`पृथग्योगकरणमुत्तरार्थम्' इति। `आच हौ' (6.4.117) इत्येष विधिर्जहातेरेव यता स्यात्, बिभेतेर्मा भूदिति।।

117. आ च हौ। (6.4.117)
चकार इत्त्वान्यतरस्यांग्रहणयोरनुकर्षणार्थः।।

118. लोपो यि। (6.4.118)

119. ध्वसोरेद्धावभ्यासलोपश्च। (6.4.119)
`अभ्यासलोपश्च' इति धुसंज्ञकार्थमभ्यासलोपग्रहणम्; न त्वस्त्यर्थम्; अस्तेरभ्यासम्भवात्। `देहि चेहि' इति। दाञ्धाञोरेते रूपे। अन्येषान्तु घुसंज्ञकानामुदाहरणं न सम्भवति; विकरणेन हेर्व्यवधानात्। असम्भवाच्च यथायोगम्। तत्र `दो' इत्येतस्य श्यना हिशब्दो व्यवधीयते, दणो धेटस्तु शापा, देङः पुनरात्मनेपदित्वाद हेरसम्भवः। `एधि' इति। सकारस्यैत्त्वे कृते तस्यासिद्धत्वात् `हुझलभ्यो हेर्धिः (6.4.101) इति धिभावः। ननु च `अलोऽन्त्यस्य' (1.1.52) इत्यलामन्त्यस्य लोपेन भवितव्यम्, तत् कथं सर्वस्याभ्यासस्य लोपो भवति? इत्यत आह--`शिदयम्' इत्यादि। `लोपश्च' इत्यत्र द्वौ शकारौ निर्दिष्टौ। तत्रैको लोपस्य समबन्धी, द्वितीयस्तु विभक्तेः। यश्च लोपस्य सम्बन्धी तस्येत्संज्ञा प्रतिज्ञायत इति शिदयं लोपो भवति। तेन सर्वस्याभ्यासस्थ लोपो भवति। `आ च हौ' (6.4.117) इत्यतो होग्रहणं मण्डूकप्लुतिन्यायेन शक्यतेऽनुवर्त्तयुतुम्। तत्रन्यतरस्यांग्रहणेन सम्बद्धमिति तदनुवृत्तौ `अन्यतरस्याम्' इत्येतस्याप्यनुवृत्तिरित्याशङ्का स्यात्, अतस्तन्निवृत्त्यर्थं `हौ' इत्युक्तम्। चकारस्य सन्नियोगर्थत्वाल्लोपो भवत्येत्त्वञ्च।।

120. अत एकहल्मद्येऽनादेशादेर्लिटि। (6.4.120)
`एकहल्मध्ये' इति। एकशब्दोऽयमसहायवाची। एकश्च एकश्च एकौ, एकौ च तौ हलौ चेत्येकहलौ, एकहलोर्मध्य इति द्विवचनान्तस्य षष्ठीसमासः। द्व्योरेव हि हलोर्मध्यं सम्भवति, नैकस्य। अत्र यदि लिट्यादशो न विशिष्यते ततो नेमतुः, नेमु; सेहे सेहाते, सेहिर इत्यत्र न स्यात्।
अस्तिह्यत्राप्यङ्गस्यादेश आदिरित्येतच्चेतसि कृत्वा लिट्यादेशं विशेषयितुमाह--`लिटि परतः' इत्यादि। लिटि परभूते य आदेशो विधीयते स आदियंस्याङ्गस्य नास्तीत्यर्थः। `तस्य' इति। तस्यैवंविधस्याङ्गस्येत्यर्थः। तस्येति चाङ्गस्य योऽकार इत्यनेन सम्बन्धः। अवयवषष्ठी चेयम्, तस्यैवंविधस्याङ्गस्य योऽकारोऽवयवस्तस्येत्यर्थः। `एक हल्मध्ये' इत्यस्येदं विवरणम्--`असहाययो र्हलोर्मध्ये' इति। तत्येत्यनन्तरोक्तोऽकारः सम्बध्यते। तस्याङ्गस्यावयवस्याकारस्येत्यर्थः। स्थानषष्ठी चेम्--तस्य स्थान एकार आदेशो भवति। `रेणतुः, रेणुः' इति। `अण रण' (धा.पा.444,445) इति `रणिः शब्दार्थः' पठ्यते। `येमतुः, येमुः' इति। `यम उपरमे' (धा.पा.984)। `देमतुः, देमुः' इति। `दमु उपशमे' (धा.पा.1203)।
`रराशे'[ररासे--काशिका.] इति। `राशृ शब्दे' [राशृ शब्दे--धा.पा.] (धा.पा.626) आत्मनेपदी। `शश्रमतुः शश्रमुः' इति। `श्रमु तपसि खेदे च' (धा.पा.1204)।
केचित्तु ततक्षतुः, ततक्षुरित्येतदेकहल्यध्यस्य प्रत्युदाहरणं पठन्ति; एतच्चायुक्तम्; क्ङितीत्यनुवर्त्तते, न च पक्षेः परस्य लिटः कित्त्वमस्ति। `असंयोगात्' इति प्रतिषेधात् । `तत्सरतुः, तत्सरुः' इति। `त्सर छद्मगतौ' (धा.पा.554)। `चकणतुः, चकणुः' इति। `अण रण वण भण क्वण कण शब्दार्थाः' (धा.पा.444,445,446,447,450449)। तत्र कणतिर्भ्वादौ पठ्यते। `जगणतुः, जगणुः' इति। `गण संख्याने' (धा.प.1853) चुरादौ पठ्यते। ननु च चौरादिकत्वाण्णिचि कृते `कास्प्रत्ययादाममन्त्रे लिटि' (3.1.35) इत्यामा भवितव्यम्? `अनित्यण्यन्ताश्चुरादयः' (है.प.पा.97) इत्यदोषः।

अनित्यण्यन्तत्वन्तु तेषां सप्तमे ज्ञापयिष्यते। `बभणतुः' इति। भणतिर्भ्वादौ पठ्यते शब्दार्थ एव।
`नेमतुः' इति। `णम प्रह्वत्वे शब्दे' (धा.पा.981)। `णो नः' (6.1.65) इति नत्वम्। `सेहे' इति। `षह मर्षणे' (धा.पा.852) `धात्वादेः षः सः' (6.1.64) इति सत्वम्। कथं पुनर्नत्वे सत्वे च लिटयादेशादी न भवतः? इत्यत आह--`अनैमित्तिके नत्वसत्वे' इत्यादि। नत्वसत्वविधाने हि न किञ्चिन्निमित्तमाश्रीयत इत्यनैमित्तिके एते भवतः, ततश्च प्रागेव लिङुत्पत्तेस्ताभ्यां भवितव्यम्। तेन तदादि यदङ्गं तल्लिट्यादेशादि न भवति। यदि तर्हि लिटाऽदेशो विशिष्यत एवं सत्यङ्गमविशेषितं स्यात्, ततश्च पक्वः पक्ववानित्यत्रापि प्रसज्येत, पचेरपि ह्यङ्गस्य लिटि परभूते य आदेशः क्रियते स इहाप्यादिर्नास्ति? नैतदस्ति; अभ्यासलोपसन्नियोगेन ह्येत्त्वमुच्यते। तेन यत्रैवाभ्यासलोपः तत्रैवैत्त्वेन भवितव्यम्। न चात्राभ्यासलोपः; असम्भवात्। इह तर्हि स्यात्--पापच्यत इति? अयमप्यदोषः; इह परत्वात् `दीर्घोऽकितः' (7.4.83) इति दीर्घो भविष्यति। ह्रस्वहलादिशेषावुत्सर्गौ, तयोर्दीर्घत्वमेत्त्वञ्चापवादः। तत्र दीर्घस्यावकाशः--बाभास्यते, एत्वस्यावकाशः---पेचतुः, पेचुरिति; इहोभ्यं प्राप्नोति--पापच्यत इति, अपवादविप्रतिषेधे सति परत्वाद्दीर्घत्वं भविष्यति। अथ बभणतुः, बभणुरित्यत्रेत्त्वं कस्मान्न भवति, `अभ्यासे चर्च' (8.4.54) इति जश्त्वे कृत आदेशादित्वादिति चेत्? न; एत्त्वे कर्त्तव्ये जश्त्वस्यासिद्धत्वात्। तस्मादभवितव्यमेवैत्त्वेन। विप्रतिषेधस्य तु यत्र `कुहोश्चुः (7.4.62) इति श्चुत्वं क्रियते--चकणतुः, चकणुः, जहसतुः, जहसुरित्यादाववकशः स्यादित्यत आह--`इह' इत्यादि। कथमेतज्ज्ञायते--नास्त्यसिद्धत्वम्? इत्याह--`तथा च' इत्यादि। तदैव `तृफलभजत्रपश्च' (6.4.122) इति फलिभज्योरेत्त्वमुपपद्यते यदि जश्त्वचत्वंयोरसिद्धत्वं न भवति, नान्यथा। अनादेशादित्वादनेनैवैत्त्वस्य सिद्धत्वात् तन्नोपपद्यते। तस्मात् फलिभज्योरेत्त्वविधानाददसीयते--जश्त्वचर्त्त्वयोरसिद्धत्वमिह नास्तीति। `रूपाभेदे च' इत्यादि। `शब्दरूपस्य स्थानिनोऽबेदे सति य आदेशः स इह नाश्रीयते' इत्यस्यार्थस्य `न शसददवादिगुणानाम्' (6.4.126) इति शसिदद्योः प्रतिषेधवचनं ज्ञापकम्। `अभ्यासे चर्च' (8.4.54) इत्यनेन प्रकृतिजशां प्रकृतिजशः, प्रकृतिचरां प्रकृतिचरो भवन्तीति शसः शकारस्य शकारो भवति, ददेर्दकारस्यापि दकार; तेनोभावपि तावादेशादी भवतः। तत्र यदि स्थान्यभेदे सति य आदेशः सोऽपीहाश्रीयेत, तत आदेशादि्त्वादेव न भविष्यतीति शसिद्योरेत्त्वप्रतिषेधो न विधीयेत; विहितश्च, तस्मादेतदेव प्रतिषेधवचनं ज्ञापयति--रूपाभेदे सति य आदेशः स इह नाश्रीयत इति। यदि तर्ह्याश्रीयत किं स्यात्? इत्यत आह--`अन्यथा हि' इत्यादि। अन्यथा योऽपि रूपाभेदादादेशः स्थानिनाभिन्नरूपः सोऽपीहाश्रयेत, ततो यथा चकणतुरित्येवमादीनामेत्त्वं न भवति, तथा पेचतुः, पेचुरित्येवमादीनामपि प्रकृतिजश्चरादीनां न स्यात्। प्रकृतिजशः प्रकृतिचरश्चादयो येषान्ते तथोक्ताः। `अहं पपठ, अहं पपच' इति। अत्र स्थानिवद्भावेन पित्त्वात् कित्त्वं नास्ति, तेनैत्त्वाभ्यासलोपौ न भवतः। वृद्धिरपि न भवति; `णलुत्तमो वा' (7.1.91) इति पक्षे णित्त्वाभावात्। णित्त्वपक्षे तु परत्वाद्वृद्ध्या बाधित्वादेत्त्वाभायासलोपाभ्यां न भवितव्यम्, इत्यणित्त्वपक्ष एवोदाहृतम्।
`दम्भेः' इति। किं पुनः कारणं दम्भेरेत्त्वं न भवति, यावता `लिट्यनादेशाद्ध्येतदङ्गम्। `अनिदिताम्' (6.4.24) इत्यादिना न लोपे कृत एकहल्मध्य एवाकारः? इत्यत आह--`नलोपस्य' इत्यादि। `ग्रन्थिश्रन्थिदम्भिस्वञ्जीनाम्' (वा.17) इति सूत्रे [?] दम्भेः परस्य लिटः कित्त्वमुक्तम्, तस्मिन् सति य उपधाया लोपस्तस्य `असिद्धवदत्रा भात्' (6.4.22) इत्यसिद्धत्वान्न प्राप्नोति। तस्माद्दम्भेरेत्त्वं वक्तव्यम्। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`श्नसोरल्लोपः (6.4.111) इत्यत्रा भाच्छास्त्रीयस्यासिद्धत्वस्यानित्यत्वं ज्ञापितम्, तेन दम्भेरेत्त्वे कर्त्तव्ये लोपस्यासिद्ध्त्त्वं न भवति, ततश्च दम्भेर्लिट्यत्त्वं भविष्यतीति। अथ वा `अत एकहल्मध्ये' (6.4.120) इत्यत्र `अतः' इति योगविभागः कर्त्तव्यः, तेन यत्र यत्रेत्त्वमिष्यते तत्र तत्र भविष्यतीति। एवञ्च कृत्वा `नशिमन्योरलिट्येत्त्वम्' (वा.793) इत्याद्यपि नोपसंख्येयम्; योगविभागेनैव सिद्धत्वात्। वक्तव्यशब्दस्य व्याख्येय इत्येषोऽर्थ इति सर्वत्र वेदितव्यम्।
`अनेशम्' इति। `तस्थस्थ' (3.4.101) इत्यादिना मिपोऽम्भावः।
अथ `मेनका' इत्यत्र `प्रत्ययस्थात्' (7.3.44) इत्यादिनेत्त्वं कस्मान्न भवति? इत्याह--`क्षिपकादिषु' इत्यादि। क्षिपकादिष्वित्त्वस्य प्रतिषेधो वक्ष्यते। अस्य च क्षिपकादिषु प्रक्षेपः, तेनेत्त्वं न क्रियते।
`चानशि' इति। `तच्छील्यवयोवचनशक्तिषु चानश' (3.2.129) `मुक् न क्रियते' इति। `आने मुक्' (7.2.82) इति मुक् प्राप्नोति, स न भवति `अनित्यमागमशासनम्' (व्या.पा.95) इति कृत्वा। छान्दसत्वाद्वा--`सर्वे विधयश्छन्दसि विकल्प्यन्ते' (भो.प.99) इति। `छान्दसं ह्रस्वत्वम्' इति। `ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (6.3.63) इति ङ्यापोर्विधीयमानं ह्रस्वत्वं बहुलवचात् `पेरिरन्नित्यत्रापि वति। पचेर्लिङ्, सीयुट्, झस्य रन्, शप्, `आद्गुणः' (6.1.87)। पचेरन्निति प्राप्त एत्त्वे ह्रस्वत्त्वे च कृते पेचिरन्निति भवति।।

121. थलि च सेटि। (6.4.121)
`पेचिथ, शेकिथ' इति। `उपदेशेऽत्वतः' (7.2.62) इतीट्प्रतिषेधप्राप्तः `ऋतो भारध्वाजस्य' (7.2.63) इति नियमादिहेङ्भवति। तदयमत्रार्थः--ऋत एव भारध्वाजस्ये्ति, नान्येषां धातूनामिति।
`पपक्थ' इति। अन्येषामाचार्याणां मतेनेट्प्रतिषेधो भवत्येव।
अथ थल्ग्रहणं कमर्थम्, `न सोटि इत्येवोच्येत; यत्र हि पूर्वेण न सिद्ध्यते तदर्थं वचनम्, अन्यत्रेडादौ कित्त्वात् पूर्वेणैव सिद्धम्, तत्रान्तरेणापि थल्ग्रहणं थल्येव भविष्यति? इत्यत आह--`थल्ग्रहणम्' इत्यादि असति थल्ग्रहणे, आरम्भसार्थ्यादेतावान् निश्चयः स्यात्--यत्र पूर्वेण न सिद्ध्यति तदर्थमेतदिति। अक्ङिदर्थमित्येतत् तु दुरवसानम्; बहवो विशेषाः प्रकान्ताः, तत्र सन्देहः स्यात्--किमक्ङिदर्थमेतत् स्यात्, उतादेशार्थम्? आहोस्विदनेकहल्मध्यार्थम्? किमु

अनेकाकारार्थमिति? तत्रासन्देहार्थम् `अत एकहल्मध्येऽनादेशादेर्लिटि' (6.4.120) इत्येते विशेषाः सर्व एवेहानुवर्त्तन्ते। क्ङिद्ग्रहणन्तु निवृत्तम्। तस्मात् क्ङिदर्थोऽयमारम्भः। न च थलोऽन्यदिहाक्ङिदस्ति सेट्। ततः सामर्थात् थल्येवायं विधिर्व्याख्येयः। व्याख्यानद्वारेण प्रतिपत्तौ मन्दधियां प्रतिपत्तिगौरवं स्यात्। तस्माद्विस्पष्टार्थं थल्ग्रहणं क्रियते। थलो ह्यक्ङित उपादाने सुखमेव प्रतीयते--अक्ङिदर्थोऽयमारम्भ इति।।

122. तृफलभजत्रपश्च। (6.4.122)
`तेरतुः तेरुः' इति। `ऋच्छत्यृताम्'(7.4.11) इति गुणः। `फेलतुः, फेलुः' इति। `फल निष्पत्तौ' (धा.पा.530), `ञि फला विशरणे' (धा.पा.516) इति च। `तरतेर्गुणार्थम्' इति। `न शसददवादिगुणानाम्' (6.4.123) इति प्रतिषेधं वक्ष्यति। अतस्त्रतेरिदं वचनं गुण इत्येवमभिनिवृत्तस्यापि यथा स्यादित्येवमर्थम्।
`श्रन्थेश्चेति वक्तव्यम्' इति। `ग्रन्थ श्रन्थ सन्दर्थे' (धा.पा.1511,1512) इत्यस्याप्येत्त्वं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--चकारोऽतत्र क्यिये, स चानुक्तसमुच्चयार्थः, तेन श्रन्थेरपि भविष्यतीति। `श्रेथतुः, श्रेथुः' इति पूर्ववदुपसंख्यानेन लिटः कित्त्वे नकारलोपः।।

123. राधो हिंसायाम्। (6.4.121)
`राधो हिंसायामर्थे' इत्यादि। यद्यपि `राध साध संसिद्धौ' (धा.पा.1262,2363) इति राधिः संसिद्धौ पठ्यते, इह तथाप्यनेकार्थत्वाद्धातूनां हिंसार्थता वेदितव्या। राधेर्हिसायमर्थेऽवर्णस्यैकारादेशो भवतीत्युच्यते।
ननु च नात्र सूत्रेऽवर्णग्रहणमस्ति, योऽप्यत्रत्योऽवर्णः प्रकृतः सोऽपि मात्राकालः, न च राधेर्मात्राकलोप्रऽवर्णोऽस्ति, तत् कथमवर्णस्य स्थान एत्त्वं लभ्यते? इति यश्चोदयेत् तं प्रत्याह--`अत इत्येतदिहोपस्थितम्' इत्यादि। `अतः' इति स्वरितत्वादिहोपस्थितम्, यदिहोपस्थितं तत् तपरत्वकृतस्य कालविशेषस्याभावात् तदपास्य=परित्यज्यावर्णमात्रं स्थानित्वेन प्रत्याययति=दोधयति; अन्यथा तस्योपस्थानमनर्थकं स्यात्।
`अथ वा' इत्यादि। `श्नाभ्यास्तयोः' (6.4.112) इत्यनेन यतः सूत्रात् स्थान्यनुवर्त्तते तदुपलक्षयति। `आतः' इत्यनेनापि यः स्थान्यनुवर्त्तते तं दर्शयति--`श्नाभ्यरत्तयोरात् इत्यत आत इत्यनुवर्त्तत इति व्याख्येयम्' इति। एवञ्च व्याख्यायमाने राधेरवर्णस्येत्त्वं विज्ञायते यदि तर्ह्यत इत्यनुवर्त्तते, एवञ्च सति `अत एकहल्मध्ये' (6.4.120) इत्यत्रापि तस्यातः सन्निधानादिहापि प्राप्नोति--शशासिव शशसिमेति? नैष दोषः; मण्डूकपलुतिन्यायेन तस्येहानुवृत्तिः।
`एकहल्मध्ये वा' इत्यादि। अथ वा--एकहल्मध्य इत्यनुवर्त्तते, तत्राप्यनुवर्त्तमानेऽसम्भवादत इतीह न व्याप्रियते। तेन राधेर्यः एकहल्मध्येऽवयवः स स्थानी भवति, स पुनराकार एव भवति, तस्यैवैत्त्वं भविष्यति।।

124. वा जृभ्रमुत्रसाम्। (6.4.124)
`जृ वयोहानौ' (धा.पा.1494) [`जॄ--मु.पाठः] इत्यस्य गुणार्थं वचनम्। भ्रमेरादेशार्थम्, अनेकहल्मध्यार्थञ्च त्रसेश्चानेकहल्मध्यर्थम्। `जजरतुः' इति। पूर्ववद्गुणः।।

125. फणाञ्च सप्तानाम्। (6.4.125)
बहुवचननिर्देशादाद्यर्थो गम्यते। अत आह--`फणादीनाम्' इत्यादि। `फण गतौ' (धा.पा.821) `राजृ दीप्तौ' (धा.पा.822) `टु भ्राजृ टु भ्राश्रृ टु भ्लाश्रृ दीप्तौ' (धा.पा.823-825)। `स्यमु स्वन ध्वन शब्दे' (धा.पा.826-828) इत्येते ध्वनवर्जिताः फणादयः सप्त। तत्राद्यस्य नित्ये प्राप्ते विकल्पार्थं वचनम्, इतरेषामप्राप्ते। तत्र राजृप्रभृतीनां चतुर्णामवर्णस्यैत्त्वस्य प्रतिप्रत्तये `राधो हिंसायाम्' (6.4.123) इत्यत्र `अत इत्येतदिहोपस्थितम्' इत्यादिना यदुक्तं तद्यथासम्भवं वेदितव्यम्।।

126. न शसददवादिगुणानाम्। (6.4.126)
अत्र यदि गुण इत्येनेन यस्यैत्त्वं विहितं स एत्राकार उच्यते, ततोऽयमर्थः--अकारस्य गुणस्य न भवतीति। तथा चैत्त्वविधिरनवकाश एव स्यादित्येतद्बुद्धौ कृत्वा नात्र गुणेनाकार एवोच्यते, अपि तु गुणशब्दभिनिर्वृत्त इति दर्शयन्नाह--`गुण इत्येवमभिनिर्वृत्तस्य च' इत्यादि। गुणशब्दमुच्चार्य योऽभिनिर्वृत्तः शब्दस्तस्य सम्बन्धी योऽकारस्तस्य स्थान एत्त्वं न भवतीत्यर्थः। तत्सम्बन्धित्वं पुनस्तस्य तत्स्थानिकत्वात् तदवयवत्वाच्च यद्यायोगं वेदितव्यम्। तदेवं गुणशब्दाभिनिर्वृत्तस्य सम्बन्ध्यकारः प्रतिषेधस्य निमित्तम्, इतरस्तु विधेरित्येव विधिप्रतिषेधयोर्विषयविभागः। `विशशसतुः' इति। `शसु हिंसायाम्' (धा.पा.727)। `ददे' इति। `दद दाने' धा.पा.17)। `ववमतुः' इति। `टु वम उद्गिरणे' (धा.पा.849) `विशशरतुः' इति। `शृ हिंसायाम्' (धा.पा.1488)। `गुणशब्दभिनिर्वृत्तस्य' इत्यादिना यदुक्तं तस्यार्थमुदाहरणे दर्शयति। `विशशरतुः' इत्यत्रारित्ययं शब्दो गुणशब्दाभिनिर्वृत्तः। तत्सम्बन्ध्यकारस्य तदेकदेशात्वात्। `लुलविथ' इति। अत्राप्योकारो गुणशब्दाभिनिर्वृत्तः तत्सम्बन्ध्यकारस्य तत्स्थानिकत्वात्। ननु `विशशरतुः' इत्यत्राकारमात्रं गुणशब्देनाभिनिर्वृत्तम्, नाऽर्शब्दः! नैतदस्ति; रेफस्य गुणभक्तत्वात्। तथा च भाष्यम्--`अर्भवति गुणो भवति, आर्भवति वृद्धिर्भवति--रेफसहितो गुणवृद्धिसंज्ञो भवति' इति।।

127. अर्वणस्त्रसावनञः। (6.4.127)

`त्' इत्ययमादेशो भवति' इति। `नानुबन्धकृतमनेकाल्त्वम्' (व्या.प.14) इत्यन्तस्य भवति; एकाल्त्वात्, कारस्यानुबन्धत्वात्। उकारस्यानुबन्धत्वात् प्रथमैकवचनं सुशब्दो गृह्यते, तेन सप्तमीबहुवचने भवत्येव--अर्वत्स्वित। स च नञ उत्तरो न भवतीति चेदिति यत् प्रकृतं तदिहापि सम्बध्यते। `अर्वन्तौ' इति। ऋकारस्योगित्कार्यार्थत्वात् `उगिदचाम्' (7.1.70) इति नुम्। `अर्वति' इति। `उगितश्च' (4.1.6) इति ङीप्। `आर्वतम्' इति। अपत्यार्थविवक्षायामण्। ननु च नञिवयुक्तन्यायेन (व्या.प.65) सादृश्यात् सोरन्यत्र विभक्तादेव भवितव्यम्? नैतत्; असाविति प्रसज्यप्रतिषेधोऽयम्। अत एव वृत्तिकृतोक्तम्--`सुश्चेत् ततः परो न भवति' इति। अन्यथा सोरन्यो यः सुप् स चेत् ततः परो भवतीति ब्रूयात्। अथापि पर्युदासः? एवमप्यदोषः; अनित्यत्वान्नञिवयुक्तपरिभाषायाः। अनित्यत्वन्तु तस्याः `ओषधेश्च विभक्तावप्रथमायाम्' (6.3.132) इत्यत्र विभक्तिग्रहणाद्विज्ञायते। यदि हि सा नित्या स्यात्, प्रथमापर्युदासेन विभरक्तावेव भविष्यतीति विक्तक्तिग्रहणं न कुर्यात्। कुर्वन्नपि तज्ज्ञापयति--अनित्येयं परिभाषेति।।

128. मघवा बहुलम्। (6.4.128)

मधवेति सुव्यत्ययेन षष्ठ्याः स्थाने प्रथमा। `मधोनः' इति। `श्वयुवमधोनाम्' (6.4.133) इति समप्रसारणम्, परपूर्वत्वम्, `आद्गुणः' (6.1.87)। ननु च मघोऽस्यास्तीति मत्वर्थविवक्षायां `छन्दसीवनिपो वकतव्यौ' (वा.582) इति वनिप्रत्ययान्तोऽयं मघवन्शब्दः। तत्र वनिपः सम्प्रसारणे भसंज्ञायां सत्याम्, `यस्येति च' (6.4.148) इति लोपेन भवितव्यम्, ततश्च `मधुनः' इत्यनिष्टं रूपं स्यात्? नैतत्; अन्येव हीदमव्युत्पन्नं प्रातिपदिकम्, तथा हि भावायामपि तस्य प्रयोगो दृश्यते। अथापि वनिप्रत्ययान्तः स्यात्? एवमपि बहुलवचनात् `यस्येति' (6.4.148) इति लोपो न भविष्यतीत्यदोषः। `मघोनी' इति। `ऋन्नेभ्यो ङीप्' (4.1.5)। `माघवनम्' इति। पूर्ववदण्। `अन्' (6.4.67) इति प्रकृतिवद्भावः।।

129. भस्य। (6.4.129)

130. पादः पत्। (6.4.130)

`पादः' इति। `पादशब्दो लुप्ताकारो गृह्यते' इति। अथ पादयतेः क्विबन्तस्य यः पाच्छब्दः सम्पद्यते स कस्मान्न गृह्यते? तस्यासम्भवात्। पादयतेर्हि क्विप् `अन्येभ्योऽपि दृश्यते' (3.2.178) इत्यनेन स्यात्? स च `दृश्यते' इति वचनान्न भवति। यत्र लोके क्विबन्तप्रोयगो दृश्यते तत्र यथा स्यादित्येवमर्थं हि तत्र `दुश्यते' इत्युक्तम्, न च पादयतेः क्विबन्तस्य प्रयोगो दृश्यते? पादशब्दस्य समास एवाकारो लुप्यते, तेन सामर्थ्यात् तदन्तस्याङ्गस्य कार्यं विज्ञायत इत्याह--`तदन्तस्याङ्गस्य' इत्यादि। यदि तर्हि पाच्छब्दन्तस्याङ्गस्य पदित्ययमादेशो विज्ञायेत, एवं तर्हि `ये न विधिस्तदन्तस्य' (1.1.72) इति सर्वस्य तदन्तस्य प्राप्नोतीत्याह--`स च' इत्यादि। `द्विपदः' इति। द्वौ पादवस्येति बहुव्रीहिः। `संख्यासुपूर्वस्य' (5.4.140) इत्यकारलोपः। `द्विपदिकाम्' इति। द्वौ द्वौ पादौ ददातीति `पादशतस्य' (5.4.1) इत्यादिना वुन्। `वैयाघ्रपद्यः' इति। व्याघ्रस्येव पादावस्येति बहुव्रीहिः, `पादस्य लोपोऽहस्त्यादिभ्यः' (5.4.138) इत्यकारलोपः, व्याघ्रपदोऽपत्यमिति गर्गादित्वाद्यञ्।।

131. वसोः सम्प्रसारणम्। (6.4.131)

प्रत्ययग्रहणपरिभाषया (भो.प.सू.7) तदन्तस्य कार्यं विज्ञायत इत्याह--`वस्वन्तस्य, इत्यादि। `विदुषः' इति। `विदेः शतुर्वसुः' (7.1.36)। `पेचषः' इति। `क्वसुश्च' (3.2.107) इति लिटः क्वमुः, `अत एकहल्मध्ये' (6.4.120) इत्यादिनैत्तवाभ्यासलोपौ। `पपुषः' इति। `आतो लोप इटि च' (6.4.64) इत्याकारलोपः। ननु चाकारलोपे कर्त्तव्ये सम्प्रसारणमसिद्धम्, तत् कुतोऽत्राकारलोपः? इत्याह--`आकारलोपे कर्त्तव्ये' इत्यादि। आकारलोपः सम्प्रसारणे, तत्तु विभक्ताविति वयाश्रयत्वम्, अतो नास्त्यसिद्धत्वम्। ननु च एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य' (व्या.प.52) इति, `तदनुबन्धकग्रहणे नातदनुबन्धकस्य' (व्या.प.54) इति वा न क्वसोरिह ग्रहणेन भवितव्यम्, तत् कथं पपुषः, पेचुष इत्यत्र सम्प्रसारणं भवति? इत्याह--`वसुग्रहणे' इत्यादि। एतत्तु शत्रादेशस्य वसोरुकारानुबन्धकरणाद्वेदितव्यम्। उकारानुबन्धस्य ह्येतदेव फलम्--इह सामान्येन ग्रहणं यथा स्यात्। ननु चोगत्त्वार्थं तत् स्यात्? नैतत्; उगित्कार्यस्य स्थानिवद्भावेनैव सिद्धत्वात्।।

132. वाह ऊठ्। (6.4.132)

`वाहः' इति। वहिरयं ण्विप्रत्ययान्तः, स चास्मात्सोपपदादेव ण्विर्विहितः। तेन सामर्थ्यात् तदन्तविधिर्विज्ञायत इत्याह--`वाह इत्येवमन्तस्य' इत्यादि। `ऊडित्येतत्' इति। ठिदयमूकारः। `एत्येधत्यूठ्सु' (6.1.89) इति विशेषणार्थः। `सम्प्रसारणं भवति' इति। सम्प्रसारणमित्येष विशेषः कुतो लभ्यते। पूर्वसूत्रात् सम्प्रसारणमित्यस्यानुवृत्तेः। किमर्थं पुनः सम्प्रसारणमनुवार्यते? स्थानिनियमार्थम्। यद्येतन्नानुवर्त्यते, यण एव स्थाने `इग्यणः सम्प्रसारणम्' (1.1.45) इति भवितव्यम्। `प्रष्ठौहः' इति। प्रष्ठं वहतीति `भजो ण्विः' (3.2.62) इत्यनुवर्त्तमाने `वहश्च' (3.2.64) इति ण्विः।

अथ किमर्थमूठ् क्रियते, न `वाह' इत्येतावदेव सूत्रं कर्त्तव्यमित्यभिप्रायः। `सम्प्रसरण एव कृते' इति। पूर्वसत्रात् समप्रसारणग्रहणानुवृत्तेः। `गुणे च' इति। कृत इति सम्बन्धः। गुणस्तु `पुगन्तलघूपधस्य च' (7.3.86) इति लुप्तेऽपि ण्वौ प्रत्यलक्षणेन। ननु च `अङ्गवृत्ते पुनरङ्गवृत्तावविधि निष्ठितस्य' (व्या.प.38) इति सम्प्रसारणे कृते गुणेन न भवितव्यम्? `निष्ठितस्य' इति। `वचनाददोषः। निष्ठा हि शब्दस्य परिसमाप्तिः, सा च तदा भवति यदा शब्दसय प्रयोगार्हता भवति। न च यावद्गुणादिसंस्कारो न क्रियते तावदस्य प्रयोगार्हता भवति। तस्मात् कृतेऽपि सम्प्रसारणे भवत्येव गुणः, तत्रेतत् स्यात्। यद्यूड् न क्रियते, तदा शार्लि वहति, दितिं वहति, शाल्युहः, दित्यूह इत्येवमाद्यनकारन्ते शालिदितिशब्द उपपदे वहेर्ण्वि प्रत्यये विहिते सति न सिद्ध्यतीत्यत आह--`अनकारान्ते चोपपदे' इत्यादि। `वहश्च' (3.2.64) इत्यनेन `छन्दसि सहः' (3.2.63) इत्यतोऽत्र छन्दोग्रहणानुवृत्तेश्छन्दस्येव ण्विर्विधीयते, दृष्टार्थविधिश्छन्दसि, अकारान्त एव चोपपदे प्रष्ठादौ वहेश्छन्दसि ण्विर्दृश्यते न त्वकारान्ते शाल्यादौ। कथं पुनरनेन बहिरङ्गपरिभाषा ज्ञाप्यते? इत्याह--`तस्यां हि' इत्यादि। बहिरङ्गत्त्वं पुनः सम्प्रसारणस्य बाह्याजादिप्रत्ययनिमित्तां भसंज्ञामाश्रित्य प्रवृत्तात्वात्। गुणस्य त्वन्तरङ्गत्त्वम्; अबाह्यप्रत्यये प्रवृत्तत्वात्। किं पुनरस्याः परिभाषायाः ज्ञापनेनप्रयोजनम्? पचावेदम्, यजावेदमित्यत्रः सिद्धत्त्वं बहिरङ्गलक्षणस्य। अतोऽन्तरङ्गलक्षणमेत ऐत्वं न भवति; बहिरङ्गलक्षणत्वाद्गुणस्य। बहिरङ्गत्वन्तु पदद्वयाश्रितत्वात्। ऐत्वस्य त्वन्तरङ्गत्वं विपर्ययात्।।

133. श्वयुवमघोनामतद्धिते। (6.4.133)

`यूनः' इति। सम्प्रसारणे कृते परपूर्वत्वे च सवर्णदीर्घत्वम्। `शौवम्' इति। `नस्तद्धिते' (6.4.144) इति टिलोपः। `यौवनम्' इति। यूनो भाव इति `हायनान्तयुवादिभ्योऽण्' (5.1.130) इत्यण्, `अन्' (6.4.167) इति प्रकृतिभावात् `टेः' (6.4.143) इति टिलोपाल्लोपौ न भवतः। `माघवनम्' इति--मघवा देवताऽस्येति `सास्य देवता' (4.2.24) इत्यण्, पूर्ववत्प्रकृतिभावः। `शौवम्' इत्येतद्व्युत्पादयितुमाह--`शुनो विकारः' इत्यादि। युवशब्दस्य तिप्रत्ययान्तस्यापि `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (व्या.प.29) इति सम्प्रसारणं प्राप्नोति। मधवन्नित्यस्यापि त्रित्यादेशे कृते `एकदेशविकृतमनन्यवद्भवति' (व्या.प.16) इति तकारान्तस्यापि प्राप्नोति। तत् कथं न भवति? इत्याह--`श्वादीनाम्' इत्यादि। `तदर्थम्' इति। नकारान्तानामेव यथा स्यात्, अनकारान्तानां मा भूदित्येवमर्थम्। `अन इत्युभयोः शेषः' इति। अन इत्यस्योभयोर्योगयोः शेषत्वेऽवयवत्वे सत्यन इत्यनेन सम्प्रसारणशेषस्यातिदेश इति न भवति।।

134. अल्लोपोऽनः। (6.4.134)

तपरकरणं नञ्समासोऽयमित्याशङ्कानिरासार्थम्।

`राजकीयः' [`राजकीयम्'--काशिका] इति। `गर्त्तोत्तरपदाच्छः' (4.2.137) इति छे प्रकृते `राज्ञः क च' (4.2.140) इति छः, ककारश्चान्तादेशः। अत्रापि `एकदेशविकृतमनन्यवद्भवति' (व्या.प.16) इति।।

135. षपूर्वहन्धृतराज्ञामणि। (6.4.135)

`अन्' (6.4.167) इति प्रकृतिभावेनाल्लोपस्य निवृत्तिर्मा भूदित्येवमर्थ वचनम्। `औक्ष्णः, ताक्ष्णः' इति। उक्षन्, तक्षन्, इत्येताभ्यामपत्यार्थेऽण्। `भ्रौणाध्नः' इति। भ्रूणं हतवानिति `ब्रह्मभ्रूणवृत्रेषु हनः' (3.2.87) [`ब्रह्मभ्रूणवृत्रेषु क्विप्' इति सूत्रम्] इति क्विप्, तदन्तादण्, `हो हन्तेर्ञ्णिन्नेषु' (7.3.54) इति कुत्वम्। `धार्त्तराज्ञः' इति। घृतराजशब्दाद्बहुव्रीहेरण्।

`सामनः, वैमनः' इति। `तस्येदम्' (4.3.120) इत्यण्, `उभावपि न भवतिः' इति। अल्लोपटिलोपावुभावपि चापेक्ष्य प्रकृतिभावस्य विधानात्। `ताक्षण्यः' इति। `कुर्वादिब्यो ण्यः' (4.1.151) इति ण्ये प्रकृते सेनान्तलक्षणकारित्वाण्ण्यप्रत्ययः' (4.1.152), `ये चाभावकर्मणोः' (6.4.168) इति प्रकृतिभावः।।

136. विभाषा ङिश्योः। (6.4.136)

`शीशब्दे च' इति। एतेन `नपुंसकाच्च' (7.1.19) इति यो विहितः शोशब्दस्तस्येदं ग्रहणम्, न तु `जश्शसोः शिः' (7.1.20) इति यो विहितः शिशब्दस्तस्येदं ग्रहणमिति दर्शयति। कुतः पुनरेतज्ज्ञायते? शिशब्दे भसंज्ञाया अभावात्।।

137. न संयोगाद्वमन्तात्। (6.4.137)

`प्रति दीव्ना' इति। `हलि च' (8.2.77) इति दीर्घः। अथान्तग्रहणं किमर्थम्, न `दमः' इत्येवोच्येत, वकारमकाराभ्यां संयोगेन विशिष्यमाणेन च तदन्तविधिर्भवतीत्यन्तरेणाप्यन्तग्रहणं तदन्तविधिर्लभ्यत एव? सत्ययेतत्, विस्पष्टार्थमन्तग्रहणम्।।

138. अचः। (6.4.138)

`अच इत्ययमञ्चतिर्लुप्तनकारो गृह्यते' इति। कुत एतत्, प्रत्याहारः कस्मान्न गृह्यते? `अल्लोपः' (6.4.134) इत्यानुवृत्तेर्न शक्यते प्रत्याहारो ग्रहीतुम्। प्रत्याहारग्रहणे सति तेनाकारो विशिध्येत, तथा चानर्थकं प्रत्याहारग्रहणं स्यात्। न ह्यकारोऽचत्वं व्यभिचरति। ननु चाङ्गं प्रकृतम्, तत् प्रत्याहारेण विशिष्यते--अजन्तस्याङ्गस्येति? न; एवं सत्यजन्तस्याङ्गस्याल्लोपो भवतीत्येष सूत्रार्थः स्यात्। तथा च `यस्येति च' (6.4.148) इति लोपोऽनर्थकः स्यात्; अनेनैव सिद्धत्वात्। अपि च `द्युप्रागपागुदक्प्रतीचो यत्' (4.2.101) इत्येत्रमादिनिर्देशो लिङ्गं ह्यत्राप्रत्याहारग्रहणस्य। यदि हि प्रत्याहारग्रहण स्यात्, अत्राञ्चतेर्ग्रहणं न स्यात्, न ह्येतदजन्तमङ्गम्। अत एव निर्देशात् पचाद्यजपि न गृह्यते। न ह्येतत् पचाद्यजन्तमङ्गम्। `दधीचः' इति। दध्यञ्चतीति ऋत्विगादिना (3.2.59) क्विन्, `आनिदिताम्' (6.4.24) इत्यादिनानुनासिकलोपः; `चौ' (6.3.138) इति दीर्घः।।

139. उद ईत्। (6.4.139)

140. आतो धातोः। (6.4.140)
`कीलालपः' इति। `विजुपे छन्दसि' (3.2.73) इति विचि प्रकृते `आतो मनिन्क्वनिब्वनिपश्च' (3.2.74) इति विच्। `नियेः' इति। क्विप् इयङ।।

141. मन्त्रेष्वाङ्यादेरात्मनः। (6.4.141)
`आङ' इति तृतीयैकवचनस्यैषा संज्ञा पूर्वाचार्यैर्विहिता। `आङोऽन्यत्रापि दृश्यते' इति। `मन्त्रेषु' इति बहुवचननिर्देशादेतल्लभ्यते। बहुवचननिर्देशेन ह्ययमर्थः सूचितः--बहुविषयोऽयं निर्देश इति। एवञ्च बहुविषयो भवति यद्याङोऽन्यत्रापि क्वचिद्भवति, नान्यथा। `त्मान्यासमञ्जत' इति। सप्तम्येकवचने। अत्रादिलोपः।
आदिग्रहणमुत्तरार्थम्। इह तु पूर्वसूत्रात् `आतः' (6.4.140) इत्यनुवृत्तेरन्तरेणाप्यादिग्रहणमादेरेवलोपो भवतीति शक्यते विज्ञातुम्।।

142. ति विंशतेर्डिति। (6.4.142)
`विंशकः' इति। `विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम्' (5.1.24) इति ड्वुन्, तिशब्दस्य लोपे कृते अतो गुणे' (6.1.97) पररूपत्वम्। `विंशं शतम्' इति। विंशतिरधिकाऽस्मिन्निति `शदन्तविंशतेश्च' (5.2.46) इति डप्रत्ययः। `विंशः, एकविंशः' इति। तस्य पूरणे डट् (5.1.48)। तिग्रहणमनत्यस्य मा भूदित्येवमर्थम्।।

143. टेः। (6.4.143)
`कुमुद्वान्' इत्यादि। कमुदनडवेतसेभ्यश्चातुरर्थिको ड्मतुप् (4.2.87)। `उपसरजः' इति। `सप्तम्यां जनेर्डः' (3.2.97) एवं `मन्दुरजः' इत्यत्रापि। अत्र हि `ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (6.3.63) इति पूर्वपदस्य ह्रस्वत्वम्। `त्रिंशकः' इति। पूर्ववत् ड्वुन्। ननु च `भस्य' (6.4.129) इत्यनुवर्त्तते, न च ड्मतुपि डप्रत्यये च धातोर्विहिते पूर्वस्य भसंज्ञा प्राप्नोति, उभयोरनजादित्वात् अस्वादित्वाच्च यथायोगम्, तत् कथमत्र लोपो भवति? इत्याह--`डित्यभस्यापि' इत्यादि। यदि टिलोपो न स्यात्, तदा डित्त्वमनर्थकं स्यात्। अथैवं कस्मान्न विज्ञातुम्। एवं तर्हि `प्रावृट्शरत्कालदिवां जे' (6.3.15) इति कृतटिलोपस्य जनेर्निर्देशो नोपपद्येत? तस्मादत एव निर्देशादवसीयते--भवति धातुप्रत्ययडकारस्येत्संज्ञेति। तस्याञ्चासत्यां यदि टिलोपो न स्यात्, तस्यास्तदा वैयर्थ्यं स्यात्। ड्मतुपोऽपि यदि डकारस्य लोपो न स्यात्, तदन्तेन तन्नामादेशो न गम्येत, तत्र च `देशे तन्नाम्नि' (4.2.67) इति वर्त्तते। तस्मादवश्यं तत्रापि डकारस्येत्संज्ञया भवितव्यम्, तस्याञ्च तत्सामर्थ्याट्टिलोपेन।।

144. नस्तद्धिते। (6.4.144)
`सात्वतः' इति। सत्वतोऽपत्यमित्यण्। `नान्तस्य टिलोपः' इत्यादि। किं पुनः कारणं न सिद्ध्यति यत उपसंख्यानं कर्त्तव्यम्? इत्याह--`अत्र य इन्नन्ताः' इत्यादि। ये त्वन्नन्तास्तेषाम् अन्' (6.4.167) इति प्रकृतिभावः प्राप्त इति प्रकृतेन सम्बन्धः। `साब्रह्मचारः' इति। `तस्येदम्' (4.3.120) इत्यण्। `पीठसर्पिणः' इति। इम इति प्रकृतेन सम्बन्धः। `पैठसर्पाः' इति। `तस्येदम्' (4.3.120) इत्यण्। `पीठसर्पिणः' इति। इम इति प्रकृतेन सम्बन्धः। `पैठसर्पाः' इति। पूर्ववदण्। `कालापाः' इति। पूर्ववत्प्रोक्तार्थे `कलापिवैशम्पायनान्तेवासिभ्यश्च' (4.3.104) इति वैशम्पायनान्तेवासित्वाण्णिनिप्रत्यये प्राप्ते तदपवादः `कलापिनोऽण्' (4.3.108), ततः `तदधीते तद्वेव' (4.2.59) इत्यण्, तस्य `प्रोक्താल्लुक्' (4.2.64) इति लुक्, `छन्दोब्राह्मणानि च तद्विषयाणि' (4.2.66) इत्यध्येतृवेदितृविषयता। `कोथुमाः' इति। `तस्येदम्' (4.3.120) इत्यण्। `तत्कृतो ग्रन्थ उपचारात्' इत्यादि। उपचारस्य तु तत्कृतत्वात्र निबन्धनम्। भवति हि तत्कृतत्वे तदुपचारः, यथा सर्वमिदं पुराणं कर्म शुभाशुभं भुज्यत इति। अथ कस्मादुपचार आश्रीयते, न `अधिकृत्य कृते ग्रन्थे' (4.3.87) इत्येवमादिशैषिकार्थविवक्षायां तद्धित एव क्रियेत? इत्यत आह--`शैषिकेष्वर्थेषु' इत्यादि। तैतिलिजाजलिशब्दौ वृद्धसंज्ञकौ, तयोर्वृद्धत्वात् शैषिकेष्वथषु विधीयमानोऽसौ तद्धितः `वृद्धाच्छः' (4.2.114) इति छः प्रसज्येत। तस्मिंश्च सति `तैतिलाः, जाजलाः' इति न सिद्ध्येत्, तस्मान्मा भूदेष

दोष इत्युपचार आश्रितः। `एवम्' इत्यनेनान्तरोक्तां व्युत्पत्तिं दर्शयति छप्रत्ययनिवृत्तये। लाङ्गलिशब्दस्याप्येवं व्युत्पत्तिः कर्त्तव्या। लाङ्गलिः आचार्यः, तत्कृती ग्रन्थ उपचारात् लाङ्गलशब्देनाभिधीयते। `लाङ्गलाः' इति। `शिखण्डाः` इत्याद्युदाहरणत्रयेऽपि `तस्येदम्' (4.3.120) इत्यण्।
`आश्मः' इति। अत्रापि `तस्य विकारः' (4.3.134) इत्यण्। `आश्मनोऽन्यत्र' इति। अत्रापि `तस्येदम्' (4.3.120) इत्यत्रार्थाभिधाने। `चार्मः' इत्यत्रापि `तस्येदम्' (4.3.120) इत्यणेव।
`चर्मणोऽन्यः' इति। चर्मणो विकार इति। `शौवः' इति। `द्वारादीनाञ्च' (7.3.4) इत्यैजागमः।
सायम्प्रातिकायः प्रातिपदिकेषु न पठ्यन्त इत्यतः पृच्छति--`के पुनः सामम्प्रातिकादयः इति। सायम्प्रातिकप्रकारा इत्यनेन प्रकारवचनतामादिशब्दस्य दर्शयति।
ननु च `सायञ्चिरम्' (4.3.23) इत्यादिनाऽव्ययेभ्यष्ट्युल्भ्यां भवितव्यम्, तत् कथं ठञ् भवति? इत्याह--`ट्युट्युलौ तु नेष्येते' इति। अनभिधानात्। अत्र च सर्वत्रोपसंक्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्--मन्त्रेष्वित्यादेः (6.4.141) सूत्रादादिग्रहणमनुवर्त्तते, तद्धितग्रहणञ्चेदमर्थमेव कृतम्। तदनुवृत्तौ चायमर्थो भवति--नान्तादीनां तद्धिते परतष्टिलोपो भवतीति। आदिशब्देन सायम्प्रातिकादयो गृह्यन्ते। तेन सर्वत्र टिलोपः सिद्धो भवति। `इत्येवमादिषु न दृश्यते टिलोपः' इति। एतेनारातीयः इत्येवमादीनामसायम्प्रातिकत्वं दर्शयति। अथ `शाश्वतः' इत्यत्र कथमण्, यावता `कालट्ठञ' (4.3.11) इति ठञा भवितव्यम्? नैतदस्ति; `कालट्ठञ्' (4.3.11) इत्यत्र `कालात्' इति योगविभागः कर्त्तव्यः, तेन शश्वच्छब्दाद्यथादिहितमण् भवति। न च योगविभागेन ठञ् बाध्यते; `येषाञ्च विरोधः शाश्वतिकः' (2.4.9) इति निपातनात्। तेन पक्षे ठञपि भवत्येव। ट्युट्युलौ तु शाश्वतशब्दान्नेष्येते, अनभिधानादेव। अथ `शाश्वतिकः' इत्यत्र `इसुसुक्तान्तात्कः' (7.3.51) इति ठञः कादेशः कस्मान्न भवति? अत एव निर्देशात्।।

145. अह्नष्टखोरेव। (6.4.145)
`द्व्यहः' इति। `तद्धितार्थोत्तरपदसमाहारे च' (2.1.51) इति समासः, `राजहःसखिभ्यष्टच्' (5.4.91) इति टच् समासान्तः। अत्र `अह्नोह्न एतेभ्यः' (5.4.88) इत्यह्नादेशः प्राप्तः स च `न संख्यादेः समाहारे' (5.4.89) इति प्रतिषेधान्न भवति। `द्व्यहीनः' इति। तद्धितार्थे `समायाः' (5.1.85) इति वर्त्तमाने `रात्र्यहःसंवत्सराच्च' (5.1.87) इति खः।
केन पुनरहीन इत्यत्र खप्रत्ययः? इत्याह--`अह्नः समूहे खो वक्तव्वः' इति। ननु च अह्नो नकारान्तत्वात् पूर्वेणैव सिद्धष्टिलोपः, तत् किमर्थोऽयमारम्भः? इत्याह--`सिद्धे सति' इत्यादि। `आह्निकम्' इति। आर्हीयष्ठक्। यदि सिद्धे सति नियमर्थोऽयमारम्भः, एवं सत्येवग्रहणमनर्थकं स्यात्, विनापि तेन सिद्धे सत्यारम्बो नियमार्थो विज्ञास्यते? इत्याह--`एवकारकरणं विस्पष्टार्थम्' इति। अथ विपरीतनियमाशङ्कानिरासार्थं कस्मान्न भवति? इत्याह--`अह्न एव' इत्यादि। यद्यह्न एव टखोः--इत्येव विपरीतनियमः स्यात्, एवं सत्यन्यस्य खे टिलोपप्रसङ्ग एव नास्ति। `आत्माध्वानो खे' (6.4.169) इति प्रकृतिवद्भावविधानमनर्थकं स्यादित्यभिप्रायः।।

146. ओर्गुणः। (6.4.146)
`बाभ्रष्यः' इति। `मधुबभ्रवोर्ब्राह्मणकौशिकयोः' (4.1.106) इति बभ्रुशब्दादपत्यार्थे यञ्। `माण्डव्यः' इति। अत्रापि गर्गादित्वात्। `वान्तो यि प्रत्यये' (6.1.79) इत्यवादेशः। `शङ्कव्यम्' इत्यदौ `तस्मै हितम्' (5.1.5) इत्यस्मिन्नर्थे `उगवादिभ्यो यत्' (5.1.2)। `औपगवः, कापटवः' इति। अत्राप्यपत्यार्थेऽण्। तद्धित इत्येव--`वोतो गुणवचनात्' (4.1.44) इति ङीष्, पट्वी।
`ओरोत्' इति वक्तव्ये' इत्यादि। एवमुच्यमाने लघु सूत्रं भवतीति भावः। `स्वायम्भुवः' इति। स्वयं भवतीति क्विप्--स्वयम्भूः, स्वयम्भुव इतमित्यण्। संज्ञापूर्वकस्य विधेरनित्यत्वादत्र गुमो न भवति, तस्मिश्चा सत्युवङेव क्रियते।।

147. ढे लोपोऽकद्रूवाः। (6.4.147)
`कामण्डलेयः, शैतबाहेयः' इति। `चतुष्पाद्भ्यो ढञ्' (4.1.135) इति ढञ्। एवं `जाम्बेयः' इत्यत्रापि। `माद्रबाहेयः' इति। मद्रबाहुशब्दात् `बाह्वन्तात् संज्ञायाम्' (4.1.67) इत्यूङ, तदन्तात् `स्त्रीभ्यो ढक्' (4.1.120)। `काद्रवेयः' इति। `कद्रूकमण्डल्वोश्छन्दसि संज्ञायाम्' (4.1.71,72) इत्यूङ तदन्तात् पूर्ववङ्ढक्।।

148. यस्येति च। (6.4.148)
अत्र यस्येति यकारस्येदं ग्रहणं वा स्यात्, इवर्णावर्णयोर्वा? अत्र यदि यकारस्येदं ग्रहणं स्यात्, उत्तरसूत्रे पुनर्यग्रहणं न कुर्यात्, एतदेव हि तत्रानुवर्त्तिष्यते। तस्मादिवर्णावर्णयोरिदं ग्रहणम्। तत्र वर्णग्रहणं सर्वत्र तदन्तविधिं प्रयोजयतीति तदन्तविधिर्विज्ञायते--इत्यतच्चेतसि कृत्वाऽऽह--`इवर्णावर्णान्तस्य' इत्यादि। `दाक्षी, प्लाक्षी' इति। दाक्षिप्लाक्षिशब्दाभ्यां `इतो मनुष्यजातेः' (4.1.65) इति ङीष्। `सखी' इत्यत्रापि `सख्यशिश्वीति भाषायाम्' (4.1.62) इति निपातनात्। ननु चात्र सवर्णदीर्घत्वेनाप्येतत् सिद्धम्, तत् किमर्थमत्र लोप विधीयते? इत्यत आह--`सवर्णदीर्घत्वे हि' इत्यादि। `अतिक्रान्ता सखी एनम्'

इति `प्रादिभ्यो धातुजस्य' (वा.101) इति बहुव्रीहिरुत्तरपदलोपश्च, उपसर्जनह्रस्वत्वम्। तत्र यदि सवर्णदीर्घत्त्वं क्रियेत, न तु लोपस्तदा सखीकारेकारयोरेकादेशः सखिशब्दस्यान्तवद्भवतीति `शेषो ध्यसखि' (1.4.7) इतचि धिसंज्ञायाः प्रतिषेधः स्यात्। ततश्चातिसखेरागनच्छतीति `घेङिति' (7.3.111) इति गुणो न स्यात्। लोपे सत्युपसर्जनह्रस्वत्वे सति यद्यपि प्रविशिष्टं रूपम्, तथापि लाक्षणिकम्। अतो लक्षणप्रतिपदोक्तपरिभाषया (व्या.प.3) तन्न गृह्यत इति न भवति प्रतिषेधः। तस्माल्लोप एव कर्त्तव्यः।

`दौलेयः' इत्युदाहरणत्रये `इतश्टचानिञः' (4.1.122) इत्यपत्यार्थे ढक्।

`कुमारी इति। `वयसि प्रथमे' (4.1.20) इति ङीप्। `गौरी' इति। `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीष्। `शाङ्र्गरवी' इति। `शाङ्र्गरवाद्यञो ङीन्' (4.1.73)। `बालाकिः सौमित्रिः' इति। बालकसुमित्राभ्यां बह्वादित्वादिञ्।

`यस्येत्यादौ' इति। आदिशब्देनोत्तरो विधिः परिगृह्यते। वक्तव्य इति व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--`विभाषा ङिश्योः' (6.4.136) इत्येतत्सूत्राद्विभाषाग्रहणं मण्डूकप्लुतिन्यायेनानुवर्त्तते, सा च व्यवस्थितविभाषा। तेन चानेन सूत्रेण लोपो विधीयते, यश्चोत्तरसूत्रेण, तावुभावपि न भवत इति। `काण्डे, कुडये' इति। `औङ आपः' (7.1.18) इति, `नपुंसकाच्च' (7.1.19) इति शोभाव इति, तत्र यस्येत्यकारलोपः प्राप्नोति। `सौर्ये' इति। `तेनैकदिक्' (4.3.112) इति सूर्यशब्दादण्, तदन्तादौङः शीभावः, तत्रानेनाकारलोपः प्राप्नोति, उत्तरसूत्रेम यकारलोपश्च। `इयङ्वङभ्याम्' इत्यादि। इयङुवङोरवकाशः--श्रियौ, श्रियः, भ्रुवौ भ्रुवः, लोपस्यावकाशः--कामण्डलेयः, माद्रबाहेय इति; वात्सप्रेयः, लैखाभ्रेय इत्यत्रोभयं प्राप्नोति, लोपो भवति विप्रतिषेधेन। `वत्सप्रीः' इति। क्विबन्तमेतत्।।

149. सूर्यतिष्यागस्त्यमतस्यानां य उपधायाः। (6.4.149)

यद्यत्र भसंज्ञया सूर्यादयो विशिष्येरन्--`सूर्यादीनां भसंज्ञकानामिति, तदा सौरी, बलाकेत्यत्र लोपो न स्यात्। न हि सूर्यशब्द इह भसंज्ञक इति, किं तर्हि? अन्येदवाणन्तं शब्दान्तरमिति बुद्धौ निधायानाश्रितरूपभेदस्य लोपेन सम्बन्धः सूर्यादिभिः सम्बन्धिभिर्यकारो विशिष्यत इति दर्शयन्नाह--

`सूर्यतिव्यागस्त्यमत्स्य--`इत्येतेवाम्' इत्यादि। `भस्य' इति। भसंज्ञकस्य। यो यकार उपधा, तस्य लोपो भवति स चेद्यकारः सूर्यादीनां सम्बन्धी भवति--अयमतरार्थो विवक्षितः। ते तु सूर्यादयो भत्वेन न विशिष्यतन्ते। तेन यदापि तेषां भसंज्ञा न भवति, तदापि तस्योपधायकारस्य लोपो भवत्येव यद्यसौ यकारः सूर्यादीनां सम्बन्धी भवति। `सौरी, बलाका' इति। ननु चात्राकारलोपस्य व्याश्रयत्वेनासिद्धत्वं नास्तीत्युपधायकारो न भवतीत्येतदुक्तम्? इत्याह--`अणि यो यस्येति लोपः' इत्यादि। अत्र हि द्वौ यस्येतिलापौ--एकोऽणिपरतः, अपर ईकारे। तत्र प्रथमो व्याश्रयः, तथा हि--लोपोऽणमाश्रित्य भवति, यलोपस्त्वीकारम् अतो व्याश्रयत्वादसिद्धत्वाभावस्तस्य युक्तः। इतरस्त्वीकारमाश्रित्य भवति समानाश्रय एव, ततश्च तस्यासिद्धत्त्वादुपधायकारो भवति। `भस्याणन्तस्य' इत्तयादिना सूत्रार्थमुदाहरणे दर्शयति। `तैषम्, तैषी' इति। `नक्षत्रेण युक्तः कालः' (4.2.3) इत्यण्, `टिड्ढाणञ्' (4.1.15) इति ङीप्। `ऋषित्वादणि कृते' इति। `ऋष्यन्धक' (4.1.114) इत्यादिना `मत्स्यचरी' इति। मत्स्यो भूतपूर्वः--`भूतपूर्वे चरट्' (5.3.53) पूर्ववन्ङीप्। भवत्यत्र मत्स्यचर इति भसंज्ञकमत्स्यसम्बन्धी यकारः, नत्वसौ भसंज्ञकस्योपदेति लोपो न प्रवर्त्तते।

अथ किमर्थं यग्रहणम्, यावता सूर्यादिभिरूपधायां विशिष्यमाणायामन्तरेणापि यग्रहणं यकारस्योपधाभूतस्य लोपो विज्ञास्यते, यकार एव हि तेषामुपधा, न तु वर्णान्तरम्? इत्यत आह--`यग्रहणमुत्तरार्थम्' इति। `वक्तव्यम्' इति व्याख्येयमित्यर्थः। व्याख्यानन्त्विहापि पूर्ववद्विभाषामाश्रित्य कर्त्तव्यम्। `मात्स्यम्' इति। `तस्येदम्' (4.2.120) इत्यण्।

`सौरीयम्' इति। अणन्तात् `वृद्धाच्छः' (4.2.114)। एवं `आगस्तीयम्' इति। `सौर्यम्' इति। सूर्यो देवतऽस्येति `सा।डस्य देवता (4.2.24) इत्यण्। `आगस्त्यः' इति। अपत्यार्थे ऋष्यण्। `नक्षत्राणि' इति। नक्षत्रसम्बन्धो योऽण् तस्मिन्नित्यर्थः।

`ककारादेः शब्दस्य' इति। ककारस्याकारस्येत्यर्थः। `आद्युदात्तवञ्च' इति। प्रत्ययस्वरेणान्तोदात्तत्वे प्राप्ते सत्याद्युदात्तार्थं वचनम्। `अन्तितः' इति। `अपादाने चाहीयरुहोः' (5.4.45) इति तसिः।

`तादेश्च' इति। तिकशब्दस्येत्यर्थ। चकारात् कादेश्च। `अन्तमः' इति। अतिशायने तमप्' (5.3.55)।

`अन्तिषत्' इति। `सत्सूद्विष' (3.2.61) इत्यादिना क्विप्। `ये च' इति। दृश्यत इति प्रकृतेन सम्बन्धः। `अन्तिमः' इति। `भवे छन्दसि' (4.4.110) इति यः, `तत्र साधुः' (4.4.98) इति वा। केचित् सर्वमेव लोपविधानं छन्दस्येवेच्छन्ति।।

150. हलस्तद्धितस्य। (6.4.150)

`तद्धित इति निवृत्तम्' इति। उत्तरसूत्रे तद्धितग्रहणात्। तेनायमीत्येव विधिः। `गार्गी' इत्यादि। गर्गादिशब्देभ्यो यञन्तेभ्यः `यञश्च' (4.1.16) इति ङीप्। `कारिकेयी' इति। `स्त्रीभ्यो ढक्' (4.1.120), तदन्तात् `टिड्ढाणञ्' (4.1.15) इति ङीप्। `वैधी' इति। `पुंयोगादाख्यायाम्' (4.1.48) इति ङीष्।।

151. आपत्यस्य च तद्धितेऽनाति। (6.4.151)

`गार्गकम्' इति। `गोत्रोक्षोष्ट्रोरभ्र' (4.2.39) इत्यादिना गार्ग्यशब्दाद्वुञ्, तत्र यञो लोपः। `साङ्काख्यकः' इति। `काम्पिल्यकः' इति। पूर्ववत्

सङ्काशकम्पिलशब्दाभ्याञ्चातुरार्थिकः `दुञ्छण्' (4.2.80) इत्यादिना ण्यः, तदन्ताज्जातादौ शैषिकेऽर्थे `धन्वयोपधाद्वुञ्' (4.2.121) इति वुञ्।
अथ तद्धितग्रहणं किमर्थम्, `नस्तद्धिते' (6.4.144) इति तद्धितग्रहणमनुवर्त्तिष्यते? इत्यत आह--`तद्धितग्रहणम्' इत्यादि। सोमी देवतस्येति `सोमाट्ट्यण्' (4.2.30), `टिड्ढाणञ' (4.1.15) इति ङीप्। तत्र परतोऽनपत्ययकारस्यापि `हलस्तद्धितस्य' (6.4.150) इत्यनेन लोपो यथा स्यादित्येवमर्थं तद्धितग्रहणम्; अन्यथा यदि तदेव प्रकृतं तद्धितग्रहणमिहानुर्तेत, तदा तत्सम्बन्धमीद्ग्रहणमनुवर्त्तेत। तथा चोभयमिहानुवर्त्तमानं पूर्वयागेऽप्यनुवर्त्तत। तथा च पूर्वेणैव योगेन सिद्धे सत्युभयत्र तद्धित ई, ति च नियमार्थोऽयमारम्भः स्यात्---आपत्यस्यैवानाकारादौ तद्धिते लोपो भवति ईति च नानापत्ये च। एवञ्च यथानपत्यस्य साङ्कश्यक इत्यत्र लोपो न भविष्यति, तथा सौमी इष्टिरित्यत्रापि न स्यात्; नियमेन व्यवर्त्तितत्वात्। इह तु तद्धितग्रहणे क्रियमाणे पूर्वयोगे तद्धितग्रहणस्य निवृत्तिराख्यायते। तेन पर्वयोगेन तद्धितमात्रस्य यकारस्यानपत्यस्य चापत्यस्य चाविशेषेण लोपो विदीयते। सौमी इष्टिरित्यत्रापि लोपो यथा स्यादित्येवमर्थं तद्धितग्रहणम्। ननु च यद्युभयत्र तद्धित इति चायं नियमः स्यात् सूत्रद्वयस्यार्थोऽपार्थकः स्यात्। `हल आपत्यस्यानाति' इत्येकमेव योगं कुर्यात्। तस्मात् सूत्रद्वयस्यारम्भसामर्थ्यादन्यतरस्यैवेहानुवृत्तिर्भवतिष्यति, न तूभयस्यापि। इह त्वेतावान् सन्देहः स्यात्--किं तद्धितग्रहणमिहानुवर्त्तते, उतेद्ग्रहणमिति? अत्रापि तद्धितग्रहणमनुवर्त्तते, नेद्ग्रहणमिति; व्याख्यानात्। सरवसन्देहेष्विदमुपतिष्ठते `भवति व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' (पु.प.वृ 120) इति। तद्धितग्रहणे च केवल इहानुवर्त्तमाने तद्धितविषय एवायं नियमो भविष्यति, न त्वीद्विषय इति। तथा चासत्यपि पुनरिह तद्धितग्रहण इति नियमाभावात् पूर्वसूत्रेण सौमी इष्टिरित्यत्रापि लोपः सिद्ध्यत्येव। तत् कथमिदमुक्तम्--तद्धितग्रहणीत्यनपत्यस्यापि लोपार्थमिति? सुखेन लोपः प्रतीयत इत्येतदर्थमिदमित्यभिप्रायो द्रष्टव्यः। ततश्चायमत्रार्थः सम्पद्यते--प्रतिपत्तिगौरवपरीहारार्थं तद्धितग्रहणम्।
`गार्ग्यायणः' इति। `यञिञोश्च' (4.1.101) इति फक्।
`कारकेयिः' इति। कारिकाया अपत्यमिति `स्त्रीब्यो ढक्' (4.1.120), ततस्तस्यापत्यम्, `अत इञ्' (4.1.95) कारिकेयिः।।

152. क्यच्व्योश्च। (6.4.152)
अतद्धितार्थोऽयमारम्भः। `क्य' इति क्यच्क्यङोः सामान्येन ग्रहणम्। `गार्गीयति इति। `सुप आत्मनः क्यच्' (3.1.8), `क्यचि च' (7.4.33) इतीत्त्वम्। `गार्गीयः' इति। `कर्त्तुः क्यङ सलोपश्च' (3.1.11) इति क्यङ, `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः। `गार्गीभूतः' इति। `अभूततद्भावे' (5.4.50) इति च्विः, `अस्य च्वौ' (7.4.32) इतीत्त्वम्।।

153. बिल्वकादिभ्यश्छस्य लुक्। (6.4.153)
`बिल्वकदिभ्यः' इति। आगन्तुकेनाकारेण निर्देशः। `बिल्वकीया' इति। `उत्करादिभ्यश्छः' (4.2.90) `नडादीनां कुक्च' (4.2.91) इति चातुरर्थिकश्छः, कुगागमः। `बैल्वकाः' इति। `प्राग्दीष्यतेऽण्' (4.1.83)।
अथ छग्रहणं किमर्थम्, यावता कृतकुगागमा बिल्वकीदयो गृहीताः, एभ्यश्छप्रत्ययः सम्भवतीत्यन्तरेणापि छग्रहणं छस्यैव लोपो भवितव्यतीति? अत आह--`छग्रहणम्' इत्यादि। यदि छग्रहणं न क्रियेत, तदा सन्नियोगशिष्टपरिभाषया (ह.भा.14) छकारे निवर्तमाने कुको निवृत्तिः स्यात्। तस्याश्च परिभाषया एतेदेव छग्रहणं ज्ञापकम्। अथ लुग्ग्रहणं किमर्थम्, प्रकृत एव लोपो विधीयते? इत्यत आह--`लुग्ग्रहणम्' इत्यादि। यकारग्रहणमेकदेशोपलक्षणार्थं द्रष्टव्यम्। स हि लोप उपधाया इत्यनेन सम्बद्ध इति तस्मिन्ननुवर्तमाने `य उपधायाः' (6.4.149) इत्येतदप्युनुवर्त्तेत, छस्येयादेशे कृते यकारमात्रस्य स्यात्। अथापि `उपधायाः' इत्येतन्नानुवर्त्तेत? एवमपि `आदेः परस्य' (1.1.54) इतीकारमात्रस्य स्यात्। `लुग्ग्रहणम्' इति। लुगिति प्रत्ययादर्शनस्यैषा संज्ञा, न तु प्रत्यस्यैकदेशस्यादर्शनस्येति। लुग्ग्रहणे सति सर्वस्यैव लुक् सिद्ध्यति। तद्रथं हि लुग्ग्रहणम्।।

154. तुरिष्ठेमयस्सु। (6.4.154)
`तुः' इति। विसेषकराननुबन्धानुत्सृज्य तृंस्तृचोः सामान्येन ग्रहणम्। `करिष्ठः' इति। करोतेस्तृन्। तदन्तादतिशायन इष्ठन्, तृशब्दस्य लोपः। `विजयिष्ठः' इति। विपूर्वाज्जयतेस्तृन्। `वहिष्ठः' इति। अत्रापि वहेस्तृन्। तदन्तादिष्ठन्, `हो ढः' (8.2.31) इति ढत्वम्। तृशब्दस्य लोपे कर्त्तव्ये `पूर्वत्रासिद्धम्' (8.2.1) इत्यसिद्धम्, तेन पूर्वलोप एव क्रियते, तस्मिन् कृते झलि यदान्ते च विधीयमानं ढत्वं निमित्ताभावान्न प्रवर्त्तते। `दोहीयसी' इति। दुहेस्तृजन्तादीयसुन्, `उगितश्च' (4.1.6) इति ङीप्। अत्रापि लोपे कर्त्तव्ये `दादेर्धातोर्धः' (8.2.32) इत्येतदप्यसिद्धमिति पूर्वं लोपः, तस्मिन् सति पूर्ववद्धत्वं न प्रवर्त्तते।
अथ `अलोऽन्त्यस्य' (1.1.52) इत्यन्त्यस्यायं लोपः कस्मान्न भवति? इत्याह--`सर्वस्य' इत्यादि। तत्रैव कारणमाह--`अन्त्यस्य' इत्यादि। यद्यन्त्यस्य स्याद्वचनवैयर्थ्यमापद्येत; `अन्त्यस्य टेः' इत्येवं सिद्धत्वात्। तस्मादन्त्यलोपवचने प्रयोजनं नास्तीति सर्वस्य तृशब्दस्य लोपो यता स्यादित्येवमर्थमिदं वचनं विज्ञायते।
यदि तर्हि तृशब्दस्य लोपार्थं वचनमनन्तरो लुगेव कस्मान्न विधीयते, एवं तर्हि सर्वस्य सुखमेव लोपोऽवसीयते, प्रत्ययादर्शनस्य लुग्विधानात्? इत्यत आह--`लुगित्येतत्तु' इत्यादि। कः पुनस्तत्र सति दोषः स्यात्? इत्यत आब--`तथा हि' इत्यादि। यदि लुगित्येतदिहानुवर्त्तत, ततः `अन्तरङ्गानपि विधीन्

बहिरङ्गो लुग् बाधते' (व्या.प.128) इति कृत्वा पूर्वं लुका भवितव्यम्, ततश्च `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणनिषेधः स्यात्; करिष्ठः, विजयिष्ठ इत्यत्रार्धदातुकलक्षणो गुणो न स्यात्। तस्मान्मा भूदेष दोष इति लुगित्येतदिहानुवर्त्तते। अथेमनिज्ग्रहणं किमर्थम्, यावता तृशब्दात् पर इमानिज्न सम्भवति। तथापि `पृथ्वादिभ्य इमानिज्वा' (5.1.122) `वर्मदृढादिभ्यः व्यञ्च' (5.1.123) इत्यनेन योगद्वयेन स विहितः, न तृशब्दान्तं किञ्चित् पृथ्वादिषु दृढादिषु वा मध्ये पठ्यते, नापि वर्णवाच्यस्तीत्यत आह--`इतरौ तु' इत्यादी।।

155. टेः। (6.4.155)
`णाविष्ठवत्' इति। `तसिलादिष्वा कृत्वसुचः' (6.3.35) इष्ठनि पुंवद्भाव उक्तः, `र ऋतो हलादेर्लघोः' (6.4.161) इति रभावः, `टेः' इति टिलोपः, `स्थूलदूरयुवह्रस्व' (6.4.156) इत्यादिना यणादिपरस्य लोपः, पूर्वस्य च गुणः, `विन्मतोर्लुक्' (5.3.65) इति लुक्, `युवाल्पयोः कनन्यतरस्याम्' (5.3.64) इति कन्। `प्रियस्थिर' (6.4.157) इत्यादिना प्रादय आदेशाः--एतानि कार्याणि यथेष्ठनि भवन्ति, तथा णावपि यथा स्युरिति णाविष्ठवत् प्रातिपदिकस्य कार्यं भवतीति वक्तव्यम्। प्रातिपदिकग्रहणं शक्यमकर्त्तुम्, अन्यस्यातिदेशस्यासम्भवात्। वतिरिह सादृश्यार्थः, तेन यस्येष्ठनि यत्कार्यं विवक्षितं ततोऽन्यस्यातिदेशस्यासम्भवात् तद्व्यवच्छेदार्थ प्रातिपदिकग्रहणं न कर्त्तव्यम्। तत् क्रियते विसपष्टार्थम्। केचित्तु ब्रुवते प्रत्ययस्य कार्याणामतिदेशो मा भूदित्येवमर्थं प्रातिपदिकग्रहणं न कर्त्तव्यम्। तत् क्रियते विस्पष्टार्थम्। केचित्तु ब्रुवते प्रत्ययस्य कार्याणामतिदेशो मा भूदित्येवमर्थं प्रातिपदिकग्रहण, तेन बहुमाचष्टे बहयतत्यत्र `इष्ठस्य यिट् च' (6.4.158) इति यिण्ण भवति? एतच्चायुक्तम्; इष्ठवदित्यत्र हि सप्तमी समर्थाद्वतिर्दिहितः, णादिति प्रतियोगिनि सपतमीश्रवणात्। तेनेष्ठनि यत्कार्यं विहितं तदतिदिश्यते, न त्विष्ठस्य यत्कार्यं तदपि। न च यिङ् इष्ठनि यत् कार्यम्, अपि त्विष्ठन एव। तस्यैह प्राप्तिरेव नास्तीति किं तन्निवृत्त्यर्थेन प्रातिपदिकग्रहणेन! `एनीम्' इति। एतच्छब्दात् `वर्णादनुदात्तात्तोपधात्' (4.1.39) इत्यादिना ङीष्, तकारस्य च नकारः। `एतयति' इति। णौ कृते पुंवद्भावेन ङीष्नकारावुभावपि निवर्त्तेते। ननु च ङीषा व्यवहितोऽत्र णिरिति णावतिदेशः क्रियमाणस्तद्व्यवधाने न प्राप्नोतीति? नैष दोषः; इष्ठन्यपि हि ङोपा व्यवधानएव प्रातिपदकस्य पुंवद्भावः। तस्मादिहापि व्यवधानेऽपि तद्वदेव भविष्यति।
`स्रग्विणम्' इति। `अस्मायामेधास्रजो विनिः' (5.2.121) इति विनिः। स्रजयतीत्यत्र `संज्ञापूर्वको विधिरनित्यः' (व्या.प.64) इति `अत उपधायाः' (7.2.116) इति वृद्धिर्न भवति। `अह्गवृत्ते पुनरङ्गवृत्तावविधिर्निष्ठितस्य' (व्या.प.38) इति वपा। प्रापयतीत्येवमादौ भवत्येवानिष्ठितत्वात्। अत्र `अर्त्तिह्रो' (7.3.36) इत्यादिना पुक्। ननु भारद्वाजीयपाठे प्रादयो न सिद्ध्यन्ति; अपि तु स्रजयति वसयतीति लुक्, कनयतीत्यत्र च कन्नित्यत आह--`तदेतदुभयमप्युदाहरणमात्रम्' इत्यादि। तदेतद्भावद्वाजीयपाठे अन्येषाञ्च प्रयोजनमुपदर्शितम्, न त्वेतदुदाहरणमात्रपरिगणनम्। एतावदेव प्रयोजनमिति यस्मात् प्रादयोऽपीष्यन्ते। ननु `प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (धा.पा.ग.सू.186) इति चुरादिगण एव पठ्यते, तत् कस्मात् पुनरिह णाविष्ठवद्भाव उच्यते? अस्यैव प्रपञ्चार्थमित्येके। गणे वा स वक्तव्यः। `असौ इतरः' इति विकल्पप्रदर्शनार्थमित्यन्ये।।

156. स्थूलदूरयुवह्वस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः। (6.4.156)
यद्यपि पूर्वं भावसाधनो लोपशब्द उपात्तः, तथापीह कर्मसाधनो गृह्यते; यणादिपरिमिति निर्देशात्। भावसाधने हि तस्मिन् `कर्त्तृकर्मणओः कृति' (2.3.65) इति षष्ठी स्यात्। कर्मसाधने तु कर्मणस्तेनैषाभिहितत्वात् प्रथमैव युज्यत इति मन्यमानो लापशब्दस्य कर्मशब्दस्य कर्मसाधनतां दर्शयन्नाह--`यणादिपरं लुप्यते' इति। कथं पुनस्तस्यैव भावसाधनस्य सतः कर्मसाधनतोपपद्यते? कः पुनराह--`तस्यैव' इति! प्रतिसूत्रं ह्यनुवर्त्तमानो लोपशब्दो भिद्यते। ननु च यणादौ परस्मिन् लुप्ते सामर्थ्यात् तत्पूर्वस्यैव गुणो विज्ञास्यते, तत् किमर्थं पूर्वग्रहणम्? इत्याह--`पूर्वग्रहणं विस्पष्टार्थम्' ति।।

157. प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवंर्बहिगर्वर्षित्रब्द्राधिवृन्दाः। (6.4.157)
किं पुनः कारणं प्रियोरुगुरुदीर्घाणामेवेमनिजुदाह्रियते, नान्येषाम्? इत्याह--`प्रियोरुबहुलगुरुदीर्घाः' इत्यादि। `प्रियादिभ्य एवेमनिच् सम्भवति, नान्येभ्यः' इत्येवम्परमेतद्वाक्यमित्यर्थः। अन्यथा यद्यपि प्रियादय एव पृथ्त्रादिषु पठ्यन्ते, वर्णावाचिनो वा स्युः, तदोदाह्रियेतेमनिच् तेषामित्यकारणमेदिमनिचोऽत्रोदाहरणं स्यात्।।

158. बहोर्लोपो भू च बहोः। (6.4.158)
`बहोरुत्तरेषाम्' इति। एतेन प्रथमस्य बहोः पञ्चम्यन्ततां दर्शयति, तस्य च वहोरित्यनेनापि द्वितीयस्य षष्ठ्यन्तताम्। `भूयान्' इति। `आदेः परस्य' (1.1.54) इतीकारस्यव लोपः।
अथ किमर्थं बहोरिति पुनर्ग्रहणम्? इत्याह--`बहोरिति पनः' इत्यादि। असति हि बहोरिति ग्रहणे बहुशब्दस्य स्थानित्वं न प्रतीयेत; पञ्चम्यन्तेन निर्देशात्। तस्मात् स्थानित्वप्रतिपत्तये पुनर्बहोरित्यच्यते। `अन्यथा हि' इत्यादि। यदि बहोः इति नोच्येत, तदा प्रत्ययानामेव भूभावः स्यात्; `तस्मादित्युत्तरस्य' (1.1.67) इति वचनात्। ननु पृथग्निर्देशादेव प्रत्ययानां न भविष्यति, अन्यथा `भूलोपौ' इत्ययं ब्रूयात्? नैतदस्ति; अस्ति ह्यन्यत् पृथग्निर्देशस्य प्रयोजनम्। किम्? पृथक्स्थानिकौ यथा स्ताताम्, आदेर्मा भूतामिति। यदि `भूलोपौ' इत्येवमुच्येत, तदा `आदेः परस्य' (1.1.54) इत्याद्यस्यैव वर्णस्य पर्यायेण भूलोपो

स्यातामिति। अतो भिन्नस्थानिकौ यता स्यातामित्येवमर्थः पृथग्योगनिर्देशः स्यात्। तस्माद्युक्तमुक्तम्--`अन्यथा हि प्रत्ययानामेव भूभावः स्यात्' इति। चकारोऽत्र सन्नियोगार्थः।।

159. इष्ठस्य यिट् च। (6.4.159)
`लोपापवादो यिडागमः' इति। नाप्राप्ते तस्मिन्नस्यारम्भात्। `तस्मिन्निकार उच्चारणार्थः' इति। प्रयोजनान्तराभावात्। चकारः `बहोश्च भूः' इत्यनुकर्षणार्थः।।

160. ज्यादादीयसः। (6.4.160)
`ज्यायान्' इति। `प्रशस्यस्य श्रः' (5.3.60) `ज्य च' (5.3.61) इति ज्यादेशः। `लोपस्य यिट् च' इयादि। यद्यत्र लोपो यिटा न व्यवधीयते तदा तेनैव ज्यायानित्येतत् सिद्ध्यतीति कृत्वाऽऽदिति नोच्येतेत्यभिप्रायः। कथं पुनरादित्यनुच्यमाने लोपेन सिद्ध्यति? इत्यत आह--`लोपे हि सति' इत्यादि। अथ दीर्घोच्चारणं किमर्थम्, यावतान्तरतम्यादेव दीर्घस्य दीर्घ एव भविष्यति? नैतदस्ति; न हि `भाव्यमानोऽण् सवर्णान् न गृह्णाति' (व्या.प.35) इति।।

161. र ऋतो हलादेर्लघोः। (6.4.161)
`कर्त्तव्यम्' इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--उत्तरसूत्रे यद्विभाषाग्रहणं तदिहापि सम्बध्यते, सा च व्यवस्थितविभाषा, तेन पृथ्वादीनामेव भविष्यति। यद्येवम्, `हलादेर्लघोः' इत्येतन्न कर्त्तव्यम्, व्यवस्थितविभाषया हलादेर्लघोश्च भविष्यति? सत्यमेतत्; तद्विस्पटार्थं क्रियते।
`तत इह न भवति' इत्यादि। अक्रियमाणे तु परिगणने कृतयतीत्यादावपीष्ठवद्बावेन स्यादेवेति भावः।।

162. विभाषर्जोश्छन्दसि। (6.4.162)

163. प्रकृत्यैकाच्। (6.4.163)
`स्रजिष्ठः' इति। अत्र प्रकृतिवद्भावेन टिलोपो न भवति। ननु च `विन्मतोर्लुक्' (5.3.65) टिलोपं बाधिष्यते, नाप्राप्ते त्वस्मिंस्त्वस्यारम्भात्? नैतदस्ति; द्वौ टिलोपौ--एको विन्मत्वन्तस्य, अन्यो लुकि कृते सत्यवशिष्टस्य; तत्र योऽसौ विन्मत्वन्तस्य टिलोपस्तस्मिन्नाप्राप्ते लुगारभ्यत इति युक्तं यदसौ तं बाधते। यस्त्ववशिष्टस्य टिलोपस्तस्य प्राग्लुक्प्राप्त्यसम्भवादप्राप्त एव तस्मिन्नारभ्यमाणः कथं पश्चादुपजातप्राप्तिकं लोपं बाधेत। तस्मादारब्धव्यमिदम्।
`प्रकृत्याके राजन्य' इत्यादि। किं वक्तव्यमेतत्? न; कथं तर्हि `तुरिष्ठेमेयस्तु' (6.4.154) इत्येतन्निवृत्तम्। सामान्येनयं प्रकृतिवद्भावो विधेयः, विभाषति चानुवर्त्तते, सा च व्यवस्थितविभाषा। तेन यत्र यत्रेष्यते तत्र सर्वत्र भविष्यति, यत्र तु नेष्यते तत्र न भविष्यत्येव। एवम् `इनण्यनपत्ये' (6.4.164) इत्येवमादिकं प्रकृतिभावविधानमनर्थकं स्यादिति चेत्? न; प्रपञ्चार्थत्वात्। `राजन्यकम्' इति। `राज्ञोऽपत्यम्' इति। `राज्ञोऽपत्यम्' इति `राजरुषसुराद्यत्' (4.1.137) तस्मात्समूहेर्थे `गोत्रोक्षोष्ट्रोरभ्र' (4.2.39) इत्यादिनात्र वुञ्। `मानुष्यकम्' इति। मनोरपत्यमिति `मनोर्जातावञ्यतौ षुक्च' (4.1.169) इति येषां मतेऽपत्यार्थे यत्, तेषां पूर्वसूत्रेण वुञि कृते लोपः प्राप्नोति, स प्रकृतिबावान्निवर्त्तते। येषान्तु मतेन जातिमात्रे यत्, नापत्ये, तेषां नार्थः प्रकृतिभावेन; अनापत्ययकारत्वादेव हि लोपो न भविष्यति।।

164. इनण्यनपत्ये। (6.4.164)
`साङ्कूटिनम्, सांराविणम्, साम्मार्जिनम्' इति। `कूट दाहे' (धा.पा.1890), [परितापे (परिदाहे)--धा.पा.] `रु शब्दे' (धा.पा.1034), `मृजू शुद्धौ' (धा.पा.1066) `अभिविधौ भावे इनुण्' (3.3.44), `मृजेर्वृद्धिः' (7.2.114) सांकूटिन्, सांराविन्, सांमार्जिन्--इति स्थिते `अणिनुणः' (5.4.15) इति स्वर्थेऽण्। `मैधावः' इति। `अस्माया' (5.2.121) इत्यादिना विनिः, तदन्तात् प्राग्दीव्यतोऽणपत्यार्थे।।

165. गाथिवदथिकेशिगणिपणिनश्च। (6.4.165)
अपत्यार्थोऽयमारम्भः; अनपत्ये पूर्वेणैव सिद्धत्वात्। इन्नन्तत्वादेषाम्।।

166. संयोगादिश्च। (6.4.166)
अयमप्यपत्यार्थ आरम्भः। `शाङ्खिनः' इति। शङ्खमद्रवज्रशब्देभ्यो मत्वर्थे इतिः, तदन्तात् पूर्ववदण्।।

167. अन्। (6.4.167)
`अनपत्ये' इति। निवृत्तम्। सामान्येनाष्मत्रे विधिः। `सामनः, वैमनः' इति। `तस्येदम्' (4.3.120) इत्यण्। `सौत्वनः' इति। `षुञ् अभिषवे' (धा.पा.1247) `सुमुजोर्ङ्वनिप्' (3.1.106) इति ङ्वनिप, `ह्रस्वस्य पिति कृति तुक्' (6.1.71)।।

168. ये चाभावकर्मणोः। (6.4.168)
`सामन्यः, वेमन्यः' इति। `तत्र साधुः' (4.4.98) इति यत्।।

169. आत्माध्वानौ खे। (6.4.169)

`आत्मनीनम्' इति। `आत्मन्विश्वजनभोगोत्तरपदात् खः' (5.1.9)। `अध्वनीनम्' इति। अत्रापि `अद्वने यत्खौ' (5.2.16) इति खप्रत्ययः। `प्रत्यात्मम्' इति। आत्मानं प्रतीति `अव्ययं विभक्ति' (2.1.6) इत्यादिना यथार्थेऽव्ययीभावः। ततः `अनश्च' (5.4.108) इति टच्। `प्राध्वम्' इति। प्रगतमध्वानमिति प्रादिसमासः, `उपसर्गादध्वनः' (5.4.85) इत्यच्।।

170. न मपूर्वोऽपत्येऽवर्मणः। (6.4.170)
`चार्मणः' इति। `परिवृत्तो रथः' (4.2.10) इत्यर्थे `प्राग्दीव्यतोऽण्' (4.1.83)।
`वा हितनाम्न इति वक्तव्यम्' इति। हितनामशब्दस्य व प्रतिषेधो भवतीत्येतदर्थरूपं व्याख्येयमित्यथः। तत्रेदं व्याख्यानम्--इहापि तदेव विभाषाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा। तेन हितनाम्नो वा प्रतिषेधो भविष्यति।।

171. ब्राह्मोऽजातौ। (6.4.171)
यद्येतदेकमेव सूत्रं स्यात् ततो निममार्थ वा स्मात्? विध्यर्थं वा? यद्यपत्य इति वर्त्तते, ततोऽनन्तर सूत्रेणैव प्रकृतिभावे प्रतिषिद्धे `नस्तद्धिते' (6.4.144) इति टिलोपः सिद्ध्यत्येव, सिद्धे सत्येतन्नियमार्थ भविष्यति--`अजातावेवापत्यार्थे यथा स्यात्' इति। तथा च `तस्येदम्' (4.3.120) इत्यणि विहिते ब्राह्मो गर्भः, ब्राह्ममस्त्रम्, ब्राह्मं हविः, ब्राह्मी ओषधिरिति न सिद्ध्यति; अपत्याणोऽभावात्। अथापत्य इति निवृत्तम्, ततो विध्यर्थमेव भविष्यति। अपत्ये हि पूर्वसूत्रेण प्रकृतिबावः प्रतिषिद्धः, ततश्च `अन्' (6.4.167) इति इति प्रकृतिभावे प्राप्तेऽजातो ब्राह्म इत्येतट्टिलोपार्थं निपात्यते। एवञ्च विध्यर्थेऽस्मिन् सिद्धम्---ब्राह्मो गर्भः, ब्राह्मणस्त्रम्, ब्राह्मं हविरिति; ब्रह्मण इयं ब्राह्मी ओषदिरित्येतत्तु न सिद्ध्येत्; `अजातौ' इति प्रतिषेधात्। अपत्ये जातौ च `न मपूर्वोऽपत्येऽवर्मणः' (6.4.17)) इति प्रकृतिभावे प्रतिषिद्धे सति `नस्तद्धिते'(6.4.144) इति भवति टिलोपः--ब्राह्मो नारद इति, तथेहापि स्यात्--ब्रह्मणोऽपत्यमिति ब्राह्मण इति। एवमेकयोगे दोषप्रसङ्गमभिवीक्ष्य तत् परिजिहीर्षुराह--`योगविभाघोऽत्र क्रियते' इति। योगविभागे सति यदि `अपत्ये' इत्यनुवृत्तेरपत्य एव टिलोपो निपात्यते, पूर्ववत् सिद्धे सति नियमार्थमेव निपातनं स्यात्, ततश्च स दोषस्तदवस्थ एव स्यात्, यः प्राङनियमपक्षे उक्तः। तथा च योगविभागकरणमनर्थकं स्यात्। तस्मादपत्याधिकारोऽपि योगविभागकरणसामर्थ्यादपत्यादन्यतर `ब्राह्मः' इत्येतन्निपात्यते। एवमनपत्येऽपि `ब्राह्मः' इति निपातनात् `ब्राह्मो गर्भः, ब्राह्मस्त्रम्, ब्राह्म हविरित्येतत् सिद्ध्यति। ततः `अजातौ' इत्ययं द्वितीयो योगः। `न मपूर्वोऽपत्येऽवर्मणः' (6.4.170) इति प्रकृतिभावे प्रतिषिद्धे यः `नस्तद्धिते' (6.4.144) इति टिलोपः, स मा भूदित्येवमर्थोऽपत्य इत्येवेति। एतेनास्मिन्द्वितीये योगे `अपत्ये' इत्यनुवर्तत इत्याचष्टे। `अजातौ' इति च प्रसज्यप्रतिषेधोऽयम्। तत्र जातेरपत्यार्थेन सम्बन्धः, नञ्सतु भवतिना। तमेवार्थं वृत्तौ दर्शयन्नाह--`अपत्ये जातावणि ब्राह्मण इति लोपो न भवति' इति। जातिविशिष्टे।पत्ये विवक्षितेऽणि परतो ब्राह्मण इत्यत्र टिलोपो न भवतीत्यर्थः।
अपत्य इत्येव--`ब्रह्मो ओषधिः' इति। प्रत्युदाहणव्याजेन योगविभागे जातिमात्रविवक्ष्यां ब्राह्मी ओषधिरित्येतदपि सिद्धं भवतीति दर्शयति।।

172. कार्मस्ताच्छील्ये। (6.4.172)
`यद्येवम्' इति। यदि णकारोऽत्र प्रत्ययः, एवं सति किमर्थमिदम्? नैवास्य प्रयोजनं किञ्चिदित्यर्थः। किं कारणम्? इत्याह--`नस्तद्धित इत्येवं हि' इत्यादि। यद्धि लक्षणेन न प्राप्नोति तदर्थं निपातनमारभ्यते, इह तु `नस्तद्धिने' (6.4.144) इत्येवं सिद्धः, न हि णे केनचित् प्रकृतिभाव उक्तो यतस्तत्र टिलोपातनमारभ्यमाणमिदमर्थवत्स्यात्। अणि हि प्रकृतिभावोऽणन्तस्योक्तः, न तु णे। अनन्तरोक्तमर्थमभ्युपगच्छति--यदि सत्यम्, किमर्थमिदमित्याह--`ज्ञापकार्थम्' इत्यादि। `अण्कृतानि' इत्यादि। अणि कृतानि कार्याणि अष्कृतानि, `सप्तमौ' (2.1.40) इति योगाविभागात्समासः। अथ वा अणा कृतानि `कर्तृकरणे कृता बहुलम् (2.1.32) इति समासः। `किमेतस्य ज्ञापनेन प्रयोजनम्? इत्याह--`तेन' इत्यादि। चुरा शीलमस्याः, तपः शीलमस्या इति `छत्त्रादिभ्यो णः' (4.4.62) इति णः, तदन्तन्ङीप्। `ताच्छीलिके णः' इत्यस्यार्थस्य ज्ञापितत्वात् `तदस्यां प्रहरणमिति क्रीडायां णः' (4.2.57) इति दण्डात् णे दाण्डेति--अण्कृतं कार्यं न भवति।
यदि तर्हि ताच्छीलकेष्वण्कृतमिष्येत, अणेव छत्त्रादिभ्यः कस्मान्नोच्येत, तत्राप्ययमर्थः--ज्ञापनार्थं निपातनं कर्त्तव्यं न भवति? युक्तमेतदुक्तवानसि; वैचित्र्यार्थ त्वण्कृतः।
`कार्मणम्' इति। `तद्युक्तात् कर्मणोऽण्' (5.4.36) इत्यण्। कर्मणा युक्तं कार्मणमिति।।

173. औक्षमनपत्ये। (6.4.173)
`औक्षं पदम्' इति। `तस्येदम्' (4.3.120) इत्यण्।।

174. दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि। (6.4.174)
`उपचाराद् ग्रन्थोऽप्यथर्वन्नित्युच्यते' इति। उपचारस्य तु तत्प्रोक्तत्वमेव निबन्धनम्। `आथर्वणिकः' इति। `वसन्तादिभ्यष्ठक्' (4.2.66)।
`भ्रौणहत्यम्' इति। भ्रणं हतवानिति `ब्रह्मभ्रूणवृत्रेषु क्विप्' (3.2.87), तदन्तात् ष्यञ्। `हरस्तोऽचिण्णलोः' (7.3.32) इत्यनेनैव तकारः सिद्धः, तत्किं निपात्यते? इत्याह--`इनस्तोऽचिण्णलोः' इत्यादि। `धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यसम्प्रत्यय एव' (जै.वृ.31)। `धातोः' (6.1.162) इत्येवं यो विहितः प्रत्ययः, तत्र कार्यं विज्ञायत इत्यर्थः। न च ष्यञ्प्रत्ययो धातुप्रत्ययः, किं तर्हि? प्रातिपदिकप्रत्ययः तेन तत्र `हनस्तोऽचिण्णलोः' (7.3.32) इति तकारो न प्राप्नोति, अतो निपात्यते। कथं पुनर्विज्ञापते--धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यं भवतीति? नैतदस्ति; `न क्वादेः' (7.3.59) इत्यत्र हि नेति योगदिभागादपि शक्यते कुत्वनिवृत्तिः कर्त्तुम्। `भ्रौणध्नः वर्त्रध्नः' इति। अपत्यार्थेऽण्। इक्ष्वाकुशब्दाद्यदा `जनपदशब्दात्' (4.1.138) इत्यादिनाञ् भवति, तदैक्ष्वाकशब्दो ञित्स्वरेणाद्युदात्तः। यदा तु `कोपधात्' (4.2.132) इति शैषिकोऽण्, तदान्तोदात्तः।
ननु चैवंविधसूत्र एकस्योपादानेऽपरस्य ग्रहणं न सिद्ध्यति, तस्मादुभयोरपि स्वरभिन्नयोरुपादानं कर्त्तव्यम्--`एश्वकः, ऐक्ष्वकः' इति। एतच्चोद्यमपाकर्त्तुमाह--`स्वरसर्वनाम्ना' इत्यादि। उदात्तादीनां स्वराणा मविभागेनोच्चारणम्, एकश्रुतिः। सा च स्वराणां सर्वनामेव सर्वनाम यथैव हि `तस्यापत्यम्' (4.1.92) इत्यादौ निर्देश उपगुप्रभृतीन्विशेषान्विभागेन प्रतिपदयति, ततैकश्रुतिरप्युदात्तादीन्स्वरविशेषान्। तथात्रायमैक्ष्वाकशब्दः पठ्यते--नाप्याद्युदात्तो नाप्यन्तोदात्तः, तस्य त्वेवं पठितस्य प्रत्ययविशेषात्स्वरविशेषो भवति--यदाञ् तदान्तादोत्तः।
`इत्यादेशापवादः' इति। केकयादि (7.3.2) सूत्रेणेयादेशः प्राप्नोति, तदपवादो लोपो निपात्यते। `अतो गुणे' (6.1.97) पररूपत्वम्।
`अथ किमर्थम्' इति। येनाभिप्रायेण पृष्टवांस्तं स्वयमेवाविष्कर्त्तुमाह--`ततोऽञि कृते] इत्यादि। `सिद्धम्' इति। रूपस्वरूपयोरभेदात्। `यलोपार्थश्च' इत्यादिना बिदादिषु पाठे यो गुणस्तं दर्शयति। `यस्कादिषु च' इत्यादि। तत्र हि तस्य बहुषु गोत्रप्रत्ययस्य लुग्यथा स्यादित्येवमर्थः पाठः। स च लुग्बिदादिषु पाठे सति `यञञोश्च' (2.4.64) इत्यनेनैव सिद्ध्यतीति नार्थो यस्कादिषु पाठेन। `मैत्रेयः सङ्घः' इत्यादि। एतेन बिदादिषु पाठे यो दोषस्तं दर्शयति। बिदादिषु पाठे सति सर्वमेतदुपपद्यते यदुक्तवानासि; किन्तु मैत्रेयशब्दादञन्तात् `सङ्घाङ्कलक्षण' (4.3.127) इत्यादिनाण्प्रत्ययः स्यात्, ततो मैत्रेय इत्यनिष्टं रूपं स्यात्, न तु मैत्रेयक इत्यभीष्टम्। ढञन्तात् तु `गोत्रचरणाद्वुञ्' (4.3.126) भवतीति मैत्रेयक इत्यभीष्टं सिद्ध्यति। `हिरण्मयः' इति। `मयड्वैतयोर्भाषायाम्' (4.3.143) इति मयट्।।

175. ऋत्व्यवास्त्वास्त्व्यमाध्वीहिरण्ययानि च्छन्दसि। (6.4.175)
`ऋत्व्यम्, वास्त्व्यम्' इति। `भवे छन्दसि' (4.4.110) इति यत्। `वास्त्वम्' इति। `तस्येदम्' (4.3.120) इत्यण्। एवं `माध्वी' इत्यत्रापि। `हिरण्ययः' इति। पूर्ववन्मयट्।।

इति बोधिसत्त्वदेशीयाचार्यश्रीजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरहणपञ्जिकायां षष्ठाध्यायस्य
चतुर्थः पादः।।

7.1

श्रीबोधिसत्त्वदेशीयाचार्थजिनेन्द्रबुद्धिपादविरचिता
न्यासापरपर्याया
काशिकाविवरणपञ्जिकाख्या
काशिकाव्याख्या
- - -
सप्तमोऽध्यायः
प्रथमः पादः

1. युवोरनाकौ। (7.1.1)
शास्त्रस्य लाघवार्थमिह, युवू प्रत्ययावुपदिष्टौ, तयोः स्थानेऽनाकावादेशौ विधीयते। यदि हि यत्र यत्र युवोरुपदेशस्तत्र तत्रानाकावादेशो विधियेयाताम्, तदा

शास्त्रस्य गौरवं स्यात्; तयोः प्रभूतवर्णसमुदायात्मकत्वात्। इह युवोरनुनासिकयणोः प्रत्यययोरिदं ग्रहणम्, न च तथाविधावननुबन्धकौ युवू शास्त्रे सम्भवतः; तत्र सामर्थ्याद्विशेषकराननुबन्धानुत्सृज्य सामान्येन तयोर्ग्रहणं विज्ञायते? इत्याह---`युवु--इत्येतयोरुत्सृष्टविशेषणयोः' इति। इदं ग्रहणमिति वक्ष्यमाणेन सम्बन्धः। विशेषणं यद्योयोगं लकारादि, तदुत्सृष्टं परित्यक्तं ययोस्तौ यथोक्तौ। एतेन `युवो' इति ल्युडादीनां सामान्येन निर्देश इति दर्शयति। यद्यत्र युवोरित्याविशेषेण ग्रहणं स्यात् तदा `यु मिश्रणे' (धा.पा.1033) [`यु मिश्रणेऽमिश्रणें च'--धा.पा.] युतः, युतवान्, युत्वा; `दिषु क्रीडादौ (धा.पा.1107) द्यूतः, धूतवान्, धूत्वा; `ऊर्णाया युस्' (5.2.123) ऊर्णायुरित्येवमादावप्यनाकौ स्याताम्, अतोऽस्यातिप्रसङ्गनिरासायाह--`अनुनासिकयणोः' इति। अनुनासिको यण्ययोरिति बहुव्रीहिः। सन्ति हि यणः सानुनासिकाः निरनुनासकाश्च, तत्र हि ययोरनुनासिको यण् तयोरिदं ग्रहणम्। अनुनासिकयणौ च यौ युवू तौ प्रत्ययावेव, नाप्रत्ययाविति दर्शयितुमाह--`प्रत्यययोः' इति। अन्ये ,त्वप्रत्ययनिवृत्त्यर्थं प्रत्यययोरित्युक्तमिति वर्णयन्ति, तदयुक्तम्; अनुनासिकयणोरित्यनेनैवाप्रत्ययनिवृत्तेः सिद्धत्वात्। तन ह्यप्रत्ययावनुनासिकयणौ युवू शास्त्रे स्तः। तस्मादनुनासिकयणौ यो यूवू तौ प्रत्ययावेव, नाप्रत्ययाविति सम्भवप्रदर्शनार्थं प्रत्यययोरित्युक्तमिति विज्ञायते। अनुनासिकयणोश्च प्रत्यययोर्ग्रहणे सत्यङ्गस्येति सम्बन्धलक्षणेयं षष्ठी वित्रेया। ङ्गसम्बन्धिनोर्युवोरिति सम्बन्धः। स पुनर्निमित्तिनिमित्तभावलक्षणः। प्रत्ययनिमित्तो ह्यङ्गस्यात्मलाभ इत्यङ्गं निमिति, प्रत्ययो निमित्तम्। `योरनो वोरकः' इति। अनेन यथाक्रमं स्थान्यादेशसम्बन्धमाचष्टे'। `नन्द्यादिभ्यो ल्युः' इति। `नन्दिग्रहि' (3.1.134) इत्यादिना। `नन्दनः, रमणः' इति। `टु नदि समुद्धौ' (धा.पा.67), `रमु `क्रीडायाम्' (धा.पा.853)। हेतुमति णिच्, तदन्ताल्लयुः। `सायन्तनः' इति। सायमादिभ्यष्ट्युट्युलादिति। `सायञ्चिरम्' (4.3.23) इत्यादिना। जातादौ शैषिकेऽर्थे तद्धितः। `वासुदेवकः, अर्जुनकः' इति। वसुदेवस्यापत्यं वासुदेवः, वासुदेवो भक्तिरसयेति `वसुदेवार्जुनाभ्यां वुन्' (4.3.98) इति वुन्--वासुदेवकः, अर्जुनकः।

ऊर्णा अस्य सन्तीत्यूर्णायुः, तत्रानुनासिकयणत्वाभावान्न भवति। किं पुनः कारणमेवमादीनीं यणोऽनुनासिकत्वं नास्ति? इत्याह--`एवमादीनाम्' इत्यादि। `प्रतिज्ञानुनासिक्याः पाणिनीयाः' इति। यत्र तैरनुनासिकत्वं प्रतज्ञायते तत्रैव भवति, नान्यत्र। न च युस्प्रभृतीनां तैस्तत् प्रतिज्ञायते, लक्ष्यानुरोधात्। तेन तेषां यणोऽनुनासिकत्वं न भवति। आदिशब्देन `अहं शुभमोर्युस्' (5.2.140) इत्येवमादयो गृह्यन्ते। ननु च `अहंशुभमोर्युस्' `कंशंभ्यां वभयुस्तितुतयसः' (5.2.138) इत्यतर, सित्करणादेव न भविष्यति, सित्करणं हि पदसंज्ञार्यम्, पदसंज्ञा चानुस्वारार्था--तस्यां सत्यां `मोऽनुस्वारः' (8.3.23) इत्यनुस्वारो यथा स्यात्। यदि चात्रानादेशः स्यात् तदा सित्करणमनर्थकं स्यात्, न ह्यनादेशे कृतेऽनुस्वारो भवति, तद्विधौ `हलि सर्वेषाम्' (8.3.22) इत्यतो हलीत्यनुवृत्तेः। आदेशे कृते न भवति; हलादित्वाभावात्? नैतदस्ति; वचनसामर्थ्यादजादावप्यनुस्वारः स्यात्। सित्करणस्यान्यदपि प्रयोजनम्--पदसंज्ञा। तत्प्रजनम्--भसंज्ञाबाधः। भसंज्ञायामध्ययानां भमात्रे टिलोपः स्यात्। अवग्रहार्थे वा सित्करणं स्यात्, कुतस्यानर्थक्यम्!
इह युवोरिति निर्देशे समाहारे वा द्वन्द्व आश्रीयते, इतरेतरयोगे वा; तत्र पूर्वस्मिन् पक्षे षष्ठ्येकवचने कृते `स नपुंसकम्' (2.4.17) इति नपुंसकत्वात् `इकोऽचि विभक्तौ' (7.1.73) इति नुमा भवितव्यम्, ततश्च `युवुनः' इति निर्द्देशः स्यात्। इतरस्मिंस्तु पक्ष ओसि परतो यणादेशे कृते युष्वोरिति द्वितीयवकारश्रवणमापद्येत? इत्येतच्चोद्यनिरासायाह--`इह युवोरिति निर्देशः' इत्यादि। `अनित्यमागमशासनम्' इति। आगमानां शासनम्=विधानम्, तदनित्यमिति; क्वचित् तदभावात्। अथ वा--आगमाः शिष्यन्ते विधीयन्ते येन शास्त्रेण तदागमशासनं शास्त्रम्, तदनित्यम्, अविद्यमानं नित्यं कार्यमस्येति कृत्वा। अनित्यता पुनरागमशासनस्य `घोर्लोपो लेटि वा' (7.3.70) इत्यत्र वाग्रहणाल्लिङ्गाद्विज्ञायते। तद्धि ददद्, ददादित्यत्र नित्यं घोर्लोपो मा भूदित्येवमर्थं क्रियते। यदि च नित्यमागमशासनं स्याद्वाग्रहणमनर्थकं स्यात्। भवतु नित्यो लोपः, सत्यपि तस्मिन् `लेटोऽडाटौ' (3.4.94) इत्यटि कृते ददद् ददादिति सिद्ध्यत्येव। अनित्यत्वे त्वागमशासनस्याडागमाभावान्न सिध्यति। ततो वावचनमर्थवद्भवति।
`नपुंसकलिङ्गता वा' इत्यादि। अथ वा नपुंसकलिङ्गतैवात्र नास्ति। किं कारणम्?इत्याह--`लिङ्गमशिष्यम्' इत्यादि। लिङ्गस्य हि लोकधर्मत्वाल्लोक एवाश्रयः। तस्माल्लोकत एव सिद्धत्वात् तदश्रिष्यं न विधातव्यम्। लिङ्गशास्त्रमेवात्र तादर्थ्याल्लिङ्गशब्देनोच्यते। लिङ्गार्थ शास्त्रमशिष्यं न कर्त्तव्यम्, तत्साध्यस्य लिङ्गस्य लोकाश्रयत्वात्। तदनेन `स नपुंसकम्' (2.4.17) इत्यादेः प्रत्याख्यानं दर्शयति। तस्मिंश्च प्रत्याख्याते सति तद्द्वारेण तस्य नपुंसकत्वं न भवतीति कुतो नुम्प्रसङ्गः! `इतरेतरपक्षे तु च्छान्दसत्वाद्वर्णलोपः' इति। `छन्दोवत् सूत्राणि भवन्ति' इति। छान्दसत्वम्। तेन यथेष्कर्त्तारमध्वर इत्यत्र निसो नकारलोपः तथेहापि वकारस्यापि लोपो द्रष्टव्यः।।

2. आयन्नेयीनीयियः [`आयनेयीनीयियः'--इति काशिका पाठः] फढखच्छघां प्रत्ययादीनाम्। (7.1.2)
फादयोऽपीह शास्त्रे लाघवार्थमुपदिष्टाः, ततस्तेषामायन्नादय आदेश विधीयन्ते। तेन च विधीयमानाः फकारादेर्हल्मात्रस्य भवन्तीति वेदितव्यम्। कुत एतत्? अन्ते घामित्यनच्कनिर्द्देशात्; इतरथा हि घानामित्येवं ब्रूयात्। अन्यत्र त्वागन्तुकोऽकार उच्चारणार्थ एव। अत एव प्रत्ययादौ वर्त्तमानस्य फादेर्व्यञ्जनमात्रस्य स्थानित्वेनोपादानान्निरनुबन्धकपरिभाषात्र (व्या.प.53) नोपतिष्ठते; सर्वत्र हि फादयो निरनुबन्धकाः। यत्र चोभयं सम्भवति तत्रैवास्या उपस्थानम्, `नाडायनः' इति। `नडादिभ्यः फक्' (4.1.99) अपत्यार्थे फक्प्रत्ययः। उत्तरेष्वप्युदाहरणेष्वीयादेशोदाहरणादन्यत्रापत्यार्थे वेदितव्यः। `सौपर्येणः, वैनतेयः' इति। सुपर्णाविनताभ्यां ढक्। `आढ्यकुलीनः' इति। `अपूर्वपदादन्यतरस्यां यड्ढकञौ' (4.1.140) इत्यत्रापूर्वपदादिति वचनात् `कुलात्खः' (4.1.139) इत्यनेन सपूर्वपदादपि खो भवति। `गार्गीयः, वात्सीयः' इति। गार्ग्यवात्स्यशब्दाभ्यां यञन्ताभ्यां `तस्येदम्' इत्यर्थविवक्षायां छः,

`यस्येति च' (6.4.148) इत्यकारालोपः, `आपत्यस्य च तद्धितेऽनाति' (6.4.151) इति यकारलah_>
`फक्कति, ढौकते' इति। `फक्क नीचैर्गतौ' (धा.पा.116), `ढोकृ गतौ' (धा.पा.98), `खनु अवदारणे' (धा.पा.878), `छिदिर् द्वैधीकरणे' (धा.पा.1440), `घूण घूर्ण भ्रमणे'[`घुण'--धा.पा.] (धा.पा.437,438)-इत्येतेषां रूपाणि। ढौकतिधूर्णत्योरनुदात्तेत्त्वादात्मनेपदम्। `ऊरुदध्नम्, जानुदध्नम्' इति। ऊरू प्रमाणमस्य `प्रमाणे द्वयसच्' (5.2.37) इत्यादिना दध्नच्।
इहैत आयन्नादयोऽह्गाधिकारे विधीयमानाः प्रकृतिप्रत्ययावपेक्ष्य भवतीति बहिरङ्गाः, प्रत्ययाद्युदात्तत्वं तु प्रकृत्यनपेक्षत्वात् प्रत्ययमात्रमाश्रित्य भवतीत्यन्तरङ्गम्; ततो बहिरङ्गा यावदायन्नादयो न भवन्ति तावदेव प्रत्ययाद्युदात्तत्वेन भवितव्यम्, तस्मिन् कृते सत्यादेशा भवन्तो यत्र स्वरार्थोऽनुबन्धो न विधीयते `शिलाया ढः' (5.3.102), `वृद्धाच्छः' (4.2.114) इत्यादौ तत्रानियतस्वराः प्राप्नुदन्तीत्यस्य चोद्यस्य निरासायाह--`इहैत आयन्नादयः' इत्यादि। अयमभिप्रायः-आयन्नादयोऽप्यन्तरङ्गा एव। यदि हि `अङ्गस्य' (6.1.4) इत्यत्राभिसम्बध्यते तदा स्यात् तेषां प्रकृतिप्रत्ययापेक्षया बहिरङ्गत्वम्। न चात्र तदभिसम्बध्यते; प्रयोजना भावात्। तथा हि--अङ्गस्य निमित्तं ये प्रत्ययास्तदादीनां फादीनामायन्नादयो यथा स्युः, अन्येषां मा भूवन्नित्येतत् प्रयोजनम्। एतच्च विनाप्यङ्गाधिकारं सामर्थ्यादेव लभ्यते। न हि फादीनां मद्ये सोऽस्ति प्रत्ययो योऽङ्गस्य निमित्त न भवति। तस्मात् प्रयोजनाभावादङ्गस्येत्येतन्नाभिसम्बध्यते। तेन स्थानिमात्रमेवादेशा अपेक्षन्ते, न प्रकृतिमिति तेऽप्यन्तरङ्गा एव। ततश्च परत्वात् प्रत्ययोपदेशकाले तैरेव तावद्भवितव्यम्, ततश्च प्रत्ययाद्युदात्तत्वेनेति प्रत्ययोपदेशकाल एवायन्नदयो भवन्तीति तेषु कृतेषु प्रत्ययाद्युदात्तत्वं भवतीति। अत्र ज्ञापकमप्याह--`तथा च' इत्यादि। एवञ्चेत्यर्थः। घचश्चित्कारणस्यैतत् प्रयोजनम्--`चितः' (6.1.163) इत्यन्तोदात्तत्वं यथा स्यात्। यदि च प्रत्ययोपदेशावस्थायामेवायन्नादयो भवन्ति, एवं सति घचश्चित्करणमर्थवद्भवति; नान्यथा। अन्यथा हि यद्युपदेशादस्थाया उत्तरकालमेते स्युस्ततो यत्रैवासति चित्करण उदात्तत्वं भवति, धकाराकारे सत्यपि चित्करणे तत्रैव तेन भवितव्यमिति चित्करणमनर्थकं स्यात्। तस्माच्चित्करणादवसीयते--प्रत्ययोपदेशकाल एवैत आयन्नाद्यादेशास्तावद्भवन्ति, पश्चात् प्रत्ययाद्युदात्तत्वमिति भावः।
ननु च व्यञ्जनस्यैते विधीयन्ते, तच्च व्यञ्जनमस्वरम्, एवाञ्चावश्यं येन केनचित् स्वरेण भवितव्यम्, उदात्तादिगुणरहितस्याचोऽसम्भवात्। तत्र स्थानिनः स्वराभावादान्तरतम्यं नास्तीति स्थानेन्तरतमपरिभाषया (1.1.50) अनुपस्थाने सत्यनियतस्वरैरेभिर्भवितव्यम्, ततश्च यदि चित्त्वं न स्यात्, पश्चाद्विधीयमानानामेषां यदाद्युदात्तस्वरो भवति तदा स एव स्वरः प्रसज्येत; सतिशिष्टत्वात्। तस्मात् तमपि सतिशिष्टस्वरं बाधित्वाऽन्तोदात्तत्वं यथा स्यादित्येवमर्थं घचश्चित्करणम्। ततः कुतो ज्ञापकत्वमेतच्चिन्त्यम्। अथ `शमेः खः' (प्.उ.1.104) शङ्खः, `षणो ढः' (पं.उ.4.104) षण्ढः--इत्येवमादीनां कस्मादादेशा न भवन्ति? इत्याह--`शङ्खः, षण्ढः' इत्यादि। `लशक्वतद्धिते' (1.3.8), `चूटू' (1.3.7) इतीत्संज्ञापि बहुलवचनादेव न भवतीति वेदितव्यम्। `ऋतेरीयङ' इत्यादि। यदयं `ऋतेरीयङ' (3.1.29) इतीयङं शास्ति तज्ज्ञापयति--धातुप्रत्ययानामायन्नादयो न सन्तीति। यदि हि स्युः, `ऋतेश्छङ' इति। ब्रूयात्। ननु सिद्धे विधिरारभ्यमाणो ज्ञापकाय भवतीति? न च च्छङा सिध्यतीति, छङि हि सति वलादिलक्षण इट् प्रसज्येत, ततश्चानादित्वादादेशो न स्यात्? नैतदस्ति; यस्मादन्तरङ्गत्वादादेशेनैव भवितव्यम्। अन्तरङ्गत्वन्तु तस्योपदेशावस्थायामेव विधीयमानत्वात्। आदेशे च कृते वलादित्वाभावादिट्प्रसङ्गो नास्ति। तदेतदीयङ्वचनं ज्ञपकमेव।
`एजेः खश्' इत्यादि। तु शब्दः शङ्खः, षण्ढ इत्येदमादिभ्यो विशेषप्रदर्शनार्थः। यत्रेत्संज्ञा नास्ति--शङ्खादौ, तत्रादेशप्रसङ्गे सति तन्निरासार्थ बहुलवचनमिति, `ऋतेरीयङ्' (3.1.29) इति वावचनमुपन्यस्तम्। `एजेः खश्' (3.2.28) इत्येवमादौ तु `लशक्वतद्धिते' (1.3.8) इतीत्संज्ञया भवितव्यमित्यादेशप्रसङ्गो नास्त्येव। ततो न तत्र तदभावार्थं बहुलवचनम्, `ऋतेरीयङ' इति वावचनमुपन्यसनीयमिति भावः। आदिशब्देन `प्रियवसे वदः खच्' (3.2.38), `पुंसि संज्ञायां घः प्रायेण' (3.3.118) इत्येवमादीनां ग्रहणम्। स्यादेतत्--अनवकाशं खकारघकारयोरादेशवचनम्, अतस्तेन बाध्यमानेत्संज्ञा कथमत्र स्यात्? इत्याह--`तद्धिते' इत्यादि। `खित्यनव्ययस्य' (6.3.66) इति ह्रस्वविधानम्, `चजोः कु घिण्ण्यतोः' (7.3.52) इति कुत्वविधानं ज्ञापकम्--न ह्यादेशविधानेनेत्संज्ञायां बाधितायां तदुपपद्यते; खितो घितश्चात्यन्तासम्भवात्। `आयन्नीनोर्नकारस्य' इत्यादि। आयन्नीनोर्नकारोऽन्ते वर्त्तत इति तस्य `हलन्त्यम्' (1.3.3) इतीत्संज्ञा प्राप्नोति, तस्याञ्च स्त्यां `तस्य लोपः' (1.3.9) इति कृते नाडायनः, आढ्यकुलीन इत्यादि न सिध्यति। तस्मादायस्नीनोर्नकारस्येत्संज्ञायां प्राप्तायां तत्प्रतिविधानं कर्त्तव्यम्। स्यादेतत्। प्रयोजनाभावादेवेत्संज्ञा न भविष्यति? इत्यत आह--`नित्कार्थं हि' इत्यादि। तत्पुनः `ञ्नित्यादिर्नित्यम्' (6.1.197) इत्याद्युदात्तत्वम्। प्रतविधानं पुनरत्र `प्राचामवृद्धात् फिन् बहुलम्' (4.1.160) इत्यत्र फिनो नकारानुबन्धकरणम्। तस्यांतत् प्रयोजनम्--नित्त्वादाद्युदात्तत्वं यथा स्यात्। तत्र यद्यायन्नीनोर्नकारस्येत्संज्ञा स्यात्, नित्त्वे सत्याद्युदात्तत्वस्य सिद्धत्वात् फिनो नित्करणमनवर्थकं स्यात्। ननु `फेश्छ च' (4.1.149) इत्यततर सामान्यग्रहणार्थं स्यात्, तस्मिन्नसति निरनु बन्धकपरिभाषयास्यैव ग्रहणं स्यात्, न फिञः? नैतदस्ति; तत्र हि `वृद्धाट्ठक् सौवीरेषु बहुलम्' (4.1.148) इति बहुलग्रहणानुवृत्तेः फिञ एव ग्रहणमिष्यते, न फिनः। तदेतत् फिनो नित्करणमित्संज्ञाभावस्य ज्ञापकमेव। योगपक्षं चेदं ज्ञापकम्--अनेन योगेन विहितस्यादेशस्य यो नकारस्तस्मेत्संज्ञा न भवतीति। तेनेनोऽपि नकारस्येत्संज्ञाऽभावो न भवति सिद्धः।।

3. झोऽन्तः। (7.1.3)
`प्रत्ययग्रहणमनुवर्त्तते' इति। अनन्तरसूत्रात्। यद्येवम्, एकयोगनिर्दिष्टत्वादादिग्रहणमप्यनुवर्त्तेत, ततश्च शयान्तै--इत्यत्र न स्यात्, चकारस्यादित्वाभावात्?

इत्यत आह--`आदिग्रहणं निवृत्तम्' इति। एवं मन्यते--स्वरितत्वप्रतिबद्धा हि शब्दानामनुवृत्तिः, तच्च स्वरितत्वं प्रतिज्ञाधर्मः--`प्रतिज्ञास्वरिताः पाणिनीयाः' इति--यत्रैव तैः स्वरितत्वं प्रतिज्ञायते तत्रैव भवति, नान्यत्रेति। तेनैकयोगनिर्दिष्टानामप्येकतरस्यानुवृत्तिर्न विरुध्यते। इह च प्रत्ययस्यैव स्वरितत्वं प्रतिज्ञायते, नादिग्रहणस्य। तेन सत्यप्येकयोगनिर्दिष्टत्वे प्रत्ययग्रहणमनुवर्त्तते। `आदिग्रहणं निवृत्तम्' इति। `अन्त इत्ययमादेशो भवति' इति। अकारसहित एवादेशः करणीयः। अकारः--तकारेत्संज्ञा मा भूदित्येवमर्थः। स च जरन्तः, वेशन्त इत्यत्र। कुर्वन्तीत्यादौ `न विभक्तौ तुस्माः' (1.3.4) इति प्रतिषेधादेवेत्संज्ञा न भवति। अथ तु `उणादयो बहुलम्' (3.3.1) इति वचनाज्जरन्तः, वेशन्त इत्यादौ न भवति? तथा च सत्यकार उच्चारणार्थः। `न विभक्तौ तुस्माः' (1.3.4) इत्यस्यानित्यत्वज्ञापकार्थं वाऽकारोच्चारणम्। `तेन किमोऽत्' (5.3.12) इत्यादीनां तकारेत्संज्ञा भवति। `कुर्वन्ति' इति। `अत उत्सार्वधातुके' (6.4.110) इत्युत्त्वम्। `शयान्तै' इति। शीङः `लिङर्थे लेट्' (3.4.7), `लेटोऽडाटौ' (3.4.94) इत्याट्, टेरेत्त्वम्, `एत ऐ' (3.4.93) इत्यनुवर्त्तमाने `वैतोऽयन्त्र' (3.4.96) इत्यैत्त्वम्। `उज्झिता' इति। `उज्झ उत्सर्गे' (धा.पा.1304) तृच्। `ऋदुशनस्' (7.1.94) इत्यादिनानङ्, `नोपधायाः' (6.4.7) `सर्वनामस्थाने च' (6.4.8) इति दीर्घः। `उज्झितुम्' इति। तुमुन्। `उज्झितव्यम्' इति। तव्यः।

`अस्मिन्नपि' इत्यादि। ननु चान्तरङ्गत्वात् प्रत्ययाद्युदात्तत्वेन प्राग्भवितव्यम्, पश्चादादेशेन? नैवम्; अन्तादेशस्याप्यन्तरङ्गत्वात्। अन्तरङ्गत्वं तु तस्यायन्नादिवद्वेदितव्यम्। उभयोरन्तरङ्गत्वात् पूर्वमन्तादेशः, पश्चात् प्रत्ययाद्युदात्तत्वम्। अत्रैव ज्ञापकमाह--`तथा च' इत्यादि। एतच्च "`घच्छौ च' (4.4.117) इति घचश्चित्करणमनर्थवद्भवति"--इत्येतद्वाख्यानेन व्याख्यातमिति। प्रत्ययाद्युदात्तत्वात् पूर्वमन्तादेशस्य भावे सति द्विषन्तीत्यत्र मध्योदात्तत्वम्; अन्यथाऽन्तोदात्तता स्यात्। सा चानिष्टेति पूर्वमन्तादेशः क्रियते।।

4. अदभ्यस्तात्। (7.1.4)

अनात्मनेपदार्थं आरम्भः; आत्मनेपदेषूत्तरसूत्रेणैव सिद्धत्वात्। `ददति' इति। `श्नाभ्यास्तयोरातः' (6.4.112) इत्याकारलोपः। `ददतु' इति। लोट्, `एरुः' (3.4.86) इत्युत्वम्। जक्षति, जाग्रतीत्यत्र `जक्षित्यादयः षट्' (6.1.6) इत्यभ्यस्तसंज्ञः।

युक्तं जक्षित्यादिकमुदाहरणम्, ददतीत्याद्ययुक्तम्; अत्र झकारस्यात्मलाभकालसमनन्तरमेव ताददन्तरङ्गत्वादन्तादेशेन भवितव्यम्, ततः शपः श्लुः, `श्लौ' (6.1.10) इति द्विर्वचनम्, ततोऽभ्यस्तसंज्ञा तदा झकारस्य स्थानिनोऽभावाददभावो न प्राप्नोति। न च शक्यते वक्तुम्--स्थानिवद्भावाद्भविष्यति। न ह्यत्र स्थानिवद्भावोऽस्ति; अल्विधित्वात्। नापि बहिरङ्गोऽनवकाशत्वादन्तादेशं बाधित्वाऽदादेशो भविष्यतीति युक्तं परिकल्पयितुम्। जक्षित्यादिषूपदेशावस्थायामेव लब्धाभ्यस्तसंज्ञकेषु तस्य सावकाशत्वादिति चोद्यमपाकर्तुमाह--`अन्तादेशापवादोऽयम्' इति। अन्तादेशस्य सामान्येन सर्वत्र प्रसक्तस्यायमद्भावोऽपवाद आरभ्यते। न चापवादविषयमुत्सर्गोऽवगाहते। तथा चोक्तम्--`पूर्वमपवादाः प्रवर्त्तन्ते पश्चादुत्सर्गाः, परिहृत्यापवादविषयमुत्सर्गः प्रवर्तते' (पु.प.56) इति। अत एव तर्हि जुस्भावो न स्यात्। यथैव ह्यन्तादेशस्य सामान्येन प्रवृत्तस्य विशेषोऽद्भाव आरभ्यमाणोऽपवादः, तथा जुस्भावस्यापीत्याह--`जुसादेशेन तु बाध्यते' इति। `जुसादेशस्यानवकाशत्वादित्यदादेशो बाध्यते। `अददुः' इति। लङ्, `सिजभ्यस्तविधिभ्यश्च' (3.4.109) इति झेर्जुस्। `अजागरुः' इति। जागर्त्तेर्या गुणप्राप्तिस्तस्याः `अविचिण्णल्ङित्सु' (7.3.85) इति प्रतिषेधल्लक्षणान्तरेण, `जुसिच' (7.3.83) इत्यनेन गुणः। `अत्राप्यादेशे कृते प्रत्ययाद्युदात्तत्वं भवति' इति। तेन पुनत इत्यादिकं पदं मध्योदत्तं भवतीति भावः। यदि तु विपर्ययः स्यात्, अन्तरङ्गत्वात्प्रत्ययाद्युदात्तत्वे कृते व्यञ्जनमात्रस्याद्भावो विधीयमानोऽनियतस्वरः प्रसज्येत। तत्र यदासावनुदात्तः स्यात्, तदा पुनत इत्यादेः पदस्यान्तोदात्तता प्रसज्येत; यदा स्वरितस्तदा मध्यस्वरितता, मध्योदात्तता चेष्यते। ननु च प्रत्ययाद्युदात्तत्वं प्रत्ययमात्रापेक्षयाऽन्तरङ्गम्, आदेशस्तुप्रकृतिप्रत्ययापेक्षत्वाद्बहिरङ्गः। `अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः' (व्या.प.94) इति प्रत्ययाद्युदात्तत्वेनैव पूर्वं भवितुं युक्तम्, पश्चादादेशेनेति, तत्कथमुच्यते--अदादेशे कृते प्रत्ययाद्युदात्तत्वं भवतीति? नैतदस्ति उक्तं हि `उपदेशिवद्वचनं कर्त्तव्यम्' इति। किञ्च--आदेशो नित्यः, कृताकृतप्रसङ्गित्वात्। स हि कृते प्रत्ययाद्युदात्तत्वं पुनरनित्यम्, शब्दान्तरप्राप्त्या। तथा ह्यकृतेऽदादेशे झेरिकारस्य प्राप्नोति, कृते स्वदादेशाकारस्य `शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति' (व्या.प.106)। `नित्यानित्ययोर्नित्यं बलीयः' (व्या.प.93) इति बलीयस्त्वमस्य। तदेतन्नित्यत्वादनयोर्बलपीयसोः परत्वाददादेशेन पूर्वं भवितव्यम्, ततः प्रत्यायाद्युदात्तत्वेन । तस्मात् सुष्ठूक्तम्--आदेसे कृते प्रत्ययाद्युदात्तत्वं भवतीति।।

5. आत्मनेपदेष्वनतः। (7.1.5)

`चिन्वेते' इति। लट्, स्वरितत्वादात्मनेपदम्। `चिन्वताम्' इति। लेट्, झः टेरेत्त्वम्, `आमेतः' (3.4.90)। `अचिन्वत' इति। लङ्, अडागमः, `हुश्नुवोः सार्वधातुके' (6.4.87) इति यणादेशः। `पुनते, लुनते' इति। पूर्ववदाकारलोपः।

`च्यवन्ते, प्लवन्ते' इति। अत्र शपि कृतेऽनकारान्तादङ्गादुत्तरो झकारो न भवति।

ननु परत्वाददादेशेन भवितव्यम्, पश्चाद्विकरणेन? इत्यत आह--`नित्यत्वाददत्र' इत्यादि। नित्यत्वं तु कुताकृतप्रसङ्गित्वात्। विकरणो हि कृतेऽप्यदादेशे प्राप्नोत्यकृतेऽपि, न तु तस्मिन् कृतेऽद्भावस्य प्राप्तिरस्तीत्यनित्यत्वमस्य। `अनकारान्तेन' इत्यादि। प्रत्ययः कस्मादनकारान्तेनाङ्गेन न विशिष्यते? इति मन्यमान आह--`इह' इत्यादि। यदि प्रत्ययो विशिष्येत शयान्तं--इत्यत्रापि स्यात्, भवति ह्यत्राप्यनकारान्तादङ्गादुत्तरो झप्रत्ययः। आटा व्यवहितत्वान्न भवतीति चेत्? न; तस्य तद्भक्तत्वान्न हि तदेकदेशेन व्यवधानं युक्तम्। झकारे तु विशिष्यमाणे न दोषः; आटा व्यवहितत्वात्। समुदायभक्तो ह्याट्

समुदायमेव न व्यवदध्यात्। अवयवं तु व्यवदधात्येव; न ह्यवयवोऽवयवान्तरस्याव्यवधायको दृष्टः।
`तङ्यनतः', `झस्यानतः' इति वा वक्तव्ये `आत्मनेपदेष्वनतः' इति वैचित्र्यार्थम्।।

6. शीङो रुट्। (7.1.6)
`झादेशस्यातो रुडागमो भवति' इति। ननु न चेहाद्ग्रहणमस्ति, यदपि प्रकृतं तदपि प्रथमान्तम्, षष्ठीनिर्देशेन चेहार्थः, तत् कथं झादेशस्यातो रुडागमो भवतीति शक्यं विज्ञातुम्? नैतदस्ति; `तस्मादित्युत्तरस्य' (1.1.67) इति शीङ इत्येषा पञ्चमी अदित्यस्याः प्रथमायाः षष्ठीत्वं परिकलपयिष्यतीत्यदोषः। `शेरते' इति। `शूङः सार्वधातुके गुणः' (7.4.21)। ननु चात्र रुटा व्यवहितं सार्वधातुकम्, तत्कुतो गुणः, न ह्ययं सार्वधातुकभक्तस्तत् कथं व्यवधायको न स्यात्, अचछब्दस्य सार्वधातुकावयवस्यायमवयव इति तद्ग्रहणेन गृह्यते, न सार्वधातुकग्रहणेन; अवयवावयवस्य समुदायानवयवत्वात्; तथा हि--`छे च' (6.1.73) इत्यत्रोक्तम्--`नावयवावयवः समुदायावयवो भवति' इति? नैष दोषः; अवयवावयवोऽपि समुदायावयवो भवत्येव। तथा हि--
देवदत्तोऽलंक्तियतामित्युक्ते देवदत्तस्य येऽवयवा हस्तपादायस्तवयवाश्चङ्गुल्यादयोऽलंक्रियन्ते। तस्मात् सार्वधातुकावयवस्याच्छब्दस्य योऽवयवो रुडागयः, सोऽपि सार्वधातुकावयव इति तद्ग्रहणेन गृह्यते, अतो नास्ति व्यवधानम्।
यत्पुनः `छे च' (6.1.73) इत्यत्रोक्तम्--नावयवावयवः समुदायावयवो भवतीति, तत् तत्सूत्रविहितमेव तुगागममभिप्रेत्योक्तम्, स तुगवयवावयवोऽपि समुदायग्रहणेन न गृह्यत इति कृत्वा। कस्मात् पुनर्न गृह्यते? ह्रस्वानुकर्षणसामर्थ्यात्। तत्र हि चकारेण ह्रस्वोऽनुकृष्यते--ह्रस्वमात्रस्यागमित्वं यथा स्यात्, ह्रस्वन्तस्य मा भूदिति। यदि ह्रस्वान्तस्यागमित्वं स्यात्, चिच्छिदतुः, चिच्छिदुरित्यत्र तुकोऽभ्यासग्रहणेन ग्रहणाद्धलादिशेषेण निवृत्तिः स्यात्। यदि च तत्सूत्रविहितस्तुगवयवावयवः समुदायग्रहणेन न गृह्यते, तदा ह्रस्वमात्रस्यायमित्वे हलादिशेषेण निवृत्तिः स्यादेव; ह्रस्ववयवस्य तुकोऽभ्यासग्रहणेन ग्रहणात्। ततश्च ह्रस्वानुकर्षणमनर्थकं स्यात्।
अथ किमर्थमदादेशस्य रुङ् विधीयते, न झकारस्य विधीयताम्, तत्रायमर्थः--अत िति षष्ठी प्रकल्पयितव्या न भवति; झ इत्यस्य षष्ठ्यन्तस्य प्रकृतत्वात्? अत आह--`रुडयम्' इत्यादि। यदि ककारमनुबन्धमासन्य पूर्वान्तः क्रियत, तदा शेरत इत्यत्र गुणो न स्यात्; अनिगन्तत्वात्। तस्मान्मा भूदेष दोष इति रुडयं परादिः क्रियते; परादिरपि क्रियमाणो यदि झकारस्यैव स्यात् किमनिष्टं स्यात्? इत्याह--`यदि' इत्यादि। झकारस्यैव रुट् स्यात् तदाऽदादेशो न स्यात्। ततो यथा शयान्तै--इत्यत्राटा व्यवहितत्वाददादेशो न भवति; तथा शेरते इत्यत्रापि न स्यात्; रुटा व्यवहितत्वात्। तस्मादस्य दोषस्य परिहारार्थम्--अत एव रुडागमो विधीयते, न झकारस्येति केचिद्व्याचक्षते, एतच्चासम्यक्; झकारस्य क्रियमाणो रुट् तस्यैव भक्तो भवति, तत्कथं तेन व्यवधानं भवेत्! न हि स्वावयवेन व्यवदधात्येव। तस्मादसद्व्याख्यनमेतदित्यन्यथा व्याख्यायते--अदादेशो न स्यादित्यत्र झकारस्येत्येतदपेक्षते, तदयमर्थो भवति--यदि रुडागमो झकारस्यैव स्यात् तदादादेशस्तस्यैव न स्यात्। कस्य तर्हि स्यात्? तस्यैव रुटः स्यात्; `आदेः परस्य' (1.1.54) इति वचनात्। अनेकाल्त्वेऽपि सर्वादेशो न भवति; रुट आनर्थक्यप्रसङ्गात्। रुटो विधानसामर्थ्यान्न भविष्यतीति चेत्? नैतदस्ति; उत्तरार्थ रुङविधानंस्यात्। `बहुलं छन्दसि' (7.1.8) इत्यत्र रुजागमो यथा स्यात्। न ह्यदृश्रन्नित्यतटा सिध्यति। तस्माज्ताकश्रवणं रुङ्विधेः प्रयोजनम्। तदेतस्य दोषस्य निरासायादादेशस्य रुङ्विधीयते; न झकार्सय। `शीङः' इत्यनुबन्धेन निर्देशे यङ्लुग्निवृत्त्यर्थः--व्यतिशेस्यत इति।।

7. वेत्तेर्विभाषा। (7.1.7)
`संविद्रते, संविदते' इति। `विद ज्ञाने' (धा.पा.1064)। `समोभ्यृच्छि' (1.3.29) इत्यादिनाऽत्मनेपदम्, अदादित्वाच्छपो लुक्। `संविद्रताम्, संविदताम्' इति। लोट्। देरेत्त्वे कृते `आमेतः' (3.4.90) इत्याम्।
`वेत्तेरिति लुग्विकरणस्य ग्रहणं किम्' इति। एवं मन्यते--विधेरिति सामान्यनिर्देशेन सर्वविदीनां ग्रहणमस्तु, लघु ह्येवं सूत्रं भवति, सत्यपि सर्वविधीनां ग्रहणे लुग्विकरणादेव भविष्यति, नान्यतः, विकरणेन व्यवधानात्। यद्यविशेषेण विदीनां ग्रहण स्यात् `विद विचारणे' (धा.पा.1450) इत्यस्मादपि रौधादिकात् स्यात्, न ह्यत्र विकरणो व्यवधायकः; धात्वन्तःपातित्वात्? इत्यत आह--`इह' इत्यादि। `विन्ते, विन्दाते, विन्दते' इति। अनुदात्तेत्त्वादात्मनेपदम्, `श्नसोरल्लोपः' (6.4.111)। अत्र तु `विन्दते' इति बहुवचनान्तं प्रत्युदाहरणम्। एकवचनद्विवचनयोरुपन्यासो विदेर्विचारणार्थस्य रूपमिति प्रदर्शनार्थः; अन्यथा `विन्दते' इत्येताचत्युच्यमाने लाभार्वस्य विदेरेकवचनान्तमिदं रूपमिति कस्यचिद्भ्रान्तिः स्यात्।
श्तिपा निर्देशाद्यङ्लुकि न भवति--संवेविदते, व्यतिवेविदते।।

8. बहुलं छन्दसि।
`अदुह्र' इति। स्वरिरेत्त्वादात्मनेपदम्। ननु च विभाषाग्रहणानुवृत्तेरेवादुह्रतेत्यादि सिद्धम्, किं बहुलवचनेनेति यश्चोदयेत् तं प्रत्याह--`बहुलवचनात्' इत्यादि। विभाषानुवृत्त्या हि विकल्पमात्रं लभ्यते, न त्वन्यत्रापि भवति। बहुलवचनादन्यत्रापि भवति। तेन विभाषायां प्रकृतायां बहुलवचनमिति भावः। `अदृश्रन्' इति। दृशेर्लुङ्, झेरन्तादेशः, `इरितो वाट (3.1.57) इति च्लेरङ्, तस्य रुट् `इतश्च' (3.4.100) इतीकारलोपः, `संयोगन्तस्य' (8.2.23) इति तकारस्य च, `अतो गुणे' (6.1.97) पररूपत्वम्। अथात्र `ऋदृशोरङि' (7.4.16) इति गुण कस्मान्न भवति? `क्ङिति च' (1.1.5) इति प्रतिषेधादिति चेत्? न;

तसय ङित्येव विधानात्। सार्वधतुकस्य ङितमाश्रित्य प्रतिषेधः प्राप्नोतीति चेत्? न; एकादेशः पूर्वविधौ स्थानिवद्भवतीति यश्चोदयेत्, तं प्रत्याह-- `ऋदृशोऽङि गुणः' इति।।

9. अतो भिस ऐस्। (7.1.9)

`समासे कृते' इत्यादि। `कुगतिप्रादयः' (2.2.18) इति क्रान्ताद्यर्थेऽतिशब्दस्य। `ह्रस्वत्वे च' इति। `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति ह्रस्वः। ननु यदि ह्रस्वः क्रियते, तदा जराशब्दस्योच्यमानो जरसादेशो जरशब्दस्य न प्राप्नोतीति चोद्यमपाकर्तुमाह--`एकदेशविकृतम्' इत्यादि।

ननु चैकदेशविकृतस्यानन्यत्वेऽपि नैवात्र जरसादेशेन भवितव्यम्, `सन्निपातलश्रणो विधिरनिमित्तं तद्विधातस्य' (व्या.प.12) इति परिभाषया जरशब्दसन्निपातलक्षणो ह्यैस् विधीयते, स कथं तस्य विधातस्य तद्विधातस्य' (व्या.प.12) इति परिभाषया जरशब्दसन्निपातलक्षणो ह्यैस् विधीयते, स कथं तस्य विघातस्य निमित्तं स्यात्? इत्याह--`सन्निपात' इत्यादि। अनित्यत्वं पुनरस्याः `कष्टाय क्रमणे' (3.1.14) इत्यतः कष्टायेति निर्देशाद्वेवितव्यम्। यदि ह्येषा नित्या स्यात्, ततोऽकारान्तलक्षणो विधिरकारान्तताविधातस्य निमित्तं न स्यादिति `सुपि च' (7.3.102) इति दीर्घत्वं न स्यात्, ततश्च `कष्टाय' (3.1.14) इति निर्देशो नोपपद्यत इति। अथ किमर्थमैस् विधीयते, न एसेव विधीयताम्, तत्रापि `वृद्धिरेचि' (6.1.88) इति वृद्धौ कृतायाम्--वृक्षैः, प्लक्षैरित्यादि सिध्यति? कः पुनरेवं सतदि गुणो लभ्यते? न ह्यैस्येसि वा क्रियमाणो कश्चिल्लाधवकृतो विशेषः, प्रक्रियागौरवमेव तु स्यात्; एवं विधाय लक्षणान्तरेण वृद्धेर्विधानात्? अजितरसैरिति तु न सिद्ध्यति; वृद्ध्यभावात्। वृद्ध्यभावसत्वकारान्तताभावदिति यत्किञ्चिदेतत्।

इह वृक्षैरित्यत्र भिसि परभूते `अतो भिस ऐस्' इत्यैस्भावः प्राप्नोति, `बहुवचने झल्येत्' (7.3.103) इत्येस्वञ्च, उभयञ्चैतत् सावकाशम्, तत्रैस्भावस्य सावकाशत्वम्--कृतेऽप्येत्त्वे भूतपूर्वमकारान्तत्वामाश्रित्य, एवत्त्वस्यावकाशः--भ्यसादिः' परत्वादेत्त्वेनात्र भवितव्यमिति यो मन्येत, तं प्रत्याह--`एत्त्वं भिसि परत्वात्' इत्यादि। भिसि परत्वादेत्त्वञ्चेन्मन्यसे, अत ऐस् क्व भविष्यति? अकारान्तात् परस्य भिस ऐस् विधीयते, तत्र यदि परत्वादेत्त्वं भवेत् क्वेदानीमैस् भविष्यति? न क्वचित्; अकारान्ततायाः सर्वत्रैत्त्वेन विहितत्वादिति भावः। ऐस्भावस्य विषयं दर्शयितुमाह--`कृतेऽप्येत्त्वे' इत्यदि। कथं पुनः कृत एत्त्व ऐस् भवति, यावताऽकारान्तादङ्गादुत्तर्स्य भिस ऐसिकति, न च परत्वादेत्त्वे कृतेऽकारान्तादुत्त्रो भिस् भवति, तत्र वचनप्रमाण्यात् कृतेऽप्येत्त्वे भूतपूर्वमकारान्तत्वमाश्रित्यैस्मभविष्यति। `ऐस्तु नित्यस्तथा सति' इति। एवं कृतेऽप्येत्त्व ऐस्भावेन भवितव्यमकृतेऽपीति कृताकृतप्रसङ्गित्वात्; ऐस्तु नित्यः, एत्त्वं त्वनित्यम्; न हि तदैस्भावे कृते प्राप्नोति; झलो निमित्तस्याभावात्। नित्यानित्ययोश्च तुल्यबलत्वाद्विप्रतिषेधो नोपपद्यते। ततश्च परमप्येत्त्वमपास्य बलवानैस्भविध्यतीति भावः।।

10. बहुलं छन्दसि। (7.1.10)

बहुलग्रहणं विस्पष्टार्थम्। शक्यते हि मण्डूकप्लुतिन्यायेन बहुलग्रहणमनुवर्त्तयितुम्।।

11. नेदमदसोरकोः। (7.1.11)

अविद्यमानः ककारो ययोस्तवकौ। `एभिः' इति। इदमस्त्यदाद्यत्वम्, `बहुवचने झल्येत्' (7.3.103) इत्येत्त्वम्, `हलि लोपः' (7.2.113) इतीद्रूपस्य लोपः। `अमीभिः' इति। अदस एत्त्वे कृते `एत ईदवहुवचने' (8.2.81) इतीत्त्वम्, दस्य च मत्वम्।

`इमकैः' इति। `अव्ययसर्वनाम्नामकच्प्रक्टोः' (5.3.71) इत्यकच्, `दश्च' (7.2.109) इति दकारस्य मत्वम्। `अमुकैः इति। `अदसोऽसोर्दादु दो मः' (8.2.80) इति मत्वोत्वे।

अथ `नेदमदसोः' इत्येवं कस्मान्नोक्तम्, किमकोरत्यनेन, अकोरित्यनुच्यमाने सककारयोरपि अतिषेधः स्यादिति चेत्? नैतदस्ति; इदमदसोर्हि प्रतिषेध उच्यमानः कः प्रसहगो या सककारयोः स्यात्? नैव प्राप्नोति शब्दान्तरत्वादित्याह--`अकोरित्येत्' इत्यादि। ज्ञापकस्य प्रयोजनम्--अकज्वतां सर्वनामसंज्ञा सर्वादीनाम्, स्वरादीनाञ्चाव्ययसंज्ञा।

अथ `इदमदसोः कात्' इति कस्मान्नोक्तम्, तत्र पूवणैव सिद्धे नियमार्थ भविष्यति--इदमदसोः सम्बन्धो यो भिस् तस्य कादेव परस्यैस् भवति, इत्येवं विज्ञायमाने नियमे सर्वमभीष्टं नियमे सर्वमभीष्टं सिध्यत्येव, लघु च सूत्रं भविष्यति? सत्यमेतत्; किन्त्वस्मिन् सूत्रविन्यासे `तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' (व्या.प.21) इत्येषा न ज्ञापिता स्यात्। विपरीतनियमोऽपि भन्दधीभिराशङ्क्येत--इदमदसोरेव कादिति। तत्रायं नियमार्थः स्यात्--इदमदसोरेव यः ककारस्तस्मात् परस्य भिस ऐस्भवतीति। ततो विश्वकैः, सर्वकैरित्यत्र न स्यात्; नियमेन व्यावर्त्तितत्वात्। इह च स्यादेव--एभिः, अमीभिरिति। नियमेनाव्यावर्त्तितत्वात्। तस्माद्यथान्यासमेवास्तु।।

12. टाङसिङसामिनात्स्याः। (7.1.12)

`अतिजरसिना' इत्यादि। पूर्ववत् समासे कृते ह्रस्वत्वे च जरसादेशः। `केचित्' इति। सूत्रकारमतानुसारिणः। यदि ह्यतिजरसिनेत्येतत् सूत्रकारस्य साधुत्वेनाभिमतं न स्यात्, टेत्येतस्य नादेशमेव कुर्यात्। तत्राप्येत्वे कृते वृक्षेणेत्यादि सिध्यति। कथमेतत्वमिति चेत्? एवमेत्त्वविधौ योगविभागः करिष्यते। इदमस्ति--`बहुवचने झल्येत्' (7.3.103), ततः `ओसि च' (7.3.104), ततः `आङि चापः' (7.3.105) इति; तत्राङीति योगविभागः कर्त्तव्यः--आङि

परतोऽत एत्वं भवति--वृक्षेण, प्लक्षेण; ततः `आपः', `सम्बुद्धौ च' (7.3.106) इति। ननु च नादेशे सतीदम इद्रूपस्य हलि लोपः प्रसज्येत, ततश्चानेनेति न सिध्यति? नैष दोषः; `हलि लोपः' (7.2.113) इत्यत्र `जराया जरसन्यतरस्याम्' (7.2.101) इत्यतोऽन्यतरस्यांग्रहणमनुवर्त्तते, सा च व्यवस्तितविभाषा विज्ञायते तेन नादेशे कृते सतीद्रूपस्य लोपो न भवति। तदेवं नादेशेनैव वृक्षेणेत्यादि। सिध्यति। ततः स एव कर्त्तव्यः, नेनादेशः; कृतश्चासौ, अतोऽवगम्यते--नूनं सूतद्रकारस्याति जरसिनेत्येतत्साधुत्वेनाभिमतम्, यस्य सिद्ध्यर्थमिनादेशं कृतवानितिति। तथा यद्यतिजरसादित्यस्य साधुत्वमभीष्टं न स्यात् ङसेरद्भावं विदध्यात्। तत्रापि अकः सवर्णे दीर्घत्वेन (6.1.101) वृक्षादित्येवमादि सिद्ध्यत्येव। ननु चाकः सवर्णावपवादः `आतो गुणे' (6.1.97) पररूपत्वं प्राप्नोति, तत् कथं सिद्ध्यति? नैतदस्ति; अकारोच्चारणसामर्थ्यान्न भविष्यति पररूपम्, अन्यथा तकारमेव विदध्यात्। अत्र हि `आदेः परस्य' (1.1.54) इत्यकारस्य तकारे विहिते संयोगान्तलोपे वृक्षादित्येवमादि सिध्यत्येव। अत्र हि `आदेः परस्य' (1.1.54) इत्यकारस्य तकारे विहिते संयोगान्तलोपे वृक्षादित्येवमादि सिध्यत्येव। तस्मादकारोच्चरणसामर्थ्यात् पररूपत्वं न भविष्यतीत्यद्भावो विधेयः, किमाद्भावेनेति? विहितश्चाद्भावः, ततोऽवसीयते--नूनमतिजरसादित्यस्य साधुत्वं सूत्रकारस्याभिमतं यत्सिद्ध्यर्थमाद्भावं विहितवानिति। एवं सूत्रकारस्य मतमनुसरन्तः केचिदतिजरसिना, अतिजरसादित्यस्य साधुत्वमिच्छन्ति। `यथा तु' इत्यादि। भाष्ये हि--`अथ किमर्थमिनादेश उच्यते, न नादेश एवोच्येत' इत्येवं ग्रन्थसन्दर्भेणेनादेशं प्रत्यख्याय नादेश एव व्यवस्थापितः। `अथ किमर्थमादिप्युच्यते, न अदेवोच्येत' इत्येवमादिना ग्रन्थसन्दर्भेण आदादेशं प्रत्याख्याय अदादेश एव व्यवस्थापितः। यदि चातिजरसिना, अतिजरसादित्यस्य साधुत्वमिष्टं स्यादिनादेशमाद्भावं च भाष्यकृन्न प्रत्याचक्षीत। न हि प्रयोजने सति प्रत्याख्यानं युक्तम्, कृतञ्च तयोः प्रत्याख्यानम्, ततोऽवगम्यते--`नैतदिष्यते' इति।।

13. ङेर्यः। (7.1.13)

`ङेः' इति। चतुर्थ्यकवचनस्येदं ग्रहणम्। कस्मान्न भवति सप्तम्येकवचनस्य ग्रहणम्? यदि हि तस्य ग्रहणं स्यात्, तदा--अत्यन्तसंयोगे, भावे अपवर्गे, कारकमध्ये--इत्येवमादि न सिद्ध्यति। तस्मादेतेभ्यो निर्देशेभ्यो नेदमिह सप्तम्येकवचनस्य ग्रहणम्। अतः परिशेष्याच्चतुर्थ्येकवचनस्य ग्रहणं न निश्चीयत इति। `तस्मै हितम्' (5.1.5) इति निर्देशाच्च लिङ्गादत्तरत्राप्येतदेवानुवर्त्तते। `वृक्षाय' इति। `सुपि च' (7.3.102) इति दीर्घः। ननु `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या.प.12) इति परिभाषया उपस्थाने सति सन्निपातलक्षणो यविधिरकारविधातं प्रति निमित्तं नोपपद्यते, कुतो दीर्घत्वम्? इत्याह--`सन्निपातलक्षणः' इत्यादि। अनित्यत्वं त्वस्याः प्रागेव प्रतिपादितम्। अथ ङकारोच्चारणं किमर्थम्? एकारमात्रस्य ग्रहणं मा भूदिति। यदि स्यात्, पचे, यजे--इत्येवमादावपि स्यात्। ननु च `अतो गुणे' (6.1.97) इति पररूपत्वे कृते निमित्ताभावान्न भविष्यति? नैतदस्ति; नाप्राप्ते ह्यतो गुणे पररूपत्वेऽयमादेश उच्यते; स यथा वृक्षाय इत्यत्र `अतो गुणे' (6.1.97) पररूपत्वं बाधते तथा पचे, यजे--इत्यत्रापि बाधेत प्रतिपदोक्तस्येकारस्य ग्रहणादिह न भविष्यतीति चेत्? न; अस्याप्येकारस्य प्रतिपदोक्तत्वात्। `टित आत्मनेपदानां टेरे' (3.4.79) इति निर्द्देशादेकारः प्रतिपदोक्तो भवति। तस्माद्विशेषणार्थो ङकार कर्त्तव्यः।।

14. सर्वनाम्नः स्मै। (7.1.14)

`भवते' इति। त्यदाद्यत्वं न भवति। `द्विपर्यन्तास्त्यदादयः' (वा.7.2.102) इति भवच्छब्दस्य त्यदादित्वाभावादकारान्तता न भवति। `अथो अत्र' इत्यादि चोद्यम्। अत्र इदम् ए इति स्थिते `इदमोऽन्वादेशे' (2.4.32) इत्यशादेशे कृते परमपि स्मैभावं बाधित्वा नित्यत्वादेकादेशोऽकः सवर्णे दीर्घत्वं (6.1.101) प्राप्नोति। नित्यत्वं पुनरस्य कृताकृतप्रसङ्गित्वात्। एकादेशे च कृतेऽनकारान्तत्वात् स्मैबावो न प्राप्नोति। `तत्र' इत्यादि परीहारः। तत्रैकादेशे प्राप्तेऽन्तरङ्गत्वात् पूर्वं स्मैभावो विधीयते, पश्चादेकादेशः। अन्तरङ्गत्वं तु स्मैभावस्यैकपदाश्रयत्वात्। एकादेशस्य द्विपदाश्रयत्वात् बहिरङ्गत्वम्।।

15. ङसिङ्योः स्मात्स्मिन्नौ। (7.1.15)

ङेरल्पाच्तरस्य पूर्वनिपाते प्राप्ते परनिपातो वैचित्र्यार्थः।।

16. पूर्वादिभ्यो नवभ्यो वा। (7.1.16)

पूर्वेण नित्यं प्राप्तयोः स्मात्स्मिनोर्विकल्पार्थ वचनम्।

ननु च `पूर्वापरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्' (1.1.34), `स्वमज्ञातिधनाख्यायाम्' (1.1.35), `अन्तरं बहिर्योगोपसंव्यानयोः' (1.1.36) इति नवैव सूत्रे पूर्वादीनि पठ्यन्ते, तदपार्थकं नवग्रहणम्, नैतदस्ति; न हीह सूत्रपरिपठितानि पूर्वादीनि गृह्यन्ते, किं तर्हि? गणपठितानि। कुत एतत्? जसि हि सूत्रपरिपठितानां तेषां सर्वनामसंज्ञा, न ङसिङ्योः। `सर्वनाम्नः' (7.1.14) चेतीहानुवर्त्तते, किं प्रयोजनम्? विद्यमाने स्वे यजते, स्वाद् बिभेतीत्यत्र मा भूत्। तस्मात् गणपरिपठितान्येव पूर्वादीनि गृह्यन्ते; तत्रासति नवग्रहणे त्यदादिभ्योऽपि स्यात्। तस्मान्नवग्रहणं कर्त्तव्यम्।।

17. जसः शी। (7.1.17)

शकरः सर्वादेशार्थः, असति तस्मिन् `आदेः परस्य' (1.1.54) इति वचनादकारमात्रस्य स्यात्। अथ दीर्घोच्चारणं किमर्थम्, न ह्रस्व एव विधीयताम्, अकारान्ताद्ध्ययं विधीयते। अत्राद्गुणेन' (6.1.87) भवितव्यमिति नास्ति गुणे कृते ह्रस्वस्य दीर्घस्य वा विधाने विशेषः? इत्याह--`दीर्घोच्चारणम्' इत्यादि। `नपुंसकाच्च' (7.1.19) इति वक्ष्यति; तत्र त्रपुणी, जतुनी--इत्यत्र दीर्घस्य श्रवणं था स्यादित्येवमर्थं दीर्घोच्चारणम्।
सर्वनाम्न इत्येव--दक्षिणा इमे गाथकाः। अत इत्येव--भवन्तः।।

18. औङ आपः। (7.1.18)

`वृद्धिरेचि' (6.1.88) इति वृद्धौ प्राप्तायामयमारम्भः। `औङः' इति प्रथमाद्वितीयाद्विवचनयोः सामान्येन ग्रहणम्। `आपः' इति टाड्डाप्चापाम्। `खट्वे' इति। `अजाद्यतष्टाप्' (4.1.4) तिष्ठतः, पश्येति यथाक्रममनुप्रयोगयोरुपन्यासः प्रथमान्ततां द्वितीयान्तताञ्च प्रतिपादयितुम्च अन्यथा खट्वे इत्युभयत्र रूपस्य तुल्यत्वात् प्रथमान्ततादौ विशेषे सन्देहः स्यात्। `बहुराजे' इति। करीषस्येव गन्धोऽस्येति बहुव्रीहिः, `उपमानाच्च' (5.4.137) इतीच्। करीषगन्धेरपत्यमित्यण्, तस्य `अणिञोः' (4.1.78) इत्यादिना ष्यङादेशः। `यङश्चाप्' (4.1.74) इति चाप्।
`औकारोऽयम्' इत्यादि। शीविधौ=शीविधाने। औकारोऽयं स्थानी ङिद्गृहीतो ङकारानुवन्ध उपात्त इत्यर्थः। ङकार इद्यस्य स ङित्। ङिच्चास्माकं वैयाकरणानां मतेन शास्त्र औकारो नास्ति। ततः कोऽयं प्रकारः, किंशब्द कुत्सायां वर्त्तते। कुत्सितोऽयं सूत्रप्रणयनप्रकार इत्यर्थः। कुत्सितत्वं त्वसत एवोपादनात्।
ङकारासञ्जनप्रयोजनप्रदर्शनद्वारेण कुत्सितत्वं सूत्रप्रणयनस्य निरकर्त्तुमाह--`सामान्यार्थः' इति। यदि ह्यौकारोऽनुबन्धरहितः स्थानित्वेनोपादीयेत, ततः `निरनुबन्धकग्रहणे न सानुबन्धकस्य' (व्या.प.53) इति द्वितीयाद्विवचनं न गृह्येत। अथ त्सय टकारोऽनुबन्ध उपादीयेत, एवमपि प्रथमाद्विवचनं न गृह्येत। तस्मात् सामान्येन द्वयोरपि ग्रहणं यथा स्यादित्येवमर्थं ङकार आसज्यते। ननु च द्वितीयाद्विवचने यष्टकारो नासौतस्यानुबन्धः, कस्य तर्हि? समुदायस्य। प्रत्याहरार्था हि येऽनुबन्धास्ते समुदायानुबन्धा एव विज्ञायन्ते, यथा--महिङो ङकारः, सुपश्च पकारः। तस्मान्निरनुबन्धकग्रहणे द्वयोरप्नुबन्धकत्वात् सामान्येन ग्रहणं भविष्यति, तत् कि ङकारेण? नैतदस्ति; समुदायानुबन्धकत्वेषऽवयवानुबन्धकत्वमपि ह्येषां प्रतिज्ञायते। न हि समुदायानुबन्धकत्वे प्रत्ययानुबन्धकत्वं विरुध्यते। हत्संज्ञको ह्यनुबन्ध उच्यते, हलश्चान्त्यस्येत्संज्ञा निधीयते। औटश्च टकारो यथा समुदायं प्रतयन्तस्तथा प्रत्ययं प्रत्यपि। तस्मात् तस्य `हलन्त्यम्' (1.3.3) इतीत्संज्ञायां विहितायां यथासौ समुदायं प्रत्यनुबन्धस्तथा प्रत्ययमपि। प्रयोजनाभावात् प्रत्ययानुबन्धकत्वमनुपपन्नमिति चेत्? न; इहास्ति प्रयोजनम्--द्वितीयाद्विवचनस्य सानुबन्धकत्वं यथा स्यात्। यदि तर्हि प्रत्ययानुबन्धस्तदा सत्यपि ङकारासञ्जने `तदनुबन्धकग्रहणे नातदनुबन्धकस्य' (व्या.प.54) इति `एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य' (व्या.प.52) इति च प्रथमाद्विवचनस्यैव ग्रहणं स्यात्, तस्य हि ङकार एवैकोऽनुबन्धः; द्वितीयाद्विवचनसय तु स चान्योऽपि टकारः? नैष दोषः, ङकारोच्चारणसामर्थ्याद्द्वितीयाद्विवचनमपि ग्रहीष्यते। अन्तरेणैव ङकारं प्रथमाद्विवचनस्यैव ग्रहणे सिद्धे ङकार उपदिश्यते सामान्यार्थः। यदि च सत्यपि ङकारे प्रथमाद्विवचनमेव गृह्यते ङकारोऽनर्थकः स्यात्। कथं पुनरस्य ङ्कारस्येत्संज्ञा, यावतोपदेशे योऽन्त्यो हल् तस्येत्संज्ञा विहिता, न चायमुपदेशेऽन्त्यः? भवतु वा तस्येत्संज्ञा, टकारस्य औटस्तर्हि न स्यात्; कथं ह्येकस्मिन्नुपदेशे द्वावन्त्यौ स्याताम्? नैष दोषः, औङिति वचनात्। द्वयोरप्यौकारयोरौङित्ययमादेशो विज्ञायते, तस्य चोपदेशोऽस्ति यथा `चक्षिङः ख्याञ्' (2.4.54) इति ञकार उपदेशेऽन्त्य इति, यथा तस्येत्संज्ञा तथा ङकारस्यापि। टकारस्य तु पूर्वमेव क्रमेणेत्संज्ञा लोपश्च क्रियत इति नास्ति दोषः। यश्चासावादेश औकारः स एव शोभाषस्य स्थानित्वेननोपात्त इति वेदितव्यम्।
`तस्य च' इत्यादिना--ङकारासञ्जने यो दोषः प्राप्नोति तं दर्शयति। अनुबन्धभूतसय ङकारस्योपादानमासञ्जनम्। ङिति यत् कार्यं तत् `ङित्कार्यम्'--`सप्तमी' (2.1.40) इति योगविभागात्समासः। तत्पनः कार्यं `याडापः' (7.3.113) इति आट्। यदि सामान्यार्थोऽयं ङकार आसज्यते, एवं सति ङकारस्यासञ्जने ङिति यत्कार्यं तत् ते=तव सूत्रकारस्य मतेन `श्यां प्रसक्तं' प्राप्तम्, `स दोषः'। `याडापः' (7.3.113) इति याडागमे सति खट्वे--इति रूपं न सिध्येत्। अत श्यामिति कथमामाटौ स्याताम्? कथञ्च न स्याताम्? अनदीत्वात्; अनदीत्वं च तस्यास्त्र्याख्यत्वात्? नैतदस्ति; यथैव हि खट्वादयः स्त्रियां वर्त्तन्ते तथा शीशब्दोऽपि। तथा चाह लिङ्गकारिकाकारः--`ईदूदन्तं यच्चैकाच् शरद्दरदृषत्प्रावृषश्च' इति। तस्मात् स्त्र्याख्यत्यादयमपि नदीसंज्ञक एव; श्रुतितामानाधिकरण्यात्। श्रुतौ वर्त्तमानः शीशब्दो नदोसंज्ञां प्रतिपद्यते। श्रुतिः स्वरूपमेव।
`ङित्त्वे' इत्यादि। `याडापः' (7.3.113) इत्यत्र `धेर्ङिति' (7.3.111) इत्यतो ङिद्ग्रहणमनुवर्त्तते। तत्र ङिदिति नायं बहुव्रीहिः--ङकार इद् यस्य स ङिदिति, किं तर्हि? तत्पुरुषः--ङकार एव इद् ङित्। तस्मादौकारो यो ङित् तस्मिन्नभ्युपेते सति ङितीत्यस्मिन्निर्देशे ङकारस्येत्संज्ञकस्य वर्णमात्रसक्य निर्देशं विद्यादवगच्छेत् प्राज्ञः। मात्रशब्दस्ततोऽन्यव्यवच्छेदाय। यदि ङितीत्यत्र ङकारस्य वर्णमात्रस्य निर्द्देशो न ङकारानुबन्धस्य प्रत्ययस्य तत् किमिति श्यां ङित्कार्यं न भवति? इत्याह--`वर्णे' इत्यादि। वर्णे परभूते यत् कार्यं विधीयते तत् `यस्मिन् विधिस्तदादावल्ग्रहणे' (व्या.प.127) इति परिभाषया तदादौ वर्णादौ विद्यात्। ततश्च यत्र ङकार आदावित्संज्ञकस्तत्रैव भवितव्यं याटा, न श्याम्। न ह्यत्रादौ ङकारः, क्व तर्हि? अन्ते। एवमयं ङित्त्वमभ्युपेत्य परीहार उक्तः।
इदानीं ङित्त्वमनभ्युपेत्य परोहारान्तरमाह--`वर्णश्चायम्' इत्यादि। वार्थे चशब्दः। वर्णो वायमिति यावत्। औङित्यौवर्णोऽयमुपत्तः प्रत्यविशेषणार्थः, न तु प्रत्ययः। अङ्गाधिकारादादन्तात् परो यः सामर्थ्यप्राप्तः प्रतययः स औकारेण विशेष्यते, विशेषणेन च तदन्तविधिर्भवतीति। तेनायमर्थो जायते--

औकारान्तेऽस्य प्रत्ययस्येति। औकारान्तत्वं व्यपदेशिवद्भावात्। ङकारश्चायं नानुबन्धः, मुखसुखार्थस्त्वयम्, यथा--`ऋदोरप्' (3.3.57) इत्यत्र दकारः। वर्णरूपतया च तथौकारस्य ग्रहणे सति द्वयोरप्यौकारयोः शीभावः सिद्धौ भवति। प्रत्ययग्रहणे हि निरनुबन्धक (व्या.प.53) परिभाषोपतिष्ठते, न चेह प्रत्ययग्रहणम्। किं तर्हि? वर्णमात्रस्य। ननु च द्वावप्येतौ प्रत्ययौ, तत्किमिति नोपतिष्टते? सत्यम्; यद्यपि तौ प्रत्यौ, तथधापि नात्र शास्त्रे प्रत्यरूपेणौकार उपात्तः? किं तर्हि? वर्णरूपेणेति, अतस्तस्या नेहोपस्थानम्।
ङित्त्वमनभ्युपेत्य परीहारान्तरमाह--`निर्द्देशोऽयम्' इत्यादि। नेह व्याकरण औकारसय ङकारोऽनुवग्ध उपादीयते। पूर्वाचार्याणां तु सूत्रे द्वे अप्येते द्विवचने ङिती पठ्येते। तथा हि `आबौटावौङ्' इति तत्र सूत्रपाठः। अतस्तत्सत्रानुरोधेनायं निर्द्देशः, तस्येह ग्रहणं यथा स्यात्। तस्मान्ङित्त्वाभावान्नास्ति ङित्कार्यस्य प्रसङ्गः। न हि पूर्वाचार्यसूत्रानुरोधेनेहानुबन्धकार्याणि क्रियन्ते। `तेन ङित्त्वेऽप्यदोषः' इति। किं पुनर्यत्र नास्त्येव ङित्त्वमित्यपि शब्दस्यार्थः। तदेतदुक्तं भवति--ङित्त्वेऽब्युपेते सति ङित्त्वे विद्याद्वर्णनिर्देशमात्रम्। `वर्णे यत्स्यात् तच्च विद्यात्तदादौ' इत्येवं ङित्कारयप्रसङ्गनिरासाय यस्मातद् परीहार उक्तः। यस्माद्वर्णश्चायमित्यनेन, `निर्देशोऽयं पूर्वसूत्रेण वा स्यात्' इत्यनेन चौकारयोङित्त्विभावः प्रतिपादितः। तेन हेतुना सत्यपि ङित्त्वेऽप्यदोषः। किं पुनर्नास्त्येव यत्र ङित्त्वमिति।।

19. नपुंसकाच्च। (7.1.19)
`दधिनी' इति। `इकोऽचि विभक्तौ' (7.1.73) इति नुम्।।

20. जसिशसोः शिः। (7.1.20) [`जश्शसीः शिः' इति मूले पठ्यते। अयं तु `जसिशसोः शिः' इति न्यासकाराभिप्रायेण पाठः। आज्जसेरसुक्' (7.1.50) इति सूत्रेऽपि जसिरेव दृश्यते]
जसीत्यत्रेकार उच्चारणार्थः। `कुण्डानि' इति। `नपुंसकस्य झलचः' (7.1.72) इति नुम्, `सर्वनामस्थाने च' (6.4.8) इति दीर्घ-।
अथेह कस्मान्न भवति--कुण्डं कुण्डं ददाति, `संख्यैकवचनाच्च वीप्सायाम्' (5.4.43) इति शस्, कुणअडशो ददाति? इत्याह--`जसा साहचर्यात्' इत्यादि। एतच्चोद्यपरिहारवचनं यदार्थप्रकरणादेर्वृत्तो कुण्डादिशब्द एकवचनो भवति तदा वेदितव्यम्, न त्वन्यदा। शस्विधौ हि वृत्तिस्थैकार्थताऽऽश्रीयते, न वाक्यस्था। अर्थप्रकरणादिरहितः कुण्डादिशब्दो वृत्तौ निवृत्तायां विभक्तावेकार्थो न भवतीति शसा न भवितव्यम्। कस्मात् पुनः कुण्डादिशब्दो वृत्तौ निवृत्तायं विभक्तावेकार्थो न भवतीति शसा न भवितव्यम्। कस्मात् पुनः कुण्डादिशब्दो वृत्तावेकार्थो न भवति? जातिशब्दत्वात्। जातिशब्दा हि नैकसयामेव जात्याधारभूतायां व्यक्तौ वर्त्तन्ते। किं तर्हि? अनेकस्यामपि। एवञ्च यत्तत्र शस्विधौ प्रत्युदाहरणमुपन्यस्तम्--`संख्यैकवचनादिति किम्? घटं घटं ददाति', तदुपपद्यते। यद्यर्थप्रकरणादिरहितो जातिशब्दो वृत्तावेकार्थो न भवति, तदा न भवितव्यमेव शसा।।

21. अष्टभ्य औश्। (7.1.21)
`कृताकारोऽष्टन्शब्दो गृह्यते' इति। यत्रात्वं तत्रौश्त्वं यथा स्यादित्यभिप्रायः। `अष्टौ तिष्ठन्ति' इति। आत्वे कृत औश्त्वम्।
`अष्ट तिष्ठन्ति' इति। अत्रात्वाभावादौश्त्वं न भवति। कथं पुनरत्रात्वाभावः, यावता न तत्रात्वविधौ विकल्पस्य प्रतिपादकं किञ्चिदन्यतरस्यांग्रहणादिकमसति? इत्याह--`एतदेव' इत्यादि। कृतात्वनिर्देशस्यैतदेव प्रयोजनम्--यत्रात्वं तत्रैवौशत्वं यथा स्यात्, अन्यत्र मा भूदिति। यदि च नित्यमात्वं स्यात् तदा कृतात्वस्य निर्देशोऽनर्थकः स्यात्; व्यवर्त्त्याभावात् `अष्टनः' इत्येवं ब्रूयात्। तदेवं लघुनिर्देशे सम्भवति सति यत् कृतात्वस्य निर्देशो गरीयान् क्रियते, तज्ज्ञापयति--विकल्पेनात्वं भवतीति। यद्यपि चायमर्थः `अष्टनो दीर्घात्' (6.1.172) इत्यत्रापि ज्ञापितः, तथापि विस्मरणशीलानामनुग्रहाय पुनरिह ज्ञाप्यते।
अथाष्टपुत्रः, अष्टभार्य इत्यत्र कस्मान्न भवति, `सुपो धातुप्रातिपदिकयोः' (2.4.71) इति लुका बाधितत्वादिति चेत्? न; इहापि तर्हि न स्यात्--अष्टौ तिष्टन्ति, अष्टौ पश्येति। `षड्भ्यो लुक् (7.1.22) इति लुका बाधितत्वात्। अथौश्भावस्य लुगपवादत्वादत्र लुक्रं बाधित्वा स एव भवति। पूर्वत्रापि तर्हि स एव स्तात्, अत एव हेतोः? इत्याह--`षड्भ्यो लुगित्यस्यापवादोऽयम्' इति। अत्रैवोपपत्तिमाह--`नाप्राप्ते' इत्यादि। `षड्भ्यो लुक्' (7.1.22) इत्यसमासे प्राप्नोति--अष्टौ तिष्ठन्तीत्यादौ, समासे च--अष्टपुत्र इत्यादौ। तस्मान्नाप्राप्ते अष्टभार्यः--इत्यत्र सुब्लुकैव भवितव्यमित्यौशत्वं न भवति।
`तदन्तग्रहणम्' इत्यादि। किं पुनरिष्यमाणमपि लभ्यते? `अङ्गाधिकारे तस्य तदुत्तरपदस्य च' (पु.प.वृ.85) इति वचनात्। अथ वा--अष्टाभ्य इत्यर्थप्रधाननिर्देशोऽ
यं बहुवचननिर्द्देशादवसीयते। शब्दप्रधाने हि निर्देशे `अष्टनः' ब्रूयात्। अर्थाच्च शब्दद्वारेणैव जश्शसोः परत्वं विज्ञायत इति केवलाच्चाष्टनो भवति। तदन्ताच्चातदन्तेऽपि हि शब्दद्वेरेणार्थात् परौ जश्शसौ भवत इति। यदि तदन्तग्रहणमत्रेष्यते, प्रियाष्टन इत्यत्रापि प्राप्नोति? अत आह--`प्रियाष्टनः' इत्यादि। प्रिया अष्टौ येषामिति बहुव्रीहिः। ननु च विकल्पेनात्वम्। तत्र यदात्वं न भवति तदा मा भूदौश्त्वम्; यदात्वं तदा स्यादेव; व्यवस्थितविभाषयात्रात्वं न भविष्यतीत्यदोषः।।

22. षड्भ्यो लुक्। (7.1.22)

`पञ्च, सप्त' इति। `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नलोपः। `षट्परधानात् तदन्तादपि भवति' इति। अत्र पूर्वको हेतुर्वकतव्यः। `यत्र तु' इत्यादि। अर्थस्येदं ग्रहणं बहुलवचनादवसितम्। स चार्थो द्विविधः--प्रधानोऽप्रधानश्च। तत्र `प्रदाने कार्यसम्प्रत्ययः' (व्या.प.120) इति यत्रार्थस्य प्राधान्यं तत्रैव भवति, न तु यत्रार्थस्याप्राधान्यं तत्र। एष च हेतुः प्रियाष्टान इत्यत्रौश्त्वाभावेऽपि वेदितव्यः। `प्रियषषः' इति। प्रियाषडेषामिति बहुव्रीहिः। अत्रान्यपदार्थस्य प्राधान्यम्, षडर्थस्तु तत्र गुणभावादप्रधानः।।

23. स्वमोर्नपुंसकात्। (7.1.23)

`सु' इति यद्यपि सप्तमीबहुवचनमस्ति, तथाप्यमा द्वितीयैकवचनेन सहचर्यात्प्रथमैकवचनमेव गृह्यते।
तदब्राह्मणकुलमित्यत्र परत्वात् त्यदादयत्वेनैव भवितव्यम्, त्यदाद्यत्वे कृते लुग्न प्राप्नोति; `अतोऽम्, (7.1.24) इत्यम्भावप्रसङ्गात्, तस्मात्त्यदाद्यत्वात्प्राग् लुग्वक्तव्यः? इत्याह--`तदब्राह्मणकुलमित्यत्र' इत्यादि। लुकोऽवकाशः--दधि, मध्वित्यत्र, त्यदाद्यत्वस्यावकाशः--ब्राह्मण इति; इहोभयं प्राप्नोति--तदब्राह्मणकुलमिति, लुग्भवति पूर्वविप्रतिषेधेन। न च पूर्वविप्रतिषेधो वक्तव्यः; इष्टवाचित्वात्परशब्दस्य। `नित्यत्वाद्वा' इति। वाशब्दः समुच्चये। यद्यपि लुक्, त्यदाद्यत्वञ्चोभयं प्राप्नोति, तथापि लुक एव नित्यत्वं विज्ञायते। कुतः? सामर्थात्। `लुका त्यदाद्यत्वे बाध्यते' इत्यत्र हीदं हेत्वन्तरमुक्तम्। एवञ्चेदमत्रार्थे हेत्वन्तरं सम्भवति यदि लुको नित्यत्वं भवति, नान्यथा, नित्यत्वं पुनः कृताकृतप्रसङ्गित्वात्। त्यदाद्यत्वं हि विभक्तावुच्यमानं कृते लुकि विभक्त्यभावान्न प्राप्नोति। प्रत्ययलक्षणेन चास्य प्राप्तिनं युक्ता; `न लुमताङ्गस्य' (1.1.63) इति प्रतिषेधात्। लुक्पुनः कृते त्यदाद्यत्वे प्राप्नोत्यकृतेऽपि।
ननु च कृते त्यदाद्यत्वे लुकः प्राप्तिरेव नास्ति; `अतोऽम्' (7.1.24) इत्यपवादविधानात्। तस्मात्सोऽप्यनित्य एव? इत्याह--`लुको हि' इत्यादि। असति `अतोऽम्' (7.1.24) इति लक्षणेऽकारान्तमप्यङ्गं लुको निमित्तमासीत्, तदनेन लक्षणेनोपजायमानेनापवादविधानाल्लुकं प्रत्यनिमित्तभावमापद्यते। लुग्निमित्ताभावापादनमेव विघातः। `न पुनस्त्यदाद्यत्वेन' इति। लुको निमित्तभावो विहन्यत इति सम्बन्धनीयम्। यदि `अतोऽम्' (7.1.24) इत्यपवादविधायि लक्षणान्तरं न स्यात्, कृते त्यदाद्यत्वे स्यादेवाकारान्तमङ्गं लुको निमित्तम्। तच्च `अतोऽम्' (7.1.24) इत्यपवादेनैव लुको निमित्तं व्याहन्यते, न पुनस्त्यदाद्यत्वेन। यद्येवम् तत्किमित्यनित्यो लुग्न भवति? इत्याह--`यस्य च' इत्यादि। लक्षणान्तरत्वं लक्षणान्तरत्वं पुनरम्भावशास्त्रस्य त्यदाद्यत्वशास्त्रापेक्षया वेदितव्यम्।।

24. अतोऽम्। (7.1.24)

पूर्वेण प्रापतसय लुकोऽयमपवादः। तपरकरणं मुखसुखार्थम्; न तु दीर्घनिवृत्त्यर्थम्। दीर्घस्याभावात्। अभावस्तु `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति ह्रस्वविधानात्। अथ किमर्थमम्भाव उच्यते, न मकारादेश एवोच्येत? न चैवम्; `आदेः परस्य' (1.1.54) इति द्वितीयैकवचनाकारस्य मकारे कृते द्वयोर्मकारयोः श्रलणं प्राप्नोति; एकस्य संयोगान्तलोपेनापहृतत्वात्। नापि `सुपि च' (7.3.102) इति यञादौ सुपि विधीयमानं दीर्घत्वं प्राप्नोति; `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या.प.12) इति वचनात्। अकारान्तसन्निपाते हि मकारविधिः, स कथमकारविघातस्य निमित्तं स्यात्? एवं तर्हि मकारादेशे विघातव्येऽमा देशं कुर्वन्नेतज्ज्ञापयति--नित्यैषा परिभाषेति। तेनातिजरसात्, अतिजरसैरिति जरसादेशः सिद्धो भवति।।

25. अद्ड्डतरादिभ्यः पञ्चभ्यः। (7.1.25)

द्विडाकारोऽयं निर्द्दशः--तत्रैको डतरसम्बन्धी द्वितीयस्त्वादेशम्बन्धी। डतरादयश्चैते सर्वाद्यन्तःपातिनो गृह्यन्ते; न तु `द्वयोरेकस्य डतरच्' (5.3.92) इत्येवमादयः प्रत्यया। कुत एतत्? नेतराच्छन्दसि' (7.1.26) इति प्रतिषेधात्। प्रत्ययग्रहणे हीतरशब्दात् प्राप्तेरेव नास्तीति प्रतिषेधोऽनर्थकः स्यात्। तेषां डतरादीनां मध्येऽन्त्यानि त्रीणि प्रातिपदिकानि; डतरडतमौ च प्रत्ययौ; तत्र प्रत्यग्रहणपरिभाषया (भो.प.सू.7) तदन्तयोर्ग्रहणं भवति। `कतरत्' इति। `किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्' (5.3.92)। `कतमत्' इति। `वा बहुनां जातिपरिप्रश्ने डतमच्' (5.3.93)। `कतरत् तिष्ठतीत्यत्र' इत्यादि। असति हि ङित्करणे कतरत् तिष्ठतीत्यत्र `अकः सवर्णे दीर्घः' (6.1.101) इत्यनुवर्त्तमाने `प्रथमयोः पूर्वसवर्णः' (6.1.102) इति दीर्घः स्यात्, अतः स मा भूदित्येवमर्थं ङित्करणं क्रियते। अत्र हि कृते दीर्घत्वप्रसङ्गो न भवति; टिलोपेनाऽकोऽपहृतत्वात्।
किं पुनः कारणम्--प्रथमैकवचनस्यैव ङित्करणस्य दीर्घाभावः प्रयोजनमुच्यते, न तु द्वितीयैकवचनस्य? इत्यत आह--`इह तु' इत्यादि। अमो हि स्थाने य आदेशस्तस्य `स्थानिवदादेशोऽनल्विधो' (1.1.56) इति स्थानिवद्भावादमि पूर्वत्वेनापि सिध्यति--कतरदित्येतत्, तस्मात् तत्र ङित्करणस्य दीर्घत्वाभावः प्रयोजनमिति नोच्यते। `तकारादेश एव कस्मान्न क्रियते' इति। यद्यत्र दीर्घत्वं नेष्यते तदा तकारादेश एव कर्त्तव्यः। तत्राप्ययमर्थः--दीर्घनिवृत्त्यर्थं ङित्करणं न कर्त्तव्यमिति। `हे कतरत्' इत्यादि। यदि तकारादेश एव क्रियते तदा तस्य स्थानिवद्भावेन सम्बुद्धिभावोऽस्तीति `एङ् ह्रस्वात् सम्बुद्धेः' (6.1.69) इति लोपः प्राप्नोति, अतः स मा भूदित्येवमर्थं तकारादेशो न क्रियते।
`अपृक्तश्च' इत्यादि। `हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तम्' (6.1.69) इत्यतश्चेदपृक्तग्रहणं सम्बुद्धिलोपेऽनुवर्त्तते तदामो दोषः--हे कुण्डेत्यत्र। निवृत्तेऽपृक्ताधिकारे डतरादिषु दोषः--हे कतरदिति। तस्माड्डित्करणादेवाकारलोपे कृते ह्रसवाभावान्न लोपः, न च दीर्घतेति।।

26. नेतराच्छन्दसि। (7.1.26)
पूर्वेणाद्डादेशस्य प्रसकतस्यायं प्रतिषेधः।

अथ `अतोऽम्' (7.1.24) इत्यस्यानन्तरं ` इतराच्छन्दसि' इति कस्मान्नोक्तम्, एवं हि नेति प्रतिषेधः कर्त्तव्यो न भवति, अमादेशोऽद्डादेशस्यापवादो भविष्यति? इत्याह--`अतोऽमित्यस्मादनन्तरम्' इत्यादि। `योगविभागार्थम्' इति। नेत्येकयोगविभागो यथा स्यादिति। किमर्थं पुनर्योगविभाग इष्यते? इत्याह--`एकतराद्धि' इत्यादि। एकशब्दाद्धि सर्वत्र प्रतिषेध इष्यते, स च नेति योगविभागाल्लभ्यते। तस्माद्योगविभाग इष्यते। स च यथान्यासे सिध्यति; नान्यथेति `नेतराच्छन्दसि' इत्युच्यते।।

27. युष्मदस्मद्भ्यां ङसोऽश्। (7.1.27)
यदि `शेषे लोपः' (7.2.90) इत्यन्तलोपः, तदास्य भावे प्राप्त इदं वचनम्। अथ टिलोपः, तदा विभक्तेः श्रवणप्राप्त आदेशार्थं वचनम्। `तद स्वम्, मम स्वम्' इति। `तदममौ ङसि' (7.2.96) इति मपर्यन्तयोर्युष्मदस्मदोस्तवममादेशौ भवतः। `शेषे लोपः' (7.2.90) इति दकरलोपे कृते `अतो गुणे' (6.1.97) पररूपत्वम्। `शित्करणं सर्वादेशार्थम्' इति। असति शित्करणे `आदेः परस्य' (1.1.54) इत्याकारस्यादेशोऽकारः स्यात्। ननु चाकारस्याकारवचने प्रयोजनं नास्तीत्यन्तरेणापि शित्करणं सर्वादेशो भविष्यति, अन्तस्य वा। तत्र द्वयोरकारयोरतो गुणे पररूपत्वेनेष्टं सिध्यति? अत आह--`अन्यथा हि' इत्यादि। अन्यथा यदि शित्करणं न स्यात् तदाऽऽदेश इति योऽयं व्यपदेशस्तस्य या प्रक्लृप्तिः=निष्पत्तिस्तदर्थमादेरेव स्यात्; `आदेः परस्य' (1.1.54) इति वचनात्। स्यादेतत्--यद्यादेशव्यपदेशप्रक्लृप्तितः कश्चिदर्थः सम्पद्यते तदा स्यात् तदर्थमादेरेव वचनम्, न च ततः कश्चिदर्थः सम्पद्यते तस्मादयुक्तमेवेति? इत्यत आह--`ततश्च' इत्यादि। चशब्दो हेतौ। लिङ् सम्भावनायाम्। तत आदेशव्यपदेशप्रक्लृप्तेः `योऽचि' (7.2.82) इति कार्यं न स्यात्। एतद्धि यत्र विभक्तावादेशो नास्ति तत्र विधीयते; `अनादेशे' (7.2.86) इत्यधिकारात्। तस्मात् प्रयोजनवत्यादेशवयपदेशप्रक्लृप्तिरिति तदर्थमादेरेव स्यात्, ततश्चेटं रूपं न सिध्येत्। तस्मात् सर्वादिशार्थः शकारः कर्त्तव्यः।।

28. ङे प्रथमयोरम्। (7.1.28)
`ङे इत्यविभक्तिकोऽयं निर्देशः' (इति)। `सुपां सुलुक्' (7.1.39) इति षष्ठ्या लुप्तत्वात्। प्रथमयोरिति षष्ठीद्विवचनान्तम्--प्रथमा च प्रथमा च ते प्रथमे, तयोः प्रथमयोः। षष्ठीनिर्देशस्योभयत्र तुल्यत्वात् प्रथमयोः प्रत्यययोः स्वौकारयोर्ग्रहणमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह--`विभक्त्योः' इति। एतदेव स्पष्टीकर्तुमाह--`प्रथमाद्वितीययोः' इति। कथं पुनर्द्वितीया प्रथमाशब्देनोच्यते? उपदेशे प्रथमासामीप्यात्। भवति हि सामीप्यात् ताच्छब्द्यम्, यथा--गङ्गायां घोष इति। अथ विभक्त्योरिदं ग्रहणं न प्रत्यययोः--इति कुतोऽयं निश्चयः? लिङ्गात्। तत्पुनर्लिङ्गं `द्वितायायाञ्च' (7.2.87) इत्यत्त्वविधानम्। तद्ध्यादेशार्थमुच्यते; अनादेशे हि `युष्मदस्मदोरनादेशे' नान्यथा। ननु च `योऽचि' (7.2.89) इति यत्वबाधनार्थम् `द्वितीयायाञ्च' (7.2.87) इत्याद्वचनं स्यात्? नैतदस्ति; तदर्थे द्विवचने यकारमेव विशेषणं विदध्यात्--`योऽच्यद्वितीयायाम्' इति, `योऽच्यनचि' इति वा ब्रूयात। अतो द्वितीयायामात्त्वविधानं ज्ञापकमेवैतद्विभक्तिग्रहणस्य। `तभ्यम्, मह्यम्' इति। मपर्यन्तयोर्युष्मदस्मदोस्तभ्यमह्यावादेशौ। `शेषे लोपः' (7.2.90), `अमि पूर्वः' (6.1.107)।
`त्वम्, अहम्' इति। `त्वाहौ सौ' (7.2.94)। `युवाम्, आवाम् इति। `युववौ द्विवचने' (7.2.92) इति युवावौ, `प्रथायश्च' (7.2.88) इत्यादिनाऽत्त्वम्। `यूयम्, वयम्' इति। `यूयवयौ जसि' (7.2.93)। `त्वाम्, माम्' इति। त्वमावेकवचने' (7.2.97), `द्वितीयायाञ्च' (7.2.87) इत्यात्त्वम्। अथ किमर्थममादेश उच्यते, न मकार एवोच्यते? स चैकाल्त्वादादेर्भविष्यति, तत्र परस्य संयोगान्तलोपेन सिद्धम्, `शेषे लोपः' (7.2.90) इति टिलोपान्न सिध्यतीति चेत्? नैष दोषः; सेषे लोपो यद्यपि टिलोपः स्यात्, तथापि `त्वाहौ सौ' (7.2.94) इत्येवमादीनामकारान्तत्वात् सिद्ध्यत्येव; ते चावश्यकमकारान्ता विधेयाः, अन्तोदात्तत्वं यथा स्यात्। न च मकारादेशे `सुचि च' (7.3.102) इति दीर्घत्वं प्राप्नोति; `अङ्गवृत्ते पुनरङ्गवृत्ताविधिर्निष्ठितस्य' (व्या.प.38) इति वचनात्। एवं तर्हि वैचित्र्यार्थममादेशविधानम्। अथ वा--मकार एवादेशः, अकारस्तूच्चारणार्थः; न ह्यन्यथास्मिन्निर्देश आदावन्ते वाऽकारमकृत्वा मकार उचचारयितुं शक्यते। `ङेत्सुटोः' इति। वक्तव्ये `ङे प्रथमयोः' इति वचनं वैचित्र्यार्थम्।।

29. शसो न। (7.1.29)
पूर्वेणामादेशे प्राप्ते शसो न विधीयते। `युष्मान् ब्राह्मणान्। अस्मान् ब्राह्मणान्' इति। `आदेः परस्य' (1.1.54) इत्यकारस्य नकारः, संयोगान्तलोपः, पूरववदात्त्वम्। ननु चैतदुदाहरणद्वयममादेशे कृत आत्त्वे च `प्रथमयोः पूर्वसवर्णः' (6.1.102) इति दीर्घत्वे च `तस्माच्छसो नः पुंसि' (6.1.103) इति नत्वेमैव सिध्यति? नैतदस्ति; न ह्यत्र पूर्वसवरणदीर्घत्वं प्राप्नोति, अमिपूर्वत्वेन बाधितत्वात्।।

30. भ्यसो भ्यम्। (7.1.30)

`युष्मभ्यम्, अस्मभ्यम्' इति। `शेषे लोपः' (7.2.90) इत्यन्तलोपः।
यदि भ्यमादेशोऽयम्, एवं सति तत्र विहिते शेषेलोपे च `बहुवचने झल्येत्' (7.3.103) इत्येत्त्वं प्राप्नोति, ततश्चानिष्टरूपमापद्येत? इत्यत आह--
`भ्यमादेशे कृते' इत्यादि। वर्त्तनं वृत्तम्, अङ्गे वृत्तं यस्य तदङ्गवृत्तं कार्यम्, तस्मिन्नङ्गवृत्ते कार्ये पुनरत्तरकालमङ्गवृत्तावपरस्य कार्यस्य प्राप्तौ तस्य कार्यस्यादिधिः;=अविधानम्। निष्ठितस्येत्यनेन यत्समम्बन्धिनः कार्यस्याविधिर्भवति तदङ्गं विशिष्यते। निष्ठितम्=परिसमाप्तम्, प्रयोगार्हमङ्गम्।
तत्सम्बन्धिनः कार्यस्याविधिर्भवति, नान्यसम्बन्धिन इत्यर्थः।
`केचित्' इत्यादि। तेषामन्त्यलोपे कृते `अतो गुणे' (6.1.97) पररूपत्वं भवति। `येषां तु' इत्यादि। यैः `शेषे लोपः' (7.2.90) इत्यन्तलोपः क्रियते, तेषां मतभेदः--ते हि केचिद्भ्यमादेशमिच्छन्ति, केचिदभ्यमादेशम्। येषां तु शेषेलोपष्टिलोपः तेषां मतेनायमभ्यमादेश एव, न भ्यमादेशः; अन्यथा युष्मब्यमिति न सिध्येवितयभिप्रायः। यदि तर्हि शेषेलोपष्टिलोपः, एवं सति `अनुदात्तस्य यत्रोदात्तलोपः' (6.1.101) इत्यनेनाभ्यम्शब्दस्यान्तोदात्तत्वं स्यात्? इत्यत आह--`उदात्तनिवृत्तिस्वरश्च' इत्यादि। पूर्वपक्षवादिनोदात्तनिवृत्तिस्वरविधौ `कर्षात्वतो घञोऽन्त उदात्तः' (6.1.159) इत्यतोऽन्तग्रहणमनुवर्त्तत इति मन्यमानेन चोदितन्। उत्तरपक्षवादिना तु `अन्तग्रहणं तत्र निवृत्तमुच्चारणक्रमप्रतयासत्त्या चादेरेवोदात्तत्वेन भवितुं युक्तम्' इति। मन्यमानेन परिहृतम्।।

31. पञ्चम्या अत्। (7.1.31)
पूर्वेण प्राप्तस्य भ्यमोऽयमपवादः।।

32. एकवचनस्य च। (7.1.32)
चकारोदादेशानुकर्षणार्थः, भ्यसपेक्षया समुच्चयार्थो वा। `ङसेश्च' इति। वक्तव्ये, एकवचनक्तेति वचनं वैचित्र्यार्थम्।।

33. साम आकम्। (7.1.33)
`सम इति षष्ठीबहुवचनमागतसुट्कं परिगृह्यते' इति। युष्मदस्मद्भ्यामुत्तरस्यान्यस्य सामशब्दस्यासम्भवात्। आगतः सम्प्राप्तः सुट् यत्र येन वा तत्तथोक्तम्। `अथ' इत्यादौ वाक्य `आगतसुट्कः' इत्याम्प्रत्ययापेक्षया पुंल्लिङ्गत्वं वेदितव्यम्! `अथ किमर्थमागतसुट्कः परिगृह्यते' इति पृष्टस्य ससुट्कस्यादेशो यथा स्यादिति प्रतिवचनमाशह्क्याह--`न हि' इत्यादि। `आमि सर्वनाम्नः सुट्' (7.1.52) इत्यत्र `आज्जसेरसुक्' (7.1.50) इत्यत आदिति वर्त्तते, तेनाकारान्तात् सर्वनाम्नः सुङ् विधीयते। अकारान्तता च युष्मदस्मदोः `शेषे लोपः' (7.2.90) इत्यन्तलोपे सति भवति। शेषेलोपेनाप्याकमादेशे कृते भवितव्यम्। तस्मादादेशविधानकाले सुण्न विद्यते। ततश्च ससुट्कस्यादेशो यथा स्यादित्येतत्प्रयोजनं नोपपद्यत इत्यन्यद्वक्तवयमित्यभिप्रायेणाह--`तस्यैव' इत्यादि। यद्यसुट्को गृह्यते `निर्दिश्यमानस्यादेशा भवन्ति' (व्या.प.106) इत्यसुट्कस्यैवादेशः स्यात्। एवञ्चाभिनिवृत्ते स्थान्यादेशभावे पश्चाद्भवतः सुटः केन निवृत्तिः स्यात्? इष्यते च तस्यापि निवृत्तिः। अतस्तस्य भाविनोऽपि निवृत्तिर्यथा स्यादित्येवमर्थं समुट्को गृह्यते। ननु च युष्मदस्मद्भ्यामुत्तरस्यामः सुडेव न प्राप्नोति, अकाराद्धि सर्वनाम्नः सुङ् विधीयते, युष्मदस्मादोश्च त्यदाद्यत्वं नास्ति, `द्विपर्यन्तास्त्यदादयः' इति त्यदाद्यत्वस्याभावाच्छेषेलोपस्य च टिलोपादकारान्तता न सम्भवति; अतो भाविनोऽपि सुटो निवृत्तिर्नैव प्रयोजनमुपपद्यते? एतच्चोद्यमपाकर्त्तुम् "`शेषे लोपः' इत्यन्तलोपः" इति हृदि कृत्वाऽऽह--`कृते हि' इत्यादि। अथ क्रियमाणे समुट्कस्य ग्रहणे कथमसौ निवर्त्तते, शास्त्रान्तराद्धि प्रसक्तस्य शास्त्रेण निवृत्तिः क्रियते, न चादेशविधानकले सुट्प्रसङ्गोऽस्ति? इत्याह--`स च स्थान्यन्तर्भूतत्वात्' इत्यादि। यद्यादेशविधानकाले सुटः प्रसङ्गः सम्भवेत् ततो भावी न निवर्त्तते, न चासावादेशकाले सम्भवति। तस्माद्भाविनः सुटः ससुट्कग्रहणेन स्थान्यन्तर्भूतत्वाद्यस्यामवस्थायां तस्य प्राप्तिस्तस्यां प्रसक्तः स निवर्त्तते; मन्यथा हि तस्य स्थान्यन्तर्भावोऽनर्थकः स्यात्। स्यादेतत्--यदि `शेषे लोपः' (7.2.90) इत्यन्तलोपस्ततः समुटकस्योपादानमर्थवद्भवति, यदा तु सेषेलोपष्टिलोपस्तदा नार्थः कस्मान्नाश्रीयते, तस्यानुपपत्तेः। अनुपपत्तिस्तु लक्षणाभावात्। अन्त्यलोपस्यास्यैतदेवास्ति लक्षणमिति स एवाश्रितः। यद्येवम्,
युष्मद्ब्राह्मणीभ्योगच्छतीत्यन्त्यलोपे सति `अजाद्यतष्टाप्' (4.1.4) इति टाप्प्रसज्येत? `अलिङ्गे युष्मदस्मदी' इति नैषोऽस्तप्रसङ्गः।
`दीर्घोच्चारणम्' इत्यादि। ननु चाकम्यपि अकः सवर्णदीर्घत्वे (6.1.101) न सिध्यत्येव? न; सिध्यति। `अतो गणे' (6.1.97) इति पररूपत्वमपवादः प्राप्नोतीति चेत्? न; अकारोच्चारणसामर्थ्यात्। यदि अतो गुणे' (6.1.97) पररूपत्वं स्यात् तदाकारोच्चारणमनर्थकं स्यात्, कमित्येव ब्रयादित्यत आह--
`अकमि तु' इत्यादि। तुशब्दो दीर्घोच्चारणापेक्षया समुच्चयार्थः। इतिकरणो हेतौ।
यदि ह्यकारोच्चारणस्य प्रयोजनं न स्यात्, शक्यते वक्तुम्--अकारोचचारणसामर्थ्यान्न भविष्यतीति; अस्ति च तसय प्रयोजनम्, किं तत्? `ब्रहुवचने झल्येत्' (7.3.103) इत्येत्त्वं मा भूत्। तस्मात् सत्यप्यकारोच्चारण एतत्त्वनिवृत्त्यर्थे `अतो गुणे' (6.1.97) पररूपत्वं स्यात्, न सवर्णदीर्घत्वम्। अतस्तदर्थं दीर्घोच्चारणं क्रियते।।

34. आत औ णलः। (7.1.34)
`तस्यौ' इति। `शर्पूर्वाः खयः' (7.4.61) इति खयः शेषः। `जग्लौ' इति। `कहोश्चुः' (7.4.62) इति चुत्वम्।

इह `पा' इत्यादिभ्यो णलि परत्रवस्थिते युगपत् त्रीणि कार्याणि प्राप्नुवन्ति--द्विवचनम्, एकादेशः, औत्वञ्च। तेषाञ्च तथा प्राप्तानां युगपत्प्रवृत्तिः सम्भवतीति सामर्थ्यात् प्राप्तः क्रम आश्रीयते। तत्र येन क्रमेण तानि कर्त्तव्यानि, तं दर्शयितुमाह--`अत्र' इत्यादि। अत्रेत्यनेन पपवित्यादीन्युदहरणानि प्रत्ययमुश्यन्ते। यदि द्विर्वचनादेकादेशः पूर्वं क्रियते तदा `वृद्धिरेचि' (6.1.88) इति वृद्धावेकादेशे कृते निमित्तनिमित्तिनोर्विशेषाभावाल्लिटि परतः पूर्वस्योचयमानं द्विवचनं न प्राप्नोतीति तस्य निरासायेदमुक्तम्--स्थानिवद्भावो द्विर्वचनमिति। केन पुनरत्र स्थानिवद्भावः? `द्विर्वचनेऽचि' (1.1.59) इत्यनेन? नैवम्; द्विर्वचननिमित्तेऽपि परतः पूर्वस्योच्यमानं द्विवचनं न प्राप्नोतीति तस्य निरासायेदमुक्तम्--स्थानिवद्भावो द्विर्वचनमिति। केन पुनरतर स्थानिवद्भावः? `द्विर्वचनेऽचि' (1.1.59) इत्यनेन? नैवम्; द्विर्वचननिमित्तेऽचि परतः पूर्वसय स्थानिवद्भाव उच्यते, न चात्र द्विर्वचननिमित्तं परमचं पश्यामः।
अत्र क्विदाहुः--अचीत्युपलक्षणम्, अचि य आदेशो दृष्टः स द्विर्वचने कर्त्तव्ये स्थानिवद्भवतीतीमं सूत्रार्थमाश्रित्यैतदुक्तम्। इह सम्प्रत्यनच्परत्वेऽप्येकादेशकरणकालेऽचः परस्य निमित्तभावेनश्रयणादच्ययमादेशः कृतः। तस्माद्भवितव्यं स्थानिवद्भावेन।
अन्ये त्वाहु--`एकादेशः पूर्वविधौ स्थानिवद्भवतीति वक्तव्यम्' इत्यनयेष्ट्या स्थानिवद्भावः।
`द्विर्वचनेऽचि' (1.1.59) इति योगाविभागाद्वा स्थानिवद्भावः इत्यपरे।
कथं पुनरयमेषां कार्याणां क्रम उपलभ्यते? इत्यत आह--`एकादेशात्' इत्यादि। पा+अ इति स्थितेऽकः सवर्णे दीर्घत्वं (6.1.101) प्राप्नोति, औत्वञ्च। तत्रैकादेशः--दण्डाग्रमित्यादौ सावकाशः, औत्वं तु न क्वचित् सावकाशम्; अतस्तावदनवकाशत्वात् प्रागौत्वं क्रियते, ततर कृते वृद्धिः प्रापनोति, द्ववचनञ्च, तत्र परत्वाद्वृद्धिर्भवति। द्विवचनं हि--पपाचेत्यादौ सावकाशम्, वृद्धेस्त्ववकाशः--खट्वैडकेत्यादौ। अतो वृद्धौ कृतायां पश्चाद्भवति द्विर्वचनं स्थानिवद्भावेन!
`णलः' इति। णकारोच्चारणं प्रत्ययग्रहणं यथा स्यात्। णलो णकारोच्चारणे हि णल्प्रत्ययोऽस्तीति तस्य ग्रहणं भवति। तस्मिंश्चासत्यल इत्युच्यमाने सत्यल्प्रत्ययस्याभावात् प्रत्याहारग्रहणं विज्ञायेत।
लकारोच्चारणं `श्याद्व्यध' (3.1.141) इत्यादिना विहितस्य णप्रत्ययस्य ग्रहणं मा भूदित्येवमर्थम्। अथ `एकवचनस्य' (7.1.32) इत्यनुवर्त्तते? तथा सति मुखसुखार्थम्।।

35. तुह्योस्तातङाशिष्यन्यतरस्याम्। (7.1.35)
`जोवताद्भवान्' इति। `आशिषि लिङ्लोटौ' (3.3.173) इति लोट् तिप्, शप् `एरुः' (3.4.86) इत्युत्वम्, तस्य तुशब्दस्य तातङ्। जीवतात्त्वम्' इति। सिप्, `सेर्ह्यपिच्च' (3.4.87) इति हिरादेशः; तस्य तातङ्। `जीव त्वम्' इति। `अतो हेः' (6.4.105) इति हेर्लुक्। अथ जीवतात् त्वमित्यत्र स्थानिवद्भावेन तातङो हिग्रहणेन ग्रहणाल्लुक्कस्मान्न भवति? `हुझल्भ्यो हेर्धिः (6.4.101) इत्यतो हेरित्यनुवर्त्तमाने पुनः `अतो हेः' (6.4.105) इति ग्रहणात्। तस्य ह्येतत् प्रयोजनम्--हिरूपावस्थितस्यैव हेर्लुग्यथा स्यात्। स्थानिवद्भावेन यच्छब्दान्तरं हिग्रहणेन गृह्यते तस्य मा भूत्।
अथ `ङिच्च' (1.1.53) इति वचनात् तातङ्यमन्त्यस्य कस्मान्न भवति? इत्याह--`ङित्करणम्' इत्यादि। गणप्रतिषेधार्थम्--ब्रूयात् भवानित्यत्र। वृद्धिप्रतिषेधार्थम्--मृष्टादित्यत्र। इतिकरणो हेतौ। यस्माद्गुणवृद्धिप्रतिषेधार्थं ङित्करणं तस्मात्सर्वादेशस्तातङ् भवति। यदि हि तस्यान्यत् प्रयोजनं न स्यात्, स्यादेवान्त्यस्य तातङ्। अस्ति च तस्यान्यत् प्रयोजनं गुणवृद्धिप्रतषेधः। तस्मिन् सति किं `ङिच्च' (1.1.53) इत्यन्त्यस्य भवतु, अथ `अनेकाल्शित्सर्वस्य' (1.1.55) इति सर्वस्य वा? तत्र परत्वात् सर्वादेशेनैव युक्तं भवितुम्। तस्मात् `अनेकाल्शित्सर्वस्य' (1.1.55) इति सर्वस्य वा? तत्र परत्वात् सर्दादेशेनैव युक्तं भवितुम्। तस्मात् `अनेकाल्शित्सर्वस्य' (1.1.55) इति सर्वस्यैव स्यादिति सर्वादेशो भवति। ननु च तुस्थानिकस्य तातङः स्थानिवदभावेन पित्त्वं प्राप्नोति; ततश्च हलि पिति सार्वधातुके यता ब्रवीत्वित्यत्रेड् भवति, तथा ब्रूताद्भवानित्यत्राणीटा भवितव्यम्?--एतच्चोद्यमपाकर्त्तमाह--`ङित्त्वाच्च' इत्यादि। अस्येति तातङः। किं कारणं निवर्तते? इत्याह--`ङिच्च' इत्यादि। चकारो हेतौ। तुस्थानिकस्य तातङो नाप्राप्ते पित्त्वे ङित्त्वमारभ्यत इति ङित्त्वेन हि पित्त्वं बाध्यते। तथासौ ङिद्भवत यदि स्थानिवद्भावेन प्राप्तं पित्त्वं निवर्त्तते। `तेन' इत्यादि। यत एवं पित्त्वं निवर्त्तते तेन पित्त्वाश्रय ईण्न भवति। ग्रामं गच्छतु भवान्। त्वं गच्छेति। `लोट् च' (3.3.62) इति बिध्यादौ लोट्।।

36. विदेः शतुर्वसुः। (7.1.36)
यद्यपि विदेरिति सामान्यनिर्देशोऽयम्, तथधापि ज्ञानार्थस्य ग्रहणं विज्ञायते। तस्यैव हि शतानन्तरः सम्भवति, नान्येषां विदीनाम्। तत्र सत्ताविचारणार्थयोः शतुरसम्भव एव; आत्मनेपदित्वम्। लाभार्थस्य तूभययदित्वात् सम्भवत्यसौ, न त्वनन्तरः; शप्रत्ययेन व्यवधानात्। ज्ञानार्थस्य तु लुग्विकरणत्वाच्छतुर्विकरणकृतं व्यवधानं नास्ति, अतस्तस्यैव ग्रहणमित्याह--`विद ज्ञाने' इति। `विद्वान्' इति। उगित्त्वान्नुम्, `सान्तमहतः संयोगस्य' (6.4.10) इति दीर्घः। अन्यतरस्यांग्रहणमनुवर्त्तते। तेन पक्षे विदन्, विदन्तौ, विदन्त इत्याद्यपि भवति। एचच गम्यमानत्वाद्वृत्तौ नोक्तम्।
अथ किमर्थमुकारोऽनुबन्धः क्रियते, नुमाद्युगित्कार्यं यथा स्यादिति चेत्? न; तस्य स्थानिवद्भावेनैव सिद्धत्वादित्यत आह--`स्थानिवद्भावात्' इत्यादि।
`क्वसोऽपि' इति। अपिशब्दादस्यापि। असत्युकारे सामान्यार्थे क्वसोरेव ग्रहणं स्यात्, नान्यस्य। अथ `वसोः सम्प्रसारणम्' (6.4.131) इति सूत्रं क्रियत एवास्यैव ग्रहणार्थम्, न क्वसोः; ननु च सत्यप्युकारकरणे सामान्यग्रहणं नोपपद्यते, एकानुबन्धकपरि(व्या.प.52) भा,यास्यैव ग्रहणं स्यात्, न क्वसोः?

इत्याह--`एकानुबन्धकग्रहणे' इत्यादि। एतत् परिभाषासूत्रम्। न भवति। नोपतिष्ठत इत्यर्थः। किं कारणं न भवति? इत्याह--`तथा च सति' इत्यादि। एवञ्च सतीत्यर्थः। यदि क्रियमाणेऽप्युकार एकानुबन्धपरिभाषोपतिष्ठते, एवं सत्युकारकरणमनर्थकं स्यात्। विनाऽपि तेन `वसः सम्प्रसारणम्' इत्युच्यमाने केवलस्यास्य ग्रहणं लभ्यत एव। तस्मादुकारकरणसामर्थ्यादियं परिभाषा नोपतिष्ठते।।

37. समासेऽनञ्पूर्वे क्त्वो ल्युप्। (7.1.37)

`अनञ्पूर्वे' इति। न नञ् अनञ् अनञ् पूर्वो यसय सोऽनञ्पूर्वः। `प्रकृत्य' इत्यादि। `समानकर्त्तृकयोः पूर्वकाले' (3.4.21) क्त्वा, `कुगतिप्रादयः' (2.2.18) इति समासः, `ह्रस्वस्य पिति कृति तुक्' (6.1.71) इति तुक्। `पार्श्वतःकृत्य' इति। `स्वाङ्गे तस्प्रत्यये कृभ्वोः (3.4.61) इति क्त्वा, `तृतीयाप्रभृतीन्यन्यतरस्याम्' (2.2.210 इति समासः। `नानाकृत्य' इति। `नाधार्थप्रत्यये च्व्यर्थे' (3.4.62) इति क्त्वा, पूर्ववत्समासः। `कृत्वा, हृत्वा' इति। एतत् प्रत्युदाहरणम्। अत्र कृत्वाशब्दोऽनञ्पूर्वोऽस्ति; किन्तु समासो न भवतीति ल्यबभावः। `परमकृत्वा, उत्तमकृत्वा' इति। `सन्महत्' (2.1.61) इत्यादिना समासः। कथं पुनरनेन समासः? कथञ्चं न स्यात्? सामानाधिकरण्याभावात्? वार्त्तमेतत्; कर्त्तरि क्त्वा विहितः, स एव च परमोत्तमशब्दाभ्यां विशिष्यते, तत् कथं सामानाधिकरण्याभावः! अथ क्रियाविशेषणत्वं तयोराश्रित्य सामानाधिकरण्यभाव उच्यते, एवमपि `विशेषणं विशेष्येण बहुलम्' (2.1.57) इत्यतो बहुलग्रहणानुवृत्तेरसामानाधिकरण्येऽपि समासो भवति।

ननु चानञ्पूर्वावेतौ समासौ, तत् कथमेतत्प्रत्युदाहरणमुपपद्यते? इत्याह--`अनञ्' इत्यादि। अनञिति नायं प्रसज्येपरतिषेधः, किं तर्हि? पर्युदासः--नञोऽन्यदनञ्। तत्र नञिवयुक्तन्यायेन (व्या.प.65) नञो यदन्यन्नञ्सदृशमव्ययं तदनञिति परिगृह्यते। तेन कारणेन नञव्ययमनव्ययञ्च परमशब्दादिकमुभयमप्येतदनञ् न भवति, न तत्राव्ययेन नञा सादृश्यमस्ति। अत्यन्ताभेदादनव्ययत्वाच्च यथाक्रमम्। तस्माद् यथा अकृत्वा, अहत्वेत्येतत् प्रत्युदाहरणमुपपन्नरूपम्, एवं परमकृत्वा, उत्तमकृत्वेयपि। यदि तर्हि अनञिति नञ्सदृशमध्ययं परिगृह्यते--स्नात्वाकालकः, पीत्वास्थिरक इत्यादावपि स्यात्, अस्ति ह्यत्रापि नञ्सदृशमध्ययं पूर्वपदम्; क्त्वाप्रत्ययस्याव्ययत्वादित्याह--`स्नात्वाकालकः' इत्यादि। मयूरव्यंसकादिषु समाससंज्ञार्थमेते समुदायाः पठ्यन्ते, तस्मान्निपातनाल्ल्यबादेशो न भवति।

`अथ वा' इत्यादि। `समासे' इत्यधिकरणसप्तम्यां सत्यां स्नात्वाकालकादिषु ल्यबादेशप्रसङ्गो भवतीति। तथा ह्यधिकरणसप्तम्यामयमर्थो भवति--समासेऽनञ्पूर्वे यः क्त्वा वर्त्तते तस्य ल्यब्भवति। एवञ्च सति देशविशेषपरिग्रहाभावाद्यथा समासस्यान्ते वर्त्तमानस्य क्त्वो ल्यब्भवति, तथा मध्येऽपि स्यात्। तस्मान्न चेयमधिकरणसप्तमी, किं तर्हि? निर्धारणसप्तमी। तस्मिंश्च पक्षे `समासे' इति जातावेकवचनम्, यथा--`कारके' (1.4.23) इति। अथ वा `व्यत्ययो बहुलम्' (3.1.85) इति सुब्व्यत्ययेन बहुवचनस्य स्थान एकवचनं वेदितव्यम्। `तेन' इत्यादि। यतो निर्धारण इयं सप्तमी, तेन क्त्वान्तः समास एव गृह्यते, न समासावयवः--स्नात्वेति। निर्घारणं हि समानजातीयस्यैव भवति, यथा--कृष्णा गवां सम्पन्नक्षीरतमेत्युक्ते गौरेव निर्धार्यमाणा प्रतीयते, तथाऽत्रापि `समासोऽनञ्पूर्वे' इत्युक्ते समासेष्वनञ्पूर्वेषु मद्ये यः क्त्वान्तः समासः स एव निर्धायमाणः प्रतीयते। तेन समासस्यैव क्त्वान्तस्य ग्रहणमिति तस्यैव ल्यबादेशेन भवितव्यम्, न च स्नात्वाकालकादिषु क्त्वान्तः समासः। स्नात्वाकालकादयो यद्यपि समासाः, न तु क्त्वान्ता इति ल्यबादेशो न भवति। स च समासः `येन विधिसतदन्तस्य' (1.1.72) इति तदन्तविधिना क्त्वान्तो गृह्यते। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणेन (व्या.प.126) वा प्रत्ययग्रहणपरिभाषया (भो.प.सू.7) तदन्तग्रहणं न शक्यते वक्तुम्। न हि क्त्वाप्रत्ययः समासादुत्पद्यते। तत्र यदि कृद्ग्रहणपरिभाषया (व्या.प.126) तदन्तो गृह्यते, नानाकृत्येत्यत्र न स्यात्; न ह्ययं गतिकारकपूर्वः। इहैव तु स्यात्--प्रकृत्य, पार्श्वतःकृत्येति। असिति ह्यत्रापि गतिः कारकश्च पूर्वोऽवयवः, `येन विधिस्तदन्तस्य' (1.1.72) इत्यनेन तदन्तविधौ गम्यमाने सर्वत्र भवतीति मन्यमान आह--`स च' इत्यादि। अत्रैवोपपत्तिमाह--`तथा च' इत्यादि। यस्मात् `येन विधिस्तदन्तस्य' (1.1.72) इत्यनेन क्त्वान्तः समासो गृह्यते, एवञ्च कृत्वा `अनञ्पूर्वे' इत्युच्यते। `येन विधिस्तदन्तस्य' (1.1.72) इत्यनेन क्त्वान्तः समासो गृह्यते, एवञ्च कृत्वा `अनञ्पूर्वे, इत्युच्यते। `येन विधिस्तदन्तस्य' (1.1.72) इत्यनेन हि सामान्येन तदन्तविधौ सति नञ्पूर्वस्यापि प्रसज्येत। तस्मात् तन्निवृत्त्यर्थम् `अनञ्पूर्वे' इति युक्तमुक्तम्। यदि कृद्ग्रहणपरिभा,या (व्या.प.126) क्त्वान्तः समासो गृह्यते, तदा गतिकारकपूर्वस्यैव ग्रहणं स्यात्। एवञ्च गतिकारकपूर्वस्य ग्रहणे सति नञ्पूर्वस्य प्रसङ्ग एव नास्ति। `नञ् न गतिर्न च कारकम्' इति। अतो हेतोर्यथैव परमकृत्वेत्यत्र प्रसङ्गो नास्ति, परमशब्दस्यागतित्वादकारकत्वाच्च; तथाऽकृत्वेत्यत्रापि, नञोऽगतित्वादकारकत्वाच्च। ततश्च प्रसङ्गाभावात् `अनञ्पूर्वे' इति न वक्तव्यं स्यात्, उक्तञ्च। तदेतस्मादनञ्पूर्व इति वचनात् `येन विधिस्तदन्तस्य (1.1.72) इत्यनेन क्त्वान्तः समासो गृह्यते, न तु कृद्गहणपरिभाषयेति स्थितमेतत्।

`प्रधाय' इति। अत्रान्तरङ्गत्वात् `दघातेर्हिः' (7.4.42) इति हिः प्राप्नोति। `प्रस्थाय' इति--अत्रापि `द्यतिस्यतिमास्थामित्ति किति' (7.4.40) इतीत्त्वम्। `प्रखन्य' इति। `जनसनखनाम्' (6.4.42) इत्यात्त्वम्। `प्रणभ्य' इति। `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इति दीर्घः। `आपृच्छ्य' इति `च्छ्वोः शूडनुनासिके च' (6.4.19) इति शत्वम्। `प्रतिदीव्य' इति। तेनैवोट्। `प्रपठ्य' इति। `आर्थधातुकस्येड् वलादेः' (7.2.35) इतीट्। अन्तरङ्गत्वं पनरेषामेकपदाश्रयत्वात्। ल्यबादेशस्य तु बहिरह्गत्वम्, समर्थानेकपदाश्रयसमासापेक्षत्वात्। हिप्रभृतिषु कृतेषु प्रधायेत्यादीनि रूपाणि न सिध्यन्ति? इति यश्चोदयेत्, तं प्रत्याह--`प्रधाय' इत्यादि। `ज्ञापितमेतत्' इति। `अदो जग्धिर्ल्यप्ति किति' (2.4.36) इत्यत्र।

अथ पूर्वग्रहणं किमर्थम्। नानञोत्येवमुच्येत? नैवं शक्यम्; अनञोत्युच्यमाने बहुव्रीहिरयं स्यात्--अविद्यमानो नञ् यत्रासावनञिति। ततश्चेहापि न स्यात्--

स्त्रैणीकृत्येति। स्त्रिया इदं स्त्रैणम्, `स्त्रीपुंसाभ्यां,नञ्स्नञौ भवनात्' (4.1.87) इति नञ्। तदन्तात् `अभूततद्भावे' (5.4.50) इत्यादिना च्विः, `अस्य च्वौ' (7.4.32) इतीत्त्वम्। `कुगतिप्रादयः' (2.2.18) इति समासः। पूर्वग्रहणे तु सति पूर्वशब्द आदिभूतावयवमाचष्टे। तेन यत्र समासादिभूतो नञ् तत्र न ल्यपा भवितव्यम्, तत्र स्त्रैणीकृत्येत्यत्र भवत्येव। न ह्यत्र समासादिभूतो नञवयवः, किं त्रिह? मध्यभूतः।
लित्करणम्--प्रतिकीर्ष्येत्यत्र लित्प्रत्ययात् पूर्वस्योदात्तत्वं यथा स्यात्। प्रकृत्येत्येवमादावृदात्तार्थं लित्करणं नोपपद्यते, धातुस्वरेणैव पूर्वस्योदात्तत्वं सिध्यति। तस्मादनेकाझवयव एव धार्लित्त्वं प्रयोजयति।।

38. क्त्वापि छन्दसि। (7.1.38)
`परिधापयित्वा, प्रत्यर्पयित्वा' इति। दधातेः, अर्त्तेश्च हेतुमण्णिच्, `अर्त्तिह्री' (7.3.36) इत्यादिना पुक्, `पुगन्तलघूपपधस्य' (7.3.86) इति गुणः, क्त्वा, इट् अयादेशः। `उद्धृत्य' इति। `हृञ् हरणे' (धा.पा.899), `झयो होऽन्यतरस्याम्' (8.4.62) इति हकारस्य धकारः।
`वा छन्दसि' इति। वक्तव्ये `क्त्वापि छन्दसि' इति। वचनमसमासेऽपि यथा स्यात्--अर्च्य तान् देवान् गत इति।।

39. सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः। (7.1.39)
`पन्थाः' इति। पथिन्नित्येतस्माज्जस्, तस्य सुः, `पथिमथ्यृभुक्षामात्' (7.1.85) इत्यात्त्वम्, `इतोऽत्सर्वनामस्थाने' (7.1.86) इतीकारस्यात्त्वम्, `थो न्थः' (7.1.87) इति न्थादेशः।
`सुपाम्' इत्यादिना सुपां स्थाने सुप आदेशा भवन्तीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--पूर्वसूत्रादपिशब्दोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, तेन सुपामन्येऽपि सुपो भवन्ति। `धुरि दक्षिणायाः' इति। सप्तम्येकवचनस्य स्थान पञ्चम्येकवचनम्, षष्ठ्येकवचनं वा।
`तिङाम्' इत्यादि। तिङाञ्च तिङो भवन्तीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु पूर्वपदेव वक्तव्यम्।
`आर्द्रे चर्मन्' इति। सप्तम्येकवचनस्य चर्मन्शब्दाल्लुक्।

`यत्' इति। अत्रापि यच्छब्दात्, तच्छब्दाच्च।
`धीती' इत्यादि। `धीति-मति-सुष्टुतिशब्देभ्यः परसय तृतीयैकवचनस्य पूर्वसवर्ण इकारः, उभयोरकः सवर्णे (6.1.101) दीर्घत्वम्।
`उभा' इति। उभशब्दात्प्रथमाद्विवचनस्याकारः। `प्रथमयोः पूर्वसवर्णः' (6.1.102) इत्येकादेशः।
`न ताद् ब्राह्मणाद् निन्दामि' इति। तच्छब्दाद् ब्राह्मणशब्दाच्च द्वितीयैकवचनस्यात्। निशब्दे परतः `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इति तकारस्य नकारादेशः।
`युष्मे, अस्मे' इति। युष्मदस्मच्छब्दाभ्यां परस्य च जसः `शे' (1.1.13) इत्ययमादेशः। शकारः सर्वादेशार्थः। अथेह `यूयषयौ जसि' (7.2.93) इति यूयवयादेशौ कस्मान्न भवतः? इत्याह-`यूयादेशः' इत्यादि।
`उरुया, धृष्णुया' इति। उरुधृष्णुशब्दाभ्यां परस्य तृतीयैकवचनस्य यादेशः।
`नाभा' इति। नाभिशब्दात् सप्तम्ये कवचन्सय डादेशः डकारष्टिलोपार्थः।
`अनुष्ट्या' इति। अनुष्टुप्शब्दात् तृतीयैकवचनस्य ड्यादेशः।
`साधुया' इति। साधुशब्दात् परस्य प्रथमैकवचनस्य याजादेशः। चकारोऽन्तोदात्तार्थः। `सोर्लुकि प्राप्ते इति। याजित्ययमादेशो विधीयत इति शेषः। लुक्प्राप्तिस्तु `स्वमोर्नपुंसकात्' (7.1.23) इत्यनेन।
`वसन्ता' इति। वकन्तशब्दात् परस्य सप्तम्येकवचनस्यालित्ययमादेशः। लित्करणं लित्प्रत्ययात् पूर्वस्योदात्तत्वं यथा स्यात्।
`उपसंख्यानम्' इति। प्रतिपादनमस्यार्थः। उत्तरत्राप्युपसंख्यानशब्दस्य प्रतिपादनमर्थः। प्रतिपादनं त्वपिशब्दमाश्रित्य कर्त्तव्यम्। उर्विया, दार्विया' इति। उरुदारुशब्दाभ्यां परस्य तृतीयैकवचनस्येयादेशः। `सुक्षेत्रिया' इति। सुक्षेत्रिन्नित्यादेर्मत्वर्थीयेनिप्रत्ययान्तात् परस्य तृतीयैकवचनस्य डियाजादेशः। डकारष्टिलोपार्थः। चकारोऽन्तोदात्तार्थः। `सरसी' इति। सरःशब्दात् सप्तम्येकवचनस्य ईकारः। `प्रबाहवा' इति। प्रबाहुशब्दात् तृतीयैकवचनस्याङादेशः, `घेङिति' (7.3.111) इति गुणः, अवादेशः। ननु च
`ङित्त्वे विद्याद्वर्णनिर्देशमात्रं वर्णे यत्स्यात्तच्च विद्यात्तदादौ।।' (म.भा.3.247)
इत्युक्तम्, न चेहादौ ङकारः, तत् कथं गुणः? ङित्करणसामर्थ्याद्भविष्यतीत्यदोषः। `स्वप्नया' इति। स्वप्नशब्दात् परस्य तृतीयैकवचनस्यायाच्, `अतो गुणे' (6.1.97) पररूपत्वम्। चकारः स्वरार्थः। `नावया' इति। मौशब्दात् परस्य तृतीयैकवचनस्यायारादेशः। रेफः `उपोत्तमं रिति' (6.1.217) इत्युपोत्तमाकारस्योदात्तत्वार्थः।।

40. अमो मश्। (7.1.40)

`अमिति मिबादेशो गृह्यते' इति द्वितीयैकवचनाशङ्कां निराकारोति। द्वितीयैकवचनस्याग्रहणम्; छन्दसि यथादृष्टानुविधानात्। अपिशब्दानुवृत्तेर्वा, तदनुवृत्तौ ह्येषं सम्बन्धः क्रियते--अमो मश्च भवति, अपिशब्दात् क्वचिच्छ्रवणमपीति। `वधीम्' इति। हन्तेर्लुङ, `चलेः सिच्' (3.1.44) सिप्, तस्य `तस्थस्थ' (3.4.101) इत्यादिनाऽम्, तस्य मशादेशः--अकार उच्चारणार्थः, `लुङि च' (2.4.43) इति हन्तेर्वधादेशा, `आर्धधातुकस्य' (7.2.35) इत्यादिनेट् `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट् `इट ईटि (8.2.28) इति सिचो लोपः, सवर्णदीर्घतद्वलम्। `क्रमीम्' इति। `क्रमु पादविक्षेपे' (धा.पा.473) सर्वं पूर्ववत्। अयमत्र विशेषः--`स्नुक्रमोरनात्मनेपदनिमित्ते' (7.2.36) इतीट्। अवधिवम्, अक्रमिषमिति प्राप्ते।
`शित्ककरणं सर्वादेशार्थम्' इति। असति तस्मिन् `अलोऽन्त्यस्य' (1.1.52) स्यादिति भावः। ननु च मकारस्य मकारवचने प्रयोजनं नास्तीत्यन्तरेणापि शकारं सर्वादेशो भविष्यति? इत्याह--`मकारस्य' इत्यादि। अस्ति हि मकारविधाने प्रयोजनम्। किं तत्? `मोऽनुस्वारः' (8.3.23) प्राप्नोति; स मा भूदिति। सत्येतस्मिन् प्रयोजने यदि शकारो न क्रियेत, तदाऽन्त्यस्यैव स्यात्, न स्यात्, न सर्वस्य। तस्मात् सर्वादेशार्थः शकारः कर्त्तव्यः।।

41. लोपस्त आत्मनेपदेषु। (7.1.41)
`अदुह्र' इति। दुहेर्लङ, अदादित्वाच्छपो लुक्, `आत्मनेपदेष्वनतः' (7.1.5) इत्यादेशः, `बहुलं छन्दसि' (7.1.8) इति रुट्, तकारलोपे कृते द्वयोरकारयोः `अतो गुणे' (6.1.97) पररूपत्वम्। दुह्राम्' इति। लोट्, बहुवचनं झः, टेरेत्वम्, आमादेशः, झादेशस्याते रुडागमः, पूर्वच्छपो लुक्, तकारलोपे कृते `अकः सवर्णे दीर्घः, (6.1.10)। `शये' इति। लट्, एकवचनान्तः, `शीङः सार्वधातुके गुणः' (7.4.21), शपो लुक्। `दुहाम्' इति। लोट् एकवचनान्तः, टेरेत्त्वम्, `आमेतः' (3.4.90) इत्याम्। `दुग्धाम्' इति। `दादेर्धातोर्धः (8.2.32), `झषस्तथोर्धोऽधः' (8.2.40) इति धत्वम्, `झलां जश् शशि' (8.4.56) इति धकारस्या गकारः।
`अपीत्यधिकरात्' इत्यादि। `क्त्वादि छन्दसि' (7.1.38) इत्यतोऽपीत्यनुवर्त्तते, तत्रैवमभिसम्बन्धः क्रियते--लोपो भवति श्रवणमपीति; तेन कुरुत इत्यत्र न भवति। करोतेर्गुणे कृते `अत उत्सार्वधातुके' (6.4.110) इत्युत्त्वम्। यदि अपिशब्दानुवृत्तेः क्वचिच्छ्रवणमिप भवति, अत एव हेतोः परस्मैपदेषु न भवतीति किमात्मनेपदग्रहणेन? एवं तर्हि विस्पष्टार्थमात्मनेपदग्रहणम्।।

42. ध्वमो ध्वात्। (7.1.42)
`वारयध्वात्' इति। वृञो वृङो वा हेतुमण्णिजन्तात् `वृञ् आवरणे' (धा.पा.1813) इत्यस्माद्वा चुरादिणअयन्ताल्लोट्, तस्य ध्वम्, तस्य ध्वात्। `वारयध्वम्' इति। टेरेत्त्वे कृते `सवाभ्यां वामौ' (3.4.91) इत्यमादेशः।।

43. यजध्वैनमिति च। (7.1.43)

44. तस्य तात्। (7.1.44)
`लोण्मध्यमपुरुषबहुवचनस्य' इति। अथ प्रथमपुरुषस्यैकवचनं कस्मान्न भवति? छन्दसि यथादृष्टानु विधानात्, अपिशब्दानुवृत्तेर्वा। `कृणुतात्' इति। `कृवि हिंसाकरणयोः' (धा.पा.598) इत्यस्यैदित्त्वान्नुम्, `धिन्विकृण्व्योर च' (3.1.80) इत्युप्रत्ययः, अकारश्चान्तादेशः, अतो लोपः (6.4.48)। `संसृजतात्' इति। सृजेस्तुदादित्वाच्छः। `गमयतात्' इति। णिच्, `मितां ह्रस्वः' (6.4.92)।।

45. तप्तनप्तनथनाश्च। (7.1.45)
`श्रृणोतेः' इति। `श्रुवः शृ च' (3.1.74) इति श्नुप्रत्ययः, शृभावश्च। पित्त्वे ङित्त्वाभावाद्गुणः। `सुनोत' इति। `स्वदिभ्यः श्नुः' (3.1.73)। `दधातन' इति। दधातेः `श्लौ' (6.1.10) इति द्विर्वचनम्। अत्रापि पूर्वलत् ङित्त्वाभावात् `श्नाभ्यस्तयोरातः' (6.4.112) इत्याकारलोपो न भवति। `धत्त' इति। `दधस्तथोश्च' (8.2.38) इत्यभ्यासादकारस्य धकारः। धातोरकारलोपे कृते `झलां जश् झशि' (8.4.53) इति जश्त्वम्--डकारः, तस्य `खरि च' (8.4.55) इति चर्त्वम्--तकारः। `जुजुष्टन' इति। इषेरिच्छार्थात् पूर्ववच्छः, `बहुलं छन्दसि' (2.4.73) इति तस्य लुक्। `यदिच्छत' इति। `इषुगमियमां छः' (7.3.77)। चकार स्तस्येत्यस्येहानुकर्षणार्थः।।

46. इदन्तो मसि। (7.1.46)
`इदन्तः' इति। तकारोऽसन्देहार्थः। असति हि तकारे यणादेशे कृते `यन्तः' इति भवितव्यम्, तत्र सन्देहः स्यात्--किमयं यकारान्तः, उतेकारान्त इति। इद् अन्तो यस्य इदन्तः। मसित्ययं शब्दोऽन्यपदार्थः। सकारान्तमसीत्यविभक्तिकोऽयं निर्द्देशः; `सुपां सुलुक्' (7.1.39) इति प्रथमैकवचनस्य लुप्तत्वात्। इकार उच्चारणार्थः। भसीत्ययं शब्द इकारान्तो भवतीत्यस्यार्थं `मसः सकारान्तस्य' इत्यादिना व्यक्तीकरोति। `सकारान्तस्य' इत्यनेन मन्त्रं वोचेमेत्यत्राकारान्तस्य न भवतीति दर्शयति। कथं पुनः सकारान्तस्योपादानेऽसकारान्तस्य प्राप्नोति? एकदेशविकृतस्यानन्यत्वात्। यद्येवम्, कस्मान्न भवति?

छन्दसि यथादृष्टानुविधानात्। अपौत्यधिकाराद्वा। `वोचेम' इति। वचेः परस्याशिषि लिङो मस्, यासुट्, `लिङ्याशिषि' (3.1.86) इत्यङ्, `अतो येयः' (7.2.80) इतीयादेशः, वचेः परस्याशिषि लिङो मस्, यासुट् `लिङ्याशिषि' (3.1.86) इत्यङ्,`अतो येयः' (7.2.80) इतीयादेशः, `वच उम्' (7.4.20) इत्युमागमः। `छन्दस्युभयथा' (3.4.117) इति सार्वधातुकत्वात् `लिङः सलोपोऽनन्त्यस्य' (7.2.79) इति सलोपः, `नित्यं ङितः' (3.4.99) इत्युत्तमस्य सलोपः, `लोपो व्योर्वलि' (6.1.66) इति यकारसय च, `आदगुणः' (6.1.87)। `आगम इकारो भवति' इति। कथम्पुनरयमागमः? कथञ्च न स्यात्? आगमलिङ्गाभावात्। टित्त्व--कित्त्व-मित्त्वान्यागमलिङ्गानि, अत्र चैषामेकमपि नास्ति, ततो नासावागमः, यथा--`अस्तेर्भूः' (2.4.52) इति भूभावः। यद्येवम्, `न य्वाभ्यां पदान्ताभ्यां पूर्वौ च ताभ्यामैच्' (7.3.3) इत्यैजागमो न स्यात्। अथ पूर्वग्रहणात् तस्यागमत्वमवसीयते? अस्याप्यन्तग्रहणादवसीयताम्। यथैव हि पूर्वशब्दोऽवयववचनो नियतदेशमदयवमाचष्टे, तथान्तशब्दोऽपीति समानमेतत्। `स च तस्यान्तो भवति' इति। अन्त एकदेशोऽवयव इति यावत्। अत एवासौ तद्गरहणेन गृह्यत इत्याह--`तद्ग्रहणेन च प्रयोजनम्--पृथक् स्वरनिवृत्तिरिति; `तिङ्ङतिङा' (8.1.28) इति निघातश्च। `मस इक्' इति नोक्तम्; असन्देहार्थम्। एवं ह्युच्यमाने सन्देहः स्यात्--किमिगागमः, उत प्रत्याहार इति। `दीपयामसि, जम्भयमसि' इति। `दीपी दृप्तौ' (धा.पा.1150),जभि जृभी गात्रविनामे'[`जभी, जृभि--धा.पा] (धा.पा.388,389)--आभ्यां णअयन्ताभ्यां लट्, `रधिजभोरचि' (7.1.61) इति लुम्। क्वचित् भञ्जयामसीति पाठः। स च `भञ्जो आमर्दने' (धा.पा.1453) इत्यस्य ण्यन्तस्य वेदितव्यम्।।

47. क्त्वो यक्। (7.1.47)
`दत्त्वाय' इति। `दो दद् घोः' (7.4.46) इति ददादेशः।

`क्त्वापि छन्दसि' इत्यादि। एवमुच्यमाने द्विः क्त्वाग्रहणं न कर्त्तव्यमिति भावः। `समास इत्यत्रानुवर्त्तते' इति। `समासेऽनञ्पूर्वे' (7.1.37) इत्यतः। यदि तस्यानन्तरमिदमुच्यते, तत्रापि समासग्रहणमनुवर्त्तत इत्याशङ्का स्यात्, ततस्तस्यानुवृत्तिनिवृत्त्यर्थं तस्यानन्तरमिदं नोक्तमित्यभिप्रायः।।

48. इष्ट्वीनमिति च। (7.1.48)
`इष्ट्वीनम्' इति। वच्यादिसूत्रेण (6.1.15) सम्प्रसारणम्। `पीत्वीनम्' इति। `धुमास्था' (6.4.66) इत्यादिनेत्त्वम्।
एतच्चेतिकरणादाद्यर्थाच्चकरास्यानुक्तसमुच्चयार्थत्वाद्वा लभ्यते। अनयोरन्यतरोपादानेनैव सिद्ध उभयोरुपादानं वैचित्र्यार्थम्।।

49. स्नात्व्यादयश्च। (7.1.49)
`स्नात्वी, पीत्वी' इति। आकारस्य स्थान ईत्त्वन्निपात्यते। ननु च स्नात्व्यादयः शब्दाः प्रातिपदिकगणे न पठ्यन्ते, तत्कथं ते वेदितव्याः? कथं चादिशब्देन ते शक्या लक्षयितुम्? इत्याह `प्रकारार्थोऽयमादिशब्दः' इति। एवम्प्रकारा य एतत्सदृशाः शब्दास्ते स्नात्व्यादयो वेदितव्यः।।

50. आजजसेरसुक्। (7.1.50)
जसेरिति पूर्वाचार्यनिर्द्देशः। पूर्वाचार्या हि जसिरित्येवं विहतवन्तः। `ये पूर्वासो ये परास इत्यत्र' इत्यादि चोद्यम्। एतच्च जातौ पदार्थे। तत्रान्यत्र चरितार्थत्वाच्छास्त्रयोस्तुल्यबलयोर्विरोधे सति परस्पर प्रतिबन्धादप्रवृत्तौ प्राप्तायां `विप्रतिषेधे परं कार्यम्' (1.4.2) इति क्रियते--विप्रतिषेधे परं भवति, तत्र कृते यदि पूर्वमपि प्राप्नोति तदपि भवतीति जातिपदार्थः पुन प्रसङ्गविज्ञानस्य विषयः। `सकृत्' इत्यादिना परीहारः। एव च ष्यक्तो पदार्थेऽन्यत्राकृतार्थत्वाद्द्वयोरपि शास्त्रयोरीदृशे विषये पर्यायेण प्रवृत्तौ प्राप्तायामयं नियम आरभ्यते--विप्रतिषेधे परमेव भवति, न पूर्वमिति। तेन पुनः प्रसङ्गविज्ञानाभावाद्बाधितः शोभावो न भवति। न ह्यसति पुनःप्रसङ्गे यद्बाधितं तदुत्सहते पुनर्भवितुम्।।

51. अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि। (7.1.51)
`आत्मप्रीतौ' इति। विषयसप्तमीयम्। अत एवाह--`आत्मप्रीतिविषये क्यचि' इति। आत्मप्रीतिर्विषयो यस्य क्यचः स तथोक्तः। `अश्वस्यति' इति। आत्मनोऽश्वमिच्छतीति `सुपः आत्मनः क्यच्' (3.1.8) अनेनासुक्, अतो गुणे' (6.1.97) पररूपत्वम्। एवं `क्षीरस्यति' इत्यादावपि वेदितव्यम्। सर्वत्रात्मप्रीतिविषये क्यच्। यो ह्यात्मनोऽश्वादिकमिच्छति स नियोगत आत्मनः प्रोत्यर्थमिच्छति। यद्येवम्, इच्छायां क्यच्विधीयमानः सर्वत्रात्मप्रीतिविषये भविष्यतीतीच्छायां वक्तव्यम्? प्रसिद्ध्युपसंग्रहार्थमात्मप्रीताविति लौकिकस्यार्थस्योपादानम्, तेन यत्रात्मप्रीतावसुग्लोके प्रयुज्यते तत्रैव भवति, नान्यत्र। तेनाश्ववृषयोर्मैथुनेच्छायां क्षीरलवणयोर्लालसायामित्युपपन्नं भवति।
`अश्वीयति' इति। अश्वमिवाचरतीति `उपमानादाचारे' (3.1.10) इति क्यच्, `क्यचि च' (7.4.33) इतीत्त्वम्।
`अश्ववृषयोः' इत्यादि। ` अश्ववृष्योर्मैथुनेच्छायामसुग्भवति' इत्येतदर्थरूपं व्याख्येयमित्यर्थः।
`क्षीरलवणयोः' इत्यादि। वक्तव्यमित्येतदपेक्षते। `क्षोरलवणयोर्लालसायामसुग्भवति' इत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु कृतमेव।
`अन्यत्रात्मप्रीतावपि न भवति' इति। आत्मनोऽश्वादिकमिच्छत्यश्वीयतीति। लवणीयति। `तृष्णातरेकः' इति। तृष्णाया अतिरेकः=अतिशयः, प्रकर्षः,

अधिक्यमित्यर्थ-।।

52. आमि सर्वनाम्नः सुट्। (7.1.52)
`ह्रस्वनद्यापो नुट्' (7.1.54) इति प्राप्ते वचनम्।
`आमीति षष्ठीबहुवचनं परिगृह्यते' इति। इह बहव आमः सम्भवन्ति--षष्ठीबहुवचनम्, `ङेराम्नद्याम्नीभ्यः' (7.3.116) इति,
`किमेत्तिङव्ययधादाम्वद्रव्यप्रकर्षे' (5.4.11) इति, `कास्प्रत्ययादाममन्त्रे लिटि' (3.1.35) इत्याम्; एतेषां यदि सर्वेषां ग्रहणं स्यात् तदा सर्वेषाम्
`ह्रस्वनद्यापो नुट्' (7.1.54) इति नुट् प्रसज्येत, तत्राप्येतदेवाम्ग्रहणमनुवर्त्तते, षष्ठीबहुवचनस्यैवेष्यते अतस्तदेव गृह्यत इत्याह--`तस्य हि परत्वात्' इत्यादि। सुटो नुटश्च षष्ठीबहुवचनमवकाशः, आट्प्रभृतीनां तु चतुरर्थ्येकवचनादिः ङेराम्नद्याम्नीभ्यः' (7.3.116) इति परत्वादाडादयो भवन्ति। तत्र `आण्नद्याः' (7.3.112) इत्याट्--कुमार्यामिति। `याडापः' (7.3.113) इति याट्--खट्वायामिति। `तर्वनाम्नः स्याड्ढ्रस्वश्च' (7.3.114) इति स्याट्--सर्वस्यामिति। यस्तर्हि घान्तादाम् विधीयते यश्च लिट्याम् तौ कस्मान्न गृह्येते? इत्याह--`यश्च किम्' इत्यादि। तयोर्ह्यको घान्ताद्विधीयतेऽपरो घातोः। न च घान्तस्य सर्वनामसंज्ञा, नापि घातोरिति। न तौ सर्वनाम्नः परौ सम्भवत इति न गृह्येते। अथ तु सर्वनाम्नः परौ न सम्भवत इति कृत्वैतदर्थं तयोर्ग्रहणमनुपपन्नम्, तथाऽप्युत्तरार्थं तूपपद्यते, विद्येते तौ हि हरस्वान्तात् परौ--पचतितराम्, पचतितमाम्, चिकीर्षाञ्चकार, कारायाञ्चकार? इत्यत आह--
`सानुबन्धकादिति वा तौ न गृह्येते' इति। निरनुबन्धकपरिभाषयेति भावः। तत्र घादामोरुकारोऽनुबन्धः, इतरस्य त्वकारः। तथा चोक्तदम्--
आमोऽमित्त्वमदन्तत्वादिति।
`उत्तरार्थः' इत्यादि। `त्रेस्त्रयः' (7.1.53) इत्यामि परतो यथा स्यात्। एतदर्तोऽप्यामीति सप्तमीनिर्द्देशः कस्मान्न भवति, अस्ति ह्यत्रापि प्रयोजनम्--आमि परतः सर्वनाम्नः सुङ् यथा स्यात्? इत्यत आह--`इह तु' इत्यादि। `उभयनिर्देशे पञ्चमीनिर्द्देशो बलीयान्' (शाक.प.97) इति `तस्मादित्युत्तरस्य' (1.1.67) इति `सर्वनाम्नः' इत्यनया पञ्चम्या आमीत्यस्याः सप्तम्याः षष्ठ्यां परिकल्पितामाम एव सुटा भवितव्यमिति नास्तीह निर्द्देशस्य प्रयोजनम्।।

53. त्रेस्त्रयः। (7.1.53)
`ह्रस्वनद्यापो नुट्' (7.1.44) इति प्राप्ते वचनम्। `त्रयाणाम्' इति। `सुपि च' (7.3.102) इति दीर्घः. ननु च `णिजां त्रयाणां गुणः श्लौ' (7.4.75) इति निपातनादेव सिद्धम्, तत्किमर्थमिदमारभ्यते? एवं सिद्धे सतीदमारभ्यमाणमेतज्ज्ञापयति--`अबाधकान्यपि निपातनानि भवन्ति (पु.प.वृ.99) इति, तेन पुरातनमिति सिद्धं भवति; अन्यथा `पुराणप्रोक्तेषु' (4.3.105) इति निपातनेन बाधित्त्वान्न सिध्यति।
`त्रीणामपीष्यते छन्दसि' इति। एतच्चापीत्यधिकाराद्वा, `सर्वे विघयश्छन्दसि विकल्प्यन्ते (पु.प.वृ.56) इति वा लभ्यते।।

54. ह्रस्वनद्यापो नुट्। (7.1.54)
`कुमारीणाम्' इति। `वयसि प्रथमे' (4.1.20) इति ङीष्। `गौरीणाम्' इति। `षिद्गौरादिभ्यश्च' (4.1.41) इति ङीष्। `शाङ्गर्गरवीणाम्' इति।
`शाङ्गर्गरवाद्यञो ङीन्' (4.1.73) इति ङीन्। `लक्ष्मीणाम्' इति। `अवितृस्तृतन्त्रिभ्य ईः' (पं.उ. 3-158) इत्यनुवृत्तौ `लक्षेर्मुट् च' (पं.उ.3.160) इतीर्मुट् च। `ब्रह्मबन्धूनम्' इति। ब्रह्मा बन्धुरासामिति बहुव्रीहिः। `ऊङुतः (4.1.66) इत्यूङ्। `खट्वानाम्' इति। `अजाद्यतष्टाप्' (4.1.4)।
`बहुराजानाम्' इति। `डाबुभाभ्यामन्यतरस्याम्' (4.1.13) इति डाप्। `कारीषगन्ध्यानाम्' इति। कारीषगन्धेरपत्यमित्यण। तस्य `अणिञोरनार्षयोः' (4.1.78) इत्यादिना ष्यङादेशः, `यङश्चाप्' (4.1.74) इति चाप्।।

55. षट्चतुर्भ्यश्च। (7.1.55)
`पञ्चानाम्' इति। `नोपधायाः' (6.4.7) इति दीर्घः, `नलोपः प्रातिपदकान्तस्य' (8.2.7) इति नलोपः। `षष्णाम्' इति। `झलां जशोऽन्ते' (8.2.39) इति षकारस्य डकारः, `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इति डकारस्य णकारः, `ष्टुना ष्टुः' (8.4.41) इति नकारस्य णकारः।
`ष्णान्ता षट्' (1.1.24) इति रेफान्ताया अपि संख्यायाः कस्मान्न विहिता षट्संज्ञेति, एवं सतीह चुतुर्ग्रहणं न कर्त्तव्यं भवति? इत्याह--`रेफान्तायाः' इत्यादि। गतार्थम्। `बहुवचननिर्देशात्' इत्यादि। यदि हि शब्दस्य प्रधानस्य ग्रहणं स्यात्, तदेतरेतवयोगपक्षे `षट्चतुर्भ्याम्' इति द्विवचने निर्देशं कुर्यात् समाहारपक्षे त्वे कवचनेन `षट्चतुरः' इति बहुवचनेन तु निर्देशः कृतः। तस्माद्बहुवचननिर्देशात् संख्याप्रधानस्यैव षठ्संज्ञकस्य चतुःशब्दस्य च ग्रहणम्।
तस्य चेदं प्रयोजनम्--यत्र संखक्यायाः प्राधान्यम्, तेन तदन्तादपि भवति। अर्थप्रधाने हि निर्देशेऽर्थग्रहणेतद्भवति, अर्थाच्च शब्दद्वारेणैवामः परत्वं विज्ञायते।
अतः केवलेभ्यः षद्चतुर्भ्यो भवति, तदन्ताच्च। तदन्तादपि शब्दद्वारेणैवामः परत्वं भवत्येव।
`उपसर्जनोभूतायास्तु' इत्यादि। बहुवचननिर्देशाद्वि संख्यार्थस्येदं ग्रहणम्। स चार्थो द्विविधः--प्रधानः अप्रधानश्च। तत्र प्रधाने कार्यसम्प्रत्ययाद्यत्र संख्यायाः प्राधान्यं तत्र तदन्तादपि भवति। यत्र तूपसर्जनीभूता संख्या तत्र न भवति--प्रियषषामित्यादौ। अन्यपदार्थस्य ह्यत्र प्राधान्यम्, संख्यायास्त्वप्राधान्यम्।
`प्रियपञ्च्आम' इति। अल्लोपे (6.4.134) कृते `स्तोः श्चुना श्चुः' (8.4.40) इति श्चुत्वम्।।

56. श्रीग्रामण्योश्छन्दसि। (7.1.56)
श्रीग्रामण्योरिति सम्बन्धलक्षणा षष्ठी। `नित्यार्थं `वचनम्' इति। श्रीशब्दस्य, न तु ग्रामणीशब्दस्य। तस्तु तु प्राप्त्यर्थमेव। यथैव हि भाषायां नदीसंज्ञापक्षे `ह्रस्वनद्यापो नुट्' (7.1.54) इति सिध्यति तथा छन्दस्यपि। तस्मान्नित्य यथा स्यादित्येवमर्थम्। असति ह्यस्मिन् यदा नदीसंज्ञा, तदैव स्यात्, नान्यदा। `यदा सूताश्च' इत्यादि। एतेनैतद्दर्शयति--यदा सूतशब्दस्य ग्रामणीशब्देन सह कर्मधारयः क्रियते तदा सूतग्रामणीशब्दो न ह्रस्वान्तः न नद्यन्तः, नाप्याबन्त इति न प्राप्नोति, इष्यते च, ततो यथा स्यादित्यवमर्थं वचनम्। यदा सूतग्रामणीशब्दयोः `सर्वो द्वन्द्वो विभाषयैकवद्भवति' (पु.प.वृ.50) इत्येकवद्भावी द्वन्द्वः, तदा `स नपुंसकम्' (2.4.47) इति नपुंसकत्वात्, `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति ह्रस्वत्वं कृत्वा बहूनां सूतग्रामणीशब्दानामेकशेषञ्च, ततः षष्ठीबहुवचनं विधीयते। तदा ह्रस्वान्तत्वादेव सिद्धमिति नार्थस्तवर्थेन वचनेन।।

57. गोः पदान्ते। (7.1.57)
`ऋक्पादान्ते वर्त्तमानात्' इति। छन्दसि ऋक्पाद एव सम्भवति, न श्लोकपाद इति ऋक्पादग्रहणम्।।

58. इदीतो नुम् धातोः।
`कुण्डिता, हुण्डता' इति। `कुडि दाहे' (धा.पा.270), `हुडि सङ्घाते' (धा.पा.269)--आभ्यां तृच्, इट्, `ऋदुशनस्' (7.1.94) इत्यादिनानङ्। `किमयं धातूपदेशावस्थायामेव नुमु विधीयते? इत्याह--`कुण्डा, हुणडा' इत्यादि। यदि प्रत्यय उत्पन्ने नुम् स्यात्, तद प्रत्ययविघधानवेलायं कुडिडुड्योरगुरुत्वात् क्तिन्नेव स्यात्, न त्वकारप्रत्ययः, स चेध्यते। तस्मात् तदर्थं धातूपदेशावस्थायामेव नुम् भवतीत्यवसीयते। कथं पुनर्धातूपदेशावस्थायां नुम् भवतीत्यवसीयते, यावतात्रोपदेशग्रहणं नास्ति? इत्याह--`तथा हि' इत्यादि। `धिन्विकृण्ष्योर च' (3.1.80) इत्युप्रत्ययविधानकाले नुमनुषक्तयोर्ग्रहणं सनुम्कयोरेव प्रकृततवं यथा स्यात्। एवं सनुम्कयोः परकृतत्वं भवति यद्युपदेशावस्थायामेव नुम् भवति, नान्यथा। तस्मान्नुमनुषक्तयोर्ग्रहणाज्ज्ञापकादवसीयते--धातूपदेशावस्थायामेव नुम् भवतात्। तस्य ह्यतत् प्रयोजनम्--उपदेशावस्थायामेव नुम् यथा विज्ञायेतेति। न हि तन्नुमर्थं प्रयुज्यते; नुम् भवतीति। तस्य ह्यतत् प्रयोजनम्--उपदेशावस्थायामेव नुम् यथा विज्ञायेतेति। न हि तन्नुमर्थं प्रयुज्यते; नुम भवितव्यम्, तत्र लक्षणवशादेव `धिन्विकृच्च्योर च' (3.1.80) इति नुमनुषक्तयोर्ग्रहणम्, तत्कथमस्यार्थस्य ग्रहणं ज्ञापकम्? नैतदस्ति; न हि `धिन्विकृण्व्योर च' (3.1.80) इत्ययमिका निर्देशः, स हि `रोगाख्यायां ष्वुल् बहुलम्' (3.3.108) इति बहुलवचनेन सन्निधानात् क्वचिदेव भवति न सर्वत्र। एवञ्च `गुप्तिज्किद्भ्यः सन्' (3.1.5) इत्येवमादयो निर्देशा उपपद्यन्ते। तस्मात् `धिन्विकृण्व्योः' (3.1.80) इति नायमिका निर्द्देशः, किं तर्हि? उच्चारणार्थेनेकारेण, यथा--`इन्धिभवतिभ्याम्' (1.2.6) इत्यत्रेकारेण निर्द्देशः; अन्यथा `अनिदिताम्' (6.4.24) इत्यादिनानुनासिकलोपः स्यात्। अथापि हि `धिन्विकृण्व्योः' (3.1.80) इतीका निर्देशः स्यात्, एवमपि यदि धातूपदेशावस्थायामेव नुम्भवतीत्ययमर्थो ज्ञापयितुं नाभीष्टः स्यात्, ततो लाघवार्थमनितयत्वादागमशासनस्य नुममकृत्वैव निर्द्देशं कुर्यात्, यथा--`युवोरनाकौ' (7.1.1) इत्यत्र द्वन्द्वैकवद्भावपक्ष उक्तम्। तस्मान्नुमनुषक्तयोर्ग्रहणं ज्ञापकमेव धातुग्रहणादप्यवसीयते। नुमुपदेशावस्थायामेव भवतीति दर्शयितुमाह--`धातुग्रहणं च' इत्यादि। धातुसंज्ञाप्रवृत्तिकालो धातूपदेशकालः, तत्रैव नुम् भवतीत्येवमर्थमिह धातुग्रहणं क्रियते। तस्मादतोऽपि धातुग्रहणादुपदेशवस्थाया मेव नुम् भवतीति ज्ञायते, न ह्यन्यद्धातुग्रहणस्य प्रयोजनमस्तीत्यभिप्रायः। ननु च भेत्ता, अभैत्सोदित्यत्राघात्वोस्तासिस्चोरिदितीर्नुम् मा भूदित्येवमर्थं धातुग्रहणं स्यात्? इत्याह--`तासिसिचोः' इत्यादि। यदि तासिसिचोरिदित्कार्यं स्यात्, तदेकारस्येत्संज्ञार्थमनुनासिकत्वं प्रतिज्ञायेत, न चास्ति प्रयोजनमिति न प्रतिज्ञायते; ततश्च निरनुनासिकोऽप्रतिलब्धेत्संज्ञक उच्चारणार्थं एवानयोरिकारः पठ्यत इति नुमः प्रसङ्ग एव नास्ति, तत् किं तन्निवृत्त्यर्थेन धातुग्रहणेन! ननु चारंस्त, अमंस्त, मन्ता, संगन्त्तेत्यत्र `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपो मा भूदित्येवमर्थं तासिसिचोरिदित्कार्यम्, तत् किमुच्यते इदित्कार्यं तासिसिचोर्नास्ति? इत्यत आह--`अरंस्त, अमंस्त' इत्यादि। `हनः सिच्' (1.2.14) इति कित्त्वविधावस्यैतत्प्रयोजनम्--आहतेत्यत्रानुनासिकलोपो यथा स्यात्। यदि सिज्न्तस्यानुनासिकलोपः सार्वधातुकङित्त्वमाश्रित्य स्यात् `हनः सिच्' (1.2.14) इति कित्त्वमनर्थकं स्यात्, प्रयोजनाभावात्? नैतदस्ति; अस्ति ह्यन्यत् कित्त्वविधानस्य प्रयोजनम्--`अनुदात्तोपदेश' (6.4.37) इत्यादिना सिच्यनुनासिकलोपो यथा स्यादिति; `अनिदताम्' (6.4.24) इत्यादिना सिजन्तस्य सार्वधातुके मा भूदिति। कः पुनरत्र विशेषः--सार्वधातुके ङिति वा? सिचि किति वा? अयमस्ति विशेषः--समानाश्रये सिच्यनुनासिकलोपस्यासिद्धत्वादतो लोपो (6.4.48) न भवति; सार्वधातुके तूपधालोपे तस्य व्याश्रयत्वेनासिद्धत्वाभावादतो लोपः स्यादेव। नैषोऽस्ति विशेषः; अतो लोपविधौ `अनुदात्तोपदेश' (6.4.37) इत्यादेः सूत्रादुपदेशग्रहणमनुवर्त्तते, तेनार्थधातुकोपदेशे यदकारान्तमङ्गं तस्य लोपो विज्ञायते; न चाहतेत्यत्रोपदेशेन्कारान्तमेतत्। तस्मात् `हनः सिच्' (1.2.14) इति कित्त्वविधानसामर्थ्यादरंस्तेत्यादौ नकारलोपो न भवति। तदेवं सिच इदित्कार्यं न भवतीति प्रतिपादितम्।
इदानीं तासेरप्यनुनासिकलोपाभाव इदित्कार्यं न भवतीति प्रतिपादयितुमाह--`मन्ता' इत्यादि। नकारलोपो न भवतीति प्रकृतेन सम्बन्धः। उपधानकारस्य `अनिदिताम्' (6.4.24) इत्यादिना लोप उच्यते। न च मक्तेत्यत्र नकार उपधा भवति; टिलोपस्यासिद्धत्वात्। तस्मात् तासेरपीदित्कार्यं न विद्यते। ततश्च युक्तमुक्तम्--`तासिसिचोरिदित्कार्य नास्ति' इति। अथ नुमागम इदित्कार्यं कस्मान्न भवति? अनिष्टत्वात्। न ह्यनिष्टं कार्यं शास्त्रे परिकल्पयितुं युक्तम्। यदि

तर्हि तासेर्निरनुनासिक इकारः उच्चारणार्थः, एवं तर्हि `स्यतासी लृलुटोः' (3.1.33) इत्यत्र यदुक्तम्--`इदित्करणमनुनासिकलोपप्रतिबन्धर्थम्', तत्कथं न विरुध्यते? यथा न विरुध्यते तदा तत्रैवोक्तम्।

अथ भिदिरित्येवमादीनां नुम् कस्मान्न भवति, स्ति ह्येषामपीकार इत्संज्ञकः? इत्याह--`हरिताम्' इत्यादि। भिदिर्प्रभृतयो हीरितः, न त्विदितः; यस्मात् `इर उपसंख्यानम्' (1.3.7.वा) इति रेफेकारस्य समुदायस्य तेषामित्संज्ञा, न प्रत्येकमवयवस्य। तत्रेदितामुच्यमानो नुम् कः प्रसङ्गो यदिरितां स्यात्!

स्यादेतत्--`उपदेशेऽजनुनासिक इत्' (1.3.2) इतीत्संज्ञेकारस्य, `हलन्त्यम्' (1.3.3) इति रेफस्य, तस्मादस्त्येव तेषामिदित्त्वम्? इत्याह--`अवयवस्यापि' इति। गतार्थम्।।

59. शे मुचादीनाम्। (7.1.59)

मुचादयस्तुदादौ पठ्यन्ते `मुच्लृ मोक्षणे' (धा.पा.1430) इत्यतः प्रभृत्या गणपरिसमाप्तेः।

`मोक्ता' इति। तृच्, `एकाचः' (7.2.10) इतीट्प्रतषेधः, `चो कुः' (8.2.30) इति कुत्वम्।

`के पुनस्तृम्फादयः' इति। एवं मन्यते--तृम्फादिषु तृफादयो निरनुषङ्गा अपि गणे पठ्यन्ते--`तृफतृन्फ तृप्तौ' (धा.पा.1307,1308) इत्येवमादयः। तत्र यदि तेऽपि तृफादिग्रहणेन गृह्येरन्, तृफतीत्यादि रूपं नोपपद्यत इत्यत आह--`ये तत्र सानुषङ्गाः पठ्यन्ते, ते तृम्फादयः' इति। आदिशब्दोऽयं प्रकारार्थः, प्रकारस्तु सादृश्यम्, तस्मात् तृम्फतिना सानुषङ्गेण ये सदृशाः, त एवादिग्रहणेनोपलक्ष्यन्त इत्यभिप्रायः। `सानुषङ्गाः' इति। नकारोऽनुषङ्गः, तेन सह वर्त्तन्त इति सदृशाः, त एवादिग्रहणेनोपलक्ष्यन्त इत्यभिप्रायः। `सानुषङ्गाः' इति नकारोऽनुषङ्गः, तेन सह वर्त्तन्त इति सानु,ङ्गाः। यदि तर्हि ये सानुवङ्गाः पठ्यन्ते ते तृम्फादयः, तेषां नुमि कृते परस्यानुस्वारे कृते तस्य परसवर्णे द्वयोर्नकारयोः श्रवणं प्राप्नोति? इत्यत आह्व--`तेषाम्' इत्यादि। कृते हि नकारलोपे नुम् विधीयते। अतो न भवत्येव दोष इति भावः। अथ सोऽपि नुम् कस्मान्न लुप्यते? इत्याह--`स च' इत्यादि। यदि सोऽपि लुप्येत, नुमो विधानमनर्थकमेव स्यादिति मन्यते। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्--`धातोः' (7.1.58) इत्यनुवर्त्तते, `शे' इति योगविभागः क्रियते, तेन तृ-म्फादीनाञ्च नुम् भविष्यति। मुचादीनामित्येवमनर्थकं स्यात्, `शे' इत्यनेन सिद्धत्वात्? नानर्थकम्, `शे' इत्यस्यासर्वविषयत्वज्ञापनार्थत्वात्। एवपं ह्यतिप्रसङ्गो न भवति। कथं मुचादिष्वेव तृम्फादयो न पठिताः? येऽत्र निरनुषङ्गाः पठ्यन्ते तेषां नुमागमो मा भूदित्येवमर्थम्।।

60. मस्जिनशोर्झलि। (7.1.60)

`मङ्क्ता' इति। `टुमस्जो शुद्धौ' (धा.पा.1415), तृच्, पूर्ववदिडभावः, कुत्वञ्च, अन्त्याज्जकारात् पूर्वो नुम्, `स्कोः' (8.2.29) इत्यादिना सकारलोपः, अनुस्वत्रपरसवर्णो। `नेष्टा' इति। `रधादिभ्यश्च' (7.2.45) इति यदेण्नास्ति तदायं नुम्, व्रश्चादिसूत्रेण (8.2.36) षत्वम्, ष्टुत्वम्। इट्पक्षे झलादित्वाभावान्नुम् नास्ति--नशितेति।

`मज्जनम्, नशनम्' इति। ल्युट्, `झलां जश् झशि' (8.4.53) इति जश्त्वम्--सकारस्य दकारः, तस्य चत्वं जकार-।

`मस्जेः' इत्यादि। यदि मस्जेरन्त्यादचः परो नुम् स्यात्, असंयोगदित्वात् मलोपो न प्राप्नोति, अनुपधत्वान्न नलोपः, स चेष्यते; अन्यथा मग्नो मानवानिति न सिध्यत्। तस्मादन्त्यात्पूर्वमाचार्या मस्जेर्नुममिच्छन्ति। कथं पुनरिष्यमाणोऽप्ययमर्थो लभ्यते? नशेरल्पाच्तरस्य पूर्वनिपातलक्षमव्यभिचारचिह्नात्। स हि लक्षणनिरपेक्षतां सूचयन् `मिदयोऽन्त्यात्परः' (1.1.47) इत्येतदपीह लक्षणं नापेश्रत इति सचयति। तस्मिंश्चानपेक्षिते लक्ष्यानुरोधाद्यत्र मस्जेर्नुमि कृते सतीष्टं सिध्यति तत्रैव विधीयते। तेन मस्जेरन्त्यास्पर्वं नुम् सिद्धो भवति। `मग्नः' इति। `ओदितश्च' (8.2.45) इति निष्ठानत्वम्।।

61. रधिजभोरचि। (7.1.61)

`रन्धयति' इति। `रध हिंसासंराद्ध्याः' (धा.पा.1193) हेतुमण्णिच्। `रब्धकः' इति ण्वुल। `साधुरन्धी' इति। `सुप्यजातौ णिनिस्ताच्छील्ये' (3.2.78) इति णिनिः। `रन्धंरन्धम्' इति। `आभीक्षण्ये। णमुल्' (3.4.22), `आभीक्षण्ये द्वे भवतः' (वा.887) इति द्विर्वचनम्। `रन्धो वर्त्तते' इति। भावे घञ्। अथ रन्धयतीत्यादिषु परत्वात् `अत उपधायाः' (7.2.116) इति वृद्धिः प्राप्नोति, सा कस्मान्न भवति? इत्यत आह--`परापि सती' इत्यादि। नित्यत्वं पनः कृताकृतप्रसङ्गित्वान्नुमः। स हि कृतायां वृद्धौ प्राप्नोत्यकृतायामपीति नित्यः; वृदधिस्तु नुमि कृते न प्राप्नोत्यकारस्यानुपधत्वादित्यनित्या।

`रद्धा' इति। `झषस्तथोर्धोऽधः' (8.2.40) इति तकारस्य धकारः, धातुधकारस्य जश्त्वम्--दकारः।।

62. नेट्यलिटि रधेः। (7.1.62)

पूर्वेण प्राप्तस्य नुमः प्रतिषेध उच्यते। `रधिता' इत्यादि। `रधादिभ्यश्च' (7.2.45) इतीट्। `ररन्धिव, ररन्धिम' इति। क्रादिनियमादिट् (7.2.13) `परस्मैपदानाम्' (3.4.82) इत्यादिना वस्मसोर्वमादेशौ।

ननु रधिरयमसंयोगान्तः पठ्यते, तत्र `असंयोगाल्लिट् कित्' (1.2.5) इति कित्त्वे `अनिदिताम्' (6.4.24) इति नलोपः प्राप्नोति, स कस्मान्न भवति? इत्याह--`नुमि कृते' इत्यादि। `उपदेशावस्थायामेव नुम् भवति' इत्युक्तमेतत्, तेनोपदेशावस्थायामेव नुमि कृते संयोगान्तत्वं जातमिति कित्त्वं नास्तीति न

भवति नलोपः।

`अथ क्वसौ कथं भवितव्यम्' इति। किं रराध्वानिति भवितव्यम्, उत रेधिवानिति पृच्छति। अपर आह--`रेधिवात्' इति। लिटः `क्वसुश्च' (3.2.107) इति क्वसुः, द्विर्वचनम्, `अत एकहल्मध्ये'(6.4.120) इत्यादिनैत्त्वांभ्यासलोपौ, `वस्वेकाजाद्घसाम्' (7.2.67) इतीट् नुम्, `सान्तमहतः संयोगस्य' (6.4.10) इति दीर्घः। `कथम्' इत्यादि। एवं मन्यते--यदेङ् भवति तस्मिंश्च नुमा भवितव्यम्, नुमि च सत्येकहल्मध्यता नास्तीत्येत्त्वेऽब्यासलोपयोः पुनः प्रत्यापत्त्या भवितव्यम्, ततश्च कृतद्विर्वचन एकाण्न भवतीतीटा न भवितव्यम्; तस्माद्ररध्वानिति युक्तं भवितुमिति। इतरस्तु कृतसयापि नुमोऽत्रि लोपेन भवितव्यम्, ततश्चैकहल्मध्यताभावो नोपपद्यते, कुतः पुनरेत्त्वाभ्यासलोपयोः प्रत्यापत्तिः? इत्याह--`एत्त्वाभ्यासलोपयोः कृतयोः' इत्यादि। कृतद्विर्वचनानामेकाचां क्वसोरिङ् विधीयते। `ततो नुमागमः' इति। अचि तद्विधानात् तस्यौपदेशिकत्त्वाश्रयो लोप इत्यौपदेशिकग्रहणान्नुमि कृते संयोगान्तत्वादातिदेशिकस्य कित्त्वस्यासम्भवात्।

`अथ' इत्यादि। इटि `नेटि' (7.2.4) इत्युच्यमाने पुर्वेण सिद्धे सति नियमर्थमेतद्भविष्यति--लिट्येवेडादौ, नान्यस्मिन्निडादाविति। तेन ररन्धिव, ररन्धिमेत्यादौ भविष्यति, न रधितेत्येवमादौ। तस्मादिटिलिटीति कस्मान्नोक्तम्, एवं सतीष्टं सिध्यति, लघु च सूत्रं भवतीति भावः। `लिट्येव' इति। नियमस्वरूपं दर्शयति। `नान्यत्र' इत्यनेनापि तस्य व्यवच्छेद्यम्। यतो हेतोर्नियमो न क्रियते, तं दर्शयितुमाह--`विपरीतम्' इत्यादि। `इट्येव लिटि' इति। विपरीतनियमसय स्वरूपकथनम्। `नान्यत्र' इत्यनेनापि तद्ध्यवच्छेद्यं दर्शयति। कस्माद्विपरीतमवधारणं नेष्यते? इत्याह--`तथा हि' इत्यादि। इट्येव लिटीत्यस्य नियमस्यानिडादिर्ल्लिङ्व्यावर्त्त्य इतीडादावेव लिटि भवति, नानिडादाविति। ततश्चानिडादित्वाद्ररन्धेत्यत्र नुम् न स्यात्। रधितेत्यत्र पूर्वेम स्यादेव; नियमेनाव्यावर्त्तितत्वात्। तस्मात्तद्दोषपरिजिहीर्षया नियमो न क्रियते।।

63. रभेशब्लिटोः। (7.1.63)

`आरेभे' इति। `रभ राभस्ये' (धा.पा.974) लिट्, अनुदात्तेत्त्वादत्मनेपदम्। `लिटस्तझयोरेशिरेच्' (3.4.81) इत्येशू, पूर्ववदेत्त्वाभ्यासलोपौ।।

64. लभेश्च। (7.1.64)

`पृथग्योगकरणमुत्तरार्थम्' इति। उत्तरत्रूत्रेण लभेरेव कार्यं यथा स्यात्। रभेर्मा भूदिति। यदि `रभिलभ्योरशब्लिटोः' इत्येको योगः क्रियते, ततो रभिरित्यनुवृत्तिरुत्तरत्र स्यात्। अतश्च तस्याप्युत्तरत्र कार्यं प्रसज्येत।।

65. आङो यि। (7.1.65)

`यकारादौ प्रत्यय' इति। अनेन `यि' इत्यस्याः सप्तम्या विषयसप्तमीत्वं दर्शयन् यकारादौ प्रत्यये ववयभूतेऽनुत्पन्न एव नुम् भवतीति दर्शयति। `प्राक्' इत्यादिना विषयसप्तम्यां सत्यां यदिष्टं सम्पद्यते तदाचष्टे। परसप्तम्यां हि पूर्वं प्रत्ययेन भवितव्यम्, पश्चान्नुमा, ततश्च `अदुपधात्' (3.1.98) इति यत् प्रसज्येत। विषयसप्तम्यां तु प्रागुत्पन्नेन नुमाऽदुपधत्वस्य विहतत्वात् `ऋहलोर्ण्यत्' (3.1.124) इत ण्यदेव भवति। कः पुनर्ण्यति यत वा विशेषः; यावतोभयत्रापि तदेव रूपमिति, व्यत्प्रत्ययेऽपि वृद्ध्या न भवितव्यम्, तथा च प्रागुक्तम्--`परापि सती वृद्धिर्नित्यत्वाभुमा बाध्यते' इति? अत आह--`तत्र' इत्यादि। तत्र ण्यति सति तित्स्वरितत्वात् `गतिकारकोपपदात् कृत्' (6.2.139) इति प्रकृतिस्वरः; तेनालम्भ्य इत्युदाहरणमन्त्यस्वरितं भवति। यति तु `यतोऽनावः' (6.1.213) इत्याद्युदात्तत्वे सति प्रकृतिवद्भावेनाप्युदात्तत्वमित्यस्ति विशेषः।

`लभ्यम्' इति। यदन्तमेतत्।

`एवमालभ्य' इत्येतदपि। आलभ्यत इति भावे कर्मणि वा लकारः।

`अनुषङ्गलोपः क्रियते' इति। `अनिदताम्' (6.4.24) इत्यादिना।।

66. उपात्प्रशंसायाम्। (7.1.66)

`प्रशंसायाम्' इति। उपलभ्य इति स्तुतौ। अतिप्रशंस्य इत्यर्थः। `उपलभ्यम्' इति। प्रप्तव्यमित्यर्थः।।

67. उपसर्गात्खल्घञोः। (7.1.67)

`ईषत्प्रलम्भः' इति `ईषद्दुःसुषु' (3.3.126) इत्यादिना खल्। `दुष्प्रलम्भः' इति। `इदुदुपधस्य' (8.3.41) इत्यादिना षत्वम्। `विप्रलम्भः' इति। भावे घञ्। ननु च `लभेश्च' (7.1.64) इत्यनेन नुम् सिद्धः, तत्किमर्थोऽयमारम्भः? इत्याह--`सिद्धे' इत्यादि। `अन्यत्र न भवति' इति तद्व्यवच्छेद्यम्। `उपसर्गात् खल्घञोरेव' इत्येष तु विपरीतनियमोऽत्र न सम्भावनियः; `गृधिवञ्च्योः प्रलम्भने' (1.3.69) इति निर्देशात्।।

68. न सुदुर्भ्यां केवलाभ्याम्। (7.1.68)।

`उपसृष्टस्य' इति। उपसर्गेण सम्बद्धस्येत्यर्थः, `सुलाभः' इति। सुशब्दोऽयमाधिक्यार्थः, नाकृच्छ्रार्थः, यथा--सुषिक्तं नाम किं तवात्रेत। `दुर्लाभः' इति।

`दुशब्दो निन्दार्थः, न कृच्छ्रार्थः, यथा--दुर्ब्रह्मण इति। तेन घञेव भवति, न खल्।
`सुदुर्म्यामिति तृतीयां मत्वा केवलग्रहणं क्रियते' इति। `सुदिर्भ्याम्' इति। तृतीयायामभ्युपेतायां सुदुर्भ्यामुपसृष्टस्य लभेर्नुम् न भवतीत्येषोऽर्थः सम्पद्यते। व्यवहितेनाऽप्युपसृष्टो भवत्येव। तत्रासति केवलग्रहणे सुप्रलम्भः, दुष्प्रलम्भ इत्यत्रापि प्रतिषेधः स्यात्। तस्मात् तृतयायामभ्युपेतायां केवलग्रहणं क्रियते। अथ पञ्चत्र्यां केवलग्रहणं कस्मान्न क्रियेतेति प्रश्नावसरत आह--`पच्चम्यां हि' इत्यादि। पञ्चम्यां ह्यस्यां निर्दिष्टग्रहणस्यानन्तर्यार्थत्वादनन्तरस्यैव प्रतिषेधेन भवितव्यम्, इह च प्रशब्देन व्यवधानम्, अतः प्रसङ्ग एव नास्ति, तत् किं केवलग्रहणेन? यद्येवम् न कर्त्तव्यमेव केवलग्रहणम्, पञ्चमीमेनां प्रतिज्ञास्याम इति? नैतदस्ति; सुप्रलम्भः दुष्प्रलम्भ इति--प्रत्युदाहणद्वयमभिप्रेत्यैतदुक्तम्। `पञ्चम्यां हि व्यवहितत्वादेवाप्रसङ्गः' इति। अतिसुलम्भ इत्यत्र यदाभिशब्दोऽप्युपसर्गस्तदा ह्यसति केवलग्रहणे प्रतिषेधः प्रसज्येत; अव्यवधानात्। तस्मात् सर्वधा केवलग्रहणस्य कर्त्तव्यत्वात्, कमव्यतिक्रमे च प्रयोजनाभावात् तृतीयैवेषा युक्ता प्रतिज्ञातुम्।
अतिसुलभमित्यत्रातिनोपर्गेन सुशब्देन लभिरुपसृष्टः, तस्मात् प्रतिषेधेन भवितव्यमिति कस्याचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्त्तुमाह--`अतिसुलभमित्यत्र' इत्यादि। कर्मप्रवचनीयत्वं पुनरतिशब्दस्य `अतिरतिक्रमणे च' (1.4.95) इति कर्मप्रवचनीसंज्ञाविधानात्। यस्य कर्मप्रवचनीयसंज्ञा तस्योपसर्गसंज्ञा नास्ति; एकसंज्ञाधिकारात्, कर्मप्रववनायसंज्ञयोपसर्गसंज्ञाया बाधतत्वात्। कथं पुनः कर्मप्रचवनीयस्य हि तस्यापि केवलत्वमुपपद्यते? एवं मन्यते--केवग्रहणात् स्वशब्दोपात्तादन्यत् तुल्यजातीयमेव व्यवच्छेद्यम्, न तु विजातीयम्। तथा हि--`केवलभ्यां विज्ञातीयेन कर्कटादिना सहितौ प्रविशत एव। अत एवान्योपसर्गरहिताभ्यामित्यनेन तुल्यजातीयनिवृत्तयर्थता केवलग्रहणस्य दर्शिता। यदि तु सर्वस्य तुल्यजातीयस्य विजातीयस्यापि केवलग्रहणेन निवृत्तिः कर्त्तु शक्यते, तदोपसर्गगरहणमनर्थकं स्यात्, अन्यरहिताभ्यामित्येवं ब्रूयात्। तस्माद्विजातीयेन केवलग्रहणेन निवृत्तिः कर्त्तु शक्यते, तदोपसर्गग्रहणमनर्थकं स्यात्, अन्यरहिताभ्यामित्येवं ब्रूयात्। तस्माद्विजातीयेन सहितावपि तौ केवलावेवेत्यतिसुलभमित्यत्र कर्मप्रवचनीयसहितेनापि सुशब्देनोपसृष्टस्य भवत्येव प्रतिषेधः। यत्र तर्हि पूजातिक्रमणाभ्यामन्यत्र वृत्तिः, अतिशब्दसय तत्र कर्मप्रवचनीयसंज्ञा न भवति, तदा कथम्? इत्याह--`यदा तु' इत्यादि। पञ्चमीनिर्देशेऽप्येवमर्थं केवलग्रहणं कर्त्तव्यमिति; अन्यथा ह्यत्र व्यवधानाभावात् प्रतिषेधः प्रसज्येतेत्यभिप्रायः। ननु च प्रसुलम्भः--इत्येवमर्थं केवलग्रहणं कर्त्तव्यम्? नैतदस्ति; उक्तं हि भाषेय--`नैषोऽस्ति प्रयोगः' इति।।

69. विभाषा चिण्णमुलोः। (7.1.69)
`अलाभि' इति। लुङ्, `चिण्भावकर्मणोः' (3.1.66) इति चिण्, `चिणो लुक्' (6.4.104) इति तकारसय लुक्।
`अनुपसृष्टस्य' इति। उपसर्गेणासम्बदधस्येत्यर्थः।।

70. उगिदचां सर्वनामस्थानेऽघातोः। (7.1.70)
उगिति प्रत्याहारग्रहणम्--उक् इद् येषां तान्युगिन्ति, अङ्गविशेषणञ्चैतत्, अत आह--`उगितामङ्गानाम्' इति। अजिति प्रत्याहारस्य ग्रहणमेवेदं वा स्यात्, अञ्चतेर्वा लुप्तनकारस्य? तत्र यदि प्रत्याहारग्रहणं स्यात्, `नपुंसकस्य झलचः' (7.1.72) इत्यत्र सूत्रे पुनरज्ग्रहणं न कुर्यात्, तद्धि प्रत्याहाग्रहणम्, नाञ्चेः; झला साहचर्यात्। तस्मादञ्चतेरिदं ग्रहणमित्यालोच्याह--`अञ्चतेश्च' इत्यादि। `भवान्' इति। `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः। `श्रेयान्' इति। प्रशस्यशब्दात् `द्विवचनविभज्योपपदे तरबीयसुनौ' (5.3.57) इतीयसुन्, `प्रशस्यस्य श्रः' (5.3.60) इति श्रादेशः, `प्रकृत्यैकाच्' (6.4.163) इति प्रकृतिवद्भावाट्टिलोपाभावः, `आद्गुणः' (6.1.87), `सान्तमहतः संयोगस्य' (6.4.10) इति दीर्घः। ननु चात्र नाङ्गमुगित्, किं तर्हि? प्रत्ययः? नैतदस्ति; अङ्गमप्युगिदेव। कथम्? अवयवावयवेनापि समुदायस्य सम्बन्धो भवत्येव, यथा--देवैदत्तस्याङ्गुलिरित्यत्र देवदत्तस्यावयवस्य हस्तस्य योऽवयवोऽङ्गुलिस्तेन देवदत्तस्य सम्बन्धः। तस्मादिहापि प्रत्ययस्यावयवो य उक् इत्संज्ञकस्तेनाङ्गस्यापि सम्बन्धोऽस्त्येवेत्यङ्गमप्युगिदेव। `प्राङ्' इति। प्राञ्चतति ऋत्विगादिसूत्रण (3.2.59) क्विन्, नुम्हल्ङ्यादि(6.1.68) संयोगान्तलोपौ (8.2.23), `क्विन्प्रत्ययस्य कुः' (8.2.62) इति कुत्वम्--नकारस्य ङकारः। `प्राञ्चौ, प्राञ्चः' इति। चुत्वम्--नकारस्य ञकारः।
अथाञ्चतिग्रहणं किमर्थम्, यावतोगित्त्वादेव तस्य नुम् सिद्धः? इत्यत आह--`अञ्चतिग्रहणम्' इत्यादि। उखास्रत्, पर्णध्वत्' इति। `स्रन्सु ध्वन्सु `अधः पतने' (धा.पा.754,755), [`अवस्रंसने'--धा.पा.] उखायां स्रंसते, पर्णानि ध्वंसते। `क्विप्च' (3.2.76) इति क्विप्, नलोपः, `वसुस्रंसुध्वंस्वनडुहां दः' (8.2.72) इति सकारस्य दकारः, तस्य `वाऽवसाने' (8.4.56) चर्त्वम्--तकारः।
`अधातोरिति किम्' इति। अञ्चतिग्रहणादेव नियमार्थाद्धातेर्न भवतीत्यभिप्रायः। अधातोरिति नायं प्रसज्यप्रतिषेधः, किं तर्हि? पर्युदास इति मन्यमान आह--`अधातुभूतपूर्वस्यापि यथा स्यात्' इति। पूर्वपक्षवादिनाऽधातोरिति प्रसज्यप्रतषेधोऽयमिति मन्यमानेन चोदितम्। सिद्धान्तवादिना पर्युदासेन परिहृतम्।
`गोमत्यति' इति। गोमच्छब्दात् `सुप आत्मनः क्यच्ट (3.1.8)। `गोमत्यतेरप्रत्ययः' इति। अश्रावी प्रत्ययोऽप्रत्ययः, स पुनः क्विप्, `अतो लोपः' (6.4.48) इति दीर्घः--गोमान्। कस्मात् पुनरसत्यधातुग्रहणेऽत्र न सिध्यतीत्यत आह--`अत्र हि' इत्यादि।
असत्यधातुग्रहणेऽञ्चतिग्रहणान्नियमाद्यथोखस्रदित्यादौ न भवति, तथात्रापि न स्यात्। भवति ह्ययमपि धातुः--सतद्यपि धातुत्वे क्विबन्तत्वे `क्विबन्ता धातुत्वं न जहति' (व्य.प.132) इति कृत्वा। तस्मादधातुग्रहणं क्रियते--योऽप्यवस्थान्तरेऽधातुरासीत् तस्य गरहणं यथा स्यात्। अथ गोमानिति कथमत्र दीर्घत्वम्?

कथं च न स्यात्? अधातोरिति प्रतिषेधः, नात्वन्तस्य। अत्र ह्यधातोरिति किम्? पिण्डं प्रसत इति पिण्डग्रः, चर्म वस्त इति चर्मवः--इत्यसन्तस्यैव प्रत्युदाहरणमुपनयस्तम्, नात्वन्तस्य। अथ वा--चकारन्तत्र क्रियते, स चानुक्तसमुच्चयार्थः, तेन क्वचिद्धातोरयीति भविष्यति।।

71. युजेरसमासे। (7.1.71)

`युङ, युञ्जौ, युञ्जः' इति। पूर्ववत् क्विन्नादि।

`अश्वयुक्' इति। अश्वं युनक्तीति `सत्सूद्विष' (3.2.61) इत्यादिना क्विप्। कथं युजेर्नुब्युच्यमाने समासेऽपि स्यात्? तदन्तविधिना। कथमत्र तदन्तविधिः? एतेदेव ज्ञापकम्--अस्तीह तदन्तविधिरिति। उक्तञ्च--`अङ्गाधिकारे तस्य तदुत्तरपदस्य' (पु.प.वृ.85) इति वचनात्।

`युजेः' इत्यादि। इकारेण निर्देशो ह्येवमर्थः क्रियते--यस्य युजेरिकारोऽनुबन्धस्तस्य ग्रहणं यथा स्यात्, अन्यस्य मा भूदिति। तेन `युज समाधौ' (धा.पा.1177) इत्यस्य ग्रहमं न भवति, न हि तस्येकारोऽनुबन्धोऽस्ति। `युजम्' इति। सम्पदादित्वात्क्विप्। `आपन्नाः' इति। प्राप्ता इत्यर्थः।।

72. नपुंसकस्य झलचः। (7.1.72)

`पर्यांसि, श्रोयांसि' इति। `सान्तमहतः संयोगस्य' (6.4.10) इति दीर्घः। `बहुपुरि, बहुधुरि' इति। बह्व्यः पुरः, बह्व्यो धुरो येषामिति बहुव्रीहिः। `ऋक्पुरब्धूः पथामानक्षे' (5.4.74) इत्यकारः समासान्तो न भवति--`समासान्तविधिरनित्यः' (व्या.प.94) इति कृत्वा। `विमलदिवि' इति। विमला द्यौर्येषामिति तानि। विमलदिवि वकारो दन्त्यौष्ठ्यो झल् न भवति, झलः पूर्वेण पठितत्वात्। `चत्वारि' इति। `चतुरनडुहोरामुदात्तः' (7.1.98) इत्याम्। इह यदुगिन्नपुंसकं झलन्तं नुमि कृते `उगिदचाम्' (7.1.70) इत्यादिना द्वितीयो नुम् प्राप्नोति; सम्भवति हि विधानकालेनेकस्य परत्वम्, यथा--पचतीत्यत्र लकारविकरणयोरेकस्माद्धातोरिति। अत्र तुदन्ति, नदन्तीत्यत्र परसय नुमोऽनुस्वारे कृते तसय परसवर्णे च द्वयोर्नकारयोः श्रवणमापद्येत? भवतु नाम, हल्परस्य व्यञ्जनस्यैकस्यानेकस्य श्रुतिं प्रति नास्ति विशेषः शक्यते वक्तुम्। इह त्वस्ति विशेषः--कुर्वन्ति, कृषन्तीत्यत्र परस्य नुमोऽनुस्वारसवर्णयोः कृतयोः पूर्वस्याझल्परत्वादनुस्वारपरसवर्णौ न स्त इति अट्कुप्वादिना (8.4.2) णत्वं प्राप्नोति। एकस्मिंस्तु नुमि तस्यानुस्वारे परसवर्णे कृते न भवति णत्वप्रसङ्गः; परसवर्णस्यासिद्धत्वात्। तस्मादुगिल्लक्षणस्य नुमः प्रतिषेधो वक्तव्य इत्याह--`उगितो झलन्तस्य' इत्यादि। झलन्तलक्षणस्य नुमोऽवकाशो यदनुगिन्नपुंसकम्--सर्पीषीति, उगिल्लक्षणस्यावकाशो यदुगिदनपुंसकम्--गोमान् यवमानिति; यदुगिज्झलन्तं नपुंसकं तस्योभयप्रसङ्गे सति परत्वादनेनैव नुमा भवितव्यम्, तस्मिन् सति पुनरुगिल्लक्षणो नुम् न भवति--`सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' (व्य.प.40) इति कृत्वा। `भूयांसि' इति। बहुशब्दादीयसुन्, `बहोर्लोपो भू च बहोः' (6.4.158) इतीकारस्य लोपः, बहोश्च भूभावः। `कुर्वन्ति, कृषन्ति' इति। शत्रन्तात् `जश्शसोः शिः' (7.1.20) इति शिभावः। `बहुर्जि' इत्यादि। बहूर्जीत्यस्मिन् नुभः प्रतिषेधो वक्तव्यः, व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--`विभाषा चिण्णमुलोः' (7.1.69) इति विभाषाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा, तेन बहूर्जीत्यत्र न भवति। `उर्ज बलप्राणधारणयोः (धा.पा.1549) [`बलप्राणनयोः' धा.पा.] इत्येतस्मात् `भ्राजभ्रास' (3.2.177) इत्यादिना क्विप्, बहव ऊर्जो बलानि येषां तानि बहूर्जि ब्राह्मणकुलानि।

`अन्त्यात्पूर्वम्' इति। अन्त्यो जकारः, तस्मात्पूर्वं नुममिच्छन्ति केचित्--बहूर्ञ्जीति।।

73. इकोऽचि विभक्तौ। (7.1.73)

`विभक्तौ' इति वचनात् `सर्वनामस्थाने' (7.1.70) इति निवृत्तम्।

`अचीति किम्' इति। एवं मन्यते--त्रपुभ्याम्, त्रपुभिरित्यत्र व्यञ्जनादौ मा भूदित्येवमर्थमज्ग्रहणं क्रियते, एतच्चाप्रयोजनम्; अस्त्वत्र नुम्, `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति लोपो भविष्यति। इतरो विदिताभिप्राय आह--`उत्तरार्थम्' इति। `अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' (7.1.75) इत्यजादौ यथा स्यात्, इह मा भूत्--अस्थिभ्याम्, अस्थिभिरिति, एवमर्थमज्ग्रहणम्। इहासय करणस्य यत्प्रयोजनं तन्मया पृष्टम्, अतस्तदेव कथ्यताम्? इत्यभिप्रायेणाह--`यद्येवम्' इत्यादि। इतरो विदिताभिप्राय आह--`इह तु करणस्य' इत्यादि। त्रपुशब्दात् सम्बोधने प्रथमैकवचने कृते यद्यचीति नोच्येत, तदात्रापि नुम् स्यात्, तदत्र नुम् मा भूदित्येवमर्थमचीत्युच्यते। स्यादेतत्--भवतु नाम नुम्, तस्य `स्वमोर्नपुंसकात्' (7.1.23) इति सोर्लुकि कृते `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नलोपो भविष्यति? इत्याह--`न ङिसम्बुद्ध्योः इत्यादि।

`ननु च' इत्यादि। एवकारोऽत्र भिन्नक्रमः प्रतिषेधानन्तरं द्रष्टव्यः। स चौपचारिकमपि दिभक्तेरस्तित्वम् `न लुमताङ्गस्य' (1.1.63) इति प्रतिषेधान्नास्तीति प्रतिपादयति। द्विविधं हि विभक्तोरस्तित्वम्--मुख्यम्, औपचारिकञ्च। तत्र मुख्यं श्रूयमाणाया विभक्तेर्भवति, इतरत् तु लुप्ताया अपि। कार्यस्यास्तित्वाद्विभक्तेरप्युपचारेणास्तित्वमुच्यते, यथा--अस्त्यतीतं कर्मेति तत्रातीतेन कर्मणा यदाहितं फलदानसामर्थ्यं तस्यस्तित्वात् तत् कर्मान्तीत्युच्यते। तदिह `स्वमोर्नपुंसकात्' (7.1.26) इति विभक्तेर्लप्तत्वान्मुख्यं तावदस्तित्वं नास्ति। `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणप्रतिषेधादौपचारिकमपि नास्त्वेव। तत्र विभक्तावुच्यमानो नुम् कः प्रसङ्गो यः सर्वथैवासत्यां विभक्तौ हे त्रपो इत्यत्र स्यात्! नैव प्राप्नोति; तस्मान्नैतदज्ग्रहणस्य प्रयोजनम्। `एतदेव' इत्यादि। यदि ह्यत्र प्रत्ययलोपलक्षमप्रतिषेधः स्यात्, अज्ग्रहणमनर्थकं स्यात्, कुतश्च, तस्मादेतदेवाज्ग्रहणं ज्ञापयति--प्रत्ययलोपलक्षणप्रतिषेधोऽत्रेगन्ते नपुंसके सम्बुद्धिविषये नास्तीति। `तथा च' इत्यादिना ज्ञापकस्य प्रयोजनमाह। सम्बुद्धिविषयो गणः `सम्बुद्धौ च' (7.3.106) इति वर्त्तमाने यः `ह्रस्वस्य

गुणः' (7.3.108) इत्यनेन गुणः स वेदितव्यः।
`तौम्बुरवं चूर्णम्' इति। तुमबुरुणो विकारः `औरञ् (4.2.71), `ओर्गुणः' (6.4.146)।
क्वचित्--`इकोऽचि व्यञ्जने मा भूवस्तु लोपः स्वरः कथम्' इत्यादिकं श्लोकद्वयं पठ्यते। `इकोऽचि विभक्तौ' (7.1.73) इत्यत्राचीति किमर्थमुच्यते, न `इको विभक्तौ' इत्येवोच्येत? प्रयोजनमाह--`व्यञ्जने मा भूत्' इति। प्रकरणान्नुमिति विज्ञायते। त्रपुभ्याम्, त्रपुभिरित्यत्र व्यञ्जनादौ मा भूदित्येवर्थमज्ग्रहणं क्रियते। यद्येवम्, नार्थस्तेन, व्यञ्जनादौ नुमस्तु, न च तस्य श्रवणं प्रसज्यते; यस्मात् `नलोपः प्रातपदिकान्तस्य' (8.2.7) इति नलोपो भविष्यति।
पञ्चत्रपुभ्याम्, पञ्चत्रपुभिरित्यत्र कथं स्वरः? पञ्चभिस्त्रपुभिः क्रीताभ्यां क्रीतैर्वेति `तद्धितार्थोत्तरपदसमाहारे च' (2.1.51) इति तद्धितार्थे समास; `संख्यापूर्वो द्विगुः'(2.1.52) इति द्विगुसंज्ञा, `आर्हादगोपुच्छ' (5.1.19) इत्यादिना ठक्, तस्य `अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायाम्' (5.1.28) इति लुक्, ततो विभक्तो नुम्, नकारलोपः, तस्य `नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' (8.2.2.) इत्यसिद्धत्वात् `इगन्तकालकपालभगालशरावेषु द्विगौ' (6.2.29) इत्यनेन पूर्वपदप्रकृतिस्वरो न प्राप्नोति; अनिगन्तत्वात् `भ्रः संख्यायाः' (फि.सू.2.28) इत्याद्युदात्तत्वं स्यात्। `भ्रः' इति नकाररेफान्तयोग्रहणमिति। `खरो षै' इत्यादि। वैशब्दोऽक्षमायाम्। पञ्चत्रपुण इत्यत्र श्रूयमाणे नुमि स्वरो भवति। `लुप्ते किं न भविष्यति' ? (इति)। भविष्यत्येवेत्यर्थः। किं पुनः कारणं श्रूयमाणे नुमि स्वरो भवति? स्वरविधौ व्यञ्जनस्यादिद्यमानत्वात्। अथ वा--समुदायभक्तो ह्यसौ नुम् नोत्सतेऽवयवस्य त्रपुशब्दस्येगन्ततां विहिन्तुम्।
इह तर्हि रायमतिक्रान्ताभ्यां ब्राह्मणकुलाभ्याम्--अतिराभ्यामिति `कुगतिप्रादयः' (2.2.18) इति समासे कृते `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति ह्रस्वत्वे च कृते यदि व्यञ्जनादौ नुम् स्यात्, तदा तस्य लोपे कृते नलोपस्यासिद्धत्वात् `रायो हलि' (7.2.85) इति हलादावुच्यमानमात्वं न प्राप्नोति, नुमा व्यवदानात्, समुदायभक्तोऽसौ समुदायमेव न व्यवदव्यात्, अवयवं तु व्यवदधात्येव। तथा प्रियास्तिस्रोऽनयोर्ब्राह्मणकुलयोरिति बहुव्रीहौ कृते प्रियतिसृभ्यामिति--यदि व्यञ्जनादौ नुम् स्यात्, तदा `त्रिचतुरोः स्त्रियां तिसृचतसृ' (7.2.99) इत्यनेन तिस्रादेशो न प्राप्नोति, समुदायभक्तेन नुमा त्रिशब्दस्य व्यवधानात्? नैतदस्ति;
`रायात्वं तिसृबावं [`तिसृभावश्च'--मूलपाठः] च व्यवधानान्नुमापि हि' (इति)। भवतीति शेषः। व्यवधानादिति ल्यब्लोपे पञ्चमी, यथा--प्रासादात् प्रेक्षत इति। प्रासादमारुह्येत्यर्थः। तदयमर्थः--नुमा व्यवधानमपि प्राप्य राय आत्त्वं तिसृभावञ्च भवतीति। कस्मात् पुनर्व्यवधाने तौ भवतः'? `रायो हलि' (7.2.85) इत्यत्र रायो या विहिता विभक्तिः, त्रिशब्दाच्च या विहिता विभक्तिस्तस्यामिति विहितविशेषणपक्षस्य तत्रश्रयणात्। अथ वा--किं व्यवधानचिन्तया, परत्वादेव हि तौ भविष्यतः, तयोस्तु कृतयोः `सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' (व्या.प.40) इति पुनर्नुम् न भवति। नुम्परत्वमनङ्गीकृत्य `व्यवधानान्नुमापि हि' इत्युक्तम्। अत एवापिशब्दः पक्षान्तरद्योतनाय प्रयुक्तः। व्यवधाने च यथा भवति, तथोक्तमेव। एवं तर्हि नुम्नुटोर्विप्रतिषेधार्थमज्ग्रहणमिति नुटि कृते नुम्न क्रियते। `ह्रस्वनद्यायो नुट्' (7.1.54) इति अस्यावकाशः--अग्नीनाम्, वायूनमिति, इगन्तनुमोऽव काशः--त्रपुणे, जतुन इति; इहोभयं प्राप्नोति--त्रपूणाम्, जतूनामिति, पूर्वविप्रतिषेधे नुडागमो भवति, नुटि च सति `नामि' (6.4.3) इति दीर्घत्वं प्राप्नोति, अस्मिंस्तु सतेि न स्यात्; अनजन्तत्वात्, यथा--वर्मणामित्यत्र। स चायं विप्रतिषेधोऽज्ग्रहणे सत्युपपद्यते। नुटि कृते नुम् न प्राप्नोति; अनजादित्वात्। नुम्यपि कृते नुण्न प्राप्नोति, ह्रस्वान्ताभावादित्येवमभयोस्तुल्ययोर्विप्रतिषेध उपपद्यते। अक्रियमाणेऽज्ग्रहणे नुटि कृतेप्यकृतेऽपि हलादावजादौ च नुमा भवितव्यमिति तस्य नित्यत्वम्। नुमि कृते ह्रस्वान्तत्वाभावान्नुटा न भवितव्यमिति तस्यानित्यत्वम्। नित्यानित्ययोश्चातुल्यबलत्वादयुक्तो विप्रतिषेध इति नित्यत्वान्नुमैव भवितव्यमिति। तस्मादज्ग्रहणं विप्रतिषेधार्थमिति।
अत्र परीहारान्तरमाह--`नुड् वाच्यः' इति। लाघवार्थम्। नुडर्थः पूर्वविप्रतिषेधः। तादर्थ्यन्नुदित्युक्तः। क्रियमाणेऽप्यज्ग्रहणे विप्रतिषेदेन नुमेव प्राप्नोति, ततोऽवश्यं पूर्वविप्रतिषेधेन नुड् वाच्यः--`नुमचिरतृज्वद्भावेभ्यो नुड् भवति पूर्वविप्रतिषेधेन' (वा.11;7.1.96) इति। क्रियमाणेऽप्यज्ग्रहणे पूर्ववप्रतिषेधो वक्तव्यः। अक्रियमाणे तस्मिंस्तेनैव यत्नेन नुड् भविष्यतीति किं यत्नद्वयेन, तस्मादज्ग्रहणमनर्थकम्? ननु चेष्टवाची परशब्दः, इष्टवाचित्वाद्भविष्यति, अलं यत्नेन/ असदेतत्, अवश्यं पूर्वविप्रतिषेधः परिगणयतव्यः, अन्यथेदमिष्टमिदमनिष्टमित्येतदेव न ज्ञायते। ननु च त्रपूणामित्यत्र पूर्वविप्रतषेधेन नुटि कृते नुम् मा भूदित्येवमर्थमज्ग्रहणं कर्त्तव्यम्? नैतदस्ति; अस्त्वत्र नुम् तस्य लोपो भविष्यति। नलोपस्य दीर्घविधावसिद्धत्वात् `नामि' (6.4.3) इति दीर्घत्वमनजन्तत्वान्न स्यादिति चेत्? मा भूदनेन, `नोपधायाः' (6.4.7) इत्यनेन भविष्यति। इह तर्हि शुचीनामित्यतर "इन्हन्पूषार्यम्णां शौ" (6.4.12) इति नियमाद्दीर्घत्वं न स्यात्? नैतदस्ति; लक्षणप्रतिपदोक्तपरिभाषया (व्य.प.3) प्रतिपदोक्तस्येन्नन्तस्य स नेियमः। अयञ्च नुमि कृते सतोन्नन्त इति लाक्षणिकत्वादेवास्य नियमेन प्रत्याख्यानं करिष्यते। एवं प्रत्याख्यातेऽज्ग्रहणे अत उत्तरतोऽज्ग्रहणस्य प्रयोजनं दर्शयितु माह--`उत्तरार्थं तु' इति। तुशब्दस्तर्ह्यर्ते। तर्हिशब्दः पक्षान्तरोपन्यासे। यद्येतत् प्रयोजनं नोपपद्यते, उत्तरार्थं तर्ह्यज्ग्रहणं कर्त्तव्यम्।
`इह तु करणस्य यत्प्रयोजनं तदुच्यताम्? इत्याह--`इह' इत्यादि। अपिशब्दोऽत्र गम्यमानार्थत्वान्न प्रयुक्तः। इहापि प्रयोजनमस्ति, किं पुनस्तत्? इत्याह--`त्रपो' इति। हे त्रपो इत्यस्योदाहरणस्य साधुत्वार्थमज्ग्रहणम्। अक्रियमाणे त्वज्ग्रहणे प्रत्ययलोपलक्षणमिहास्तीति न ज्ञाप्येत; यतश्च हे त्रपो इत्यत्र लुपतायां सम्बुद्धावुच्यमानो गुणो न स्यात्, अज्ग्रहणे सत्यत्रापि प्रत्ययलोपलक्षणो भवति। तस्मादेतदर्थमज्ग्रहणं कर्त्तव्यम्, उत्तरार्थञ्च।।

74. तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य। (7.1.74)
`इगन्तं नपुंसकम्' इति। नपुंसकस्येक इत्यनुवर्त्तते। तच्च यद्यपि षष्ठ्यन्तं प्रकृतम्, तथाप्येतदर्थाद्विभक्तिविपरिणामो भवतीति प्रथमान्तं सम्पद्यते।

`पुंवद्भवति' इति। अस्यार्थं स्पष्टीकर्त्तुमाह--`यथा' इत्यादि। कथं पुनः `पुंवद्भवति' इत्यनेन प्रतिषेधातिदेशः शक्यते वक्तुम्। एवं मन्यते--पुंसि तृतीयादिष्वजादिषु न किञ्चित् कार्यं विधीयते यन्नपुंसकेऽतिदश्येत। तस्मान्नपुंसकाश्रयस्य कार्यस्य पुंस्यभावात् प्रतिषेधातिदेश एवायं विज्ञायते। एवमपि नुम् एव प्रकृतस्याभावातिदेशः पक्षे स्यात्, ह्रस्वस्य; तस्याप्रकृतत्वात्, ततश्च ह्रस्वाश्रयाणि गुण नाभाव नुडौत्त्वात्त्वानि प्रसज्येरन्--`घेर्ङिति' (7.3.111) इत्यौत्त्वात्त्वम्--ग्रामण्यां ब्राह्मणकुल इति? नैतदस्ति; नुमभावमात्रातिदेशे ह्यतिदेश एवानरथकः स्यात्। नुम एव गालवस्य मतेन प्रतिषेधं कुर्यात्। तस्मादतिदेशासामर्थ्याद् ह्रस्वाभावोऽप्यतिदिश्यते। `ग्रामणीर्ब्राह्मणः, ग्रामाणि ब्राह्मणकुलम्' इति। भाषितपुंस्कत्वदर्शनार्थमिदमुक्तम्, न तूदाहरणम्। इदमत्रोदाहरणम्--`ग्रामण्या ब्राह्मणकुलेन' इति। अत्र पुंवद्भावेन ह्रस्वो न भवति, नुमपि। `एरनेकाचः' (6.4.82) इति ह्रस्वत्वम्, `आङो नाऽस्त्रियाम्' (7.3.120) इति नाभावः। `ग्रामणीनाम्' इति। पूर्वविप्रतिषेधेन नुटि कृते `नामि' (6.4.3) इति दीर्घत्वम्।
न्नुचिशब्दस्य तृतीयैकवचनं नोदाहृतम्; विशेषाभावात्। सत्यसति वा पुंवद्भावे `आङो नाऽस्त्रियाम्' (7.3.120) इति नाभावेन भवितव्यम्। `शुचये' इति। पुंवद्भावपक्षे न नुम्, `घेर्ङिति' (7.3.111) इति गुणः। `शुचिने' इति। पुंवद्भावाभावपक्षे नुम्।
`ग्रामणिनी ब्राह्मणकुले' इति। पुंवद्भावाभावादिह ह्रस्वनुमौ भवतः। `त्रपुणे, जतुने' इति। सर्वकालं नपुंसकत्वमेवानयोरिति भाषितपुंस्कत्वाभावः। तेनात्र पुंवदेभावाभावान्नुम्भवत्येव।
`इह कस्मान्न भवति' इति। भाषितपुंस्कशब्दस्य बहुव्रीहेः शब्दोऽन्यपदार्थः। पोलुशब्दश्चायं पुंसि वृक्षे वर्त्तित्वा पीलोर्विकारः फलमिति विवक्षिते सति `ओरञ्' (4.2.71) इत्यागतस्याञः `फले लुक्' (4.3.163) इति लुक् क्रियते, तदा नपुंसके फले वर्त्तत इति भाषितपुंस्को भवति, न चेह कश्चिद्विशेष उपात्तः, तस्माद्भवितव्यमेदात्र पुंवद्भावेनेति मन्यमानस्य प्रश्नः। `समानायामाकृतौ' इत्युत्तरम्। अस्यैवार्थं स्पष्टीकर्त्तुमाह `तुल्य प्रवृत्तिनिमित्ते' इति। अत्र `तस्य पुंवद्भावो विधीयते' इत्यध्याहार्यम्। आक्रियेते व्युत्पाद्येते परिच्छिद्येते अनया वृद्धिशब्दादिति `आकृतिः'। शब्दस्य प्रवृत्तिकारणमिहाकृतिरभिप्रेता, न सन्निदेशः, नापि जातिमात्रम्। तस्मिंस्तु तुल्ये प्रवृत्तिनिमित्ते यद्भाषितपुंस्कं तस्य पुंवद्भावो विधीयते। तथा च--ग्रामणीशब्दस्य, शचिशब्दस्य च समासे प्रवृत्तिनिमत्ते पुंवद्भाव उदाहृतः, यथा--ग्रामणीशब्दस्य पुंसि नपुंसके च वर्त्तमानस्य ग्रामनयनं प्रति कर्त्तृत्वं समानाकृतिः प्रवृत्तिनिमित्तम्। शुचिशब्दस्यापि शुचित्वं गुणः तत्रैवैतत् स्यात्। इहापि समानैवाकृतिः? इत्याह--`इह तु' इत्यादि। तु शब्द ो ग्रामणीशब्दादेर्विशेषं दर्शयति। अनेन पीलुशब्दस्य भिन्नायामाकृतौ भाषितपुंस्कत्वं दर्शयति। वृक्षाकृतिः=वृक्षजातिः। फलाकृतिः=फलजातिः। तदेवं समानायामाकृतौ यद्भाषितपुंस्कं तस्य पुंदद्भावो विधीयते। न तु पीलुशब्दः समानायमाकृतौ भाषितपुंस्क इति न भवति तस्य पुंवद्भावः। `तदेतदेवम्' इत्यादि। यदेतदुक्तम्--`समानायमाकृतौ' इत्यादि, तदेतदेवम्प्रकारमर्थरूपं कथम्भवति? न कथञ्चिदित्यर्थः। `समानायामाकृतौ' इत्यस्य विशेषस्यानुपादानादित्यभिप्रायः। `भाषितपुंस्कग्रहणात्' इत्यादिना यथैतदेव भवति तथा दर्शयति। शब्दे ह्यन्यपदार्थे समाश्रीयमाणे सत्येतन्नोपपद्यते। न चात्र शब्दोऽन्यपदार्थत्वेनाश्रितः, किं तर्हि? अर्थः। सोऽपि न सर्वः, अपि तु प्रत्यासत्तेर्यस्य शब्दस्य यत् प्रवृत्तिनिमित्तं स एव विज्ञायत इति स एव भाषितपुंस्कशब्दोनोच्यते; अन्यथा सर्व एव ह्यर्थो भाषितपुंस्को भवति, अन्ततोऽर्थशब्देनापि भाषितपुंस्कत्वसम्भवात्। तत्र यदि येन केनचिच्छब्देन यो भाषितपुंस्कः स इहाश्रीयते, तदा भाषितपुंस्कग्रहणमनर्थकं स्यात्; व्यावर्त्त्याभावात्। तस्माद्यस्य नपुंसकाभिधायिनः शब्दस्य पुंवद्भाव इह विधातुमिष्टस्तेनैव स्वमिन् प्रवृत्तिनिमित्ते पुमान् भाषितः, स एव भाषितपुंत्कोऽत्राक्षीयते। `तेद्योगात्' इत्यादि। तेन प्रवृत्तिनिमित्तलक्षणेनार्थेन योगात् सम्बन्धादभिधेयं यन्नपुंसकं तदपि भाषितपुंस्कमितयुच्यते। भवति हि तद्योगात् ताच्छब्द्यम्, यथा--यष्टीः प्रवेशयेति। योगः पुनरत्र समवायसमवायिलक्षणः; शब्दप्रवृत्तिनिमित्तस्यार्थस्य नपुंसकेन समवायात्। `यत् तस्य' इत्यादि। तस्य नपुंसकस्य यत् प्रतिपादकं शब्दरूपं तदापि भाषितपुंत्केन नपुंसकेन योगादभाषितपुंस्कमित्युच्यते। योगः पुनरनयोर्वाच्यवाचकभावः। तत्र यद्यपि सूत्रेऽर्थो भाषितपुंस्कशब्देनोपात्तः, तथाऽप्यर्थे कार्यासम्भवात् यथोक्तन प्रकारेण यो भाषितपुंस्कः शब्दस्तस्यैवायं पुंवद्भावो विधीयते, एवञ्च स विधीयमानः समानायामाकृतौ यो भवितपुंस्कः शब्दः सामर्थ्यात् तस्य भवतीति विज्ञायते। यो ह्येवं भाषितपुंस्केन शब्दप्रवृत्तिनिमित्तेन सम्बद्धं नपुंसकमाह स नियोगतः समानायामाकृतौ भाषितपुंस्को भवति। यथा स एव ग्रामणीशब्दः, शुचिशब्दश्च। पीलुशब्देन यत्र भाषितः पुमान् प्रवृत्तिनिमित्ते वृक्षाकृतौ न तत्सम्बद्धमसौ नपुंसकमाह। किं तर्हि? फलाकृतिसम्बन्धम्। तस्मात् पीलुशब्दो न समानायामाकृतौ भाषितपुंस्क इति न भवति तस्य पुंवद्भावः। `कीलालपा' इति। `अतो मनिन्क्वनिब्वनिपश्च' (3.2.74) इति विच्। कोलालपाशब्दोऽयं समानायामाकृतौ भाषितपुंस्कः--उभयत्रापि वर्त्तमानः कीलालपात्वं प्रवृत्तिनिमित्तमादाय प्रवर्त्तत इति कृत्वा। इगन्तस्तु न भवतीति न भवति पुंवद्भाव; तेन ह्रस्वत्वं भवत्येव। तस्मिन् सतदि `टाङसिङसामिनात्स्याः' (7.1.12) इतीनादेशे कृते कीलालपेनेति भवति। यदि पुनरत्र पुंवद्भावः स्यात् तदा ह्रस्वत्वं न स्यात्, ततश्च `आतो धातोः' (6.4.140) इत्यकारलोपे कृते कोलालापेति स्यात्।।

75. अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः। (7.1.75)
`इकोऽचि विभक्तौ' (7.1.73) इति नुमि प्राप्तेऽस्ध्यादीनामनङ विधीयते। ङकारोऽन्त्यादेशार्थः। अकार उच्चारणार्थः। अस्थ्यादयश्चैते `नब्विषयस्यानिसन्तस्य' (फि.सू.2.26) इत्याद्युदात्ताः, शेषमनुदात्तम्। तत्रानङ् विधीयमानः स्थानिवद्भावादनुदात्तत्वं प्राप्नोतीत्युदात्तत्वामुच्यते--नब्विषयस्येति। नपुंसकविषयस्येत्यर्थः। `अस्थ्ना' इति। अनङि कृते `अल्लोपोऽनः' (6.4.134) इत्यकारलोपः।
`एतैः' इत्यादि। कथं पुनरोतल्लभ्यते, यावता प्रकृतस्यास्थ्यादिभिर्विशेषणाद्विशेषणेन तदन्तविधिरिति विज्ञानात् `अङ्गाधिकारे तस्य सदुत्तरपदस्य' (पु.प.वृ.85) इति वचनाद्वा यद्यपि तदन्तविधिर्भवति, तथापि सत्यपि तस्मिन्नस्थ्याद्यन्तत्यानपुंसकस्य ग्रहणं नोपपद्यते, नपुसकस्येत्यनुवृत्तेः? नैष दोषः; न

ह्यत्र नपुंसकेनाङ्गं विशिष्यते, अपि तु श्रुतत्वादस्थ्यादय एव। एवञ्च तदन्तस्याङ्गस्य लिङ्गान्तरेपि वर्त्तमानस्यास्थ्यादीनां नपुंसकत्वं विद्यत एव। तेन नपुंसके ये वर्त्तन्तेऽस्थ्यादयस्तदन्तस्यानपुंसकेऽपि वर्त्तमानस्य ग्रहणमुपपन्नं भवति। यदि तर्हि तदन्तस्य ग्रहणम्, केवलानां न सिध्यति? अयमप्यदोषः; व्यदेशिवद्भावात् केवलानां न भविष्यति। `व्यपदेशिवद्भावोऽयतिपदिकेन' (शाक.प.65) इत्येषा परिभाषा प्रत्ययविधिविषयेतीह नोपतिष्ठत एव। नपुंसकेनास्थ्यादिविशेषणं किम्? यदा ते पदुच्छाशब्दाः सन्तोऽपि लिङ्गान्तरे वर्त्तन्ते तदा मा भूत्--दधिर्नाम कश्चित् तेन दधिनेति।।

76. छन्दस्यपि दृश्यते। (7.1.76)

`यतो विहितः' इत्यादिनाऽपिशब्दस्य सर्वोपाषिण्यभिचारार्थतां दर्शयति। `अस्थभिः' इति। अनङि कृते नलोपः। `अस्थान्युत्कृत्य' इति। शस्यनङ्। `अक्षण्वता' इति। अत्रापि मतुपि `अनो नुट्' (8.2.16) इति नुल्यम्। द्वितीयान्तमेतत्। `यदनस्थः' इति। अस्थि यसय नास्तीति सावनङ, `सर्वनामस्थाने च' (6.4.8) इति दीर्घः।।

77. ई च द्विवचने। (7.1.77)

चकारश्छन्दसीत्यनुकर्षणार्थः। `अक्षी ते' इति अक्षि औ इति स्थिते `नपुंसकाच्च' (7.1.19) इति शीभावः, ईकारे कृते `प्रथमयो पूर्वसवणः' (6.1.102) इती दीर्घः, `दीर्घाज्जसि च' (6.1.105) इति प्रतिषिद्धोऽपि छान्दसत्वाद्भवति। ननु सवर्णे दीर्घत्वेनाऽप्येतत् सिद्ध्यति? यद्यपि रूपं सिद्ध्यति, उदात्तत्वं तु न सिध्यति। एतेनोदत्त ईकारो विधीयते। अथ वा--रूपमपि न सिध्यति। पूर्वसवर्णाद्धि परत्वात् पूर्वं नुमि कृते नैव सवर्णदीर्घः स्यात्। अथाक्षी इत्यत्र `इकोऽचि विभक्तौ' (7.1.73) इति नुम् कस्मान्न भवति? इत्याह--`अक्षी इत्यत्र' इत्यादि। नुमोऽवकाशः--त्रपुणे, जतुन इति इकरस्यावकाशः--अक्षीभ्यमिति; प्रथमाद्विवचन उभयप्रसङ्गे परत्वादीकार एव भवति। अथेदानोमीकारे कृते पुनःप्रसङ्गविज्ञानान्नुम् कस्मान्न भवति? इत्याह--`सकृद्गतो इति।।

78. नाभ्यस्तच्छतुः। (7.1.78)

`उदत्त, ददत्तौ' इति। `श्नभ्यस्तयोरात्तः' (6.4.112) इत्याकारलोपः। अक्षितिजागरत्त्याः `जक्षित्यादयः षट्' (6.1.6) इत्यभ्यस्तसंज्ञा। कथं पुनरयं नुमः प्रतिषेधो विज्ञायते, यावता `अनन्तस्य विधिर्वा भवति प्रतिषेधो षा' (व्या.प.19) इतीकारस्य प्रतिषेधो युक्तः? इत्याह--`शतुरनन्तरः' इत्यादि। लक्षणान्तरेण विहितस्य प्रतषेधो भवति, न तु शतुरनन्तर ईकारः केनचिद्विहितः। अङ्गस्येति वर्त्तते, न च नुमोऽन्यत् कार्यं शतुः सम्भवति। अतः सामर्थ्याद्व्य वहितस्यापि `उगिवचाम्' (7.1.70) इति नुमः प्रतिषेधो विज्ञायत इति।।

79. वा नपुंसकस्य। (7.1.79)

शतुप्रत्ययमात्रं नपुंसके न वर्त्तत इत्यभ्यस्तादहगादुसरो यः शता तदन्तस्य नपुंसकस्य विकल्पो विज्ञायत इत्याह--`अभ्यास्तादङ्गात्' इत्यादि।।

80. आच्छीनद्योर्नुम्। (7.1.80)

`तदुन्ती कुले' इति। `नपुंसकाच्च' (7.1.19) इति शीभावः। `तुदती ब्राह्मणी' इति। `उगितश्च' (4.1.6) इति ङीप्, `याती ब्राह्मणी' इति। अवादित्वाच्छपो लुक्, `उगितश्च' (4.1.6) इति ङीप्। `करिष्यन्ती कुले' इति। `लृटः सद्वा' (3.3.14) इति शत्रादेशः, `ऋद्धनोः स्ये' (7.2.70) इतीट्।

`अत्रान्तरङ्गत्वात्' इत्यादि चोद्यम्। अकारान्तादङ्गात् परे शतरि व्यवस्थिते ईकारे च किं नुम् क्रियताम्? उत्तैकादेशः? अत्रान्तरङ्गत्वात् `अतो गुणे' (6.1.97) पररूपमेकादेशः। अन्तरङ्गत्वं पुनस्तस्य वर्णाश्रयत्वाकत् नुमस्तु बह्वपेक्षत्वाद्बहिरङ्गत्वम्। स ह्यकरान्तमङ्गं शतृप्रत्ययान्तं ततश्च परतः शीनद्योर्भावमपेक्षते। `वार्णादाङ्गम्' (व्य.प.39) इत्यादीह नास्ति; भिन्नकालत्वात्--शीनद्योर्हि परभावे सति नुम् प्राप्नोति, एकादेशस्तु ततः प्रागेव। `यत्र च वार्णाङ्गयोर्युगपत् प्राप्तिः, तत्रेयमुपतिष्ठते' इत्युक्तं प्राक्। व्यपवर्गाभावादवर्णान्तादङ्गादुत्तरस्य शतुरिति शक्यते वक्तुम्। भेदे हि सत्यवध्यवश्रिमतोरिदमस्मादुत्तरमिदञ्च पूर्वमित्येव व्यवहारो भवति, नान्यथा। स्यादेतत्--`अन्तादिवच्च' (6.1.85) इत्यन्तादिवदभावेनैकादेशः पूर्वं प्रत्यन्तवद्भवति परञ्च प्रत्यादिवदित्येकादेशस्य पूर्वं प्रत्यन्तत्त्वात् परञ्च प्रत्यादिवत्त्वाद्युज्यत एवावर्णादङ्गादुत्तरस्य शतुः? इत्याह--`उभयत आश्रये' इत्यादि। अत्र ह्यकारान्तमङ्गं शता चोभयमाश्रितम्। `उभयत आश्रये' इत्यादि। अत्र ह्यकारन्तमङ्गं शता चोभयमाश्ितम्। `उभयत आश्रये नान्तादिवत्' (व्या.प.51) इति नास्त्यन्तादिवद्भावः। न ह्येकस्यैकदा पूर्वं प्रत्यन्तवद्भावः परञ्च प्रत्यादिवद्भाव उपपद्यते। तथा हि--यदि पूर्वं प्रत्यन्तवद्भवति, तदा शतृरूपं न सम्पद्यते; अथ परं प्रत्यादिवद्भवति, तदाऽकारान्तताऽङ्गस्य न परिकल्प्यते; उच्यते चेदमाच्छीनद्योर्नुमिति, न चवर्णान्तादङ्गादुत्तरः शता क्वचित् सम्भवति; तत्र वचनप्रामाण्याद्भूतपूर्वगतदिराश्रीयते--अवर्णान्तादुत्तरो यः शत पूर्वमासीदिति। अत आह--`भूतपूर्वगत्या' इत्यादि। यदि हि भूतपूर्वगतिराश्रीयते, अवती, ध्नतीत्यादावतिप्रसङ्गः स्यात्; अत्राप्यवर्णान्तादङ्गादुत्तरः शता पूर्वमासीत्? इत्याह--`अत्र केचित्समाधिमाहुः' इति।

समाधिः=परीहारः। परीहारश्च--शतुरवयव इति। शतुरवयवस्तकारः। तत्रेह शतृशब्दो वर्त्तते, यथा--पटो दन्ध इत्यत्र पटावयवे पटशब्दः, समुदायेषु प्रवृत्ताः शब्दाः क्वचिदवयेष्वपि वर्त्तन्त इति। स च शत्रवयव एकादेशे हि कृतेऽवर्णान्तादङ्गादुत्तरो भवतीति `अन्तरङ्गत्वादेकादेशे कृते' इत्यादिना यत् कृतञ्चोद्यं तत् परिहृतं भवति। किं पुनरनच्कसय तकारस्य नुम्? रुथञ्च नुम् स्यात्? कथञ्च न स्यात्? `मिदचोऽन्त्यात् परः' (1.1.47) इति वचनात्। मा भूत् तकारस्य, तदन्तस्य भविष्यति। एवञ्च सूत्रार्थं वर्णयिष्यामः--अवर्णान्तादङ्गादुत्तरो यः शत्रवयवस्तदन्तस्याङ्गस्य नुम् भवतीति। अङ्गग्रहणञ्च द्विरावर्त्तयिष्यामः-- अवर्णान्तादङ्गदुत्तरो यः शत्रवयवस्तदन्तस्याङ्गस्य नुम् भवतीति। अङ्गग्रहणञ्च द्विरावर्त्तयिण्यामः--शत्रवयवविशेषणार्थम्, अङ्गकार्यप्रतिपत्त्यर्थञ्च। कथं पुनस्तुदतीत्यादी तकारात् पूर्वस्याङ्गत्वम्, यावता यतः प्रत्ययो विहितस्तदादेः प्रत्यये परतोऽङ्गसंज्ञा, न च तकारः प्रत्ययः असत्याञ्चाङ्गसंज्ञायां यदुक्तमवर्णान्तादङ्गादुत्तरो यः शत्रवयव इति तन्नोपपद्यते? नैष दोषः; यथैव हि शत्रवयवे शतृशबदो वर्त्तते, तथाङ्गवयवे तकारात् पूर्वस्मिन्नङ्गशब्दः। किं पुनस्तदङ्गम्? यस्यावयवः शत्रन्तम्। तस्य हि शौनद्योः परतोऽङ्गत्संज्ञा विधीयते।
इहापि तर्हि कस्मान्न भवति--अदती, ध्नतीति, अत्रापि ह्यवर्णान्तादङ्गादुत्तरः शत्रवयदो भवति? यद्यत्रापि स्यात्, आदिति विशेषणमनर्थकं स्यात्, शीनद्योरित्येवं ब्रूयात्। यत्र च शीनद्योः परतः शत्रन्तमङ्गं भवति, तत्र नियोगत एवाकारान्तादङ्गादुसरो शत्रवयवो भवति। तस्मात् `आतः' इति विशेषणोपादानसामर्थ्यात् विशेषपरिग्रहो विज्ञायते--शत्रवयवदकारात् पूर्षो योऽकारस्तदन्तादुत्तरो यः शत्रवयव इति नेह नुमः प्रसङ्गः। `अवर्णान्तादङ्गादुत्तरे ये शीनद्यौ' इति। अत्रापि पूर्ववदङ्गावयवेऽङ्गशब्दो वर्त्तते। ननु च तुदन्तीत्यादाववर्णान्तादङ्गादुत्तरे शीनद्यौ न सम्भवत एव; तकारेण व्यवधानात्? इत्याह--`तत्र येन' इत्यादि। गतार्थम्। अथ नुम्यनुवर्त्तमाने किमर्थ पुनर्नुम्ग्रहणम्? नेति, वेति च प्रकृतम्। तत्र नुम्ग्रहणमन्तरेणानिष्टमपि विज्ञायते--शीनद्योर्विभाषा नुमवर्णान्तान्न भवतीति। किञ्च स्यात्? कुर्वती, तन्वतीत्यत्र विभाषा स्यात्, करिष्यन्तीत्यत्र न स्यात्। केन पुनः प्राप्तस्य नुमः शोनद्योः प्रतिषेधः क्रियते? एतदेव ज्ञापयति--अस्तिशीनद्योर्दिभाषा नुमिति। नुम्ग्रहणे तु क्रियमाणे विधिरेवायं विज्ञायत इत्यदोषः।।

81. शप्श्यनोर्नित्यम्। (7.1.81)

82. सावनडुहः। (7.1.82)

83. दृक्स्ववस्स्वतवसां छन्दसि। (7.1.83)
`ईदृङ्, कीदृङ्' [नास्ति--काशिकायाम्] इति। `त्यदादिधु' (3.2.60) इत्यादिना क्विन्, `इदंकिमोरीश्की' (6.3.90) इतीश्की--आदेशो, हल्ङ्यादिसंयोगान्तलोपौ (6.1.68,8.2.23), `क्विन्प्रत्ययस्य कुः' (8.2.62) इति कुत्वाम्। `यावृङ्, तादृङ्' इति। `आ सर्वनाम्नः' (6.3.91) इत्यात्वम्। `सदृङ्' इति। `दृग्दुशवतुषु' (6.3.89) इति समानस्य सभावः।।

84. दिव औत्। (7.1.84)
`द्यौः' इति। औत्त्वे कृते यणादेशः। इहाक्षद्यूरित्यक्षैर्दीष्यतीति क्विपि कृते तदाश्रये चान्तरङ्गत्वात् `च्छ्वोः शूजनुनासिके च' (6.4.19) इत्युठ्। एकदेशविकृतसयानन्यत्वाद्दिव्शब्दं एवायमित्यूकगारस्योत्त्वं प्राप्नोति, तत् कस्मान्न भवति? इत्याह--`दिविति प्रातिपदिकम्' इत्यादि। अस्त्येवायं दिव्शब्दो धातुः, अस्ति चाव्युत्पन्नं प्रातिपदिकम्। तत्र धातुः सानुबन्धकः, अस्य `उदितो वा' (7.2.56) इत्युदित्कार्यम्। प्रातिपदिकं तु निरनुबन्धकम्, न हि तस्य किञ्चिदनुबन्धकार्यमस्ति। तत्र निरनुबन्धकपरिभाषया (व्या.प.56) धातुरिह गृह्यते। तेनान्नद्युरित्यत्र न भवत्योत्त्वप्रसङ्गः। तकारो मुखसुखार्थः।।

85. पथिमथ्यृभुक्षामात्। (7.1.85)
हल्ङ्यादिलोपे प्राप्ते नलोपे चात्त्वं विधीयते। `पन्थाः' इति। `थो न्थः' (7.1.80) इति न्यादेशः, `इतिऽसर्वनामस्थाने' (7.1.86) इत्यत्त्वम्। ननु चास्य स्थान्यनुनासिको नकारः, तत्र `तपरसतत्कालस्य' (1.1.70) इति सवर्णानां ग्रहणे सत्यान्तरतम्यादनुनासिकेनैवाकारेण भवितव्यम्। किमिह शुद्धोऽयमुदाह्रियते? इत्याह--`स्थानिन्यनुनासिकेऽपि' इत्यादि। अत्रैव कारणमाह--`भाव्यमानः' इत्यादि। यदि च तपरेणापि भाव्यमानेनाणा सवर्णानां ग्रहणं न भवति, एवं सति `विड्वनोरनुनासिकस्यात्' (6.4.41) इत्यत्रापि न स्यात्, तथा `जनसनखनां सञ्झलोः' (6.4.42) इत्यत्रानुनासिकाकारो न स्यात्। एवं तर्हि नैवायमाकारस्तपरः, किं तर्हि? दकारः। दकारस्तु मुखसुखार्थः, स चर्त्वभूतत्वान्न श्रूयते। स्यादेतत्--यद्यपि भाव्यमानोऽण् सवर्णान्न गृह्णातीति (व्या.प.35) सवर्णानां ग्रहणं न भविष्यति, तथाप्यनुनासिकविशिष्टस्योच्चारणादनुनासिकेनैव युक्तं भवितुम्? इत्याह--`शुद्धो हि' इत्यादि। अयं ह्यकारः शुद्धो निरनुनासिक उच्यते तस्माच्छुद्ध एवेति नानुनासिकविशिष्टः। अथायं किमर्थं दीर्घ उच्यते, न ह्रस्व एव क्रियताम्, अत्रापि `अकः सवर्णे' (6.1.101) इति दीर्घत्वेन सिध्यत्येव? न सिध्यति; `अतो गुणे' (6.1.97) इति पररूपत्वं स्यात्। अकारोच्चारणसामर्थ्यान्न भविष्यतीति चेत्? न; अस्ति ह्यन्यदकारोच्चारणस्य प्रयोजनम्। किं तत्? नकारस्य श्रवणं न स्यादिति। लोपो हि क्रियमाणे गौरवं स्यात्, तस्माद्दीर्घो विधीयते।।

86. इतोऽत्सर्वनामस्थाने। (7.1.86)

अथ `आत्' (7.1.85) इत्यनुवर्त्तमाने किमर्थमद्वचनम्, ह्रस्वस्य श्रवणं यथा स्यादिति चेत्? नैतत्; कृते हि ह्रस्वत्वे सौ परतौऽकः सवर्णे दीर्घत्वेन (6.1.101) भवितव्यमन्यत्र `नोपधायाः' (6.4.7) इत्यनेन, तत्कुतो ह्रस्वस्य श्रवणम्? इत्याह--`आदिति वर्त्तमाने' इत्यादि। षपूर्वोऽर्थः प्रयोजनं यस्य तत् तथोक्तम्। कथं पुनरिवं षपूर्वार्थं भवति? इत्याह--`ऋभुक्षणम्' इत्यादि। यदि प्रकृतो दीर्घ एव विधीयते, तदा ऋभुक्षमिन्द्रमित्यत्र ह्रस्वस्य श्रवणं न स्यात्। ह्रस्वविधाने तु `वा षपूर्वस्य निगमे' (6.4.9) इति दीर्घविधानात् पक्षे भवति। स्थानिन्यादेशे च तपरकरणं मुखसुखार्थमित्येके। पथीरित्यत्र दीर्घनिवृत्त्यर्थमितयन्ये। पन्थानमिच्छति `सुप आत्मनः क्यच्' (3.1.8), `अकृत्सार्वधातुकयोः' (7.4.25) दीर्घः--पथीयति; पथीयतेः क्विप्, `अतो लोपः' (6.4.48) इत्यल्लोपः, `क्यस्य विभाषा' (6.4.50) इति यकारसय लोपः--पथीः।।

87. थो न्थः। (7.1.87)

थः, न्थः--इति द्वावपि स्थान्यादेशावनच्कौ। यत्त्वन्थ इत्यत्राकारः श्रूयते स उच्चारणार्थः। सत्यप्यादेशस्यानेकाल्त्वे `निर्दिश्यमानस्यादेशा भवन्ति' (व्या.प.106) इति थकारमात्रस्यादेशो विज्ञायते, न सर्वस्य।।

88. भस्य टेर्लोपः। (7.1.88)

`सर्वनामस्थाने' इत्यादि। `यचि भम्' (1.4.18) प्रत्यत्र `स्वादिष्वसर्वनामस्थाने' (1.4.17) इत्यतः `असर्वनामस्थाने' इत्यनुवर्त्तमाने भसंज्ञा विहिता, तत्र यदि सर्वनामस्थाने परतः पथ्यादीनां टिलोपः स्यात्, तदा भसंज्ञकास्ते न स्युः, अथ भसंज्ञकास्ते स्युस्तदा सर्वनामसथानं परं तेब्यो न स्यादिति भसंज्ञकानां सर्वनामस्थानस्य च सहानवस्थानलक्षणो विरोधः। तस्माद्यद्यप्युत्तरार्थं सर्वनामस्थानग्रहणमनुवर्त्तते, तथापीह नाभिसम्बध्यते।।

89. पुंसोऽसुङ्। (7.1.89)

असुङो ङकारोऽन्त्यादेशार्थः। उकार उगित्कार्यार्थः। `पुमान्' इति। `उगिदचाम्' (7.1.70) इत्यादिना नुम्, `सान्तमहतः संयोगस्य' (6.4.10) इति दीर्घः, हल्ङ्यादिसंयोगान्तलोपौ।

`इह परमपुमान्' इत्यादि। परमश्चासौ पुमांश्चेति `सन्महत्' (2.1.61) इत्यादिना समासे कृते यावद्विभक्तिर्नोत्पद्यते तावदसुङादेशेन न भवितव्यम्; तस्य तदाश्रयत्वात्। समासान्तोदात्तत्वं तु न किञ्चिदपेक्षत इति अन्तरङ्गत्वात् प्रागेव विभक्तेरन्तोदात्तत्वं भवति। पश्चादुत्पन्नायां विभक्तावसुङ् अस्वरस्य व्यञ्जनस्य स्याने भवन्न नियतस्वरः स्यात् ततश्चानिष्टोऽपि स्वरः प्राप्नोति, अन्तोदात्तमेव चोत्तरपदमिष्यते, आद्युदात्तत्वं प्राप्नोति। `तदर्थम्' इत्यादि। अर्थशब्दो निवृत्तिवाची, यथा--मशकार्थो धूम इति। तदर्थं तस्यानिष्टस्य स्वरसय निवृत्त्यर्थमुपदेशिवद्ववचनं कर्त्तव्यम्, अकृते समासान्तोदात्तत्वं उपदेशावस्थायामेव विभक्त्युत्पत्तेः प्रागसुङ् यथा स्यात्। तेनासुङि पूर्वं कृते पश्चात् समासान्तोदात्तत्वेन परमपुमानित्ययं शब्दोऽन्तोदात्तो भवति। यद्येवम्, पुमानित्ययं शब्दोऽप्यन्तोदात्तः स्यात्, उपदेशावस्थायामेवासुङि कृते पश्चात् प्रातिपदिकस्वरेण भवितव्यम्? इत्याह--`पुमानित्ययं पुनः' इत्यादि। पुम्स्शब्दोऽयं पुनातेः `मुक्सुनो ह्रस्वश्च' (द.उ.9.48) [पातेः डुम्सुन्-द.उ. पातेडुस्सुन् पं.उ.4.177] इति मुक्सुन्प्रत्ययान्तो व्युतपादितः। तेन नित्स्वरेणायमाद्युदात्तो भवति, नान्तोदात्तः।।

90. गोतो णित्। (7.1.90)

णिदिति संज्ञा वाऽनेन क्रियते--गोतः परं सर्वनामस्थानं णिद्भवति, णित्संज्ञं भवतीत्यर्थः; अथ वा--गोतः परस्य सर्वनामस्थधानस्य णकार इत्संज्ञको भाव्यते, तेन गोतः परसक्य सर्वनामस्थानस्य णकार इत्संज्ञको भवतीति; आदेशो वा विधीयते--गोतः परस्य सर्वनामस्थानस्य णिणकारानुबन्धवानादेशो भवति; अतिदेशो क्रियते--गोतः णिद्भवति, णिद्वद्भवतीत्यर्थः, विनापि वतिना वत्यर्थो गम्यते, यथा--गाङकुटादिसूत्रे (1.2.1)। तत्राद्ये पशे संज्ञोच्चारिता संज्ञिनं प्रत्याययतीति णित्प्रदेशेषु कृत्रिमत्वादस्यैव सर्वनामस्थानस्य ग्रहणं प्राप्नोति, न ण्वुलादीनाम्। द्वितीये तु णकार इत्संज्ञकः सर्वनामस्थानस्य प्रसज्येत। तृतीये तु पुनर्णित् सर्वनामस्थानं न क्वचिद्दृष्टमिति। य एवैते ष्वुलादयस्य एवादेशाः प्रसज्येरन्नित्येते दोषा आद्येषु त्रिषु पक्षेषु यथाक्रमं प्रतिविधेयाः। तत्प्रतिविधाने प्रतिपत्तिगौरवं स्यात्, अतिदेशपक्षे तु न किञ्चित् प्रतिविधेयम्, अतः स एव साधुरिति। तमेवाश्रित्याह--`गोशब्दात्' इत्यादि। `णित्कार्यम्' इत्यादिना णिद्भवतीत्यस्यार्थं व्याचक्षणः कार्यातिदेशोऽयमित्याचष्टे। गौरिति वृद्धिर्णित्कार्यम्।

`चित्रगुः' इति। यत्र बहुव्रीहौ कृते `गोस्त्रियोरुपसर्जनस्य ' (1.2.48) इति ह्रस्वः। तत्रासति तपरकरणे `अङ्गाधिकारे तस्य तदुत्तरपदस्य' (पु.प.वृ.85) इति वचनात्तदन्तविधिमभ्युपगम्य स्थानिवद्भावेन गोशब्दान्तमेतदङ्गं भवतीति णिद्भावः प्राप्नोति। तपकरणे तु ततकालनियमे सति न भवति; भिन्नकालत्वात्। `तपरस्तत्कालस्य' (1.1.70) इत्यत्राण्ग्रहणस्य निवृत्तत्वादनणोऽपि तत्कालनियमो भवत्येव।

`कथम्' इत्यादि। सत्यपि तपरकरणं `ह्रस्वस्य गुणः' (7.3.108), `जसि च' (7.3.109) इति सम्बुद्धिजसोर्गुणे कृते हे चित्रगो, हे चित्रगव इत्यत्र प्राप्नोति। तत्कालत्वादित्यभिप्रायः। ननु च लक्षमप्रतिपदोक्तपरिभाषया (व्या.प.3) न भविष्यति? नैतदस्ति; यत्र हि स्थानिवद्भावस्तत्रैवा नोपतिष्ठते;

अध्यया हि स्थानिवद्भावोऽनर्थकः स्यात्। `अङ्गवृत्ते पुन' इत्यादि परीहारः। एष तु हे चित्रगवित्यत्र परीहारः, न तु चित्रगव इत्यत्र; अनिष्ठितत्वात्। अवादेशे हि कृते निष्ठितत्वमत्र भविष्यति, न च गुणमात्रे; अप्रयोगार्हत्वात्।

अत एवाव्यापकत्वादस्य परीहारस्यापरितुष्यन् परिहारान्तरमाह--`अथ वा' इत्यादि। स्यादेतत्--अत्रापि गोः सम्बन्धि सर्वनामस्थानमानन्तर्यलक्षणेन भवति सम्बन्धेनेति/ अत आह--`यच्च' इत्यादि। यद्यानन्तर्यलक्षणेन गोः सम्बन्धि सर्वनामस्थानं गृह्यते तदा षष्ठ्याश्रयणामनर्थकं स्यात्, पञ्चम्येवाश्रयितव्येति; क्रमव्यतिक्रमे प्रयोजनाभावात्। तस्मात् षष्ठ्याश्रयणसामर्थ्याद्गोशब्दस्यार्थस्य य एकात्वादयस्तेषु यत्सर्वनामस्थानं तद्गोः सर्वनामस्थानमित्युच्यते। तत् पुनर्गोशब्दस्यैकत्वादीनां वेदितव्यम्। आदिशब्देन द्वित्वादिपरि ग्राहः। तत्रैतत् स्यात्--चित्रगुशब्दादपि यत् सर्वनामस्थानं तद्गोशब्दस्यार्थस्यैकत्वादिषु वर्त्तते? इत्याह--`चित्रगुशब्दात्' इत्यादि।

यदि यद्गोः सम्बन्धि सर्वनामस्थानं तस्य णिद्भावो विधीयते, तदा तपरकरणमनर्थकं स्यात्, तद्धि चित्रगुरित्यादौ मा भूदित्येवमर्थं क्रियते। न चात्र प्राप्तिः, न ह्यत्र गोः सम्बन्धि सर्वनामस्थानम्, किं तर्हि? अन्यपदार्थस्येत्याह--`तपरकरणं' तु इत्यादि।

`केचित्' इत्यादि। किमर्थं पुनस्त एवं पठन्ति? इत्याह--`द्योशब्दोऽपि' इत्यादि। य त्वेदं न पठन्ति `गोतः' इति, तेषां द्योशब्दात् परस्य सर्वनामस्थानस्य णिद्भावो न सिध्यतीत्याह--`गोत इत्येतदेव' इत्यादि। कथं पुनरेतदोकारान्तोपलक्षणार्थं शक्यं विज्ञातुम्? इत्याह--`वर्णनिर्देशेषु' इत्यादि। यथा `वृद्धिरादैच्' (1.1.1), `अदेङ्गुणः' (1.1.2) इत्यवमादिषु योगेषु वर्णस्तपरो निर्दिश्यत इति तपरकरणं वर्णनिर्देशेषु हि प्रसिद्धम्। तस्मादिहापि तपरनिर्देशात् `गोतः' इत्येतदोकारान्तोपलक्षणं द्रष्टव्यमिति। अतो वचनात् तपरकरणं वर्णनिर्देशार्थ मेवेत्यस्यैवौकारान्तोपलक्षणार्थं विज्ञायते।।

91. णलुत्तमो वा। (7.1.91)

`णित्कार्यं वा भवतोत्यर्थः' इति। अनेन णित्कार्यस्य पक्षेऽबावाण्णिद्वा भवतीत्युच्यते, न तु णित्त्वस्यैव प्रतिषेध इति दर्शयति। न तु णल उपदेशावस्थायां सिद्धं णित्त्वं तद्वचनशतेनापि शक्यं तिषेद्धुमिति भावः। `चकार, चकर' इति। यदा णित्त्वं तदा `अचो ञ्णिति' (7.2.115) इति वृद्धिः, अन्यदार्धधातुकलक्षणो गुणः। `पपाच, पपच' इति। यदा णित्त्वं तदा `अकत उपधायाः' (7.2.116) इति वृद्धिः, अन्यदा तदभावः।।

92. सख्युरसम्बुद्धौ। (7.1.92)

`असम्बुद्धौ' इति पर्युदासः--सम्बुद्धेरन्याऽसम्बुद्धिः। `हे सखे' इति। `ह्रस्वस्य गणः' (7.3.108) इति गुणः।।

93. अनङ् सौ। (7.1.93)

पूर्वेण णित्त्वे प्राप्तेऽनङ् विधीयते। तस्य ङकारोऽन्त्यादेशार्थः। अकार उच्चारणार्थः। `सखा' इति। `सर्वनामस्थाने चासम्बुद्धौ' (6.4.8) इति दीर्घः, हल्ङ्यादिसुलोपः, (6.1.68), `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नकारस्य। आकारे विदातव्येऽनङ्वचनं सोर्लोपो यथा स्यात्। अकारविधाने तस्य लोपो न स्यात्, यथा--पन्था इति।।

94. ऋदुशनस्पुरुदंसोऽनेहसां च। (7.1.94)

ऋकारान्तस्य `ऋतो ङिसर्वनामस्थानयोः' (7.3.110) इति गुणे प्राप्ते। इतरेषामपि हल्ङ्यादिलोपे (6.1.68) कृते रुत्वविसर्जनीयसान्तदीर्घेषु प्राप्तेषु। `उशनसः सम्बुद्धावपि पक्ष इष्यते' इति। तत्कथम्? चकारोऽत्र क्रियते, स चानुक्तसमुच्चयार्थः। तेन तम्बुद्धावप्युशनसोऽनङ् भविष्यति। यद्येवम्, नित्यं स्यात्? नैतत्; `णलुत्तमो वा' (7.1.91) इत्यधिकारात् पक्षे भविष्यति। व्यवस्थित विभाषाविज्ञानाच्चान्येषां नित्यम्।

`नलोपप्रतिषेधोऽपि पक्ष इष्यते' इति। कथमेतल्लभ्यते? तत्र हि स्वरितो वाऽनुदात्ते पदादौ' (8.2.6) इत्यतौ वेत्यनुवर्त्तते, तेनैवं विज्ञायत--न ङिसम्बुद्ध्योर्नलोपप्रतिषेधो वा भवतीति। व्यवस्थितविभाषादिज्ञानाच्चोशनसः सम्बुद्धिनकारस्य लोपो वा भविष्यति। अन्येषां तु नित्यमेव लोपो न भविष्यतीति।

`तथा चोक्तम्' इत्यादिनाऽनन्तरोक्तमर्थमागमवचनन द्रढयति। `सान्तम्' इति। यदाऽनङ न क्रियते। `नान्तम्' इति। न तु नलोपः। `अदन्तम्' इति। यदा नलोपः क्रियते।

`तपरकरणमसन्देहार्थम्' इति। असति हि तस्मिन्नुशनसि परतो यणादेशे कृते सन्देहः स्यात्--किमृकारन्तस्य ग्रहणम्? उत्त रेफान्तस्येति?।।

95. तृज्वत्क्रोष्टुः। (7.1.95)

`क्रोष्टुशपब्दस्तुन्प्रत्ययान्तः संज्ञाशब्दः' इति। `क्रुश आह्वाने' (धा.856)[`अह्वाने रोदने च'--धा.पा.] इत्येतस्मात् `सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्' (द.उ.1.122)[`पसि'--द.उ] इति तुन्प्रत्ययान्तस्य संज्ञायां व्युत्पादितत्वात्। संज्ञा पुनरियं जम्बुकस्य। `तृज्वद्भवति' इति। तृचा तुल्यं वर्त्तत इति तृज्वत्। `रूपातिदेशोऽयम्' इति वक्षयति। तत्र `तृज्वद्भवति' इत्युक्ते तृच्छब्दसय यद्रूपं तदतिदिश्यत इति कस्यचिद्भ्रान्तिः स्यात् अतस्तां निराकर्त्तुमाह--`तृजन्तसय यद्रूपम्' इत्यादि। एतच्च `प्रत्ययग्रहणे यस्मात्म विहितस्तदादेस्तदन्तस्य ग्रहणं भवति'

(पु.प.वृ.44) इत्यतो लभ्यते। यद्यपि शास्त्रातिदेशेऽप्यदोषो बहुधा भाव्ये प्रदर्शिताः--तस्यादुष्टत्वेन प्रातिपादनात्, कार्यातिदेशोऽपयदीषवानेव व्याख्यातः--तस्य शास्त्रातिदेशेनाभिन्नत्वात्; तथापि शास्त्रातिदेशकार्यातिदेशयोररूपार्थत्वाद्रूपे गुणाभावः। रूपस्य तु प्राधान्यम्; ताभ्यां तस्य संस्कार्यत्वात्। अतो रूपातिदेशोऽयं युक्त इत्याह--`रूपातिदेशोऽयम्' इत्यादि। यदि तर्हि तृजन्तस्य यद्रूपं तत् क्रोष्टुशब्दस्यातिदिश्यते तदा यत्किञ्चिदेव तृजन्तस्य रूपम्--वक्तृ, पक्तृ--इत्येवमाद्यपि प्राप्नोति? अत आह--`प्रत्यासत्तेश्च' इत्यादि। इह धात्वन्तरस्य पचतिप्रभृते स्तृजन्तस्य रूपमस्ति, क्रुशेरपि, तत् किमश्रुतसय धातोस्तृजन्तस्य यद्रूपं तदतिदिश्यते, उत्त श्रुतस्य क्रुशेरिति? तत्र श्रुतस्यैव यद्रूपं तदेवातिदेष्टुं इति। चकारोच्चारणसामर्थ्यात् स्वरोऽप्यतिविश्यते। अन्यथा `तृवत्' इत्येव ब्रूयादिति भावः। `क्रोष्टा' इति। तृज्वद्भावे कृते पूर्वसूत्रेणानङ्। `क्रोष्टारौ' क्रोष्टारः' इति। `ऋतो ङिसर्वनामस्थानयोः' (7.3.110) इति गुणः, रपरत्वम्, अप्त्रादिसूत्रेण (6.4.11) दीर्घः। `क्रोष्टन्' इति। `प्रथमयोः पूर्वसवर्णः' (6.1.102) इति दीर्घः। `तस्माच्छसो नः पुंसि' (6.1.103) इति नत्वम्।।

96. स्त्रियाञ्च। (7.1.96)

`क्रीष्ट्रीभिः' इति। तृज्वद्भावे कृते यणादेशः।

केन पुनः क्रोष्टुशब्दादीकारः, तृज्वद्भावे कृते `ऋन्नेभ्यो ङीप्' (4.1.5) इत्यनेनेति चेत्? न; अनुदात्तत्वप्रसङ्गादित्यत आह--`क्रोष्टुशब्दं केचित्' इत्यादि। `पञ्चभिः क्रोष्ट्रीभिः क्रीतैः' इति। `तद्धितार्थोत्तरपदसमाहारे च' (2.1.51) इति समासः। `आर्हादगोपुच्छ' (5.1.19) इत्यादिना ठक्, तस्य `अध्यर्द्धपूर्व' (5.1.28) इत्यादिना लक्, `लुक्तद्धितलुकि' (1.2.49) इति स्त्रीप्रत्ययस्य लुक्, तस्मिंल्लुप्ते ये ङीष्प्रत्यये कृते तृज्वद्भावं कुर्वन्ति तेषां तृजवद्भावो न भवति, तस्मात् `प्रतिविषेयम्' इति। प्रतिविधानं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिविधानम्--चकारोऽत्र क्रियते, स चानुक्तसमुच्चयार्थः, तेन लुप्तेऽपि स्त्रीप्रत्यये भविष्यति।

ये तर्हि गौरादिषु न पठन्ति तेषामीकारः कथम्? इत्याह--`गौरादिषु' इत्यादि। तेषां पञ्चक्रोष्टुभिरित्यत्र न किञ्चित् प्रतिविधेयम्; परस्य स्त्रीप्रत्ययस्य निमित्तत्वेनानाश्रितत्वात्। ननु च तेषामपि स्त्रीप्रत्ययस्य लुप्तत्वादसस्यामङ्गसंज्ञायामङ्गस्योच्यमानस्तृण्वद्भावो न प्राप्नोतीति प्रतिविधेयमेव? नैतदस्ति; लुप्ते हि स्त्रीप्रत्यये प्रत्ययलक्षणेनाङ्गसंज्ञा भवत्येव। `न लुमताङ्गस्य' (1.1.63) इति यः प्रतिषेधः सोऽङ्गाधिकार विहितस्यैव कार्यस्य। न चाङ्गसंज्ञाऽङ्गाधिकारे विहिता। `कृतेऽतिदेशे' इत्यादि। `इकोऽचि विभक्तौ (7.1.73) इत्यनुवृत्तेर्विभक्तावुत्पन्नायां तदाश्रयायाञ्चाङ्गसंज्ञायां स्त्रियां वर्त्तमानस्य क्रोष्टुशब्दस्यातिदेशः क्रियते। तस्मिन् कृते ऋकारान्तत्वात् `ऋन्नेभ्यो ङीप्' (4.1.5) इति ङीब्भवति। ननु च ङीप्प्रत्यये कृतेऽन्तोदात्तः क्रोष्ट्रीशब्दो न सिध्यति? इत्याह--`तत्र' इत्यादि। क्रोष्ट्रीशब्दोऽन्तोदात्तोऽतिदिश्यत इति तृसम्बन्धिन ऋकारस्य स्थाने यणादेशो भवन्नुदात्तयण् भवति, ततश्च `शतुरनुमो नद्यजादी' (6.1.173) इत्यनुवर्त्तमाने `उदात्तयणो हल्पूर्वात्' (6.1.174) इत्यन्तोदात्तो भवति क्रोष्ट्रीशब्दः।।

97. विभाषा तृतीयादिष्वचि। (7.1.97)

`स्त्रियाम्' (7.1.96) इति नानुवर्त्तते, तेनेयमप्राप्तविभाषा। `क्रोष्टुना' इति। `आङो नास्त्रियाम्' (7.3.120) इति नाभावः। `क्रोष्टवे' इति। `घेर्ङिति' (7.3.111) इति गुणः। `क्रोष्टुः' इति। `ऋत उत्' (6.1.111) इत्युत्त्वम्, रपरत्वम्, `रात् सस्य' (8.2.24) इति सलोपः। `क्रोष्टोः' इति। पूर्ववद्गुणः, `ङसिङसोश्च' (6.1.110) इति पूर्वरूपत्वम् `क्रोष्टरि इति। `ऋतो ङिसर्वनामस्थानयोः' (7.3.110) इति गुणः। `क्रीष्टौ' इति। `अच्च घेः' (7.3.119) इत्यत्त्वम्, औत्वञ्च। `तृज्वद्भावात्' इत्यादि। तृज्वद्भावस्यावकाशः--पुंसि क्रोष्ट्रो इति, नुमोऽवकाशः--त्रपुणे, जतुन इति; प्रियक्रोष्टुने वनायेत्यत्रोभयप्रसङ्गे सति नुम्भवति पूर्वविप्रतिषेधेनेति। नुटोऽवकाशः--अग्नीनाम्, वायूनामिति, तृज्वद्भावस्यावकाशः स एव; क्रोष्ट्रनामित्यत्रोभयप्रसङ्गे सति नुङ् भवति पूर्वविप्रतिषेधेनेति। पूर्वविप्रतिषेधस्तु परशब्दस्येष्टवाचित्वा ल्लभ्यते।।

98. चतुरनडुहोरामुदात्तः। (7.1.98)

`सर्वनामस्थाने' (7.1.86) इति स्वर्यते, न `तृतीयादिषु' (7.1.97) इति। `आगमा अनुदात्ता भवन्ति' (व्या.प.105) इत्यनुदात्तत्वे प्राप्ते, उदात्तत्वार्थं वचनम्।

`तदन्तविधिरत्रेष्यते' इति। `अङ्गाधिकारे तस्य तदुत्तरपदस्य' (पु.प.वृ.85) इति वचनात्। `प्रियचत्वाः' इति। बहुव्रीहिः। `सर्वनामसंख्ययोरुपसंख्यानम्' (वा.113) इति संख्यायाः पूर्वनिपाते प्राप्ते `वा प्रियस्य' (वा.114) इति प्रियशब्दस्य पूर्वनिपातः।।

99. अभ्सम्बुद्धौ। (7.1.99)

पूर्वेणामि प्राप्ते वचनम्। `हे प्रियचत्वः। हे प्रियानढवन्' इति। अत्र चतुःशब्दस्य केवलस्य सम्बुद्धिर्न भवतीति दतन्तस्योदाहरणम्। अनजुहस्तु यदयपि केवलस्य सम्भवति, तथापि तदन्तविधिरत्रेष्यत इति तदन्तस्योदाहरणम्।।

100. ऋत इद्धातोः। (7.1.100)

`किरिति, गिरति' इति। `कृ विक्षेपे' (धा.पा.1409), `गु निगरणे' (धा.पा.1410)। `तुदादिभ्यः शः' (3.1.77)। `आस्तीर्णम्' इति। `स्तृ आच्छादने' (धा.पा.1484),[स्तृञ्--धा.पा.] `रदाभ्याम्' (8.2.42) इति नत्वम्, `रषाभ्याम्' (8.4.1) इति णत्वम्, `हलि च' (8.2.77) इति दीर्घः। `विशीर्णम्' इति। `शृ हिंसायाम्' (धा.पा.1488)।

`मातृणाम्, पितृणाम्' इति। `नामि' (6.4.3) इति दीर्घः। सत्यपि ऋकारान्तत्वेऽधातुत्वादिह न भवति। ननु च लक्षणप्रतिपदोक्तपरिभाषयै (व्या.प.3) वत्र न भविष्यति, तत्किमेतन्निवृत्त्यर्थेन धातुग्रहणेन? इत्याह--`लाक्षणिकस्यापि' इत्यादि। किमर्थं पनर्लाक्षणिकस्य ग्रहणम्? इत्याह--`चिक्रीर्वति' इत्यादि। कथं पुनरिष्यमाणमपि लाक्षणिकस्यात्र ग्रहणं लभ्यते? अत एव धातुग्रहणाज्ज्ञापकात्। तस्य ह्येतत् प्रयोजनम्--मातृणाम्, पितृणामित्यत्र मा भूदिति। यदीह लाक्षणिकस्य ग्रहणं न स्यात् तदा मातृणाम्, पितृणामित्यादौ लाक्षणिकत्वादेव न भविष्यतीति धातुग्रहणमनर्थकम्। तस्माल्लाक्षिकस्याप्यत्र ग्रहणम्। तेन चिकीर्षतीत्येव मादिषु `अज्झनगमां सनि' (6.4.16) इति दीर्घत्वे सत्यपि भवत्येव।

तपरकरणमसन्देहार्थम्। `र' इत्युच्यमाने सन्देहः स्यात्--किमयं रेफस्य निर्देशः? उत्त यणादेश ऋकारस्येति?

101. उपधायाश्च। (7.1.101)

ऋकारान्तस्य धातोरित्त्वमुक्तम्। उपधाभूतस्य धातोॠकारस्य न प्राप्नोति, इष्यते; तदर्थमेतत्। `कीर्त्तयति' इति। `कृत संशब्दने' (धा.पा.1656) चुरादौ ण्यन्तः। ननु च `ऊतियूतिजूतिसातिहेतिकीर्त्त यश्च' (3.3.97) इति निपातनादेवेत्त्वं भविष्यतीति कथं तदर्थो योगरम्भः? नैतदस्ति; क्तिन्विषय एव निपातनं स्यात्। एवं तर्हि पूर्वयोगे धातुना ऋकारं विशेषयिष्यामः, अत्र तत्स्थस्येति? एतदपि नास्ति; एवं सति ऋकारमिच्छति ऋकारीयतीत्यत्रापि स्यात्। तस्माद्वक्तव्यमिदम्।

`कृतश्च' इति वक्तव्ये `उपधायाश्च' इति वचनं वैचित्र्यार्थम्। `कृतश्च' इत्युच्यमाने तकारस्य स्यात्? नैतदन्ति; `ॠतः' इति पूर्वसूत्रे विशेषणत्वेन प्रककृतम्; न शक्यते तद्धि विशेष्यत्वेन विवक्षितुमिति। तस्य `उपधाया ऋकारस्येकारादेशो भवति' इत्येष वृत्तिग्रन्थो विरुध्यते। अत्र हि ऋकारस्य विशेष्यता दर्शिता। तस्माद्यथाङ्गस्यैतत् क्वचिद्विशेषणम्; तथा `ॠतः' इत्येतदपि पूर्वसूत्रे विशेषणम्, इह तु विशेष्यम्।।

102. उदोष्ठ्यपूर्वस्य। (7.1.102)

`ॠत इद्धातोः] (7.1.100) इतीत्त्वे प्राप्त उत्त्वं विधीयते। `पूर्त्तः' [`पूर्त्ताः'--काशिका, पदमञ्जरी च] इति। `पृ पालनपूरणयोः' (धा.पा.1086), क्तः। `न ध्याख्या' (8.2.57) इत्यादिना प्रतिविषद्धत्वान्न निष्ठानत्वं भवति। `वुवूर्षति' इति। `वृ वरणे' (धा.पा.1490)। `मुमूर्षति' इति। `मृ हिंसायाम्' (धा.पा.1492)। `सूस्वूर्षति' इति। `स्थृ शब्दोपतापयोः' (धा.पा.932), `अज्झनगमां सनि' (6.4.16) इति दीर्घत्वं ऋकारान्तत्वमस्य।

अथेह कथमुत्त्वम्--`वृङ् सम्भक्तौ' (धा.पा.1509), `वृञ् वरणे' (धा.पा.1254)--प्रावुवूर्षते, प्रावुवूर्षतीति, न ह्यत्र ऋकार ओष्ठ्यपूर्वः किं तर्हि? दन्त्योष्ठ्यपूर्वं इति? तदेतदाह--`दन्त्यौष्ठ्यपुर्वोऽप्योष्ठ्यपूर्वो भवति' इत्यादि। यो ह्युभयस्थाने निष्पद्यते लभतेऽसावन्यतरव्यपदेशम्। तेन दन्त्यौष्ठ्यो यो भवति सोऽप्योष्ठ्यो भवत्येव। दन्त्यौष्ठ्यपूर्वोऽपयोष्ठ्यपूर्व एव। अथ समीर्णमित्यत्र कस्मान्नि भवति, अस्ति ह्यत्राप्योष्ठग्रपूर्वता? इत्याह--`ओष्ठ्यो ह्यत्र' इत्यादि। ओष्ठ्यो ह्यत्राङ्गावयवोऽपि। तत्रेह प्रत्यासत्तेरङ्गावयवो गृह्यते, नोपसर्गवयवः। प्रत्यासन्नत्वं पुनाप्रसङ्गस्य प्रकृतत्वात् उपसर्गस्य तु नास्ति प्रत्यासन्नत्वम्; विपर्ययात्।

`इत्त्वोत्त्वाभ्याम्' इत्यादि। इत्त्वोत्त्वयोरवकाशः--आस्तीर्णम्, पूर्त्त इति; गुणवृद्ध्योरवकाशः--चयनम्, चायक इति; इहोमयं प्राप्नोति--आस्तरणम्, आस्तारकः, निपरणम्, निपारक इति, अत्र गुणवृद्धी भवतो विप्रतिषेधेन।।

103. बहुलं छन्दसि। (7.1.103)

`ततुरिः, जगुरिः' इति। तरतेर्गिरतेश्च `आदृगमहनजनः किकिनौ लिट् च' (3.2.171) इति किकिनोरन्यतरः, ततश्चोत्त्वे `द्विर्वचनेऽचि' (1.1.59) इति स्थानिवद्भावात् `तृ गृ', इति द्विरच्यते, `उरत्' (7.4.66) इत्यत्त्वम्। `पप्रितमम्, वव्रितमम्' इति। `पृ, वृ' इत्येतयोः किकिनोरन्यतरः, यथदेशः। किप्रत्ययान्तात् `अतिशायने तमप्' (5.3.55) इत्यादिना तमप्।।

इति बोधिसत्त्वदेशीयाचार्य श्रीजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्चिकायां सप्तमाध्यायस्य
प्रथमः पादः।।

- - -

7.2
अथ सप्तमाध्यायः
द्वितीयः पादः

1. सिचि वृद्धिः परस्मैपदेषु। (7.2.1)
`सार्वधातुकार्धधातुकयोः' (7.3.84) इति गुणे प्राप्ते वचनमिदमारभ्यते। सिचीति, परस्मैपदेष्विति च द्वे अप्येति परसप्तम्यौ; तत्र सिचोऽङ्गापेक्षं परत्वं, परस्मैपदानां तु सिजपेक्षम्। `परस्मैपदपरे' इति। परस्मैपदं परं यस्मात् स तथोक्तः। `इगन्तस्य' इति। `इको गुणबृद्धी' (1.1.3) इत्यस्योपस्थाने सतीकाऽङ्गं विशिष्यते, विशेषणेन च तदन्तविधिर्भवतीत्याह--`इगन्तस्याङ्गस्य वृद्धिर्भवति' इति। `अचैषीत्, अनैषीत्' इति। `चिञ् चयने' (धा.पा.1251), `णोञ् प्रापणे' (धा.पा.91), भूते लुङ्, `च्लेः सिच्' (3.1.44), `एकाचः' (7.2.10) इत्यादिनेट्प्रतिषेधः, अडागमः, `नित्यं ङितः' (3.4.99) इत्यनुवर्त्तमाने `इतश्च' (3.4.100) इतीकारलोपः, `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्, `इष्कोः' (8.3.57) इत्यनुवर्त्तमाने `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्। `अलावीत् अपावीत्' इति। `पूर्ववल्लुङ, `आर्धधातुकस्येड्वलादेः' (7.2.35) इतीट् पूर्ववदीट्, `इट ईटि' (8.2.28) इति सिचो लोपः। `अकार्षात्' इति। उदाहरणं सुबोधम्। ननु चात्रान्तरङ्गत्वाद्गुणेन भवितव्यम्, अन्तरङ्गत्वं पुनस्तस्यार्धधातुकापेक्षात्वात्; वृद्धेस्त्वाद्गुणविशेषं परस्मैपदपरं सिचमपेक्ष्य बहिरङ्गत्वम्? अत आह--`अन्तरङ्गमपि' इत्यादि। यद्यन्तरङ्गत्वाद्णः स्यात्, तदैतद्वचनमनर्थकं स्यात्। तस्माद्वचनसामर्थ्याद्वहिरङ्गापि वृद्धिर्गुणं बाधते। यद्येवम्, तर्हि यथा वचन सामर्थ्याद्वृद्धिरन्तरङ्गमपि गुणं बाधते, तथोवङादेशमपि बाधेत ततश्च न्यनुवीत्, न्यधुवीदिति न सिध्येत्? इत्यत आह--`व्यनुवीन्यधुवीत्' इत्यादि। यत्र हि वृद्धेः प्रतिषेधो नास्ति, तत्र वचनसामर्थ्याद्विध्यन्तरं बाधित्वाऽसौ प्रवर्त्तते। इह तु ङित्त्वे सति `क्ङिति च' (1.1.5) इति वृद्धिः प्रतिषिध्यते, प्रतिषिद्धा च सतो नोत्सहत उपङादेशं बाधितुम्। तेन तस्यां प्रतिषिद्धायां `अचि श्नुधातु' (6.4.77) इत्यादिनोवङादेशः क्रियते। ङित्त्वं पुनरत्र `णू स्तवने' (धा.पा.1397), `धू विधूनने' (धा.पा.1398) इत्येतयोः कुटादिषु पाठाद्गाङकुटादिसूत्रेण (1.2.1) यथा सामर्थ्याद्वृद्ध्या गुणो बाध्यते, तथा प्रतिषेधोऽपि बाध्येत एव? नैतदस्ति; गुणे हि नाप्राप्ते वृद्धिरारभ्यते, प्रतिषेधे तु प्राप्ते चाप्राप्ते च। तत्र येन नाप्राप्ति नान्येन (व्या.प.49) गुणस्यैव बाधा युक्ता, न प्रतिषेधस्य।
`अच्योष्ट, अप्लोष्ट' इति। `च्युङ् छ्युङ् ज्युङ् (न स्तः--धातुपाठे) इयुङ् प्रुङ् प्लुङ् गतौ' (धा.पा.955,956,957)

2. अतो ल्रान्तस्य। (7.2.2)
अन्तशब्दोऽयमस्त्यवयववचनः, यथा वस्त्रान्तः, वसनान्त इति। अस्ति च समीपवाची, यथा--उदकान्तं प्रियं प्रोथमनुव्रजेदिति। उदकसमोपमित्यर्थः। अत्रावयववाचिनोऽन्तशब्दस्य ग्रहणे इहान्तग्रहणमनर्थकं स्यात्? तस्य ह्युपादनस्यैतत् प्रयोजनम्--रेफलकारान्तस्य यथा स्यादिति। एतच्च `येन विधिस्तदन्तस्य' (1.1.72) इत्यनेनैव सिध्यति। तस्मात् समीपवाचिन एव ग्रहणमिति मत्वाऽऽह--`रेफलकारो यावतोऽन्तौ= समीपी' इति। यदि तर्हि ल्रावन्तौ यसय समीपावत इत्यनेन निर्दिश्यते वृद्धिभाग् न निर्दिष्टः स्यात्। एवञ्च `अलोऽन्त्यस्य' (1.1.52) इत्यन्त्यस्य स्यात्; अकारसमीपभूतस्य ल्रान्तस्यान्त्यस्य वृद्धिभाज इकोऽभावादित्यत आह--`अत एव स्थाने' इति। एवं मन्यते--अकारस्य श्रुतत्वादकारस्यैव स्थाने वृद्धिर्विज्ञायत इति। `अक्षारीत्' इत्यादि। `क्षर सञ्चलने' (धा.पा.851), `त्सर छद्मगतौ' (धा.पा.554), `ज्वल दीप्तौ' (धा.पा.804), `ह्वल ह्मल चलने' (धा.पा.805,806) इत्येतेषां रूपाणि। `अतो हलादेर्लघोरित्यस्य विकल्पस्यायमपवादः' इति। एतेन नियमार्थतामस्य योगस्य दर्शयति।
`न्यखोरीत्, न्यमीलीत्' इत्यादि। `खुर छेदने' (वा.यां.1342), `मील श्मील स्मील श्मील निमेषणे' (धा.पा.517-520)। `मा भवानटीत्, मा भवानशीत्' इति। `अट पट गतौ' (धा.पा.295,296), `अशभोजने' (धा.पा.1523) `न माङ्योगे' (6.4.74) इत्याट्प्रतिषेधार्थो माङ्योगः। `भवान्' इति। अयं सन्देहनिरासार्थः; अतोऽन्यत्र विशेषाभावात्।
`अवभ्रीत्' इति। `अभ्र वभ्र मभ्र चर गत्यर्थाः' (धा.पा.556-559)। `अश्वल्लीत्' इति। `श्वलश्वल्ल आशुगमने' (धा.पा.549,550)। `न तावतः समीपौ' इति। भकारलकाराभ्यां व्यवधानादिति।।

3. वदव्रजहलन्तस्याचः। (7.2.3)
अनिगन्तार्थोऽयमारम्भः। अथ वदिव्रज्योर्ग्रहणं किमर्थम्, यावता हलन्तत्वादेव वृद्धिः सिध्यति? इत्यत आह--`विकलपबाधनार्थम्' इत्यादि। `अतो हलादेः' (7.2.7) विकल्पं वक्ष्यति, तस्य बाधो यथा स्यात्। `अपाक्षीत्' इति। `डुपचष् पाके' (धा.पा.996), `चोः कुः' (8.2.30) इति कुत्वम्। `अभैत्सीत्' इति। `भिदिर् विदारणे (धा.पा.1439), `खरि च' (8.4.55) इति चर्त्वम्--दकारस्य तकारः। `अरौत्सीत्' इति। `रुधिर आवरणे' (धा.पा.1438)। `अत्र' इत्यादि। `वदिव्रज्योः इत्येको योगः, `अचः' इति द्वितीयः; एवं योगविभागे सति हलन्तग्रहणमन्तरेणापीष्टं सिध्यत्येव। `कथम्' इति। असम्भावयतः प्रश्नः। `वदिव्रव्योः' इत्यादिना यथा योगविभागे सति सिध्यति तथा दर्शयति। तत्र प्रथमयोगे पूर्वसूत्रात् `अतः' इति स्थान्यनुवर्त्तते। तेनावादीत्, अव्राजीदित्येतावत्सिध्यति। ततो यदच इति द्वितीयं सूत्रम्, तत्र विशेषणविशेष्यभावयोर्यथेष्टत्वात् प्रकृतेनाङ्गेनाजिविशिध्यते--अङ्गस्य योऽजिति।

तेनाङ्गस्याचो यत्र तत्रावस्थितस्य सिचि परतो वृद्धिर्भवति। अपाक्षीदित्याद्यपि सिध्यति। यद्येवम्, योगविभाग एव कर्त्तव्यः, किं हल्ग्रहणेन? इत्यत आह--`तदेतत्' इत्यादि। हल्समुदयपरिग्रहः किमर्थो यतसतदर्थोऽयं यत्नः क्रियते? इत्याह--`इहापि' इत्यादि। `अराङ्क्षीत्' इति। `रञ्ज रागे' (धा.पा.1167)। `असाङ्क्षीत्' इति। `षन्ज सङ्गे' (धा.पा.987)। ननु चाङ्गस्य योऽच् तस्य सिचि परतो वृद्धिरुच्यते, न चात्राङ्गसम्बन्धिनोऽचोनन्तरः परः सिच् सम्भवति यस्यानेन वृद्धिर्विधीयते। तथा ह्यकारान्तस्याङ्गस्य तावत् `अतो लोपः' (6.4.48) इति लोपेन भवितव्यम्। न च वचनादतो लोपं वृद्धिर्बाधिष्यत इति शक्यते वक्तुम्; यदि ह्यकारान्तस्यैव वृद्धिः स्यात् प्रत्याहारग्रहणमनर्थकं स्यात्, `अतः' इत्येवं ब्रूयात्। अथ वा--तदपि सम्भवति। अकारान्तस्य तु कामं संभवति यावाप्रभृतेः। न तु तस्यास्ति विशेषः सत्यां वा वृद्धावसत्यां वा। इगन्तस्य पुनः `सिचि वृद्धिः' (7.2.1) इत्यादिनैव वृद्धिर्विहिता। सन्ध्यक्षराणां च नास्त्येव; `आदेच उपदेशेऽशिति' (6.1.45) इत्यात्त्वविधानात्। उदवोढाम्, उदवोढमित्यत्रास्तीति चेत्? न; ढलोपस्यासिद्धत्वात्। तदयं न क्यचिदचोऽनन्तरः परस्मैपदपरः सिच् सम्भवति। उच्यते चेदं वचनम्; ततो `येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या.प.46) यथाऽपाक्षीदित्यादौ वृद्धिर्भवति, तथाऽराङ्क्षीदित्यादावपि वृद्धिर्भविष्यति, ततो नार्थो हल्ग्रहणेन? इत्यत आह--`अन्यथा हि' इत्यादि। एकेन वर्णेन सर्वत्र व्यवधानमस्ति। हल्समुदायेन क्यचिदेवाराङ्क्षीदित्यादौ। अपाक्षीदित्यदौ नास्ति, तत्रसति हलग्रहणेऽनन्तरोक्तया नीत्या यत्रैकेन वर्णेन व्यवधानमस्ति--अपाक्षीदित्यादौ, तत्रैव स्यात्, यत्र त्वर्नेकवर्णेन व्यवधानमस्ति--अराङ्क्षीदित्यादौ, तत्र न स्यात्, यथाऽपिपठिषीदित्यादौ आदययोरचोर्व्यवधानान्न भवति। हल्ग्रहणे तु सति हल्समुदायेन व्यवधानेऽपि भवति; हल्ग्रहणसामर्थ्यात्।

उदवोढाम्, उदवोढमित्यत्र वहेर्वृद्धिः कस्मान्न भवति, ढलोपे कृतेऽहलन्तादिति चेत्? न; ढलोपस्यासिद्धत्वादिति यश्चोदयेत्, तं प्रत्याह--क्रियते एवात्र वृद्धिः। तस्यास्त्वोत्त्वं विधीयत इति दर्शयितुमाह--`उदवोढाम्' इत्यादि। आदिशब्देन धात्वादयो गृह्यन्ते। वहेरुत्पूर्वाल्लुङ्, तस्थसौ, तयोः `तस्थस्थमिपाम्' (3.4.101) इत्यादिना तान्तमादेशौ यथाक्रमम्, हलन्तलक्षणा वृद्धिः, `हो ढः' (8.2.31) इति ढत्वम्, `झलो झलि' (8.2.26) इति सिचो लोपः, `झषस्तथोर्धोऽधः' (8.2.40) इति षत्वम्, `ष्टुना ष्टुः' (8.4.41) इति ष्टुत्वम्। `सहिवहेरोदवर्णस्य' (6.3.112) इत्योत्त्वम्। तत्र ह्योत्त्वे पुनर्वृद्धिः कस्मान्न भवति? इत्याह--`तत्र कृते पुनः' इत्यादि। एकं ह्यत्र वृद्धिशास्त्रम्, तेन च प्रागेव कृता वृद्धिरिति कृतकार्यत्वाद्वृद्धिशास्त्रस्य, पुनस्तन्न व्याप्रियत इति न भवति पुनर्वृद्धिः।

सौढामित्रिरित्यत्र तर्हि कथमोत्त्वे कृते वृद्धिर्भवति? इत्याह--`यत्र तु' इत्यादि। यत्र प्राग्वृद्धिः कृता तत्र कृतार्थत्वाद्वृद्धिशास्त्रस्य पुनर्न व्याप्रियत इति न भवति वृद्धिः, सोढामित्रिरित्यत्र तु न कृता वृद्धिः। तस्मादकृतार्थत्वाद्वृद्धिशास्त्रं व्याप्रियत इति भवत्येव वृद्धिः। सा च भवत्योकारस्य भवति, नाकरस्य वृद्धिरिति; वृद्धिविधानकाल ओकारस्यैव वृद्धिभाजः सन्निहितत्वात्। सहेर्निष्ठा, तत्र ढत्वादिषु कृतेषु सोढ इति भवति, सोढोऽमित्रोऽनेनेति सोढामित्रः, तस्यापत्यमिति `अत इञ्' (4.1.95), `तद्धितेष्वचामाने' (7.2.117) वृद्धिः। `येन विधिस्तदन्तस्य' (1.1.72) इत्येव सिद्धे तदन्तत्वेऽन्तग्रहणमसन्देहार्थम्। `हलोऽचः' इत्युच्यमाने सन्देहः स्यात्--किमजन्तस्याङ्गस्य हलो वृद्धिर्भवति? उत हलन्तस्याच इति?।।

4. नेटि। (7.2.4)

हलन्तस्याच इति या वृद्धिः प्राप्ता सा हलन्तलक्षणा वृद्धिरनेन प्रतिषिध्यते `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इति कृत्वा। `अदेवीत्, असेवीत्' इति। `दिवु क्रीडादो' (धा.पा.1107), `सिवु तन्तुसन्तानेट [`षिवु'--दा.पा.] (धा.पा.1108)। वृद्धौ प्रतिषिद्धायां `पुगन्तलघूपधस्य' (7.3.86) इति गुणः। `अकोषीदमोषीत्' इति। `कुष निष्कर्णे' (धा.पा.1518), `मुष स्तेये' (धा.पा.1530)। `नन्वत्रैतदन्तरङ्गत्वात्'[नन्वत्रैतदप्यन्तरङ्गत्वात्--कीशिका] इति चोद्यम्। `नैतदेवम्' इति परिहारः। उभयञ्चैतद्गतार्थम्।।

5. ह्य्यन्तक्षणश्वसजागृणिश्व्येदिताम्। (7.2.5)

`अग्रहीत्' इति। ग्रह उपादाने' (धा.पा. 1533)। `अस्यमीत्' इति। `स्थमु स्वन ध्वन शब्दे'(धा.पा.826)-828) `अवमीत्' इति। `टु वम उद्गिरणे' (धा.पा.849)। `अव्ययीत्' इति। `व्ययवित्तसमुत्सर्गे' (धा.पा.1932) `अक्षणीत्' इति। `क्षणु हिंसायाम्' (धा.पा.1465) अश्वसीदिति। `श्वसप्राणने' (दा.पा.1069)। `अजागरीत्' इति। `जागृ निद्राक्षये' (धा.पा.1072)। `औनयीत् ऐलयीत्' `ऊन परिहाणे' (धा.पा.1888), [परिहरणे--धा.पा.] `ईल प्रेरणे' (धा.पा.1660), [`इल'--धा.पा.] चुरादिणिच्। `नोनयति' (3.1.51) इत्यादिना चङि प्रतिषिद्धे सिजेव भवति, `आडजादीनाम्' (6.4.72) इत्याट्, `आटश्च' (6.1.90) इति वृद्धिः। `अश्वयीत्' इति। `टु ओश्यि गतिवृद्द्योः' (धा.पा.1010)। `अरगीत्, अलगीत् इति। `रगे लगे सङ्गे [रगे शंकायाम्--धा.पा.] (धा.पा.785,786)। `अस्थागीत्' इति। `स्थगे संवरणे' (धा.पा.790) [`ष्टगे'--धा.पा.] `अकखीत्' इति। `कखे हसने' (धा.पा.784)।

`सा च नेटीति न प्रतिषिध्यते' इति। अनन्तराया हलन्तक्षणाया वृद्धेः प्रतिषेधः, न पूर्वस्याः। अथ किमर्थं णिश्विग्रहणम्, यावतान्तरङ्गत्वादेवात्र गुणेन भवितव्यम्, कृते गुणेऽयादेशेन, ततश्च यकारान्तत्वादेव तथोः प्रतिषेधो भविष्यति? इत्याह--`न च' इत्यादि। इदमन्तरङ्गत्वं सिच्यभ्युपेत्योक्तम्। इदानीमन्तरङ्गत्वमेव सिचि नास्तीति दर्शयितमाह--`यदि' इत्यादि। किं कारणं णिश्विग्रहणमनर्थकं स्यात्? इत्यात आह--`गुणायादेशयोः' इति। यदि तर्हि सिच्यन्तरङ्गत्वं नास्ति, यदुक्तं `अन्तरङ्गमपि गुणमेषा वृद्धिर्वचनाद्बाधते' इति तद्विरुध्यते? नास्ति विरोधः, अध्यारोप्यो तथाभिधानात्।

`अथ' इत्यादि। अत्र वक्ष्यमाणोऽभिप्रायः। अथ जागृग्रहणं किमर्थमिति पृष्टस्य किं कारणं जागृग्रहणं न कर्त्तव्यमिति प्रश्नावसरे येनाभिप्रायेण पृष्टवांस्तमाविष्कर्त्तुमाह--`जाग्रोऽविचिण्' इत्यादि। यथा जागरयतीत्यादौ `अचो ञ्णिति' (7.2.115) इति प्राप्तां वृद्धिं जागर्त्तर्गुणो बाधते तथा सिचिवृद्धिमपि बाधिष्यते, वृद्ध्यपवादत्वाद्गुणशास्त्रसय। `गृणे कत' इत्यादि। अकृते हि गणे या सिचि वृद्धिः प्राप्नोति सापवादत्वाद्गुणेन बाध्यते; अकृतार्थत्वाद्गुणशास्त्रस्य। न च साऽनेन वचनेन बाधिष्यते; किं तर्हि? गुणे कृते रपरत्वे च `अतो ल्रान्तस्य' (7.2.2) इत्युत्तरकालं या वृद्धि प्राप्नोति तस्याः प्रतिषेधो विधीयते, न च शक्या गुणेन बाधितुं सा। न हि `जाग्रोऽविचिण्णल्ङित्सु' (7.3.85) इति शास्त्रं पुनः प्रवर्त्तितुमुत्सहते; कृतार्थत्वात्। न चान्यद्गुणलक्षणमस्त्युत्तरकालवृद्धेर्बाधकम्। तत्र यदि जागग्रहणं न क्रियते, `अतो ल्रान्तस्य' (7.2.2) इति वृद्धि स्यात्।
`अथ' इत्यादि चोदकः। यदि गुणेऽपि कृते पुनर्वृद्धिः स्यात्, वृद्धिविषये गुणविधानमनर्थकं स्यात्। तस्मात् गुणविधानसामर्थ्याद्यापि गुणे कृते रपरत्वे च पश्चात् `अतो ल्रान्तस्य' (7.2.2) इति वृद्धिः प्राप्नोति सा प्रतिषिध्यते, यथा--जागरयतीत्यत्र। गुणे कृते रपरत्वे च या प्राप्नोति `अत उपधायाः' (7.2.116) इत्युत्तरकालभादिनी वृद्धिः, साऽपि न भवति; गुणेन बाधितत्वात्। `तथा च' इत्यादि। गुणाविधानसामर्थ्यादुत्तरकालभाविन्यपि वृद्धिर्बाध्यते; अन्यथा हि गूणे कृते रपरत्वे च `अत उपधायाः' (7.1.116) इत्युत्तरकालभाविनी वृद्धिः, साऽपि न भवति; गणेन बाधितत्वात्। `तथा च' इत्यादि। गुणविधानसामर्थ्यादुतरकालभाविन्यपि वृद्धिर्गुणेन बाध्यत इति, तदेव द्रढयति। एवञ्च चिण्णलोः प्रतिषेधोऽर्थवान् भवति यद्युत्तरकालभाविन्यपि वृद्धिर्बाध्यते; अन्यथा हि गुणे कृते रपरत्वे च `अत उपधायाः' (7.2.116) इति वृद्ध्या भवितव्यम्। चिण्णलोर्यः प्रतिषेधः क्रियते सोऽनर्थकः स्यात्। तस्मादुत्तरकालभाविन्यपि वृद्धिर्गुणेन बाध्यत इति स्थिमेतत्। ततश्च शक्यमेव जागृग्रहणमकर्त्तम्। एवं प्रत्याख्याते जागृग्रहणे, इतर आह--`तत् क्रियते' इत्यादि। य एवं प्रतिपत्तुं न शक्तः, तं प्रति विस्पष्टार्थं जागृग्रहणं क्रियते।।

6. ऊर्णोतेर्विभाषा। (7.2.6)
नित्यं वृद्धिप्रसङ्गे प्राप्ते विकल्पार्थं वचनम्।।

7. अतो हलादेर्लघोः। (7.2,7)
`नेटि' (7.2.4) इति प्रतिषेधे प्राप्ते विकल्पार्थमिदमारभ्यते। `अकणीत्, अकाणीत्' इति। `अण रण वण कण भण क्वण' (धा.पा.444-446,449,447,450) इति भ्वादौ पठ्यते। `अरणीत् अराणीत्' इति। रणिरपि तत्रैव।
`न्यकुटीत्' इति। `कुट कौटिल्ये (धा.पा.1366)। `न्यपुटीत्' इति। `पुट संश्लेषणे' (धा.पा.1367) ननु चात्र कुटादित्वान्ङित्त्वे सति `क्ङिति च' (1.1.5) इति प्रतिषेधो भविष्यति, ततो नैतन्नियुयर्थम् `अतः इत्येतत् कर्त्तव्यम्? इत्यत आह--`अत इत्येतस्मिन्नसति' इत्यादि। यदि `अतः' इति नोच्येत, ततोऽवश्यम् `वदव्रजहलन्तस्याचः' (7.2.3) इत्यनुवर्त्तयितव्यम्; अन्यथा ह्यनिर्दिष्टस्थानिकत्वादिक एव लघोर्विकल्पेन वृद्धिः स्यात्--अदेवीदित्यादौ, अकाणीदित्यादौ त्वकारस्य न स्यात्। अज्ग्रहणानुवृत्तौ तु सत्यामज्लक्षमेयं वृद्धिः स्यात्, नेग्लक्षणा; निर्दिष्टस्थानिकत्वात्। यत्र हि स्थानी न निर्दिश्यते स इग्लक्षणाया वृद्धेर्विषयः, न तु यत्र स्थानो निर्दिश्यते सोऽपि, ततश्च `क्ङिति च' (1.1.5) इति प्रतिषेधो न स्यात्; तत्र `इकः' इत्यधिकारात्। तस्मान्न्यकुटीत्, न्यपुटीदित्यत्र विकल्पेन वृद्धिर्मा भूदित्येवमर्थमत इति वक्तव्यम्।
`अतक्षीत्, अरक्षीत्' इति। `तक्षू त्वक्षू तनूकरणे' (धा.पा.655,656), `रक्ष पालने' (धा.पा.658)। इह सिच आनन्तर्येऽकारस्य वृद्धिरुच्यते, न क्वचिदनन्तरः सिच् सम्भवति। तत्र `येन नाव्यवचानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या.प.46) इति व्यवधानेऽपि वृद्ध्या भवितव्यम्।
एवं यथा अकाणीदित्यत्र लघोरकारस्य भवति, तथा अचकासीदित्यत्रापि लघोरकारस्य वृद्ध्या भदितव्यमेव? इत्यनेनाभिप्रायेणाह--`अथेह कस्मान्न भवत्यचकासीत्' इति। `चकासृ दीप्तौ' (धा.पा.1074)। `येन' इत्यादि परीहारः। `हला व्यवधानमाश्रितम्' इति। हलन्तस्येत्यनुवृत्तेरित्यभिप्रायः। लघोरिति किमिति येनैवं पृष्टम्, स एवं लघुग्रहणं प्रत्याचिख्यासुराह--`अथ पुनः' इत्यादि। यद्येवं परिकल्प्यते, वचनप्रामाण्यद्धला व्यवधानमाश्रीयते, न त्वचा, `अतो लघोः' इति वक्तव्यम्, अन्यथा ह्यतक्षीदित्यादावपि स्यात्? अत्र हि हला व्यवधानम्, नाचा। अथ पुनरिवं परिकल्प्यते--`येन नाव्यवधानं तेन व्यवहतेऽपि वचनप्रामाण्यात' (व्या.प.46) इत्येकेन वर्णेन व्यवधानमाश्रीयते, न पुनरनेकेनेति नार्थो लघोरित्यनेनेति, न ह्येवं परिकल्प्यमानेऽतक्षीदित्यादौ प्राप्नोति यद्यनेकेन वर्णेन व्यवधानम्? इत्यत आह--`तत् क्रियते' इत्यादि।।

8. नेड्वशि कृति। (7.2.8)
`आर्धधातुकस्येड्वलादेः (7.2.35) इतीटं वक्ष्यति, तस्य यत्र प्रकृतिलक्षणः परतिषेधो नास्ति तत्रानेन प्रतिषेधः क्रियते। पुरस्तात् प्रतिषेधकाण्डस्य प्रयोजनं क्रादिनियमसूत्रे (7.2.13) वक्ष्यति। `ईशिता' इत्यादि प्रत्ययान्तरे त्विटो भावेन `एकाच उपदेशेऽनुदात्तात्' (7.2.10) इति यः प्रकृतिनिमित्तकः प्रतिषेधस्तदभावमेवाचष्टे। `ईश्वरः' इति। `ईश ऐश्वर्ये' (धा.पा.1020), `स्थेशभास' (3.2.175) इत्यादिना वरच्। `दीप्रः' इति। `दीपी दीप्तौ' (धा.पा.1150), `नमिकम्पि' (3.2.167) इत्यादिना रः। `भस्म' इति। `भस भर्सनदीप्त्योः' (धा.पा.1100)। `आतो मनिन्क्वनिब्वनिपश्च' (3.2.74) इत्यादौ `अन्येभ्योऽपि दृश्यन्ते' (3.2.75) इति मनिन्। `याच्ञा' इति। `टु याचृ याच्ञायाम्' (धा.पा.863)। `यजयाच' (7.3.66) इत्यादिना नङ्।

`वरमनादौ प्रयोजनम्' इति यदुक्तं तत्र प्ररिगणनत्वमवधार्य य एवं चोदयेत्--यदि वरमनादाविति परिगणनं क्रियते तदा `षणु दाने' (धा.पा.1464), `ञमन्ताड्डः' (पं.उ.1.104)--षण्डः, `शमः खः' (पं.उ.1.113)--शङ्ख इत्यादौ प्रतिषेधो न प्राप्नोतीति--तं प्रति नेदं परिगणनमिति दर्शयितुमाह--`वरमनादावित्युदाहरणम्' इति। `अथ तत्र' इत्यादि। तत्रौणादिके डप्रत्यये समाधीयेतेति परिगणनपक्षभादि चोद्यं परिह्रियत इत्यर्थः।
`सम्बवोदाहरणप्रदर्शनार्थमेतत्' इति। अत्रापि न परिगणनमेतदिति सम्बध्यते। प्रतिषेधस्य सम्भव उदाह्रियते। यत्र कृति प्रतिषेधः सम्भवति तस्य प्रदर्शनार्थमेतदुक्तं भवति। यत्र वसादौ कृतीद्प्रतिषेधः सम्भवति, तस्य प्रदर्शनार्थं वरमनादावित्युक्तम्, न पुनरेतत् परिगणनमिति। `रुरुदिव, रुरुदिम' इति। अत्र कृद्ग्रहणादार्धधातुकस्येटो न भवति प्रतिषेधः।।

9. तितुत्रतथसिसुसरकसेषु च। (7.1.9)
अवशाद्यर्थोऽयमारम्भः। `तन्तिः' इति। `ननु विस्तारे' (धा.पा.1463) `क्तिच्क्तौ च संज्ञायाम्' (3.3.174) इति क्तिच्। `अनुदात्तोपदेशवनतितनोति' (6.4.37) इत्यादिनाऽनुनासिकलोपः प्राप्नोति, `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इति दीर्घश्च, तदुभयमपि `न क्तिचि दीर्घश्च' (6.4.39) इति प्रतिषेधान्न भवति।
`दोप्तिः' इति। `क्तिन्नाबदिभ्यश्च' (वा.307) इति क्तिन्। रोदिति स्वपितीत्यत्र प्रतिषेधो न भवति; कृतीत्यनुवृत्तेः।
`सक्तुः' इति। `सच समवाये' [`षच'--धा.पा.] (धा.पा.997)।
`पत्रम्' इति। `पत्लृ गतौ' (धा.पा.845)। `तनु विस्तारे' (धा.पा.1486)।
`हस्तः' इति। `हस हसने' (धा.पा.721)[`हसे'--धा.पा.] `लोतः' इति। `लूञ् छदने' (धा.पा.1483)।
`औणादिकस्य' इत्यादि। `ऊर्णोतेर्विभाषा' (7.2.6) इत्यतो विभाषाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा। तेनौणादिक एव तशब्दे प्रतिषेधेन भवितव्यम्, नान्यत्र। यत्र प्रतिषेधेन भवितव्यम् तस्यैव ग्रहणं युक्तमित्यौणादिकतशब्दस्य ह्पबणमिष्यते, न तु क्तस्य। तेन हसितमित्यत्रेडागमो भवत्येव।
`कुष्ठम्' इति। `कुव निष्कषे' (धा.पा.1518)। `काष्ठम्' इति। `काशृ दीप्तौ' (धा.पा.647)। शकारस्य व्रश्चादिसूत्रेण (8.2.36) षत्वम्, `ष्टुना ष्टुः' (8.4.41) इति ष्टुत्वम्।
`कुक्षिः' इति। कुषेः `षढोः कः सि' (8.2.41) इति कत्वम्, `इण्कोः' (8.3.57) इति षत्वम्।
`इक्षुः' इति। `इषु इच्छायाम्' (धा.पा.1351)[`इष'--धा.पा.] पूर्ववत्कत्वषत्वे।
`अक्षरम्' इति। `अशू व्याप्तौ' (धा.पा.1264) [व्याप्तौ संघाते च--धा.पा.] व्रश्चादिसूत्रेण (8.2.36) षत्वम्, पूर्ववत्कत्वम्। `शल्कम्' इति `शल गतौ' (धा.पा.843)। `वत्सः' इति। `बद व्यक्तायां वाचि' (धा.पा.1009), चर्त्वम्--तकारः।
`तितुत्रथेष्वग्रहादीनां वक्तव्यम्' इति। `तितुत्रथ' (7.2.9) इत्यादिसूत्रमुपलक्षयति। तितुत्रतथेत्यैदौ ग्रहादीनां प्रतिषेधो न भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--इहापि `विभाषा' (7.2.6) इत्यनुवर्त्तते, स च व्यवसथितदिभाषा, तेन ग्रहादीनां प्रतिषेधो न भवति। `प्रहादयो ग्रहप्रकाराः' इति। अनेनादिशपब्दस्य प्रकारार्थतामाचष्टे। के पुनर्ग्रहप्रकाराः? इत्याह--`येषाम्' इत्यादि। `निगृहीतिः' इति। `स्त्रियां क्तिन्' (3.3.94), `ग्रहोऽलिटि दीर्घः' (7.2.37) इति दीर्घः, ग्रह्यादीना सूत्रेण (6.1.16) सम्प्रसरणम्। `उपस्निहितिः' इति। `ष्णिह प्रीतौ' (धा.पा.1200)। `निकुचितिः' इति। `कुच सङ्कोचे' [`सङ्कोचने'--धा.पा.] (धा.पा.1368)।
अत्र त्वौणादिकानां ग्रहणं शक्यमकर्त्तुम्; यथैव हि `उणादयो बहुलम्' (3.3.1) इति बहुलवचनात् `ञमन्ताङ्डः' (पं.उ.1.104) इत्येवमादाविण्व भवति, तथा तेष्वति न भवितव्यम्? प्रपञ्चापर्थ तेषां ग्रहणं वेदितव्यम्।।

10. एकाच उपदेशेऽनुदात्तात्। (7.2.10)
`अनुदात्तात्' इति। बहुव्रीहिरयम्--नास्योदात्तोऽस्तीत्यनुदात्तः। अन्वर्थशब्दोऽयमनुदात्तशब्दः। शास्त्रीये ह्यनुदात्ते गृह्यमाण एकवर्णा एव धातवो गृह्येरन्। तथा चान्येवां धातूनामनुदात्तप्रतिज्ञानमनर्थकं स्यात्। इह चेकाज्ग्रहममुपदेशविशेषणम्।
`उपदेशे' इति। प्रकृतिपाठ इत्यर्थः। `अनुदात्तश्च' इति। उपदेश इत्यपेक्षते; तेनोपदेशग्रहणमुभयविशेषणमिति दर्शयति। तस्य प्रयोजनं प्रत्युदाहरणेष्वाविष्करिष्यति। `ये तथा गणे पठ्यन्ते' इति। एतेन गणपाठादेव ते वेदितव्या इति दर्शयति। `त एव' इत्यादिना द्वितीयं परिज्ञानहेतुमाह। काः पुनस्ता अनिट्कारिकाः? इत्याह--`अनिट्स्वरान्तः' इत्यादि। यावातन् कश्चित् स्वरान्तोऽजन्तो धातुः स सर्वोऽनिङ्भवतोत्येतददृश्यताम्, अवगम्यताम्। अनिडिति बहुव्रीहिः--नास्मादिडस्तीति। `अनिट् स्वरान्तः' इत्यस्योत्सर्गस्यापवादमाह--`इमांस्तु' इत्यादि। इमांस्त्वदन्तादीन् वक्ष्यमाणान् सेटः प्रवदन्ति। इटा सह वर्त्तन्त इति सेटः। के वदन्ति? तद्विदः सेडनिड्विद इत्यर्थः। `अदन्तम्' इति बहुव्रीहिः--अकारस्तपरोऽन्तो यसय स तथोक्तः। तपरकरणं दीर्घनिवृत्त्यर्थम्। `ॠदन्तम्' इति। अयमपि बहुव्रीहिः। तपरकरणमसन्देहार्थम्। रन्तमित्युच्यमाने, किमयं रेफस्य निर्देशः? उत्त ॠकारस्य? इति सन्देह--स्यात्। `ॠतां च' इति। ॠतामिति निर्धारणे षष्ठी। ॠकारान्तानां मध्ये वृङवृञो सेटौ प्रवदन्ति। तपरकरणं पादपरणार्थम्। पूर्वमृकारान्तग्रहणागेन हि ह्रस्वस्य ग्रहणमिहावसीयते। `श्विडीङिवर्णेषु' इति। निर्धारणे सप्तमी। इवर्णान्तेषु, मध्ये श्विडीङौ सेटौ प्रवदन्त। `टु ओश्वि गतिवृद्ध्योः' (धा.पा.1010),

`डीङ् विहायसागतौ' (धा.पा.968)। `अथ शीङ्श्रिञावपि' इति। `अथेत्यानन्तर्ये। अनयोः पूर्वक्तयोरनन्तरं शीङ्श्रिञावपि सेटौ प्रवदन्ति। `घीङ् स्वप्ने' (धा.पा.1032), `श्रिञ् सेवायाम्' (धा.पा.897)।
`गणस्थम्' इति। स्वरूपख्यानमेतत्, न तु विशेषणम्--गणनिवृत्त्यर्थमिति; तस्यासम्भवात्। `ऊन्तम्' इति। `लूञ् छेदने' (दा.पा.1483), `पूञ् पवने' (धा.पा.1482) इत्येवमादयः। `उत्ताञ्च' इति। निर्धारणषष्ठी। `रु शब्दे' (धा.पा.1034), `स्नु प्रस्रवणे'[ष्णु--धा.पा.] (धा.पा.1038)। `क्षुवं तथोर्णोतिम्' इत्यादि। `टु क्षु शब्दे' (धा.पा.1036), `ऊर्णुञ् आच्छादने' (धा.पा.1039), `यु मिश्रण' (धा.पा.1033), [मिश्रणेऽमिश्रणे च--धा.पा.] `णु स्तुतौ' (धा.पा.1035), `क्ष्णु तेजने' (धा.पा.1037)। `आवधिष्ट' इति। आङ्पूर्वाद्धन्तेर्लुङ्, `आङोयमहनः' (1.3.28) इत्यात्मनेपदम्; `आत्मनेपदेष्वन्यतरस्याम्' (2.4.44) इति वधादेशः। स चावधीदित्यत्र वृद्धिर्मा भूदित्येवमर्थमदन्तः पठ्यते। इट्, `अतो लोपः' (6.4.48) इत्यकारलोपः। अथ किमर्थमूर्णोतिरुदात्त उपदिश्यते? इट्प्रतिषेधो मा भूदिति चेत्? नैतदस्ति; एकाचो हीट्प्रतिषेध उच्यते, न चास्यैकाचत्वमस्ति? इत्यत आह--`वाच्य ऊर्णोर्णुवद्भावः' इति। `एकाच्त्वम्' इति। पदान्तस्यापि कुत्वाभावः, कुत्वस्यानित्यत्वात्। अनित्यत्वं तु `बह्वच्पूर्वपदात्' (4.4.64), `अल्पाच्तरम्' (2.2.34) इति निर्देशाद्वेदितव्यम्। `इति' इत्येवमर्थः। `निपुणम्' इति। सम्यगविपरीतमित्यर्थः। क्रियाविशेषणञ्चैतत्। `समुच्चिताः' इति। उदात्तानुदात्तसङ्कीर्णाद्धातुराशेः पृथग्व्यवस्थिता इत्यर्थः।
`ततः' इति। स्वरान्तधातुसमुच्चयनादुत्तरकालम्। `हलन्तानपि निबोधत', अवगच्छतेत्यर्थः। `शकिस्तु' इत्यादि। `शक्लृ शक्तौ' (धा.पा.1261)। `घसिश्च' इत्यादि। ननु चादिं हदिमित्यादेः स्वरूपग्रहणे सति तस्य स्थाने `लुङ्सनोर्थस्लृ' (2.4.37) इति विहितस्य घस्लादेशस्यापि स्यानिवद्भावेनानिट्त्वं सिध्यत्येव, तत्किमर्थं घसिः पृथगुपादीयते? इत्याह--`घसिः प्रकृत्यन्तरमस्ति' इति। अन्यदेव हीदं धात्वन्तरं `घस्लु अदने' (धा.पा.715) इत्यदादौ पञ्चते, तस्येदं ग्रहणम्, न त्वादेशस्य। `प्रसारणी' इति। प्रसारणम्=सम्प्रसारणम्, तदस्यास्तीति प्रसारणी। `वसिता' इति। `वस आच्छादने' (धा.पा.1023)। `वस निवासे' इत्यस्य सम्प्रसारणं विहितम्' इति। वाच्यादिसूत्रेण (6.1.15)। एतेन निवासार्थो वसिः प्रसारणी, न त्वाच्छादनार्थं इति दर्शयति। `रभिश्च' इत्यादि। `रभ राभस्ये' (धा.पा.974) `यभ मैथुने (धा.पा.980) `डु लभष् प्राप्तो' (धा.पा.975)।
`यमिञंमन्तेषु' इत्यादि। `ञम्' इति ञकारादारभ्य अमो मकारेण प्रत्याहरग्रहणम्। `यम उपरमे' (धा.पा.984), `रमु क्रीडायाम्' (धा.पा.853), `मन ज्ञाने' (धा.पा.1176), `णम प्रह्वत्वे शब्दे च' (धा.पा.981), `हन हिंसागत्योः' (धा.पा.1012), `गम्लृ सृप्लृ गतौ' (धा.पा.982,983)।
`श्यनिपठ्यते' इति। श्यन्ग्रहणेन साहचर्यात् दिवादिर्लक्ष्यते। दिवादौ पठ्यत इत्यर्थः। `प्रतिषेधदाचिनाम्' इति। प्रतिषेधं वक्तुं शीलं येषां ते तथोक्ताः धातव एव ह्यनुदात्तलिङ्गानुषक्ताः प्रतिषेधं प्रतिपादयन्तति प्रतिषेधवाचिन उच्यन्ते। अथ वा--इट्प्रतिषेधमात्मविषयमाचार्येण वाचयन्त्यभिधापयन्तीति प्रतिषेधवाचिन इत्युच्यन्ते। एवञ्चात्र सम्बन्धः कर्त्तव्यः--ञमन्तेषु मध्ये ये परतिषेधवाचिनो धातवस्तेषां मध्ये यमिरनिडिष्यते। `रमिश्च' इत्यादि। अथ वा--प्रतिषेधवाचिनामित्यत्र मतेनेत्यध्याहार्यम्। तत्रैवं सम्बन्ध कर्त्तव्यः--इट्प्रतिषेधवाचिनामाचार्याणां मतेन यमिर्ञमन्तेष्वनिडेक इष्यत इति।
`मनुतेः' इति। `मनु अवबोधने' (धा.पा.1471) इत्येतस्य तानादिकस्य।
`दिहिः' इत्यादि। `दिह उपचये' (धा.पा.1015), `दुह प्रपूरणे' (धा.पा.1014), `मिह सेचने' (धा.पा.992) `रुह जन्मनि प्रादुर्भावे' (दा.पा.859), `वह प्रापणे' (धा.पा.1004), `णह बन्धने' (धा.पा.1166), `दह भस्मीकरणे' (धा.पा.991), `लिह आस्वादने' (धा.पा.1016)। `मुक्तसंशयाः' इति। मुक्तः= त्यक्तः संशयो येषु यैर्वा ते तथोक्ताः। `प्रविभज्य कीर्त्तिताः' इति। सेडनिङ्विभागेन व्यवस्थाप्य कीर्त्तिता इत्यर्थः।
`देग्धा, दोग्धा' इति। `दादेर्धातोर्घः' (8.2.32) इति धत्वम्, `झषस्तथोर्धोऽधः' (8.2.40) इति धत्वम्, `झलां जश् झशि' (8.4.53) इति जश्त्वमित्येते विधयः कर्त्तव्याः। `मेढा, `आरोढा' इति। `हो ढः' (8.2.31) इति ढत्वम्, पूर्ववद्धत्वम्, `ष्टुन ष्टुः' (8.4.41) ष्टुत्वम्, `ढो ढे लोपः' (8.3.13) इति डलोपः। `वोढा' इति। पूर्ववड्ढत्वादि; `सहिवबोरोदवर्णस्य' (6.3.112) इत्योत्त्वम्। `नद्धा' इति। `नहो धः' (8.2.34) इति धत्वम्, पूर्ववज्जश्तवम्।
`तन्नान्तरे' इति। आपिशले व्याकरणे। `सहेर्विकल्पस्तकरादौ' इति। `तीषसह' (7.2.48) इत्यादिना तकारादौ सहेर्विकल्प उक्तः। `मुहिरपि रधादौ पठ्यते' इति। एतेन मुहेरपि `रधादिभ्यश्च' (7.2.45) इति विकल्पं दर्शयति। `तेन तौ ससंशयौ सविकल्पौ' इति। एतेन विकल्पात्मकेन संशयेन तौ ससंशयौ न तु सन्देहात्मकेनेति दर्शयति। `इतरौ' इति। रिहिलुही। `कैश्चिदभ्युपगम्येते' इति। आपिशलिप्रभृतिभिः। `स्वरूपेणैव ससंशयौ' इति। स्वरूपेणेति स्वभावेन। ससंशयौ=ससन्देहौ। संशयो ह्यतर सन्देहे वर्त्तते। सन्देहस्तु--धातुष्वपाठात्। अथ च कैश्चिदभ्युपगमाच्च। तयोश्चैको हिंसायां वर्त्तमानोऽब्युपगम्यते, अपरस्तु गार्ध्ये।
`दिशिं दृशिम्' इत्यादि। `दिश अतिसर्जने' (धा.पा.1283) `दृशिर् प्रेक्षणे' (धा.पा.988), `दन्श दशने' (धा.पा.981) `अथो शब्दः पादपूरणे। मृश आमर्दने' (धा.पा.1425),[`आमर्शने'--धा.पा.] `स्पृश संस्पर्शे'[`संस्पर्शने'--धा.पा.] (धा.पा.1422) `रुश रिश हिंसायाम्' (धा.पा.1419,1420), `क्रुश आह्वानेग रोदने च' (धा.पा.856), `विश प्रवेशने' (धा.पा.1424), `लिश अल्पीभावे' (धा.पा.1179)। `पुराणगाः' इति। पुराणम्=व्याकरणम्, चिरन्तनत्वात्ष तदगायन्त्यधीयते येते पुराणगाः। `पाठेषु' इति अनिट्कारिकापाठेषु, धातुपाठेषु वा। `नेतरान्' इति। `स्पश बाधनस्पर्शनयोः' (धा.पा.887) इत्येमादीनिति।
`देष्टा' इति। व्रश्चादिसूत्रे (8.2.36) षत्वम्। `अनुदात्तस्य' (6.1.59) इत्यादिना मृशिप्रभृतीनामनुदात्तेट्प्रतिषेधादधिकं कथं दर्शयति।
`रुधिः सराधिः' इत्यादि। सह राधिना वर्त्तत इति सराधिः। `रुधिर् आवरणे' (धा.पा.1438), `राध साध संसिद्धौ' (धा.पा.1162,1163)।

`राधोऽकर्मकाद्वृद्धौ' इति। द्वयोरपि ग्रहणमिष्यते, विशेषाभावात्। `युध सम्प्रहारे' (धा.पा.1190), `शुध शौचे' (दा.पा.1191), `बुध अवगमने' (धा.पा.1172), `व्यध ताडने' (धा.पा.1181), `सिधु संराद्धौ'[`षिधु'--धा.पा.] (धा.पा.1192)। `नेतरे' इति। इन्धिप्रभृतयः। `न्याय्यविकरणयोः' इति शब्विकरणयोरित्यर्थः. `बुध बोधने' (धा.पा.875), [`बुधिर्'--धा.पा.] `षिधु गत्याम्' (धा.पा.47)[`षिध'--धा.पा.] इत्येतयोः। `निष्ठायामपि' इत्यादि। अथ कतं बुधेर्भौवादिकस्य प्रति,ेध आशङ्कितः? सिधेरुदित्त्वेन प्रतिषिद्धत्वात्। `उदित्तो वा' (7.2.56) इति कत्वाप्रत्यये विकल्पविधानात् `यस्य विभाषा' (7.2.15) इति निष्ठायां प्रतिषेधेन भवितव्यमिति युक्ता प्रतिषेधाशङ्का। बुधेस्तु न किञ्चिन्निष्ठायां प्रतिषेधाशङ्काकारणमस्ति। तस्याप्यस्ति--इह भौवादिकदैवादिकयोर्बुध्योरर्थरूपे समाने, अतश्चार्थरूपसाम्यादुपजातभ्रान्तिः प्रतिपत्ता; एक एवायं धातुः, विकरणद्वयार्थमुभयोर्गणयोः पाठः, तस्य चार्द्धधातुक इडप्युक्तः, अनेन सूत्रेणेट्प्रतिषेधोऽपीत्येकविषयत्वाद्विधिप्रतिषेधयोः पर्यायप्रतिपत्तो विभाषेट्त्वम्, अतः `यस्य विभाषा' (7.2.15) इति निष्ठायां प्रतिषेधे न भवितव्यमिति कैश्चिन्मन्यते। तस्मात् तन्मतमाशङ्क्येदमुक्तम्--निष्ठायामपीत्यादि। एवं मन्यते--अन्य एव भौदादिको बुधिर्यस्येड्विधिः, अन्यश्च वैवादिको यस्येट्प्रतिषेधः; तस्मात् भिन्नविषयत्वाद्विधिप्रतिषेधयोर्विभाषेट्त्वं नोपपद्यत इति। अथ सिषेर्निष्ठाया प्रतिषेधाभावः कथमुक्तः, यावतीदिस्वात् तस्य `उदितो वा' (7.2.56) इति विभाषेट्त्वात् `यस्य विभाषा' (7.2.15) इति निष्ठायां भवितव्यमेव प्रतिषेधेन? एवं मन्यते--सिधेरुदित्त्वमनार्षमेव, यद तस्योदित्त्वं स्यात्, भ्वादौ पाठोऽनर्थकः स्यात्; यदनेन साध्यं रूपं तस्य `षिधू शात्रे' (धा.पा.48) [`शास्त्रे माङ्गल्ये च'--धा.पा] इत्यनेनैव सिद्धत्वात्। अनुदित्त्वे तु तस्य सिधितमित्येतत्सिद्धयेऽर्थवान् पाठो भवति। न ह्येतत् `षिधू शास्त्रे' इत्यतेन सिध्यतीति। ऊदित्त्वेनास्य `स्वरितसूति' (7.2.44) इत्यादिना विभाषितेटः `यस्य विभाषा' (7.2.15) इति निष्ठायामिट्प्रतिषेधात्। तस्माद् भ्वादिपाठादेव सिद्धे सिधेरुदित्त्वमनार्षमेव।

`शिर्षि पिषिम्' इत्यादि। `शिष्लृ विशरणे' (धा.पा.1451), [`विशेषणे'--धा.पा.] `पिष्लृ सञ्चूर्णने' (धा.पा.1452), `शुष शोषणे' (धा.पा.1183), `पुष पुष्टौ' (धा.पा.1182), `त्विष दीप्तौ' (धा.पा.1001)। `जिषु विषु मिषु सेचने' (धा.पा.697,698,699), `श्रिषु श्लिषु प्रषु प्लुषु दाहे' (धा.पा.701-704)--द्वयोरपि ग्रहणम्। `तुष तुष्टौ' (धा.पा.1184), [`प्रीतौ'--धा.पा.(तूष तुष्टो--धा.पा.674)] `दुष वैकृत्ये' (धा.पा.1185), `द्विष अप्रीतौ' (धा.पा.1013), `कृष विलेखने' (धा.पा.1286)--भौवादिकतौदादिकौ। `पुष्यति' इति। श्यना निर्देशो भौवादिककैयादिकयोर्निवृत्त्यर्थः। शुष्यतिप्रभृतीनां तु वृत्तभङ्गपरिहारार्थः। `क्रष्टा, कर्ष्टा' इति। पूर्ववद्विकल्पेनामागमः।

`तपिं तिपिम्' इत्यादि। `तप सन्तापे' (धा.पा.985), `तप ऐश्यर्ये' [दाहे ऐश्वर्ये वा---धा.पा.] (धा.पा.984)--द्वयोरपि ग्रहणम्। `तिपृ तेपृ ष्टेपृ क्षरणार्थाः, (धा.पा.362,363,365), `आप्लृ व्याप्तौ' (धा.पा.1260), `टु वपबीजतन्तुसन्ताने' (धापा.1003),[डु वप बीजतन्तुसन्ताने, छेदनेऽपि--धा.पा.] `ञि ष्वप् शये' [`ष्वप'--धा.पा.] (धा.पा.1068), `लिप उपदाहे' (धा.पा.1433), `लुप्लृ छेदने' (धा.पा.1431), `तृप पीणने' (धा.पा.1195), `हप हर्णणमोचनयोः' (धा.पा.1196), [`हर्षमोहनयो-धा.पा.] `गम्लृ सृप्लृ गतौ' (धा.पा.982,983)। `स्वरेण नीचेन' इति। अनुदात्तेनेत्यर्थः। `शप आक्रोशे' (धा.पा.1000), `शप उपालम्भे' [`आक्रोशे'--धा.पा.] (धा.पा.1168)--उभयोरपि ग्रहणम्। `छुप स्पर्शे' (धा.पा.1418), `क्षिप प्रेरणे' (धा.पा.1285)। तृप्यति दृप्यत्योरनुदात्तेत्त्वममागमार्थम्, `अनुदात्तस्य' (6.1.59) इत्यादिना पक्षेऽमागमो यथा स्यात्। इद्प्रतिषेधार्थं कस्मान्न भवति? इत्याह--`इट् त्वनयोः' इत्यादि। `तुदादिषु यौ तृपिदृपी' इति। `तृप तृम्प तृप्तौ'[`तृन्फ'--धा.पा.] (धा.पा.1307,1308), दृप उपक्लेशे'[`उल्लकेशे--धा.पा.] (धा.पा.1313) इत्येतौ।

`अदिं हदिम्' इत्यादि। `अद भक्षणे' (धा.पा.1011),`हद पुरोषोत्सर्गे' (धा.पा.977), `स्कन्दिर्गतिशोषणयोः' (धा.पा.959), `भिदिर् विदारणे' (धा.पा.1439), `छिदिर् द्वैधीकरणे' (धा.श.1440), `क्षुदिर् सम्पेषणे' (धा.पा.1443), `शद्लु शातने' (धा.पा.855), `षद्लृ विशरणगत्यवसादनेषु' (धा.पा.854), `ञि ष्विदा गात्रप्रक्षरणे' (धा.पा.1188), `पद गतौ' (धा.पा.1169)। `खिद दैन्ये' (धा.पा.1170), `खिद परिद्याते' (धा.पा.1282), `विद सत्तायाम्' (धा.पा.1188), `पद गतौ' (धा.पा.1169), `विद विचारणे' (धा.पा.1450)। `ञिष्विदेत्यस्य ग्रहणं मा भूत्' इति। `ञिष्विदा स्नेहमोचनयोः (धा.पा.744) [`स्नेहनमोचनयोः--धा.पा.] इत्यस्य। `अन्यविकरणनिवृत्त्यर्थः' इति। `विद ज्ञाने' (धा.पा.1064) इति लग्विकरणस्य, `विद्लृ लाभे' (धा.पा.1432) इत्यस्य शविकरणस्य च निवृत्त्यर्थः। `विद वेदनाख्यानविवासेषु' (धा.पा.1708) [`चेतनाख्यानविवासेषु'--धा.पा.] इत्यस्य चौरादिकस्यानेकाच्त्वा देवाप्रसङ्गः।

`पचिं वचिम्' इत्यादि। `डु पचष् पाके' (धा.पा.996)। `वच परिभाषणे' (धा.पा.1063), `ब्रुवो वचिः' (2.4.53) इति च द्वयोरपि ग्रहणम्। सौत्रोऽप्युपदेशो भवत्येव। `विचिर् पृथग्भावे' (धा.पा.1442), `विचिर् विवेचने' (धा.1094), [`विजिर् पृथग्भावे'--धा.पा.] `रन्ज रागे' (धा.पा.999), `प्रच्छ ज्ञीप्सायाम्' (धा.पा.1413), `णिजिर् शौचपोषणयोः' (धा.पा.1093), `षिचिर् क्षरणे' (धा.पा.1434),[`षिच'--धा.पा.] `मुच्लृमोक्षणे' (धा.पा.1430), `भज सेवायाम्' (धा.पा.998), `भन्जो आमर्दने' (धा.पा.1453), `भ्रस्ज पाके' (धा.पा.1444), `युज समाधौ' (धा.पा.1177)--द्वयोरपि ग्रहणम्। `रुजो भङ्गे' (धा.पा.1416), `षन्ज सङ्गे' (धा.पा.987), `टु मस्जो शुद्धौ' (धा.पा.1415)। `भुज पालनाभ्यवहारयोः' (धा.पा.1454), `भुजो कौटिल्य' (धा.पा.1417)--द्वरोरपि ग्रहणम्। `ष्वञ्ज परिष्वङ्गे' (धा.पा.976)। कृतानुनासिकलोपस्य निर्देशो वृत्तभङ्गपरीहारार्थः। `सृज विसर्गे' (धा.पा.1414)। `मृजू शुद्धौ' (धा.पा.1066) आदादिकः। `मृज शौचालङ्कारयोः' (धा.पा.1848) [`मृजू'--धा.पा.] इति चौरादिकोप्यस्ति, सोऽपि यदा `आ धुषाद्वा' (धा.पा.1805) अनन्तरम्) इति णिजनास्ति, तदा शक्य एव ग्रहीतुम्। यदा त्वस्ति, तदाऽनेकाच्त्वादेवेट्प्रतिषेधाप्रसङ्गः।

`मृजिरयम्' इत्यादिनप्रतिषेधार्थतां मृजेरिह निरस्यति। `अमागमोऽप्यस्य' इत्यादि। अनेनामागमार्थताम्। `तदिह' इत्यादि। यत एव हि प्रयोजनद्वयं न सम्भवति, तत्समादिहास्य पाठे प्रयोजनं चिन्त्यम्। तत्र केचिदाहुः--यद्यप्यमागमो न दृश्यते, तथाप्यसौ कर्त्तव्य एव अन्यथा ह्यस्य पाठोऽनर्थकः स्यात्। न हि यन्न दृश्यते तेन न भवितव्यमेव, अन्यता हि `यथालक्षणमप्रयुक्तेषु' इत्येतद्वचनमप्रयुज्यमानं स्यात्। अन्ये तु वर्णयन्ति--मृजेनिरुपपदात्, क्विबन्ताद्विकारावयवविवक्षायां माजं इति `अनुदात्तादेरञ्' (4.2.44) इत्यञ् यथा स्यात्--इत्येतत् प्रयोजनमिति; एतच्चायुक्तम्; एकाच्त्वाद्धि नित्यं मयटा भवितव्यम्। तथा हि--`नित्यं वृद्धञरादिभ्यः' (4.3.144) इत्यत्र नित्यग्रहणं किमर्थम्, यावताऽऽरम्भसामर्थ्यादेव नित्यं भविष्यति? इति चोदेते, इदमुक्तम्--`एकाचो नित्यं मयटमिच्छन्तीति तदर्थमेतत् क्रियते--त्वङ्मयं वाङ्मयम्' इति। `केचित्' इत्यादि। केचित् प्रयोजनमपश्यन्तो मृजेः स्थाने विजिं पठन्ति। किं करणमित्याह--`निजादिषु हि' इत्यादि। `विजिर् प्रथग्भावे' (धा.पा.1094) इति निजादिषु विजिः पठ्यते, स यस्मादनिडिष्यते तस्मान्भृजिमपनीय तस्य स्थाने विजिं पठन्ति। कथं ज्ञायतेऽसावनिडिष्यते? इत्याह--`तथा च' इत्यादि। `तन्त्रान्तरे'[`ग्रन्थान्तरे--इति पाठान्तरम्] इति। आपिशलिष्याकरणे। अथ `सुजिविजी' इत्यस्मिन् पाठे `ओविजी भयचलनयोः' (धा.पा.1289) इत्यस्य ग्रहणं कस्मान्न भवति? ईदित्वात्। तद्ध्येवमर्थं क्रियते--`श्वोदितो निष्ठायाम्' (7.2.14) इतीट्प्रतिषेधो यथा स्यात्। यदि च तस्यापीह ग्रहणं स्यादनेनैव सिद्धत्वादीदित्त्वमनर्थकं स्यात्।
`अवधीत्' इति। `लुङि च' (2.4.43) इति वाधादेशोऽदन्तः। स चानुदत्तस्यादेशः स्थानिवद्भावेनैव भवति। उपदेशेऽनुदात्त एकाच उपदेशो न भवतीति न भवति प्रतिषेधः। कथं पुनरयमेकाज्भवति? इत्याह--`वृद्धिनिवृत्त्यर्थम्' इत्यादि। यदि ह्यदन्तो वधिर्नोपदिश्येत, `अतो हलादेर्लघोः' (7.2.5) इति विकल्पेन वृद्धिः स्यात्। अदन्ते तु सति न भवति, तत्र `येन च्यवधानमाश्रियम्। अदन्तत्वे तु सति वधेरकारलोपस्य पुर्वविधौ स्थानिवद्भावेनापि व्यवधानं भवति, न केवलं हलैव। याऽपि हलन्तलक्षणा वृद्धिः, साऽप्यदन्तत्वे सति न भवत्येव;अकारलोपस्य स्थानिवद्भावादहलन्तत्वात्। तस्माद्वृत्त्यर्थमदन्तो वधिरुपदिश्यते। ननु यद्यप्यदन्त उपदिश्यते, तथापि स्थानिवद्भावेनैकाजिति व्यपदेशे सति भवितव्यमेव प्रतिषेधेन? "नतदस्ति; एवं ह्येकाज्ग्रहणमनर्थकं स्यात्। तथा हि--जागृदरद्राचकात्प्रभृतीनामुदात्तत्वात् नैकाज्ग्रहणं ते प्रयोजयन्ति। सनाद्यन्तानां धातूनामुपदेशत्वं नास्ति; लाक्षणिकत्वात्समुदायसय। न चान्योऽनेकाज् धातुरूपदेशेऽनुदात्तोऽस्ति य एकाज्ग्रहणं प्रयोजयति। न चास्मिन् व्यपदेशे कर्त्तव्ये स्थानिवद्भावेऽस्ति; अल्विधित्वात्।
`इह च यता स्यात्' इति। असत्युपदेशग्रहणे' एकाचो धातोरनुदात्तादिडागमो न भवतीत्येव सूत्रार्थः; एवञ्च लविष्यति, पविष्यतीत्यत्रेडागमो न स्यात्। भवत्यत्र प्रत्ययस्वरे कृते शेषानुदात्तत्वे धातुरनुदात्तः। तथा च--कर्त्ता कटान्, कर्त्तुमिच्छतीत्यत्र त्विडागमः स्यादेव; तृनि तुमुनि च कृते नित्स्वरेण धातोरुदात्तत्वात्। उपदोशग्रहणे तु सति तेनाद्यावस्था विशेष्यत इति न भवत्येव दोषप्रसङ्गः। यद्यप्युत्तरकालं लुनातिपुनाती अनुदात्तौ, तथाप्युपदेशावस्थायामुदात्तावेव। तथा यद्यप्यत्तरकालं करोतिरुदात्तः, तथाप्युपदेशवस्थायामनुदात्त एव। अथ बिभिच्छब्दस्य प्रकृतेपाठो नास्ति, नाप्येकाच्त्वम्; तथापि भिदेस्तूभयमिदमस्ति। `द्विष्प्रयोगो द्विर्वचनम्' इत्ययमपि तत्र पक्ष आश्रितः, तेन भिदिरेव तत्र द्विरुच्यते, तस्य चोभयविशेषणविशिष्टत्वात् सिध्यत्येव प्रतिषेधः।।

11. श्रयुकः किति। (7.2.11)
उदात्तार्थं आरम्भः। `लूनः' इति। `ल्वादिभ्यश्च' (8.2.44) इति नत्वम्। `तीर्णः' इति। अत्रापि `रदाभ्याम्' (8.2.42) इति।
`केचित्' इत्यादि `ग्लाजिस्थस्च क्स्नुः' (3.2.139) इति `भुवश्चेति वक्तव्यम्' (3.2.138) [`भुवश्च'--इति सूत्रम्] इत्यत्र भवतेः क्स्नुप्रत्यये गिति कृते सति विधीयमानस्वाद् गितीट्प्रतिषेधो न प्राप्नोति, ततश्च भूष्णुरिति न सिध्येत्। तस्माद् भूष्णुरित्यत्रेट्प्रतिषेधार्थं केचित् श्वभूति--व्याडिप्रभृतयः `श्रयुकः किति' इत्यत्र द्विककारनिर्देशेव हेतुना चर्त्वभूतो गकारः प्रश्लिष्ट इत्येवमाचक्षते। यदि चर्त्वभूतो गकारः प्रश्लिष्टः, एवं सति `ससजुषो रुः' (8.2.66) इति रुत्वे कृते चर्त्वस्यासिद्धत्वात् `हशि च' (6.1.114) इति रोरुत्वेन भवितव्यम् न तु विसर्जनीयेन, ततश्च `श्रयुकः किति' इति निर्देशो न युज्यते? इत्येतच्चोद्यं निराकर्त्तुमाह--`सौत्रत्वान्निर्देशस्य' इत्यादि। चर्त्वभूतस्यासिद्धत्वमनाश्रित्य रोरुत्वं न कृतम्, विसर्जनीयश्च कृत इति वर्णयन्ति। किमर्थं पुनस्ते क्स्नुप्रत्येय गित्त्वं प्रतिजानते, यस्मिन् सतीदं व्याख्यानं कर्त्तव्यं जायते? स्थास्नुशब्दस्य सिद्ध्यर्थम्। एवं हि ते मन्यन्ते--क्स्नोः कित्त्वे सति `धुमास्थागादि' (6.4.66) सूत्रेण तिष्ठतेरीत्त्वं स्यात्, ततश्च स्थास्नुरिति न सिध्येदिति। `ग्लाजिस्थश्च क्स्नु इत्यत्र' इत्यादि। गित्वे हि सति क्स्नोरट्प्रतिषेधार्थमेवं व्याख्यायते, न च तस्य गित्त्वम्। किं तर्हि? कित्त्वमेव। न च कित्त्वे सतीत्त्वं प्रसज्यते, यस्मात् `ग्लाजिस्थश्च क्स्नुः' (3.2.139) इत्यत्र स्था+आ इत्यकारप्रश्लेषः कृतः। तिष्ठतेः क्स्नुप्रत्ययान्तस्याकारान्तस्याकारान्ततैव यथा स्यातद्, ईकारान्तता मा भूदित्येवमर्थः। आकाराप्रश्लेषे हि सतीत्त्वापवादस्तिष्ठतेराकारादेशो भवति, अतस्तेन बाधित्वादीत्त्वं न प्रवर्त्तते। तदेवं कित्त्वे सत्यकरप्रश्लेषात् स्थास्नुशब्दस्य सिद्धत्वात् न किञ्चिदेतत्। एतद्व्यास्यानमसारमित्यर्थः। `तीर्णम्' इत्यत्रापि किं पुनः कारणमसत्युपदेशग्रहणेऽत्रि न स्यात्, यावता तरतिरयमुगन्तः पठ्यते? इत्याह--`इत्त्वे हि' इत्यादि। `ऋत् इद्धातोः' (7.1.100) इतीत्त्वे च कृत उगन्तता विहतेत्यसत्युपदेशग्रहणे न स्यात्, तस्मिंस्तु सति भवति। यद्यप्युत्तरकालं तरतिरुगन्तो न भवति, तथाप्युपदेश एव। `मा भूदेवम्' इत्यादि। चोदकः। `कस्य पुनः' इत्यादोतरः। `ॠतः'[`कृतः' इति मुद्रितः पाठः] इति चोदकः। `यद्येवम्' इत्यादीतरः। `स्थानिवद्भावात्' इति। अल्विधित्वं पुनरुगिति प्रत्याहारग्रहणात्। `तस्मात्' इति। आह--यस्मादेदमसत्युपदेशग्रहणे तीर्ण इत्यत्र प्रतिषेधो न प्राप्नोति, तस्मादुपदेश इत्यनुवर्त्तनीयम्। `तथा च सति' इत्यादि। उपदेशेऽनुवर्त्तमाने सतीत्यर्थः। `जागरित इत्यत्रापि प्राप्नोति' इति। जागर्त्तेरुपदेशावस्थायामुगन्तत्वात्। `तदर्थम्' इति। जागरित इत्यादाविट्प्रतिषेधप्राप्तिनिवृत्त्यर्थम्; अर्थशब्दस्य निवृत्तिवाचित्वात्। यदि तर्हि `एकाचः'

(7.2.10) इत्यनुवर्त्तते, प्रोर्णुतः, प्रोर्णुतवनित्यत्रेट्प्रतिषेधो न प्राप्नोति; ऊरणोतेरनेकाण्त्वात्? इत्यत आह--`वाच्य ऊर्णोर्णुवत्' इत्यादि। अस्याः कारिकायाः पूर्वमेवार्थो व्याख्यात इति न पुनर्व्याख्यायते।।

12. सनि ग्रहगुहोश्च। (7.2.12)

ग्रहेः सनि चित्यमिटि प्राप्ते गुहेरप्यूदित्त्वात् `स्वरति' (7.2.44) इत्यादिसूत्रेण विकल्पे प्राप्तेऽस्यारम्भः। चकारः `उकः' (7.2.11) इत्यनुकर्षणार्थः। ननु च `इको झल्' (1.2.9) इत्युगन्तानां किदेव सन् तत्र पूर्वेणैव प्रतिषेधः सिद्धः किमुक इत्यनुकर्षणार्थेन चकारेण? नैतदस्ति; न हीट्प्रतिषेधमन्तरेण सनो झलादित्वमुपपद्यते, कुतः कित्त्वम्! अनेन त्विटि प्रतिषिद्धे झलादित्वं सनो जायते, पश्चाद्गुणप्रतिषेधार्थं कित्त्वमिति क्रमः। `जिघृश्रति' इति। `रुदविद' (1.2.8) इत्यादिना सनः कित्त्वे सति ग्रह्यादि (6.1.16) सूत्रेण सम्प्रसारणम्, `हो ढः' (8.2.31) इति ढत्वम्, `षढोः कः सि' (8.2.41) इति कत्वम्, `इण्कोः' (8.2.57) इति षत्वम्, `एकाचो वशो भष्' (8.2.37) इत्यादिना भष्भावेन गकारस्य घकारः, द्विर्वचनम्, अभ्यासकार्यम्। `जुधुक्षति' इति। `रुदविद' (1.2.8) इत्यादिना सनः कित्त्वे सति ग्रह्यादि (6.1.16) सूत्रेण सम्प्रसरणम्, `हो ढः' (8.2.31) इति ढत्वम्, `षढोः कः सि' (8.2.41) इति कत्वम्, द्विर्वचनम्, अभ्यासकार्यम्। `जुघुक्षते' [`जुधुक्षति'--काशिका, पदमञ्जरी च] इति। `गुहू संवरणे' (धा.पा.896), `पूर्ववत्सनः' (1.3.62) इत्यात्मनेपदम्। `रुरूषति' इति। `अज्झनगमां सनि' (6.4.16) इति दीर्घः। अथ चकारेण यथेगन्तमनुकृष्यते, तथा चैकयोगनिर्दिष्टः श्रयतिरप्यनुकृष्येत? इत्यत आह--`श्रिस्वृयूर्णुरभज्ञपि' इत्यादि। श्रयतेः `सनीदन्तर्घ' (7.2.49) इतीटो विकल्पं विधास्यतीत्यतस्तस्येहानुवत्तिरपार्थिकेति नानुकृष्यते।

13. कृसृभृवृस्तुद्रुस्रुश्रुवपो लिटि। (7.2.13)

`सकृव, चकृम' इति। `परस्मैपदानाम्' (3.4.82) इत्यादिना वस्मसोर्वमादेशौ। `क्रादय एव' इति। नियमस्य स्वरूपं दर्शयति। `लिट्येव क्रादयोऽनिटः' इत्येष तु विपरीतनियमो नाशङ्कनीयः; `कृतलब्धक्रीतकुशलाः' (4.3.38) इति `तमधिष्टो भृतो भूतो भावी वा' (5.1.80) इत्यादिनिर्देशात्।
केन पुनस्तेषामिट्प्रतिषेधः सिद्धः, यतः सिद्धे सत्यारम्भो नियमार्थ उच्यते? इत्यत आह--`अनुदात्तोपदेशानाम्' इत्यादि। अनुदात्तोपदेशा वृङ्वृञ्भ्यामन्ये करोत्यादयः, तेषामेव `अचः' (7.2.10) इत्यादिना प्रकृत्याश्रयः प्रतिषेधः सिद्धः। वृङ्वृञोस्तु `श्रयुकः किति' (7.2.11) इति प्रत्ययाश्रयः, न तु प्रकृत्याश्रयः; तयोरुदात्तत्वात्। `तत्' इत्यादि। यत एव तेषां यथायोगं प्रकृत्याश्रयः प्रत्ययाश्रयश्च प्रतिषेधः सिद्धः, तस्मादुभयस्यापि प्रतिषेधस्य प्रयुक्तस्यायं नियम इत्यर्थः। धात्वन्तरेभ्यो व्यवच्छिद्य करोत्यादीनां प्रतिषेधस्थेह नियमो वेदितव्यः।
`कथं पुनरेतद्वृञं प्रति थलि नियमार्थमुपपद्यते? सति हि प्रतिषेधे नियमो भवति। वृञस्थलीट्प्रतिषधः। तस्य हि नात्र प्रकृत्याश्रयः प्रतिषेधः सिद्धः; उदात्तत्वात्। नापि प्रत्ययाश्रयः; थलः कित्त्वाभावात्। तस्मात् वृञं प्रति थलीट्प्रतिषेधार्थतैव युक्ता, न नियमार्थता? इत्यत आह--`वृञो हि' इत्यादि। व्यवस्था=नियमः। `बभूथाततन्थजगृम्भववर्थेति निगमे' (7.2.64) इति निपातनाद्वृञो निगम एव थलीट्प्रतिषेधेन भवितव्यम्, न भाषायाम्। यत एवं व्यवस्था तस्मान्नायं वृञस्थलीट्प्रतिषेधः; अन्यथा ववर्थेति निपातनस्य वैयर्थ्यं स्यात्। तस्मात् प्रतिषेधाभावात् वृञोऽप्येतत् सूत्रं नियमार्थमेव विज्ञायत इत्येकान्त एषः।
`स्तुद्रुस्रुश्रुवां तु' इत्यादि। अपिशब्दः आर्धधातुकलक्षणोऽपि य इट् प्राप्नोति सोऽपि नेष्यत इति दर्शनार्थः। कथं पुनरिष्यमाणोऽपि लभ्यते, पुरस्तात्, प्रतिषेधकाण्डस्य बलीयस्त्वात्। इह च `न वृद्भ्याश्चतुर्भ्यः' (7.2.59) इत्यस्यानन्तरमिदं प्रतिषेधकाण्डं कर्त्तुं युक्तम्। एवं द्विष्प्रतिषेधाश्रयणं न कर्त्तव्यं स्यात्। यदयं पुरस्तात् प्रतिषेधं करोति, तस्यैतत् प्रयोजनम्--इष्मात्रस्यानाश्रितविशेषविधानस्य प्रतिषेधो विज्ञायते, पुरस्तात् प्रतिषेधे क्रियमाणे सति विशेषमनाश्रित्येण्मात्रस्यायमपवादो भवति। तेन यावानिट् प्राप्तस्तस्य सर्वस्य प्रतिषेधो भवति सिद्धः। अन्यस्त्वाह--`नेटि' (7.2.4) इत्यनुवर्त्तमाने पुनरिङ्ग्रहणसामर्थ्यात्, पुनः प्रतिषेधसामर्थ्याच्च इण्मात्रस्य प्रतिषेधो विज्ञायते।
`कुञोऽसुट्कस्येति वक्तव्यम्' इति। करोतेरविद्यमानसुटः षतिषेधो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। किमर्थम्? ससुट्कस्येडागमो यथा स्यात्। तत्रेदं व्याख्यानम्--`द्वन्द्वे घि' (2.2.32) इत्यनेन स्तुप्रभृतीनामन्यतमस्य घिसंज्ञकस्य पूर्वनिपातमकृत्वैतत् सूचितम्--यतेह पूर्वनिपातलक्षणं व्यभिचरति स्वविषये न प्रवर्त्तते, तथेदमपीति। तेन यदा करोतिः ससुट्कः, तत्र न प्रवर्त्तत इति। `सञ्चस्करिव, सञ्चस्करिम' इति। `सम्पर्युपेभ्यः करोतौ भूषणे' (6.1.137) इति सुडित्यनुवर्त्तमाने `अडब्यासव्यवायेऽपि' (6.1.136) इति सुट् क्रियते।
`ऋतो भारद्वाजस्य (7.2.63) इत्येतदप्यसुयट्कस्यैवेष्यते' इति। `कृञः' इति सम्बध्यते। कथं पुनरसुट्कस्यैव भवतीति लभ्यते? यथा लभ्यते तच्च श्रूयताम्--तत्र हि `उदितो वा' (7.2.56) इत्यतो वेत्यनुवर्त्तते मण्डूकल्पुतिन्यायेन, सा च व्यवस्थितविभाषा, तेनासुट्कस्यैव भवतीति।।

14. श्वीदितो निष्ठायाम्। (7.2.14)

`शूनः' इति। वच्यादि (6.1.15) सूत्रेण सम्प्रसारणम्, `हलः' (6.4.2) इति दीर्घः। `लग्नः' इति। नत्वस्यासिद्धत्वात् `चोः कुः' (8.2.30) इति कुत्वम्। `उड्डीनः' इति। `ङ्डिङ् विहायसा गतौ' (धा.पा.1135)।
`ननु डीङ उदात्तत्वान्निष्ठायामिट् प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः; हि उड्डयित इत्यनिष्टं रूपं स्यादिति यो मन्येत, तं प्रत्याह--`ङीङः' इत्यादि।

`ओदिताम्' इति। स्वादीनामित्यर्थः। `स्वादय ओदितः' इति वचनात। स्वादयः `षूङ् प्राणिगर्भविमोचने' (धा.पा.1031) इत्यादयः। कथं कृत्वा ज्ञापकः? इत्याह--`स हि' इत्यादि। स्वदीनां ह्योदितां मध्ये तस्यैवमर्थः पाठः--निष्ठातकारस्यौदित उत्तरस्य नत्वं यथा स्यात्। स्यादेतत्--इट्यपि कृते नत्वं भविष्यति? इत्याह--`नतवं च' इत्यादि। `तस्मादित्युत्तरस्य' (1.1.67) इत्यत्र निर्दिष्टग्रहणस्यानन्तर्यार्थस्यानुवृत्तेरोदितो धातोरनन्तरस्य निष्ठातकारस्य नत्वं विधीयते। तत्र यदि डीङ परस्या निष्ठाया इट् स्यात्, तदा सत्यप्योदित्त्वे इटा व्यवहितत्वान्नत्वेन न भवितव्यम्। नित्योदितां मध्ये तस्य पाठोऽनर्थकत्वान्न कृतः स्यात्, स चास्ति; तस्मात् स एव पाठो ज्ञापकः? नैतदस्ति; एवं ह्यानन्तर्यपरिभाषा बाधिता भवति, शास्त्रं चानिष्टं स्यात्, एतच्चायुक्तम्; न ह्यनिष्टार्था शास्त्रे प्रक्लृप्ति(भो प.सू.107) रस्ति। तस्माद्यथानन्तर्यपरिभाषा न बाध्यते शास्त्रञ्च नानिष्टं भवति, ओदिितां मध्ये डीङ पाठश्च सफलो भवति--स प्रकरोऽभ्युपगन्तव्यः। ततश्चौदितां मध्ये डीङः पाटो ज्ञापक एव। अपरः प्रकारः--`ओदितश्च' (8.2.45) इत्यत्रौदित इत्येतद्द्विरावर्त्तयिष्यते `तस्मादित्युत्तरस्य' (1.1.67) इत्यस्याः परिभाषाया द्विरुपस्थानार्थम्, तत्रास्या यद्द्वितौयमुपस्थानं तस्यैतत् प्रयोजनम्--डीङोऽप्यनन्तरस्यैव निष्ठातकारस्य नत्वं यथा स्यादिति। यदि च डीङो निष्ठायामिट् स्यात् इटा व्यवहितत्वान्नत्वं न स्यात्। न च शक्यते वक्तुम्--व्यवधानेऽपि पाठसामर्थ्याद्भविष्यतीति। एवं हि परिभाषाया द्विरुपस्थानमनर्थकं स्यात् एतच्चायुक्तम्; तस्मादोदितां मध्ये डीङः पाठो ज्ञापक एव। श्विग्रहणं शक्यमकर्तुम्, ओदित्करणादेव निष्ठायामिण्न भविष्यति, ओदित्त्वं हि नत्वार्थं क्रियते, नत्वं च निष्ठातोऽनन्तरस्य विधीयते; यदि च ततः परस्या निष्ठाया इट् स्यात् ओदित्त्वमनर्थकं स्यात्? वैचित्र्यार्थं श्विग्रहणं वेदितव्यम्।।

15. यस्य विभाषा। (7.2.15)
`विधूतः' इति। `धूञ् कम्पने' (धा.पा.1836) `गूढः' इति। `गूहू संवरणे' (धा.पा.986)। ढत्वादिषु कृतेषु `ढ्रलोपे' (6.3.111) इत्यादिना दीर्घः। अतेह कस्मात् प्रतिषेधो न भवति--पतित--पतित इति, भवति हि पतिर्विभाषितेट् `सनीवन्तर्घ' (7.2.49) इत्यत्र `तनिपतिदरद्राणामुपसंख्यानम्' इति विकप्लेनोपसंख्यानात्? इत्यत आह--`द्वितीयाश्रित' इत्यादि।।

16. आदितश्च। (7.2.16)
भावादिकर्मणोरनन्तरं विभाषां वक्ष्यति, ततोऽन्यत्र कर्त्तरि कर्मणि चायं प्रतिषेधो विज्ञायते। `आश्वस्तः' इत। `श्वास प्राणने' (धा.पा.1069) । `वान्तः' इति। `टु वम अद्गिरणे' (धा.पा.849)। `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इति दीर्घः। `योगविभागकरणं किमर्थम्' इति। पृष्टस्य `आदितश्च विभाषा भावादिकर्मणोः' इति। यद्येकयोगः क्रियते, ततो भावादिकर्मभ्यामन्यत्र प्रतिषेधो न स्यादिति प्रतिवचनमात्रङ्क्याह--`आदितश्च' इत्यादि। `आदितश्च विभाषा भावादिकर्मणोः' इत्येकयोगे भावादकर्मणोर्विभाषायां विहितायां ततोऽन्यत्र कर्त्रादौ `यस्य विभाषा' (7.2.15) इति प्रतिषेधो भविष्यति, तस्मादपार्थक योगविभागकरणम्। `ज्ञापनार्थम्' इत्यादिनाऽपार्थकत्वं परिहरति। `यदुपाधेर्विभाषा तदुपाधेः' इति। उभयत्रापि बहुव्रीहिः। उपाधिः=विशेषणम्। स चैतदर्थं उपाधिर्विर्ज्ञेयः। यदि यदुपाधार्विभाषा तदस्योपाधेरपि प्रतिषेधः स्यात्, तदा योगविभागं न कुर्यात्। एकयोगेनापि भावादिकर्मणोर्विहिते विकल्पे ततोऽन्यत्र `यस्य विभाषा' (7.2.15) इति प्रतिषेधो लभ्यत एव, कृतश्च योगविभागः, तस्मादेतेन योगविभागकरणेन सूचितम्--यदुपाधेर्विभाषा तदुपाधेर्निषेध इति। `तेन' इत्यादिना ज्ञापकस्य प्रयोजनं दर्शयति। अत्र विदेर्लाभार्थस्य विभाषेति विशिना तौदादिकेन साहचर्याल्लाभार्थस्य तौदादीकस्य ग्रहणम्। `यस्य विभाषा' (7.2.15) इति च तस्यैव प्रतिषेधो भवति, नान्यस्य। यदि यदुपाधेर्विभाषा तदुपाधेर्निषेध इति ज्ञाप्यते, `जृव्रश्चोः क्त्विः' (7.2.55), `उदितो वा' (7.2.56) इति क्त्वाप्रत्यये भावविषये विभाषिते `यस्य विभाषा' (7.2.15) इति भावविषय एव निष्ठायामिट्प्रतिषेधः स्यात्, न कर्त्तृकर्मणोः? नैष दोषः; आश्रीयमाणो हि धर्मो भेदको भवति। न च क्त्वाप्रत्यये निष्ठायां वा भिन्नमभिधेयं निमित्तत्वेनाश्रितम्। तस्माद्भवत्येवात्र प्रतिषेधः। अत्र लिङ्गम्--`तेन निर्वृत्तम्' (4.2.68) इति निर्द्दशः।।

17. विभाषा भावादिकर्मणोः। (7.2.17)
`मिन्नमनेन' इति। `नपुंसके भावे क्तः' (3.3.114)। `मेदितम्' इति। `निष्ठा शीङ' (1.2.19) इत्यादिना कित्त्वप्रतिषेधे गुणः। `प्रमिन्नः' इति। प्रशब्द आदिकर्म द्योतयति। `आदिकर्म' इति। आदिभूतक्रियाक्षण इति। तस्मिन् भूतत्वेन विवक्षिते यः क्तः स पुनः `आदिकर्मणि क्तः कर्त्तरि च' (3.4.71) इत्यनेन कर्त्तरि कारके भवति। शक्तो घटः कर्त्तुम्, शकिको घटः कर्त्तुमित्यस्य सिद्धये विभावेति योगविभागोऽत्र कर्त्तव्यः। तत्र `आदितः' (7.2.16) इति नानुवरत्तनीयम्। `भावादिकर्मणोः' इत्यत्र द्वितीये योगेऽनुवर्त्तमीयमेव।।

18. क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमः सक्ताविस्पष्टस्वरानायासभृशेषु। (7.2.18)
`क्षुब्धः' इति। `क्षुभ सञ्चलने' (धा.पा.1239) इत्यस्येडभावो निपात्यते। `मन्थाभिधानं चेत्' इति। समुदायेन चेन्मन्थोऽभिधीयते। मन्थ इति द्रवद्रव्यसम्पृक्ताः सक्तव उच्यन्ते। `क्षुग्धो मन्थः' इति। चलितो मन्थ इत्यर्थः। `क्षुभितं मन्तेन' इति। नात्र मन्थोऽभीधीयते, किं तर्हि? तत्साधनं चलनम्। अथ मन्थाभिधाने क्षुब्धशब्दो निपात्यते, क्षुब्धा गिरिनटी, क्षुब्धा सेना, क्षुब्धः समुद्रः--इत्यादि। नोपपद्यते? इत्यत आह--`क्षुब्धा गिरिनदी' इत्तयादि।

चलितमन्थसाधर्म्याद्गिरिनद्यादिषु तथा व्यवपेश इति दर्शयति। यथा क्षुब्धत्वं मन्थस्य चलनं प्रति साधनभावः, तथा गिरिनद्यादेरर्थस्य चलनं प्रति साधनभावः क्षुब्धमन्थसाधर्म्यात् क्षुब्धशब्देन व्यपदिश्यते, यथा गोसाधर्म्याद्गोशब्देन वाहीक उच्यते।
`स्वान्तम्, ध्वान्तम्' इति। `स्वन ध्वन शब्दे' (धा.पा.827,828)। इडभावो निपात्यते। एवमुत्तरेष्वप्युदाहरणेषु वेदितव्यम्। बाह्येषु विषयेष्वविक्षिप्तमनाकुलं मनः=स्वान्तमुच्यते। `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इति दीर्घः। `स्वनितं मनसा' इति। मनः कर्तृकं स्वननमुच्यते, न तु मनः। `ध्वनितं तमसा' इति। अत्रापि तमःकर्तृकं ध्वननमुच्यते, न तमः।
`लग्नः' इति। `रगे लगे सङ्गे' (धा.पा.785,786)[`रगे शङ्कायाम्'--धा.पा.] निष्ठानत्वं निपात्यते। `स्वरश्चेत्' इति। स्वरशपब्दोऽत्र ध्वनौ वर्त्तते।
`फाष्टम्' इति। `फण गतौ' (धा.पा.821)। पूर्ववद्दीर्घः ष्टुत्वञ्च। कः पुनरयमनायासो नाम? इत्याह--`यदश्रृतम्' इत्यादि। अश्रृतमित्यपक्वम्। अपिष्टमित्यचूर्णितम्। उदकसम्पर्कः उदकसंयोगः। मात्रशब्देन निष्पीडनादेर्व्यवच्छेदः। `विभक्तरसम्' इति। पृथग्भूतरसमित्यर्थः। ईषदुष्णं कोष्णम्।
`तदल्पप्रयत्नसाध्यत्वादनायासेन लक्ष्यते' इति। आयासः प्रयत्नाधिक्यम्, तद्यस्मिन्न विद्यते सोऽल्पप्रयत्नासाध्योऽनायासः। तेनेह यदशृतत्वादिविशिष्टं वस्तु तदल्पप्रयत्नासाध्यत्वादनायासेन लक्ष्यते। तदनेनानायासोपलक्षतो यो वस्तुविशेषस्तत्र फाष्टमिति निपात्यते, न त्वनायास एव। नान्यत्रापि सर्वत्रानायसोपलक्षित इति दर्शयति। अयं चार्थो निपातनसामर्थ्याल्लभ्यते। यथैव ह्यन्यत् किञ्चिदिडभावादिकं निपतनसामर्थ्याल्लभ्यते तथाऽर्थविशेषेऽपि।
`बाढम्' इति। अत्र पूर्वदद् ढत्वादिकार्यम्।।

19. घृषिशसी वेयात्ये। (7.2.19)
`वियातस्य भावो वैयात्यम्' इति। यातम्=यातिः, प्राप्तिः विरूपं यातं यस्यासन्मार्गविषयत्वात् स वियातः=अविनीत इत्युच्यते; तद्भावो वैयात्यम्। ब्राह्मणादित्वात् (5.1.124) ष्यञ्। `षुष्टः' इति। `ञि धृषा प्रगल्भ्ये' (धा.पा.1269)। `विश्तः' इति। `शसु हिंसायाम्' (धा.पा.727), शसेरपि `उदतो वा' (7.2.56) इति विकल्पविधानात् `यस्य विभाषा' (7.2.15) इतीट्प्रतिषेधः सिद्ध एवेति सम्बध्यते। यदि तर्हि सिद्ध एव प्रतिषेधः तत् किमर्थं वचनम्? इत्याह--`नियमार्थम्' इत्यादि। वैयात्य एव वर्त्तमानोर्यथा स्यात्, अन्यत्र मा भूत्। अथ धृषेः `विभाषा भादिवादिकर्मणोः' (7.2.17) इति विकल्पे प्राप्ते नित्यार्थ वचनमिति कस्मान्न भवति? इत्याह--`भावादिकर्णणोरप , इत्यादि। अत्र चाभित्रानशक्तिस्वाभाव्यं हेतः। `धार्षितः' इति। `धर्षितः इति। पूर्ववत् कित्त्वे प्रतिषिद्दे गूणः।।

20. दृढः स्थूलबलयोः। (7.2.20)
`बलवति' इति मतुबन्तनिर्द्देशेनार्शआदित्वात् सूत्रे मत्वर्थीयाकारान्तो बलशब्दो निर्द्दिष्ट इति दर्शयति। `दृंहेः' इति। `दृहि वृद्धौ' (धा.पा.834) इत्यस्य। `अथ वा-- दृहिः प्रकृत्यन्तरमस्ति' इति। `दृह दृहि दृद्धौ' (धा.पा.733,734), इति कैश्चित् पाठात्। `नकारस्याभावात्' इति।
नकारस्योपदेशाभावादनिदित्त्वाच्च नकारस्योपदेशाभावादनिदित्त्वाच्च नकारस्याभावादिति।
अथ हकारलोपः किमर्थं निपात्यते? नाढकार एव निपात्यताम्, परस्य च धत्वे ष्टुत्वे कृते, ढो ढे लोपे च कृते सिद्धं दृढ इति। अत्राप्ययमर्थः--परस्य ढत्वं निपातयितव्यं न भवति, ष्टुनैव सिद्धत्वात्? इत्यत आह--`हलोपनिपातनम्' इत्यादि। यदि हकारस्य ढकारो निपात्यते तदा `ढो ढे लोपः' (8.3.13), तस्य `पूर्वत्रासिद्धम्' (8.2.1) इत्यसिद्धत्वं स्यात्, सिद्धश्चासाविष्यते। तस्मात् पूर्वत्रासिद्धत्वनिवृत्तये हलोपो निपात्यते, न ढकार इति। कः पुनरसिद्धत्वे दोषो यत्परिहाराय पूर्वत्रासिद्धत्वनिवृत्त्यर्थं हकारलोपो निपात्यते, न ढकारः? इत्यत आह--`ढलोपे' इत्यादि। यदि हि ढकारो निपात्यते, तदा `ढो ढे लोपः' (8.3.13) कर्त्तव्यः, तस्मिंस्तु सति लोपे द्रढिमेत्यादौ `र ऋतो हलादेर्लघोः' (6.4.161) इति रोफो न स्यात्; ढलोपस्यासिद्धत्वे `संयोगे गुरु' (1.4.11) इति गुरुसंज्ञायामुपजातायां लघुसंज्ञाया बाधितत्वात्। `द्रढिमा' इति। `वर्णद्ढादिभ्यः ष्यञ्च' (5.1.123) इतीमनिच्, `तुरिष्ठेयाःसु' (6.4.154) इति टिलोपः। `द्रढीयान्' इति। `द्विवचनविभज्योपपरदे तरबीयसुनौ' (5.3.57) इतीयसुन्प्रत्ययः। `द्रढयति' इति। द्रढमाचष्ट इति `तत्करोति तदाचष्टे' (धा.पा.ग.सू.187) इति णिच्, `णाविष्ठवत् कार्यं प्रातिपदिकस्य' (दा.813) इतीष्ठवद्भावेन रेफटिलोपौ। `परिद्रढय्य गतः' इति। दृढमाचष्टे इति णिच्। रभावे कृते ण्यन्तस्य परिणा योगः, ततः क्त्वा, प्रादिसमासः, `समासेऽनञ्पूर्वे क्त्वो ल्यप्' (7.1.37) इति ल्यप्। `पारिद्रढी कन्या' इति। परिद्रढशब्दादिञ्, `इतो मनुष्यजातेः' (4.1.65) इति ङीष्। `ष्यङ् प्रसज्येत' इति। `अणिञोरनार्षयोर्गुरूपोत्तमयोः' (4.1.78) इत्यादिना।
`दृंहितम्' इति। दृंहेः प्रत्युदाहरणम्। `दृहितम्' इति दृहेः।।

21. प्रभौ परिवृढः। (7.2.21)
`पूर्वेण समानम्' इति। निपातनस्येडभावादेस्तुल्यत्वात्। यथैव हि पूर्वस्मिन् सूत्रे क्तप्रत्यये कृते हकारनकारस्योर्लोप इडभावश्च परस्य ढत्वं निपातितम्, तथेहापि तत्सर्व निपात्यते। `वृंहेर्निपातनम्' इति। `वृहि वृद्धौ' [`बृहि'--धा.पा.] (धा.पा.736) इत्यस्य। `वृहिश्च यदि प्रकृत्यन्तरमस्ति ततस्तस्यापि' इति। निपातनमेतदिति कृतेन सम्बन्धः। प्रकृत्यन्तरास्तित्वं तु `वृह वृद्धौ'[`बृह'--धा.पा.] (धा.पा.735) इति कैश्चिदुक्तम्। `तदेव प्रयोजनम्' इति। पूर्वत्रासिद्धत्वनिवृत्तिः। `परिव्रझयति' इति। अत्र ढलोपे सति पूर्ववद्रेफो न स्यात्। `परिव्रढय्य गतः' इति। हलोपनिपातने तु भवन्त्येते दोषाः।

`परिव्रढमाचष्टे' इत्यादि। कथं पुनः परिवृढशब्देन विग्रहे कृते णिचो वृ शब्दादेवोत्पततिर्लभ्यते? इत्याह--`संग्रामयतेः' इत्यादि। `प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (धा.पा.ग.सू.186) इत्यनेनैव णिचि सिद्धे `संग्रामे' इत्यस्य सोपसर्गस्य गणे यः पाठः स नियमार्थः--संग्रामयतेरेव सोपसर्गाण्णिजुत्पत्तिर्यथा स्यात्, अन्यत्र मा भूदिति। तदेवं संग्रामयतेरेव यस्मात् सोपसर्गाण्णिजुत्पत्तिरिष्यते, नान्यस्मात्। तस्माद् यद्यपि `परिवृढमाचष्टे' इति विग्रहः क्रियते, तथापि वृढशब्दाण्णिजुत्पत्तौ सत्यां लकारो भवन्नयं णिज् यतो विहितस्तदादेरेव भवति प्रत्ययग्रहणपरिभाषया; `सनाद्यन्ता धातवः' (3.1.32) इति तदादेरेव धातुसंज्ञाविधानात्। तेन परेस्तिङन्तग्रहणेनाग्रहणात् ततोऽतङन्तात् पदात् परस्य तिङन्तस्य पदस्य परिव्रढयतीत्यत्र `तिङ्ङतिङः' (8.1.28) इति निघातस्वरः सिद्धो भवति। यदि पुनः परिवृढशब्दाण्णिजत्पद्यते तदा लकारोऽपि निघातो न स्यात्। किञ्च--यदा वृढशब्दाण्णिजुत्पद्यते न परिवृढशब्दात्, तदा क्त्वाप्रत्ययोऽपि वृढशब्दाण्णिजन्ताद्भवति। तेन परिशब्दस्य क्तान्तेन सम्रथेन शब्दान्तरेण `कुगतिप्रादयः' (2.2.18) इति समासे कृते परिव्रढय्येत्यत्र ल्यबादेशः सिद्धो भवति। परिवृढशब्दाण्णिजुत्पत्तौ क्त्वाप्रत्ययोऽपि परिवृढशब्दादेव णिजन्तादुत्पद्यते, ततः समासो न स्यात्; कुगतिप्रादयः समर्थेन शब्दान्तरेण समस्यन्ते, न चात्र परेः परं क्तान्तं शब्दान्तरमस्ति। एकमेव हीदं क्तान्तं परिणा सह शब्दरूपम्; तत्रैव परिशब्दस्यान्तर्भावात्। असति च समासे `समासेऽनञ्पूर्वे' (7.3.17) इत्यादिना ल्यबादेशो न स्यात्। `परिवृंहितम्' इति। वृंहेः प्रत्युदाहरणम्। `परिवृहितम्' इति। वृहेः।।

22. कृच्छ्रगहनयोः कषः। (7.2.22)
`कष्टः' इति। कषिशिषीत्यादिहिंसार्थधातुवर्गे कषिः पठ्यते। किं पुनः कृच्छ्रं नाम? इत्याह--`कृच्छ्रं दुःखम्' इति। यद्येवम्, दुःखे प्राणिधर्मे प्रतिषेध उच्यमानोऽग्न्यादौ न सिध्यते? इत्याह--`तत्कारणमप्यग्न्यादिकं कृच्छ्रमुच्यते' इति। कारणे कार्योपचारात्, यथा--नड्वलोदकं पादरोग इति। चिन्त्यं पुनरेतत् किं मुख्ये सति गौणस्य ग्रहणं युक्तम्? उत नेति? यदि तु कृच्छ्रशब्दाण्णिजन्तात् पचाद्यचमुत्वाद्य कृच्छ्रयतीति कृच्छ्र इत्येवं व्युत्पाद्यते, तदा कृच्छ्रशब्दोऽपि मुख्येऽगन्यादावपीति न किञ्चिच्चिन्त्यम्; न चास्यां व्युत्पत्तौ तत्कारणमप्यगन्यादिकं कृच्छ्रमित्युच्यत इत्येतद्विरुध्यते। यद्धि कृच्छ्रयति तन्नियोगत एव दुःखस्य कारणं भवति।।

23. घुषिरविशब्दने। (7.2.23)
`विशब्दनं प्रतिज्ञानम्' इति। स्वाभिप्रायस्य शब्देनाविष्करणमित्यर्थः। `सामान्येन ग्रहणम्' इति। विशेषानुपादानात्। यदि `घुषिरविशब्दने' (धा.पा.1726) [`घुषिर् विशब्देने--धा.पा.]इति चुरादौ पठ्यते एवं सति णिचा भवितव्यम्, न च णिजन्तस्येटि सत्यसति वा कश्चिद्विशेषोऽस्ति। तथा हि--इटि सति `निष्ठायां सेटि' (6.4.52) इति णिलोपे कृते घोषितमिति यद्रूपं भवत्यसत्यपीटि णिलोपाभावात् तदेव। न च तदन्ताविट्प्रतिषेधस्य प्राप्तिरस्ति; `एकाचः' (7.2.10) इत्यधिकारात्। भौवादिकस्य (धा.पा.653) [`घुषिर् अविश्बदेन'--धा.पा.] घुषेर्विशब्दने वृत्तिरेव नास्ति; शब्दशक्तिस्वाभाव्यात्; तत्किं विशब्दनप्रतिषेधेन? इत्यत आह--`विशब्दनप्रतिषेधः' इत्यादि। यदि च नित्यो णिच् स्यात्, तदा यथोक्तया रीत्या प्रतिषेधोऽनर्थकः स्यात्, ततश्च न कर्त्तव्य एव स्यात्, कृतश्च, तस्मादयमेव प्रतिषेधो ज्ञापयित--चुरादिणिज्विशब्दनार्थस्यानित्य इति। `जुघुषुः' इति। अनित्यप्रतिज्ञाप्रयोजनम्। असति ह्यनित्यत्वे घोषयाञ्चक्रुरिति स्यात्।।

24. अर्देः सन्निविभ्यः। (7.2.24)
`अर्देः' इति। `अर्द गतौ याचने च' (धा.पा.55)।।

25. अभेश्चाविदूर्ये। (7.2.25)
`विदूरं विप्रकृष्टम्' इति। विशेषेणातिशयेन दूरं विदूरमिति कृत्वा, ततोऽन्यदविदूरम्। तत् पुनर्यदासन्नं यच्चादूरं न त्वतिविप्रकृष्टं तदिति वेदितव्यम्। `तस्य भाव आदिदूर्यम्' इति। ब्राह्मणादित्वात् (5.1.124) ष्यञ्। ननु च `न नञ्पूर्वात् तत्पुरुषात्' (5.1.121) इत्युत्तरस्य भावप्रत्ययस्य प्रतिषिद्धत्वात् ष्यञा न भवितव्यम्? इत्यत आह--`एतस्मादेव' इत्यादि। उत्तरत्वं तु भावप्रत्ययस्य त्वतलापेक्षया वेदितव्यम्।।

26. णेरध्यायने वृत्तम्। (7.2.26)
`अध्ययनम्' इति। `कृत्यल्युटो बहूलम्' (3.3.113) इति ल्युट्। अधीयत इत्यध्ययनम्--कर्मसाधनोऽध्ययनशब्दः। भावसाधने हि वृत्तो गुणो देवदत्तेनेति न स्यात्, वृत्तं गुणस्य देवदत्तेनेति स्यात्। निष्ठाविशेषणञ्चैतत्। अध्येतव्याभिधायिन्यां निष्ठायामित्यर्थः। `णिलुक् च' इति। णिलुग्निपातनं प्रत्ययलक्षण प्रतिषेधार्थम्। लोपे हि प्रतययलक्षणेन गुणः स्यात्। लुकि सति `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणप्रतिषेधाद्गुणो न स्यात्। `वृत्तो गुणः' इति। गुणः कश्चिदेवाध्ययनविशेष इहोच्यते।
`वृत्तिरयमकर्मकः' इति। दृतं गुणस्य, वृत्तं पारायणस्येति भावे निष्ठादर्शनात्। अकर्मकाणां हि भावे निष्ठा भवति, न सकर्मकाणाम्। `स ण्यर्थे' इत्यादि। सोऽन्तर्भावितण्यर्थो यदा भवति तदा प्रकृत्यन्तो ण्यर्थे वर्त्तमानः सकर्मको भवति, यथा--वर्द्धन्तु त्वां सुष्टुतय इत्यत्र वृधिः। कथमेतद्विज्ञायते? इत्याह--`तेन

निर्वृत्तम्' इत्यादि। न चैतद्वक्तव्यम्--अकर्मका इति। `धातवः सोपसर्गाः सकर्मका भवन्ति' इति सोपसर्गत्वादिह वृत्तेः सकर्मकत्वम्। न तु ण्यर्थवृत्तित्वादिति कृतो ण्यर्थावगतिः? यदि सोपसर्गात्वादिह वृत्तेः सकर्मकत्वं स्यान्न ण्यर्थवृत्तित्वात्, ततो यथानुभूतः क्मबलो देवदत्तदेनेत्यत्र ण्यर्थो न गम्यते, तथा तेन निर्वृत्तः इत्यत्रापि न गम्येत; गम्यते च, तस्माण्णयर्थवृत्तित्वादेव वृत्तेः सकर्मकत्वम्। यदा च ण्यर्थवृत्तर्भवति तदा प्रयोजकव्यापारापेक्षयाऽस्य कर्त्ता कर्मभावभापद्यत इति। तेन प्रयोज्येन कर्मणा सकर्मको भवति। `तद्वदिहापि' इत्यादि। यस्मादेवाकर्मकोऽपि स न प्रकृत्यन्त एव ण्यर्थे वर्त्तमानः सकर्मको भवति तस्माद्वृत्तो गुणो देवदत्तेनेत्यत्रापि ण्यर्थवृत्तेरेव कर्मणि क्तप्रत्ययो भविष्यति। ततश्च निपातनमनर्थकं स्यात्। विनाऽपि तेन सिद्धत्वात्। कथमिति चेत्? वृत्तेः क्वाप्रत्यये `उदितो वा' (7.2.56) इतीङ्विकल्पे कृते निष्ठायाम्, `यस्य विभाषा' (7.2.15) इति प्रतिषेधात्। यद्येवम्, किमर्थं तदित्याह--`तत् क्रियते' इत्यादि। कदाचिण्ण्यर्थोऽन्तर्भावितण्यर्थतया प्रकृत्यैवाभिधीयते, तत्र यदि निपातनं न क्रियेत, तदाध्ययनेऽपि वर्त्तितमिति स्यात्। तस्मादेतन्निवृत्त्यर्थं तदित्येके प्रतिपन्नः। `अपरे तु' इत्यादि। अन्ये तु वत्तितो गुण इत्यपीच्छन्ति। ण्यन्तस्याण्यन्तस्य च--वृत्तो गुण इति। तन्मतेन निपातनं न कर्त्तव्यमेव। क्रियमाणं वैचित्र्यार्थं वेदितव्यम्।।

27. वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः। (7.2.27)

`दान्तः, शान्तः' इति। `शमु दमु उपशमे' (धा.पा.1201,1203)। हेतुमण्णिच्, णिलुगिट्प्रतिषेधयोः कृतयोः `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इति दीर्घः। ननु च णिलोपस्य स्थानिवद्भावाद्व्यवधाने सति न प्राप्नोति? नैतदस्ति; न हि निपातनेन लोपे सति तस्य परनिमित्तत्वव्यपदेशो विद्यते, तत् कुतः स्थानिवद्भावः! `न पदान्त' (1.1.58) इत्यादिना दीर्घविधौ स्थानिवद्भावप्रतिषेधाच्च। `दमितः, शमितः' इति। `मितां ह्रस्वः' (6.4.92) इति ह्रस्वत्वम्। `पूर्णः' इति। `पूरी आप्यायने' (धा.पा.1803)। दिवादिश्चुरादिश्च। `दस्तः' इति। `तसु उत्क्षेपे' (धा.पा.1212) [`उपक्षये'--धा.पा.] `दसु च' (धा.पा.1213)। अत्रोपधा ह्रस्वत्वमपि निपात्यते। `स्पष्टश्छन्नः' इति। `स्पश बाधनस्पर्शनयोः (धा.पा.887), `छद अपवारणे' (धा.पा. 1935)। अत्रापयुपधाह्रस्वत्वमपि निपात्यते। ज्ञप्त इति। `ज्ञप मारणतोषणनिशामनेषु' (धा.पा.1624)[`ज्ञानज्ञापनमारणतोषणनिशाननिशामनेषु--धा.पा.] इति चुरादिः, `मारणतोषणनिशामनेषु ज्ञा मिच्च' (धा.पा.811) इति घटादिश्च, ततो णिच्। `इट्प्रतिषेधो णिलुक्च' इति। चकारात् क्वचिदुपधाह्रस्वत्वमपि निपात्यते।।

28. रुष्यमत्वरसंघुषास्वनाम्। (7.2.28)

`रुष रोषे' (धा.पा.1670), `अम गत्यादिषु' (धा.पा.465)। `अम रोगे' (धा.पा.1720) इत्येतस्य चौरादिकस्य ग्रहणं न भविष्यति; एकाच (7.2.10) इत्यधिकारात्। `ञि त्वरा सम्भ्रमे' (धा.पा.775) सम्पूर्वः। पूर्वोक्तो धुषिः। आङ्पूर्वः पूर्वोक्त एव स्वनिः। `आस्वान्तः' इति। पूर्ववद्दीर्घः। `तूर्णः' इति। `ज्वरत्वरस्रिव्यविमवामुपधायाः' (6.4.20) इत्यूठ्। `सम्पूर्व' इत्यादि। `घुषिर् अविशब्देने' (धा.पा.653) इत्यस्यावकाशोऽसम्पूर्वत्वे सत्यविशब्देन--घुष्टा रज्जुः, धुष्टौ पादाविति। अस्य च वचनस्यावकाशः सम्पूर्वत्वे सति विशब्दने--संघुषितं वाक्यमाह, संघुष्टं वाक्यमाहेति; सम्पूर्वत्वे सत्यविशब्दन उभयप्राप्तौ परत्वादनेन विक्लपो भवति--संघुष्टौ दन्तौ, संघुषितौ दन्ताविति। `आङ्पूर्वस्य' इत्यादि। `क्षुब्धस्वान्त' (7.2.18) इति स्वनरिट्प्रतिषेधस्यावकाशः। अनाङ्पूर्वत्वे सति मनोऽभिधाने स्वान्तं मन इत्यस्यावकाशः, आङ्पूर्वत्वे सतयमनोऽभिधानम्। `आस्वन्तो देवदत्तः, आस्वनितो देवदत्तः' इति। आङ्पूर्वत्वे सति मनोऽभिधाने स्वान्तं मन इत्यस्यावकाशः, आङ्पूर्वत्वे सत्यमनोऽभिधानम्। `आस्वन्तो देवदत्तः, आस्वनितो देवदत्तः' इति। आङ्पूर्वत्वे सति मोनऽभिधाने परत्वादयमेव विकलपो भवति--आस्वान्तं मनः, आस्वनितं मनः।।

29. ह्रषेर्लोमसु। (7.2.29)

`ह्रष्टानि लोमानि' इति। गत्यर्थामकर्मकादिना (3.4.72) अकर्मकत्वात् कर्त्तरि क्तः। `ह्रष्टं लोमभिः' इति। `नपुंसके भावे क्तः' (3.3.114) इति क्तः। निष्ठायामनिट्' इति। `उदितो वा' (7.2.56) इति क्त्वाप्रत्यय इटि विकल्पिते निष्ठायां `यस्य विभाषा' (7.2.15) इति प्रतिषेधात्। `अयं सेट्' इति। उदात्तत्वादिट्प्रतिषेधाभावात्। `उभयत्रविभाषेयम्' इति। प्राप्ते चाप्राप्ते च। आलीक्यार्थस्य प्रतिषेधे प्राप्ते विकल्पः, तुष्ट्यर्थस्य चाप्राप्ते; लोमशब्दस्याङ्गजतेष्वेव रूढत्वात्।

लोमस्वित्युच्यमानेङ्गजेष्वेव न केशेषु भवितव्यमिति कस्याचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्त्तुमाह--`लोमानि' इत्यादि। कथम्? इत्याह--`यथा लोमनखम्' इत्यादि। अत्र हि सामान्येन ग्रहणं तेषाम्। तथा हि--केशानपि स्पृष्ट्वा शौचं क्रियत इति। कथं पुनः क्रियावचनसय धातोर्द्रव्येषु लोमसु वृत्तिरुपपद्यते? इत्याह--`तद्विषये' इत्यादि। तानि लोमानि विषयो यस्य स तथोक्तः। ह्रषेर्योऽर्थः स लोमत्साध्यत्वाल्लोमविषयः। तत्र वर्त्तमानो ह्रषिरप्यर्थद्वारेण लोमसु वर्त्तते इत्युच्यते। तदेवमर्थद्वारेण लोम्नां ह्रषिं प्रति विशेषणत्वं दर्शितं भवति।

`विस्मितप्रतिधातयोश्च' इति। निपातनमिति। विस्मिप्रतिधातयोर्निष्ठायामिण् न भनत्येवमर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--ह्रषेरिति योगविभागः क्रियते, ततो विस्मितप्रतिधातयोरपि भविष्यतीति। अथ वा--बहुवचननिर्देशोऽत्र क्रियते, आद्यर्थोऽयं विज्ञायते लोमादिषु लोमस्विति तेन विस्मतप्रतिधातयोरपि भविष्यति।।

30. अपचितश्च। (7.2.30)
`चायतेः' इति। चायृ पूजानिशामनयोः' (धा.पा.880) इति। अयं योगो यश्चिनोतेरपूर्वसय पूजायां वृत्तिं न प्रतिपद्यते तं प्रत्यारभ्यते। यस्तु प्रतिपद्यते तं प्रति नारब्धब्ध एव। तथा हि--चिनोतेरपचित इति भविष्यतीति, चायतेस्त्ववचायित इति।
`वक्तव्यम्' इति। व्याख्येयमित्यर्थः। तेत्रेदं व्याख्यानम्--चकारोऽत्र क्रियते। स चानुक्तसमुच्चयार्थः। तेनापचितिरित्येतदपि निपात्यत इति। एतच्च निपातयता चायतेः क्तिनि नित्यं चिभावो वक्तव्यः।।

31. ह्रू ह्वरेश्छन्दसि। (7.2.31)
`ह्वृ कौटिल्ये' (धा.पा.931) इत्येतस्यानुदात्तत्वादिट्प्रतिषेधोऽस्त्येवेत्यादेशार्थ वचनम्।।

32. अपरिह्रूवृताश्च। (7.2.32)
"ह्रु' इत्येतस्यादेशस्याभावो निपात्यते' इति। पूर्वसूत्रेण प्राप्तस्य। बहुवचननिर्देशो बहवचन एव निपातनं यथा स्यात्। तेन क्वनान्तरे हि अपरिह्रुतः, अपरिह्रु, अपरिह्रुतावित्येव भवति।।

33. सोमे ह्वरित। (7.2.33)
`इडागमो गुणश्च निपात्यते' इति। चकारात् `ह्रु' इत्येतस्यादेशाभावश्च।।

34. ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्वलितिक्षरितिक्षमितिवमित्यमितीति च। (7.2.34)
`ग्रसु स्कन्भु स्तन्भु इत्येतेषाम्' इत्यादि। `ग्रसु ग्लसु अदने' (धा.पा.630,631), `स्कन्भु', `स्तन्भु' (3.1.82) इत्येतौ सौत्रौ धातू;
`स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च' (3.1.82) इति सूत्रे पाठात्। `स्कभितम्, स्तभितम्' इति। `अनिदिताम्' (6.4.24) इत्यनुनासिकसलोपः।
`स्कब्धम्, स्तब्धम्' इति। `झषस्तथोर्धोऽधः' (8.2.40) इति धत्वम्, `झलां जश् झशि' (8.4.56) इति जश्त्वम्। `उत्तभितम्' इति। `उदः स्थास्तम्भोःत पूर्वस्य' (8.4.61) इति पूर्वसवर्णः। `अन्योपसर्गपूर्वः स्तभितशब्दो न भवतीति इति। यदि स्यात्, उत्पूर्वस्य निपातनमनर्थकं स्यात्।
`चतेः, कसेश्च' इति। `चते चदे याचने' (धा.पा.865,866), `कस गतौ' (धा.पा.860)। ननु सूत्रे विकस्तशब्दाद्बहुवचनं श्रूयते, ततश्च कथमसौ वृत्तादेकवचनान्त उदह्रतः? इत्यत आह--`निपातनं बहुत्वापेक्षम्। विकस्ता इति बहुवचनम्' इति। सूत्रे ग्रसितादीनि निपातनानि कृतद्वन्द्वानि, अतस्तदपेक्षया बहुवचनं कृतम्। वृत्तौ त्वसमस्त एक एवायं विकस्तशब्दः। न चैतदर्थस्य बहुवचनं विवक्षिम्, अत एकवचनान्त एवोदाह्रतः। `अपरेषु' इति। विशस्तृप्रभृतिषु।
`प्रत्येकं विभक्तिनिर्देशः' इति। बहुत्वाभावाद्बहुवचनम्, तेन तत्र न कृतमित्यभिप्रायः।
शसेर्विपूर्वस्य शंसेः शासेश्चेति। `शसु हिसायाम्' (धा.पा.727), `शन्सु स्तुतौ' (धा.पा.728) `शासु अनुशिष्टौ' (धा.पा.1075)।
`तरीतारम् वरीतारम्' इति। `वृतो वा' (7.2.38) इति दीर्घः। `वरूत्रीः' इति। `ऋन्नेभ्यो ङीप्' (4.2.5) इति ङीप्, तदन्ताज्जस्, `वा छन्दसि' (6.1.106) इति पूर्वसवर्णदीर्घः। जसि पूर्वसवर्णोच्चारणम्' इत्यादि। ननु यणादेशे कृते वरूत्र्य इति भवितव्यम्, कथं `वरूत्रयः' इति भवति? इत्याह--
`छान्दसम्' इत्यादि। छान्दसत्वेन हि ह्रस्वत्वे कृते `जसि च' (7.3.109) इति यणादेशापवदो गुणो विधीयते। `प्रपञ्चार्थम्' इति।
विस्तरेणान्वाख्यानमित्यर्थः। तथा हि `पचिर्विस्तारवचने' (धा.पा.1651) इति तस्यैवाजन्तस्य प्रपञ्च इति भवति। प्रपञ्चस्तु विस्पष्टार्थः। विस्तरेण ह्यन्वाख्यानं स्पष्टं भवति। अथ वरूत्रीशब्दस्य सिध्यर्थ निपातनं कस्मान्न भवति? इत्याह--`वखृतृशब्दो हि' इत्यादि।
ज्वलतेरिति `ज्वल दीप्तौ' (धा.पा.831), `क्षर सञ्चलने' (धा.पा.851), `टु वम उद्गिरणे' (धा.पा.849) `अम गत्यादिषु (धा.पा.465)। `इतिकरणं प्रदर्शनार्थम्' इति एवम्प्रकारस्याम्यस्यापि प्रदर्शनार्थमितिकरणम्। तेन किं सिद्धं भवति? इत्याह--`तेन क्वचित्' इत्यादि। चकारस्श्छन्दसीत्यनुकर्षणार्थः। तेन चानुकृष्टत्वान्नोत्तरत्राभिसम्बध्यते। तेनोत्तरत्र विधानमविशेषेण भवति।।

35. आर्घधातुकस्येड्वलादेः। (7.2.35)
`आस्ते, शेते, वस्ते' इति। `आस उपवेशने' (धा.पा.1021), `शीङ् स्वप्ने' (धा.पा.1032), `दस आच्छादने' (धा.पा.1023)। अदादित्वाच्छपो लुक्,
`शीङः सार्वधातुके गुणः' (7.4.21)। आर्धधातुकग्रहणादिह--सार्वधातुकस्येण्न भवतीति। ननु च `रुदादिभ्यः सार्वधातुके' (7.2.76) इत्येतन्नियमार्थ विज्ञायते--`रुदादिभ्य एव सार्वधातुकस्य नान्येभ्य' इति। `रुदादिभ्यः सार्वधातुकस्यैव' इत्येषा तु विपरीतनियमाशङ्का न कर्त्तव्या। यदि ह्येवंविधो नियमः स्यात्, तदा रुदादेः परस्य सन इडागमो न स्यात्; नियमेन व्यावर्त्तितत्वात्। ततश्च `रुदविद' (1.2.8) इत्यत्र रुदिग्रहणमनर्थकं स्यात्; `हलन्ताच्च' (1.2.10) इति कित्त्वस्य सिद्धत्वात्। तस्मान्नात्र विपरीतनियमाशङ्का। `रुदादिभ्य एव सार्वधातुकस्य, नान्येभ्यः' इत्येष नियमो भविष्यति, ततो नार्थः सार्वधातुकनिवृत्त्यर्थेनार्द्धधातुकग्रहणेन? इत्यत आह--`रुदादिभ्यः' इत्यादि। `रुदादिभ्यः सार्वधातुके' (7.2.76) इत्येतस्मिन्नियमार्थे विज्ञायमाने

कश्चिन्मन्दबुद्धिः प्रतिपत्ता विपरीतनियमं सम्भावयेत्, तत्रानन्तरोक्तया नीत्याऽभिमतनियमे प्रतिपद्यमाने `प्रतिपत्तिगौरवं भवति' इति। इतिकरणो हेतौ। यत एव `रुदादिभ्यः सार्वधातुके' (7.2.76) इत्येतस्मिन्नियमार्थे विज्ञायमाने प्रतिपत्तिगौरवं भवति, अतो हेतोरार्धधातुकग्रहणं कस्मान्न भवति? नार्हतीत्येवमर्थं भवितुम्। यदि ह्यङ्गस्य स्यात्, `एकाच उपदेशेऽनुदात्तात्' (7.2.10) इति प्रत्ययस्येट्प्रतिषेधोऽनर्थकः स्यात्; प्राप्त्यभावा। `न क्त्वा सेट्' (1.2.18), `निष्ठा शीङ्' (1.2.19) इति वचनाच्च। न ह्यस्येडागमे सति क्त्वानिष्ठयोः सेट्त्वमुपपद्यते। इह तर्हि वृक्षात्वम्, वृक्षतेति प्रातिपदिकप्रत्ययस्य मा भूदित्येवमर्थं कस्मान्न भवति? एवमर्थमपि नार्हति भवितुम्, `ॠत इद्धातोः' (7.1.100) इत्यतः `धातोः' इत्यनुवर्त्तते। नन्वेवमपि लूभ्याम्, लूभिरित्यत्र प्राप्नोतीत्येव, न ह्यत्र प्रकृतेः प्रतिपदिकत्वेन धातुत्वं विहन्यते `क्विबन्ता धातुत्वं न जहति' (व्या.प.132) इति कृत्वा, तस्मादिह मा भूदित्येवमर्थमार्धधातुकग्रहणं युक्तम्? नैतदस्ति; `ॠत इद्धातोः' (7.1.100) इत्यत्र हि स्वरूपपदात्मकस्य धातुशब्दस्य ग्रहणम्। अत इहापि `धातो' रित्यनुवर्त्तमानं तथाभूतमेवानुवर्त्तते। तेन `धातोः' इत्येवंविहितस्येड्विधानात् लूभ्याम्, लूभिरित्यत्रासत्यार्धधातुकग्रहण इटः प्रसङ्गो न भवति। तथा जुगुप्सत इत्येवमादावपि; न ह्यत्र धातोरित्येवं सन् विहितः, किं तर्हि? गुपादीन् धातून् स्वरूपेणोपादाय। तस्मादेतन्निवृत्त्यर्थमप्यार्धधातुकग्रहणं न भवतीति वेदितव्यम्। `ॠत इद्धातोः' (7.1.100) इत्यत्र स्वरूपपदात्मकस्य धातुशब्दस्य ग्रहणं स्यात्। तदा तस्यापि `ॠतः' इति विशेषणं न परिकल्प्येत। तस्य धातुशब्देऽसम्भवात् तदर्थस्य विशेषणं विज्ञायत इत्यदोषः।

अथ वा--तत्र तन्त्रेण द्वे धादुग्रहण उपात्ते; तत्रैकमर्थपदात्मकम्, अपरं स्वरूपपदात्मकम्। तत्र यदर्थपदात्मकं तत्र तस्योपयोगः, अपरस्य त्वत्रेति न कश्चिद्दोषः। तस्मात् प्रतिपत्तिगौरवपरीहारार्थमेवार्धधातुकग्रहणम्।

अथेड्ग्रहणं किमर्थम्, यावता `नेड्वशि कृति' (7.2.28) इत्यत इड्ग्रहणमनुवरत्तते? इत्याह--`इडिति वर्त्तमाने' इत्यादि। तद्धिड्ग्रहणं प्रतिषेधेन सम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्। तन्निवृत्यर्थ पुनरिड्ग्रहणं क्रियते। ननु च प्राप्तौ सत्यां प्रतिषेधः स्यात्, न च वलादेरार्धधातुकस्य केनचिदिट्प्राप्नोति, अतः प्राप्त्यभावादेव विधिरयं विज्ञास्यते, न प्रतिषेधः? नैतदस्ति; एतस्मादेव प्रतिषेधवचनाद्विधिरप्यनुमीयते। नूनमार्धधातुकस्येड्विधिरस्तीति येन वलादेः प्रतिषेधं शास्ति। पुनरिड्ग्रहणात् तु विधिरेष विज्ञास्यते।।

36. स्नुकरमोरनात्मनेपदनिमित्ते। (7.2.36)

`स्नु प्रस्रवणे' [`ष्णु'--धा.पा.] (धा.पा.1038), `क्रमु पादविक्षेपे' (धा.पा.473)--अनयोरुदात्तत्वादिदिट सिद्धे नियमार्थं वचनम्--अनात्मनेपदविषय एवानयोर्यथा स्यात्, अन्यत्रा मा भूदिति। ननु च स्नोतेरुगन्तत्त्वात् किति सनि च प्रतिषेधविधानात् तस्य वचनं विद्यर्थमपि सम्भवति? नैतदस्ति; `आर्धधातुकस्येड्वलादेः' (7.2.35) इत्यनुवर्त्तते। तेनास्याः प्राप्तेर्विषये योगोऽयमिति विज्ञायते। न चास्याः प्राप्तेः सन्कितौ विषयौ; तयोरपवादविषयत्वात्। आत्मनेपदनिमित्ते इति प्रथमाद्विवचनान्तम्। स्नुक्रमोरेतद्विशेषणमिति दर्शयितुमाह--`न चेत्' इत्यादि। `क्व च तावात्मनेपदनिमित्ते' इति। किं यत्रात्मनेपदं प्रति योग्यतामात्रमपि तयोरस्ति तत्रापि तावात्मनेपदनिमित्ते? उत यत्र तदाश्रयमात्मनेपदं भवति तत्र? एवमर्थ पृच्छति--`यत्र' इत्यादि। अत्रैवं व्याख्यानम्--यत्र तदाश्रयमात्मनेपदं सम्भवति तत्र तावात्मनेपदनिमित्ते। किं पुनस्तद् यत्र तदाश्रयमात्मनेपदं भवति? इत्याह--`भावकर्मकर्त्तृकर्मकर्मव्यतीहारः, क्रमेश्च' इति। एषु हि स्तुक्रम्याश्रयमात्मनेपदं भवति। आदिशब्देन सर्गादिपरिग्रहः। निमित्तम्=कारणम्। न चाकुर्वत् कार्यं कारणं भवति। यत्र त्वकुर्वत्यपि कार्यं कुसूलस्य बीजादौ कारणमपि व्यपदेशः, तत्रासौ योग्यतयौपचारिकः। तस्माद्यत्र स्नुक्रमावाश्रित्यात्मनेपदं भवति, तत्रैव भावकर्मादौ तयोरात्मनेपदनिमित्तं मुख्यं विज्ञायते। `तेन' इत्यादि। यस्मादेवं यत्र तावाश्रित्यात्मनेपदं भवति तत्र तयोरात्मनेपदनिमित्तत्वम्। तेन सत्यात्मनेपदे प्रतिषेधोऽयं भवति, नासति। न ह्यसत्यात्मनेपदे तयोर्मुख्यमात्मनेपदनिमित्तत्वमुपपद्यते। ततश्च प्रस्नविता, प्रस्नवितुम्, प्रस्नवितव्यम्, प्रक्रमिता, प्रक्रमितुम्, प्रक्रमितव्यमित्यत्र यद्यप्यात्मनेपदयोग्यत्वात् स्नुक्रमावात्मनेपदस्य निमित्तव्यपदेशमासादयतः, तथापि प्रतिषेधो न भवति। न ह्यत्र मुख्यमात्मनेपदनिमित्तत्वम्; आत्मनेपदाभावात्।

`प्राप्नोषीष्टेति। आशिषि लिङ् सीयुट्, `भावकर्मणोः' (1.3.13) इत्यात्मनपदम्, `सुट्तिथोः' (3.4.107) इति सुट्, षत्वम्, ष्टुत्वम्। `प्रक्रंसीष्ट' इति। अत्र `प्रोपाभ्यां समर्थाभ्याम' (1.3.42) इति कर्त्तर्थात्मनेपदम्। `प्रस्नोष्यते' इति। `लृट् शेषे च' (3.3.13) इति लृट्। `प्रचिक्रंसते' [नास्तीदमुदाहरणं काशिकायाम्। `प्रचिक्रंसिष्यते' इत्येवास्ति] इति। सन्, `पूर्ववत्सनः' (1.3.62) इत्यात्मानेपदम्। `सर्वत्रैव' इत्यादि। युक्तं प्रक्रंसीष्ट, प्रस्नीषीष्टेत्यादौ स्नुक्रमोरात्मनेपदस्य निमित्तत्वम्, तस्मादात्मनेपदस्य विधानात्; प्रचिक्रंसत इत्यत्र तु कथं क्रमिरात्मनेपदस्य निमित्तम्, न ह्यत्र क्रमिमाश्रित्यात्मनेपदं भवति, किं तर्हि? सनन्तं धात्वन्तरम्? इत्याह--`सनन्तादपि' इत्यादि। सनन्तादपि हि यदात्मनेपदं विधीयते `पूर्ववत्सनः' (1.3.62) इत्यनेन। तेन तत्रापि पूर्ववदिति वचनात् पूर्व धातुस्वरूपमात्मनेपदस्य निमित्तमाश्रीयत इति। यद्यपि सनन्तादात्मनेपदं विधीयते तथापि क्रमेस्तत्र निमित्ताभावोऽस्त्येवेत्यभिप्रायः। अथ निमित्तग्रहणं किमर्थमुपादीयते, न `आत्मनेपदे' इत्येवोच्यते? इत्यत आह--`निमित्तग्रहणम्' इत्यादि। सीयुट् आदिर्यस्य स सीयुडादिः, तदात्मनेपदे परं यस्मात् स तत्परः स्यप्रत्ययः, स परो यस्मात् स तत्परपरः सन्प्रत्ययः; तयोः प्रतिषेदो यथा स्यादित्यवमर्थं निमित्तग्रहणम्। तत्र सीयुडादेः प्रतिषेधार्थम्--प्रस्नोषीष्ट, प्रक्रंसीष्टेति; तत्परपरस्य च प्रतिषेधार्थम्--प्रचिक्रंसिष्यत इति; अत्र हि निमित्तग्रहणं न क्रियते, तदा `आत्मनेपदे' इत्येषा परसप्तमी विज्ञायेत। न च प्रस्नीषीष्ट, प्रक्रंसीष्टेत्यात्मनेपदे परत आर्धधातुकमस्ति तथा ह्यात्मनेपदस्यागमः सीयुट्, तदेकदेशात्वदात्मनेपदे परत उच्चार्थमाणः प्रतिषेधो न स्यात्। प्रचिक्रंसिष्यत इत्यत्र `आत्मनेपदे' इत्येतस्यां परसप्तम्यां विज्ञायमानायां `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इति

निर्दिष्टग्रहणस्यानन्तर्यार्थत्वात् स्येन व्यवधाने सति सन इट्प्रतिषेधो न स्यात् निमित्तग्रहणे तु सति भवति। अस्ति ह्यत्र सर्वत्र स्नुक्रमोर्यथायोगमात्मनेपदं प्रति निमित्तभावः। तस्मान्निमित्तग्रहणं कर्त्तव्यम्। प्रस्नवित्रीयत इत्यत स्नौतेरात्मनेपदं परं चोपलब्धम्; अतः स्नौतिरात्मनेपदसय निमित्तमिति प्रतिषेधेन भवितश्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्त्तुमाह--इह प्रस्नवितेवाचरति' इत्यादि। क्वचित् `प्रस्नवितारमिवाचरति' इति पाठः, स तु नोपपद्यते। न हि कर्मणः क्यङ् विधीयते, किं तर्हि? सुबन्तात् कर्त्तुः। तस्मात् प्रमादकृतोऽयं पाठः। प्रस्नवितेवाचरतीति तृजन्तात्, `कर्त्तुः क्यङ सलोपश्च' (3.1.11) इति क्यङ्, `रीङृतः' (7.4.27) इति रीङ्। क्यङन्तादातमनेपदं विधीयमानं ङित इत्येवं विधीयते। स च स्नौतिर्ङित् किं तर्हि? क्यङन्तः। तस्मात् क्यङन्तमेवात्मनेपदनिमित्तं न स्नौतिरिति न भवति प्रतिषेधः।

`क्रमेस्तु' इत्यादि। निमित्तग्रहणात् सत्येवात्मनेपदे प्रतिषेधेन भवितव्यम्, नासतीति। कर्त्तरि कृति प्रतिषेधो न प्राप्नोतीत्युपसंख्यायते। `प्रक्रान्ता, उपक्रान्ता' इति। `प्रोपाभ्यां समर्थाभ्याम्' (1.3.42) इति प्रोपाम्यामुपसुष्टात् क्रमेरात्मनेपदवषानादिह क्रमेरात्मनेपदस्य विषयः। `आत्मनेपदविषयः' [आत्मनेपदविषयात्--मूलम्] इति। आत्मनेपदं विषयो यस्य स आत्मनेपदविषयः। `प्रक्रमितव्यम्, उपक्रमितव्यम्' इति। `तयोरेव कृत्यक्तखलर्थाः' (3.4.70) इति भावे कर्मणि कृत्यः। `निष्क्रमिता' इति। `इदुदुपधस्य' (8.3.41) इति विसर्जनीयस्य षत्वम्। निष्फूर्वात् क्रमेरात्मनेपदस्याभावादिहात्मनेपदस्य वषयो न भवति। अथ प्रसुस्नूषति, प्रस्नुतः, प्रस्नुतवानित्यत्र कस्मान्न भवति, न ह्यत्र स्नौतिरात्मनेपदविषयः? इत्यात आह--`स्नौतेः' इत्यादि। ननु `श्रयुकः किति' (7.2.11), `सनि ग्रहगुहोश्च' (7.2.12) इतीट्प्रतिषेधस्य धात्वन्तरमुगन्तमवकाश इति परत्वादिदैवात्र भवितव्यम्, न प्रतिषेधेन? नैतदस्ति; उक्तं हि पुरस्तात् प्रतिषेधकाण्जस्य बलीयस्त्वात् प्रयोजनमिण्मात्रस्थानाश्रितविशेषविधानस्य प्रतिषेधो यथा स्यादिति।।

37. ग्रहोऽलिटि दीर्घः। (7.2.37)

`ग्रह उत्तरस्य' `ग्रह' इति पञ्चमीं दर्शयति। यद्येवम्, तदेङ्ग्रहणं कर्त्तव्यम्? न कर्त्तव्यम्; प्रकृतमेव तदनुवर्त्तते। तद्धि प्रथमान्तनिर्दिष्टम्, षीष्ठीनिर्देशेन चेहार्थः? नैष दोषखः; `ग्रहः' इत्येषा पञ्चमीति प्रथमायाः षष्ठीत्वं प्रकल्पयिष्यति; `तस्मादित्युत्तरस्य' (1.1.67) इति वचनात्। `जगृहिव, जगृहिम्' इति। ग्रह्यादिसूत्रेण (6.1.16) सम्प्रसारणम्।

तथा ग्राहिता, ग्राहिष्यत इत्यत्र कथं चिण्वदिटो न भवति? इत्याह--`प्रकृतस्यैव' इत्यादि। आर्धधातुकस्येति यः प्रकृत इट् तस्येदं दौर्घत्वं भवति, न चिण्वदिटः; तस्याप्रकृतत्वात्। चिण्वदित्यनेन चिण्वद्भाव उपलक्ष्यते। तत्सहचरित इट् चिण्वदित्युच्यते। `ग्राहित' इति। `अनद्यतने लुट्' (3.3.35), `स्यतासी लृलुटोः' (3.1.33) इति तासिः, भावकर्मणोः' (1.3.13) इत्यात्मनेपदम्, `लुट प्रथमस्य' (2.4.85) इत्यादिना डादेशः, टिलोपः, `स्यसिच्सीयुट्तासिषु' (6.4.62) इत्यादिनेट् चिण्वद्भावाद्वृद्धिः। अथ जरीगृहिता, जरीगृहीतुमित्यत्र यङन्तात् तृनि तुमुनि च यलोपाल्लोपयोः कृतयोर्दीर्घः कस्मान्न भवति? उत्तरसूत्रे वाग्रहणस्योभयोरपि योगयोः शेषभूतत्वाद्व्यवस्थिविभाषाविज्ञानात्। अथ वा--विहितविशेषणपक्षोऽत्र व्याख्यायते। ग्रहेर्थो विहित इट् तस्य दीर्घो भवति। न चात्र ग्रहेर्विहित इट् कुतस्तर्हि? यङन्तात्। तस्मान्नेह दीर्घस्य प्रसङ्गः। अथ `ग्रह ईडलिटि' इत्येवं कस्मान्नोक्तम्, किं दीर्घग्रहणेन? नैवं शक्याम्; एवं सतीट्कार्यमीटो न स्यात्, ततश्चाग्रहीदित्यत्र `इट ईटि' (8.2.28) इति सिचो लोपो न स्यात्, `नेटि' (7.2.4) इति प्रतिषेधश्च; इह चाग्रहीढ्वम्, अग्रहीध्वमित्यत्रेटः `विभाषेटः' (8.3.79) इति मूर्घन्यश्च; दीर्घ इट आदेशे सति तस्य स्थानिवद्भावदिट्कार्यमुपपद्यत इति दीर्घ एव विधीयते।।

38. वृतो वा। (7.2.38)

1. `वृ वरणे' (धा.पा.1490) इत्यस्येदं ग्रहणं वा स्यात्?, 2. अथ वा--अस्यान्येषाञ्च ऋकारान्तानाम्?, 3. उत्त तस्यान्येषाञ्च ऋकारान्तानाम्?, 4. आहोस्विद् वृङवृञोश्चान्येषाञ्च ऋकारान्तानाम्? अथ वा--5. तयोश्च ऋकारान्तानाम्? तत्र यदि प्रथमः पक्ष आश्रितः स्यात् तदा यणादेशं कृत्वा `व्रः' इति निर्देशं कुर्यात्, यथा--`ग्रो यङि' (8.2.20) इति। अथ यदि द्वितीयः पक्षः, तदा `दृ' इत्येतस्य ग्रहणं न कुर्यात्; ऋकारान्तग्रहणेनैव तद्ग्रहणस्य सिद्धत्वात्। अथ तृतीयः पक्षः, `ऋतस्य संयोगादेः' (7.2.43) इत्यत्र ऋतशब्देन ह्रस्वस्य ग्रहणं न कुर्यात्, इदमेव हि तत्र ऋकारग्रहणमनुवर्त्तिध्यते। अथ चतुर्थः पक्षः, वृङ्वृञो प्रथग्ग्रहणं न कुर्यात्; ऋकारान्तग्रहणेनैतद्ग्रहणस्य सिद्धत्वात्। तस्मात् पारिशेष्यात् पञ्चमोऽत्र पक्षोऽभिमत इति मत्वाऽऽह--`वृङ्वृञोः सामान्येन ग्रहणम्' इत्यादि। सामान्येन ग्रहणमिति विशेषानुपादानात्।

`वृत इति किम्' इति। एवं मन्यते--`उर्षा' इत्येवं वक्तव्यम्, एवमप्युच्यमाने वृङ्वृञोॠकारान्तयोः सवर्णग्रहणादृकारान्तानाञ्च ग्रहणं भविष्यति। एवमप्युच्यमाने सत्यतिप्रसङ्गो भवतीति दर्शयन्नाह--`करिष्यति, हरिष्यति' इति। अत्र `ऋद्धनोस्ये' (7.2.70) इतीट्।।

39. न लिङि। (7.2.39)

`वरिषौष्टेत्यादौ [`विवरिषीष्ट'--इति काशिकायामुदाहरणम्]`लिङ्सिचोरात्मनेपदेषु' (7.2.42) इतीट्। `विस्तरिषीष्ट' इति। कर्मण्यात्मनेपदम्।।

40. सिचि च परस्मैपदेषु। (7.2.40)

`प्रावारिष्टाम्' इति। `तस्थस्थमिपां तान्तन्तामः' (3.4.101) इति तसस्ताम्, सामान्यविहित इट् सिचि वृद्धिः। `प्रावारिषुः' इति। `सिजभ्यस्तविदिभ्यश्च'

(3.4.109) इति झेर्जुस्। वृङ उदाहरणं नोपन्यस्तम; तस्य परस्मैपदासम्भवात्। `प्रावरिष्ट, प्रावरीष्ट' इति। `लिङ्सिचोरात्मनेपदेषु' (7.2.42) इतीट्।।

41. इट् सनि वा। (7.2.41)
`वुवूर्षते' इति। `इको झल्' (1.2.9) इति सनः कित्त्वम्, `अज्झनगमां सनि' (6.4.16) इति दीर्घः, `उदोष्ठ्यपूर्वस्य' (7.1.102) इत्युत्वम्, रपरत्वम्। अतेह कस्मान्न भवति--चिकीर्षति, जिहीर्षतीति, अस्ति दीर्घत्वे कृते प्राप्तिः? इत्यत आह--`चिकीर्षति, जिहिर्षति' इति। गतार्थम्।।

42. लिङ्सिचोरात्मनेपदेषु। (7.2.42)
वृत उदात्तत्वादिटि प्राप्ते विकल्पार्थ आरम्भः। `आत्मनेपदेषु' इति परसपतमीयम्। सिचश्चैतद्वि शेषणम्। यद्येवम्, लिङ् विशेषितो न स्यात्, ततश्च लिङ् परस्मैपदेष्वपि प्रसज्येत? नैतदस्ति; `वलादेः' (7.2.35) इत्यधिकारात्, लिङ्श्च परस्मैपदेषु यासुडादित्वाभावात्। `आत्मनेपदपरे' इति। आत्मनेपदं परं यस्मात् स तथोक्तः। एतच्च सिजित्यनेनैव सम्बध्यते, न लिङित्यनेम; सिचमेव प्रत्यात्मनेपदग्रहणस्य विशेषणभावात्। `वृषीष्ट' इति। `उश्च' (1.2.12) इति कित्त्वाद्गुणाभावः। `आस्तीर्षीष्ट'इति। पूर्ववत् कित्त्वदीर्घत्वादिः। `अवृत' इति। `ह्रस्वादङ्गात्' (8.2.27) इति सिचो लोपः।।

43. ऋतश्च संयोगादेः। (7.2.43)
ऋकारान्तानामनुदात्तत्वात् प्रतिषेधे प्राप्ते विकल्पार्थ वचनम्। `ध्वृषीष्ट' इति। `ध्वृ हूर्च्छने' (धा.पा.139)। `भावकर्मणोः' (1.3.13) इत्यात्मनेपदम्। एवमन्यत्राप्यात्मनेपदं वेदितव्यम्। पूर्ववत् कित्त्वाद्गुणाभावः। `स्मृषीष्ट' इति। `स्मृ चिन्तायाम् (धा.पा.933)।
`च्योषीष्ट' इति। `च्युङ् छ्यङ् [नास्ति--धा.पा.] ज्युङित्यादि। (धा.पा.955,956)। अत्र ङित्वात् कर्त्तर्यात्मनेपदम्। `अकृषत' इति। `आत्मनेपदेष्वनतः' (7.1.5) इत्यदादेशः।
अथ संस्कृषीष्ट समस्कृतेत्यत्र कस्मान्न भवति, भवति हि करोतिरत्र `संपर्युपेभ्यः करोतौ भूषणे' (6.1.137) इति सुटि कृते संयोगादिः? इत्याह--`संस्कृषोष्ट' इत्यादि। `एकाच उपदेशेऽनुदात्तात्' (7.2.10) इत्यत उपदेशग्रहणमनुवर्त्तते, तेनोपदेशावस्थायां यः संयोगादिस्तत एवैतेन भवितव्यम्, न च करोतिरुपदेशावस्थायां संयोगादिः, किं तर्हि? तत उत्तरम्, अतो न भवति। `अभक्तत्वाच्च' इत्यादि। संस्कृषीष्टेत्यत्रायं परीहारः, न समस्कृतेत्यत्र। अम्र ह्यडागमः `तद्भक्तस्तद्ग्रहणेन गृह्यते' (व्या.प.20) इति अटोऽप्यङ्गग्रहणेन ग्रहणादिति `तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' (व्या.प.21) इति सुटोऽप्यङ्गग्रहणेन ग्रहणात् करोतिरपि संयोगादिर्भवत्येव। अङ्गाधिकाराच्चाङ्गावयवोऽत्रि संयोगोऽपि गृह्यते; प्रत्यासत्तेः। न च संस्कृषीष्टेत्यत्राङ्गावयवः संयोगादिः, यश्चाङ्गावयवो नासौ संयोगे भवति, तदिह न भवतीट्प्रसङ्गः। अत्र `सम्पुकानां सत्वम्' (वा 936) इति वचनात् समो मकारस्य सकारः, पूर्वस्यानुनासिकः। समस्कृतेत्यत्र पूर्ववत् सिचो लोपः। चकार आत्मनेपदानुकर्षणार्थः, तेनोत्तरत्र विधिरविशेषेम भवति; चानुकृष्टस्योत्तरत्राननुवृत्तेः।।

44. स्वरतिसूतिसूयति धूञूदितो वा। (7.2.44)
`स्वृ शब्दोपतापयोः' (धा.पा.932), `षूङ् प्राणिगर्भविमोचने' (धा.पा.1031) इत्यादादिकः, `षूङ् प्राणिप्रसवे' (धा.पा.1132) इति दैवादिकः। `धूञ् कम्पने' (धा.पा.1255,1487,1385) इति स्वादिः, क्र्यादिः, चुरादिश्च। तत्र `एकाचः' (7.2.10) इत्यधिकारादाद्ययोर्ग्रहणम्, नेतरस्य। ऊदितः--`गाहू विलोडने (धा.पा.649), `गुपू रक्षणे' (धा.पा.395) इत्यादयः। एतेषां स्वरतेश्चानुदात्तत्वात् प्रतिषेधे प्राप्ते, इतरेषामुदात्तत्वान्नित्यमिटि प्राप्ते विकल्पार्थं वचनम्। `विगाढा' इति। पूर्ववङ्ढत्वादि विधेयम्।
अथ वावचनं किमर्थम्? यावता `इट् सनि वा' (7.2.41) इत्यतो वाग्रहणमनुवर्त्तते? इत्याह--`वेत्यनुवर्त्तमाने' इत्यादि। तद्धि वाग्रहणं लिङ्सिज्भ्यां सम्बद्धमिति तदनुवृत्तौ तयोरप्यनुवृत्तिः स्यात्। तस्मात् पूर्ववाग्रहणसम्बद्धयोर्लिङ्सिचोर्निवृत्त्यर्थमन्यदिदं वाग्रहणमिति। ननु च लिङ्सिचोरनुवृत्तिः स्यात्। तस्मात् पूर्ववग्रहणसम्बद्धयोरलिङ्सिचोर्निवृत्त्यर्थमन्दिदं वाग्रहणमिति। ननु च लिङ्सिचोरनुवृत्तौ स्वरतिग्रहण मनर्थकमापद्यते, पूर्वेणैव विकल्पस्य सिद्धत्वात्? नैतदस्ति; वचनप्रामाण्यात् स्वरतिग्रहणं नित्यार्थ विज्ञायते। अथ वा--स्वरितग्रहणात् `वा' इत्येतन्निवर्त्तते। अथ सूतिसूयत्योर्विकरण निर्देशः किमर्थः, न `सू' इत्येबोध्येत? इत्यत आह--`सूतिसूयत्योः' इत्यादि। `सू' इत्युच्यमाने `निरनुबन्धकग्रहणे न सानुबन्धकस्य' (व्या.प.53) इति `सू प्रेरणे' (धा.पा.1408) [`षू प्रेरणे'--धा.पा.] इत्यस्यैव ग्रहणं स्यात्। अतस्तन्निवृत्त्यर्थो विकरण निर्देशः करणीयः। यद्येतत् प्रयोजनम्, सूङिति निर्देशः कर्त्तव्यः? नैवं शक्यम्; एवं हि सति निर्देशे क्रियमाणे `लुग्वकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्' (व्या.प.50) इति सूयतेरेव ग्रहणं स्यात्, न सूतेः। अतस्तन्निवृत्तये विकरणनिर्देशः। अस्याः परिभाषाया अस्तित्वेऽयमेव निर्देशो ज्ञापकः। अस्यां ह्यसत्यां `सूङ्' इति निर्देशं कुर्यात्। अथ `धूञ्' इति सानुबन्धकस्य ग्रहणं न क्रियेत, ततो निरनुबन्धकपरिभाषया (व्या.पा.53) `धू विधूनने' (धा.पा.1398) इत्यस्यैव ग्रहणं स्यात्, एतच्चानिष्टम्। अतो विधूननार्थस्य निवृत्त्यर्थः सानुबन्धकनिर्देशः।
`स्वरतेः' इत्यादि। अस्य विकल्पस्यावकाशः--स्वरिता, स्वर्त्तेति; ऋद्धनीः स्ये' (7.2.70) इत्यस्यावकाशः--करिष्यति, हरिष्यतीति; स्वरतेरस्योभयप्रसङ्गे `ऋद्धनोः स्ये' (7.2.70) इत्येतद्भवति विप्रतिषेधेन--स्वरिष्यति इति।

`किति तु प्रत्यये' इत्यादि। `श्रयुकः किति' (7.2.11) इत्यस्यावकाशः--सूतः, सूतदानि, अस्य विकल्पस्यावकाशः--स्वर्त्ता, स्वरितेति; सोता सविता; धोता, धवितेति; इहोमयप्रसङ्गे `श्रयुकः किति' (7.2.11) इति नित्यं [नित्यः--काशिका] प्रतिषेधो भवति पूर्वविप्रतिषेधेन--स्वृत्वा, सूत्वा, धूत्वा'। एतच्च पुरस्तात् प्रतिषेधकाण्डविधानादेव सिद्धम्। उक्तं हि प्राक् पुरस्तात् प्रतिषेधविधानस्य प्रयोजनम्--इण्मात्रस्यानाधितदिधानविशेषस्य प्रतिषेधो यथा स्यादिति। तदेतत् पुरस्तात् प्रतिषेधविधानं पूर्वदिप्रतिषेधेन समानफलकत्वादिह पूर्वविप्रतिषेधशब्देनोक्तम्।।

45. रधादिभ्यश्च। (7.2.45)
`रध हिंसासंराद्ध्योः' (धा.पा.1193), `णश अदर्शने' (धा.पा.1194,) `तृप प्रीणने' (धा.पा.1195), `दृप हर्षणमोहनयोः' (धा.1196),[`हर्षमोहनयो'--धा.पा.] `द्रुह जिघांसायाम्' (धा.पा.1197), `मुह वैचित्त्ये' (धा.पा.1198), `ष्णुह द्धद्गिरणे' (धा.पा.1199) ष्णिह प्रीतौ' (धा.पा.1200)--इत्येते रधादयः। एषु तृप्यतिदृप्यत्योरनुदात्तत्वादिट्प्रतिषेधे प्राप्ते शेषाणामुदात्तत्वान्नित्यमिटि प्राप्ते विकल्पार्थं वचनम्। `नंष्टा' इति। `मस्जिनशोझंलि' (7.1.60) इति नुम्। व्रश्चादिसूत्रेण (8.2.36) षत्वम्, ष्टुत्वम्। `त्रप्तः' इति। `अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' (6.1.59) इत्यम्, यणादेशः। `तर्पिता' इति। लघूपधगुणः। द्रोग्क्षा, मेग्धा, स्नोध्या, स्नेग्धेतीडभावपक्षे `वा द्रुहमुहष्णुहष्णिहाम्' (8.2.33) इति घत्वम्, `झषस्तथोर्षोऽधः' (8.2.40) इति धत्वम्, `झलां जश् झशि' (8.4.53) इति जशत्वं गकारः। `द्रोढा, ञोढा, स्नोढा स्नेढा' इति। पूर्ववङ्ढत्वादि विधेयम्।
`क्रादिनियमाल्लिटि रधादिभ्यः परत्वाद्विकल्पं केचिदिच्छन्ति' इति। पक्षे ररध्व, ररध्मेत्याद्यपि यथा स्यात्। `अपरे पुनः' इत्यादि। एतदेव हि पूर्वविधेरिट्प्रतिषेधविधानस्य प्रयोजनम्--प्रतिषेधस्य बलीयस्त्वं यथा स्यादिति। तस्मात् प्रतिषेधनियमस्या बलीयस्त्वान्नित्यमिटा भवितव्यम्। तत्र पूर्वेषामयमभिप्रायः--पूर्वविधेरिट्प्रतिषेधविधानसामार्थ्यात् प्रतिषेधस्य बलीयस्त्वं भवति, न तु प्रतिषेधनियमस्येति। इतरेषामयमभिप्रायः--प्रतिषेधस्य बलीयस्त्वात् तद्धर्मस्य नियमस्यापि बलीयस्त्वं भवति, न तु प्रतिषेधस्यैवेति तस्य बलीयस्त्वे सति तत्प्राप्तिः, तेन नित्यमिटा भवितुं युक्तमिति। प्रतिषेधनियमस्तु स एव क्रादिनियमः। `ररन्धिव, ररन्धिम' इति। `रधिजभोरचि' (7.1.61) इति नुम्।।

46. निरः कुषः। (7.2.56)
`कुष निष्कर्षे' (धा.पा.1518)। अस्योदात्तत्वान्नित्यामिटि प्राप्ते विकल्पार्थं वचनम्। `निष्कोष्टा' इति। `शर्परे विसर्जनीयः' (8.3.35) इत्यस्यानुवृत्तेः `इदुदुपधस्य चाप्रत्ययस्य' (8.3.41) इति विसर्जनीयस्य षत्वम्।
ननु च सकारान्तोऽयमुपसर्गः, तथा प्रादिषु निसिति पठ्यते, न तु निरिति, तस्मात् `निसः' इति वक्तुं युक्तम्, न निर इति; यथा--निसस्तपतावनासेवने' (8.3.102) इति, तत् किमर्थं तिर इति निर्देशः? इत्याह--`निसः' इति। `वक्तव्ये' इत्यादिना रेफान्तस्यास्तित्वज्ञापने प्रयोजनमाह। `तेन' इत्यादि। स्यादेतत्। निस इति रुत्वे कृते लत्वं भविष्यतीत्याह--`निसो हि' इत्यादि। `निलयनम्' इति। अयतेर्ल्युटि रूपम्।।

47. इण्निष्ठायाम्। (7.2.47)

किमर्थमिडिति वर्त्तमाने पुनरिङ्ग्रहणं क्रियते? इत्याह--`इड्ग्रहणं नित्यार्थम्' इति। असतीङ्ग्रहणे हि विकल्पस्य प्रकृतत्वात् पाक्षिक इडविधिः स्यात्। तस्मान्नित्यर्थमिङ्ग्रहणं कर्त्तव्यम्। ननु च सिद्धा विभावा पूर्वसूत्रेण, आरंभसामर्थ्यादेव नित्योऽयं विधिर्भवतिष्यति? इत्याह--`आरम्भो हि' इत्यादि। पूर्वसूत्रेणेटो विकल्पितत्वान्निष्ठायां, `यस्य विभाषा' (7.2.15) इति प्रतिषेधे प्राप्ते नित्योऽयमारम्भः। तत्र यदीङ्ग्रहणं न क्रियेत, तदा तस्यैव प्रतिषेधस्यायमारम्बो बाधकः स्यात्, ततश्च विकल्प एव स्यात्, न नित्यो विधिः। तस्मान्नित्यार्थमिङ्ग्रहणं कर्त्तव्यम्। यदि हि नित्यार्थमिङ्ग्रहणं क्रियेत तदा तेन विकल्पस्य निवर्त्तितत्वादुत्तरत्रापि नित्य एव विधिः स्यादित्यत आह--`तत्रेव' इत्यादि। न चानेनेङ्ग्रहणेन विकल्पः शक्यते निवर्त्तयितुम्; तस्य स्वरितत्वादिङ्ग्रहणसामर्थ्यात्। अनुवर्त्तमानेऽपि वाग्रहणे नित्योऽयं विधिर्भवति। या तु तस्यैव विकल्पस्यानुवृत्तिः, सोत्तरार्था। तेनोत्तरत्र विकल्प एव।।

48. तीषसहलुभरुषरिषः। (7.2.48)
`इषु इच्छायाम्' (धा.पा.1351),[`इष'--धा.पा.] `षह मर्षणे' (धा.पा.852); `लुभ गार्द्ध्ये (धा.पा.1238), `लुभ विमोहने' (धा.पा.1305)--द्वयोरपि ग्रहणम्; विशेषानुपादनात्। `रुष रोषे' (धा.पा.1670), `रुष रिष हिंसायाम्' धा.पा.1230,1231)। सर्व एषैत उदात्ता इति नित्यामिटि प्राप्ते विकल्पार्थोऽयमारम्भः।
`तदर्थम्' इति। इच्छार्थस्यैव विकल्पो यथा स्यादितरयोर्म भूदित्येवमर्थम्। ये तूदितं न पठन्ति, ते `वा' इति प्रकृतस्य व्यवस्थितविभाषाविज्ञानात् सहिना भौवादिकेन साहचर्याद्वा इच्छार्थस्यैव विकल्पेन भविष्यति, नेतरयोरिति वर्णयन्ति। `सोढा' इति। ढत्वष्टुत्वढलोपेषु कृतेषु `सहिवहोरोदवर्णस्य'
(6.3.112)

49. सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्। (7.2.49)

इवन्तानामिति। `दिवु' (धा.पा.1107), `सिवु' (धा.पा.1108) इत्येवमादीनाम्। `ऋधु वृद्धौ' (धा.पा.1245 `भ्रस्ज पाके' (धा.पा.1284), `दम्भे' [`दम्भने'--धा.पा.] (धा.पा.1270), `श्रिञ्सेवायाम्' (धा.पा.897), `स्वृ शब्दोपतापयोः' (धा.पा.932), `यु मिश्रणे' [`मिश्रणेऽमिश्रणे च'--धा.पा.] (धा.पा.1033), `ऊर्णु आच्छादने' (धा.पा.1039), `भ्रिञ् भरणे' (?), मारणतीषणनिशामनेषु ज्ञपिर्ण्यन्तः। `षणु दाने' (धा.पा.1464), `वन षण सम्भक्तौ' (धा.पा.463,444)--द्वयोरपि ग्रहणम्; विशेषानुपादानात्। अत्र भ्रस्जेरनुदात्तत्वात्, ल्वुयुर्णुभृञां चोगन्तत्वात् `सनि ग्रहगुहीश्च' (7.2.12) इति प्रतिषेधे प्राप्ते, शेषाणामुदात्तत्वान्नित्यमिटि प्राप्ते विकल्पोऽयमारभ्यते। `दुद्यूषति' इति। दिवेः सन्, `हलान्तच्च' (1.2.10) इति सनः कित्त्वम्, `च्छ्वो शूडनुनासिके' (6.4.19) इत्यूठि यणादेशः, द्विर्वचनम्--`द्यूष' इत्येतस्य, `हलादिः शेषः' (7.4.60) इति चर्त्वम्--धकारस्य दकारः।

`विभ्रज्जिषति' इति। `झलां जश् झशि' (8.4.53) इति सकारस्य दकारः, `स्तोः श्चुना श्चुः' (8.4.40) इति श्चुत्वम्--दकारस्य जकारः। `बिभर्क्षति' इति। भ्रस्जो रोपधाया रमन्यतरस्याम्' (6.4.47) इत्यकारात् परो रमागमः `रोपधयोः' इति षष्ठीनिर्देशाद्रेफस्योपधायाश्च सकारस्य निवर्त्तकः, `चोः कुः' (8.2.30) इति कुत्वम्, `इण्कोः' (8.3.57) इति`आदेशप्रत्यययोः' (8.3.59) इति षत्वम्।

`धिप्सति, धीप्सति' इति। `दम्भ इच्च' (7.4.56) इतीत्त्वमीत्त्वञ्च, `खरि च' (8.4.55) इति चर्त्वम्, भकारस्य पकारः, पूर्ववदभ्यासलोपः, `हलान्ताच्च' (1.2.10) इति कित्त्वादनुनासिकलोपः।

`उच्छिश्रीषति' इति। `इको झल्' (1.2.9) इति कित्त्वम्, `अज्झनगमां सनि' (6.4.16) इति दीर्घत्वम्, द्विर्वचनमभ्यासकार्यम्। `आदेशप्रत्ययोः' (8.3.59) इति षत्वम्, दकारस्य चुत्वम्--चकारः। `शश्छोऽटि' (8.4.63) इति शकारस्य छकारः।

`सिस्वरिषति' इति। द्विर्वचनम् `स्वृ' इत्येतस्य, `उरत्' (7.4.66) इत्यत्त्वम्, रपरत्वञ्च। `सुस्वूर्षति' इति। पर्ववद्दीर्घः, `उदोष्ठ्यपूर्वस्य (7.1.102) इत्युत्त्वम्, रपरत्वम्, `हलि च' (8.2.70) इति दीर्घः, द्विर्वचनम्--`स्वूर्ष' इत्येतस्य, अभ्यासकार्यम्, `आदेशपरत्ययोः' (8.3.59) इति षत्वम्।

`यियिविषति' इति। `ओः पुयण्ज्यपरे' (7.4.80) इत्यभ्यासस्येत्त्वम्। `प्रोर्णुनूषति' इति। `अजादेर्द्वितीयस्य' (6.1.2) इति वचनाद्द्वितीयस्यैकाचः `नुस' इत्येतस्य द्विरुक्तिः, रेफस्य पूर्वन्न द्विर्वचनम्।

`प्रोर्णुनविषति' इति। इट, पक्षे `विभाषोर्णोः' (1.2.3) इति यदा ङित्त्वं तदोवङ्, अन्यदा तु गुणः.

`भुञित्येतस्य भौवादिकस्य ग्रहणम्' इति। अथ डुभृञित्यस्य जौहोत्यादिकस्य ग्रहणं कस्मान्न भवति? इत्याह--`शपा निर्देशात्' इत्यादि। यदि जौहोत्यादिकस्य भृञो धारणपोषणार्थस्य ग्रहणमभिमतं स्यात्, तदा `भृ' इत्येवं निर्देशं कुर्यात्, न तु `भर' इति शपानिर्देशम्, कृतश्च शपा निर्देशः, तस्माद्भौवादिकस्य ग्रहणमिति गम्यते। `बुभूर्षति' इति। पूर्वदुत्त्वदीर्घत्वे।

`ज्ञीप्सति' इति। `ज्ञा' इत्येतस्माण्णिच्, `अर्त्तिह्रौ' इत्यादिना पुक्, पूर्वदीत्त्वाभ्यासलोपौ। `सिषासति' इति। `जनसनखनां सञ्झलोः' इत्यात्वम्। `केचिदत्र' इत्यादि। केचिदिदिति वचनात् केचिन्न पठन्तीत्युक्तं भवति। ये तु न पठन्तितेऽत्र तनिपतिदरिद्राणामुपसंख्यानं कुर्वन्ति। `तितंसति, तितांसति' इति। `तेनोतेर्विभावा' (6.4.17) इति पक्षे दीर्घः। `पित्सति' इति। `सनिमीमा' (7.4.54) इत्यादिनेसादेशः, अभ्यासलोपः, `स्कोः' (8.2.29) इत्यादिना सलोपः। `दिदरिद्रिषति, दिदरिद्रासति' इति। `दरिद्रातेरार्धधातुके' (वा.789) इत्यादिना विकल्पेनाकारलोपः।।

50. क्लिशः क्त्वानिष्ठयोः। (7.2.50)

`क्लिष्ट्वा' इति। व्रश्चादिसूत्रेण (8.2.36) षत्वम्। `क्लिशित्वा' इति। `रलो व्युपधाद्धलादेः संश्च' (1.2.26) इति कित्त्वम्। `क्त्वाप्रत्यये विकल्पः सिद्ध एव' इति। ऊदित्वात् `स्वरति' (7.2.44) इत्यादिना यदि कत्वाप्रत्यये विकल्पः सिद्ध एव, तत्किमर्थं क्त्वाग्रहणम्? इत्याह--`क्लिश उपताप इत्यस्य तु' इत्यादि। `नित्यमिडागमः प्राप्नोति' इति। उपतापार्थस्य क्लिशेरुदात्तत्वात्। `तदर्थम्' इति। उपतापार्थो यः क्लिशिस्तदर्थम्। सोऽर्थः प्रयोजनं यस्य तत् तथोक्तम्। अथ वा--उपतापर्थस्य क्लिशेर्यो नित्यमिडागमः प्राप्नोति तदर्थम्, तन्निवृत्यर्थ मित्यर्थः; अर्थशब्दस्य निवृत्तिवचनत्वात्।।

51. पूङश्च। (7.2.51)

उगन्तत्वात् `श्रयुकः किति' (7.2.11) इतीट्प्रतीषेधे प्राप्ते कत्वानिष्ठयोः पक्षे प्राप्त्यर्थं वचनम्। `पवित्वा, पक्तिः, पवितवान्' इति। `पूङः क्त्वा च' (1.2.22) इति कित्त्वप्रतिषेधाद्गुणो भवत्येव। `पूङः' इति सानुबन्धकस्य ग्रहणं पूञो निवृत्त्यर्थम्।।।

52. वसतिक्षुधेरिद। (7.2.52)

`वस निवासे' (धा.पा.1005), `क्षुध बुभुक्षायाम्' (धा.पा.1190)--अनयोरनुदत्तत्वादिट्प्रतिषेधे प्राप्ते क्त्वानिष्ठयोरिड्विधनार्थ वचनम्। `उषित्वा' इति। क्त्वा, इट्, `न क्त्वा सेट्' (1.2.18) इति कित्त्वप्रतिषेधे प्राप्ते `मुडमृव' (1.2.7) इत्यादिना कित्त्वम्, वच्यादिसूत्रेण (6.1.15) यजादित्वात्

सम्प्रसारणम्, `शासिवसिचसीनां च' (8.3.60) इति षत्वम्। `क्षुधित्वा' इति। अत्रापि `रलो व्युपधाद्धलादेः संश्च' (1.2.26) इति पक्षे कित्त्वम्। `वसतीति विकरणनिर्देशः' इत्यादि। `विकरणनिर्देशो धातुनिर्देशार्थे एव' इत्युक्तम्। अथ `वस आच्छादने' (धा.पा.1023) इत्यस्य निवृत्त्यर्थः कस्मान्न विज्ञायते? इति यश्चीदयेत्, तं प्रत्याह--`वस्तेः' इत्यादि। अथ वावस्तः, वावस्तवानित्यत्र यङ्लुङ्निवृत्त्यर्थः कस्मान्न विज्ञायते? इति यश्चोदयेत्, तं प्रत्याह--`वस्तेः' इत्यादि। अथ वावस्तः, वावस्तवानित्यत्र यङ्लुङ्निवृत्त्यर्थः कस्मान्न विज्ञायते? विहितविशेषणपक्षविज्ञानादपि यङ्लुङ्निवृत्तिः शक्यते कर्त्तुमित्यभिप्रायः। अथेडित्यनुवर्त्तमाने पुनरिङ्ग्रहणं किमर्थम्? इत्याह--`पुनरिङ्ग्रहणं नित्यार्थम्' इति। पूर्वकमिङ्ग्रहणं विकल्पेन सम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्। तस्मात्तन्निवृत्त्यर्थ पुनरिङ्ग्रहणं कृतम्।।

53. अञ्चेः पूजायाम्। (7.2.53)
`अञ्चिताः' इति। पूजिता इत्यर्थः। `मतिबुद्धिपूजार्थेभ्यश्च' (3.2.177) इति क्तप्रत्ययः। `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपो न भवति; `नाञ्चेः पूजायाम्' (6.4.30) इति प्रतिषेधात्। `अस्य' इति। `क्तस्य च वर्त्तमाने' (2.3.67) इति षष्ठी।।

54. लुभो विमोहने। (7.2.54)
`लुभित्वा, लोभित्वा' इति। `रलो च्युपधात्' (1.2.26) इत्यादिना पक्षे कित्ताद्गुणाभावो भवत्येव।
`गार्ध्ये यथाप्राप्तमेव' इति। क्वाप्रत्यये विकल्पः। निष्ठायां `यस्य विभाषा' (7.2.15) इति नित्यः प्रतिषेध इति।।

55. जृव्रश्च्योः क्त्वि। (7.2.55)
`जरीत्वा, जरित्वा' इति। `जृ वयोहानौ' (धा.पा.1494) क्रैयादिकः। `वृतो वा' (7.2.38) इति पक्षे दीर्घः। यस्तु `जृष वयोहानौ' (धा.पा.1130) इति विवादौ पठ्यते, तस्य सानुबन्धकत्वादिह ग्रहणं नास्तीति तस्य जौर्त्वेत्येवं भवति। `व्रश्चित्वा' इति। `ओ व्रश्चू छेदने' (धा.पा.1292)। `न क्त्वा सेट्' (1.2.28) इति प्रतिषेधाद् ग्रहिज्येत्यादिसूत्रेण (6.1.16) सम्प्रसारणं न भवति; किति तसय विधानात्।
अथ क्त्वाग्रहणं किमर्थम्, यावता `क्लिशः क्त्वानिष्ठयोः' (7.2.50) इत्यत एव कत्वाग्रहणमनुवर्त्तत एव? इत्याह--`क्त्वाग्रहणम्' इत्यादि। तद्धि क्त्वाग्रहणं निष्ठ्या सह सम्बद्धम्, अतस्तदनुवृत्तौ तस्या अध्यनुवृत्तिः स्यात्। एवं च सति निष्ठायामपि स्यात्। तस्मात् निष्ठानिवृत्त्यर्थमन्यदिह क्त्वाग्रहणं क्रियते।।

56. उदितो वा। (7.2.56)
`शान्त्वा' इति। `शमु उपशमे' (धा.पा.1201), `तमु काङ्क्षायाम्' (धा.पा.1202), `दमु उपशमे' (धा.पा.1203), `भ्रमु चलमे' (धा.पा.850), `क्रमु पादविक्षेपे' (धा.पा.473)। अनिट्पक्षे `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इति दीर्घः।
वाग्रहणं विस्पटार्थम्। उदितां ह्युदात्तत्वादिट् सिद्ध एव, तत्रारम्भसामर्थ्यादेव विकल्पेन विधिर्विज्ञास्यते। उत्तरार्थ चावश्यं वाग्रहणं कर्त्तव्यम्, तद्धिस्पष्टार्थमिहैव क्रियते।।

57. सकेऽसिचि कृतचृतच्छृदतृदनृतः। (7.2.57)
`कृती छेदने' (धा.पा.1435) इति तौदादिकः, `कृती वेष्टने' (धा.पा.1447) इति रौधादिकः--विशेषानुपादनाद्द्वयोरपि ग्रहणम्। `चृती हिंसासंग्रन्थयोः' [`हिंसाश्रन्थनयोः'--धा.पा.] (धा.पा.1324), उ छृदिर् दीप्तिदेवनयोः' (धा.पा.1445), `उ तृदिर् हिंसादानयोः' [`हिंसाऽनादरयोः'--धा.पा.] (धा.पा.1446)। उकारौ `उदितो वा' (7.2.56) इति विशेषणार्थो। इकाररेफावपि `इरितो वा' (3.1.57) इति विशेषणार्थादेव। `नृती गात्रविक्षेपे' (धा.पा.1116)। सर्वेवामेषानुदात्तत्वान्नित्यमिटि प्राप्ते सिचोऽन्यत्र सकारादौ विकल्पार्थ वचनम्। `से' इत्येतस्याकारोच्चारणमतन्त्रम्; अविवक्षितत्वात्। तेन स्येऽपरि विकल्पो भवति। अतन्त्रत्वं तु पुनरस्य `असिचि' इति सिचः प्रतिषेधाद्विज्ञेयम्। यदि ह्यतन्त्रमकारोच्चारणम्, एवं सति `स्वसिचि' इत्येवं कस्मान्नोक्तम्? सन्देहभयात्। एवं ह्युच्यमाने `स्ये सिचि च' इत्येषोऽप्यर्थ आशङ्क्येत। `सेऽसिचि' इत्युच्यमाने तु सप्तमीद्वयोरुपादानात् सिज्विर्जिते सकारादावित्यभिमतोऽर्थो विज्ञायते। नन्वत्रापि सन्देहः स्यात्--एवमुच्यमाने किमर्थं सिचि न वेति? यदि हि सिच्यपि स्यात् तदुपादानमनर्थकं स्यात्, सीत्येवं ब्रूयात्। `कर्त्स्यैति' इति लृट्। `अकर्त्स्यत्' इति । लुङ्। `चिकृत्सति' इति। सन्, `हलन्ताच्च' (1.2.10) इति कित्वाद्गुणाभावः।।

58. गमेरिट् परस्मैपदेषु। (7.2.58)
`गम्लृ गतौ' (धा.पा.982)। गमिरयमनुदात्तत्वादनिट्। योऽपि `सनि च' (2.4.47) इति `इण् गतौ' (धा.पा.1045) इत्यस्य गमिरादेशः, यश्च `इण्वदिक इति उक्तव्यम्' (वा.167) इति `इक् स्मरणे' (धा.पा.1047) इत्येतस्य, यश्च `इङश्च' (2.4.48) इति `इङ् अध्ययने' (धा.पा.1046) इत्येतस्य सोऽपि स्थानिवद्भावादनिडेव स्यात्। तेभ्यः परस्य सकारादेरार्धधातुकस्य सिज्वर्जितस्येडागमो यथा स्यादित्येवमर्थं वचनम्। `गमिष्यति,

अगमिष्यत्' इति। अनादेशस्य गमेरुदाहरणम्। `जिगमिषति' इति। एतत् तस्येणादेशस्य, इगादेशस्य वा।
अथेडिते वर्त्तमाने पुनरिङ्ग्रहणं किमर्थम्? इत्याह--`इङ्ग्रहणं नित्यार्थम्' इति। तद्धि [`तद्धि पूर्वकमिङ्ग्रहण्। `उदितो वा' इति वाग्रहणेन प्रकृतमिङ्ग्रहणं सम्बद्धम्, अतस्तदनुवृत्तौ' इत्यादिः मुद्रितः पाठः] पूर्वकमिङ्ग्रहणं `उदितो वा' (7.2.56) इति वाग्रहणेन सम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्, तथा च विकल्पेनेट् प्रसज्येत। तस्मात् तन्निवृत्त्यर्थं पुनरिङ्ग्रहणं क्रियेत। `संगंसीष्ट' इति। सम्पूर्वाद्गमेराशिषि लिङ् सीयुट्, `समो गम्पृच्छि' (1.3.29) इत्यादिनाऽऽत्मनेपदम्, `सुट् तिथोः' (3.4.107) इति सुट्, धत्वम्, ष्टुत्वम्। `सञ्जिर्गसते' इति। `पूर्ववत्सनः' (1.3.62) इत्यात्मनेषदम्।
`अधिजिगांसते' इति। गमेरिङादेशस्य प्रत्युदाहरणम्। अथ सञ्चिगंसत इत्यत्र `अज्झनगमां सनि' (6.4.16) इति दीर्घत्वं कस्मान्न भवति? इत्याह--`गमेरिङादेशस्य' इत्यादि। तद्धि दीर्घत्वमिङादेशस्य गमेरिष्यते, नान्यस्य। तथा हि तत्रोक्तम्--गमेरिङादेशस्येति वक्तव्यमिति।
यदि परस्मैपदेष्वित्युच्यते, तदा कृति परस्मैपदलुकि च न प्राप्नोति? इत्याह--`आत्मनेपदेन' इत्यादि। `समानपदस्थस्य' इति। एकपदस्थस्येत्यर्थः। `अन्यत्र सर्वत्रैवेष्यते' इति। एतच्च `कृत्यपि हि' इत्यादिना विसपष्टीकरोति। `सञ्जिगमिषिता, अधिजिगमिषिता' इति। कृत्युदाहरणे द्वे। `जिगमिव त्वमिति' इति। एतत् परस्मैपदलुकि। सन्नन्तत्वाद्गमेर्लोट्, सिप्, `सेर्ह्यपिच्च' (3.4.87) इति सेहिंरादेशरः, `अतो हेः' (6.4.105) इति लुक्। कथं पुनः परस्मैपदेष्वित्युच्यमाने कृति परस्मैपदलुकि च लभ्यते? एवं मन्यते--योगविभागः कर्त्तव्यः; `गमेरिट' इत्येको भागः, तत्र `से' इत्यनुवर्त्तते--सकारादावार्थधातुके गमेरिडागमो भवति। ततः `परस्मैपदेषु' इति द्वितीयो योगो नियमार्थः। स चायं नियमो यद्यविशेषेण स्यात् तदा पूर्वयोगोऽनर्थकः स्यात्। तस्मात् तुल्यजातीयापेक्षया नियमः, तुल्यजातीयश्च तिङ्---सिङ्विषये यदि भयति तदा परस्मैपदेष्वेव, नात्मनेपदेष्विति। ते कृति परस्मैपदलुकि च पूर्वयोगे न भवत्येव; नियमेनाव्यावर्त्तितत्वदिति।
`पदशेषकारस्य पनः' इत्यादि। पदशेषकारः पुनरेवं मन्यते---परस्मैपदेष्विति नेयं परसप्तमी, किं तर्हि? विषयसप्तमी, परस्मैपदविषये यो गमिरुपलक्षितः=उपलब्धस्तस्य सकारादावार्धधातुक इड् भवतीति। एवं च सति योगविभागमन्तरेणापि तन्मतेन परस्मैपदेषु यो गमिरुपलक्षितः, तस्मादसत्यपि परस्मैपदे सर्वत्र कृति परस्मैपदलुकि चेड् भवत्येव; परस्मैपदपरत्वेन सकारादेरार्धधातुकस्याविशेतत्वात्। तन्मतेन सञ्चिर्गसिता, अधिजिर्गसिता व्याकरणस्येति भवितव्यमिति; सम्पूर्वस्य, अधिपूर्वस्य च गमेः परस्मैपदेष्वनुपलक्षितत्वात्। तथा हि--सम्पूर्वाद्गमेः `समो गम्युच्छि' (1.3.29) इत्यादिनाऽऽत्मनेपदं विहितम्। अधिपूर्वादपि स्थानिवद्भावात् `अनुदात्तङितः' (1.3.12) इत्यनेनात्मनेपदमिति।।

59. न वृद्भ्यश्चतुर्भ्यः। (7.2.59)
`वृद्भ्यः' इति बहुवचननिर्देशादाद्यर्थो गम्यते। अत एवाह--`वृदादिभ्यः' इति। `वृतु वर्त्तने' (धा.पा.758), `वृधु वृधौ' (धा.पा.759), `शृधु शब्दकुत्सायम्' (दा.पा.760) `स्यन्दू स्रवणे' (धा.पा.761)--इत्येते वृदादयश्चत्वार उदात्तः। तत्राद्यानां त्रयाणां नित्यमिटि प्रप्ते, स्यन्देस्तूदित्त्वात् पाक्षिके प्राप्ते प्रतिषेधोऽयमुच्यते। `वर्त्स्यति' इति। `लृट् शेषे च' (3.3.13) इति लृट्, `वद्भ्याः स्यसनोः' (1.3.92) इति विकल्पेन परस्मैपदम्। `विवृत्सति' इति। `हलन्ताच्च' (1.2.10) इति सनः कित्वाद्गुणाभावः। वृधिश्रृध्योर्धकारस्य `खरि च' (8.4.55) इति चर्त्वम्--तकारः।
`चतुर्भ्य इति न वक्तव्यम्' इति। अत्र कारणमाह---`वृत्करणं हि' इत्यादि। तदेव यदि वृदादिपरिसमाप्त्यर्थमपि विज्ञायत इति तन्त्रेणानेकशक्तितो वा शब्दानां न किञ्चिदनिष्टं प्राप्नोति। एवमपि विशायमान इष्टस्यैव सिद्धेरत्यभिप्रायः। एवं प्रत्याख्याते चतुर्ग्रहणे, प्रयोजनमाह--`तत्क्रियते' इत्यादि। यदि चतुर्ग्रहणं न क्रियेत, तदा स्पन्देरूदिल्लक्षणोऽन्तरङ्गत्वाद्विकल्पः स्यात्। अन्तरङ्गत्वं तु तसय वलाद्यर्धधातुकमात्राश्रयत्वात्। अस्य तु प्रतिषेधस्यार्थधातुकविशेषाश्रयत्वाद्वहरङ्गत्वम्। तस्मादन्तरङ्गमपि स्यन्देरूदिल्लक्षणं विकल्पमयं प्रतिषेधो यथा बाधेतेत्येवमर्थञ्च चतुर्ग्रहणं क्रियते। कथं पुनः क्रियमाणेऽपि चतुर्ग्रहणे, अयमर्थो लभ्यते? इत्यत आह--`चतुर्ग्रहणे' इत्यादि। स स्यन्दिः परः प्रधानो यस्य तत् तत्परम्, तद्भावस्तात्पर्यम्, तेन तात्पर्येण तत्प्रधानतयेत्यर्थः। `सन्निधापितः' इति। उपस्थापित इत्यर्थः। तस्य चैवं सन्निधापितस्य विकल्पोऽनेन प्रतिषेधेन कथं नाम बाध्येतत्येतदेव प्रयोजनम्। ततश्चतुर्ग्रहणादन्तरङ्गमपि विक्लपं प्रतिषेधो बाधते। `अत्रपि' इत्यादि। कथं पुनः `परस्मैपदेषु' (7.2.58) इत्यनुवर्त्तमानेऽन्यत्र सर्वत्र प्रतिषेधो लभ्यते? एवं मन्यते--गमेरित्यनुवर्त्तते, तत्रैवमभिसम्बन्धः करिष्यते--गमेः सकारादौ येन प्रकारेण इट् तेनैव प्रकारेण वृदादिब्यो नेडिति। तेन यथा गमेरात्मनेपदवर्जनमन्यत्र सर्वत्रैवेङ् भवति, तथा वृदादिभ्योऽपि प्रतिषेध इति।।

60. तासि च क्लृपः। (7.2.60)
`कृपू सामर्थ्ये' (धा.पा.762)। तस्मादूदित्त्वाद्विकल्पेनेटि प्राप्ते प्रतिषेधोऽयमारब्यते। `कल्प्ता' इति। लुट्, `लुटि च क्लृपः' (1.3.93) इति परस्मैपदं विकल्पेन, `कृपो रो लः' (8.2.18) इति लत्वम्। `चिक्लृप्सति' इति। पूर्ववत्कित्त्वम्।
`क्लृपेरपि' इत्यादि। अयमर्थो वृदादीनामनुवृत्तर्लभ्यते, तदनुवत्तौ सत्यामेवाभिसम्बन्धः करिष्यते--यथा वृदादीना प्रतिषेधो भवति, तथाऽयमपि क्लृपेरिति। यदि तर्हि वृददीनां ग्रहणमिहानुवर्त्तते, तदा वृदादीनामपि तासौ प्रतिषेधः प्राप्नोति? योगविभागकरणसामर्थ्यान्न भविष्यति। यदि वृदादीनामपि तासौ स्यात्, तदा `न वृद्भ्यः पञ्चभ्यस्तासि च' इत्येकरणे कुर्यात्।।

61. अचस्तास्वत्थल्यनिटो नित्यम्। (7.2.61)

क्रादिनियमादिटि प्राप्तेज्जन्तानां तासौ नित्यानिटां थलि प्रतिषेधो विधीयते। `पाता' इत्यादि। लुडुपन्यासस्तासौ नित्यानिट्त्वप्रदर्शनार्थः'; अनिट्त्वं [`अनिट्प्रतिषेधात्'--इत्येव मुद्रितः पाठः] च `एकाचः' (7.2.10) इत्यादिनेट् प्रतषेधात्।

`लूत्वा, लुलविथ' इति। तास्वदिति वचनादिह न भवति प्रतिषेधः। तस्मिंस्वनुच्यमान[`तस्मिंसत्वनुच्यमान इहापि प्रतिषेध स्यात्--भवति, लुनाति। किति नित्यमनिटः `श्रयुकः किति' इति प्रतिषेधात्'---इति मुद्रितः पाठः] इहापि प्रतिषेधः स्यात्। भवति लुनातिः किति नित्यमनिट्। `श्रयुकः किति' (7.2.11) इति प्रतिषेधात् `पपिव, पपिम' इति। `आतो लोप इटि च' (6.4.64) इत्याकारलोपः। `अनिङ्ग्रहणं नित्यमित्यनेन' इत्यादि। नित्यमित्यनेनानिट्त्वं धातोः कथं नाम विशेष्येतेत्येवमर्थमनिङ्ग्रहणमित्यर्थः। अथ सविता, लुलवथेति तासौ सेटस्थलौट्प्रतिषेधो मा भूदित्येवमर्थमनिड्ग्रहणं कस्मान्न भवति? नार्हत्येवमर्थं भवितुम्। तथा हि--तास्वत् थलीण्न भवतीत्युच्यते; न च यस्तासौ सेट् तस्य प्रतिषेधो भवंस्तास्वदिति व्यपदेष्टुं शक्यते, यो ह्यमिजभावस्थलि विधीयते तस्य तासाविडमावेनैव सादृश्यं वतिराचष्टे। एवं तु वतिग्रहणादेव तासौ सेटस्थलि प्रतिषेधो न भविष्यति; अन्यथा वतिना यत् सादृश्यं समाख्ययते तन्न स्यात्। तस्माद्युक्तमुक्तेमेवानिद्ग्रणस्य प्रयोजनम्। अथाक्रयमाणेऽनिङ्ग्रहणे नित्यमिति कस्य विशेषणं विज्ञायते? प्रतिषेधस्य। ननु च नित्य एव प्रतिषेधः प्रकृतः, तत्र यदि नित्यग्रहणे न प्रतिषेधो विशिष्येत, तदा नित्यग्रहणमनर्थकं स्यात्? नैतदस्ति; पूर्वसूत्रे प्रतिषेधस्यानित्यत्वं यथा स्यादित्येवमर्थं स्यात्। अवं च पूर्वसूत्रेण पक्ष इडागमः स्यादेव। तस्मात् पूर्वोक्तमेवानिड्ग्रहणस्य प्रयोजनम्। `तासौ विबाषितेट्' इति। स्वरत्यादिसूत्रेम (7.2.44) धूञ इङ् विकल्पितः। तस्य नित्यग्रहणाद्विभाषितेटस्थलि नित्यमिडागमो भवति। असति च नित्यग्रहणे प्रतिषेधः स्यादेव। पाक्षिकेणापीडभावेनानिङ्व्यपदेशो भवत्येव। तथा हि--गुहेर्विभाषितेटोऽपि `शल इगुपधादनिटः क्सः' (3.1.45) इति क्सो भवत्येव--अधुक्षदिति।

अथ वतिना निर्देशः किमर्थः, न तासावित्येवोच्येत? इत्यत आह--`तास्वत्' इत्यादि। असति वतिना निर्देशे योऽपि तासावसन् असत्त्वाच्च नित्यमनिट्, तस्यापि थलि प्रतिषेधः स्यात्। वतिना निर्देशे तु सति, वतेः सर्वसादृश्यार्थत्वाद्यथाभूतस्य तासाविण्न भवति तथाभूतस्यैव थल्पपीटा न भवितव्यमिति न भवत्येव दोषप्रसङ्गः। यदि हि यस्तासावसत् असत्त्वाच्च नित्यमनिट् तस्यापि थलि प्रतिषेधः स्यात्। एवं च सति तसावसत इडभावः, इतरत्र तु सत इति यथाभूतस्य तासादिडभावस्तथाभूतस्थापि थलि न स्यात्।

यो हि तासावसन्नसत्त्वाच्च नित्यमनिट्, तस्य थलि प्रतिषेदो न भवति--जघसिथेति--उत्तरसूत्रेणेत्यभिप्राय इत्यत आह--`उत्तरसूत्रेऽपि' इत्यादि। तदेवमुत्तरार्थो वतिना निर्देशोऽयं भवति। इह तु नार्थो वतिनिर्देशेन, अनजन्तत्वादेव घसेर्वयेश्च परतिषेधो न भवतीति। `जघसिथ' इति। `लिट्यन्यतरस्याम्' (2.4.4.0) इत्यदेर्घस्लादेशः। `उदयिथ' इति। `वेञो वयिः' (2.4.41) इति वयिरादेशः; `लिट्यभ्यासस्योभयेषाम्' (6.1.17) इति सम्प्रसरणम्। कस्मात् पूनर्घसेः, वयेश्च तासावसत्त्वान्नित्यानिट्त्वम्? इत्याह--`अदादेशो हि' इत्यादि। नास्तित्वं तयोः पुनस्तासावविधानाद्वेदितव्यम्।।

62. उपदेशेऽत्वतः। (7.2.62)

अनजन्तार्थोऽयमारम्भः। `इयष्ठ' [`इयष्ट' इति पदमञ्जरी] इति। पूर्ववदभ्यासस्य सम्प्रसारम्, व्रश्चादिसूत्रेण (8.2.36) षत्वम्, ष्टुत्वम्। `चकर्षिथ' इति। `कृष विलेखने' (धा.पा.990)। भवत्ययमकारवान्, न तूपदेशे, किं तर्हि? पश्चाद्गुणे कृते।

उपदेशग्रहमिह शक्यमकर्त्तुम्, शक्यत एव हि `एकाच उपदेशे' (7.2.10) इत्यत उपदेशग्रहणमनुवर्त्तयितुम्? तत् क्रियते विस्पष्टार्थम्। असति तस्मिन्, पूर्वसूत्रे तस्यानुपयोगान्निवृत्तिं मन्यमानः `तासावत्वतः' इत्येवमपि कश्चित् प्रतिपद्येत। `रराधिथ' इति। `राध साध संसिद्धौ' (धा.पा.1262,1263)।

`जिघृक्षति' इति। `सनि ग्रहगुहोश्च' (7.2.12) इतीट्प्रतिषेधाद्भवति नित्यानिट्, न तु तासौ, किं तर्हि? सचि।

`आनाञ्जथ' इति। `अन्जू `व्यक्तिभ्रक्षणादिषु' [`व्यक्तिमरषणकान्तिगतिषु'--धा.पा.] (धा.पा.1458)। `अत आदेः' (7.4.70) इत्यभ्यासस्य दीर्घः, `तस्मान्नुङ् द्विहलः' (7.4.71) नुट्, भवत्ययं धातुरुपदेशेऽकारवान्, न तु तासौ नित्यानिट्; स्वरत्यादिसूत्रेण (7.2.44) विकल्पितेट्कत्वात्।।

63. ऋतो भारद्वाजस्य। (7.2.63)

`सस्मर्थ' इति। `स्मृ चिन्तायाम्' (धा.पा.933) । `दध्वर्थ' इति। `ध्वृ हूर्छने' (धा.पा.939)।

ननु यद्यप्यकारान्तानां मद्ये वृङ्वृञावुदात्तौ तत्रापि वृङस्थल्न सम्भवत्येव, आत्मनेपदितत्वात्। वृञस्तु `ववर्थेति निगमे' (7.2.64) निपातनादभाषायामिटा भवितव्यमेव, तस्मात् तयोरिट्प्रतिषेधार्थमेतन्नोपपद्यते; ये त्वन्ये ऋकारान्ताः, तेषामनुदत्तत्वात् तासौ नित्यमनिट्त्वामिति `अचस्तास्वत् थल्यनिटो नित्यम्' (7.2.61) इतीट्प्रतिषेधः सिद्ध एव, परत्वाद्गुणे कृते रपरत्ये चानजन्तत्वान्न सिध्यतीत्येवमेतन्नाशङ्कनीयम्; उपदेशग्रहणस्य पुरस्तादनुकृष्टस्य `अचः' इत्यनेनाभिसम्भन्धात्; अथ वा--`अचः' इति विहितविशेषणा पञ्चमी, तत्रैवं विज्ञास्यामः--अजन्ताद्यो वहितस्थलिति, तस्मादचस्तास्वदित्यनेनैव ऋकारन्तेभ्यः प्रतिषेधः सिद्धः, तत्किमर्थोऽप्यमारम्भः? इत्याह--`सिद्धे सत्यारम्भो नियमार्थः' इति। `नान्येभ्यः' इति। के पुनस्ते? य ऋकारान्तादन्येऽजन्ताः, अनजन्ताश्चोपदेशेऽत्वन्तः। अथैवं कस्मान्नियमो न विज्ञायते--ऋतो भारद्वाज्यैव, नान्येषामाचार्याणामिति? एवं मन्यते--पूर्वसूत्रादयोऽत्वत इति चनुवर्त्तते, तदनुवृत्तेरेतदेव प्रयोजनम्--अनेन नियमेन सन्निधानात् तस्यैवाजन्तस्यानुवृत्तस्यात्वतश्च प्रकृतस्य धातोः। तथा च तदनुवृत्तिरपार्थिका स्यात्। तस्मावृत एव भारद्वाजस्येत्ययमेव नियमो विज्ञायत इत्याह--`तत्' इत्यादि। तदिति हेतौ। यस्मादेवंविधोऽत्र नियमः--तस्मादृत एव भारद्वाजस्य प्रतिषेधो भवति, नान्येभ्यो

धातुभ्य ति। तेन यद्यपि पूर्वयोगाभ्यां नित्यमिट्प्रतिषेधः कृतः, तथां च सामर्थ्यात् पूर्वयोगयोरयं विकल्पो भवति। यद्यपि तत्र वाग्रहणम्, आचर्यग्रहणं च क्रियते, तथाप्यर्थाल्लभ्यते।
अथ तपरकरणं किमर्थम्, न `उर्भारद्वाजस्य' इत्येवोच्येत? इत्याह--`तपरकरणम्' इत्यादि। यदि ह्युरित्येवोच्येत, ततोऽण् सवर्णान् गृह्णातीति ऋकारान्तानामपि ग्रहणं स्यात्। ततस्तन्निवृत्यर्थं तपरकरणम्। किं पुनः स्याद्यद्युकारान्तानां ग्रहणं न स्यात्? इत्यत आह--`तथा हि' इत्यादि। तथेत्येवमर्थे। हिशब्दो यस्मादर्ये। एवं यस्मात् तपरकरणमन्तरेणापि ऋकारानातानां ग्रहणे सति विध्यर्थमेतत् सम्भाव्येत। असति हि विधेये नियमो भवति। ऋकारान्तानां ग्रहणे सति तेषामेव प्रतिषेधो विधेयः स्यात्, न हि तेषां पूर्वेण प्रतिषेधः सिद्धः। सर्वेषामृकारान्तानां तासौ नित्यम्; सेट्त्वात् । तपरकरणे तु सति तकारेण दीर्घनिवृत्तौ कृतायां विधेयताभावान्नियमोऽयं सम्पद्यते।।

64. बभूथाततन्थजगृभ्मववर्थेति निगमे। (7.2.64)
बभूथेत्यादौ सर्वत्र क्रादिनियमादिटः प्राप्तस्याभावो निपात्यते। `बभूथ' इति। `भवतेरः' (7.4.73) इत्यभ्यासस्याकारस्यात्वम्। `बभूविथ' इति। `भुवो वुग्लुङ्लिटोः' (6.4.88) इति वुक्। `आततन्थ' इति। `तनु विस्तारे' (धा.पा.1463), आङ्पूर्वः। `अतेनिथ' इति। `थलि च सेटि' (6.4.121) इत्येत्त्वाभ्यासलोपौ। `जगृभ्म' इति। `भुवो वुग्लुङ्लिटोः' (6.488) इति वुक्। `आततन्थ' इति। `तनु विस्तारे' (धा.पा.1463), आङ्पूर्वः। `अतेनिथ' इति। `थलि च सेटि' (6.4.121) इत्येत्त्वाभ्यासलोपौ। `जगृभ्म' इति। ग्रहेर्लिट्, `परस्मैपदानाम्' (3.4.82) इत्यादिना मसो मादेशः, `ग्रहिज्या' (6.1.16) इति सूत्रेण सम्प्रसारणम्। `ववपर्थ' इति। `वृञ् वदणे' (धा.पा.1254)।।

65. विभाषा सृजिद्दशोः। (7.2.65)
`सुज विसर्गे' (धा.पा.1414), `दृशिर् प्रेक्षणे' (धा.पा.988)--अनयोः क्रादिनियमादिटि नित्यं प्राप्ते विकल्पार्थ वचनम्। `सस्रष्ठ, दद्रष्ठ' इति। व्रश्चादिना (8.2.36) षत्वम्, `सृजिदृशोर्झल्यमकिति' (6.1.58) इत्वम्।।

66. इडत्त्यर्त्तिव्ययतीनाम्। (7.2.66)
`आदिथ, आरिथ' इति। `अद भक्षणे' (धा.पा.1011), `ऋ गतो' (धा.पा.1098)। `अत आदेः' (7.4.70) इत्यभ्यासस्य दीर्घः। `विष्ययिथ' इति। `व्येञ् संवरणे' (धा.पा.1007), लिट्यभ्यासत्योभयेषाम्' (6.1.17) इति सम्प्रसारणम्। कस्मात् पुनरत्र व्येञः `आदेच उपदेशे' (6.1.45) इत्यात्त्वं न भवति? इत्याह--`व्येञो न व्यो लिटि इत्यादि। `अर्त्तेरपि नित्यं प्रतिषेधः' इति। `ऋतो भारद्वाजस्य' (7.2.63) इत्यनेन।
`अत्रेङ्ग्रणं विस्पष्टार्थम्' इति। ननु च नित्यमिडागमो यथा स्यादित्येवमर्थमिङ्ग्रहणं स्यात्, न हीङ्ग्रहणमन्तरेणायं शक्यत इड्विधिर्नित्यो विज्ञातम्? इत्याह--`विकल्पवधाने हि' इत्यादि। अनेन हि विकल्पस्यानन्तरस्य वा विधानं क्रियते, पूर्वपरकृतस्य वा नित्यप्रतिषेधस्य? शक्यते ह्यसावपि मण्डूकप्लुतिन्यायेनानुवर्त्तयुतम्। तत्र यदि पूर्वको विकल्पस्तदाऽर्त्तिव्ययतिग्रहणमनर्थकं स्यात्; `उपदेशेऽत्वतः' (7.2.62) इत्यनेनैव विकल्पस्य सिद्धत्वात्। अथेतरः, एवं सत्यर्त्तिग्रहणमनर्थकं स्यात्; `ऋतो भारद्वाजस्यैव' (7.2.63) इत्यनेनैव प्रतिषेधस्य सिद्धत्वात्। यत एवं न विकल्पस्य विधानमुपपद्यते तेन नापि प्रतिषेधस्य। अस्मादन्तरेणापीङ्ग्रहणं नित्योऽयमिड्विधिरिति शक्यते विज्ञातुम्। प्रतिपत्तिगौरवं पुनरेवं विज्ञायमाने स्यादिति विस्पष्टार्थमिङ्ग्रहणं क्रियते।।

67. वस्वेकाजाद्घसाम्। (7.2.67)
`कृतद्विर्वचनानां धातूनामेकाचाम्' इति। कुत एतदवसितम्? एकाज्ग्रहणसामर्थ्यात्। न हि कश्चिदकृते द्विर्वचनेऽनेकाजस्ति, यन्निवृत्त्यर्थमेकान्ग्रहणं क्रियते। ननु च जागर्त्तिरस्ति, अतस्तन्निवृत्त्यर्थ तत् स्यात्? नैतदस्ति; न ह्येकमूदाहरणं प्रति योगारम्भं प्रयोजयति। यद्येतत् प्रयोजनं स्यात्, `जाग्रो न' इत्येवं ब्रूयात्। तदाप्ययमर्थः--प्रतिपत्तिगौरवं परिहृतं भवति। ननु चोर्णोतेर्निवृत्त्यर्थमपि स्यात्? नैतत्; उक्तं हि प्राक्--`वाच्यऊर्णोर्णुवद्भावः' (कारिका.7.2.11) इति। तस्माद्युक्तमुक्तम्--कृतद्विर्वचनानां धातूनामेकाचामिति। `आदिवान्,आशिवान्' इति। `अद भक्षणे' (धा.पा.1011), `अश भोजने' (धा.पा.1523)। लिटः `क्वसुश्च' (3.2.107) इति क्वसुः, द्विर्वचनम्, अभ्यासकार्थञ्च, `अत आदेः (7.4.70) इति दीर्घत्वम्। सवर्णदीर्घत्वम्, इट्, `उगिदचम्' (7.2.70) इति नुम्, `सान्तमहतः' (6.4.10) इत्यादिना दीर्घः, हल्ङ्यादि-(6.1.68)संयोगान्तलोपौ (8.2.23)। `पेचिवन्, शोकिवान्' इति। `अत एकहल्मध्ये' (6.4.120) इत्यादिनैत्त्वाभ्यासलोपौ। `धात्वभ्यासयोरेकादेशे कृते' इत्यादि। ननु च षाष्ठिके द्विर्षचनविधौ `द्विष्प्रयोगो द्विर्वचनम्' इत्येव पक्षो वृत्तिकारेणाश्रितः, एवं चाकृते दात्वभ्यासयोरेकदेशेऽकृतयोरपि चैत्वाभ्यासलोपयोः कृतद्विर्वचना अप्येत एकाचो भवन्ति। स्थाने द्विर्वचने हि शब्दान्तरमनेकाजतिदिश्यत इति स्यादेषां कृतद्विर्वचनानामनेकाच्त्वम्, न तु द्विष्प्रयोगे द्विर्वचने; तत्र हि स एव धातुर्द्विरुच्यते, न चासौ शतकृत्वोऽप्युच्चार्यमाण एकाच्त्वं जहाति, किंपुनर्द्विरुच्यमानः, तत् क्रिमुच्यते--धात्वभ्यासयोरेकादेश एत्वाभ्यासलोपयोश्च कृतयोः कृतद्विर्वचना एत एकाचो भवन्तीति? आवृत्तिकृतमेकाचो बेदमाश्रित्यैवमुक्तमित्यदोषः। भवति हि धर्मभेदादपि धर्मिणो भेदव्यवहारः? तथा हि, वक्तारो वदन्ति--परुद्भावान् पटुरासीत्, पटुतरश्चैषमः, पटुतमः परारि, सोऽन्य एवासि संवृत्त इति। अथ वा--स्थाने द्विर्वचनपक्षोऽपि तत्राश्रितः, द्विष्प्रयोगश्च द्विर्वचनमिति कृत्वा। चकारात् स्थाने

द्विर्वचनमपीति स्थाने द्विर्वचनपक्षस्यापि तत्र सूचनात्। ये तु तत्पक्षभाविनो दोषस्ते तत्र प्रतिविहिता एव। `तस्थिवान्' इति। `शर्पूर्वाः खयः' (7.4.61) इति ख्यः शेषः; `अतो लोप इटि च' (6.4.64) इत्याकारलोपः। `जक्षिवान्' इति। पूर्ववददेर्घस्लादेशः, इट् `गमहन' (6.4.98) इत्यादिनोपधालोपः, `कुहोश्चुः' (7.4.62) इति चुत्वम्--धकारस्य झकारः, `अभ्यासे चर्च्च' (8.4.54) इति झकारस्य जकारः। परस्य धकारस्य `खरि च' (8.4.55) इति चर्त्वम्--ककारः, `शासिवसि' (8.3.60) इत्यादिना षत्वम्।

ननु चात्र क्रादिनियमादिडागमः सिद्ध एव, तत् किमर्थोऽयमारम्भः? इत्याह--`सिद्धे' इत्यादि। `क्रादिनियमात् प्रसक्तः' इत्यादिना `सिद्धे सत्यारम्भो नियमार्थः' (कात.प.59) इत्येतदेव स्पष्टीकरोति। `प्रसक्तः' इति। प्राप्त इत्यर्थः। `नियम्यते' इति। धात्वन्तरेभ्यो व्यावर्त्त्येकाजादिष्वेव व्यवस्थाप्यत इत्यर्थः।

अथाद्ग्रहणं किमर्थम्, यावताऽकारान्ता अप्यतो लोपे कृते कृतद्विर्वचना एकाचो भवन्त्येव, तत्रैकाज्ग्रहणेनैव सिद्धम्? इत्याह--`आद्ग्रहणमनेकाज्ग्रहणार्थम्' इति। कथं पुनस्तेषामनेकाच्त्वम्? इत्यत आह--`द्विर्वचने' इत्यादि। इण्निमित्तत्वादाकारलोपस्येटि सति तेषामाकारलोपेन भवितव्यम्, नासति, अतो यावदिण्न क्रियते तावदाकारलोपाभावात् कृतद्विर्वचना एतेऽनेकाच इत्यसत्याद्ग्रहणे [`इत्यसत्यादिग्रहणे'--इति मुद्रितः पाठः] तेषां ग्रहणं न स्यात्। तस्मादनेकाजर्थमाद्ग्रहणं कर्त्तव्यम्।

यद्येवम्, दरिद्रातेरपीट् प्रसज्येत? इत्यत आह--`दरिद्रातेस्तु' इत्यादि। दरिद्रातेः क्वसो सम्भव एव नास्ति, यतः `कास्यनेकान्ग्रहणम्' (वा.305) इति वचनाद्दरिद्रातेरामा भवितव्यम्, तस्मिंश्च सति `आमः' (2.4.81) इति लेर्लुका भवितव्यम् तत्कुतोऽयमिट्प्रसङ्गः! `दरिद्राञ्चकर' इति। `कृञ्चानुप्रयुज्यते' (3.1.40) इति लिट्परस्य कृञोऽनुप्रयोगः। अभ्युपगम्यपि दरिद्रातेरामोऽभावं परीहारान्तरमाह--`अथाप्याम्न क्रियते' इत्यादि। आकारान्तानां धातूनामिहेड्विधीयते। दरद्रातेरार्धधातुके `लोपः सिद्धश्च प्रत्ययविधौ' इति वचनात् प्रागेव प्रत्ययोत्पत्तेराकारो लुप्त इतीडागमोऽस्मान्निमित्ताभावान्न भवति। क्रियतां नामाद्ग्रहणम्, घसिग्रहणं न कर्त्तव्यमिति, अस्य द्विर्वचने कृते `घसिभसोहंलि च' (6.4.100) इत्युपधालोपे कृते चैकाच इत्येवं सिद्ध इडागमः? इत्याह--`घसेरपि' इत्यादि। `अनच्कत्वात्' इति। द्विर्वचनाभावहेतुः। एकाचो द्विर्वचनमुच्यते; `एकाचः' (6.1.1) इत्यधिकारात्। तस्मादुपधालोपे कृतेऽनच्कत्वान्न द्विर्वचनं स्यात्, ततश्च जक्षिवानिति न सिध्यतीत्यभिप्रायः। अथ क्रियमाणेऽपि घसिग्रहणे कस्मादेव दोषो व भवति? इत्याह--`क्रियमाणे' [`नास्ति काशिकायाम्। पदमञ्जर्यां तु `क्रियमाणे तु' इति प्रतीकमुपलभ्यते] इत्यादि। सुबोधम्।।

68. विभाषा गमहनविदविशाम्। (7.2.68)

पूर्वस्मान्नियमाद्गमादीनामिङ् न भवतीति विभाषेयमारभ्यते। `जग्मिवान्' इति। परत्वादिट् ततः `गमहन' (6.4.98) इत्यादिनोपधालोपः, ततो द्विर्वचनम्। `जघन्वानिति, जध्निवान' इति। `अभ्यासाच्च' (7.3.55) इति कुत्वम्--हकारस्य घकारः। `लाभार्थस्य' इति। `विद्लृ लाभे' (धा.पा.1432) इत्यस्य। `न ज्ञानार्थस्य' इति। `विद ज्ञाने' (धा.पा.1064) इत्यस्य। `विद सत्तायाम्' (धा.पा.1171), `विद विचारणे' (धा.पा.1450)--इत्येतयोश्चात्मनेपदित्वादात्मनेपदेषु क्वसुर्न भवतीत्यनुपन्यासः।

`दृशेश्च' इत्यादि। `वृशिर् प्रेक्षणे' (धा.पा.988) इत्यस्माच्च परे क्वसोरिडागमो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`विभाषा' इति योगविभागः क्रियते, तेन दृशेरपि भविष्यतीति। न चैवं सति `गमहनविदविशाम्' इत्यस्यानर्थक्यम्; पूर्वयोगस्यासर्ववषयत्वसूचनात्। एवं ह्यतिप्रसङ्गः परिहृतो भवति।।

69. सनिंससनिवांसम्। (7.2.69)

`सनोतेः' इति। `षणु दाने' (धा.पा.1464) इत्यस्य सनिंपूर्वस्य द्वितीयान्तस्योच्चारणेन नियता मानुपूर्वीमुपलक्षयति। यत्रैषानुपूर्वी नियता तत्रैव यथा स्यात्। इयं चानुपूर्वीं छन्दस्यैव नियतेति तद्विषयमेवैतन्निपानं विज्ञायते। अत एव वृत्तिकृता छान्दसः प्रयोगो दर्शितः। `सेनिवांसम्' इति। पूर्ववदेत्त्वाभ्याम्यासलोपौ। `वस्वेका जाद्धसाम्' (7.2.67) इतीट्।।

70. ऋद्धनोः स्ये। (7.2.70)

विभाषेति निवृत्तम्। ऋकारान्तानां हन्तेश्चानुदात्तत्वात् `एकाचः' (7.2.10) इत्यादिना प्रतिषिद्धस्येदः स्ये विधानार्थमेतत्। अथ स्वरतेः स्वरत्यादिसूत्रेण (7.2.44) पक्ष इट् अथानेन नित्यमित्याह--`स्वरतेः' स्ये विधानार्थमेतत्। अथ स्वरतेः स्वरत्यादिसूत्रेण (7.2.44) पक्ष इट्, अथानेन नित्यामित्याह--`स्वरतेः' इत्यादि। स्वरतेर्धातोर्यत् स्वरत्यादि(7.2.44)सूत्रेण वेट्त्वं विहितं तस्मादनेन स्ये ऋकारान्तेभ्यो विधीयमानं नित्येट्त्वं भवति विप्रतिषधेन। अञ्चार्थः स्वरत्यादिसूत्र उक्तेऽपि विस्मरणशीलानामनुग्रहाय पुनरिहोच्यते।

अथ तपरकरणं किमर्थम्? दीर्घाणां मा भूदिति चेत्? नैतदस्ति; उदात्तत्वाद्धि तेषां भवितव्यमेवेटा। एवं तर्ह्यसति तपरकरणे यथा `स्मिपूङ्रञ्ज्वशां सनि' (7.2.74) इत्यत्र स्वरत्यादिसाहचर्यात् `ऋः' इत्येतस्य धातोर्ग्रहणम्, तथेहापि हन्तिना साहचार्यात् `ऋ' इत्येतस्य धातोर्ग्रहणं स्यात्। तपरत्वे तु सति वर्णग्रहणमेतद्विज्ञायते। वर्णनिर्देशे हि तपरत्वं प्रसिद्धम्। वर्णग्रहणे च वर्णग्रहणानि सर्वत्र तदन्तविधिं प्रयोजयन्तीति ऋकारान्तानामिट सिद्धो भवति।।

71. अञ्जेः सिचि। (7.2.71)
`अन्जू व्यक्तिम्रक्षणकान्तिगतिषु' [`व्यक्तिमर्षणकान्तिगतिषु--धा.पा.] (धा.पा.1458)। ऊदित्त्वादत्र स्वरत्यादिसूत्रेण (7.2.44) विकल्पे प्राप्ते नित्यार्थ वचनम्। `आञ्जीत्' इति। `इतश्च' (3.4.1001) इतीकारलोपः, `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट् `इट ईटि' (8.2.28) इति सिचो लोपः, `आडजादीनाम्' (6.4.72) इत्याट् `आटश्च' (6.1.90) इति वृद्धिः। `आञ्जिष्टाम्' इति। `तस्थस्थमिपाम्' (3.4.1010)इति झेर्जुस्।।

72. स्तुसुधूञ्भ्यः परस्मैपदेषु। (7.2.72)
`ष्टुञ् स्तुतौ' (धा.पा.1043), `षुञ् अभिषवे' (धा.पा.1247)--अनयोरनुदात्तत्वात् प्रतिषेधे प्राप्ते, धूञस्तु स्वरत्यादिसुत्रेण (7.2.44) विकल्पे प्राप्ते सतीदमारभ्यते।।

73. यमरमनमातं सक् च। (7.2.73)
`यम उपरमे' (धा.पा.984), `रमु क्रीडायाम्' (धा.पा.853), `णम प्रह्वत्वे शब्दे च' (धा.पा.981)। आकारान्ताः `या प्रापणे' (धा.पा.1049) इत्येवमादयः। सर्वेषामनुदत्तत्वादिट्प्रतिषेधे प्राप्तेऽयमारम्भः। अत्र षष्ठीनिर्देशाद्यमादीनां सग्भवति, इट् पुनरार्धधातुकाधिकारात् सिच एव। `व्यरंसीत्' इति। `व्याङ्परिभ्यो रमः' (1.3.83) इति परस्मैपदम्।
द्विवचनबहुवचनयोर्युक्तमुदाहरणम्; अस्ति हि तत्र सगिटोः श्रुतौ विशेषः; एकवचनस्य त्वयुक्तम्, विशेषाभावात्--इति यो वेशयेत्, तं प्रति तत्रापि वृद्धिप्रतिषेधो विशेषोऽस्तीति दर्शयितुमाह--`यमादीनाम्' इत्यादि। `आयंस्त' [`अयंस्त'--काशिका, पदमञ्जयमिपि--`आयंस्त' इत्येव प्रतीकीद्धारः] इति। `आङो यमहनः' (1.3.28) इत्यात्मनेपदम्। `अरंस्त' इति। अत्रापि `अनुदात्त' (1.3.12) इत्यादिना।।

74. स्मिपूङ्रञ्ज्वशां सनि। (7.2.74)
`ष्मिङ् ईषद्धसने' (धा.पा.948), `पूङ् पवने' (धा.पा.966)। अनुबन्धोच्चारणंपूञ्निवृत्त्यर्थम्। `ऋ गतिप्रापणयोः' (दा.पा.936) इति भ्वादिः, `ऋ गतौ' (धा.पा.1098) इति जुहोत्यादिः--उभयोरपि ग्रहणम्; विशेषानुपादनात्। ऋकारान्तानां त्वेतद्ग्रहणं न भवति; उत्तरत्र किरत्यादीनामिटो विधानात्। `अन्जू म्रक्षणे' [`व्यक्तिमर्षणकान्तिगतिषु--धा.पा.] (धा.पा.1458), `अशू व्याप्तौ'[`व्याप्तौ संधे च'--धा.पा.] (धा.पा.1264)। `अश भोजने' (धा.पा.1523) इत्यस्य ग्रहणं न भवति; उदात्तत्वादेवेट् सिद्ध इति। तत्राञ्जेरशेश्चोदित्त्वाद्विकल्पे प्राप्ते, शेषाणां तूगन्तत्वात् `सनिग्रहगुहोश्च' (7.2.12) इति प्रतिषेधे प्राप्त इदमारभ्यते। `सिस्मियिषते' इति। `पूर्ववत्सनः' (1.3.62) इत्यात्मनेपदम्। `पिपविषते' इति। `ओः पुयण्ज्यपरे' (7.4.80) इत्याभ्यासस्येत्त्वम्। `अरिरिषति' इति। इटि सति गुणे कृतेऽजादेर्द्वितीयस्यैकाचो द्विर्वचनम्। `अञ्जिजिषति इति `अशिशिषति' [`अशिशिषते'--काशिका। नास्ति--मुद्रितग्रन्थे] इति। अञ्जेर्नकारो न द्विरुच्यते; `न न्द्राः संयोगादयः' (6.1.3) इति निषेधात्।।

75. किरश्च पञ्चभ्यः। (7.2.75)
`कॄ विक्षेपे' (धा.पा.1409), `गॄ निगरणे' (धा.पा.1410), `दृङ् अनादरे' (धा.पा.1411), `धृङ् अनवस्थाने' [`अवस्थाने--धा.पा.](धा.पा.1412), `प्रच्छ ज्ञीपसायाम्' (धा.पा.1413)। अत्रान्त्यस्यानुदात्तत्वादिट्प्रतिषेधे प्राप्ते, दृङ्धृङोरुगन्तत्वात् `सनि ग्रहगुहोश्च' (7.2.12) इति निषेधे प्राप्ते, इतरयोस्तु वृत्तिकारप्रदर्शितविकल्पे प्राप्ते सतीदमारभ्यते। `पिपृच्छिषति' इति। `रुदविद' (1.2.8) इत्यादिना सनः कित्त्वम्, `ग्रहिज्या' (6.1.16) इत्यादिना सम्प्रसारणम्, `छे च' (6.1.73)। इति तुक्, `उरत्' (7.4.66) इत्यभ्यासस्यात्त्वम्, पूर्ववदित्त्वम्। `सिसृक्षति' इति। `सृज विसर्गे' (धा.पा.1178)। पञ्चग्रहणादस्येण्न भवति। सामान्यलक्षणोऽपीण्न भवत्येव; `एकाचः' (7.2.10) इति प्रतषेधात्। `हलन्ताच्च' (1.2.10) इति कित्त्वम्, `चोः कुः' (8.2.30) इति कुत्वम्, व्रश्चादिसूत्रेण (8.2.66) षत्वम्, `षढोः कः सि' (8.2.41) इति कत्वम्। `वृतो वेत्यस्य दीर्घत्वं नेच्छन्ति' इति। कथं पुनरिष्यमाणमपि न भवति? व्यवस्थिविभाषाविज्ञानात्। `अस्य' इति। एतत्सूत्रविहितस्येटः।।

76. रुदादिभ्यः सार्वधातुके। (7.2.76)
`रुदिर् अश्रुविमोचने' (धा.पा.1067), `ञि ष्वप् शये' (धा.पा.1068), `श्वस प्राणने' (धा.पा.1069), `अन च' (धा.पा.1070), `जक्ष अदने'[`भक्षहसनयोः--धा.पा.] (धा.पा.1071)। रुदादयोऽदादिषु पठ्यन्ते। `उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' (शाक.प.97) इति `रुदादिभ्यः' इत्येषा पञ्चमी `सार्वधातुके' इत्यस्याः सप्तम्याः षष्ठीत्वं प्रकल्पयति। सप्तमीनिर्देशस्तदूत्तरार्थः। तेन सार्वधातुकस्य वलादेरिड् विज्ञायत इत्यत आह--`रुदादिभ्यः पञ्चभ्यः' इत्यादि। `प्राणिति' इति। `अनितेः' (8.4.19) इति णत्वम्। `स्वप्ता' इति। सार्वधातुकग्रहणादार्धधातुकस्येण्न भवति। सामान्यलक्षण इण्न भवत्येव; `एकाचः' (7.2.10) इति प्रतिषेधात्। अन्येभ्यस्तु रुदादिभ्य उदात्तत्वादार्थधातुकस्यापीटा भवितव्यमेवेति स्वपेरेव प्रत्युदाहरणम्।।

77. ईशः से। (7.2.77)
`से' इति। `सुपां सुलुक्' (7.1.39) इति षष्ठ्या लकं कृत्वाऽविभक्तिकोऽयं निर्द्देशः। `ईशिषे' इति। `ईश ऐश्वर्ये' (धा.पा.1020), लट्
अनुदात्तेत्वादात्मनेपदम्, `थासः सेट (3.4.80), अदादित्वाच्छपो लुक्। `ईशिष्व' इति। लोट्, से, `सवभ्यां वामौ' (3.4.91) इति वादेशे कृते
`एकदेशविकृतमनन्य वद्भवति' (व्या.प.16) इतीहापि भवति।।

78. ईडजनोर्ध्वे च। (7.2.78)
`ध्वे' इति। पूर्ववदेवाविभक्तिकोऽयं निर्द्देशः। `ईडिध्वे' इति। `ईड स्तुतौ' (धा.पा.1019), पूर्ववदात्मनेपदम्, पूर्ववच्छपो लुक्। `ईडिध्वम्' इति। लोट्,
`सवाभ्यां वामौ' (3.4.91) इत्यमादेशः। `जनिष्वम्' इति। पूर्वदातमनेपदम्। छान्दसत्वाच्छ्यनी लृक् `बहुलं छन्दसि' (3.2.88) इत्यनेन।
`उपधालोपाभावश्च' इति। `गमहन' (6.4.98) इत्यादिनोपधालोपः प्राप्नोति, तदभावश्छाब्दसत्वादेव, `सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पु.प.वृ.56)
इति।
`जन जनन इत्यस्य' इत्यादि। ननु सानुबन्धकत्वादस्यैव[`चानुबन्धकत्वात्'--मुद्रितः पाठः।] ग्रहणेन भवितव्यम्, न पूर्वस्य, उच्चारणार्थोऽकारः, नानुबन्धः?
नैष दोषः; इह हि लध्वक्षरत्वाज्जनशब्दस्य पूर्वनिपाते प्राप्ते परनिपातो लक्षणव्यभिचाराय। तेन निरनुबन्धकपरिभाषाया (व्या.प.53) इहानुपस्थानादुभयोरपि
ग्रहणं भवति। `व्यतिजज्ञिध्वम्' इति। `कर्त्तरि कर्मव्यतीहारे' (1.3.14) इति आत्मनेपदम्।
`तत्र' इत्यादि। तत्रैवं सूत्रपाठे `यस्मिन् विधिस्तदावावल्ग्रहणे' (व्या.प.127) इति सकारग्रहणे सकारादेः सेशब्दस्य ग्रहणम्। स च सकारादिशब्दः
सार्वधातुकसंज्ञाकः सेशब्द एव सम्भवति; अन्यस्याऽसम्भवात्। ननु च स्वशब्दोऽपि सम्भवति? नैतदेवम्; एकदेशविकृतस्यानन्यत्वात् (व्या.प.16) सोऽपि
सेशब्द एव, अतस्तद्ग्रहणेनापि भवितव्यम्।
`ये तु `ईडजनोर्ध्ये च' इति। सूत्रं पठन्ति, ते `ईशः स' (7.2.77) इत्यस्यैव योगस्यानुकर्वणार्थ चकारं कुर्वन्ति। तेनेशेरपि ध्वेशब्द इडागमो भवति। यदि
तर्हीशेरपि ध्व इडागम इष्यते, तदा `ईशीडजनां सेध्वयोः' इत्येकमेव सूत्रं कस्मान्न पठन्ति, एवं पृथग्विभक्तिर्नोच्चारयितव्या, चकारश्च न कर्त्तव्यो भवति?
इत्याह--`विचित्रा सूत्रस्य' इत्यादि।
`ध्व इति कृतटेरेत्त्वस्य' इत्यादि। कृतटेरेत्त्वस्यैतदेव प्रयोजनम्--यत्र टेरेत्त्वं कृतं तत्रैव यथा स्यात्। न च लङि टेरेत्तवमसिति, अतस्तत्रेटा न भवितव्यम्।
यद्येवम्, लोट्यपि न भवितव्यम्, अमादेशे कृते टेरेत्त्वस्याभावात्? इत्याह--`लोटि पुनः' इत्यादि।।

79. लिङः सलोपोऽनन्त्यस्य। (7.2.79)
`सार्वधातुके यो लिङ्' इति। `सार्वधातुके' (7.2.76) इत्येषात्र निर्धारणे सप्तमी, जातावेकवचनम्, यथा `कारके' (1.4.23) इति। अथ वा--सुब्व्यत्ययेन
बहुवचनस्य परसङ्ग एकवचनम्। परसप्तमीत्येषा न न भवति--सार्वधातुके परतः; पूर्वस्य लिङोऽसम्भवात्। `कुर्यात्' इति। विध्यादिसूत्रेम (3.3.161)
लिङ्, यासुट्, `इतश्च' (3.4.100) इतीकारलोपः, धातोर्गुणः, रपरत्वे `अत उत् सार्वधातुके' (6.4.110) (3.4.108), `उस्यपदान्तात्' (6.1.96)
इति पररूपत्वम्। `कुर्वीत' इति। उकारस्य यणादेशः। `कुर्वीरन्' इति। `झस्य रन्' (3.4.105)।
`कुर्युः' कुर्याः' इति। अत्रानन्त्यग्रहणाज्जुसः सिपश्च न भवति।
`क्रियास्ताम्, क्रियासुः' इति। आशिषि लिङ् (3.3.173), `रिङ्शयग्लिङ्क्षु' (7.4.28) इति रिङादेशः। सार्वधातुकग्रहणादार्धधातुके न भवति।
आर्धधातुकत्वं च `लिङाशिषि' (3.4.116) इत्यार्धधातुकसंज्ञाविधानात्। `कृषीष्ट, ह्रषीष्ट' इति। `उश्च' (1.2.12) इति कित्त्वम्, गुणाभावः।।

80. अतो येयः। (7.2.80)
सार्वधातुकं यत् प्रकृतं तदर्थादिह विभक्तिविपरिणामेन षष्ठ्यन्तं प्रतिपद्यते। अत एवाह--`अकारान्तादङ्गादुत्तरस्य सार्वधातुकस्य' इति। `पचेत' [`पठेत्'--
इति प्राचीनमुद्रितः पाठः] इति। इयादेशे कृतेऽकारेण सह `आद्गुणः' (6.1.87), `लोपो व्योर्वलि' (6.1.66) इति यकारलोपः। `चिनुयात्' इति।
`स्वादिभ्यः श्नुः' (3.1.73) `यायात्' इति। अदादित्वाच्छपो लुक्। `चिकीर्ष्यात्' इति। सनन्तादाशिषि लिङ्।
`ननु चातो लोपेनात्र भवितव्यम्' इति। नार्थोऽनुवृत्तेन सार्वदातुकग्रहणेनेत्यभिप्रायः। `पचेदित्यत्रापि' इत्यादि। यद्यपि पचेदितोदमस्योदाहरणमभिमतम्,
तत्रापि `अतो दीर्गो यञि' (7.2.101) इति दीर्घत्वेन भवितव्यमिति, ततश्च सर्वविषयस्य विध्यन्तरेणावष्टब्धत्वादनवकाशोऽयमियादेशः। तस्मादवश्यमनेन
विध्यन्तरं बाधितव्यम्। एवञ्च यथा दीर्घस्यायं बाधकः, तथाऽतो लोपस्यापि स्यात्। तस्मात् सार्वधातुकग्रहणमनुवर्त्तयितन्यमिति भावः। `स्यादेतदेवम्'
इत्यादि। यदि च दीर्घत्वं `तुरुस्तुन्नम्यमः सार्वधातुके' (7.3.95) इत्यतः सार्वधातुकग्रहणमनुवर्त्य विधीयते, ततश्च स्यादेतदेवं यदुक्तवानसि;
इयादेशस्यानवकाशत्वात्। अथ `भूसुवोस्तिङि' (7.3.88) इति तिङ्ग्रहणमनुवर्त्त्य विधीयते, तदा तिङ्मात्रमभावि दीर्घत्वमिति लिङ् विधीयमान इत्यादेशे
नाप्राप्ते तस्मिन्नयमारभ्यते, ततश्च `येन नाप्राप्ति' (व्या.प.49) न्यायेन तस्यैव बाधको भवति, न त्वतो लोपस्य। इयोऽतो लोपे प्राप्ते चाप्राप्तेऽयमारभ्यते।
आर्धधातुके हि प्राप्ते सार्वधातुके त्वप्राप्ते।

अथ येय इति कोऽयं निर्द्देशः, अत्र हि `या' इत्येष यः स्थानी तत्र षष्ठ्यां कृतायामतो या अस् इय इति स्थिते `आतो लोपः' (6.4.48) इति `आतः `धातोः' (6.4.140) इति योगविभागाद्वा आकारलोपे कृते `ससजुषोः' (8.2.66) इति षष्ठीसकारस्य रुत्वे कृते त्सय `भोभयोअघोअपूर्वस्य योऽशि' (8.3.17) इति यकारः। तस्यापि `लोपः शाकस्यस्य' (8.3.19) इति लोपे च `य इयः' इति निर्द्देशेन भवितव्यमिति, न तु यत इति। न ह्यत्राद्गुणो भवितुमुत्सहते; `पूर्वत्रासिद्धम्' (8.2.1) इति यलोपस्यासिद्धत्वात्? इत्यत आह--`येय इत्यविभक्तिकोऽयं निर्द्देशः' इति। येय इत्यस्मिन् स्थान्यादेशसमुदयेन `या' इति। योऽयं निर्द्देशः सोऽविभक्तिकः; `सुपां सुलुक्' (7.1.39) इति विभक्तेर्लुप्तत्वात्। अङ्गीकृत्य च सविभक्तिकत्वं निर्देशस्य परीहारान्तरमाह--`यः' इति। `वा' इत्यादि। कथं पुन लोपस्यासिद्धत्वं शक्यमनाश्रयितुम्? इत्यत्राह--`सौत्रोऽयं निर्देशः' इति। इतिकरणो हेतौ। यस्मात् `सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पु.प.वु.56) इति `छन्दोवत् सूत्राणि भवन्ति' (म.भा) इति, तस्मात्, सौत्रत्वादस्य निर्द्देशस्यासिद्धत्वमनाश्रित्य `आद्गुणः' (6.1.87) कृतः। इत्यादेशेऽकार उच्चारणार्थः।।

81. आतो ङितः। (7.2.81)

`आतः', `ङितः' इति व्यधिकरणे षष्ठ्यौ। आत इयादेशापेक्षया स्थाने षष्ठीति। ङित इति आकारापेक्षयावयवषष्ठी' ङितो ह्यकारमात्रस्यासम्भवात्। ङित इत्येषोऽवचवयोगे षष्ठो विज्ञायते--ङिदवयस्येति ङकार इद्यस्य स ङित्, तस्यावयवो ङिदवयवः। `पचेते' पचेथे' इति। लट्, स्वरितेत्त्वादात्मनेपदम्, आतामथाम्, `सार्वधातुकमपित्' (1.2. 4) इति ङित्त्वम्। `पचोताम्, पचेथाम्' इति। लोट्, टेरेत्त्वे (3.4.79) कृते `आमेतः' (3.4.90) इत्याम्। ननु च ङिदवयवोऽत्राकारो न भवति, यस्माद्गाङकुटादिसूत्रे (1.2.1) ङितीव ङिद्वदित्येवमर्वोऽङ्गौक्रियते, तथा `सार्वधातुकमपित्' (1.2.4) इत्यत्राप्ययमर्थः, तथा ह्यस्मिन्नपि योगे तदेव ङिद्ग्रहणमनुवर्त्तते, तस्मिंश्चार्थेऽङ्गीक्रियमाणे ङिति यत्कार्यं तदपि हि सार्वधातुके परतः पूर्वस्य लक्ष्यते, न तु तस्यैवापित्सार्वधातुकस्यङित्वम्? इत्याह--`सार्वधातुकमपिदित्यत्र' इत्यादि। `पूर्वसूत्र एव' इति। गाङ्कुटादिसूत्रे (1.2.1) यद्येवमङ्गीक्रियते--गाङ्कुटादिभ्यः परो योऽञ्णित्प्रत्ययोऽसौ ङिदवद्भवतीति, तदा कुटादिभ्यः परस्य सनो ङित्त्वं भवति, ङित्त्वे सति `अनुदात्तङितः' (1.3.12) इत्यादिनाऽऽत्मनेदपं स्यात्, ततश्चोच्चुकुटिपतीति न सिध्येत्। तस्मादेतत्सिध्यर्थं ङितीय ङिद्वदित्यङ्गीक्रियते। `सार्वधातुकमपित् (1.2.4) इत्यत्र तु तत् सार्वधातुकं ङिद्भवतीत्येषोऽर्थोऽङ्गीक्रियते। तस्माद्युक्तमेवाकारस्य ङिदवयवत्वम्। `पचन्ते, यजन्ते' इति। `भवत्यत्र [`भवत्यङिदवयवो'--मुद्रितपाठः] ङिदवयवोऽत्तादेशस्याकारः, तथाप्यात इति वचनात्र भवति। `पचावहै, पचामहै' इति। लोट् वहिमहिङौ। आडुत्तमस्य पिच्च' (3.4.92) इत्याट्, उत्तमश्च पिद्भवतीति। अत्र पित्त्वान्ङित्त्वं न भवतीति आतो ङिददयवाकारो न भवति।
`मिमाते, मिमाथे' इति। `माङ माने' [`माने शब्दे च'--धा.पा.] (धा.पा.1088), जुहोत्यादित्वाच्छपः श्लुः। `श्लौ' (6.1.10) इति द्विर्वचनम्, `भृञायित्' (7.4.76) इत्यभ्यासस्येत्त्वम्, `श्नाभ्यस्तयोरातः' (6.4.112) इत्याकारलोपः।।

82. आने मुक्। (7.2.82)

`अङ्गस्यातः' इति। व्याधिकरणे षष्ठ्यो--आङ्गस्य योऽत् तसय मुगगमो भवतीति। तदिहाद्ग्रहणं तर्हि क्रियताम्? न कर्त्तव्यम्; `अतो येयः' (7.2.80) इत्यतोऽत इत्यनुवर्त्तिष्यते। ननु च पञ्चमीनिर्दिष्टं तत्र, षष्ठीनिर्दिष्टेन चेहार्थः? नैतदस्ति; अत इत्येषा तु पञ्चमी तत्रेयादेशे चरितार्था, `आने' इत्येषा तु सप्तम्यकृतार्था। तस्मादान इत्येषा सप्तम्यत इत्यस्याः पञ्चमी तत्रेपादेशे चरतार्था, `आने इत्येषा तु सप्तम्यकृतार्था। तस्मादान इत्येषा सप्तम्यत इत्यस्याः पञ्चम्याः षष्ठीत्वं परिकल्पबयिष्यति, `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इति नियमात्। ननु चाकारोवर्णो मकारोऽपि वर्ण एव, मुगयं त्वन्तलिङ्गः, अन्तश्चावयवः, न च वर्णो `वर्णस्यावयवो [`वर्णस्यावयवी--मुद्रित पाठः] युज्यते, तेनानारब्धत्वात्, तस्मादयुक्तमुक्तम्--अतो मुगागमो भवतति? नैष दोषः; सर्वत्रैव हि यस्यागमो विधीयते, यश्चागमो विधीयते तत्समुदायापेक्षयाऽऽदित्वमन्तत्वं वा विधीयते। तस्मादत्तो मुगागमो भवतीत्यस्यार्थोऽयं विवक्षितः--अकारादिरयं समुदायो सकारान्तश्च भवतीति। `पचमानः' इति। लट्, तस्य शानच्।
आने परतोऽह्गस्यातो मुगागमो भवतीत्युक्ते समानाधिकरणे एते षष्ठ्याविति मन्यमानोऽकारान्तस्य आने परतो मुगगगमो भवतीतीदं सूत्रार्थ गृहीत्वा य एवं देशयेत्--यद्यकारान्तमङ्गमागमि, पचमान इत्यत्र `अदुपदेशाल्लसार्वधातुकमनुदात्तम्' (6.1.186) इत्यनुदात्तत्वं न स्यात्; अकारस्य मुका व्यवहितत्वात्। अकारो य उपदेश इत्येवं हि ततर व्यवस्थितम्, न त्वकारान्तोऽयमुपदेश इति। न च शक्यते वक्तुम्--अङ्गभक्तोऽयं नुक्, अतो नास्ति व्यवदानमिति; अङ्गभक्तो ह्ययमङ्गमेव न व्यवदध्यात्, अकारं तु व्यवदधात्येव। अवयवो हि समुदायस्य व्यवधायको न भवति। अवयवान्तरस्य तु व्यवधायको भवत्येवेत्यत आह--`अकारमात्रभक्तो ह्ययम्' इत्यादि। मात्रशब्दोऽयमङ्गभक्तत्वव्यवच्छेदाय। अङ्गञ्चात्राकारविशेषणम्। अकार एवागमी, नाङ्गम्। तस्मात् तदभक्तत्वात् तदग्रहणेनैव मुग् गृहयत इति व्यवधानाभावाल्लसार्वधातुकमनुदत्तं भवति। ननु चाकारान्तभक्तेऽपि मुकि भवितव्यमेव `लसार्वधातुकमनुदात्तमहन्विङोः' (6.1.186) इत्यनुदात्तत्वेन, `स्वरविधौ व्यञ्जनमविद्यमानवत्' (व्या.प.37) इति मुकोऽविद्यमानवत्त्वाद्व्यवधानाभावात्? एवं मन्यते--नैषा परिभाषा भाष्यकारस्य सम्मता। तथा हि--तेनेमां परिबाषां प्रत्याख्यायेयमन्या परिभाषा गृहीता--`हलःस्वरप्राप्तौ [`हल्स्वरप्राप्तौ--नी.प.वृ] व्यञ्जनमविद्यमानवत्' (नी.पा.वृ.68), इति। न चात्र हलः स्वरप्रापतिरस्ति, किं तर्हि? अचः। `यद्येवम्' इत्यादि। यद्यकारभक्तोऽय मुकं तद्ग्रहहणेन गृह्य इत्येवं स्त्यव्यवधायकत्वादेव तस्य पचमान इत्यत्राकारादनन्तरस्यान इति, तस्य `आतो ङितः' (7.2.81) इतीयदेशः प्राप्नोतीत्यत आत--

`तपरकरणनिर्देशान्न भवति' इति। अकारो ह्यत्र मात्राकालस्तपरो निरदिष्टो मुकि सतयर्धमात्रो भवति। अतः कालभेदान्न भविष्यति। अधिकमर्द्ध यस्याः साऽध्यर्द्धा, अध्यर्द्धा मात्रा यस्या सोऽद्यर्द्धमात्रः। लसार्वधातुकमनुदात्तमपि तर्हि न प्राप्नोतीति तद्विधावपि तपरनिर्देशात्। `उपदेशग्रहणम्' इत्यादि। उपदेशग्रहण तत्र क्रियते प्रागवस्थोपलश्रणार्थम्। तेन उपदेशावस्थायां मात्राकालस्तस्य यद्यप्युत्तरकालं मुकि कृते कालभेदोऽस्ति, तथापयुपदेशावस्थायां मात्राकालत्वाद्भवत्येवात्रानुदात्तत्वम्। `तथा च' इत्यादि। यतस्तत्रोपदेशादूर्ध्वं सत्यपि कालभेदेऽनुदात्तत्वेन भवितव्यम्, एवञ्च कृत्वा यत्रापि `अतो दीर्घो यञि' (7.3.101) इति दीर्घत्वे कृते कालभेदोऽस्ति--पचाव इत्यादौ, तत्रापि भवति।।

83. ईदासः। (7.2.83)

`आसः' इति पञ्चम्यकृतार्था `आने' (7.2.82) इति पूर्वत्र कृतार्थायाः सप्तम्याः षष्ठीत्वं प्रकल्पयिष्यति; `तस्मादित्युत्तरस्य' (1.1.67) इति वचनात्। तेनानस्यैवायमादेशो विधीयते, इत्याह--`आस उत्तरस्यानशब्दस्य' इति। `आसीनः' इति। `आस उपवेशने' (धा.पा.1021)। अनुदात्तेत्त्वादात्मनेपदम्; `आदेः परस्य' (1.1.54) इत्याकारस्येकारः। अदादित्वाच्छयो लुक्। तपरकरणं मुखसुखार्थम्।।

84. अष्टन आ विभक्तौ। (7.2.84)

`आ इति व्यक्तिनिर्देशोऽयम्' इति। शुद्धाया निरनुनासिकाया आकारस्य व्यक्तेरेव निर्देश इत्यर्थः। अथाकृतिनिर्देशे को दोषः स्यात्, यतस्तत्परीहारार्थो व्यक्तिनिर्देशोऽयमाश्रितः? इत्यत आह--`आकृतिनिर्देशे हि' इत्यादि। जातिरिहाकृतिर्विवक्षिता, न तु संस्थानम्। जातिनिर्देशे सति शुद्धाया जातेर्निर्देष्टुमशक्यत्वात् तदाधारभूतासु व्यक्तिषु कार्यं विज्ञायते। तत्र यदीह जातिनिर्देश आश्रीयेत, तदा सर्वास्वकारव्यक्तिषु जात्यावारत्वमुपगतासु `अलोऽन्त्यस्य' (1.1.52) इति नकारस्य विधोपमान आकार आन्तरतम्यादनुनासिकस्य स्थानेऽनुनासिक एव स्यात्। व्यक्तिनिर्देशे त्वेष दोषो न भवति; इत्यादि न सिध्यति, न ह्यत्र विकल्पाभिधायि वचनमस्ति, नपि प्रकृतम्? इत्यत आह--`विकल्पेन' इत्यादि। `अष्टनो दीर्घात्' (6.1.172) इत्यनेनाष्टनी दीर्घादसर्वनामस्थानाविभक्तेरुदात्तत्वं विधीयते। यदि च नित्यमात्त्वं स्यात्, दीर्घादिति विशेषणं निरर्थकं स्यात्। अष्टाभ्य औश्' (7.1.21)इत्यत्र च कृतात्त्वस्य निर्देशोऽनर्थकः स्यात्। व्यवच्छेद्याभावदष्टन इत्येवं ब्रूयात्। तस्मादीर्घग्रहेन कृतात्त्वनिर्देशेन विकल्पेनेदमात्त्वं भवतीति ज्ञापितम्। तेनाष्टभिरित्याद्यपि पक्षे उपात्तः; एकवचननिर्देशात्। अन्यथा हि बह्वर्थत्वादष्टानामित्येवं ब्रूयात्। तस्मात् स्वरूपधानोयम्। तत्राङ्गे प्रकृतेऽनेन विशेष्यमाणे तदन्तविधिर्लभ्यते। विशेषणेन हि तदन्तविधिर्भतीत्युक्तम्। `प्रियाष्टा' [नेदमदाहरणं मूले दृश्यते] इति। `सर्वनामस्थाने' (6.4.8) इत्यादिना दीर्घः।।

85. रायो हलि। (7.2.85)

86. युष्मदस्मदोरनादेशे। (7.2.86)

`युष्मत्, अस्मत्' इति। `पञ्चम्या अत्' (7.1.31) इति पञ्चमीभ्यसोऽदादेशः, `शेषे लोपः' (7.2.9) इत्यन्तलोपे कृते `अतो गुणे' (6.1.97) पररूपत्वम्।

यदि च हलीत्यधिकारादत्राप्यात्त्वं न स्यात्, तत् किमर्थमनादेशग्रहणम्? इत्याह--`उत्तरत्र तु' इत्यादि। उत्तरत्र `योऽचि' (7.2.89) इति सूत्रेऽनादेशस्य प्रयोजनमिति। यद्येवं तत्रैव कर्त्तव्यम्, इह किमर्थं क्रियते? विस्पष्टार्थमित्यभिप्रायः।।

87. द्वितीयायाञ्च। (7.2.87)

`त्वाम्, माम्' इति। `त्वमावेकवचने' (7.2.97) इति त्वमादेशौ। `युवाम्, आवाम्' इति। `यवावौ1 द्विवचने' (7.2.92) इति युवावादेशौ। सर्वत्र `ङे प्रथमपोरम्' (7.1.28) इत्यम्भावे विभक्तेः कृतोऽमि पूर्ववत्वम् (6.1.107)।।

88. प्रथमायाश्च द्विवचने भाषायाम्। (7.2.88)

इदमप्यादेशार्थं वचनम्। `युवयोः, आवयोः' इति। ननु च `योऽचि' (7.2.89) इति यत्वमत्र वाधकं भविष्यति? प्रथमाद्विवचनेऽपि तर्हि शेषेलोपो (7.2.90) बाधकः स्यात्। तत्र यथा वचनसामर्थ्याच्छेषेलोपोऽनेन बाध्यते, तथा यत्वमपि बाध्येत। `पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' (व्या.प.9) इति यत्वमपि बाध्येत। तस्मात् `प्रथमायाः' इति वक्तव्यम्। `त्वम् अहम्' इति। `त्वाहौ सौ' (7.2.94) त्वाहावादेशौ। `औ' इति वक्तव्ये प्रथमाया द्विवचनं वैचित्र्यार्थम्।।

89. योऽचि। (7.2.89)

`युष्मदस्मोदारमादेश इत्यत्र' इत्यादि। `युष्मदस्मदोरनादेशे' (7.2.86) इत्यत्र यदि पूर्वसूत्राद् (7.2.85) हल्ग्रहणमनुवर्त्तते, तदाऽविशेषेम विधीयमानं यत्वमुत्सर्गो ज्ञाप्यते। आत्वं तु विभक्तिविशेषे हलादौ विधीयमानमस्याप्यपवादः। एवं चाप्यन्तरेणाप्यज्ग्रहणम्, यकारोऽजादावेवावतिष्ठते,

तस्मदचीत्येच्छक्यमकर्त्तुम्? तत् क्रियते विस्पष्टार्थम्।
`स्वद् गच्छति, मद् गच्छति' इति। `एकवचनस्य च' (7.1.32) इति ङसेरदादेशः।।
90. शेषे लोपः। (7.2.90)
`यान्यद्विवचनानि' इति। एकवचनबहुवचनानीत्यर्थः। `अत्र' इति। पञ्चम्यादिषु विभक्तिषु। `तेषु लोपो विधीयते' इति। तेषामेव शेषत्वात्। `तुभ्यम्, मह्यम्' इति। `तुभ्यमह्यौ ङयि' (7.2.95) इति तुभ्यमह्यावादेशौ भवतः। `युष्मभ्यम्' अस्मभ्यम्' इति। `भ्यसो भ्यम्' (7.1.30) इति भ्यमादेशः। `तव, मम' इति। `तवममौ ङसि' (7.2.96) इति तवममादेशौ। `युष्माकम्, अस्माकम्' इति। `साम आकम्' (7.1.33) इति।
अथ शेषग्रहणं किमर्थम्, न `लोपः' इत्येवोच्येत, एवमुच्यमाने सत्यविशेषेण लोपः स्यादित्येतच्च नाशङ्कनीयम्, अविशेषेण हि लोपो विधीयमान उत्सर्गो भविष्यति, तस्यानादेशे विभक्तिविशेषे यकाराकारापवादौ, एवञ्चान्तरेणापि शेषग्रहणं शेष एव लोपोऽवस्थाप्यते? इत्यत आह--`शेषग्रहणं विस्पष्टार्थम्' इति। `शेषेलोपे कृते स्त्रियां टाप् कस्मान्न भवति' इति। अन्त्यलोपे कृते सत्यदन्तत्वात् `अजाद्यतष्टाप्' (4.1.4) इति टापा भवितव्यमिति भावः। `सन्निपात' इत्यादि। विभक्त्यानन्तर्ये हि सति युष्मदस्मदी अकारान्ते समुपजाते। तत्र यदि टापमुत्पादयेयाताम्, तदा विभक्तेरानन्तर्य ताभ्यां विहतं स्यात्। न च यो यत्सन्निपातलक्षणः स तद्विघातस्य निमित्तं भवतीति न भवति टाप्। यद्येवम्, त्यदादिभ्योऽपि न स्यात्? नैष दोषः; यदयम् `न यासयोः' (7.3.45) इति निर्देशं करोति, तज्ज्ञापयति--भवति त्यदादिभ्यष्टाविति। अयञ्च स्त्रीलिङ्गत्वं युष्मदस्मदोरभ्युपेत्य परीहार उक्तः। इदानीं स्त्रीलिङ्गाभावादेव टाब्न भवतीति दर्शयितुमाह--`अलिङ्गे' इत्यादि।
`केचित्तु शेषेलोपं टिलोपमिच्छन्ति' इति। त्वं ब्राह्मणी, अहं ब्राह्मणी--इत्यत्र टाब्मा भूदित्येवमर्थम्। युष्मभ्यम्, अस्मभ्यमित्यत्र भ्यमादेशे कृते `बहुवचने झल्येत्' (7.3.103) इत्येत्त्वं मा भूदित्येवमर्थञ्च। `कथम्' इति। एवं मन्यते--यत्र विभक्तावाकारो यकारश्च न विहितः स शेषः, तत्र शेषेलोप उचयमानष्टिलोपो न लभ्यते। `अलोऽन्त्यस्य' (1.1.52) इति परिभाषयाऽन्त्यस्यैव प्राप्नोतीति वक्ष्यमाणादेशापेक्षया शेष इत्यस्यार्थं `ते च' इत्यादिना स्पष्टीकरोति। `मपर्यन्ताद्योऽन्यः स शेषः' इति। स पुनष्टिरेव। अत्रायं शेषोलोपष्टिलोपो भवतीति लोपं प्रति शेषस्याधिकरणविवक्षायां सप्तमी। किमर्थं पुनर्लोप इत्युच्यते, यावता त्यदाद्यत्वेनैव सिद्धम्? न सिध्यति; अत्यदादित्वात्। त्यदादित्वं हि द्वपर्यन्तास्त्यदादयः' इति। तत्र चैतदेव शेषेलोपवचनं ज्ञापकम्। तेन भवच्छब्दस्य त्यदाद्यत्वं न भवति--भवानिति।।

91. मपर्यन्तस्य। (7.2.91)
`युवकाम्, आवकाम्' इति। `अव्ययसर्वनाम्नामकच्प्राक्टेः' (5.3.71) इत्यकच। अत्र यदि मपर्यन्तस्येति नोच्यते, ततोऽवधेरनुपादानात् साकच्कस्यापि स्यादित्यत आह--`साकच्कस्य सर्वस्य मा भूत्' इति। असति मपर्यन्तग्रहणे, अवधेरनुपादनादनेकाल्वाच्चादेशस्य सर्वस्यैव स्यात्। कः पुनः सर्वादेशे दोषः स्यात्? इत्यत आह--`तथा च' इत्यादि। `अनिष्टं रूपं स्यात्' इति। अकारस्य `योऽचि' (7.2.89) इति यकारे कृते त्व्या, म्या इति स्यात्।
मपर्यन्तग्रहणे तु सति युष्मदस्मदोर्मपर्यन्तस्य स्थानित्वेनाधिकृतत्वादस्यैव वक्ष्यमाणा आदेशा भवन्तीति न कश्चिद्दोष इति।
अथ परिग्रहणं किमर्थम्, न मान्तस्येत्येवोच्यतेत, एवमपि ह्युचयमानेऽन्तशब्दस्य समीपवचनत्वात् तद्गुणसंविज्ञानस्य बहुव्रीहेराश्रयणात् सिद्धमिष्टम्? इत्यत आह--`मान्तस्य' इत्यादि। एतस्मिन् साकच्कस्यादेशाभावे अथवैतस्मिन् युवकामावकामित्यादिके शब्दरूपे मान्तस्येत्येवं सिद्धं यत् परिग्रहणं कृतं तदवधिद्योतनार्थम्। युष्टदस्मदोरवयवसय स्थानिनोऽवधिद्योतनार्थम्। तस्मान्मान्ते युष्मच्छब्दे अस्मच्छब्दे च वक्ष्यमाणं कार्यं मा भूदित्येवमर्थम्। कदा? इत्यादि--`यदा ण्यन्तयोः' इत्यादि। तदाचष्ट इति युष्मदस्मद्भ्यां णिचि कृते `णाविष्ठवत् कार्यं प्रातपदिकस्य' (वा.813) इतीष्ठवद्भावाट्टिलोपः, ततः क्विप्, तत्र `णेरनिटि' (6.4.51) इति णिचो लोपे कृते यदा मान्तत्वं विद्यते युष्यदस्मदोस्तदा मा भूदिति। असत्यपि परिग्रहणे मान्स्येत्येन युष्मदस्मदोरित्ययवावस्थानं लभ्यते, ततश्च यत्र मान्ते युष्मदस्मदी, तत्रैव वक्ष्यमाणा आदेशा भवेयुः। परिग्रहणे त्ववधिद्योतनार्थे सति नियोगतो वर्ज्यमानेन भवितव्यम्; न हि तेन वनाऽवधिः सम्भवति। तत्र समुदायावयवस्थानीनिर्द्दिश्यते। यत्राच्छब्दो वर्जनीयोऽस्ति तत्रैव भविष्यति, न तु मान्तयोरयुष्मदस्मादोरेव। ननु च विभक्तिपरयोर्युष्मदस्मदोरादेशा विधास्यन्ते, न च मान्तवस्थायां विभक्तिपरतस्ति; णिलोपस्य स्थानिवद्भावात्, तत् किं मान्तस्य निवत्त्यर्थेन परिग्रहणेन? इत्याह--आह--`स्थानिवत्त्वं च' इत्यादि। `क्वौ लुप्ते न स्थानिवत्' (वा.1.1.58) इति वचनात् स्थानिवद्भावोऽत्र नास्ति। तस्माद्विद्यत एव विभक्तिपरत्वमित्यभिप्रायः।।

92. युवावौ द्विवचने। (7.2.92)
`द्विवचने' इति। यदीदं पारिभाषिकस्य दविवचनस्य ग्रहणं स्यात्, स्यात्, तदा तस्मिन् परत एव तावादेशो भवेताम्। तथा च यदा समासे द्व्यर्थे युष्मदस्मदी भवतः, समासार्थस्य त्वन्यसंख्यत्वादेकवचनं बहुवचनं वा समासाद्भवति, तदा न स्यातामिति; यदा युष्मदस्मदी एकत्वे वा बहुत्वे वा वर्त्तते समासार्थस्य द्वित्त्वे सति समासाद्द्ववचनं वति, तदा युवादौ स्यातामेव, एतच्चानिष्टम्' इति। द्वयोरर्थयर्वचनमुक्तिः=द्विवचनम्। `द्विवचने ये युष्मदस्मदी' इति। `द्विवचने' इति। विषयसपतमीयम्। तदेव विषयसप्मीत्वमस्या व्यक्तीकर्तुमाह--`द्व्यर्थाभिधानविषये' इति। `द्वयोरर्थयोरभिधानं द्व्यर्थाभिधानम्, तद्विषय ये युष्मदस्मदी ते तथोक्ते। `तयोः' इत्यादि। तयोर्युष्मदस्मदोर्मपर्यन्तावयवः स्थानी, तस्य युवावौ भवतः।

`यदा' इत्यादिनार्थग्रहणे सति यदिष्टं सिध्यति तद्दर्शयति। यदि तर्हि समासादेकवचनबहुवचनयोरुपजातयोर्द्व्यर्थाभिधानदिषयत्वाद्युष्मदस्मदोर्युवावौ भवतः, एवं सति `त्वाहौ सौ' (7.2.94), `यूयववौ जसि' (7.2.93), `तुभ्यमह्यौ ङपि' (7.2.95), `तदममौ ङसि' (7.2.96)--इत्येषामपि विषये स्याताम्? इत्यत आह--`यदि त्वाहौ सौ' इत्यादि। `अतियुवामत्यावाम्' इति। `आत्यादयः क्रान्ताद्यर्थे' (वा.91) इति प्रादिसमासः। तत्र योऽसौ युष्मदस्मदर्थञ्चातिक्रान्तः स एकसंख्यावच्छिन्नोऽर्थ इति तत्र यद्यप्येकवचनं भवति, तथापि द्व्यर्थाभिधानविषयत्वाद्युष्मदस्मदोर्युवावौ भवत एव। अत्र हि `द्वितीयायाञ्च' (7.2.87) इत्यात्त्वम्। `अतियुवान्, अत्यावान्' इति। `शसो न' (7.1.29) इति नत्वम्। `अत्यावया' इति। `योऽचि' (7.2.89) इति यत्वम्। `अतियुवाभिरत्यावाभिः' इति। `युष्मदस्मदोरनादेशे' (7.2.86) इत्यात्त्वम्। `अतियुवभ्यमत्यावभ्यम्' इति। `भ्यसो भ्यम्' (7.1.30)। `अतियुवदत्यावत्' इति। `एकवचनस्य च' (7.1.32) इति ङसेरदादेशः। बहुवचनस्य तु `पञ्चम्या अत्' (7.1.31) इत्यनेन। `अतियुदाकम्, अत्यावाकम्' इति। `साम आकम्' (7.1.30)। `अतियुवदत्यावत्' इति। `एकवचनस्य च' (7.1.32) इति ङसेरदादेशः। बहुवचनस्य तु `पञ्चम्या उत्' (7.1.31) इत्यनेन। `अतियुवाकम्, अत्यावाकम्' इति। `साम आकम्' (7.1.33) `अतियुवयि, अत्यादयि' इति। पूर्ववद्यत्वम्। `अतियुवासु अत्यावासु' इति। पूर्ववदात्त्वम्।

`त्वाहादीनां विषये' इत्यादिना यदुक्तं--`यदि त्वहौ (7.2.94) इत्यादिनाऽऽदेशान्तरेण न बाध्येते' इति, तद्विस्पष्टीकरोति--`यदा तु' इत्यादिना। अर्थग्रहणे सति यदिष्टमुपपद्यते तद्दर्शयति--`अतित्वामतमाम्' इति। अत्र यो युष्मदस्मदर्थावतिक्रान्तौ तौ द्विसंख्यौ समासार्थाविति समासाद्यद्यमि द्विवचनं भवति, तथापि युष्मदस्मदोर्द्व्यर्थता नास्तीति युवावौ न भवतः। त्वमावेव भक्तः। `प्रथमायाश्च द्विवचने भाषायाम्' (7.2.88) इत्यात्त्वम्। अथ वा--द्वितीयाद्विवचनमेतत्, ततः `द्वितीयायाञ्च' (7.2.87) इति। `एवसुन्नेयम्' इति। वचनान्तरेष्वप्यादेशाभावं दर्शयति। युष्मानतिक्रान्तौ पश्य अतियुष्माम्, अत्यस्माम्। अतिक्रान्ताभ्यां त्वां कृतमतित्वाभ्याम्, अतिमाभ्याम्। अतिक्रान्ताभ्यां युष्मान् कृतमतियुष्माभ्यां कृतम्। त्वामतिक्रान्ताभ्यां देहि अतित्वाभ्यां देहि, अतिमाभ्यां देहि। अतिक्रान्ताभ्यां युष्मान् देहि अतियुष्माभ्यामत्यस्माभ्यां देहि। अतिक्रान्ताभ्यां त्वामागतोऽतिस्याभ्यामागतः, अतिमाभ्यामागतः। अतिक्रान्तभ्यां युष्मानागतोऽतियुष्माभ्यामागतः, अत्यस्माभ्यामागतः। अतिक्रान्तयोस्त्वां स्वमतित्वयोः स्वम्, अतिमयोः स्वम्। युष्मानतिक्रान्तयोः स्वमतयुष्मयोः स्वम्, अत्यस्मयोः स्वम्। अतिक्रान्तयोस्त्वां निधेहि अतित्वयोर्निधेहि, अतिमयोर्निधेहि। अतिक्रान्तयोर्युष्मान्निधेहि, अतियुष्मयोर्निधेहि, अत्यस्मयोर्निदेहि।।

93. यूयवयौ जसि। (7.2.93)

`परमयूयम्' इति। `अङ्गाधिकारे तस्य च तदुत्तरपदस्य च' (पु.प.वृ.85) इति वचनादुत्तरपदयोरपि भवतः। अथ वा--`जसि' इति परसप्तमीयम्, तेन समस्तयोरपि जसि परत इति भवतः। परमयूयमित्यादावपि युष्मदस्मद्भ्यां जसः परत्वमस्त्येव।।

94. त्वाहौ सौ। (7.2.94)

`त्वमावेकवचने' (7.2.97) इति वक्ष्यति, तस्यायमपवादः। अथ त्वग्रहणं किमर्थम्, `अहः सौ' इत्येवोच्येत, त्वादेशो हि `त्वमावेकवचने' (7.2.97) इत्येवं भविष्यति? अशक्यमेवं वक्तुम्; असति त्वग्रहणे युष्मदोऽप्यहादेशः स्यात्। अथ वा--अत्र `अस्मदोऽहः सौ' इतेयवोच्येत? एवमपि गौरवं स्यात्। तस्माद्यथान्या समेवास्तु।।

95. तुभ्यमह्यौ ङयि। (7.2.95)

96. तवममौ ङसि। (7.2.96)

अनन्तरं वक्ष्यमाणयोस्त्वमयोः प्राप्तयोरिवं वचनम्।।

97. त्वमावेकवचने। (7.2.97)

`एकवचन इत्यर्थेनिर्देशः' इति। एतेनार्थस्येवं ग्रहणम्, न तु पारिभाषिकस्यैकवचनस्येति दर्शयति। पारिभाषिकस्य तु ग्रहणे यो दोषः स `युवाधौ द्विवचने' (7.2.92) इत्यत्रोक्त इत्यभिप्रायः। अर्थग्रहणं त्विह वचनग्रहणाल्लभ्यते। यदीह प्रत्ययग्रहणमभिमतं स्यात्, `एकत्वे' इत्येवं ब्रूयात्। विभक्ताविति वर्त्तते, तत्रैवमभिसम्बन्धः करिष्यते--एकत्वे या विभक्तिरिति। अथ वा--एतदिति न ब्रूयात्; एकवचने हि `प्रत्ययोत्तरपदयोश्च' (7.2.98) इत्येनेनैवादेशयोः सिद्धत्वात्। `त्वाम्, माम्' इति। `द्वितीयायाञ्च' (7.2.87) इत्यात्त्वम्।

`यदा समास एकार्थे' इत्यादिनाऽर्थग्रहणं सति यदिष्टं सिध्यति तद्दर्शयति। यदापि समासात् संख्यान्तरयुक्ताद्द्विवचनं बहुवचनं वा भवति, तदाप्येकार्थयोर्युष्मदस्मदोरेतावादेशो भवतः। एवं सति `त्वाहौ सौ' (7.2.94), `यूय्वयौ जसि' (7.2.93), `तुभ्यमह्यौ ङयि' (7.2.95), `तवममौ ङसि' (7.2.96)--इत्येषामप्यादेशान्तराणां विषयं स्यातामित्यत आह--`आदेशान्तराणां तु' इत्यादि। पूर्वविप्रतिषेधस्येति वचनं परस्य विप्रतिषेधस्यासम्भवात्। असम्भवस्त्वनयोरेव परत्वात्। पूर्वविप्रतिषेधस्तु परशब्दस्येष्टवाचित्वाल्लभ्यते। तत्र `त्वाहौ सौ' (7.2.94) इत्यस्यावकाशो यत्रैकार्थे युष्मदस्मदी न भवतः--अतिक्रान्तो युष्मानित्यतित्वमत्यहमिति, त्वमावेकवचन(7.2.97)स्यावकाशो यत्रैकार्थाभ्यां विभक्त्यन्तरं भवति--त्वाम्, मामिति;

अतिक्रान्तस्त्वामतित्वमतिक्रान्तो मामत्यहमित्यत्रोभयप्रसङ्गे प्राप्ते त्वहौ सौ भवतः पूर्वविप्रतिषेधेन। अन्या दिशाऽऽदेशान्तरेषु प्राप्तेषु पूर्वं विप्रतिषेधो वक्तव्यः। `अतिक्रान्तो त्वामतित्वाम्, अतिमाम्' इति। अत्र यद्यपि समासाद्द्विवचन भवति, तथाप्येकार्थे युष्मदस्मदी इति भवत एव त्वमादेशौ। पारिभाषिकस्य त्वेकवचनस्य ग्रहणे न स्याताम्; तस्येहाविद्यमानत्वात्। `एवमाद्युदाहर्त्तव्यम्' इति। अतिक्रान्तौ त्वां पश्यातित्वाम्, अतिमां पश्य। अतित्वाभिरतिमाभिः कृतम्। अतक्रान्ताभ्यां त्वां देह्यतित्वाभ्यामतिमाभ्यां देहि। अतिक्रान्तेभ्यस्त्वां देह्यतित्वभ्यमतिमभ्यं देहि। अतिक्रान्तयोस्त्वां त्वामागतोऽतित्वाभ्यामतिमाब्यामागतः। अतिक्रान्तेभ्यस्त्वामागतोऽतित्वदागतोऽतिमदागतः। अतिक्रान्तयोस्त्वां स्वमतित्वयोः स्वम्, अतिमयोः स्वम्। अतिक्रान्तानां त्वां स्वमतित्वाकं स्वम्, अतिमाकं स्वम्। अतिक्रान्तयोस्त्वां निधेह्यतित्वयोर्निधेहि, अतिमयोर्निधेहि। अतिक्रान्तेषु त्वां निधेह्यतित्वासु निधेहि, अतिमासु निधेहि।।

98. प्रत्ययोत्तरपदयोश्च। (7.2.98)

`एकवचने वर्त्तमानयोः' इति। एकार्थाभिधानविषयोयोरित्यर्थः। `त्वदीयः मदीयः' इति। `त्यदादीनि च' (1.1.74) इति वृद्धसंज्ञकत्वात् `वृद्धाच्छः' (4.2.114) इति च्छप्रत्ययः। `त्वत्तरः, मत्तरः' इति। `द्विवचनविभदज्योपपदे तरबीयसुनौ' (5.3.57) इति तरप्। `त्वद्यति, मद्यति' इति। `सुप आत्मनः क्यच्' (3.1.8)। `त्वद्यते, मद्यते' इति। `कर्त्तुः क्यङ सलोपश्च' (3.1.11) इति क्यङ।

ननु च पूर्वेणेवदेशौ सिद्धौ, तत् किमर्थोऽयमारम्बः? इत्यत आह--`विभक्तावित्यधिकारात्' इत्यादि।

`ननु च' इत्यादि देशकः। प्रकृतिप्रत्यययोः पूर्वोत्तरपदयोश्च या मर्ध्ये वर्त्तते साऽन्तर्वत्तिनी विभक्तिः। नैवं शक्यम्' इतीतरः। `लुका तस्य भवितव्यम्' इति, अश्यतायां हेतुः। `सुपो धातुप्रातिपदिकयोः' (2.4.71) इति प्रागेवादेशाभ्यां लुका भवितव्यमिति, ततश्च तन्निमित्तावादेशौ न स्यातामित्यभिप्रायः।

`बहिरङ्गो लुक्' इत्यादि देशकः। विभक्तिमात्रं ह्यादेशयोराश्रयः लुकस्तु धातुत्वं प्रातिपदिकत्वञ्चापरम्। तदेवं धातुप्रतिपदिकत्वे यथायोगं बाह्यप्रत्ययापेक्षत्वात् समासापेक्षत्वाच्च बहिरङ्गे किं पुनस्तदपेक्षया लुको बहिरङ्गता? `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इत्यादेशावेव प्रथमं भविष्यतः। `एतदेवेत्यादि' इतरोऽपि। `अन्तरङ्गानपि विथीन् बहिरङ्गो लुग्न बाधते' इति पूर्वेणैव सिद्धत्वाददेशवचनं न कुर्यात्, कृतञ्च, तदेव ज्ञापयति--`अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते' (व्या.प.128) इति। किमेतस्य ज्ञापकस्य प्रयोजनम्? इत्यत आह--`तेन' इत्यादि। यद्ययमर्थो न ज्ञाप्यते, तदा गोमान् प्रियोऽस्येति गोमत्प्रिय इत्यन्तरङ्गत्वाल्लुकः प्राक् `उगिदचाम्' (7.1.70) इति नुम् स्यात्, `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घत्वम्, ततश्च संयोगान्तलोपे (8.2.23) कृते गोमान्प्रिय इत्यनिष्टं रूपं प्रसज्येत। अस्मिन् हयर्थे ज्ञापिते, अन्तरङ्गमपि नुमादिकं बहिरङ्गेण लुका बाध्यत इति न भवत्येष दोषप्रसङ्गः। एकेनादिशब्देन गोमन्तमिच्छति गोमत्यति, गोमानिवाचरति गोमत्यते--इत्यादेर्ग्रहणम्। द्वितीयेन दीर्घत्वस्य हल्ङ्यादिलोपस्य (6.1.66)। यद्यन्तरङ्गत्वाद् हल्ङ्यादिलोपः (6.1.66) स्यात्, प्रत्ययलक्षणेन नुमादिकं स्यात्, ततश्च तदेवानिष्टं रूपं स्यात्। लुकि च सति `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणप्रतषेधान्न भवति।

`एवं च' इत्यादि। यत एवं बहिरङ्गोऽपि लुगन्तरङ्गानपि विधीन् बाधने, एवञ्च कृत्वा, `त्वाहौ सौ' (7.2.94), `यूयवयौ जसि' (7.2.93), `तुम्यमह्यौ ङयि' (7.2.95) `तवममौ ङसि' (7.2.96)--इत्येत आदेशाः प्रत्यय उत्तरपदे च परतो न भवन्तीति।

`अथ' इत्यादि। असति प्रयोजने ज्ञापकं भवति, अस्ति चास्यत् प्रयोजनम्--एवां त्वहटीनामादेशान्तराणां बाधनम्। सत्येतस्मिन् प्रयोजने, एतदर्थमेवेदं युक्तं विज्ञातुम्, न तु ज्ञापनार्थमिति भावः। `लक्ष्यस्थित्यपेक्षया' इति। लक्ष्यस्य व्युत्पाद्यस्य स्थितिः=स्थानं लक्ष्यस्थितिः, तद्विषयेऽपेक्षा=लक्ष्यस्थित्यपेक्षा; तथा हेतु भूतया। नेदमादेशान्तराणां बाधनार्थं विज्ञायते। गोमत्प्रियो गोमत्यतीत्येवमादिकं लक्ष्यं लोके साधुभावेनादस्थितम्। आदेशान्तरबाधनार्थे ह्येतस्मिन्' विज्ञायमाने न संगृहतं सायत्। ज्ञापनार्थे त्वेतदपि संगृहीतं भवतत्येतद्दर्शयति---`ज्ञापनार्थे ह्येतस्मिन्' इत्यादि। कथं पुनः सत्येवं प्रयोजने सत्यामपि लक्ष्यस्थित्यपेक्षायां ज्ञापकार्थमेतत् शक्यं विज्ञातुम्? एवं मन्यते--प्रयोजनमेवैतन्न भवति; मपर्यन्तग्रहणस्य चकारेणानुकर्षणार्थत्वात्। तदनुकर्षणस्यैतदेव प्रयोजनम्--मपर्यन्तयोरादेशौ यथा स्यातामिति। यदि चादेशान्तराणां बाधनार्थमेतत् स्यात्, अनुकर्षणं तस्यापार्थकं स्यात्। यद्बाधनार्थमेत् सूत्रं प्रकल्प्यते तान्यादेशान्तराणि मपर्यन्तस्यैव प्रयुक्तानि, नान्यस्य। ततश्चान्तरेणापि मपर्यन्तग्रहणानुवृत्तिमुत्सर्गसमानदेशत्वादपवादानां मपर्यन्तस्यैव भविष्यत इति किं मपर्यन्तस्येत्यनुवर्त्तनेन! आदेशान्तरामबाधनार्थे ह्येतस्मिन् सर्वादेशिवृत्त्यर्थं मपर्यन्तग्रहणमनुवर्त्तयितुं युक्तम्।

तस्मादेतस्मान्मपर्यन्तग्रहणानुवर्त्तनान्नादेशान्तरबाधनमस्य प्रयोजनम्। अतो ज्ञापकं विज्ञायते। ननु च किमर्थमेषां त्वाहादीनां बाधनार्थमेतन्न विज्ञायत इति परेण देशितम्। तस्यायमभिप्रायः--मपर्यन्तस्येतत्येतन्निवर्त्यादेशान्तरबाधनार्थमेतत् कस्मान्न भवतीति? तत्रायमर्थः--मपर्यन्तग्रहणस्यानुकर्षणार्थश्चकारो न कर्त्तव्यो भवति। मपर्यन्तग्रहणानुवृत्तावेतदादेशान्तरबाधनार्थं नोपपद्यते, तस्मिन्निवृत्तौ तूपपद्यत एव।।

99. त्रिचतुरीः स्त्रियां तुसृचतसृ। (7.2.99)

`त्रयः' इति। `जसि च' (7.3.109) इति गुणः। `चत्वारः' इति। `चतुरनडुहोरामुदात्तः' (7.1.98) इत्याम्।

`त्रीणि' इति। `जश्शसोः शिः' (7.1.20) इति शिभावः, `नपुंसकस्य झलचः' (7.1.72) नुम्, `नोपधायाः' (6.4.7), `सरवनामस्थाने चासम्बुद्धौ' (6.4.8) इति दीर्घः।

`स्त्रियामिति चैतत् त्रिचतुरोर्विशेषणम्' इति। तयोरेव श्रुतत्वात्। `नाङ्गस्य' इति। एवकारस्य व्यवच्छेद्यं दर्शयति--`तेन' इति। विशेषणविशेष्यभावेन। यदि

हि स्त्रियामित्यनेनाङ्गमेव विशेष्यते,[`विशेष्येत'--मुद्रितपाठः] ततो यदा त्रिचतुशब्दौ पुंसि नपुंसके वा वर्त्तेते, अङ्गं [`अङ्गे'--मुद्रितपाठः] तु स्त्रियाम्, तदाप्येतावादेशौ स्याताम्। `त्रिचतुरोः स्त्रियाम्' इत्यनेन विशेष्यमाणयोर्न भवतः।
`प्रियत्रिः' इत्यादि। स्त्रिया अन्यपदार्थत्वादङ्गं स्त्रियां वर्त्तते, त्रिचतुःशब्दौ लिङ्गान्तरे। यदा त्वङ्गं पुंसि नपुंसके वा वर्त्तते, त्रिचतुःशब्दौ तु स्त्रियाम्, तदा भवत एव। प्रियास्तिस्रो बाह्मण्योऽस्येति प्रियतिसा, प्रियतिस्रौ, प्रियतिस्नः। प्रियतिसृ ब्राह्मणकुलम्, प्रियतिसृणो, प्रियतिसृणि। प्रियचतसृ ब्राह्मणकुलम्, प्रियचतसृणी, प्रियचतसृणि।
`तिसृभावे' इत्यादि। त्रिशब्दात् संज्ञायां कन्' (5.3.87) इति कनि कृते विभक्त्यभावान्न प्राप्नोतीतीदमारभ्यते। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतपादनम्--पूर्वसूत्रादिह चकारोऽनवर्त्तते, स चानुक्तसमुच्चयार्थः। तेन संज्ञायां कन्यपि भविष्यति। `तिसृका' इति। ग्रामस्यैषा संज्ञा।
`चतसर्याद्युदात्तत्वनिपातनम्' इति। चतस्रः पश्येत्यत्र `चतुरः शसि' (6.1.167) इत्यन्तोदात्तत्वं प्राप्नोति, आद्युदात्तञ्चेष्यते, तदर्थमाद्युदात्तत्वनिपातनं कर्त्तव्यम्। निपातनस्वरेण बाधितत्वादन्तोदात्तत्वं मा भूदित्येवमर्थम्। यथैवं तर्हि निपातनस्वरः शसिस्वरं बाधते, तथा `षट्त्रिचतुर्भ्यो हलादिः' (6.1.179) इत्यमेन यदविभक्तेराद्युदात्तत्वं विधीयते तदपि बाधेत, ततश्चतसृणामित्यत्राम उदात्तत्वं न स्यत्? इत्यत आह--`चतसृणामित्यत्र तु' इत्यादि।
`हलादिग्रहणसामर्थ्यात्' इति। तत्रैवायं हेतुः। हलादिग्रहणं हि तत्राजादिनिवृत्त्यर्थ क्रियते। चतुःशब्दश्चायं हुवचनविषयः। सर्वाणि बहुवचानि प्रथमाद्वितीयाषष्ठीबहुवचनेभ्योऽन्यानि हलादीनि। तत्रामो नुमचिरतृज्वद्भावेभ्यो पूर्वविप्रतिषेधेन नुटि कृते भवितव्यमाद्युदात्तत्वेन; हलादितत्वात्। जसस्तु `अञ्जेश्छन्दस्यसर्वनामस्थानाम्' (6.1.170) इत्यतोऽसर्वनामस्थानग्रहणस्यानुवर्त्तमानत्वादाद्युदात्तत्वं [`ग्रहणानुवर्तमानत्वात्'--मुद्रितः पाठः] न भवति। तस्माच्छसो मा भूदित्येवमर्थं तत्र हलादिग्रहणं कृतम्। यदि च निपातनस्वरो न भविष्यति। तस्मान्मा भूद्धलादिग्रहणस्य वैयर्थ्यम्। इह हलादिग्रहमसमर्थ्याद्विभक्तिस्वरेण निपाततस्वरो बाध्यत इति, तेन चतसृणामित्यत्रान्तोदात्तत्वं भवति।।

100. अचि र ऋतः। (7.2.100)
किमर्थं पुनरचि रादेश उच्यते, न यणादेशेन सिद्धत्वात्? इत्यत आह--`पूर्वसवर्ण' इत्यादि। असति ह्येतस्मिन् सूत्रे शसि `प्रथमयोः पूर्वसवर्णः' (6.1.102) इति पूर्वसवर्णः स्यात्, `ङसिङसोश्च' (6.1.110) `ऋत उत्' (6.1.111) इत्युत्त्वञ्च, सर्वनामस्थाने ङौ च `ऋतो ङिसर्वनामस्थानयोः' (7.3.110) गुणः। तस्मादेतेषामपवादोऽयं रेफादेश आरभ्यते। ननु युक्तः पूर्वसवर्णस्योत्त्वस्य चेहायमपवादो रेफादेशः, गुणस्य त्वयुक्तः; यस्मात्, `मध्येपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' (व्या.प.10) इति? अत आह--`परमपि' इत्यादि। गुणस्यावकाशः--कर्त्तारौ, हर्त्तारौ, कर्त्तरीति; रेफस्यावकाशः--तिस्लः पश्येति, तिस्रस्तिष्ठन्तीति; प्रियतिस्रि निधेहीति। अत्रोभयप्रसङ्गे पूर्वविप्रतिषेधेन रेफो भवन् परमपि ङिसर्वनामस्थानगुणं बाधते।
`ऋत इति किम्' इति। एवं मन्यते--तिसृचतसृशब्दावहानुवर्त्तिष्येते। तौ च ऋकारान्तावेवेत्यलोऽन्त्यपरिभाषया (1.1.52) ऋत एव भविष्यति। तिसृचतस्लोः प्रतिपत्त्यर्थम्' इति। तिसृचतस--इत्येतयोरच्यपि परतस्त्रिचतुरोः स्थाने प्रतिपत्तिः=प्राप्तिर्यथा स्यादित्येवमर्थं `ऋतः' इत्युच्यम्। `अन्यथा हि' इत्यादि। यदि `ऋतः' इति नोच्येत, तदा तयोरेव तिसृचतस्रोरयमपवादो विज्ञायेत, ततश्चाजादौ तौ न स्याताम्।।

101. जराया जरसन्यतरस्याम्। (7.2.101)
`नुमो विधानाज्जरसदेशो भवति विप्रतषेधेन' इति। नुमोऽवकाशः--त्रपूणि जतूनि; जरसावेशस्यावकाशः--जरसौ; अतिजरांसि ब्राह्मणकुलानीतयत्रोभयप्रसह्गे विप्रतिषेधेन परो जरसादेशो भवति। यदि हि पूर्वं नुम् स्यात्, नुमा व्यवहितत्वाज्जरसादेशो न लभ्यते, तथापि विहितविशेषणपाश्रयणेन लभ्यते। एवमपि `निर्दिश्यमानस्यादेशा भवन्ति' (व्या.प.106) इति जराशब्दस्यादेशे कृते सकारत् परो नुम् श्रूयेत। [`श्रूयते' मुद्रित पाठः] अथापि समुस्कस्यादेशः स्यात्? एवमपि कृतकार्यत्वान्नुम्शास्त्रस्य पुनरप्रवृत्तेरादेशे कृते पुनर्नम्न स्यात्, तथानिष्टं रूपं प्रसज्येत।
अथेहातिजरसं ब्राह्मणकुलं पश्येति जरसादेशे कृते `स्वमोर्नपुंसकात्' (7.1.23) इति सुक्कस्मान्न भवति? इत्यत आह--`इह' इत्यादि। जरामतिक्रान्तमिति प्रादिसमासः, `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति ह्रस्वः, द्वितीयैकवचनमम् इति स्थित एकदेशविकृतस्यानन्यत्वात्(व्या.पा.16)कृतेऽपि ह्रस्वत्वे लुक्, अम्भावः, जरस्भावः--इत्येतानि त्रीणि कार्यामि युगपत् प्राप्नुवन्ति, तत्र लुगपवादत्वात् `अतोऽम्'(7.1.24) इत्यम्भावेन बाध्यते, अम्भावोऽपि परत्वाज्जरसादेशेन। अथ कृते जरसादेशे लुक् पुनः कस्मान्न भवति? इत्यत आह--`पुनर्लुक्शास्त्रम्' इत्यादि। न च लुक्शास्त्रं पुनः प्रवर्त्तते; भ्रष्टावसरत्वात्, तृतीयाबहुवचने किमतजरैर्ब्राह्मणकुलैरित्येवं भवितव्यम्; आहोसविदतिजरसम्, अतिजरसैरित्येवम्? इत्यत आह--`अतिजरसम्' इत्यादि।
`गोनर्द्दीयमतेन' इति। तथा हि भाष्ये उक्तम्--`गोदर्दीय आह--`इषटमेषैतत् संगृहीतं भवतीति--अतिजरमतिजरैतिति भवितव्यम्' इति। का पुनरस्य युक्तिः? इत्यत आह--`सन्निपातलक्षण' इत्यादि। यद्यम्भावः, ऐस्भावश्च जरसादेशस्य निमित्तमात्रं स्यात्, अकारान्तताऽङ्गस्य ताभ्यां विहता स्यात्। एतच्चायुक्तम्; तस्मन्निपाते हि तावभिनिर्वृत्तौ नोत्सहेते सां विहन्तुम्।
`अन्ये' इति। सूत्रकारमतानुसारिणः। कस्मात् पुनरस्त एवं मन्यन्ते? इत्यत आह--`अनित्यत्वादस्याः' इत्यादि। अनित्यत्वं पुनरस्याः--`अतो भिस ऐस्' (7.1.9) इत्यत्र प्रतिपादितम्।।

102. त्यदादीनामः। (7.2.102)
`स्यः' इति। `तदोः सः सावनन्त्ययोः' (7.2.106) इति तकारस्य सकारः। `त्यः' इति। `जसः सी' (7.1.17) इति शीभावः, `आद्गुणः' (6.1.87)। `इमौ' इति। `दश्च' (7.2.109) इति मत्वम्। `असौ' इति। `अदस औ सुलोपश्च' (7.2.107)। `अमू' इति। `अदसोऽसेर्दादु दो मः' 8.2.80) इति मत्वोत्वे, `प्रथमयोः पूर्वसवर्णः' (6.1.102) इति दीर्घः। `अमी' इति। `एत ईद्बहुवचने' (8.2.81) इतीत्त्वम्।
अथेह कस्मान्न भवति--भवानिति? अत आह--`द्विपर्यन्तानाम्' इत्यादि। एतच्च `शेषे लोपः' (7.2.90) इत्यत्र प्राग्वि ज्ञापितम्। `भवान्' इति। `उगिदचाम्' (7.1.70) इति नुम्, `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः।
अथेह संज्ञोपसर्जनीभूतानामपि कस्मान्न भवति त्याददौ--त्यद् अतिस्यद्, अतित्यदः? इत्यत आह--`संज्ञोपसरजनीभूताः' इत्यादि।
सर्वाद्यन्तःपातिनस्त्यदादयः। सर्वादयश्चासंज्ञीभूता अनुपसर्जनीभूतश्च पठ्यन्ते। तथा हि--तेषां `सर्वनामानि' (1.1.27) इति महत्याः संज्ञायाः करणस्यैतत् प्रयोजनम्--सर्वेषां नामभूतानां संज्ञा यथा स्यात्। ये तु कस्याचिदेव संज्ञाभूता उपसर्जनीभूताश्च, तेषां मा भूदिति। तस्मात् संज्ञोपसर्जनीभूतास्त्यदादयः पाठादेव पर्युदस्ताः, त्यदादिभ्यो बहिष्कृता इत्यर्थः। तस्मादत्यदादित्वात् तेषां न भवति त्यदादिकार्यम्। `त्यदादिप्रधाने शब्दे तु भवत्येव' इति। त्यदादयः प्रधाना यस्मिन् शब्दे स त्यदादिप्रधानः, तत्र भवत्येवात्त्वम्; तस्य पाठापदर्युदस्तत्वात्। अपर्युदस्तत्वं तु सर्वनामसंज्ञायस्तदन्तविधेः सर्वादेरभ्युपगमात्।।

103. किमः कः। (7.2.103)
अथाकार एव किमः कस्मान्न विधीयते, एवं हि लघु सूत्रं भवति, अकारो हि प्रकृतोऽनुवर्त्तत इति, तत्रैवं सुत्रं कर्त्तव्यम्, `किमोऽत्' इति? अत आह--`साकच्कस्यादेशो भवति' इति। तेनाकारः किमो न विधीयते' इति। अयं ह्यादेशः `तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' (व्या.पा.21) अकचश्च किम्ग्रहणेन ग्रहणात् साकच्कस्यापि भवति; तेनाकार एव किमः स्थाने न विधीयते। यदि हि विधीयेत, तदाऽनकच्कस्यादेशे कृते यश्चादकचि कक इत्यनिष्टं रूपं स्यादित्यभिप्रायः। कथं पुनः किमोऽत्त्वे कृते क इति भवति, यावता मकारस्यात्त्वे कृते सतकारस्य यणादेशे कृते क्य इति स्यात्? नैष दोष; इकारस्यापि ह्यत्त्वं विधीयते, यदिह पूर्वसूत्रात् `अः' इत्यनुवर्त्तते। नालोऽन्त्यस्यात्वं भवति यत् पुनरिहाकारग्रहणं क्रियते। तेन `अनन्त्यविकारेऽन्त्यसदेशस्य' (व्या.प.63) इतीकारसय, तत्र द्वयोरकारयोः परपूर्वत्वे क इति सिद्धम्।
क्यचित् पाठः `इमः' इति। तत्रायं पूर्वपक्षः--अथाकार एवेमः कस्मान्न विधीयते? लघु ह्येवं सूत्रं भवति; प्रकृतस्याकारस्येहानुवृत्तेः, तत्रैवं तावत् सूत्रं कर्त्तव्यम्--`इमः' इति। न चैवं सति `तिम ष्टिम आद्रीभावे' (धा.पा.1123,1124) इत्यस्य क्विबन्तस्य तीन्, तिमौ, तिम इत्यत्रापि प्रसज्येत, त्यदादिभिरिमो विशेषणात्--त्यदादीनां य इमिति? न; `दश्च' (7.2.109) इति मत्वे कृत इदम इमौ इम इत्यत्रापि प्रसज्येत। लक्षणप्रतिपदोक्तपरिभाषया (व्या.प.3) नापीम इत्युचयमाने `अलोऽन्त्यस्य'
(1.1.52) इति प्रसज्येतेत्याशङ्कनीयम्, यस्मान्नानर्थकेऽलोन्त्यविधिः (व्या.प.62)? इत्यत आह--`साकच्कस्यापि' इत्यादि। पूर्व एव पाठः साधुतरः। इतरत्र तु पाठ उत्तरसूत्रेण क्वादेश इमः कृते द्वयोः ककारयोश्च संयुक्तयोः श्रवणं प्रसज्येत, तच्चानिष्टम्।।

104. कु तिहोः। (7.2.104)
पूर्वस्यायमपवादः। तिशब्दस्य विभक्तेरभावादिकार उच्चारणार्थः। तकारस्यैव प्रयोजनम्। तत्र `यस्मिन्विधिस्तदादावल्ग्रहणे' (व्या.प.127) तकारादेशो विभक्तौ कार्यं विधीयते। अत आह--`तकारादौ' इत्यादि। `कुतः' इति। `पञ्चम्यास्तसिल्' (5.3.7)। `कुत्र' इति। `किमोऽत्' (5.3.12) इत्यत्र परसूत्राद्वाग्रहणं पुरस्तादपकृष्यते। तेन पक्षे `सप्तम्यास्त्रल्' (5.3.10) इति त्रल्यपि भवति। `कुह' इति। `वा ह च च्छब्दसि' (5.3.13) इति हः। एषाञ्च तसिलदीनां `प्राग्दिशो विभक्तिः' (5.3.1) इति विभक्तिसंज्ञा।।

105. क्वाति। (7.2.105)
कादेशस्यायमपवादः। `क्व' इति। `किमोऽत्' (5.3.12) इत्यत्।
अथ किमर्थमादेशान्तरं विधीयते, न प्रकृतः कु एव विधीयताम्, तत्रापि यणादेशो क्वेति सिध्यत्येव; योगविभागश्च न कर्त्तव्यो भवति, `कुतिहात्सु' इत्येको योगः करिष्यते? इत्यत आह--`आदेशान्तरवचनम्' इत्यादि। कुशब्दे ह्यादेशे सति यणादेशं बाधित्वा `ओर्गुणः' (6.4.146) इति गुणः स्यात्। तस्मात् तन्निवृत्त्यर्थं क्वादेश इत्युच्यते।
एवमपि प्रत्ययविधावेव `किमो ड्वत्' इति ड्वत्प्रत्ययो विधेयः, तत्रापि टिलोपे कृते क्वेति रूपं सिध्यत्येव। पदसंज्ञायां सत्यां `झलां जशोऽन्ते' (7.2.39) इति ककारस्य गकारः प्राप्नोतीत्यतो न सिध्यतीति चेत्? नैतदस्ति; `असिद्धं बहिरङ्गमन्तरङ्गे (व्या.प.42) इति टिलोपस्यासिद्धत्वाज्जश्त्वं न भवति। टिलोपो हि डिति विधीयते, तेन डितमपेक्षमाणो बहिरङ्गो भवति। जश्त्वं तु पदान्ते विधीयमानं नापरनिमित्तमपेक्षत इत्यन्तरङ्गमित्यत आह--`किमो ड्वदिति प्रत्ययान्तरम्' इत्यादि। यदि डवदिति प्रत्ययान्तरं विधीयेत, साकच्कस्य क्वेति रूपं न सिध्यति। असचि हि कृते ककिमिति स्थिते ड्वत्प्रत्यये परतष्टिलोपे सति कक्वेत्यनिष्टं रूपं स्यत्। अत्प्रत्यये तु क्वादेशो विधीयमानोऽनेकास्त्वात् साकच्कस्य सर्वादेश एव भवतीति न भवत्यनिष्टरूपप्रसङ्घः।

तस्मात् साकच्कार्थं ड्वदिति न प्रत्ययान्तरं विधीयते। साकच्कोऽर्थः प्रयोजनं यस्य तत् साकच्कार्थम्।।

106. तदीः सः सावनन्त्ययोः। (7.2.106)
`सै' इति। किमिदं प्रथमैकवचनस्य ग्रहणम्? उत सप्तमीबहुवचनस्य? आहोस्विदुभयोरपि? तत्र प्रथमैकवचनस्य ग्रहणम्। तथा हि--द्वयोरपि सामान्येन ग्रहणं न भवति। यदि स्यात्, सीर्त्येवं ब्रूयात्। एवं हि सकारादौ कार्यं विधीयमानं तयोर्द्वयोरपि भविष्यति। तस्मादन्यतरस्य ग्रहणम्। तथा हि--`स्यश्छन्दसि बहुलम्' (6.1.133) `सोऽचि लोपे चेत्' (6.1.134) इत्येवमादेर्निर्देशात् प्रथमैकवचनस्यैव ग्रहण युक्तम्।
`हे स, सा' इति। हे शब्दो निपातसमुदायोऽवधारणार्थे वर्त्तते। ननु च त्यदाद्यत्वमत्र बाधकं भविष्यति? नैतदस्ति; अनवकाशा हि विधयो बधका भवन्ति। सावकाशं चात्वम्। कोवकाशः? द्विशब्दः-द्वाविति। सत्यपि तस्मिन्नवकाशे यद्यपि सकरस्याप्यनन्त्योवकाशः, तथाप्यन्तस्य परत्वात् सत्वं स्यात्। ततश्च हे स इत्यत्र `एङ् ह्रस्वात् सम्बुद्धेः' (6.1.69) इति सोर्लोपो न स्यात्। तत्र हल्ङ्यादिलोपे कृते रुत्वविसर्जनीययोः कृतयोरनिष्टं रूपं स्यात्। सेत्यत्र तु `अजाद्यतष्टाप्' (4.1.4) इति स्त्रियां टाब्न स्यात्। तस्मात् `अनन्त्ययोः' इति वक्तव्यम्।।

107. अदस औ सुलोपश्च। (7.2.107)
`सौ' इत्येव। त्यदाद्यत्वापवादोऽदस औत्वं विधीयते। `असौ' इति। पूर्वसूत्रेण दकारस्य सकारः, `वृद्धिरेचि' (6.1.88) इति वृद्धिः।
`यदा च' इत्यादि। `सादुत्वञ्च' इति। चकारः सन्नियोगार्थः। तेन यस्मिन् पक्षे औत्वप्रतिषेधः, तस्मिन्नेव पक्षे सादुत्तरस्याकारस्योत्त्वं विधीयते।
`उत्तरपदमभूतानाम्' इत्यादि। इह परमाहम्, परमानेनेति `त्वाहौ सौ' (7.2.94), `इदोऽय् पुंसि' (7.2.111), `अनाप्यकः' (7.2.112) इति समासाद् या विभक्तिः, तस्यामेत आदेशः भवन्तो बहिरङ्गा भवन्ति; प्रागेव तु विभक्त्युत्पत्तेः। अकः सवर्णे दीर्घत्वं प्राप्नुवदन्तरङ्गम्, तस्मात् पूर्वं तदेव स्यात्, पश्चादादेशाः स्युः; ततश्च परमहम्, परमयम्, परमनेनेत्यनिष्टानि रूपाणि रूपणि स्युः। तस्मादुत्तपदभूतानामकृतसवरसन्धीनां त्यदीदीनामादेशा वक्तव्याः=व्याख्येया इत्यर्थः। आचार्यप्रवृत्तिर्ज्ञापयति--पूर्वोत्तरयोः पदयोस्तावत् कार्यं प्रथमं भवति, पश्चादेकादेश ति। यदयं `नेन्द्रस्य परस्य' (7.3.22) इति प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्? इन्द्रे द्वावचौ, तत्रैकः--`यस्येति च' (6.4.148) इति लोपेनापह्नियते, अपरः--एकादेशेनेत्यनच्क इन्द्रशब्दः सम्पन्नः, तत्र को वृद्धिप्रसङ्गः! पश्यति त्वाचार्यः--पुर्वोत्तरयोः पदयोस्तावत् कार्यं भवति, पश्चादेकादेश इति; यतः `नेन्द्रस्य परस्य' (7.3.22) इति वृद्धिप्रतिषेधं शास्ति। तदेतस्माज्ज्ञापकादकृतस्वरसन्धीनामुत्तरपदभूतानां त्यदादीनामादेशा भवन्तीति।
`अवसः सोर्भवेदौत्वम्' इत्यादि। अवधारणमत्र द्रष्टव्यम्। अदःशब्दात् परस्य सोरेवौत्वं भवेत्। भवतु, मा वा भूत्। अदश्शब्दस्य त्यदाद्यत्वे कृते `वृद्धिरेचि' (6.1.88) इति वृद्धौ कृतायामसाविति सिध्यत्येव, तत् किमर्थं सुलोपे विधीयते? निरर्थकतवान्नैवं सोर्लोपो विधेयः, औत्वमेव विधेयम्। अत्र दोषमाह--`ह्रस्वाल्लुप्येत सम्बुद्धिः' इति। हेऽसावित्यत्र `एङ ह्रस्वात् सम्बुद्धेः' (6.1.69) इति सोर्लोपः प्रसज्येत, ततश्च सम्बुद्धौ हेऽसाविति न सिध्येत्? `न हलः प्रकृतं हि तत्' इति। नायं देषः; हलः सम्बुद्धेर्लोप औत्वे कृतेऽण् भवति, न हलिति, तत्कुतो लोपप्रसङ्गस्तत्र! तर्हि हल्ग्रहणं कर्त्तव्यम्? न कर्त्तव्यम्; यस्मात् प्रकृतं तत्। `हल्ङ्याब्भ्यः सुतिस्यपृक्तं हल्' (6.1.68) इत्यतो हल्ग्रहणं प्रकृतमेव। यद्यपि तत्र प्रथमानिर्दिष्टम्, षष्ठीनिर्देशेन चेहार्थः, तथापि `एङ् ह्रस्वात्' (6.1.69) इति पञ्चमी हलित्यस्याः प्रथमायाः षष्ठीत्वं प्रकलप्यिष्यति; `तस्मादित्युत्तरस्य' (1.1.67) इति वचनात्।
अथं तर्हि दोषः--`आप एत्वं भवेत् तस्मिन्' इत्यादि। तस्मिन्नोकारे परतस्त्यदाद्यत्वे कृते स्त्रियां टापि--हे असौ ब्राह्मणीत्यतर `सम्बुद्धौ च' (7.3.106) इत्येत्वं स्यात्, यथा हि हे खट्वे इत्यत्र? `न झलीत्यनुवर्त्तनात्' इति। नायं दोषः; `सम्बुद्धो च' (7.3.106) इत्यत्र `बहुवचने झल्येत्' (7.3.103) इत्यनुवर्त्तते, तेन झलादौ सम्बुद्धावेत्येन भवितव्यम्। च चौकारे कृते झलादिः सम्बुद्धिर्भवति, किं तर्हि? अजादिः।
`प्रत्ययस्थाच्च कादित्त्वं शीभावश्च प्रसज्यते' [`प्रसज्येत'--प्रा. मुद्रितः पाठः] इति। पूर्वकश्चकारः तर्ह्यर्थे, इतरः समुच्चये। अयं तर्हि दोषः--असकौ ब्राह्मणीत्यत्राज्ञाताद्यर्थविवक्षायामकचि कृते टापि च `प्रत्ययस्थात् कात्' (7.3.44) इत्यादिना कात् पूर्वस्येत्वं प्राप्नोति? असौ ब्राह्मणी इत्यत्र `औङ आपः' (7.1.18) इत्यनेन शीभावोऽदसस्त्ववयव ओकारे कृते टाबेव नास्तीति नैतद्दोषद्वयं सम्भवति। शीभावदोषश्च पाक्षिको वेदितव्यः, यस्मिन् पक्षे सामान्यग्रहणार्थो ङकारः प्रत्ययस्यासज्यते। यदा तु पूर्वसूत्रनिर्देशस्तदा द्विवचनयोरेव शीभावः; तयोरेव पूर्वाचार्यैर्ङित्त्वस्य कृतत्वात्। अन्यस्य प्राप्तिरेव नास्ति; आङित्त्वात्।।

108. इदमो मः। (7.2.108)
अलोऽन्त्यपरिभाषया (1.1.52) मकारस्यैवानेन मकारेण भवितव्यम्, न च मकरसय मकारादेशे कृते विशेषोऽस्ति, तत्किमर्थं मकारस्य मकारः इत्युच्यते? --इत्येतच्चोद्यं निराकर्तुमाह--`मकारस्य' इत्यादि। गतार्थम्।।

109. दश्च। (7.2.109)
`इदमः' इति वर्त्तते, `सौ' इति निवृत्तम्; उत्तरसूत्रे पुनः `सौ' इति वचनात्। तेनायं विभक्तिमात्रे दाकारस्य मकारो भवति।।

110. यः सौ। (7.2.110)
उत्तरसूत्रे पुंसीति वचनात् स्त्रियामयं यकारः। अथ नपंसके कस्मान्न विज्ञायते? अशक्यमेवं विज्ञातुम्; नपुंसके हि `स्वमोर्नपुंसकात्' (7.1.23) इति सोर्लुका भवितव्यम्। अत्र सावुच्यमानः कथं तस्मिंल्लुप्ते यकारः स्यात्; प्रत्ययलक्षमेनेति चेत्? न; `न लुमतङ्गस्य' (1.1.63) इति प्रत्ययलक्षणप्रतिधेधात्। तस्माद्युक्तमुक्तम्--`स्त्रियामयं यकारः' इति।।

111. इदोऽय् पुंसि। (7.2.111)

112. अनाप्यकः। (7.2.112)
`अनेन' इति। त्यदाद्यत्वे पररूपत्वे च कृत इद्रूपस्यानादेशः, `टाङसिङसामिनात्स्याः' (7.1.12) इतीनादेशः, `आद्गुणः' (6.1.87)। `अनयोः' इति। `ओसि च' (7.3.104) इत्येत्वम्, अनादेशः, सुलोपः।
`पकारेण' इति। अथ कपः पकारेण कस्मान्न भवति? प्रयोजनाभावात्। ननु चेहेत्यत्र प्राग्दिशीयायां विभक्तौ `हलि लोपः' (7.2.113) यथा स्यादितीदमस्ति प्रयोजनम्? `इदम इश्' (5.3.3) इतीशात्र बाधकेन भवितव्यम्। अत्र च `अमेहक्वतिसित्रेभ्यः' (कारिका 4.2.104) इत्यत्र इहेत्यकृतेद्रूपलोपस्य हकारान्तस्येदमो तिर्देशो लिङ्गम्।।

113. हलि लोपः। (7.2.113)
पूर्वेणानादेशे प्राप्ते हलादाविद्रूपस्य लोपो विधीयते। `आभ्याम्' इति। त्यदद्यत्वम्; अतो गुणे (6.1.97) पररूपत्वम्, `सुपि ;ट (7.3.102) इति दीर्घत्वञ्च।
अथालोऽन्त्यपरिभाषया(1.1.52)न्त्यस्यायं लोपः कस्मान्न भवति? इत्याह--`नानर्थके' इत्यादि। अभ्युपेत्यानर्थकेऽलोऽन्त्यविधिं परिहारान्तरमाह--`अथ वा' इत्यादि। न चाल्ग्रहणं कर्त्तव्यम्, यतस्तदनुवर्त्तते? इत्यत आह--`अनाप्यकः' इत्यादि। यद्यपि तत्र प्रथमानिर्दिष्टम्, षष्ठीनिर्दिष्टेन चेहार्थः, तथापि हलीति सप्तमी अन्निति षष्ठीत्वं प्रकल्पयिष्यति; `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इति वचनात्। एवं परिहारो भाष्यकारमतेन बोद्धव्यः; अस्याः परिभाषया अनङ्गीकरणात्। अत्र दर्शने तु त्रयाणामकराणां पररूपमेकादेशं कृत्वा दीर्घत्वादि विधेयम्।।

114. मृजेर्वृद्धिः। (7.2.114)
`मार्ष्टा' इति। `मृजू शृद्धौ' (धा.पा.1066) व्रश्चादिसूत्रेण (8.2.36) षत्वम्, `ष्टुत्वम्।
मृजेः क्विबन्ताद्विभक्तावुत्पन्नायां कंसपरिमृङ्भ्याम्, कंसपरिमृङ्भिरित्यत्र वृद्धिः प्राप्नोति, न च क्विबाश्रयः `क्ङिति च' (1.1.5) इति वृद्धिप्रतिषेधो भवितुमुत्सहते; यस्मात् क्ङितीति निंमित्तसप्तमी। न चात्र क्विब्निमित्ता वृद्धिः प्राप्नोति, किं तर्हि? विभक्तिनिम्त्ता। तस्मात् तस्याः प्रतिषेधो वक्तव्य इत्यत आह--`मुजरिति धातुग्रहणम्' इत्यादि। भ्रौणहत्य(6.4.174)मिति निपातनेन ज्ञापितोऽयमर्थः--धाताः कार्यमुच्यमानं धातुप्रत्यय एव भवतीति, तेन कंसमृङ्भ्यामित्यत्र न भवति। यो हि धातोरित्येवं विहितः स धातुप्रतययः। न च भ्यामादिकं धातोरित्येवं विहितम्, किं तर्हि? प्रातिपदिकादित्येवम्, तस्मान्नासो धातुप्रत्ययः। `कंसपरिमृङ्भ्याम्' इत्यादि। पूर्ववत् षत्वे कृत षकारस्य जश्त्वं डकारः।।

115. अचो ञ्णिति। (7.2.115)
`निश्चायनिष्पावौ' [`एकसतण्डुलनिश्चायः, द्वौ शूर्पनिष्पावौ'--काशिका] इति। निष्पूर्वाच्चिनीतेः, पुनातेश्च `परिमाणाख्यायां सर्वेभ्यः' (3.3.20) इति धञ्। `इदुपधस्य चाप्रत्ययस्य' (8.3.41) इति विसर्जनीयषत्वम्। `कारः, हारः' इति। कृञः हृञश्च भावे घञ्।
`गौः, गावो गावः' इति। `गोतो णित्' (7.1.90) इति सर्वनामस्थानस्य णित्त्वम्। `सखायौ, सखायः' इति। अत्रापि `सख्युरसम्बुद्धौ' (7.1.92) इति। `जयतेः, यौतेश्च' इति। `जि जये' (धा.पा.561), `यु मिश्रणे' [`मिश्रणेऽमिश्रणे च'--धा.पा.] (धा.पा.1033)। `च्यवतेः' इति। `च्युङ छ्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ'[नास्ति--धा.पा.] (धा.पा.955-958)। अज्ग्रहणमनिकोऽपि यथा स्यात्--गोरिति। ननु णित्करणसामर्थ्यादेव तत्र भविष्यति? नैतदस्ति; अस्ति ह्यन्यत् णित्करणस्य प्रयोजनम्, किं तत्? गावौ, गाव इत्यवादेशे कृते `अत उपधायाः' (7.2.116) इति वृद्धिर्यथा स्यात्। यद्येवम्, गौरित्यत्रागुणविषये वृद्धिरियं कृतार्थेति कारयतीत्यादिषु परत्वाद्गुणेन बाध्येत? णित्करणसामर्थ्यान्न भविष्यतीति। एतच्चानुत्तरम्; `णेरनिटि' (6.4.51) इत्येवमादौ णित्करणस्य चरितार्थत्वात्? नैष दोषः; आचार्यप्रवृत्तिर्ज्ञापयति--गुणविषयेऽपि वृद्धिरभवतीति; यदयं जागर्त्तर्वृद्धिविषये प्रतिषेधविषये च `जाग्रोऽविचिण्णल्ङित्सु' (7.3.85) इति पुनर्गुम आरभ्यते। यदि हि गुणविषये वृद्धर्न स्यात्, तदा जागरयतीत्यादिषु गुणोऽस्त्येवेति तद्विषये गुणारम्भोऽनर्थकः स्यात्। वृद्धिविषयता चारम्भस्य चिण्णलोः प्रतिषेधाद्विज्ञायते। अथ योगविभागः किमर्थः, न `ञ्णित्यत उपथायाः' इत्येदोच्येत? अशक्यमेवं वक्तुम्; एवं ह्युच्यमाने यद्यपि गावो, गाव इत्यत्रावादेशे कृते चायकः, लावक इत्यत्र गुणे कृतेऽयवादेशयोः कृतयोः सिध्यति--गौः, सखायौ; जैत्रमित्यादौ तु न सिध्यति; अयवादेशयोर्गुणस्य च यथायोगमसम्भवात् स्माद्यथायोगं योगविभागः कर्त्तव्यः।।

116. अत उपधायाः। (7.2.116)
पाक इत्यादौ भावे घञ्, `चजोः कु घिण्ण्यतोः' (7.3.52) इति कुत्वम्। `रागः' इति। `घञि च भावकरणयोः' (6.4.27) इत्यनुनासिकलोपः। `पाचयति' इति। `हेतुमति च' (3.1.26) इति णिच्। `चकासयति' इति। उपधाग्रहणादिह चकारादकारस्य न भवति। तपरकरणं लाघवार्थम्। असति हि स्मिन्नस्योपधाया इत्युच्यमाने गौरवं स्यात्। दीर्घनिवृत्त्यर्थं तु तपरकरणं न भवति, न दीर्घस्य कृतायां वृद्धौ कश्चिद्विशेषोऽस्ति।।

117. तद्धितेष्वचामादेः। (7.2.117)
`अचाम्' इति निर्धारणे षष्ठी। `अचामादेरचः स्थाने' इति। ननु चेक्परिभावोपस्थानादिक एव स्थाने वृद्ध्या भवितव्यम्, तस्मादिकः स्थान इत्येवं वक्तव्यम्, न त्वचः स्थान इति? एवं मन्यते--`अचो ञ्णिति' (7.2.115) इत्यतः स्थानिनिर्देशार्थं द्वितीयमज्ग्रहणमनुवर्त्तते, तेन यथा `अचो ञ्णिति' (7.2.115) इत्यत्र स्थानिनिर्देशादिक्परिभाषा नोपतिष्ठते, तथेहापीत्यदोषः। `गार्ग्यः, वात्स्यः' इति। `गर्गादिभ्यो यञ्' (4.1.105)। `दाक्षिः, प्लाक्षिः' इति। `अत इञ्' (4.1.95)। `औपगवः, कापटवः' इति। प्राग्दीव्यतीयोऽण् (4.1.83)।
अथ त्वाष्ट्रः, जागत इत्यतर त्वष्टृजगद्भ्यां `तस्येवम्' (4.3.120) इत्यणि कृते यथाक्रमं `अचो ञ्णिति' (7.2.115) इत्यज्लक्षणा वृद्धिः प्राप्नोति, `अत उपधायाः' (7.2.116) इत्युपधालक्षणा वृद्धिः कस्मान्न भवति? इत्याह--`अचामादेर्वृद्धिरन्त्योपधावृद्धिं बाधते' इति। कथं पुनरन्यस्योच्यमानाऽन्यस्य बाधिका स्यात्? ज्ञापकात्। यदयमनुशतिकादिषु पुष्करसच्छब्दं पठति, तज्ज्ञापयति--यत्रादिवृद्धिस्तत्रान्या वृद्धिर्न भवतीति। तस्यानुशतिकादिषु पाठस्यैतत् प्रयोजनम्--उभयपदवृद्धिर्यथा स्यात्, पुष्करसदोऽपत्यं पौष्करसादिरिति। `बाहवादिभ्यश्च' (4.1.96) इतीञ्। यदि चादिवृद्धिरन्यस्या वृद्धेर्बाधिका न स्यात्, उपधालक्षणेनैव वृद्धेः सिद्धत्वात् पौष्करसादिशब्दस्य, पुष्करसच्छब्दोऽनुशतिकादिषु न पठ्येत। पश्यत्याचार्यः--यत्रादिपदवृद्धिस्तत्रान्या वृद्धिर्न भवतीति; यतोऽनुशतिकादिषु पुष्करसच्छब्दं पठति। ननु ठगर्थस्तत्र पठः, तत्र ह्युपधालक्षणा वृद्धिर्न प्राप्नोतीति ठकोऽञ्णित्त्वात्--पुष्करसदा चरतीति पौष्करसादिक इति? नैतदस्ति; यदि पुष्करसच्छब्दाच्चरत्यर्थे ठगुत्पद्यते। कस्मात् पुनर्नोत्पद्यते? अनभिधानात्। अभिधानलक्षणा हि कृत्तद्धितसमासा भवन्तीति। तस्माज्ज्ञापक एवानुशतिकादिषु पाठः पुष्करसच्छब्दस्य।।

118. किति च। (7.2.118)
यद्यपि `तद्धितेषु' (7.2.117) इति बहुवचनान्तं प्रकृतम्, तथापोहैकवचननिर्देशादेकवचनविषयो बहुवचनस्य विपरिणामेन विज्ञायते, इतयत आह--`किति च तद्धिते परतः' इति। `नाडायनः, जारायणः' इति। `नडादिभ्यः फक्' (4.1.99) इति फक्। `आक्षिकः, शालाकिकः ति। अक्षिशलाकाशब्दाभ्यां `तेन दीव्यत खनति जयति जितम्' (4.4.2) इति ठक्; `ठस्येकः' (7.3.50)।।

इकि बोधिसत्त्वदेशीयाचार्य श्रीजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां सप्तमाध्यायस्य
द्वितीयः पादः

- - -

7.3
अथ सप्तमोऽध्यायः
तृतीयः पादः

1. देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्। (7.3.1)
`तद्धितेष्वचामादेः' (7.2.117) इत्यान्तरतम्यादैकारे वृद्धौ प्राप्तायां देविकादीनामाकारो विधीयते। `अत्र पक्षत्रयं सम्भाव्यते--1. प्रकृतेनाङ्गेन देविकादयो विशिष्यन्ते--देविकादीनामङ्गानामिति; 2. तैर्वाङ्गम्--`देविकाद्यन्तस्याङ्गस्येति, अथ वा--3. तैराद्योऽच्---देविकदीनां सम्बन्धिनामचां मध्ये य आदिरजिति। तत्र यद्याद्यः पक्ष आश्रीयेत, तदा देविकाकूले भवाः शालयो दाविकाकूलाः शालय इति न सिध्येत्, न ह्यतर देविकाशब्दोऽङ्गम्, किं तर्हि? देविकाकूलशब्दः। ननु चाङ्गस्येत्यवयवषष्ठी, तत्रैवं विशेषणविशेष्यभावः करिष्यते--अङ्गस्य ये देविकादयोऽवयवभूता इति, भवति चेहावयवोऽङ्गस्य देविकाशब्दः, ततोऽयमोदोष इति चेत्? सत्यमेतत् किन्त्वतिप्रसङ्गः स्यात्, सुदेविकायां भवः सौदेविकः--इत्यत्रापि स्यात्। अथ द्वितीयपक्ष आश्रीयेत, एवमपि दाविकाकूलाः शालय इति न सिध्येत्। देविकादिभिः प्रकृतेऽङ्गे विशेष्यमाणे विशेषणे च तदन्तविधिरिति देविकाद्यन्तस्याङ्गस्येति भवितव्यम्, न

तदादेः। तस्मात् तदादेरपि यथा स्यादिति यत्नान्तरमास्थेयमिति। तृतीये तु पक्ष आश्रीयमाणे, विनापि यत्नान्तरेण केवलस्य तदादेस्तदन्तस्य भवति। सर्वत्राचामादेरचो देविकादिसम्बन्धित्वात्। अतस्तमेवाश्रित्याह--`देविकाशिंशपादित्यवाड्दीर्घसत्त्रश्रेयस इत्येतेषाम्' इत्यादि। एषां देविकादीनामचां मध्य आदिभूतो योऽज् वृद्धेरैकारस्य प्रसङ्गे तस्याकारो विधीयते।
`पूर्वशांशप' इति। पूर्ववदुत्तरपदस्य वृद्धिः। साप्याकार एव भवतीत्युत्तरपदाधिकारे देविकादीनामनुवृत्तेर्लभ्यते।
`वहीनरस्येद्वचनं कर्त्तव्यम्' इति। अकारस्य या वृद्धिः प्राप्नोति तद्बाधनार्थमेत्। इकारे कृते या वृद्धिः प्राप्नोति सा तु भवत्येव। `केचित्तु' इत्यादि। कुणडवाडवादयः। विहीनो नरः कामक्रोधाभ्यामिति पृषोदरादित्वान्नलोपः, विहीनरस्यापत्यं वैहीनरिः--`अत इञ्' (4.1.95)।।

2. केकयमित्रयुप्रलयानां यादेरियः। (7.3.2)
केकयमित्रयुप्रलयानामिति याद्यपेक्षयाऽवयवषष्ठी। यादेरित्येषापीत्यादेशापेक्षया स्थानषष्ठी-य आदिर्यस्य स यादिः। अकारसहितो यकार उकारसहितश्च। केकयादीनां योऽवयवो यादिस्तस्येयादेशो भवति। ननु च मित्रयुशब्दः परमप्रकृतिः, न गोत्रम्; `अपत्यं पोत्रप्रभृति गोत्रम्' (4.1.162) इत्यपत्यविशेषस्य गोत्रसंज्ञाविधानात्, तत्कथं गोत्रादुच्यमानः प्रत्ययः परमपरकृतेर्भवति? इत्यत आह--`लौकिकं हि' इत्यादि। किं पुनर्लौकिकं गोत्रम्? इत्यत आह--`लोके च' इत्यादि। इह लौकिकं गोत्रं गृह्यते। लोके च ऋषिशब्दः `गोत्रम्' इत्यभिधीयते। मित्रयुशब्दश्चायमृषिवचनः, तस्मात् ततोऽपि गोत्रादुच्यमानः प्रत्ययो भवतीति।
`प्रालेयम्' इति। `अत आगतः' (4.3.74) इत्यण्।।

3. न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्। (7.3.3)
`तद्धितेष्वचामादेः' (7.2.117) इत्यादिना ञ्णिदादौ तद्धिते वृद्धौ प्राप्तायां प्रतिषेधोऽयमुच्यते, तत्सन्नियोगेनैजागमौ भवतः। `यकारादैकारः' इत्यादिना यतासंख्येन सम्बन्धं दर्शयति। `वैयसनम्' इति। `असु क्षेपणे' (धा.पा.1209)। विपूर्वाद्विशेषेणास्यते क्षिप्यते येनेति करणे ल्युट्, प्रादिसमासः, यणादेशः, तत, `तत्र भवः' (4.3.53) इत्यण्। तत्र यकारात् पदान्तात् परस्याकारस्य वृद्धिर्न भवति, तस्मात् पूर्वमैजागमः। `वैयाकरणः' इति। विशेषेणाक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति करणे ल्युट्, व्याकरणमिति, प्रादिसमासः, ततः `तदधीते तद्वेव' (4.2.59) इत्यण्, तत्र पर्जन्यवल्लक्षणप्रवृत्त्या पदान्ताद्यकारात् परसय या वृद्धिः प्राप्नोति सा न भवति, तस्मात् पूर्वमैजागमः। `सौवश्वः' इति। शोभनोऽश्वः स्वश्वः, पूर्ववत् समासः, ततोऽपत्यर्थे शिवाद्यण् (4.1.112)। अत्र वकारात् पदान्तात् परस्य वृद्धिर्न भवति, तस्मात् पूर्वमैजागमो भवति। `आर्‌थिः' इति। ना अर्थो यस्य स अर्थः, तस्यापत्यम् `उत इञ्' (4.1.95)। `याष्टकः' इति। `शक्तियष्ट्योरीकक्' (4.4.59)। `याताः' इति। इणः परस्य लटः शत्रादेशः, `इणो यण्' (6.4.81) इति यण्, ततः `तस्येदम्' (4.3.120) इत्यण्। तत्रोभयत्रापि यकारस्य पदान्तता भविष्यतः, यथा--`ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय' इति दधिदानस्य तक्रदानां बाधकम्। अथापि बाधगौ न स्याताम्, तथापि नित्यत्वादैचोः कृतयो पश्चाद्वृर्भवन्ती तयोरेव भविष्यतीति। न चात्र शब्दान्तरप्राप्त्या तयोरप्यैचोरनित्यत्वमाशङ्कनीयम्, न हि तौ शब्दान्तरसय विधीयेते, अपि त्वभकतावेव य्वाभ्यां पूर्वौ।
यद्यपि शब्दातन्तरस्य प्राप्तिः स्यात्, तथापि द्वयोरनित्ययोः परत्वादैचोः कृतयोः सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' (व्या.प.40) इति पुनर्वृद्धिर्न भवति। यद्यपि पुनःप्रसङ्गविज्ञानाद्वृद्धिः स्यात्; तथापीष्टसिद्धिः स्यादेव; विशेषाभावादित्यत आह--`प्रतिषेधवचनम्' इत्यादि। प्रक्लृतिः=प्रकल्पनम्, व्यवस्थेत्यर्थः। यत्र य्वाभ्यां परस्य वृद्धेः प्रतिषेधः स एवैचोर्विषयः कथन्नाम प्रकल्पेत?व्यवतिष्ठेतेत्येवमर्थः। प्रतिषेध उच्यते, किमर्थं पुनरै चोर्विषयपरक्लृप्तिः क्रियते? इत्यत आह--`इह मा भत्' इति। यदि प्रतषेधवचनेनैचोर्विषयन्यवस्था न क्रियेत, तदा दाध्यश्विः, माध्वश्विरित्यत्रापि स्यात्। अतो मा भूदेष दोष इति प्रतिषेधवचनेनैचोर्विषयन्यवसथा क्रियते। दधिप्रियोऽश्वो दध्यश्वः मधुप्रियोऽश्वो मध्यश्वः। `सामानाधिकरणाधिकारे शापकपार्थिवादीनां समास उत्तरपदलोपश्च' (वा.83) इति मध्यमपदलोपौ समासः। अथ क्रियमाणे प्रतिषेधवचने कस्मादेवात्र न भवति, यावता य्वाभ्यां परस्य वृद्धिर्नास्ति? इत्यत आह--`न ह्यत्र' इत्यादि। प्रसङ्गे हि सति वृद्धेः प्रतिषेधो भवति, नासति; न चात्र य्वाभ्यां परस्य वृद्धेः प्रसङ्गोऽस्ति, अतः प्रतेषेधो नास्त्येवेत्यभिप्रायः। ननु च `अचामादेः' (7.2.117) इत्यनुवर्त्तते, तेन य्वौ विशिष्येते--अचामादेरचः स्थाने यौ य्वादिति। न च दध्यश्विरित्यादावेवंविधौ तौ स्त इति। न चात्रैचो भविष्यतः, अतो नार्थः? नैतदस्ति; एवं हयचामादिग्रहणम्, तेन यदि य्वौ विशिष्येते तदा वृद्धिरविशेषिता स्यात्। ततश्चेहापि वृद्धेः प्रतिषेधः स्यात्--द्वे अशीती भृतो भृतो भावी वा `प्राग्वतेष्ठञ्' (5.1.18) द्व्याशौतिक इति। अथ वृद्धिर्विशिष्यते--अचामादेरित्येवं वा वृद्धिः, ततो न भवत्येष दोषः। न ह्यत्राचामादेरित्येवं वृद्धिः, किं तर्हि? `संख्याया संवत्सरसंख्यस्य च' (7.3.15) इत्येवम्। किं तर्हि य्वौ न विशेषितौ स्याताम्? ततश्च दाध्यश्विरित्यादावैचौ स्यातामेव। तस्मात् तयोर्विषयव्यवस्थार्थं नेति वक्तव्यम्।
`उत्तरपदवृद्धेरप्ययं प्रतिषेध इष्यते' इति। स चोत्तरपदाधिकारेऽस्यानुवर्त्तमानत्वाल्लभ्यते। `पूर्वत्रैयलिन्दे' इति। अत्र `विशोऽमद्राणाम्' (7.3.13) इत्युत्तरपदवृद्धौ प्राप्तायां प्रतिषेधः। यद्युत्तरपदवृद्धेरप्ययं प्रतिषेधः, तदा द्व्याशीतिक इत्यत्रापि `संख्यायाः संवत्सरसंख्यस्य च' (7.3.15) इति या वृद्धिरुत्तरपदस्य आप्तेत्यस्या अपि प्रतिषेधः स्यादित्यत आह--`यत्र तु' इत्यादि। कथं पुनरिष्यमाणोऽप्यत्र प्रतिषेधो न भवति? उत्तरपदस्याचामाद्येनाचा हि य्वोर्विशेषणत्वात्। उत्तरपदसम्बन्दी योऽचामादिरच् तस्य स्थाने यो य्वौ ताभ्यामुत्तरपदस्य वृद्धिर्न भवति। न च द्व्याशीतिक इत्यत्रोत्तरपदस्याचामादेरचः

स्थाने यकार इति नात्र वृद्धेः प्रतिषेधो भवतीति।।

4. द्वारादीनाञ्च। (7.3.4)

`दौवारिकः' इति। `तत्र नियुक्तः' (4.4.69) इति ठक्। `द्वारपालस्येदं दौवारपालम्' इति। `तस्येदम्' (4.3.120) इत्यण्। प्रायेण तु पुस्तकेषु `द्वारपालस्येवं दौवारपालिकम्' इति। पाठः, स चायुक्तः; न हि तस्यैद(4.3.120)मित्यत्रार्थे द्वारपालशब्दात् लक्षणेन केनचिट्ठग्विहितः। क्वचित् पुनः `द्वारपालस्यापत्यं दौवारपालिकः' इति पाठः, तत्र `रेवत्यादिभ्यष्ठक् (4.1.146) इति ठक्। ननु। तत्र द्वारपालीशब्दः पठ्यते, न तु द्वारपालशब्दः? एवं तर्हि मन्यते--द्वारपालशब्दस्तत्र पठितव्यः, स द्वारपालीशब्दमपि ग्राहयिष्यति; `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (व्या.प.29) इति। न्यायात्। ये तु तत्र द्वारपालशब्दं न पठन्ति, तेऽपत्यार्थे दौवारपालिरितीञन्तमुदहरन्ति। कथं पुनर्द्वारस्य गणे द्वारपालस्य भवति? अत्रापि द्वारादिभिराद्यचो विशेषणत्--द्वारादीनां शब्दानामचां मध्ये य आदिरजिति। वक्ष्यमाणाद्वा तदादिविधेज्ञपिकात्। `सौवरः' इति। स्वरमधिकृत्य कृतो ग्रन्थ इति `अथिकृत्य कृते ग्रन्थे' (4.3.87) इत्यण्। `सौवर्‌य्यः' इति। `टिड्ढाणञ्' (4.1.1.5) इति ङीप्। `वैयल्कशः' इति। `तत्र भवः' (4.3.53) इत्यण्। `सौवस्तिकः' इति। `तदाहेति माशब्दादिभ्य उपसंख्यानंम्' (वा.482) इति ठक्। `सोवर्गमनिकः' [`सौवर्गमिकः'--काशिका] इति। `आहौ प्रभूतादिभ्य उपसंख्यानम्' (वा.483) इति ठक्।

`पूर्वेणैव सिद्धम्' इति। वकारस्य पदान्तत्वात् तत्रैतत् स्यात्। यद्येवं व्युत्पत्तिः क्रियते--स्वोऽध्यायः स्वाध्यायः, तदाऽपदान्तत्वान्न प्राप्नोति, तस्यां व्युत्पत्तावर्थवान् स्वध्यायशब्दस्य पाठः? इत्यत आह--`अथाप्येवम्' इत्यादि।

कथं पुनः स्वशब्दात् स्वाध्यायशब्दस्य सिध्यति? इत्याह--`तदादावपि हि' इत्यादि। `स्फैयकृतः'[स्फैकृतः--काशिका] इति। `ऋष्यन्धकवृष्णिकुरुभ्यश्च' (4.1.114) इत्यण्। `सौवादुमृदवः'[सोवादुमृदवम्--काशिका] इति। अत्रापि `तस्यैदम्' (4.3.120) इत्यण्।

एवं `शौवनम्' इत्यत्रापि। `शौवम्' इति। `नस्तद्धिते' (6.4.144) इति टिलोपः। `शौवादंष्ट्रः' इति। `अन्येषामपि' (6.3.137) इति दीर्घः।।

5. न्यग्रोधस्य च केवलस्य। (7.3.5)

`नैयग्रोधः' इति। `तस्य विकारः' (4.3.134) इत्यण्।

`न्यग रोहतीति न्यग्रोधः' इति। न्यञ्चतीति ऋत्वि(3.2.59)गादिनाऽञ्चतेः क्विन्, `क्विन्प्रत्ययस्य कुः' (8.2.62) इति कुत्वम्--ककारः, नेर्यणादेशः। न्यक्पूर्वाद्रूहेः पचाद्यच्। तत्र `न्यङ्क्वादीनाञ्च' (7.3.53) इति हकारस्य धकारः, `झलां जशोऽन्ते' (8.2.39) इति ककारस्य गकारः, लघूपधगुणः--एवं यदा न्यग्रोधशब्दो व्युत्पाद्यते तदा पदान्तत्वाद्यकारस्य `न य्वाभ्याम्' (7.3.3) इत्यादिनैव सिद्धे नियमार्थमेतत्--केवलस्यैव यथा स्यात्, तदादेर्मा भूदिति। `अव्युत्पत्तिपक्षे विध्यर्थमेतत्' इति। अपदान्तत्वाद्यकारस्य।।

6. न कर्मव्यतिहारे। (7.3.6)

`यदुक्तम्' इति। वृद्धिप्रतिषेधः, ऐजागमश्च। `व्यावक्रोशो' [`व्याक्रोशी' इति मु. पाठः] इत्यादि। `क्रुश आह्वाने' [`आह्वाने रोदने च'--धा.पा.] (धा.पा.856), `लिख अक्षरविन्यासे' (दा.पा.1365), `चर्च अध्ययने' (धा.पा.1712) चुरादिः, `हसे हसने' (धा.पा.721)--एभ्यो व्यवपूर्वेभ्यो णच्, तदन्तादञ्। अत्र यथोक्ते कार्ये प्रतिषिद्धे वृद्धिरेव भवति, द्वौ प्रतिषेधो प्रकृत्यर्थं गमयत इति कृत्वा। `टिड्ढाणञ्' (4.1.15) इति ङीप्।।

7. स्वागतादीनाञ्च। (7.3.7)

`स्वागतिकः' इति। शोभनमागतं स्वागतम्। `तदाहेत्यादौ प्रभूतादिब्य उपसंख्यानम्' (वा.483) इति ठक्। `स्वाध्वरिकः' इति। अत्रापि `चरति' (4.4.8) इति ठक्। शोभनोऽध्वरः स्वध्वरः। `स्वाङ्गिः' इत्यादि। `स्वाङ्गिगर्ण्याडिः' इति। `अत इञ्' (4.1.95)। शोभनान्यङ्गान्यस्य स्वङ्गः, विगतान्यङ्गान्यस्य व्यङ्गः, विगतोऽडोऽस्य व्यङः। व्यवहरणं व्यवहारः, भावे घञ्। ननु च व्यवहारशब्दोऽयं क्रमव्यतीहारे वर्त्तते, तत्र `न कर्मव्यतीहारे' (7.3.6) इति प्रतिषेधः सिद्धः, तत् कस्मादिह पठ्यते? इत्याह--`व्यवहारशब्दोऽयम्' इति। किं पुनर्लौकिकम्? लौकिकं पुनर्वृत्तं येनाचारेण व्यवहाराल्लोके व्यावहारिक इत्युच्यते तद्वेदितव्यम्। `स्वापतेयम्' इति। `पथ्यतिथिवसतिस्वपतेढैञ्' (4.4.104)। कथं पुनरत्र प्राप्तिः, यावता नास्य वकारः पदन्तः? इत्याह--`द्बारादिषु स्वशब्दपाठादस्य प्राप्तिः' इति। तदादिविधिनेत्यभिप्रायः। यता तदादिविधिर्भवति तथा तत्रैवोक्तम्।।

8. श्वादेरिञि। (7.3.8)

`श्वाभास्त्रिः श्वादंष्ट्रिः' इति। श्वेव भस्त्रा यसय, शुन इव दंष्ट्रा यस्येति बहुव्रीहिः, उपसर्जनह्रस्वत्वम्। केन पुनः श्वादेर्वृद्धिप्रतिषेधः प्राप्नोति; यतोऽयं प्रतिषेध उच्यते, न ह्यस्य वकारः पदानतः? इत्यत आह--`श्वशब्दो द्वारादिषु पठ्यते' इति। ननु च केवलः श्वशब्दो द्वारादिषु पठ्यते, तत्र कः प्रसङ्गौ यतस्तदादेः स्यात्! `यस्मिन् विधिस्तदादावल्ग्रहणे' (व्या.प.127) इत् तददिविधिर्ति चेत्? नैतदस्ति; सप्तमीनिर्दिष्टै हल्ग्रहणे च सति तदादिविधिर्भवति,

न चात्रैतदुभयमस्तीत्यत आह--`तत्र च' इत्यादि। यदि तत्र तदादिविधिर्न स्यात्, तदैतत् प्रतिषेधवचनमनर्थकं स्यात्; प्राप्त्वभावादित्यभिप्रायः। ज्ञापकसय प्रयोजनम्--शौवादंष्ट्रो मणिरित्यादौ वृद्धिप्रतिषेधः।

`इकारादिग्रहणं कर्त्तव्यम्' इति। इकारादितद्धितो गृह्यते, येन तदिकारादिग्रहणं व्याख्यानं कर्त्तव्यमित्यर्थः। किमर्थमित्याह--`श्वागणिकाद्यर्थम्' इति। श्वागणिकादीनामर्थः=प्रयोजनं यस्मिंस्तत् तथोक्तम्। अर्थस्तु तेषामादिवृद्धिरेव। तत्रैवं व्याख्यानम्--इञ्ग्रहणमिहेकारादेस्तद्धितस्योपलक्षणार्थम्, तेनान्यत्रापि तद्धिते प्रतिषेधो भवतीति।

`तदन्तस्य' इति। इञन्तस्यान्यन्नायीति। कथं पुनरिष्यमाणोऽन्यत्र लभ्यते, यावताऽन्यत्रापि तद्धित उत्पन्न इञः `यस्येति च' (6.4.148) इति लोपेन भवितव्यम्? नैष दोषः; इञीति नेयं निमित्तसप्तमी, किं तर्हि? परसप्तमी। निमित्तसप्तम्यामण्निमित्ताय वृद्धेः प्रतिषेधस्य प्रतिषेधो न स्यात्। परसप्तम्यां तु यद्यपि लोपः क्रियते, तथापि स्थानिवद्भावात् प्रतिषेधः सिध्यति। `श्वाभस्त्रम्' इति। `इञश्च' (4.2.112) इत्यण्।।

9. पदान्तस्यान्यतरस्याम्। (7.3.9)

पूर्वेण नित्ये प्राप्ते प्रतिषेधे विकल्प उच्यते। `पदान्तस्य' इति। पदशब्दान्तस्येत्यर्थः। `श्वापदम्' इति। शुन इव पदमस्येति श्वपदः, तस्येदं श्वापदम्। `शौवापदम्' इति। `अन्येषामपि दृश्यते' (6.3.137) इति दीर्घः।।

10. उत्तरपदस्य। (7.3.10)

अङ्गस्यचामादेरचो वृद्धौ प्राप्तायामिदमुच्यते। ननु च `अवयवादृतोः' (7.3.11) इत्यदौ पञ्चमीनिर्देशादन्तरेणाप्युत्तरपदाधिकारं `तस्मादित्युत्तरस्य' (1.1.67) इत्युत्तरपदस्यैव भविष्यति, तत् किमुत्तरपदाधिकारेण? इतयत आह--`यत्र'--इत्यादि। आदिशब्देन `ह्रद्भगसिन्ध्वन्ते पूर्वपदस्य' (7.3.19), `अनुन्नतिकादीनाञ्च' (7.3.20), `देवताद्वन्द्वे च' (7.3.21)--इत्येवमादयो गृह्यन्ते। एषु पञ्चमीनिर्देशाभावादसत्युत्तरपदाधिकारोऽङ्गसयाचामादेरच एव वृद्धिः स्यात्, नोत्तरपदस्य। तस्मात् तदर्थमुत्तरपदाधिकारः क्रियते।

यद्येवम्, इह `अवयवादृतोः' (7.3.11) इत्येतन्नोपन्यसनीयम्, अत्र पञ्चमीनिर्देशस्य विद्यमानत्वात्? इति चोद्यमाशङ्क्यान्यार्थं क्रियमाणस्य यत्रापि पञ्चमीनिर्देशोऽस्ति, तत्रापि प्रासङ्गिकं कार्यमाह--`पञ्चमीनिर्देशेष्वपि' इत्यादि। प्रयोजनान्तरमपर्याह--`वृद्धेश्च' इत्यादि। उत्तरपदाधिकारे या विहिता वृद्धिरित्येष व्यपदेशो वृद्धेर्यथा स्यादित्यवमक्छञ्चोत्तरपदाधिकारः क्रियते। किं पुनः कारणमेवं वृद्धेरव्यपदेशः प्रार्थ्यते? इत्याह--`उत्तरपदवृद्धौ' इत्यादि। उत्तरपदाधिकारे विहिते वृद्धिमत्युत्तरपदे पूर्वपदस्यान्तोदात्तत्वं यथा स्यादित्येवमर्थम्। `उत्तरपदवृद्धौ सर्वञ्च' (6.2.105) इत्यत्रोत्तरपदाधिकारे या विहिता वृद्धिरित्येवं विधायते। एतत्कथं शक्यते विज्ञातुम्? यदि व्यपदेशार्थ उत्तरपदाधिकारः क्रियते, नान्यथा। तस्माद्व्यपदेशार्थश्चोत्तरपदाधिकारः कर्त्तव्यः।।

11. अवयवादृतोः। (7.3.11)

`ऋतोः' [नास्ति--मु. पुस्तके] इति। नेदं स्वरूपग्रहणम्, किं तर्हि? अर्थग्रहठणम्। तथा ह्यवययवादित्युच्यते, ऋतोश्चायं एवावयधी भवति। अवयविथ्येनतौ। विज्ञयमानेऽर्थनिर्देशोऽयं विज्ञायते, ततश्चावयववाचिनः पूर्वपदादुत्तरस्यर्त्तुवाचिनः कार्यं विज्ञायत इत्याह--`अवयववाचिनः' इत्यादि। `एकदेशिसमासः' इति। पूर्वापरादिसूत्रेण (2.2.1)। ननु ग्रहठणवता प्राप्तिपधेकेन तदन्तविधिः (व्या.प.89) प्रतिषिध्यते, तत्कथं वर्षाहेमन्ताभ्यां प्रत्ययो विधीयमानस्तदन्ताभ्यां लक्ष्यते? इत्याह--`तत्र ऋती वृद्धिमद्विधाववयवानाम्' इति।

`पौर्ववर्षिकः' [पौर्ववार्षिकम्--काशिका] इति। पूर्वाश्च ता वर्षाश्चेति विशेषणसमासं कृत्वा भवार्थे तद्धितो विधेयः। पूर्वशब्दोऽत्र कालवाची, न त्ववयववाचीत्यङ्गस्यादिवृद्धिरेव भवतोति। अथात्रापि तदन्तविधिना ठक् कस्मान्न भवपति? इत्याह--`अवयवपूर्वस्यैव हि' इत्यादि।।

12. सुसर्वार्धाज्जनपदस्य। (7.3.12)

`जनपदस्य' इति। नेवं स्वरूपग्रहणम्, उत्तरसूत्रे `अमद्राणाम्' (7.3.13) इति निषेधात्। उत्तरसूत्रेहीदमेव जनपदग्रहणमनुवर्त्तते, ततोऽत्र यदि स्वरूपग्रहणं स्यात्, मद्राणां प्रतिषेधोऽनर्थकः स्यात्, तस्मादर्थस्येदं ग्रहणम्, तेन जनपदवचिनः कार्यं विज्ञायत इत्याह--`सुसर्वार्धं इत्येतेब्य उत्तरस्य जनपदवाचिनः' इत्यादि। `सुपाञ्चालकः' इति। शोभनाः पञ्चाला इति प्रादिसमासः। `सर्वपाञ्चालकः' इति। `पूर्वकालैक' (2.1.49) इत्यादिना कर्मधारयः। `अर्धपाञ्चालकः' इति। `अर्ध नपुंसकम्' (2.2.2) इत्यर्धशब्देन तत्पुरुषः। सर्वत्र शैषिके जातादावर्थे तद्धितः। कथं जनपदात् `जनपदतदवद्योश्च' (4.2.124) इत्युच्यमानः प्रत्ययस्तदन्ताद्भवति? इत्याह--`सुसर्वार्धदिक्शब्देभ्यः' इत्यादि।।

13. दिशोऽमद्राणाम्। (7.3.13)

`पूर्वपाञ्चालकः' इति। पूर्वेषु पाञ्चालेषु भवति इति तद्धितार्थे समासः, ततो वृञ्। दिश इति किम्? पूर्वं पाञ्चालानां पूर्वापाञ्चालः। पूर्वापरादि (2.2.1) सूत्रेणैकादेशिसमासः, तत्र भवः पौर्वपाञ्चालः। दिशि यो वर्त्तते स इह दिक्शब्दोऽभिप्रेतः। न चायं पूर्वशब्दो दिशि वर्त्तते, किं तर्हि? अवयवे। तेन

पूर्वपदवृद्धिरेव भवति। योगविभाग उत्तरार्थः। प्राचां ग्रामनगराणां दिश एवोत्तरपदस्य यथा स्यात्, सुसर्वार्धान्मा भूदिति।।

14. प्राचां ग्रामनगराणाम्। (7.3.14)

`जनपदस्य' (7.3.12) इत्यनुवर्त्तते, तेन प्राचामित्येतद्देशग्रहणं विज्ञायते न त्वाचार्यग्रहणमिति मात्वाऽऽह--`प्राचां देशे ग्रामाणाम्' इत्यादि। `पुर्वेषुकामशमः' इति। पूर्वा चासाविषुकामशमी चेति `दिक्संख्ये संज्ञायाम्' (2.1.50) इति समासः, ततो भवार्थे `दिक्पूर्वपदादसंज्ञायां ञः' (4.2.107) इति। `पूर्वपाटलिपुत्रकः' इति। पूर्वस्मिन् पाटलिपुत्रे भव इति पूर्ववत् तद्धितार्थे समासः। `रोपधेतोः' (4.2.123) इति वुञ्।

ननु चैकमेव पाटलिपुत्रम्, तत्र पाटलिपुत्रान्तरस्य व्यवच्छेद्यस्याभावात्, तत्कथं पूर्वशब्देन पाटलिपुत्रशब्दो विशिष्यते? पाटलिपुत्रैकदेशे पाटलिपुत्रशब्दो वर्त्तत इत्यदोषः। अथ नगरग्रहणं किमर्थम्, न `ग्रामाणाम्' इत्येवं सिद्धम्, नगरमपि हि ग्रामो भवत्येव; जननिकायनिवासे ग्रामो रूढः, नगरञ्च जननिकायनिवास एव, अतश्च नगरमपि ग्रामः, यतो ये ग्रामे विधयो नेष्यन्ते, नगरेऽपि ते न क्रियन्ते। तथा हि--`अभक्ष्यो ग्राम्यकुक्कुटः', `अभक्ष्यो ग्राभ्यशूकरः'--इत्युक्ते नागरोऽपि न भक्ष्यते; `ग्रामे नाध्येतव्यम्' इत्युक्ते नगरेऽपि नाधीयते, तस्मान्नगरमपि ग्रामः। एवञ्च कृत्वा--`उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्', (4.2.109), `वाहीकग्रामेभ्यश्च' (4.2.117), `दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु' (6.2.103) इत्यत्र ग्रामग्रहणेन नगरग्रहणमपि भवतीत्याह--`ग्रामत्वादेव' इत्यादि। यदि तर्हि नगरमपि ग्रामः, तदा `विशिष्टलिङ्गो नदीदेशोऽग्रामाः' (2.4.7) इत्यत्र नगरग्रहणं प्राप्नोति? सत्यमेतत्, तत्र तु नगराणां प्रतिषेधो वक्तव्यः। स एव च सम्बन्धभेदः कुतो हेतोर्भवति, यस्य प्रतिपत्तथे ग्रामनगरयोर्भेदेनोपादानं क्रियते! इत्याह `दिक्पूर्वपदो हि' इत्यादि। यदि हि यथा दिक्पूर्वपदः पूर्वोत्तरसमुदायः पूर्वेषुकामशम्यादिर्ग्रामनामधेयम्, तथा नगरनामधेयमपि स्यात्, ततः सम्बन्धो न भिद्येत। यथा च पाटलिपुत्रादिशब्दरूपमुत्तरपदभूतमेव नगरसय वाचकम्, तथा यदि ग्रामनामधेयमपि ग्रामस्य स्यात्, एवमपि सम्बन्धो न भिद्येत? न चैवम्; अन्यादृश एव हि पूर्वोत्तरसमुदयातमको ग्रामवाची शब्दः, अन्यादृशश्चोततरपदात्मको नगरवाची शब्दः। तस्माद्ग्रामनगरयोर्भेदात् सम्बन्धभेदो भवति। एवं सम्बन्धभेदहेतुं दर्शयित्वा सम्बन्धभेदं दर्शयन्नाह--`तत्र' इत्यादि। `ग्रामवाचिनाम्' इति। पूर्वोषुकमशमीत्येवमादीनाम्। `अवयवस्य' इति। इषुकामशमी-कृष्णमृत्तिकेत्येवमादेः। `दिक्शब्दात्' इति। पुर्वादेः। `इतरत्र तु' इत्यादि। नगरेषु। `देश उत्तरेषां नगराणाम्' इति। अत्र वृद्धिर्भवतीत्यभिसम्बन्धः क्रियत इत्येतदपेक्ष्यते।।

पूर्वेषुकामशन इत्येवमादिषु पूर्वोत्तरपदयोरन्तरङ्गत्वाद्गुणे कृते दिक्शब्दोग्रामश्चोत्तरपदं नास्तीति वृद्धिर्न प्राप्नोति, वृद्धिर्हि तद्धिते कृते तदाश्रयेण भवन्ती बहिरङ्गा भवति। प्रागेव तद्धितोत्पत्तेर्गुणः प्राप्नुवन्नन्तरङ्गो भवति। न च वचनाद्वृद्धिर्भविष्यतीति शक्यते वक्तुम्, यत्र ह्येकादेशो नास्ति स च वचनस्यावकाशः--पूर्वकार्ष्णमृत्तिक इत्येवमादौ। न चान्ताविवद्भावोऽस्ति; `उभयत आश्रये नान्तादिवत्' (व्या.प.51) इति प्रतिषेधात्। अतोऽत्र पूर्वपदमुत्तरपदञ्चाश्रीयते? इति यश्चोदयेत्, तं प्रत्याह--`पुर्वेषुकामशम इत्येवमादिषु' इत्यादि। यथा `नेन्द्रस्य परस्य' (7.3.22) इति निर्देशनायमर्थो ज्ञापितः तथा `अदस औ सुलोपश्च' (7.2.107) इत्यत्र प्रतिपादितः। `ग्रामनगराणाम्' इति बहुवचनं स्वरूपविधिनिरासार्थम्।।

15. संख्यायाः संवत्सरसंख्यस्य च। (7.3.15)

`द्विसांवत्सरिकः' इति। पूर्ववत् तद्धितार्थे समासः। ततः प्राग्वतीयष्ठञ्।

`द्विषाष्टिकः, द्विसाप्ततिकः' इति। ननु च `तमधीष्टो भृतो भृतो भावी' (5.1.80) इत्यत्र कालादिति। (5.1.78) वर्त्तते, न द्विषष्ट्यादिः कालशब्दः, किं तर्हि? संख्याशब्दः, तत्कथं कालाधिकारविहितं प्रत्ययमुत्पादयति? इत्याह--`द्विषष्ट्यादिशब्दः' इत्यादि। कालवाचिशब्दस्तत्र कालग्रहणेन गृह्यते, द्विषष्ट्यादिशब्दो हि यदा वर्षेषु संख्येयेषु वर्त्तते, तदा कालवाचित्वात् कालशब्दो भवति। ततः कालाधिकारीयं प्रत्ययमुत्यादयति।

अथ संवत्सरग्रहणं किमर्थम्, यावतः `परिमाणान्तस्यासंज्ञाशाणयोः' (7.3.17) इत्यत्र परिमाणशब्देन परिच्छेदहेतुमात्र गृह्यते, न तु प्रस्थादिवदारोहपरिणाहपरिच्छेदहेतुः, अन्यथा हि शाणप्रतिषेधोऽनर्थकः स्यात्, न हि शाणः परिमाणमारोहपरणाहपरिच्छेदहेतुः, अतः कालोऽपि परिच्छेदहेतुर्भवति, ततश्च सोऽपि परिमाणमिति संवत्सरशब्दस्य `परिमाणस्यासंज्ञाशाणयोः' (7.3.17) इत्येव सिद्धम्? इति चोद्यनिरासायाह--`संवत्सरग्रहणम्' इत्यादि। परिमाणग्रहणेन कालपरिमाणस्य ग्रहणं मा भूदित्येवमर्थं संवत्सरग्रहणम्। संवत्सरग्रहणेनासावर्थो ज्ञाप्यते--`परिमाणग्रहणे कालपरिमाणग्रहणं न भवति' इति। ततश्च यत्र परिमाणग्रहणं तत्र कलपरिमाणं न गृह्यते। `तेन' इत्यादिना परिमाणग्रहणे कालपरिमाणस्याग्रहणे सति यदिष्टं सिध्यति तद्दर्शयति। `उत्तरपदवृद्धिरन भवति' इति। `परिमाणान्तस्य' (7.3.17) इत्यादिना। `द्विवर्षा' इति। द्वे वर्षे भृतो भूतो भावी वा, पूर्ववट्ठक्, तस्य `वर्षाल्लुक्' (5.1.88) इत्यनुवर्त्तमाने `चित्तवति नित्यम्' (5.1.89) इति लुक्। `पर्युदासो न भवति' इति। ङीप्प्रतिषेधे कर्त्तव्ये तेन प्रतिषेधः। प्रवर्त्तत एवेति `द्विगोः' (4.1.21) इति ङीब्न भवति।।

16. वर्षस्याभविष्यति। (7.3.16)

`द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतति दैवार्षिको मनुष्यः' इति। अत्राधीष्टभृतयोस्तद्धित उत्पन्ने भविष्यता प्रतीयते, तस्मात् तयोरपि प्रतिषेधेन भवितव्यमिति कस्याचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह--`अधीष्टभृतयोः' इत्यादि। किं पुनः कारणं न भवति? इत्याह--`गम्यते हि' इत्यादि। तत्र

यदि शब्दान्तरम् `द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यति' इति प्रयुज्यते, ततो भविष्यत्ता गम्यते, नान्यथा। तस्मान्नासौ तद्धितार्थ इत्यधीष्टभृतयोरभविष्यतीति प्रतिषेधो न भवति। ननु च मनुष्येऽभिधेये `चित्तवति नित्यम्' (5.1.89) इति ठञो लुका भवितव्यम्, तत्कथं द्विवार्षिको मनुष्य इति सिध्यति? नैष दोषः; न ह्यसावविशेषेण लुक्, किं तर्हि? विशिष्ट ेव विषये। कथम्? ततर नित्यग्रहणं कर्त्तव्यम्, पूर्वेणैव सिद्ध आरम्भसामर्थ्यादेव नित्यं लुग्भविष्यतीति, तत् कृतं विशिष्टे विषये भूते यथा स्यात्, अधोष्टादी मा भूदित्येवमर्थम्। तेनाधीष्टादौ `वर्षाल्लुक्' (5.1.88) इति विभाषैव लुग्भवति।।

17. परमाणान्तस्यासंज्ञाशाणयोः। (7.3.17)
संज्ञायाः परत्वं न सम्भवतीत्यतः संज्ञाशाणयोरिति विषयसप्तमीं दर्शयन्नाह--`संज्ञायां विषये' इत्यादि। `शाणे चोत्तरपदे' इति। विषय इत्यपेक्षते। यद्यप्युत्तरपदस्य[यद्युत्तरपदस्य--मुद्रित पाठः] शाणस्य परत्वमुपपद्यते, तथापि दुर्घटमेकस्याः सप्तम्या विषयसप्तमीत्वम्, परसप्तमीतवञ्चेति। तेन शाणशब्दमप्युत्तरपदं प्रति विषयसप्तम्येषा युक्ता। `द्विकौडविकम्' इति। `प्राग्वतेष्ठञ' (5.1.18)। अनार्हीयत्वाच्च प्रत्ययस्य `अध्यर्थपूर्वद्विगोः' (5.1.28) इति लुग्न भवति। `द्विसौवर्णिकः' [द्विसौवरणिकम्--काशिका] इति। स एव प्रत्ययः। कथं पुनरत्र वृद्धिः, यावता परिमाणान्तस्येत्युच्यते, सुवर्णञ्च गुरुत्वमानादुन्मानम्, न परिमाणमिति? नैव दोषः; आचार्यप्रवृत्तिर्ज्ञायति--`गुरुत्वपरिमाणमपीह परिच्छेदहेतुत्वात् पूरिमाणं गृह्यते' इति; यदयम् `असंज्ञाशाणयोः' इति शाणप्रतिषेधमारमते। अथ `अध्यर्धपूर्व' (5.1.28) इति लुक्कस्मान्न भवति? इत्याह--`विभावा' इत्यादि। `द्विनैष्किकम्' इति। `असमासे निष्कादिभ्यः' (5.120) इति ठक्।
`पाञ्चलोहितिकः' [पाञ्चलोहितिकम्--काशिका] इति। तस्मिन्नेव ठकि कृते `भस्याढे तद्धिते' (वा.731) इति पुंवद्भावेन `वर्णादनुदात्तात्, तोपधात् तो तः' (4.1.39) इत्यनेन विहितयोर्ङीब्नकारयोर्निवृत्ति।
`द्वैकुलिजिकम्' [द्वैकुलिजिकः--काशिका] इति। प्राग्वतीयष्ठञ्च।।

18. जे प्रोष्ठपदानाम्। (7.3.18)
`संख्यायाः' (7.3.15) इति निवृत्तम्। "`जे' इति जातार्थो निर्दिश्यते" इति। जातशब्दैकदेशस्य `जे' इति, तस्यायं प्रयोगः। भवति हि पदैकदेशस्यापि प्रयोगः, यथा--भोमो भीमसेनः, सत्यभामा भामेति। तस्माज्जातशब्दस्यैकदेशस्य प्रयोगेण जातार्थो निर्दिश्यत इति विज्ञेयम्।
`प्रोष्ठपदासु' इति। `लुपि युक्ततवद्व्यक्तिवचने' (1.2.51) इति युक्तवदभावः। `भद्रयादाः' इति। भद्रपदेन युक्तः काल इति अणादिकार्यं पूर्वविद्विधेयम्।।

19. हृद्भगसिन्ध्वन्ते पूर्वपदस्य च। (7.3.19)
`सौहार्दम्' इति। तस्येदम्' (4.3.120) इत्यण्। यदा सुहृदयशब्दादण्, तदा `हृदयस्य हृल्लेखयदण्लासेषु' (6.3.50) इति हृद्भावः। `सौहार्द्यम्' इति। `गुणवचनब्राह्मणादिभ्यः' (5.1.124) इति ष्यञ्, `वा शोकष्यञ्रोगेषु' (6.3.51) इति हृद्भावः। `सौभागिनेयः, दीर्भागिनयः' इति। `कस्याण्यादीनामिनङ च' (4.1.126) इति ढकि कृत इनङादेशः।
`सक्तुसिन्धवः' इति। शापकपार्थिवादित्वान्मध्यमपदलोपो समासः। `साक्तुसैन्धवः' इति। ओर्देशे (4.2.119) ठञि प्राप्ते `कच्छादिभ्यश्च' (4.2.133) इत्यण्। ननु च केवलस्तत्र सिन्धुशब्दः पठ्यते, कथं तदन्ताद्भवति? इत्याह--`तेन' इत्यादि। कथं पुनस्तेन सिन्धुशब्देन तदन्तविधिर्लभ्यते, यावता `ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' (व्या.प.89) इति तदन्तविधिः प्रतिषिध्यते? नैष दोषः; चकारस्तत्रानुक्तसमुच्चयार्थः, तेन सिन्धुशब्दात् तदन्तादपि भवति।।

20.अनुशतिकादीनां च। (7.3.20)
`अनुशतिक' इति। शतेन क्रीतः--`शताच्च ठन्यतावशते' (5.1.21) इति ठन्--शतिकः, अनुगतः शतिकेनानुशतिकः, ततः `तस्येदम्' (4.3.120) इत्यण्। आनुशातिकम्, आनुहौडिकम्' इति। `चरति' (4.4.8) इति ठक्। `आनुसांवत्सरिकम्' इति। `तत्र च दीयते कार्यं भववत्' (5.1.96) इत्यतिदेशात् `बह्वचोऽन्तोदात्तात्' (4.3.67) इति ठञ्। `आङ्गारवैणवः' इति। `तस्यापत्यम्' (4.1.92) इत्यण्।
`आसिहात्यम्' इति। `तत्र भवः' (4.3.53) इत्यण्। `आस्यहात्यम्' इति। `विमुक्तादिभ्योऽण्' (5.2.61)। `आस्यहैतिकम्' इति पाठे `तदस्य प्रयोजनम्' (5.1.109) इति प्राग्वतीयष्ठञ्। ननु च प्रातिपदिकादिति वर्त्तते, अस्यहत्यास्यहेतिश्च पदसमुदायोऽयम्, न प्रातिपदिकम्, तत्कथमतः प्रत्ययः? सत्यपि वा प्रत्यये कथं विभक्तेरलुक्? इत्याह--`अत एव' इत्यादि।
`वाध्यौगः' इति। `अनुष्यानन्तर्ये बिदादिभ्योऽञ्' (4.1.104)। `पौष्करसादिरानुहारतिः' इति। `बाह्वादिभ्यश्च' (4.1.96) इतीण्। `कौरुकात्यम्' [कौरुकात्यः--काशिका] इति। गरगादित्वादयञ्। `कौरुपाञ्चालः' इति। `तत्र भवः' (4.3.53) इत्यण्। ननु च जनपदशब्दा `जनपदतदवध्योश्च' (4.2.124) इति वुञा भवितव्यम्! इत्यत आह--`जनपदसमुदायो जनपदग्रहणेन' इत्यादि। कुरुपञ्चालशब्दो हि जनपदमुदायवचनः, न च

जनपदसमुदायो जनपदग्रहणेन गृह्यत इति कुतो वुञ्प्रसङ्गः? `औदकशौद्धिः' इति। `अत इञ्' (4.1.95)।
`ऐहलौकिकः, पारलौकिकः' इति। `लोकोत्तरपदस्य' [लोकोत्तरपदाच्च--इति वर्तिकम्](वा.459) इति ठञ्। एतत् `समानस्य तदादेश्च' इत्येवमादिकायां कारिकायामियमिष्टिरिति पठ्यते। `सार्वलौकिकः' इति। `लोकसर्वलोकाट्ठञ्' (5.1.44)। `सार्वपौरुषम्' इति। `तस्येदम्' (4.3.120) इत्यण्।
`सार्वभौमः' इति। `सर्वभूमिपृथिवीभ्यामणञौ' (5.1.41) इत्यण, अञ्चा। `प्रायौगिकः' इति। अध्यात्मादित्वात् (वा.456) ठञ्। `पारस्त्रैणेयः' इति।
`कुलटाया व' (4.1.127) इतीनङ्। तत्र `स्त्रीभ्यो ढक्' (4.1.120) `कल्याण्यादीनामिनङ् च' (4.1.146) इत्यनुवर्त्तते।
`राजपौरुष्यम्' इति। ब्राह्मणादित्वात् (5.1.124) ष्यञ्। `सौत्रनाडिः' इति। `अत इञ्' (4.1.95) `आभिगामिकः' इति। अभिगममर्हतीत्यार्हीयष्ठक् (5.1.63)।
`आधिदैविकम्, आधिभौतिकम्' इति। भवार्थेऽध्यात्मादित्वात् (वा.456) ठञ्। `चातुर्वेद्यम्' इति। ष्यञ्। स्वार्थिको वक्तव्यश्चातुर्वर्ण्यादिसिद्ध्यर्थमिति स्वार्थं एव ष्यञ्।।

21. देवताद्वन्द्वे च। (7.3.21)
`आग्निमारुतीम्' इति। अग्निश्च मरुच्चेति द्वन्द्वः, तौ देवते अस्याः--`सास्य देवता' (4.2.24) इत्यण्; ततः पूर्वोत्तरयोर्वृद्धिः, `इद्वृद्धौ' (6.3.28) इत्यग्निशब्दस्यानङ्विषय इकारादेशः, `टिड्ढाणञ्' (4.1.15) इति ङीप्।
`यो देवताद्वन्द्वः सूक्तसम्बन्धी इत्यादि। यः सूक्तं भजते स सूक्तसम्बन्धी, यस्मै हविर्निरूप्यते स हविः सम्बन्धीति। अर्थद्वारकं चेदं द्वन्द्वस्य विशेषणम्। `इह च न भवति' इत्यादि। कथं पनः सामान्योक्तो सत्यामयं विशेषो लभ्यते? एवं मन्यते--`नेन्द्रस्य परस्य' (7.3.22) इत्यतर नेति योगविभागः कर्त्तव्यः, तेन सूक्तसम्बन्धिनो हविःसम्बन्धिनश्चान्यत्र न भवतीति। `स्कान्दविशाखः' इति। `तस्येदम्' (4.3.120) इत्यण्। `ब्राह्मप्रजापत्यम्' इति।
`दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' (4.1.85)।

22. नेन्द्रस्य परस्य। (7.3.22)
`सैमेन्द्रः, आग्नेन्द्रः' इति। `सास्य देवता' (4.2.24) इत्यण्, `देवताद्वन्द्वे च' (7.3.21) इत्यानङादेशः, पूर्वपदस्याद्गुणः। `ऐन्द्राग्नम्' इति। अत्रापि पूर्ववदणादिकार्यम्। `इन्द्रशब्दे द्वावचौ' इत्यादि। प्रागेवोक्तत्वात् सुबोधम्।।

23. दीर्घाच्च वरुणस्य। (7.3.23)
`ऐन्द्रावरुणम्, मैत्रावरुणम्' इति। `देवताद्वन्द्वे च' (7.3.21) इत्यानङि कृते दीर्घात् परो वरुणशब्दः।।

24. प्राचां नगरान्ते। (7.3.24)
यद्यत्र प्राचामित्यत्राचार्यग्रहणं स्यात्, ततश्चोत्तरसूत्रे (7.3.26) `विभाषितम्' इति न ब्रूयात्,एतदेव विकल्पार्थं प्राचांग्रहणं तत्रानुवर्त्तिष्यते। तस्माद्देशग्रहणं विज्ञायते इत्याह--`प्राचां देशे' इत्यादि। नगरग्रहणेनेह स्वरूपग्रहणम्; `स्वं रूपं शब्दस्य' (1.1.68) इति वचनात्।।

25. जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम्। (7.3.25)
`उत्तरम्' इत्यनेनोत्तरपदं लक्ष्यते; तस्य चोत्तरपदस्य नित्यं सन्निधानात् विभाषितत्वं नोपपद्यते। तस्मात् तत्सम्बन्धिन्या वृद्धेर्विभाषितत्वात् `विभाषितम्' इत्युक्तम्। अत एवाह--`उत्तरपदस्य विभाषा भवति' इति। वृद्धिरिति प्रकृतेन सम्बन्धः।।

26. अर्धात् परिमाणस्य पूर्वस्य तु वा। (7.3.26)
`आर्धद्रौणिकम्' इति। `अर्धं नपुंसकम्' (2.2.2) इति समासः, `प्राग्वतेष्ठञ्' (5.1.18)। अथ वावचनं किमर्थम्, न विभाषितमिति (7.3.25)पूर्वसूत्रादनुवर्त्तष्यते, उत्तरमित्यनेन तत् सम्बद्धम्, अतस्तदनुवृत्तावुत्तरपदस्यैव विकल्पः स्यादिति चेत्? नैतदस्ति; उततरपदमित्येतन्न स्वरिष्यते, तुशब्दश्चेह क्रियते, स नियमर्थो भविष्यति--पूर्वस्यैव भवति, नोत्तरस्येति। एवं तर्ह्येकयोगे स्वरतत्वकरणाकरणाद्धि वावचनमेव लधीय इति पुनर्वावचनं क्रियते।।

27. नातः परस्य। (7.3.27)
पूर्वेण परिमाणस्य वृद्धिरुच्यमाना अकारस्याचमादेः प्राप्नोतीति प्रतिषिध्यते। पूर्वपदस्य तु विकल्पो भवत्येव; पूर्वस्य त्वित्यनुवृत्तेः। `आर्धप्रस्थिकः' इति।
`अर्धं नपुंसकम्' (2.2.2) इति समासः, पूर्ववत् प्रत्ययः।
`किञ्च स्यात्' इति। एवं मन्यते--आकारो हि वृद्धिमानेव, ततर नास्ति विशेषः सत्यसति वा वृद्धिपरतिषेधे, तदेव रूपम्, अतोऽसत्यपि तपरकरणे नैव

किञ्चिदनिष्टमापद्यत इति। `वृद्धिनिमित्तस्य' इत्यादि। यसति तपरकरणे तत्कालार्थे यदनिष्टमापद्यते तद्दर्शयति। किं पुनः कारणं पुंवद्भावप्रतिषेधो न स्यात्? इत्यत आह--`यत्र हि' इत्यादि। वृद्धिं कुर्वन्नेव हि तद्धितो वृद्धिनिमित्तं भवति। तस्माद्यत्र तद्धिते वृद्धिप्रतिषेधः क्रियते स वृद्धेनिमित्तं न भवति। तेन वृद्धिनिमित्तस्य तद्धितस्य पुंवद्भावो न प्रतिषिध्यत इति पुंवद्भावः स्यात्। क्व? `यथा' इत्यादि। `वैयाकरणी भार्याऽस्य' इति। वृद्धिप्रतिषेधः पुनरत्र `न य्वाभ्याम्' (7.3.3) इत्यादिना। अथ परस्येति किमर्थं, पूर्वस्य मा भूदिति? नैतदस्ति; अत इति विशेषणोपादानसामर्थ्यात् पूर्वस्य न भविष्यति। न हि पूर्वस्यार्धशब्दस्यातोऽन्यो वृद्धिमाक् सम्भवति, `पूर्वस्य तु वा' (7.3.26) इति च विकल्पशासनमनर्थकं स्यात्, यदि तस्य प्रतिषेधः स्यात्। इदं तर्हि प्रयोजनम्--तदन्तविधिर्मा भूदिति? तदन्तदिधौ सतीहापि प्रतिषेधः स्यात्--अर्धद्रौणिकमिति। पूर्वस्तु विधिः--अर्धेन मुष्टिना क्रोतमर्धमौष्टिकम्, आर्धमौष्टिकमित्येवमर्थः स्यात्, परग्रहणे तु सति यदर्धात् परमनन्तरं तदेवाश्रितं भवतीति नास्ति तदन्तविधिप्रसङ्गः।।

28. प्रवाहणस्य ढे। (7.3.28)

प्रवाहणशब्दस्य ढे प्रत्यये परत उत्तरपदस्येति व्यधिकरणे षष्ठ्यौ। प्रवाहणशब्दसय यदुत्तरपदमवयवस्तस्येत्यर्थः। `प्रवाहणेयः' इति। वहेः प्रपूर्वाण्णिच्--प्रवाहयतीति प्रवाहणः। णिजन्तात् `कृत्यल्युटो बहुलम्' (3.3.113) इति कर्त्तरि ल्युट्, प्रादिसमासः, `णेर्विभाषा' (8.4.30) इति णत्वम्, ततोऽपत्यार्थे ढक्। किमर्थं पुनरुत्तरपदस्य वृद्धिर्विधीयते, यावता वृद्धिमवेवैतत्? यदप्येवम्, तथापि वृद्धिरविधातव्या; तद्धितस्य वृद्धिनिमित्तत्वात्, `वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' (6.3.39) इति पुंवद्भावप्रतषेधो यथा स्यात्। यदि ह्युत्तरपदवृद्धिर्न विधीयते, ततो यस्मिन् पक्षे पूर्वपदे वृद्धिर्न विधीयते तस्मिन् पक्षे प्रवाहणेयी भार्या अस्येति प्रवाहणेयीभायं इत्यत्र पुंवद्भावप्रतषेधो न स्यात्; वृद्धेरनिमित्तत्वात् तद्धितस्य। यथा--वैयाकरणभायं इत्यत्र। ननु चासत्यपि वृद्धिनिमित्तत्वे तद्धितस्य' `जातेश्च' (6.3.41) इति पुंवद्भावप्रतिषेधो भविष्यति, अस्ति ह्यत्रापि `गोत्रं च चरणैः सह' (म.भा.2.225) इति जातित्वम्? एवं तर्हि एतज्ज्ञापयति--अनित्योऽयं प्रतिषेध इति। तेन हस्तिनीनां समूहो हास्तिकमित्यत्र `भस्याढे तद्धिते' (वा.731) इत्यौपसंख्यानिकस्य पुंवद्भावस्य प्रतिषेधो न भवति।।

29. तत्प्रत्ययस्य च। (7.3.29)

`प्रावाहणेयिः' इति। `अत इञ्' (4.1.95)। `प्रावाहणेयकम्' इति। `गोत्रचरणादषुञ्' (4.3.126)।

अथ किमर्थमिदमुच्यते, यावता ढप्रत्ययन्तस्य प्रवाहणेयशब्दस्योत्तरपदं नित्यं वृद्धिमदेदेति, तदर्थस्तावदारम्भो न युक्तः; पूर्वपदस्य वृद्धेर्विकल्पो यथा स्यादित्येवमर्थोऽपि नैवास्यारम्भो युज्यते; इञादावपि तद्धिते तन्निमित्तां वृद्धिं बाधित्वा पूर्वसूत्रेण च निमित्त एव विकल्पो भविष्यति, न हीञादावुतपन्ने तद्धिते ढस्य परत्वमपैति? इत्याह--`बाह्यतद्धित' इत्यादि। बाह्यतद्धिनो निमित्तं यस्याः सा तथोक्ता। बाह्यत्वं पुनरित्रदेस्तद्धितस्य प्रावाहणेयशब्देऽनन्तर्भावात्। सैवं बाह्यं तद्धितं निमित्तमाश्रित्य भवन्ती बहिरङ्गा। प्रागेव तु ब्राह्यतद्धितोत्पत्तेर्ढाश्रयो विकल्पो भवन्नन्तरङ्गस्तां बाधितुं न शक्नोति। ततश्च यदीदं नारभ्येत तदा स्यादेव। तस्माद्विकल्पार्थमिदमारभ्यते।।

30. नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्। (7.3.30)

उदाहरणान्युत्तरत्र व्युत्पादयिष्यन्ते।

`अत्र केचदहुः' इत्यादि। ग्रहणकवाक्यम्। अस्य `न नञ्पूर्वात् तत्पुरुषात्' इति विवरणम्। `न नञ्पूर्वात् तत्पुरुषात्' (5.1.121) इति त्वतल्भ्यामन्यो भावप्रत्ययः प्रतिषेध्यते, तत्रोत्तरं भावप्रत्ययमिच्छता शूच्यादिभ्य एव, न तु नञ्समासेभ्य उत्तरो भावप्रत्ययः कर्त्तव्यः। तस्मिन् कृते पश्चान्नञ्समासः, ततश्चाङ्गस्यामादेरचो विधीयमाना वृद्धिर्न प्राप्नोति। न हि पूर्वं भावप्रत्यये कृते पश्चान्नञ्समासे नञ् अङ्गसयाचामादिर्भवति, उत्तरपदस्यैवाङ्गत्वात्; उच्यते चेदं वचनम्, तत्र वचनसामर्थ्यादङ्गस्यापि वृद्धिर्भवति।

`तदपरे' इत्यादि। यदुक्तमियं पूर्वपदस्य वृद्धिरप्राप्तैव विभाष विधीयत इति, तदपर आचार्या न क्षमन्ते। किं कारणम्? इत्याह--`भाववचनादन्योऽपि हि' इत्यादि। एवकारो भिन्नक्रमो विद्यत इत्यस्यानन्तरं द्रष्टव्यः। यदि नञ्समासादपत्यादिष्वर्थेषु वृद्धिनिमित्तं भाववचनादपरस्तद्धितो न विद्येत, एवं बहुव्रीहेश्च नञ्समासाद्भाववचनादन्योऽपि न विद्येत; ततो युज्यतेऽशुच्यादिशब्दानामनङ्गत्वादङ्गाधिकारोपमर्दनेन वृद्धिवचनस्याकृतार्थत्वात्। न त्वेतदेवम्; विद्यत एव ह्यन्योऽपत्यादिव्वर्थेषु नञ्समासाद्वृद्धिनिमित्तस्यद्धितः--अकुशलस्यापत्यमाकौशलिः, अकुशलस्येदमाकौशलमिति। बहुव्रीहेश्च नञ्समासाद्भाववचनोऽपि विद्यत एव--नास्य शुचयो विदयन्त इत्यशुचिः, तस्य भावः, `इगन्ताच्च लघुपूर्वात्' (5.1.131) इत्यण्--आशौचम्। यत एवमन्योऽपि भाववचनात् तद्धितो नञ्समासाद्विद्यते, वृद्धिनिमित्तको बहुव्रीहेश्च नञ्समासाद्भाववचनोऽपि विद्यते; तस्मात् तत्र कृतार्थत्वाद्वचनस्याङ्गाधिकारबाधनं च युच्यते।

यदप्युक्तम्--`न नञ्पूर्वात् तत्पुरुषादित्युत्तरो भावप्रत्ययः एव'(इति), तदप्ययुक्तमिति दर्शयन्नाह--`अक्षेत्रज्ञोऽनीश्वरः'[`अक्षेत्रज्ञानीश्वरौ'--काशिका] इत्यादि। एतौ हि द्वौ शब्दौ बाह्मणादिषु तत्पुरुषावेव पठ्येते, तेनाभ्यां तत्पुरुषाभ्यामेव ष्यञ् भवति, अन्यथा हि ब्राह्मणादिष्वनयोः पाठस्य वैयर्थ्यं स्यात्। तस्मादङ्गस्यैवेयं वृद्धिर्नित्यं प्राप्ता सती भावप्रत्यये, अन्यत्र च तद्धिते विकल्पेन विधीयते यथायोगम्। ततराशौचमिति यदि तत्पुरुषः क्रियते--न शुचिरशुतचिः, तदा `तस्येदम्' (4.3.120) इत्यणि कृते वृद्धिः; अथ बहुव्रीहिः--नास्ति शुचिरस्येन्यशुचिः, ततो यदि भावार्थो विवक्ष्यते तदा `इगन्ताचच लघुपूर्वात्' (5.1.131) इत्यण्; अथ `तस्येदम्' (4.3.120) इत्यर्थो विवक्ष्यते, तदा `प्राग्दीवयतोऽण्' (4.1.83) इत्यण्--आनैश्वर्य्यम्, आक्षैत्रज्ञ्यमिति।

तत्पुरुषाभ्यां ब्राह्मणादित्वात् व्यञि कृते वृद्धिः। आकौशलमानैपुणमिति यदि बहुव्रीहिरयापि तत्पुरुषः, उभयथापि `तस्येदम्' (4.3.120) इत्यणेव। यद्यपि कुशलनिपुणशब्दौ ब्राह्मणादिषु युधादिषु च पठ्येते तथापि तदन्तात् तत्पुरुषाद्बहुव्रीहेरपि भावप्रत्ययो नोपपद्यते; तदन्तविधेरभावात्।

31.यथातथयथापुरयोः पर्यायेण। (7.3.31)
`ब्राह्मणादिषु नञ्समासावेतौ द्रष्टव्यौ' इति। तेन नञ्समासाभ्यां ष्यञ् भवतीति भावः। `एतौ' इति। यथातथा--यथापुरशब्दौ। "`यथाऽसावृश्यते' इत्यव्ययीभावसमासौ" इति। ननु च `असादृश्य' (2.1.7) इति प्रतिषेधः प्राप्नोति? नैष दोषः; न ह्यत्र सादृश्यं गम्यते। तथा हि--यथातथमिति सत्यमुच्यते, यथा--पुरमिति पुरातनम्। कथं पुनर्ज्ञायतेऽवययीभावसमासौ? इत्याह--`तथा हि' इत्यादि। अत्र हि `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति नपुंसकाश्रय ह्रस्वत्वं कृतम्। नपुंसकत्वं चाव्ययीभावस्य विहितम्, तस्मादव्ययीभावसमासाविति ज्ञायते। `भाष्ये तु' इत्यादि। अयथातथाभाव इति ह्रस्वत्वमकृत्वा वाक्यं यथा दर्शितां तथा `सुप्सुपा' (2.1.4) इति समासो लक्ष्यते नाव्ययीभावः। अव्ययीभावे हि नपुंसकाश्रयं ह्रस्वत्वं स्यात्। अस्मिंस्तु पक्षे सौत्रत्वान्निर्देशस्य--`छन्दोवत्सूत्राणि भवन्ति' (म.भा.) इति वर्णव्यत्ययेन दीर्घस्य स्थाने ह्रस्वो वेदितव्यः।।

32. हनस्तोऽचिण्णलोः। (7.3.32)
`तद्धितेष्विति निवृत्तम्' इति। अस्वरितत्वात्। `तत्सम्बद्धं कितीत्यपि' इति। निवृत्तमित्यपेक्षते। तत्सम्बद्धत्वं पुनस्तस्य `किति च' (7.2.118) इत्यत्र `तद्धितेषु' (7.2.117) इत्यनुवृत्तेः। यदि पुनः कितीत्यनुवर्त्तत, ततो लक्षणे `जायापत्योष्टक्' (3.2.52) `अमनुष्यकर्त्तृके च' (3.2.53) इति टकि कृते--जायाघ्नस्तिलकालक इत्यत्रापि स्यात्। ञ्णिद्ग्रहणं तु प्रत्ययमात्रेण सम्बद्धम्। अतः `तद्धितेषु' (7.2.117) इत्येतस्मिन् निवृत्तेऽपि तदनुवर्त्तत एव। `घातयति' इति। हेतुमण्णिच्। `हौ हन्तेर्ञ्णिन्नेषु' (7.3.54) इति कृत्वम्। `घातकः' इति। ण्वुल। `साधुघाती' इति। `सुप्यजातौ णिनिस्ताच्छील्ये' (3.2.78) इति णिनिः। `घातंघातम्' इति। `आभीक्ष्ण्ये णमुल् च' (3.4.22), `आभीक्ष्ण्ये द्वे भवतः' (वा.887) इति द्विर्वचनम्। `घातः' इति। भादे घञ् (3.3.18)।
`अघानि' इति। लुङ्, `चिण् भावकर्मणोः' (3.1.66) इति चिणादेशश्च; `भावकर्मणोः (1.3.13) इत्यात्मनेपदम्, `चिणो लुक्' (6.4.104) इति तकारस्य लुक्। `जघान' इति। लिट्, तिप्, तस्य णल्, `अभ्यासाच्च' (7.3.55) इति कुत्वम्-घकारः। अथेह कस्मान्न भवति--वृत्रं हतवानिति। `ब्रह्मभ्रूणवृत्रेषु क्विप्' (3.2.87), तदन्तात् `तस्येदम्' (4.3.120) इत्यण्, `षपूर्वहन्धृतराज्ञामणि' (6.4.135) इत्यल्लोपः--वार्त्रघ्नः, भ्रौणघ्नः? इत्याह--`धातोः' इत्यादि। धातोरित्येवमुच्चार्य यो विहितः प्रत्ययः स धातुप्रत्ययः। धातोः कार्यमुच्यमानं तत्रैव धातुप्रत्यये भवति। एतच्च भौणहत्यमिति निपातनेन (6.4.174) ज्ञापितम्। तेन वार्त्रघ्नः, भ्रौणघ्न इत्यादौ न भवति। न ह्यत्र धातोरित्येवं प्रत्ययो विहितः, किं तर्हि? प्रातपदिकादित्त्येवम्।।

33. आतो युक्चिण्कृतोः। (7.3.33)
`चिणि कृति च' [`च' नास्ति--काशिका] इति। चिण्ग्रहणमकृदर्थम्। अकृत्त्वं तु तस्य द्वितीयधात्वधिकारेऽविहितत्वात्। `अदायि, अधायि' इति। ददातिदधात्योः पूर्ववल्लुङादिकार्यम्। `दायः, धायः' इति। धञ्। `दायकः, धायकः' इति। ण्वुल्।
`ददौ, दधौ' इति। `आत औ णलः' (7.1.34) इत्यौत्वम्। `चौडिः, बालाकिः' इति। चूडाबलाकाभ्यां बाह्वादीञ्। अचामादेरित्यनुवृत्तेरत्र न भविष्यतीति यो मन्येत, तं प्रत्युदाहरणान्तरमाह--`ज्ञा देवता अस्येति ज्ञः' (इति)। `सास्य देवता' (4.2.24) इत्यण्। अत्र व्यपदेशिवदभावेनाचामादिराकारो भवति। अत्रासति चिण्कृद्ग्रहणे सत्यामप्यचामादेरित्यनुवृत्तौ स्यादेवात्र युक्। `व्यपदेशिवदभावोऽप्रातिपदिकेन' (शाक.प.65) इत्येतच्च प्रत्ययवधिविषय एव ह्युक्तम्।।

34. नोदात्तोपदेशस्य मान्तस्यानाचमेः। (7.3.34)
`अशमि, अतमि, अदमि' इति। `शमु उपशमे' (धा.पा.1201), `तमु काङ्क्षायाम्' (धा.पा.1202), `दमु उपशमे' (धा.पा.1203), लुङादि पूर्ववत्। `शमकः' इत्यादौ ण्वुल्। `शमः' इत्यादौ घञ्। `यामकः, रामकः' इति। `यम उपरमे' (धा.पा.984), `रमु क्रीडायाम्' (धा.पा.856)। अनुदात्तोपदेशावेतौ।
अथ कथमुद्यमोपरमौ? इत्याह--`उद्यमोपरमौ' इत्यादि। `अनुगन्तश्यौ' इत्यादि। साधुत्वेनेति शेषः। निपातनादेतो साधुत्वेन वेदितव्यावित्यर्थः।
`शमी, तमी, दमीत्यत्र यथा स्यात्' इति। शमादिभ्यः `शमित्यष्टाभ्यो धिनुण्' (3.2.141)। असत्युपदेशग्रहणेऽत्र न स्यात्; प्रत्ययस्वरे कृते धातोरनुदात्तत्वात्। उपदेशग्रहणे तु सति तेनाद्यवस्था लक्ष्य इति यद्यप्युततरकालमनुदात्तत्वं भवति, तथापि भवत्येव प्रतिषेधः; उपदेशावस्थायामुदात्तत्वात्।
`इह' इत्यादि। यद्युपदेशग्रहर्णं न क्रियते, ततो यामकः, रामक इत्यत्रापि स्यात्; `लिति' (6.1.193) इति प्रत्ययात् पूर्वस्योदात्तत्वविधानात्। उपदेशग्रहणे तु न भवति; उपदेशेऽनुदात्तत्वात्।
`अनाचमिकमिवमीनामिति वक्तव्यम्' इति। `कमु कान्तौ' (धा.पा.443), `टुवम उद्गिरर्णे' (धा.पा.849), `चम छमु, चमु, झमु अदने' (धा.पा.469,470,471,472) एषां त्रयाणां धातुनां प्रतिषेधो न भवतोत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--चमेस्तावदनाचमेरिति सूत्र

एवोपादानात् प्रतिषेधो न भवतीति। इतरयोस्तु `धामदेवाङ् ङ्यडङ्यौ' (4.2.9), `धनहिरण्यात् कामे' (5.2.65) इति निपतनादिति। अथ कथमामः? इत्याह--`आम ति चौरादिकस्य' इत्यादि। `अम रोगे' (धा.पा.1720) इत्यस्य चौरादिकस्य णिचि वृद्धौ, `एरच्' (3.3.56) इत्यचि कृते-आम इति। न हि णिच्यपि वृद्धेः प्रतिषेधो भवति; तस्याचिण्कृत्त्वात्। अकृत्त्वं तु पूर्ववद्वेदितव्यम्। ननु `जनीजृष्क्नसुरञ्जोऽमन्ताश्च' (धा.पा.817 अनन्तरम् ग.सू.) इति मित्संज्ञायां सत्याम् `मितां ह्रस्वः' (6.4.92) इत्यनेनेह णौ भवितव्यम्? इत्यत आह--`अत्र हि मित्त्वं नास्ति' इति। कथं नास्ति? इत्याह--`नान्ये' इत्यादि। यस्तु भ्वादिः `अम गत्यादिषु' (धा.पा.465) पठ्यते, अम इत्येवं तस्य भवितव्यम्। अथ कथं विश्राम इति, न चायमसाधुरिति शक्यते वक्तुम्, यतः `सूर्यविश्रामा भूमिः' इति प्रयोगो दृश्यते? इत्याह--`एवमादिकं प्रयोगम्' इत्यादि।।

35. जनिवध्योश्च। (7.3.35)
वधिरयं हनादेशोऽस्ति, तस्यैदं ग्रहणमिति कस्यचिदाशङ्का स्यात्, अतस्तां निराकर्त्तुमाह--`वधिः प्रकृत्यन्तरम्' इत्यादि। प्रकृत्यन्तरमपि भवन् यदयकारान्तः स्यात्, अनर्थकः प्रतिषेधः स्यात्, धोपधत्वादेव न वृद्धिर्भवतीति मत्वाऽऽह--`व्यञ्जनान्तस्य' इति। कुतः पुनर्विधिः प्रकृत्यन्तरमस्तीत्येतदवसितम्? इत्याह--`भक्षकश्च' इत्यादि। अथ हनादेशस्यैव वधेरयं प्रतिषेधः कस्मान्न भवति? इत्याह--`हनादेशस्य' इत्यादि। `जजान गर्भम्' इत्यादि। छान्दसः प्रयोगः।।

36. अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ। (7.3.36)
अर्त्तीति श्तिता निर्देशः। ऋकारान्तस्य ग्रहणं मा विज्ञायीति, यथा--`ऋदृशोऽङि गुणः' (7.4.16) इति। `अर्पयति' इति। हेतुमण्णिच्, `पुगन्तलघूपधस्य' (7.3.86) इति गुणः। `ह्रेपयति, व्लेपयति' इति। `ह्री लज्जायाम्' (धा.पा.1085) `व्लो वरणे (धा.पा.1502)। `क्नोपयति, क्ष्मापयति' इति। `क्नूयो शब्दे' (धा.पा.4.85), `क्ष्मायी विधूनने' (धा.पा.486)। `लोपो व्योर्वलि' (6.1.66) इति यकारलोपः। `द्वयोरपि धात्वोर्ग्रहणम्' इति। विसेषाभावात्। रोत्येतस्यापि `री गतिशोषणयोः' (धा.पा.1500), `रोङ् श्रवणे' (धा.प.1138)--इति द्वयोरपि ग्रहणमित्यपेक्ष्यते। ननु च `निरनुबन्धकग्रहणे न सानुबन्धकस्य' (व्या.प.53) इति रीङो ग्रहणं न प्राप्नोति? नैष दोषः; अत्र ह्यल्पाच्तरत्वात् ह्रोव्ल्यातामन्यतमस्य पूर्वनिपाते कर्त्तव्ये `अल्पाच्तरम्' (2.2.34) इत्येतदनपेक्ष्यार्त्तिशब्दस्य पूर्वं निपातं कुर्वताऽन्यदपि किञ्चिदिह शास्त्रवचनं नापेक्ष्यत इत्येतत् सूचितम्। तेन निरनुबन्धकपरिभाषा नापेक्ष्यत इति रीङोऽपि ग्रहणं भवति।
अथ किमर्थं पुनः पुक् पूर्वान्तः क्रियते, न परादिरेव पुङ् विधीयताम्; पुटि सति गुणविधौ पुगन्तग्रहणं न कर्त्तव्यं भवति, `सार्वधातुकार्धधातुकयोः' (7.3.84) इत्येवं सिद्धत्वात् पुटि; अवश्यं पुड्ग्रहणं कर्त्तव्यम्, अन्यथा हि `अचो ञ्णिति' (7.2.115) इति वृद्धिः स्यादिति चेत्? नैतदस्ति; नाप्राप्ते णिचो वृद्धिं प्रति निमित्तत्वे पुटं प्रत्यागमित्वमुच्यत इत्युत्तरस्य बाधकं भविष्यतीति नास्ति वृद्धेः प्रसङ्गः। अयं तर्हि परादौ दोषः--दाप्यते, दाप्यत इति--अत्र णेर्लोपेनापहृतत्वात् पकारस्य श्रवणं न स्यादिति? एषोऽप्यदोष-; न हि णिलोपः सर्वापहारी भवति, येन णेर्निवृत्तौ पुडागमोऽपि निवर्त्तत। प्रत्ययलश्रणञ्चास्तीति निवृत्तेऽपि णौ पुटः श्रवणं भविष्यतीत्याह--`पुकः पूर्वान्तकरणम्' इत्यादि। दापयतेर्लुङ्, च्लिः, तस्य `णिश्रिद्रु स्रुभ्यः कर्त्तर' (3.1.48) इति चङि णिलोपः, `णौ चङ्युपधाया ह्रस्वः' (7.4.1) इति ह्रस्वत्वम्, `चङि' (6.1.11) इति द्विर्वचनम्, `सन्वल्लघुनि चङ्परे' (7.4.93) इतीत्त्वम्, `दीर्घो लघोः' (7.4.94) इति दीर्घत्वम्--अदीदपत्। अत्र यदि पुट् क्रियते तदा ह्रस्वत्वं न स्यात्; अनुपधात्वात्। पुकि तु सति भवति। अतो ह्रस्वार्थं पुकः पूर्वान्तकरणम्।।

37. शाच्छासाह्वाव्यावेपां युक्। (7.3.37)
`शो तनूकरणे' (धा.पा.1145), `छो छेदने' (धा.पा.1146), `षोऽन्तकर्मणि' (धा.पा.1147), `ह्वेञ् स्पर्धायाम्' (धा.पा.1008), `व्येञ् संवरणे' (धा.पा.1007), `वेञ् तन्तुसन्ताने' (धा.पा.1006), `पा पाने' (धा.पा.925), `पै ओवै शोषणे' (धा.पा.920,921)-इति द्वयोरपि। एषामाकारान्तत्वात् पुकि प्राप्ते युको विधानम्। `निशाययति' इत्यादि। `आदेच उपदेशेऽशिति' (6.1.45) इत्यात्त्वम्। `पाग्रणे' `पै ओवै शोषणे' इत्येतस्यापि ग्रहणमिज्छन्ति' इति। यत्र ह्यस्य ग्रहणं नेष्यते, तत्र पिबतेरित्याह; यथा--`लोपः पिबतेरीच्च' (7.4.4) इति भावः। अथ `पा रक्षणे' (धा.पा.1056) इत्यस्यापि ग्रहणं कस्मान्न भवति? इत्याह--`पा रक्षण इत्यस्य तु' इत्यादि।
`लुगागमस्तु तस्य वक्तव्यः' इति। ननु च `पाल रक्षणे' (धा.पा.1609) इति चुरादौ पठ्यते, तस्य पालयतीति भविष्यति? सत्यमेतत; पुकस्तु निवृत्त्यर्थो लुगागम उपसंख्यायते, अन्यथा हि पातेः पाययतीति स्यात्।
`धूञ्प्रीञोर्नुग्वक्तव्यः' इति। `धूञ् कम्पने' (धा.पा.1835), `प्रीञ् तर्पणे' (धा.पा.1836) इति--एतयोर्नुग्वक्तव्यः, व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--धूञ् विधूनने' (धा.पा.1398), `तृप प्रीणने' (धा.पा.1195) इति निपातनादेतयोर्लुग्भविष्यतीति।
`एतेऽपि' इति। युगादयः। निशाययतीत्यादिषु `आदेच उपदेशेऽशिति' (6.1.45) इत्यात्त्वम्। न्यशीशयदित्यादीनि अदीदपदित्यनेन तुल्यानि, पूर्ववल्लुङादीनि विधाय व्युत्पाद्यानि। `अदूधनत्' इति। अनकारान्तत्वादिह सन्वद्भावोऽभ्यासस्य नास्तीति। `अपिप्रिणत्' इत्यत्राप्यलघुत्वाद्दीर्घत्वं नास्ति।

ननु च शाच्छासाह्वाव्याः--इत्येत एजन्ता गणे पठ्यन्ते, तत्कथमेषां कृतात्त्वानां ग्रहणम्? इत्याह--`शाच्छासाह्वा'[`शाह्वेत्यादि'---मुद्रितपाठः] इत्यादि। कथं पनः कृतात्त्वानां ग्रहणेन पुकः प्राप्तिराख्यायते? आकारान्तानां पुग्विधानात्। `अध्यापयति' इत्यादिना ज्ञापस्य प्रयोजनं दर्शयति। अध्यापयतीति `क्रोङ्जीनां णौ' (6.1.48) इत्वात्त्वम्। आदिशब्देन जापयतीत्यादीनां ग्रहणम्। यदु पुकः प्राप्तिमाख्यातुं शाप्रभृतीनां कृतात्त्वानां गरहणं कृतम्, तदा वेञोऽपि कृतात्त्वस्यैव ग्रहणं युक्तम्? नैवं शक्यम्, वेत्युच्यमाने `पै ओवै शोषणे' (धा.पा.920,921) इत्यस्यापि ग्रहणं स्यात्। तस्मादकृतात्त्वस्यैव वेञो ग्रहणं युक्तम्।।

38. वो विधूनने जुक्। (7.3.38)
पुकि प्राप्ति जुग्विधीयते। `वा हत्येतस्य' इति। `वा गतिगन्धनयोः' (धा.पा.1050) इत्येतस्य। `विधूननेऽर्थे' इति। कम्पन इत्यर्थः।
ननु `वज व्रज गतौ' (धा.पा.252,253) इत्यस्य धातोर्ण्यन्तस्योपवाजयतीति सिद्धम्, तत्किमर्थमेतत्? वातेः पुग्मा भूदित्येवमर्थं जुको विधानम्। `पै ओर्व शोषण इत्येतस्यैतद्रूपम्' इति। ननु च लाक्षणिकस्याकारान्तत्वाम्, अतो जुका न भवितव्यम्? नैतदस्ति; इदानोमेव ह्युक्तम्--एतस्मिन् प्रकरणे लक्षणप्रतिपदोक्तपरिभाषा नास्तीति।।

39. लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने। (7.3.39)
`स्नेहविपातनेऽर्थे' इति। किमिदं स्नेहविपातनं नाम? विगच्छतः स्नेहसय पातनं व्यापारणम्। तथा हि--पातेर्व्यन्तस्य भावे ल्युटि कृते वपीतनमिति। `विलीनयति' इति। गुणायादेशौ।
अथ `विभाषा लीयतेः' (6.1.51) इत्यत्त्वे कृत एकदेशविकृतस्यानन्यत्वाद्विलापयतीत्यत्र कस्मान्नुग्भवति? इत्याह--`ली' इत्यादि। ली+ई इति ईकारोऽत्र प्रश्लिष्यते--ईकारान्तस्यैव यथा स्यात् कृतात्त्वस्य न भवति।
`ली इति लीलीङोर्ग्रहणम्' इति। ननु च निरनुबन्धकपरिभाषया `ली श्लेषणे' (धा.पा.1501) इत्येतस्यैव क्रैयादिकस्य ग्रहणं युक्तम्, न तु `लीङ् श्लेषणे' (धा.पा.1139) इत्येतस्य दैवादिकस्य? एवं मन्यते--एक एवायं धातुर्विकरणद्वयर्थमात्मनेपदार्थञ्च द्विरुपदिश्यते। एवञ्च कृत्वा `लियः सम्माननशलिनोकरणयोश्च' (1.3.70) इत्युभाभ्यामात्मनेपदं भवतीति। `ला इति लातेः, कृतात्वस्य च लोयतेः' इति। ग्रहणमिति प्रकृतेन सम्बन्धः।।

40. भियो हेतुभये षुक्। (7.3.40)
हेतुः स्वतन्त्रस्य कर्तुः प्रयोजकः। विभेत्यस्मादिति भयः, हेतुश्चासौ भयश्चेति हेतुभयः, तस्मिन् हेतुभये। `ञिभी भये' (धा.पा.1084) इत्यस्य वृद्धौ प्राप्तायां `बिभेतेर्हेतुभये' (6.1.56) इत्यात्त्वे च प्राप्ते पक्षे णौ धुग्विधीयते। `मुण्डो भीषयते' इति। `भीस्म्योर्हेतुभये' (1.3.78) इत्यात्मनेपदम्।
अथात्त्वे कृते मुण्डो भापयत इत्यत्र कस्मान्न भवति? इत्याह--`अत्रापि' इत्यादि।।

41. स्फायो वः। (7.3.41)
`स्फावयति' इति। `स्फायो, ओ प्यायी वृद्धौ' (धा.पा.487,488)।।

42. शदेरगतौ तः। (7.3.42)
किमर्थं पुनरिदमुच्यते, यावता `शद्लृ शातने' (धा.पा.1428) इत्यस्मादेव निपातनात् तकारो भविष्यतीति? गतेरन्यत्र यथा स्यात् गतौ मा भूदिति चेत्? न; शातनशब्दो हि गतेरन्यमर्थमाचष्टे। एवं तर्हि एतज्ज्ञापयति---`अबाधकान्यपि निपातनानि भवन्ति' (पु.ल.प.वृ.99) इति। तेन पुराशब्दात् `सायञ्चिरम्' (4.3.23) इत्यादिना विधीयमानयोष्ट्युट्युलोः `पुराणप्रोक्तेषु' (4.3.105) इति निपातनेन तुदो बाधनं न भवतीतित। तेन पुरातनमित्यपि सिद्धं भवति।।

43. रुहः पोऽन्यतरस्याम्। (7.3.43)
`रोपयति' इति। `रुह जन्मनि प्रादुर्भावे च' (धा.पा.859)। किमर्थं पुनरिदमुच्यते, यावता दिवादिषु `रुप लुप विमोहने' (धा.पा.1236,1237) इति रुपिः पठ्यते, तस्य रोपयतीति भविष्यती, रुहेस्तु रोहयतीति? जन्मार्थेऽपि रोपयतीति प्रयोगो यथा स्यात्; अन्यथा हि विमोहनार्थस्यैव स्यात्। अनेकार्थत्वाद्धातूनां रुपिर्जन्मनि वर्त्तिष्यत इति चेत्? नैतदस्ति; अनेकार्था हि धातवः, न तु सर्वार्थाः। न हि रुप्यतीत्युक्ते अन्मार्थः प्रातीयते, किं तर्हि? विमोहनार्थ एव।।

44. प्रत्ययस्थात्कात्पूर्वस्यात इदापयसुपः। (7.3.44)
`सुपः परो न भवति' इति। सुबन्तात्परो न भवतीत्यर्थः। एवं चार्थः प्रत्ययग्रहणपरिभाषया वेदितव्यः। `जटिलिका, मुण्डिका' इति। अज्ञातादिष्वर्थेषु `प्रागिवात् कः' (5.3.70)। `कारिका, हारिका' इति। ण्वुल्। `एतिका' इति। एतदः `अव्ययसर्वनाम्नाम्' (5.3.71) इत्यकच्, त्यादाद्यत्वम्, `अतो गुणे'

(6.1.97) पररूपत्वम्, टाप्, अकः सवर्णे दीर्घत्वम् (6.1.101)। `शका' इति। पचाद्यच्, टाप्।
`स्थग्रहण विस्पुष्टार्थम्' इति। अत्र यत्र ककारमात्रं हि प्रतययसतत्र मा भूदित्येवमर्थं कस्मान्न भवति? इत्याह--`ककारमात्रं हि' इत्यादि। कादिति वर्णग्रहणम्। अकारस्तूच्चारणार्थः। न तु केवलः ककारः प्रत्ययोऽस्ति यन्निवृत्त्यर्थं स्थग्रहणं स्यात्। `कात् प्रत्ययात्' इत्युच्यमाने प्रत्ययावयवे प्रत्ययशब्दो वर्त्तिष्यते, अतोऽन्तरेणापि स्थग्रहणं प्रत्ययस्थस्य ककारस्य ग्रहणं शक्यते विज्ञातुम्। तस्माद्वस्पष्टार्थं स्थग्रहणम्। `मण्डना, रमणा' इति। नन्द्यादभ्यो लयुः (3.1.134। `पटुक' मृदुका, गोका, नौका' इति। पूर्ववत् कः। `राका, धाका' इति। `रालाऽदाने' (धा.पा.1057,1058) इत्यस्माद्दषातेश्च `कृदाधारार्चिकलिभ्यः कः' (द.उ.3.18) इत्यौणादिकः कप्रत्ययः।
`अथ' इत्यादि। चोदतः। `ककारः' इतीतरः। ककरस्य श्रुतत्वात् तस्यैवापीति विशेषणं युक्तमित्यभिप्रायः। येनाभिप्रायेण चोदकः पृष्टवांस्तमाविष्कर्तुमाह--`यद्येवम्' इत्यादि। यद्यपीत्यनेन ककारो विशिष्यते--आपि परतो यः ककार इति। एवं सति करिकेत्यत्र न प्राप्नोति; ककारस्याकारेणायो व्यवहितत्वात्। `एकादेशे कृते' इत्यादीतरः। व्यवसर्गे हि सति व्यवधानं भवति। न चैकादेशे कृते व्यवसर्गोऽस्तीत्यतो नास्ति व्यवधानम्। `एकादेशः पूर्व' इत्यादि। चोदकः। स्थानिवद्भावस्तु `अचः परस्मिन् पूर्वविधौ' (1.1.57) इत्यनेन। `वचनात्' इतीतरः। उच्यते चेदं वचनम्, न चाप्यनन्तरं ककारः सकम्भवतीति तत्र वचनसामर्थ्यात् स्थानिवद्भावे कृते नैकेन वर्णेन सर्वत्र व्यवधानमाश्रीयते। यद तर्हि वचनसामर्थ्यात् कारिकेत्यादौ व्यवधानेऽपि भवति, तदारथकट्या, पुत्रकाम्येत्यत्रापि स्यात्? इत्यत आह--`रथकट्यादिषु' इत्यादि। रथानां समूहः `इनित्रकट्यचश्च' (4.2.51) इति कट्यच्, ततष्टाप्। पुत्रमिच्छतीति `कम्यच्च' (3.1.9) इति काम्यच्प्रत्ययः। `अ प्रत्ययात्' (3.3.102) ततष्टाप्। तत्र श्रुतिकृतमनेकेन वर्णेन व्यवधानमितीत्त्वं न भवति। `येन नावयवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या.प.46) इत्येकेन वर्णेन व्यवधानमाश्रीयते। येन नावयवधानमपि तु सर्वत्र व्यवधानम्, तेनैकेन वर्णेन व्यवहिते भवित्तुं युक्तम्। स्थानिवद्भवकृतमेकेन वर्णेन सर्वत्र वयवधानमस्ति, सङ्घातेन त्वस्ति नास्ति च। तस्मात् तदिह नाश्रीयते।
`सुबन्तादयम्' इति। परिव्राजकशब्दात् पर आबिति प्रतययलक्षणे सुबन्तता वेदितव्या। `प्रसज्यप्रतिषेधश्चायम्' इति। न चेत्सुबन्तादाप् परो भवति। कः पुनः परयुदासे दोषो यतः स साश्रोयते? इत्याह--`पर्युदासे हि' इत्यादि। यद्ययं पर्युदासः स्यात् सुपोऽन्योऽसप्, ततश्चोदाप् परो भवतीति; ततो बहुपरिव्राजकेत्यत्रापि स्यादेवेत्त्वम्, असुबन्तात् पूर्वोत्तरपदसमुदायात् पर आबिति कृत्वा। असुबन्ततवं पुनः समुदायस्य, तस्मात् सुदनुत्पत्तेः; अवयवाद्धि परिव्राजकशब्दादत्र सुबुत्पत्तिः, न तु समुदायात्। `अविद्यमानः सुब् यस्मिन् सोऽयमसुबित्ययमपि नाश्रीयते' इति। बहुव्रीहिरपि नाश्रीयत इत्यर्थः। कः पुनस्तदाश्रयणे दोषो यतः स नाश्रीयते? इत्याह--तथा हि' इत्यादि। एवं तर्हीत्यर्थः। बहुव्रीहौ पूर्वोत्तरपदयोः प्रत्ययलक्षणेन सुबन्तव्यपदेशोऽस्तीति नासावसुप, अपि तु विद्यमानसुबेव। तेन बहुचर्मिकेत्यत्र नासुपः पर आबितीत्त्वं न स्यात्। बहूनि चर्माण्यस्यां विद्यन्त इति बहुव्रीहिः। `शेषाद्विभाषा' (5.4.154) इति कप्, टाप्।
`मामिका' इति। ममेयमिति `तस्येदम्' (4.3.120) इत्यण् `तवकममकौ' (4.3.3) इति ममकादेशः। नन्वणन्तान्ममकशब्दात् `टिड्ढाणञ्' (4.1.15) इति ङीपा भवितव्यम्, तत् कथं टाब्भवति? `केवलमामकेति नियमात्' इत्यादि। `नरिका' इति। `कै गे शब्दे' (धा.पा.916,917)। `आदेच उपदेशेऽशिति' (6.1.45) इत्यत्त्वम्, `आतोऽनुपसर्गे कः' (3.2.3), ततष्टाप्।
`दाक्षिणात्यिका, इहत्यिका' इति। दक्षिणस्यां दिशि भवेत `दक्षिणापश्चात्पुरसस्त्यक्' (4.2.98) इति त्यक्। इह भवेति `अव्ययात्यप्' (4.2.104)। उभयत्राज्ञातादिष्वर्थेषु `प्रागिवात्कः' (5.3.70)।
उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेवं प्रतिपादनम्--`उदीचामातः, स्थाने' (7.3.46) इत्यत्र व्यवस्थितविभाषाविज्ञानात् त्यक्त्ययोर्नित्यं भविष्यतीति।।

45. न यासयोः। (7.3.45)
येतयेतस्य `उदीचामातः स्थाने' (7.3.46) इत्यादिना विकल्पे प्राप्ते, सेत्यस्य पूर्वेण नित्ये प्राप्ते प्रतिषेधोऽयमारभ्यते; प्राप्तिपूर्वकत्वात् प्रतिषेधस्य। यदा तयोरकज्भवति तदाऽयं प्रतिषेधो विज्ञायते। `यका', `सका' इति। यत्तदोः पूर्ववदकच्, सुः, त्यदाद्यत्वञ्च। `यासेति निर्देशोऽतन्त्रम्' इति। अप्रधानमित्यर्थः। किं कारणम्? इत्याह--`यत्तदोरुपलक्षणार्थमेतत्' इति। किं कारणमेवं व्याख्यायते? इत्याह--`इहापि' इत्यादि। यासेति प्रथमैकवचनान्तरूपम्। ततर यद्ययं निर्देशस्तन्त्रं स्यात्, प्रथमैकवचनन्तयोर्ग्रहणाद्विभक्त्यन्तरे यकाम्, तकामित्यत्र न स्यात्, इष्यते च तत्रापि। तस्मादतन्त्रमयं निर्देशो यत्तदोः प्रातिपदिकयोरुपलक्षणार्थमेतत्--इत्युच्यते।
`यासयोरित्त्वप्रतिषेधे' इत्यादि। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तदेतदुक्तं भवति--यत्तदोः प्रतिषेध इत्यस्मिन् क्रियमाणे त्यकन्प्रत्ययान्तस्य त्यकन्प्रत्ययान्तस्य प्रतिषेधप्रतिपादनं कर्त्तव्यमिति। तत्रेदं प्रतिपादनम्--नेति योगविभागोऽत्र क्रियते, तेन त्यकन्प्रत्ययान्तस्य प्रतिषेधो भविष्यतीति। एवमुत्तरत्राप्युपसंखघ्यानशब्दस्य प्रतिपादनार्थो वेदितव्यः। प्रतिपादनमप्येतदेव योगविबागकरणमाश्रितय कर्त्तव्यम्। `उपत्यका, अधत्यका' इति। `उपाधिभ्यां त्यकन्नासन्नारूढयोः (5.2.34) इति त्यकन्। `पावका' इति। ण्वुल्। `अलोमका' इति। नास्या लोमानि सन्तीति बहुव्रीहिः। `शेषाद्विभाषा' (5.4.154) इति कप्।
`जीवका, नन्दका' ति। `आशिषि च' (3.1.150) इति वुन्। `देवका, यज्ञका' इति। देवदत्तयज्ञदत्तशब्दाभ्यां `अनुकम्पायां कन्' (5.3.76) इति कनि कृते `अनजादौ च विभाषा लोपो वक्तव्यः' (वा. 614) इत्युत्तरपदलोपः।

`क्षिपका, ध्रुवका' इति। `क्षिप प्रेरणे' (धा.पा.1285), `ध्रुव स्थैर्ये' (धा.पा.943), `इगुपधज्ञाप्रीकिरः कः' (3.1.135)। तदन्तादज्ञाताद्यर्थे `प्रागवात्कः' (5.3.70)।
`तारका' इति। तरतेर्ण्वुल्।
`वर्णका' तान्तवः' इति। तन्तूनां विकार इति `ओरञ्' (4.3.139), `ओर्गुणः' (6.4.146)। तान्तवः=प्रावरणविशेषः। तत्र वर्णकेत्युपसंख्यातव्या। `वर्ण वर्णक्रियाधिस्तारगुणवचनेषु'[`वर्ण'--नास्ति मुद्रितन्यसपाठे] (धा.पा.1938) इति चौरादिको धातुः, ततो ण्वुल्--`वर्णिका' इति। व्याख्यत्रीत्यर्थः।
`वर्त्तका' इति। `वृतु वर्त्तने' (धा.पा.758), ण्वुल्। `वर्त्तिका' इति। अध्येत्रीत्यर्थः। `अष्टका पितृदैवत्ये' इति। पितृदैवत्यम्=वैदिककरमविशेषः, तत्राष्टकेत्युपसंख्यायते। `अशू व्याप्तौ' (धा.पा.1264) इत्यस्मात् `इष्यसिभ्यां तकन्' (द.उ.3-30) इति तकन्प्रत्ययः, व्रश्चादिसूत्रेण (8.2.36) षत्वम्, ष्टुत्वम्। `अष्टका' इति। अष्टौ परिमाणमस्या इति `तदस्य परिमाणम्' (5.1.67) इति `संख्याया अतिशदन्तायाः कम्' (5.1.22)।
`वा सूतका' इत्यादि। उपसंख्यातशब्दसय प्रतिपादनमर्थः। तत्रैदं प्रतिपादनम्--सूतका, सूतिका--इत्यादयः शब्दा पृषोदरान्तःपातिनः, तेन पृषोदरादित्वादेवायं विकल्पः सिद्धः।।

46. उदिचामातः स्थाने यकपूर्वायाः। (7.3.46)
पूर्वेण नित्यमित्त्वे प्राप्ते विकल्पार्थं वचनम्। यकौ पूर्वे। यस्याः सा यकपूर्वा। कोऽन्यपदार्थः? समुदायः। तथा हि, पूर्वशब्दोऽवयवे वर्त्तते। स चावयवः समुदायस्य भवति, नावयवान्तरस्य। न हि वर्णो वर्णस्यावयवो भवति। अवयवान्तरापेक्षस्तु तस्य पूर्वत्वव्यपदेशः। तत् पुनरवयान्तरं प्रकृतत्वात् स्थान्यकार एव विज्ञायते। स्त्रीलिङ्गनिर्देशस्तु तस्य[तस्येत्यारभ्य `तु' इति पर्यन्तं मुद्रितन्यासे नोपलक्ष्यते] समुदायस्यार्थधर्मेण स्त्रीत्वेन वेदितव्यः। प्रयोजनं तु तस्य वक्ष्यते। `आतः स्थाने' इति। योऽकार इति व्यवहितेन सम्बन्धः। `इभ्यिका' इत्यादि। इभ्यादिशब्देभ्यः `प्रागिवात् कः' (5.3.70), `केऽणः' (7.4.13) इति ह्रस्वः।
`सांकाश्यिका' इति। `धन्वयोपधाद्वुञ्' (4.2.121)। नात्रातः स्थानेऽकार इति नित्यमेवेत्त्वम्।
अथ स्थानग्रहणं किमर्थम्, यावतात् इत्येषैव षष्ठी स्थानेयोगं प्रतिपादयिष्यति, `षष्ठी स्थानेयोगा' (1.1.49) इति वचनात्? इत्यत आह--`स्थानग्रहणम्' इत्यादि। । अकारस्य स्थाने लक्षणान्तरेण दिहितस्याकारस्य संकीर्त्तनम्=अनुवादः। अत्रापि स्थाने सम्बन्धप्रतिपत्तिर्यथा स्यात्--इत्येवमर्थ स्थानग्रहणम्। किं पुनः कारणम्--असति स्थानग्रहणेऽनुवादे सम्बन्धप्रतिपत्तिर्न स्यात्? इत्याह--`आत इत्यनेन' इत्यादि। आदेशविधौ `अस्तेर्भूः' (2.4.52) इत्येवमादौ `षष्ठी स्थानेयोगा' (1.1.49) इत्येषा परिभाषोपतिष्ठते, न त्वनुवादे; विधिवाक्यशेषभूतत्वादस्याः। न चात्राकारस्य स्थानेऽकारोऽनेन विधीयते, किं तर्हि? लक्षणान्तरेणाभिनिर्वृत्तोऽनेन विशिष्यते--आतः स्थाने योऽकार इति। तेन नात्र तस्याः परिभाषाया उपसथानमिति तत्र यदि स्थानग्रहणं न क्रियेत, तदातः समीपो योऽकार इति सामीप्पसम्बन्धप्रतिपत्तिः स्यात्। अथ वा पूर्ववत् प्रश्ने कृत इत्याह--`आत इत्यनेन' इत्यादि। इकारस्य यः स्थानित्वेनोपात्तोऽकारः स आत इत्यनेन विशिष्यते। एवञ्च विशेष्यत्वादकारस्य प्रधान्यम्; आकारस्य विशेषणत्वादप्राधान्यम्। तत्रासति स्थानग्रहमे यद्यपि सा परिभाषानुवाद उपतिष्ठेत तथापि प्रधाने कार्यसम्प्रत्ययादात इत्यस्या एव षष्ठ्याः स्थानसम्बन्धो विज्ञायेत, न त्वात इत्यस्याः। स्थानग्रहणे तु सत्यस्या अपि विज्ञायते--एतदर्थं स्थानग्रहणम्। `अश्विका' इति। पूर्ववत् कः, ह्रस्वत्वञ्च। अथ `यकपूर्वायाः' इति स्त्रीलिङ्गेन निर्देशः क्रिमर्थः? इत्याह--`स्त्रीलिङ्गेन निर्देशः। असति तस्मिन्नाकारमात्रस्थाने योऽकारस्तस्य स्थानित्वं विज्ञायेत, ततश्च यातेः शुभम्भद्रंशब्दयोरुपपदतः `विजुपे च्छब्दसि' (3.2.73) इति `आतो मनिब्क्वनिब्वनिपश्च' (3.2.74) इति विच्। तदन्तात् कप्रत्यये शुर्भयिका, भद्रंयिका इत्यत्रापि विकल्पः प्रसज्येत। तस्मात् तन्निवृत्त्यर्थं स्त्रीलिङ्गनिर्देशः। शुभम्भद्रंशब्दौ मकारान्तौ निपातौ।
`यकपूर्वायाः' इत्यादि। ग्रहणवाक्याम्। तस्य `धात्वन्तयोर्यकारककारयोः' इत्यादि। विवरणम्। `वक्तव्यम्' इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--व्यवस्थितविभाषाविज्ञानाद्धात्वन्तयोरपि यकारवकारयोरनन्तरस्याकारस्येत्त्वप्रतिषेधः प्राप्नोति, स न भविष्यतीति। `सुनयिका, सुशयिका' इति। णीञ्शीङ्भ्यां `एरच्' (3.3.56) इत्यच्। शोभनो नयोऽस्याः, शोभनः शयोऽस्याः--सुनया, सुशया, ततः `प्रागिवात् कः'(5.3.70), `केऽणः' (7.4.13) इति ह्रस्वत्वम्। `सुपाकिका', `अशोकिका' इति। `डुपचष् पाके' (धा.पा.996), `शुच शोके' (धा.पा.183), भावे घञ्। शोभनः पाकोऽस्याः, अविद्यमानः शोकोऽस्या इति बहुव्रीहिः, `शेषाद्विभाषा' (5.4.154) इति कप्, `आपोऽन्यतरस्याम्' (7.4.15) इति ह्रस्वत्वम्।।

47. भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि। (7.3.47)
`भस्त्रका, भस्त्रिका' इति। पूर्ववत् कः। `अभस्त्रका, अभस्त्रिका' इति। पूर्ववत् कप्रत्ययः, बहुव्रीहिः, ततपुरुषो वा।
अथ कस्मादेषा--द्वे नञ्पूर्वे नोदाह्रियेते? इत्याह--`एषाद्वे नञ्पूर्वे न प्रयोजयतः' इति। प्रकृतत्वादित्त्वप्रतिषेधविकल्प इति विज्ञेयम्। `किं कारणम्' इति। अनेन नञ्पूर्वयोरप्रयोजकत्वे कारणं पृच्छति। `अत्र हि' इत्यादिना तत्करं दर्शयति। `सोऽन्तर्वर्तिन्या विभक्त्या' इति। याऽसौ समासार्था विभक्तिस्तया लुप्तयाऽपि प्रत्ययलक्षणेन स आप्सुबन्तादेवैतच्छब्दाद् द्विशब्दाच्च परः सम्पद्यते, तेनेत्त्वस्य प्राप्तिरेव नास्ति; `असुपः' (7.3.44) इति प्रतिषेधात्, तत्किं प्रतिषेधविकल्पेन? तस्मादेषाद्वे नञ्पूर्वे न प्रयोजयतः।

यद्येवम्, अनयैव युक्त्या स्वशपब्दोऽपि न प्रयोजयेत्? इत्यत आह--`स्वशब्दस्तु' इत्यादि। युक्तं यदेषाद्व नञ्पूर्वे न प्रयोजयतः, अत्र व्यवधानाभावात् सुबन्तात् पर आब् भवतीति कृत्वा, न हि प्राक् टेर्भवन्नकज् व्यवधायको भवितुमर्हति; स्वशब्दस्तु `स्वमज्ञाति धनाख्यायाम्' (1.1.35) इति वचनाज्ज्ञातिधनयोरसर्वनामसंज्ञकः, तेन तस्मात् कप्रत्ययेनैव भवितव्यम्, नाकचा, तत्र यदि नञ्समासं कृत्वा कप्रत्ययः क्रियते, तदन्ताच्च टाप्, तदासौ सुबन्तात् परो न भवति; कप्रत्ययेन व्यवधानादिति असर्वनामंज्ञकः स्वशब्दो नञ्पूर्वोऽपि विकल्पं प्रयोजयति।
`भस्त्रेत्ययमभाषितपुंस्कः' इति। स्त्रियामेव सर्वदा वृत्तेः। यद्येवम्, `अभाषितपुंस्काच्च' (7.3.48) इत्यनेनैव विकल्पः सिद्धः, तत्किमर्थमिहोपादीयते? इत्यत आह--`तस्य' इत्यादि। उपसर्जनमर्थः प्रयोजनं यस्य तत् तथोक्तम्। यदानुपसर्जनं भस्त्राशब्दो भवति, तदायमभाषितपुंस्क इति सत्यमुत्तरसूत्रेण सिद्धो विकल्पः; तत्रापि नञ्पूर्वाणामित्यनुषृत्तेः। यदा तूपसर्जनं भवति, तदा भाषितपुंस्कत्वं प्रतिपद्यत इति न सिध्यति। तस्मादुपसर्जनस्य भाषितपुंस्कस्यापि यथा स्यादित्येवमर्थमिह भस्त्राशब्दस्य ग्रहणम्। `अभस्त्रका, अभस्त्रिका' इति। `अल्पे' (5.3.85) इत्यर्थे `प्रागिवात् कः' (5.3.70) `अत्र' इति। उपन्यस्त उदाहरणे। `उपसर्जनह्रस्वत्वे कृते' इति। अविद्यमाना भस्त्राऽसया इति बहुव्रीहौ कृते `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इत्यनेन। `पुनः' इत्यादि। अभस्त्रशब्दो हि बहुव्रीहिः, स पुंस्यपि वर्त्तत इति भाषितपुंस्को भवति। तस्माद्यदा टाप् स भाषितपुंस्कशब्दादुत्पदयते। तसय भाषितपुंस्कादुत्पन्नस्यापि टापो यः `केऽणः' (7.4.13) इति ह्रस्वो भवति, नासावभाषितपुंस्काद्विहितस्यातः स्थाने भवति। तस्मादभाषितपुंस्कादित्यनेन न सिध्यति--इत्यभिप्रायः।
`नञ्पूर्वाणामपीत्यपिशब्दादन्यपूर्वाणां केवलानां च विधिरयमिष्यते' इति। तत्रोदाहरणमाह--`निर्भस्त्रिका' इत्यादि। निर्गता भस्त्रा यस्याः सा निर्भस्त्रिका। वह्व्यो भस्त्रा यस्याः सा बहुभस्त्रिका। आदिशब्देन सुभस्त्रका, सुभस्त्रिका; भस्त्रका, भस्त्रिका-इत्येवमादीनां ग्रहणम्। यदि तर्ह्यन्यपूर्वाणां केवलानां च विधिरिष्यते, तदा `नञ्पूर्वाणाम्' इति वचनमनर्थकं स्यात्। नञादिपूर्वाणां तदन्तविधिना भविष्यति, केवलनाञ्च व्यपदेशिवद्भावेन; `ग्रहणवता प्रतिपदिकेन तदन्तविधिर्न' (व्या.प.89) इति। `व्यपदेशिवद्भावोऽप्रातपदिकेन' (धा.प.पा.65) इति वचनान्न सिध्यतीत्येतच्च नाशङ्कनीयम्, उभे अपि ह्येते परिभाषे प्रत्ययविधिविषये एवेत्यत आह--`अत्र' इत्यादि। तदन्तवधिना व्यपदेशिवद्भावेनात्र सिद्धस्यैव प्रकरविधेर्नञ्पूर्वाणामपीति वचनानुवादः। किमर्थः? मन्दबुद्धिप्रतपत्त्यर्थः। नञ्पूर्वाणामपीति वचनमन्तरेण यः प्रतिपत्तुमनन्तरोक्तमर्थमसमर्थस्तस्यापि मन्दबुद्धेः प्रतिपत्तिर्यथा स्यादित्येवमर्थम्।।

48. अभाषितपुंस्काच्च। (7.3.48)

नञ्पूर्वाणामपीत्यनुकर्षणार्थश्चकारः। खट्वका, खट्विका' इति। पूर्ववत् कः। खट्वाशब्दोऽयमादिष्टलिङ्गो नित्यं स्त्रियामेव वर्त्तत इति भाषितपुंस्को न भवति। `अखटविका' इति। न खट्वा अखट्वेति नञ्समासः। `परमखट्विका' इत्यादि। `सन्महत्' (2.1.61) इत्यापिना समासः। सर्वत्र `कोऽणः' (7.4.13) इति ह्रस्वः।
बहुव्रीहेर्भाषितपुंस्कत्वादत्र न भवितव्यमनेन विकल्पेनेति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकरत्तुमाह--`बहुव्रीहौ' इत्यादि। कथं पुनरभाषितपुंस्कादित्युच्यमाने बहुव्रीहौ भाषितपुंस्कादपि भवति? इत्याह--`अत्राप्यभाषितपुंस्कात्' इत्यादि। इतिकरणो हेतौ। यद्यपि बहुव्रीहेर्भाषितपुंस्को भवति, तथापि यदा कपि `आपोऽन्यतरस्याम्' (7.4.15) इति ह्रस्वः क्रियते, तदाऽभाषितपुंस्कादेव विहितस्याकारस्य स्थाने यः स्यादकारस्तस्माद्भवत्येव विकल्पः। अविद्यमाना खट्वाऽस्या इति बहुव्रीहिः, `शेषाद्विभाधा' (5.4.154) इति कप्; ततो ह्रस्वः। स चाभाषितपुंस्कादेव विहितस्याकारस्य भवति। तेनाखट्वका, अखट्विकेति विकल्पो भवत्येव। `यदा तु' इत्यादि। अविद्यमाना खट्वाऽस्या इति बहुव्रीहौ कृत उपसर्डजनह्रस्वत्वम्; ततष्टाप्। अल्पा अखट्वेति `प्रागिवत् कः' (5.3.70)--`अखट्विका' इति। अत्र विकल्पो न भविष्यति; भाषितपुंस्कत्वाद्वहुव्रीहेविहितस्यातः स्थानेऽकारस्य विहितत्वात्। प्रादिसमासेऽपि न भवतीति दर्शयन्नाह--`तथा' इत्यादि। `अतिखट्विका' इति। अत्रापि प्रादिसमासे कृते, उपसर्जनह्रस्वत्वे च, पुनस्तत्पुरुषाद्भाषितपुंस्काद्विहितस्यातः स्थाने विहितोऽकार इति न प्रवर्त्तते विकल्पः।।

49. आदाचार्याणाम्। (7.3.49)

नञ्पूर्वाणामपीत निवृत्तम्; पूर्वसूत्रे चानुकृष्टत्वात्। इत्त्वापवादोऽयं योगः। `केऽणः' (7.4.13) इति ह्रस्वपवादश्च।
आचार्यग्रहणं नित्यार्थम्। असति हि तस्मिन्; `उदीचाम्' (7.3.46) इत्यधिकाराद्विकल्पः स्यात्। आचार्यग्रहणे तु सति तेन `उदीचाम्' इत्येतस्मिन्निवर्त्तिते, नित्य एष विधिर्भवतीति।।

50. ठस्येकः। (7.3.50)

अत्र यद्यविशेषेण ठस्य ग्रहणं स्यात्, पठिता, पठितुमित्यादौ धात्वन्तस्यापि स्यात्। अत एतद्दोषपरिजिहीर्षया प्रत्ययसय ठस्य ग्रहणम्, न तु ठमात्रस्येति दर्शयितुमाह--`अङ्गस्य निमित्तं यष्ठः' इति। अङ्गस्येति सम्बन्धलक्षणा षष्ठी। अतर यद्यपि धात्ववयवो ह्यङ्गस्य सम्बन्धी भवति, तथापि यदा यतो ह्यङ्गस्यात्मलाभो यस्मिन्नङ्गमित्येतद्भवति, स एव प्रत्यासत्तेरङ्गस्य निमित्तीभूतः सम्बन्धी गृह्यते, न त्वरयवोऽपि। `कश्चाङ्गस्य निमित्तं भवति' इति। एवं मन्यते--यदि सामान्येनाङ्गस्य निमित्तं यत्तदिह गृह्यते धात्वन्तस्य ठस्य स्यादेव, भवन्ति हि अवयवा अङ्गसयावयविनो निमित्तम्; तैस्तस्यारभ्यमाणत्वादित्याह--`प्रत्ययः' इति। अस्यायमभिप्रायः--सत्स्वप्यवयवेषु यावत्प्रत्ययो नोत्पद्यते तावत्तस्यावयविनोऽङ्गात्मलाभो न भवति,

तस्मिंस्तूत्पन्ने सति भवति; तस्मात्प्रत्यय एवाङ्गस्य निमित्तम्, नावयव इति। `आक्षिकः, शालाकिकः' इति। अक्षैर्दीव्यति, [`अक्षैर्दीव्यतीत्यर्थे ठक्--मु. पाठः] शलाकाभिर्दीष्यतीत्यर्थे ठक्। `लावणिकः' इति। अत्रापि लवणं पण्यमस्येति `लवणाट्ठञ्' (4.4.52)।
इह ठस्येति वर्णमात्रस्य ग्रहणं वा स्यात्? सङ्घातस्य वा? तत्र पूर्वस्मिन पक्षे ठस्येति निर्देशो नोपद्यते; इतरस्मिंस्त्वोणादिकेऽतिप्रसङ्गः--`कणेष्ठः' (द.उ.5-6) कण्ठ इत्यादौ। इह तु मथितं पण्यमस्येति माथितिक इति ठस्येकादेशे कृते प्रकृतेश्च `यस्येति च' (6.4.148) इत्यकारलोपे सति तान्ततायामुपजातायामिकादेशस्य स्थानिवद्भावाट्ठग्रहणेन ग्रहणात् `इसुसुक्तान्तात् कः' (7.3.51) इति कादेशः प्रसज्येतेति यश्चोदयेत्, तं प्रत्याह--`ठगादिषु' इत्यादि। आदिशब्देन ठञादीनां ग्रहणम्, यदि तेषु वर्णमात्रमनच्कप्रत्ययोऽकारस्तूच्चारणार्थः, तदा `ठस्येकः' (7.3.50) इत्यत्राप्यकार उच्चारणार्थः। एवं वर्णमात्रं स्थानित्वेनोपादीयते। इहाप्यकार उच्चारणार्थ एवेति वर्णमात्रग्रहणेन यो दोषः परस्य चोदयिष्यतः स वर्णमात्रं स्थानित्वेनोपादीयते। इहाप्यकार उच्चारणार्थ एवेति वर्णमात्रग्रहणेन यो दोषः परस्य चोदयिष्यतः स निराकृतः। सत्यपि वर्णमात्रस्य ग्रहणे, आगन्तुकेनोच्चारणार्थेनाकारेण ठस्येति निर्देशस्योपादानात्। `सङ्घातग्रहणे तु' इत्यादि। अथ ठगादिषु सङ्घातः साच्कष्ठशब्दः प्रत्ययः, एवं सत्यत्रापि सूत्रे सङ्घातस्येति स्थानित्वेन ग्रहणं युक्तम्। यस्त्वस्मिन् पक्षे प्रथमो दोषश्चोदयितुमिष्टः परस्य, तं जिहीर्षुराह--`तत्र' इत्यादि।
योऽप्यस्मिन् पक्षे द्वितीयो दोषस्तं `मथित पण्यमस्य' इत्यादिनाऽऽविष्कृत्य--`सन्निपातलक्षणो विधिः' इत्यादिना परिहरति। अजादिसन्निपातेन तकारान्ततोपजाता, सा नोत्सहतेऽजादित्वं विहन्तुमिति न भवति कादेशः। `यस्येति चेति लोपस्य स्थानिवद्भावाद्वावाद्वा' इति। न भवति कादेश इति प्रकृतेन सम्बन्धः; स्थानिवद्भावेन तकारान्ततया विहतत्वात्। स्थानिवद्भावः पुनः `अचः परस्मिन्' (1.1.57) इत्यादिना। पूर्वविधौ कर्त्तव्ये स्थानिवद्भवति, न चात्र पर्वस्य विधिः, किं तर्हि? पूर्वस्मादुत्तरस्य, तत्कुतः स्थानिवद्भावः? इत्याह--`पूर्वस्मादपि' इत्यादि। न केवलं पूर्वस्य विधिः पूर्वविधिरिति षष्ठसमासोऽभिमतः, अपि तु पूर्वस्माद्विधिः पूर्वविधिरिति पञ्चमीसमासोऽपीत्यभिप्रायः।।

51. इसुसुक्तान्तात् कः। (7.3.51)
पूर्वेणेकादेशे प्राप्त इसाद्यन्तात् कादेश उच्यते। `सर्पिष्कः' इति। `तदस्य पच्यम्' (4.4.51) इति प्राग्वहतीयष्ठक्, रुत्वविसर्जनीयौ, विसर्जनीयस्य `इसुसोः सामर्थ्ये' (8.3.44) इति षत्वम्। `धानुष्कः' इति। `तदस्य ग्रहणम्' (4.4.57) इति ठक्। `याजुष्कः' इति। `तेन दीव्यति' (4.4.2) इति ठक्। `नैषादकर्षुकः, शाबरजम्बूकः' इति। निषादकर्ष्वां जातः, शाबरजम्बां जात इति `ओर्देशे ठञ्' (4.2.119), `केऽणः' (7.4.13) इति ह्रस्वः। `मातृकम्' पैतृकम्' इति। मातुरागतम्, पितुरागतमिति--`ऋतष्ठञ्' (4.3.78)। `औदश्वित्कः' इति। `उदश्विवतोऽन्यतरस्याम्' (4.2.19) इति ठक्। शाकृत्कः, याकृत्कः' इति। शकृता यकृता संसृष्टे (4.4.22) इति ठक्।
अथेह कस्मान्न भवति--आशिषा चरतीत्याशिषिकः, उषा चरतीत्यौषिकः? इत्याह--`इसुसोः' इत्यादि। `अर्चिसुचिहुसृपिछादिछर्दिभ्य इसिः' (द.उ.9.30), `जनेरुसिः' (द.उ.9.37), `अर्त्तिपृवपियजितनिधनितपिभ्यो नित्' (द.उ.9.39) इत्यादिना प्रकरणेन यौ विहितौ तयोर्लक्षणप्रतिपदोक्तपरिभाषया (व्या.प.3) प्रतिपदोक्तयोरिसुसोर्ग्रहणम्। तेनाशिषिकः, औषिक इत्यत्रापि न भवति; लाक्षणिकत्वादिसुसोः। तथा ह्याङ्पूर्वात् `शासु इच्छायाम्' (धा.पा.1022) इत्यस्मात्, `वस निवासे' (धा.पा.1005) इत्येतस्माच्च केवलात् क्विपि कृते `शास इदङ्हलोः' (6.1.15) सम्प्रसारणे परपूर्वत्वे च कृत इसुसति रूपं प्रतिपद्यते। `आशिषिकः, औषिकः' इति। `शासिवसिधसीनां च। (8.3.60) इति षत्वम्। तस्य त्वसिद्धत्वात् कादेश प्राप्तिराशङ्किता।
`दोष उपसंख्यानम्' इति। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्--`नञ्पूर्वाणामपि' (7.3.47) इत्यतोऽपगरहणमनुवर्त्तते; स चानुक्तसमुच्चयार्थः, तेन दोषोऽपि भविष्यति।।

52. चजोः कु घिण्ण्यतोः। (7.3.52)
`पाकः, त्यागः' इति। भावे घञ्। `पाक्यम्, वाक्यम्' इति। `ऋहलोर्ण्यत्' (3.1.124)। ननु चात्र धिण्ण्यतोः कार्यिणोश्चजोः साम्याद्यथासंख्यं प्राप्नोति--चकारस्य धिति, जकारस्य ण्यति, तत्कथं त्यागः, राग इति धिति जकारसय कुत्वं प्राप्नोति? नैतदस्ति; ज्ञापकादत्र यथासंख्यं न भवति। यत् `भुजन्युब्जौ पाण्युपतापयोः' (7.3.61), `प्रयाजानुयाजौ यज्ञाङ्गे' (7.3.62) इति घञि जकारस्य कुत्वाभावं निपातयति, `तेन रक्तं रागात्' (4.2.1) इति च निर्देशं करोति, तज्ज्ञापयति--यथासंख्यमिह न भवतति।।

53. न्युङ्क्वादीनां च। (7.3.53)
अधिण्ण्यदर्थोऽयमारम्भः। `नावञ्चतेरित्युप्रत्ययः' इति। तत्र `भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः' (द.उ.1.92) इत्यनुवृत्तेः। `मद्गुः' इति। `टुमस्जो शुद्धौ' (धा.पा.1415), `झलां जश् झशि' (8.4.53) इति सकारस्य दकारः। `मिमस्जिभ्य उः' इति। अनेन `भृमृशीतृचरि' (द.उ.1.92) इत्यादिकमुपलक्षयति। `भृगुः' इति। `भ्रस्ज पाके' (धा.पा.1284)। `प्रथिभ्रदि' (द.उ.1.113) इत्यादिके सूत्रऽत एव
सूत्रा(द.उ.1.92)दुप्रत्ययोऽनुवर्त्तते।
`दूरेपाकः'[`दूरेपाकाः'--मु.पाठ] इति। कर्मकर्त्तरि पचाद्यच्। `उकारान्तावपेर' इति। अधीयत इत्यपेक्ष्यते।

`तञ्चतेः' इति। `तन्चु त्वन्चु गतौ' (धा.पा.191,192) इति, `वन्चु प्रलम्भने' (धा.पा.1703) `स्फायितञ्चिवञ्चि' इति सूत्रैकदेशः `स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपिदृपितृपिवन्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिभिदिछिदिमन्दिचन्दिदहिदसिदम्भिवहवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक्' (द.उ.8.31) इत्येतत् सूत्रमुपलक्षयति। `व्यतिषङ्गः' इति। `षन्ज सङ्गे' (धा.पा.987) `अवसर्गः' इति। `सृज विसर्गे' (धा.पा.1178) पचाद्यच। `मेधः' इति। `मिह सेचने' (धा.पा.992)। अजेव। `श्वपाकः' इति। कर्मोपपदादणप्रत्ययः `कर्मष्यण्' (3.2.1) इत्यनेन। `अर्हतेः' इति। `अर्ह पूजायाम्' (धा.पा.740)। `दहेः' इति। `दहभस्मीकरणे' (धा.पा.992)। `रुहेः' इति। `रुह बीजजन्मनि प्रादुर्भावे' (धा.पा.859)।
ननु च न्यङ्क्वादयः कृतकुत्वाः प्रातपदिकगणे पठ्यन्ते, तत्किमर्थमिदम्, यथैव हि कुत्वादन्यत् कार्यं भवति निपातनात् तथा कुत्वमपि भविष्यति? तस्यैव प्रातपदिकपाठस्याभ्यनुज्ञानार्थमितदमुच्यते। असति ह्यतस्मिन् प्रमादपाठो विज्ञायतेत।।

54. हो हन्तेर्ञ्णिन्नेषु। (7.3.54)
`धातयति' इत्याद्युदाहरणानि `हनस्तोऽचिण्णलोः' (7.3.32) इत्यत्र व्युत्पादितानि। `ध्नन्ति' इति। लट्, झेरन्तादेशः, `गमहन' (6.4.98) इत्यादिनोपधालोपः। `ध्नन्तु' इति। लोट्। `अध्नन्' इति। लङ्, `इतश्च' (3.4.100) इतीकारलोपः।
`प्रहारः, प्रहारकः' इति। हरतेर्घञ्ण्वुलौ।
इह णिन्नग्रहणं हन्तिविशेषणं वा स्यात्--ञ्णिन्नकारपरस्य हन्तेर्यो हकार इति, हकारविशेषणंवा--ञ्णिन्नकारपरसय हकारस्येति स चेद्धन्तेरिति? तत्र यदि पूर्वकः पक्ष आश्रीयेत, ध्नन्त्यादौ न स्यात्, न ह्यत्र नकारपरो हन्तिः; अवयवेन समुदायस्य पौर्वापर्यानुपपत्तेः, अन्यस्य नकारस्याभावात्। अथेतरः पक्ष आश्रीयेत, न क्वचित् स्यात्, न हि हकारस्य ञ्णिन्नकारपरता सम्भवति। असम्भवस्तु ध्नन्तत्यादावकारलोपस्य पूर्वविधौ स्थानिवद्भावे सत्यकारेण व्यवधानात्, घातयतीत्यादावपि हकारात् परेण हन्त्यवयवेनानशब्देन व्यवधानात्। अथ वचनसामर्थ्याद्व्यवधानेऽपि कृत्वं स्यात्, एवमपि हननमिच्छतीति `सुप आत्मनः क्यच' (3.1.8), `क्यचि च' (7.4.33) इतीत्त्वम्, क्यजन्ताण्ण्वुल्, `अतो लोपः' (6.4.48) इत्यकारलोपो हननीयक इत्यत्रापि स्यादिति यश्चोदयेत्, तं प्रति पक्षान्तरमाश्रित्याह--`ञ्णित्प्रत्ययोऽत्र हन्तेर्विशेषणम्' इत्याद। न हि सर्वेषां ञ्णिन्नकाराणां हन्तिं प्रति विशेषणत्वमुपपद्यते, नापि हकारं प्रति। तस्माद्यथासम्भवं किञ्चिदेव कस्यचिद्विशेषणम्। ञ्णित्प्रत्ययस्तु हन्तेः परतः उपपद्यते इति तस्यासौ विशेषणम्--ञ्णिति प्रत्यये परतोऽनन्तरस्य हन्तेरिति। नकारस्तु हन्तेर्विशेषणँ नोपपद्यते; पूर्वोक्तात् कारणात्। इकारस्य तूपपद्यत इति तस्यैव विशेषणम्--नकारे परतोनन्तरस्य हन्तिहकारस्यानन्तर इति। अयं तु `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इति निर्दिष्टग्रहणस्यानन्तर्यार्थत्वाल्लभ्यते। आनन्तर्याश्रयणे तु--हन्ता, हन्तुमित्यत्राप्यतिप्रसङ्गो निरस्तः। ननु चानन्तर्यमेव हकारस्य णकारेण न सम्भवति, अकारलोपस्य स्थानिवद्भावे सत्यकारेण व्यवधानात्? इत्यत आह--`तच्च' इत्यादि। `सन्निपातकृतम्' इति। श्रुतिकृतमित्यर्थः। ननु चाश्रितेऽपि सन्निपातकृतानन्तर्ये स्थानिवद्भावशास्त्रेण यत् कृतमनानन्तर्यं तद्विहन्यादेव कुत्वम्? इत्यत आह--`स्थानिवद्भावशास्त्रकृतं तु' इत्यादि। किं कारणमविघातकम्? इत्याह--`वचनसामर्थ्यात्' इति। यदि स्थानिवद्भावशासतद्रकृतमनानन्तर्य व्यवधायकं बाधकं स्यान्नकारवचनमनर्थकं स्यात्; निरवकाशत्वात्। तस्माद्वचनसामर्थ्यान्न विघातकम्।
`यद्यपि' इत्यादिना यौ द्वौ पक्षावुपन्यस्तौ, तत्र द्वितीये पक्षे यो दोषस्तस्य परीहारः। तत्र नकारेण हकारे विशेष्यमाणे यो दोषः स पूर्वमेव परिहृतः। सम्प्रति तु ञ्णित्प्रत्ययेन हकारे विसेष्यमाणे यो दोषस्तं परिहरति। योऽयं हन्तेरवयवो हकारात् परोऽकारादिर्नकारान्तः, तेन सर्वत्र ञ्णित्प्रत्ययस्य व्यवधानम्। अननीयशब्देन तु च्यवधानं सम्भवति, न सम्भवति च तत्र `येन नाव्यवधानं तेन व्यवहितेऽति वचनप्रामाण्यात्' (व्या.प.46) इति घातयतीत्यादौ कुत्वं भवति। येन त्वननीयशब्देन व्यवधानं न सम्भवति, सम्भवति च तेन व्यवधाने हननीयक इत्यत्र न भविष्यति। आद्ये तु पक्षे यो दोष उक्तः, स तस्यानभ्युपगमादेवानवसरः। हन्तेः श्तिपा निर्देशो धातुनिर्देशार्थ एव, न यङ्लुग्निवृत्त्यर्थः। तत्र हि `अभ्यासाच्च' (7.3.55) इति भवितव्यमेव कुत्वेन।।

55. अभ्यासाच्च। (7.3.55)
`जिघांसति' इति। सन्, `अज्झनगमां सनि' (6.4.16) इति दीर्घः, द्विर्वचनम्, `कुहोश्चुः' (7.4.62) इति चुत्वम्--झकारः; `अभ्यासे चर्च' (8.4.54) इति जश्त्वम्--जकारः, `सन्यतः' (7.4.79) इत्तीत्त्वम्। `जङ्घन्यते' इति। `नुगतोऽनुनासिकान्तस्य' (7.4.85) इति नुक्। जघान' इति। उत्तमपुरुषेणलि यदा णित्वं नास्ति तदेदमुदाहरणम्। णित्वपक्षे तु पूर्वेणैव सिद्धम्। अग्र हननशब्दात् क्यचि कृते तदन्तात् सनि जिहननीयिषतीत्यत्र कस्मान्न भवतीति, भवति ह्यवाभ्यासात् परो हन्तिहकरः? इत्याह--इहाभ्यासनिमित्तप्रत्यये' इत्यादि। इह `हन्तेः' (7.3.54) इत्यनुवर्त्तते, अङ्गस्येति च। अभ्यासेनाभ्यासनिमित्तं प्रत्ययः सन्निधापितः, तस्य प्रत्ययः विशेषनिमित्तत्वात्, तत्र तेनाभ्यासनिमित्तेन प्रत्ययेन हन्तेरङ्गं विशिष्यते।
`अभ्यासनिमित्ते[अभ्यासनिमित्ते प्रत्येये हन्तेरङ्गस्य--काशिका] प्रत्यये यदङ्गं हन्तिः' इति। तेनाप्येवंविधेन हन्तिनाभ्यासो विशिष्यते। यथोक्तविशेषणविशिष्टस्य हन्तेरङ्गस्य योऽभ्यासः--इत्येवं विशेषणविशेष्यभावे सत्यभ्यासनिमित्ते सनादौ प्रत्यये हन्तेरङ्गस्य योऽभ्यासस्तस्मादेव कुत्वेन भवितव्यम्। `तेनेह [`तेन' नास्ति--काशिका] न भवति--`जिहननीयिषति' इति। न ह्यतराभ्यासनिमित्ते प्रत्यये सनि हन्तिरङ्गम्, किं तर्हि? हननीयशब्दः। यस्मिंस्तु हन्तिरङ्गम्, ल्युटि स नाभ्यासनिमित्तम्।।

56. हेरचङि। (7.3.56)
`प्रजिघीषति' इति। `हि गतौ' (धा.पा.1257) सन्, पूर्ववद्दीर्घत्वम्। `प्रजेघीयते' इति। `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः, द्विर्वचनम्, `गुणो यङ्लकोः' (7.4.72) इत्यभ्यासस्य गुणः। `प्रजिघाय' इति। णल्, वृद्ध्यायादेशो।
`प्राचीहयत्' इति। हेतुमण्णिच, `णिश्रि' (3.1.48) इत्यादिना चङादेशः, `णौ चङ्युपधायाः' (7.4.1) इति ह्रस्वः; `चङि' (6.1.11) इति द्विर्वचनम्। तच्च `णौ कृतं स्थानिवद्भवति' (चां.प.21) इति हिशब्दसय `दीर्घो लघोः' (7.4.94) इति दीर्घः।
`चङ्यम्यासनिमित्ते' इत्यादि। प्राजीहयदित्यत्र चङ्यभ्यासनिमित्ते परतो यो णिच् तस्मिन् हिनोतिरङ्गम्, न तु तस्मिन्नेव चङ्यभ्यासनिमित्ते; इह सूत्रेऽब्यासाधिकारात्। अभ्यासेनाक्षिप्तेऽऽभ्यासनिमित्ते प्रत्यये यदङ्गं हिनोतिरित्येवं विज्ञायते, एवञ्च विज्ञायमाने कः प्रसङ्गो यो व्यधिकस्य चङि स्यात्? नैवं प्राप्नोतीस्यतो नार्थोऽचङीति प्रतिषेधेन। एवं प्रत्याख्याय चङ्ग्रहणम्, तस्य प्रयोजनमाह--`तत्क्रियते' इत्यादि। किं पुनरनेन ज्ञाप्यते? इत्याह--`हेरचङि' इत्यादि। `हेरचङि' इत्यादि। `हेरचङि' इत्यनेन चङोऽन्यत्र सनादौ ण्यधिकस्यापि हिनोतेः कुत्वं भवतीत्येषोऽर्थो ज्ञाप्यते। `तेन' इत्यादिना ज्ञापकस्य प्रयोजनं दर्शयति। `प्रजिघाययिषति' इति। प्रहाययितुमिच्छतीति ण्यन्तात् सन्।।

57. सन्लिटोर्जेः। (7.3.57)
`जिगीषति जिगाय' इति। `आदेः परस्य' (1.1.54) इति परस्यादेर्जकारस्य कुत्वम्, `ज्या वयोहानौ' (धा.पा.1499) इत्यसय लिट्। ग्रहिज्यादिसूत्रेण (6.1.16) सम्प्रसारणे कृते परपूर्वत्वे च जिरत्येष रपविशेषो भवति। अतस्तस्यापि कुत्वं प्राप्नोति, जिग्रहणेन ग्रहणात्। न च शक्यते वक्तुम्, `हलः' (6.4.2) इति दीर्घत्वे कृते जिग्रहणेन ग्रहणं न भविष्यति, एकदेशविकृतस्यानन्यत्वात्; (व्या.प.16) अन्यथा हि जिगीषतीत्यत्रापि `अज्झनगमां सनि' (6.4.16) इति दीर्घत्वे कृते जिग्रहणेन ग्रहणं न भविष्यति। अथ वा--प्रागेव दीर्घात् परत्वात् कुत्वेन भवितव्यमिति यश्चोदयेत्, तं प्रत्याह--`जिनातेः' इत्यादि। लक्षणप्रतिपदोक्तपरिभाषया (व्या.प.3) `जि जये' (धा.पा.561) इति यः पठ्यते, तस्यैवेदं प्रतिपदोक्तस्य ग्रहणम्, न जिनातेः। सम्प्रसारणे कृते यज्जीरूपं सम्पदयते, तस्य लाक्षणिकत्वात्। `जिज्यतुः, जिज्युः' इति। `लिट्, अतुस्, उस्, `एरनेकाचोऽसंयोगपूर्वस्य' (6.4.82) इति यणादेशः।।

58. विभाषा चेः। (7.3.58)

59. न क्वादेः। (7.3.59)
`चजोः कु घिण्ण्यतोः' (7.3.52) इति कुत्वे प्राप्ते प्रतिषेधोऽयमारभ्यते। `कूजः, खजः, गर्जः' इति। `कूज अव्यक्ते शब्दे' (धा.पा.223), `खर्ज व्यथने' (धा.पा.229) `गर्ज शब्दे' (धा.पा.226)।।

60. अजिव्रज्योश्च। (7.3.60)
`समाजः उदाजः' इति। `अज गतिक्षेपणयोः' (धा.पा.230)। `समुदोरजः पशुषु' (3.3.69) इति घञ्। `परिव्राजः, परिव्राज्यम्' इति। `वज व्रज गतौ' (धा.पा.252,253)।
अथाजेर्ण्यति कस्मादुदाहरणं नोपन्यस्तम्? इत्याह--`वीभावस्य' इत्यादि। तत्र `अजेर्व्यघञपोः' (2.4.56) इति वीभावस्य विधानमिति; तेन तस्योदाहरणं नोपपद्यते, ततो न दर्शितमित्यभिप्रायः। चकारोऽनुक्तसमुच्चयार्थः, तेन वजेरपि प्रतिषेधो भवति--वाजः, वाच्यमिति।।

61. भुजन्युब्जौ पाण्युपतापयोः। (7.3.61)
`भुजः' इति। `भुज पालनाभ्यवहारयोः' (धा.पा.1454), `हलश्च' (3.3.121) इति धञ्। अत्र `अवे तृस्त्रोर्घञ्' (3.3.120) इत्यतो घञनुवर्त्तते।
`न्युब्जः' इति। यदा दकारोपध उच्यते `उद्ज आर्जवे' इति तदा दकारस्य बकारो निपात्यते। अथ वा--`असिद्धेभ उद्जेः' [`इयवरट्' सूत्रस्थमेतत् वचनं महाभाष्ये] इत्यनयेष्ट्या दकारस्य भकारे कृते जश्त्वेन बकारो भवति। यदि तु बकारोपधः `उब्ज आर्जवे' इति तदा समुद्ग इतयतर बकारसय दकारो वक्तव्यः।।

62. प्रयाजानुयजौ यज्ञाङ्गे। (7.3.62)
`प्रयाजः, अनुयाजः' इति। प्रपूर्वादनुपूर्वाचच यजेः `अकर्त्तरि च कारके संज्ञायाम्' (3.3.19) इति घञ् तस्मिन्न कुत्वं निपात्यते।
`प्रदर्शनार्थम्' इति। अन्यस्याप्येवंप्रकारस्योपलक्षणार्थमित्यर्थः। तेनान्यत्रापि प्रयाजानुयाजप्रकारे यज्ञाङ्गे कुत्वं न भवति। प्रदर्शनार्थता पुनः प्रयाजानुयाजशब्दयोर्यज्ञाङ्गगरहणाद्वेदितव्या, तद्ध्येवमर्थं क्रियते। कथं नाम प्रयाजनृयाजगरहणस्योपलक्षणार्थता प्रतीयेत! [प्रतीयते--प्रा.मु. पाठः] अन्यथा हि निपातनसामर्थ्यादेव यज्ञाङ्गविषयता विज्ञायत इति तन्न कर्त्तव्यमेव स्यात्।।

63. वञ्चेर्गतौ। (7.3.63)
`वङ्चम्' इति। `वञ्चु चञ्चु तञ्चु त्वञ्च म्रुञ्चु म्लञ्चु भ्रुचु म्लुचु गत्यर्थाः (धा.पा.189-196)। कर्मणि घञ्। वञ्च्यं वञ्चन्ति गन्तव्यं गच्छन्तीत्यर्थः।
`चङ्कम्' इति। `हलश्च' (3.3.121) इति घञ्।।

64. आक उचः के। (7.3.64)
`न्योकः' इति। निपूर्वात् `उच समवाये' (धा.पा.1223) इत्यस्मात् `इगुपधज्ञाप्रीकिरः कः' (3.1.135)--न्युचतीति न्योकः, निवसतीत्यर्थः।
न्युचन्त्यस्मिन्निति `घञर्थे कविधानम्' (वा.306) इति वा कः--न्योकः, निवसन्त्यस्मिन्नित्यर्थः।
`किमर्थं पुनः' इत्यादि। एवं मन्यते--रूढिशब्दोऽयम्, नात्र कश्चिदवयवार्थोऽस्ति, व्यत्पत्तिः केवलं कर्त्तव्या, सा च `हलश्च' (3.3.121) इति घञ्यपि कृते भवत्येव, ततो नार्थोऽनेन योगेनेति। `घञि सत्याद्युदात्तः स्यात्' इति। `ञ्नित्यादेर्नित्यम्' (6.1.197) इत्यनेन।
अथ दिवौकसः, जलौकस इत्यादौ कथं कुत्वम्ष यावता नात्र कप्रत्ययोऽस्ति, नापि धिण्ण्यतौ, किं तर्हि? असुन्निति? अत आह--`दिवौकसः' इत्यादि।
गतार्थम्।।

65. ण्य आवश्यके। (7.3.65)
`अवश्यपच्यम्' इत्यादि। `डुपचष् पाके' (धा.पा.996), `वच परिभाषणे' (धा.पा.1842), `आवश्यकाधमर्ण्ययोर्णिनिः' (3.3.170) इत्यनुवृत्तौ `कृत्याश्च' (3.3.171) इत्यावश्यके ण्यत्। मयूरव्यंसकादित्वात् (2.1.72) समासः, `लुम्येदवश्यमः कृत्ये तुम्काममनसोरपि' (काशिका 6.1.144) इत्यनयेष्ट्याऽवश्यमो मकारलोपः।।

66. यजयाचरुचप्रवचर्चश्च। (7.3.66)
`ण्ये' इत्येव। अनावश्यकार्थमिदम्। `याज्यम्' इत्यादि। `यज देवपूजादौ' (धा.पा.1002), `टुयाच् याच्ञायाम्' (धा.पा.863), `रुच दीप्तौ' (धा.पा.745), `वच परिभाषणे' (धा.पा.1842) प्रपूर्वः, `ऋच स्तुतौ' (धा.पा.1302)। कथं पुनऋचेर्ण्यत्, यावता `ऋदुपधाच्चाक्लृपि चृतेः' (3.1.110) इति ण्यदपदादेव क्यपा भवितव्यम्? इत्याह--ऋदुपधात्' इत्यादि।
अथ प्रवचिग्रहणं किमर्थम्, यावता `वचोऽशब्दसंज्ञायाम्' (7.3.67) इत्यनेनैव प्रतिषेधो भविष्यति? इत्याह--`प्रवचिग्रहणं शब्दसंज्ञार्थम्' इति। स्यादेतत्।
नास्त्येव कश्चिच्छब्दो यस्य वाच्यमिति नामधेयम्? इत्याह--`प्रवाच्यो नाम' इत्यादि।
`अपरे पुनः' इत्यादिना मतान्तरं दर्शयति। `एतत्तु' इति। अविवाक्यमेतद्रूपम्। कः पुनरसौ विशेषः? इत्याह--`दशरात्रस्य' इत्यादि। यस्मिन् याज्ञिका न विब्रुवते, तस्य दशरात्रस्य यद्दशमाहस्तत्रैवैतच्छशब्दरूपमिष्यते, नान्यत्र। यद्येवम्, अनर्थकं नियमार्थं प्रवचिग्रहणम्, अवश्यं तस्य विशिष्टविषये वुत्तिर्यथा स्यादित्यवमर्थो यत्नः कर्त्तव्यः, तत एव यत्नात् तत्र कुत्वमपि भविष्यति? नैतदस्ति; नियमाद्ध्यन्योपसर्गस्य कुत्वप्रतिषेधो निवर्त्तते। अभिधेयव्यवस्था तु प्रसिद्धिवशादेव विज्ञास्यते।
`ण्यति प्रतिषेधे' इत्यादि। ण्यति प्रतिषेधेऽस्मिन् क्रियमाणे `त्यज हानौ' (धा.पा.986) इत्यस्योपसंख्यानं कर्त्तव्यम्। उपसंख्यानशब्दसय प्रतिपादनमर्थः।
तत्रेदं प्रतिपादनम्---चकारोऽनुक्तसमुच्चयार्थः, तेन त्यजेरपि प्रतिषेधो भविष्यतीति।।

67. वचोऽशब्दसंज्ञायाम्। (7.3.67)

68. प्रयोज्यनियोज्यौ शक्यार्थो। (7.3.68)
प्रपूर्वस्य निपूर्वस्य च `युजिर् योगे' (धा.पा.1444) इत्यसय ष्यति कुत्वाभावो निपात्यते, स चेण्ण्यच्छक्यार्थे भवति। शक्यार्थे पुनर्ण्यत् `शकि लिङ् च' (3.3.172) इत्यनेन वेदितव्यः। तत्र हि `कृत्याश्च' (3.3.171) इत्यनुवर्त्तते। अथ किमर्थं पुनर्निपातनम्, यावता `ण्ये' (7.3.65) इत्यनुवर्त्तत एव?
तत्र `प्रयुजनियुजोः शक्यर्थे' इति वक्तव्ये निपातनं रूढ्यर्थम्। अगुणभूता यत्र शक्यार्थता तत्र यथा स्यात्--प्रयोज्यो भृत्यः, नियोज्यो दास इति। स्वमिनि प्रयोज्यो नियोज्य इति न भवति। न हि तत्र प्रयोज्यनियोज्यशब्दौ रूढौ, किं तर्हि? गुणभूतादेव।।

69. भोज्यं भक्ष्ये। (7.3.69)
`भोज्यम्' इति। `भुज पालनाभ्यवहारयोः' (धा.पा.1454) इत्यस्य ण्यति भक्ष्येऽभिधेये कुत्वाभावो निपात्यते। `भोज्या यवागूः' इति। ननु च भक्षिरयं खरविशदेऽभ्यवहार्ये वर्त्तते, न तु द्रवद्रव्ये, यथा--`संस्कृतं भक्षाः' (4.2.16) इत्यत्र, तत्कथं `भक्ष्ये' इत्युच्यमाने यवाग्वां भवति? इत्याह--`इह भक्ष्यम्' इत्यादि। नावश्यं भक्षिः खरविरादे वर्त्तते। तथा हि--द्रवद्रव्येऽप्यस्य प्रयोगो दृश्यते। यथा--अबभक्षः, वायुभक्षः, वायुभक्ष इति। तस्मादभ्यवहार्यसामान्ये

भक्षिर्वर्तत इति यवाग्वामपि भवति। `भुजो भक्ष्ये' इति वक्तव्ये निपातनं रूढ्यर्थम्। अभ्यवहार्ये भक्ष्ये कर्मणि यथा स्यात् परिपालनीये मा भूत्--भोग्या अपूपाः। पालनीया इत्यर्थः।।

70. घोर्लोपो लेटि वा। (7.3.70)
`ददन्' इति। `डुदाञ् दाने' (धा.पा.1091), लिङर्थे लेट् (3.4.97), झेरन्तादेशः, (7.1.3), `इतश्च लोपः परस्मैपदेषु' (3.4.97) इतीकारलोपः, `लेटोऽडाटौ' (3.4.94) इत्यट्, शप्, तस्य जुहोत्यादित्वात् श्लुः `श्लौ' (6.1.10) इति द्विर्वचनम्, संयोगान्तलोपः, (8.2.23) `ङमो ह्रस्वावचि ङमुण्णित्यम्' (8.3.32) इति ङ्मुडागमः। `सोमोददद्गन्धर्वाय' इति। ददातेस्पिप्, शेषं पुर्ववत्। `यदग्निरग्नये ददात्' इति। ददा+आदिति स्थितेऽकः सवर्णे दीर्घत्वम् (6.1.101) शेषं पूर्ववत्।
यद्याडागमे [`यद्यडागमे'--प्रा.मु.पाठः] कृते सत्यपि लोपे च ददादिति सिध्यति, किमर्थं तर्हि वेत्युच्यते? इत्याह--`तत्र' इत्यादि। स्यादेतत्--विस्ष्टार्थं तर्हि वाग्रहणणयुक्तम्; वदादित्यस्य रूपस्यासिद्धिं प्रत्याशङ्काया अभावात्? इत्यत आह--`एषा हि' इत्यादि। सुबोधम्।

71. ओतः श्यनि। (7.3.71)
`निश्यति' इत्यादि। `शो तनूकरणे' (धा.पा.1145), `छो छेदने'[`नास्त्ययं धातुः'--मुद्रितग्रन्थे] (धा.पा.1146) `दो अवखण्डने' (धा.पा.1148) `षो अन्तकर्मणि' (धा.पा.1147)। अथ किमर्थं इयनीत्युच्यते, न `शिति' इत्येवोच्येत, एवं ह्युच्यमाने श्यन्येव लोपो भविष्यति, न ह्योकारान्ताच्छ्यनोऽन्यच्छित् सम्भवति, लघु चैवं सूत्रं भवति, तत्रायमप्यर्थः--`ष्ठिवुक्लमुचमां शिति' (7.3.75) इत्यत्र शिद्ग्रहणं न कर्त्तव्यं भवतीत्येतदेव तत्रानुवर्त्तिष्यते? सत्यं सिध्यत्येव, किन्तु प्रतिपत्तिगौरवं स्यात्। तस्मात् प्रतिपत्तिगौरवपरीहारार्थं श्यनीत्युक्तम्।
`ओतः' इति। तपरकरणं मुखसुखार्थम्। न ह्यन्यदस्य निवर्त्त्यं विधेयं वा सम्भवति।।

72. क्सस्याचि। (7.3.72)
`अधुक्षाताम्, अधुक्षाथाम्' इति। दुहेर्लुङ्, च्लिः, `स्वरितञितः' (1.3.72) इत्यात्मनेपदम्, आतामाथाम्, `शाल इगुपधादनिटः क्सः' (3.1.45) इति क्सादेशश्च्लेः, तस्यानेन `अलोऽन्त्यस्य' (1.1.52) लोपः, `दादेर्घातोर्घः' (8.2.32) इति हकारस्य धकारः, `एकाचो वशो भष्' (8.2.37) इत्यादिना भष्--धकारः, `खरि च' (8.4.55) इति चर्त्वम्--धकारस्य ककारः `इण्कोः' (8.3.57) इति षत्वम्। `अधिक्षि' इति। उत्तमपुरुषैकवचनमिट्। `अधुक्षत्' इति। तिप्, `इतश्च' (3.4.100) इतीकारलोपः। `अधुक्षताम्' इति। `तस्थस्थमिपाम्' (3.4.101) इत्यादिना तसस्ताम्। ककारक्त उपादानम्, इह मा भूत्--हंसौ हंसाः, षत्सौ, वत्सा इति।।

73. लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये। (7.3.73)
`दुह प्रपूरणे' (धा.पा.1014), `दिह उपचये' (धा.पा.1015), `लिह आस्वादने' (धा.पा.1016), `गुहू संवरणे' (धा.पा.896)--सर्वं एते स्वरितेतः। स्वरितेत्त्वात् `स्वरितिञितः कर्त्रभिप्राये क्रियाफके' (1.3.72) इत्यामनेपदिनः। `अदुग्ध' इति। पूववद्धकरः, `झषस्तथोर्धोऽयः' (8.2.40) इति तकारस्य धकारः, `झलां जश् झशि' (8.4.53) इति धकारस्य गकारः। `अदुग्धाम्' इति। थास्, पूर्ववद् धत्वादि। `अदुग्ध्वम्' इति। ध्वम्। `अदुह्वहि' इति। वहिः। `अदिग्ध' इति। पूर्ववद् घत्वादि। `अलीढ' इति। हकारसय `हो ढः' (8.2.31) इति ढकारः पूर्ववत्, तकारस्य धत्वं ष्टुत्वञ्च, `ढो ढे लोपः' (8.3.13), `ढ्रलोपः पूरवस्य (6.3.111) इत्यादिना दीर्घः। `न्यगूढ' इति। एतदपि पूर्वेण तुल्यम्।
`व्यत्यपुक्षत' इति। `पुष पुष्टौ' (धा.पा.1182) व्यतिपूर्वः। `कर्त्तरि कर्मण्यतिहारे' (1.3.14) इत्यातमनेपदम्, `षढोः कः सि' (8.2.41) इति षकारस्य ककारः।
`अजुक्षामाहि' इति। महिङ।
अथ लुग्ग्रहणं किमर्थम्, यावता लोप इत्यनुवर्त्तत एव? इत्याह--`लोप इति वर्त्तमाने' इति। यदि लोपग्रहणमनुवर्त्त्य लोपो विधीयते तत् `अलोऽन्त्यस्य' (1.1.52) इत्यन्त्यस्य स्यात्। कि तु सर्वस्यैव भवति; प्रत्ययादर्शनस्य लुक्संज्ञाविधानात्। तस्मात् सर्वस्य क्सस्य लोपो यथा स्यादित्येवमर्थं लुग्ग्रहणं कृतम्। `वह्यर्थम्' इति। उत्तमपुरुषद्विवचनार्थमित्यर्थः। वहिरर्थः प्रयोजनं यस्य तत् तथोक्तम्। अथान्यार्थं कस्मान्न भवति? इत्याह--`अन्यत्र तु' इत्यादि। यदात्मनेपदं दन्त्यादि तत्सर्वं झलाद्येव। तत्रान्त्यस्यैवाकारस्य लोपे कृते `झलो झलि' (8.2.26) इति सकारसय लोपेनेष्टं सिध्यत्येव। स्यादेतत्--अन्यत्रापि लुका विना न सिध्यति; अकारलोपस्य सकारलोपे कर्त्तव्ये `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवदभावादिति? अत आह--`स्थानिवद्भावोऽप्यकारलोपस्य नास्ति' इति। कस्मान्नास्ति? इत्याह--`पूर्वत्रासिद्धे न स्थानिवत्' इति। तस्मान्नान्यार्थं लुग्ग्रहणम्, अपि तु वह्यर्थमेव। अत्र ह्यझलादित्वात् `झलो झलि' (8.2.26) इति सकारलोपो नास्तीति न सिध्यति।
`ननु च क्रियमाणेऽपि लुग्ग्रहणे वहौ लुका न भवितव्यमेव, अदन्त्यादित्वात्, न हि दन्त्यौष्ठ्यो वकारो दन्त्यग्रहणेन गुह्यते? इत्याह--`दन्त्यौष्ठ्योऽपि'

इत्यादि। अत्रैव हेतुमाह--`यदि' इत्यादि। यदि दन्त्यौष्ठ्यौ दकारो दन्त्यग्रहणेन न गृह्येत्, तदा तावित्येवं ब्रूयात्, न दन्त्य इति। तावप्युच्यमाने सर्वमिष्टं सिध्यत्येव। न हि तदर्गादन्यद्दन्त्यमात्मनेपदस्यास्ति। तस्माद्दन्त्यौष्ठ्योऽपि वकारो दन्त्यग्रहणेन गृह्यते। तत्रेदं चोद्यते--यदुक्तम्--"अन्यत्र ह्यन्त्यस्यैव लोपे कृते `झलो झलि' (8.2.26) इति सकारलोपेनेष्टं सिद्ध्यत्येवेति, तदयुक्तम्; न हि `झलो झलि' (8.2.26) इत्यनेन सकारमात्रस्य लोपो विधियते, किं तर्हि? सिचः, तथा हि तत्रैव वक्ष्यति--`अयमप सिच एव लोपः'" इति? नैतदस्ति; सिज्ग्रहणस्य च्ल्यादेशस्योपलक्षणार्थत्वाच्च्लेर्थ आदेशस्तत्सम्बन्धिन एव सकारस्य लोपो भवतीत्ययं तत्रार्थो वेदितव्यः।।

74. शमामष्टानां दीर्घः श्यनि। (7.3.74)

बहुवचननिर्देशादष्टग्रहणाच्चाद्यर्थो गम्यत इत्याह--`शमादीनाम्' इत्यादि। `शमु उपशमे (धा.पा.1201), `तमु काङ्क्षायाम्' (धा.पा.1202), `दमु उपशमे' (धा.पा.1203), `श्रमु तपसि खेदे च' (धा.पा.1204) `क्षमु सहने' (धा.पा.1206), `भ्रमु अनवस्थाने' (धा.पा.1205), `क्लमु ग्लानौ' (धा.पा.1207), `मदी हर्षे' (धा.पा.1208)--इत्येतेऽष्टौ शमादयः।

`अस्यति' इति। `असु क्षेपणे' (धा.पा.1209)। अष्टाभ्यः परेणायं पठ्यते। `भ्रमति' इति। `वा भ्राश' (3.1.70) इत्यादिना श्यन् यस्मिन् पक्षे नास्ति तत्रेदं प्रत्युदाहरणम्।

श्यन्ग्रहणं स्पष्टार्थम्। शक्यते हि `ओतः श्यनि' (7.3.71) इति यत् प्रकृतं शन्ग्रहणं तल्लुग्ग्रणेव व्यवहितमपि मण्डूकप्लतिन्यायेनेहानुवर्त्तयितुम्।।

75. ष्ठिवुकलभ्याचमां शिति। (7.3.75)

`ष्ठिवु निरसने' (धा.पा.1110) `क्लमु ग्लागौ' (धा.पा.1207), `चमु छमु जमु झमु अदने' (धा.पा.469-472) आङ्पूर्वः। `क्लामति' इति `वा भ्राश' (3.1.70) इत्यादिना श्यनोऽभावे शप्। `क्लमिग्रहणं शवर्थम्' (इति। न तु श्यनर्थम्, तत्र पूर्वेणैव सिद्धत्वात्।

`चमेराङ्पूर्वस्य' इत्यादिना केवलस्यान्योपसर्गपूर्वस्य वा मा भूदित्येवमर्थं चमेराङ्पूर्वस्य ग्रहणमिति दर्शयति।।

76. क्रमः परस्मैपदेषु। (7.3.76)

`क्रामति' इति। `क्रमु पादविक्षेपे' (धा.पा.473)। `आक्रमते' इति। आङ्पूर्वः। `आङ उद्गमने' (1.3.40) इत्यात्मनेपदम्।

`इहोत्क्राम, सङ्क्राम' इत्यादिना चोद्यम्। उत्पूर्वात् सम्पूर्वाच्च क्रमेर्लोट `सेर्ह्यपिच्च' (3.4.87) इति हिरादेशः, तस्य `अतो हेः' (6.4.105) इति हेर्लुकि कृते `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणनिषेधात् उत्क्राम सङ्क्राम' इत्यत्र दीर्घत्वं न प्राप्नोति; न ह्यसति प्रत्ययलक्षणे हौ लुप्ते क्रमः परस्मैपदपरता सम्भवति। `नैष दोषः, इत्यादि परीहारः। स्यादेतत् लुमता लुप्ते क्रमः प्रत्यये हावेव करमिरत्राङ्गमित्याह--`न च क्रमिरङ्गम्' इति। शपा व्यवहितत्वात्। `किं तर्हि? `शपि' इति। शप एव ततो व्यवहितस्य विद्यमानत्वात्।।

77. इषुगमियमां छः। (7.3.77)

`इच्छति' इति। `तुदादिभ्यः शः' (3.1.77)। `गच्छति, यच्छति' इति। `कर्त्तरि शप्' (3.1.68)।

अथ किमर्थम्, `इषु इच्छायाम्' (धा.पा.1351) इत्येतस्योदितो ग्रहणम्? इत्याह--`इषेः' इत्यादि। `इष गतौ' (धा.पा.1127) इत्यसय दैवादिकस्येष्यतीत्यत्र मा भूत्। `इष आभीक्ष्ण्ये' (धा.पा.1525) इत्यस्य क्रैयादिकसय इष्णातीत्यत्र मा भूदित्येवमर्थमुकारानुबन्ध इषिरिह गृह्यते। ये तर्हीषिमुदितमिह न पठन्ति, तेषामिष्यति, इष्णातीत्यत्रापि प्राप्नोति? इत्यत आह--`ये त्विषिमुदितम्' इत्याद। य इषिमुकारानुबन्धविशिष्टमिह न पठन्ति; त इष्यति, इष्णातीत्यत्र च्छत्वं मा भूदित्येवमर्थम्, `क्सस्याचि' (7.3.72) इत्यतोऽज्ग्रहणमनुवर्त्तयन्ति। अनुवर्त्तमानेऽप्यस्मिन् यदि तेन शितीत्येतद्विशिष्यते--शित च्छो भवति, किं विशिष्टे? अजादाविति, तदेष्णातेर्लोट्सिपो हीत्यादेशे कृते `हलः श्नः शानज्झौ' (3.1.83) इति श्नाप्रत्ययस्य शानजादेशे कृते सति इषणेत्यत्र `यस्मिन् विधिस्तदादावल्ग्रहणे' (व्या.प.127) इति तदादिविधिना छत्वं स्यादेवेति मन्यमान आह--`तच्च प्रधानमन्ग्रहणं शितीत्यनेन विशिष्यत इति वर्णयन्ति' इति। अचि च्छो भवति स चेच्छिद्भवति। प्राधान्यं पुनरज्ग्रहणस्य विशिष्यमाणत्वादेव। `तथा च सति' इत्यादि। एवमचीत्यस्मिन् प्रधाने शितीत्यनेन विशिष्यमाणे तदादिविधिर्न भवति। किं कारणम्? इत्याह--`यस्मिन् विधिः' इत्यादि। न केवलं `येन वधिस्तदन्तस्य' (1.1.72) इत्येतदेव तदन्तविधानं विशेषणेनेष्यते, अपि तु `यस्मिन्विधिस्तददावल्ग्रहणे' (व्या.प.127) इत्येतदेव तदादिविधानं विशेषणेनैवेष्यते। तेन च तदादिविधेरभावादषाणेत्यत्र छत्वं न भवति। असत्यपि तदादिविधौ शानजदेशस्य योऽयमादिराकारस्तत्र शिति परतश्छत्वं कस्मान्न भवति? इत्याह--`न ह्ययम्' इत्यादि। शकारः समुदायानुबन्धः, नाकारस्याचः। तस्मान्नाजेव शित्, अपि तु समुदाय एवेति न भवति च्छत्वम्।।

78. पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः। (7.3.78)

`पा पाने' (धा.पा.925), `घ्रा गन्धोपादाने' (धा.पा.926) `ध्मा शब्दाग्निसंयोगयोः' (धा.पा.927), `ष्ठा गतिनिवृत्तौ' (धा.पा.928), `म्ना अभ्यासे'

(धा.पा.929), `दाण् दाने' (धा.पा.930), `दृशिर प्रेक्षणे' (धा.पा.988); `ऋ गतिप्रापणयोः, (धा.पा.936), `ऋ सृ गतौ च' (धा.पा.1298,1099); `शद्लृ शातने' (धा.पा.1428), `षद्लृ वशरणे' (धा.पा.1427) तौदादकः, `षद्लृ विशरणगत्यवसादनेषु' (धा.पा.854) भौवादिकः--एषां धातूनां स्थाने यथासंक्यं पिबादय आदेशा भवन्ति। ननु च द्वौ सदी, तत्र वैषम्याद्यथासंख्यं न प्राप्नोति? नैष दोषः; एक एव हि सदिर्विकरणद्वयार्थ द्वियपदिश्यते। `शीयते' इति। `शदेः शितः' (1.3.60) इत्यात्मनेपदम्।

`अथ वा' इत्यादि। `पिबतेर्लघूपघगुणः प्राप्नोति' इत्यत्र परिहारान्तरम्। यद्याद्युदात्तो न निपात्येत, ततो धातुस्वरेणान्तोदात्तत्वे सति `एकादेश उदात्तेनोदात्तः' (8.2.5) इति शपा सहैकदेशे सति `अतो गुणे' (6.1.97) पररूपत्वे उदात्ते कृते पिबतीति मध्योदात्तं पदं स्यात्, आद्युदात्तञ्चेष्यते, तस्मादाद्युदात्तो निपात्यते। स निपातनस्वरो धातुस्वरसय बाधको यथा स्यात्। `सर्त्तः' इत्यादि। वेगः=जवः; स यस्यास्ति स वेगी, तस्य भावो वेगिता, तस्यां गतौ सर्त्तेर्धावादेशमिच्छन्ति। स च `लुग्वा दुहदिह' (7.3.73) इत्यादेः सूत्राद्वाग्रहणानुवृत्तेर्ष्यवस्थितविभाषात्वाल्लम्यत इति वेदितव्यम्। अर्त्तिसर्त्तीति शितपा निर्देशो धातुनिर्देशार्थ एव, न यङ्लुग्निवृत्त्यर्थः। न हि यङलुकि शित्परः सम्भवति; अदादत्वत् ततो विहितस्य शपो लुग्वधानात्। `बहुलं छन्दसि' (2.4.73) इति शपो लग्न भविष्यतीति चेत्? न, छन्दस यथादृष्टानुविधानात्। अर्त्तिप्रभृतेश्छब्दसि यङ्लुकि शबन्तस्य प्रयोगादर्शनात्।।

79. ज्ञाजनोर्जा। (7.3.79)

`जनेर्देवादकसय ग्रहणम्' इति। द्वौ जनी--दैवादिकः `जनी प्रादुर्भावे' (धा.पा.1149), जौहोत्यादिकः `जन जनने' (धा.पा.1105) इति। तत्रैह दैवादिकस्य ग्रहणम्, नेतरस्य। न हि ततः परः शित् सम्भवति, श्लुविधानात्। दीर्घोच्चारणस्य प्रयोजनमुत्तरत्र वक्ष्यति।।

80. प्वादीनां ह्वस्वः। (7.3.80)

`व्ली गतौ वृदिति यावत् केचिदिच्छन्ति' इति। तेषां ततः परेण पठितयोः `व्री वरणे' (धा.पा.1504), `भ्री भये' (धा.पा.1505)--इत्येतयोर्ह्रस्वत्वेन न भवितव्यम्--व्रीणाति, भ्रीणातीति। ननु ल्वादीनां परिसमाप्त्यर्थं तद्वृत्करणम्, अन्यथा आ गणान्तात् तेभ्यो निष्ठानत्वं स्यात्, ल्वादिपरिसमाप्त्यर्थे च तस्मिन्नागणान्ताः प्वादयो युक्ताः? इत्यत आह--`वृत्करणम्' इत्यादि। न ह्युभयगणपरिसमाप्त्यर्थता केनचिद्विरुध्यत इत्यभिप्रायः।

`अपरे' इत्यादि। ल्वादेर्गणस्यानन्तरत्वात् तत्परिसमाप्त्यर्थतैव वृत्करणस्य युक्तेति भावः। तेषामेवमिच्छतां व्री वरणे, भ्रो भये--इत्येतयोरपि भवितव्यं ह्रसवत्वेन व्रिणाति, भ्रिणातोति; प्वादिषूभयोरन्तर्भावात्। `जानातीत्यत्र ह्रस्वः प्राप्नोति' इति। तल्याप प्वाद्यन्तर्भावादित्याह--`ज्ञाजनोर्जा' इत्यादि। यदि `जा' इत्यादेशे कृते ह्रसवः स्यात् तदा दीर्घोच्चारणमनर्थकं स्यात्, `ज' इत्येवं ब्रूयात्। तस्मात् दीर्घोच्चारणसामर्थ्यज्जानातीत्यत्र ह्रस्वो न भविष्यति। ननु च दीर्घोच्चारणं जन्यर्थं स्यात्, न हि जनेर्ज इत्यादेशे कृते जायत इति रूपं सिध्यति? इत्यत आह--`ज इत्यपि ह्यादेशे कृते' इत्यादि।

येषान्तूभयगणपरिसमाप्त्यर्थं वृत्करणं तेषां किमर्थं जा इति दीर्घोच्चारणम्? जानातीत्यत्र दीर्घो यथा स्यात्? नैतदस्ति; `अतो दीर्घो यञि' (7.3.101) इति दीर्घो भविष्यति? ननु च `अङ्गवृत्ते पुनर्वृत्ताविधिर्निष्ठितस्य' (व्या.प.38) इति न प्राप्नोति? नैतदस्ति; `निष्ठितस्य' इत्युच्यते, न च ज इत्यादेशे कृते निष्ठितमङ्गं भवति; अप्रयोगार्हत्वात्। प्रतिपत्तिलाघवार्थं दीर्घोच्चारणम्।।

81. मीनातेर्निगमे। (7.3.81)

`प्रमिणन्ति' इति। `हिनु मीना' (8.4.15) इति णत्वम्, `श्नाभ्यस्तयोरातः' (6.4.112) इत्याकारलोपः। मीनातेरिह विकरणनिर्देशः `मीञ् हिंसायाम्' (धा.पा.1476) इत्यस्य क्रैयादिकस्य ग्रहणं यथा सात्, `मीङ् हिंसायाम्' (धा.पा.1137) इत्यस्य दैवादिकसय ग्रहणं मा भूदित्येवमर्थम्। `मीञः' इति निर्देशो न कृतो वैचित्र्यार्थः।।

82. मिदेर्गुणः। (7.3.82)

`ञिमिदा स्नेहने' (धा.पा.743,1243) इति भौवादिको दैवादिकश्च, तत्र दिवादेरिह ग्रहणम्; इतरस्व ह्यङित्त्वाच्छपः `पुगन्तलघूपधस्य च' (7.3.86) इत्येवं गुणः सिद्धः। `मिद्यते' इति। `भावकर्मणोः' (1.2.13) इत्यात्मनेपदम्, `सार्वधातुके यक्' (3.1.67)।।

83. जुसि च। (7.3.83)

इकात्र सन्निहितेन प्रकृतमङ्गं विशिष्यते, विशेषणेन तदन्तविधिर्भवतीत्यत आह--`इगन्तस्य' इत्यादि। `अजुहवुः' इति। लङ्, `सिजभ्यस्तविदभ्यश्च' (3.4.109) इति झेर्जुस्, शपः श्लुः, `श्लौ' (6.1.10) इति द्विर्वचनम्। `अबिभयुः' इति। `ञिभो भये' (धा.पा.1084)। `अबिभरुः' इति। `डु भृञ् धारणपोषणयोः' (धा.पा.1087), `भृञामित्' (7.4.76) इत्यभ्यासस्येत्त्वम्।

`चिनुयुः सुनुयुः' इति। लिङ्, यासुट् झेर्जुस्, `स्वादिभ्यः श्नुः' (3.1.73) `उस्यपदान्तात्' (6.1.96) इति पररूपत्वाम्। `तत्र नाप्राप्ते' इत्यादि। सार्वाधातुकमाश्रयो यस्यतत् सार्वधातुकाश्रयम्। ङित्त्वं निमित्तं यस्य प्रतिषेधस्य स तथोक्तः। स सर्वत्रैव जुसि प्राप्नोतीति तस्मिन्नाप्राप्तेऽयं गुण आरभ्यमाणस्तस्यैव बाधको भविष्यति; न तु यस्य यासुडाश्रयं ङित्त्वं निमित्तम्, तस्यापि। अत्र हि प्राप्ते चाप्राप्तेऽयमारभ्यते। चिनुयुरित्यादौ प्राप्ते,

अजुहवुरित्यादावप्राप्ते। चकारः समुच्चये। नान्यत् समुच्चेतव्यमस्तीत्यस्यैव लक्षणस्य पुनरावृत्तिमाचष्टे। तेन प्रकृतलक्षणस्यापि प्रतिषेधविषये भवति। `अदीधयुः' इति। `दीधीङ् दीप्तिदेवनयोः' (धा.पा.1076), लङ् व्यत्ययेन परस्मैपदम्, झिः, `जक्षित्यादयः षट्' (6.1.6) इत्यभ्यस्तसंज्ञा, `सिजभ्यस्तविदिभ्यश्च' (3.4.109) इति झेर्जुस्, अदादित्वाच्छपो लुक्। ततः `सार्वधातुकार्धधातुकयोः' (7.3.84) इति गुणः प्राप्तः, स `क्ङिति च' (1.1.5) इति प्रतिषिद्धः, सोऽप्यनेन पुनः प्राप्तौ `दीधीवेवीटाम्' (1.1.6) इति प्रतिषिद्धः समुच्चयार्थत्वाच्चकारस्य भवति।।

84. सार्वधातुकार्धधातुकयोः। (7.3.84)
`चेता, स्तेता' इति। तृच्। `ऋदुशनस्पुरोदंसोऽनेहसाञ्च' (7.1.94) इत्यनङ्, `सर्वनामस्थाने' (6.4.8) इत्यादिना दीर्घः।
`सार्वधातुकार्धधातुकयोरिति किम्'? इति। एवं मन्यते--प्रत्यय इति वक्तव्यम्, सङीति वा, एवं ह्युच्यमाने भवतीत्यादौ गुणः सिद्ध एव, सङीति प्रत्याहारग्रहणं सनः सकारादारभ्य महिङो ङकारेण। `अग्नित्वम्' इति। `तस्य भावस्त्वतलौ' (5.1.119) इति त्वप्रत्ययः। `अग्निकाम्यति' इति। `काम्यच्च' (3.1.9) इति काम्यच्। `यदि इत्यादि। यदि प्रत्यय इत्युच्येत, त्वाकाम्यचोरपि स्यात्। अथापि सङीत्युच्येत, काम्यचि स्यात्; तस्यापि प्रत्याहरेऽन्तर्भावात्।।

85. जाग्रोऽविचिण्णल्ङित्सु। (7.3.85)
`जागरयति' इति। णिच्। `जागरकः' इति। ण्वुल्। `साधुजागरी' इति। ताच्छील्ये णिनिः। `जागरञ्जागरम्' इति। `आभीक्ष्ण्ये णमुल्' (3.4.22), `आभीक्ष्ण्ये द्वे भवतः' (वा.887) इति द्विर्वचनम्। `जागरो वर्त्तते' इति। भावे धञ्। एतानि वृद्धिविषय उदाहरणानि। `जागरिता, जगरितवान्' इति प्रतिषेधविषये।
किं पूनः कारणं वृद्धिविषये प्रतिषेधविषये चैवोपन्यस्तान्युदाहरणानि? इत्यत आह--`वृद्धिविषये प्रतिषेधविषये च' इत्यादि। वृद्धिप्रतिषेधविषयादन्यत्र पूर्वसूत्रेण गुणः सिद्धो भवति। तस्मादवृद्धिप्रतिषेधविषयेऽयं गुण आरभ्यते, तेन तद्विषयाणामेवोदाहरणानासुपन्यासः। जागरयतीत्यादौ गुणे कृते रपरत्वे च `अत उपधायाः' (7.2.116) इति वृद्ध्या भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निरकर्त्तुमाह--`तस्मिन् कृते' इत्यादि। किं पुनः कारणं तस्मिन् कृते न भवति? इत्याह--`यदि हि' इत्यादि। यद्यस्मिन् कृतेऽपि गुणे `अत उपधायाः' (7.2.116) इति वृद्धिः स्यात्, जागरयतीत्यादिकं रूपं न स्यात्, तथा चानर्थको गुणः स्यात्; `अचो ञ्णिति' (7.2.115) इत्यनयैव वृद्ध्या सिद्धत्वात्। `चिण्णलोश्च' इत्यादि। चिण्णलोः प्रतिषेधस्येतत् प्रयोजनम्--वृद्धेः श्रवणं यथा स्यात्। यदि तु कृतेऽपि गुणे `अत उपधायाः' (7.2.116) इति स्यात्, चिण्णलोः प्रतिषेधोऽनर्थकः यात्; अस्त्वत्र गुणः, सत्यपि तस्मिन् पुनरुपधाया इति वृद्ध्या भवितव्यम्, ततश्च वृद्धेः श्रवत्रं भविष्यतीति।
`अजागारि' इति। लुङ्, च्लिः, `चिण्भावकर्मणोः' (3.1.66) इति च्लेश्चिण्, `चिणो लुक्' (6.4.104) इति तकारस्य लुक्। `जागृतः, जागृथः' इति। लट्, तस्थसौ, तयोः `सार्वधातुकमपित्' (1.2.4) इति ङित्त्वम्, अदादित्वाच्छयो लुक्।
`वीति केचिदिकारमुच्चारणार्थं वर्णयन्ति' इति। किं पुनरेवं सतीष्टं सिध्यति, यत एवं व्याचक्षते? आह--`क्वसावप' इत्यादि। यदि समुदायस्थ वेः प्रत्ययस्येवं ग्रहणं स्यात्, क्वासौ गुणप्रतिषेधो न स्यात्। यदि त्विकार उच्चारणार्थो वर्णमात्रस्यैवेदं ग्रहणम्, तदा `यस्मिन् विधिस्तदादावल्ग्रहणे' (व्या.प.127) इति तदादिविधिना क्वासावपि गुणप्रतिषेधः सिद्धो भवति। `जजागृवान्' इति। लिटः `क्वसुश्च' (3.2.107) इति क्वसुरादेशः, `उगिदचाम्' (7.1.70) इति नुम्, `जजागृवान्' इति। लिटः `क्वसुश्च' (3.2.107) इति क्वसुरादेशः, `उगिदचाम्' (7.1.70) इति नुम्, `सान्तमहतः संयोगस्य' (6.4.10) इति दीर्घः, हल्ङ्यादिसंयोगान्तलोपौ। `केचित्' इति वचनात्--अपर उच्चारणार्थं न वर्णयन्तीत्युक्तं भवति। त एवं मन्यन्ते--छान्दसः क्वसुः, लिट् च छन्दसि सार्वधातुकमपि भवति; `छन्दस्युभयथा' (3.4.117) इति वचनात् ततः `सार्वधातुकमपित्' (1.2.4) इति ङित्त्वादेव पर्युदासो भविष्यतीति। `अजागरुः' इत्यादि। एवं मन्यते--`अविचिण्णल्ङित्सु' (1.2.4) इति ङित्त्वादेव पर्युदासो भविष्यतीति। `अजागरुः' इत्यादि। एवं मन्यते--`अविचिण्णल्ङित्सु' इति प्रसज्यप्रतिषेधोऽयम्--विचिण्णल्ङितसु न भवतीति, ततश्चाजागरुरित्यत्रापि `जुसि च' (7.3.83) इत्यनेनापि प्राप्तस्य गुणस्या प्रतिषेधः प्राप्नोति। एवमहं जजागरेत्यत्र `णलुत्तमो वा' (7.1.91) इति वचनाण्णित्त्वं यदा नास्ति तदा `सार्वधातुकार्धधातुकायोः' (7.3.84) इति गुण इष्यते, सोऽस्मात् प्रतिषेधान्न प्राप्नोति। `न' अप्रतिषेधात्' इति परिहारः। नायं दोषः; कुतः? अप्रतिषेधात्। अप्रसज्यप्रतिषेधा दित्यर्थः। यदि प्रसज्यप्रतषेधो न भवति, कस्तर्ह्ययम्? इत्याह--`अविचिण्णाल्ङित्स्विति पर्युदासोऽयम्' इति। प्रसज्यप्रतिषेधे हि लक्षणान्तरेणापि प्रसक्तस्य प्रतिषेधः स्यात्, न पर्युदासे। तथा हि पर्युदासे विचिण्णल्ङिद्भ्योऽन्यत्र गुणो विधीयते, न तु तेषु विचिण्णलादिषु प्रतिषिध्यते। पर्युदासश्चायम्। तस्माज्जुसि णलि च गुणो भवत्येव।
अभ्युपेत्यापि प्रसज्यप्रतिषेधं परहारान्तरमाह--`अथ वा' इत्यादि। `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (व्या. प.19) इत्यानन्तर्यात् जाग्र इति या प्राप्तिस्तस्या अयं प्रतिषेधः, या तु `जुसि च' (7.3.83) इत्यादिना लक्षणान्तरेण प्राप्तिः सा न प्रतिषिध्यते। `अजागरुः' इति। लङ्, `जक्षित्यादयः षट्' (6.1.6) इत्यभ्यस्तसंज्ञा, `सिजभ्यस्तविदिभ्यश्च' (3.4.109) इति झेर्जुस्।।

86. पुगन्तलघूपघस्य च। (7.3.86)

पुगन्तस्याङ्गस्य, लघूपधस्य चेत्युभावपि बहुव्रीही--पुगन्तो यस्य तत् तथोक्तम्, लध्वी उपधा यस्य तल्लघूपधम्। `भेत्ता, छेत्ता' इति।
ननु च प्रत्ययादेर्हलोऽङ्गावयवस्य चानन्तर्ये सति `संयोगे गुरु' (1.4.11) इति गुरुसंज्ञया लघुसंज्ञायां वाधितायां गुणेनात्र न भवितव्यम्? इत्यत आह--`प्रत्ययादेः' इत्यादि। `त्रसिगृधिधृषिक्षिपेः क्नुः' (3.2.140), `हलन्ताच्च' (1.2.10) इति क्नुसनोः कित्करणस्यैतदेव प्रयोजनम्--गृध्नुः, विभत्सतीत्यादौ गुणो मा भूदिति। यदि प्रत्ययादेर्हलोऽङ्गावयवस्य चानक्तर्ये सति लघूपधगुणो न स्यात् तयोः कित्त्वं न कुर्यात्, कृतञ्च, तस्मात् क्नुसनो कित्त्वं कुर्वता--प्रत्ययाङ्गावयवयोर्हलोरानन्तर्येऽपि लघूपधगुणो न व्यावर्त्त्यत इति ज्ञापितमेतत्। ननु च सनः कित्त्वं सिसृक्षतीत्यत्रामागमो मा भूदित्येवमर्थं स्यात्? नैतदस्ति; यदि ह्येतत् प्रयोजनमभिमतं स्यात् तत्रैवं प्रतिषेधं कुर्यात्--सूजदृशोर्झल्यमकित्सनोरिति। तस्मात् सनः कित्करणं ज्ञापकमेव यद लघूपधल्यानेन गुणो विधीयते। एवं सति `इको गुणवृद्धी' (1.1.3) इत्यस्या उपस्थाने सति यत्र तत्र स्थितस्येको गुणः प्रसज्येत, ततश्चेहापि प्राप्नोति--भिनत्तीति, भवति ह्यतर लघूपधमङ्गम्। न च शक्यते वक्तुम्--`हलोऽनन्तराः संयोगः' (1.1.7) इति संयोगसंज्ञायां सत्यां लघूपधमेतन्न भवतीति गुणो न भविष्यतीति।
यज्ज्ञापितमेतदिदाधीमेव--प्रत्ययादेरङ्गावयवसय च हलोरानन्तर्ये सति लघुपधगुणो न व्यावर्त्त्यत इति? अत आह--`उपधा चात्र' इत्यादि। इक्परिभाषया ह्यत्रकः सनिधापितत्वादिगेवोपधा गृह्यते, तेन भिनत्तीत्यत्र गुणो न भवति; न ह्यत्राङ्गस्येगुपधा, किं तर्हि? अकारः।
`अपरे तु' इत्यादिओ। सूत्रार्थ वर्मयन्ती त वक्ष्यमाणेन सम्बन्धः। पुकि अन्तः पुगन्तः--`सप्तमी' (2.1.40) इति योगविभागात् समासः।
अन्तशब्दोऽयमवयववचनः, पुकि परतोऽवयव इत्यर्थः। कस्यावयवः? `अङ्गस्य' इत्यनुवृत्तेः पुगिति वचनात्पुगागमवतोऽङ्गस्य। न पुनः पुगन्त इक्परिभाषोपश्तानादिगेव वेदितव्यः। `लध्वी उपधा लघूपधा' इति। विशेषणसमासः। `पुगन्तलघूपधम्' इति। समाहारद्वन्द्वोऽयम्। `सूत्रार्थम्' इति।
तूत्रार्थैकदेशे सूत्रार्थशब्दो वर्त्तते, न ह्येतावानेव सूत्रार्थः, अपरिसमाप्तत्वात्। अपरिसमाप्तिस्तु पुगन्तस्य तस्याश्च लघूपधाया गुणो भवतीत्यस्य सूत्रार्थस्यैकदेशस्यानभिधानात्। `वर्णयन्ति' इति। व्याचक्षत इति। भिनत्तीत्यत्र गुणो मा भूदित्येवमर्थम्। न ह्यत्र सूत्रार्थे भिनत्तीत्यत्र गुणः प्रसज्येत।
बहुव्रीहौ ह्याश्रीयमाणेऽङ्गस्यान्यपदार्थस्य यो नाम कश्चिदिक् तस्य यत्र तत्रावस्थितस्य गुणः प्रसज्येत। बहुव्रीहौ हयश्रीयमाणेऽङ्गसयान्यपदार्थस्य यो नाम कश्चिदिक् तस्य यत्र तत्रावस्थितस्य गुणः प्रसज्येत। तत्पुरेषे तु नायं दोषः, तत्र हि लघूपधेग्भ्यामङ्गं विशिष्यते, अतस्तस्या एव गुणो विधीयते--अङ्गस्य या लघ ूपधा इक् तस्या गुणो भवतीति। भिनत्तीत्यत्रयाऽङ्गस्य लघूपधा नासाविक्, यश्चेक् स यद्यपि लघुर्भवति लघुर्भवति न त्वस्योपधा।
तस्मात् तत्पुरुष आश्रीयमाणे नेह गुणस्य प्रसङ्गः।
सार्वधातुकार्धधातुकयोरित्येव--`अगनिचित्त्वम्, अग्निचितकाम्यति'। पुगन्तग्रहणं लघूपधार्थम्।।

87. नाभ्यस्तस्याचि पिति सार्वधातुके। (7.3.87)

`नेनिजानि, वेविजानि, परिवेविषाणि' इति'। `णिजिर् शौचपोवणयोः' (धा.पा.1093) `विजिर् पृथग्भावे' (धा.पा.1094) `विषु व्याप्तौ' (धा.पा.1095)-एभ्यो लोट्, मिप् `मेर्निः' (3.4.89), `आडुत्तमस्य पिच्च' (3.4.92) इत्यट्, `जुहोत्यादिभ्यः श्लुः' (2.4.75) इति शपः श्लुः, `शलौ' (6.1.10) इति द्विर्वचनम्, `निजां त्रयाणां गुणः श्लौ' (7.4.75) इत्याभ्यासस्य गुणः। `अनेनिजम्, अवेविजम्, पर्यवेषिषम्' इति। लङ्, `तस्थस्तमिपां तान्तन्तामः' तान्तन्तामः' (3.4.101) इति मिपोऽम्भावाः।
`वेदानि' इति। `विद ज्ञाने' (धा.पा.1064)। `पूर्ववल्लोडादि यथायोगम्, अदादितावाच्छपो लुक्।
`नेनेक्ति' इति। लट्, तिप्, `चोः कुः' (8.2.30) इति कुत्वम्।
अथ पिद्ग्रहणं किमर्थम्, यावताऽपिति सार्वधातुके `सार्वधातुकमपित्' (1.2.4) इति ङित्त्वे सति `क्ङिति च' (1.1.5) इति निषेधेन भवितव्यमिति, न चानयोः प्रतिषेधयोः कश्चिद्विशेषोऽस्ति? इत्यत आह--`पिद्ग्रहणम्' इति। `तृणह इम्' (7.3.92) इतीमं वक्ष्यति, स पिति यथा स्यात्, अपिति मा भूदित्येवमर्थं पिद्ग्रहणम्। `निनेज' इति। लिट्। स च `लिट् च' (3.4.115) इत्यार्धधातुकसंज्ञकः।
`जुहवानि इति। `हु दाने' (धा.पा.1083)। पूर्ववल्लोडादि। `अजुहवम्' इति। पूर्ववल्लङादि। अत्र `लघूपधस्य' (7.3.86) इत्यनुवृत्तेः `सर्वधातुकार्यधातुकयोः' (7.3.84) इतीगन्तस्य यो गुणो विहितस्तस्य प्रतिषेधो न भवति।
`बहुलं छन्दसीति वक्तव्यम्' इति। छन्दसि विषये बहुलं गुणप्रतिषेधो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--इहेदं सूत्रं विभज्य द्वौ योगौ क्रियेते, तत्र `न' इत्येको योगः; `अभ्यस्तस्याचि पिति सार्वधातुके' इति द्वितीयः, तत्र च नेत्यनुवर्त्तते, यञ्च योगः पूर्वयोगस्यासर्वविषयत्वज्ञापनार्थः। तेन च्छब्दसि बहुलं प्रतिषेधो भविष्यति। `जुजोषत्' इति। `जुषी प्रतिसेवनयोः' (धा.पा.1288) लेट्, तिप्; `लेटोऽडाटौ' (3.4.94) इत्यट्, तुदादित्वाच्छः, तस्य `बहुलं छन्दसि' (2.4.73) इति श्लुः, `श्लौ' (6.1.10) इति द्विर्वचनम्। लघूपधगुणः। यद्यभ्यस्तस्याचि पिति सार्वधातुके गुणप्रतिषेध इध्यते, पस्पशाते, चकाशीति, वावशीतित्यत्रोपधाह्रसवत्वमिष्यते, तन्न प्राप्नोति; तस्मादभ्यस्तानामुपधाह्रस्वत्वमेव वक्तव्यम्, न गुणप्रतिषेधः; ह्रस्वत्वे हि नेनिजानीत्येवमादि सिध्यति; पश्पशाते इत्यादि च? इति यश्चोदयेत्, तं प्रत्याह--`पस्पशाते' इत्यादि। हि नेनिजानीत्येवमादि सिध्यति; पस्पशाते इत्यादि च? इति यश्चोदयेत्, तं प्रत्याह--`पस्पशाते' इत्यादि। `स्पशिरिति [`स्पाशिरिति'--प्रा.मु.पाठः] गणपरिपठितो धात्वन्तरमस्त्येव, तस्माद्यङ्, तस्य `यङोऽचि च' (2.4.74) इति लुक्, द्विर्वचनम्, `शर्पूर्वाः खयः' (7.4.61) इति खयः शेषः; अभ्यासस्य ह्रस्वत्वे कृते `दीर्घोऽकितः' (7.4.83) इति दीर्घः, `व्यत्ययो बहुलम्' (3.1.85) इति वर्णव्यत्ययेनोपधाया अभ्यासस्य च ह्रस्वः, लेट्, व्यत्ययेनैवात्मनेपदम्, आट्। `चाकशीति' इति। `काशृ दीप्तौ' (धा.पा.1162),

`कुहोश्चुः' (7.4.62) इत्यभ्यासस्य चुत्वम्, तिप्, `यङो वा' (7.3.94) इतीट्। `वावशीति' इति। `वाशृ शब्दे' (धा.पा.1163), शेषं यथायोगं पूर्ववत्।
`पस्पशाते इत्यत्राभ्यासह्रस्वत्वं च' इति। चकारादुपधाह्रस्वत्वञ्च। इतरत्र तूपधाह्रस्वत्वमेव, नाभ्यासस्य ह्रस्वत्वम्।
`प्रकृत्यन्तराणां वा' इति। `स्पश बाधनस्पर्शनयोः' (धा.पा.887), `कश गनिशासनयोः' (धा.पा.1024), `वश कान्तौ' (धा.प.1080)--एतानि प्रकृत्यन्तराणि ह्रस्वोपधानि सन्तीति, अत एषामेवैतानि रूपाणि। तस्माद्यथान्यासमेवास्तु।।

88. भूसुवोस्तिङि। (7.3.88)
`अभूत्' इति। `लुङ्, `गातस्था' (2.4.77) इत्यादिना सिचो लुक्। `सुवावहै, सुवामहै' इति। `षूङ् प्राणिगर्भविमोचने' (धा.पा.1031), लोट् वहिमहिङौ, टेरेत्वम्, `एत ऐ' (3.4.93), आदित्वाच्छपो लुक्, `आडुत्तमस्य पिच्च' (3.4.92) इत्याट् `अचि श्नुधातु' (6.4.77) इत्यादिनोवङ्। अथ कस्मात् सूतेरादादिकस्योपन्यासः कृतः, न सुवतिसयत्योस्तौदादिकदैवादिकयोः? इत्यत आह--`सूतेर्लुग्विकरणस्य' इत्यादि।
ननु च लुग्विकरणपरिभाषया (व्या.प.50) `षू प्रेरणे' (धा.पा.1408) इत्येतस्य शविकरणस्य तौदादिकस्य, `षूङ् प्राणिप्रसवे' (धा.पा.1132)--इत्यस्य दैवादिकसय च ग्रहणं युक्तम्? इत्यत आह--`सुवतिसूयत्योः' इत्यादि। तिङीति सप्तमीनिर्देशादनन्तरे तिङि प्रतिषेधेन भवितव्यम्। न च सुवतिसूयतिभ्यामनन्तरस्तिङ् सम्भवति, विकरणेन व्यवधानात्। तस्मान्न तयोर्ग्रहणमिति सूतेरेव ग्रहणं युक्तमित्यभिप्रायः। स्यादेतत्--वचनप्राणाण्याद्विकरणेन व्यवधानेऽपि प्रतिषेधो भविष्यतीत्यतस्ययोरेव ग्रहणं युक्तमिति? अत आह--`विकरणस्यैव' इत्यादि। तयोर्हि `सार्वधातुकमपित्' (1.2.4) इति विकरणङित्त्वम्, तत्र `क्ङिति च' (1.1.5) इत्यनेनैव सिद्धः प्रतिषेध इति निरर्थकं तयोर्ग्रहणं स्यात्, अतो न तावह गृह्यते। `भवति' इति। तिङीति वचनादिहातिङि शपि परतो निषेदो न भवति। `व्यतिभविषीष्ट' इति। आशिषि लिङ् (3.3.173)। स च `लिङाशिषि' (3.4.116) इत्यार्धधातुकसंज्ञकः, सीयुट्, `कर्त्तरि `कर्त्तरि कर्मण्यतिहारे' (1.3.14) इत्यात्मनेपदम्, सुट् षत्वम्, ष्टुत्वम्।
`अथ' इत्यादि। `प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणं भवति' (व्या.प.79) इति यङ्लुकोऽपि ग्रहणे सति तत्रापि प्रतिषेधेन भवितव्यमिति भावः। `बोभवीति' इति। `गुणो यङ्लुकोः' (7.4.82) इत्यभ्यासस्य गुणः। `ज्ञापकात्' इत्यादि। यदि यङ्लुक्यपि प्रतिषेधः स्यात्, गुणाभावार्थं निपातनं न कुर्यात्, कृतञ्च, तस्मादेव ज्ञापयति--यङलुक्ययं प्रतिषेधो न भवतीति।।

89.उतो वृद्धिर्लुकि हलि। (7.3.89)
गुणे प्राप्त उत्तो वृद्धिरारभ्यते। यौतीत्यादौ पूर्ववच्छपो लुक्।

`सुनोति' इति। श्नुः। `यवानि' इति। लोट्। उत्तमपुरुषै कवचनम्। `युतः, रुतः' इति। लट्, तस्। तपरकरणं सूतीत्यत्र मा भूदति।
अथ `अपि स्तुयाद्राजानञ्' इत्यत्र कस्मान्न भवति, अस्ति ह्यत्रापि यासुटस्तिङ्भक्तत्वात् तिङ्ग्रहणेन ग्रहणमिति प्राप्तिः, न च शक्यते वक्तुम्--`क्ङिति च' (1.1.5) इति प्रतिषेधो भविष्यतीति; यस्मादिग्लक्षणाया वृद्धेः प्रतिषेधोऽसौ, न चेयमिग्लक्षणा; साक्षान्निर्दिष्टस्थानिकत्वात्, `यस्या हि वृद्धेः स्थानी न निर्दिश्यते सेग्लक्षणा' इत्युक्तम्? इत्याह--`अपि स्तुयात्' इत्यादि। अत्र हि `यासुट् परस्मैपदेषूदात्तौ ङिच्च' (3.4.103) इति सार्वधातुकं ङित; `ङिच्च पिन्न भवति' इति ङित्त्वेन पित्त्वस्य बाधितत्वात्। तस्मात् पित्युच्यमाना वृद्धिरिहापि न भवति। अथ `योयोति, रोरोति' इत्यत्र कस्मान्न भवति, लुकि सति भवति ह्येतदङ्गद्वयमुकारान्तम्? इत्याह--`नाभयस्तस्य' इत्यादि। गतार्थम्। आदिशब्देन नोनोतीत्येवमादीनां[`चोकोतीत्यादीनाम्'--प्रा.मु.पाठः] ग्रहणम्।।

90. ऊर्णोतेर्विभाषा। (7.3.90)
पूर्वेण नित्यायां वृद्धौ प्राप्तायां विकल्पार्थोऽयमुत्यते। `प्रोर्णोति' इति। पूर्ववच्छपो लुक्। `प्रोर्णवानि' इति। लोडुत्तमपुरुषैकवचनम।।

91. गुणोऽपृक्ते। (7.3.91)
विभाषेति निवृत्तम्। पूर्वेण प्राप्तायाः पाक्षिक्या वृद्धेरयमपवादः। ननु हलत्यनुवर्त्तत एव, तत्र सामर्थ्यादपृक्त एव भविष्यतीति न तदादी, न हि हलादिसमुदायो हल् भवति, तत्किमपृक्तग्रहणेन इत्यत आह--`हलीत्यनुवर्त्तमाने' इत्यादि। अपुक्तग्रहणं ह्येवमर्थं क्रियते--हलीत्यनुवृत्तेस्तदादौ मा भूदिति। यदि चेयं परिभाषा न स्यात्, अपृक्तग्रहणमनर्थकत्वान्न कुर्यात्। हल्युचयमानो गुणः कः प्रसङ्गो यस्तदादावपि स्यात्? नैव प्राप्नोति; तस्या हलात्मकत्वात्। कृतञ्चेदमपृक्तग्रहणम्, अतस्तोनास्तीयं परिभाषेति ज्ञाप्यते। अथ `नापृक्ते' इत्येवं कस्मान्नोक्तम्, किं गुणग्रहणेन, वृद्धौ प्रतिषिद्धायामुत्सर्गेण गुणेनैव सिध्यति? नैतदस्ति; अन्तरोक्ताया विभाषायाः प्रतिषेधो विज्ञायेत, तथा च नित्यं वृद्धिः स्यात्।।

92. तृणह इम्। (7.3.92)
`तृह हिंसायाम्' (धा.पा.1455) इति रुधादिः, `तृहू तृबृहू हिंसार्थाः (धा.पा.1348,1350) इति तुदादी--तयोराद्यस्येदं ग्रहणम्, नेतरस्य। तस्य

विकरणेन व्यवधावादनन्तरो हल् न सम्भवतीति। `तृणेढि' इति। `हो ढः' (7.2.31), `झषस्तथोर्धोऽधः' (8.2.40) इति धत्वम्, `ष्टुना ष्टुः' (8.4.41) इति ष्टुत्वम्, `ढो ढे लोपः' (8.3.13), तस्येमागमः, `आद्गुणः' (6.1.87)। `तृणेक्षि' इति। `धढोः कः सि' (8.2.41) इति कत्वम्। `अतृणेट्' इति। लङ्, तिप्, हल्ङ्यादिलोपः (6.1.68), ढत्वे कृते `झलां जशोऽन्ते' (8.2.39) इति जश्त्वम्--ढकारस्य डकारः, तस्य `वावसाने' (8.4.56) इति चर्त्वम्--टकारः।

ननु चात्र लुप्तत्वात् सार्वधातुकस्येमागमेन न भवितव्यम्, लुप्तोऽपि तत्र प्रत्ययलक्षणेन भविष्यतीति चेत्? न; वर्णाश्रये प्रत्ययलक्षणं नास्तीत्यत आह-- `वर्णाश्रये' इत्यादि। एवं मन्यते--`वर्णाश्रये नास्ति प्रत्ययलक्षणम्' (व्या.प.96) इति नानेन सर्वधा वर्णाश्रयस्य प्रत्ययलक्षणस्य प्रतिषेधः क्रियते, किं तर्हि? `प्रत्ययलोपे प्रत्ययलक्षणम्' (1.1.62) इत्यत्र प्रतययग्रहणस्य प्रयोजनं व्याख्यायते। प्रत्यये लुप्ते द्विविधं कार्यं विज्ञायते--प्रत्ययनिमित्तम्, अप्रत्ययनिमित्तञ्च। तत्र यत् प्रत्ययनिमित्तं तत् प्रत्ययलोपे यथा स्यात्, इतरन्मा भूदित्येवमर्थम्। तेन गवे हितं गोहितमित्यत्र लुप्तायां विभक्ताववादेशो न भवति। अवादेशस्य ह्यचीत्यधिकाराद्वर्णो निमित्तम्, न प्रतयय एव। इह त्वङ्गाधकारात् प्रत्यय एव हलादिराश्रीयत इतीमागमस्य प्रत्ययनिमित्तता। तेनासौ प्रत्ययलक्षणेन भवत्येव। यदि ह्यसौ प्रत्ययनिमित्तस्तत्कथं वर्णाश्रयेऽपयत्रेतयुक्तम्? अतृणेडित्यत्रोदाहरणे त्ययस्य वर्णमात्रत्वात् प्रत्ययविशेषणत्वेन वी वर्णस्याश्रयणादेवमुक्तम्, न त्वप्रत्ययनिमित्तत्वात्, वर्णस्यापि तकारस्य प्रत्ययत्वापरित्याागत्। `तृणहानि' इत्यत्र तदेव लोडुत्तपुरुषैकवचनम्। `तृण्ढः' इति। तस्, `श्नसोरन्लोपः' (6.4.111), पूर्ववड्ढत्वादि, `नश्चापदान्तस्य झलि' (8.3.24) इत्यनुस्वारः, `अनुस्वारस्य ययिपरसवर्णः' (8.4.58) इति परसवर्णो णकरः।

अथ किमर्थमिह तृहीरागतश्नम्को गृह्यते, न तृह इत्येवोच्येत? इत्याह आह--`तृणह' इत्यादि। यद्यागतश्नम्कस्य ग्रहणं न क्रियेत, ततो नाप्राप्ते श्नम्ययमारभ्यते, देशहेतुकश्च तयोर्विरोधोऽस्तीति श्नम णमा बाधा स्यात्। असत्यामपि बाधायामनिष्टा व्यवस्था स्यात्--पूर्वमिम्, पश्चात् श्नम्; ततश्चानिष्टं रूपं स्यात्। आगतश्नम्कस्य ग्रहणे सश्नम्कस्य तृहेरिमि विधीयमाने समावेशस्तयोर्भवति, इष्टा च व्यवस्था सम्पद्यते--पूर्व श्नम्, पश्चादिम्; तस्मात् श्नमि कृते सतीमागमो भवेदित्येवमर्थमागतश्नम्कस्तृहिर्ग्रगृह्यते।।

93. ब्रुव ईट्। (7.3.93)

ब्रुवः' इत्येषा पञ्चम्यकृतार्था पूर्वत्र कृतार्थायाः `सार्वधातुके' इत्यस्याः सप्तम्याः षष्ठीत्वं प्रकल्पयिष्यति तस्मादितयुत्तरस्य' (1.1.67) इति वचनात्। तेन हलादेः पितः सार्वधातुकस्यैवायमिड् विज्ञायत इत्यत आह--`ब्रू इत्येतस्मादुत्तरस्य हलादेः' इत्यादि। कथं पूनर्हल आगमित्वेन तदादिर्लभ्यते, `यस्मिने विधिस्तदादावल्ग्रहणे' (व्या.प.127) इत्युच्यते, न तु यस्य विधिरिति, असति हि तदादिविधावब्रवीदित्यादावेव स्यात्, ब्रवीतीत्यादौ न स्यात्? नैष दोषः; उत्तरत्र ह्यपृक्तग्रहणात् तदादिविधेः सम्भवो गम्यते, अन्यथा ह्यसति तदादिविधौ विनाप्यपृक्तग्रहणेनापृक्त एव भविष्यति, अपृक्तग्रहणमनर्थकं स्यात्। `ब्रवीति' इति। पूर्ववच्छपो लुक्। `ब्रवाणि' इति। तदेव लोडुत्तमपुरुषैकवचनम्। `ब्रूतः' इति। लट्, तस्।।

94. यङो वा। (7.3.94)

`लालपीति' इत्यादि। लपिवदिरौतिभ्यो यङ्; पूर्वयोः `दीर्घोऽकितः' (7.4.83) इत्यभ्यासस्य दीर्घः, रौतेस्तु `गुणो यङ्लुकोः' (7.4.82) इति गुणः, `यङोऽचि च' (2.4.74) इति यङो लुक्। `वर्वर्त्ति, चर्कत्ति' इति। वृञ्कृञोर्यङ्लुकि `ऋतश्च' (7.2.92) इत्यभ्यासस्य रुगागमः।

किं पुनः कारणं यङ्लुक्येवोदाह्रियते, न यङन्ते? इत्याह--`हलादेः' इत्यादि। यङन्ते हि ङित्त्वादात्मनेपदम्, न चात्मनेपदं हलादि पिदस्ति। हलादेः पितः परस्य सार्वधातुकस्याभावान्नेह यङन्तस्योदाहरणम्, किं तर्हि? यङ्लुगन्तस्य। तत्र हि हलादि पित् सार्वधातुकं सम्भवति, यङ्लुगन्तस्यादादौ `चर्करीतञ्च परस्मैभावम्' इति पाठे सति परस्मैपदित्वात्, तेन यङ्लृक्येवोदाह्रियते। चर्करीतमिति यङ्लुगन्तसय पूर्वाचारयसंज्ञा।।

95. तुरुस्तुशम्यमः सार्वधातुके। (7.3.95)

`तु' इति सौत्रो धातुर्वृद्ध्यर्थे इत्येके, हिंसार्थे इत्यपरे। अस्य च लुग्विकरणत्वं स्मर्यते, तच्च `बहुल छन्दसि' (2.4.73) इति बहुलग्रहणेन भाषायामपि लुकसम्पादनाल्लभ्यते। `शमीष्वम्' इति। लोट्। `अशमीध्वम्' इति। लङ्। `अभ्यमीति' इति। लोट्। `अशमीध्वम्' इति। लङ्। `अभ्यमीति' इति। `अम गत्यादिषु' (धा.पा.465) लट्, तिप्। कथं पुनः शम्यमिभ्यामनन्तरं हलादि सार्वधातुकं सम्भवति, यावता शमेर्व्यवधायकेनैव श्याना भवितव्यम्। अमेरपि शप् क्रियते? इत्याह--`शध्यमोः' इत्यादि। विकरणस्यात्र लुक् `बहुलं छन्दसि' (2.3.73) इत्यमेन।

`सार्वधातुकासु' इति। स्त्रीलिङ्गनिर्देशा। स्त्रीलिङ्गस्य सार्वधातुकाशब्दस्यापिशलिना संज्ञात्येन प्रचीतत्वात्।

अथ सार्वधातुकग्रहणं किमर्थम्, यावता `नाभ्यस्तस्याचि पिति सार्वधातुके' (7.3.87) इत्यतः सूत्रात् सार्वधातुकग्रहणमनुवर्तते? इत्याह--`सार्वधातुक इत्यनुवर्त्तमाने' इत्यादि। तद्धि सार्वधातुकग्रहणं पितीत्यनेन सम्बद्धम्। अतस्तदनुवृत्तौ पिद्ग्रहणमप्यमुवर्त्तेत तथा चापिति न स्यात्। तस्मादपित्यपि यथा स्यादियेवमर्थं त्सार्वधातुकग्रहणं क्रियते।।

96. असतिसिचोऽपृक्ते। (7.3.96)

`अपृक्ते' इति। सुब्वयत्ययेन षष्ठ्यर्थे सप्तदमी, तेनायमपृक्तस्यैवेट्। अस्तिग्रहणं लङर्थय्। `आसीत्' इति। `अस भुवि' (धा.पा.1065), लङ्, अदादित्वाच्छपो लुक्, `आडजादीनाम्' (6.4.72) इत्याट्। `आटश्च' (6.1.90) इति वृद्धिः। `अकार्षीत्' इति। सिचि वृद्धिः। `अलावीत्, अपाधीत्' इति। `इट ईटि' (8.2.28) इति सिचो लोपः। `आत्थ' इति। अत्र ब्रुष उत्तरस्य सिपः `ब्रुवः पञ्चानामदित आहोब्रुवः' (3.4.84) इति थलि कृते ब्रुवश्चाहादेशे कृते तस्य स्थानिवद्भावे सति ब्रूञ्ग्रहणेन ग्रहमात् थलोऽपि सार्वधातुकग्रहणेन ग्रहणादीट् प्राप्नोति। `अभूत्' इति। अस्तेः सिच्, `अस्तेर्भूः' (2.4.52) इति भूभावे तस्य स्थानिवद्भावे सत्यस्तिग्रहणेन ग्रहणादीट् प्राप्नोति, स कस्मान्न भवति? इत्याह--`आहिभुवोः' इत्यादि। `ईटि प्रतिषेधः' इति। आहेर्भुवश्चेटि कर्त्तव्ये स्थानिवद्बावस्य प्रतिषेधः। तेनेह न भवति--आत्व' इति। `आहस्थः'(8.2.35) इति हकारस्य थकारः, तस्य `खरि च' इति तकारः। `अभूत्' इति। `गातिस्था'(2.4,77) इति सिचो लुक्।।

97. बहुलं छन्दसि। (7.3.97)

`सर्वमाः' इति। अस्तेर्लङ्, पूर्ववदाट्, सियो हल्ङ्यादिलोपः (6.1.68), सकारस्य रुत्वविसर्जनीयो।

`गोभिरक्षाः प्रत्यञ्चमत्साः' इति। `क्षर सञ्चलने' (धा.पा.851), `त्सर च्छद्मगतो' (धा.पा.554) इन्ङ्यादिना (6.1.68) सिचो लोपः, `अतो ल्रान्तस्य' (7.2.2) इति वृद्धिः, पूर्ववद्बिसर्जनीयः। `अभैषीः' इति। `ञिभी भये' (धा.पा.1084), सिचि वृद्धिः।

अथाभैषीर्मा पुत्रकेत्यत्र कथमडागमः, यावता `न माङ्योगे' (6.4.74) इति प्रतिषिद्धोऽसौ, इह चाक्षाः, अत्सा इत्यत् सिच ईजागमः कस्मान्न भवति? इत्याह--`छाब्दसत्वात्' इत्यादि। अक्षाः, अतसा इत्यत्र चेडागमाभाव इति च्छान्दसत्वादिति प्रकृतेन सम्बन्धः।

`वा छन्दसि' इति वक्तव्ये बहुलग्रहमुत्तरार्थम्। उत्तरार्थतां चास्योत्तरत्र प्रतिपादपिष्यामः।।

98. रुदश्च पञ्चभ्यः। (7.3.98)

`रुदः' इति सुब्व्यत्ययेन बहुवचनस्यैकवचनम। एतचच `पञ्चभ्यः' इति बहुवचनाद्विज्ञायते। `रुदादिभ्यः सार्वधातुके' (7.2.76) इतीटि प्राप्ते तदपवाद ईडागमो विधीयते। `रुदिर् अश्रुविमोचने' (धा.प.1067), `ञिष्वप् शये' (धा.पा.1068), `श्वस प्राणने' (धा.पा.1069), `अन च' (धा.पा.1070), जक्ष भक्षहसनयोः' (धा.पा.1071)-इत्येते रुदादय आदादिकाः। `अरोदीत्' इति। लङ्। `प्राणीत्' इति। `अनितेः' (8.4.19) इति णत्वम्। `अजागर्भवान्' इति। `अजागर्भवान्' इति। जागर्त्तिः पञ्चभ्यः परेणायं पठ्यते। गुणे रपरत्वे च कृते हल्ङ्यादिलोपः (6.1.68)।।

99. अड्ू गार्ग्यगालवयोः। (7.3.99)

पूर्वेणेटि प्राप्तेऽडागमो विधीयते। गार्ग्यगालवग्रहणं पूजार्थम्, न तु विकल्पार्थम्। अडीटोरादिलिङ्गत्वादेकविषयत्वाच्च न सम्भवति; समुच्चय इत्यन्तरेणाप्याचार्यग्रहणं विकल्पस्य सिद्धत्वात्।।

100. अदः सर्वेषाम्। (7.3.100)

सर्वेषांग्रहणं पूजार्थम्, न तु नित्यार्थम्; गार्ग्यगालवग्रहस्याविकल्पार्थत्वात्।।

101. अतो दीर्घो यञि। (7.3.101)

तपरकरणमुत्तरार्थम्। खट्वाभिरित्यत्र `बहुवचने झल्येत्' (7.3.103) इत्येत्त्वं मा भूदित्येवमर्थम्।

`अङ्गना' इति। प्रशस्तान्यङ्गान्यस्याः सन्तीति लोमादिना (5.2.100) नप्रत्ययः। `केशवः' इति। केशा यस्य सन्तीति `केशाद् वोऽन्यतरस्याम्' (5.2.109) इति वप्रत्ययः।

`केचिदत्र तिङीत्यनुवर्त्तयन्ति' इति। `भूसुवोस्तिङि' (7.3.88) इत्यतः। तेषां भववानिति क्वसौ सार्वधातुके दीर्घत्वेन न भवितव्यमिति; क्वसोरतिङन्तत्वात्। `भगवान्' इति। भवतेर्लिट्, कवसुः, `छन्दस्युभयथा' (3.4.117) इति तस्य पक्षे सार्वधातुकत्वम्, तेन `कर्त्तरि शप्' (3.1.68) भवति, `सान्तमहतः संयोगस्य' (6.4.10) इति दीर्घः, हल्ङ्यादिसंयोगान्तलोपौ (6.1.68; 8.2.23)।

आदिति वक्तव्ये दीर्घग्रहणम्--दीर्घ एव यथा स्यात्, यदन्यत् प्राप्नोति, तन्मा भूदिति। किञ्चान्यत् प्राप्नोति? `विचार्यमाणानाम्' (8.2.97), `अनन्तरस्याप्यैकैकस्य प्राचाम्' `प्रश्नाख्यानयोः' (8.2.105) इति प्लुतः। अथ प्रकृतोऽजागमः कस्मान्न विधीयते? तत्राप्यकः सवर्णे दीर्घत्वेन (6.1.101) वहीति `क्सस्याचि' (7.3.72) इति लोपः स्यात्, अतिजराभ्यामित्यत्राचीति जरस्भावः स्यात्; तन्निवृत्त्यर्थ दीर्घग्रहमं कृतम्। स चात्र प्लुतः प्रसज्येत।।

102. सुपि च। (7.3.102)

103. बहुवचने झल्येत्। (7.3.103)
ननु च वृक्षाणामित्यत्र `नामि' (6.4.3) इति दीर्घत्वं बाधकं भविष्यति, तत् किं तन्निवृत्त्यर्थेन झल्ग्रहणेन? नैतदस्ति; `नामि' (6.4.3) इति ह्यग्नीनामित्यत्र सावकाशम्, तत्रासति झल्ग्रहणे दीर्घत्वं बाधित्वा परत्वादेत्त्वमेव स्यात्।
`पचध्वम्, यजध्वम्' इति। लोट् टेरेत्त्वम्, `सवाभ्यां वामौ' (3.4.91) इत्यामादेशः।।

104. ओसि च। (7.3.104)

105. आङि चापः। (7.3.105)
`आङिति पूर्वाचार्यनिर्देशेन' इत्यादि। आचार्या हि पूर्व आङिति तृतीयैकवचननिर्देशं कुर्वन्ति स्म। तस्मात् तदीयेनाङिति निर्देशेन तृतीयैकवचनं गृह्यते।
`खट्वया' इति टाबन्तस्योदाहरणम्। `बहुराजया' इति। जावन्तस्योदाहरणम्। `डाबुभाभ्यामन्यतरस्याम्' (4.1.13) इति डाप्। `कारीषगन्ध्यया' इति। चाबन्तस्य। करीषस्येव गन्धोऽस्य `उपमानाच्च' (5.4.137) इतीत्--करीषगन्धिः, `तस्यापत्यम्' (4.1.92) इत्यण्, तस्य `अणिञोरनार्षयोः' (4.1.78) इत्यादिना व्यङ्, तदन्तात् `यङश्चाप्' (4.1.74) इति चाप्।
`कीलालपा' इति। कीलालं पिबतीति `अतो मनिन्क्वनिब्वनिपश्च' (3.2.74) इति विच्, तदन्तात् तृतीयैकवचनम्, `आतो धातोः' (6.4.140) इत्यकारलोपः।
अथेह कस्मान्न भवति--खट्वामतिक्रान्तेनातिखट्वेनेति, उपसर्जनह्रस्वत्वे कृते स्थानिवद्भावात् तस्य प्राप्नोति? इत्याह--`ङ्याब्ग्रहणम्' इत्यादि।
केचिदाहुः--ङ्याब्ग्रहणे दीर्घग्रहणमित्येतद्वचनं कर्त्तव्यम्, तेन ह्रस्वत्वे कृते न भवति अपरे त्वाहुः--`हल्ङ्याब्भ्यो दीर्घात्' (6.1.68) इति योगविभागः कर्त्तव्यः, यावच्छास्त्रे ङ्यापोः कार्य तत् सर्वं दीर्घयोर्यथा स्या ह्रस्वयोर्मा भूदिति; ततः `सुतिस्यपृक्तम् (6.1.68) इति द्वितीयो योगः, तत्र `हल्ङ्याग्भ्यः' इत्यनुवर्त्तत इति।
चकारः `ओप्ति च' (7.3.104) इत्यनुकर्षणार्थः।।

106. सम्बुद्धौ च। (7.3.106)

107. अम्बार्थनद्योर्ह्वस्वः। (7.3.107)
पूर्वस्यायमपवादः। अम्बार्थाः=मात्रर्थाः।
`डलकवतीनाम्' इत्यादि। डलाका यासां श्रुतीनां सन्तीति ता डलकवत्यः। असंयोगावयवभूता डलका इह गृह्यन्ते। अन्यथा हे अक्क, हे अल्ल--इत्यत्रापि स्यात्। वक्तव्यशब्दस्य व्याख्यय इत्येषोऽर्थः। उत्तरयोरपि वक्तव्यशब्दयोरयमेवार्थो वेदितव्यः। तत्रैदं व्याख्यानम्--`बहुलं छन्दसि' (7.3.97) इत्यतो बहुलग्रहणं मण्डूकप्लुतिन्यायेनानुवर्त्तते, तेन सर्वं प्रतिषेधादिकं कार्यमपि भविष्यतीति।
`अर्हते' इति। प्रशंसाभाजनभूतायेत्यर्थः। `गार्गीमाता' इति। यो गार्ग्या मात्रा ष्यपदेशेन प्रशंसामर्हति स एवमुच्यते।।

108. ह्रस्वस्य गुणः। (7.3.108)
ह्रस्वग्रहणं प्रकृताङ्गविशेषणम्, विशेषणेन च तदन्तविधिर्भवतीत्याह--`ह्स्वान्तस्य' इत्यादि। एवमुत्तरत्रापि तदन्तविधिर्वेदितव्यः।
अथ हे कुमारि, हे ब्रह्मबन्ध्वित्येवमादीनां कस्मान्न भवति? इत्याह--`हे कुमारि' इत्यादि। यदि ह्रस्वत्वे कृते गुणः स्यात्, ह्रस्वकरणमनर्थकं स्यात्। ननु च गुणार्थमेतत् स्यात्, असति हि तस्मिन् `ह्रस्वसय गुणः' (7.3.108) इति गुणो न स्यात्, अह्रस्वान्तत्वात्? इत्याह--`यदि' इत्यादि। एवं प्रक्रियागौरवं परिहृतं भवतीति भावः।।

109. जसि च। (7.3.109)
`जसादिषु' इत्यादि। आदिशब्दः प्रकारे। जस्प्रकारेषु प्रत्ययेष्वित्यर्थः। `इतः प्रकरणात्' इति। `अम्बार्थनद्योर्ह्रस्वः' (7.3.107) इत्येवमादिकात्।
`छबदसीति वक्तव्यम्' इति। छन्दसि विषये वा कार्यं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु तदेव बहुलवचनमाश्रित्य कर्त्तव्यम्। `अम्बे' इत्यादि। `अम्बार्थनद्योर्ह्रस्वः' (7.3.107) इति ह्रस्वो न भवति। `दर्वी' इत्यत्र ह्रस्वस्य गुणः। `शतक्रत्वः' इत्यत्रापि `जसि च' (7.3.109) इति। `पश्वे' इति। `घेर्ङिति' (7.3.111) इति गुणः। `किकिदीव्या' इति। अत्र `आङो नास्त्रियाम्' (7.3.120) इति नाभावः।।

110. ऋतो ङिसर्वनामस्थानयोः। (7.3.110)
`तपरकरणं मुखसुखार्थम्' इति। न हि ङिसर्वनामस्थानयोर्दीर्घ ऋकारः सम्भवति यस्तपरेण निवर्त्त्येत।।

111. घेर्ङिति। (7.3.111)
`सख्ये, पत्ये' इति। सखिपतिशब्दौ घिसंज्ञकौ न भवतः; `शेषो घ्यसखि' (1.4.7) इति पर्युदासात्; `पतिः समास एव' (1.4.8) इति नियमाच्च। `पट्वी' इति। `वोतो गुणवचनात्' (4.1.44) ङीषु। अत्र गुणो न भवति; `सुपि च' (7.3.102) इत्यतः सुपीत्यनुवृत्ते `कुरुतः' इति। करोतेस्तस्, उप्रत्ययः, धातोर्गुणः, रपरत्वम्, `अत उत् सार्वधातुके' (6.4.110) इत्युत्त्वम्। अत्रापि सुपीत्यनुवृत्तेस्तसि परतो विकरणान्तसय न भवति गुणः।।

112. आण्नद्याः। (7.3.112)
`नद्याः' इति पञ्चमी, सा चाकृतार्था पूर्वत्र कृतार्थाया ङितीत्यस्याः सप्तम्याः षष्ठीत्वं प्रकल्पयिष्यति। तेन ङित एवायमाडागमो विज्ञायते, इत्याह--`नद्यन्तादङ्गादुत्तरस्य' इत्यादि। `कुमार्यै' इत्येवमादौ `आटश्च' (6.1.90) इति वृद्धिः।
अथ दीर्घोच्चारणं किमर्थम्, न अडेवोच्येत, `वृद्धिरेचि' (6.1.88) इति वृद्ध्या सवर्णदीर्घत्वेन सिद्ध्यत्येव; कुमार्यै, कुमार्या इत्यत्र `अतो गुणे' (6.1.97) पररूपत्वं प्राप्नोतीत्येतच्च नाशङ्कनीयम्, पररूपत्वं ह्यत्र वचनसामर्थ्यान्न भविष्यति? नैष दोषः; अस्ति ह्यन्यदवचनस्य प्रयोजनम्। किं तत्? श्रियै, श्रिया इत्यत्र `सावेकाचस्तृतीयादिर्विभक्तिः' (6.1.168) इत्युदात्तत्वं मा भूत्। आगमा आद्युदात्ता भवन्तीत्यनुदात्तत्वं यथा स्यादिति। शक्यते ह्येकादेशोन्तादिवद्भावादागमग्रहणेन ग्रहीतुम्। आगमानुदात्तत्वञ्च यथा प्रत्ययस्वरम्--लविता, लवितुमित्यादौ बाधते, तथा विभक्तस्वरमपि बाधेत। तस्मात् `आटश्च' (6.1.90) इति वृद्ध्यर्थमेतत्।।

113. याडापः। (7.3.113)
`खट्वायाम्' इति। `वृद्धिरेचि' (6.1.88) इति वृद्धिः। खट्वाया इत्यत्राकः सवर्णे (6.1.101) दीर्घोच्चारणम्--वृद्धिसवर्णदीर्घत्वे यथा स्याताम्, पररूपत्वं मा भूदित्येवमर्थम्। अकारोच्चारणसामर्थ्यान्न भविष्यतीति चेत्? न; अस्ति ह्यन्यदकारोच्चारणस्य प्रयोजनम्। किं तत्? ज्ञायै, ज्ञाया इत्यत्र `सावेकाचस्तृतीयादिर्विभक्तिः' (6.1.168) इत्यनेनोदात्तत्वं मा भूत्, आगमनुदात्तत्वं यथा स्यादिति।
अथ खट्वामतिक्रान्तायातिखट्वायेत्यत्र कस्मान्न भवति, उपसर्जनह्रस्वत्वे कृते तस्य स्थानिवद्भावादाव्ग्रहणेन ग्रहणे सति प्राप्नोति? इत्यत आह--`अतिखट्वाय' इत्यादि। यदा तावत् `सुपि च' (7.3.102) इति दीर्घत्वं न क्रियते, तदा ङ्याव्ग्रहणेन दीर्घग्रहणमित्येतद्ववचनान्न भवति। यदा दीर्घत्वं तदा लाक्षणिकत्वान्न भवति; `लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' (व्या.प.3) इति वचनात्।।

114. सर्वनाम्नः स्याड्ढ्स्वश्च। (7.3.114)
याटोऽपवादः। आकारोच्चारणं सर्वस्या इत्यत्र यथा स्यात्, अन्यथा पररूपत्वं प्रसज्येत। अकारोच्चारणसामर्थ्यान्न प्रसज्येत--इत्येतच्च नाशङ्कनीयम्, तद्धि तस्यामित्यत्र `ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः' (6.1.171) इति विभक्त्युदात्तत्वं मा भूत्, आगमानुदत्तत्वं यथा स्यादित्येवमर्थम्।।

115. विभाषा द्वितीयातृतयाभ्याम्। (7.3.115)
असर्वनामार्थं वचनम्। ये तु `वाप्रकरणे तीयस्य ङित्सूपसंख्यानम्' (वा. 6) इति सर्वनामसंज्ञां तीयस्योपसञ्चक्षते त इदं सूत्रं प्रत्याचक्षते; तेनैव सिद्धत्वात्। तच्चोपसंख्यानमवश्यं कर्त्तव्यम्, स्मायादयो ङिति विकल्पेन यथा स्युरिति--द्वितीयस्मै, द्वितीयाय, द्वितीयस्मिन्, द्वितीय इति। अन्ये त्वनेनैव स्मायादयः सिध्यन्तीत्युपसंख्यानमेव प्रत्याचक्षते। कथम्? `सर्वनाम्नः' इत्येतदिहानुवर्त्तते, स्याडिति निवृत्तम्, तेनैवमभिसम्बन्धः क्रियते--सर्वनाम्नो ङिति यदुक्तं तद्विभाष द्वितीयातृतीयाभ्यां भवतीति। तेन स्मायादयोऽपयनेनैव भविष्यन्तीति नार्थ उपसंख्यानेन।।

116. ङेराम्नद्याम्नीभ्यः। (7.3.116)
`ङेः' इति सप्तम्येकवचनस्य ग्रहणम्। एतच्च `स्त्रियाम्' इत्येवमादिनिर्देशाद्विज्ञायते। `ग्रामण्याम्' इति। ग्रामं नयतीति `सत्सूद्विष' (3.2.61) इत्यादिना क्विप्, `अग्रग्रामाभ्याञ्च' इति णत्वम्। `एरनेकाचः' (6.4.72) इति यणादेशः। अथ कुमार्याम्, खट्वायाम्, सर्वस्यामिति कथं सिध्यति, आमि कृते `ह्रस्वनद्यापो नुट्' (7.1.54) इति नुडागमेन भवितव्यम्? नैष दोषः; नुटः परत्वादाट्--याट्--स्याटो भवन्ति। तेष कृतेषु नुटः प्राप्तिरेव नास्तीति, न हि द्वयोरादिलिङ्गयोः समुच्चय उपपद्यते।।

117. इदुद्भ्याम्। (7.3.117)
नदीग्रहणमिहनुवर्त्तते। तेन चेदुतौ विशिष्यतेते नदीसंककौ यादिदुताविति। यद्येवम्, अनर्थकमिदम्, पूर्वेणैव सिद्धत्वात्? नैतदस्ति; औकरो हि परत्वदुत्तरसूत्रेण स्यात्, अस्मिंश्च सत्यामेव भवति।।

118. औत्। (7.3.118)
नदीसंज्ञकात् परस्य ङेराम् पूर्वेण विहितः, घिसज्ञकादुत्तरेणात्त्वसन्नियुक्तमौकारं वक्ष्यति, तस्मात् पारिशेष्यात् ताभ्यां यदन्यदिकारोरान्तं तदिहोदाहरणं विज्ञायत इत्याह--`यग्न नदीसंज्ञम्' इत्यादि। अत्र च सखिपतिशब्दावस्त्र्याख्यात्वान्नदीसंज्ञकावपि न भवतः। घखिसंज्ञको यथा न भवतस्तथा पूर्वमेव प्रतिपादितम्।।

119. अच्च घेः। (7.3.119)
अथात्त्वे कृते `अजाद्यतष्टाप्' (4.1.4) इति--कृतौ, धेनादित्येवमादौ टाप् कस्मान्न भवति? इत्याह--`अदिति तपरकरम्' इत्यादि। यस्मात् तपरकरणं टाब्निवृत्तयर्थं क्रियते, तस्मात् कृतेऽप्यत्त्वे टाब्न भवतीति भावः। तपरकरणं हि तत्कालावधारणार्थम्। न चात्र भाव्यमानत्वादणो मात्रिकत्वाच्च स्थानिनो दीर्घत्वस्य प्राप्तिरस्ति। अतोऽन्येनापि हेतुना यद्दोर्घत्वमापद्यते तत्प्रतिषेधार्थमुपजायमानं तट्टापोऽभावमापादयति। टापि हि सत्यकः सवर्णे (6.1.101) दीर्घत्वं स्यात्। तथा चानर्थकं तपरकरणं स्यात्। तस्मान्मा भूदनर्थकमिति कृतेऽप्यत्त्वे टापा न भवितव्यमिति।
`औदच्च धेरिति येषाम्' इत्यादि। इह केचित् `औदच्च र्घेः' इत्येकं योगं कुर्वन्ति; तथा च सत्यौत्त्वात्त्वयोः सन्नियोगशिष्टत्वाद्यत्रात्त्वं तत्रैवोत्त्वेन भवितव्यम्। घेश्चात्त्वमिति सख्यौ, पत्यावित्यत्रात्त्वाभावादौत्त्वमपि न स्यात्। अतस्तस्य दोषस्य परीहाराय येषामेक एवायं योगस्ते प्रधानशिष्टमौत्त्वमाचक्षते। यथा `कर्त्तुः क्यङ् सलोपश्च' (3.1.11) इत्यत्र प्रधानशिष्टमाचक्षते क्यङम्, अक्षवाचयशिष्टं सलोपम्। यथा तत्रैव--तत्रासत्यपि सलोपे यथा क्यङ् भवति श्येनायते--इत्यादौ; एवमसत्यप्यत्त्वे सख्यौ, पत्यावित्यत्रौत्त्वं भवतीति तेषामभिप्रायः।।

120. आङो नाऽस्त्रियाम्। (7.3.120)
आङ इति स्थान्यन्तरनिर्देशादिहार्थाद्विभक्तिविपरिणामो भवतीति षष्ठ्यन्तं यद्घेरिति प्रकृतं तदिह पञ्चम्यन्तमुपजायत इत्याह--`घेरुत्तरस्य' इत्यादि। अथ किमरथम् `अस्त्रियाम्' इत्युच्यते, `आङो ना पुंसि' इत्येवोच्येत; एवमुच्यमाने त्रपुणा जतुनेत्येतन्न सिध्यतीत्येतच्च नाशङ्कनीयम्; `इकोऽचि विभक्तौ' (7.1.73) इति नुमैव सिद्धत्वात्? इति यो मन्येत, तं निराकर्त्तुम्--`अमुना ब्राह्मणकुलेन इत्यस्योपन्यासः। अत्र हि त्यदाद्यत्वे कृते `अदसोऽसेर्दादु दो मः' (8.2.80) इत्युत्त्वमत्वे च। तत्र यदि पुंसीत्युच्यते, ततोऽमुनेति नपुंसके न सिध्येत्; मुभावस्यासिद्धत्वात्। नुमोऽभावात् `अस्त्रियाम्' इत्युच्यमाने नपुंसकेऽपि नाभावो भवतीत्यमुनेति सिद्धं भवति। न हि नाभावे कर्त्तव्ये मुभावस्यासिद्धत्वम्; `न मु ने' (8.2.3) इति वचनादत्यभिप्रायः।।

इति बोधिसत्त्वदेशीयाचार्य श्रीजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां सप्तमाध्यायस्य
तृतीयः पादः

- - -

7.4
अथ सप्तमोऽध्यायः
चतुर्थः पादः
1. णौ चङ्युपधाया ह्रस्वः। (7.4.1)
`चङ्परे णौ परतः' इति। चङ् परो यस्माण्णेरिति स तथोक्तः। `अचीकरत्' इत्यादि। कृञ्, ह्रञ्, लूञ्, पञित्येतेभ्यो हेतुमण्णिच्, ततो लुङ्, च्लिः,`णिश्रि' (3.1.48) इत्यादिना च्लेश्चङ्, `णेरनिटि' (6.4.51) इति णिलोपः। अत्र द्विर्वचनोपधाह्रस्वत्वयोः प्राप्तयोः परत्वादुपधाह्रस्वत्वम्, ततो द्विर्वचनम्, ततश्च णौ कृतं सथानिवद्भवतीति कृ, हृ--इत्यादिकमविकृतधातुरूपमेव द्विरुच्यते। अत्र कृ, हृ--इत्येतयोरभ्यासस्य `उरत्' (7.4.66) इत्यत्त्वे कृते रपरत्वे हलादिशेषे च ततश्च `सब्वल्लधुनि' (7.4.93) इत्यादिना सन्वद्भावादित्त्वम्। पू, लू--इत्येतयोरपि ह्रस्वत्वे कृते `ओः पुयण्ज्यपरे' (7.4.80) इतीत्त्वम्। सर्वत्र `दीर्घो लघोः' (7.4.94) इति दीर्घत्वम्। `अत्र द्विर्वचनोपधाह्रस्वत्वयोः प्राप्तयोः' इत्यादि। अचीकरवित्यादिषूदाहरणेषु कृताकृतप्रसङ्गित्वाद्द्विर्वचनं नित्यमुपधाह्रस्वत्वमपि, तयोरुभयोः परत्वादुपधाह्रस्वत्वं भवति, तत्र कृते द्विर्वचनम्--इत्येष कार्याणां प्रवृत्तिक्रमः। मा भवानटिटदित्यत्र तु द्विर्वचनमेव नित्यम्, न ह्रस्वत्वं तु द्वितीयस्यै काचो द्विर्वचने कृते न प्राप्नोति; परेण टिशब्दरूपेण व्यवधानात्। तस्मान्मा भवानटिटदित्यत्र नित्यत्वाद्द्वितीयस्यैकाचो द्विर्वचनं प्रप्नोति। द्विर्वचने हि सति को दोषः स्यात्? इत्यत आह--`तथा च सति' इत्यादि। एवञ्च द्विर्वचने कृते चङ्परे णौ यदङ्गं तस्य ह्रस्वभाव्याकार उपधा भवति। असति च ह्रस्वत्वे मा भवानटिटदिति रूपं न सिध्यति। मायोग आण्निवृत्त्यर्थः। आटि तु सति नास्ति विशेषः। सत्यसति वा ह्रस्वत्वे `आटश्च' (6.1.90) इति वृद्ध्या भवितव्यमिति। भवच्छब्दः सन्देहनिरासार्थः। `नैष दोषः' इति। योऽनन्तरोक्तः स कथं लभ्यते? इत्याह--

`ओणेर्ऋदित्करणम्' इत्यादि। `ओणृ अपनयने' (धा.पा.454) इत्येतस्य ऋदित्करणस्यैतत्प्रयोजनम्--ऋदित्वान्नाग्लोपि (7.4.2) इत्यादिना ह्रस्वप्रतिषेधो यथा स्यादिति। यदि च नित्यमपि द्विर्वचनमुपधाह्रस्वत्वेन न बाध्यते, तदौणेर्ऋदित्करणमनर्थकं स्यात्। द्विर्वचने हि कृते परेण णिशब्दरूपेण व्यवधानादेव ह्रस्वो न भविष्यति, किमोणेर्ऋदित्करणेनेति? आचार्यप्रवृत्तिर्ज्ञापयति--नित्यमपि द्विर्वचनमुपधाह्रस्वत्वेन बाध्यत इति; यत ओणेर्ऋदत्करणं करोति।
`णाविति किम्' इति। एवं मन्यते--णिग्रहणे चाकृते लुङ्चङादेशयोः कृतयोर्णिलोपे चाकृते वृद्ध्यावादेशयोश्चाकृतयोः, अलू इ+अत् इति स्थित ऊकरस्य ह्रस्वो मा भूदत्येवमर्थं वा णिग्रहणं क्रियते? ऊकारस्य वृद्धौ कृतायामौकारसय ह्रस्वो मा भूदित्येवमर्थं वा? एतच्चोभयमप्रयोजनम्; अत्रान्तरङ्गत्वाद्वृद्ध्यावादेशाभ्यामेव भवितव्यम्। अन्तरङ्गत्वं पुनस्तयोर्णिज्मात्राश्रयत्वात्; ह्रस्वस्य च बहिरङ्गत्वं चङाश्रयत्वादिति। `चङ्युपधाया ह्रस्व इत्युच्यमाने' इत्यादि। एतावत्युच्यमानेऽसति णिग्रहणे चङ्परे यदङ्गं तस्योपधाया ह्रस्वो भवतीत्येवमर्थः स्यात्। तथा चानवकाशो ह्रस्वोऽलीलवदित्यत्रान्तरङ्गामपि वृद्धिं बाधित्वा वचनसामर्थ्यादृकारस्यैव स्यात्। अथापि कथञ्चिद् वृद्धिर्न बाध्यते; एवमपि वृद्धौ कृतायामन्तरङ्गमप्यावादेशं बाधित्वौकारस्यैव प्रसज्येत; अन्यथा हि वचनमिदमनर्थकं स्यात्। `अदीदपत्' इति। अत्र ददातेर्णिचि लुङि चङि च कृते अ दा इ+अत् इति स्थिते वचनप्रामाण्यादनवकाशो ह्रस्वोऽन्तरङ्गमपि पुकं बाधित्वा प्रसज्येत, तसमिंश्च सति पुग्विहतनिमित्तत्वान्न स्यात्। `अपीपचदित्यादौ तु नैव ह्रस्वः स्यात्' इति। चङि परतो यदङ्गं पाचिप्रभृति तदीयाया उपधायाश्चाकारादेरह्रस्वभाविनीत्वात्। आदिशब्दोऽपीपठदित्यादिपरिग्रहार्थः। तस्माण्णाविति वक्तव्यम्।
`चङीति किम्' इति। एषोऽभिप्रायः--केवले णौ ह्रस्वो मा भूदित्येवमर्थं चङीत्युच्यते; नैतच्चङग्रहणस्य प्रयोजनमुपपद्यते; यस्मादाचार्यप्रवृत्तिर्ज्ञापयति--णावेव केवले ह्रस्वत्वं न भवतीति, यदयम् `मितां ह्रस्वः' (6.4.92) इति ह्रस्वत्वं शास्ति। ततः कारयति, हारयतीत्यादौ न भविष्यतीत्यभिप्रायः। यद्येतस्माज्ज्ञापकात् कारयतीत्यादौ ह्रस्वो न भवति, तदाऽचीकरदित्यत्रापि न स्यात्। अथात्र वचनसामर्थ्याद्भविष्यति? एवमपि कारयतीत्यादौ स्यादेव। न हि `मितां ह्रस्वः' (6.4.92) इत्युचयमाने सत्यचीकरदित्यादौ न भवतीत्येव विषयविभागः शक्यते विज्ञातुम्। तस्मात् चङ्ग्रहणं कर्त्तव्यम्। `उपधाग्रहणं किम्' इति। एवं मन्यते--अलोऽन्त्यस्य मा भूदित्येवमर्थमुपधाग्रहणं क्रियते, एतच्चाप्रयोजनम्; चङ्परे णौ यदङ्गं तस्याचीकरदित्यादावपि णावन्तरङ्गत्वाद् वृद्ध्यादिषु कृतेषु ह्रस्वभाव्यजन्त्यो न सम्भवति यत्राजन्ताण्णिजुत्पद्यते, किं पुनरपपठवित्यादौ यत्र हलन्ताण्णिजुत्पद्यते! तस्मादजन्त्यो ह्रस्वभावो नास्तीत्यन्तरेणाप्युपधाग्रहणं वचनादनव्यस्यैवोपधाभूतस्य ह्रस्वो भविष्यतीति। `अचकाङ्क्षत्, अववाञ्छत्' इति। `क्राक्षि वाक्षि माक्षि काङ्क्षायाम्' (धा.पा.667,668,669)। यद्यप्यजन्तो ह्रस्वभावी नास्ति, तथापि वचनादनन्त्यस्याचोकरदित्यादौ यथा भवति, तथा अचकाङ्क्षदित्यादावपि स्यात्। तस्मान्मा भूदेष दोष इत्युपधाग्रहणं क्रियत इत्यभिप्रायः। ननु चाङ्गस्य योऽच् तस्य चङ्परे णौ ह्रस्वो विधीयते, तत्र यद्यप्यनन्तरोऽज् न सम्भवति, तथापि `येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या.प.46) इत्येकेन वर्णेनेति येन नाव्यवधानम्, अपि तु सर्वदा व्यवधानमेव; तेन व्यवहितेऽपि वचनप्रामाण्याद्भवितव्यम्। एकेनैव वर्णेन व्यवधानं सर्वत्र सम्भवति। सङ्घातेन तु व्यवधानं सम्भवति, न सम्भवति च। इहाचकाङ्क्षदित्यादौ सङ्घातेनैव व्यवधानम्, अतो नास्त्येव ह्रस्वप्रसङ्ग इति किमुधाग्रहणेन? इत्याह--`तदेतत्' इत्यादि। उपधाग्रहणमवश्यमुत्तरार्थं कर्त्तव्यम्। इह तु क्रियमाणे सत्यचकाङ्क्षदित्येवमर्थम् `येन नाव्यवधानम्' (व्या.प.46) इत्येषा परिभाषा नाश्रयितव्या भवति। उपधाग्रणेनैवात्र ह्रस्वस्य निवर्त्तितत्वादित्येष गुणो लभ्यते। तेनेहैव कृतम्, नोत्ररत्र।
`उपधाह्रस्वत्वे णेर्णिचयुपसंख्यानम्' इति। चङ्परे णौ परतो यो णिस्तस्मिन् परतोऽङ्गस्योपधापा ह्रस्वः उपसंख्येयः। `अवीवदत्' इति। वदेः `हेतुमति च' (3.1.26) इति णिच्, तदन्ताद्वादितवन्तं प्रयोजितवानिति पुनः `हेतुमति च' (3.1.26) इति णिच्, ततो लुङादिः,`णेरनिटि' (6.4.51) इति णिलोपः। किं पुनः कारण न सिध्यति, यावता णिलोपे कृते चङ्परे णावङ्गस्याकारो ह्रस्वभाविन्युपधा भवत्येव? इत्याह--`योऽसो' इत्यादि। `अचः परस्मिन् पूर्वविधौ' (1.1.57) अपि णिलोपस्य ह्रस्वत्वे कर्त्तव्ये स्थानिवद्भावाण्णिजव्यवधानाद् ह्रस्वो न प्राप्नोति। तेन वा णिलोपेनाग्लोप्यङ्गमेतद्भवति--तदेतस्माद्धेतोर्न हरसवत्वं प्राप्नोति। अग्लोपीत्यादिनानन्तरवक्ष्यमणिप्रतिषेधात् (7.4.4) `ण्याकृतिनिदशात् सिद्धम्' इत्युपसंख्यानं प्रत्याचष्टे--`णौ इति। ण्याकृतिरिति णिजातिर्निर्देशयते, न तु णिव्यक्तिः। तेन व्यक्तौ व्यवधानं न भवति, न हि जातौ; एकत्वाण्णिजातेः। न हि तयैव तस्या व्यवधानमुपपद्यते। ननु चोत्तरया ण्याकृत्या जात्याधारभूतया णिव्यक्त्या णिजात्याश्रयेऽपि व्यवधानमुपपद्यत एव? नैतत्; तस्यामपि व्यक्तौ जातेः समवायात्। एवं तादद्व्यवधानं ण्याकृत्याश्रये नास्ति। अग्लोपित्वमपि नास्त्येव; न ह्यत्र णिजातिव्यतिरेकेणाऽन्योऽग्विद्यते, यस्य लोपेनाग्लोप्यङ्गं स्यात्। न च ण्याकृतेर्लोपश्च; तस्याः श्रूयमाणत्वात्। न हि श्रूयमाणाया लोपे लपपद्यते; `अदर्शनं लोप' (1.1.60) इति वचनात्। ननु च जातिव्यतिरेकेणापि तदाश्रयभूता व्यकतिरग्विद्यत एव; न जातिव्यक्त्योरनन्यत्वमिति सांख्योयसिद्धान्तस्येहाश्रयणात्। अथ वा--ण्याकृतिनिर्देशे सत्युपधाह्रस्वत्वस्य ण्याकृतनिमित्तत्वेना श्रोयते। तेन गोबलीवरदन्यायेन तस्या ण्याकृतेर्निमित्तत्वेनोपात्ताया अन्यस्याको लोपः प्रतिषेधनिमित्तत्वेन विज्ञायते, स चेह नास्ति। तस्माण्ण्याकृतिनिर्देशात् सिद्धम्।।

2. नाग्लोपिशास्वृदिताम्। (7.4.2)
अगिति प्रत्याहारग्रहणम्। अको लोपोऽग्लोपः, स एषामस्तीति तान्यग्लोपीन्यङ्गानि। `शासु अनुशिष्टौ' (धा.पा.1075) ऋदिद्येषां तानि ऋदिन्ति `बाधृ विलोडने' (धा.पा.5) इत्येवमादीनि। `अममालत्, अममातरत्' इति। `तत्करोति तदाचष्टे' (ग.सू.187) इति णिच्, `णाविष्ठवत्कार्यं प्रातिपदिकस्य' (वा.813) इतीष्ठवद्भावः, `तुरिष्ठेमेयःसु' (6.4.154) इति टिलोपः, ततो लुङादिः। `अतयरराजत्' इत्यादौ, `प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च'

(ग.सू.186) इति णिच्। `अन्वलुलोमत्' इति। `सत्यापपाशरूप' (3.1.25) इत्यादिना णिच्।
`अगेव केवलो यत्र' इत्यादि। इह द्विविधमगलोपयङ्गम्--क्वचिदगेव केवलो लुप्यते, अममालदित्यादौक्वचिद्धलचौ, अत्यरराजदित्यादौ। अगेव केवलो यत्र लुप्यते तत्राग्लोपस्य स्थानिवद्भावात् सिद्धम्। स्थानिवद्भावे सत्यग्लोपस्य व्यवधानादेव ह्रसवप्राप्तिः, तस्मान्न तदर्थमग्लोपीति वचनम्। इतरत्र तु हलचोरुभयोरप्यादेश इति सिध्यति, अस्थानिवद्भावात्। अजादेशसय हि परनिमित्तकस्य स्थानिवद्भाव उक्तः, न तु हलचोरादेशस्य। तस्माद्यत्र हलचोरादेशास्तदर्थमिदं वचनम्। अन्यार्थमेतत् क्रियमाणं यत्रागेव केवलो लुप्यते तदर्थमपि भविष्यतीति तदर्थमस्योदाहरणमुपन्यस्तम्। `अडुढौकत्' इत। `ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ तिकृ रघि लघि गत्यर्थाः' (धा.पा.94,95,96,97,98,99,100,101,102,103,104,105,106,107,108)। `अभ्यासे चचं' (8.4.54) इति जश्त्वम्--डकारः।।

3. भ्राजभासभावदीपजवमीलपीडामन्यतरस्याम्। (7.4.3)
भ्राजिरयं भ्वादावनुदात्तेत् पठ्यते, आत्मनेपदी ऋकारानुबन्धः फणादिषु `टुभ्राजु टुभ्रासु दीप्तौ' (धा.पा.823,824) इति पठ्यते, फणादिभ्यः पुरस्ताच्च `एजृभ्रेजृ भ्राजृ दीप्तौ' (धा.पा.179,180,181) इति। तन्त्रान्तर्गचकार्यार्थः फणादिष्ववश्यमेवास्य पाठोऽङ्गीकर्त्तव्य इति तेनैव शबादेरपि गणकार्यस्य सिद्धत्वात्। अन्यत्रास्य पाठोऽनार्ष एव लक्ष्यते। `भासृ दीप्तौ' (धा.पा.624), `भा, व्यक्तायां वाचि' (धा.पा.612) `दीपी दीप्तौ' (धा.पा.150), `जीव प्राणधारणे' (धा.पा.562) `मील श्मील स्मील क्ष्मील निमेषणे' (धा.पा.517,518,519,520), `पीड अवगाहने' (धा.पा.1544)--एषां नित्ये ह्रस्वत्वे प्राप्ते विभाषेयमारभ्यते। `अबिभ्रजत्' इति। यधा ह्रस्वत्वम्, तदा पूर्ववत्सन्वद्बावेनेत्त्वम्। `अबीभवत्' इति। पूर्ववद्दीर्घः।
अथ भ्राजभासयोऋृदित्करणं किमर्थम्, यावता तयोर्हि ऋदित्करमस्यैतत् प्रयोजनम्--ऋदित्त्वात् पूर्वसूत्रेण ह्रस्वप्रतिषेधो यथा स्यादिति। यदि विभाषया च तयोर्ह्रस्वत्वं विधीयते तदा ऋदित्करणमस्य वैयर्व्यमेव? इत्यत आह--`भ्राजभासोः' इत्यादि। `अपाणिनीयम्' इति। पाणिनेरिदं पाणिनीयम्, न पाणिनीयमपाणिनौयमिति; तेनानभ्युपगमात्; न तु तेनाकृतत्वात्। अन्यथा हि `बाधृ विलोडने' (धा.प.5)--इत्येवमादीनामपि ऋदित्करणमपाणिनीयं स्यात्। प्रतिपादितं हि पूर्वम् (4.1.106 तमसूत्रे)---गणकारः पाणिनिर्न भवतीति। तथा च--अन्यो गणकारः अन्यश्च सूत्रकारः।।

4. लोपः पिबतेरीच्चाभ्यासस्य। (7.4.4)
ह्रस्वत्वे प्राप्ते तदपवादः पिबतेर्लोपो विधौयते, ईकारश्चाभ्यासस्येति। उपधाधिकारादुपधाया एव। पर्यायेण लोपेकारौ मा भूताम्--इत्येवमर्थमध्यासग्रहणम्। `अपीप्यत्' इति। `पा पाने' (धा.पा.925), णिच्, `शाच्छासाह्वाव्यावेपाम्' (7.3.37) इति युक्। ननु च नित्यत्वात् परत्वाच्च पूर्वमुपधालोपे कृतेऽनच्कत्वाद् द्विर्वचनेन न भवितव्यम्? इत्यत आह--`उपधालोपे कृते' इत्यादि। सुबोधम्। पिब्रतेः श्तिपा निर्देशो यङ्लुग्निवृत्त्यर्थः--अपापयदिति। `पा रक्षणे' (धा.पा.1056, `पै ओवै शोषणे' (धा.पा.920,921)--इत्येतयोस्तु निवृत्त्यर्थः स नोपपद्यते; तत्र ह्योकस्य लुग्विकरणत्वादेव न भविष्यति, अपरस्य तु लाक्षणिकत्वात्।।

5.तिष्ठतेरित्। (7.4.5)
अयमपि ह्रस्वापवादः। `ईच्चाभ्यागस्य' (7.4.4) इति निवृत्तम्। श्तिपा निर्देशो यङ्लुग्निवृत्त्यर्थ एव--अतास्थपदिति।।

6. जिघ्रतेर्वा। (7.4.6)
एषोऽपि ह्रस्वापवादः। अत्रापि श्तिपा निर्देशस्य तदेव प्रयोजनम्--अजाघ्रपदिति।।

7. उऋृत्। (7.4.7)
अत्र ऋकारः स्थानित्वेनोपात्तः, तस्य चान्तरङ्गत्वादिररार एव प्राप्नुवन्ति, न हि बहिरङ्गो ह्रस्वः, तस्मात् तेषामपवादौ विज्ञायत इत्यत आह--`इररारामपवादः' इति। `उपघायाश्च' (7.1.101) इतीकारः, `पुगन्तलघूपघस्य' (7.3.86) इति गुणोऽकारः, `मृजेर्बृद्धिः' (7.2.114) इत्याकारः--इत्येते च ऋकारस्य स्थाने `उरण्रपरः' (1.1.51) इति रपरा भवन्तो यताक्रममिररारो भवन्ति, तेषामपवादः। `अचीकृतत्' इति। `कृत संशब्देने' (धा.पा.1653), चुरादिः, णिच्। `अवीवृतत्' इति। `वृतु वर्त्तने' (धा.पा.758) `अमीमृजत्' इति। `मृजू शुद्धौ' (धा.पा.1066) हेतुमण्णिच्। ननु चान्तरङ्गत्वादिरारार्भिरेव भवितव्यम्, अन्तरङ्गत्वं तु पुनस्तेषां ण्ज्मात्राश्रयत्वात्। ऋकारस्तु चङ्परं णिचमाश्रित्य भवतीति बहिरङ्गः। तत्कथं तेनेररारो बाध्यन्ते? इत्यत आह--`वचनसामर्थ्यात्' इत्यादि। यद्यन्तरङ्गत्वादिरराराः स्युः, वचनस्य तदा वैयर्थ्य स्यात्; अनवकाशत्वात्। तस्मादन्तरङ्गा अपि ते बाध्यन्ते।
`तपरकरणम्' इत्यादि। असति हि तपरकरणे यत्र दीर्घः स्थानी, तत्रान्तरतम्याद्दीर्घः प्रसज्येत तस्मा द्दीर्घेऽपि स्थानिनि ह्रस्व एव यथा स्यादित्येवमर्थं तपरकरणम्। ननु `भाष्यमानोऽण् सवर्णान्न गृहृणाति' (व्या.प.35) इति दीर्घस्यापि स्थानिनो ह्रस्व एव भविष्यति, न दीर्घः? इत्यत आह--`न चायं

भाव्यमानः' इत्यादि। किं कारणम्? इत्यत आह--`आदेशान्तरनिवृत्त्यर्थम्' इति। इति। आदेशान्तरमिररारादि; तस्य निवृत्त्यर्थमीकारस्यास्मीयरूपेणैवाभ्यनुज्ञायते, न त्वपूर्व एव ऋकारो विधीयते, तत्कुतोऽस्य भाव्यमानता!।।

8. नित्यं छन्दसि। (7.4.8)

`अवीवृधत्' इति। `वृधु वृद्धौ' (धा.पा.759) हेतुमाण्णिच्, ततो लुङादिः। नित्यग्रहणं पूर्वसूत्रे वेत्येतदनुवृत्तेर्विज्ञापनार्थम्; अन्यथा हि तत्राप्यस्याननुवृत्तिर्विज्ञायेत।।

9. दयतेर्दिगि लिटि। (7.4.9)

`अवदिग्ये' इत्यादि। `देङ् रक्षणे' (धा.पा.962), लिट्, ङित्त्वादात्मनेपदम्, प्रथपुरुषः, `लिटस्तझयोरेशिरेच्' (3.4.81) इत्येशिरेचौ, एरनेकाचः' (6.4.82) इत्यादिना यणादेशः। `दयतेरिति देङो ग्रहणम्, न तु दय दान इत्यस्य' इति। ननु च `दय दानगतिरक्षणहिंसादानेषु' (धा.पा.481) इत्येतस्य ग्रहणं कस्मान्न भवति? इत्यत आह--`तस्य हि' इत्यादि। लिटीत्युच्यते, न च `दय दाने' (धा.पा.481)--इत्येतस्यानन्तरो लिडस्ति; यस्मात् तस्य `दयायासश्च' (3.1.37) इत्यनेनाम् विहितः। ननु च `अमन्त्रे' इति तत्रानुवर्त्तते, ततो मन्त्र आमोऽभावात् स्यादेवानन्तर्यम्? एवं मन्यते--यथादृष्टानुविधिश्छन्दसीति। न च `दय दाने' (धा.पा.481) इत्येतस्य मन्त्रे दिग्यादेशो दृश्यत इत्यभिप्रायः।
इहावदिग्ये--इत्यनवकाशात्वाद् दिग्यादेसे कृते पश्चाद् द्विर्वचनेन भवितव्यम्, यथा चख्यावित्यत्र `चक्षिङः ख्याञ्' (2.4.54) इति ख्याञादेशस्यानवकाशत्वात् तत्र कृते पश्चाद्द्विर्वचनम्, तथावदिग्ये इत्यत्रापि दिग्यादेशे कृते पश्चाद् द्विर्वचन केन बाध्येत? इति यश्चोदयेत्--तं प्रत्याह--`दिग्यादेशेन द्विर्वचनस्य बाधनमिष्यते' इति। कथं पुनरिष्यमाणमपि लभ्यते? नित्यग्रहणानुवृत्तेः। इह पूर्वसूत्रान्नित्यग्रहणमनुवर्त्तते, न चात्र विभाषा प्राप्नोति, यन्निवृत्त्यर्थ नित्यग्रहणं विज्ञायते। तस्मादन्यल्लिटि यत् कार्यं प्राप्नोति, तन्निवृत्त्यर्थं नित्यग्रहणं विज्ञायते; तेनैवमभिसम्बन्धः करिष्यते--`लिटि प्राप्नुवतां कार्याणां दिग्यादेश एव नित्यं भवति, नान्यत्कार्यम्'। इत्येवं द्विर्वचननिवर्त्तनं भवति। यणादेशस्तु लिटित्युच्यायं न विधीयत इति `एरनेकाचः' (6.4.42) इत्यचि भवति।।

10. ऋतश्च संयोगादेर्गुणः। (7.4.10)

`सस्वरतुः, सस्वरुः' इति। `स्वृ शब्दोपतापयोः' (धा.पा.932), `उरत्' (7.4.66) इत्यभ्यासस्यात्त्वम्, रपरत्वम्, हलादिशेषः। `दध्वरतुः, दध्वरुः' इति। `ध्वृ हूर्च्छने' (धा.पा.939)। `सस्मरतुः, सस्मरुः' इति। `स्मृ आध्याने' (धा.पा.807)। ननु च सर्वत्रैव साभ्यासमङ्गम्, न च तत् संयोगादि? नैष दोषः, `द्विष्प्रयोगो द्विर्वचनम्' इत्येषोऽत्र पक्षः, तत्र परस्याप्यङ्गसंज्ञा भवत्येव। अथापि `स्थाने द्विर्वचनम्' इत्यप्यदोषः; सर्वत्रैव हि लिट्यभ्यासः संयोगादित्वं विहन्ति, उच्यते चेदं वचनम्, तत्रैवं विज्ञास्यामः--प्राग्द्विर्वचनात् संयोगादित्वमस्ति, इह च द्विर्वचनात् प्राक् संयोगादित्वमस्ति। `चिक्षिपतुः, चिक्षिपुः' इति। `क्षि क्षये' (धा.पा.236), इयङादेशः।
`प्रतिषेधविषयेऽपि' इत्यादि। यः `क्ङिति च' (1.15) इत्यसय प्रतिषेधस्य विषयो न भवति थलादिः, तत्र `सार्वधातुकार्धधातुकयोः' (7.3.84) इत्येवं गुणः सिद्धः। तस्माद्गुणप्रतिषेधविषयेऽपि यथा स्यादित्ययमारम्भः वृद्धिविषयेऽपि परत्वाद्गुणेन भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह--`वृद्धिविषये तु' इत्यादि। गुणस्यावकाशः--सस्वरतुः, सस्वरुरिति; ञ्णिति वृद्धेरवकाशः--स्वारकः, ध्वारक इति; सत्त्वार, दध्वारेत्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधेन वृद्धिरेव भवति।
अथ तपरकरणं किमर्थम्, दीर्घस्यापि मा भूदित्येवमर्थं चेत्? नैतदस्ति; भवितव्यमेव हि दीर्घस्योत्तरसूत्रेण--`स्तृञ् आच्छादने' (धा.पा.1484), आतस्तरतुः, आतस्तरुरिति। ननु चैतस्मात् तपरकरणान्न प्राप्नोत, सावकाशं चोत्तरवचनमसंयोगादौ--`कृ विक्षेपे' (धा.पा.1409) निचकरतुः, निकरुरिति? यद्येवम्, एवे तर्हि न चेदं तपरकरणम्, किं तर्हि तसिनायं निर्देशः।
`संयोगादेः' इत्यादि। इहाङ्गप्रकरणादङ्गं संयोगादित्वेन विशिष्यते। न च करोतेः संयोगाद्यङ्गमिति न प्राप्नोति, तस्मात् संयोगोपधग्रहणं कर्त्तव्यमिति करोतेरपि यथा स्याद्गुणः। `सञ्चस्करतुः, सञ्चस्करुः' इति। `सम्पर्युपेभ्यः करोतौ भूषणे' (6.1.137) इति सुट्, स च `अडभ्यासव्यवायेऽपि' (6.1.136) इति वचनादभ्यासव्यवायेऽपि भवति। किं पुनः कारणमिह गुणो न सिध्यति, यावता सुटि कृते `तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' (व्या.प.21) इति करोतिः संयोगादर्भवति? इत्यत आह--`अत्र हि' इत्यादि। अनेन सुटो बहिरङ्गतां प्रतिपादयति। बहिरङ्गत्वे हि तस्य `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इत्यन्तरङ्गे गुणे कर्त्तव्ये बहिरङ्गस्य सुटोऽसिद्धत्वात् संयोगादित्वं करोतेर्नोपपद्यते। पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेन' (जै.प.वृ.98) इत्यस्मिन्दर्शने धातूपसर्गयोः कार्यमन्तरङ्गमिति सुटोऽपि धातूपसर्ययोः कार्यत्वादन्तरङ्गता स्यात्। `पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' (सी.प.128) इत्यस्मिन् दर्शने सुड्बहिरङ्गो भवति। तथा हि--अस्मिन् दर्शने निरुपसर्गस्यैव धातोरर्थः साधनेन युज्यत इति साधनाभिधायी पूर्वं तावल्लिट् कर्त्तव्यः; तत्र कृते तदाश्रये द्विर्वचने कृते पश्चादुपसर्गयोगे `अडभ्यासवयवायेऽपि' (6.1.136) इति सुट् क्रियते। एवञ्च क्रियमाणे ह्यनेकपदाश्रितत्वात्, बह्वपेक्षत्वाच्च सुटो बहिरङ्गता प्रतिपाद्यते। गुणस्तु लिडुत्पत्तिसमनन्तरकालमेव प्राप्नोति, नापरं किञ्चिदपेक्षते;

एकपदापेक्षत्वादल्पापेक्षत्वाच्चान्तरङ्गः, ततश्च तस्मिन् कर्त्तव्ये सुटोऽसिद्धत्वात् करोतिः संयोगाद्यङ्गं न भवति। तस्मादसौ न प्राप्नोति। `एवञ्च कृत्वा' इत्यादि। यत एवं सुड्बहिरङ्गः, एवञ्च कृत्वाऽन्तरङ्ग इटि कर्त्तव्ये तस्यासिद्धत्वादसंयोगादित्वात् करोतेरुपस्कृषीष्ट, संस्कृषीष्ट--इत्यतर `ऋतश्च संयोगादेः' (7.2.43) इतीडागमो न भवति। एतेन बहिरङ्गतैव सुटः प्रतिपादिता।

ननु चाङ्गाधिकारात् प्रत्यासत्तेरङ्गावयव एव संयोगो गृह्यते, कात्पूर्वग्रहणेन तत्र ज्ञापितमभक्तत्वं सुटः, ततश्चाभक्तत्वादेवासंयोगादित्वात् करोतेरिण्न भविष्यति, किमत्र बहिरङ्गत्वेनासिद्धत्वेनोपन्यस्तेन? सत्यमेतत्; एवं मन्यते--भवतु नाम करोतिभक्तत्वं सुटः, तथाप्यसिद्धत्वात् तस्य संस्कृषीष्ट--इत्यत्रेट्प्रसङ्गो न भविष्यतीति संयोगोपधग्रहणं कर्त्तव्यमिति। अस्यायमर्थः--संयोगोपधः करोतिरङ्गं गृह्यते येन तत् संयोगोपधग्रहणव्याख्यानं कर्त्तव्यमित्यर्थः। तत्रेदं व्याख्यानं कर्त्तव्यम्--चकारोऽत्र क्रियते, स च करोतेः संयोगोपधस्य समुच्चयार्थः। तेन तस्यापि सुटि कृते संयोगोपधस्य गुणो भविष्यतीति।।

11. ऋच्छत्यताम्। (7.4.11)

`ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु' (धा.पा.1296)। अर्त्तेरप्यत्र प्रश्लेषः; बहुवचननिर्देशात्। अत एवाह--`ऋच्छतेरङ्गस्य, ऋ इत्येतस्य, ऋकारान्तानां च' इति। ऋकारान्ताः--`कृ विक्षेपे' (धा.पा.1409), `गृ निगरणे' (धा.पा.1410) इत्येमादयः। `आनर्च्छतुः, आनर्च्छुः' इत्यादि। अतुसुसौ, गुणः, द्विर्वचनम्, अभ्यासकार्यं पूर्ववत्, `अत आदेः' (7.4.70) इति दीर्घः, `तस्मान्नुड् द्विहलः' (7.4.71) इति नुट्। `आरतुः' आरुः' इति। पूर्ववदभ्यासस्य दीर्घः, ततः पूर्वसवर्णेनेति।

`ऋच्छतेरलघूपधत्वात्' इत्यादि। अलघूपघत्वं तु तस्यान्तरङ्गत्वात्। `छे च' (6.1.73) इति तुकि कृते `संयोगे गुरु' (1.4.11) इति गुरुसंज्ञायां सत्यां गुरूपधत्वान्न प्राप्नोतीति वेदितव्यम्। `ऋतां तु' इत्यादि। ऋ ऋतां तु प्रतिषिद्ध एवेति गुणो विधीयत इत्यपेक्ष्यते। गुणप्रतिषेधस्तु तेषां `असंयोगास्लिट् कित्' (1.2.5) इति कित्त्वे सति `क्ङिति च' (1.1.5) इत्यनेन वेदितव्यः।

`वृद्धिविषये तु' इत्यादि। यथा `ऋतश्च संयोगावेः' (7.4.10) इति वृद्धिविषये पूर्वविप्रतिषेधेन वृद्धिरेवेध्यते, तथा ऋऋतामपीति। गुणस्यावकाशः--निचकरतुः, निचकरुरिति; वृद्धेरवकाशः--कारकः, हारक इति; निचकार, निजगारेत्यत्र वृद्धिविषये पूर्वविप्रतिषेधेन वृद्धिरेवेध्यते।।

12. शृदृप्रां ह्रस्वो वा। (7.4.12)

`शृ हिंसायाम्' (धा.पा.1488) `दृ विदारणे' (धा.पा.1490) `पृ पालनपूरणयोः' (धा.पा.1489)--एषां पूर्वसूत्रेण नित्यो गुणो भवत्येव। `विशश्रतुः' इति। ह्रस्वत्वे कृते यणादेशः। `ह्रस्ववचनम्' इत्यादि। असति ह्रस्वग्रहणे वाश्चनेन विकल्पिते यस्मिन् पक्षे गुणो नास्ति तस्मिन् पक्षे `ऋत इद्धातोः' (7.1.100) इतीत्त्वं प्रसज्येत, `उदीष्ठ्यपूर्वस्य' (7.1.102) इत्युत्त्वञ्च। तस्मात् तन्निवृत्त्यर्थ ह्रस्व इत्युच्यते? ऋदिदिति कर्त्तव्ये ह्रस्वग्रहणमुत्तरार्थम्।

केचित् इत्यादि। कथं पुनरस्य प्रत्याच्यमाने विशश्रतुः--इत्येवमादीनि रूपाणि सिध्यन्ति? इत्याह--`श्रा पाके' इत्यादि। यद्यपि `आतो लोप इटि च' (6.4.64) इत्यकरलोपे कृते श्रादीनां विशश्रतुरित्येवमादीनि रूपाणि सिध्यन्तीति, तथाप्यर्थमेवो भवति; तदाऽयुत्तमस्य प्रत्याख्यानमित्याशङ्क्यानेकार्थत्वाद्धातूनामित्युक्तम्। `तथा च सति' इत्यादिना प्रत्यादिना प्रत्याख्यानं प्रत्याचष्टे। यदि सूत्रस्य प्रत्याख्यानं क्रियते, क्वासौ कृते विशशृषानिति रूपं न सिध्यति, तथा हि--यदि शृणातेर्ह्रस्वो न क्रियते, तदा विशशर्वानिति रूपं स्यात्। अथ श्रातेः, विशश्रिवानिति। तस्मादयुकतमस्य प्रत्याख्यानम्।।

13. केऽणः। (7.4.13)

अणिति पूर्वेम णकारेण प्रत्याहारग्रहणम्; अन्यथा `केऽचः' इत्येवं ब्रूयात्। अथ वा--अच इत्येतदपि न ब्रूयात्, अच एव हि हरस्वदीर्घल्पुता भवन्ति। `ज्ञका' इति। जानातीति ज्ञा, `इगुपधज्ञाप्रीकिरः कः' (3.1.135), तदन्ताट्टाप। अज्ञाता ज्ञेति `प्रागिवास् कः' (5.3.70)। अथ वा--अनुकम्पिता ज्ञेति `अनुकम्पायाम्' (5.3.76) इति कन् कनि कृते तदन्ताट्टाप्।

अथेह कस्मान्न भवति--`कृदाधारार्चिकलभ्यः कन्' (द.उ.3.18) इति रातेर्दधातेश्च कन्, तदन्ताट्टाप्--`राका, धाका' इत्यादि। सुबोधम्। निरनुबन्धस्येह ग्रहणान्निरनुबन्धकपरिभाषया कनो ग्रहणेन न [नास्ति--मुद्रिते] भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्त्तुमाह--`न कपि' इत्यादि। यद्येषा परिभाषोपतिष्टते, तदा `न कपि' (7.4.14) इति प्रतिषेधोऽनर्थकः स्यात्। सानुबन्धकत्वादेव कपो ग्रहणं ग्रहणं न भविष्यतीत्यभिप्रायः।।

14. न कपि। (7.4.14)

`बहुकुमारीकः' इति। बह्व्यः कुमार्यो यस्य सः। `नद्यृतश्च' (5.4.156) इति कप्; अनुबन्धलोपः।

अथात्रास्मिन् ह्रस्वत्वे प्रतिषिद्ध उपसर्जनह्रस्वत्वं कस्मान्न भवति? अत ेव प्रतिषेधान्न भविष्यतीति चेत्? न; `अनन्तरस्य विधिरावा प्रतिषेधो वा' (व्या.प.19) इत्यनन्तरस्यैव ह्रस्वस्य ह्ययं प्रतिषेधो न सर्वस्य। कपीति वचनसामर्थ्यादुपसर्जनह्रस्वत्वमिति न भविष्यतीति चेत्? यत्र ह्युपसर्जनह्रस्वत्वस्य

प्राप्तिरस्ति, `गोस्त्रियोरुपसर्जनस्य' (1.2.48) इति ह्रस्वशासने स्त्रीशब्देन स्त्र्यधिकारविहितानां प्रत्ययानां टाबादीनां ग्रहणात्। तस्माद्बहुकुमारीक इत्यत्रोपसर्जनस्य ह्रस्वत्वेन भवितव्यमित्यत आह--`गोस्त्रियोरुपसर्जनस्य' इत्यादि। कस्मान्न भवति? इत्याह--`समासार्थे हि' इत्यादि। उपसर्जनह्रस्वत्वं हि स्त्रीप्रत्ययान्तस्य समासप्रातिपदिकसय विधीयते, तद्धिधाने `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इत्यतः प्रातिपदिकग्रहणानुवृत्तेः समासप्रातिपदिकस्यैव स्त्रीप्रत्ययान्तस्योपसर्जनह्रस्वः स्यात्। न च बहुकुमारीक इत्यादौ स्त्रीप्रत्ययान्तं समासप्रातिपदिसं भवति; यस्मात् `समासान्ताः' (5.4.68) इत्यधिकार एवायां कब्विधीयते। `समासान्ताः' इत्यत्रान्तग्रहणस्यैतत् प्रयोजनम्--समासस्यान्तोऽवचयो यथा स्यादिति, स च कथं समासस्यावयवो भवति? यदि तेन सह समाससंज्ञा भवति। कथञ्च तेन समाससंज्ञा भवति? यद्यकृते समासे समासार्थादुत्तरपदात् कब्भवति, पश्चात् कदन्तेन समासो भवति, नान्यथा। तस्मात् समासान्ताधिकारे कपो विधानात् समासार्थादुत्तरपदात् कपि कृते पश्चात् समासेन भवितव्यम्। ततश्च स्त्रीपरत्ययान्तमिह समासपरातपदेकं न भवतीति न भवत्युपसर्जनह्रस्वत्वम्।

15. आपोऽन्यतरस्याम्। (7.4.15)
`बहुखट्वाकः' इति। `शेषाद्विभाषा' (5.4.154) इति कप्।।

16. ऋदृशोऽङि गुणः। (7.4.16)
`क्ङिति च' (1.1.5) इति प्रतिषेधे प्राप्तेऽयं गुणो विधीयते। `अकरत्' इति। कृञो लुङ्, च्लिः, `तिप्, `कृमृदृरुहिभ्यश्छन्दसि' (3.1.59) इति च्लेरङ। `असरत्' इति। `सृ गतौ' (धा.पा.935)। `आरत्' इति। `ऋ गतिप्रापणयोः' (धा.पा.936), `सर्त्तिशास्त्यर्त्तिभ्यश्च' (3.1.56) इति च्लेरङ्, अर्त्तेरजादित्वादाटि कृते `आटश्च' (6.1.90) इति वृद्धिः। `अदर्शत्' इत `इरितो वा' (3.1.57) इत्यङ्। अथ गुणग्रहणं किमर्थम्। अकार एव नोच्येत? नैवं शक्यम्; अकार इत्युच्यमाने दुशेरन्त्यस्य स्यात्। गुणग्रहणे तु सति संज्ञाविधाने नियम इतीक एव स्थाने भवति।।

17. अस्यतेस्थु क्। (7.4.17)
`आस्थत्' इति। `असु क्षेपणे' (धा.पा.1209) `अस्यतिवक्तिखक्यातिभ्योऽङ्' (3.1.52) इति च्लेरङादेशः।।

18. श्वयतेरः। (7.4.18)
`अश्वत्' इति। `टु ओश्वि गतिवृद्ध्योः' (धा.पा.1010)। `जृस्तम्भुम्रुचु' (3.2.58) इत्यादिनाङ् द्वयोरकारयोः पररूपत्वम्।।

19. पतः पुम्। (7.4.19)
`अपप्तत्' इति। `शल हुल पत्लृ गतौ (धा.पा.843,844,845), पुषादिनाङ। मकारो देशविध्यर्थः।।

20. वच उम्। (7.4.20)
`अवोचत्' इति। `वच परिभाषणे' (धा.पा.1842), `अस्यतितक्तिख्यातिभ्यः' (3.1.52) इत्यादिनाङ्। मकारसय तदेव प्रयोजनम्।।

21. शीङः सार्वधातुके गुणः। (7.4.21)
अप्राप्तविषयत्वाद्गुणविधानस्य ङिति सार्वधातुक एतद्विधानम्। पिति तु सामान्यलक्षणैनैव गुणः सिद्धः। लोट्, `आडुत्तमस्य पिच्च' (3.4.92) इत्याटि--शयै, शयावह इत। तस्माद्यत्र गुणो न प्राप्नोति तत्र विधीयते। `शेरते' इति। अदादित्वाच्छपो लुक् `त्मनेपदेष्वनतः' (7.1.5) इति झकारस्यादादेशः। अत्र `शीङो रुट्' (7.1.6) रुडागमो भवति।
`शिश्ये' इति। लिट्, `लिट् च' (3.4.115) इत्यार्धधातुकसंज्ञा, उत्तमपुरुषस्यैकवचनम्, प्रथमपुरुषस्यैकवचनं वा। यदा प्रथमपुरुस्यैकवचनं तदैश्, पूर्ववदेव द्विर्वचनम्, `एरनेकाचोऽसंयोगपूर्वस्य' (6.4.82) इति यणादेशः; अन्यदेट्, टेरेत्त्वम्। अथ गुणग्रहणं किमर्थम्, न `शीङः सार्वधातुके एत' इत्येंवोच्येत? एवं मन्यते--`शीङः' इति सानबन्धकनिर्देशे षष्ठ्युच्यारिता, निवृत्तिधर्मा चानुबन्धः तस्येत्संज्ञायां लोपेन निवृत्तौ प्राप्तायामयमन्यप्रकारो निवृत्तेरवज्ञायेत। तस्य नान्येत्संज्ञा निवर्त्तिका, किं तर्हि? एकारः। एवं तर्हि ङकारस्य स्थान एकार आपद्यते। तस्माद्गुणग्रहणं त्विकमुपस्थापयति। ङकारस्तु तेनैव हेतुना निवर्त्तत इति यद्येवम्, ङकारो नोच्चारयिष्यते, `झियः' इति निर्देशः करिष्यते? नैष शक्यम्; एवं हि निर्देशे सति यङ्लुक्यपि स्यात्--शेशीत, शेश्यतीति।।

22. अयङ्यि क्ङिति। (7.4.22)
`शय्यते' इति। `सार्वधातुके यक्' (3.1.67)। `शाशय्यते' इति यङ्, परत्वान्नित्यत्वाच्च द्विर्वचनात् प्रागयङादेशः, ततः शय्येत्यस्य द्विर्वचनम्, `दीर्घोऽकितः' (7.4.83) इत्यभ्याससय दीर्घत्वम्। `प्रशय्य' इति। `समानकर्तृकयोः पूर्वकाले क्त्वा' (3.4.21), `कुगतिप्रादयः' (2.2.18) इति

समासः, `समासेऽनञ्पूर्वे क्त्वो ल्यप्' (7.1.37) `येम्' इति। `ञचो यत्' (3.1.97)। `शय्या' [नास्ति--काशिकायाम्] इति। `सञ्ज्ञायां समजनि' (3.3.99) इत्यादिना क्यप्।।

23. उपसर्गाद्ध्रस्व ऊहते। (7.4.23)
`समुह्य गतः' इति। `ऊह वितर्के' (धा.पा.648)। यद्यपि यजादित्वात् किति सम्प्रसारणेनैतत् सिध्यति, तथाप्यूहेरपि दीर्घस्याश्रवणं तथा स्यादित्येवमर्थमिदं ह्रस्वविधानम्।
`समीह्यते' इति। `ईह चेष्टायाम्' (धा.पा.632)। `समूहितः' इति। क्तः। `समूहयोऽयमर्थः' इति। `ऋहलोर्ण्यत्' (3.1.124)। `अण इत्येव' इत्यादि। `केऽणः' (7.4.13) इत्यतोऽण्ग्रहणमनुवर्त्तते। `आ उह्यते ओह्यते, समोह्यते' इति। ह्रस्वत्वं न भवति। यद्यव्ग्रहणमनुवर्त्तते, तदा ह्रस्वविधानमनर्थकं स्यात्, उपसर्गादूहतेरुदिति वक्तव्यम्? नानर्थकम्; उत्तारार्थत्वात्--`एतेलिङि' (7.4.24) इति वक्ष्यति, तत्र `ह्रस्वः' इत्येतस्यानुवृत्तिर्यथा स्यात्।।

24. एतेर्लिङि। (7.4.24)
`उदियात्' इति। `इण् गतौ' (धा.पा.1045), आशिषि लिङ, `स्कोः संयोगाद्योरन्ते च' (8.2.29) इति सकारलोपः। `अभीयात्' इति। सवर्णदीर्घत्वेऽकृते ह्रस्वः। `आशिषि लिङि' इत्यादिना सूत्रस्य विषयं दर्शयति। सार्वधातुके हि लिङि दीर्घत्वमिणो न सम्भवतीति नात्रास्योपयोगः। यत्राकृत्सार्वधातुकयोर्दीर्घत्व (7.4.25) मापद्यते; तत्र दीर्घत्वे कृतेऽनेन ह्रस्वो भवति।

25. अकृत्सार्वधातुकयोर्दीर्घः। (7.4.25)
`भृशायते' इति। `भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' (3.1.12) इति क्यङ्। `सुखायते' इति। `सुखादिभ्यः कर्त्तृवेदनायाम्' (3.1.18) इति क्ङ्। `चीयते' इति। कर्मणि लकारः, `सार्वधातुके यक्' (3.1.67)। `चेचीयते' इति। `गुणो यङ्लुकोः' (7.4.82) इत्यभ्यासस्य गुणः। `तोष्टूयते' इति। `ष्टुञ् स्तुतौ' (धा.पा.1043), `शर्पूर्वाः खयः' (7.4.61) इति खयः शेषः। `चीयात्, स्तूयात्' इति। आशिषि लिङ्।
`प्रकृत्य' इति। पूर्ववल्ल्यप्। स च `कृदतिङ्' (3.1.93) इति कृत्संज्ञकः। ननु च दीर्घश्रुत्याऽजित्येतस्मिन्नुपस्थिते तेनाङ्गं विशिष्यते तत्र विशेषणेन च तदन्तविधिरित्यजन्तस्याङ्गस्य दीर्घत्वेन भवितव्यमिति, इह `ह्रस्वस्य पिति कृति' (6.1.71) तुकि कृतेऽजन्तता नास्ति, ततश्चानजन्तततवादेव दीर्घत्वेन भवितव्यमिति, इह `ह्रस्वस्य पिति कृति' (6.1.71) तुकि कृतेऽजन्तता नास्ति, ततश्चानजन्तत्वादेव दीर्घत्वं न भविष्यति, किमेतन्निवृत्त्यर्थेनाकृद्ग्रहणेन? इत्यत आह--`परत्वात्' इत्यादि। तुकोऽवकाशः--अग्निचिदिति, दीर्घस्यावकाशः--चीयत इति; प्रकृत्य, प्रहृतय--इत्यत्रोभयप्राप्तौ सति, असत्यकृद्ग्रहणे परत्वाद्दीर्घत्वेन तुग्बाध्येत। तस्मादकृद्ग्रहणं कर्त्तव्यम्।
`चिनुयात्' इति। विध्यादिलिङ्, स च `तिङशित्सार्वधातुकम्' (3.4.113) इति सार्वधातुकसंज्ञकः।
`उरुया, धृष्णुया' इति। उरु धुष्णुशब्दयोस्तृतीयैकवचने `सुपां सुलुक्' (7.1.39) इत्यादिना याभावः।।

26. च्वौ च। (7.4.26)
`शुचीकरोति' इति। `उभूततद्भावे' (5.4.50) इत्यादिना च्विः। चकारः पूर्वापेक्षया समुच्चयार्थः।।

27. रीङृतः। (7.4.27)
यिग्रहणमनुवर्त्तते, अकृत्सार्वधातुकयोरिति च। `मात्रीयति' इति। `सुप आत्मनः क्यच्' (3.1.8)। `पित्रीयते' इति। `कर्त्तुः क्यङ् सलोपश्च' (3.1.11) इति क्यङ्। `चेक्रीयते' इति। करोतेर्यङ्। `पित्र्यम्' इति। `पितुर्यच्च' (4.3.79) इति यत्प्रत्ययः; रीङादेशे कृते `यस्येति च' (6.4.148) इतीकारलोपः। कथं पुनः क्ङितोत्युचयमाने तत्रादेशो भवति? इत्याह--`क्ङितीत्येतदिह निवृत्तम्' इति। यद्येवं यिग्रहणस्यापि निवृत्तिः प्राप्नोति, तदेकयोगनिर्दिष्टत्वात्? नैतदस्ति; स्वरितत्वप्रतिबद्धा हि शब्दानामनुवृत्तिः। इह च यिग्रहणस्यैव स्वरितत्वं प्रतिज्ञायत इति तदेवानुवर्त्तते, क्ङिद्ग्रहणस्य स्वरितत्वं न प्रतिज्ञायत इति न तदिहानुवर्त्तते।
`चेकीर्यते' इति। `कृ विक्षेपे' (धा.पा.1409), `ऋत इद्धातोः' (7.1.100) इतीत्त्वे रपरत्वम्। `हलि च' (8.2.77) इति दीर्घः। `निजेगिल्यते' इति। `गृ निगरणे' (धा.पा.1410), `लुपसद' (3.1.24) इत्यादिना यङ्, `यो यङि' (8.2.20) इति लत्वं रेफस्य। अथ दीर्घग्रहणं किमर्थम्, न रिङित्येवोच्येत, `अकृत्सार्वधातुकयोः' (7.4.25) इतिदीर्घत्वेनैव सिद्धमिति, तत्राप्ययमर्थः--उत्तरसूत्रे पुना रिङ्ग्रहणं न कर्त्तव्यं भवति, एतदेव हि तत्रानुवर्त्तिष्यते? न सिध्यति; नाप्राप्ते दीर्घत्वे रिङारभ्यमाणस्तस्य बाधकः स्यात्। भवतु नाम ऋकारस्य यो दीर्घस्तस्य बाधकः, यस्तु कृत आदेशे स्थान्यन्तरस्य प्राप्नोति तस्य कथं बाधकः, न ह्यस्मिन् प्राप्ते रिङारभ्यते? एवं तर्हि मन्दधियां सुखप्रतिपत्त्यर्थ दीर्घोच्चारणम्। ङकारोऽन्त्यादेशार्थः।।

28. रिङ् शयग्लिङक्षु। (7.4.28)

अत्रापि यिग्रहणम्, अकृत्सार्वधातुकं चानुवर्त्तते। तत्र सम्भवव्यभिचाराल्लिङ एव विशेषणाम् न शयकोः। `आद्रियते, आध्रियते' इति। `दृङ् आदरे' (धा.पा.1411), `धृङ् अवस्थाने' (धा.पा.1412) आङ्पूर्वः, तुदादित्वाच्छः। `क्रियात्' इति। `आशिषि लिङ्' (3.3.173)। `बिभृयात्' इति। अत्र बिध्यादिलिङ्, जुहोत्यादित्वात् श्लुः, `श्लौ' (6.1.10) इति द्विर्वचनम्, `भृञामित्' (7.4.76) इतीत्त्वमभ्यासस्य। `कृपीष्ट' इति। `आशिषि लिङ्' (3.3.173)। `उश्च' (1.2.12) इति कित्त्वाद्गुणाभावः।।

29. गुणोऽर्तिसंयोगाद्योः। (7.4.29)

`ॠ गतिप्रापणयोः' (धा.पा.936), `ॠ सृ गतौ' (धा.पा.1098,1099)--इत्येतयोर्भौवादिकजौहोत्यादिकयोर्ग्रहणम्। `छन्दोवत् सूत्राणि भवन्ति' (म.भा.) इत्यतः `बहुलं छन्दसि' (2.4.73) इति शयो लुकं कृत्वाऽर्त्तिति निर्देशः कृतः; अन्यथा हि यद्युच्छतीति निर्देशः क्रियेत, एवं सति जौहोत्यादिकस्य ग्रहणं न स्यात्। अथापीयर्त्तिनिर्देशः क्रियते, एवमपि भौवादिकस्य ग्रहणं न स्यात्। `ॠ' इत्येतन्निर्देशस्तु न कृतः, वैचित्र्यार्थः। पूर्वेण रिङः प्राप्तस्यायमपवादः। `श इत्यसम्भवान्निवृत्तम्' इति। असम्भवस्त्वर्त्तिसंयोगाद्योरशविकरणत्वात्। `अर्यते' इति। यक्। `अर्यात्' इति। आशिषि लिङ्।
अथ संस्क्रियते, संस्क्रियादित्यत्र कस्मान्न भवति, भवति हि करोतिरपि सुटि कृते संयोगाद्यङ्गम्? इत्यत आह--`इहेत्यादि। बहिरङ्गत्वं तु सुटो द्विपदाश्रयत्वात्। गुणस्य पुनरन्तरङ्गत्वमेकपदाश्रयत्वात्। `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इति सुटोऽसिद्धत्वात् संयोगादित्वमङ्गस्य नास्ति। अथापि कथञ्चित् सुटसिद्धत्वं स्यात्, एवमप्यभक्तत्वात् सुटः संयोगादित्वं नास्ति, अतो गुणो न प्रवर्त्तते। अङ्गाधिकारादङ्गावयवः संयोगो गृह्यते। न ह्यत्राभक्तत्वे सुटोऽङ्गावयवः संयोग उपपद्यते। `इयृयात्' इति। `ॠ गतौ' (धा.पा.1098), विध्यादिलिङ्। जुहोत्यादित्वाच्छपः श्लुः, `श्लौ' (6.1.10) इति द्विर्वचनम्, `अर्त्तिपिपर्त्त्योश्च' (7.4.77) इत्यभ्यासस्येत्त्वम्, `अभ्यासस्यासवर्णे' (6.4.78) तीयङ्, `लिङः सलौपोऽनन्त्यस्य' (7.2.79) इति सलोपः।
`अर्त्तिसंयोगाद्योरत्' इति कर्त्तव्ये गुण ग्रहणं वैचित्र्यार्थम्।।

30. यङि च। (7.4.30)

पूरवेम प्राप्तस्य रीङोऽयमपवादः। `अरार्यते' इति। यङ गुणः, रपरत्वम्। `अजादेर्द्वितीयस्य (6.1.2) इति द्विर्वचनम्; हलादिशेषः, `दीर्घोऽकितः' (7.4.83) इति दीर्घत्वम्। ननु चार्त्तेरहलादित्वाद्यङ न प्राप्नोति? इत्यत आह--`अर्त्तेः' इत्यादि।
भवतु नामोपसंख्यानाद्यङ्, रेफादेशृतु द्विर्वचनेन न भवितव्यम्, `न न्द्राः संयोगादयः' (6.1.3) इति प्रतिषेधात्? इत्यत आह--`न न्द्राः संयोगादयः' इति। उक्तं हि ततर--यकारपरस्य रेफस्य प्रतिषेधो वक्तव्यः। तस्माद्रेफादेर्यं इत्येतस्य द्विर्वचनं भवति। `जङ्घन्यते' इति। `नुगतोऽनुनासिकान्तस्य' (7.4.85) इति नुक्, `अभ्यासाच्च' (7.3.55) इति कुत्वम्।।

31. ई घ्रध्मोः। (7.4.31)

अत्र दीर्घोच्चारणं किमर्थम्, दीर्घो यथा स्यात्, ह्रस्वो मा भूत्? नैतदस्ति; ह्रस्वस्यापि हि विधाने अकृत्सार्वधातुकयोर्दीर्घः' (7.4.25) इत्येवं सिध्यति, `च्वौ च' (7.4.26) इति यथायोगं दीर्घो भविष्यति? एवं तर्ह्येतज्ज्ञापयति--`संज्ञापूर्वको विधिरनित्यः' (व्या.प.64) इति। तेन स्वायम्भुवमिति सिद्धं भवति।।

32. अस्य च्वौ। (7.4.32)

`च्वौ च' (7.4.26) इति दीर्घस्यापवादः।।

33. क्यचि च्। (7.4.33)

`अकृत्सार्वधातुकयोर्दीर्घः' (7.4.25) इत्यस्यायमपवादः। चकारः `अस्य' (7.4.32) श्यनुकर्षणार्थः। अथ पृथग्योगकरणं किमर्थम्, नास्य `च्विक्यचोः' इत्येकयोग एव क्रियताम्? इत्यत आह--`पृथग्योगकरणम्' इत्यादि। `न च्छन्दस्यपुत्रम्य' (7.4.35) इत्येवमाद्युत्तरकार्यं क्यचि यथा स्यात्, च्वौ मा भूत्--इत्येवमर्थो योगविभागः कृतः।।

34. अशनायोदन्यधनायाबुभुक्षापिपासागर्धेषु। (7.4.34)

भोक्तुमिच्छा बुभुक्षा। पातुमिच्छा पिपासा। गर्धनं गर्धः। अभिकाङ्क्षेत्यर्थः।।

35. न च्छन्दस्यपुत्रस्य। (7.4.35)

`क्यचि यदुक्तं तन्नभवति' इति। किं पुनस्तत्? इत्याह--`दीर्घत्वमीत्वञ्च' इति। ननु च `अनन्तरस्य विधिर्वा भनत प्रतिषेधो वा' (व्या.प.19) इत्यनन्तरस्य ईत्वस्य प्रतिषेधेन भवितव्यम्, न तु व्यवहितस्य दीर्घत्वस्य? नैष दोषः; `अश्वाधस्यात्' (7.4.37) इत्यश्वाघयोराद्वचनं ज्ञापकम्--दीर्घत्वस्याप्ययं प्रतिषेधो

भवतीति; अन्यथा दीर्घत्वेनैव सिद्धत्वादाकारकरणमनर्थकं स्यात्। `मित्रयुः' इति। `क्याच्छन्दसि' (3.2.170) इत्युप्रत्ययः; `अतो लोपः' (6.4.48) इत्यकारलोपः।
`अपुत्रादीनामिति वक्तव्यम्' ति। पुत्रादीनां प्रतिषेधो न भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`क्यचि च' (7.4.33) इत्यस्यानन्तरं पुत्रस्येति वक्तव्यम्, किमर्थमिदम्? `नच्छन्दसि' इति प्रतिषेधं वक्ष्यति तद्बाधनार्थम्। एवं `अपुत्रस्य' इति नञ् उच्चारयितव्यो न भवति। तदिदं `क्यचि च' (7.4.33) इत्यस्यानन्तरं पुत्रस्येति वक्तव्ये यदिहापुत्रस्येति वचनं तत् पूत्रादीनां प्रतिषेधो यथा स्यादित्येवमर्थम्। एतच्च पुत्रस्योपलक्षणत्वाल्लभ्यते।।

36. दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति। (7.4.36)

37. अश्वाघस्यात्। (7.4.37)
`एतदेवाद्ववचनं ज्ञापकम्' इत्यादि। कथं कृत्वा ज्ञापकम्? यदि `न च्छन्दसि' (7.4.35) इत्यनन्तरस्यैवेत्वस्यायं प्रतिषेधः तदाऽद्वचनमनर्थकं स्यात्, `अकृत्सार्वधातुकयोः' (7.4.25) इत्यनेनैव सिद्धत्वात्, कृतञ्च, तस्मादेतज्ज्ञापयति--दीर्घस्याप्ययं प्रतिषेधो भवतीति।।

38. देवसुम्नयोर्यजुषि काठके। (7.4.38)
`न च्छन्दसि' (7.4.35) इति प्रतिषेधे प्राप्ते देवसुम्नयोरिदमारभ्यत आद्वचनम्। `काठके' इति। यजुष एवैतद्विशेषणम्। कठस्येदं यजुः काठकम्--`गोत्रचरणाद्वञ्' (4.3.126)।।

39. काव्यध्वरपृतनस्यर्चि लोपः। (7.4.39)
`काव्यन्तः' इति। `अलोऽन्त्यस्य' (1.1.52) लोपः। क्यजन्ताच्छतृप्रत्ययः, तदन्ताज्जस।।

40. द्यतिस्यतिमास्थामिति किति। (7.4.40)
छन्दसि, यजुषि, ऋचीति सर्व निवृत्तम्; तेन सामान्येनायं विधिः। `दो अवखण्डने' (धा.पा.1148), `षो अन्तकर्मणि' (धा.पा.1147)। `मा माने' (धा.पा.1062), `माङ माने' (धा.पा.1142), `मेङप्रणिदाने' (धा.पा.961)--`गामादाग्रहणेष्वविशेषः' (व्या.प.124) इति त्रयाणामपि ग्रहणम्। `ष्ठा गतिनिवृत्तौ' (धा.पा.928)। तत्राद्यस्य `दो दद्घोः' (7.4.46) इति दत्त्वे प्राप्ते शेषाणां `घुमास्था' (6.4.66) इत्यादिसूत्रेण ईत्त्वे प्राप्त इत्त्वं विधीयते।।
`अवदाय' इति। पूर्ववत् क्त्वो ल्यप्। `अवदाता' इति। तृच्।
द्यतिस्यतति श्तिपा निर्देशोऽयं यङलुग्निवृत्त्यर्थः। तेन तयोर्यथाप्राप्तमेव भवति--दादत्तः, दादत्तवान्, सासीतः, सासीतवान्।
तपरकरणं मुखसुखार्थम्, न तु दीर्घनिवृत्त्यर्थम्। `भाव्यमानोऽण् सवर्णान्न गृह्णाति' (व्या.प.35) इति दीर्घस्याप्राप्तेः।।

41. शाच्छोरन्यतरस्याम्। (7.4.41)
`शो तनूकरणे' (धा.पा.1145), `छो छेदने' (धा.पा.1146)।
`श्यतेरित्त्वं व्रते नित्यम्' इति। ब्रत इति नोत्तरपदं गृह्यते, किं तर्हि? विषयः। व्रतविषये श्यतेर्नित्यमित्त्वं भवति। `संशितो ब्राह्मणः' इति। आचारविशेषे व्रताख्ये यत्नवानेवोच्यते संशितव्रत इति। संशितं यत्नेन सम्यक् प्रतिपादितं व्रतं यस्य येन वा स एवमुच्यते। ननु च व्रतविषये विधीयमानेनेत्त्वेनैव व्रतस्य द्योतितत्वाद्व्रतशब्दस्य प्रयोगो न प्राप्नोति? नैष दोषः; अन्यत्र हीत्वं भवत्येव, व्रते तु नित्यमाख्यायते, सोऽयं सामान्यशब्दो भवति। अत्र विशेषार्थो व्रतशब्दः प्रयुज्यते। परनिपातस्त्वाहितग्न्यादित्वाद्द्रष्टव्यः। `व्यवस्थितविभाषाविज्ञानात् सिद्धम्' इति।
एतदागमवाक्येन द्रढयितुमाह--`देवत्रातः' इत्यादि। `त्रैङ् पालने' (धा.पा.965), क्तः। `नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्' (8.2.56) इति संज्ञाविषये नत्वं न भवत्येव--देवैस्त्रातो देवत्रातः, देवशब्दोऽत्र संज्ञोपलक्षणार्थः। केवलस्यापि त्रातशब्दस्य संज्ञायां न नत्वं प्रतिपद्यते। एवं सज्ञाया अन्यत्रोभयं भवति--त्राणः, प्रात इति। `गलः' इति। गिरतेः पचाद्यच्। `ग्रो यङि' (8.3.20), `अचि विभाषा' (8.2.21) इति प्राण्यङ्गे नित्यं लत्वम्--गल इति। विषे तु भवत्येव--गर इति। `ग्राहः' इति। ग्राहेः `विभाषा ग्रहः' (3.1.143) इति णप्रत्ययः। जलचरे नक्रे नित्यं णप्रत्ययो भवति--ग्राह इति। आदित्यसोमादिषु पचाद्यज्भवत्येव--ग्रह इति। `इतियोगे च सद्विधिर्न भवति' इति। वर्षतीति धावति, हन्तीति पलायते इति--`लक्षमहेत्वोः क्रियायाः' (3.2.123) इति सत्संज्ञकौ शतृशानचावितियोगे न भवत एव, व्यवस्थितविभाषया। तत्र `नन्वोर्विभाषा' (3.2.121) इत्यतो विभाषाग्रहणमनुवर्त्तते--अर्जयन् वसति, अधीयानो वसति। तत्रासतीति योगे नित्यावेव तौ भवतः। ननु चेतिशब्देनैव हेत्वर्थस्य द्योतितत्वाद्वर्षतीति, हन्तीत्येवमादौ सद्विधिर्न भविष्यति, यत्र त्वितिशब्दो न प्रयुज्यते तत्र भवत्येव--अर्जयन् वसतीत्यादौ, तदत्र विभाषाधिकारनन्तरेणापि विभाषा लभ्यत एव; अतो विभाषाग्रहणं नानुवर्त्त्यमेव, तस्मादनुदाहरणमेतद्व्यवस्थितविभाषायाः? इदं तर्ह्युदाहरणम्--करिष्यामीति व्रजतीति। अत्र `लृट् शेषे च' (3.3.13) इति चकारात् क्रियायामुपपदे

क्रियार्थायां लृट्, तस्य लृटः सद्विधिर्न भविष्यतीति; व्यवस्थितविभाषया। अप्रथमासमानाधिकरणेनेतियोगादन्यत्र नित्यं भवति--करिष्यन्तं पश्येति, प्रथमासमानाधिकरणे तु विकल्पः--ब्राह्मणः करिष्यन् ब्राह्मणः करिष्यतीति।

`मिथः' इत्यादि। मिथ इति सहभावेन। देवत्रातगलग्राहादयस्त्राणगरग्रहादिभिः सहैकस्मिन् विषये विकल्पेन नान्वाख्यायन्त इत्यर्थः। `गवाक्षः' इति। `सर्वत्र विभाषा गोः' (6.1.122) इत्यनुवर्त्तमाने `अवङ् स्फोटायनस्य' (6.1.123) इति वातायने नित्यमवङ् भवति, प्राण्यङ्गो तु गोऽक्षमित्यत्र न भवति; अन्यत्रोभयम्--गवाक्षम्, गोऽक्षमिति। `संशितव्रतः' इति। व्रते नितयमित्त्वम्। अन्यत्र विकल्पेन--निशितम्, निशातं शस्त्रम्। तीक्ष्णमित्यर्थः। तदेतत् सर्वं व्यवस्थितविभाषया लभ्यते। क्वचिद्विधिरेव, क्वचित् प्रतिषेध एव, क्वचिदुभयमपीत्येवंविधा विविधार्थे स्थितां विभाषा व्यवस्थितविभाषा। एतच्च विविधमवस्थानमाकृतौ पदार्थे वेदितव्यम्। तत्र हि सर्व लक्ष्यराशिमेकीकृत्याभिसंक्षिप्य तदुभयमुपदिश्यते। विधिः प्रतिषेधश्च जातौ पदार्थ उभयमपि भवतीत्येतावतोऽर्थस्य प्रतिपादने शास्त्रस्य व्यापारः। यस्तु क्वचिदर्थे विधिरेव, क्विचित् प्रतिषेध एव, क्वचिदुभयमित्यसङ्करेण व्यवस्थानम्, एतच्चाविच्छिन्नाचार्यपारम्पर्योपदेशाल्लभ्यते।।

42. दधातेर्हिः। (7.4.42)

धुमास्था' (6.4.66) इति सूत्रेणेत्त्वे प्राप्ते दधातेर्हिरादेशो विधीयते। श्तिपा निर्देशो यङ्लुग्निवृत्त्यर्थः। तेन यङ्लुगन्तस्य हिरादेशो न भवति--दाधीतः, दाधीतवान्, दाधीत्वेति।।

43. जहीतेश्च क्त्वि। (7.4.43)

पूर्ववदीत्त्वे प्राप्ते क्त्वाप्रत्यये हिरादेशो विधीयते। यद्यपि `हि गतौ' (धा.पा.1257) इत्यस्यापि हित्वेति सिध्यति, तथापि जहातेरिकारनिवृत्त्यर्थ वचनम्। अथ किमर्थं जहातेरिति श्तिपा निर्देशः, न `हः' एवोच्यते? इत्याह--`जहातेः' इत्यादि। एतेन `ओहाङ् गतौ' (धा.पा.1089) इत्यस्य निवृत्त्ये निर्देशः क्रियत इति दर्शयति। यदि हि `हः' इति निर्देशः स्यात्, तदा तस्य साधारणत्वाज्जिहातेरपि स्यात्। जहातेरिति श्तिपा निर्देशे तु न भवति। अनेन जहातिरेव निर्दिश्यते, न जिहातिः। न हि तस्यैवंविधो निर्देशे यङ्लुगन्तस्य न भवति--जाहात्वेति। ईत्वमप्यत्र न भवति; तद्विधावपि श्तिपा निर्देशात्। अत्र चेटि कृते `आतो लोप इटि च' (3.4.64) इत्याकारलोपः।।

44. विभाषा छन्दसि। (7.4.44)

45. सुधितवसुधितनेमधितधिष्वधिषीय च। (7.4.45)

चकारेण छन्दसीत्यनुकृष्यते। `इडागमो वा' इति। यदेडागमस्तदा `आतो लोप इटि च' (6.4.64) इत्याकारलोपः। `सुधितम्' इति, `कुगतिप्रादयः' (2.2.18) इति समासः। `वसुधितम्' इति। विशेषणसमासः। पूर्ववदाकारलोपः। `नेमधितम्' इति। `सामि' (2.1.27) इति द्वितीयासमासः। सामीति तत्रार्थग्रहणमित्युक्तम्। नेमशब्दश्चायं सामिशब्दपर्यायः। `धिष्व' इति। `थासः से' (3.4.80), `सवाभ्यां वामौ' (3.4.91) इति वकारः। `द्विर्वचनाभावः' इति। `श्लौ' (6.4.112) इत्यकारलोपः; घकारस्य `खरि च' (8.4.55) इति चर्त्वम्--तकारः, `दधस्तथोश्च' (8.2.38) इत्यभ्यासस्य भष्भावेन धकारः। `धिषीय' इति। आशिषि लिङ्, `इटोऽत्' (3.4.106) इत्यत्त्वम्।।

46. दो दद्घोः। (7.4.46)

छन्दसीति निवृत्तम्; पूर्वसूत्रे चकारेणानुकृष्टत्वात्। `दत्तः दत्तवान्' इति। क्तक्तवतू। `दत्तिः' इति। क्तिन्। `धीतः, धीतवान्' इति। पूर्ववदीत्त्वम्। अथ `दधातेर्हिः' (7.4.42) इति हिरादेशः कस्मान्न भवति? इत्यत आह--`घेट एतद्रूपम्' इत्यादि। `धेट् पाने' (धा.पा.902) इत्यस्य रूपम्, न दधातेः। तेन हिरादेशो न भवतीति भावः। `दातम्' इति। `दाप् लवने' (धा.पा.1059) इत्येतस्यैतद्रूपम्; तस्य घुसंज्ञा नास्ति; `अदाप्' (1.1.20) इति प्रतिषेधात्। `दो दद्घोः' इति जश्त्वेनायं न्र्देशः, तत्र न ज्ञायते--किं तककारान्तोऽयमादेशः? आहोस्विद्दकारान्तः? उत धकारान्तः? अथ थकारान्त इति वा?--इति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्त्तुमाह--`अयमादेशः' इत्यादि। कथं ज्ञायते? इत्याह--`एवं ह्युक्तम्' इत्यादि। यद्ययमादेशस्तकारान्तः स्यात्, सुदत्तेत्यत्र `इकः काशे' (6.3.123) इत्यनुवर्त्तमाने `दास्ति' (6.3.124) इती दीर्घत्वं स्यात्। अथ दकारान्तः, तदा `रदाभ्याम्' (8.2.42) इति निष्ठानत्वं स्यात्। अथ धकारान्तः, तदा `झषस्तथोर्घोऽधः' (8.2.40) इति झषन्ताद्धत्वमापद्येत निष्ठातकारस्य। `थान्तेऽदोषः' इति। नञोऽत्र प्रश्लेषः। थान्ते दोषो नास्तोत्यर्थः। `तस्मात्' इत्यादि। यस्मात् त्रिषु पूर्षकेषु पक्षेषु दोषः, तस्मात्थान्तोऽयमादेशः। उदाहरणे दत्तः, दत्तवानिति `खरि च' (8.4.55) इति चर्त्वम--थस्य तः।

`यदि तु' इत्यादि। द्वौ पक्षौ भाध्ये `दस्ति' (6.3.124) इत्यत्र दर्शितौ--`दा' इत्येतस्मिंस्तकारादौ, तकारान्ते वेति। तत्र यदि तकारान्ते `दा' इत्येतस्मिन् दीर्घत्वं भवतीति--एष पक्ष आश्रीयते, तदैव दीर्घत्वप्राप्तिदोषः। यदि तु तकारादौ `दा' इत्येतस्मिन् दीर्घत्वं भवतीति--एष पक्ष आश्रीयते, तदा

तान्तेऽप्यदोषः। यत्र तकारादित्वम्, `दा' इत्येतस्य, तत्र दीर्घत्वं भवत--नीत्तम्, वीत्तमित्यादौ, न तु सुदत्तादौ। तस्मात् पाक्षिको दीर्घप्राप्तिदोषः।
`दान्तधान्तयोरपि' इत्यादि। तकारादिसन्नियोगेन हि दान्तधान्तावादेशाविमौ विहितौ नोत्सहेते तद्विघातनिमित्ततामुपगन्तुम्। तस्माद्दान्तधान्तयोरप्यदोषः।
`अवदत्तम्' इत्यादि। आदिकर्मणि=क्रियारम्भे। आदिभूतक्रियाक्षण इत्यर्थः। अत्र `अच उपसर्गात्तः' (7.4.47) इति तकारादेशे प्राप्त एतेऽवदत्तादयो निपात्यन्ते। `आदिकर्मणि' इति च सर्वेषां विशेषणम्, न तु प्रदत्तमित्यस्यैव। आदिकर्मणोऽन्यत्र `अच उपगर्गात्तः' (7.4.47) इति तकारादेशो भवति, न तु दद्भावः--अवत्तम्, वीत्तम्, सूत्तम्, अनूत्तमिति।
`अनुपसर्गाः' इत्यादि। अथ वा--अवादयो ददातिं प्रत्युपसर्गसंज्ञका एव न भवन्ति; तद्वाच्यायाः क्रियया अन्या या क्रिया गमिर्वाच्या तद्विषयत्वात्--अवगतं दत्तमवदत्तमित्येवमन्यत्रावगन्तव्यम्। तस्माद् गमिं प्रत्युपसर्गसंज्ञका एते, न ददातिं प्रति। तथा ह्युक्तम्--यं प्रति क्रियायृक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञका भवन्तीति। तस्मादुपसर्गसंज्ञाया अभावान्नैवात्र तकारः प्रसजेदिति किं निपातनेन!।।

47. अच उपसर्गात्तः। (7.4.47)

ददादेशस्यायमपवादः। `त इत्ययमादेशो भवति' इति। अकार उच्चारणार्थः। प्रत्तमित्यादावाकारस्य तकारे कृते दकारस्य चर्त्वम्--तकारः `नीत्तम्' इति। `दस्ति' (6.3.124) इति दीर्घत्वम्। `अवदात्तम्' इति। `दैप् शोधने' (धा.पा.924) इत्येतस्यैतद्रूपम्।
`आदेरलः प्राप्नोति' इति। `आदेः परस्य' (1.1.54) इति वचनात्। `अच इत्येतद्द्विरावर्त्तयितव्यम्' इति। `अचः' इत्येतस्य द्विरावृत्तावचोऽच इति द्वे शब्दरूपे भवतः। तत्रैकं पञ्चम्यन्तम्; अपरं षष्ठ्यन्तम्। तत्रैकेनोपसर्गो विशिष्यते--अजन्तादुपसर्गादिति। इतरेणापि स्थानी निर्दिश्यत इत्येवमाकारस्यायमादेशो भवति। `द्वितकारो वा' इति। अथ वा--`अच उपसर्गात्तः' इति। द्वितकार एव संयोगादेशो निर्दिश्यते, तेनास्यानेकास्त्वात् सर्वस्यैव भवति, यदि तर्हि द्वितकारकोऽयं निर्देशस्तदा `अपो भि' (7.4.48) इत्यनेनापि सर्वादेशः प्राप्नोति, नेकाल्त्वादित्याह--`अषो भि' इत्यादि। `अपो भि' इत्यत्र पञ्चम्यन्तमच इत्यनुवर्त्तते, तेन सत्यप्यनेकाल्त्वे `तस्मादित्युत्तरस्य' (1.1.67) इति पकारमात्रस्य भविष्यति, न सर्वस्येति।
`द्यतेः' इत्यादि। द्यतेरित्यस्यावकाशः--यत्राजन्त उपसर्गो न भवति--निर्दितम्, दुर्दितमिति; अस्यादेशस्यावकाशः--अजन्तादुपसर्गात् परो योऽन्यो घुसंज्ञकः--`डुदाञ् दाने' (धा.पा.1091), अवत्तम्, परीत्तमिति; अजन्तादुपसर्गादुत्तरस्य द्यतेरुभयप्रसङ्गे सति तकार एव भवति विप्रतिषेधेन--अवत्तम्, प्रत्तमिति।।

48. अपो भि। (7.4.48)

`अद्भिः' इति। `झलां जशोऽन्ते' (8.2.39) इति जश्त्वम्--तकारस्य दकारः। `द्वितकारपक्षे तु पूर्वस्यापि `झलां जश्झशि' (8.4.53) इति जश्त्वम्--दकारः। `झरो झरि सवर्णे' (8.4.65) इति पूर्वदकारलोपः।
`सुवः' [`स्ववः' इति। काशिका] इत्यादि। सुवस्, स्वतवस्, मास, उवस्--इत्येतेषां च भकारादौ परतस्त इत्ययमादेश इष्यते च्छन्दसि विषये। स च `व्यत्ययो बहुलम्' (3.1.85) इत्यनेनैव लभ्यत इति वेदितव्यम्।।

49. सः स्यार्धधातुके। (7.4.49)

अत्रापि द्वितकारपक्षेऽनेकाल्त्वात् सर्वादेशः प्राप्नोति, तस्मात् `अचः' इति। पञ्चम्यन्तमनुवर्त्तनीयमिति। अथ वा--`निर्दिश्यमानस्यादेशा भवन्ति' (व्या.प.106) इति सकारस्यैव भविष्यति। `वत्स्यति' इति। `वसनिवासे' (धा.पा.1942)। `जिघत्सति' इति। अदेः सन्, `लुङ्सनोर्घस्लृ' (2.4.37) इति तस्य घस्लादेशः। `वक्ष्यति' इति। `वच परिभाषणे' (धा.पा.1842), `चोः कुः' (8.2.30) इति कुत्वम्। `घासः, वासः' इति। भावे घञ्, `घञपोश्च' (2.4.38) इत्यदेर्घस्लादेशः। `आस्से, वस्से' इति। `आस उपवेशने' (धा.पा.1021), `वस आच्छादने' (धा.पा.1023), अनुदात्तेत्त्वादात्मनेपदम्, `चासः से' (3.4.80), अदादित्वाच्छपो लुक्।
अथ `सः स्यतिङ्' इति कस्मान्नोक्तम्? नैवं शक्यम्; इहापि न स्यात्--व्यतिवत्सीष्ठा इति।।

50. तासस्त्योर्लोपः। (7.4.50)

`अनद्यतने लुट्' (3.3.15) तासिः, सिप्। `कर्त्तासे' इति। `थासः से' (3.4.80)। `त्वमसि' इति। `स भुवि' (धा.पा.1065), पूर्ववच्छपो लुक्।
`व्यतिसे' इति। `कर्त्तरि कर्मव्यतीहारे' (1.3.14) इत्यात्मनेपदं भवति। `थासः से' (3.4.80), `श्नसोरल्लोपः' (6.4.111) इत्यकारलोपः।
अथ `आदेशप्रत्यययोः' (8.3.59) इति षत्वं कस्मान्न भवति? इत्यत आह--`अस्तेरकारसकारयोः' इत्यादि। अकारसकारयोर्हि लुप्तयोः प्रत्ययमात्रमवशिष्यते, तदेव पदम, अतः `सात्पदाद्योः' (8.3.111) इति प्रतिषेधात् षत्वं न भविष्यतीति भावः।।

51. रि च। (7.4.51)

`कर्त्तारौ, कर्त्तारः' इति। लुट्, तस्, झिः, `लुटः प्रथमस्य डारौरसः' (2,4,85) इति तसो झेश्च यथाक्रमं रौरसौ भवतः। `अध्येतारौ, अध्येतारः' इति। इङो ङित्त्वादत्मनेपदम् आताम्, झः तयोश्च पूर्ववद्रौरसौ। अस्ते रेफादिप्रत्ययो न सम्भवतीति नास्त्युदाहरणम्। केचित्तु--`व्यतिरे' इत्युदाहरणं दर्शयन्ति; एतच्च

च्छब्दस्येवं प्रयोगो यद्यसति ततो युक्तम्, अथ तु नास्त्येवं सत्ययुक्तम्। `इरयो रे' (6.4.76) इति रेभावश्छन्दसि विधीयते, `यथादृष्टानुविधिश्छन्दसि' (व्या.प.68) इति। चकारः पूर्वापेक्षया समुच्चयार्थः।।

52. ह एति। (7.4.52)
`कर्त्ताहे' इति। कृञो लुट्, आत्मनेपेदम्, उत्तमपुरुषैकवचनम्, इट्, टेेत्त्वम्। अत्र सकारस्यानेन हः। `व्यतिहे' इति। अस्तेः `कर्त्तरि कर्मव्यतिहारे' (1.4.14) इत्यात्मनेपदम्, पूर्ववदकारलोपः। `एति' इति। तपरकरणं सप्तम्यामयादेशपरीहारार्थम्। अयादेशे हि सति सन्देहः स्यात्--कस्यायं निर्देश इति--किमयादेशस्य? अथैकारस्य?।।

53. यीवर्णयोर्द्दीधीवेव्योः। (7.4.53)
स्वरितत्वाल्लोपोऽनुवर्त्तते, न त्वनन्तरो हकारः, तस्यास्वरितत्वाप्रतिज्ञानात्। यकारे त्विकार उच्चारणार्थः। यिश्च इवुर्णश्च तौ योवर्णौ तयोः परतः `दीधीङ् दीप्तिदेवनयोः' (धा.पा.1076) `वेवीङ् वेतिनां तुल्ये' (धा.पा.1077)--इत्यनयोर्लोपो भवति, स च `अलोऽन्त्यस्य' (1.1.52) इत्यन्त्यस्य। यकारादौ श्रवणे प्राप्त इवर्णादौ `एरनेकाचः' (6.4.82) इति यणादेशे प्राप्ते लोपवचनमिदम्। `आदीध्य, आवेव्य' इति। ल्यप्। `आदीध्यत, आवेवित' इति। `भावकर्मणोः' (1.3.13) इत्यात्मनेपदम्, `सार्वधातुके यक्' (3.1.67)। `आदीधित, आवेवित' इति। `भावकर्मणोः' (1.3.13) इत्यात्मनेपदम्, `सार्वधातुके यक्' (3.1.67)। `आदीधित, आवेवित' इति। तृच्। `आदीध्यनमादेव्यनम्' इति। ल्युट्, `दौधीवेवीटाम्' (1.1.6) इति गुणनिषेधाद्यणादेशः। अत्र यद्यपि निमित्त्योः कार्यिणोः समानत्वम्, तथापि यथासंख्यं न भवति; अस्वरतत्वात्। वर्णग्रहणमिवर्णे श्रूयमाणे यथा स्यात्, इह मा भूत्--आदीधयतेः, आवेवयतेर्णिजन्ताण्णवुल्, आदीध्यकः, आदेव्यकः। अत्र हि नित्यत्वाण्णिलोपे कृते प्रत्ययलोपलक्षणन (1.1.62) प्राप्नोति, अतो वर्णग्रहणान्न भवति।।

54. सनि मीमाघुरभलभशकपतपदामच इश्। (7.4.54)
`सः स्यार्धधातुके' (7.4.49) इत्यतः सीत्यनुवर्त्तते, तच्च सोन विशेषणम्। `मीति मीनातिमिनत्योः' इति। `मीञ् हिंसायाम्' (धा.पा.1476), `डुमिञ् प्रक्षेपणे' (धा.पा.1250)--इत्येतयोः। ननु च `मी' इत्येतस्मिन्नुच्चार्यमाणे मिनोतेर्ग्रहणं नोपपद्यते? नैवम्; अस्यापि `अज्झनगमां सनि' (6.4.16) इति दीर्घत्वे कृते मीत्येवं रूपं भवति। एवमपि लक्षणप्रतिपदोक्तपिभाषया (व्या.प.3) तस्य ग्रहणं नोपपद्यते? नैतदस्ति; अत्र हि घुसंज्ञकत्वात् `घु' इत्यस्य पूर्वनिपातमकुर्वतैतत् सूचितम्--यथा पूर्वनिपात इह नापेक्ष्यते, तथान्यदपि किञ्चिच्छास्त्रीयं वचनमिति। तेनेयं परिभाषा नापेक्ष्यत इति युक्तं मिनोतेरपि ग्रहणम्। `मा हि गामादाग्रहणेष्वविशेषः' इति। मेङप्रभृतीनां पूर्वोक्तानां त्रयाणां ग्रहणम्। `घु' इति घुसंज्ञकौ `दा' `धा'--इत्यतौ गृह्यते। `रभ राभस्ये' (धा.पा.974), `डुलभष् प्राप्तौ' (धा.पा.975), `शक्लृ शक्तौ' (धा.पा.1261), `शल हुल पत्लृ गतौ' (धा.पा.843,844,845), `पद गतौ' (धा.पा.1169)--एषामचः स्थाने सकारादौ प्रत्यये सनीस् भवति।
अच इत्यस्य ग्रहणं सर्वादेशो मा भूदित्येवमर्थम्। असति हि तस्मिन्ननेकाल्त्वात् सर्वादेशः स्यात्। `प्रमित्सनि' इति। `अत्र लोपोऽब्यासस्य' (7.4.58) इत्यभ्यासलोपः, `सः स्यार्धधातुके' (7.4.49) इति तस्य सः। `अपमित्सते' इति। `पूर्ववत्सनः' (1.3.62) इत्यात्मनेपदम्। एवं आरिप्सते' `आलिप्सते' इत्यत्रापि। `खरि च' (8.4.55) इति चर्त्वम्--भकारस्य पकारः, `त्कोः संयोगाद्योरन्ते च' (8.2.29) इति सलोपः।।

55. आप्ज्ञप्यृधामीत्। (7.4.55)
`ईप्सति' इति। `आप्लृ व्याप्तौ' (धा.पा.1260)। `ज्ञीप्सति' इति। `ज्ञा अवबोधने' (धा.पा.1507), णिच्, `अर्त्ति' (7.3.36) इत्यादिना पुक्, `मारणतोपणनिशामनेषु ज्ञा' (धा.पा.811) `मिच्च' इति मित्संज्ञायां ह्रस्वः, `णेरनिटि' (6.4.51) इति णिलोपः। `ईर्त्सति' इति। `ऋधु वृद्धौ' (धा.1271), ईकारः, रपरत्वं च, श्रकारस्य `खरि च' (8.4.55) इति चर्त्वम्--तकारः।
इह च ज्ञापिनाङ्गेनाज्विशेषयितव्यः, न त्वचा ज्ञापिः, व्यभिचाराभावात्। न हि ज्ञपरजन्ततां व्यभिचरति। अचि तु ज्ञपिनाङ्गेन विशिष्यमाणे सर्वस्य ज्ञपिसम्बन्धिनोऽच ईत्त्वेन भवितव्यम्, तथा च णेरपीत्त्वे कृते ज्ञीप्सतीति न सिध्येदित्येतच्चोद्यमाशङ्क्याह--`ज्ञपेर्द्वावचौ' इत्यादि। तत्रेत्त्वास्यावकाशोऽजाद्यः, णिलोपस्यावकाशः--कारणा, हारणा; द्वितीयस्याच उभयप्रसङ्गे णिलोप एव भवति पूर्वविप्रतिषेधेन--ज्ञीप्सतीति। `इतरस्य' इति। अकारस्य। `अर्दिधिषति' इति। लघूपधगुणः, रपरत्वम्, `अजादेर्द्वितीयस्य' (6.1.2) इति `धि' इत्येतद्द्विरुच्यते। रेफस्य तु द्विर्वचनं न भवति; `न न्द्राः संयोगादयः' (6.1.3) इति प्रतिषेधात्। अभ्यासस्य जश्त्वम्--जकारः। तकारो मुखसुखार्थः।।

56. दम्भ इच्च। (7.4.56)

contin...

56. दम्भ इच्च। (7.4.56)
`धिप्सति, धीप्सति' इति। `दन्भु दम्भे' (धा.पा.1270)। तस्य यदा `सनीवन्तर्ध' (7.2.49) इत्यादिनेण्न क्रियते, सनि सकारादाविकारः, ईकारश्च, `हलन्ताच्च' (1.2.10) इति कित्त्वादनुनासिकलोपः, भकारस्य चर्त्त्वे पकारः।।

57. मुचोऽकर्मकस्य गुणो वा। (7.4.57)
`मोक्षते' इति। `मुच्लृ मोक्षणे' (धा.पा.1430)। `चोः कुः' (8.2.30) इति कुत्वम्; `इण्कोः' (8.3.57) इति षत्वम्, `कर्मवत्कर्मणा' (3.1.87) इत्यदिना कर्मवदतिदेशादात्मनेपदम्। `स्वयमेव' इति वचनं कर्मकर्त्तृत्वप्रदर्शनार्थम्। वत्सं मोक्तुमिच्छति, स मोक्तुमिष्यमाणो मुक्तिक्रियां प्रत्यानुकूल्यं यदा प्रतिपद्यते तदा स्वतन्त्रत्वादस्मिन् कर्मणि कर्त्तृत्वेन विवक्षिते मुचिरकर्मको भवति।
अथ गुणग्रहणं किमर्थम्, नोदित्येवोच्येत? ननु चैवं सत्योकारश्चकारस्य स्थाने `अलोऽन्त्यस्य' (1.1.52) प्राप्नोति, गुणग्रहणादिक एव भवति, संज्ञाविधाने नियमात्? नैतदस्ति; अच इत्यनुवर्त्तते। तेनान्त्यस्य न भविष्यति। एवं तर्ह्येतज्ज्ञापयति--अच इति निवृत्तमिति। तेन `अत्र लोपोऽभ्यासस्य' (7.4.58) इत्यत्रातोऽभ्यासस्य लोपो न भवति। सति त्वजधिकारे, मा भूत् तस्यानुवृत्तिरपार्थिकेत्यच एव लोपः स्यात्।।

58. अत्र लोपोऽभ्यासस्य। (7.4.58)
अत्रेत्यनेन यन्निर्दिश्यते तद्दर्शयितुमाह--`यदेतत्' इत्यादि। अथात्रग्रहणं किमर्थम्? `सनि मीमा' (7.4.54) इत्यादौ प्रकरणे यथा स्यात्; ददौ, ददतुरित्यादौ मा भूदिति चेत्? न; यदि ह्येतत् प्रयोजनमभिमतं स्यात् `सनि मीमाधुरभलभशकपतपदामच इसभ्यासलोपश्च' इत्येवमुद्दिश्येत, एवमिहैव प्रकरणे भविष्यति, नान्यत्र, ततो निष्प्रयोजनमत्रग्रहणमित्यत आह--`सनि मीमाधुरभलभ' इत्यादि। `विषयावधारणार्थम्' इति। अभ्यासलोपविषयस्य नियमार्थमित्यर्थः। तामेव तस्य विषयनियमार्थतां दर्शयितुमाह--`अत्रैव' इत्यादि। अत्रेत्यनेनेसादिविषयो निर्दिश्यते। इसादिविषय एवाभ्यासलोपो यथा स्यादिति नियमेन यद्व्यवच्छिन्नं तद्दर्शयितुमाह--`सन्वद्भावविषये न भवति' इति। `अमीमपत्' इति। `मीञ् हिंसायाम्' (धा.पा.1476) `मीनातिमिनोतिदीङां ल्यपि च' (6.1.50) इत्यात्त्वम्, णिच्, पूर्ववत् पुक्, लुङः, च्लेश्चङ्, णिलोपः, उपधाह्रस्वत्वम्, द्विर्वचनम्, अट्, `सन्वल्लघुनि चङ्परे' (7.4.93) इत्यादिना सन्वद्भावे `सन्यतः' (7.4.79) इतीत्त्वम्, `दीर्घो लघोः' (7.4.94) इति दीर्घः। `अदीदपत्' इति। `डुदाञ् दाने' (धा.पा.1091) पूर्ववण्णिजादिः। अत्रग्रहणादिहाभ्यासलोपो न भवति।
कथं पुनः सन्यभ्यासलोप उच्यमान इह प्राप्नोति, यन्निवृत्त्यर्थमत्रग्रहणं क्रियते? इत्याह--`सन्वल्लघुनि' इत्यादि। यथैव हि सन्वद्भावातिदेशादित्त्वं भवति, एवमभ्यासलोपः स्यात्। इहालोन्त्यपरिभाषया `अलोऽन्त्यस्य' (1.1.52) लोपेन भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह--`सर्वस्य' इत्यादि। कथं पुनः सर्वस्य लभ्यते? इत्यत आह--`तदर्थमेव' इत्यादि। एतेनैवकारेण विषयावधारणार्थतां निरस्यति। यद्येवम्, सन्वद्भावविषयेऽपि प्राप्नोति? एवं मन्यते--सन्वद्भावविषयेऽप्यभ्यासलोपप्रसङ्गः परिहर्तु शक्यते। तत्र सन्वदिति सनाश्रयकार्यमतिदिश्यते। न चाभ्यासलोपः सनमेवापेक्षते, किं तर्हि? इस्भावादिकमपि। तदभावादसत्यप्यत्रग्रहणेऽमीमपदित्यादिष्वभ्यासलोपो न भविष्यति। तस्मादतिरिच्यत एवात्रग्रहणमिति न कर्त्तव्यमेव। तत् क्रियते--सर्वस्याभ्यासलोपो यथा स्यादिति।
कथं पुनः क्रियमाणेऽप्यत्रग्रहणे सर्वस्य लोपो लभ्यते? ग्रन्थाधिक्यादर्थाधिक्यमित्येके। अत्रग्रहणेन महत् सूत्रं प्रयणतैतत् सूचितम्--महतः स्थानिनोऽयं लोपः कर्त्तव्यः। एवञ्चायं महतः स्थानिनः कृतो भवति यदि सर्वस्याभ्यासलोपः क्रियते, नान्यथेत्यन्ये।
`नानार्थकेऽलोन्त्यविधिरित्यपरे' इति। के पुनस्ते? ये विषयावधारणार्थतामत्रग्रहणस्य वर्णयन्ति ते वेदितव्याः। अनर्थकत्वमभ्यासस्य स्थाने द्विर्वचनपक्षे वेदितव्यम्। अत्र हि यस्य स्थाने यच्छब्दान्तरं विधीयते तत् समस्तमेवार्थवत्। एकदेशस्त्वभ्यासोऽनर्थक एव। द्विष्प्रयोगद्विर्वचनपक्षेऽप्यनर्थान्तरवाचित्वादनर्थान्तरवाचित्वादनर्थकताभ्यासस्य।।

59. ह्रस्वः। (7.4.59)
`डुढौकिषते, तुत्रौकिषते' इति। ढौकृ, त्रौकृ--इत्येताभ्यामनुदात्तेत्त्वादात्मनेपदिभ्यां सन्, `पूर्ववत्सनः' (1.3.62) इत्यात्मनेपदम्। `अडुढौकत्, अतुत्रौकत्' इति। आभ्यामेव ण्यन्ताभ्यां लुङ्, पूर्ववच्चङादिकार्यम्। `डुढौके, तुत्रौके' इति। लिट, एकवचनम्, तस्यैश्।
`अभ्यासस्यानचि' इत्यादि। अभ्यासस्य यत् कार्यं विधीयते तदनचिपरे भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`वा चरिचलिपतिददोनामच्याक्याभ्यासस्य' (वा.658) इत्यागमविधानसामर्थ्याद्धलादिशेषेण न भवितव्यम्। हलादिशेषे हि सत्यादेशस्यागमस्य च कश्विद्विशेषो नास्तीत्यादेशमेव विदध्यात्। एवञ्च--अभ्यासलोपाभावात् पारिशेध्यादचोऽन्यत्रैव भविष्यति।।

60. हलादिः शेषः। (7.4.60)
`हलादिः' इति। हल् चासावादिश्चेति हलादिः--कर्मधारयोऽयम्, न तु षष्ठीसमासः--हलामादिर्हलादिः। यदि षष्ठीसमासः स्यात्, तदायमर्थः स्यात्--अभ्यासस्य यै हलस्तेषामादिः शिष्यत इति। तथा च--आनक्षतुः, आनक्षुरित्यत्र `अक्षू व्याप्तौ' (धा.पा.654) इत्यस्याजादित्वाद्द्वितीयस्यैकाचोऽभावात्

प्रथमस्यैकाचो द्विर्वचने कृते यद्यप्यभ्यासादिः ककारो न भवति, तथापि हलादिर्भवति, तस्य शेषः प्रसज्येत। कर्मधारये तु न दोषः, तत्राभ्यासापेक्षं हलादित्वं विधीयते, न चात्र ककारोऽभ्यासादिः। तस्मात् कर्मधारयोऽयम्। `जग्लौ' `मम्लौ' इति। `ग्लै हर्वक्षये' (धा.पा.903), `म्लै गात्रविनामे' (धा.पा.904), `आदेच उपदेशेऽशिति' (6.1.45) इत्यात्त्वम्, `आत औ णलः' (7.1.34) इत्यौत्त्वम्। `आटतुः' आटुः' इति। `अत आदेः' (7.4.70) इत्यभ्यासस्य दीर्घत्वे कृते सवर्णदीर्घत्वम्।

ननु च शेषोऽवस्थानम्, तच्चानेः सिद्धमेव, तत्किमर्थं विधीयते? इत्याह--`आदिशेषनिमित्तोऽयम्' इत्यादि। आदिशषो निमित्तं यस्य लोपस्य स तथोक्तः। न ह्यत्रादेः शेषो विधीयते, किं तर्हि? तन्निमित्तोऽयमनादेर्लोपो विधीयते। सिद्ध एव ह्यादेरवस्थाने हलादिशेष इतीदं विधीयमानं नियमार्थं विज्ञायते--आदेरेव हलोऽवस्थानं भवति, त्वनादेरिति एवमादिशेषनिमित्तमनादेरदर्शनं विहितं भवति। यदि तर्ह्यादिशेषनिमित्तोऽयमनादेर्लोपो विधीयते, एवं सत्यादुतुराटुरित्यत्र लोपो न भवति; निमित्ताभावात्, अभ्यासस्य हलेव तावदादिर्नास्ति, कुतः पुनस्तस्य शेषः? इत्यत आह--`तत्र' इत्यादि। अनादिलोपे कर्त्तव्येऽभ्यासजातिराश्रीयते, नाभ्यासव्यक्तिः। तेन यद्यपि सर्वास्वभ्यासव्यक्तिषु हलादिर्न वर्त्तते, तथापि क्वचिदपि पपाचेत्यादौ वर्त्तमानो हलादिरनादेः सर्वत्राटतुः, आटुरित्येवमादावपि निवृत्तिं करोति; अभ्यासजातेरभिन्नत्वात्। यैव हि पपाचेत्यादावभ्यासजातिः, सैवाटतुः आटुरित्यादावपि।
`अपरे तु' इत्यादि। आटतुः, आटुरित्यादावनादेर्लोपं प्रतिपादयितुमपरे ब्रुवत इति। शेषशब्दोऽयं नावस्थानमात्रमाह, किं तर्हि? निवृत्त्या विशिष्टमवस्थानम्, यद्येवम्, अवस्थानस्य विशेष्यत्वात् प्राधान्यम्, निवृत्तेस्तु विशेषणावादप्राधान्यम्। तथा च--परधानानुयायित्वादप्राधान्यं गुणानाम्। यत्रैवाभ्यासस्य हलादेरवस्थानं पपाचेत्यादौ, तत्रैदानादेर्हलो निवृत्त्या भवितव्यम्; ततः स एव दोषः--आटतुः, आटुरित्यादावनादेर्हलो निवृत्तिर्न प्राप्नोतीति? अत आह--`तदवस्थानम्' इत्यादि। यद्यपि निशेष्यभूतं तदवस्थानं शेषशब्देनाभिधीयत इत्युक्तितः प्रधानम् तथाप्यविधेयत्वादप्रधानम्। अविधेयत्वं तु तस्य सिद्धत्वात्। निवृत्तरेव विशेषणभूतापि विधेयत्वात् प्रधानम्। तथा चोक्तम्--सिद्धमुपकारकं परार्थमङ्गम्, साध्योऽनुपकारकस्त्वङ्गीति कृत्वा प्रधानम्। तत्र निवृत्तौ विधेयत्वात् प्रधानभूतायामयमस्य सूत्रस्यार्थो जायते--`अभ्यासस्यानादेर्हलो निवृत्तिर्भवति' इति। ततश्चासौ विधेयत्वात् प्राधान्यमापन्ना सती किमित्यादेरविधेयामप्रधानभूतामनिवृत्तिमपेक्षिष्यते। केन कारणेनापेक्षिष्यते? न केनचिदित्यर्थः। न हि प्रधानस्य गुणानुयायित्वं युक्तम्। तस्मादसत्यपि हलादेरवस्थानेऽवादेर्लोपेन भवितव्यमिति भावः।।

61. शर्पूर्वाः खयः। (7.4.61)

पूर्वेण शरां सेषे प्राप्ते खयां शेष आरभ्यते। अनादिशेषश्चायमादिशेषं बाधते। न हि शरामवस्थाने खयां शेषशब्दो विशेषणमुपपद्यते। स हि निवृत्त्या विशिष्टमवस्थानमाह--इत्युक्तम्। न चोभयोरवस्थाने निवृत्त्या विशिष्टमवस्थानं भवति। तस्मादादिशेषस्यायमनादिशेषोऽपवादः। `चुश्चोतिषति' इति। `श्चुतिर्क्षरणे' (धा.पा.41), सन्, इट्। `तिष्ठासति' इति। `ष्ठा गतिनिवृत्तौ' (धा.पा.928)। `पिस्पन्दिषते' इति। `स्पदि किञ्चिच्चलने' (धा.पा.14), अनुदात्तेत्, इदित्वान्नुम्, `पूर्ववत्सनः' (1.4.62) इत्यात्मनेपदम्।

`सस्नौ' इति। `ष्णा शौचे' (धा.पा.1052)। पूर्ववण्णल औत्वम्।

`खर्पूर्वाः' इत्यादि। `उचिच्छिवति' इति। `उच्छी विवासे' (धा.पा.216), सन् उछिष् इति स्थिते द्विर्वचनं प्राप्नोति, तुक् च; तत्र वर्णाश्रयेणान्तरङ्गत्वात् तुक्। तस्मान् कृते, द्विर्वचनं प्राप्नोति, चुत्वञ्च, ततर परत्वात् द्विर्वचने कर्त्तव्ये चुत्वस्यासिद्धत्वाद्द्विर्वचनं प्राप्नोति छिष्शब्दस्य। तत्र छकारस्य शेषो न प्राप्नोति; अशर्पूर्वत्वात्। न ह्यं तकारः अर्भवति, ततश्च पूर्वेण हलादिशेषे कृते सत्यभासे तकारः श्रूर्यत। अथापीदमस्ति--`पूर्वत्रासिद्धोयमद्विर्वचने' (जै.प.वृ.70) इति चुत्वं पश्चाद्द्विर्वचनं क्रियते, तथापि हलादिशेषेण छकारे निवृत्ते `निमित्तापाये नैमित्तिकस्याप्यपायः' (व्या.प.47) इति चुत्वे निवृत्ते उचिच्छिषतीत्यतर तकार एवाभ्यासे श्रूयेत। तस्मात् खर्पूर्वाः खय इति वक्तव्यन्। एवं हि सति च्छकारस्य शेषे कृते तकारो निवर्त्तत इति न भवत्यनिष्टप्रसङ्गः।।

62. कुहोश्चुः। (7.4.62)
`चखान' इति। `खनु अवदारणे' (ध.पा.878), द्विर्वचनम्, तस्य चुत्वम्--छकारः, `अभ्यासे चर्च' (8.4.54) इति छकारस्य चकारः। `जघाति' इति। `लिट्यन्यतरस्याम्' (2.4.40) इत्यदेर्घस्लादेशः, अभ्यासस्य चुत्वम्। नादवतो महाप्राणस्य स्थाने तादृश एव झकारः, तस्यापि जश्त्वम्--जकारः। `जहार' इति। `हृञ् हरणे' (धा.पा.899)। `जिहीर्षति' इति। `इको झल्' (1.2.9) इति सनः कित्त्वम्, `अज्झनगमां (6.4.16) इति दीर्घत्वम्, `ॠत इद्धातोः' (7.1.100) इतोत्त्वम्, रपरत्वम्, `हलि च' (8.2.77) इति दीर्घत्वम्, हीर्ष-इत्यस्य द्विर्वचनम्।।

63. न कवतेर्यङि। (7.4.63)

पूर्वेण प्राप्तस्य चुत्वस्यायं निषेधः। `कोकूयते' इति। `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः, `गुणो यङ्लुकोः' (7.4.82) इत्यभ्यासस्य गुणः। अथ विकरणनिर्देशः किमर्थः, न `कोः' इत्येवोच्येत? इत्यत आह--`कवतेः' इत्यादि। `कुङ् शब्दे' (धा.पा.1401) इति तौदादिकः, `कु शब्दे' (धा.पा.1042) इत्यादादिकः, `कुङ्' (धा.पा.151) इति भौवादिकः शब्दार्थ एव; तत्र भौवादिकस्य ग्रहणं यथा स्यात्, इतरयोर्मा भूदित्येवमर्थो विकरणनिर्देशः। ननु चानयोर्निवृत्तेरेतत् फलम्--चोकूयत इत्येतदपि रूपं यथा स्यादिति, एतच्च `कोः' इत्यपि निर्देशे निरनुबन्धकपरिभाषया कौतेरेव निरनुवन्धकस्य ग्रहणे सति सिध्यत्येव, तस्मात् `कोः' इत्येवं निर्देशः कर्त्तव्यः? नैतदेवम्; सत्यपि हि शब्दार्थत्वे भिद्यत एवैषामभिधेयम्। तथा हि--कवतिस्तावदव्यक्तशब्दे वर्त्तते--उष्ट्रः कोकूयत इति; कुवतिरप्यार्त्तस्वरे वर्त्तते--चोकूयते बृषल इति, पोडित इत्यर्थः; कौतिस्तु शबदमात्रे। तस्माद्विशिष्टार्थस्य परिग्रहो यथा स्यादित्येवमर्थो विकरणनिर्देशः कर्त्तव्यः। ननु लुग्विकरणपरिभाषया कौतेर्न भविष्यतीति, तत्किमर्थं तन्निवृत्तयर्थता विकरणस्योपपद्यते? एवं मन्यते--कुवतिनिवृत्त्यर्थोऽवश्यं विकरणनिर्देशः कर्त्तव्यः, सोऽन्यार्थः क्रियमाणः कौतेर्निवृत्त्यर्थोऽपि भवति, तेन लुग्विकरणपरिभाषा (व्या.प.50) अत्र कौतेर्निवृत्त्यर्थमाश्रयितव्या न भवति।
`चुकुवे' इति। पूर्ववत् तशब्दस्यैच् `अचि श्नुधातु' (6.4.77) इत्यादिनोवङ्।।

64. कृषेश्छन्दसि। (7.4.64)
`करीकृष्यते' इति। `कृष विलेखने' (धा.पा.990) `रीगृदुपधस्य' (7.4.90) इति रीगागमः।।

65. दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतंवरीवृजनमर्मृज्यागनीगन्तीति च। (7.4.65)
चकारश्छन्दसीत्यनुकर्षणार्थः। `धारयतेः' इति। `धृञ् धारणे' (धा.पा.900) `धृङ् अवस्थाने' (धा.पा.1412) `धृङ् अवध्वंसने' (धा.पा.960)--इत्येताषां ण्यन्तानां ग्रहणम्, `धृङो वा' इति। अनन्तरोक्तयोरण्यन्तयोः। `श्लौ यङ्लुकि वा' इति। तत्र तावत् `दाधर्त्ति इति--यदा धारयतेः श्लौ निपात्यते, तदा णिलोपोऽभ्यासस्य दीर्घत्वं निपात्यते। यदा तु यङ्लुकि, तदाऽनेकाच्त्वाद्यङ् न प्राप्नोति, सोऽपि निपात्यते, उपधाह्रस्वत्वञ्च। णिलोपस्त्वार्धधातुकत्वादेव यङः `णेरनिटि' (6.4.51) इत्येवं सिद्धः। भ्यासस्य दीर्घत्वमपि `दीर्घोऽकितः' (7.4.83) इत्येवं सिद्धम्। `दर्धर्ति, दर्धर्षि' इति। अत्रापि यदा धारयतेः श्लौ तदाऽभ्यासस्य रुगागमो णिलोपश्च। श्लुस्तु सर्वत्र `बहुलं छन्दसि' (2.4.76) इत्यनेनैव वेदितव्यः। यदा तु यङ्लुकि, तदा `दीर्घोऽकितः' (7.4.83) इत्यनेन दीर्घत्वे प्राप्ते तदभावश्च निपात्यते। यदा धृङः--दाधर्तीति श्लौ निपात्यते, तदा द्विर्वचने कृतेऽभ्यासस्य दीर्घत्वं निपात्यते। यदा तु तस्यैव धृङो यङ्लुकि तदाऽस्यासस्य `ऋतश्च' (7.4.92) इति प्राप्तस्य रुगादेरभावो निपात्यते। `दर्घर्ति, दर्घर्षि' इति। अत्रापि यदा धृङ्, श्लौ, तदाभ्यासस्य रुगागमो निपात्यते; यदा तु यङलुकि, तदा पूर्ववत् प्राप्तस्य दीर्घस्याभावो निपात्यते, न तु रुगागमः; तस्य हि `रुग्रिकौ च लुकि' (7.4.91) इत्येवं सिद्धत्वात् परस्मैपदं च व्यत्ययो बहुलम्' (3.1.85) इति।
`बोभूतु' इति। `अन्यत्र' इति। लोट्प्रथमपुरुषस्यैकवचनापेक्षमन्यत्वं वेदितव्यम्। `बोभवीति' इति। अदादित्वाच्छपो लुक् `बहुलं छन्दसि' (2.4.73) इति बहुलवचनत्वाद्भवति; `यङो वा' (7.3.94) इति पक्षे ईट्।
`तेतिषते' इति। `तिजेः' इति। `तिज निशाने' (धा.पा.971) इत्येतस्य। ननु च यङो ङित्त्वात् प्रत्ययलक्षणेनात्मनेपदं (1.1.62) सिद्धम्, एतत् किमर्थं निपात्यते? इत्याह--`यङो ङित्त्वात्' इत्यादि। ज्ञापनार्थमात्मनेपदं सिद्धम्। ज्ञापनार्थमात्मनेपदं निपात्यत इति दर्शयति। ज्ञापनस्य तु प्रयोजनम्--अन्यत्र यङ्लुगन्तादात्मनेपदं न भवतीति--भावः, बोभवीतीति।
`अलर्षि' इति। `ऋ सृ गतौ' (धा.पा.1098,1099)--इत्यस्य जौहोत्यादिकस्य `उरत्' (7.4.66) इत्यत्त्वे कृते रपरत्वे च हलादिशेषः प्राप्नोति, तदपवादौ रेफस्य लत्वं निपात्यते। किं पुनः कारणं सिपा निर्देशोऽयमतन्त्रमित्येवं व्याख्यायते? इत्याह--`तिप्यपि' इत्यादि।
`फणतेः' इति। `फण गतौ' (धा.पा.821)--इत्येतस्य। `स्यन्देः' इति। `स्यन्दू प्रस्रवणे' (धा.पा.761)--इत्येतस्य। किमर्थं पुनः सम्पूर्वस्यातन्त्रत्वं व्याख्यायते? इत्याह--`अत्रापि हि' इत्यादि।
`करिक्रत्' इति। `डुकृञ् करणे' (धा.पा.1472)। यणादेशे कृतेऽनृकारान्तत्वात् `ऋतश्च' (7.4.92) इत्यभ्यासस्य रिगागमो न प्राप्नोति, स निपात्यते।
`क्रन्देः' इति। `कदि क्रदि क्लदि आह्वाने रोदने च' (धा.पा.772,773,774) इत्येतस्य। कथं पुनर्ज्ञायते लुङीत्येतन्निपातनम्? इत्याह--`अस्य हि' इत्यादि। यस्माल्लुङन्तेन क्रन्दतेरर्थो निर्दिश्यते, ततो ज्ञायते--लुङयेतन्निपातनमिति। अत्र चाभ्यासस्य रीगागमो निपात्यत एव।
`विभर्त्तेः' इति। `डुभृञ् धारणपोषणयोः' (धा.पा.1087) इत्यस्य।

`ध्वरतेः' इति। `ध्वृ हूर्च्छने' (धा.पा.939)।

`द्युतेः' इति। `द्युत दीप्तौ' (धा.पा.741) इत्यस्य। `सम्प्रसारणाभावः' इति। `द्युतिस्वाप्योः सम्प्रसारणम्' (7.4.67) इति सम्प्रसारणं प्राप्नोति,

अतस्तदभावो निपात्यते।
`तरतेः' इति। `तृ प्लवनतरणयोः' (धा.पा.969) इत्यस्य।

`सृपेः' इति। `गम्लृ सृप्लृ गतौ' (धा.पा.982,983) इत्यस्य।

`वृजेः' इति। `वृजो वर्जने' (धा.पा.1812) इत्येतस्य।

`मर्मृज्य' ति। `मृजू शुद्धौ' (धा.पा.1066) इत्येतस्य णलि रूपम्। `आगनीगन्ति' इति। एतदपि सटि तिपि।
इतिकरणस्य प्रकारार्थतां दर्शयितुमाह--`एवम्प्रकाराणाम्' इत्यादि। दाधर्त्तिप्रभृतीनामिव येषां छन्दस्यलाक्षणिकं कार्यं दृश्यते त एवम्प्रकारा दाधर्त्तिसदृशा इत्यर्थः। के पुनस्ते? गलगर्त्तीत्येवमादयः। `गृ निगरणे' (धा.पा.1410) इत्येतस्य यङ्लुकि श्लौ वा गलगर्त्तीति रूपम्, अभ्यासस्य चर्त्त्वामावः, हलादिशेषापवादः, रेफस्य लत्वं च निपात्यते।।

66. उरत्। (7.4.66)
छन्दसीति निवृत्तम्; पूर्वसूत्रे च कारानुकृष्टत्वात्। `ववृते, ववृधे, शशृधे' इति। `वृतु वर्त्तने' (धा.पा.758), `वृधु वृद्धौ' (धा.पा.759), `शृधु शब्दकुत्सायाम्' (धा.पा.760), लिट्; तत्राद्ययोरनुदात्तेत्त्वादात्मनेपदम्, इतरत्र स्वरितेत्त्वात्; पूर्ववदेव द्विर्वचनम्, हलादिशेषे च कृत ऋवर्णान्ततयामुपजातायामद्भावः, रपरत्वम्, हलादिशेषः।
`नर्नर्त्ति, नरिनर्त्ति, नरीनर्त्ति' इत्येवमादौ `ऋदुपधस्य च' (7.4.90) इति, `रुग्रिकौ च लुकि' (7.4.91) इति वा परत्वादपवादेषु कृतेषु रीगादिषु ऋवर्णान्ताभावादनेन न भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह--`नर्नर्ति' इति।।

67. द्युतिस्वप्योः सम्प्रसारणम्। (7.4.67)
हलादिशेषे प्राप्ते तस्यापवादौ द्युतिस्वाप्योः सम्प्रसारणमारभ्यते। `विदिद्युते' इति। `द्युत दीप्तौ' (धा.पा.741), लिट्, अनुदात्तेत्त्वादात्मनेपदम्; तत्र सम्प्रसरणमनेन, `सम्प्रसारणाच्च' (6.1.108) इति परपूर्वत्वम्। `व्यद्युतत्' ति। ण्यन्ताल्लुङ; श्लेश्चङ्, णिलोपः उपधाह्रस्वत्वम्, द्विर्वचनम्, अडागमः।
`विदिद्युतिषते, विदिद्योतिषते' इति। सन्, `रलो व्युपधात्' (1.2.26) इत्यादिना विकल्पेन कित्त्वम्। यदा कित्त्वं नास्ति, तदा लघूपधगुणः, `पूर्ववत्सनः' (1.3.62) इत्यात्मनेपदम्। `सुस्वापयिषति' इति। `ञिष्वप् शये' (धा.पा.1068), णिच्, तदन्तात् सन्।
किं कारणं ण्यन्तस्योदाहरणमुपन्यस्तम्? इत्यत आह--`स्वपिर्ण्यन्तो गृह्यते' इति। तेन ण्यन्तस्योदाहरणमुपदर्शितमित्यभिप्रायः। ण्यन्तस्य ग्रहणं स्वापेरिति निर्देशादेव विज्ञायते। न ह्यण्यान्तस्यैवंविधो निर्देश उपपद्यते। अपि च--अण्यन्तस्य योऽब्यासस्तस्यानेनैव शास्त्रेण सम्प्सारणं सिद्धम्। तथा हि--लिटि तावत् `लिट्यभ्यासस्योभयेषाम्' (6.1.17) इत्यनेनैव सिद्धम्, सनि तु `रुदविद' (1.2.8) इत्यादिना सनः कित्त्वे सति वच्यादिसूत्रेण (6.1.15) कृतसम्प्रसारण एव सुपिभूतो द्विरुच्येत, यङ्यपि `स्वपिस्यमिव्येञां यङि' (6.1.19) इति कृतसम्प्रसारण एवासौ द्विरुच्यते। तस्मादण्यन्तस्यानेन शास्त्रेण सम्प्रसारणस्य सिद्धत्वात् स्वापिर्ण्यन्तो गृह्यते।
यदि स्वापिर्ण्यन्तो गृह्यते। तदा स्वापयतेर्ण्वुल्--स्वापकः, स्वापकमिच्छतीति क्यच्, स्वापकीय इति स्थिते स्वापकीयितुमिच्छतीति सन्--सिध्वापकीयिषति, अत्रापि सम्प्रसारणं प्राप्नोति? इत्याह--`तस्य' इत्यादि। तस्य स्वापेरभ्यासस्य नि मत्तं यः प्रत्ययस्तेनानन्तर्ये सत्यव्यवधान इदं सम्प्रसारणमिष्यते, तेन सिध्वापकीयिषतीत्यत्र न भवति। न ह्यभ्यासनिमित्तं यः प्रत्ययः इह स स्वापेरनन्तरः; ण्वुला क्यचा च व्यवधानात्।
कथं पुनरभ्यासनिमित्तेन प्रत्ययेनानन्तर्ये सति सम्प्रसारणं लभ्यते, यावता नायं विशेषः सूत्रोपात्तः? एवं मन्यते--अभ्यासेनाभ्यासनिमित्तं यः प्रत्ययः सन्निधापितः, तस्य प्रत्ययविशेषनिमित्तत्वात्; तत्र लेनाभ्यासनिमित्तेन प्रत्ययेन स्वापिरङ्गं विशिष्यते--अभ्यासनिमित्ते प्रत्यये यदङ्गं स्वापिरिति। एवञ्च विशेष्यविशेषणभावे सक्यभ्यासनिमित्ते प्रत्ययेऽनन्तरे सति स्वापेरङ्गस्य योऽभ्यासस्तस्यैव सम्प्रसारणेन भवितव्यम्। न तु व्यवहितेन प्रत्ययान्तरेण हि यो व्यवहितः प्रत्ययः सन्नभ्यासे निमित्त तदपेक्षया स्वापिरङ्गं भवति, न च सिध्वापव्यवहितेन प्रत्ययान्तरेण हि यो व्यवहितः प्रत्ययः सन्नभ्यते निमित्तं तदपेक्षया स्वापिरङ्गं भवति, न च सिध्वापकौयिषतत्यभ्यासनिमित्तं यः प्रत्ययः स स्वारेरङ्गस्यानन्तरः, यस्तु स्वापेरनन्तरो ण्वुल् तदपेक्षया स्वापिरङ्ग भवति, न चासावभ्यासनिमित्तं भवति। इह तर्हि कस्मान्न भवति--स्वपनं स्वापो घञ्, स्वापं करोततिं णिच्, स्वापयितुमिचछतीति सन् सिष्वापयिषतीति? उच्यते; अकारलोपश्य स्थानिवद्भावात् स्वापेर्योऽभ्यासस्तस्य सम्प्रसारणेन भवितव्यम्। न चाकारलोपस्य स्थानिवद्भावे सति स्वापेरभ्यासः, किं तर्हि शब्दान्तरस्य स्वाप इत्येतस्य।।

68. व्यथो लिटि। (7.4.68)
`विव्यथे' इति। `व्यथ भयचलनयोः' (धा.पा.764), अनुदात्तेत्त्वादात्मनेपदम्। अथ यकारस्य हलादिशेषेण निवृत्त्या भवितव्यम्, वकारस्य सम्प्रसारणेन?

इति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्त्तुमाह--`यकारस्य' इत्यादि।
`वाव्यथ्यते' इति। यङ्।।

69. दीर्घ इणः किति। (7.4.69)
इणो ह्रस्वस्यैव श्रवणे प्राप्ते दीर्घत्वं विधीयते। `ईयतुः ईयुः' इति। ननु च परत्वात् `इणो यण्' (6.4.81) इति यणादेशे सत्यनच्कत्वात् द्विर्वचनं न प्राप्नोतीत्यत आह--`इणो यण्' इत्यादि। स्थानिवद्भावस्तु `द्विर्वचनेऽचि' (1.1.59) इत्यनन। स च नियतकाले द्विर्वचन एव कर्त्तव्ये कृते च तस्मिन्नादेशरूप एवावतिष्ठते। `इयाय, इययिथ' इति। णलि थलि चेति यथाक्रमं वृद्धिगुणयोः कृतयोः स्थानिवद्भावाद्द्विर्वचनमिकारः, तस्य `अभ्यासस्यासवर्णे, (6.4.78) इतीयङ्।।

70. अत आदेः। (7.4.70)
लिटीत्यनुवर्त्तते। किद्ग्रहणं तु निवृत्तम्। `अतो गुणे' (6.1.97) इति पररूपत्वे प्राप्ते दीर्घत्वमारभ्यते। तपरकरणं स्वभावत एव यो ह्रस्वस्तस्य दीर्घो यथा तेनोपदेशे वो दीर्घस्तस्य ह्रस्वत्वे कृतेऽपि दीर्घो न भवति--`आच्छि आयामे' (धा.पा.209), आच्छ, आच्छतुः, आच्छुरिति। लिट्, तिपो णल्, तसोऽतुम्, झेरुस्, द्विर्वचने हलादिशेषे `ह्रस्वः' (7.4.59)। किञ्च स्याद् यद्यत्र दीर्घः स्यात्? `तस्मान्नुड्द्विहलः' (7.4.71) इति नुट् स्यात्। `आदेः' इति वचनादिहान्तस्य दीर्घो न भवति--पपाचेत्यादौ।।

71. तस्मान्नुड्द्विहलः। (7.4.71)
द्वौ हलौ यस्य तद्द्विहल्। `आनङ्ग, आनङ्गतुः, आनङ्गुः' इति। `अगि रगि लगि गत्यर्थाः' (धा.पा.146,144,145), इदित्त्वान्नुम्। `आनञ्ज, आनञ्जतुः, आनञ्जुः' इति। `अन्जू व्यक्तिम्रक्षणकान्तिगतिषु' (धा.पा.1458)।
`ऐऔच्' (मा.सू.4) इत्यत्र `प्रत्याहारे वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयः, तेषु तत्कार्यं न भवति, तच्छायानुकारिणो हि ते, न पुनस्त एव; पृथक्प्रयत्ननिर्वर्त्त्यं हि वर्णमिच्छन्त्याचार्याः' इत्युक्त्वा `नुड्विधिलादेशविनामेष्वृकारे प्रतिविधातव्यम्' इत्युक्तम्। तत्रावसरप्राप्त्या ऋकारे नुड्विधौ प्रतिविधानमाह--`ऋकारैकदेशो रेफौ हल्ग्रहणेन गृह्यते' इति। `आनुधतुः, आनृधुः' इति। `ऋधु वृद्धौ' (धा.पा.1271)। कथं पुनर्वर्मआत्मकानां हला ग्रहणेनावर्णात्मक ऋकारैकादेशो रेफो गृह्यते? द्विहल्ग्रहणसाममर्थ्यादिति भावः।
अत्र `तस्मान्नुट्' इत्येवं वक्तव्यम्। न चैवं सत्याटतुः, आटुरित्यादौ नुट्प्रसङ्गो भवति; अश्नोतेरित्यस्य नियमार्थत्वात्--अद्विहलो यदि भवति नुट् तदाश्नोतेरेव, नान्यस्येति। अश्नाति निवृत्त्यर्थं तदेतन्नाशङ्कनीयम्; यद्येतावत् प्रयोजनं स्यात् `नाश्नः' इत्येवं ब्रूयात्। तस्मान्नियम एवास्य प्रयोजनम्। तदेवमन्तरेणापि द्विहल्ग्रहणं सिद्धे यतो द्विहल्ग्रहणं करोति तस्यैतत् प्रयोजनम्--द्विहल्समानाकृतेरपि यथा स्यात्। यस्याप्येको हल् मुख्योऽवयवो द्वितीयस्त्वमुख्यस्तच्छायानुकारित्वादुपचारेण हलव्यपदेशार्हः, तस्यापि यथा स्यादित्येवमर्थम्। एतस्य कथं ल्यते? यद्यत्र द्विहल इत्येवंश्रुतिस्तच्छायानुकारिण्यपि ऋकारावयवे रेफे वर्त्तते, नान्यथा। तस्माद्द्विहल्ग्रहणसामर्थ्यादत्र हल्ग्रहणेन ऋकारैकदेशो रेफो गृह्यते; अन्यथा द्विहल्ग्रहणमनर्थकं स्यात्।।

72. अश्नोतेश्च। (7.4.72)
अद्विहलार्थोऽयमारम्भः। `व्यान शे' इति। `अशू व्याप्तौ' (धा.पा.1264), अनुदात्तेत्त्वादात्मनेपदम्, त, एश्।
अश्नोतेरिति विकरणनिर्देशः `अश भोजने' (धा.पा.1523) इत्येतस्य क्रैयादिकस्य निवृत्तये। चकारो नुडागमानुकर्षणार्थः।।

73. भवतेरः। (7.4.73)
`बभूव' इति। `भुवो वुग्लुङ्लिटोः' (6.4.88) इति वृक्। `अनुबभूवे' इति। कर्मण्यात्मनेपदम्। श्तिपा निर्देशी यङ्लुग्निवृत्त्यर्थः--वोभावेति।।

74. ससूवेति निगमे। (7.4.74)
`सूतेः' इति। `षूङ् प्राणिगर्भविमोचने' (धा.पा.1031)--इत्येतस्य। `सुषुवे' इति। ङित्त्वादात्मनेपदम्; उवङ्।
इतिकरणमेवम्प्रकाराणामन्येषामुपसङ्ग्रहार्थम्। तेन जाग्रमः, अदर्शमेत्यादि सिद्धं भवति। जाग्रम इति जागर्त्तेरग्निपात्यते। अदर्शमेति लङि दृशेः पश्यादेशाभावः। जागृम, अपश्यामेति भाषायामृ। दाधर्त्त्यादिषु ससूवग्रहयणं न कृतम्; वैचित्र्यार्थम्।।

75. णिजां त्रयाणां गुणः श्लौ। (7.4.75)
बहुवचननिर्देशादाद्यर्थो गम्यत इत्यत आह--`एवाम्' इत्यादि। `णिजिर् शौचपोषणयोः' (धा.पा.1093), `विजिर् पृथग्भावे' (धा.पा.1094), `विष्लृ

व्याप्तौ' (धा.पा.1095)--इत्येते णिजादयो जौहोत्यादिकाः।
`त्रिग्रहणमुत्तरार्थम्' इति। `भृञामित्' (7.4.76) इतीत्त्वम्। त्रयाणामेव यथा स्यादधिकानां मा भूदित्येवमर्थं त्रिग्रहणम्। एतदर्थमपि कस्मान्न भवति? इत्यत आह--`एवाम्' इत्यादि। यद्यत्र त्रिग्रहणं क्रियते निजादीनामन्ते बृत्करणं किमर्थम्? एतद्गणकारः प्रष्टव्यः, न सूत्रकारः। `अन्यो हि गणकारोऽन्यश्च सूत्रकारः' इत्युक्तं प्राक्। गणकारेणापि वैचित्र्यार्थं वृत्करणं कृतमिति वेदितव्यम्। विचित्रा हि गणस्य कृतिर्गणकारेण।
अथ गुणग्रहणं किमर्थम्, एकार एव नोच्येत? अशक्यमेवेदं वक्तुम्; एवं ह्युच्यमाने द्वेव्यमपि कश्चिद्विजानीयात्--हलादिशेषापवादोऽयं निजादीनामेकर इति। गुणग्रहणे हि संज्ञाविधाने नियम इतीक एव भवति, हलस्तु हलपादिशेषेण निवृत्तिर्भवति।।

76. भृञामित्। (7.4.76)
`डु भृञ् धारणपोषणयोः' (धा.पा.1087), `माङ् माने' (धा.पा.1088), `ओहाङ् गतौ' (धा.पा.1089)--इत्येते भृञादयो जौहोत्यादिका एव। `मिमीते, जिहीते' इति। `ई हल्यघोः' (6.4.113) इतीत्त्वम्।।

77. अर्तिपिपर्त्योश्च। (7.4.77)
`इयर्ति, पिपर्ति' इति। `ऋ सृ गतौ' (धा.पा.1098,1099) `पृ पालनपूरणयोः' (धा.पा.1086), जुहोत्यादिकत्वाच्छपः श्लुः गुणः द्विर्वचनम्, `उरत्' (7.4.66) इत्यत्त्वम्, अनेनेत्त्वम्, रपरत्वञ्च। अर्त्तेः `अभ्यासस्यासवर्णे' (6.4.78) इतीयङ्। अथार्तिग्रहणं किमर्थम्, यावता निजादिभ्योऽयं परः पठ्यते। ये च निजादिब्य परे ते सर्व एव च्छान्दसाः, तथा हि तान् पठित्वा छन्दसीत्युक्तम्। छान्दसत्वाच्चार्तेः `बहुलं छन्दसि' (7.4.78) इत्येवं सिद्धम्? एवं तर्ह्येतज्ज्ञापयति--भाषायामप्यर्त्तेः प्रयोगो भवतीति।।

78. बहुलं छन्दसि। (7.4.78)
`विविष्टि' इति। `वश कान्तौ' (धा.पा.1080), `बहुलं छन्दसि' (2.4.76) इति शपः श्लुः, व्रशस्चादिसूत्रेण (8.2.36) षत्वम्। `विवक्ति' इति। `वच परिभाषणे' (धा.पा.1842)। `सिषक्ति' इति। `सच समवये' (धा.पा.997), `सच सेचने' (धा.पा.163) इति वा। `जिगर्त्ति, जिघर्त्ति' इति। `गृ घृ सेचने' (धा.पा.937,938)। सर्वत्र पूर्ववच्छपः श्लुः।
`जजनम्, दधनम्' इति। `जन जनने' (धा.पा.1105), `धन धान्ये' (धा.पा.1104)। लुङ्मिपोऽम्, जुहोत्यादित्वाच्छपः श्लुः; `बहुलं छन्दस्यामाङ्योगेऽपि' (6.4.75) इत्यड्निषेधः।।

79. सन्यतः। (7.4.79)
`पिपक्षति' इत्यादि। पचियज्यो रूपे। `पिपासति' इति। पातेः, पिबतेर्वा।

`लुलूषति' इति। `लूञ् छेदने' (धा.पा.1483)। `इको झल्' (1.2.9) इति कित्त्वाद्गुणाभावः। `सनि ग्रहगुहोश्च' (7.2.12) इतीट्प्रतिषेधः। तपरकरणं किमर्थम्? पापच्यतेः सन् पापचिषत इत्यत्र मा भूत्। किं पुनः कारणमत्र ह्रस्वो न भवति? दीर्घविधानसामर्थ्यात्। यदि `सनि योऽभ्यासः' इत्येवं विज्ञायेत, [विज्ञायते-प्रा.मु. पाठः] ततो मुखसुखार्थम्।।

80. ओः पुयण्ज्यपरे। (7.4.80)
`पुयण्जि' [नास्ति--काशिका] इति। पुयण्जामेकवद्भावं कृत्वा सप्तम्या निर्देशः। `अपरे' [नास्ति--काशिका] इति। अः परो यस्मात् पुयण्जस्तदपरमवर्णपरमित्यर्थः। `पिपविषते' इति। पूङ् पदने' (धा.पा.966) सन्, `स्मिपूङ्रञ्ज्वशां सनि' (7.2.74) इतीट्, गुणावादेशौ। स्थानिवद्भावात् `पू' इत्यस्य द्विर्वचनम्, स्थानिवद्भावस्तु `द्विर्वचनेऽचि' (1.1.59) इत्यनेन। `पिपावयिषति' इति। पूङो ण्यन्तात् सन्। अत्रापि स्थानिवद्भावात् `पू' इत्येतद्द्विरुच्यते। `बिभावयिषति' इति। `भू सत्तायाम्' (धा.पा.1) ण्यन्तात् सन्।
`यियावयिषति' इति। यौतेर्ण्यन्तात् सन्। `सनीवन्तं (7.2.49) इत्यादेनेट्। `रिरावयिषति; लिलावयिषति' इति। रौतिलुनातिभ्यां ण्यन्ताभ्यां सन्।
`जिजावयिषति' इति। `जु' इति सौत्रो धातुः (3,2,150); `जुचंक्रम्य' (3.2.150) इत्यादौ पाठात्। तस्मात् ण्यन्तात् सन्।
कथं पुनः पिपादयिषतीत्यादावुकारान्तताऽभ्यासस्य, यावता णौ परतोऽन्तरङ्गत्वाद्वृद्ध्यावादेशयोः कृतयोर्वकारान्तस्याद्विर्वचनेन भवितव्यम्, स्थानिवद्भावादुकारान्तस्य द्विर्वेचनं भविष्यतीति चेत्? न; न हि णौ कृतस्य स्थानिवद्भावो भवति। णेरद्विर्वचननिमित्तत्वादित्यत आह--`एतदेव' इत्यादि। न हि णिचमन्तरेण पुयण्जोवर्णपराः सर्वे सम्भवन्ति। तत्र हि यदि णौ कृतस्य स्थानिवद्भावो न स्यात्, तदा येषां णिचमन्तरेण पुयण्जोऽवर्णपराः सर्वे सम्भवति। तत्र हि यदि मऔ कृतस्य स्थानिवद्भवो न स्यात्, तदा येषां णिचमन्तरेणावर्णपरता न सम्भवति, तेषामुवर्णान्तोऽभ्यासो न स्यात्, उच्यते चेदं

`ओः पुयज्जयपरे' इति वचनम्। तस्मादेतज्ज्ञापकम्--अद्विर्वचननिमित्त्ेऽपि णौ स्थानिवद्भवतीति। तेन तुतावयिषति, बिभावयिषतीत्यादि सिद्धं भवति। केषाञ्च पुनर्णिचमन्तरेणावर्णपरता न सम्भवति? यकारपकाराभ्यामन्येषां सर्वेषामेव। `पापचिषते' इति। `अतो लोपः' (6.4.48) इत्यकारलोपः, `यस्य हलः' (6.4.49) इति यकारस्य। `तुतावयिषति' [`अवतुतावयिषति' इति काशिकापदमञ्जर्योः पाठः] इति। `तु' इति सौधो धातुः; `तुरुस्तुशम्यमः' (7.3.95) इत्यादौ सूत्रे पाठात्। `जुहावयिषति' इति। `हु दाने' (धा.पा.1083) ण्यन्तात् तस्मात् सन्। `बुभूषति' इति। पूर्ववदिङ्गुणयोरभावः।।

81. स्रवतिश्रृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा। (7.4.81)

`सु स्रु गतौ' (धा.पा.940) `श्रु श्रवणे' (धा.पा.942) `दु द्रु गतौ' (दा.पा.944,945)`प्रुङ्प्लुङ् च्युङ् गतौ' (धा.पा.957,958,956) `सिस्रावयिषति' इत्यादि। एभ्यो ण्यन्तेभ्यः सर्वत्र सन्।

ननु च सकारादिना वर्णेनात्र यणो व्यवधानम्, अत्रावर्णपरे यणि परत इत्त्वमुच्यमानं व्यवधाने कथं भवति? इत्याह--`वचनसामर्थ्यात्' इति। सवत्रैव हि सकारादिनैकवर्णेन व्यवधानम्, उच्यते चेदं वचनम्, तस्मादत्र वचनसामर्थ्यादेकेन वर्णेन व्यवधानमाश्रीयते; अन्यथा हि वचनमिदमनर्थकं स्यात्। `पूर्वसूत्रेण' इत्यादेनाऽप्राप्तविभाषेयमिति दर्शयति।

`शुश्रुषति' [शुश्रूयते--काशिका] इति। पूर्ववदिङ्गुणयोरभावः। श्तिपः निर्देशो धातुनिर्देशार्थः, न यङलग्निवृत्त्यर्थः। अत्र गुणे कृत उकारान्तताभावादित्त्वं न भवतीति। `सोस्रविषति'।।[नास्ति--कीशिका]

82. गुणो यङ्लुकोः। (7.4.82)

अभ्यसस्य गुणोऽयं विधीयते। तेन यद्यप्यत्र लुक्शब्दोऽयं सामान्यः, तथापि यङ्लुक एव सम्प्रत्ययो भवति। न ह्यत्र लुक्यभ्यासः सम्भवतीति मत्वाऽऽह--`यङि यङ्लुकि च' इत्यादि। `चौक्रुशीति' `क्रुश आह्वाने' (धा.पा.856) यङ्, तस्य `यङोऽचि च' (2.4.74) इति लृक्, `यङो वा' (7.3.94) इतीट्, `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणनिषेधाद्यङो लुकि कृते गुणो न प्राप्नोतीति लुग्ग्रहणम्। `पुगन्तलघुपधस्य च' (7.3.86) इति प्राप्तोऽपि गुणः `नाभ्यस्तस्याचि पिति सार्वधातुके' (7.3.87) इति निषिध्यते।।

83. दीर्घोऽकितः। (7.4.83)

`यंयम्यते' इति। `यम उपरमे' (धा.पा.984), `नुगतोऽनुनासिकान्तस्य' (7.4.85) इति नुक्।

`ननु च' इत्यादिनाऽकित इत्येतत्प्रत्याचष्टे। यंयम्यत इत्यत्र मा भूदित्येवमर्थं `अकितः' इत्युच्यते। अत्र ह्यपवादत्वान्नुकि कृतेऽनजन्तत्वादेव दीर्घो न भविष्यतीति नार्थोऽकित इत्यनेन। `एवं तर्हि' इत्यादिना `अभ्यासविकारेष्वपवादा नोत्सर्गान् विधीन् बाधन्ते' (व्या.प.23) इत्येतां परिभाषां ज्ञापयितुं `अकितः' इत्येतदुच्यत इति दर्शयति। `डोढौक्यते' इति। `ढौकृ गतौ' (धा.पा.98) इत्यस्य यङि कृते हलादिशेषे च `ह्रस्वः' (7.4.59) इति ह्रस्वत्वम्, पूर्वसूत्रेण गुणः। तत्रासत्यस्मिन् ज्ञापके पिपासतीत्येवमादौ सावकाशं ह्रस्वत्वं `दीर्घोऽकितः' (7.4.83) इत्येनेन सन्ध्यक्षरे दीर्घत्वेन बाध्येत। दीर्घस्य दीर्घविधाने प्रयोजनाभावाद्दीर्घो न भविष्यतीति चेत्? नैतत्; अस्ति हि दीर्घस्य दीर्घविधाने प्रयोजनम्, किं तत्? ह्रस्वो मा भूदिति। एवं चासत्यस्मिन् ज्ञापके `अचीकरत्' इत्यत्राप्यचिक्षणदित्यादौ सावकाशमित्त्वम् `दोर्घो लघोः' (7.4.94) इति दीर्घत्वेन बाध्येत। `मीमांसते' इत्यादावसत्यस्मिन् ज्ञापके पिपक्षतीत्यादौ सावकाशं `सन्यतः' (7.4.79) इतीत्त्वं मान्बधादिसूत्रेण (3.1.6) विहितेन दीर्घत्वेन बाध्यते। `अजीगणत्' इत्यत्राप्यसत्यास्मेन् ज्ञापके पपाठेत्यादौ सावकाशो हलादिशेषः `ई च गणः' (7.4.97) इतीत्त्वेन बाध्यते। अस्मिंस्तु सति तर्वमेतन्न बाध्यते। ननु चासति प्रयोजने ज्ञापकं भवति; अस्ति चास्य प्रयोजनम्, किं तत्? धातुकित्त्वमपेक्ष्य जहातेर्मा भूत्--जाहाति, जाहेतीति? नैतदस्ति; यदि ह्येतत् प्रयोजनं स्यात्, तदा `अहाकः' इति प्रतिषेधं कुर्यात्। किञ्च `अकितः' इत्यभ्यासस्य विशेषणं भवितुमर्हति, यद्यभ्यासावस्थायां कित्त्वमुपजायते। न च जहातेः कित्त्वमभ्यासमपेक्षते, पूर्वमेव हि तदभ्यासाद्भवति। तस्माज्जहातेः--जाहाति, जाहेतीति रूपेण भवितव्यम्। ततश्च `अकितः' इति वचनं ज्ञापकमेव। कित्करणं तु जहातेः `हश्च व्रीहिकालयोः' (3.1.148) इत्यत्र सामान्यग्रहणाविघातार्थम्। अथ दीर्घग्रहणं किमर्थम्; आदित्येव नो्येत/ नैवं शक्यम्, `अकितः' इत्यस्य ज्ञापकता नोपपद्यते। सति हि दीर्घग्रहणे नुकि कृतेऽनजन्तत्वादेव हि दीर्घस्य प्राप्तिर्नास्तीति `अकितः' इति प्रतिषेधस्य ज्ञापकत्वमुपपद्यते। आकारस्तु विधीयमानोऽजन्तस्याभ्यासस्य स्यादिति `अकितः' इत्यस्य ज्ञापकत्वं न स्यात्। तस्माद्दीर्घग्रहणं कर्त्तव्यम्।।

84. नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्। (7.4.84)

`वन्चु चन्चु तन्चु त्वन्चु भ्रुन्चु ग्लुन्चु [`मुन्चु' इति प्रा.मु. न्यासपाठः] गत्यर्थाः' (धा.पा.189-194)। `स्रन्सु ध्वन्सु अवस्रंसने' (धा.पा.754,755), `कस गतौ' (धा.पा.860) `शल हुल पत्लृ गतौ' (धा.पा.843-845), `स्कन्दिर् गतिशोषणयोः' (धा.पा.979)। `वनीवच्यते' इति। `अनिदिताम्' (6.4.24) इत्यादिनानुनासिकलोपः। `वनीवञ्चीति' इति। अत्र न भवत्यनुनासिकलोपः। यङी लुप्तत्वात् `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणनिषेधात्। अथ नीकि कृते ह्रस्वत्वं कस्मान्न भवति? दीर्घोच्चारणसामर्थायत्।।

85. नुगतोऽनुनासिकान्तस्य। (7.4.85)
`दीर्घोऽकितः' (7.4.83) इत्यनेन दीर्घत्वे प्राप्ते वचनमिदमारभ्यते। `तन्तन्यते' इत्यादीनि तमिगमियमिरमीणां रूपाणि।
यदि नुक् क्रियते, यम्यम्यते इत्यादौ `नश्चापदान्तस्य झलि' (8.3.24) इति झल्युच्यमानोऽनुस्वारो न सिध्यति, अझल्परत्वात्? इत्यत आह--`नुगित्ये तत्' इत्यादि। कथं पुनर्नुगित्येतदनुस्वारोपलक्षणार्थं शक्यते द्रष्टुम्? इत्याह--`स्थानिना हि' इत्यादि। नुका हि स्थानिनाऽत्रादेशोऽनुस्वार उपलक्ष्यते। तस्मादनुस्वार एवागमोऽत्र विधीयते, न तु नुक्। यम्यम्यत इत्यादौ यद्यप्यझल्परताऽस्ति, तथाप्यनुस्वारः सिध्यति।
एवं `अनुस्वारस्य ययि परसवर्णः' (8.4.58) प्राप्नोति, इष्यते च पक्षेऽनुस्वारस्य श्रवणम्, तन्न सिध्यति, अपवान्तत्वात्? इत्यत आह--`पदान्तवच्च' इत्यादि। पदान्तवदनुस्वारो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--तदन्तविधिर्नवानुनासिकान्तस्यानुस्वारो भवतीति नार्थोऽन्तग्रहणेन, तत्क्रियते--पदान्तस्यानुत्वारस्य यो धर्मा स नुकोऽपि स्यादित्येवमर्थम्; तेनानुस्वारस्य पक्षे श्रवणं भविष्यतीति।
`तेतिम्यते' इति। `तिम ष्टिम आर्द्रीभावे' (धा.पा.1123,1124)।

अथ तपरकरणं किमर्थम्, यावता नास्ति किञ्चिदन्यदस्य व्यावर्त्यमिति सर्वत्र ह्रस्वाभावात्? इत्यत आह--`तपरकरणम्' इत्यादि। वर्त्तमानस्य दीर्घस्याभावाद्भूतपूर्वस्यापि दीर्घस्य निवृत्त्यर्थं तपरकरणं भविष्यतीति। `बाभाम्यते' इति। `भाम क्रोधे' (धा.पा.441)।।

86. जपजभदहदशभन्जपशां च। (7.4.86)
अनुनासिकार्तोऽयमारम्भः। `जप जल्प व्यक्तायां वाचि' (धा.पा.397,398), `जभि जृभी गात्रविनामे' (धा.पा.388,389) `दह भस्मीकरणे' (धा.पा.991), `दन्श दशने' (धा.पा.989) `भव्जो आमर्दने' (धा.पा.1453), `पशिः' सौत्रो धातुः। `जञ्जप्यते' इत्यादिषु `दंदश्यते' इति पर्यन्तेषु `लुपसद' (3.1.24) इत्यादिना यङ्। इतरत्र सामान्यलक्षणेन' (3.1.22)।।

87. चरफलोश्च। (7.4.87)
`चर गतौ' (धा.पा.559)। `ञि फला विशरणे' (धा.पा.516), `फल निष्पत्तौ' (धा.पा.530)-द्वयोरपि ग्रहणम्। निष्पत्त्यर्थस्याकार उच्चारणार्थः, नानुबन्धः, प्रयोजनाभावात्, ततश्च निरनुबन्धकपरिभाषया (व्या.प.53) निरनुबन्धस्य निष्पत्त्यर्थस्यैवास्य ग्रहणं प्राप्नोति, न विशरणार्थस्य? नैष दोषः; चकारोऽत्र क्रियते, स च विशरणार्थस्य समुच्चयार्थो भविष्यति। `चञ्चूर्यते' इति। `लुपसद' (3.1.24) इत्यादिना यङ। उत्तरसूत्रेणाकारस्योकारे कृते `हलि च' (8.2.77) इति दीर्घः। योगभाग उत्तरार्थः।।

88. उत्परस्यातः।(7.4.88)
`अभ्यासस्य मा भूत्' इति। असति परग्रहणेऽभ्यासाधिकारादभ्यासस्यैव स्यादित्यभिप्रायः। `अलोऽन्त्यस्य मा भूत्' इति। यदि `अतः' इति नोच्येत, ततोऽलोऽन्त्य (1.1.52) परिभाषयाऽभ्यासात्परस्य धातुरूपस्य योऽन्त्योऽल् तस्य स्यादिति मन्यते।
अथ तपरकरणं किमर्थम्, यावता मात्रिकस्य स्थान आन्तरतम्याद्विधीयमानो मात्रिक एव भविष्यति? इत्यत आह--`तपरकरणम्' इत्यादि। असति तपरकरण उकारे कृते चञ्चूर्ति, पम्फुल्तीत्यत्र `पुगन्तलघूपधस्य' (7.3.86) इति गुणः स्यात्, स मा भूदित्येवमर्थं तपरकरणं क्रियते। ननु चञ्चूर्तीत्यत्र दीर्घत्वमेव गुणस्य बाधको भविष्यति, तत्किमेतन्निवृत्त्यर्थेन तपरकरणेन? इत्यत आह--`दीर्घत्वम्' इत्यादि। असिद्धत्वं तु `पूर्वत्रासिद्धम्' (8.2.1) इत्यनेन। यदि तर्हि लक्षणान्तरेण प्राप्तो गुणस्तपरकरणेन निवर्त्तते, गुणवद्दीर्घत्वमपि न स्यात्/ नैष दोषः; तपरकरणे हि दीर्घत्वमपि सिद्धमिति। तेन दीर्घस्य निवृत्तिर्न शक्यते वक्तुम्। तथा च --`अत उत् सार्वधातुके' (6.4.110) इति तपरकरणेन दीर्घत्वमशक्यं निवर्त्तयितुमिति मन्यमानेन `न भकुर्च्छुराम्' (8.2.79) इति करोतेर्दीर्घत्वप्रतिषेध आरभ्यते। अत इति तपरकरणमिह मा भूत्--फलन्तं प्रयुङ्क्ते फालयति, फालयतेः क्विप्, तदन्तात् `आचारे पुनः सर्वप्रातिपदिकेभ्यः' (वा.186?) इति क्विप्, तदन्ताद्यङ्--पन्फाल्यते, पम्फालोति। कथञ्च प्राप्नोति? एकदेशविकृतस्यानन्यत्वात्।।

89. ति च। (7.4.89)
अयङलुगर्थोऽयमारम्भः। `चूर्त्तिः' इति। `स्त्रियां क्तिन्' (3.3.94) पूर्ववद्दीर्घः। `प्रकृल्ताः' इति। `निष्ठा, तदन्ताट्टाप्; जस्। `वचनसामर्थ्यादिह नाभिसम्बध्यते' इति। यदीह यङ्लुग्ग्रहणमभ्यासग्रहणञ्चाभिसम्बध्येत, ततो वचनस्य वैयर्थ्यं स्यात्। पूर्वेणैव यङयङ्लुकोरभ्यासस्य सिद्धत्वादित्यभिप्रायः।।

90. रीगृदुपधस्य च। (7.4.90)
`वरीवृत्यते' इत्यादीनि वृतिवृधिनृतीनां (धा.पा.758,759.1116) रूपाणि। `रीगृत्वत इति वक्तव्यम्' इति। ऋदुपधादन्यस्यापि ऋत्वतो रीगादयो यथा

स्युरित्येवमर्थो व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--चकारोऽत्र क्रियते, स च ऋदुपधादन्यस्यापि ऋत्वतः समुच्चयार्थः, तेन वृश्चतिप्रभृतीनामपि ऋत्वतां रीगादयो भवन्तीति।
`रीगृत्वतः' इति सूत्रं न कृतम्; वैचित्र्याथम्।

`ऋदुपधस्य' इति तपरकरणमसन्देहार्थम्। उकारे परतो यणादेशे कृते सन्देहः स्यात्--किमृकारोपधस्य? अथ वा रेफोपधस्येति?।।

91. रुग्रिकौ च लुकि। (7.4.91)

92. ऋतश्च। (7.4.92)
लुकीत्येव। चकारेण रीगादयोऽनुकृष्यन्ते। `चर्कर्ति' इति। `डुकृञ् करणे' (धा.पा.1472) `जर्हति' इति। `हृञ् हरणे' (धा.पा.899)।

`किरतेश्चाकर्ति' इति। `कॄ विक्षेपे' (धा.पा.1409), इत्यस्य।

`किरतिम्' इत्यादि। किरतिग्रहणमुपलक्षणार्थम्। तेन `गॄ निगरणे' (धा.पा.1410) इत्येवमादेरपि ॠकारान्तस्य ग्रहणं वेदितव्यम्। `चर्करीतान्तम्' इति। यङ्लुगन्तमित्यर्थः। यङ्लुक एव पूर्वाचार्यप्रणीतैषा संज्ञा `चर्करीतम्। इति। `पचति' इति। लट्प्रथमपुरुषस्यैकवचनम्। एतदप्युपलक्षणार्थमेव। वचनान्तराणामपि ह्यत्र ग्रहणम्। तेन `कृ' इत्येवमादिकमृकारान्तं यो लट्प्रथमपुरुषैकवचनादौ नये=चाकर्तीत्येवमादीनि रूपाणि प्रापयेत्, सम्पादयेदितग्रथः. `प्राप्तिज्ञं तमहं मन्ये' इति। प्राप्तिं जानातीति प्राप्तिज्ञः। इह तु रुगादीनां प्रकृतत्वात् तत्प्राप्तिं यो जानाति स प्राप्तिज्ञो वेदितव्यः। मन्यं=अवगच्छा। `प्रारब्धस्तेन संग्रहणः' इति। अनेन प्राप्तितायां हेतुमाह। सम्यग्गृह्यते ज्ञापये लक्षणमनेनेति संग्रहः=व्याकरणशास्त्रम्। प्रकर्षेणारब्धः प्रारब्धः; बहुभ्यो बहुशः श्रवणात्।

का पुनरसां प्राप्तिर्यत्परिज्ञानाय प्राप्तिज्ञमवगच्छामीत्याह--`तत्रेयम्' इत्यादि। द्वयमिह प्रकृतम्--अङ्गम् अभ्यासश्चेति। ऋत इति विशेषणमुपात्तम्; तत्र यद्यप्युमयं प्रकृतं तथाप्यृत इत्येतदङ्गस्यैव विशेषणम्, नाभ्यासस्य। कुतः? तपरकरणसामर्थ्यात्। सर्वत्रैव ह्यभ्यासस्य `ह्रस्वः' (7.4.59) इति ह्रस्वत्वेन भवितव्यम्; अतो दीर्घस्याम्यासस्याभावात्। यदि `ऋतः' इत्येदभ्यासस्य विशेषणं स्यात्, तदा तपरकरणमनर्थकं स्यात्। तस्मात् तपरकरणसामर्थ्यादङ्गस्यैव विशेषणमृत इत्येतत्, नाभ्यासस्य। एवञ्च सति किरतेरप्राप्तिः; रुगादीनां तपरकरणेन व्यावर्त्तितत्वात्। आदिशब्देन रिगादीनां परिग्रहः। `तथा चाप्राप्तिः किरते रुगादीनाम्' इति ब्रुवर्ततदुक्तं भवति--करोतिप्रभृतीनामेव ह्रस्वान्तानां परिशेष्यात् प्राप्तिरिति।।

93. सन्वल्लघुनि चङ्परेऽनग्लोपे। (7.4.93)

`सन्यतः' (7.4.79) इत्यादिना सूत्रत्रयेण यदभ्यासस्य सनि कार्यं भवति तल्लघुनि चङ्पर इत्यतिदिश्यते। `लघुनि' `चङ्परे' इति। व्यधिकरणे सप्तम्यौ--चङपरे णौ परतो यत् पूर्वं लघु तस्मिन् परतो योऽभ्यासस्तस्य सन्वद्भवतीति। `चङपरे' इति बहुव्रीहिः--चङ् परो यस्मादिति तच्चङ्परम्; न तु चङ् चासौ परश्चेति तत्पुरुष. तेन सामर्थ्याण्ण्यन्तस्यैवायमतिदेशो विज्ञायते; अन्यथा हि यदि प्रकृत्यन्तस्यायमतिदेशः स्यात्, तदा `सन्वच्चङि' इत्येवं ब्रूयात्। `अनन्लोपे' इति। `चङ्परे' इत्यस्यैतद्विशेषणम्। अगिति प्रत्याहारग्रहणम्। अको लोपोऽग्लोपः, स यस्य नास्ति तदनग्लोपम्। `अपीपचत्' इति। पचेर्णित्, लुङ्, च्लेश्चङ्, उपधाह्रस्वत्वम्, द्विर्वचनमभ्यासकार्यम्, हलादिशेषे च कृतेऽनेन सन्वद्भावः, `सन्यतः' (7.4.79) इतीत्त्वम्, उत्तरसूत्रेण (7.4.94) दीर्घत्वम्।
`अततक्षत्, अररक्षत्' इति। अत रेफतकारयोः संयोगपरत्वाद् गुरुसंज्ञायां सत्यां न भवति सन्वद्भावः। `अजजागरत्' इति। अत्र जकाराकारस्य दीर्घत्वाद्गुरुत्वम्।

`अत्र केचित्' इत्यादि। तेषां `अजीजागरत्' इति भवितव्यम्। किं पुनः कारं त एवमिच्छन्ति, यावता लघुनि चङ्पर इत्यच्यते, व्यवहितश्चात्र लघुनि चङ्परे? इत्यत आह--`सर्वत्रैव' इत्यादि। `अचीकरत्' इत्यादावपि ककारादिना वर्णेन व्यवधानाल्लघोरानन्तर्यमभ्यासे नास्ति; उच्यते चेदं वचनम्, अतो वचनप्रामाण्या द्वय्वधान एव सन्वद्भावेन भवितव्यम्। ततश्च यथा `अचीकरत्' इत्यादौ व्यवधानेऽपि भवति, तथेहापि व्यवधाने सन्वत्कार्येण भवितव्यम्। अथ चेद्व्यवधानान्न भवति, अत्रापि न स्यादिति भावः। `तदसत्' इति। `अजजागरत्' इत्यत्र गृशब्दं लघुमाश्रित्य यत् सनवद्भावमिच्छन्ति, सर्वत्रैवेत्यादिना च यत् कारणमुक्तम्, तदुभयमत्राशोभनम्; अयुक्तत्वात्। कथम्? इतयाह--`येन' इत्यादि। एकेन वर्णेन व्यवधानमस्ति सर्वत्र। वर्णसङ्घातेन व्यवधानमस्ति नास्ति च। तत्र `येन नाव्यधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या.प.46) इति यन्नियतभाव्येकेन वर्णेन व्यवधानमशक्यं परिहर्त्तुम्, तदेवाश्रीयते, न तु वर्णसङ्गातेन। `अजजागरत्' इत्यत्र वर्णसङ्घातेन व्यवधानम्।
यदि तर्हि वर्णसङ्घातेन व्यवधानं नाश्रीयते, व्यञ्जनसङ्घातेन व्यवधाने न सिद्धयति? इत्यभिप्रायेणाह--`कथमचिक्षणत्' इत्यादि। `क्षणु हिंसायाम्' (धा.पा.1465) इत्येतस्यैतद्रूपम्। अत्रापि ज्ञापकेन सिद्ध्यतीत्यत आह--`आचार्यप्रवृत्तिः' इत्यादि। क्षणोतिना ये सदृशाः संयोगादयस्त एवञ्जातीयाः। क्षणोतिप्रकारः इत्यर्थः। तेषां यदीत्त्वं न स्यात्, तदा तद्बाधनार्थं `अत्स्मृदृत्वरप्रथभ्रद' (7.4.95) इत्यादिनात्त्वं न विदध्यात्, विदधाति च। तस्मादेतदेवात्त्वविधानलक्षणमाचार्यप्रवृत्तिर्ज्ञापयति--`भवत्येवञ्जातीयकानामित्त्वम्' इति।
`अहं पपच' इति। उत्तमे णलि यदा `णलुत्तमो वा' (7.1.91) इति णित्त्वं नास्ति तदेदं प्रत्युदाहरणं भवति। अत्र लघुपरतोऽक्षरम्, न तु चङ्परम्। `अचकमत' इत्यादि। कमेश्चोपसंख्यानम्' (वा.208) इति `कमु कान्तौ' (धा.पा.443) इत्येतस्मात् प्रकृत्यन्तादेव लुङ्, चङ्। `अचकथत्' इति। `कथ वाक्यप्रबन्धे' (धा.पा.1851) चुरादावदन्तः। अत्र `अतो लोपः' (6.4.48) इत्यकारलोपः। अत्र त्वग्लोपस्य स्थानिवद्भावे सति व्यवधानेऽपि न स्यात्। अतः प्रत्युदाहरणान्तरमाह--`दृषदमाख्यददृषत्' इति। `तत्करोति तदाचष्टे' (वा.200?) इति णिच्। `णाविष्ठवत् कार्य प्रातिपदिकस्य' (वा.811) इतीष्ठवद्भावाट्टिलोपः। अत्राज्झलोर्लोपः, नाक एव केवलस्येति नास्त्यत्र स्थानिवद्भावः। अन्यार्थं त्वग्लोप इति क्रियमाणमचकथदित्यत्रापि सन्वद्भावं निवर्त्तयतीत्यस्योपन्यासः।
`अवीवदत्' इति। वदतेर्ण्यन्ताद् वादितवन्तं प्रयोजितवानिति `हेतुमति च' (3.1.26) इति णिच्, पुनर्णिच्युत्पन्ने `णेरनिटि' (6.4.51) इति णिलोपे कृते सत्यप्यग्लोप्यङ्गं भवति, अतो न भवितव्यं सन्वद्भावेनेति यो मन्यते, तं प्रत्याह--`वादितवन्तं प्रयोजितवान्' इत्यादि। `चङ्परे' इत्यादिना णिलोपस्याग्लोपित्वेनानाश्रयणे कारणमाह। `चङ्परे' इत्यनेन हि सन्वद्भावनिमित्तेन णिजातिराक्षिप्ता। तस्माद्गोबलीवर्दन्यायेन णिजातिर्निमित्तत्वेनाश्रीयते। अतो णिजातेरन्यस्याको लोपः प्रतिषेधनिमित्तत्वेन परिगृह्यते, न तु तस्या एव णिजातेः। तस्माण्णिलोपस्याग्लोपित्वेनानाश्रयणात् तल्लोपेऽग्लोप्यङ्गं न भवति। अतो भवत्येवात्र सन्वद्भावः। सन्वदित्यतिदेशेन यथाचीकरदित्यादावभ्यासस्येत्त्वं भवति तथामीमपदित्यादावप्यभ्यासलोपेन मीमादीनां भवितव्यमिति यश्चोदयेत्, तं प्रत्याह--`मीमादीनाम्' इत्यादि। आदिशब्देन ध्वादीनां ग्रहणम्। `किञ्च' इत्यादिना परीहारान्तरम्। सन्वदित्यतिदेशेन हि सनाश्रयणेव कार्यमतिदिश्यते। सनाश्रयञ्च किं कार्यम्? यत् सनमपेक्षते, नापरं किञ्चित्। न च `अत्र लोपेऽभ्यासस्य' (7.4.58) इत्यनेन विधीयमानो लोपः सनमेवापेक्षते, किं तर्हि? इस्भावादिकमपि। आदिशब्देन ध्वादीनां ग्रहणम्।
`किञ्च' इत्यादिना परोहारान्तरम्। सन्वदित्यतिदेशेन हि सनाश्रयमेव कार्यमतिदिश्यते। सनाश्रयञ्च किं कार्यम्? यत् सनमपेक्षते, नापरं किञ्चित्। न च `अत्र लोपेऽभ्यासस्य' (7.4.58) इत्यनेन विधीयभानो लोपः सनमेवापेक्षते, किं तर्हि? इस्भावादिकमपि। आदिशब्देन--`अब्ज्ञप्यृधामीत्' (7.4.55) इतीत्त्वम्, `मुचोऽकर्मकस्य' (7.4.57) इति गुणश्च परिगृह्यते। तेन `अभीमपत्' इत्यादाविसादेशो न भवति। अभ्यासलोपेऽपि न भवतीत्यभिप्रायः।।

94. दीर्घो लघोः। (7.4.94)

95. अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम्। (7.4.95)
`स्मृ चिन्तायाम्' (धा.पा.933), `दृ भये' (धा.पा.808), `ञि त्वरा सम्भ्रमे' (धा.पा.775), `प्रथ प्रख्याने' (धा.पा.1553), `म्रद मर्दने' (धा.पा.767), `स्तृञ् आच्छादने' (धा.पा.1484), `स्पशबाधनस्पर्शनयोः' (धा.पा.887)।
अथ `अददरत्' इत्यत्र `दीर्घो लघोः' (7.4.94) इति दीर्घत्वं कस्मान्न भवतीत्याह--`तपरकरणसामर्थ्यात्' इत्यादि। अनेनैव हि लक्षणेन दीर्घो औव प्राप्नोति, यस्य निवृत्तिस्तपरकरणेन क्रियते; `भाव्यमानोऽण् सवर्णान् न गृह्णाति' (व्या.पा.35)। इति भाव्यमानानां सवर्णानामग्रहणात् सर्वत्र स्थादिनो ह्रस्वत्वाच्च। तत्र यदि लक्षणान्तरेणापि प्राप्नुक्तो दीर्घस्य निवर्त्तकं तपरकरणं न स्यान्निरर्त्तकमेव तपरकरणं स्यात्। तस्मात् तपरकरणसामर्थ्यादिति कृते `दीर्घो लघोः' (7.4.94) इति दीर्घो न भवतीति भावः।।

96. विभाषा वेष्टिचेष्ट्योः। (7.4.96)
`वेष्ट वेष्टने' (धा.पा.255), `चेष्ट चेष्टायाम्' (धा.पा.256)--एतयोरभ्यासस्य लघुपरता नास्तीत्यप्राप्त एव सन्वद्भाव इति अनेन विभाषाऽकारो विधीयते।।

97. ई च गणः। (7.4.97)
`गण संख्याने' (धा.पा.1853) चुरादावदन्तः। तत्राकारात् `अतो लोपः' (6.4.48) इति लोपे कृतेऽनग्लोप इति वचनादप्राप्तयोरेव सन्बद्भावदीर्घयोरिवमीत्वं विधीयते।
चकारो विभाषेत्यनुकर्षणार्थः।।

इति बोधसत्त्वदेशीयाचायं श्रीजिनेन्द्रवुद्धिपादविरचितायां

काशिकाविवरणपञ्जिकायां सप्तमाध्यायस्य

चतुर्थः पादः

समाप्तश्च सप्तमोऽध्यायः
- - -

8.1
अष्टमोऽध्यायः

प्रथमः पादः

1. सर्वस्य द्वे। (8.1.1)
स्वरितलिङ्गासङ्गादधिकारत्वमस्यावगम्याह--`सर्वस्य' इत्यादि। `वक्ष्यामः' इति। व्याख्यास्याम इत्यर्थः। `प्राक् पदस्य' [`पदस्य' इत्यतः प्राक्--काशिका] इति। `पदस्य' (8.1.16) इति वक्ष्यमाणो यो योगस्तस्मात् प्रागित्यर्थः। `पदस्य' (8.1.16) इति वक्ष्यमाणस्य योगस्यानुकरणमेतत्। विभक्तिस्त्वनुकार्यानुकरणयोर्भेदस्यादिवक्षितत्वादसत्यर्थवत्वे प्रातिपदिकत्वाभावान्न भवति, यथा--गवित्ययमाहेति। `सर्वस्य द्वे भवत इत्येवं तद्वेदितव्यम्' इति। इतिकरणोऽर्थनिर्देशार्थः। `सर्वस्य द्वे भवतः' इति योऽयमर्थः प्रतीयत एतदर्थरूपं तद्वक्ष्यमाणं वेदितव्यमित्यर्थः।
`वक्ष्यति' इति। सूत्रकारः। `तत्र' इति। `नित्यवीप्सयोः' (8.1.4) इत्यत्र योगे। इह द्वौ पक्षौ सम्भवतः--स्थाने द्विर्वचनम्, द्विष्प्रयोगो द्विर्वचनञ्चेति। कथं कृत्वा? सर्वस्येति शब्दानुशासनप्रस्तावात् सर्वस्य शब्दस्येति गम्यते। यद् द्विशब्दश्चायं `आदशभ्यः संख्याः संख्येये वर्त्तन्ते' (हे.ग.90) इति संख्येयवचनः, तच्चेह संख्येयं शब्दरूपं वा स्यात्, आवृत्तिर्वा? `द्वे' इत्यपि निर्देशो नपुंसकलिङ्गेन वा स्यात्? स्त्रीलिङ्गेन वा? तत्र यदा नपुंसकलिङ्गेन निर्देशः, तदा शब्दरूपे संख्येये। यदि स्त्रीलिङ्गेन निर्देशा, तदा शब्दस्यावृत्ती उच्चारणलक्षणे क्रिये। तत्र यदा शब्दरूपे विधीयेते तदा सर्वस्येति स्थानषष्ठीयं सम्पद्यते; अनियतसम्बन्धत्वात् `षष्ठी स्थानेयोगा' (1.1.49) इति न्यायात्। अस्मिन् दर्शने `स्थाने द्विर्वचनम्' इत्येष पक्षो भवति। यदा तु द्वे आवृत्ती विधीयेते तदा `द्विष्प्रयोगो द्विर्वचनम्' इत्येष पक्षो जायते। अस्मिन् दर्शने स्थान्यादेशभावो नास्ति। आवृत्तिर्हि क्रिया, तस्याश्चेह शब्दः साधनम्। न च क्रियायाः साधनस्य च स्थान्यादेशभाव उपपद्यते। यदि हि स्यात्, शब्दस्य स्थानिनो निवृत्तिधर्मत्वान्निवृत्तिरेव स्यात्; ततश्च क्रियाया अभाव एव स्यात्। न हि शब्देन विनोच्चारणक्रियोपपद्यते; तस्याः शब्दधर्मत्वात्। तस्माद्यदाद्वे आवृत्ती विधीयेते तदा `द्विष्प्रयोगो द्विर्वचनम्' इत्येष पक्ष उपजायते। अस्मिंस्तु पक्ष आवृत्तिशब्दापेक्षया सर्वस्येति `कर्त्तृकर्मणोः कृति' (2.3.65) इति कृद्योगलक्षणा कर्त्तृषष्ठी वेदितव्या। सर्वो हि शब्द आवर्त्त्यमान एवावृत्तिक्रियायाः कर्त्ता भवति। अवाद्यां पक्षमाश्रित्यैतदुक्तम्--सर्वस्य स्थाने द्वे भवत इति।
कथं पुनः स्थाने द्विर्वचनपक्ष आश्रितः? कथं पुनर्नाश्रयितव्यः? सदोषत्वात्। स्थाने द्विर्वचने पुनः--श्वलिट्च्छवलिट्, दाग्वागिति `पूर्वत्रासिद्धम्' (8.2.1) इत्यसिद्धत्वात् पूर्वं ढत्वादिभ्यो द्विर्वचने कृते ढत्वादयोऽत्र न सिद्ध्यन्ति; अपदान्तत्वात्? नैष दोषः; वक्ष्यति ह्येतत्--`पूर्वत्रासिद्धीयमद्विर्वचने' (जै.प.दृ.70) इति। अपि च नित्येऽर्थे वीप्सायाञ्च यः शब्दो वर्त्तते तस्य द्विर्वचनं विधीयते, न च ढत्वादिष्वकृतेषु नित्यादावर्थे पदस्य वृत्तिरुपपद्यते। तस्मात् पूर्वं ढत्वादिभिरेव भवितव्यम्; पश्चाद्द्विर्वचनेनेत्येष क्रमः। इह तर्हि विसंविसम्, मुसलम्भुलमित्यत्र `आदेशप्रत्यययोः' (8.3.59) इति षत्वं प्राप्नोति? अयमप्यदोषः; यस्मादादेशो यः सकारस्तस्य षत्वं विधीयते, न ह्यत्रादेशः सकारः, किं तर्हि? तदवयवः। इह तर्हि नृभिर्नृभिरित्यत्र `रषाभ्यां नो णः समानपदे' (8.4.1) इति णत्वं प्राप्नोति? एषोऽप्यदोषः; कार्यिणो नकरस्य रेफादिना निमित्तेन यदा सर्वदा समानपदस्थत्वमेवं सति णत्वेन प्राप्नोति? एषोऽप्यदोषः; कार्यिणो नकारस्य रेफादिना निमित्तेन यदा सर्वदा समानपदस्थत्वमेवं सति णत्वेन भवितव्यमिति। किं वक्तव्यमेतत्? न; कथं तर्हि अनुच्यमानं लभ्यते? समानग्रहणसामर्थ्यात्। यदि हि यत्र समानपदस्थत्वमसमानपदत्वञ्च तत्रापि स्यात्, समानग्रहणमनर्थकं स्यात्। नृभिरिति शब्दस्य

नकारस्य द्विर्वचन एव कृते रेफेण निमित्तेन समानपदस्थत्वम्, नाऽकृते। तस्माददुष्ट एव स्थाने द्विर्वचनपक्ष इति युक्त एवाश्रयितुम्। `के द्वे' इति। एवं मन्यते--विशिष्टे द्वे एवेष्येते, इह च विशेषानुपादानादनियमेन ये केचन शब्दरूपे अप्नुत इति। `स्थानेऽन्तरतमः' (1.1.50) इति परिभाषया व्यवस्था भवितव्यतीत्यनेनाभिप्रायेणाह--`ये शब्दतश्च' इत्यादि। इह केषाञ्चित् शब्दानां शब्दत एवान्तरतम्यम्, यथा--बिभीतकादिवाचिनामक्षादिशब्दानाम्। केषाञ्चिदर्थत एव, न शब्दतः, यथा--तरुपादपादिशब्दानाम्। केषाञ्चिदुभयत एव, यथा--द्वयोः पजतिशब्दयोस्तिङतयोः। ततोभयथा यत्रान्तरतम्यमस्ति तत्र यथा स्यादित्येवमर्थमुभयोर्ग्रहणम्। एतच्च `स्थानेऽन्तरतमः' (1.150) इति परिभाषायास्तमब्ग्रहणाल्लभ्यते। ते एवोभयथाऽन्तरतमे दर्शयितुमाह--`एकस्य' इत्यादि। अथ `स्वं रूपं शब्दस्याशब्दसंज्ञा' (1.1.68) इति स्वरूपग्रहणाद्द्विशब्दादेश एव कस्मान्न भवति? द्विर्वचनेन निर्देशात्। स्वरूपग्रहणे तु सति द्विशब्दादेशप्रसङ्गः। यतश्चायं `तस्य परमाम्रेडितम्' (8.1.2), `अनुदात्तञ्च' (8.1.3) इत्याह, ततो, विज्ञायते--न द्विशब्दादेश इति। द्विशब्दादेशे हि सति भेदनिबन्धनत्वात् परस्य द्विशब्दस्य चाभिन्नत्वात् परत्वमेव तावन्न द्विशब्दादेशे स्यात्, कुतः पुनराम्रेडितसंज्ञा, अनुदात्तत्वञ्च? यदि च द्विशब्द आदेशः स्यात्, `अव्यक्तानुकरणस्यात इतौ' (6.1.98) इत्यनुवर्त्तमाने `नाम्रेडितस्यान्त्यस्य तु या' (6.1.99) इत्याम्रेडितावयवस्याच्छब्दस्य पररूपत्वप्रतिषेधो नोपपद्यते, न द्विशब्दस्याच्छब्दोऽवयवोऽस्ति। एतेन सर्वशब्दस्यापि स्वरूपग्रहणं प्रतिक्षिप्तम्। यदि हि सर्वशब्दस्य स्वरूपग्रहणं स्यात्, तस्यैव हि द्विर्वचनं स्यात्। ततश्च पूर्ववदाम्रेडितसम्बन्धिनोऽच्छब्दस्य पररूपत्वप्रतिषेधो नोपपद्यते, `नित्यवीप्सयोः' (8.1.4) इत्यत्र नित्यग्रहणं चानर्थकं स्यात्। तत्र हि नित्येऽर्थे वीप्सायां च वर्त्तमानस्य द्विर्वचनं विधास्यते। न च सर्वशब्दस्य नित्येऽर्थे वृत्तिरस्ति, तिङ्क्षु नित्यता; `अव्ययकृत्सुच्सुप्सु वीप्सा' इति वचनात्। तस्मात् सर्वस्येत्यत्रार्थग्रहणम्। सर्वशब्दोऽयमिह सकले कलावति वर्त्तते, तेन पचतीत्यादेः कृत्स्नस्य शब्दस्य द्विर्वचनं भवतीत्यलमतिप्रसङ्गेन। एवं तावत् स्थाने द्विर्वचनपक्षमाश्रित्य `सर्वस्य स्थाने द्वे भवतः' इत्युक्तम्।

इदानीम् `द्विष्प्रयोगो द्विर्वचनम्' इति पक्षमाश्रित्याह--`यदा तु' इत्यादि। तुशब्दः पूर्वस्मात् पक्षाद्विशेवस्य प्रदर्शकः, तत्रान्तरतम्येन द्वे शब्दरूपे आदिश्येते। इह तु स एव शब्दो द्विरावर्त्त्यते, द्विरुच्यत इत्यर्थः। `द्वे आवृत्ती भवतः' इति। द्वे उच्चारणाक्रिये भवत इत्यर्थः। कथं पुनः `द्विष्प्रयोगो द्विर्वचनम्' इति पक्ष आश्रयितव्यः? कथं च नाश्रयितव्यः? सदोषत्वात्। द्विष्प्रयोगे हि--`आम् पचसि पचसि देवदत्त' इत्यत्र `आम एकान्तरमामन्त्रितमनन्तिके' (8.1.55) इति निघातप्रतिषेधो न प्राप्नोति; आमन्त्रितस्य पदद्वयेन व्यवधानादेकान्तरताया अभावात्। स्थाने पुनर्द्विर्वचने ह्येकपदस्यायमादेश इति सत्यप्यादेशस्य स्वगते भेदे स्थानिवद्भावादेकत्वव्यपदेशे सत्येकीवितरती भवतीति निघातप्रतिषेधः सिध्यति? नैष दोषः; धर्मभेदादुपचरितो हीह भेदः, स्वगतस्त्वभेद एव; अन्यथा वृत्तिरेव न स्यात्। एकस्यैव हि वस्तुन आवृत्तदिः क्रियते। तस्माद्भिन्नत्वाद्वस्तुन इहैव सुनरमेकान्तरता सिध्यति। इह तर्हि पौनःपुन्यमिति? अत्र `गुणवचनब्राह्मणादिभ्यः कर्मणि च' (5.1.124) इति ष्यञ् न प्राप्नोति, पौनःपुनिक इत्यत्र च `कालाट्ठञ्' (4.3.11) इति ठञ् न प्राप्नोति; अप्रातिपदिकत्वात्। अप्रातिपदिकत्वं त्वर्थवत्समुदायानां समासस्यैवेति समासग्रहणस्य नियमार्थत्वात्। स्थाने द्विर्वचने पुनर्यद्यपि सुबन्ततया स्वाश्रया प्रातिपदिकसंज्ञा नास्ति, तथापि स्थानिवद्भावात् प्रातिपदिकग्रहणे ग्रहणात् प्रातिपदिकं भवति। यद्यपि चास्य स्थानी प्रत्ययलक्षणेन सुबन्तः; तथाप्यप्रत्ययः (1.2.45) इति प्रातिपदिकसंज्ञायाः प्रतिषेधो न भवति; प्रातिपदिकसंज्ञायाः प्रत्ययलक्षणेताप्रत्यय (1.2.45) इति प्रतिषेधो न भवतीत्यस्यार्थस्य `न ङिसम्बुद्ध्योः' (8.2.8) इत्यनेन ज्ञापितत्वात्। द्विष्प्रयोगे द्विर्ववसेऽपि न दोषः। अत्र समासग्रहणं हि तुल्यजातोयस्यैव प्रातिपदिकसंज्ञां निवर्त्तयति। कश्च तुल्यजातीयः? यस्य भेदसंसर्गद्वारेण समुदायार्थ उपजायते। कस्य चैवं विधोऽर्थ उपजायते? वाक्यस्य। नित्यादिश्चायमर्थः पदादस्थायां न दृष्ट एव। द्विरुक्तिकाले दृश्यमानः पदान्तरेण न भिद्यते, नापि संसृज्यत इति कुत एवम्प्रकारस्य समासग्रहणान्निवृत्तिः। अथ वाऽऽचार्यप्रवृत्तिर्ज्ञापयति--भवत्येवंजातोयेभ्यस्तद्धितोत्पत्तिरिति, यदयं कस्यादिषु कौतस्कुतशब्दं पठति। कुतः कुत आगत इति `अव्ययात्त्यप्' (4.2.104) इति त्यपि प्राप्तेऽस्मादेव निपातनादण्।

सर्वस्येति वचनमिह `अलोऽन्त्यस्य' (1.1.52) निवृत्त्यर्थं वा स्यात्? षष्ठ्यर्थप्रतिपत्त्यर्थ वा? तत्र त्वलोऽन्त्यनिवृत्त्यर्थं तावन्नोपपद्यते। तथा हि--शब्दतश्चार्थतश्चान्तरतमाभ्यां द्वाभ्यां शब्दरूपाभ्यां भवितव्यम्। ये चैवम्प्रकारे ते नियोगतोऽनेकाल्स्वरूपे इत्यन्तरेणापि सर्वग्रहणेन `अनेकाल्शित्सर्वस्य' (1.1.55) इति। सर्वस्यैव भविष्यतः, नान्त्यस्य। षष्ठ्यर्थप्रतपत्त्यर्थमपि सर्वग्रहणं नोपपद्यते। तथा हि--यत्र तावत् षष्ठ्युच्चार्यते `परेर्वर्जने' (8.1.5) इत्यादौ, तत्र षष्ठ्युच्चारणादेव षष्ठ्यर्थस्य प्रतिपत्तिर्भविष्यति। `नित्यवीप्समोः' (8.1.4) इत्यत्र यद्यपि षष्ठी नोच्चार्यते, तथापि सर्वस्येति वचनमन्तरेणापि शक्यते षष्ठ्यर्थोऽवगन्तुम्। कथम्? `द्वे' इति ह्यादेशनिर्देशः, आदेशश्च सम्बन्धिनमपेक्षते, `नित्यवीप्सयोः' (8.1.4) इति चार्थनिर्देशाः; न चार्थनिर्देशे स्थान्यादेशसम्बन्ध उपपद्यते। तस्मान्नित्यदीप्सयोर्यः शब्दो वर्त्तते तस्य द्वे भवतः--इत्येवं वाक्यार्थः स्थाने द्विर्वचनपक्षे तावदवगम्यते। यदा `द्विष्प्रयोगो द्विर्वचनम्' तदापि विना सर्वस्येति वचनेन षष्ठ्यर्थोऽवगम्यत एव। एवं ह्यावृत्तिर्हि क्रिया, तस्या अवश्यं साधनेन सम्बन्धिना भवितव्यम्; तदायत्तत्वादात्मलाभस्य क्रियायाः। तस्माद्यत्तस्याः क्रियायाः साधनं तस्य द्वे भवत इति विल्पष्टैव षष्ठ्यर्थप्रतिपत्तिर्भवतीत्यभिप्रायेणाह--`सर्वस्येति किम्' इति। `विस्पष्टार्थम्' इति। य एवं न शक्नोति सर्वादेशं षष्ठ्यर्थं वा प्रतिपत्तुम्, तं प्रति सुखप्रतिपत्तये सर्वस्येत्युच्यत इति भावः।

`अथ' इत्यादि। एवं मन्यते--`पदस्य' इत्युच्यमाने समासतद्धितवाक्यानां द्विर्वचननिवृत्तिः कृता भवति; उत्तरत्र च `पदस्य' (8.1.16) इति वक्तव्यं न भवति। एतदेव हि `पदस्य' इति वचनं तत्रानुवर्त्तयिष्यते। अनुच्यमाने `पदस्य' इत्येस्मिन्, समासस्यापि द्विर्वचनं स्यात्--पर्वणिपर्वणि सप्तसप्त पर्णान्यस्य सन्तीति सप्तपर्ण इति; तद्धितस्यापि द्वौ द्वौ पादौ ददाति `पादशतस्य संख्यादेः' (5.4.1) इत्यादिना वन्--द्विपदिकां ददातीति; वाक्यस्यापि--ग्रामेग्रामे पानीयमिति। पदस्य' (8.1.16) इति चोत्तरत्र न वक्तव्यं भवति। `नैवं शक्यम्' इति। अत्र कारणमाह--`इह हि' इत्यादि। `प्रपचति' इति। वाक्यमेतत्,

पदसमुदायात्मकत्वात्। अत्र `पदस्य' इत्युच्यमानेऽस्य द्विर्वचनं न स्यात्। तस्मादशक्यं पदस्येति वक्तुम्। सप्तपर्णः, द्विपदिकां ददातीत्यत्र तु पदस्येत्युच्यमाने द्विर्वचनं न भविष्यति; समासतद्धिताभ्यामेवोक्तत्वात्। वीप्सायां ग्रामेग्रामे पानीयमित्यत्रापि न भविष्यति; अवयवद्विर्वचनेनैव वीप्साया द्योतितत्वादित्यभिप्रायः।

`इह' इत्यादि। `द्रूह जिघांसायाम्' (धा.पा.1197), ततस्तृच्, द्रुह्+तृ इति स्थिते घत्वढत्वे प्राप्नुतः, द्विर्वचनं च, तत्र `पूर्वत्रासिद्धम्' (8.2.1) इति द्विर्वचने कर्त्तव्ये यत्वढत्वयोरसिद्धत्वादकृतयोरेव तयोर्द्विर्वचनं पूर्वं प्राप्नोति। कृते तस्मिन् पश्चात् `वा द्रुहमुहष्णुष्णिहाम्' (8.2.33) इति विकल्पे सत्यनिष्टमपि प्राप्नोति। नावश्यमिष्टमेव यद्ययं नियमो लभ्यते। यदैकस्य धत्वं भवति तदा द्वितीयस्यापि घत्वेन भवितव्यम्, यदा त्वेकस्य ढत्वं तदा द्वितीयस्यापि ढत्वेन भवितव्यमिति तदेष्टमेव स्यात्। न त्वेष नियमो लभ्यते; नियमकारणाभवात्। तस्मात् कदाचिदनिष्टमपि स्यात्। तत्र यदा पूर्वोत्तरयोरेकस्य घत्वं भवत्यपरस्य ढत्वम्, तदानिष्टमपि प्राप्नोति। यदोभयोरपि घत्वं ढत्वं वा भवति, तदेष्टं स्यात् तस्मादनिष्टनिवृत्त्यर्थम् `पूर्वत्रासिद्धीयमद्विर्वचने' (जै.प.वृ.70) इति वक्तव्यम्। `पूर्वत्रासिद्धम्' (8.2.1) इत्यस्मिन्नधिकारे भवं पूर्वत्रासिद्धीयं नलोपादिकार्यम्। गहादित्वाच्छः (4.2.138), ततो द्विर्वचनादन्यत्रासिद्धं भवति, न तु द्विर्वचने।

अथ वा--पूर्वत्र सपादसप्ताध्याय्यामसिद्धं पूर्वत्रासिद्धम्, तदेव नलोपादिकार्यम्, तत्र भवं पूर्वत्रासिद्धीयम्। तत् पुनस्तस्यैव नलोपादेरसिद्धत्वम्, तद्द्विर्वचनादन्यस्मिन् कर्त्तव्ये भवति, न तु द्विर्वचन एव। एतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`न मु ने' (8.2.3) इत्यत्र नेति यचोगविभागः कर्त्तव्यः, तेन द्विर्वचने कर्त्तव्येऽसिद्धत्वं न भविष्यतीति। असति चासिद्धत्वे द्रूहेस्तृचि कृते पूर्वं विकल्पेन घत्वम्, `झषस्तथोर्घोऽधः' (8.2.40) इति धत्वम्, `झलां जश् झशि' (8.4.53) इति जश्त्वम्--धकारस्य गकारः, ततो द्विर्वचनम्--द्रोग्धाद्रोग्योति। यदा तु घत्वं नास्ति तदा `हो ढः' (8.2.31) इति ढत्वम्, पूर्ववद्धत्वम्। ष्टुत्वञ्च, `ढो ढे लोपः' (8.3.13) इति पूर्वढकारलोपः, ततो द्विर्वचनम्--द्रोढाद्रोढेति; इष्टमेव सिध्यति। यदि तर्हि `पूर्वत्रासिद्धीयमद्विर्वचने' (जै.प.वृ.70) इत्येतद्वक्तव्यम्; तदा `पूर्वत्रासिद्धम्' (8.2.1) इत्यत्र औजढवित्यस्य सिद्धये यद्वक्ष्यति--`ढत्वष्टुत्पढलोपादीनामसिद्धत्वाण्णौ यष्टिलोपस्तस्य स्थानिवद्भावाद् हत् इत्येतद्द्विरुच्यते' इति--तद्विरुध्यते? नास्ति विरोधः; `पूर्वत्रासिद्धीयमद्विर्वचने' (जै.प.वृ.70) इत्यस्यासर्वविषयत्वात्। कथं विज्ञायते? `उभौ साभ्यासस्य' (8.4.21) इत्यस्य सूत्रस्यारम्भात्। यदि हि `पूर्वत्रासिद्धीयमद्विर्वचने' (जै.प.वृ.70) इत्येतत् सर्वविषयकं स्यात्, एवं सति `अनितेः' (8.4.19) इत्यनेन कृतणत्वस्य द्विर्वचनेन भवितव्यमिति सिद्धम्--प्राणिणिषतीत्यादिकं रूपम्, किम् `उभौ साभ्यासस्य' (8.4.21) इत्येनेन सूत्रारम्भेम? आरब्धञ्च, ततो ज्ञापते, पूर्वत्रासिद्धीयमद्विर्वचने' (जै.प.वृ.70) इत्येतदसर्वविषयमिति। यस्तु मन्यते--आष्टमिकं द्विर्वचनमभिप्रेत्यैतद्वक्यव्यमिति, तदयुक्तम्; तस्य `सुविनिर्दुर्भ्यः सुपिसूतिसमाः' (8.3.88) इत्यत्र विषुषुपुरित्यस्य सिद्ध्यर्थं यद्वक्ष्यति--`षुपिभूतो द्विरुच्यते' इति; तद्विरुध्यते; यदि हि षष्ठिके द्विर्वचने कर्त्तव्ये षत्वस्यासिद्धत्वं नास्ति, एवं षुपिभूतस्य द्विर्वचनं लभ्यते, नान्यथा। तस्मात् पूर्व एव परीहारः साधुः।

`सर्वस्येतद्वा' [`सर्वस्य' इत्येतदेव--काशिका, पदमञ्जरी च] इति। वाशब्दः पूर्वप्रयोजनापेक्षया विकल्पार्थः। अथ वा--नैवम्, विस्पटार्थ सर्वग्रहणम्। किं तर्हि? कृतसर्वकार्यस्य प्रतिपत्त्यर्थं कृतम्। सर्वं ढत्वादिकार्य यस्य तस्य प्रतिपत्तिः प्रतीतिर्यथा स्यादित्येवमर्थं सर्वग्रहणं द्रष्टव्यम। एतत् कथम्? सर्वशब्दोऽयं मत्वर्थीयाकारप्रत्ययान्तः--सर्वं कार्यमस्यास्तीति सर्वः, अर्शआदित्वादच् (5.2.127), तेन कृतसर्वकार्यस्य द्विर्वचनं भवतीत्युक्तं भवति।।

2. तस्य परमाम्रेडितम्। (8.1.2)

`तस्य' इत्ववयवषष्ठी। तस्य द्विरुक्तस्य यत् परमवयवभूतं शब्दरूपं तस्याम्रेडितसंज्ञा विधीयते। अथ द्विष्प्रयोगद्विर्वचनपक्षे कथं परमिति व्यपदेशः? कथञ्च न स्यात्? तस्य भेदनिबन्धनत्वात्। परव्यपदेशो हि भेदनिबन्धनः। न च द्विष्प्रयोगद्विर्वचनपक्षे शब्दभेदोऽस्ति, आवृत्तिमात्रं हि तत्र भिद्यते, न शब्दः? नैष दोषः; अभिन्नस्यापि शब्दस्य धर्मभेदादौपचारिकमन्यत्वं भविष्यति। भवति हि धर्मभेदादभिन्नेऽपि वस्तुनि भेदव्यवहारः। तथा हि वक्तारो वदन्ति--परुद्भवान् पटुरासीत् पटुतरश्चैषमोऽन्य एवासि संवृत्त इति। `चौर चौर' इति। `एङ्ह्रस्वात्सम्बुद्धेः' (6.1.69) इति सुलोपः, `वाक्यादेरामन्त्रितस्य' (8.1.8) इत्यादिना भर्त्सने द्विर्वचनम्, `आरम्रेडितं भर्त्सने' (8.2.95) इति प्लुतः। `दस्यो दस्यो' इति। `सम्बुद्धौ च' (7.3.106) इति गुणः।

अथ तस्यग्रहणं किमर्थम्, यावता `द्वे' इत्यनुवर्त्तिष्यते, तत्रैवं विज्ञायते--द्वयोर्यत् परमिति? नैवं शक्यम्; `एकाचो द्वे प्रथमस्य' (6.1.1) इत्यत्रापि परमाम्रेडितसंज्ञं स्यात्। तस्यग्रहणे सति यत्रैतद्वक्ष्यमाणं द्विर्वचनं तस्य परमिति विज्ञायते। तेन न भवत्यतिप्रसङ्गः।

आम्रेडितमिति महत्याः संज्ञायाः करणमन्वर्थसंज्ञाविज्ञानार्थम्। आम्रेड्यत आधिक्येनोच्यत इत्याम्रेडितम्। तेनेहापि भवति--अहो दर्शनीया अहो दर्शनीया, मह्यं रोचते मह्यं रोचत इति। दर्शनीयत्वस्य रुचेश्चाधिक्यं द्योतयितुमत्र द्रष्टव्यं द्विर्वचनम्। एतदेव महत्याः संज्ञायाः करणं ज्ञापकम्--आधिक्याभिधाने द्विर्वचनं भवतीति।।

3. अनुदात्तञ्च। (8.1.3)

प्रकृतिस्वरे प्राप्ते परस्यानुदात्तत्वमुच्यते। अनुदात्तशब्दश्चात्र परशब्दसामानाधिकरण्यान्न शास्त्रीयमनुदात्तमाह, किं तर्हि? अन्वर्थो विज्ञायते--अविद्यमानमुदात्तमनुदात्तमिति। शास्त्रीये ह्यनुदात्ते गृह्यमाणे सम्बन्धार्थं परस्यैति षष्ठ्युच्चारयितव्या स्यात्। तथा च `अलोऽन्त्यस्य' (1.1.52) स्यात्। अथापि सर्वस्येत्यनुवर्त्तत, एवमपि वचनप्रामाण्यादेककाल एव सर्वादेशः प्रसज्येत। तस्मादन्वर्थस्यैव ग्रहणं युक्तम्। `भुङ्क्तेभुङ्क्ते' इति। `भुजोऽनवने'

(1.3.66) इत्यात्मनेपदम्। तस्मिन् कृते सति शिष्टस्वरत्वाद्धातुस्वरं बाधित्वा प्रत्ययस्वरः। श्नमि कृते यद्यपि तस्य स्वरः सतिशिष्टः, तथापि `विकरणस्वरः सार्वधातुकस्वरं न बाधते' इति तेशब्द एव स्वरे प्रसक्ते `तस्यनुदात्तेविङददुपदेशाल्लसार्वधातुकमनुदात्तमह् न्विङोः' (6.1.186) इति सार्वधातुकस्यानुदात्तत्वम्, श्नसोरल्लोपे कृते `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इति पुनस्तेशब्द उदात्तः, नित्ये चार्थे द्विर्वचनम्, तस्मिन् कृतेऽनेन परमनुदात्तं भवति। `पशून्पशून्' इति। `कुर्भ्रश्च' (द.उ.1-107) इत्यत `कुः' इत्यनुवर्त्तमाने `अर्जिवृशिकसम्यमिपशिबाधामृजिपशितुग्धुग्दीर्घहकाराश्च' (द.उ.1.112) इति कुप्रत्ययः, दृशे पशिरदिशश्च। पशृशब्दः प्रत्ययस्वरेणान्तोदात्तः, विभक्त्यकारेण सहैकादेशः, `एकादेश उदात्तेनोदात्तः' (8.2.5) वीप्सायां द्विर्वचनम्, अनेन परस्यानुदात्तत्वम्।।

4. नित्यवीप्सयोः। (8.1.4)

`नित्ये चार्थे वीप्सायाञ्च' इति। अनेन `नित्यदीप्सयोः' इति सप्तमीयमर्थनिर्देशार्था, न तु षष्ठीयमिति दर्शयति। यदि ह्येषा षष्ठी स्यात्, तदा स्वरूविधिः प्रसज्येत, ततश्च `नित्यं क्रोडाजीविकयोः' (2.2.17) इति, `पादशतस्य संक्यादेर्वीप्सायाम्' (5.4.1) इत्यादिनिर्देशो नोपपद्यते। इह नित्यशब्दोऽयं सर्वकालभादिनो य आत्माकाशादयः, यषामुत्पत्तिविनाशौ प्रयोक्तृभिर्नोपलभ्येते, तेष्वपि प्रयुज्यमानो लोके दृश्यते--नित्य आत्मा, नित्यमाकाशम्, नित्या द्यौरिति। आभीक्ष्ण्येऽपि--नित्यं प्रहसितः, नित्यं प्रजल्पित इति। तत्र यदीह सामान्येन तत्र नाम नित्यताऽभिधेयभावेन वर्त्तते तस्य नित्यार्थवाचिनो ग्रहणं स्यात्, आत्माकाशादिशब्दानामपि द्विर्वचनं प्रसज्येत--इत्येनेनाभिप्रायेणाह--`केषु नित्यता' इति। इतरो विदिताभिप्राय आह--`तिङ्क्षु नित्यताऽव्ययकृत्सुण' इति। अव्ययानि च तानि कृन्ति चेति कर्मधारयः। यद्यप्यात्माकाशादिशब्देष्वपि सर्वकालभावित्वलक्षणा नित्यताऽभिधेयभावेन वर्त्तते, तथापीह भावप्रधानेषु तिङ्क्ष्वव्ययकृत्सु चाभीक्ष्ण्यलक्षणा या नित्यता सैवाश्रीयते। अतोऽतिप्रसङ्गो न भवतीति भावः।

ननु च नित्यशब्दोऽयं सामान्यवचनः। न च सामान्यशब्दाः प्रकरणादिकमन्तरेण विशेषेऽवस्थातुमुत्सहन्ते। न चेह तथाविधं किञ्चित् प्रकरणादिकमस्ति, यतो विशेषेऽवस्थानं स्यात्, तत्कुतो नित्यताविशेषपरिग्रहो लभ्यते? इति मन्यमान आह--`कुत एतत्' इति। आभीक्ष्ण्यमिह नित्यतेत्याश्रीयत इति शेषः। व्याप्तेराभीक्ष्ण्यवचनस्य नित्यशब्दस्य ग्रहणादिहाभीक्ष्ण्यलक्षणा नित्यताऽऽश्रीयते, पदस्य हि द्विर्वचनमुच्यते। तच्च पदं सुबन्तं तिङन्तं च, तत्र सुप्सु दीप्सेति वक्ष्यति। यदि च नित्यशब्दोऽयं कूटस्थवचनो गृह्यते, ततश्च कूटस्थमिति सुबन्तेष्वभिधेयभावेन वर्त्तत इति सुबन्थानामेव द्विर्वचनं स्यात्, न तिङन्तानाम्, नाप्यव्ययकृताम्। आभीक्ष्ण्यवचनस्य तु नित्यशब्दस्य ग्रहणे सति नित्यलक्षणद्विर्वचनमाख्यातानामव्यकृतां च भवति। वीप्सालक्षणञ्चान्येषामिति सर्व पदजातमनुगृहीतं भवति। तस्माद्व्याप्तेराभीक्ष्ण्यवचनस्य नित्यशब्दस्य ग्रहणादिह `आभीक्ष्ण्यं नित्यता' इत्युपपन्नं भवति।

`आभीक्ष्ण्यमिह नित्यता' (इति)। सा च तिङ्क्ष्वव्ययकृत्सु चेति। कुत एतत्? इत्याह--`आभीक्ष्ण्यं च` इत्यादि। आभीक्ष्ण्यं हि पुनः पुनः प्रवृत्तिः। तच्च साध्यरूपायाः क्रियाया एव सम्भवतीति तस्या एव धर्मः, न तु द्रव्यस्य; तस्य सिद्धरूपस्यैव सुबन्तेनाभिधानात्। सा च क्रिया तिङन्तादिभिरेवाभिधीयत इति तेष्वेव नित्यता। कीदृशी पुनः सा क्रिया? आभीक्ष्ण्यलक्षणेन या नित्यत्वेन योगान्नित्यशब्देनोच्यते, इत्याह--`याम्' इत्यादि। `अनुपरमन्' इति। `विरतिमकुर्वन्' इत्यर्थः। `तन्नित्यम्' इति। तत क्रियारूपं वस्तु नित्यमित्यर्थः। `प्राधान्येन' इति। यदुद्दिश्य क्रियाप्रवृत्तिस्तत् प्रधानम्, तस्य भावस्तथा। यद्यपि ग्रामं गन्तुमिच्छन् वृक्षमूलोपसर्वणं पुनः पुनः करोति, तथापि न तन्नित्यमिति। एतदुक्तं भवति--न ह्यसौ प्राधान्येन तत्करोति; तदुद्दिश्याप्रवृत्तेः। तेन ग्रामं गच्छन् वृक्षमूलान्युपसर्पतीत्यत्र सत्यप्यामभीक्षण्ये द्विर्वचनं न भवति। `यां क्रियाम्' इत्यनेन हि क्रिया धर्मिणी दर्शिता। `अनुपरमन् करोति' इत्यनेनापि तस्या आभीक्षण्यं धर्मः।

`पचतिपचति' इति। तिङन्तस्योदाहरणम्। `भुक्त्वाभुक्त्वा, भोजंभोजम्' इति। अत्र `आभीक्षण्ये णमुल्च' (3.4.22) इति क्त्वाणमुलौ। `लुनीहिलुनीहि' इति। `क्रियासमभिहारे' (3.4.2) इत्यादिना लोट्, तस्य हिरादेशः, `लोट्धर्माणौ हिस्वो भवतः' इति (3.4.2) तत्रोक्तम्, तेन विकरणम्, [`विकरणः'--प्रा.मु.पाठः] `ईहल्यघोः' (6.4.113) इतीत्वम्। एतानि त्रीण्यव्ययकृतामुदाहरणानि। एषां क्त्वादीनां `कृदतिङ्' (3.1.93) इति कृत्संज्ञा। अव्ययसंज्ञा तु क्त्वाप्रत्ययस्य `कत्वातोसुन्कसुनः' (1.1.40) इति। णमुलस्तु `कृन्मेजन्तः' (1.1.39) इति। लोटस्तु स्वरादिष्वाभीक्षण्यस्य पाठात्।

ननु चैते क्त्वाणमुल्लोटश्चाभीक्ष्ण्य एव विधीयन्ते, तत्र यथा पापच्यत इति क्रियासमभिहारे विधीयमानेन यङा पौनःपुन्यस्य प्रकाशितत्वाद्द्विर्वचनं न भवति, तथा कत्वादिभिरपि तस्य प्रकाशितत्वान्न भवितव्यम्। अथ प्रकाशितेऽपि तस्मिंस्तु तद्भवति, पापच्यत इत्यत्रापि स्यात्? इत्यत आह--`कत्वाणमुलोः' इत्यादि। भिन्ना हि भावानां शक्तयः। तथा हि--यामेव क्रियां भारोद्बहनादिकां कश्चित् सहायसापेक्षः करोति, तामेवान्यः सहायनिरपेक्षः, तस्माद्यद्यपि चाभीक्ष्ण्ये क्त्वा णमुल्लोट् च विधीयते, तथापि तैर्नैवाभीक्ष्ण्यभिव्यक्तं भवति। द्विर्वचनसापेक्षाणामेव तेषां पौनःपुन्यप्रकाशने शक्तिः, न केवलानाम्। तेन भवत्येव तदन्तस्य द्विर्वचनम्; यङन्तु द्विर्वचननिरपेक्षस्यापि पौनःपुन्याभिव्यक्तौ सामर्थ्यमस्तीति तेनैवाभीक्षण्यस्य द्योतितत्वात् पापण्यत इत्यत्र न भवति। आभीक्ष्ण्यप्रकाशनाय हि द्विर्वचनमुच्यते, एतच्च यङैव प्रकाशितमिति किं द्विर्वचनेन?

ननु च यङन्तस्यापि क्वचिद्द्विर्वचनमिष्यत एव, तच्च यङो द्विर्वचननिरपेक्षस्य यौनःपुन्यप्रकाशने शक्तौ सत्यां न सिद्ध्यति? इत्याह--`यदा तु' इत्यादि। द्विप्रकारः क्रियासमभिहारः पौनःपुन्यम्, भृशार्थश्च। तत्र यदा यङन्तेन द्विर्वचनं भवति तदा भृशार्थे यङ्। द्विर्वचनं तु नस्यैव भृशार्थस्य धर्मे पौनापुन्ये, न हि तद्यङा प्रकाशितम्; तस्य भृशार्थे विदितत्वादित्यभिप्रायः। `क्रियासमभिहारे पौनःपुन्यं द्रष्टव्यम्। इति। अत्र यद्यपि क्रियासमभिहारशब्दः सामान्यः, तथापि सामर्थ्यादभृशार्थलक्षणा एव क्रियासमभिहारे तस्य वृत्तिर्विज्ञायते, न हि पौनःपुन्येऽन्यस्य पौनःपुन्यस्य सम्भवोऽस्ति। अथ कथं पौनःपुन्ये यङ् भवति? कथं

च न स्यात्? द्विर्वचनेनापदादेन बाधितत्वात्। यङः कोऽवकाश इति चेत्? भृशार्थ एव? नैष दोषः; पदस्य हि द्विर्वचनमुच्यते, धातोश्च यङ्। तथा कार्यिणोरतिभेदात् कुतो बाधा?

`नित्यवीप्सयोः' इत्युक्तम्, तत्र नित्यता तिङ्क्ष्वव्ययकृत्सु चेत्युक्तम्। वीप्सा तु न विज्ञायते--क्वाभिधेयभावेन वर्त्तते? इति, अतस्तत्परिज्ञानार्थं पृच्छते--`अथ केषु वीप्सा' इति। इतरो विदिताभिप्राय आह--`सुप्सु वीप्सा' इति। सुपामेव तदभिवयक्तौ सामर्थ्यात्। यदि सामान्येन व्याप्तुमिच्छा वीप्सा तदा चिकीर्षाशब्दस्यापि द्विर्वचनं प्राप्नोति, तस्य करोतिक्रियया कटादेर्व्याप्तुमिच्छा तत्र वृत्तिरिति मन्यमान आह--`का पुनर्वीप्सा' इति। `व्याप्तिविशेषविषया' इत्यादि। नानादाचिनामधिकरणानां क्रियादिसम्बन्धेन युगपद्व्याप्तिर्व्याप्तिविशेषः, स विषयो यस्या इच्छायाः सा तथोक्ता। सैवंविधा `प्रयोक्तुरिच्छा वीप्सा'। प्रयोक्तुरित्यनेन प्रयोक्तृधर्मो वीप्सा, नाभिधेयधर्म इति दर्शयति। कथं पुनर्व्याप्तिविशेषविषयेत्येष विशेषो लभ्यते? विशब्दप्रयोगात्। यदि ह्यविशेषेण व्याप्तुमिच्छां दीप्साऽभिमता स्यात्, `नित्येप्सयोः' इत्येवं ब्रूयात्।

`व्याप्तिविशेषविषया प्रयोक्तुरिच्छा वीप्सा' इत्युक्तम्, स तु विशेषोऽनिर्दिष्टस्वरूपत्वान्न विज्ञायते, तदज्ञानच्च तद्विशिष्टा वीप्सापि न ज्ञायत इत्यतः पृच्छति--`का पुनः सा' इति। `नानावाचिनाम्' इत्यादि। नानावाचिनाम्, अधिकरणानामिति--व्यधिकरणे षष्ठ्यौ। नाना=पृथग्भूताः, तान् वक्तुं शीलं येषां शब्दानां ते नानावाचिनः। तत्सम्बन्धिनामधिकरणानां वाच्यानामित्यर्थः। `क्रियागुणाभ्याम्' इति। करणे तीया। `युगपत्' इति। एककालम्। `प्रयोक्तुः' इति। वक्तुः। यो द्विर्वचनं प्रयुङ्क्ते तस्य। `व्याप्तुम्' इति। सम्बन्धविशेषेणाप्तुम्। साकल्येन सम्बन्धुमित्यर्थः। `इच्छा' इति। अभिलाषः। `वीप्सा' इति। प्रादिसमासः--विशिष्टा ईप्सा वीप्सा।

`नानाभूतार्थवाचिनाम्' इत्यादिना अनन्तरेक्तं वाक्यं विवृणोति। यत एवंविधा वीप्सा, तेन चिकीर्षेत्यत्र द्विर्वचनं न भवति। चिकीर्षा हि कर्त्तुरिच्छा, न प्रयोक्तुः। यतश्चैवंविधा वीप्सा, तेन जातिवाचिनामपि द्विर्वचनं न भवति--निष्पन्नो यव इति। न हि जातिशब्दा नानाभूतार्थवाचिनः। यदा तु क्रमेण व्याप्तुमिच्छा तदापि न भवति--अयं ग्रामो रमणीयः, अयञ्च ग्रामो रमणोय इति। द्वन्द्वैकशेषयोरपि न भवति--अस्मिन्वने शोभना धवखदिरपलाशाः, अस्मिन्वने शोभना वृक्षा इति। अशेषविशेषव्याप्तावनभिमतायामप्येवं प्रयोगः क्रियत इति सर्वविशेषाभिधानं [`सर्वविशेषाविधानं'--का.मु. पाठः] न भवति, अतः प्रयोक्तुरप्यशेषान् विशेषान् व्याप्तुमिच्छा न जायते। बाहुल्येन तु शोभनत्वमाश्रित्येवं वाक्यं प्रयोक्ता प्रयुङ्क्ते--ग्रामो ग्रामो रमणीय इति। अत्र हि दिन्देशादिभेदेन भिन्नानां ग्रामाणां रमणीयत्वेन गुणेन प्रयोक्तुर्युगपद्व्याप्तुमिच्छा दीप्सा। `जनपदो जनपदः' इति। अत्रापि जनपदानाम्। `पुरुषः पुरुषे निषनमुपैति' इति। अत्र पुरुषाणां निधनक्रियया। निधनम्--विनाश इत्यर्थः। क्रियागुणग्रहणमुपलक्षणार्थम्। द्रव्येणापि नानावाचिनामधिकरणानां युगपद्व्याप्तुं प्रयोक्तुर्येच्छा सा वोप्सैव। तेन ग्रामे ग्रामे पानीयमित्यत्रापि द्विरवचनं सिद्धं भवति। यस्तु `द्रव्यस्य द्रव्यान्तेण सह सम्बन्धो न भवति, सिद्धरूपत्वात्' इत्याह, तस्य यदुक्तम्--क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः सम्बन्धोऽत्यन्तसंयोगः' इति, तद्वचनं व्याहन्यते; ग्रामे ग्रामे पानीयमित्ययं च शिष्टप्रयोगो नोपपद्यते। अथ कथं ग्रामशब्दोऽयं वीप्सायां वर्त्तते, यावता न तस्या वीप्साः-भिधेया, किं तर्हि? जनाकीर्मो भूखण्डः? सत्यमेतत्; यद्येवम्, तथापि द्विर्वचनप्रतिपत्तिद्बारेण तस्या द्योतितत्वात् स तस्यां वर्त्तत इत्युच्यते। ग्रामो हि द्विर्वचनं प्रतिपद्यमानो वीप्सां द्योतयतीति तस्यां द्योतनद्वारेण वर्त्तते। अथ ग्रमो ग्राम इति कथमेकवचनम्, यावता बहुत्वाद्धिप्रामाणां बहुवचनेनैव भवितव्यम्; अथ कृते द्विर्वचने? नैतदस्ति; समुदाय एवात्र बहुत्वमुपजायते, न प्रत्येकम्? उपातैकत्वसंख्येऽवयवेऽविरुद्धं ह्येकत्वं बहुत्वेन। तेनावयवाद्बहुवचन न भवति। समुदायात् तर्हि कथं न भवति? बहुत्वस्याबगतत्वाद्वीप्सया। स हि समुदायो वीप्सायां बहुत्वमन्तरेण न सम्भवतीति तां प्रकाशयन्नान्तरीयकत्वाद्बहुत्वमपि गमयति। ततोऽवगतार्थत्वाद्बहुवचनं न प्रयुज्यते।

अथ यत् तिङन्तं नित्यतया प्रकर्षेण च युक्तम्, तत्र किं कृते द्विर्वचने प्रकर्षप्रत्ययेन भवितव्यम्। अथ वा कृते प्रकर्षप्रत्यये द्विर्वचनेन? इत्यत आह--`यत्तिङन्तम्' इत्यादि। अत्र विप्रतिषेधो हेतुः। तत्र द्विर्वचनस्यावकाशो यत्र नित्यार्थो विवक्षितः, न प्रकर्षः--पचतिपचतीति; प्रकर्षप्रत्ययस्यावकाशो यत्र प्रकर्षेण योगः, न नित्यतया--पचतितरामिति; यत्र तूभाभ्यां योगस्तत्र विप्रतषेधेन द्विर्वचनं भवति--पचतिपचतितरामिति।

सुबन्तमपि तर्हि यद्वीप्सया प्रकर्षेण च युक्तम्, तस्मादत एव हेतोः कृतद्विर्वचनात् प्रकर्षप्रत्ययः स्यात्, ततश्चाढ्यतरमाढ्यतरमानयेति न सिद्ध्येदित्यत आह-`इह तु' इत्यादि। यदि सुबन्तस्यैककालं वीप्सा प्रकर्षेण च योगः स्यात्, तदा स्यादयं प्रसङ्गः, स न नास्ति; यतः सुबन्तस्य प्रकर्षप्रत्ययेन संयुक्तस्य पश्चाद्वीप्सया योग इष्यते। कथम्? इह हि वीप्सा नाम पौरुषेयो धर्म इच्छाविशेषः, स च तथा प्रयोक्तुर्विदुषः प्रवर्त्तते यथा शब्दे नानिष्टमापद्यते, नापि प्रयोक्तरि। यदि प्रकर्षप्रत्ययात् प्राक् सहभावेन वा वीप्सा स्याच्छब्देनिष्टमापद्यते, तद्द्वारेण प्रयोक्तर्यपि, यथा--हेलयो हेलय इति ब्रुवप्सु पुरुषेषु; यज्ञेषु चानिष्टमापद्यते। तस्मात् प्रकर्षयोगविवक्षाया उत्तरकालं शिष्टस्य प्रयोक्तुर्वीप्सया भवितव्यमिति सिद्धमाढ्यतरमाढ्यतरमानयेति।

अपरः प्रकारः--इहापि तर्हि तत एव हेतोः कृते द्विर्वचने प्रकर्षप्रत्ययः स्यात्, ततश्चाढ्यतरमाढ्यतरमानयेति न सिद्ध्यति?--इत्येतस्मिन् पूर्वपक्ष इदमाह--`इह तु' इत्यादि। प्रकर्षसाहचर्यात् प्रकर्षप्रत्ययः प्रकर्षशब्देनोक्तः। वीप्सासाहचर्याद्धि द्विर्वचनं वीप्साशब्देन। तदेतदुक्तं भवति--प्रकर्षप्रत्यययुक्तस्य द्विर्वचनेन योग इष्यत इति। अत्र चायमभिप्रायः--येन हेतुना युगपत् प्रकर्षेण नित्यतया च युक्तस्य पूर्वं द्विर्वचनं भवति, स विप्रतिषेधोऽत्र नास्ति; अतुल्यबलत्वात्। अतुल्यबलत्वं तु प्रकर्ष प्रत्ययस्यान्तरङ्गत्वात्, द्विर्वचनस्य बहिरङ्गत्वात्। तथा हि ङ्याप्प्रातिपदिकादातिशायिको भवति, द्विर्वचनं तु पदस्य। `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इति सिद्धासिद्धयोश्चायुक्तो विप्रतिषेधः। तस्मात् पहूर्वं प्रकर्षप्रत्ययेन सुबन्ताद्भवितव्यम्, पश्चात् तदन्तस्य द्विर्वचनेनेति। ननु चातिशायिको नैवान्तरङ्गः, समर्थाद्धि स उपपद्यते, `समर्थानां प्रथमाद्वा' (4.1.82) इत्यधिकारात्, सामर्थ्य च सुबन्तेनैव? नैतत्; उक्तं हि तत्रैव (4.1.82) `स्वार्थिकप्रत्ययावधिश्चायमधिकारः प्राग्दिशो विभक्तिरिति (5.3.1) यावत्, स्वार्थिकेष्वस्योपयोगो नास्ति' इति। स्वार्थिकाश्चतिशायिकाः।

तस्मादन्तरङ्गत्वादुत्पन्ने तस्मिन् पश्चात् सुबन्तस्य द्विर्वचनेन भवितव्यम्।।

5. परेर्वर्जने। (8.1.5)
`परि परि त्रिगर्त्तेभ्यः' इति। `अपपरी वर्जने' (1.4.88) इति परेः कर्मप्रवचनीयसंज्ञायां सत्याम् `पञ्चम्यपाङ्परिभिः' (2.3.10) इति पञ्चमी। `परिषिञ्चति' इति। सर्वत्र सिञ्चतीत्यर्थः। `उपसर्गात् सुनोति' (8.3.65) इत्यादिना षत्वम्। `परेर्वर्जनेऽसमासे वा' इत्यादि। परेर्वर्जनेऽर्थेऽसमासे विभाषा द्विर्वचनं भवतीत्येतदर्थरपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`विभाषा वेषिटिचेष्ट्योः' (7.4.96) इत्यतो मण्डूकप्लुत्या विभाषाग्रहणमनुवर्त्तते, तेनासमासे द्विर्वचनं परेर्वर्जने विभाषा भवतीति।
`असमासे' इति। वचनात् समासे तु नित्यमेव द्विर्वचनेन भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्त्तुमाह--`समासे तु' इत्यादि। यथा दध्नोपसिक्त ओदनो दध्योदन इतीहोपसिक्तशब्दः समासेऽन्तर्भूतः, तथा `अपपरिबहिरञ्चवः पञ्चम्या' (2.1.12) इति समासे कृते तत्र वर्जनम्। परिशब्दस्तु समासेऽनर्थक एव; तेन वर्जनेऽर्थे वर्त्तमानस्य द्विर्वचनमुच्यमानं समासे न भवति। अथापि परिशब्दो वर्जनेऽर्थेऽर्थवान् स्यात्; एवमपि समासेनैव वर्जनार्थप्रत्यायितत्वान्नैव द्विर्वचनेन भवितव्यम्। `परित्रिगर्त्तम्' इति। समासादुत्पन्नस्य सोः `नाव्ययीभावादतोऽस्त्वपञ्चम्याः' (2.4.83) इत्यम्भावः।।

6. प्रसमुपोदः पादपूरणे। (8.1.6)
`प्रसमुपोदः' इति। `द्वन्द्वाच्चुदषहान्तात् समाहारे' (5.4.106) इति समासान्तो न कृतः; समासान्तविधेरनित्यत्वात्। `पादपूरणे' इति। `यस्य च भावेन भावलक्षणम्' (2.3.37) इति सप्तमीयम्। पादपूरणस्य भावेनोत्पत्तिलक्षणेन द्विर्वचनसक्य भावो लक्ष्यते। ननु च द्विर्वचनात् प्राक् पादपूरणमसदेव, तत् कुतस्तस्य भावो द्विर्वचनस्य लक्षणं स्यात्, न हि तत् सत्त्वम्? असारमेतत्; तदुत्पत्तिर्ह्यत्र भावः, सा चानिष्पन्नसत्ताकस्यैव भवति, न निष्पन्नसत्ताकस्य। न हि मृत्तिकावस्थायां सन्तो घटादय उत्पद्यन्तेः पादश्चेह विशेषानभिधानेऽपि सामर्थ्यादृच एव गृह्यते, न श्लोकस्य। लौकिको हि श्लोकः, लोके चार्थपरत्वादनर्थकस्य प्रयोगो नोपपद्यते।।

7. उपर्यध्यधसः सामीप्ये। (8.1.7)
`सामीप्ये' इति। प्रत्यासत्तावित्यर्थः। एतच्चोपर्यादीनां विशेषणम्। सामीप्यं देशकृतम्, कालकृतञ्च भवति। तत्र `उपर्युपरि ग्रामम्' इति देशकृतस्योदाहरणम्। समीपे ग्रामस्येत्यर्थः। द्वितीयात्र `उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु' (वा.118) इत्याद्युपसंख्यानात्। कालकृतस्योदाहरणम्--`उपर्युपरि दुःखम्' इति। समीपं यद्दुःखमचिरकालातिक्रान्तमचरकालभावि वा तदेवमुच्यते।
`अथेह[`अथ'--नास्ति--काशिका] कस्मान्न भवति--उपरि शिरसो घटं धारयति' इति, अस्ति ह्यत्र घटेन शिरसः प्रत्यास्त्तिः? इत्याह--`उपरि शिरसो घटम्' इत्यादि। न हीह शास्त्रे वस्तुनः सत्तैव शब्दव्युत्पत्तेः प्रथानं कारणम्, किं तर्हि? तद्विवक्षापि, सा चेह नास्ति। औत्तराधर्यमात्रस्य विवक्षितत्वात्। तेनेह न भवति द्विर्वचनम्। द्वितीययाऽपि न भवितव्यम्, नाम्रेडितत्वात्।।

8. वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु। (8.1.7)
आख्यातं साध्ययकारकविशेषणं वाक्यम्, तस्यादिर्वाक्यादिः। असूयादीनपेक्षमाणस्यापि गमकत्वात् समासः। `असूयासम्मतिकोपकुत्सनभर्त्सनेषु यदि तद्वाक्यं भवति' इति। एतेनासूयादीनां वाक्यं प्रति विशेषणभावं दर्शयति। ननु चामन्त्रितस्य विशेष्यत्वात् प्राधान्यम्, वाक्यस्य विशेषणत्वादप्राधान्यम्, तत्र प्राधान्यादामन्त्रितं प्रत्येवैषां [`प्रत्येषां'--प्रा.मु.पाठः] विशेषणत्वं युक्तम्? नैतदस्ति; आमन्त्रितविशेषणत्वे हि सति तेषामसूयादिवृत्तेरेवामन्त्रितस्य द्विर्वचनं स्यात्--असूये असूय इत्यादौ वाक्ये, माणवक माणवकेत्यादौ तु वाक्ये न स्यात्। वाक्यविशेषणत्वं [वाक्यविशेषणत्वे--प्रा.मु.पाठः] ह्यसूयादीनां सर्वत्र भवति। तस्माद्वाक्यविशेषणतैघासूयादीनां युक्त; व्याप्तेः। कदा पुनर्वाक्यमसूयादिषु भवति? यदा तस्मिन् वाक्ये प्रयुच्यमाने असुयादयो गम्यन्ते। असहनम् अक्षान्तिः। पूजनम् शब्देन गुणाविष्करणम्। `एते च प्रयोक्तृधर्माः' इति। यो वाक्यं प्रयुङ्क्ते तस्यैते धर्मा गुणविशेषा इत्यर्थः। प्रयोक्तृधर्मत्वं च तेषां प्रयोक्तरि वृत्तेः। `नाभिधेयधर्माः' इति। अभिधेये तेषामवृत्तेः। न हि यथा माणवकादावभिधेय आभिरूप्यादयो धर्मा वर्त्तन्ते, तथाऽसयादयः। तथा हि--`माणवका मणवक आभिरूपका अभिरूपक रिक्तं त आभिरूप्यम्'--इत्येवं वाक्यप्रयोगे प्रयोक्तृगता एवासूयादयः प्रतयन्ते, न तु माणवकादिगताः। `रिक्तम्' इति। असारमित्यर्थः।
`शक्तिके शक्तिके' इति। कुत्सिता शक्ता। `प्रागिवात् कः' (5.3.70), `केऽणः' (7.4.13) इति ह्रस्वः; टाप्, `प्रत्ययस्थात्' (7.3.44) इतीत्त्वम्, `सम्बुद्धौ च' (7.3.106) इत्येत्त्वम्। `आन्रेडितस्यैव' इति। भर्त्सने यदुक्तमिहोदाहरणं तदधिकृत्यैतदुक्तम्, न तु `आम्रेडितं भर्त्सने' (8.2.95) इत्यनेनाम्रेडितस्यैव प्लुतः क्रियते, अपि तु पर्यायेण; `भर्त्सने पर्यायेण' (वा.930) इति वचनात्। `शोभनः खल्वसि माणवक' इत्यत्रास्ति पूजनम्, न त्वामन्त्रितं वाक्यादि। `उदारो देवदत्तः' इत्यत्रास्ति पूजनम्। वाक्यादित्वञ्चोदारशब्दस्य, न त्वामन्त्रितत्वम्।
ननु चासूयायाः कुत्सनं कार्यम्, भर्त्सनं कोपस्य, तत्र कुत्सनमत्संनयोर्द्विर्वचने कृते ततः प्रतीयमानाभ्यां कुत्सनभर्त्सनाभ्यां कोपासूययोरपि प्रतीतिर्भविष्यति; कार्यस्य कारणाव्यभिछारात्, तस्मात् कोपासूययोर्ग्रहणं न कर्त्तव्यमेव? नैवम्; न हि कोपासूयाप्रभवे एव कुत्सनभर्त्सने। तथा हि--पित्रादयः

पुत्रादीननसयन्तोऽपि कुत्सयन्ति, अकुप्यन्तोऽपि भर्त्सयन्ते। यद्यपि तदानीं कायवाग्विकारोऽस्ति, तथापि न त्वसावसूया, नापिकोपः; तयोश्चैतसिकत्वात्। अतः कार्यकरणभावसस्याभावात् कुत्सनभर्त्सनप्रतीत्या कोपासूययोः प्रतीतिर्नोपपद्यते।
अथ कोपासूयाप्रभवे एव विशिष्टे कुत्सनभर्त्सने, ये ते गृहीत्वा कोपासूययोरनुमानं करिष्यत इति चेत्? न; विशेषस्यावधारयितुमशक्यत्वात्। तथा हि--यथाऽसयन्कुत्सयति तथाऽनसूवन्नपि। यथा कुप्यन्नपि भर्त्सयते तथाऽकुप्यन्नपि। तस्मात् कोपासूययोरपि ग्रहणं कर्त्तव्यम्।।

9. एकं बहुव्रीहिवत्। (8.1.9)

यद्यविशेषेणैकशब्दस्य बहुव्रीहिवद्भावो विधीयते, तदैकमित्यत्रापि स्यादिति मन्यमानोऽतिप्रसङ्गं परिजिहीर्षुराह--`एकमित्येतद्द्विरुक्तं बहुव्रीहिवद्भावो भवति' इति। कथं पुनर्द्विरुक्तमित्येव विशेषो लभ्यते, यावता नायं सूत्रोपात्तः? एवं मन्यते--वीप्साऽनुवर्त्तते, [`वीप्सामनुवर्त्तते'--प्रा.मु.पाठः] वीप्सायाञ्च पूर्वमेव द्विर्वचनं विहितम्। न च तदेकशब्दस्यानेन बहुव्रीहिवद्भावेन बाध्यते; अन्यथा हि `एकैकस्य प्राचाम्' (8.2.86) इति निर्देशो नोपपद्येत। तस्माद्वीप्साग्रहणानुवृत्तेर्द्विरुक्तस्यैकशब्दस्यायं बहुव्रीहवद्भावो विज्ञायत इति। किं पुनर्बहुव्रीहिवद्भावे प्रयोजनमित्याह--`बहुव्रीहिवत्त्वे' इत्यादि। यद्यपि सुब्लृक्पुंवद्भावौ बहुव्रीहावित्येवं नोच्येते, तथाप्येतौ तत्र दृष्टावित्यस्मिन्नतिदेशे तयोः प्रवृत्तिः प्रयोजनम्। `एकैकम्' इति। वीप्सायां द्विर्वचने कृते यता चित्रगुरित्यादौ बहुव्रीहौ `सुपो धातुप्रातिपदिकयोः' (2.4.71) इति सुब्लुग्भवति, तथेहाप्यतिदेशेन। अतिदेशेनैव समासे प्रातिपदिकत्वात् सुः, `अतोऽम्' (7.1.24) इत्यम्भावः। `एकैकया' इति। पूर्ववद्विभक्देर्लुक्, `स्त्रियाः पुंकृत्' (6.3.34) इत्यादिना यथा दर्शनीयभार्य इत्यत्र बहुव्रीहौ पुंवद्बावो भवति, तथेहाप्यतिदेशेन, तृतीयैकवचनम्, `आङि चापः' (7.3.105) इत्येत्तवम्, अयादेशः। ननु चासत्यपि पुंवद्भावे `वृद्धिरेचि' (6.1.88) इति वृद्धावपि कृतायामेतत् सिध्यत्येव? यद्यप्येतत् सिध्यति, तथापि गतगतेत्येतत् `आबाधे च' (8.1.10) इति द्विर्वचने कृते न सिध्यति। तस्मादुत्तरसूत्रे पुंवद्भावो बहुव्रीहिवदित्यस्यातिदेशस्यैव प्रयोजनत्वेनोच्यते। एकैकयेत्येतत्तु `एकमित्येष नपुंसकलिङ्गेन निर्देशोऽन्त्रम्' इत्येतत्सूचयितुमुक्तम्। अतन्त्रत्वं तु सूत्रे लिङ्गनिर्देशस्य `अर्धं नपुंसकम्' (2.2.2) इत्यत्र नपुंसकग्रहणेन ज्ञापितम्। यदि सौत्रो निर्देशस्तन्त्रमभविष्यत्, अर्धमित्यत्र तत एव निर्देशाल्लिङ्गविशेषे सिद्धे नपुंसकमिति नावक्ष्यत्। अथ पूर्वपदप्रकृतिस्वरत्वमपि प्रयोजनं कस्मान्नोच्येत? विशेषाभावा। परस्य निघाते कृते पूर्वपदप्रकृतिस्वर एव भविष्यति। यदि तर्हि बहुव्रीहौ यद्वृष्टं तदतिदिश्यते, सर्वनामसंज्ञाप्रतिषेधस्वरसमासान्तानामप्यतिदेशः प्राप्नोति? इत्यत आह--`सर्वनामसंज्ञा' इत्यादि। कथं पुनरेते सर्वनामसंज्ञाप्रतिषेधादयः समासाधिकारे विहिते बहुव्रीहौ शक्या विज्ञातुम्? उच्यते; सर्वनामसंज्ञाप्रतिषेधस्तावत् `बहुव्रीहौ' (1.1.28) इत्यनुवर्त्तमाने पुनर्बहुव्रीहि (1.1.29) ग्रहणाच्च शक्यते विज्ञातुम्। तस्य ह्यतत् प्रयोजनमुक्तम्--बहुव्रीहेरेव यो बहुव्रीहिस्तत्र प्रतिषेधो यथा स्यात्, बहुव्रीहिवद्भावेन यो बहुव्रीहिस्ततर मा भूदिति। एवञ्चार्थात् समासाधिकारविहित एव बहुव्रीहौ प्रतिषेधो विज्ञायते। न हि ततोऽन्यो बहुव्रीहिरेव बहुव्रीहीर्भवति; `एकैकस्मै' इत्यादेर्बहुव्रीहिवद्भावेन बहुव्रीहिवत्त्वात्। `नञ्सुभ्यम्' (6.2.172) इत्यनेनापि `बहुव्रीहाविदमेतत्तद्भ्यः (6.2.162) इत्यतो बहुव्रीहिग्रहणेऽनुवर्त्तमाने नञ्सुम्यां परस्य बहुव्रीहावन्तोदात्तत्वं विधीयते, न तु तयोरपि; यस्मात् सुनञादिह निमित्तत्वेनोपात्तौ। न च निमित्तयोः कार्यित्वं युक्तम्। यथोक्तम्---`नेमौ [`हयवरट्' (मा.सू.5) इत्येतस्मिन् सूत्रे भाष्यकारेण] रहौ कार्यिणौ, किं तर्हि? निमित्तमिमौ द्विर्वचनस्य' इति। तस्माद्यत्र बहुव्रीहौ नञ्सूभां सुनञोरेव परभूतत्वात् `आबाधे च' (8.1.10) इति द्विर्वचनम्, बहुव्रीहिवद्भावश्च। अथ वा स्वरविधौ `समासस्य' (6.1.223) इत्यतः समातग्रहणमनुवर्त्तते, तेन च बहुव्रीहि विशेषयिष्यामः--समासो यो बहुव्रीहिरिति। ननु च नन, सुस्वित्यतावपि समासावेव, अस्ति ह्यनयोरेव बहुव्रीहिवद्भावेनोत्पादिता समाससंज्ञा, ततश्च विशिष्यमाणऽपि समासग्रहणे न बहुव्रीहौ स्वरः प्राप्नोतीत्येव? नैव दोषः; विशिष्यते हि समासग्रहणेन बहुव्रीहिः, न कश्चिदसमासो बहुव्रीहिरस्ति, तत्र विशेषणसामर्थ्यावतिदेशद्बारेम यस्य समाससंज्ञा तस्य न भवति। स च समासाधिकारे विहितो बहुव्रीहिरिति विज्ञायते। ननु च समासग्रहणेन बहुव्रीहौ विशिष्यमाणे विशेषणसामर्थ्याद्विशिष्टस्य बहुव्रीहेरिवं ग्रहणमित्येतादन्मात्रं निश्चीयते, तत्र तु विशिष्टे बहुव्रीहौ सन्देह एव? उच्यते; भवति व्याख्यानतो विशेषप्रतिपत्तिः, न हि सन्देहादलक्षण(व्या.पा.75)मित्यदोषः, समासान्तविधावपि `समासाच्च तद्विषयात्' (5.3.106) इत्यतः समासग्रहणमनुवर्त्तते। तत्र समासाधिकारादेव समासान्तत्वे वक्ष्यमाणानां प्रत्ययानां सिद्धे समासग्रहणानुवृत्तिविशिष्टे समासे समासान्तत्वं यथा स्वादित्येवमर्थं विज्ञायते। स पुनर्विशिष्टः समासो यः समासाधिकारे विहितः स एव व्याख्यानाद्वेदितव्यः। अथ ननेत्यत्र `नलोपो नञः' (6.3.73) इति नलोपः कस्मान्न भवति, अस्ति तस्यापि बहुव्रीहौ दर्शनम्? नैष दीषः; `नलोपो नञः' इत्यत्र हि उत्तरवदाधिकारोऽनुवर्त्तते--उत्तरपदे नलोपो विधीयते। नञ् च कार्यित्वेनोपात्तः, कार्यिणश्चेह निमित्तभावो नोपपद्यत इति नञोऽन्यस्मिन्नुत्तरपदे लोपेन भवितव्यम्, यथा--अब्राह्मण इति, न तु तस्मिन्नेवेति कुतो नकारलोपस्य प्रसङ्गः?।।

10. आबाधे च। (8.1.10)

`आबाधनभावाधः' इति। भावे घञ्। यद्यत्राबाधोऽभिधेयधर्म आश्रीयते, तदा बाधितपीडिताविशब्दानामेव द्विर्वचनं स्यात्, न तु गतादिशब्दानाम्। प्रयोक्तृधर्म आश्रीयमाणे सर्वत्र भवति। तस्माद्व्याप्तिव्यायात् प्रयोक्तृधर्म एवाश्रीयते, इत्याह--`प्रयोक्तृधर्मः' इति। `तत्र वर्त्तमानस्य' इति। द्विर्वचनप्रतिपत्तिद्वारेण, बहुव्रीहिवद्भावप्रतिपत्तिद्वारेण च तत्प्रकाशनात् तत्र तस्य वृत्तिर्वेदितव्या, न तु तदभिधानात्। न हि गतादयः शब्दा कथञ्चिदाबाधनमभिदधति। चकारो वाक्यभेदमाचष्टे। तेन द्वयमत्र विधीयते--एकेन वाक्येन द्विर्वचनम्, अपरेण च बहुव्रीहिवद्भावः। `गतगतः' इत्यादौ पूर्ववत् सोर्लुक्। `गतगता' इत्यादौ तु

पुंवद्भावः पूर्ववदेव। `प्रियस्य गमनादिना' इत्यादि। एतेन प्रयोक्तृधर्मताऽबाधस्येति दर्शयति। आदिशब्देन विनाशादेर्ग्रहणम्।।

11. कर्मधारयवदुत्तरेषु। (8.1.11)
कर्मधारयवत् कार्यं भवतीत्यनेन कार्यातदेशोऽयमित्याचष्टे। कार्यातिदेशस्य फलमुत्तरत्र दर्शयिष्यते। `कर्मधारयवत्त्वे प्रयोजनम्' इत्यादि। तत्र सुग्लुग्बहुव्रीहिवद्भावे, अस्मिन्नतिदेशे च साधारणं प्रयोजनम्। पुंवद्भा वस्तु क्वचित् साधारणम्, क्वचिदसाधारणम्; यत्र हि पुंवद्भावस्य प्रविषेधो नास्ति--पटुपट्वीत्यादौ, तत्र साधारणम्, यत्र तु ' न कोपधायाः' (6.3.37) इत्यादिना पुंवद्भावप्रतिषेधोऽस्ति--कालककालिकेत्यादौ, तत्रा साधारणम्। तथा हि यस्य हि पुंवद्भावः प्रतिविद्धस्तस्यापि `पुंवत्कर्मधारय' (6.3.42) इत्यादिना कर्मधारये पुंवद्भावो विधीयते। अन्तोदात्तत्वं त्वसाधारणमेव। यस्मात् कर्मधारय एव `समासस्य' (6.1.223) इत्यन्तोदात्तत्वं विधीयते, न बहुव्रीहौ; तत्र `बहुव्रीहौ प्रकृत्या पूर्वपदम्' (6.2.1) इति पूर्वपदप्रकृतस्वरस्य समासान्तोदात्तस्यापवादस्य विधीनात्। तत्र यदसाधारणं प्रयोजनं तदिममतिदेशं प्रयोजयति, नेतरत्। तद्धि बहुव्रीहिवदित्यतिदेशस्यानुवृत्तावपि सिद्ध्यत्येव। सति त्वन्यार्थोऽस्यारम्भे बहुव्रीहिवदित्यतिदेशस्यानुवृत्तिरपार्थिका; अनेनैव साधारणस्यापि सिद्धत्वात्। अतः सुब्लुगादिकमपि साधारणं कर्मधारयवत्त्वे प्रयोजनं न भवति। `पटुपट्वी' इति। `वोतो गुणवचनात्' (4.1.44) इति ङीष्। स च पूर्वपदे पुंवद्भादेन निवर्त्तते। `कालककालिका' इति। अज्ञाताद्यर्थे `प्रागिवात् कः' (5.3.70), टाप्, `केऽणः' (7.4.13) इति ह्रस्वः, पूर्ववदित्त्वम्। पुंवद्भावेन पूर्वपदे टाबित्त्वयोर्निवृत्तिः। कथं पुनरत्र पुंवद्भावः, यावता `न कोपधायाः' (6.3.37) इत्यस्य प्रतिषेधः कृतः? इत्याह--`कोपधायाः' [`न कोपधायाः' इत्यादि--प्रा. मु. पाठ] इत्यादि। कर्मधारये हि `पुंवत्कर्मधारय' (6.3.42) इत्यादिनां योगेन प्रतिषेधविषयेण पुंवद्भावो विहितः तेन कोपधाया अपि पुंवद्भावो भवत्येव।
ननु चाम्रेडितानुदात्तत्वमाष्टिकिमम्, समासान्तोदात्तत्वं च षाष्ठिकम्, अतः परत्वादाम्रेडितानुदात्तत्वेनैव भवितव्यम्; न चैवं सति कर्मधारयदित्यतिदेशस्य वैयर्थ्यं स्यात्, तस्य प्रयोजनान्तरे चरितार्थत्वात्? इत्यत आह--`समासान्तोदात्तत्वमनेन' इत्यादि। शल्त्रातिदेशे हि शस्त्रेध्वतिदिष्टेषु तैरेव स्वदेशस्थैः कार्याणि क्रियन्त इत्याम्रेडितानुदात्तस्य समासान्तोदात्तत्वात् परत्वं स्यात्। न चायं शास्त्रातिदेशः, किं तर्हि? कार्यातदेशः। कार्यातिदेशे सत्यतिदेशशास्त्रेणैव विधियते। तस्मादन्तोदत्तत्वेमेव परम्। अतस्तस्मात् परत्वादाम्रेडितानुदात्तत्वं बाधते।
ननु चान्तरेणाप्युत्तरग्रहणं यथा `प्रत्ययः' (3.1.1) इत्येवमादीनामधिकाराणामुत्तरत्रावस्थानं भवति, तथाऽस्यापि भविष्यति; अधिकाराणामुत्तरत्रानुधृत्तिदर्शनात्, तत्किकमर्थम् `उत्तरेषु' इति वचनम्? इत्याह--`अधिकारेणैव' इत्यादि। अधिकाराणां क्वचिल्लक्षणत्वस्य व्यवहारः, यथा `शेषे' (4.2.92) इत्यधिकारस्य लक्षणत्वमस्ति, तच्चाविस्पष्टम्; अन्येष्वधिकारेषु `प्रत्ययः' (3.1.1) इत्येवमादिष्वदृष्टत्वात्। तस्मादस्य विस्पष्टत्वं यथा स्यादित्येवमर्थमुत्तरेष्विति वचनम्। एतद्धि लक्षणत्वमस्य मा भूदित्येवमर्थं क्रियते। यदि तु लक्षणस्याधिकारेष्वसम्भवः स्यात्, उत्तरेष्विति वचनमनर्थकं स्यात्; व्यार्त्त्याभावात्। अथ वा--सिंहावलोकितव्यायस्येत्यव्याहारः। प्रायेण ह्यणिकारणमुत्तरत्रानुवृत्तिर्दुष्टेति सिहावलोकितन्यायस्याविस्पष्टता; केषुचित् प्रत्ययादिष्वदृष्टत्वात्। तस्मात् तस्य विस्पष्टीकरणार्थमुत्तरेष्विति वचनम्। यदि सिंहावलोकितन्यायेन पूर्वत्रानुवृत्तेरधिकारणां न सम्भव एव स्यात्, उत्तरेष्विति वचनमनर्थकं स्यात्; व्यावर्त्त्याभावात्।।

12. प्रकारे गुणवचनस्य। (8.1.12)
`प्रकारो भेदः। सादृश्यं च' इति। उभयत्रापि प्रकारशब्दस्य प्रयोगदर्शनात्। तत्र भेदे प्रयोगो दृश्यते--बहुभिः प्रकारैर्भुङ्क्ते। बहुभिर्भेदैः, विशेवैर्भुङ्क्त इत्यर्थः। सादृश्येऽपि--बाह्मणप्रकारोऽयं माणवकः। ब्राह्मणसदृश इत्यर्थः। `तदिह सादृश्यं प्रकारो गृह्यते' इति। कुत एतत्? लक्ष्यानुरोधात्। न हि कृतद्विर्वचनात् गुणवचनात् पदादिह भेदो गम्यते, किं तर्हि? सादृश्यम्। अत्र च शब्दशक्तिस्वाभाव्यं हेतुः। `प्रकारे वर्त्तमानस्य' इति द्विर्ववचनप्रतिपत्तिद्वारेण तद्द्योतनात् तत्र तस्य वृत्तिर्विज्ञेया। `परिपूर्णगुण' इत्यादि। एतेनोदाहरणे गुणवचनत्य सादृदये वृत्ति दर्शयति। उपमानं हि सादृश्यम्। परिपूर्णः=सकलः पाटवादिर्गुणो यस्य स तथोक्तः। स एव न्यूनः=असकलोऽपरिसमाप्तो यस्य स न तथोक्तः। जातीयरपि प्रकारवचन एव विधीयत इति नाप्रप्ते तस्मिन्निदामारभ्यत इति तद्बाधनं प्राप्नोति? इति यश्चोदयेत्, तं प्रत्याह--`जातीयरोऽनेन बाधनं नेष्यते' इति। कथं पुनरिष्यमाणमपि बाधनं न भवितव्यति? वक्ष्यमाणस्यान्यतरस्यांग्रहणस्योभयोरपि योगयोः शेषभूतत्वात्। किं पुनः कारणं बाधनं नेष्यते? इत्याह--`पटुजातीयो मृदुजातीय इत्यपि [इत्यादि भवतीति'--प्रा.मु.पाठः] हि भवति' इति। यस्तु `पटुपटुजातीयो मृदुमृदुजातीयः' इति प्रायेण पुस्तकेषु पाठः स प्रमादकृतः। कुतः? एकस्य कार्यिणोऽनेकेषां कार्याणां प्राप्तौ बाध्यबाधकभावो भवति। इह तु पटुदटुमृदुमृदुशब्दाभ्यामेव प्रकारस्य द्योतितत्वात् तयोः पुनर्द्विर्वचनं न प्रप्नोति, नापि जातीयर्; तस्मादपपाठोऽयम्। `अग्निर्माणवकः, गौर्वाहिकः' इति। अग्निशब्दो गोशब्दश्चान्नाप्रकारे वर्त्तते। तथा ह्यग्निना माणवकस्य सूदृश्यं गम्यते, गवा च वाहीकस्य। न हि तौ गुणवचनौ, किं तर्हि? द्रव्यवचनौ; माणवकवाहीकयोर्द्रव्यत्वात्।

ननु चमावपि मणवचनावेव, तथा हि--यज्जातयस्तैरुण्यादिर्गुणो यह्नो दृष्टस्तज्जातीयमेव गुणविशेषमुपादाय सोऽयमित्यभेदोपचारेण सम्बन्धेनोपमानोपमेयभावेन वाऽग्निशब्दोऽयं माणयके वर्त्तते; तमेव गुणविशेषं प्रतपादयितुं प्रवृत्तत्वात्। एवं गोशब्दोऽपि यज्जातीयो जाड्यादिर्गुणः सास्नादिमति दृष्टः, तज्जातीयमेद गुणविशेषमुपादाय पूर्वोक्तयोः सम्बन्धयोरन्यतरेण सम्बन्धेन वाहोके वर्त्तते, तस्यैव गुणविशेषस्य प्रतिपादनाय।

तस्माद्गुणविशेषे प्रतिपादयितुं प्रवृत्ताविमावपि गुणवचनावेव, इत्याह--`यद्यप्यत्र' इत्यादि। यतः शब्दात् श्रुतिमात्रेण योऽर्थः प्रतियते स तस्य मुख्योऽनपचरितोऽर्थः। स्त्वभेदोपचारादिना निमित्तन कथञ्चिद्यत्वेन प्रतीयते, स गौण इति। उपचरित इत्यर्थः। अग्निशब्दात् श्रुतिमात्रेण पावकः प्रतीयते, गोशब्दाच्च सास्नादिमान्। अतोऽग्निशब्दस्य पावको मुख्यार्थः, गोशब्दस्यापि वाहिकः। मुख्येनार्थेन यावकादिना गौणस्य माणवकादेः सम्बन्धः। पूर्वोक्तयोः सम्बन्धयोरन्यतरो मुख्यार्थसम्बन्धः। तेन हेतुना करणेन वाऽवधतो निश्चितो भेदो विशेषो यस्य तैक्ष्ण्यजाड्यादेर्गुणस्य स तथोक्तः। कथं पुनस्तेन सम्बन्धेन तस्य निश्चयो भवति? तत्प्रतीनी तत्प्रततेः। स हि गुणविशेषस्तस्य सम्बन्धस्य हेतुः; तस्मिन् सति तत्सद्भावात्। अतः सम्बन्धो द्विप्रकारोऽपि प्रतीतः सन् तत्प्रतीतिंजिनयति; धूम इवाग्नौ। तमेवंविधं गुणविशेषमेव यद्यपि मुख्यादर्थादन्यस्मिन् गौणेऽर्थे गोशब्दोऽग्निशब्दश्च प्रतिपादयितुं प्रवृत्तः, तथापि सर्वकालं गुणवचनो न भवतीति न तद्द्विरुच्यते, तथा हि--यदासावमुख्येऽर्थे साधर्म्येण माणवके वाहीके च प्रयुज्यते, तदा गुणवचनो न भवतीति न तद्द्विरुच्यते, तथा हि--यदासावमुख्येऽर्थे साधर्म्येण माणवके बाहीके च प्रयुज्यते, तदा गुणवचनो भवति। यदा च वह्नौ सास्नादिमति च, तदा जातिवचनो द्रव्यवचनो वा। तत्र यदाऽग्निशब्दोऽग्नित्वे वर्त्तते गोशब्दोऽपि गोत्वे, तदा जातिवचनौ भवतः। यदा तु जातिवचनो द्रव्यवचनो वा। तत्र यदाऽग्निशब्दोऽग्नित्वे वर्त्तते गोशब्दोऽपि गोत्वं, तदा जातिवचनौ भवतः। यदा तु जात्युपलक्षिते जतिमति द्रव्ये तदा द्रव्यवचनौ। तस्मात् सर्वकालमगुणवचनत्वान्न भवति तयोर्द्विर्वचनम्। एतच्च गणवचग्रहणाल्लभ्यते। प्रकारे हि वर्त्तमानः शब्दः सर्व एव गुणवचनः सम्पद्यते, उच्यते चेदं वचनम् गुणवचनस्येति, तत्र सर्वप्रकर्षावगतिर्विज्ञायते--साधीयान यो गुमवचन इति। कश्च साधीयान् गुणवचनः? यः [नास्तीदं वाक्यं भुद्रिते] सर्वदा गुणवचनः। यदि तर्हि सर्वदा यो गुणवचनस्तस्य द्विर्वचनेन भवितव्यम्; तदा पटुशब्दस्यापि द्विर्वचनं न प्राप्नोतीति, सोऽपि यदा पाटवमात्रे गुणविशेषे वर्त्तते तदैव गुणवचनः; यदा तु तद्वति द्रव्ये तदा द्रव्यवचन एव? नैतत; न हि विशेषणमनभिदधता विशेष्यं शक्यमभिधातुम्। अतो विशेष्यं द्रव्यमभिदधता नियोगतो विशेषणमव्यभिधेयम्। तस्मस्द्द्रव्येऽपि वर्त्तमानः पटुशब्दस्तद्विशषणमपि मुणमभिदधात्येव। इयांस्तु विशेषः--गुणमुपसर्जनीभूतमभिदधाति, द्रव्यं तु प्रधानभूतमिति।

आनुपुर्व्ये, इत्यादि। अवीप्सार्थमिदम; वीप्साया असम्भवात्। तल्यजातीयानां हि भिन्नानां वीप्सा भवति, यथा--यामाणाम्। सर्वे, हि वे ग्रामत्वजास्यैकयाऽध्यासितत्वात् तुल्युजातीया दिग्देशादिभेदेन भिन्नाः। `मूले मूले स्थूलाः' इत्यादौ तु देण् नडादोनां [`नलादीनाम्--प्रा.मु.पाठः] ये भागस्तेषामेकमेव मुख्यं मूलं यस्याधोभागान्तरं न सन्निविष्टम्। एवकेकमेव च मुख्यमग्रं ग्रस्पोपरिभागान्तरं न सन्निविष्टम्। तथा हि वेणोर्मूलमित्यक्ते यस्याधोभायान्तरं नास्ति तत्रैव प्रतीतिरुपजायते। तथा वेणोरग्रमित्युक्ते यस्योपरिभागान्तरं नास्ति तत्रेव ग्रतीतिरुपजायते नतरेव। यस्तु तेषु मूलव्यपदेशोऽग्रव्यपदेशश्च, सोऽपेक्षाकृतः, अपरि सन्निविष्टमपेक्ष्य मूलवयपदेशः, अधःसन्निविष्टमपेक्ष्याग्रमिति। तस्माद्यथा सर्वे ग्रामास्तुल्यजातीया न तथा वेणुभागः भवन्ति। ग्रामाणां हि न किञ्चिदपेक्षाकृतं ग्रामत्वम् भागानां त्वेकस्यैव मुख्यं मूलत्वमग्रत्वञ्चानपेक्षाकृतम्। अनेकेषां भागानां तूभयम्। यत्तदपेक्षाकृतमेव तस्माद्भिन्नजातीयः भागाः। न च भिन्नजातीयानां वीप्सा भवति, यथा--सास्नादिमतां गदां वाहिकानाञ्च। न हि गोर्गौरित्यक्ते वाहीकगतापि दीपासा गम्यते। अप चैतावातिहार्थो विवक्षितः---आनुपूर्व्येण वेणु नडादयः [`नलादयः'---प्रा.मु.पाठः] स्थूलाः सूक्ष्मा वेति प्रतियते; न तु वीप्सा। `ज्यॆष्ठं ज्येष्ठं प्रदेशय' इति। अत्रानुपूर्व्यमात्रं विवक्षितम्। यः सर्वेयां ज्येष्ठस्त तावत्प्रदेशय, ततसतदन्येषां यो ज्यष्ठन्तं प्रदेशयेति। अन्यथा यद्यत्र ज्येष्ठानां वीप्सा स्यात् सर्वकनीयसः प्रवेशो न स्यात्; तस्य वीप्सयाऽविवयीकृतत्वात्, न ह्यसौ ज्येष्ठः। तस्मादत्रापि नास्ति वीप्सा। तेनानुपूर्व्ये द्वे भवत इत्येदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--यथा `शेषे' (4.2.92) इति लक्षणञ्च, अधिकारश्च; तथा `सर्वस्य द्वे' (8.1.1) इत्येतदपि लक्षणमधिकारश्च। तेनानुपूर्व्ये द्वे भवत इत्युत्तरत्रापि द्विर्वचनविधौ यथायोगमेव व्याख्यानं कर्त्तव्यम्। यदि तर्हि `सर्वस्य द्वे इत्येतल्लक्षणमपि, एवं सति `नित्यवीप्सयोः' (8.1.4) इत्यादेर्वेयर्थत्य न भवति, तत्रैव [`तथा हि'--प्र.मु.पाठः] `नित्यदीप्सयोः' इत्येसादीनाम प योगानाम्।

`अस्मात् काषपिणादिह भवद्भ्यां मा मावं देहि' इत। अत्र द्बावेवेत्यवधार्यते। द्वावेव देहि, नैकम्, नापि बहुनित्यर्थः। विनापि ह्येवकारप्रयोगेणावधारणे गम्यते; विवक्षितत्वात्, यथा--पार्थो धनुर्धर इति। ननु किं पुनः कारणे दीप्सा न सम्भवति? इत्याह--`अत्र हि' इत्यादि। अनेन वीप्साया अभाव दर्शयति। कार्षापणौ ह्यनेकमावसमुदायः। न च सर्वे मावा दानक्रियया व्याप्तुमिष्यन्ते, अपि तु द्वावेदेति नास्त्यतर वीप्सा--माषं देहि, द्वौ माषौ देहि, क्रीन् मावान् देहीति। एकं माषं देहि, द्वौ वा, त्रीन वा--इत्ययमत्रार्थो विवक्षितः, न त्ववधारणमिति द्विर्वचनं न भवति।

`सम्भ्रमेण' इति। त्वरया। `प्रवृत्तिः' इति। प्रवत्तनम्। `अहिरहिर्बुध्यस्व बुध्यस्व' इति। यद्ययं न वुध्यतेऽह चर्व नावबोधयाम्, ततो नून दृष्ट [दष्टः--प्रा.मु.पाठ] एवायमहिनेति मत्वा सम्भ्रमेणैवं वाक्य प्रयुक्ते। `क्रियासमभिहारे द्वे भवत इति वक्तव्यम्' (वा.886), `आभीक्ष्ण्ये द्वे भवत इति वक्तव्यम्' (वा.887) इत्येवं वाक्यद्वयं लोडादिभिरेव तन्नित्यताया द्योतितत्वाद्द्विवचनं न प्राप्नोतीत्युपन्यस्तम्। `नित्य' इत्यादिना `नित्यवीप्सयोः' (8.1.4) इत्यनेनैवात्र द्विर्वचनं सिद्धमिति दर्शयति। यथा च सिद्ध तथा तत्रैव `क्त्वाणगलोर्लोटश्च द्विर्वेचनापेक्षया इत्यादिना ग्रन्थेन प्रतिपादितम्।

पटपटाकरोति' इति। पटच्छपब्दस्य डाचि विषयभूतेऽनुत्पन्न एव द्विर्वचनम्। ततः `अव्यक्तानुकरणाद्द्व्यर्जवरार्धादनितौ डाच' (5.4.57), नित्यमाम्रीडते डाजि' (6.1.100) इति तकारस्य पररूपत्वम्। `पटपटायते इति। `लोहितादिडाज्भ्यः क्यष' (3.1.413), `वा क्यषः' (1.3.90) इत्यात्मनपदम्। `ढाजन्तस्य' इति। भाविडाजन्तमभिप्रेत्यैवमुक्तम्। तस्मात् डाचि विषयभूतेऽनुत्पन्न एवैतद्द्विर्वचनमिष्यते। अत एव वृत्तिकारेण `अव्यक्तानुकरण' (5.4.57) इत्यादौ सूत्रे उक्तम्--डाचीति विषयसप्तमीयमिति। अत्र `नित्यमाम्रेडिते डाचि' (6.1.100) इति पररूपविधानं ज्ञापकम्। तत्र ह्य इति, अन्तस्येति, च वर्त्तते। यदि डाचि परभूते द्विर्वचनमिष्यते, ततो डाचि विहिते पटच्छब्दस्य नित्यत्वाट्टिलोपेनैव प्राग्भवितव्यम्; तथा च सत्यच्छब्दाभावात् तत् परूपं नोपपद्यते। तस्माद्विषयसप्तमीयम्। एवं कृत्वा `नित्यमाम्रेडिते डाचि' (6.1.100) इत्यत्र यदुक्तम्--`प्राक् टिलोपाद्द्विर्वचनमिष्यते' इति, तदुपपन्नं भवति।

एवं हि प्राक् टिलोपाद्द्विर्वचनं सिध्यति; यदि डाचि विषयभूते तत्र तद्विधीयते; अन्यथा हि यदि तस्मिन् परभूते विधीयेत, ततो नित्यत्वात् प्राक् टिलोप एव स्यात्, न तु द्विर्वचनम्। `द्वितीयाकरोति' इत्यादि। `कृञो द्वितीयतृतीय' (5.4.58) इत्यादिना डाच्। `तदर्थम्' इति। अव्यक्तानुकरणडाजन्तस्यैव द्विर्वचनं यथा स्यादित्येवमर्थम्। `केचित्' इति वचनात् केचिद्बहुलमिति न पठन्तीत्युक्तं भवति। तेषामयमभिदप्रायः--`सर्वस्य द्वे' इत्यतो विभाषाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा। तेनाव्यक्तानुकरणडाजन्तस्यैवात्र द्विर्वचनं भविष्यति, नान्यस्येति। ततो नार्थो बहुलग्रहणस्येति। `पूर्वप्रथमयोः' इत्यादि।
`अर्थातिशयविवक्षायाम्' इति। पूर्वप्रथमशब्दस्य वाच्यस्यातिशयः प्रकर्षः, तस्य विवक्षा वक्तुमिच्छा, तस्यां द्वे भवत इत्येतर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु पूर्वमेव कृतम्। `नाप्राप्ते आतिशायिके द्विर्वचनमिदमारभ्यमाणं तस्य बाधकं प्राप्नोति' इति यो मन्येत, तं प्रत्याह--`आतिशायिकोऽप दृश्यते' इति। कथम्? `सर्वस्य द्वे' (8.1.1) इत्यनेनैव द्विर्वचनं विधीयते। अत्र विभाषाधिकाराद्विकल्पेन। तेन यदा नास्ति द्विर्वचनं तदातिशायको भवति।
`डतरडतमयोः' इत्यादि। `किंयत्तदोः' (5.3.92) इत्यादिना इतज्विहितः। ` वा बहूनां जातिपरिप्रश्ने' (5.3.93) इत्यादिना डतमच्। समेन गुणेनाढ्यत्वादिना निरूपणायोभादिमावाढ्यावित्येवमादिप्रकारा सा सम्प्रधारणा। स्त्रीलिङ्गशब्धः स्त्रीलिङ्गयोगात् स्त्रीत्युक्तः। निगद्यतेऽनेनेति निगदः--`पुंसि संज्ञायां घः प्रायेण' [`प्रायेण'--नास्ति मुद्रिते] (3.3.118) इति घः। स्त्रीनिगदो यस्य स स्त्रीनिगदो भावः। डतरडतमान्तयोः स्त्रीनिगदे भावे वर्त्तमानयोः शब्दयोः सम्प्रधारणायां विषयभूतायां द्वे भवतः। डतरडतमग्रहणमत्रोपलक्षणार्थं द्रष्टव्यम्। अत एव वक्ष्यति--`डतरडतमान्यामन्यत्रापि दृश्यते' [`हि' इत्यधिकम्--काशिका] इति। इहाढ्यत्वं कस्यचित् साधनसम्बन्धकृतम्, कस्यचिद्यत्नकृतम्, कस्यचिद्भाग्यसम्पत्कृतम्। तत्रोभाविमावाढ्यावित्युक्ते प्रतिपत्ता किंकृतमनयोराढ्यत्वमिति प्रतिपद्यमानः कतराकतराऽनयोराढ्यतेति वाक्यं प्रयुङ्क्ते, तदाढ्यता विभूतिपर्यायः स्त्रीनिगदो भावः। तत्र च डतरडतमान्ते वर्त्तते; तां प्रष्टुं प्रवर्त्तितत्वात्।
`कर्मव्यतिहारे' इत्यादि। कर्मव्यतिहारः क्रियाविनिमयः। एकस्यान्यभोजनापदरस्यापीतरो भोजनादिः। समासवद्भावोऽनेन बहुलं विधीयते। द्विर्वचनं तु `सर्वस्य द्वे' (8.1.1) इत्यनेनैव सिद्धम्। स च समासवद्भावो बहुलवचनादन्योऽन्यशब्दे न भवत्येव। इतरेतरशब्दे तु नित्यम्। असमासपक्षे पूर्वपदस्य प्रथमैकवचनं कर्त्तव्यम्। `अन्योऽन्यमिमे ब्राह्मणा भोजयन्ति' इति। अन्यमित्यस्य द्वितीयैकवचनान्तस्य द्विर्वचनम्। अत्र समासवद्भावो नास्तीति पूर्वपदस्य प्रथमैकवचनम्। तस्य च `ससजुषो रुः' (8.2.66), `अतो रोरप्लुतादप्लुते' (6.4.113) इत्युत्वम्; `आद्गुणः' (6.1.87), `एङः पदान्तादति' (6.1.109) इति पूर्वरूपत्वम्--एते विधयो विधेयाः। `अन्योऽन्यस्य' इति। षष्ठ्यन्तस्य द्विर्वचनम्। अन्योऽन्यसम्बन्धिनं पुत्रादिकं भोजयन्ति। अन्योऽप्यस्येत्यर्थः। `इतरेतरं भोजयन्ति' इति। द्वितीयान्तस्य द्विर्वचने कृते द्वितीयैकवचनम्, अमि पूर्वत्वम् (6.1.107)। इतरेतरस्य' इति। षष्ठ्यन्तस्य द्विर्वचनम्। सुब्लुकि कृते समासप्रातिपदिकत्वात् पुनः षष्ठ्येकवचनं भवति।
`स्त्रीनपुंसकयोः' इत्यादि। स्त्रीनपुंसकयोर्यत् सर्वनाम कर्मव्यतिहारे वर्त्तते तदुत्तरपदस्य विकल्पेनाम्भावो वक्तव्यः। उत्तरपदस्येत्यवयवसम्बन्धे षष्ठी, तेनोत्तरपदस्य या विभक्तिरवयवभूता तस्या अयमादेशो भवति। स्थाने षष्ठ्यां ह्यस्यामनेकाल्त्वात् सर्वादेशः स्यात्। `अन्योन्यामिमे ब्राह्मण्यो भोजयतः' इति। अन्यामित्यस्य द्विर्वचनम्, विभक्तेराम्भावः, पूर्वपदस्य बहुलवचनाद्ह्रस्वत्वम्, पूर्ववद्रुत्वादि। `अन्योऽन्यम्' इत्यत्र उत्तरपदस्यापि पूर्ववद् ह्लस्वत्वादिः। `इतरेतरां भोजयतः' इति। समासवद्भावे सति सर्वनाम्नो वृत्तिमात्रे पुंवद्भावेन (जैन.वृ.103) टापो निवृत्तिः। एवं `इतरेतरम्' इत्यत्रापि।।

13. अकृच्छ्रे प्रियसुखयोरन्यतरस्याम्। (8.1.13)

नञत्र विपक्षे वर्त्ततेऽधर्मानृतादिवत्। कृच्छ्रम्=दुःखम्, प्रयत्नः=प्रयास इत्यर्थः; स पुनः प्राणिधर्मः। कृच्छ्रविपक्षोऽकृच्छ्रम्; प्राणिधर्म एव, यस्मिन् सति प्रयत्नमन्तरेणैव दानादिक्रियां सम्पादयति। तत्र वर्त्तमानयोः प्रियखशब्दयोर्द्वे भवतः। प्रियप्रियेण ददाति। विना प्रयासेन ददातीत्यर्थः। तृतयैकवचनान्तस्य द्विर्वचने कृते सुब्लकि च पुनस्तृतीयैकवचनमेव समासवद्भावेन भवति। `प्रियः पुत्रः, सुखो रथः' इति। नात्र प्रियसुखशब्दौ कृच्छ्रविपक्षे प्राणिधर्मविशेषे वर्त्तते, किं तर्हि? द्रव्ययोः। पुत्रो हि प्रीणातीति कृत्वा प्रिय इत्युच्यते, रथोऽपि सुखयतीत कृत्वा सुखः।।

14. यथास्वे यथायथम्। (8.1.14)

`यथास्वम्' इति। `यथाऽसादृश्ये (2.1.7) इति वीप्सायामव्ययीभावः। स्वशब्दो हीहात्मवचनः, आत्मीयवचनो वा--इति दर्शयितुमाह--`यो य आत्मा' इत्यादि। `यथायथम्' इति। `ह्रस्वो नपुंसके' (1.2.47) इति ह्रसवः।।

15. द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगामिव्यक्तिषु। (8.1.15)
`पूर्वपदस्याम्भावः' इत्यादि। द्विर्वचने कृते द्वि+औ इति स्थिते सुब्लुकि कृतेऽम्भावोऽत्वञ्चोभयमपीकारस्य क्रियते, यथा क्रमं समुदायात् सुः, `अतोऽम्' (7.1.24) इति कृतेऽमि पूर्वत्वञ्च (6.1.107), अन्यथा हि द्वन्द्वसिति रूपं त सिध्येत्। किं पुनरेदेषु रहल्यादिदाच्येषु द्वन्द्वमिति निपात्यते? उत विषयभूतेष्वित्यत आह--`तत्र' इत्यादि। रहः=गुप्तिः, तत्र साधु रहल्यम्, `तत्र साधुः' (4.4.98) इति `प्राग्धिताद्यत' (4.4.75)। अथ वा--रहसि भवमिति दिगादित्वाद्यत् (4.3.54)। `मर्यादादचने' इति। मर्यादः=स्थित्यनतिक्तमः, तस्या वचनं मर्यादावचनम्। वचनग्रहणम्--शब्दोपात्तायां मर्यादायां यथा स्यात्, अर्थप्रकरणादिना गम्यमानायां मा भूत्। `आचतुरम्' इति। `आङ् मर्यादाभिविध्योः' (2.1.13) इत्यव्ययीभावः; `अव्ययीभावे शरत्प्रभृतिभ्यः' (5.4.107) समासान्तष्टच्। उदाहरणे भर्यादार्थमभिव्यक्तीकर्त्तमाह--`माता पुत्रेण' इत्यादि। माता हि मिथुताय चतुरः सन्तानजान् प्राप्नोति, न तु ततोऽधिकान् पुत्रपौत्रपयौत्रतत्पुत्रान्। `मर्यादार्थः' इति। मर्यादेवर्थो मर्यादार्थः। `प्रयुनक्ति' इति। उपकल्पयतीत्यर्थः। `द्वन्द्वानि' इति। शीतोष्णादीनि सुखदुःखहेतूनित्यर्थः। [सुखदुःखहेतूनीत्यर्थः--प्रा.मु.पाठः] यदि योगविभागः क्रियते, रहस्यादिग्रहणमनर्थकम्? नानर्थकम्; प्रपञ्चार्थत्वात्। द्वन्द्वमित्यस्य वा योगविभागस्यासर्वविषयज्ञापनार्थत्वात्।।

16. पदस्य। (8.1.16)
`प्रागपदान्ताधिकारात्' इति। `अपदान्तस्य भूर्धन्यः' (8.3.55) इत्यतः प्राक्। अनन्तरेषु योगेष्वामन्त्रितादेः सुबन्तस्य तिङन्तस्य च यत् कार्य विधीयते तत्रान्तरेणापि पदाधिकारं पदस्यैव कार्यं लभ्यते, अतस्तानुल्लङ्ध्य यत्र पदाधिकारस्योपयोगस्तमेवोपन्यस्यत। `वक्ष्यति--संयोगान्तस्य लोपः' इति। `षष्ठी स्थानेयोगा' (1.1.49) इति नियमात् `पदस्य' इत्येषा स्थानषष्ठी। स्थानषष्ठ्याञ्चास्यान् `उदात्तस्वरतयोर्यणः स्वरितोऽनुदात्तस्य' (8.2.4) इत्यस्यायमर्थो जायते--उदात्तस्वरितयोर्यणः परो योऽनुदात्तस्तदन्तस्य पदस्य स्वरितो भवतीतिः तथा चात्रैव स्यात्--कुमार्याविति, कुमार्य इत्यत्र न स्यात्। न ह्येतदुदात्तस्वरितयोर्यणः परो योऽनुदात्तस्तदन्तं पदम्, किं तर्हि? सकारान्तम्। `एकादेश उदात्तेनोदात्तः' (8.2.5) इत्यत्रापि स्थानषष्ठ्यामस्यामयमर्थो जायते--उदात्तानुदात्तयोर्य एकदेशस्तदन्तस्य पदस्योदात्तो भवतीति। तथा चात्रैव स्यात्--वृक्षाविति, वृक्षा इत्यतर न स्यात्। न ह्यत्रोदात्तानुदात्तयोर्य एकादेशस्तदन्तं पदम्, किं तर्हि? सान्तमिति यश्चोदयेत्, तं प्रत्याह--`वक्ष्यमाणवाक्यापेक्षया' इत्यादि। हेताविय़ं तृतीया। वक्ष्यमाणानां वाक्यानां याऽपेक्षा तया हेतुभूतया पदस्याधिकृतस्य षष्ठ्यर्थव्यवस्था द्रष्टव्या। व्यवस्था=नियम इत्यर्थः। वक्ष्यमाणानि हि वाक्यानि कानिचित् `संयोगान्तस्य लोपः' (8.2.23) इत्येवमादीनि पदस्येति स्थानवष्ठीमपेक्षन्ते। कानिचित् `उदात्तस्वरितयोर्यणः' (8.2.4) इत्येवमादीन्यवयवषष्ठीमिति। अत एव परापेक्षया षष्ठ्यर्थे नियमो भवति। अधिकारा हि परार्था भवन्ति। एवञ्चैषां परार्थता भवति यदि ते परापेक्षानुरोधेनार्थमात्मसात् कुर्वन्ति। `क्यचित्' इत्यादिना तामेव षष्ठ्यर्थव्यवस्थां दर्शयति। किं पुनः कारणन् `षष्ठो `स्थाने योगा' (1.1.49) इत्येष नियमोऽत्र न प्रवर्त्तते? एवं मन्यते--सम्बन्धन्ध्यन्तरापेक्षया नियमोऽयम्। योगो हि सम्बन्धः, स चानेकसम्बन्ध्याधारः। न चेहाधिकारसूत्रे सम्बन्ध्यन्तरं विद्यते, अतो नास्त्येव तस्येहोपस्थानमिति।।

17. पदात्। (8.1.17)
`प्राक् कुत्सने च सुप्यगोत्रादौ' इत्यादि। कुत एतत्? अत्र केचिदाहुः--"`सुपि' (8.1.69) इति येयं सप्तमी तथा `पदात्' इत्यस्याः पञ्चम्या निमित्तभावस्य बाधितत्वान्नोत्सहते प्रवर्त्तितुम्, अतो बाध्यते पञ्चस्या निमित्तभावः" इति, एतच्चायुक्तम्; न हि सप्तमीपञ्चम्योर्निमित्तत्वे सत्याश्रीयमाणे कश्चिद्विरोधः। तत्रैवमभिसम्बन्धः स्यात्--पदात परं यत्तिङन्तं कुत्सनवाचिनि सुबन्ते परतस्तस्मिन्निहन्यत इति, ततश्चेहैव स्यात्--देवदत्तः पचति पूतीति, इह तु न स्यात्--पचति पूतीति। किञ्च `चनचिदिवगोत्रादितद्धिताभ्रेडितेध्वगतेः' (8.1.57) इत्यत्रापि पदादित्यस्यानुवृत्तिर्न स्यात्। सप्तम्या `पदात्' इत्यस्याः पञ्चम्याः बाधितत्वात्; ततश्च निद्यातार्थमेव सूत्रे स्यात्। चनादिप्रयोगे सति विज्ञायेत--तस्मादिति। अतोऽधिकाराणां प्रवृत्तिनिवृत्ती भवत इति समाधेयम्। अथ वा--पदादिस्येतत् प्रतिषेधेन सम्बद्धम्। अतः `कुत्सने' (8.1.69) इत्यतर प्रतिषेधे निवृत्ते `पदात्' इत्येतदपि निवर्त्तते।।

18. अनुदात्तं सर्वमपादादौ। (8.1.18)
`यत् ते नियतम्' इत्यादि। अत्र `मृत्यो' इत्येतदामन्त्रितं पदं भवति रजसमित्येतस्मात् पदात् परन्। किन्तु मृत्यो अनवधृष्यमित्यस्य पदस्यादौ वर्त्तत इति न भवति निघातादेशः। अस्मिन्नसति `आमन्त्रितस्य च' (6.1.198) इत्यामन्त्रिस्य षाष्ठिकमेवाद्युदात्तत्वं भवति।
`रुद्रो विश्व' इति। अत्र `देवः'--इत्यस्मात्पदात् परं `युष्माकम्' इत्येतत् पदं भवति, किन्तु `युष्माकं कुलदेवता' इत्यस्य पादस्यादौ वर्त्तत इति न भवति वसादेशः। अनन्तरेऽपि प्रत्युदाहरणे `अस्माकं शत्रुमर्वनः' इत्यस्य पादस्यादौ वर्त्तेऽस्माकमित्येतत्पदम्। तेन `भगवान्' इत्यस्मात् पदात् परस्यापि तस्य नसादेशो न भवति।
`पादग्रहणेनात्र ऋक्पादः श्लोकपादश्च गृह्यते' इति। विशेषानुपादानात्।
अथ सर्वग्रहणं किमर्थम्, यावता `अनुदात्तं पदमेकवर्णम्' (6.1.158) इति पदेषु स्वरित उदात्तो वैव एव भवति; तस्य चानुदात्त आदिष्टे सर्वमेवानुदात्तं पदं जायते? इत्याह--`सर्वग्रहणम्' इत्यादि। `अनूद्यमानम्' इत्यादिना सर्वग्रहणस्य प्रयोजनमाचष्टे। तद्द्विविधं पदम्--अनूद्यमानम्, विधीयमानञ्च। तत्र

यत् सिद्धमेव कार्यन्तरार्थं संकीर्त्यते नदनूद्यमानं पदम्, यत्त्वपूर्वमेव विधीयते तद्विधीयमानम्; तदुभयमप्यनुदात्तं यथा स्यादित्येवमर्थं सर्वग्रहणम्। तेन किं सिद्धं भवति? इत्याह--`तेन' इत्यादि। युष्मदस्मदादेशा हि विधीयमानत्वादसिद्धसत्ताकाः। सिद्धस्य हि वस्तुनो धर्मान्तरं खस्यते कर्तुम्, यथा--निष्पन्नरूपस्य वाससो रागः, नानिष्पन्नस्य; तथा तस्यैवानुपजातावस्थस्य। तत्रासति सर्वग्रहणे यदेव सिद्धसत्ताकं पदमनूद्यमानमामन्त्रितादि, तस्यैदानुदात्तत्वं विधीयते, न तु युष्मदस्मदादेशानाम्। सर्वग्रहणे तु सति तेषामपि विधीयते। अथ क्रियमाणेऽपि सर्वग्रहणे कथं युष्मदस्मदादेशानामप्यनुदात्तत्वं शक्यं विधातुम्? न हि तेन तेषां विधानकाले यदसिद्धत्वं तदपनीतम्? इत्यत आह--`वाक्यभेदेन' इत्यादि। सर्वग्रहणसामर्थ्यादत्र वाक्यभेद उक्तो भवति, न ह्यन्यथा सर्वग्रहणस्यानुदात्तत्वं शक्यं विज्ञातुम्। तत्रैकेन वाक्येनादेशा विधीयन्ते द्वितीयेन च तेषामनुदात्तत्वम्। कथं तर्हि विधीयमानमित्युक्तम्, यावता विहितानामेव युष्मदस्मदादेशानां वाक्यान्तरेणानुदात्तत्वं विधीयते? यदिह प्रकरणे विधीयमानं तद्विहितं सदुत्तरकालमनुदात्तं यथा स्यात्--इत्ययं तेत्राभिप्रायो वेदितव्यः। यद्यसिद्धस्य धमन्तिरमशक्यं विधातुम्, तत्कथं `लुङलङ्लृङ्क्ष्वडुदात्तः' (6.4.71) इत्यत्र विधीयमानस्याट उदात्तत्वं विधीयते? तत्रापि वचनप्रामाण्याद्वाक्यभेदः कृतो भवेत्--तत्रैकेन वाक्येनाड्विधीयते, अपरेण तु विहितस्योदात्तत्वम्; इह त्वसति सर्वग्रहणे वाक्यभेदो न लभ्यत इत्यनुदात्तत्वमेव न स्यात् अनुदात्तवचनस्यामन्त्रितादिषु चरितार्थत्वात्।

`युष्मदस्मदादेशाश्च' इति। चशब्दः प्रयोजनान्तरसमुच्चये। इदञ्चान्यत् सर्वग्रहणस्य प्रयोजनम्--युष्मदस्मदोर्वान्नावादय आदेशा सर्वस्य सुबन्तस्य पदस्य यथा स्युरिति; अन्यथा ह्यसति सर्वग्रहणे `युष्मदस्मदोः' (8.1.20) इति षष्ठीनिर्देशाद्विभक्तिं विहाय तयोः केवलयोरेव स्युः। ननु च `पदस्य' (8.1.16) इति वर्त्तते, विभक्त्यन्तं हि पदम्, तत्रान्तरेणापि सर्वग्रहणं सर्वस्य सविभक्तिकस्यैव पदस्य भविष्यति? इत्यत आह--`यत्रापि' इत्यादि। स्वादौ पदं स्वादिपदम्, `सप्तमी' (2.1.40) इति योगविभागात् समासः; तत्पुनर्यस्य `स्वादिष्वसर्वनामस्थाने' (1.4.17) इति पदसंज्ञा विहिता। असति सर्वग्रहणे यत्र विभक्त्यन्तं पदं तत्रैव सविभक्तिकस्य पदस्य स्युः। यत्र विभक्तौ परतः पूर्व पदं तत्र न स्युः, इष्यन्ते च तत्रापि सर्वस्य। तस्माद्यत्रापि स्वादिपदं चतुर्थीद्विवचनादौ तत्रापि सर्वस्य सुबन्तस्य यथा स्युः इत्येवमर्थं `सर्वम्' त्युचेयते। ननु चामन्त्रितस्य पदात् परस्यानुदत्तत्वं वक्ष्यति। तत्र नाप्राप्ते आमन्त्रिताद्युदात्तत्व इदमनुदात्तत्वमारभ्यत इति तस्यापदादः, ततश्च तेन तस्मिन् बाधिते प्रकृतिल्वरत्वमामन्त्रितल्यापद्येत; सर्वग्रहणात्तु सर्वस्वरप्राप्तिरामन्त्रितानुदात्तत्वेन बाध्यते, तस्मात् सर्वस्वरप्राप्तिबाधनार्थमपि सर्वग्रहणं कस्मान्न भवति? नार्हत्येवं भवितुम्; अनुदात्तशब्दो ह्ययमामन्त्रितसमानाधिकरणः सर्वस्वरप्राप्तिं बाधिष्यते। न ह्याद्युदात्तत्वे प्रतिषिद्धे प्रकृतिस्वरे क्रियमाणेऽनुदात्त शब्देनामन्त्रितमुच्यते। तस्मात् पूर्वोक्तमेव सर्वग्रहणस्य प्रयोजनम्।।

19. आमन्त्रितस्य च। (8.1.19)

`आमन्त्रिताद्युदात्तत्वे प्राप्त इदमुच्यते। इह पदाधिकारमात्रं प्रकृत्य निघातयुष्मदादेशा विधीयमाना यत्रापि नेष्यन्ते, तत्रापि प्रसजन्ति। यत्रापि क्वचिदिष,यन्ते, तत्रापि क्वचिन्न प्राप्नुवन्ति, अत एतद्दोषपरिजिहीर्षयाऽऽह--`समानवाक्ये' इत्यादि। यस्मात् पदात् परस्यामन्त्रितादेर्निघातादि कार्यं विधीयते, तयोः समान एकस्मिन् वाक्य आधारभूते सति विघातादयो विधीयन्त इति वक्तव्यम्। किमर्थम्? इत्याह--`इह' इत्यादि। `अयं दण्डः' इति। अत्रास्तीत्येतदपेक्षते। अप्रयुज्यमानमपि गम्यत इत् तथोक्तम्। `यत्रान्यत् क्रियापदं नास्ति तत्रास्तिर्भवन्तीपरः प्रयुज्यते इत्यप्रयुज्यमानोऽपि गम्यते' इति, तदेवमस्तीत्यनेन गम्यमानेन सहितमयं दण्ड इत्येकं धाक्यम्, हरानेनेत्यपरम्। तत्र यद्येकवाक्ये निघातादयो नोच्येरन्, ततो दण्डादिशब्दादतिङन्तात् परस्य हरेत्यस्य तिङन्तस्य निघातः प्रसज्येत। ननु पदविधिरयम्, स च सामर्थ्ये सति भवति, न चेह तदस्ति, अतोऽसामर्थ्यान्निधातो न भविष्यतीति चेदिहापि तर्हि न स्यात्--इह देवदत् माता ते कथयति, नद्यास्तिष्ठति कूले, शालीनां त ओदनं दास्यामीति। न ह्यत्रेहेत्यनेन देवदत्तेत्यामन्त्रितस्यास्ति सामर्थ्यम्; अपि च विद्यत एवायं दण्डो हरानेनेत्यत्र सामर्थ्यम्, तथा ह्यनेनेति सर्वनाम्ना यत करणेन प्रत्यवमुश्यते तद्धरेत्येतदपेक्षते। तच्च प्रत्यासत्तेर्वण्ड एवेत्यस्ति दण्डस्य हरेत्येतस्य च व्यपेक्षालक्षणं सामर्थ्यम्। `ओदनं पच तव भविष्यति' इति। ओदनं पचेत्यकं वाक्यम्, तव भविष्यतीत्यपरम्। `ओदनं पच मम भविष्यति' इति। अत्राप्योदनं पचेत्येकं वाक्यम्, मम भविष्यतीत्यपरम्। तत्र यद्येकवाक्ये युष्मदस्मदादेशा नोच्येरन्, ततः पचेत्येतस्मात् पदात् परयोर्युष्मदस्मदोस्तु `तेमयावेकवचनस्य' (8.1.22) इति तेमयावादेशो स्याताम्, अस्ति ह्यत्रापि सामर्थ्यम्। तथा हि--युष्मच्छब्ददाच्योऽस्मच्छब्दवाच्यश्च योऽर्थस्तत्साधनेन पाकेन तत्त्वामिकौदनो भविष्यतीत्येवम्भूता पाकस्य युष्मदस्मदोश्च व्यपेक्षा विद्यते। असः समानवाक्यग्रहणे तु सति न किञ्चिदनिष्टमापद्यते।

`इह च' इत्यादि। चशब्दः समुच्चये। इदञ्चापरमत्त्या इष्टेः प्रयोजनमिति दर्शयति। `इह देवदत्त माता ते कथयति' इत्येकं वाक्यम्, `नद्यास्तिष्ठति कूले' इति द्वितीयम्। `शालीनां त ओदनं दास्यामि' इति तृतीयम्। तत्र प्रथमे वाक्ये--इहेत्यस्मात् पदात् परस्य देवदत्तस्यामन्त्रितस्यानेन निघातो यथास्यात्, द्वितीये--नद्या इत्वस्मात्परस्य युष्मच्छब्दस्य `तेमयावेकवचनक्य' (8.1.22) इति त इत्येवमादेशो यथा स्यादित्येवमर्थ समानवाक्ये निघातादयो वेदितव्याः। अस्मच्छब्दादेशोदाहरणमिह नोपन्यस्तम्; युष्मच्छब्दादेशोदाहरणेनैवावगम्यमानत्वात्। तात्पुनः शालौनामोदनं मे देहीत्येवंजातीयकं तत्र द्रष्टव्यम्। किं पुनः स्याद्यदि समानवाक्ये निघातयुष्मदस्मदादेशा नोच्येरण्? इत्यत आह--`आमन्त्रितान्तम्' इत्यादि। प्रथमे तावद्वाक्ये--इहेत्येतदधिकरणप्रधानम्, अधिकरणञ्चाधेयापेक्षम्, तच्चाधेयं माता न तु देवदत्तः। इह ते स्विता माता कथयतीत्यर्थः। तस्मादिहशब्देन नास्तिदेवदत्तत्यस्यामन्त्रितस्य सामर्थ्यम्। द्वितीये तु नद्या इत्येतस्मात् परं तिष्ठतीत्येतत् तिङन्तम्। न च तस्या नद्या इत्यनेन सामर्थ्यम्; किं तर्हि? कूल इत्यस्य। तृतीयेऽपि--शालीनामित्यस्मात्

पदाद्युष्मच्छब्दः परः, म तु शालीनामित्यनेन तस्य सामर्थ्यमस्ति, किं तर्हि? ओदनस्येति। ततः सामर्थ्याभावात् तदाश्रया निघातादयो न त्युः।
`तदाश्रयाः' इति। इहेत्येतत् पदं `नद्या' इत्येच्छालीनामित्येतच्छाश्रयो निमित्तं यथां ते तथोक्ताः। अथ वा--तत् सामर्थ्यमाश्रयो येषां ते तथोक्ताः। असल्यां ह्यस्यामिष्टौ पदादधिकारात् पदविधिर्निघातादि कार्यं भवति, स च सामर्थ्यनिबन्धनः। तच्च सामर्थ्यमिह नास्तीति कुतो निघातादेः प्रसङ्गः! तस्मादसामर्थ्येऽपि यथा स्यादित्येवमर्थं समानवाक्ये निघातादि कार्यं वक्तव्यम्।।

20. युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ। (8.1.20)
`षष्ठीचतुर्थीद्वितीयास्ययोः' इति। षष्ठ्यादिषु यौ तिष्ठतस्तौ तथोक्तौ। `सुपि स्था' (3.2.4) इति कः।
कि पुनः कारणं द्विवचनान्तयोरेवोदाहरण पन्यस्तम्? इत्याह--`एकवचनान्तबहुवचनान्तयोः' इत्यादि।
अथ स्थग्रहणं किमर्थम्, न `युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयासु' इत्येवोच्येत, षष्ठ्यादिषु विधीयमानेध्ववश्यं युष्मदस्मदोस्तात्स्थ्यं भविष्यति? इत्यत आह--`स्थग्रहणम्' इत्यादि। श्रूयमाणा विभक्तिरर्थः प्रयोजनं निमित्तं यस्य तत् तथोक्तम्। [`तथोक्तं भवति--का.मु.पाठः] एतदुक्तं भवति--श्रूयमाणआ षष्ठ्यादिका विभक्तिरादेशस्य निमित्तं कथं नाम लभ्येतेत्येवमर्थं स्थग्रहणमिति? तेन विभक्तिर्यत्रन श्रूयते तत्र न भवतीति--अयं युष्मत्पुत्रोऽयमस्मत्पुत्र इति। असति तु स्थग्रहणे लुप्तायामपि विभक्तौ प्रत्ययलक्षणेन (1.1.62) स्यातामेवादेशौ। अश्रूयमाणरणं पुनरत्र विभक्तेः षष्ठीसमासे कृते `सुपो धातुप्रातिपदिकयोः' (2.4.71) इति लुप्तत्वात्। कथम्? पुनः स्थग्रहणे श्रूयमाणा [एष पंक्तिभागः का. मुद्रितेनोपलभ्यते] विभक्तिरादेशस्य निमित्तत्वेन लभ्यते? श्रूयमाणायामेव तस्यां तात्स्थ्यस्य सम्भवात्। अथ वा--तिष्ठतिरयमपरिहाणावर्थे वर्त्तते, यथा--`समये तिष्ठ सुग्रीव' [`न च सङ्कुचितः पन्थाः येन वाली हतो गतः। समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः।।'] (वा.रा.किं.स.30.श्लो.81) इति। समयं न परिजहिहीत्यर्थः। तेनैवं विज्ञायते--षष्ठीचतुर्थीद्वितीयामपरिजहतोर्युष्मदस्मदोरादेधाविति। एवं च विज्ञायमाने श्रूयमाणैव विभक्तिरादेशस्य निमित्तत्वेनोपात्ता भवतीति।।

21. बहुवचनस्य वस्नसौ। (8.1.21)

22. तेमयावेकवचनस्य। (8.1.22)
किं पुनः कारणं षष्ठीचतुर्थ्यन्तयोरेवोदाहरणमुपन्यस्तम्, न द्वितीयान्तयोः? इत्याह--`द्वितीयान्तस्य' इत्यादि।।

23. त्वामौ द्वितीयायाः। (8.1.23)

24. न चवाहाहैवयुक्ते। (8.1.24)
`एभिर्युक्ते' इति। `नपुंसके भावे क्तः' (3.3.114) एभिर्योग इत्यर्थः। अथ वा--`तयोरेव कृत्यक्त खलर्थाः' (3.4.70) इति कर्मणि क्तः। एभिर्युक्ते सम्बद्धे। कस्मिन्? युष्मच्छब्देऽस्मच्छब्दे च। यद्यपि तौ द्विर्वचनान्तौ प्रकृतौ, तथापीह प्रत्येकमभिसम्बन्धादेकवचनं कृतम्। `तव, मम' इति। `युष्मदस्मद्भ्यां ङसोऽश्' (7.1.27), `तवममौ ङसि' (7.2.96)। `युवयोरावयोः' इति। `युवावौ द्विवचने' (7.2.92)। `युष्माकमस्माकम्' इति। `साम आकम्' (7.1.33)। `तुभ्यं मह्यम्' इति। `ङेप्रथमयोरम्' (7.1.28) इत्यम्, `तुभ्यमहौ ङयि' (7.2.95)। `धुष्मभ्यमस्मभ्यम्' इति। `भ्यसो भ्यम्' (7.1.30)। `त्वां माम्' इति। `त्वमावेकवचने' (7.2.97) इति त्वमादेशौ, `द्वितीयायां च' (7.2.87) इत्यात्त्वम्। `युष्मान्, अस्मान्' इति। `शसो न' (7.1.29), `पूर्ववदात्त्वम्'। `युक्तग्रहणं साक्षाद्योगप्रतिपत्त्यर्थम्' इति। साक्षादव्यवधानेन चादिभिर्योगः। तस्य प्रतिपत्तिर्यथा स्यादित्येवमर्थ युक्तग्रहणम्। कथं पुनर्युक्तग्रहणे साक्षाद्योगप्रतिपत्तिर्भवति? एवं मन्यते--अपरिसमाप्तत्वादस्य वाक्यस्य तृतीयानिर्देश एव युक्तग्रहणमध्याहरिष्यति, यथा--`तुल्यार्थे रतुलोपमाभ्याम्' (2.3.72) इत्यत्र। तस्माद्युक्तग्रहणं न कर्त्तव्यमेव? तत् क्रियते साक्षाद्योगप्रतिपत्तिर्यथा स्यादिति। अन्यस्त्वाह--पदविधिरयम्, पदविधिश्च समर्थानामेव भवति, तत्र पदविधित्वादेव योगे लब्धे यद्युक्तग्रहणं क्रियते तत् साक्षाद्योगप्रतिपत्तिर्यथा स्यादिति? एतच्चायुक्तम्; असामर्थ्येऽपि निघातादिकार्यं समानवाक्ये भवतीत्युक्तमेतत्। कदा पुनश्चादिभिः साक्षाद्युष्मदस्मदोर्योगः? यदा तदर्थगतान् समुच्चयादीनर्थास्ते द्योतयन्ति। इहैते चादयः समुच्चयादिना द्योत्येनार्थेनार्थवन्तः, तत्र यदा युष्मदस्मदनुगतानेव समुच्चयादीन् धर्मान् द्योतयन्ति, तदा चादिभिः साक्षाद्युष्मदस्मदोर्योगः। यदा तु ग्रामादिसम्बन्ध्यन्तरगताः, तदा युक्तयोगः, न तु साक्षाद्योगः। तत्र युक्तयोगे प्रतिषेधो न भवति--ग्रामश्च ते स्वं नगरञ्च मे स्वमिति। तत्र ग्रामशब्दो नगरशब्दश्च चशब्देन युक्तः; तदर्थगस्तस्य समुच्चयस्य तेन द्योतनात्। युष्मदस्मच्छब्दौ तु ग्रामनगराभ्यां युक्तौ; तयोस्ताभ्यां स्वस्वामिकत्वसम्बन्धस्यार्थस्येह सम्भवात्। ननु च साक्षाद्योगप्रतिपत्त्यर्थं युक्तग्रहणम्--युक्तयुक्ते मा भूदित्येवमर्थं कथं क्रियते, न च चादियोगे प्रतिषेध उच्यमानो युक्तयुक्ते प्राप्नोति, न हि यश्चादिभिर्युक्तयुक्तेन योगः स चादियोगो भवति, तत्किंसाक्षाद्योगप्रतिपत्त्यर्थेन युक्तग्रहणेन? एवं तर्ह्येतदेव युक्तग्रहणं ज्ञापयति--इह प्रतिषेधकाण्डे युक्तयुक्तेऽपि प्रतिषेधो भवतीति। तेनोत्तरसूत्रे यद्वक्ष्यते--`पस्यार्थैर्युक्तयुक्तेऽपि प्रतिषेधः' इति तदुपपन्नं भवति।।

25. पश्यार्थैश्चानालोचने। (8.1.25)
पश्यार्थैरिति बहुव्रीहिः। तत्र `पश्य' इति यदि `पाघ्रध्माधेट्दृशः शः' (3.1.137) इति कर्त्तरि शप्रत्ययान्तः स्यात् ततो द्रष्ट्रर्थैरित्यर्थः स्यात्। एवं च `अनालोचने' इति प्रतिषेधो दुर्घटः स्यात्। तस्मादालोचनशब्दोऽयं भावसाधनः--आलोचितिरालोचनमिति। तत्र द्रष्ट्रर्थैर्युक्त प्रतिषेध उच्यमानः कः प्रसङ्गो यदालोचनवृत्तिभिर्युक्ते स्यात्, नैव प्राप्नोति, स एधोऽनालोचन इति प्रतिषेध उच्यमानः कः प्रसङ्गो यदा लोचनवृत्तिभिर्युक्ते स्यात्, नैव प्राप्नोति, स एवोऽनालोचन इति प्रतिषेधः कथमुपपद्यते? यदि पश्यशब्दो भावसाधनो भवति, नान्यथा। तस्मादत एव निपातनात् `कृत्यल्युटो बहुलम्' (3.3.113) इति वा भावेऽत्र शप्रतत्ययः, तत्र `पाघ्रा' (7.3.78) इत्यादिना पश्यादेशः, द्वयोरकारयोः पररूपत्वम् (6.1.97)। पश्योऽर्थो येषां ते पश्यार्था दर्शनार्था इत्यर्थः। दर्शनशब्दोऽयं चक्षुष्पर्यायोऽस्ति, यथा--`अक्ष्णोऽद्रशनात्' (5.4.76) इत्यत्र। अतश्चक्षुधोऽपि सम्प्रत्ययः कस्यचिन्मा भूदित्यत आह--`दर्शनं ज्ञानम्' इति। तच्चोत्तरत्रालोचनं चक्षुर्ज्ञानमिति, चक्षुर्ज्ञानस्य पृथगुपादानात्, ततोऽन्यद्विज्ञायते। `ग्रामस्त्वां समीक्ष्यागतः' इत्यादिकं साक्षाद्युक्त उदाहरणम्। `ग्रामस्तव स्वं समीक्ष्यागतः' इत्यादिकं युक्तयुक्ते। `समीक्ष्यागतः' इति। मनसा निरूप्यागत इत्यर्थः। `ग्रामस्त्वा पश्यति' इति। चक्षुर्ज्ञानेन त्वां पश्यातीत्यर्थः।
`तथा चैवोदाहृतम्' इति। यादृशीयमिष्टिस्तदर्थरूपमेवोदाहृतमित्यर्थः।।

26. सपूर्वायाः प्रथमाया विभाषा। (8.1.26)
सहशब्दोऽत्र विद्यमानवचनः, पूर्वशब्दो व्यवस्थावाची। सह विद्यमानं पूर्व यस्याः सा सपूर्वा--पञ्चम्यर्थे बहुव्रीहिः, `वोपसर्जनस्य' (6.3.82) इति सहस्य सभावः। `प्रथमायाः' इति। प्रत्ययग्रहणपरिभाषया (भो.प.7) तदन्तग्रहणं विज्ञायते। अत एवाह--`प्रथमान्तात् पदात्' इति। `युष्मदस्मदोर्विभाषा' इत्यादि। आदेशः=कथनम्, अन्दादेशः=अनुकथनम्। न अन्वादेशोऽनन्वादेशः। तत्रानन्वादेशे युष्मदस्मदोर्विभाधा भवतीति वक्तव्यम्।
किमर्थमित्याह--`इह' इत्यादि।

`सर्व एव' इत्यादि। ये सपूर्वात् प्रथमान्तात् पदात्परयोर्युष्मदस्मदोः प्राप्नुवन्त्यादेशाः, ये च ततोऽन्ये ते सव एवानत्वादेशे विभाषा वक्तव्याः। यद्येवम् अनेन वचनेनैव सर्वत्र विकल्पस्य सिद्धत्वादपार्थकमिदं सूत्रमिति मन्नमान आह--`न तर्हि' इत्यादि। `अन्वादेशार्थम् इति। यद्येतन्नोच्येत, ततोऽनन्वादेश इत्यभिधानात् सपूर्वात् प्रथमान्तादन्वादेशे विकल्पो न स्यात्। तस्मात् सपूर्वात् प्रथमान्तादन्वादेशेऽपि विकल्पो यथा स्यादित्येवमर्थं क्रियमाणेऽप्युपसंख्याने सूत्रमिदं कर्त्तव्यमेव। अस्मिंस्तु क्रियमाणे तदुपसंख्यानं न कर्त्तव्यम्। कथम्? सिंहावलोकितत्यायेन विभाषाग्रहणं पूर्वत्राप्युपतिष्ठते। सत्र व्यवस्थितविभाषाग्रहणादनन्वादेशे सर्वत्र विकल्पो भविष्यति, अन्वादेशे तु नित्यं दान्नावादयः, सपूर्वायाः प्रथमाया अन्वादेशेऽपि विकल्प इति।।

27. तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः। (8.1.27)
यथायथमुदात्तादिषु प्राप्तेष्विदमारभ्यते। `पचति गोत्रम्' इति। यः स्वपुरुषकारेण जोविकां कल्पयितु मशक्तो गोत्रखककककक्यापनेन तां कल्पयति स एवमुच्यते। `पचति' इति। व्यक्तीकरीतीत्यर्थः। `पचि व्यक्तीकरणं' (धा.पा.174) `पचतिपचति गोत्रम्' इति। नित्येऽर्थे द्विर्वचनम्। यस्त्वाभीक्ष्ण्येन गोत्रं ख्यापयति स एव मुच्यते। `वाच्यादेशाभावश्च' इति। `ब्रुवो वचिः' (2.4.53) इति वच्यादेशः प्राप्नोति, तस्याभावो निपातनादव। `विचक्षण' इति। अत्रापि `चक्षिङः ख्याञ' (2.4.54) इति प्राप्तस्य ख्याञादेशस्याभावो निपानादेव वेदितव्यः।
`नामेत्येतदवा निहन्यते' इति। विभाषाग्रहणस्यानुवृत्तेः। न च तदनुवृत्तावतिप्रसङ्गो भवति; व्यवस्थित विभाषाविज्ञानात्। `पक्षे आद्युदात्तमेव भवति' इति। `नब्विषयस्यानिसन्तस्य' (फि.सू.2.26) इति नामशब्दस्याद्युदात्तत्वात्। `कुत्सितं गोत्रम्' इति। `गुङ् अव्यक्ते शब्दे' (धा.पा.949) इत्यस्मादौणादिके ष्ट्रनि विहिते गोत्रमिति भवति। तस्मान्नित्स्वरेण गोत्रशब्दोऽत्राद्युद्त्तः। `पचति पापम्' इति। पापश्ब्दः कुत्सने वर्त्तते, सिङन्ताच्च परो भवति, न तु गोत्रादिरिति न निहन्यते।
इह कुत्सनाभिक्ष्ण्यग्रहणे, एतदनुदात्तविशेषणं वा स्यात्--तिङः पराणि गोत्रादीन्यनुदात्तानि भवन्ति कुत्सनाभीक्ष्ण्ययोरिति, उत गोत्रादीनां पाठविशेषणं वा स्यात्--एतयोरर्थयोर्गोत्रादीनि भवन्ति, तानि च तिङः पराण्यनुदात्तानि भवन्तीति? अनयोरर्थयोर्गोत्रादिव्यपदेशमासादयन्तीति योऽसौ तेषां प्रातिपदिकेषु विशिष्टानुपूर्वीकः पाठः, स एव तयोरर्थयोर्वर्त्तमानानां भवतीति यावत्। तत्र पूर्वस्मिन् पक्षे `चनचिदिवगोत्रादितद्धिताम्रेडितेध्वगतेः' (8.1.57) इत्यत्र `कुत्सने च सुप्यगोत्रादौ' (8.1.69) इत्यत्र च कुत्सनाभीक्ष्ण्ययोरपि वर्त्तमानानं कार्यं प्राप्नोति; विशेषानुपादानात्। इतरस्मिंस्तु पक्षे न भवत्येष दोषः। यानि हि न कुत्सनाभीक्ष्ण्ययोर्वर्त्तन्ते तेषां गोत्रादिव्यपदेश एव नास्ति; कुत्सनाभीक्ष्ण्यवृत्तीनामेव गणे पठितत्वात्। एतत् सर्वं चेतसि कृत्वाऽऽह--
`कुत्सनाभीक्ष्ण्यग्रहणं च' इत्यादि। पठ्यत इति पाठः, सन्निवेशविशेषः। सद्विशेषणमेव तद्वेवितव्यम्। तेन किमिष्टं भवतीत्याह--`तेन' इत्यादि। कथं पुनरेकेन यत्नेन गोत्रादीनां पाठश्च शक्यो विशेषयितुमनुदात्तत्वञ्चैषां विधातुम्? एवं मन्यते--योगविभागः कर्त्तव्यः, तिङः पराणि गोत्रादीन्यनुदात्तानि भवन्ति; ततः `कुत्सनाभीक्ष्ण्ययोः', गोत्रादीनीत्येव। न चात्र द्वितीयेयोगे विधेयमन्यदस्तीति गोत्रादीन्येव कुत्सनाभीक्ष्ण्यग्रहणेन विशिष्यन्ते। अथ वा--उभयथा सूत्रमाचार्येण शिष्याः प्रतिपादिताः, उभयञ्चैतत् प्रमाणम्, अत उभयं ग्रहीष्यन्तीति। वृत्तिग्रन्थस्तु तिङन्तात् पदादुत्तराणि गोत्रादीनीत्यादिको वाक्यभेदेनैव

नेयः--गोत्रादीनि कुत्सने चामीक्ष्ण्ये च भवन्ति, तान्येव तिङन्तात् पदादुत्तराण्यनुदात्तानि भवन्तीति। ननु च गोत्रादयः शब्दा गोत्रादावेवानर्थान्तरे वर्त्तन्ते, ते कथं कुत्सनाभीक्ष्ण्ययोर्वर्त्तरन्? तमेव स्वार्थं यदा तु कुत्सनाभीक्ष्ण्यविशिष्टमाचक्षते तदा तयोर्वर्तन्त इत्यदोषः।।

28. तिङ्ङतिङः। (8.1.28)
`नीलमुत्पलम्' इति। उत्पलमित्येतत् `नब्विषयस्यानिसन्तस्य' (फि.सू.2.26) इत्याद्युदात्तं भवति। `भवति पचति' इति। पचतिक्रिया भवतीत्ययमस्यार्थः। पचतिशब्दे शप्तिपावनुदात्तौ, अकारो धातुस्वरेणोदात्तः, `उदात्तादनुदात्तस्य स्वरितः' (8.4.66) इति शबकारः स्वरितः। ननु च समासवाक्ये निघातादय उच्यन्ते, इदञ्च वाक्यमेव न भवति, तत् किमेतन्निवृत्त्यर्थेनातिङग्रहणेन? किं पुनः कारणमेतद्वाक्यं न भवति? अख्यातं साव्ययकारकविशेषणं वाक्यम्' इत्यत्र वाक्यलक्षण एकत्वस्य विवक्षितत्वात्, इह चाख्यातस्य द्वित्वात्? नैष दोधः; अत्राप्याख्यातं यदकारकं तद्विवक्षितम्। तच्चास्मिन्नेकमेव भवतिशब्दः, पचतीत्येतत्तु कारकम्। तथा हि भाष्ये उक्तम्--`पचत्यादयः क्रियाः [`क्रियाः भवन्ति' नास्ति का. मुद्रिते] भवन्ति, क्रियायाः कर्त्र्यो भवन्ति' इति। यदपीदमुक्तम्--`एकतिङ् पदसमूहो वाक्यम्' इति, अत्रापि प्रधानं यत् तिङ् तदधिकृत्यैकतिङित्युक्तम्। अत्र चैकमेव तिङन्तं प्रधानम्। यद्येतत्, किं तर्हि अत्र तिङन्तं तत्? भवतीति। पचतीत्येतत् पुनः साधनत्वादप्रधानम्।।

29. न लुट्। (8.1.29)
`श्वः कर्त्ता' इति। करोतेर्लुट्, तासिः, `लुटः प्रथमस्य डारौरसः' (2.4.85) इत्येकवचनस्य डादेशः, डिति टिलोपः।
`तासेः परस्य' इत्यादि। आगमः प्रत्ययस्वरेणाद्युदात्तः। तस्य यत्र टिलोपो नास्ति--इर्त्तारो, कर्त्तार इत्यादौ, तत्र `नास्यनुदात्तेन्ङित' (6.1.186) इत्यादिना लसार्वधातुकस्यानुदात्तत्वे कृते तासेरेवोदात्तत्वं भवति। यत्र तु टिलोपस्तत्र `अनुदात्तस्य च यत्रोदात्तलोपः (6.1.161) इति लसार्वधातुकमेवोदात्तं भवति।।

30. निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चेण्कच्चिद्यत्रयुक्तम्। (8.1.30)
यद्यपि निपातैरित्येतदपेक्षमाणावां यदादीनां सामर्थ्यम्, तथापि गमकत्वाद्युक्तशब्देन समास एषां युक्त एव। अथ वा--मत्र न समासः, विभक्तिस्त्वव्ययत्वादेषां लुप्तेते न श्रूयते। युक्तग्रहणं त्विहापि साक्षाद्योगप्रतिपत्त्यर्थम्, तेन युक्तयुक्ते प्रतिषेधो न भवति। एतच्च प्रयुदाहरणेऽपि स्पष्टीकरिष्यामः। अत्र यद्यत्रयोर्ग्रहणमाभ्यां पूर्वस्यापि तद्युक्तस्य प्रतिषेधो यथा स्यादित्येवमर्थम्। यद्धि ततः परं तिङक्तं तस्य `यद्वृत्तान्नित्यम्' (8.1.66) इत्येवं सिद्धः प्रतिषेधः, पूर्वस्य तु तेन न सिध्यति। तदा हि यद्वृत्तादिभिः पञ्चमी `तस्मादित्युत्तरस्य' (1.1.67) इति परस्यैव निघातप्रतिषेधं प्रतिपादयति, नेतरस्य। `यत्करोति' इति। करोतिशब्द उकारप्रत्ययस्योदात्तत्वान्मध्योदात्तः।
`नेज्जिह्मायन्तो नरकं पताम' [`नोज्जिह्मायन्तो'--प्रा.मु.पाठः] इति। पतेर्लट्, मस्, शप्, `अतो दीर्घो यञि' (7.3.101) इति दीर्घः। ङिददुपदेशत्वाल्लसार्वधातुकत्वादनुदात्तत्वे (6.1.186) कृते धातुत्वरेणाद्युदात्तमेतत्।
`स चेट्भुङ्क्ते' इति। `भुजोऽनवने' (1.3.66) इत्यात्मनेपदम्, रुधादित्वात्वात् श्नम्। पूर्ववल्लसार्वधातुकानुदात्तत्वम्; `इनसोरल्लोपः' (6.4.111), `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इत्युदात्तत्वे कृते भुङ्क्त इत्येतदन्तोदात्तम्। `स चेदधीते' इति। इङ् धातुस्वरेणोदात्तः। ङित इति लसार्वधातुकमेवानुदात्तम्। आदिशब्दापेक्षया निघाते प्राप्ते न प्रतिपदोक्तपरिभाषोपतिष्ठते (व्या.प.3), साहचर्यञ्च व्यवस्थाकारणं न भवतीति। तेन `यावद्यथाभ्याम्' (8.1.36) इति यथाशब्दसाहचर्याद्यावच्छब्दोऽपि नाव्ययमेव परिगृह्यते, किं तर्हि? परिमाणशब्दोऽपि लाक्षणिकः। यावतोऽदवान् प्रतिगृह्णीयादित्यत्रापि निघातप्रतिवेधो भवति। `यत्तदेतेभ्यः परिमाणे वतुम्' (5.2.39) इति वतुबन्तोऽत्र यावच्छब्दः।
`यत्र क्व च ते मनो दक्षं दधस उत्तरम्' इति। `दध धारणे' (धा.पा.8) लट्, धास्, `धासः से' (3.4.80)। अत्र यत्रेत्यनेनैधिकरणप्रधाने उत्तरमित्येतदाधेयं युक्तम्, तेन युक्तं तिङन्तम्, अतः साक्षाद्योगो नास्तीति प्रतिषेधो न भवति।।

31. न ह प्रत्यारम्भे। (8.1.31)
नहेत्ययं निपातसमुदायः प्रतिषेधे वर्त्तते। तेन युक्तं तिङन्तं प्रत्यारम्भविषये न निहन्यते। पुनरारम्भः=प्रत्यारम्भः। स च यत्र विषये क्रियते तद्दर्शयितुमाह--`चोदितस्य' इत्यादि। भुङक्ष्याधीष्वेत्येवं चोदितं विहितं यत् कर्त्तव्यतयोपन्यस्तं भोजनादौ यदा तत् कर्त्तुं न प्रवर्त्तते नाद्रियते, अवधीर्यत इति यावत्; तदा तस्यादधीरणेऽदज्ञाने सति तमवधीरयितारमुपालब्धुं या इच्छा तथोपालिप्सयैतस्यैव भोजनादेरवधीरितस्य प्रतिषेधेन सम्बन्धः प्रत्यारम्भः। `प्रत्यारम्भः क्रियते' इति। प्रतिषेधसम्बद्धस्य पुनरुपन्यासः क्रियत इत्यर्थः। `नह भोक्ष्यसे, नहाध्येध्यसे' इति। भुजेरिङश्च लृट्, `थासः से' (3.4.80) , अदुपदेशत्वात् ङित्त्वाच्च तयोर्धात्वोर्लसार्वधातुकमनुदात्तम्। स्यः प्रत्ययस्वरेणोदात्तः।
`इच्छन्ति' इति। `इषु इच्छायाम्' (धा.पा.135), तुदादित्वाच्छ, `डषुगमियमां छः' (7.3.77)।।

32. सत्यं प्रश्ने। (8.1.32)

सत्यशब्दोऽयमुदाहरणे प्रश्ने वर्त्तते। प्रत्युदाहरणे तु ऋतशब्दस्यार्थे।।

33. अङ्गाप्रातिलोम्ये। (8.1.33)

प्रातिलोम्यम्=प्रातकूल्यम्, अनभिमतकारित्वमित्यर्थः। ततोऽन्यदप्रातिलोम्यम्=अनुकूलत्वम्, अभिमतकारित्वमिति यावत्। तस्मिन् गम्यमानेऽयं प्रतिषेधः। `अङ्ग कुरु, ङ्ग पच' इति। अङ्गशब्दोऽयं निपात इहानुज्ञायां वर्त्तमानोऽप्रातिलोम्यं गमयति। करोतेर्लोटि सिप्, `सेर्ह्यपिच्च' (3.4.87), धातोर्गुणे कृते `अत उत्सार्वधातुके' (6.4.110) इत्युत्त्वम्, `उत्तश्च प्रत्ययात्' (6.4.1-6) इति हेर्लुक्। अत्रोकारः प्रत्ययस्वरेणोदात्तः। `पच' इति। `अतो हेः' (6.4.105) इति लुक्। धातुस्वरेणाद्युदात्तमेतत्। प्रत्युदाहरणेऽङ्ग शब्दोऽमर्धे वर्त्तते।

`आनुलभ्ये' इति वक्तव्येऽप्रातिलोम्ये इति वचनं वैचित्र्यार्थम्।।

34. हि च। (8.1.34)

चकारोऽप्रातिलोम्य इत्यस्यानुकर्षणार्थः। `स हि कुरु, स हि पच' इति। हिशब्दोऽत्रावधारणे, हेतौ वा वर्त्तते। प्रत्युदाहरणे त्वमर्धे।।

35. छन्दस्यनेकमपि साकाङ्क्षम्। (8.1.35)

`हि च (8.1.34) इत्येव। सहाकाङ्क्षया वर्त्तत इति साकाङ्क्षम्। एतच्च तिङन्तस्यार्थद्वारकं विशेषणं वेदितव्यम्। `एकमपि' इति। हीत्यनेन युक्त तिङन्तं साकाङ्क्षं भवतीति प्रकृतेन सम्बन्धः। अत्र च योऽप्ययमेकस्यानुदात्तत्वप्रतिषेधः, सोऽपि यत्रानेकतिङन्तं हियुक्तं तत्रैद वदितव्यः; अन्यथा यदि यत्रैकं हियुक्तं तत्रायमेकस्य हियुक्तस्य निघातप्रतिषेधोऽपिशब्दप्रायितः स्यात्, सूत्रमिदमनुर्थकं स्यात्; समानेनैकस्या नेकस्य वा पूर्वेणैव सिद्धत्वात्। यथा यत्रानेकस्य हियुक्तस्य उपनिपातस्तत्रैवैकस्यानुदात्तत्वप्रतिषेधः, तथा न भवति वैयर्थ्यप्रसङ्गः; पूर्वेण नित्ये प्राप्ते विकल्पार्थत्वात्। `कदाचित्' इत्यादिना तमेवानन्तरोक्तमर्थं विस्पष्टो करोति। `अनृतं हि मत्तो यदति पाप्मा एनं विपुनाति' इति। अत्र द्वयोरपि तिङन्तयोर्हेतुहेतुमद्भावे साकाङ्क्षता। पाप्मा मद उच्यते। यस्मादनृतं मत्तो वदति तस्मात् पाप्मा एनं षिपुनाति शुद्धिमापादयति, मत्तस्यानृतमदोष इति कृत्वा। द्वे अपि चैते हिशब्देन युक्ते; तदर्थगतस्त हेतुहेतुमद्भावस्य तेन द्योतेतत्वात्। तत्र वदतीत्येतत् पचतीत्यनेन तुल्यस्वरम्। पुनातीत्येतत्तु विकरणस्वरेण मध्योदात्तम्।

`अग्निर्हि' इत्यादि। अत्रापि हेतुहेतुमद्भावात् साकाङ्क्षता। यस्मादग्निरग्रे पूर्वमुदजयत् तस्मादग्निमिन्द्र अनुश्चादुदजयत्। `उदजयत्' इति। उत्पूर्वाज्जयतेर्लङि रूपम्। `एकमुदजयदित्याद्युदात्तम्' इति। तद्भक्तस्पाट उदात्तत्वात्। `अपरमनुदात्तम्' इति। तत्र निघातप्रतिषेधस्याप्राप्तेः। `अजा ह्यग्नेरजनिष्ट' इत्यादि। तत्रापि तत एव हेतो साकाङ्क्षत्वम्। तस्मादजा ह्यग्नेर्गर्भस्य जनितारमपश्यत् तस्मादग्नेर्गर्भमजनिष्ट जनितवती। `जनिः प्रादुर्भावे' (धा.पा.1149) लुङ्, `च्लेः सिच्' (3.1.44) इट्, षत्वम्, ष्टुत्वम्। अन्तर्भावितव्यर्थोऽत्र जनिर्वेदितव्यः, अन्यथा कर्मत्वं गर्भस्य नोपपद्यते; अकर्मकत्वात्। `अपश्यत्' इति। दृशेर्लङ् पाघ्रादिसूत्रेण (7.3.78) पश्यदेशः। `अजनिष्ट' इति। आद्युदात्तम्। `अपश्यदित्यनुदात्तम्' इति। पूर्ववत्।।

36. यावद्यथाभ्याम्। (8.1.36)

किमर्थं पुनरिदमारभ्यते? न `यद्वृत्तान्नित्यम्' (8.1.66) इत्येव सिद्धमिति यश्चोदयेत्, तं प्रति--`देवदत्तः पचति यावत्', `देवदत्तः पचति यथा'--इत्येतदुदाहरणद्वयमुपन्यस्तम्। एषोऽभिप्रायः--यद्वृत्तादिति पञ्चमीनिर्देशात् `तस्मादित्युत्तरस्य' (1.1.67) इति यत्रैव यावद्यथाभ्यां परं तिङन्तं तत्रैव प्रतिषेधः स्यात्। यत्र तु ताभ्यां पूर्वं तत्र न स्यात्। इह तु तृतीयनिर्देशात् तत्रापि भवतीति।।

37. पूजायां नानन्तरम्। (8.1.37)

`पूजायां विषये' इति। विषयग्रहणे पूजायामिति विषयसप्तमीति दर्शयति। `किं तर्ह्यमुदात्तमेव' इति। द्वौ प्रतिषेधो प्रकृतमर्थं गमयत इति कृत्वा। `यावत् पचति शोभनम्' इति। स्तुतिरत्र पूजा, सा च क्रियायाः साधनस्य वा।।

38. उपसर्गव्यपेतञ्च। (8.1.38)

`उपसर्गव्यपेतम्' इति। उपसर्गव्यवहितम्। चकारेण `पूजायाम्' इत्यनुकृष्यते; अनन्तरमिति चानुवर्त्तते। तत्रोपसर्गेण व्यवधानमाश्रीयत इति। सामर्थ्यात् अनन्तरग्रहणं शब्दान्तरव्यवधाननिरासार्थं विज्ञायते।।

39. तुपश्यपश्यताहैः पूजायाम्। (8.1.39)

ननु `पूजायां नानन्तरम्' (8.1.37) इति पूजाग्रहणमनुवर्त्तत एव, तत्किमर्थं पूजायामित्युच्यते? इत्याह--`पूजायामित्यनुवर्त्तते' इत्यादि। स्यादेतत्--तदेव पूजाग्रहणमिहानुवर्त्तमानं निघातप्रतिषेधार्थं भविष्यतीति? अतआह--`तद्धि' इत्यादि। तद्धि पूर्वत्र पूजाग्रहणं निघातप्रहतिषेधस्य प्रतिषेधेन सम्बद्धम्। तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्। एवञ्च तेषां निघातप्रतिषेधः। लुडादीनां तेषां तुप्रभृतिभिर्योगे निघातप्रतिषेधस्य प्रतिषेधो विज्ञायेत। तस्मान्निघातस्य प्रतिषेधो यथा स्यादित्येवमर्थं पुनः पूजाग्रहणम्। अत्राहग्रहयणं किमर्थम्, चनादिषु (8.1.57) चेत्येव सिद्धम्? न सिध्यति;

`चनचिदिवगोत्रादितद्धिताम्रेडितेवषगतेः' (8.1.57) इत्यतो गतेरिति तत्रानुवृत्तेः। तथा च-देवदत्तः प्रपचत्यहेत्यत्र प्रतिषेधो न स्यात्। परभूतेषु वा स प्रतिषेध इति पूर्वभूतेऽबशब्दे च न स्यात्--देवदत्तोऽह पचतीतिी।।

40. अहो च। (8.1.40)
चकारेण पुजायामित्यनुकृष्यते।

अथ योगविभागः किमर्थम् पूर्वसूत्र एवाहोग्रहणं क्रियते? इत्यत आह--`पृथक्ं' इत्यादि। पृथग्योगे `शेषे विभाषा' (8.1.41) इति अहेत्यनेनैव योगे यथा स्यात्, तुप्रभृतीनां मा भूदित्येवमर्थं पृथग्योगकरणम्।।

41. शेषे विभाषा। (8.1.41)
`करिष्यसि' इत्यादि। लृडन्तं स्यस्वरेण मध्योदात्तम्।

ननु च पूजाग्रहणं पूर्वसूत्रे चानुकृष्टम्। तत्र चानुकृष्टस्येहानुवृत्तेरविशेषे भविष्यति, तत् किं शेषग्रहणेन? इत्यत आह--`पूजायामित्यस्य' इत्यादि।।

42. पुरा च परीप्सायाम्। (8.1.42)
चकारो विभाषेत्यनुकर्षणार्थः। `परीप्सायामर्थे' इति। गम्यमान इति शेषः। `परीप्सा त्वरा' इति। सम्भ्रमः=अशुप्रवृत्तिरित्यर्थः। `अधीष्व माणवक' इत्यादि। त्वरितमधीष्वेत्येधोऽर्थो गम्यते। तथा ह्यत्र पुरा विद्योतते विद्युत्, पुरा स्तनयति स्तनियुरितत्येतदुभयमप्यध्ययनदिषययोस्त्वरायाः कारणत्वेनोपातम्। विद्युद्द्योतनादौ हि न पठितव्यं पर्वदिवसेष्विव। एतदुक्तं भवति--यस्मादचिरकालभावि विद्युद्द्योतनं स्तनयित्नुस्तननं वाऽध्ययनन्तरायोऽतोऽधीष्वेति। `पुरा विधीयते' इति। `यावत्पुरानिपातयोर्लट्, (3.3.4), अनुदात्तेत्त्वादात्मनेपदम्। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे (6.1.186) कृते धातुस्वरेणाद्युदात्तमेतत्। `पुरा स्तनयति' इति। `स्तन गदी देवशब्दे' (धा.पा.1859,1860) चुरादिणिच्। अदन्तत्वाद्बृद्ध्यभावुः। एतदपि पूर्ववन्मध्योदात्तम्। `पुराशब्दोऽत्र भविष्यदासत्तिं द्योतयति' इति। भविष्यद्विद्युद्द्योतनादिरध्ययनान्तरायो यस्तस्य प्रत्यासत्तिं सामीप्यर्माचरकालभादित्वं द्योतयति। तेन त्वरा गम्यत इत्यभिप्रायः।।

43. नन्वित्यनुज्ञैषणायाम्। (8.1.43)
`अनुज्ञाया एतणा प्रार्थना' इति। किञ्चित् कर्तु स्वयमेवोद्यतस्यैवं क्रियतामित्यनुज्ञानमनुज्ञा। प्रार्थनायां मूलोदाहरणयोः `वर्त्तमाने लट्' (3.3.123) इति लट्। प्रत्युदाहरणे तु भूते `ननौ पृष्टप्रतिवचने' (3.2.120) इत्यनेन। इतिकरण एकनिपातोऽयमिति प्रदर्शनार्थः। नन्वनुज्ञेषणायामिति ह्युच्यमाने सन्देहः स्यात्--किमयमेकनिपातः? उत्त निपातद्वयमिति? यथा--`नन्वोर्विभाषा' (3.2.121) इत्यत्रः इतिकरणेन त्ववच्छिद्यमानमेकमेवेवं शब्दरूपमिति गम्यते।।

44. किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषषिद्धम्। (8.1.44)
`अप्रतिषिद्धम्' इति। प्रतिषेधः प्रतिषिद्धम्। भावे निष्ठा। नास्य प्रतिषिद्धमस्तीत्यप्रतिषिद्धम्। अथ वा--कर्मणि निष्ठा, निविद्धं प्रतिषिद्धमप्रतिषिद्धम्। अर्थद्वारकञ्चैतत् तिङो विशेषणम्।
`पूर्वं किंयुक्तम्' इति। तत्समीपे किमः श्रूयमाणत्वादित्यभिप्रायः। `उत्तरं तु न किंयुक्तम्' इति। तस्यासमीपे श्रूयमाणत्वादिति भावः।
`अपरे त्वाहुः' इत्यादि। न हि समीपे श्रुयमाणत्वं किंशब्दस्य शब्दान्तरेण सम्बन्धे हेतुः अपि तु संशयविषयत्वम्। यथा चात्र पूर्वस्याख्यातस्य, तथा तत्परस्यापीत्यस्ति तस्य योगः किंशब्देनेत्युभयत्र प्रतिषेधः।।

45. लोपे विभाषा। (8.1.45)
किंशब्दस्य प्रकृतत्वात् तस्यैव लोपो विज्ञायते, इत्याह--किमो लोपे इति। किंशब्दस्य शास्त्रे न क्वचिल्लोपो विहितः, इत्यतः पृच्छति--`क्व चास्य लोपः' इति। अदर्शनमात्रस्य `लोपः' (1.1.60) इति संज्ञा कृता न तु शास्त्रकृतस्यैवादर्शनस्येत्यभिप्रायेणाह--`यत्र' इत्यादि। `गम्यते चार्थः' इति। कुतश्चिदर्थप्रकरणादेः। `न च प्रयुज्यते' इति। गम्यमानार्थत्वात्। `देवदत्तः पचत्याहोस्वित् पठति' इति। अत्रायमाहोस्विच्छब्दः पक्षान्तरे वर्त्तते। पक्षान्तरोपन्यसनं किमर्थम्? प्रश्नं न व्यभिचरतौति। अत्राप्रयुज्यमानस्यापि तस्यार्थो गम्यते। पञतिशब्दोऽयं पक्षे पचतिशब्देन तुल्यस्वरः।।

46. एहिमन्ये प्रहासे लृट्। (8.1.46)
`एहिमन्य इत्यनेन' इति। समुदायस्यैकत्वात् तदपेक्षयैकवचनम्, अन्यथा हि द्वे एते आख्याते इति द्वित्वाद्द्विवचनं स्यात्। `प्रहासः' इति। प्रकृष्टो हासः; परिहास इत्यर्थः। `एहि मन्य ओदनं भोक्ष्यसे' इति। `प्रहासे च मन्योपदे' (1.4.106) इति पुरुषव्यत्ययः। भुजेरस्मद्युपपदे मध्यमः, मन्यतेर्युष्मद्युपपदे

उत्तमः। `एवम एहि मन्ये रथेन यास्यसि' इत्यत्रापि पुरुषव्यत्ययो वेदितव्यः। द्वे अपि चैते लृङन्ते स्यप्रत्ययस्वरेण मध्योदात्ते।
`प्रहास इति किम्? एहि मन्यस ओदनं भोक्ष्ये' इति। अत्र मन्यतेः `यष्मद्युपपदे' (1.4.105) इत्यादिना मध्यमः। भुजेस्तु `अस्मद्युत्तमः' (1.4.107) इत्युत्तमः। सुष्ठु मन्यसे, साधु मन्यसे' इति। अनेन यथाभूतं दर्शयत् प्रहासाभावं दर्शयति।
ननु च `गत्यर्थलोटा लृट्' (8.1.51) इत्यादिनैव सिद्धम्, तत् किमर्थोऽयमारम्भः? इत्यत आह--`गत्यर्थलोटा' इत्यादि। `एहिमन्येयुक्ते' इत्यादिना नियमार्थतामस्य व्यक्तीकरोति। कथं पुनरेहिमन्य इत्येनेन योगेन नियमः क्रियमाणः `एहि मन्यसे ओदनं भोक्ष्ये' इत्यत्र निवृत्तिं करोति, न ह्यतर पहीत्यनेव लृडन्तं युक्तम्, किं तर्हि? एहि मन्यस इत्यनेन? इत्यत आह--`एहि मन्य इत्युत्त्मोपादानमतन्त्रम्' इति। अतन्त्रत्वं तु तस्योपलक्षणार्थत्वात्। ननु च `मन्यतेरुत्तमः' (1.4.106) इति वचनाद्युष्मद्युपपदे मन्यतेरुत्तमेनैव भवितव्यम्, एवञ्च `एहि एव हि मन्यतिरुत्तमः' इति। गतार्थम्।।

47. जात्वपूर्वम्। (8.1.47)
`अपूर्वम्' इति। अविद्यमानं पूर्वं यस्मात् तदपूर्वम्। अत्र च द्वयं सम्भाव्यते--तिङन्तस्य चेदं विशेषणं स्यात्, जातुशब्दस्य वेति। तत्र यदि तिङन्तस्य स्यात् `आहोउताहो जानन्तरन्' (8.1.49) इत्यत्रानन्तर ग्रहणं न कुर्यात्। अस्यैव ह्यपूर्वग्रहणस्य तत्रानुवृत्तेस्तिङन्तस्यानन्तर्यं लभ्यते; तस्माज्जातुशब्दस्येदं विशेषणम्, इत्यालोच्याह--`जात्वित्येतत्' इत्यादि।।

48. किंवृत्तं च चिदुत्तरम्। (8.1.48)
`चिदुत्तरम्' इति। चिदित्येतदुत्तरं यस्मात् तत् तथोक्तम्। पूर्वोक्तया नोत्यैतदपि किवृत्तस्यैव विशेषणम्। `किंवृत्तग्रहणेन तद्विभक्त्यन्तम्' इत्यादि। `किवृत्ते लिप्सायाम्' (3.3.6) इत्यत्रैतदुक्तार्थम्। `भोजयति' इति। पूर्ववन्मध्योदात्तमेवैतत्। `कस्मैचिद्ददाति' इति। `अभ्यस्तानामादिः' (6.1.189) इत्याद्युदात्तमेतत्। `कतरः' इति। `किंयत्तदोर्निर्धारणे' (5.3.92) इति डतरच। `कतमः' इति। `वा बहूनां जातिपरिप्रश्ने' (5.3.93) इति डतमच्।।

49. आहोउताहो चानन्तरम्। (8.1.49)
अविद्यमानमन्तरं व्यवधानं यस्य तदनन्तरम्। अव्यवहितमित्यर्थः। तिङन्तविशेषणमेतत्। आनन्तर्यञ्चाहो, उताहो--इत्येतयोः श्रुतत्वात् तदपेक्षयैव वेदितव्यम्। ्रापि चकारोऽपूर्वमित्यस्यानुकर्षणार्थः।।

50. शेषे विभाषा। (8.1.50)
शेषः सन्निहितापेक्षः। शेषत्रयञ्च पूर्वसूत्रे सन्निहतं निघातकारणम्--आहो उताहोशब्दौ, अनन्तर मित्येतत्, अपूर्वमित्येतच्च। तत्र न ज्ञायते--किं कारणभावापेक्षः शेष इति। किमाहोउताहोशब्दापेक्षः? उतानन्तरभावापेक्षः? आहोस्विदपूर्वभावापेक्षः?--इत्यतः पृच्छति--`कश्च शेषः' इति। इह निघातमिच्छता तत्कारणमवश्यमेवापेक्षणीयम्। `आहो उदाहो' इति। अपूर्वमित्येतदपि, द्विश्चकारेणानुकृष्टत्वात्। तस्य हि द्वयोर्योगयोश्चकारोऽनुकर्षणार्थ एव कृतः। कथं नामात्रापि तदपेक्षा स्यादिति! अन्यथा हि समनन्तरातीति एव सूत्रे तदनुकर्षणार्थश्चकारः क्रियते। किंवृत्तादिसूत्रे (8.1.48) हि स्वरितत्वादेव तदनुवर्त्तत इति। तस्मात् पारिशेष्यादनन्तरभावपेक्षः शेषो विज्ञायते? इत्यत आह--`यदन्यदनन्तरात' इति।।

51. गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत्। (8.1.51)
`गमिना समानार्था गत्यर्थाः' इति। अर्थप्रदर्शनमेवैतत्। एवं तु विग्रहः कर्त्तव्यः--गतिरर्थो येषामिति। `गत्यर्थलोटा युक्तम्' इति। योगः पुननिमित्तनिमित्तरूपः। तयोर्निमित्तमिति भावः। `न चेत्कारकम्' इत्यादेरर्थं विस्पष्टीकर्त्तुमाह--`यत्रैव' इत्यादि। अनेन लोडन्तवाच्यं लृडन्तवाच्यार्थं यत् कारकं तस्यैवानन्यत्वमाश्रितम्; न शब्दातन्तरवाच्यस्येति दर्शयति, एवच्च प्रत्यासत्तेर्लभ्यते। तिङन्तस्य हि तदेव प्रत्यासन्नं कारकं यत् तेनैवाभिधीयते न शब्दान्तरेण; तेन शब्दान्तरवाच्ये भिद्यमानेऽपि भवत्येव भिधातप्रतिषेधः। `आगच्छ देवदत्त ग्रामं द्रक्ष्यस्येनम्' इति। आगच्छेति गत्यर्थलोट, द्रक्ष्यसीति लृडन्तम्; तयोश्चैकमेवात्र कारकं देवदत्तः कर्त्ता। `द्रक्ष्यसि' इति। `सृजिदृशोर्झल्यमकिति' (6.1.58) इत्यमागमः; व्रश्चादि सूत्रेण (8.2.36) षत्वम्, `षढोः कः सि'(8.2.41) इति कत्वम्। स्यप्रत्ययस्वरेण मध्योदात्तमेतत्। एवमुत्तरत्रापि यत्र निघातप्रतिषेधस्तत्र लृडन्तस्य मध्योदात्तता वेदितव्या।
`आगच्छ देवदत्त ग्राममोदनं भोक्ष्यसे' इति। अत्रापि तदेवाभिन्नमुभयलकारवाच्यं कर्त्तुकारकम्। कर्म तु यद्यपि भिद्यते, तथापि तच्छब्दान्तरवाच्यमिति सत्यपि त्भेदे भवत्येव निघातप्रतिषेधः। `उह्यन्तां देवदत्तेन शालयो यज्ञदत्तेन भोक्ष्यन्ते' इति। अथात्र शालय इत्युभयलकारवाच्यमभिन्नं कर्म कारकम्, कर्ता तु यद्यपि भिद्यते, तथापि स शब्दान्तरवाच्य इति तद्भेदेऽपि निघातप्रतिषेधो भवत्येव। `उह्यन्ताम्' इति। वहेः कर्मणि लोट्, आत्मनेपदम्, झस्यान्तादेशः, `सार्वधातुके यक्' (3.1.67) वच्यादिसूत्रेण (6.1.15) सम्प्रसारणम्, टेरेत्वम् (3.4.79), `आमेतः' (3.4.90) इत्याम्भावः। कथं पुनरिहाभिन्नं कारकम्, यावता शक्तिः कारकम्, सा च प्रतिक्रियं भिद्यत एव शक्तिशक्तिमतोर्भेदस्याविवक्षितत्वादेकं कारकं भविष्यतीत्यदोषः।
`आगच्छेर्देवदत्त ग्रामं द्रक्ष्यस्यनम्' इति। अत्र गत्यर्थलिङा लृडन्तं युक्तम्, न गत्तयर्थलोटा। `आगच्छ देवदत्त ग्रामं पश्यस्येनम्' इति। अत्र गत्यर्थलोटा

लङन्तं युक्तम्, न तु लुङन्तम्। `आगच्छ देवदत्त ग्रामं पिता त ओदनं भोक्ष्यते' इति। अत्र लोङन्तस्य देवदत्तः कर्ता, लृडन्तस्य तु पितेति भिद्यते कारकम्। `आगच्छ देवदत्त ग्रामं त्वं चाहं च' इत्यादि। यथा पूर्वोपन्यस्तेषु मूलोदाहरणेषु यल्लोडन्तस्य कर्त्रादि कारकं वाच्यं तन्मात्रमेव लृङन्तस्यापि, इह तु न तथा। अत्रापि [`तत्रापि--का.मु.पाठः] लोङन्तस्य देवदत्तो युष्मदर्थ एवप कर्त्ता वाच्यः, लृङन्तस्य तु स चास्मदर्थश्च; तत्रासति सर्वग्रहण इह निघातप्रतिषेधो न स्यात्। अत इहापि यथा स्यादित्येवमर्थं सर्वग्रहणम्। अथ सत्यपि सर्वग्रहणे निघातप्रतिषेधः कथमेवात्र भवति, यावाता भिद्यते लोङन्तवाच्यात् कारकाल्लृङन्तवाच्यो योऽर्थः कारकं कर्तात? इत्यत आह--`लृङन्तवाच्ये हि' इत्यादि। सर्वग्रहणे सति लोडन्तवाच्यं यत्कारकं तस्माल्लृङन्तस्य यदि सर्वमन्यद्भवति, तथाप्येवं न निघातप्रतिषेधेन भवितव्यम्, अन्यथा तु सति भवत्येव। यदि हि यत्रापि लोङन्तस्य किञ्चित् तदेव कारकं वाच्यम्, लृङन्तस्य किञ्चित् ततोऽन्यत्रापि निघातप्रतिषेधो न स्यात्, सर्वग्रहणमनर्थकं स्यात्। तस्मात् सर्वग्रहणाद्भवत्येवात्र निघातप्रतिषेधः। तत्रैवं स्यात्--अस्मिन्नप्युदाहरणे लृङन्तस्य वाच्यं यत् कारकमन्यदेव तल्लोङन्तवाच्यात्। अतः सत्यपि सर्वग्रहणे न भवितव्यं निघातप्रतिषेधेण? इत्यत आह--`इह तु' इत्यादि। गतार्थम्।।

52. लोट् च। (8.1.52)

चकारः पूर्वापेक्षया समुच्चयार्थः। `पश्य' इति। अन्तोदात्तम्--`एकादेश उदात्तेनोदात्तः' (8.2.5) `अतो गुणे' (6.1.97) इति गुणग्रहणे पररूपस्येवोदात्तत्वात्। `शाधि' इति। `शासु अनुशिष्टौ' (धा.पा.1075), `सेर्ह्यपिच्च' (3.4.87) इति सिपो हिरादेशः, अदादित्वाच्छपो लुक्; `शा हौ' (6.4.35) इति धातोः शादेशः, `हुझल्भ्यो हेर्धिः' (6.4.101) इति हेर्धिभाव-। प्रत्ययस्वरेणान्तोदात्तमेतत्। एवं दृश्यतामित्येदपि; `विकरणस्वरात् सार्वधातुकस्वरो बलीयान्' इति वचनात्।

अथ पृथग्योगकरणं किमर्थम्, न पूर्वसूत्र एव लोङ्ग्रहणमपि क्रियेत? इत्यत आह--`पृथक्' इत्यादि। उत्तरत्र लोट एव कार्यं यथा स्यात्, लृटो मा भूदित्येवमर्थं पृथग्योगकरणम्।।

53. विभाषितं सोपसर्गमनुत्तमम्। (8.1.53)

पूर्वेण नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं वचनम् विभाषितशब्दश्चायं विभावाशब्देन समानार्थः। `नपुंसके भावे क्तः' (3.3.114)। `प्रविशानि' इति। मिपः `मेनिः' (3.4.89), `आडुत्तमस्य पिच्च' (3.4.92) इत्याद्।।

54. हन्त च। (8.1.54)

चकारः `विभाषितं सोपसर्गमनुत्तममु' (8.1.53) इत्यस्यानुकर्षणार्थः। `कुरु' इति। करोतेर्गुणे कृते `अत डत्सार्वधातुके (6.4.110) इत्युत्त्वम्, `उतश्च प्रत्ययात्' (6.4.106) इत्यादिना हेर्लुक्। प्रत्ययस्वरेणान्तोदात्तमेतत्।

`हन्त प्रभुञ्जावहै' [`प्रभुनजावहै'--प्रा.मु.पाठः] इति। भुजेर्लोट्, वहिः, टेरेत्त्वम्, `आडुत्तमस्य पिच्च' (3.4.92), श्नम्। अत्रापि `निपातैर्यद्यदि' (8.1.30) इत्यादिना निघातप्रतिषेधः। अदुपदेशाल्लसार्वधातुकस्यानुदात्तत्वे (6.1.186) कृते विकरणस्वरेण मध्योदात्तमेतत्।।

55. आम एकान्तरमामन्त्रितमनन्तिके। (8.1.55)

`एकान्तरम्' इति। अन्तरयतीत्यन्तरम्। व्यवधायकमित्यर्थः। एकं पदमन्तरं यस्य तत्तथोक्तम्। एकेन निपातेन व्यवहितमित्यर्थः। `आम् पचसि देवदत्तात्रि इति। निघाते प्रतिषिद्धे `आमन्त्रितस्य' (6.1.198) इति धाष्ठिकमामन्त्रिताद्युदात्तत्वं भवति। `दूराद्धूते च' (8.2.84) इति प्लुतः। `आम भो देवदत्तात्रि' इति। भवद्भगवदघवतामोच्चावस्य' (8.3.1.वा.2) इति भवच्छब्दावयवस्यावशब्दस्यौत्त्वम्; दकारस्य रुत्वम्, तस्य `भोभगोअधोअपूर्वस्य' (8.3.17) इत्यादिना यकारः, तस्य `हलि सर्वेषाम्' (8.3.22) इति लोपः।

ननु चात्र भोःशब्दस्य `आमन्त्रितं पूर्वमविद्यमानवत्' (8.1.72) इत्यविद्यमानत्वादेकान्तरता नोपपद्यते? इत्यत आह--`भो इत्यामन्त्रितान्तमपि' इत्यादि। `भोः' इति सामान्यवचनम्। अत्र `भोः' इति यद्यप्यामन्त्रितम्, तथापि नाविद्यमानवत्, `नामन्त्रिते' (8.1.73) इत्यादिनाऽविद्यमानवद्भावस्य प्रतिषेधात्। `तदुभयमप्यनेन क्रियते' [तदुभयमनेन--काशिका] इति। कथं पुनरुभयमप्यनेन कर्तुं शक्यम्, यावतानुदात्ताधिकारादनुदात्तस्यैवानेन युज्यते प्रतिषेधः? न शक्यते कर्तुमप्रकृताया असंशब्दिताया एकश्रुतेः? नैष दोषः; `अनन्तिके' (8.1.55) इति नञत्र विरोधे वर्तते, अधर्मानृतादिवत्। अन्तिकविरुद्धमनन्तिकम्। दूरमित्यर्थः। दूरात् सम्बुद्धौ चकश्रुतिरुच्यते;`एकश्रुति दूरात् सम्बुद्धौ' (1.2.33) इति वचनात्। एवं हि प्रपचसि देवदत्तेत्येवमादिष्वामन्त्रितनिघातं कृतार्थं बाधित्वा यत्राम एकान्तरमामन्त्रितमनन्तिकम्, तचैकश्रुतिरेव भवति; यदिदं नारभ्येत। अतो नाप्राप्तायामेकश्रुतौ इवमारभ्यत इति तां तावद्बाधते, ततस्तस्याञ्च बाधितायां बाधकाभावात् प्राप्नुवत् तं निघातमपि बाधत एव। कुतः? निघातप्रतिषेधाधिकारे वचनात्। एकश्रुतिप्रतिषेधे हि विधित्सिते सत्येकश्रुतिप्रकरण एव (1.2.33-40) प्रतिषेधं कुर्यात्, नाम एकान्तरमिति; तत्राप्ययमर्थः--`आमन्त्रितमनन्तिके' (8.1.55) इति वक्तव्यं न भवति। तस्मान्निघातप्रतिषेधाधिकारे वचनान्निघातमपि बाधत इति युक्तम्--तदुभयमनेन क्रियत इति। नैष दोषो यदि तर्ह्यप्रकरणापन्नाशब्दिताप्येकश्रुतिरनेन

प्रतिषिध्यते। इह `दूराद्धूते च' तदुभयमनेन क्रियत इति। नैष दोषो यदि तर्ह्यप्रकरणापन्नाशब्दिताप्येकश्रुतिरनेन प्रतिषिध्यते। इह `दूराद्धूते च' (8.2.84) इति यः प्लुतोदात्तः प्राप्नोति; सोऽपि प्रतिषिध्यते? इत्यत आह--`प्लृतोदात्तः पुनः' इत्यादि। तस्मिन् कर्त्तव्येऽसिद्धत्वात् प्लुतोदात्तो नास्त्येव, स कथं प्रतिषिध्येत![`प्रतिषिध्यते'--प्रा.मु.पाठः] असिद्धत्वं तु `पूर्वत्रासिद्धम्' (8.2.4) इति वचनात्।

56. यद्धितुपरं छन्दसि। (8.1.56)

यद्धितवः परे यस्मात् तत्तथोक्तम्। `उदसृजोऽयम्' इति। अत्र हि तिङन्तमट्स्वरेणाद्युदात्तम्। `सृज विसर्गे' (धा.पा.1178), लङ् सिप्, तुदादित्वाच्छः, `हशि च' (6.1.114) इत्युत्त्वम्, `आद्गुणः' (6.1.87)। `उशन्ति हि' इति। `वश कान्तौ' (धा.पा.1080) झेरन्तादेशः (7.1.3), पूर्ववच्छपो लुक्, ग्रहज्यादिसूत्रेण (6.1.16) सम्प्रसारणम्। प्रत्यस्वरेण मध्योदात्तमेतत्।

`आख्यस्यामितु' इति। `ख्या प्रकथने' (धा.पा.1060), चक्षिङादेशो वा, लृङ्। स्यप्रत्ययस्वरेण मध्योदात्तमेतत्।

`निपातैर्यद्यविहन्त' (8.1.30) इत्यादिना नियमस्य कारणं दर्शयि। `वचनम्' इत्यादिनाप्यस्य वचनस्य नियमार्थत्वम्। `एभिरेव' इत्यादिनापि नियमसय स्वरूपम्। `नान्यैः' इति। अनेनापि नियमस्य व्यवच्छेद्यम्। `इह' इत्यादिनापि व्यवच्छेद्यस्य विषयम्। `स्वो होहावैहि' इति। `रुह बीजजन्मनि प्रादुर्भावे' (धा.पा.859), लोट्, वस्, शप्, `आडुत्तमस्य पिच्च' (3.4.92), `स उत्तमस्य' (3.4.98) इति सकरलोपः। रोहावेत्येतस्मिन् परभूते स्वरित्यस्य `रो रि' (8.3.14) इति रेफस्य लोपो न भवति; छान्दसत्वात्। तस्मिन्नसति पूर्ववदुत्त्वम्। `आद्गुणः' (6.1.87) इति हि गुणे, लोमण्यध्यमपुरुषैकवचने रूपम्। क्वचित्-- `जाये स्वो रोहावैहीत्येहीत्यनेन गत्यर्थलोटा युक्तस्य' इति पाठः, तत्राङ्पूर्वस्येणः प्रयोगो वेदितव्यः।

अथ परग्रहणं क्रिमर्थम्, न `यद्धितुष्वेव' नैवं शक्यम्; सप्तमीनिर्देशे हि निर्दिष्यटग्रहणस्यानन्तर्यार्थत्वादनन्तरेष्वेवाक्यवादिषु भवतीति नियमो विज्ञायते। ततोऽनन्तरेष्वेव पददिषु भविष्यति, न व्यवहितेष्विति। तथा चाव्ययोगनिवृत्तेनियमेनाकृतत्वात् स्वो रोहावैहीत्यत्र स्यादेव प्रतिषेधः।।

57. चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः। (8.1.57)

`इहापि गोत्रादयः कुत्सनाभीक्ष्ण्ययोरेव गृह्यन्ते' इति। न केवलं `तिङो गोत्रादीनि' (8.1.27) इत्यादो सूत्र इत्यपिशब्दार्थः। यथा चात्रापि कुत्सनाभीक्ष्ण्ययोरेव गोत्रादीनि गृह्यन्ते, तथा तत्रैवोपपादितम्। `पचतिकल्पम्' इति। `ईषदसमाप्तौ कल्पप्' (5.3.67)। तत्र हि `तिङश्च' (5.3.56) इत्यनुवर्त्तते, `अनुदात्तस्तद्धित इहोदाहरणमिति कस्मान्न भवति? इति प्रश्नावसरे आह--`अन्यत्र तद्धितस्वरेण तिङ्स्वरो वाच्ये, इति तद्धितस्योदात्तत्वे सति `अनुदात्तं पदमेकवर्जम् (6.1.158) इति चानुदात्तत्वापतत्तिः। एवञ्चान्यत्र निघातः सिद्ध एवेति। अनुदात्त एव तद्धित इहोदाहरणम्।

`अत्र इत्यादि। कथं पुनरुपसर्गग्रहणं शक्यं द्रष्टुम्? उत्तरसूत्रे `चादिषु च' (8.1.58) इति चशब्देनास्य सूत्रस्य द्वितदीयो व्यापार उच्यते, स आनन्तर्याद्गतेरित्यस्य विशेषणार्थो भविष्यति--चादिषु यो गतिरिति। चादिष्विति सामीप्यलक्षणमधिकरणम्। कश्चादिषु गतिः? चादिसमीपे य उदितः। तेनायं प्रादीनामेवेपसर्गसंज्ञानां प्रतिषेधो विज्ञायते। एवं तावदस्मिन् सूत्रे गतिग्रहणेनोपसर्गस्य ग्रहणं विज्ञायते। `सगतिरपि तिङ्' इति। अत्रापि `चादिलोपे विभाषा' (8.1.63) इति सूत्रात् मण्डूकप्लुतिन्यायेन विभावेत्यनुवर्त्तते, सा च व्यवस्थितविभाषा। तेनोपसर्गसंज्ञेन गतिना यो गतिः सः। तस्यैवानुदात्तत्वेन भवितव्य मित्युपसर्ग9स्यैव गतेर्ग्रहणं विज्ञायते। अथ वा--द्वयोरप्येतयोर्बोगयोः `विभाषितं सोपसर्गमनुत्तमम्' (8.1.53) इत्यत उपसर्गग्रहणं मण्डूकप्लुतिन्यायेनानुवर्त्तते, गतिग्रहणमनर्थकं स्यात्; उपसर्गग्रहणानुवृत्यैव सिद्धत्वात्। नानर्थकम्; विस्पष्टार्थत्वात्। `उपसर्गाच्छन्दसि धात्वर्थे' (5.1.118) इत्यत्र ह्युपसर्गग्रहणं प्राद्युपलक्षणार्थम्। तत्रासति गतिग्रहणे, इहाप्युसर्गग्रहणं प्राद्युपलक्षणार्थमिति कस्यचित् सन्देहः स्यात्। प्राद्युपलक्षणे च सति को दोषः? अनुपसर्गाणामपि प्रादीनां ग्रहणं विज्ञायेत। ततः शुक्लौकरोतीत्यत्र निघातप्रतिषेधो भवत्येव। `अभूततद्भावे' (5.4.50.वा.1) इत्यादिनेह च्विः, तस्य `ऊर्यादिच्विडाचश्च' (1.4.61) इति गतिसंज्ञा, `अस्य च्वौ' (7.4.32) इतीत्त्वम्। `यत् काष्ठं शुक्लीकरोति' इति। अत्र `सगतिरपे तिङः' (8.1.68) इति निघातो न वर्त्तते। तेन `निपातैर्यद्यदि' (8.1.30) इत्यादिना निघातप्रतिषेध एव भवति।।

58. चादिषु च। (8.1.58)

द्विविधाश्चादयः--गणपरिपठिताश्च, यावङ्गीकृत्यैतदुक्तम्--`चादयोऽसत्त्वे (1.4.57) इति; सूत्रपठिताश्च--`न चवाहाहैवायुक्ते' (8.1.24) इति; तत्र प्रत्यासत्तेर्य इह प्रकरणे पठितास्तेषामेव ग्रहणं युक्तम्? इति मत्वाऽऽह--`चादयो न चदाहाहैव' इत्यादि। खादतिशब्दः पचतिशब्देन तुल्यस्वरः। `प्रथमस्यात्र तिङन्तस्य' इत्यादिना द्वितीयमिह गतेरित्यस्य प्रत्युदाहरणमिति दर्शयति। चश्बदो गतेरित्यस्यानुकर्षणार्थः। अन्यच्चास्य प्रयोजनमुक्तमेव।।

59. चवायोगे प्रथमा। (8.1.59)

`प्रथमा तिङविभक्तिः' इति। एतेन प्रथमेति स्त्रीलिङ्गनिर्देशो विभक्त्यपेक्षः सूत्रे कृत इति दर्शयति। प्रथमात्वं तस्य पुनः प्रथममुच्चारणाद्वेदितव्यम् `गर्दभाँश्च कालयति' इति। `कल विल क्षेपे' (धा.पा.1604-1605) चुरादिणिच्। चित्स्वरेण लकारेऽकार उदात्त इति मध्योदात्तमेतत्। द्वितदीयं तु निहन्यत एव।

अथ योगग्रहणं किमर्थम्, न च वयोरित्येव सप्तम्या निर्देशः क्रियेत, यथा `चादिष च' (8.1.58)? इत्यत आह--`योगग्रहणम्' इत्यादि। यथा `चादिषु च' (8.1.58) इति सप्तम्या निर्देशे सति परैरेव चादिनिर्योगे प्रतिषेधो भवति, न पूर्वै; तथेहापि पराभ्यामेव चवाभ्यां योगे स्यात्, न पूर्वाभ्याम्। ताभ्यामपि योगे यथा स्यादित्येवमर्थं योगग्रहणम्। यदि तु चवाभ्यामिति तृतीयया निर्देशः क्रियते, विनापि योगग्रहणेन पूर्वाभ्यामपि योगे स्यादेव प्रतिषेधः? सन्देहपरिहारार्थं तु तथा न कृतम्, चवाभ्यामित्युच्यमाने सन्देहः स्यात्--किमयं तृतीयया निर्देशः? उत पञ्चम्येति? पञ्चम्या निर्देशे को दोषः स्यात्? परमताभ्यां योगे न स्यात्।
कथं पुनर्द्वितीयादितिङन्तस्य चवाभ्यां योगः, यत्तन्निवृत्त्यर्थं प्रथमाग्रहणं क्रियेत? इत्यत आह--`चवायोगो हि' इत्यादि। इह चयोगः समुच्चये भवति, वायोगस्तु विकल्पे। स च समुच्चयो वपिकल्पश्चानेकस्य धर्मः, द्वित्वादिवत्। अतो यत्र तौ समुच्चयविकल्पौ, तत्रावश्यमनेकस्य द्वितीयादेः सन्निधानेन भवितव्यम्। तस्मात् तन्निवृत्त्यर्थं प्रथमाग्रहणम्।।

60. हेति क्षियायाम्। (8.1.60)
`आचारभेदः' इति। शिष्टाचारव्यतिक्रम इत्यर्थः। `याति' इति। धातुस्वरेणाद्युदात्तः। इतिकरणेन हशब्दमात्रलस्य निघातकारणत्वमाख्यायते। असति हि तस्मिन् क्षिया हशब्दस्योपाधिर्विज्ञायेत तिङन्तस्य वा। तथा च यदा हशब्दस्तिङन्तं वा क्षियायां न प्रयुज्यते, तदा निघातप्रतिषेधो न स्यात्। इतिकरणे तु सति स्वरूपमात्रप्रधानो हशब्दो निघातस्य कारण भवतीति असत्यामपि हशब्दस्य तिङन्तस्य वा क्षियायां वृत्तौ निघातप्रतिषेधः सिद्धो भवति।।

61. अहेति विनियोगे च। (8.1.61)
चकारेण क्षियायामित्येतदनुकृष्यते। `नानाप्रयोजनः' इति। अनेकप्रयोजन इत्यर्थः। `नियोगः' इति। प्रेषणम्, व्यापारणमित्यर्थः। इतिकरणमस्य पूर्ववदेव प्रयोजनम्।।

62. चाहलोप एवेत्यवधारणम्। (8.1.62)
`क्व चास्य लोपः' इति। `लोपे विभाषा' (8.1.45) इत्यत्र योऽभिप्राय प्रष्टुरुक्तः स इहापि वेदितव्यः। `यत्रार्थो गम्यते' इत्यादि। अत्रापि यस्तत्राभिप्राय इतरस्याभिहितः स एव द्रष्टव्यः। कः पुनरर्थस्तयोः प्रयुक्तयोरपि गम्यते? इत्याह--`तत्र' इत्यादि। क्य पुनर्दिषये चलोपः? क्व वाहलोपः? इत्याह--`समानकर्त्तृके' इत्यादि। यस्मिन् व्यापारविशेषे समास एकः कर्त्ता स समानकर्त्तकः। `समानकर्त्तृके चलोपः, नानकर्त्तृकेऽहलोपः' इति। नाना कर्त्ता यस्मिन् स नानाकर्त्तुकः।
`देवदत्त एव ग्रामं गच्छतु, स देवदत्त एवारण्यं गच्छतु' इति। अत्र ग्रामकर्मकमरण्यकर्मकञ्च गमनं यत् तस्य देवदत्त एव कर्त्तेति तत् समानकर्तृकम्। चार्थं च दर्शयितुमाह--`ग्रामं च' इत्यादि। अत्र हि देवदत्त एवारण्यं गच्छतु देवदत्त एव ग्रामं गच्छत्विति देवदत्तस्यैव नियोज्यस्य गन्तुर्ग्राम एव गन्तव्यतयोपदिश्यते, यज्ञदत्तस्य त्वरण्यमेव केवलम्। तेनासत्यप्यहशब्दस्य प्रयोगे तदर्थो गम्यते--ग्रामं केवलं देवदत्तो गच्छतु, अरण्यं केवलं यज्ञदत्तो गच्छत्विति।
`अनवक्लृप्तौ' इति। असम्भावनायामित्यर्थः। यो हि देवदत्तस्य भोजनं न क्वचित्सम्भावयति स एव प्रयुङ्क्ते--देवदत्त तदेव भोक्ष्यसे' इति। पररूपत्वम्।।

63. चादिलोपे विभाषा। (8.1.63)
`सूत्रनिर्दिष्टा गह्यन्ते' इति। पूर्वतः प्रत्यासत्तेः। अत्र चवालोपे `चवायोगे प्रथमा' (8.1.59) इति प्राप्ते विभाषा, परिशेषाणामप्राप्ते। `भवन्ति' इति। पक्षे प्रत्ययस्वरेण मध्योदात्तः। `यजेत' इति। अत्र पक्षेऽदुपदेशाल्लसार्वधातुकस्यानुदात्तत्वे कृते धातोकदात्तत्वे सत्याद्युदात्तत्वम्।।

64. वैवावेति च च्छन्दसि। (8.1.64)
`आसीत्' इति। `अस भुवि' (धा.पा.1065), लङ् अदादित्वाच्छयो लुक्, `अस्तिसिचोऽपृक्ते' (7.3.96) इति आट्, स चोदात्त इत्याद्युदात्तमेतत्। इतिकरणस्य पूर्वोक्तमेव प्रयोजनम्। चकारोऽनुक्तसमुच्चयार्थः। या द्विः पचत्विह तस्याः संवत्सरस्य सस्यं पच्यते द्विरित्यनेन युक्ता प्रथमा तिङ्विभक्तिः पचत्विति वा न निहन्यते।।

65. एकान्याभ्यां समर्थाभ्याम्। (8.1.65)
`समर्थाभ्याम्' इति। नायमस्यार्थः--तिङन्तेन संगताभ्यामिति; अन्यथा ह्यस्योपादानमनर्थकमेव स्यात्, `चदायोगे प्रथमा' (8.1.59) इत्यतो योगग्रहणानुवृत्तेरेवास्यार्थस्य लब्धत्वात्। तस्मात् समानार्थाभ्यामित्यस्यायमर्थः। सा च समानार्थता तिङन्तापेक्षया भवतीति परस्परापेक्षया वेदितव्या। `एका जिन्वति' इति। जयतेर्लट्, `व्यत्ययो बहुलम्' (3.1.85) इति श्नुः, `बहुलं छन्दसि' (7.1.8) इति झेरदादेशः, `हुश्नुवोः सार्वधातुके' (6.4.87) इति यणादेशः। अनिघातपक्षे सार्वधातुकस्वरेण मध्योदात्तमेतत्। सतिशिष्टादपि हि विकरणस्वरात् सार्वधातुकस्वरो बलीयानिष्यते। `अत्ति' [`अन्ति'--प्रा.मु.पाठः] इति। अदेः `खरि च' (8.4.55) इति चर्त्वम्। अनिघातपक्षे धातुस्वरेणादाद्युत्तमेतत्। `चाकशीति' इति। `काशृ दीप्तौ' (धा.पा.647), अस्य

यङ्लुगन्तस्य रूपमेतत्।
`उपातिष्ठत्' इति। तिष्ठतेर्लङ पाध्रादिसूत्रेण (7.3.78) तिष्ठादेशः। `एक इति संख्यापदमेतत्' इति। अनेन प्रत्युदाहरण एकशब्दस्यान्यशब्देनासमानार्थतां दर्शयति। किं पुनः कारणमन्यशब्देनासमानार्थेन योगेन प्रत्युदाहरणं न दर्शितम्? इत्याह--`एकशब्दस्य व्यवस्थार्थं च' इत्यादि। चशब्दोऽवधारणार्थः। अनेकार्थसम्भवेऽरहथान्तराद्व्यवच्छिस्यैकत्रैवार्थे व्यवस्थानं व्यवस्था। एकशब्दस्य व्यवस्थार्थमेव समर्थग्रहणम्; नान्यशब्दस्य व्यवस्थार्थम्। न हि तस्यानेकार्थः सम्भवति। तस्मादेकशब्दस्य व्यवस्थार्थं समर्थग्रहणं कृतम्। तेनैवैकशब्देनासमर्थेन योगे युक्तं प्रत्युदहरणमुपदर्शयितुम्, नान्यशब्देनेत्यभिप्रायः। कस्मात् पुनरेकशब्दव्यवस्थार्थमेव समर्थग्रहणं कृतम्? इत्याह--`व्यभिचारित्वात् तस्य' इति। एकशब्दो हि यत्रार्थेऽन्यत्रादौ वृष्टस्तं व्यभिचरति? तथा हि--स क्वचिदन्यशब्दस्यार्थे दृश्यते, क्वचित्प्राथम्ये, क्वचित् संख्यायाम्, तस्मादसौ व्यभिचारी। अनवस्थित इत्यर्थः। तद्व्यवस्थार्थं समर्थग्रहणं युक्तम्, नान्यशब्दव्यवस्थार्थम्; तस्याख्यभिचारित्वात्। न ह्यन्यशब्दो यत्रार्थे दृष्टस्ततोऽन्यत्र वर्त्तते। ननु च व्यवस्थाया एतत्फलम्--अन्यशब्दसमानार्थस्यैकशब्दस्य ग्रहणं यथा स्यादिति, एतच्चान्तरेणापि व्यवस्थाकारणं समर्थग्रहणमन्यशब्दसाहचर्यादेव लभ्यते, तदनर्थकं समर्थग्रहणम्? नैतदस्ति; `निपातैर्यद्यदि' (8.1.30) इत्यादौ सूत्रे निपातग्रहणेन ज्ञापितम्--साहचर्यमिह प्रकरणे व्यवस्थाकारणं न भवतीति।।

66. यद्वृत्तान्नित्यम्। (8.1.66)
`प्रथमा छन्दसीति च निवृत्तम्' इति। तयोर्विभाषाग्रहणेन सम्बद्धत्वात्। तस्य चेह नित्यग्रहणेन निवर्त्तितत्वात्। अतस्तन्निवत्तौ तत्सम्बद्धयोरपि निवृत्तिर्भवति। वृत्तशब्दोऽयमिहाधिकरणसाधनम्--वर्त्तते तस्मिन्निति वृत्तम्; वृतेरकर्मकत्वात् `क्तोऽधिकरणे च' (3.4.76) इत्यातदिनाऽधिकरणे क्तः। तत्पुनरधिकरणं पदाधिकारात् पदमेव विज्ञायते, इत्याह--`यत्र पदे यच्छब्दो वर्त्तते' इत्यादि। यदि यद्वृत्तमित्यधिकरणे क्तः, तर्हि `अधिकरणवाचिना च' (2.2.13) इति प्रतिषेधात् षष्ठीसमासो न प्रवर्त्तते? अत एव निपातनात् समास इत्यदोषः। `एतन्नाश्रीयते' इति। यद्येतदाश्रीयेत, `यत्कामास्ते जुहुमः' इत्यादौ न स्यादिति भावः। कथं पुनरत्र परिभाषा शक्या नाश्रयितुम्? वक्तव्यमेवैतत्--इह परिभाषा न भवतीति। `ददाति जुहुमः' इति। अभ्यस्तानामादिः' (6.1.189) इत्युभयमप्येतदाद्युदात्तम्। `यत्कामाः' इति। यस्मिन् काम एषामिति बहुव्रीहिः। `यद्र्यङ्' इति पदम् यदञ्चतीति `ऋत्विक्' (3.2.59) इत्यादिना क्विन्, `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः, हल्ङ्यादिलोपः, `उगिदचाम्' (7.1.70) इति तुम्, संयोगान्तलोपः, विष्वग्देवयोः' (6.3.92) इत्यद्र्यादेशः, क्विन्प्रत्ययस्य कुः' (8.2.62)। `वाति' इति। `वा गतिगन्धनयोः' (धा.पा.1050), अदादित्वाच्छपो लुक्। धातुस्वरेणाद्युदात्तमेतत्। `पवते' इति। `पूङ पवने' (धा.पा.966) एतदपि पूर्ववदाद्युदात्तम्। अत ङित्त्वाल्लसार्वधातुकस्यानुदात्तत्वे कृते धातुस्वर एव भवति।
ननु च यद्वृत्तादिति पञ्चमीनिर्देशोऽयम्, यत्कामस्ते जुहमः--इत्यादिषु चोदाहरणेषु त इत्यादिना पदेन व्यवधानम्, अतो निर्देष्टग्रहणस्यानन्तर्यार्थत्वादिह निघातप्रतिषेधेन भवितव्यम्? इत्याह--`पञ्चमीनिर्देशेऽप्त्र व्यवहितेऽपि कार्यमिष्यते' [`व्यवहिते' इत्येव--काशिका] इचि एतच्चोत्तरसूत्रे ज्ञापयिष्यते।।

67. पूजानात्पूजितमनुदात्तं काष्ठादिभ्यः। (8.1.67)
`पूजनात्' इति। सुपां सुपो भवन्तीति (7.1.39.वा) बहुवचनस्य स्थान एकवचनम्, अत एवाह--`पूजनवचनेभ्यः' इति। `उत्तरपदम्' इति। सुबन्तं वेदितव्यम्। ननु तिङिति वर्त्तते? सत्यमेतत्; उत्तरत्र (8.1.68) तिङिति वचनादिह सुबन्तस्य ग्रहणं विज्ञायते। अपि च वक्ष्यत्येतत्--इहैव समासे चैतदनुदात्तत्वमिति। समासश्च काष्ठादीनां सुबन्तेनैव सम्भवति, न तिङन्तेनेति युक्तमिह सुबन्तस्यैव पदस्य गरहणम्। सर्व एते काष्ठादयोऽद्भुतपर्यायाः पूजनवचना भवन्ति। अद्भुतं योऽधीते स काष्ठाध्यायक इत्युच्यते। एवं दारुणादिषु वेदितव्यम्।
इह सर्व एवैते काष्ठादयः क्रियाविशेषणभूताः समस्यन्ते, न च क्रियाविशेषणानां समासः क्वचिद्विहितः, तत्कथमत्र समासः? इत्याह--`मयूरव्यंसकादित्वात् समासः' इति। `समासे चैतत्' इत्यादि। चकारोऽवधारणार्थः। समास एवेत्यर्थः। कथं पुनः समास एवैतल्लभ्यते? `चादिलोपे विभाषा' (8.1.63) इत्यतो मण्डूकप्लुतिन्यायेन विभाषाग्रहणानुवृत्तेः। सा व्यवस्थितविभाषेति विज्ञानाच्च।
यद्येवम्, कथं वार्त्तिककारेणोक्तम्--मलोपश्चेति, काष्ठादिषु हि योऽकारान्तास्तेषां विभक्तेरम्भावे कृते मकारः सम्भवति, समासे चैतदनुदात्तत्वेन भवितव्यम्, तत्र विभक्तेरभावान्मकारो न सम्भवतीति मलोपवचनमयुक्तं स्यात्? इत्यत आह--`मलोपश्चेत्यनेनापि' इत्यादि। एवमस्माभिरनुदात्तत्वस्य विषय आख्यातः। मलोप श्चेत्यनेनापि स एवाख्यायते; यस्मात् समासे मलोपो न भवति; विभक्तेर्लुप्तत्वात्। असमासे विभक्तेरम्भावे कृते मकारस्य श्रवणमेव भवति, न तु लोपः।
अथासमासे मलोपार्थमित्येतदुक्तमित्येव कस्मान्न विज्ञायते? इत्याह--`असमासे[`अथासमासे'---का.मु.पाठः] हि इत्यादि।
अथ पूजितग्रहणं किमर्थम्, यावता पूजनशब्दोऽयं पूजितापेक्षत्वात् सम्बन्धिशब्दः, तेन सम्बन्धिशब्दत्वात् पूजितमर्थादुपस्थापयति, तन्त्रान्तरेणापि पूजितग्रहणं पूजितस्यैव परिग्रहो भविष्यति? इत्यत आह--`पूजनादेव' इत्यादि। पूजनग्रहणादेव पूजितग्रहणे लब्धे पूजितग्रहणं यत् क्रियते तस्यैतत् प्रयोजनम्--विशिष्टस्याव्यवहितस्य प्रत्यासन्नस्य ग्रहणं यथा स्यादित्येवमर्थम्। तेनोत्तरसूत्रे (8.1.68) यत् काष्ठं देवदत्तः पचतीत्यत्र व्यवहितस्य न भविष्यति। ननु पञ्चमीनिर्देशादेव व्यवहितस्य न भविष्यति? इत्यत आह--`एतदेव' इत्यादि। यादृशमिदं ज्ञापकं तदनुरूपम् `यद्वृत्तान्नित्यम्' (8.1.66) इत्यत्र यत्कामास्ते जुहुमः, यद्र्यङ् वायुर्वातीत्येवमाद्युदाहृत मित्यर्थः। एतेन ज्ञापनस्य प्रयोजनं दर्शितम्।

अथानुदात्तग्रहणं किमर्थम्, यावता `अनुदात्तं सर्वमपादादौ' (8.1.18) इत्यतोऽनुदात्तग्रहणमनुवर्तत [`अनुवर्त्तेत इत्याह'---का.मु.पाठः] एव? इत्याह--`अनुदात्त इति वर्त्तमाने' [`अनुदात्तमिति'--काशिका] इत्यादि। तदध्यनुदात्तग्रहणं `न लुट्' (8.1.29) इति प्रतिषेधेन सम्बद्धम्, अतस्तदनुवृत्तौ सोऽप्यनुवर्त्तते। तथा च सति यस्यामन्त्रितादेः पूजितस्य निघातप्राप्तिरस्ति तस्यायं काष्ठादिभ्यः परस्य निघातप्रतिषेधो विज्ञायेत। तस्मात् प्रतिषेधनिवृत्त्यर्थमन्यदिहानुदात्तग्रहणं क्रियते।।

68. सगतिरपि तिङ्। (8.1.68)

`सगतिग्रहणाच्च गतिरपि निहन्यते' इति। तुल्ययोगेऽत्र सहशब्दः। तत्रोभयोरपि विधीयमानेन कार्येण सम्बन्धो भवति। तथा हि सपुत्रो भोज्यतामित्युक्ते द्वयोरपि पितापुत्रयोर्भोजनेन सम्बन्धो भवति। तस्मादिहाप्यगतेस्तिङन्तस्य च निघाते च सम्बन्धो विज्ञायते। `गतिग्रहणेन चात्रोपसर्गग्रहणमिष्यते' इति। यथा चैतल्लभ्यते तथा पूर्वमेवाख्यातम्। तिङ्ग्रहणं पूर्वो निघातः सुबन्तविषयो यथा विज्ञायेतेत्येवमर्थम्।।

69. कुत्सने च सुप्यगोत्रादौ। (8.1.69)

`पचति पूति' इति। पतिशब्दसय क्रियादिविशेषणत्वात् `स्वमोर्नपुंसकात्' (7.1.23) इति विभक्तेर्लुक्। `पचति, क्लिश्नाति' इति। `क्लिशू विबाधने' (धा.पा.1522), क्र्यादित्वात् श्ना। अत्र क्लिश्नातीत्येतत् कुत्सनं भवति, यो यस्य बाधनं करोति तेन स कुत्स्यते। सम्बन्धोऽप्यनयोस्तिङन्तयोरस्त्येव। यस्मात् पचति तस्मात् क्लिश्नातीति। सुबन्तं तु क्लिश्नातीत्येतन्न भवति, अस्य न भवति निघातः।

`क्रियाकुत्सने' इत्यादि। तिङन्ते द्वयमस्ति--साधनम्, क्रिया च। तत्र क्रियायाः कुत्सनेऽनुदात्तत्वं भवतीत्येतदर्थमिदं व्याख्येयम्, कर्त्तुः कुत्सने मा भूदित्येवमर्थं च। तत्रेदं व्याख्यानम्--`चादिलोपे विभाषा' विभाषा' (8.1.63) इत्यतो विभाषाग्रहणमनुवर्त्तते। व्यवस्थितविभाषा च सा, तेन क्रियाकुत्सन एव भविष्यति, न कर्त्तुः कुत्सन इति। ननु च क्रियाप्रधानमाख्यातम्, साधनं तु तत्राप्रधानम्, तस्य क्रियाङ्गत्वात्, अत्र प्राधान्यादेव पतीत्येवमादिना विशेषणेन क्रियाया एव सम्बन्धो भविष्यति, न गुणभूतस्य कर्तुः, तत्किमुच्यते क्रियाकुत्सनमिति? एवं मन्यते--यथैव कृदन्तेषु दारुणाध्यायकादिषु क्रियायाः प्रधानभूताया अपि विशेषणेन सम्बन्धो भवति, तथाऽख्यातेष्वप्राधान्येऽपि साधनस्य विशेषणेन सम्बन्धेन भवितव्यमिति।

`पूतिश्चानुबन्धः' इत्यादि। पूतिशब्दश्चकारानुबन्धो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--चकारोऽत्र क्रयते, स चानुक्तसमुच्चयार्थः, तेन पूतिश्चानुबन्धो भविष्यतीति। ननु च पूतिशब्दस्य प्रातिपदिकत्वादप्रतिषिद्धमेवान्तोदात्तत्वम्, कस्मात् स चानुबन्धः क्रियते? न चायं क्तिन्नन्तः, पूतिरयमिति पुंसा सामानाधिकरण्यात्। तर्ह्यनेन चकारानुबन्धकरणेनैवैतद्दर्शयति--यत्र सगतेस्तिङोऽनुदात्तत्वं तत्र पूतेरन्तोदात्तत्वम्, अन्यत्रायमाद्युदात्त एव; तेन क्रियाकुत्सनेऽन्तोदात्तः कर्त्तव्यः, कुत्सन आद्युदात्त इति। `तेनायम्' इत्यातदिना चानुबनधकत्वस्य फलं दर्शयति।

`विभाषितम्' इत्यादि। बह्वर्थ यत् तिङन्तं तद्विभाषाऽनुदात्तं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं त्विहापि विभाषाग्रहणानुवृत्तेः। तेन व्यवस्थितविभाषात्वं चश्रित्य कर्त्तव्यम्।

`सुपि कुत्सने' इत्यादि। अथमुक्तार्थसंग्रहश्लोकः। तत्राद्येन पादेन यदुक्तं क्रियाकुत्सन इति वरक्तव्यमिति तस्य संग्रहः। `मलोपः' इत्यादि। नास्मिन् तिङ् विद्यत इत्यतिङिति। स पुनः प्रस्तावात् [प्रस्तादान्--प्रा.का.मुद्रितपाठौ] काष्ठादीनां समासो विज्ञायते। तत्रातिङि काष्ठादिसमासे मलोप इष्टः। एतच्च मलोपश्चेत्यनेनायमेव विषय आख्यायत इत्यादिना तूक्तार्थम्, तदनेन समास चैतदनुदात्तत्वमित्यादिना यदुक्तं ततसर्वं ग्रहीतुम्। अथ वा मलोप इत्यनेन मलोपश्चेत्येतद्वचनमुपलक्षयति। अस्य चोक्तार्थमित्यनेन सम्बन्धः। तदेतदुक्तं भवति--मलोपश्चेति यत् कार्यं वचनं तन्मलोपश्चेत्यनेनैपित्यादिना पूर्वमेवोक्तप्रयोजनमिति। `अतिङि' इति। अनुदात्तमित्येतद्वक्तव्यमिति वृत्तभङ्गभयान्नोक्तम्। अनुक्तमपि तस्य श्लोकस्य पूर्वोक्तार्थसंग्रहार्थत्वात् काष्ठादीनाम च पूर्वमनुदात्तस्य चोक्तत्वाद्गम्यत एव। अतिङीति चानेन बहुव्रीहिणा समासः। तेनैतदुक्तं भवति--काष्ठादीनां समासेऽनुदात्तत्वं भवतीति। शेषं सुगमम्।।

70. गतिर्गतौ। (8.1.70)

`अभ्युद्धरति' इति। अभिशब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वे प्राप्त उच्छब्दे गतौ परतोऽनुदात्तत्वं भवति। `समुदानयति' इति। अत्रापि `निपाता आद्युदात्ताः' (फि.सू.4.80), `उपसर्गाश्चाभिवर्जम्' (फि.सू.4.81) इति सम आद्युदात्तत्वे प्राप्तेऽनुदात्तत्वं भवति। कथं पुनरत्राह--समश्च गतिसंज्ञेति यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसञ्ज्ञे भवत इत्युक्तम् (जै.प.वृ.99), न चोच्छब्दस्य क्रियावाचित्वम्? नैष दोषः; क्रियाविशेषवाचिनो हि प्रादयः। क्रियाविशेषश्च क्रियैव। कारकाणां प्रवृत्तिविशेषः क्रियेत्युक्तम्। उपसगऽपि कारकप्रवृत्तिविशिष्यत एव। न [न ह्युद्धरतीति?] ह्युत्तरतीति हरत्यर्थ एव केवलं कर्त्तृव्यापारं व्यवच्छिनति। किं तर्हि? उपसर्गार्थोऽपि। अथ वा हरणादर्थान्तरमेवोद्धरणम्, तस्याभिर्विशेषणमिति नानुपपन्ना गतिसंज्ञा।

`देवदत्तः प्रपचति' इति। देवैर्दासीष्टेति `क्तिच्क्तौ च संज्ञायाम्' (3.3.174) इति क्तः; `दो दद्धोः' (7.4.46) इति ददादेशः। `तृतीया कर्मणि' (6.2.48) इत्याद्युदात्तत्वे प्राप्ते `कारकाद्दत्तश्रुतयोरेवाशिषि' (6.2.148) इति देवदत्तशब्दोऽन्तोदात्तः। `आमन्द्रैः' इत्यादि। अत्र सर्वमस्ति, न तु मन्द्रोगतिरिति। तस्मिन् परत आङोऽनुदात्तत्वं न भवति। असति चनुदात्तत्वे `निपाता आद्युदात्ताः' (फि.सू.4.80) `उपसर्गश्चाभिवर्जम्' (फि सू 4.81) इत्याद्युदात्तत्वमेव भवति।

कथं पुनराङो गतिसंज्ञा, क्रियायोगे हि सति विहिता सा, न चात्रास्ति क्रियायोगः, मन्दरशब्दस्याक्रियावाचित्वात्? इत्यत आह--`याहीत्येतत् प्रति

क्रियायोगादाङित्वेष गतिः' इति। सत्यपि व्यवधाने व्यवहिताश्च (1.4.82) इति गतिसंज्ञाविधानादिति भवाः। स्यादेतत्, यद्यपि याहीत्येतत् प्रत्याङो गतित्वम्, तथापि मन्द्रशब्दं प्रति नास्त्येव तस्य गतिसंज्ञा, तेन यद्यपि गतावित्येतन्नोच्येत, तथापि नैवेहानुदात्तत्वं प्राप्नोति? इत्यत आह--`तस्य' इत्यादि। अत्रास्यानुदात्तत्वं स्यादेवेति। अस्य `अनाश्रितपनिमित्तकम्' इत्यनेन हेतुरुक्तः। तस्यानाश्रितपरनिमित्तकस्यापि गतावित्यस्मिन्नसत्येनेन गतिग्रहणस्याभावो हेतुरभिहितः। यदि गतावित्येन्नोच्येत, ततोऽनाश्रितपरनिमित्तमेवानुदात्तत्वमुक्तं स्यात्। न ह्यसति सप्तमीनिर्दिष्टे गतिग्रहणे परनिमित्तताश्रीयते। ततश्च गतिरित्येतावत्युच्यमाने यद्यपि मन्द्रशब्दो गतिर्न भवति, तथापि तस्याङाश्रितपरनिमित्तमनुदात्तत्वमिह स्यादेव। गतावित्यस्मिंस्तु सति न भवत्येष दोषः; गतेः परनिमित्तस्याश्रयणात् तस्य चेहाभावात्।।

71. तिङि चोदात्तवति। (7.1.71)

`यत्प्रपचति यत्प्रकरोति' [यत् करोति--मुद्रितकाशिकापाठः] इति। `यद्वृत्तान्नित्यम्' (8.1.66) इति निघातप्रतिषेधे कृते उभयमप्येतत् तिङन्तमुदात्तवद्भवति--एकं धातुस्वरेण, अपरं प्रत्ययस्वरेण।

इहेदं तिङ्ग्रहणमेवमर्थं क्रियते--तिङ्युदात्तवति यथा स्यात्, `आमन्द्रैरिन्द्र हरिभिर्याहि' इत्यत्र मन्द्रशब्दे मा भूदित्येवमर्थम्; एतच्चाप्रयोजनम्, यदि स तत्र स्यात् पूर्वसूत्रे गतावित्येतदपार्थकं स्यात्। अस्य हि तत्र मन्द्रशब्दे मा भूदित्येवमर्थम्; एतच्चाप्रयोजनम्, यदि स ततर स्यात् पूर्वसूत्रे गतावित्येतदपार्थकं स्यात्। अस्य हि तत्र मन्द्रशब्दे परतो मा भूदित्येतदेव अयोजनं व्यवस्थितम्। न चान्यत् तिङ्ग्रहणस्येह व्यवच्छेद्यमस्ति। तस्माद्व्यवच्छेद्याभावान्न कर्त्तव्यमेव तिङ्ग्रहणम्? इत्येतच्चोद्यमपाकर्त्तुमाह--`तिङ्ग्रहणम्' इत्यादि। परिमाणम्=परिच्छेदः। तदुदात्तवतो यथा स्यादित्येवमर्थं तिङ्ग्रहणम्। किं पनः स्यात्, यदि परिमाणार्थं तिङ्ग्रहणं न क्रियेत? इत्यत आह--`अन्यथा हि' इत्यादि। यदि हि तिङीति नोप्येत तदोदात्तवतीत्येतावत्युच्यमाने यद्युदात्तवतीति सामान्येनोच्येत, तथापि प्रत्यासत्तेर्यं प्रति गतिस्तस्यव निघातो विज्ञायेत। ततश्च धातावेवोदात्तवति स्यात्--यत् प्रवचतीत्यादौ, प्रत्यये तु यत् प्रकरोतीत्यत्र न स्यात्। विकरणो ह्यत्रोदात्तवान् न धातुः। ननु चोदात्तोऽत्र प्रत्ययः, नोदात्तवान्, न हि प्रत्ययादन्यः स उदात्तोऽस्ति येन प्रत्यय उदात्तवान् स्यात्? नैतत् सारम्; यथा स्यात् [`नास्ति--का.मु.पुस्तके] यत्राद्युदात्तत्वमस्य व्यपदेशिवद्भावेन भवति तथोदात्तत्वमपि स्यादेव। स्यादेतत्। प्रत्ययमपि प्रति प्रादेर्गतिसंज्ञा, ततो नायं दोषः? इत्यत आह--`यत्क्रियायुक्ताः' इत्यादि। इतिकरणो हेतौ। यस्मात् यत्क्रियायुक्ताः प्रादयस्तं प्रति तेषां गत्युपसर्गसंज्ञा, तस्माद्धातुमेव प्रति गतिसंज्ञा, न प्रत्ययम्। यदि हि प्रत्ययोऽपि धातुवत् क्रियावचन स्यात्, तमपि प्रति प्रादयो गतिसंज्ञां प्रपद्येरन्। न चासौ क्रियावचनः, तस्मान्न प्रत्ययं प्रति प्रादीनां गतिसंज्ञाः।

`आमन्ते तर्हि' इत्यादि। प्रपचतितरामिति `तिङश्च' (5.3.56) इति तरप्, तदन्तात् `किमेत्तिङ्' (5.4.11) इत्यादिनामि कृते सत्यामन्तमेतद्भवति। न तिङन्तम्। ततो यदि तिङि चेति तिङग्रहणं न क्रियेत, तस्मिन्नामन्ते परतो गतिनिघातो न प्राप्नोति। अत्र' इत्यादि उत्तरम्। अत्र केचित् `कुगतिप्रादयः' (2.2.18) इत्यामन्तेन गतेः समासं कुर्वन्ति, केचिन्न कुर्वन्त्येवेति। तत्र त्रयः पक्षाः। तत्र य आमन्तेन समासं कुर्वन्ति, तेषां `तत्पुरुष तुल्यार्थतृतीया' (6.2.2) इत्यादिना पूर्वपदस्याव्ययस्य प्रकृतिस्वरे सति शेषस्य `अनुदात्तं पदमेकवर्जम्' (6.1.158) इत्यनुदात्तत्वेन भवितव्यम्। अतोऽक्रियमाणेऽपि तिङ्ग्रहणे परमामन्तमुदात्तं न भवतीति गतिनिघातो नैव सिध्यति। ततो नायं दोषस्तिङ्ग्रहणे सत्येव, किं तर्हि? असत्यपि। तेन तिङ्ग्रहणे क्रियमाण एव चोदयितुं युक्तमित्यभिप्रायः।

`अथ' इत्यादि। अथ तरबन्तेन गतिसमासः क्रियते? एवमप्युक्तमेव चोद्यम्। तथा हि--`तरबन्तस्य गतिसमासः' इत्यस्मिन् पक्षे प्राग्गतिसमासे कृते पूर्वपदस्य च प्रकृतिस्वरत्वे पश्चादामा भवितव्यम्, तथा च सतिशिष्टत्वादाम एवोदात्तत्वे सति गतेः `अनुदात्तं पदेमेकवर्जम्' (6.1.158) इत्यनेनैवानुदात्तत्वं सिद्धम्, अतो नार्थं एतत्सूत्रविहितेन गतिनिघातेनेति। वाभावे वाह चोदकः--`येषां तु' इत्यादि। `गतिकारकीपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' (व्या.प.138) इत्यत्र दर्शनद्वयम्--`गत्यादयोऽविशेषेण समस्यन्ते कृद्भिः सह सह प्राक्सुबुत्पत्तेः' इत्येकं दर्शनम्; `गत्यादयः कृद्भिरेव समस्यन्ते, नान्यप्रत्ययान्तैः, तैश्च प्राक्सुबुत्पत्तेः' इति द्वितीयम्। तत्र येषां पूर्वं दर्शनं तान्प्रत्यामन्ते तर्हि न प्राप्नोतीति सत्यमयुक्तमेतच्चोद्यम्। येषां तु द्वितीयं दर्शनं तान् प्रत्युरक्तमेव। तथा हि--तेषामेवंविधविषये प्रपचतितरामित्येवंप्रकारे यत्र कृत्प्रयोगो नास्ति तत्र समासेन नैव भवितव्यम्। अथ पृथक्स्वरः प्राप्नोति--प्रशब्दस्य `उपसर्गाश्चाभिवर्जम्' (फि.सू.4.81) इत्याद्युदात्तत्वं प्राप्नोति, पचतितरामित्यत्रापि प्रत्ययस्वरेणाम उदात्तत्वम्? तत्र पृथक्स्वरप्राप्तौ सत्यामनेन निघातेन प्रयोजनम्। एष च गतिनिघातस्तिङग्रहणे क्रियमाणे सत्यामन्तेन प्राप्नोतीति भावः। इतर आह--`तदर्थ यत्नः कर्त्तव्यः' इति। स पुनरत्र व्याख्यानविशेषः। इह चकारः क्रियते, स चानुक्तसमुच्चयार्थः, तेनामन्तेऽपि निघातो भविष्यतीति।

`प्रपचति, प्रकरोति' इति। `तिङङतिङ' (8.1.28) इति निघातादुभयमप्येतदुदात्तवन्न भवति।।

72. आमन्त्रितं पूर्वमविद्यमानवत्। (8.1.72)

`तस्मिन् सति' इत्यादिनाऽविद्यमानवद्भवतीत्यस्यार्थमाचष्टे। `अविद्यमानवत्' इति। वतिना निर्देशोऽयम्, अविद्यमानेन तुल्यं वर्त्तत इत्यविद्यमानवत्। वतिश्च सादृश्ये भवति, एवञ्च तस्याविद्यमानेन सादृश्यं भवति यदि सत्यपि तस्मिंस्तन्निबन्धनं कार्यं न भवति। असति च तस्मिन् यत् कार्यं तदत्तानिबन्धनं तत् सत्यपि तस्मिन् भवति। `आमन्त्रितनिघातेन' [आमन्त्रिततिङनिघात--काशिका--पदमंजरी च] इत्यादिना तस्मिन् सति यत्कार्यं प्राप्नोति

तदभावमविद्यमानवद्भावस्य प्रयोजनं दर्शयति। `देवदत् यज्ञदत्त' इति। अत्र पूर्वस्याविद्यमानत्वादसति निघाते यज्ञदत्तशब्दस्य षाष्टिकमेवामन्त्रि (6.1.198) ताद्युदात्तत्वं भवति। `देवदत्त मम ग्रामः स्वम्' ति। `तवममौ ङसि' (7.2.96) इति तदममादेशौ साप्तिकौ। `इत्येवमादिषु' इति। आदिशब्देन `देवदत्त तुभ्यं दीयते' इत्येवमादीनां ग्रहणम्, `युष्मदस्मदादेशा न भवन्ति' इति। `तेमयावेकवचनस्य' (8.1.22) इत्येवमादयः। `पूजायामनन्तरप्रतिषेधः प्रयोजनम्' इत्यादिना तस्मिन्नामन्त्रितेऽसति यत्कार्यं प्राप्नोति तस्य सत्यपि तस्मिन् भावेऽविद्यमानवद्भावस्य प्रयोजनं दर्शयति। `यावद्देवदत्त पचसीत्यत्रापि' इत्यादि। यत्राप्यामन्त्रितं व्यवधायकमित्येषोऽपिशब्दस्यार्थो वेदितव्यः।
`देवदत्तः पचति' इति। अत्राविद्यमानत्वाभावत् तिङनिघातो भवत्येव। `पूर्वम्' इति। किं देवदत्त इति पूर्वं परमपि खलु भवति? न चेह परमस्तीति नास्ति देवदत्तेत्यस्य पूर्वत्वम्। तेनामन्त्रिताद्युदात्तत्वे कर्त्तव्ये नाविद्यमानवद्भवति। `देवदत्त पचसि' इति। अत्र पचसीत्येतदपेक्षया देवदत्तशब्दस्य पूर्वत्वमस्तीत्यविद्यमानवद्भावेन तस्य भवितव्यम्, ततश्चामन्त्रिताद्युदात्तत्व तस्य न स्यात्। `इमं मे गङ्गे यमुने'--इत्यत्र च गङ्गेशब्दस्य यमुनेशब्देनानन्तर्यमपनयन् स निघातनिमित्तभावं प्रतिबध्नीयादिति यमुनेशब्दस्य निघातो न स्यादित्येतच्चोद्यद्वयमाशङ्क्याह--`पूर्वत्वं च' इत्यादि। चकारोऽवधारणे, भिन्नक्रमश्च। परापेक्षमेवेत्येवं द्रष्टव्यम्। इतिकरणो हेतौ। येषां यद्भावो यदपेक्षवद्भवति तेषां तद्भावेनानूद्यमानानां विधीयमानो धर्मस्तद्विषय एव प्रतीयते। तद्यथा--पुत्रः कार्येष्ववहित इति पुत्रस्य पुत्रभावः पुत्रापेक्ष इति तस्य पुत्रभावेनानूद्यमानस्य विधीयमानं कार्येष्ववहितत्वं यदपेक्षं पुत्रत्वं तत्कार्येष्ववगम्यते, नान्यकार्येषु। पूर्वत्वं चेदं परापेक्षमेव। तस्मात् तदनूद्यामन्त्रितस्याविद्यमानवद्भावो यदपेक्षं तत्पूर्वत्वं तस्यैव परस्य कार्ये कर्त्तव्ये भवति, नान्यस्य। किंविशिष्टे कार्ये? स्वानिमित्ते, अन्यनिमित्ते या। स्वं निमित्तं यस्य तत् स्वनिमित्तम्, आमन्त्रितमित्यर्थः। तस्मादन्यच्छब्दान्तरं निमित्तं यस्य तदन्तनिमित्तम्। यत एवं परस्यैव कार्ये कर्त्तव्ये तदामन्त्रितमविद्यमानवद्भवति, न तु स्वकार्ये कर्त्तव्ये, तेन देवदत्त पचसौत्यत्रामन्त्रिताद्युदात्तत्वं न परस्य कार्यम्; किं तर्हि? आमन्त्रितस्यैव। यतः परस्य कार्यमनुदात्तत्वम्, तस्मिंस्त्वविद्यमानव्दभवत्येव।
एवं प्रथमचोद्यं निराकृत्य द्वितीयं निराकर्त्तुमाह--`इमं मे गङ्गे यमुने' इत्यादि। अत्रापि पूर्वत्वं च परापेक्षं भवतीत्येष एव हेतुः। गङ्गेशब्दः पूर्वमामन्त्रितान्तः स्वयमविद्यमानवत्त्वान्निमित्तं न भवतीति सम्बन्धनीयम्। क्व विषये निमित्तं न भवति? परस्यैव सुमुनेशब्दस्यानुदात्तत्वे कर्त्तव्ये। मेशब्दस्य च निमित्तभावं न प्रतिबध्यातीति गङ्गेशब्दः पूर्वमामन्त्रितो यमुनेशब्दस्यानुदात्तत्वे कर्त्तव्ये विद्यमानवत्त्वादिति सर्वमपेक्षते। इह पूर्वशपब्दस्य सम्बन्धिशब्दत्वात् परस्य कार्ये कर्त्तव्ये पूर्वस्यामन्त्रितस्याविद्यमानवद्भावो विधीयते। `इमं मे गङ्गे यमुने' इत्तयत्र च यद्यपि गङ्गेशब्दादन्यच्छब्दान्तरं `मे' इत्येतद्यमुनेशब्दस्यानुदात्तस्य निमित्तम्, तथापि तदनुदात्तत्वं पस्यैवामन्त्रितस्य कार्यमिति तस्मिन्नपि कर्त्तव्ये गङ्गेशब्दोऽविद्यमानवद्भवति। अत एव प्रागुक्तम्--अन्यनिमित्ते वैतेनाविद्यटचमानत्वान्मेशब्दस्य निघातं प्रति यो निमित्तभावः तं न प्रतिबध्नाति। वत्करणं किमर्थम्? स्वाश्रयमपि यथा स्यात्--आम् भो देवदत्तत्रि। `आम एकगान्तरमामन्त्रितमनन्तिके' (8.1.55) इत्येकान्तरतानिबन्धनो निघातप्रतिषेधः सिद्धो भवति। बहुवचनान्तञ्चैतद्विज्ञेयम्; एकवचनान्ते हि `नामन्त्रिते समानाधिकरणे सामान्यवचनम्' (8.1.73) इति प्रतिषेधान्नैवाविद्यमानवत्त्वमस्ति। बहुवचनान्ते तु `विभाषितं विशेषवचने बहुवचनम्' (8.1.74) इति पक्षे विद्यते।
ननु च परार्थे प्रयुज्यमानाः शब्दा अतिदेशं गमयन्ति, यथा--`गौर्वाहीक इति, तत्र विद्यमानस्याविद्यमानमिति वचनादतिदेशो गम्यते। अतिदेशधर्मश्च स्वाश्रया निवृत्तिरिति नार्थो वतिना? सत्यमेतत्; एवं तु मन्यते--वतिमन्तरेण प्रयोगव्यवस्थार्थमिवं स्यात्, कुतश्चिदामन्त्रितं पूर्वं न भवतीति। तथा चामन्त्रितस्यामन्त्रितेन पूर्वेणैकान्तराता न स्यादिति।।

73. नामन्त्रिते समानाधिकरणे सामान्यवचनम्। (8.1.73)
`समानाधिकरणम्' [समानाधिकरणे--काशिका] इति। समानाभिधेयमित्यर्थः। `अग्ने गृहपते' इति। अग्निशब्दोऽत्राग्निमात्राभिधायित्वात् सामान्यवचनोऽपि गृहपतिशब्देन विशेषाभिधायिना व्यवच्छिद्यमानस्तद्वाच्ये गार्हपत्याख्येऽग्निविशेषे एवावतिष्ठत इति गृहपतिशब्दस्तेन समानाधिकरणः। एवं `माणवक जटिलाध्यापक' इत्यत्रापि समानाधिकरणाता विज्ञेया। अत्र जटिलकशब्दस्यापेक्षाभेदात् सामान्ये विशेषत्वं न; किं तर्हि? माणवकापेक्षया विशेषत्वम्, अध्यापकापेक्षया सामान्यभावः। अत्र जटिलके समानाधिकरणे परतो माणवकस्याविद्यमानवत्त्वं न भवति, अध्यापके तु जटिलकशब्दस्य। पूर्वस्य' इत्यादिना प्रतिषेधस्य फलं दर्शयति।
`देवदत्त पचसि' इति। तत्र देवदत्तस्य योऽभिधेयोऽर्थस्तत्रैव कर्त्तरि लकारो विहित इति भवति पचसीत्येतद्देवदत्तशब्देन समानाधिकरणम्। आमन्त्रितं तु न भवति--देवदत्त यज्ञदत्तेति। देवदत्तशब्दोऽत्र न संज्ञाशब्दो गृह्यते, किं तर्हि? क्रियानिमित्तकः; अन्यथा संज्ञशब्दस्यैकवस्तुनिष्ठत्वात् सामान्यवचनः, स न स्यात्। `एते पर्यायाः' इति। एतेन सामान्यवचनत्वाभावं दर्शयति। विशेषापेक्षं सामान्यम्। न चात्र कस्यचिद्विशेषो वाच्यो यदपेक्षया सामान्यं स्यात्, सर्वेषामत्यन्ताभिन्नार्थत्वात्, अन्यथा पर्याया एवं न स्युः। कथं पुनर्ज्ञायन्ते पर्याया एते? इत्याह--`एवं ह्युक्तम्' इत्यादि।।

74. विभाषितं विशेषवचने बहुवचनम्। (8.1.74)
पूर्वेण नित्यं विद्यमानवत्त्वे प्राप्ति विकल्पार्थमिदं वचनम्। `देवाः शरण्याः' इति। यदाऽविद्यमानवत्त्वं तदा शरन्या इत्यस्यामन्त्रिताद्युदात्तत्वं भवति; अन्यथा निघातः। एवं `ब्राह्मणा वैयाकरणाः' इत्यात्रापि वैयाकरणशब्दस्याद्युदात्तत्वम्, पाक्षिकनिघातश्च वेदितव्यः।

अथ विशेषवचनं किमर्थम्, यावता `सामान्यवचनम्' इत्यनुवर्त्तते, सामान्यञ्च विशाषापेक्षम्, तत्रान्तरेणापि विशेषवचनं विशेषवचनं विज्ञास्यते? इत्यत आब--`सामान्यवचनाधिकारादेव' इत्यादि। य एवं न शक्नोति मन्दधीः प्रतिपत्तुम्, तं प्रति विस्पष्टार्थ विशेषवचनग्रहणं क्रियते। यदि तर्हि सामान्यस्य विशेषापेक्षत्वात् सामान्यवचनग्रहणाद्विशेषवचने कार्यं विज्ञायते, तत्र पूर्वसूत्रेऽपि (8.1.73) तत्रैव कार्यं विज्ञायते, तथा च देवदत्त यज्ञवत्तेति प्रत्युदाहरणं द्वयङ्गविकलं स्यात्; तथा हि यथा यज्ञदत्तशब्दो न समानाधिकरणो भवति, तथा विशेषवचनोऽपि। अथासौ विशेषवचनः? एवं सति यथाऽग्ने गृहपत इत्यत्राग्निशब्दः सामान्यवचनोऽपि गृहपतिशभ्देन विशेषाभिधायिना व्यवच्छिद्यमानस्तदग्नि विशेषणं भवति गृहपतिशब्दस्तेन समानाधिकरणः, एवं देवदत्तशब्दो विशेषाभिधायिना यज्ञदत्तशपब्देन व्यवच्छिद्यमानस्तद्वच्य एव विशेषेऽवतिष्ठत इति यज्ञदत्तशब्दस्तेन समाधिकरण इति चिन्त्यमेतत्।।

इति बोधिसत्त्वदेशीयाचार्यश्रीजिनेन्द्रबुद्धिपादविरचितायां

काशिकाविवरणपञ्चिकायामष्टमाध्यायस्य

प्रथमः पादः

- - -

8.2

अथाष्टमाऽध्यायः

द्वितीयः पादः

1. पूर्वत्रासिद्धम्। (8.2.1)

एष योगः परिभाषा वा स्यात् अधिकारो वेति पक्षद्वयं सम्भाव्यते। तत्र यद्ययं परिभाषा स्यात् सर्वस्यामष्टाध्याय्याम्पूर्वस्मिन्नुत्तरमसिद्धं स्यात्, ततश्च `अतो भिस ऐस्' (7.1.9) इत्यत्र त्यदाद्यत्वस्यासिद्धत्वात् तैः, यैः--इत्यत्रैस्भावो न स्यादितीमं परिभाषापक्षे दोषं दृष्ट्वा स्वरितत्वेनाधिकारत्व (1.3.11) मस्येति निश्चित्याह--`पूर्वत्रासिद्धमित्यधिकारोऽयम्' इति। `अध्यायपरिसमाप्तेः' इति। अवधिप्रदर्शनार्थमेतत्। `तत्र' इति वाक्योपन्यासे। `सपादा' इति। सह पादेनानन्तरं प्रक्रान्तेन वर्त्तत इति सपादा। `सप्ताध्यायी' इति। सप्तानामध्यायानां समाहारः, `द्विगोः' (4.1.21) इति ङीप्। क्वचित् `सपादसप्ताध्यायी' इति पाठः, तत्र सपादा चासौ सप्ताध्यायी चेति विशेषणसमासः, पुंवद्भावः। `अयम्' इति। वक्ष्यमाणः। `पादोनोऽध्यायः' इति। अनन्तरोक्तेन पादेनोनोऽपरिपूर्णः पादोनोऽध्यायः। `असिद्धो भवति' इत्यादि। पादोनाध्यायग्रहणेनोत्तरोत्तरयोगग्रहणेन च शास्त्रासिद्धत्वमिहाश्रीयत इति दर्शयति। कार्यासिद्धत्वाश्रयणे हि यथा देवदत्तस्य हन्तरि हते न पुनर्देवदत्तस्य प्रादुर्भावो भवति, तथा कार्यस्यासिद्धत्वे तिपादिते न पुनः प्रकृतेः प्रत्यापत्तिर्भवति। [`प्रादुर्भावो'--प्रा.मु.पाठः] ततश्चामुद्धत्वे तुस्मैभावशास्त्रमेव प्रवर्त्तते, न त्वशास्त्रमसिद्धतवामिति न भवत्येष दोषप्रसङ्गः। अपि च शास्त्रस्य मुख्यत्वं पूर्वत्वं कार्यस्यौपचारिकत्वम्। यस्य कार्यस्य शास्त्रं पूर्वं तदप्युपचारेण पूर्वमित्युच्यते, न स्वत एव तसय पूर्वत्वम्; सन्निवेशविशेषाभावात्। कार्यं हि लक्ष्यगतम्, तत्र यथा लक्ष्यस्य सन्निवेशो नास्ति तथा तद्गतस्यापि कार्यस्य। न च मुख्ये पूर्वत्वे सति गौणत्वस्य परिग्रहणं मुक्तम्। तस्माच्छास्त्रं [तस्माच्छास्त्रपूर्वग्रहणेन--प्रा.मु.पाठः] पूर्वग्रहणेन गृह्यते। तस्य च पूर्वत्वं परशास्त्रमेवापेक्ष्य भवति। अतो यदपेक्षं तस्य पूर्वत्वं ततः परस्य शास्त्रस्यैवासिद्धत्वमनेन कर्त्तुं युक्तम्। शास्त्रस्यासिद्धौ च कृतायामर्थतः कार्यासिद्धत्वं कृतमेव भवति; तस्य तन्निबन्धनत्वात्। सिद्धशब्दो निष्पन्नवचनः। सिद्धं निष्पन्नमित्यर्थः। न सिद्धमसिद्धम्, अनिष्पन्नमित्युच्यते। परञ्च शास्त्रं यच्च निष्पन्नं तन्न शक्यं वचनशतेनाप्यनिष्पन्नसत्तायामापादयितुम्। अन्यथा न कश्चिद्दुःखविवशां दशामनुभवेतु; असिद्धवचनेनैव न दुःखस्यानिष्पन्नतापादानात्। तस्माद्यथा ब्रह्मदत्तोऽब्रह्मदत्तोऽयमित्युक्तेऽकतिदेशोऽयं गम्यते, तथेहाप्यसिद्धत्वमित्युक्तेऽतिदेशोऽयं गम्यत इत्याह--`असिद्धवद्भवति' इति। एतदेव स्पष्टीकर्तुमाह--`सिद्धकार्यम्' इत्यादि। एवं हि तदसिद्धवद्भवकति यदि सिद्धस्य यत्कार्यं तन्न करोति।

`तदेतत्' इत्यादि। तदिति हेतो, यस्मादनन्तरोक्तोऽसिद्धशब्दस्यार्थः, तस्मादेतदसिद्धवचनमादेशलक्षणप्रतिषेधार्थम्। आदेशो लक्षणं निमित्तं यस्य तदादेशलक्षणम्, तस्य प्रतिषेधः। सोऽर्थः प्रयोजनं यस्य तत्तथोक्तम्। `उत्सर्गलक्षणभाववार्थं च' इति। उत्सृज्यते निवर्त्यत इत्युत्सर्गः=स्थानिलक्षणम्, उत्सर्गौ लक्षणं निमित्तं यस्य तदुत्सर्गलक्षणं कार्यम्, तस्य भाव उपजननमुत्सर्गलक्षणभावः, सोऽर्थः प्रयोजनं यस्य तत्तथोक्तम्। `अस्मा उद्धर' इत्यादि। अस्मै इतोदंशब्दाच्चतुर्थी, उद्धरेत्यस्मिन् परत आयादेशः, `लोपः शाकल्यस्य' (8.3.19) इति वकारलोपः। तत्र कृतेऽकः सवर्णेदीर्घत्वं (1.1.101) प्राप्नोति; वकारलोपस्यासिद्धत्वान्न भवति। `व्यलोपस्यासिद्धत्वात्' इति। तादर्थ्याद्व्यलोपशास्त्रं व्यलोपशब्देनोक्तम्। अथ वा--व्यलोपशस्त्रस्यासिद्धत्वाद्व्यलोपस्यासिद्धत्वमित्युच्यते। एवूदाहरणेष्वादेशलक्षणप्रतिषेधोऽसिद्धत्वावचनस्य प्रयोजनम्। इदानीं येषूदाहरणेषूत्सर्गलक्षणभावः प्रयोजनम्, तानि दर्शयितुमाह--`अमुध्मै' इत्यादि। अदसश्चतुर्थीपञ्चमीसप्तम्यैकवचनानि। त्यदाद्यत्वम् (7.2.102)। अत्रासत्यप्यसिद्धत्वे परत्वात्

`अदसोऽसेर्दादु दो मः' (8.2.80) इत्युत्वम्, ततश्चाकारान्तस्याभावात् तन्निबन्धनाः `सर्ववाम्नः स्मै' (7.1.14), `ङसिङ्योः स्मात्स्मिनौ' (7.1.15) इति स्मायादयो न स्युः। असिद्धत्वे सति शास्त्रस्य ते भवन्ति। `उत्वस्यासिद्धत्वात्' इति। अत्रापि तादर्ध्यादुत्वशब्देनोत्वशास्त्रमुक्तम्।
`शुष्किका' इत्यादिश्लोकः। अत्र `निदर्शनम्' इत्येतत् शुष्किकेत्यादिभिः प्रत्यकमभिसम्बध्यते। `झलां चश्त्वे' इति। अत्राप्यसिद्ध इति वृत्तभङ्गभयान्नोक्तम्। अनुक्तमपि प्रकरणेन ज्ञायते।
`शुष्किका' इति। `शुष शोषणे' (धा.पा.1183) इत्येतस्मात् क्तप्रत्ययः, `शुषः कः' (8.2.51) इति कादेशः, टाप्, अज्ञातार्थे `प्रागिवात् कः' (5.3.70), `केऽणः' (7.4.13) ति ह्रस्वत्वम्, ततष्टाप्, `प्रत्ययस्यात् कात्' (7.3.44) इत्यादिना नित्यमित्त्वं भवति, न तु `उदीचाम्' (7.3.46) इत्यादिना पाक्षिकम्; `शुषः कः' (8.2.51) इत्यस्यासिद्धत्वात्।
`शुष्कजङ्घा' इति। शुष्के जङ्घे अस्या इति बहुव्रीहिः, `न कोपधायाः' (6.3.37) इचि पुंवद्भावनिषेधो न भवति। `शुषः कः' (8.2.51) इत्यस्यासिद्धत्वादिति प्रकृतेन सम्बन्धनोयम्। ननु च सत्यप्यसिद्धत्वे नैवात्र पूर्वद्भावप्रतिषेधो न प्राप्नोति, `कोपधप्रतिषेदे तद्धितवुग्रहणं कर्त्तव्य्' (धा.733) इति वचनात्? न; वाक्यकारमतमेतत्, सूत्रकारमतेन तु श्लोकवार्त्तिककारेण च न चात्रैतत् प्रयोजनमुपन्यस्तम्। एतयोर्हि सामान्येन कोपधप्रतिषेधोऽभिमतः।
`क्षामिमान्' इति। `क्षै जै षै क्षये' (धा.पा.913,914,915), `आदेच उपदेशेऽशिति' (6.1.45) इत्यात्त्वम्, `क्षायो मः' (8.2.53) इति निष्ठातकारस्य मकारः--क्षाम इति स्थिते `अत इञ्' (4.1.95) इतीञं कृत्वा `अत इनिठनौ' (5.2.115) इतीनिप्रत्ययं वा कृत्वा मतुप् कर्त्तव्यः।
`वहेः' इत्यादि। `वह प्रापणे' (धा.पा.1004) इत्येतस्मान्निष्ठा, सम्प्रसारणम् (6.1.15), `हो ढः' (8.2.31) इति ढत्वम्, `झषस्तथोर्धोऽधः' (8.2.40) इति धत्वम्, `ष्टुना ष्टुः' (8.4.41) इति ष्टुत्वम्, `ढो ढे लोपः' (8.3.13) इति ढलोपः, `ढ्रलोपे पूर्वस्य दीर्घोऽणः' (6.3.111) इति दीर्घः, ऊढ इति स्थिते, तमाचष्ट इति णिच्, `णाविष्ठवत् कार्य प्रातिपदिकस्य' (वा.813) इतीष्ठवद्भावाट्टिलोपः, तदन्ताल्लुङ्, `णिश्रि' (3.1.48) इत्यादिना चङ्। अत्र धत्वष्टुत्वादीनामसिद्धत्वाद्योऽसौ णो टिलोपलस्तस्य णौ कृतं स्थानिवद्भवतीति (चांप.पा.21) स्थानिवद्भावात् `चङि' (6.1.11) इति `अजादेर्द्वितीयस्य' (6.1.2) इति ह्त इत्येतस्य द्विर्वचनम्, `कुहोश्चुः' (7.4.62) इति चुत्वम्--महाप्राणस्य हकारस्य स्थाने महाप्राण एव झकारः, `अभ्यासे चर्च' (8.4.54) इति झकारस्य स्थाने जकारः, `आडजादीनाम्' (6.4.72) इत्याट्, `आटश्च' (6.1.90) इति वृद्धिः। अथ `सस्वल्लधुनि चङ्परे' (7.4.93) इति सन्वद्भावः कस्मान्न भवति? इत्याह--`अनग्लोपे' इत्यादि। यदि तर्ह्यनग्लोप इति प्रतिषेधात् सन्वद्भावो न भवति तदौजिढदिति [`तदोजढदिति"--प्रा.मु.पाठः] न सिध्यति? इत्याह--`औजिढत्' [`औजढत्'--प्रा.मु.पाठः] इत्यादि।
गुडलिण्मान्' इति। गुडं लेढीति क्विप्, तदन्तान्मतुप्, पूर्ववड्ढत्वम्, `झलां जशोऽन्ते' (8.2.39) इति जश्त्वम्--ढकारस्य डकारः! मतोर्वत्वे कर्त्तव्य ढत्वजशत्वयोरसिद्धत्वात् `झयः' (8.2.10) इति वत्वं न भवति। कारिकायां झलां जश्त्वग्रहणमुपलक्षणार्थं निदर्शनमिति। अनेनैतत् दर्शयति--निदर्शनमेतच्छुष्किकादीनाम्, न तु परिगणनमिति।
यदि हि सपादायां सप्ताध्याय्यां कर्त्तव्यायां पादोनोऽध्यायोऽसिद्ध इत्युच्यते तदा य इह षष्ठीनिर्देशसप्मीनिर्देश-पञ्चमीनिर्देशाः क्रियन्ते तेऽप्यसिद्धः स्युः, ततश्च `संयोगान्तस्य लोपः' (8.2.23) इत्यत्र षष्ठीनिर्देशस्यासिद्धत्वात् `षष्ठी स्यानेयोगा' (1.1.49) इत्येषा नोपतिष्ठेन, एवञ्च सामीप्ययोगाप्येषा षष्ठी स्यातः ततः संयोगान्तसमीपो यस्तस्यापि लोप आपद्येत; `झलो झलि' (8.1.26) इत्यत्रापि सप्मीनिर्देशस्यासिद्धत्वात् `तस्मिन्निति निर्दिष्टे पूर्वस्य (1.1.66) इत्येषा परिभाषा नोपतिष्ठेत, तथा च पूर्वस्यैवानन्तरे भवितव्यमिति नियमस्याभावात् सामान्येन पूर्वस्य परस्य वानन्तरे व्यवहिते झलि लोपः; `ह्रस्वादङ्गात् (8.2.27) इत्यादावपि पञ्चमीनिर्देशस्यासिद्धत्वात् `तस्मादित्युत्तरस्य' (1.1.67) इत्यस्योपस्थानं न स्यात्, ततश्चानियमात् पूर्वस्य परस्य वानन्तरस्य व्यवहितस्य च लोपः प्रसज्येतेत्यत आह--`येऽत्र षष्ठीनिर्देशाः' इत्यादि। किं पुनः कारणमसिद्धत्वं न भवति? इत्याह--`कार्यकालं हि' इत्यादि। यदि हि `यथोर्द्दशं संज्ञापरिभाषम्' (व्या.प.59) स्यात्, एवमासां परिभाषाणां पूर्वत्वे सति षष्ठोनिर्देशादीनामसिद्धत्वं न स्यात्, न तु यथोद्देशं संज्ञापरिभावम्, किं तर्हि? `कार्यकालं संज्ञापरिभाषम्' (व्या.पा.58), कार्यकालाः कार्यप्रयुक्ता हि संज्ञाः परिभाषाश्च। तस्माद्यत्र कार्यं तत्रैव ताः प्रयुज्यन्ते, तेन ता उपदेश एव। अतो निर्देशैरभिन्नदेशत्वात् परिभाषाणामत्र पूर्वत्वं नास्ति, ततः कुतस्तासु कर्त्तव्यासु तेषामसिद्धत्वप्रसङ्गः! यदि कार्यकालं संज्ञापरिभाषम्, `विप्रतिषेधे परं कार्यम्' (1.4.2) इत्येषाऽत्रोपतिष्ठेत? तत्र को दोवः? `स्फुर स्फुल सञ्चलने' (धा.पा.1389), 1390), `गुरी उद्यमने' (धा.पा.1396)--आभ्यां `ऋहलोर्ण्यत्' (3.1.124) इति ण्यति कृते दिस्फोयम्, अवगोर्यमिति न सिध्येत्। अस्या हि परिभाषाया उपस्थाने, गुणं परत्वाद्बाधित्वा `हलि च' (8.2.77) इति दीर्घत्वं प्राप्नोतीत्यत आह--`विप्रतिषेधे परमित्येषा तु' इत्यादि। `विप्रतिषेधे परम्' (1.4.2) इत्येषा परिभाषाऽत्र न प्रवर्त्तत इति प्रकृतेन सम्बन्धः। कस्मान्न प्रवर्त्तते? इत्याह--`येन' इत्यादि। द्वयोर्हि तुल्यबलयोर्विप्रतिषेधो भवति। इह तु येन पूर्वेण लक्षणेन `पुगन्तस्य' (7.3.86) इत्यादिना सह परं लक्षणं स्पर्धते तदप्यभिभवितुमिच्छति। परं लक्षणं `हलि च' (8.2.77) इत्यादिकम्, तत् पूर्वं प्रति तस्यासिद्धत्वम्। अतोऽतुल्यबलत्वाद्विप्रतिषेधो नास्तीति `विप्रतिषेधे परम्' (1.4.2) इत्येषा परिभाषा न प्रवर्त्तते। `तथा च' इत्यादि। एवमस्याः परिभाषाया अप्रवृत्तौ सत्यामित्यर्थः। यदि तर्हि पूर्वस्मिन् कार्ये कर्त्तव्ये परमसिद्धं भवति, एवं सत्युत्सर्गे कर्त्तव्ये परस्यापवादस्यासिद्धत्वां सायत्। ततश्च दोग्धा, दोग्धृमित्यत्र `दादेर्घातोर्घः' (8.2.32) इति धस्यासिद्धत्वाड्ढत्वं स्यात्? इत्यत आह--`अपवादसर्य तु' इत्यादि। यद्यप्यपवादविषयस्यापि परस्योत्सर्गे कर्त्व्येऽसिद्धत्व स्यात्, निर्विषयत्वाच्चापवादवचनस्य वैयर्थ्यं स्यात्। अतोऽपवादस्य परस्यापि वचनप्रामाण्यादसिद्धत्वं न भवति। ननु च वचनप्रामाण्यात् पर्यायेण तयोर्भावः स्यात्,

तत्कुतो वैयर्थ्य प्रसङ्ग? नैतदस्ति; यद्यपवादस्य पर्यायता स्यात्, `वा द्रुहमुह' (8.2.33) इति विकल्पेन धत्वविधाननमनर्थकं स्यात्।।

2. नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति। (8.2.2)
कृतोत्येतदनन्तरोक्तेन तुग्ग्रहणेनैव सम्बध्यते, न तु सर्वेः सुबादिभिः; अन्यथा यथा विधिशब्दस्य प्रत्येकं विधिसम्बन्धो दर्शितः, तथाऽस्यापि सम्बन्धं दर्शयेत्। इहायं विधिशब्दः सुबादिभिःसम्बध्यमानो भावसाधनो वा सम्बध्येत? कर्मसाधनो वा? तत्राद्ये पक्ष आश्रीयमाणे--राजभिः, तक्षभिरित्यत्रैस्भावे कर्त्तव्ये नलोपस्यासिद्धत्वं न प्राप्नोति, भावसाधने हि यत्रासतो विधानं तत्रासिद्धत्वेन भवितव्यम्, न तु सतः। न चात्रासतः सुपो विधानम्; किं तर्हि? सत एव, यतस्तस्य स्थान ऐस्भावस्य राजभ्यां राजभ्य इत्यत्रापि `सुपि च' (7.3.102) इति दीर्घत्वे `बहुवचने झल्येत्' (7.3.103) इत्येत्त्वे च कर्त्तव्ये नैवासिद्धत्वं प्राप्नोति; यस्मादिह सुपि परतो दीर्घत्वस्यैत्त्वस्य च विधानम्, त्वसतः सुपः। इतरस्मिंस्तु पक्षे स्वरसंज्ञातुकामसतामेव विधानेन लोपस्यासिद्धत्वमिष्यते, एतच्च न सिध्यति; कर्मसाधने हि विधिशब्दे तैः सम्बाध्यमाने सतामेव तेषामन्यस्मिन् कार्ये विधीयमाने सत्यसिद्धत्वेन भवितव्यम्, न तु तेषामसतां विधानेन [`विधानेन तु'--प्रा.मु.पाठः] शक्यते वक्तुम्--सुपा कर्मसाधनः सम्बध्यते, स्वरादिभिश्च भावसाधन इति। एको ह्ययं विधिशब्दः सूत्रोपात्तः, स च भावसाधनो वा स्यात्, कर्मसाधनो वेति; न तूभयसाधनः, न ह्येकस्योभयसाधनत्वमुपपद्यत इति? --एतच्चोद्यमपाकर्त्तमाह--`विधिशब्दोऽयम्' इत्यादि। यद्येव विधिशब्दः सुप्स्वरादिभिः समुदायेन सम्बध्यते, तदा स्यादयं दोषः। न च समुदायेन सम्बध्यते, किं तर्हि? सुबादिभिः प्रत्येकम्। प्रत्येकञ्चास्मिन् सम्बध्यमाने यावद्भिः सहायं सम्बध्यते तावन्त्येव स्वरादिदिधौ मलोपोऽसिद्धो भवतीत्येवमादीनि वाक्यानि भवन्ति। नलोपः सुप्स्वरसंज्ञातुग्विधिष्वेतद्ग्रहणकवाक्यं तेषामेव। निबन्धनम्। तेषु च भिन्नेषु वाक्येषु विधिशब्दोऽपि भिन्न एव। तत्र कश्चिद्भावसाधनः, कश्चित्कर्मसाधनः। तत्र स्वरसंज्ञातुकामसतामेव विधाने कर्त्तव्ये नलोपस्यासिद्धत्वमुच्यते, तेन च ते विधीयमानत्वात् कर्मभावमापद्यन्ते। ततो भावसाधनेन विधिशब्देन कर्मणोऽनभिहितत्वादेषु `कर्त्तृकर्मणो कृति' (2.3.65) इति षष्ठ्या भवितव्यम्। तेन तैः कर्मषष्ठीयुक्तैर्भावसाधनोऽभिसम्बध्यते, सुपा च सम्बन्धसामान्यवचनषष्ठ्यन्तेन।
`कर्मसाधनः' इति। सुपो विधीयमानेन कार्येण सम्बन्धमात्रम्। सम्बन्धसामान्ये षष्ठी तु यत्र `शेषे' (2.3.50) इति षष्ठी विधीयते तत्र वेदितव्यम्। सम्बन्धसामान्यस्य वचनीति षष्ठीसमासः, सा चासौ षष्ठी चेति विशेषणसमासः सम्बन्धसामान्यवचनषष्ठी अन्ते यस्य सुपः स तथोक्तः। कर्मषष्ठीयुक्तेन सुपा कर्मसाधनस्य विधिशब्दस्य सम्बन्धो नोपपद्यते; कर्मषष्ठ्यनुपपत्तेः। यदि हि सुप् कर्म स्यात् तत्र कर्मणि षष्ठी स्यात्, न चासौ सुप् कर्म; सुपो विधीयमानत्वात्। तत्तु तत्सम्बन्धिकार्यम्। विधीयमानत्वात् कर्म तद्विधिशब्देनोक्तम्। अतस्तत्रापि तावत् कर्मषष्टो न सम्भवति, किं पुनरकर्मणि सुपि! [`सुप्'--का.मु.पाठः] `तेन' इत्यादि। यस्मात् सम्बन्धमात्राभिधायिनी या षष्ठी तदन्तेन सुपा कर्मसाधनो विधिशब्दः सम्बध्यते, तेन हेतुना सुपः स्थाने यो विधिर्भिस ऐस्भावः, सुपि परतः यो विधिर्दीर्घत्वादिर्यस्य सुब्निमित्तं सर्वोऽसौ सुप्सम्बन्धी भवतीति सर्वत्राप्यसिद्धत्वं भवति। ननु च `षष्ठी स्थानेयोया' (1.1.49) इति वचनात् सम्बन्धविशेषे षष्ठ्या भवितव्यम्, न तु सम्बन्धसामान्ये। ततश्च सुप एव स्थाने यत् कार्यं तत्रैवासिद्धत्वं स्यात्, नान्यत्र? नैतदस्ति; यत्र ह्यादेशो विधीयते--`अस्तेर्भूः' (2.4.52) इत्येवमादौ तत्रास्याः परिभाषाया व्यापारः, न तु यत्र लक्षणान्तरेण विहितं कार्यं कार्यान्तरार्थ मुपादीयते तत्रापि; अन्यथा `उदीकारस्तस्य ग्रहणं भवति। ननु चेह सुपामादेशो न विधीयते, किं तर्हि? लक्षणान्तरविहितस्यापि सिद्धत्वम्। तस्मान्नात्र स्थानेयोगपरिभाषाया (1.1.49) व्यापारः।
`राजवती' इत्यादि। राजशब्दाद्मतुप्, `उगितश्च' (5.1.6) इति ङीपि कृते अन्तोऽबत्या' (6.1.220) इत्यन्तोदात्तत्वं प्राप्नोति। नलोपस्यासिद्धतवान्नायमवतीशब्द इति न भवति। तस्मिन्नसति `कनिन्युवृवितक्षिराजिधन्विद्युप्रतिदिवः' (द.उ.6.51) इति राजशब्दस्य कनिन्प्रत्ययान्तस्य नित्स्वरेणाद्युदात्तत्वात् राजवतीशब्द आद्युदात्त एव भवति। `पञ्चार्भम्, दशार्मम्' इति। `दिक्संख्ये संज्ञायाम्' (2.1.50) इति मासः। अत्र नलोपे कृतेऽवर्णान्तं पूर्वपद जातममिति `अर्भे चावर्णम्' (6.2.90) इत्यादिना सूत्रेण तस्याद्युदात्तत्वं प्राप्नोति, असिद्धत्वान्न भवति, समासान्तोदात्तत्वमेव (6.1.223) भवति। `पञ्चदण्डि' [पञ्चदण्डी--काशिका] इति। पञ्चानां दणअडिनां समाहार इति `तद्धितार्थ' (2.1.51) इत्यादिना समासः, समाहाहे द्विगुः, `स नपुंसकम्' (2.4.17) इति नपुंसकत्वम्। नलोपे कृत इगन्तता जातेति `इगन्तकालकपालभगालशरावेषु द्विगौ' (6.2.29) इति पूर्वपदस्य प्रकृतिस्वरः प्राप्नोति, नलोपस्यासिद्धत्वान्न भवकति, समासान्तोदात्तत्वमेव (6.1.223) भवति।
`तदेतत्' इत्यादि। इह केषाञ्चिदेकयैव संज्ञयाऽनेकसंज्ञाकार्यं क्रियते--`यावन्ति संज्ञाकार्याणि तत्रैकैव संज्ञा प्रवर्त्तते' इति। दर्शनम्। अन्येषां तु `यथा संज्ञयैककार्यं क्रियते तयैवान्यम्, अतो यावन्ति संज्ञाकार्याणि तावस्य एव संज्ञाः प्रवर्त्तन्ते इति दर्शनम्। तत्र पूर्वस्मिन् दर्शने नेदं प्रयोजनम्; ययैव हि पाक्प्रवृत्त्या संज्ञया `षड्भ्यो लुक्' (7.1.22) इति जश्शसोर्लुक्कार्यं कृतं तयैव हि टाप्प्रतिषेधो भविष्यति। तस्मादितरस्मिन् दर्शने तत् प्रयोजनं भवति। अत्रापि कथमेतत् प्रयोजनं भवति? इत्याह--`या हि' इत्यादि। हिशब्दो यस्मादर्थे। इतिकरणस्तस्मादर्ते। यस्माज्जश्शसोर्लुगर्था या षट्संज्ञा प्रवृत्ता तया स्त्रीप्रत्ययप्रतिषेधो न भवति, तस्मात् पुनः सा प्रवर्त्तयितव्या। यस्मात् सा प्रवर्त्तयितव्या तस्मादेतत् प्रयोजनमित्यर्थः।
`वृत्रहाभ्याम्, वृत्रहभिः' इति। वृत्रं हतवानिति `ब्रह्मभ्रूणवृत्रेषु क्विप' (3.2.87) तदन्तात् भ्याम्भिसौ, ततर नलोपे कृते `ह्रस्वस्य पिति कृति तुक्' (6.1.71) स्यात्, असिद्धत्वान्न भवति। `अत्र केचित्' इत्यादि। सन्निपातः=आनन्तर्यम्, तल्लक्षणं निमित्तं यस्य न तथोक्तः। सुपः सन्निपातेन नलोपः। स यदि तुकं प्रवर्त्तयेत् तत् सन्निपातं विहन्यात्। अनिमित्तञ्च `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या.पा.12) इति। तस्मान्नलोपस्तुकं न प्रवर्त्तयतीति

तुग्ग्रहणमनर्थकम्। ननु च तुकः पूर्वान्तत्वात् तुक् प्रातपदिकग्रहणेनैव गृह्यते, तत् कुतस्तस्य सन्निपातस्य विघातः, न हि स्वावयवेनैव स्वस्य व्यवधानमुपपद्यते? नैतदस्ति; ह्रस्वो ह्यागमी तुकः, न तदन्तः समुदायः, तत्कुतस्तस्य प्रातिपदिकग्रहणेन ग्रहणम्? बहिरङ्गलक्षणेन वासिद्धत्वात् तुकं प्रति नलोपस्य, तुग्विधिग्रहणमनर्थकम्। पदस्य बाह्मविभक्तिप्रत्ययमाश्रित्य नलोपो विधीयत इति तस्य बहिरङ्गत्वम्, अन्तर्वर्तिनं पदमाश्रित्य वर्णस्य तुग्विधीयत इति तस्यान्तरङ्गत्वमिति--`असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इति। यद्येवम्, युक्तमेवेति प्रतिपन्नाः, तत्किमर्थं तुग्ग्रहणं क्रियते? इत्यत आह--`तत् क्रियते' इत्यादि। अनित्यत्वज्ञापने तु सन्निपातलक्षणपरिभाषायाः प्रयोजनम्--`दृक्षाय' इत्यत्र `सुपि च' (7.3.102) इति दीर्घत्वसिद्धिः। अकारान्ततासन्निपाते हि ङेर्यो (7.1.13) विधीयत इति; तन्निमित्तत्वादिति दीर्घत्वनिमित्तभावोपगमनद्वारेण तद्विघातं न कुर्यात्। अनित्यत्वात् करोति। अन्यच्चात्र प्रयोजनमुत्तरत्रैव वक्ष्यते। बहिरङ्गलक्षणपरिभाषया सुप्यनित्वस्य ज्ञापने--एषा, द्वे इतयत्र टाप्सिद्धिः। अत्र हि त्यादद्यत्वस्य विभक्त्याश्रयत्वाद्बहिरङ्गत्वम्, प्रातिपदिकाश्रयत्वाट्टाबन्तरङ्गः। तत्र टाप कर्त्तव्ये त्यदाद्यत्वस्यासिद्धत्वं स्यात्, ततष्टाप् न सिद्ध्येत्। अनित्यत्वात्तु सिध्यति। प्रतिदीब्नेत्यत्र `हलि च' (8.2.77) इति दीर्घत्वसिद्धिः प्रयोजनम्। असति तस्यानित्यत्वे `हलि च' इति दीर्घत्वे कर्त्तव्ये बहिरङ्गस्याल्लोपस्यासिद्धत्वाद् हलि परतो वकारान्तो धातुर्न भवतीति दीर्घत्वं न स्यात्। अनित्यत्वात्तु सिद्ध्यति।
`राजीयति' इति। `सुप आत्मनः क्यच्' (3.1.8) इति क्यच्, `क्यचि च' (7.4.33) इतीत्त्वम्। `राजायते' इति। `कर्त्तुः क्यङ सलोपश्च' (3.1.11) इति क्यङ् `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः। `राजश्यः' इति। `अकः सवर्णो दीर्घः' (6.1.101)।।

3. न मु ने। (8.2.3)

`मु' इत्यविभक्तिकोऽयं निर्देशः। `अमुना' इति। अदसस्त्यदाद्यत्वम्, `अदसोऽदेर्दादु दो मः' (8.2.80) इत्युत्वमत्वे, `अच्च घेः' (7.3.119) इत्यतः `घेः' इत्यनुवर्त्तमान `आङो नास्त्रियाम्' (7.3.120) इति नाभावः। यदि मुभावो नाभावे कर्त्तव्ये नासिद्धो भवति--इत्येव सूत्रार्थः स्यात्, एवं सति नाभावे कृते यत् कार्यं प्राप्नोति तत्र तस्यासिद्धत्वं न स्यात्, ततश्चामुनेत्यत्राकारान्तस्याङ्गस्य `सुपि च' (7.3.102) इति विधीयमानं दीर्घत्वं प्रसज्येत? इत्यत आह--`कृते तु नाभावे' इत्यादि। ह्रस्वसन्निपातेन हि नाभावो ह्रस्वस्य विघातं प्रति निमित्तं न भवतीति सत्यप्यसिद्धत्वे न भवति दीर्घत्वप्रसङ्गः।
`अथ वा' इत्यादि। यथैकेन हि क इतो धावतीति पृष्टोऽपरेणापि किंवर्णो धावतीति प्रश्ने कश्चिन्निपुणमतिस्तन्त्रेण वाक्यद्वयमुत्तरयति--श्वेतो धावतीति, तथेहापि योगद्वयमेतत् तन्त्रेणोच्चरितम्। तत्र द्वितीयस्य योगस्य न परतो यत् प्राप्नोति तस्मिन् कर्त्तव्यं भुभावो नासिद्ध इत्येव सूत्रार्थः। तेन दीर्घत्वं न भविष्यति।
एकस्मिन्नेव योगे दीर्घत्वप्राप्तिमपाकर्त्तुमाह--`अथ वा' इत्यादि। ननु चास्मिन् सूत्रार्थे ने कर्त्तव्ये मुभावस्य यत् सिद्धत्वं तत् सूत्रेण संगृहीतं स्यात्, ततश्च नाभाव एव तावन्न प्राप्नोति, कुतः पुनस्तस्मिन् परतो यत् प्राप्नोति तस्मिन् कर्त्तव्ये मुभावस्यासिद्धत्वम्? इत्याह--`ने तु कर्त्तव्ये' इत्यादि। यथा पुत्रा मे बहुक्षीरघृतमोदनं सुवर्णापात्र्यां भुञ्जोरन्निति वरं प्रार्थयमानया वृद्धकुमार्या अर्थतः पतिः पुत्रा गावो धनं संगृहीतम्, एवमिहापि ने परतो यत् कार्यं प्राप्नोति तस्मिन् कर्त्तव्ये मुभावस्य सिद्धत्वं ब्रुवता ने कर्त्तव्ये मुभावस्यासिद्धत्वं नाश्रितम्। `तेन' इत्यषृदि। यस्मादेव एव वाक्यार्थः--ने कर्त्तव्ये मुभावस्य यत् सिद्धत्वं तदर्थतो गृहीतम्, तेन हेतुना नाभावश्च भवति, दीर्घत्वञ्च न भवतीति।
`एकदेश' इति। `प्रातिपदिकान्तसप्तम्येकवचनयोरुदात्तानुदात्तयोः' इति। वृक्षशब्दः प्रातिपदिकस्वरेणान्तोदात्त इति तस्यान्तो योऽकारः स उदात्तः। सप्तम्येकवचनम्, `अनुदात्तौ सुप्पितौ' (3.1.4) इत्यनुदात्तम्, तयोः `आद्गुणः' (6.1.87) इत्येकादेश आन्तरतम्यात् स्वरिते प्राप्ते `एकादेश उदात्तेनोदात्तः' असिद्धत्वे हि सति तस्य स एकादेशः स्वरित एवायादेशे कर्त्तव्ये स्यादिति तस्य स्थानेऽयादेश आन्तर्यतः स्वरित एव प्रसज्येत। अन्तरङ्गत्वं पुनरेकादेशस्यान्तरश्रितत्वात्। आद्गुणो ह्यवान्तरङ्गः; एकपदाश्रितत्वात्। अयादेशस्तु बहिरङ्गः; तद्विपर्वयात्।
`कुमार्या इदम्' इति। कुमारशब्दो वृक्षशब्दवदन्तोदात्तः। तस्मात् `वयसि प्रथमे' (4.1.20) इति ङीप्, `यस्येति च' (6.4.148) इत्यकारलोपः, `अनुदात्तस्य च य्रोदात्तलोपः' (6.1.161) इतीकारस्योदात्तत्वम्, चतुर्थ्येकवचनम्; कुमारी+ए इति स्थिते `आण्नद्याः' (7.3.112) इत्याट् यणादेशः (6.1.77), `उदात्तयणो हल्पूर्वात्' (6.1.174) इति विभक्तेरुदात्तत्वम्। तच्च `आदेः परस्य' (1.1.54) इति विभक्तिभक्तस्याट एव भवति, `आटश्च' (6.1.90) इति वृद्धिरेकादेशः। स च पूर्ववत् स्वरिते प्राप्ते `एकादेश उदात्तेनोदात्तः' (8.2.5) इत्युदात्तः क्रियते। तस्य सिद्धत्वं वक्तव्यम्--कुमार्या इदमित्यत्रायादेश उदात्ते यथा स्यात्, अन्यथा हि पूर्ववत् स्वरितः [वास्ति--का.मु.पुस्तके] स्यातद्। `यदि' इत्यादि। यदि पूर्वमुदात्तत्वं क्रियते, पश्चादेकादेशः, यथादर्शितमनन्तरायां रूपसिद्धावेवायादेश कर्त्तव्ये सिद्धो भवतीति युज्यत इदमुदाहरणम्। `अथ तु' इत्यादि। कुमारी+ए इति स्थित आट्, यणादेशः। "तत्रैकादेशे `उदात्तयणो हल्पूर्वात्' (6.1.174) इति विभक्तिस्वरः" इति। यदि कृत एकादेशे विभक्तिस्वरः क्रियते तदा नैतदस्योपसंख्यानस्य प्रयोजनम्। अस्यां हि रूपसिद्धावेकादेशस्य यदुदात्तत्वं तस्यायादेशे कर्त्तव्ये सिद्धत्वादनेन प्रकारेणोपसंख्यानस्येदं प्रयोजनं न भवतीत्याचष्टे। युक्तञ्चैतत्। तथा हि--अन्तरङ्गवादेकादेशेनैव तावद्भवितव्यम्, पश्चद्विभक्तिस्वरेण। वर्ण ह्याश्रित्यैकादेशो भवतीति तस्यान्तरङ्गत्वम्। उदात्तत्वं विभक्तेराश्रितत्वात् पदस्य भवतीति तस्य बहिरङ्गत्वम्।
`वृक्षाविदम्' इति। वृक्ष इदमित्येतदनुसारेणानुगन्तव्यम्, एकादेशः पुनरत्र `वृद्धिरेचि' (6.1.88) इति वृद्धिः। प्रथमयोः पूर्वसर्वदीर्घः (6.1.102) इत्येतत्त न प्रवर्त्तते; `नादिचि' (6.1.104) इति दीर्घप्रतिषेधात्।
`गाङ्गेऽनूपः' इति। गङ्गायां जात इत्यणि कृते प्रत्ययस्वरेणान्तोदात्तो गाङ्गशब्दः। अनुगता आपोऽस्मिन्निति बहुव्रीहिः, `ऊदनीर्देशे' (6.3.98)

इत्यूत्त्वम्, ऋक्पूरब्धूःपथामानक्षे' (5.4.74) इत्यकारप्रत्यये कृतेऽनूपशब्दोऽपि प्रत्ययस्वरेणान्तोदात्तः, शेषमस्यानुदात्तम्। `तस्य सिद्धत्वात्' इति। योऽसावेकारो गाङ्गशब्दे सप्तम्यकवचने परतः `आद्गुणः' (6.1.87) इत्यनेनाभिनिर्वृत्तः, तस्य सिद्धत्वाद्यः पुनः `एङः पदान्तादति' (6.1.109) इत्येकादेशोऽनूपशब्दाकारेण सह सः `एकादेश उदात्तेनोदात्तः' (8.2.5) इति भवति। अतो हेतोः `स्वरितो वानुदात्ते पदादौ' (8.2.6) इति पक्षे स्वरितो भवति। यदि पुनरसिद्धत्वं स्यात् तदासावेकार उदात्तानुदात्तस्थानित्वादान्तर्यतः स्वरितः स्यात्। यः पुनः `एङः पदान्तादति' (6.1.109) इत्येकादेशः, स उदात्तनानुदात्तस्य न भवतीति `स्वरितो वानुदात्ते पदादौ' (8.2.6) इति पक्षे स्वरितो न स्यात्, अपि तु स्वरितानुदात्तयोः स्थाने भवन्नान्तरतम्यान्नियमेन स्वरितः स्यात्।

`शतृस्वरः' इति। शत्राश्रयः स्वर इति शाकपार्थिवादित्वादुत्तरपदलोपो (वा.83) समासः। `तुदती, नुत्ती' इति। तुदिनुदिभ्यां (धा.पा.1281,1282) लट्; तुदादित्वाच्छः, स च प्रत्ययस्वरेणान्तोदात्तः, लसार्वधातुकस्यानुदात्ते कृते `अतो गुणे' (6.1.97) पररूपत्वमेकादेशः। स च `एकादेश उदात्तनोदात्तः' (8.2.5); तदुदात्तसय सिद्धत्वात्। `अन्तोदात्तादुत्तरपदात्' (6.1.169) इत्यन्तोदात्तादित्यनुवर्त्तमाने `शतुरनुमो नद्यजादी' (6.1.173) इति शत्रन्तादन्तोदात्तादीकारस्योदात्तत्वं भवति। असिद्धत्वे त्वेकादेशेऽस्योदात्तत्वं न स्यात्; अन्तोदात्तादित्यधिकारात् (6.1.169)। `अनुमः इत्यादिना ज्ञापकमाश्रित्यैतत्प्रयोजनमपाकरोति। कथं पुनरेतज्ज्ञापकम्? इत्याह--`न हि' इत्यादि। हिशब्दो हेतौ। अनुम इति प्रतिषेधस्यैतत् प्रयोजनम्--तुदन्ती, नुदन्तीत्यत्र `आच्छीनद्योर्नुम्' (7.1.80) इति नुमि कृते सनुम उदात्तत्वं मा भूदिति। यदि च शतृस्वरे, एकादेशस्वरोऽसिद्धः स्यात्, प्रतिषेधस्य वैयर्थ्य स्यात्; यस्मादेकादेशस्वरमन्तरेण नास्ति शतुरन्तोदात्तत्वम्। अतः प्रतिषेधादवसीयते--सिद्ध एकादेशस्वरः। न हि एकादेशस्वरमन्तरेण शत्रन्तं सनुम्कं किञ्चिदन्तोदात्तमस्ति। तस्मादनुम इति प्रतिषेधवचनं ज्ञापकमेव।

`तुदन्ति, लिखन्ति' इति। अत्रापि पूर्ववल्लसार्वधातुकानुदात्तत्वे कृत उदात्तत्वे कृत उदात्तानुदात्तयो रेकादेश उदात्तः। `तेन' इति। एकादेशस्वरेण सिद्धेन। `वर्ज्यमानता' इति। `अनुदात्तं पदमेकवर्णम्' (6.1.158) इत्येषोऽर्थोऽनेन लक्ष्यते। एकं वर्जयित्वा शेषस्यानुदात्तत्वं भवतीत्यर्थः। यदि पुनरसिद्धत्वं स्यात् `अनुदात्तं पदेमकवर्जम्' (6.1.158) इत्यस्मिन् कर्त्तव्ये सत्येकादेशस्वरस्यासिद्धत्वादसत्यां च वर्ज्यमानतायां द्वयोरुदात्तयोः श्रवणं प्रसज्येत।

ननु चासिद्धवचनमुत्सर्गलक्षणभावार्थमित्युक्तम्, अस्य च स्थानी स्वरितः; तथा हि `अतो गुणे' (6.1.97) पररूपत्व इत्यनेनैवान्तयैतो यो विहितः स्वरितस्यस्य स्थाने `एकदेश उदात्तेनोदात्तः' (8.2.5) इत्यनेनोदात्त आदेशो विधीयते, तत्र यद्युदात्तस्यादेशस्यासिद्धत्वात् तन्निमित्ता वर्ज्यमानता न भवति मा भूत्; यस्त्वस्य स्वरितस्य स्थानी तन्निमित्ता भविष्यति, तत्कथमेतत् प्रयोजनमुपपद्यते? यथोपपद्यते तथाख्यायते--`एकादेश उदात्तेनोदात्तः' (8.2.5) इत्यत्र चत्वारि दर्शनानि। `आद्गुणः' (6.1.87) इत्येवमादिभिरुदात्तानुदात्तयोरेकादेश आन्तरतम्यात् स्वरितगुणयोर्निवृत्तः, तस्य `एकादेश उदात्तेनोदात्तः' (8.2.5) इत्यनेन स्वरितस्य स्थान उदात्तगुण आदेशो विधीयत इत्येकं दर्शनम्। स्वरितगुणस्यैवाभिनिर्वृत्तस्य गुणान्तरापसिद्वारेण शब्दान्तरं प्रतिपद्यत इति द्वितीयम्। परिभाषेयमनुदात्तानुदात्तयोरेकादेश उदात्त इति तृतीयम्। अस्मिन् दर्शने परिभाषायाः पराङ्गभूतत्वादेकादेशशास्त्रैः सहास्यैकवाक्यता भवति, तत्रायमर्थः सम्पद्यते--आद्गुणो भवति, उदात्तानुदात्तयोस्तु `आद्गुणः' (6.1.87) भवतीति। चतुर्थं तु दर्शनम्--उदात्तानुदात्तयीर्य एकादेशः स उदात्तो भवति, न स्वरितगुणयुक्त इति। स्वरितस्यापवादभूतस्तूदात्तत्वमारभ्यते। येन नाप्राप्तिब्यायेनेदं (व्या.प.49) दर्शनमाश्रित्येवं प्रयोजनमुपन्यस्तम्। उपपद्यते च तदेतस्मिन् दल्शने। अत्र हि नाम विधान समकालमेवोदात्तत्वं विधीयते, न तु स्वरितगुणविहितस्य पुनरुदात्तत्वगुण आदेश इति न सम्भवति स्वरितेन स्थानिना वर्ज्यमानता; एकादेशस्वरस्य सिद्धत्वात्।

`कृते तस्मिन् तिङ्ङतिङ इति निघातः' इति। असति तु तस्य सिद्धत्वे पश्चादेकादेशस्वरः स्यात्, ततश्च मध्योदात्तता प्रसज्येत। `पचति' इति। अत्र तिशब्दे य इकारः स सतिशिष्टत्वादनुदात्तः, इतिशब्दः `निपाता आद्युदात्ताः' (फि.सू.4.80) इत्याद्युदात्तः; तयोरकः सवर्णदीर्घत्वमेकादेशो द्विपादश्रयत्वाद्बाहिरङ्गः, तस्य बहिरङ्गत्वात् तदाश्रयोऽपि स्वरो बहिरङ्गः, तत इकारस्यासिद्धतवमेव भवति। ततश्च तेन `अनुदात्तं पदमेकवर्जम्' (6.1.158) इति वर्ज्यमानता न भवति। `प्रपचति' इति। अत्रापि बहिरङ्गत्वेनासिद्धत्वात् तिङि चोदात्तवति' (8.1.71) इति गतेरनुदात्तत्वं न भवतति `तिङ्ङतिङः (8.1.28) इति निघात एवात्र भवति।

`हरिवो मेदिनम्' इति। हरिशब्दान्मतुप्, सुः, नुम् हल्ङ्यादि(6.1.68) लोपः, संयोगान्तलोपश्च (8.2.23), तस्मिन् कृते रुत्वम्, `हशि च' (6.1.114) इत्यस्योत्वम्, `आद्गुणः' (6.1.87)। `संयोगान्तलोपस्यासिद्धत्वात् हशि चेत्युत्वं न प्राप्नोति' इति। संयोगान्तलोपस्यासिद्धत्वे सति तकारेक इशो मकारस्य व्यवधानात्, तकारस्याहक्त्वात्।

`अलादीत्' इति। लुङ्, च्लेः सिच्, इट्, `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्, सिज्वृद्धिः, `इट ईटि' (8.2.28) इति सिचो लोपेऽकः सवर्णदीर्घत्वम्। `वृक्णः, वृक्णवान्' इति। `ओव्रश्चू छेदने' (धा.पा.1292) निष्ठा, ग्रहिज्यादिसूत्रेण (6.1.16) सम्प्रसारणम्, `चोः कुः' (8.2.30) इति कुत्वम्, `ओदितश्च' (8.2.45) इति नत्वम्, `अट्कुप्वाङ्' (8.4.2) इति णत्वम्। षत्वे चासति `स्कोः संयोगाद्योः' (8.2.29) इति सलोपः। `कुत्वं प्रत्यासिद्ध एव' इति। षत्वस्वरपरत्ययविधीड्विधिग्रहणस्य व्यावर्त्त्य दर्शयति--`स्वरप्रत्ययविधीडविधिषु क्षीबशब्द उदाह्रियते' इति। कथं पुनस्त्रिषु विधिषु क्षीबशब्द एक एवोदाहरणमुपपद्यते? इत्याह--`तत्र' इत्यादि। `अनुपसर्गात् फुल्लक्षीव' (8.2.55) इत्यत्र `क्षीब् मदे' (धा.पा.382) इत्यस्मात् क्तप्रत्यये परभूते क्षीबशब्दो निपातितः। तत्र चानेकपरकारं निपातनमाश्रितम्। तत्र क्वचिन्निपातने प्रत्ययविधौ स्वरविधौ च क्षीबशब्द उदाह्रियते, क्वचिदिड्विधौ। कथम्? इत्याह--`यदा' इत्यादि। संज्ञायामित्यादिग्रहणम्; `संज्ञायामुपमानम्' (6.1.204) इत्यतः संज्ञाग्रहणानुवृत्तेः। `एष स्वरः' इति। आद्युदात्तः। तत्र हि

`कर्षात्वतो घञोऽन्त उदात्तः' (6.1.159) इत्यतः उदात्तग्रहणमनुवर्त्तते, `ञ्नित्यादिर्नित्यम्' (6.1.197) इत्यत आदिग्रहणञ्च प्राप्नोतीति; इच्छब्दलोपस्यासिद्धत्वे सति क्षीबशब्दस्याद्व्यच्कत्वात्। न होच्छब्दलोपस्यासिद्धत्वे सति क्षीबशब्दो द्व्यच्को भवति, किं तर्हि? त्र्यच्कः। `क्षीबिकः' इति। `नौद्व्यचष्ठन्' (4.4.7)। `इडागमः प्राप्नोति' इति। तकारलोपस्या सिद्धत्वे सति; आर्धधातुकस्य बलादित्वात्।
`अग्नात्रि [अग्नात्रि इच्छत्रमिति] इच्छत्रम्, पटात्रि उच्छत्रम्' इति। अग्निपटुशब्दयोः सम्बुद्धौ ह्रस्वस्य गुणे कृते एङ् ह्रस्वात् सम्बद्धेः' (6.1.69) इति सम्बुद्धिलोपे `एचोऽप्रगृह्यस्यादूराद्धते पूर्वस्यार्धस्यादूत्तरस्येदूत्तौ' (8.2.107) इत्येकारौकारयोः पूर्वस्यार्थस्याकारावशः, स च पुनरुत्तरस्य च यथाक्रममिकारोकारौ। `नित्यस्तुग्न प्राप्नोति' इति। नित्यश्चेष्यते; `पदान्ताद्वा' (6.1.76) इत्यनेन विकल्पेन प्राप्नोति, स चातिष्टः। तस्मात्तुग्विधौ प्लुतविकारः सिद्धो वक्तव्यः। छ इति किम्? अन्यत्र तुग्विधौ प्लुतविकारस्यासिद्धत्वमेव यथा स्यात्--खलं पुनाति ब्रह्मणकुलमिति। क्विप; `ह्रस्वो नपुंसके प्रातिपदिकस्य' (7.1.23) इति तस्य लुक्, `ह्रस्वस्य गुणः (7.3.108), पूर्ववत् प्लुतविकारः। अस्यासिद्धत्वात् खलपु इत्यत्र `ह्रस्वस्य पिति कृति तुक्' (6.1.71) इति तुग्न भवति।
`श्चुत्वं धुटि' इत्यादि। अटश्च्योतति, रट्श्च्योतति' इति। अट रट गतौ' (धा.पा.295,297) इत्याभ्यां क्विप; सुः, हल्ङ्यादिलोपः (6.1.68), `झलां जशोऽन्ते (8.2.39) इति टकारस्य डकारः। तस्मिन् श्च्योततिशब्दे परतः श्चुत्वस्यासिद्धत्वात् धुङ् न प्राप्नोति तस्मात् श्चुत्वं धुट्त्वे कर्त्तव्ये सिद्धं वक्तव्यम्। किमर्थं पुनरयम्' इत्यादि। न त्वस्य सकारस्य क्वचित् क्वचित् श्रवणमस्तीत्यभिप्रायः। `मधुश्च्यत्' इति। तत्करोति तदाचष्टे' (वा.209) इति भधुश्च्युतमाचष्ट इति णिचि कृते `णाविष्ठवत् प्रातिपदिकस्य' (वा.813) इति। णिलोपः, मधुश्च्यित् इति स्थिते ण्यब्लात् पुनरपि क्विप्, `णेरनिटि' (6.4.51) इति णिलोपः। श्चुत्वस्यासिद्धत्वात् `स्फोः संयोगाद्योः' (8.2.29) इति सकारस्य संयोगाद्यस्य लोपः, ततः सयोगन्तस्य लोपः' (8.2.23) इति यलोपः, ततः `चोः कुः' (8.2.30) इति कुत्वम्--मधुगित्येतदिष्टं रूपं भवति। तदर्थं सकारादिः पठ्यतेऽयमित्यभिप्रायः स्यादेतत्। शकारादावप्येतस्मिन्नेतद्रूपं भवत्येव? इत्यत आह--`शकारादौ पुनरेतस्मिन्' इत्यादि। पूर्वं तावद्यकारस्य संयोगान्तस्य लोपः' (8.2.23) इति लोपः, लुप्ते यकारे चकारः संयोगान्तो जात इति तस्यापि लोपः, ततः शकारस्य व्रश्चादिसूत्रेण (8.2.36) षत्वे सति `झलां जशोऽन्ते' (8.2.39) इति षकारस्य डकारे मधुड्त्यिपि नित्यं स्यात्।
`बभणतुः, बभणुः' इति। `अण रण भण' (धा.पा.444,445,447) इत्यस्माल्लिट्, तस्य तावद्द्विर्वचने `अभ्यासे चर्च' (8.4.54) इति जश्त्वम्--बकारः, तस्यासिद्धत्वादनादेशादिरेवायमिति, `अत एक हल्मध्येऽनादेशादेलिटि' (6.4.120) इत्येत्त्वं प्राप्नोतीति। `विचिच्छित्सति' इति। छिदेः सन्, द्विरवचनं छिदत्यस्य, `अभ्यासे चर्च' (8.4.54) इति चर्त्वं चकारः, तस्य सिद्धत्वादभ्यासे परे चिशब्दस्य `छे च' (6.1.73) इति तुग्न भवति। `उचिच्छिषति' इति। `उछी विवासे' (दा.पा.216), सन्, अजादेर्द्वितीयस्य (6.1.2) इत्युच्छेरन्तरङ्गत्वात् तुकि कृते त्छिस्शब्दो द्विरुच्यते, तत्र `खर्पूर्वाः खयः' (वा.878) इति छकारः शिष्यते, पूर्ववच्चर्त्वम्, तस्य सिद्धत्वादुकारस्य तुग्न भवति।
`सयँय्यन्ता, सवँव्वत्सरः' इत्यादि। समित्येतस्य यन्तेत्येतस्मिन् परतः वत्सरशब्दे च परतः, यल्लोकं तल्लोकमित्यत्रापि यत्तदोर्द्वितीयैकवचनान्तयोर्लोकशब्दे परतो मोऽनुस्वारे (8.3.23), तस्य `अनुस्वारस्य ययि परसवर्णः' (8.4.58) इति परसवर्णे आन्तर्यतः सानुनासिके ययि कृते तस्यासिद्धत्वात् `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इति वर्त्तमाने `अनचि च' (8.4.47) इति यरो द्विर्वचनं न प्राप्नोति। ततश्च पक्षे त्रयाणां यकारादीनां द्वित्वं न स्यात्।
`पदाधिकारश्चेत्' इत्यादि। यदि लत्वादिषु `पदस्य' (8.1.16) इति नानुवर्त्तते, तदा पदस्य द्विर्वचनमपदस्य द्विर्वचनेन तुल्यत्वाद्द्विर्वचनस्य् बहिरङ्गत्वम्, लत्वादीनाञ्चान्तरङ्गत्वम्। `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इति लत्वादिषु कर्त्तव्येषु द्विवैचनसिद्धत्वात् [`द्विर्वचनस्यासिद्धम्'--प्रा.मु.पाठः। द्विर्वचनेनेति सिद्धत्वात्--का.मु. पाठ]`पूर्वत्रासिद्धम्' (8.2.1) इत्येतन्न प्रवर्त्तते, ततश्च लत्वादिभिरेव तावद्भवितव्यम्, तेषु सत्सु पश्चाद्द्विर्वचनेनेति सिध्यत्येवेष्टम्। पदाधिकारे सति लत्वादीनामपि बहिरङ्गत्वादसत्या बहिरङ्गपरिभाषया (व्या.प.42) तेषु सत्सु द्विर्वचनं सिद्धम्। लत्वादयस्त्वस्मिन् कर्त्तव्येऽसिद्धाः, पूर्वत्रासिद्धत्वात् (8.2.1); ततश्च पूर्वं द्विर्वचने कृते पश्चाल्लत्वादिषु विधीयमानेषु परतश्चानिष्टमपि प्रसज्येत। तस्माद्यदि पदाधिकारः ततो लत्वादीनि सिद्धानि वक्तव्यानि। `गलो गलः' इति। `मृ निगरणे' (धा.पा.1410)। `नुन्नः' इति। `मुदविव' (8.2.56) इत्यादना नकारः, पक्षे तकारश्च। `अभिनोऽफभिनः' ति। भिदेर्लङ्, सिप्, श्नम्, हल्ङ्यादिलोपः, (6.1.68) `सिपि धातोरुर्वा' (8.2.74), `दश्च' (8.2.75) इति वा रुत्वं पूर्ववदेव `अतो रोरप्लुदादप्लुते' (6.1.113) इत्युत्वम्। `आद्गुणः' (6.1.87)। `मातृष्ष्वसा, पितृष्वसा' इति। `मातुःपितृभ्यामन्यतरस्याम्' (8.3.85) इति पक्षे षत्वम्। `माष वापाणि' इति। `वा भावकरणयोः' (8.4.10) इत्यनुवर्त्तमाने `प्रातिपदिकान्तनुम्बिभक्तिषु' (8.4.11) इति पक्षे णत्वम्। `वाङ्नयनम' इति। `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इति पक्षेऽनुनासिकः। `वाक्छ्यनम्' इति। `झयो होऽन्यतरस्याम्' (8.4.62) इति वर्त्तमाने `शश्छोटि' (8.4.63) इति वा छत्वम्। `लत्वादीनाम्' इत्यादि। एतेनासिद्धत्वे सति लत्वादीनां यो दोषस्तं दर्शयति। लत्वादीनामसिद्धत्वात् पूर्वं द्विर्वचने कृते सत्युत्तरत्र काले विकल्पविधित्वादयमर्थः प्रवर्त्तमानो यथा पूर्वत्र वर्त्तते, तथा नियोगातः परत्रापि न प्रवर्त्तत [`प्रवर्त्तेत'--का.मु.पाठः] इत्यनियोगो लभ्यते; नियमकारणाभावात्। ततश्चानिष्टो विकल्पः स्यात्--पूर्वपरयोरेकत्र प्रवृत्तेः, अपरत्राप्यप्रवृत्तेः। नेषेटोऽनिष्टो विकल्पः। तथा सति गरो गलः, गलो गर इत्येवमाद्यनिष्टमापद्यते। तत्र `न' इत्येतावदनिष्टविषये सूत्रं कर्त्तव्यम्। किमर्थम्? अनिष्टविषये पूर्वत्रासिद्धत्वस्य प्रतिषेधार्थम्। यत्र पूर्वत्रासिद्धत्वस्यानिष्टविषयः। ततः `भु ने' इत्येतदध्यत्र वचनेऽनुवर्त्तते। यद्येदम्, किमर्थमिदम्, पूर्वसूत्रेणैव सिद्धा

प्रतिषेधः? सर्वत्र तत् सूत्रं नास्तीति ज्ञापनार्थम्। तेन यत्रासिद्धत्वमिष्यते तत्रैदासौ प्रवर्त्तते। तदन्यत्र विपर्ययस्तु न भवति; योगविभागादस्मिन् सूत्रे।।

4. उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य। (8.2.4)
`उदात्तयणः, स्वरितयणश्च' इति। उदात्तस्थाने यो यण स उदात्तयण; स्वरितस्थाने यो यण् स स्वरितयणित्यर्थः। `कुमार्यौ, कुमार्यः' इति। अत्र `अनुदात्तौ सुप्पितौ' (3.1.4) इत्यौजसावनुदात्तौ, तयोरुदात्तयणोः परयोः स्वरितो भवति। `उदात्तनिवृत्तिस्वरेण' इति। उदात्तलोपनिमित्तस्वरः पूर्वमुदात्तस्य लोपो यस्मात्, स पुनरुदात्तनिवृत्तिस्वरः `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इत्यत्र यो विहिसः स [नास्ति--का.मु. पाठे] वेदितव्यः।
`कृत्स्वरेणान्तोदात्तौ' इति। `ल्व्या प्व्या' इति। लूपूभ्यां धातुस्वरेणान्तोदात्ताभ्यां क्विप्, `उपपदमतिङ्' (2.2.19) इति समासः। `गतिकारकोपपदात् कृत्' (6.2.139) इति कृदन्तस्योत्तरपदस्य प्रकृतिभावदिधानादेतौ कृत्स्वरेणान्तोदात्तौ भवतः। `उदात्तयणआदेशश्च' इति। इहनेन सूत्रेणानुदात्तयोदात्तयणः परस्य स्वरितो विधीयते, स्वरितयणश्च परसय सप्तम्येकवचनस्य पूर्वेण प्रकारेण स्वरितो विधीयत इति दर्शयति। `तस्य यो यण्' इति। तस्येत्यनेन सप्तम्येकवचनस्य परामर्शः। `आशाशब्दाकारस्यानुदात्तस्य' इति। `आशाया अदिगारव्या चेत्' (फि.सू.1.18) इत्याशाशब्द आद्युदात्तः, तेन `अनुदात्तं पदमेकवर्जम्' (6.1.158) इत्याकारस्यानुदात्तत्वम्।
`ननु च' इत्यादि। सप्तम्येकवचनस्य `उदात्तयणः' इत्येवमनेन सुत्रेण यत् स्वरितत्वं विहितं तत् षाष्ठिकयणादेशे कर्त्तव्येऽसिद्धम्, ततश्च नैवायं स्वरितस्य स्थाने यणादेश इति सकृल्ल्व्याशा खलप्व्यशेत्यत्र स्वरितत्वं न भवतीत्यभिप्रायः। `आश्रयात्' इत्यादि। आहायम्--स्वरितयण इति; न क्वचित् सिद्धः स्वरितः। तत्राश्रयात् सिद्धत्वं भविष्यति, यथा `अतो रोरप्लुतादप्लुते' (6.1.913) इत्यत्र रुत्वस्य।
`यद्येवम्' इत्यादि। एतेनाश्रयात् सिद्धत्वे समाश्रोयमाणेऽतिप्रसङ्गमुद्भावयति। `दध्याशा' इति। दधिशब्दः `नब्विषयस्यानिसन्तस्य' (फि.सू.2.26) इत्याद्युदात्तः, शेष स्यानुदात्तत्वम्, `उदात्तादनुदात्तस्य स्वरितः' (8.4.66) इति धकारात्परस्येकारस्य स्वरितत्वम्। तस्याश्रयात् सिद्धत्वे तत्स्थानिकाद्यण उत्तरस्याशाशब्दाकारस्य स्वरितत्वं स्यात्। `तस्मात्' इत्यादि। यत एवमाश्रयात् सिद्धत्व आश्रीयमाणेऽयमतिप्रसङ्गो भवति; तस्मादयमेव यण्स्वरो योऽनेन सूत्रेण (8.2.4) विधीयते, तस्य यणादेशे कर्त्तव्ये सिद्धत्वं वक्तव्यम्। वक्तव्य मित्यस्य व्याख्यानमर्थः। तच्च पूर्ववदेव योगादिभागमाश्रित्य कर्त्तव्यम्।
`केचित्तु' इत्यादि। यद्येवमित्यादिना योऽतिप्रसङ्गदोष उद्भावितः, तं केषाञ्चिन्मतेन परिहरति। अनिष्टेऽपि विषये प्रवृत्तिरतिप्रसङ्गः। न च `उदात्तादनुदात्तस्य स्वरितः' (8.4.66) इत्यनेनोदात्तात् परो यः स्वरितो विधीयते तस्याश्रयात् सिद्धत्वमानिष्टम्; यस्मादुदात्तात् परो यः स्वरितयण् तत्परस्यानुदात्तस्य स्वरितत्वम्, ततः स्थानित्वाद्यणः परस्याशाशब्दाकारस्य स्वरितत्वं तैत्तिरीयके शाखान्तरे पठ्यते। तदनुदात्तत्वं पुनरग्निशब्दसयाकारस्य; तस्य प्रातिपदिकस्वरेणान्तोदात्तत्वात्। `तथा ब्राह्मणेऽपि इति। [इति-नस्ति--प्रा.मु.पाठे] तदेकदेशविशेषो ब्राह्मणशब्देनेह विवक्षितः। `दध्याशयति' इति। अश्नोतेर्णिजन्तस्य धातुस्वरेण चित्स्वरेण वान्तोदात्तादकारोऽनुदात्तः। तस्य स्वरितयणः परस्य ब्राह्णे स्वरितत्वं पठ्यते।
`यथा तु' इत्यादि। एतेन तमेवातिप्रसङ्घं समर्थयते। वार्तिककारेणोक्तम्--`आक्षयात् सिद्धमिति चेदुदात्तात् स्वरिते दोषः' इति। अस्यायमर्थः--यद्याश्रयात् स्वारतस्य सिद्धत्वमुदात्तात् परो यः स्वरितस्तस्य यो यण् ततः परस्यानुदात्तस्य स्वरितत्वमिष्टं स्यात्, तत्र दोषः। तेनानेन सूत्रेण स्वरितत्वं न भवतीति स्थितम्। अनेन हि वार्तिकेन--उदात्तात् परो यः स्वरितयण् तस्मात्परस्यानुदात्तस्य स्वरती भवतीत्येषोऽर्थो न प्रतीयते। तस्मादेतच्च न। यथा भाव्यं तथोदात्तस्यानेन स्वरितयणः परस्यानुदात्तस्य स्वरितो न भवतीति सिद्धं भवतीति। `तथा' इत्यादिनानन्तरमेवार्थं द्रढयति। भाष्ये हि `स्वरितग्रहणं न करिष्यते' इत्यादिना यन्थेन स्वरितग्रहणासिद्धत्वे सूत्रे प्रत्याच्याते। एवञ्च तत्प्रत्याल्यानमुपपद्यते, यद्युदात्तात् स्वरितयणः परस्यानुदात्तस्य स्वरितत्वं नेष्यते; अन्यथा तन्निमित्तस्य स्वरितस्येष्टौ सत्यां प्रत्याख्यानमुपपन्नमेव न स्यात्। किं [`किं' नास्ति--प्रा.मु.पाठेः] पुनर्भाष्ये स्वरितयणो ग्रहणं प्रत्याख्यायते, यावता तस्मिन् प्रत्याख्याते सकुल्ल्व्याशेथ्येवमादावनुदात्तस्य स्वरितो न सिध्यति? इत्यत आह--`सकृल्ल्व्याशेत्येमादौ' इत्यादि। उदात्तयण् पुनरत्रोकारवकारेको यकारः। ननु च योऽसौ सप्तम्येकवचनस्य स्थाने जायते तेन व्यवधानान्न सिध्यति? इत्यत आह--`स्वरितयण्' इत्यादि। अत्रैव कारणमाह--`स्वरविधौ' इत्यादि। इतिकरणो हेतौ।
यदि स्वरितग्रहणन्तरेणापि सिध्यति, कस्मात् सूत्रे तद्ग्रहणं क्रियते? इत्यत आह--`तत्तु क्रियते' इत्यादि। `अचः परस्मिन् पूर्वविधौ' (1.1.57) इत्यस्य हि--पूर्वस्माद्विधौ कर्त्तव्येऽजादेशः स्थानिवद्भवतीत्येषोऽर्थोऽभिमतः। उदात्तयणः परस्यानुदात्तस्य स्वरितविधौ कर्त्तव्य सप्तम्येकवचनस्थाने यो यणादेशस्तस्य स्थानिवद्भावादिकारेण व्यवधानमस्ति; व्यञ्जनस्य स्वरविधावविद्यमानवद्भावात् (व्या.प.37)। तेन व्यवधानं सति सकृल्ल्व्याशेत्यत्र `उदात्तयणः' इत्येव न सिध्यतीति स्वरितग्रहणं क्रियते। ननु च `नपदान्तरद्विर्वचन' (1.1.58) इत्यादिना स्वरविधौ प्रतिषिध्यते स्थानिवद्भावः। तत्कुतो व्यवधानम्? इत्यत आह--`स्वरदीर्घयलोपेषु' इत्यादि। अचो हि लोपादेशस्य स्वरविधौ [अयं भागः का.मुद्रिते नास्ति] स्थानिवद्भावः प्रतिषिध्यते। तथा हि तत्रोक्तम्--`स्वरदीर्घयलोपेषु[अयं भागः का.मुद्रिते नास्ति] लोपाजादेशो [लोपादेशो--का.मुद्रितपठिः] न स्थानिवद्भवतीति वक्तव्यम्' (1.1.58.वा.1) ति। न चात्राचो लोपादेशः, किं तर्हि? यणादेशः तस्मान्नास्ति स्थाविद्भावप्रतिषेधः।
`वैद्याशा' इति। विदस्यायत्यमिति `अनृष्यानन्तर्ये (4.1.104) इत्यादिना विदादित्वादञ्, तदन्तात् `शाङ्गरवाद्यञो ङीन्' (4.1.73) इति ङीन्। अत्र नित्त्वादाद्युदात्तत्वे कृते शेषस्यानुदात्तत्वमिति बैद्याशाशब्देऽचानुदात्तस्थाने यण्, नोदात्तस्य, नापि स्वरितस्य। `अत्र' इति। `अयमाद्युदात्तो लित्स्वरेण' इति। `सप्तम्यास्त्रल्' (5.3.10) इति त्रल्प्रत्ययान्तत्वात्। `हलि लोः' (7.2.113) इतीद्रूपस्य लोपः।।

5. एकादेश उदात्तेनोदात्तः। (8.2.5)
`अनुदत्तस्य' इति। उदात्तेन सहानुदात्तस्य यस्मिन्नेकादेशः स उदात्तः स्यात्, न तु स्वरितः। स्वरिते प्राप्त इदमारभ्यते। उदाहरणेष्वग्निप्रभृतयः प्रातिपदिकस्वरेणान्तोदात्ताः (फि.सू.1.1) विभक्तिस्तु `अनुदात्तौ सुप्तितौ' (3.1.4) इत्यनुदात्ता। `अग्नी, वायू' इति। `प्रथमयोः पूर्वसवर्णः' (6.1.102) इति दीर्घः। `वृक्षी, प्लक्षौ इति। `वृद्धिरेचि' (6.1.88) इति वृद्धिः।
`पचन्ति, यजन्ति' इति। `अतो गुणे' (6.1.97) पररूपत्वम्। `द्वयोरनुदात्तयोरयमेकादेशः' इति। ननु च `उदात्तादनुदात्तस्य स्वरितः' (8.4.66) इति शबकारस्य स्वरितत्वे कृते स्वरितानुदात्तयोरयमेकादेशः, तत्कथं द्वयोरनुदात्तयोरिति? एवमाह--`पररूपे कर्त्तव्ये स्वरितस्यासिद्धत्वात्'।।

6. स्वरितो वाऽनुदात्ते पदादौ। (8.2.6)
`सूत्थितः' इति। `कुगतिप्रादयः' (2.2.18) इति समासः। `अत्र सुशब्दः कर्मप्रवचनीयः' इति। अनेन सुशब्दस्य गतित्वमपनयति। गतित्वे हि सति `गतिर्गतौ' (8.1.70) इति निघातः स्यात्, ततश्चोदात्तेनानुदात्तस्यायमेकादेशो न स्यात्। `प्रादिसमासे' इत्यादि। सुशब्द आद्युदात्तः। तत्र हि प्रादिसमासे कृते `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना पूर्वपदप्रकृतिस्वरत्वादाद्यूदात्तत्वं भवति। अतस्तेन प्रकृतिस्वरत्वेन हेतुनायमादेशः, यतोऽकः सवर्णदीर्घत्वमनुदात्ते पदादौ भवति। सुशब्दस्य ह्याद्युदात्तस्य प्रकृतिस्वरत्वे सति शेषस्यानुदात्तभावोपपत्तेः। ननु `प्रादिसमासे [`प्रादिप्रसङ्गे' इति वातिकपाठः] कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः' (वा.96) इत्युक्तम्, तत्कथमिह प्रादिसमासः? नैष दोषः; तस्य प्रतिधेधस्यानित्यत्वात्। अनित्यत्वं तु सुशब्दस्य सुषामादिषु (8.3.98) प्रयोगाद्विज्ञैयम्। तस्य हि तत्र `उपसर्गात्सुनोति' (8.3.65() इत्यादिनैव सिद्धेऽनुपसर्गार्थः पाठः। अनुपसर्गत्वं च सोः `सुः पूजायाम्' (1.4.94) इति कर्मप्रवचनीयत्वात्। अथ वा स्वतिभ्यामन्ये ये प्रादयस्तत्रायं प्रतिषेधः। तथा हि तत्र `स्वती पूजायाम्' (का.2.2.18) इति पूजायां स्वतिशब्दयोः प्रातिसमास उक्तः पूजायां च तयोः कर्मप्रवचनीयत्वं विवक्षितम्।
`दीक्षते' इति। विशब्दो निपरातस्वरेणाद्युदात्तः। अत्रापि `तिङ्ङतिङः' (8.1.28) ति निघाते कृत एकादेश इत्यनुदात्ते पदादौ भवतीति सम्बन्धनीयम्।
`वसुकोऽसि' इति। वसुशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, ततः सुप्रन्ययान्तत्वात् कस्य ह्यसिशब्दे परतः `अतो रोरप्लुतादप्लुते' (6.1.113) इत्युत्वम्, तस्य स्थानिवद्भावेन सुप्त्वादनुदात्तत्वमम्, पूर्वेण सह `आद्गुणः' (6.1.87) स च पूर्वसूत्रे (8.2.5) णान्तोदात्तः। `असि' इति। `तायस्त्योर्लोपः' (7.4.50) इति सकारलोपे कृते लटि सिपि रूपम्। अत्र `तिङ्ङतिङः' (8.1.28) इति निघातेनाकारोऽनुदात्तः, तसयाकारेण सह `एङः पदान्तादति' (6.1.109) इति परपूर्वत्वम्। `स्वरितग्रहणम्' इत्यादि। कथं पुनरसति स्वरितग्रहणे स्वरित आदेशो भवति, पुनः स्वरितग्रहणं विस्पष्टार्थम्; न पुनः पक्षे स्वरितविधानार्थम्? इत्यत आह--`उदात्ते हि' इत्यादि। उदात्ते हि विकल्पिते यस्मिन् पक्षे स न भवति तस्मिन्नुदात्तानुदात्तयोरन्तरतमो यस्तेनैव भवितव्यम्, स च स्वरित एव। अतोऽन्तरेणापि स्वरितग्रहणं स्वरित एव भविष्यति।

7. नलोपः प्रातिपदिकान्तस्य। (8.2.7)
`प्रातिपदिकस्य' इति, `पदस्य' इति समानाधिकरणे षष्ठ्यौ।

`अहन्नहिम्' इति। हन्तेर्लङ्, तिप्, हल्ङ्यादिलोपः' (6.1.68) अदादित्वाच्छपो लुक्। `अधातुः' (1.2.45) इति प्रतिषेधादिह प्रातिपदिकत्वं नास्ति। `राजा, राजानौ, राजानः' इति। असर्वनामस्थाने पदसंज्ञाप्रतिषेधादिह (1.4.17) प्रातिपदिकस्यावयवोऽन्तो नकारो भवति। `प्रातिपदिकान्तस्य' इति। षष्ठीतत्पुरुषेऽत्रोत्तरपदप्रधानत्वादस्यैव पदस्य तद्विशेषणं युक्तम्, न तु गुणभूतस्य। प्रातिपदिकेनान्तशब्देन चात्र नकारो विशेषितः, स च नकारः प्रातिपदिकस्यान्तर्भूतः। `पदस्य' इति। अनिष्टयोरपि व्यधिकरणयोः पदप्रातिपदिकान्तर्योर्विशेषणविशेष्यभावेन भवितव्यम्--प्रातिपदिकान्तस्येति, पदस्येति। पदस्य योऽवयवः सोऽपि प्रातिपदिकस्येत्यर्थः। एवञ्च सति क्रियमाणेऽप्यन्तग्रहणे राजानौ, राजान इत्यत्र प्राप्नोत्येव नलोपः, भवति ह्यत्रापि पदावयवः प्रातिपदिकस्यान्तो नकारः?--इत्येतच्चोद्यमपाकर्तुमाह--`प्रातिपदिकग्रहणमसमस्तमेव' इति। ततश्च तस्य `पदस्य' इत्येतत् समानाधिकरणविशेषणं युक्तमेवेत्यभिप्रायः। यदि तर्ह्यसमस्तमेव प्रातिपदिकग्रहणं षष्ठ्याश्रयणं प्राप्नोतीत्यभिप्रायः? इत्यत आह--`सुपां सुलक्' इति। अनेन यत् षष्ठ्यां लुक् तेन लुका निर्दिष्टं प्रातिप्रार्तिपदिकग्रहणम्, अतो न भवति षष्ठ्याः प्रसङ्गः।
`अहः' इति। `स्वमीर्वपुंसकात्' (7.1.23) इति सोर्लुक्, `रोऽसुपि' (8.2.69) इति नकारस्य रेफः। प्रत्ययलक्षणेनाह्नः (1.1.62) सुप्परता नास्ति; `लुमता लुप्ते प्रत्ययलक्षणं नास्ति' (1.1.63) इति वचनात्। `अहोभ्याम्, अहोभिः' इति। `अहन्' (8.2.68) इति रुत्वम्, `हशि च' (6.1.114) इत्युत्वम्, `आद्गुणः' (6.1.87)। ननु च प्राप्तिपूर्वकः प्रतिषेधो भवति; इह च रेफरुत्वयोः कृतयोर्नलोपस्य प्राप्तिरेव नास्ति, नकाराभावात् तत्किं प्रतिषेधेन? इत्यत आह--`अहन्' (8.2.68) `रोऽसुपि' (8.6.9) इति आदिश्येते। तद्रेफो रुत्पञ्च द्वयमप्येतदनवकाशम्, अतो लोपे न भवति; अन्यथा हि तयोर्विधानमनर्थकं स्यादित्यत आह--`सावकाशम्' इत्यादि। सम्बुद्धौ हि लोप न; `न ङिसम्बुद्ध्योः' (8.2.8) इति प्रतिषेधात्। अतस्तत्रोभयमप्येतत् सावकाशम्। `हे दीर्घाहो निदाघ' इति। दीर्घाण्यहानि यस्मिन्निदाघ इति बहुव्रीहिः, तत्सम्बुद्धिः, हल्ङ्यादिलोपः (6.1.68)। सत्यपि लोपे प्रत्ययलक्षणेन

सुप्परतास्ती ति `रोऽसुपि' (8.2.69) इत्येतन्न प्रवर्त्तते, `अहन्' (8.2.68) इति रुत्वमेव भवति।

`अहन्' इति। `प्रथमैकवचनान्तम्' इत्यादि। तत्र `अहन्' (8.2.68) इति रुत्वविधौ यदुपादीयते तदावर्त्तते--इत्येतावति वक्तव्ये `अहन्' इत्यनेन सूत्रेण केवलं रुत्वमादेशो न विधीयते, अपि त्वावृत्तिन्यायादहन्नित्येतच्छब्दरूपमन्वाख्यायते--इत्यत्रोपपत्तिप्रदर्शनार्थम् `प्रथमैकवचनान्तमकृतनलोपम्' इत्युक्तम्। यदि ह्यादेशनात्रमहन्नित्यनेन विधीयते, तदादेशसम्बन्धे षष्ठ्या भवितव्यमिति षष्ठ्युपादीयेत, न प्रथमा। प्रथमया ह्युपादीयमानं कृतनकारलोपमुपादीयेत, नकारलोपलक्षणस्य भावात्; न चैव कृतम्; तस्मात् प्रथमान्तस्याकृतनकारलोपस्योपादानदवसीयते--अहन्निति रूपस्यान्वाख्यानं क्रियत इति। अन्वाख्यायते--साधुत्वेन प्रतिपाद्यत इत्यर्थः। किमर्थम्? नलोपाभावार्थम्। `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इत्यनेन लोपो मा भूदित्येवमर्थम्।।

8. न ङिसम्बुद्ध्योः। (8.2.8)

`चर्मन्' इति। `सुपां सुलुक्' (7.1.39) इति ङेर्लुक्। ननु च सुराजन्निति प्रातिपदिकसंज्ञा हि विद्यते, प्रत्ययलक्षणेन (1.1.62) `अप्रत्ययः' (1.2.45) इति न प्रतिषेधात्। `आर्द्रे चर्मन्' इति। अत्र तु न केवल प्रातिपदिकसंज्ञा पूरवोक्तादेव हेतोर्नास्ति; प्रत्ययलक्षणेन प्रवृत्तया भसंज्ञया बाधितत्वात्। अतो नलोपप्राप्तिर्मास्त्येवेत्यर्थः।

कथं प्रतिषेधः? इत्यत आह--`एतस्मादेव' इत्यादि। `भसंज्ञा च न भवति' इति। अत्राप्येतस्मादेव प्रतिषेधवचनात् प्रत्ययलक्षणेन च ज्ञाप्यत इति सम्बध्यते। `तथा च' इत्यादिना ज्ञापनप्रयोजनं दर्शयति तदेवमेतस्मात् प्रतिषेधादर्थद्वयं ज्ञाप्यते। एवञ्च कृत्वा--राजपुरुष इत्यत्र प्रातिपदिकसंज्ञायां सत्यां नलोपश्च भवति। भसंज्ञायामसत्यां `अल्लोपोऽनः' (6.4.134) इत्यलोपश्च न भवति। न भसंज्ञाभावन्चेत्यस्येह `यथोद्देशं संज्ञापरिभाषम्' (व्या.प.59) इत्यस्मिन् दर्शने प्रयोजनं वेदितव्यम्। `कार्यकालं हि संज्ञापरिभाषम्' (व्या.प.58) इत्यस्मिन् दर्शने भसंज्ञायामङ्गकार्यं भवतीति `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणप्रतिषेधादेव भसंज्ञा न भवतीति नार्थस्तत्र भसंज्ञाया अभावज्ञापनेन।

`ङावुत्तरपदे' इत्यादिनायं ङौ परतो नलोपप्रतिषेधस्य प्रतिषेध उक्तः। तस्योत्तरपदे परतो यो ङिस्तत्र प्रतिषेधो वक्तव्यः। `वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--`स्वरितो दानुदात्तं पदादौ' (8.2.6) इत्यतः `वा' इत्यनुवर्त्तते, सा च व्यवस्थितविभाषा, तेन ङावुत्तरपदे न भविष्यतौति। `चर्मणि तिला अस्य चर्मतिलः' इति। वैयधिकरण्येऽपि गमकत्वात् समासः। ननु चात्यल्पमिदमुच्यते--ङावुत्तरपदे प्रतिषेधो वक्तव्य [अयं भागः का. मुद्रितपूस्तके नास्ति] इति। सम्बुद्धावपि ह्युत्तरपदे प्रतिषधो [अयं भागः का. मुद्रितपूस्तके नास्ति] वक्तव्य एव; अन्यथा हि हे राजन् वृन्दारकेति विगृह्य `वृन्दारकनागकुञ्जरैः' (2.1.62) इति समासे कृते हेराजन् वृन्दारकेत्यत्र नलोपो न स्यात्? इत्यत आह--`हे राजन् वृन्दारकेत्यत्र तु' इत्यादि। समानार्थेन वाक्येन समासेन भवितव्यम्, एवं हि सामर्थ्यं भवति, नान्यथा। तथा चोक्तम्--ग्रहणवाक्यार्थाभिधाने यः शक्तः स समर्थो वेदितव्य इति। यश्चेहार्थो हे राजन् वृन्दारकेति वाक्येन गम्यते, स न ज्ञायते--हे राजवृन्दारकेति समासेन। वाक्येन ह्येकार्थीभावाभावात् सम्बोधनं गम्यते, समासे तु विपर्ययात् समुदायार्थः सम्बोधनम्। तस्माद्राजा चासौ वृन्दारकश्चेत्येवमेव विगृह्य समासः कर्त्तव्यः, ततः सम्बुद्धिः, एवञ्च सम्बुद्ध्यन्तं पूर्वपदम्। हे राजन् वृन्दारकेत्यत्र समासो भविष्यत्येव; ततश्चोत्तरपदे परतः सम्बुद्धेरभावान्नलोपप्रतिषेधस्य प्राप्तिरेव नास्तीति नार्थस्ततप्रतिषेधेन।

`वा नपुंसकानाम्' इत्यादि। नपुंसकलिङ्गानां वा नलोपप्रतिषेधो भवतीत्येतदर्थरूपं व्याख्येयमिति। अत्र व्याख्यानं तु--इहापि वाग्रहणानुवृत्तिं व्यवस्थितविभाषात्वं चाश्रित्य कर्त्तव्यम्।।

9. मादुपधायाश्च मतोर्वोऽयवादिभ्यः। (8.2.9)

मकारान्तान्मकारोपधादवर्णान्तादवर्णोपधाच्चोत्तरस्य मतुपो मकारसय `च' इत्ययमादेशो भवतीत्ययमर्थोऽभिमतः। स एव यथा सम्पद्यते, तथा दर्शयितुमाह--`मतोरिह' इत्यादि। अत्र मतुप कार्यित्वेनीपात्तः। स च नास्त्यन्तरेण प्रातिपदिकत्वम्; तद्विधौ प्रातिपदिकाधिकारात् (4.1.1)। तस्मान्मतुपः पूर्वं सामर्थ्यलभ्यं प्रातिपदिकम्, तन्मकारावर्णाभ्यां मादिति विशिष्यते--मकारोऽन्तो यस्यं, अवर्णोऽन्तो यस्येति। मकारावर्णविशिष्टा या चोपधेति सामर्थ्यम्। कथम्? पूर्वं प्रातिपदिकान्तं विशिष्यते इति सम्बन्धनीयम्। मकारेण विशेषणेन, अवर्णेन विशेषणेन च विशिष्टा योपधा सा च विशिष्यते--मकार उपधा यस्य, अवर्ण उपधा यस्येति। मकारावर्णविशिष्टस्येति मतुपो विशेषणे `उपधायाश्च' इत्यत्र मा भूदिति? अस्यापेक्षितस्वल्लभ्यत इत्ययमर्थो भवतीति। इतिकरणो हेतौ। यस्मात् सामर्थ्यप्राप्तं प्रातिपदिकमेव विशिष्यते, तस्मादयं वक्ष्यमाणोऽर्थः सूत्रस्यापि भविष्यतीति। `किंवान्' इति। किमस्यास्तीति मतुप्; `उगिदचाम्' (7.1.70) इत्यादिना नुम्, हलङ्यादिसंयोगान्तलौ (6.1.68; 8.2.23), `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः।

`नार्मतम्' इति। नरोऽस्य सन्तीति नृमान्, नृमत इदमिति `तस्येदम्' (4.3.120) इत्यण्, तत्र वृद्धौ कृतायां दार्मतमित्यत्रावर्णोपधमतुप् प्रातिपदिकं जातमिति वत्वं प्राप्नीति, तत् कस्मान्न भवति? इत्याह--`इह' इत्यादि। नार्मतमित्यत्र ह्यवर्णोपधमतुप्त्वं वृद्धिरेव, सा च बाह्मतद्धितनिमित्ता। अतोऽवर्णौपधत्वस्य बहिरङ्गत्वम्, वत्वं तु प्रवृत्तिनिमित्तमिति तस्यान्तरङ्गत्वम्, असिद्धं च बहिरङ्गमन्तरङ्गे (व्या.प.42) इति, तेन नार्मत मित्यत्र वत्वं न भवति।।

10. झयः। (8.2.10)

`अग्निचित्वान्' इति। `तसौ मत्वर्थे' (1.4.19) इति भसंज्ञा। तेन पदसंज्ञानिबन्धनं `झलां जशोऽन्ते' (8.2.39) इति जश्त्वं न भवति।।

11. संज्ञायाम्। (8.2.11)
`अहीवती' इति। `नद्यां मतुप्' (4.2.85) इति चातुरर्थिको भतुप्, `शरादीनाञ्च' (6.3.120) दीर्घः।।

12. आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती। (8.2.12)
अथाष्ठीवदिति किमर्थं निपात्यते, यावतोर्वष्ठीवमित्यस्मादेव निपातनात् (5.4.77) एतत्सिद्धम्? एवं मन्यते--द्वन्द्व एवैतन्निपातनमिति तत्रैव स्यात्, इह तु निपातनं क्रियमाणं सर्वविषयं भविष्यतीति। कथं पुनर्ज्ञायते--आसन्दीशब्दः प्रकृत्यन्तरं विद्यते? इत्याह--`तथा चोक्तम्' इत्यादि। यदि तर्हि तत्रैव संज्ञायामिति वत्वे च (8.2.11) सिद्धमासन्दीवदिति, तत्किमर्थमिह पठ्यते? इत्याह--`आसन्दीवत्' इत्यादि। `तत्प्रयञ्चार्थम्' इति।
यदि तर्हि चक्रीवदिति संज्ञायामेतन्निपातनम्, कथं चक्रीवन्ति सदोहविर्धानानि भवन्तीति, न हीयं संज्ञा? इत्यात आह--`चक्रीवन्ति' इत्यादि। छन्दसि ह्ययं प्रयोगः, तत्र `व्यत्ययो बहुलम्' (3.1.85) इति वर्णव्यत्ययेनाकारस्येकारे कृते `छन्दसीरः' (8.2.15) इति मतोर्वत्वे चक्रीवन्तीत्येतत् सिध्यति। तस्माच्छान्दसत्वादेवमेतत् साधुत्वेनानुगन्तव्यम्।
`कक्षीवान्' इति। `हलः'[`हलि च' इति सूत्रम्] (8.2.77) इति दीर्घः। `नलोपाबावार्थम्' इति। `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नकारलोपः प्रापनोति, स मा भूदित्येवमर्थम्। `णत्वर्थं च' इति। `पदान्तस्य' (8.4.37) इति णत्वप्रतिषेधः प्राप्नोति, अतो णत्वार्थञ्च निपातनम्। `मतोर्वा नुडर्थमिति' इति। वाशब्दो विकल्पार्थः। थ वा--नैव नकारलोपाभावार्थं निपातनम्, नापि णत्वार्थम्, किं तर्हि? मतोर्नुडर्थम्। नुटि कृते नलोपे सत्यपि सिध्यत्येवेष्टम्, णत्वप्रतिषेधस्य प्रार्प्नास्त्येव; अपदान्तत्वात्। `अट्कुप्वाङ्' (8.4.2) इति णत्वं भवति।।

13. उदन्वानुदधौ च। (8.2.13)
`उदधावर्थे' इति। यस्मिन्नुदकं धीयते तस्मिन्नर्थं इत्यर्थः। तथा ह्युदके कर्मण्युपपदे `कर्मण्यधिकरणे च' (3.3.93) इति किप्रत्यये कृते `पेषंवासवाहनधिषु च' (6.3.58) इत्युदकस्योदभावे कृत उदधिशब्दो व्युत्पाद्यते। चकारेण `संज्ञायाम्' (8.2.11) इत्यनुकृष्यत इति दर्शयति। `संज्ञायां च' इत्यादि। `उदधावर्थे' इत्यादि। उदधिग्रहणञ्च संज्ञार्थम्। `उदन्दान्' इति। डदकं धेयमास्मिन्नस्तीत्यर्थविवक्षायां मतुप्। `स एव मुच्यते' इति। न तु गङ्गादिः। यदि यस्मिन्नुदकं धीयते [नास्ति--का.मु.पुस्तके] स एव मुच्यते--उदकवान् घट इत्यभिधानं प्राप्नोति, घटेऽप्युदकं धीयत इत्यत आह--`उदकवान् घटः' इत्यादि। इह विवक्षा शब्दव्युत्पत्तेः प्रधानं कारणम्, न वस्तुनः सत्ता। स च येन दधात्यर्थेनोदधिरित्युच्यते, सोऽस्मिन् प्रयोगे घटे न विवक्षितः, किं तर्हि? उदकसत्तायाः सम्बन्धमात्रम्। उदकमस्मिन्नस्तीत्येवन्मात्रं विवक्षितम्। अतो दधात्यर्थस्याविवक्षितत्वाद्घटस्योदधित्वं विद्यमानमप्यसङ्कल्प्यमेवेति नायं निपातनस्य विषयः। तेन घट उदकवानित्युच्यते। यदा तु दधात्यर्थो विवक्ष्यते तदोदन्वानित्येवं वक्तव्यम्।।

14. राजन्वान् सौराज्ये। (8.2.14)
`राजन्वानिति निपात्यते' इति। किमत्र निपात्यते? नलोपाभावः, नुड्वा। `सौराज्यम्' इति। शौभनो राजा यस्मिन् देशे स सुराजा, तद्भावः सौराज्यम्, ब्राह्मणादित्वात् व्यञ्, `नस्तद्धिते' (6.4.144) इति नलोपः। तत्पुनः सौराज्यं यत्र शोभनेन राज्ञा देशस्य सम्बन्धः। `समासकृत्तद्धितेषु सम्बन्धाभिधानम्' (सी.पा.130) इति वचनाद्राजन्वानित्यस्य शब्दस्य देश एव वाच्यः, न सौराज्यम्। स तु देश शब्दात् प्रतीयमानः; सौराज्येनाविनाभावित्वात्। तच्च गमयतीत्याह--`गम्यमाने' इति। `राजन्वान्' इति पुंल्लिङ्गम्। तस्यातन्त्रतां दर्शयितुम्--`राजन्वती पृथिवी' इत्यस्योदाहरणस्योपन्यासः।।

15. छन्दसीरः। (8.2.15)
`हरिवो मेदिनम्' इति। `न मु ने' (8.2.3) इत्यत्रैतद्व्युत्पादितम्। `आरेवानेतु मा विशत्' इति। रयिशब्दस्य `रयेर्मतौ बहुलम्' (दा.665) इति सम्प्रसारणम्, परपूर्वत्वम्, `आद्गुणः' (6.1.87)। अथेह कस्मान्न भवति--सप्तर्षिमन्तं द्यावापृथिवीमन्तम्? इत्याह--द्यौश्च पृथिवी चेति द्वन्द्वे कृते `दिवसश्च पृथिव्याम्' (6.3.30) इति दिवो द्यावादेशः।
`गोर्वान्, धूर्वान्, आशीर्वान्' इति। `गृ शब्दे' (धा.पा.1498), `धुर्वी हिंसार्थः (धा.पा.573), `आङ शासु श्च्छायाम्' (धा.पा.1022), एषां सम्पदादित्वात् क्विप्। गृणातेः `ॠत इद्धातोः' (7.1.100) इतीत्त्वम्, धुर्वेः `राल्लोपः' (6.4.21) इति वकारलोपः, `शास इदङ्हलोः' (6.4.34), इत्यत्र शास इत्त्वे `आशासः क्वावुपसंख्यानम्' (वा.781) इत्याङ्पूर्वस्य शास इत्त्वम्, मतुपि कृते `ससजुवो रुः' (8.2.66) इति रुत्वम्।।

16. अनो नुट्। (8.2.16)
`अक्षण्यन्तः' इति। `अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' (7.1.75), ` छन्दस्यापि दृश्यते' (7.1.76) इत्याङ्; नुट्, अनङी नकारस्य लोपः नुमो णत्वम्। `अस्थन्वन्तम्' इति। अस्थिशब्दस्य णत्ववर्जं पूर्ववदनङादि कर्त्तव्यम्। `शीर्षण्वती' इति। `शीर्षंश्छन्दसि' (6.1.60) निपातितम्। ननु च नुटोऽनन्तरत्वात् तस्यैव वत्वेन भवितुं युक्तम्, न तु तद्व्यवहितस्य मकारस्य, तत्कथमिह नुटो वत्वं न भवति, ततस्तु परस्य न भवति? इत्याह--`नुटोऽसिद्धत्वात्' इत्यादि। अथायं नुट् परत्वादपवाद एव कस्मान्न भवति? भिन्नजातीयत्वात्। समानजातीयकार्यपन्नो हि विशेषः सामान्यस्य बाधको भवति, इह कार्यभेदोऽस्ति;

वत्वस्यादेशत्वान्नुटस्थ्वागमत्वादिदिति नास्ति वाध्यबाधकभावः, नुटः परादिकरणं णत्वं यथा स्यादित्येवमर्थम्; अन्यथा हि `पदान्तस्य' (8.4.37) इति प्रतिषेधः स्यात्।।

17. नादघस्य। (8.2.17)
`सुपथिन्तरः' इति। शोभनः पन्था इति प्रादिसमासः--सुपन्थाः, सुशब्दात् `न पूजनात्' (5.4.69) इति प्रतिषेधात् `ऋक्पूरब्धूः' (5.4.74) इत्यादिना समासान्तो न भवति, तरप्। `दल्युहन्तमः'। दस्युं हतवानिति क्विप्, तदन्तात् तमप्।
`भूरिदावत्तरः' इति। भूरि वदातीति `आतो मनिन्' (3.2.74) इत्यादिना वनिप्, तदन्तादुत्तरपदस्य तुट्।
`रथीतरः' इति। रथिन्नित्येतस्मान्मत्वर्थीयेनिप्रत्ययान्तात् तरप्, नकारस्य लोपः, ईकारः अथ वा--नकारस्यैवेकारः, सवर्णदीर्घत्वम्।।

18. कृपो रो लः। (8.2.18)
इह र इति वर्ण उपादीयते, ल इत्यस्यादेशस्तादृश एव; ततश्च केवलो यो रेफवरणो नावयवभूतस्तस्यैव तथाभूत एव लकारादेशः स्यात्, ऋकारस्य तु लकारो न स्यात्; तयोः स्थान्यादेशभावेन सूत्रोऽनुपादानात्। ततश्च क्लृप्तः, क्लृप्तवानित्यादि न सिध्येदिति यश्चोदयेत्, तं प्रत्याह--`र इति सामान्यमुपादीयते' इति। वर्णत्वावर्णत्वकृतं भेदमुत्सृज्य यत् सामान्य वर्णात्मिकायामवर्णात्मिकायां च रेफव्यक्तौ वर्त्तते यतस्तयोर्वर्णत्वावर्णत्वादिभेदभिन्नयोर्द्वयोरपि र इत्यभिधानप्रत्ययावभिन्नौ भवतस्तदुपादीयते, न तु वर्णात्मकः--एवं विशेषः। `तेन' इति। सामान्योपादानेन द्वयोरपि ग्रहणं भवतीति। तस्य सामान्यस्य द्वयोरपि भावात् `ल इत्यपि सामान्यमेव' इति। उपदीयत इत्यपेक्षते। अत्रापि तेन यश्चकेवलो लकारो यश्च लृकारस्थः, तयोर्द्वयोरपि ग्रहणमित्येतद्वाच्यम्? पूर्वानुसारेण गम्यमानार्थत्वान्नोक्तम्। `ततोऽयम्' इत्यादि। यत एवं द्वयोरपि रेफयोलकारयोश्च ग्रहणम्, तस्मात् केवलस्य रेफस्य केवलो लकार आदेशो विधीयते। आन्तरतम्यादृकारस्यापि लृकारः। ननु च सत्यपि द्वयोरपि ग्रहणे ऋकारस्य स्थान ऋकारो विधीयत इत्येतन्न लभ्येत, न हि ऋकारस्थो रेफ ऋकारो भवति, किं तर्हि? तदवयवः; तत्र द्वयोरपि ग्रहणे सति ऋकारस्थस्यापि रेफस्य लृकारस्थो लकारस्त त्सदृश एवान्तरतन्याद्भवतीत्येषोऽर्थो लभ्यते, न तु ऋकारस्यापि स्थाने लृकारो भवतीत्येषोऽर्थोऽपि? इत्येतस्य चोद्यस्य निराकरणार्थं `एकदेशविकारहद्वारेण' इत्युक्तम्। एकदेश ऋकारस्यावयवो रेफस्तस्य विकार लृकारावयवो लकारः। अथ वा--एकदेश लृकारस्यावयवो लकारः, स एव विकारः। ऋकारस्य रेफस्यैकदेशविकारः। द्वारम्--मुखम्, उपाय इति यावत्। तेन ऋकारस्य स्थान लृकारादेशो विधीयते। यदि ऋकारलृकारस्थयो रेफलकारयोर्ऋकारलृकाराभ्यां पृथग्भावः सम्भवति। तस्मान्नान्तरीयकत्वादेकदेशविकारद्वारेण समस्तस्यैव ऋकारस्य समस्त एव लृकारादेशो विधीयते। अस्यैवार्थस्य द्रढीकरणायाह--`एवं च' इत्यादि। यत एवमेकदेशविकाद्वारेण ऋकारस्य स्थाने लृकारो विधीयते, एवञ्च `लुटि च क्लृपः' (1.3.110) इत्येवमादीनां ग्रहणम्। तदेवं चोद्यं परिहरता यदुक्तम्--`नुङ्विधिलादेशविनामेष्वृकारः [`ऋकारे'--काशिका, पदमञ्जरी च] प्रतिविधातव्यः' [विधातव्यम्--काशिका, पदमञ्जरी च] (वा.1) इति, तत्रावसरे प्राप्ते लादेशे प्रतिविहितम्। `कल्प्ता, कल्प्तारौ, कल्प्तारः' इति। तृच्, अथ वा लुट्। `चिक्लृप्सति' इति। सन्, `हलन्ताच्च' (1.2.10) इति कित्वाद्गुणाभावः। `क्लृप्तः, क्लृप्तवान्' इति। क्तक्तवत्।
`कृपा' इति। एतत्कथं सिध्यति? यावताऽत्रापि लत्वेन भवितव्यम्? इत्यत आह--`कृपेत्येतत्' इत्यादि। एतेन `क्रप कृपायां गतौ' (धा.पा.771) इत्यस्मात् `षिद्भिदादिभ्यो।ऽङ्' (3.3.104) इत्यङि तत्सन्नियोगेन च सम्प्रसारणे कृते कृपेत्येतद्भवतीति दर्शयन् कृपेत्यस्य रूपस्य लाक्षणिकत्वं दर्शयति। यद्येवम्, ततः किमत्यत्र लत्वं न भवति? इत्याह--`तस्य हि' इत्यादि। यतसतस्य कृतसम्प्रसारणस्य क्रपेः कृपेत्येतद्रूपं भवति, तस्माल्लाक्षणिकत्वम्। अतो लक्षणप्रतिपदोक्तपरिभाषयैव (व्या.प.3) न गृह्यते इति भवति लप्रसङ्गः।
कृपण, कृपीट, कर्पूरादिषु ह्यौपदेशिकमेव कृपेत्येसद्रूपम्, न लाक्षणिकम्। तथा हि `रञ्जे क्वुन्' [`रजः क्युन्' इति द.उ.पाठः `रजेः, रञ्जेः' इति पाठान्तरे] (द.उ.5.24) इति यः क्वुन् विहितः, तस्मिन् बहुलवचनात् कृपेरेव विहिते कृपण इति भवति; `कृतृकृपिभ्यः कीटन्' [`कृतृकृपिकम्पिभ्यः कीटन्' इति द.उ.पाठः `कपिकम्पिभ्यः' इति पाठान्तरम्] (द.उ.5.3) इति कृपेरेत कोटनि विहिते कृपीट इति भवत; `खर्जिपिञ्जादिभ्य ऊरोलचौ' (द.उ.10.10) इत्युरप्रत्यये कृते कर्पूर इति भवतीत्याह--`कृपणकृपीट' इत्यादि। एवं मन्यते--बहुलवचनात् क्रपेरेव क्युन् [क्वुन् प्रा.मु.पाठः] भवति, तत्र चास्य सम्प्रसारणं कृतम्, `कृ-तृकृपिभ्यः कीटन्' (द.उ.5.3) इत्यत्रापि कृपिग्रहणमपनीय क्लृपिग्रहणं करिष्यते, सम्प्रसारणं तु बहुलवचनादेव भविष्यति; `खर्जिपिञ्जादिभ्य ऊरोलचौ' इत्यत्रापि आदिग्रहणे कृपिरेव ग्रहीष्यते, सम्प्रसारणं च पूर्ववदेव भविष्यतीति। यद्यपि कृपणकृपाणेत्येवमादीनि रूपाणि स्युः, तदास्य दोष इति दर्शयितुमाह--`जणादयो बहुलमिति वा' इत्यादि।
अत्यन्तभिन्नरूपयोरभिन्नस्वभावत्वमसम्भावयन् पृच्छति--`किमिदम्' इत्यादि। `समानविषयत्वम्' इति। अभिन्नविषयत्वमेकशब्देनात्र विवक्षितम्, न त्वभिन्नस्वभावत्वमिति दर्शयति। किमर्थं पुनः कृपिमुद्दिश्य लादेशो विधीयते, न कृपिरेवोद्दिश्येत? गु स्थाने लत्वमात्रं कर्त्तव्यम्, तच्चावश्यमुकर्त्तव्यमुपल्कारीयतीत्येवमर्थम्। तथा च--`ऋदुपधाच्चक्लृपि चृतेः (3.1.110) इत्यत्र क्लृपिप्रतिषेधो न कर्त्तव्यो जायते। तेनैवं शक्यम्--इह ह्यचोक्लृपदिति ऋकारलृकारयोः सवर्णसंज्ञादिधानादृकारस्य विधीयमानमुरत्त्वं लृकारस्यापि स्यात्। तथा च लृकारस्याप ऋवर्णः प्रसज्यते; ऋकारान्तं तूपदिश्य लत्वे विधीयमाने तस्यापि लृकारस्य लत्वं सिद्धं भवति।।

19. उपसर्गस्यायतौ। (8.2.19)

इह द्वौ पक्षौ सम्भवतः--अयतिग्रहणं रेफविशेषणमित्येकः पक्षः, उपसर्गस्य विशेषणमिति द्वितीयः। तत्राद्ये पक्षेऽयतौ परत इत्येवामादिको वृत्तिग्रन्थ एवं नेयः--अयतौ परतो यो रेफ उपसर्गस्थस्तस्य लकारादेशो भवतीति। द्वितीये ह्येवं नेयः--अयतौ परतो म उपसर्गस्तस्योपसर्गस्य यो रेफस्तस्य लकारादेशो भवतीति। `प्लायते' पलायते' इति। `अय ण्य' इत्यस्मादनुदात्तेत्त्वादात्मनेपदम्। कथमत्राद्ये पक्षे लत्वं भवति, यावता तस्मिन् कर्त्तव्ये `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावेन भवितव्यम्, ततश्च प्रकृत्युपसर्गयोर्निमागे सत्यवर्णेन व्यवधानद्रेफस्यायतिपरता न सम्भवति? इत्याह--`अत्र योऽयम्' इत्यादि। विभागे विश्लेष इत्यर्थः। एकग्रहणं प्रत्यय इत्यत्र सङ्घाते व्यवधाने लत्वं न भवतीति प्रदर्शनार्थम्। येन हि व्यवधानमेव नाव्यवधानं तेन व्यवधाने वचनाप्रामाण्याल्लत्वेन भवितव्यम्। केन व्यवधानमेवम्? एकेन वर्णेन। सङ्घातेन पुनर्व्यवधानमस्ति नास्ति चेति, तेन व्यवधाने भवति। `तथा च' इत्यादि। एवमाद्ये पक्ष एकेन वर्णेन व्यवधाने लत्वं भवति। न केवल पल्ययत इत्यत्र प्रवर्त्तते यत्र स्यानिवद्भावद्वारेणाशास्त्रीयं व्यवधानम्; यत्रापि तु श्रूयमाणेनैव वर्णेन लौकिकं व्यवधानम्, तत्रापि प्रवर्त्त इत्येषोऽपिशब्दस्यार्थः।

ननु च निरः कुषः' (7.2.46) इत्यत्र निर इति निर्देशेन ज्ञापितमेतत्--निरिति रेफान्तमुपसर्गान्तर मस्तीति, ततश्च निलय इत्यत्र वचनस्यावकाशे सति कथं `येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या.पा.46) इत्युक्तम्? एवं मन्यते--नैकमुदाहरणं सामान्यलक्षणं सामान्यलक्षणं प्रयोजयति, यदि ह्येतावत् प्रयोजनं स्यात्, निर एव ग्रहणं कुर्यादिति। एवं प्रथमे पक्षे सर्वस्य सिद्धतां प्रतिपाद्य द्वितीये पक्षे प्रतिपादयितुमाह--`उपसर्गविशेषणे तु' इत्यादि। तुशब्दोऽयमपिशब्दस्यार्थे वर्त्तते। न केवलं रेफविशेषणेऽयतिग्रहणे पल्ययत इत्यादि सर्वं सिद्धम्, अपि तूपसर्गविशेषणेऽपि तस्मिन् सर्वमेतत् सिद्धम्। अथ वा--तुशब्दः पूर्वस्मात्पक्षादस्य विशेषं द्योतयति। तत्र हि वयवधानाल्लत्वं प्राप्नोतीत्येतच्चोद्यमवतरति। अतो यदेतत् प्रतिपाद्यमेतत् सर्वम्। इह त्वस्य चोद्यस्यावतार एव नास्तीति सिद्धमेवैतत्, न यत्नसाध्यमित्यर्थः। प्रतेरपि प्राप्नोतीति चोदकः। तुशब्दः पूर्वस्माद्विशेषणार्थः, पूर्वत्र प्रतेर्न प्राप्नोति; सङ्घातेन व्यवधानात्; इह तु नास्ति केनचिद्व्यवधानम्, अतः प्रतेरपि प्राप्नोतीति मन्यन्ते। `अपरे' इति। द्वितीयपक्षाभिनिविष्टानामम्यतमे। `निस्दुसित्येतयोः' इति। यद्ययतिग्रहणं रेफस्य विशेषणम्, अथाप्युपसर्गस्य विशेषणम्, सर्वथाः रत्वे कृते लत्वं प्राप्नोति? इति यश्चोदयेत्, तं प्रत्याह--`निस्दुस्' इत्यादि। गतार्थम्।।

20. ग्रो यङि। (8.2.20)

`निजेगिल्यते' इति। `ऋत इद्धातोः' (7.1.100) इतीत्त्वम्, द्विर्ववचनम्, अभ्यासकार्यम्।

`भावगर्हायां ग्रो यङ विहितः' इति। `लुपसदचर' (3.1.24) इत्यादिना। `गिरतेः' इति। `गृ निगरणे' (धा.पा.1410) इत्येतस्य तौदादिकस्य। `गृणातेः' इति। `गु शब्दे' (धा.पा.1498) इत्यस्य ऋयादिकस्य।`सामान्येन ग्रहणमिच्छन्ति' इति। विशेषणानुपादानात्। `अपरे तु' इत्यादि। कथं पुनः सामान्योपादानेऽपि गिरतेरेव ग्रहणं लभ्यते? इत्याह--`गृणातेः' इत्यादि। किं `कारणं यङेव नास्ति? इत्याह--`अनभिधानात्' इति।

`निगीर्यते' इति। `सार्वधातुके यक्' (3.1.67), `हलि च' (8.2.77) इति दीर्घः।।

21. अचि विभाषा। (8.2.21)

`गिरति' इति। निगरणार्थस्य रूपम्। `निगरणम्' इति। ल्युट्। `निगारकः' इति। ण्वुल्। निगार्यते' इति। अत्र हि णिलोपे कृते विकल्पो न सिध्यत्यचः परस्याभावात्? इत्येतच्चोद्यमपाकर्त्तुमाह--`निगार्यते' निगाल्यते' इति। स्थानिवद्भावस्तु पूर्ववत्।

स्यादेतत्। नास्त्येवात्र स्थानिवद्भावः; `पूर्वत्रासिद्धे न स्थानिवत्' (जै.प.वृ.48) इति प्रतिषेधात्? इत्यत आह--`पूर्वत्रासिद्धे' इत्यादि। अपवादः=दोषः, सह तेन वर्त्तत इति सापवादम्। दोष एवायमस्याः परिभाषाया इत्यर्थः। अपिशब्दः समुच्चये। न केवलं तच्चोद्यं सापवादम्, अपि तु `पूर्वत्रासिद्धं न स्थानिवत्' (जै.प.वृ 48) इत्येतदपि वचनं सापवादमेव। तदेव सापवादत्वमाप्तवचनेन प्रतिपादयितुमाह--`तस्य' इत्यादि। तत्र संयोगादिलोपविधावयं दोषः--काक्यर्थः, वास्यर्थ इति; अत्रासति यणादेशस्य स्थानिवदभावे `स्कोः संयोगाद्योः' (8.2.29) इति ककारसकारयोर्लोपः प्रसज्येत। लत्वविधौ--निगार्यते, निगाल्यत इति; णिलोपस्य सति स्थानिवद्भावे विकल्पेन लत्वं न स्यात्। णत्वविधौ--प्रहिणोति प्रमीणीन इति; अत्र गुणेत्त्वयोरसति स्थानिवद्भावे `हिनुमीना' (8.4.15) इति णत्वं न प्राप्नोति। `अन्तरङ्गत्वाद्वा' इत्यादि। परिहारन्तरम्। अन्तरङ्गत्वं तु लत्वविकल्पस्य वर्णाश्रयत्वात्। णिलोपस्य तु बहिरङ्गत्वम्; आर्धधातुकाश्रयत्वात्।

अथ गिरौ, गिरः--इत्यत्र लत्वं कस्मान्न भवति? इत्याह--`गिरौ, गिरः' इत्यादि। इतिकरणो हेतौ। धातोः स्वरुपेण ग्रहणे सति तत्प्रत्यये धातोरित्येव यः प्रत्ययो विहितस्तत्र तत्कार्यं विज्ञायते। तस्मादगिरो, गिर इत्यत्र न भवति। न ह्यत्र श्नातो (3.1.91) रित्येव गिरतेः क्विबन्तादौजसौ विहितौ, किं तर्हि? प्रातिपदिकाधिकारात् (4.1.1)।।

22. परेश् घाङ्कयोः। (8.2.12)

`परिघः' इति। पर उपपदे हन्तेर्धातोरप्रत्ययः। हलोपः, धत्वञ्च निपात्यते, उपपदसमासः। `पर्यङ्कः' इति `अकि लक्षणे' (धा.पा.87) इत्यस्मात् पचाद्यच, `हलश्च' (3.3.121) इति वा घञ्, प्रादिसमासः--परिगतोऽङ्कः पर्यङ्कः। [नास्ति--का.मु.पुस्तके]

ननु च [नास्ति--का.मु.पुस्तके]`घ' इति तरप्तमपोरपीयं संज्ञा, स्वं रूपं शब्दस्य' (1.1.68) इति स्वरूपग्रहणं प्रतिषिष्यते, तत्किमिति घरूप एव लत्वमुदाह्रियते? इत्याह--`घ इति स्वरूपग्रहणमत्र' इति। एवं मन्यते--अङ्क इत्यनेनासंज्ञाशब्देन साहचार्यद्घ इत्यस्याप्यसंज्ञाशब्दस्यैव ग्रहणमिति। `योगे चेति वक्तव्यम्' इति। योगशब्दे च परतः परेर्विकल्पेन [परविकल्पेन--का.मु.पाठः] लत्वं भवतत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--चकारोऽनुक्तसमुच्चयार्थः क्रियते, तेन योगेऽपि भविष्यतीति।

23. संयोगान्तस्य लोपः। (8.2.23)

`संयोगान्तस्य' इति। संयोगोऽन्तो यस्य तत्तथोक्तम्। अन्तग्रहणं विस्पष्टार्थम्। `पदस्य' (8.1.16) इति हि वर्त्तते, तत्र संयोगेन पदे विशिष्यमाणे `येन विधिस्तदन्तरस्य' (1.1.72) इत्येव संयोगान्तता पदस्य लभ्यते। `गोमान्' इति। हल्ङ्यादिलोपे कृतेऽलोऽन्त्यस्य लोपः (1.1.52), `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः। `क्षेयान्, भूयान्' इति। अत्र संयोगान्तलोपे न प्राप्नोति; परत्वाद्रुत्वेन बाध्यत इति यो मन्येत, तं प्रत्याह--`श्रेयान्, भूयान्' इत्यादि।
यदि तर्हि परमपि रुत्वमसिद्धत्वात् संयोगान्तसय बाधकं न भवति, एवं सत्यत एव हेतोर्जश्त्वस्यापि बाधकं न स्यात्, ततश्च यशः, पय इति जशत्वमेव स्यात्, न रुत्वम्? इत्यत आह--`जश्त्वे तु' इत्यादि। संयोगान्तलोपे हि प्राप्ते चाप्राप्ते च रुत्वमारभ्यते। श्रेयानित्यादौ प्राप्ते, पय इत्यत्र त्वप्राप्त इति युवतं यद्रुत्व न बाधते। जश्त्वे तु सर्वत्र प्राप्त एव तदारभ्यते। श्रेयानित्यादौ प्राप्ते, पय इत्यत्र त्वप्राप्त इति युक्तं यद्रूत्व न बाधते। जश्त्वे तु सर्वत्र प्राप्त एव तदारभ्यते। तस्माद्बाधकलक्षणयोगाद्रुत्वं जश्तवस्य बाधकं भवत्येव। श्रेयानिति--`प्रहशस्यस्य श्रः' (5.3.6)) इतीयसुनि श्रभावः, `आद्गुणः' (6.1.87), `सान्तमहतः' (6.4.10) इति दीर्घः। भूयानिति--`बहोर्लोपो भू च बहोः' (6.4.158) इतीयसुनि ईकारस्य लोपः, बहोश्च भूभावः।
अथ दध्यत्र, मध्वत्रेत्यत्र संयोगान्तलोपः कस्मान्न भवति? इत्याह--`दध्यात्र' इत्यादि। बहिरङ्गत्वं तु यणादेशस्य द्विपदाश्रयत्वात्। संयोगान्तलोपस्य त्वेकपदाश्रयत्वादन्तरङ्गत्वम्। पदस्येति किम्? गोमन्तौ, गोमन्तः।।

24. रात्सस्य। (8.2.24)

`संयोगान्तस्य पदस्य' इत्यादि। अत्र संयोगान्तं पदं रेफस्य विशेषणम्, रेफोऽपि सकारस्य। संयोगान्तस्य पदस्य योऽवयवो रेफस्तस्मादुत्तरो यः सकारस्तस्यालोऽन्त्यस्य लोपो भवति। `अक्षाः, अत्साः' इति। `क्षर सञ्चलने' (धा.पा.851), `त्सर च्छद्मगतौ' (धा.पा.554), लङ्, `अतो ल्रान्तस्य' (7.2.2) इति वृद्धिः, तिपो हल्ङ्यादिलोपः (6.1.68), सिचः सकारस्याप्यनेन, अडागमः, रेफस्य विसर्जनीयः (8.3.15)।
ननु चैतत् पूर्वेणैव सिद्धम्, तत्किमर्थमिदमारभ्यते? इत्याह--`सिद्धे' इत्यादि। `रात् सस्यैव' इति नियमस्य स्वरूपं दर्शयति। रादेव सस्य--इत्येष तु विपरीतनियमोऽत्र नाशङ्कनीयः, उरः प्रभृतिषु (5.4.151) पुमानिति कृतसंयोगान्तलोपस्य [`कृतसंयोगान्तस्य लोपस्य'--इति प्रा.मु.पाठः] पुम्स्शब्दस्य पाठात्। न हि विपरीतनियमे तस्य संयोगान्तलोप उपपद्यते। `ऊर्क्' इति। `ऊर्ज बलप्राणनयोः' [उर्ज--प्रा.मुपाठः] (दा.पा.1549), `भ्राजभ्रास' (3.2.177) इत्यादिना क्विप्। अत्र नियमाज्जकारस्य लोपो न भवति, तस्मिन्नसति `चोः कुः' (8.2.30) इति कुत्वम्--जकारस्य गकारः, `वावसाने' (8.4.56) इति चर्त्वम्--ककारः। `न्यमार्ट्'[अमाटै--काशिका, पदमञ्जरी च] इति। `मृजू शुद्धौ' (धा.पा.1066), अदादित्वाच्छपो लुक्, तिपो हल्ङ्यादिलोपः (6.1.68) `मृजेर्वृद्धिः' (7.2.114), `व्रश्च' (8.2.36) इत्यादिना षत्वम्, तस्य जश्त्वम्--डकारः, तस्यापि चर्त्वम्-टकारः।।

25. धि च। (8.2.25)

`अलविध्वम्, अलविढ्वम्' इति। लुङ्, सिच् (3.1.44) सस्य `धि च' इति लोपः, `विभाषेटः' (8.3.79) इति पक्षे भू र्धन्यः। `यद्यत्र' इत्यादिना सति सकारलोपे यदिष्टं प्राप्नोति तद्दर्शयति। असति हि सकारलोपे सिचः `आदेशप्रत्यययोः' (8.3.59) इति षत्वे कृते `झलां जश् झशि' (8.4.53) इति जश्त्वे च डकारे `ष्टुना ष्टुः' (8.4.41) इति धकारस्य ष्टुत्वे ढकारेण भवितव्यम्, ततश्च मूधन्याभावपक्षेऽपि धकारो न श्रूयते। विभाषाग्रहणं तु सिद्धं लिडर्थं लिङर्थं च स्यात्। तस्मादमूर्धन्यपक्षे धकारस्य श्रवणं यथा स्यादिति लोपो विधीयते।
`इतः प्रभृति सिचः सकारस्य लोप इष्यते' इति। स च `अचि विभाषा' (8.2.21) इत्यतो विभाषाग्रहणआनुवृत्तेर्व्यवस्थितविभाषाविज्ञानाच्च लभ्यते। `चकाद्धि' इति। `चकासृ दीप्सौ' (धा.पा.1074), लोट्, सिप्, `सेर्ह्यपिच्च' (3.4.87) इति हिरादेशः, `हुझल्भ्यो हेर्धिः' (6.4.101) इति हेर्धिभावः, पूर्ववच्छपो लुक्, पूर्ववज्जश्त्वम्--सकारस्य दकारः। `पयो धावति' इति। पयः शब्दस्य रुत्वम्, `हशि च' (6.1.114) इत्युत्त्वम्, `आद्गुणः' (6.1.87)।
यदीतः प्रभृति सिचो लोप इष्यते, सग्धिः, बब्धायित्यत्र `झलो झलि' (8.2.26) इति सकारस्य लोपो न प्राप्नोतौति चोद्यमाशङ्क्याह-सग्धिर्बब्धाम्' इत्यादि। `अद भक्षणे' (धा.पा.1011), स्त्रियां क्तिन् (3.3.94) `बहुलं छन्दसि' (2.4.39) इति घस्लादेशः, `घसिभसोर्हलि च' (6.4.100) इत्युपधालोपः, सकारस्य `बहुलं छन्दसि' इति च्छान्दसो लोपः। क्वचिदन्यदेवोच्यते एषोऽपि बहुलस्यार्थः। इष्यते `झषस्तथोर्धोऽधः' (8.2.40) इति तकारस्य धत्वम्, पूर्ववज्जश्त्वम्--घकारस्य गकारः। समाना ग्धिरिति विशेषणसमासः, `समानस्य च्छन्दसि' (6.3.84) इति सभावः। बब्धामिति--`भस भर्त्सनदीप्त्योः' (धा.पा.1100), लोट् तस्य `लोटो लङ्वत्' (3.4.85) इत्यतिदेशात् तसस्ताम्, जुहोत्यादित्वाच्छपः श्लुः, `श्लौ' (6.1.10) इति

द्विर्वचनम्, पूर्ववदुपधासलोपौ, पूर्ववदेव तकारस्य दत्वञ्च, भकारस्य दकारः `अभ्यासे चर्च' (8.4.54) इति जश्त्वम्। एवमिदं तावत् श्लोकवार्त्तिककारस्याभिमतं दर्शितम्। इदानीं भाष्यकारस्य मतं दर्शयितुमाह--`भाष्यकारस्त्वाह इत्यादि। एतेनाविशेषेणैव सकारमात्रस्य भाष्यकाशे लोपमिच्छतीति दर्शयति। `तेन' इत्यादि। अविशेषेण हि सकारमात्रस्य यो लोपमिच्छति तस्य पयो धावतीत्यत्रापि प्राप्नोति। तस्मादिह मा भूदिति यत्नान्तरमास्थेयम्। यत्नान्तरं तु व्यवस्थितविभाषाश्रयणमेव पूर्वधत्। अयं तु विशेषः--पूर्वत्र व्यवस्थितविभाषया धि चैव सिचो भविष्यति, नान्यस्य; इह तु यत्र समानपदस्थौ निमित्तनिमित्तिनौ तत्रैवाविशेषेण सकारमात्रस्य लोपो भवति। अत्र तु भिन्नपदस्थौ पयोधावतौत्यादौ, तत्र न भवन्येवेति। एतावता विशेषेण व्यवस्थितभाषा यत्नान्तरमित्युच्यते।

संक्षिप्तमेतमर्थं विस्तरेण सचोद्यपरिहरं वक्तुमाह--`धि सकारे सिचो लोपः' इत्यादि। धीत्येतद्यत्र परभूते सकारलोप इत्यतः प्रभृति विधातव्यः, तदुपलक्षणं वेदितव्यम्। कुत एतत्? इत प्रभृति सिचः सकारस्यलोप इष्यत इति प्राग्वचनात्। लोपं प्रति सकारस्याधिकरणत्वेन विवक्षतत्वात् सप्तम्या निर्देशः। किं प्रयोजनम्? इत्याह--`चकाद्धि' इत्यादि। यदि सिचो लोपः, आशाध्वं तु कथम्? आङः शासु इच्छायाम्' (धा.पा.1022), लोट्, ध्वम्, टेरेत्वम्, `सवाभ्यां वामौ' (3.4.91) इत्यमादेशः, पूर्ववच्छपो लुक्। अत्र सकारस्य लोप इष्यते, स न प्राप्नोति; यदि सिच एव सकारस्य लोपो विधीयते? `जश्त्वं सकारस्य भविष्यति' इति। `झलां जश्झशि' (8.4.53) इत्यनेन जश्त्वम्--सकारस्य दकारो भविष्यतीति सिद्धम्--आशाब्दमित्येतत्।

इतः सकारलोपशास्त्रं प्रत्याख्यातुमाह--`सर्वमेवं प्रसिद्धं स्यात्' इति। यदि सकारस्य भवति, एवं सति तेनैद जश्त्वेन सर्वं लक्ष्यं प्रसिद्धं स्यात्। ततश्च सकारलोपशास्त्रमेतन्न कर्तव्यमेवेत्यभिप्रायः। तत्रैतत्स्यात्--जश्त्वे सति श्रुतिभेदो भवति, तथा हि `अनचि च' (8.4.47) इति सकरस्य द्विर्वचने कृते सकारयोश्च जश्त्वे दकारद्वयस्य श्रवणं प्रसजतीत्याह--`श्रुतिश्चापि न भिद्यते' इति। न हि व्यञ्जनपरस्यैकस्यानेकस्य वा हलः श्रुतिं प्रति विशेषोऽस्तीति भावः। `लुङश्चापि न मूर्धन्ये ग्रहणम्' इति। कर्त्तव्यं भवतीति शेषः। अयं चान्यो जश्त्वे सति गुणः। `इणः षीध्वंलुङ्लिटां धोऽङ्गात्' (8.3.78) इत्यत्र मूर्धन्ये कर्त्तव्ये लुङ उपादानं कर्त्तव्यं न भवतीति; अच्चोढ्वम्, अप्लोढ्वमित्यादौ षत्वजश्त्वष्टुत्वैरेव मूर्धन्यस्य सिद्धत्वात्। `च्युङ् छ्युङ् [अयं धातुर्धातुपाठे नोपलभ्यते] ज्युङ् [न स्तः--प्रा.मु.पुस्तके] प्रुङ्प्लुङ गतौ' [न स्तः--प्रा.मु.पुस्तके] (धा.पा.955,956,957,958), लुङ् ध्वम्, सिच्, `आदेशप्रत्ययोः' (8.3.59) इति षत्वम्, `झलां जश् झशि' (8.4.53) इत्यनेन षकारस्य जशत्वम्--इकारः, धकारस्य ष्टुत्वम्--ढकारः। एवं षत्वादिकार्यक्रमेण लुङि घकारस्य मूर्धन्यः सिदध इति, किं लुङ्ग्रहणेन? एवं लुङ् प्रत्याख्यायते। सलोपे परे लुङ्ग्रहणं कर्त्तव्यमिति यस्याभिमतम्; स आह--`सेटि दुष्यति' इति। यदि मूर्धन्यविदौ लरङ्ग्रहणं न क्रियेत, ततः `विभाकेटः' (8.3.79) इत्यत्र मूर्धन्यो न प्राप्नोति, ततश्च पूर्ववत् षत्वादिषु कृतेष्वलविध्वमित्थेव नित्यं स्या, न तु कदाचिदपयलविढ्वमिति। तस्मादुत्तरार्थं लुङ्ग्रहणं कर्त्तव्यम्। `धि च' (8.2.25) इति सकारलोपोवक्तव्यः--अलविढ्वमित्यस्य सिद्ध्यर्थम्। न ह्येतदसति सकारलोपे सिध्यति, ततश्च यदुक्तम्--`सर्वमेवं प्रसिद्धं स्यात्' इति, तदयुक्तम्। `ध्रि च' (8.2.25) इत्येतस्मिश्च क्रियमाणे चकाद्धोति मा भूदिति सिच्ग्रहणं कर्त्तव्यम्, एवं श्लोकबार्त्तिककारमतेन सिज्ग्रहणं कर्त्तव्यमिति स्थितम्।

इतरस्तस्मिन् क्रियमाणेऽपरं दोषं दर्शयितुमाह--`घसिभसोनं `सिध्येत'[सिध्येत् त्विक्ष्यादि--का.मुद्रितःपाठः] इत्यादि। तुशब्दो हेतौ। यस्मात् सिज्ग्रहणस्य हि धसिभसोः सकारलोपः सग्धिर्बब्धामित्यत्र न सिध्यतीत्येष हेतुरुक्तः स चायमहेतुः; यस्माद्यद्यपि सिज्ग्रहणे क्रियमाणे धसिभसोः `झलो झलि' (8.2.26) इत्यनेन लोपो न भविष्यति, तथापि च्छाब्दसो वर्णलोपो भविष्यति; तेनापि सग्धिः, बब्धामित्येतदुभयं सिध्यत्येव। क्व यथा च्छान्दसो वर्णलोपः? इत्याह`यथा' इत्यादि। यथाध्वरविषये प्रयोगे इष्कत्तरिमध्वरस्येत्यत्र च्छान्दसो वर्णलोपो भवति, तथा साग्धिः, बब्धामित्यत्रापि घसिभयोर्भविष्यति। वाशब्दोऽत्रैवोपपत्यन्तरं सूचयति। तत्रेदमुपपत्त्यन्तरम्--सग्धिरिति नैतद्घसे रूपम्, किं तर्हि? `षघ हिंसायाम्' (धा.पा.1268) इत्यस्य। ननु चार्थभेदो भवति, स्वरभेदश्च; पूर्वस्यां व्युत्पत्तौ समानावनमित्येषोऽर्थो भवति, तसासस्वरेणान्तोदात्तत्वञ्च; षधिस्तु क्तिनि विहिते हिंसार्थो भवति, नित्स्वरेणाद्युदात्तश्च? अनेकार्थत्वाद्धातूनां षघिश्च समानावनमित्यस्मिन्नर्थे वर्त्तिष्यते, स्वरव्यत्ययेन चान्तोदात्तत्वं भविष्यतीत्यदोषः। बन्धामिति च नैतद्भसे रूपम्, किं तर्हि? `बध बन्धने' (धा.पा.973) इत्यस्माल्लोटि तस्माम्, `व्यत्ययो बहुलम्' (3.1.85) इति धत्वे तकारस्य `व्यत्ययो बहुलम्' (3.1.85) इति धातुधकारस्य बकारे च कृते बब्धामिति भवति। एवं च सिज्ग्रहणे क्रियमाणे घसिभसोर्यदि न सिध्यति नाम, तथापि नैव किञ्चिदनिष्टम्; यस्मादनयापि व्युत्पत्त्या तदपाकृतं भवति। तदुक्तम्--`घसिभसोर्न सिध्येत्तु [`सिध्येत'--काशिका] तस्मात् सिज्ग्रहणं न तत्' (का. 8.2.25)। ततश्च `धि सकारे सिचो लोपश्चकाद्धीति प्रयोजनम्' (का. 8.2.25) इत्येतदवस्थितं श्लोकवार्त्तिककारस्य मतम्।।

26. झलो झलि। (8.2.26)

`अभित्त, अभित्थाः' इति। भिदेर्लुङि स्वरितेत्त्वादात्मनेपदम्; तथासो, दकारस्य `खरि च' (8.4.55) इति चर्त्त्वम्--तकारः। `अवात्ताम्' इति। दसेर्लुङि तसस्ताम्। `अदात्त' इति। थस्य तः, `वदव्रज' (7.2.3) इत्यादिना वृद्धिः। अत्र सकारलोपे कृते `सः स्यार्धधातुके' (7.4.49) इति तकारो न प्राप्नोतीति यस्य भ्रान्तिः स्यात्, तं प्रत्याह--`अवात्ताम्' इत्यदि।

`अमंस्त, अमंस्थाः' इति। `मन ज्ञाने' (धा.पा.1176), अनुदात्तेत्त्वादात्मनेपदम्। `अभित्साताम्' इति। भिदेराताम्। `अभित्सत' इति। `आत्मनेपदेष्वनतः' (7.1.5) इति झस्यादादेशः।।

27. ह्वस्वादङ्गात्। (8.2.27)
`अलाविष्टाम्' इति। तसस्ताम्, सिचि वृद्धिः। अत्र श्रुतिकृते पौर्वापये सति ह्रस्वादिङः परः सकारो भवति, न त्वङ्गात्; इडागमः प्रत्ययभक्तत्वेनानङ्गत्वात। `अलाविषुः' इति। `सिजभ्यस्तविदिभ्यश्च' (3.4.109) इति झेर्जुस्। `अकृषाताम्' इति। `उश्च' (1.2.12) इति कित्त्वाद्गुणाभावः। `द्विष्टचाम्' इति। `द्वित्रिचतुर्भ्यः सुच्' (5.4.18) तदन्तादतिशायने तरप्; `किमेत्तिङ्' (5.4.11) इत्यादिनामुः, `ह्रसवात्तादौ तद्धिते' (8.3.101) इति सकारस्य मूर्धन्यः।।

28. इट ईटि। (8.2.28)
`अदेवीत्' इति। `नेटि' (7.2.4) इति वृद्धिप्रतिषेधे कृते लघूपधगुणः, `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्।।

29. स्कोः संयोगाद्योरन्ते च। (8.2.29)
झलोति वर्त्तते। `संयोगाद्योः' इति षष्ठीसमासः। अत्र यद्यपि संयोग उत्तरपदार्थो गुणभूतः, तथापि संयोगाद्योः स्कोरन्तग्रहणं विशेषणं न भवतीति गुणभूतोऽपि तेन संयोग एव विशिष्यत इति विज्ञायते, इत्याह--`पदस्यान्ते यः संयोगः' इति। `अन्ते' इति। अवसान इत्यर्थः। `झलि परतः' इति। पदस्येत्यपेक्षते। `तदाद्योः' इति। तस्यैवम्भूतस्य संयोगस्यादिभूतयोरित्यर्थः। `लग्नः' इति। `ओलजो ओलस्जीव्रीडे' (धा.पा.1290, 1291), निष्ठा। अत्र जकारे झलि परतः सकारजकारयोर्यः संयोगः पदस्यादयवस्तदादेः सकारस्य लोपः, `ओदितश्च' (8.2.45) इति नत्वम्, `श्वीदितो निष्ठायाम्' (7.2.14) इतीट्प्रतिषेधः, `चोः कुः' (8.2.30) इति कुत्वम्--गकारः। `साधुलक्' इति। साधु लज्जात इति क्विप्। अत्र पदस्यादसाने संयोगः। (7.1.60) इति नुम्, स च भवत् `मस्जेरन्त्यात् पूर्वो नुमनुषङ्गसंयोगादिलोपार्थम्' (वा. 7) इति वचनादन्त्याज्जकारात् पूर्वो भवति, तस्य च `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः।
`तष्टः' इति। `तक्षू त्वक्षू तनूकरणे' (धा.पा.655,656) ऊदित्त्वात्, स्वरत्यादिसूत्रेण (7.2.44) विभाषितेट्; तेन निष्ठायां `यस्य विभाषा' (7.2.15) इतीट्प्रतिषेधः। `काष्ठशवस्थाता' इति। काष्ठं शक्नोतीति क्विप्; काष्ठशकि स्थातेति `सप्तमी' (2.1.40) इति योगविभागात्समासः।
`तदत्र' इत्यादिना `झलि सङीति वक्तव्यम्' (वा 917) इति यदुक्तम्, तत् प्रत्याचष्टे। तदिति वाक्योपन्यासार्थः। `शकेः क्विबन्तस्य प्रयोग एव नास्ति' इति। शकेः `अन्येभ्योऽपि दृश्यते' (3.2.178) इति क्विप् स्यात्, इह च `दृश्यते' इत्यस्य ग्रहण एवायमर्थः--यत्र लौकिके प्रयोगे क्विबन्तस्य प्रयोगो दृश्यते तत्र यथा स्यादिति, न च लोके काष्ठशगित्येवंविधः शकेः क्विबन्तस्य प्रयोगो दृश्यते। ततः शकेः क्विबन्तस्य प्रयोग एव नास्ति, अतो हेतोः `झलि सङीति वक्तव्यम्' (वा.917) इत्येतत् प्रत्याख्यातुमाह भाव्यकारः--`काष्ठाशगेव नास्ति; कुतोऽयं काष्ठशकि तिष्ठेत्' इति। आधारपरतन्व उद्घनादावस्य वृत्तिः, अतो यत्र काष्ठशगाधार एव नास्ति, तत्र तदाधेयः स्थाता सुतरामेव नास्ति तस्मान्न झलि सङीति वक्तव्यम्; व्यावर्त्त्याभावात्। इह कस्मान्न भवति--वाक्स्थातेति? संयोगादिलोपे कुत्वम्यासिद्धत्वात्।
अथेह कस्मान्न भवति--वास्यार्थम् काक्यर्थम्? इत्याह--`दास्यर्थम्, काक्यर्थम्' इत्यादि।
अथ स्कोरिति किमर्थम्? नर्नर्तीत्यत्र मा भूत्। नृतेर्यङ्लुगन्तस्य `रुग्रिकौ च लुकि' (7.4.91) इत्यभ्यासस्य रुकि कृते रूपमेतत्। `संयोगाद्योरिति किम्? `पयःशक्' इति। क्विबन्तमेतत्। सोपपदस्य हि शकेः क्विबन्तस्य प्रयोग एव नास्ति। केवलस्य तु स्यादेव। अन्ते चेति किम्? तक्षिता, तक्षकः।।

30. चोः कुः। (8.2.30)
`झलि पदान्ते च' इति। `परतः' इति प्रत्येकमभिसम्बध्यते। ननु च पूर्वसूत्रे चकारेण झलनुकृष्ट इति तस्येहानुवृत्तिरयुक्ता? नैतदस्ति; न हि तत्र चकारेण झलनुकृष्टः, किं तर्हि? स्वरितत्वादेवानुवर्त्तमानस्यान्तग्रहणं न बाधकमित्यतादच्चकारेण व्याख्यातम्। `वाक्' इति। वचेः `क्विब्वचि' (वा.288) इत्यादिना ज्विप्, दीर्घश्च।
`क्रुञ्च' इति। इह केचित् `कुञ्च कौटिस्याल्पीभादयोः' (धा.पा.186) इति सरेफं अकारोपधं धातुं पठन्ति, `कुञ्च कौटिल्याल्पीभावयोः' (धा.पा.185) इत्यरेकं नकारोपधं परे। तत्र पूर्वपाठं गृहीत्वा यश्चोदयेत्--अथ क्रुञ्चेत्यत्र कस्मान् भवतीति? तं प्रत्याह--`ऋञ्च' इत्यादि। अनेन `झलि सङीति न वक्तव्यम्' इति यत् पूर्वं प्रत्याख्यातं तस्येहार्थतां दर्शयति। `युजिक्रुञ्चाञ्च' (3.2.59) इति निपातनाद्वेति। `क्रुञ्चेत्यत्र ञकारस्य चकारे कुत्वं न भवतीति सम्बन्धः। `ञकारोपधस्य [ञकारिपदस्य--का.मुद्रितपाठः] सरेफस्य पाठमभ्युपेत्य प्राप्तौ तस्यामेवं परिहारद्वयमुक्तम्। इपानीं कुत्वस्य प्राप्तिरेव नास्ति; यस्मान्नायं ञकरोपधः पठ्यते, किं तर्हि? नकारोपध इति दर्शयितुमाह--`नकारोपधो वा' इत्यादि। किं पुनः कारणं नकारोपधः पठ्यते? किं तर्हि? नकारोपध इति दर्शयितुमाह--`नकारोपधो वा' इत्यादि। किं पुनः कारणं नकारोपधः पठ्यते? इत्याह--`नकारलोपे हि'[`सकारलोपे हि'--प्रा.मु.पाठः] इत्यादि। निकुचित इत्येष प्रयोगोऽस्त्येव। धातोर्निष्ठान्तस्य `श्नान्नलोपः' (6.4.23) इत्यनुवर्त्तमाने-`अनिदिताम्' (6.4.24) इति नलोपादिह नकारलोपस्य दर्शनान्नकारोपधोऽयं पठ्यते; अन्यथा ह्येष प्रयोगो नोपपद्यते। न हि ञकारलोपस्य किञ्चिल्लक्षणमस्ति। यदि तर्हि कुञ्चेति रेफरहितो नकारोपधः पठ्यते, एवं सति क्रुङ, क्रुञ्चौ, क्रुञ्चः--इति न सिध्यति; ऋत्विगित्यादिना (3.2.59) सूत्रेण हि क्विनि कृते `अनिदिताम्' (6.4.24) इति नलोपे कुक, कुचौ,

कुचः--इत्येवं प्राप्नोतीत्यत आह--`युजिक्रुञ्चाम्' इत्यादि। स्यादेतत्--यद्यपि नकारलोपाभावो निपात्यते, तथापि नकारस्यानुस्वारे तस्य ययि परसवर्णे (8.4.58) ञकारे स्यादेव कुत्वम्? इत्यत आह--`तत्र' इत्यादि। गतार्थम्।।

31. हो ढः। (8.2.31)
`सोढा' इति। `हो ढः' इति ढत्वे कृते `झषस्तथोर्धोऽधः' (8.2.40) इति तृचतकारस्य धत्वम्, ष्टुत्वम्, `ढो ढे लोपः' (8.2.13) `सहिवहोरोदवणस्य' (6.3.112) इत्योत्त्वम्। `जलाषाट्' इति। जलं सहत इति `भजो ण्विः' (3.2.62), `छन्दसि सहः' (3.2.63) इति ण्विः, उपधावृद्धिः उपपदसमासः, `अन्येषामपि दृश्यते' (6.3.137) इति पूर्वपदस्य दीर्घ, ढकारस्य जश्त्वम्--डकारः, तस्य चर्त्त्वम्--टकारः, `सहेः साडः सः' (8.3.56) इति मूर्धन्यः। `प्रष्ठवाट्' इति। `वहश्च' (3.2.64) इति ण्विः।
`चुहोः कुढौ' इत्येकयोग एव कर्त्तव्ये पृथग्योगकरणं समसंख्यात्वप्रतिषेधार्थम्। एकयोगे तु समसंख्यत्वाज्झलादौ कुत्व पदान्ते ढत्वं स्यात्।।

32. दादेर्धातोर्घः। (8.2.32)
`दग्धा, दग्धुम्' इति। पूर्ववद्धत्वम्, घकारस्य झशि झशत्वम्--गकारः। `काष्ठधक्' इति। क्विबन्तमेतत्। `एकाचो बशो भष' (8.2.37) इत्यादिना दकारस्य भष्--धकारः, घकारस्य जश्त्वम्--गकारः, तस्य चर्त्त्वम्--ककारः। `दादेः' इत्युच्यते, तेनाधोगित्यत्र घत्वं न सिध्यति, अदकारादित्वेऽस्याविहितत्वादित्यत आह--`धातोः' इत्यादि। `तद्विशेषणम्' इति। दादेर्विशेषणमित्यर्थः। किंविशिष्टम्? अवयवषष्ठ्यन्तमिति। अवयवसम्बन्धिनी या षष्ठी तदन्तमित्यर्थः। `किं कृतं भवति? इति। एवं सति किमिष्टं साधितं भवतीत्यर्थः। `अधोगित्यत्रापि घकारः सिद्धो भवति' इति। अत्रापि धातोरवयवो यो दादिशब्दस्तदवयवत्वाद्हकारस्य। दुहेर्लङ्, तिप्, अदादित्वाच्छपो लुक्, हल्ङ्यादिलोपः (6.1.68), पूर्धवद्भष्भावः, अट्। `कथम्' इत्यादि। धातोरवयवो यो दादिशब्दस्तदवयवसय हकारस्य घत्वं भवति। एवं सति दग्धा, दग्धुमित्यत्र घत्वं न कथञ्चिदित्यर्थः। तथा ह्यत्र धातोरवयवो यो दादिशब्दो न तस्यावयवो हकारः। यस्य तु समुदायस्य हकारोऽवयवः स धातुरेव, न हकारावयवः। अत्रोत्तरमाह--`व्यपदेशिवद्भावात्' इति। एषोऽपि व्यपदेशिवद्भावेन धातोर्वादिरवयवो भवति। अभेदेऽपि व्यपदेशिवद्व्यवहारो लोके दृश्यते। तथा हि--शिलापु त्रकस्य शरीरम्, राहोः शिर इति च।
`अथ वा' इत्यादि। धातूपदेशो धातुपाठः। तत्र यो दादिरित्येवं विज्ञायते। कथं पुनर्धातुपाठे दकारादित्वं विशेषणं लभ्यते, धातुग्रहणसामर्थ्यात्। तस्य हीदं प्रयोजनं स्यात्--अधातोर्मा भूदिति। एतच्चाप्रयोजनम्, न ह्यधातोर्धकारादेर्झलि वा पदान्ते च हकारोऽवयवः सम्भवति, यन्निवृत्त्यर्थं धातुग्रहणम्। तदतिरिच्यमानं धातूपदेश एव दकारादित्वं विशेषणं भवतीत्यमुमर्थं गमयति। एवं विज्ञायमाने यद्यपि `धातोः' इत्यस्य `दादेः' इत्यनेन सामानाधिकरण्यम्, तथाप्यधोगित्यत्र घत्वं प्रवर्त्तत एव; धातुपाठे दुहेर्दकारादित्वात्। `तथा च' इत्यादि। एवञ्च विज्ञायमाने यद्यपि दामलिह्यतेर्दकारादित्वम्, तथापि दामलिडित्यत्र न भवति धत्वम्'; धातूपदेशे तस्यादकारादित्वात्। धातुत्वं तस्य `सनाद्यन्ता धातवः' (3.1.32) इति। न केवलमधोगित्वत्र धत्वं भवति, अपि तु दामलिहेरपि भवतीत्यपिशब्दो द्योतयति। दाम लेढोति दामलिडिति क्विप्, तदन्ताद् दामलिहमिल्छतीति `सुप आत्मनः क्यच्; (3.1.8) इति क्यच्, क्यजन्तात् क्विप्, `अतो लोपः' (6.4.48) इत्यकारलोपः, `क्यस्य विभाषा' (6.4.50) इति यकारस्य च, `हो ढः' (8.2.31) इति ढत्वम्, ढकारस्य जश्त्वम्।।

33. वा द्रुहमुहष्णुहष्णिहाम्। (8.2.33)
`द्रूहेः' इति। `द्रुह जिघांसायम्' (धा.पा.1197) इत्यस्य। `इतरेवाम्' इति। `मुह वैचित्त्ये' (धा.पा.1198), `ष्णुह उद्गिरणे' (धा.पा.1199), `ष्णिह प्रीतौ' (धा.प.1200)-इत्येषामप्राप्तेः। पुनरेषं घत्वं स्यात्, अदकारादित्वात्।।

34. नहो धः। (8.1.34)
`उपानत्' इति। `णह बन्धने' (धा.पा.1166) क्विप्, `नहिवृति' (6.3.116) इत्यादिना दीर्घः। एवं परीणत्' इति। अत्र णत्वं तु `उपसर्गादसमासेऽपि, (8.4.14) इत्यादिना। प्रक्रियालाघवार्थं दकारे विधातव्ये धकारविधानम्--नद्धेत्यत्र `झषस्तथोर्धोऽधः' (8.2.40) इति धत्वं यथा स्यादित्येवमर्थम्। दकारे हि तन्न स्यात्, दकारस्याझष्त्वात्। `रदाभ्यां निष्ठातो नः' (8.2.42) इत्येवमर्थं च, नकारो यथा न स्यादिति।।

35. आहस्थः। (8.1.35)
`आत्थ' इति। `ब्रुवः पञ्चानामादित आहो ब्रुवः' (3.4.84) इति लडादेशस्य सिपस्थल् ब्रुवश्चाहादेशः, तस्यानेन थकारः, तस्य `खरि च' (8.4.55) इति चर्त्त्वम्--तकारः। किमर्थमादेशान्तरं क्रियते, न प्रकृतेर्विकार एव विधीयते? इत्यत आह--`आदेशान्तरकरणम्' इत्यादि। यदि धकार आदिश्येत, ततः `झषस्तथोर्धोऽधः' (8.2.40) इति धत्वं स्यात्, अतस्तन्निवृत्त्यर्थमादेशान्तरं क्रियते।

`ह्वग्रहोः' इत्यादि। हरतेः, ग्रहेश्च यो हकारस्तस्य च्छन्दसि विवये भकारो वक्तव्यः। हकारस्येति वचनं हरत्यर्थम्। ग्रहेस्तु `अलोऽन्त्यस्य' (1.1.52) इत्येव भविष्यति हकारस्य। `ग्रभीता' इति। तृन्, इट्, `ग्रहोऽलिटि दीर्धः' (7.2.37)। `जभ्रिरे' इति। ह्वञो लिट्, `लिटस्तझयोरेशिरेच्' (3.4.81) इति झस्येरेच्; यणादेशः, द्विर्वचनम्, अभ्यासकार्यम्। `उद्ग्राभम्', `निग्राभम्' इति। ग्रहेः `हलश्च' (3.3.121) इति घञ्। एतत्तु सर्वं `व्यत्ययो बहुलम्' (3.1.85) इति वर्णव्यत्ययेनैव सिद्धम्। वक्तव्यशब्दस्य व्याख्येयमित्येषोऽर्थो वेदितव्यः।।

36. व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः। (8.2.36)
`ओ व्रश्चू छेदने' (धा.पा.1292), `भ्रस्जो पाके' [`भ्रस्ज' इत्येव धातुपाठः] (दा.पा.1284), `सृज विसर्गे' (धा.पा.1178), मृजू शुद्धौ' (धा.पा.1066), `यज देवपूजासङ्गतिकरणदानेषु' (धा.पा.1002), `राजू दीप्तौ' (धा.पा.822), `टु भ्राजृ टृभ्राशृ टुभ्लाशृ दीप्तौ' (धा.पा.823,824,825)। छ इति च्छकारान्तावां ग्रहणम्; श इति शकारान्तानाम्। अत्र च शकारस्य जश्त्वे प्राप्ते, इतरेषां तु कत्वे तदपवादः षकारो विधीयते। `व्रष्टा' इति। `स्कोः संयोगाद्योः' (8.2.29) इति सकारलोपः, ऊदित्त्वात् पक्ष इडभावः। `मीलबृट्, धानाभृट् इति। `ग्रहिज्या' (6.1.16) इति सूत्रेण सम्प्रसारणम्। `स्रष्टा' इति। `सृजिदृशोर्झल्यमकिति' (6.1.58) इत्यमागमः। `मार्ष्टा' [मार्ष्टीति का. मुद्रितपाठ] इति। `मृजेर्वृद्धिः' (7.2.114)। `उपयट्' ति। यदेः `विजुपे छन्दसि' (3.2.73) इति विच्। `सम्राट्' इति। `मो राजि समः क्वौ' (8.3.25) इति समो मकारस्य मकारादेशः।
किं पुनः कारणं राजभ्राजोर्झल्युदाहरणं न प्रदर्शितम्? इत्याह--`राजभ्राजोः' इत्यादि। झलत्वं कस्मान्न भवतीत्याह--`झलादिराभ्याम्' इत्यादि। आभ्यां परो यो झलादिः स इटा पर्यवपद्यत इतीङ्विधीयते; सेट्त्वादनयोः। इतरेष्वाद्यचतुर्थे। विभाषितेटौ, स्वरतीत्यादिसूत्रेम (7.2.44) शेषास्त्वानिटः; `एकाचः' (7.2.10) इतीट्प्रतिषेधात्। तस्मात् तेषामुभयार्थमेव ग्रहणम्। `राष्टिः भ्राष्टिः' इति। `क्वितन्नाबादिभ्यश्च' (वा.307) इति क्तिन्प्रत्ययः, `तितुत्र' (7.2.9) इत्यादिनेट्प्रतिषेधः। `शब्दप्राट्' इति। शब्दं पृच्छतीति `क्विव्वचि' (वा.288) इत्यादिना क्विप्, दीर्घश्च।
अथ किमर्थं छग्रहणम्, यावता `च्छ्वोः शूडनूमासिके च' (6.4.19) इति च्छकारस्य शकारे कृते शकारान्तत्वादेव पृष्ट इत्यादौ षत्वं भविष्यति? इत्यत आह--`च्छदोः शूट्' इत्यादि। `अत्र' इत्यादि। इतिकरणौ हेतौ। तत्र हि `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इत्यनुवर्त्तते, तेन च्छग्रहणं क्रियते; अन्यथा पृष्टः, पृष्टवानित्याद्येव सिध्यत्; न तु प्रष्टा, प्रष्टुमित्यादि; तृजादावक्ङिति शत्वाभावात्। एतच्च सूत्रकारमतेनोत्तम्। केचिदाचार्याः छग्रहणमिह सूत्रे प्रत्याचक्षत एव। तथा हि--`च्छ्रवो शूडनुनासिके च' (6.4.19) इत्यत्रोक्तम्--"केचिदिह क्ङितीत्येतन्नानुवरत्तयन्ति। कथं द्युभ्याम्, द्युभिरित्यूठि कृते? `दिव उत्' (6.1.131) इति तपरकरणान्मात्राकालो भविष्यतीति। `छशां षः' (8.2.36) इत्यत्र च्छग्रहणं न कर्त्तव्यम्, अनेनैव हि सर्वत्र शकारो विधीयते" इति।
`लेष्टा' इति। `लिश अल्पीभावे' (धा.पा.1179) `वेष्टा' इति। `विश प्रवेशने' (धा.पा.1424)।।

37. एकाचो बशो भष् झषन्तस्य स्ध्वोः। (8.2.37)
`धातोः' (8.2.32) इति यदीहानुवर्त्तते तदवयवषष्ठ्यन्तमेकाचो विशेषणम्। `झषन्तस्य' इत्येतदपि समानाधिकरणं तस्यैव विशेषणम्। `एकाचः' इत्येतदवयवषष्ठ्यन्तं बशः। `तदवयवस्य' इति। तस्यावयवस्तदवयवः। योऽसौ धातोरवयव एकाज् झषन्तस्तस्य, तदित्यनेनाभिसम्बध्यते। `झलि परतः' इत्यनेन झलीत्यनुवर्त्तते (8.2.26), तस्य सकारो विशेषणमिति दर्शयति। किमर्थं पनर्झलीत्यनुवर्त्तते? पदान्तस्येत्यनुवृत्तिर्यथा स्यात्; अन्यथा झलीत्यस्मिन् निवर्त्तमाने तत्सम्बद्धं पदान्तग्रहणमपि निवर्त्तत, ततश्च पदान्ते न सिध्येत्। ननु च स्वरितत्वात् पदान्तस्येस्यानुवृत्तिर्भविष्यति? तर्ह्यनेनापि प्रकारेणाख्यायते मन्दधियां सुखप्रतिपत्त्ये। `ध्वशब्दे च' इति। अत्र झलीत्येतन्नापेक्षते, असम्भवात्। न हि कश्चित् झल् ध्वशब्दोऽस्ति; तस्य प्रत्याहारेष्वसन्निवेशात्।
`भोत्स्यते' [`भोत्स्यन्ते'--काशिका, पदमञ्जरी च] इति। `बुध अवगमने' (धा.पा.858), लृट्, स्यः, `खरि च' (8.4.55) इति चर्त्त्वम्--तकारः, अनुदात्तेत्त्वादात्मनेपदम्। अत्र बुधेर्धातोर्व्यपदेशिवद्भावेन स्वरूपमेवैकाजवयवो झषन्तः, तदवयवो बकारो बश, अस्यान्तरतम्यादोष्ठ्यस्य स्थान ओष्ठ्य एव भकारो भविष्यति। एवमन्यत्रापि विज्ञेयम्। `अभुध्वम्' [`अबुद्ध' इति प्रा.मु.पाठः] `षढोः कः सि' (8.2.41) इति कत्वम्, `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्। `न्यघूढ्वम्' इति। `ढ्रलोपे पूर्वस्य दोर्घोऽणः' (6.3.111)। `धोक्ष्यते' इति। दुहो लृट्, `दादेर्धातोर्घः' (8.2.32), तस्य `खलि च' (8.4.55) इति चर्त्वम्--ककारः।
`अजर्घाः' इति। `गुधु अभिकाङ्क्षायाम्' (धा.पा.1246), यङ्, द्विर्वचनम्, हलादिशेषः, `उरत्' (7.4.66) इत्यत्वम्, `कुहोश्चुः' (7.4.62) इति चुत्वम्, `यङोऽचि च' (2.4.74) यङ्लुक्, `रुग्रिकौ च लुकि' (7.4.91) इति रुक्। जगृध इति स्थिते इङादयो विधेयाः। अत्र मुख्य एव गृध इत्ययं धातोर्झषन्तोऽवयवः।
`गर्दभयतेः' इति। गर्दभशब्दात् तदाचष्ट इति णिच्, `णाविष्ठवत् प्रातिपदिकस्य' (वा.813) इति टिलोपः। अत्र गर्वभीत्ययं मुख्य एव धातोर्झषन्तोऽवयवः। `अप्रत्ययः' इति। अश्राविप्रत्ययः क्विबादिरप्रत्यय इत्युच्यते। `दामलिट्' इति। अत्र `होढः' (8.2.31) इति ढत्वे कृते झषन्ततायामुपजातायामेकाज्ग्रहणाद्भष्भाषो न भवति। ननु चात्र द्वावेकाजवयवौ--दकारादिर्मकारान्तः, लकारादिर्झषन्तश्च; तयोश्चासत्यप्येकाज्ग्रहणे नैव

भष्भावः प्रसज्यते। तथा हि-यो झषन्तस्तस्य वश् न विद्यते, यस्तु दकारादिर्मकारान्तस्तस्य वश् विद्यते, झषन्तता तु नास्ति, तदनर्थमेकाज्ग्रहणम्? इत्यत आह--`असत्येकाजग्रहणे' इत्यादि। वशो विशेषणं व्यवच्छेदार्थम्। व्यवच्छेदोऽर्थः प्रयोजनं यस्य तत्तथो क्तम्। यद्येकाज्ग्रहणं न स्यात्, ततोऽन्यस्येहाश्रुतत्वात्, बशस्तु श्रुतत्वाच्च स एव धातोरित्यनेन विशेष्यते न धातोरवयवो वशिति। एवं च बशो झषन्तता न सम्भवतीति झषन्तस्येत्यनेन धातुरेव विशेष्यते; अन्यस्येहासम्भवात्। तथा चायं सूत्रार्थः स्यात्--झषन्तस्य धातोर्योऽवयवो बश तस्य झलि सकारे ध्वे च परतः पदान्ते च भव् भवतीति। अस्मिंश्च सूत्रार्थे दामलिडित्यत्रापि प्रसज्येत। भवति दकारोऽत्र बश् झषन्तस्य धातोरवयवः। एकाच इत्येतस्मिन् सति धातोर्झषन्तस्येत्येतदुभयान्तस्यैव विशेषणं भवति, तदपि बशः। तेन वृत्तिकारोपदर्शित एव सूत्रार्थो जायते; ततश्च न किञ्चिदनिष्टमापद्यते। दामलिडित्यत्र हि यो झषन्त एकाजवयवो लकारादिनं तस्य बश् विद्यते, यस्य तु विद्यते दकारादिर्मान्तस्य स झषन्तो न भवति।
`क्रोत्स्यति' इति। `क्रुध कोपे' (धापा.1189)। `दादद्वि' इति। `दीर्घोऽकितः' (7.4.83) इत्यभ्यासस्य दीर्घत्वम्।
अन्तग्रहणमसन्देहार्थम्। असति हि तस्मिन् सन्देहः स्यात्--किमत्र बशः स्थानित्वम्? अथ झषः? इति।।

38. दधस्तथोश्च। (8.2.38)
दधातेरप्येतत् कृतद्विर्वचनस्य रूपमस्ति। `दध धारणे' (धा.पा.8)--इत्यस्य चाकृतद्विर्वचनस्य रूपम्, तत्र तु शपा व्यवहितत्वादनन्तरौ तथो न सम्भवतः; तस्माद्दधातेरेव ग्रहणं विज्ञायते, इत्याह--`दध इति कृतद्विर्वचनो दधातिः परिगृह्यते' इति। `धत्तः, इति। लटस्तस्थसौ, शपः [शपः श्लुलुपि द्विर्वचनम्--प्रा.मुद्रितः पाठः] श्लुः `श्लौ' (6.1.10) (इति) द्विर्वचनम्, `अभ्यासे चर्च' (8.4.54) इति जश्त्वम्--दकारः, `श्नाभ्यस्तयोरातः' (6.4.112) इत्याकारलोपः, अभ्यासदकारस्य भष् धकारः। धातुधकारस्य चर्त्वम्--तकारः। `धत्से' इति। `थासः से' (3.4.80) `धध्वे' इति। टेरेत्त्वम्। `धध्वम्' इति। लोटि `सवाभ्यां वामौ' (3.4.91) इत्यमादेशः।
कथं पुनरत्र भष्भावः; यावता दधातेर्झषन्तस्य यो दश् तस्य भष् भवतीत्युच्यते, अत्र नापि झषन्ततास्ति; आकारलोपस्य `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावात्; नापि बश्, अभ्यासजशत्वस्यासिद्धत्वात्? इत्यत आह--`वचनसामर्थ्यात्' इत्यादि। `अभ्यासजश्त्वस्यासिद्धत्वम्' इति वचनसामर्थ्यान्न भवतीत्य पेक्षते। यद्याकारलोपस्य स्थानिवद्भावः स्यादभ्यासजश्त्वस्यासिद्धत्वम्। एवं सत्यपार्थकतैवास्य वचनस्य स्यात्, न हि दधातेराकारलोपेन विना बश् स्यात्। तस्माद्वचनप्रामाण्यादुभयं न भवति।
इह झलोत्यनुवर्त्तते, झषन्तस्येति च, तकारथकाराभ्यामन्यः स झलस्ति यत्र दधातेर्झषन्तस्य भष्भावो नेष्यते। तस्मात् `तथोः' इति वचनमन्तरेणापिसिद्धमिष्टमित्यभिप्रायेणाह--`तथोरिति किम्' इति। `आनन्तर्यात्' इत्यादि। अनन्तरसूत्रे हि `स्ध्वोः' (8.2.37) इत्युक्तम्, ततश्च `अनन्तरलस्य विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इति स्ध्वोरेव भष्भावो विज्ञायते, न तथोः; अतः `तथोः' इत्युच्यते। यद्येवम्, निमित्तान्तरोपा दाने पूर्वस्य निमित्तस्य निवृत्त्या भवितव्यम्, ततश्च तथोरेव स्यात्, न स्ध्वोः? इत्यत आह--`चकारः' इत्यादि। परिहारः।।

39. झलां जशोऽन्ते। (8.2.39)
`श्वलिट्' इति। ढत्वे कृते जश्त्वम्।

अथान्तग्रहणं किमर्थम्, ननु `स्कोः संयोगाद्योरन्ते च' (8.2.29) इत्यतोऽन्तग्रहणमनुवर्त्तत एव? इत्यत आह--`अन्तग्रहणम्' इत्यादि। तद्ध्यन्तग्रहणं झलीत्यनेन सम्बद्धम्, अतस्तदनुवृत्तौ झलीत्येतदप्यनुवर्त्तत, तस्मादेतन्निवृत्त्यर्थमन्यदेवान्तग्रहणं क्रियते। तेन च वसतेः--वस्ता, वस्तुमित्यत्र न भवति।।

40. झषस्तथोर्धोऽधः। (8.2.40)
`अथः' इति। अनेन धातुप्रतिषेधोऽयं न धकारप्रतिषेध इति दर्शयति। यदि हि धकारप्रतिषेधः स्यात्, धकारात् परयोस्तथोर्धकारो न भवतीति। ततः `मतिबुद्धिपूनार्थेभ्यश्च' (3.2.188), `वृद्धिर्यस्याचामादिस्तद्वृद्धम्' (1.1.73) इत्येवमादयो निर्देशा नोपपद्येरन्। `अलब्ध, अलब्धाः' इति। लुङ्, तस्य तथासौ, `झलो झलि' (8.2.26) इति सकारलोपः। `अलीढ, अलीढाः' इति। ढत्वष्टुत्वढलोपदीर्घत्वानि कर्त्तव्यानि।।

41. षढोः कः सि। (8.2.41)
`पेक्ष्यति' इति। `पिष्लृ सञ्चूर्णने' (धा.पा.1452), लृट्। `अपेक्ष्यत्' इति। लृङ्। `पिपिक्षति' इति। सन्, `हलन्ताच्च' (1.2.10) इति कित्त्वाद्गुणाभावः।

`पिनष्टि' इति। रूधादित्वात् श्नम्। `लेढि' इति। अदादित्वाच्छपरो लुक्।।

42. रदाभ्यां निष्ठातो नः पूर्वस्य च दः। (8.2.42)
`आस्तीर्णम्' इति। `स्तृञ् आच्छादने' (धा.पा.1484)। `ॠत इद्धातोः' (7.1.100) इतीत्त्वम्, `हलि च' (8.2.77) इति दीर्घः। `विशीर्णम्' इति।

`शृहिंसायाम्' (धा.पा.1488)। `निगीर्णम्' इति। `गॄ निगरणे' (धा.पा.1410)। एषु `श्र्युकः किति' (7.2.11) इतीट्प्रतिषेधः, `अवगूर्णम्' इति। `गुरी उद्यमने' (धा.पा.1396)। `श्वीदितो निष्ठायाम्' (7.2.14) इतीट्प्रतिषेधः।
अथ यथा `कृपो रो लः' (8.2.18) इत्यत्र `र' इति वर्णत्वावर्णत्वकृतं भेदमुत्सृज्य सामान्यस्योपादानम्, तथेहापि, अस्ति च ऋकारे रेफः; ततश्च कृतः कृतवानित्यत्र भवितव्यमेव नत्वेनेति यो मन्यते, तं प्रत्याह--`र इत्यत्र' इत्यादि। यद्यत्र `र' इति सामान्यमुपादीयेत तस्मादेवः प्रसङ्गः, न तु रश्रुतिसामान्यमुपादीयते, किं तर्हि? व्यञ्जनमर्धमात्रात्मकम्। न च समानाकारोऽस्तीति कुतो नत्वप्रसङ्गः? भवतु नाम सामान्यस्योपादानम्, तथापि नैवात्र नत्वं प्रसज्यत इति दर्शयितुमाह--`सामान्यनिर्देशेऽपि' इत्यादि। ऋकारोऽत्र ये भागास्तन्मध्यवर्ती रेफो मात्राचतुर्भागात्मकः, तत्र योऽसौ रेफात्परस्तृतीयो भागस्तेन व्यवधानान्न भवति।
`चरितम्, मुदितम्' इति। `चर गत्यर्थः' (धा.पा.559),`मुद हर्षे' (धा.पा.16)। असति हि `त' इति ग्रहणे `रदाभ्याम्' इत्यनेन निष्ठा विशेष्यते--रदाभ्यां परा या निष्ठेति, ततश्चरितमित्यादौ `आदेः परस्य' (1.1.54) इति इट एव नत्वं स्यात्; तस्य निष्ठाभक्तत्वात्। अथ `त' इत्युच्यमाने चरितमित्यादौ तकारस्य कस्मान्न भवति? इटा व्यवहितत्वात्। स हि प्रत्ययभक्तत्वात् प्रत्ययमेव न व्यवदध्यात्। तदवयवत्वं तु व्यवदध्यादेव। `परस्य मा भूत्' इति। असति हि पूर्वग्रहणे यदि हि सन्निहितया निष्ठया दकारो विशेष्येत--निष्ठाया यो दकार इति, ततो जशत्वे कृते परस्यैव स्यात्--भिन्नवद्भ्याम्, भिन्नवद्भिरित्यादौ। अथ न विशेष्येत, ततो विशेषानुपादानाद्यथापूर्वस्य भवति, तथा परस्यापि। तस्मात् परस्य मा भूदित्येवमर्थं पूर्वग्रहणं कृतम्।
अथ कृतस्यापत्यम्, `अत इञ्' (4.1.95) कार्त्तिरित्यत्र कस्मान्न भवति? इत्याह--`इह' इत्यादि। वृद्धिर्हि तद्धितं निमित्तमाश्रित्य भवतीति बहिरङ्गा, नत्वं तु न किञ्चिद्बाह्यं निमित्तमाश्रित्य भविष्यतीत्यतस्तदन्तरङ्गम्। तस्माद्वृद्धेर्बहिरङ्गत्वान्नत्वे कर्त्तव्ये रेफस्यासिद्धत्वम्। ननु च यदि तर्हि बहिरङ्गलक्षणा सा, तस्या एवासिद्धत्वेन भवितुं युक्तम्, न तु रेफस्यापि, न हि रेफो वृद्धिर्भवति? नैष दोषः; वृद्ध्याश्रितो हि रेफः, ततो वृद्धेर्बहिरङ्गत्वाद्रेफस्यापि बहिरङ्गत्वेन भाव्यम्।।

43. संयोगादेरातो धातोर्यण्वतः। (8.2.43)
`प्रद्राणः' इति। `द्रा कुत्सायां गतौ' (धा.पा.1054)। `कृत्यचः' (8.4.29) इति णत्वम्। `म्लानः' इति। `म्लै गात्रविनामे' [`म्लै हर्षक्षये'--इति धातुपाठः] (धा.पा.904)।
`च्युतः, प्लुतः' इति। `च्युङ् प्लुङ् गतौ' (धा.पा.955,958)। `निर्यातः' इति। `या प्रापणे' (धा.पा.1049)। `निर्वातः' इति। `वा गतिगन्धनयोः' (धा.पा.1050)। अत्र र्या, र्वा-इत्येतयोर्धातुत्वं न भवति। `र्या' इत्ययं हि समुदायः संयोगादिः, न चायं धातुः, किं तर्हि? `या' इत्ययम्। एवं `र्वा' इत्ययं संयोगादिः, न चैष धातुः, किं तर्हि? `वा' इत्ययम्। ननु च बहिरङ्गमत्र संयोगादित्वम्, द्विपदाश्रयत्वात्, नत्वं तु विपर्ययादन्तरङ्गम्; `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इत्यसिद्धत्वादेव संयोगादित्वस्य नत्वं न भवतीति किं धातुग्रहणेन? एवं तर्हि एतज्ज्ञापयति--उपसर्गसम्बन्धेन यो धर्म उपजायते धातूपसर्गसमुदायस्य स धातोरतद्धर्मवतोऽपि कार्याणि प्रापयतीति। तेनोपास्तते गुरुः, अभिभूयते शत्रुरिति कर्मणि लकारः सिद्धो भवति। अत्र ह्यु पसर्गसम्बन्धेन सकर्मकत्वधर्मो जातः। स च धातूपसर्गसमुदायस्य, न धातुमात्रस्य। तत्र यद्ययमर्थो न ज्ञाप्येत, कर्मणि लकारो न स्यात्; धातोरकर्मकत्वात्। अस्मिंश्चार्थे ज्ञापिते तु भवति। `स्नातः' इति। `ष्णा शौचे' (धा.पा.1052)।।

44. ल्वादिभ्यः। (8.2.44)
`जीनः' इति। `ज्या वयोहानौ' (धा.पा.1499), `ग्रहिज्या' (6.1.16) इत्यादिसूत्रेण सम्प्रसारणम्, `हलः' (6.4.2) इति दीर्घः।
`ऋकारल्पादिभ्यः' इत्यादि। ऋकारान्तेभ्यो ल्वादिभ्यश्च परो यः क्तिन् स निष्ठा भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं नु `ओदितश्च' (8.2.45) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात्। यथा ऋकारल्पादिभ्यो निष्ठातकारस्य नत्वं भवति, तथा क्तिनोऽपि तकारस्य नत्वं भवतीति।
`दुग्वोः' इति। `दु उपतापे' [`टु टु उपतापे'--धातुपाठः, पदमञ्जर्यां तु-`दु गतौ(944)इत्ययं धातुरुपात्तः, न `टु टु उपतापे' इति] (धा.पा.1256)। `गु पुरीषोत्सर्गे' (धा.पा.1399)।
`पूनाः' इति विनष्टा इत्यर्थः। `पूतं धान्यम्' इति। विधूतमित्यर्थः।

`सिनोतेः' इति। `विञ् बन्धने' (धा.पा.1248) इत्येतस्य। `ग्रासकर्मकर्त्तृकस्य' इति। ग्रासः कर्मकर्ता यस्य स तथोक्तः। अर्थद्वारकञ्चेदम्। तस्य ग्रासकर्मकर्त्तृकत्वं विशेषणं वेदितव्यम्। यथा सिनो ग्रासो बन्धनक्रियायां व्यञ्जनविशेषयोगादानुकूल्यं प्रतिपद्यते, तथा कर्मणोऽपि सतस्तस्य कर्त्तृत्वं विवक्षितमिति कर्मकर्त्तासौ भवति। `सिनो ग्रासः' ति। स्वयमेव बद्ध इत्यर्थः। `सिता पाशेन सूकरी' इति। समुदायप्रत्युदाहरणमेतत्। अवयवप्रत्युदाहरणं दर्शयितुमाह--`ग्रासोऽपि' इत्यादि। ग्रासोऽपि यदि कर्मैव भवति न कर्मकर्ता, तदापि न भवति; ग्रासकर्मकर्त्तृकत्वमस्य तदाभावात्। ग्रासकर्मतो हि स तदानीं भवति ग्रासकर्मकर्त्तृकः।।

45. ओदितश्च। (8.2.45)

`आपीनः' इति। `प्यायः पी' (6.1.28) इति पीभावः।

`स्वादय ओदितः' इति। ते पुनः `षूङ प्राणिप्रसवे' (धा.पा.1132) इत्यादयः `व्रीङ् प्रीणात्यर्थे' [वृणोत्यर्थे-धातुपाठः] (धा.पा.1140) इत्येवमन्ता दिवादिषु पठ्यन्ते।।

46. क्षीयो दीर्घात्। (8.2.46)
`क्षियः' इति। `क्षि क्षये' (धा.पा.236), `क्षि निवासगत्योः' (धा.पा.1407) इति द्वयोरपि ग्रहणम्; विशेषानुपादानात्। `क्षीणआः क्लेशाः' इति। `क्तोऽधिकरणे' च' (3.4.76) इत्यादिनाऽकर्मकत्वात् कर्त्तरि निष्ठा, `निष्ठायामण्यदर्थे' (6.4.60) इति दीर्घः। `क्षीणो जाल्मः, क्षीणस्तपस्वी' इत्यादि। `वाऽऽक्रोशदैभ्ययोः' (6.4.61) इति।
ननु च `क्षियः' इति निर्देशादेव दीर्घस्य ग्रहणं विज्ञायते, तत् किं दीर्घग्रहणेन? यदि ह्रस्वस्येवं ग्रहणं स्यात्, एवं सति परत्वात् `घेर्ङिति' (8.3.111) इति गुणे कृते क्षेरिति निर्देशः स्यात्? इत्यत आह--`ह्रस्वस्यापि हि' इत्यादि। यदि नियोगतो दीर्घस्यैव धात्वनुकरणस्येयङा निर्देशः स्यात्, ततोऽस्मान्निर्देशाद्दीर्घस्येदं ग्रहणमिति विज्ञायते। न च दीर्घस्यैवेयङा निर्वेशो भवति। तथा हि ह्रस्वान्तस्यासौ दृष्टः क्षियः। `निष्ठायामण्यदर्थे' (6.4.60) इत्यत्रावसितं ह्रस्वान्तस्थेदमनुकर्णम्, न दीर्घान्तस्येति? उच्यते; यथाभूतस्यैवानुकर्तुयुक्तम्। ह्रस्वान्तस्य च दीर्घत्वं विधेयम्। अतस्तस्यैवानुकरणमिदमिति विज्ञायते। यदि तर्हि ह्रस्वान्तस्यापि धात्वनुकरणस्येयङा निर्देशो भवति, `विपराभ्यां जेः' (1.3.19), `विभाषा चेः' (7.3.58) इत्येवमादावपि कस्मान्न भवति? इह `विपराभ्यां जेरित्येवमादौ' इत्यादि। अत्रासङ्कल्पमित्यतदध्याहार्यम्। धात्वनुकरणस्य हि `प्रकृतिवदनुकरणं भवति' (व्या.प.113) इतीयङा निर्देशो भवति। धात्वनुकरणं च किं भवितुमर्हति येन धातावनुकार्येव स्थितम्? धातुत्वं क्रियावाचित्वलक्षणं विवक्ष्यते। `विपराभ्यां जेः' (1.3.19) इत्येवमादौ त्वनुकार्यगतं धातुत्वं सदप्यववक्षितत्वादसङ्कल्पम्। तस्मान्नात्र धात्वनुकरणम्। अपि तु ङीप्रभृतेः क्रियावाचिनश्च तत्सादृश्यशब्दान्तरस्य ङीत्येवमादेर्यद्रूपसामान्यमर्थशून्यं तदनुकरणं द्रष्टव्यम्। तस्मादधात्वनुकरणत्वान्न भवतीयङादेश इत्यभिप्रायः। यदि तर्हि धात्वनुकरण स्यात्, प्रकृतिवदनुकरण भवतीति, एवं सत्यधातो (1.2.45) इति प्रातिपदिकसंज्ञाप्रतिषेधोऽपि स्यात्, ततश्च विभक्तिर्नोपपद्यते? वत्करणेनानुकार्येणार्थेणार्थनार्थवत्त्वस्याश्रयात् प्रातिपदिकसंज्ञा भविष्यतीत्यदोषः।।

47. श्योऽस्पर्शे। (8.2.47)
`शीनम्' इति। `श्यैङ् गतौ' (धा.पा.963), `द्रवमूर्त्तिस्पर्शयोः श्यः'(6.1.24) इति सम्प्रसारणम्, `हलः' (6.4.2) इति दीर्घः। `शोतं वर्त्तते' इति। भावे निष्ठा। पूर्वत्र तु कर्त्तरि। एवं `शीतो वाधुः' इत्यादौ।
`शीतमुदकमित्यत्र' इत्यादि। `गुणभूतोऽपि' इति। अप्रधानभूतोऽपीत्यर्थः। ननु च प्रधाने कार्यसम्प्रत्ययादप्रधानस्य नत्वप्रतिषेधादिकार्यं प्रति निमित्तभावो नोपपद्यते? नैष दोषः; `अस्पर्शे' इति हि यद्ययं पर्युदासः स्यात्, एवं सति शीतो वायुरित्यादौ स्पर्शादन्यद्द्रव्यमस्तीति नत्वं स्यात्; न त्वयं पर्युदासः, किं तर्हि? प्रसज्यप्रतिषेधः। तेन यत्र ल्पर्शनगन्धोऽस्ति तत्र तदाश्रयेण नत्वप्रतिषेधेन भवितव्यम्। अस्ति चेह गुणभूतः स्पर्शः, तेन तदाश्रयो नत्वप्रतिषेधो भवत्येव। भवत्वेवं नत्वप्रतिषेधः, सम्प्रसारणस्य तु गुणभूतः स्पर्शः कथं कारणं भवति? नियमस्य त्यागात्। इह `अल्पाच्तरम्' (2.2.34) इति नियमः--अल्पाच्तरं द्वन्द्वे पूर्वमेव प्रयोक्तव्यमिति; `द्रवमूर्तिस्पर्शयोः श्यः' (6.1.24) इत्यत्र स्पर्शशब्दस्याल्पाच्तरस्य परनिपातं कुर्वताऽस्य नियमस्य त्वागः कृतः। स किमर्थं कृतः? स्पर्शोऽत्रानियमेन प्रधानभूत उपसर्जनभूतो वा सम्प्रसारणस्य कारणमित्यस्यार्थस्य सूचनार्थः। तेन गुणभूतोऽपि स्पर्शः सम्प्रसारणस्य निमित्तं भवति।
स्पर्शशब्दोऽयमस्ति गुणवचनः, अस्ति च रोगवचनः; तदिह विशेषानुपादानादुभयोरपि ग्रहणम्। ततो रोगेऽपि प्राप्नोतीति प्रतिशीन इत्येतन्न सिध्येदिति चोद्यमाशह्क्याह--`गुणे च' इत्यादि। गुण एवेत्यर्थः। कथं पुनर्गुण एव प्रतिषेधो लभ्यते? ज्ञापकात्। यदयं `द्रवमूर्त्तिस्पर्शवोः श्य-' (6.1.24) इत्यत्र सम्प्रसारणं विधाय पुनः `प्रतेश्च' (6.1.25) इति विधत्ते, तज्ज्ञापयति--श्यायतेर्यत्र ग्रहणं तत्र स्पर्श उपादीयमानो रोगं न प्रत्याययतीति। यदि हि प्रत्याययेत्, पुनर्विधानमनर्थकं स्यात्; पूर्वेणैव सिद्धत्वात्। प्रतिपूर्वो हि रोग एव श्यायतिर्वर्त्तते, नान्यत्र।।

48. अञ्चोऽनपादाने। (8.2.48)
`न चेदपादानं तत्र भवति' इति। तत्रेत्यनेनाञ्चतिः परामृश्यते। शब्दद्वारेणाञ्चत्यर्थ एवायमपादानस्य प्रतिषेधसामर्थ्याद्विज्ञायते। न ह्यञ्चतावपादानत्वं सम्भवति, किं तर्हि? तदर्थे क्रियाविषयत्वात् कारकाणाम्। तदेतदुक्तं भवति--न चेदञ्चत्यर्थे विषयभूतेऽपादानं न भवतीति। `समक्नौ' इति। सङ्गतावित्यर्थः। `अन्चु गतिपूजनयोः' [`अन्चू' इति काशीमुद्रितः पाठः](धा.पा.188) इत्युदित्त्वाद्विभाषितेट्। [इत्यूदित्त्वात्--काशीमुद्रितः पाठः] तेन `यस्य विभाषा' (7.2.15) इति निष्ठायामिट्प्रतिषेधः, `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः। `उदक्तमुदकम्' इति। उद्धृतमुदकमित्यर्थः। अथ व्यक्तमित्यत्र नतवं कस्मान्न भवति? इत्याह--`व्यक्तमित्येतत्' इत्यादि। `अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' [`अन्चू' इति। काशीमुद्रितः पाठः] (धा.पा.1458) इत्येतस्यैतद्रूपम्,[इत्येतद्रूपम्--काशीमुद्रितः पाठः] नाञ्चतेः; ततो नत्वमिह न भवतीति भावः।।

49. दिवोऽविजिगीषायाम्। (8.2.49)
`आद्यूनः, परिद्यूनः' इति। अविजिगीषुरित्यर्थः। `च्छ्वोः शूडनुनासिके च' (6.4.19) इति ऊठ्। `द्यूतं वर्त्तते' इति। विजिगीषार्थोऽत्र विवक्षित इति नत्वं न प्रवर्त्तते। कथं पुनरिह विजिगीषार्थः, यावता अक्षपातनलक्षणक्रोडा न प्रतीयते? इत्याह--विजिगीषायां हि'[इत्येतद्रूपम्--काशीमुद्रितः पाठः] इत्यादि। विजेतुमिच्छा विजिगीषा, तस्याम्। तत्र क्रोडायामक्षपातनादि क्रियते। तस्माद्विजिगीषार्थेऽवतिष्ठत इति भावः। आदिशब्देन शलाकापातादेर्ग्रहणम्।।

50. निर्वाणोऽवाते। (8.2.50)
`दातेरुत्तरस्य' इति। `वा गतिगन्धनयोः' (धा.पा.1050) इत्येतस्मात्। `न च' इत्यादि। धातमचिकरणमाधारो यस्य स तथोक्तः। एतदुक्तं भवति--धातेर्धातोर्योऽर्थः स यदि धातेन समवेतो भवतीत्यर्थः। `निर्वाणोऽग्निः, निर्वाणः प्रदीपः' इति। अत्र स्वरूपस्य यः प्रशम उपरतिलक्षणः स धात्वर्थः। `एष निर्वाणो भिक्षुः' इति। अत्रापि। अथ वा--रागादिप्रहाणं धात्वर्थः।
`निर्वातो वातः' इति। अकर्मकत्वात् कर्त्तरि निष्ठा। `निर्वातं वातेन' इति। अत्र भावे। उभयत्राप्यत्र गतिनिरोधो धात्वर्थ-।
`निर्वाणः प्रदीपी वातेन' इति। अत्र वातेनेति कर्त्रि तृतीया। तस्माद्वात एव दात्यर्थस्याधारः, ततश्च नत्वेन भवितव्यमिति कस्यचिद्व्यामोहः स्यात्, अतस्तान्निराकरणायाह--`निर्याणः प्रदीपः' इत्यादि। अत्र निर्वाणंधात्वर्थः, तच्च प्रदपाधारम्, न वाताधारम्। वाताधारे हि तस्मिन्निर्वाण इति यदि कर्त्तरि निष्ठा, तदा तयैवाभिहितत्वात् कर्त्तुर्वातात् तृतीया न स्यात्। अथ `नपुंसके भावे क्तः' (3.3.114) इति भावे? एवं ससि निर्वाण इति पुंल्लिङ्गं न स्यात्। तस्मात् प्रदीप एव कर्त्ता धात्वर्धस्याधारः। यद्येवम्, कथं वातेनेत्यत्र तृतीया? इत्यत आह--`वातस्तु' इत्यादि। एतेनैषा तृतीया न कर्त्तरीति दर्शयति।।

51. शुषः कः। (8.2.51)
`शुष शोषणे' (धा.पा.1183) इत्यस्मात् परस्य निष्ठातकारस्य ष्टुत्वे प्राप्ते ककारो विधीयते। अकार उच्चारणार्थः। `शुष्कः, शुष्कवान्' इति। युक्तं शुष्वानित्येतदुदाहरणम्, शुष्क इत्येतत्त्वयुक्तम्; न ह्येतदर्थेऽस्य सूत्रस्यारम्भो युज्यते, `शुष्कधृष्टौ' (6.1.206) इति निपातनेनैव सिद्धत्वात्? नैतदस्ति; निपातनेन हि ककारे सति शुष्किकेत्यत्र `उदीचामातः स्थाने यकपूर्वायाः' (7.3.46) इति विभाषेत्वं स्यात्, शुष्कजङ्घेत्यत्र च `न कोपधायाः' (6.3.37) इति पुंवद्भावप्रतिषेधः स्यात्; इह तु ककारस्य विधाने सति तस्यासिद्धत्वादेतदुभयं न भवति। तस्माच्छुष्क इत्येतदर्थोऽप्यस्यारम्भो युक्तः।।

52. पचो वः। (8.2.52)
`पक्वः, पक्ववान्' इति। `डुपटचष् पाके' (धा.पा.996)। यद्येवम्, पक्व इत्यतत् `सिद्धशुष्कपक्वबन्धैश्च' (2.1.41) इति निपातनादपि हि सिध्यति; तथापि पक्ववानित्येतदर्थमिदमवश्यमारब्धव्यम्। अन्यार्थं चारभ्यमाणं पक्व इत्येतदर्थरूपमपि भवतीति पस्वशब्दोऽस्योदाहरणमुपन्यस्तम्। निपातनद्वारेण हि तद्व्युत्पत्तौ प्रतिपत्तिगौरवं स्यादित्यभिप्रायः।।

53. क्षायो मः। (8.2.53)
`क्षै जै वै क्षये' (धा.पा.913-915)।।

54. प्रस्त्योऽन्यतरस्याम्। [`प्रस्तोन्यतरस्याम्'--इति प्राचीन्यासमुद्रितः पाठः]
`प्रस्तीमः' इति। `ष्टयै स्त्यै सङ्घातशब्दयोः' (धा.पा.911,910)। `स्त्यः प्रपूर्वस्य' (6.1.23) इति सम्प्रसारणम्; पूर्ववद्दीर्घः। इह यदा मत्वं न भवति। तदा `संयोगादेः' (8.2.43) इत्यनेन नत्वेन भवितव्यम्; ततश्च प्रस्तीनः, प्रस्तीनवानितीष्टं स्यात्--इति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्त्तुमाह--`यदा मत्वं नास्ति' इत्यादि। कृते तर्हि प्रथमं सम्प्रसारणे नत्वं कस्मान्न भवति? इत्याह--`तत्र कृते' इत्यादि।।

55. अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः। (8.2.55)
`फुल्लः' इति। `ञिफला विशरणे' (धा.पा.516), `आदितश्च' (7.2.16) इतीट्प्रतिषेधथः, `उत्परस्यातः' (7.4.88) इत्युत्त्वम्।
`क्तवत्वन्तस्याप्येतल्लत्वमिष्यते' इति। कथं पुनरिष्यियाणमपि लभ्यते, न हि क्तवत्वन्तः शब्दः सूत्र उपात्तः? उच्यते; इह निष्ठायास्तकारान्तं यच्छब्दरूपं तस्य `फुल्ल' इत्येतन्निपात्यते, क्तवतोश्च [`क्तक्तवतोश्च' इति काशीमुद्रितः पाठः] तत् तुल्यम्। परस्तु यदि क्तवतोऽर्थो वा विशेष्यते? विशेष्यताम्, न हि तेन समानेनासमानेन वा परयोजनमस्ति। तस्मात् क्तवत्वन्तस्याप्येतल्लत्वं भवति। एवमनयैव युक्त्या क्षीबकृशोल्लाघादिष्वपि यन्निपात्यते, तदपि क्तवत्वन्तस्य प्रसज्यते?[`प्रसज्येत'--इति का.मु.पाठः] नैष दोषः; वक्ष्यमाणमन्यतरस्यांग्रहणमुभयोर्योगयोः शेषः। व्यवस्थितविभाषा च न ज्ञायते, तेनातिप्रसङ्गो न भविष्यतीति।

`क्षीविकृशिभ्याम्' इति। `क्षीबृ मदे' (धा.पा.382), `कृश तनूकरणे' (धा.पा.382), `कृश तनूकरणे' (धा.पा.1227)। `इडभावश्च निपात्यते' इति। क्तलोपस्यासिद्धत्वाद्वलादिरार्धधातुको भवतीतीट् प्राप्नोति; अतस्तदभावश्च निपात्यते। `कृते वा इटि इच्छब्दलोपः' इति। निपात्यत इति सम्बन्धः। इडभावापेक्षो विकल्पः। अथ वा--नेडभावो निपात्यते। किं तर्हि? कृत इटीच्छब्दलोपः।
`लाघेरुदोऽन्य उपसर्गः प्रतिषिध्यते' इति। उत्पूर्वस्य ग्रहणसामर्थायत्। अन्यथा ह्युत्पूर्वस्योपादानमनर्थकं स्यादित्यभिप्रायः।
अनुपसर्गादित्युच्यते, तत्र परिकृश इति न सिध्यति? इत्यत आह--`परिकृश इत्यत्र' इत्यादि। तनूकरणलक्षणक्रियाया अन्यक्रिया गमनलक्षणा क्रियान्तरम्, तेन योगोऽयम्, न परिशब्दः, अतर कृशिं प्रत्युपसर्गसंज्ञा भवतीति कृत्वा। `परिगतः कृशः' इति। अनेन तं क्रियान्तरयोगं दर्शयति। अथ किमर्थं निपातनम्; यावता फुल्ल इति `फुल्ल विकसने' (धा.पा.532) इत्यस्मात् पचाद्यचि सिध्यति, क्षीबेरिगुपधलक्षणे के--क्षौव इति, कृश इत्यपि कृशेरचैव, उल्लराघ इति--लाघ इत्येव पचाद्यचि सिद्ध्यत्येव? सत्यमेवैतत्; निष्ठायां तु फलतिप्रभृतीनामसत्यस्मिन्ननिष्टं रूपं प्राप्नोति। अतस्तन्निवृत्त्यर्थमारब्धध्यमेतत्।।

56. नुदविदोन्दत्राघ्रह्वीभ्योऽन्यतरस्याम्। (8.2.56)
`समुन्नः, समुत्तः' इति। `अनिदिताम्' (6.4.24) इति नलोपः। `ह्रीत्यस्य' [`ह्री' इत्यतस्य--काशिका, पदमञ्जरी च] इति। `ह्री लज्जायाम्' (धा.पा.108530 इत्यस्य। `अप्राप्त्रः' इति। केनचिदविधानात्। `इतरेषाम्' इति। तत्र `नुद प्रेरणे' [`णुद प्रेरणे'--धातुपाठः] (धा.पा.1426), `उन्दी क्लेदने' (धा.पा.1457)--तयोः `रदाभ्याम्' (8.2.42) इति नित्यं प्राप्सम्। `त्रैङ् पालने' (धा.पा.965), `घ्रा गन्धोपादाने' (धा.पा.926)--एतयोः `संयोगादेः' (8.2.43) इत्यादिना।
`विद विचारणे' इत्यस्य विदेरिह ग्रहणमिध्यते' इति। कथं पुनरस्य ग्रहणमिष्यते, श्लुविकरणेन ह्रीत्यनेन [`ह्रीणा'--प्रा.मु पाठः] साहचार्यात्? नैतदस्ति; शविकरणेन नुदिना साहचर्याल्लाभार्थस्य विदेर्ग्रहणप्रसङ्गात्? एवं तर्ह्यन्यतरस्यामित्येषा व्यवस्थितविबाषा, तेन विचारणार्थस्यैव भवितव्यम्, नान्यस्य; यस्यैवं भवितव्यं तस्यैव ग्रहणं युक्तमिति स एव गृह्यते।
कथं पुनर्ज्ञायते--विचारणार्थस्य विदेर्यहणमिष्यते? इत्याह--`एवं हि' इत्यादि। इष्यत इति वक्ष्यमाणं प्रत्येकमभिसम्बध्यते। `निष्ठा' इत्यनेन निष्ठान्तमुपलक्षयतिः `वेत्तेः' इत्यादि। `विद ज्ञाने' (धा.पा.1064) इत्यस्य `विदितः' इत्येतद्रूपमिष्यते; नित्येट्त्वात्, तस्येटा निष्ठातकारस्य व्यवधाने सति नत्वस्यासम्भवात्। `विद्यतेः' इति। `विद सत्तायाम्' (धा.पा.1171) इत्यस्य श्यन्विकरतस्य [नास्ति--का.मुपाठे] निष्ठान्तस्य `विन्नः' इत्येतद्रूपमिध्यते; `एकाचः' (7.2.10) इतीट्प्रतिषेधात्; `रदाभ्याम्' (8.2.42) इत्यादिना च नित्यं नत्वविधानात्। `विन्तेविन्नश्च वित्तश्च' इति। `विद विचारणे' (धा.पा.1450) इत्यस्य निष्ठान्तस्यैतद्रूपदव्यमिष्यते; पूर्ववदिट्प्रतिषेधात्, अनेन च सूत्रेण (8.2.56) पक्षे नत्वविधानात्। `भोगिवित्तश्च विन्दतेः' इति। विब्दतेरित्यनेन लाभार्थविदिं दर्शयति। तस्य हि `शे मुचादीनाम्' (7.1.59) इति नुमि कृते विन्दतीत्येतद्रूपं भवति। भोगवित्त इति--भोगे वित्तो भोगवित्तः, `सप्तमी' (2.1.40) इति योगविभागात् समासः। भोगग्रहणं चोपलक्षणमात्रम्। प्रत्ययोऽयि गृह्यते। `विद्लृ लाभे' (धा.पा.1432) इत्यस्य भोगे प्रत्यये चार्थे वित्त इत्येतद्रूपं निष्ठायामिष्यते; `वितो भोगप्रत्यययोः' (8.2.58) इति नत्वाभावस्य निपातनात्, `यस्य विभाषा' (7.2.15) इति निष्ठायामिट्प्रतिषेधाच्च। विन्दतेर्हि क्वसौ `विभाषा गमहनविदविशाम्' (7.2.68) इतीड्विभाषितः; `भोगवित्तश्च विन्दतेः' इति ब्रुवताऽर्थतौ भोगप्रत्ययाभ्यामन्यत्र विन्न इत्येतद्रूपमिष्यत इत्युक्तं भवति।।

57. न ध्याख्यापमूर्च्छिमदाम्। (8.2.57)
`ध्यै चिन्तायाम्' (धा.पा.908), `ख्या प्रकथने' (धा.पा.1060), `चक्षिङः ख्याञ्' (2.4.54) इति च--द्वयोरपि ग्रहणम्। ननु च चक्षिङादेशस्य सानुबन्धकत्वान्निरनुबन्धकग्रहणपरिभाषया (व्या.प.53) न प्राप्नोतीति? नैष दोषः; इह हि निष्ठातकारस्य परत्वप्रतिपादने पञ्चमी युक्ता, यथा--`रदाभ्याम् (8.2.42) इति। तत्र पञ्चमीनिर्देशे कर्त्तव्ये यः षष्ठीनिर्देशः क्रियते, स सम्बन्धसामान्यं प्रतिपादयितुम्। न च सम्बन्धिन मन्तरेण सम्बन्धसामान्यमुपपद्यते। न च सानुबन्धके परित्यज्यमाने सम्बन्धिभेदः सम्भवतीति युक्तं तस्यापि ग्रहणम्, `पृ पालनपूरणयोः' (धा.पा.1489), `मुर्च्छा मोहसमुच्छ्राययोः' (धा.पा.212), `मदी हर्षे' (धा.पा.1208)। एषु ध्याख्याप्रभृतिषु--आद्ययोः `संयोगादेः' (8.2.43) इत्यादिना नत्दे प्राप्ते, इतरेषामपि `रदाभ्याम्' (8.2.42) इत्यादिना, प्रतिषेधोऽयमारभ्यते। `पूर्त्तः' इति। `श्रयुकः किति' (7.2.11) इतीट्प्रतिषेधः, `उदोष्ठ्यपूर्वस्य' (7.1.102) इत्युत्त्वम्, पूर्ववद्दीर्घः। `मूर्त्तः' इति `राल्लोपः' (6.4.21) इति च्छकारलोपः, `आदितश्च' (7.2.16) इतीट्प्रतिषेधः। `मत्तः' इति। अत्रापि `श्वीदितो निष्ठायाम्' (7.2.14) इति।।

58. वित्तो भोगप्रत्यययोः। (8.2.58)
`धनमस्य बहवित्यर्थः' इति। कथं पुनर्भोगे व्यत्पादितस्य धने वृत्तिरर्थो भवति? इत्याह--`घनं हि' इत्यादि। अनेन कर्मसाधनत्वं भोगशब्दस्य दर्शयन् धनेऽस्य वृत्तिं दर्शयति।
`प्रतीत इत्यर्थः' इति। एतेन प्रत्ययशब्दस्य कर्मसाधनतामाचष्टे। प्रतीत इति कर्मणि निष्ठा। प्रतीत आख्यात इत्यर्थः। स चायमर्थः प्रत्यये व्युत्पाद्यमानेऽस्य

कथं [नास्ति--का.मु.पाठे] भवति, यदि प्रत्यशब्दोऽपि कर्मसाधनो भवति--प्रतीयत इति प्रत्ययः। तेन प्रत्ययशब्दस्य कर्मसाधनता वेदितव्या।।

59. भित्तं शकलम्। (8.2.59)
`भित्तमिति निपात्यते' इति। किं निपात्यते? रदाभ्यामिति (8.2.42) नत्वे प्राप्ते तदभाव इति। `शकलं चेत्तद्भवति' इति। शकलशब्दस्य योऽर्थः, खमण्ड इति यस्यापरमभिधानम्, भित्तशब्दस्यापि यदि स एवार्थो भवतीत्यर्थः। कथं पुनर्भित्तशब्दस्य शकलमर्थो भवति? इत्याह--`शकलपर्यायोऽयम्' इति। भित्तशब्दः शकलस्यैव पर्यायः। तस्माद्यथा शकलशब्दस्य शकलमभिधेयं भवति, एवं भित्तशब्दस्यापि।
ननु च शकलशब्दोऽयं जातिशब्दः; जातिप्रव-त्तिनिमित्तमुपादाय स्वाभिदेये प्रवृत्तत्वात्; भित्तशब्दस्तु क्रियाशब्दः, क्रियाप्रवृत्तिनिमित्तत्वात्; तथा हि--भिदेर्विदारणार्थात् क्ते विहिते भित्तमिति निपात्यते, न च क्रियाशब्दो जातिशब्दपर्याय उपपद्यते? इत्याह--`अत्र' इत्यादि। शब्दव्युत्पत्तिः=शब्दसंस्कारः, तस्या एवात्र भित्तशब्दे भिदिक्रियानिमित्तत्वाम्; न तु तत्प्रवृत्तेः; असत्त्वात्। जातिरेव तु तत्प्रवृत्ति प्रति निमित्तम्; तस्या विद्यमानत्वात्। तस्माच्छकलशब्दवद्भित्तशब्दोऽपि जातिशब्द एव; न क्रियाशब्द इति युक्ता तस्य तत्पर्यायता। यदि तर्ह्यसत्येवात्र भिदिक्रिया, शब्दसंस्कारत्वस्यापि सा निमित्तं नोपपद्यते? नैतदस्ति; न ह्ययं नियोगोऽभिधीयते--विद्यमानैव क्रिया शब्दसंस्कारस्य निमित्तं भवतीति। तथा हि तैलपायिकाशब्दो यत्र प्राणिविशेषे रूढः, तत्र तैलपानक्रियाशब्दोऽपि नास्ति; तथापि तैलपानक्रिया तत्संस्कारनिमित्तत्वेनाश्रीयते। कथं पुनर्भित्तशब्दो भिदिक्रियाप्रवृत्तिनिमित्तं न भवति? इत्याह--`भिदिक्रियाविवक्षायां हि' इत्यादि। अत्र भिन्नमित्यस्य च भित्तशकलशब्दाभ्यां प्रत्येकमभिसम्बन्धः। तेन `भिन्नं भित्तमित्येव भवति' इति। एतत् प्रयोगद्वयमपि भिदिक्रियादिवक्षायां सिद्धं भवति। विदीर्णे हि शकले तस्य विदीर्णतां प्रतिपादयितुं भिन्नम्, भित्तमित्येष प्रयोगो भिदिक्रियाविवक्षायां क्रियते। यदि च भित्तशब्द क्रियाप्रवृत्तिनिमित्तं स्यात्, ततो भित्तशब्देनैव भिदिक्रियानिमित्तकेन विदीर्णता शकलस्य प्रतिपाद्यत इत्येष प्रयोगो नोपपद्यते, न हि तदस्ति यस्य भित्तशब्देनाप्रतिपादितस्य भिन्नशब्दयोगो भवेत्। भिन्नं शकलमित्येष च प्रयोगो नोपपद्यते; शकलव्युत्पादितेन भित्तशब्देन भिदिक्रियानिमित्तकेन भिन्नशब्दस्य बाधितत्वात्। अस्ति चायं द्विविधोऽपि प्रयोगः, तस्माद्भित्तशब्दस्य भिदिक्रियानिमित्तत्वं न गम्यते।।

60. ऋणमाधमर्ण्ये। (8.2.60)
`ऋ इत्येतस्मात्' इति। `ऋ गतौ' (धा.पा.1098) इत्येतस्मात्, `ऋ गतिप्रापणयोः' (धा.पा.936) इत्येतस्माद्वा।
`अधम ऋणेऽधमर्णः' इति। केन पुनरत्र समास इति? यावता नात्र किञ्चित् समासलक्षणमस्ति; `सप्तमिति योगविभागात् समासः' इत्येतच्च न वक्तव्यम्, सप्तम्याः पूर्वनिपातप्रसङ्गत्? इत्यत आह--`एतस्मादेव' इत्यादि। `तद्भाव आधमर्ण्यम्' इति। तत् प्रतिदास्यतीति ग्रहणक्रियाभिसम्बन्धः। तद्योगाद्भावेऽसावधमर्ण इत्युच्यते। `कालान्तर' इत्यादि। यस्मिन् कालेऽधमर्णो गृह्णाति तस्मात् कालादन्य आगामी कालः कालान्तरम्, तत्र यद्देयं तत् कालान्तरदेयम्, तेन यो विनिमयः= विपरिवर्त्तनम्, तदुपलक्षणार्थमेवाधमर्णग्रहणमेवमुपात्तम्, न च स्वार्थपरतिपादनार्थमेव। किं कारणमेवं व्याख्यायते? इत्याह--`उत्तमर्ण इत्यपि भवति' इति। ऋणे ह्येकोऽधमर्णो भवति, यो गृहीत्वा प्रतिदास्यतीति; यस्तु दत्वा ग्रहौष्यति स उत्तमर्णः। तत्र यद्याधमर्ण्यग्रहणं स्वार्थप्रतिपादनार्थमेवोपात्तम्, तदोत्तमर्ण इति न सिध्येत्, न ह्यत्राधमर्ण्यं विवक्षितम्। तत्तर्हीदं चोत्तमर्यर्णेऽपि कालान्तरदेयविनिमयोपलक्षणार्थत्वादाधमर्ण्यग्रहणे सत्येतदपि सिध्यति, अस्ति ह्यत्र कालान्तरद्वयविनिमयः। तथा ह्युत्तमर्णोऽपि प्रयच्छन् कालान्तरे यद्देयं तेन विनिमयं करोति।।

61. नसत्तनिषत्तानुत्तप्रतूर्त्तसूर्त्तगूर्त्तानि छन्दसि। (8.2.61)
`सदेः' इति। `षद्लृ विशरणगत्यवसादनेषु' (धा.पा.854) इत्येतस्मात्। `निषत्तः' इति। `सदिरप्रत्तेः' (8.3.66) इतिषत्वम्।
`अनुत्तम्' इति। `उन्दी क्लेदने' (धा.पा.1457), `अनिदिताम्' (6.4.24) इति नलोपः।
`प्रतूर्त्तम्' इति। यदा `ञित्वरा सम्भ्रमे' (धा.पा.775) इत्यस्य निपात्यते, तदा `ज्वरत्वर' (6.4.20) इत्यादिना वकारस्योपथायाश्चोत्वम्। यदा `उर्वी तुर्वी थुर्वी हिंसार्थाः' (धा.पा.569,570,571) इत्यस्य, तदा `राल्लोपः' (6.4.21) इति रकारलोपः, पूर्ववद्दीर्घः।
`सूर्त्तम्' इति। `सृ गतौ' (धा.पा.935) उत्वसन्नियोगे रपरत्वम्, पूर्वद्दीर्घः।

`गूर्त्तम्' इति। `गुरी उद्यमाने' [`गूरी'--प्रा.मु.पाठ] (धा.पा.1396)।

62. क्विन्प्रत्ययस्य कुः। (8.2.62)
`घृतस्पृक्' इति। अत्र शकारस्य विवृत्तकरणस्य श्वासानुप्रदानस्याघोषस्य तादृश एव खकारः, तस्य जश्त्वम्--गकारः। गकारस्यापि चर्त्वम्--ककारः। अथ प्रत्ययग्रहणं किमर्थम्, न क्विन इत्येवोच्येत, न हि क्विन् प्रत्ययत्वं व्यभिचरति। एवमुच्यमाने लोपापवादः क्विन एव कुत्वं स्यादित्येतच्च नाशङ्कनीयम्, तथा हि--क्विन्निति प्रत्ययग्रहणं यत्र प्रत्ययग्रहणं प्रत्ययग्रहणपरिभाषया (भो.प.सू.7) क्विन्नन्त उपस्थापिते क्विनो लोपे कर्त्तव्ये कुत्वस्यासिद्धत्वात् पूर्वं लोपेनैव भवितव्यम्। तस्मिन् सति पश्चाद्भवत्कुत्वं परिशिष्टस्य धातोरेव भविष्यिति? इत्यत आह--`क्विनः कुरिति वक्तव्ये'

इत्यादि। असति हि प्रत्ययग्रहणे क्विन्प्रत्ययान्तस्यैव पदान्तस्य स्यात्, मान्यप्रत्ययान्तस्य, तस्यापि चेष्यते। तस्मात् प्रत्ययग्रहणं क्रियते। प्रत्ययग्रहणे सति बहुव्रीहिर्लभ्यते। तेन बहुव्रीहिणा यस्माद्विहितः स धातुरूपलक्ष्यत इति सर्वस्य सिध्यति। `मानो अस्राक्, मानो अद्राक्' इति। `सृज विसर्गे' (धा.पा.1414) `दृक्षिर् प्रेक्षणे' (धा.पा.988), लुङ्, च्लेः सिच् (3.1.44), तिप्, `सृजिदृशोर्झल्यमकिति' (6.1.58) इत्यमागमः, `वदव्रज' (7.2.3) इत्यादिना वृद्धिः, हल्ङ्यादिलोपः (6.1.68), अडागमः, अनेन कृत्वम्।
`सृजिदृशिभ्यां क्विन्विहितः' इति। `ऋत्विक्' (3.2.59) इत्यादिना सृजेः क्विन्विहितः। दृशेरपि `त्यवादिषु दुशेरनालोचने कञ्च' (3.2.60) इत्यनेन। कथं पुनरत्राडागमः, यावता `न माङयोगे' (6.4.74) इति प्रतिषिद्धोऽसो? इत्यत आह-`माङ्योगेऽपि' इत्यादि। छान्दसौ ह्येतौ प्रयोगौ। तेन सत्यपि माङ्योगे `बहुलं छन्दस्यामाङ्योगेऽपि' (6.4.75) इत्यडागमो भवत्येव। `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट् तर्हि कस्मान्न भवति? इत्याह-ईट् च न भवति' इत्यादि।
प्रत्ययग्रहणाद्यथा क्विन्प्रत्ययस्य लुगन्तस्य कृत्वं भवति, दृग्भ्यामित्या दौदृशेः क्विबन्तस्यापि। `एवम्' इत्यादि। प्रत्ययग्रहणात् क्विन्प्रत्ययो यस्माद्विहितः, तस्यान्यप्रत्ययान्तस्यापि कुत्वं भवतीत्यस्मिन्नर्थे व्यवस्थिते रज्जुसृङ्भ्यामित्यत्रापि ब्रश्चादिसूत्रेण (8.2.36) षत्वं यत् प्राप्नोति तद्बाधित्वा कृत्वेन भवितव्यम्।
`अथ तु नेष्यते, प्रतिविधानं कर्त्तव्यम्' इति। [नास्ति--प्रा.मु.पाठे] प्रतिविधानमुत्तरसूत्रे वाग्रहणं यत् तदुभयोर्योगयोः शेषः। व्यवस्थितविभाषा च, तेनेह न भविष्यतीति। एवञ्च सति रज्जुसृभ्याम्, रज्जुसृङ्भ्य इति भवितव्यम्।।

63. नशेर्वा। (8.2.63)
`जीवनङाहुतिः' इति। अत्राकुत्वपक्षे व्रश्चादिसूत्रेण (8.2.36) षत्वे कृते जश्त्वम्--डकारः।।

64. मो नो धातोः। (8.2.64)
`पदस्य' इति वर्त्तते। तच्च धातुसमानाधिकरणं मकारेण विशेष्यते--मकारान्तस्य पदस्य धातोरिति। `प्रशान्, प्रतान् इति। `शमु उपशमे' (धा.पा.1201), `तमु काङ्क्षायाम्' (धा.पा.1202), क्विप्, `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इत्युपधादीर्घत्वम्, हल्ङ्यादिलोपः (6.1.68)। अथेह `नलोपः प्रातिपदिकान्तस्य' (8.2.7) ति नकारलोपः कस्मान्न भवति? इत्याह--`नत्वस्य' इत्यादि।।

65. म्वोश्च। (8.2.65)
`अगन्म' इति। `स उत्तमस्य' (3.4.98) इति सकारलोपः। `जगन्वान्' इति। गमेर्लिट्, क्वसुः, हल्ङ्यादि (6.1.68) संयोगान्तलौपौ (8.2.23), `सान्तमहतः' (6.4.10) इति दीर्घः, `गमहन' (6.4.98) इत्यादिनोपधालोपः। `छन्दस्युभयथा' (3.4.117) इति सार्वधातुकत्वं न भवति। चकारः `धातौः' इत्यनुकर्षणार्थः।।

66. ससजुषो रुः। (8.2.66)
`सजूः' इति। `जुषी प्रीतिसेवनयोः' (धा.पा.1288), सह जषत इति क्विप्, उपपदसमासः, `सहस्य सः संज्ञायाम्' (6.3.78) इति सभावः। रुत्वे कृते `र्वोरुपधायाः' (8.2.76) इति दीर्घः। सजुवो ग्रहणमसकारान्तार्थम्। योगश्चायं जश्त्वापवादः।।

67. अवयाः श्वेतवाः पुरोडाश्च। (8.2.67)
`दाशेः' [`दाशतेः'--काशिका] इति। `दाशृ दाने' (धा.पा.882) इत्यस्माण्ण्विनि कृत इति। वहिदाशिभ्यां `मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्' (3.2.71) इत्यनेन, यजेश्च `आवे यजः' (3.2.72) इति ण्विन्प्रत्ययान्तेभ्यः सम्बुद्धिः, तस्या हलङ्यादिलोपः (6.1.68), ततः `श्वेतवाहादीनां डस्पदस्य' (वा.263) इति डस्प्रदस्य' टिलोपः। किमर्थमेते निपात्यन्ते, यावता श्वेतवोभ्याम्, श्वेतवोभिरित्येवमाद्यर्थम् `श्वेतवाहादीनां डस्पदस्य' इत्यदश्यमिदं वक्तव्यम्, डसि च कृते `ससजुषो रुः' (8.2.66) इत्येव सिद्धम्? इत्याह--`श्वेतवाहादीनाम्' इत्यादि।
नैते रुत्वार्थ निपात्यन्ते, किं तर्हि? सम्बुद्धौ दीर्घत्वार्थम्। ननु च द्रीर्घत्वमप्येषां `अत्वसन्तस्य चाधातोः' (6.4.14) इत्येव सिद्धम्? इत्यत आह-- `अत्वसन्तस्य च' इत्यादि। तत्र हि `सर्वनामस्थाने चासम्बुद्धौ' (6.4.8) इत्यतः `असम्बुद्धौ' इत्येतदनुवर्त्तते, तेन सम्बुद्धौ दीर्घत्वं प्राप्नोतीति, तदर्थमेते निपात्यन्ते। `पुरोडाः' इति। `मन्त्रे श्वेतवहोक्थशस्' (3.2.71) इत्यादिनैव सूतद्रेण दकारस्य डकारो निपात्यते। `उक्थशाः' इति। `शन्सु स्तुतौ' (दा.पा.728)। उक्थानि शंसतीति `मन्त्रे श्वेतवह' (3.2.71) इत्यादिनैव ण्विन्, ततः पूर्ववत् सम्बुद्ध्यादिः।।

68. अहन्। (8.2.68)
`नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नलोपे प्राप्ते विधीयते। ` अहोभ्याम्, अहोभिः' इति। `हशि च' (6.1.114) इत्युत्वम्, `आद्गुणः' (6.1.87)।

`दीर्घाहो निदाघः' ["दर्घाहा"--काशिका, प्राचीनमुद्रितन्यासपाठश्च] इति। बहुव्रीहिः, हल्ङ्यादिलोपः (6.1.68), रुत्वस्यासिद्धत्वात् `सर्वनामस्थाने च' (6.4.8) इत्यादिना दीर्घः, `भोभगोअधो' (8.3.7) इत्यादिना रेफस्य यकारः, तस्य `हलि सर्वेषाम्' (8.3.22) इति लोपः। `हे दीर्घाहोऽत्रि' इति। `अतो रोरप्लुतादप्लुते' (6.1.113) इत्युत्वम्; `आद्गुणः' (6.1.87), `एङः पदान्तात्' (6.1.109) इति परपूर्वत्वम्।

हन्तेर्लङि तिपा हल्ङ्यादिलोपे (6.1.68) कृते तिपश्च लुक्यडागमे चाहन्नित्येतद्रूपं सम्पद्यते, तस्मात्तस्य रुत्वेन भवितव्यम्? इति कसयचिद्भान्तिः स्यात्, अतस्तन्निरासायाह--`अहन्' इत्यादि।

उपसंख्यानशब्दोऽत्र प्रतिपादने वर्त्तते। अह्नो रूविधौ कर्त्तव्ये रूपादिषु रुत्वस्य प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्--पूर्वसूत्रादिह चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, तेनाह्रो रूपादिषु रुत्वं भविष्यतीति। `अहोरूपम्' इति। अह्नो रूपमिति षष्ठीसमासः। कथं पुना रात्रिशब्द उच्यमानं रुत्वं रात्रशब्दे भवति? स्थानिवद्भावात्, एकदेशविकृतस्यानन्यत्वाद्वा। रात्रशब्दास्य तु ग्रहणं न कृतम्, रात्रिशब्दस्यापि यथा स्यात्--गतमहो रात्रिरागतेति। `अहो रथन्तरम्' इति। षष्ठीसमासः। अथ वा--असमास एव। "रोऽसुपि' इत्यस्यापवादो रुत्वम्' इत्यादि। अहोरूपमित्यादि यदि समासः, यद्यसमासो वा, सर्वथा विभक्तेर्लुका भवितव्यम्। लुकि सत्यह्नो रविधौ लुमता लुप्ते (1.1.63) प्रत्ययलक्षणस्य प्रतिषेधः। तेन सुप्परत्वस्याभावात् `रोऽसुपि' (8.2.69) इत्येतत् प्राप्नोतीति रुत्वं विधीयते। किमर्थम्? `हशि च' (6.1.114) इत्युत्वं यथा स्यात्। यदि रुरुदुत्पन्नस्य स्यात्, उत्वविधौ `रोः' इत्युकारानुबन्धविशिष्टस्य रेफस्यानुवृत्तेः।।

69. रोऽसुपि। (8.2.69)

पूर्वस्यायमपवादः। रेफेऽकार उच्चारणार्थः। `अहर्ददाति' इति। यद्यत्र रुत्वं स्यात् `हशि च' (6.1.114) इत्युत्वं प्रसज्येत। तस्माद्रो विधीयते। ननु चात्रापि प्रत्ययलक्षणेन सुबस्ति? नैष दोषः; अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणस्य प्रतिषेधः।

लोपशब्देन यत्र लोपस्तत्र हि प्रत्ययलक्षणम्, यथा--`हे दीर्घाहोऽत्र। हे दीर्घाह निदाघ' इति। अत्र हल्ङ्यादिलोपः (6.1.68)।।

70. अभ्नरूधरवरित्युभयथा छन्दसि। (8.2.70)

नित्यं रुत्वे प्राप्ते पक्षे रोऽपि यथा स्यादित्येवमर्थमिदम्। सकारस्य रुत्वं कृत्वा निर्देशः--यस्मिन् प्राप्ते रेफ उच्येते, तस्य रुत्पस्योभयथाग्रहणेन पक्षेऽबावो विज्ञायेत-इत्येवमर्थञ्च; इतरथा हि द्वेष्यमपि विज्ञायेत। यस्मिन् प्राप्ते रुत्वमारभ्यते तस्य जश्त्वं पक्षेऽभ्यनुज्ञायत इति। `अम्न एव' इति। रुत्वपक्षे `भोभगो' (8.3.17) इत्यादिना यकारः, तस्य `लोपः शाकल्यस्य' (8.3.19) इति लोपः।

`प्रचेतस उपसंख्यानम्, अहरादीनां पत्यादिषूपसंख्यानम्' इति। उभयत्रोपसंख्यानशब्दसय प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्--इतिकरणः प्रदर्शनार्थः, एवम्प्रकारेष्वन्येष्वप्युभयथा भवति--रुत्वं वा रेफो वेते। तेन प्रचेतःशब्दस्य राजनि, अहरादीनाञ्च पत्यादिषूभयता भवति। `प्रचेतो राजन्' इति। प्रकृष्टं चेतो यस्येति बहुव्रीहिः, आमन्त्रितैकवचनम्, रुत्वम्, `हशि च' (6.1.114) इत्युत्वम्, `आद्गुणः' (6.1.87)। इत्युत्वं यथा स्यात्। यदि रुरुदुत्पन्नस्य स्यात्, उत्वविधौ `रोः' इत्युकारानुबन्धविशिष्टस्य रेफस्यानुवृत्तेः।।

69. रोऽसुपि। (8.2.69)

पूर्वस्यायमपवादः। रेफेऽकार उच्चारणार्थः। `अहर्ददाति' इति। यद्यत्र रुत्वं स्यात् `हशि च' (6.1.114) इत्युत्वं प्रसज्येत। तस्माद्रो विधीयते। ननु चात्रापि प्रत्ययलक्षणेन सुबस्ति? नैष दोषः; अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणस्य प्रतिषेधः।

लोपशब्देन यत्र लोपस्तत्र हि प्रत्ययलक्षणम्, यथा--`हे दीर्घहोऽत्र। हि दीर्घाह निदाघ' इति। अत्र हल्ङ्यादिलोपः (6.1.68)।।

70. अम्नरूधरवरित्युभयथा छन्दसि। (8.2.70)

नित्यं रुत्वे प्राप्ते पक्षे रोऽपि यथा स्यादित्येवमर्थमिदम्। सकारस्य रुत्वं कृत्वा निर्देशः--यस्मिन् प्राप्ते रेफ उच्यते, तस्य रुत्पस्योभयथाग्रहणेन पक्षेऽभावो विज्ञायेत-इत्येवमर्थञ्च; इतरथा हि द्वेष्यमपि विज्ञायेत। यस्मिन् प्राप्ते रुत्वमारभ्यते तस्य जश्त्वं पक्षेऽभ्यनुज्ञायत इति। `अम्न एव' इति। रुत्वपक्षे `भोभगो' (8.3.17) इत्यादिना यकारः, तस्य `लोपः शाकल्यस्य' (8.3.19) इति लोपः।

`प्रचेतस उपसंख्यानम्, अहरादीनां पत्यादिषूपसंख्यानम्' इति। उभयत्रोपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्--इतिकरणः प्रदर्शनार्थः, एवम्प्रकारेष्वन्येष्वप्युभयथा भवति--रुत्वं वा रेफो वेति। तेन प्रचेतःशब्दस्य राजनि, अहरादीनाञ्च पत्यादिषूभयता भति। `प्रचेतो राजन्' इति। प्रकृष्टं चेतो यस्येति बहुव्रीहिः, आमन्त्रितैकवचनम्, रुत्वम्, `हशि च' (6.1.114) इत्युत्वम्, `आद्गुणः' (7.1.87)। `प्रचेता राजन्' इति। रेफे कृते तस्य `रो रि' (8.3.14) इति लोपः, `द्रलोपे' (6.3.111) इत्यादिना दीर्घः। सम्बुद्ध्यन्तोदाहरणं रुत्वरेफयोर्विशेष सम्प्रतिपादनार्थम्; असम्बुद्धौ हि रुत्वरेफयोरसिद्धत्वात् `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घत्वे तुल्यमेव रूपं भवति। `अहर्पत्तिः' इति। षष्ठीसमासः। `रोऽसुपि' (6.2.69) इति रेफे कृते तस्य पक्षे रेफो विधीयते। `अह पत्तिः' इति। रेफस्य विसर्जनीये कृते `कुप्वोः क पौ च' (8.3.37) इति पक्षे उपध्मानीयः। `गीर्पतिः' इति। `गृ

शब्दे' (धा.पा.1498)। सम्पदादित्वात् क्विप्, `ऋत इद्धातोः' (7.1.100) इतीत्वम्, रपरत्वम्। `धूर्पतिः' इति। धुर्वेः क्विप्, `राल्लोपः' (6.4.21) इति वकारलोपः। अथ किमर्थं रेफस्यैव रेपो विधीयते? इत्याह--`विसर्जनीयवाधनार्थम्' इत्यादि। `खरवसानयोः' (8.3.15) इति विसर्जनीयः प्राप्नोति, तद्बाधनार्थं रेपस्यैव रेफो विधीयते।।

71. भुवश्च महाव्याहृतेः। (8.2.71)

भुवःशब्दः षष्ठ्य तप्रतिरूपकमव्ययम्, तस्य नित्यं रुत्वे प्राप्ते पक्षे रेफो यता स्यादित्येवमर्थमिदम्। चकार उभयथेत्यस्यानुकर्षणार्थः। तेनोत्तरत्रानुवृत्तिर्न भवति।

`भुवो विश्वस्य' इति। मूशब्दस्य षष्ठ्यन्तस्य पञ्चम्यन्तस्य वा प्रयोगः। यद्येवम्, लाक्षणिकत्वादेवास्य [`लाक्षणिकत्वादिनास्य'--प्रा.मु.पाठः] न भविष्यति, तत्किमेन्निवृत्त्यर्थेन महाव्याहृतिग्रहणेन? एवं तर्ह्येतज्ज्ञापयति--अनित्यलक्षणा प्रतिपदोक्तपरिभाषेति। तेन क्रापयतीत्यतर पुगागमः सिद्धो भवति, नित्यत्वे तु तस्य न स्यात्, अस्याकारान्तस्य लाक्षणिकत्वात्।

कीदृशी भुवःशब्दो महाव्याहृतिर्भवति? इत्याह--`भुवसित्येतत्' इत्यादि। अन्तरिक्षं हि महत्, तस्य व्याहृतिः=उक्तितर्यस्मात्; तस्मान्महाव्याहृतिर्भवति।।

72. वसुस्रंसुध्वंस्वनडुहां दः। (8.2.72)

`विद्वद्भ्याम्' इति। `विदेः शतुर्वसुः' (7.1.36) इति वसुरादेशः। `पपिवद्भ्याम्, पपिवद्भिः' इति। पिवतेः पातेर्वा लिट्, क्वसुः, `वस्वेकाजाद्घासाम्' (7.2.67) इतीट्, `आतो लोप इटि च' (6.4.64) इत्याकारलोपः, स्थानिवद्भावेन `पा' इत्येतद्द्विरुच्यते। `उखास्रत्, पर्णध्वत्' इति स्रंसिध्वंसिभ्याम्--उखायाः स्रंसते, पर्णानि ध्वंसत इति क्विप्, `अनिदिताम्' (6.4.24) इति नलोपः।

इहेदं वसोर्दत्वमनवकाशम्, सर्वस्य विषयस्य विध्यन्तरेणावष्टब्धत्वात्; तथापि विद्वानित्यादौ संयोगान्तलोपः प्राप्नोति, विद्वद्भ्यामित्यादौ तु रुत्वम्। अतस्तदनवकाशत्वाद्यदा रुत्वं बाधते तदा संयोगान्तलोपोऽपि तेन बाधितव्यः, ततश्च विद्वानिति न सिध्यतीति तस्य व्यामोहः स्यात्, तं प्रत्याह-`रुत्वे नाप्राप्ते' इत्यादि। `यस्मिन्नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति' (व्या.प.49), न चाप्राप्ते रुत्व इदमारभ्यते, अतस्तदेव दत्वेन बाध्यते।

`संयोगान्तलोपस्तु नैवम्' इति। तुशब्दो रुत्वाद्विशेषं दर्शयति। इतिकरणो हेतौ। यथा रुत्वं सर्वत्र प्राप्नोति नैवं स्योगान्तलोपः। स हि विद्वानित्यादावेव प्राप्नोति, न विद्वद्भचामित्यादौ। तस्मात् तेनैव दत्वं बाध्यते, न त्वसौ दत्वेन; संयोगान्तलोपे कर्त्तव्ये दत्त्वस्यासिद्धत्वादित्यभिप्रायः।

अत यथा `हो ढः' (8.2.31) इत्यस्य दकारोऽत्रापवादः, तथा स [`स तथा'--प्रा.मु.पाठः] `सावनडुहः' (7.1.82) इत्यस्यापि कस्मान्न भवति, यता ह्यवकाशत्वाद्दकारो ढत्वस्य बाधकस्तथा नुमोऽपि बाधक एव युक्तः? इत्यत आह--`नुमस्तु विधानसामर्थ्यान्न भवति' इति। प्रतिपदं हि `सावनडुहः' नुम् विधीयते, तस्य यद्ययं दकारोऽपवादः स्यात्, नुम्वधानमनर्थकं स्यात्। `अनड्वान्' इति। `चतुरनडुहोरामुदात्तः' (7.1.98) इत्याम्, यणादेशः, हल्ङ्यादि (6.1.68) संयोगान्त (8.2.23) लोपौ। `हे अनड्वन्' इति। `अम् सम्बुद्धौ' (7.1.99) इत्यम्। सेषं पूर्ववत्।।

73. तिप्यनस्तेः। (8.2.73)

`अचकात् अन्वशात्' इति। `चकासृ दीप्तौ' (धा.पा.1074), `शासु अनुशिष्टौ' (धा.पा.1075), लङ्, तिप्, अदादित्वाच्छपो लुक्, हल्ङ्यादिलोपः (6.1.68)। भवानित्यनुप्रयोगस्तिपोऽभिव्यक्तेये। `आ' इति। `आडजादीनाम्' (6.4.72) इत्याट्, `आटश्च' (6.1.90) इति वृद्धिः, तिपो लोपे कृते धातुसकारस्य रुत्वम्, तस्य विसर्जनीयः।।

74. सिपि धातो रुर्वा। (8.2.74)

`अचकास्त्वम्' इति। रुत्वे कृते तस्य विसर्जनीयः, तस्य `विसर्जनीयस्य सः' (8.3.34) इति सकारः। `त्वम्' इति अनुप्रयोगः सिपोऽभिव्यक्तये। अथ धातुग्रहणं किमर्थम्, यावता सकारान्तस्यापि रेफदकारावुच्येते, न च सिपि सकारान्ताद्धातोरन्यदस्ति? इत्यत आह--`धातुग्रहणम्' इत्यादि। उत्तरार्थता चास्व `र्वोरुपधायाः' (8.2.76) इत्यत्र दर्शयिष्यते। क्रियतामुत्तरार्थं धातुग्रहणम्, रुग्रहणं तु न कर्त्तव्यम्; अनर्थकत्वात्; दकारे हि विकल्पिते यथाप्राप्तं रुत्वं पक्षे लभ्यत एव? इत्यत आह--`रुग्रहणं च' इति। उत्तरार्थमित्यपक्षते। `दश्च' (8.2.75) इति वक्ष्यति, तत्र पक्षे रुत्वं यथा स्यादित्येवमर्थम्। असति हि तस्मिन् यदा दत्वं न भवति, तदा यथाप्राप्तं चत्वं न स्यात्।।

75. दश्च। (8.2.75)

चकारेण `दः' (8.2.72) इत्यनुकृष्यते, तेनोत्तरत्र तस्यानुवृत्तिर्न भवति। `अभिनस्त्वम्' इति। लङ्, रुधारित्वात् श्नम्।।

76. र्वोरुपधाया दीर्घ इकः। (8.2.76)

पदस्येत्येव, धातोरिति च, तदुभयमिह समानाधिकरणं रेफवकाराभ्यां विशेष्यते, विशे णेन च तदन्तविधिर्भवतीत्याह--`रेफवकारान्तस्य' इति।

वकारस्योदाहरणं कसमान्न प्रदर्शितम्? इत्याह--`दकारग्रहणमुतरार्थम्' इति। तेन वकारान्तस्योदाहरणं न प्रदर्शितमिति भावः। एतदर्थं तु तन्न भवति; वकारान्तस्य पदस्य धातोरसम्भवात्। `अबिभः' इति। भृञो लङ्, तिप्, गुणः, रपरत्वम्, `जुहोत्यादिभ्यः श्लुः' (2.4.75), द्विर्वचनम्, `उरत्' (7.4.66) इत्यत्त्वम्, `भृञामित्' (7.4.76) इतीत्त्वम्, हल्ङ्यादिलोपः (6.1.68)।।

77. हलि च। (8.2.77)
`दिव्यति, चतुर्यति' इति। दिव् चतुर्--इत्युभयं प्रातिपदिकमत्र, तेन न भवति। `स्मेर्यते' इति। भावे यक्, `गुणोर्त्तिसंयोगाद्योः' (7.4.29) इति गुणः। `भव्यम्' इति। `अचो यत्' (3.1.97) गुणः; `धातोस्तन्निमित्तस्यैव' (6.1.80) इत्यवादेशः।।

78. उपधायाञ्च। (8.2.78)
पूर्वं रेफवकारान्तस्य घातोर्दीर्घत्वविधानादरेफवकारान्तार्थमिदम्। उपधायामिति सुब्व्यत्ययेन षष्ठीद्विवचनस्य स्थाने सप्तम्येकवचनम्। `उपधाभूतौ' इति। उपधात्वं प्राप्तावित्यर्थः। अलोऽन्त्यात् पूर्वौ इति यावत्। `हल्परो' इति। हल् पर आभ्यामिति बहुव्रीहिः। स पुनर्हल् धात्ववयव एव वेदितव्यः। यत्र हि प्रत्ययावयवो रेफवकाराभ्यां हल्परस्तत्र पूर्वेणैव सिद्धः। `हूर्छिता' इति। `हुर्च्छ कौटिल्ये' (धा.पा.211)। `मूर्च्छिता' इति। `मुर्च्छा मोहसमुच्छ्राययोः' (धा.पा.212)। ननु च `अचो रहाभ्यां द्वे' (8.4.46) इति द्विर्वचने कृते रेफोऽत्रोपधा न भवति? नैतदस्ति; दीर्घत्वे कर्त्तव्ये द्विर्वचनस्यासिद्धत्वाच्छकारोऽत्रैक एव हलिति भवत्येवोपधात्वं रेफस्य।
`चिरिणोति, जिरिणोति' इति। `रि क्षि चिरि जिरि दाश दृ हिंसायाम्' (धा.पा.1275-1280) स्वादित्वात्श्नुः'।
इह `री गतौ' (धा.पा.1500), `धी गतिप्रजनादिषु' (धा.पा.1048)-एताभ्यां लिट्, अतुसि, उसि च, `एरनेकाचः' (6.4.82) इति यणादेशः; तस्य स्थानिवद्भावाद्द्विर्वचने कृते `रिर्यतुः, रिर्युः; विव्यतुः विव्यु' इति स्थितेऽभ्यासेकारस्य दीर्घस्य प्राप्नोति, हल्परयो रेफवकारयोरुपधाभूतत्वात्। एतत्कस्मान्न भवति? इत्याह--`रिर्यतुः, रिर्यः' इत्यादि। स्थानिवद्भावः `अचः परस्मिन्' (1.1.57) इत्यादिना। ननु च `न पदान्त' (1.1.58) इत्यादिना दीर्घविधौ प्रतिषिध्यते स्थानिवद्भावः, तत् कुतस्तस्येह सम्भवः? नैतदस्ति; परिगणनं हि तत्र क्रियते--`स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत्' (का.वृ.1.1.58) इतिः `असिद्धत्वाद्वा' इत्यादि। अत्र बहिरङ्गत्वं यणादेशस्य; अङ्गाधिकारे विधीयमानस्य प्रत्ययाश्रितत्वात्। दीर्घत्वस्य त्वन्तरङ्गत्वम्; प्रकृत्याश्रयत्वात्। `असिद्धञ्च बहिरङ्गमन्तरङ्गे' (व्या.प.42) इति दीर्घत्वे कर्त्तव्ये यणादेश स्यासिद्धत्वाद्रेफवकारौ हल्परौ न भवतिः, तत्कुतो दीर्घत्वस्य प्राप्तिः।
इह तर्हि चतुर्यितेति दीर्घत्वं कस्मान्न भवति, अत्र हि `चतुर्य' इत्यस्य क्यजन्तस्य धातोस्तृचि परतः `अतो लोपः' (6.4.48) इत्यकारलोपे कृत उपधाभूतो रेफो हल्परो भवतीत्यस्ति दीर्घत्वस्य प्राप्तिः, इत्याह--`चतुर्यितेत्यत्रापि' इत्यादि। बहिरङ्गत्वमतो लोपस्यार्धधातुकाश्रय स्यात्। दीर्घस्यान्तरङ्गत्वं पूर्ववत्। तर्हि प्रतिदीव्नेत्यत्रापि दीर्घत्वं न स्यात्। यथैव हि चतुर्यितेत्यत्र धातोरुपधा रेफो न भवति, तथा प्रतिदीव्नेत्यत्रापि वकारः। तथा हि--दीव्येत्येतावान् धातुः, नकारस्तु प्रत्यय सम्बन्धी; न च दिवेर्धातोर्वकर उपधाभूतः, किं तर्हि? अन्तभूतः? इत्यत आह--`प्रतिदीव्नेत्यत्र' इत्यादि। प्रतिपूर्वाद्दिवः `कनिन् युवुषितक्षि' (द.उ.6.51) इत्यादिना कविन्, `अल्लोपोऽनः' (6.4.134) इत्यकारलोपः। ननु च `अचः परस्मिन् पूर्वविधौ' (1.1.57) इत्यल्लोपस्य स्थाविवद्भावाद्धलि परतो वकारान्तोऽत्र धातुर्न भवति। तत्कथं `हलि च' (8.2.77) इति दीर्घत्वम्? इत्याह--`दीर्घविधौ' इत्यादि। स्थानिवद्भावप्रतिषेधस्तु `न पदान्त' (1.1.58) इत्यादिना। नन्वेवमपि बहिरङ्गलक्षणसिद्धत्वादल्लोपस्य नैवात्र हलि परतो वकारान्तो धातुरुपपद्यते? इत्याह--`असिद्धं बहिरङ्गम्' इत्यादि। अनाश्रयणस्य तु हेतुरनित्यत्वमस्याः परिभाषायाः। अनित्यत्वं तु `नलोपः सुप्स्वर' (8.2.2) इत्यादौ सूत्रे तुग्विधिग्रहणाज्ज्ञापितम्।
अथ जिव्रिः, किर्योरित्यादौ `हलि च' (8.2.77) इति दीर्घत्वं कस्मान्न भवति जिव्रिशब्दोऽप्ययमे वं व्युत्पाद्यते, `जीर्यतेः क्रिन् रश्च वः' (द.उ.1-80) इति। `जृष् [`जृष'-धा.पा.] झृष् [`झृष'--धा.पा.] वयोहानौ' (धा.पा.1130,1131) इत्यस्मात् क्रिन्प्रत्ययः; `ऋत इद्धातोः' (7.1.100) इतीत्त्वम्, रपरत्वम्, रेफस्य वकार आदेशः--इत्येवं व्युत्पत्तौ जिव्रिरित्येतस्य वकारान्तस्य धातो रेफे हलि परतः `हलि च' (8.2.77) इत्यस्ति दीर्घत्वस्य प्राप्तिः। किरिः गिरिरित्येवमादीनामपि शब्दानामेवं व्युत्पत्तिः क्रियते। `अच इः' (द.उ. 1-67) इत्यत इप्रत्ययेऽनुवर्त्तमाने `भुजेः किच्च' (द.उ. 1-71) इति च `कृगृशृपृकुटिभिदिच्छिदिभ्यश्च' (द.उ. 1-72) इतिकिरतिप्रभृतिभ्यो धातुभ्य इप्रत्ययं विधाय व्युत्पाद्यन्त एते। एवं हि व्युत्पत्तावोसि यणादेशे कृते यकारे हलि परतो रेफान्तानां किरिप्रभृतीनां `हलि च' (8.2.77) इति दीर्घत्वं प्राप्नोति? इत्यत आह--`उणादयोऽव्युत्पन्नानि' इत्यादि। ननु च किर्योः, गिर्योरित्यत्र व्युत्पत्तिपक्षेऽपि दीर्घत्वं न प्रसजति, न ह्यत्र हलि परतः किरतिगिरती रेफान्तौ, दीर्घत्वे कर्त्तव्ये यणादेशस्य स्थानिवद्भावात् स्वराविलोपेषु हि लोपाजादेशो न स्थानिवत्, अन्यस्तु स्थानिवदेव? सत्यमेतत्; अभ्युपगम्येवं परिहार उक्तः। एवं मन्यते--भवत्यविशेषेण स्थानिवद्भावप्रतिषेधः, तथापि नैवात्र दीर्घत्वं प्रसज्येत; अव्युत्पन्नत्वादुणादीनामिति। यद्युणादयोऽव्युत्पन्नानि प्रातिपदिकानीति, न हि तत्रैव सूत्रे व्युत्पत्तिपक्षश्चाश्रयितुं युक्तः, योऽपि `आतो मनिन्क्वनिब्वनियश्च' (3.2.74) इति `अन्येभ्योऽपि दृश्यन्ते' (3.2 75) इति क्वनिप्रत्ययान्त प्रतिदिवञ्शब्दं व्युत्पादयेत तस्यापि नैव दीर्घत्वं सिध्यति, `लोपोव्योर्वलि' (6.1.66) इति वकारलोपे कृते धातोरवकारान्तत्वादिति? कर्त्तव्योऽत्र यत्नः। एव क्रियते-`हलि च' (8.2.77) इत्यत्र `व्याक्तः पदार्थः' इत्येतद्दर्शनमाश्रीयते। अस्मिंश्च दर्शने प्रतिलक्ष्यं लक्षणभेदो भवतीति यावन्ति लक्ष्याणि तावन्त्येव लक्षणाम्युपदिशन्ति, तत्र भिन्नेषु लक्ष्यानुरोधात् क्वचित्

प्रतिदीव्नेत्यादौ व्युत्पत्तिपक्ष आश्रीयते; क्वचित् पुनर्जिव्रिः, किर्योः, गिर्योरित्यादावव्युत्पत्तिपक्ष इति।
चकारो हलोत्यनुकर्षणार्थः।।

79. न भकुर्छुराम्। (8.2.79)
`हालि च' (8.2.70) इति दीर्घत्वे प्राप्ते प्रतिषेधोऽयमारभ्यते। `धुर्यः' इति। `धुरं वहतीति `धुरी यड्ढकौ' (4.4.77) इति यत्। `कुर्यात्' इति। करोतेलिङ्, `तनादिकृञ्भ्य उ' (3.1.79), धातोर्गुणः, रपरत्वम्, `अत उत् सार्वधातुके' (6.4.110) इत्युत्त्वम्, `ये च' (6.4.109) इत्युकारलोपः। `कुर्यात्' इति। आशिषि लिङ्। करोतेर्विकरणेन निर्देशश्चिकीर्षतीत्यत्र प्रतिषेधो मा भूवित्येवमर्थः।।

80. अदसोऽसेर्दादु दो मः। (8.2.80)
`असेः' इतीकार उच्चारणार्थः। अविद्यमानः सकारो यस्य स तथोक्तः। यश्चैवंविधः स सकारान्तो न भवतीत्याह--`असकारान्तस्य' इत्यादि। `अमुम्' इत्यादि। अदसोऽमादिषु त्यदाद्यत्वे `अतो गुणे' (6.1.97) पररूपत्वे च कृतेऽसि (6.1.107) पूर्वत्वम्। औटि, `वद्धिरेचि' (6.1.88) इति वद्धिः। शसि प्रथमयोः पूर्वसवर्णदीर्घत्वम्। अत्र स्थानेऽन्तरतमपरिभाषया (1.1.50) एकवचने मात्रिकस्य मात्रिक एव भवति, अन्यत्र द्विमात्रिकस्य द्विमात्रिकः ननु च मात्रिकः सूत्र उपात्तः, तत्कथं द्विमात्रिको लभ्यते? `अणुदित् सवर्णस्य चाप्रत्ययः' (1.1.69) इति सवरणग्रहणादिति चेत्? न; `भाव्यमानोऽण् सवर्णान् न गृह्णाति' (व्या.प.35) इति प्रतिषेधादित्यत आह--`भाव्यमानोऽपि' इत्यादि। एतच्च `ऋत उत्' (6.1.111) इत्यत्र तपरकरणेन ज्ञापितम्।
`अदस्यति' इति। `सुप क्षात्मनः क्यच्' (3.1.8)।

`अदसोऽनोस्र इति वक्तव्यम्' इति। ओकारसकाररेफाणां द्वन्द्वः, अविद्यमान्रा ओस्रोऽस्येति बहुव्रीहिः। अदोऽत्रेति नपुंसकत्वात् `स्वमोर्नपुंसकाप्त' (7.1.23) इति सोर्लुक्, सकारस्य रुत्वे `अतो रोरप्लुतादप्लुते' (6.1.113) इति रोरुत्वम्, `आद्गुणः' (6.1.87), `एङः पदान्तादति' (6.1.109) इति परपूर्वत्वम्। इदमीकारप्रतिषेधस्य प्रत्युदाहरणम्। `अदः' इति। एतत्तु रेफप्रतिषेधस्य। रुत्वे कृते विसर्जनीयः।
`तदर्थम्' इति। सकाररेफयोरपि प्रतिषेधो यथा स्यादित्येवमर्थम्। `अः सेर्यस्य' इति। सकार [नास्ति-का.मु.पाठे] उच्चारणार्थः। अकारः सकारस्य यस्येत्यर्थः।
`कथम्' इत्यादि। यदाऽदसोऽद्र्यादेशः क्रियते, तदेदमदसोऽद्रेश्च पृथङ्मुत्वं भवति? उतान्त्यसदेशस्य? आहोस्विदद्र्यादेशविषये न भवत्येव? इत्येतत् पृच्छति।
`अदसोऽद्रः' इत्यादि। मश्च उश्च मुः, तस्य भावो मुत्वम्। अदसोऽद्रेश्चोभयोरपि केचिन्मुत्वमिच्छन्तीत्यर्थः। विनापि हि चकारेण तदर्थो गम्यते। तद्यथा--अहरहर्नयमानो गामश्वं पुरुषं पशुमित्यादौ वाक्ये। कथम्? यथेत्याह--`लत्त्ववत' इति। यथा चलीक्लृप्यत इत्यत्र `कृपो रो लः' (8.2.18) इति धातो रेफस्य रीशब्दस्य चोभयोरपि लत्वमिच्छन्ति, तद्वददशः, अद्रेश्च मुत्वम्। `केचिदन्त्यसदेशस्य' इति। अद्र्यादेश इकारान्तः, तस्य केचिदुत्वमिच्छन्ति। स पुनरद्र्यादेशसम्भन्धी दकारो रेफश्च। `नेत्येके' इति। अपरे तु--यदाऽदसोऽद्र्यादेशः क्रियते तदा न भवितव्यमेव मुत्वेनेतीच्छन्ति। अत्रैव कारणमाह--`असेर्हि दृश्यते' इति। अः सेर्यस्य सोऽयमसिः, तस्यासेः। हिशब्दो यस्यादर्थे। यस्मात् सकारस्य स्थाने यस्यादसोऽकारो भवति तस्य पण्डितैर्मुत्वं दृश्यते। न च कृताद्र्यादेशस्यादसः सकारस्य स्थानेऽत्वं भवति; विभक्तेः परहस्य निमित्तस्यानावात्। तस्मात् न तस्य मुत्वेन भवितव्यमिति।
`यैः' इत्यादिना श्लोकस्य पूर्वार्ध व्याचष्टे। असेरति सकारस्य प्रतिषेधः क्रियते-नास्य सिर्विद्यत इत्येवं व्याचक्षाणैः। `उभयोरपि' इति। अदसः, अद्रेश्च। `अमुमुयङ्' इत्यादि। अदोञ्चतीति ऋत्विगित्यादिना (32.59) सूत्रेणाञ्चतेः क्विन्, `अनिदिताम्' (6.4.24) इति नलोपः, उपपदसमासः, `उगिदचाम्' (7.1.70) इति नुम्, हल्ङ्यादि (6.1.68)संयोगान्त(8.2.23) लोपौ। एकवचने `क्विन्प्रत्ययस्य कुः' (8.2.62) इति कुत्वम्--नकारस्य ङ्कारः। अन्यत्र `न श्चापदान्तस्य झलि' (8.3.24) इत्यनुस्वारः, `अनुस्वारस्य यपि परसवर्णः' (8.4.58) इति परसवर्णो ञकारः, [`ङकारः'--का.मु.पाठः] `आसर्वनाम्नः' (6.3.91) इत्यतः `सर्वनाम्नः' इत्यमुवर्त्तमाने `विष्वग्देवयीश्च टेरद्र्यञ्चतौ वप्रत्यये' (6.3.92) इत्यदः शब्दस्य टेरद्र्यादेशः, पूर्वस्माद्दकारादुत्तरस्योत्वम्, दकारस्य मत्वम्, द्वितीयस्मादपि दकाराद्रफस्योत्वम्, दकरस्य मत्वम्--अमुमुयङ्, अमुमुयञ्चाविति भवति। `यथा' इत्यादिना लत्ववदित्यस्थार्थमाचष्टे। `चलीक्लृप्यते' इति। `कृपू सामर्थ्ये' (धा.पा.762)। अत्यन्तं कल्पत इति यङ्, द्विर्वचनम्, `उरत्' (7.4.66) इत्यत्त्वम्, `हलादिः शेषः' (7.4.60), `रीगृदपधस्य च' (7.4.90) इति रीक्, `कुहोश्चः' (7.4.62) इति चुत्वम्, `कुपो रो लः' (8.2.18) इत्युभयोरपि लत्वम्; `अनन्त्यविकारेऽन्त्यसदेशस्य' (व्या.प.63) इति परिभाषानाश्रयणात्।
`ये तु' इत्यादिना `केचिदन्त्यसदेशस्य' इत्यस्यार्थ कथयन्ति। `अदमुयङ्, अदमुयञ्चौ' इति। अत्राद्रिदकारादेरुत्तरस्योत्वम्, अद्रिदकारस्यैव च मत्वम्। शेषं पूर्ववत्।
`येषां तु'[`तेषां तु'--प्रा.मु.पाठे] इत्यादिना `एके' इत्यादेर्व्याख्यानम्। केषां पुनस्त्यदाद्यत्वविषय एव मुत्वेन भवितव्यम्? ये `अः सेयंस्य सोऽयमसिस्तस्यासेः' इत्येवं वर्णयन्ति तेषाम्। `अत्र' इति। अद्र्यादेशविषये नैव भवितव्यमिति;त्यदाद्यत्वाभावात्। अदद्र्यङ, अदद्र्याञ्चौ, अदद्र्यञ्चः' इति। पूर्ववत्। मुभावस्तु विशेषः।

`अमुया, अमुयोः' इति। अदसस्तृतीयैकवचन ओसि च परतस्त्यदाद्यत्वम्, (7.2.102) टाप्, एकादेशः, तस्य `अन्तादिवच्च' (6.1.85) इति पूर्वं प्रत्यन्तवद्भावो दादुदोग्रहणेनैव ग्रहणम्। अत्र यदि दादिति नोच्येत तदा `आङि चापः' (7.3.105), `ओसि च' (7.3.104) इति ङित्येत्वे कृते तस्य चायादेशेऽलोन्त्यपरिभाषया (1.1.52) यकारस्यैवोत्वं स्यात्। दादिति वचनान्न भवति।
उदिति तपरकरणं मुखसुखार्थम्।।

81. एत ईद्रबहुवचने। (8.2.81)
`बहुवचन इत्यर्थविर्देशोऽयम्' इति। अन्वर्थनिर्देश इत्यर्थः। एतदुक्तं भवति--नेदं पारिभाषिकस्य बहुवचनस्य ग्रहणम्, किं तर्हि? अन्वर्थस्य ग्रहणम्--बहुनामर्थानामुक्तिः बहुवचनमिति। किं कारणमेवं व्याख्यातम्? इत्याह--`पारिभाषिकस्य हि' इत्यादि। यदि पारिभाषिकस्य बहुवचनस्येदं ग्रहणं स्यात्, अमी इत्यत्र न स्यात्। न ह्यत्रैकारात् परं पारिभाषिकं बहुवचनमस्ति। अन्वर्थग्रहणे त्वत्रापि बहुनामर्यानामभिधानमस्तीति सिध्यति। अन्वर्थग्रहणं तु व्याप्तिन्यायाल्लभ्यते--एव इति एकारस्य स्थानिवत्त्वं यथा विज्ञायेत। `एः' इत्युच्यमाने, इकारस्यापि स्थानित्वमाशङ्क्येत। किञ्च स्यात्? अद्र्यादेशे कृते तदवयव स्येकारस्य यणादेशो बाधितः स्यात्।
ईदिति तकारो मुखसुखार्थः।।

82. वाक्यस्य टेः प्लुत उदात्तः। (8.2.82)
`वाक्यग्रहणम्' इत्यादि। असति हि वाक्यग्रहणे वाक्ये यावन्ति पदानि तेषां सर्वेषामेव प्लुतः प्रसज्येत। वाक्यग्रहणे त्वन्त्यस्यैव भविष्यति, नानन्त्यस्य। अन्त्यस्यैव हि पदस्य यष्टिः स वाक्यटिर्भवति, न त्वितरस्य। तस्मादनन्त्यस्य पदस्य प्लुतौ मा भूत्, अन्त्यस्यैव यता स्यादित्येवमर्थम्। अनन्त्यस्य कस्मान्न भवति? अनिष्टत्वात्। न हि पदाधिकारस्य निवृत्तिरिष्यते, तथा हि प्रागुक्तम्--पदाधिकारः प्रागपदान्ताधिकारादिति। असत्यत्वाच्च; न हि वाक्यग्रहणेन वाक्ये यावन्ति पदान्ति तेषां सर्वेषाम्। एक एव हि वाक्यस्य टिः, स नियोगतः पदस्यापि भवति, अतो न युक्ता वाक्यस्य पदाधिकारनिवृत्त्यर्थता।
अथ टिग्रहणं किमर्थम्, यावताऽलोऽन्त्यपरिभाषयैव (1.1.52) आयुष्मानेधि देवदत्त3 इत्यत्र टेः प्लुतो भविष्यति? इत्यत्र आह--`टिग्रहणम्' इत्यादि। असति हि टिग्रहणे यथा `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति ह्रस्वग्रहणेघ समुर्त्थापिते `अचः' (1.2.28) इत्येतस्मिन्नचा प्रातिपदिके विशेषिते तस्याजन्तस्यैव ह्रस्वत्वं भवति, नानजन्तस्य--सुवाग् ब्राह्मणकुलमिति; तथेहापि प्लुतग्रहणेन `अचः' इत्येतस्मिन्नुपस्थापिते सत्यचा वाक्ये विशेषितेऽजन्तस्यैव प्लुतः स्यात्, न व्यञ्जनान्तस्य। टिग्रहणे तु सति टिसंज्ञकेनाज्विशेष्यते, न त्वचा टिसंज्ञकः। यदि ह्यचा टिसज्ञको विशेष्येत, ततोऽजन्तो यष्टिस्तस्य प्लुतः स्यात्; तथा चानर्थकं हि टिग्रहणं स्यत्। विनापि तेनाचा वाक्ये विशेषिते तस्याजन्तस्य प्लुतो भवन्नलोऽन्त्यपरिभाषया (1.1.52)ऽन्त्यस्याचः सिध्यति। तस्माट्टिग्रहणस्य नानर्थक्यमिति। टिसंज्ञकेनाज्विशेष,यते--टिसंज्ञको योऽजिति। एवं च सति व्यञ्जनस्यापि टेर्योऽच् तस्यापि प्लुतः सिध्यति। `अग्निचि3त्त' इति। अव्यञ्जनान्तस्यापि व्यपदेशिवद्भावेन--देवदत्त3 इति। तस्माद्व्यञ्जनान्तस्यापि टेरचः प्लुतो यथा स्यादित्येवमर्थं टिग्रहणं कृतम्।
उदात्तग्रहणं तु स्वरान्तरनिवृत्त्यर्थम्, तच्चानन्तोदात्तं प्रयोजयति; योह्यन्तोदात्तस्तत्र स्थानिवद्भावादेवान्चोदात्तो भवति।।

83. प्रत्यभिवादेऽशूद्रे। (8.2.83)
`यदभिवाद्यमानो गुरुः' इत्यादि। अत्र सामान्योपक्रमेण विशेषस्यानभिधानाद् यदिति नपुंसकलिङ्गेन निर्देशः। `आयुष्मानेधि देवदत्त3' इति। इदमत्रोदाहरणम्; प्रत्यभिवादवाक्यत्वात्। अत्र `अभिवादये देवदत्तोऽहम्' इत्येतत्तु गुरोरभिवाद्यमानतां दर्शयितुमुपन्यस्तम्। अभिवाद्यमानो गुरुर्यामाशिषं प्रयुङ्क्ते स प्रत्यभिवादः। तत्रावश्यं गुरोरभिवाद्यमानता दर्शयितव्या; अन्यथा प्रत्यभिवादो न गम्येत। `एधि' इति। भवेत्यर्थः। `अस भुवि' (धा.पा.1065), लोट्, मध्यमपुरुषैकवचनम्, `सेर्ह्यपिच्च' (3.4.87), ध्वसोरेद्धावभ्यासलोपश्च' (6.4.119) इत्येत्त्वम्, `श्नसोरल्लोपः' (6.4.111) इत्यकारलोपः, `हुझल्भ्यो हेर्धिः' (6.4.101) इति धिरादेशः।
`वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--`सिपि धातो रुर्वा' (8.2.74) इत्यतो मण्डूकप्लुतिन्यायेन वेत्यनुवर्त्तते, सा च व्यवस्थितविभाषा, तेन स्त्रियां न भविष्यतीति।
`असूयकेऽपि' इति। असूयतीत्यसूयकः। यो गुरुमसाध्व्या प्रवृत्त्या सामर्ष करोति स उच्यतेऽसूयक इति। `तस्मिन्' इत्यादिना प्रतिषेध इष्यमाणोऽपि न वक्तव्य इति दर्शयति। यदा ह्यसावभिवादयिताऽसूयकत्वेन न निर्ज्ञायते, तदा तेनाभिवाद्यो गुरुः प्रत्यभिवादने तस्य प्लुतं करोत्येव। यदा तु `असूयकोऽयं मां विहेडयितुकामः' इत्येवं विज्ञातो भवति, तदात्र प्रत्यभिवादना नास्त्येवेति किं प्रतिषेधेन! कथं पुनर्ज्ञायते--तत्रासूयकत्वेन निर्ज्ञाते प्रत्यभिवादो नास्ति? इत्याह--`तथा च' इत्यादि। केनाप्यविनीतेनोपगम्याविधिनाभिप्रायेणाभिवादयेऽयं भोः स्थालीत्येवमभिवादिते गुरुस्तस्यासूयकत्वमज्ञात्वा स्थालिञ्शब्दोऽयमस्य संज्ञेति मत्वा प्रत्यभिवादयन् प्लुतं प्रयुक्तवान्--`आयुष्मानेधि स्थालि3न्' इति। अथ सोऽविनीत उक्तवान्--नैष मम संज्ञा, मया दण्डिन्यायो विवक्षितः। ततो गुरुः प्लुतरहितं प्रत्यभिवादनं कृतवान्--`आयुष्मानेधि स्थालिन्निति। पुनः स उक्तवान्--न न मया दण्डिन्यायो विवक्षितः, संज्ञा ममैषेति; अथ स गुरुरसूयकत्वमस्य विज्ञायोनतवान्--`असूयकस्त्वं जाल्म, न त्वं प्रत्यभिवादमर्हसि, भिद्यत्वं वृषल स्थालिन्' इति।

अथाभिवाद्यमानो यदा देवदत्त कुशल्यसि, देवदत्तायुष्मानेधीत्येवं प्रत्यभिवादं प्रयुङ्क्ते तदा कस्मात् प्लुतो न भवति? इत्याह--`अभिवादनवान्ये' इत्यादि। अभिवाद्यतेऽनेनेत्यभिवादनम्, अभिवादनञ्च तद्वाक्यञ्चेत्यभिवादनवाक्यम्। तत्र तावत् सङ्कोर्त्तितं संशब्दितं नाम देवदत्तोऽहमित्येवम्, गोत्रम्--वात्स्योऽहमित्येवम्। यद्यत्र प्रत्यभिवादवाक्यस्यान्ते=अवसाने प्रयुज्यते तत्रायं प्लुत इष्यते। देवदत्त कुशल्यसीत्यादौ तु यदभिवादनवाक्ये सङ्कीर्तितं नाम देवदत्तशब्दः, तत् प्रत्यभिवादनवाक्यस्यादौ प्रयुक्तम्, नावसाने। तस्मात् प्लुतो न भवति। कुतः पुनरेतल्लभ्यते? वेत्यनुवृत्तेः, व्यवस्थितविभाषाविज्ञानाच्च, प्राधान्याद्वा। इह हि प्रधाने कार्यसम्प्रत्ययात् प्रधानस्य वाक्यस्यान्ते वर्त्तमानस्य टेः प्लुतेन भवितव्यम्। प्राधान्यञ्च पदस्यार्थद्वारकम्। प्रधानस्यार्थस्य यद्वाचकं पदं तत् प्रधानं [`प्रधाने'--का.मु.पाठः] चार्थोऽभिवादयिता, तदनुग्रहार्थत्वात् प्रत्यभिवादस्य। तथा ह्यभिवादयितुरनुगुहीतार्यं गुरुः प्रत्यभिवादं प्रयुङ्क्ते। तस्मादभिवादयिता संस्कार्यः, कुशलिताऽऽयुष्मत्तादीनि तस्यैव संस्कारकाणि। अतोऽभिवादयिता संस्कार्यत्वात् प्रधानम्, तस्य वाचकं पदं संज्ञाशब्दो गोत्रशब्दश्चेति तस्यैव वाक्यान्ते वर्त्तमानस्य टेः प्लुतो भवति। यद्यपि तिङन्तवाच्योऽर्थः साध्यः, न तु तस्य साध्यत्वमिह प्राधान्येनाश्रितम्, किं तर्हि? संस्कारकत्वमेव, तस्मान्न तस्यापि प्राधान्यम्।
`भोराजन्यविशाम्' इत्यादि। भो इति--स्वरूपग्रहणम्, राजन्य इति--क्षत्रियनाम्नः, विश इति--वैश्यनाम्नः। अत्र भोःशब्दस्याप्राप्ते विभाषा, असंज्ञागोत्रशब्दत्वात्। इतरेषां तु प्राप्ते; संज्ञाशब्दत्वात्।।

84. दूराद्धूते च। (8.2.84)
`दूरात्' इति। आरात्। `दूरान्तिकेभ्यो द्वितीया च' (2.3.35) इति पञ्चमी। ह्वानं हूतम्। भावे निष्ठा।
दूरादित्युच्यते, दूरञ्चानवस्थितम्। यवेवालस्यापहतं प्रति दूरं भवति तदेवोत्साहसम्पन्नं प्रत्यन्तिकम्। एवं हि कश्चित् कञ्चिदाह--य एष पार्श्वतः करकस्तमानयेति। स आह-उत्थाय गृहाण, दूरं गन्तुं न शक्ष्यामीति। अतो दूरस्यानवस्थितत्वान्न ज्ञायते--कस्यामवस्थायां प्लुत्या भवितव्यमिति। अत आह--`दूरम्' इत्यादि। हूतं ह्वानम्। तदपेक्षं यद्दूरं तदिहाश्रीयते। इतिकरणो हेतौ। यस्माद्धूतापेक्षमिह दूरमाक्षीयते तस्मात् प्राकृतात् प्रकृतौ भवात् प्रयत्नाद्यः प्रत्यत्नविशेषः प्राकृतयत्नादधिकस्तस्यिन्नाश्रीयमाणे यत्र शब्दाह्वानं तत् श्रूयते तद्दूरम्। ततो न भवति दूरस्यानवस्थितत्वमित्वभिप्रायः।
अथेह कथं प्लुतः स्यात्--सक्तून् पिव देवदत्त3 इति? न शब्दमात्रं हूतम्, अपि तु शब्दविशेधः, येन परत आगमने नियुज्यते स शब्दविशेषो हूतम्, न च तदिहास्ति? इत्यत आह--`हूतग्रहणं च' इत्यादि। सम्बोधनं शब्दसाधनं हूतम्। चशब्दस्तस्मादित्यर्थे। तेन तत्साध्यं सम्बोधनं लक्ष्यत इति हूतग्रहणं सम्बोधनमात्रोपलक्षणं वेदितव्यम्। इहायं प्लुतोऽपि दूरात् सम्बोधने विधीयते; एकश्रुतिरपि; `एकश्रुति दूरात् सम्बुद्धौ' (1.2.33) इति; तत्रैवमेकत्र प्राप्नुवतामनेकेषां बाधाविकल्पसमुच्चयानामन्यतमेन भवितव्यम्, अत्र न ज्ञायते--किमेतयोः समुच्चयो भवति? उत विकल्पः? आहोस्विदन्यतरस्य बाधेति? तत्परिज्ञानायाह--`अस्याश्च' [`अस्यां च'--प्रा.मु. न्यासपाठः'] इत्यादि। बाधया तावन्न भवितव्यम्; समानविषयत्वात्। विषयभेदे हि सति बाध्यबाधकभावो भवति, तद्यथा--`कर्मण्यण्'[`तत्तथा'--प्रा.मु.न्यासपाठः] (3.2.1), `आतोऽनुपसर्गे कः' (3.2.3) इति; अत्र ह्येकस्य विशेषो विषयः; अपरस्य सामान्यमित्यस्ति विषयभेदः। अनयोस्तु विशेषो नास्तीत्ययुक्ता [`नास्तीत्युक्ता--का.मु.पाठः] बाधा। विकल्पोऽप्ययुक्तः; असहप्राप्तेः। सहप्राप्तयोर्हि विकल्पो भवति, यथा--तच्यदादीनाम्। न चैकश्रुत्यपेक्ष्येह सहप्राप्तिरस्ति; प्लुतस्यासिद्धत्वात्। तस्मात्पारिशेष्यात् समादेश एव भवति। समावेशः पुनरत्रैकस्मिन् वाक्ये प्रवृत्तिः, न त्वेकस्मिन्नवयवे; दिरुद्धयोरेकस्मिन् प्रवृत्तेरसम्भवात्। वाक्यस्य त्वेनेकावयवात्मकत्वात्। टेरचः प्लृतो भवति। अवशिष्टस्य त्वेकश्रुतिरिति युज्यते समावेशः।।

85. हैहेप्रयोगे हैहयोः। (8.2.85)
पूर्वसूत्रेण प्राधान्याद् हूयमानस्यैव प्लुतो विहितः। प्राधान्यं तु तस्य तदभिमुखीकरणाय वाक्यप्रयोगात्। अतो हैहयोर्न प्राप्नोति, एतदर्थोऽयमारम्भः। अथ पुनर्हैहयोर्ग्रहणं किमर्थम्, यावता विनापि तेन श्रुतत्वात् तयोरेव भविष्यति? इत्याह--`पुनः' [`पुनस्त्वित्यादि'--का.मु.पाठः] इत्यादि। `हैहेप्रयोगे' इत्युच्यमाने `वाक्यस्य टेः प्लुत उदात्तः' (8.2.82) इत्यधिकारादन्त्ययोरेव स्यात्, नानन्त्ययोः; तयोरपि यता स्यादित्येवमर्थं पुनर्हैहेग्रहणम्, हैहेग्रहणे प्रयोगग्रहणं चानर्थकयोरपि यथा स्यात्। तदा चैतावनर्थको यदाऽऽमन्त्रितान्तम्। तेनैवामन्त्रितार्थस्यावगमितत्वादर्थान्तस्य द्योत्यस्याभावात् तावनर्थकौ भवतः। अन्ये त्वाहुः--निपातसमाहारावपि तौ स्तो हन्त हैह इति। तत्रासति प्रयोगग्रहणे तयोर्न स्यात्; लाक्षणिकत्वात्। तस्मात् प्रयोगमात्रे लाक्षणिकयोरपि यथा स्यादित्येवमर्थं प्रयोगग्रहणमिति।।

86. गुरोरनृतोऽनन्त्यस्याप्यैकैकस्य प्राचाम्। (8.2.86)
प्रत्यभिवादादिषु वाक्यस्य टेः प्लुत उदात्तः। स एव तु ऋकारवर्जितस्य गुरोरनन्त्यस्य प्लुत उच्यते। `अव्यस्यापि टेः' इति। अनेनापिशब्दष्टेः तमुच्चयं करोतीति दर्शयति। यदि ह्यपिशब्देन गुरोः समुच्चयः क्रियते, अनन्त्यस्यापि,गुरोरन्त्यस्यापीति, तदानेन गुरावनन्त्ये प्लुतः। लघुरन्त्यः पूर्वेण प्लुत एव। ततश्च द्वयोः प्लुतयोः श्रवणं युगपत् प्रसज्येत। न च `अनुदात्तं पदमेकवर्जम्' (6.1.158) इति वचनान्न भविष्यतीति शक्यं वक्तुम्; तस्मिन् कर्त्तव्ये प्लुतस्यासिद्धत्वात्। यदा टिसंज्ञकोऽपिशब्देन समुच्चीयते तदानेनैव सूत्रेणान्त्यस्य[सूत्रेणानन्त्यस्य--प्रा.मु.पाठः] गुरोरनन्त्यस्य च टेः प्लुतो विधीयते। तत्रैकैकस्येति वचनाद्यथानन्त्यस्य पर्यायो न भवति, तथान्त्यस्यापीति न भवति यौगपद्यप्रसङ्गः।

`एकैकग्रहणम्' इत्यादि। यद्येकैकग्रहणं न क्रियत, तदा पक्षे युगपदेव सर्वेषां प्रसज्येत। तस्मात् पर्यायेण यथा स्यादित्येनमर्थमेकैकग्रहणम्। एतच्च `यथोद्देशं संज्ञापरिभाषम्' (व्या.प.59) इत्याश्रित्य कृतमिति वेदितव्यम्। दर्शनान्तरे `अनुदात्तं पदमेकवर्जम्' (6.1.158) इत्यस्योपस्थाने सति न प्लुतयोर्द्वयोर्यौगपद्यप्रसङ्गः।
अथ प्राचामिति किम; यावतैकैकग्रहणादेव विभाषा सिध्येत्? इत्यत आह--`प्राचाम्' इति। सर्वस्य प्लुतस्येत्यभिप्रायः। अत एवाह--`तदनेन' इत्यादि। अपायहेतुमविमृश्य प्रवृत्तिः=साहसम्।।

87. ओमभ्यादाने। (8.2.87)
`प्रारम्भः' इति। कस्य प्रारम्भे? स्वाध्यायादेः।।

88. ये यज्ञकर्मणि। (8.2.88)
`येज्ञकर्मणि' इति। कर्मशब्दः क्रियावाची। यज्ञक्रियायामित्यर्थः। `ये3 यजामहे' इत्यत्रैवायं प्लुत इष्यत इत्येतच्च `प्राचाम्' इत्यस्यानुवृत्तेः, व्यवस्थितविभाषाविज्ञानाच्च लभ्यत इति वेदितव्यम्।।

89. प्रणवष्टेः। (8.2.89)
`क एष प्रणवो नाम' इति। इह शास्त्रे प्रणवस्यापरिभाषितत्वाल्लोके चाप्रसिद्धत्वात् प्रश्नः। `पादस्य वा' [`पादस्य चेल्यादिना'--प्रा.मु.पाठः] इत्यादिना शास्त्रान्तरपरिमाषया प्रणवस्वरूपं दर्शयति। `वान्त्यमक्षरम्' इति। स्वरोऽत्राक्षरशब्देन विवक्षितः। अन्त्यत्वं पुनस्तस्येतरस्वरापेक्षयः। `उपसंगृह्य' इति। गृहीत्वेत्यर्थः। तदन्त्यमक्षरमादौ यस्याक्षरशेषस्य तत् तदादि। अक्षरञ्च शेषञ्चेति [इति--नास्ति प्रा.मु.पाठे] समाहारे द्वन्द्वः। अक्षरं स्वरः, तस्य शेषः व्यञ्जनम्, तदाचि च तदक्षरशेषञ्च, तदक्षरशेषं यत्रान्त्यात् स्वरात् परं व्यञ्जनं नास्ति तत्र स एव। तदादि तस्य बहुव्रीहेरन्यपदार्थः। व्यपदेशिवद्भावेन तत्रापि तदादिव्यपदेशो भवति। यत्रान्त्यात् स्वरात् परं व्यञ्जनमस्ति तत्र सह स्वरेण व्यञ्जनमन्यपदार्थः; तद्गुणसंविज्ञानस्य बहुव्रीहेरिहाश्रितत्वात्। योऽयमनेन ग्रन्थेन टिसंज्ञक एवोक्तो भवति तद्व्यक्षरशेषस्य ल्थाने यत् त्रिमात्रनोकारम्, ओङ्कारं वा विदवाति तत् प्रणवं कथयन्ति। `जिन्वतो3म्' इति। जयतेः परस्य लट्, तस्य शत्रादेशः, व्यत्ययेन श्नुप्रत्ययः, यणादेशः; जिन्वन्निति स्थितेऽन्शब्दस्यान्त्याक्षरादेः प्रणवः। `सुम्नयो3म्' इति। सुम्नशब्दात् क्यच्, `क्याच्छब्दसि' (3.2.170) इति उप्रत्ययः, `देवसुम्नयोर्यजुषि काठके' (7.4.38) इति आभावः, सुम्नआयुस् इति स्थिते उसित्यस्यान्त्याक्षरादेः प्रणवः। ननु च टिस्थानिकयोरेव त्रिमात्रयोरोकारौकारयोः प्रणव इति परिभाषा कृता। तत्रान्तरेणापि टिग्रहणं टेरेव भविष्यति, तत् किं टिग्रहणेन? इत्यत आह-- `टिग्रहणम्' इत्यादि। असत्यत्र टिग्रहणे व्यञ्जनान्तेष्वलोऽन्त्यपरिभाषयाऽ(1.1.52)न्त्यस्यैव स्यात्। अतष्टिग्रहणं क्रियते--सर्वस्यैव टेर्यथा स्यादिति। `अन्त्यस्य मा भूत्' इति। ओङ्कारस्यानेकाल्त्वात् सर्वादेशो भविष्यतीत्योकारार्थं टिग्रहणम्।।

90. याज्यान्तः। (8.2.90)
इहान्तग्रहणं टेरित्येतस्य निवर्त्तकं वा स्यात्? विशेषणं वा? पूर्वस्मिन् पक्षेऽचान्ते विशेषितेऽजन्ताया एव याज्याया प्लुतः स्यात्। इतरस्मिंस्त्वन्तग्रहणमनर्थकम्, न ह्यनन्त्यष्टिः सम्भवति; `अचोऽन्त्यादि टि' (1.1.64) इत्यस्यैव टिशब्दरूपविशषसंज्ञाविधानादित्यभिप्रायेणाह--`अन्तग्रहणं किम्' इति। इतरोऽपि विदिताभिप्रायोऽन्यदेवान्तग्रहणस्य प्रयोजनं दर्शयितुमाह--`याज्या नाम' इत्यादि। गतार्थम्।।

91. ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः। (8.2.91)
श्रौषट्, वौषडिति निपातौ; इतराणि लोण्मध्यमपुरुषैकवचनानि। केचित्तु आवहशब्दोऽपि निपात इत्याहुः। `प्रेष्य' इति। `ईषु गतौ' [दिवादिषु `इष गतौ' इत्येव पठ्यते] (धा.पा.1127), दिवादित्वाच्छ्यन्, उपसर्गाकारेण सह `आद्गुणः' (6.1.87)।
अथेह कस्मान्न भवति--`आवह देवान् यजमानाय' (वा.सं.5.12), `आवह जातवेदः' (आ.श्रौ.सू.1.3.22), `सुयजा यज'? इत्याह--`आवह देवान्' इत्यादि।
आदिग्रहणं वाक्यादेर्मा भूदिति।।

92. अग्नीत्प्रेषणे परस्य च। (8.2.92)
अग्निमिन्त्रे इत्यस्मिन्नर्थेऽग्नीट्=ऋत्विग्विशेषः, तस्य प्रेषणं नियोजनमग्नीत्प्रेषणमित्यर्थः। आदेः सन्निहितत्वात् तदपेक्षयैव परोऽपि ज्ञायत इत्याह-- `तस्मादेवादेः' इत्यादि। `अत्रैव' इति। अनन्तरोक्त उदाहरणद्वय एवकारेण यद्व्यवच्छिन्नं तद्दर्शयितुमाह--`अग्नीदग्नीन् विहर बर्हिस्तृणीहि' इति। कथं पुनरेतल्लभ्यते? इत्याह--`तदर्थम्' इत्यादि। यथा च सर्वत्र प्लुतो विभाषा शक्यो विज्ञातुम्, तथा `गुरोरनृतोऽनन्त्यस्य' (8.2.86) इत्यादौ सूत्रे प्रतिपादितम्। यदि तर्हि सर्वत्र प्लुतो विभाषा विज्ञायेत, उत्तरत्र विभाषाग्रहणमनर्थम्? न; प्रपञ्चार्थत्वात्। अथेह कथं प्लुतः--`उद्धर3 उद्धर, अभिहर3 अभिहर' इति; स्वाध्यायकाले ह्ययंप्लुतः, नाग्नीत्प्रेषणे, न चायमादेः, नापि `आदेः परस्य' (1.1.54), किं तर्हि? ततोऽन्यस्यैव? इत्यत आह-देः

सन्निहितत्वात् तदपेक्षयैव परोरपि ज्ञायत इत्याह--`तस्मादेवादेः' इत्यादि। `अत्रैव' इति। अनन्तरोक्त उदाहरणद्वय एवकारेण यद्व्यवच्छिन्नं तद्दर्शयितुमाह--`अग्नीदग्नीन् विहर बर्हिस्तृणीहि' इति। कथं पुनरेतल्लभ्यते? इत्याह--`तदर्थम्' इत्यादि। यथा च सर्वत्र प्लुतो विभाषा विज्ञायेत, उत्तरत्र विभाषाग्रहणमनर्थकम्? न; प्रपञ्चार्थत्वात्। अथेह कथं प्लुतः--`उद्धर3 उद्धर, अभिहर3 अभिरह' इति; स्वाध्यायकाले ह्ययं प्लुतः, नाग्नीत्प्रेषणे, न चायमादेः, नापि `आदेः परस्य' (1.1.54), किं तर्हि? ततोऽन्यस्यैव? इत्यत आह--`इह तु' इत्यादि। विस्पष्टार्थम्।।

93. विभाषा पृष्टप्रतिवचने हेः। (8.2.93)
`पृष्टप्रतिवचनम्' इति। पृष्टस्य प्रतिवचनम्=आख्यानं पृष्टप्रतिवचनम्। प्रतिवचनशब्दोऽयं विरुद्धेऽपि वचने प्रवर्त्तते--विरुद्धं वचनं प्रतिवचनमिति, प्रतिशब्दो ह्यत्र विरोधं द्योतयति, यथा--प्रतिमल्लः, प्रतिगज इति; वीप्सायामपि वर्त्तते--वचनं वचनं प्रतीति प्रतिवचनम्, `यथार्थे यदव्ययम्' (2.1.6) इति वीप्सायामव्ययोभावः; समाधानेऽपि वर्त्तते--यदनेनाभिहितं तस्य मया प्रतिवचनं विहिनमिति, समाधिर्विहित इति गम्यते; तत्र `प्रतिवचने' इत्युच्यमाने सर्वत्र प्रसज्येत। तस्मात् प्रतिवचनविशेषार्थं पृष्टग्रहणम्। पृष्टस्य यत् प्रतिवचनम्=अर्थाख्यानं तत्रैव यथा स्यात्, अन्यत्र मा भूदिति।।

94. निगृह्यानुयोगे च। (8.2.94)
`निगृह्य' इति। ल्यबन्तमेतत्। `स्वतात्' इति। स्वावगमात्। `प्राच्यावनम्'[`प्रच्याचनम्'--प्रा.मु.पाठः] इति। अपनयनम्। `आविष्करणम्' इति। प्रकाशनम्। `श्राद्धम्' इति। कर्मविशेषः। `एवमनुयुज्यते' इति। एवमादिष्कृतस्वमतः क्रियत इत्यर्थः। चकारो विभाषेत्यस्यानुकर्षणार्थः। तेनोत्तरविधिर्नित्यो भवति।।

95. आम्रेडितं भर्त्सने। (8.2.95)
`चौर चौर3' इति। `वाक्यादेरामन्त्रितस्य' (8.1.8) इत्यादिना भर्त्सने द्विर्वचनम्। यद्यपि वाक्यग्रहणमेतदन्त्यस्य पदस्य प्लुतनिवृत्त्यर्थम्, तथापीह वचनसामर्थ्यादनन्त्यस्यापि भवति। न हि वाक्यान्ते भर्त्सन आम्रेडितं सम्भवति, वाक्यादेरेव पदस्य भर्त्सने द्विर्वचनविधानात्।
`तदर्थम्' इति। पर्यायेण पूर्वोत्तरयोः पदयोर्यथा स्यादित्येवमर्थम्; द्विरुक्तोपलक्षणार्थञ्च। आम्रेडितस्य भर्त्सनग्रहणाद्विज्ञायते--तद्द्विरुक्तस्य हि यत् परं तदाम्रेडितम्। न च तावता भर्त्सने प्रवृत्तिः सम्भवति; भर्त्सनस्य द्विरुक्तिद्योत्यत्वात्। तस्माद्द्विरुक्तोपलक्षणार्थमाम्रेडितग्रहणं विज्ञायते। तद्द्विरुक्तिश्च पूर्वोत्तरविषयेऽपीति द्वयोरपि प्लुतो भवति। स च पर्यायेण भवति, न यौगपद्येन; भर्त्सनद्योतनफलत्वात् प्लुतेः। अन्यतरप्लुत्यैव च तद्भर्त्सनस्य द्योतितत्वात्।।

96. अङ्गयुक्तं तिङाकाङ्क्षम्। (8.2.96)
`आकाङ्क्षम्' इति। आकाङ्क्षति अपेक्षत इत्याकाङ्क्षम्, पचाद्यच्। `अङ्ग कूज3' इत्यादि। अङ्गकूज 3, अङ्ग व्याहर 3--इत्येतदुभयमपि `इदानीं ज्ञास्यति जाल्म' इत्येतदपेक्षते। `अङ्ग देवदत्त' इत्येतदपि `मिथ्या वदसि' इत्येतत्। `अधीष्व' इत्येतदपि `ओदनं ते दास्यामि' इत्येतत्।
`नैतदपरमाकाङ्क्षति' इति। विवक्षितार्थस्य परिसमाप्तत्वात्।
अथ युक्तग्रहणं किमर्थम्, यावता पदविधित्वादेव योगो विज्ञास्यते। एवं तर्हि युक्तग्रहणं कुर्दन्नेतज्ज्ञापयति--`समर्थः पदविधिः' (2.1.1) इत्येषा परिभाषाऽनित्या। तेनाऽसूर्यम्पश्यानि मुखानीति नञोऽसत्यपि सूर्यशबह्देन सामर्थ्ये समासः सिद्धो भवति।।

97. विचार्यमाणानाम्। (8.2.97)
`प्रमाणेन वस्तुपरीक्षणं विचारः। तेन विषयीक्रियमाणानि विचार्यमाणानि। बहुवचननिर्देशो येषामर्थगत एव विचारो न स्वरूपगतः, तेषामपि यथा स्यादित्येवमर्थः; इतरथा हि येषां स्वरूपगतो विचारस्तेषामेव स्यात्। न हि मुख्ये वाक्ये विचार्यमाणे सत्यर्थद्वारकं गौणं यस्य विचार्यमाणत्वं तस्य ग्रहणं युक्तम्। `गृहा3इ' इति। गृह इत्यत्र एकारः, तस्य `एचोऽप्रगृह्यस्य' (8.2.107) इत्यादिना पूर्वार्थस्याकारः, उत्तरार्धस्य त्विकारः। तस्याकारस्यानेन प्लुते भवति।।

98. पूर्वं तु भाषायाम्। (8.2.98)
पूर्वेणैव सिद्धे नियमार्थमेतत्। तुशब्दस्त्विष्टतोऽवधारणार्थः। असति हि तस्मिन् विपरीतोऽपि नियमो विज्ञायेत--भाषायामेव पूर्वमिति। पूर्वत्वं च प्रयोगापेक्षम्। अहिर्नु3, रज्जुर्नु3--इत्येतयोर्वाक्यायोर्यत् पूर्वं प्रयुज्यते तस्यैव टेः प्लुतो भवति। इह तु भावाग्रहणात् पूर्वयोगाश्छन्दसीति विज्ञायते।।

99. प्रतिश्रवणे च। (8.2.99)
प्रतिश्रुतिः प्रतिश्रवणम्। प्रतिपूर्वाच्छृणोतेर्भावे ल्युट्, `कुगति' (2.2.18) इत्यादिना तत्पुरुषः। प्रतिपूर्वस्य शणोतिर्यदा परानुग्रहो विवक्ष्यते, तदाभ्युपगमे वर्त्तते। अथ त्वविवक्षा परानुग्रहस्य, तदा प्रतिज्ञाने। यदा श्रितिः--श्रवणमिति भावसाधनेन श्रवणशब्देन प्रतिशब्दस्य `लक्षणेनाभिप्रती आभिमुख्ये' (2.1.14)

इत्यव्ययीभावः क्रियते, तदा श्रवणाभिमुख्ये श्रवणं प्रति प्रवृत्त इत्यर्थः। तदिह विशेषानभिधानात् सर्वस्मिन् प्रतिश्रवणे वाक्यस्य टेः प्लुतो भवति। `देवदत्त भोः किमात्थ3' इति। एतच्छ्रवणाभिमुख्य उदाहरणम्। `देवतत्त भोः' इत्यामन्त्रितम्। तप्र श्रवणार्थमेवमाह--`किमात्थ3' इति। एकत्र श्रवणमुद्दिश्य प्रवृत्तत्वादभिमुखं भवति। अभ्युपगमे तूदाहरणम्--`गां मे देहि भोः, अहं ते ददामि3' इति। प्रतिज्ञाने--`नित्यः शब्दो भवितुमर्मति' इति।
चकारो भाषायामित्यनुकर्षणार्थः।।

100. अनुदात्तं प्रश्नान्ताभिपूजितयोः। (8.2.100)
अगम3' इति। गमेर्लुङ् पुवदिसूत्रेण (3.1.55) लृदित्त्वादङ्, सिप्।

`अग्निभूता3इ' इति, `पटा3उ' इति। सम्बुद्धौ परतः `ह्रस्वस्य गुणः' (7.3.108) इति गुणः, `एचोऽप्रगृह्यस्य' (8.2.107) इत्यादिनाऽकारः, इदुतौ च। उदाहरणवाक्ये पूर्वपदानामेतेनैव प्लुतः, कृत इति गृहीत्वा यश्चोदयेत्--अथ कथमिहानन्त्यस्यापि प्लुतो भवति, यावता वाक्यस्य टेरित्यनुवर्त्तते इति? तं प्रत्याह--`अग्निभूते, पटो इत्येतयोः' इत्यादि।।

101. चिदिति चोपमार्थे प्रयुज्यमाने। (8.2.101)
`चिदिति' इति। इतिकरणः प्रयुज्यमान इत्येतच्छब्दस्य विशेषणमित्यस्यार्थस्य द्योतनाव। असति ह्येतदर्थं इतिकरणे ह्युपमार्थेऽन्यस्मिन् प्रयुज्यमाने चिच्छब्दः प्लवत इति विज्ञायेत। तत्प्रज्यमानतयात्र तस्मिन् विशेषिते वाक्यस्य टेः प्लतः सिद्धो भवति।
`कतथञ्चिदाहः' इति। अत्र कृच्छ्रे चिच्छब्दो वर्त्तते। `अग्निर्माणवको भायात्' इति। अग्निरिव माणवको दीप्येतेत्यर्थः अस्तीहोपमार्थः, तथापि चिच्छब्दस्य प्रयोगो नास्तीति न प्लुतो भवति। असति तु प्रयुज्यमानग्रहणे इहोपमानगतौ सत्यां यदप्यन्येषामपि सर्वेषामुपमानार्थानां प्रयोगो गम्यते, तथापि योऽत्र चिच्छब्दस्य प्रयोगस्तदाश्रयः प्लुतः स्यादेव। चकारोस्यैव प्लुतस्य समुच्चयार्थः। समुच्चयश्च भेदाधिष्ठान इति प्लुतानन्तरमेवेदमाख्यातं भवति; अन्यथा पूर्वध्वेव प्लुतनिमित्तेष्वेतस्मिन् विषयेऽनुदात्तत्वमात्रं विधीयत इति विज्ञायेत।।

102. उपरिस्विदासीदति च। (8.2.102)
इतिकरणः कार्यिणो निर्देशार्थः। कार्यं हि विधातुमवश्यं षष्ठ्यासौ निर्देष्टव्यः। इतिकरणेन वेति वार्थः प्रत्यवमुश्यते। शब्दप्रधानस्त्विहोपरिस्विदादिशब्दः कार्य इष्यत इतीतिकरणेन निर्दिष्टः प्लुतो यथा विज्ञायेत। `अधःस्विदासीदित्यत्र' इत्यादि। अत्राधःस्विदासीत्, उतोपरिस्विदासीवित्येतद्विचार्यते; तत्र पूर्वस्मिन् वाक्ये `विचार्यमाणानाम्' (8.2.97) इत्यादिनोदात्तः प्लुतः, इतरस्मिंस्त्वनेनानुदात्तः, तस्यैवापवादः।
चकारस्य पूर्ववदेव प्रयोजनम्।।

103. स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु। (8.2.103)
असूयादिशब्दानां `वाक्यादेरामन्त्रित' (8.1.8) इत्यादौ सूत्रेऽयं आख्यातः। `माणवक3 माणवक' इत्यादौ द्विर्वचनं तेनैव सूत्रेण वेदितव्यम्।
`वावचनं कर्त्तव्यम्' इति। वेत्येतद्विकल्पोपलक्षणम्। वचनं व्याख्यानमित्यर्थः। अत्रैतदुक्तं भवति--विकल्पव्याख्यानं कर्त्तव्यमिति। तत्रेदं व्याख्यानम्--`विभाषा पृष्टप्रतितिवचने हेः' (8.2.93) इत्यतो मण्डूकप्लुतिन्यायेन विभाषाग्रहणनुवर्त्तते, तेन विकल्पो भविष्यतीति।।

104. क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्। (8.2.104)
क्षिया=आचारभेदः। इष्टाशंसनम्=आशीः। नियोगः=प्रैषः। आकाङ्क्षत्यपरं तिङन्तमेव। कुत एतत्? आकाङ्क्षाग्रहणादेव। सुबन्ते हि साधनादायिनी तिङन्तस्यावश्यम्भाविनी अपेक्षेति।
`धनं च तात' इति। अत्र लप्सीष्टेत्येतदपेक्षते। `व्याकरणं च' इति। अत्राप्यध्येषीष्टेत्येतत्।
`लुनीहि3' इति। `ई हल्यधोः' (6.4.113) इतीत्वम्। `पिब' इति। पाघ्रादिसूत्रेण (7.3.78) पिबादेशः।
`अस्तु' इति। अस्तेर्लोट्, `एरुः' (3.4.86) इत्युत्वम्, अदादित्वाच्छपो लुक्, एतच्चापरं तिङन्तं नापेक्षते। एवं `विहर' इत्येतदपि।।

105. अनन्त्यस्यापि प्रश्नाख्यानयोः। (8.2.105)
`अन्त्यस्य तु' इत्यादि। तुशब्दः पदान्तरेभ्यो विशेषं दर्शयति। अन्त्यस्येत्यनेनापि स्वरितः, `अनुदात्तं प्रश्नान्ताभिपूजितयोः' (8.2.100) इत्यनेनाप्यनुदात्तः; तयोश्चैकत्र यौगपद्यं न सम्भवति। तत्र वचनप्रामाण्यादनुदात्तोऽपि पक्षे न भवति, स्वरितोऽपि।।

106. प्लुतावैच इदुत्तौ। (8.2.106)
`दूराद्धूते च' (8.2.84) इत्येवमाविभिर्लक्षणैः प्लुतो विधीयमानः `अचश्च' (1.2.28) इत्यस्योपस्थाने सति यत्रैव प्लुत उक्तः, तत्र तस्यैवैचः

समुदायात्मनः स्यात्, तदवयवयोरेवेष्यते। स च वचनमन्तरेण न सिध्यतीतीदमारभ्यते। तस्य तु प्लुतस्य निमित्तं दूराद्धूतादेवैचः प्रसङ्ग इति पूर्वेण प्रकरणेन प्लुतस्य प्राप्तौ सत्यामित्यर्थः। `ऐ3तिकायन्, औ3पमन्यव' इति। अत्र `गुरोरनृतीः' (8.2.86) इत्यादिना एचः प्लुते प्राप्तेऽनेन तदवयवयोरिदुतोः प्लुतः क्रियते। ऐ3तिकायन, औ3पमन्यवेत्यत्र यद्यैचोरवयवयोरिदुतोः प्लुतः क्रियते, तत्रैकारीकारौ चतुर्मात्रौ सार्द्धत्रिमात्रो वा प्राप्नुतः। इह ह्यौचौ समाहारवर्णौ; मात्राऽवर्णस्य मात्रेवर्णोवर्णयोः। अपरे त्वाहुः--अर्धमात्राऽवर्णस्य, अध्यर्धमात्रेवर्णोवर्णयोरिति। अत्र पर्वस्मिन् दर्शनेऽनेन प्लुते कृते सति इदुतोस्तिस्रो मात्राः, अवर्णस्य चैकमात्रेति चतुमत्रिः प्राप्नोति; इतरत्र तु दर्शनेऽवर्णस्यार्धमात्रा, इदुतीस्तु ता एव तिन्न इति सार्धत्रिमात्रः प्राप्नोतीत्यत आह--`अत्र यदा' इत्यादि।

ननु च त्रिमात्रस्य `प्लुत इति संज्ञा कृता, तत्कथं द्वित्रिमात्रावपि प्लृतौ शक्यावनेन कर्त्तुम्? इत्यत आह--`प्लुताववििति हि' इत्यादिना। एतेन लौकिकस्यात्र प्लुतस्य ग्रहणम्, न पारिभाषिकस्येति दर्शयति। कुतः पुनरेतल्लभ्यते? पुनः प्लुतग्रहणमनर्थकं स्यात्, लोके हि च प्लुतो वृद्धिमानुष्यते। अत एवाह--`इदुत्तौ वृद्धिं गच्छत इत्यर्थः' इति। अनेकार्थत्वाद्धातूनां प्लवतिर्वृद्धावपि वर्त्तते। नन्वेवमप्यनियमेन वृद्धिः प्रसज्यते; इयत्तानभिधानात्; ततश्च यावती वृद्धिः स्यात्, याक्त्या चतुर्मात्रार्वचौ सम्पद्येयातामिति? अत [`अत्राह'--का.मु.पाठः] इत्यादि। प्लुतिर्वृद्धिरित्यर्थः। कथं पुनरयं नियमो लभ्यते? एवं मन्यते--ऐच इति प्लुतापेक्षया षष्ठी। इदुतौ तथा प्लवेते यथा स प्लुत एङोर्भवति; एवञ्चंचोर्भवति यदि तावती वृद्धिर्भवति यावत्या तावैचौ त्रिमात्रौ सम्पद्येते। अकृतायां हि वृद्धौ ऐच्त्वमेव स्यात्; युक्तपरिमाणत्वादैचाम्, ततश्चैच्सम्बन्धी प्लुतो न स्यादिति।
`अर्धतृतीयमात्रौ' इति। अर्धतृतीयं ययोर्मात्रयोस्तेऽर्धतृतयमात्रे, ते ययोस्तावर्धतृतयमात्रौ। इदं तावद्वार्त्तिककारमतमाश्रित्य समाधानमुक्तम्। भाष्यकारस्य त्विष्टैव चतुर्मात्रता प्लुतस्येति दर्शयन्नाह--`भाष्ये तूक्तम्' इत्यादि। `तत्कथम्' इति। यदि तत् भाव्यकारस्य मतं तत् केन प्रकारेण सम्पद्येत? इत्येतत् पृच्छति। `सम्परविभागपक्षे' इत्यादिना यथा तत् सम्पद्यते तथा दर्शयति। समप्रविभागपक्षे ह्यनेन सूत्रेणेदुतोस्त्रिमात्रः प्लुतः क्रियते, ततश्च तत्सम्बन्धिन्यो यास्मिस्रो मात्रा या च पूर्वाकारमात्रा ताः सर्वाः समाहृताश्चतस्रो मात्रा भवन्ति। एवञ्च चतुर्मात्रः प्लुतो भवति। अत्र भाष्यकारदर्शने पुनः प्लुतग्रहणं सर्वत्र प्लुतोपसंग्रहार्थम्; अन्यथा स्वरितप्रकरणात् तस्यैव प्रसङ्गे सत्येवेदुतोरिवं प्लुतिः स्यात्। पुनः प्लुतग्रहणे तूदात्तानुदात्तयोरपि भवति। तपरकरणं मुखमुखार्थम्।।

contin...november file

107. एचोऽप्रगृह्यस्यादूरादूधूते पूर्वस्यार्घस्यादुत्तरस्येदुतौ। (8.2.107)
एचः समाहारवर्णाः तत्र एकारस्य ओकारस्य च पूर्वेण प्रकरणेन समुदायस्यैष प्लुतः, एचोः पुनरवयवयोरिदुतोः। अनन्तरसूत्रेणेदमारभ्यते `विषयपरिगणनं कर्त्तव्यम्' इति। एतद्ग्रहणवाक्यम्। अस्य `प्रश्नान्ताभिपूजित' इत्यादिना विवरणं करोति `कर्त्तव्यम्' [वक्तव्यम्--काशिका] इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`अनुदात्तं प्रश्नान्ताभिपूजितयोः' (8.2.100) इत्यादयो योगा इहानुवर्त्तन्ते, तेनान्यत्र न भवति। `यथाविषयम्' इति। यो यस्य विषयो यथाविषयम्--`यथाऽसादृश्ये' (2.1.7) इत्यव्ययीभावः, `प्रश्नान्ताभिपूजितयोः' (8.2.100) अनुदात्तः प्लुतः। प्रश्ने तु `अनन्त्यस्यापि प्रश्नाख्यानयोः' (8.2.105) इति स्वरितः, शेषेपूदात्तः। `इतुतौ पुनरुदात्तावेतौ' इति। `टेरुदात्तः' (8.2.82) इति चाधिकारात्। `विष्णुभूते विष्णुभूते3' इति। अत्र `आम्रेडितं भर्त्सने' (8.2.95) इति प्लुतः।

`आगच्छ भो माणवक विष्णुभूते3' इति। अत्र `दूराद्घते च' (8.2.84) इति। ननु चासत्यपि परिगणने नैव प्लुतः प्राप्नोति; `अदूराद्धते' इति वचनात्, तत्किमर्थमिदं परिगणनस्य प्रत्युदाहरणित्याह--`परिगणने च' इत्यादि। असति परिगणने, अदूराद्धूत [`अदूराद्धूतेन भविष्यतीति' इत्येव--का.मु.पाठः] इत्युच्यते। अस्मिंस्तु सत्येतन्न वक्तव्यम्। परिगणनादेव हि दूराद्धूते न भविष्यतीति। `कर्त्तव्यम्' इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`याज्यान्तः' (8.2.90) इत्यतोऽन्तग्रहणमनुवर्त्तते, तेनान्तस्यैव भविष्यतीति।
`भद्रं करोषि गौः' इति। `अभिपूजिते' (8.2.100) इति प्लुतः। अन्तग्रहणानुवृत्तेरत्रायं विधिर्न भवति, न ह्यत्रैतच्छब्दोऽश्ते, किं तर्हि? व्यञ्जनम्।
`शोभने खल् स्तः खट्वे3' इति। अत्रापि `अभिपूजिते' (8.2.100) इत्येव प्लुतः।
`आमन्त्रिते `च' [`च' नास्ति--काशिका पदमञ्जरी च] इत्यादि। प्लुतश्चासौ विकारश्चेति प्लुतविकारः। प्लुतव्यपदेशस्त्विदुतोः प्लुतसाहचर्याद्वेदितव्यः। इदुतोर्ग्रहणमैचः पूर्वस्योत्तरस्य चैत आदेशा मा भूवन्नित्येवमर्थम्। तपरकरणमिहापि मुखसुखार्थम्।।

108. तयोयर्वावचि संहितायाम्। (8.2.108)
`तयोः' इति। अनन्तरविहिताविदुतौ प्रत्यवमृश्येते।

`अग्ना3याशा, पटा3वाशा' इति। अग्ने आशा, पटो आशा इति स्थिते `प्रद्नान्ताभिपूजितदिचार्यमाणप्रत्यभिवाख्याज्यान्तेषु' (वा.932) इत्येतेषामन्यतमस्मिन् विवक्षिते, एचः पूर्वस्यार्थस्याकारः प्लुतः, उत्तरस्यार्थस्येदुतौ, तयोरनेन य्वौ।
किमर्थं पुनरेतदारभ्यते? एतौ `इको यणचि' (6.1.77) इत्येव सिध्यत? इत्यत आह--`इदुतोरसिद्धत्वात्' इत्यादि। ननु च सिद्धा प्लुतः स्वरसन्धिषु। यणादेशादिषु यदयम् `प्लुतप्रगृह्या अचि' (6.1.125) इति प्लुतस्य प्रकृतिभावमाह; सतो हि कार्येम भवितव्यम्, नासतः; प्लुतस्य चेकः, अतस्तावपि स्वरमन्धिषु सिद्धावेष? इत्यत आह--`अथापि' इत्यादि। यदीदं नोच्येत, तदा `अग्ना3 इ इन्द्रम्, पटा3 उ उदकम् ति स्थिते षाष्ठिकं यणादेशं बाधित्वाऽकः सवर्णे दीर्घत्वं (6.1.101) स्यात्। इह चाग्ना3 इति आशा इति स्थिते `इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' (6.1.127) इति प्रकृतिभावः स्यात्। तस्माद्यथानयोः सिद्धत्वं स्यात्, तथापि दीर्घत्वं शाकलविषिश्च मा भूदित्येवमर्थमिदं वक्तव्यमेव। ननु चान्यदेव तन्निवृत्त्यर्थ यत्नान्तरमस्ति, किं पुनस्तदिति चेत्? उच्यते; `श्को यणचि' (6.1.77) इत्यत्रोपसंख्यायते--`इकः प्लुतपूर्वस्य यणादेशो वक्तव्यः शाकलदीर्घनिवृत्त्यर्थम्' (वा.673) इति। तस्योपसंख्यानमवश्यं कर्त्तव्यम्। य इक् भोःशब्दस्य प्लुतः। अत्र भोःशब्दात् पर इकारो निपातः, न प्लुतविकारः। तस्य यणादेश इष्यते, सोऽसति तस्मिन्नुपसंख्याने न स्यात्। तस्मादवश्यं तत् कर्त्तव्यम्। यस्मिंश्च क्रियमाणे प्लुतविकारयोरपीदुतोस्तेनैव भवितव्यम्, ततो नेदं वक्तव्यमित्यत आह--`तथापि' इत्यादि। अग्ना3 इति आशा इति स्थिते यदि तेन षाष्ठिकोपसंखक्यानेन यणादेश इहोदात्तल्येकारस्य स्थाने क्रियेत, तस्योदात्तयण्स्वरे कर्त्तव्ये सिद्धत्वादाशाशब्दाकारस्यानुदात्तस्य `उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (8.2.4) इति स्वरितः प्रसज्येत। आशाशब्दः `आशाया अदिगाख्या चेत्' (फि.सू.1-18) इत्यन्तोदात्तः। शेषमपि `अनुदात्तम्' (6.1.158) इत्याकारोऽनुदात्तः। तस्मादस्ति स्वरितत्वपरसङ्ग इति तन्निवृत्त्यर्थमिदमुच्यते।
`किन्त यणा' इत्यादि। संग्रहश्लोकद्वयम्। किमिति प्रश्ने। तु इति वितर्के। `इको यणचि' (6.1.77) इति यणादेशेन किं न सिद्धं भवतीहाग्ना3 याशेत्येवमादावुदाहरणे यदाचार्य इदुतीर्य्वौ विदधाति! सर्वमेव सिद्धमित्यभिप्रायः। स्यादेतत्--यणादेशो न प्राप्नोति, तस्मिन् कर्त्तव्ये इदुतोरसिद्धत्वादित्यत आह--`तौ च' इत्यादि। तुशब्दो हेतौ। यदा इक् प्लुतपूर्वो भवति तदा तस्य स्यात्। तस्मात् `इकः प्लुतपूर्वस्य यणादेशो वक्तव्यः शाकलदीर्घनिवृत्त्यर्थम्' (वा.673) इत्युपसंख्याने यणादेशमपवादं करोति शाकलदोर्घविध्योः। तेन हेतुना तयोरिदुतोः शाकलदीर्घविधी न भविष्यतः। चशब्दः समुच्चये; भिन्नक्रमश्च प्रतिषेधानन्तरं द्रष्टव्यः। `तौ च मम स्वरसन्धिषु सिद्धौ'। न च शाकलदीर्घविधी प्रयोजयतः। एवमपवादः। तेषां शाकलदीर्घनिवृत्तेः प्रयोजनत्वे प्रयोजनान्तरमाह--`यणस्वरबाधनमेव तु हेतुः' इति। यणादेशाश्रयः स्वरो यणस्वरः, तस्य बाधनं हेतुः कारणम्। कस्य? प्रकरणात् सूतारम्भस्यैति गम्यते। तुशब्दोऽवधारणे। यण्स्वबाधनमेव तु सूत्रारम्भस्य हेतुरित्यर्थः।।

इति बोधिसत्त्वदेशीयाचार्य श्रीजिनेन्द्रबुद्धिपादविरचितायां काशिकाविवरणपञ्जिकायामष्टमाध्यायस्य

द्वितीयः पादः
- - -

8.3

अथाष्टमाऽध्यायः

द्वितीयः पादः

1. पूर्वत्रासिद्धम्। (8.2.1)

एष योगः परिभाषा वा स्यात् अधिकारो वेति पक्षद्वयं सम्भाव्यते। तत्र यद्ययं परिभाषा स्यात् सर्वस्यामष्टाध्याय्याम्पूर्वस्मिन्नुत्तरमसिद्धं स्यात्, ततश्च `अतो भिस ऐस्' (7.1.9) इत्यत्र त्यदाद्यत्वस्यासिद्धत्वात् तैः, यैः--इत्यत्रैस्भावो न स्यादितीमं परिभाषापक्षे दोषं दृष्ट्वा स्वरितत्वेनाधिकारत्व (1.3.11) मस्येति निश्चित्याह--`पूर्वत्रासिद्धमित्यधिकारोऽयम्' इति। `अध्यायपरिसमाप्तेः' इति। अवधिप्रदर्शनार्थमेतत्। `तत्र' इति वाक्योपन्यासे। `सपादा' इति। सह पादेनानन्तरं प्रक्रान्तेन वर्त्तत इति सपादा। `सप्ताध्यायी' इति। सप्तानामध्यायानां समाहारः, `द्विगोः' (4.1.21) इति ङीप्। क्वचित् `सपादसप्ताध्यायी' इति पाठः, तत्र सपादा चासौ सप्ताध्यायी चेति विशेषणसमासः, पुंवद्भावः। `अयम्' इति। वक्ष्यमाणः। `पादोनोऽध्यायः' इति। अनन्तरोक्तेन पादेनोनोऽपरिपूर्णः पादोनोऽध्यायः। `असिद्धो भवति' इत्यादि। पादोनाध्यायग्रहणेनोत्तरोत्तरयोगग्रहणेन च शास्त्रासिद्धत्वमिहाश्रीयत इति दर्शयति। कार्यासिद्धत्वाश्रयणे हि यथा देवदत्तस्य हन्तरि हते न पुनर्देवदत्तस्य प्रादुर्भावो भवति, तथा कार्यस्यासिद्धत्वे तिपादिते न प ुनः प्रकृतेः प्रत्यापत्तिर्भवति। [`प्रादुर्भावो'--प्रा.मु.पाठः] ततश्चामुद्धत्वे तुस्मैभावशास्त्रमेव प्रवर्त्तते, न त्वशास्त्रमसिद्धतवामिति न भवत्येष दोषप्रसङ्गः। अपि च शास्त्रस्य मुख्यत्वं पूर्वत्वं कार्यस्यौपचारिकत्वम्। यस्य कार्यस्य शास्त्रं पूर्वं तदप्युपचारेण पूर्वमित्युच्यते, न स्वत एव तसय पूर्वत्वम्; सन्निवेशविशेषाभावात्। कार्यं हि लक्ष्यगतम्, तत्र यथा लक्ष्यस्य सन्निवेशो नास्ति तथा तद्गतस्यापि कार्यस्य। न च मुख्ये पूर्वत्वे सति गौणत्वस्य परिग्रहणं मुक्तम्। तस्माच्छास्त्रं [तस्माच्छास्त्रपूर्वग्रहणेन--प्रा.मु.पाठः] पूर्वग्रहणेन गृह्यते। तस्य च पूर्वत्वं परशास्त्रमेवापेक्ष्य भवति। अतो यदपेक्षं तस्य पूर्वत्वं ततः परस्य शास्त्रस्यैवासिद्धत्वमनेन कर्त्तुं युक्तम्। शास्त्रस्यासिद्धौ च कृतायामर्थतः कार्यासिद्धत्वं कृतमेव भवति; तस्य तन्निबन्धनत्वात्। सिद्धशब्दो निष्पन्नवचनः। सिद्धं निष्पन्नमित्यर्थः। न सिद्धमसिद्धम्, अनिष्पन्नमित्युच्यते। परञ्च शास्त्रं यच्च निष्पन्नं तन्न शक्यं वचनशतेनाप्यनिष्पन्नसत्तायामापादयितुम्। अन्यथा न कश्चिद्दुःखविवशां दशामनुभवेतु; असिद्धवचनेनैव न द ुःखस्यानिष्पन्नतापादानात्। तस्माद्यथा ब्रह्मदत्तोऽब्रह्मदत्तोऽयमित्युक्तेऽकतिदेशोऽयं गम्यते, तथेहाप्यसिद्धत्वमित्युक्तेऽतिदेशोऽयं गम्यत इत्याह--`असिद्धवद्भवति' इति। एतदेव स्पष्टीकर्तुमाह--`सिद्धकार्यम्' इत्यादि। एवं हि तदसिद्धवद्भवकति यदि सिद्धस्य यत्कार्यं तन्न करोति।

`तदेतत्' इत्यादि। तदिति हेतो, यस्मादनन्तरोक्तोऽसिद्धशब्दस्यार्थः, तस्मादेतदसिद्धवचनमादेशलक्षणप्रतिषेधार्थम्। आदेशो लक्षणं निमित्तं यस्य तदादेशलक्षणम्, तस्य प्रतिषेधः। सोऽर्थः प्रयोजनं यस्य तत्तथोक्तम्। `उत्सर्गलक्षणभाववार्थं च' इति। उत्सृज्यते निवर्त्यत इत्युत्सर्गः=स्थानिलक्षणम्, उत्सर्गौ लक्षणं निमित्तं यस्य तदुत्सर्गलक्षणं कार्यम्, तस्य भाव उपजननमुत्सर्गलक्षणभावः, सोऽर्थः प्रयोजनं यस्य तत्तथोक्तम्। `अस्मा उद्धर' इत्यादि। अस्मै इतोदंशब्दाच्चतुर्थी, उद्धरेत्यस्मिन् परत आयादेशः, `लोपः शाकल्यस्य' (8.3.19) इति वकारलोपः। तत्र कृतेऽकः सवर्णेदीर्घत्वं (1.1.101) प्राप्नोति; वकारलोपस्यासिद्धत्वान्न भवति। `व्यलोपस्यासिद्धत्वात्' इति। तादर्थ्याद्व्यलोपशास्त्रं व्यलोपशब्देनोक्तम्। अथ वा--व्यलोपशस्त्रस्यासिद्धत्वाद्व्यलोपस्यासिद्धत्वमित्युच्यते। एवूदाहरणेष्वादेशलक्षणप्रतिषेधोऽसिद्धत्वावचनस्य प्रयोजनम्। इदानीं येषूदाहरणेषूत्सर्गलक्षणभावः प्रयोजनम्, तानि दर्शयितुमाह--`अमुध्मै' इत्यादि। अदसश्चतुर्थीपञ्चमीसप्तम्यैकवचनानि। त्यदाद्यत्वम् (7.2.102)। अत्रासत्यप्यसिद्धत्वे परत्वात् `अदसोऽसेर्दादु दो मः' (8.2.80) इत्युत्वम्, ततश्चाकारान्तस्याभावात् तन्निबन्धनाः `सर्ववाम्नः स्मै' (7.1.14), `ङसिङ्योः स्मात्स्मिनौ' (7.1.15) इति स्मायादयो न स्युः। असिद्धत्वे सति शास्त्रस्य ते भवन्ति। `उत्वस्यासिद्धत्वात्' इति। अत्रापि तादर्ध्यादुत्वशब्देनोत्वशास्त्रमुक्तम्।

`शुष्किका' इत्यादिश्लोकः। अत्र `निदर्शनम्' इत्येतत् शुष्किकेत्यादिभिः प्रत्यकमभिसम्बध्यते। `झलां चशत्वे' इति। अत्राप्यसिद्ध इति वृत्तभङ्गभयान्नोक्तम्। अनुक्तमपि प्रकरणेन ज्ञायते।

`शुष्किका' इति। `शुष शोषणे' (धा.पा.1183) इत्येतस्मात् क्तप्रत्ययः, `शुषः कः' (8.2.51) इति कादेशः, टाप्, अज्ञातार्थे `प्रागिवात् कः' (5.3.70), `केऽणः' (7.4.13) ति ह्रस्वत्वम्, ततष्टाप्, `प्रत्ययस्यात् कात्' (7.3.44) इत्यादिना नित्यमित्त्वं भवति, न तु `उदीचाम्' (7.3.46) इत्यादिना पाक्षिकम्; `शुषः कः' (8.2.51) इत्यस्यासिद्धत्वात्।

`शुष्कजङ्घा' इति। शुष्के जङ्घे अस्या इति बहुव्रीहिः, `न कोपधायाः' (6.3.37) इचि पुंवद्भावनिषेधो न भवति। `शुषः कः' (8.2.51) इत्यस्यासिद्धत्वादिति प्रकृतेन सम्बन्धनोयम्। ननु च सत्यप्यसिद्धत्वे नैवात्र पूर्वद्भावप्रतिषेधो न प्राप्नोति, `कोपधप्रतिषेदे तद्धितवुग्रहणं कर्त्तव्य्' (धा.733) इति वचनात्? न; वाक्यकारमतमेतत्, सूत्रकारमतेन तु श्लोकवार्तिककारेण च न चात्रैतत् प्रयोजनमुपन्यस्तम्। एतयोर्हि सामान्येन कोपधप्रतिषेधोऽभिमतः।

`क्षामिमान्' इति। `क्षै जै षै क्षये' (धा.पा.913,914,915), `आदेच उपदेशेऽशिति' (6.1.45) इत्यात्त्वम्, `क्षायो मः' (8.2.53) इति निष्ठातकारस्य मकारः--क्षाम इति स्थिते `अत इञ्' (4.1.95) इतीञं कृत्वा `अत इनिठनौ' (5.2.115) इतीनिप्रत्ययं वा कृत्वा मतुप् कर्त्तव्यः।

`वहेः' इत्यादि। `वह प्रापणे' (धा.पा.1004) इत्येतस्मान्निष्ठा, सम्प्रसारणम् (6.1.15), `हो ढः' (8.2.31) इति ढत्वम्, `झषस्तथोर्धोऽधः' (8.2.40) इति धत्वम्, `ष्टुना ष्टुः' (8.4.41) इति ष्टुत्वम्, `ढो ढे लोपः' (8.3.13) इति ढलोपः, `ढ्रलोपे पूर्वस्य दीर्घोऽणः' (6.3.111) इति दीर्घः, ऊढ इति स्थिते, तमाचष्ट इति णिच्, `णाविष्ठवत् कार्य प्रातिपदिकस्य' (वा.813) इतीष्ठवद्भावाट्टिलोपः, तदन्ताल्लुङ्, `णिश्रि' (3.1.48) इत्यादिना चङ्। अत्र धत्वष्टुत्वादीनामसिद्धत्वाद्योऽसौ णो टिलोपलस्तस्य णौ कृतं स्थानिवद्भवतीति (चांप.पा.21) स्थानिवद्भावात् `चङि' (6.1.11) इति `अजादेर्द्वितीयस्य'

(6.1.2) इति ह्त इत्येतस्य द्विर्वचनम्, `कुहोश्चुः' (7.4.62) इति चुत्वम्--महाप्राणस्य हकारस्य स्थाने महाप्राण एव झकारः, `अभ्यासे चर्च' (8.4.54) इति झकारस्य स्थाने जकारः, `आडजादीनाम्' (6.4.72) इत्याट्, `आटश्च' (6.1.90) इति वृद्धिः। अथ `सस्वल्लघुनि चङ्परे' (7.4.93) इति सन्वद्भावः कस्मान्न भवति? इत्याह--`अनग्लोपे' इत्यादि। यदि तर्ह्यनग्लोप इति प्रतिषेधात् सन्वद्भावो न भवति तदौजिढदिति [`तदोजढदिति"--प्रा.मु.पाठः] न सिध्यति? इत्याह--`औजिढत्' [`औजढत्'--प्रा.मु.पाठः] इत्यादि।

गुडलिण्मान्' इति। गुडं लेढीति क्विप्, तदन्तान्मतुप्, पूर्ववड्ढत्वम्, `झलां जशोऽन्ते' (8.2.39) इति जश्त्वम्--ढकारस्य डकारः! मतोर्वत्वे कर्त्तव्य ढत्वजशत्वयोरसिद्धत्वात् `झयः' (8.2.10) इति वत्वं न भवति। कारिकायां झलां जश्त्वग्रहणमुपलक्षणार्थं निदर्शनमिति। अनेनैतत् दर्शयति--निदर्शनमेतच्छुष्किकादीनाम्, न तु परिगणनमिति।

यदि हि सपादायां सप्ताध्याय्यां कर्त्तव्यायां पादोनोऽध्यायोऽसिद्ध इत्युच्यते तदा य इह षष्ठीनिर्देशसप्मीनिर्देश-पञ्चमीनिर्देशाः क्रियन्ते तेऽप्यसिद्धः स्युः, ततश्च `संयोगान्तस्य लोपः' (8.2.23) इत्यत्र षष्ठीनिर्देशस्यासिद्धत्वात् `षष्ठी स्यानेयोगा' (1.1.49) इत्येषा नोपतिष्ठेन, एवञ्च सामीप्ययोगाप्येषा षष्ठी स्यातः ततः संयोगान्तसमीपो यस्तस्यापि लोप आपद्येत; `झलो झलि' (8.1.26) इत्यत्रापि सप्मीनिर्देशस्यासिद्धत्वात् `तस्मिन्निति निर्दिष्टे पूर्वस्य (1.1.66) इत्येषा परिभाषा नोपतिष्ठेत, तथा च पूर्वस्यैवानन्तरे भवितव्यमिति नियमस्याभावात् सामान्येन पूर्वस्य परस्य वानन्तरे व्यवहिते झलि लोपः; `ह्रस्वादङ्गात् (8.2.27) इत्यादावपि पञ्चमीनिर्देशस्यासिद्धत्वात् `तस्मादित्युत्तरस्य' (1.1.67) इत्यस्योपस्थानं न स्यात्, ततश्चानियमात् पूर्वस्य परस्य वानन्तरस्य व्यवहितस्य च लोपः प्रसज्येतेत्यत आह--`येऽत्र षष्ठीनिर्देशाः' इत्यादि। किं पुनः कारणमसिद्धत्वं न भवति? इत्याह--`कार्यकालं हि' इत्यादि। यदि हि `यथोद्देशं संज्ञापरिभाषम्' (व्या.प.59) स्यात्, एवमासां परिभाषाणां पूर्वत्वे सति षष्ठोनिर्देशादीनामसिद्धत्वं न स्यात्, न तु यथोद्देशं संज्ञापरिभावम्, किं तर्हि? `कार्यकालं संज्ञापरिभाषम्' (व्या.पा.58), कार्यकालाः कार्यप्रयुक्ता हि संज्ञाः परिभाषाश्च। तस्माद्यत्र कार्यं तत्रैव ताः प्रयुज्यन्ते, तेन ता उपदेश एव। अतो निर्देशैरभिन्नदेशत्वात् परिभाषाणामत्र पूर्वत्वं नास्ति, ततः कुतस्तासु कर्त्तव्यासु तेषामसिद्धत्वप्रसङ्गः! यदि कार्यकालं संज्ञापरिभाषम्, `विप्रतिषेधे परं कार्यम्' (1.4.2) इत्येषाऽत्रोपतिष्ठेत? तत्र को दोवः? `स्फुर स्फुल सञ्चलने' (धा.पा.1389), 1390), `गुरी उद्यमने' (धा.पा.1396)--आभ्यां `ऋहलोर्ण्यत्' (3.1.124) इति ण्यति कृते दिस्फोयम्, अवगोर्यमिति न सिध्येत्। अस्या हि परिभाषाया उपस्थाने, गुणं परत्वाद्बाधित्वा `हलि च' (8.2.77) इति दीर्घत्वं प्राप्नोतीत्यत आह--`विप्रतिषेधे परमित्येषा तु' इत्यादि। `विप्रतिषेधे परम्' (1.4.2) इत्येषा परिभाषाऽत्र न प्रवर्त्तत इति प्रकृतेन सम्बन्धः। कस्मान्न प्रवर्त्तते? इत्याह--`येन' इत्यादि। द्वयोर्हि तुल्यबलयोर्विप्रतिषेधो भवति। इह तु येन पूर्वेण लक्षणेन `पुगन्तस्य' (7.3.86) इत्यादिना सह परं लक्षणं स्पर्धते तदप्यभिभवितुमिच्छति। परं लक्षणं `हलि च' (8.2.77) इत्यादिकम्, तत् पूर्वं प्रति तस्यासिद्धत्वम्। अतोऽतुल्यबलत्वाद्विप्रतिषेधो नास्तीति `विप्रतिषेधे परम्' (1.4.2) इत्येषा परिभाषा न प्रवर्त्तते। `तथा च' इत्यादि। एवमस्याः परिभाषाया अप्रवृत्तौ सत्यामित्यर्थः। यदि तर्हि पूर्वस्मिन् कार्ये कर्त्तव्ये परमसिद्धं भवति, एवं सत्युत्सर्गे कर्त्तव्ये परस्यापवादस्यासिद्धत्वां सायत्। ततश्च दोग्धा, दोग्धृमित्यत्र `दादेर्घातोर्घः' (8.2.32) इति धस्यासिद्धत्वाड्ढत्वं स्यात्? इत्यत आह--`अपवादसर्य तु' इत्यादि। यद्यप्यपवादविषयस्यापि परस्योत्सर्गे कर्त्व्येऽसिद्धत्व स्यात्, निर्विषयत्वाच्चापवादवचनस्य वैयर्थ्यं स्यात्। अतोऽपवादस्य परस्यापि वचनप्रामाण्यादसिद्धत्वं न भवति। ननु च वचनप्रामाण्यात् पर्यायेण तयोर्भावः स्यात्, तत्कुतो वैयर्थ्य प्रसङ्ग? नैतदस्ति; यद्यपवादस्य पर्यायता स्यात्, `वा द्रुहमुह' (8.2.33) इति विकल्पेन धत्वविधाननमनर्थकं स्यात्।।

2. नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति। (8.2.2)

कृतोत्येतदनन्तरोक्तेन तुग्ग्रहणेनैव सम्बध्यते, न तु सर्वेः सुबादिभिः; अन्यथा यथा विधिशब्दस्य प्रत्येकं विधिसम्बन्धो दर्शितः, तथाऽस्यापि सम्बन्धं दर्शयेत्। इहायं विधिशब्दः सुबादिभिःसम्बध्यमानो भावसाधनो वा सम्बध्येत? कर्मसाधनो वा? तत्राद्ये पक्ष आश्रीयमाणे--राजभिः, तक्षभिरित्यत्रैस्भावे कर्त्तव्ये नलोपस्यासिद्धत्वं न प्राप्नोति, भावसाधने हि यत्रासतो विधानं तत्रासिद्धत्वेन भवितव्यम्, न तु सतः। न चात्रासतः सुपो विधानम्; किं तर्हि? सत एव, यतस्तस्य स्थान ऐस्भावस्य राजभ्यां राजभ्य इत्यत्रापि `सुपि च' (7.3.102) इति दीर्घत्वे `बहुवचने झल्येत्' (7.3.103) इत्येत्त्वे च कर्त्तव्ये नैवासिद्धत्वं प्राप्नोति; यस्मादिह सुपि परतो दीर्घत्वस्यैत्त्वस्य च विधानम्, त्वसतः सुपः। इतरस्मिंस्तु पक्षे स्वरसंज्ञातुकामसतामेव विधानेन लोपस्यासिद्धत्वमिष्यते, एतच्च न सिध्यति; कर्मसाधने हि विधिशब्दे तैः सम्बाध्यमाने सतामेव तेषामन्यस्मिन् कार्ये विधीयमाने सत्यसिद्धत्वेन भवितव्यम्, न तु तेषामसतां विधानेन [`विधानेन तु'--प्रा.मु.पाठः] शक्यते वक्तुम्--सुपा कर्मसाधनः सम्बध्यते, स्वरादिभिश्च भावसाधन इति। एको ह्ययं विधिशब्दः सूत्रोपात्तः, स च भावसाधनो वा स्यात्, कर्मसाधनो वेति; न तूभयसाधनः, न ह्येकस्योभयसाधनत्वमुपपद्यत इति? --एतच्चोद्यमपाकर्त्तमाह--`विधिशब्दोऽयम्' इत्यादि। यद्येव विधिशब्दः सुप्स्वरादिभिः समुदायेन सम्बध्यते, तदा स्यादयं दोषः। न च समुदायेन सम्बध्यते, किं तर्हि? सुबादिभिः प्रत्येकम्। प्रत्येकञ्चास्मिन् सम्बध्यमाने यावद्भिः सहायं सम्बध्यते तावन्त्येव स्वरादिदिधौ मलोपोऽसिद्धो भवतीत्येवमादीनि वाक्यानि भवन्ति। नलोपः सुप्स्वरसंज्ञातुग्विधिष्वेतद्ग्रहणकवाक्यं तेषामेव। निबन्धनम्। तेषु च भिन्नेषु वाक्येषु विधिशब्दोऽपि भिन्न एव। तत्र कश्चिद्भावसाधनः, कश्चित्कर्मसाधनः। तत्र स्वरसंज्ञातुकामसतामेव विधाने कर्त्तव्ये नलोपस्यासिद्धत्वमुच्यते, तेन च ते विधीयमानत्वात् कर्मभावमापद्यन्ते। ततो भावसाधनेन विधिशब्देन कर्मणोऽनभिहितत्वादेषु `कर्त्तृकर्मणो कृति' (2.3.65) इति षष्ठ्या भवितव्यम्। तेन तैः कर्मषष्ठीयुक्तैर्भावसाधनोऽभिसम्बध्यते, सुपा च सम्बन्धसामान्यवचनषष्ठ्यन्तेन।

`कर्मसाधनः' इति। सुपो विधीयमानेन कार्येण सम्बन्धमात्रम्। सम्बन्धसामान्ये षष्ठी तु यत्र `शेषे' (2.3.50) इति षष्ठी विधीयते तत्र वेदितव्यम्। सम्बन्धसामान्यस्य वचनीति षष्ठीसमासः, सा चासौ षष्ठी चेति विशेषणसमासः सम्बन्धसामान्यवचनषष्ठी अन्ते यस्य सुपः स तथोक्तः। कर्मषष्ठीयुक्तेन सुपा कर्मसाधनस्य विधिशब्दस्य सम्बन्धो नोपपद्यते; कर्मषष्ठ्यनुपपत्तेः। यदि हि सुप् कर्म स्यात् तत्र कर्मणि षष्ठी स्यात्, न चासौ सुप् कर्म; सुपो विधीयमानत्वात्। तत्तु तत्सम्बन्धिकार्यम्। विधीयमानत्वात् कर्म तद्विधिशब्देनोक्तम्। अतस्तत्रापि तावत् कर्मषष्टो न सम्भवति, किं पुनरकर्मणि सुपि! [`सुप्'--का.मु.पाठः] `तेन' इत्यादि। यस्मात् सम्बन्धमात्राभिधायिनी या षष्ठी तदन्तेन सुपा कर्मसाधनो विधिशब्दः सम्बध्यते, तेन हेतुना सुपः स्थाने यो विधिर्भिस ऐस्भावः, सुपि परतः यो विधिर्दीर्घत्वादिर्यस्य सुब्निमित्तं सर्वोऽसौ सुप्सम्बन्धी भवतीति सर्वत्राप्यसिद्धत्वं भवति। ननु च `षष्ठी स्थानेयोया' (1.1.49) इति वचनात् सम्बन्धविशेषे षष्ठ्या भवितव्यम्, न तु सम्बन्धसामान्ये। ततश्च सुप एव स्थाने यत् कार्यं तत्रैवासिद्धत्वं स्यात्, नान्यत्र? नैतदस्ति; यत्र ह्यादेशो विधीयते--`अस्तेर्भूः' (2.4.52) इत्येवमादौ तत्रास्याः परिभाषाया व्यापारः, न तु यत्र लक्षणान्तरेण विहितं कार्यं कार्यान्तरार्थ मुपादीयते तत्रापि; अन्यथा `उदीकारस्तस्य ग्रहणं भवति। ननु चेह सुपामादेशो न विधीयते, किं तर्हि? लक्षणान्तरविहितस्यापि सिद्धत्वम्। तस्मान्नात्र स्थानेयोगपरिभाषाया (1.1.49) व्यापारः।
`राजवती' इत्यादि। राजशब्दाद्मतुप्, `उगितश्च' (5.1.6) इति ङीपि कृते अन्तोऽबत्या' (6.1.220) इत्यन्तोदात्तत्वं प्राप्नोति। नलोपस्यासिद्धतवान्नायमवतीशब्द इति न भवति। तस्मिन्नसति `कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः' (द.उ.6.51) इति राजशब्दस्य कनिन्प्रत्ययान्तस्य नित्स्वरेणाद्युदात्तत्वात् राजवतीशब्द आद्युदात्त एव भवति। `पञ्चार्भम्, दशार्मम्' इति। `दिक्संख्ये संज्ञायाम्' (2.1.50) इति मासः। अत्र नलोपे कृतेऽवर्णान्तं पूर्वपद जातमिति `अर्भे चावर्णम्' (6.2.90) इत्यादिना सूत्रेण तस्याद्युदात्तत्वं प्राप्नोति, असिद्धत्वान्न भवति, समासान्तोदात्तत्वमेव (6.1.223) भवति। `पञ्चदण्डि' [पञ्चदण्डी--काशिका] इति। पञ्चानां दणअडिनां समाहार इति `तद्धितार्थ' (2.1.51) इत्यादिना समासः, समाहाहे द्विगुः, `स नपुंसकम्' (2.4.17) इति नपुंसकत्वम्। नलोपे कृत इगन्तता जातेति `इगन्तकालकपालभगालशरावेषु द्विगौ' (6.2.29) इति पूर्वपदस्य प्रकृतिस्वरः प्राप्नोति, नलोपस्यासिद्धत्वान्न भवकति, समासान्तोदात्तत्वमेव (6.1.223) भवति।
`तदेतत्' इत्यादि। इह केषाञ्चिदेकयैव संज्ञयाऽनेकसंज्ञाकार्यं क्रियते--`यावन्ति संज्ञाकार्याणि तत्रैकैव संज्ञा प्रवर्त्तते' इति। दर्शनम्। अन्येषां तु `यथा संज्ञयैककार्यं क्रियते तयैवान्यम्, अतो यावन्ति संज्ञाकार्याणि तावस्य एव संज्ञाः प्रवर्त्तन्ते इति दर्शनम्। तत्र पूर्वस्मिन् दर्शने नेदं प्रयोजनम्; ययैव हि पाक्प्रवृत्त्या संज्ञया `षड्भ्यो लुक्' (7.1.22) इति जश्शसोर्लुक्कार्यं कृतं तयैव हि टाप्प्रतिषेधो भविष्यति। तस्मादितरस्मिन् दर्शने तत् प्रयोजनं भवति। अत्रापि कथमेतत् प्रयोजनं भवति? इत्याह--`या हि' इत्यादि। हिशब्दो यस्मादर्थे। इतिकरणस्तस्मादर्ते। यस्माज्जश्शसोर्लुगर्था या षट्संज्ञा प्रवृत्ता तया स्त्रीप्रत्ययप्रतिषेधो न भवति, तस्मात् पुनः सा प्रवर्त्तयितव्या। यस्मात् सा प्रवर्त्तयितव्या तस्मादेतत् प्रयोजनमित्यर्थः।
`वृत्रहाभ्याम्, वृत्रहभिः' इति। वृत्रं हतवानिति `ब्रह्मभ्रूणवृत्रेषु क्विप' (3.2.87) तदन्तात् भ्याम्भिसौ, ततर नलोपे कृते `ह्रस्वस्य पिति कृति तुक्' (6.1.71) स्यात्, असिद्धत्वान्न भवति। `अत्र केचित्' इत्यादि। सन्निपातः=आनन्तर्यम्, तल्लक्षणं निमित्तं यस्य न तथोक्तः। सुपः सन्निपातेन नलोपः। स यदि तुकं प्रवर्त्तयेत् तत् सन्निपातं विहन्यात्। अनिमित्तञ्च `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या.पा.12) इति। तस्मान्नलोपस्तुकं न प्रवर्त्तयतीति तुग्ग्रहणमनर्थकम्। ननु च तुकः पूर्वान्तत्वात् तुक् प्रातपदिकग्रहणेनैव गुह्यते, तत् कुतस्तस्य सन्निपातस्य विघातः, न हि स्वावयवेनैव स्वस्य व्यवधानमुपपद्यते? नैतदस्ति; ह्रस्वो ह्यागमी तुकः, न तदन्तः समुदायः, तत्कुतस्तस्य प्रातिपदिकग्रहणेन ग्रहणम्? बहिरङ्गलक्षणेन वासिद्धत्वात् तुकं प्रति नलोपस्य, तुग्विधिग्रहणमनर्थकम्। पदस्य बाह्यविभक्तिप्रत्ययमाश्रित्य नलोपो विधीयत इति तस्य बहिरङ्गत्वम्, अन्तर्वर्तिनं पदमाश्रित्य वर्णस्य तुग्विधीयत इति तस्यान्तरङ्गत्वमिति--`असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इति। यद्येवम्, युक्तमेवेति प्रतिपन्नाः, तत्किमर्थं तुग्ग्रहणं क्रियते? इत्यत आह--`तत् क्रियते' इत्यादि। अनित्यत्वज्ञापने तु सन्निपातलक्षणपरिभाषायाः प्रयोजनम्--`दृक्षाय' इत्यत्र `सुपि च' (7.3.102) इति दीर्घत्वसिद्धिः। अकारान्ततासन्निपाते हि ङेर्यो (7.1.13) विधीयत इति; तन्निमित्तत्वादिति दीर्घत्वनिमित्तभावोपगमनद्वारेण तद्विघातं न कुर्यात्। अनित्यत्वात्त् करोति। अन्यच्चात्र प्रयोजनमुत्तरत्रैव वक्ष्यते। बहिरङ्गलक्षणपरिभाषया सुप्यनित्वस्य ज्ञापने--एषा, द्वे इतयत्र टाप्सिद्धिः। अत्र हि त्यादद्यत्वस्य विभक्त्याश्रयत्वाद्बहिरङ्गत्वम्, प्रातिपदिकाश्रयत्वाट्टाबन्तरङ्गः। तत्र टाप कर्त्तव्ये त्यदाद्यत्वस्यासिद्धत्वं स्यात्, ततष्टाप् न सिद्ध्येत्। अनित्यत्वात्तु सिध्यति। प्रतिदीब्नेत्यत्र `हलि च' (8.2.77) इति दीर्घत्वसिद्धिः प्रयोजनम्। असति तस्यानित्यत्वे `हलि च' इति दीर्घत्वे कर्त्तव्ये बहिरङ्गस्याल्लोपस्यासिद्धत्वाद् हलि परतो वकारान्तो धातुर्न भवतीति दीर्घत्वं न स्यात्। अनित्यत्वात्तु सिद्ध्यति।
`राजीयति' इति। `सुप आत्मनः क्यच्' (3.1.8) इति क्यच्, `क्यचि च' (7.4.33) इतीत्त्वम्। `राजायते' इति। `कर्त्तुः क्यङ सलोपश्च' (3.1.11) इति क्यङ् `अकृत्सार्वधातुकयोः' (7.4.25) इति दीर्घः। `राजश्यः' इति। `अकः सवर्णो दीर्घः' (6.1.101)।।

3. न मु ने। (8.2.3)
`मु' इत्यविभक्तिकोऽयं निर्देशः। `अमुना' इति। अदसस्त्यदाद्यत्वम्, `अदसोऽदेर्दादु दो मः' (8.2.80) इत्युत्वमत्वे, `अच्च घेः' (7.3.119) इत्यतः `घेः' इत्यनुवर्त्तमान `आङो नास्त्रियाम्' (7.3.120) इति नाभावः। यदि मुभावो नाभावे कर्त्तव्ये नासिद्धो भवति--इत्येव सूत्रार्थः स्यात्, एवं सति नाभावे कृते यत् कार्यं प्राप्नोति तत्र तस्यासिद्धत्वं न स्यात्, ततश्चामुनेत्यत्राकारान्तस्याङ्गस्य `सुपि च' (7.3.102) इति विधीयमानं दीर्घत्वं प्रसज्येत? इत्यत आह-

-`कृते तु नाभावे' इत्यादि। ह्रस्वसन्निपातेन हि नाभावो ह्रस्वस्य विघातं प्रति निमित्तं न भवतीति सत्यप्यसिद्धत्वे न भवति दीर्घत्वप्रसङ्गः।

`अथ वा' इत्यादि। यथैकेन हि क इतो धावतीति पृष्टोऽपरेणापि किंवर्णो धावतीति प्रश्ने कश्चिन्निपुणमतिस्तन्त्रेण वाक्यद्वयमुत्तरयति--श्वेतो धावतीति, तथेहापि योगद्वयमेतत् तन्त्रेणोच्चरितम्। तत्र द्वितीयस्य योगस्य न परतो यत् प्राप्नोति तस्मिन् कर्त्तव्यं भुभावो नासिद्ध इत्येव सूत्रार्थः। तेन दीर्घत्वं न भविष्यति।

एकस्मिन्नेव योगे दीर्घत्वप्राप्तिमपाकर्त्तुमाह--`अथ वा' इत्यादि। ननु चास्मिन् सूत्रार्थे ने कर्त्तव्ये मुभावस्य यत् सिद्धत्वं तत् सूत्रेण संगृहीतं स्यात्, ततश्च नाभाव एव तावन्न प्राप्नोति, कुतः पुनस्तस्मिन् परतो यत् प्राप्नोति तस्मिन् कर्त्तव्ये मुभावस्यासिद्धत्वम्? इत्याह--`ने तु कर्त्तव्ये' इत्यादि। यथा पुत्रा मे बहुक्षीरघृतमोदनं सुवर्णपात्र्यां भुञ्जोरन्निति वरं प्रार्थयमानया वृद्धकुमार्या अर्थतः पतिः पुत्रा गावो धनं संगृहीतम्, एवमिहापि ने परतो यत् कार्यं प्राप्नोति तस्मिन् कर्त्तव्ये मुभावस्य सिद्धत्वं ब्रुवता ने कर्त्तव्ये मुभावस्यासिद्धत्वं नाश्रितम्। `तेन' इत्यष्दि। यस्मादेव एव वाक्यार्थः--ने कर्त्तव्ये मुभावस्य यत् सिद्धत्वं तदर्थतो गृहीतम्, तेन हेतुना नाभावश्च भवति, दीर्घत्वञ्च न भवतीति।

`एकदेश' इति। `प्रातिपदिकान्तसप्तम्येकवचनयोरुदात्तानुदात्तयोः' इति। वृक्षशब्दः प्रातिपदिकस्वरेणान्तोदात्त इति तस्यान्तो योऽकारः स उदात्तः। सप्तम्येकवचनम्, `अनुदात्तौ सुप्पितौ' (3.1.4) इत्यनुदात्तम्, तयोः `आद्गुणः' (6.1.87) इत्येकादेश आन्तरतम्यात् स्वरिते प्राप्ते `एकादेश उदात्तेनोदात्तः' असिद्धत्वे हि सति तस्य स एकादेशः स्वरित एवायादेशे कर्त्तव्ये स्यादिति तस्य स्थानेऽयादेश आन्तर्यतः स्वरित एव प्रसज्येत। अन्तरङ्गत्वं पुनरेकादेशस्यान्तरश्रितत्वात्। आद्गुणो ह्यवान्तरङ्गः; एकपदाश्रितत्वात्। अयादेशस्तु बहिरङ्गः; तद्विपर्वयात्।

`कुमार्या इदम्' इति। कुमारशब्दो वृक्षशब्दवदन्तोदात्तः। तस्मात् `वयसि प्रथमे' (4.1.20) इति ङीप्, `यस्येति च' (6.4.148) इत्यकारलोपः, `अनुदात्तस्य च ग्रोदात्तलोपः' (6.1.161) इतीकारस्योदात्तत्वम्, चतुर्थ्येकवचनम्; कुमारी+ए इति स्थिते `आण्नद्याः' (7.3.112) इत्याट् यणादेशः (6.1.77), `उदात्तयणो हल्पूर्वात्' (6.1.174) इति विभक्तेरुदात्तत्वम्। तच्च `आदेः परस्य' (1.1.54) इति विभक्तिभक्तस्याट एव भवति, `आटश्च' (6.1.90) इति वृद्धिरेकादेशः। स च पूर्ववत् स्वरिते प्राप्ते `एकादेश उदात्तेनोदात्तः' (8.2.5) इत्युदात्तः क्रियते। तस्य सिद्धत्वं वक्तव्यम्--कुमार्या इदमित्यत्रायादेश उदात्ते यथा स्यात्, अन्यथा हि पूर्ववत् स्वरितः [वास्ति--का.मु.पुस्तके] स्यातद्। `यदि' इत्यादि। यदि पूर्वमुदात्तत्वं क्रियते, पश्चादेकादेशः, यथादर्शितमनन्तरायां रूपसिद्धावेवायादेश कर्त्तव्ये सिद्धो भवतीति युज्यत इदमुदाहरणम्। `अथ तु' इत्यादि। कुमारी+ए इति स्थित आट्, यणादेशः। "तत्रैकादेशे `उदात्तयणो हल्पूर्वात्' (6.1.174) इति विभक्तिस्वरः" इति। यदि कृत एकादेशे विभक्तिस्वरः क्रियते तदा नैतदस्योपसंख्यानस्य प्रयोजनम्। अस्यां हि रूपसिद्धावेकादेशस्य यदुदात्तत्वं तस्यायादेशे कर्त्तव्ये सिद्धत्वादनेन प्रकारेणोपसंख्यानस्येदं प्रयोजनं न भवतीत्याचष्टे। युक्तञ्चैतत्। तथा हि--अन्तरङ्गवादेकादेशेनैव तावद्भवितव्यम्, पश्चद्विभक्तिस्वरेण। वर्ण ह्याश्रित्यैकादेशो भवतीति तस्यान्तरङ्गत्वम्। उदात्तत्वं विभक्तेराश्रितत्वात् पदस्य भवतीति तस्य बहिरङ्गत्वम्।

`वृक्षाविदम्' इति। वृक्ष इदमित्येतदनुसारेणानुगन्तव्यम्, एकादेशः पुनरत्र `वृद्धिरेचि' (6.1.88) इति वृद्धिः। प्रथमयोः पूर्वसर्वदीर्घः (6.1.102) इत्येतत्त न प्रवर्त्तते; `नादिचि' (6.1.104) इति दीर्घप्रतिषेधात्।

`गाङ्गेऽनूपः' इति। गङ्गायां जात इत्यणि कृते प्रत्ययस्वरेणान्तोदात्तो गाङ्गशब्दः। अनुगता आपोऽस्मिन्निति बहुव्रीहिः, `ऊदनोर्देशे' (6.3.98) इत्यूत्त्वम्, ऋक्पूरब्धूःपथामानक्षे' (5.4.74) इत्यकारप्रत्यये कृतेऽनूपशब्दोऽपि प्रत्ययस्वरेणान्तोदात्तः, शेषमस्यानुदात्तम्। `तस्य सिद्धत्वात्' इति। योऽसावेकारो गाङ्गशब्दे सप्तम्यकवचने परतः `आद्गुणः' (6.1.87) इत्यनेनाभिनिर्वृत्तः, तस्य सिद्धत्वाद्यः पुनः `एङः पदान्तादति' (6.1.109) इत्येकादेशोऽनूपशब्दाकारेण सह सः `एकादेश उदात्तेनोदात्तः' (8.2.5) इति भवति। अतो हेतोः `स्वरितो वानुदात्ते पदादौ' (8.2.6) इति पक्षे स्वरितो भवति। यदि पुनरसिद्धत्वं स्यात् तदासावेकार उदात्तानुदात्तस्थानित्वादान्तर्यतः स्वरितः स्यात्। यः पुनः `एङः पदान्तादति' (6.1.109) इत्येकादेशः, स उदात्तनानुदात्तस्य न भवतीति `स्वरितो वानुदात्ते पदादौ' (8.2.6) इति पक्षे स्वरितो न स्यात्, अपि तु स्वरितानुदात्तयोः स्थाने भवन्नान्तरतम्यान्नियमेन स्वरितः स्यात्।

`शतृस्वरः' इति। शत्राश्रयः स्वर इति शाकपार्थिवादित्वादुत्तरपदलोपो (वा.83) समासः। `तुदती, नुत्ती' इति। तुदिनुदिभ्यां (धा.पा.1281,1282) लट्; तुदादित्वाच्छः, स च प्रत्ययस्वरेणान्तोदात्तः, लसार्वधातुकस्यानुदात्ते कृते `अतो गुणे' (6.1.97) पररूपत्वमेकादेशः। स च `एकादेश उदात्तनोदात्तः' (8.2.5); तदुदात्तसय सिद्धत्वात्। `अन्तोदात्तादुत्तरपदात्' (6.1.169) इत्यन्तोदात्तादित्यनुवर्त्तमाने `शतुरनुमो नद्यजादी' (6.1.173) इति शत्रन्तादन्तोदात्तादीकारस्योदात्तत्वं भवति। असिद्धत्वे त्वेकादेशेऽस्योदात्तत्वं न स्यात्; अन्तोदात्तादित्यधिकारात् (6.1.169)। `अनुमः इत्यादिना ज्ञापकमाश्रित्यैतत्प्रयोजनमपाकरोति। कथं पुनरेतज्ज्ञापकम्? इत्याह--`न हि' इत्यादि। हिशब्दो हेतौ। अनुम इति प्रतिषेधस्यैतत् प्रयोजनम्--तुदन्ती, नुदन्तीत्यत्र `आच्छीनद्योर्नुम्' (7.1.80) इति नुमि कृते सनुम उदात्तत्वं मा भूदिति। यदि च शतृस्वरे, एकादेशस्वरोऽसिद्धः स्यात्, प्रतिषेधस्य वैयर्ध्यं स्यात्; यस्मादेकादेशस्वरमन्तरेण नास्ति शतुरन्तोदात्तत्वम्। अतः प्रतिषेधादवसीयते--सिद्ध एकादेशस्वरः। न हि एकादेशस्वरमन्तरेण शत्रन्तं सनुम्कं किञ्चिदन्तोदात्तमस्ति। तस्मादनुम इति प्रतिषेधवचनं ज्ञापकमेव।

`तुदन्ति, लिखन्ति' इति। अत्रापि पूर्ववल्लसार्वधातुकानुदात्तत्वे कृत उदात्तत्वे कृत उदात्तानुदात्तयो रेकादेश उदात्तः। `तेन' इति। एकादेशस्वरेण सिद्धेन।

`वर्ज्यमानता' इति। `अनुदात्तं पदमेकवर्णम्' (6.1.158) इत्येषोऽर्थोऽनेन लक्ष्यते। एकं वजंयित्वा शेषस्यानुदात्तत्वं भवतीत्यर्थः। यदि पुनरसिद्धत्वं स्यात् `अनुदात्तं पदेमकवर्जम्' (6.1.158) इत्यस्मिन् कर्त्तव्ये सत्येकादेशस्वरस्यासिद्धत्वादसत्यां च वर्ज्यमानतायां द्वयोरुदात्तयोः श्रवणं प्रसज्येत।

ननु चासिद्धवचनमुत्सर्गलक्षणभावार्थमित्युक्तम्, अस्य च स्थानी स्वरितः; तथा हि `अतो गुणे' (6.1.97) पररूपत्व इत्यनेनैवान्तयैतो यो विहितः स्वरितस्यस्य स्थाने `एकदेश उदात्तेनोदात्तः' (8.2.5) इत्यनेनोदात्त आदेशो विधीयते, तत्र यद्युदात्तस्यादेशस्यासिद्धत्वात् तन्निमित्ता वर्ज्यमानता न भवति मा भूत्; यस्त्वस्य स्वरितस्य स्थानी तन्निमित्ता भविष्यति, तत्कथमेतत् प्रयोजनमुपपद्यते? यथोपपद्यते तथाख्यायते--`एकादेश उदात्तेनोदात्तः' (8.2.5) इत्यत्र चत्वारि दर्शनानि। `आद्गुणः' (6.1.87) इत्येवमादिभिरुदात्तानुदात्तयोरेकादेश आन्तरतम्यात् स्वरितगुणयोर्निवृत्तः, तस्य `एकादेश उदात्तेनोदात्तः' (8.2.5) इत्यनेन स्वरितस्य स्थान उदात्तगुण आदेशो विधीयत इत्येकं दर्शनम्। स्वरितगुणस्यैवाभिनिर्वृत्तस्य गुणान्तरापसिद्वारेण शब्दान्तरं प्रतिपद्यत इति द्वितीयम्। परिभाषेयमनुदात्तानुदात्तयोरेकादेश उदात्त इति तृतीयम्। अस्मिन् दर्शने परिभाषायाः पराङ्गभूतत्वादेकादेशशास्त्रैः सहास्यैकवाक्यता भवति, तत्रायमर्थः सम्पद्यते--आद्गुणो भवति, उदातानुदात्तयोस्तु `आद्गुणः' (6.1.87) भवतीति। चतुर्थं तु दर्शनम्--उदात्तानुदात्तयीर्य एकादेशः स उदात्तो भवति, न स्वरितगुणयुक्त इति। स्वरितस्यापवादभूतस्तूदात्तत्वमारभ्यते। येन नाप्राप्तिब्यायेनेदं (व्या.प.49) दर्शनमाश्रित्येवं प्रयोजनमुपन्यस्तम्। उपपद्यते च तदेतस्मिन् दल्शने। अत्र हि नाम विधान समकालमेवोदात्तत्वं विधीयते, न तु स्वरितगुणविहितस्य पुनरुदात्तत्वगुण आदेश इति न सम्भवति स्वरितेन स्थानिना वर्ज्यमानता; एकादेशस्वरस्य सिद्धत्वात्।

`कृते तस्मिन् तिङ्ङतिङ इति निघातः' इति। असति तु तस्य सिद्धत्वे पश्चादेकादेशस्वरः स्यात्, ततश्च मध्योदात्तता प्रसज्येत। `पचति' इति। अत्र तिशब्दे य इकारः स सतिशिष्टत्वादनुदात्तः, इतिशब्दः `निपाता आद्युदात्ताः' (फि.सू.4.80) इत्याद्युदात्तः; तयोरकः सवर्णदीर्घत्वमेकादेशो द्विपादश्रयत्वाद्बाहिरङ्गः, तस्य बहिरङ्गत्वात् तदाश्रयोऽपि स्वरो बहिरङ्गः, तत इकारस्यासिद्धतवमेव भवति। ततश्च तेन `अनुदात्तं पदमेकवर्जम्' (6.1.158) इति वर्ज्यमानता न भवति। `प्रपचति' इति। अत्रापि बहिरङ्गत्वेनासिद्धत्वात् तिङि चोदात्तवति' (8.1.71) इति गतेरनुदात्तत्वं न भवतति `तिङ्ङतिङः (8.1.28) इति निघात एवात्र भवति।

`हरिवो मेदिनम्' इति। हरिशब्दान्मतुप्, सुः, नुम् हल्ङ्यादि(6.1.68) लोपः, संयोगान्तलोपश्च (8.2.23), तस्मिन् कृते रुत्वम्, `हशि च' (6.1.114) इत्यस्योत्वम्, `आद्गुणः' (6.1.87)। `संयोगान्तलोपस्यासिद्धत्वात् हशि चेत्युत्वं न प्राप्नोति' इति। संयोगान्तलोपस्यासिद्धत्वे सति तकारेक इशो मकारस्य व्यवधानात्, तकारस्याहक्त्वात्।

`अलादीत्' इति। लुङ्, च्लेः सिच्, इट्, `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्, सिज्वृद्धिः, `इट ईटि' (8.2.28) इति सिचो लोपेऽकः सवर्णदीर्घत्वम्। `वृक्णः, वृक्णवान्' इति। `ओव्रश्चू छेदने' (धा.पा.1292) निष्ठा, ग्रहिज्यादिसूत्रेण (6.1.16) सम्प्रसारणम्, `चोः कुः' (8.2.30) इति कुत्वम्, `ओदितश्च' (8.2.45) इति नत्वम्, `अट्कुप्वाङ्' (8.4.2) इति णत्वम्। षत्वे चासति `स्कोः संयोगाद्योः' (8.2.29) इति सलोपः। `कुत्वं प्रत्यासिद्ध एव' इति। षत्वस्वरपरत्ययविधीड्विधिग्रहणस्य व्यावर्त्त्य दर्शयति--`स्वरप्रत्ययविधीडविधिषु क्षीबशब्द उदाह्रियते' इति। कथं पुनस्त्रिषु विधिषु क्षीबशब्द एक एवोदाहरणमुपपद्यते? इत्याह--`तत्र' इत्यादि। `अनुपसर्गात् फुल्लक्षीव' (8.2.55) इत्यत्र `क्षीब् मदे' (धा.पा.382) इत्यस्मात् क्तप्रत्यये परभूते क्षीबशब्दो निपातितः। तत्र चानेकपरकारं निपातनमाश्रितम्। तत्र क्वचिन्निपातने प्रत्ययविधौ स्वरविधौ च क्षीबशब्द उदाह्रियते, क्वचिदिड्विधौ। कथम्? इत्याह--`यदा' इत्यादि। संज्ञायामित्यादिग्रहणम्; `संज्ञायामुपमानम्' (6.1.204) इत्यतः संज्ञाग्रहणानुवृत्तेः। `एष स्वरः' इति। आद्युदात्तः। तत्र हि `कर्षात्वतो घञोऽन्त उदात्तः' (6.1.159) इत्यतः उदात्तग्रहणमनुवर्त्तते, `ञ्नित्यादिर्नित्यम्' (6.1.197) इत्यत आदिग्रहणञ्च प्राप्नोतीति; इच्छब्दलोपस्यासिद्धत्वे सति क्षीबशब्दस्याद्व्यच्कत्वात्। न होच्छब्दलोपस्यासिद्धत्वे सति क्षीबशब्दो द्व्यच्को भवति, किं तर्हि? त्र्यच्कः। `क्षीबिकः' इति। `नौद्व्यचष्ठन्' (4.4.7)। `इडागमः प्राप्नोति' इति। तकारलोपस्या सिद्धत्वे सति; आर्धधातुकस्य बलादित्वात्।

`अग्नात्रि [अग्नात्रि इच्छत्रमिति] इच्छत्रम्, पटात्रि उच्छत्रम्' इति। अग्निपटुशब्दयोः सम्बुद्धौ ह्रस्वस्य गुणे कृते एङ् ह्रस्वात् सम्बद्धेः' (6.1.69) इति सम्बुद्धिलोपे `एचोऽप्रगृह्यस्यादूराद्धते पूर्वस्यार्धस्यादूत्तरस्येदूत्तौ' (8.2.107) इत्येकारौकारयोः पूर्वस्यार्थस्याकारावशः, स च पुनरुत्तरस्य च यथाक्रममिकारोकारौ। `नित्यस्तुग्न प्राप्नोति' इति। नित्यश्चेष्यते; `पदान्ताद्वा' (6.1.76) इत्यनेन विकल्पेन प्राप्नोति, स चातिष्टः। तस्मात्तुग्विधौ प्लुतविकारः सिद्धो वक्तव्यः। छ इति किम्? अन्यत्र तुग्विधौ प्लुतविकारस्यासिद्धत्वमेव यथा स्यात्--खलं पुनाति ब्रह्मणकुलमिति। क्विप; `ह्रस्वो नपुंसके प्रातिपदिकस्य' (7.1.23) इति तस्य लुक्, `ह्रस्वस्य गुणः (7.3.108), पूर्ववत् प्लुतविकारः। अस्यासिद्धत्वात् खलपु इत्यत्र `ह्रस्वस्य पिति कृति तुक्' (6.1.71) इति तुग्न भवति।

`श्चुत्वं धुटि' इत्यादि। अटश्च्योतति, रट्श्च्योतति' इति। अट रट गतौ' (धा.पा.295,297) इत्याभ्यां क्विप; सुः, हल्ङ्यादिलोपः (6.1.68), `झलां जशोऽन्ते (8.2.39) इति टकारस्य डकारः। तस्मिन् श्च्योततिशब्दे परतः श्चुत्वस्यासिद्धत्वात् धुङ् न प्राप्नोति तस्मात् श्चुत्वं धुट्त्वे कर्त्तव्ये सिद्धं वक्तव्यम्। किमर्थं पुनरयम्' इत्यादि। न त्वस्य सकारस्य क्वचित् क्वचित् श्रवणमस्तीत्यभिप्रायः। `मधुश्च्यत्' इति। तत्करोति तदाचष्टे' (वा.209) इति भधुश्च्युतमाचष्ट इति णिचि कृते `णाविष्ठवत् प्रातिपदिकस्य' (वा.813) इति। णिलोपः, मधुश्च्यित् इति स्थिते ण्यब्तात् पुनरपि क्विप्, `णेरनिटि' (6.4.51) इति णिलोपः। श्चुत्वस्यासिद्धत्वात् `स्फोः संयोगाद्योः' (8.2.29) इति सकारस्य संयोगाद्यस्य लोपः, ततः सयोगन्तस्य लोपः' (8.2.23) इति यलोपः, ततः `चोः कुः' (8.2.30) इति कुत्वम्--मधुगित्येतदिष्टं रूपं भवति। तदर्थं सकारादिः पठ्यतेऽयमित्यभिप्रायः स्यादेतत्। शकारादावप्येतस्मिन्नेतद्रूपं भवत्येव? इत्यत आह--`शकारादौ पुनरेतस्मिन्' इत्यादि। पूर्वं तावद्यकारस्य संयोगान्तस्य लोपः' (8.2.23) इति लोपः, लुप्ते यकारे चकारः संयोगान्तो जात इति तस्यापि लोपः, ततः शकारस्य व्रश्चादिसूत्रेण (8.2.36) षत्वे सति `झलां जशोऽन्ते' (8.2.39) इति षकारस्य

डकारे मधुङित्यपि नित्यं स्यात्।
`बभणतुः, बभणुः' इति। `अण रण भण' (धा.पा.444,445,447) इत्यस्माल्लिट्, तस्य तावद्द्विर्वचने `अभ्यासे चर्च' (8.4.54) इति जश्त्वम्--बकारः, तस्यासिद्धत्वादनादेशादिरेवायमिति, `अत एक हल्मध्येऽनादेशादेलिटि' (6.4.120) इत्येत्त्वं प्राप्नोतीति। `विचिच्छित्सति' इति। छिदेः सन्, द्विरवचनं छिदत्यस्य, `अभ्यासे चर्च' (8.4.54) इति चर्त्वं चकारः, तस्य सिद्धत्वादभ्यासे परे चिशब्दस्य `छे च' (6.1.73) इति तुग्न भवति। `उचिच्छिषति' इति। `उछी विवासे' (दा.पा.216), सन्, अजादेर्द्वितीयस्य (6.1.2) इत्युच्छेरन्तरङ्गत्वात् तुकि कृते त्छिस्शब्दो द्विरुच्यते, तत्र `खर्पूर्वाः खयः' (वा.878) इति छकारः शिष्यते, पूर्ववच्चर्त्वम्, तस्य सिद्धत्वादुकारस्य तुग्न भवति।
`सयँय्यन्ता, सवँव्वत्सरः' इत्यादि। समित्येतस्य यन्तेत्येतस्मिन् परतः वत्सरशब्दे च परतः, यल्लोकं तल्लोकमित्यत्रापि यत्तदोर्द्वितीयैकवचनान्तयोर्लोकशब्दे परतो मोऽनुस्वारे (8.3.23), तस्य `अनुस्वारस्य ययि परसवर्णः' (8.4.58) इति परसवर्णे आन्तर्यतः सानुनासिके ययि कृते तस्यासिद्धत्वात् `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इति वर्त्तमाने `अनचि च' (8.4.47) इति यरो द्विर्वचनं न प्राप्नोति। ततश्च पक्षे त्रयाणां यकारादीनां द्वित्वं न स्यात्।
`पदाधिकारश्चेत्' इत्यादि। यदि लत्वादिषु `पदस्य' (8.1.16) इति नानुवर्त्तते, तदा पदस्य द्विर्वचनमपदस्य द्विर्वचनेन तुल्यत्वाद्द्विर्वचनस्य् बहिरङ्गत्वम्, लत्वादीनाञ्चान्तरङ्गत्वम्। `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इति लत्वादिषु कर्त्तव्येषु द्विवैचनसिद्धत्वात् [`द्विर्वचनस्यासिद्धम्'--प्रा.मु.पाठः। द्विर्वचनेनेति सिद्धत्वात्--का.मु. पाठ]`पूर्वत्रासिद्धम्' (8.2.1) इत्येतन्न प्रवर्त्तते, ततश्च लत्वादिभिरेव तावद्भवितव्यम्, तेषु सत्सु पश्चाद्द्विर्वचनेनेति सिध्यत्येवेष्टम्। पदाधिकारे सति लत्वादीनामपि बहिरङ्गत्वादसत्या बहिरङ्गपरिभाषया (व्या.प.42) तेषु सत्सु द्विर्वचनं सिद्धम्। लत्वादयस्त्वस्मिन् कर्त्तव्येऽसिद्धाः, पूर्वत्रासिद्धत्वात् (8.2.1); ततश्च पूर्वं द्विर्वचने कृते पश्चाल्लत्वादिषु विधीयमानेषु परतश्चानिष्टमपि प्रसज्येत। तस्माद्यदि पदाधिकारः ततो लत्वादीनि सिद्धानि वक्तव्यानि। `गलो गलः' इति। `मृ निगरणे' (धा.पा.1410)। `नुन्नः' इति। `मुदविव' (8.2.56) इत्यादना नकारः, पक्षे तकारश्च। `अभिनोऽफभिनः' ति। भिदेर्लङ्, सिप्, श्नम्, हल्ङ्यादिलोपः, (6.1.68) `सिपि धातोरुर्व ा' (8.2.74), `दश्च' (8.2.75) इति वा रुत्वं पूर्ववदेव `अतो रोरप्लुदादप्लुते' (6.1.113) इत्युत्वम्। `आद्गुणः' (6.1.87)। `मातृष्ष्वसा, पितृष्षवसा' इति। `मातुःपितृभ्यामन्यतरस्याम्' (8.3.85) इति पक्षे षत्वम्। `माष वापाणि' इति। `वा भावकरणयोः' (8.4.10) इत्यनुवर्त्तमाने `प्रातिपदिकान्तनुम्बिभक्तिषु' (8.4.11) इति पक्षे णत्वम्। `वाङनयनम' इति। `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इति पक्षेऽनुनासिकः। `वाक्छयनम्' इति। `झयो होऽन्यतरस्याम्' (8.4.62) इति वर्त्तमाने `शश्छोटि' (8.4.63) इति वा छत्वम्। `लत्वादीनाम्' इत्यादि। एतेनासिद्धत्वे सति लत्वादीनां यो दोषस्तं दर्शयति। लत्वादीनामसिद्धत्वात् पूर्वं द्विर्वचने कृते सत्युत्तरत्र काले विकल्पविधित्वादयमर्थः प्रवर्त्तमानो यथा पूर्वत्र वर्त्तते, तथा नियोगातः परत्रापि न प्रवर्त्तत [`प्रवर्त्तेत'--का.मु.पाठः] इत्यनियोगो लभ्यते; नियमकारणाभावात्। ततश्चानिष्टो विकल्पः स्यात्--पूर्वपरयोरेकत्र प्रवृत्तेः, अपरत्राप्यप्रवृत्तेः। नेषेटोऽनिष्टो विकल्पः। तथा सति गरो गलः, गलो गर इत्येवमाद्यनिष्टमापद्यते। तत्र `न' इत्येतावदनिष्टविषये सूत्रं कर्त्तव्यम्। किमर्थम्? अनिष्टविषये पूर्वत्रासिद्धत्वस्य प्रतिषेधार्थम्। यत्र पूर्वत्रासिद्धत्वस्यानिष्टविषयः। ततः `भु ने' इत्येतद्ध्यत्र वचनेऽनुवर्त्तते। यद्येदम्, किमर्थमिदम्, पूर्वसूत्रेणैव सिद्धा प्रतिषेधः? सर्वत्र तत् सूत्रं नास्तीति ज्ञापनार्थम्। तेन यत्रासिद्धत्वमिष्यते तत्रैदासौ प्रवर्त्तते। तदन्यत्र विपर्ययस्तु न भवति; योगविभागादस्मिन् सूत्रे।।

4. उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य। (8.2.4)
`उदात्तयणः, स्वरितयणश्च' इति। उदात्तस्थाने यो यण स उदात्तयण; स्वरितस्थाने यो यण् स स्वरितयणित्यर्थः। `कुमार्यौ, कुमार्यः' इति। अत्र `अनुदात्तौ सुप्तितौ' (3.1.4) इत्यौजसावनुदात्तौ, तयोरुदात्तयणोः परयोः स्वरितो भवति। `उदात्तनिवृत्तिस्वरेण' इति। उदात्तलोपनिमित्तस्वरः पूर्वमुदात्तस्य लोपो यस्मात्, स पुनरुदात्तनिवृत्तिस्वरः `अनुदात्तस्य च यत्रोदात्तलोपः' (6.1.161) इत्यत्र यो विहिसः स [नास्ति--का.मु. पाठे] वेदितव्यः।
`कृत्स्वरेणान्तोदात्तौ' इति। `ल्व्या प्व्या' इति। लूपूभ्यां धातुस्वरेणान्तोदात्ताभ्यां क्विप्, `उपपदमतिङ्' (2.2.19) इति समासः। `गतिकारकोपपदात् कृत्' (6.2.139) इति कृदन्तस्योत्तरपदस्य प्रकृतिभावविधानादेतौ कृत्स्वरेणान्तोदात्तौ भवतः। `उदात्तयणआदेशश्च' इति। इहनेन सूत्रेणानुदात्तयोदात्तयणः परस्य स्वरितो विधीयते, स्वरितयणश्च परसय सप्तम्येकवचनस्य पूर्वेण प्रकारेण स्वरितो विधीयत इति दर्शयति। `तस्य यो यण्' इति। तस्येत्यनेन सप्तम्येकवचनस्य परामर्शः। `आशाशब्दाकारस्यानुदात्तस्य' इति। `आशाया अदिगारव्या चेत्' (फि.सू.1.18) इत्याशाशब्द आद्युदात्तः, तेन `अनुदात्तं पदमेकवर्जम्' (6.1.158) इत्याकारस्यानुदात्तत्वम्।
`ननु च' इत्यादि। सप्तम्येकवचनस्य `उदात्तयणः' इत्येवमनेन सुत्रेण यत् स्वरितत्वं विहितं तत् षाष्ठिकयणादेशे कर्त्तव्येऽसिद्धम्, ततश्च नैवायं स्वरितस्य स्थाने यणादेश इति सकृल्ल्व्याशा खलप्व्यशेत्यत्र स्वरितत्वं न भवतीत्यभिप्रायः। `आश्रयात्' इत्यादि। आहायम्--स्वरितयण इति; न क्वचित् सिद्धः स्वरितः। तत्राश्रयात् सिद्धत्वं भविष्यति, यथा `अतो रोरप्लुतादप्लुते' (6.1.913) इत्यत्र रुत्वस्य।
`यद्येवम्' इत्यादि। एतेनाश्रयात् सिद्धत्वे समाश्रोयमाणेऽतिप्रसङ्गमुद्भावयति। `दध्याशा' इति। दधिशब्दः `नब्विषयस्यानिसन्तस्य' (फि.सू.2.26) इत्याद्युदात्तः, शेष स्यानुदात्तत्वम्, `उदात्तादनुदात्तस्य स्वरितः' (8.4.66) इति धकारात्परस्येकारस्य स्वरितत्वम्। तस्याश्रयात् सिद्धत्वे तत्स्थानिकाद्यण उत्तरस्याशाशब्दाकारस्य स्वरितत्वं स्यात्। `तस्मात्' इत्यादि। यत एवमाश्रयात् सिद्धत्व आश्रीयमाणेऽयमतिप्रसङ्गो भवति; तस्मादयमेव यण्स्वरो योऽनेन

सूत्रेण (8.2.4) विधीयते, तस्य यणादेशे कर्त्तव्ये सिद्धत्वं वक्तव्यम्। वक्तव्य मित्यस्य व्याख्यानमर्थः। तत्तु पूर्ववदेव योगादिभागमाश्रित्य कर्त्तव्यम्।
`केचित्तु' इत्यादि। यद्येवमित्यादिना योऽतिप्रसङ्गदोष उद्भावितः, तं केषाञ्चिन्मतेन परिहरति। अनिष्टेऽपि विषये प्रवृत्तिरतिप्रसङ्गः। न च `उदात्तादनुदात्तस्य स्वरितः' (8.4.66) इत्यनेनोदात्तात् परो यः स्वरितो विधीयते तस्याश्रयात् सिद्धत्वमानिष्टम्; यस्मादुदात्तात् परो यः स्वरितयण् तत्परस्यानुदात्तस्य स्वरितत्वम्, ततः स्थानित्वाद्यणः परस्याशाशब्दाकारस्य स्वरितत्वं तैत्तिरीयके शाखान्तरे पठ्यते। तदनुदात्तत्वं पुनरग्निशब्दसयाकारस्य; तस्य प्रातिपदिकस्वरेणान्तोदात्तत्वात्। `तथा ब्राह्मणेऽपि इति। [इति-नस्ति--प्रा.मु.पाठे] तदेकदेशविशेषो ब्राह्मणशब्देनेह विवक्षितः। `दध्याशयति' इति। अश्नोतेर्णिजन्तस्य धातुस्वरेण चित्स्वरेण वान्तोदात्तादकारोऽनुदात्तः। तस्य स्वरितयणः परस्य ब्राह्णे स्वरितत्वं पठ्यते।
`यथा तु' इत्यादि। एतेन तमेवातिप्रसङ्घं समर्थयते। वार्तिककारेणोक्तम्--`आक्षयात् सिद्धमिति चेदुदात्तात् स्वरिते दोषः' इति। अस्यायमर्थः--यद्याश्रयात् स्वारतस्य सिद्धत्वमुदात्तात् परो यः स्वरितस्तस्य यो यण् ततः परस्यानुदात्तस्य स्वरितत्वमिष्टं स्यात्, तत्र दोषः। तेनानेन सूत्रेण स्वरितत्वं न भवतीति स्थितम्। अनेन हि वार्त्तिकेन--उदात्तात् परो यः स्वरितयण् तस्मात्परस्यानुदात्तस्य स्वरती भवतीत्येषोऽर्थो न प्रतीयते। तस्मादेतच्च न। यथा भाव्यं तथोदात्तस्यानेन स्वरितयणः परस्यानुदात्तस्य स्वरितो न भवतीति सिद्धं भवतीति। `तथा' इत्यादिनानन्तरमेवार्थं द्रढयति। भाष्ये हि `स्वरितग्रहणं न करिष्यते' इत्यादिना यन्थेन स्वरितग्रहणासिद्धत्वे सूत्रे प्रत्याच्याते। एवञ्च तत्प्रत्याल्यानमुपपद्यते, यद्युदात्तात् स्वरितयणः परस्यानुदात्तस्य स्वरितत्वं नेष्यते; अन्यथा तन्निमित्तस्य स्वरितस्येष्टौ सत्यां प्रत्याख्यानमुपपन्नमेव न स्यात्। किं [`कि' नास्ति--प्रा.मु.पाठेः] पुनर्भाष्ये स्वरितयणो ग्रहणं प्रत्याख्यायते, यावता तस्मिन् प्रत्याख्याते सकुल्ल्व्याशेथ्येवमादावनुदात्तस्य स्वरितो न सिध्यति? इत्यत आह--`सकृल्ल्व्याशेत्येमादौ' इत्यादि। उदात्तयण् पुनरत्रोकारवकारेको यकारः। ननु च योऽसौ सप्तम्येकवचनस्य स्थाने जायते तेन व्यवधानान्न सिध्यति? इत्यत आह--`स्वरितयण्' इत्यादि। अत्रैव कारणमाह--`स्वरविधौ' इत्यादि। इतिकरणो हेतौ।
यदि स्वरितग्रहणन्तरेणापि सिध्यति, कस्मात् सूत्रे तद्ग्रहणं क्रियते? इत्यत आह--`तत्तु क्रियते' इत्यादि। `अचः परस्मिन् पूर्वविधौ' (1.1.57) इत्यस्य हि--पूर्वस्माद्विधौ कर्त्तव्येऽजादेशः स्थानिवद्भवतीत्येषोऽर्थोऽभिमतः। उदात्तयणः परस्यानुदात्तस्य स्वरितविधौ कर्त्तव्य सप्तम्येकवचनस्थाने यो यणादेशस्तस्य स्थानिवद्भावादिकारेण व्यवधानमस्ति; व्यञ्जनस्य स्वरविधावविद्यमानवद्भावात् (व्या.प.37)। तेन व्यवधानं सति सकृल्ल्व्याशेत्यत्र `उदात्तयणः' इत्येव न सिध्यतीति स्वरितग्रहणं क्रियते। ननु च `नपदान्तरद्विर्वचन' (1.1.58) इत्यादिना स्वरविधौ प्रतिषिध्यते स्थानिवद्भावः। तत्कुतो व्यवधानम्? इत्यत आह--`स्वरदीर्घयलोपेषु' इत्यादि। अचो हि लोपादेशस्य स्वरविधौ [अयं भागः का.मुद्रिते नास्ति] स्थानिवद्भावः प्रतिषिध्यते। तथा हि तत्रोक्तम्--`स्वरदीर्घयलोपेषु[अयं भागः का.मुद्रिते नास्ति] लोपाजादेशो [लोपादेशो--का.मुद्रितपठिः] न स्थानिवद्भवतीति वक्तव्यम्' (1.1.58.वा.1) ति। न चात्राचो लोपादेशः, किं तर्हि? यणादेशः तस्मान्नास्ति स्थाविद्भावप्रतिषेधः।
`वैद्याशा' इति। विदस्यायत्यमिति `अनृष्यानन्तर्ये (4.1.104) इत्यादिना विदादित्वादञ्, तदन्तात् `शाङ्गरवाद्यञो ङीन्' (4.1.73) इति ङीन्। अत्र नित्त्वादाद्युदात्तत्वे कृते शेषस्यानुदात्तत्वमिति बैद्याशाशब्देऽचानुदात्तस्थाने यण्, नोदात्तस्य, नापि स्वरितस्य। `अत्र' इति। `अयमाद्युदात्तो लित्स्वरेण' इति। `सप्तम्यास्त्रल्' (5.3.10) इति त्रल्प्रत्ययान्तत्वात्। `हलि लोः' (7.2.113) इतीद्रूपस्य लोपः।।

5. एकादेश उदात्तेनोदात्तः। (8.2.5)
`अनुदत्तस्य' इति। उदात्तेन सहानुदात्तस्य यस्मिन्नेकादेशः स उदात्तः स्यात्, न तु स्वरितः। स्वरिते प्राप्त इदमारभ्यते। उदाहरणेष्वग्निप्रभृतयः प्रातिपदिकस्वरेणान्तोदात्ताः (फि.सू.1.1) विभक्तिस्तु `अनुदात्तौ सुप्तितौ' (3.1.4) इत्यनुदात्ता। `अग्नी, वायू' इति। `प्रथमयोः पूर्वसवर्णः' (6.1.102) इति दीर्घः। `वृक्षी, प्लक्षौ इति। `वृद्धिरेचि' (6.1.88) इति वृद्धिः।
`पचन्ति, यजन्ति' इति। `अतो गुणे' (6.1.97) पररूपत्वम्। `द्वयोरनुदात्तयोरयमेकादेशः' इति। ननु च `उदात्तादनुदात्तस्य स्वरितः' (8.4.66) इति शबकारस्य स्वरितत्वे कृते स्वरितानुदात्तयोरयमेकादेशः, तत्कथं द्वयोरनुदात्तयोरिति? एवमाह--`पररूपे कर्त्तव्ये स्वरितस्यासिद्धत्वात्'।।

6. स्वरितो वाऽनुदात्ते पदादौ। (8.2.6)
`सूत्थितः' इति। `कुगतिप्रादयः' (2.2.18) इति समासः। `अत्र सुशब्दः कर्मप्रवचनीयः' इति। अनेन सुशब्दस्य गतित्वमपनयति। गतित्वे हि सति `गतिर्गतौ' (8.1.70) इति निघातः स्यात्, ततश्चोदात्तेनानुदात्तस्यायमेकादेशो न स्यात्। `प्रादिसमासे' इत्यादि। सुशब्द आद्युदात्तः। तत्र हि प्रादिसमासे कृते `तत्पुरुषे तुल्यार्थ' (6.2.2) इत्यादिना पूर्वपदप्रकृतिस्वरत्वादाद्यूदात्तत्वं भवति। अतस्तेन प्रकृतिस्वरत्वेन हेतुनायमादेशः, यतोऽकः सवर्णदीर्घत्वमनुदात्ते पदादौ भवति। सुशब्दस्य ह्याद्युदात्तस्य प्रकृतिस्वरत्वे सति शेषस्यानुदात्तभावोपपत्तेः। ननु `प्रादिसमासे [`प्रादिप्रसङ्गे' इति वातिकपाठः] कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः' (वा.96) इत्युक्तम्, तत्कथमिह प्रादिसमासः? नैष दोषः; तस्य प्रतिधेधस्यानित्यत्वात्। अनित्यत्वं तु सुशब्दस्य सुषामादिषु (8.3.98) प्रयोगाद्विज्ञैयम्। तस्य हि तत्र `उपसर्गात्सुनोति' (8.3.65() इत्यादिनैव सिद्धेऽनुपसर्गार्थः पाठः। अनुपसर्गत्वं च सोः `सुः पूजायाम्' (1.4.94) इति कर्मप्रवचनीयत्वात्। अथ वा स्वतिभ्यामन्ये ये प्रादयस्तत्रायं प्रतिषेधः। तथा हि तत्र `स्वती पूजायाम्' (का.2.2.18) इति पूजायां स्वतिशब्दयोः प्रातिसमास उक्तः पूजायां च तयोः कर्मप्रवचनीयत्वं विवक्षितम्।

`दीक्षते' इति। विशब्दो निपरातस्वरेणाद्युदात्तः। अत्रापि `तिङ्ङतिङः' (8.1.28) ति निघाते कृत एकादेश इत्यनुदात्ते पदादौ भवतीति सम्बन्धनीयम्। `वसुकोऽसि' इति। वसुशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, ततः सुप्रन्ययान्तत्वात् कस्य ह्यसिशब्दे परतः `अतो रोरप्लुतादप्युते' (6.1.113) इत्युत्वम्, तस्य स्थानिवद्भावेन सुप्त्वादनुदात्तत्वमम्, पूर्वेण सह `आद्गुणः' (6.1.87) स च पूर्वसूत्रे (8.2.5) णान्तोदात्तः। `असि' इति। `तायस्त्योर्लोपः' (7.4.50) इति सकारलोपे कृते लटि सिपि रूपम्। अत्र `तिङ्ङतिङः' (8.1.28) इति निघातेनाकारोऽनुदात्तः, तसयाकारेण सह `एङः पदान्तादति' (6.1.109) इति परपूर्वत्वम्। `स्वरितग्रहणम्' इत्यादि। कथं पुनरसति स्वरितग्रहणे स्वरित आदेशो भवति, पुनः स्वरितग्रहणं विस्पष्टार्थम्; न पुनः पक्षे स्वरितविधानार्थम्? इत्यत आह--`उदात्ते हि' इत्यादि। उदात्ते हि विकल्पिते यस्मिन् पक्षे स न भवति तस्मिन्नुदात्तानुदात्तयोरन्तरतमो यस्तेनैव भवितव्यम्, स च स्वरित एव। अतोऽन्तरेणापि स्वरितग्रहणं स्वरित एव भविष्यति।

7. नलोपः प्रातिपदिकान्तस्य। (8.2.7)
`प्रातिपदिकस्य' इति, `पदस्य' इति समानाधिकरणे षष्ठ्यौ।

`अहन्नहिम्' इति। हन्तेर्लङ्, तिप्, हल्ङ्यादिलोपः' (6.1.68) अदादित्वाच्छपो लुक्। `अधातुः' (1.2.45) इति प्रतिषेधादिह प्रातिपदिकत्वं नास्ति। `राजा, राजानौ, राजानः' इति। असर्वनामस्थाने पदसंज्ञाप्रतिषेधादिह (1.4.17) प्रातिपदिकस्यावयवोऽन्तो नकारो भवति। `प्रातिपदिकान्तस्य' इति। षष्ठीतत्पुरुषेऽत्रोत्तरपदप्रधानत्वादस्यैव पदस्य तद्विशेषणं युक्तम्, न तु गुणभूतस्य। प्रातिपदिकेनान्तशब्देन चात्र नकारो विशेषितः, स च नकारः प्रातिपदिकस्यान्तर्भूतः। `पदस्य' इति। अनिष्टयोरपि व्यधिकरणयोः पदप्रातिपदिकान्तर्योर्विशेषणविशेष्यभावेन भवितव्यम्--प्रातिपदिकान्तस्येति, पदस्येति। पदस्य योऽवयवः सोऽपि प्रातिपदिकस्येत्यर्थः। एवञ्च सति क्रियमाणेऽप्यन्तग्रहणे राजानौ, राजान इत्यत्र प्राप्नोत्येव नलोपः, भवति ह्यत्रापि पदावयवः प्रातिपदिकस्यान्तो नकारः?--इत्येतच्चोद्यमपाकर्तुमाह--`प्रातिपदिकग्रहणमसमस्तमेव' इति। ततश्च तस्य `पदस्य' इत्येतत् समानाधिकरणविशेषणं युक्तमेवेत्यभिप्रायः। यदि तर्ह्यसमस्तमेव प्रातिपदिकग्रहणं षष्ठ्याश्रयणं प्राप्नोतीत्यभिप्रायः? इत्यत आह--`सुपां सुलक्' इति। अनेन यत् षष्ठ्यां लुक् तेन ल्ुका निर्दिष्टं प्रातिप्रार्तिपदिकग्रहणम्, अतो न भवति षष्ठ्याः प्रसङ्गः।
`अहः' इति। `स्वमोर्वपुंसकात्' (7.1.23) इति सोर्लुक्, `रोऽसुपि' (8.2.69) इति नकारस्य रेफः। प्रत्ययलक्षणेनाह्नः (1.1.62) सुप्परता नास्ति; `लुमता लुप्ते प्रत्ययलक्षणं नास्ति' (1.1.63) इति वचनात्। `अहोभ्याम्, अहोभिः' इति। `अहन्' (8.2.68) इति रुत्वम्, `हशि च' (6.1.114) इत्युत्वम्, `आद्गुणः' (6.1.87)। ननु च प्राप्तिपूर्वकः प्रतिषेधो भवति; इह च रेफरुत्वयोः कृतयोर्नलोपस्य प्राप्तिरेव नास्ति, नकाराभावात् तत्किं प्रतिषेधेन? इत्यत आह--`अहन्' (8.2.68) `रोऽसुपि' (8.6.9) इति आदिश्यते। तद्रेफो रुत्पञ्च द्वयमप्येतदनवकाशम्, अतो लोपे न भवति; अन्यथा हि तयोर्विधानमनर्थकं स्यादित्यत आह--`सावकाशम्' इत्यादि। सम्बुद्धौ हि लोप न; `न ङिसम्बुद्ध्योः' (8.2.8) इति प्रतिषेधात्। अतस्तत्रोभयमप्येतत् सावकाशम्। `हे दीर्घाहो निदाघ' इति। दीर्घाण्यहानि यस्मिन्निदाघ इति बहुव्रीहिः, तत्सम्बुद्धिः, हल्ङ्यादिलोपः (6.1.68)। सत्यपि लोपे प्रत्ययलक्षणेन सुप्परतास्ती ति `रोऽसुपि' (8.2.69) इत्येतन्न प्रवर्त्तते, `अहन्' (8.2.68) इति रुत्वमेव भवति।
`अहन्' इति। `प्रथमैकवचनान्तम्' इत्यादि। तत्र `अहन्' (8.2.68) इति रुत्वविधौ यदुपादीयते तदावर्त्तते--इत्येतावति वक्तव्ये `अहन्' इत्यनेन सूत्रेण केवलं रुत्वमादेशो न विधीयते, अपि त्वावृत्तिन्यायादहन्नित्येतच्छब्दरूपमन्वाख्यायते--इत्यत्रोपपत्तिप्रदर्शनार्थम् `प्रथमैकवचनान्तमकृतनलोपम्' इत्युक्तम्। यदि ह्यादेशनात्रमहन्नित्यनेन विधीयते, तदादेशसम्बन्धे षष्ठ्या भवितव्यमिति षष्ठ्युपादीयेत, न प्रथमा। प्रथमया ह्युपादीयमानं कृतनकारलोपमुपादीयेत, नकारलोपलक्षणस्य भावात्; न चैव कृतम्; तस्मात् प्रथमान्तस्याकृतनकारलोपस्योपादानदवसीयते--अहन्निति रूपस्यान्वाख्यानं क्रियत इति। अन्वाख्यायते--साधुत्वेन प्रतिपाद्यत इत्यर्थः। किमर्थम्? नलोपाभावार्थम्। `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इत्यनेन लोपो मा भूदित्येवमर्थम्।।
8. न ङिसम्बुद्ध्योः। (8.2.8)
`चर्मन्' इति। `सुपां सुलुक्' (7.1.39) इति ङेर्लुक्। ननु च सुराजन्निति प्रातिपदिकसंज्ञा हि विद्यते, प्रत्ययलक्षणेन (1.1.62) `अप्रत्ययः' (1.2.45) इति न प्रतिषेधात्। `आर्द्रे चर्मन्' इति। अत्र तु न केवल प्रातिपदिकसंज्ञा पूरवोक्तादेव हेतोर्नास्ति; प्रत्ययलक्षणेन प्रवृत्तया भसंज्ञया बाधितत्वात्। अतो नलोपप्राप्तिर्मास्त्येवेत्यर्थः।
कथं प्रतिषेधः? इत्यत आह--`एतस्मादेव' इत्यादि। `भसंज्ञा च न भवति' इति। अत्राप्येतस्मादेव प्रतिषेधवचनात् प्रत्ययलक्षणेन च ज्ञाप्यत इति सम्बध्यते। `तथा च' इत्यादिना ज्ञापनप्रयोजनं दर्शयति तदेवमेतस्मात् प्रतिषेधादर्थद्वयं ज्ञाप्यते। एवञ्च कृत्वा--राजपुरुष इत्यत्र प्रातिपदिकसंज्ञायां सत्यां नलोपश्च भवति। भसंज्ञायामसत्यां `अल्लोपोऽनः' (6.4.134) इत्यलोपश्च न भवति। न भसंज्ञाभावन्चेत्यस्येह `यथोद्देशं संज्ञापरिभाषम्' (व्या.प.59) इत्यस्मिन् दर्शने प्रयोजनं वेदितव्यम्। `कार्यकालं हि संज्ञापरिभाषम्' (व्या.प.58) इत्यस्मिन् दर्शने भसंज्ञायामङ्गकार्यं भवतीति `न लुमताङ्गस्य' (1.1.63) इति प्रत्ययलक्षणप्रतिषेधादेव भसंज्ञा न भवतीति नार्थस्तत्र भसंज्ञाया अभावज्ञापनेन।
`ङावुत्तरपदे' इत्यादिनायं ङौ परतो नलोपप्रतिषेधस्य प्रतिषेध उक्तः। तस्योत्तरपदे परतो यो ङिस्तत्र प्रतिषेधो वक्तव्यः। `वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--`स्वरितो दानुदात्तं पदादौ' (8.2.6) इत्यतः `वा' इत्यनुवर्त्तते, सा च व्यवस्थितविभाषा, तेन ङावुत्तरपदे न भविष्यतौति। `चर्मणि तिला

अस्य चर्मतिलः' इति। वैयधिकरण्येऽपि गमकत्वात् समासः। ननु चात्यल्पमिदमुच्यते--ङावुत्तरपदे प्रतिषेधो वक्तव्य [अयं भागः का. मुद्रितपूस्तके नास्ति] इति। सम्बुद्धावपि ह्युत्तरपदे प्रतिषधो [अयं भागः का. मुद्रितपूस्तके नास्ति] वक्तव्य एव; अन्यथा हि हे राजन् वृन्दारकेति विगृह्य `वृन्दारकनागकुञ्जरैः' (2.1.62) इति समासे कृते हेराजन् वृन्दारकेत्यत्र नलोपो न स्यात्? इत्यत आह--`हे राजन् वृन्दारकेत्यत्र तु' इत्यादि। समानार्थेन वाक्येन समासेन भवितव्यम्, एवं हि सामर्थ्यं भवति, नान्यथा। तथा चोक्तम्--ग्रहणवाक्यार्थाभिधाने यः शक्तः स समर्थो वेदितव्य इति। यश्चेहार्थो हे राजन् वृन्दारकेति वाक्येन गम्यते, स न ज्ञायते--हे राजवृन्दारकेति समासेन। वाक्येन ह्येकार्थीभावाभावात् सम्बोधनं गम्यते, समासे तु विपर्ययात् समुदायार्थः सम्बोधनम्। तस्माद्राजा चासौ वृन्दारकश्चेत्येवमेव विगृह्य समासः कर्त्तव्यः, ततः सम्बुद्धिः, एवञ्च सम्बुद्ध्यन्तं पूर्वपदम्। हे राजन् वृन्दारकेत्यत्र समासो भविष्यत्येव; ततश्चोत्तरपदे परतः सम्बुद्धेरभावान्नलोपप्रतिषेधस्य प्राप्तिरेव नास्तीति नार्थस्ततप्रतिषेधेन।
`वा नपुंसकानाम्' इत्यादि। नपुंसकलिङ्गानां वा नलोपप्रतिषेधो भवतीत्येतदर्थरूपं व्याख्येयमिति। अत्र व्याख्यानं तु--इहापि वाग्रहणानुवृत्तिं व्यवस्थितविभाषात्वं चाश्रित्य कर्त्तव्यम्।।

9. मादुपधायाश्च मतोर्वोऽयवादिभ्यः। (8.2.9)
मकारान्तान्मकारोपधादवर्णान्तादवर्णोपधाच्चोत्तरस्य मतुपो मकारसय `च' इत्ययमादेशो भवतीत्ययमर्थोऽभिमतः। स एव यथा सम्पद्यते, तथा दर्शयितुमाह--`मतोरिह' इत्यादि। अत्र मतुप कार्यित्वेनीपात्तः। स च नास्त्यन्तरेण प्रातिपदिकत्वम्; तद्विधौ प्रातिपदिकाधिकारात् (4.1.1)। तस्मान्मतुपः पूर्वं सामर्थ्यलभ्यं प्रातिपदिकम्, तन्मकारावर्णाभ्यां मादिति विशिष्यते--मकारोऽन्तो यस्यं, अवर्णोऽन्तो यस्येति। मकारावर्णविशिष्टा या चोपधेति सामर्थ्यम्। कथम्? पूर्वं प्रातिपदिकान्तं विशिष्यते इति सम्बन्धनीयम्। मकारेण विशेषणेन, अवर्णेन विशेषणेन च विशिष्टा योपधा सा च विशिष्यते--मकार उपधा यस्य, अवर्ण उपधा यस्येति। मकारावर्णविशिष्टस्येति मतुपो विशेषणे `उपधायाश्च' इत्यत्र मा भूदिति? अस्यापेक्षितस्वल्लभ्यत इत्ययमर्थो भवतीति। इतिकरणो हेतौ। यस्मात् सामर्थ्यप्राप्तं प्रातिपदिकमेव विशिष्यते, तस्मादयं वक्ष्यमाणोऽर्थः सूत्रस्यापि भविष्यतीति। `किंवान्' इति। किमस्यास्तीति मतुप्; `उगिदचाम्' (7.1.70) इत्यादिना नुम्, हलङ्यादिसंयोगान्तलौ (6.1.68; 8.2.23), `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः।
`नार्मतम्' इति। नरोऽस्य सन्तीति नृमान्, नृमत इदमिति `तस्येदम्' (4.3.120) इत्यण्, तत्र वृद्धौ कृतायां दार्मतमित्यत्रावर्णोपधमतुप् प्रातिपदिकं जातमिति वत्वं प्राप्नीति, तत् कस्मान्न भवति? इत्याह--`इह' इत्यादि। नार्मतमित्यत्र ह्यवर्णोपधमतुप्त्वं वृद्धिरेव, सा च बाह्यतद्धितनिमित्ता। अतोऽवर्णौपधत्वस्य बहिरङ्गत्वम्, वत्वं तु प्रवृत्तिनिमित्तमिति तस्यान्तरङ्गत्वम्, असिद्धं च बहिरङ्गमन्तरङ्गे (व्या.प.42) इति, तेन नार्मत मित्यत्र वत्वं न भवति।।

10. झयः। (8.2.10)
`अग्निचित्वान्' इति। `तसौ मत्वर्थे' (1.4.19) इति भसंज्ञा। तेन पदसंज्ञानिबन्धनं `झलां जशोऽन्ते' (8.2.39) इति जश्त्वं न भवति।।

11. संज्ञायाम्। (8.2.11)
`अहीवती' इति। `नद्यां मतुप्' (4.2.85) इति चातुरर्थिको भतुप्, `शरादीनाञ्च' (6.3.120) दीर्घः।।

12. आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती। (8.2.12)
अथाष्ठीवदिति किमर्थं निपात्यते, यावतोर्वष्ठीवमित्यस्मादेव निपातनात् (5.4.77) एतत्सिद्धम्? एवं मन्यते--द्वन्द्व एवैतन्निपातनमिति तत्रैव स्यात्, इह तु निपातनं क्रियमाणं सर्वविषयं भविष्यतीति। कथं पुनर्ज्ञायते--आसन्दीशब्दः प्रकृत्यन्तरं विद्यते? इत्याह--`तथा चोक्तम्' इत्यादि। यदि तर्हि तत्रैव संज्ञायामिति वत्वे च (8.2.11) सिद्धमासन्दीवदिति, तत्किमर्थमिह पठ्यते? इत्याह--`आसन्दीवत्' इत्यादि। `तत्प्रयञ्चार्थम्' इति।
यदि तर्हि चक्रीवदिति संज्ञायामेतन्निपातनम्, कथं चक्रीवन्ति सदोहविर्धानानि भवन्तीति, न हीयं संज्ञा? इत्यात आह--`चक्रीवन्ति' इत्यादि। छन्दसि ह्ययं प्रयोगः, तत्र `व्यत्ययो बहुलम्' (3.1.85) इति वर्णव्यत्ययेनाकारस्येकारे कृते `छन्दसीरः' (8.2.15) इति मतोर्वत्वे चक्रीवन्तीत्येतत् सिध्यति। तस्माच्छान्दसत्वादेवमेतत् साधुत्वेनानुगन्तव्यम्।
`कक्षीवान्' इति। `हलः'[`हलि च' इति सूत्रम्] (8.2.77) इति दीर्घः। `नलोपाबावार्थम्' इति। `नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नकारलोपः प्रापनोति, स मा भूदित्येवमर्थम्। `णत्वर्थं च' इति। `पदान्तस्य' (8.4.37) इति णत्वप्रतिषेधः प्राप्नोति, अतो णत्वार्थञ्च निपातनम्। `मतोर्वा नुडर्थमिति' इति। वाशब्दो विकल्पार्थः। थ वा--नैव नकारलोपाभावार्थं निपातनम्, नापि णत्वार्थम्, किं तर्हि? मतोर्नुडर्थम्। नुटि कृते नलोपे सत्यपि सिध्यत्येवेष्टम्, णत्वप्रतिषेधस्य प्रार्प्नास्त्येव; अपदान्तत्वात्। `अट्कुप्वाङ्' (8.4.2) इति णत्वं भवति।।

13. उदन्वानुदधौ च। (8.2.13)
`उदधावर्थे' इति। यस्मिन्नुदकं धीयते तस्मिन्नर्थं इत्यर्थः। तथा ह्युदके कर्मण्युपपदे `कर्मण्यधिकरणे च' (3.3.93) इति किप्रत्यये कृते `पेषंवासवाहनधिषु

च' (6.3.58) इत्युदकस्योदभावे कृत उदधिशब्दो व्युत्पाद्यते। चकारेण `संज्ञायाम्' (8.2.11) इत्यनुकृष्यत इति दर्शयति। `संज्ञायां च' इत्यादि। `उदधावर्थे' इत्यादि। उदधिग्रहणञ्च संज्ञार्थम्। `उदन्दान्' इति। डदकं धेयमास्मिन्नस्तीत्यर्थविवक्षायां मतुप्। `स एव मुच्यते' इति। न तु गङ्गादिः। यदि यस्मिन्नुदकं धीयते [नास्ति--का.मु.पुस्तके] स एव मुच्यते--उदकवान् घट इत्यभिधानं प्राप्नोति, घटेऽप्युदकं धीयत इत्यत आह--`उदकवान् घटः' इत्यादि। इह विवक्षा शब्दव्युत्पत्तेः प्रधानं कारणम्, न वस्तुनः सत्ता। स च येन दधात्यर्थेनोदधिरित्युच्यते, सोऽस्मिन् प्रयोगे घटे न विवक्षितः, किं तर्हि? उदकसत्तायाः सम्बन्धमात्रम्। उदकमस्मिन्नस्तीत्येवन्मात्रं विवक्षितम्। अतो दधात्यर्थस्याविवक्षितत्वाद्घटस्योदधित्वं विद्यमानमप्यसङ्कल्प्यमेवेति नायं निपातनस्य विषयः। तेन घट उदकवानित्युच्यते। यदा तु दधात्यर्थो विवक्ष्यते तदोदन्वानित्येवं वक्तव्यम्।।

14. राजन्वान् सौराज्ये। (8.2.14)

`राजन्वानिति निपात्यते' इति। किमत्र निपात्यते? नलोपाभावः, नुड्वा। `सौराज्यम्' इति। शौभनो राजा यस्मिन् देशे स सुराजा, तद्भावः सौराज्यम्, ब्राह्मणादित्वात् व्यञ्, `नस्तद्धिते' (6.4.144) इति नलोपः। तत्पुनः सौराज्यं यत्र शोभनेन राज्ञा देशस्य सम्बन्धः। `समासकृत्तद्धितेषु सम्बन्धाभिधानम्' (सी.पा.130) इति वचनाद्राजन्वानित्यस्य शब्दस्य देश एव वाच्यः, न सौराज्यम्। स तु देश शब्दात् प्रतीयमानः; सौराज्येनाविनाभावित्वात्। तच्च गमयतीत्याह--`गम्यमाने' इति। `राजन्वान्' इति पुंल्लिङ्गम्। तस्यातन्त्रतां दर्शयितुम्--`राजन्वती पृथिवी' इत्यस्योदाहरणस्योपन्यासः।।

15. छन्दसीरः। (8.2.15)

`हरिवो मेदिनम्' इति। `न मु ने' (8.2.3) इत्यत्रैतद्व्युत्पादितम्। `आरेवानेतु मा विशत्' इति। रयिशब्दस्य `रयेर्मतौ बहुलम्' (दा.665) इति सम्प्रसारणम्, परपूर्वत्वम्, `आद्गुणः' (6.1.87)। अथेह कस्मान्न भवति--सप्तर्षिमन्तं द्यावापृथिवीमन्तम्? इत्याह--द्यौश्च पृथिवी चेति द्वन्द्वे कृते `दिवसश्च पृथिव्याम्' (6.3.30) इति दिवो द्यावादेशः।

`गोर्वान्, धूर्वान्, आशीर्वान्' इति। `गृ शब्दे' (धा.पा.1498), `धुर्वी हिंसार्थः (धा.पा.573), `आङ शासु श्च्छायाम्' (धा.पा.1022), एषां सम्पदादित्वात् क्विप्। गृणातेः `ॠत इद्धातोः' (7.1.100) इतीत्त्वम्, धुर्वेः `राल्लोपः' (6.4.21) इति वकारलोपः, `शास इदङ्हलोः' (6.4.34), इत्यत्र शास इत्त्वे `आशासः क्वावुपसंख्यानम्' (वा.781) इत्याङ्पूर्वस्य शास इत्त्वम्, मतुपि कृते `ससजुवो रुः' (8.2.66) इति रुत्वम्।।

16. अनो नुट्। (8.2.16)

`अक्षण्यन्तः' इति। `अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' (7.1.75), ` छन्दस्यापि दृश्यते' (7.1.76) इत्याङ्; नुट्, अनङी नकारस्य लोपः नुमो णत्वम्। `अस्थन्वन्तम्' इति। अस्थिशब्दस्य णत्ववर्ज पूर्ववदनङादि कर्त्तव्यम्। `शीर्षण्वती' इति। `शीर्षश्छन्दसि' (6.1.60) निपातितम्। ननु च नुटोऽनन्तरत्वात् तस्यैव वत्वेन भवितुं युक्तम्, न तु तद्व्यवहितस्य मकारस्य, तत्कथमिह नुटो वत्वं न भवति, ततस्तु परस्य न भवति? इत्याह--`नुटोऽसिद्धत्वात्' इत्यादि। अथायं नुट् परत्वादपवाद एव कस्मान्न भवति? भिन्नजातीयत्वात्। समानजातीयकार्यपन्नो हि विशेषः सामान्यस्य बाधको भवति, इह कार्यभेदोऽस्ति; वत्वस्यादेशत्वान्नुटस्थ्वागमत्वादिति नास्ति वाध्यबाधकभावः, नुटः परादिकरणं णत्वं यथा स्यादित्येवमर्थम्; अन्यथा हि `पदान्तस्य' (8.4.37) इति प्रतिषेधः स्यात्।।

17. नादघस्य। (8.2.17)

`सुपथिन्तरः' इति। शोभनः पन्था इति प्रादिसमासः--सुपन्थाः, सुशब्दात् `न पूजनात्' (5.4.69) इति प्रतिषेधात् `ॠक्पूरब्धूः' (5.4.74) इत्यादिना समासान्तो न भवति, तरप्। `दल्युहन्तमः'। दस्युं हतवानिति क्विप्, तदन्तात् तमप्।

`भूरिदावत्तरः' इति। भूरि वदातीति `आतो मनिन्' (3.2.74) इत्यादिना वनिप्, तदन्तादुत्तरपदस्य तुट्।

`रथीतरः' इति। रथिन्नित्येतस्मान्मत्वर्थीयेनिप्रत्ययान्तात् तरप्, नकारस्य लोपः, ईकारः अथ वा--नकारस्यैवेकारः, सवर्णदीर्घत्वम्।।

18. कृपो रो लः। (8.2.18)

इह र इति वर्ण उपादीयते, ल इत्यस्यादेशस्तादृश एव; ततश्च केवलो यो रेफवरणो नावयवभूतस्तस्यैव तथाभूत एव लकारादेशः स्यात्, ॠकारस्य तु लकारो न स्यात्; तयोः स्थान्यादेशभावेन सूत्रोऽनुपादानात्। ततश्च क्लृप्तः, क्लृप्तवानित्यादि न सिध्येदिति यश्चोदयेत्, तं प्रत्याह--`र इति सामान्यमुपादीयते' इति। वर्णत्वावर्णत्वकृतं भेदमुत्सृज्य यत् सामान्य वर्णात्मिकायामवर्णात्मिकायां च रेफव्यक्तौ वर्त्तते यतस्तयोर्वर्णत्वावर्णत्वादिभेदभिन्नयोर्द्वयोरपि र इत्यभिधानप्रत्ययावभिन्नौ भवतस्तदुपादीयते, न तु वर्णात्मकः--एवं विशेषः। `तेन' इति। सामान्योपादानेन द्वयोरपि ग्रहणं भवतीति। तस्य सामान्यस्य द्वयोरपि भावात् `ल इत्यपि सामान्यमेव' इति। उपदीयत इत्यपेक्षते। अत्रापि तेन यश्चकेवलो लकारो यश्च लृकारस्थः, तयोर्द्वयोरपि ग्रहणमित्येतद्वाच्यम्? पूर्वानुसारेण गम्यमानार्थत्वान्नोक्तम्। `ततोऽयम्' इत्यादि। यत एवं द्वयोरपि रेफयोलकारयोश्च ग्रहणम्, तस्मात् केवलस्य रेफस्य केवलो लकार आदेशो विधीयते। आन्तरतम्यादृकारस्यापि लृकारः। ननु च सत्यपि द्वयोरपि ग्रहणे ॠकारस्य स्थान ॠकारो

विधीयत इत्येतन्न लभ्येत, न हि ऋकारस्थो रेफ ऋकारो भवति, किं तर्हि? तदवयवः; तत्र द्वयोरपि ग्रहणे सति ऋकारस्थस्यापि रेफस्य लृकारस्थो लकारस्त त्सदृश एवान्तरतन्याद्भवतीत्येषोऽर्थो लभ्यते, न तु ऋकारस्यापि स्थाने लृकारो भवतीत्येषोऽर्थोऽपि? इत्येतस्य चोद्यस्य निराकरणार्थं `एकदेशविकारहद्वारेण' इत्युक्तम्। एकदेश ऋकारस्यावयवो रेफस्तस्य विकार लृकारावयवो लकारः। अथ वा--एकदेश लृकारस्यावयवो लकारः, स एव विकारः। ऋकारस्य रेफस्यैकदेशविकारः। द्वारम्--मुखम्, उपाय इति यावत्। तेन ऋकारस्य स्थान लृकारादेशो विधीयते। यदि ऋकारलृकारस्थयो रेफलकारयोर्ऋकारलृकाराभ्यां पृथग्भावः सम्भवति। तस्मान्नान्तरीयकत्वादेकदेशविकारद्वारेण समस्तस्यैव ऋकारस्य समस्त एव लृकारादेशो विधीयते। अस्यैवार्थस्य द्रढीकरणायाह--`एवं च' इत्यादि। यत एवमेकदेशविकाद्वारेण ऋकारस्य स्थाने लृकारो विधीयते, एवञ्च `लुटि च क्लृपः' (1.3.110) इत्येवमादीनां ग्रहणम्। तदेवं चोद्यं परिहरता यदुक्तम्--`नुङ्विधिलादेशविनामेष्वृकारः [`ऋकारे'--काशिका, पदमञ्जरी च] प्रतिविधातव्यः' [विधातव्यम्--काशिका, पदमञ्जरी च] (वा.1) इति, तत्रावसरे प्राप्ते लादेशे प्रतिविहितम्। `कल्प्ता, कल्प्तारौ, कल्प्तारः' इति। तृच्, अथ वा लुट्। `चिक्लृप्सति' इति। सन्, `हलन्ताच्च' (1.2.10) इति कित्वाद्गुणाभावः। `क्लृप्तः, क्लृप्तवान्' इति। क्तक्तवत्।

`कृपा' इति। एतत्कथं सिध्यति? यावताऽत्रापि लत्वेन भवितव्यम्? इत्यत आह--`कृपेत्येतत्' इत्यादि। एतेन `क्रप कृपायां गतौ' (धा.पा.771) इत्यस्मात् `षिद्भिदादिभ्यो।।ऽङ्' (3.3.104) इत्यङि तत्सन्नियोगेन च सम्प्रसारणे कृते कृपेत्येतद्भवतीति दर्शयन् कृपेत्यस्य रूपस्य लाक्षणिकत्वं दर्शयति। यद्येवम्, ततः किमत्यत्र लत्वं न भवति? इत्याह--`तस्य हि' इत्यादि। यतसतस्य कृतसम्प्रसारणस्य क्रपेः कृपेत्येतद्रूपं भवति, तस्माल्लाक्षणिकत्वम्। अतो लक्षणप्रतिपदोक्तपरिभाषयैव (व्या.प.3) न गृह्यते इति भवति लप्रसङ्गः।

कृपण, कृपीट, कर्पूरादिषु ह्यौपदेशिकमेव कृपेत्येसद्रूपम्, न लाक्षणिकम्। तथा हि `रञ्जे क्वुन्' [`रजः क्युन्' इति द.उ.पाठः `रजेः, रञ्जेः' इति पाठान्तरे] (द.उ.5.24) इति यः क्वुन् विहितः, तस्मिन् बहुलवचनात् कृपेरेव विहिते कृपण इति भवति; `कृतृकृपिभ्यः कीटन्' [`कृतृकृपिकम्पिभ्यः कीटन्' इति द.उ.पाठः `कपिकम्पिभ्यः' इति पाठान्तरम्] (द.उ.5.3) इति कृपेरेत कोटनि विहिते कृपीट इति भवत; `खर्जिपिञ्जादिभ्य ऊरोलचौ' (द.उ.10.10) इत्युरप्रत्यये कृते कर्पूर इति भवतीत्याह--`कृपणकृपीट' इत्यादि। एवं मन्यते--बहुलवचनात् क्रपेरेव क्युन् [क्वुन् प्रा.मु.पाठः] भवति, तत्र चास्य सम्प्रसारणं कृतम्, `कृ-तृकृपिभ्यः कीटन्' (द.उ.5.3) इत्यत्रापि कृपिग्रहणमपनीय क्लृपिग्रहणं करिष्यते, सम्प्रसारणं तु बहुलवचनादेव भविष्यति; `खर्जिपिञ्जादिभ्य ऊरोलचौ' इत्यत्रापि आदिग्रहणे कृपिरेव ग्रहीष्यते, सम्प्रसारणं च पूर्ववदेव भविष्यतीति। यद्यपि कृपणकृपाणेत्येवमादीनि रूपाणि स्युः, तदास्य दोष इति दर्शयितुमाह--`जणादयो बहुलमिति वा' इत्यादि।

अत्यन्तभिन्नरूपयोरभिन्नस्वभावत्वमसम्भावयन् पृच्छति--`किमिदम्' इत्यादि। `समानविषयत्वम्' इति। अभिन्नविषयत्वमेकशब्देनात्र विवक्षितम्, न त्वभिन्नस्वभावत्वमिति दर्शयति। किमर्थं पुनः कृपिमुद्दिश्य लादेशो विधीयते, न कृपिरेवोद्दिश्येत? गु स्थाने लत्वमात्रं कर्त्तव्यम्, तच्चावश्यमुकर्त्तव्यमुपल्कारीयतीत्येवमर्थम्। तथा च--`ऋदुपधाच्चक्लृपि चृतेः (3.1.110) इत्यत्र क्लृपिप्रतिषेधो न कर्त्तव्यो जायते। तेनैवं शक्यम्--इह ह्यचोक्लृपदिति ऋकारलृकारयोः सवर्णसंज्ञादिधानादृकारस्य विधीयमानमुरत्त्वं लृकारस्यापि स्यात्। तथा च लृकारस्याप ऋवर्णः प्रसज्यते; ऋकारान्तं तूपदिश्य लत्वे विधीयमाने तस्यापि लृकारस्य लत्वं सिद्धं भवति।।

19. उपसर्गस्यायतौ। (8.2.19)

इह द्वौ पक्षौ सम्भवतः--अयतिग्रहणं रेफविशेषणमित्येकः पक्षः, उपसर्गस्य विशेषणमिति द्वितीयः। तत्राद्ये पक्षेऽयतौ परत इत्येवामादिको वृत्तिग्रन्थ एवं नेयः--अयतौ परतो यो रेफ उपसर्गस्थस्तस्य लकारादेशो भवतीति। द्वितीये ह्येवं नेयः--अयतौ परतो म उपसर्गस्तस्योपसर्गस्य यो रेफस्तस्य लकारादेशो भवतीति। `प्लायते' पलायते' इति। `अय ण्य' इत्यस्मादनुदात्तेत्त्वादात्मनेपदम्। कथमत्राद्ये पक्षे लत्वं भवति, यावता तस्मिन् कर्त्तव्ये `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावेन भवितव्यम्, ततश्च प्रकृत्युपसर्गयोर्निमागे सत्यवर्णेन व्यवधानद्रेफस्यायतिपरता न सम्भवति? इत्याह--`अत्र योऽयम्' इत्यादि। विभागे विश्लेष इत्यर्थः। एकग्रहणं प्रत्यय इत्यत्र सङ्घाते व्यवधाने लत्वं न भवतीति प्रदर्शनार्थम्। येन हि व्यवधानमेव नाव्यवधानं तेन व्यवधाने वचनाप्रामाण्याल्लत्वेन भवितव्यम्। केन व्यवधानमेवम्? एकेन वर्णेन। सङ्घातेन पुनर्व्यवधानमस्ति नास्ति चेति, तेन व्यवधाने भवति। `तथा च' इत्यादि। एवमाद्ये पक्ष एकेन वर्णेन व्यवधाने लत्वं भवति। न केवल पल्ययत इत्यत्र प्रवर्त्तते यत्र स्यानिवद्भावद्वारेणाशास्त्रीयं व्यवधानम्; यत्रापि तु श्रूयमाणेनैव वर्णेन लौकिकं व्यवधानम्, तत्रापि प्रवर्त्त इत्येषोऽपिशब्दस्यार्थः।

ननु च निरः कुषः' (7.2.46) इत्यत्र निर इति निर्देशेन ज्ञापितमेतत्--निरिति रेफान्तमुपसर्गान्तर मस्तीति, ततश्च निलय इत्यत्र वचनस्यावकाशे सति कथं `येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या.पा.46) इत्युक्तम्? एवं मन्यते--नैकमुदाहरणं सामान्यलक्षणं सामान्यलक्षणं प्रयोजयति, यदि ह्येतावत् प्रयोजनं स्यात्, निर एव ग्रहणं कुर्यादिति। एवं प्रथमे पक्षे सर्वस्य सिद्धतां प्रतिपाद्य द्वितीये पक्षे प्रतिपादयितुमाह--`उपसर्गविशेषणे तु' इत्यादि। तुशब्दोऽयमपिशब्दस्यार्थे वर्त्तते। न केवलं रेफविशेषणेऽयतिग्रहणे पल्ययत इत्यादि सर्वं सिद्धम्, अपि तूपसर्गविशेषणेऽपि तस्मिन् सर्वमेतत् सिद्धम्। अथ वा--तुशब्दः पूर्वस्मात्पक्षादस्य विशेषं द्योतयति। तत्र हि वयवधानाल्लत्वं प्राप्नोतीत्येतच्चोद्यमवतरति। अतो यदेतत् प्रतिपाद्यमेतत् सर्वम्। इह त्वस्य चोद्यस्यावतार एव नास्तीति सिद्धमेवैतत्, न यत्नसाध्यमित्यर्थः। प्रतेरपि प्राप्नोतीति चोदकः। तुशब्दः पूर्वस्माद्विशेषणार्थः, पूर्वत्र प्रतेर्न प्राप्नोति; सङ्घातेन व्यवधानात्; इह तु नास्ति केनचिद्व्यवधानम्, अतः प्रतेरपि प्राप्नोतीति मन्यन्ते। `अपरे' इति। द्वितीयपक्षाभिनिविष्टानामम्यतमे। `निस्दुसित्येतयोः' इति।

यद्ययतिग्रहणं रेफस्य विशेषणम्, अथाप्युपसर्गस्य विशेषणम्, सर्वथाः रत्वे कृते लत्वं प्राप्नोति? इति यश्चोदयेत्, तं प्रत्याह--`निस्दुस्' इत्यादि। गतार्थम्।।

20. ग्रो यङि। (8.2.20)
`निजेगिल्यते' इति। `ॠत इद्धातोः' (7.1.100) इतीत्त्वम्, द्विर्वचनम्, अभ्यासकार्यम्।
`भावगर्हायां ग्रो यङ विहितः' इति। `लुपसदचर' (3.1.24) इत्यादिना। `गिरतेः' इति। `गृ निगरणे' (धा.पा.1410) इत्येतस्य तौदादिकस्य।
`गृणातेः' इति। `गु शब्दे' (धा.पा.1498) इत्यस्य ॠयादिकस्य।`सामान्येन ग्रहणमिच्छन्ति' इति। विशेषणानुपादानात्। `अपरे तु' इत्यादि। कथं पुनः सामान्योपादानेऽपि गिरतेरेव ग्रहणं लभ्यते? इत्याह--`गृणातेः' इत्यादि। किं `कारणं यङेव नास्ति? इत्याह--`अनभिधानात्' इति।
`निगीर्यते' इति। `सार्वधातुके यक्' (3.1.67), `हलि च' (8.2.77) इति दीर्घः।।

21. अचि विभाषा। (8.2.21)
`गिरति' इति। निगरणार्थस्य रूपम्। `निगरणम्' इति। ल्युट्। `निगारकः' इति। ण्वुल्। निगार्यते' इति। अत्र हि णिलोपे कृते विकल्पो न सिध्यत्यचः परस्याभावात्? इत्येतच्चोद्यमपाकर्त्तुमाह--`निगार्यते' निगाल्यते' इति। स्थानिवद्भावस्तु पूर्ववत्।
स्यादेतत्। नास्त्येवात्र स्थानिवद्भावः; `पूर्वत्रासिद्धे न स्थानिवत्' (जै.प.वृ.48) इति प्रतिषेधात्? इत्यत आह--`पूर्वत्रासिद्धे' इत्यादि। अपवादः=दोषः, सह तेन वर्त्तत इति सापवादम्। दोष एवायमस्याः परिभाषाया इत्यर्थः। अपिशब्दः समुच्चये। न केवलं तच्चोद्यं सापवादम्, अपि तु `पूर्वत्रासिद्धं न स्थानिवत्' (जै.प.वृ 48) इत्येतदपि वचनं सापवादमेव। तदेव सापवादत्वमाप्तवचनेन प्रतिपादयितुमाह--`तस्य' इत्यादि। तत्र संयोगादिलोपविधावयं दोषः--काक्यर्थः, वास्यर्थ इति; अत्रासति यणादेशस्य स्थानिवदभावे `स्कोः संयोगाद्योः' (8.2.29) इति ककारसकारयोर्लोपः प्रसज्येत। लत्वविधौ--निगार्यते, निगाल्यत इति; णिलोपस्य सति स्थानिवद्भावे विकल्पेन लत्वं न स्यात्। णत्वविधौ--प्रहिणोति प्रमीणीन इति; अत्र गुणेत्त्वयोरसति स्थानिवद्भावे `हिनुमीना' (8.4.15) इति णत्वं न प्राप्नोति। `अन्तरङ्गत्वाद्वा' इत्यादि। परिहारन्तरम्। अन्तरङ्गत्वं तु लत्वविकल्पस्य वर्णाश्रयत्वात्। णिलोपस्य तु बहिरङ्गत्वम्; आर्धधातुकाश्रयत्वात्।
अथ गिरौ, गिरः--इत्यत्र लत्वं कस्मान्न भवति? इत्याह--`गिरौ, गिरः' इत्यादि। इतिकरणो हेतौ। धातोः स्वरुपेण ग्रहणे सति तत्प्रत्यये धातोरित्येव यः प्रत्ययो विहितस्तत्र तत्कार्यं विज्ञायते। तस्मादगिरो, गिर इत्यत्र न भवति। न ह्यत्र श्नातो (3.1.91) रित्येव गिरतेः क्विबन्तादौजसौ विहितौ, किं तर्हि? प्रातिपदिकाधिकारात् (4.1.1)।।

22. परेश् घाङ्कयोः। (8.2.12)
`परिधः' इति। पर उपपदे हन्तेर्धातोरफ्प्रत्ययः। हलोपः, धत्वञ्च निपात्यते, उपपदसमासः। `पर्यङ्कः' इति `अकि लक्षणे' (धा.पा.87) इत्यस्मात् पचाद्यच, `हलश्च' (3.3.121) इति वा घञ्, प्रादिसमासः--परिगतोऽङ्कः पर्यङ्कः। [नास्ति--का.मु.पुस्तके]
ननु च [नास्ति--का.मु.पुस्तके]`घ' इति तरप्तमपोरपीयं संज्ञा, स्वं रूपं शब्दस्य' (1.1.68) इति स्वरूपग्रहणं प्रतिषिष्यते, तत्किमिति घरूप एव लत्वमुदाह्रियते? इत्याह--`घ इति स्वरूपग्रहणमत्र' इति। एवं मन्यते--अङ्क इत्यनेनासंज्ञाशब्देन साहचार्यद्घ इत्यस्याप्यसंज्ञाशब्दस्यैव ग्रहणमिति।
`योगे चेति वक्तव्यम्' इति। योगशब्दे च परतः परेर्विकल्पेन [परविकल्पेन--का.मु.पाठः] लत्वं भवतत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--चकारोऽनुक्तसमुच्चयार्थः क्रियते, तेन योगेऽपि भविष्यतीति।

23. संयोगान्तस्य लोपः। (8.2.23)
`संयोगान्तस्य' इति। संयोगोऽन्तो यस्य तत्तथोक्तम्। अन्तग्रहणं विस्पष्टार्थम्। `पदस्य' (8.1.16) इति हि वर्त्तते, तत्र संयोगेन पदे विशिष्यमाणे `येन विधिस्तदन्तरस्य' (1.1.72) इत्येव संयोगान्तता पदस्य लभ्यते। `गोमान्' इति। हल्ङ्यादिलोपे कृतेऽलोऽन्त्यस्य लोपः (1.1.52), `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः। `क्षेयान्, भूयान्' इति। अत्र संयोगान्तलोपे न प्राप्नोति; परत्वाद्रुत्वेन बाध्यत इति यो मन्येत, तं प्रत्याह--`श्रेयान्, भूयान्' इत्यादि।
यदि तर्हि परमपि रुत्वमसिद्धत्वात् संयोगान्तसय बाधकं न भवति, एवं सत्यत एव हेतोर्जश्त्वस्यापि बाधकं न स्यात्, ततश्च यशः, पय इति जशत्वमेव स्यात्, न रुत्वम्? इत्यत आह--`जश्त्वे तु' इत्यादि। संयोगान्तलोपे हि प्राप्ते चाप्राप्ते च रुत्वमारभ्यते। श्रेयानित्यादौ प्राप्ते, पय इत्यत्र त्वप्राप्त इति युवतं यद्रुत्व न बाधते। जश्त्वे तु सर्वत्र प्राप्त एव तदारभ्यते। श्रेयानित्यादौ प्राप्ते, पय इत्यत्र त्वप्राप्त इति युक्तं यद्रुत्व न बाधते। जश्त्वे तु सर्वत्र प्राप्त एव तदारभ्यते। तस्माद्बाधकलक्षणयोगाद्रुत्वं जश्तवस्य बाधकं भवत्येव। श्रेयानिति--`प्रहशस्यस्य श्रः' (5.3.6)) इतीयसुनि श्रभावः, `आद्गुणः' (6.1.87), `सान्तमहतः' (6.4.10) इति दीर्घः। भूयानिति--`बहोर्लोपो भू च बहोः' (6.4.158) इतीयसुनि ईकारस्य लोपः, बहोश्च भूभावः।
अथ दध्यत्र, मध्वत्रेत्यत्र संयोगान्तलोपः कस्मान्न भवति? इत्याह--`दध्यात्र' इत्यादि। बहिरङ्गत्वं तु यणादेशस्य द्विपदाश्रयत्वात्। संयोगान्तलोपस्य

त्वेकपदाश्रयत्वादन्तरङ्गत्वम्। पदस्येति किम्? गोमन्तौ, गोमन्तः।।

24. रात्सस्य। (8.2.24)

`संयोगान्तस्य पदस्य' इत्यादि। अत्र संयोगान्तं पदं रेफस्य विशेषणम्, रेफोऽपि सकारस्य। संयोगान्तस्य पदस्य योऽवयवो रेफस्तस्मादुत्तरो यः सकारस्तस्यालोऽन्त्यस्य लोपो भवति। `अक्षाः, अत्साः' इति। `क्षर सञ्चलने' (धा.पा.851), `त्सर च्छद्मगतौ' (धा.पा.554), लङ्, `अतो ल्रान्तस्य' (7.2.2) इति वृद्धिः, तिपो हल्ङ्यादिलोपः (6.1.68), सिचः सकारस्याप्यनेन, अडागमः, रेफस्य विसर्जनीयः (8.3.15)।
ननु चैतत् पूर्वेणैव सिद्धम्, तत्किमर्थमिदमारभ्यते? इत्याह--`सिद्धे' इत्यादि। `रात् सस्यैव' इति नियमस्य स्वरूपं दर्शयति। रादेव सस्य--इत्येष तु विपरीतनियमोऽत्र नाशङ्कनीयः, उरः प्रभृतिषु (5.4.151) पुमानिति कृतसंयोगान्तलोपस्य [`कृतसंयोगान्तस्य लोपस्य'--इति प्रा.मु.पाठः] पुम्स्शब्दस्य पाठात्। न हि विपरीतनियमे तस्य संयोगान्तलोप उपपद्यते। `ऊर्क्' इति। `ऊर्ज बलप्राणनयोः' [उर्ज--प्रा.मुपाठः] (दा.पा.1549), `भ्राजभ्रास' (3.2.177) इत्यादिना क्विप्। अत्र नियमाज्जकारस्य लोपो न भवति, तस्मिन्नसति `चोः कुः' (8.2.30) इति कुत्वम्--जकारस्य गकारः, `वावसाने' (8.4.56) इति चर्त्वम्--ककारः। `न्यमार्ट्'[अमार्ट--काशिका, पदमञ्जरी च] इति। `मृजू शुद्धौ' (धा.पा.1066), अदादित्वाच्छपो लुक्, तिपो हल्ङ्यादिलोपः (6.1.68) `मृजेर्वृद्धिः' (7.2.114), `व्रश्च' (8.2.36) इत्यादिना षत्वम्, तस्य जश्त्वम्--डकारः, तस्यापि चर्त्वम्-टकारः।।

25. धि च। (8.2.25)

`अलविध्वम्, अलविढ्वम्' इति। लुङ्, सिच् (3.1.44) सस्य `धि च' इति लोपः, `विभाषेटः' (8.3.79) इति पक्षे भू र्धन्यः। `यद्यत्र' इत्यादिना सति सकारलोपे यदिष्टं प्राप्नोति तद्दर्शयति। असति हि सकारलोपे सिचः `आदेशप्रत्यययोः' (8.3.59) इति षत्वे कृते `झलां जश् झशि' (8.4.53) इति जश्त्वे च डकारे `ष्टुना ष्टुः' (8.4.41) इति धकारस्य ष्टुत्वे ढकारेण भवितव्यम्, ततश्च मूधन्याभावपक्षेऽपि धकारो न श्रूयते। विभाषाग्रहणं तु सिद्धं लिडर्थं लिङर्थं च स्यात्। तस्मादमूर्धन्यपक्षे धकारस्य श्रवणं यथा स्यादिति लोपो विधीयते।
`इतः प्रभृति सिचः सकारस्य लोप इष्यते' इति। स च `अचि विभाषा' (8.2.21) इत्यतो विभाषाग्रहणआनुवृत्तेर्व्यवस्थितविभाषाविज्ञानाच्च लभ्यते। `चकाद्धि' इति। `चकासृ दीप्सौ' (धा.पा.1074), लोट्, सिप्, `सेर्ह्यपिच्च' (3.4.87) इति हिरादेशः, `हुझल्भ्यो हेर्धिः' (6.4.101) इति हेर्धिभावः, पूर्ववच्छपो लुक्, पूर्ववज्जश्त्वम्--सकारस्य दकारः। `पयो धावति' इति। पयः शब्दस्य रुत्वम्, `हशि च' (6.1.114) इत्युत्त्वम्, `आद्गुणः' (6.1.87)। यदीतः प्रभृति सिचो लोप इष्यते, सग्धिः, बब्धायित्यत्र `झलो झलि' (8.2.26) इति सकारस्य लोपो न प्राप्नोतौति चोद्यमाशङ्क्याह-सग्धिर्बब्धाम्' इत्यादि। `अद भक्षणे' (धा.पा.1011), स्त्रियां क्तिन् (3.3.94) `बहुलं छन्दसि' (2.4.39) इति घस्लादेशः, `घसिभसोर्हलि च' (6.4.100) इत्युपधालोपः, सकारस्य `बहुलं छन्दसि' इति च्छान्दसो लोपः। क्वचिदन्यदेवोच्यते एषोऽपि बहुलस्यार्थः। इष्यते `झषस्तथोर्धोऽधः' (8.2.40) इति तकारस्य धत्वम्, पूर्ववज्जश्त्वम्--घकारस्य गकारः। समाना ग्धिरिति विशेषणसमासः, `समानस्य च्छन्दसि' (6.3.84) इति सभावः। बब्धामिति--`भस भर्त्सनदीप्त्योः' (धा.पा.1100), लोट् तस्य `लोटो लङ्वत्' (3.4.85) इत्यतिदेशात् तसस्ताम्, जुहोत्यादित्वाच्छपः श्लुः, `श्लौ' (6.1.10) इति द्विर्वचनम्, पूर्ववदुपधासलोपौ, पूर्ववदेव तकारस्य दत्वञ्च, भकारस्य दकारः `अभ्यासे चर्च' (8.4.54) इति जश्त्वम्। एवमिदं तावत् श्लोकवार्त्तिककारस्याभिमतं दर्शितम्। इदानीं भाष्यकारस्य मतं दर्शयितुमाह--`भाष्यकारस्त्वाह इत्यादि। एतेनाविशेषेणैव सकारमात्रस्य भाष्यकाशे लोपमिच्छतीति दर्शयति। `तेन' इत्यादि। अविशेषेण हि सकारमात्रस्य यो लोपमिच्छति तस्य पयो धावतीत्यत्रापि प्राप्नोति। तस्मादिह मा भूदिति यत्नान्तरमास्थेयम्। यत्नान्तरं तु व्यवस्थितविभाषाश्रयणमेव पूर्वधत्। अयं तु विशेषः--पूर्वत्र व्यवस्थितविभाषया धि चैव सिचो भविष्यति, नान्यस्य; इह तु यत्र समानपदस्थौ निमित्तनिमित्तिनौ तत्रैवाविशेषेण सकारमात्रस्य लोपो भवति। अत्र तु भिन्नपदस्थौ पयोधावतौत्यादौ, तत्र न भवन्येवेति। एतावता विशेषेण व्यवस्थितभाषा यत्नान्तरमित्युच्यते।
संक्षिप्तमेतमर्थं विस्तरेण सचोद्यपरिहरं वक्तुमाह--`धि सकारे सिचो लोपः' इत्यादि। धीत्येतद्यत्र परभूते सकारलोप इत्यतः प्रभृति विधातव्यः, तदुपलक्षणं वेदितव्यम्। कुत एतत्? इत प्रभृति सिचः सकारस्यलोप इष्यत इति प्राग्वचनात्। लोपं प्रति सकारस्याधिकरणत्वेन विवक्षतत्वात् सप्तम्या निर्देशः। किं प्रयोजनम्? इत्याह--`चकाद्धि' इत्यादि। यदि सिचो लोपः, आशाध्वं तु कथम्? आङः शासु इच्छायाम्' (धा.पा.1022), लोट्, ध्वम्, टेरेत्वम्, `सवाभ्यां वामौ' (3.4.91) इत्यमादेशः, पूर्ववच्छपो लुक्। अत्र सकारस्य लोप इष्यते, स न प्राप्नोति; यदि सिच एव सकारस्य लोपो विधीयते? `जश्त्वं सकारस्य भविष्यति' इति। `झलां जश्झशि' (8.4.53) इत्यनेन जश्त्वम्--सकारस्य दकारो भविष्यतीति सिद्धम्--आशाब्दमित्येतत्।
इतः सकारलोपशास्त्रं प्रत्याख्यातुमाह--`सर्वमेवं प्रसिद्धं स्यात्' इति। यदि सकारस्य भवति, एवं सति तेनैद जश्त्वेन सर्वं लक्ष्यं प्रसिद्धं स्यात्। ततश्च सकारलोपशास्त्रमेतन्न कर्तव्यमेवेत्यभिप्रायः। तत्रैतत्स्यात्--जश्त्वे सति श्रुतिभेदो भवति, तथा हि `अनचि च' (8.4.47) इति सकरस्य द्विर्वचने कृते सकारयोश्च जश्त्वे दकारद्वयस्य श्रवणं प्रसजतीत्याह--`श्रुतिश्चापि न भिद्यते' इति। न हि व्यञ्जनपरस्यैकस्यानेकस्य वा हलः श्रुतिं प्रति विशेषोऽस्तीति भावः। `लुङश्चापि न मूर्धन्ये ग्रहणम्' इति। कर्त्तव्यं भवतीति शेषः। अयं चान्यो जश्त्वे सति गुणः। `इणः षीध्वंलुङ्लिटां धोऽङ्गात्' (8.3.78) इत्यत्र मूर्धन्ये कर्त्तव्ये लुङ उपादानं कर्त्तव्यं न भवतीति; अच्चोढ्वम्, अप्लोढ्वमित्यादौ षत्वजश्त्वष्टुत्वैरेव मूर्धन्यस्य सिद्धत्वात्। `च्युङ् छ्युङ् [अयं धातुर्धातुपाठे

नोपलभ्यते] ज्युङ् [न स्तः--प्रा.मु.पुस्तके] प्रुङ्प्लुङ गतौ' [न स्तः--प्रा.मु.पुस्तके] (धा.पा.955,956,957,958), लुङ् ध्वम्, सिच्, `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्, `झलां जश् झशि' (8.4.53) इत्यनेन षकारस्य जशत्वम्--इकारः, धकारस्य ष्टुत्वम्--ढकारः। एवं षत्वादिकार्यक्रमेण लुङि घकारस्य मूर्धन्यः सिदध इति, किं लुङ्ग्रहणेन? एवं लुङ् प्रत्याख्यायते। सलोपे परे लुङ्ग्रहणं कर्त्तव्यमिति यस्याभिमतम्; स आह--`सेटि दुष्यति' इति। यदि मूर्धन्यविदौ लरङ्ग्रहणं न क्रियेत, ततः `विभाकेटः' (8.3.79) इत्यत्र मूर्धन्यो न प्राप्नोति, ततश्च पूर्ववत् षत्वादिषु कृतेष्वलविध्वमित्थेव नित्यं स्या, न तु कदाचिदपयलविढ्वमिति। तस्मादुत्तरार्थं लुङ्ग्रहणं कर्त्तव्यम्। `धि च' (8.2.25) इति सकारलोपोवक्तव्यः--अलविढ्वमित्यस्य सिद्ध्यर्थम्। न ह्येतदसति सकारलोपे सिध्यति, ततश्च यदुक्तम्--`सर्वमेवं प्रसिद्धं स्यात्' इति, तदयुक्तम्। `श्रि च' (8.2.25) इत्येतस्मिश्च क्रियमाणे चकाद्धोति मा भूदिति सिच्ग्रहणं कर्त्तव्यम्, एवं श्लोकबार्त्तिककारमतेन सिज्ग्रहणं कर्त्तव्यमिति स्थितम्।

इतरस्तस्मिन् क्रियमाणेऽपरं दोषं दर्शयितुमाह--`घसिभसोनं `सिध्येत'[सिध्येत् त्विक्ष्यादि--का.मुद्रितःपाठः] इत्यादि। तुशब्दो हेतौ। यस्मात् सिज्ग्रहणस्य हि धसिभसोः सकारलोपः सग्धिर्बब्धामित्यत्र न सिध्यतीत्येष हेतुरुक्तः स चायमहेतुः; यस्माद्यद्यपि सिज्ग्रहणे क्रियमाणे धसिभसोः `झलो झलि' (8.2.26) इत्यनेन लोपो न भविष्यति, तथापि च्छाब्दसो वर्णलोपो भविष्यति; तेनापि सग्धिः, बब्धामित्येतदुभयं सिध्यत्येव। क्व यथा च्छान्दसो वर्णलोपः? इत्याह`यथा' इत्यादि। यथाध्वरविषये प्रयोगे इष्कत्तरिमध्वरस्येत्यत्र च्छान्दसो वर्णलोपो भवति, तथा साग्धिः, बब्धामित्यत्रापि घसिभयोर्भविष्यति। वाशब्दोऽत्रैवोपपत्त्यन्तरं सूचयति। तत्रेदमुपपत्त्यन्तरम्--सग्धिरिति नैतद्घसे रूपम्, किं तर्हि? `षघ हिंसायाम्' (धा.पा.1268) इत्यस्य। ननु चार्थभेदो भवति, स्वरभेदश्च; पूर्वस्यां व्युत्पत्तौ समानावनमित्येषोऽर्थो भवति, तसासस्वरेणान्तोदात्तत्वञ्च; षधिस्तु क्तिनि विहिते हिंसार्थो भवति, नित्स्वरेणाद्युदात्तश्च? अनेकार्थत्वाद्धातूनां षघिश्च समानावनमित्यस्मिन्नर्थे वर्त्तिष्यते, स्वरव्यत्ययेन चान्तोदात्तत्वं भविष्यतीत्यदोषः। बन्धामिति च नैतद्भसे रूपम्, किं तर्हि? `बध बन्धने' (धा.पा.973) इत्यस्माल्लोटि तस्माम्, `व्यत्ययो बहुलम्' (3.1.85) इति धत्वे तकारस्य `व्यत्ययो बहुलम्' (3.1.85) इति धातुधकारस्य बकारे च कृते बब्धामिति भवति। एवं च सिज्ग्रहणे क्रियमाणे घसिभसोर्यदि न सिध्यति नाम, तथापि नैव किञ्चिदनिष्टम्; यस्मादनयापि व्युत्पत्त्या तदपाकृतं भवति। तदुक्तम्--`घसिभसोर्न सिध्येत्तु [`सिध्येत'--काशिका] तस्मात् सिज्ग्रहणं न तत्' (का. 8.2.25)। ततश्च `धि सकारे सिचो लोपश्चकाद्धीति प्रयोजनम्' (का. 8.2.25) इत्येतदवस्थितं श्लोकवार्त्तिककारस्य मतम्।।

26. झलो झलि। (8.2.26)

`अभित्त, अभित्थाः' इति। भिदेर्लुङि स्वरितेत्त्वादात्मनेपदम्; तथासो, दकारस्य `खरि च' (8.4.55) इति चर्त्त्वम्--तकारः। `अवात्ताम्' इति। दसेर्लुङि तसस्ताम्। `अदात्त' इति। थस्य तः, `वदव्रज' (7.2.3) इत्यादिना वृद्धिः। अत्र सकारलोपे कृते `सः स्यार्धधातुके' (7.4.49) इति तकारो न प्राप्नोतीति यस्य भ्रान्तिः स्यात्, तं प्रत्याह--`अवात्ताम्' इत्यदि।

`अमंस्त, अमंस्थाः' इति। `मन ज्ञाने' (धा.पा.1176), अनुदात्तेत्त्वादात्मनेपदम्। `अभित्साताम्' इति। भिदेराताम्। `अभित्सत' इति। `आत्मनेपदेष्वनतः' (7.1.5) इति झस्यादादेशः।।

27. ह्स्वादङ्गात्। (8.2.27)

`अलाविष्टाम्' इति। तसस्ताम्, सिचि वृद्धिः। अत्र श्रुतिकृते पौर्वापये सति ह्रस्वादिङः परः सकारो भवति, न त्वङ्गात्; इडागमः प्रत्ययभक्तत्वेनानङ्गत्वात। `अलाविषुः' इति। `सिजभ्यस्तविदिभ्यश्च' (3.4.109) इति झेर्जुस्। `अकृषाताम्' इति। `उश्च' (1.2.12) इति कित्त्वाद्गुणाभावः। `द्विष्टचाम्' इति। `द्वित्रिचतुर्भ्यः सुच्' (5.4.18) तदन्तादतिशायने तरप्; `किमेत्तिङ्' (5.4.11) इत्यादिनामुः, `ह्रसवात्तादौ तद्धिते' (8.3.101) इति सकारस्य मूर्धन्यः।।

28. इट ईटि। (8.2.28)

`अदेवीत्' इति। `नेटि' (7.2.4) इति वृद्धिप्रतिषेधे कृते लघूपधगुणः, `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट्।।

29. स्कोः संयोगाद्योरन्ते च। (8.2.29)

झलोति वर्त्तते। `संयोगाद्योः' इति षष्ठीसमासः। अत्र यद्यपि संयोग उत्तरपदार्थो गुणभूतः, तथापि संयोगाद्योः स्कोरन्तग्रहणं विशेषणं न भवतीति गुणभूतोऽपि तेन संयोग एव विशिष्यत इति विज्ञायते, इत्याह--`पदस्यान्ते यः संयोगः' इति। `अन्ते' इति। अवसान इत्यर्थः। `झलि परतः' इति। पदस्येत्यपेक्षते। `तदाद्योः' इति। तस्यैवम्भूतस्य संयोगस्यादिभूतयोरित्यर्थः। `लग्नः' इति। `ओलजो ओलस्जीव्रीडे' (धा.पा.1290, 1291), निष्ठा। अत्र जकारे झलि परतः सकारजकारयोर्यः संयोगः पदस्यादयवस्तदादेः सकारस्य लोपः, `ओदितश्च' (8.2.45) इति नत्वम्, `श्वीदितो निष्ठायाम्' (7.2.14) इतीट्प्रतिषेधः, `चोः कुः' (8.2.30) इति कुत्वम्--गकारः। `साधुलक्' इति। साधु लज्जात इति क्विप्। अत्र पदस्यादसाने संयोगः। (7.1.60) इति नुम्, स च भवत् `मस्जेरन्त्यात् पूर्वो नुमनुषङ्गसंयोगादिलोपार्थम्' (वा. 7) इति वचनादन्त्याज्जकारात् पूर्वो भवति, तस्य च `अनिदिताम्'

(6.4.24) इत्यनुनासिकलोपः।
`तष्टः' इति। `तक्षू त्वक्षू तनूकरणे' (धा.पा.655,656) ऊदित्त्वात्, स्वरत्यादिसूत्रेण (7.2.44) विभाषितेट्; तेन निष्ठायां `यस्य विभाषा' (7.2.15) इतीट्प्रतिषेधः। `काष्ठशवस्थाता' इति। काष्ठं शक्नोतीति क्विप्; काष्ठशकि स्थातेति `सप्तमी' (2.1.40) इति योगविभागात्समासः।
`तदत्र' इत्यादिना `झलि सङीति वक्तव्यम्' (वा 917) इति यदुक्तम्, तत् प्रत्याचष्टे। तदिति वाक्योपन्यासार्थः। `शकेः क्विबन्तस्य प्रयोग एव नास्ति' इति। शकेः `अन्येभ्योऽपि दृश्यते' (3.2.178) इति क्विप् स्यात्, इह च `दृश्यते' इत्यस्य ग्रहण एवायमर्थः--यत्र लौकिके प्रयोगे क्विबन्तस्य प्रयोगो दृश्यते तत्र यथा स्यादिति, न च लोके काष्ठशगित्येवंविधः शकेः क्विबन्तस्य प्रयोगो दृश्यते। ततः शकेः क्विबन्तस्य प्रयोग एव नास्ति, अतो हेतोः `झलि सङीति वक्तव्यम्' (वा.917) इत्येतत् प्रत्याख्यातुमाह भाव्यकारः--`काष्ठाशगेव नास्ति; कुतोऽयं काष्ठशकि तिष्ठेत्' इति। आधारपरतन्व उद्घनादावस्य वृत्तिः, अतो यत्र काष्ठशगाधार एव नास्ति, तत्र तदाधेयः स्थाता सुतरामेव नास्ति तस्मान्न झलि सङीति वक्तव्यम्; व्यावर्त्त्याभावात्। इह कस्मान्न भवति--वाक्स्थातेति? संयोगादिलोपे कुत्वम्यासिद्धत्वात्।
अथेह कस्मान्न भवति--वास्यार्थम् काक्यर्थम्? इत्याह--`दास्यर्थम्, काक्यर्थम्' इत्यादि।
अथ स्कोरिति किमर्थम्? नर्नर्तीत्यत्र मा भूत्। नृतेर्यङ्लुगन्तस्य `रुग्रिकौ च लुकि' (7.4.91) इत्यभ्यासस्य रुकि कृते रूपमेतत्। `संयोगाद्योरिति किम्? `पयःशक्' इति। क्विबन्तमेतत्। सोपपदस्य हि शकेः क्विबन्तस्य प्रयोग एव नास्ति। केवलस्य तु स्यादेव। अन्ते चेति किम्? तक्षिता, तक्षकः।।

30. चोः कुः। (8.2.30)
`झलि पदान्ते च' इति। `परतः' इति प्रत्येकमभिसम्बध्यते। ननु च पूर्वसूत्रे चकारेण झलनुकृष्ट इति तस्येहानुवृत्तिरयुक्ता? नैतदस्ति; न हि तत्र चकारेण झलनुकृष्टः, किं तर्हि? स्वरितत्वादेवानुवर्त्तमानस्यान्तग्रहणं न बाधकमित्यतादच्चकारेण व्याख्यातम्। `वाक्' इति। वचेः `क्विब्वचि' (वा.288) इत्यादिना ज्विप्, दीर्घश्च।
`क्रुञ्च' इति। इह केचित् `कुञ्च कौटिस्यात्पीभादयोः' (धा.पा.186) इति सरेफं अकारोपधं धातुं पठन्ति, `कुञ्च कौटिल्याल्पीभावयोः' (धा.पा.185) इत्यरेकं नकारोपधं परे। तत्र पूर्वपाठं गृहीत्वा यश्चोदयेत्--अथ क्रुञ्चेत्यत्र कस्मान् भवतीति? तं प्रत्याह--`ऋञ्च' इत्यादि। अनेन `झलि सङीति न वक्तव्यम्' इति यत् पूर्वं प्रत्याख्यातं तस्येहार्थतां दर्शयति। `युजिक्रुञ्चाञ्च' (3.2.59) इति निपातनाद्वेति। `क्रुञ्चेत्यत्र ञकारस्य चकारे कुत्वं न भवतीति सम्बन्धः। `ञकारोपधस्य [ञकारिपदस्य--का.मुद्रितपाठः] सरेफस्य पाठमभ्युपेत्य प्राप्तौ तस्यामेवं परिहारद्वयमुक्तम्। इपानीं कुत्वस्य प्राप्तिरेव नास्ति; यस्मान्नायं ञकरोपधः पठ्यते, किं तर्हि? नकारोपध इति दर्शयितुमाह--`नकारोपधो वा' इत्यादि। किं पुनः कारणं नकारोपधः पठ्यते? किं तर्हि? नकारोपध इति दर्शयितुमाह--`नकारोपधो वा' इत्यादि। किं पुनः कारणं नकारोपधः पठ्यते? इत्याह--`नकारलोपे हि'[`सकारलोपे हि'--प्रा.मु.पाठः] इत्यादि। निकुचित इत्येष प्रयोगोऽस्त्येव। धातोर्निष्ठान्तस्य `श्नान्नलोपः' (6.4.23) इत्यनुवर्त्तमाने-`अनिदिताम्' (6.4.24) इति नलोपादिह नकारलोपस्य दर्शनान्नकारोपधोऽयं पठ्यते; अन्यथा ह्येष प्रयोगो नोपपद्यते। न हि ञकारलोपस्य किञ्चिल्लक्षणमस्ति। यदि तर्हि कुञ्चेति रेफरहितो नकारोपधः पठ्यते, एवं सति क्रुङ, क्रुञ्चौ, क्रुञ्चः--इति न सिध्यति; ऋत्विगित्यादिना (3.2.59) सूत्रेण हि क्विनि कृते `अनिदिताम्' (6.4.24) इति नलोपे कुक, कुचौ, कुचः--इत्येवं प्राप्नोतीत्यत आह--`युजिक्रुञ्चाम्' इत्यादि। स्यादेतत्--यद्यपि नकारलोपाभावो निपात्यते, तथापि नकारस्यानुस्वारे तस्य ययि परसवर्णे (8.4.58) ञकारे स्यादेव कुत्वम्? इत्यत आह--`तत्र' इत्यादि। गतार्थम्।।

31. हो ढः। (8.2.31)
`सोढा' इति। `हो ढः' इति ढत्वे कृते `झषस्तथोर्धोऽधः' (8.2.40) इति तृचतकारस्य धत्वम्, ष्टुत्वम्, `ढो ढे लोपः' (8.2.13) `सहिवहोरोदवणस्य' (6.3.112) इत्योत्त्वम्। `जलाषाट्' इति। जलं सहत इति `भजो ण्विः' (3.2.62), `छन्दसि सहः' (3.2.63) इति ण्विः, उपधावृद्धिः उपपदसमासः, `अन्येषामपि दृश्यते' (6.3.137) इति पूर्वपदस्य दीर्घ, ढकारस्य जश्त्वम्--डकारः, तस्य चर्त्त्वम्--टकारः, `सहेः साडः सः' (8.3.56) इति मूर्धन्यः। `प्रष्ठवाट्' इति। `वहश्च' (3.2.64) इति ण्विः।
`चुहोः कुढौ' इत्येकयोग एव कर्त्तव्ये पृथग्योगकरणं समसंख्यात्वप्रतिषेधार्थम्। एकयोगे तु समसंख्यत्वाज्झलादौ कुत्व पदान्ते ढत्वं स्यात्।।

32. दादेर्धातोर्घः। (8.2.32)
`दग्धा, दग्धुम्' इति। पूर्ववद्धत्वम्, घकारस्य झशि झशत्वम्--गकारः। `काष्ठधक्' इति। क्विबन्तमेतत्। `एकाचो बशो भष' (8.2.37) इत्यादिना दकारस्य भष्--धकारः, घकारस्य जश्त्वम्--गकारः, तस्य चर्त्त्वम्--ककारः। `दादेः' इत्युच्यते, तेनाधोगित्यत्र घत्वं न सिध्यति, अदकारादित्वेऽस्याविहितत्वादित्यत आह--`धातोः' इत्यादि। `तद्विशेषणम्' इति। दादेर्विशेषणमित्यर्थः। किंविशिष्टम्? अवयवषष्ठ्यन्तमिति। अवयवसम्बन्धिनी या षष्ठी तदन्तमित्यर्थः। `किं कृतं भवति? इति। एवं सति किमिष्टं साधितं भवतीत्यर्थः। `अधोगित्यत्रापि घकारः सिद्धो भवति' इति।

अत्रापि धातोरवयवो यो दादिशब्दस्तदवयवत्वाद्हकारस्य। दुहेर्लङ्, तिप्, अदादित्वाच्छपो लुक्, हल्ङ्यादिलोपः (6.1.68), पूर्धवद्भष्भावः, अट्।
`कथम्' इत्यादि। धातोरवयवो यो दादिशब्दस्तदवयवसय हकारस्य घत्वं भवति। एवं सति दग्धा, दग्धुमित्यत्र घत्वं न कथञ्चिदित्यर्थः। तथा ह्यत्र धातोरवयवो यो दादिशब्दो न तस्यावयवो हकारः। यस्य तु समुदायस्य हकारोऽवयवः स धातुरेव, न हकारावयवः। अत्रोत्तरमाह--`व्यपदेशिवद्भावात्' इति। एषोऽपि व्यपदेशिवद्भावेन धातोर्वादिरवयवो भवति। अभेदेऽपि व्यपदेशिवद्व्यवहारो लोके दृश्यते। तथा हि--शिलापु त्रकस्य शरीरम्, राहोः शिर इति च।
`अथ वा' इत्यादि। धातूपदेशो धातुपाठः। तत्र यो दादिरित्येवं विज्ञायते। कथं पुनर्धातुपाठे दकारादित्वं विशेषणं लभ्यते, धातुग्रहणसामर्थ्यात्। तस्य हीदं प्रयोजनं स्यात्--अधातोर्मा भूदिति। एतच्चाप्रयोजनम्, न ह्यधातोर्धकारादेर्झलि वा पदान्ते च हकारोऽवयवः सम्भवति, यन्निवृत्त्यर्थं धातुग्रहणम्। तदतिरिच्यमानं धातूपदेश एव दकारादित्वं विशेषणं भवतीत्यमुमर्थं गमयति। एवं विज्ञायमाने यद्यपि `धातोः' इत्यस्य `दादेः' इत्यनेन सामानाधिकरण्यम्, तथाप्यधोगित्यत्र घत्वं प्रवर्त्तत एव; धातुपाठे दुहेर्दकारादित्वात्। `तथा च' इत्यादि। एवञ्च विज्ञायमाने यद्यपि दामलिह्यतेर्दकारादित्वम्, तथापि दामलिडित्यत्र न भवति धत्वम्'; धातूपदेशे तस्यादकारादित्वात्। धातुत्वं तस्य `सनाद्यन्ता धातवः' (3.1.32) इति। न केवलमधोगित्वत्र धत्वं भवति, अपि तु दामलिहेरपि भवतीत्यपिशब्दो द्योतयति। दाम लेढोति दामलिडिति क्विप्, तदन्ताद् दामलिहमिल्छतीति `सुप आत्मनः क्यच्; (3.1.8) इति क्यच्, क्यजन्तात् क्विप्, `अतो लोपः' (6.4.48) इत्यकारलोपः, `क्यस्य विभाषा' (6.4.50) इति यकारस्य च, `हो ढः' (8.2.31) इति ढत्वम्, ढकारस्य जश्त्वम्।।

33. वा द्रुहमुहष्णुहष्णिहाम्। (8.2.33)
`द्रूहेः' इति। `द्रुह जिघांसायम्' (धा.पा.1197) इत्यस्य। `इतरेवाम्' इति। `मुह वैचित्त्ये' (धा.पा.1198), `ष्णुह उद्गिरणे' (धा.पा.1199), `ष्णिह प्रीतौ' (धा.प.1200)-इत्येषामप्राप्तेः। पुनरेषं घत्वं स्यात्, अदकारादित्वात्।।

34. नहो धः। (8.1.34)
`उपानत्' इति। `णह बन्धने' (धा.पा.1166) क्विप्, `नहिवृति' (6.3.116) इत्यादिना दीर्घः। एवं परीणत्' इति। अत्र णत्वं तु `उपसर्गादसमासेऽपि, (8.4.14) इत्यादिना। प्रक्रियालाघवार्थं दकारे विधातव्ये धकारविधानम्--नद्धेत्यत्र `झषस्तथोर्धोऽधः' (8.2.40) इति धत्वं यथा स्यादित्येवमर्थम्। दकारे हि तन्न स्यात्, दकारस्याझष्त्वात्। `रदाभ्यां निष्ठातो नः' (8.2.42) इत्येवमर्थं च, नकारो यथा न स्यादिति।।

35. आहस्थः। (8.1.35)
`आत्थ' इति। `ब्रुवः पञ्चानामादित आहो ब्रुवः' (3.4.84) इति लडादेशस्य सिपस्थल् ब्रुवश्चाहादेशः, तस्यानेन थकारः, तस्य `खरि च' (8.4.55) इति चर्त्वम्--तकारः। किमर्थमादेशान्तरं क्रियते, न प्रकृतेर्विकार एव विधीयते? इत्यत आह--`आदेशान्तरकरणम्' इत्यादि। यदि धकार आदिश्येत, ततः `झषस्तथोर्धोऽधः' (8.2.40) इति धत्वं स्यात्, अतस्तन्निवृत्त्यर्थमादेशान्तरं क्रियते।
`हृग्रहोः' इत्यादि। हरतेः, ग्रहेश्च यो हकारस्तस्य च्छन्दसि विवये भकारो वक्तव्यः। हकारस्येति वचनं हरत्यर्थम्। ग्रहेस्तु `अलोऽन्त्यस्य' (1.1.52) इत्येव भविष्यति हकारस्य। `ग्रभीता' इति। तृन्, इट्, `ग्रहोऽलिटि दीर्धः' (7.2.37)। `जभ्रिरे' इति। हृञो लिट्, `लिटस्तझयोरेशिरेच्' (3.4.81) इति झस्येरेच्; यणादेशः, द्विर्वचनम्, अभ्यासकार्यम्। `उद्ग्राभम्', `निग्राभम्' इति। ग्रहेः `हलश्च' (3.3.121) इति घञ्। एतत्तु सर्वं `व्यत्ययो बहुलम्' (3.1.85) इति वर्णव्यत्ययेनैव सिद्धम्। वक्तव्यशब्दस्य व्याख्येयमित्येषोऽर्थो वेदितव्यः।।

36. व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः। (8.2.36)
`ओ व्रश्चू छेदने' (धा.पा.1292), `भ्रस्जो पाके' [`भ्रस्ज' इत्येव धातुपाठः] (दा.पा.1284), `सृज विसर्गे' (धा.पा.1178), मृजू शुद्धौ' (धा.पा.1066), `यज देवपूजासङ्गतिकरणदानेषु' (धा.पा.1002), `राजृ दीप्तौ' (धा.पा.822), `टु भ्राजृ टृभ्राशृ टुभ्लाशृ दीप्तौ' (धा.पा.823,824,825)। छ इति च्छकारान्तावां ग्रहणम्; श इति शकारान्तानाम्। अत्र च शकारस्य जश्त्वे प्राप्ते, इतरेषां तु कत्वे तदपवादः षकारो विधीयते। `व्रष्टा' इति। `स्कोः संयोगाद्योः' (8.2.29) इति सकारलोपः, ऊदित्त्वात् पक्ष इडभावः। `मीलबृट्, धानाभृट् इति। `ग्रहिज्या' (6.1.16) इति सूत्रेण सम्प्रसारणम्। `स्रष्टा' इति। `सृजिदृशोर्झल्यमकिति' (6.1.58) इत्यमागमः। `मार्ष्टा' [मार्ष्टीति का. मुद्रितपाठ] इति। `मृजेर्वृद्धिः' (7.2.114)। `उपयट्' ति। यदेः `विजुपे छन्दसि' (3.2.73) इति विच्। `सम्राट्' इति। `मो राजि समः क्वौ' (8.3.25) इति समो मकारस्य मकारादेशः।
किं पुनः कारणं राजभ्राजोर्झल्युदाहरणं न प्रदर्शितम्? इत्याह--`राजभ्राजोः' इत्यादि। झलत्वं कस्मान्न भवतीत्याह--`झलादिराभ्याम्' इत्यादि। आभ्यां परो यो झलादिः स इटा पर्यवपद्यत इतीड्विधीयते; सेट्त्वादनयोः। इतरेष्वाद्यचतुर्थे। विभाषितेटौ, स्वरतीत्यादिसूत्रेम (7.2.44) शेषास्त्वानिटः; `एकाचः'

(7.2.10) इतीट्प्रतिषेधात्। तस्मात् तेषामुभयार्थमेव ग्रहणम्। `राष्ट्रिः भ्राष्ट्रिः' इति। `क्तिन्नाबादिभ्यश्च' (वा.307) इति क्तिन्प्रत्ययः, `तितुत्र' (7.2.9) इत्यादिनेट्प्रतिषेधः। `शब्दप्राट्' इति। शब्दं पृच्छतीति `क्विब्वचि' (वा.288) इत्यादिना क्विप्, दीर्घश्च।
अथ किमर्थं छग्रहणम्, यावता `च्छ्वोः शूडनूमासिके च' (6.4.19) इति च्छकारस्य शकारे कृते शकारान्तत्वादेव पृष्ट इत्यादौ षत्वं भविष्यति? इत्यत आह--`च्छदोः शूट्' इत्यादि। `अत्र' इत्यादि। इतिकरणौ हेतौ। तत्र हि `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इत्यनुवर्त्तते, तेन च्छग्रहणं क्रियते; अन्यथा पृष्टः, पृष्टवानित्याद्येव सिध्यत्; न तु प्रष्टा, प्रष्टुमित्यादि; तृजादावक्ङिति शत्वाभावात्। एतच्च सूत्रकारमतेनोक्तम्। केचिदाचार्याः छग्रहणमिह सूत्रे प्रत्याचक्षत एव। तथा हि--`च्छ्वो शूडनुनासिके च' (6.4.19) इत्यत्रोक्तम्--"केचिदिह क्ङितीत्येतन्नानुवरत्तयन्ति। कथं द्युभ्याम्, द्युभिरित्यूठि कृते? `दिव उत्' (6.1.131) इति तपरकरणान्मात्राकालो भविष्यतीति। `छशां षः' (8.2.36) इत्यत्र च्छग्रहणं न कर्त्तव्यम्, अनेनैव हि सर्वत्र शकारो विधीयते" इति।
`लेष्टा' इति। `लिश अल्पीभावे' (धा.पा.1179) `वेष्टा' इति। `विश प्रवेशने' (धा.पा.1424)।।

37. एकाचो बशो भष् झषन्तस्य स्ध्वोः। (8.2.37)

`धातोः' (8.2.32) इति यदीहानुवर्त्तते तदवयवषष्ठ्यन्तमेकाचो विशेषणम्। `झषन्तस्य' इत्येतदपि समानाधिकरणं तस्यैव विशेषणम्। `एकाचः' इत्येतदवयवषष्ठ्यन्तं बशः। `तदवयवस्य' इति। तस्यावयवस्तदवयवः। योऽसौ धातोरवयव एकाज् झषन्तस्तस्य, तदित्यनेनाभिसम्बध्यते। `झलि परतः' इत्यनेन झलीत्यनुवर्त्तते (8.2.26), तस्य सकारो विशेषणमिति दर्शयति। किमर्थं पनर्झलीत्यनुवर्त्तते? पदान्तस्येत्यनुवृत्तिर्यथा स्यात्; अन्यथा झलीत्यस्मिन् निवर्त्तमाने तत्सम्बद्धं पदान्तग्रहणमपि निवर्त्तत, ततश्च पदान्ते न सिध्येत्। ननु च स्वरितत्वात् पदान्तस्येस्यानुवृत्तिर्भविष्यति? तर्ह्यनेनापि प्रकारेणाख्यायते मन्दधियां सुखप्रतिपत्त्ये। `ध्वशब्दे च' इति। अत्र झलीत्येतन्नापेक्षते, असम्भवात्। न हि कश्चित् झल् ध्वशब्दोऽस्ति; तस्य प्रत्याहारेष्वसन्निवेशात्।
`भोत्स्यते' [`भोत्स्यन्ते'--काशिका, पदमञ्जरी च] इति। `बुध अवगमने' (धा.पा.858), लृट्, स्यः, `खरि च' (8.4.55) इति चर्त्त्वम्--तकारः, अनुदात्तेत्त्वादात्मनेपदम्। अत्र बुधेर्धातोर्व्यपदेशिवद्भावेन स्वरूपमेवैकाजवयवो झषन्तः, तदवयवो बकारो बश, अस्यान्तरतम्यादोष्ठ्यस्य स्थान ओष्ठ्य एव भकारो भविष्यति। एवमन्यत्रापि विज्ञेयम्। `अभुध्वम्' [`अबुद्ध' इति प्रा.मु.पाठः] `षढोः कः सि' (8.2.41) इति कत्वम्, `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्। `न्यघूढ्वम्' इति। `ढ्रलोपे पूर्वस्य दोर्घोऽणः' (6.3.111)। `धोक्ष्यते' इति। दुहो लृट्, `दादेर्धातोर्घः' (8.2.32), तस्य `खलि च' (8.4.55) इति चर्त्वम्--ककारः।
`अजर्घाः' इति। `गुधु अभिकाङ्क्षायाम्' (धा.पा.1246), यङ्, द्विर्वचनम्, हलादिशेषः, `उरत्' (7.4.66) इत्यत्वम्, `कुहोश्चुः' (7.4.62) इति चुत्वम्, `यङोऽचि च' (2.4.74) यङ्लुक्, `रुग्रिकौ च लुकि' (7.4.91) इति रुक्। जगृध इति स्थिते इङादयो विधेयाः। अत्र मुख्य एव गृध इत्ययं धातोर्झषन्तोऽवयवः।
`गर्दभयतेः' इति। गर्दभशब्दात् तदाचष्ट इति णिच्, `णाविष्ठवत् प्रातिपदिकस्य' (वा.813) इति टिलोपः। अत्र गर्वभीत्ययं मुख्य एव धातोर्झषन्तोऽवयवः। `अप्रत्ययः' इति। अश्राविप्रत्ययः क्विबादिरप्रत्यय इत्युच्यते। `दामलिट्' इति। अत्र `होढः' (8.2.31) इति ढत्वे कृते झषन्ततायामुपजातायामेकाज्ग्रहणाद्भष्भाषो न भवति। ननु चात्र द्वावेकाजवयवौ--दकारादिर्मकारान्तः, लकारादिर्झषन्तश्च; तयोश्चासत्यप्येकाज्ग्रहणे नैव भष्भावः प्रसज्यते। तथा हि-यो झषन्तस्तस्य वश् न विद्यते, यस्तु दकारादिर्मकारान्तस्तस्य वश् विद्यते, झषन्तता तु नास्ति, तदनर्थमेकाज्ग्रहणम्? इत्यत आह--`असत्येकाजग्रहणे' इत्यादि। वशो विशेषणं व्यवच्छेदार्थम्। व्यवच्छेदोऽर्थः प्रयोजनं यस्य तत्तथो क्तम्। यद्येकाज्ग्रहणं न स्यात्, ततोऽन्यस्येहाश्रुतत्वात्, बशस्तु श्रुतत्वाच्च स एव धातोरित्यनेन विशेष्यते न धातोरवयवो वशिति। एवं च बशो झषन्तता न सम्भवतीति झषन्तस्येत्यनेन धातुरेव विशेष्यते; अन्यस्येहासम्भवात्। तथा चायं सूत्रार्थः स्यात्--झषन्तस्य धातोर्योऽवयवो बश तस्य झलि सकारे ष्वे च परतः पदान्ते च भव् भवतीति। अस्मिंश्च सूत्रार्थे दामलिडित्यत्रापि प्रसज्येत। भवति दकारोऽत्र बश् झषन्तस्य धातोरवयवः। एकाच इत्येतस्मिन् सति धातोर्झषन्तस्येत्येतदुभयान्तस्यैव विशेषणं भवति, तदपि बशः। तेन वृत्तिकारोपदर्शित एव सूत्रार्थो जायते; ततश्च न किञ्चिदनिष्टमापद्यते। दामलिडित्यत्र हि यो झषन्त एकाजवयवो लकारादिनं तस्य बश् विद्यते, यस्य तु विद्यते दकारादिर्मान्तस्य स झषन्तो न भवति।
`क्रोत्स्यति' इति। `क्रुध कोपे' (धापा.1189)। `दादद्वि' इति। `दीर्घोऽकितः' (7.4.83) इत्यभ्यासस्य दीर्घत्वम्।
अन्तग्रहणमसन्देहार्थम्। असति हि तस्मिन् सन्देहः स्यात्--किमत्र बशः स्थानित्वम्? अथ झषः? इति।।

38. दधस्तथोश्च। (8.2.38)

दधातेरप्येतत् कृतद्विर्वचनस्य रूपमस्ति। `दध धारणे' (धा.पा.8)--इत्यस्य चाकृतद्विर्वचनस्य रूपम्, तत्र तु शपा व्यवहितत्वादनन्तरौ तथो न सम्भवतः; तस्माद्दधातेरेव ग्रहणं विज्ञायते, इत्याह--`दध इति कृतद्विर्वचनो दधातिः परिगृह्यते' इति। `धत्तः, इति। लटस्तस्थसौ, शपः [शपः श्लुलुपि द्विर्वचनम्--प्रा.मुद्रितः पाठः] श्लुः `श्लौ' (6.1.10) (इति) द्विर्वचनम्, `अभ्यासे चर्च' (8.4.54) इति जश्त्वम्--दकारः, `श्नाभ्यस्तयोरातः' (6.4.112) इत्याकारलोपः, अभ्यासदकारस्य भष् धकारः। धातुधकारस्य चर्त्वम्--तकारः। `धत्से' इति। `थासः से' (3.4.80) `धध्वे' इति। टेरेत्त्वम्। `धध्वम्' इति।

लोटि `सवाभ्यां वामौ' (3.4.91) इत्यमादेशः।
कथं पुनरत्र भष्भावः; यावता दधातेर्झषन्तस्य यो दश् तस्य भष् भवतीत्युच्यते, अत्र नापि झषन्ततास्ति; आकारलोपस्य `अचः परस्मिन् पूर्वविधौ' (1.1.57) इति स्थानिवद्भावात्; नापि बश्, अभ्यासजशत्वस्यासिद्धत्वात्? इत्यत आह--`वचनसामर्थ्यात्' इत्यादि। `अभ्यासजशत्वस्यासिद्धत्वम्' इति वचनसामर्थ्यान्न भवतीत्य पेक्षते। यद्याकारलोपस्य स्थानिवद्भावः स्यादभ्यासजशत्वस्यासिद्धत्वम्। एवं सत्यपार्थकतैवास्य वचनस्य स्यात्, न हि दधातेराकारलोपेन विना बश् स्यात्। तस्माद्वचनप्रामाण्यादुभयं न भवति।
इह झलोत्यनुवर्त्तते, झषन्तस्येति च, तकारथकाराभ्यामन्यः स झलस्ति यत्र दधातेर्झषन्तस्य भष्भावो नेष्यते। तस्मात् `तथोः' इति वचनमन्तरेणापिसिद्धमिष्टमित्यभिप्रायेणाह--`तथोरिति किम्' इति। `आनन्तर्यात्' इत्यादि। अनन्तरसूत्रे हि `स्ध्वोः' (8.2.37) इत्युक्तम्, ततश्च `अनन्तरलस्य विधिर्वा भवति प्रतिषेधो वा' (व्या.प.19) इति स्ध्वोरेव भष्भावो विज्ञायते, न तथोः; अतः `तथोः' इत्युच्यते। यद्येवम्, निमित्तान्तरोपा दाने पूर्वस्य निमित्तस्य निवृत्त्या भवितव्यम्, ततश्च तथोरेव स्यात्, न स्ध्वोः? इत्यत आह--`चकारः' इत्यादि। परिहारः।।

39. झलां जशोऽन्ते। (8.2.39)
`श्वलिट्' इति। ढत्वे कृते जश्त्वम्।

अथान्तग्रहणं किमर्थम्, ननु `स्कोः संयोगाद्योरन्ते च' (8.2.29) इत्यतोऽन्तग्रहणमनुवर्त्तत एव? इत्यत आह--`अन्तग्रहणम्' इत्यादि। तद्ध्यन्तग्रहणं झलीत्यनेन सम्बद्धम्, अतस्तदनुवृत्तौ झलीत्येतदप्यनुवर्त्तत, तस्मादेतन्निवृत्त्यर्थमन्यदेवान्तग्रहणं क्रियते। तेन च वसतेः--वस्ता, वस्तुमित्यत्र न भवति।।

40. झषस्तथोर्धोऽधः। (8.2.40)
`अधः' इति। अनेन धातुप्रतिषेधोऽयं न धकारप्रतिषेध इति दर्शयति। यदि हि धकारप्रतिषेधः स्यात्, धकारात् परयोस्तथोर्धकारो न भवतीति। ततः `मतिबुद्धिपूनार्थेभ्यश्च' (3.2.188), `वृद्धिर्यस्याचामादिस्तद्वृद्धम्' (1.1.73) इत्येवमादयो निर्देशा नोपपद्येरन्। `अलब्ध, अलब्धाः' इति। लुङ्, तस्य तथासौ, `झलो झलि' (8.2.26) इति सकारलोपः। `अलीढ, अलीढाः' इति। ढत्वष्टुत्वढलोपदीर्घत्वानि कर्त्तव्यानि।।

41. षढोः कः सि। (8.2.41)
`पेक्ष्यति' इति। `पिष्लृ सञ्चूर्णने' (धा.पा.1452), लृट्। `अपेक्ष्यत्' इति। लृङ्। `पिपिक्षति' इति। सन्, `हलन्ताच्च' (1.2.10) इति कित्त्वाद्गुणाभावः।

`पिनष्टि' इति। रूधादित्वात् श्नम्। `लेढि' इति। अदादित्वाच्छपरो लुक्।।

42. रदाभ्यां निष्ठातो नः पूर्वस्य च दः। (8.2.42)
`आस्तीर्णम्' इति। `स्तृञ् आच्छादने' (धा.पा.1484)। `ॠत इद्धातोः' (7.1.100) इतीत्त्वम्, `हलि च' (8.2.77) इति दीर्घः। `विशीर्णम्' इति। `शृहिंसायाम्' (धा.पा.1488)। `निगीर्णम्' इति। `गृ निगरणे' (धा.पा.1410)। एषु `श्रयुकः किति' (7.2.11) इतीट्प्रतिषेधः, `अवगूर्णम्' इति। `गुरी उद्यमने' (धा.पा.1396)। `श्वीदितो निष्ठायाम्' (7.2.14) इतीट्प्रतिषेधः।
अथ यथा `कृपो रो लः' (8.2.18) इत्यत्र `र' इति वर्णत्वावर्णत्वकृतं भेदमुत्सृज्य सामान्यस्योपादानम्, तथेहापि, अस्ति च ॠकारे रेफः; ततश्च कृतः कृतवानित्यत्र भवितव्यमेव नत्वेनेति यो मन्यते, तं प्रत्याह--`र इत्यत्र' इत्यादि। यद्यत्र `र' इति सामान्यमुपादीयेत तस्मादेवः प्रसङ्गः, न तु रश्रुतिसामान्यमुपादीयते, किं तर्हि? व्यञ्जनमर्धमात्रात्मकम्। न च समानाकारोऽस्तीति कुतो नत्वप्रसङ्गः? भवतु नाम सामान्यस्योपादानम्, तथापि नैवात्र नत्वं प्रसज्यत इति दर्शयितुमाह--`सामान्यनिर्देशेऽपि' इत्यादि। ॠकारोऽत्र ये भागास्तन्मध्यवर्ती रेफो मात्राचतुर्भागात्मकः, तत्र योऽसौ रेफात्परस्तृतीयो भागस्तेन व्यवधानान्न भवति।
`चरितम्, मुदितम्' इति। `चर गत्यर्थः' (धा.पा.559),`मुद हर्षे' (धा.पा.16)। असति हि `त' इति ग्रहणे `रदाभ्याम्' इत्यनेन निष्ठा विशेष्यते--रदाभ्यां परा या निष्ठेति, ततश्चरितमित्यादौ `आदेः परस्य' (1.1.54) इति इट एव नत्वं स्यात्; तस्य निष्ठाभक्तत्वात्। अथ `त' इत्युच्यमाने चरितमित्यादौ तकारस्य कस्मान्न भवति? इटा व्यवहितत्वात्। स हि प्रत्ययभक्तत्वात् प्रत्ययमेव न व्यवदध्यात्। तदवयवत्वं तु व्यवदध्यादेव। `परस्य मा भूत्' इति। असति हि पूर्वग्रहणे यदि हि सन्निहितया निष्ठया दकारो विशेष्येत--निष्ठाया यो दकार इति, ततो जशत्वे कृते परस्यैव स्यात्--भिन्नवद्भ्याम्, भिन्नवद्भिरित्यादौ। अथ न विशेष्येत, ततो विशेषानुपादानाद्यथापूर्वस्य भवति, तथा परस्यापि। तस्मात् परस्य मा भूदित्येवमर्थं पूर्वग्रहणं कृतम्।
अथ कृतस्यापत्यम्, `अत इञ्' (4.1.95) कार्त्तिरित्यत्र कस्मान्न भवति? इत्याह--`इह' इत्यादि। वृद्धिर्हि तद्धितं निमित्तमाश्रित्य भवतीति बहिरङ्गा, नत्वं तु न किञ्चिद्बाह्यं निमित्तमाश्रित्य भविष्यतीत्यतस्तदन्तरङ्गम्। तस्माद्वृद्धेर्बहिरङ्गत्वान्नत्वे कर्त्तव्ये रेफस्यासिद्धत्वम्। ननु च यदि तर्हि बहिरङ्गलक्षणा सा, तस्या एवासिद्धत्वेन भवितुं युक्तम्, न तु रेफस्यापि, न हि रेफो वृद्धिर्भवति? नैष दोषः; वृद्ध्याश्रितो हि रेफः, ततो वृद्धेर्बहिरङ्गत्वाद्रेफस्यापि

बहिरङ्गत्वेन भाव्यम्।।

43. संयोगादेरातो धातोर्यण्वतः। (8.2.43)
`प्रद्राणः' इति। `द्रा कुत्सायां गतौ' (धा.पा.1054)। `कृत्यचः' (8.4.29) इति णत्वम्। `म्लानः' इति। `म्लै गात्रविनामे' [`म्लै हर्षक्षये'--इति धातुपाठः] (धा.पा.904)।
`च्युतः, प्लुतः' इति। `च्युङ् प्लुङ् गतौ' (धा.पा.955,958)। `निर्यातः' इति। `या प्रापणे' (धा.पा.1049)। `निर्वातः' इति। `वा गतिगन्धनयोः' (धा.पा.1050)। अत्र र्या, र्वा-इत्येतयोर्धातुत्वं न भवति। `र्या' इत्ययं हि समुदायः संयोगादिः, न चायं धातुः, किं तर्हि? `या' इत्ययम्। एवं `र्वा' इत्ययं संयोगादिः, न चैष धातुः, किं तर्हि? `वा' इत्ययम्। ननु च बहिरङ्गमत्र संयोगादित्वम्, द्विपदाश्रयत्वात्, नत्वं तु विपर्ययादन्तरङ्गम्; `असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.42) इत्यसिद्धत्वादेव संयोगादित्वस्य नत्वं न भवतीति किं धातुग्रहणेन? एवं तर्हि एतज्ज्ञापयति--उपसर्गसम्बन्धेन यो धर्म उपजायते धातूपसर्गसमुदायस्य स धातोरतद्धर्मवतोऽपि कार्याणि प्रापयतीति। तेनोपास्तते गुरुः, अभिभूयते शत्रुरिति कर्मणि लकारः सिद्धो भवति। अत्र ह्यु पसर्गसम्बन्धेन सकर्मकत्वधर्मो जातः। स च धातूपसर्गसमुदायस्य, न धातुमात्रस्य। तत्र यद्ययमर्थो न ज्ञाप्येत, कर्मणि लकारो न स्यात्; धातोरकर्मकत्वात्। अस्मिंश्चार्थे ज्ञापिते तु भवति। `स्नातः' इति। `ष्णा शौचे' (धा.पा.1052)।।

44. ल्वादिभ्यः। (8.2.44)
`जीनः' इति। `ज्या वयोहानौ' (धा.पा.1499), `ग्रहिज्या' (6.1.16) इत्यादिसूत्रेण सम्प्रसारणम्, `हलः' (6.4.2) इति दीर्घः।
`ऋकारल्पादिभ्यः' इत्यादि। ऋकारान्तेभ्यो ल्वादिभ्यश्च परो यः क्तिन् स निष्ठा भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं नु `ओदितश्च' (8.2.45) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात्। यथा ऋकारल्पादिभ्यो निष्ठातकारस्य नत्वं भवति, तथा क्तिनोऽपि तकारस्य नत्वं भवतीति।
`दुग्वोः' इति। `दु उपतापे' [`टु टु उपतापे'--धातुपाठः, पदमञ्जर्यां तु-`दु गतौ(944)इत्ययं धातुरुपात्तः, न `टु टु उपतापे' इति] (धा.पा.1256)। `गु पुरीषोत्सर्गे' (धा.पा.1399)।
`पूनाः' इति विनष्टा इत्यर्थः। `पूतं धान्यम्' इति। विधूतमित्यर्थः।

`सिनोतेः' इति। `विञ् बन्धने' (धा.पा.1248) इत्येतस्य। `ग्रासकर्मकर्त्तृकस्य' इति। ग्रासः कर्मकर्ता यस्य स तथोक्तः। अर्थद्वारकञ्चेदम्। तस्य ग्रासकर्मकर्त्तृकत्वं विशेषणं वेदितव्यम्। यथा सिनो ग्रासो बन्धनक्रियायां व्यञ्जनविशेषयोगादानुकूल्यं प्रतिपद्यते, तथा कर्मणोऽपि सतस्तस्य कर्त्तृत्वं विवक्षितमिति कर्मकर्त्तासौ भवति। `सिनो ग्रासः' ति। स्वयमेव बद्ध इत्यर्थः। `सिता पाशेन सूकरी' इति। समुदायप्रत्युदाहरणमेतत्। अवयवप्रत्युदाहरणं दर्शयितुमाह--`ग्रासोऽपि' इत्यादि। ग्रासोऽपि यदि कर्मैव भवति न कर्मकर्ता, तदापि न भवति; ग्रासकर्मकर्त्तृकत्वमस्य तदाभावात्। ग्रासकर्मतो हि स तदानीं भवति ग्रासकर्मकर्त्तृकः।।

45. ओदितश्च। (8.2.45)
`आपीनः' इति। `प्यायः पी' (6.1.28) इति पीभावः।

`स्वादय ओदितः' इति। ते पुनः `षूङ प्राणिप्रसवे' (धा.पा.1132) इत्यादयः `व्रीङ् प्रीणात्यर्थे' [वृणोत्यर्थे-धातुपाठः] (धा.पा.1140) इत्येवमन्ता दिवादिषु पठ्यन्ते।।

46. क्षीयो दीर्घात्। (8.2.46)
`क्षियः' इति। `क्षि क्षये' (धा.पा.236), `क्षि निवासगत्योः' (धा.पा.1407) इति द्वयोरपि ग्रहणम्; विशेषानुपादानात्। `क्षीणआः क्लेशाः' इति।
`क्तोऽधिकरणे' च' (3.4.76) इत्यादिनाऽकर्मकत्वात् कर्त्तरि निष्ठा, `निष्ठायामण्यदर्थे' (6.4.60) इति दीर्घः। `क्षीणो जाल्मः, क्षीणस्तपस्वी' इत्यादि।
`वाऽऽक्रोशदैभ्ययोः' (6.4.61) इति।
ननु च `क्षियः' इति निर्देशादेव दीर्घस्य ग्रहणं विज्ञायते, तत् किं दीर्घग्रहणेन? यदि ह्रस्वस्येवं ग्रहणं स्यात्, एवं सति परत्वात् `घेर्ङिति' (8.3.111) इति गुणे कृते क्षेरिति निर्देशः स्यात्? इत्यत आह--`ह्रस्वस्यापि हि' इत्यादि। यदि नियोगतो दीर्घस्यैव धात्वनुकरणस्येयङा निर्देशः स्यात्, ततोऽस्मान्निर्देशाद्दीर्घस्येदं ग्रहणमिति विज्ञायते। न च दीर्घस्यैवेयङा निर्वेशो भवति। तथा हि ह्रस्वान्तस्यासौ दृष्टः क्षियः। `निष्ठायामण्यदर्थे' (6.4.60) इत्यत्रावसितं ह्रस्वान्तस्थेदमनुकर्णम्, न दीर्घान्तस्येति? उच्यते; यथाभूतस्यैवानुकर्तुयुक्तम्। ह्रस्वान्तस्य च दीर्घत्वं विधेयम्। अतस्तस्यैवानुकरणमिदमिति विज्ञायते। यदि तर्हि ह्रस्वान्तस्यापि धात्वनुकरणस्येयङा निर्देशो भवति, `विपराभ्यां जेः' (1.3.19), `विभाषा चेः' (7.3.58) इत्येवमादावपि कस्मान्न भवति? इह `विपराभ्यां जेरित्येवमादौ' इत्यादि। अत्रासङ्कल्पमित्यतदध्याहार्यम्। धात्वनुकरणस्य हि `प्रकृतिवदनुकरणं भवति' (व्या.प.113) इतीयङा

निर्देशो भवति। धात्वनुकरणं च किं भवितुमर्हति येन धातावनुकार्येव स्थितम्? धातुत्वं क्रियावाचित्वलक्षणं विवक्ष्यते। `विपराभ्यां जेः' (1.3.19) इत्येवमादौ त्वनुकार्यगतं धातुत्वं सदप्यववक्षितत्वादसङ्कल्पम्। तस्मान्नात्र धात्वनुकरणम्। अपि तु ङीप्रभृतेः क्रियावाचिनश्च तत्सादृश्यशब्दान्तरस्य ङीत्येवमादेर्यद्रूपसामान्यमर्थशून्यं तदनुकरणं द्रष्टव्यम्। तस्मादधात्वनुकरणत्वान्न भवतीयङादेश इत्यभिप्रायः। यदि तर्हि धात्वनुकरण स्यात्, प्रकृतिवदनुकरण भवतीति, एवं सत्यधातो (1.2.45) इति प्रातिपदिकसंज्ञाप्रतिषेधोऽपि स्यात्, ततश्च विभक्तिर्नोपपद्यते? वत्करणेनानुकार्येणार्थेणार्थनार्थवत्त्वस्याश्रयात् प्रातिपदिकसंज्ञा भविष्यतीत्यदोषः।।

47. श्योऽस्पर्शे। (8.2.47)

`शीनम्' इति। `श्यैङ् गतौ' (धा.पा.963), `द्रवमूर्त्तिस्पर्शयोः श्यः'(6.1.24) इति सम्प्रसारणम्, `हलः' (6.4.2) इति दीर्घः। `शोतं वर्त्तते' इति। भावे निष्ठा। पूर्वत्र तु कर्त्तरि। एवं `शीतो वाधुः' इत्यादौ।

`शीतमुदकमित्यत्र' इत्यादि। `गुणभूतोऽपि' इति। अप्रधानभूतोऽपीत्यर्थः। ननु च प्रधाने कार्यसम्प्रत्ययादप्रधानस्य नत्वप्रतिषेधादिकार्यं प्रति निमित्तभावो नोपपद्यते? नैष दोषः; `अस्पर्शे' इति हि यद्ययं पर्युदासः स्यात्, एवं सति शीतो वायुरित्यादौ स्पर्शादन्यद्द्रव्यमस्तीति नत्वं स्यात्; न त्वयं पर्युदासः, किं तर्हि? प्रसज्यप्रतिषेधः। तेन यत्र ल्पर्शनगन्धोऽस्ति तत्र तदाश्रयेण नत्वप्रतिषेधेन भवितव्यम्। अस्ति चेह गुणभूतः स्पर्शः, तेन तदाश्रयो नत्वप्रतिषेधो भवत्येव। भवत्वेवं नत्वप्रतिषेधः, सम्प्रसारणस्य तु गुणभूतः स्पर्शः कथं कारणं भवति? नियमस्य त्यागात्। इह `अल्पाच्तरम्' (2.2.34) इति नियमः--अल्पाच्तरं द्वन्द्वे पूर्वमेव प्रयोक्तव्यमिति; `द्रवमूर्तिस्पर्शयोः श्यः' (6.1.24) इत्यत्र स्पर्शशब्दस्याल्पाच्तरस्य परनिपातं कुर्वताऽस्य नियमस्य त्वागः कृतः। स किमर्थं कृतः? स्पर्शोऽत्रानियमेन प्रधानभूत उपसर्जनभूतो वा सम्प्रसारणस्य कारणमित्यस्यार्थस्य सूचनार्थः। तेन गुणभूतोऽपि स्पर्शः सम्प्रसारणस्य निमित्तं भवति।

स्पर्शशब्दोऽयमस्ति गुणवचनः, अस्ति च रोगवचनः; तदिह विशेषानुपादानादुभयोरपि ग्रहणम्। ततो रोगेऽपि प्राप्नोतीति प्रतिशीन इत्येतन्न सिध्येदिति चोद्यमाशह्क्याह--`गुणे च' इत्यादि। गुण एवेत्यर्थः। कथं पुनर्गुण एव प्रतिषेधो लभ्यते? ज्ञापकात्। यदयं `द्रवमूर्त्तिस्पर्शवोः श्य-' (6.1.24) इत्यत्र सम्प्रसारणं विधाय पुनः `प्रतेश्च' (6.1.25) इति विधत्ते, तज्ज्ञापयति--श्यायतेर्यत्र ग्रहणं तत्र स्पर्श उपादीयमानो रोगं न प्रत्याययतीति। यदि हि प्रत्याययेत्, पुनर्विधानमनर्थकं स्यात्; पूर्वेणैव सिद्धत्वात्। प्रतिपूर्वो हि रोग एव श्यायतिर्वर्त्तते, नान्यत्र।।

48. अञ्चोऽनपादाने। (8.2.48)

`न चेदपादानं तत्र भवति' इति। तत्रेत्यनेनाञ्चतिः परामृश्यते। शब्दद्वारेणाञ्चत्यर्थं एवायमपादानस्य प्रतिषेधसामर्थ्याद्विज्ञायते। न ह्यञ्चतावपादानत्वं सम्भवति, किं तर्हि? तदर्थे क्रियाविषयत्वात् कारकाणाम्। तदेतदुक्तं भवति--न चेदञ्चत्यर्थे विषयभूतेऽपादानं न भवतीति। `समक्नौ' इति। सङ्गतावित्यर्थः। `अन्चु गतिपूजनयोः' [`अन्चू' इति काशीमुद्रितः पाठः](धा.पा.188) इत्युदित्त्वाद्विभाषितेट्। [इत्यूदित्त्वात्--काशीमुद्रितः पाठः] तेन `यस्य विभाषा' (7.2.15) इति निष्ठायामिट्प्रतिषेधः, `अनिदिताम्' (6.4.24) इत्यनुनासिकलोपः। `उदक्तमुदकम्' इति। उद्धृतमुदकमित्यर्थः। अथ व्यक्तमित्यत्र नतवं कस्मान्न भवति? इत्याह--`व्यक्तमित्येतत्' इत्यादि। `अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' [`अन्चू' इति। काशीमुद्रितः पाठः] (धा.पा.1458) इत्येतस्यैतद्रूपम्,[इत्येतद्रूपम्--काशीमुद्रितः पाठः] नाञ्चतेः; ततो नत्वमिह न भवतीति भावः।।

49. दिवोऽविजिगीषायाम्। (8.2.49)

`आद्यूनः, परिद्यूनः' इति। अविजिगीषुरित्यर्थः। `च्छवोः शूडनुनासिके च' (6.4.19) इति ऊठ्। `द्यूतं वर्त्तते' इति। विजिगीषार्थोऽत्र विवक्षित इति नत्वं न प्रवर्त्तते। कथं पुनरिह विजिगीषार्थः, यावता अक्षपातनलक्षणक्रोडा न प्रतीयते? इत्याह--विजिगीषायां हि'[इत्येतद्रूपम्--काशीमुद्रितः पाठः] इत्यादि। विजेतुमिच्छा विजिगीषा, तस्याम्। तत्र क्रोडायामक्षपातनादि क्रियते। तस्माद्विजिगीषार्थेऽवतिष्ठत इति भावः। आदिशब्देन शलाकापातादेर्ग्रहणम्।।

50. निर्वाणोऽवाते। (8.2.50)

`दातेरुत्तरस्य' इति। `वा गतिगन्धनयोः' (धा.पा.1050) इत्येतस्मात्। `न च' इत्यादि। धातमचिकरणमाधारो यस्य स तथोक्तः। एतदुक्तं भवति--धातेर्धातोर्योऽर्थः स यदि धातेन समवेतो भवतीत्यर्थः। `निर्वाणोऽग्निः, निर्वाणः प्रदीपः' इति। अत्र स्वरूपस्य यः प्रशम उपरतिलक्षणः स धात्वर्थः। `एष निर्वाणो भिक्षुः' इति। अत्रापि। अथ वा--रागादिप्रहाणं धात्वर्थः।

`निर्वातो वातः' इति। अकर्मकत्वात् कर्त्तरि निष्ठा। `निर्वातं वातेन' इति। अत्र भावे। उभयत्राप्यत्र गतिनिरोधो धात्वर्थ-।

`निर्वाणः प्रदीपी वातेन' इति। अत्र वातेनेति कर्त्रि तृतीया। तस्माद्वात एव दात्यर्थस्याधारः, ततश्च नत्वेन भवितव्यमिति कस्यचिद्व्यामोहः स्यात्, अतस्तान्निराकरणायाह--`निर्याणः प्रदीपः' इत्यादि। अत्र निर्वाणंधात्वर्थः, तच्च प्रदपाधारम्, न वाताधारम्। वाताधारे हि तस्मिन्निर्वाण इति यदि कर्त्तरि निष्ठा, तदा तयैवाभिहितत्वात् करत्तुर्वातात् तृतीया न स्यात्। अथ `नपुंसके भावे क्तः' (3.3.114) इति भावे? एवं ससि निर्वाण इति पुंल्लिङ्गं न

स्यात्। तस्मात् प्रदीप एव कर्त्ता धात्वर्थस्याधारः। यद्येवम्, कथं वातेनेत्यत्र तृतीया? इत्यत आह--`वातस्तु' इत्यादि। एतेनैषा तृतीया न कर्त्तरीति दर्शयति।।

51. शुषः कः। (8.2.51)
`शुष शोषणे' (धा.पा.1183) इत्यस्मात् परस्य निष्ठातकारस्य ष्टुत्वे प्राप्ते ककारो विधीयते। अकार उच्चारणार्थः। `शुष्कः, शुष्कवान्' इति। युक्तं शुष्वानित्येतदुदाहरणम्, शुष्क इत्येतत्त्वयुक्तम्; न ह्येतदर्थेऽस्य सूत्रस्यारम्भो युज्यते, `शुष्कधृष्टौ' (6.1.206) इति निपातनेनैव सिद्धत्वात्? नैतदस्ति; निपातनेन हि ककारे सति शुष्किकेत्यत्र `उदीचामातः स्थाने यकपूर्वायाः' (7.3.46) इति विभाषेत्वं स्यात्, शुष्कजङ्घेत्यत्र च `न कोपधायाः' (6.3.37) इति पुंवद्भावप्रतिषेधः स्यात्; इह तु ककारस्य विधाने सति तस्यासिद्धत्वादेतदुभयं न भवति। तस्माच्छुष्क इत्येतदर्थोऽप्यस्यारम्भो युक्तः।।

52. पचो वः। (8.2.52)
`पक्वः, पक्ववान्' इति। `डुपटचष् पाके' (धा.पा.996)। यद्येवम्, पक्व इत्यतत् `सिद्धशुष्कपक्वबन्धैश्च' (2.1.41) इति निपातनादपि हि सिध्यति; तथापि पक्ववानित्येतदर्थमिदमवश्यमारब्धव्यम्। अन्यार्थं चारभ्यमाणं पक्व इत्येतदर्थरूपमपि भवतीति पस्वशब्दोऽस्योदाहरणमुपन्यस्तम्। निपातनद्वारेण हि तद्व्युत्पत्तौ प्रतिपत्तिगौरवं स्यादित्यभिप्रायः।।

53. क्षायो मः। (8.2.53)
`क्षै जै वै क्षये' (धा.पा.913-915)।।

54. प्रस्त्योऽन्यतरस्याम्। [`प्रस्तोन्यतरस्याम्'--इति प्राचीन्यासमुद्रितः पाठः]
`प्रस्तीमः' इति। `ष्ट्यै स्त्यै सङ्घातशब्दयोः' (धा.पा.911,910)। `स्त्यः प्रपूर्वस्य' (6.1.23) इति सम्प्रसारणम्; पूर्ववद्दीर्घः। इह यदा मत्वं न भवति। तदा `संयोगादेः' (8.2.43) इत्यनेन नत्वेन भवितव्यम्; ततश्च प्रस्तीनः, प्रस्तीनवानितीष्टं स्यात्--इति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्त्तुमाह--`यदा मत्वं नास्ति' इत्यादि। कृते तर्हि प्रथमं सम्प्रसारणे नत्वं कस्मान्न भवति? इत्याह--`तत्र कृते' इत्यादि।।

55. अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः। (8.2.55)
`फुल्लः' इति। `ञिफला विशरणे' (धा.पा.516), `आदितश्च' (7.2.16) इतीट्प्रतिषेधथः, `उत्परस्यातः' (7.4.88) इत्युत्त्वम्।
`क्तवत्वन्तस्याप्येतल्लत्वमिष्यते' इति। कथं पुनरिष्यियाणमपि लभ्यते, न हि क्तवत्वन्तः शब्दः सूत्र उपात्तः? उच्यते; इह निष्ठायास्तकारान्तं यच्छब्दरूपं तस्य `फुल्ल' इत्येतन्निपात्यते, क्तवतोश्च [`क्तक्तवतोश्च' इति काशीमुद्रितः पाठः] तत् तुल्यम्। परस्तु यदि क्तवतोऽर्थो वा विशेष्यते? विशेष्यताम्, न हि तेन समानेनासमानेन वा परयोजनमस्ति। तस्मात् क्तवत्वन्तस्याप्येतल्लत्वं भवति। एवमनयैव युक्त्या क्षीबकृशोल्लाघादिष्वपि यन्निपात्यते, तदपि क्तवत्वन्तस्य प्रसज्यते?[`प्रसज्येत'--इति का.मु.पाठः] नैष दोषः; वक्ष्यमाणमन्यतरस्यांग्रहणमुभयोर्योगयोः शेषः। व्यवस्थितविभाषा च न ज्ञायते, तेनातिप्रसङ्गो न भविष्यतीति।
`क्षीविकृशिभ्याम्' इति। `क्षीबृ मदे' (धा.पा.382), `कृश तनूकरणे' (धा.पा.382), `कृश तनूकरणे' (धा.पा.1227)। `इडभावश्च निपात्यते' इति। क्तलोपस्यासिद्धत्वाद्वलादिरार्धधातुको भवतीतीट् प्राप्नोति; अतस्तदभावश्च निपात्यते। `कृते वा इटि इच्छब्दलोपः' इति। निपात्यत इति सम्बन्धः। इडभावापेक्षो विकल्पः। अथ वा--नेडभावो निपात्यते। किं तर्हि? कृत इटीच्छब्दलोपः।
`लाघेरुदोऽन्य उपसर्गः प्रतिषिध्यते' इति। उत्पूर्वस्य ग्रहणसामर्थायत्। अन्यथा ह्युत्पूर्वस्योपादानमनर्थकं स्यादित्यभिप्रायः।
अनुपसर्गादित्युच्यते, तत्र परिकृश इति न सिध्यति? इत्यत आह--`परिकृश इत्यत्र' इत्यादि। तनूकरणलक्षणक्रियाया अन्यक्रिया गमनलक्षणा क्रियान्तरम्, तेन योगोऽयम्, न परिशब्दः, अतर कृशिं प्रत्युपसर्गसंज्ञा भवतीति कृत्वा। `परिगतः कृशः' इति। अनेन तं क्रियान्तरयोगं दर्शयति। अथ किमर्थं निपातनम्; यावता फुल्ल इति `फुल्ल विकसने' (धा.पा.532) इत्यस्मात् पचाद्यचि सिध्यति, क्षीबेरिगुपधलक्षणे के--क्षीव इति, कृश इत्यपि कृशेरचैव, उल्लराघ इति--लाघ इत्येव पचाद्यचि सिद्ध्यत्येव? सत्यमेवैतत्; निष्ठायां तु फलतिप्रभृतीनामसत्यस्मिन्ननिष्टं रूपं प्राप्नोति। अतस्तन्निवृत्त्यर्थमारब्धध्यमेतत्।।

56. नुदविदोन्दत्राघ्रह्वीभ्योऽन्यतरस्याम्। (8.2.56)
`समुन्नः, समुत्तः' इति। `अनिदिताम्' (6.4.24) इति नलोपः। `ह्रीत्यस्य' [`ह्री' इत्यतस्य--काशिका, पदमञ्जरी च] इति। `ह्री लज्जायाम्' (धा.पा.108530 इत्यस्य। `अप्राप्त्रः' इति। केनचिदविधानात्। `इतरेषाम्' इति। तत्र `नुद प्रेरणे' [`णुद प्रेरणे'--धातुपाठः] (धा.पा.1426), `उन्दी क्लेदने' (धा.पा.1457)--तयोः `रदाभ्याम्' (8.2.42) इति नित्यं प्राप्सम्। `त्रैङ् पालने' (धा.पा.965), `घ्रा गन्धोपादाने' (धा.पा.926)--एतयोः `संयोगादेः' (8.2.43) इत्यादिना।

`विद विचारणे' इत्यस्य विदेरिह ग्रहणमिध्यते' इति। कथं पुनरस्य ग्रहणमिष्यते, श्लुविकरणेन ह्रीत्यनेन [`ह्रीणा'--प्रा.मु पाठः] साहचार्यात्? नैतदस्ति; शविकरणेन नुदिना साहचर्याल्लाभार्थस्य विदेर्ग्रहणप्रसङ्गात्? एवं तर्ह्यन्यतरस्यामित्येषा व्यवस्थितविबाषा, तेन विचारणार्थस्यैव भवितव्यम्, नान्यस्य; यस्यैवं भवितव्यं तस्यैव ग्रहणं युक्तमिति स एव गृह्यते।

कथं पुनर्ज्ञायते--विचारणार्थस्य विदेर्यहणमिष्यते? इत्याह--`एवं हि' इत्यादि। इष्यत इति वक्ष्यमाणं प्रत्येकमभिसम्बध्यते। `निष्ठा' इत्यनेन निष्ठान्तमुपलक्षयतिः `वेत्तेः' इत्यादि। `विद ज्ञाने' (धा.पा.1064) इत्यस्य `विदितः' इत्येतद्रूपमिष्यते; नित्येट्त्वात्, तस्येटा निष्ठातकारस्य व्यवधाने सति नत्वस्यासम्भवात्। `विद्यतेः' इति। `विद सत्तायाम्' (धा.पा.1171) इत्यस्य श्यन्विकरतस्य [नास्ति--का.मुपाठे] निष्ठान्तस्य `विन्नः' इत्येतद्रूपमिध्यते; `एकाचः' (7.2.10) इतीट्प्रतिषेधात्; `रदाभ्याम्' (8.2.42) इत्यादिना च नित्यं नत्वविधानात्। `विन्तेविन्नश्च वित्तश्च' इति। `विद विचारणे' (धा.पा.1450) इत्यस्य निष्ठान्तस्यैतद्रूपद्व्यमिष्यते; पूर्ववदिट्प्रतिषेधात्, अनेन च सूत्रेण (8.2.56) पक्षे नत्वविधानात्। `भोगिवित्तश्च विन्दतेः' इति। विब्दतेरित्यनेन लाभार्थविदिं दर्शयति। तस्य हि `शे मुचादीनाम्' (7.1.59) इति नुमि कृते विन्दतीत्येतद्रूपं भवति। भोगवित्त इति--भोगे वित्तो भोगवित्तः, `सप्तमी' (2.1.40) इति योगविभागात् समासः। भोगग्रहणं चोपलक्षणमात्रम्। प्रत्ययोऽयि गृह्यते। `विद्लृ लाभे' (धा.पा.1432) इत्यस्य भोगे प्रत्यये चार्थे वित्त इत्येतद्रूपं निष्ठायामिष्यते; `वितो भोगप्रत्यययोः' (8.2.58) इति नत्वाभावस्य निपातनात्, `यस्य विभाषा' (7.2.15) इति निष्ठायामिट्प्रतिषेधाच्च। विन्दतेर्हि क्वसौ `विभाषा गमहनविदविशाम्' (7.2.68) इतीड्विभाषितः; `भोगवित्तश्च विन्दतेः' इति ब्रुवताऽर्थतौ भोगप्रत्ययाभ्यामन्यत्र विन्न इत्येतद्रूपमिष्यत इत्युक्तं भवति।।

57. न ध्याख्यापमूर्च्छिमदाम्। (8.2.57)

`ध्यै चिन्तायाम्' (धा.पा.908), `ख्या प्रकथने' (धा.पा.1060), `चक्षिङः ख्याञ्' (2.4.54) इति च--द्वयोरपि ग्रहणम्। ननु च चक्षिङादेशस्य सानुबन्धकत्वान्निरनुबन्धकग्रहणपरिभाषया (व्या.प.53) न प्राप्नोतीति? नैष दोषः; इह हि निष्ठातकारस्य परत्वप्रतिपादने पञ्चमी युक्ता, यथा--`रदाभ्याम् (8.2.42) इति। तत्र पञ्चमीनिर्देशे कर्त्तव्ये यः षष्ठीनिर्देशः क्रियते, स सम्बन्धसामान्यं प्रतिपादयितुम्। न च सम्बन्धिन मन्तरेण सम्बन्धसामान्यमुपपद्यते। न च सानुबन्धके परित्यज्यमाने सम्बन्धिभेदः सम्भवतीति युक्तं तस्यापि ग्रहणम्, `पृ पालनपूरणयोः' (धा.पा.1489), `मुर्च्छा मोहसमुच्छ्राययोः' (धा.पा.212), `मदी हर्षे' (धा.पा.1208)। एषु ध्याख्याप्रभृतिषु--आद्ययोः `संयोगादेः' (8.2.43) इत्यादिना नत्दे प्राप्ते, इतरेषामपि `रदाभ्याम्' (8.2.42) इत्यादिना, प्रतिषेधोऽयमारभ्यते। `पूर्त्तः' इति। `श्रयुकः किति' (7.2.11) इतीट्प्रतिषेधः, `उदोष्ठ्यपूर्वस्य' (7.1.102) इत्युत्त्वम्, पूर्ववद्दीर्घः। `मूर्त्तः' इति `राल्लोपः' (6.4.21) इति च्छकारलोपः, `आदितश्च' (7.2.16) इतीट्प्रतिषेधः। `मत्तः' इति। अत्रापि `श्वीदितो निष्ठायाम्' (7.2.14) इति।।

58. वित्तो भोगप्रत्यययोः। (8.2.58)

`धनमस्य बहवित्यर्थः' इति। कथं पुनर्भोगे व्यत्पादितस्य धने वृत्तिरर्थो भवति? इत्याह--`घनं हि' इत्यादि। अनेन कर्मसाधनत्वं भोगशब्दस्य दर्शयन् धनेऽस्य वृत्तिं दर्शयति।

`प्रतीत इत्यर्थः' इति। एतेन प्रत्ययशब्दस्य कर्मसाधनतामाचष्टे। प्रतीत इति कर्मणि निष्ठा। प्रतीत आख्यात इत्यर्थः। स चायमर्थः प्रत्यये व्युत्पाद्यमानेऽस्य कथं [नास्ति--का.मु.पाठे] भवति, यदि प्रत्यशब्दोऽपि कर्मसाधनो भवति--प्रतीयत इति प्रत्ययः। तेन प्रत्ययशब्दस्य कर्मसाधनता वेदितव्या।।

59. भित्तं शकलम्। (8.2.59)

`भित्तमिति निपात्यते' इति। किं निपात्यते? रदाभ्यामिति (8.2.42) नत्वे प्राप्ते तदभाव इति। `शकलं चेत्तद्भवति' इति। शकलशब्दस्य योऽर्थः, खमण्ड इति यस्यापरमभिधानम्, भित्तशब्दस्यापि यदि स एवार्थो भवतीत्यर्थः। कथं पुनर्भित्तशब्दस्य शकलमर्थो भवति? इत्याह--`शकलपर्यायोऽयम्' इति। भित्तशब्दः शकलस्यैव पर्यायः। तस्माद्यथा शकलशब्दस्य शकलमभिधेयं भवति, एवं भित्तशब्दस्यापि।

ननु च शकलशब्दोऽयं जातिशब्दः; जातिप्रव-त्तिनिमित्तमुपादाय स्वाभिदेये प्रवृत्तत्वात्; भित्तशब्दस्तु क्रियाशब्दः, क्रियाप्रवृत्तिनिमित्तत्वात्; तथा हि--भिदेर्विदारणार्थात् क्ते विहिते भित्तमिति निपात्यते, न च क्रियाशब्दो जातिशब्दपर्याय उपपद्यते? इत्याह--`अत्र' इत्यादि। शब्दव्युत्पत्तिः=शब्दसंस्कारः, तस्या एवात्र भित्तशब्दे भिदिक्रियानिमित्तत्वाम्; न तु तत्प्रवृत्तेः; असत्त्वात्। जातिरेव तु तत्प्रवृत्ति प्रति निमित्तम्; तस्या विद्यमानत्वात्। तस्माच्छकलशब्दवद्भित्तशब्दोऽपि जातिशब्द एव; न क्रियाशब्द इति युक्ता तस्य तत्पर्यायता। यदि तर्ह्यसत्येवात्र भिदिक्रिया, शब्दसंस्कारत्वस्यापि सा निमित्तं नोपपद्यते? नैतदस्ति; न ह्ययं नियोगोऽभिधीयते--विद्यमानैव क्रिया शब्दसंस्कारस्य निमित्तं भवतीति। तथा हि तैलपायिकाशब्दो यत्र प्राणिविशेषे रूढः, तत्र तैलपानक्रियाशब्दोऽपि नास्ति; तथापि तैलपानक्रिया तत्संस्कारनिमित्तत्वेनाश्रीयते। कथं पुनर्भित्तशब्दो भिदिक्रियाप्रवृत्तिनिमित्तं न भवति? इत्याह--`भिदिक्रियाविवक्षायां हि' इत्यादि। अत्र भिन्नमित्यस्य च भित्तशकलशब्दाभ्यां प्रत्येकमभिसम्बन्धः। तेन `भिन्नं भित्तमित्येव भवति' इति। एतत् प्रयोगद्वयमपि भिदिक्रियादिवक्षायां सिद्धं भवति। विदीर्णे हि शकले तस्य विदीर्णतां प्रतिपादयितुं भिन्नम्, भित्तमित्येष प्रयोगो भिदिक्रियाविवक्षायां क्रियते।

यदि च भित्तशब्द क्रियाप्रवृत्तिनिमित्तं स्यात्, ततो भित्तशब्देनैव भिदिक्रियानिमित्तकेन विदीर्णता शकलस्य प्रतिपाद्यत इत्येष प्रयोगो नोपपद्यते, न हि तदस्ति यस्य भित्तशब्देनाप्रतिपादितस्य भिन्नशब्दयोगो भवेत्। भिन्नं शकलमित्येष च प्रयोगो नोपपद्यते; शकलव्युत्पादितेन भित्तशब्देन भिदिक्रियानिमित्तकेन भिन्नशब्दस्य बाधितत्वात्। अस्ति चायं द्विविधोऽपि प्रयोगः, तस्गादि्भत्तशब्दस्य भिदिक्रियानिमित्तत्वं न गम्यते।।

60. ऋणमाधमर्ण्ये। (8.2.60)

`ऋ इत्येतस्मात्' इति। `ऋ गतौ' (धा.पा.1098) इत्येतस्मात्, `ऋ गतिप्रापणयोः' (धा.पा.936) इत्येतस्माद्वा।

`अधम ऋणेऽधमर्णः' इति। केन पुनरत्र समास इति? यावता नात्र किञ्चित् समासलक्षणमस्ति; `सप्तमिति योगविभागात् समासः' इत्येतच्च न वक्तव्यम्, सप्तम्याः पूर्वनिपातप्रसङ्गत्? इत्यत आह--`एतस्मादेव' इत्यादि। `तद्भाव आधमर्ण्यम्' इति। तत् प्रतिदास्यतीति ग्रहणक्रियाभिसम्बन्धः। तद्योगाद्भावेऽसावधमर्ण इत्युच्यते। `कालान्तर' इत्यादि। यस्मिन् कालेऽधमर्णो गृह्णाति तस्मात् कालादन्य आगामी कालः कालान्तरम्, तत्र यद्देयं तत् कालान्तरदेयम्, तेन यो विनिमयः= विपरिवर्त्तनम्, तदुपलक्षणार्थमेवाधमर्णग्रहणमेवमुपात्तम्, न च स्वार्थपरतिपादनार्थमेव। किं कारणमेवं व्याख्यायते? इत्याह--`उत्तमर्ण इत्यपि भवति' इति। ऋणे ह्येकोऽधमर्णो भवति, यो गृहीत्वा प्रतिदास्यतीति; यस्तु दत्वा ग्रहौष्यति स उत्तमर्णः। तत्र यद्याधमर्ण्यग्रहणं स्वार्थप्रतिपादनार्थमेवोपात्तम्, तदोत्तमर्ण इति न सिध्येत्, न ह्यत्राधमर्ण्यं विवक्षितम्। तत्तर्हीदं चोत्तमर्यर्णेऽपि कालान्तरदेयविनिमयोपलक्षणार्थत्वादाधमर्ण्यग्रहणे सत्येतदपि सिध्यति, अस्ति ह्यत्र कालान्तरद्वयविनिमयः। तथा ह्युत्तमर्णोऽपि प्रयच्छन् कालान्तरे यद्देयं तेन विनिमयं करोति।।

61. नसत्तनिषत्तानुत्तप्रतूर्त्तसूर्त्तगूर्त्तानि छन्दसि। (8.2.61)

`सदेः' इति। `षद्लृ विशरणगत्यवसादनेषु' (धा.पा.854) इत्येतस्मात्। `निषत्तः' इति। `सदिरप्रत्तेः' (8.3.66) इतिषत्वम्।

`अनुत्तम्' इति। `उन्दी क्लेदने' (धा.पा.1457), `अनिदिताम्' (6.4.24) इति नलोपः।

`प्रतूर्त्तम्' इति। यदा `ञित्वरा सम्भ्रमे' (धा.पा.775) इत्यस्य निपात्यते, तदा `ज्वरत्वर' (6.4.20) इत्यादिना वकारस्योपथायाश्चोत्वम्। यदा `उर्वी तुर्वी थुर्वी हिंसार्थाः' (धा.पा.569,570,571) इत्यस्य, तदा `राल्लोपः' (6.4.21) इति रकारलोपः, पूर्ववद्दीर्घः।

`सूर्त्तम्' इति। `सृ गतौ' (धा.पा.935) उत्वसन्नियोगे रपरत्वम्, पूर्वद्दीर्घः।

`गूर्त्तम्' इति। `गुरी उद्यमाने' [`गूरी'--प्रा.मु.पाठ] (धा.पा.1396)।

62. क्विन्प्रत्ययस्य कुः। (8.2.62)

`घृतस्पृक्' इति। अत्र शकारस्य विवृत्तकरणस्य श्वासानुप्रदानस्याघोषस्य तादृश एव खकारः, तस्य जश्त्वम्--गकारः। गकारस्यापि चर्त्वम्--ककारः। अथ प्रत्ययग्रहणं किमर्थम्, न क्विन इत्येवोच्येत, न हि क्विन् प्रत्ययत्वं व्यभिचरति। एवमुच्यमाने लोपापवादः क्विन एव कुत्वं स्यादित्येतच्च नाशङ्कनीयम्, तथा हि--क्विन्निति प्रत्ययग्रहणं यत्र प्रत्ययग्रहणं प्रत्ययग्रहणपरिभाषया (भो.प.सू.7) क्विन्नन्त उपस्थापिते क्विनो लोपे कर्त्तव्ये कुत्वस्यासिद्धत्वात् पूर्वं लोपेनैव भवितव्यम्। तस्मिन् सति पश्चाद्भवत्कुत्वं परिशिष्टस्य धातोरेव भविष्यिति? इत्यत आह--`क्विनः कुरिति वक्तव्ये' इत्यादि। असति हि प्रत्ययग्रहणे क्विन्प्रत्ययान्तस्यैव पदान्तस्य स्यात्, मान्यप्रत्ययान्तस्य, तस्यापि चेष्यते। तस्मात् प्रत्ययग्रहणं क्रियते। प्रत्ययग्रहणे सति बहुव्रीहिर्लभ्यते। तेन बहुव्रीहिणा यस्माद्विहितः स धातुरूपलक्ष्यत इति सर्वस्य सिध्यति। `मानो अस्राक्, मानो अद्राक्' इति। `सृज विसर्गे' (धा.पा.1414) `दृक्षिर् प्रेक्षणे' (धा.पा.988), लुङ्, च्लेः सिच् (3.1.44), तिप्, `सृजिदृशोर्झल्यमकिति' (6.1.58) इत्यमागमः, `वदव्रज' (7.2.3) इत्यादिना वृद्धिः, हल्ङ्यादिलोपः (6.1.68), अडागमः, अनेन कृत्वम्।

`सृजिदृशिभ्यां क्विन्विहितः' इति। `ऋत्विक्' (3.2.59) इत्यादिना सृजेः क्विन्विहितः। दृशेरपि `त्यवादिषु दुशेरनालोचने कञ्च' (3.2.60) इत्यनेन। कथं पुनरत्राडागमः, यावता `न माङ्योगे' (6.4.74) इति प्रतिषिद्धोऽसो? इत्यत आह-`माङ्योगेऽपि' इत्यादि। छान्दसौ ह्येतौ प्रयोगौ। तेन सत्यपि माङ्योगे `बहुलं छन्दस्यामाङ्योगेऽपि' (6.4.75) इत्यडागमो भवत्येव। `अस्तिसिचोऽपृक्ते' (7.3.96) इतीट् तर्हि कस्मान्न भवति? इत्याह-ईट् च न भवति' इत्यादि।

प्रत्ययग्रहणाद्यथा क्विन्प्रत्ययस्य लुगन्तस्य कृत्वं भवति, दृग्भ्यामित्या दौदृशेः क्विबन्तस्यापि। `एवम्' इत्यादि। प्रत्ययग्रहणात् क्विन्प्रत्ययो यस्माद्विहितः, तस्यान्यप्रत्ययान्तस्यापि कुत्वं भवतीत्यस्मिन्नर्थे व्यवस्थिते रज्जुसृङ्भ्यामित्यत्रापि ब्रश्चादिसूत्रेण (8.2.36) षत्वं यत् प्राप्नोति तद्बाधित्वा कृत्वेन भवितव्यम्।

`अथ तु नेष्यते, प्रतिविधानं कर्त्तव्यम्' इति। [नास्ति--प्रा.मु.पाठे] प्रतिविधानमुत्तरसूत्रे वाग्रहणं यत् तदुभयोर्योगयोः शेषः। व्यवस्थितविभाषा च, तेनेह न भविष्यतीति। एवञ्च सति रज्जुसृभ्याम्, रज्जुसृङ्भ्य इति भवितव्यम्।।

63. नशेर्वा। (8.2.63)
`जीवनङाहुतिः' इति। अत्राकुत्वपक्षे व्रश्चादिसूत्रेण (8.2.36) षत्वे कृते जश्त्वम्--डकारः।।

64. मो नो धातोः। (8.2.64)
`पदस्य' इति वर्त्तते। तच्च धातुसमानाधिकरणं मकारेण विशेष्यते--मकारान्तस्य पदस्य धातोरिति। `प्रशान्, प्रतान् इति। `शमु उपशमे' (धा.पा.1201), `तमु काङ्क्षायाम्' (धा.पा.1202), क्विप्, `अनुनासिकस्य क्विझलोः क्ङिति' (6.4.15) इत्युपधादीर्घत्वम्, हल्ङ्यादिलोपः (6.1.68)। अथेह `नलोपः प्रातिपदिकान्तस्य' (8.2.7) ति नकारलोपः कस्मान्न भवति? इत्याह--`नत्वस्य' इत्यादि।।

65. म्वोश्च। (8.2.65)
`अगन्म' इति। `स उत्तमस्य' (3.4.98) इति सकारलोपः। `जगन्वान्' इति। गमेर्लिट्, क्वसुः, हल्ङ्यादि (6.1.68) संयोगान्तलौपौ (8.2.23), `सान्तमहतः' (6.4.10) इति दीर्घः, `गमहन' (6.4.98) इत्यादिनोपधालोपः। `छन्दस्युभयथा' (3.4.117) इति सार्वधातुकत्वं न भवति। चकारः `धातौः' इत्यनुकर्षणार्थः।।

66. ससजुषो रुः। (8.2.66)
`सजूः' इति। `जुषी प्रीतिसेवनयोः' (धा.पा.1288), सह जषत इति क्विप्, उपपदसमासः, `सहस्य सः संज्ञायाम्' (6.3.78) इति सभावः। रुत्वे कृते `र्वोरुपधायाः' (8.2.76) इति दीर्घः। सजुवो ग्रहणमसकारान्तार्थम्। योगश्चायं जश्त्वापवादः।।

67. अवयाः श्वेतवाः पुरोडाश्च। (8.2.67)
`दाशेः' [`दाशतेः'--काशिका] इति। `दाशृ दाने' (धा.पा.882) इत्यस्माण्ण्विनि कृत इति। वहिदाशिभ्यां `मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्' (3.2.71) इत्यनेन, यजेश्च `आवे यजः' (3.2.72) इति ण्विन्प्रत्ययान्तेभ्यः सम्बुद्धिः, तस्या हलङ्यादिलोपः (6.1.68), ततः `श्वेतवाहादीनां डस्पदस्य' (वा.263) इति डस्प्रदस्य' टिलोपः। किमर्थमेते निपात्यन्ते, यावता श्वेतवोभ्याम्, श्वेतवोभिरित्येवमाद्यर्थम् `श्वेतवाहादीनां डस्पदस्य' इत्यदश्यमिदं वक्तव्यम्, डसि च कृते `ससजुषो रुः' (8.2.66) इत्येव सिद्धम्? इत्याह--`श्वेतवाहादीनाम्' इत्यादि।
नैते रुत्वार्थ निपात्यन्ते, किं तर्हि? सम्बुद्धौ दीर्घत्वार्थम्। ननु च द्रीर्घत्वमप्येषां `अत्वसन्तस्य चाधातोः' (6.4.14) इत्येव सिद्धम्? इत्यत आह--`अत्वसन्तस्य च' इत्यादि। तत्र हि `सर्वनामस्थाने चासम्बुद्धौ' (6.4.8) इत्यतः `असम्बुद्धौ' इत्येतदनुवर्त्तते, तेन सम्बुद्धौ दीर्घत्वं प्राप्नोतीति, तदर्थमेते निपात्यन्ते। `पुरोडाः' इति। `मन्त्रे श्वेतवहोक्थशस्' (3.2.71) इत्यादिनैव सूतद्रेण दकारस्य डकारो निपात्यते। `उक्थशाः' इति। `शन्सु स्तुतौ' (दा.पा.728)। उक्थानि शंसतीति `मन्त्रे श्वेतवह' (3.2.71) इत्यादिनैव ण्विन्, ततः पूर्ववत् सम्बुद्ध्यादिः।।

68. अहन्। (8.2.68)
`नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नलोपे प्राप्ते विधीयते। ` अहोभ्याम्, अहोभिः' इति। `हशि च' (6.1.114) इत्युत्वम्, `आद्गुणः' (6.1.87)। `दीर्घाहो निदाघः' ["दर्घाहा"--काशिका, प्राचीनमुद्रितन्यासपाठश्च] इति। बहुव्रीहिः, हल्ङ्यादिलोपः (6.1.68), रुत्वस्यासिद्धत्वात् `सर्वनामस्थाने च' (6.4.8) इत्यादिना दीर्घः, `भोभगोअधो' (8.3.7) इत्यादिना रेफस्य यकारः, तस्य `हलि सर्वेषाम्' (8.3.22) इति लोपः। `हे दीर्घाहोऽत्रि' इति। `अतो रोरप्लुतादप्लुते' (6.1.113) इत्युत्वम्; `आद्गुणः' (6.1.87), `एङः पदान्तात्' (6.1.109) इति परपूर्वत्वम्।
हन्तेर्लङि तिपा हल्ङ्यादिलोपे (6.1.68) कृते तिपश्च लुक्यडागमे चाहन्नित्येतद्रूपं सम्पद्यते, तस्मात्तस्य रुत्वेन भवितव्यम्? इति कसयचिद्भान्तिः स्यात्, अतस्तन्निरासायाह--`अहन्' इत्यादि।
उपसंख्यानशब्दोऽत्र प्रतिपादने वर्त्तते। अह्नो रूविधौ कर्त्तव्ये रूपादिषु रुत्वस्य प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्--पूर्वसूत्रादिह चकारोऽनुवर्त्तते, स चानुक्तसमुच्चयार्थः, तेनाह्रो रूपादिषु रुत्वं भविष्यतीति। `अहोरूपम्' इति। अह्नो रूपमिति षष्ठीसमासः। कथं पुना रात्रिशब्द उच्यमानं रुत्वं रात्रशब्दे भवति? स्थानिवद्भावात्, एकदेशविकृतस्यानन्यत्वाद्वा। रात्रशब्दास्य तु ग्रहणं न कृतम्, रात्रिशब्दस्यापि यथा स्यात्--गतमहो रात्रिरागतेति। `अहो रथन्तरम्' इति। षष्ठीसमासः। अथ वा--असमास एव। "रोऽसुपि' इत्यस्यापवादो रुत्वम्' इत्यादि। अहोरूपमित्यादि यदि समासः, यद्यसमासो वा, सर्वथा विभक्तेर्लुका भवितव्यम्। लुकि सत्यह्नो रविधौ लुमता लुप्ते (1.1.63) प्रत्ययलक्षणस्य प्रतिषेधः। तेन सुप्परत्वस्याभावात् `रोऽसुपि' (8.2.69) इत्येतत् प्राप्नोतीति रुत्वं विधीयते। किमर्थम्? `हशि च' (6.1.114) इत्युत्वं यथा स्यात्। यदि रुरुदुत्पन्नस्य स्यात्, उत्वविधौ `रोः' इत्युकारानुबन्धविशिष्टस्य रेफस्यानुवृत्तेः।।

69. रोऽसुपि। (8.2.69)
पूर्वस्यायमपवादः। रेफेऽकार उच्चारणार्थः। `अहर्ददाति' इति। यद्यत्र रुत्वं स्यात् `हशि च' (6.1.114) इत्युत्वं प्रसज्येत। तस्माद्रो विधीयते। ननु चात्रापि प्रत्ययलक्षणेन सुबस्ति? नैष दोषः; अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणस्य प्रतिषेधः।
लोपशब्देन यत्र लोपस्तत्र हि प्रत्ययलक्षणम्, यथा--`हे दीर्घाहोऽत्र। हे दीर्घाह निदाघ' इति। अत्र हल्ङ्यादिलोपः (6.1.68)।।

70. अभ्नरूधरवरित्युभयथा छन्दसि। (8.2.70)
नित्यं रुत्वे प्राप्ते पक्षे रोऽपि यथा स्यादित्येवमर्थमिदम्। सकारस्य रुत्वं कृत्वा निर्देशः--यस्मिन् प्राप्ते रेफ उच्येते, तस्य रुत्पस्योभयथाग्रहणेन पक्षेऽबावो विज्ञायेत-इत्येवमर्थञ्च; इतरथा हि द्वेष्यमपि विज्ञायेत। यस्मिन् प्राप्ते रुत्वमारभ्यते तस्य जश्त्वं पक्षेऽभ्यनुज्ञायत इति। `अम्न एव' इति। रुत्वपक्षे `भोभगो' (8.3.17) इत्यादिना यकारः, तस्य `लोपः शाकल्यस्य' (8.3.19) इति लोपः।
`प्रचेतस उपसंख्यानम्, अहरादीनां पत्यादिषूपसंख्यानम्' इति। उभयत्रोपसंख्यानशब्दसय प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्--इतिकरणः प्रदर्शनार्थः, एवम्प्रकारेष्वन्येष्वप्युभयथा भवति--रुत्वं वा रेफो वेते। तेन प्रचेतःशब्दस्य राजनि, अहरादीनाञ्च पत्यादिषूभयता भवति। `प्रचेतो राजन्' इति। प्रकृष्टं चेतो यस्येति बहुव्रीहिः, आमन्त्रितैकवचनम्, रुत्वम्, `हशि च' (6.1.114) इत्युत्वम्, `आद्गुणः' (6.1.87)। इत्युत्वं यथा स्यात्। यदि रुरुदुत्पन्नस्य स्यात्, उत्वविधौ `रोः' इत्युकारानुबन्धविशिष्टस्य रेफस्यानुवृत्तेः।।

69. रोऽसुपि। (8.2.69)
पूर्वस्यायमपवादः। रेफेऽकार उच्चारणार्थः। `अहर्ददाति' इति। यद्यत्र रुत्वं स्यात् `हशि च' (6.1.114) इत्युत्वं प्रसज्येत। तस्माद्रो विधीयते। ननु चात्रापि प्रत्ययलक्षणेन सुबस्ति? नैष दोषः; अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणस्य प्रतिषेधः।
लोपशब्देन यत्र लोपस्तत्र हि प्रत्ययलक्षणम्, यथा--`हे दीर्घहोऽत्र। हि दीर्घाह निदाघ' इति। अत्र हल्ङ्यादिलोपः (6.1.68)।।

70. अम्नरूधरवरित्युभयथा छन्दसि। (8.2.70)
नित्यं रुत्वे प्राप्ते पक्षे रोऽपि यथा स्यादित्येवमर्थमिदम्। सकारस्य रुत्वं कृत्वा निर्देशः--यस्मिन् प्राप्ते रेफ उच्यते, तस्य रुत्पस्योभयथाग्रहणेन पक्षेऽभावो विज्ञायेत-इत्येवमर्थञ्च; इतरथा हि द्वेष्यमपि विज्ञायेत। यस्मिन् प्राप्ते रुत्वमारभ्यते तस्य जश्त्वं पक्षेऽभ्यनुज्ञायत इति। `अम्न एव' इति। रुत्वपक्षे `भोभगो' (8.3.17) इत्यादिना यकारः, तस्य `लोपः शाकल्यस्य' (8.3.19) इति लोपः।
`प्रचेतस उपसंख्यानम्, अहरादीनां पत्यादिषूपसंख्यानम्' इति। उभयत्रोपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्--इतिकरणः प्रदर्शनार्थः, एवम्प्रकारेष्वन्येष्वप्युभयथा भवति--रुत्वं वा रेफो वेति। तेन प्रचेतःशब्दस्य राजनि, अहरादीनाञ्च पत्यादिषूभयता भति। `प्रचेतो राजन्' इति। प्रकृष्टं चेतो यस्येति बहुव्रीहिः, आमन्त्रितैकवचनम्, रुत्वम्, `हशि च' (6.1.114) इत्युत्वम्, `आद्गुणः' (7.1.87)। `प्रचेता राजन्' इति। रेफे कृते तस्य `रो रि' (8.3.14) इति लोपः, `ढ्रलोपे' (6.3.111) इत्यादिना दीर्घः। सम्बुद्ध्यन्तोदाहरणं रुत्वरेफयोर्विशेष सम्प्रतिपादनार्थम्; असम्बुद्धौ हि रुत्वरेफयोरसिद्धत्वात् `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घत्वे तुल्यमेव रूपं भवति। `अहर्पत्तिः' इति। षष्ठीसमासः। `रोऽसुपि' (6.2.69) इति रेफे कृते तस्य पक्षे रेफो विधीयते। `अह पत्तिः' इति। रेफस्य विसर्जनीये कृते `कुप्वोः क पौ च' (8.3.37) इति पक्षे उपध्मानीयः। `गीर्पतिः' इति। `गॄ शब्दे' (धा.पा.1498)। सम्पदादित्वात् क्विप्, `ॠत इद्धातोः' (7.1.100) इतीत्वम्, रपरत्वम्। `धूर्पतिः' इति। धुर्वेः क्विप्, `राल्लोपः' (6.4.21) इति वकारलोपः। अथ किमर्थं रेफस्यैव रेपो विधीयते? इत्याह--`विसर्जनीयवाधनार्थम्' इत्यादि। `खरवसानयोः' (8.3.15) इति विसर्जनीयः प्राप्नोति, तद्बाधनार्थं रेपस्यैव रेफो विधीयते।।

71. भुवश्च महाव्याहृतेः। (8.2.71)
भुवःशब्दः षष्ठ्य तप्रतिरूपकमव्ययम्, तस्य नित्यं रुत्वे प्राप्ते पक्षे रेफो यता स्यादित्येवमर्थमिदम्। चकार उभयथेत्यस्यानुकर्षणार्थः। तेनोत्तरत्रानुवृत्तिर्न भवति।
`भुवो विश्वस्य' इति। भूशब्दस्य षष्ठ्यन्तस्य पञ्चम्यन्तस्य वा प्रयोगः। यद्येवम्, लाक्षणिकत्वादेवास्य [`लाक्षणिकत्वादिनास्य'--प्रा.मु.पाठः] न भविष्यति, तत्किमेन्निवृत्त्यर्थेन महाव्याहृतिग्रहणेन? एवं तर्ह्येतज्ज्ञापयति--अनित्यलक्षणा प्रतिपदोक्तपरिभाषेति। तेन क्रापयतीत्यतर पुगागमः सिद्धो भवति, नित्यत्वे तु तस्य न स्यात्, अस्याकारान्तस्य लाक्षणिकत्वात्।
कीदृशी भुवःशब्दो महाव्याहृतिर्भवति? इत्याह--`भुवसित्येतत्' इत्यादि। अन्तरिक्षं हि महत्, तस्य व्याहृतिः=उक्तितर्यस्मात्; तस्मान्महाव्याहृतिर्भवति।।

72. वसुस्रंसुध्वंस्वनडुहां दः। (8.2.72)

`विद्वद्भ्याम्' इति। `विदेः शतुर्वसुः' (7.1.36) इति वसुरादेशः। `पपिवद्भ्याम्, पपिवद्भिः' इति। पिवतेः पातेर्वा लिट्, क्वसुः, `वस्वेकाजाद्घासाम्' (7.2.67) इतीट्, `आतो लोप इटि च' (6.4.64) इत्याकारलोपः, स्थानिवद्भावेन `पा' इत्येतद्द्विरुच्यते। `उखास्रत्, पर्णध्वत्' इति स्रंसिध्वंसिभ्याम्--उखायाः स्रंसते, पर्णानि ध्वंसत इति क्विप्, `अनिदिताम्' (6.4.24) इति नलोपः।
इहेदं वसोर्दत्वमनवकाशम्, सर्वस्य विषयस्य विध्यन्तरेणावष्टब्धत्वात्; तथापि विद्वानित्यादौ संयोगान्तलोपः प्राप्नोति, विद्वद्भ्यामित्यादौ तु रुत्वम्। अतस्तदनवकाशत्वाद्यदा रुत्वं बाधते तदा संयोगान्तलोपोऽपि तेन बाधितव्यः, ततश्च विद्वानिति न सिध्यतीति तस्य व्यामोहः स्यात्, तं प्रत्याह-`रुत्वे नाप्राप्ते' इत्यादि। `यस्मिन्नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति' (व्या.प.49), न चाप्राप्ते रुत्व इदमारभ्यते, अतस्तदेव दत्वेन बाध्यते। `संयोगान्तलोपस्तु नैवम्' इति। तुशब्दो रुत्वाद्विशेषं दर्शयति। इतिकरणो हेतौ। यथा रुत्वं सर्वत्र प्राप्नोति नैवं स्योगान्तलोपः। स हि विद्वानित्यादावेव प्राप्नोति, न विद्वद्भचामित्यादौ। तस्मात् तेनैव दत्वं बाध्यते, न त्वसौ दत्वेन; संयोगान्तलोपे कर्त्तव्ये दत्त्वस्यासिद्धत्वादित्यभिप्रायः।
अत यथा `हो ढः' (8.2.31) इत्यस्य दकारोऽत्रापवादः, तथा स [`स तथा'--प्रा.मु.पाठः] `सावनडुहः' (7.1.82) इत्यस्यापि कस्मान्न भवति, यता ह्यवकाशत्वाद्दकारो ढत्वस्य बाधकस्तथा नुमोऽपि बाधक एव युक्तः? इत्यत आह--`नुमस्तु विधानसामर्थ्यान्न भवति' इति। प्रतिपदं हि `सावनडुहः' नुम् विधीयते, तस्य यद्ययं दकारोऽपवादः स्यात्, नुम्वधानमनर्थकं स्यात्। `अनड्वान्' इति। `चतुरनडुहोरामुदात्तः' (7.1.98) इत्याम्, यणादेशः, हल्ङ्यादि (6.1.68) संयोगान्त (8.2.23) लोपौ। `हे अनड्वन्' इति। `अम् सम्बुद्धौ' (7.1.99) इत्यम्। सेषं पूर्ववत्।।

73. तिप्यनस्तेः। (8.2.73)
`अचकात् अन्वशात्' इति। `चकासृ दीप्तौ' (धा.पा.1074), `शासु अनुशिष्टौ' (धा.पा.1075), लङ्, तिप्, अदादित्वाच्छपो लुक्, हल्ङ्यादिलोपः (6.1.68)। भवानित्यनुप्रयोगस्तिपोऽभिव्यक्तेये। `आ' इति। `आडजादीनाम्' (6.4.72) इत्याट्, `आटश्च' (6.1.90) इति वृद्धिः, तिपो लोपे कृते धातुसकारस्य रुत्वम्, तस्य विसर्जनीयः।।

74. सिपि धातो रुर्वा। (8.2.74)
`अचकास्त्वम्' इति। रुत्वे कृते तस्य विसर्जनीयः, तस्य `विसर्जनीयस्य सः' (8.3.34) इति सकारः। `त्वम्' इति अनुप्रयोगः सिपोऽभिव्यक्तये। अथ धातुग्रहणं किमर्थम्, यावता सकारान्तस्यापि रेफदकारावुच्येते, न च सिपि सकारान्ताद्धातोरन्यदस्ति? इत्यत आह--`धातुग्रहणम्' इत्यादि। उत्तरार्थता चास्व `र्वोरुपधायाः' (8.2.76) इत्यत्र दर्शयिष्यते। क्रियतामुत्तरार्थं धातुग्रहणम्, रुग्रहणं तु न कर्त्तव्यम्; अनर्थकत्वात्; दकारे हि विकल्पिते यथाप्राप्तं रुत्वं पक्षे लभ्यत एव? इत्यत आह--`रुग्रहणं च' इति। उत्तरार्थमित्यपक्षते। `दश्च' (8.2.75) इति वक्ष्यति, तत्र पक्षे रुत्वं यथा स्यादित्येवमर्थम्। असति हि तस्मिन् यदा दत्वं न भवति, तदा यथाप्राप्तं चत्वं न स्यात्।।

75. दश्च। (8.2.75)
चकारेण `दः' (8.2.72) इत्यनुकृष्यते, तेनोत्तरत्र तस्यानुवृत्तिर्न भवति। `अभिनस्त्वम्' इति। लङ्, रुधारित्वात् श्नम्।।

76. र्वोरुपधाया दीर्घ इकः। (8.2.76)
पदस्येत्येव, धातोरिति च, तदुभयमिह समानाधिकरणं रेफवकाराभ्यां विशेष्यते, विशे णेन च तदन्तविधिर्भवतीत्याह--`रेफवकारान्तस्य' इति। वकारस्योदाहरणं कसमान्न प्रदर्शितम्? इत्याह--`दकारग्रहणमुतरार्थम्' इति। तेन वकारान्तस्योदाहरणं न प्रदर्शितमिति भावः। एतदर्थं तु तन्न भवति; वकारान्तस्य पदस्य धातोरसम्भवात्। `अबिभः' इति। भृञो लङ्, तिप्, गुणः, रपरत्वम्, `जुहोत्यादिभ्यः श्लुः' (2.4.75), द्विर्वचनम्, `उरत्' (7.4.66) इत्यत्त्वम्, `भृञामित्' (7.4.76) इतीत्त्वम्, हल्ङ्यादिलोपः (6.1.68)।।

77. हलि च। (8.2.77)
`दिव्यति, चतुर्यति' इति। दिव् चतुर्--इत्युभयं प्रातिपदिकमत्र, तेन न भवति। `स्मेर्यते' इति। भावे यक्, `गुणोर्त्तिसंयोगाद्योः' (7.4.29) इति गुणः। `भव्यम्' इति। `अचो यत्' (3.1.97) गुणः; `धातोस्तन्निमित्तस्यैव' (6.1.80) इत्यवादेशः।।

78. उपधायाञ्च। (8.2.78)
पूर्वं रेफवकारान्तस्य घातोर्दीर्घत्वविधानादरेफवकारान्तार्थमिदम्। उपधायामिति सुब्व्यत्ययेन षष्ठीद्विवचनस्य स्थाने सप्तम्येकवचनम्। `उपधाभूतौ' इति। उपधात्वं प्राप्तावित्यर्थः। अलोऽन्त्यात् पूर्वौ इति यावत्। `हल्परो' इति। हल् पर आभ्यामिति बहुव्रीहिः। स पुनर्हल् धात्ववयव एव वेदितव्यः। यत्र हि प्रत्ययावयवो रेफवकाराभ्यां हल्परस्तत्र पूर्वेणैव सिद्धः। `हूर्छिता' इति। `हुर्च्छ कौटिल्ये' (धा.पा.211)। `मूर्च्छिता' इति। `मुर्च्छा मोहसमुच्छ्राययोः'

(धा.पा.212)। ननु च `अचो रहाभ्यां द्वे' (8.4.46) इति द्विर्वचने कृते रेफोऽत्रोपधा न भवति? नैतदस्ति; दीर्घत्वे कर्त्तव्ये द्विर्वचनस्यासिद्धत्वाच्छकारोऽत्रैक एव हलिति भवत्येवोपधात्वं रेफस्य।
`चिरिणोति, जिरिणोति' इति। `रि क्षि चिरि जिरि दाश दृ हिंसायाम्' (धा.पा.1275-1280) स्वादित्वात्श्नुः'।
इह `री गतौ' (धा.पा.1500), `धी गतिप्रजनादिषु' (धा.पा.1048)-एताभ्यां लिट्, अतुसि, उसि च, `एरनेकाचः' (6.4.82) इति यणादेशः; तस्य स्थानिवद्भावाद्द्विर्वचने कृते `रिर्यतुः, रिर्युः; विव्यतुः विव्यु' इति स्थितेऽभ्यासेकारस्य दीर्घस्य प्राप्नोति, हल्परयो रेफवकारयोरुपधाभूतत्वात्। एतत्कस्मान्न भवति? इत्याह--`रिर्यतुः, रिर्यः' इत्यादि। स्थानिवद्भावः `अचः परस्मिन्' (1.1.57) इत्यादिना। ननु च `न पदान्त' (1.1.58) इत्यादिना दीर्घविधौ प्रतिषिध्यते स्थानिवद्भावः, तत् कुतस्तस्येह सम्भवः? नैतदस्ति; परिगणनं हि तत्र क्रियते--`स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत्' (का.वृ.1.1.58) इतिः `असिद्धत्वाद्वा' इत्यादि। अत्र बहिरङ्गत्वं यणादेशस्य; अङ्गाधिकारे विधीयमानस्य प्रत्ययाश्रितत्वात्। दीर्घत्वस्य त्वन्तरङ्गत्वम्; प्रकृत्याश्रयत्वात्। `असिद्धञ्च बहिरङ्गमन्तरङ्गे' (व्या.प.42) इति दीर्घत्वे कर्त्तव्ये यणादेश स्यासिद्धत्वाद्रेफवकारौ हल्परौ न भवतिः, तत्कुतो दीर्घत्वस्य प्राप्तिः।
इह तर्हि चतुर्यितेति दीर्घत्वं कस्मान्न भवति, अत्र हि `चतुर्य' इत्यस्य क्यजन्तस्य धातोस्तृचि परतः `अतो लोपः' (6.4.48) इत्यकारलोपे कृत उपधाभूतो रेफो हल्परो भवतीत्यस्ति दीर्घत्वस्य प्राप्तिः, इत्याह--`चतुर्यितेत्यत्रापि' इत्यादि। बहिरङ्गत्वमतो लोपस्यार्थधातुकाश्रय स्यात्। दीर्घस्यान्तरङ्गत्वं पूर्ववत्। तर्हि प्रतिदीव्नेत्यत्रापि दीर्घत्वं न स्यात्। यथैव हि चतुर्यितेत्यत्र धातोरुपधा रेफो न भवति, तथा प्रतिदीव्नेत्यत्रापि वकारः। तथा हि--दीव्येत्येतावान् धातुः, नकारस्तु प्रत्यय सम्बन्धी; न च दिवेर्धातोर्वकर उपधाभूतः, किं तर्हि? अन्तभूतः? इत्यत आह--`प्रतिदीव्नेत्यत्र' इत्यादि। प्रतिपूर्वाद्दिवः `कनिन् युवुषितक्षि' (द.उ.6.51) इत्यादिना कविन्, `अल्लोपोऽनः' (6.4.134) इत्यकारलोपः। ननु च `अचः परस्मिन् पूर्वविधौ' (1.1.57) इत्यल्लोपस्य स्थाविवद्भावाद्धलि परतो वकारान्तोऽत्र धातुर्न भवति। तत्कथं `हलि च' (8.2.77) इति दीर्घत्वम्? इत्याह--`दीर्घविधौ' इत्यादि।
स्थानिवद्भावप्रतिषेधस्तु `न पदान्त' (1.1.58) इत्यादिना। नन्वेवमपि बहिरङ्गलक्षणसिद्धत्वादल्लोपस्य नैवात्र हलि परतो वकारान्तो धातुरुपपद्यते? इत्याह--`असिद्धं बहिरङ्गम्' इत्यादि। अनाश्रयणस्य तु हेतुरनित्यत्वमस्याः परिभाषायाः। अनित्यत्वं तु `नलोपः सुप्स्वर' (8.2.2) इत्यादौ सूत्रे तुग्विधिग्रहणाज्ज्ञापितम्।
अथ जिव्रिः, किर्योरित्यादौ `हलि च' (8.2.77) इति दीर्घत्वं कस्मान्न भवति जिव्रिशब्दोऽप्ययमे वं व्युत्पाद्यते, `जीर्यतेः क्रिन् रश्च वः' (द.उ.1-80) इति। `जृष् [`जृष'-धा.पा.] झृष् [`झृष'--धा.पा.] वयोहानौ' (धा.पा.1130,1131) इत्यस्मात् क्रिन्प्रत्ययः; `ऋत इद्धातोः' (7.1.100) इतीत्त्वम्, रपरत्वम्, रेफस्य वकार आदेशः--इत्येवं व्युत्पत्तौ जिव्रिरित्येतस्य वकारान्तस्य धातो रेफे हलि परतः `हलि च' (8.2.77) इत्यस्ति दीर्घत्वस्य प्राप्तिः।
किरिः गिरिरित्येवमादीनामपि शब्दानामेवं व्युत्पत्तिः क्रियते। `अच इः' (द.उ. 1-67) इत्यत इप्रत्ययेऽनुवर्त्तमाने `भुजेः किच्च' (द.उ. 1-71) इति च `कृगृशृपृकुटिभिदिच्छिदिभ्यश्च' (द.उ. 1-72) इतिकिरतिप्रभृतिभ्यो धातुभ्य इप्रत्ययं विधाय व्युत्पाद्यन्त एते। एवं हि व्युत्पत्तावोसि यणादेशे कृते यकारे हलि परतो रेफान्तानां किरिप्रभृतीनां `हलि च' (8.2.77) इति दीर्घत्वं प्राप्नोति? इत्यत आह--`उणादयोऽव्युत्पन्नानि' इत्यादि। ननु च किर्योः, गिर्योरित्यत्र व्युत्पत्तिपक्षेऽपि दीर्घत्वं न प्रसजति, न ह्यत्र हलि परतः किरतिगिरती रेफान्तौ, दीर्घत्वे कर्त्तव्ये यणादेशस्य स्थानिवद्भावात् स्वराविलोपेषु हि लोपाजादेशो न स्थानिवत्, अन्यस्तु स्थानिवदेव? सत्यमेतत्; अभ्युपगम्येवं परिहार उक्तः। एवं मन्यते--भवत्यविशेषेण स्थानिवद्भावप्रतिषेधः, तथापि नैवात्र दीर्घत्वं प्रसज्येत; अव्युत्पन्नत्वादुणादीनामिति। यद्युणादयोऽव्युत्पन्नानि प्रातिपदिकानीति, न हि तत्रैव सूत्रे व्युत्पत्तिपक्षश्चाश्रयितुं युक्तः, योऽपि `आतो मनिन्क्वनिब्वनियश्च' (3.2.74) इति `अन्येभ्योऽपि दृश्यन्ते' (3.2 75) इति क्वनिप्प्रत्ययान्त प्रतिदिवञ्शब्दं व्युत्पादयेत तस्यापि नैव दीर्घत्वं सिध्यति, `लोपोव्योर्वलि' (6.1.66) इति वकारलोपे कृते धातोरवकारान्तत्वादिति? कर्त्तव्योऽत्र यत्नः। एव क्रियते-`हलि च' (8.2.77) इत्यत्र `व्याक्तः पदार्थः' इत्येतद्दर्शनमाश्रीयते। अस्मिंश्च दर्शने प्रतिलक्ष्यं लक्षणभेदो भवतीति यावन्ति लक्ष्याणि तावन्त्येव लक्षणाम्युपदिशन्ति, तत्र भिन्नेषु लक्ष्यानुरोधात् क्वचित् प्रतिदीव्नेत्यादौ व्युत्पत्तिपक्ष आश्रीयते; क्वचित् पुनर्जिव्रिः, किर्योः, गिर्योरित्यादावव्युत्पत्तिपक्ष इति।
चकारो हलोत्यनुकर्षणार्थः।।

79. न भकुर्छुराम्। (8.2.79)
`हालि च' (8.2.70) इति दीर्घत्वे प्राप्ते प्रतिषेधोऽयमारभ्यते। `धुर्यः' इति। `धुरं वहतीति `धुरी यड्ढकौ' (4.4.77) इति यत्। `कुर्यात्' इति। करोतेलिङ्, `तनादिकृञ्भ्य उ' (3.1.79), धातोर्गुणः, रपरत्वम्, `अत उत् सार्वधातुके' (6.4.110) इत्युत्त्वम्, `ये च' (6.4.109) इत्युकारलोपः। `कुर्यात्' इति। आशिषि लिङ्। करोतेर्विकरणेन निर्देशश्चिकीर्षतीत्यत्र प्रतिषेधो मा भूवित्येवमर्थः।।

80. अदसोऽसेर्दादु दो मः। (8.2.80)
`असेः' इतीकार उच्चारणार्थः। अविद्यमानः सकारो यस्य स तथोक्तः। यश्चैवंविधः स सकारान्तो न भवतीत्याह--`असकारान्तस्य' इत्यादि। `अमुम्' इत्यादि। अदसोऽमादिषु त्यदाद्यत्वे `अतो गुणे' (6.1.97) पररूपत्वे च कृतेऽसि (6.1.107) पूर्वत्वम्। औटि, `वद्धिरेचि' (6.1.88) इति वद्धिः। शसि प्रथमयोः पूर्वसवर्णदीर्घत्वम्। अत्र स्थानेऽन्तरतमपरिभाषया (1.1.50) एकवचने मात्रिकस्य मात्रिक एव भवति, अन्यत्र द्विमात्रिकस्य द्विमात्रिकः ननु च

मात्रिकः सूत्र उपात्तः, तत्कथं द्विमात्रिको लभ्यते? `अणुदित् सवर्णस्य चाप्रत्ययः' (1.1.69) इति सवरणग्रहणादिति चेत्? न; `भाव्यमानोऽण् सवर्णान् न गृह्णाति' (व्या.प.35) इति प्रतिषेधादित्यत आह--`भाव्यमानोऽपि' इत्यादि। एतच्च `ऋत उत्' (6.1.111) इत्यत्र तपरकरणेन ज्ञापितम्।
`अदस्यति' इति। `सुप क्षात्मनः क्यच्' (3.1.8)।

`अदसोऽनोस्र इति वक्तव्यम्' इति। ओकारसकाररेफाणां द्वन्द्वः, अविद्यमान्ना ओस्रोऽस्येति बहुव्रीहिः। अदोऽत्रेति नपुंसकत्वात् `स्वमोर्नपुंसकाप्त' (7.1.23) इति सोर्लुक्, सकारस्य रुत्वे `अतो रोरप्लुतादप्लुते' (6.1.113) इति रोरुत्वम्, `आद्गुणः' (6.1.87), `एङः पदान्तादति' (6.1.109) इति परपूर्वत्वम्। इदमीकारप्रतिषेधस्य प्रत्युदाहरणम्। `अदः' इति। एतत्तु रेफप्रतिषेधस्य। रुत्वे कृते विसर्जनीयः।
`तदर्थम्' इति। सकाररेफयोरपि प्रतिषेधो यथा स्यादित्येवमर्थम्। `अः सेर्यस्य' इति। सकार [नास्ति-का.मु.पाठे] उच्चारणार्थः। अकारः सकारस्य यस्येत्यर्थः।
`कथम्' इत्यादि। यदाऽदसोऽद्र्यादेशः क्रियते, तदेदमदसोऽद्रेश्च पृथङ्मुत्वं भवति? उतान्त्यसदेशस्य? आहोस्विदद्र्यादेशविषये न भवत्येव? इत्येतत् पृच्छति।
`अदसोऽद्रः' इत्यादि। मश्च उश्च मुः, तस्य भावो मुत्वम्। अदसोऽद्रेश्चोभयोरपि केचिन्मुत्वमिच्छन्तीत्यर्थः। विनापि हि चकारेण तदर्थो गम्यते। तद्यथा--अहरहर्नयमानो गामश्वं पुरुषं पशुमित्यादौ वाक्ये। कथम्? यथेत्याह--`लत्ववत' इति। यथा चलीक्लृप्यत इत्यत्र `कृपो रो लः' (8.2.18) इति धातो रेफस्य रीशब्दस्य चोभयोरपि लत्वमिच्छन्ति, तद्वददशः, अद्रेश्च मुत्वम्। `केचिदन्त्यसदेशस्य' इति। अद्र्यादेश इकारान्तः, तस्य केचिदुत्वमिच्छन्ति। स पुनरद्र्यादेशसम्भन्धी दकारो रेफश्च। `नेत्येके' इति। अपरे तु--यदाऽदसोऽद्र्यादेशः क्रियते तदा न भवितव्यमेव मुत्वेनेतीच्छन्ति। अत्रैव कारणमाह--`असेर्हि दृश्यते' इति। अः सेर्यस्य सोऽयमसिः, तस्यासेः। हिशब्दो यस्यादर्थे। यस्मात् सकारस्य स्थाने यस्यादसोऽकारो भवति तस्य पण्डितैर्मुत्वं दृश्यते। न च कृताद्र्यादेशस्यादसः सकारस्य स्थानेऽत्वं भवति; विभक्तेः परहस्य निमित्तस्यानावात्। तस्मात् न तस्य मुत्वेन भवितव्यमिति।
`यैः' इत्यादिना श्लोकस्य पूर्वार्धं व्याचष्टे। असेरति सकारस्य प्रतिषेधः क्रियते-नास्य सिर्विद्यत इत्येवं व्याचक्षाणैः। `उभयोरपि' इति। अदसः, अद्रेश्च।
`अमुमुयङ्' इत्यादि। अदोञ्चतीति ऋत्विगित्यादिना (32.59) सूत्रेणाञ्चतेः क्विन्, `अनिदिताम्' (6.4.24) इति नलोपः, उपपदसमासः, `उगिदचाम्' (7.1.70) इति नुम्, हल्ङ्यादि (6.1.68)संयोगान्त(8.2.23) लोपौ। एकवचने `क्विन्प्रत्ययस्य कुः' (8.2.62) इति कुत्वम्--नकारस्य ङ्कारः। अन्यत्र `न श्चापदान्तस्य झलि' (8.3.24) इत्यनुस्वारः, `अनुस्वारस्य यपि परसवर्णः' (8.4.58) इति परसवर्णो ञकारः, [`ङकारः'--का.मु.पाठः] `आसर्वनाम्नः' (6.3.91) इत्यतः `सर्वनाम्नः' इत्यमुवर्त्तमाने `विष्वग्देवयीश्च टेरद्र्यञ्चतौ वप्रत्यये' (6.3.92) इत्यदः शब्दस्य टेरद्र्यादेशः, पूर्वस्माद्दकारादुत्तरस्योत्वम्, दकारस्य मत्वम्, द्वितीयस्मादपि दकाराद्रफस्योत्वम्, दकरस्य मत्वम्--अमुमुयङ्, अमुमुयञ्चाविति भवति। `यथा' इत्यादिना लत्ववदित्यस्यार्थमाचष्टे। `चलीक्लृप्यते' इति। `कृपू सामर्थ्ये' (धा.पा.762)। अत्यन्तं कल्पत इति यङ्, द्विर्वचनम्, `उरत्' (7.4.66) इत्यत्त्वम्, `हलादिः शेषः' (7.4.60), `रीगृदपधस्य च' (7.4.90) इति रीक्, `कुहोश्चुः' (7.4.62) इति चुत्वम्, `कुपो रो लः' (8.2.18) इत्युभयोरपि लत्वम्; `अनन्त्यविकारेऽन्त्यसदेशस्य' (व्या.प.63) इति परिभाषानाश्रयणात्।
`ये तु' इत्यादिना `केचिदन्त्यसदेशस्य' इत्यस्यार्थ कथयन्ति। `अदमुयङ्, अदमुयञ्चौ' इति। अत्राद्रिदकारादेरुत्तरस्योत्वम्, अद्रिदकारस्यैव च मत्वम्। शेषं पूर्ववत्।
`येषां तु'[`तेषां तु'--प्रा.मु.पाठे] इत्यादिना `एके' इत्यादेर्व्याख्यानम्। केषां पुनस्त्यदाद्यत्वविषय एव मुत्वेन भवितव्यम्? ये `अः सेयंस्य सोऽयमसिस्तस्यासेः' इत्येवं वर्णयन्ति तेषाम्। `अत्र' इति। अद्र्यादेशविषये नैव भवितव्यमिति;त्यदाद्यत्वाभावात्। अदद्र्यङ, अदद्र्याञ्चौ, अदद्र्यञ्चः' इति। पूर्ववत्। मुभावस्तु विशेषः।
`अमुया, अमुयोः' इति। अदसस्तृतीयैकवचन ओसि च परतस्त्यदाद्यत्वम्, (7.2.102) टाप्, एकादेशः, तस्य `अन्तादिवच्च' (6.1.85) इति पूर्वं प्रत्यन्तवद्भावो दादुदोग्रहणेनैव ग्रहणम्। अत्र यदि दादिति नोच्येत तदा `आङि चापः' (7.3.105), `ओसि च' (7.3.104) इति ङित्येत्वे कृते तस्य चायादेशेऽलोन्त्यपरिभाषया (1.1.52) यकारस्यैवोत्वं स्यात्। दादिति वचनान्न भवति।
उदिति तपरकरणं मुखसुखार्थम्।।

81. एत ईद्बहुवचने। (8.2.81)
`बहुवचन इत्यर्थविर्देशोऽयम्' इति। अन्वर्थनिर्देश इत्यर्थः। एतदुक्तं भवति--नेदं पारिभाषिकस्य बहुवचनस्य ग्रहणम्, किं तर्हि? अन्वर्थस्य ग्रहणम्--बहुनामर्थानामुक्तिः बहुवचनमिति। किं कारणमेवं व्याख्यातम्? इत्याह--`पारिभाषिकस्य हि' इत्यादि। यदि पारिभाषिकस्य बहुवचनस्येदं ग्रहणं स्यात्, अमी इत्यत्र न स्यात्। न ह्यत्रैकारात् परं पारिभाषिकं बहुवचनमस्ति। अन्वर्थग्रहणे त्वत्रापि बहुनामर्यानामभिधानमस्तीति सिध्यति। अन्वर्थग्रहणं तु व्याप्तिन्यायाल्लभ्यते--एव इति एकारस्य स्थानित्त्वं यथा विज्ञायेत। `एः' इत्युच्यमाने, इकारस्यापि स्थानित्वमाशङ्क्येत। किञ्च स्यात्? अद्र्यादेशे कृते तदवयव स्येकारस्य यणादेशो बाधितः स्यात्।
ईदिति तकारो मुखसुखार्थः।।

82. वाक्यस्य टेः प्लुत उदात्तः। (8.2.82)

`वाक्यग्रहणम्' इत्यादि। असति हि वाक्यग्रहणे वाक्ये यावन्ति पदानि तेषां सर्वेषामेव प्लुतः प्रसज्येत। वाक्यग्रहणे त्वन्त्यस्यैव भविष्यति, नानन्त्यस्य। अन्त्यस्यैव हि पदस्य यष्टिः स वाक्यटिर्भवति, न त्वितरस्य। तस्मादनन्त्यस्य पदस्य प्लुतौ मा भूत्, अन्त्यस्यैव यता स्यादित्येवमर्थम्। अनन्त्यस्य कस्मान्न भवति? अनिष्टत्वात्। न हि पदाधिकारस्य निवृत्तिरिष्यते, तथा हि प्रागुक्तम्--पदाधिकारः प्रागपदान्ताधिकारादिति। असत्यत्वाच्च; न हि वाक्यग्रहणेन वाक्ये यावन्ति पदान्ति तेषां सर्वेषाम्। एक एव हि वाक्यस्य टिः, स नियोगतः पदस्यापि भवति, अतो न युक्ता वाक्यस्य पदाधिकारनिवृत्त्यर्थता। अथ टिग्रहणं किमर्थम्, यावताऽलोऽन्त्यपरिभाषयैव (1.1.52) आयुष्मानेधि देवदत्त3 इत्यत्र टेः प्लुतो भविष्यति? इत्यत्र आह--`टिग्रहणम्' इत्यादि। असति हि टिग्रहणे यथा `ह्रस्वो नपुंसके प्रातिपदिकस्य' (1.2.47) इति ह्रस्वग्रहणेघ समुर्त्थापिते `अचः' (1.2.28) इत्येतस्मिन्नचा प्रातिपदिके विशेषिते तस्याजन्तस्यैव ह्रस्वत्वं भवति, नानजन्तस्य--सुवाग् ब्राह्मणकुलमिति; तथेहापि प्लुतग्रहणेन `अचः' इत्येतस्मिन्नुपस्थापिते सत्यचा वाक्ये विशेषितेऽजन्तस्यैव प्लुतः स्यात्, न व्यञ्जनान्तस्य। टिग्रहणे तु सति टिसंज्ञकेनाज्विशेष्यते, न त्वचा टिसंज्ञकः। यदि ह्यचा टिसज्ञको विशेष्येत, ततोऽजन्तो यष्टिस्तस्य प्लुतः स्यात्; तथा चानर्थकं हि टिग्रहणं स्यत्। विनापि तेनाचा वाक्ये विशेषिते तस्याजन्तस्य प्लुतो भवन्नलोऽन्त्यपरिभाषया (1.1.52)ऽन्त्यस्याचः सिध्यति। तस्माट्टिग्रहणस्य नानर्थक्यमिति। टिसंज्ञकेनाज्विशेष,यते--टिसंज्ञको योऽजिति। एवं च सति व्यञ्जनस्यापि टेर्योऽच् तस्यापि प्लुतः सिध्यति। `अग्निचि3त्त' इति। अव्यञ्जनान्तस्यापि व्यपदेशिवद्भावेन--देवदत्त3 इति। तस्माद्व्यञ्जनान्तस्यापि टेरचः प्लुतो यथा स्यादित्येवमर्थं टिग्रहणं कृतम्।

उदात्तग्रहणं तु स्वरान्तरनिवृत्त्यर्थम्, तच्चानन्तोदात्तं प्रयोजयति; योह्यन्तोदात्तस्तत्र स्थानिवद्भावादेवान्चोदात्तो भवति।।

83. प्रत्यभिवादेऽशूद्रे। (8.2.83)

`यदभिवाद्यमानो गुरुः' इत्यादि। अत्र सामान्योपक्रमेण विशेषस्यानभिधानाद् यदिति नपुंसकलिङ्गेन निर्देशः। `आयुष्मानेधि देवदत्त3' इति। इदमत्रोदाहरणम्; प्रत्यभिवादवाक्यत्वात्। अत्र `अभिवादये देवदत्तोऽहम्' इत्येतत्तु गुरोरभिवाद्यमानतां दर्शयितुमुपन्यस्तम्। अभिवाद्यमानो गुरुर्यामाशिषं प्रयुङ्क्ते स प्रत्यभिवादः। तत्रावश्यं गुरोरभिवाद्यमानता दर्शयितव्या; अन्यथा प्रत्यभिवादो न गम्येत। `एधि' इति। भवेत्यर्थः। `अस भुवि' (धा.पा.1065), लोट्, मध्यमपुरुषैकवचनम्, `सेर्ह्यपिच्च' (3.4.87), ध्वसोरेद्धावभ्यासलोपश्च' (6.4.119) इत्येत्त्वम्, `श्नसोरल्लोपः' (6.4.111) इत्यकारलोपः, `हुझल्भ्यो हेर्धिः' (6.4.101) इति धिरादेशः।

`वक्तव्यः' इति। व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्--`सिपि धातो रुर्वा' (8.2.74) इत्यतो मण्डूकप्लुतिन्यायेन वेत्यनुवर्त्तते, सा च व्यवस्थितविभाषा, तेन स्त्रियां न भविष्यतीति।

`असूयकेऽपि' इति। असूयतीत्यसूयकः। यो गुरुमसाध्व्या प्रवृत्त्या सामर्ष करोति स उच्यतेऽसूयक इति। `तस्मिन्' इत्यादिना प्रतिषेध इष्यमाणोऽपि न वक्तव्य इति दर्शयति। यदा ह्यसावभिवादयिताऽसूयकत्वेन न निर्ज्ञायते, तदा तेनाभिवाद्यो गुरुः प्रत्यभिवादने तस्य प्लुतं करोत्येव। यदा तु `असूयकोऽयं मां विहेडयितुकामः' इत्येवं विज्ञातो भवति, तदात्र प्रत्यभिवादना नास्त्येवेति किं प्रतिषेधेन! कथं पुनर्ज्ञायते--तत्रासूयकत्वेन निर्ज्ञाते प्रत्यभिवादो नास्ति? इत्याह--`तथा च' इत्यादि। केनाप्यविनीतेनोपगम्याविधिनाभिप्रायेणाभिवादयेऽयं भोः स्थालीत्येवमभिवादिते गुरुस्तस्यासूयकत्वमज्ञात्वा स्थालिञ्शब्दोऽयमस्य संज्ञेति मत्वा प्रत्यभिवादयन् प्लुतं प्रयुक्तवान्--`आयुष्मानेधि स्थालि3न्' इति। अथ सोऽविनीत उक्तवान्--नैष मम संज्ञा, मया दण्डिन्यायो विवक्षितः। ततो गुरुः प्लुतरहितं प्रत्यभिवादनं कृतवान्--`आयुष्मानेधि स्थालिन्निति। पुनः स उक्तवान्--न न मया दण्डिन्यायो विवक्षितः, संज्ञा ममैषेति; अथ स गुरुरसूयकत्वमस्य विज्ञायोनतवान्--`असूयकस्त्वं जाल्म, न त्वं प्रत्यभिवादमर्हसि, भिद्यत्वं वृषल स्थालिन्' इति।

अथाभिवाद्यमानो यदा देवदत्त कुशल्यसि, देवदत्तायुष्मानेधीत्येवं प्रत्यभिवादं प्रयुङ्क्ते तदा कस्मात् प्लुतो न भवति? इत्याह--`अभिवादनवान्ये' इत्यादि। अभिवाद्यतेऽनेनेत्यभिवादनम्, अभिवादनञ्च तद्वाक्यञ्चेत्यभिवादनवाक्यम्। तत्र तावत् सङ्कोर्त्तितं संशब्दितं नाम देवदत्तोऽहमित्येवम्, गोत्रम्--वात्स्योऽहमित्येवम्। यद्यत्र प्रत्यभिवादवाक्यस्यान्ते=अवसाने प्रयुज्यते तत्रायं प्लुत इष्यते। देवदत्त कुशल्यसीत्यादौ तु यदभिवादनवाक्ये सङ्कीर्तितं नाम देवदत्तशब्दः, तत् प्रत्यभिवादनवाक्यस्यादौ प्रयुक्तम्, नावसाने। तस्मात् प्लुतो न भवति। कुतः पुनरेतल्लभ्यते? वेत्यनुवृत्तेः, व्यवस्थितविभाषाविज्ञानाच्च, प्राधान्याद्वा। इह हि प्रधाने कार्यसम्प्रत्ययात् प्रधानस्य वाक्यस्यान्ते वर्त्तमानस्य टेः प्लुतेन भवितव्यम्। प्राधान्यञ्च पदस्यार्थद्वारकम्। प्रधानस्यार्थस्य यद्वाचकं पदं तत् प्रधानं [`प्रधाने'--का.मु.पाठः] चार्थोऽभिवादयिता, तदनुग्रहार्थत्वात् प्रत्यभिवादस्य। तथा ह्यभिवादयितुरनुगुहीतार्यं गुरुः प्रत्यभिवादं प्रयुङ्क्ते। तस्मादभिवादयिता संस्कार्यः, कुशलिताऽऽयुष्मत्तादीनि तस्यैव संस्कारकाणि। अतोऽभिवादयिता संस्कार्यत्वात् प्रधानम्, तस्य वाचकं पदं संज्ञाशब्दो गोत्रशब्दश्चेति तस्यैव वाक्यान्ते वर्त्तमानस्य टेः प्लुतो भवति। यद्यपि तिङन्तवाच्योऽर्थः साध्यः, न तु तस्य साध्यत्वमिह प्राधान्येनाश्रितम्, किं तर्हि? संस्कारकत्वमेव, तस्मान्न तस्यापि प्राधान्यम्।

`भोराजन्यविशाम्' इत्यादि। भो इति--स्वरूपग्रहणम्, राजन्य इति--क्षत्रियनाम्नः, विश इति--वैश्यनाम्नः। अत्र भोःशब्दस्याप्राप्ते विभाषा, असंज्ञागोत्रशब्दत्वात्। इतरेषां तु प्राप्ते; संज्ञाशब्दत्वात्।।

84. दूराद्धूते च। (8.2.84)
`दूरात्' इति। आरात्। `दूरान्तिकेभ्यो द्वितीया च' (2.3.35) इति पञ्चमी। ह्वानं हूतम्। भावे निष्ठा।
दूरादित्युच्यते, दूरञ्चानवस्थितम्। यवेवालस्यापहतं प्रति दूरं भवति तदेवोत्साहसम्पन्नं प्रत्यन्तिकम्। एवं हि कश्चित् कञ्चिदाह--य एष पार्श्वतः करकस्तमानयेति। स आह-उत्थाय गृहाण, दूरं गन्तुं न शक्ष्यामीति। अतो दूरस्यानवस्थितत्वान्न ज्ञायते--कस्यामवस्थायां प्लुत्या भवितव्यमिति। अत आह--`दूरम्' इत्यादि। हूतं ह्वानम्। तदपेक्षं यद्दूरं तदिहाश्रीयते। इतिकरणो हेतौ। यस्माद्धूतापेक्षमिह दूरमाक्षीयते तस्मात् प्राकृतात् प्रकृतौ भवात् प्रयत्नाद्यः प्रत्यत्नविशेषः प्राकृतयत्नादधिकस्तस्यिन्नाश्रीयमाणे यत्र शब्दाह्वानं तत् श्रूयते तद्दूरम्। ततो न भवति दूरस्यानवस्थिततत्वमित्वभिप्रायः।
अथेह कथं प्लुतः स्यात्--सक्तून् पिव देवदत्त3 इति? न शब्दमात्रं हूतम्, अपि तु शब्दविशेधः, येन परत आगमने नियुज्यते स शब्दविशेषो हूतम्, न च तदिहास्ति? इत्यत आह--`हूतग्रहणं च' इत्यादि। सम्बोधनं शब्दसाधनं हूतम्। चशब्दस्तस्मादित्यर्थे। तेन तत्साध्यं सम्बोधनं लक्ष्यत इति हूतग्रहणं सम्बोधनमात्रोपलक्षणं वेदितव्यम्। इहायं प्लुतोऽपि दूरात् सम्बोधने विधीयते; एकश्रुतिरपि; `एकश्रुति दूरात् सम्बुद्धौ' (1.2.33) इति; तत्रैवमेकत्र प्राप्नुवतामनेकेषां बाधाविकल्पसमुच्चयानामन्यतमेन भवितव्यम्, अत्र न ज्ञायते--किमेतयोः समुच्चयो भवति? उत विकल्पः? आहोस्विदन्यतरस्य बाधेति? तत्परिज्ञानायाह--`अस्याश्च' [`अस्यां च'--प्रा.मु. न्यासपाठः'] इत्यादि। बाधया तावन्न भवितव्यम्; समानविषयत्वात्। विषयभेदे हि सति बाध्यबाधकभावो भवति, तद्यथा--`कर्मण्यण्'[`तत्तथा'--प्रा.मु.न्यासपाठः] (3.2.1), `आतोऽनुपसर्गे कः' (3.2.3) इति; अत्र ह्येकस्य विशेषो विषयः; अपरस्य सामान्यमित्यस्ति विषयभेदः। अनयोस्तु विशेषो नास्तीत्ययुक्ता [`नास्तीत्युक्ता--का.मु.पाठः] बाधा। विकल्पोऽप्ययुक्तः; असहप्राप्तेः। सहप्राप्तयोर्हि विकल्पो भवति, यथा--तच्यदादीनाम्। न चैकश्रुत्यपेक्ष्येह सहप्राप्तिरस्ति; प्लुतस्यासिद्धत्वात्। तस्मात्पारिशेष्यात् समादेश एव भवति। समावेशः पुनरत्रैकस्मिन् वाक्ये प्रवृत्तिः, न त्वेकस्मिन्नवयवे; दिरुद्धयोरेकस्मिन् प्रवृत्तेरसम्भवात्। वाक्यस्य त्वेनेकावयवात्मकत्वात्। टेरचः प्लृतो भवति। अवशिष्टस्य त्वेकश्रुतिरिति युज्यते समावेशः।।

85. हैहेप्रयोगे हैहयोः। (8.2.85)
पूर्वसूत्रेण प्राधान्याद् हूयमानस्यैव प्लुतो विहितः। प्राधान्यं तु तस्य तदभिमुखीकरणाय वाक्यप्रयोगात्। अतो हैहयोर्न प्राप्नोति, एतदर्थोऽयमारम्भः। अथ पुनर्हैहयोर्ग्रहणं किमर्थम्, यावता विनापि तेन श्रुतत्वात् तयोरेव भविष्यति? इत्याह--`पुनः' [`पुनस्त्वित्यादि'--का.मु.पाठः] इत्यादि। `हैहेप्रयोगे' इत्युच्यमाने `वाक्यस्य टेः प्लुत उदात्तः' (8.2.82) इत्यधिकारादन्त्ययोरेव स्यात्, नानन्त्ययोः; तयोरपि यता स्यादित्येवमर्थं पुनर्हैहेग्रहणम्, हैहेग्रहणे प्रयोगग्रहणं चानर्थकयोरपि यथा स्यात्। तदा चैतावनर्थको यदाऽऽमन्त्रितान्तम्। तेनैवामन्त्रितार्थस्यावगमितत्वादर्थान्तस्य द्योत्यस्याभावात् तावनर्थकौ भवतः। अन्ये त्वाहुः--निपातसमाहारावपि तौ स्तो हन्त हैह इति। तत्रासति प्रयोगग्रहणे तयोर्न स्यात्; लाक्षणिकत्वात्। तस्मात् प्रयोगमात्रे लाक्षणिकयोरपि यथा स्यादित्येवमर्थं प्रयोगग्रहणमिति।।

86. गुरोरनृतोऽनन्त्यस्याप्यैकैकस्य प्राचाम्। (8.2.86)
प्रत्यभिवादादिषु वाक्यस्य टेः प्लुत उदात्तः। स एव तु ऋकारवर्जितस्य गुरोरनन्त्यस्य प्लुत उच्यते। `अव्यस्यापि टेः' इति। अनेनापिशब्दष्टेः तमुच्चयं करोतीति दर्शयति। यदि ह्यपिशब्देन गुरोः समुच्चयः क्रियते, अनन्त्यस्यापि,गुरोरन्त्यस्यापीति, तदानेन गुरावनन्त्ये प्लुतः। लघुरन्त्यः पूर्वेण प्लुत एव। ततश्च द्वयोः प्लुतयोः श्रवणं युगपत् प्रसज्येत। न च `अनुदात्तं पदमेकवर्जम्' (6.1.158) इति वचनान्न भविष्यतीति शक्यं वक्तुम्; तस्मिन् कर्त्तव्ये प्लुतस्यासिद्धत्वात्। यदा टिसंज्ञकोऽपिशब्देन समुच्चीयते तदानेनैव सूत्रेणान्त्यस्य[सूत्रेणानन्त्यस्य--प्रा.मु.पाठः] गुरोरनन्त्यस्य च टेः प्लुतो विधीयते। तत्रैकैकस्येति वचनाद्यथानन्त्यस्य पर्यायो न भवति, तथान्त्यस्यापीति न भवति यौगपद्यप्रसङ्गः।
`एकैकग्रहणम्' इत्यादि। यद्येकैकग्रहणं न क्रियत, तदा पक्षे युगपदेव सर्वेषां प्रसज्येत। तस्मात् पर्यायेण यथा स्यादित्येनमर्थमेकैकग्रहणम्। एतच्च `यथोद्देशं संज्ञापरिभाषम्' (व्या.प.59) इत्याश्रित्य कृतमिति वेदितव्यम्। दर्शनान्तरे `अनुदात्तं पदमेकवर्जम्' (6.1.158) इत्यस्योपस्थाने सति न प्लुतयोर्द्वयोर्यौगपद्यप्रसङ्गः।
अथ प्राचामिति किम; यावतैकैकग्रहणादेव विभाषा सिध्येत्? इत्यत आह--`प्राचाम्' इति। सर्वस्य प्लुतस्येत्यभिप्रायः। अत एवाह--`तदनेन' इत्यादि। अपायहेतुमविमृश्य प्रवृत्तिः=साहसम्।।

87. ओमभ्यादाने। (8.2.87)
`प्रारम्भः' इति। कस्य प्रारम्भे? स्वाध्यायादेः।।

88. ये यज्ञकर्मणि। (8.2.88)
`येज्ञकर्मणि' इति। कर्मशब्दः क्रियावाची। यज्ञक्रियायामित्यर्थः। `ये3 यजामहे' इत्यत्रैवायं प्लुत इष्यत इत्येतच्च `प्राचाम्' इत्यस्यानुवृत्तेः, व्यवस्थितविभाषाविज्ञानाच्च लभ्यत इति वेदितव्यम्।।

89. प्रणवष्टेः। (8.2.89)

`क एष प्रणवो नाम' इति। इह शास्त्रे प्रणवस्यापरिभाषितत्वाल्लोके चाप्रसिद्धत्वात् प्रश्नः। `पादस्य वा' [`पादस्य चेल्यादिना'--प्रा.मु.पाठः] इत्यादिना शास्त्रान्तरपरिमाषया प्रणवस्वरूपं दर्शयति। `वान्त्यमक्षरम्' इति। स्वरोऽत्राक्षरशब्देन विवक्षितः। अन्त्यत्वं पुनस्तस्येतरस्वरापेक्षयः। `उपसंगृह्य' इति। गृहीत्वेत्यर्थः। तदन्त्यमक्षरमादौ यस्याक्षरशेषस्य तत् तदादि। अक्षरञ्च शेषञ्चेति [इति--नास्ति प्रा.मु.पाठे] समाहारे द्वन्द्वः। अक्षरं स्वरः, तस्य शेषः व्यञ्जनम्, तदाचि च तदक्षरशेषञ्च, तदक्षरशेषं यत्रान्त्यात् स्वरात् परं व्यञ्जनं नास्ति तत्र स एव। तदादि तस्य बहुव्रीहेरन्यपदार्थः। व्यपदेशिवद्भावेन तत्रापि तदादिव्यपदेशो भवति। यत्रान्त्यात् स्वरात् परं व्यञ्जनमस्ति तत्र सह स्वरेण व्यञ्जनमन्यपदार्थः; तद्गुणसंविज्ञानस्य बहुव्रीहेरिहाश्रितत्वात्। योऽयमनेन ग्रन्थेन टिसंज्ञक एवोक्तो भवति तद्व्यक्षरशेषस्य ल्थाने यत् त्रिमात्रनोकारम्, ओङ्कारं वा विदवाति तत् प्रणवं कथयन्ति। `जिन्वतो3म्' इति। जयतेः परस्य लट्, तस्य शत्रादेशः, व्यत्ययेन श्नुप्रत्ययः, यणादेशः; जिन्वन्निति स्थितेऽन्शब्दस्यान्त्याक्षरादेः प्रणवः। `सुम्नयो3म्' इति। सुम्नशब्दात् क्यच्, `क्याच्छब्दसि' (3.2.170) इति उप्रत्ययः, `देवसुम्नयोर्यजुषि काठके' (7.4.38) इति आभावः, सुम्नआयुस् इति स्थिते उसित्यस्यान्त्याक्षरादेः प्रणवः। ननु च टिस्थानिकयोरेव त्रिमात्रयोरोकारौकारयोः प्रणव इति परिभाषा कृता। तत्रान्तरेणापि टिग्रहणं टेरेव भविष्यति, तत् किं टिग्रहणेन? इत्यत आह--`टिग्रहणम्' इत्यादि। असत्यत्र टिग्रहणे व्यञ्जनान्तेष्वलोऽन्त्यपरिभाषयाऽ(1.1.52)न्त्यस्यैव स्यात्। अतष्टिग्रहणं क्रियते--सर्वस्यैव टेर्यथा स्यादिति। `अन्त्यस्य मा भूत्' इति। ओङ्कारस्यानेकाल्त्वात् सर्वादेशो भविष्यतीत्योकारार्थं टिग्रहणम्।।

90. याज्यान्तः। (8.2.90)

इहान्तग्रहणं टेरित्येतस्य निवर्त्तकं वा स्यात्? विशेषणं वा? पूर्वस्मिन् पक्षेऽचान्ते विशेषितेऽजन्ताया एव याज्याया प्लुतः स्यात्। इतरस्मिंस्त्वन्तग्रहणमनर्थकम्, न ह्यनन्त्यष्टिः सम्भवति; `अचोऽन्त्यादि टि' (1.1.64) इत्यस्यैव टिशब्दरूपविशषसंज्ञाविधानादित्यभिप्रायेणाह--`अन्तग्रहणं किम्' इति। इतरोऽपि विदिताभिप्रायोऽन्यदेवान्तग्रहणस्य प्रयोजनं दर्शयितुमाह--`याज्या नाम' इत्यादि। गतार्थम्।।

91. ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः। (8.2.91)

श्रौषट्, वौषडिति निपातौ; इतराणि लोण्मध्यमपुरुषैकवचनानि। केचित्तु आवहशब्दोऽपि निपात इत्याहुः। `प्रेष्य' इति। `ईषु गतौ' [दिवादिषु `इष गतौ' इत्येव पठ्यते] (धा.पा.1127), दिवादित्वाच्छ्यन्, उपसर्गाकारेण सह `आद्गुणः' (6.1.87)।
अथेह कस्मान्न भवति--`आवह देवान् यजमानाय' (वा.सं.5.12), `आवह जातवेदः' (आ.श्रौ.सू.1.3.22), `सुयजा यज'? इत्याह--`आवह देवान्' इत्यादि।
आदिग्रहणं वाक्यादेर्मा भूदिति।।

92. अग्नीत्प्रेषणे परस्य च। (8.2.92)

अग्निमिन्त्रे इत्यस्मिन्नर्थेऽग्नीट्=ऋत्विग्विशेषः, तस्य प्रेषणं नियोजनमग्नीत्प्रेषणमित्यर्थः। आदेः सन्निहितत्वात् तदपेक्षयैव परोऽपि ज्ञायत इत्याह--`तस्मादेवादेः' इत्यादि। `अत्रैव' इति। अनन्तरोक्त उदाहरणद्वय एवकारेण यद्व्यवच्छिन्नं तद्दर्शयितुमाह--`अग्नीदग्नीन् विहर बर्हिस्तृणीहि' इति। कथं पुनरेतल्लभ्यते? इत्याह--`तदर्थम्' इत्यादि। यथा च सर्वत्र प्लुतो विभाषा शक्यो विज्ञातुम्, तथा `गुरोरनृतोऽनन्त्यस्य' (8.2.86) इत्यादौ सूत्रे प्रतिपादितम्। यदि तर्हि सर्वत्र प्लुतो विभाषा विज्ञायेत, उत्तरत्र विभाषाग्रहणमनर्थम्? न; प्रपञ्चार्थत्वात्। अथेह कथं प्लुतः--`उद्धर3 उद्धर, अभिहर3 अभिहर' इति; स्वाध्यायकाले ह्ययंप्लुतः, नाग्नीत्प्रेषणे, न चायमादेः, नापि `आदेः परस्य' (1.1.54), किं तर्हि? ततोऽन्यस्यैव? इत्यत आह-देः सन्निहितत्वात् तदपेक्षयैव परोरपि ज्ञायत इत्याह--`तस्मादेवादेः' इत्यादि। `अत्रैव' इति। अनन्तरोक्त उदाहरणद्वय एवकारेण यद्व्यवच्छिन्नं तद्दर्शयितुमाह--`अग्नीदग्नीन् विहर बर्हिस्तृणीहि' इति। कथं पुनरेतल्लभ्यते? इत्याह--`तदर्थम्' इत्यादि। यथा च सर्वत्र प्लुतो विभाषा विज्ञायेत, उत्तरत्र विभाषाग्रहणमनर्थकम्? न; प्रपञ्चार्थत्वात्। अथेह कथं प्लुतः--`उद्धर3 उद्धर, अभिहर3 अभिरह' इति; स्वाध्यायकाले ह्ययं प्लुतः, नाग्नीत्प्रेषणे, न चायमादेः, नापि `आदेः परस्य' (1.1.54), किं तर्हि? ततोऽन्यस्यैव? इत्यत आह--`इह तु' इत्यादि। विस्पष्टार्थम्।।

93. विभाषा पृष्टप्रतिवचने हेः। (8.2.93)

`पृष्टप्रतिवचनम्' इति। पृष्टस्य प्रतिवचनम्=आख्यानं पृष्टप्रतिवचनम्। प्रतिवचनशब्दोऽयं विरुद्धेऽपि वचने प्रवर्त्तते--विरुद्धं वचनं प्रतिवचनमिति, प्रतिशब्दो ह्यत्र विरोधं द्योतयति, यथा--प्रतिमल्लः, प्रतिगज इति; वीप्सायामपि वर्त्तते--वचनं वचनं प्रतीति प्रतिवचनम्, `यथार्थे यदव्ययम्' (2.1.6) इति दीप्सायामव्ययोभावः; समाधानेऽपि वर्त्तते--यदनेनाभिहितं तस्य मया प्रतिवचनं विहिनमिति, समाधिर्विहित इति गम्यते; तत्र `प्रतिवचने' इत्युच्यमाने सर्वत्र प्रसज्येत। तस्मात् प्रतिवचनविशेषार्थं पृष्टग्रहणम्। पृष्टस्य यत् प्रतिवचनम्=अर्थाख्यानं तत्रैव यथा स्यात्, अन्यत्र मा भूदिति।।

94. निगृह्यानुयोगे च। (8.2.94)

`निगृह्य' इति। ल्यबन्तमेतत्। `स्वतात्' इति। स्वावगमात्। `प्राच्यावनम्'[`प्रच्याचनम्'--प्रा.मु.पाठः] इति। अपनयनम्। `आविष्करणम्' इति। प्रकाशनम्। `श्राद्धम्' इति। कर्मविशेषः। `एवमनुयुज्यते' इति। एवमादिष्कृतस्वमतः क्रियत इत्यर्थः। चकारो विभाषेत्यस्यानुकर्षणार्थः। तेनोत्तरविधिर्नित्यो भवति।।

95. आम्रेडितं भर्त्सने। (8.2.95)
`चौर चौर3' इति। `वाक्यादेरामन्त्रितस्य' (8.1.8) इत्यादिना भर्त्सने द्विर्वचनम्। यद्यपि वाक्यग्रहणमेतदन्त्यस्य पदस्य प्लुतनिवृत्त्यर्थम्, तथापीह वचनसामर्थ्यादनन्त्यस्यापि भवति। न हि वाक्यान्ते भर्त्सन आम्रेडितं सम्भवति, वाक्यादेरेव पदस्य भर्त्सने द्विर्वचनविधानात्।
`तदर्थम्' इति। पर्यायेण पूर्वोत्तरयोः पदयोर्यथा स्यादित्येवमर्थम्; द्विरुक्तोपलक्षणार्थञ्च। आम्रेडितस्य भर्त्सनग्रहणाद्विज्ञायते--तद्द्विरुक्तस्य हि यत् परं तदाम्रेडितम्। न च तावता भर्त्सने प्रवृत्तिः सम्भवति; भर्त्सनस्य द्विरुक्तिद्योत्यत्वात्। तस्माद्द्विरुक्तोपलक्षणार्थमाम्रेडितग्रहणं विज्ञायते। तद्द्विरुक्तिश्च पूर्वोत्तरविषयेऽपीति द्वयोरपि प्लुतो भवति। स च पर्यायेण भवति, न यौगपद्येन; भर्त्सनद्योतनफलत्वात् प्लुतेः। अन्यतरप्लुत्यैव च तद्भर्त्सनस्य द्योतितत्वात्।।

96. अङ्गयुक्तं तिङाकाङ्क्षम्। (8.2.96)
`आकाङ्क्षम्' इति। आकाङ्क्षति अपेक्षत इत्याकाङ्क्षम्, पचाद्यच्। `अङ्ग कूज3' इत्यादि। अङ्गकूज 3, अङ्ग व्याहर 3--इत्येतदुभयमपि `इदानीं ज्ञास्यति जाल्म' इत्येतदपेक्षते। `अङ्ग देवदत्त' इत्येतदपि `मिथ्या वदसि' इत्येतत्। `अधीष्व' इत्येतदपि `ओदनं ते दास्यामि' इत्येतत्।
`नैतदपरमाकाङ्क्षति' इति। विवक्षितार्थस्य परिसमाप्तत्वात्।
अथ युक्तग्रहणं किमर्थम्, यावता पदविधित्वादेव योगो विज्ञास्यते। एवं तर्हि युक्तग्रहणं कुर्दन्नेतज्ज्ञापयति--`समर्थः पदविधिः' (2.1.1) इत्येषा परिभाषाऽनित्या। तेनाऽसूर्यम्पश्यानि मुखानीति नञोऽसत्यपि सूर्यशबद्देन सामर्थ्ये समासः सिद्धो भवति।।

97. विचार्यमाणानाम्। (8.2.97)
`प्रमाणेन वस्तुपरीक्षणं विचारः। तेन विषयीक्रियमाणानि विचार्यमाणानि। बहुवचननिर्देशो येषामर्थगत एव विचारो न स्वरूपगतः, तेषामपि यथा स्यादित्येवमर्थः; इतरथा हि येषां स्वरूपगतो विचारस्तेषामेव स्यात्। न हि मुख्ये वाक्ये विचार्यमाणे सत्यर्थद्वारकं गौणं यस्य विचार्यमाणत्वं तस्य ग्रहणं युक्तम्। `गृहा3इ' इति। गृह इत्यत्र एकारः, तस्य `एचोऽप्रगृह्यस्य' (8.2.107) इत्यादिना पूर्वार्थस्याकारः, उत्तरार्धस्य त्विकारः। तस्याकारस्यानेन प्लुते भवति।।

98. पूर्वं तु भाषायाम्। (8.2.98)
पूर्वेणैव सिद्धे नियमार्थमेतत्। तुशब्दस्त्विष्टतोऽवधारणार्थः। असति हि तस्मिन् विपरीतोऽपि नियमो विज्ञायेत--भाषायामेव पूर्वमिति। पूर्वत्वं च प्रयोगापेक्षम्। अहिर्नु3, रज्जुर्नु3--इत्येतयोर्वाक्यायोर्यत् पूर्वं प्रयुज्यते तस्यैव टेः प्लुतो भवति। इह तु भावाग्रहणात् पूर्वयोगाश्छन्दसीति विज्ञायते।।

99. प्रतिश्रवणे च। (8.2.99)
प्रतिश्रुतिः प्रतिश्रवणम्। प्रतिपूर्वाच्छृणोतेर्भावे ल्युट्, `कुगति' (2.2.18) इत्यादिना तत्पुरुषः। प्रतिपूर्वस्य शणोतिर्यदा परानुग्रहो विवक्ष्यते, तदाभ्युपगमे वर्त्तते। अथ त्वविवक्षा परानुग्रहस्य, तदा प्रतिज्ञाने। यदा श्रितिः--श्रवणमिति भावसाधनेन श्रवणशब्देन प्रतिशब्दस्य `लक्षणेनाभिप्रती आभिमुख्ये' (2.1.14) इत्यव्ययीभावः क्रियते, तदा श्रवणाभिमुख्ये श्रवणं प्रति प्रवृत्त इत्यर्थः। तदिह विशेषानभिधानात् सर्वस्मिन् प्रतिश्रवणे वाक्यस्य टेः प्लुतो भवति। `देवदत्त भोः किमात्थ3' इति। एतच्छ्रवणाभिमुख्य उदाहरणम्। `देवतत्त भोः' इत्यामन्त्रितम्। तप्र श्रवणार्थमेवमाह--`किमात्थ3' इति। एकत्र श्रवणमुद्दिश्य प्रवृत्तत्वादभिमुखं भवति। अभ्युपगमे तूदाहरणम्--`गां मे देहि भोः, अहं ते ददामि3' इति। प्रतिज्ञाने--`नित्यः शब्दो भवितुमर्मति' इति। चकारो भाषायामित्यनुकर्षणार्थः।।

100. अनुदात्तं प्रश्नान्ताभिपूजितयोः। (8.2.100)
अगम3' इति। गमेर्लुङ् पुवदिसूत्रेण (3.1.55) लृदित्त्वादङ्, सिप्।

`अग्निभूता3इ' इति, `पटा3उ' इति। सम्बुद्धौ परतः `ह्रस्वस्य गुणः' (7.3.108) इति गुणः, `एचोऽप्रगृह्यस्य' (8.2.107) इत्यादिनाऽकारः, इदुतौ च। उदाहरणवाक्ये पूर्वपदानामेतेनैव प्लुतः, कृत इति गृहीत्वा यश्चोदयेत्--अथ कथमिहानन्त्यस्यापि प्लुतो भवति, यावता वाक्यस्य टेरित्यनुवर्त्तते इति? तं प्रत्याह--`अग्निभूते, पटो इत्येतयोः' इत्यादि।।

101. चिदिति चोपमार्थे प्रयुज्यमाने। (8.2.101)

`चिदिति' इति। इतिकरणः प्रयुज्यमान इत्येतच्छब्दस्य विशेषणमित्यस्यार्थस्य द्योतनाव। असति ह्येतदर्थं इतिकरणे ह्युपमार्थेऽन्यस्मिन् प्रयुज्यमाने चिच्छब्दः प्लवत इति विज्ञायेत। तत्प्रज्यमानतयात्र तस्मिन् विशेषिते वाक्यस्य टेः प्लतः सिद्धो भवति।
`कतथञ्चिदाहः' इति। अत्र कृच्छ्रे चिच्छब्दो वर्त्तते। `अग्निर्माणवको भायात्' इति। अग्निरिव माणवको दीप्येतेत्यर्थः अस्तीहोपमार्थः, तथापि चिच्छब्दस्य प्रयोगो नास्तीति न प्लुतो भवति। असति तु प्रयुज्यमानग्रहणे इहोपमानगतौ सत्यां यदप्यन्येषामपि सर्वेषामुपमानार्थानां प्रयोगो गम्यते, तथापि योऽत्र चिच्छब्दस्य प्रयोगस्तदाश्रयः प्लुतः स्यादेव। चकारोस्यैव प्लुतस्य समुच्चयार्थः। समुच्चयश्च भेदाधिष्ठान इति प्लुतानन्तरमेवेदमाख्यातं भवति; अन्यथा पूर्वध्वेव प्लुतनिमित्तेष्वेतस्मिन् विषयेऽनुदात्तत्वमात्रं विधीयत इति विज्ञायेत।।

102. उपरिस्विदासीदति च। (8.2.102)
इतिकरणः कार्यिणो निर्देशार्थः। कार्यं हि विधातुमवश्यं षष्ठ्यासौ निर्देष्टव्यः। इतिकरणेन वेति वार्थः प्रत्यवमुश्यते। शब्दप्रधानस्त्विहोपरिस्विदादिशब्दः कार्य इष्यत इतीतिकरणेन निर्दिष्टः प्लुतो यथा विज्ञायेत। `अधःस्विदासीदित्यत्र' इत्यादि। अत्राधःस्विदासीत्, उतोपरिस्विदासीवित्येतद्विचार्यते; तत्र पूर्वस्मिन् वाक्ये `विचार्यमाणानाम्' (8.2.97) इत्यादिनोदात्तः प्लुतः, इतरस्मिंस्त्वनेनानुदात्तः, तस्यैवापवादः।
चकारस्य पूर्ववदेव प्रयोजनम्।।

103. स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु। (8.2.103)
असूयादिशब्दानां `वाक्यादेरामन्त्रित' (8.1.8) इत्यादौ सूत्रेऽयं आख्यातः। `माणवक3 माणवक' इत्यादौ द्विर्वचनं तेनैव सूत्रेण वेदितव्यम्।
`वावचनं कर्त्तव्यम्' इति। वेत्येतद्विकल्पोपलक्षणम्। वचनं व्याख्यानमित्यर्थः। अत्रैतदुक्तं भवति--विकल्पव्याख्यानं कर्त्तव्यमिति। तत्रेदं व्याख्यानम्--`विभाषा पृष्टप्रतितिवचने हेः' (8.2.93) इत्यतो मण्डूकप्लुतिन्यायेन विभाषाग्रहणनुवर्त्तते, तेन विकल्पो भविष्यतीति।।

104. क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्। (8.2.104)
क्षिया=आचारभेदः। इष्टाशंसनम्=आशीः। नियोगः=प्रैषः। आकाङ्क्षत्यपरं तिङन्तमेव। कुत एतत्? आकाङ्क्षाग्रहणादेव। सुबन्ते हि साधनादायिनी तिङन्तस्यावश्यम्भाविनी अपेक्षेति।
`धनं च तात' इति। अत्र लप्सीष्टेत्येतदपेक्षते। `व्याकरणं च' इति। अत्राप्यध्येषीष्टेत्येतत्।
`लुनीहि3' इति। `ई हल्यधोः' (6.4.113) इतीत्वम्। `पिब' इति। पाध्रादिसूत्रेण (7.3.78) पिबादेशः।
`अस्तु' इति। अस्तेर्लोट्, `एरुः' (3.4.86) इत्युत्वम्, अदादित्वाच्छपो लुक्, एतच्चापरं तिङन्तं नापेक्षते। एवं `विहर' इत्येतदपि।।

105. अनन्त्यस्यापि प्रश्नाख्यानयोः। (8.2.105)
`अन्त्यस्य तु' इत्यादि। तुशब्दः पदान्तरेभ्यो विशेषं दर्शयति। अन्त्यस्येत्यनेनापि स्वरितः, `अनुदात्तं प्रश्नान्ताभिपूजितयोः' (8.2.100) इत्यनेनाप्यनुदात्तः; तयोश्चैकत्र यौगपद्यं न सम्भवति। तत्र वचनप्रामाण्यादनुदात्तोऽपि पक्षे न भवति, स्वरितोऽपि।।

106. प्लुतावैच इदुत्तौ। (8.2.106)
`दूराद्धूते च' (8.2.84) इत्येवमाविभिर्लक्षणैः प्लुतो विधीयमानः `अचश्च' (1.2.28) इत्यस्योपस्थाने सति यत्रैव प्लुत उक्तः, तत्र तस्यैवैचः समुदायात्मनः स्यात्, तदवयवयोरेवेष्यते। स च वचनमन्तरेण न सिध्यतीतीदमारभ्यते। तस्य तु प्लुतस्य निमित्तं दूराद्धूतादेवैचः प्रसङ्ग इति पूर्वेण प्रकरणेन प्लुतस्य प्राप्तौ सत्यामित्यर्थः। `ऐ3तिकायन्, औ3पमन्यव' इति। अत्र `गुरोरनृतीः' (8.2.86) इत्यादिना एचः प्लुते प्राप्तेऽनेन तदवयवयोरिदुतोः प्लुतः क्रियते। ऐ3तिकायन, औ3पमन्यवेत्यत्र यद्यैचोरवयवयोरिदुतोः प्लुतः क्रियते, तत्रैकारीकारौ चतुर्मात्रौ सार्द्धत्रिमात्रो वा प्राप्नुतः। इह ह्यौचौ समाहारवर्णौ; मात्राऽवर्णस्य मात्रेवर्णोवर्णयोः। अपरे त्वाहुः--अर्धमात्राऽवर्णस्य, अध्यर्धमात्रेवर्णोवर्णयोरिति। अत्र पर्वस्मिन् दर्शनेऽनेन प्लुते कृते सति इदुतोस्तिस्रो मात्राः, अवर्णस्य चैकमात्रेति चतुमत्रिः प्राप्नोति; इतरत्र तु दर्शनेऽवर्णस्यार्धमात्रा, इदुतीस्तु ता एव तिन्न इति सार्धत्रिमात्रः प्राप्नोतीत्यत आह--`अत्र यदा' इत्यादि।

ननु च त्रिमात्रस्य `प्लुत इति संज्ञा कृता, तत्कथं द्वित्रिमात्रावपि प्लृतौ शक्यावनेन कर्त्तुम्? इत्यत आह--`प्लुताववििति हि' इत्यादिना। एतेन लौकिकस्यात्र प्लुतस्य ग्रहणम्, न पारिभाषिकस्येति दर्शयति। कुतः पुनरेतल्लभ्यते? पुनः प्लुतग्रहणमनर्थकं स्यात्, लोके हि च प्लुतो वृद्धिमानुष्यते। अत एवाह--`इदुत्तौ वृद्धिं गच्छत इत्यर्थः' इति। अनेकार्थत्वाद्धातूनां प्लवतिर्वृद्धावपि वर्त्तते। नन्वेवमप्यनियमेन वृद्धिः प्रसज्यते; इयत्तानभिधानात्; ततश्च यावती वृद्धिः स्यात्, याक्त्या चतुर्मात्रार्वचौ सम्पद्येयातामिति? अत [`अत्राह'--का.मु.पाठः] इत्यादि। प्लुतिर्वृद्धिरित्यर्थः। कथं पुनरयं नियमो लभ्यते? एवं मन्यते--ऐच इति प्लुतापेक्षया षष्ठी। इदुतौ तथा प्लवेते यथा स प्लुत एङोर्भवति; एवञ्चंचोर्भवति यदि तावती वृद्धिर्भवति यावत्या तावैचौ त्रिमात्रौ सम्पद्येते।

अकृतायां हि वृद्धौ ऐच्त्वमेव स्यात्; युक्तपरिमाणत्वादैचाम्, ततश्चैच्सम्बन्धी प्लुतो न स्यादिति।
`अर्धतृतीयमात्रौ' इति। अर्धतृतीयं ययोर्मात्रयोस्तेऽर्धतृतयमात्रे, ते ययोस्तावर्धतृतयमात्रौ। इदं तावद्वार्त्तिककारमतमाश्रित्य समाधानमुक्तम्।
भाष्यकारस्य त्विष्टैव चतुर्मात्रता प्लुतस्येति दर्शयन्नाह--`भाष्ये तूक्तम्' इत्यादि। `तत्कथम्' इति। यदि तत् भाव्यकारस्य मतं तत् केन प्रकारेण सम्पद्येत? इत्येतत् पृच्छति। `सम्परविभागपक्षे' इत्यादिना यथा तत् सम्पद्यते तथा दर्शयति। समप्रविभागपक्षे ह्यनेन सूत्रेणेदुतोस्त्रिमात्रः प्लुतः क्रियते, ततश्च तत्सम्बन्धिन्यो यास्मिस्रो मात्रा या च पूर्वाकारमात्रा ताः सर्वाः समाहृताश्चतस्रो मात्रा भवन्ति। एवञ्च चतुर्मात्रः प्लुतो भवति। अत्र भाष्यकारदर्शने पुनः प्लुतग्रहणं सर्वत्र प्लुतोपसंग्रहार्थम्; अन्यथा स्वरितप्रकरणात् तस्यैव प्रसङ्गे सत्येवेदुतोरिवं प्लुतिः स्यात्। पुनः प्लुतग्रहणे तूदात्तानुदात्तयोरपि भवति। तपरकरणं मुखमुखार्थम्।।

contin...november file

107. एचोऽप्रगृह्यस्यादूरादूधूते पूर्वस्यार्घस्यादुत्तरस्येदुतौ। (8.2.107)
एचः समाहारवर्णाः तत्र एकारस्य ओकारस्य च पूर्वेण प्रकरणेन समुदायस्यैष प्लुतः, एचोः पुनरवयवयोरिदुतोः। अनन्तरसूत्रेणेदमारभ्यते `विषयपरिगणनं कर्त्तव्यम्' इति। एतद्ग्रहणवाक्यम्। अस्य `प्रश्नान्ताभिपूजित' इत्यादिना विवरणं करोति `कर्त्तव्यम्' [वक्तव्यम्--काशिका] इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`अनुदात्तं प्रश्नान्ताभिपूजितयोः' (8.2.100) इत्यादयो योगा इहानुवर्त्तन्ते, तेनान्यत्र न भवति। `यथाविषयम्' इति। यो यस्य विषयो यथाविषयम्--`यथाऽसादृश्ये' (2.1.7) इत्यव्ययीभावः, `प्रश्नान्ताभिपूजितयोः' (8.2.100) अनुदात्तः प्लुतः। प्रश्ने तु `अनन्त्यस्यापि प्रश्नाख्यानयोः' (8.2.105) इति स्वरितः, शेषेपूदात्तः। `इतुतौ पुनरुदात्तावेतौ' इति। `टेरुदात्तः' (8.2.82) इति चाधिकारात्। `विष्णुभूते विष्णुभूते3' इति। अत्र `आम्रेडितं भर्त्सने' (8.2.95) इति प्लुतः।
`आगच्छ भो माणवक विष्णुभूते3' इति। अत्र `दूराद्घते च' (8.2.84) इति। ननु चासत्यपि परिगणने नैव प्लुतः प्राप्नोति; `अदूराद्धते' इति वचनात्, तत्किमर्थमिदं परिगणनस्य प्रत्युदाहरणित्याह--`परिगणने च' इत्यादि। असति परिगणने, अदूराद्धूत [`अदूराद्धूतेन भविष्यतीति' इत्येव--का.मु.पाठः] इत्युच्यते। अस्मिंस्तु सत्येतन्न वक्तव्यम्। परिगणनादेव हि दूराद्धूते न भविष्यतीति। `कर्त्तव्यम्' इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`याज्यान्तः' (8.2.90) इत्यतोऽन्तग्रहणमनुवर्त्तते, तेनान्तस्यैव भविष्यतीति।
`भद्रं करोषि गौः' इति। `अभिपूजिते' (8.2.100) इति प्लुतः। अन्तग्रहणानुवृत्तेरत्रायं विधिर्न भवति, न ह्यत्रैतच्छब्दोऽश्ते, किं तर्हि? व्यञ्जनम्।
`शोभने खल् स्तः खट्वे3' इति। अत्रापि `अभिपूजिते' (8.2.100) इत्येव प्लुतः।
`आमन्त्रिते `च' [`च' नास्ति--काशिका पदमञ्जरी च] इत्यादि। प्लुतश्चासौ विकारश्चेति प्लुतविकारः। प्लुतव्यपदेशस्त्विदुतोः प्लुतसाहचर्याद्वेदितव्यः। इदुतोर्ग्रहणमैचः पूर्वस्योत्तरस्य चैत आदेशा मा भूवन्नित्येवमर्थम्। तपरकरणमिहापि मुखसुखार्थम्।।

108. तयोयर्वावचि संहितायाम्। (8.2.108)
`तयोः' इति। अनन्तरविहिताविदुतौ प्रत्यवमृश्येते।

`अग्ना3याशा, पटा3वाशा' इति। अग्ने आशा, पटो आशा इति स्थिते `प्रद्नान्ताभिपूजितदिचार्यमाणप्रत्यभिवाख्याज्यान्तेषु' (वा.932) इत्येतेषामन्यतमस्मिन् विवक्षिते, एचः पूर्वस्यार्थस्याकारः प्लुतः, उत्तरस्यार्थस्येदुतौ, तयोरनेन य्वौ।
किमर्थं पुनरेतदारभ्यते? एतौ `इको यणचि' (6.1.77) इत्येव सिध्यत? इत्यत आह--`इदुतोरसिद्धत्वात्' इत्यादि। ननु च सिद्धा प्लुतः स्वरसन्धिषु। यणादेशादिषु यदयम् `प्लुतप्रगृह्या अचि' (6.1.125) इति प्लुतस्य प्रकृतिभावमाह; सतो हि कार्येम भवितव्यम्, नासतः; प्लुतस्य चेकः, अतस्तावपि स्वरमन्धिषु सिद्धावेष? इत्यत आह--`अथापि' इत्यादि। यदीदं नोच्येत, तदा `अग्ना3 इ इन्द्रम्, पटा3 उ उदकम् ति स्थिते षाष्ठिकं यणादेशं बाधित्वाऽकः सवर्णे दीर्घत्वं (6.1.101) स्यात्। इह चाग्ना3 इति आशा इति स्थिते `इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' (6.1.127) इति प्रकृतिभावः स्यात्। तस्माद्यथानयोः सिद्धत्वं स्यात्, तथापि दीर्घत्वं शाकलविषिश्च मा भूदित्येवमर्थमिदं वक्तव्यमेव। ननु चान्यदेव तन्निवृत्त्यर्थं यत्नान्तरमस्ति, किं पुनस्तदिति चेत्? उच्यते; `श्को यणचि' (6.1.77) इत्यत्रोपसंख्यायते--`इकः प्लुतपूर्वस्य यणादेशो वक्तव्यः शाकलदीर्घनिवृत्त्यर्थम्' (वा.673) इति। तस्योपसंख्यानमवश्यं कर्त्तव्यम्। य इक् भोःशब्दस्य प्लुतः। अत्र भोःशब्दात् पर इकारो निपातः, न प्लुतविकारः। तस्य यणादेश इष्यते, सोऽसति तस्मिन्नुपसंख्याने न स्यात्। तस्मादवश्यं तत् कर्त्तव्यम्। यस्मिंश्च क्रियमाणे प्लुतविकारयोरपीदुतोस्तेनैव भवितव्यम्, ततो नेदं वक्तव्यमित्यत आह--`तथापि' इत्यादि। अग्ना3 इति आशा इति स्थिते यदि तेन षाष्ठिकोपसंखक्यानेन यणादेश इहोदात्तल्येकारस्य स्थाने क्रियेत, तस्योदात्तयण्स्वरे कर्त्तव्ये सिद्धत्वादाशाशब्दाकारस्यानुदात्तस्य `उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (8.2.4) इति स्वरितः प्रसज्येत। आशाशब्दः `आशाया अदिगाख्या चेत्' (फि.सू.1-18) इत्यन्तोदात्तः। शेषमपि `अनुदात्तम्' (6.1.158) इत्याकारोऽनुदात्तः। तस्मादस्ति स्वरितत्वपरसङ्ग इति तन्निवृत्त्यर्थमिदमुच्यते। `किन्त यणा' इत्यादि। संग्रहश्लोकद्वयम्। किमिति प्रश्ने। तु इति वितर्के। `इको यणचि' (6.1.77) इति यणादेशेन किं न सिद्धं भवतीहाग्ना3 याशेत्येवमादावुदाहरणे यदाचार्य इदुतीर्य्वौ विदधाति! सर्वमेव सिद्धमित्यभिप्रायः। स्यादेतत्--यणादेशो न प्राप्नोति, तस्मिन् कर्त्तव्ये इदुतोरसिद्धत्वादित्यत आह--`तौ च' इत्यादि। तुशब्दो हेतौ। यदा इक् प्लुतपूर्वो भवति तदा तस्य स्यात्। तस्मात् `इकः प्लुतपूर्वस्य यणादेशो वक्तव्यः शाकलदीर्घनिवृत्त्यर्थम्' (वा.673) इत्युपसंख्याने यणादेशमपवादं करोति शाकलदोर्घविध्योः। तेन हेतुना तयोरिदुतोः शाकलदीर्घविधी न भविष्यतः। चशब्दः समुच्चये; भिन्नक्रमश्च प्रतिषेधानन्तरं द्रष्टव्यः। `तौ च मम स्वरसन्धिषु सिद्धौ'। न च शाकलदीर्घविधी प्रयोजयतः। एवमपवादः। तेषां शाकलदीर्घनिवृत्तेः प्रयोजनत्वे प्रयोजनान्तरमाह--`यणस्वरबाधनमेव तु हेतुः' इति। यणादेशाश्रयः स्वरो यणस्वरः, तस्य बाधनं हेतुः कारणम्। कस्य? प्रकरणात् सूतारम्भस्यैति गम्यते। तुशब्दोऽवधारणे। यण्स्वबाधनमेव तु सूत्रारम्भस्य हेतुरित्यर्थः।।

इति बोधिसत्त्वदेशीयाचार्य श्रीजिनेन्द्रबुद्धिपादविरचितायां काशिकाविवरणपञ्जिकायामष्टमाध्यायस्य

द्वितीयः पादः

- - -

8.4

अथाष्टमाऽध्यायः

चतुर्थः पादः

1. रषाभ्यां नो णः समानपदे। (8.4.1)

`समानपदस्थौ चेत्' इत्यादि। समानशब्दोऽयमेकपर्यायः। समानम्=एकम्, अभिन्नमित्यर्थः। समानञ्च तत् पदञ्चेति कर्मधारयः; तत्र तिष्ठत इति समानपदस्थौ, `सुपि स्थः' (3.2.4) इति कप्रत्ययः। अत्र निमित्तं रेफः षकारश्च। तन्निमित्तं यस्यास्तीति णत्वभावेन विपरिणतौ साध्यायां स निमित्ती नकारः। तेनैतदुक्तं भवति--यत्र पदे रेफषकारौ स्तस्तत्र यदि नकरोऽपीत्यर्थः। `आस्तीर्णम्, विशीर्णम्' इति। `स्तृञ् आच्छादने' (धा.पा.1484), `शॄ हिंसायाम्' (धा.पा.1488)। व्याङ्पूर्वाभ्यां निष्ठा; `श्रुयुकः किति' (7.2.11) इट्प्रतिषेधः। `ऋत इद्धातोः' (7.1.100) इतीत्त्वम्; रपरत्वञ्च। `अवगूर्णम्' इति। `गुरी उद्यमने' (धा.पा.1396), `श्वीदितो निष्ठायाम्' (7.2.14) इतीट्प्रतिषेधः। `हलि च' (8.2.77) इति दीर्घः, `रदाभ्यां निष्ठातो नः' (8.2.42) इति तकारस्य नकारः, तस्यानेनैव णत्वम्। `कुष्णाति, पुष्णाति' इति। `कुष निष्कर्षे' (दा.पा.1518), `पुष पुष्टौ' (धा.पा.1529)। श्नाप्रत्ययः। `षग्रहणमुत्तरार्थम्' इति। अथैतदर्थमपि कस्मान्न भवति? इत्याह--`ष्टुत्वेनैव सिद्धत्वात्' इति। यद्येवम्, कुष्णातीत्यादेरुपन्यासः किमर्थः? उत्तरार्थं षग्रहणं क्रियमाणमेतदर्थमपि भवतीति प्रदर्शनार्थः। असति षग्रहणे कुष्णातीत्येवमादौ ष्टुत्वेनैव सिद्धिर्भवति। सति च तस्मिन्नुत्तरार्थं आरभ्यमाणेऽनेनैव णत्वं कर्त्तदव्यम्। अस्मिन् कर्त्तव्ये ष्टुत्वस्यासिद्धत्वादन्यत्र चरितार्थत्वान्न च परत्वमुपपद्यते; `पूर्वत्रासिद्धीये नास्ति विप्रति, विप्रतिषेधोऽभावादुत्तरस्य' (जै.प.षृ.67) इति।

`ऋवर्णाच्चेति वक्तव्यम्' इत्यादि। रषाभ्यां णत्वमुच्यमानमृवर्णान्न प्राप्नोति, तस्य वर्णान्तरत्वात्। न च शक्यते वक्तुम्--ऋवर्णस्थाद्रेफाद्भविष्यति, वर्णो हि रेफः सूत्रे णत्वं प्रति निमित्तत्वेनाश्रितः। न हि ऋवर्णस्थो रेफो वर्णः, किं तर्हि? वर्णैकदेशः; तदेकदेशत्वात्, न हि वर्णेकदेशो वर्णग्रहणेन गृह्यते। तथा चोक्तम्--`वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्येषु तत्कार्यं न वति। तच्छायानुकारिणो हि ते, न पुनस्त एव। पृथक्प्रयत्ननिर्वर्त्त्य वर्णमिच्छन्त्याचार्याः' इति। तस्मात् `ऋषर्णाच्च' इति वक्तव्यम्। `तिसृणाम्, चतसृणाम्' इति। `त्रिचतुरोः स्त्रियां तिसृचतसृ' (7.2.99) इत्येतावादेशौ भवतः। `न तिसृचतसु' (6.4.4) इति निषेधात् `नामि' (6.4.3) इति दीर्घत्वं न भवति।

`रश्रुतिसामान्यनिर्देशात् सिद्धम्' इति। अनेनोपसंख्यानं प्रत्याचष्टे। `र' इतीह श्रुतिरुपलब्धिर्यस्येति बहुव्रीहिः। अथ वा--श्रुयत इति श्रुतिः, रश्चासौ श्रुतिश्चेति रश्रुतिः। तस्याः केवलाया ऋवर्णस्थायाश्च वर्णत्वावर्णत्वकृतभेदमुत्सृज्य यत् सामान्यं रश्रुतिमात्रं तदिह निर्दिश्यते, न तु वर्णात्मिकैव रेफब्यक्तिः। तेनेह सिद्धं तिसृणामित्यादावपि णत्वम्; ऋवर्णे हि तस्य रश्रुतिसामान्यस्य विद्यमानत्वात्। स्यादेतत्--ऋकारे त्रयोऽज्भागाः सन्ति, तन्मध्यवर्ती तुरीयो रेफः, तत्र रश्रुतिसामान्यनिर्द्देशादपि नैव णत्वं सिध्यति; योऽसौ रेफात् परोऽज्भागस्तेन व्यवधानात्? इत्यत आह--`अवर्णभाक्' इत्यादि। यदयं क्षुम्नादिषु णत्वप्रतिषेधार्थं नुनमनतृप्नोतिग्रहणं करोति तेनैतज्ज्ञाप्यते--अवर्णभागव्यवधानेऽपि णत्वं भवतीति, अन्यथैतयोः पाठोऽनर्थकः स्यात्; प्राप्त्यभावात्, प्राप्तिपूर्वकत्वात प्रतिषेधानामिति।

इदानीं यद्यपि वर्णास्मिकैव रेफव्यक्तिर्निर्द्दिश्यते, तथापि णत्वं भवतोति दर्शयितुमाह--`अथ वा' इत्यादि। पूर्वं सूत्रोपात्ताद्रश्रुतिसामान्यनिर्द्देशादवर्णभागव्यवधानेऽपि णत्वं भवतीति ज्ञापितम्। सम्प्रति तु सूत्रानुपात्तादृवर्णादव्यवहिताद्भवतीत्येव विशेषः। शथ किमर्थं णग्रहणम्? यावता प्रकृतोऽत्र मूर्धन्योऽनुवर्त्तिष्यते। स एव विधेयः; तत्रान्तरतम्यान्नकारस्य णकार एव भविष्यति? सत्यमेतत्; पूर्वसूत्रे मूर्धन्यग्रहणं निषेधेन सम्बद्धम्, अतसतदनुवृत्तौ तस्याप्यनुवृत्तिराशङ्क्येत। तस्मात् प्रतिषेधशङ्कानिरासार्थं पुनर्ग्रहणं निषेधेन सम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिराशङ्क्येत। तस्मात् प्रतिषेधशङ्कानिरासार्थं पुनर्ग्रहणं कृतम्। ननु च प्राप्त्यभावादेव प्रतिषेधशङ्का न भविष्यति; प्राप्तिपूर्वका हि प्रतिषेधा भवन्ति, न च केनचिद्रषाभ्यामुत्तरस्य मूर्धन्यप्राप्तिरस्ति? सत्यमेतत्, अस्मादेव प्रतिषेधाद्विधिरनुमीयत इति। अथ वा अनन्तरसूत्रे (8.3.119) `वा' इति। वचनाद्विकल्पेनायं विधिर्विज्ञायते। तस्माद्विकल्पनिवृत्त्यर्थम्, विस्पष्टार्थं वा।।

2. अट्कुप्वाङ्नुम्व्यवायेऽपि। (8.4.2)

रवाभ्यामिति पञ्चमीनिर्देशान्निर्दिष्टग्रहणस्यानन्तर्यार्थत्वात् पूर्वेणाडादिव्यवधाने सत्यप्रप्तमेव णत्वमेनन विधीयते। `पर्याणद्धम्' इति। `णह बन्धने' (धा.पा.1166), निष्ठा, `नहो धः' (8.2.34) इति हकारस्य धकारः, `झषस्तथोर्धोऽधः' (8.2.40) इति तकारस्य धकारः, पूर्वधकारस्य `झलां जश् झशि' (8.4.53) इति दकारः।

ननु चाङ्व्यवायेऽत्र णत्वं सिद्धम्, `अण् सवर्णान् गृह्णाति' (1.1.69) इत्यङोऽप्यङ्ग्रहणेन ग्रहणात् किमर्थमाङ्ग्रहणम्? इत्याह--`आङ्ग्रहणम्' इत्यादि। असत्याङ्ग्रहणे `पदवप्यवायेऽपि' (8.4.38) इत्याङ्व्यवाये प्रतिषेधः स्यात्। अतस्तद्बाधनार्थमाङ्ग्रहणम्। `बृंहणम्' इति। `बृह बृहि वृद्धौ' [वहि वृद्धौ शब्दे च--धा.पा.] (धापा.735,736) `इदितो नुम- धातोः' (7.1.58) इति नुम्, ल्युट्, `नश्चापदान्तस्य झलि' (8.3.24) इत्यनुस्वारः।

कथं पुनरिदं नुम्ग्रहणस्योदाहरणम्, यावताऽनुस्वारेणात्र व्यवायः, न नुमा; `तृंहणम्' इत्यत्रापि नुमोऽभावात्, `प्रेन्वनम्' इत्यत्रैव प्रसज्येत, अस्ति ह्यत्र नुमा व्यवायः? इति देश्यमाशङ्क्याह--`नुम्ग्रहणम्' इत्यादि। अनुस्वारोपलक्षणार्थं ह्यत्र नुम्ग्रहणम्, न नुमः प्रतिपादनार्थम्। तेन किं सिद्धं भवति? इत्याह--`तेन' इत्यादि। `दृंहणम्' [तृंहणम्--काशिका, पदमञ्जरी च] इति। `दृह दृन्ह हिंसायाम्'[तृह--हिंसायाम्--धा.पा.1455 तृह हिंसार्थं--धा.पा.1350] (धा.पा.145501350), ल्युट्, पूर्ववदनुस्वारः। अत्र नुम्ग्रहणस्यानुस्वारोपलक्षणार्थत्वादसत्यपि नुम्यनुस्यारव्यवाये णत्वं भवत्येव। अपिशब्दोऽयं वृंहणमित्यत्र नुमोऽनुस्वारे तद्व्यवाये णत्वं भवतीत्येवमर्थं द्योतयति। `प्रेन्वनम्' इति। `इवि व्याप्तौ' (धा.पा.587)। पूर्थवशुम्, तस्याझल्परत्वादनुस्वारो न भवति। अत्राप्यनुस्वारोपलक्षणार्थत्वाद्विद्यमानेऽपि नुव्यनुस्वारव्यवायो नास्तीति णत्वं न प्रवर्त्तते। यथैव हि `नक्षत्रं दृष्ट्वा वाचो विसृज्येरन्' इत्यत्र नक्षत्रदर्शनकालस्योपलक्षणार्थत्वादसत्यपि नक्षत्रदर्शने तस्मिन् कालविशेषे सति वाचा विसुज्यन्ते, सत्यपि च [`च' नास्ति प्रा.मु.पाठः] नक्षत्रदर्शने तस्मिश्कालविशेषाभावे वाचो न विसृज्यन्ते; तथेहापि नुम्ग्रहणस्यानुस्वारोपलक्षणार्थत्वादसत्यपि नुमि यत्रानुस्वारव्यवायो नास्ति तत्र न भवतीत्येधमर्थ वेदितव्यम्।

किं पुनरिह समुदायेन वाक्यपरिसमाप्तिः? प्रत्येकं वा? तत्र यदि पूर्वकः पक्ष आश्रौयते, तदा क्वचिदपि न स्यात्। न ह्येकस्मिन्नुदाहरणे सर्वैरडादिभिर्व्यवायः सम्भवति। अथ द्वितीयस्तदा अर्केणेत्यादौ न स्यात्, अनेकेन व्यवधानात्? इत्यत आह--`व्यवायोपलक्षणार्थतत्वात्' इत्यादि। इहैषामडादीनां व्यवायस्तस्मिन्निति। शक्नुवन्ति चैत एकैकाः परस्परसहिताश्च। तमुपलक्षयितुं ये च तदुपलक्षणार्थमुपादीयन्ते तेषामेकेन द्वाभ्यां बहुभिश्च य उपलक्षितः स सङ्गृह्यत एव। तथा हि--देवदत्तयज्ञदत्तविष्णुमित्रैः सह नाध्येतव्यमियुक्ते देवदत्तादयो ये सहाध्ययनप्रतिषेधोपलक्षणार्थमुपात्तास्तेषामेकेनापि सह नाधीयते, द्वाभ्याम्, बहुभिश्च। तस्मादिहापि व्यषायोपलक्षणार्थत्वादडादीनां तैर्व्यस्तैः, समस्तैश्च व्यवाये णत्वं भवति। `व्यस्तैः' इति। तैरेकैकैरव्यवाय उपलक्ष्यते। `समस्तैः' इति। परस्परसहितैः। समस्तग्रहणमनेकोपलक्षणार्थम्। न हि समस्तैर्व्यवायः क्वचित् सम्भवति। एवञ्च क्वचित् प्रत्येकं वाक्यपरिसमाप्तिः, क्वचिद्यथासम्भवं समुदायेन--इत्युक्तं भवति।

अथापिग्रहणं किमर्थम्? अव्यवाये यता स्यादिति चेत्? न; पूर्वेणैव सिद्धत्वात्? एवं तर्ह्युत्तरार्थमपिग्रहणम्। असति हि तस्मिन्नुत्तरार्थे `उपसर्गादसमासेऽपि' (8.4.14) इत्येतदिहैव स्यात्--प्रणयतीति, यत्रास्ति व्यवायः। इह तु न स्यत्--निर्णयतीति, न ह्यत्राडादीनामेकतमेन व्यवायोऽस्ति।।

3. पूर्वपदात्संज्ञायामगः। (8.4.3)

रेफादिनिमित्तमिहानुवर्त्तते, तस्य केवलस्य पूर्वपदत्वं न सम्भवतीति सामर्थ्यात् पूर्वपदस्थान्निमित्तादुत्तरस्येत्येषोऽर्थो विज्ञायत इत्याह--`पूर्वपदस्थान्निमित्तात्' इत्यादि। `द्रूणसः' इति। दुरिव नासिकास्येति बहुव्रीहिः। द्रुशब्दोऽत्र शाखावचनः। `अञ्नासिकायाः सञ्ज्ञायां नसञ्चास्थूलात्' (5.4.118) इत्यच् समासान्तनासिकायाश्च नसादेशः।

`चर्मनासिकः' इति। चर्मविकारो नासिकास्येति `समुदायविकारषष्ठ्याश्च बहुव्रीहिरुत्तरपदलोपश्च' (दा.100) इति समासः। उपसर्जनह्रस्वत्वम्।

`ऋगयन्म्' इति। ऋचोऽयनमिति षष्ठीसमासः।

`अगः' इति शक्यमकर्तुम्, `अणृगयनादिभ्यः' (4.3.73) इति निपातनादेव ऋगयनमित्यत्र णत्वाभावः सिद्धः? नैतदस्ति; `अबाधकान्यपि निपातनानि भवन्ति' (पृ.प.वृ.00) इत्युक्तम्, तत्र यद्यग इति नोच्येत, तदा पक्ष ऋगयणमित्यपि विज्ञायेत। तस्यादग इति वक्तव्यम्। अथ किं पुनरिदं नियमार्थम्? उत्त विध्यर्थम्? इत्यत आह--`केचित्' इत्यादि। अपरे विध्यर्थमेतदिति वर्णयन्ति। अतः केचिदित्युक्तम्। ननु पूर्वसूत्रेण निमित्तनिमित्तिनोः समानपदस्थत्वे सति णत्वं विहितम्, न च द्रुणस इत्यादौ समासे कृते निमित्तनिमित्तिनोः समानपदस्थत्वमस्ति, निमित्तस्य पूर्वपदस्थत्वात्, निमित्तन उत्तरपदस्थात्वाच्च। एवञ्च पूर्वसूत्रेणाप्राप्तिरेव णत्वस्य, तत् कथमस्य नियमार्थतोपपद्यते? इत्यत आह--`समासेऽपि' इत्यादि। यद्यति समासार्थाभ्यां पदाभ्यां या विभक्तिरुत्पन्ना तस्यां लुप्तायामपि तयोः प्रत्येकं प्रत्ययलक्षणेन पदसंज्ञायां सत्यां समासावयवापेक्षयाऽसमानपदताऽस्ति, तथापि समासाद्या विभक्तिरुत्पन्ना तया समुदायस्य पदसंज्ञायां सत्यां समुदायापेक्षया समानपदताऽस्त्येव। तस्मात् सञासेऽपि समानपदे निमित्तनिमित्तनोर्बावादसति पूर्वेण प्राप्तिः; ततश्च नियमार्थमेतदिति स्थितम्। यद्येवम्, तर्हि यथा चर्मनासिक, इत्यत्रोत्तरपदस्थस्य नकारस्य णत्वं न भवति नियमेन व्यावर्त्तितत्वात्, तथा खरपस्यापत्यं खारपयणः--`नडादिभ्यः फक' (4.1.99) मातृभोगाय हितो मातृभोगीणः--`आत्मन्विश्वजनभोगोत्तरपदात् खः' (5.1.9) इत्यत्र च तद्धितस्थस्यापि न स्यात्, तथा करणं प्रियमस्य करणप्रिय इत्यत्र पूर्वपदस्थस्यापि न स्यात्? अत आह--`स च' इत्यादि। सध्बन्धिशब्दो हि नियतमेव प्रतियोगिनं सन्निधापयति, [सन्निधापयन्ति--का.मु.पाठः, प्रा.मु.पाठश्च] यथा हि `भातरि भक्त्या प्रवर्त्तितव्यम्' इत्युक्ते यद्यपि स्वस्यामिति नोच्यते, तथापि स्वस्यां मातरीति गम्यते; तथेहापि पूर्वपदमुत्तरपदमिति सम्बन्धिशब्दावेतौ--सति पूर्वपदत्वे उत्तरपदत्वं सम्भवति, सति चोत्तरपदत्वे पूर्वपदत्वं सम्भवति। पूर्वपदसन्निधानादुत्तरपदे सथिधापिते तस्यैवोत्तरपदस्थस्य नकारस्य नियमो णत्वं निवर्त्तयति---चर्मनासिक इत्यादौ, न सद्धितपूर्वपदस्यस्यापि। खारपायणो मातृभोगीण इत्यादौ यतायोगं तद्धितपूर्वपदस्थोनकारः, न तूत्तरपदस्थः। अयं तर्ह्यस्मिन्नियमार्थे दोषः--`अगः' इति। प्रतिषेदो नियमस्यैव स्यात्, न तु णत्वस्य; नियमवाक्यैकदेशभूतत्वात् प्रतिषेधस्य। ततः संज्ञायामसंज्ञायाञ्च गकाराण्णत्वं स्यात्। अत एवाह--`अगः' इत्यादि। अग इति योऽयं प्रतिषेधः स णत्वस्यैव, न नियमस्य। तल्मान्न भवत्येव दोषप्रसङ्गः। कथं पुनर्नियमवाक्यैकदेशभूतः सन्नेव प्रतिषेधो णत्वस्य विज्ञातुं शक्यः? इति प्रश्नावसर इदमुत्तरमाह--`योगविभागेन' इत्यादि। `पूर्वपदात्संज्ञायाम्' इत्येको योगः, `अगः' इति द्वितीयः; अनेन यावती काचिण्णत्वस्य प्राप्तिः सा सर्वा प्रतिषिध्यते, न त्वनन्तरमेव कार्यम्। अन्यथा योगविभागस्य वैयर्थ्य स्यात्।

`अपरे तु' इत्यादि। तुशब्दः पूर्वस्माद्विशेषं दर्शयति। अपरे त्वाचार्याः पूर्वसूत्रे समानमेव यन्नित्वं पदं तत् समानपदमित्याश्रयन्ति। तदेतदुक्तं भवतदि--यदाऽवयवापेक्षा क्रियते तदापि यत् समानपदम्; यदापि समुदायापेक्षा क्रियते, तदापि यत् समानपदं तत् समानपदमित्येवं परिगृह्लान्ति। कस्मात्? इत्यत आह--`समानग्रहणात्' इत्यादि। समानग्रहणं ह्येवमर्थं क्रियते। एकपदाधिकरणत्वे सति निमित्तनिमित्तिनोर्णत्वं यथा स्यात्, भिन्नपदत्वे मा भूदिति। एतच्चाप्रयोजनम्; पदग्रहणादेवाल्यार्थस्य लब्धत्वात्। यदि भिन्नपदाधारत्वे सति णत्वं स्यात्, तदा पदग्रहणमनर्थकं स्यात्, व्यवच्छेद्याभावात्, न ह्यपदस्थौ तौ स्तः। तस्मात् पदग्रहणसामर्थ्यादेवाभिन्नपदयोर्निमित्तनिमित्तनोर्णत्वं लभ्यते। तत् पदग्रहणादेव समानपदे लब्धे समानग्रहणं क्रियमाणं नियमार्थं भवति--`नित्यं यत् समानपदम्' इत्यभिप्रायः। `तेषाम्' इत्यादिना समानमेव यन्नित्यं पदं तत् पूर्वसूत्रे य आश्रयन्ति, तन्मतेन विध्यर्थतामस्य दर्शयति। स्यादेतत्--समासेऽपि नित्यं समानपदमेवाश्रयो निमित्तनिमित्तिनोः, अत्रो नियमार्थमेतदुक्तम्, न विध्यर्थम्? इत्यत आह--`समासे हि' [`समासेऽपि'--प्रा.मु.पाठः] इत्यादि। समासे ह्यवयवापेक्षयैतत्पूर्वपदमिति, एतदुत्तरपदमिति--एव विभागोऽस्ति, तस्मादसमामपदत्वमप्यस्ति। अपिशब्दात्समानपदत्वमपि। तत्र यदा पूर्वोत्तरवदापेक्षा भयति, तदा पूर्वोत्तरविभागादसमानपदत्वम्। यदा तु समुदायापेक्षा, तदा पूर्वोत्तरविभागाभावात् समानपदत्वम्। अतो न समासे समानपदत्वं नित्यमेव।।

4. वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः। (8.4.4)

वनमिति षष्ठीस्थाने सुब्व्यत्ययेन प्रथमा। `पुरगावणम्' इति षष्ठीसमासः। `वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम्' (6.3.117) इति पूर्वपदस्य दीर्घः। `अग्रेवणम्' इति। षष्ठोसमासः। तस्मिन् कृते राजदन्तादिवद्वनशब्दस्य परनिपातः। `हलदन्तात् सप्तम्याः सञ्ज्ञायाम्' (6.3.9) इति सप्तम्या अलुक्।

ननु च पूर्वेणैव णत्वं सिद्धम्, तत्किमर्थोऽयम्? इत्यत आह--`सिद्धे' इत्यादि। पुरगादिभ्यो वननकारस्यैवेति विपरीतनियमो नाशङ्कनीयः, पुरगादीनं कृतदीर्घाणां निर्देशात्। सह्येवमर्थः क्रियते--यत्रैषां दीर्घत्वं तत्र नियमो यथा स्यात्, अन्यत्र मा भूदिति। अन्यता `अनगिर्योः' (6.3.117) इत्यनेनैव दीर्घत्वे सिद्धे दौर्घोच्चारणं गौरवफलमेव केवलं स्यात्। तस्माद्यत्रैषां दीर्घत्वं तत्रैव नियमः। अतो व्यवच्छेद्यामाभावान्न भवति विपरीतनियमाशङ्का; न हि वनादन्यस्मिन्नमीषां पूर्वपदभूतानां दीर्घत्वमस्ति।।

5. प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि। (8.4.5)

येऽत्रौषधिवनस्पतिशब्दा न भवन्ति प्रादयस्तेभ्यः संज्ञायाम्--यदि पूर्वसूत्रं नियमार्थम्, अथापि विध्यर्थम्--उभयथाप्यप्राप्तणत्वमनेन विधीयते। एवमसंज्ञायामपि विधिपक्षे। नियमपक्षे त्वसंज्ञायां निष्प्रयोजनोऽस्यारम्भः; असंज्ञायां नियमाभावात्, आद्याभ्यामेव सूत्राभ्यां यथायोगं णत्वस्य सिद्धत्वात्। इतरेषु शरादिष्विक्षुशरशपब्दावोषधिवचनौ। शेषाः प्लक्षादयो वनस्पतिवचनाः। तेभ्यः संज्ञायां विधिपक्षे नियमपक्षे चाप्राप्तं णत्वमनेन विधीयते। असंज्ञायां तु `विभाषौषधिवनस्पतिभ्यः' (8.4.6) इति विभाषा णत्वं प्राप्तं नित्यमनेन विधीयते। `असंज्ञायामपि' इत्यपिशब्दस्य व्यापारं दर्शयति--असत्यपिशब्दे संज्ञाधिकारादसंज्ञायां न स्यात्। अथ तु संज्ञाधिकारं निवर्त्त्यं समामान्येन विधीरुच्यते सदा शक्यते संज्ञाग्रहणमकर्त्तुम्? तत् क्रियते विस्पष्टार्थम्। `प्रवणम्, निर्वणम्' इति। विभक्त्वर्थेऽयं `अव्ययम्' (2.1.6) इत्यादिनाऽण्ययीभावः। वनस्य मध्य इत्यर्थः। `शरवणम्' इत्यादयश्च षष्ठीसमासाः।।

6. विभाषौषधिवनस्पतिभ्यः। (8.4.6)

संज्ञायाम् `षनं पुरगामिश्रका' (8.4.4) दिनियमादोषधिवनस्पतिभ्यः परस्य वननकारस्य णत्वेन न भवितव्यमिति पारिशेष्यादसंज्ञायां विभाषा वेदितव्या। परत्वादनया भिभाषया संज्ञायामपि भवितव्यमित्येतच्च नाशङ्कनीयम्; नियमे कर्त्तव्ये विभाषाया असिद्धत्वात्। अथ तु संज्ञायामसंज्ञायामपि विभाषेयमिष्यते, तदर्थं यत्नानन्तरमास्थेयम्। किं पुनस्तत्? विभाषेति योगविभागकरणम्। योगविभागे सत्येको योगो नियमबाधनार्थो विज्ञायत इति संज्ञायामपि विभाषा सिध्यति। असिद्धत्वं तु योगविभागसामर्थ्यान्न भविष्यति। अत्र समानग्रहणसामर्थ्यात् समानमेव यन्नित्यं पदं तत् समानपदमित्याश्रयन्ति ये, तेषामप्राप्तविभाषेयम्; अन्येषां तु प्राप्तविभाषा। बहुवचननिर्द्देशस्तु स्वरूपनिरासार्थः। `दूर्वावणम्' इत्येवमादयः षष्ठीसमासाः।

'द्वयक्षरत्र्यक्षरेभ्य इति वक्तव्यम्' इति। अक्षरशब्दोऽत्राक्षु वर्त्तते। द्वे अक्षरे, त्रीणि वाक्षराणि येषां ते द्व्यक्षरत्र्यक्षाराः, ओषधिदनस्पतिशब्दाः, तेभ्यः परस्य वननकारस्य णत्वं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रैदं व्याख्यानम्--व्यवस्थितभाषाविज्ञानाद्द्व्यक्षरत्र्यक्षरेभ्य एव भवति। एवमुत्तरत्रापि वक्तव्यशब्दस्य व्याख्येयमित्यर्थः। व्याख्यानं तु व्यवस्थितविभाषामाश्रित्य कर्त्तव्यम्।

ननु च शिरीषावयो वृक्षाः, न तु वनस्पतयः, न तु वनस्यतिग्रहणे न वृक्षस्य ग्रहणं भवति; तेषामत्यन्तभेदात्। तथा चोक्तं शास्त्रान्तरे `फली वनस्यतिर्ज्ञेयो वृक्षाः पुष्पफलोपयाः' इति। तत्कथं शिरीषवणम्, वदरीवणमित्युदाहृतम्? इति यो देशयेत् तं प्रत्याह--`फली वनस्पतिर्ज्ञेयः' इति। यद्यप्यनेन श्लाकेन दृक्षवनस्पत्योर्भेदो दर्शितः, तथापि ततोरिहाभेदेन ग्रहणं वेदितव्यम्। अभेदग्रहणे तु तयोर्भाष्यकारवचनमेव लिङ्गम्; तथा हि `लुपि युक्तवद्व्यक्तिवचने' (1.2.51) इत्यत्र भाष्यकारेणोक्तम्--`व्यन्तिवचने इति किम्? शिरीषाणामदूरभवो ग्रामः शिरीषाः, तेषां वनं शिरीदवनम्'। यद्यत्र `व्यक्तिवचने' इति। नोच्यते, तदा वचनस्पतित्वमतिदिश्येत्, ततो वनस्पतित्वमतिदिश्येत, तत्र `विभाषौषधिवनस्पतिभ्यः' (8.4.6) इति णत्वं प्रसज्येत। यदि चेह वृक्षवनस्पत्योरभेदेव ग्रहणं न स्यात्, ततो वनस्पतित्वातिदेशाद्विभाषा णत्वप्रसञ्जनञ्च नोपपद्यते; शिरोषाणामवनस्पतित्वात्। `फली वनस्पतिर्ज्ञेयः' इति। पुष्पमन्तरेण फलमात्रं यस्यास्तीति स फली वनस्पतिर्ज्ञेय इति--उदुम्बरादयः। `वृक्षाः पुष्पफलोपगाः' इति। पुष्पं फलञ्चोपगच्छन्ति प्राप्नुवन्तीति पुष्पफलोपगाः। `अन्तात्यन्त' (3.2.48) इत्यादौ `अन्येष्पपि दृश्यते' (वा. 256) इत्युपसंख्यानाड्डप्रत्ययः। न च ये पुष्पफले उपगच्छन्ति त एव वृक्षाः, किं तर्हि? येऽन्यतरत् पुष्पं फलं चोपगच्छन्ति तेऽपि वृक्षा। एव। तत्र वेतसादयः पुष्पमेदोपगच्छन्ति, प्लक्षादयः फलमेव; आम्रादयस्तूभयम्। तत्र यो वनस्पतिः स नियतं वृक्षो भवति, यस्तु वृक्षः स तु नावश्यं वनस्पतिः यथा--पुष्पोपगोश्च वृक्षा वेतसादयः, फलोपगाश्च प्लक्षादयः, पुष्पफलोपगाश्चाम्रादयः। `ओषध्यः फलपाकान्ताः' इति। ओषधिशब्दात् `कृदिकारादिक्त्निः' (ग.सू.50) इति, `सर्वतोऽक्तिन्नर्थादित्यके' (ग.सू.51) इति बह्वादिपाठात् ङीष्। फलपाकेनान्तो विनाशो यासां ताः फलपाकान्ता ओषध्यो विज्ञेयाः, कवल्यादयः। `लता गुल्माश्च वीरुचः' इति। लताः=प्रतानवत्थो मालत्यादयः। गुल्माः=ह्रस्वस्कन्धास्तरावः। वीरुषः=बहुप्रकाण्डपचा विज्ञेयाः।।

7. अह्नोऽदन्तात्। (8.4.7)

`अह्नः' इति षष्ठ्याः स्थाने प्रथमा पूर्ववत्। समानमेव यन्नित्यं पदं तत् समानग्रहणादाश्रयन्ति ये, तेषां विध्यर्थमेतत्। अन्येषां तु नियमार्थम्। एवमुत्तरत्रापि नियमार्थता विध्यर्थता च यथायोगं वेदितव्या। `पूर्वाह्णाः' इत्यादि। पूर्वापरादिसूत्रेण [`पूर्वपरादि'--का.मु.पाठः, प्रा.मु.पाठश्च] (2.2.1) एकदेशी समासः। `राजाहःसखिभ्यष्टच्' (5.4.91) इति टच् समासान्तः। `अह्नोऽह्न एतेभ्यः' (5.4.88) इत्यह्नादेशः, सवर्णदीर्घः।

`निरह्नः' इति। निर्गतमह्न इति प्रादिसमासः। शेषं पूर्वयत्। `दीर्घाह्नो' इति। दीर्घाव्यहानि यस्यामिति बहुव्रीहिः। टज्विचौ `तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (5.4.86) इत्यतस्तत्पुरुषग्रहणमनुवर्त्तते। तेन बहुव्रीहौ टज्न भवति। `अन उपधालोपिनोऽन्यतरस्याम्' (4.1.28) इति ङीप्,

`अल्लोपोऽनः' (6.4.134) इत्युपधाकारलोपः। अत्राकारान्तग्रहणान्न भवति णत्वम्। यदि त्वनकारान्तस्य स्यात्, ततः `पूर्वाह्णः' इत्यत्र प्रत्ययात्प्राग्यथा व्यवस्थितस्याङ्नो नकारस्य णकारादेशो भवति, तथा `दीर्घाह्नी शरत' इत्यत्रापि स्यात्। अतोऽस्य गर्हणं हि व्याख्यानाद्विज्ञायते। तपरकरणात् पराजितमहः `पराह्नः' इत्यत्र आकारान्तान्न भवति।
अन्तग्रहणं विस्पष्टार्थम्। तपरेणाकारेम पूर्वपदे विशेष्यमाण तदन्तविधिर्भविष्यतीति विनाप्यन्तग्रहणतदन्तता लभ्यत इति।

8. वाहनमाहितात्। (8.4.8)
उह्यतेऽनेनेति करणे ल्युट्। अत एव निपातनादुपधादीर्घः। `इक्षुवाहणम्' इति। इक्षूणां वाहनमिति कृद्योगलक्षमायाः कर्मणि षष्ठ्याः समासः। `वाहमे यदारोपितं तदाहितमुच्यते' इति। अनेकार्थत्वाद्धातूनां दधातिस्तत्र वर्त्तते। आहितमिति भूतकालोऽत्र न विवक्षितः। `कृत्यल्युटो बहुलम्' (3.3.113) इति कालसामान्ये क्तो विधीयते। तेन यदापि वाहने वाहनार्थमिक्ष्वादिकमारोपितं न भवति, तदर्थं तु केवलमुपकस्पितं भूतलस्थितम्, तदापि भवत्येव। `दाक्षिवाहनम्' इति। अत्र दाक्षिस्वामिकवाहनमेव प्रतीयते, न त्वाहितत्वम्। अत एवाह`दाक्षिस्वामिकं वाहनमित्यर्थः' इति। अत्र शब्दशक्तिर्हेतुः।।

9. पानं देशे। (8.4.9)
`देशाभिधाने' इति। गम्यमान इति शेषः। `क्षीरं पानं येषाम्' इत।[`इति'--नास्ति--प्रा.मु.पाठे] कर्त्तरि कृद्योगलक्षणा षष्ठी। `क्षीरपाणा उशीनराः' इति। अतिशयोऽत्र प्रतीयते, न तु क्षीरपानसम्बन्धमात्रम्; तस्यान्यत्रापि सम्भवात्। ननु च क्षीरपाणादयः शब्दा मनुष्ये वर्त्तन्ते, तत्सामानाधिकरण्यादुशीनरादयोऽपि तत्रैव, तत कथमिह देशाभिधानं गम्यते? नैतदस्ति; उशोनरादिदेशवासिनां तात्स्थ्यात् तथा प्रतीयमानत्वादुशीनरादिदेशसम्बन्धद्वारेण मनुष्येषूशीनराख्या। उशीनरादयोऽपि शब्दाः संज्ञात्वेन प्राग्देशेष्वेव प्रवृत्ताः। क्रोशन्ति' इत्यत्र मञ्चसम्बन्धद्वारेण मनुष्येष्वपि वर्त्तमाना ये मञ्चशब्दास्तेषां मञ्चाभिदानं गम्यते। यदि तेषां मञ्चाभिधानं न गम्यतेत, तदा मञ्चाधारविशिष्टाः पुरुषाः कथं प्रतीयेरन्!।।

10. वा भावकरणयोः। (8.4.10)
आदेशार्थोऽयमारम्भः। `क्षीरपाणम्' इति। पीतिः=पानम्, `नपुंसके भादे क्तः' (3.3.114) इत्यनुवर्त्तमाने `ल्युट् च' (3.3.115) इति ल्युट्प्रत्ययः। `क्षीरपाणः कंसः' इति। पोयतेऽनेनेति पानः, `करणाधिकरणयोश्च' (3.3.117) इति ल्युट्।
`वाप्रकरणे' इत्यादि। उपसंख्यानशब्दस्य चेह प्रतिपादनमर्थः। अस्मिन् वाप्रकरणे गिरिनदीप्रभृतीनां यो नकारस्तस्य णत्वप्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्--उत्तरसूत्रेऽनुक्तसमुच्चयार्थश्चकारः। तेन गिरिनदीप्रभृतीनां यो नकारस्तस्य णत्वं वा भविष्यतीति।।

11. प्रातिपदिकान्तनुम्विभक्तिषु च। (8.4.11)
अन्तशब्दोऽवयववाची। `माषवापिणौ' इति। `बहुलमाभीक्ष्ण्ये' (3.2.81) इति णिनिः, न तु `सुप्यजाती णिनिस्ताच्छील्ये' (3.2.78) इति; जातिवाचित्वादुपपदस्य। `माषवापाणि' इत्युपपदसमासः, माषान् वपन्तीति `कर्मण्यण्' (3.2.1), `जश्शसोः शिः' (7.1.20) इति शिरादेशः; `नपुंसकस्य झलचः' (7.1.72) इति नुम्, `सर्वनामस्थाने चासम्बुद्धौ' (6.4.8) इति दीर्घः। `माषवापेण' इति। माधवापशब्दात् तृतीयैकवचनस्य `टाङसिङसामिनात्स्याः' (7.1.12) इतीनादेशः।
अथह कस्मान्न भवति--गर्गाणआं भगिनो गर्गभगिनीति, अत्रापि गर्गशब्दात् परो भगिन्नित्येष शब्दः प्रातिपदिकम्, तस्य चान्तो नकारो भवतीत्यस्ति प्राप्तिः? इत्यत आह--`पूर्वपदाधिकारात्' इत्यादि। `पूर्वपदात्संज्ञायामगः' (8.4.3) इत्यतः `पूर्वपदात्' इत्यनुवर्त्तते, पूर्वशब्दस्य सम्बन्दिशब्दत्वात्, यदपेक्षया तस्य पूर्वपदत्वं तदेवोत्तरपदमुपस्थापयति। तेन यद्यपीह प्रातिपदिकस्य विशेषो नोपात्तः, तथाप्युत्ततरपदं यत् प्रातिपदिकं तदन्तस्य नकारस्यैव णकारादेशो भवति। `इह हि न भवति' इति। हिशब्दो हेतौ। यस्मात् पूर्वपदाधिकारादुत्तरपदं यत् प्रातिपदिकं तदन्तस्यैव नकारस्य णत्वं विज्ञायते, तस्माद्गर्गभगिनीत्यत्र न भवति। न ह्यत्र भगिन्नित्येतच्छब्दरूपमृत्तरपदम्, किं तर्हि? भगिनीत्येव शब्दः, स च प्रातिपदिकं न भवति; `अप्रत्ययः' (1.2.45) इति निषेधात। न च तस्यान्तो नकारः, किं तर्हि? ईकारः।
ननु गर्गभगिणीत्ययमपि च प्रयोगो दृशऱ्यते, स चैवं सति नोपपद्यते? इत्यत आह--`यदा तु' इत्यादि। यदा तु गर्गाणां भगिनीत्येवं व्युत्पत्तिः, तदा न भवितव्यं णत्वेन। यदा तु गर्गस्य भग इति भगशब्देन षष्ठीसमासं कृत्वा, ततः स्त्रियां मत्वर्य इञि--इति व्युत्पाद्यते, तदैवं व्युत्पत्तौ सत्यां यथा मातृभोगीण इत्यत्र नित्यं णत्वं भवति, तता गर्गभगिणीत्यत्रापि णत्वेन भवितव्यम्। `मातृभोगीणवत्' इत्यनेन तदापि नानेन सूत्रेण वा णत्वम्, किं तर्हि? लक्षणान्तरेणेति दर्शयति। तेनैतदुक्तं भवति--यदैवं व्युत्पत्तिर्भवति तदा यथा मातृबोगीण इत्यत्र अट्कुप्वादिना (8.4.2) नित्यं तद्धितस्य नकारस्य णत्वं भवति; तथा गर्गभगिणीत्यत्रापि। अत्र तद्धितस्थ एव नकारः, न तूत्तरपदस्थः। अत एव भिन्नपदस्थता निमित्तनिमित्तिनोर्नाशङ्कनीया। यथा `पूर्वपदात्संज्ञायामगः' (8.4.3) इत्यनेन नियमेन णत्वं न निवर्त्त्यते, तथा तत्रैव प्रतिपादितम्।
यद्युत्तरपदं यत्प्रातिपदिकं तदन्तस्य नकारस्य णकारेण भवितव्यम्, एवं सति माषवापिणी, माषवापिनीत्यत्र विभाषा णत्वं न प्राप्नोति। अत्र वापिनौशब्द

एवोत्तरपदम्, न वापिन्नित्येतच्छब्दः? इत्यत आह--`माववापिनीत्यत्र तु' इत्यादि। अत्र हि प्राक् सुबुत्पत्तेः कृदन्तेनैव वापिन्नित्यनेन समासे कृते सति प्रातिपदिकस्यान्तो नकारो भवति; वापिन्नित्येतस्य `कृत्तद्धितसमासाश्च' (1.2.46) इति प्रातिपदिकत्वात्। तस्माद्भवत्येवात्र णत्वमिति। कथं पुनः प्राक्सुबुत्पत्तेः समासे सत्युत्तरपदस्यान्तो नकार उपपद्यते? यावता `सुप्तिङन्तं पदम्' (1.4.14) इत्यनेन सुबन्तस्य तिङन्तस्य च पदमित्येषा संज्ञा विहिता। तत्रासत्यां सुबुत्पत्तौ पदत्वमत्र न सम्भवति। कुतः पुनरेतदुत्तरपदमित्येष विशेषः? रूढित्वाददोषः। पूर्वपदोत्तरपदशब्दावेदौ रूढिशब्दौ; यस्मात् समासे कृते यः कश्चिच्छब्दः पूर्वपदमिति प्रसिद्धः, यः कश्चिदुत्तरपदमिति। सा च रूढिर्न सुबन्तेष्वेव समासावयवेषु सम्भवति; किं तर्हि? असुबन्तेष्वपि केषुचिदिति। तत् किमत्र नोपपद्यते पूर्वोत्तरपदन्यवहारः! `तथात्र' इत्यादिना यदुक्तम् `पूर्वपदाधिकारादुत्तरस्य' इति तद्द्रढयति। यत एवमुत्तरपदस्य प्रातिपदिकस्य योऽन्त्यो न कारस्तस्यैव णत्वं भवति, नान्यस्येत्ययमत्रार्थः। एवञ्च कृत्वा नुम्ग्रहणं कृतम्। कस्मात् पुनरस्मिन्नर्थे सति नुमो न सिध्यति, यतस्तदुपादानं कृतम्? इत्यत आह--`स हि' इत्यादि। अङ्गस्य नुम्विधानात्। माषवापानीत्यत्र समुदायस्याङ्गत्वात् समुदायात्मनोऽङ्गस्य भक्तो नुम्; नोत्तरपदस्य। ततश्चोत्तरपदस्यान्तो नुम् न भवति। तत्र यदि नुम्ग्रहणं न क्रियेत तदा णत्वं न स्यादित्यभिप्रायः। यदि पुनः प्रातिपदिकस्यानुत्तरपदभूतस्यापि योऽन्तो नकारः, तस्य णत्वं विधीयते, तदा नुम्ग्रहणं न कर्त्तव्यमेव, प्रातिपदिकान्तस्येत्येव सिद्धत्वात्। भवति हि माषवापिनीत्यत्रापि समासे सति प्रातिपदिकस्यान्तो नकारः।

`वक्तव्यम्' इति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`वा' (8.4.10) इति वर्त्तते, सा च व्यवस्थितविभाषा, तेन युवादीनां णत्वेन न भवितव्यम्। `आर्ययूना' इति। विशेषणसमासः, `श्वयुवमघोनामतद्धिते' (6.4.133) इति सम्प्रसारणम्, `सम्प्रसारणाच्च' (6.1.108) इति पूर्वरूपत्वम्, `अकः सवर्णे दीर्घः' (6.1.101) `प्रपक्वानि' इति। गतिसमासः। चकारस्य पूर्वोक्तमेव प्रयोजनम्।।

12. एकाजुत्तरपदे णः। (8.4.12)

`वृत्रहणौ' इति। `ब्रह्मभ्रूण' (3.2.87) इति क्विप्। `क्षीरपाणि' इति। पिबतेः पातेर्वा`आतोऽनुपसर्गे कः' (3.2.3), `आतो लोप इटि च' (6.4.64) इत्याकारलोपः। `सुरापाणि' इति। पिबतेः `गापोष्टक' (3.2.8)। पातेर्वा पूर्ववत् कः।

अथ णग्रहणं किमर्थम्, यावता `णः' (8.4.1) इत्यनुवर्त्तत एव? नित्यार्थमिति चेत्? स्यादेतत्--वेति प्रकृतम्, तत्रासति पुनर्णग्रहणे विकल्पः प्रसज्येत, तस्मान्नित्यं यथा स्यादित्येवमर्थं पुनर्णगहणं कृतमिति? एतच्चायुक्तम्, पूर्वेणैव विकल्पः सिद्धः। तत्रारम्भसामर्थ्यादेवायं विधिर्नित्यो भविष्यति? इत्यत आह--`ण इत्यनुवर्त्तमाने' इत्यादि। विकल्पाधिकारस्यास्वरितत्वाद्या निवृत्तिस्तस्या विस्पष्टार्थं पूनर्णग्रहणम्। असति हि णग्रहणे कश्चिन्मन्दबुद्धिरेवं मन्येत--अनुवर्त्तत एव वाग्रहणम्, तस्मिंस्त्वनुवर्त्तमानेऽप्यारम्भसामर्थ्यादयं दिधिर्नित्यो भविष्यति, उत्तरस्तु पाक्षिक एवेति।।

13. कुमति च। (8.4.13)

अनेकाजुत्तरपदार्थ आरम्भः। चकारः `प्रातिपदिकान्तनुम्विभक्षि च' (8.4.11) इत्यनुकर्षणार्थः। तेनोत्तरत्रानुवृत्तिर्न भवति चानुकृष्टपरिभाषया (व्या.प.76)। `वस्त्रयुगिणौ' इति। `अत इनिठनौ' (5.2.115) इतीनिः। `को' इति कर्त्तव्ये कुमतीति वजनमकवर्गादावपि यता स्यात्; इतरथा हि `यस्मिन्विधिस्तदावल्ग्रहणे' (व्या.प.127) इति कवर्गादेरेव स्यात्। दपन वापः, कुम्भस्य वापः कुम्भवापः, माषाणां कुम्भवापो माषकुम्भवापः--`अत इतिठनौ' (5.2.115) इतीनिः। माषकुम्भवापिणावित्यत्र स्यात्, वस्त्रयुगिणआवित्यत्र न स्यादिति।।

14. उपसर्गादसमासेऽपि णोपदेशस्य। (8.4.14)

`णोपदेशस्य' इति। ण उपदेशे यस्य स णोपदेशः--गमकत्वादैयधिकरण्ये बहुव्रीहिः। अथ वा--उपविश्यते प्रथमत उच्चार्यत इत्युपदेशः, ण उपदेशो यस्येति समानाधिकरण एव बहुव्रीहिः। `प्रणमति' इति। `णम प्रह्वत्वे शब्दे च' (धा.पा. 981)। `प्राणायकः' इति। `णोञ् प्रापणे' (धा.पा. 901), ण्वुल्, प्रादिसमासः।

`प्रनायको देशः' इति। अत्र गर्मि प्रति क्रियायुक्तत्वात् प्रशब्दस्य गमिमेव प्रत्युपसर्गत्वम्, न नयतिं प्रति, यं प्रति प्रयुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञाविधानात्। `असमासेऽपीति किम्' इति। विनाऽप्यनेन विशेषानुपादानात् समासेऽसमासेऽपि भविष्यतीति भावः। `पूर्वपदाधिकारात्' इत्यादि। पूर्वपदात् (8.4.3) इति वर्त्तते। असमासे भवति पूर्वपदत्वम्। रूढिशब्दो हि पूर्वपदशब्दः पूर्वमाश्रितः, स एव चेहानुवर्त्तते, स च समास एव संभवति, ततश्च समासेऽपीत्युच्यमाने `समास एव स्यात्' इति। इतिकरणो हेतौ। यस्मादसति तस्मिन्नेष दोषस्तस्मात् तस्य पूर्वपदस्य निवृत्तिं द्योतयितुम् `असमासेऽपि' इत्युच्यते। द्योतनग्रहणेनैतदाचष्टे--नानेन तस्य निवृत्तिः क्रियते, किं तर्हि? अस्वरितत्वादविद्यमानतैव केवलं प्रकाश्यत इति। तदेतदुक्तं भवति--मन्दबुद्धिर्य एवं प्रतिपत्तुमसमर्थस्तं प्रति विस्पष्टीकरणार्थमसमासेऽपीत्युच्यत इति। `प्रनर्दति' इति। `नर्द गर्द शब्दे' (धा.पा.56,57)। सत्यप्यच्परत्वेऽच्परोऽयं णोपदेशो न भवति; `नृतिनर्दिनन्दिनक्किनाथृनवर्जम्' (म.भा.) इत्यपवादविधानात्।।

15. हिनुमीना। (8.4.15)

`प्रणिणोति' इति। `हि गतौ' [गतौ वृद्धौ च--धा.पा.] (धा.पा.1257), `स्वादिभ्यः श्नुः' (3.1.73), गुणः। `प्रमीणाति' इति। `मी हिंसायाम्' [`मीञ्'--धा.पा.] (धा.पा.1476), क्र्यादित्वात् शना। `प्रमीणीतः' इति। `ई हल्यघोः' (6.4.113) इतीत्वम्। अथ कथं प्रहिणोति, प्रमीणीत इत्यत्र णत्वम्, यावता `हिनुमीना' इति स्वरूपयोर्ग्रहणम्, न चात्र गुणादौ विकारे कृते ते रूपे स्तः; तस्माच्चात्रैव भवितव्यम्--प्रहिणुतः, प्रमीणातीति? अजादेशस्य स्थानिवद्भावात्, एकदेशविकृतस्यानन्यत्वाद्वा भविष्यतीत्यदोषः। ननु प्रतिषिध्यते स्थानिवद्भावः--`पूर्वत्रासिद्धीये न स्थानिवत्' (जै.प.वृ.48) इति? दोव एवायमत्याः परिभाषायाः; तथा चोक्तम्--`अस्या दोषः संयोगादिलोपत्वणत्वेषु' [`तस्य'--इति वार्तिके पाठः] (1.1.58 वा.9.) इति। अथ `हिमीभ्याम्' इत्येवं कस्मान्नोक्तम्? अशक्यमेवं वक्तुम्, अविकरणनकारस्यापि स्यात्--प्रहेनर्दनमिति, प्रमीनर्दनमिति। प्रहिणोतीति प्रहेः, `अन्येभ्योऽपि दृश्यन्ते' अविकरणनकारस्यापि स्यात्--प्रहेनर्दनमिति, प्रमीनर्दनमिति। प्रहिणोतीति प्रहेः, `अन्येभ्योऽपि दृश्यन्ते' (3.2.75) इति विच्। गुणः। प्रमीणातीतिि प्रमीः, क्विप्। प्रहेर्नर्दनम्, प्रम्यो नर्दनमिति षष्ठीसमासः।।

16. आनि लोट्। (8.4.16)

`प्रवपाणि' इति। वपेर्लोट्। मिप्। `मेर्निः' (3.4.89)। आड्उत्तमस्य पिच्च' (3.4.92) इत्याट्। `प्रयाणि' इति। `या प्रापणे' (धा.पा.1049)। `प्रवपानि मांसानि' इति। प्रकृष्टा वपा येषामिति बहुव्रीहिः, `जश्शसोः शि' (7.1.20) इति शिरादेशः, `नपुंसकस्य झलचः' (7.1.72) इति नुम्, `सर्वनामस्थाने चासम्बुद्धौ' (6.4.8) इति दीर्घः--प्रवपानीति। अत्र लोड्ग्रहणान्न भवति। `प्रातिपदिकान्तनुम्विभक्तकिषु च' (8.4.11) इत्यनेन तर्हि कस्मान्न भवतीति? भवत्येव पक्षे। ननु चोपसर्गादिति वर्त्तते, न चानिं प्रति प्रशब्दस्योपसर्गत्वम्। किं तर्हि? अपिं [`कृषिं' इति प्रा.मु.पाठः] प्रति, तस्मादुपसर्गत्वाभावादेव न भविष्यतीति किं लोड्ग्रहणेन? नैतदस्ति; मूलोदाहरणेष्वपि तर्हि न स्यात्। अत्र हि धातुं प्रत्युपसर्गत्वम्, नानिं प्रति। तस्मात् सामर्थ्यादिहोपसर्गग्रहणमनुवर्त्तमानं प्राद्युपलक्षणार्थं विज्ञायते,--यथा--`अञ्नासिकायाः संज्ञायां नसञ्चास्थूलात्' (5.4.118)। `उपसर्गाच्च' (5.4.119) इत्यत्रोपसर्गग्रहणं प्राद्युपलक्षणार्थम्। ततश्चासति लोज्ग्रहणे स्यादेव णत्वमिति तन्निवृत्त्यर्थं लोडित्युच्यते। नन्वेवयपि न कर्त्तव्यं लोड्ग्रहणम्, `अर्थवद्ग्रहणे नानर्थकस्य' (व्या.प.1) इत्यर्थवतो ह्यानिशब्दस्येदं ग्रहणम्, न हि प्रवपानि मांसानीत्यत्रानिशब्दोऽर्थवान्, किं तर्हि? इकारः? एवं तर्ह्यतज्ज्ञापयति--अनित्यैषा परिभाषेति। तेन `इन्हन्पूषार्यम्णां शौ' (6.4.12) इत्यत्रानर्थकस्यापीनो ग्रहणे सति बहुवाग्मीनि ब्राह्मणकुलानीत्यत्रापि दीर्घत्वं सिद्धं भवति। आनीत्याकारोच्चारणं किमर्थम्? यदाऽडागमो न भवति तदा शुद्धस्य निशब्दस्य स्यादित्येवमर्थम्। [`भूदित्येवमर्थम्--प्रा.मु.पाठः]
ननु च नित्यमेवाडागमेव भवितव्यम्, न हि तद्विधौ विकल्पोऽस्ति? एवं तर्ह्येतज्ज्ञापयति--अनित्यमागमशासनमिति। तेनापि `शाकं पचानस्य सुखा वै मधवन् गृहाः' इत्यादयः प्रयोगाः सिद्धा भवन्तीति।।

17. नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च। (8.4.17)

`घु' इति घुसंज्ञकानां ग्रहणम्। `मा' इति `माङ् माने' (दा.पा.1142), `मेङ् प्रणिदाने' (धा.पा.961) इत्येतयोर्ग्रहणम्; न तु `मीञ् हिंसायाम्' (धा.पा.1476), `डु मिञ् प्रक्षेपणे' (धा.पा.1250)--इत्येतयोः `मीनातिमिनोतिदीङां ल्यपि च' (6.1.50) इति कृतात्त्वयोः, नापि `मा माने' (धा.पा.1062) इत्येतस्य। ननु च `गामादाग्रहणेष्वविशेषः' (व्या.प.124) इति सर्वेवामेव ग्रहणेन भवितव्यम्, तत् कथं माङ्मेङोरेव ग्रहणं लभ्यते? नैतदस्ति; इह `द्वन्देव धि' (2.2.32) `अल्पाच्तरम्' (2.2.34) इति वचनमपेक्ष्य `घु' इत्येतस्य पूर्वनिपातमकुर्वता नात्र वचनानुरोधेन प्रवर्त्तितष्यम्, अपि त्विच्छयेति सूचितम्। तेन यत्रेच्छा भवति स एव गृह्यते। इच्छालक्ष्यानुरोधान्माङमेङोरेव ग्रहणं भवतीति युक्तम्। अत एवेच्छयां प्रवर्त्तितव्यमिति सूचनाद्यदापि मेङ आत्त्वाभावे मेत्येतद्रूपं न सम्भवति, तदापि तस्य ग्रहणं भवत्येव--प्रणिमयत इति। `प्रतिपद्यते' इति। दिवादित्वाच्छ्यन्, अनुदात्तेत्त्वादात्मनेपदम्।
`प्रणिमिमीते' इति। जुहोत्यादित्वात् श्लुः, `श्लौ' (6.1.10) इति द्विर्वचनम्, `भृञामित्' (7.4.76) इत्यभ्यासस्येत्त्वम्, `ई हल्यघोः' (6.4.113) इतीत्त्वम्।
`प्रणिष्यति' इति। `ओतः श्यनि' (7.3.71) इत्योकारलोपः, `उपसर्गात् सुनोति' (8.3.65) इति षत्वम्। `प्रणिहन्ति' इत्यादिषु `प्रणिप्साति' इति पर्यन्तेष्वदादित्वाच्छपो लुक्। `प्रणिशाम्यति' इति। `शमामष्टानां दीर्घः' (7.3.74) इति दीर्घः। `प्रणिदेग्धि' इति। `दिह उपचये' (धा.पा.1015), लट्, पूर्ववच्छपो लुक्, `दादेर्धातोर्घः' (8.232) इति घत्वम्, `शषस्तथोर्धोऽर्थः' (8.2.40) इति धत्वम्, `झलां जश् झशि' (8.4.53) इति जश्त्वम्--गकारः। इह गदादीनां सप्तम्या निर्दिष्टत्वात् `तस्मिन्निति निर्दिष्ठे पूर्वस्य' (1.1.66) इति निर्दिष्टग्रहमस्यानन्तर्यार्थत्वावड्व्यवधानान्न भवितव्यमिति कस्यचिद्भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह--`अड्व्यवायेऽपि' इति। कथं पुनरिष्यमाणमड्व्यवाये णत्वं लभ्यते? अत्र चकारस्यानुक्तसमुच्चयार्थत्वात्, निव्यविभ्योऽड्व्यवायेऽपि' [निव्यभिभ्येऽड्व्यवाये वा छन्दसि' इति सत्रम्। (8.3.119) इत्यतो मणअडूकप्लुतिन्यायेन `अड्व्यवाये' इत्यस्यानुवृत्तेर्वा। ननु चाटो गदादिभक्तत्वात् तस्य ग्रहणेनैव ग्रहणम्, तत् कुतो व्यावायः? नैतदस्ति; अङ्गस्य ह्यडागम उच्यते, विकरणान्तञ्चाङ्गम्। स ह्यङ्गस्य सङ्घातस्य भक्तः न गदादिमात्रस्य। अतो न शक्यते गदादिग्रहणेन ग्रहीतुम्।।

18. शेषे विभाषाऽकखादावषान्त उपदेशे। (8.4.18)

`उपसर्गात्' (8.4.14) इति वर्त्तते। उपसर्गत्वं च यं प्रति क्रियायुक्ताः प्रादयस्तं प्रति भवति। धातुरेव क्रियावची, तमेव प्रति प्रादीनामुपसरग्त्वम्। ततश्चोपसर्गग्रहणेन धातौ सन्निधापिते तस्यैवाकखादित्वमषान्तत्वं च विशेषणं विज्ञायते, इत्यत आह--`अककारादिरखकारादिरषान्त उपदेशे यो धातुः' इति। आद्यन्तग्रहणे उभे अपि विस्पष्टार्थे; `अकखे अषे' इत्येषं सिद्धत्वात्। यदि सर्वैरेवाकककारादिभिस्तदादिधिधिस्तदन्तविधिर्वा स्यात्, तदा सर्वेषां द्वन्द्वं कृत्वा `अकखषे' इत्येवं ब्रूयात्। `अकखे अषे' इति वचनात् केनचित् तदादिविधिः, केनचित् तदन्तविधिरिति विज्ञायते। अत्र त्वेतावान् सन्देहः स्यात्--केन तदादिविधिः, केन वा तदन्तविधिरिति, स चापि व्यास्यानान्निर्वर्त्तिष्यत इति।

शेषग्रहणमिति स्पष्टार्थम्। यदि च गदादिषु विभाषा स्यात्, पूर्वयोगो निरर्थकः स्यात्। उपदेशग्रहणमपि स्पष्टार्थमेव। शक्यते तद्धि `उपसर्गादसमासेऽपि णोपदेशस्य' (8.4.14) इत्यतोऽनुवर्त्तयितुमुपदेशग्रहणं मण्डूकप्लुतिन्यायेन।

`प्रनिपिनष्टि' इति। `पिष्लृ सञ्चूर्णने' (धा.पा.1452), `रुधादिभ्यः श्नम्' (3.1.78)। `इह च प्रतिषेधः' इत्यादि। `प्रतिपेक्ष्यति' इति। पिणेः षकारस्य `षढोः कः सि' (8.2.41) इति कत्वेऽकखादित्वादवान्तत्वाच्चासत्युपदेशग्रहणे प्रतिषेधो न स्यात्। अस्मिंस्तु सति न भवति, उपदेशे षकारान्तत्वादिति। `इह च मा भूत्' इति। प्रतिषेध इत्यपेक्ष्यते। `प्रणिदेष्टा' इति। अत्र `विश प्रवेशने' (धा.पा.1424) इत्येतस्य व्रश्चादिसूत्रेण (8.2.36) षत्वे कृते षकारान्तत्वादुपदेशग्रहणेऽसति प्रतिषेधः स्यात्। अस्मिंस्तु सति न भवति। अपि चोपदेशग्रहणेऽसति प्रणिचकार, प्रचिचखादेत्यभ्यासस्य `कुहोश्चुः' (7.4.62) इति चुत्वे प्रतिषेधो न स्यात्; अकखादित्वात्। अस्मिंस्तु सति भवति।।

19. अनितेः। (8.4.19)

`प्राणिति' इति। `श्वस प्राणने' (धा.पा.1069), `अन च' [`च' नास्ति--धा.पा.](धा.पा.1070), पूर्ववच्छपो लुक्, `रुधादिभ्यः सार्वधातुके' (7.2.76) इतीट्। ऽनितेरिति श्तिपा निर्देशो धातुनिर्देशार्थ एव; न यङ्लुङ्निवृत्त्यर्थः; न ह्यनितेर्यङ्प्राप्तिरस्ति, हलादित्वाभावात्।।

20. अन्तः। (8.4.20)

अन्तशब्दोऽयमवयवयचनो वस्त्रान्तवत्। `हे प्राण्' इति। क्विबन्तात् सम्बुद्धिः, तस्य हल्ङ्यादिलोपः (6.1.68)। सम्बुद्धेरन्यत्र यो नकारः प्रातिपदिकान्तः, तस्या लोपेन भवितव्यमिति सम्बुद्ध्यन्तस्योपन्यासः। सम्बुद्धौ हि `न ङिसम्बुद्ध्योः' (8.2.8) इति प्रतिषेधान्नलोपो न भवति। ननु च पूर्वेणैवात्र णत्वं सिद्धम्, तत् किमर्थमिदमारभ्यते? इत्यत आह--`पदान्तस्य' इत्यादि। `पदान्तस्य' (8.4.37) इति प्रतिषेधं वक्ष्यति। तस्यायं पुरस्तादपवाद आरभ्यते। अन्तश्च पदापेक्षया गृह्यते; तत्रैव सम्भवव्यभिचारौ स्तः। न त्वनित्यपेक्षः। व्यभिचाराभावादिति भावः।

`केचित्' इत्यादि। केचिदन्तग्रहणं पूर्ययोग एव सम्बध्नन्ति। `अनितेरन्तः' इत्येकयोगमेव कुर्वन्तीत्यर्थः। किमर्थम्? अन्तग्रहणं सामीप्यार्थम्। सामीप्यमर्थो यस्य तत् तथोक्तम्। समीपमेव सामीप्यम्, चातुर्वर्ण्यादित्वात् स्वार्थे ध्यञ्। तदनेनोदकान्तवत् समीपवचनस्तैरन्तशब्दः समाश्रित इति दर्शयति। किमर्थं पुनरस्त एवमन्तशब्दं सम्बध्नन्तीत्याह--`निमित्तसमीपभूतस्य' इत्यादि। यदि हि पूर्वसूत्रेऽन्तशब्दः समीपवचनो न सम्बध्येत, तदेहापि स्यात्--पर्यनितौति। तस्मात्प्रकृतस्य णत्यनिमित्तस्य समीपो य एकवर्णव्यवहितः स प्रत्यासन्नो नकारस्तस्थैव णत्वं यथा स्यात्। पर्यनितीत्यत्र निमित्ताद्विप्रकृष्टस्य मा भूदित्येवमर्थं पूर्वसूत्रे समीपवचनमन्तशब्दं सम्बध्नन्ति। एकवर्णव्यवहितस्येत्यनेन सामीप्यमाचष्टे। अनेकवर्णव्यवहितस्य सामीप्यं नोपपद्येतेत्येतद्देश्यं नाशह्कनीयम्; तस्यापेक्षिकत्वात्। पर्यनितीत्यत्रैवानेकवर्णेन व्यवहितो नकराः; यणादेशे कृते सत्याकारयकाराभ्यां रेफस्य व्यवधानात्। प्राणितीत्यत्र त्वेकादेशे कृते सत्येकेन वर्णेन व्यवहितो नकारः; निमित्तादाकारेणैव केवलेन व्यवधानात्। यो ह्यनेकवर्णव्यवहितः, स एकमपेक्ष्य विप्रकृष्टौ भवति; इतरस्तु तमपेक्ष्य सन्निकृष्टः, सोऽप्यष्यवहितमपेक्ष्य विप्रकृष्टो भवति, भवत्येवं यद्यव्यवहितः सम्भवेत्। स चानितेर्न सम्भवतीति न भवति तदपेक्षं विप्रकृष्टत्वम्। ननु च `अचः परस्मिन् पूर्वविधौ' (1.1.57) इत्यत्र पूर्वस्माद्विधिः पूर्वविधिरिति तत्पुरुषस्याश्रयणाण्णत्वे कर्त्तव्ये सत्येकादेशस्य स्थानिवद्भावात् प्राणितीत्यत्रानेकेन वणनापि व्यवहितो नकारः? `पूर्वत्रासिद्धीये न स्थानिवत्' (पै.प.वृ.48) इति वचनात्र भवति स्थानिवद्भाव इत्यदोषः। `सैः' इत्यादि। येऽत्रान्तशब्दं सामीप्यार्थमाश्रिर्त्यकयोगं कुर्वन्ति, तेषां तस्य योगस्य प्राणित्यत्र सावकाशत्वात्, हे प्राणित्यत्र `पदान्तस्य' (8.4.37) इति प्रतिषधः प्राप्नोति। तस्मात् तैद्वितीयमप्यन्तस्य ग्रहणमावृत्त्या तन्त्रेण न्यायेना श्रयितव्यम्, पदान्तस्य णत्वं यथा स्यात्।

ननु येऽपि योगविभागं कुर्वन्ति, तेऽन्तशब्दगवयववचनमाश्रयन्ति। तैरपि पूर्वसूत्रे सामीप्यवाच्यन्तग्रहणमाश्रयितव्यमेव; अन्यथा हि पर्यनितीत्यत्रायि णत्वं स्यात्? इत्यत आह--`येषां तु' इत्यादि। येषामिति योगविभागकारिणाम्। ते ह्यनेकवर्णव्यवहितस्यापि णत्वमिच्छन्त्येव। तस्मान्नार्थस्तेषां पूर्वसूत्रेऽन्तहणेन।।

21. उभौ साभ्यासस्य। (8.4.21)

नकारोऽयमडादोनामेकोऽपि न भवतीति। ततो द्विवचने कृते सत्यभ्यासनकारेण व्यवहितत्वादितरस्य नकारस्य न स्यात्, इष्यते च। तस्मात् तस्यापि यथा स्यादितीदमारम्यते। `प्राणिणिषति' इति। सम्, इट्, `अजादेर्द्वितीयस्य' (6.1.2) इति `सम्यङोः' (6.1.9) इत्यनेन निशब्दो द्विरुच्यते। `प्राणिणत्' इति। ण्यन्ताल्लुङ्, णिलोपः, तस्य `द्विर्वचनेऽचि' (1.1.59) इति स्थानिवद्भावान्निशब्दस्य द्विर्वचनम्।

`पूर्वत्रासिद्धीयम्' इत्यादि। `पूर्वात्रासिद्धीयमद्विरवचने' (जै.प.वृ.70) इत्येतस्मिन्नसति द्विर्वचन कर्त्तव्ये णत्वस्यासिद्धत्वात् प्राग्द्विर्वचनेन भवितव्यम्।

अत्रास्मिन् सूत्रेऽसति प्रथमेन नकारेम व्यवाये द्वितीयस्य `अनितेः' (8.4.19) इत्यनेन णत्वं न स्यादिति प्राणिणिषतीत्यादि न सिध्यति। अस्मिंस्तु `पूर्वत्रासिद्धम्' (8.2.1) इत्यस्यापवादे सति `अनितेः' (8.4.19) इत्यनेन परत्वाण्णत्वमेव क्रियते। ततः कृतण्त्वस्य द्विर्वचने कृते सिद्धमेवैतदन्तरेणाप्येतत् सूत्रम्। यद्येवम्, किमर्थमिदमारभ्यते? इत्यत आह--`एतत्तु' इत्यादि। शक्यार्थे कृत्यः। इतिकरणो हेतौ। तु शब्दोऽयभवधारणे। यस्मात्तदपवादवचनं नैव शक्याश्रयितुम्, तस्मात् सूत्रमिदमारभ्यते। यदि हि तदेदाश्रीयेत,[`तदेवाश्रीयते'--प्रा.मु.पाठः] तदेदं सूत्रं न कर्त्तव्यं स्यात्, ततश्चास्यापवादवचनस्यासर्वविषयता न विज्ञायते। एवमूढमाख्यदौजढदित्यत्र पूर्वत्रासिद्धस्याभावाड्ढत्वादीनमसिद्धत्वात् `हत्' इर्त्येतस्य द्विर्वचनं न स्यात्। अस्मिंस्तु सूत्रे सति तस्यापवादवचनस्यासर्वविषयता विज्ञायते। तेनौजढवित्यत्र ढत्वादीनामसिद्धत्वात् `हत्' इत्येतस्य द्विर्वचनं भवति।
अतोभाविति किमर्थम्, यावता पूर्वस्य नकारस्य पूर्वसूत्रेणैव णत्वं सिद्धम्, इतरस्य त्वारम्भसामर्थ्यात्। अन्तरेणापि `उभौ' इति वचनं णकारस्य व्यवायेप्यनेन भविष्यति? एवं मन्यते--`साभ्यासस्य' इत्येतावत्युच्यमाने यथा `अजादेर्द्वितीयस्य' (6.1.2) इति द्विर्वचनमारभ्यमाणं प्रथमद्विर्वचनस्यापवादौ विज्ञायते तथेहाप्यनडादिव्यवाये द्वितीयस्य नकारस्य णत्वमारभ्यमाणं पूर्वस्यापवादो विज्ञायते।
`साभ्यासस्य' इति वचनं विस्पष्टार्थम्; उभावित्यनेनैव सिद्धत्वात्। न ह्यनभ्यासस्यानितेरुभौ नकारौ सम्भवतः।।

22. हन्तेरत्पूर्वस्य। (8.4.22)

हन्तेरित्यवयवलक्षणा षष्ठी। `अत्पूर्वस्य' इति। अत्पूर्वो यस्मादिति बहुव्रीहिः। नकारोऽन्यपदार्थः। `प्रहण्यते' इति। `हन हिंसागत्योः' (धा.पा.1012) `भावकर्मणोः' (1.3.13) इत्यात्मनेपदम्। `प्रध्नन्ति' इति। `गमहन' (6.4.98) इत्यादिनोपधालोपः। `हो हन्तेर्ञ्णिश्नेषु' (7.3.54) इति कुत्वम्। `प्राधानि' इति। लुङ्, `चिण्भावकर्मणोः' (3.1.66) इति च्लेश्चिण्, `अत उपधायाः' (7.2.116) इति वृद्धिः, `चिणो लुक्' (6.4.104) इति तकारसय लुक्। शितपा निर्देशो धातुनिर्देशारथ एव, न यङ्लुग्निवृत्त्यर्थः। `प्रजङ्घनीति' इति। द्विर्वचने चुत्वे जश्त्वे कृते परस्य नकारलस्य जकारेम व्यवधानाण्णात्वं न भविष्यतीति। पूर्वस्य तु `नश्चापदान्तस्य झलि' (8.3.24) इत्यनुस्वारे सत्यनुस्वारी भूतत्वाच्च।
अत इति कर्त्तव्ये `पूर्वस्य' इति वचनं वैचित्र्यार्थम्।।

23. वमोर्वा। (8.4.23)

पूर्वेण नित्ये प्राप्ते विकल्पार्थ वचनम्। वाग्रहणं पूर्वविधीनां नित्यत्वज्ञापनार्थम्; अन्यथा हि योगारम्भसामर्थ्यादेवास्य विधेर्नित्यत्वं [विधिः--प्रा.मु.पाठः; का.मु.पाठश्च] विज्ञायेत, पूर्वेषां तु विधीनां `शेषे विभाषा' (8.4.18) इत्यतो विभाषाग्रहणस्यानुवृत्तेः पाक्षिकत्वं स्यात्। इह तु वाग्रहणे द्वयोर्विभाषयोर्मध्ये ये विधयस्त एवह नित्या इति तेषां नित्यत्वं विज्ञायते।।

24. अन्तरदेशे। (8.4.24)

`अन्तरपरिग्रहे' (1.4.65) इत्यत्र `अन्तःशब्दस्याङ्क्रिविधिणत्वेषूपसर्गसंज्ञा वक्तव्या' (वा.71) इत्यनेन णत्वविधावुपसर्गसंज्ञाया विद्यमानत्वात् `हन्तेरत्पूर्वस्य' (8.4.22) इत्यनेनैव णत्वे सिद्धेऽदेशार्थोऽस्य योगस्यारम्भः। `अन्तर्हणनम्' इति। अत्र भावे ल्युट्। मध्ये हननमित्यर्थः। `अन्तरपरिग्रहे' (1.4.65) इति गतिसंज्ञकत्वात् `कुगतिप्रादयः' (2.2.18) इति समासः। `अन्तर्हननो देशः' इति। अधिकरणे ल्युट्। अन्तः-शब्दादबन्तस्य हन्तेः--अन्तर्धणो देश इति निपातनादेव देशाभिधानेऽपि णत्वं भवति।।

25. अयनञ्च। (8.4.25)

`अयनम्' इति। अयतेः, इणो वा ल्युटि रूपम्। `कृत्यचः' (8.4.29) इत्यनेनैव सिद्धेऽदेशप्रतिविधानार्थ वचनम्। चकारेणादेशग्रहणमुपसर्गग्रहणं चानुकृष्यते। तेषामुत्तरत्रानुवृत्तिनिरासार्थम्।।

26. छन्दस्यृदवग्रहात्। (8.4.26)

अवगृह्यते विच्छिद्य पठ्यत इत्यवग्रहः ऋच्चासाववग्रहश्चेति ऋदवग्रहः। ऋकारात्, अवग्रहात्, पूर्वपदात्--इत्येतास्तिस्रः समानाधिकरणाः पञ्चम्यः। ऋकारमात्रं च पूर्वपदं न भवतीति सामर्थ्यात्पूर्वपदैकदेश ऋकारे पूर्वपदशब्दो वर्त्तत इति दर्शयति। समुदयेषु हि यवृत्ताः शब्दाः क्वचिदवयवेष्वपि वर्त्तन्त इति, यथा--पटो दग्ध इत्यत्र [`इत्यत'--प्रा.मुद्रितः पाठः] पटैकदेशे पटशब्दः। `नृमणाः' इति। नरि मनोऽस्येति बहुव्रीहिः। `अत्वसन्तस्य चाधातोः' (6.4.14) इति दीर्घः। `पितृयाणम्' इति। यान्त्यनेनेति यानम्, करणे ल्युट्। पितुर्यानमिति षष्ठीसमासः।
`अत्र हि' इत्यादिना ऋकारस्यावग्रहत्वं दर्शयति। `अवग्रहग्रहणम्' इत्यादि। यद्यवग्रहग्रहणं न क्रियते, ततोऽव्यपदान्तादनवग्रृह्यणाणात् ऋकारात् स्यात्; अस्मिस्तु सति न वति। पदान्तस्यैवावग्रहो भवति, नापदान्तस्य। अत्र केषाञ्चिद्दर्शनम्--अत्र `संहितायाम्' (8.2.108) इत्यनुवर्त्तमानमपि नाभिसम्भध्यते, अवग्रहग्रहणात्। तेन यदाऽवगृह्यत ऋकारस्तवैव णत्वं भवति, नान्यदेति। अपरे तु मन्यन्ते--यथाऽनृत्यन्नापि नर्त्तनयोग्यत्वान्नर्त्तक इत्युच्यते, तथाऽनवगृह्यमाणोऽपि ऋकारोऽवग्रहयोग्यत्वादवग्रह इत्युक्तः। अत एतदुक्तं भवति--अवग्रहयोग्यात् ऋकाराण्णत्वं भवति, एवं सत्यवग्रहग्रहणे

संहिताधिकारात् संहितायामेव णत्वं भवति, नावग्रहादिति।।

27. नश्च धातुस्थोरुषुभ्यः। (8.4.27)
धातौ तिष्ठतीति धातुस्थः, `सुपि स्थः' (3.2.4) इति कप्रत्ययः। ऊर्विति, ष्विति च स्वरूपग्रहणम्। नसिति नासिकादेशस्यास्मदादेशस्य च सामान्येन ग्रहणम्। तत इहास्मदादेश एव कार्यी, नेतरः; इतरस्य धातुस्थादिभ्यः परस्यासम्भवात्। उत्तरत्र हि नासिकादेशस्य कार्यित्वं भविष्यति। `रक्षा णः' इति। `रक्ष पालने' (धा.पा.658) इत्यस्माद्धातोर्लोट्, मध्यमपुरुषैकवचनान्तात् परस्यास्मदो द्वितीयान्तस्य `बहुवचनस्य अस्नसौ' (8.1.21) इति नसादेशः, `द्व्यचोऽतस्तिङः' (6.3.135) इति पूर्वपदस्य दीर्घः। `शिक्षा णः' इति। `शिक्षा विद्योपादाने' (धा.पा.605) इत्यस्मात् तथाविधादेवास्मदो नसादेशः। `उरुणस्कृधि' इति। कृञो लोट् सिप्, `सेर्ह्यपिच्च' (3.4.87) इति हिरादेशः। `श्रुशृणुपृकृवृभ्यश्छन्दसि' (6.4.102) इति हेर्धिरादेशः। `कःकरत्' (8.3.50) इत्यादिना विसर्जनीयस्य सत्वम्। `अभीषु णः' इति। `इकः सुञि' (6.3.134) इति दीर्घः, `सुञः' (8.3.107) इति षत्वम्। एवं `ऊर्ध्व ऊषु णः' इत्यत्राप्युकारस्य `निपातस्य च' (6.3.126) इयानेन दीर्घः, सुञः' (8.3.107) इति इति षत्वञ्। चकारेण `छन्दसि' (8.4.26) इत्यनुकृष्यते, उत्तरत्रानुवृत्तिनिरासार्थम्।।

28. उपसर्गाद्बहुलम्। (8.4.28)
नसादेशस्याक्रियावाचित्वात् तं प्रत्युपसर्गत्वं न सम्भवतीति प्राद्युपलक्षणार्थमेतदुपसर्गग्रहणं विज्ञायते। `प्रथः' इति। पूर्ववदस्मदो नस्। `प्रणसम्' इति। प्रगता नासिका यस्येति बहुव्रीहिः। `उपसर्गाच्च' (5.4.119) इत्यच् समासान्तः; नासिकायाश्च नसादेशः।।

29. कृत्यच। (8.4.29)
`कृत्स्थो यो नकारोऽच उत्तरः' इति। एतेनाद्य इति नकारस्येवं विशेषणम्। न तु कृत इति दर्शयति। यदि कृत एव विशेषणं स्यात्, `प्रवपणम्' इत्यत्र णत्वं न स्यात्, न ह्यत्र कृदचः परः। नकारस्तु सम्भवत्येव। यदि कृत एतद्विशेषणं स्यात्, तदा `न भाभूपूकमिगमिप्यायी' (8.4.24) इत्यादौ कम्यादीनां ग्रहणमनर्थकं स्यात्, प्राप्त्यभावात्। न ह्येतेभ्यो यः कृद्विधीयते सोऽचः परः सम्भवति; तेषामनजन्तत्वात्। तस्मान्नकारस्येदं विशेषणं युक्तम्। कृत्स्थानां येषां णत्वं सम्भवति, तान् दर्शयितुमाह--`अनमानानीयानि' इत्यादि। अन--योरादेशः। मानः--आगतमुका शानच्-कानच्-चानशः। अनीयर्-तव्यदादि (3.1.96) सूत्रेण यो विहितः। अनिः--`आक्रोशे नञ्यनिः' (3.3.112) इति, इनिः--`सुप्यजातौ णिनिस्ताच्छील्ये' (3.2.78) इति, `आवश्यकाधमर्ण्ययोरिनिः' (3.3.112) इति, इनिः--`सुप्यजातौ णिनिस्ताच्छील्ये' (3.2.78) इति, `आवश्यकाधमर्ण्ययोरिनिः' (3.3.170) इति; अयञ्च उत्सृष्टानुबन्धः। निष्ठादेशः--`रदाभ्यां निष्ठातो नः' (8.2.42) इति प्रकरणे यो विहितः। `प्रयाणम्' इति। पूर्ववद्यातेर्ल्युट्। `प्रयायमाणम्' इति। कर्मणि लकारः। शानच्, यक्, `आने मुक्' (7.2.82) इति मुक्। `प्रयाणीयम्' इति। अनीयर्। `अप्रयाणिः' इति। आक्रोशे नञ्यनिः' (3.3.112)। `प्रयायिणौ' इति। `आतो युक्चिण्कृतोः' (7.3.33) इति युक्। `प्रहीणः' इति। `ओहाक् त्यागे' (धा.पा.1090)। `ओदितश्च' (8.2.45) इति तकारस्य नकारः; `धुमास्था' (6.3.66) त्यादिनेत्त्वम्।
`प्रमग्नः' इति। `टु मस्जो शुद्धौ' (धा.पा.1415), `मस्जिनशोर्झलि' (7.1.60) इति नुम्। सच भवञ्जकारात् [`भवञ्चकारात्'--का.मु.पाठः] पूर्वो भवति; `मस्जेरन्त्यात् पूर्वं नुममिच्छन्त्यनुषङ्गसंयोगादिलोपाथम्' (वा.7) इति वचनात्। `अनिदिताम्' (6.4.24) इत्यादिनास्य नकारलोपः, `स्कोः' (8.2.29) इत्यादिना सकारस्य च। `चोः कुः' (8.2.30) इति कुत्वम्। `परिभुग्वः' इति। `भुजो कौटिल्ये' (धा.पा.1417)।
`निर्विण्णः' इति। लाभसत्ताविचारणार्थानां विदीनामन्यतमस्य रूपम्, न `विद ज्ञाने' (धा.पा.1064) इत्यस्य; सेट्त्वात् सस्य। अत्राच उत्तरो न भवति, तस्मान्निर्विण्णस्य सिद्धय उपसंख्यानम्=प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रैदं प्रतिपादनम्--पूर्वसूत्राद्बहुलवचनमनुवर्त्तते, तेनानचोऽपि परस्य भविष्यतीति।।

30. णेर्विभाषा। (8.4.30)
पूर्वेण नित्ये प्राप्ते विकल्पार्थमिदमारभ्यते। यद्येवम्, विभाषाग्रहणमनर्थकं स्यात्। आरम्भसामर्थ्यादेव विकल्पो विज्ञायते? नैतत्, विपर्ययोऽपि सम्भाव्येत। अयं तु नित्यो विधिः, पूर्वसूत्रं तु बहुलग्रहणानुवृत्तेर्विभाषेति। `ण्यन्ताद्यो विहितः' इति। एतेन `णेः' इति विहितविशेषणत्वं दर्शयति। तस्य च प्रयोजनं वृत्तौ वक्ष्यति। `प्रयाप्यमाणम्' इति। `हेतुमति च' (3.1.26) इति णिच्। `अर्त्तिह्री' (7.3.36) इत्यादिना पुक्।।

31. हलश्चेजुपधात्। (8.4.31)
चकारो विबाषेत्यनुकर्षणार्थः। तेनोत्तरत्र विधिर्नित्यो भवति। `प्रकोपधम्' ति। `कुप क्रोधे' (धा.पा.1233)।
`प्रहणम्, प्रोहणम्' इति। `ईह चेष्टायाम्' (दा.पा.632), `ऊह वितर्के' (दा.पा.648)। अत्र `कृत्यचः' (8.4.29) इति नित्यमेव भवति। कथं पुनर्ज्ञायते--हल्ग्रहणमिहादेर्विशेषणम्, न त्वन्तस्य? इत्यत आह--`इजुपधस्य' इत्यादि। सर्व एवेजुपधा धातवो हलन्ता एवेतीजुपधादेव हलन्तत्वे लब्धे हल्ग्रहणमं

क्रियमाणमादेर्विशेषणं विज्ञायते।।

32. इजादेः सनुमः। (8.4.32)
`हल इत्यनुवर्त्तते' इति। तदनुवृत्ते। प्रयोजनं वक्ष्यति। ननु च पूर्वसूत्रे हल्ग्रहणमादेर्विशेष म्, अन्तस्य विशेषणेन चेहार्थः? इत्याह--`तेन' इत्यादि। न हीजादिर्धातुः कश्चिद्धलादर्विद्यते, सामर्थ्यात्। तेन हल्ग्रहणानुवृत्तेन तदन्तविधिर्भवति। `सनुमः' इति। सानुस्वादादित्यर्थः। कुत एतत्? नुम्ग्रहणस्यानुस्थारीपलक्षणार्थत्वात्। कस्मात् पुनरेवं व्याख्यायते? नियमार्थत्वादस्य योगस्य। एवञ्चास्य नियमार्थता भवति यदि नुम्ग्रहणमनुस्वारोपलक्षणार्थं भवति, नान्यथा। असति विधेये नियमार्थता विज्ञायते। यदि नुम्ग्रहणं मुम एव प्रतिपादकं स्यात्, नानुस्वारोपलक्षणार्थ स्यात्, नानुस्वारोपलक्षणार्थं स्यात्। एवञ्च सति यत्र `कृत्यचः' (8.4.29) इत्यनेन न सिध्यति, तत्र स्यादेवास्य विधेयत्वम्। क्वैतेन न सिध्यतीति? `इवि व्याप्तौ' (धा.पा.587), प्रेध्वनमिति। अत्र यद्यपि च `अट्कुप्वनुम्व्यवायेऽपि' (8.4.2) इत्यनुवर्त्तते, तथापि तेनात्र न प्राप्नोति; नुम्ग्रहणास्यानुस्वारोपलक्षणार्थत्वात्, इह चानुस्वाराभावात्। तस्मान्नियमार्थतामस्येच्छता नुम्ग्रहणस्यानुस्वारोपलक्षणार्थत्वं वेदितष्यम्। एवं प्रेङ्खणमित्यादौ `कृत्यचः' (8.4.29) इति सिद्धे नियमार्थमेतत्सम्पद्यते। अनुस्वारोपलणार्थता च नुमः `इजादेः सनुमः' इति महतः सूत्रसय प्रणयनादवसीयते। यदि हि नुम्ग्रहणं नुम एव प्रतिपादकं स्यान्नानुस्वारोपलक्षणार्थम्, तदानीं `इवेः' इत्येवं ब्रूयात्; न हीवेरन्यो धातुरिवादिर्हलन्तः सनुम् सम्भवति। इखिप्रभृतयः सम्भवन्तीति चेत्? न; अनुस्वारे कृते नुमोऽभावात्। `प्रेङ्खणम्' इति। `अख वख' [नख--प्रा.मु.पाठः] इत्यादौ कवर्गान्त इखिः पठ्यते; तस्येदित्त्वान्नुम् (7.1.58), `नश्चापदान्तस्य झलि' (8.3.24) इत्यनुस्वारः, `अनुस्थारस्य ययि' (8.4.58) इति [`इति--नास्ति--प्रा.मु.पाठे] परसवर्णत्वम्, तस्यासिद्धत्वादनुस्वार एवायम्। `प्रोम्भणम्' इति। `उभ उन्भ पूरणे' (धा.पा.1319,1320) पूर्ववदनुस्वारः।
ननु च `कृत्यचः' (8.4.29) इत्येवं सिद्धमत्र, किमर्थमिदमारभ्यते? इत्याह--`सिद्धे' इत्यादि। `प्रमङ्गनम्' इति। तत्रैव गत्यर्थवर्गे मगिः पठ्यते, क्वचित् `प्रमङ्कनम्' इति पाठः। स `मकि मण्डने' (धा.पा.89) इत्यस्य द्रष्टव्यः। ननु चासति विधेये नियमार्थता भवति, इह च णेर्विभाषायां प्राप्तायां नित्यंणत्वं विधेयमस्ति--`निधिनियमसम्भवे विधिरेव ज्यायान्' (व्या.प.130) इति, ततो ण्यन्तान्नित्यं विध्यर्थमेतत् कस्मान्न भवति? इत्याह--`हल इत्यभिकारात्' इत्यादि। पूर्वसूत्राद्धल इत्यनुवर्त्तते, तेन च तदन्तविधिरित्युक्तम्, न हि हलन्तो भवति ण्यन्तो धातुः। किं तर्हि? सजन्तः। न च हलन्तादुच्यमानमजन्ताद्भवितुमर्हति, तस्मान्नेदे ण्यन्ते नित्यं विध्यर्थ भवति। ननु च णिलोपे कृते ण्यन्तोऽपि हलन्तो भवति, ततश्च `हलः' इत्यधिकारेऽपि स्यादेव विध्यर्थता? नैतदस्ति; विहितवशेषणाश्रयणात्। एतच्चोद्यनिरासायाह--`इजादेः समुमो हलन्ता द्धातोर्यो विहितः कृत्' इति। विहितविशेषणमाश्रितम्।।

33. वा निंसनिक्षनिन्दाम्। (8.4.33)
`णिसि चुम्बन' (धा.पा.1025), `णिक्षि रोषे' [नख--प्रा.मु.पाठः] (धा.पा.659), णिदि कुतसायाम्' (धा.पा.66)। णोपदेशत्वादेषाम् `उपसर्ग' (8.4.14) इत्यादिना नित्ये प्राप्ते विकल्पार्थमिदमारभ्यते। यद्येवम्, न कर्त्तव्यं वाग्रहणम्, पृथग्योगकरणादेव विकल्पो भविष्यति? नैतदस्ति; विपर्ययोऽपि विज्ञायेत--अयं विधिर्नित्यः, स विभाषेति। `उपसरगादसमासे' (8.4.14) इत्यस्यानन्तरमस्मिन् कर्त्तव्य इहास्य करणं पूर्वविधेर्नित्यत्वज्ञापनर्थम्--द्वयोर्विभाषयोर्मध्ये ये वै विधयस्ते नित्या भवन्तीति।।

34. न भाभूपूकमिगमिप्यायीवेषाम्। (8.4.34) [`प्यायि'--प्रा.मु.पाठः]
`पूग्रहणेन पूञ्ग्रहणं द्रष्टव्यम्' इति। `पूङ् पवने' (धा.पा.966) इति भ्वादौ यः पठ्यते तस्य ग्रहणं नेष्यते। तेन क्रैयादिकस्य चेष्यते। कथं `पू' इत्युच्यमाने पूञ एव ग्रहणं लभ्यते? `कृत्यचः' (8.4.29) इति `कृति' इति योगविभागात्। `योपविभागादिष्टसिद्धिः' (व्या.प्र.87) इति पूङ एव योगविभागेन णत्वं भवतीति। एवं योगविभागेन पूङः परस्य कृत्स्थस्य नकारस्य णत्वेऽसाधिते पारिशेष्यात् पूञ एव ग्रहणं विज्ञायते।
`ण्यन्तानां च' इत्यादि। ण्यन्तानां ग्रहँ शब्दान्तरत्वान्न प्राप्नोति। तस्मादुपसंख्यानं कर्त्तव्यमेवेति। तस्य प्रतिपादन मित्यर्थः। तत्रेदं प्रतिपादनम्--नेति योगविभागः कर्त्तव्यः, तेन ण्यन्तानामपि न भविष्यतीति। न चवं सति भादीनां ग्रहणमनर्थकं स्यात्; पूर्वयोगस्यासर्वविषयत्वज्ञापनात्। एवं ह्यतिप्रसङ्गः परिह्रतो भवति।।

35. षात् पदान्तस्य। (8.4.35)
`निष्पानम्, दुष्पानम्' इति। `इदुदुपधसय' (8.3.41) इति विसर्जनीयस्य षत्वम्। इह `कृत्यचः' (8.4.29) इत्यनेन प्राप्तिः। `सर्पिष्पानम्, यजुष्पानम्' इति। षष्ठीसमासः। `इसुसोः सामर्थ्ये' (8.3.44) इत्यनुवर्त्तमाने `नित्यं समासे' (8.3.45) इत्यादिना विसर्जनीयस्य षत्वम्। अत्र `वा भावकरणयोः' (8.4.10) इति प्राप्तिः।
`पदान्तात्' इति षष्ठीसमासोऽयमिति मन्यमानो यो देशयेत्--अथेह णत्वप्रतिषेधः कस्मान्न भवति--सुसर्पिष्केणेति, अत्र पदस्यान्तः षकार इति? तं प्रत्याह--`पदे अन्तः' इत्यादि। षष्ठीसमासे हि सति णत्वस्य प्रतिषेधः स्यात्, न चायं षष्ठीसमासः, किं तर्हि/ `सप्तमी' (2.1.40) इति योगविभागात् समासः--पदे

परभूतेऽन्तः पदान्त इति। न चात्र पदे परभूते षकारोऽन्तः; कशब्दस्यापदसंज्ञकप्वात्। तेनेह न भवति णत्वप्रतिषेधः। शोभनं सर्पिरस्येति बहुव्रीहिः, `शेषाद्विभाषा' (5.4.154) इति कप्।।

36. नशेः षान्तस्य। (8.4.36)
`उपसर्गादसमासे' (8.4.14) इत्यादिना प्राप्तस्य णत्वस्य प्रतिषेधः क्रियते। `प्रनष्टः' इति। `णश अदर्शने' (धा.पा.1194), तस्मान्निष्ठा, मस्जिनशोर्झलि' (7.1.60) इति नुम्, `अनिदितां हल उपधायाः क्ङिति' (6.4.24) इति नलोपः; व्रश्चादिसूत्रेण (8.2.36) षत्वम्। `प्रणश्यति' इति। दिवादित्वाच्छ्यम्। अथान्तग्रहणं किमर्थम्; यावता `नशेः षः' इत्युच्यमान नशो विशिष्यमाणे `येन विधिस्तदन्तस्य' (1.1.72) इति तदन्तविधौ षान्तस्य णत्वप्रतिषेधो भविष्यति? इत्याह--`अन्तग्रहणम्' इत्याह। `प्रनङ्क्ष्यति' इति। पूर्ववत् षत्वे `षढोः कः सि' (8.2.41) इति कत्वम्। अत्र यद्यन्तग्रहणं न क्रियेत, कत्वे षान्तता नास्तीति प्रतिषेधो न स्यात्। अस्मिंस्तु सति कत्वेऽपि कृते भवति। एतदेव हि तस्य प्रयोजनम्--भूतपूर्वेऽपि षान्ते प्रतिषेधो यथा स्यात्।।

37. पदान्तस्य। (8.4.37)
`अट्कृप्वाङ्नुञ्व्यवायेऽपि' (8.4.2) इति प्राप्तस्य णत्वस्य प्रतिषेधोऽयमुच्यते। `वृक्षान्' इति। `प्रथमयोः पूर्वसवर्णः' (6.1.102) इति दीर्घः, `तस्माच्छसो नः पुंसि' (6.1.103) इति सकारस्य नकारः।।

38. पदव्यवायेऽपि। (8.4.38)
निमित्तनिमित्तिनोः परकृतत्वादुभयोरेव व्यवायो विज्ञायते, इत्यत आह--`पदेन व्यवाये सति निमित्तनिमित्तिनोः' इत्यादि। `माषकुम्भषापेन' इति। माषाणां कुम्भः माधकुम्भः, तं वपतीति `कर्मण्यण्' (3.2.1), तदन्तात् तृतीयैकवचनम्। अत्र `प्रातिपदिकान्तनुम्विभक्तिषु च' (8.4.11) इति प्राप्तिः। `चतुरङ्गयोगेन' इति। अत्र `कुमति च' (8.4.13) इति प्राप्तिः। चत्वार्यङ्गान्यस्येति बहुव्रीहिः; तेन योगश्चतुरङ्गयोगः, `कर्त्तृकरणे कृता बहुलम्' (2.1.32) इति तृतीयासमासः। पूर्वत्र कुम्भशब्देन व्यवायः, उत्तरत्र त्वङ्गशब्देन। `प्रावनद्धम' इति। `णह बन्धने' (धा.पा.1166), निष्ठा, `नहो धः' (8.2.34), `झषस्तथोर्धोऽधः' (8.2.40), `झलां जश् झशि' (8.4.53) इत्येते विधयः कर्त्तव्याः, गतिसमासः। अत्रावशब्देन व्यवायः। णत्वप्राप्तिस्तु `उपसर्गादसमासेऽपि' (8.4.14) इत्यादिना। एवं `प्रगान्नयामः' इत्यत्रापि। व्यवधानं तु गामित्यनेन। इदं तु च्छान्दसमुदाहणम्। न हि भाषायां व्यवहितादामुपसर्गाणां धातोः प्राक् प्रयोगोऽस्ति, किं तर्हि? `छन्दसि परेऽपि' (1.4.81) इत्यतः `छन्दसि' इत्यनुवर्त्तमाने `व्यवहिताश्च' (1.4.82) इत्यनेन छन्दसि व्यवहितो भवति। गोशब्दस्यौकारस्य `औतोऽम्शसोः' (6.1.93) इत्यात्त्वम्।
`पदव्यवाये' इत्यादि। योऽयं पदव्यवाये प्रतिषेध उच्यते सोऽतद्धिते भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानमित्यर्थः। तत्रेदं व्याख्यानमित्यर्थः। तत्रेदं व्याख्यानम्--`वा निंस निक्ष निन्दाम्' (8.4.33) इत्यतो मण्डूकप्लुतिन्यायेन वाग्रहणमनुवर्त्तते; सा च व्यवस्थितविभाषा, तेन तद्धिते प्रतिषेधो न भविष्यतीति। `आर्द्रगोमर्येण' इति। गोरिदं गोमयम्, `गोश्च पुरीषे' (4.3.145) इति मयट्। आर्द्र च तत् गोमयञ्चेति कर्मधारयः। गोशब्देन पदेन ध्यवधानम्। पदसंज्ञा चास्य `स्वादिष्वसर्वनामस्थाने' (1.4.17) इत्यनेन।।

39. क्षुभ्नादिषु च। (8.4.39)
`रवाभ्मां नो णः' (8.4.1) इत्यादिशास्त्रेण प्राप्तस्य णत्वस्य प्रतिषेधोऽयमुच्यते। `क्षुभ्ना' इति स्वरूपग्रहणमेतत्, न धातुग्रहणम्; अन्यथा `क्षोभणम्' इत्यत्रापि स्यात् प्रतिषेधः। यद्येवम्, `क्षभ्नन्ति' इत्यत्र `श्नाभ्यास्तयोरातः' (6.4.112) इत्याकारलोपे कृते, `क्षुभ्नीतः' [`क्षुध्वनीतः--प्रा.मु.पाठः] इत्यत्र `ई इल्यधोः' (6.4.113) इतीत्त्वे कृते णत्वस्य प्रतिषेधो न स्यात्; स्वरूपस्याभावात्? अजादेशस्य स्थानिवद्भावादेश विकृतस्यानन्यत्वाद्वा (व्या.प.16) भविष्यतीत्यदोषः।
`एतान्युत्तरपदानौ' इत्यादि। एतेन `पूर्वपदात् संज्ञायामगः' (8.4.3) इति प्राप्ति दर्शयति।
`हरिन्दी' इति। ताच्छील्ये णिनिः। `हरिनन्दनः' इति। ल्युडन्तेन समासः। एवं `हरिनगरम्' [गिरि नगरम्'--काशिका, पदमञ्जरी च] इत्यत्रापि नगरेण षष्ठीसमासः।
`नरीनृत्यते' इति। `रीगृदुपधस्य च' (7.4.90) इत्यभ्यासस्य रीगागमः, `अट्कुप्वाङ्' (8.4.2)
एवं `तृप्नोति' इत्यत्रापि। `तृप प्रीणने' (धा.पा.2195), व्यत्वयेन श्नुः। `परिनर्त्तनम्, परिगहनम् इति। गतिसमासौ। `कृत्यचः' (8.4.29) इति प्राप्तिः। `शरनिवेशा'दयो `दर्भानूप' पर्यन्ताः षष्ठीसमासाः। `अनूपः' ति। अमुगता आपो यस्मिन्निति बहुव्रीहिः, `ऋक्पूरब्धूःपथामानक्षे' (5.4.74) इत्यकारः समासान्तः, `ऊदनोर्देशे' (6.3.98) इत्युत्त्वम्, सवर्णदीर्घत्वम्।
`आचार्यादणत्वञ्च' इति। चकाराण्णत्वं च, तेन विभाषा सम्पद्यते। व्यवस्थितविभाषाविज्ञानादाचार्येणेति नित्यं णत्वं भवति। `आचार्यभोगौनः' इति। `आत्मन्विश्वजनभोगोत्तरपदात् खः' (5.1.9)। `अट्कुप्वाङ्' (8.4.2) इत्यादिना प्राप्तिः। एवं `आचार्यानी' इत्यत्रापि। `इन्द्रवरुण' (4.1.49) इत्यादिना

ङीष्, आनुगागमश्च। चकारस्यानुक्तसमुच्चयार्थत्वावपरिसमाप्तिं क्षुभ्नादेर्बोधयतीति मत्वाऽऽह--`क्षुभ्नादिराकृतिगणः' इति।।[`क्षुध्वनीतः--प्रा.मु.पाठः]

40. स्तोः श्चुना श्चुः। (8.4.40)
`शकारचवर्याभ्यां सन्निपाते' इत्यादि। सन्निपाते=आनन्तर्य इत्यर्थः।

`वृक्षश्शेते' इति। `वा शरि' (8.3.36) इति विसर्गस्य सकारः। तस्यानेन शकारः।
`यज्जति' इति। `टु मस्त्रो शुद्धौ' (धा.पा.1415), `झलां जश् झशि' (8.4.53) इति सकारस्यदकारः, तस्यानेन जकारः। श्चुत्वे कर्त्तव्ये जश्त्वत्यासिद्धत्वं नाशङ्कनीयम्; `मस्जिनशोर्झलि' (7.1.60) इत्यत्र मज्जेः कृतचुत्वनिर्देशात्। असिद्धत्वे ह्ययं निर्देशो नोपपद्यते। `भृज्जति, वृश्चति' इति। ग्रह्यादि (6.1.16) सूत्रेण सम्प्रसारणम्। `यज्ञः, पाञ्चा' इति। यजियाचिभ्यां `यजयाच' (3.3.90) इत्यादिना नङ्।
इह सकारतवर्गौ द्वौ कार्यिणौ, निमित्ते अपि द्वे एव--शकारचवर्गौः, ततश्च साम्यात् संख्यातानुदेशः प्राप्नोति, सकारस्य शकारेण सन्निपाते तवर्गस्य चवर्गेण कस्मान्न भवति? इत्याह--`शात्' इत्यादि। प्राप्तिपूर्वका हि प्रतिषेधा भवन्ति। यदि निमित्तं प्रति यथासंख्यं स्यात्, एवं सति शात्परस्य तवर्गस्य चुत्वप्राप्तिरेव नास्तीति `शात्' (8.4.44) इति प्रतिषेधं न कुर्यात्, कृतश्चासौ, अतः स ज्ञापयति--संख्यातामुदेशो न भवन्नीति।
`स्तोश्चौ' इति लाघवार्थ सप्तम्या निर्देशे कर्त्तव्ये `श्चुना' इति तृतीयानिर्देशः पूर्वभूतेनापि सन्निपातेन यथा स्यात्--यज्ञः, याच्ञेति। सप्तनीनिर्देशे हि `तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) इति परभूतेनैव स्यात्, न पूर्वभूतेन।।

41. ष्टुना ष्टुः। (8.4.41)
अत्रापि संख्यातानुदेशाभावस्य `तोः षि' (8.4.43) इति प्रतिषेधो ज्ञापकः। यद्यत्रापि निमित्तं प्रति संख्यातानुदेकः स्यात्, षकारेण सन्निपाते तवर्गस्य ष्टुत्वमेव न प्राप्नोति। `तोः षि' (8.4.43) इति प्रतिषेधं न कुर्यात्, कृतश्चासौ, अतः स एव लिङ्गमिह संख्यातानुदेशाभावत्य। `वृक्षष्टीकते' इति। तिकृ टिकृ टीकृ रगि [`रधिः'--धा.पाठ] लधि गत्यर्थाः (धा.पा.105,103,104,107,108)।
`पेष्टा' इति। `पिप्लृ सञ्चूर्णने' (धा.पा.1452)। `कृषीष्ट, कृषीष्ठाः' इति। करोतेराशिवि लिङ्, तस्य तथासौ, सीयुट्, `लोपो व्योर्वलि' (6.1.66) इति यकादलोपः, `सुट तिथोः' (3.4.107) इति सुट्, `आदेशप्रत्यययोः' (8.3.59) इति षत्वम्, अनेन ष्टुत्वम्। `अग्निचिड्डीनः' इति। `डीङ्[``अट्ट'--धा.पा.] विहायसा गतौ' (धा.पा.968), स्वादित्वात् `ओदितश्च' (8.2.45) इति नत्यम्। `अग्निचिढ्ढौक्ते' इति। `ढौकृ गतौ' (धा.पा.98) `अट्टति, अड्ढति' इति। `अत्ट [अतिक्रमहिंसयोः--धा.पा.] अतिक्रमणहिंसयोः' (धा.पा.254), [अड्ड--धा.पा.] (धा.पा.254), `अदड अनियोगे' (धा.पा.348) तकारवकारोपधयोरेतयोर्गणे पाठः क्विबन्तयोल्तयोः संयोगान्तलोपे सकारदकारयोः श्रवणार्थः।।

42. न पदान्ताट्टोरनाम्। (8.4.42)
`अनाम्' इति षष्ठीबहुवचनस्यागतनुट्कस्य प्रतिषेधः। `श्वलिट्साये' इति। यदा `ङः सि धुट्' (8.3.29) इति धुट नास्ति, तदैतदुदाहरणम्। `ईट्टे' इति। `इड स्तुतौ' (धा.पा.1029)। अनुदात्तेत्त्वादात्मनेपदम्, अदादित्वाच्छपो लुक्, `खरि च' (8.4.55) इति डकारस्य टः। `सर्पिष्टमम्' इति। `अतिशायने तमप्' (5.3.55), `ह्रस्वात्तादौ तद्धिते' (8.3.101) इति सकारस्य मूर्धस्यः। `षज्णाम्' इति। `षट्चतुर्म्यश्च' (7.1.55) इति गुट्, `झलां णशोऽन्ते' (8.2.39) इति षकारस्य डकारः, `यरोऽनुनासिकेऽनुनासिको वा' (8.4.45) इति डकारस्य णकारः। `षण्णवतिः' इति। पडधिका नवतिरिति शाकपार्थिवा दित्वादुत्तरपदलोपिसमासः। षण्णां नगराणां समाहारः `षण्णगरी' `द्विगोः' (4.1.21) इति ङीप्।।

43. तोः षि। (8.4.43)
`अग्निचित् षण्डे' इति। `अग्नौ चेः' (3.2.91) इति क्विप्। `सोमसुत्षण्डे' [नास्तीदमुदाहरणं--काशिका] इति। `सोमे सुञः' (3.2.90) इति क्विप्। अत्र `पि' इति सप्तमीनिर्देशात् पूर्णभूतेन सन्निपातेन भवत्येव ष्टुत्वामिति--पेष्टा, पेष्टुमिति।

44. शात्। (8.4.44)
`विश्नः, प्रश्नः' इति। `विच्छ गतौ' (धा.पा.1423) `प्रच्छ ज्ञीप्सायाम्' (धा.पा.1413), पूर्ववन्नङ्, `च्छ्वोः शूडनुनासिके च' (6.4.19) इति च्छकारस्य शकारः। यद्यपि `प्रश्ने चासन्नकाले' (3.2.117) इति निपतनादेव शात्परस्य तदर्गस्य चुत्वं न भवतीत्यैषोऽर्थो लभ्यते, तथापि मन्दधियां प्रतिपत्तिगौरवपरीहारार्थमिदमारभ्यते। अथ वा`अवाधकान्यपि निपातनानि भवन्ति' (पु.प.वृ.19) इत्युक्तम्। यद्येतन्नारभ्यते, प्रश्ञः, विश्ञ इत्यपि रूपं सम्भाव्येत।।

45. यरोऽनुनासिकेऽनुनासिको वा। (8.4.45)

`पदान्तस्य' इत्यनेन `न पदान्ताट्टोरनाम्' (8.4.42) इत्यतः पदान्तग्रहणमनुवर्त्तते, तच्चार्थात् षष्ठ्यन्ततामनुभवतीति दर्शयति। `वाङ्न्यति' इत्यादावुदाहरणे `झलां जशोऽन्ते' (8.2.39) इति गकारादौ जश्त्वे कृते तस्यानुनासिकः कर्त्तव्यः। `वाङ्मयम्' इति। `नित्यं वृद्धशरादिभ्यः' (4.3.144) इति मयट्। `त्वङ्मयम्' इति। अत्रापि `मयङ्वैतयोः' (4.3.143) इत्यादिना।।

46. अचो रहाभ्यां द्वे। (8.4.46)

`अच उत्तरौ यौ रेफहकारौ' इति। एतेनाच इति रहोर्विशेषणमिति दर्शयति। `आन्यामुत्तरस्य यरः' इति। अनेनापि रहौ यर्विशेषणमिति। `बर्क्ककः' इति। `अर्च पूजायाम्' (धा.प.204),धञ्, `चजोः कुधिण्ण्यतोः' (7.3.52) इति कुत्वम्। `मर्क्ककः' इति। मर्चिः सौत्रो दातुः, तस्मात् इण्भीकापाशस्यर्तिमर्चिभ्यः कन्' (द.उ.3.21) इति कन्, `चोः कुः' (8.2.30) इति कुत्वम्। अत्राकारादुत्तरो रेफः, तस्मादपि परः ककारो यरिति। `ब्रह्मा' इति। अत्राप्यकारादेवाच्च उत्तरो हकारः, तस्मादपि परो मकारो यरिति। `अपह्तुते' इति। अत्राप्यकारादुत्तरो हकारः, पूर्ववच्छपो लुक्, तस्मात् परस्य नकारस्य द्विर्वचनम्। `किन्ह्नुते' इति। अत्राच उत्तरो हकारो न भवतति नकारो न द्विरुच्यते। `किम्ह्मलयति' इति। `ह्वल ह्मल सञ्चलने' (धा.पा.805,806), हेतुमण्णिच। `ज्वलह्वलह्मलनमामनुपसर्गाद्वा' [`ज्वलह्नलह्वल'--प्रा.मु.पाठः] (धा.पा.817 अनन्तरम्) इति मित्त्वम्, `मितां ह्रस्वः' (6.4.92) इति ह्रस्वत्वम्।।

47. अनचि च। (8.4.47)

`अनच्परस्य' इति। अचोऽन्योऽनच्, अनच् परो यस्मात् सोऽयमनच्परः। `दद्ध्यत्र' इति। अत्राचः परो धकारो यर्, तस्यानचि यकारे परतो द्विर्वचनम्। `झलां जश् झशि' (8.453) इति धकारस्य दकारः। `मद्ध्वत्र' इति। अत्रानच्परस्य धकार्सय द्वर्वचनम्।

`यणो मयः' इत्यादि। अच उत्तरलस्य यरो द्विर्वचनमुक्तम्। अनचि यण उत्तरस्य मयोऽचि परतो न प्राप्नोतीत्युपसंख्यायते।

किं पुनरिहोदाहरणम्? इत्याह--`केचित्' इत्यादि। `उत्क्का, वल्म्मौकः' इत्यादि। यकाराद्यन उत्तरस्य ककारस्य मकारस्य च मयो द्विर्वचनम्। `दध्य्यत्र, मध्व्वत्र' इति। धकारान्मय उत्तरस्य यकारस्य च यणो द्विर्वचनम्।

`शरः खयः' इत्यादि। `स्त्थालौ, स्त्थाता' इति सकाराच्छर उत्तरस्य खयस्थकारस्य द्विर्वचनम्। `वत्स्सः' इति। तकारात् खय उत्तरस्य सकगारस्य शरो द्विर्वचनम्। `इक्च्षु_, कष्षीरम्' इति। ककारात् खय उत्तरस्य खरः षकारस्य द्विर्वचनम्। `अप्स्सराः' इति। पकारात् खयः परस्य सकारस्य शरो द्विर्वचनम्।

`अवसाने द्वे' इत्यादि। `अवचि च' इति पर्युदासाश्रयणादिदमुज्यते। प्रसज्यप्रतिषेधेतु `यनोऽनुनासिकेऽनुनासिको वा' (8.4.45) इत्यतो वाग्रहणमनुवर्त्त्यं शक्यनिदमकर्त्तुम्। नैतत्। प्रसज्यप्रतिषेधे हि विधिवाक्यत्वं सूत्रस्य नोपपद्यते, ततश्च केनचिद्द्विर्वचनं स्यात्? तस्मादेव प्रतिषेध वाक्याद्विधिवाक्यतास्यानृमास्यत इत्यदोवः। प्रसज्यप्रतिषेधे सति प्रतिपत्तदिगौरवभयात् पर्युदासाश्रयणम्।।

48. नादिन्याक्रोशे पुत्त्रस्य। (8.4.48)

आदिनीति [मुद्रित काशिकायां तथा पदमञ्जर्यां च `आदिनी' शब्दो ङीबन्तो गृहीतः] परसप्तमीयम्। अत आह--`आदिनि परतः' इति। `पुत्रादिनी' इति। पुत्रावत्तुं शीलमस्या इति ताच्छीस्ये णिनिः। `पुत्त्रादिनी, सिशुमारी' इति। तत्त्वख्यानमेतत्, नाक्रोशः।

`तत्परे चेति यक्तव्यम्' (इति)। स आदिनिशब्दः परो यस्मात् पुत्रशब्दात् तत्र द्विर्वचनं न भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--नेति योग विभागः क्रियते, तेन तत्परे न भविषयतीति।

`वा हत' इत्यादि। हतजग्धशब्दयोः परतः पुत्त्रस्य या द्विर्वचनं न भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तु वागद्रहणमनुवर्त्त्यं, नेति योगविभागकरणमाश्रित्य वा कर्त्तव्यम्। न चैवं पुत्त्रादिनीत्यत्रापि विकल्पः प्रसक्तः। व्यवस्थितविभाषाविज्ञानात्। हतञ्च जग्धञ्च तत् हतजग्धम्, हतजग्धञ्च तत् परञ्चेति हतजग्धपरम्, तस्मिन् हतजग्धपरे। `पुत्रहती, पुत्रजग्धी' इति। पुत्रो हतः, पुत्रो जग्धोऽनयेत बहुव्रीहिः, `अस्वाङ्गपूर्वपदात्' (4.1.53) इत्यादिना ङीष्।

`चयो द्वितीयाः' इत्यादि। चय इति स्थानषष्ठी, खछठथफा इति द्वितीया इत्यस्यार्थः। द्वितीयत्वमेषां वर्णानां प्रथमवर्णापेक्षया भवति। `वप्सः' इति। तकारस्य चयः सकारे शरि परतो द्वितीयस्थकारः। `ख्षीरम्' इति। ककारस्य चयः वकारे शरि परतो द्वितौयः सकारः। `अफ्सराः' इति। पकारस्य चयः सकारे शरि परतो द्वितीयः फकारः।।

49. शरोऽचि। (8.4.49)

`कर्वति' इति। `कृष विलेखने' (धा.पा.990)। `वर्वति' इति। `पृषु वृषु मृषु सेचने' (धा.पा.705-707)। `आदर्शः' इति। `दृशिर् प्रेक्षणे' (धा.पा.988)। अधिकरणे धञ्। `दर्शः' [नास्ति--काशिकायाम्] इति। अत एव करणे धञ्।।

50. त्रिप्रभृतिषु शाकटायनस्य। (8.4.50)
`इन्द्रः' इत्यादौ `अनचि च' (8.4.47) इति प्राप्तिः। `इन्द्रः, चन्द्रः, मन्द्रः' इति। `इदि परमैश्वर्ये' (धा.पा.63), `चदि आह्लादे'[आह्लादे दीप्तौ च--धा.पा.] (धा.पा.68) `मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' (धा.पा.13)। `स्फायितञ्चि' (द.उ.8.31) इत्यादिना रक्प्रत्ययः। `राष्ट्रः, भ्राष्ट्रः' [राष्ट्रम्, भ्राष्ट्रम्--काशिका] इति। `राजृ भ्राजृ दीप्तौ' [टु भ्राजृ दीप्तौ--धा.पा.] (धा.पा.822,823)। `सर्वधातुभ्यः ष्ट्रन् (द.उ.8.79) प्रत्ययः। व्राचादिसूत्रेण (8.2.36) षत्वम्। शाकटायनग्रहणं पूजार्थम्। नित्य एवायं विधिः। अन्ययोत्तरसूत्रेणैव सिद्धत्वादस्यारम्भो निरर्थकः स्यात्।।

51. सर्वत्र शाकल्यस्य। (8.4.51)
अत्रिप्रभृत्यर्थोऽयमारम्भः। `अर्कः' इत्यादौ `अचो रहाभ्यां द्वे' (8.4.46) इति प्राप्तिः। आरम्भसामर्थ्यादेवात्रिप्रभृतिष्वपि सिद्धे सर्वत्रग्रहणं पूर्वस्या[पूर्वस्यापि प्राप्ते प्रतिषेधः--प्रा.मुद्रितः पाठः; का.मु.पाठश्च] अपि प्राप्तेः प्रतिषेधो यथा स्यादित्येवमर्थम्। असति तस्मिन् प्रत्यासत्तेः `अनचि च' (8.4.47) इत्यस्या एव प्राप्तेस्यं निषेधः स्यात्।
शाकल्यग्रहणं पूजार्थम्, न विकल्पार्थम्। विधिरपि योगद्वयेनोच्यते, प्रतिषेधोऽपि। अत्र सामर्थादेव विकल्पो भविष्यति; अन्यथा विधेरनवकाशः स्यात्।।

52. दीर्घादाचार्याणाम्। (8.4.52)
नित्यार्थोऽयमारम्भः। अत्रारम्भसामर्थ्यादेव सिद्ध आचार्यग्रहणं पूजार्थ। दातद्रमित्यादौ `अनचि च' (8.4.47) इति प्राप्तिः।।

53. झलां जश् झशि। (8.4.53)
`लब्धा' इत्यादि। लभेस्तृच्तुमुन्तव्याः। `झषस्तथोर्धोऽधः' (8.2.40) इति धकारे झशि भकारस्य जश्त्वम्--बकारः। `देग्धा' [`दोग्घा'--काशिका] इति। `दिह उपचये' (धा.पा.1015), `दादेर्धातोर्घः' (8.2.32) इति हकारस्य धकारः। `बोद्धा' इति। जश्तेवन धकारस्य दकारः।।

54. अभ्यासे चर्च। (8.4.54)
चकारेण चश्ग्रहणमनुवर्त्तते, तेनोत्तरत्र तदनुवृत्तिर्न भवति। `चिखनिषति' ति। खनतेः सन्, द्विर्वचनम्, हलरादिशेषः, `कुहोश्चुः' (7.4.62) इति चुत्वम्--छकारः, तस्थानेन चकारः। `चित्छित्सति'[`चिच्छित्सति'--का.प्रा.मु.पाठो] इति। छिदेः सन्, द्विर्वचनम्, `छे च' (6.1.73) इति तुक्, चुत्वम्।
`ठिठकारयिषति' इति। ठकारमाचष्ट इति `तत्करोति तदाचष्टे' (धा.200, 201) इति णिच्, इष्ठवद्भावाट्टिलोपः, सन्, इट्, गुणः, अयादेशः।
`तिष्ठाससि' इति। `शर्पूर्वाः खयः' (7.4.61) शेषः। `पिफकारयिषति' इचि। `टिठकारयिषतीत्यनेन तुल्यसाधनम्। अयं तु विशेषः--फकारशब्दाण्णिच्।
`प्रकृतिचरा प्रकृतिचरो भवन्ति' इति। जश्त्वबाधनार्थम्' पर्जन्यवल्लक्षण (व्या.प.83) प्रवृत्त्या प्रकृतिरूपाश्चरः प्रकृतिचरः स्थानिनाऽभिन्नरूपा इत्यर्थः।
`चिचीषति' इति। `अज्झनगमां सनि' (6.4.16) इति दीर्घः। `तितीर्षति'[न स्तः--काशिकायाम्] इति। `ऋत इद्धातोः' (7.1.100) इतीत्त्वं रपरत्वं च, `हलि च' (8.2.77) इति दीर्घः। `जिझकारयिषति' [न स्तः--काशिकायाम्] इति। टिठकारयिधतीत्यनेन तुल्यसाधनम्। अत्र झकारशब्दाण्णिजि विशेषः।
`जिघत्सति' इति। अदेः सन्, `लुङसनोर्घस्लृ' (2.4.37) इति धस्लादेशः पूर्ववदभ्यासस्य चुत्वम्--झकारः, तस्य जश्त्वम्--जकारः, `सः स्यार्धधातुके' (7.4.49) इति सकारस्य तकारः। `डुढौकिषते' इति। ढौकतेः सन्।
`प्रकृतिजशां प्रकृतिजशो भवन्ति' इति। चर्वाधनार्थं पूर्ववत् प्रकृत्या स्थानिनाऽभिन्नरूपा जशः प्रकृतिजशः। `जिजनिषते' इति। `पूर्ववत् सनः' (1.3.62) इत्यात्मनेपदम्। `बुबुधे' इति। अनुदात्तेत्त्वादात्मनेपदम्, `लिटस्तझयोरेशिरेच्' (3.4.81) इत्येश्। `ददौ' इति। `आत औ णलः' (7.1.34) इत्यौत्त्वम्।
`डिड्ये इति। `डीङ् विहायसा गतौ' (धा.पा.968), पूर्ववदेशादेशः, स्थानिवद्भावड्डीत्यस्य द्विर्वचनम्।।

55. स्वरि च। (8.4.55)
`युयुत्सते' इति युधेः सन्, `पूर्ववत् सनः' (1.3.62) इत्यात्मनेपदम्। `आरिप्सते' इति। रत्रिलभिभ्यां सन्। `सनि मीमा' (7.4.54) इत्यादिनेस्, `स्कोः संयोगाद्योरन्त च' (8.2.29) इति सकारलोपः। `अत्र लोपोऽब्यासस्य' (7.4.58) इत्यभ्यासलोपः।
समुच्चयार्थश्चकारः, न केवलमब्यासे चरो भवन्ति, अपि तु खरि च। असति ह्यस्मिंश्चकारेऽनन्तरविहितं यच्चर्त्त्वं तत् खरादावभ्यासनिमित्ते प्रत्यये स्यात्--तिष्ठासतीत्यादौ, न तु `चखाद' इत्यादावपीति कस्यचिन्मन्दभियो भ्रान्तिः स्यात्।।

56. वाऽवसाने। (8.4.56)
`झलां जशोऽन्ते' (8.2.39) इति नित्ये जश्त्वे प्राप्तेऽवसाने वा चरो विधीयन्ते। वावचनात् पक्षे जश्त्वमपि भवत्येव।।

57. अणोऽप्रगृह्यस्यानुनासिकः। (8.4.57)

`अणः' इति पूर्वेण णकारेण प्रत्याहारग्रहणम्। अन्यथाऽसन्देहार्थ `अचः' इति कुर्यात्। न च पदान्तहलोऽणः सम्भन्ति। `दीर्घे, मधुँ' इति। `स्वमोर्नपुंसकात्' (7.1.23) इति स्वमोर्लुक्। `अग्नी, वायू' इति। `प्रथमयोः पूर्वसवर्णः' (6.1.102) इति दीर्घः। `ईदूदेद्विवचनम्' (1.1.11) इति प्रगृह्यसंज्ञा।।

58. अनुस्वारस्य ययि परसवर्णः। (8.4.58)

`शङ्किता' इत्यादि। `शकि शङ्कायाम्' (धा.पा.86), `उछि उञ्छे' (धा.पा.215), `कुडिदाहे' (धा.पा.270), `टुनदि समृद्धो' (धा.पा.67), `कपि चलने' (धा.पा.375)--एभ्यस्तृजादयः, इदित्त्वान्नुम्, `नश्चापदान्तस्य झलि' (8.3.24) इत्यनुस्वारः, तस्यानेन परसवर्णः। `कुर्वन्ति, कृषन्ति' इति। करोतेः, `कृष विलेखने' (धा.पा.1286) इत्यस्माच्च तौदादिकात् परस्य लडादेशस्य झेः `झोऽन्तः' (7.1.3) इत्यन्तादेशः।

नकारस्यानुस्वारे तस्य च परसवर्णे नकारे सति `अट्कुप्वाङ्नुम्' (8.4.2) इत्यादिना णत्वं प्राप्नोति, तत् कस्मान्न भवति? इत्याह--`इह' इत्यादि। णत्वमत्रानुस्वारात् पूर्वं स्यात्? पश्चाद्वा? पूर्वं तावन्न भवति; यस्मादनुस्वारे कर्त्तव्ये णत्वस्यासिद्धत्वम्, अतः पूर्वं नकारस्यानुस्वार एव क्रियते। परसवर्णे नकारे कृते पश्चादपि न भवति; णत्वे कर्त्तव्येऽनुस्वारस्थानिकस्यासिद्धत्वात्। `परसवर्णेन' इति। परसवर्णार्थेन शास्त्रेणेत्यर्थः। भवति तादर्थ्यात् ताच्छब्द्यम्। यथा प्रदीपार्था मल्लिका प्रदीप इति। `पुनः' इति। अनुस्वारक्रियाया उत्तरकालमित्यर्थः। `एवम्' इत्यादिनाऽनुस्वारीभूतो नकारो णत्वमतिक्रामतीति भाष्ये णत्वस्यातिक्रमणमनुस्वारीभूतस्य नक्रस्योक्तम्। तदेवासिद्धत्वात् परसवर्णस्य नकारसय णत्वं न सम्पद्यत इति दर्शयति। `अतिक्रामति' इति। अतिक्रम्म वर्त्तत इत्यर्थः।

`आर्क्रस्यते' इति। आङ्पूर्वात् क्रमेर्लुट्, `आङ उद्गमने' (1.3.40) इत्यात्मनेपदम्। `आचिर्क्रसते'[आचिक्रंस्यते--काशिका] इति। `पूर्ववत् सनः' (1.3.62) इत्यात्मनेपदम्।।

59. वा पदान्तस्य। (8.4.59)

वावचनं पूर्वस्य नित्यात्वज्ञापनार्थम्। द्वयोर्विभावयोमध्ये ये वै विधयस्ते नित्या भवन्तीति कृत्वा। असति वाग्रहणे विपर्ययः सम्भाव्येत--पूर्वो विधिर्विभाषा, अयं तु विधिरारम्भसामर्थ्यान्नित्य इति।।

60. तोर्लि। (8.4.60)

61. उदः स्थास्तम्भोः पूर्वस्य। (8.4.61)

`उत्थाता' इति। `आदेः पदस्य' (1.1.54) इति सकारस्य महाप्राणस्याघोषस्य तादृश एव पूर्वसवर्णस्थकारः, `खरि च' (8.4.55) इति थकारस्य तकारः, `अनचि च' (8.4.47) इति पूर्वतकारस्य द्विर्वचनम्, `झरो झरि' (8.4.65) इति पक्ष एकस्य लोपः। `उत्तम्भिता' इति। स्तम्भिः सौत्रो धातुः। `उत्स्नाता' इति`ष्णा शौचे' (धा.पा.1052)।

पूर्वग्रहणं परसवर्णनिवृत्त्यर्थम्।

`उत्पूर्वस्य' इत्यादि। पूर्वसवर्णे कर्त्तव्ये स्कन्देश्छन्दति दि य उपसंख्यानम्--प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदं प्रतिपादनम्--`व्यत्ययो बहुलम्' (3.1.85) इति व्यत्ययेनोदः परस्य स्कन्दे श्छन्दसि विषये पूर्वसवर्णो भविष्यति। `उत्कन्द' [`उत्कन्दः'--काशिका] इति। लोट्, सिप्, `सेर्ह्यपिच्च' (3.4.87) इति हिरादेशः, `अतो हेः' (6.4.105) इति हेर्लुक्।

`रोगे च' इत्यादि। इदमविशेषेण च्छन्दसि भाषायां च रोगे वाच्य उदः परस्य स्कन्देः पूर्वसवर्णो भवतीत्येतदर्थरूपं व्याक्येयमित्यर्थः। तत्रेदं व्याख्यानम्--पृषोदरादित्वा(6.3.109)द्भविष्यतीति। `उत्कन्दकः' इति। `रोगाख्यायां ण्वुल्बहुलम्' (3.3.108) इति ण्वुल्।।

62. झयो होऽन्यतरस्याम्। (8.4.62)

`वाग्धसति' इत्यादावुदाहरणे हकारस्य महाप्राणस्यान्तरतम्यात् तादृश एव घकारादयो वर्गचतुर्था भवन्ति।

अन्यतरस्यांग्रहणं पूर्वविध्योर्नित्यत्वज्ञापनार्थम्।।

63. शश्छोऽटि। (8.4.63)

`छत्वममीति धक्तव्यण्' इति। अमि परतश्छत्वं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्--`शश्छः' इति योगविभागः क्रियते, तेनाट्प्रत्याहारेऽसन्निविष्टे लकारादावपि भविष्यति, अतोऽटीत्यतिप्रसङ्गनिरासार्थो द्वितीयो योगः--तेनाट्येव परभूते, नान्यनेति। योगवभागकरणसामर्थ्याच्चाम्प्रत्याहारान्तर्गतेऽनट्यदि क्वचिद्भवत्येव। अन्यथा योगविभागकरणमनर्थकं स्यात्। अमीति नोक्तम्, वैचित्र्यार्थम्। अत्र `वा पदान्तस्य' (8.4.59) इत्यतः पदान्तग्रहणमनुवर्त्तते, झयो विशेषणार्थम्। तेन `शि तुक्' (8.3.31) इत्यत्र तुकः पूर्वान्तकरणं छत्वार्थमुपपन्नं भवति; `ङः

सि धुट्' (8.3.29) इत्यतो धुङ्ग्रहणानुवृत्तेः परस्या सिद्धत्वात् पूर्वान्तकरणमनर्थकं स्यात्।।

64. हलो यमां यमि लोपः। (8.4.64)
`शय्य्येत्यत्र द्वौ यकारो' इति। एकः `संज्ञायां समज' (3.3.99) इत्यादिना विहितस्य क्यपोऽवयवः, अपरस्त्वपङः। `क्रमजस्तृतीयः' इति। क्रमः=आनुपूर्वी, ततो जातः क्रमजः। स पुनः `अनचि च' (8.4.47) इत्यनेन यो विहितः, स हि पूर्वयकाराभ्यां पश्चाज्जात इति क्रमजो भवति। `तकारत् परो यकार एकः' [एको यकारः--काशिका] इति। `दित्यदित्यादित्य' (4.1.85) इत्यादिना विहितस्य ण्यस्यावयवः। `द्वौ यकारौ' इति। एकोऽदितिशब्दात् `तस्यापत्यम्' (4.1.92) इत्यर्थे `दित्यदित्या'दिसूत्रेण (4.1.85) विहितस्यावयवः। द्वपितीयस्त्वादित्यशब्दादेव `साऽस्य देवता' (4.2.24) इत्यर्थे तेनैव सूत्रेण विहितस्य ण्यस्यावयवः। `क्रमजस्तृतीयः' इति। `यणो मयः' (वा.956) इत्यनेन यो विहितः। `मध्यमस्य मध्यमयोर्वा' इति। अन्यतरस्याम् (8.4.62) इत्यधिकारात्। यद्येकस्य भवति ततो मध्यमस्य, अथ द्वयोरिति ततो मद्यमयोः। `आश्नम्' इति। `अन्नाष्णः' (4.4.85) इति निपातनात् `अदो जग्धिर्ल्यप्ति किति' (2.3.36) इति न भवति जग्ध्यादेशः, `रदाभ्याम्' (8.2.42) इत्यादिना निष्ठानत्वम्। भवत्ययं नकारो यम्, यमि परतश्च; न च हल उत्तरः, किं तर्हि? अचः। `अर्ध्यम्' इति। `पादार्धाभ्याञ्च' (5.4.25) इति तादर्थे यत्। अत्र घकारो रेफादुत्तरो भवति, यकारे यमि परतः। न त्वयं यम् धकारः; तस्य यम्त्वसन्निवेशात्। `शाङ्गंम्' इति। शृङ्गस्य विकार इत्यण्, आदिवृद्धिः, रपरत्वम्। अत्र ङकारो यम् हल उत्तरो भवति, न तु तस्मात् परो यम् गकारः; तस्य यम्प्रत्याहारेऽसन्निवेशात्। नत्वादिवृद्धिस्तद्धिताश्रया बहिरह्गा भवति; न तु तस्मात् परो यम् गकारः; तस्य यम्प्रत्याहारेऽसन्निवेशात्। नत्वादिवृद्धिस्तद्धिताश्रया बहिरङ्गा भवित; लोपस्त्वन्तरङ्गः, ततश्चान्तरङ्गे लोपे कर्त्तव्ये वृद्धेरसिद्धत्वम्, तस्या असिद्धत्वात् तदाश्रितस्य रेफस्याप्यसिद्धत्वमेव। एवं च सति ङकारो हल एव परो न भवतीति यत् केचिच्चोदयन्ति तन्मतमिदं नोपन्यसनीयमेव; मूलोदाहरणेऽपि तथा सम्भवात्।।

65. झरो झरि सवर्णे। (8.4.65)
`प्रत्तमवत्तम्' इत्यादि। ददातेः क्तः, `अच उपसर्गात्तः' (7.4.47) इत्यकारस्य तकारः, दकारस्यापि `खरि च' (8.4.55) इति चर्त्वम्। एवं तावत् त्रयस्तकाराः--द्वावादेशौ, एकः प्रत्ययावयवः। `अनचि च' (श्र.4.47) इति यो निर्वृत्तः स क्रमजश्चतुर्थः। `मध्यमस्य मध्यमयोर्वा' इति। पूर्ववदन्यतरस्यांग्रहणानुवृत्तेरेव वेदितव्यम्। `मरुत्त इति चत्वारस्तकाराः' इति। तरयः पूर्ववत्, चतुर्थो मरुच्छब्दावयवः, क्रमजः पञ्चम इति `अनचि च' (8.4.47) इति यो विहितः। ननु चाजन्तादुपसर्गात् तत्वमुच्यते, न च मरुच्छब्दोऽजन्तः, किं तर्हि? हलन्तः, तत् कथं तत्वं भवति? इत्याह--`मरुच्छब्दस्य' इत्यादि। `उपसर्गाः क्रियायोगे' (1.4.59) इत्यत्र मरुच्छब्दस्योपसंख्यानमुपसर्गकार्यार्थम्। यदि सत्यामपि तस्यां तत्वं न स्यात्, तदा तस्य वैयर्ध्य स्यात्। तस्मादुपसंख्यानसामर्थ्यादनजन्तादपि तत्वं भवत्येव। तर्हि यथा ह्युपसर्गोपसंख्यानसामर्थ्यात् तत्वं भवति, तथा भरुन्नयतीत्यत्रापि `उपसर्गादसमासेऽपि णोपदेशस्य' (8.4.14) इति तकारेणा नडादिव्यवाये णत्वं स्यात्। यदीष्यते तदा भवतु। यदि नेष्यते तदा क्षुभ्नादिषु (8.4.39) द्रष्टव्यः। `शाङ्र्गम्' इति। ङकारो हल उत्तरो भवति झरि च सवर्णे परतः, न त्वयं झरिति न भवति लोपः। `प्रियपञ्च्आ' इति प्रियाः पञ्चास्येति बहुव्रीहिः, ततस्तृतीयैकवचनम्। `अल्लोपोऽनः' (6.4.134) इत्यकारलोपः, `स्तोः श्चुना श्चुः' (8.4.40) इति श्चुत्वं तवर्गस्य। वर्गो वर्गेण सवर्ण इति ञकारश्चवर्गस्य सवर्णः। न त्वयं ञकारो झर्। तेन तस्मिन् परभूते पूर्वस्माद्धलः परस्यापि चकारस्य लोपो न भवति। ननु चाक्रियमाणेऽपि झरीत्येतस्मिन् नैवात्र लोपः प्राप्नोति, निर्दिष्टग्रहणस्यादन्तर्यार्थत्वात्; अनन्तरे परभूते सवर्णे लोपेन भवितव्यम्, न चात्रानन्तरो ञकारः, पूर्वस्य लोपे कृते `अचः परस्मिन् पूर्वविधौ' (1.1.57) इत्यकारलोपस्य स्थानिवद्भावात्, तत् किं झरीतयनेन? इत्यत आह--`लोपस्य' इत्यादि। पूर्वत्रासिद्धीये ह्यल्लोपस्य स्थानिवद्भावः प्रतिषिध्यते। अत्र `झरि' इत्येतन्नोच्येत यदि, तदात्र लोप स्यादेव।
`तर्प्ता' इति। `तृप प्रीणने' (धा.पा.1271), पकारस्य तकारः स्थानबेदात् सवर्णो न भवति, तेनाच लोपे न भवति। ननु च निमित्तानां कार्यिणां च साम्यादिह संख्यातानुदेशेन भवितव्यम्, तत्रासत्यपि सवर्णग्रहणे तर्प्तेत्यादौ नैव लोपः प्राप्नोति, तत् किं तन्निवृत्त्यर्थेन सवर्णग्रहणेन? इत्यत आह--`सवर्णग्रहणसामर्थ्यात्' इत्यादि। यद्यत्र यतासंक्यं स्यात् ततो झकारस्य झकार एव लोपः प्रसज्येत, यावता झकारस्य झकार एव सवर्णः, एवं च सति सवर्णग्रहणमनर्थकं स्यात्; व्यवच्छेद्याभावात्। न हि झकारस्यासवर्णो झकारः सम्भवति। तस्मादत्र सवर्णग्रहणसामर्थ्यान्न संख्यातानुदेशो भवति। तेन शिण्डि, पिण्ढौत्यत्र सवर्णमात्रे ढकारे डकारलोपे भवतीति। `शिष्लृ विशरणे' [`विशेषणे'--धा.पा'] (धा.पा.1451), `पिष्लृ सञ्चूर्णने' (धा.पा.1452), लोङ्, सिप्, `सेर्ह्यपिच्च' (3.4.87) इति हिरादेशः, श्नम्, `श्नसोरल्लोपः' (6.4.111) इत्यकारलोपः, `हुझल्भ्यो हेर्धिः' (6.4.101) इति धिभावः, `ङलां जश् झशि' (8.4.53) इति जश्त्वम्--षकारस्य डकारः, `नश्चापदान्तस्य झलि' (8.3.24) इत्यनुस्यारः; `ष्टुना ष्डुः' (8.4.41) इति धकारस्य ढकारः, `अनुस्वारस्य ययि परसव्रणः' (8.4.58) इति णकारः, अनेन डकारस्य ढकारे लोपः।।

66. उदात्तादनुदात्तस्य स्वरितः। (8.4.66)
`गार्ग्यः, वात्स्यः' इति। गर्गवक्षतशब्दाभ्याम् `गर्गादिभ्यो यञ्' (4.1.105) इति यञ्, `ञ्नित्यादि नित्यम्' [`ञ्नित्यादेनि'--प्रा.मुद्रितः पाठः]

(6.1.197) इत्यत्त्युदात्तत्वम्, `अनुदात्तं पदमेकवर्जम्' (6.1.158) इति शेषस्यानुदात्तत्वम्, तस्य स्वरितो भवति। `पचति, पठति' इति। तिप्सपौ पित्त्वादनुदात्तौ। पकारस्याकारोऽपि धातुस्वरेणोदात्तः। तस्मात् परस्य शवकारस्य स्वरितत्वं भवति।

किं पुनः कारणं सूत्रमिदमिहोचयते, न `तित्स्वरितम्' (6.1.185) इत्यस्यानन्तरमुच्यताम्, एवं हि स्थरितग्रहणं न कर्त्तव्यं भवति; प्रकृतमेव ह्यनुवर्त्तिष्यते? इत्याह--`अस्य' इत्यादि। यदि तत्र क्रियेत, तदा `अनुदात्तं पदमेकवर्जम्' (6.1.158) इत्येतदिह प्रवर्त्तेत, तत्श्चानुदात्तस्वरितौ श्रूयेयाताम्, नोदात्तस्वरितौ। इह तु क्रियमाणे स्वरितस्यासद्धत्वात् तदाश्रयम् `अनुदात्तं पदमेकवर्जम्' (6.1.158) इति न प्रवर्त्तते, तेन द्वावप्यस्योदात्तस्वरितौ श्रूयेते।।

67. नोदात्तस्वरितोदामगार्ग्यकाश्यपगालवानाम्। (8.4.67)

`उदात्तस्वरितोदयम्' इति। उदात्तस्वरितादुवयौ यस्मादिति बहुव्रीहिः। उदयशब्दोऽत्र प्रत्येकमभिसम्बध्यत इति दर्शयितुमाह--`उदात्तोदयस्य' इत्यादि। उदयशब्दः परशब्दस्यार्थे वर्त्ततेऽत्र।

`गार्ग्यस्तत्र' इति तत्रशब्द आद्युदात्तः। `सप्तम्यास्त्रल्' (5.3.10) इति त्रल्प्रत्ययान्ताल्लित्स्वरेण। `गार्ग्यः क्व' इति। कशब्दः स्वरितस्तित्स्वरेण, `किमोऽत्' (5.3.12) इति किंशब्दादत्प्रत्ययः। किमः क्वादेशः `क्वाति' (7.2.105) इति।

उदात्तस्वरितमिति वक्तव्ये लाघवार्थत्वाद्विल्पष्टार्थत्वाच्च `उदयग्रहणं मह्गलार्थम्' इति। इष्टार्थसिद्धेर्हेतुर्गङ्गलम्, इष्टं पुनरर्थागस्त्रस्य प्रथनं वीरपुरुषादिता च। तथा चोक्तम्--`यतो मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणियन्ते, वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि च' (म.भा.1.1.1) इति। यथा मङ्गलादीन्येर्वधानि भवा तथा मङ्गलावसानान्यपि। मङ्गलार्थं इहोदयशब्दे क्रियमाण उत्तरारन्भो मङ्गलपूर्वकौ भवति। तेन यद्वक्त--

`वीर्घप्लुतयोश्चानेन विवृताकारेण ग्रहणं नेष्यते, संवृतेन [`संवृतेन च णस्य मात्रिकस्य ग्रहणमिष्यते'--काशिका] तु मात्रिकस्य सर्वगुण युक्तस्याकारसय ग्रहणमि' (का.8.4.68) इति, तदुपपन्नं भवति। मङ्गलपूर्वकेषु हि कारयेष्वारभ्यमाप्येध्वपीष्टार्थसिद्धिर्भवति। उशब्दश्चायं लोके वृदिशब्दवन्मङ्गलार्थत्वेन प्रसिद्धः। तस्मात् तस्य ग्रहणं मङ्गलार्थं क्रियते।।

68. अ अ इति। (8.4.68)

एकोऽत्र विवृ अपरः संवृतः। तेन स्थान्यादेशयोरुभयो रूपाभेदादपि परयत्नभेदाद्भेदो भवति। अत्यन्ताबेदे सत्यकारस्याकारवचवमनर्थकं स्यात्। अत्र यो विवृतः स स्थानी, यः संवृतः स आदेशः। अकारो विवृत्त, स संवृतो भवति। विवृत्तप्रयत्नोऽकारः संवृतप्रयत्नो भवति। संवृतप्रयत्नमादेशमनुभवतीत्यर्थः। `वृक्षप्लशः' इति। संवृतप्रयत्नविषयोपदर्शनार्थम्। ननु च विवृतोऽकारो नास्त्येव लोके वेदे च; संवृतस्यैव प्रयोग दर्शनात्, तदपार्थकमिदम्? इत्याह--`इह' इत्यादि। यद्यपि लोके वेदे च संवृत एवाकारः, तथागीह व्याकरम कस्यचित् कार्यस्य सिद्धये विवृतीऽप्यभ्युपगतः। किं पुनस्तत्कार्यम्? अकारसय चान्योऽन्यापेक्षया सावर्ण्यम् एतदुकग्तं भवति--ह्रस्वदीर्धाकारौ सवर्णौ यथा स्यातामित्येवमर्थमकारो विवृतगुणः प्रतिज्ञात इति; अन्यथा यदि संवृतविषृतप्रयत्नौ परस्परं सवर्णौ न स्याताम्, ततश्चाकारो गृह्यमाण आका न ग्रृह्णीयात्। एवं स सति दण्डाग्रमित्यादावेव `अकः सवर्णे दीर्घः' (6.1.101) इति दीर्घत्वं स्यात्, दण्डाढकमित्यादौ तु न स्यात् `अभेदका इह शास्त्रे गुणाः' (पु.प.वृ.57) इत्युक्तम्, ततोऽयमदोष इति चेत्? न; सवर्णसंज्ञासूत्रे (1.1.9) प्रयत्नभेदस्याप्याश्रितत्वात्; अन्यथा तत्र प्रयत्नग्रहणमनर्थकं स्यात्। यदि तर्हि विवृतः प्रतिज्ञातस्तत् किमर्थं तस्येह प्रत्यत्पत्तिः क्रियते? इत्याह--`तस्य' इत्यादि। `तथाभूतस्य' इति। विवृतप्रयत्नभूतस्येतेयर्थः। प्रत्यापत्तिः पुनस्तस्य संवृतगुणस्याकारस्य स्वरूपात् प्रच्युतस्य पुनः स्वरूपस्य प्रतिलक्षण, मृतस्य प्रत्युज्जीवनवत्।

इहानेन विवृतेनाकाकेण गृह्यमाणेनाणत्वात् सकलमवर्णकुलमुदात्तादिभेदभिन्नमष्टादक्षप्रकारं गृहीतम्, ततश्च यथा गुणान्तरयुक्तस्य ह्रस्वस्य संवृतो ह्रस्व आदेशो भवति, एवं दीर्घप्लुतयोरपि स्यात्। किञ्चादेशोऽयमकारः संवृत उपात्तः, संवृतस्य चाकारस्याण्त्वं नास्ति, प्रत्याहारेऽसन्निवेशात्, ततश्च यथाऽच्त्वाभावादीर्घप्लुतौ न गृह्णाति, तथा संवृतमपि मात्रिकं गुणान्तरयुक्तं न गृह्णीयात; एवञ्च सति यद्गुण उच्चारितस्तद्गुणयुक्तस्यैव प्रत्यापत्तिः स्यात्। न गुणान्तरयुक्तस्य? इत्याह--`दीर्घप्लुतयोश्च' इत्यादि। कथं पुनर्दीर्घप्लुतयोरनेन विवृतेनाकारेण ग्रहणनिष्यमाणमपि न भवति? कथं च संवृतेन सर्वगुणयुक्तस्य मात्रिकस्य ग्रहणमिष्यमाणमपि लभ्यते? पूर्वसूत्र उदयग्रहणादिति पूर्वमेव कारणमुक्तमत्रास्माभिरुदयग्रहणस्य प्रयोज्न वर्णयद्भिः। तपरकरणनिर्द्देशमन्ये त्वाहुः। अद् अ इति तपर निर्देशः कर्त्तव्यः। तथा च भाव्य उत्तम्--`सिद्धं तु तपरनिर्देशात्' इति। तत्र प्रथमोऽकारः तः परो यस्मादिति तपरः, द्वितीयस्तु तदपि परस्तपर इति। तस्य विवृतस्य तपरत्वं दीर्घप्लुतनिवृत्त्यर्थम्, संवृतस्य सर्वगुणयुक्तस्य मात्रिकस्य च ग्रहणायंमिति। इष्ट्युपसंख्यानवतीत्यादिश्लोकः पूर्वमेव व्याख्यातः।।

इति बोधिसत्त्वदेशीयाचार्यश्रीजिनेन्द्रबुद्धिपादविरचितायां

काशिकाविवरणपञ्जिकायामष्टमाध्यायस्य

चतुर्थः पादः

- - -
समाप्तश्चाष्टमोऽध्यायः।

इति बोधिसत्त्वदेशीयाचार्य श्रीजिनेन्द्रबुद्धिपादविरचिता

काशिकाविवरणपञ्जिका।

- - -
समाप्तश्च न्यासग्रन्थो जिनेन्द्रबुद्धिकृतः।।

- - -

Padamanjari

1.1

अथ प्रथमाध्याये प्रथमः पादः
पदमञ्जरी
<वृद्धिरादैच् ।। 1.1.1।।>
त्रिपदमिदं सूत्रम्--वृद्धिः, आद्, ऐज् इति । अत्र चाकारः प्रयोगस्थैराकारैरर्थवान् । जात्यभिप्रायं चैकवचनम् । ऐच्छब्दस्तु ऐकारौकाराभ्याम् । संज्ञिनोर्द्वित्वेऽपि द्विवचनं न भवति; द्वयोरप्येकशब्दरूपरूषितत्वेनैक्यमापन्नयोरिवाभिधानात् । एवं सर्वेष्वेव प्रत्याहारेष्वेकवचनं द्रष्टयम् । समाहारद्वन्द्वो वा--आदैजिति ।
"द्वन्द्वाच्चुदषहान्तात् समाहारे" इति समासान्तस्तु न भवति; समासान्तविधेरनित्यत्वात् । अनित्यत्वं च "द्वित्रिभ्यां पाद्दन्मूर्द्धसु" इति मूर्द्धन्शब्दस्य निर्द्देशादवसीयते । अन्यथा "द्वित्रिभ्यां ष मूर्ध्नः" इति षप्रत्ययान्तत्वान्मूर्धेष्विति निर्द्देश्यं स्यात् । आदैच्छब्दात्समासत्वादर्थवत्त्वाद्वा विभक्त्युत्पत्तौ "चोः कुः " पदस्येति कुत्वं प्राप्तम्, अयस्मयादित्वेन भत्वान्न हि भविष्यति; छन्दोवत्सूत्राणि भवन्ति । वृद्धिशब्दस्य त्रयीशब्दानां प्रवृत्तिरिति पक्षे "वृधु वृद्धौ" इत्यस्माद्भावे क्तिनि व्युत्पत्तिः, अभेदोपचाराच्च वृद्धियुक्तेष्वादैक्षु वृत्तिः । न चैवं लक्षणयैवादैक्षु वृद्धिशब्दस्य वृत्तिसिद्धेः सूत्रस्यानर्थक्यम्; नियमार्थत्वात् । अन्यथा वर्द्धनक्रियायोगिष्विकारादिषु प्लुतेषु च वर्तेत । मा तत्र वर्तिष्ट, आदैक्ष्वेव वर्ततामिति नियमः । चतुष्टयीपक्षे तु कथम्, यावतश्च संज्ञात्वेन विनियुक्ते सति "सिचि वृद्धिः" इत्यादौ प्रदेशान्तर एव वृद्धिशब्दस्यादैक्षु प्रवृत्तिर्युक्ता, न त्वत्रैव संज्ञाविनियुक्तिकाले ? उच्यते; "नित्यः शब्दार्थसम्बन्धः" इति दर्शनेन क्वचिदपि पुरुषव्यापारात्प्राग् वाचकः सन् पुरुषव्यापारेण वाचकः क्रियते । अतः सर्वे शब्दाः संज्ञारूपेण सर्वानर्थान् प्रतिपादयितुं समर्थाः । तत्रानियतार्थेन व्यवहारासिद्धेर्नियमार्थ एव पुरुषव्यापारः--मया प्रयुक्तस्य वृद्धिशब्दस्यादैजर्थ इति । एवं तावत्पदार्थो व्याख्यातः ।
वाक्यविषयाः पुनरष्टौ विकल्पाः-अनर्थकम्, साध्वनुशासनम्, प्रयोगनियमार्थम्, आदेशार्थम्, आगमार्थम्, विशेषणार्थम्, तद्गुणाध्यारोपार्थम्, संज्ञार्थमिति । तत्रानर्थकाभिधानं प्रमादाश्रयदोषादनवधानादशक्तेर्वा भवति । न चैतच्चतुष्टयं भगवतः सम्भवति; आचार्यो हि दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख आसीनो मङ्गलपूर्वकं महता प्रणिधानेन सूत्राणि प्रणीतवान् । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण ! साध्वनुशासनमपि न भवति,

सिद्धत्वाद्वृद्धिशब्दस्य क्तिन्नन्तत्वात्, आदैच्छब्दस्य चार्थवत्त्वात् । ननु छन्दोवद्भावेन सूत्र एव प्रयोगः सिद्ध्यति, सूत्राद्बहिरपि कुत्वाभावार्थं निपातनमेतत् स्यात्, उच्यते; वृद्धिशब्दस्यैवमनन्वयप्रसङ्गः, संभूयकारित्वं च पदानां व्युत्पत्तिसिद्धम्, अतो नायं पक्षः । नापि प्रयोगनियमार्थम्, यत्र हि सहप्रयोगप्रसङ्गस्तत्र नियमः कर्त्तव्यः । न च वृद्ध्यादैच्छब्दयोः सहप्रयोगप्रसङ्गः, विनियोगात्प्रागसम्बन्धाद् उत्तरकालं वृद्धिशब्देनैव गतत्वात् । किं च नेह प्रयोगनियम आरभ्यते । नन्वारभ्यते,"परश्च" इति ? पदस्य नारभ्यते । पदस्याप्यारभ्यते "उपसर्जनं पूर्वम् " इति ? ययोरैकपद्यं नास्ति तयोर्नारभ्यते । तयोरप्यारभ्यते "ते प्राग्धातोः" "कृञ्चानुप्रयुज्यते लिटि" इति ? नैवंविधेनोच्चारणेनारभ्यते । एवमप्यारभ्यते "विदाङ्कुर्वन्त्वित्यन्यतरस्याम्" इति ? नात्र केवलः प्रयोग एव नियम्यते, किन्तु आमादिकमपि विधीयते, अतः केवलस्य प्रयोगनियमस्य साक्षादुच्चारणेन क्वचिदप्यभावान्नायं प्रयोगनियमः । आदेशार्थमपि न भवति; स्थान्यर्थाभिधानसमर्थस्यैव ह्यादेशत्वम् । न च वृद्धिशब्द आदैचाम्, ते वा तस्यार्थमभिधातुं समर्थाः । निर्देशाच्च; यदयं "सिचि वृद्धिः" "यातिवातिद्राति" "रायः""नावः" इत्याह, ततो ज्ञायते--न वृद्धिशब्द आदैचां ते वा तस्यादेशाः इति । अथादैच्शब्दस्य वृद्धिशब्द आदेशः कस्मान्न भवति, न ह्यत्र किं चिल्लिङ्गमस्ति ? सत्यम्; अयं तु पक्षो न संभवत्येव, ऐच्छब्दो ह्यादिरन्त्येनेति संज्ञात्वेन विनियुक्तः कथमस्य स्वरूपस्य ग्रहणम्; अशब्दसंज्ञेति निषेधात् । एतैरेव लिङ्गैरागमार्थत्वं न भवति । षष्ठ्यभावाच्च, "पूर्वौ तु ताभ्याम्" इति पञ्चम्याः षष्ठ्यर्थोऽवगम्यते । टित्त्वादिलिङ्गाभावाच्च, न हि तद्रहितः कश्चिदागमो दृष्टः । विशेषणत्वमपि न भवति, असंभवादप्रयोजनत्वाच्च । न ह्यस्ति संभवो वृद्धिशब्दश्चासावादैच्छब्दश्चेति, नापि वर्द्धनक्रियाऽऽदैज् इति । एवं विशेषणे च प्रयोजनमपि नास्ति । एतेन तद्गुणाध्यारोपोऽपि निरस्तः । यथा हि सिंहो माणवक इति सिंहगुणा माणवके आरोप्यन्ते, नैवमत्र सम्भवः प्रयोजनं वाऽस्ति; अतः पारिशेष्यात्संज्ञासंज्ञिसम्बन्ध एवेत्यालोच्याह-%वृद्धिशब्द% इत्यादि । विपर्ययस्तु न भवति--वृद्धिशब्दः संज्ञी, आदैचः संज्ञेति । स हि त्रिधा स्यात्--आदैजित्ययं शब्दः, आ ऐ औ इत्ययं समुदायः, ते वा प्रत्येकमिति । तत्रादैच्छब्दस्तावन्न सम्भवति; ऐजित्यस्य संज्ञाशब्दत्वात्, स्वरूपग्रहणासम्भवात्, गौरवाद्, अनावृत्तेश्च । आवर्त्तिन्यो हि संज्ञा भवन्ति, वृद्धिः शब्दश्चावर्त्तते; नादैच्छब्दः । नापि समुदायः, गौरवादनावृत्तेश्च । अस्तु तर्हि प्रत्येकम्, लाघवादावृत्तेश्च--"अष्टन आ विभक्तौ", "पूतक्रतोरै च" "मनोरौ वा " इति ? न; प्रयोजनमन्तरेणैकस्यानेकसंज्ञाकरणस्यायुक्तत्वात्, न ह्ययं वृद्धिशब्दः सहस्रेण नामभिः स्तोतव्यः । शब्देनार्थस्य संज्ञात्वं मा विज्ञायीति शब्दग्रहणम्, एतच्चार्थे व्यवहारासम्भवाल्लभ्यते । तदिह वृद्धिशब्दः संज्ञात्वेन विधीयत इति समुदायेनानर्थकादिपक्षनिरासः । वृद्धिशब्द इत्यनेन विपर्ययनिरासः । वृद्धिशब्दः संज्ञा, न पुनरादैच्छब्द इति वचनव्यक्त्या शब्दग्रहणेनार्थनिरासः-वृद्धिशब्दः संज्ञा न पुनरर्थ इति । यत्र समुदायस्य कार्यमिच्छति करोति तत्र प्रयत्नम्--"उभे अभ्यस्तम्" इति । तत्र ह्युभे ग्रहणं समुदितप्रतिपत्त्यर्थम् । अन्वर्थां वा महतीं संज्ञां करोति-"हलोऽनन्तराः संयोगः" इति । इह तु महासंज्ञाकरणं मङ्गलार्थम् । अत एव प्रथममुच्चारणम्; अन्यथा हि सतः कार्यिणः कार्येण भवितव्यमिति "अदेङ् गुणः" इत्यादिवन्निर्दिश्येत । अतो यत्नाभावात्प्रत्येकमेव संज्ञा । किञ्च--लौकिकप्रयोगे व्यवस्थितानामादैचां संज्ञया भवितव्यम् । न च समुदायस्य क्वचित्प्रयोगः, अतोऽसंभवादपि प्रत्येकमेव संज्ञा । लिङ्गाच्च-किं लिङ्गम् ? "प्रस्थे वृद्धमकर्क्यादीनाम्" "मालादीनां च" इति । इदं हि "मालाप्रस्थः" इत्यादाववृद्धमिति पर्युदासे प्राप्ते वचनम्,अतः प्रत्येकमेव संज्ञा तदाह-प्रत्येकमिति ।।

तत्रापि त्रयः प्रकाराः-लुगादिसंज्ञावत्तद्भावितानामेव, टिसंज्ञावद्वाऽतद्भावितानामेव, अनुनासिकादिसंज्ञावदुभयेषां वेति । तत्र यदि तद्भावितानामेव--ये वृद्धिसंज्ञया भाव्यन्ते, तेषामेव स्यात्, शालीयो मालीय इति छो न स्यात्; आम्रमयं रैकुलमयम्--वृद्धलक्षणो मयण् न स्यात्; आम्रगुप्तायनिः--"उदीचां वृद्धात्" इति फिञ् न स्यात् । अथातद्भावितानामेव--गार्गीयः, ऐतिकायनीयः, औपगवीयः-छो न स्यात् ; अतो दोषदर्शनादगृह्यमाणविशेषत्वाच्चोभयेषां संज्ञेत्याह-%सामान्येने%ति । आकारोऽनण्त्वादेव न भिन्नकालानां ग्राहक इति न तन्निवृत्त्यर्थं तपरत्वम्, नापि गुणान्तरयुक्तानां ग्रहणार्थम् । अभेदकत्वाच्च गुणानाम्, लोके हि मुण्डेनापि चौर्ये कृते संजातकेशोऽपि प्रत्यभिज्ञाय निगृह्यते । तथा "अड्डदात्तः" इत्युदात्तवचनं लिङ्गम्, अन्यथा ह्युदात्तगुणमेवाटमुच्चारयेत् । अतोऽनर्थकं तपरकरणमित्यत आह--%तपरकरणमि%ति । तश्चासौ परश्च तपरः, तस्य करणमुच्चारणम्, आकारात्परस्य तकारस्योच्चारणमित्यर्थः । अथ वा-तः परो यस्मादिति तद्गुणसंविज्ञानो बहुव्रीहिः, तकारसहितस्याकारस्योच्चारणमित्यर्थः । %ऐजर्थमि%ति । ऐचोरर्थः प्रयोजनं यस्य तत्तथोक्तम् । "तपरस्तत्कालस्य" इत्यत्र तः परो यस्मादिति बहुव्रीहिराश्रितः । तत्कथं तपरकरणमैजर्थमित्याशङ्क्य पञ्चमीसमासोऽपि तत्राश्रित इति दर्शयति-%तादपि पर% इति । इतिकरणो हेतौ । यस्मात् तादपि परस्तस्मादैजर्थ इति । ऐजर्थत्वमेव प्रकटयति--%खट्वैलकादिष्वि%ति । असति तपरकरणे त्रिमात्रचतुर्मात्रयोरप्यैचोः सवर्णग्रहणेन ग्रहणाद् वृद्धिसंज्ञा स्यात्, ततश्च वृक्षैलकः, वृक्षौदनः, खट्वैलका, खट्वौदन इति त्रिमात्रचतुर्मात्रस्थानिनोस्त्रिमात्रचतुर्मात्रावेवैकारौकारौ स्यातामिति तन्निवृत्त्यर्थं तपरकरणम् । आश्वलायन इत्यादीनि तद्भावितानामाकारादीनां क्रमेण रूपोदाहरणानि । अश्वलेतिकशब्दौ नडादी । उपमन्युशब्दो बिदादिः । लक्षणस्य बहुविषयत्वसूचनार्थं चतुर्थस्योदाहरणस्योपन्यासः । आकारस्यातद्भावितस्य कार्योदाहरणमाह--%शालीयः, मालीय% इति । ऐकारौकारयोस्त्वतद्भावितयोरुदाहरणं रैकुलमयं नौकुलमयमिति, वृद्धलक्षणो मयड् भवति ।।

<अदेङ् गुणः ।। 1.1.2 ।।>

पूर्वेण तुल्यमेतत् । %तपरकरणं त्विह सर्वार्थमि%ति । न तु पूर्ववदन्यतरार्थमिति तु शब्दस्यार्थः । असति हि तस्मिन् दीर्घप्लुतयोरपि गुणसंज्ञा स्यात्; ततश्च तरतीति कदाचिदकारः स्यात्, कदाचिदाकारः, रपरत्वे कृत एकस्याध्यर्धमात्रत्वादपरस्यार्धतृतीयमात्रत्वात् । न चाकारस्य वृद्धिसंज्ञा बाधिका; एकसंज्ञाधिकारादन्यत्र संज्ञासमावेशात् । एङश्च त्रिमात्रचतुर्मात्रस्य गुणसंज्ञायाम्-रथेषा,खट्वेषा, अश्वोढः, वडवोढ इति त्रिमात्रतुर्मात्रौ स्याताम् ।

तरितेत्यादीनि तद्भावितानामदेङां क्रमेण रूपोदाहरणानि । पचन्ति जयन्तीत्यकारस्य कार्योदाहरणे । अत्रान्त्यकारे परतः शबकारस्य "अतो गुणे" इति पररूपं भवति । एकारस्यातद्भावितस्योदाहरणम्-%अहं पचे %इति । ओकारस्य तु न संभवति ।।

<इको गुणवृद्धी ।। 1.1.3 ।।>

%परिभाषेयमि%ति । नाधिकारः; अस्वरितत्वात्, असंयुज्यनिर्देशाच्च । अधिकारे हि "इको गुणवृद्धी न धातुलोपः" इति संयुज्यैव निर्दिशेत् । नापि विधिः, "इकः स्थाने गुणवृद्धी भवतः" इति लक्षणान्तरेण विधास्यामानत्वात् । ननु यदायं स्वतन्त्रो विधिस्तदा तेष्विक इत्यस्योपस्थापकाभावाद् यातेत्यादावनिकोऽपि विधिः स्यात्, इह तु सार्वधातुकाद्यभावेऽपि दधि मध्वित्यादौ विधिरस्तु ? एवं तर्हि गुणवृद्ध्यधिकारे पुनर्गुणवृद्धिग्रहणान्न विधिः । यद्यपि प्रकृतं गुणवृद्धिग्रहणं संज्ञापरम्, इह त्वनुवृत्तिसामर्थ्यात्संज्ञिपरं भविष्यति । "अदेङ् गुणः" इत्यत्र चानुवर्त्तमानमपि वृद्धिग्रहणं न संबध्यते, अन्यवचनाच्चकाराकरणाच्च । अन्या हि तत्र गुणसंज्ञोच्यते, चकारश्च न क्रियते; अतो विधिपक्षे पुनर्गुणवृद्धिग्रहणं न कर्त्तव्यम् । अत एवाधिकारोऽपि न भवति । परिभाषायां तु तस्यां विशिष्टविषयत्वसिद्धये कर्त्तव्यं तदिति वक्ष्यामः । अतः परिभाषेयम् ।

योगो वायं व्यपदिश्येत, सूत्रं वा, तत्कथम् "इयम्" इति स्त्रीलिङ्गनिर्द्देशः ? उच्यते-यथायं योगः, यथा वा सूत्रमिदम्, एवं परिभाषापि, तत्सामानाधिकरण्यादियमिति निर्देशः । ननु परिभाषात्वं विधित्सितम्, इदंशब्दस्तु उद्देशकः, सिद्धरूपस्य चोद्देशः, सूत्ररूपता योगरूपता वा सिद्धेति पुनरप्युद्देशकस्य स्त्रीलिङ्गानुपपत्तिः । कश्चिदत्र परिभाषेयमित्यनूद्य स्थानिनियमार्थता विधीयते-"येयं परिभाषा सा स्थानिनियमार्थेति, न तु परिभाषारूपता विधीयते" इत्याह, स वाच्यः-"असिद्धं परिभाषात्वं कथमनूद्यते" इति । अव्यापकश्चायं परिहारः "समर्थः पदविधिः" इत्यादौ । तत्र परिभाषेयमित्येतावच्छ्रूयते, न पुनरेतदर्थेति । वयं तु ब्रूमः-निर्दिश्यमानप्रतिनिर्दिश्यमानयोरैक्यमापादयन्ति सर्वनामानि पर्यायेण तल्लिङ्गभाञ्जि भवन्ति । तत्र यथा "अणौ यत्कर्म णौ चेत्स कर्त्ता" इति कर्माकारपरामर्शिनोऽपि तच्छब्दस्य विधीयमानस्य कर्त्राकारस्य लिङ्गं भवति, तद्वदिहापि सूत्रमेवोद्दिश्यत इदंशब्दस्य विधीयमानपरिभाषाकारस्य लिङ्गं भविष्यति । %स्थानिनियमार्थे%ति । इगाख्ये स्थानिनि गुणवृद्ध्योर्नियमोऽर्थः = प्रयोजनं यस्याः सा तथोक्ता । "द्वन्द्वे घि" इति वृद्धिशब्दस्य पूर्वनिपातः प्राप्तः सूत्रनिर्देशेन नित्यं बाध्यते;"धर्मादिषु उभयम्" इति वचनादिति सूचयन्नाह-%वृद्धिगुणा%वित्यादि ।

किं पुनरनेन ग्रन्थेनोच्यते ? ननु नियमरूपेणास्य सूत्रस्य प्रवृत्तिरिति; यथा "एच इग्घ्रस्वादेशे" ह्रस्व आदिश्यमान एच इगेवेति । यद्येवम्, अनियमप्रसङ्गे नियम इति "सार्वधातुकार्धधातुकयोः","सिचि वृद्धिः" इत्यत्रैव स्यात्, अत्र ह्यसत्यस्मिन्योगेऽलोऽन्त्यस्य भवन्तौ वृद्धिगुणावनन्त्यस्याविशेषितत्वादिकश्चानिकश्व प्राप्नुतः, न तु मिदिमृजिपुगन्तलधूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्वपि। अत्रालोन्त्यस्येत्यनिक एव प्रसङ्गः । अथ सर्ववाक्यानां सावधारणत्वात् प्राप्तमेवावधारणमिक एवेत्येव शब्देनाभिधीयते, न पुनर्नियमोऽनेन प्रदर्श्यते; यथा-"तपस्तपः कर्मकस्यैव" इति । अतो विधिरूपेणैवास्य व्यापारो विवक्षितः, परिभाषात्वाच्च गुणवृद्धिविधेः संस्कारकं विध्यन्तरमिदम्, यथा "इद्गोण्याः" इत्यादेः"अलोऽन्त्यस्य" इत्ययमिति पक्षः । ततो नाप्राप्तायामलोऽन्त्यपरिभाषायामियमारभ्यमाणा तस्या बाधिका स्यात् । ततश्च यत्रैषा, न तत्र सा प्रवर्त्ततेति जुसि गुणो यथेह भवति--अबिभयुः अबिभरुरिति, एवमनेनिजुः पर्यवेविषुरत्रापि प्राप्नोति । "सार्वधातुकार्धधातुकयोः" यथेह भवति चेता स्तोतेति; एवमीहिता, ऊहिता, उम्भिता अत्रापि प्राप्नोति ।

अथ तु सामान्यविशेषयोरसम्भवे बाध्यबाधकभावः; अस्ति चात्र सम्भवो यद् अलोऽन्त्यस्य गुणवृद्धी स्याताम् इकश्च, ततः "जुसि च" इत्यादौ गुणवृद्धिलिङ्गादिक्परिभाषाप्युपतिष्ठत, अङ्गस्येति स्थानषष्ठीनिर्देशात्, "अलोऽन्त्यस्य" इत्येषापि । तत्र च न समुच्चयोऽङ्गान्त्यस्यानिकोऽपि गुणो भवति, तदवयवस्य चेकोऽनन्त्यस्यापीति । नापि विकल्पः;कदाचिदङ्गान्त्यस्यानिकोऽपि, कदाचित्तदवयवस्येकोऽनन्त्यस्यापीति, एकत्वात् षष्ठ्यर्थस्यैक एव हि सकृच्छ्रुताया अङ्गस्येति षष्ठ्या अर्थः-स्थानेयोगो वा थ अवयवयोगो वा, न द्वौ समुच्चितौ नापि विकल्पितौ । तत्र यद्यङ्गस्येत्येतत्पूर्वमिक इत्यनेन वैयधिकरण्येन संबध्येत-"अङ्गस्य य इक्, तस्य गुणः" इति, ततोऽलोऽन्त्यस्येत्येतदनन्वितं स्यात् । अतः पूर्वमलोन्त्यस्येत्यनेन संबध्यते, स चान्त्येका विशेष्यते "अङ्गान्त्यस्येको गुणः" इति । यद्वा-इकाऽङ्गं विशिष्यते, विशेषणेन च तदन्तविधिः-इगन्तस्याङ्गस्येति । एवमपि हि स्थानषष्ठीत्वानपायादलोन्त्यस्येत्यव्याहतप्रसरं सर्वथाङ्गान्त्यस्येको गुण इति जुसि सार्वधातुकार्धधातुकगुणे न कश्चिद्दोषः । मिदादिषु पूर्वोक्तेन प्रकारेण द्वयोरन्वयासंभावदन्यतरद्धातव्यम् । तत्राविशेषादुभयमपि त्यज्येत, उच्येते च वृद्धिगुणौ "मृजेर्वृद्धिः" "मिदेर्गुणः" इति, तौ सर्वादेशौ स्याताम् । अतो विधिरूपेण नियमरूपेण वास्य सूत्रस्य व्यापारो नाभ्युपगन्तव्यः, किं तर्हि ? अनेन क्रियते पदोपस्थापनम्; यत्र ब्रूयाद् गुणो भवतीति, वृद्धिर्भवतीति; तत्रेक इत्येतत् षष्ठ्यन्तं पदमुपतिष्ठतामिति । "अलोऽन्त्यस्य" इत्यस्य तु वाक्यभावः । एवं हि विज्ञायमाने "सिचि वृद्धिः" इत्यादौ यत्रान्त्य इक् संभवति, तत्रेक इत्येतेनोपस्थितेनाङ्गे विशेषिते तदन्तविधौ सतीगन्ताङ्गस्य गुण इति वाक्यव्यापारे परिनिष्ठते पश्चादलोऽन्त्यस्येत्येतदिगन्तस्य प्राप्तं गुणं ततोऽपकृष्याङ्गान्त्यस्य विधत्ते, न त्विक इत्यस्योपस्थानवेलायामुपतिष्ठते । "मिदेर्गुणः" इत्यादौ तु यत्रान्त्य इङ् न संभवति तत्राङ्गेनेकि विशेषितेऽङ्गस्येको गुण इति वाक्यव्यापारे परिसमाप्ते स्थानषष्ठ्यभावात्स्वयं न प्रवर्तते, न त्विक इत्यनेन सहोपतिष्ठते, येनाविशेषादुभयोर्निवृत्तिः स्यादिति सिद्धमिष्टम् ।

वृत्तिकारेण त्वस्य सूत्रस्य प्रयोजनं पिण्डीकृत्य प्रदर्शितम्-सर्वथान्त्यस्य वाऽनन्त्यस्य वेक एव गुणवृद्धी भवतः, न त्वक्षरव्यापारः । अत एव %वेदितव्यौ% इत्याह । अक्षरव्यापारप्रदर्शने तु इक एव स्थाने भवत इत्येतावद्वक्तव्यं स्यात् । %स्वसंज्ञया शिष्यमाणा%विति । वृद्धिर्भवति गुणो भवतीत्येवं

विधीयमानावित्यर्थः ।
%इक इति किमि%ति । प्रधानावयवाक्षेपेण समुदायस्यैवाक्षेपः-सूत्रं किमर्थमित्यर्थः । %आत्सन्ध्यक्षरे%त्यादि । ननु "गापोष्टक्" इति टकः कित्करणं सामग इत्यादावाल्लोपे च सिद्धं स्यात् सामग इति । तथा ग्लायतीत्यादौ सन्ध्यक्षराणामप्युपदेशसामर्थ्याद् गुणो न भविष्यति, इतरथा प्रक्रियालाघवार्थमेकारमेवोपदिशेत् । "जनेर्डः" इति डित्करणाद्व्यञ्जनानामपि गुणो न भविष्यति । यदि हि तस्य स्याद्, अर्द्धमात्रस्य मात्रिकेऽकारे गुणे कृते सिद्धं स्यादुपसरज इति । यद्येवम्,मिदेर्गुणोऽन्त्याद्व्यावर्तितः सर्वादेशः स्यात् । किं च गमेरप्ययं डो भवति, तस्य च स्थानत आन्तर्यादोकारो गुणः स्यात्; रैनौग्लौशब्देभ्यश्चाचाराक्विबन्तेभ्यस्तृजादौ गुणप्रसङ्गो यद्यभिधानमस्ति; तथा चितः, चिनुतः,भिन्नः, बेभिद्यते इत्यादौ "क्ङिति च" इति प्रतिषेधार्थमपि गुणस्येग्लक्षणत्वमेषितव्यम् ।
अथ वृद्धिग्रहणं किमर्थम् ? "मृजेर्वृद्धिः" इको यथा स्यात्, अलोऽन्त्यस्य मा भूत् । योगविभागात्सिद्धम्--"मृजेर्वृद्धिरचः", मृजेरचो वृद्धिर्भवति, अङ्गाक्षिप्तेन प्रत्ययेनाचो विशेषणात् "न्यमार्ट्" अटो न भविष्यति, सिचि वृद्धिस्तर्ह्यकारस्य मा भूत्, अचिकीर्षीत् । अतो लोपो भविष्यति, "ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषिद्धम्?" इति वचनात्, यथा-चिकीर्षक इति । आकारस्य नास्ति विशेषः; सग्विधानादसंभवश्च । एजन्तमपि न संभवति; आत्वविधानात् । रैनौग्लोशब्दानामाचारक्विबन्तानामविशेषः, गोशब्दस्य क्विबन्तस्य "ॠत इद्धातोः" इत्यतः "धातोः" इत्यनुवृत्तेः धातुरेव यो धातुरिति विज्ञानात् सिचि वृद्ध्यभावः । अभैत्सीदित्यादौ "सिचि वृद्धिः" इत्यनेन व्यञ्जनस्य नाप्राप्तायां वृद्धौ विधीयमाना हलन्तलक्षणा वृद्धिर्बाधिका, "नेटि" इत्ययं च निषेधो यावती हलन्तस्य वृद्धिः, सिचि वृद्धिरिति वा, हलन्तस्याच इति वा, सा सर्वा न भवतीति विज्ञायते । तेन अनर्दीदित्यादौ अन्त्यस्य वृद्धिर्न भविष्यति । तदेवम् "इको वृद्धिर्यथा स्याद् अदेङ्व्यञ्जनानां मा भूद्" इत्येवमर्थं तावद् वृद्धिग्रहणं न कर्त्तव्यम् । एवं तर्हि मृज्यते, मृष्ट इत्यादौ "क्ङिति च" इति प्रतिषेधार्थं मृजेर्वृद्धेरिग्लक्षणत्वम् । इदमपि योगविभागात्सिद्धम्--मृजेर्वृद्धिरित्यस्यानन्तरमजादौ क्ङिति वेति वक्तव्यम्--परिमृजन्ति परिमार्ज्जन्ति,परिममृजतुः परिममार्जतुरित्येवमर्थम् । तत्र योगविभागः-"अजादौ क्ङिति मृजेरचो वृद्धिर्भवति" । किमर्थमिदम् ? नियमार्थम्--क्ङिति यदि भवति अजादावेवेति । तेन मृज्यते मृष्ट इत्यादौ न भविष्यति, ततो वा, अजादावपि विकल्पेनेति । सिचि वृद्धेस्तर्हि प्रतिषेधार्थमिग्लक्षणत्वम् । "णु स्तुतौ" "धू विधूनने" कुटादी, न्यनुवीद् न्यधुवीद् । अत्राप्यन्तर्भूतसिज्मात्रापेक्षत्वादन्तरङ्ग उवङि सति हलन्तत्वात् "नेटि" इति निषेधः । यदि सिच्यन्तरङ्गं भवति, अचैषीद् अहौषीद् अहौषीद्-गुणः स्यात् । अस्तु, तस्यैव वृद्धिः करिष्यते ? अकार्षीदित्यादौ हलन्तलक्षणा वृद्धिः, अतारीदित्यादौ हलन्तलक्षणायाः "नेटि" इति प्रतिषेधे "अतो हलादेः " इति विकल्पं बाधित्वा "अतो ल्रान्तस्य" इति नित्या वृद्धिः । अलावीदित्यादावुवर्णान्तेषु सेटि सिच्यन्तरङ्गत्वाद् गुणावादेशयोः कृतयोरपि "अतो ल्रान्तस्य" इत्यत्र वकारस्यापि लुप्तनिर्दिष्टत्वान्नित्या वृद्धिः । यद्येवम्, मा भवानवीत्, अमवीदित्यत्रापि तर्हि वकारप्रश्लेषान्नित्या वृद्धिः स्यात् । सिच्यन्तरङ्गं भवतीत्युक्ते "ह्म्यन्तक्षण" इत्यत्र णिश्विग्रहणं न कर्त्तव्यम्; औनयीत्?, अश्वयीदित्यत्रान्तरङ्गत्वाद् गुणावयादेशयोः कृतयोर्यान्तानां नेत्येव सिद्धत्वात् । तत्स्थाने "अविमवी"निवेशयिष्यामः-"अतो ल्रान्तस्य" इत्यत्र वकारप्रश्लेषेण प्राप्तवृद्धिरविमव्योर्नेति । तदेवमनर्थकं वृद्धिग्रहणम् ?
नानर्थकम्, सिच्यन्तरङ्गस्य प्रवृत्तिमाश्रित्य हि वृद्धिग्रहणं प्रत्याख्यायते,यदि च सिच्यन्तरङ्गं स्यात् चिनीप्रभृतिभ्यो यङ्गलुगन्तेभ्यश्चिरिणोतिजिरिणोतिभ्यां च लुङि सिचि अचेचायीद्; अनेनायीद्, अचिरायीद्, अजिरायीदिति? न स्याद्; गुणायादेशयोः कृतयोः यान्तानां नेति प्रतिषेधप्रसङ्गाद् । इग्लक्षणायां तु सिचि वृद्धौ तयैवान्तरङ्गं बाध्यते, यदि स्याद्, न क्वापि सिचीगन्तमङ्गं भवेत्, ततश्चाचिरायीदित्यादि सिद्धम् । यथा च तया गुणायदेशौ बाध्येते, एवं न्यनुवीदित्युवङपि बाध्येत । अतः प्रतिषेधार्थमपि वृद्धेरिग्लक्षणत्वमेषितव्यमिति सर्वमवदातम् । एवं बहुवक्तव्यत्वाद् वृत्तिकारेण वृद्धिग्रहणस्य प्रयोजनं न दर्शितम् ।
अथ कथं स्वसंज्ञया शिष्यमाणावित्येष विशेषो लभ्यते इत्याह-%गुणवृद्धिग्रहणमि%त्यादि । इह पूर्वसूत्राभ्यां गुणवृद्धिग्रहणमनुवर्तते । तेनैवादेङामादैचां च ग्रहणे सिद्धे यत्पुनर्गुणवृद्धिग्रहणं तत्स्वसंज्ञया विधाननियमार्थम्; अन्यथा प्रकृतंगुणवृद्धिग्रहणं तटस्थमुपलक्षणं स्याद्--'वस्तुतो ये गुणवृद्धी तद्विधौ' इति । स तु विधिर्गुणवृद्धिशब्दाभ्यां प्रकारान्तरेण वेत्येव विशेषो नाश्रितः स्यात्, पुनर्गुणवृद्धिग्रहणसामर्थ्यात्तु शब्दव्यापारोऽप्याश्रीयते--गुणवृद्धी ये गुणवृद्धी, एवं शब्दिते ये गुणवृद्धी इत्यन्यतरस्य गुणवृद्धिग्रहणस्य स्वरूपप्रधानत्वं सम्पद्यते । तेनायं विशेषो लभ्यत इत्यर्थः । अन्यथा "अचश्च" इत्यस्य स्वसंज्ञया विधाने नियमस्य "दिव उत्" इत्यादिष्वगुणवृद्धिसंज्ञकेषु; तत्संज्ञेषु च यत्रेङ् न संभवति "अष्टन आ विभक्तौ" इत्यादौ, तत्र चरितार्थत्वात् "दिव औत्" इत्यादिषु गुणवृद्धिसंज्ञकेषु यत्रेक् संभवति तत्रायं नियमः स्यात् । द्यौः पन्थाः, सः,इममिति । स इत्येतदनुदाहरणम्, न ह्यत्रेगस्ति ।
एवं प्रकटितोऽस्माभिर्भाष्ये परिचयः परः ।
तस्य निःशेषतो मन्ये प्रतिपत्तापि दुर्लभः ।।
<न धातुलोप आर्धधातुके ।। 1.1.4 ।।>
"दुरीणो लोपश्च" दुःशब्द उपपदे इणो धातोरप्रत्ययो भवति, धातोश्च लोपः । दुःखेन ईयते=प्राप्यते दूरमित्यत्र यद्यपि कृत्स्नस्य धातोर्लोपः संभवति, तथाप्येवंविषये गुणवृद्ध्योः प्राप्त्यभावादेकदेशे धातुशब्दो वर्त्तत इत्याह--धात्वेकदेश इति । "धातुलोप" इति तत्पुरुषे सति आर्द्धधातुकग्रहणं लोपविशेषणम्, गुणवृद्धिविशेषणम्, उभयविषेषणं वा-इति त्रयः कल्पाः । तत्र यदि लोपविशेषणम्--आर्द्धधातुकनिमित्ते धातुलोपे सति यत्किञ्चिद् निमित्ते गुणवृद्धी न भवत इत्यर्थः स्यात् । ततश्च प्रेद्धम् इत्यत्र प्रपूर्वादिन्धेः क्तप्रत्यये तन्निमित्ते नलोपे सति प्राप्नुवत आद्गुणस्यापि निषेधः स्यात् । यद्यपीक इत्यनुवर्तते, तथापि

द्वयोः षष्ठीनिर्द्दिष्टयोः स्थाने भवन्नन्यतरव्यपदेशं लभत इति स्यादेव । न चेह सूत्रे "इक" इत्यस्य रूपपरत्वे प्रमाणमस्ति । उत्तरसूत्रे तु प्रमाणं वक्ष्यामः । ननु "पूर्वं धातुः साधनेन युज्यते" इत्यस्मिन् दर्शने प्रथमोपनतक्तप्रत्ययापेक्षत्वादुपधालोपोऽन्तरङ्ग इति तदपेक्षः प्रतिषेधोऽप्यन्तरङ्गः, "पूर्वं धातुरुपसर्गेण युज्यते" इति तु दर्शने प्रथमोपनतोपसर्गापेक्षत्वाद् गुणोऽन्तरङ्गः, ततश्च "असिद्धं बहिरङ्गमन्तरङ्गे" इति प्रतिषेधो न भविष्यति ? नैतदस्ति; "नाजानन्तर्ये" इति निषेधात् । अथ गुणवृद्धिविशेषणमार्द्धधातुकग्रहणम्, ततोऽयमर्थः स्यात्--यत्किञ्चन निमित्ते धातुलोपे सत्यार्द्धधातुकनिमित्ते गुणवृद्धी न भवत इति ; तदा प्रेद्धमित्यत्र दोषो न, गुणस्यातन्निमित्तत्वात्; किन्तु क्नोपयतीत्यत्र "क्नूयी शब्दे" इत्यस्माण्णिचि पुकि च यलोपे पुगन्तलक्षणस्य गुणस्य निषेधः स्याद् । अत उभयविशेषणम्--आर्द्धधातुकनिमित्ते धातुलोपे सत्यार्द्धधातुकनिमित्ते गुणवृद्धी न भवत इति ।
तत्र सकृच्छ्रुतस्योभयविशेषणत्वमेव तावद् दुर्लभम् ? अथापि स्याद्, एवमपि लोपगुणवृद्धीनामेकार्द्धधातुकनिमित्तत्वं न लभ्यते । ततश्च विभज्यान्वाख्यानपक्षे भेद्यत इत्यत्र भिदेर्ण्यन्तात्कर्मणि यकि भिद् + इ + य इति स्थिते नित्यत्वात्पूर्वं णिलोपे कृते यकमपेक्ष्य प्रवृत्ते? प्रत्ययलक्षणेन णिचमपेक्ष्य प्राप्नुवतो गुणस्य निषेधः स्याद्, द्वयोरप्यार्द्धधातुकनिमित्तत्वादिति तत्पुरुषे सति सर्वथा दोषं दृष्ट्वाऽऽह--%तस्य लोपो यस्मिन्नि%ति । अस्मिन्पक्षे धातोर्लोपो यस्मिन्निति अन्यपदार्थभूतेनार्द्धधातुकेन लोपो विशेष्यते, साक्षाच्च गुणवृद्धी, धातोर्लोपो यस्मिन् तस्मिन्निति । एकार्द्धधातुकनिमित्तत्वं च लोपगुणवृद्धीनां लभ्यत इति न कश्चिद् दोषः । %ते न भवत% इति । अनेन गुणवृद्ध्योरयं निषेधः, न पूर्वसूत्रव्यापारस्येति दर्शयति । पदोपस्थापनं हि पूर्वसूत्रव्यापारः । न चैवम्भूत आर्द्धधातुके तस्य प्रसङ्गः, "दीधीवेवीटाम्" इति चासम्बद्धं स्यादुपस्थाननिषेधे । %लोलुव% इत्यादि । लूपूभ्यां यङ्, द्विर्वचनम्, "गुणो यङ्लुकोः" गुणे निषिद्धे उवङ् । %मरीमृज %इति । "रीगृदुपधस्य च" । लोलूयादिभ्य इत्यादिना सूत्रार्थमुदाहरणेषु दर्शयति । ननु च यङकारस्यातो लोपे कृते तस्या स्थानिवत्त्वादेव गुणवृद्धी न भविष्यतः, यथा--पापचक इति "अत उपधायाः" इति वृद्धिः, न ह्यत्रानेन निषेधः सिध्यति, किं कारणम् ? अनिग्लक्षणत्वात् । नालोपो लभ्यते, "यङोऽचि च " इति समुदायलुका प्रतिपदविहितेन बाधितत्वात् । योगविभागात्सिद्धम्--अतो लोपो भवत्यार्द्धधातुके, ततो "यस्य" य इत्यस्य समुदायस्य योऽकारस्तस्यापि लोपो भवति । किमर्थमिदम् ? विशेषविहितेन समुदायलुकाऽतो लोपो मा बाधीति । तेन स्थानिवत्त्वादेव गुणवृद्धी न भविष्यतः । यथैव तर्हि गुणवृद्धी न भवत एवं चेक्षियः, चेक्रियः, लोलुवः, तोष्टुवः, सुश्रुव इतीयङुवङावप्यच्प्रत्ययमपेक्ष्य न स्याताम् । मा भूतामचि, य एव त्वसौ स्थान्यकारस्तदाश्रयौ भविष्यतः । स हि यकारे लुप्ते प्रत्ययसंज्ञकः । ननु क्षेत्रियः तोष्टुव इत्यत्रान्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधत इति अकृत्सार्वधातुकयोर्दीर्घात् प्रागेव यङो लुकि कृते स्थानिवद्भावे सत्यपि चेक्षि अ अ, तोष्टु अ अ इति स्थिते स्थान्यकारेण सह लघूपधमङ्गं संजातमिति अच्प्रत्यये गुणः स्यादेव ; न अन्तरङ्गावियङुवङौ भविष्यतः, अशिश्रियद् अदुद्रुवद् इति यथा । अतः स्थानिवत्त्वादेव सिद्धम्, नार्थोऽनेन ? उच्यते; सर्वत्र दीर्घान्तेषु ह्रस्वान्तेषु चेयङुवङोः कृतयोः पुनर्लघूपधलक्षणो गुणः प्राप्नोति । न च पुनरपि स्थानिवद्भावः, आदिष्टादचः पूर्वत्वात् । किञ्च यद्यतो लोपः क्रियेत, जङ्गम इत्यत्र "गमहन्" इत्युपधालोपः स्यात् । अथात्रानङीति प्रतिषेधस्तर्हि दरीदृश इत्यत्र "ऋदृशोः" इति गुणः स्याद्; देद्य इत्यत्र "दीङो युडचि" इति युट् स्यात्; सनीस्रंसः, दनीध्वंस इत्यत्र "अनिदिताम्" इत्युपधालोपः स्यात्; यायावर इत्यादिष्वाकारलोपः स्यात् । यदा पुनर्योगविभागमकृत्वा विशेषविहितः समुदायलुक् क्रियते, तदा हलचोरादेशस्य स्थानिवत्त्वाभावादुपधालोपादयो न भवन्तीत्यवश्यं समुदायस्य लुगेषितव्यः । एवं च लोलुव इत्यादावपि गुणवृद्धी स्यातामिति सूत्रमपि कर्त्तव्यम् ।। %लूञ् लविते%ति । प्रागेव धातुसंज्ञाया भवन्ननुबन्धलोपो धातुलोपो न भवति । %रेडसी%ति । "रुष रिष हिंसायाम्" । "अन्येभ्योऽपि दृश्यन्ते" इति विच्, वेरपृक्तस्य लोपः--न धातुलोपो भवति ।
नन्वसत्यपि धातुग्रहणे लुप्यतेऽस्मिन्नित्यधिकरणसाधनलोपशब्दस्याश्रयणादनैमित्तिकेऽनुबन्धप्रत्ययलोपे न भविष्यति । तत्र लोपशब्दो हि संज्ञाशब्दः, कथमस्याधिकरणसाधनता लभ्यते । %रोरवीती%ति । "रु शब्दे" यङ्लुकि तिपि रूपम् । नन्वसत्यप्यार्धधातुकग्रहणे धातोर्लोपो यस्मिन्निति बहुव्रीहिर्विज्ञास्यते, रोरवीतीत्यत्र च यङ्लुगनैमित्तिकः । न ह्यार्द्धधातुकग्रहणं बहुव्रीहित्वे प्रमाणम्; सत्यपि तस्मिंस्तत्पुरुषसम्भवात् । इदं तर्हि प्रयोजनम्-- "तुर्वी थुर्वी धुर्वी हिंसार्थाः", मुर्छा मोहसमुच्छ्राययोः, तेभ्यो यङ्लुगन्तेभ्यस्तिबादौ सार्वधातुके परतो राल्लोपे तोतोर्ति मोमोर्तीत्यादौ छ्रवोर्लोपस्य गुणस्य चैकनिमित्तत्वान्निषेधः स्यादेव । %इक इत्येवे%ति । इक इत्यस्यानुवृत्तिं प्रति न शङ्का कार्येत्येवशब्दस्यार्थः । अतः अभाजि, राग इति "भञ्जेश्च चिणि", "घञि च भावकरणयोः" इत्युपधालोपः ।।
प्रक्रियातर्कगहनप्रविष्टो हृष्टमानसः ।
हरदत्तहरिः स्वैरं विहरन् केन वार्यते ।।
<क्ङिति च ।। 1.1.5 ।।>
क्ङिद्ग्रहणं यदि विधीयमानस्य प्रतिषेधस्य विशेषणं स्याद्--गुणवृद्धी क्ङिति न भवत इति, ततो विधिसंस्पर्शात् " तस्मिन्निति निर्दिष्टे पूर्वस्य" इत्यस्योपस्थानात् क्ङित्यनन्तर एव प्रतिषेधः स्यात् । यद्यपि प्रतिषेधस्य विधानदशायां पौर्वापर्यं न संभवति, तथा निषेध्यमानयोर्गुणवृद्ध्योरपि; तथापि स्थानिन इकोऽनन्तरे क्ङिति प्रतिषेधः स्यात् । एवं हि विधानोत्तरकालमपि तावद् गुणवृद्ध्यभावरूपस्य प्रतिषेधस्य क्ङिदनन्तरः सम्भवति, "इको यणचि" इत्यादावप्येतावदेव पौर्वापर्यं यद्विधानदशायां तु स्थानिनः, उत्तरकालं तु विधेयस्य । यदा त्वनूद्यमानयोर्गुणवृद्ध्योर्विशेषणम्-क्ङिति सति ये गुणवृद्धी प्राप्नुतस्ते न भवत इति, तदाऽनुवादकत्वात्तस्मिन्नित्यादिकायाः परिभाषाया अनुपस्थानम् । न हि "क्ङिति सति ये गुणवृद्धी" इत्युक्ते विधिव्यापारेण क्ङितः कश्चित् संस्पर्शः । विध्यङ्गभूताश्च परिभाषास्तत्रैवोपतिष्ठन्ते नानुवादे, तस्यापि परार्थत्वाद्,द्वयोश्च परार्थयोः परस्परं सबन्धाभावात्; अन्यथा "वृद्धिर्यस्याचामादिस्तद्वृद्धम्" इत्यत्रेक्परिभाषोपस्थाने शालीय इति वृद्धसंज्ञाया अभावात्तल्लक्षणश्छो न स्यात् । तथा च "उदीचामातः स्थाने" इति

स्थानेग्रहणं कृतम्-आतः स्थाने योऽकार इत्यनुवादकत्वात् "षष्ठी स्थानेयोगा" इति स्थानेयोगो न लभ्येतेति । अतोऽस्मिन् पक्षे क्ङितीति सति सप्तमी "यस्य च भावेन" इति । क्ङितोर्हि सत्तालक्षणेन भावेन गुणवृद्ध्योः प्राप्तलक्षणो भावो लक्ष्यते, निमित्तस्य च सत्तया निमित्तिनः प्राप्तिर्लक्ष्यत इति "क्ङिति सति ये गुणवृद्धी प्राप्नुतः " इत्यस्य "क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत" इत्यर्थो भवति । भिन्नः, मृष्ट इत्यादौ चोपधाया अपि प्राप्नुवन्त्यौ गुणवृद्धी क्ङितं निमित्तमाश्रित्य प्राप्नुत इत्येतत्सर्वमालोच्याह--निमित्तसप्तम्येषेति । निमित्तात्सप्तमी निमित्तसप्तमी, पञ्चम्यर्थे शेषत्वेन विवक्षिते पष्ठीसमासः । क्ङिन्निमित्ते इति । एतेन गुणवृद्धिविशेषणं क्ङिद्ग्रहणमिति दर्शयति । ननु च विधीयमानतया प्राधान्यात् प्रतिषेधस्यैवैतद्विशेषणं युक्तम्, नैतदस्ति; यत्र हि गुणः कृतात्मसंस्कारः प्रधानोपकाराय महते प्रभवति, तत्रात्मनोऽपि संस्कारमनुभूय प्रधानेन सम्बध्यते, यथा-पानीयमेलादिसंस्कृतं पुरुषेण । उक्तं च-

"गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते ।
प्रधानस्योपकारे हि तथा भूयसि वर्तते ।।" इति ।

इह च गुणवृद्ध्योः क्ङिद्ग्रहणेन विशेषितयोर्महान् प्रधानप्रतिषेधस्योपकारो भवति; व्यवहितस्यापि तत्सिद्धेः । %भिन्न% इति-"रदाभ्याम्" इति नत्वम् । %मृष्ट% इति - व्रश्चादिना षत्वम् । %चिन्वन्ती%ति-"सार्वधातुकमपित्" "हुश्नुवोः सार्वधातुके" । यद्येषा निमित्तसप्तमी, शचङन्ते दोषः; "धि धारणे" "रि गतौ"तुदादी ताभ्यां तिपि "तुदादिभ्यः शः" "णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्" धि अ ति, रि अ ति, श्रि अ त्, द्रु अ त्, इति स्थिते शचङन्तस्याङ्गस्य तिपि लघूपधलक्षणश्च गुणः प्राप्नोति, शचङोः परतः पूर्वस्य सार्वधातुकलक्षणश्च, तत्र शचङ्निमित्तस्यैव प्रतिषेधः स्याद्, न तिङ्निमित्तस्य । पक्षान्तरे तु तिङ्निमित्तस्यापि गुणस्य शचङोः परतः प्रतिषेधो लभ्यते । न वा बहिरङ्गलक्षणत्वाद्बहिर्भूततिबाश्रयो गुणो बहिरङ्गोऽन्तर्भूतशचङ्निमित्ताभ्यामियङुवङ्भ्यां बाधिष्यते । "ग्लाजिस्थश्च ग्स्नुः" इत्यत्र वक्ष्यति--"गिच्चायं प्रत्ययो न कित्, तेन स्थ ईकारो न भवति" इति,"ग्स्नोर्गित्त्वान्न स्थ ईकारः" इति च । ततश्च भूष्णुरित्यत्र प्रतिषेधो न स्यादित्यत आह--%गकारोऽप्यत्रे%त्यादि । %चर्त्वे भूतः%-चर्त्वं प्राप्तः । अत एव गकरप्रश्लेषात् संख्यातानुदेशो न भवति; अन्यथा क्ङितौ द्वौ, गुणवृद्धी अपि द्वे इति संख्यातानुदशः प्राप्नोति-किति गुणस्य, ङिति वृद्धेरिति । ज्ञापकाद्वा, यदयं "मिदेर्गुणः" इति श्यनि ङिति गुणं शास्ति, तज्ज्ञापयत्याचार्यः-"नात्र संख्यातानुदेशो भवति" इति । यदि तर्हि क्स्नुप्रत्ययो गिद्, भूष्णुरितीट् प्राप्नोति, नैष दोषः; "श्र्युकः किति" इत्यत्रापि गकारश्चर्त्वभूतो निर्दिश्यते, सौत्रत्वाच्च निर्देशस्य चर्त्वस्यासिद्धत्वात्प्राप्तमपि "हशि च" इत्युत्वं न भवति, "कुप्वोः" इति विसर्जनीयश्च भवति । %कामयते% इति-"कमेर्णिङ्" । %लैगवायन% इति-लिगुशब्दात्"नडादिभ्यः फक्" इति फक् । "ओर्गुणः" इति गुणस्य प्रतिषेधः कथं न भवति यावतोकार इगेव ? नैतदस्ति; अत्र हि चकारः क्रियते, स इत्यर्थो विज्ञायते, तेनेक इतीमं शब्दमुच्चार्य विधीयमानयोर्गुणवृद्ध्योः प्रतिषेधः, न चैवमोर्गुणः । मृजेरित्यादि । इह त्रिमुनि व्याकरणम्, यथोत्तरं च मुनीनां प्रामाण्यमिति दर्शनस्थितिस्तेन सूत्रकारेणानुक्तं वार्तिककार आह,तदुक्तं च दूषयति, एवं भाष्यकारो वार्तिककारेण । व्याख्यातृत्वमपि द्वयोश्चास्तीत्येतावत्,? "यस्मिन्विधिस्तदादावल्ग्रहण" इत्यनेन तदादिविधौ सिद्धेऽप्यादिग्रहणं मुख्येऽजादौ यथा स्याद् व्यपदेशिवद्भावेनाजादौ मा भूत् । तुन्दपरिमृजः, यूयं ममृज, त्वया ममृजे । %संक्रमो नामे%त्यादि । संक्रामतोऽपक्रामतो गुणवृद्धी अस्मादिति कृत्वा । %लघूपधगुणस्याप्यत्र प्रतिषेध% इति। अत्र सूत्रे लघूपधगुणस्यापि प्रतिषेधः, न तु "सार्वधातुकार्द्धधातुकयोः" इत्येतस्यैवेत्यर्थः । अनेन निमित्तसप्तम्याः फलं दर्शितम् । अत्र इत्यनेन सूत्रं निर्दिश्यते । इह अचिनोदिति ङितो लङस्तिबादेशः, स्थानिवद्भावाद् ङिदिति गुणप्रतिषेधः प्राप्नोति, इह "अचिनवम्" इति ङितो लङो मिपि तस्यापि स्थानिवद्भावपरम्परया ङित्त्वाद् गुणप्रतिषेधः स्यादित्यत आह-%अचिनवमि%त्यादि । यदि ङिति यत्कार्यं तद् ङितो लकारस्यादेशे स्थानिवद्भावात्स्यात्, यासुटो ङिद्वचनमनर्थकं स्याद्; लिङो ङित्त्वादेव तदादेशेषु ङित्कार्यस्य सिद्धत्वात् ।।

<दीधीवेवीटाम् ।। 1.1.6।।>

%दीधीवेव्यो%रिति । "दीधीङ् दीप्तदेवनयोः" "वेवीङ् वेतिना तुल्ये" इत्येतयोः । अथ दीङ् क्षये" "धीङ् अनादरे" "वेञ् तन्तुसन्ताने" वी गत्यादिषु"- एतेषां ग्रहणं कस्मान्न भवति ? दीङस्तावन्न भवति, "मीनातिमिनोतिदीङां ल्यपि च" इति चकारेणैज्विषय आत्वविधानात् । वेञोऽपि न भवति, गुणप्राप्त्यभावात्, नैतदस्ति; चकारस्तावन्मीनातिमिनोत्यर्थः स्यात्, दीङोऽपि ग्रहणं ल्यबर्थं स्यात्, वेञोऽपि प्रवेयमित्यत्र "ईद्यति" इति ईत्वे कृते गुणः प्राप्नोति । एवं तर्हि चतुर्णां ग्रहणेऽभिप्रेते, असन्देहार्थं "वीवेधीदीटाम्" इति ब्रूयात् । किञ्च-"अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी" । %इटश्चे%ति । आर्धधातुकस्येडित्यागमस्य । ननु धातुसाहचर्यात् "इट किट गतौ" इत्यस्य धातोर्ग्रहणं युक्तम्, सत्यम्; प्रसिद्ध्यतिशयादागमस्य ग्रहणम्, आगमो हि प्रसिद्धतरः । शास्त्रेऽल्पाचरत्वेन पूर्वनिपाताभावाच्च धातुरिट्, दीधीवेव्योस्तु धातुत्वात्प्रकृतित्वाद् "अभ्यर्हितं च" इति पूर्वनिपातः । अथ दीधीवेव्योः किमर्थं ग्रहणं, यावता छान्दसावेतौ छन्दसि च दृष्टानुविधिः, दृश्यते च गुणः "होत्राय वृतः कृपयन्नदीधेत्", "अधीधयुर्दाशराज्ञः" इति, अतस्तयोरनर्थकः प्रतिषेधः ? केचिदाहुः-"आदीध्यनमावेव्यनम् इत्युदाहरतो वृत्तिकारस्य नानयोश्छान्दसत्वमभिप्रेतम्, अन्यथा हि छन्दस्येव किंचिदुदाहार्यम्" इति, इदं तु वार्त्तिकविरुद्धम्; यदाह-"दीधीवेव्योश्छन्दोविषयत्वाद् दृष्टानुविधानाच्च छन्दस्यदीधेददीधयुरिति च गुणदर्शनादप्रतिषेधः" इति । % आदीध्यनमि%ति । ल्युटि "एरनेकाचः" इति यणादेशः । %कणिते%ति । "कणिरणी शब्दार्थौ" लुटि तिपौ डादेशस्तासि टिलोपः, कणित् + आ इति स्थिते तकारन्तं लघूपधमङ्गमिति प्राप्तस्य गुणस्य प्रतिषेधः । ननु च "नेड्वशि कृति" इत्यत इडित्यनुवर्त्तमाने "आर्धधातुकस्येट्" इति पुनरिड्ग्रहणम् "इडेव यथा स्याद्, विकारो मा भूद्" इत्येवमर्थं भविष्यति । यद्येवम्; अलावीत्, पिपठिषतेः क्विपि पिपठी रित्यत्र "अकः सवर्णे दीर्घः" "र्वोरुपधायाः" इति च दीर्घो न स्याद् । अङ्गप्रकरणे नियमादाङ्ग एव विकारो निवर्त्यते, इह च पिपठिषतेरप्रत्यये नपुंसके जसः शिः, अतो लोपस्य स्थानिवत्त्वान्नुम्न भवतीति "सान्तमहतः" इति दीर्धत्वं न भवतीति

पिपठिषि ब्राह्मणकुलानीति भवति ।।
<हलोऽनन्तराः संयोगः ।। 1.1.7 ।।>
अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये ।
छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च ।।
इत्यन्तरशब्दोऽनेकार्थः । इह छिद्रवाचिनो ग्रहणम्; इतरेषामसम्भवात् । न विद्यतेऽन्तरं येषां तेऽनन्तराः=निश्छिद्राः । एतमेवार्थं व्यक्तेन शब्दान्तरेण दर्शयति-%भिन्नजातीयैरज्भिरव्यवहिताः श्लिष्टोच्चारिता% इति । एवम्भूता हि हलो निश्छिद्रा भवन्ति भिन्नजातीयैरिति वचनं तत्रैव व्यवधानप्रसिद्धेः । श्लिष्टोच्चारिता इति वचनादवग्रहेऽपि संज्ञा न भवति-अप्स्वित्यप्सु, विद्यते ह्यत्रान्तरमर्द्धमात्राकालः । %संयोग% इति । यद्येकैकस्य हलः शिलष्टोच्चारितस्यैषा संज्ञा स्याद् ? इह च निर्यायादित्यत्र प्रत्येकं संज्ञित्वे सति रेफे यकारः संयोग इति "वान्यस्य संयोगादेः" इत्येत्वं स्यात् । समुदायस्य संज्ञित्वे "अचो रहाभ्याम्" इति यकारस्य सत्यपि द्विर्वचने तस्यासिद्धत्वादेत्वाभावः, इह च संस्कृषीष्ट "ऋतश्च संयोगादेः" इतीट्, संस्क्रियत इति "गुणोऽर्तिसंयोगाद्योः" इति गुणः, दृषत्करोतीति ककारसंनिधौ दकारस्य संयोगाद्योः"? इति लोपः स्यात्, निर्यात इति "संयोगादेरातः" निष्ठानत्वं स्यात्; समुदाये तु संज्ञिनि नैते दोषा इत्यालोच्याह--%समुदायः संज्ञी%ति । महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थम्-"संयुज्यन्तेऽस्मिन्मिथो हलः" इति । नैरन्तर्यं च श्रुतं संज्ञिरूपेऽनुप्रविशतीति युक्तम् । प्रत्येकपक्षे तु तदुपलक्षणं स्याद् । अतः समुदाय एव संज्ञी युक्त इति भावः । "हलः" इति बहुवचननिर्द्देशाद् द्वयोः संज्ञा न स्यादित्याशङ्क्याह--%जातौ चे%ति । च शब्दो यस्मादर्थे, यस्माज्जातौ बहुवचनम्, तेन द्वयोर्बहूनां चेति । अथ यत्र बहवो हलः संश्लिष्टास्तत्र किं द्वयोर्बहूनां चाविशेषेण संज्ञा ? आहोस्विद्बहूनामेव ? यदि बहूनामेव, इह "मस्जिनशोर्झलि" इत्यन्त्यादचः परे नुमि मन्स्ज् इति स्थिते नसजानामेका संज्ञा, न तु सजयोरिति "स्कोः संयोगाद्योः" इति सलोपो न स्यात्, नैष दोषः; मस्जेरन्त्यात् पूर्वं नुमेषितव्यः, मग्न इत्युपधालोपो यथा स्यात्; अन्यथा द्वयोस्संज्ञाश्रयेण सत्यपि संयोगादिलोपे तस्यासिद्धत्वान्नलोपो न स्याद् । इह तर्हि निर्ग्लेयात्, संस्वरिषीष्ट, संस्वर्यते, निर्ग्लान इति एत्वेड्गुणनिष्ठानत्वानि न स्युः ? अस्तु तर्ह्यविशेषेण, कुतः ? निश्छिद्रत्वस्याविशेषात् !न च द्विर्वचनन्यायेन समुदायस्यैव स्यादिति वाच्यम्; यथा द्विर्वचनं समुदायावयवैकाचोर्युगपत् कर्त्तुमशक्यम्, नैवमत्राशक्तिः, यथा च समुदाये द्विरुक्तेऽवयवा अपि द्विरुक्ता भवन्ति--वृक्षः प्रचलन् सहावयवैः प्रचलतीति न्यायेन , न च तथेह समुदाये प्रवृत्तया संज्ञयाऽवयवानां तत्कार्यसिद्धिः । अतो नायं द्विर्वचनन्यायस्य विषयः । अतोऽविशेषेण द्वयोर्बहूनां चेति स्थितम् । यद्येवम्, इन्द्रमिच्छति इन्द्रीयति, ततः सन् इन्दिद्रीयिषतीत्यत्र द्वौ संयोगौ-नदौ, दरौ च; तत्र "न न्द्राः" इति प्रतिषेधो नकारवद्दकारस्यापि स्यात् । न वाज्विधेः, अजादेरिति वर्त्तते, तत्र कर्मधारयात् पञ्चमी, आदेरचः परे नदरा न द्विरुच्यन्त इत्यर्थः । ऊग्नि?रित्यादीनि रूपोदाहरणानि । %तिलान्त्स्त्र्यावपती%ति । "हे मपरे वा" इति वर्त्तमाने "ङः सि धुट्" इति च "नश्च" इति धुट् चर्त्वम् । तत्र यदा न धुट्, तदा नसतरयाः; यदा धुट् तदा नतसतरयाः । %तितउच्छत्रमि%ति । "तनोतेर्डउः सन्वच्च" इति डउप्रत्ययः, व्यस्तोच्चारणसामर्थ्याद् गुणाभावः, सन्वद्भावाद् द्विर्वचनमित्वं च, टिलोपः । %संयोगान्तलोपः स्यादि%ति । यद्यचोरप्यनन्तरयोः संयोगसंज्ञा स्यादिति भावः । ननु च "छे च" इति तुकि कृते तकारः पदान्तो न संयोगः, नैतदस्ति, "छे च" इत्ययं तुग् ह्रस्वमात्रभक्तो न तदन्तग्रहणेन गृह्यत इति पदं संयोगान्तमेव । पचतीति रूपप्रत्युदाहरणम् । पनसमिति कार्यप्रत्युदाहरणम् । %स्कोस्संयोगाद्योरिति लोपः स्यादि%ति । यदि सकारमकारयोः सान्तरयोरपि संयोगसंज्ञा स्यादिति भावः ।।
<मुखनासिकावचनोऽनुनासिकः ।। 1.1.8 ।।>
यद्यत्र "मुखं च नासिका च" इति द्वन्द्वः स्याद्, "द्वन्द्वश्च प्राणितूर्य" आदिसूत्रेणैकवद्भावः स्यात्, ततश्च "स नपुंसकम्" इति नपुंसकत्वे, "ह्रस्वो नपुंसके" इति ह्रस्वत्वे च 'मुखनासिकवचनः' इति प्राप्नोतीत्युत्तरपदलोपिनं तत्पुरुषं दर्शयति-%मुखसहिता नासिके%ति । %तयोच्चार्यत% इति । एतेन "कृत्यल्युटो बहुलम्" इति कर्मणि ल्युटं दर्शयति । "तया" इति करणे कर्त्तरि वा तृतीया; करणस्यैव कर्तृत्वेन विवक्षणात् । सूत्रेऽपि "मुखनासिकावचनः" इति "कर्तृकरणे कृता बहुलम्" इति तृतीयासमासः, षष्ठीसमासो वा । %अनुस्वारस्यैव हि स्यादि%ति । तस्मिन्नुच्चार्यमाणे नासिकाया एव व्यापारो न मुखस्य, तेन तस्यैव स्याद्, न तु ञमङणनानाम्, नाप्यभ्र आँ अप इत्यस्य; तदुच्चारणे मुखस्यापि व्यापारादित्येवकारेण दर्शयति । ननु यथा "प्रासादवासिन आनीयन्ताम्" इत्युक्ते ये प्रासाद एव निवसन्ति, ये च प्रासादे भूमौ च, ते द्वयेऽप्यानीयन्ते, प्रसादवासान्वय उभयेषामस्तीति, तथेहापि"नासिकावचनः" इत्युक्ते यः केवलनासिकावचनः, यश्च मुखनासिकावचनः-उभयोरपि ग्रहणं भविष्यति; नासिकान्वयस्य विवक्षितत्वात् । तत्किमुच्यतेऽनुस्वारस्यैव हि स्यादिति, अनुस्वारस्यापि हि स्यादिति तु वक्तव्यम् ? उच्यते; इह त्रीणि दर्शनानि-कृत्स्न एवानुनासिको मुखेन नासिकया चोच्चार्यते, पूर्वो भागो मुखेन परो नासिकया, विपरीतं वा । नासिक्यभागानुरागाच्चेतरोऽपि भागस्तद्वदेव भासते इति । तत्रोत्तरस्मिन्दर्शनद्वये नासिकान्वयस्य भागविषयत्वान्नासिकावचनग्रहणेनोभयवचनो न गृह्यते इति सुष्ठूक्तम्--%अनुस्वारस्यैव हि स्यादि%ति । %कचटतपानां मा भूदि%ति । ते हि मुखेनैवोच्चार्यन्ते इत्यसति नासिकाग्रहणे तेषामेव स्यात्, ततश्च तर्प्तुमिति "अनुदात्तोपदेश" इत्यनुनासिकलोपः स्यात्,"ओदनपक्" इति "अनुनासिकस्य क्विझलोः क्ङिति" इति दीर्घः स्यादिति महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थम्-"अनु पश्चान्मुखस्य नासिका व्याप्रियते यस्मिन्","नासिकाया वा पश्चान्मुखं व्याप्रियते यस्मिन्" इति । तेन भागविषयो नासिकाव्यापार इति सूचनात् प्रासादवासिन्यायस्यायमविषय इत्युक्तं भवति ।
<तुल्यास्यप्रयत्नं सवर्णम् ।। 1.1.9 ।।>
तुल्यशब्दोऽयं यद्यपि तुलया संमितं तुल्यमिति "नौवयोधर्म" इति यतमुत्पाद्य व्युत्पाद्यते, तथापि व्युत्पत्त्यर्थमेव तुलोपादीयते, रूढशब्दस्त्वयं प्रवीणः,

प्रतिलोमादिवदित्याह-%तुल्यशब्दः सदृशपर्याय% इति । ननु "नौवयोधर्म" इत्यत्र वक्ष्यति--"यथा तुला द्रव्यान्तरं परिच्छिनत्ति, तथा तुल्यामपि सादृश्येन परिच्छिनत्तीत्येतत्तुलया तुल्यस्य साधर्म्यम्" इति, सत्यम्; न ह्येवं लौकिकाः प्रतियन्ति । तथा हि -"तुल्य" इत्युक्ते "सदृश" इति प्रत्ययो भवति, न तु कश्चिदवयवार्थः प्रतीयते । %आस्ये भवमास्यमि%ति । लोकसिद्धं तावदास्यमोष्ठात्प्रभृति प्राक्काकलकाद्-अस्यन्ते क्षिप्यन्तेऽनेन वर्णा इति कृत्वा । काकलकं नाम ग्रीवाया उन्नतप्रदेशः । इह तु तस्मिन्नास्ये भवमास्यमित्यर्थः । "दिगादिभ्यो यत्" "शरीरावयवाच्च" इति यत्प्रत्ययः । किं पुनस्तदित्याह--%ताल्वादिस्थानमि%ति । यस्मिन्वर्णा निष्पद्यन्ते तत् स्थानम् । आदिश्ब्देन नासिकादीनां ग्रहणम् । नासिकापि न बाह्या वर्णोत्पत्तिनिमित्तम्, किं तर्हि ? अन्तरास्ये चर्मविततमस्ति, पणवचर्मवत्, तत्संबद्धा रेखा नासिका, तस्यां वायुनाऽभिहतायां वर्णोत्पत्तिः । यदि पुनर्लौकिकमास्यं गृह्येत, तदा तुल्यास्यप्रयत्नमिति द्वन्द्वगर्भो बहुव्रीहिः स्यात्-आस्यं च प्रयत्नश्च आस्यप्रयत्नौ, तौ तुल्यौ यस्येति; त्रिपदो वा बहुव्रीहिः - तुल्य आस्य प्रयत्नो यस्येति । तत्र द्वन्द्वगर्भे आस्यग्रहणं व्यर्थं स्यात्, सर्वेषां हि तत्तुल्यम् । विसर्जनीयस्यैकीयमतेनोरस्यत्वात् सावर्ण्याभावेऽपि न दोषः, त्रिपदे तु बहुव्रीहावास्येन प्रयत्नस्य विशेषितत्वादास्याद्वाह्याः प्रयत्ना हापिता भवन्ति, किन्तु ताल्वादिस्थानं तुल्यत्वेनाविशेषितं स्यात् । ततश्च भिन्नस्थानानामपि जबगडदानां सवर्णसंज्ञा प्राप्नोति । तत ऊर्ग्ज इति "झरो झरि" इति गकारस्य जकारे लोपः स्याद् । अतस्तद्धितान्तस्यैव ग्रहणम् । तत्रापि यदि द्वन्द्वगर्भो बहुव्रीहिः स्यात्, स्थानेन प्रयत्नो न विशेषितः स्यात्; ततश्च ककारङकारयोर्मिथः सवर्णसंज्ञा न स्यात्; बाह्यप्रयत्नस्य भिन्नत्वात् । ततश्च शङ्कितेति "अनुस्वारस्य ययि परसवर्णः" इति ङकारो न स्यात् । अथ सत्यपि बाह्यप्रयत्नभेदे आभ्यन्तरस्य प्रयत्नस्याभेदमाश्रित्य संज्ञा स्यात्, चकारशकारयोरपि सत्याभ्यन्तरभेदे बाह्याभेदमाश्रित्य सवर्णसंज्ञा प्राप्नोति । ततश्च अरुश्च्योततीति वक्ष्यमाणप्रत्युदाहरणं नोपपद्यते इतीमं दोषं दृष्ट्वा त्रिपदोऽयं बहुव्रीहिरिति दर्शयति--%तुल्य आस्ये प्रयत्नो यस्ये%ति । तद्धितान्त आस्यशब्दो न स्वाङ्गवाच्येवेति"अमूर्द्धमस्तकात्" इत्यलुङ्न भवति । नन्वस्मिन्नपि पक्षे भिन्नविभक्तिकत्वात् प्राधान्याच्चास्यं तुल्यत्वेनाविशेषितं स्याद्; नैवात्रास्यं तुल्यतया विशेष्यते, भेदनिबन्धना हि तुल्यता । न च कखगघङां भिन्नं स्थानम्, एकत्वात्कण्ठस्य, किन्तु तद्धितान्तस्यास्यशब्दस्याश्रयणसामर्थ्यादस्य इत्येकत्वं विवक्षितम् । तेनैकस्मिन्नेव ताल्वादिके स्थाने यः प्रयत्नः, स तुल्यो ययोरित्याश्रयणान्न कश्चिद्दोषः । %समानजातीयं प्रती%ति । एतच्च संज्ञाविधानसामर्थ्याल्लभ्यते, अन्यथा यत्किञ्चनवर्णापेक्षया तुल्यास्याप्रयत्नत्वेन सवर्णत्वे लब्धे तदाश्रयमन्यस्यापि कार्यं स्यात्, सवर्णसंज्ञाविधानमनर्थकं स्यात् । न च रेफोष्मनिवृत्त्यर्थं वचनम्; रेफस्यापि रेफः सवर्ण एव, एवमूष्मस्वपि द्रष्टव्यम् । संबन्धिशब्दत्वाद्वा सम्बन्धिशब्दो हि तुल्यास्यप्रयत्नशब्दः, ततश्च यथा तुल्याय कन्या दातव्येत्युक्ते दात्रा तुल्यायेति गम्यते, तथेहापि । अथ वा, महती संज्ञा क्रियते; अन्वर्था यथा विज्ञायेत-समानोऽस्य वर्णः सवर्ण इति । यदि च समानजातीयमेव प्रति सवर्णसंज्ञा भवति, एवं समानोऽस्य वर्णो भवति ।
%चत्वार% इत्यादि । द्विविधाः प्रयत्नाः-बाह्याः, आभ्यन्तराश्च । तत्राभ्यन्तराश्चत्वारो वृत्तौ दर्शिताः । आभ्यन्तरत्वं पुनरेषाम्-स्थानकरणव्यापारेण; उत्पत्तिकाल एव भावात् । स्थानं ताल्वादि, करणं जिह्वाया अग्रोपाग्रमध्यमूलानि । बाह्याः पुनरेकादश-विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितश्चेति । बाह्यत्वं पुनरेतेषाम्--वर्णनिष्पत्तिकालादूर्ध्वं वायुवशेनोत्पत्तेः । तत्र स्पृष्टकरणाः स्पर्शाः, कादयो मावसानाः स्पर्शाः । स्पृष्टं स्पृष्टतागुणः, करणं कृतिरुच्चारणप्रकारः, स्पृष्टतानुगतं करणं येषां ते तथोक्ताः । एवमन्यत्रापि - ईषत्स्पृष्टकरणा अन्तःस्थाः; यरलवा अन्तःस्थाः । विवृतकरणा ऊष्माणः स्वराश्च; शपसहा ऊष्माणः, स्वराः सर्व एवाचः । वर्गाणां प्रथमद्वितीयाः; शषसविसर्जनीयजिह्वामूलीयोपध्मानीयाः; यमौ च प्रथमद्वितीयौ; विवृतकण्ठाः, श्वासानुप्रदानाः अघोषाः; वर्गयमानां प्रथमेऽल्पप्राणाः, इतरे महाप्राणाः । वर्गाणां तृतीयचतुर्थाः, अन्तःस्थाः, हकारानुस्वारौ,यमौ तृतीयचतुर्थौ संवृतकण्ठा नादानुप्रदाना घोषवन्तश्च । वर्गयमानां तृतीया अन्तःस्था अल्पप्राणाः, इतरे महाप्राणाः । यथा तृतीयास्तथा पञ्चमाः, आनुनासिक्यमेषामधिको गुणः । तत्र यमा नाम वर्गेष्वादितश्चतुर्णां पञ्चमेषु परतः त एव नासिक्या भवन्ति । तद्यथा--पलिक्क्नीरिन्, चख्ख्नतुः, आग्ग्मन्नायः, जघ्घ्नतुः, अप्प्नस्वतीमित्यादि? । य एते द्विविधाः प्रयत्नाः, तेषामिह सवर्णसंज्ञायामाभ्यन्तराः स्पृष्टतादयश्चत्वार एवाश्रीयन्ते, न विवारादयो बाह्याः; आस्यग्रहणेन तेषां निवर्त्तितत्वात् । अ अ अ इत्यादि । अत्र सवर्णसंज्ञो भवतीति प्रकृतं बहुवचनान्तं विपरिणतमनुषज्यते, त्रयोऽकारा मिथः सवर्णसंज्ञा भवन्तीत्यर्थः । कथं त्रयोऽकाराः, यावता प्रत्युच्चारणं भेदेऽनन्ताः, अभेदे त्वेक एव ? तत्राह--%उदात्ते%ति । अनेन प्रकारेण त्रय इत्यर्थः । एवं च "त्रयः" इत्यस्य "त्रिविधा"इत्यर्थो भवति । तत्राकुहविसर्जनीयाः कण्ठ्याः, इचुयशास्तालव्याः, उपूपध्मानीया ओष्ठ्याः, ऋटुरषा मूर्द्धन्याः, लृतुलसा दन्त्याः, एऐ कण्ठ्यतालव्यौ, ओऔ कण्ठ्योष्ठ्यौ, वकारो दन्तोष्ठ्यः-इत्येवं तुल्यस्थानप्रयत्नाः सर्वेऽकारादयो मिथः सवर्णसंज्ञा भवन्तीति । %अन्तःस्था । द्विप्रभेदा% इति । अत्रापि पूर्ववदनुषङ्गः, अन्तःस्था इत्युक्तेऽपि रेफनिवृत्त्यर्थं स्वरूपेण पठति । %यवला %इति । %रेफोष्मणां सवर्णा न सन्ती%ति । विजातीयाभिप्रायमेतत् । सजातीयास्तु रेफोष्माणस्तुल्यस्थानप्रयत्नास्सवर्णा भवन्त्येव । तत्र रेफस्य तावद्यवला भिन्नस्थाना ऋटुरषा भिन्नप्रयत्ना अन्ये भिन्नस्थानप्रयत्नाः । एवमूष्मणामपि सवर्णाभावो वेदितव्यः ।
%वर्ग्य% इत्यादि । वर्गे भवो वर्ग्यः, दिगादित्वाद्यत् । %वर्ग्येण%--स्ववर्गान्तःपातिना । तद्यथा ककारः खकारेण । %तर्प्ते%ति । "तृप् प्रीणने" । %इचुयशानामि%ति । एषां मध्ये येषां प्रसङ्गः, तेषां मा भूदित्यर्थः । %अरुश् श्च्योतती%ति ।
"श्च्युतिर् क्षरणे" । अरुःशब्दस्य रुत्वविसर्जनीययोः "वा शरि" इति सकारः, तस्यापि श्चुत्वे शकारः ।
%ऋकारलृकारयोरि%ति । स्थानभेदान्न प्राप्नोतीत्यारम्भः । श्रुतत्वाच्चानयोरेवमिथः सवर्णसंज्ञा विधीयते, न त्वेतयोरन्येन सह । %होतृकार% इति । कथं पुनरत्र समुदायिनोऽन्तरतमो भवति न समुदायस्य, तत्रापि ऋकारस्यैव न लृकारस्येत्यत आह-%उभयोरि%त्यादि । उभयोरन्तरतमो दीर्घो न सम्भवति, लृकारस्यापि दीर्घो न सम्भवतीत्यत ऋकार एव भवत्युभयोरित्यर्थः । ननु च नैतत्सवर्णसंज्ञायाः प्रयोजनम्, कथम् ? "अकः सवर्णे" इत्यत्र तु वक्ष्यति

"ऋति ऋ वा वचनम्, लृति लृ वा वचनम्" इति । तत्र चायमर्थः-अकां सवर्णे ऋति परतो वा ऋ भवति; द्विमात्रोऽयम्, मध्ये द्वौ रेफौ तयोरेका मात्रा,अभितोऽज्भक्तेरपरा, ईषत्स्पृष्टश्चायम् । तत्र प्रयत्नभेदादृकारेणाग्रहणाद् अनण्त्वाद्दीर्घसंज्ञाया अभावादप्राप्तोऽयं विधीयते । लृति लृ वा वचनमित्ययमपि द्विमात्र ईषत्स्पृष्टश्च, मध्ये द्वौ लकारौ, तयोरेका मात्राऽभितोऽज्भक्तेरपरा । पूर्ववदप्राप्तौ विधीयते । तत्र ऋति ऋ वा वचनमित्यत्र वाशब्दो दीर्घस्य समुच्चयार्थः, तेनाप्राप्त एव दीर्घो भविष्यति । ननु यद्यविधायैव सवर्णसंज्ञां तदुच्यते, ततोऽक इति सम्बन्धादङ्मात्रस्य लृति तत्कार्य स्याद् दध्य्लृकारो मध्व्लृकार इति, संज्ञाविधाने तु ऋकार ऋकारस्यैव सवर्ण इति तत्रैव व्यवस्थितं भवति । तस्मादविधेया सवर्णसंज्ञा ? न विधेया, यदेतद् ऋतीति "एतदृत इति वक्तव्यम्, सवर्ण इत्येव, ऋकारस्य ऋकार एव सवर्णः" इति ऋत्येव भविष्यति । तत लृति, ऋत इत्येव । इदं चासवर्णार्थम्, तेन लृति रूपद्वयं सिद्धम्-होतृकारः, होत्लृकार इति । तन्न वक्तव्यं भवति । कथम् ? ऋ वा वचनम्, लृ वा वचनमिति ब्रुवतापि तयोरच्त्वं वक्तव्यम्; अन्यथा विधानमात्रमनयोः स्याद्, न त्वच्कार्यः प्लुतः । सति त्वच्त्वे ताभ्यां त्रिमात्रयोरपि सावर्ण्याद् ग्रहणे सति प्लुतसंज्ञा भवतीति प्लुतसिद्धिः । एवं च होतृ ऋकार इति ऋकारयो रेफद्वययुक्तत्वाद्विवृतत्वाच्च कदाचिद्रेफद्वययुक्त ऋ भविष्यति, कदाचिद्विवृतः शुद्धो दीर्घः । लृकारेऽपि कदाचिदृकारान्तरतम ऋकारः, कदाचिद् लृकारान्तरतम लृकार इति, सत्यम्; सवर्णसंज्ञायां तन्न वक्तव्यं भवति, तद्वोच्येत, इदं वा, को न्वत्र विशेषः । इदं वाऽवश्यं वक्तव्यम्, इदमपि सिद्धं भवति "ऋत्यकः" - खट्वालृकारः, मातृलृकारः । "वा सुप्यापिशलेः"-उपलृकारीयति, उपाल्कारीयतीति । ऋदिताम्लृदितां च धातूनां पृथगुपदेशसामर्थ्यादनुबन्धकार्याणामसङ्करः ।।

<नाज्झलौ ।। 1.1.10 ।।>

अत्राज्झलौ न केनापि सवर्णसंज्ञौ भवत इति तावदर्थो न भवति; संज्ञाया निर्विषयत्वात् । एतावन्तो वर्णा अचश्च हलश्च । नाप्यचामज्भिर्हलां हल्भिः सवर्णत्वनिषेधः; अत एव निर्देशात् । अन्यथाऽकारस्याकारे दीर्घो न स्यान्नाजिति, नाप्यज्झलाविति पूर्वसवर्णः । तस्मादचां हलां च मिथः सवर्णसंज्ञा निषिध्यते । तत्र च यद्यपि "नाज्झलौ" इति सामान्येनोक्तम्, तथाप्यकारहकारयोरिकारशकारयोश्च प्राप्तिरिति तत्रैव निषेधः । यद्येवम्, नाण्शलाविति वक्तव्यम् ? न तावदेवं लाघवे विशेषः । किं च प्रागुक्तं पक्षद्वयं सम्भाव्येत । %अच्च हल् चे%ति । अनेन नात्राज्झलोर्निर्देश इति दर्शयति । तत्रापि न दोषः कश्चित्, किन्तु पक्षान्तरसम्भावनैव । तुल्यास्यप्रयत्नाविति प्रसङ्गे हेतुमाह । सवर्णदीर्घत्वं न भवतीति प्रतिषेधस्य फलं दर्शयति । ननु दीर्घविधावचीत्यनुवर्तते, तच्चावश्यमनुवर्त्यम्, कुमारी शेते इत्यत्र मा भूदिति, न ह्यात्रानेन निषेधः सिद्ध्यति । किं कारणम् ? वाक्यापरिसमाप्तेः । इह हि वर्णानामुपदेशः पूर्वम्, तत इत्संज्ञा, ततः "आदिरन्त्येन सहेता" इति प्रत्याहारः, ततः "नाज्झलौ" इत्यस्य निष्पत्तिः, तस्मिंश्च निष्पन्ने सत्यपवादविषयपरिहारेणेष्टविषये सवर्णसंज्ञा प्रवर्त्तते, न त्वेतत्सूत्रनिष्पत्तिसमये । ततश्च "अणुदित्सवर्णस्य च" इत्येतत् स्वाङ्गभूतेषु उपदेशेत्संज्ञाप्रत्याहारसवर्णत्वेषु निष्पन्नेषु "अस्य च्वौ" इत्यादिषु वर्त्तते, न त्वङ्गेषूपदेशादिष्विति "नाज्झलौ" इत्यगृहीतसवर्णानामचां ग्रहणमिति सिद्धम् । अवश्यं चागृहीतसवर्णानामेवाचां ग्रहणमेष्टव्यम्, अन्यथा ह्यजिति गृह्यमाण इकारः शकारस्य? ग्राहकः स्यात् । न चास्मिन्नपि सूत्रेऽयमेव निषेधः, स्वात्मनि क्रियाविरोधात् । अतोऽज्ग्रहणेनापि शकारस्य ग्रहणम्, हल्षु चोपदेशाद्धल्ग्रहणेनापीति शकारद्वयस्य मिथः सवर्णसंज्ञा न स्यात् । ततश्च "परःशतानि कार्याणि" इत्यत्र शतात्पराणि, शतादधिकानीति विगृह्य "कर्तृकरणे कृता बहुलम्" इति बहुलवचनात्समासे पारस्करादित्वात्सुटि कृते "अनचि च" इति शकारस्य द्विर्वचने परश्श्शतानीति स्थिते मध्यमस्य शकारस्य
"झरो झरि सवर्णे" इति लोपो न स्यादिति सर्वदा शकारत्रयश्रवणप्रसङ्गः । अतोऽगृहीतसवर्णानामचां ग्रहणादीकारशकारयोरप्रतिषिद्धं सवर्णत्वमिति "कुमारी शेते" इत्यत्र मा भूदिति दीर्घविधौ "अचि " इत्यनुवर्त्यं तदनुवृत्तिसामर्थ्याच्चाजेव योऽज् न कथञ्चन हल्, तत्रैव दीर्घत्वविज्ञानाद्धकारशकारयोरकारेकाराभ्यां सावर्ण्येन ग्रहणादच्त्वे सत्यपि हल्त्वस्यापि भावाद्दीर्घाभावः सिद्धः, सत्यम्; अज्ग्रहणमप्यन्यार्थमनुवर्त्यम्, इदमपि वैपाशो मत्स्यः, आनडुहं चर्म्मेत्यत्र यस्येति लोपाभावार्थं कर्तव्यं दण्डहस्तो दधिशीतमित्येतदुभयथापि सिद्ध्यतीति प्रदर्शनार्थमुदाहरणद्वयमुपन्यस्तम् । %वैपाशा %इति -भवार्थेऽण् । %आनडुहमि%ति-विकारे "प्राणिरजतादिभ्योऽञ्" ।।

<ईदूदेद् द्विवचनं प्रगृह्यम् ।। 1.1.11 ।।>

अत्र चत्वारः पक्षाः सम्भवन्ति-ईदादि विशेष्यम्, द्विवचनं विशेषणम्, तत्र द्विवचनान्तत्वमीदादेर्न सम्भवतीति द्विवचनसंज्ञकमीदादि प्रगृह्यमिति प्रथमः पक्षः । ईदादि विशेषणम्, द्विवचनं विशेष्यम्, विशेषणेन तदन्तविधावीदाद्यन्तं द्विवचनमिति द्वितीयः पक्षः । प्रत्ययग्रहणपरिभाषया तदन्तविधौ सति पश्चाद् द्विवचनान्तस्येदादिभिर्विशेषणादीदाद्यन्तं द्विवचनान्तमिति तृतीयः । ईदादिविशिष्टेन द्विवचनेन तदन्तविधावीदाद्यन्तं यद् द्विवचनम्, तदन्तं प्रगृह्यमिति चतुर्थः । तत्राद्ये पक्षे-अग्नी, वायू, खट्वे इत्यादावेव स्यात्; एकादेशस्य परं प्रत्यादिवद्भावेन द्विवचनमीदादीति, पचेते पचेथे पचावहे इत्यादावेकारमात्रस्याद्विवचनत्वान्न स्यात् । तृतीये तु-कुमार्योरगारं कुमार्यगारम्, वध्वोरगारं वध्वगारम्; इत्यत्रापि स्यात्-एतद्धि प्रत्ययलक्षणेन द्विवचनान्तमीदाद्यन्तं च श्रूयते । यथा हि "तावकीनः" इत्यादावादेशेन संख्याविशेषो व्यज्यते, तथेहापि सत्यां प्रगृह्यसंज्ञायां प्रकृतिभावेन द्वित्वमभिव्यज्येतेति स्याद् द्विवचनान्तस्यापि समासः । चतुर्थे कुमार्यगारमित्यादावप्रसङ्गः; द्विवचनस्यानीदाद्यन्तत्वात्, किन्त्वशुक्ले शुक्ले समपद्येतां शुक्ल्यास्तां वस्त्रे-अत्रापि प्राप्नोति, कथम् ? शुक्लशब्दाद्वस्त्रवृत्तेर्द्विवचनमौ, "नपुंसकाच्च" इति शीभावः, ततश्च्विः, शीशब्दस्य "सुपो धातु" इति लुक्, "अस्य च्वौ" तद्धितान्तत्वात्सुः, अव्ययत्वाल्लुक्; अत्र शीशब्द ईकारान्तं द्विवचनम्, तदन्तश्च समुदायः प्रत्ययलक्षणेनेति प्रगृह्यसंज्ञा प्राप्नोति । अयं च तृतीयेऽपि पक्षे समानो दोषः । किं च-संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधात् तदन्तपक्षोत्थानमेव नास्ति, अतो द्वितीयं पक्षमाश्रित्याह-%ईद् ऊद् एद्

इत्येवमन्तं द्विवचनमि%ति । नन्वस्मिन्नपि पक्षे ईदूतोः केवलयोरेव संभव इत्यग्नी इत्यादिकं यद्यपि सिध्यति, तथाप्येकारान्तस्य तु द्विवचनस्य "पचेते" इत्यादौ सम्भवात्तत्रैव स्यात्, न खट्वे इत्यादौ; व्यपदेशिवद्भावेनात्रापि भविष्यति । किं पुनरत्र प्रमाणमयमेव पक्ष आश्रीयत इति ? तृतीयचतुर्थयोस्तावदसम्भव एव; संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधात् । संज्ञायाश्च संज्ञ्यपेक्षायामनन्तरश्रुतं द्विवचनमेव संज्ञीत्युक्तमिति प्रथमस्याप्यसम्भवः । अत्र चतुर्थः पक्षोऽसम्भवादेव निरस्तः; न दोषवत्त्वात् । शुक्ल्यास्तां वस्त्र इत्यत्र हि "अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्वाधते" इति अन्तरङ्गमपि शीभावं बाधित्वा "सुपो धातु" इति लुकि कृतेऽनीकारान्तं द्विवचनं भवति । अग्नी इत्यादौ प्रगृह्यत्वात् "प्लुतः प्रगृह्या अचि" इति प्रकृतिभावः । प्रत्युदाहरणेषु तदभावात् स्वरसन्धिः । तपरकरणं गुणान्तरभिन्नानां तत्कालानां ग्रहणार्थमिति चेत्, न; अभेदकत्वाद् गुणानाम् । भिन्नकालानां निवृत्त्यर्थमिति चेत्, न; ईदूतोरनण्त्वात् । स्यादेतत्-जातिपक्षे यद्यपि दीर्घोच्चारणसामर्थ्यात् प्रयत्नाधिक्यात् अकुर्वह्यत्रेत्यादौ ह्रस्वानां न स्यात्, प्लुतानां तु स्यादेव । एकारस्य त्वण्त्वादपि प्लुतस्य प्रसङ्गः, अतः प्लुतनिवृत्त्यर्थं तपरकरणमिति, तन्न; इष्टत्वात् ।

किमर्थं पुनः प्लुतानां प्रगृह्यसंज्ञेष्यते ? प्रगृह्याः प्रकृत्येति प्रकृतिभावो यथा स्यात् । मा भूदेवम्, प्लुतः प्रकृत्येत्येव भविष्यति । यत्र तर्हि प्लुताश्रयः प्रकृतिभावः प्रतिषिध्यते-"अप्लुतवदुपस्थिते" इति, तत्र प्रगृह्याश्रयः प्रकृतिभावो यथा स्याद् अग्नी3 इतीति । इह च अग्नी3 अप्रगृह्यस्येत्यनुनासिकपर्युदासो यथा स्यात् । अतः प्लुतानामपि प्रगृह्यसंज्ञाया इष्टत्वान्न तन्निवृत्त्यर्थमपि तपरकरणमित्यत आह-%तपरकरणमसन्देहार्थमि%ति । असति हि तस्मिन् समाहारद्वन्द्वे नपुंसकह्रस्वत्वे च कृते ग्वीति निर्देशे सन्देहः स्यात् । इतरेतरयोगाद्वन्द्वेऽपि सन्देह एव । तस्मादसन्देहार्थं तपरकरणम् । यद्यसन्देहार्थमपि तपरत्वं क्रियते, तदेव प्लुतस्येष्टां संज्ञां व्यावर्तयति,तत् प्लुतस्य कथं संज्ञा ? मा भूत् प्लुतस्य, तस्य त्वसिद्धत्वात् स्थानिनि प्रवृत्ता संज्ञा स्वारसन्धिमनुनासिकं च प्रतिभन्त्स्यति, सिद्धः प्लुतः स्वरसन्धिषु,प्लुतः प्रकृत्येति लिङ्गात् । अन्यथा कार्यिणोऽसत्त्वात्कस्य प्रकृतिभावो विधीयते ! यस्य च विकारप्रसङ्गः, प्लुतप्रकरणे तस्य प्रकृतिभावो विधेयः, प्लुतस्यासिद्धत्वेन तस्य विकाराप्रसङ्ग इति प्लुतस्यासतः प्रकृतिभावविधानमनुपपन्नम् । अस्तु, स्वरसन्धिप्रकरणे प्लुतः सिद्धः, संज्ञाविधावसिद्धः । संज्ञाविधौ च सिद्धः, कथम् ? कार्यकालं संज्ञापरिभाषम्, ततश्च प्रगृह्याः प्रकृत्येत्यत्रास्योपस्थानात् संज्ञापि स्वरसन्धिप्रकरणान्तर्गता । एवं तर्हि सिद्धः प्लुतः स्वरसन्धिष्विति नाश्रीयते, प्लुतभावी प्रकृत्येति स्थानिन एव प्रकृतिभावो विधास्यते ? एवमप्यनुनासिकपर्युदासो न सिध्यति, कार्यकालपक्षे संज्ञायामपि प्लुतस्य सिद्धत्वात् । एवं तर्हि "यथोद्देशं संज्ञापरिभाषम्" ततश्चास्मिन् प्रदेशे संज्ञायां क्रियमाणायां प्लुतस्यासिद्धत्वात् स्थानिनि प्रवृत्ता संज्ञा स्वरसन्धिमनुनासिकं च प्रतिभन्त्स्यति । ननु यद्यपि संज्ञायामसिद्धः प्लुतः, अनुनासिकपर्युदासे तु सिद्धः, ततश्च यस्यानेन संज्ञा कृता द्विमात्रस्य, न सोऽनुनासिकविधिं प्रति स्थानी, किन्तु त्रिमात्र एव । न च स्थानिवद्भावात्तस्यापि प्रगृह्यत्वम्, अल्विधित्वात् । अवश्यं च "सिद्धः प्लुतः स्वरसन्धिषु" इत्याश्रयणीयम्, दण्ड-आ3ढकमिति प्लुतस्य सवर्णदीर्घेण निवृत्तिर्यथा स्यात् । तथा च "अङउण्" इत्यत्र सर्वैरेव ग्रन्थकारैरुक्तम् । तथा सुश्लोका3 इति सुश्लोकेति--अत्रापि "अप्लुतवदुपस्थिते" इति प्लुताश्रये प्रकृतिभावे प्रतिषिद्धे गुणो भवन् प्लुतमेव निवर्त्तयति, न तु स्थानिनम्; अन्यथा ह्यादेशरूपे प्लुतः श्रूयेत । तदिह यथोद्देशेऽपि संज्ञापरिभाषे, कथमिवेष्टसिद्धिः ? कथं वा ग्रन्थेषु पूर्वापरविरोधपरिहारः ? इति विपश्चितः प्रष्टव्याः ।

%मणीवादीनामि%ति ।"सिद्धये" इति शेषः । न पुनर्मणीवादीनामपरः प्रतिषेधो विधेयः । न चेदं वचनम्, भाष्यवार्त्तिककाराभ्यामपठितत्वात्; किन्तु मणीवादीनां निर्वाहः कर्त्तव्य इत्यर्थः । तत्र "मणीवोष्ट्रस्य लम्बेते" इत्यत्र वाशब्दस्योपमानार्थस्य प्रयोगः । रोथसीवेत्यादौ थछान्दसत्वादिति निर्वाहः ।।

<अदसो मात् ।। 1.1.12 ।।>

"स्वरितेनाधिकारः" इत्यत्र द्वौ पक्षौ-अर्थाधिकारः, शब्दाधिकारश्चेति । तत्रार्थाधिकारो नाम-यस्य यस्मिन्सूत्रे स्वरितत्वं प्रतिज्ञातं तत्र तस्य योऽर्थः स उत्तरत्राधिक्रियत इति । शब्दाधिकारस्तु स एव शब्दोऽविवक्षितार्थोऽधिकृतस्तत्तत्सूत्रानुगुणमर्थं प्रतिपादयतीति । तत्रार्थाधिकारे पूर्वत्रेदादिभिस्तदन्तं प्रत्यायितम्, इहानुवृत्तम् "मात्" इत्यनेन विशेष्येतेति "अमुकेऽत्र" इत्यत्रापि प्रसङ्गः, शब्दाधिकारे त्विदादिमात्रस्येहानुवृत्तस्यापि विशेष्याभावादसति तदन्तविधौ "मात्" इत्यनेन विशेषणाददोष इति तमाश्रित्याह-%तस्मात्परे ईदूदेदन्ता% इति । %प्रगृह्यसं ज्ञा% इति । प्रगृह्यशब्दः संज्ञा येषां ते तथोक्ताः । यद्यपि पूर्वसूत्र एव प्रगृह्यशब्दः संज्ञात्वेन विनियुक्तः, तथापीह संज्ञिनो न प्रत्याययति; स्वरूपपदार्थकस्यैव तस्येहानुवृत्तेः । किमर्थमिदमुच्यते, यावता स्त्रीनपुंसकयोर्द्विवचने मुत्वस्यासिद्धत्वेऽप्येकारान्तत्वात् पूर्वेणैव सिद्धा संज्ञा; स्वरसन्धिप्रकरणे च मुत्वस्यासिद्धत्वादेकारस्यैव विकारप्रसङ्गे प्रकृतिभावोऽपि सिद्धः,अनुनासिकपर्युदासश्च कार्यकालपक्षे लिङ्गत्रयेऽपि द्विवचने सिद्धः ? "अणोऽप्रगृह्यस्य" इत्यत्रोपस्थितेन पूर्वसूत्रेण संज्ञायां क्रियमाणायां मुत्वस्य सिद्धत्वात् । अतोऽनुनासिकपर्य्युदासेऽद्विवचनार्थोऽयमारम्भः, प्रकृतिभावे तु पुंसि द्विवचनार्थश्च । नन्वारब्धेऽप्यस्मिन्यथोद्देशपक्षे संज्ञायां कर्त्तव्यायां मुत्वमीत्वयोराश्रयात्सिद्धत्वेऽपि स्वरसन्धिप्रकरणे तयोरसिद्धत्वादयावेकादेशप्रसङ्गः, अमी आसते इत्ययादेशः, अमू आसाते इति पुंस्यावादेशः, अमी अत्र इति "एङः पदान्तादति" इत्येकादेशः । न च संज्ञाया वैयर्थ्यम्; अनुनासिकपर्युदासेनार्थवत्त्वात् । तत्र हि कर्त्तव्ये मुत्वमीत्वयोरसिद्धत्वाभावाद्ययोरनेन संज्ञा कृता तावेव ?न, न तं प्रति । कार्यकालपक्षे तु संज्ञायामपि कर्त्तव्यायामाश्रयात् सिद्धत्वं नाश्रयणीयम्;"अणोऽप्रगृह्यस्य" इत्यत्रोपस्थितेऽस्मिन् कर्तव्ये मुत्वमीत्वयोः सिद्धत्वात्, तावता चास्य चरितार्थत्वात् । तदेवमुभयोरपि पक्षयोः स्वरसन्धिः स्यादेव ? उच्यते; यद्यनुनासिकपर्युदास एव प्रयोजनमभविष्यद् "अणोऽप्रगृह्यस्यानुनासिकोऽदसो न " इत्येवावक्ष्यत् । अमुके, अमुयेत्यादावनण्त्वादनवसानत्वाच्चाप्रसङ्गः । अतः संज्ञारम्भसामर्थ्यात् प्रकृतिभावार्थत्वमप्यस्य विज्ञायते, तच्च स्वरसन्धिप्रकरणे मुत्वमीत्वयोः सिद्धत्वमन्तरेणानुपपन्नमित्युभयोरपि पक्षयोः सामर्थ्यादसिद्धत्वबाधः ।

%मादिति किमि%ति । "अदस" इति षष्ठी, अमी अमू इत्यत्र च मूत्वमीत्वयोः स्थानिनावेकादेशावन्तवद्भावाददस्-शब्दग्रहणेन गृह्येते इति तदादेशयोरपि

तद्ग्रहणेन ग्रहणादस्ति तावदिष्टसिद्धिः । एदिति च निवर्तिष्यते, न च मात्परावीदूतौ सम्भवत इत्यतिप्रसङ्गोऽपि नास्तीति प्रश्नः । %अमुकेऽत्रेति% । एकयोगनिर्दिष्टानामेकदेशानुवृत्तिर्दुर्ज्ञानेति भावः । न च मादित्यस्मिन् सत्यपि एद्ग्रहणसामर्थ्यादत्र प्रसङ्गः; मादित्यस्य वैयर्थ्यप्रसङ्गात् । न च विकल्पः; अतुल्यबलत्वात् । तद्धि पूर्वत्र चरितार्थम्, मादिति त्वकृतार्थम् । न चानुवृत्तिसामर्थ्यम्; अन्यानुरोधेनाप्यनुवृत्तिसम्भवात् ।।

<शे ।। 1.1.13 ।।>

"शे" इति श्रुतेरविशेषात् "काशे","कुशे" इत्यत्रापि प्रसङ्ग इति मत्वा पृच्छति--किमिदमिति । सुपामादेश इति । काशे तइत्यत्र तु लाक्षणिकत्वादग्रहणमिति भावः । युष्म इति । षष्ठीबहुवचनस्य "सुपां सुलुक्" इत्यादिना शे आदेशः,"शेषे लोपः" । अस्मे इति । चतुर्थीबहुवचनस्य शे । त्वे मे इति । सप्तम्येकवचनस्य त्वमावेकवचने । असमे इन्द्राबृहस्पती इति । छान्दसमुदाहरणमित्युक्त्वा, इतरत्तु लोकिकमनुकरणमित्युक्तेन युष्मे वाजबन्धवः, त्वे रायः, मे राय इत्येषामप्यनुकरणत्वमुक्तं स्याद् । अतो यदत्रेतरदिति विवक्षितं तत्स्वरूपेण पठति । युष्मे इतीत्यादि । लौकिकमनुकरणमित्यनेन च सूत्रस्यावश्यारभ्यात्वं दर्शयति । "अस्मे इन्द्राबृहस्पती" इत्यादि छान्दसत्वादपि सिद्ध्येत् । इदं तु पदकारैरिति परं प्रयुज्यमानं लौकिकम्, अतो न छान्दसत्वात्सिद्धिरिति ।।

निपात एकाजनाङ् ।। 1.1.14 ।।

" व्याहरति मृगः", "व्यवहृपणोः समर्थयोः" इति निर्देशादेकाजिति कर्मधारयः, न बहुव्रीहिरित्याह-एकश्चासाविति । यद्येवम्, तएकग्रहणमनर्थकम्, निपातोऽजित्येवास्तु, तत्र निपातेनाज् विशिष्यते । निपातसंज्ञकोऽजिति विपर्ययस्तु न भवति; "अजन्तो निपातः" इति व्यावर्त्याभावाद् हलन्तानां सत्यसति वा प्रगृह्यत्वे विशेषाभावात् । ननु पुरोस्तीति हलन्तस्य प्रकृतिभावाद्रो रुत्वं न स्यात्,नैतदस्ति; प्रगृह्यसंज्ञायां रुत्वस्यासिद्धत्वात्, सकारस्य च कार्यान्तराप्रसङ्गात् । ननु चेदमस्ति प्रयोजनमचा निपातस्य विशेषणे किम् ? अजन्तस्य यथा स्याद्, अज्मात्रस्य मा भूत् इति । एवं सत्यनाङित्यानर्थकं स्यात्, अतो निपातेनाज् विशेष्यते, नार्थ एकग्रहणेन, न; अच्समुदायनिवृत्त्यर्थं तर्ह्येकग्रहणम् अइउ अपेहीति समुदायस्यैव स्याद्, नावयवानाम्; एकाज्द्विर्वचनवदजन्तस्यैव प्रकृतिभावः स्यात्, पूर्वयोस्तु स्वरसन्धिः स्यात् । ननु च निपातोऽजिति चैकत्वस्य विवक्षितत्वात् समुदायस्य न भविष्यति, एवं तर्ह्यच्समुदायग्रहणशङ्कानिरासार्थमेकग्रहणं कुर्वन् ज्ञापयति-"वर्णानिर्द्देशेषु व्यक्तिसंख्या न विवक्ष्यते, जातिरेव निर्द्दिश्यते" इति । तेन दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धमित्युपपन्नं भवति ।

निपात इति किमिति । निपातस्यैवैकाचोऽर्थवत्त्वसम्भव इति प्रश्नः । चकारारात्रेति--कृञो लिटि तिपो णल् । अन्वयव्यतिरेकाभ्यां प्रत्ययस्याप्यर्थवत्त्वमिति भावः । आकारोऽत्र ङिद्विशिष्ट उपात्तः, प्रयोगे च न क्वचिन् ङकारः श्रूयते । अतोऽर्थवशेन ङित्त्वाङित्त्वे व्यवस्थापयति ।

ईषदर्थ इत्यादि । ईषदर्थे-आ + उष्णाः = ओष्णः । आङीषदर्थ इति चोक्तम् । क्रियायोगे - आ + इतः = एतः । प्रादिषु पठितः । मर्यादाभिविधौ चेति । समाहारद्वन्द्व आगमस्यानित्यत्वान्नुमभावः । मर्यादासहितो वाऽभिविधिः । मर्यादायाम्- आ + उदकान्ताद् = ओदकान्तात् । अभिविधौ - आ + अहिच्छत्राद् =आहिच्छत्रात् । आह च --"विना तेन मर्यादा, सह तेन इत्यभिविधिः" । "आङ्मर्यादाभिविध्योः" इति च ङिन्निर्द्दिष्टः पूर्वप्रक्रान्तस्य वाक्यस्यान्यथात्वद्योतनाय आकारः प्रयुज्यते-आ एवं नु मन्यसे, नैवं पूर्वममंस्थाः, संप्रति त्वेवं मन्यसे इति । तथा स्मृतेः सूचकः आकारः प्रयुज्यते, ततः स्मृतोऽर्थो निर्दिश्यते-आ एवं किल तदिति ।।

ओत् ।। 1.1.15 ।।

ननु चाहोप्रभृतयो निपातसमाहाराः, अह + उ = अहो, उत+आहो=उताहो, अथ+उ=अथो, या + उ =यो, न + उ = नो, मा + उ = मो, च + उ =चो; यद्यप्यर्थभेदो न प्रतीयते, तथाप्यनर्थकानामपि निपातानां दर्शनात् समाहारत्वं नानुपपन्नम्, ततश्चादिवद्भावात् पूर्वेणैव सिद्धा प्रगृह्यसंज्ञा, यथा--"एषो उषा अपूर्व्या" इति । एषा + उ = एषो इत्याशङ्क्य, एकनिपाता इति दर्शयति--ओदन्तो यो निपात इति । चादिषु तथा पाठादिति भावः । समाहारपक्षे च आहो इतीत्यादौ "उञः" "ऊँ" इत्ययं विधिः प्राप्नोति । अथापि समाहार, एवमपि सूत्रं कर्त्तव्यम् "ओ चित्सखायम्" "ओ षुं वर्तमरुतः" इत्याद्यर्थम् । आ + उ = ओ इत्यत्रान्तवद्भावादनाङिति प्रतिषेधः प्राप्नोति, अत्रापि पर्युदासे सिद्धम्; आङनाङोरेकादेश आदिवद्भावादनाङ्ग्रहणेन गृह्यत इति । इहानदोऽदोऽभवदिति ? च्व्यन्तत्वान्निपातत्वेऽडपि प्रतिपदोक्तस्यौकारस्य ग्रहणान्न भवति । एवमप्यगौर्गौः समपद्यत गोभवदित्यत्र प्राप्नोति; गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययान्न भविष्यति । अत्र हि जड्याद्यिधर्मेणारोपितगोत्वे वाहीके गोशब्दो वर्त्तते इति गौणार्थत्वमस्य । कथं तर्हि गौर्वाहीकस्तिष्ठति, गां वाहीकमानयेति वृद्ध्यात्वे भवतोः ? उच्यते; स्वार्थे प्रवृत्तात्प्रातिपदिकाद्विभक्तावुत्पन्नायां कार्येषु कृतेषु शब्दान्तरसन्निधानादत्र गौणत्वं प्रतीयते । कारकाणामपि हि क्रियया सम्बन्धः, न परस्परेण; गामानय, वाहीकमानय, गौस्तिष्ठति, वाहीकस्तिष्ठतीति । पश्चात्तु वाक्योपन्यासात् सामानाधिकरण्याद्गौणार्थे प्रादुर्भावो भवति । इह तु गौणार्थप्रादुर्भावादुत्तरकालं च्व्यन्तत्वे सति प्रगृह्यसंज्ञाप्राप्तिरिति विशेषः । अतः पदकार्येष्वेवायं न्यायः, न प्रातिपदिककार्येष्विति सिद्धम् ।

संबुद्धौ शाकल्यस्येतावनार्षे ।। 1.1.16 ।।

"संबुद्धौ" इत्यनेनाऽनूद्यमान ओकारो विशेष्यते, अतः क्ङितीतिवन्निमित्तसप्तमीयमित्याह--संबुद्धिनिमित्त इति । परसप्तम्यां तु त्रपो इतीत्यादौ नपुंसके न स्यादिति भावः । अवैदिक इति । अनाष इत्यस्यार्थमाह, ऋषिर्वेदः तदुक्तमृषिणेत्यादौ दर्शनात् । ननु च गवित्ययमाहेत्यत्रानुकार्येणार्थवत्त्वात्प्रातिपदिकत्वे सति विभक्त्या भाव्यमित्यत तआह --अत्रेत्यादि । अत एव हि विभक्त्यभावादपदान्तत्वाच्छाकल्यस्यापि प्रत्युदाहरणे "लोपः शाकल्यस्य" इति लोपो न

भवति ।

भेदस्याविवक्षितत्वादिति । भेदनिबन्धनो हि प्रतिपाद्यप्रतिपादकभावः, स तस्मिन्नविवक्षिते न भवति । असत्यर्थवत्त्व इति । यद्यनर्थकः; कथं तर्हि प्रयुज्यते ? प्रयोजनवत्त्वात्, प्रयोजनमनुकार्यप्रतीतिः । यद्यप्यभिधानव्यापारो नास्ति, तथापि तदानीमुच्चारितं रूपं सादृश्यादनुकार्यप्रतिपत्तिपरम्, भेदश्च सन्नेव न विवक्षित इति अनुकार्यस्यापशब्दत्वेऽपि नास्यापश्बदत्वम् । शाकल्यग्रहणं विभाषार्थमिति । तत्र बह्वृ चाः प्रगृह्यमेवाधीयते, तैत्तिरीयास्त्वप्रगृह्यम् ।

उञः ।। 1.117 ।।

यद्ययमेको योगः स्याद् "उञ ऊँ" इति यथापठितं सूत्रकारेण, ततः "उञः" इत्यस्य श्रुतेनादेशेन सम्बन्धः स्याद्, न प्रगृह्यसंज्ञया; सा तु "निपात एकाजनाङ" इति नित्यैव स्यात्, शाकल्यश्रुत्यनुवृत्त्या चादेशे विकल्पिते रूपद्वयमेव स्याद्- उ इति, ऊँ इतीति; न तु वितीति तृतीय । अतो विभज्य व्याचष्टे । तत्र यद्यपि पूर्वसूत्रेषु सामानाधिकरण्येन निर्देशात्प्रदेशेष्विव प्रगृह्यशब्दो द्विवचनाद्यभिधेयः, तथापीह षष्ठीनिर्देषात्स्वरूपपदार्थकः सम्पद्यते । अत एवाह--उञः प्रगृह्यसंज्ञा भवतीति । प्रगृह्यमित्येषा संज्ञा भवतीत्यर्थः । पुर्वत्र तु द्विवचनं प्रगृह्यसंज्ञं भवतीत्युक्तम्, अनेन च प्रगृह्यसंज्ञाया एव विकल्पनाद्- उ इति, वितीति साधितं रूपद्वयम् ।।

ऊँ ।। 1.1.18 ।।

शाकल्यस्य मतेन प्रगृह्यसंज्ञकश्चेति । अनेनास्मिन्नपि योगे द्वयमप्येतदनुवर्त्त्यमिति दर्शयति । यदि "शाकल्यस्य" इति नापेक्ष्येत तदा प्रगृह्यस्योञो नित्यमादेशः स्यात्, अनुवृत्तस्य प्रगृह्यशब्दस्य पष्ठ्यन्ततया विपरिणामात्, ततश्च ऊँ इति, वितीति द्वे एव रूपे स्याताम्; उ इतीति न स्यात् । शाकल्यग्रहणेन तु विकल्पे सति तदपि भवति । तथा प्रगृह्यग्रहणाननुवृत्तौ प्रगृह्याप्रगृह्ययोरप्यादेशे विकल्पः स्यात् । तत्र प्रगृह्यस्यादेशेऽपि सिद्धमिष्टम्, अप्रगृह्यस्य तु यण् सानुनासिको वकारः स्यात् । अतः प्रगृह्यग्रहणमप्यनुवर्त्त्यम् । त्रीणि रूपाणीति । त्रीण्येव रूपाणि भवन्ति । त्रीणि च भवन्तीत्यर्थः । इह यदेतनूँ पदकारैरुच्यत इत्यनुकरणे "यरोऽनुनासिकेऽनुनासिको वा " इत्येष विधिर्भवति ।

ईदूतौ च सप्तम्यर्थे ।। 1.1.19 ।।

शाकल्यस्येताविति निवृत्तमिति । अस्वरितत्वात् । इह चश्ब्देन प्रत्नेन प्रकृतमनुकृष्यते, तत्र संज्ञाया अननुवृत्तौ विधेयं नास्तीति सैवानुकृष्यते । मामक्यां तन्वामिति प्राप्त इति । सप्तम्यर्थं दर्शयति । मामकीतनूशब्दौ "सुपां सुलुक्" इति लुप्तसप्तमीकौ । मामकी इति, तनू इतीति । कार्योदाहरणे । गौरी अधिश्रित इति तु संहितापाठेऽपि कार्योदाहरणमिति । स एव तत्र दर्शतः ।

अग्ना भवातीति । रूपप्रत्युदाहरणम्, कार्यं तु पदकाले । धीतीत्यादि । धीति-मति-सुष्टुतिशब्देभ्यः परस्य तृतीयेकवचनस्य पूर्वसवर्ण ईकारः, तद्दर्शयतिधीत्या, मत्येत्यादिना । वाप्यश्वः, नद्यातिरिति । "संज्ञायाम्" इति सप्तमीसमासः । अथ क्रियमाणेऽप्यर्थग्रहणे कस्मादेवात्र न भवति, अस्ति ह्यत्रापि सप्तम्यर्थः ? उच्यते; जहत्स्वार्था वृत्तिरिति पक्षे समासस्यैवार्थवत्त्वात्पूर्वोत्तरपदयोर्वर्णवदानर्थक्यमिति सप्तम्यर्थो नास्ति । अजहत्स्वार्थायामपि वृत्तावुपसर्जनपदं न स्वार्थमात्रे पर्यवस्याति; किन्तु तत्संसृष्टे प्रधानार्थे ।

तत्रार्थग्रहणसामर्थ्याद्यावानर्थो वाक्ये सप्तम्यन्तेनाभिधीयते केवलोऽसंसृष्टरूपस्तसयैव ग्रहणमिति संसृष्टे न भविष्यति । तपरकरणं गुणान्तरभिन्नानां तुल्यकालानां ग्रहणार्थमिति चेत्, न; अभेदकत्वाद् गुणानाम् । भिन्नकालानां प्लुतानां निवृत्त्यर्थमिति चेत्, न; अनण्त्वादसंभावाच्च । न हि सप्तम्यर्थवृत्ति प्लुतान्तं सम्भवतीत्यत आह-तपरकरणमित्यादि ।

ईदूतावित्यादि । "ईदूतौ सप्तमी" इत्येवास्तु, "नार्थोऽर्थग्रहणेन । लुप्तेऽर्थग्रहणाद्भवेदिति । असत्यर्थग्रहणे संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधात् सप्तम्या एव संज्ञा स्यात्, ततश्च "सोमो गौरी अधिश्रितः" इत्यत्र न स्याल्लुप्तत्वात् । अर्थग्रहणे त्वर्थनिमित्तेयं संज्ञा, न तु प्रत्ययश्रवणनिमित्ता । अतः "लुप्तेऽर्थग्रहणाद्भवेत्"। नात्र सप्तमी लुप्यते, पूर्वसवर्णोऽत्र भवति-सुपां सुलुगिति । ततोऽकः सवर्णे दीर्घत्वेन तस्यादिवत्त्वात् सप्तमीग्रहणेन ग्रहणाद् अस्त्येव सप्तमीति शङ्कतेपूर्वस्य चेदिति । दूषयति-आडाम्भाव इति । यदि ह्यत्र पूर्वसवर्णः स्यात्, दीर्घा देशं बाधित्वाऽऽडामौ स्याताम्, अतो लुगेव युक्तः । तस्मादर्थग्रहणं कर्त्तव्यम् ? न कर्त्तव्यम्, यस्मात्सर्वत्रैव लुका भाव्यमिति न क्वचित्सप्तम्यस्ति । उच्यते चेदम्-"तत्र वचनसामर्थ्यात्संज्ञाविधावपि तदन्तविधिर्भविष्यति । नेदं वचनाल्लभ्यम्,यतो वचनाद्यत्र दीर्घत्वं तत्रैव स्याद्-दृतिं न शुष्कं सरसीशयानम् " इति । अत्र हि सरः शब्दात्परस्य ङिशब्दस्य "इयाडियाजीकाराणामुपसङ्ख्यानम्" इतीकारे कृते सप्तम्येव श्रूयते इति तत्रैव स्याद्, न गौरी इत्यादौ । तत्रापि सरसी यदि । तत्रापि सिद्धम्, कथम् ? यदि सरसीशब्दो विद्यते । असंदिग्धे संदिग्धाभधानमेतद्, शास्त्राणि चेत्प्रमाणं स्युरिति यथा । अस्ति च सरसीशब्दः, दक्षिणापथे महान्ति सरांसि "सरस्यः" उच्यन्ते । ततश्च सरसीशब्दोऽपि लुप्तसप्तमीक एवेति वचनात्तदन्तविधिरित्येतदेव स्थितम् । एवं तर्हि-ज्ञापकं स्यात्तदन्तत्वे । "ईदूदेद्" इत्यत्र चत्वारः पक्षा उपन्यस्ताः, तत्र तदन्तत्वे इत्यनेन तृतीयचतुर्थपक्षावुपलक्षयति । तत्र ज्ञापकं स्याद्-इह प्रगृह्यप्रकरणे प्रत्यलक्षणं न भवतीति; यदि स्यात्, पूर्वोक्तन्यायेन संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेराश्रयणात् लुप्तायामपि सप्तम्यां प्रत्ययलक्षणेन सप्तम्यन्तमिति संज्ञा भविष्यति, किमर्थग्रणेन ? तेन तदन्तत्वे यो दोष उक्तः-प्रत्ययलक्षणेन संज्ञा प्राप्नोति, स न भवतीति संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेरभावादेव तदन्तपक्षस्तत्र नैव स्थित इत्याह--मा वेति ।।

दाधा घ्वदाप् ।। 1.1.20 ।।

किमिदं प्रयोगस्थानामनुकरणम्-प्रयोगे ये दाधारूपाः श्रूयन्ते, ते घुसंज्ञा भवन्तीति ? आहोस्वित् उपदेशे धातुपाठेऽपस्थितानां यावतामनुकरणं दाधारूपं संभवति तेषामिति ? किं चातः ? यदि प्रयोगस्थानामनुकरणम्, शिति न प्राप्नोति, दो-प्रणिद्यति, देङ्-प्रणिदयते, दाण्-प्रणियच्छति, धेट्-प्रणिधयति; किं

कारणम् ? अदाधारूपत्वात् । प्रणिदाता प्रकणिधाता इत्यादावेव तु स्यात् । किमुच्यते शिति न प्राप्नोतीति, यावता दोदेङ्धेटामशित्यप्यात्वे कृतेऽपि लाक्षणिकत्वान्न प्राप्नोति ? नैष दोषः; "गामादाग्रहणेष्वविशेषः" इति दोदेङो तावद्गृह्येते । अस्याश्च परिभाषाया दैपः पित्त्वं लिङ्गम्; अन्यथा हि लाक्षणिक्त्वादेवास्य ग्रहणं न भविष्यति । "दो दद् घोः" इत्यत्र च "दः" इत्येतद्धेण्णिवृत्त्यर्थं सत्तस्य घुसंज्ञां ज्ञापयति, दधातेस्तु "दधातेर्हिः" इति ह्यादेशाविधानादेव दद्भावाप्रसङ्गः । यदि "गामादाग्रहणेष्वविशेषः" तर्हि अर्थवत्परिभाषापि निवर्तेत, तत्र को दोषः ? प्रनिदारयति-अत्रापि प्राप्नोति । अस्तु, णत्वं कस्मान्न भवति ? "उपसर्गात्" इत्यनुवर्तते, सम्बन्धिशब्दश्चायमुपसर्ग इति, तस्मादेवं विज्ञास्यामः-गदादीनां य उपसर्गस्तत्रस्थान्निमित्तादुत्तरस्य तानेव गदादीन्प्रत्युपसर्गस्य नेरिति । प्रनिदारयतीत्यत्र च यं प्रत्युपसर्गो नासौ दारूपः, यश्च दारूपः न तं प्रत्युपसर्गः, तस्यानर्थकत्वाद् । अतः शित्येव दोषः । उपदेशस्थानां त्वनुकरणे दोदेङ्धेडनुकरणानामपि "आदेच उपदेशेशिति" इत्यात्त्वसद्भावात्तेषां दाण्दाञ्धाञां च सर्वेषां सिद्ध्यति । आत्वधिषयेऽप्येकदेशविकृतस्यानन्यत्वात् सिद्धम् । सर्वेषां च स्वरूपेणानुक्रियमाणत्वात् लक्षणप्रतिपदोक्तयोर्निरनुबन्धकेति च परिभाषयोरनुपस्थानम्, नापि प्रनिदारयतीत्यत्र प्रसङ्गः, न हि "दीङ्" इत्येतदनुकरणस्यात्वमस्ति । कृतात्वमपि किञ्चिन्मात्रसाधर्म्यादनुकरणं न विरुध्यते, यथा गवित्ययमाहेति कृतावादेशमपि गोशब्दस्येति निर्दोषं द्वितीयं पक्षमाश्रित्याह-दारूपाश्चत्वार इत्यादि । एवं च दीङोऽनुकरणस्यात्वाभावात् तृजादिषु "मीनातिमिनोतिदीङाम्" इत्यात्त्वे दारूपस्यापि घुसंज्ञा न भवति, प्रनिदाता-णत्वं न भवति । उपादास्तास्य स्वरः शिक्षकस्य-"स्थाध्वोरिच्च" इतीत्त्वं न भवति । केचितु संज्ञामिच्छन्ति । तेषामप्युपादास्तेत्यत्र न भवति, " सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य" इति । `प्रणिददातीत्यादौ नेर्गदेति णत्वम् । प्रणिद्यतीति-"ओतः श्यनि" ।

दातं बर्हिरति । लूनमित्यर्थः । घुसंज्ञाया अभावाद् "दो दद् घोः " इति न भवति । अवदातमित्यत्र च "अच उपसर्गात्तः" इति न भवति । ननु दाब्दैपोरननुकरणादेव न भविष्यति, अस्मदायत्तं खल्वनुकरणं दाप्दैपोर्न करिष्यामः, तन्न; असति तस्मिन्प्रतिपदोक्तमेव दाधारूपमनुकरणं गृह्यते । सति तु तस्मिन् यावतामनुकरणं दाधारूपं सम्भवति लाक्षणिकं प्रतिपदोक्तं वा, तावतां सर्वेषामनुकरणं भवति । "उदीचां माङो व्यतीहारे" इति च मेङः कृतात्त्वास्य निर्देशो ज्ञापयति-"नानुबन्धकृतमनेजन्तत्वम्" इति । न हि "माङ् माने" इत्यस्य व्यतीहारे वृत्तिः सम्भवति, तेन दैपः पकारे श्रूयमाण एवात्त्वं भवतीति अदाबिति प्रतिषेधो भवति । संज्ञाप्रवृत्तिसमये च यद्दाब्रूपम्, तस्य प्रतिषेध इति प्रणिदापयतीत्यत्र प्रगेव पुकः प्रवृत्तां घुसंज्ञामाश्रित्य णत्वं भवति । "दाधा घ्वपित्" इति वक्तव्यम्, पित् घुसंज्ञो न भवतीति । बकारो वा द्वयोरनुबन्धः, सूत्रमपि बकारान्तमेव पठितव्यम् । भाष्यवार्त्तिकविरोधस्तु महापदमञ्जर्यामस्माभिः प्रपञ्चितः ।।

आद्यन्तवदेकस्मिन् ।। 1.1.21 ।।

"द्वन्द्वे घि" इत्येतद्बाधित्वा "अजाद्यदन्तम् " इत्यन्तशब्दस्य पूर्वनिपातः प्राप्नोऽस्मादेव निर्द्देशान्न भवति । न चात्यन्तबाधः, अन्तादिवच्चेति लिङ्गात् । असहायस्येत्यादिना सूत्रारम्भस्य प्रयोजनमाह । सति परस्मिन् यस्मात्पूर्वं नास्ति स आदिः, सति च पूर्वस्मिन्यस्मात्परं नास्ति सोऽन्तः, तदेतदुभयमसहाये न सम्भवति । तस्मादाद्यन्तयोर्यान्युपदिष्टानि उक्तानि कार्याणि तान्यसहायस्यापि यथा स्युरित्ययमारम्भः । असहायस्येत्यनेनासहायवचन एकशब्दो न संख्यावचन इति दर्शयति । बहुष्वपि व्यवस्थितस्यैकत्वसंख्यास्तीति "एकस्मिन्" इति व्यर्थं स्यादिति भावः । "एकस्मिन्" इत्युपमेये सप्तमीश्रवणादुपमानस्यापि सप्तमीसमर्थतेत्याह-सप्तम्यर्थे वतिरिति । वर्तमानादिति शेषः । "तत्र तस्येव" इति इवार्थे वतिः । पूर्वं त्वसहायस्येति षष्ठीनिर्देशः सप्तम्यर्थस्यैव शेषरूपविवक्षया । कार्यार्थत्वात्सर्वातिदेशानां प्राधान्यात्कार्यातिदेशोऽयमित्याह-कार्ये भवतीति । । आद्यन्तवद्व्यपदेशो निमित्तम् । "पूर्ववत्सनः" इति तु निर्मूलम्, व्यपदेशातिदेशे हि कुरुते, कुर्वे इत्यादौ अन्तवद्व्यपदेशेऽपि अन्त्योऽजादिरस्येत्येवं रूपस्य बहुव्रीह्यर्थस्याभावाट्टिसंज्ञाया अभावे टेरेत्वं न स्यात् । कुर्वाते इत्यादौ तु दृष्टस्य टेरेत्वाख्यस्य कार्यस्यातिदेशे न दोषः । आभ्यामिति । अत्र द्वे अन्तत्वे उपयुज्येते-आकारान्तस्याङ्गस्यालोऽन्त्यस्य दीर्घ इति ।

सभासन्नयन इति । असत्येकग्रहणे यत्रादिव्यपदेशो नास्ति मध्येऽसहाये च सोऽतिदेशस्य विषयः । "वृद्धिर्यस्याचामादिस्तद्वृद्धम्" इत्यत्रादिग्रहणस्याप्येतदेव व्यावर्त्यमिति विकल्पः स्यात्-कदाचिद् वृद्धसंज्ञा, कदाचिन्न इति । तस्मादाकारमाश्रित्य पक्षे वृद्धसंज्ञा न भवतीति ग्रन्थार्थः ।।

तरप्तमपौ घः ।। 1.1.22 ।।

तरप्तमपौ घः ।। 1.1.22 ।।

तरतेः "ऋदोप्" इत्यपि गुणे भूतपूर्वेण पकारेण यद्यपि तरबिति रूपं भवति, तथापि तमपा साहचर्यात् प्रत्ययस्यैव ग्रहणमित्याह --तरपतपौ प्रत्ययाविति । तेन नद्यास्तरो नदीतर इति ह्रस्वो न भवति । अथ वा तरबिति रूपाश्रय संज्ञा, रूपनिर्ग्रहश्च प्रयोगे उपदेशे वा । तत्र न क्वचित्प्रयोगे तरबिति रूपमस्तीत्युपदेशगतं गृह्यते । न चात्रौपदेशिकं तरब्रूपमस्ति, सत्यामपि वा घसंज्ञायां न दोषः, ह्रस्वत्वं हि समानाधिकरणे स्त्रीलिङ्गे विधीयते । आतिशायनिकप्रकरण एव तादी घः, पितौ घ इति वा कर्त्तव्ये प्रकरणोत्कर्षेण संज्ञाकरणमन्योऽपि तरबस्तीति सूचनार्थम्, तेन "अल्पाच्तरम्" "लोपश्च बलवत्तरः" इत्यादौ स्वार्थे तरप् सिद्धो भवति ।।

बहुगणवतुडति संख्या ।। 1.1.23 ।।

यद्यपि "वतुडती" इति संज्ञाविधौ प्रत्ययग्रहणम्, तथापि केवलयोः प्रत्यययोः संज्ञायां प्रयोजनाभावात् तदन्तयोरेव ग्रहणम् । वहुकृत्व इत्यादि-"संख्यायाः

क्रयाभ्यावृत्तिगणने कृत्वसुच्,""संख्याया विधार्थे धा" "बह्वल्पार्थात्" इति वर्त्तमाने "संख्यैकवचनात्" इति शस् । "संख्याया अतिशदन्तायाः कन्" । तावत्कृत्व इति-"यत्तदेतेभ्यः परिमाणे वतुप्", "आ सर्वनाम्नः" । कतिकृत्व इति--"किमः संख्यापरिमाणे डति च" । बहुगणशब्दयोरित्यादि । कथं पुनर्गहणं नास्ति ? संख्येत्यन्वर्थसंज्ञेयम् संख्यायतेऽनयेति संख्येति । न च यो वैपुल्ये बहुशब्दः--बहुरोदन इति, संख्येये वा गणशब्दः-इक्षूणां गण इति, नाभ्यां संख्यायते । यदि तर्हि संख्यावाचिनोरेव ग्रहणं किमर्थं तयोरिह संज्ञा विधीयते ! यावता संख्याप्रदेशेषु लौकिक्यपि संख्या गृह्यते; अन्यथा पञ्चकः, सप्तक इत्यादौ "संख्याया अतिशदन्तायाः" इति कन् न स्यात्,"अतिशदन्तायाः" इति च प्रतिषेधोऽनर्थकः स्यात्, शास्त्रीयायाः संख्यायास्तिशदन्ताया अभावादित्यत आह--भूर्यादीनामित्यादि । एतेन नियमार्थमेतयोर्ग्रहणमिति दर्शयति । तुल्यजातीयापेक्षत्वाच्च नियमस्य; भूर्यादीनामेवानियतबहुत्वाचिनां निवृत्तिः, नाबहुत्वविषययोर्द्व्येकशब्दयोः, नापि नियतबहुत्ववाचिनां त्र्यादीनाम्, तदाह--भूर्यादीनामिति ।

अघपूर्वपदश्चेति । अर्धशब्दः पूर्वपदं यस्य, स च पूरणप्रत्यान्तः; पूरणप्रत्ययान्तस्यार्धशब्दः पूर्वपदं सम्भवति, समास एव हि पूर्वपदं सम्भवति । अर्धपञ्चमशूप इति । अर्ध पञ्चमं येषामिति वहुव्रीहिः । अर्धपञ्चमैरर्धाधिकैश्चतुर्भिः शूर्पैः क्रीत इति "तद्धितार्थ" इति समासः । "शूर्पादञन्यतरस्याम्" इति विहित स्याञष्ठञो वा "अध्यर्धपूर्वद्विगोः" इति लुक् । कथं पुनर्लुक्, यावता नायं समासः नापि कन् ? समासकन्विध्यर्थमिति सम्बन्धसामान्ये षष्ठी, तेन समासे विधीयमाने समासनिमित्ते वान्यस्मिन्विधीयमान इत्यर्थः ।

ष्णान्ता षट् ।। 1.1.24 ।।

इह कस्मान्न भवति-विप्रुषः, पामान इति ? सङ्ख्येति वर्तते । ननु च तत्सङ्ख्याग्रहणं संज्ञाप्रधानम्, इहानुवृत्तमपि ष्णान्तानां संज्ञामेव विदध्याद्, न तु ष्णान्तेत्यस्य विशेष्यं समर्पयेद्; अत आह--स्त्रीलिङ्गनिर्देशादिति । "ष्णान्ता" इत्यत्र स्त्रीलिङ्गस्य विशेष्यापेक्षायां सम्बध्यमानं प्रदेशेष्विव संज्ञिप्रधाने भविष्यतीत्यर्थः । अत एवात्रान्तग्रहणम् । इतरथा वर्णग्रहणे सर्वत्र तदन्तविधिरित्येव सिद्धम् ।

इह कस्मान्न भवति-शतानि, सहस्राणि ? नुमि कृते तस्य पूर्वभक्तत्वान्नान्ता सङ्ख्या भवति । अस्तु, लुक्कस्मान्न भवति ? सर्वनामस्थानसन्निपातकृतो नुम् न तद् विहन्ति । अथेह कथं संज्ञा-अष्टानामिति ? कथं च न स्यात् ? अष्टन् + आम् इति स्थिते परत्वान्नित्यत्वाच्च "अष्टन आ विभक्तौ" इत्यात्वे कृतेऽनान्तत्वादसत्यां संमज्ञायां नुड् न स्यात्, अष्टनो दीर्घग्रहणं ज्ञापकम्-कृतात्वस्याप्यष्टनः संज्ञा भवतीति । एतच्च तत्रैवोपपादयिष्यामः । यद्वा, प्रागेव विभक्त्युत्पत्तेरनुद्दिश्य प्रयोजनविशेषं षट्संज्ञा भविष्यति । सा च कृतेऽप्यात्वे न निवर्त्तते ।।

डति च ।। 1.1.25 ।।

डत्यन्ता च या संख्येति । अनेन संख्याग्रहणानुवृत्तिं दर्शयति । असत्यां ह्यनुवृत्तौ पातेर्डतिः पतयः-अत्रापि स्यात् । अथेह संख्याग्रहणानुवृत्तावपि कस्मादेवात्र न भवति, सामान्येन हि डतेः संख्यासंज्ञा विहिता ? उच्यते; संख्यासंज्ञायां हि वतुना साहचर्यात्तद्धितस्य डतेर्ग्रहणम्, न त्वौणादिकस्य ।।

क्तक्तवतू निष्ठा ।। 1.1.26 ।।

इह क्तक्तवतुरूपाश्रयेयं संज्ञा, रूपनिर्ग्रहश्च प्रयोगे उपदेशे वा भवति । न च प्रयोगे सानुबन्धकं रूपमस्तीत्युपदेशगतं ग्राह्यम् । तत्र "नपुंसके भावे क्तः" "ञीतः" इति क्तस्य क्वचिदुपदेशोऽस्ति । यदि तस्यैव स्याद्, लिङ्गान्तरे,कालान्तरे धात्वन्तरे च न स्यात् । क्तवतोस्तु न क्वचिदुपदेशः, तत्केनविहितयोः क्तक्तवत्वोरेषा संज्ञा विधीयते ? अनयैव संज्ञया । वक्ष्यति--निष्ठेति । यद्येवम्, इतरेतराश्रयः प्राप्नोति-विहितयोः संज्ञा, संज्ञया च विधानमिति, नैष दोषः; भाविनी संज्ञा विज्ञायते सूत्रशाटकवत् । तद्यथा-कश्चित्कञ्चित् तन्तुवायमाह-अस्य सूत्रस्य शाटकं वयेति । स पश्यति-यदि शाटको न वातव्यः; अथ वातव्यो न शाटकः; शाटको वातव्यश्चेति विप्रतिषिद्धम्; स मन्ये वातव्यो यस्मिन्नुते शाटक इत्येतद्भवतीति । तद्वदिहापि तौ भूते काले भवतः, ययोर्विहितयोर्निष्ठेत्येषा संज्ञा भविष्यतीति ।।

सर्वादीनि सर्वनामानि ।। 1.1.27 ।।

द्वन्द्वतत्पुरुषयोरुत्तरपदलिङ्गत्वेन नपुंसकत्वायोगाद् बहुवचनासंभवाच्च सर्वादीनीति बहुव्रीहिरित्याह-सर्वशब्द इत्यादि । आदिर्येषामिति । यद्येवं बहुव्रीहेरन्यपदार्थप्रधानत्वात्सर्वशब्दोपलक्षितानां विश्वादीनामेव संज्ञा स्याद, नोपलक्षणस्य सर्वशब्दस्य । यथा चित्रगुरानीयतामित्युक्ते अस्य ता गावः स एवानीयते, न चित्रा गाव इत्याशङ्क्याह-तानीमार्नति । अत्र "तानि" इत्येव सिद्धे इमानीति प्रत्यक्षविषयेणेदंशब्देन गणपठितेषु सर्वशब्दस्यान्तर्भावं सूचयन् तद्गुणसंविज्ञानं बहुव्रीहिं दर्शयति । तस्य = अन्यपदार्थस्य, गुणः=वर्तिपदार्थः, सोऽपि कार्यी संविज्ञायते यस्मिन् बहुव्रीहौ स तद्गुणसंविज्ञानः । मत्वर्थे हि बहुव्रीहिः । भूमादिषु च मतुब् विधीयते । तद्यत्र स्वस्वामिभावादिसम्बन्धः प्रवृत्तिनिमित्तम्, न तत्रोपसर्जनस्य कार्ययोगः । यथा-गोमन्तमानयेति, संभवति ह्यरण्यावस्थिताभिरपि गोभिः स्वस्वामिभावः । यत्र तु संयोगसमवाययो रन्यतरत् प्रवृत्तिनिमित्तम्, तत्र स्वभावादेवोपसर्जनस्यापि कार्योयोगः, यथा-दण्डिनमानय, विषाणिनमानयेति , नो खलु गृहावस्थितेन दण्डेन दण्डसंयुक्तः पुरुषो भवति । एवं बहुव्रीहावपि-चित्रगुः, शुक्लवासा इति । इहाप्यादिशब्दोऽवयववचन उद्भूतावयवभेदः समुदायः समासार्थः, तत्र समुदायस्य युगपल्लक्ष्ये प्रयोगाभावत्तदन्तर्भूतानां संज्ञा भवन्ती विश्वादीनामिव सर्वशब्दस्यापि भविष्यति । अत्र च लिङ्गम्-"अदः सर्वेषाम्" इति निर्देशः, "आमि सर्वनाम्नः सुट्" । सर्वे इति--"जसः शीः । पूर्वयोस्तूपन्यासो जसन्ततामस्य दर्शयितुम् । सर्वस्मै इत्यादि--"सर्वनाम्नः स्मै" "ङसिङ्योः स्मात्सिनौ" ।

उभशब्दो द्विवचनविषये एव प्रयुज्यते, असति द्विवचने नैव प्रयुज्यते, न हि भवति उभौ पुत्रावस्य उभपुत्र इति उभयशब्दोऽत्र तत्स्थाने भवति उभयपुत्र इत्यादि । न च द्विवचने किञ्चित्सर्वनामकार्यमस्ति; स्मैप्रभृतीनामेकवचनबहुवचनविषयत्वात्, काकचोश्च नास्ति विशेष इति तस्येह पाठे प्रयोजनमाह-

उभशब्दस्येत्यादि । उभाभ्यां हेतुभ्याम्,उभयोर्हेत्वोरिति तृतीयाषष्ठ्यौ भवतः । उभयेषाम्, उभयस्मिन्निति । उभाववयवावस्येति व्युत्पाद्यमान उभयशब्दो यदा तिरोहितावयवभेदं समुदायमाचष्टे तदैकवचनं भवति-उभयो मणिरिति । यदा तु वर्गद्वयारब्धे समुदायिनि वर्त्तमानो वर्ग्यभेदानुगतं समुदायमाचष्टे तदा बहुवचनम्-उभये देवमनुष्या इति ।

डतर-डतमेति । संज्ञाविधौ प्रत्ययग्रहणेऽपि तदन्तयोर्ग्रहणम्; केवलयोः प्रयोजनाभावात् ।

वक्ष्यमाणेनेति । "प्रथमचरम्" इत्यादिना । सर्वशब्दपर्यायस्येति । अस्ति च सर्वशब्दपर्यासः समशब्दः "नभन्तामन्यके समे","मा नो वृकाय वृक्ये समस्मै","उरुष्याणोऽघायतः समस्मात्", "उतो समस्मिन्नाशिशी हि नो वसो," "मा नः समस्य दूढ्यः" इति यथा । एतच्च "सर्वेषां नामानि" इत्यन्वर्थसंज्ञाकरणाल्लभ्यते । स एव हि समशब्दः सर्वेषां नाम भवति यः सर्वशब्दपर्यायः । यद्यन्वर्थसंज्ञा, "पूर्वपदात् संज्ञायाम्" इति णत्वं कस्मान्न भवति ? अस्मादेव निपातनात् । यदि "सर्वादोति सर्वनामानि",तर्हीहापि प्राप्नोति-सर्वो नाम कश्चित् तस्मै सर्वाय देहीति, इह चातिक्रान्तः सर्वस्मै अतिसर्वाय देहीति; तस्मात्संज्ञानामुपसर्जनानां च सर्वादीनां संज्ञाप्रतिषेधो वक्तव्यः । न केवलं संज्ञायाः, पाठोऽपि तेषां गणे नास्तीति वक्तव्यम्; संज्ञामात्रप्रतिषेधे हि सर्वनामप्रयुक्तमेव कार्यं तेषां न स्यात् । पाठाश्रयं तु स्यादेव--"त्यदादीनामः" तन्नामकः कश्चित्,तत्स,तदौ, तदः; अतिक्रान्तस्तमतितत्, अतितदौ, अतितदः; "अदड्डतरादिभ्यः पञ्चभ्यः", कतरमतिक्रान्तं ब्राह्मणकुलमतिकतरमिति । संज्ञाप्रतिषेधस्तावन्न वक्तव्यः ।

अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्त्तव्यः शब्देषु न तदुक्तिषु ।।

तत्र यथा बाहुर्नाम कश्चित्तस्यापत्यं बाहवः, "बाह्वादिभ्यश्च" इतीञ् न भवति संज्ञा, श्वशुरस्यापत्यम् "राजश्वशुराद्यत्" न भवति, धान्यमातुः स्वसा, "मातुपितृभ्यां स्वासा" इति षत्वं न भवति; एवमिहापि संज्ञाभूतानां सर्वादीनां संज्ञा, तन्निबन्धनं च कार्यम्, अन्तर्गणकार्यं च न भविष्यति ।

यद्वा-"व्यवस्थायाम्" इत्यत्र "असंज्ञायाम्" इति विभज्यते, तेन च गणपाठो विशेष्यते-यान्येतान्यनुक्रान्तानि सर्वादीनि तान्यसंज्ञायां द्रष्टव्यानीति ।

उपसंर्जनप्रतिषेधोऽपि न कर्त्तव्यः, सर्वादीनां संज्ञा विधीयते, तत्र कः प्रसङ्गो यत् सर्वाद्यन्तस्य स्यात् ? सर्वशब्दस्य तु सत्यामपि संज्ञायामङ्गस्यासर्वनामत्वात् स्मायाद्यप्रसङ्गः । यद्येवम्, परमसर्वस्मै इत्यादावपि न स्याद्; यतो यदङ्गं न तत्सर्वनाम, यच्च सर्वनाम न तदङ्गमिति । मा भूदङ्गं सर्वनाम, तअवयवस्यैव तु स्रवनामत्वे "अङ्गाधिकारे तस्य च तदुत्तरपदस्य च" इति समुदायस्य च कार्यं भविष्यति; यथा--अस्थ्यादीनामनङ् परमास्थ्नेति । न चैवमत्यस्थ्नेत्यादिवदतिसर्वायेत्यादावुपसर्जनेऽपि प्रसङ्गोऽर्थद्वारकस्य सम्बन्धस्याश्रयणात्सर्वनामार्थगतमेकत्वादिकं या विमक्तिराहेति; यथा-"अष्टाभ्य औश्" "षड्भ्यो लुक्" इति परमाष्टौ परमपञ्चेत्यादौ भवति, प्रियाष्टानः प्रियपञ्चान इत्यादौ न भवति; तद्वदत्रापि । "त्यदादीनामः" इत्याद्यन्तर्गणकार्यमप्येवमेव द्रष्टव्यम् । यत्तु रूपाश्रयं कार्यम् "युष्मदस्मदोरनादेशे" इति, न पाठाश्रयम्, नापि संज्ञाश्रयं तदस्थ्याद्यनङ्वदुपसर्जनेऽपि भवति । यत्तूपसर्जनदशायाः प्रागेव प्राप्तं तदपि भवति अतिक्रान्तो भवकन्तमतिभवकानिति, तस्मान्नार्थस्तदन्तस्य संज्ञया, उच्यते; अव्ययसर्वनाम्नामित्यकच् परमभवकानिति तदन्तान्न स्यात् । "पञ्चम्यास्तसिल्" परमसर्वतः, "सप्तम्यास्त्रल्" परमसर्वत्र,"आ सर्वनाम्नः" "विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये" परमतद्र्यङ् परमयद्र्यङित्यादौ न स्यादिति तदन्तस्य संज्ञेषितव्या । कथं पुनरिष्यमणापि लभ्यते ? ज्ञापकादिति वक्ष्यामः । तत्तदन्तस्य च भवन्ती परमसर्वादिवद् अतिसर्वादेरपि स्यादिति उपसर्जनप्रतिषेधोऽपि वक्तव्यः ? न वक्तव्यः, अन्वर्थसंज्ञाविज्ञानादेव सिद्धम् । वृत्तौ हि प्रधानार्थसंसर्गादुपसर्जनानि न सर्वार्थानि, यथासम्भवं च सार्वार्थ्यामिति प्रत्यक्षपरोक्षतादिविषेषवाचित्वेऽपि तदिदमादीनां भवत्येव । अन्वर्थत्वादेव च संज्ञाभूतानामपि संज्ञाभावः । एवं तावत्संज्ञानिबन्धनं स्मायाद्युपसर्जनानां निबारितम् । त्यदाद्यन्तर्गणकार्यं तु स्यादेव; पाठस्य स्थितत्वात् । एवं तर्हि तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणाद् द्वितीयोऽपि सर्वनामशब्द उपात्तः, तेन पाठो विशेष्यते-यानि सर्वेषां नामानि तानि सर्वादीनीति, तेन सर्वादिपाठोपजीवनेन प्रवर्तमानमन्तर्गणकार्यमपि व्यवस्थास्यते । यद्वा-संज्ञाया अन्वर्थत्वात्तत्तत्संबन्धयोग्यानां सर्वार्थानां तावत्पाठोऽवश्याभ्युपगन्तव्यः । ततश्च प्रकारान्तरजुषां पाठे प्रमाणाभावादेव सिद्धः पाठात्पर्युदासः ।।

विभाषा दिक्समासे बहुव्रीहौ ।। 1.1.28 ।।

अत्र समासावयवानां सर्वादीनां संज्ञा विकल्प्यत इत वृत्तौ लक्ष्यते, यथाह- दिगुपदिष्ट इत्यादि । दिशामुपदिष्ट उक्ते "दिङ्नामान्यतराले" इत्यस्मिन्समासेऽवयवत्वेन वर्तमानानीत्यर्थः । न चावयवानां संज्ञाविकल्पे किञ्चित्प्रयोजनमस्ति, स्मायादिकं तावदङ्गाश्रयम्, काकचोश्च नास्ति विशेषः, दिग्वाचिनामकारान्तत्वात् । "सर्वनाम्नो वृत्तिमात्रे" इति पूर्वपदस्य पुंवद्भावोषऽपि न प्रयोजनम्, तत्र हि मात्रग्रहणं क्वचित्सर्वनामत्वेन दृष्टानां संप्रत्यसर्वनामत्वेऽपि यथा स्यात्, तथा च दक्षिणपूर्वाया इति संज्ञाभावपक्षेऽपि भवति । स्यादेतत्--अवयवानामेव संज्ञा, कार्यं तु "अङ्गाधिकारे तस्य च तदुत्तरपदस्य च" इति । एवमपि दक्षिणपूर्वतः, दक्षिणपूर्वत्रत्यत्र तसिलादयो न स्युः; तस्मात्सर्वाद्यन्ते बहुव्रीहौ संज्ञा विकल्प्यते । "सर्वादीनि" इत्ययं तु वृत्तिग्रन्थः "सर्वाद्यन्ते प्रवर्तमाना संज्ञा सर्वादीन्यपि गोचरयति" इत्येवंपरो व्याख्येयः । यद्वा--अवयवानां संज्ञाविधानेन तदन्तस्यापि सिद्ध्यति, तदन्तविधेरभ्युपगमादिति ।

समासग्रहणं किमिति । न बहुव्रीहिः समासत्वं व्यभिचरतीति प्रश्नः । दक्षिणदक्षिणस्यै इति । "एकं बहुव्रीहिवत्" इत्यनुवृत्तौ "आबाधे च" इति दक्षिणशब्दस्य द्विर्वचनम् "न बहुव्रीहौ" इत्ययमपि निषेधो न भवति, तत्रापि समासाधिकारात् । दक्षिणोत्तरपूर्वाकणामिति । असति बहुव्रीहिग्रहणे यथा "न बहुव्रीहौ" इति प्रतिषेधं बाधते, एवं "द्वन्द्वे च" इत्येतमपि बाधेत । अथ क्रियमाणऽपि बहुव्रीहिग्रहणे या पूर्वा सोत्तरा यस्योन्मुग्धस्य तस्मै पूर्वोत्तराय देहीत्यत्र

कस्मान्न भवति ? प्रतिपदोक्तो यो दिक्समासः-"दिङ्नामान्यन्तराले" इति, तस्य ग्रहणम् । यद्येवम्, तत एव हेतोर्द्वन्द्वे न भविष्यति ? सत्यम्; उत्तरार्थमवश्यं कर्त्तव्यं बहुव्रीहिग्रहणमिहापि विस्पष्टार्थं भविष्यतीति मन्यते ।।

न बहुव्रीहौ ।। 1.1.29 ।।

अत्र वृत्तौ द्विधा सूत्रार्थो लक्ष्यते--बहुव्रीहाविति निषेधाधिकरणम्-बहुव्रीहि संज्ञा न भवति, बहुव्रीह्याधारा संज्ञा न भवतीति; बहुव्रीहेः संज्ञा न भवतीति । सर्वाद्यधिकरणं वा--बहुव्रीहौ यानि सर्वादीनि तानि सर्वनामसंज्ञानि न भवन्तीति । तत्र सर्वनामसंज्ञायाम् इत्यादिनाऽऽद्यं पक्षं द्वितीयं सूत्रार्थं दर्शयति । कथं पुनर्ज्ञायतेऽभ्युपगतस्तदन्तविधिरिति ? अत एव निषेधात् । द्वितीयं सूत्रार्थं दर्शयति--बहुव्रीहावित्यादि । प्रथमस्योदाहरणमाह--प्रियविश्वायेति । "सर्वनामसंख्ययोरुपसंख्यानम्" इति सर्वनाम्नः पूर्वनिपाते प्राप्ते "वा प्रिययस्य" इति प्रियशब्दस्य पूर्वनिपातः । द्व्यन्यायेति । "सर्वनामसंख्ययोः" इति द्व्यन्ययोः पूर्वनिपाते प्राप्ते परत्वात् सङ्ख्यायाः पूर्वनिपातः । द्वितीयस्योदहरणमाह--इह चेति । अत्र च प्रतिषेधोऽयमारभ्यत इत्यनुषङ्गः; अत्रासति निषेधेऽकचि सति त्वकत्पितृको मकत्पितृक इति प्राप्नोति, सति तु "प्रागिवात्कः" इति के सति "प्रत्ययोत्तरपदयोश्च" इति त्वमादेशयोस्त्वत्कपितृको मत्कपितृक इति सिद्ध्यति "नद्यृतश्च" इति समासान्ते कपि । ननु च बहुव्रीहावयं निषेधः, इह च प्रागेव; ततस्त्वकं पिताऽस्य अहकं पिताऽस्येति वाक्यावस्थायामेवाकच् प्राप्नोति ? एवं तर्हि प्रतिषेधसामर्थ्यात् यद्वाक्योपमर्देन बहुव्रीहिर्भवति तस्यामेवावस्थायां निषेधो भविष्यति । अत्र च प्रथमः सूत्रार्थस्तदन्तविविज्ञापनायैवोपन्यस्तः, न तु प्रियविश्वायेत्यादौ समुदायस्य संज्ञाप्रसङ्गः; असर्वार्थत्वात्, यथा अतिसर्वायेत्यादौ ।

बहुव्रीहाविति वर्तमाने पुनर्बुहुव्रीहिग्रहणं किमर्थमित्याह--बहुव्रीहावित्यादि वस्त्रान्तरवसनान्तरा इति । वसनमन्तरं येषामिति बहुव्रीहौ द्वन्द्वः । अत्रासति बहुव्रीहिग्रहणे वर्तमानद्वन्द्वाश्रयो निषेधः स्यात्, ततश्च जसि विभाषा स्यात् । पुनर्बहुव्रीहिग्रहकणात्तु यदन्तो द्वन्द्वः, सोऽन्तरशब्दो बहुव्रीहेः पूर्वमत्रासीद् इति बहुव्रीह्याश्रयो नित्य एव निषेधो भवति । इदं तु "तदन्तस्य संज्ञानिषेध" इति प्रथमपक्षानुरोधेन प्रत्युदाहरणम् । न त्वत्र प्रसङ्गः; असर्वार्थत्वात् । वसन्त्यस्मिन्निति वसनं गृहम्, तेन "विरूपाणामपि समानार्थानाम्" इत्येकशेषाभावः ।।

तृतीयासमासे ।। 1.1.30 ।।

समासे इति, वर्त्तमाने इत्यादि । मुख्यस्यैव ग्रहणे प्राप्ते गौणस्यापि ग्रहणार्थं पुनः समासग्रहणमित्यर्थः । न च तृतीयासमासमात्रार्थे वाक्ये प्रसङ्ग इत्याह--पूर्वसदृशेत्यादि । एतच्च लक्षणप्रतिपदोक्तपरिभाषया लभ्यते । त्वयका, मयकेति । "युष्मदस्मदोस्तृतीयैकवचने","त्वमावेकवचने", "योऽचि" सुबन्तयोः प्राक् टेरकच् ।।

द्वन्द्वे च ।। 1.1.31 ।।

अयं समुदायस्यैव निषेधो नावयवानाम्, कुतः ? त्यादादीनां तावत् "त्यदादीनि सर्वैर्नित्यम्" इति एकशेषेण भाव्यम्, प्राक् च त्यादादिभ्योऽकारान्ताः,तत्र न काकचोर्विशेषः; "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" त्विष्यत एव-दक्षिणोत्तरपूर्वाणामिति, सोऽयं प्रतिषेधो ज्ञापयति-"अस्ति सर्वनामसंज्ञायां तदन्तविधिः" इति ।।

विभाषा जसि ।। 1.1.32 ।।

जसः कार्यं प्रति विभाषेति । तत् कथम् ? व्यवस्थितविभाषेयम् । यद्वा, जसीति कार्यापेक्षयाधिकरणसप्तमी--जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्य इति । अन्ये त्वाहुः- जस ई जसी शब्दरूपापेक्षया नपुंसकह्रस्वत्वे सप्तम्या लुका निर्देशः-जस ईकारे कर्तव्य इति । किं पुनः कारकणमेवं व्याख्यायते ? तत्राह--अकज्हीति । हि शब्दो यस्मादर्थे । यद्यविशेषेण विकल्पः स्यात्, कतर कतम अस् इति स्थिते कुत्साद्यर्थविवक्षायां यस्यामवस्थायामकज्विधिं प्रति संज्ञा स्यात्, ततश्च तन्मध्यपतितत्वात्तद्ग्रहणे शीभावः स्यात्; के तु सति न भवति ।।

प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ।। 1.1.33 ।।

उभयशब्दस्येत्यादि । उभाववयवावस्य "उभादुदात्तो नित्यम्" इति तयपोऽयजादेशः । स्थानिवद्भावाद्भवत्ययं तयबन्तः, तथापि गणे पाठाद् नित्यैव संज्ञा भवति । ननु गणे पाठस्योभयस्मिन्नुभयेषामित्यादिरवकाशः, इह तयब्ग्रहणस्य द्वितये द्वितया इति, उभयशब्दाज्जस्युभयप्रसङ्गे परत्वादियमेव विभाषा प्राप्नोति, नैष दोषः; अन्तरङ्गा नित्या संज्ञा विभक्त्यनपेक्षत्वादिति सैव प्रवर्तते ।

काकचोर्यथायोगं वृत्तिरिति । नेमशब्देऽकचो वृत्तिः, अन्येषु कस्येत्येष यथायोगार्थः । कः पनर्दोषो नेमशब्दे, यदि जसः कार्यं प्रति न स्यात्, पक्षे कोऽपि स्यात् ? अस्तु; नेमके, नेमकाः"-नित्येऽप्यकचि तस्य तद्ग्रहणेन ग्रहणादस्मिन् विकल्पे सति एतद्रूपद्वयं भवत्येव, सत्यम्; प्रथमादिषु पक्षेऽकज्न भवतीत्येवम्परो ग्रन्थः ।।

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ।। 1.1.34 ।।

असंज्ञायामिति । संज्ञायामसत्याम्, पूर्वादयश्चेत्संज्ञारूपा न भवन्तीत्यर्थः । व्यवस्था = नियमः, स चात्रार्थादवध्यपेक्ष इत्याह-स्वामिधेयापेक्ष इत्यादि । पूर्वादीनां शब्दानां स्वाभिधेयो दिग्देशकालस्वभावोऽर्थस्तमपेक्षते, तेन वापेक्ष्यते यः स स्वाभिधेयापेक्षः । अवधिः = मर्यादा; पूर्वदेशस्य यत्पूर्वत्वं तत्परदेशमपेक्ष्य भवति, परस्यापि यत्परत्वं तत्पूर्वदेशम् । एवं दिक्कालयोरपि द्रष्टव्यम् । तस्मात्पूर्वादिशब्दवाच्योऽर्थोऽवश्यमवधिं कञ्चिदपेक्ष्य भवति । तत्र योऽयमपेक्षाया नियमः सा व्यवस्थेति तावद्विवक्षितम् । तस्यां गम्यमानायां पूर्वादिशब्दानां स्वाभिधेय एव वर्त्तमानानामियं संज्ञा भवति, न तु वाच्यायाम् । प्रवीणा इत्यर्थ इति । अनेन व्यवस्थाभावमाह । न हि प्रवीणशब्द सापेक्षमर्थमाचष्टे । सत्यामेव व्यवस्थायामित्यनेनान्वर्थतां दर्शयति । सुमेरुमवधिमपेक्ष्य

कुरुषूत्तरशब्दो वर्तते, अत्र जसः कार्यं प्रतीति नोक्तम्; विशेषाभावात् ।।
स्वमज्ञातिधनाख्यायाम् ।। 1.1.35 ।।
अज्ञातिधनाख्यायामित्यस्यार्थमाह-न चेदित्यादि । यत्र शब्दान्तरनिरपेक्षः स्वशब्दो ज्ञातिधने स्वरूपेणाचष्टे तत्रासौ संज्ञारूपेण प्रवर्तते । आत्माया इत्यर्थ इति । पुत्राणां गवां सत्यपि ज्ञातिधनत्वे न तेनाकारेण तत्र वर्तते, किन्त्वात्मीयाकारेणेत्यर्थः । आख्याग्रहणे त्वसति ज्ञातिधनयोः पर्यवसानादत्रापि प्राप्नोति ।
धूमायन्त इत्यादि । यथोल्मुकान्यश्लिष्टानि असंहतानि धूमायन्ते, संहतानि प्रज्वलन्ति; तद्वत् ज्ञातयोऽपीत्यर्थः । स्वा ज्ञातय इति । स्वशब्दस्यानेकार्थस्य व्यक्तीकरणाय पर्यायस्यापि ज्ञातिशब्दस्य प्रयोगः, स एव तु न प्रयुक्तः; निरङ्कुशाः कविवाच इति ।।
अन्तरं बहिर्योगोपसंव्यानयोः ।। 1.1.36 ।।
बहिरित्यनावृतो देश उच्यते । बहिरित्यनेन योगो बहिर्योग इतीतिशब्दाध्याहारेण विगृह्य समासः । स चानावृतस्य बाह्यस्य वस्तुनो भवति । उपसंवीयते विधीयते वासोऽन्तरेणेत्युपसंव्यानम्, कर्मणि ल्युट् । नगरबाह्या इति । बहिर्योगं दर्शयति । परिधानीयमन्तर्वासः, प्रावरणीयं बहिर्वासः । अन्तरे तापस इति । अत्र संज्ञाभावाद् ङेः स्मिन्न भवति । "जसि" इति वर्तमाने कथं सप्तमान्तं प्रत्युदाहरणे दीयत इत्यत आह--गणसूत्रस्य चेत्याद । गणसूत्रमप्येवमेव पठ्यते । कस्मात्पुनरप्रस्तुतस्य गणसूत्रस्य प्रत्युदाहरणं दीयते, न सूत्रस्य ? "अपुरीति वक्तव्यम्" इति वक्ष्यति, तद् गणसूत्रविषयं यथा स्यादिति; तस्यायं प्रस्तावः । सूत्रस्याप्यनया दिशा प्रत्युदाहरणं गम्यत इति न पृथग्दर्शितम् । अन्तरायामिति । प्राकाराद्बहिर्वर्तिन्यामित्यर्थः । यद्यपि गणसूत्रेऽन्तरशब्दः पठ्यते, तथापि तस्यैव सर्वनामत्वात् टापा सहैकादेशोऽपि तद्ग्रहणेन गृह्यत तइति स्यात् प्रसङ्गः । लिङ्गविशिष्टपरिभाषया वा टाबन्तस्यैव संज्ञाप्रसङ्गे वचनम् । विभाषाप्रकरण इत्यादि । यथायमर्थः सिद्ध्यति, तथा "विभाषा द्वितीयातृतीयाभ्याम्" इत्यत्र वक्ष्यामः ।।
स्वरादिनिपातमव्ययम् ।। 1.1.37 ।।
तसिलादिरिति । "पञ्चम्यास्तसिल्" इत्यारभ्य "एधाच्च" इत्येतदन्तः । शस्तसी -- "बह्वल्पार्थाच्छस्", प्रतियोगे "पञ्चम्यास्तसिः" । संख्यायाः "क्रियाभ्यावृत्तिगणने कृत्वसुच्","द्वित्रिचतुर्भ्यः सुच्" । आस्थालाविति । "इण आसिः" अयाः,"प्रत्नपूर्व"-त्वं प्रत्नथाः । च्व्यर्थाः-"संपद्यकर्तरि च्विः""विभाषासातिः कार्त्स्ये","देये त्रा च", अमु चच्छन्दसि","किमेत्तिङव्ययघादामु" । निपाता वक्ष्यन्त इति । अथ किमर्थं स्वरादीनां पृथग्ग्रहणं क्रियते, ते चादिष्वेव पठ्येरम् ? न; चादीनामसत्त्ववचनानां निपातसंज्ञा, स्वरादीनां पुनः सत्त्ववचनानामसत्त्ववचनानां चाव्ययसंज्ञा-स्वस्ति वाचयति, स्वः प्रश्येति । क्रियासम्बन्धेऽनेकशक्तिदर्शनात् सत्त्ववाचित्वम् । अथ "प्राग्रीश्वरान्निपाताः स्वरादीनि चादयोऽसत्त्वे" इत्येवं सूत्रन्यासः क्रियेत, कः पुनरत्र विशेषस्तत्र वा स्वरादिग्रहणं क्रियेत ? अत्र वा ? किं च "निपात एकाजनाङ्" इति प्रगृह्यसंज्ञा स्वरादीनामप्येकाचां प्रसज्येत-"किमोऽत्","दक्षिणादाच्", "एकाच्च तद्धितः"; केन्प्रभृतयस्तु कृत एकाचस्सन्ति । अथ "चादिरेकाजनाङ्" इति क्रियते तदा चादीनामसत्त्ववचनत्वं विशेषणं न लभ्यते ? नैष दोषः; "चादयोऽसत्त्वे" इत्यत्रासत्त्वाग्रहणं चादीनां पाठविशेषणम्, यथा-"तिङो गोत्रादीनि" इत्यत्र कुत्सनाभीक्ष्ण्यग्रहणं गोत्रादीनाम्, तेन यत्र यत्र चादिग्रहणं तत्र सर्वत्र विशिष्टनामेव ग्रहणम्, तत्रायमप्यर्थः--"उभे संज्ञे न कर्त्तवंये भवतः-अव्ययम्, निपातः" इति । कथम् ? "प्राग्रीश्वरान्निपाताः" इति वा "अव्ययानि" इति वा सूत्रं कर्त्तव्यम्, ततः स्वरादीनि "तद्धितश्चासर्वविभक्तिः" यावद् "अव्ययीभावश्च" इति, ततः "चादयोऽसत्त्वे" इत्यारभ्य यावद् "अधिरीश्वरे", विभाषा कृञि" इति; तत्र यस्मिन् प्रदेशे निपातग्रहणं तत्र चादिग्रहणमस्तु, अव्ययप्रदेशेष्वव्ययग्रहणं निपातग्रहणं चेति, तत्तु तथा न कृतमित्येव । अव्ययमित्यन्वर्थसंज्ञति । सदृशम् इत्यादि । श्रुतिश्चेयमाथर्वणी प्रणवविद्यायां त्रिषु लिङ्गेषु स्त्रीपुन्नपुंसकेषु सदृशम्, लिङ्गविशेषप्रतिपादनेऽसामर्थ्यात् । विभक्तिष्विति । कारकेषु वचनेष्विति । एकत्वादिसंख्यासु, अव्ययीभावस्य शक्तिल्रिङ्गविशेषयोगेऽपि वचनादव्ययत्वम्"यस्मान्न व्येति नाना न गच्छति यत्त्वधर्मान्न गृह्णातीत्यर्थस्तत्तस्मादव्ययम्" इति । यच्छब्दरूपं न व्येति तदव्ययमिति वा । किं पुनः प्रयोजनमन्वर्थसंज्ञाकरणे ? उपसर्ज्जनप्रतिषेधः-अत्युच्चैसौ, अत्युच्चैस इति । अतिक्रान्तप्रधानस्यात्र सत्त्वधर्मपरिग्रहात् उच्चैःशब्दः पठ्यते, कः प्रसङ्गस्तदन्तस्य ? एतज् ज्ञापयत्याचार्यः--"अस्त्यव्ययसंज्ञायां तदन्तविधिः" इति । तेन परमस्वः, परमोच्चैरिति स्वरादिप्राधान्ये तदन्तस्यापि भवति । कुशब्दः स्वरादिषु पठितव्योऽव्ययसंज्ञार्थः ।।
तद्धितश्चासर्वविभक्तिः ।। 1.1.38 ।।
इह यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधस्तथापि केवलस्य तद्धितस्य संज्ञायाः प्रयोजनाभावात् तदन्तविधिर्विज्ञायत इत्याह-तद्धितान्तः शब्द इति । अकच् तावत्प्रातिपदिकस्य सुबन्तस्य वा विधीयते । "अव्ययादाप्सुपः" इत्यत्राप्यव्ययाद्विहितस्य सुपो लुक्, न तु परस्य; अत्युच्चैसावित्यादावपि प्रसङ्गात् । "तत्पुरुषे तुल्यार्थ","नाव्ययदिक्छब्द","खित्यनव्ययस्य" इत्यत्रापि पूर्वपदस्याव्ययस्य ग्रहणम् । सर्वा विभक्तिर्यस्य सम्बन्धिनी न भवति सोऽसर्वविभक्तिः ।
किं पुनरिदं तद्धितस्य वशेषणम् ? आहोस्वित्तदान्तस्य ? कथञ्चेदं तद्धितस्य विशेषणम्, कथं वा तदन्तस्य ? यदि सर्वा विभक्तिर्यस्य सम्बन्धिनी न भवति--कारणत्वेन यस्योत्पत्तौ सर्वा विभक्तिः कारणं न भवति, यथा "पञ्चम्यास्तसिल्" इत्यादाविति कार्यमन्यपदार्थः, तदा तद्धितस्य विशेषणं भवति--तद्धितस्यैव ह्युत्पत्तिर्न तदन्तस्य । एवंविशिष्टेन तद्धितेन तदन्तविधौ-तादृशतद्धितान्तोऽव्ययमित्यर्थो भवति । अथ तु सर्वा विभक्तिर्यस्य कार्यत्वेन सम्बन्धिनी न भवति-यस्मात्सर्वा विभक्तिर्नोत्पद्यत इति कारणमन्यपदार्थः, तदा तदन्तसाय विशेषणं भवति । न हि तद्धितमात्राद्विभक्त्युित्पत्तिप्रसङ्गः । तत्र पूर्वस्मिन् पक्षे विना, नानेत्यत्र न स्याद्; न हि विनञ्भ्यमामित्यत्र प्रतिनियता काचिद्विभक्तिराश्रीयत इति सर्वविभक्त्यन्ताभ्यां विनञ्भ्यां नानाञौ भवतः । अव्ययेभ्यस्तु निः

सङ्ख्येभ्यः सामान्यविहिताः स्वादयो विद्यन्त एवेति पक्षे येऽपि भवदादिप्रयोगे तसिलादयो विधीयन्त--"इतराभ्योषऽपि दृश्यन्त" इति, तेऽपि स भवाँस्ततो भवांस्तं भवन्तं ततो भवन्तमित्यादिसर्वविभक्त्यन्तेभ्य उत्पद्यन्त इति तत्रापि न स्यात् । "तस्यापत्यम्""तत्र भवः" इत्यादौ च षष्ठ्यादिकैकैव विभक्तिर्निमित्तम्, न तु सर्वेतत्यौपगवादावतिप्रसङ्गश्चेति द्वितीयं पक्षमाश्रित्याह--यस्मादित्यादि । तत इत्यादौ "प्राग्दिशो विभक्तिः" इति तसिलादीनां विभक्तित्वात्त्यदाद्यत्वम् ।

कथं पुनरेतेऽसर्वविभक्तयः; यावता यत्र च सङ्ख्या सम्भवति तत्रायमुपदेशाः, अव्ययेभ्यस्तु निःसङ्ख्येभ्य इत्यस्मिन्पक्षे "अव्ययादाप्सुपः" इति ज्ञापकाश्रयणे च सर्वविभक्तयः; अथ सङ्ख्याकर्मादयश्च स्वादीनामर्थास्तेन सहास्यैकवाक्यतेति पक्षः, ततोऽविभक्तित्वमेवासत्त्वभूतार्थानामापद्येत ? उच्यते; "द्व्येकयोर्द्विवचनैकवचने" इत्यत्रैकस्मिन्नित्यपनीय "एकवचनम्" इति पृथक् सूत्रं कर्त्तव्यम्, ततः "द्विबह्वोर्द्विवचनबहुवचने" इति, ततश्चैकवचनमेकस्मिन्नपि भविष्यति, सङ्ख्याकर्माद्यभावे चाप्राप्तप्रापणार्थत्वादेकवचनमित्यस्य सूत्रस्य, द्वित्वबहुत्वयोस्तु प्राप्तं द्विवचनबहुवचनाभ्यां बाध्यते, ततश्चासत्त्ववचनेभ्योऽपि सप्तानां विभक्तीनां सप्ताप्येकवचनानि भवन्ति । अव्ययीभावादप्येवमेव, तावतापि नाव्ययीभावात् "तृतीयासप्तम्योः" इत्यस्योपपत्तेः, तदिदमुच्यते- "एकवचनमुत्सर्गतः करिष्यते" इति । एवं स्थिते यस्मात्सर्वा विभक्तिर्नोत्पद्यत इत्येकवचनेन विग्रहोऽवयवकार्त्स्न्यवृत्तिः सर्वशब्दो यस्य त्रिकस्य विभक्तिशंज्ञा विहिता तन्निरवशेषं यस्मान्नोत्पद्यते, किन्तु तदेकदेश एवत्यर्थस्तदाह--यस्मान् सर्वा विभक्तिरिति । यदि तु सर्वा विभक्तय इति बहुवचनेन विगृह्येत ततः सर्वान्नीन इतिवत् प्रकार कार्त्स्न्यऽपि सर्वशब्दस्य संभवाद् एकवचनमात्रोत्पत्तावपि सर्वा विभक्तयः, सप्ताप्येकवचनान्यसत्त्ववचनेभ्य उत्पद्यन्त इति न स्यादसर्वविभक्तित्वमिति भावः । इह "तेनैक दिक्""तसिश्च" इत्येकस्मिन्नर्थे विधीयमानयोरप्यण्तसोरण् द्रव्यप्रधानः, तसिस्तु द्रव्योपसर्जनतृतीयार्थप्रधान इति तस्यासत्त्ववचनता ।

तद्धित इति किमिति । असर्वविभक्तिरव्ययमित्येवास्तु, मा भूत्सर्वमेय प्रकरणं ये हि स्वरादयः, ये च निपाताः, ये च कृन्मेजन्ताः, ये च क्त्वादयः, यश्चाव्ययीभावः, सर्वे तेऽसर्वविभक्तय इति प्रश्नः । एकः द्वौ, बहव इति । एतेभ्योऽपि सप्तस्वपि विभक्तिष्वेकैकमेव वचनमुत्पद्यत इति स्यादतिप्रसङ्ग इति कर्त्तव्यं तद्धितग्रहणम् । तस्मिंश्च कृते प्रकरणमपि कर्त्तव्यमिति भावः । विशत्यादयस्तु कृतैकशेषा द्विवचनबहुवचनान्ता अपि भवन्तीति नासर्वविभक्तयाः । एवं द्वयत्रयोभयशब्दा अयजन्ताः । एवमपि गोदयोरदूरभवो ग्रामः "अदूरभवश्च" इत्यणः "वरणादिभ्यश्च" इति लुपि युक्तवद्भावात् सर्वासु विभक्तिषु द्विवचनस्योत्पत्तेरस्त्यतिप्रसङ्गः । स्यादयं पर्यनुयोगः--यदि तद्धितान्तो गोदशब्दः,वयं तु "लुब्योगाप्रख्यानाद्" "योगप्रमाणे च तदभावे दर्शनं स्याद" इत्यधीयाना नैवं पर्यनुयोज्याः; एवमपि "सङ्खायास्संज्ञासङ्घसूत्राध्ययनेषु" संज्ञायां स्वार्थ उत्पाद्यः, पञ्चैव पञ्चकाः शकुनयः--अत्र प्राप्नोति, पचतिरूपं पचतिकल्पमित्यादौ च एकवचनमेवोत्पद्यत इति स्यादेवातिप्रसङ्गः । तस्मात्तद्धितानां पाठ एवाश्रयणीयः, तदाह--"सिद्धं तु पाठात्तसिलादयः प्राक् पाशपः, शस्प्रभृतयः प्राक् समासान्तेभयः, मान्तः कृत्वोर्थाः, तसिवती नानाञाविति" ।।

कृन्मेजन्तः ।। 1.1.39 ।।

अत्रापि पूर्ववत्तदन्तस्य संज्ञेति स्थिते मेजन्तग्रहणं कदन्तस्य विशेषणम्--"कृदन्तम्मेजन्तमब्ययम्" इति । कृत एव वा-कृद्यो मेजन्तस्तदन्तमव्यमिति । तत्राद्यो पक्षे प्रतामौ प्रतामः, लवमाचष्टे इति णिचि क्विपि णिलोपे ऊठि "एत्येधत्यूठ्सु" इति वृद्धौ लौरत्रापि प्राप्नोति, भवति ह्योतत् प्रत्ययलक्षणेन कृदन्तम्, मेजन्तं च श्रूयत इतीमं दोषं दृष्ट्वा द्वितीयं पक्षमाश्रित्याह--कृद्य इति । नन्वत्रापि कारयाञ्चकार--आमन्तस्य न प्राप्नोति, पूर्वत्र तु लिटः कृत्त्वात्सिद्धम्, अत्रापि स्वरादिष्वामिति पाठात् सिद्धम् । अथापि तत्र तद्धितस्य पाठः; एवमपि कृदन्तत्वादुत्पन्नानां सुपाम् "आमः" इति लुग्भविष्यति, "लेः" इति हि तत्र नानुवर्त्तते ।

स्वादुङ्कारमिति । "स्वादुमि णमुल्" स्वादुमित्यर्थग्रहणात्सम्पन्नङ्कारमित्यपि भवति, स्वादुमिति । निपातनात्पूर्वपदस्य मान्तत्वम् । "येन विधिस्तदन्तस्य" इत्येव सिद्धेरपार्थकमन्तग्रहणं तत्राह-अन्तग्रहणमित्यादि । नित्ययोगे बहुव्रीहिविज्ञानादौपदेशिकप्रतिपत्तिः । आधय इति । आङ्पूर्वाद्धाञः "उपसर्गे घोः किः",चतुर्थ्येकवचने "घेर्ङिति" आधये, भवत्ययं संप्रत्येजन्तः, नोपदेशे । एवं चिकीर्षवे-करोतेः सन्नन्तात् "सनाशंसभिक्ष उः ", कुम्भकारशब्दः कर्मण्यणन्तः "बहुवचने झल्येत्", अत्राव्ययसंज्ञायाम् "अव्ययात्" इति लुक् स्यात्, सन्निपातपरिभाषयाऽप्येतत्सिद्धम्, तथा लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । अन्तग्रहणं तु यत्नान्तरं द्रष्टव्यम् ।।

अव्ययीभावश्च ।। 1.1.41 ।।

लुङ्मुखस्वरोपचारा इति । अत्र मखस्वरोपचारौ निवर्त्यपानतया प्रयोजनम्, मशकार्थो धूम इतिवत् । लुक् प्रवर्त्यमानतया । उपाग्नीति । अव्ययादिति लुक् । पूर्वपदप्रकृतित्वर एवेति । समासस्वरेणान्तोदात्तत्वम् । उपपयः काम इति । "शीलिकामिभिक्षाचरिभ्यो णः" कर्मणि घञन्तेन वा बहुव्रीहिः, अत्र मुखस्वरनिवृत्तिरेव साक्षात्प्रयोजनम्, लुक् तु "नाव्ययीभावादतोऽम्" इति विशेषप्रतिषेधात् सिद्धः, "अतः कृकमिकंस" इत्यत्र च "अनुत्तरपदस्थस्य" इति वर्तते । नन्वन्यदप्यव्ययकार्यं सम्भवति-उपाग्निकमित्यकच्, उपकुम्भमन्य इति मुम्प्रतिषेधः, उपकुम्भीभूत इति "अस्य च्वौ" इतीत्वस्योपसङ्ख्यानिकः प्रतिषेधः, उपाग्न्यधीयानेति "सुबामन्त्रिते" इत्यस्यौपसंख्यानिकः प्रतिषेधः, तत्कुतोऽयं कार्यनियम इत्यत आह - सर्वमिदमित्यादि । इह चेत्यादिना "न लोकाव्यय" इत्यत्र यद्वक्ष्यति --"अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः" इति, तस्यावक्तव्यतां दर्शयति ।।

शि सर्वनामस्थानम् ।। 1.1.42 ।।

कुण्डानीति । "जशशसोझ शिः" "सर्वनामस्थाने" इति वर्तमाने "नपुंसकस्य झलचः" इति नुम् । "सर्वनामस्थाने चासम्बुद्धौ" इति दीर्घो यद्यपि "जसः शीः" "नपुंसकाच्च" इति विहितस्य शीशब्दस्य शब्दलूपापेक्षया नपुंसक ह्रस्वत्वे "शि" इति रूपं सम्भवति, तथापि लाक्षणिकत्वान्न तस्य ग्रहणम्, सर्वनामस्थानप्रदेशेषु शिग्रहणे सुटो ग्रहणं न स्यात् । शिसुटोरिति वचने नपुंसकसुटोऽपि ग्रहणं प्राप्नोति, अतः संज्ञा तावत्कर्त्तव्या । किमर्थं तु महती क्रियते ? के चिदाहुः-सर्वनाम तिष्ठत्यस्मिन्निति सर्वनामस्ओथानम्, नाम प्रतिपदिकम्, सर्वशब्दोऽवयवकात्र्स्यवचनः सर्वावयवयुक्तं यत्र नाम तिष्ठतीत्यर्थः, तेनान्यत्र न्यूनं नाम तिष्ठतीत्यर्थो गम्यते, किं सिद्धं भवति ? "उपेयुषः" इत्यादौ सम्प्रसारणे कृते पूर्वकृतस्येटो निवृत्तिः सिद्धा भवति; अन्यथा निवृत्तिकारणाभावात् अवतिष्ठेतेति । एवं तु कस्मिन् प्रातिपदिके किं न्यूनमिति न ज्ञायेत ! तस्मात्पूर्वाचार्यानुपालब्धुमेषा महती संज्ञा प्रणीता ।।
सुडनपुंसकस्य ।। 1.1.43 ।।
सुडिति पञ्च वचनानीति । अनेनौटष्टकारेण प्रत्याहारः, न टाशब्दस्येति दर्शयति । आदिरन्त्येनेत्यत्रान्त्यत्वप्रयुक्ता यस्येत्संज्ञा तेन प्रत्याहारः । लकारे त्वकारस्येत्संज्ञाविधानसामर्थ्यात् प्रत्याहार इति भावः । नपुंसकादन्यत्रेति । अनेन पूर्युदासतां दर्शयति । प्रज्यप्रतिषेधे हि कुण्डानि तिष्ठन्तीति जसः शौ, पूर्वेण या प्राप्तिस्तस्या अपि प्रतिषेधशङ्कायाम् "अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा" इति परिहर्त्तव्यं स्याद्, असमर्थसमासश्चाश्रयणीयः स्यात् । नपुंसके न विधिरिति । स्त्रीपुंससम्बन्धिनः सुट उपादानाद् । न प्रतिषेध इति । विधिप्रधानत्वात् पर्युदासस्य । तेनेत्यादि । यत एवं नपुंसकेनास्य व्यापारः तेन जसो यः शिस्तस्य पूर्वेण संज्ञा भवतीति । सामनी इति । नपुंसकाच्चेति शीभावः । "विभाषा ङिश्योः" इत्यल्लोपाभावे दीर्घो न भवति ।।
न-वेति विभाषा ।। 1.1.44 ।।
नवाशब्दोऽयमेकनिपातोऽप्यस्ति प्रतिषेधवावी, नवोक्तार्थत्वादिति यता, तस्य ग्रहणे "विभाषादिक्समासे" इति प्रकृते " न बहुव्रीहौ" इति प्रतिषेधोऽनर्थकः स्याद् । विभाषाप्रदेशेषु च न शब्द एवोपादेयः स्याद् । अत एव संख्यावाचिनो नकारान्तस्याप्यग्रहणम् । प्रत्यग्रस्त्रीलिङ्गवचनोऽपि न गृह्यते; प्रदेशेष्वसम्भवात् । न हि "विभाषा श्वेः" इत्यादौ विधेयस्य नवपुराण्त्वं स्त्रीलिङ्गता वा सम्भवति । तस्मान्निपातसमुदायोऽयमित्याह-नेति । प्रतिषेध इत्यादि । तयोः प्रतिषेधविकल्पयोरित्यनेनार्थयोरेषा संज्ञेति दर्शतम् । ननु च "स्व रूपं शब्दस्य" इति वचनान्नवाशब्दयोरेव ग्रहणं युक्तम्, तत्राह-इतिकरण इत्यादि । कर्माणि ल्युट्, इतिश्चासौ करणश्च सोऽर्थस्य संज्ञिनो निर्देशो यथा स्यादित्येवमर्थः । इतिशब्दो हि पदार्थविपर्यासकृत् । तत्र लोके बाह्यार्थप्रधानेषु शब्देष्वितिशब्दः प्रयुक्तः, अर्थपदार्थकत्वात् प्रच्याव्य शब्दपदार्थकत्वे व्यवस्थापयति गौरित्ययमाहेति । इह तु व्याकरणे "स्वं रूपम्" इति वचनात् स्वरूपपदार्थः । ततश्च नवाशब्दाभ्यां परत्र प्रयुक्त इति शब्दस्तौ स्वरूपपदार्थकत्वात्प्रच्याव्यार्थपदार्थकत्वे व्यावस्थापयति । तस्मादर्थयोरेव संज्ञा । विभाषाप्रदेशेषु इत्यादिना प्रतिषेधविकल्पयोरेकस्मिन्नेव योगे सहोपस्थापनं विषयभेदेनेति तं दर्शयति । तथा सति विषयभेदो दुर्ज्ञानः स्यादिति भावः । तत्रेत्यादिना पूर्वं प्रतिषेधः प्रवर्तते, पञ्चाद्विकल्प इति दर्शयति । यदि तु पूर्वं विकल्पः प्रवर्तेत पश्चात्प्रतिषेधः, ततो विकल्पप्रवृत्तिरनर्थिकैव स्यात् । आनुपूर्वी च संज्ञाविधिवाक्ये श्रुतैव प्रदेशवाक्येष्वप्याश्रयितुं युक्ता । उभयत्रविभाषाः प्रयोजयन्तीति । प्राप्तविभाषायामप्राप्तविभाषायां च संज्ञाकरणस्यानुपयोगात् । तथा हि--प्राप्तविभाषायां तावद् "विभाषोपपदेन प्रतीयमाने" इति "स्वरितञितः" इत्यादिना नित्यमात्मनेपदे प्राप्ते विभाषा विधीयते । विभाषाशब्दश्चायं "वा" "अन्यतरस्याम्" इत्यादिवद्विकल्पवाचित्वेन प्रसिद्धः । तेन भावाभावयोः प्रतिपादितयोर्भावांशस्य प्राप्तत्वादभावांशपरता विज्ञायते, भावांशः स्थित एव । अप्राप्तविभाषायामपि "विभाषोर्णोः" इत्यभावांशस्य प्राप्तत्वाद् भावांशपरता विज्ञायते "विभाषा श्वेः" इत्यत्र तु यदि विधिमुखेन विभाषा श्रुतिः प्रवर्तते, पित्स्वेव संप्रसारणं विभाषा स्यात्, कित्सु तु यजादित्वान्नित्यमेव स्यात् । अथ प्रतिषेधमुखेन प्रवृत्तिस्तदा कित्स्वेन विकल्पः स्यान्न पित्सु । न च शक्यं वक्तुम्--पित्सु विधिमुखेन प्रवर्त्तते, कित्सु प्रतिषेधमुखेनेति; एकत्वाद्वाक्यस्य तस्य चान्यतरविकल्प एवोपक्षीणत्वात् । संज्ञाकरणे तु पूर्वं प्रतिषेधे कित्सु प्रवृत्ते किदकिदाख्यो लिट् सर्व एव समीकृतो भवति; सर्वस्यासम्प्रसारणनिमित्तत्वात् । ततो विकल्पः सर्वत्र विधिमुखेन पक्षे सम्प्रसारणं सम्पादयति । एतच्च--"आकृतौ पदार्थे समुदाये सकृल्लक्षणं प्रवर्तते" इति दर्शने प्रयोजनम् । यदा तु प्रतिलक्ष्यं "विभाषा श्वेः" इत्यस्य व्यापारः, तदा क्वचिद्विधिमुखेन क्विचितप्रतिषेधमुखेन प्रवर्तत इति संज्ञाकरणमन्तरेणापीष्टं सिद्ध्यति । तता च "ह्वक्रोरन्यतरस्याम्" इत्यादावन्यतरस्यांग्रहणे वा ग्रहणे चोभयत्रविभाषास्विष्टसिद्धः । सूत्रारम्भे तु संज्ञाप्यर्थः, विभाषेत्यर्थः । संज्ञा नवार्थयोरिति व्याख्येयम् । शुशावेति । श्वयतेर्लिटि तिपो णलि सम्प्रसारणे वृद्ध्यावादेशौ ।।
इग्यणः सम्प्रसारणम् ।। 1.1.45 ।।
यणः स्थान इति । कथं पुनरनुवादे स्थानसम्बन्धो लभ्यते ? "षष्ठी स्थानेयोगा" इत्यत्राधिकारात् । भूत इति । कार्यान्तरार्थमनूद्यमानो भूतः, विधेयस्तु भावती, तत्र च संज्ञिनो भावित्वात् संज्ञापि भविन्येव । यथा-अस्य सूत्रस्य शाटकं वयेति । "वचिस्वपियजादीनां किति" तद्भवति यस्य भूतस्य सम्प्रसारणसंज्ञा भवतीति । इष्टम्, उप्तमिति । "वचिस्वपि" इत्यादिना सम्प्रसारणम् । गृहीतमिति । "ग्रहिज्या" इत्यादिना । "ग्रहोऽलिटि दीर्घः" । केचिदित्यादि । एवंवदतां भाविनी संज्ञा नाश्रयणीया, स्थानेयोगश्च लभ्यते । "इग्यणः" इत्यत्र भवतीत्यध्याहारात्पूर्वसूत्राच्चेतिकरणानुवृत्तेर्यणः, स्थाने इग्भवतीति योऽयं वाक्यार्थ इत्यर्थो लभ्यते । कथं पुनरर्थद्वयमेकस्य सूत्रस्य भवति ? तन्त्रेण,आवृत्त्या वा । अस्य च लिङ्गं विभक्तिविशेषनिर्देशः । यदयं "ष्यङः सम्प्रसारणम्" इत्यादौ भाव्यमानविभक्त्या निर्देशां करोति, ततो ज्ञापयति--वाक्यार्थः संज्ञेति । न हि तत्र वर्णस्य सम्भवः । "सम्प्रसारणस्य" इत्यादौ तु भूतविभक्त्या निर्देशात् ज्ञायते --वर्णः संज्ञीति । न हि तत्र वाक्यार्थः सम्भवति । तत्रेत्यादिना द्वयोरर्थयोर्विषयविभागेनोपस्थानं दर्शयति । अदुहितरामिति । दुहेर्लङि कर्मकर्त्तरि उत्तमैकवचने इटि "न दुहस्नुनमाम्" इति यकि प्रतिषिद्धे शब्लुकि अदुहि इति स्थिते "तिङश्च" इति तरपि

"किमेत्तिङव्ययघाद्" इत्याम् । तत्र लकारस्य यणः स्थाने इङ्विहित इति संप्रसारणसंज्ञायाम् "हलः" इति दीर्घत्वं प्राप्नोतीति चोद्यमपाकरोति । सङ्ख्यातानुदेशादिति । तरप उपन्यासोऽङ्गसंज्ञार्थः । सङ्ख्यासाम्यात् संख्यातानुदेशे सति यकारस्थानिकस्येकारस्य संज्ञया भाव्यम्, अयं तु लकारस्थानिकः । द्युभ्यामित्यत्र "दिव उत्" इत्युत्वे यणादेशे "हलः" इति दीर्घत्वं प्राप्तंतपरकरणान्न भवति । अक्षद्यूः, अक्षद्युवौ, अक्षद्युव इत्यादावूठः संप्रसारणसंज्ञायाम् "संप्रसारणाच्च" इति पूर्वरूपत्वं प्राप्तम् "वार्णादाङ्गं बलीयः" इति उवङा बाध्यते ।।

आद्यन्तौ टकितो ।। 1.1.46 ।।

अत्र द्वौ पक्षौ सम्भवतः-संज्ञा स्यात्, परिभाषा वेति । तत्र संज्ञापक्षेऽयमर्थः-टकिताविति कर्मधारयः, इत्संज्ञकौ टकारककारौ आद्यन्तयौः संज्ञेति । तत्रेडित्यत्राद्यर्थेन टकारेण बहुव्रीहौ इकारादिः शब्दो गृहीत आदेशो विधीयमानस्तव्यस्य स्थानेऽन्तरतम इतव्यो भवतीति सिद्धमिष्टम् । एवं षुक्यन्तवचनेन ककारेण बहुव्रीहौ षकारान्तो गृहीत आदेशो भियो भीष् भवतीति सिद्धम् ।

नन्वस्मिन्पक्षे संज्ञा संज्ञिप्रत्यायनार्था, संज्ञिनं प्रत्याय्य स्वयमेव निवर्तिष्यत इति किमिद्ग्रहणेन, टकावित्येवास्तु ? उच्यते; इत्संज्ञकत्वेन देशविशेषो लक्ष्यते, तेनेत्संज्ञकस्य यो देशस्तद्देशावस्थितौ टकौ संज्ञे भवत इति आलजाटचौ "ठस्येकः" इत्यादौ टकौ संज्ञे न भवतः । अस्मिन्पक्षे दोषः, "लुङ्लङ्लृङ्क्ष्वड्उदात्तः" इत्यडित्यकारादेरादेशस्य विधानात्तस्यैवोदात्तत्वमलोऽन्त्यस्य स्याद्, नाकारस्य ? नैष दोषः; "अड्उदात्तः" इति त्रिपदो बहुव्रीहिः- उदात्तोऽकार आदिरस्येति । विशेषणस्याप्युदात्तस्य सौत्रः परिनिपातः । एवमपि --"आडजादीनाम्" इत्यत्रोदात्तग्रहणमेवानुवर्त्तत इति बहुव्रीहेरसम्भवाद्दोषः, तस्मात्परिभाषापक्षमाश्रित्याह-"आदिष्टिद्भवतीति । परेण परिभाषाप्रकरणेन साहचर्यादिति भावः । यद्वा-"षष्ठी स्थानेयोगा" इत्यत्रेदमनुवर्त्यम्, अत एवाह-षष्ठीनिर्द्दिष्टस्येति । तेन "चरेष्टः","आतोऽनुपसर्गे कः" इत्यादयः प्रत्यया आद्यन्तभूता न भवन्ति । एवमपि "गापोष्टक्" "व्रीहिशाल्योर्ढक्" इत्यत्र प्रसङ्गः, तत्र टकष्टित्त्वकित्त्वयोगे परत्वादन्त्यः स्यात्, नैष दोषः; "पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते न परान्" इति । एवमयं स्थानेयोगं बाधते, न प्रत्ययपरत्वम् । भीषयत इति । "ञिभी भये", णिच् । "भियो हेतुभये षुक्" "भीस्म्योर्हेतुभये" ।।

मिदचोऽन्त्यात् परः ।। 1.1.47 ।।

"अचः" इति निर्धारणे षष्ठी, जातावेकवचनमित्याह--अचामित्यादि । अत्रापि जातौ बहुवचनम् । यदि पुनरन्त्यादित्यानया समानाधिकरणा पञ्चमी स्यात्, ततो हरन्तेष्वस्याः प्रवृत्तिर्न स्यात् । ततश्च "नुपंसकस्य झलचः" इति नुमिहैवान्त्यात्परः स्यात् कुण्डानीति, यशांसीत्यत्र त्वलोऽन्त्यस्य स्यात्; एवं "शे मुचादीनाम्" इत्यादौ । ततश्च तेषु मित्त्वमनर्थकं स्यादिति भावः । समानजातीयस्यैव निर्द्धारणं भवतीत्यन्त्योऽप्यजेव विज्ञायत इत्याह-अन्त्यादचः पर इति । पुरस्तादपवादन्यायेन स्थानेयोगत्वस्यैवायमपवादो युक्त इत्या शङ्क्याह--रथानेयोगप्रत्ययपरत्वस्यापवाद इति । स्थानेयोगश्च प्रत्ययपरत्वं चेति समाहारे द्वन्द्वः । "तृणहः "इति निर्देशात् श्नमो मकारो न श्रवणार्थः, अतो मित्करणसामर्थ्यात् प्रत्ययपरत्वस्याप्ययमपवादौ युक्त इति भावः । मस्जेरित्यादि । "मस्जिनशोर्झलि" तइति नुम् यद्यन्त्यादचः परः स्यात् ततो निष्ठायां मन्स्ज इति स्थिते "स्कोस्संयोगाद्योरन्ते च " इति सलोपो न स्यात् । वहूनां समुदाये समुदायस्यैका संयोगसंज्ञा न द्वयोर्द्वयोरित्यस्मिन् पक्षे सत्यपि वा सलोपे तस्यासिद्धत्वादनुपधानकार इति "अनिदिताम्" इत्यनुषङ्गलोपो न स्यात् । नकारस्योपधायाः " अनुषङ्गः" इति पूर्वाचार्याणां संज्ञा । तस्माज्जकारात्पूर्वो नुम् कर्त्तव्य इत्यर्थः ।

मग्न इति । "ओदितश्च" इति निष्ठानत्वम्, तस्यासिद्धत्वात्कुत्वम् । अत्र "आद्यन्तौ टकितौ" इत्यतः "अन्त" इत्यनुवृत्तौ पूर्वस्य सङ्घातस्य मिदन्तावयवो भवति । "आदि" इत्यनुवृत्तौ तत्र सन्निहितस्य परस्यादिर्भवति । अथोभयं निवृत्तं ततोऽभक्त इति त्रयः पक्षाः । तत्राभक्ते--ताता पिण्डानामिति नलोपो न स्यात् । तच्छब्दात् "जश्शसोः शिः" तानि "शेश्छन्दसि बहुलम्" इति शेर्लुक् । वहंलिहः, अर्भ्रलिहः-"वहाभ्रे लिहः" इति खशि "अरुर्द्विषदजन्तस्य मुम" इति मुम् । अस्यापदान्तत्वादनुस्वारो न स्यात् । त्रपुणी इत्यत्र परत्वान्नित्यत्वाच्च नुमि कृते तेन व्यवधानादौङः शीभावो न स्यात् । अथ परादिः-त्रपुणे, "घेर्ङिति" इति गुणः प्राप्नोति, अतिसखीनि-"सख्युरसम्बुद्धौ" इति णिद्वद्भावे "अचो ञ्णिति" इति वृद्धिः प्राप्नोति । त्रपुणि, "अच्च घेः", शुचीनि, "नोपधायाः" इति दीर्घत्वं न प्राप्नोति । ताता पिण्डानामिति नलोपः वहंलिह इत्यनुस्वारः । तस्मात्पूर्वान्त एवायं मिदेषितव्यः ।।

एच इग्घ्रस्वादेशे ।। 1.1.48 ।।

परिभाषेयं स्थानिनियमार्था । "ह्रस्वो नपुंसके" इत्यादाववुपतिष्ठते । इहैचां पूर्वो भागो मात्रात्मकः कण्ठ्योऽकारसदृशाः । एदैतोरुत्तरस्तालब्य इकारसदृशः । ओदौतोरोष्ठ्य उकारसदृशः । एवमवयवसमाहारात्मनामेचां ह्रस्वशासनेषु समुदायान्तरतमस्याभावाद् अवयवान्तरतमो ह्रस्वो भवन् कदाचिदकारः स्यात्, कदाचिदिकारोकारौ; मा कदाचिदकारो भूदित्येवमर्थमिदमारभ्यते, तदाह--इगेव ह्रस्वो भवतीति । यदि त्वयं विधिः स्यात्, तदा ह्रस्वादेश इति विषयोपलक्षणमेतत्स्याद्--यस्मिन्विषय एचो ह्रस्वादेशप्रसङ्गस्त त्रेग्भवतीति । ततश्च दीर्घाणां स्थाने दीर्घा एवकः स्युः सवर्णग्रहणात्, नैषदोषः;"भाव्यमानोऽण् सर्वर्णान्न गृह्णाति" "भाव्यमानोऽप्यकारः सवर्णान् गृह्णाति" "दिव उत्" इतितपरकरणाद् अमूभ्यामितिवत्; तथैचामिकां च साम्यात् संख्यातानुदेशोऽपि स्याद्, आदेशग्रहणं चानर्थकं स्यात् । तत आदेशग्रहणसामर्थ्याद् ह्रस्वादेशे ह्रस्वदेशनकाल इक्कर्तव्यः, ह्रस्वादेशं कुर्वन्निकं कुर्यादित्यर्थः । यद्वा -आदिश्यत इत्यादेशः, ह्रक्वश्चासावादेशश्च ह्रस्वादेशः । निर्द्धारणे सप्तमी, जातावेकवचनम् । आदिश्यमानेषु ह्रस्वेषु मध्ये इगेव ह्रस्वो भवतीति सर्वथा नियमरूपेणास्य प्रवृत्तिः । प्राप्तिपूर्वकश्च नियम इति ये प्राप्ता अन्तरतमास्तेष्वेव नियमः । न च ऋकारलृकारौ प्राप्ताविति कुतो यथासङ्ख्यम् ? कुतो दीर्घप्रसङ्गः ? एवं चेणित्येव सिद्धे इग्ग्रहणं परेण मा भूदिति । अतिरि । अतिनु । रायमतिक्रान्तं नावमतिक्रान्तं ब्राह्मणकुलमिति प्रदिसमासे नपुंसकह्रस्वत्वम् । उपग्विति । अव्ययीभावः । रैशब्दश्छन्दस्येवेति भाष्यम् । एकारस्याप्रसिद्धत्वादुदाहरणं न प्रदर्शितम् । हेशब्दमतिक्रान्तं

ब्राह्मणकुलमतिहि । अतिखट्व इति । उपसर्जनह्रस्वः । देश्वदेत्तेति । आमन्त्रिताद्युदात्तत्वम् । देवद3त्त । "गुरोरनृत" इत्यादिना प्लुतः ।।
षष्ठी स्थानेयोगा । योगनियमार्थेति । यद्यपि षष्ठी स्थानेयोगैवेत्यस्यां वचनव्यक्तौ यत एवकारस्ततोऽन्यत्रावधारणमिति षष्ठीनियमः श्रुत्या प्रतीयते तथापि स्थाननिमित्तक एव सम्बन्धः षष्ठ्या वाच्य इत्यर्थात्सम्बन्धनियमोऽपि भवतीति भावः । योगे वा नियमो योगनियमः । यदि योगनियमः क्रियते लोकेऽपि नियमः प्राप्नोति, अवयवषष्ठ्यादयश्च न सिद्ध्यन्ति; ततश्च "शास इदङ्हलोः" शासेश्चान्त्यस्य स्यादुपधामात्रस्य च, "ऊदुपधाया गोहः" गोहेश्चान्त्यस्य स्याद् उपधामात्रस्य च, तत्राह-इह शास्त्रे या षष्ठ्यनियतयोगेति । एतेन शास्त्रेऽयं नियमः, शास्त्राङ्गत्वात्परिभाषाणाम्; तत्राप्यनियमप्रसङ्ग इति दर्शयति । अनियमप्रसङ्गे नियमः कर्त्तव्यो लोकवत्, तद्यथा-लोके ग्रामान्तरं जिगमिषुः कश्चित्कञ्चिदाह-"पन्थानं मे भवानुपदिशतु" इति, स यत्र संदेहः, पथि द्वैविध्यात्, तत्रैवोपदिशति-"अमुष्मिन्नवकाशेऽनेन पथा गच्छ" इति; एवमिहापि "अस्तेर्भूः" अस्तेः स्थानेऽनन्तरो वेति संदेहे नियमः क्रियते - स्थानेयोगैवेति । एतदेव स्पष्टयति-स्थानेयोगस्य निमित्तभूत इति । निमित्तभूते, निमित्तत्वं प्राप्ते । निमित्तग्रहणं कुर्वन् "स्थाने" इति निमित्तसप्तमीति दर्शयति । स्थानशब्दोऽयमस्त्यपकर्षवचनः-गोस्थानेऽश्वो बध्यतामिति, अस्ति च निवृत्तिवचनः-श्लेष्मणः स्थाने कटुकमौषधमिति, अस्ति च प्रसङ्गवचनः--दर्भाणां स्थाने शरैः प्रस्तरितव्यमिति, तदिह चरमस्य ग्रहणमित्याह--स्थानशब्दश्चेति । चशब्दोऽवधारणे भिन्नक्रमश्च वाचीत्यस्यानन्तरं द्रष्टव्यः । प्रसङ्गवाच्येवेति कथमिवेत्याह--यथेति । निवृत्तिवाची न गृह्यते, अस्तेरुपदेशसामर्थ्यात् । न ह्यार्धधातुके निवर्त्तितस्य सार्वधातुके श्रवणमुपपद्यते, न हि मथुरायां व्यापादितः स्रुघ्ने जीवति । नाप्यपकर्षवचनः, न ह्यर्थेन नित्यसम्बद्धस्य ततोऽपकर्षः सम्भवति । नाप्यार्द्धधातुकादपकर्षः, न हि नित्ये प्रकृतिप्रत्ययसमुदाये प्रकृतेरपकर्षः सम्भवति । स्वाभाविक एव ह्यस्तेरप्रयोग आर्द्धधातुके भूशब्द स्य च प्रयोगोऽनेन प्रकारेणान्वाख्यायते, अतः प्रसङ्गः एव स्थानम् । प्रसङ्गः प्राप्तिः, अस्तेः प्राप्तौ भूः प्रयोक्तव्य इत्यर्थः । अस्तिनार्थं प्रतिपादयितुमुद्युक्त आर्द्धधातुके विषये भवतिना प्रतिपादयेदिति यावत् । प्रसङ्गसम्बन्धस्येत्यादिना सूत्रार्थमुद्राहरणे दर्शयति । ब्रुव इत्युपलक्षणम् ।
किं पुनर्बहवः षष्ठ्यर्था यत इदमुच्यत इत्यत आह --बहवो हीति । एकशतं षष्ठ्यर्थाः तत्र स्वस्वामिभावादयः शब्दे न सम्भवन्ति, समीपादय एव तु सम्भवन्तीत्यतो यावन्तः शब्दे सम्भवन्तीत्युक्तम् । व्यवहितमपि समीपं भवतीत्यनन्तराद्भेदेनोपादानम् । स्थानेयोगेत्यसमासश्चेद् योगेति स्त्रीलिंगं षष्ठीशब्देन च सामानाधिकरण्यमनुपपन्नम् । समासेऽपि तत्पुरुषश्चेत् तौ च पूर्वोक्तदोषौ, सप्तम्या लुक्प्रसङ्गश्च, बहुव्रीहावपि लुक्प्रसङ्गोऽनिवार्य एवेत्यत आह--षष्ठी स्थानेयोगेत्यादि ।
यद्वा--अयोगेति पदच्छेदः । न विद्यते योगो यस्याः साऽयोगा । तत्र योगः मन्तरेण षष्ठ्या एवाभावाद् विशिष्टो योगो यस्या नास्तीत्यर्थः । एवं च कृत्वासंदेह एवोपस्थानमित्येवं सर्वत्र सिद्धं भवति । अथ वा - योगवती योगा, षष्ठ्याश्चावश्यम्भावी योग इति सामर्थ्याद् भूम्नि मत्वर्थीयोऽकारः, बहवो योगा यस्याः सन्तीति । अस्मिन्नपि पक्षे सन्देहविषय उपस्थानमिति सिद्धम् ।
भाष्ये सूत्रं प्रत्याख्यातम्, कथम् ? "अस्तेर्भूः" इत्यत्र सन्देहः --स्थानेऽनन्तरः, समीप इति ? लक्ष्यानुरोधात् स्थान इति व्याख्यास्यामः । इदं तु षष्ठ्यन्तं यथा स्थानेन युज्येत; अतः षष्ठ्युच्चारिता । तेन "निर्दिश्यमानस्यादेशा भवन्ति" इति सिद्धं भवतीति । तत्र सूत्रे षष्ठ्यन्तं गृह्यते--षष्ठ्यन्तमेव निर्दिश्यमानं स्थानेन युज्यते, न तु प्रतीयमानमिति । तेन "पादः पत्" इत्यस्यायमर्थः--पादन्तस्याङ्गस्य यो।वयवः पाच्छब्दः सूत्रे षष्ठ्या निर्दिष्टः, तस्य पच्छब्द आदेशः, न तु प्रतीयमानस्य तदन्तस्येति ।।
स्थानेऽन्तरतमः ।। 1.1.50 ।।
यद्ययं स्वतन्त्रो विधिः स्याद्, अत्रापि प्राप्नोति - दघि, मघु । अस्तु; न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते, तत्रान्तर्यतः स एव तस्य भविष्यति, न; तस्याप्यन्य इत्यनवस्थाप्रसङ्गात् । प्रयोजनमन्तरेण हि प्रवर्त्तमानमसकृदपि प्रवर्त्तते । ततश्च सर्वस्य निवृत्त्युन्मुखत्वादर्थप्रत्यायनाय प्रयोगो न स्यात् । अपि च बिसं मुसलमित्यादौ यदा समुदायस्य समुदायस्तदा सकारमात्रस्यानादेशत्वात् षत्वाप्रसङ्गेऽपि सकारमात्रस्य सकार इति षत्वं प्राप्नोति । अतः परिभाषाप्रकरणात् परिभाषेयं यत्र स्थानषष्ठी तत्रोपतिष्ठते । तेन विधिवाक्यानामनेन सूत्रेणैकवाक्यत्वाद् विधानकाल एवान्तरतम आदेशो विधीयत इत्याह--स्थाने प्राप्यमाणानामिति । अत्रैवशब्दाप्रयोगात् प्राप्यमाणानामिति वचनच्च विशिष्टविधिरेवायम्, न नियमः । अर्थात्त्वनन्तरतमव्युदास इति दर्शितं भवति । अन्तरतम इत्यस्यार्थमाह--सदृशतम इति । कुतश्चेति । शब्दत्वस्य साधारणत्वात् प्रापतिस्विकविशेषस्य चासाधारणत्वात् प्रश्नः । वतण्डी चासौ युवतिरिति । विग्रहवाक्यम्, इतरदुदाहरणम् । अत्र वतण्डस्यापत्यं स्त्री "वतण्डाच्च" "लुक् स्त्रियाम्" इति यञो लुक्, शार्ङ्गरवादिपाठान्ङीन् । "पोटायुवति" इति समासे सति पुंवत्कर्मधारयेति पुंशब्दो निर्दिश्यमानो वतण्डापत्यवाचिनो वतण्डशब्दस्यतदपत्यवाची वातण्ड्यशब्दो भवति । चकारस्येत्यादि । अल्पप्राणत्वादिकं सवर्णसंज्ञायामुक्तम् । अमुष्मै, अमूभ्यामिति । अदसश्चतुर्थ्येकवचने त्यदाद्यत्वम्, "सर्वनाम्नः स्मै", भ्यामि"सुपि च" इति दीर्घत्वम् । स्थान इति वर्तमान इति । पूर्वसूत्राद् । यद्यपि तत्र समस्तम्, तथापि स्वरितत्वानुषङ्गादनुवृत्तिरिविरुद्धा । पुनः स्थानेग्रहणमिति । प्रकृतेन हि स्थानशब्देन स्थाने प्राप्यमाणानामित्ययमर्थो लभ्यते, अयं तु ताल्वादिस्थानवचनो वाक्यभेदेन सम्बध्यते, स्थानैऽन्तरतमो भवति । यत्रानेकमान्तर्थं तत्र स्थानकृतान्तर्थमाश्रीयत इति वाक्यभेदस्य च तमब्ग्रहणं लिङ्गम् । स्थानकृत एव हि सादृश्ये गृह्यमाणे सादृश्यान्तरपरित्यागात् तमब्ग्रहणं व्यर्थमेव स्यात् । तमब्ग्रहणं किमिति । सुमदृश्यव्यवहारदर्शनात् तमब्ग्रहणमिति भावः । सोष्मणः, सोष्माण इत्यादि । ऊष्मशब्दोऽत्र गुणमात्रवचनः । इतिकरणो हेतौ । यस्मादूष्मगुणयुक्ताः, तस्मादूष्मगुणयुक्तस्य हकारस्य द्वितीयाः प्रसक्ता इत्यर्थः । "शादय ऊष्माणः सस्थानेन द्वितीया हकारेण चतुर्थाः" इति शिक्षा । अत्रोष्मशब्दो गुणवचनः, सस्थानेनेति इत्थंभूतलक्षणे तृतीया । हशषसाः खच्छादीनां द्वितीयानां स्थाना यथा ते ऊष्माण एवं द्वितीया अपीत्यर्थः । फकारस्य सस्थान ऊष्मा नास्ति, तस्मात्तस्य विशेषत ऊष्मत्वं वक्तव्यम् । हकारेण चतुर्था इति, यथाहकार ऊष्मा एवं तेऽपीत्यर्थः । एवं नादवतो नादवन्त

इतीत्यत्रापि हेत्वर्थो योज्यः । इह इष्टम्, उप्तम्--आन्तर्यतोऽर्द्धमात्रस्य व्यञ्जनस्यार्द्धमात्रेक् संप्रसारणं प्राप्नोति; इह च दध्यत्र, कुमार्यत्र, ब्रह्मबन्ध्वर्थम्--मात्रिकद्विमात्रिकत्रिमात्रिकाणामिकां मात्रिकद्विमात्रिकत्रिमात्रिका यणः प्राप्नुवन्त्यान्तर्यतः । नैव लोके वेदेऽर्द्धमात्र इगस्ति, नापि मात्रिको द्विमात्रिको वा यण्, योऽस्ति स भविष्यति । इहान्तरतमशब्दः सप्तम्यन्तोऽपि पठितो भाष्ये । "स्थानेऽन्तरतम उरण् रपरः" इति संहितापाठोऽनित्यः" तत्र पदच्छेदे सप्तम्यन्तमपि सम्भवति । तत्र चायमर्थः-षष्ठीति वर्त्तते,अन्तरतमो य आदेशस्य स्थानी, तत्र षष्ठी, तस्यादेश इति "अकः सवर्णे दीर्घः" इत्यादौ विधीयमानस्य दीर्घस्यान्तरतमे स्थानिन्यक इति षष्ठ्योपसंहारात् सिद्धमिष्ठम् । तथा "वान्तो यि प्रत्यये" इत्यत्रैव इत्यनुवृत्तायाः षष्ठ्या वान्तादेशस्यान्तरतमयोरोदौतोरुपसंहारात् सिद्धम्, इतरथैज्मात्रस्य वान्तादेशः स्यात् । अत्र यक्षे दोषः -"इको यणचि" इति यणो येऽन्तरमा इकस्तत्र षष्ठीति दध्यत्रेत्यादावेव स्यात्, कुमार्थत्रेत्यादौ न स्यात् । तथा "इको गुणवृद्धी" गुणवृद्ध्योर्येऽन्तरतमा इकस्तत्र षष्ठीति इहैव स्याद्-नेता, लविता, नायकः, लावकः; चेता, स्तोता, चायकः, तावक इत्यत्र न स्यात् । एवं दोषवत्त्वादस्य पक्षस्य यथाव्याख्यातमेव साधीयः । "वान्तो यि प्रत्यये" इत्यत्र परिहारं वक्ष्यति ।।

उरण् रपरः ।। 1.1.51 ।।

अत्र चत्वारः पक्षाः सम्भवन्ति--"उः स्थाने रपरोऽण् भवतीत्यनेन रपरत्वविशिष्टोऽण् भाव्यते" इति प्रथमः पक्षः । "उः स्थानेऽणेव भवति,स च रपर इति अणनणप्रसङ्गेऽण् नियम्यते, तस्य च रपत्वं विधीयते" इति द्वितीयः पक्षः । "य उः स्थानेऽण्विधीयते इत्यनूद्य तस्य प्रसङ्गावस्थायामेव रपत्वमात्रं विधीयते" इति चतुर्थः पक्षः । तत्र प्रथमपक्षे--नाप्राप्तेषूदात्तादिषु विधीयमानोऽण् तेषां बाधकः स्यात्, तैरनवरुद्धस्य विषयस्याभावात् । एवं हि तदा वचनव्यक्तिः, षष्ठीनिर्द्दिष्टमात्रस्याभावान्नादेशोऽन्तरतमो भवति, ऋवर्णस्य त्वण् रपर इति, ततश्च कृतिरित्यत्र "ञ्नित्यादिर्नित्यम्" इति प्राप्तमृकारं बाधित्वाण् रपरः स्यात्; प्रकृतमिति शेषनिघातः स्वरितश्च, नॄंः पाहीति पूर्वसवर्णदीर्घत्वमनुनासिकं च बाधित्वाण् रपरः स्यात्, कर्त्ता, कारक इति च गुणवृद्धी बाधित्वाऽण् भवन्नकार एवेति नियमाभावादिकारोकारावपि रपरौ स्याताम्; ये चामी प्रातिपदमुः स्थान आदेशाः "ऋत इद्धातोः" इत्यादयः-तेषु रपरत्वं न स्यात् ।

द्वितीये तु कामं गुणवृद्ध्योर्दोषो न स्यात् । तथा हि -- "सर्वेषु गुणवृद्धिसंज्ञकेषु प्राप्तेषु अणेव भवति" इति नियमादकाराकारावेव गुणवृद्धी रपरे भवत इति सिद्धं कर्त्तेत्यादि, शास्त्रान्तरेण योऽण् प्रसक्तः स एव नियमादपि भवतीतीकारोकारावपि न प्राप्नुतः । ननु "अनुयमप्रसङ्गे नियमः" इति वृद्धावेव स्याद्, अस्ति तत्रानियमप्रसङ्ग इति कृत्वा; गुणस्तु कर्त्तेत्यादौ मात्रिकस्य मात्रिकोऽकार एव प्राप्नोति;तरितेत्यादौ द्विमात्रस्य द्विमात्र एव भवेद्, अणेवेति त्र नियमाभावात् तरितेत्यादावेङेव गुणः स्यात्; कर्त्तेत्यादौ तु यद्यप्यकार एव गुणो लभ्यते, तस्य रपत्वं तु न लभ्यते, यो ह्यणनणप्रसङ्गेऽणेवेति भवतीति नियमतो योऽण् तस्यैव रपरत्वं विहितम्; अतो निमयमपक्षेऽपि गुणविषये दोषस्तदवस्थ एव ? उच्यते, द्वे एते परिभाषे आदेशनियमार्थे--"स्थानेऽन्तरमः" इति च "उरण् रपरः" इति च । तत्र पूर्वस्या अवकाशः "चजोः कुघिण्ण्यतोः" इत्यादि, अस्या अवकाशो यत्रान्तरतम्ये विशेषो नास्ति, यथा तारक इत्यादौ, वृद्धीनां कर्त्ता तारितेत्यादौ । गुणो भवतीत्युक्ते सर्वेषु गुणेषु प्राप्तेषु "स्थानेऽन्तरतमः" इति नियमोऽस्तु, "उरण् रपरः" इति वा परत्वात् "उरण्रपरः" इत्ययमेव भविष्यति । अतः सुष्ठूक्तम्-"नियमपक्षे गुणविषये न कश्चिद्दोषः" इति । किन्तूदात्तादिषु दोषस्तदवस्थ एव स्यात्,तथा हि-कृतिरित्यादावुदात्तो भवतीत्युक्ते सर्वेषदात्तसंज्ञकेषु प्राप्तेषु परत्वादनेनाण एवोदात्ताः स्युः ते च रपराः । एवमनुदात्तादिष्वपि द्रष्टव्यम् । ये च प्रतिपदामादेशाः "ऋत इद्धातोः" इत्येवमादयः, तेष्वनियमप्रसङ्गाभावादस्ति नियमे रपत्वं न स्यात्, तदाह--"उरण् रपरवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषः" इति ।

तृतीय पक्षे उदात्तादिषु न दोषः; ञ्नित्यादिभिरन्तरतमस्यैव विधानात् । किरतीत्यादौ च न दौषः । गुणवृद्ध्योरुक्तदोषः स्यादेव, तथा हि--विहितस्य पश्चादनेन रपरत्वं विधीयते, विधानकाले त्वान्तर्यतो मात्रिकस्य; मात्रिके गुणे रपरे कर्त्तेत्यादि यद्यपि सिध्यति, तरितेत्यादौ त्वेङेव गुणः स्याद्; वृद्धिषु च विधानसमये कस्याश्चिदान्तर्याभावात् तिसृषु प्रवृत्तास्वाकारस्याण्त्वात् रपरत्वे कारकस्तारक इति यद्यपि सिद्धति, वायकस्तावक इत्यद्यनिष्टमनुसज्यत एव । अत एवमेतेषु पक्षेषु दोषसद्भावाच्चतुर्थं पक्षमाश्रित्याह--

उः स्थानेऽण्प्रसज्यमान एवेत्यादि । एतच्च स्थानद्वयग्रहणानुवृत्तेर्लभ्यते । तत्रैकमुः स्थाने योऽण् विधीयत इत्यनुवादेऽपि स्थानसम्बन्धलाभाय । द्वितीयं तु सोऽण् प्रसङ्ग एव प्रसज्यमानावस्थायामेव रपरो भवतीति रपरत्वस्य कालविधानार्थम् । "स्थानेऽन्तरतमः" इत्यत्र हि यद्यपि ताल्वादिवचनः स्थानशब्दः, तथापि न तेनात्र कश्चिदर्थोऽस्तीति प्रसङ्गवचन एवेह सम्पद्यते । एवं च गुणवृद्ध्योः प्राप्त्यवस्थायामेवाणो परपाः सम्पन्ना इति प्रमाणतोऽन्तरतमावेङैचौ बाधित्वा स्थानतोऽन्तरतम एव भविष्यतीति न कश्चिद्दोषः । न चानेकाल्त्वात्सर्वादेशप्रसङ्गः; आनुपूर्व्या सिद्धेः । यदाङ्गस्येति षष्ठी अन्त्येऽल्यनुसंह्रता तदायमुः स्थाने, यदायमुः स्थाने तदा रपरः, यदा रपरस्तदानेकालिति न पुनः परावृत्य सर्वादेशो युज्यते ।

द्वैमातुर इति । "मातुरुत्सङ्ख्यासम्भद्रपूर्वायाः" । खेयमिति । "ई च खनः" । सौधातकिरिति । "सुधातुरकङ् च " । अत्रायमकङादेशोऽनण्त्वाद्रपरो न भवति । अथ योऽत्राण् स परः कस्मान्न भवति ? अनादेशत्वात्, समुदायो ह्यत्रादेशः । यद्येवम्, खट्वश्र्य इत्यादावपि रपरत्वं न स्यात्, पूर्वपरयोर्हि समुदायोऽत्र स्थानी नावयव ऋकारः, उच्यते; पूर्वपरयोरिति द्विवचननिर्द्दिशात्तयोरेव स्थानित्वं न समुदायस्य, अनुर्देशात् । अत एव द्वयोः स्थानिनोर्भिन्नादिषु नत्ववत् द्वावादेशौ सायाताम् इति तत्रैकग्रहणं क्रियते । तत ऋकारस्यापि स्थानित्वमस्त्येव । तदिदमुच्यते-"यो ह्युभयोः स्थाने भवति लभते सोऽन्यतरब्यपदेशम्" इति । अतस्तत्रापि रपरत्वं भविष्यति ।।

अलोऽन्त्यस्य ।। 1.1.52 ।।

"अलः" इति जसन्तं चेदयमर्थः स्यात्-अलात्मका आदेशा अन्त्यस्येति । तत्र रहोरजसां लोपः सर्वादेशः स्याद्--नीरजीकरोतीति । अन्त्यस्य चविशेषितत्वात् "वसुस्रंसुध्वंस्वनडुहां दः" इति दत्वं पदस्याप्यन्त्यस्य स्यात्--परमानडुद्भ्यामिति । असन्देहार्थं चालोऽन्त्यस्येति वाच्यं स्याद् । अतोऽलोन्त्यस्येत्यनेन सामानाधिकरण्यात् षष्ठ्यन्तमिति स्थितम् । यदि "षष्ठी स्थानेयोगा" इत्येनैकवाक्यताऽस्य स्यात्, ततोऽयमर्थः स्यात्--"इह शास्त्रे या काचन षष्ठी सान्त्यस्यालो भवति सा स्थानेयोगा इति । ततश्च "आर्द्धधातुकस्येड्वलादेः" इत्यस्याप्यन्तेऽल्यनुसंहारादार्द्धधातुकान्त्यस्यैवेट् स्यात्, स च भवन् "आद्यन्तौ टकितौ" इत्यन्त्यात्प्राक् स्यात् । "आद्यन्तौ टकितौ" इत्यनेन हि स्थानेयोगात्वमेव षष्ठ्या बाध्यते, न पुनरन्त्येऽल्यनुसंहारोऽपि । अतो भिन्नं वाक्यम्, तदाह--षष्ठीनिर्दिष्टस्येत्यादि । सामान्यवचनेऽपि "षष्ठी स्थानेयोगा" इत्याधिकारात् स्थान षष्ठीनिर्दिष्टस्येति वेदितव्यम्; अन्यथा षष्ठीमात्रस्याधिकारे यस्य षष्ठोनिर्दिष्टस्य यत्कार्यं यथाभूतमुच्यते--आदेशरूपम्, तआथगमरूपं वा, तत्तथाभूतमेव तदन्तस्य भवतीत्यर्थः स्यात् । ततश्च स एव दोषो य एकवाक्यतायाम् । अतः "षष्ठी स्थानेयोगा" इति सर्वमनुवर्त्त्यम् । अयञ्चार्थो भवति--"स्थानषष्ठीनिर्दिष्टस्य यदुच्यते तत्तदन्त्यस्यालो भवति, न तस्य कृत्स्नस्य" इति । सोऽयं कार्यस्यान्त्येऽल्यनुसंहारो वृत्तिकारेण दर्शितः ।

यद्वा-"या स्थानेयोगा षष्ठी साऽन्त्यस्यालः" इति षष्ठ्या एवानुसंहारो वेदितव्यः । अत्र पक्षे "ङिच्च" इत्यस्यायमर्थः -"यत्र ङिदादेशो विधीयते तत्र या षष्ठी सान्त्यस्यालः" इति । एवं सर्वत्र । कार्यानुसंहारे तु यताश्रुतमेव षष्ठ्याः स्याद्, अनुसंहारे "ङिच्च" इत्यादावसङ्गतिः । अतः कार्यानुसंहारो वृत्तिकारेण दर्शितः ।।

ङिच्च ।। 1.1.53 ।।

होतापोताराविति । "ऋतो ङिसर्वानामस्थानोयः"इति गुणः । "अप्तृन्" इत्यादिना दीर्घः । मातापितराविति । "पितामात्रा" इत्येकशेषाभावपक्षेऽभ्यर्हितत्वान्मातुः पूर्वनिपातः; "पितुर्दशगुणं माता गौरवेणातिरिच्यते"। अथ तातङन्त्यस्य कस्मान्न भवति ? तत्राह--तातङीत्यादि । अनन्यार्थङित्त्वेष्वनङादिषु चरितार्थमेतद् गुणवृद्धिप्रतिषेधार्थतया चरितार्थङित्त्वे तातङि परेण "अनेकाल्शित्सर्वस्य" इत्यनेन बाध्यत इत्यर्थः । ननूत्सर्गापवादयोरयुक्तो विप्रतिषेधः, अतुल्यकक्षत्वात्, न चान्तरेण सर्वादेशतां गुणवृद्धिप्रतिषेधार्थत्वस्योन्मेष एति चरितार्थत्वमपि ङित्त्वस्य चिन्त्यम् ? न ब्रूमो गुणवृद्धिप्रतिषेधार्थस्य निश्चितत्वाद् दुर्बलं ङित्त्वमिति; कि तु सर्वादेशेऽपि तातङि गुणवृद्धिप्रतिषेधः प्रयोजनं सम्भाव्यते । तावता च कियानपि विलम्बो भवति । अनङादिषु सर्वादेशत्वे न किञ्चिन् ङित्त्वस्य प्रयोजनमिति सर्वादेशार्थतासम्भावनापि नास्तीति । तेष्वेव सहसा प्रवर्त्तते । ततश्च त्रिप्रतिषेधोपपत्तिः ।

अथ वा - "एरुः" इत्यस्यानन्तरम् "तुह्योस्तातङाशिषि" इति वक्तव्यम्, एरित्येव । एवं वक्तव्ये ङित्करणं गुणवृद्धिप्रतिषेधार्थमेवेति निश्चितमिति विप्रतिषेधोपपत्तिस्तदाह--तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेश इति ।

अथ वा - यथोपदर्शितं गुणवृद्धिप्रतिषेधार्थत्वं सर्वादेशतामन्तरेण नोपपद्यत इति अन्तरेणैव विप्रतिषेधं सर्वादेशस्तातङ् भवति ।।

आदेः परस्य ।। 1.1.54 ।।

शास्त्रे न क्वचित्परस्येत्युच्चार्य्य कार्यं विधीयत इति निर्विषयमेतदित्यभिप्रायेणाह--क्व चेति । यत्रेत्यादि । पञ्चमीनिर्देशेषु "तस्मादित्युत्तरस्य" इति परस्य कार्यं विधीयत इत्यर्थः । आसीन इति । "आस उपवेशने" अनुदात्तेत् । द्वीपमिति । द्विधागता आपो।स्मिन्निति "ऋक्पूरब्धूःपथामानक्षे" इति अकारः समासान्तः ।।

अनेकाल्शित्सर्वस्य ।। 1.1.55 ।।

अनेकालग्रहणं किमर्थम् ? "अस्तेर्भूः" सर्वस्य यथा स्यात्, अलोऽन्त्यस्य मा भूत्; नैतदस्ति प्रयोजनम्; "ङिच्च" इत्येतन्नियमार्थं भविष्यति--"यद्यनेकालन्त्यस्य भवति, ङिदेव" इति । एवमप्यसत्यनेकाल्ग्रहणे "अतो भिस ऐस्" इत्यादिषु पञ्चमीनिर्देशेष्वनेकालप्यादेश आदेः परस्य स्यात्, सति तु तस्मिन् द्वावेतौ "अलोऽन्त्यस्य" इत्यस्यापवादौ--"आदेः परस्य","अनेकाल्शित्सर्वस्य" इति; तत्र "आदेः परस्य" इत्यस्यायमवकाशो य एकालदेशो लोपो वा--"ई दासः" "बहोर्लोपो भू च वहोः" आसीनः, भूयान् ; "अनेकाल्शित्सर्वस्य" इत्यस्यावकाशो यत्र पञ्चमीनिर्देशो नास्ति-"अस्तेर्भूः" । इहोभयं प्राप्नोति-"अतो भिस ऐस्", अपवादविप्रतिषेधादनेकाल्शित्सर्वस्येत्ययमेव भवतीति सिद्धमिष्टम् ।

शिद्ग्रहणं किमर्थम् ? "जसः शी" सर्वस्य यथा स्यात्, अनेकालित्येव भविष्यति, शकारे लुप्ते नानेकाल्, आनुपूर्व्यात्सिद्धम् । यदायं सर्वादेशस्तदा प्रत्ययः, यदा प्रत्ययस्तदेत्संज्ञा, यदेत्संज्ञा तदालोपः, यदालोपस्तदैकाल् तदिह सर्वादेशत्वमन्तरेण नैकाल्त्वमुपपद्यते । इह तर्हि "इदम इश्" "इदं किमोरीश्कीः" ? अत्र ह्यन्तरेणापि सर्वादेशतां प्रगेवेत्संज्ञा भवति । नन्वत्रापि शकारः प्रयोजनान्तराभावाद् अनेकाल्त्वमादेशस्य संपाद्य निवर्त्तिष्यते । इह तर्हि "घ्वसोरेद्धावभ्यासलोपश्च" इति ? लोपः शित्सर्वस्य यथा स्यात् । "इदम् इश्" इत्यादावपि प्रयोजनाभावदित्संज्ञैव शकारस्य न स्यादिति श्रवणप्रसङ्गः ।।

स्थानिवदादेशोऽनल्विधौ ।। 1.1.56 ।।

ननु तत्स्थानापन्नस्य तद्धर्मलाभो लोकवेदयोः सिद्ध एव । लोके तावदेकस्मिन्नुपाध्याये मृते तत्स्थाननिविष्टस्याप्यविवादनाद्युपाध्यायधर्मलाभो भवति, एकस्मिंश्च राजनि प्रोषिते तत्स्थानेऽभिषिक्तस्य तत्पुत्रादेरपि तद्धर्मलाभो भवति । वेदेऽपि व्रीहिस्थानपतिता वीवारादयोऽवघातादीन् व्रीहिधर्मान् लभन्ते ।

तद्वदत्राप्यस्तिस्थानापन्नो भूरस्तिधर्मान् धातुत्वादीन् लप्स्यते, नार्थोऽनेनेत्याशङ्क्याह--स्थान्यादेशयोरित्यादि ।

अयमभिप्रायः--उपाध्यायत्वप्रयुक्ता उपाद्यायधर्मा राजधर्माश्चाभिषिक्तत्वप्रयुक्ता व्रीहिधर्माचापूर्वसाधनत्वनिबन्धनाः, न तत्तत्स्वरूपनिबन्धना इति युक्तं तत्प्रकारजुषो भवन्तीति । इह तु स्वं रूपमितिवचनादस्त्यादिस्वरूपनिबन्धना धातुत्वादयो धर्मा न भवनाद्यर्थाभिधानलक्षणकार्यप्रयुक्ताः, तच्च स्वरूपमादेशानां नास्तीति तत्स्थानापन्नानामपि न स्युरिति तदाह--पृथक्त्वादिति । रूपभेदादित्यर्थः ।

नन्वेतत्प्रकारजुषोऽपि तत्स्थानापन्नस्य तद्धर्मलाभो दृष्टते, यदा ह्युपाध्यायः शिष्येण यज्ञार्थमुपनिमन्त्रितः कार्यव्यासङ्गात् स्वशिष्यमन्यं प्रेरयति तदा स तत्र गत्वाऽग्रासनादीनुपाध्यायधर्मान् लभते, अत्राप्युपाध्यायप्रतिनिधित्वात् तद्बुद्ध्यैव तद्धर्मा अनुष्ठीयन्ते; एवं कृते तु सत्युपाध्याय इति न तत्स्थानापन्नतया, न चैवमत्र संभवतीत्यारब्धव्यमेव सूत्रम् । युष्मदस्मदोरादेशनिषेधात्सिद्धम् । यदयं "युष्मदस्मदोरनादेशे" इत्याह, तज् ज्ञापयति-"भवति स्थानिकृतमादेशः" इति; अलाश्रये चाप्रसङ्गः, "अदो जग्धिः" ल्यब्ग्रहणात् । यदि हि स्थान्यलाश्रयमप्यादेशे स्यात् कितीत्येव सिद्धे ल्यब्ग्रहणनर्थकं स्यात्, सत्यम्; "उत्तरार्थं तावत् स्थानिवदादेश इति वक्तव्यम् । अजादेशस्य विषयविशेषे स्थानिवत्त्वं वक्ष्यामि, पदान्तादिविधिषु प्रतिषेधं वक्ष्यामि" इति । सोऽन्यार्थः सन्निहैव क्रियते लिङ्गानाश्रयणाय ।

षोढातिदेशः-निमित्तातिदेशः, व्यपदेशातिदेशः, शास्त्रातिदेशः, रूपातिदेशः, तादात्म्यातिदेशः, कार्यातिदेश इति । तत्र निमित्तमशक्यमतिदेष्टुं ब्राह्मण्यवत्, न हि ब्राह्मणस्याग्रभोजनादिनिमित्तं ब्राह्मण्यं वचनशतेनापि क्षत्रियेऽतिदेष्टुं शक्यते । "पूर्ववत्सनः" इत्यत्रापि न प्रकृतिगतं निमित्तं ङित्वादि सनन्तेऽतिदिश्यते, किन्तु प्रकृतिगतमेव तत् सना व्यवधानेऽप्यात्मनेपदनिमित्तमिति । एतावता निमित्तातिदेशवाचोऽयुक्तिः ।

व्यपदेशातिदेशः संज्ञापक्षान्न भिद्यते, तत्र च वतेरानर्थक्यं वक्ष्यते, कः पुनरायुष्मतो व्यपदेशोऽभिप्रेतः ? किं स्थानीति व्यपदेशः, यथा "आद्यन्तवदेकस्मिन्"इत्यत्र व्यपदेशातिदेशपक्षः ? उत स्थानिनो ये व्यपदेशा धातुरङ्गमित्यादयः, त आदेशस्य भवन्ति ? इति । पूर्वः पक्षो भवतोऽप्यनभिप्रेतः, द्वितीयस्य तु संज्ञापक्षान्महान् भेदः । तथाहि --संज्ञापक्षे यत्र स्थानिरूपमुच्चार्यते "आङो यमहनः " इत्यादौ, तत्रैव कार्यं स्याद्, न धातोस्तव्यादयोऽङ्गस्येनादय इत्यादौ; न ह्यत्र संज्ञात्वेन विनियुक्तमस्त्यादि स्थानिरूपमुच्चारितम्; यच्चोच्चारितं न सा संज्ञा, तआदेशस्यैव कार्यं स्याद् न स्थानिनः, न हि संज्ञोच्चारिता स्वयं कार्येण युज्यते, स्थानिनस्तु व्यपदेश आदेशस्तयातिदिश्यमाने धातोस्तव्यादयोऽङ्गस्येनादय इत्यादौ स्थान्यादेशयोरुभयोरपि कार्यं सिद्ध्यति; उभयोरपि व्यपदेशसद्भावात् । "आङो यमहनः" इत्यादिकं तु स्थानिस्वरूपनिबन्धनं कार्यमादेशस्य न स्यात्,न ह्यत्र काश्चिद्व्यपदेशो य आदेशस्यातिदिश्येत । अथापि "स्वं रूपम्" इति वचनाद्घ्नन्नित्यपि हन्तेर्व्यपदेश इति तस्मिन्नतिदिष्टे कार्यं सिध्यतीत्युच्यते; एवमपि पूर्वोक्तस्तावद्विशेषो विद्यत इत्यास्तामेतत् ।

अप्रधानत्वात्तु व्यपदेशो न भवति । अत एव शास्त्रातिदेशोऽपि न भवति । स्थानिरूपे चाऽतिदिश्यमान आदेशविधानं व्यर्थं स्यात् । न च वचनद्वयप्रामाण्याद्विकल्पः, "वा लिटि" इति विकल्पारंभात् । तादात्म्यातिदेशोऽसंभवान्न भवति, द्वयोर्हि सहावस्थितयोरन्योऽन्यतादात्म्यमतिदिश्यते, सुबामन्त्रितयोरिव, इह त्वादेशेन स्थानी निवर्त्तित इत्यसंभवः । अतः पारिशेष्यात्प्राधान्याच्च कार्यातिदेशोऽयम्, तदाह-स्थान्याश्रयकार्यमिति, स्थान्याश्रयेषु कार्येष्विति च । तात्पर्यतश्चायं कार्यातिदेशो वर्ण्यते । अक्षराणि त्वादेशः स्थानिना तुल्यं वर्त्तत इत्येतावत्येव पर्यवसितानि । केन तु प्रकारेण तुल्यत्वमित्यपेक्षायां तत्कार्यापत्त्येति तदाह--स्थानिना तुल्य वर्तत इति । स्थानिवदिति । स्थान्याश्रयेष्विति । बहुव्रीहिः ।

अनल्विधावित्यस्यार्थमाह--अनलाश्रयेष्विति । एतेन विधीयते इति विधः= कार्यम्, अलाश्रयो विधिरल्विधिरित्युत्तरपदलोपी समास इति दर्शयति । किमर्थं पुनरुत्तरपदलोपाश्रयणम् ? स्यादेतत्-सति तस्मिन्, यश्चालि विधिः, यश्चालो विधिः,यश्चालः परस्य विधिः-यजेः क्तः, इष्टः, क इष्ट इत्यत्र संप्रसारणस्य स्थानिवत्वात् को यष्टेत्यादिवत् "हशि च"इत्युत्वं प्राप्तं न भवति, स इष्ट इत्यत्र "एतत्तदौः" सुलोपो न भवति । अलो विधिः - द्युकामः, उकारस्य "लोपो व्योर्वलि" इति न भवति । उत्त्वं तु "अहर्विमलद्यु" इत्यत्र चरितार्थम् । अलः परस्य विधिः-द्यौः, पन्थाः, सः-हल्ङ्याबिति लोपो न भवति । अला विधिः-व्यूढोरस्केन । अत्र "सोऽपदादौ" इति वसर्जनीयस्य स्थाने विहितस्य स्थानिवत्त्वात् विसर्जनीयस्याटसूपदेशाद् "अड्व्यवाये" इति णत्वं प्राप्तं न भवति । अतः सर्वविभक्त्यर्थसंग्रहाथंमुत्तरपदलोपाश्रयणम् । अन्यथा हि षष्ठीसमास एवाश्रीयतेऽल्स्थानिक एव विधिराश्रितः स्यादिति, तन्न; सम्बन्धसामान्ये षष्ठ ीविज्ञानादपि सर्वविभक्त्यर्थसंग्रहस्य सिद्धत्वात् । अनुवादे हि स्थानेयोगाभावात् सर्वोऽल्सम्बन्धी विधिः प्रतिपत्स्यते । एवं तर्हि यत्र गुणभावेनाप्यलाश्रीयते, तत्रापि निषेधो यथा स्यात्-प्रपठ्येति, अत्र हि वलादेरिति प्रत्ययः प्राधान्यनाश्रितः, वल् तु गुणभावेनेति अप्राधान्यान्न स्यात् । उत्तरपदलोपे तु भवति; अलाश्रयत्वादिड्विधेः । यद्यलाश्रयेषु स्थानिवत्त्वं न भवति, वृक्षाय--"सुपि च" इति दीर्घो न स्यात्; यञादौ सुपीत्यलाश्रयत्वात् । अरुदितामित्यत्र सार्वाधातुकस्य तसस्तामादेशे

"रुदादिभ्यः सार्वधातुके " इति वलाश्रय इण् न स्यात्, अत आह-स्थान्यलाश्रयाणीति । स्थानिनोऽल् स्थान्यल्, स आश्रयो येषां तानि तथोक्तानि । अयमभिप्रायः-यथा गुरुपद्गुरुपुत्रे वर्त्तितव्यमन्यत्रोच्छिष्टभोजनात् पादेपसंग्रहणाच्चेति अतिदेशे प्रवृत्ते, यदा गुरुपुत्रः स्वयं गुरुर्भवति तदोच्छिष्टं भुज्यते पादौ चोपसंगृह्येते, तत्कस्य हेतोः ? अतिदेशेनैक्वाक्यतामापन्नः प्रतिषेध आतिदेशिकीमेव प्राप्तिं प्रतिषेधतीति, तथेहाप्यातिदेशिक एवाल्विधिः प्रतिषिध्यते । न च वृक्षाय, अरुदितामित्यत्रातिदेशापेक्षा; स्वयमेव यञादित्वाद्वलादित्वाच्च । ततश्च यत्र स्थानिन एवालाश्रीयते स एव निषिध्यते, यथा-प्रपठ्येत्यत्र । न ह्यत्र ल्यप् स्वयं वलादिरिति । ननु च गुरुपुत्रस्य स्वयं गुरुत्व उच्छिष्टभोजनादौ न मात्रयाप्यतिदेशापेक्षा, इह तु सत्यपि स्यमेव यञादित्वे नान्तरेणातिदेशं दिर्घः सिद्ध्यति; असुप्त्वात् । अरुदितामित्यत्रापि सत्यपि स्वयं वलादित्वेऽसार्वधातुकत्वाददतिदेशेनैव वेट् प्रार्थनीयः, सत्यम्; द्वे कार्ये-सुप्संज्ञा च, दीर्घत्वं च

। न हि "प्रयोगसमवाय्येव कार्यमतिदेश्यम् " इति नियमोऽस्ति, यत्तु शास्त्रीयं तदेवातिदिश्यते । न च सुप्संज्ञाऽलाश्रयेति; तस्यामतिदिष्टायां स्वाश्रयं यञादित्वमाश्रित्य दीर्घत्वं भविष्यति । अरुदितामित्यत्राप्यातिदेशिकं सार्वधातुकत्वं स्वाश्रयं च वलादित्वमाश्रित्येड् भविष्यति ।
ननु च वृक्षायेत्यत्र स्थानिन एकारस्याल्त्वात्तदाश्रयं सुप्त्वमलाश्रयमेव, उच्यते; कार्यापेक्षमल्विधित्वं नोदाहरणापेक्षम् । एतदुक्तं भवति--यस्मिन् कार्ये विधीयमानेऽल एवासाधारणं किञ्चिद्रूपं निमित्तादिरूपेणाश्रीयते--"हशि" "हलि" "व्योर्वलि""हल्ङ्याब्भ्यः""अड्व्यवाये" इति - स एवाल्विधिः; "सुपि च" इत्यत्र तु नैवंविधं किञ्चिदस्ति, केवलं वृक्षायेत्यत्रोदाहरणेऽलात्मकः स्थानीतेयतावत् किमुदाहरणमिति प्रश्नः । धात्वाद्यादेशाः प्रयोजनमित्युत्तरम् । तत्र "प्रयुज्यतेऽनेनेति प्रयोजनम्" उदाहरणं न प्रयुज्यत इत्यर्थात्प्रश्नानुरूपं प्रतिवचनम् ।
ननु चास्तिब्रुवोरार्द्धधातुके परत आदेशाभ्यां भाव्यम्, तत् किमतिदेशेनेत्यत आह--आर्द्धधातुके विषय इत्यादि ।
दाधिकम् । दध्नि संस्कृतम् "दध्नष्टक्" । अव्ययादेश इति । क्त्वामात्रस्य ल्यबादेशः, क्त्वान्तस्याव्ययसंज्ञा, स कथमव्ययादेशः, तस्मात् क्त्वाग्रहणेन ल्यपो ग्रहणात्तदन्तस्यापि संज्ञा भवतीत्येवम्परमेतत् । तत्रापि "कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्" इति प्रस्तुत्येति संघातस्य भवति ।
वक्करणं किमिति । विनापि तेन तदर्थो गम्यते, यथा ङित्किदित्यादाविति प्रश्नः ।
स्थानीत्यादि । असति वत्करणे संज्ञाप्रकरणत्वात् स्थान्यादेशस्य संज्ञा विज्ञायेत, मैवं विज्ञायीति वत्करणमित्यर्थः । किमर्थं पुनः स्थान्यादेशस्य संज्ञा नेष्यत इत्याह--स्वाश्रयमपीति । संज्ञायां हि स्थानिस्वरूपनिबन्धनम् "आङोयमहनः" इत्यादि कार्यमादेश एव स्याद्, न स्थानिनि; न हि संज्ञोच्चारिता स्वयं कार्येण युज्यते । "आत्मनेपदेष्वन्यतरस्याम्" इति च विषयसप्तमी विज्ञायते । स्वाश्रयमपीति । कोऽर्थः ? स्थानिन्यपीत्यर्थः । तथा चोत्तरग्रन्थे "उभयत्र" इति सप्तमीनिर्द्देशः ।
आदेशग्रहणं किमिति । यथा "पितृवत्स्थूलः" इत्युक्ते सम्बन्धिशब्दात्पुत्र इति मम्यते, तथेहापि स्थानिवदित्युक्ते क इत्यपेक्षायाम् "यदपेक्षं स्थानित्वं स एवा देशः" इति गम्यत प्रश्नः । आनुमानिकस्येत्यादि । द्विविधो हि आदेशः--प्रत्यक्षश्च "अस्तेर्भूः" इत्यादिः, आनुमानिकश्च "एरुः" इत्यादिः ।
अत्रेकारेणेकारान्तः स्थान्यनुमीयते, विषणेनेव गौः । उकारेण चोकारान्त आदेशः ततस्तेस्तुरिति सम्पद्यते । तत्रासत्यादेशग्रहणे प्रत्यक्षस्यैव ग्रहणं स्यान्नानुमानिकस्य, पुनःश्रतेस्तु व्याप्त्यर्थत्वात् आदेशमात्रं स्थानिवद्भवति । तेन पचत्वित्यत्र "तिङन्तं पदम्" इति पदसंज्ञा सिद्धा भवति । ननु चेकारमात्रस्योकारमात्रमादेशोऽस्तु, किं तदन्तानुमानन ? एवं हि "एरुः" इत्येतच्च यथाश्रुतमेव व्याख्यातं भवति; आदेशग्रहणं च न कर्त्तव्यं भवति, "एकदेशविकृतिस्यानन्यत्वात् पदसंज्ञा भविष्यति । एवं तर्हि पुनःश्रुतिरेव लिङ्गम्, एकदेशविकारः शास्त्रे नाश्रीयत इति, तेन--
सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।
एकदेशविकारे हि नित्यत्वं नोपपद्यते ।।
इति सिद्धं भवति ।
द्युपिथित्यदादेशा इति । "दिव औत्", "पथिमथ्युभुक्षामात्","त्यदादीनामः-इत्येते । ननु सामान्यातिदेशे विशेषानतिदेशः, ततश्च यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमिति ब्राह्मणमात्रकार्यमेव भवति, न माठरादिविषेषकार्यम्; तथा "स्थानिवदादेशः" इत्युक्ते यः स्थानी यदाकारविशिष्टः सूत्रे श्रूतस्तदादेशस्य तदाकारप्रयुक्तेनैव कार्येण भवितव्यम् । "क्त्वो ल्यप्" इत्यत्र च वस्तुस्थित्या सन्निहितमपि वलादित्वं स्थानिरूपेण नाश्रितम् । तथा हि-इडादिरपि क्त्वा भवत्येव,क्त्वा केवलोऽपि दत्वायेति यगन्तोऽपि, इष्ट्वीनमिति मान्तोऽपि; तत्र क्त्वामात्रप्रतिबद्धं यत्कार्यं कृत्त्वप्रत्ययत्वादि, तदादेशेऽतिदिश्यताम्, वलादित्वस्य तु कुतोऽतिदेशः ? एवं क इष्ट इत्यादावपि च यण इक् भवति, दिवोऽलोऽन्त्यस्योत्वौत्वे भवतः, पथ्यादीनामन्त्यस्याद्भवति, त्यदादीनामन्त्यस्याकारः, विसर्ज्जनीयस्य सत्वमित्येवं यणादिरूपेण स्थानिन आश्रयणम् । ततश्च तत्तदाकारप्रयुक्तस्यैव कार्यस्यापि अतिदेशः, न हल्त्वादिविशेषनिबन्धनस्येति नार्थोऽनल्विधावित्यनैन । यत्र तर्हि विशेषरूपमेव स्थानित्वेनाश्रीयते, यथा-"च्छ्वोः शूठ्" इति वकारः, तत्र तत्कार्यमादेशस्य मा भूद्-अक्षद्यूभ्याम् । वलि लोपो न भवति ।
अथात्रापि वकारान्तस्याङ्गस्यालोऽन्त्यस्योडिति रूपेण स्थानिन आश्रयणम्, एवमपि विशेषातिदेशज्ञापनार्थमिदमुच्यते; अन्यथा ल्यपो वलादित्ववत् कित्त्वस्याप्यतिदेशो न स्यात्, देवित्वेत्यादावकितोऽपि कृत्वः सम्भवात् । अनुबन्धाश्च स्थानिन्यसन्त एव कार्येषु युज्यन्त इति तत्कार्येष्वनल्विधाविति निषेधो न भवति । लिङ्गाच्च । यदयं "सेर्ह्यपिच्च" इत्याह, तज्ज्ञापयति-भवत्यनुबन्धकार्याणामतिदेश इति ।।
अचः परस्मिन् पूर्वविधौ । अच इति स्थानिनिर्देश इति । यद्यप्यनूद्यमानादेशविशेषणत्वात् स्थानषष्ठी न लभ्यते, तथाप्यचो य आदेश इत्युक्ते तत्स्थानिक एव प्रतीयत इति । परस्मिन्निति निमित्तभावे सप्तमी, न परसप्तमी; परशब्देनैव परत्वस्योक्तत्वात्, परस्मिन्य आदेश इति अनुवादत्वाच्च, किति ये गुणवृद्धी इतिवत्; पूर्वविधाविति विषय इति प्रकृतत्वात् स्थानिवत्त्वस्य ।
पूर्वविधौ कर्तव्ये स्थानिवदिति । एवं पदतात्पर्यं दर्शयित्वा वाक्यार्थमाह--अजादेश इतायदि । किमर्थमिदमुच्यते, पूर्वत्र स्थानिकार्यमादेशेऽतिदिष्टम्, इह तु स्थानिनि सति पूर्वस्य यत्कार्यं तदादेशेऽपि सति पुर्वस्य भवतीत्यतिदिश्यते । ननु तत्रापि स्थानिनिमित्तमन्यस्य तदप्यतिदिश्यते, यथा वृक्षायेति "सुपि च" इति दीर्घत्वम् ? एवं तर्ह्याल्विध्यर्थमिदम् । तथा हि-वव्रश्चेत्युदत्वे "न संप्रसारणे संप्रसारणम्" इति वकारस्य संप्रसारणप्रतिषेधः स्थान्यलाश्रयोऽस्माद्वचनाद्भवति । इदं च "संप्रसारणे परः प्रतिषेधः" इति पक्षे प्रयोजनम्, "संप्रसारणभाविनि यण्येव प्रतिषेधः" इति तु पक्षे न प्रयोजनम् ।
इहाचितीकः, बहुचितीक इति चितेः कपि दीर्घत्वे कृते "ह्रस्वान्तेऽन्त्यात्पूर्वम्" इति स्थान्यलाश्रयः स्वरो भवति । एवं यातेर्यङन्तात् क्तिचि अतो लोपे

यलोपविधिं प्रति स्थानिवत्त्वनिषेधाद् यलोपे च या या ति इति स्थिते यङकारलोपस्य स्थानिवत्त्वात् "आतो लोप इटि च" इत्याकारलोपे पुनर्यलोपे यातिरिति भवति । न च पुनराकारलोपः, पुनश्च यलोप इति प्रत्ययमात्रस्य श्रवणप्रसङ्गः, आल्लोपस्य स्थानिवत्त्वाच्चिणोलुङ्न्यायेनासिद्धत्वाद्वा । तथा च वरेविधौ स्थानिवत्त्वं निषिध्यते-यायावर इति । स्थानिवद्भावादातो लोपो मा भूदिति । तथा तिष्ठ

तेर्यङन्तात् क्विच्, अल्लोपयलोपयोस्तेष्ठीति स्थिते अल्लोपस्य स्थानिवत्त्वादियङ् भवति, तथा चोत्तरसूत्रेकण्डूतिरित्यत्र उपङ्प्रसङ्गं चोदयित्वा "अस्तु तस्यैव च्छ्वोः शूडित्यूठ् करिष्यते" इत्युक्तम्, इयङि च कृते यलोपे च तेष्ठितिरिति भवति । न च पुनरियङ्, आदिष्टादचः पूर्वत्वात् । तथा पेपीयतेः क्विचि अल्लोपयलोपयोः "एरनेकाचः" इति यणि यलोपे पेप्तिरिति भवति । "शो तनूकरणे" यङन्तात् क्विचि अल्लोपयलोपाल्लोपेषु पूर्वत्राद्धीये न स्थानिवदिति स्थानिवत्त्वनिषेधाच्छशां ष इति षत्वे शाष्टिरिति भवति । एवं चिचीयतेश्चेक्तिरित्येषा दिक् ।

तथा तितउमाचष्ट इति णिचि टिलोपस्य स्थानिवत्त्वादयो ञ्णितीत्यस्याभावे "अतः उपधायाः" इति स्थान्यलाश्रया वृद्धिर्भवति । न चात्र क्विलुगुपधात्वेत्युपधाविधि प्रति स्थानिवत्त्वनिषेधः, तस्य प्रत्ययविधिविषयत्वात्, सत्यां च वृद्धौ पुकि सति तितापयतीति भवति । न च पुक्यपि स्थानिवत्त्वम्; आदिष्टादचः पूर्वत्वात् । ननु पूर्वस्य कार्ये कर्त्तव्ये सति स्थानिवत्त्वेन भवितव्यम्, अत्र च सर्वत्र स्थानिवत्त्वे सति पूर्वस्य कार्यप्राप्तिरिति इतरेतराश्रयम् । नात्र स्थानिवत्त्वात् प्रगेव पूर्वस्य कार्ये प्राप्ते स्थानिवत्त्वम्, किं तर्हि ? प्राग्वा पश्चाद्वा पूर्वस्य कार्ये पूर्वस्य कार्ये चिकीर्षिते । अत एव वरेविधौ स्थानिवत्त्वनिषेधः । तदेवमल्विध्यर्थमिदम् ।

किञ्च--ब्राह्मणवदस्मिन्क्षत्रिये वर्तितव्यमित्यत्र ब्राह्मणाश्रयं कार्यं प्राप्यते, न तु स्वाश्रयं युद्धादिकं व्यावर्त्यते । पूर्वसूत्रेऽपि स्थान्याश्रयं प्राप्यते, न स्वाश्रयं व्यावर्त्यते, यथा--वृक्षायेति दीर्घत्वमादेशाश्रयं भवति; भविता, भवितुम्, भवितव्यमिति गुणः । इह तु स्थान्यलाश्रयमेवेष्यते, स्वाश्रयं नेष्यते । तथा च पटयतीति टिलोपे कृते प्राप्ता उपधावृद्धिर्न भवति, अवधीदिति हलन्तलक्षणा, बहुखट्वक इति "ह्रस्वान्तेऽन्त्यात्पूर्वम्" इतिस्वरो न भवति, वाय्वोर्यलोपो न भवति, तन्वन्तीतीण् न भवति । एवं बहूनि स्वाश्रयनिवृत्तिरुदाहरणानि । अत एव द्वर्वचनादिविधौ स्थानिवत्त्वनिषेधः । अतोऽजादेशः परनिमित्तकः पूर्वस्य विधौ स्थानिवदेव यथा स्यात्, मा भूत्स्वयं निमित्तमिति नियमार्थमपीदमारब्धव्यम् ।

कथं पुनरेकेन यत्नेनोभयं लभ्यम्, विधिश्च, नियमश्च ? विधिग्रहणसामर्थ्यादिति तन्निरूपणे वक्ष्यामः । अथ वा - विधिग्रहणं विधिमात्रे स्थानिवद्भावा यथा स्यादशास्त्रीयो च विपरीते च । तेन पटयतीत्यादौ स्थानिनि दृष्टो वृद्ध्यभावादिरशास्त्रीयोऽप्यतिदिश्यते । तत्र वृत्तिकारेण यत्नसाध्यत्वादशास्त्रीयोदाहरणनि दर्शितानि । विधिशब्दः कर्मसाधनः, पूर्वस्येति शेषलक्षणषष्ठी; पूर्वस्य व्यवस्थितस्य सतः सम्बन्धिनि कार्ये कर्त्तव्ये इति । पूर्वत्वं त्वत्राजपेक्षमाश्रीयते; नादेशापेक्षम्, निमित्तापेक्षं वा । न चाजपेक्षे पूर्वत्व विधिशब्दो भावसाधनः सम्भवति । बावसाधने हि तस्मिन्, पूर्वस्येति कर्मणि षष्ठीविज्ञानात् पूर्वस्मिन्विधात्व्ये स्थानिवदित्यर्थः स्याद् । अवस्थिते चाचि ततः पूर्वं किञ्चि द्विधेयं भवति, इह चादेशाः स्थानिवदिति वचनात् आदेशेन स्थानी निवर्तित इति नायमर्थः सम्भवति । अत्रादेशः परनिमित्तकः, तस्यैवादेशस्य स्थानिभूतो योऽच्, ततः पूर्वस्मिन् विधातव्य इति । तथा हि-"अचो य आदेशः" इत्यादेशात्प्रागवस्थानूद्यते, ततश्च संनिधानात् प्रतीयमानमवधित्वमपि तदवस्थस्यैवाचो युक्तम् । अत एवोच्यते-"योऽनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः" इति । आदेशनमादिष्टं तदकृतं यस्य सोऽनादिष्टः, अकृतादेशादचः पूर्वस्येत्यर्थः । आदेशात्प्रागवस्थायामिति यावत् । न चास्या अवस्थायाः पूर्वस्मिन् विधातव्ये तदादेशः स्थानिवदिति सम्भवति । ननु कर्मसाधनेऽप्यजादेशः स्थानिवद्भवति-अकृतादेशाचः पूर्वस्य विधाविति नायमर्थः सम्भवति, स्थानिवद्भावदशायामच आदेशेन निर्वर्त्तितत्वात् । नात्र सम्प्रत्यचः पूर्वस्येत्ययमर्थः, किं तर्हि ? अचोऽवस्थानदशायां पूर्वत्वेन दृष्टस्याजवस्थाप्रभृतिपूर्वस्येत्यर्थः । तदेवमजपेक्षस्य पूर्वत्वस्याश्रयणात् कर्मसाधन एव विधिशब्दः । कि पुनः कारणमजपेक्षमेव पूर्वत्वमाश्रीयते, न पुनरादेशापेक्षं निमित्तापेक्षं वा ? उच्यते; तदपेक्षे पूर्वत्वे वैयाकरणः, सौवश्व इत्यत्र स्थानिवद्भावादैचोरायावौ प्राप्नुतः, तावपि हि यणादेशात्तन्निमित्ताच्च परस्मादचः पूर्वस्य कार्यम् । न च वाच्यम्--"सत्यपि स्थानिवत्त्वेऽन्तर्भूताज्निमित्ततयाऽन्तरङ्गयोरायावोः कर्त्तव्ययोर्बहिभूततद्धितापेक्षतया बहिरङ्गावैचावसिद्धावित्यायावौ न भविष्यतः" इति; "नाजान्तर्ये बहिरङ्गप्रक्लृप्तिः" इतिवचनात् । यथा-अक्षद्यूरिति बहिर्भूतक्विबवेक्षोऽप्यूडन्तर्भूताजपेक्षेयणि नासिद्धो भवति । अजपेक्षे तु पूर्वत्वे वि + आकरणः, सु + अश्व इत्यजवस्थायां य्वोरभावेनैचोरदर्शनादप्रसङ्गस्तदाह-"अचः पूर्वत्वविज्ञानादैचौः सिद्धम्" इति । किं च --निमित्तापेक्षे पूर्वत्वे द्वाभ्याम्, देयम्, लवनमित्यत्रात्वेत्वगुणाः स्वनिमित्तात्पूर्वेषां स्वेषामेव कार्येषु दीर्घगुणावादेशेषु स्थानिवत्स्युः । तथोभयोरपि पक्षयोरपीपचदित्यादौ "सन्वल्लघुनि" इति सन्वद्भावो न स्यात्; उपधाह्रस्वस्य स्थानिवत्त्वादलघूपधत्वात् । अजपेक्षे तु पूर्वत्वे पाचि + अत् इति स्थिते द्विर्वचनमुपधाह्रस्वत्वं णिलोपः-इत्येतेषु प्राप्तेषु परत्वादन्तरङ्गत्वाच्च णिलोपे कृते पर वान्नित्यत्वाच्च ह्रस्वत्वे च पश्चाद् द्विर्वचनेऽभ्यासस्य स्थानिनोऽचः पूर्वत्वेनादृष्टत्वान्नास्ति स्थानिवद्भावः । तथा च तत्र तत्रोच्यते- "योऽनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भाव आदिष्टाच्चैषोऽचः पूर्वः" इति । तस्मादजपेक्षमेव पूर्वत्वम् । यद्येवम्, तन्वन्तीत्यत्रेटि कर्त्तव्ये यणः स्थानिवत्त्वं न स्यात्, तन् उ अन्तीत्यजवस्थायां यत्पूर्वमङ्गं न तस्येट्, किं तर्हि ? ततः परस्यादेशस्यैव । निमित्तापेक्षे तु यणो निमित्तादन्त्यकारात्पूर्वस्य तस्यैव यण इड् विधेय इति कर्मसाधने भावसाधने च विधिशब्दे स्थानिवत्त्वं लभ्यते । आदेशापेक्षेऽपि भावसाधने यणः पूर्वत्वेनेटो विधेयत्वात्सिध्यति, नैष दोषः, "आर्द्धधातुकस्येड्" इत्यत्र "एकाच उपदेशे" इत्यतः "उपदेशे" इत्यनुवृत्तेरुपदेशे वलादेरिड् भविष्यति; तत्राप्युपदेश इत्यनुवृत्तेः । एवमपि चोरिष्यत इत्यादौ वलादिलक्षणे चिण्वदिटि च प्राप्ते नित्यत्वाच्चिण्वदिडिति । वक्ष्यति-"नित्यश्चायं वल्निमित्तविघाती" इति,तन्नोपपद्यते; उक्तेन प्रकारेण वलादिलक्षणस्यापीटो नित्यत्वात् । एवं तर्हि अहिरङ्गस्य यणोऽसिद्धत्वादिडभावः ।

यद्वा-पूर्वस्माद्विधिः पूर्वविधिरिति पञ्चमीसमासोऽप्याश्रीयते, तेन पूर्वस्मादङ्गादिटो निमित्तत्वेननाश्रितात्परस्य यण इति कर्त्तव्ये स्थानिवद्भविष्यति ।। कानि पुनः पञ्चमीसमासप्रयोजनानि ? इदं तावत्प्रयोजनम्-तन्वन्तीति । किञ्च बेभिदिता, मार्थितिकः, अपीपचन् । बेभिद्यतेर्यङन्तात्तृचि अल्लोपस्य स्थानिवत्त्वान्न भवति, नैतदस्ति; बेभिद्य तृ इति स्थितेल्लोपश्च पाप्नोति इट् च; परत्वादिट् । नित्योऽल्लोपः-कृतोऽपीटि प्राप्नोति; इट् पुनरनित्यः, न हि कृतेऽल्लोपे प्राप्नोति, नित्येनाल्लोपेन बाध्यते । यस्य च निमित्तं लक्षणान्तरेण न विहन्यते तद् नित्यम्, अत उभयोर्नित्ययोः परत्वादिडेव भविष्यति । इदं तर्हि मथितं पण्यमस्य माथितिक इति ठस्येकादेशे कृते, यस्येति लोपे चेकस्य स्थानिवद्भावेन ठग्रहणेन ग्रहणात् "इसुसुक्तान्तात्कः" इति कादेशः प्राप्नोति, यस्येति लोपस्य स्थानिवद्भावान्न भवति । एतदपि सन्निपातपरिभाषया ठस्येति वर्णग्रहणेनाल्विधित्वेन स्थानिवद्भावाभावाद्वा सिद्धम् । इदं तर्हि अपीपचन्, अपीपच+अन् इति स्थितेऽन्त्याकारस्य चङकारस्य च "अतो गुणे" इति पररूपत्वे तस्य परं प्रत्यादिवद्भावाज् झिग्रहणेन ग्रहणे सति सिजभ्यस्तविदिभ्यश्च" इति जुस् प्राप्नोति, णिलोपस्यैकादेशस्य वा स्थानिवद्भावान्न भवति । तदेवमजपेक्षमेव पूर्वत्वमाश्रीयते; विधिशब्दश्च कर्मसाधनः, शेषषष्ठ्या च समास इति न कश्चिद् दोष इति स्थितम् ।

पट्यतीति । णाविष्ठवदिति टिलोपः । अवधीदिति । "हनो वध लिङि" "लुङि च" इति वधादेशः । हलन्तलक्षणेति । "वदव्रज" इत्यत्र हलन्तस्येत्यनुवृत्तेर्हलन्तलक्षणा । बहुखट्वक इत्यत्र "स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवद्" इति वचनात् स्वरविधावप्यत्र स्थानिवत्त्वं भवत्येव । प्रश्न इति । "यजयाचयत" इत्यादिना नङ्, "च्छ्वोः शूठ्" इति छस्य शः । तुकि न स्थानिवद्भवतीति । तुकि कर्त्तव्ये न स्थानिवद्भवतीत्यर्थः । नन्वन्तरङ्गत्वात् पूर्वं तुका भाव्यम्, तत्र चैकं निमित्तीकृत्य युगपदाङ्गवार्णयोः प्रसङ्गः, तत्र वार्णादाङ्गं बलीयः, यथा-करोतेर्लिटि णलि कृ अ इति स्थिते, गौरित्यत्र सावकाशाम् "अचो ञ्णिति" इति वृद्धिं बाधित्वाऽन्तरङ्गत्वात्प्राप्तं यणं वृद्धिरेव बाधते, प्रश्न इत्यत्र तु शस्य नङ् निमित्तं तुकस्तु छः, भिन्नकाला चानयोः प्राप्तिरिति नायमस्या विषय इति तुकि सति "च्छ्वोः शूठ्" इत्यत्र सतुक्कच्छकारनिर्देशेन तस्यैवादेशः एवं च सत्यापि स्थानिवत्त्वे सतुक्तच्छग्रहणेन शो गृह्यते, न केवलं छग्रहणेनेति कुतस्तुकः प्रसङ्गः ! अत एव नङो ङित्वमपि विश्न इति गुणो मा भूदिति, तस्मादप्रत्युदाहरणमेतदिति प्रत्युदाहरणान्तरमाह-आक्राष्टामिति । "स्पृशमृशकृषतृप्दृषां सिज् वा वक्तव्यः" इति क्सापवादः पक्षे सिच् । अनुदात्तस्येत्यम्, यणि "वदव्रज" इति वृद्धिः । "पूर्वत्रासिद्धे न स्थानिवद्" इति वचनादत्राप्यतृप्यन्नाह--आगत्येति । "वा ल्यपि" ।

युवजानिरिति । बहुव्रीहौ पुंवद्भावः, युवतिशब्दस्य वयोवचनत्वेनाजातिवाचित्वात् "जातेश्च" इति प्रतिषेधो न भवति । यलोपे न स्थानिवदिति । ननु योऽत्रादेशो नासौ लोपस्य निमित्तम्, तस्य वल्मात्रनिमित्तत्वात्; यश्च निमित्तं नकारः नासावादेश इति स्थानिवत्त्वं न भविष्यति । न च जायाशब्दस्य जनेरौणादिके यङ्प्रत्यये "ये विभाषा" इत्यात्वे च व्युत्पादितत्वाद् निङः स्थानिवत्त्वे सत्यातो लोपप्रसङ्गः, न ह्युणादिषु व्युत्पत्तिकार्यमवश्यं भवति, अत उदाहरणानतरोपन्यासः--वैयाघ्रपद्य इति । व्याघ्रस्येव पादावस्येति "पादस्य लोपोऽहस्त्यादिभ्यः" इत्यपरनिमित्तः "गर्गादिभ्यो यञ्" । ननु सत्यपि स्थानिवत्त्वे वचनात् पद्भावो भविष्यति; यद्येवम्, पादे इत्यत्रापि प्राप्नोति; सति तु परस्मिन्नत्यस्मिन्वैयाघ्रपद्य इत्यत्र पद्भावस्य चरितार्थत्वाद् पादे इत्येकादेशस्य स्थानिवत्त्वात् पद्भावाभावः । कथं पुनरेकादेशस्य स्थानिवत्त्वम्, न ह्ययमच आदेशः, किं तर्हि ? अचोः उच्यते; वर्णनिर्देशेषु जातिग्रहणाद्, "अच" इत्येकत्वास्याविवक्षितत्वाद् अचोरप्यादेशः स्थानिवत् । द्वयोरपि वा स्थानित्वे यदेकस्य स्थानित्वं तदाश्रयं तस्य स्थानिवत्त्वं भविष्यति । अत एव श्रायसौ, गौमतौ, चातुरौ, आनुडुहाविति श्रायसादिभ्योऽणन्तेभय औप्रत्यय एकादेशस्यादिवत्त्वात् प्राप्तौ नुमामौ न भवतः; उदकं वहति, "कर्मण्यण्" संज्ञायामुदभावः, सप्तम्येकवचन एकादेशस्यादिवत्त्वाद्भत्वे सति प्राप्तः "वाह ऊठ्" न भवति उदवाहे इति । आदीघ्य इति । अदादित्वाच्छपो लुक् । परस्मिन्नत्युच्यमाने स्यानिवद्भावाभावात् कृते टेरेत्वे लोपो न प्राप्नोति । टेरेत्वं तु कृताकृतप्रसङ्गित्वान्नित्यमिति तदेव भवति । ननु च परस्मिन्नत्यसति शब्लुकोऽपि स्थानिवत्त्वात् तद्व्यवधानादेव लोपो न भविष्यति, न; "क्विलुगुपधात्वचङ्पनिर्ह्निर्ह्लासकुत्वेषु" इति लुका लुप्तस्य स्थामिवत्त्वप्रतिषेधात् । हे गौरिति । "गोतो णित्" । बाभ्रवीया इति । बभ्रोरपत्यमिति "मधुबभ्रवोर्ब्राह्मणकौशिकयोः" इति यञ्, "ओर्गुणः","वान्तो यि प्रत्यये" इत्यवादेशः । अवादेशो न स्थानिवद्भवतीति । ननु चासत्यपि स्थानिवद्भावे संनिपातपरिभाषया न भवितव्यमेवात्र यलोपेन, नैतदस्ति; "अचः" इत्ययं संघातो यादिसन्निपातकृतः; न च स लोपस्य निमित्तम्, किं तर्हि ? वकारमात्रम् । यद्येवम्, स्थानिवद्भावस्याप्यप्रसङ्गः, योऽत्रादेशो नासावाश्रीयते, यश्चाश्रीयते नासावादेशः । नैवेय इति । निपूर्वाद्धाञः "उपसर्गे घोः किः","आतो लोपः","द्व्यचः" "इतश्चानिञः" इति ढक् । ननु च पूर्वस्मादपि विधौ स्थानिवत्त्वमुक्तम्, तत् कथमेतानि प्रत्युदाहरणानि ? नैष दोषः; अत्राप्यजपेक्षस्य पूर्वस्याश्रयणाद् योऽनादिष्टादचः पूर्वस्ततः परस्येति । एवमपि हे गौरित्यत्र प्राप्नोति व्यवहितेऽपि परशब्दवृत्तेर्गकारात्परस्य सोर्लोपः, एवमितरयोरपि, नैतदेवम्; पूर्वस्य विधिरिति षष्ठीसमास एवायम्, तत्रानुवादत्वात् स्थानषष्ठ्यभावात् सम्भन्धसामान्ये षष्ठी-पूर्वसम्बन्धिनि विधाविति । सम्बन्धश्च द्विविधः-कार्यित्वेन, निमित्तत्वेन वा । यत्र कार्यित्वेन स पूर्वस्य विधिः, यत्र निमित्तत्वेन स पूर्वस्मात्; ततश्च योऽनादिष्टादच पूर्वस्तन्निमित्तत्वेनाश्रित्य यत्कार्यं प्राप्तं स एव पूर्वस्माद्विधिः, यथा-अपीपचन्निति । अत्र हि योऽनादिष्टो णिच् चङ् वा, ततः पूर्वमपीपच् इत्येवाभ्यस्तं परस्य झेर्जुसो निमित्तम् । तन्वन्तीत्यत्र योऽनादिष्टोऽच् उप्रत्ययस्ततः पूर्वं यत् तन्निमित्तत्वेनाश्रीयते तद्विधावङ्गस्येत्यनुवृत्तेः । एतदेव तत्राङ्गाधिकारस्य प्रयोजनम् । हे गौरित्यादौ तु योऽनादिष्टादचः पूर्वो गकारादिर्न तत्सम्बुद्धिलोपादेर्निमित्तम्, यच्च निमित्तमोकारादिर्नासावनादिष्टादचः पूर्व इति न दोषः । इह तर्हि वेतस्वानिति, टिलोपस्य पूर्वविधौ स्थानिवत्वात् सकारात्पूर्वस्यानुपधात्वाद् "मादुपधायाः" इति वत्वं न स्यात् । न च स्थानिवद्भावेन सन्निहितमकारमपेक्ष्याकारान्तादिति लभ्यते, तस्यानादिष्टादचः पूर्वत्वाभावात् तदपेक्षत्वे स्थानिवद्भावात्, नैष दोषः; "पूर्वत्रासिद्धे न स्थानिवतद्" ।

विधिग्रहणं किम्, ननु पूर्वसूत्रादेवानुवर्त्तते ? समासद्वयपरिग्रहार्थम् । असति हि तस्मिन् पूर्वस्येत्युक्ते पूर्वस्माद्विधौ न स्यात्, पूर्वस्मादित्युक्ते पूर्वस्य विधौ न स्यात्, नैतदस्ति; पूर्वस्येत्युक्तेऽपि अनुवादत्वात् स्थानषष्ठ्यभावात् सर्वः पूर्वसम्बन्धी विधिः प्रतिपत्स्यते । एवं तर्हि विधिमात्रे स्थानिवद्यथा स्यात् शास्त्रीये विपरीते च । यद्वा-विधिग्रहणं द्वितीयो यत्नः, तत्राचः परस्मिन्पूर्वस्येत्येको योगः, विधावित्येव । तेन वव्रश्चेत्यादौ स्थान्यलाश्रयमतिदिश्यते । ततो विधौ, अचः परस्मिन्पूर्वस्येत्येव, नियमार्थमेतत्-अजादेशः परनिमित्तकः पूर्वविधौ स्थानिवदेव, न तु स्वयं निमित्तमिति । तेन पटयतीत्यादि सिद्धं भवतीति । नन्वसत्यपि द्वितीययत्ने यथा चोलवत् काश्मीरेषु व्रीहयः, मरुभूमिवदस्मिन्प्रदेशेजलमित्यादौ दृष्टान्ते प्रसिद्धस्य भावस्याभावस्य वा यथादर्शनमतिदेशः, एवमत्रापि भविष्यति ? विषम उपन्यासः; युक्तं तत्र भावस्यैवाभावस्यैव च प्रसिद्धत्वाद्, इह तूदाहरणभेदेन भावाभावयोः प्रसिद्धावपि "स्थानिवदादेशः" इत्युक्तेऽश्रुतक्रियापदेषु वाक्येषु भावतीत्येवाध्याहारस्य प्रसिद्धत्वाद् भावातिदेशः स्याद् इत्यलमितप्रबन्धेन ।।

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ।। 1.1.58 ।।

द्विर्वचने यलोपादौ च तावत् तदेव विधेयम्, न तु तस्य व्यवस्थितस्य किञ्चित् । कौ स्त इत्यादौ तु पदान्तस्य सतः कार्यमावादि पदान्तस्य वाऽऽवादेर्विधानमित्युभयथा सम्भवः । एवं वरेविधावपि । तथापि सर्वग्रहाय भावसाधन एव विधिशब्दः । एतेष्विति । पदान्तादिविधेयभेदेन भिन्नानि यानि विधानानि एतेष्वित्यर्थः । पूर्वविधावित्यादि । यद्यपि व्याकरणे न पदानि संस्क्रियन्ते, न वाक्यम्, तथापि वाक्यगते स्त इत्यादिके पदे व्युत्पाद्यमाने कावित्यादेः पदस्यासत्यपि निमित्तत्वे सन्निधानमविरुद्धम् । ततश्चानादिष्टादचः पूर्वत्वसम्भवादस्ति स्थानिवत्त्वप्रसङ्ग इति भावः ।

दध्यत्रेति । स्थानिवद्भावप्रतिषेधसामर्थ्याद् "असिद्धं बहिरङ्गमन्तरङ्गे" इत्येतदपि न प्रवर्तते । शच्यावित्यादावपि बहिर्भूताजपेक्षत्वाद्यण् बहिरङ्ग एव "वर" इति निपातनादलुक् । यायावर इति । "नित्यं कौटिल्ये गतौ" इति यङ् । अतो लोपः परनिमित्तक इति । " आर्द्धधातुके" इति परसप्तमीपक्ष इति भावः । तथा च "अनुदात्तेतश्च हलादेः" इत्यत्रादिग्रहणम् । असति हि तस्मिन् हलन्तादिति विज्ञायेत, ततश्च जुगुप्सनो मीमांसन इत्यत्र युज्न स्यादिति । यदि च सा विषयसप्तमी स्यात्, प्रगेव प्रत्ययोत्पत्तेरतो लोपे सति हलन्तत्वादत्रापि युच् सिद्धः स्यात् । यत्तु "अचो यत्" इत्यत्र वक्ष्यति--"अज्ग्रहणं किम्, यावता हलन्ताण्ण्यं वक्ष्यति ? अजन्तभूतपूर्वादपि यथा स्याद्-दित्स्यम्, धित्स्यमिति । तद्विपयसप्समीपक्ष इति वेदितव्यम् । परसप्तमीपक्षे हि प्राक्प्रत्ययोत्पत्तेरतो लोपाभावादनुपपन्नं तत्स्यात् ।

कण्डूयतेः क्तिनि कृत इति । "क्तिन्नावादिभ्यो वक्तव्यः" इत्यनेनेति भावः । "क्तिचि" इति तु युक्तः पाठः । कण्डूतिरित्यत्राल्लोपस्य स्थानिवत्त्वादुवङ् प्राप्नोति, अस्तु; च्छ्वोः शूठ्" इत्यूट् भविष्यति । न चोठ्यपि स्थानिवत्त्वम्, आदिष्टादचः पूर्वत्वात् । अत एवोठः पुनरुवङ् न भवति ।

परसवर्णे न स्थानिवद्भवतीति । ननु श्नसोरल्लोपे कृते पश्चादनुस्वारो भवन्नादिष्टादचः पूर्व इति कथमस्य परसवर्णे कर्त्तव्ये स्थानिवत्त्वप्रसङ्गः ? स्यादेतत्स्थानिनो नकारस्यानादिष्टादचः पूर्वत्वादादेशोऽनुस्वारोऽपि स्थानिवद्भावादनादिष्टादचः पूर्व इति, तन्न; न ह्यनादिष्टादचः पूर्वत्वं नाम शास्त्रीयं यदतिदिश्येत । एवं तर्ह्यनादिष्टादचः पूर्वत्वापेक्षेऽचः परस्मिन्नत्यतिदेशे कर्त्तव्ये स्थानिवदादेश इत्येतत् प्रवर्त्तते, अतः सवर्णग्रहणं कृतम् ।

शिषन्तीति । यद्यपि शिण्ढीत्येवानुस्वारविधेरप्युदाहरणम्, तथापि तस्मिन्नेवोदाहृते परसवर्णविधौ स्थानिवत्त्वनिषेधः, तस्य स्थानिनोऽनुस्वारस्यापि विधौ स्थानिवत्त्वप्रतिषेधमन्तरेणानुपपन्न इति पृथगनुस्वारग्रहणं न कर्त्तव्यमित्याशङ्का निराकरणाय केवलानुस्वारोदाहरणं दर्शितम् ।

प्रतिदीव्नेति । प्रतिपूर्वाद्दिवेः "कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः" इति कनिन्प्रत्ययः भस्येत्यधिकृत्येति । परनिमित्तकत्वोपपादनार्थः । किमिदमुक्तम्हलि चोपधायां चेति दीर्घत्वं न स्यादिति, उपधायाञ्चेत्येतल्लेखकैः प्रमादाल्लिखितम्, तथा चोपधायाञ्चेत्यत्र वक्ष्यति-प्रतिदीव्नेत्यत्र "हलि च" इति दीर्घत्वमिति । अस्माद्वचनाद्भवतीति । "न भकुर्छुराम्" इति तु प्रतिषेधो रेफवकारान्तस्य भस्येत्यत्र न प्रवर्त्तते ।

झलो झलीति सलोप इति । सकारे सिचो लोप इत्येतत्तु नाश्रीयते, तस्मिंस्त्वाश्रिते छान्दसत्वाद्वर्णलोपः ।

बहुखट्वक इति । अत्र स्थानिवद्भावद् "ह्रस्वान्तेऽन्त्यात्पूर्वम्" इति खकारा कारस्योदात्तत्वं न भवति,"कपि पूर्वम्" इत्येतदेव तु भवति । किर्योः, गिर्योरिति । "कृग्रोरिच्च" इति व्युत्पत्तिपक्ष एतदुदाहृतम् । "उपाधायाञ्च" (8।2।78) इत्यत्रत्वव्युत्पत्तिपक्षमाश्रित्य वक्ष्यति--"उणादयोऽव्युत्पन्नानि प्रातिपदिकानि, इति किर्योगिर्योरित्यादिषु दीर्घो न भवति" इति ।

"क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेष्वजादेशो न स्थानिवद्भवति" इति वक्तव्यम् । क्वि-क्वौ यद्विधीयते तत्र कर्त्तव्ये यत्र कुत्रचित् कृतोऽजादेशो न स्थानिवद्भवतीति; लवमाचक्षाणो लौः, अत्र णिचि यष्टिलोपः, यश्च क्वौ णिलोपस्तदुभयमपि "च्छ्वोः शूठ्" इति वकारस्य क्विनिमित्ते ऊठि कर्तव्ये न स्थानिवद्भवतीति "एत्येधत्यूठ्सु" इति वृद्धिः । ये तु "क्वौ लुप्तं न स्थानिवत्" इति पठन्ति तेषामेतन्न स्यात् । तथा पिपठिषतेः क्वौ, अतो लोपे नपुंसके बहुवचने जसिझल्लक्षणे नुमि जस्निमित्तेऽपि कर्त्तव्येऽयो लोपस्य स्थानिवत्त्वनिषेधः स्यात्, क्वौ कृतत्वात् । क्वौ विधिं प्रतीत्यत्र तु पक्षे प्रतिषेधो न भवति, पिपठीषि ब्राह्मणकुलानि, नुम्यसति "सान्तमहतः" इति दीर्घत्वं न भवति । देवयतेर्द्यूरित्यत्रोभयथापि सिध्यति । लुक्-लुका लुप्ते न स्थानिवत्, आमलक्या विकारफलम् "नित्यं वृद्धशरादिभ्यः" इति मयटः "फले लुक्" "लुक्तद्धितलुकि" इति ङीपो लुक् परिनिमित्तकः यस्येति लोपे न स्थानिवद् भवति । केचित्त्वेतदर्थं सूत्रे वर+ई = वरे इति ईकारप्रश्लेषं वर्णयन्ति, ईविधिं प्रति न स्थानिवदिति । उपधात्वेउपधात्वे कर्तव्ये न स्थानिवत् । परिखाशब्दाच्चातुरर्थिके णिकृते पारिखे भवः पारिखीय इति "वृद्धादकेकान्तखोपधात्" इति छो न स्यात्, आकारलोपस्य स्थानिवत्त्वादनुपधाखकार इति । प्रत्ययविधिविषयं चैतत्, यत्रोपधासंज्ञानिबन्धन प्रत्ययो विधातुमिष्यते तत्रैवेत्यर्थः, घटयतीत्यादौ तु तन्न भवति । चङ्परो ये निर्ह्रासो ह्रस्वस्तत्र न स्थानिवद्भवति--वादितवन्तं प्रयोजितवान् अवीवदद् वीणां परिवादकेन, योऽसौ णौ णिर्लुप्यते तस्य स्थानिवद्भावाद् णौ चङ्युपधाया ह्रस्वो न स्यात्,

यश्चङ्परो णिर्न तस्मिन्नङ्गस्योपधा, यस्मिंश्चाङ्गस्योपधा न चङ्पर इति । कुत्वम्--पाचयतेः क्तिचि पाक्तिः । कुत्वमुपलक्षणम् । लेहयतेर्लेढिः, दोहयतेर्दोग्धिः, याचयतेर्याक्तिः, वेशयतेर्वेष्टिरित्यादि ।।

द्विर्वचनेऽचि ।। 1.1.59 ।।

"अचः परस्मिन्" इत्यत्र "योऽनादिष्टादचः पूर्वः" इति स्थितम् । साच्कस्य द्विर्वचनं न त्वचः पूर्वस्येत्यप्राप्तं स्थानिवत्त्वं विधीयते, रूपातिदेशार्थं च । अत्र षट् पक्षाः सम्भवन्ति । अचीत्यादेशोपलक्षणम्, द्विर्वचन इति विषयनिर्देशः, अचि योऽजादेशः स द्विर्वचने स्थानिवद्भवतीति प्रथमः पक्षः । अचीत्येतदपि स्थानिवद्भावेनैव सम्बध्यते, द्विर्वचन इति विषयनिर्देशाद्, द्विर्वचने कर्तव्येऽजादेशः स्थानिवद्भवत्यचि पर इति द्वितीयः । द्विर्वचननिमित्तत्वादजेव द्विर्वचनग्रहणेन विषेष्यते, द्विर्वचनमस्मिन्नस्तीत्यर्शआद्यच्प्रत्ययान्तेन वा, अधिकरणसाधनेन वा, आदेशोपलक्षणम्, द्विर्वचननिमित्तेऽचि योऽजादेश- स स्थानिवदिति तृतीयः । एवं विशेषितं वाज्ग्रहणं स्थानिवद्भावस्य विशेषणम्, अजादेशः स्थानिवद्भवति द्विर्वचननिमित्तेऽचि परत इति चतुर्थः । द्विर्वचनग्रहणमा वर्तते, तत्रैकेनाज्विशेष्यते, परेण विषयी निर्दिश्यत इति स्थिते तद्विशेषितमज्ग्रहणं स्थानिवद्भावस्य विशेषतणम्, द्विर्वचने कर्तव्येऽजादेशः स्थानिवद्भवति द्विर्वचननिमित्तेऽचि परत इति पञ्चमः । एवमेव स्थितेऽज्ग्रहणमादेशोपलक्षणम्, द्विर्वचननिमित्तेऽचि योऽजादेशः स द्विर्वचने कर्तव्ये स्थानिवद्भवतीति षष्ठः ।

अत्राद्ये पक्षेऽचो द्विर्वचनेनाविशेषितत्वाद् द्विर्वचननिमित्तेऽप्यचि आदेशः स्यानिवत्स्यात्, ततश्चाचिकीर्तद् इत्यत्र णिचि "उपधायाश्च" इतीत्वस्य "चङि" इति द्विर्वचने स्थानिवद्भावादचकीर्त्तदिति स्यात् । दुद्यूषति--ऊठि यणादेशः स्थानिवत्स्यात् । भवनमिच्छति, भवनीयतेः सन्, बिभवनीयिषति-ल्युटि कृतयोर्गुणावादेशायोः स्थानिवत्त्वे बुभवनीयिषतीत्यनिष्टं रूपं प्राप्नोति । द्वितीये तु अचिकीर्तदित्यत्र न दोषः, इत्वस्य तकारेण व्यवहितत्वात् स्थानिवद्भावभाजो ह्यादेशस्य स्थानिवत्त्वविधानवेलायामच्यचनन्तरे स्थानिवत्त्वेन भवितव्यम् । एवं ह्यचि परतः स्थानिवद्भावः कृतो भवति । दुद्यूषतीत्यादौ तु स्यादेव । ययावित्यत्र "आत औ णलः" इत्यौकारेण वृद्धौ कृतायां संप्रत्यादेशात्परोऽज्नास्तीति स्थानिवत्त्वं न स्यात् । जग्मतुरित्यादौ च "गमहन" इत्युपधालोपस्य व्यवहितत्वान्न स्यात् । तृतीये तु कालावधारणं कर्तव्यम्, अन्यथा द्विर्वचनादुत्तरकालमपि स्थानिरूपमेवावतिष्ठेत । चतुर्थे तु ययौ, जग्मतुरित्यादौ पूर्वोक्तन्यायेन स्थानिवद्भावो न प्राप्नोति, कालावधारणं च कर्तव्यम् । पञ्चमेऽपि ययौ, जग्मतुरित्यादौ न स्यात्, अत एतेषु पक्षेष्वेवं दोषसम्भवात् षष्ठं पक्षमाश्रित्याह-द्विर्वचननिमित्तेऽचीत्यादि । अत्र हि पक्षे द्विर्वचनेनाचो विशेषणादचिकीर्त्तत्, दुद्यूषति, बिभवनीयिषतीत्यादौ न दोषः । आदेशोपलक्षणत्वाच्च ययावित्यादावपि न दोषः पुनश्च द्विर्वचनग्रहणात् कालावधारणमपि लभ्यते । ननु "द्विर्वचननिमित्तेऽचि योऽजादेशः" इत्युच्यमाने नुनावयिषति, चक्षावयिषति, पुस्फारयिषतीत्यादौ णेरद्विर्वचननिमित्तत्वात्तन्निमित्तावादेशः, आकारश्च न स्थानिवत्स्यात्; ततश्चाभ्यास उकारो न श्रूयेत, नैष दोषः;"पुयण्जि" इति ज्ञापकाद् द्वित्वनिमित्तेऽपि णौ स्थानिवत्त्वापायात् । तथा हि- न हि णौ कृतस्य स्थानिवद्भावमन्तरेण ओः पराः पुयण्ज्योऽवर्णपराः सम्भवन्ति; पिपविषति, यियविषति-इत्यत्र सम्भव इति चेत्, किमेतावता पुग्रहणं प्रत्याहारग्रहणं जग्रहणं चार्थवद्भवतीति ? ज्ञापकमुक्तार्थस्य यद्येवम्; अचिकीर्तदित्यत्रेत्वस्य स्थानिवत्त्वादचकीर्तदिति स्यात्, नैष दोषः; ज्ञापकस्य तुल्यजातीयापेक्षत्वात् यत्रोत्तरभागस्याद्योऽवर्णपरो भावस्तत्रैव स्थानिवत्त्वज्ञापनात् । नन्वेवमपि "ओः पुयण्" इत्यत्र णेरित्यश्रवणात्सामान्येन द्वित्वनिमित्तं स्थानित्वं विज्ञायेत, ततश्च विभवनीयिषतीत्यत्रापि स्यात्, न ह्यत्राजमात्रं द्विर्वचननिमित्तम्, क्व तर्हि स्यात् ? चकार, चक्रे इत्यादौ ह्यज्मात्रं प्रत्ययः । स्यादेतत्-परस्मिन्नित्यनुव-त्तमचीत्यनेन विशेष्यते, तत्र यस्मिन्विधिस्तदादावल्ग्रहणमिति तदादिविधिर्भवति । अजादौ परस्मिन्निति द्विर्वचननिमित्तत्वेनापि अजाद्येव विशेष्यत इति । एवमपि चक्रतुरित्यत्र स्यात्, यद् द्विर्वचननिमितमजादि न तदादेशस्य निमित्तम्; अच्येव यणो विधानात् । यच्चादेशस्य निमित्तं न तद् द्विर्वचनस्य निमित्तम्; पपतः चख्नतुरित्यादावेन तु स्यात् । किञ्च "यस्मिन्विधिः" इति वचनाद्यत्र किञ्चिद्विधीयते तत्रैव तदादिविधिः, इह तु अचि योऽजादेश इत्यनुवादत्वात्तदादिविधेरेवासम्भवस्तस्यमादजेव गृह्यते, न तदादिः, उच्यते; चक्रतुरित्यादावतुसोद्विर्वचनं प्रति निमित्तत्वेनाश्रयणेऽप्यचि परत्रावस्थिते द्विर्वचनं दृष्टमित्येतावताजेव द्विर्वचननिमित्तमित्युच्यते । समुदायेऽप्ययं द्विर्वचनशब्द उपचारेण प्रवर्त्तते । एवमपि पपतुरित्यत्र न स्यात्, आल्लोपस्याजादिनिमित्तं नाज्मात्रम्, नैष दोषः; "अचि योऽजादेशः" इति कोऽर्थः ? अचि यो दृष्ट इत्यर्थः । यश्चाचि विधीयते, यश्चाजादौ-द्वावपि अचि दृष्टावेवेति सर्वत्र सिध्यति । अथ वा-अजादावाल्लोपो न हलादौ, तत्र प्राप्ताप्राप्तविवेकेनाच एव मिमित्तत्वम् । द्विर्वचन एव कर्त्तव्य इति एवकारेणैतद्दर्शयति--द्विर्वचनग्रहणमचं विशिनष्टि,कालं चावधारयतीति । एकस्योभयसम्बन्धे हि भवति एवकारः-देवदत्तो ग्रामं गच्छतु स एव गामानयत्विति । यद्यत्रापि पूर्ववत्कार्यातिदेशः स्यात्; चक्रतुरित्यादावनच्कत्वादप्राप्तं द्विर्वचनं स्थानिवद्भावाद् भवदपि यणाद्यादेशयुक्तस्यैव स्यादित्यभयासे स्थानिरूपं न श्रूयेत, तदर्थमाह-रूपातिदेशश्चायमिति । "च" शब्दोऽवधारणे । कथं पुनरवगम्यते रूपातिदेशोऽयमिति ? अज्ग्रहणात् । तद्धिजेघ्रीयत इत्यत्र "ई घ्राध्मोः" इति हलादौ विहितस्येत्वस्य स्थानिवत्त्वं मा भूदित्येवमर्थं क्रियते । यदि च रूपं स्थानिवत्, ततोऽसत्यज्ग्रहणे घ्रायघ्रीय्ध्मायध्मीय् इति द्विर्वचनं स्यादिति तन्नवृत्तयेऽजग्रहणमर्थवद् भवति । अथ हि--कार्यं स्थानिवद् भवति, तस्य सत्यपि स्थानिवत्त्वे ईकारयुक्तस्यैव द्विर्वचनमिति नार्थोऽज्ग्रहणेन । भसेस्तु क्वसौ "घसिभसोर्हलि" इत्युपधालोपे कृते सत्यसति वा द्विर्वचनेभ्स्वानिति श्रुतौ विशेषाभावः । छान्दसच क्वसुः, छन्दसिदृष्टानुविधानमतो ज्ञापकमेवाज्ग्रहणम् । तत्र यद्यपि स्थान्येव स्वरूपमापद्यते, तथाप्यातिदेशिकानातिदेशिकरूपभेदाश्रयस्तु वतिर्द्विर्वचन एव कर्त्तव्य इत्येतदेव स्पष्टयति । नियतकाल इति । कृते द्विर्वचने इत्यादिना नियतकालत्वमेव दर्शयति । यदि कृते द्विर्वचने पुनरादेशरूपमेवावतिष्ठते, यथा--चक्रतुरित्यादौ द्विर्वचनादूर्ध्वं पूर्वं कृतो यणादेश एव श्रूयते तथा निन्यतुरित्यादावपि द्विर्वचनात्पूर्वमेकाच्त्वादि, यङादेशे कृते स्थानिवद्भावाद् द्विर्वचनेऽपि पूर्वप्रवृत्त इयङेव स्यात् । अस्तुः तस्य "असिद्धवदत्राभात्"

इत्यसिद्धत्वाद् "एरनेकाचः" इति यणि सति श्रवणं न भविष्यति । यद्वा-पूर्वप्रवृत्तोऽपीयङ् द्विर्वचनकालेऽपहृत इति पुनः प्रवर्तयितव्यः, तस्यां च दशायाम नेकाच्त्वाद्यणा बाध्यते । यद्येवम्, इयेष उवोषेति इषेरुषेश्च लिटि तिपि णलि प्रवृत्तस्यापि गुणस्य द्विर्वचनकालेऽपहृतत्वात्कृते द्विर्वचने पुनः प्रवृत्तिः, ततश्चानादिष्टादचः पूर्वत्वेनाभ्यासो दृष्ट इति तस्याभ्यासस्य उवङि कर्त्तव्ये गुणस्य स्थानिवद्भावादसवर्णं इति प्रतिषेधः स्यात् ।
असवर्णग्रहणसामर्थ्यात्स्थानिवत्त्वं न भविष्यति । अस्ति वचनस्यावकाशः-इयर्त्ति, इयृतः । ह्येकमुदाहरणमसवर्णेग्रहणं प्रयोजयति । यद्येतावत्प्रयोजनं स्यात्, अर्त्तावित्येव ब्रूयात् । कि तर्ह्युच्यते--द्विर्वचने पुनरादेशरूपमेवावतिष्ठत इति, अत्र हि "पुनः" शब्दाद्, "अवतिष्ठते" इति वचनाच्च पूर्वकृतस्यैवादेशस्योन्मज्जनमेवोक्तं प्रतीयत इति ? नायमर्थः; अपि तु कृते द्विर्वचने स्थानिरूपं नावतिष्ठते यत्प्राप्तं तद्भवतीत्येवंपरमेतत् ।
अल्लोपेत्यादि । उपलक्षणमेतत् । ततुरिः, पपुरिरित्यदौ "ॠत ईद्धातोः" "उदोष्ठ्यपूर्वस्य" "बहुलं छन्दसि" इति इत्वोत्वयरपि स्थानिवत्त्वं भवति । आटिटदिति । अटतेर्ण्यन्ताल्लुङि चङि "अजादेर्द्वितीयस्य" इति टिशब्दस्य द्विर्वचनम्, "आडजादीनाम्" । निनायेत्यादि । "णलुत्तमो वा" इति यदा णित्त्वं नास्ति तदा गुणः, णित्त्वपक्षे वृद्धिः ।
नेनैलोलाइति द्विर्वचनमिति । गृणवृद्ध्योस्तु स्थानिवद्भावे विशेषाभावान्नोक्तः ।
जग्ले, मम्ल इति । भावे लिट्, अनैमित्तिकमात्वम्, शिति तु प्रतिषेध इत्यात्वस्य स्थानिवत्त्वं न भवति । श्रवणमित्यादि । यदि कालो नावधार्येत, तदोत्तरकालमपि स्थानिरूपं प्रसज्येत, ततश्चाकारस्य श्रवणे सति परेण सह "वृद्धिरेचि" इति वृद्धिः स्यात् । इहाधिजगे इति "गाङ्लिटि" इति द्विलकारनिर्देशेन लकारादौ लिटि गाङादेशविधानादज्निमित्तत्वाभावात् स्थानिवत्त्वाभावः ।।
अदर्शनं लोपः ।। 1.1.60 ।।
इह दर्शनं ज्ञानमुपलब्धिः । तच्च शब्दानुशासनप्रस्तावाच्छब्दविषयं सच्छ्रवणं भवतीत्याह-अश्रवणमिति । श्रवणं च श्रोतृव्यापारः, तन्निषेधे "लोपो व्योर्वलि" इत्यस्य वकारयकारौ वल्परौ न श्रोतव्यावित्यर्थः स्यात् । ततश्च प्रयोक्तृव्यापार उच्चारणमनिषिद्धं स्यात् । असति श्रवणे उच्चारणमनर्थकमेव स्यादिति श्रवणनिषेधेन तद्धेतुभूतमुच्चारणमेव निषिद्धं भवतीत्याह-अनुच्चारणमिति । "लोपो व्योर्वलि" इत्यस्य कोऽर्थः ? वकारयकारौ वल्परौ नोच्चारयितव्याविति । अनेनापि प्रकारेणास्मिन्विषये तयोरभाव एव व्याख्यापितो भवति, न हि विद्यमानयोरनुच्चारणमुपपद्यत इत्याह-अभाव इति । स्वाभाविक एवाभाव इत्यर्थः । विनाश इति । कार्यशब्ददर्शन एतत् । अनर्थान्तरमिति । शब्दविषयाणामेषामर्थो न भिद्यत इत्यर्थः । "स्वं रूपम्" इति वचनाद् अदर्शनशब्दस्यैव संज्ञायां लोपप्रदेशेषु अदर्शनशब्द एवादेशः स्यादित्यत आह--एतैः शब्दैरिति । एतच्च "नवेति विभाषा" इत्यत इतिकरणानुवृत्तेर्लभ्यते । अथ वा-महती संज्ञा क्रियते, अन्वर्था यथा विज्ञायेत-लोपनं लोप इति । न चादर्शनशब्दो लोपनक्रिया भवति । यद्येवम्, प्रदेशेष्वेवार्थग्रहणमस्तु, किं संज्ञया ? तन्न; असति संज्त्राकरणे "स्वं रूपम्" इति वचनात् प्रदेशेषु लोपशब्द एवादेशः स्यात् । सति त्वशब्दसंज्ञेति निषेधान्न स्वरूपग्रहणं भवति । न शब्दस्येति । अर्थसिद्धमप्येतद्विस्पष्टार्थ पुनरुक्तम् । ननु विधिप्रदेशेष्वितरेतराश्रयः प्राप्नोति-सतोऽदर्शनस्य संज्ञा, संज्ञया चादर्शनं भाव्यत इति, तन्न; न हि लोपविधानात्प्रगसदेवादर्शनं वचनेन भाव्यते, अनित्यत्वप्रसङ्गात्, किं तर्हि ? सदेवादर्शनं साधुत्वेनान्वारूयायते । यद्येवम्, सर्वस्य स्वविषयादन्यत्र स्वभावतोऽदर्शनमस्तीति लोपसंज्ञा स्यात् । ततश्च दधि, मध्विति णिचोऽदर्शनस्य लोपसंज्ञायां प्रत्ययलक्षणेन वृद्धिः स्यात् । अङ्गस्य वृद्धिः, अङ्गसंज्ञा च विधानप्रतिबद्धा । क्विपस्तर्ह्यदर्शनस्य लोपसंज्ञायां तुक् प्राप्नोति, तत्राह-प्रसक्तस्येति । एवं मन्यते-"स्थाने" इति वर्तते; स्थानं च प्रसङ्गः; तेन प्रसङ्गे यददर्शनं तस्य लोपसंज्ञा, न च दधीत्यत्र क्विपः केनचित्प्रसङ्गोऽस्ति । एवमपि ग्रमणीरित्यत्र कर्मधातुकर्तृसन्निधानादस्ति अणः प्रसङ्ग इति तददर्शनस्य संज्ञायां वृद्धिः स्यात् । योऽत्राणः प्रसङ्गः, क्विपा सोऽपाह्रियते । सामान्यशास्त्रं हि विशेषसन्निधौ तद्व्यतिरिक्त एव विषये प्रतीतिं जनयति । तेन "सत्सूद्विष" इत्यस्य सन्निधौ "कर्मण्यण्" इत्यनेन नयतेरण् भवतीति बुद्धिरेव न जन्यते ।।
प्रत्ययस्य लुक्शलुलुपः ।। 1.1.61 ।।
"अदर्शनम्" इति सम्बन्धात् "प्रत्ययस्य" इति कर्मणि षष्ठी । यदि प्रत्ययादर्शनस्य लुगदिसंज्ञासङ्करः प्राप्नोति, विधानदशायां यया कयाचन संज्ञया भावितस्य प्रत्ययादर्शनस्यानुवादप्रदेशेषु यत्किञ्चनसंज्ञोच्चारणेऽपि ग्रहणप्रसङ्गः, ततश्च-अत्तीति लुक्संज्ञाया भावितस्यापि शपोऽदर्शनस्य "श्लौ" इत्यत्र ग्रहणाद् द्विर्वचनं स्यात्; जुहोतीति-"उतो वृद्धिर्लुकि हलि" इति वृद्धिः स्यात्; हरीतक्या फलानि-"लुक्तद्धितलुकि" इति ङीषो लुक् स्यात्; "लवणाल् लुक्" लवणस्सूपः, युक्तवद्भावः स्यात्; तथा लोपसंज्ञया भावितस्यापि लुक्संज्ञाया अगोमति गोमती सम्पन्ना गोमतीभूता ब्राह्मणीति च्वेर्लोपे "लुक् तद्धितलुकि" इति लुक् स्यादित्यत आह-अनेकसंज्ञाविधानाच्चेत्यादि । यद्यतद्भावितस्याप्येताः संज्ञाः स्युः, नेकसंज्ञाकरणमनर्थकं स्यात् । एकामेव संज्ञां कृत्वा तयैव सर्वाणि कार्याणि विधीयेरन् ! तस्मादनेकसंज्ञाविधानाद्यया संज्ञया यददर्शनं भवतितं तस्यैव सा संज्ञेति संज्ञानां सङ्करो न भवति । यद्येवम्, विधिप्रदेशेष्वितरेतराश्रयः प्राप्नोति । न चात्र नित्यतया परिहारः सम्भवाति; अदर्शनमेव हि नित्यम्; न पुनर्लुगादिसंज्ञया भावितम् । तत्र यदि तया संज्ञया भावितस्यादर्शनस्य सा संज्ञेति, व्यक्तमितरेतराश्रयो भवति, तत्राह-विधिप्रदेशेषु चेति । अदिप्रभृतिभ्यः परस्य शपस्तद्भवति, यस्य भूतस्य लुक्संज्ञा भविष्यतीत्येवं भाविन्याः संज्ञाया विज्ञानान्न भवतीतरेतराश्रयत्वदोषः । लोपसंज्ञात्वदर्शनमात्रस्य विधीयत इति लुगादिसंज्ञाविषयेऽपि भवत्येव । न च लुगादिसंज्ञाभिबधिः; एकसंज्ञाधिकारादन्यत्र संज्ञानां समावेशात् । अत एव " न लुमताङ्गस्य" इति निषेधः । वरणा इति । "अदूरभवश्च" इत्यणः "वरणादिभ्यश्च" इति लुप् ।
प्रत्ययग्रहणं किमति । न तावदप्रत्ययनिवृत्त्यर्थम्; लुग्, अणिञोः, तद्राजस्य यञञोश्च, शपः, यङः, सिचः, लेः, सुपः इति सर्वत्र प्रत्ययस्यैव निर्देशाद,

अनुवादेषु च तद्भावितस्यैव तस्य संप्रत्ययात् । "गोस्त्रियोरुपसर्जनस्य" इत्यत्र योगो विभज्यते--"गोरुपसर्जनस्य स्त्रियाः" इति, "लुक् तद्धितलुकि" इति स्त्रिया इत्येव;गोरिति निवृत्तम्; इतरथा कृतेऽपि प्रत्ययग्रहणे गमेर्डो लुक् स्यात्, "कंसीयपरशब्ययोर्यञञौ लुक् च" इत्यत्र ङ्याप्प्रातिपदिकाधिकारात् कंसीयपरशव्ययोः प्रतिपदिकात्परस्य भागस्य लुग्विज्ञास्यते, न प्रकृतिभागस्य; अन्यथा कृतेऽपि प्रत्ययग्रहणे कमेः सः कंसः, परान् शृणाति परशुरिति उकारसकारयोर्लुक् स्यात्, अतोऽप्रत्ययनिवृत्त्यर्थ तावत्प्रत्यग्रहणं न कर्त्तव्यम् । यत्र तर्हि न कश्चिन्निर्दिश्यते--"अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च" इति, अत्र प्रत्ययप्रतिपत्त्यर्थं प्रत्ययग्रहणं भविष्यति ? नैवम्; तत्रापि "यस्कादिभ्यो गोत्रे" इत्ययो गोत्रग्रहणानुवृत्तेरत्र्यादिभ्यो गोत्रे यो विहितस्तस्य लुक्, तथा "जनपदे लुप्" इत्यत्र "ङ्याप्प्रातिपदिकातप्रत्ययः " इत्यनुवृत्तेः जनपदे विहितस्य चातुरर्थिकप्रत्ययस्यैव लुप् । "लवणाल्लुक्" इत्यदिष्वपि प्रकृतस्य, अतः प्रत्ययस्य प्रतिपत्त्यर्थमपि न कर्त्तव्यं भवति । सर्वत्र चात्र्यादिभ्यः प्रतिपदिकाल्लवणादिति पञ्चम्यधिकारेण सन्निहितस्य षष्ठीं प्रकल्पयिष्यति, सा चानियतयोगत्वात् स्थानषष्ठी भविष्यतीति स्थानषष्ठीप्रतिपत्त्यर्थमपि प्रत्ययग्रहणं न कर्त्तव्यं भवति ।

एवं तर्हि सर्वादेशार्थं प्रत्ययग्रहणम्; असति तस्मिन् "यञञोश्च","सुपो धातु प्रातिपदिकयोः" इत्यादिषु यत्रानेकाल् प्रत्ययः, तत्रालोऽन्त्यस्य स्यात्, "लवणाल्लुक्" इत्यादौ तु आदेः स्यात्; सति तु प्रत्ययग्रहणे तत्सामर्थ्यात् सर्वादेशो लुगादिर्भवति ? ज्ञापकात्सिद्धम्, यदयम् "घोर्लोपो लेटि वा" इति लोपे प्रकृते "लुग्वा दुहदिह" इति लुकं शास्ति,तज्ज्ञापयति--"लुगादयः सर्वादेशाः" इति । "अलोऽन्त्यस्य" ह्यदर्शनं प्रकृतेन लोपेनापि सिद्धम् । विपर्ययस्तु न भवति, "घोर्लोपः" इत्यत्र तावदसंजातविरोधित्वाद् "अलोऽन्त्यस्य" इति प्रवर्तते, पश्चाल्लुग्ग्रहणं तस्यैव सर्वादेशतां गमयति । सामान्येन च ज्ञापकं समर्थयिष्यते--"लोपव्यतिरिक्तमदर्शनं सर्वादेशः" इति । अतः सर्वादेशार्थमपि प्रत्यग्रहणं न कर्तव्यमिति प्रश्नः ।

इतरोऽपि विदिताभिप्रायः परिहरति । आगस्तयः कुण्डिना इति । असति प्रत्ययग्रहणे आगस्त्यकौण्डिन्ययोरित्यत्र "लुगणिञोः" इत्यतो लुग्ग्रहणमनुवर्त्तते वा ? न वा ?

अनुवृत्तौ--स्थानिनौ द्वौ, लुका सह त्रय आदेशा इति वैषम्यादसति यथासङ्ख्ये एकैकस्य त्रय आदेशाः पर्यायेण स्युः । ततश्चागस्तयोऽपि कुण्डिनाः स्युः, कुण्डिनाश्चागस्तयः स्युः । लुक् च क्रियमाणो यदि ज्ञापकात्सर्वादेशः, तत उभयत्रापि विभक्तिमात्रश्रवणप्रसङ्गः ।

अथ निवृत्तम्--ततोऽगस्तयः, कुण्डिना इत्यत्र न कश्चिद्दोषः । अगस्तीनां छात्रा आगस्तीया इत्यत्र तु प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षितेऽप्यगस्त्यादेशस्य नि,ेधाभावात् प्रवृत्ताववृद्धत्वाच्छो न स्यात्; प्रत्ययग्रहणे तु सति लुग्ग्रहणानुवृत्त्याऽऽगस्त्यकौण्डिन्ययोः प्रत्ययांशस्य लुग्न भवति ।

परिशिष्टयोर्भागयोर्यथासंख्यमगस्तिकुण्डिनचावित्यर्थः सम्पद्यते; तेनगस्तयः, कुण्डिना इति च सिद्ध्यति । प्राग्दीव्यतीये च विवक्षिते "गोत्रे लुगचि" इति लुकि प्रतिषिद्धे तत्सन्नियोगशिष्टत्वादगस्त्यादेशेऽपि निवृत्ते आगस्त्यशब्दस्य वृद्धत्वाच्छे कृते "सूर्यतिष्यागस्त्य" इति यलोपे चगस्तीया इति सिद्ध्यति । कौण्डिन्ये च नास्ति विशेषः, निवृत्तेऽपि कुण्डिनजादेशे कौण्डिन्यशब्दादपि "कण्वादिभ्यो गोत्रे" इति अणि कृते "आपत्यस्य" इति यलोपे कौण्डिना इत्येव भवितव्यम् । अत आगस्त्यकौण्डिन्ययोरित्यत्रावश्यमनुवर्त्यं लुग्ग्रहणम् । ततश्च पूर्वोक्तदोषपरिहाराय प्रत्ययग्रहणमपि कर्तव्यम् ।

वयन्तु ब्रूमः-"सर्वादेशार्थमपि प्रत्ययग्रहणं सामान्येन ज्ञापकमगतिकगति" इत ।।

प्रत्ययलोपे प्रत्ययलक्षणमिति ।। 1.1.62 ।।

सूत्रारम्भस्य प्रयोजनमाह--प्रत्ययनिमित्तमित्यादि । लक्षणशब्दोऽयमस्ति भावसाधनः प्रादुर्भाववचनः, अस्ति च करणसाधनो निमित्तवचनः । तत्राद्यस्य ग्रहणे प्रत्ययलोपे सति प्रत्ययस्य प्रादुर्भावो भवतीत्यर्थः स्यात् । तत्र लुप्तस्यैव प्रत्ययस्य पुनः प्रादुर्भावविधौ लोपविधिर्व्यर्थः स्यात् । ननु च यः प्रत्यस्यैव लोपः "णेरनिटि" इत्यादि, तस्य वैयर्थ्यं नामास्तु; यस्तु "टेः" इत्यादिना सामान्येन विहितः, स यदा प्रत्ययस्य भवति--भिक्षुमाचष्टे भिक्षयतीति, तदा तस्य पुनः प्रादुर्भावेऽपि न तस्य वैयर्थ्यम्; उप्रत्यये चरितार्थत्वात् । एवं तर्हि लुप्तस्यैव प्रत्ययस्य पुनः प्रादुर्भाव इष्टे, न प्रत्ययस्य लोप इति वक्तव्यम्--सामान्यविहितो लोपः प्रत्ययस्य न भवतीति ।

अथ प्रत्ययान्तरस्य लुप्तप्रत्ययनिमित्तकस्य पादुर्भावो विधीयते, यथा--ग्रामणीरिति क्विपो लोपे तन्निमित्तस्य सोर्विधिः । एवमपि "प्रत्ययलोपे प्रत्यय" इत्येव वक्तव्यम्--प्रत्ययस्य लोपे न तन्निमित्तकः प्रत्ययो भवतीति । अतो निमित्तपर्यायेण लक्षणशब्देन बहुव्रीहिः, कार्यं चान्यपदार्थं इत्याह--प्रत्ययहेतुकं कार्यमिति । प्रत्यासत्तेश्च यः प्रत्ययो यस्य कार्यस्य निमित्तं तस्य लोपेऽपि तद्भवतीत्यर्थः ।

पदसंज्ञा भवतीति । ननु च स्थानिवद्भावेनापि सिद्धा पदसंज्ञा, इह तर्हि ता ता पिणअडानामिति-तच्छब्दात्परस्य जसः शिः, "शेश्छन्दसि बहुलम्" इति लोपे "नपुंसकस्य झलचः" इति नुम्, "सर्वनामस्थाने" इति दीर्घश्च भवति; अनड्वान्-- सोर्लोपे नुम्भवति; अधोक्--अड्गुणौ भवतः; न्यमार्ट्-मृजेर्वृद्धिः; उन्देर्लङि तिलोपे श्नमाटौ भवतः; "श्नान्नलोपः"--औनत्; अग्निचित्-क्विपो लोपे तुग्भवति ? एतान्यपि स्थानिवद्भावेनैव सिद्ध्यन्ति; अल्विधित्वात् । सर्वत्रैवाल्मत्रप्रत्ययः, तदाश्रयो विधिरल्विधिरिति । नैतत्सुष्ठूच्यते, उक्तं हि कार्यापेक्षमल्विधित्वं नोदाहरणापेक्षमिति । नुमादिविधौ च सर्वत्र शास्त्रे यद्रूपमाश्रीयते--सर्वनामस्थाने सार्वधातुके पिति कृति सुप्तिङन्तमिति, साधारणं तदलश्चानलश्च । केवलं ताता पिण्डानामित्याद्युदाहरणेऽर्थादलात्मकं तदित्येतावत् ।

इह तर्हि अतृणेट्-"तृहि हिसायाम्", लङ्, तिप्, श्नम्,"इतश्च" इतीकारलोपः, तकारस्य हल्ङ्यादिलोपे हलादौ पिति सार्वधातुके विधीयमानोऽल्विधिः "तृणहइम्" अस्माद्भवति; तथा आशीरित्यत्र "शास ईदङ्हलोः" इतीत्वं लुप्तेऽपि क्विपि भवति । ननु च "वर्णाश्रये नास्ति प्रत्ययलक्षणम्"; नैवंविधं वचनमस्ति । द्वितीयस्य प्रत्ययग्रहणस्य प्रयोजनमिदं पठ्यते - अत्र हि " प्रत्ययलोपे तल्लक्षणम्" इत्येव सिद्धे पुनः प्रत्ययग्रहणाद्यत्र प्रत्ययस्यैवासाधारणं

रूपं निमित्तत्वेनाश्रीयते सुपि सार्वधातुके कृति सुप्तिङन्तमिति तदेव यथा स्यात् । तेन गोहितमित्यवादेशो न भवति । न हि "एचोऽयवायावः" इत्यत्र प्रत्ययस्यासाधारणं किञ्चिद्रूपमुपात्तम्, किन्त्वचीति यदुपात्तं तद्गवे हितमित्यस्मिन्नुदाहरणे अर्थात्प्रत्ययात्मकमित्येतावत् । इत्वेमागमयोस्तु हलादौ क्ङिति हलादौ पिति सार्वधातुक इति प्रत्यय एव प्राधान्येन निमित्तम्, हल् तु तद्विशेषणमिति नेमौ वर्णाश्रयौ । तस्मादल्विध्यर्थमिदमारब्धव्यम् ।
यद्येवम्, भसंज्ञाङीप्ष्फेषु दोषः । भसंज्ञायां तावद्-राज्ञः पुरुषो राजपुरुष इति श्रूयमाणे प्रत्यये यथा संज्ञा भवति, एवं लुप्तेऽपि स्यात् । ततश्च तया पदसंज्ञाया बाधितत्वाद् लनोपो न स्यात् । ननु च द्वे अत्र पदसंज्ञे--स्वादाविति च, सुप्तिङन्तमिति च । तत्र या स्वादौ पदमिति पदसंज्ञा, साऽपवादभूतया बाध्यते; या तु "सुप्तिङन्तम्" इति पदसंज्ञा, सा न बाधनीया, यथा--श्रूयमाणे प्रत्यये "राज्ञः" इति समुदायस्य ? नैतदेवम्; श्रूयमाणे प्रत्यये ततः पूर्वस्य भागस्य भसंज्ञा, समुदायस्य तु विसर्जनीयान्तस्य पदसंज्ञेति युक्तम्-विभिन्नावधिकया भसंज्ञया पदसंज्ञा न बाध्यत इति । लुप्ते तु प्रत्यये यस्यैवावधेः स्वादौ पदमिति पदसंज्ञा,सुबन्तं पदमित्यपि तस्यैवावधेः पदसंज्ञा । तत्रैवावधौ भसंज्ञा भवन्ती यथाऽयवदत्वात् स्वादिलक्षणां पदसंज्ञां बाधते, तथा सुबन्तलक्षणामपि परत्वाद्बाधते ।
एवं तर्हि "न लुमताङ्गस्य" इति प्रतिषेधाद् भसंज्ञा न भविष्यति, यचीति सप्तमीनिर्देषात् । ततः पूर्वस्य भागस्य वस्तुतोऽस्य प्रवर्तमाना भसंज्ञाप्यङ्गकार्यमेव । एवं च बुध्वा "न ङिसंबुद्ध्योः" इत्यत्र ङौ नलोपः प्रतिषिध्यते, यदि प्रत्ययलक्षणेन भसंज्ञा स्याद्, अपवादत्वादेवार्द्रे चर्मन्निति नलोपो न भविष्यतीति किं तेन प्रतिषेधेन ? इह तर्हि चित्रायां जाता "चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम्" इत्यणो लुकि "लुक्तद्धितलुकि" इति टापि लुप्ते, चित्र इति स्थिते प्रत्ययलक्षणेनाणन्तत्वात् ङीप् प्राप्नोति, नैष दोषः; "टिड्ढाणञ्" इत्यत्र "अतः" इत्यनुवर्तते, तत्र चाणाकारो विशेष्यते--अणोऽकार इति, ततश्चाकार एव ङीपो निमित्तम्; अण् तु तद्विशेषणमिति प्रत्ययलक्षणत्वाभावाद् ङीबभावः ।
इह तर्हि वतण्डस्यात्यं स्त्री "वतण्डाच्च" इत्यञः "लुक् स्त्रियाम्" इति लुकि वतण्डी-शाङ्र्गरवादिलक्षणं ङीनं बाधित्वा "प्राचां ष्फस्तद्धितः सर्वत्र" इति सर्वत्रग्रहणस्य पूर्वत्रापकर्षात्प्राचां मतेन यञन्तलक्षणः ष्फः प्राप्नोति, यथा आवट्याच्चापं वा बाधित्वा ष्फ एव भवतीति ? नैष दोषः; अत्रापि यञाकारो विशेष्यते-यञोऽकार इति, यञवयवो योऽकारस्तदन्तादिति । तेनात्राप्यकार एव निमित्तम्, तद्विशेषणन्तु यञिति ष्फो न भवति । अयं तर्हि दोषः-परिवीरिति, परिपूर्वाद्ध्येञः क्विपो लोपे यजादित्वात् संप्रसारणे पूर्वत्वे च तुक् प्राप्नोति, "हलः" इति दीर्घश्च; तत्र विप्रतिषेधेन दीर्घ इष्यते, स विप्रतिषेधो न सिद्ध्यति । किङ्कारणम् ? इह प्रत्ययलोपे सर्वाणि प्रत्ययाश्रयाणि कार्याणि पर्यवसन्नानि, तान्यनेन प्रत्युत्थाप्यन्ते, अनेनैव तुक्, अनेनैव दीर्घः-तदेकयोगलक्षणयोरयुक्तो विप्रतिषेधः ? नैष दोषः; अवस्थिते प्रत्यये, तन्निबन्धनं यत्कार्यं भवत्येव तदेवानेन लुप्ते तस्मिन् प्रत्युत्थाप्यते, न तु यस्य प्राप्तिमात्रं तदपि । परिवीयेत्यादौ श्रूयमाणे प्रत्यये दीर्घ एव परत्वाद् भवति, न तुक्; ततश्चात्रापि यदि क्विबेवास्थास्यद्, दीर्घ एवाभविष्यदिति स एवानेन प्रत्युत्थाप्यते । तदेवमारब्धव्यं सूत्रं न कश्चिद्दोष इति स्थितम् ।
अत्रोच्यते--यदुक्तं "तृणह इम्" हलाश्रय इति; नायं हलाश्रयः, हलीति निवर्तिष्यते । यदि निवर्तते, तृणहानि--अत्रापि प्राप्नोति ? नाभ्यस्तस्याचीत्यतो नाचीत्यनुवर्त्तते, ततश्चानल्विधित्वात् स्थानिवद्भावेनैव सिद्ध इमागमः । आशीरित्यत्रापि "आसासः क्वावुपसंख्यानम्" इत्यस्माद् वचनात्सिद्धमित्वम् । आरब्धेऽपि खल्वस्मिंस्तदवश्यं वक्तव्यम् । यदि तावत् "शास इदङ्हलोः" इत्यत्र शासिमात्रस्य ग्रहणम्, ततो नियमार्थम् "आशासः क्वावेव यथा स्याद्, आशास्त इत्यादा मा भूत्" इति । अथ यस्माच्छासेरङ् विहितस्तस्य ग्रहणम्, ततो यथाऽऽशास्त इत्यादौ न भवति तथा क्विप्यपि न स्यादिति विध्यर्थमिदम् । इह तर्हि बिदस्यापत्यानि बहूनि "अनुष्यानन्तर्ये बिदादिभ्योऽञ्" बिदाः, बिदानामपत्यं युवा, "अत इञ्", तस्य ण्यक्षत्रियार्षञितः" इति लुकि कृते, अञो गोत्रबहुत्व उत्पन्नस्य लुकि प्राप्ते"गोत्रेऽलुगचि" इति प्रतिषेध इष्यते, सोऽजादाविति लुप्तेऽप्यस्माद्वचनाद्भवति ? एतदपि नास्ति प्रयोजनम्; अचीति विषयसप्तमी, तेन गोत्र इति विवक्षितेऽनुत्पन्न एव लुकि प्रतिषिद्धे पश्चादिञो लुगिति सिद्धमिष्टम् । तदेवमल्विधेः कस्यचिद् दर्शनात् स्थानिवद्भावेनैव सिद्धमिति नार्थोऽनेन ।
एवं तर्हि नियमार्तमिदम्-"प्रत्ययलोपे प्रत्ययलक्षणमेव यथा स्यात् प्रत्ययाप्रत्यलक्षणं मा भूत्" इति । एतदुक्तं भवति--यस्मिन्कार्ये विधीयमाने प्रत्ययस्यैवासाधारणं किञ्चिद्रूपं निमित्तत्वेनाश्रीयते, तदेव प्रत्ययलोपेऽपि भवति, न पुनः प्रत्ययाप्रत्यसाधारणं रूपमाश्रित्य यद्विधीयते तदिति । तेन शोभना दृषदो यस्य सुदृषदिति "सोर्मनसी अलोमोषसी" इत्युत्तरपदाद्युदात्तत्वं न भवति । अन्यथा लुप्तेऽपि जसि स्थानिवद्भावेनासन्तमुत्तरपदमिति स्यात्प्रसङ्गः । प्रत्ययलक्षणं तु न भवति, "अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन तदन्तविधिं प्रयोजयन्ति" इत्यस्मात्तस्य ग्रहणात् ।
वृत्तिकारेण तु " नियमार्थमप्येतत् प्रत्ययलोपे सर्वत्र प्रवर्तते" इति मत्वोक्तं पदसंज्ञा भवतीति । आघ्नयेति । "आङो यमहनः" । संग्मीयेति । "समो गम्यच्छि" इत्यात्मनेपदम्, "इटोऽत्", बहुलं छन्दसि" इति शपो लुक्, उभयत्र "गमहन" इत्युपधालोपः ।।
न लुमताङ्गस्य ।। 1.1.63 ।।
"लुमता" इति लुशब्दो यस्मिन्नस्ति स लुमान्=लुगादिः संज्ञाशब्दः । करणे च तृतीया, लोपे च करणत्वम् । "प्रत्ययलोपे" इत्यनुवृत्तेः लुमता शब्देन प्रत्ययलोपे सति अङ्गस्य प्रत्ययलक्षणं कार्यं न भवति । तत्र च प्रत्यासत्तेर्लुप्तप्रत्ययापेक्षया येनाङ्गसंज्ञा प्रतिलब्धा तस्य तन्निमित्तं कार्यं न भवतीत्यर्थः । एतदेव वस्तुतो दर्शयति --लुमता लुप्ते प्रत्यये यदङ्गमिति । तेनोत्क्रामेत्यत्र "अतो हेः" इति लुकि कृते परस्मैपदापेक्षया ययङ्गंशबन्तं न तस्य दीर्घत्वम्, यस्य च दीर्घत्वं न तत्परस्मैपदापेक्षयाङ्गम् । किं तर्हि ? शबपेक्षयेति निषेधाभावात् प्रत्ययलक्षणेन "क्रमः परस्मैपदेषु" इति दीर्घो भवति, तथा "गमेरिट् परस्मैपदेषु" "न वृद्भ्यश्चतुर्भ्यः" इटो विधिप्रतिप्रेधौ जिगमिष विवृत्सेति परस्मैपदलुक्यपि भवतः । लुमता लुप्ते परस्मैपदे यदङ्गं सनन्तं न तस्येटो

विधिनिषेधौ, किं तर्हि ? सकारादेः प्रत्ययस्येति । इदं चान्यदस्मिन् ग्रन्थे दर्शितम्-नाङ्गस्येत्यनेनाङ्गाधिकारः प्रतिनिर्दिश्यते "न लुमता लुप्ते प्रत्यये आङ्गं भवति" इति, किं तर्हि ? लुमता लुप्ते प्रत्यये यदङ्गं तस्याङ्गमनाङ्गं च सर्वं प्रतिषिध्यते इति । तेन गर्गाः, बिदाः-यञञोर्लुक्, उष्ट्रग्रीवः-"इवे प्रतिकृतौ" इति कनः "देवपथादिभ्यश्च" इति लुप्, पन्थाः प्रियोऽस्य पथिप्रियः--"सुपोधातु" इति सर्वनामस्थानस्य लुक् । अत्र "ञ्नित्यादिर्नित्यम्","पथिमथोः सर्वनामस्थाने" इति चाद्युदात्तस्यानाङ्गस्यापि निषेधो भवति । सप्तमीनिर्द्देशाद्ध्येतद्वस्तुतोऽङ्गस्य कार्यम् । तथाऽहर्ददाति - "रोः सुपि" इति रत्वप्रतिषेधो न भवति । यद्यनाङ्गमपि प्रतिषिध्यते, अवधि भवता दस्युः, आगायि भवता ग्रामः, अध्यगायि भवताऽनुवाकः; लुङि परतोऽङ्गस्य विधीयमाना हनिणिङादेशाः "चिणो लुक्" इति लुङो लुकि न स्युः । न लुङि हनिणिङादेशा विधीयन्ते, किं तर्हि ? लुङि यदार्धधातुकं तत्र । ततश्च लुङि यदङ्गं चिणन्तं न तस्य हनिणिङादेशाः, यस्य च ते न तल्लुक्यङ्गमिति निषेधाभावः ।

इह तर्हि "मा हि दातां सर्पिरागच्छेत्" इति सिजामन्त्रितयोर्लुकि सति "आदिः सिचोऽन्यतरस्याम्""आमन्त्रितस्य च" इति आद्युदात्तत्वं न स्यात् ? नैतदङ्गस्य चिणन्तं कार्यम्, किं तर्हि ? तदन्तस्य; षष्ठीनिर्देशात् । तेन पयः सामेत्यादौ पदसंज्ञा च भविष्यति । ननु यद्यपि तदन्तस्याद्युदात्तत्वम्, पदसंज्ञाऽपि, तथा लुप्ते इदानीं प्रत्यये वस्तुतोऽङ्गस्य प्राप्नुत इति भवितव्यं निषेधेन ? नात्र लुप्ते प्रत्यये यदङ्गस्य प्राप्तं तन्निषिध्यते, किं तर्हि ? अवस्थितेऽपि प्रत्यये यत्ततः पूर्वस्याङ्गस्य कार्यं तन्निषिध्यते । वृक्षा मा हि लाबिष्टामित्यादौ च श्रूयमाणो प्रत्यये तदन्तस्यैव पदसंज्ञा स्वरश्चेति लुप्तेऽपि भविष्यतः । एवं च राज्ञः पुरुष इति श्रूयमाणे ङसि, ततः पूर्वस्य भसंज्ञा न तदन्तस्येति अङ्गकार्यत्वात् लुप्तेऽपि तस्मिन् प्रत्ययलक्षणेन प्राप्ताऽनेन निषिध्यते ।।

इह तर्हि अत्रेरपत्यानि "इतश्चानिञः" इति ठकः "अत्रिभृगु" इति लुकि कृते अत्रय इति तद्धितस्य "कितः" इत्यन्तोदात्तत्वं स्यात्, तदन्तकार्यत्वात्, नैषदोषा; तद्धितस्यैवान्तोदात्तत्वम्, न तदन्तस्य ।

इह तर्हि सर्वः स्तोमो यस्य सर्वस्तोमः-"सर्वस्य सुपि" इत्याद्युदात्तत्वं न स्यात्, सुपीति सप्तमीनिर्द्देशात् ? कर्तव्योऽत्र यत्नः । यत्नश्च-सर्वस्य सुप इति षष्ठीनिर्द्देशः षष्ठीनिर्दशे तु तदन्तकार्यत्वात् सिच्स्वरवत् सिध्यति । ननु द्वयोरिप पक्षयोः-अभूवन्, प्रत्ययलक्षणेन जुस्प्राप्नोति, "आतः" इति नियमान्न भविष्यति ।

इह तर्हि देवदत्तं याजयाञ्चकार--"आमः" इति लुकं बाधित्वा परित्वात्तिबाधिषु कृतेषु तेषां च लुकि प्रत्ययलक्षणेन तिङन्तत्वादामन्तस्य च विधातः, ततः परस्यानिघातश्च प्राप्नोति, लेरित्यनुवृत्तेर्लावस्थायामेव लुग्भविष्यति । इह च देवदत्तो युष्मत्पुत्र इति षष्ठन्तस्य विधीयमानौ वांनानौ "द्वितीयास्थायोः इति स्थग्रहणान्न भवतः । षष्ठीचतुर्थीद्वितीयास्ववस्थानं श्रूयमाणस्यैव सम्भवति ।

इह तर्हि परमवाचा, परमगौदुहा, परमलिहा, परमदण्डिना, परमदिवापरमकुमार्येति समासार्था या विभक्तिः, तामाश्रित्योत्तरपदस्य पदसंज्ञायां प्राप्तयाम्, "चोः कुः", "दादेर्धातोर्घः","हो ढः ", नलोपः प्रतिपदिकान्तस्य" "दिव उत्","इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च" इति -एते विधयः प्राप्नुवन्ति नैष दोषः; भसंज्ञाविषये तावत्सैव पदसंज्ञां बाधिष्यते । ननु च समुदायस्य पदसंज्ञा स्वादिष्वति प्राप्ता सा तुल्याविधिकया भसंज्ञया बाध्यताम्, या तुत्तरपदस्य सुबन्तमिति प्राप्त सा कथं बाध्यते, भिन्नावधित्वात् ? एवं तर्हि "सुप्तिङन्तम्" इत्यतः सुबन्तमित्यनुवर्त्तनीयम्, ततश्चायमर्थो भवति-"यजादावसर्वनामस्थाने परतः पूर्वस्समुदायो भसंज्ञो भवति । तत्र च समुदाये यत्सुबन्तं वर्तते तदपि भसंज्ञं भवति यजादावनन्तरे" इति । तत्र च समुदायस्य भसंज्ञा प्रधानशिष्टा, अवयवस्य त्वन्वायशिष्टा । यत्र च सुबन्तं पश्यति तत्र तस्यापीति, तेन राज्ञ इत्यादौ सुबन्ताभावेऽपि भवति । सुबन्तसद्भावे तु तस्य समुदायस्य चेति विवेक्तव्यम् । सर्वनामस्थानेऽपि "असर्वनामस्थाने" इति प्रतिषेधात् पदसंज्ञा न भविष्यति । ननु "स्वादिषु" इति या प्राप्तिः समुदायस्य, तस्या एव स प्रतिषेधः, नेत्याह; तत्रापि सुबन्तमित्यनुवर्तते, प्रसज्यप्रतिषेधश्चाश्रीयते, तत्सामर्थ्यात् "अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा" इति नाश्रीयते; ततश्चायमर्थो भवति--"सर्वनामस्थाने परतः पूर्वसय् समुदायसंय स्वादिष्विति प्राप्ता पदसंज्ञा न भवति । तत्र च यत्सुबन्तमवयवत्वेन वर्त्तते, तस्य सुबन्तस्य पदसंज्ञा न भवति" इति । यद्येवम्; सुवाक्, सुराजेति सावपि समुदायस्यावयवस्य च स्वादिष्विति वा सुबन्तमिति वा पदसंज्ञाया अभावात् कुत्वादि न स्यात् । एवं तर्हि "असर्वनामस्थाने" इत्यत्र उत्तरसूत्राद्यचीत्यपकृष्यते, ततो यजादौ सर्वनामस्थाने या च यावती च पदसंज्ञा, सा सर्वा प्रतिषिध्यते; सौ तु स्वादिष्विति च सुबन्तमिति च भवत्येव । यद्येवम्, श्रूयमाणएऽपि सौ पूर्वस्य पदसंज्ञा प्राप्नोति, तत्र को दोषः ? "एचोऽप्रगृह्यस्य" इत्यत्र पदान्तग्रहणं चोदयिष्यति-भद्रं करोषि गौरित्यत्र मा भूदिति । तत्र क्रियमाणेऽपि पदान्तग्रहणे प्लुतविकारः प्राप्नोति, नैष दोषः; वाक्यपदयोरन्त्यस्येत्येवमेतद्विज्ञायते, तदेवं समासेषूत्तरपदस्य पदत्वं नास्तीति स्थितम् । यद्येवम्, दधिसेचौ, दधिसेचः "सात्पदाद्योः" इति षत्वनिषेधो न प्राप्नोति, नैवं विज्ञायते-पदस्यादिः पदादिः, पदादेर्नेति, कथं तर्हि ? पदादादिः पदादिः, दादेर्नेति । कथमग्निषु, वाक्षु, त्वक्षु ? सात्प्रतिषेधो ज्ञापयतिस्वादौ यत्पदं ततः परस्य नेति । अवश्यं च पदादादिरित्येवं विज्ञेयम्, अन्यथा "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति यत्र सुबन्तमुत्तरपदं तत्र प्रतिषेधो न स्यात् ।

इह तर्हि बहुसेचौ, बहुसेचम्, बहुचोऽपदत्वात्, प्रतिषेधो न प्राप्नोति, वक्तव्यमेवैतत् "बहुचपूर्वस्य न" इति, तत्रायं सूत्रन्यासः-साते सः षत्वं न भवति, ततो "बहुचः",बहुचः परस्य षत्वं न भवति; आदिग्रहणं न कर्तव्यम्, "आदेः परस्य" इत्येव सिद्धम् । तदिदं बहुज्ग्रहणेन निमातव्यम् ।

कार्यते, हार्यते इति । ण्यन्तात्कर्मणि लकारः, यक्, णिलोपः । ननु चात्रान्तरङ्गा वृद्धिरुत्पन्नमात्र एव णौ भवति, लोपस्तु यकि भवन् बहिरङ्गः । एवं तर्हि विभज्यान्वाख्यानपक्षे एतत्प्रत्युदाहृतम् ।।

अचोऽन्त्यादि टि ।। 1.1.64 ।।

अन्ते भवोऽन्त्यः दिगादित्वाद्यत्, अन्त्यादिति बहुव्रीहिः । यद्यप्यचामित्येतदपेक्षोऽन्त्यशब्दस्तथापि सम्बन्धिशब्दत्वेन नित्यसापेक्षत्वादविरुद्धः समासः निर्धारणे षष्ठीति । यद्येवं निर्द्धारणस्यानेकाश्रयत्वाद् अच इत्येकवचनमुनपपन्नम्, तत्राह-जाताविति । योऽन्त्योऽजिति ।निर्द्धारणस्य सजातीयविषयत्वादजिति लभ्यम् । इच्छब्द इत्यादि रूपोदहरणम् । कार्यं त्वग्निचि तमाचष्टे णिचि "णाविष्ठवत्" इति टिलोपः । पचेते इत्यादि कार्योदाहरणम् ।।

अलोऽन्त्यात्पूर्व उपधा ।। 1.1.65 ।।

समुदाय एवान्त्यो भवतीत्याह--धात्वादाविति । "अलः" इति जसन्तं चेद् अन्त्यस्याविशेषितत्वात् समुदायादपि पूर्वस्य संज्ञायां शिष्ट इति शकारस्येत्वं स्याद्, असन्देहार्थमलित्येव च ब्रूयाद्; अतोऽन्त्यादित्यानया समानाधिकरणा पञ्चमीत्याह--अन्त्यादल इति । यद्येवम्, पूर्वस्याविशेषितत्वात् समुदायस्यापि संज्ञायां शिष्ट इति " शा" इति समुदायस्येत्वं प्राप्नोति, "अलोऽत्यस्य" इत्यन्त्यस्य भविष्यति । "नानर्थकेऽलोन्त्यविधिरनभ्यासविकारेषु", तत्र यथा-आभ्यामित्यत्र "हलि लोपः" इद्रूपस्य विधीयमानो लोपोऽन्त्यस्य न भवति, तथात्रापि न स्याद्; अतोऽलोऽन्त्यात्पूर्वोऽलिति आह-अलेवेति । एवकारः पौनर्वचनिकः, यथान्त्योऽल्, एवं पूर्वोऽप्यलेवेति । कथं पुनर्द्धितीयसल्ग्रहणमन्तरेणायमर्थो लभ्यते ? लोकतः । लोके ह्यमीषां ब्राह्मणानामन्त्यात्पूर्व आनयतामित्युक्ते एक एवान्त्यात्पूर्वोऽनन्तर आनीयते, न समुदायः । संयोगोपधग्रहणं कृञर्थमित्यत्रावयवधर्मेण समुदायस्य संयोगस्योपधाव्यपदेशः । अकार इत्यादीनि रूपोदाहरणानि । कार्यं तु पाचक इत्यादौ "अत उपधायाः" इति वृद्धिः । भेदक इत्यादौ "पुनगन्तलघूपधस्य च" इति गुणः । शिष्ट इति । शासेर्निष्ठा, "शास इदङ्हलोः" इतीत्वम्, "शासिवसिघसीनां च" इति षत्वम् ।।

तस्मिन्निति निर्दिष्टे पूर्वस्य ।। 1.1.66 ।।

इतिकरणस्य गौरित्ययमाहेत्यादौ स्वरूपपदार्थकत्वेन व्यवस्थापकत्वादर्शनात् "तस्मिन्नणि च" इत्यत्रोपात्तस्यैदमनुकरणम्, ततश्च तत्रैवास्य प्रवृत्तिः स्याद् । अस्ति च तत्र व्यवच्छेद्यं हे यौष्माकीणमस्मभ्यं देहि, आस्माकीनं युष्मभ्यं ददामीति परनिवृत्तिः, तामिनां भ्रान्तिमपाकरोति--तस्मिन्निति सप्तम्यर्थनिर्देश इति । एतेन "तस्यापत्यम्" "तत्र भवः" इत्यादिवत् स्वतन्त्रस्य सर्वनाम्नोऽयं निर्देशः, तद्वदेव तस्मिन्निति सामान्यविशेषणमचि, हलीत्यादीनामुपलक्षणम्; न त्वनुकरणमिति दर्शयति । एतच्चेतिकरणाल्लभ्यते । स हि पदार्थविपर्यासकृत् । शास्त्रे च स्वारुपपादर्थः, तस्य विपर्यासोऽर्थपदार्थकता । यदि च "तस्मिन्नणि च" इत्यत्रैवैतदुपास्थास्यत तत्रैव पूर्वग्रहणमकरिष्यतेति भावः । किमर्थं पुनरिदमारभ्यते ? "इको यणचि" इत्यादौ सन्देहः-किं सत्सप्तमी ? किं वा गङ्गायां घोष इति वदौपश्लेषिकाधिकरणे सप्तमी ? इति । तत्र सत्त्वं परस्य च पूर्वस्य च सम्भवति, एवमुपश्लेषोऽपि । तत्र पूर्वस्य परस्य च व्यवहितानन्तरस्य यण् प्राप्तः, दध्युदकादिषु तु युगपदेकस्य कार्यित्वनिमित्तत्वायोगात्पर्यायेण यण् प्राप्तः; इष्यते च पूर्वस्यैव स्यादनन्तरस्यैवेति, तत्र निमार्थमिदम्--सप्तमीनिर्देशे पूर्वस्य भवति अनन्तरस्यैवेति । "इको यणचि" इत्यादेश्च सकृत्प्रवृत्तिः, सा चेवं विशोषितेति न क्वाप्यनिष्टशङ्का । तत्राद्यं नियमं दर्शयति-पूर्वस्यैवेति । व्यावत्यं दर्शयति-नोत्तरस्येति ।

पचत्योदनमिति । यद्यप्यत्रानियमप्रसङ्गो नास्ति, तथापि "इको यणचि" इत्यस्मिन्सूत्रेऽनियमप्रसङ्गे नियमः क्रियत इत्येतदपि भवत्येवोदाहरणम् । द्वितीयं नियमं दर्शयति-निर्दिष्टग्रहणमिति । दिशिरुच्चारणक्रियः, निःशब्दो नैरन्तर्ये, निरन्तरं दिष्टो निर्दिष्ट इत्येवमानन्तर्यमर्थो भवति, तत्रैवं वचनव्यक्तिः-अचि हलीत्यादौ पूर्वस्यैव कार्यं भवति, तत्र निर्दिष्टे = निरन्तर एवोच्चारित इति तत्रार्थात्पूर्वस्यानन्तरस्येत्यर्थो भवति । तदाह-व्यवहितस्य मा भूदिति । अन्यथा व्यवहिते मा भूदिति वक्तव्यम्; पूर्वपदस्य व्यवहितेऽपि वृत्तेस्तस्य प्रसङ्गात् ।।

तस्मादित्युत्तरस्य ।। 1.1.67 ।।

निर्दिष्टग्रहथणमनुवर्त्तत इति । तेनात्रापि व्यवहिते कार्यं न भवतीति भावः । अत्रापि इतिपरत्वादनुकरणमिति कस्याचिद् भ्रान्ति स्यात्; "तस्मान्नुड् द्विहलः" इत्यत्र "अत आदेः" इति दीर्घत्पूर्वस्याङ्गस्यासम्भवात् प्रयोजनाभावात् यद्यपि तस्यानुकरणं न भवति; "तस्माच्छसो नः पुंसि" "तस्मान्नु डचि" इत्यत्र तु व्यवच्छेद्यमस्ति, उच्चारितोऽनुपलभ्यते, गौरनश्व इति पूर्वस्य मा भूदिति, अतस्तयोरेवेदमनुकरणमिति तामिमा भ्रान्तिपाकरोति-तस्मादिति पञ्चम्यर्थनिर्देश इति । एतेन पूर्वससूत्रवत् स्वतन्त्रस्य सर्वनाम्नोऽयं निर्देशः । तद्वदेव च तस्मादिति सामान्यमतिङ इत्यादीनां विशेषाणामुपलक्षणम्, न त्वनुकरणमिति दर्शयति । एतच्छेतिकरणाल्लभ्यत इत्युक्तम् । किमर्थम पुनरिदमारभ्यते ? "तिङ्ङतिङः" इत्यादौ कारकविभाक्तेरसम्भावद्दिग्योगलक्षणा पञ्चमीति, दिक्छब्दस्त्वध्याहार्यः; तत्र पूर्वोत्तरशब्दयोरध्याहारः सम्भवतीति नियमार्था परिभाषेयम् । तदाह--उत्तरस्यैव कार्यमिति । तदेवं पूर्वस्य चास्य च वृत्तिकारेण नियमार्थत्वं दर्शितम् ।

षष्ठीप्रक्लृप्तिपक्षोऽपि भाष्ये प्रदर्शितः । कथम् ? "षष्ठी" इति वर्तते, सप्तम्यर्थनिर्देशे पूर्वस्यानन्तरस्य षष्ठी । पञ्चम्यर्थनिर्देशे, उत्तरस्यानन्तरस्य षष्ठीति; तत्र "इको यणचि" इत्यादौ यत्र पूर्वमेव षष्ठी विद्यते तत्र पूर्वस्यानन्तरस्य, नोत्तरस्यानन्तरस्य सा षष्ठीत्युच्यते । "आने मुक्" "ईदासः" इत्यादौ तु यत्र षष्ठी नास्ति, तत्र षठ्यपि प्रकल्प्यते सा चानियतयोगत्वात् स्थानषष्ठी भवति । यस्य च स्थानषष्ठी स्यैव कार्यमिति सर्वत्र कार्यनियमोऽपि सिध्यति । यत्र तूभयनिर्देश स्तत्र याऽनवकाशा सा इतरस्याः षष्ठीं प्रकल्पयति, यथा-"आने मुक्" इति सप्तमी "निरवकाशा "अतो येयः" इति पञ्चम्याः पूर्वसूत्रे सावकाशायाः । एवम् " ई दासः" इति पञ्चमी "आने मुक्" थइति सप्तम्याः,उभयोस्त्वनवकाशयोः परत्वात्पञ्चमी सप्तम्याः षष्ठी प्रकल्पयति, यथा-"आमि सर्वनाम्नः सुट्" इति सर्वनाम्न इति पञ्चम्यनवकाशामीति सप्तम्या अनवकाशायाः । अथ सप्तम्युत्तरार्था तथाप्यादित्यनुवृत्तया पञ्चम्या समानाधिकरणा "सर्वानाम्नः" इति पञ्चम्यपि सावकाशा षष्ठीं प्रकल्पयति । एवं नियमपक्षेऽपि परत्वानवकाशत्वाभ्यां व्यवस्थां द्रष्टव्य । "दीर्घाच्छे तुग्भवति" इत्यत्र षष्ठ्याः स्थाने पञ्चमीव्याख्यानाद् दीर्घस्यैव तुक् भवति, न तु छस्य; तथा च "सुराच्छाया" इति निर्देश उपपद्यते ।।

स्वं रूपं शब्दस्याश्बदसंज्ञा ।। 1.1.68 ।।

स्वरूपस्य पर्यायाणां च ग्रहणे प्राप्ते नियमार्था परिभाषेयम् । शास्त्राङ्गत्वाच्च परिभाषाणां शास्त्र एव नियमः, न लोक इत्याह--शास्त्रे स्वमेवेत्यादि, ग्राह्यमिति । "ग्राह्मम्" इति णिजन्ताद् यत्, एतच्चाध्याहारेण लब्धम् । शब्दस्येति "कृत्यानां कर्त्तरि वा" इति षष्ठी, शब्दः स्वमेव रूपं ग्राहयति बोधयतीत्यर्थः । संज्ञापक्षे तु वृत्तावेव शब्दः संज्ञानुच्चारणं च नोपपद्येत । सूत्रे षष्ठीनिर्देशोऽपि नातीव युक्तः स्यात्; संज्ञासंज्ञिसम्बन्धे प्रायेण सामानाधिकरण्यदर्शनात् । रूपशब्देन चेहाग्निशब्दत्वादिकं शुकसारिकापुरुषादिभिरुदीरिता सुभिन्नासु शब्दव्यक्तिषु समवेतं सामान्यमिभिधीयते । "अग्नेर्ढक्" इति सूत्रकारेण या व्यक्तिरुच्चारिता, तस्याः सर्वोच्चारणेष्वनुगतं सामान्यं वाच्यमित्यर्थः । सामान्यस्य कार्ययोगो व्यक्तिद्वारक इति तेन तेनोच्चारिताया स्तस्यास्तस्या व्यक्तेर्ढग् भवतीत्यर्थः सम्पद्यते ।

एवकारस्य व्यच्छेद्यं दर्शयति--न बाह्योऽर्थ इति । शब्दसंज्ञां वर्जयित्वेति । शब्दसंज्ञासु स्वरूपं ग्राह्यं नभवतीत्यर्थः । अनियमप्रसङ्गे नियमः कर्तव्यस्तं दर्शयति-शब्देनेत्यादि । लोके गौरुपलभ्यतामित्युक्तेऽर्थ एव कार्ययोगो गम्यते, न हि शब्दरूमुपलभ्य कृती भवति; व्याकरणे तु प्रत्ययविधानादिकार्यमर्थे न सम्भवति, तेन सह पौर्वापर्यायोगात् । तेन "अग्नेर्ढक्" इत्युक्ते लोकवदर्थ एव तावत्प्रतीयते, तत्र सम्भवो नास्ति; अतस्तद्वाचिनां सर्वेषां सम्प्रत्ययः स्याद्, यथा-आकृतियोदनायां व्यक्तीनाम्, मा भूदेष दोषः; उपात्तादेव यथा स्यादिति नियमार्थमिदमारभ्यत इत्यर्थः ।

औदश्वित्कमिति । उदश्विति संस्कृतमिति सप्तमीसमर्थाट्टक्, "इसुसुक्तान्तात्कः" ।

घुग्रहणेष्वित्यादि । अन्यथा "उपसर्गे घोः किः" इति किप्रत्ययो धातोरेव घोः शब्दार्थत्स्यात्, न तु दाधाभ्यः । "ई हल्यघोः" इत्यत्र तु घुशब्दस्यानाकारान्तत्वाद्दाधानामेव ग्रहणं सिध्यति । कुमारीघ इत्यत्र "घरूप" इति ह्रस्वप्रसङ्गः ।

ननु च प्रदेशेषु संज्ञिसम्प्रत्यायनार्थं संज्ञाकरणमिति सामर्थ्यात् स्वरूपग्रहणं न भविष्यति, नैतदस्ति; उभयगतिरिह शास्त्रे सम्भवतीति सङ्ख्याकर्मकरणादिष्विव स्वरूपस्य संज्ञिनश्च प्रदेशेषु ग्रहणं स्यात् । ज्ञापकात्सिद्धम्; यदयं "ष्णान्ता षट्" इति षकारान्तायाः सङ्ख्यायाः षट्संज्ञां विदधाति, तज्ज्ञापयति-संज्ञाशब्दो न स्वरूपग्राहक इति । अन्यथा "षड्भ्यो लुक्""षट्चतुर्भ्यश्च" इत्यादौ स्वरूपस्यापि षडित्यस्य ग्रहणात् षकारान्तायाः सङ्ख्यायाः षट्संज्ञां न विदध्यात् ।

ननु च षकारान्ता संज्ञा षकारान्तस्य कार्यमिष्यते, संज्ञापि षकारान्तैव; अतो नार्थोऽशब्दसंज्ञेत्यनेन ? सत्यम्; प्रतिपत्तिगौरवपरिहारार्थः प्रतिषेधः । शब्दशब्देन चाभेदीपचारात् व्याकरणमुच्यते, शब्दे संज्ञा शब्दसंज्ञा; एवं च कर्मकरणमित्यादिष्वर्थसंज्ञास्वपि शास्त्रीयासु स्वरूपग्रहणं न भवति ।

अथ रूपग्रहणं किमर्थम्, इह यावता प्रतीतावुपदेशानपेक्षत्वादसाधारणत्वान्नित्यसम्बन्धित्वाच्च तदेव शब्दस्य स्वार्थो हि स्वप्रतीतौ सम्बन्धग्रहणमपेक्षते, पर्यायैरपि प्रत्यायनात्साधारणश्चानित्यसंबन्धश्चानुकरणदशायामभावात्, न चार्थो ग्राहकः शक्यते कर्तुम्, ग्राह्यत्वे च सूत्रमनर्थकं स्यादिति नार्थो रूपग्रहणेन ? एवं तर्ह्येतज् ज्ञापयति--शास्त्रे स्वरूपेण समानकक्ष्योऽर्थः" इति । तेनार्थवद्ग्रहणेनानर्थकस्येत्युपपन्नं भवति । तत्र ज्ञापकादर्थोऽपि ग्राह्यः; स्वं रूपमिति वचनाद् । रूपं चेति सामर्थ्यादर्थवतो रूपस्य ग्रहणम् । तेन काशे कुशे इत्यत्र "शे" प्रगृह्यसंज्ञाभावः सिद्धः ।

सित्तद्विशेषाणामिति वार्त्तिकं व्याचष्टे-सिन्निर्देशः कर्त्तव्य इति । वृक्षस् इत्येवम् । ततो वक्तव्यमिति । स्वं रूपमित्यस्यानन्तरम् । ननु किं प्रयोजनमित्युक्ते वृक्षादीतिवक्तव्यम्, किमुच्यते-वृक्षाद्यर्थमिति ? वृक्षादिषु प्रयोजनमस्येत्युक्ते वृक्षाद्यस्य प्रयोजनमित्यर्थादुक्तं भवतीत्यदोषः । अस्यार्थस्य न्यायतः सिद्धिं विभाषेत्यत्र वक्ष्यामः ।

पित्पर्यायवचनस्य चेति । चकारात्स्वस्वरूवस्य विशेषाणां च । इदं वाचनिकमेव । जित्पर्यायस्येत्यास्यापि न्यायतः सिद्धिं वक्ष्यामः ।

झित्तस्य चेति । इदं वाचनिकमेव । मृगपक्षिणस्तु पिन्निर्देशः कर्त्तव्य इत्याहुः । अथैकस्येति । इयमिष्टिरेव ।।

अणुदित्सवर्णस्य चाप्रत्ययः ।। 1.1.69 ।।

संज्ञासूत्रमेतत् न परिभाषा; प्रसिद्धार्थविनियोगात् । परेण णकारेणेति । एतच्च "लण्" इत्यत्र प्रतिपादितम् । स्वस्य च रूपस्येति यद्यपि प्रथमान्तं प्रकृतम्, तथापि सवर्णस्य चेति षष्ठ्यन्तस्यानन्तरं श्रूयमाणश्चशब्दोऽन्यस्य षष्ठन्तस्याभावात् तस्यैव षष्ठ्यन्ततां प्रकल्पयतीति भावः । प्रत्ययं वर्जयित्वेति । तेन तत्रोच्चारितमेव रूपं गृह्यते । "आद् गुणः" इत्यादि । यथेह भवति देवेन्द्र इति, एवं खट्वेन्द्र इत्यादावपि भवति । अस्य च्वो । यथेह भवति शुक्लीभवतीति, एवं मालीभवतीत्यादावपि भवति । यस्येति च । यथेह भवति दाक्षिः प्लाक्षिरिति, एवं चौडिर्बालाकिरित्यादावपि भवति । जूडाबलाकाशब्दौ बाह्वादी ।

ननु च "अकः" "अचि" इत्यादौ प्रत्याहारग्रहणे कथं मध्यवर्त्तिरिकारादिभिस्सवर्णग्रहणम्, उच्चारितो हि संज्ञाशब्दः संज्ञिनं प्रत्याययति, न च मध्यवर्त्तिनामुच्चारणमस्ति । ते ह्यगादिसंज्ञाभिः संज्ञित्वेन प्रत्याय्यन्ते, क्व तर्हि स्यात् ? "अस्य च्वौ" "यस्येति" यत्र संज्ञाया उच्चारणमस्ति । प्रत्याहारे चाद्यो वर्ण उच्चारितत्वात्सवर्णग्रहाहकः । स्यादेतत्-अक्षरसमाम्नाय उच्चारिता इकारादयः सवर्णानां ग्राहका इति । अगादिचोदनासु ईकारादयोऽपि ह्रस्ववत्संज्ञित्वेनैव प्रतीयन्ते त्विकारादिभिः प्रतीतैः प्रत्याय्यन्त इति, न; अपरकालत्वात् । इह वर्णानामुपदेशस्तावद्, उपदेशोत्तरकाला इत्संज्ञा, इत्संज्ञोत्तरकालमादिरन्त्येनैतत्प्रवर्त्तते, ततोऽण् सवर्णस्येति । तदनेनोपदेशादिष्वङ्गेषु निष्पन्नेषु अन्यत्र "अस्य च्वौ" इत्यादौ सवर्णानां ग्रहणं भवति, नाङ्गेषु, नापि स्वात्मनि; अनिष्पन्नत्वात् । यदि त्वस्मिन्नपि सूत्रे सवर्णग्रहणं स्यात्,"आदृगमहनः","ॠदोरप्" इत्यादौ अकारादयोऽपि सवर्णान् गृह्णीयुः । अतोऽस्मिन् सूत्रेऽक्षरसमाम्नोये चागृहीतसवर्णानां ग्रहणम् । ततश्च तदेव स्थितम् प्रत्याहारेषु मध्यवर्त्तिभिः सवर्णग्रहणं न स्यादिति, नैष दोषः; उच्चार्यमाणैरेव प्रत्यायकैर्भवितव्यमिति नास्ति नियमः, बुद्ध्युपारूढास्तु प्रत्यायकाः । अस्ति च मध्यवर्तिनां बुद्ध्युपारोहः, ततश्च संज्ञित्वेन

प्रत्याय्यमानस्यापि प्रत्यायकत्वं भविष्यति । अत्र ज्ञापकम्--"दीर्घाज्जासि च" इति प्रतिषेधः । स हि कुमार्यावित्यादौ "प्रथमयोः पूर्वसवर्णः" इति दीर्घो मा भूदिति । तत्र चाक इति वर्त्तते । खट्वे इत्यादौ तु "नादिचि" इत्येव सिद्धः प्रतिषेधः । "दीधीवेवीटाम्""ल्वादिभ्यः" इत्यादयश्च निर्द्देशा एवमेवोपपद्यन्ते,यदि मध्यवर्त्तिभिरपि सवर्णग्रहणं भवति । स्वरानुनासिकेत्यादिरुदात्तः सूत्रे गृहीतः स्वरान्तरभिन्नमपि गृह्णाति, एवमनुदात्तस्वरितौ च । तथा सानुनासिको निरनुनासिकम्, सोऽपि तम् ।

दीर्घो न भवतीति । असति त्वप्रत्यय इत्यस्मिन् प्रत्ययेनापि सवर्णग्रहणात् दीर्घोऽपि स्यात् । अत्यल्पमिदमुच्यते-"अप्रत्ययः" इति, "अप्रत्ययादेशटित्किन्मित इति वक्तव्यम्" । प्रत्यये प्रत्युदाहृतं तत्र । आदेशे-"इदम् इश्",इतः; इह विशेष विहितत्वात्त्यदाद्यत्वं बाधित्वा त्रिमात्रिक आदेशः प्राप्नोति । टिति--"आर्द्धधातु कस्येड् वलादेः", पठितेति दीर्घोऽपि स्यात् । "ग्रहोऽलिटि दीर्घः" इत्येतत्तु ग्रहेर्दीर्घ एव, न ह्रस्व इति नियमार्थं स्यात् । "वृतो वा" इत्येतदपि ववरिथेति लिटि दीर्घो मा भूदित्येवमर्थं स्यात् । किति-"भुवो वुग्लुङ्लिटोः" बभूव, अनुनासिकोऽपि स्यात् । मिति-"अम् सम्बुद्धौ" हे अनड्वन्, आमपि स्यात्, एवं तर्ह्यप्रत्यय इति नेह संज्ञाग्रहणम्, किं तर्हि ? अन्वर्थग्रहणम्-प्रतीयते विधीयत इति प्रत्ययः, भाव्यमानः सवर्णान्न गृह्णातीत्यर्थः । इशादयोपि भाव्यन्ते । संज्ञाप्रत्ययस्य तु नावश्यकः प्रतिषेधः । येनार्थम्प्रतियन्ति स प्रत्ययः, न हि दीर्घप्लुतयोरर्थस्याभिधानमस्ति । "कुहोः श्चुः" इत्यादौ भाव्यमानस्याप्युदित्त्वासामर्थ्यादप्रत्यय इति निषेधाभावः । तथा च पठ्यते-"भाव्यमानोऽण् सवर्णान्न गृह्णाति" इति ।।

तपरस्तत्कालस्य ।। 1.1.70 ।।

तः परो यस्मादिति बहुव्रीहिं दर्शयति । तादपि परस्तपर इति पञ्चमीतत्पुरुषम् ।। स पुनरस्मादेव निपातनाद्वेदितव्यः । एकस्यापि तपरशब्दस्य तन्त्रावृत्त्योरन्यतराश्रयणादर्थभेदो न विरुद्धः । तत्र बहुव्रीहेर्लिङ्गम्--"अतो भिस ऐस्" इति तपरकरणम् । तत्पुरुषस्य लिङ्गम्-वृद्धिरादैच्" इत्यैजर्थं हि तदित्युक्तम् ।

तपरो वर्ण इति । वर्णस्यैव सवर्णसम्भवाद्वर्ण इत्युक्तम् । तत्कालस्येति बहुव्रीहिः-स कालोऽस्येति । अयुक्तोऽयं निर्देशः । तदित्यनेन तपरो वर्णः परामृश्यते, प्रसिद्धपरिमाणा च क्रिया प्रसिद्धपरिमाणस्य क्रियान्तरस्य परिच्छेदिका । कालो यथा--दिवसमधीत इति, दिवसशब्देनोदयादिरस्तमयान्त आदित्यगतिप्रबन्ध उच्यते । स चाध्ययनस्य परिच्छेदकत्वात् कालः; वर्णस्तु क्रियात्मको न भवतीत्ययुक्तं वर्णवाचिनस्तच्छब्दस्य कालशब्देन सामानाधिकरण्यम् ? एवं तर्ह्युत्तरपदलोपी समासो द्रष्टव्यः, उष्ट्रमुखवत् । गम्यमानार्थत्वाच्च प्रयोग एव लोपः, यथा-उष्ट्रो मुखमस्येत्येव विग्रहः । न च प्रणी प्रण्यन्तरस्य मुखमिति सामर्थ्यात् सादृश्यप्रतीतिः । उष्ट्र इव मुखमस्येति मुखेनैव मुखस्य सादडश्यं प्रसिद्धम्, न कृत्स्नेनोष्ट्रेणेति सामर्थ्यादयमर्थो भवति-उष्ट्रमुखमिव मुखमस्येति । एवमिहापि वर्णः कालो न भवतीति सामर्थ्यात्तदीया क्रियान्तरेण निमेषादिना परिच्छिन्ना सती वर्णान्तरस्य परिच्छेदिकेति वर्ण एव परिच्छेदक इत्युच्यते । स कालोऽस्येत्यस्य कोऽर्थः ? तत्कालसंबन्धिनी क्रिया परिच्छेदिका अस्येत्यर्थः । एतदेव दर्शयति--आत्मनेत्यादिना ।। तपरवर्णसन्नधावुच्चारितोऽप्ययमात्मशब्दस्तत्सहचरितायामुच्चारणक्रियायां वर्तते, वर्णेन क्रियायास्तुल्यत्वानुपपत्तेः । यादृशी तपरस्य वर्णस्योच्चारणक्रिया निमेषादिपरिच्छिन्ना, तादृश्युच्चारणक्रियाऽस्येत्यर्थः ।

गुणान्तरयुक्तस्येति । यद्ग्रणक उपात्तस्ततो गुणान्तरयुक्तस्येत्यर्थः । किं पुनरिदं नियमार्थम् ? अहोस्विद्विध्यर्थम् ? तत्राणित्यनुवृत्तौ नियमार्थम्-तपरो वर्णस्तत्कालस्यैवेति । निवृत्तौ विध्यर्थम् । तत्राद्ये पक्षे "आतो धातोः", "आतां पुङ्णौ" "यस्येति च" "विड्वनोरनुवासिकस्यात्" इत्यादौ "भेदका गुणाः" "इत्यस्मिन् दर्शने यद्ग्रणक उपात्तस्ततो गुणान्तरयुक्तस्य ग्रहणं न स्यादिति द्वितीयं पक्षमाश्रित्याह-विध्यर्थमिति । अत्र हेतुमाह-अणिति नानुवर्त्तत इति । यदि विध्यर्थमिदम्, ततोऽस्यानण्सु चरितार्थत्वादण्सु पूर्वमेव प्रवर्त्तेत, तत्राह-अणामन्येषांचेति । एतदेव विशदयति-अतो भिस ऐसित्येवमादिष्विति । न प्रवर्त्तत एवेति । परेणानेन बाधितत्वादिति भावः । विरोधो ह्यत्र वर्तते-पूर्वसूत्रेण ह्यष्टादशानां ग्रहणम्, अनेन तु षण्णामिति ।

किमुदाहरणमिति । अभेदकत्वात् गुणानामनण्सु सिद्धमिति प्रश्नः, अण्सु भिन्नकालनिवृत्त्यर्थं तावदारब्धव्यं सूत्रम् । तदेवानण्स्वपि विधिमुखेन प्रवर्तमानमिष्टं साधयतीत्युत्तरम् । विड्वनोरनुनासिकस्यादिति । कस्य पुनरत्र सवर्णस्य ग्रहणमिष्यत इति चिन्त्यम् । तस्मादुपलक्षणमेतत् । "आतो धातोः" "यस्येति च" इत्यादावेव प्रयोजनम् ।

तत्कालस्येति किमिति । प्रधानावयवद्वारेण सूत्रमेवाक्षिप्यते । खट्वामिरिति । वर्णाश्रयविधावन्तादिवद्भावो न भवति ।।

आदिरन्त्येन सहेता ।। 1.1.71 ।।

इदमपि संज्ञासूत्रम्, आद्यन्तयोर्मध्यापेक्षत्वान्मध्यवर्तिनां संज्ञित्वं विज्ञायते, "स्वं रूपम्" इत्यनुवृत्तेः स्वरूपस्य चेत्याह-मध्यवर्त्तिनामिति । यद्यप्याद्यन्तावयवा अवयविनः समुदायरूपस्य सम्बन्धिनौ तथापि तस्य युगपल्लक्ष्ये प्रयोगाभावात्समुदायिनां संज्ञेति दर्शयति-वर्णानामिति । स्वस्य च रूपस्येति । स्वरूपमादेरेव गृह्यन्ते, नान्त्यस्य; अप्राधान्यादिति दध्यत्रेति केवल एव यकारः प्रवर्त्तते, न णकारेण सहितः । सहग्रहणादाद्यन्तौ समुदितौ संज्ञेति समुदायादेव विभक्तिर्भवति "इको यण्" इति, नादिमात्रात् । टा इत्यनेन ग्रहणं मा भूदिति । तावतोऽवधेरविवक्षितत्वान्नायमन्त्यः "टाङसिङसामिनात्स्यः" "द्वितीयाटौस्वेनः" इति तृतीयैकवचनस्यासौ विशेषणार्थः ।।

येन विधिस्तदन्तस्य ।। 1.1.72 ।।

स्वरूपविधिपरिहारायायमारम्भः । इदमपि संज्ञासूत्रम् । येनेति करणे तृतीया । विधीयत इति विधिः, कर्मसाधनः किप्रत्ययः । विधिर्विधीयत इति । वधिशब्देन विधानयोग्यं वस्त्वभिधीयते, तस्य सांप्रतिकक्रियाविशेषद्योतनायाख्यातप्रयोगः । आसने आस्ते, करणेन करोतीतिवत् । तदन्तस्येसि बहुव्रीहिः ।

तदित्यनेन येनेति निर्दिष्टः शब्दो निर्दिश्यते, तदाह--आत्मान्तस्येति । अन्तशब्दस्यावयववाचित्वात्तदाक्षिप्तस्य समुदायस्येयंसंज्ञेत्याह --समुदायस्य संज्ञा भवतीति । अवश्यलाव्यमिति । मयूरव्यंसकादित्वात्समासः, "लुम्पेदवश्यमः कृत्ये" इति मलोपः ।

अथेह कस्मादेजन्तस्य संज्ञा न भवति "एचोऽयवायावः" इति, किं स्यात् ? अनेकाल्त्वादयादयः सर्वादेशाः स्युः; ततश्च चयनलवनादिष्वयनमिति प्राप्नोति, प्रकरणादिवशाच्चाक्षादिवदर्थविशेषावगतिः स्यात्, नैष दोषः; "निर्दिश्यमानस्यादेशा भवन्ति" इत्येवं भविष्यन्ति । अथ वा-यथा एचा तदन्तविधिः, एवमयादिभिरपि भविष्यति । एवमपि"आद् गुणः" इत्यत्र आदित्यवर्णान्तो गृह्यते, अचीति चाजादेरिति खट्वेन्द्र इत्यादाववर्णान्तस्य समुदायस्याजादेश्च गुणप्रसङ्गः । षष्ठ्यनिर्देशान्निर्दिश्यमानस्येत्यपि नास्ति । एवं तर्हि नैवंविधोऽस्य विषयः । येनेति करणे तृतीयेत्युक्तम्, करणं च परतन्त्रम्; कर्त्रधिष्ठितस्यैव करणत्वात् । न च "एरच्" इत्यादाविकारादीनां पारतन्त्र्यम्, धात्वादीनां च स्वातन्त्र्यं स्वरूपतोऽवभासते ।

वा स्यादिति । वृक्षादीनामतो विवक्षानिबन्धनं तदुभयमिति । विशेषणत्वेन विवक्षितं परतन्त्रमप्रधानम्, विशेष्यत्वेन विवक्षितं स्वतन्त्रं प्रधानम् । तेन विशेषणं विषेष्यस्य तदन्तस्य संज्ञेत्युक्तं सम्भवति । विशेष्यसन्निधौ च विशेषणं भवति, सन्निधिश्च कुत्रचित्साक्षान्निर्देशेन, यथा-"ईदूदेद्द्विवचनम्" इति द्विवचनस्य । क्वचिदधिकाराद्यथा-"एरच्" इति धातोः । क्वचिदाक्षेपाद्, यथा-"इको झल्" इति सना धातोः । "एचोऽयवायावः" इत्यादौ न कथंचिद्विशेष्यसंनिधिरिति नैतत्प्रवर्त्तते । यदि विशेषणं तदन्तस्य संज्ञा, ततः "उदोष्ठ्यपूर्वस्य" इत्यत्र ऋकारस्तदन्तस्य धातोः संज्ञेति ओष्ठ्यपूर्वग्रहणं धातोरेव विशेषणं स्याद्, न ञकारस्य; संज्ञायाः संज्ञिप्रत्ययनार्थत्वात् । ततश्चेह स्यात्-सङ्कीर्णमिति; पूर्तमित्यादौ च न स्यात् । एवम् "उतश्च प्रत्ययादसंयोगपूर्वाद् " इत्यत्रासंयोगपूर्वग्रहणमङ्गस्य विशेषणं स्यात्, नोतः, नैष दोषः; इयं हि संज्ञा गुणप्रधानभावापेक्षा ततश्च "उतश्च प्रत्ययाद्" इत्यादौ विशेषणसम्बन्धवेलायां गुणभावास्फुरणात्तमनुभूय पश्चात् विशेष्येण सम्बन्धे संज्ञा भवति ।

समासेति । अनेनैतदाह-श्रितादयो पश्चात् विशेष्यास्तद्विशेषणं च सुप् । एवं "नडादिभ्यः फक्" इत्यादौ नडादिविशेष्यं प्रातिपदिकं विशेषणमिति । कष्टं परमश्रित इति । श्रितान्तमेतत्सुबन्तं न भवतीति सम्बुद्ध्यन्तं पठितव्यम्, तद्धिप्रत्ययलक्षणेन सुबन्तं भवति श्रितान्तं च श्रूयते ।

नेत्याहेति । कः पुनराह ? उत्तरवादी, आचार्यो वा ।

उगिद्वर्णेति । उगिता वर्णेन च प्रातिपदिकं विशेष्यमित्यर्थः । यस्मिन्विधिरिति तदन्तविध्यपवादस्तदादिविधिः, अतो विशेषणेनैव भवति ।।

वृद्धिर्यस्याचामादिस्तद् वृद्धम् ।। 1.1.73 ।।

समुदायस्यैवाचामादिः सम्भवतीति स एव यस्येत्यनेनोच्यत इत्याह--यस्येति समुदाय उच्यत इति । संज्ञिनिर्देशार्थं चेदम्; अन्यथा तच्छब्देन किं परामृश्यते, तदित्यस्यानुपादाने वृद्धेरेव सा वृद्धसंज्ञा स्यात् । अचां मध्य इत्यादि । अत्र यस्येत्यस्याचामित्यनेन सम्बन्धः, आदिश्च निर्धार्यते, वृद्धिर्विधेयो धर्मः । आदिशब्दश्चोपक्रमवचनः-उपक्रम्यत इत्युपक्रमः, प्रथम उच्चार्यत इत्यर्थः । यस्य समुदायस्य सम्बन्धिनामचां मध्ये प्रथमत उच्चार्यमाणो वृद्धिसंज्ञक इत्यर्थः । अचामिति जातौ बहुवचनमिति । तेन द्वयोरपि भवतीति भावः । एकस्यापि व्यपदेशिवद्भावाद् भवति । शालीय इति । अत्र समुदायस्य हलादित्वेऽप्यजपेक्षया प्रथमोऽच् वृद्धिरिति संज्ञा भवति । ननु च निर्द्धारणस्य तुल्यजातीयविषयत्वान्निर्द्धार्यमाण आदिरप्यजेव प्रतीयते, न वा आकारोऽच्; अक्षरसमाम्नायेऽनुपदेशात् । कथं तर्हि सोमपं ब्राह्मणकुलमिति अच्कार्यं ह्रस्वत्वं भवति; सवर्कणग्रहणात्, न त्वच्त्वात् । इहापि तर्हि सवर्णग्रहणाभावात्प्रतीयते । अस्तु, तथाप्रतीयमान एव सवर्णं ग्रहीष्यति यथाज्ग्रहणे मध्यवर्त्तीकारादिः । किञ्च-अचामिति निर्द्धारणआश्रये तावदकारस्योच्चारितत्वाद् आकारोऽपि प्रतीयते । तेन निर्द्धार्यमाणस्याप्याकारादेस्तथाभूतमेवाच्त्वं प्रतीयत इति यत्किञ्चिदेतच्चोद्यम् ।

वा नामधेयस्येति । नामधेयशब्दः साङ्केतिकेषु रुढः । देवदत्तीया इति । काश्यादिषु देशवाची देवदत्तशब्दः पठ्यते । "एङ् प्राचां देशे" इति वृद्धसंज्ञकः काश्यादिभिः साहचर्यादित्यदेशवाचिनश्छ एव भवति । वाहीकग्रामवाचिनो।ष़पि देवदकत्तशब्दसर्यानादित्वेनासाङ्केतिकत्वाद् अप्राचां देशवाचित्वाच्च वृद्धसंथज्ञाया अभावात् काश्यादिलक्षणौ ठञ्ञिठौ न भवतः ।

गोत्रान्तादित्यादि । गोत्रशब्देन गोत्रप्रत्ययान्तं गृह्यते, तदन्तादसमस्तवत् केवलात् गोत्रान्ताद्यः प्रत्ययो भवति स एव तदन्तादपि भवतीत्यर्थः । घृतरौढीया इति । रूढऋस्यापत्यम् "अत इञ्" शौषिकेष्वर्थेष्विञश्चेत्यणः "न द्व्यचः प्राच्यभरतेषु" इति निषेधाद् "वृद्धाच्छः" । एवं वृद्धाम्भीयाः-अम्भसोऽपत्यम् "सम्भूयोऽम्भसोः सलोपश्च" इति बाह्वादिषु पाठादिञ्, सलोपश्च । ओदनपाणिनीया इति । पणिनोऽपत्यमित्यण् "गाथिविदथि" इति प्रकृतिभावात् "टेः"च इति टिलोपाभावः, पाणिनस्यापत्यं पणिनो युवेति इञ्, तस्य छात्रा इति विवक्षिते "यूनि लुग्" इति इञो लुकि कृतेऽपि प्रत्ययलक्षणेन "इञश्च" इत्यण् प्राप्तो गोत्राधिकारान्न भवति । "कण्वादिभ्यो गोत्रे " इत्यत्र तावत् पारिभाषिकं गोत्रं गृह्यते तदेव "इतश्च" इत्यत्राप्यनुवर्त्तते, तेन यूनीञ् न भवति । कश्यपशब्दो बिदादिः, कतशब्दो गर्गादिः, जिह्वाचपलो हरितभक्षश्च कात्यस्ततोऽणेन भवति । कः पुनरत्र प्रत्ययातिदेशप्रस्तावः, यावता शेषाधिकारे प्राग्दीव्यतोऽणेत्र चैतद्वक्तव्यम् ? सत्यम्; कैश्चित्तु गौत्रान्तस्य वृद्धसंज्ञा विहिता, एवमपि वृद्धाम्भीया इति सिद्धेः । वार्त्तिककारस्तु--"वृद्धसंज्ञायां सत्यां पिङ्गलकाणवस्य छात्राः पैङ्गलकाण्वा इति "वृद्धाच्छः" स्यात् । प्रत्ययातिदेशे तु "कण्वादिभ्यो गोत्रे" इत्यण् लभ्यते" इति मन्यमानः पूर्ववाक्येन परमतमुपन्यस्यानेन वाक्येन निरस्यति स्म; तदेव पठितं वृत्तिकारेण ।।

त्यदादीनि च ।। 1.1.74 ।।

उत्तरार्थमिति । तत्र प्रयोजनवत्त्वात् यस्याचामादिरेङिति सम्बन्धसम्भवाच्च । इह तु न सम्बध्यत इति । अयोग्यत्वाद् निर्द्धारणस्य सजातीय वषयत्वात् त्यदादीनां चाजात्मकत्वाभावाद् न ह्यस्ति सम्भवः । यस्याचामादयस्त्यदादय इति । न च त्यदादिस्थेऽचि त्यदादिशब्दो वर्तत इति क्लिष्टकल्पनायुक्ता; उत्तरार्थमप्यनुवृत्तिसम्भवात् । तदुक्तम् - उत्तरार्थमनुवर्तत इति । त्यादायनिरति । "उदीचां वृद्धादगोत्राद्" इति फञ्, "प्रत्ययोत्तरपदयोश्च" ।।

एङ्प्राचां देशे ।। 1.1.75 ।।
प्राचां देशाभिधान इति । प्राचि देशे ये वसन्ति ते प्राचः पुरुषास्तेषां सम्बन्धी यो देशस्तदबिधान इत्यर्थः । एतेन श्रुतस्य विशेषणं प्राचां ग्रहणं नाचार्याणामिति दर्शयति । तथा हि सति मतेनेत्यध्याहार्यं स्यादिति भावः । एणीपचनीय इत्यादि । एणीपचनादिभ्यश्छः । दैवदत्ता इति । "वाहीकग्रामेभ्यश्च" इति वृद्धादिति विहितौ ठ़ञ्ञिठौ न भवतः । काश्यादिपाठादपि न भवतः; तत्रापि वृद्धाधिकारात् । एवं क्रोडो नाम ग्रामस्तत्र भवः क्रौड इत्यणेव भवति । कुणिना तु प्राचांग्रहणमाचार्यनिर्देशार्थं व्याख्यातम्, बाष्यकारोऽपि तथैवाशिश्रियत् । तेन सेपुरं स्कोनगरं च वाहीकग्रामौ, तत्र "वाहीकग्रामेभ्यश्च" इति ठञ्ञिठौ भवतः--सैपुरिकी, सौपुरिका; स्कौनागरिकी, स्कौनगरिका । अस्य व्यवस्थितविभाषाविज्ञानाच्च क्रोडदेवदत्तशब्दयोरप्राग्देशवाचिनोष्ठञ्ञिठौ न भवतः । शैषिकेष्वेवार्थेष्वियं वृद्धिसंज्ञेष्यते । तेनापत्यविकारयोः "उदीचां वयवस्थितविभाषयैव सिद्धम् । वृत्तिकारपक्षे त्वेत्सर्वं वचनात्साध्यम् । गौमता इति ।
गोमती प्रग्देशे नदी देशग्रहणेन न गृह्यते, "नदीदेशोऽग्रामाः" इति नद्याः पृथग्ग्रहणात् "एङ् प्राचां देशे" "उदीचां वृद्धादगोत्राद्" इत्यादिषु प्रागुदञ्चौ श्रुतौ, तयोर्विभागज्ञानार्थमाह-प्रागुदञ्चाविति । शरावती नाम नदी उत्तरपूर्वाभिमुखी, तस्या दक्षिणपूर्वस्यां दिशि व्यवस्थितो देशः प्राग्देश; उत्तरपरस्यामुदग्देशः, तौ शरावती विभजते; तया मर्यादया तयो र्विभागो ज्ञायते । क्षीरोदकमिति । "जातिरप्राणिनाम्" इत्येकवद्भावः । क्वचित् "क्षीरोदके" इति पाठात्तत्र नियतव्यक्तिविवक्षया जातिपरत्वाभावाद् द्विवचनम् । किमर्थं विभजते ? विदुषां शब्दसिद्ध्यर्थम् । यद्यपि नद्या एवमुद्देशो न भवति --विदुषां शब्दा व्यवस्थिताः सिद्ध्यन्ति; तथापि तया हेतुभूतया व्यवस्थितं शब्दसाधुत्वमिति उद्देशोऽध्यारोप्यते । सैवंभूता सा नोऽस्मान् पातु । क्वचित् प्रागुदीचाविति पाठः, तत्र "अच्प्रत्यन्ववपूर्वात्" इत्यत्राजितियोगविभागादच्प्रत्ययः । "उद ईत्" इतीत्त्वम् । प्रगुदीचमिति पाठे समाहारद्वन्द्वः । "द्वन्द्वाच्चुदषहान्तात्समाहारे" इति टच् । क्वचित् प्रागुदीच इति पाठः, तत्रावयवबहुत्वस्य समुदाय आरोपः प्राग्देशान्नुदग्देशाँश्चेत्यर्थः ।।
इति हरदत्तमिश्रविरचितायां पदमञ्जर्या प्रथमध्यायस्य
प्रथमः पादः समाप्तः
* * *

1.2
अथ प्रथमाध्याये द्वितीयः पादः

गाङ्कुटादिभ्योऽञ्णिन्ङित् ।। 1.2.1 ।।

कुट आदिर्येषामिति बहुव्रीहावन्तर्वर्तिन्या विभक्त्या पदत्वेऽपि जश्त्वं न भवति; अनुक्रियमाणरूपविनाशप्रसङ्गात् । अथ वा 'कुट कौटिल्ये' इति धातुपाठे योऽकारस्तेन सह सानुबन्धानुकरणं द्रष्टव्यम् ।
अत्र चत्वारः पक्षाः सम्भवन्ति-इत्संज्ञकेन ङकारेण सह सम्बन्धप्रतिपादनम्, ङितो वा विधिः, संज्ञाकरणम्, तद्वदतिदेशो वेति । तत्राद्ये पक्षे गाङ्कुटादिभ्यः परोऽञ्णितप्रत्ययो ङिद् =इत्संज्ञकङकारयुक्तः, इत्संज्ञको ङकारस्तस्यास्तीत्यर्थः । अत्र येषामस्ति ङकारो यङादीनां तेषु व्यर्थोऽनुवादः, येषां नास्ति तव्यादीनां तेषु मिथ्योद्यमित्युपक्रिममात्रमयं पक्षः ।
अथ द्वितीयः ? 'गाङ्कुटादिभ्यः' इति पञ्चम्या 'अञ्णित्' इति प्रथमायाः षष्ठ्यां प्रकल्पितायां ङिदादेशः प्राप्नोति । अत्र प्रथमाया न च वैयर्थ्यम्, लाघवार्थत्वात् । तत्र ङिदिति कर्मधारये, असमासे वा 'आदेः परस्य' इति तव्यादीनामादेर्ङकारः प्राप्नोति, कथं पुनरित्संज्ञको नामादेशः स्यात् स्वयं निवृत्त्यभिमुखः ? को दोषः ? स्थानिनं निवर्त्य निवर्तिष्यते ! स्यादेतत्-इद्ग्रहणसामर्थ्यादादेशो न भविष्यति, आदेशत्वे हि 'लशक्वतद्धिते' इत्येव सिद्धेत्संज्ञेत्यागमो ङकारो विधास्यत इति, तन्न; अनेनेत्संज्ञा यथा स्यात् तेन मा भूदित्येवमर्थमिद्ग्रहणं स्यात् । कः पुनरत्र विशेषस्तेन वा सत्यामनेन वा ? अयमस्ति विशेषः-तेन सत्यां लोपः स्यात्, अनेन पुनर्न । तस्येति प्रकृतपरामर्शात् तस्यैतस्य प्रकृतस्येत्संज्ञकस्येति । एवं च श्रूयमाण एव ङकारे ङित्कार्याणि भवन्ति । तत्र 'नेड्वशि कृति' इत्यत्र वरमनादौ कृतीति यदि परिगणनम्, तदात्र प्रतिषेधाभावात् कुटिङा कुटिङमिति प्राप्नोति । अथ तु सम्भवोदाहरणप्रदर्शनम्, तदात्रापि प्रतिषेधात् कुट्ङा कुट्ङ्मिति प्राप्नोति । बहुव्रीहौ तु येऽमी प्रसिद्धा ङितश्च ङादयस्य एव तृजादीनामादेशाः स्युः । न चान्तर्यतो व्यवस्था, यत्र खल्वन्तरतमस्यानन्तरतमस्य च प्रसङ्गस्तत्रान्तरतमपरिभाषा । न चात्रान्तरतमानां तव्यङादीनां प्राप्तिः; लोके शास्त्रे वा तेषामप्रसिद्धेः । न चान्तरतमपरिभाषैव तान् कल्पयितुमर्हति; नियामकत्वात्तस्याः । सन्तु वा तव्याङदयः, तेऽपि त्वादेशा भवन्तः 'ङिच्च' इत्यन्त्यस्यैव स्युः । ननु च नात्र श्रौतः स्थान्यादेशभावः, किं तर्हि ? गाङ्कुटादिभ्यः परोऽञ्णित्प्रत्ययो ङिद् इत्संज्ञकङकारयुक्त इति सिद्धानुवादमात्राक्षरव्यापारः । स तु सिद्धानुवादौ विधानमन्तरेण नोपपद्यते इति ङकारस्येत्संज्ञकस्य विधिः कल्प्यते । किमतः ? यद्येवम्, इदं ततो भवति विधिवाक्यस्याश्रुतत्वात् क्व परिभाषाङ्गतामुपेयात्--'षष्ठी स्थानेयोगा' इति वा, 'आदेः परस्य' इति वा, 'ङिच्च' इति वा ? नैतदस्ति, यस्मात् षष्ठीप्रकल्पेनेन श्रौत एव स्थान्यादेशभाव

उपपादितः । अस्तु वा कल्पितविधानम्, य एव त्वसौ विधिः कल्प्यते, तत्रैव परिभाषाङ्गभावमुपैति; विध्यङ्गत्वात्परिभाषाणाम् । परिभाषाः खलु विधेरङ्गभूता अनुवादवाक्यश्रुतार्थान्यथानुपपत्त्या विधिवाक्यमेव कल्पन्ते इति सर्वथा दुष्ट एवायं पक्षः ।

संज्ञाकरणे 'क्ङिति च' इत्यत्रास्य ग्रहणं न स्यात्; संज्ञारूपस्यानुच्चारितत्वात् । ङिच्छब्दः संज्ञा, ङिच्छब्दश्चोच्चारितः प्रत्येकसम्बन्धमपीद्ग्रहणं क्ङिद् यस्येत्येतावदेव सम्पादयेत् । न बान्वर्थाऽवयवद्वययुक्ता संज्ञेति प्रत्यभिज्ञाभावात् क्ङित्प्रदेशेष्वस्य ग्रहणं न स्यादेव । तथा केवले ङिच्छब्द उच्चारिते तस्यैव ग्रहणं स्याद्, नयङादीनाम्; कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययात् । ततश्च ग्रहिज्यादिसम्प्रसारणं गृह्णातीत्यादावेव स्याद्, न जरीगृह्यतेत इत्यादौ । न च यङादीनां ङित्कारणस्य वैयर्थ्यम्; क्ङित्प्रदेशेषु यत्र संज्ञारूपं न प्रत्यभिज्ञायते तत्र ग्रहणार्थत्वात् । ननु चैवं गाङ्कुटादिभ्यः परस्य ङित्संज्ञाविधानमनर्थकमापद्यते, कथम् ? क्ङित्प्रदेशेष्वस्य ग्रहणं नास्तीत्युक्तमेव । केवलश्च हिच्छब्दो ग्रहिज्यादिसूत्र एव, न च तत्र गाङ् गृह्यते, नापि सर्वे कुटादयः, किं तु व्यतिरेक एव सत्यम्; न्यायागतेऽर्थे किं कुर्मः ! त्यज्यतामयं पक्षः ।

तदेवमेतेषां पक्षाणां दुष्टत्वात् चतुर्थं पक्षमाश्रित्याह-अतिदेशोऽयमिति । इङादेशो गृह्यते इति । 'इङश्च''गाङ् लिटि' 'विभाषा लुङ्लृङोः' इति विहितः । ङकारस्यानन्यार्थत्वादिति । इङादेशस्य हि यो ङकारस्तस्यैतदेव प्रयोजनम्--इह तस्यैव ग्रहणं यथा स्यादिति । अथ सामान्यग्रहणं कस्मान्न भवति ? असमानत्वादादेशस्य । ङकारोऽन्यार्थः; आत्मनेपदस्य स्थानिवद्भावेनैव सिद्धत्वात्, धातोस्तुचरितार्थः । यद्येवम्, आब्ग्रहणे चाप एव ग्रहणं प्राप्नोति, पकारस्यानन्यार्थत्वात्,न; एवं हि चापोऽनुबन्धावनर्थकौ स्याताम्, टापश्च टकारः । अतो यच्च यावच्च समानं सम्भवति चरितार्थपित्त्वमचरितार्थपित्त्वमपि तत्सर्वमाश्रीयते, न चाब्रूपमेवयावत् । कुङ्शब्द इति । तदनन्तरं वृत्करणाद् 'आकूतम्' इति प्रयोगदर्शनात् 'कूङ दीर्घान्तो ङिद्वद्भवतीत्यर्थः' इत्यन्तरेणापि वतिं वत्यर्थो गम्यते, यथा-सिंहो माणवक इति । यद्ययमतिदेशः, 'असंयोगाल्लिट् किद्' इति प्रकरणेऽपि कित्कार्यातिदेशोऽङ्गीकर्त्तव्यः, ततश्च सिसृक्षतीत्यत्र सत्यपि 'हलन्ताच्च' इति सनः कित्त्वातिदेशे स्वाश्रयमकित्त्वमाश्रित्य 'सृजिदृशोः' इत्यमागमः प्राप्नोति । अतिदेशेन पराश्रयं कार्यं प्राप्यते, न तु स्वाश्रयं निवर्त्यते । सिद्धं तु प्रसज्यप्रतिषेधात् किति न भवतीति । ततश्च स्वाश्रयस्य कार्यस्याभावादातिदेशिककित्त्वाश्रयः प्रतिषेधो भविष्यति । इह तर्हि उच्चुकुटिषति-'ङितः' इत्यात्मनेपदं प्राप्नोति ? ङितो धातोरात्मनेपदमुच्यते, इह चातिदेशेन सन एव ङित्त्वम्, न धातोः । यत्रावयवे लिङ्गमचरितार्थं तत्र समुदायस्य विशेषकं भवति; इह त्ववयव एव गुणप्रतिषेधादिकं ङित्त्वस्य प्रयोजनमस्ति । यङन्तादपि तर्हि न प्राप्नोति, तस्मान्नैवं शक्यं विज्ञातुम्--ङितो धातोरिति, ततश्चैकं सनमेव ङितमाश्रित्यात्मनेपदं प्राप्नोति ? नैष दोषः, सप्तमीसमर्थाद्वतिः-ङितीव ङिद्वत् । ननु च नात्र वतिर्निर्दिश्यते, सत्यम्; परत्र परशब्दप्रयोगात् कल्प्यमानो वतिर्व्याख्यानात् सप्तम्यन्तादाश्रीयते । एवमपि प्रतियोगिनि सप्तमी प्राप्नोति-अञ्णितीति ? एवं तर्हि 'अनुदात्तङितः' इत्यत्र 'उपदेशे' इति वर्त्तते, उपदेशे यो ङित्, तत आत्मनेपदं भवति ।

अध्यगीषतेति । 'विभाषा लुङ्लृङो' इति गाङादेशः,'आत्मनेपदेष्वनतः' घुमास्थादिसूत्रेणेत्त्वम् ।

व्यचेरित्यादि । 'व्यच व्याजीकरणे' तुदादौ कुटादिभ्यः प्राक् पठ्यते । उद्विचितेति । ग्रहिज्यादिना सम्प्रसारणम् ।

उरुव्यचा इति बहुव्रीहिः । कथं विव्यचिथ ? 'अनसि' इति पर्युदासोऽयमसुन्प्रत्ययस्य कृत्वा तत्सदृशो कृति कार्यं विज्ञायते ।

कथं लिखितुम्, स्वयमेव लिखिष्यते, यावता कुटेः पूर्वं लिखिः पठ्यते ? कश्चिदाह-" कुटस्यादिः, कुट आदिर्येषां ते कुटादयः, कुटादिश्च कुटादयश्चेति बहूव्रीहितत्पुरुषयोः सहविवक्षायाम् 'स्वरभिन्नानां यस्योत्तरस्वरविधिः स शिष्यते' इति बहुव्रीहेः शेषः । तत्र तत्पुरुषवृत्तया संगृहीतो लिखिरपि ङित्त्वस्य निमित्तम्" इति । एवं तु लिखित्वा, लेखित्वा; लिलिखिषति, लिलेखिषति; 'शकुनिष्वालेखने' इत्यनुपपन्नं स्यात् । तस्माद्यद्यवश्यमुपपादनीयम्--'संज्ञापूर्वको विधिरनित्यः' इति गुणो न भविष्यति । 'धू विधूनने', कुटादिः, तस्य 'अर्त्तिलूधूसूखनसहचर इत्रः' इतीत्रप्रत्यये गुणो न प्राप्नोति । नात्र गुण इष्यते, धुवित्रमित्येव भवति, कल्पसूत्रकाराणां तु प्रयोगाश्छान्दसत्वादुपपादनीयाः । अथ वा -'भञ्जभासमिदो घुरच्''विदिभिदिच्छिदेर्ङ्किद्' इति वक्तव्ये प्रत्ययान्तरकरणं ज्ञापकम्--आतिदेशिकं ङित्त्वमनित्यमिति ।।

विज इट् ।। 1.2.2 ।।

ओविजी भयचलनयोरिति । यस्तु 'सृजिविजि विद्ध्यनिट्स्वरान्' इत् विचिः, न स गृह्यते; अनिट्त्वात् । इतरस्तु ईदित्त्वसामर्थ्यात् सेट्, वृद्धसंज्ञासूत्राद् यस्यादिरिति वर्त्तते, तेनेड्विशेष्यते-यस्यादिरिडिति । तेनोत्तमैकवचनस्य ग्रहणं न भवति, न ह्यसौ कस्याचिदादिः । अत एवागममात्रस्यायं ङित्त्वविधिर्न भवति, किं तर्हि ? तदादेः प्रत्ययस्येत्याह--इडादिः प्रत्यय इति । उद्विचितेति । ङित्त्वाल्लघूपधगुणाभावः ।।

विभाषोर्णोः ।। 1.2.3 ।।

'ऊर्णुञ् आच्छादने' ञिद्, नोपधः; 'रषाभ्याम्' इति णत्वेन पाठः । प्रोर्णुनाव--रेफवियोगेऽभ्यासात्परस्य नकारस्य श्रवणं भवति । प्रोर्णुवितेति । ङित्त्वपक्षे उवङ्, अन्यत्र गुणः ।।

सार्वधातुकमपित् ।। 1.2.4 ।।

अपिदिति पर्युदासश्चेत्, च्यवन्ते इत्यत्र च्यु अ अन्ते इति स्थने नित्यत्वादन्तङ्गत्वाच्चैकादेशः । न च वार्णादाङ्गं बलीयः, नानाश्रयत्वात् । तत्र कृते परस्येहापित् आश्रितत्वात्तं प्रत्यादिवद्भावात् पिदपितोरेकादेशोऽपिद्ग्रहणेन गृह्यत इति शबेकादेशवतः सार्वधातुकस्य ङित्त्वाद् गुणनिषेधः प्राप्नोति । प्रसज्यप्रतिषेधे तु पित्त्वनिमित्तो निषेधः पूर्वस्य कार्यमिति पूर्वं प्रत्यन्तवद्भावाद् ङित्त्वाभावः । अस्तु तर्हि प्रसज्यप्रतिषेधः ? यद्येवम्, तुदानीत्यत्र विकरणोत्तमयोः पिदपितोरेकादेशः परस्य पितो ङित्त्वनिषेधे कर्तव्ये आदिवत्स्यात्, इत्यङितमुत्तममाश्रित्य गुणः प्राप्नोति । 'अन्तादिवच्च' इत्यत्र पूर्वपरौ समुदायावभिप्रेतौ, नाचौ । किं कारणम् ? आद्यन्तयोरवयवत्वात्, स्थानिनोरचोरेकादेशेन निवर्तितत्वाच्च । अतः स्थानिनावचौ पूर्वपरौ ययोः समुदाययोरन्तादी, एकादेशोऽपि तयोरेवान्तादिवद्भवतीत्ययमतिदेशार्थः । अत एव ब्रह्मबन्धूरित्यत्र एकादेशोऽपि प्रतिपदिकं प्रत्येवान्तवद्भवति, ध्रुवै तुवै इत्यत्र च उत्तैमैकवचने कृत्स्नयोरेव पिदपितोरेकादेश इति अचावेव प्रत्यादिवत्त्वे स्यादेव दोषः ।

एवं तर्ह्यकादेशस्य पूर्वविधौ स्थानिवद्भावात्पक्षद्वयेऽपि यथा स्थानिकाले यथायोगं गुणस्य प्रवृत्तिनिवृत्ती भवतः, तथा कृतेऽप्येकादेशे स्थानिबुद्ध्या भविष्यतः ।

एवमुभयोर्निर्दोषत्वेऽपि प्रयज्यप्रतिषेध एवाश्रयणीयः । तत्र हि--तदाश्रयणसामर्थ्याद्यच्च यावच्च पितो ङित्त्वं प्राप्तं तस्य सर्वस्य निषेधादिदमपि सिद्धं भवति- अचिनोद्, अचिनवमिति । अत्र हि ङितो लङ आदेशस्य स्थानिवद्भावेन प्राप्तस्य निषेधो भवति । पर्युदासे त्वतिदेशेनैकवाक्यत्वात् तस्यैव पर्युदासात् स्थानिवद्भावकृतं ङित्त्वं स्यादेवेति यासुटो ङिद्वचनं ज्ञापकमाश्रयणीयं स्यात् । किं च 'ङिच्च पिन्न भवति' इत्ययमप्यत्रार्थ इष्यते । अतो न ब्रूताद्भवानित्यत्र तातङः स्थानिवद्भावात्प्राप्तस्य पित्त्वस्य निषेधात् पिदाश्रयो ब्रुव इण् न भवति, तृणअढाद्भवान्--तृणह इण् न भवतीत्येषा दिक् । अत एतदर्थमपि प्रसज्यप्रतिषेध आश्रयणीयः । तत्र हि पृथक्कृतस्य नञो यथेष्टमभिसम्बन्धो भवति--पिद् ङिन्न भवति, ङिच्च पिन्न भवति । तत्र यस्यौपदेशिकं पित्त्वं तस्यातिदेशप्राप्तं स्थानिवद्भावप्राप्तं च ङित्त्वं निषिध्यते; यस्य पुनरौपदेशिकं ङित्त्वं तस्य स्थानिवद्भावप्राप्तं पित्त्वं निषिध्यत इति विवेक्तव्यम् । कुरुत इति । ङित्त्वाद्विकरणस्य गुणाभावः, 'अत उत्सार्वधातुके' इत्युत्त्वं च भवति । अत्र च तृतीयासमर्थाद्वतिराश्रयणीयः, न पूर्ववत्सप्तमीसमर्थात् । तेन पचेते इत्यत्र 'आतो ङितः' इति ङितो यत्कार्यं तदपि भवति । यद्येवम्, चिनुत इति 'तास्यनुदात्तेत्' इति लसार्वधातुकानुदात्तत्वं प्राप्नोति ? नैष दोषः; उपदेशग्रहणमुभाभ्यामपि सम्बध्यते-ङिदुपदेशाद्, अदुपदेशादिति । 'अह्न्विङोः' इति वा पर्युदासात् तत्सदृशस्योपदेशङकारवतो ग्रहणमिति सर्वमनवद्यम् ।।

असंयोगाल्लिट् कित् ।। 1.2.5।।

लिटाऽऽक्षिप्तो धातुरसंयोगग्रहणेन विशेष्यत इत्याह असंयोगान्ताद्धातोरिति । ननु चात्र पर्युदासत्वमुक्तं प्रतीयते, ततश्च संयोगान्तसदृशाद् हलन्तदेव स्याद्-बिभिदतुः,बिभिदुरित्यादौ; निन्यतुरित्यादौ तु न स्यात् ? ज्ञापकात् सिद्धम्, यदयम् 'ऋतश्च संयोगादेर्गुणः' इति सस्मरतुरित्यादौ गुणं विधत्ते, तज्ज्ञापयति-नात्र नञिवयुक्तन्यायो धातुमात्रस्यैव ग्रहणमिति । ङित्त्वे प्रकृते कित्त्वातिदेशस्य प्रयोजनम् --ईजनम्, ईजत्ः, ईजुः, यजादीनां कितीति सम्प्रसारणं यथा स्यात्; जजागरतुः, जजागरुः-'जाग्रोविचिण्णल्ङित्सु' इति गुणो यथा स्यात् । यदि पुनर्गाङ्कुटादिभ्योऽपि कित्त्वमेवातिदिश्येत ? नैवं शक्यम्; इह हि दोषः स्याद्--'णु स्तुतौ''धू विधूनने' तृच्, नुविदा धुविदा--'श्र्युकः किति' इतीट्प्रतिषेधः प्राप्नोति, यथा-लूत्वा, लूनः ? नैष दोषः; पूर्वस्य कार्यतिदेशोऽयमित्युक्तम् । इह तर्हि कुटित्वा, पुटित्वा--'न क्त्वा सेट्' इत्यातिदेशिकस्यापि कित्त्वस्य प्रतिषेधो नातिदेशिकस्य भवतीति, सत्यम्; असति क्त्वाग्रहणे, सति तु तस्मिन् सनः 'न क्त्वा सेट्' इति निषेधो न लभ्यते इत्यज्ञापकं वक्ष्यते-'न क्त्वा सेट्' इति निषेधो नातिदेशिकस्य भवतीति, सत्यम्; असति कत्वाग्रहणे, सति तु तस्मिन् सनः 'न क्त्वा सेट्' इति निषेधो न लभ्यते इत्यज्ञापकं तत्र ढल्ग्रहणम् । तथा 'सार्वधातुकमपिद्' इति कित्त्वातिदेशे जागृतः, जाग्रतीति गुणः स्याद्, ङित्त्वातिदेशे त्वविचिण्णल्ङित्स्विति पर्युदासो भवति । 'ऋदुपधेभ्यो लिटः कित्त्वं गुणात् पूर्वविप्रतिषेधेन' । कित्त्वस्यावकाशः-ऋजतुः, ऋजुः न ह्यत्र विध्यन्तरस्य कस्यचित्प्रसङ्गः; गुणस्यावकाशः--वर्त्तित्वा,वर्धित्वा; ववृते, ववृधुरित्यत्रोभयप्रसङ्गे कित्त्वं भवति पूर्वविप्रतिषेधेन । इह तु बिबिदतुः बिभिदुः, नित्यत्वादेव कित्त्वं सिद्धम्; तद्धि कृतेऽपि गुणे प्राप्नोत्यकृतेऽपि, गुणस्तु कित्त्वे सति न प्राप्नोति । ववृते इत्यत्र तु गुणे कृते संयोगान्तत्वात् कित्त्वं न प्राप्नोतीत्युभयमनित्यमिति पूर्वविप्रतिषेध उच्यते । स चायं कार्यातिदेशपक्षे स्फुटमेव वक्तव्यः । तथा हि-अनेनैव कित्कार्यातिदेश ईजतुरित्यादौ यत्र विध्यन्तरस्याप्रसङ्गस्तत्र सम्प्रसारणमतिदिश्य चरितार्थमतिदेशं परत्वाद् गुणो बाधेत । शास्त्रातिदेशे वा 'क्ङिति च' इत्येतच्छास्त्रमतिदिश्यते, तच्च यद्यपि गुणस्यापवादभूतम्, तथाप्यन्यत्र चरितार्थत्वाद् दुर्बलेनातिदेशेनातिदिष्टः 'क्ङिति च' इति प्रतिषेधो दुर्बल इति तं बाधित्वा गुणः स्यादेव ।।

इन्धिभवतिभ्यां च ।। 1.2.6 ।।

इन्धेरगन्तुक इकारो न तु 'इक्श्तिपौ धातुनिर्देशे' इतीक् प्रत्ययः, तेन 'अनिदिताम्' इति नलोपो न भवति । समीध इति । 'ञिइन्धी दीप्तौ' अनुदात्तेत्, एशः कित्त्वाद् 'अनिदिताम्' इत्युपधालोपद्विर्वचने सवर्णदीर्घत्वम् । बभूविव, बभूविथेति । कित्त्वाद्यथाक्रमं वृद्धिगुणौ न भवतः । इन्धेः संयोगार्थमित्यादिना पूर्वणासिद्धं दर्शयन् सूत्रारम्भं समर्थयते ।

अयं योगः शक्योऽवक्तुम्, कथम् ? इन्धेरनन्तरश्छन्दस्येव लिड् भवति, भाषायां त्विजादेश्चेत्यामा भवितव्यम्, छन्दसि च 'छन्दस्युभयथा' इति लिटः सार्वधातुकसंज्ञा, 'सार्वधातुकमपित्' इति ङित्त्वादुपधालोपः । श्नमि तु कर्तव्य आर्धधतुकसंज्ञा, छान्दसत्वाद्वा श्नमभावः । भवतेरपि 'भुवो वुग्लुङ्लिटोः' इति वुग्विधीयते, तत्र भूअ, भूइथ इति स्थिते वुक् प्राप्नोति, वृद्धिगुणौ च; कृताकृतपसङ्गित्वेन नित्यो वुक्, नच शब्दान्तरप्राप्तः,

एकदेशविकृतस्यानन्यत्वाद्; वुकि च कृतेऽनजन्तत्वादलघूपधत्वाच्च वृद्धिगुणौ न भविष्यतः । अवश्यं चैतदेवं विज्ञेयम्-'वुका वृद्धिगुणौ बाध्येते' इति । यो हि मन्यते-'कित्त्वादिमे गुणवृद्धेः किति नेति प्रतिषेधः, अनिग्लक्षणत्वात् । एवं तर्हि ज्ञापकार्थमिन्धिग्रहणम्, एतज्, ज्ञापयति-'इन्धेर्भाषायामप्यनित्य आम्' इति, समीधे समीधाञ्चक्र इति भाषायामपि भवति । भवतेरपि वुगनित्यः, किं कारणम् ? उरिति वर्तते, न च गुणवृद्ध्योः कृतयोरुवर्णान्तो भवतिर्भवति; उरिति निवर्तिष्यते ? यदि विवर्तते; बोभाव, अहं किल बोभव-यङ्लुक्यपि नित्यत्वाद् वुक् प्राप्नोति । अनुवर्तमाने पुनरुरित्यस्मिन् उभयोरनित्ययोः परत्वाद् गुणवृद्ध्योः कृतयोरनुवर्णान्तत्वाद् वुङ्न भवति । अथेदानीं यङ्लुक्यप्यनेनैव लिटः कित्त्वं कस्मान्न भवति ? श्तिपा निर्देषशात् । यदि पुनर्वुग्विधावेव श्तिपा निर्देशः क्रियते ? नैवं शक्यम्; इह हि दोषः स्याद्-बोभूवत्;, बोभूवुः । यदा पुनः कित्त्वविधौ श्तिपा निर्देशः क्रियते, न वुग्विधौ; तदा यङ्लुकि पित्सु वचनेषु लिटः कित्त्वाभावाद् गुणवृद्ध्योः कृतयोरुरित्यधिकाराद् वुङ्न भवति । अपित्सु वचनेषु 'असंयोगाल्लिट् कित्' इति कित्त्वे सति गुणाभावादुवर्णान्तत्वाद्वुग् भवति । ननु चोक्रम्--'आरभ्यमाणेऽपि कित्त्वे वृद्धेः प्रतिषेधो न सिद्ध्यति, अग्निलक्षणत्वाद्' इति, नैष दोषः; ङिद्ग्रहणमप्यनुवर्तते, तत्सामर्थ्यादनग्लिक्षणाया अपि वृद्धेः प्रतिषेधो भविष्यति, सत्यम्; अस्त्यं शुष्कस्तर्कः । वार्त्तिककारस्तु न क्षमते, यदाह-'इन्धेश्छन्दो विषयत्वाद् भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यम्' इति ।
श्रन्थिग्रन्थीत्यादि । 'श्रन्थ ग्रन्थ संदर्भे', 'दम्बु दम्भे''ष्वञ्ज परिष्वङ्गे' । श्रेथतुः, श्रेथुरिति कित्त्वादुपधालोपः, एत्वाभ्यासलोपावप्यत्र वक्तवायौ । देभतुरिति । नलोपे कृते 'अत एकहल्मध्येऽनादेशादेः' इत्येत्वाभ्यासलोपौ । न च लोपस्या सिद्धत्वम्, आभाच्छास्त्रीयस्यासिद्धत्वस्यानित्यत्वात् । परिषस्वज इति । 'ष्वञ्जपरिष्विङ्गे', अनुदात्तेत्,'उपसर्गात्सुनोति' इति षत्वम् 'सदिस्वञ्ज्योः परस्य लिटि' इति परस्य प्रतिषेधः । अत्र केचिद्वेति पठन्ति, शश्रन्थतुरित्याद्यपि भवति । अथ पित्सु वचनेषु कथम् ? यदि संयोगार्थमेव वचनम्, पित्सु न भाव्यम् । अथ संयोगान्तार्थं पिदर्थं च ? पित्स्वपि भाव्यम् । किं पुनरत्रार्थतत्त्वं देवो ज्ञातुमर्हति ।।
मृडमृदगुधकुषक्लिशवदवसः क्त्वा ।। 1.2.7 ।।
'क्लिश हिंसायाम्', अनुदात्तेद्, दिवादिरकर्मकः; 'क्लिशू विबाधने' क्र्यादिः सकर्मकः, परस्मैपदी-द्व्योरपि ग्रहणम् । किमर्थं पुनरिदम्, तावता किदेव हि क्त्वा ? तत्राह--न क्त्वा सेडित्यादि । अपकर्षः = अपवादः नन्विदमेव नियमार्थं भविष्यति-'मृडादिभ्य एव क्त्वा किद्भवति नान्येभ्यः' इति नार्थः 'न क्त्वा सेट्' इत्यनेन; कथं लूत्वा पूत्वा-तुल्यजातीयस्य सेटो नियमः ? ननु 'क्लिशः क्त्वानिष्ठयोः' इति विकल्पेनेड्विधानादनिट् क्त्वा सम्भवति ? एवं तर्हि मृडमृदवदवसां कित्त्वाविधानं नियमार्थम्, इतरेषां तु 'रलो व्यपधात्' इति विकल्पबाधेन विधिसम्भवान्नियमो न भविष्यति । एवमपि विपरीतोऽपि नियमः स्याद्--मृडादिभ्यः क्त्वैव किदिति । उदित्वा, उषित्वेति । यजादित्वात्सम्प्रसारणम् 'शासिवसिघसीनां च' इति षत्वम्, 'वसतिक्षुधोरिट्' ।।
रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ।। 1.2.8 ।।
सन्नर्थमिति । तत्र चरितार्थत्वादनिटः कृत्वाः कित्त्वाविधानं नियमार्थं न भवति ।।

इको झल् ।। 1.2.9 ।।
सनाक्षिप्तस्य धातोरिका विशेषणात्तदन्तविधिर्भवतीत्याह--इगन्ताद्धातोरिति । 'इक् स्मरणे' इत्यास्य तु धातोर्ग्रहणं न भवति, न ह्यतः परो झलादिसन् सम्भवति, कथम् ? 'इणो गा लुङि' 'णौ गमिरवबोधने' 'सनि च' 'इण्वदिक इति वक्तव्यम्' 'गमेरिट् परस्मैपदेषु'--अधिजेगमिषति । ननु च भावकर्मणओरात्मनेपदे 'अनुदात्तोपदेश' इत्यनुनासिकलोपार्थमेतत्स्यात्, तत्र तु रूपे विप्रतिपत्तिः, गमेरिङादेशस्य ग्रहणमिति वचनात् 'अज्झनगमां सनि' इति दीर्घो न भवति-अधिजिगंस्यत इति केचित् ।
अन्ये त्वाहुः-```अज्झनगमान्' इत्यत्राज्ग्रहणं न कर्त्तव्यम्, कथम् ? 'सनि दीर्घः' इत्येको योगः, अचश्च , एवं सिद्धेऽजग्रहणं प्रवृत्तिभेदेन गमेरपि विशेषणआर्थम्--अजादेशस्य गमेरिति; तेनास्यापि दीर्घेण भाव्यम्, अजादेशत्वाद्-अधिजिगांस्यत इति रूपमिति । तदेवं धातोरपि ग्रहणं युक्तमेव । एवं तर्हि झला साहचर्याद् गर्गादिषु जिगीषुशब्दस्य पाठाच्च प्रत्याहारस्य ग्रहणमुत्तरसूत्रे च इक्समीपाद्धलः पर इत्यनुपपन्नं धातुग्रहणे । झलादिरिति । कथं पुनस्सत्सप्तमीनिर्देशे तदादिविधिः शक्यो विज्ञातुम् ? झल्मात्रस्य सनोऽसम्भवात् । ननु च चिकीर्षितेत्यादवतो लोपे सति सम्भवति, अपूर्वविधत्वाच्च न लोपस्य स्थानिवत्त्वाम्; एवं तर्हि वृद्धिसंज्ञासूत्राद्यस्यादिरिति वर्त्तते सन् किद्भवति, कीदृशः ? यस्य ढलादिरिति । एतेन तदन्तविधिरपि निरस्तो वेदितव्यः । चिचीषतीति । 'एकाचः' इतीट्प्रतिषेधः । तुष्टूषतीति । 'शर्पूर्वाः खयः' । शिशयिषत इति । 'पूर्ववत्सनः' । किमर्थमिति । योगविभागविषयः प्रश्नः । सूत्रं तूत्तरार्थं कर्त्तव्यम् । दीर्घत्वगुणस्य बाधकं भविष्यतीति । ननु 'कुङ्शब्दे' कटादिः, चुकूषत इत्यस्मि दीर्घस्यावकाशः ? दीर्घान्तोऽयमित्यवोचाम् । इह तर्हि 'गु पुरीषोत्सर्गे' 'ध्रु गतिस्थैर्ययोः' कुटादी, जुगूषति, दुधूषति । एवमपि प्रत्याहारग्रहणमनर्थकम् 'उतो दीर्घ' इति वक्त्वयम् ? अस्ति प्रत्याहारग्रहणे प्रयोजनम्, किम् ? प्रतिभेदेन गमिमपि विशेषयिष्यामीति । यद्येतावत्प्रयोजनं स्यात् 'उतो दीर्घ' इत्युक्त्वा इङ्हन्योरिति वक्तव्यम्-येषां समेरिङादेशस्य ग्रहणमिति पक्षः । येषामनिङादेशस्यापि ग्रहणं तेषामिहन्योरिति वक्तव्यम्, हना साहचर्यादिरिति धातुर्गृह्यते, नेकारः, तस्मादज्गरहणसामर्थ्याद्दीर्घत्वं गुणस्य बाधकं भविष्यतीति सुष्ठूक्तम् । यथैव तर्हि झलादौ गुणो बाध्यते, एवमिङादावपि बाध्येत--जिजविषयति, नात्र दीर्धः प्रवर्त्तते, किं असति हि कित्त्वे नाप्राप्ते विध्यन्तरे आरभ्यमाणं दीर्घत्वं यथा गुणं बाधते एवं णिलोपमपि बाधेन । ननु यत्र नाप्राप्ते तस्य बाधकः, क्व च नाप्राप्ते ? दीर्घ आरभ्यते, गुणे णिलोपे तु ज्ञीप्सतीत्यत्र प्राप्ते, चिचीषतीत्यत्राप्राप्ते पाक्षिक एव परिहारः । यत्र बाध्यं भेदेनापेक्ष्यते--'इदमस्मिन्विषये प्राप्तमिदमस्तिन्विषये' इति, तत्रैकबाधेनोपपत्तौ

सत्यामनेकबाधो न न्याय्य इति किमेकं बाध्यतामित्यपेक्षायाम् 'येन नाप्राप्ते स बाधनीटः' इत्युच्यते, एवं ह्यपेक्षितविधिर्भवति । यदि तु 'नाप्राप्ते विध्यन्तरे इदमारभ्यते' इति कार्यसामान्यमपेक्ष्यते, तदा सर्वमेव बाधनीयम् । एतेन पुरस्तादपवादन्यायेन णिलोपमेव दीर्घत्वं बाधेत, न गुणमित्यपि चोद्यं निरस्तम्; यस्यादयमपि न्यायः कार्यसमान्यचिन्तायां नास्त्येव । अतः सुष्ठूक्तम्--णिलोपमपि बाधेतेति । दीर्घत्वस्यावकाशदानायेति । एतदेव स्फुटयति-चिचीषतीत्यादि ष्विति । सति हि कत्त्वे चिचीषतीत्यादौ कित्त्वेनैव गुणो बाध्यते, न दीर्घेणेत्यबाधितत्वैव विध्यन्तरं सावकाशो दीर्घः परत्वाण्णिलोपेन बाध्यत इत्यर्थः । ज्ञीप्सतीति । 'मारणतोषणनिशामनेषु ज्ञा', 'ज्ञप मिच्च' इति चुरादिषु पाठाद् णिचि पुकि 'मितां ह्रस्वः', सन्, 'सनीबन्तर्द्ध' इतीडभावक्षे 'आप्ज्ञपृधामीत्' इतीत्त्वम्, 'अत्र लोपोऽभ्यासस्य ' । किमर्थो योगविभाग इत्यशङ्क्य प्रयोजनमाह--इकः कित्तवमित्यादि । गुणो मा भूदित्येवमर्थमिक उत्तरस्य सनः कित्त्वं विधीयतइत्यर्थः । दूषयति-दीर्घारम्भादिति । गुणो न भविष्यतीति शेषः । कृते भवेदिति । शास्त्रमावर्तमानं जपादिवद्भर्मे साधनमिति भावः । अनर्थकं त्विति । शास्त्रपूर्वकात्प्रयोगाद्धर्मो न तु प्रवृत्तिमात्रादिति भावः । ननु च 'सनि मीमाघु' इत्यत्र मिनोतेरपि मीग्रहणएन ग्रहणार्थं दीर्घविधिः स्याद्, मा भून्मीग्रहणेन ग्रहणम्, 'मीनातिमिनोतिदीङां ल्यपि च' इत्यात्वे कृते 'गामादाग्रहणेष्वविशेषः' इति माग्रहणेन ग्रहणं भविष्यति; तत्रायमप्यर्थो मीग्रहणमपि न कर्त्तव्यं भवति । ह्रस्वार्थमिति । ह्रस्वानामेव दीर्घविधानासामर्थ्याद् गुणो न स्याद्, दीर्घाणां तु पुनः प्राप्नोति--लुलूषति; न हि दोर्घान्तेषु दीर्घशास्त्रं प्रवर्त्तते, पूर्वमेव तद्रूपसद्भावादिति भावः । सामार्थ्याद्धि पुनर्भाव्यमिति । सामर्थ्यम् = प्रयोजनसद्भावः, यथा 'मो राजि समः क्वौ' इति मकारस्यैव मकारो विधीयते, विकारान्तरं मा भूदिति । तथा दीर्घस्यापि गुणो मा भूदिति पुनर्दीर्घो भविष्यति । यदि तर्हि प्राप्नुवन्विधिः दीर्घेण बाध्यते, ॠदित्त्वामपि न प्राप्नोति-चिकीर्षति, तत्राह--ॠदित्त्वं दीर्घसंश्रयमिति । दीर्घः संश्रयो निमित्तं यस्य तत्तथोक्तम् । यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, यस्य तु विधेर्निमित्तमेव नासौ बाध्यते । न चात्राकृते दीर्घे ॠदित्त्वं प्राप्नोति । इह तर्हि-तितीर्षति, अकृतेऽपि दीर्घत्वे ॠदित्त्वं प्राप्नोतीति ? ॠदित्त्वानिवृत्त्यर्थमेव दीर्घत्वं स्याद्, अत आह-दीर्घाणां नाकृते दीर्घ इति । दीर्घाणामप्यकृते दीर्घत्वे ऋदित्त्वं न प्राप्नोति, किं कारणम् ? इत्त्वोत्त्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन, अतो यावद्दीर्घेण गुणो न बाधितः, तावदित्त्वं न पाप्नोति; तस्मान्नार्थ एतेनेति स्थिते प्रयोजनमाह--णिलोपस्त्विति ।।

हलन्ताच्च ।। 1.2.10 ।।

समीपवचनोऽन्तशब्द इति । अवयववचनस्तु न भवति, धातावन्यपदार्थे 'येन विधिस्तदन्तस्य' इत्येव तदन्तविधेः सिद्धत्वात् । इकस्त्वन्यपदार्थत्वं नैव सम्भवति, न हि वर्णो वर्णान्तरस्यावयव उपपद्यते । हल् चासावन्तश्चेति । कर्मधारयं दर्शयति । निपातनाद्विशेषणस्य परनिपातः । तत्र च कस्यान्तो हलितयपेक्षायामिक इति पञ्चम्यन्तं सन्निहितं षठ्यन्तं विपरिणम्यत इत्याह-इगन्तादिति । इकमपेक्षमाणस्याप्यन्तशब्दस्य नित्यसापेक्षत्वात् सूत्रे कर्मधारयः, बहुव्रीहौ तु धातोरन्यपदार्थत्वं नैव सम्भवति, अन्तशब्दो हि नियतदेशमेव समीपमाचष्टे परं नाम, न समीपमात्रम् । न च धातोः परसमीपावस्थिते हलि ततः परः सन्सम्भवति; इकि त्वन्यपदार्थे-यस्येकः परसमीपे हल् न तस्यानन्तरः स्य सम्भवतीत्येकेन हला व्यवधाने विज्ञायेतेति धिप्सतीत्यत्र न स्याद् । हलिति जातिग्रहणात् सिद्धावपि प्रतिपत्तिगौरवप्रसङ्गः । ननु च मा भूदन्तग्रहणम्, 'हलः' इत्येवास्तु, इका हल्विशेष्यते, तेन च धातुः-इकः परो यो हल् तदन्ताद्धातोरिति । न चैवमत्र शङ्कनीयम्--"असत्यन्तग्रहणे इग्वतो हलन्तादिति विज्ञायेत, ततश्च यजेः सन् 'सन्यतः' यियक्षते इत्यत्रापि कित्त्वे सति संप्रसारणं प्राप्नोति" इति; न हीक्छब्दस्य मुख्येऽर्थे सम्भवति तद्वति वृत्तिर्युक्ता, किं च 'इग्वतः' इत्यस्य व्यावर्त्यमपि न सम्भवति । यायज्यतेः सनि यायजिषत इत्यत्र सन्न झलादिः । तस्मादन्तग्रहणं चिन्त्यप्रयोजनम् ।

इह धीप्सतीति य इक्समीपे हल् नकारो न ततः परः सन्, यतश्च परः सन् भकारात् न स इक्समीप इति कित्त्वं न स्यादित्यत आह-दम्भेरिति । दम्भेरपि परस्य सनः कित्त्वं सिद्धम्, कुतः ? हल्ग्रहणस्य जातिवाचकत्वात् । 'तत्प्रयोजकः' इतिवत्समासः । जातिवाची हल्शब्दः, एकैव च जातिर्नकारभकारयोः । व्यक्तिद्वारकं च जातेरिक्समीपत्वं तदपेक्षयात्र सनः परत्वम् । भकारव्यक्तिरिक्समीपे वर्तत इति जातिरपि वर्तते, भकारव्यक्तेः परः सन्निति जातेरपि परः । विपर्ययस्तु सन्नपि शास्त्रेणानाश्रितत्वादकिञ्चित्करः । नकारव्यक्तिरिक्समीपे न वर्तत इति जातिरपि न वर्तते । नकारव्यक्तेः परः सन्न भवतीति जातेरपि परो न भवतीति । धीप्सतीति । 'दम्भ इच्च' कित्त्वादुपधालोपः 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति भष्भावः, द्विर्वचनम्, 'अत्र लोपोऽभ्यासस्य' ।।

लिङ्सिचावात्मनेपदेषु ।। 1.2.11 ।।

आत्मनेपदेषु परत इति । एतत्सिच एव विशेषणम्, न लिङ्परस्मैपदस्य; झल्ग्रहणानुवृत्त्यैव व्यावर्तितत्वात् । भित्सीष्टेति । भिदिः स्वरितेत्, 'लिङः सीयुट्','सुट् तिथोः' । भुत्सीष्टेति । बुधिरनुदात्तेत्, पूर्ववद् भष् । अबुद्धेति । च्लेः सिच्', झलो झलि', 'झषस्तथोर्धोऽधः','झलां जश् झशि' इति धकारस्य दकारः । यक्षीष्टेति । स्वरितेत्त्वादात्मनेपदम्, व्रश्चादिषत्वम्, 'षढोः कः सि' ।

अद्राक्षीदिति । अमागमे यणि च कृते 'वदव्रज' इत्यकारस्य वृद्धिः ।।

उश्च ।। 1.2.12 ।।

लिङ्सिज्भ्यामाक्षिप्तस्य धातोरुरित्यनेन तदन्तविधिरित्याह- ॠवर्णान्तादिति । 'ॠ गतौ' इत्यस्य तु ग्रहणं न भवति; 'सर्त्तिशास्त्यर्त्तिश्च' इत्यङो विधानेन सिचोऽसम्भवात् । नन्वङ्विधौ कर्तरीत्यनुवृत्तेः कर्मणि सिजपि सम्भवति, एवं तर्हि शैलीयमाचार्यस्य यत्रास्य धातोर्ग्रहणमिच्छति तत्र श्तिपा निर्देशं करोति-'अर्त्तिपिपर्त्त्योश्च','सर्तिशास्त्यर्तिभ्यश्च' इति स्वरूपेणापि ग्रहणं दृष्टम् । एवं तर्हि व्याप्तिन्यायाद्वर्णग्रहणम् । अकृतेति । 'ह्रस्वादङ्गात्' इति सिचो लोपः । अवरिष्टेति । 'लिङ्सिचोरात्मनेपदेषु' इतीट् । 'वा गमः' । संगंसीष्टेति । 'समो गम्यर्च्छि' इत्यात्मनेपदम् ।।

हनः सिच् ।। 1.2.14 ।।

सौत्रत्वान्निर्देशस्याल्लोपो न कृतः । आहसतेति ।'आङो यमहन' इत्यात्मनेपदम्, 'आत्मनेपदेष्वनतः' इत्यदादेशः । सिज्ग्रहणं लिङ्निवृत्त्यर्थमिति । प्रकृतं सिज्ग्रहणं लिङ्संबद्धमिति तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यादिति भावः ।

ननु च 'हनो वध लिङि' इति लिङि वधादेशो नित्यः, धानिषीष्टेति चिण्वदिटि वधादेशाभावेऽप्यझलादित्वादप्रसङ्गस्तत् किं लिङ्निवृत्त्येत्यत्राह-उक्षरत्रेति । उत्तरार्थमवश्यं सिज्ग्रहणं कर्त्तव्यम्, तदिहैव क्रियते, न्यायानुसरणे प्रतिपत्तिगौरवं मा भूदित्येवमार्थमित्यर्थः ।

आत्मनेपदग्रहणमित्यादि । यमः परस्मैपदेषु 'यमरमनमाताम्' इति सगिटौ भवत इति झलादिः सिज्न भवति । उपयमने तु नित्यमात्मनेपदम्, स्थाध्वोः परस्मैपदेषु सिचो लुग् भवति,'वा गमः' इत्यत्रापि परस्मैपदेष्वङ् भवति, लिङि यासुट्निवृत्त्यर्थमेव च झल्ग्रहणमनुवर्त्त्यम्, एवमस्मिन्नप्यधानिषातामिति चिण्वदिटि मा भूदिति, तदेवम् 'वा गमः' इत्यारभ्यात्मनेपदग्रहणं चिन्त्यप्रयोजनम् । किमर्थं पुनरिदम्, यावता आत्मनेपदं ङिति सिजन्तस्याङ्गस्य 'अनिदिताम्' इत्येव नलोपः सिद्धः, उच्चारणार्थो हि सिच इकारः, नानुबन्धः ? ज्ञापनार्थम् । एतज् ज्ञापयति-'न सिजन्तस्योपधालोपो भवति' इति । तेनामास्तेति सिद्धं भवति । ननु च सिचि 'अनुदात्तोपदेश' इति लोपो यथा स्याद्, आत्मनेपदे उपधालोपो मा भूदित्येवमर्थमिदं स्यात्, कः पुनरत्र विशेषः- सिचि वा लोपो भवतु, आत्मनेपदे वा ? अयमस्ति विशेषः-आत्मनेपदे लोपे सति 'अतो लोपः' प्राप्नोति, सिचि तु न; आभीयस्यानुनासिकलोबस्यासिद्धत्वात् । यद्यपि उपधालोपोऽप्याभीयस्तथापि व्याश्रयत्वादसिद्धत्वं न प्राप्नोति-आत्मनेपदे उपधालोपः, सिच्यतो लोपः । यद्येवम्, बहिरङ्ग उपधालोपः, बहिर्भूतात्मनेपदापेक्षत्वाद्; अन्तरङ्गोऽल्लोपः, अन्तर्भूतसिजपेक्षत्वात् 'असिद्धं बहिरङ्गमन्तरङ्गे' ।

ननु चैषा परिभाषाप्याभाच्छास्त्रीया 'वाह ऊठ्' इत्यत्र ज्ञापितेति तस्यामन्तरङ्गबहिरङ्गयोरसिद्धत्वाद् यथा पपुष इत्यादावल्लोपादिषु वसोः संप्रसारणस्यासिद्धत्वं न भवति, तथात्रापि न स्यात्, ततश्चातो लोपः स्यादिति सिच्येवानुनासिकलोप एषितव्य इति वक्तव्यमेव सिचः कित्त्वमिति ज्ञापकानुपपत्तेः, अमंस्तेत्यादावुपधालोपः स्यात् । तस्मात् सिच इकारोऽनुबन्ध एव, नौच्चारणार्थः । तेन 'अदिताम्' इति प्रतिषेधादुपधालोपाभावः । 'इदितो नुम्' इत्यत्र धातुग्रहणं सिजन्तनिवृत्त्यर्थमेव क्रियते, न धातूपदेशावस्थायामेव नुम् यथा स्यादित्येवमर्थम् । कुण्डेत्यादिसिद्धये च यत्नान्तरमास्थेयमिति केचित्; नेति वयम् । उपधालोपेऽपि नातो लोपेन भवितव्यम् । किं कारणम् ? 'उपदेश' इति वर्तते उपदेशे योऽकारान्तस्तस्य लोपः, इहापि तर्हि न प्राप्नोति--'धिन्विकृण्व्योर च' धिनुतः, कृणुतः, नोपदेशग्रहणेन प्रकृतिरभिसम्बध्यते--उपदेशे या प्रकृतिरकारान्तेति, किं तर्हि ? आर्धधातुकमभिसम्बध्यते--आर्द्धधातुकोपदेशे यदकारान्तं तस्येति । तदेवमुपधालोपेऽपि न कश्चिद्दोष इति ज्ञापकार्यमेव वचनमिति सर्वमनाकुलम्।।यमो गन्धने ।। 1.2.15 ।।

ननु यमिरुपरमे पठ्यते, कथं गन्धने वर्तत इत्यत आह--अनेकार्थत्वादिति । उदायतेति । परावद्यं स्वयं प्रकाशितवानित्यर्थः । उदायंस्त पादमिति । अपकृष्टवानित्यर्थः ।।

स्थाध्वोरिच्च ।। 1.2.17 ।।

चकारेण कित्त्वं समुच्चीयत इत्याह--सिच्च किदिति । प्रयोजनं गुणो मा भूदिति । इत्त्वं तु गुणविधानार्थमेव स्यात्; लघुत्वात् । उपास्थितेति । 'उपान्मन्त्रकरणे' 'अकर्मकाच्च' इत्यात्मनेपदम्, 'ह्रस्वादङ्गात्' इति सिचो लोपः । न चेत्त्वं सिजीत्युच्यते, किं तर्हि ? इकारश्चान्तादेशस्सिच्च किद्भवतीत्येतावत् । तेनेत्त्वस्यासिज्निमित्तत्वाद् भवत्येव लोपः ।

इच्चेत्यादि । तकार इद्यस्य तस्य भावः तकोरेत्त्वम्, इच्चेत्यत्र निर्देशे कस्य, कार्यस्य सिद्धये इकारस्य तकारेत्त्वं क्रियत इत्यर्थः । दीर्घो मा भूदिति । आन्तर्यतः प्राप्नोतीति भावः । ॠतेऽपि स इति । इकारविधानेनापि विनेत्यर्थः । कित्त्वे हि घुमास्थादिसूत्रेणैव दीर्घस्सिद्धः, तस्मादित्त्वविधानसामर्थ्याद् अनन्तरतमोऽपि ह्रस्व एव भविष्यतीत्यर्थः । भाव्यमानोऽण्सवर्णान्न गृह्णाति इत्ययमप्यत्र परिहारः संभवति । अनन्तर इति । असदृश आदेशे क्रियमाणे ह्रस्व इव प्लुतोऽपि स्यात्,स मा भूदित्यर्थः । प्लुतश्चेति । अनेन तपरत्वं प्रत्याख्यायते । यद्यनेन प्लुतो विधीयेत, तदा यत्र विषये 'अनन्त्यस्यापि प्रश्नाख्यानयोः' इत्यादिना प्लुतो विहितस्तत्राप्यनेनैव स्याद्, अस्मिन्कर्त्तव्ये तस्यासिद्धत्वादिति पक्षेऽनुवाददोषः प्राप्नोति,ततो ह्रस्व एव भविष्यति । अन्ये तु तपरत्वमनेन समर्थितं मन्यन्तेअसति तकार आन्तरयंतो दीर्घस्य दीर्घः प्राप्नोति । ननु चोक्तम्-'सिद्धोऽत्र दीर्घः' इति ? सिद्धे सत्यारम्भो नियमार्थः स्याद्-दीर्घ एव यथा स्यात् प्लुतो मा भूदिति तदिदमुक्तम्--अन्तर इत्यादिना । घुमास्थादिसूत्रेणानेन वा दीर्घे सति यद्यपि विशेषो नास्ति, तथाप्यनन्तरेऽविद्यमानेऽपि विशेषे प्लुतो मा भूदिति दीर्घः स्यादित्यर्थः । मा भूद् इति चेत् तत्राह-प्लुतश्चेति । स चासति तपरत्वे न प्राप्नोति, सति तु तस्मिन् दीर्घस्याप्रसङ्गाद्विधिरेव संपद्यत इति स्वविषये प्लुतो न व्यावर्त्यते । तदेवमन्यत्र भिन्नकालनिवृत्त्यर्थं तपरकरणम्, इह तु दीर्घनिवृत्त्यर्थं प्लुतप्रवृत्त्यर्थं च वस्तुबलात्समपादि ।।

न क्त्वा सेट् ।। 1.2.18 ।।

न किद्भवतीति । कित्कार्यं न करोतीत्यर्थः । न पुनः ककारस्येत्संज्ञाभावात् किन्न भवतीति । प्रकृतो हि किच्छब्दः कित्कार्यकारिणि वर्तत इति तदर्थस्यैव निषेधो युक्तः-देवित्वेत्यादौ गुणप्रतिषेधाख्यं कित्कार्यं न भवतीति ।

निगृहीतिरिति । अत्र 'तितुत्र' इतीट्प्रतिषेधो न भवति, तितुत्रेष्वग्रहदीनामिति वचनात् । निकुचितिरिति । 'कुञ्च कौटिल्याल्पीभावयोः' । एषूदाहरणेषु संप्रसारणम्, गुणप्रतिषेधः, उपधालोपश्च कित्त्वाद्भवन्ति ।

न सेडित्यादि । पूर्वार्द्धमेको ग्रन्थः, उत्तरार्द्धाच्च नेत्यपकृष्यते । न सेडित्येतावतापि योगेनाकित्त्वे कृते गुधितो गुधितवानित्यत्र निष्ठायामवधारणान्नियमान्न भविष्यति । 'निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः' इति नियमः-शीङादिभ्य एव परा निष्ठा न किदिति । विपरीतस्तु नियमः-निष्ठैवेति व्याख्यानान्न भवति ।

लिटि तर्हि प्रतिषेधः स्यात्, ततश्च जग्मिव, जग्मिम 'गमहन' इत्युपधालोपो न स्याद्, अत आह-ज्ञापकादिति । पूर्वाचार्यप्रसिद्ध्या परोक्षे लिड्ुच्यते, यथा-भवन्ती लट्, श्वस्तनी लुट् । किं ज्ञापकमित्यत आह-सनीति । 'इको झल्' इत्यत्र झल्ग्रहणस्यैतत्प्रयोजनम्--शिशयिषत इत्यत्र मा भूदिति । यदि च न सेडिति प्रतिषेध आतिदेशिकस्यापि कित्त्वास्य स्याद् झल्ग्रहणमनर्थकं स्यात् । प्राप्नोत्वत्र कित्त्वम्, 'न सेट्' इति प्रतिषेधो भविष्यति । तदेतद् झल्ग्रहणमौपदेशिकस्य कित्त्वस्यायं प्रतिषेधो नातिदेशिकस्येत्यस्यार्थस्य ज्ञापकं विदुः ।
ननु चोत्तरार्थं झल्ग्रहणम्, स्थाघ्वोरित्त्वं झलादौ यथा स्यात् चिण्वदिटि मा भूदिति-उपास्थायिषाताम्, अत्र हि उपास्थास् आतामिति स्थिते, इत्त्वं च प्राप्नोति चिण्वद्भावश्च, परत्वाच्चिण्वद्भावे युक्च प्राप्नोति वृद्धिश्च, कअपवादत्वाद्युकि कृते यकारस्येत्त्वप्रसङ्गः; न च पुनर्वृद्धिर्लभ्यते, पूर्वमेव युका बाधित्वात्, तस्मादुत्तरार्थं झल्ग्रहणम् ? नैतदस्ति; यस्मादित्त्वं कित्त्वसंयोगेनोच्यते, न चात्र कित्त्वमस्ति; न सेडिति प्रतिषेधात् । न ह्यत्रास्यां दशायां झल्ग्रहणस्य ज्ञापकत्वं स्थितमित्यातिदेशिकस्यापि कित्त्वस्यायं प्रतिषेधो भवति । रेण तुल्यं सुधीवनीति । शोभना धीवानोऽस्याः सुधीवा स्त्री 'अनो बहुव्रीहेः' इति प्रकृतस्य ङीपो निषेधे सति 'संनियोगशिष्टानामन्यतराभावे उभयोरप्यभावः' इति यथा रेफो न भवति तद्वदिहापीत्यर्थः । वस्वर्थमिति । अर्थशब्दो निवृत्तौ । जग्मिवानित्यत्र क्वसौः कित्त्वप्रतिषेधो मा भूदित्येवमर्थं तर्हि क्त्वाग्रहणमित्यर्थः । दूषयति-किंदतीदेशादिति । सिद्धमिति शेषः । अस्त्वत्रौपदेशिकस्य कित्त्वस्य प्रतिषेधः, आतिदेशिकं कित्त्वं भविष्यति । यत्रतर्हि तत्प्रतिषिध्यते संयोगान्तष्वञ्जेः, आजिवान्-अत्र हि नलोपे कृते द्विर्वचन एकदेशे च 'वस्वेकाजाद्घसाम्' इतीडागमः, तत्र कृते कित्वप्रतिषेधाद् नलोपनिवृत्तौ द्विहल्तात् नुटि सत्येकाच्त्वाभावादिण्निवृत्तौ कित्त्वनलोपादीनां चक्रकप्रसङ्गः । एवं तर्हि छान्दसः क्वसुः, लिट् छन्दसि सार्वधातुकमपि भवति 'सार्वधातुकमपिद्' इति ङित्त्वं ङितीत्युपधालोपः । न च संयोगान्तेषु कित्त्वङित्त्वयोः कश्चिद्विशेषः, तस्माद्वस्वर्थमपि क्त्वाग्रहणं न भवति । एवं तर्हि-निगृहीतिः प्रयोजनम् । क्तिन्क्तिज्निवृत्त्यर्थं क्त्वाग्रहणमित्यर्थः ।
यदि पुनरुपरिष्टाद्योगविभागः क्रियते-न सेण्निष्टा शीङ्स्विदिमिदि क्ष्विदिधृषः, मृषस्तितिक्षायाम्, उदुपधाद्भावादिकर्मणोरन्यतरस्याम्; ततः पूङश्च-पूङश्च परा निष्ठा सेण् न किद्भवति; ततः क्त्वा च, क्त्वा च सेट् किन्न भवति । अत्र 'पूङः' इति निवृत्तमिति, ततः क्त्वाग्रहणं शक्यमकर्तुम् ।।
निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः ।। 1.2.19 ।।
' ञिष्विदा स्नेहनमोचनयोः' इत्यस्य भौवादिकस्य ञिद्धातोर्ग्रहणम्, न तु 'ष्विदा गात्रप्रक्षरणे' इति दैवादिकस्य; ञिद्भिः साहचर्यात्, अस्य चाञित्वात् । 'ञिक्ष्विदा स्नेहनमोचनयोः' इति दैवादिकस्य ग्रहणम्, न तु 'ञिक्ष्विदा अव्यक्ते शब्दे' इत्यस्य भौवादिकस्य; मिदिना साहचर्यात्,'ञिधृषा प्रागल्भ्ये' । शयितवानिति । 'अत्वसन्तस्य' इति दीर्घः । प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणं भवति, स एव धातुर्द्विरुच्यत इति कृत्वा तत्रापवादः स्मर्यते ।
श्तिपा शपाऽनुबन्धेन निर्दिष्टं यद्गणेन च ।
यत्रैकाज्ग्रहणं किञ्चित्पञ्चैतानि न यङ्लुकि ।। इति ।
तदहि शीङोऽनबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थः, शेश्यितः, शेश्यितवान्-- 'एरनेकाचः' इति यण् ।।
मृषस्तितिक्षायाम् ।। 1.2.20 ।।
इदमेव तितिक्षाग्रहणं ज्ञापकम्-अनेकार्था धातव इति; अन्यथा मृषिस्तितिक्षायामेव पठ्येत इति तदपार्थकं स्यात् । अपमृषितमिति । अविस्पष्टमित्यर्थः ।।
उदुपधाद्भावादिकर्मणोरन्यतरस्याम् ।। 1.2.21 ।।
द्युतितमिति । 'द्युत दीप्तौ' नपुंसके भावे क्तः । प्रद्युतित इति । 'आदिकर्मणि क्तः कर्त्तरि च' इति कर्त्तरि क्तः । मुदितमिति । 'मुदी हर्षे ' । लिखितमिति । शब्विकरणानामेवेति न तावत् स्थितमित्यशब्विकरणोऽपि लिखिः प्रत्युदाहृतः । एवं प्रभुक्त इतिं । स्थिते तस्मिन् खिटिकिटी भौवादी, क्रुशिश्च; खिटितं क्रुष्टमिति प्रक्युदाहर्तव्यम् ।।
पूङः क्त्वा च ।। 1.2.22 ।।
इहान्यतरस्यांग्रहणानुवृत्तौ सेडित्यस्य च निवृत्तौ इड्विधौ 'पूङश्च' इति शक्यमकर्त्तुम्, उत्तरसूत्रे च वाग्रहणम्; कथम् ? अनिटोरेव क्त्वानिष्ठयोरनेन कित्त्वं विकल्प्यते,तत्र यदा कित्त्वं तदा 'श्यकः किति' इति प्रतिषेधात् पूतः पूतवान् पूत्वेति, अकित्त्वपक्षे त्विटि पवितः पवितवान् पवित्वेति भवति, सेड्ग्रहणं तु विच्छिद्येत; तस्मात्सेडित्यस्मिन्नुत्तार्थमनुवर्तमाने 'पूङश्च' इत्यारभ्य उत्तरत्र वाग्रहणमिह नित्यतासिद्ध्यर्थम्, पुवित्वेति पक्षे मा भूत्तदाह-अन्यतरस्यांग्रहणं न स्वर्यते; उत्तरसूत्रे पुनर्वावचनादिति । न सेडिति वर्त्तत इति । ननु पूङः परयोः क्त्वानिष्ठयोरिटो न भवितव्यम्, 'श्युकः किति' इति प्रतिषेधादत आह-पूङश्चेति । पूङ परो निष्ठाप्रत्यय इत्यादि ।
किं पुनः कारणं साक्षात् श्रुतं क्त्वाप्रत्ययमपहारयानुवृत्तस्य निष्ठाप्रत्ययस्यान्वयो दर्शियत उदाहरणं च ? अत आह-क्त्वाप्रत्ययस्येति । एतदेव द्रढयति-तथा चोक्तमिति । इडाद्योः क्त्वानिष्ठयोर्नित्यमकित्त्वमिष्यते, ततश्च क्त्वाग्रणमुत्तरार्थमिति भारद्वाजीयैरेवमुक्तम् । उत्तरार्थमपि यदिहैव कर्त्तव्यं सेडित्येनेन सम्बन्धार्थम्; अन्यथा निष्ठानिवृत्तौ तत्सम्बद्धं सेडित्येतदपि निवर्त्तेत ! अनुबन्धोच्चारणं विस्पष्टार्थं न पूञो निवृत्त्यर्थम्; इड्विधौ पूङ एव ग्रहणात् । पूञः क्त्वानिष्ठयोः इडभावान्नापि यङ्लुकि निवृत्त्यर्थम्; इड्विधावनुबन्धनिर्देशेन यङ्लुक्यपि 'न क्त्वा सेट्' इति प्रतिषेधस्य स्थितत्वात् । न च क्त्वाग्रहणसाार्थ्यात्तस्यापि प्रतिषेधः; तस्योत्तरत्राप्युपयोगसम्भवात्, अनुबन्धनिर्देशस्य च निष्ठायां चरितार्थत्वात् । एवं च 'क्त्वाग्रहणमुत्तरार्थम्' इति वृत्तिग्रन्थस्याविरोधः, तेन पोपुवितवानिति निष्ठायां भवति । क्त्वायां तु गुणो पोपवित्वेति भवति ।।
नोपधात्थफान्ताद्वा ।। 1.2.23 ।।
निष्ठेति निवृत्तमिति । पूर्वसूत्रे चानुकृष्टत्वात् । गुफित्वेति । 'गुफ गुम्फ ग्रन्थने' ।

रेफित्वेति । 'रिफ कत्थनयुद्धनिन्दाहिंसादानेषु' । अथैतद्विकल्पाभावेऽपि 'रलो व्युपधाद्' इति विकल्पोऽत्र कस्मान्न भवति ? नोपधग्रहणसामर्थ्यात् । ननु ऋकारोपधो नोपधग्रहणस्य व्यावर्त्यः सम्भवति 'ऋफ हिंसायाम्'- अर्फित्वेति, नैतदस्ति; त्रैशब्द्यं ह्यनयोर्धात्वोर्भवति । सति तावत्, अनोपधस्य 'न क्त्वा सेट्' इति निषेधे सति अर्फित्वेति भवति, नोपधस्य त्वस्मिन्विकल्पे-ऋफित्वेति । असत्यपि नोपधग्रहणे सर्वत्रास्मिन्विकल्पे प्रवृत्तेऽपीदमेव रूपत्रयं भवति । अन्तग्रहणं ज्ञापनार्थम्-यत्नमन्तरेणास्मिन्प्रकरणे न तदन्तविधिर्भवतीति, तेनोत्तरसूत्रे 'ऋतः' इति धातुर्गृह्यते, न ऋदन्तः ।।

वञ्चिलुञ्च्यृतश्च ।। 1.2.24 ।।

'वञ्चु गतौ' भौवादिः, 'वञ्चु प्रलम्भने' चुरादिः,सोऽपि गृह्यते, 'अनित्यण्यन्ताश्चुरादयः' इति । 'लुञ्च अपनयने', ऋतिः सौत्रो धातुः 'ऋतेरीयङ्'इति, स च घृणायां वर्त्तते ।।

तृषिमृषिकृशेः काश्यपस्य ।। 1.2.25 ।।

'ञितृषा पिपासायाम्','मृष तितिक्षायाम्', 'कृशतनूकरणे' । काश्यपग्रहणं पूजार्थमिति । 'काश्यपस्यैतद्विषयं विज्ञानं नान्येषाम्' इत्यसाधारणज्ञानोद्भावनमाचार्यस्य पूजाद्वारेण शास्त्रस्यापि पारम्पर्यप्रतिपादनेन प्रामाण्यप्रितपादनात् पूजा भवति ।।

रलो व्युपधाद्धलादेः संश्च ।। 1.2.26 ।।

क्त्वाप्रत्ययस्य 'न क्त्वा सेट्' इति कित्त्वे प्रतिषिद्धे सनोऽप्यकित्त्वे स्वतः सिद्ध उभयत्र विधिमुखेनेदं प्रवर्त्तत इत्याह-वा कितौ भवत इति । दिद्योतिषते इति । 'द्युतिस्वाप्योः संप्रसारणम्' । एषिषिषतीति । इटि कृते--'अजादेर्द्वितीयस्य' ।।

ऊकालोज्झ्रस्वदीर्घप्लुतः ।। 1.2.27 ।।

ऊः कालो यस्य स ऊकालः 'तपरस्तत्कालस्य' इतिवन्निर्देशः समर्थनीयः । एतच्च संज्ञिनो विशेषणम्, च 'ऊ' इत्येकस्यैव शब्दस्योच्चारणाद्विशेषणस्यैकत्वात् संज्ञाप्येकैवेति यश्चोदयेत् तं प्रत्याह--ऊ इति त्रयाणामित्यादि । प्रश्लेषणम् = प्रश्लिष्टम्, तेन निर्देशः = प्रश्लिष्टनिर्देशः । तेन विशेषणत्रयपरिच्छिन्नास्त्रयः संज्ञिन इत्यर्थः । प्रश्लेषणे प्रमाणमाह-ह्रस्वेति । ह्रस्वदीर्घप्लुत इति न तावदेका संज्ञा; गौरवादनावृत्तेश्च । अतस्तिसृणां संज्ञानां द्वन्द्वोऽयम् । न चैकस्यानेकसंज्ञाकरणे प्रयोजनमस्ति । लुगादिसंज्ञास्वपि तद्भावितत्वेन प्रत्ययादर्शनस्य भेद आशितः, प्रकारान्तरासम्भवाद् । इह तु निर्देश एव त्रयाणां सम्भवति । तस्मात्संज्ञानां त्रित्वात् संज्ञिनामपि त्रित्वमनुमीयत इति भावः । 'बहुवचननिरासार्थमेकवद्भावः' इत्युक्तम्, समाहारद्वन्द्व इत्यर्थः । 'स नपुंसकम्' कइत्येतत्तु न भवतीत्याह-पुंल्लिङ्गमनिर्देश इति । सौत्र इति भावः । प्रश्लेषे क्रममाह- उ ऊ ऊ3 इत्येकं काल इति । उकारादीनां परिच्छेदको यः कालो निमेषादिः, तत्काल इत्यर्थः । कुतः पुनरवसितमेष एव क्रम इति ? आदौ मध्ये वा त्रिमात्रे प्लुताश्रयः प्रकृतिभावः प्राप्नोति, तथा मध्येऽन्ते वा मात्रिके 'द्वन्द्वे घि' इत्येतद्वाध्येतेति चेति, न; अनेन हि प्लुतसंज्ञा, ततश्चादौ मध्ये वा पठितस्य त्रिमात्रस्य प्लुतसंज्ञैव न, कुतः प्रकृतिभावः ! यदि च मात्रिको मध्येऽन्ते वा स्यात्, ह्रस्वसंज्ञैव न स्यात् कुतो घिसंज्ञा ! कुतस्तरां पूर्वनिपातः ! एवं तर्हि ज्ञापकात्सिद्धम्, यदयम् 'विभाषा पृष्टप्रतिवचने हेः' इति हेः प्लुतं शास्ति, तज् ज्ञापयति-नान्ते मात्रिक इति । कथं योऽन्ते स प्लुतः ? प्लुतस्य प्लुतवचनमनर्थकम् । अनन्तरतमप्लुतार्थमेतत्स्यादिति चेत्, न हि सत्यां गतौ परिभाषा बाध्या । यच्च 'सुपि च' इति दीर्घत्वं शास्ति, तज् ज्ञापयति-न मध्ये मात्रिक इति । कथं यो मध्ये स दीर्घः ? दीर्घस्य दीर्घवचनमनर्थकम् । यच्च 'ओमभ्यादाने' इत्योमः प्लुतं शास्ति, तज् ज्ञापयति--द्विमात्रिको नान्त्य इति । कथं योऽन्ते स प्लुतः ? प्लुतस्य प्लुतवचनमनर्थकम् ।

दधि,मध्विति । रूपोदाहरणे । कुमारीत्यादि कार्योदाहरणम् 'हल्ङ्याब्भ्यः' इति दीर्घाश्रयः सुलोपो भवति । देवदत्त3 अत्र न्वसीति । 'अनन्त्यस्यापि प्रश्नाख्यानयोः' इति प्लुतः । देवदत्त त्वमत्र भवसीति प्रश्नः । नुशब्द प्रश्नं द्योतयति । देवदत्तशब्दात्परस्य सोः 'ससजुषो रुः' इति रुत्वम्, 'अतो रोरप्लुतात्' इत्युत्वे प्रतिषिद्धे 'भोभगोअघोअपूर्वस्य योऽशि' इति यत्वम्, 'लोपः शाकल्यस्य' । उकारोऽयमण्, तेन द्विमात्रयोरपि ग्रहणाद् ह्रस्वसंज्ञा प्राप्नोति । न च दीर्घप्लुतसंज्ञाभ्यां बाधः; एकसंज्ञाधिकारादन्यत्र संज्ञानां समावेशाभ्युपगमाद्, अत आह-कालग्रहणमिति । कालग्रहणं तावदुकारादिभिः प्रत्येकमभिसम्बध्यते, ऊकाल इत्यस्मिन्वाक्ये सत्यपि सवर्णग्रहणे कालशब्दस्य न पुनः प्रत्येकपरिसमाप्तिर्युज्यते, कुतः ? एकस्यैव श्रुतत्वात् । द्विमात्रत्रिमात्रौ हि संज्ञित्वेन प्रतीयेते, न तु साक्षादुच्चरितौ । एवं चैकत्वाद्बहुव्रीहेरेक एव संज्ञी, तत्रैकस्य विरुद्धकालद्वयासम्भवेन सवर्णग्रहणाभावाच्छ्रुत एवोकारः कालविशेषणमिति कालग्रहणं संज्ञिनः परिमाणार्थम् ।

यद्वा-ऊ अजित्येव कालार्थो लभ्यते, कथम् ? उकारादयोऽच्त्वं न व्यभिचरन्तीति नाच्त्वेन ते विशेष्यन्ते, अपि तु तैरच् । न चाज्मात्रस्योकारादित्वमुपपद्यत इति सामानाधिकरण्यान्यथानुपपत्त्या तत्सदृशस्याचः प्रतिपत्तिः । तत्र च स्थानसाम्यमसम्भवान्न गृह्यते, प्रयत्नसाम्यं चाव्यभिचारीति कालसाम्यमेव ग्रहीष्यते, नार्थः कालग्रहणेन । तत्क्रियते श्रूयमाणेनैव कालं विशेषयितुमिति कालग्रहणं परिमाणार्थम् ।

आलुयेति । ह्रस्वाश्रयस्तुङ् न भवति । तितउच्छ्त्रमिति । असत्यज्ग्रहणे चद्वयसमुदायस्य प्रत्येकवर्णकालसंकलनया द्विमात्रत्वाद्दीर्घसंज्ञा स्याद् । यस्तु मध्येऽर्द्धमात्राकालः सवर्णकालो न भवतीति समुदायस्य द्विमात्रत्वं न व्याहन्तीति स्यादेव प्रसङ्गे । अज्ग्रहणे तु न भवति; अच्समुदायस्यानच्त्वात् । यद्यपि वर्णग्रहणे जातिग्रहणम्, सा तु जातिरेकैकव्यक्तिव्यङ्ग्या न समुदायव्यङ्ग्या, तेन दीर्घसंज्ञायामभावात् 'दीर्घात्''पदान्ताद्वा' इति तुग्विकल्पो न भवति । न च सत्यपि विकल्पे तेन मुक्ते ह्रस्वाश्रयस्तुग् लभ्यते; समुदाये कार्यमारभ्यमाणेऽवयवानां स्वकार्यं प्रत्यव्यापारात् ।।

अचश्च ।। 1.2.28 ।।

'इको गुणवृद्धी' इत्यनेन समानमिदम् । स्वसंज्ञया विधाने नियमार्थमित्यत्र युक्तिमाह-अजिति वर्त्तत इति । ततश्च ह्रस्वादिशब्दा इहानुवृत्ता

नाचमुपस्थापर्यान्त, तस्य स्वयमुपस्थानादिति स्वरूपपदार्थका आश्रीयन्ते । तेन ह्रस्व इत्येवं योऽज्विधीयते सोऽचः स्थाने भवतीत्ययमर्थः सम्पद्यते । एवं दीर्घप्लुतयोः ।

द्यौरित्यादि । 'दिव औत्' 'पथिमथ्यृभुक्षामात्','त्यदादीनामः','दिव उत्' इति औकारादयो न संज्ञया विधीयन्ते इति हल एव स्थाने भवन्ति ।।

उच्चैरुदात्तः ।। 1.2.29 ।।

उदात्तादिशब्दा इत्यादि । सत्यं प्रसिद्धा एव ते, कुत्र प्रसिद्धाः ? धर्ममात्रे स्वरे, न तु तद्वत्यचि । ततस्च 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरिताख्यस्य धर्मस्यैव विधिः स्यात्, न च धर्मधर्मिणोः स्थान्यादेशभावः संभवतीति 'षष्ठी स्थानेयोगा' इत्यस्यानुपस्थानात् तदङ्गभूतम् 'तस्मादित्युत्तरस्य' इत्येतदपि न प्रवर्तेतेति पूर्वस्याप्यचः स्वरितप्रसङ्गः । स्यादेतत्-यथा 'कृपो रो लः' इत्यत्र ऋकारस्य रेफस्य लृकारस्थे लकारेऽपि विहिते कृत्स्नस्य वर्णस्य कृत्स्न एव वर्णो भवति, तद्वदिहापि धर्मिणोरेव स्थान्यादेशभावो भविष्यतीति युक्तं तत्र रेफलकारावृकारलृकारयोरात्मभूतौ न तावन्तरेण तावुच्चारयितुं शक्यौ, इह तूदात्तादिकमन्तरेणाप्यच उच्चारणं शक्यम्, दृष्टं च भाषायामिति धर्ममात्रमेवादेशः स्यात् । नन्वेवं स्थिते स्थान्यपि धर्म एवेति युक्त एव परिभाषाव्यापारः, सत्यम्; वर्णमात्रधर्मोऽयमुदात्तादिरिति व्यामोहनिवर्त्तनेनाचामेवायं धर्मो न हलामिति दर्शयितुमिदमारब्धम् । अत एव वर्णधर्मे इति सामान्येनोक्तम् । तद्गुणेऽचीति । स उदात्तादिर्गुणो यस्य । एतेन वस्तुतोऽज्धर्मत्वमुदात्तादेर्दर्शितम् । तथा हि, अन्तरेणापि हलमच एष धर्मा दृश्यते-आ ते पितर्मरुतां सुम्नमेरु, यथा आकारस्य, नान्तरेणयं व्यञ्जनस्योच्चारणमपि भवति, कुत एव स्वरः ! यदि च हलामप्येते गुणास्ततो हलामचां च पृथक् स्वरोऽप्युपलभ्येत । यतस्तु खल्वचामेव स्वरमनुविदधति हलस्ततो निश्चीयते-अजुपरागादेषु स्वरप्रतिभासो न स्वत इति । अजुपरगश्च पूर्वपरसंनिधानेऽपि परेणैव भवति, न पूर्वेण ।

परिभाष्यन्त इति । केचिदाहुः-प्रदेशे लोकप्रसिद्ध्या हलामचां च ग्रहणे प्राप्तेऽचामेव ग्रहणं नियम्यते इति परिभाषेयमिति ।

अन्ये तु -धर्मिण्यप्रसिद्धत्वात् संज्ञात्वेन परिभाष्यन्ते इति व्याचक्षते । उच्चै रित्यस्याधिकरणप्रधानत्वात् क्रियापेक्षत्वाच्चाधिकरणस्योपलभ्यमान इत्युक्तम् ।। श्रुतिप्रर्षो न गृह्यत इति । यदि गृह्यते उपांशुप्रयोगे न स्यादित्यव्याप्तिः, श्रुतिप्रकर्षस्य चानवस्थितत्वाद्यदेव कञ्चित्प्रत्युच्चैस्तदेव कञ्चित्प्रति नीचैरिति सर्वमुदात्तं स्यात्, सर्वं चानुदात्तमित्यमतिव्याप्तिव्यस्था च स्याद् इति भावः । स्थानकृतमित्यादि । उच्चता नाम प्रमाणविशेष ऊर्ध्वतापर्यातः, तत्र ताल्वादिबसंन्धो वर्णानामन्तरङ्ग इति स्थानसंबन्धिन्युच्चता गृह्यते, तत्कृतमुच्चैस्त्वं संज्ञिनो विशेषणम् । ननु पूर्वमुच्चैरुपलभ्यमान इति ताल्वादिस्थानवृत्तिरुच्चैः-शब्दो दर्शितः, इह तूच्चैःस्थाननिषपन्नत्वाद् अजेवोच्चैरित्युच्यते इति उक्तिविरोधः, न; पूर्वमक्षरार्थ उक्तः, इह तु वस्त्वर्थो व्याख्यातः । ननु चोच्चैः स्थान उपलभ्यमान इत्याश्रितेऽपि प्रांशुपुरुषोच्चारितोऽनुदात्तोप्युदात्त एव स्याद्, वामनपुरुषोच्चारित उदात्तोऽप्यमुदात्तः स्यात्; तत्रान्योऽन्यमुच्चतानीचतायोगाद्, अत आह-ताल्वादिषु हीति । ताल्वादीनि स्थानानि भागवन्ति, भागाश्चौत्तराधर्येण व्यवस्थिताः । तत्र यः समान इति । एकपर्यायोऽयं समान शब्दः । तेनायमर्थः-एकस्मिंस्ताल्वादिके स्थाने ऊर्ध्वाधरभगयुक्ते ऊर्ध्वभागेनोच्चार्यमाणोऽजदात्तसंज्ञो भवति । एवं चोच्चैरित्यस्योर्ध्वभाग इत्यर्थः । सर्वश्चायमर्थो लोकप्रसिद्धेरेव लभ्यते, सूत्रं तु व्यामोहनिवृत्त्यर्थम् । ऊर्ध्वभागनिष्पत्तेरप्रत्यक्षत्वात् तन्निश्चये लिङ्गमाह-यस्मिन्निति । आयाम इत्यस्य विवरणं निग्रहः । रूक्षतेत्यस्य विवरणम् अस्निग्धतेति । संवृततेति । अणुता । अत एव वायुः शनैर्निष्क्रामन् गलावयवान् शोषयतीति स्वरस्य रूक्षता भवति । ये ते के इति । यत्तत्किंभ्यो जसि त्यादद्यत्वम्, 'जसः शी', आद्गुणः,'एकादेश उदात्तेनोदात्तः ' ।।

नीचैरनुदात्तः ।। 1.2.30 ।।

अजिति वर्त्तते इति । तेन हल् स्रंसनधर्मेणानुदात्तसंज्ञो न भवति, अन्ववसर्ग इत्यस्य विवरणं मार्दवमिति, शैथिल्यमित्यर्थः । मृदुतेत्यस्य स्निग्धतेति । उरुतेत्यस्य महत्तेति । महत्त्वादेव च शीघ्रं वायोर्निष्क्रमणाद्गलावयवानामशोषणात्स्वरस्य स्निग्धता भवति । अनुच्चानीति । सर्वादावेवमेव पठात् । फिषि तु 'सिमस्याथर्वणे' इत्यन्त उदात्त इत्युक्तम् । अनाथर्वणेऽपि तुच्छन्दस्यन्तोदात्तत्वं दृश्यते, आद्वात्री वासस्तनुते सिमस्मै, उच्छुक्रमजते सिमस्मादिति, नमस्ते रुद्रेति, 'तेमयावेकवचनस्य' इत्यत्र 'अनुदात्तं सर्वम्' इत्यधिकारात्तेशब्दोऽनुदात्तः । रुद्रादयोऽप्यामन्त्रितनिघातेन । पदकाले चानुदात्तस्य श्रवणम् । संहितायां तु 'स्वरितात्संहितायाम्' इत्यैकश्रुत्यं भवति ।।

समाहारः स्वरितः ।। 1.2.31 ।।

सामर्थ्याच्चात्रेति । पारिभाषिकयोरुदात्तानुदात्तयोरचोः समाहारूपस्याचः क्वचिदप्यसम्भवः सामर्थ्यम् । ननु च समाहरणं समाहारः, विप्रकीर्णानामेकत्र राशीकरणमेकधर्मयोर्योगो वा, यथा-पञ्चपूली, षण्णगरी दृष्टेति । तत्र पूर्वो मूर्त्तानामेव, उत्तरस्तु धर्मयोरपि सम्भवति; किं तु अचा सामानाधिकरण्यं न घटते, न हि वर्णधर्मयोरुदात्तानुदात्तयोः समुदायरूपः कश्चिदज्भवतीत्यत आह -तौ समाह्रियेते अस्मिन्नचीति । नानेनाधिकरणसाधनत्वं समाहारशब्दस्य दर्शतम् । तत्र हि 'करणाधिकरणयोश्च' इति ल्युटा भवितव्यम् । वासरूपविधिश्च नास्ति; क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीति वचनात् । तस्मादर्थकथनमात्रमेतत् । सामानाधिकरण्यं त्वर्शआदित्वादच्प्रत्ययान्तत्वेन समर्थनीयम् । शिक्यम्, कन्येति । 'शिल्पशिक्यकाश्मर्यधान्यकन्यारा जन्यमनुष्याणामन्तः' इति फिट्सूत्रेणान्तःस्वरितत्वम् । सामान्य इति । सामसु साधुः 'तत्र साधुः' इति यत्, 'तित्स्वरितम्' । क्वेति । 'किमोऽत्','क्वाति' ।।

तस्यादित उदात्तमर्धह्रस्वम् ।। 1.2.32 ।।

आदौ = आदितः, सप्तम्यन्तात्तसिः । अर्द्धह्रस्वमिति । 'अर्द्धं नपुंसकम्' इति समासः । ह्रस्वशब्द उभयलिङ्गः-'ह्रस्वो नपुंसके', 'ह्रस्वंलघु' इति । तदिह परवल्लिङ्गत्वेन नपुंसकत्वम् । उक्तपरिमाणस्याचो ह्रस्वसंज्ञा कृतेति यत्रैव तस्यार्धमिति दीर्घप्लुतयोरेतद्विभागवचनं न स्यादित्याशङ्क्याह--अर्द्धह्रस्वमिति

। चेत्यादि । ह्रस्वस्य हि मात्रा भवति अतोऽर्द्धह्रस्वग्रहणेनार्द्धमात्रोपलक्ष्यते । इह प्रकृतत्वादेव स्वरितस्य विभागाख्यानसिद्धे तस्येति वचनं स्वरितमात्रपरिग्रहार्थम् । यदि चार्द्धह्रस्वग्रहणमर्द्धमात्रोपलक्षणं तत्र स्वरितमात्रपरिग्रहोऽर्थवान् भवति ।

ह्रस्वग्रहणमतन्त्रमिति । अप्रधानम् उपलक्षणत्वाद्, यथा--काकेभ्यो दधिरक्ष्यतामित्यत्र काकाः । नन्वेवमप्याष्टमिकस्वरितस्य विभागो न सिद्ध्यति,तस्यासिद्धत्वात्, नैष दोषः; इत आरभ्य नव सूत्राणि असिद्धकाण्डे 'उदात्तादनुदात्तस्य' इत्यस्मात्पराणि पठितव्यानि, किं प्रयोजनम् ? इदं तावद्विभागाख्यानमाष्टमिकस्यापि भवति । उत्तरत्रापि प्रयोजनं तत्र तत्र वक्ष्यामः ।

एकश्रुतिर्वेति । उदात्तभागस्य पटुत्वात्पटुत्वकृतौ विकल्पः । पटुत्वे हि तदुपरगात्तद्रूपतामिवापन्नो नानुदात्तव्यपदेशमर्हति, नाप्युदात्तव्यपदेशम्; उपरागमात्रत्वात् । तेन भेदतिरोधानलक्षणमैकश्रुत्यं परो भागः प्रतिपद्यते । अन्वर्थं वा एकश्रुतित्वम्, पूर्वभागश्रुतेरेकाऽभिन्नाकारा श्रुतिरस्येति कृत्वा । अध्यर्थमात्रानुदात्तेति । एकश्रुतिर्वेति नोक्तम्; पूर्वानुसारेण गम्यमानत्वात्, लघुना वा महतोऽनुपरगात् । माणवका3 माणवकेति । 'स्वरितमाम्रेडितेऽसूया' इति प्लुतः स्वरितः ।।

एकश्रुति दूरात्संबुद्धौ ।। 1.2.33 ।।

इह यद्यप्यामन्त्रितान्तस्य पदस्याप्यभिमुखीकरणं प्रति सामर्थ्यम्, तथापि ह्यर्थविशेषस्य कस्यचिदनुष्ठेयतया । संबोधना=संबुद्धिः, अन्तर्भावितण्यर्थो बुद्धिः, तथा च संबोधयति येनेति णिच् प्रयुक्तः, तत्र च वाक्यस्यैव करणभावो न पदस्येति मत्वाह--एकश्रुति वाक्यं भवतीति । कतरत्पुनस्तदित्यत आह--दूरादिति संबोधनं संबुद्धिरिति । अनेनान्वर्थस्य संबुद्धिशब्दग्रहणं न पारिभाषिकस्येति दर्शयति । पारिभाषिकस्य हि ग्रहणे, देवा ब्राह्मणा इत्यत्र न स्यात् । अन्वर्थग्रहणं च दूरादित्यनेन सम्बन्धाल्लभ्यते, न ह्यामन्त्रितैकवचनस्य दूरत्वमदूरत्वं वा सम्भवति । संबोधनस्य तु क्रियारूपत्वाद् अपादानतया दूरादिति विशेषणसम्भवात् । दूरत्वं च न देशस्वरूपागतमाश्रीयते, अनवस्थितत्वात्; किन्तु सम्बोधनक्रियापेक्षया दूरत्वम् । यावति देशे प्राकृतप्रयत्नोच्चारितं सम्बोध्यमानेन न श्रूयते, किन्त्वधिकं प्रयत्नमपेक्ष्यते, तत्संबुद्धौ दूरं भवति । स्वराणामित्यादि । एकश्रुति=स्वरूपाख्यानम्, भेदीतरोधानमित्यनन्तरोक्तस्यैव विवरणम् ।

आगच्छत्यादि । दूराद्धूते वाक्यस्य टेः प्लुतः उदात्तः, परिशिष्टमेकश्रुति । ननु च प्लुतैकश्रुत्योर्द्वयोरपि दूरात्संबोधनं द्योत्यमिति फलैक्याद्विकल्पो युक्तः, कथं समावेशः ? उच्यते, वाक्यमेव प्रतिपादकत्वात् संबुद्धौ करणं प्लुतैकश्रुतीत्यस्यैव संस्कारमात्रम्, यथा-विषयग्रहणे चक्षुष उन्मीलनादि, तत्कृतः समानफलत्वमिति वाक्यापेक्षया च समावेशः । अन्त्याजपेक्षया तु बाध्यबाधकभाव एव । प्रत्युदाहरथणे त्रैस्वर्यमेव भवति । तत्राङ् 'उपसर्गाश्चाभिवर्जम्' इत्याद्युदात्तः । गच्छेति तिङन्तस्य'तिङ्ङतिङः' इति निघातः । भोःशब्दः 'निपाता आद्युदात्ताः' इति आद्युदात्तः, शेषयोरामन्त्रितनिघातः ।।

यज्ञकर्मण्यजपन्यूङ्खसामसु ।। 1.2.34 ।।

ऐकश्रुत्यमिति । बहुव्रीहेर्भावप्रत्ययः, चातुर्वर्ण्यादित्वाद्वा कर्मधारयात्स्वार्थे ष्यञ् ।

संपाठ इति । स्वाध्यायकाले अग्निर्मूर्धा दिवः ककुत्, 'अङ्गेर्नलोपश्च' इत्यग्निशब्दः प्रत्ययस्वरेणान्तोदात्तः, 'मुर्वी बन्धने', 'कनिन्युवृषितक्षि' इति वर्ततमाने 'श्वन्नुक्षन्पूषन्तक्षन्' इत्यत्र सूत्रे मूर्धन्शब्दः कनिन्प्रत्यान्तोऽन्तोदात्तो निपातितः । 'दिवु क्रीडादौ', दिवेरन्तो डिविः षष्ठ्येकवचनस्य 'ऊडिदम्' इत्युदात्तम्, ककुच्छब्दः प्रातिपदिकस्वरेणान्तोदात्तः, 'पातेर्डतिः',पतिशब्दः प्रत्ययस्वरेणाद्युदात्तः, प्रथेः षिवन् संप्रसारणं च षित्त्वात् ङीष्, षठ्येकवचनस्य 'उदात्तयणो हल्पूर्वात्' इत्युदात्तत्वम्, इदंशब्दः प्रतिपदिकस्वरेणान्तोदात्तः, आप्नोतेः क्विब् ह्रस्वश्च, 'ऊडिदम्' इति विभक्तेरुदात्तत्वम् । 'रि गतौ', 'स्रुरिभ्यां तुट् च' इति असुन्प्रत्ययः, नित्स्वरेणाद्युदात्तो रेतः शब्दः । जिन्वतीति । जिन्वतेः प्रीणनार्थस्य तिपि निघातः 'प्रणवष्टेः' इति प्रयोगकाले प्रणयः ।

ममेत्यादि । 'युष्मदस्मदोर्ङसि' इत्याद्युदात्तत्वम् । अग्नेशब्दस्यामन्त्रिनिघातः, वर्चशशब्दोसुन्प्रत्ययान्तः, विपूर्वाद् ह्वयतेः 'ह्वः संप्रसारणं च' इत्यप्रत्यये थाथादिसूत्रेणान्तोदात्तत्वम् । जपोऽनुकरणमन्त्र इति । यद्यपि स एव मन्त्र उच्चार्यते, तथापि वर्णाभिव्यक्त्यनभिव्यक्तिभ्यां भेदपरिकल्पनयाऽनुकरणव्यवहारः । अत एवाह--उपांशुप्रयोग इति । यथा जले निमग्नस्य पाठः । क्वचिदकरणमन्त्र इति पाठः, अनेनेदं कुर्यादिति चोदितः करणमन्त्रः, ततोऽन्योऽकरणमन्त्रः । प्रसिद्धस्तु पाठोऽन्तः करणमन्त्र इति । ननु वागिन्द्रियेण शब्द उच्चार्यते स कथमन्तः करणेन सर्वेन्द्रियसाधारणेन व्यपदिश्यते, सत्यम्; वागिन्द्रियस्य स्थूलो व्यापार उपांशुप्रयोगे नास्ति, स एव च तद्व्यापारत्वेन प्रसिद्ध इति सूक्ष्मव्यापारे मन एव प्रधानं मन्यते ।

न्यूङ्खा इत्यादि । षोडशेति पाठः, ओकारा इति च, न त्वेते मकारान्ताः, तेषु प्रथमसप्तमत्रयोदशास्त्रय उदात्तास्त्रिमात्राः, इतरे त्रयोदशा अनुदात्ता अर्धौकाराः । एतच्च आश्वलायनेन चतुर्थेऽहनीत्यस्मिन् खण्डे लक्षणेनोक्तमुदाहृतं च । 'षडोङ्काराः' इति पाठे मूलान्तरं मृग्यम् । ए3 विश्वमित्यादि । एशब्दो गीतिपूरणः, निपात इत्यन्ये । विश्वशब्दः क्वन्प्रत्ययान्त आद्युदात्तः, विश्वमन्त्रिणं पाप्मानं संदहेति सम्बन्धः, गीतिवशादेशब्दोऽनेकमात्रः । वाक्यविशेषस्था गीतय इति । तदुक्तमृषिणा-'गीतिषु सामाख्या' इति ।।

उच्चैस्तरां वा वषट्कारः ।। 1.2.35 ।।

वषट्शब्देन चात्र वौषट्शब्दो लक्ष्यते इति । समानार्थत्वाद् द्वावपि हि तौ देवतासंप्रदानस्य द्योतकौ । कारग्रहणं तु ज्ञापकम्-अवर्णादपि कारप्रत्ययो भवतीति । तेन एवकार इत्यादि सिद्धं भवति ।

यद्येवमिति । लक्षणायां हि प्रतिपत्तिगौरवं भवतीति भावः । विचित्रा हीति । क्वचिदक्षरलाघवमाश्रीयते, क्वचित्प्रतिपत्तिलाघवमिति वैचित्र्यम् ।

उच्चैस्तरामिति । उच्चैःशब्द उदात्तभवने वर्त्तते, तत्र भवनक्रिययापेक्षया प्रत्ययः । उदात्ततर इत्यर्थो विवक्षितः, प्रकर्षश्च वौषट्शब्दे

'ब्रूहिप्रेषयश्रौषड्वहानामादेः' इति यः प्लुतो विहितः तदपेक्षया वेदितव्यः । सन्त्युदात्ताः, अयं तूदात्ततरः । अन्त्यसदेशस्येत्येके । प्लुतोदात्तस्य च विधानसामर्थ्याच्छेषनिघाताभावोऽसिद्धत्वाद्वा द्वयोरप्यचोरुदात्ततरो भवतीत्येके । तदा याज्यान्तापेक्षः प्रकर्षः स्वार्थि कस्तरबित्यन्ये । ततो ह्युदात्तमात्रम्प्रथमस्य सिद्धमिति द्वितीयस्याचो विधीयते । वषट्कारशब्दोऽयं मन्त्रब्राह्मयोः कल्पसूत्रेषु वौषट्शब्दे निरूढः । वषट् क्रियतेऽनेनेति वषट्कारः । 'मा मान्प्रमृज' इति मन्त्रे, 'त्रयो वै वषट्काराः वौषडिति वषट्करोति' इति ब्राह्मणे च वषट्कारोऽन्त्यः । 'सर्वत्रोच्चैस्तरां बलीयान्याज्याया' इति सूत्रे उच्चैस्तरामिति श्रुतिप्रकर्षो विधीयत इत्याहुः ।।

विभाषा छन्दसि ।। 1.2.36 ।।

यज्ञकर्मणीत्यस्य निवृत्त्यर्थमिति । ननु यद्ययं योगो यज्ञकर्मणि स्यात्, पूर्वो योगो निर्विषयः स्यात् । न च जपन्यूङ्खसामान्यस्य विषयः, जपादिव्यतिरिक्तस्तु पूर्वस्य विषय इति व्यवस्था; तथा हि सत्यत्रैव जपादिग्रहणं कर्त्तव्यं स्यात्, किं छन्दोग्रहणेन ? छन्दोग्रहणात्तु छन्दोमात्रोऽयं विकल्प इति गम्यते, ततश्च यज्ञकर्मणीत्यस्यानुवृत्तौ पूर्वो नित्यो विधिर्निर्विषयः स्यात् ? एवं मन्यते--ऊहमन्त्राणामच्छन्दस्त्वात्ते पूर्वयोगस्य विषया इति छन्दोरूपेषु मन्त्रेष्वयमेव विकल्पः स्यादिति । यद्यूहमन्त्रेषु सावकाशः पूर्वो योगः, तदा यज्ञकर्मणीत्यस्य विभाषाग्रहणेन विर्वृत्तावपि छन्दोरूपेष्वनूहितेषु मन्त्रेषु परत्वादयमेव विकल्पः प्राप्नोति, नैष दोषः; यज्ञकर्मणीत्यत्र कर्मग्रहणं यज्ञानुष्ठानमात्रे सर्वत्र नित्यो विधिर्यथा स्यादित्येवमर्थम् । यद्यप्यूह्यमाना मन्त्रा न भवन्ति, तथाप्यमन्त्राणामेव तेषां यज्ञकर्मणि प्रयुज्यमानानां पूर्वयोगस्य विषयत्वं भवत्येव । ये तु जपादिपर्युदासेन मन्त्राणामेव तत्र ग्रहणमिच्छन्ति, तेषां सामर्थ्यलभ्या यज्ञकर्मणीत्यस्य निवृत्तिरिति विभाषाग्रहणमनर्थकं स्यात् । इष इत्यादि । इडन्नम्, ऊर्ग् बलम् । चतुर्थेकवचनस्य 'सावेकाचः' इत्युदात्तत्वम् । 'त्वामौ द्वितीयायाः' इति त्वादेशोऽनुदात्तः । अग्ने ित्यामन्त्रिताद्युदात्तत्वम् । आङुपसर्गः । याहीति । 'तिङ्ङतिङः' 'वी गत्यादिषु', 'मन्त्रे वृषेषपच' इत्यादिना क्तिन्नुदात्तः, अग्निशब्दोऽन्तोदात्तः । अमि पूर्वत्वम् 'एकादेश उदात्तेनोदात्तः' । ईले इति । 'ईडस्तुतौ' लडुत्तमैकवचनम् । बह्वृचा द्वयोरचोर्मध्ये स्थितस्य डकारस्य लकारं विदधति । पुरोहितम् । 'पुरोऽव्ययम् ' इति गतिसंज्ञा, 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरः, पुरः शब्दोऽसिप्रत्ययान्तोऽन्तोदात्तः । शन्शब्दो निपातः, नसादेशोऽनुदात्तः देवडिति पचादिषु पठ्यते, टित्त्वान् ङीप्,'अनुदात्तस्य च यत्रोदात्तलोपः' अभिपूर्वादिषेः क्तिनि शकन्ध्वादित्वात् पररूपेऽभिष्टेत्यादौ च 'निति कृत्यतौ' इति पूर्वपदप्रकृतिस्वरेणाभिशब्दस्यान्तोदात्तत्वं चतुर्थ्येकवचनम् ।

न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ।। 1.2.37 ।।

सुब्रह्मण्या नाम निगद इति । अपादबन्धे गदिर्वर्त्तते, यथा गद्यमिति, निशब्दः प्रकर्षे । उच्चैरपादबन्धं यजुरात्मकं यन्मन्त्रवाक्यं पठ्यते स निगदः, नितरां गद्यत इति कर्मणि 'नौ गदनद' इत्यप्, तस्य च सुब्रह्ण्याशब्दोपलक्षितत्वात् सुब्रह्मण्याशब्दोपरित्यक्तिस्त्रीलिङ्ग एव नाम । ओङ्कारस्तित्स्वरेण स्वरित इति सुब्रह्मणि साधुरिति यत्प्रत्ययः, तित्स्वरेण स्वरितः । तस्य टाबेकादेशः स्वरितानुदात्तयोरान्तर्यात् स्वरितः, ततो निपातेनौँशब्देन 'ओमाङोश्च' इत्युदात्तस्वरितयोरेकादेशः स्वरित एव । 'आमन्त्रितमाद्युदात्तम्' इति आष्टमिकस्तु निघातोऽसमानवाक्यत्वान्न भवति । तस्यानेनेति । न च तस्यासिद्धत्वम्, इदं हि प्रकरणमसिद्धकाण्ड उत्क्रष्टडव्यमित्युक्तम् । अत एवास्मिन्नुदात्ते कृते शेषनिघातोऽपि न भवति; यथोद्देशपक्षेऽनुदात्तपरिभाषायां कर्त्तव्यायाम् असिद्धत्वेन वर्ज्यमानाभावात् । तेनेह द्वावप्युदात्तौ सम्पन्नौ थइति । पश्चिम एकोऽनुदात्त इति । न च तस्य 'उदत्तादनुदात्तस्य' इति स्वरितप्रसङ्गः; प्रकरणोतकर्षेणस्यासिद्धत्वाद्, 'नोदात्तस्वरितोदयम्' इति निषेधाच्च । द्वावनुदात्ताविति । वकारच्छकारौ, शिष्टं स्पष्टम् । 'असावमुष्येत्यन्तः' एतस्मिन्नेव सुब्रह्मण्यानिगदे प्रथमान्तस्य षष्ठ्यन्तस्य चान्त उदात्तो भवति । गार्ग्यो यजते, दाक्षेः पिता यजते--तित्स्वरे प्राप्ते वचनम् । 'स्यान्तस्योपोत्तमं च' स्यशब्दान्तस्योपोत्तममुत्तमं चोभयमुदात्तं भवति । गार्ग्यस्य पिता यजते 'वा नामेधयस्य' । देवदत्तस्य पिता यजते ।।

देवब्रह्मणोरनुदात्तः ।। 1.2.38 ।।

स्वरितस्योदात्ते प्राप्ते इति । कथं प्राप्तः, यावताऽसिद्धः स्वरितः ? एवं तर्ह्येतज्ज्ञापयत्याचार्यः-'तस्यादितः' इत्यारभ्य नबसूत्री 'उदात्तादनुदात्तस्य स्वरितः' ित्यस्मात्परा द्रष्टव्येति । उक्तानि प्रयोजनानि, उत्तरत्र च वक्ष्यामः । सामान्यापेक्षत्वाज्ज्ञापकस्य नवसूत्र्यप्युत्कृष्यते, न सुब्रह्मण्यास्वर एव । द्वयोरपि पदयोरिति । द्वितीयस्य पदत्परस्यापि निघातो न भवति; ' आमन्त्रितं पूर्वमविद्यमानवद्' इति पूर्वस्याविद्यमान्वात् । प्रथमस्यापि न भवति; भिन्नवाक्यत्वात् ।।

स्वरितात्संहितायामनुदात्तानाम् ।। 1.2.39 ।।

अनुदात्तानामिति बहुवचनं जातौ, तेनैकस्य द्वयोर्बहूनां च भवति--एकस्य पचति, द्वयोराग्निवेश्यः; बहूनां तु वृत्तावेव दर्शितम् । इतमित्यन्तोदात्तमिति । इदं-शब्दः प्रातिपदिकस्वरेणान्तोदात्तः, विभक्तिरनुदात्ता, त्यादाद्यत्वे 'अमि पूर्वः' 'एकादेश उदात्तेनोदात्तः' । विधिकाल एवेति । यद्यप्यत्र विहितस्यानुदात्तविधानेऽपि न कश्चिद्दोषः, तथापि तत्त्वेन व्यवहर्त्तव्यमित्येवमुक्तम् । तस्मात् स्वरितादिति । न च तस्यासिद्धत्वम्; उत्कृष्टत्वाद् नवसूत्र्यास्तेन कार्यं देवदत्तेत्यादाविवेकश्रुतिर्भवत्येव । गङ्गेप्रभृतीनामिति । न च यमुनेप्रभृतीनां व्यवधानम्; जातेरेकत्वाद्, व्यक्तीनां सतीनामप्यनाश्रितत्वाद् अकिञ्चित्करत्वम् । ततः परेषामिति । 'नामन्त्रिते समानाधिकरणे' इति माणवकशब्दस्याविद्यमानत्वं न भवति ।

ञवग्रहे मा भूदिति । इदमेव च संहिताग्रहणं ज्ञापकम्--पञ्चमीनिर्देशे कालो न व्यवध्यायक इति । तेन 'तिङ्ङतिङः' इत्यवग्रहेऽपि भवति-अग्निमीले ।

उदात्तस्वरितपरस्य सन्नतरः ।। 1.2.40 ।।

परशब्दः प्रत्येकमभिसम्बध्यत इत्याह--उदात्तः परो यस्मादिति । सन्नशब्देन नीचैरर्थ उच्यते, तेनानुदात्तत्वं लक्ष्यत इत्याह--अनुदात्ततर इति । प्रकर्षः स्थान्यनुदात्तापेक्षः । मातर इत्यनुदात्त इति । समासैकदेशो निष्कृष्टानुकृतः, देवा इत्यादीनां त्रयाणामामन्त्रितानामेकीभूतानामाद्युदात्तत्वे शेषनिघातः ।

'विभाषितं विशेषचने बहुवचनम्' इति विद्यमानपक्षे चामन्त्रितनिघातः, जसः सकारस्य रुत्वम्, तस्य स्रंसनयुक्तस्य 'अतो रोरप्लुतात्, इति उकारोऽनुदात्तः, 'आद्गुणः' सोऽप्यान्तर्यतोऽनुदात्तः, अच्छब्दाकारस्य शेषनिघातः, तयोरनुदात्तयोः 'एङः पदान्तादति' इत्येकादेश आन्तर्यतोऽनुदात्तः । सरस्वतीकारस्येति । ननु च नवसूत्र्युत्कृष्यत इति ज्ञापितम्, ततश्च गङ्गेप्रभृतीनामिव सरस्वतीकारस्यापि पूर्वेणैकश्रुतिरेव प्राप्नोति, कः पुनः सन्नतरस्यावकाशः, यः स्वरितात्परो न भवति ? अग्निरिति । न च विप्रतिषेधेन सन्नतरो लभ्यते; पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य । एवं तर्हि 'न मु ने' इत्यत्र नेति योगविभागात् सिद्धत्वं भविष्यति । इह देवदत्तस्य न्यङ् इति 'न्यधी च' इति पूर्वपदप्रकृतिस्वरे 'उदात्तस्वरितयोर्यणः' इत्यञ्चत्यकारस्य स्वरितः पूर्वस्य सन्नतरं प्रत्यसिद्धो न भवति; प्रकरणोत्कर्षाद् । 'उदात्तस्वरितयोः' इत्येव सिद्धे परग्रहणं बहुव्रीहावेकवचनविवक्षार्थमिति गङ्गेप्रभृतीनां सन्नतराभावः ।।

अपृक्त एकाल् प्रत्ययः ।। 1.2.41 ।।

घृतस्पृगिति । 'क्विन्प्रत्ययस्य कुः' इति कुत्वम् । अर्थभागिति । अत्र 'वेरेपृक्तस्य' इति लोपः प्रयोजनम् । एकाल्ग्रहणं किमिति । समुदायद्वारेणायमेकपदविषयः प्रश्नः, अन्यथा प्रत्ययमात्रस्य संज्ञा स्यादिति प्रदेशेषु प्रत्ययग्रहणमेव कर्तव्यं स्यात्, किं सञ्ज्ञया ! यत्र यद्यलन्तस्य स्यात्, केवलस्य चाप्यन्तवद्भावात् अल्ग्रहणं व्यर्थं स्यादिति तत्सामर्थ्यादल्समुदायस्य न भविष्यतीति भावः ।

दर्विरिति । 'दृ विदारणे' औणादिको विन् प्रत्ययः । वर्णग्रहणे जातिग्रहणादल्समुदाया गृह्यन्ते इति भावः । स्यादेतत्-'वेरपृक्तस्य' इत्यत्र 'वोऽपृक्तस्य' इत्यस्तु, क्विबादिषु च मा भूदिकारः, न चान्यः प्रत्ययो वकारोऽस्तीति, तन्नः 'राजनि युधिकृञः' राजकृत्वा, तमाचष्ट इति णिचि टिलोपे क्विपि णिलोपे च कृते क्वनिपः सम्बन्धी प्रत्ययो वकारोऽस्ति । अवश्यं च क्विबादीनामुच्चारणार्थे कश्चिदजासंजनीयः, तत्राकारे 'सृशृभ्यां वः' इत्यादिष्वपि लोपः प्रसज्येत । उकारे तु ण्वुलादिषु । अन्यत्र तु गौरवमिति यथान्यासमेव साधीयः । ननु च यद्यल्समुदायोऽपि गृह्यते, अल्ग्रहणमनर्थकं स्याद् । अतो यद्यपि 'निपात एकाजनाङ्' इत्यत्रैकग्रहणाद्वर्णग्रहणे जातिग्रहणं ज्ञापितम्, तथाप्यत्राल्ग्रहणसामर्थ्यात्समुदायस्य न भविष्यतीति चिन्त्यप्रयोजनमेकग्रहणम् । तथाऽपृक्तप्रदेशऱेष्वल्ग्रहणेनैव सिद्धे नार्थः संज्ञया; नतराम्महत्या, नतमाम्पूर्वनिर्द्दिष्टया ।

सुरा इति । सुरां सुनोतीति क्विपि तुक् सुरासुतमाचष्टे इति णिचि टिलोपः क्विब् णिलोपः, अत्र धातुसकारस्य 'हल्ङ्याब्भ्य' इति लोपो न भवति, प्रत्ययपरिभाषया सिद्धम् । तिपा साहचर्याच्चैकवचनस्य ग्रहणं सिद्धमिति प्रत्ययग्रहणमपि चिन्त्यप्रयोजनमेव ।।

तत्पुरुषः समानाधिकरणः कर्मधारयः ।। 1.2.42 ।।

अत्र 'तत्पुरुषः' 'समानाधिकरणः' इति द्वयोरपि पदयोर्मुख्यार्थत्वे ब्राह्मणराज्यं शोभनमित्यादौ यत्र बाह्येन पदेन तत्पुरुषस्य सामानाधिकरण्यं तत्रैव संज्ञा स्याद्, न तु परमराज्यमित्यादौ; शब्दान्तरस्याप्रयोगादित्यन्यतरद्गोणार्थमिति स्थिते कामचाराद्यदि तत्पुरुषशब्दो गौणः स्यात् तत्पुरुषार्थानि पदानि समानाधिकरणानीति, ततः सहग्रहणाभावात् प्रत्यकं संज्ञा इति शङ्क्येत, अतस्तत्पुरुष इति पदं मुख्यार्थमित्याह-तत्पुष इति । समासविशेषस्येत्यादि । इतरद्गौणार्थमित्याह-समानाधिकरणपद इति । समानाधिकरणानि पदान्याश्रयत्वेन यस्य सन्ति स तथोक्तः; अवयवद्वारकं सामानाधिकरण्यमौपचारिकमपि पदान्तनिरपेक्षमन्तरङ्गमिति तदेवाश्रीयत इति भावः । भवति ह्यवयवधर्मेण समुदायस्य व्यपदेशः, यथा-समं चूर्णमिति । अत्र ह्यवयवद्वारकं चूर्णस्य साम्यम्, न तु कृत्स्नस्य चूर्णस्यान्येन । परमराज्यमिति, अकर्मधारयेराज्यम् इत्यत्राकर्मधारय इति निषेधादुत्तरपदाद्युदात्तत्वाभावे समासान्तोदात्तमेव भवति । पाचकवृन्दारिकेति । 'न कोपधायाः' इति प्रतिषेधं बाधित्वा 'पुंवत्कर्मधारय' इति पुंवद्भावो भवति ।

तत्पुरुष इति किमिति । प्रतिपदोक्तत्वादधिकारावगतेर्वा समानाधिकरणाधिकारविहितस्तपुरुष एव प्रतिपत्स्यत इति प्रश्नः । पाचिकाभार्य इति । अयमेवार्थो दुरवधार इति भावः । ब्राह्मणराज्यमिति । अत्रोत्तरपदाद्युदात्तत्वमेव भवति । अथ 'पूर्वकालैक' इत्यस्य प्रकरणस्यान्ते 'कर्मधारय' इति कस्मान्नोक्तम्, योऽयं समानाधिकरणाधिकारविहितस्तत्पुरुषः स कर्मधारय इति, एवं हि 'तत्पुरुषः समानाधिकरण' इति न वक्तव्यं भवति ? सत्यम्; एकसंज्ञाधिकारात्तु कर्मधारसंज्ञया तत्पुरुषसंज्ञाया बाधः स्यादिति द्विगोरिव पुनस्तत्पुरुषसंज्ञाविधानाय कर्मधारयपदमुपादेयम् । पुनश्च पर्यायप्रसङ्गे समावेशाय चकारोऽपि वक्तव्यः नन्वेवं करिष्यते-द्विगुकर्मधारयौ चेति ? एवं तु न कृतमित्येव ।।

प्रथमानिर्दिष्टं समास उपसर्जनम् ।। 1.2.43 ।।

समास इत्यधिकरणनिर्देशोऽयम् । कष्टश्रितादयश्च समासाः, तेषु किं प्रथमानिर्द्देष्टं भवितुमर्हति ? समासे सति यस्मात्प्रथमा विधीयते, न च तथाभूतं सम्भवति । समासे हि कृते तत एव प्रथमोत्पद्यते, न तदवयवाद् । अन्तर्वर्तिन्या च विभक्त्या श्रितशब्द एव प्रथमानिर्दिष्टो न कष्टशब्दः । सापि न समासे सत्युत्पन्ना, किं तर्हि ? वाक्यकाल एव । निर्दिष्टग्रहणं चानर्थकं स्यात्, समासे प्रथमान्तमित्येव वाच्यं स्याद्, अतो मुख्यस्यासम्भवाद्गौणः समासो गृह्यते इत्याह-प्रथमयेत्यादि । कथं पुनः समास इति शास्त्रस्य ग्रहणमित्याह-समासविधायीति । समासविधायित्वात्तादर्थ्यात्ताच्छब्द्यमित्यर्थः । निर्दिष्टग्रहणादेव च तुल्येऽपि समासार्थत्वे वाक्यं न गृह्यते, न हि तत्र निर्देशार्था प्रथमा, अर्थप्रयुक्तत्वात् । द्वितीयेत्येतत्प्रथमानिर्दिष्टमिति । प्रथमया विभक्त्या उच्चारितम् । यद्येवम्, तस्यैव संज्ञा स्यान्न कष्टादीनाम्, न हि ते शास्त्रे प्रथमानिर्दिष्टाः । य एव द्वितीयेत्यस्य प्रथमानिर्देशः, स एव कष्टादीनामपि; तत्परत्वात्तस्य । यथा वक्ष्यति-'तस्येति सामान्यं विशेषोपलक्षणार्थं तदीयप्राथम्यं विशेषाणां विज्ञायते' इति । कष्टश्रितादिषूपसर्जनत्वात् पूर्वनिपातः ।

महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थम् । लोकेऽप्रधानमुपस्र्जनमुच्यते, इहाप्यप्रधानमुपसर्जनम् । प्रधानमप्रधानमिति च सम्बन्धिशब्दावेतौ, तेन यत्प्रति यदप्रधानं तदेव प्रति तदुपसर्जनं भवति, तेन राज्ञः कुमारीश्रित इति 'द्वितीया श्रित' इत्यत्र प्रथमानिर्दिष्टस्यापि कुमारीशब्दस्य संज्ञा न भवति । यदि स्यात्, पूर्वनिपातानियम उपसर्जनह्रस्वत्वं च स्यात् । अन्वर्थत्वे तु श्रितादीनेवापेक्ष्य द्वितीयान्तमुपसर्जनमिति न प्रसङ्गः । एवं राज्ञः कुमार्या इत्यत्र द्वयोरपि 'षष्ठी' इत्यत्र प्रथमानिर्देशेऽपि कुमारीमपेक्ष्य राज्ञ उपसर्जनत्वम्, न तं प्रति तस्याः । यद्यन्वर्थसंज्ञा, नार्थोऽनेन, प्रदेशेष्वेवान्वर्थग्रहणमस्तु ।

वाक्येऽपि तर्हि स्यात्-कुमारीं श्रिता गवां कुलम् । अथ संज्ञाविधिर्वाक्ये कस्मान्न भवति, यावता 'समासे' इति प्रथमानिर्देशस्याधारो न संज्ञायाः ? तथा गोकुलं कुमारीपुत्र इत्यत्र समासेऽपि पूर्वनिपातवद् ह्रस्वत्वं कस्मान्न भवति ? तस्मात्सत्येवोपसर्जनत्वे उपसर्जनगोशब्दन्तस्योपसर्जनत्वात् स्त्रीप्रत्ययान्तान्तस्य प्रातिपदिकस्य ह्रस्वविधानात्समासाधिकारे पूर्वनिपातवचनाच्च वाक्ये तौ न भवत इति वाच्यम् । संज्ञाविधानं तून्मत्तगङ्गमित्यादौ द्वयोरप्यप्राधान्ये पूर्वनिपातनियमार्थम् । यत्र चानन्यार्थः प्रथमानिर्देशस्तत्र प्रधानस्यापि यथा स्यादित्येवमर्थं च । यथा-पाचकवृन्दारकः, पुरुषव्याघ्रः, अर्द्धपिप्ली, पूर्वकाय इति अत्र 'वृन्दारकनागकुञ्जरैः पूज्यमानम्', 'उपमितं व्याघ्रादिभिः','अर्द्धं नपुंसकम्','पूर्वापराधरोत्तरम्' इति प्रथमानिर्देशस्येदमेव प्रयोजनम्; समासस्य विशेषणं विशेष्येण षष्ठीत्येव सिद्धत्वाद् । न च पूज्यमानतादिविषय एव यथा स्यादिति नियमार्थस्तदारम्भः ? उपसर्जनसंज्ञार्थत्वेऽर्द्धादिपूर्वपदस्य विशिष्टरूपस्याद्धेपिप्पलीत्यादेः समासस्य विधिसम्भवात् तस्मादेतदर्थापि संज्ञा । अन्वर्थत्वं तु सति संभवे व्यवस्थापकम् ।।

एकविभक्ति चापूर्वनिपाते ।। 1.2.44 ।।

विभक्तिशब्दः सुपां वाचकः, कारकशक्तिवचनो वा; विभज्यतेऽनया प्रातिपदिकार्थ इति कृत्वा । समासे विधीयमाने इति । यदुपमर्दनेन समासो भवति तस्मन्वाक्य इत्यर्थः, समासरूपप्राप्त्यभिमुखे पदत्रय इति यावत् । एतन समासार्थं वाक्यमत्र समासः, न पूर्वसूत्र इव शास्त्रमिति दर्शयति । शास्त्रे सर्वमेविभक्तिमित्येकविभक्तीत्यनर्थकं स्यात्, मुख्येऽपि समासे प्रत्ययलक्षणेनैकविभक्तित्वं समर्थनीयमिति वाक्यमेवात्र समासः । एकस्मिंश्च प्रयोगे सर्वमेकविभक्तिकमिति विशेषणओपादानसामर्थ्यतप्रयोगभेदेनापि यस्य न सर्वविभक्तित्वं तदाश्रीयत इत्याह-यन्नियतविभक्तिकमिति । एतदेव स्पष्ययति-द्वितीये सम्बन्धिनीत्यादि ।

केचिदाहुः-'येन सह समास्यते द्वितीयसम्बन्धी' इति, एवं तु पञ्चानां खट्वानां समाहारः पञ्चखट्वीति वा टाबन्त इति स्त्रीलिङ्गपक्षे उपसर्जनह्रस्वत्वं न स्यात् । समाहारो ह्यत्र नानाविभक्तियुक्तो न पञ्चञ्शब्दः, तस्मातप्रधानार्थवाची शब्दो द्वितीयः सम्बन्धः । निष्कौशाम्बिरिति कौशाम्बीशब्दो निष्क्रमणक्रियापेक्षयाऽपादानशक्तियोगात् पञ्चम्यन्ते एव, न तस्य क्रियान्तरमपेक्ष्य शक्त्यन्तरावेशः सम्भवति । निःशब्दस्तु निष्क्रान्तप्रधानो नानाशक्तिभिर्युज्यते ।

निष्कौशाम्बिरिति । कुशाम्बेन निर्वृत्ता नगरी कौशाम्बी, 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वः । निर्वाराणसिरिति । अनो जलं तद्वरं यस्याः सा वराणा गङ्गा, तस्या अदूरभवा नगरी वाराणसी । पुराणे तु वरणा चासिश्च नद्यौ, शकन्ध्वादिः, तयोरदूरभवा पृषोदरादित्वाद्रेफाकारस्य दीर्घः । निसः पूर्वेणोपसर्जनत्वम्, प्रधानस्यापि हि प्रथमानिर्देशसामर्थ्यात् भवतीत्युक्तम् । इहास्यावकारशोऽप्रथमानिर्द्दिष्टः, पूर्वस्यावकाशोऽनेकविभक्तिः नीलोत्पलादिः, अर्द्धिपिप्पल्यादिश्च; कष्टश्रितादिषु कष्टादय एकविभक्तिकाः प्रथमानिर्दिष्टाश्चेत्युभयप्रसङ्गे परत्वादनेनैव प्राप्नोति, ततश्च'अपूर्वनिपाते' इति प्रतिषेधप्रसङ्गः, न; अप्रतिषेधात् । नायं प्रसज्यप्रतिषेधः-पूर्वनिपाते नेति, किं तर्हि ? पर्युदासोऽयम्, पूर्वनिपाते न विधिर्न प्रतिषेधः । प्रसज्यप्रतिषेधेऽप्यनन्तरप्राप्तिः प्रतिषिध्यते, कुत एतद् ? अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा भवति, पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति । न चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते, प्रतिषिद्धत्वात् ।।

अर्थवदधातुरप्रत्ययः प्रातिपादकम् ।। 1.2.45 ।।

अभिधेयवचनोऽर्थशब्द इति । न प्रयोजनवचनोऽव्यभिचारात्; न निवृत्तिवचनः, स्वयं निवृत्तस्य किं संज्ञया ! न धनवचनः, स्वस्वामिभावस्यासम्भवात् । तच्चाभिधेयं चतुर्द्धा-चातिगुणक्रियाद्रव्यभेदेन; गौः, शुल्कः, पाचकः, डित्थ इति । यद्यर्थवतः संज्ञा, अभावशशविषाणादीनां न प्राप्नोति; अर्थाभावात् । मा भूदनेन, समास इति भविष्यति ? न; अर्थवदित्यनुवृत्तेः । अन्यर्थाऽनर्थकेऽत्र विधिसम्भावत् समासग्रहणं नियमार्थं न स्यात्, उच्यते; येषां तावद्भूतलाद्याश्रयं घटादिप्रतियोगिकं नास्तीति बुद्धिबोध्यं तत्त्वान्तरमभावस्तन्मते तेनार्थेनार्थवत्त्वम्; येषामप्याश्रयाभिमतं भूतलादिस्वरूपमेव तद्बुद्धिविशेषो वा प्रतियोगिनो घटादेरभावस्तन्मते तेनैव भूतलादिनार्थऽवत्त्वमित्यभावस्य तावत्सिद्धा संज्ञा । शशविषाणमित्यत्रापि गवादिष्वनुभूतविषाणं शशमस्तकवर्तितया बुद्ध्योत्प्रेक्ष्य तस्यैवाभिधानाय शब्दप्रयोगः । बुद्ध्युपारोह एव चार्थस्य शब्दप्रयोगे कारणम्, न बहिः सत्ता । यदि बहिः सन्तमेवार्थं शब्दा अभिदधति; घटो नास्तीति प्रयोगो न स्याद्; एकत्र पौनरुक्त्याद्, अपरत्र विरोधाद् । बुद्ध्युारूढस्य बहिः सत्त्वासत्त्वाप्रतिपादनायोपपद्यते प्रयोगः । एवमपाक्षीत्, पक्ष्यति, अस्य सूत्रस्य शाटकं वयेत्यादावपि बुद्ध्युपारूढ एव पच्यादीनामर्थः; न तु शब्दप्रयोगकाले बहिः सिद्धः ।

डित्थादीन्यव्युत्पन्नान्युदाहरणानि । व्युत्पत्तौ कृदन्तत्वादेव सिद्धम् । सर्वनाम धातुजमित्यत्रापि पक्षेऽव्ययार्थमनुकरणशब्दार्थं च सूत्रमारभ्यमेव । ननु लौकिके प्रयोगे शब्दानामर्थवत्ताध्यवसायः, स च वाक्यस्यैव पदस्य वा विभक्त्यन्तस्य; न तु प्रकृतिभागमात्रस्येति कथं तस्य निष्कृष्यार्थवत्त्वनिश्चयः ! येषां हि सहैव प्रयोगस्तेषां सङ्घातस्यैवार्थवत्ता यथा वर्णानाम् ? उच्यते; अन्वयव्यतिरेकाभ्यां शब्दार्थनिश्चयः, यस्य शब्दस्यान्वये योऽर्थः प्रतीयते, व्यतिरेके च व्यतिरिच्यते स तस्यार्थः । वृक्षौ वृक्षा इत्यादौ च प्रत्ययसामान्यव्यभिचारेऽपि तद्विशेषव्यभिचारः, वृत्तौ सामान्यव्यभिचारश्च वृक्षखण्डं वार्क्षी शाखेति, अर्थस्तु मूलस्कन्धफलपलाशादिमान् यावद्वृक्षशब्दं प्रतीयते ।

नान्तस्यावधेरिति । ननु 'वन षण सम्भक्तौ','धन धान्ये' इत्येतयोर्धात्वोरेतौ शब्दौ पचाद्यचि व्युत्पादितौ, तत्राधातुरिति निषेधो भविष्यति । एवं तर्ह्यव्युत्पत्तिपक्ष एतदुक्तम्, अत एवोदाहरणत्वेनाप्यनयोरुपन्यासः । किं चासत्यर्थ वद्ग्रहणे प्रतिवर्णं संज्ञाप्रसङ्गः, न च प्रतिवर्कणं धातुसंज्ञा, न चाधातुरप्रत्यय इति पर्युदासाश्रयणाद् अर्थवतो ग्रहणम् । अनर्थकयोरपि धातुप्रत्यययोः सम्भवाद्, यथा-अधीते, यावक इति । अत्र ह्यधिपूर्वस्येङोऽर्थवत्त्वं न तु इङि; तस्य क्वचिदप्यप्रयोगाद् । यावक इत्यत्रापि यावशब्दस्यैवार्थवत्त्वं न तु कनः; अन्तरेणापि तदर्थावगमात् । न च ज्ञायते-केन धर्मेण सादृश्यमिति ! न चार्थवद्ग्रहणपरिभाषयार्थवतो ग्रहणम् ? एषा हि नियतरूपोपादाने व्यवस्थापयति, न चात्र रूपविशेषोपादानम् । ननु सत्यामप्यनर्थकस्य संज्ञायां

संख्याकर्मादिषु विधीयमानाः स्वादयो न भविष्यन्ति, नैतदस्ति; अविशेषेणोत्पद्यन्ते, उत्पन्ना नामर्थनियमः, ततश्चाव्ययवत् स्वादयः स्युरेव । नलोपो हि स्यादिति । विभक्तेस्तु श्रवणं न भवति, समुदायस्यापि पृथक् प्रातिपदिकसंज्ञायां तदन्तर्भावाल्लुको भावात् । यद्येवम्, द्विर्वचनन्यायेनावयवस्य न भविष्यति, युक्तं तत्र पज् इत्यत्र येनैवाचा समुदाय एकाच्, तेनैव तदवयवोऽच्छब्दः पशब्दश्च; न चैकस्यैकदाऽनेकं प्रत्यवयवत्वं निरूपयितुं शक्यम् । किञ्च-- समुदायद्विर्वचनेनावयवा अपि द्विरुच्यन्ते, तदात्मकत्वात्तस्य । इह त्ववयवानां समुदायस्य च संज्ञानिबन्धनं शब्दत्वं पृथगेव । तत्र समुदायस्य यत् तेन यस्यैव कार्यं नावयवानाम् । ननु च एति, आभ्याम्, औपगवः, अ अपेहीति, धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात् वृक्षादिष्वपि वर्णा अर्थवन्तः, तथा कूप इति ककारे सति कश्चिदर्थो गम्यते, यूप इति यकारोपजनेऽर्थन्तरम्, तेन मन्यामहे यः कूपे कूपार्थः स ककारस्य, यो यूपे यूपार्थः स यकारस्येति; तथा 'ब्राह्मण' इत्युक्ते योऽर्थो गम्यते नासौ बकारादीनामन्यतरापायेऽपि गम्यते । येषां च संघातो यत्कार्यं करोति प्रत्येकमपि तत् कुर्वन्ति, यथा-तिलानां खारी तैलमुत्पादयति, प्रत्येकं च तिलाः । ये च यस्मिन् प्रत्येकमसमर्थास्तेषां संघातोऽपि तत्रासमर्थः, यथा-प्रत्येकं सिकतास्तैलं नोत्पादयन्ति तथा खार्यति तासाम् । अतः संघातार्थवत्त्वाच्चार्थवन्तो वर्णाः, तत्कथमर्थवद्ग्रहणे सत्यपि तेषां निवृत्तिः । अनर्थकास्तु, प्रतिवर्णानामर्थानुपलब्धेः, न हि 'ब्रा' इत्युक्ते कश्चिदर्थो गम्यते । अतो धात्वादीनामेकवर्णानामर्थवत्त्वाद् अन्येऽपि वर्णा अर्थवन्त इत्यनुपलब्धिबाधितमेतद् । एवमन्येऽपि हेतवो बाधितविषयाः । किं च कूपो यूप इत्यन्वयव्यतिरेकाभ्यां ककारयकारयोर्थवत्त्वे यूप इति चतुर्णां वर्णानामानर्थक्यमभ्युपगतं स्यात्; अथ तेषामर्थवत्त्वं भूयिष्ठः कूपे यूपार्थः स्यात्, कूपार्थश्च यूपे, यत्र भूयसामर्थवतामन्वयः, व्यतिरेकस्तु कस्यचित्; तत्रार्थानामपि भूयसानुमपृत्तिर्भवति, व्यतिरेकस्तु कस्यचिद्; यथा देवदत्त गामभ्याज शुक्लाम्, देवदत्त गामभायाज कृष्णामिति । अतः संघाता एव तेनार्थवन्तः । संघातार्थवत्त्वाच्चेति हेतुरनैकान्तिकः, तैलाग्निवर्तिसंघातेन दीपः, न प्रत्येकम्, रथावयवैश्चक्रादिभिः संहतैर्व्रजिक्रिया । किञ्चार्थवतां विपर्यासेऽर्थप्रत्ययस्यापि विपर्यासः-आहर पात्रं पात्रमाहरेति, अपाये चापायः-गामभ्याज शुक्लां गामभ्याजेति, उपजने चोपजनः-गामभ्याज शुक्लामिति । वर्णेषु तु नैवम्, हिनस्तीति सिंहो हन्ति हतः घ्नन्ति । अतः संघाता एवार्थवन्तः ।
अहन्निति । हन्तेर्लङि तिप् 'इतश्च' लोपे हल्ङ्यादिलोपोऽट्, स हन्ग्रहणेनैव गृह्यते, अत्र प्रागेव लङुत्पत्तेः संज्ञायां तस्यामुत्तरकालं पदत्वे सति नलोपः स्यात् । यद्वा प्रातिपदिकसंज्ञा पदसंज्ञासमकालेमेव स्यात्, न वाऽप्रत्यय इति प्रतिषेधः; 'न ङिसम्बुद्ध्योः' इति लिङ्गात्; अन्यथा हे राजन्नित्यादावप्रत्यय इति निषेधादप्रातिपदिकत्वादेव नलोपप्रसङ्गात् ।
अधातुरिति शक्यमकर्तुम्, 'सुपो धातु' इति धातुगुरहणं ज्ञापकम्-न धातोरियं संज्ञेति । नैतदस्ति ज्ञापकम्, प्रतिषिद्धार्थमेतत् स्यात्, श्येनायत इत्यादावप्रत्यय इति निषिद्धा संज्ञेति भिद्, भूः, पूरित्येवमादौ क्विबन्तत्वे कृदन्तत्वादुत्तरसूत्रेण संज्ञा । न च तस्या अपि प्रतिषेधोऽयम्, 'मध्येऽपवादाः' इति न्यायात्, पर्युदासत्वाद्वा ।
काण्डे इति । प्रथमाद्विवचनस्य 'नपुंसकाच्च' इति शीभावः, अप्रत्यय इति च प्रत्ययग्रहणपरिभाषया तदन्तस्य निषेधः । यत्र हि प्रत्ययः संज्ञिरूपेऽनुप्रविशति, यथा- 'तरप्तमपौ घः' इति, तत्र पदसंज्ञायामन्तवचनेन तदन्तविधिप्रतिषेधः । इह तु पर्युदासे प्रत्ययव्यतिरिक्तः संज्ञी, प्रसज्यप्रतिषेधेऽपि न संज्ञाविधौ प्रत्ययग्रणं, किं तर्हि ? प्रतिषेध इति, नास्ति निषेधः । ननूत्तरसूत्रे कृत्तद्धितग्रहणं नियमार्थं भविष्यति-प्रत्ययान्तस्य यदि भवति कृत्तद्धितान्तस्यैवेति, उच्यते; अस्मिन् सत्यप्रतिषेधे संज्ञाविधौ तदन्तविधिप्रतिषेधात्प्रत्ययस्य यदि भवति कृत्तद्धितस्यैवेति स्थानिनियमः स्यात् । सति त्वस्मिन्, अत्र तावत्प्रत्ययान्तस्य निषेध इति उत्तरसूत्रेऽपि तद्धितान्तस्य ग्रहणं भवति । अथ क्रियमाणेऽप्यप्रत्यय इत्यस्मिन्नपुंसकह्रस्वत्वं कस्मान्न भवति ? पर्युदासे तावत्प्रत्ययाप्रत्यययोरेकादेशस्य पूर्वं प्रत्यन्तवद्भावः, प्रसज्यप्रतिषेधेऽप्यन्तरङ्गत्वात् प्रागेव प्रत्ययोत्पत्तेः काण्डशब्दस्य प्रवृत्ता संज्ञेति एकादेशस्यान्तवद्भाव इत्यास्त्येव प्रातिपदिकत्वम् । तथा च ब्रह्मबन्धूरित्यूङेकादेशस्यान्तवत्त्वात् स्वाद्युत्पत्तिः । न चाप्रत्यय इत्यस्य वैयर्थ्यम्; त्रपुणी इत्यादौ यत्रैकादेशत्वं नास्ति तत्रार्थवत्त्वात् । एवं तर्हि नपुंसके यद्वर्तते तस्यह्स्वः, विभक्त्यन्तं तु संख्याप्रधानं कारकशक्तिप्रधानं च, न च तयोर्लिङ्गयोगः, न चान्यवद्भावेनार्थः शक्योऽतिदेष्टुमिति न भवति ह्स्वः । यद्येवम्, त्रपुणी इत्यादावप्येवमेव न भविष्यति, नार्थोऽनेन, न चान्यः प्रत्ययान्तो व्यावर्त्यः सम्भवति । तथा हि, षड्विधाः प्रत्ययाः--सनादयः, कृतः तिङः, सुपः, स्त्रीप्रत्ययाः,तद्धिताश्चेति । प्रतिपदिककार्यमपि 'ह्रस्वो नपुंसके प्रातिपदिकस्य' 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वम्, 'ङ्याप्प्रातिपदिकात्' इति प्रत्ययविधिश्च । तच्च कृत्तद्धितान्तस्येष्यत थएव । सन्प्रभृतिषु येषां तावद्धातुत्वं तेषामधातुरित्येव प्रतिषेधः, श्यन्शबादीनामपि विकरणानां लिङ्गाभावः, संख्याकर्माद्यभावोऽपत्याद्यर्थायोगश्च । एवं तिङन्तानाम्, यथा-यः पचतिरूपम्, तस्यापत्यम् इति रूपबन्तत्वात्सत्यपि प्रातिपदिकत्वे । ये तु सम्भवन्ति स्वार्थिकास्ते 'तिङश्च' इति ज्ञापकान्न भवन्ति । स्त्रीप्रत्ययानां तु विरुद्धेन नपुंसकेनायोग एव, कुमारीपुत्र इत्यत्र 'गोस्त्रियोः' इति ह्रस्वः स्यादिति चेद् ? अथ क्रियमाणेऽपि प्रतिषेधे राजकुमारीपुत्र इत्यत्र कस्मान्न भवति, अत्र हि समासत्वादस्त्येव प्रातिपदिकत्वम् ? अतो यस्तत्र परिहारः, स एवात्रापि भविष्यति । प्रत्ययविधिस्त्विष्यत एव । 'ङ्याप्प्रातिपदिकात्' इति सुबन्तस्य ह्रस्वत्वं न प्राप्नोतीत्युक्तमेव । सुपां चाप्रसङ्गः; तद्विधानदशायां तदन्तस्यासम्भवात्, लिङ्गाभावात् स्त्रीप्रत्ययाभावः । तद्धितास्त्विष्यन्त एव 'समर्थानां प्रथमाद्वा' इति । अतो नार्थोऽनेन, उत्तरसूत्रे तद्धितग्रहणेन च, उच्यते; 'बहुषु बहुवचनम्' 'कर्मणि द्वितीया' इत्यादिनां स्वादिविधिवाक्येन भिन्नवाक्यतापक्षे सर्वेभ्यः प्रत्ययान्तेभ्यः स्वादयः स्युः यथा-अव्ययेभ्यः । विकरणान्ताच्च स्वार्थिकास्तद्धिताः स्युरेवेत्यतोऽप्रत्ययग्रहणं कर्त्तव्यं तद्धितग्रहणं च । काण्डे कुड्य इत्येतयोस्तु प्रत्युदाहरणत्वम् 'हस्वो नपुंसके' इत्यत्रोपपादयिष्यामः ।
अथ प्रत्यायमात्रस्य संज्ञा कस्मान्न भविष्यति, सत्यां हि संज्ञायामुक्तेन न्यायेन बहुपटव इत्यादौ स्वादयः स्युः ? उच्यते-व्यपदेशिवद्भावेन प्रत्ययान्तवदप्रत्यय इति प्रतिषेधो भविष्यति । यद्येवम्, कृत्तद्धितमात्रेऽपि विधिसम्भवात् उत्तरसूत्रे तदन्तविधिर्न भवति । अत्र परिहारं वक्ष्यामः ।।

कृत्तद्धितसमासाश्च ।। 1.2.46 ।।
कृतो विहितास्तदादय इति वेदितव्यम् । अत्र हि कृद्ग्रहणपरिभाषा नोपतिष्ठते, तेन मूलकेनोपदंशमिति वाक्यस्य संज्ञा न भवति । मध्येऽपवादन्यायेन ह्यप्रत्यय इति निषेधः कृद्ग्रहणेन बाध्यते, न तु समासग्रहणेन कृतो नियमः । संज्ञाविधौ प्रत्ययग्रहणेऽप्यत्र तदन्तविधिर्भवतीत्यत्रोपपत्तिमाह--अप्रत्यय इति । प्रत्ययान्तस्य निषेधो न केवलस्य प्रत्ययस्येत्याश्रित्यैतदुच्यते । अप्राप्तप्रापणं विधिः, न च तदा कृत्तद्धितमात्रस्याप्राप्ता संज्ञा तदन्तस्यत्वप्राप्तेति विध्यर्थत्वात्तदन्तस्यैव ग्रहणम् । येषां तु पूर्वत्र प्रत्ययमात्रस्यापि निषेधस्तेषामर्थवद्ग्रहणानेवृत्तेरर्थवद्विशेषस्य तदन्तस्य ग्रहणं समासग्रहणमनर्थकम्, अर्थवत्त्वात्पूर्वेणैव संज्ञासिद्धेरित्यत आह-अर्थवत्समुदायानामिति । कर्मणि षष्ठी । नियमः = व्यावृत्तिः । ननु सुराजा अतिराजेत्यादौ अन्तर्वर्त्तिन्यां विभक्तौ लुप्तायां समुदायस्य संज्ञा, तामपेक्ष्य सोरुत्पन्नस्य हल्ङ्यादिलोपे तस्यामवस्थायां नलोपार्थं या संज्ञा प्राप्नोति तस्याः प्रत्ययलक्षणेनाप्रत्यय इति निषेधे प्राप्ते विध्यर्थमेतत्स्यात् ? ज्ञापकात्सिद्धम्, 'न ङिसंबुद्ध्योः' इति निषेधो ज्ञापयति-न प्रत्ययलक्षणेन निषेध इति; अन्यथा उक्तेन न्यायेन हे राजन्नित्यादौ नलोपप्रसङ्गात् । नैतदस्ति ज्ञापकम्; है सुराजन्नित्यादौ यत्र समासग्रहणेन संज्ञा विहिता तत्र नलोपप्रसङ्गे निषेधः स्याद् । एवं तर्ह्यत्राप्यप्रत्यय इत्यनुवर्त्तते, तेन प्रत्ययान्ते समासे विध्यर्थत्वासंभवान्नियमार्थमेव समासग्रहणम् ।
यद्वा-अनुद्दिश्य प्रयोजनविशेषं न कृत्संज्ञा प्रवर्तते, तस्यां तु सत्यां यस्यामवस्थायां यत्कार्यं प्राप्नोति तस्यां तद्भवति, न प्रतिकार्यमावर्त्तनीया संज्ञेत्ययं पक्ष आश्रीयते । अत्र च पक्षे सुबुत्पत्त्यर्थं नलोपार्थं च समाससंज्ञानन्तरमेव सकृत्संज्ञा प्रवर्त्तते, न तु नलोपदशायामिति विध्यर्थत्वासम्भवान्नियमार्थमेव समासग्रहणम् । तुल्यजातीयस्य च नियमेन व्यावृत्तिः, कश्च तुल्यजातीयो यस्यार्थवत्समुदायस्य पूर्वो भागस्तावत्पदम्, यश्चैव हि सुबन्तानां समासः-राजपुरुष इति, यश्चैव हि तिङन्तानाम्--"आख्यतमाख्यातेन क्रियासातत्ये', अश्नीतपिबता, खादतमोदतेति, यश्च सुबन्तानां तिङन्तानां च-'जहि कर्मणा बहुलमाभीक्ष्ण्ये', जहिजोडः, जहिशकट इति, यश्च सुबन्तानां प्रातिपदिकानां च--गतिकारकोपपदानामिति, वस्त्रक्रीति निष्कक्रीतीति, सर्वत्रात्र पूर्वो भागस्तावत्पदम् । अतः स तुल्यजातीयो नियमेन व्यावर्त्यते, तेन बहुपटव इत्यत्र जसन्तस्य पुरस्ताद्बहुचि कृते नोत्तरत्र संघाते पूर्वो भागः पदमित्यसति नियमे ईषदसमाप्तिलक्षणेनार्थेनार्थवत्त्वात्सत्यां संज्ञायां पूर्वोत्पन्नस्य जसः 'सुपो धातु' इति लुकि कृते चित्स्वरोऽपि भवन् 'चतिः सप्रकृतेर्बहुजकजर्थमिति' पटुशब्दोकारस्य भवति । पूर्वोत्पन्नस्य तु जसोऽवस्थाने तस्यैव स्यात् । वाक्यस्यार्थवत इति । प्रत्येकं पदैरप्रतीतस्य संसर्गस्य वाक्येन प्रतीयमानत्वात्तस्यार्थवत्त्वम्, समुदायाच्च प्रत्ययस्याविधानान्नास्त्यप्रत्यय इति निषेधः । न च 'नास्ति यस्मिन् प्रत्ययः सोऽप्रत्ययः' इति बहुव्रीहिः शक्य आश्रयितुम्; बहुपटव इत्यत्रापि नि,ेधप्रसङ्गात् ।।
ह्रस्वो नपुंसके प्रातिपदिकस्य ।। 1.2.47 ।।
सूत्रे नपुंसकशब्देन तद्वद्द्रव्यं विवक्षितं न लिङ्गमात्रमित्याह-नपुंसकलिङ्गेऽर्थे इति । नपुंसकं लिङ्गमस्येति बहुव्रीहिः ।
ग्रामणीरिति । 'सत्सूदिष' इत्यादिना क्विप् । प्रातिपदिकस्येति किमिति । नपुंसकलिङ्गं द्रव्यस्यैव धर्मः, द्रव्यवाचित्वं च प्रातिपदिकस्यैव, न सुबन्तस्य; शक्तिसङ्ख्याप्राधान्यात् । न धातोस्तिङन्तस्य वाक्यस्य वा; क्रियाप्रधानत्वात् । वर्णास्त्वनर्थकाः, स्त्रीप्रत्ययानां तु विरुद्धेन नपुंसकेनायोग इति प्रश्नः । काण्डे कुण्ड्ये इति । अत्र 'अप्रत्ययः' इति निषेधात् प्रतिपदिकत्वं नास्ति । ननु च एकादेशः पूर्वं प्रत्यन्तवद्भावात् प्रातिपदिकग्रहणेन गृह्यते इति क्रियमाणेऽपि प्रातिपदिकग्रहणे ह्रस्वत्वं स्यादेवात् आह-प्रातिपदिकग्रहणसामर्थ्यादिति । कथं पुन सामर्थ्यम्, यावता यत्रान्तवद्भावो नास्ति-वाः वारी त्रपुणी इत्यादौ, तद्व्यावर्त्यं स्यात् ? अथ शक्तिसङ्ख्याप्रधानत्वात् तत्र नपुंसकेनायोगः, काण्डे इत्यादावपि एवमपे न भविष्यति । न ह्यन्तवद्भावेन प्रातिपदिकत्वे सत्यपि शक्तिसङ्ख्याप्राधान्यं हीयते । एवं मन्यते-'असति प्रातिपदिकग्रहणे नपुंसकवृत्तेरनपुंसकवृत्तेश्च य एकादेशः स नपुंसकवृत्तिग्रहणेन गृह्यते नपुंसक इति स्यात्प्रसङ्गः । प्रातिपदिकग्रहणे तु मुख्यप्रातिपदिकग्रहणार्थत्वाद् अतिदिष्टप्रातिपदिकत्वस्य ह्रस्वस्याभावः' इति । उत्तार्थं च प्रातिपदिकग्रहणम् । इह वनाय, वनाभ्याम्, वनार्थम्, वनेभ्य इति ह्रस्वो न भवति, बहिरङ्गयोर्दीर्घत्वयोरसिद्धत्वात् । काण्डीभूतमित्यत्र पूर्वं नपुंसकत्वेऽपि च्व्यन्तदशायाम् अव्ययत्वेनालिङ्गत्वाद् ह्रस्वाभावः ।।
गोस्त्रियोरुपसर्जनस्य ।। 1.2.48 ।।
स्त्रीति प्रत्ययग्रहणमिति । अत्र हेतुमाह-स्वरितत्वादिति । 'स्वरितेनाधिकारः' इत्यस्य यत्र स्वरितत्वं प्रतिज्ञायते तत्र तदधिकारो ग्राह्य इत्ययमप्यर्थः । इह च स्त्रीग्रहणं स्वर्यते, तेन स्त्रियामित्यधिकृत्य विहितानां टाबादीनां ग्रहणं भवति; नार्थस्य, नापि स्वरूपस्य । क्तिन्नादीनां तु ह्रस्वभावित्वाभावादग्रहणम् । उपसर्जनग्रहणं तयोर्विशेषणमिति । प्रत्येकं सम्बन्धात्तु द्विवचनं न भवतीत्याह-गोरुपसर्जनस्येत्यादि । स्त्रीप्रत्ययान्तस्येति पाठः । पारिभाषिकं ह्यत्रोपसर्जनं गृह्यते । न च स्त्रीप्रत्ययमात्रस्य पारिभाषिकोपसर्जनत्वसम्भवः । ताभ्यामिति । उपसर्जनेन गोशब्देन स्त्रीप्रत्ययान्तेन च यदि ताभ्यां तदन्तविधिर्न विज्ञायते, तदा उपसर्जनस्य गोशब्दस्य स्त्रीप्रत्ययान्तस्य च प्रातिपदिकस्य ह्रस्व इत्यर्थः स्यात्; ततश्च गोकुलं राजकुमारीपुत्र इत्यत्रापि स्यादिति भावः । इह तु 'कुमारीपुत्रः' इत्यत्र प्रातिपदिकत्वादेवाप्रसङ्गः । उपसर्जनस्त्रीप्रत्ययान्तान्तस्येति पाठः । उपसर्जनं यत् स्त्रीप्रत्ययान्तं तदन्तस्येत्यर्थः । यदि तु लौकिकेनोपसर्जनेन स्त्रीप्रत्ययमात्रं विशेष्य पश्चात्तेन प्रातिपदिकस्य तदन्तविधिर्िविज्ञायते--उपसर्जनं यः स्त्रीप्रत्ययस्तदन्तस्य प्रातिपदिकस्येति, ततो हरीतक्यः फलानीत्यत्रापि स्यात्; स्त्रीप्रत्ययार्थस्य फलं प्रत्युपसर्जनत्वात्तद्धितान्तत्वेन प्रातिपदिकत्वाच्च । अत एवमेवाश्रयणीयम्--स्त्रीप्रत्ययान्तं यच्छास्त्रीयमुपसर्जनं तदन्तस्य प्रातिपदिकस्येति । निष्कौशाम्बिरिति । कौशम्बीत्येकविभक्तीत्युपसर्जनं स्त्रीः त्ययान्तं तदन्तं समासप्रातिपदिकम् । अथेह कथं ह्रस्वत्वम् अतिराजकुमारिरिति, यावता कुमारशब्दान् ङीब्विहतो न तु राजकुमारशब्दात् ? सत्यम्; अनुपर्जने स्त्रीप्रत्यये तदादिनियमो नास्ति । अथ गोशब्देन स्त्रीप्रत्ययान्तेन च प्रातिपदिकस्य तदन्तविधौ सत्यपि गोकुलं राजकुमारीपुत्र इत्यत्र कस्मान्न भवति, यावता 'येन विधिस्तदन्तस्य' इत्यत्र 'स्वं

रूपम्' इत्यनुवर्तते, ततश्च येन तदन्तविधिः तत्स्वरूपस्यापि ग्रहणेन भाव्यम् ? एवं तर्हि गोशब्देन प्रातिपदिकस्य विशेषणसामर्थ्यात् केवलस्य न भवति; अन्यथा गोशब्दस्यैवोपसर्जनस्य ह्रस्वं विदध्याद्, 'येन विधिस्तदन्तस्य' इत्यत्र 'स्वंरुपम्' इति निवर्त्यम् । व्यपदेशिवद्भावोऽपि प्रातिपदिके नास्ति । राजकुमारीपुत्र इत्यत्र तु परिहारः--शास्त्रीयमप्युपसर्जनं सति सम्भवेऽन्वर्थमेवाप्रधानमुपसर्जनमिति, प्रधानं चापेक्ष्याप्रधानं भवति । स्त्रीप्रत्ययान्तस्य च प्रातिपदिकत्वं समासमन्तरेणानुपपन्नम्, समासश्चावयवात्मकः; द्वयं चात्र संनिहितम्-प्रधानमप्रधानमिति; तत्रैवं विज्ञास्यामः-यत् स्त्रीप्रत्ययान्तं समासप्रातिपदिकं तदन्तर्भूतमेवापेक्ष्य स्त्रीप्रत्ययान्तस्याप्राधान्यमिति । इह तु तत्रानन्तर्भूतं पुत्रमपेक्ष्याप्राधान्यमिति न भवति ह्रस्वः ।

ईयस इत्यादि । ईयसुन्नन्ताद्यः स्त्रीप्रत्ययो विहितस्तदन्तान्तस्येत्यर्थः । बहुश्रेयसीति । 'प्रशस्यस्य श्रः' ङीप्, बह्व्यः श्रेयस्योऽस्येति बहुव्रीहिः, 'नद्यृतश्च' इति कप्, 'ईयसश्च' इति प्रतिषेधः, पुंस्यपि सोर्हल्ङ्यादिलोपः । बहुव्रीहेरिति किम् ? अतिश्रेयसिः ।।

लुक्तद्धितलुकि ।। 1.2.49 ।।

स्त्रीग्रहणमनुवर्तते इति । न तु गोग्रहणम्, कुतः ? प्रत्ययादर्शनस्य लुक्संज्ञाविधानाद् गोशब्दस्याव्युत्पन्नत्वाद् व्युत्पत्तिपक्षेऽप्यस्वरितत्वात् । उपसर्जनस्य चेति । 'अनुवर्त्तते' इत्यपेक्षते । लौकिकं चात्रोपसर्जनं गृह्यते, न शास्त्रीयम् । पूर्वेण ह्रस्वत्वे प्राप्ते इति क्वचित्पठ्यते, तत्र क्वचिदिति विशेषः । पूर्वसूत्रेण हि शास्त्रीयमुपसर्जनं गृहीतं तस्यावकाशो यत्र न तद्धितलुग्निष्कौशाम्बिरिति; अस्यावकाशो यत्र शास्त्रीयमुपसर्जनम्-आमलकमिति । तद्धितलुक्च यथा--पञ्चेन्द्र इति, अत्र हि समासार्थे नानाविभक्तिके पञ्चेन्द्राणीत्येकविभक्तिकमिति अस्त्युपसर्जनत्वम्; तत्रोभयप्रसङ्गे परत्वादयमेव लुग् ह्रस्वं बाधत इत्यर्थः । केचित्त्वस्मादेव ग्रन्थात् पूर्वसूत्रेऽपि लौकिकस्योपर्जनस्य ग्रहणं मन्यन्ते, तेषां हरीतक्यः फलानि इति लुब्विषये ह्रस्वप्रसङ्ग इत्युक्तम् । स्यादेवम्--लुपि युक्तवदिति शब्दार्थयोरप्यतिदेशः प्रकृत्यर्थस्य यल्लिङ्गं यश्च तदभिधायी प्रत्ययः तयोर्द्वयोरतिदेशः, तत्रौपदेशिकस्य ह्रस्वत्व आतिदेशिकस्य श्रवणं भविष्यतीति ? यद्येवम्, युवतिरिव पुरुषः 'लुम् मुनष्ये' युवतिः, द्वौ तिशब्दौ श्रूयेयाताम्; तस्मात् 'लुब्योगाप्रख्यानात्' इति लुपः प्रत्याख्यानेन वात्र परिहारो वाच्यः, शास्त्रीयं वोपसर्जनं ग्राह्यम् । ग्रन्थस्य च व्याख्यात एवार्थः ।

अभावरूपेण लुका पौर्वाभर्यासम्भवाल्लुकीति सत्सप्तमीत्याह-लुकि सतीति । पञ्चन्द्र इति । 'तद्धितार्थ' इति समासः,'सास्य देवता' इत्यणः 'द्विगोर्लुगनपत्ये' इति लुक्, 'इन्द्रवरुण' इत्यादिना विहितस्य ङीषोऽनेन लुक्, सन्नियोगविशिष्टानामन्यतराभाव इत्यानुको निवृत्तिः । पञ्चशष्कुल इति । 'तेन क्रीतम्' इत्यार्हीयस्य ठकः 'अध्यर्द्धपूर्व' इति लुक् । आमलकमिति । 'नित्यं वृद्धशरादिभ्यः' इति मयटः 'फले लुक्' । बदरीकुवलीशब्दाभायाम् 'अनुदात्तादेश्च' इति अञ् । शष्कुल्यादयो गौरादिङीषन्ताः ।

अवन्तीत्यादि । अवन्ति-कुन्ति-शब्दाभ्यामपत्ये ' वृद्धेत्कोसलाजादाञ्ञ्यङ्' । कुरोः 'कुरुनादिभ्यो ण्यः', स्त्रियामवन्तीति लुक्, कुरुशब्दाद् 'ऊङुतः' इत्युङ् । इतराभ्याम् 'इतो मनुष्यजातेः' इति ङीष् । अत्रापत्यलक्षणा जातिः स्त्रीप्रत्ययान्तेन प्राधान्येनाभिधीयते ।।

इद् गोण्याः ।। 1.2.50 ।।

पञ्चगोणिरिति । गोणिशब्दः परिमाणवचनः, आवपनवचनश्च; तत्राद्यात् 'प्राग्वतेष्ठञ्', द्वितीयादार्हीयष्ठक् । तयोः पूर्वल्लुक् ।

इदिति योगाविभाग इति । इहेद्ग्रहणमनर्थकम्, गोण्या इत्येवास्तु, ह्रस्व इत्येव, लुकस्तु वचनासामर्थ्यादननुवृत्तिः ? तदेतदिद्ग्रहणमेव लिङ्गं योगविभागस्य । यदि योगविभागः क्रियते, सर्वत्रेत्वं प्राप्नोति, तत्राह-स चेति । यदि सर्वत्र स्याद् गोणीग्रहणमनर्थकं स्यादिति भावः । ननु तद्धितलुकि लुगप्युक्तः, इत्वं चेति, तयोर्विकल्पप्रसङ्गे नित्यमित्वमेव यथा स्यादित्येवमर्थं गोणीग्रहणं स्यात्, तत्कथं ततो विशिष्टविषयत्वं योगविभागस्य ? उच्यते; एक एव तावद्योगः सूत्रकारेण पठितः, तत्सामर्थ्याद् विभागसंस्कारोऽप्यनुवर्त्तते, अविभक्तश्च योगो विशिष्टविषयः । इद्ग्रहणसामर्थ्यात्क्रियमाणो विभागो विशिष्टविषय एव कल्प्यते; अत एवोच्यते--योगविभागादिष्टसिद्धिरिति । स पुनर्विशिष्टो विषयो व्याख्यानादवसेयः । तपरकरणं तत्कालार्थम्--दीर्घस्य दीर्घो मा भूद् । वचनं तु लुग्घ्रस्वबाधनार्थं स्याद् । असति च तकारे, प्राप्तप्रतिषिद्ध ईकार एवं प्रतिप्रसूतः स्याद्, न त्वपूर्व इकारो विहितः स्याद् इति भाव्यमानत्वमेव न स्यात् ।।

लुपि युक्तवद्व्यक्तिचवने ।। 1.2.51 ।।

अभिधेयवल्लिङ्गवचनयोः प्राप्तयोरयमारम्भः । अभावरूपस्य लुपो लिङ्गसङ्ख्यातिदेशासम्भवादाह--लुपीति लुप्संज्ञेत्यादि । क्वचित्तु सप्तम्यन्तो लुप्शब्द उपादीयते तत्रापि प्रकृत्यर्थ एवाभिधातुमिष्टः । सप्तम्युपादानं तु सूत्रे पठितत्वाद्, यथा-मताविति मत्वर्थ उच्यत इति । युक्तवदिति निष्ठाप्रत्येनेत्यादि । अत्र हेतुमाह--स हीति । युनक्ति सम्बध्नाति । यद्यपि प्रत्ययार्थोऽपि प्रकृत्यर्थमात्मना युनक्ति, तथापि न तस्येह ग्रहणम्; आनर्थक्याद्, न हि तस्यैव लिङ्गसङ्ख्ये तस्यैव विधातव्ये ।

अथ वेत्यादि । पूर्वं 'युजिर्योगे' इत्यस्य क्तवत्वन्तस्य षष्ठीसमासो दर्शतः, इदानीं तु तस्यैव धातोः क्तान्तस्य वतिनिर्देशः, असमासश्चेति प्रदश्यते । युक्तः प्रकृत्यर्थ इति । अत्र हेतुः--प्रत्ययार्थेन सम्बद्ध इति । अस्मिन्नपि पक्षे पूर्ववदेव प्रत्ययार्थस्याग्रहणम् । सप्तम्यर्थे वतिरिति । 'लुपि' इति प्रतियोगिनि सप्तमी निर्द्देशात् सप्तम्यर्थे वर्तमानादिवार्थे वतिरित्यर्थः । व्यक्तिशब्द आविर्भावादिकेऽप्यर्थे वर्तते । वचनशब्दोऽपि भीमसेनो भीम इतिवद्, एकवचनादिशब्दानां थएकदेशप्रयोगोऽपि सम्भाव्येत, तस्य च ग्रहणे 'पञ्चालानां निवासः' इति वाक्यावस्थायां षष्ठीदर्शनात्तस्या एवातिदेशः स्यात्; कुरुपञ्चाला इति च द्वन्द्वे वाक्या वस्थायामतिदिष्टस्य वचनस्य लुकि समुदायाद् बहुवचनं न स्यात्, ततस्तत्सम्प्रत्ययो मा भूदित्याह--व्यक्तिवचने इति चेत्यादि । पूर्वाचार्यनिर्देशाश्रयणे कारणमाह -तदीयमेवेत्यादि । कुत इत्यत आह-तथा चेत्यादि । न हि स्वकृतमेव स्वयं प्रत्याचष्ट इति युक्तम्;

'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्' इति न्यायादिति भावः ।

पञ्चालाः क्षत्रिया इति । पञ्चालस्यापत्यानि बहूनि 'जनपदशब्दात् क्षत्रियादञ्' 'ते तद्राजाः', 'तद्राजस्य बहुषु' । तेषां निवासो जनपद इति । अस्य वक्ष्यमाणेन 'पञ्चालाः' इत्यनेन सम्बन्धः । 'तस्य निवास' इत्यणः 'जनपदे लुप्' । कुरव इत्यादि । 'कुरवः क्षत्रियाः' इत्यादिकं तु पूर्वानुसारेण गम्यमानत्वान्नोक्तम् । कुरुशब्दादपत्ये 'कुरुनादिभ्यो ण्यः' मगधादिभ्यः 'द्वयञ्मगध' इत्यण्, शेषं पूर्ववत् ।

लुपीति किमिति । तद्धितोऽनुवृत्तः साहचर्यादर्थमुपस्थापयिष्यतीति प्रश्नः । लुकि मा भूदिति । अन्यथा 'तद्धितलुकि' इत्यनुवृत्तेस्तत्रैव स्यादिति भावः । लवणः सूप इति । 'संसृष्टे''लवणाल्लुक्' । व्यक्तिवचने इति किमिति । युक्तवदिति क्तान्ताद्वतिरेवाश्रयिष्यते, षष्ठीनिर्द्देशो वा करिष्यते इति मन्यते । शिरीषाणामदूरभाव इत्यादि । अरीहणादिषु वराहादिषु कुमुदादिषु शिरीषशब्दस्य पाठाद् वुञ्छणादिसूत्रेण वञादयोऽस्माद्भवन्ति, तेषां च विशेषविहितत्वाल्लुका न भवितव्यम्, सत्यम्; 'औत्सर्गिकोऽपि तत इष्यते' इति वक्ष्यति, तस्य वरणादिदर्शनाल्लुप् । असति व्यक्तिवचनग्रहणे शिरीषेषु यद्वनस्पतित्वं तस्.यापि ग्रामेऽतिदेशः स्यात्, ततश्च णत्वं प्राप्नोति; णत्वविधौ विफली वनस्पतिरिति नाश्रीयते विशेषः । अत एव वृक्षवृत्तेर्णत्वं भवत्येव । शिरीषवनमिति । ननु च ग्रामेऽपि वर्तमानो गुणभूतं वनस्पतित्वमाहेति णत्वप्रसङ्गः, न चात्र किञ्चित्प्रधानाश्रयं कार्यमस्ति येन गुणः स्वकार्यं नारभेत । न च व्यक्तिवचनग्रहणस्य वैयर्थ्यम्, असति हि तस्मिन्प्रकृत्यर्थगतस्य व्यतिरेकस्याप्यतिदेशात् षष्ठी प्रसज्येत; सति तु तस्मिन् सङ्ख्यामात्रातिदेशे व्यतिरेकसहितायाः सङ्ख्याया अनतिदेशाद् ? नायं दोषः; एवं तर्हि णत्वविधौ प्रधानवनस्पतिग्रहणाद् अत्र तदभावः ।

हरीतक्यः फलानीति । हरीतकीशब्दाद् गौरादिङीषन्ताद् 'अनुदात्तादेश्च' इत्यञः 'हरीतक्यादिभ्यश्च' इति लुप् । अत्र व्यक्तिरेव युक्तवद्भवति, वचनं त्वभिधेयवदेव । खलतिकं वनानीति । खलतिकशब्दो वरणादिः, समासे उत्तर पदस्य बहुवचनस्य लुपो नियमार्थमेतद्-लुबर्थस्य बहुत्वातिदेशः समासे यदि भवति उत्तरपदस्यैवेति, मधुरापञ्चालाः; इह न भवति-पञ्चालमधुरे इति, बहुवचनस्येति वचनाद् । द्वित्वातिदेशः पूर्वपदस्यापि भवति-गोदौ च ग्रामः मधुरा च गोदमधुरा इति ।।

विशेषणानां चाजातेः ।।1.2.52 ।।

पूर्वं प्रकृत्यर्थगतयोर्लिङ्गसङ्ख्ययोर्लुबर्थेऽतिदेशः कृतः, न तु लुबन्ते शब्दे इति तत्र वर्तमानानां विशेषणानां सिद्ध एव युक्तवद्भावः । वचनं तु जातिप्रतिषेधार्थम् । अथ व्यधिकरणानां विध्यर्थं कस्मान्न भवति, ब्रह्मदत्तस्य पञ्चाला इति ? 'तत्पुरुषः समासनाधिकरणः' इत्यतः समानाधिकरणानुवृत्तेः । गोदाविति । गोदौ ह्रदौ वरणादिः, ग्रामजनपदशब्दौ जातिवाचिनौ ताभ्यां लुबर्थो जातिरूपेणोच्यते । जात्यर्थस्य चेत्यादि । जातिरूपस्य चार्थस्य, न जातिवाचिनः शब्दस्येत्यर्थः । तेन किं सिद्धं भवतीत्याह--तेनेति । द्वारग्रहणेनैतद्दर्शयति --जातौ प्रक्रान्तायां यद्विशेषणमुपनिपतितं तज्जातिमेव साक्षाद्विशिनष्टि, तद्द्वारेण तु लुबर्थो विशिष्टः प्रतीयते; तत्र विशेषणविषेष्यभावं प्रति कामचार इति रमणीयादीनां जात्युपनिपाते युक्तवद्भावो न भवति; लुबर्थो पनिपाते तु भवति । यद्येवम्, नार्थोऽनेन, लुपोऽन्यत्राप्ययं प्रकारो दृष्टः, यथा--बदरी सूक्ष्मकण्टका मधुरावृक्ष इति, मधुरादीनां बदर्युपनिपाते तल्लिङ्गसङ्ख्यायोगः, वृक्षोपनिपाते वृक्षलिङ्गसङ्ख्योगः, वृक्षस्य च नियतलिङ्गत ? एवं तर्हि यत्तत्रतत्रोच्यते--गुणवचनानां हि शब्दानां नाश्रयतो लिङ्गवचनानि भवन्तीति, तदनेन क्रियते । विशेषणानां गुणवचनानामित्यर्थः । युक्तवद्व्यक्तिवचने । आश्रयवल्लिङ्गसंख्ये इत्यर्थः । यदा तु जातिविशेषणं तदा नेति । पदसंस्कारपक्षे च वाचनिकमेतत्; पदे हि पदान्तरनिरपेक्षे संस्क्रियमाणे लिङ्गसर्वनामनपुंसकं वस्त्वन्तरानपेक्षमेकत्वं च प्राप्तमिति शुक्लं पटा इति प्राप्ते भाविनो बहिरङ्गस्याश्रयस्य लिङ्गसंख्ये विधीयेते । वाक्यसंकारे त्वयमनुबाद एव; आश्रयविशेषनिष्ठत्वेन विशेषणानामपि तल्लिङ्गसंख्ययोरसिद्धत्वात् ।

मनुष्यलुपीति । मुनष्यलक्षणे लुबर्थे विशेषणानां प्रतिषेधः । लुबन्तस्य तु भवत्येव-चञ्चाभिरूप इति, तृणपुरुषश्चञ्चा तत्सदृशो मनुष्यश्चञ्चा 'संज्ञायाम्' इति कन्, 'लुम्मनुष्ये' इति लुप् । चर्मविकारविशेषो वर्घ्रिका ।।

तदशिष्यं संज्ञाप्रमाणत्वात् ।। 1.2.53 ।।

संज्ञाप्रमाणत्वादिति । प्रमाणानाँ हि प्रमाणत्वं प्रतिपादकत्वं स्वार्थप्रत्यायनलक्षणम् । एतच्च सर्वेषामेव शब्दानामस्ति, न संज्ञाशब्दानामेव । उच्यते चेदं तत्र विशेषो विज्ञायत इत्याह--संज्ञाशब्दा हीत्यादि । ये संज्ञाशब्दास्ते नानालिङ्गसंख्या अपि स्वाभिधेयगतलिङ्गसंख्यापेक्षया भिन्नलिङ्गसंख्या अपि प्रमाणम्, स्वार्थस्य प्रतिपादका इत्यर्थः । भवतु संज्ञाशब्दानामेवंविधं प्रमाणत्वम्, किमायातं यौगिकानां पञ्चालादिशब्दानामित्य आह-पञ्चाला वरणा इत्यादि । तदनेन पक्षधर्मत्वं हेतोरुक्तम्, पूर्वं तु दृष्टान्तगतो हेतुर्व्याख्यातः । दृष्टान्तमाह--यथेति । युक्तवद्भावमारभमाणोऽपि नात्र कञ्चिद्यत्नं करोति, तदवश्यमयं शब्दस्वभाव एवाश्रयणीयः । कश्चिद्धि शब्दः स्वभावात् समुदायसंख्यामभिधत्ते, कश्चिदवयवसंख्याम्, यथा-वनं वृक्षा इति । एवं लिङ्गेऽपि द्रष्टव्यम् ।।

लुब्योगाप्रख्यानात् ।। 1.2.54 ।।

किं कारणमिति । 'निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्' इति प्रथमा द्वितीया वा । तथा च योगाप्रख्यानादित्युत्तरोपपत्तिः । योगः=जनपदादेः क्षत्रियादिभिः सम्बन्धः, तस्याप्रख्यानादनुपलब्धेरित्यर्थः । तदाह--न हीति । एतदेव विवृणोति-नैतदिति, संज्ञा एता इति । यद्यपि संज्ञाशब्दा अपि पङ्कजादयोऽपेक्षितप्रवृत्तिनिमित्ताः सन्ति, तथापीह प्रकरणादनेपेक्षितप्रवृत्तिनिमित्ता अपीति बोद्धव्यम् । अत एवाह-तस्मादत्रेत्यादि । ननु योगाप्रख्यानेऽपि तद्धित उत्पद्यते, तद्यथा--'कम्बलाच्च संज्ञायाम्' कम्बल्यमूर्णापलशतमिति, सत्यम्; यत्र रूपे विशेषोऽस्ति । ननु च संज्ञाप्रमाणत्वादिति पञ्चालादिशब्दानामयौगिकत्वमुपपादितमित्यर्थाल्लुबपि प्रत्याख्यात् एव, किमनेन क्रियते ? उच्यते; संज्ञाप्रमाणत्वादित्यनेन दृष्टान्तगतो हेतुः शब्देनोक्तः

तस्यैव त्वर्थात्पञ्चालादिगतत्वेन प्रतीयमानस्यासिद्धिमाशङ्कय योगाप्रख्यानादिति यौगिकत्वामपाकुर्वन् हेतुमेव समर्थयते ।।

योगप्रमाणे च तदभावे दर्शनं स्यात् ।। 1.2.55 ।।

पञ्चालादय इत्यादि । पूर्वयोगस्याप्रतिभास उक्तः, यस्तु तमपजानीते तं प्रत्यनेनानिष्टमापद्यत इति दर्शयति-योगप्रमाणे हीति । 'हि' शब्दो हेत्वर्थे प्रयुञ्जानः सूत्रे 'च' शब्दो हेतौ प्रयुक्त इति दर्शयति । एतदेव व्याचष्टे-यदीति, अदर्शनमयोगः चस्यादिति । दर्शनं ज्ञानं तच्च प्रयोगस्योच्चारणस्य फलम्, अतः फलाभावेन हेत्वभावो विवक्षित इत्याचष्टे । योगनिमित्तको हि योगाभावेन प्रदर्शनं युज्यते, यथा-दण्डीशब्द इति भावः । ननु भूतपूर्वमपि निमित्तं भवति, ततश्च सम्प्रति वरणादियोगाभावेऽपि भूतपूर्वः स एव निमित्तं भविष्यति, नैतदेवम्; भूतपूर्वनिमित्तो हि व्यपदेशो गौणः स्याद्, न चायं गौणः; पदान्तरस्य प्रयोगमन्तरेणाऽपि प्रतीयमानत्वात् । किञ्च यौगिकत्वे पुरुषान्तरसंबंधनिबंधनोऽपि व्यपदेशः कस्मान्न प्रवर्तते ? विपर्ययो वा कस्मान्न भवति ? देशसम्बन्धाद्राजसु पञ्चालशब्द इत्यतोऽक्षादिशब्दवदनेकार्थ एवायं पञ्चालादिशब्दः ।।

प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् ।। 1.2.56 ।।

अर्थवचनमिति । कर्मणि षष्ठ्याः समासः । ननु च प्रधानप्रत्यययोः कर्त्रोर्निर्देशादुभयप्राप्तावित्यनेनात्र षष्ठी, ततश्च 'कर्मणि च' इति निषेधः प्राप्नोति, नैष दोषः ; प्रधानप्रत्यययोरत्र करणत्वं विवक्षितम् । कस्तर्हि कर्ता, पुरुषः, समुदायो वा प्रधानोपसर्जनयोः प्रकृतिप्रत्यययोश्च ? एतदुक्तं भवति-प्रधानप्रत्ययाभ्यां करणाभ्यां पुरुषेण समुदायेन वा यदर्थस्य वचनशब्देन सह 'कर्तृकरणे कृता बहुलम्', 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इतिच समासः । ननु च प्रत्ययोऽपि प्रकृत्यपेक्षया प्रधानम्, कस्माद्भेदेनोपादीयते ? उच्यते; यदा 'प्रकृतिः प्रत्ययार्थं प्रति विशेषणतया स्वार्थमभिधत्ते' इति सिद्धं भवति, तदा प्रत्ययस्य प्राधान्यम्, तदेवेदानीं परिभाष्यत िति पूर्वाचार्यैस्तावत्प्रत्ययो भेदेन निर्दिष्टः-प्रधानोपसर्जने, प्रकृतिप्रत्ययाविति, ततश्च तल्लक्षणनिराकरणे प्रत्ययोऽपि भेदेनोपादेयः । अश्क्यत्वादिति । अशक्यत्वमनन्तप्रकारत्वात् । बहुव्रीहावन्यपदार्थ उच्यते; प्लक्षन्यग्रोधमिति समाहारः; क्वचित्प्रधानयोरेव सहाभिधानम्-प्लक्षन्यग्रोधाविति । स्वार्थिकेषु च पप्रकृतिप्रत्ययौ प्रकृत्यर्थं सह ब्रूतः-शुक्लतर इति; तथा आख्यातेषु क्रियाप्रधानमाख्यातमिति; तथा 'कर्त्तरि कृत्' 'कर्तरि तृतीया', तत्र 'कृत्सु शक्तिमद् द्रव्यं प्रधानमुच्यते' इति क्रियाभेदे शक्त्यन्तराविर्भावः; पाचकं पश्येति विभक्तिषु शक्तिप्राधान्यम्-इत्याद्यनन्तप्रकारमर्थाभिधानमशक्यं परिभाषितुमिति लोकत एवार्थावगतेः कथमेतदित्याह-यैरपीत्यादि ।।

कालोपसजने च तुल्यम् ।। 1.2.57 ।।

अर्थस्यान्यप्रमाणत्वादिति । कथं पुनरयमत्र हेतुर्लभ्यत इत्याह-तुल्यशब्दो हेत्वनुकर्षणार्थ इति कथमेतदित्याह --अशिष्यविशेषणं चैतदिति । चशब्दो हेतौ । आन्याय्यादिति । रात्रेश्चतुर्द्धा विभक्तायाः पश्चिमे यामे न्याय्यं स्वापादुत्थानम्; शास्त्रीयत्वात् । प्रथमे गते च संवेशनं शयनम् । अत्र लक्षणे रात्रेर्मध्ययामद्वयं नाद्यतनम्, द्वितीये तु तदपि । उभयतोऽर्द्धरात्रमिति । बहुव्रीहिः कृत्स्नो दिवस आगामिन्या रात्रेः पूर्वार्धेनातीतायाः पश्चिमार्धेन च युक्त इत्यर्थः । यद्येवमिति । यद्यर्थस्यान्यप्रमाणत्वादित्ययमेवात्रापि हेतुरित्यर्थः । पूर्वसूत्र एवेति । एवं हि तुल्यमिति न वक्तव्यं भवतीति भावः ।।

जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ।। 1.2.58 ।।

जात्याख्यायामिति विषयसप्तमी । एवमेकस्मिन्नित्यपि व्यधिकरणे चैते सप्तम्यौ । जातिर्नामेत्यादिना सूत्रारम्भस्य कारणमाह-एकोऽर्थ इति । यद्यपि वैशेषिकपरिभाषिता संख्या जातेर्न विद्यते, तस्या द्रव्यधर्मत्वात्; तथापि भेदगणनरूपा संख्या विद्यत एव । यथोक्तम् --

दिष्टिप्रस्थसुवर्णादि मूर्त्तभेदाय कल्पते ।

क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका ।। इति ।

बैशेषिकाश्च व्यावहरन्ति --पञ्च कर्माणि, चतुर्विंशतिर्गुणा इति । जातेराख्येति । आख्यानमाख्या= प्रत्ययनम् । एकस्मिन्नर्थ इति । जात्याख्ये बहुवचनशब्दोऽयमन्वर्थो न पारिभाषिकः, उक्तिर्वचनम्, बहूनां वचनं बहुवचनम् । ततश्चायमर्थः -एकस्मिन्नर्थे बहूनामुक्तिर्भवतीति सामर्थ्याद्वत्यर्थो गम्यते-बहूनामिवोक्तिः । यदि च जात्यर्थो बहुवद्भवतीति बहूनामिवोक्तिर्भवतीति सामर्थ्यात् स एवार्थः संपद्यत इत्याह-जात्यर्थो बहुवद्भवतीति । तेन किं सिद्धं भवतीत्याह -तेनेति । यदि तु जातिशब्दाद्बहुवचनं जात्यादि विधीयेत, ततो विशेषणेभ्यः संपन्नादिभ्यो न स्यात्, तेषामजातिशब्दात्वादिति भावः । देवदत्त इति । यद्यपि जातिपदार्थवादिपक्षे ह्यत्राप्यवस्थाभेदानुगता जातिः शब्दवाच्या, तथापीह सामर्थ्यादभिन्नपिण्डसमवेता जातिराश्रीयत इत्यनतिदेशः । काश्यप इति । कश्यपशब्दाद्विदाद्यञ्, तत इवार्थे संज्ञायां कन् 'लुम्मनुष्ये' । भवत्ययं जातिशब्द इति । गुणभूताया गोत्रजातेरभिधानात् । न त्वनेन जातिराख्यायत इति । प्रधान्येनेति भावः । असत्याख्याग्रहणे जातौ वर्त्तमानादित्यर्थः स्यात्, तत्र यथा व्यक्तिपर्यन्ताभिधाने गवादिभ्योऽपि भवति, एवमत्रापि स्यात् । सति तु तस्मिंस्तत्सामर्थ्याज्जातिप्राधान्ये भवति । व्रीहियवाविति । ननु च यथा काशिकोसलीया इति जनपदलक्षणो वुञ् विधीयते, न च जनपदरूपः समुदायोऽवयवाभ्यामारभ्यते; अतो यत्स्वतन्त्रं प्रातिपदिकं न तज्जनपदवाचि, यज्जनवदवाचि न तत्स्वतन्त्रं प्रातिपदिकमिति कुतो वुञः प्रसङ्गः ! अयं तु जातिप्रत्यायने विधिर्न जातिशब्दादिति स्यादेव प्रसङ्गः ।

संख्याप्रयोगे इति । एकस्यैव बहुत्वातिदेशे क्रियमाण एकशब्दप्रयोगेऽपि स्यादिति भावः । आरभ्यमाणेऽप्येतस्मिन् गोत्वं व्रीहित्वमित्यादि निष्कृष्य जात्यभिधानेनैवायं विधिरिष्यते । व्यक्तिपर्यन्ते त्वभिधाने जातिव्यक्त्योस्तादात्म्यं सम्बन्ध इति जातिरूपेण व्यक्तीनामभिधाने एकवचनं सिद्धम् । व्यक्त्यात्मना तु जातेरभिधाने बहुवचनमिति नार्थोऽनेन ।।

अस्मदो द्वयोश्च ।। 1.2.59 ।।

'अस्मदः' इत्यभिधेयसम्बन्धेन षष्ठीत्याह--अस्मदो योऽर्थ इति । पञ्चम्यां तु तत्र वर्त्तमानस्य तिङन्तस्य न स्यादिति भावः । एकत्वे द्वित्वे चेति । ननु

चास्मतच्छब्दः प्रत्यगात्मनि वर्त्तते, स चैकस्तस्य कथं द्वित्वयोगः, एकत्वमपि तस्यायुक्तं विशेषणम्, अव्यभिचारात् ? उच्यते; यदाऽन्यत्रात्मत्वमध्यारोप्यते- अयं मे द्वितीय आत्मेति, यदा वा 'त्यदादीनि सर्वैर्नित्यम्' इति एकशेषः क्रियते, तदा सम्भवत्यनेकार्थत्वम् । अथ यत्रैवास्मच्छब्दो बहुवचनान्तः प्रयुज्यते, तत्र कथं द्वित्वैकत्वविशेषावसायः, प्रकरणादाराच्छब्दस्येव दूरान्तिकयोः । अहमिति । 'ङेप्रथमयोरम्', 'त्वाहौ सौ' । वयमिति । 'मपर्यन्तस्य','यूयवयौ जसि', शेषे लोपः' । आवामिति । 'युवावौ द्विवचने', 'प्रथमायाश्च द्विवचने' इत्यात्वम् ।

सविशेषणस्येति । 'त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः' इत्यत्रोन्नतत्वमेव विधीयते । न च विधेयोऽर्थो विशेषणमिति अतिदेशो भवत्येव । युष्मदीति । भाष्यवार्त्तिकयोरपठितमपि शिष्टप्रयोगदर्शनात्पठितम् ।।

फल्गुनीप्रोष्ठदानां च नक्षत्रे ।। 1.2.60 ।।

चकार इत्यादि । केचिदाहुः--ज्योतिषामावस्थिकी नक्षत्रता चन्द्रयोगे सति भवति, अन्यदा तु ज्योतिष्ट्वमेव । चन्द्रयोगश्च द्वयोः समुदितयोरिति द्वयोरेव बहुवचने सिद्धे चकारेण द्वयोरित्यनुकर्षन्नाचार्यो ज्ञापयति--नक्षत्रग्रहणं ज्योतिष उपलक्षणमिति । उपलक्षितज्योतिष्ट्वमेकैकस्याप्यस्तीति एकनिवृत्त्यर्थं द्वयोरित्यनुकर्षणीयमिति ।

तत्रोच्यते--सत्यप्येकैकस्य ज्योतिष्ट्वे न तत्र फल्गुनीशब्दो वर्त्तते, एवं प्रोष्ठपदादिशब्द उद्भूतावयवभेदः समुदाय एव ताभ्यामुच्यते । अत एव 'छन्दसि पुनर्वस्वोरेकवचनम्' 'विशाखयोश्च' इति सूत्रारम्भः । नक्षत्रशब्दश्च निघण्टुषु तारकापर्याय एव पठितः । वेदेऽपि 'नक्षत्रेभिः पितरो द्यामपंशन्' 'त्वं नक्षत्राणां मेध्यसि चित्रम्' 'नक्षत्रेण युक्तः कालः' इत्यत्र वृत्तिकारो वक्ष्यति-'कथं पुनर्नक्षत्रेण पुष्यादिना कालो युज्यते' इति, तदप्यनुपपन्नम्; आवस्थिके नक्षत्ररूपे पुष्यादिभिर्योस्य कादाचित्कत्वात् । 'तिष्यपुनर्वस्वोः' इत्यत्र च उदितौ तिष्यादिभिर्योगस्य कादाचित्कत्वात् । 'तिष्यपुर्वस्वोः' इत्यत्र च उदितौ तिष्यपुनर्वसू दृश्येते । इत्थं चन्द्रयोगेऽप्युदाहरिष्यते । प्रत्युदाहरणे च ज्योतिःस्वभावमेवार्थं दर्शयति-तिष्यपुनर्वसवो माणवका इति, तस्मान्नायं वृत्तिकारस्य पक्षः--आवस्थिकी नक्षत्रतेति । ज्योतिर्मात्रवचन एवायम् । चकारेण द्वयोरित्यस्यानुकर्षणमपि--उद्भूतावयवभेदः समुदायोऽभिधीयते, न त्वेकैकं ज्योतिरिति प्रदर्शनार्थम् । प्रोष्टपदानामिति सप्तम्यर्थे ष,ठी, नक्षत्रे इति वा षष्ठ्यर्थे सप्तमीत्याह-फल्गुन्योर्द्वयोरित्यादि । नक्षत्रयोरिति प्रत्येकमभिसम्बद्ध्यते । सूत्रे तु व्यत्ययेनैकवचनम् । अत्राप्यर्थस्य बहुत्वातिदेश इति विशेषणस्यापि भवति । पूर्वे फल्गुन्याविति । फल्गुनीभ्यां फल्गुनीभिर्वा युक्तः काल इति अण्, 'लुबविशेषे','लुपि युक्तवद्व्यक्तिवचने' ।

फल्गुन्यौ माणविके इति । फल्गुन्योर्जाते 'फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ' इति टप्रत्ययः, 'टिड्ढाणञ्' इति ङीप् ।।

छन्दसि पुनर्वस्वोरेकवचनम् ।। 1.2.61 ।।

द्वयोर्द्विवचने प्राप्त इति । पूर्वसूत्रे चानुकृष्टस्य द्वयोरित्यस्येहाननुवृत्तावपि पुनर्वसुशब्देनोद्भूतावयवभेदस्य ज्योतिर्द्वयस्य समुदायस्याभिधानाद् द्वयोरेवायं विधिरिति दर्शयति ।।

विशाखयोश्च ।। 1.2.62 ।।

किमर्थो योगविभागः ? इह चकारेण छन्दसीत्यनुवर्तयिष्यामीति तेनोत्तरत्र 'छन्दसि' इति नानुवर्त्तते ।

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ।। 1.2.63 ।।

तिष्यपुनर्वस्वोः इत्यनेनैव सूत्रेण द्विचनापेक्षया सप्तमीद्विवचनम् । नक्षत्रद्वन्द्वे इति सत्सप्तमीः; नक्षत्रद्वन्द्वे सति तिष्यपुनर्वस्वोरर्थयोर्द्वयोरिवोक्तिर्भवतीति द्वन्द्वापेक्षया षष्ठीद्विवचनं वा । तेषां द्वन्द्व इति । अत्र तच्छब्दाद् द्विवचनं न भवति, वाक्यस्य प्रस्तुतत्वादद्वन्द्वार्थवृत्तित्वाद् । अत्र पारिभाषिकयोर्द्विवचनबहुवचनयोर्ग्रहणे बहुवचनस्य द्विवचनमादेशः स्यात् । तत्र जसादेशे प्रथमाद्विवचने 'जसि च' इति गुणः स्यात्, विशेषणानां च न स्यादिति मत्वाह-बहुवचनस्य प्रसङ्ग इति । बहूनामर्थानामुक्तिप्रसङ्ग इत्यर्थः । द्विवचनं भवति । द्वयोरिवोक्तिर्भवतीत्यर्थः ।

तिष्यपुनर्वसवो माणवका इति । तिष्यपुनर्वसुशब्दाभ्यां नक्षत्रणो लुपि जातार्थे सन्धिवेलादिसूत्रेणआण्, तस्य 'श्रविष्टाफल्गुन्यनुराधा' इत्यादिना लुक् । नात्र द्वन्द्वो नक्षत्रे वर्त्तते, किं तर्हि ? माणवकेषु । तत्रापि न गौणः; योगपरम्परया वृत्तेः । पर्यायाणामपीति ।

पुनर्नक्षत्रग्रहणसामर्थ्यादर्थस्यैवायमनपेक्षितोपात्तशब्दास्यातिदेशो भवति, तेन पर्यायाणामपि ग्रहणं सिद्ध्यति ।

द्वन्द्व इति किमिति । तिष्यश्च पुनर्वसूचेति वाक्ये समासेऽप्युत्तरपदार्थप्रधाने बहुत्वं न सम्भवति, तादृशः समासश्च न सुलभः, बहुव्रीहिश्च न सम्भवति व्यधिकरणत्वात्, 'संख्यापूर्वो द्विगुः' अप्यपूर्वोऽव्ययपूर्वः, अव्ययीभावश्चासम्भाव्य एवेति द्वन्द्व एव भविष्यतीति मन्यते । यस्तिष्य इत्यादि । अवयवेन विग्रहे उद्भूतावयवभेदः समुदायझ समासार्थः । उन्मुग्धाः पुरुषास्तदाह-तिष्यादय एवेति । क्विचित्तु इमे तिष्यपुनवसवो मगधा इति पठ्यते, तत्रापि वैकृत्यवचनामुहेः कर्त्तरि क्तः, अविविक्ता इत्यर्थः । ऋतवो मुह्यन्तीति यथा । नक्षत्रसमास एवायमिति । समुदायसमुदायिनोरभेदादिति भावः । सर्वो द्वन्द्व इति । ननु च एकवद्भावप्रकरणे प्राण्यङ्गादीनां समाहार एव द्वन्द्वः, दधि-पयआदौनामितरेतरयोग एवेति नियम आश्रितः; ततश्च तस्मिन् प्रकरणेऽनुपात्तानाम् 'चाथेद्वन्द्वः' इत्येव समाहारेतरेतरयोगयोर्द्वन्द्वसिद्धः, किं ज्ञापकोपन्यासेन ? सत्यम्; विपरीतोऽपि नियमः सूत्रे सम्भाव्येत-- प्राण्यङ्गादीनामेव समाहार इति । तस्माद्बहुवचनग्रहणेन प्राण्यङ्गादीनां नियम्यत्वं ज्ञाप्यते । वृक्षादिविभाषाप्रयोजनं तत्रैव वक्ष्यामः ।।

सरूपाणामेकशेष एकविभक्तौ ।। 1.2.64 ।।

समानं रूपं येषामिति सरूपा इति । 'ज्योतिर्जनपद' इत्यादिना समानस्य सभावः । 'सह रूपेण वर्तन्त इति सरूपाः' इति तु न भवति; व्यभिचाराभावात् । रूपशब्दश्चैह श्रोत्रग्राह्ये शब्दसम्बन्धिनि स्वरूपे वर्त्तते, न चक्षुर्ग्राह्ये शुक्लादौ; शब्दानुशासनप्रस्तावात्तदाह--सरुपाणां शब्दानामिति । निर्धारणे चैषा षष्ठी,

समुदायापेक्षया वा ।

अत्र पञ्च पक्षाः सम्भवन्ति । समानपर्याय एकशब्दः 'तेनैकदिक्' इतिवत् । समिान्त्वं च भेदाधिष्ठानमिति पृथक् सर्वेभ्यः समानायां विभक्तौ परत एकः शिष्यत इति प्रथमः । 'द्वन्द्वे' इति वर्तते, तत्र विरूपेषु सावकाशमपि द्वन्द्वमेकशेषो न बाध्ते,निमित्तत्वात्; सरूपाणां द्वन्द्वे कृते समासादेकस्यां विभक्तौ परत इति द्वितीयः । अत्र पक्षे सङ्ख्यावाच्येकशब्दः । 'ह्रस्वो नपुंसके' इत्यतः 'प्रातिपदिकस्य' इति वर्त्तते, एकविभक्ताविति सारूप्योपलक्षणम् । एकविभक्तौ यानि सरूपाणि दृष्टानि तेषां प्रातिपदिकानामेवानैमित्तिक एकशेष इति तृतीयः । विभक्तिशब्दः कारकशक्तिवचनः, विभज्यतेऽनया प्रातिपदिकार्थ इति कृत्वा; एकस्मिन्कारके विवक्षिक्ति प्रसूत इति ; पृथग् विभक्त्यन्तानामेकशेष इति चतुर्थः । सरूपसमुदायादेकस्यां विभक्तौ परत इति पञ्चमः ।

तत्राद्ये पक्षे-वृक्षस् वृक्षस् वृक्षस् इति स्थिते पूर्वयोर्निवृत्तौ स् स् वृक्षस् इति स्थिने मध्यसम्बन्धिनः सोर्हल्ङ्यादिलोपे तदितरयोः श्रवणप्रसङ्गः । एवमाद्यन्तयोरपि निवृत्तौ द्रष्टव्यम् । परयोर्द्वयोर्निवृत्तावपि शिष्यमाणसम्बन्धिनो लोपपासिद्धिरेव । गोदौ वरणा इत्यादौ च पृथग् द्विवचनयोः परत एकशेषे तयोः श्रवणप्रसङ्गः । यत्र हि प्रत्ययनिमित्ता प्रकृतिनिवृत्तिस्तत्र केवलस्यापि प्रत्यस्य प्रयोगो भवत्येव, यथा--इयानिति ।

द्वितीये तु--अश्व अश्व औ इति स्थिते विभक्त्यपेक्षाच्छेषात्पूर्वमन्तरङ्गत्वात्समासान्तोदात्तत्वे कृते यदि पूर्वशेषः सर्वानुदात्तं पदं स्याद् परशेषे तु अश्वशब्दान्तोदात्तः स्यात्, इह च ऋक्च ऋक्च ऋचौ अन्तरङ्गत्वात् 'ऋक्पूरब्धूः' इति समासान्ते कृते विभक्तेरकारेण व्यवधानान्नैकशेषः स्यात् । समासान्तो हि समासग्रहणेन गृह्यमाणस्तमेव न व्यवदध्यात्, सरूपं तु व्यवदधात्येव । एकग्रहणं वानर्थकम्, न हि द्वन्द्वाद्युगपदनेका विभक्तिः सम्भवति । यदि पुनरेकविभक्तावित्येतदकृत्वा द्वन्द्वक्रियानन्तरमेवैकशष इत्युच्येत, एवमपि पादौ पादा इत्यादौ द्विवचनबहुवचने न स्याताम् ; प्राण्यङ्गादीनां समाहार इव द्वन्द्व इति नियमाद् ।

तृतीये तु पक्षे जननीवचनो यो मातृशब्दः, यश्च 'माङ् माने' इत्यस्मात्तृचि धान्यमातृवचनः, तयोरपि माता मातृभ्याम् इति क्वचिद्विभक्तौ सरूपत्वात्सर्वत्रैकशेषप्रसङ्गः । तथा हरितशब्दाद्वर्णादनुदात्तादिति ङीब्नकारयोर्यो हरीणीशब्दः सम्पद्यते, यश्च हरिणशब्दाज्जातिलक्षणे ङीषि, तयोर्न स्यात्; ङ्यन्तयोः सारूप्येऽपि प्रातिपदिकावस्थायामसारूप्यात् ।

चतुर्थे तु निवर्त्तमानः शब्दो यद्यपि सह विभक्त्या निवर्त्तते, शिष्यमाणस्य त्वेकवचनश्रवणप्रसङ्गः ।

अतः पञ्चमं पक्षमाश्रित्याह--सरूपाणां शब्दानामेकविभक्तौ परत इति । सरूपसमूदायादेकस्यां विभक्तौ परत इत्यर्थः । ननु 'ङ्याप्प्रातिपदिकात्' इत्येकवचनान्तानां द्वन्द्वः, तत्र चैकत्वं विवक्षितम्, तत्कथं प्रातिपदिकसमुदायाद्विभक्तिः ? अस्तु प्रत्येकं प्रातिपदिकत्वम्, समुदायोऽपि त्वर्थवत्त्वात्प्रातिपदिकम्, कः पुनः समुदायस्यार्थः ? परस्परसम्बन्धः, एकैकेन विशकलितोऽर्थ उच्यते । समुदायेन तु सम्बन्धः तुल्यजातीयस्य चार्थवत्समुदायस्य समासग्रहणेन निवृत्तिः । कश्च तुल्यजातीयः ? यत्र पूर्वो भागः पदम् । न चात्रैवमिति समुदायाद्विभक्तिरविरुद्धा । सा त्वनुद्भूतावयवभेदत्वाद् द्विवचनं बहुवचनं वा, न त्वेकवचनम् । नावौ जनावौ कर्तारावित्यादावच्परत्वादावादिष्वपि कृतेषु विरूपाणामपि समानार्थत्वादेकशेषः । शेषशब्दोऽयं नागराजे अनन्ते अप्रधाने तउपयुक्तादन्यत्र च न वर्त्तते, किं तर्हि ? निवृत्तिमदवस्थान इत्याह-एकः शिष्यते इतरे निवर्त्तन्ते इति । नन्वस्मिन् पक्षे एकग्रहणमनर्थकम्, न हि समुदायद्युगपदेनेका विभक्तिः सम्भवति ? उच्यते, असत्येकग्रहणए पृथक् सर्वेभ्यो विभक्तौ परत इति प्रथमोऽपि पक्षः सम्भाव्येत । अतो यत्र पक्ष एकैव विभक्तिः सरूपाणां सम्भवति स एवैकग्रहणादा श्रीयते । अथ वा चतुर्थे पक्षे ग्रन्थः-कथं तर्हि विभक्तौ परत इति, न हि कारकशक्त्या शब्दानां पौर्वापर्यं भवति, उच्यते; इष्टवाची परशब्दः एकस्यां विभक्ताविष्यायां एकस्मिन्कारके विवक्षित इति यावत् । ननु चोक्तम्-शिष्यमाणस्यैकवचनश्रवणप्रसङ्ग इति, न वेदानीं निवर्त्तमानसङ्ख्यावेशादुपजायमाने द्वित्वबहुत्वे द्विवचनबहुवचने उपजनयितुमुत्सहेते, प्रत्ययान्तत्वेनाप्रातिपदिकत्वात्, नैष दोषः; सहविवक्षायामेकशेषः । का पुनः सहविवक्षा ? उक्तमत्र-

अनुद्भूतेव भेदानामेका प्रख्योपजायते ।
यदा सहविवक्षां तामाहुर्द्वन्द्वैकशेषयोः ।। इति ।

अयमर्थः--यदा बहवोऽर्था एकस्यां बुद्धौ उपारूढाः, यथा--पुरोऽवस्थितस्य हस्तस्य पञ्चाङ्गुलयः, ते चैकस्मिन्गुणे क्रियायां वा तथैव विनियुज्यन्ते-शोभना इति वा, दृश्यन्त इति वा, तदा सहविवक्षा । तथा हि-आत्मनो या बुद्धिस्तां परत्र संक्रमयितुं प्रयोक्त्रा शब्दः प्रयुज्यत इति । यदि चावयवाः पृथक् पृथगवधारिताः स्युः, यथा वातायनगतेन क्रमेण गच्छन्तः ततो भिन्नैरेव शब्दैः प्रत्यकं पर्यवसायिभिरेकवचनान्तैरभिधीयतेरन् । समुदायाकारा त्वनुस्यूतावयवभैदैका बुद्धिः तां परत्र सङ्क्रमयितुमितिच्छता तदनुरूपं शब्दः प्रयोक्तव्यः । न च तादृशस्य समुदायस्यासाधारणः कश्चिच्छब्दोऽस्स्तीत्यवयवशब्दैरेवासौ प्रतिपाद्यः । उपपदाद्यते चावयवशब्दैरेवाभिधानाम्; समुदायसमुदायिनोरभेदात् । स चैकैक एवावयवशब्द उद्भूतावयवभेदसमुदायप्रतिपादानाद् द्विवचनान्तो बहुवचनानतश्च प्रवर्तत इति नैकवचनश्रवणप्रसङ्गः । यद्येवम्, एकेनैवावयवशब्देन तादृशस्य समुदायस्याभिधातुं शक्यात्वान्न यावदवयवशब्दप्रयोगप्रसङ्गः ।

अथ मतम्-अन्योऽन्यसन्निधावेव समुदायरूपार्थाभिधानशक्तिः प्रादुर्भवति, कथं तर्हि एकषेषारम्भे एकस्य सा भवति, न हि सतोऽसती शक्तिरेकशेषवचनेन कर्तुं शक्यते ? उच्यते; विरूपेष्वन्योऽन्यसन्निधाने समुदायार्थाभिधानशक्तिः प्रादुर्भवति । पटुगुप्तावित्यत्रापि ह्युद्भूतावयवभेदं समुदायं प्रतिपादयितुमवयवशब्द एव प्रत्येकं द्विवचनान्तः प्रवर्त्तते, अन्यथा द्विवचनबहुवचनायोगात्स्वार्थमात्रपर्यवसायिभिरवयवशब्दैः क्रमेणैवोच्चरणादर्थोऽपि प्रतीयते । क्रमेण चानेकार्थप्रतीतौ द्विवचनबहुवचने न भवतः । समुच्चयश्च भवति, तद्यथा वाक्य- - पटुश्च गुप्तश्चेति । अतो विरूपेष्वेवं दर्शनात्सरूपेष्वपि द्वन्द्वाशङ्कायां सरूपेष्वेकस्यैवानेकार्थप्रतिपादनशक्तिरस्तीति वचनेन व्युत्पाद्यते ।

अन्ये तु तृतीयमपि पक्षं ग्रन्थारूढं वर्णयन्ति । सरूपाणां शब्दानामेकविभक्तौ परत एकशेषो भवति; एकविभक्तौ परतः सरूपाणामित्यन्वः, न त्वेकशेष इति । एकस्मिन्कारके विवक्षिते, एकविभक्तौ वा परतो ये सरूपा दृष्टाः शब्दास्तेषामित्यर्थः । तत्र च शिष्यमाण एव निवर्त्तमानस्याप्यर्थमाचष्टे । अग्निचिदिति प्रत्ययनिवृत्तौ प्रकृतिवदिति द्विवचनबहुवचने यथायोगं भवतः । तत्र यदुक्तम्-हरितहरिणयङ्यन्तयोर्न स्यादिति, तन्न; प्रातिपदिकग्रहणं नानुवर्त्तते, तेन ङ्यन्तयोहेव सारूप्याद् भविष्यति । यदप्युक्तम्-मातृशब्दयोः प्रसङ्ग इति, अर्थविप्रतिषेधान्न भविष्यति । कृते ह्येकशेषे ताभिरित्यनुप्रयोगे पुनर्थो न गम्यते, तैरित्युक्ते स्त्र्यर्थः । वक्ष्यमाणस्य वा एवकारस्येहानुकर्षणादेकविभक्तौ यानि सरूपाण्येवेत्याश्रयणात्परिच्छेतृवाचिनश्च 'अप्तृन्तृच्' इति सर्वनामस्थाने दीर्घविधानादसारूप्यादेकशेषाभावः । अत्र पक्षे एकग्रहणं चिन्त्यप्रयोजनम् । तदेवं पञ्चसु पक्षेषु त्रयः स्वीकृताः ।

वृक्षश्च वृक्षश्चेति । 'अनैमित्तिक एकशेषः ' इति पक्षे विभक्तौ सारूप्यं दर्शयितुं विभक्त्यन्तेन विग्रहः । कथं पुनर्विग्रहः, यावता एकशेषवृत्तिर्नित्या ? नैतद्वृत्त्या समानार्थवाक्यम्, प्रत्येकमत्र विवक्षा । आतश्च प्रत्येकम्; यतोऽत्र भेदनिबन्धेन समुच्चयश्चशब्देन द्योत्यते, भिन्नार्थमपि किञ्चिन्मात्रासाधर्म्याद्वाक्यं भवत्येव । समानार्थन्तु बाध्यत एव, यथा-वृक्षौ च वृक्षौ वृक्षाश्च वृक्षाश्च वृक्षा इति । ननु यद्येतावदेकार्थाभिनिवेशिनः शब्दाः--आकाशद्रव्यत्वगोत्वादयः, न तेषु द्विवचनबहुवचनेनाप्येकशेषः; ये त्वनेकार्थाभिनिवेशिनः--गौः शुक्लः, पाचक इत्यादयः, तेष्वनुस्यूतं किञ्चिदर्थगतमेकं गोत्वादिनिमित्तं वक्तव्यम्; अन्यथा सम्बन्धग्रहणासम्भवादत्र गवादिषु तद्गुणता जातिर्निमित्तं न, यथा शुक्लादिष्वपि गुणमात्रनिष्ठषु । गुणनिष्ठेषु तु स्वगतया जात्या एकीभूतो गुणः । एवं पाचकादिष्वपि गोत्वाश्वत्वे सामान्ये, निः साम्यानि सामान्यानीत्यत्र भिन्नेष्वभिन्नप्रत्ययहेतुत्वं तावेतावित्यादौ परोक्षत्वप्रत्यक्षत्वादिकम् ।

अभावाश्चत्वार इत्यत्र निरूपाख्यत्वमित्यादि सर्वत्र द्रष्टव्यम् । निमित्ततद्वतोश्च तादात्म्यम्, सर्वं हि वस्तु एकं नाना च गवादिरूपेणैकं खण्डादि प्रातिपदिकरूपेण नाना । एवं स्थिते यदि तावज्जातिरेव शब्दार्थस्तदा तस्या एकत्वान्नानेकशब्दप्रसङ्गः । अथाप्युभयम्, एवमपि जातिरूपेणैव शब्दो द्रव्यमभिधत्ते न प्रातिस्विकेनाकारेणेति नास्त्यनेकशब्दप्रसङ्गः । केवलद्रव्यपदार्थपक्षेऽपि अस्मिन्विषयेऽनेकार्थाभिधानसामर्थ्यं शब्दस्य द्व्यादिपदवदभ्युपगन्तव्यम्, अन्यथा सत्यप्येकशेषे तन्न स्यादिति सिद्धमेकशब्दत्वम् । द्रव्यगतसङ्ख्याप्रतिपादनाय द्विवचनबहुवचने भविष्यत; नार्थ एतेनेत्याशङ्क्याह -- प्रत्यर्थमित्यादि । एकैकस्मिन्नर्थे यस्माच्छब्दानां निवेशस्ततोऽनेकेन शब्देनानेकस्याभिधानं सिद्ध्यति । तत्रैवं स्थितेऽनेकार्थाभिधाने कर्त्तव्ये यावन्तस्तेऽर्थास्तावतां शब्दानां प्रयोगः प्राप्नोति, इष्यते चैकशब्दत्वम्, तस्मादेकशेष आरभ्यते ।

अयमभिप्रायः--केवलं जातिपक्षे अक्षाः पादाः माषा इत्यादौ अनेकशब्दत्वं स्याद्, न हि बिभीतकदेवनशकटाक्षेष्वनुस्यूतं किञ्चित्सामान्यमस्ति । अत एव तत्र व्युत्पत्तिर्भेदेनापेक्ष्यते, एवमुभयपक्षेऽपि । केवलद्रव्यपक्षेऽपि वृक्षश्चेति वाक्येऽनेकशब्ददर्शनाद्विरूपेषु द्वन्द्वदर्शनाच्चारम्भणीयमेतदिति ।

रूपग्रहणं किमिति । अन्तरङ्गत्वादहेयत्वादुपदेशानपेक्षत्वाच्च रूपकृतमेव समानत्वं ग्रहीष्यते इति प्रश्नः । प्रतिपतिलाघवं च समानानामित्युच्यमाने भवति रूढिशब्दत्वेन रूढिरिति तुल्यार्थावगमात् । रूपग्रहणे तु वर्तिपदार्थमवगम्यान्यपदार्थोऽवगन्तव्य इति गौरवं भवति । भिन्नेऽप्यर्थे इति । 'स्वं रूपम्' इत्यत्र रूपग्रहणेन ज्ञापितं शास्त्रे रूपवदर्थोऽपि तन्त्रमिति । ततश्चार्थरूपाभ्यां समानत्वं गृह्येतेति भावः ।

एकग्रहणं किमिति । शेष इत्येकत्वं विवक्ष्यत इति प्रश्नः । द्विबह्वोरिति ।द्वित्वबहुत्वविषयस्यानेकस्य शब्दस्येत्यर्थः । ननु द्वयोर्बहूनां चेति बहुवचनप्रसङ्गाद् इह शेषविधानद्वारेण संस्क्रियमाणत्वाच्छिष्यमाणं प्रधानम्, प्रधाने च सङ्ख्या न विवक्ष्यते, यथा-ग्रहं संमार्ष्टीति, विषम उपन्यासः; संमार्गे विधौ द्वितीयानिर्देशात् ग्रहाः प्रधानभूताः, संमार्गस्तु तेषां संस्कारः । संस्कारो नाम तस्य भवति यच्छास्त्रान्तरे प्रयोजनवत्यां क्रियायां साधनत्वेन विनियुक्तम्, संस्कृतस्य वा यस्य विनियोगः, द्रव्यमात्रस्य रूपसंस्कारोऽनर्थकः स्यात् । यदिह संमार्गसंकारो विधीयमानः शास्त्रान्तरे विनियुक्तं ग्रहमपेक्षते ततर् नवसङ्क्या ग्रहा श्रुता इति तदपेक्षः संमार्गविधिर्नवानामपि भवितुमर्हति । ग्रहमित्येकवचनं तु कर्मत्वमात्रमभिधायकतार्थं भविष्यति । इह तु शेषस्य वाक्यान्तरेऽनवधारणादिदमेवोत्पत्तिवाक्यामिति विवक्षणीया सङ्ख्या, पशुमालभेतेतिवत्, सत्यम्; इदमेवैकग्रहणं ज्ञापकम्-शास्त्रान्तरानवगतेऽपि प्रधाने सङ्ख्या न विवक्ष्यत इति, तेन कर्तुरीप्सिततममित्यत्र ईप्सिततमस्य सङ्ख्याया अविवक्षा सिद्धा भवति ।

शेषग्रहणं किमिति । साध्वनुशासनप्रक्रमात्सरूपाणामेकः साधुर्भवतीति विज्ञास्यत इति भावः । आदेशो मा भूदिति । असति हि शेषग्रहणे 'षष्ठी स्थाने योगा' इति वचनात् स्थानषष्ठी स्यात्, ततश्चादेशः स्याद्, अस्तु; शब्दतोऽर्थतश्चान्तरतमो भविष्यति ? नैवं शक्यम्, स्वरे हि दोषः स्याद् द्वयोरश्वशब्दयोः समुदायः स्थानी, तत्र च द्वावुदात्ताविति द्व्युदात्त आदेशः स्यादेतेन द्व्यनुदात्तत्त्वं व्याख्यातम् ।

एकविभक्ताविति किमिति । नानाविभक्तौ वैरूप्यमवश्यंभावीति भावः । पयः पय इति । एकविभक्तावित्यस्मिन्नसति सरूपाणां सर्वत्र सह प्रयोगो न स्याद् । अथ क्रियमाणेऽप्यस्मिन्नैमित्तिकपक्षे कस्मादेवात्र न भवति, एतदपि ह्येकस्यां विभक्तौ परतः सरूपं दृष्टमेव ? नैष दोषः; एकग्रहणमस्मिन्पक्षे अतिरिच्यत इत्युक्तम्, तत्सामर्थादेकस्यामेव विभक्तौ विषयभूतायां भविष्यति । अत्र तु सत्येकशेषे पर्यायेण विभक्तिः स्यात् ।

अथ वा-किं न एतेन पक्षेण क्लेशतो व्याख्येयेन ? स्तां द्वावेव पक्षौ ? इह एकश्चेति सङ्ख्याश्बदानामेकशेषो न भवति, अनिभिधानाद् । विंशत्यादीनां तु भवत्येव ।।

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ।। 1.2.65 ।।

वृद्धशब्दोऽयं लोके चरमे वयसि प्रसिद्धः,युवशब्दो द्वितीये, तयोरिह ग्रहणे तरुणश्च वृद्धश्च युवा च स्थविरश्चेत्यादौ स्यात् ।

'वृद्धिर्यस्याचामादिस्तद्वृद्धम्''जीवति तु वंश्ये युवा'- -अनयोः शास्त्रीययोर्ग्रहणे औपगवश्चानन्तर औपगविश्च युवेत्यादावपि स्यात् । अतो युवशब्दस्य तावत्कृत्रिमस्य व्यवहितापत्यवाचिनोऽत्र ग्रहणम्, तत्साहचर्याद्वृद्धशब्दस्यापि व्यवहितापत्यवाचिनः शास्त्रान्तरे प्रसिद्धस्य ग्रहणमित्याह--वृद्धशब्द इत्यादि । गोत्रग्रहणे त्वपत्याधिकारादन्यत्र लौकिकस्य ग्रहणमित्यपत्यमात्रस्य ग्रहणं स्यात् । क्वचित्पुनरधिकोऽपि ग्रन्थः पठ्यते--यूनेति सहयोग एषा तृतीयेति । स

इदानीन्तनैः प्रक्षिप्तः, यूना सह वचन इति सहशब्दं प्रयुञ्जानः सूत्रे सहयोगे तृतीयेति दर्शयति । अत एव ज्ञाप्यते-सहविवक्षायामेकशेष इति । विशेषो वैरूप्यमिति । शब्दस्य वृद्धयुवनिमित्तस्य ग्रहणान्नान्य इति भावः । पदार्थं दर्शयित्वा तदयमर्थ इत्याह-वृद्धयुवनिमित्तकमेवेत्यादि । समानायामाकृताविति । आकृतिः शब्दस्य प्रवृत्तिनिमित्तं गर्गापत्यत्वादि । क्वचित्तु प्रकृताविति पाठः, प्रकृतिः मूलप्रकृतिर्गर्गशब्दादिः । गार्ग्यश्चेत्यादि । गर्गवत्सशब्दाभ्यां गर्गादित्वाद्यञन्ताभ्यां यूनि 'यञिञोश्च' इति फक् । गार्ग्यायणाविति । प्रकरणादिनात्र जीवद्वंश्यतावसायः; शब्दस्य गोत्रद्वयस्यापि साधारणत्वाद् । यद्येवम्, गार्ग्यश्च गार्ग्यश्चेति गोत्रशब्दयोरेव पूर्वेणैकशेषोऽस्ति प्रकरणादिनैव युवत्वमन्यतरस्य गंस्यते । यूनो हि द्वावाकारौ-जीवद्वंश्यत्वम्, पौत्रप्रभृत्यपत्यत्वं च; तत्र विशेषाविवक्षायां सामान्यशब्दो न निवर्तते, यथा-वस्तुतो भूतानद्यतनेऽपि 'अभूनृपो विबुधसखः' इति लुङ् भवति, तस्मान्नार्थ एतेन ? उच्यते; प्रकरणानपेक्षेण शब्देन जीवद्वंश्यत्वं प्रतिपादयितुकामो द्वन्द्वं प्रयुञ्जीत गार्ग्यायणाविति । अतो द्वन्द्वनिवृत्यर्थं वचनम् । प्रत्युदाहरणे तु सर्वत्र द्वन्द्वो भवति--गार्ग्यवात्स्यायनाविति । नन्वत्र विशेषान्तरसद्भावेऽपि तल्लक्षणो विशेषो विद्यत इति स्यादेकशेषः, नैष दोषः; एवमर्थवचनं व्यज्यते-योऽसौ विशेषो यस्य सद्भावात्पूर्वेणापप्राप्तिः, स तल्लक्षणश्चेदिति । एवं च यावदुद्देश्यं विधेयसम्बन्धात् सूत्रारम्भहेतुभूतस्य कृत्स्नस्य विशेषस्य तल्लक्षणत्वविधानात् कुतोऽत्र प्रसङ्गः ! इह तु प्राप्नोति--भागवित्तिभागवित्तिकाविति, कृत्स्नस्य विशेषणस्य तल्लक्षणत्वात् ? एवकारेण तु व्यावर्त्यते, न ह्यत्र तल्लक्षण एव विशेषस्तदाह--कुत्सा सौवीरत्वं चापरो विशेष इति । विशेषहेतुरित्यर्थः ।।

स्त्री पुंवच्च ।। 1.2.66 ।।

स्त्रीत्वस्य वैरूप्यकारणस्याधिक्याद्वचनं पुंवच्चेति वक्ष्यामीति च । अत्र स्त्रीशब्दस्य स्वरित्वे स्त्र्यधिकारविहितानां टाबादीनां ग्रहणादयमर्थो भवति- पुंवत् स्त्रीप्रत्ययो न भवति । यथा पुंवदस्यास्तनावित्यभावातिदेशस्तद्वत् । ततश्च स्त्रीत्वस्यानिवृत्तत्वाद् गार्ग्यश्च स्त्रियो गार्ग्यायणश्च गर्गा इत्यत्र 'यञञोश्च' इति लुग् न स्यात् । 'अस्त्रियाम्' इत्यधिकारात् प्रसज्यप्रतिषेधेऽयं दोषः । पर्युदासे तु शिष्यमाणस्य निवर्त्तमानार्थाभिधायित्वादिस्ति स्त्रीसदृशोऽयं दोषः ।च पर्युदासे तु शिष्यमाणस्य निवर्त्तमानार्थाभिधायित्वादस्ति स्त्रीसदृशोऽर्थं इति सिद्ध्यति । इह तु गर्गान्पश्येति स्त्रीत्वस्यानिवृत्तत्वान्नायं पुंसां बहुत्वे शस् उत्पन्न इति नत्वं न स्यात् । स्त्र्यर्थवृत्तेः शब्दस्य तु ग्रहणे स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवतीत्यर्थः स्यात् । स्त्रीत्वं त्वनुवृत्तमेव । तत्र यद्यपि गर्गा इति बहुषु पुंशब्दस्य रूपमिति तस्मिन्नतिदिष्टे जसादिषु न दोषः, नत्वं तु विभक्तिकार्यं न स्यात् । एवं स्त्र्यर्थग्रहणे तु पुमर्थातिदेशात्तत्प्रतिबद्धानां कार्याणां सिद्धिरिति न कश्चिद् दोषः । स्त्रीति चोक्तेऽर्थ एव प्रतियते । शब्दानामर्थपरत्वात्स्वरूपग्रहणं त्वनाशङ्क्यमेव; वृद्धो यूनेत्यनुवर्त्तनाद् । अतोऽर्थस्यैव ग्रहणमित्याह-स्त्र्यर्थः पुमर्थवद्भवतीति । गार्गी चेत्यादि । गार्ग्यवात्स्यशब्दाभ्याम् । 'यञश्च' इति ङीप् । दाक्षीति । 'इतो मनुष्यजातेः' दाक्षी इति ङीषि निवृत्ते इञन्ताद् द्विचने 'प्रथमयोः' इति दीर्घः । इतमपि द्वन्द्वनिवृत्त्यर्थमेव वचनम् ।।

पुमान् स्त्रिया ।। 1.2.67 ।।

स्त्रीपुंसलक्षणश्चेदेव विशेष इति । पदान्तरगम्येऽपि तल्लक्षणे विशेषे भवति, यथा-गौश्चायं गौश्चेयमिति एतौ गावौ चरत इति । एवं कन्याखुकुककवाकुग्रामणीखलपूप्रभृतिषु पुंसः शेषो वेदितव्यः । इह कस्मान्न भवति-हंसश्च वरटा च कच्छपश्च डुलिष्वरुश्यश्च रोहिच्च अश्वश्च वडवा च पुरुषश्च योषिंच्चेति, सर्वत्राप्यत्र स्त्रीपुंसकृत एव विशेषः ? 'सरूपाणाम्' इति वर्त्तते, तेन समानायां प्रकृतौ यत्र स्त्रीपुंसकृत एव विशेषस्तत्रैव भवति । इह तु ब्राह्मणवत्सश्च ब्राह्मणीवत्सा चेत्यत्र प्राप्नोति, नैष दोषः' स्त्रीपुंसयोः सहविवक्षायामेकशेषः । सा च प्रधानयोरेव भवतीति यत्र प्रधानस्त्रीपुंसकृत्त एव विशेषस्तत्रैवैकशेषः, इह त्वप्रधानकृतोऽपीत्येकशेषाभावः । इहापि मृगक्षीरादिवज्जातिविवक्षायां कुक्कुटावित्यादि सिद्धम् । द्वन्द्वनिवृत्त्यर्थन्तु वचनम् । प्रागित्यव्ययमिति । प्रपूर्वादञ्चतेः क्विन्नन्तादस्तातेः 'अञ्चेर्लुक्' इति लुकि 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययत्वं सत्त्वासत्त्वयोर्द्वन्द्वैकशेषौ चिन्त्यौ ।।

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ।। 1.2.68 ।।

इदमपि द्वन्द्वनिवृत्त्यर्थं वचनम् । स्वसृशब्दस्य ह्येकापत्यत्वं निमित्तम्, दुहितृशब्दस्यापत्यत्वमेव । भ्रातृपुत्रशब्दयोः स्त्रीत्वपुंस्त्वं चोभयत्र विशेषः । तत्र 'भ्रातरौ पुत्रौ' इति स्त्रीपुंस्त्वाविवक्षायां सिद्धं स्वसृदुहित्रोरभिधानम् । एकशेषारम्भेऽप्ययमेव निर्वाहः ।।

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ।। 1.2.69 ।।

शुक्ला च शुक्लं चेति । विभक्तौ विभक्त्यन्तयोश्चासारूप्यादप्राप्त एकशेषः, शुक्लं च शुक्लश्चेति विभक्त्यन्तयोरसारूप्यम् । विभक्तौ सारूप्येऽपि पुंनपुंसकयोः पर्यायः स्यादिति वचनम्, एकवद्भावार्थं च । तल्लक्षणश्चेदेव विशेष इति वर्तत इति । शुक्लं च कृष्णश्चेत्यत्र मा भूत् । एवाकारस्तु हिमहिमान्यौ अरण्यारण्यान्यावित्यत्र मा भूदिति । 'अत्र हिमारण्ययोर्महत्त्वे' इति महत्त्वमपरो विशेषः, अन्यतरस्यांग्रहणमानन्तर्यादेकवच्चेत्यनेन सम्बन्ध्यते, न त्वेकशेषेण चेत्याह-एकवच्चेत्यादि । अस्य ग्रहणमेकवच्चेत्यस्योत्तरत्रानुवृत्तिर्मा भूदिति । इह शुक्लेन च वस्त्रेण शुक्लेन च कम्बलेन तेनानेन शुक्लेनेति तल्लक्षणविशेषाभावादेकशेषो न प्राप्नोति, सामान्यविवक्षायामेकशब्दत्वमेकवचनं नपुंसकत्वं च भविष्यति । यद्येपम्, तदिदं शुक्लमित्यत्राप्येवमेव भविष्यति, नार्थ एतेन ? द्वन्द्वनिवृत्त्यर्थं तु वचनम् ।

अनपुंसकेनेति किमिति । नपुंसकेनापि सहवचने सरूपाणामित्येकशेषेण भवितव्यमिति प्रश्नः, तेन यथा स्यादेनेन मा भूदिति प्रत्युत्तरम् । को न्वत्र विशेष इत्यत्र आह- एकवच्चेति ।।

पिता मात्रा ।। 1.2.70 ।।

अभ्यर्हितत्वान्मातुः पूर्वनिपातः, 'पितुर्दशगुणं माता गौरवेणातिरिच्यते' । पितरावित्यभिधानं जनयितृत्वमात्रविवक्षायां लिङ्गाविवक्षायां समर्थनीयम् । एकशेषारम्भेऽपि द्वन्द्वस्त्विष्यत एवेति नार्थ एतेन ।।

श्वशुरः श्वश्र्वा ।। 1.2.71 ।।

पितृश्वशुरौ मातृश्वक्षूभ्यामिति नोक्तम्, लाघवार्थम् । श्वश्रूशब्दोऽव्युत्पन्नं प्रातिपदिकं श्वशुरस्योकाराकारलोपश्चेत्यूङन्तत्वे प्रत्ययान्तत्वाद् ब्रह्मबन्धूरित्यादिवदेकदेशाभावाच्चाप्रातिपदिकत्वेऽपि श्वश्रेत्यस्मादेव निर्देशाल्लिङ्गात् सुपस्तद्धिताश्च भवन्ति । श्वश्रूश्वशुराविति । अभ्यर्हितत्वादेव पूर्वनिपातः, 'श्वश्रूः पूर्वजपत्नी च मातृतुल्या प्रकीर्तिता' अत्रापि दम्पत्योर्जनयितृत्वमात्रविवक्षायां लिङ्गाविवक्षायां समर्थनीयम् । अनारम्भपक्षेऽपि श्वश्रूश्वशुरावित्यभिधाने द्वन्द्वस्त्विष्यत वेति, नार्थ एतेन ।।

त्यादादीनि सर्वैर्नित्यम् ।। 1.2.72 ।।

सर्वशब्दस्यार्थमाह--त्यदादिभिरन्यैश्चेति । एतदेव प्रकटयति - सर्वग्रहणमिति । त्यादिभिरन्यैश्चेति । यदिदं साकल्यमुक्तं तदर्थमित्यर्थः; अन्यथा प्रत्यासत्तेः 'तल्लक्षणश्चेदेव विशेषः' इत्यधिकाराद्वा त्यदादिभिरेव सहवचने स्यादिति भावः । स च देवदत्तश्चेति । ननु देवदत्तोऽपि सामान्यविवक्षायां तच्छब्देनैव निर्देष्टुं शक्यते, ततश्च सरूपाणामित्येव सिद्धम् । न चारब्धेऽपि सूत्रे वृत्तौ विशेषोऽन्तर्भावयिन्तुं शक्यः, तावित्यस्य सरूपसाधारणत्वाद्विरूपाणां च नानाविधात्वात्, सत्यम्; तद्देवदत्तावित्यादिद्वन्द्वनिवृत्यर्थं वचनम्, अन्यथा 'तत्पुत्रस्तदीयः' इत्यादिवृत्यन्तरवद् द्वन्द्वोऽपि स्यात् ।

यद्यत्परमिति । त्यदादिपाठे शब्दपरविप्रतिषेधाश्रयणादिति भावः । स च यश्च यावित्यादि । भाष्ये तु 'पूर्वशेषः खल्वपि दृश्यते - स च यश्च तौ' इत्युक्तम् । इह चाहं च भवांश्चावामिति भवतीत्याहुः ।

त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि । आद्यादित्वात्तसिः, त्यदादीनां शेषे सह विवक्षितो योऽर्थः पुमान्, यच्च नपुंसकं तद्वशेन लिङ्गवचनानि भवन्तीत्यर्थः । स च देवदत्त च तौ, सा च देवदत्तश्च तौ, तच्च देवदत्ता च ते । पुंनपुंसकयोस्तु सहविवक्षायां परत्वान्नपुंसकवशेन व्यवस्था । तच्च देवदत्तश्च ते, इह स च कुक्कुटः सा च मयूरी - कुक्कुटमयूर्यावेते, अर्धं पिप्पल्यास्तद् अर्धपिप्पली च सा अर्धपिप्पल्यौ ते इति परवल्लिङ्गमिति समासार्थस्य लिङ्गातिदेशात्तद्विशेषणस्यापि सर्वनाम्नस्तदेव लिङ्गं भवति ।।

ग्राम्यपशुसंघेष्वतरुणेषु स्त्री ।। 1.2.73 ।।

ग्रामे भवा ग्राम्याः । 'ग्रामाद्यखञौ' । पुंसः शेषे प्राप्त इति । 'पुमान् स्त्रिया' इत्यनेन । सामर्थ्यादिति । प्रधानस्य संघस्य तारुण्यातारुण्ये न सम्भवत इत्यस्मात्सामर्थ्याद् गुणभूतानामपि पशूनां विशेषणमित्यर्थः ।

एतौ गावाविति । यद्यपि द्वयोरपि संघो भवत्येव, तथापीह संघग्रहणसामर्थ्याद्बहूनां संघो गृह्यते, अन्यथा शेषस्यानेकविषयत्वाद् अनर्थकं न स्यात् । अनेकशफेष्विति । शफाः = खुराः । उष्ट्राणां त्वारण्यत्वादेकशेषाभावः ।।

इति श्रीहरदत्तदमिश्रविरचितायां पदमञ्जर्यो प्रथमस्याध्यायस्य
द्वितीयः पादः समाप्तः ।।
* * *

1.3

अथ प्रथमाध्याये तृतीयः पादः
पदमञ्जरी
भूवादयो धातवः।। 1.3.1 ।।

"भू" इत्येवमादयः शब्दा इत्यनेन पाठनिबन्धनेयं संज्ञेति दर्शयति। यदि त्वनादृत्य, पाठाम्, क्रियावचनो धातुरित्युच्येत, तत आणवेदुइत्यादिष्वपि स्यात्। कथं पुनरपभ्रंशानामनुशासनमाशङ्क्यते? कुतो तु खल्वेतद् आणवेद्वित्यादयोऽपभ्रंशा इति, यावता ये शास्त्रेणानुगम्यन्ते ते साधवः? अवश्यं चातुबन्धादिविशिष्टं रूपं पाठेनैव दर्शनीयम्, न हि तद्रूपं प्रयोगे सम्भवति। अतोऽन्यार्थः सन् गणपाठ एवाश्रितो भवतीति धातुत्वे सति लङ् भवति। एधते, स्पर्द्धते इत्यनुदात्तेतौ। यदि पाठमात्रनिबन्धनेयं संज्ञा, या-वा-दिव्-शब्दानां सर्वनामविकल्पस्वर्गवाचिनां समानशब्दानामपि प्रसङ्गः? न च प्रापणादि रर्थो नियामकः, अनार्षत्वाद्, अभियुक्तैरुत्तरकालनिर्दिष्टत्वाद्, अनेकार्थत्वाभ्युपगमाच्च, सत्यम्; संज्ञायां को दोषः? न तावद्धातुप्रत्ययानां लडादीनां प्रसङ्गः; कर्त्रादीनामभावात्, इच्यते, याः पश्येति `आतो धातोः' इति लोपः स्यात्। ननु अधातुः इति निषेधाद् अप्रातिपादिकत्वाद्विभक्तिरेव न स्यात्, नौतदस्ति;विभक्तावुत्पन्नायां त्यदाद्यत्वे टापि च यारूपत्वे सति धातुत्वम्, सुबुत्पत्तिदशायां तु यदित्यस्य नास्ति धातुत्वम; वाशब्दात्तु सुबेव न स्यात्; एवं दिव्शब्दादपि। न च `दिव औत्; इत्येतद्धातुत्वाभावे लिङ्गम्; क्विबन्तस्य दीव्यतिः सुपि सम्भवात्। सानुबन्धकत्वेऽपि तस्यैव ग्रहणं स्याद्, अतः समानशब्दानां प्रतिषेधो वक्तव्य इत्यत आह-धातुशब्द इत्यादि। क्वचित्तु `भू'इत्येवमादयः शब्दा इत्यस्यानन्तरं क्रियावाचिन इति पठ्यते, तस्मिन् पक्षे यास्य ग्रन्थस्य शङ्का सा तस्य द्रष्टव्या। अस्य तु कथं पुनः सूत्रेऽनुपात्तः क्रियावचन इत्ययं विशेषो लभ्यते? अत आह-धातुशब्दः पूर्वाचार्यसंज्ञेति। ततः किमित्याह- ते चेति। ततोऽपि किमित्याह-तदिहापीति। महत्याः पूर्वाचार्यसंज्ञाया आश्रयणं तदीयोपाधिपरि-ग्रहार्थमेवेति भावः।।

यावित्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते।।

सिद्धं वा भवत्वसिद्धं वा, शब्देन तु यद्वस्तु साध्यत्वेनाभिधीयते सा क्रिया साध्यत्वे चाश्रितक्रमरूपत्वात् पूर्वापरीभूतावयवत्वं विततरूपत्वं यत्तद्रूपमभिधीयते तस्यैकस्मिन् क्षणेऽनवस्थानम्, यदाह-क्रिया नामेयम् अत्यन्तापरिहष्टऽशक्या च सा पिण्डीभूता निदर्शयितुम् इति। एकैकस्य क्रियाक्षणस्य प्रत्यक्षत्वेऽपि समूहरूपा धातुवाच्या क्रिया न प्रत्यक्षेत्यर्थः। क्रमवन्त एव क्षणा एकफलो द्देशेन संपाद्यामानत्वात् ऐक्यमिवापन्ना धातुवाच्याः तद्यथा-पचतीत्यधिश्रयणादयोऽधः श्रयणान्ताः क्लेदनफलावच्छिन्नाः। एवमपचदित्यत्रापि क्रिया साध्यैव। ताहशस्यैव हि रूपस्य तत्रात्ययः प्रतीयते यत्पूर्वापरीभूतं क्रियते। घट इत्यत्र तु घटशब्देन चक्रोदरगतोऽपि घटः सिद्धरूप उच्यते,एकस्मिन्नेव क्षणे यद्दर्शनयोग्यं रूपं तेन रूपेणेत्यर्थः। तदेवं क्रियावचनो धातुरित्याश्रयणादतिप्रसङ्गो नास्तीति स्थितम्।

इह भूरादिर्येषामिति बहुव्रीहौ यणादेशे कृते `भूवादयः'इत्यनुपपन्नो निर्देश इत्यत आह-भूवादीनां वकारोऽयं मङ्गलार्थ इति। अभिधानधर्मस्याप्यभिधेये उपचारः, यथा-भ्रमरे द्विरेफ इति। भूवादीनां संज्ञीनां सम्बन्धी यो वकारः, तदभिधायिनि भूवादिशब्दे स्थितोऽयं प्रयुज्यते, लक्षणेनाप्रप्तो निपात्यत इत्यर्थः। स च मङ्गलार्थः । अपूर्वस्य लाभो मङ्गलम्, साधुशब्दप्रयोगेऽपि धर्मो भवति, भूवादिशब्दश्च साधुः। किं च वकारे सत्यविकृतो भूशब्दो व्यह्वत्यादि स्मारयतीत्यपि धर्मो भवतीति।

प्रकारान्तरमाह-भुवो वार्थं वदन्तीति। भुवो धातोरर्थं वदन्तीति वा, भूवादय इति निर्देश इत्यर्थः। अर्थकथनं चैतद् । व्युत्पत्तिस्तु भवनं भूः, क्रियासामान्यभुवं वदन्तीत्यौणादिकोऽयम्, `वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्'इति कर्तरि वदेः इञ् प्रत्ययः। यदि क्रियासामान्यं ये वदन्ति ते संज्ञिनः, अस्तिभवतिविद्यतीनामेव स्याद्, न प चत्यादीनां विशेषवाचिनाम्? विशेपक्षे गणपाठसामर्थ्यात् सोऽप्यङ्गीक्रियते, अन्यथा शब्विकरणा ये सेटो निरनुबन्धका अन्तर्गणकार्यवर्जिता भूप्रभृतयस्तेषां पाठोऽनर्थकः स्याद्। बहुवीहेस्तु भूत्वादिशब्दस्य पृषोदरादित्वात्साधुत्वम्। तृतीयं प्रकारमाह-भ्वर्था वा वादयः स्मृता इति। भवनं भूः सोऽर्थो येषां ते भ्वर्थाः, एवम्भूता वादयो वात्र संज्ञिनः स्मृता इत्यर्थः। किमिदं वादय इति ? `वा गतिगन्धनयोः,' वा आदिर्येषां ते वादयः वा गति इत्यारभ्या चुरादिसमाप्तेः। तथा च भ्वादयो वादयः भूप्रभृतय आ `वा गतिगन्धनयोः' इत्यस्माद्। वादयश्च वादयश्च बहुव्रीहितत्पुरुषयोः सहविवक्षायां स्वरभिन्नानां यस्योत्तरः स्वरविधिरिति बहुव्रीहेः शेषः। ततो भुवो वादय इति वाच्यवाचकसम्बन्धे शेषषष्ठीसमासः। अस्मिन्पक्षे पाठविशेषोऽर्थश्चेत्युभयं सूत्राक्षरैरेवोपात्तं भवति।।

पदमञ्जरी

उपदेशेऽजनुनासिक इत्।। 1.3.2 ।।

उपदिश्यतेऽनेनेत्युपदेश इति। अकर्त्तरि च कारके इति करणे घञ् । ननु च नेयं संज्ञा, परत्वाच्च करणाधिकरणयोः इति ल्युट् प्राप्नोति, हलश्च इत्यत्रापि संज्ञायामित्येव। ल्युट् तावन्न भवति, कृत्यल्युटो बहुलम् इति। अकर्तरि च इत्यत्र चकारो भिन्नक्रमः-संज्ञायां चेति, तेन क्कचिदसंज्ञायामपि भवति। अथोपदिश्यतेऽनेनेत्यत्रोपदेशः कोऽर्थः? विधानम्। यद्येवम् लण् एध वृद्धौ इत्यादौ न स्यात्, न ह्यत्र किञ्चिद्विधीयते। अथानिर्ज्ञातस्वरूपस्य स्वरूपज्ञापनं तत्, आचारेऽवगल्भक्लीबहोडेभ्यः क्विप् इत्यत्र गल्भाद्यकारस न स्यात् न हि गल्भादीनां स्वरूपज्ञापनार्थमुच्चारणम्;पञ्चमीनिर्द्देशेन क्विपो विधानात्। यद्येवम्, क्विबनेनानिर्ज्ञातरूपो ज्ञाप्ते, तत्र चायं भवत्यकार इति भविष्यति। शास्त्रवाक्यानीति। लण्-एध-स्पर्द्धेत्यादीनामपि विशिष्टप्रयोजनपरत्वेनोच्चारणाद् वाक्यत्वम्। अस्यैव विवरणम्-सूत्रपाठ इति। खिलपाठः=धातुपाठः प्रातिपदिकपाठः, वाक्यपाठश्च। तत्र सूत्रे मतुबादेरुकारः, धातुषु एधाद्यकारः प्रातिपदिकेषु भवच्छब्दस्योकारः,वाक्ये गल्भाद्यकारः। ननु च सर्वत्रात्र शुद्धोऽच् पठ्यते, नानुनासिक इत्यत आह-प्रतिज्ञानुनासिक्या इति। प्रतिज्ञामात्रेण समधिगम्यमानुनासिक्यं येषां ते तथोक्ताः। प्रतिज्ञानुनासिका इति तु प्रसिद्धः पाठः। तत्र प्रतिज्ञासमधिगम्यत्वाद् अनुनासिके प्रतिज्ञाशब्दो द्रष्टव्यः। ततः समानाधिकरणपदो बहुव्रीहिः। तच्च प्रतिज्ञानं नानियमेन भवति, कि तर्हि? यत्राचार्याः स्मरन्ति तत्रैव। सूत्रकारेण तावद्विवक्षिताः सर्वेऽनुनासिकाः पठिताः, डुलभँष् प्राप्तौ इतिवत्, लेखकैस्तु संकीर्णा लिखिताः तत्र स्मृतिपरम्परया निर्णेयमित्यर्थः।

अभ्र आँ अप इति। नायं सूत्रादिषु स्वरूपेणोच्चरितो।नुनासिकः किं तर्हि ? `आङोऽनुनासिकश्छन्दसि'इत्यनुनासिकशब्देन विहितः। अथ क्रियमाणेऽप्युपदेशग्रहणे उञः ऊँ इत्यत्र कस्मान्न भवति ? विधानसामर्थ्याद्। इत्संज्ञायां हि तस्य लोपः इति लोपः स्यात्। यद्येवम्, अत्रापि विधानसामर्थ्यादेव न भविष्यति। एवं तर्हि उदाहरणदिगियं दर्शता । इदं तत्रोदाहरणम्-अणोऽप्रगृह्यस्यानुनासिकः कधीच्छति ब्राह्मणकुलमिति क्यजन्तात्क्विपि अल्लोपे, वलि लोपे, नपुंसकह्रस्वत्वं दधि इति। यद्यत्रेत्संज्ञा स्यात् `इदितो नुम् धातोः इति नुम् स्यात्। अत्राप्यनुनासिकविधानसामर्थ्यादेवेत्संज्ञा न भविष्यति । ननु च यत्रेत्संज्ञायां सत्यां प्रयोजनं न सम्भवति, यथा-दधि, मध्विति प्रातिपदिकेषु तत्रेत्संज्ञाया अभावः। अत्रानुनासिकविधानमर्थवत्, नैतदेवम्; लोपस्येत्कार्यस्य सर्वत्र सम्भवात् । तस्मादणोऽप्रगृह्यस्य इत्संज्ञायामेव विधेयायामनुनासिकविधानसामर्थ्यादेवात्र लोपो न भविष्यति। एवं तर्ह्युत्तरार्थमवश्यम् `उपदेश' इति वक्तव्यम्, तदिहापि विस्पष्टर्थं भविष्यतीति मन्यते। आतो मनिन्निति। अत्र मकारस्येत्संज्ञा न भवति। यदि स्याद्, अन्येभ्योऽपि दृश्यन्ते इति हलन्तेऽन्त्यादचः परः स्यात् । सर्वस्येति। दरिद्राप्रभृतिसम्बन्धिनोऽपि ।।

पदमञ्जरी

हलन्त्यम्।। 1.3.3 ।।

अन्तशब्दोऽत्र समाप्तौ वर्त्तते;नावयवे;नावयवे असम्भवात्। न समीपे;अतिप्रसङ्गात् । येन समाप्यते समुदायस्तदन्ते भवमन्त्य, दिगादित्वाद्यत्। हलन्त्ये सर्वप्रसङ्गः, सर्वस्य हलः सांज्ञा प्राप्नोति। सर्वो हि हल् तं तमवधिं प्रत्यन्तो भवति, अन्त्यग्रहणं त्वादिनिवृत्त्यर्थं स्याद्, अत आह-धात्वादेरिति। आदिशब्दन

सूत्रप्रातिपदिकप्रत्ययनिपातागमादेशानां ग्रहणम्। शीङ्, लण्,नदट्, सन्, आङ्, त्रपुजतुनोः षुक्, चक्षिङः ख्याञ् इति योऽयं धात्वादिरूपः समुदायस्तदर्थः स उपदेशः, न तु नान्तरीयकावान्तरसमुदायार्थ इत्यन्त्यस्य समुदायापेक्षायां प्राधान्याद्धात्वादेरेव ग्रहणमिति भावः। अग्निचिदिति। अत्रेत्संज्ञायां लोपः स्यात्। न च तुको वैयर्थ्यम्;आगत्येत्यादौ चरितार्थत्वात्। न च क्विपः पित्त्वस्य वैयर्थ्यम्, आग्निचितावित्यादौ चरितार्थत्वात्। यद्यप्यत्रोभयत्रापि तावतोऽवधेस्तकारोऽन्त्यः, तथापि मुख्यसमुदायस्य नान्त्य इति नास्ति प्रसङ्गः। इह च दण्डिन्निति नकारस्येत्संज्ञायां सत्याम् `न ङिसंबुद्ध्योः'इति निषेधाल्लोपाभावेऽपि समुदायस्य नित्त्वादाद्युदात्तत्वप्रसङ्गः, यथा-श्रोत्रियशब्दे वाक्यार्थे पदवचनमिति पक्षे । अथोपदेशानुवृत्तावपि सनुतरित्यस्य रेफस्य कस्मान्न भवति? स्वरादिष्वन्तोदात्तपाठसामर्थ्यात्।

इह `शषसर्' `हल्'इति यो लकारस्तस्येत्संज्ञायां सत्यां हलित्ययं प्रत्याहार उपपद्यते, सति च प्रत्याहारे लणित्यत्र लकारस्य हल्त्वात्तस्यैव `शषसर्हल्',इत्यत्रान्ते निर्दिष्टत्वादित्संज्ञा, तदाश्रयश्च प्रत्याहार इति इतरेतराश्रयत्वात् प्रत्याहारो नोपपन्नः। ततश्च सर्वेषामेव णकारादीनामित्संज्ञा न स्यादिति सर्व एव प्रत्याहारव्यवहारोऽनुपपन्नः, `आदिरन्त्येन'इत्येतस्यापि वैयर्थ्यम्? स्यादेतत्हलित्यत्र हकारात् पर लृकारः, तस्य लृकारस्यैकादेशो लपरः, तस्य `उपदेशेऽजनुनासिकः'इति इत्संज्ञा, स एव `हलन्त्यम्' इत्यत्राप्येकादेशेन लपरेण निर्दिष्ट इति। एवमपीतरेतराश्रयमेव, लृकारस्येत्संज्ञेति तस्माद्वक्तव्योऽत्र परिहारस्तमाहहस्य ल् हलित्यादि। साधारणं भवेत्तन्त्रम्, यथा-तुल्यकक्ष्ययोर्भुञ्जानयो प्रदीपः। स चेह प्रयत्नविशेषः, यथा-श्वेतो धावतीत्यत्र साधारणेनैकेनैव प्रयत्नेन द्वयोर्वाक्ययोरुच्चारितयोः फलं सम्पद्यते, तथेहाप्येकेन तन्त्रेण प्रबलेन द्वितीयं हल्ग्रहणमुपात्तं परिगृहीतं वेदितव्यम् । तस्य द्वितीयस्यार्थमाह-हस्येति। समीपसमीपिसम्बन्धे षष्ठीसमास इत्यर्थः। ततःकिमित्याह-तेनेत्यादि। एतद् दर्शयति-हकारसमीपवर्तिनो लकारस्य न प्रत्याहारसमाश्रययोणएनेत्संज्ञा, किं तर्हि? साक्षादुपादानेनेति। प्रमाणम्? अगृह्यमाणविशेषत्वमेव। ननु गृह्यते विशेषः-`कृत्रिमाकृत्रिमयोः कृत्रिमस्य ग्रहणम्'इति, कृत्रिमो हि प्रत्याहारः सत्यम्;स एवासति तन्त्रेऽनुपपन्न इति त्वयैवोक्तम्।।

पदमञ्जरी

न विभक्तौ तुस्माः।। 1.3.4 ।।

वृक्षादिति तकारस्येत्संज्ञायाम् `तित्स्वरितम्'स्यात्। ननु चादेशोत्तरकालं स्थानिवद्भावेनास्य विभक्तिसंज्ञा, उपदेशानन्तरमेवेत्संज्ञा प्राप्नोति? सत्यम्; प्रतिषेधसामर्थ्यत्तु भाविन्यपि विभक्तित्वे प्रतिषेधो भविष्यति। वर्गग्रहणं किम्?वृक्षानित्यत्रापि यथा स्यात् क्व पुनरुपदेशे नकारोऽयमन्त्यः, म तावत्तस्य क्वचिदुपदेशः? `शसो न'इत्यत्र त्वकारो नकारस्येत्संज्ञापरित्राणार्थ इति शक्यं वक्तुम्। इह तर्हि `झस्य रन्'पचेरन्निति। ब्राह्मणा इति। रूपोदाहरणमेतत्। कार्योदाहरणं तु भवतः इति। अत्र `सिति च'इति पदत्वे जश्त्वं स्यात्। पचतः पचथ इत्यत्र प्रयोजनाभावादेव न भविष्यतीति शक्यं वक्तुम्। अपचतामित्यादि। तामादयस्तसादीनामन्त्यादचः परे स्युः। किमोऽत् इत्यस्य प्राग्दिशो विभक्तिः इति विभक्तित्वम्। इटोऽत् इत्यस्यापि स्थानिवद्भावेनेति तयोरपि प्रतिषेधः प्राप्नोति, तत्राह-किमोऽदित्यादि। अनित्यत्वं तु `इदमस्थमुः' इति थमोरुकारोऽनुबन्धाद्विज्ञायते। क्वचित्तु वृत्तावेव `इदमस्थमुः'इत्युकारानुबन्धनिर्दशादनित्यत्वमुपलक्ष्यते इति पठ्यते। इदानीं तदानीमिति। दानीमस्तु प्रतिष्रेधो भवत्येव। अनित्यत्वं हि ज्ञापितम्, न पुनः प्राग्दिशीयेष्वस्याप्रवृत्तिः।। पदमञ्जरी

आदिर्ञिटुडवः ।। 1.3.5 ।।

आदिशब्दः प्रत्येकमभिसंबद्ध्यते, तेनैकवचनमुपपद्यते इति भावः। अत्र `टु' इति न टवर्गस्य ग्रहणम्;उकारस्याननुनासिकत्वेनानुदित्त्वात्,`चुटू'इत्युत्तरत्र वर्गग्रहणाद्, ञिडुभ्यां साहचर्याच्च। मिन्नि इति। `आदितश्च' `रदाभ्यां निष्ठातो नः '। वेपथुरिति । ट्वितोऽथुच्। उप्त्रिममिति। ड्वितः क्त्रिः क्त्रेर्मम् नित्यम् यजादित्वात्संप्रसारणम्।

पटुयतीति। पृथ्वादिषु टुशब्दस्योपदेशः, अत्रेत्संज्ञायां सत्यामवयवे कृतं लिङ्गं समुदायस्य विशेषकमिति समुदायादथुच्प्रसङ्गः। केवलस्यानुदाहरणत्वम्;इत्कार्याभावात्। कण्डूयतीति। ननु चायं दीर्घान्तः कण्ड्वादिषूपदिश्यते, एवं तर्हि कण्डूमिच्छतीति क्यजन्तात् क्विपि कण्डु ब्राह्मणकुलं तदिच्छतीति पुनः क्यचि द्रष्टव्यम्, तत्रेत्संज्ञायामन्तरङ्गत्वादकृत एव दीर्घे भवत्ययं डुशब्दः, गणपठितश्च कण्डूशब्द एकदेशविकृत इति स्यात् प्रसङ्गः। ञिकारीयतीति। नायं समुदायः क्वचिदुपदिष्टः।।

पदमञ्जरी

षः प्रत्ययस्य।। 1.3.6 ।।

रजकीति। `षिद्गौरादिभ्यश्च' इति ङीष्। कथं पुनरत्रोपधालोपः, यावता अनिदितां हल उपधायाः क्ङिति इत्युच्यते? ज्ञापयतिरञ्जेरक्ङित्यपि क्वचिदुपधालोपो भवतीति । षोड इति। षड् दन्ता अस्य वयसि दन्तस्य दतृ षष उत्वम्, दतृदशधासूत्तरपदादेः ष्टुत्वम् । षषोऽन्त्यस्योत्वम् उत्तरपदादेर्डकारः, षोडन्तमाचष्टे इति णिचि टिलोपे पचाद्यचि णिलोपः। `षणु दाने'`ञमन्ताड्डः', उणादयो बहुलम् इति बहुलवचनात् इत्संज्ञासत्वयोरभावः। षडिक इति। अनुकम्पितः षड्ङ्गुलिः बह्वचो मनुष्यनाम्नष्ठज् वा `ठाजादावूर्द्धं द्वितीयादचः' इति ङ्गुलिशब्दस्य लोपः, यस्येतिलोपस्य स्थानिवद्भावात् षकारान्तेऽवधौ भसंज्ञाया अभावादन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वाज्जश्त्वम्। अत्रेत्संज्ञायां ङीष्प्रसङ्गः। यद्यप्येते समुदाया न क्वाप्युपदिश्यन्ते, षकारस्तु षष उत्वम्, षणु दाने इत्युपदेशस्थो भवति। अविषः महिष इति। अविमह्योष्टिषच् । नन्वत्र प्रयोजनाभावादेव षकारस्येत्संज्ञा न भविष्यति; ईकारस्य टित्त्वादेव सिद्धेः। न च पक्षे ङीषर्थः षकारः, ङीपोषऽपि चितः परस्योदात्तनिवृत्तिस्वरेणोदात्तत्वात्, सत्यम्; अन्यतरस्यैव श्रवणार्थ उपदेशः स्यादिति टकारस्यापि शङ्क्योत।।

पदमञ्जरी

चुटू।। 1.3.7 ।।

आदी इदिति। प्रारम्भे वर्त्तमानावित्यर्थः। कौञ्जायन्य इति। च्फञन्तात् `व्रतच्फञोरस्त्रियाम्'इति स्वार्थे स्वर्थे ञ्यः। शण्डिकादिभ्यो ञ्य इति। सोऽस्या भिजनः इति तत्र वर्त्तते। मन्दुरज इति । ङ्यापोस्सैज्ञाच्छन्दसोः इति ह्रस्वः। अन्नाण्ण इति । `धनगणं लब्धा'इत्यतो लब्धेति तत्रानुवर्त्ते। किमर्थो योगविभागः,`चुटूषाः प्रत्ययस्य'इत्येक एव योगः क्रियतामत आह-पृथगित्यादि। केशचुञ्चुः केशचण इति । अत्र चकारस्येत्संज्ञायाम् `चितः'इत्यन्तोदात्तत्वं स्यात्, पित्करणन्तु पर्यायार्थं स्यात्। अवादित्यस्यानुवृत्तिर्दर्शिता।।

पदमञ्जरी

लशक्वतद्धिते।। 1.3.8 ।।

प्रियंवद इति। `अरुर्द्विषदजन्तस्य मुम्' । जिष्णुरिति। स्नुप्रत्ययस्य गित्त्वपक्षे गकारस्येदमुदाहरणम्। चूडाल इति । मत्वर्थे `प्राणिस्थादातो लजन्यतरस्याम्'इति । अत्र प्रयोजनाभावादेव न भविष्यतीति शक्यं वक्तुम्। कर्णिकेति। `कर्णललाटात् कनलङ्कारे'इति भवार्थे कन्। अत्र `किति च' इति वृद्धिः स्यात्, रूपञ्च न सिध्येत्। अथ तुदिर्छिदिर्प्रभृतिषु इरित्यस्य समुदायस्य केनेत्संज्ञा?मा भूत्समुदायस्य, रेफस्य हलन्त्यम् इति भविष्यति, इकारस्य उपदेशेजनुनासिक इत् इति। इरितो वा इत्यात्रापि-- इश्च रश्चेरौ तावितावस्येति विग्रहः, न तु इरित्ययं समुदायः स इद्यस्येति। अवश्यं च इकारस्य पृथगीत्संज्ञेषितव्या, स्वरितेत इत्यात्मनेपदं यथा स्यादिति। यद्येवम्, `इदितो नुम् धात्तोः' इति नुम् प्राप्नोति, कुम्भीधान्यन्यायेन न भवति; यस्य पुनः कुम्भ्यां वान्यत्र वा, नासौ कुम्भीधान्यः। नायं न्यायो नुम्विधौ शक्य आश्रयितुम्। इह हि न स्यात्-टुनदि' नन्दथुरिति। ज्ञापकात् सिद्धम्, यदयम् `न हशः' इति क्सस्य प्रतिषेधं शास्ति, तज्ज्ञापयति-नेदितां नुम्भवति; अन्यथा हशेरिदित्वान्नुमि सति अनिगुपधात्वात् क्सस्य प्राप्तिरेव नास्ति, किं तन्निषेधेन। परिहारान्तरमप्यत्र नुम्विधौ वक्ष्यते।।

पदमञ्जरी

तस्य लोपः।। 1.3.9 ।।

तस्य ग्रहणं किमर्थम्, यावताऽभावो लोपः, स च कस्यचिदेव भवति,तत्र प्रकरणादित्संज्ञकस्यैव लोपो भविष्यतीत्यत आह-तस्य ग्रहणमित्यादि। आदिर्ञिटुडव इति । असति तस्य ग्रहणे येऽनेकाल इत्संज्ञका ञिप्रभृतयस्तेष्वलोऽन्त्यस्य लोपः स्यात्, तस्य ग्रहणसामर्थ्यात्तु सर्वस्य भविष्यति। एतच्च `नानर्थकेऽलोन्त्यस्य विधीः' इत्यनाश्रित्योक्तम्।।

पदमञ्जरी

यथासङ्ख्यनुदेशः समानाम्।। 1.3.10 ।।

सङ्ख्याशब्देनात्र क्रमो लक्ष्यत इति। कथम्? अव्यभिचारात् । यत्रैक एवोद्देश्यनुद्देशी च, यथा `मुद्रादण्'इति, न तत्र नियमप्रसङ्ग इत्यनेकत्वसङ्ख्याया एवेह ग्रहणम्। सा च क्रमं न व्यभिचरति;युगपदनेकस्य शब्दस्योच्चारयितुमशक्यत्वात्। मुख्ये त्वर्थेऽयमर्थः स्यात्समानां समसङ्ख्यानामुद्देशिनां या सङ्ख्या चतुरादिलक्षणा तया उद्देश्यः त्वादेवास्यार्थस्य सिद्धत्वाद्। अतः क्रमपर एव सङ्ख्याशब्द इति । यथाक्रमग्रहणं तु न कृतम्, सङ्ख्याद्वारकं साम्यं यथा विज्ञायेत;अन्यथा स्थानप्रयत्ना दिकृतमपि समत्वं प्रतीयेत। ननु च क्रियमाणमपि सङ्ख्याग्रहणं क्रमपरमिति कथमतः संख्यासाम्यप्रतिपत्तिः? सत्यम्; क्रमे शब्दः पर्यवस्यति, मुख्योऽप्यर्थः प्रतीयते।स हि प्रतीतो लाक्षणिकं गमयति; तस्मात् संख्याग्रहणसामर्थ्यात् तद्द्वारकमेव साम्यं गृह्यते। यथासंख्यमिति। `यथाऽसाहश्ये' इति वीप्सायामव्ययीभावः। अनुदेशो भवतीति । सम्बन्धी भवतीति द्रष्टव्यम् । तथा च वभ्यति-अनुदेशिनः सम्बध्यन्ते इति। अनुदिश्यत इत्यनुदेश इति । अकर्त्तरि च कारके संज्ञायाम् इत्यसंज्ञायापि कर्मपि घञ्। अनुशब्दः पश्चादर्थे, दृशिरुच्चाक्रिय इत्याह-पश्चच्चार्यत इत्यर्थ इति । यदुक्तं संख्याद्वारकं साम्यं गृह्यते इति तद्दर्शयति-समानां समसंख्यानाम्। अस्यैव विवरणम्-समंपठितानामिति । उद्देशिनामिति। कञ्चिद्धर्मं विधातुं प्रसिद्धवच्छब्दपरामर्शयोग्येन रूपेण उपादानमुद्देशः, तद्वन्त उद्देशिनः, विधेयतया पश्चादुच्चारणमनुदेशः, तद्वन्तोऽनुदेशिनः। यद्यपि सूत्रे उद्देशिनो न श्रुतास्तथाप्यनुदेशशब्दस्य सम्बन्धिशब्दत्वात् समसंख्यत्वस्य च प्रतियोग्यपेक्षत्वात् त एव गम्यन्ते। उद्देशिनामनुदेशिनां चेति यथाक्रममित्येतदपेक्षया षष्ठ्यौ। यथाक्रममिति। पूर्ववदव्ययीभावस्तृतीयान्तं चैतत्।

तदयमत्रार्थः- समसंख्यानामुद्देशिनामनुदेशिनां च योयः क्रमः=प्रथमचरमभवस्तेन तेनानुदेशिनः सम्बध्यन्ते, उद्देशिभिः सहेत्यर्थाद् गम्यते । क्वचित् उद्देशिभिरिति पठ्यते। तत्र सहयोगे तृतीया। प्रथमाद् प्रथम इत्यादिना सूत्रार्थमुदाहरणे योजयति। वहन्ति, वर्षन्ति, नदन्तीत्यादौ लोक एव यथासंख्यसम्बन्धस्य दृष्टत्वान्नार्थ एतेन ? उच्यते;व्युत्क्रमेणापि सम्बन्धो लोके दृश्यते-कन्याब्रह्मचारिणौ, दण्डकन्दुकहस्ताविति। योग्यतावशादत्र सम्बन्ध इति चेत्; क्रमेणापि सम्बन्धः, तद्वशादेव योग्या हि नद्यो वहने, घनाश्च वर्षणे। अत एवैकस्य धर्मिणि बहुषु धर्मेषु विहितेषु विधानक्रमेणान्यथा वा योग्यतानुरूप एव सम्बन्धो भवति-अमुमुद्वर्त्तय, स्नापय, भोजय; भोजय, स्नापयउद्वर्त्तयेति स्यादेतत्-स्वतः प्राप्तिरियं यदुक्तक्रमेण सम्बन्धः। तथा हि, योग्यताविशेषानवधारणे प्रथमप्रतीतयोः सम्बन्धः, बाधकाभावात्। तावता हि द्वयोरपि चरितार्थत्वम्, द्वितीयस्य धर्मिणो धर्मस्य वा प्रतियोग्ययेक्षायां प्रथमश्रुतस्य चरितार्थत्वाद, अचरितार्थन द्वितीयेन प्रतियोगिनां सम्बन्धः । एवं सर्वत्र तस्मात् स्वतः प्राप्तः प्राप्त्या क्रमसम्बन्धः सिद्धः इति। यद्येवम्, लक्षणेत्थम्भूताख्यान इत्यादौ वैषम्येऽप्येवमेव स्याद्, यावतां साम्यं तावतामादितः क्रमेण सम्बन्धः, परिशिष्टस्य तु सर्वैरनन्तरेण वेत्यतः समानामिति वक्ष्यामीत्यारम्भः।

स्वरितेनेति विशेषं वक्ष्यामीति। क्वचिद्धि साम्येऽपि नेष्यते। अथारभ्यमाणेऽप्यस्मिन् परम्सैपदानां णलादयः, लुटः प्रथमस्य डारौरसः, `एचोऽयवायाव'इत्यत्र कथमस्य प्रवृत्तिः, यावता परस्मैपदादिसंज्ञया युगपदेव संज्ञिनां प्रतीतिः, न क्रमेण? सत्यम्; तिबादिसूत्रे, अक्षरमाम्नाये च तिबादयः क्रमेण प्रतीतिः, स एव क्रमो नियामको भविष्यति। एवं द्वन्द्वेऽपि । पाघ्रेत्यादौ युगपदधिकरणवचनतायां द्वन्द्वेऽपि क्रमस्य प्रतीतेः स एव नियामकः। ननु च तिपो णल्, तसोऽतुस्, पः पिबः, जिघ्रः-इत्येवं भिन्नवाक्यतयोपदेशोऽस्तु, एवं हीदं न वक्तव्यं भवति?सत्यम्; एवं तु गौरवं स्यात् तस्य रूपेणानिदशात्, तत्र विभक्तेर्भेदेनोच्चारणाच्च। तथा `विदो लटो वा ' इत्यत्रानन्तर्यान्मसोमेत्येव सम्बध्येत, तदाह-- संज्ञासमासनिर्देशात् सर्वप्रसङ्गोऽनुदेशस्य। तत्र यथासंख्यवचनं नियमार्थम्, संज्ञासमासनिर्देशच्च पृथग्विक्तिसंज्ञ्यनुच्चारणार्थः, प्रकरणे च सर्वसम्प्रत्यार्थः इति। तौदेय इत्यादौ `सोऽस्याभिजनः' इत्यत्रार्थेप्रत्ययः।

इहेत्यादि। एकयोगत्वपक्षे चोद्यम्, भिन्नयोगपक्षे तु योगविभागो यथासंख्यनिरासार्थ इति वक्ष्यति। केचित्तु विभज्य योगं पठन्ति, अन्ये त्वेकमेव। स्वरितेनेत्यादि परिहारः। कथं पुनरयं विशेषो लभ्यत इत्याह--स्वरितेनाधिकार इत्यादि। यद्येवम्, स्वरिते दृष्टे सन्देहः स्यात्, न ज्ञायते--किमयं यथासंख्यार्थः? आहोस्विदधिकारार्थः?इति। सन्देहमात्रमेतद्, भवति, सर्वसन्देहेषु चेदमुपतिष्ठते--`व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्'इति । तत्र व्याख्यानान्निर्णयो भविष्यति।।

पदमञ्जरी

स्वरितेनाधिकारः।। 1.3.11 ।।

अत्र पारिभाषिकस्य `स्वरितस्य ग्रहणे रषाभ्यान्नोणः'इत्यादौ नकारादेर्व्यञ्जनस्याधिकारोपलक्षणं नोक्तं स्याद, पारिभाषिकस्याज्धर्मत्वादिति मत्वाह--स्वरितो नाम वर्णधर्म इति। वर्णमात्रधर्म इत्यर्थः। स चायं धर्मः सलाध्मातादितुल्यः केवलं सूत्रेष्वेव भवति, न प्रयोगे। क्वचित्तु स्वरितो नाम स्वरदोषो वर्णधर्म इति पाठः। तत्र स्वरदोषः=उच्चारणदोषः, अधिकारशब्दो भावसाधनः। विनियोग इति। व्यापारणम्। अथ शब्दस्यविनियुक्तस्य को व्यापार इत्याह--अधिकृतत्वादुत्तरत्रोपतिष्ठत इति । उपस्थानमप्येतदेव यदुतास्य तत्रबुद्धिस्थता। उत्तरत्रेत्युलक्षणम्, क्वचित् पूर्वत्राप्युपतिष्ठते;सूत्रकारेण पठितस्यास्य स्वरितत्वस्य संकीर्णत्वात् पाठस्य विषयविभागो दुर्ज्ञेय इत्याह-प्रतिज्ञास्वरिता इति। प्रत्याय इत्याद्युदाहरणानि।

किमर्थ पुनरिदमुच्यते, यावता निर्द्दिश्यमानं लोकेऽधिक्रियते, यथा-देवदत्ताय गौर्द्दीयतां कम्बलश्चेति देवदत्तायेति गम्यते, तथा `सृ स्थिरे' इत्यादीनां साकाङ्क्षत्वादनुवृत्तैर्घञादिभिरेव सम्बन्धो भविष्यति? अन्यनिर्देशस्तन्निवर्त्तकः, तद्यथा--देवदत्ताय गौर्द्दीयताम्, विष्णुमित्राय कम्बल इति कम्बलो गोर्निवर्त्तको भवति, तथेहापि `अभिविधौ भावे' इतीनुण् घञो निवर्त्तकः स्यात्, ततश्च `आक्रोशेऽवन्येर्ग्रहः' इत्यादिष्वनन्तर इनुणेव स्यात्, तस्मात्परिभाषा। अधिकारपरिमाणज्ञानं तु न ज्ञायते-- कियन्तमवधिमधिकारोऽनुवर्त्तत इति? यथा-प्रागभ्यासविकारेभ्योऽङ्गधिकारः?, धातोरिति प्राक् लादेशेभ्यः? उताध्यायस्य परिसमाप्तेः? एवं तर्ह्युभयार्थमिदम्--अधिकारार्थं च निवृत्त्यर्थं च । कथम्? स्वरितेनाधिकारः स्वरिते दृष्टेऽधिकारो न भवतीत्यर्थः, तेन विंशतिकात् खः। इत्यत्र स्वरितत्वं प्रतिज्ञेयं तद्दर्शनाच्च द्वित्रिपूर्वादित्यस्य निवृत्तिरष्यते तत्र तावतिथोऽलनुबन्धनीयः, यथा--द्वित्रिपूर्वान्निष्कात् इत्यत्रेकारः। तेन द्वयोर्योगयोरनुवृत्तिर्भविष्यति । एवमन्यत्रापि यत्र तावतिथोऽल् नास्ति तत्र प्राग्वचनं कर्त्तव्यम्, यथा--अङ्गस्य प्राक् टेः इति तद् गुरु भवति। स्यादेतत्,व्याख्यानात् परिमाणं ज्ञास्यते इति? अधिकारोऽपि तर्हि व्याख्यानात् ज्ञायताम्। इनुण्घञिति संदेहे घञिति व्याख्यास्यामः, इनुण आनन्तर्यम्, घञोऽप्यनुवृत्तिसामर्थ्य दृष्टमित्यस्त्येव संदेहः। `ग्रहवृद्निश्चिगमश्च'इत्यादिषु त्वनन्तरस्याप एवाधिकारः, न दृष्टानुवृत्तिसामर्थ्यस्यापि घञः, सिद्धत्वाद्, व्याख्यानाद्वा। यदप्युत्प्रेक्षितम्--आकांक्षारहितेऽपि वाक्ये प्रकृतस्य सम्बन्धार्थं शास्त्रीयोऽधिकारः- यथा दूरान्तिकार्थभ्यो द्वितीया च इत्यत्र पञ्चम्यधिकार इति । तत्रापि व्याख्यानमेव शरणमिति तदेव सर्वत्रास्तु नार्थ एतेन ? इदं तर्हि प्रयोजनम्--अन्यत्र दृष्टस्याधिकारस्य स्वरितेनोपलक्षणं यथा स्याद्, यथा--`गोस्त्रियोरुपसर्जनस्य'इत्यत्र स्त्रीग्रहणस्य, न ह्येतल्लौकिकेनाधिकारेण सिद्धम्, आनुषङ्गिकं वास्य प्रयोजनं यत् साकाक्षेषु व्यहितस्य चानुवृत्तिः।।

पदमञ्जरी

अनुदात्तङित आत्मनेपदम्।। 1.3.12 ।।

अविशेषेणेत्यादि। लस्य तिबादयः, `लटः शतृशानचौ'`लिटः कानज्वा'`क्वसुश्च'`लृटःद्वा'इत्यात्मनेपदपरस्मैपदयोर्विहित्वादापादपरिसमाप्तेर्नियमार्थं प्रकरणमित्यर्थः । एकवाक्यतया विधावितरेतराश्रयणप्रसङ्गः। स्यादेतत्--यथा `बहुषु बहुवचनम्',`कर्मणि द्वितीया'`ङ्याप्प्रातिपदिकात्'इत्येतैरेकवाक्यभूतैः स्वादीनां विशिष्टविधिः, एवमनेन प्रकारेण लस्य तिबादय इत्यादिभिश्च तिङामपि विशिष्टविधिरस्तु इति, यद्येवम्; आत्मनेपदपरस्मैपदसंज्ञाभ्यां तिबादीनां विधिः, विहितानां च संज्ञाभ्यां भाव्यमितीतरेतराश्रयं प्राप्नोति। स्वरूपेण विशिष्टविधौशत्रादिष्वतिप्रसङ्गः। स्यान्मतम्-लस्य तिप्तस्झिसिप्थस्थमिप्वस्मम् लस्य तिबादयो भवन्ति, ततः `अनुपरभ्यांकृञः'-कर्त्तर्यनुपूर्वात् करोतेः परस्य लस्य तिबादयो भवन्ति। किमर्थमिदम्? `गन्धनावक्षेपणस्वरितञितः'इति वक्ष्यति, तिद्वाधनार्थं कर्तृग्रहणम्;`भावकर्मणोः' इति वक्ष्यमाणस्य तङो बाधो मा भूदिति । एवम् `अभिप्रत्यतिभ्यः क्षिपः' इत्यादि `लुटि च क्लुपः' इत्येवमन्तं कृत्वा ततः `अनुदात्तङितस्तातांझथासाथान्ध्वमिड्वहिमहिङ्', अनुदात्तङितः परस्य लस्य तादयो भवन्ति, तिबादीनामपवादः, ततो `भावकर्मणोः'इत्यादि, `विभाषोपपदेन प्रतीयमाने'इत्येवमन्तं करिष्यते, तत्रायमप्यर्थः-आत्यनेपदग्रहणं शेषग्रहणं परस्मैपदग्रहणं च न कर्तव्यं भवति। एवमपि प्रकरणान्तरावस्थितानां शत्रादीनां नियमो न स्याद्, अतो न स्वरूपेण विशिष्टविधिर्युक्तः। संज्ञाश्रयणे तु यत्रैत्संज्ञकयोर्विधानं तत्र सर्वत्रोपस्थानान्नायं दोषः, किं त्वितरेतराश्रयः प्राप्नोति। यदि त्वस्य सूत्रस्य शाटकंवयेतिवद् भाविनी संज्ञा विज्ञायेत, ततो नेतरेतराश्रयं लाघवं प्रति न कश्चिद्विशेष इति किं मुधा

भाविसंज्ञाश्रयणखेदेनेति भिन्नवाक्यतया नियमपक्ष एवाश्रितो वृत्तिकारेण।
यद्येवम्, विकरणव्यवधाने नियमाप्रसङ्गः, लिङ्लिट्श्नम्श्लुलुक्षु वचनानुबन्धयोरर्थत्त्वाद् । इह हि विकरणानामवकाशः-
अलादेशाश्चानशादयः;नियमस्यावकाशः,यत्र विकरणा न सन्ति-स्पर्द्धिषीष्ट, पस्पर्द्धे, आस्ते, शेते, अरर्ति,जुहोति, भिनत्ति, भूयदित्यादि;एधते, कुरुते, निविशते इत्यादावुभयप्रसङ्गे परत्वाद्विकरणेषु कृतेषु तैर्व्यवधानान्नियमो न स्याद्। असति नियमे, यदि तावत् प्रकृतिनियमोऽनुदात्तङिदादिभ्य आत्मनेपदमेव, शेषाद्धातोः परस्मैपदमेवेति,ततोऽस्मिन् विषये उभयप्रसङ्गः;प्रत्ययनियमेऽपि तुल्यजातीयस्य नियमेन व्यावृत्तिरिति धातोरनन्तरस्य लस्य यद्यात्मनेपदपरस्मैपदे भवतः, अनुदात्तङिच्छेषानन्तरमेवेत्येवं नियमो विज्ञायमानो धात्वन्तरादेव व्यावर्तयेदिति विकरणव्यवधाने नियमाप्रवृत्तावुभयप्रसङ्ग एव। एकवाक्यतया विधाने तु नायं दोषः, विहितेषु लादेशेषु सार्वधातुकापेक्षैर्विकरणैर्भाव्यम्, विधानं चानेन प्रकरणेन सहेति नेतः प्राग्विकरणसम्भवः। स्यादयो लावस्थायां विधीयमाना अपि लकारविशेषापेक्षत्वद्वहिरङ्गा इति लमात्रापेक्षेष्वन्तरङ्गेष्वादेशेषु कृतेष्वेव भविष्यन्तीति न तत्रापि दोषः। ज्ञापकात् सिद्धम्, यदयं `वृद्भ्यः स्यसनोः'इति स्ये विकल्पं शास्ति, तज्ज्ञापयति-विकरणेभ्यो नियमो बलीयानिति। एतेनैतदपि निरस्तम्-चङङ्भ्यामात्मनेपदप्रसङ्ग इति, कथम्?पूर्वनियमे प्रवृत्ते पश्चात् चङङौ भवत इति।
प्रत्येकमिच्छब्दस्यान्वय इत्याह-अनुदात्तेत इति। ये धातवो ङितश्चेति। समुदायसम्बन्धे तु चक्षिङ एव स्यात्;स ह्यनुदात्तेन पठ्यते, विचक्षण इत्यत्र युज्यथा स्याद्। ञकारस्त्वनुदात्तेत्वनिबन्धनस्यात्मनेपदस्यानित्यत्वज्ञापनार्थः, तेन `एवायं नागः सहति कलभेभ्यः परिभवम्',`न सहामि साहसमसाहसिकि'इत्यादि सिद्धम्।
धातव इत्येतत् कुतो लभ्यते? केचिद्हुः-`भूवादयो धातवः' इत्यतो धातुग्रहणमनुवर्तते, तच्च `अनुदात्तङितः' इत्यनेन सामानाधिकरण्यात् पञ्चम्या विपरिणम्यते, अत एव चङङ्भ्यामात्मनेपदं न भवतीति। यङन्तादपि तर्हि न प्राप्नोति बेभिद्यत इति, यङेव ह्यत्र ङिद्, न तदन्तो धातुः, अवयवे चाचरितार्थं लिङ्गं समुदायस्य विशेषकं भवति, तस्मदिह धातोरिति नानुवर्त्यम्। प्रायोवृत्ता तु वृत्तौ धतव इत्युक्तम्। चङङोस्तु परिहार उक्त एव। यद्ययं प्रकृतिनियमः स्याद् अनुदात्तङित आत्मनेपदमेवेति, तृजादयो न स्युः?वचनाद् भविष्यन्ति। अस्ति वचनस्यावकाशः-परस्मैपदिनः,तत्रापि नियमः-शेषात् परस्मैपदमेवेति, तेन वचनाद् भविष्यन्ति। तुल्यजातीयस्य च नियमेन व्यावृत्तिः, कश्च तुल्यजातीयः? आत्मनेपदस्य परस्मैपदम्, तस्य च तत्। एवमपि `शेषात् कर्तरि'इति शेषग्रहणं न कर्तव्यं प्रकृतिनियमपक्षे, कथम्? प्रकृतयो नियताः, आत्मनेपदं परस्मैपदं चानियतम्, ततो वक्ष्यामि-परस्मैपदमिति, तन्नियमार्थं भविष्यति-यत्र परस्मैपदं चान्यच्च प्राप्नोति तत्र परस्मैपदमेवेति। प्रत्ययनियमस्तु नान्तरेण शेषग्रहणं शक्यो विज्ञातुमिति शेषग्रहणं कुर्वतः सूत्रकारस्य स एवाभिप्रेत इत्याह-तेभ्य आत्मनेपदं भवति, नान्येभ्य इति । यदि प्रत्ययनियमोऽयम्? `शेषात् कर्त्तरि परस्मैपदम्' इत्यत्र यदि तावदेवं नियमः-कर्तरि यदि भवति शेषदेवेति, ततोऽशेषत् कर्तरि मा भूद्, भावकर्मणोस्तु शेषाच्च परस्मैपदं प्राप्नोति। अथ शेषाद्यदि भवति कर्तर्येवेति? ततः शेषाद् भावकर्मणोर्मा भूद्, अशेषात्तु भावकर्मकर्तृषु त्रिष्वपि प्राप्नोति। न चैकस्मिन्वाक्ये नियमद्वयं शक्यं विज्ञातुम्-शेषादेव भवति, तत्रापि कर्त्तर्येवेति । एवं तर्हि योगविभागेन नियमद्वयं तत्रैव साधयिष्यामः। आस्त इत्यादि। `आस उपवेशने' ,`वस आच्छादने',`षूङ् प्राणिप्रसवे',शीङ्स्वप्नेअदादयः। `शीङः सार्वधातुके गुणः'।।
पदमञ्जरी
भावकर्मणोः।। 1.3.13 ।।
भाव्यत इति भावः, ण्यन्ताद् भवतेः कर्मणि घञ्। धात्वर्थः क्रियात्मक उच्यते, कर्म तु पारिभाषिकम्। धञादिविधौ तु `भाव' इति शुद्धाद् भवतेर्भावे घञ्। भावः=सत्ता,धात्वर्थस्य सिद्धतावस्थोच्यते। अयमपि नियम इति दर्शयितुमन्यतः सिद्धिमाह-लः कर्मणि चेत्यादि । कथं पुनरयं नियमः, यावता `अनुदात्तङित एवात्मनेपद्म्'इति पूर्वेण नियमेन यथा शेषात् कर्त्तर्यात्मनेपदं व्यावर्त्तितम्, एवं भावकर्मणोरपीति तद्विषये विध्यर्थमिदं युक्तम्?सत्यम्;यदि पूर्वसूत्रे प्रवृत्तिः,विपर्ययोऽपि शक्यते वक्तुम्-भावकर्मणोरेवात्मनेपदमिति, अस्मिन्नियमे प्रवृत्ते `अनुदात्तङितः'कर्त्तर्यात्मनेपदमप्राप्तमिति पूर्वसूत्रमपि विध्यर्थमिति। तेन द्वयोरपि लस्य तिबादय इत्येतदपेक्षया नियमार्थत्वम्, परस्परापेक्षया तु विध्यर्थत्वमेवमापादपरिसमाप्तेर्द्रव्यम्। अत एवस्यान्यथासिद्धं दर्शयताप्येवशब्दो न प्रयुक्तः। तिबादिसूत्रेण धातुसामान्यविहितं च लकारमाश्रित्य तिबादयो विहितास्तत्रैभ्य एव धातुभ्य इति पूर्वे नियमः, अयं त्वेतयोरे वार्थयोरिति। ननु चात्रार्थनियम एव ग्रन्थे प्रतीयते, अयं त्वत्रार्थः-`लः कर्मणि च'इति भावकर्मणोर्यो विहितो लकातो लकारस्तस्य सामान्येन तिबादयः सर्वे वक्ष्यन्ते, न त्वात्मनेपदमेव, अतस्तदेव यथा स्यादित्यमारम्भ इति। प्रत्ययनियमे तु भावकर्मकर्तृष्वपि विहितस्य लस्य सामान्येन तङ् वक्ष्यत इति वाच्यं स्यात्, सत्यम्;अयं त्वत्रार्थः-`भावकर्मणोः'इत्युपलक्षणम्, भावकर्मकर्तृष्वित्यर्थः, तिबादय इति सूत्रे तिपः प्रथमनिर्देशादेवमुक्तम्। तिबादिष्वन्तर्भूतास्तङ इत्यर्थः, तङानाविति यावत् । किं पुनः स्याद् यद्ययमर्थनियम् स्याद्? इह को भवता लाभो लब्धः, को भवता दायो दत्त इति कर्मणि घञ् न स्याद्। `अकर्त्तरि च' इत्यस्य त्वपादानादिरवकाशः यद्यपि तुल्यजातीयस्य परस्मैपदस्य नियमेन व्यावृत्तिरिति परिहारोऽस्ति;तथापि पूर्वसूत्रे तावत् प्रत्ययनियम इतीहापि स एवाश्रितः। ग्लायत इति। `ग्लै म्लै हर्षक्षये'। सुप्यत इति । `ञिष्वप् शये', `वचिस्वपि इत्यादिना संप्रसारणम्। क्रियत इति। `रिङ् शयग्लिङ्क्षु'यदा `कर्मवत्कर्मणा'इत्ययं शास्त्रातिदेशोः व्यपदेशातिदेशो वा, तदा शास्त्रव्यपदेशयोरतिदिष्टयोः स्वेन शास्त्रेण तत्तत्कर्यं भवति तत्र कर्मण्यात्मनेपदमित्यस्यावकाशः शुद्धं कर्म, कर्त्तरि परस्मैपदमित्यस्य शुद्धः कर्ता,कर्मकर्तर्युभयप्रसङ्गे परत्वात्परस्मैपदं प्राप्नेति, अत आह-कमकर्तरीत्यादि। द्वितीयं कर्तृग्रहणमनुवर्त्तत इति। `कर्त्तरि कर्मव्यतीहारे'इत्यतः कार्यातिदेशपक्षे त्वात्मनेपदमेव । परमिति । नायं परिहारो वाच्यः।।
पदसञ्जरी

कर्त्तरि कर्मव्यतीहारे।। 1.3.14 ।।

अत्र लौकिकं कर्म गृह्यते, न पारिभाषिकमित्याह-कर्मशब्दः क्रियावाचीति। ननु कृत्रिमत्वात्पारिभाषिकस्यैव ग्रहणं युक्तं ततो देवदत्तस्य धान्यं व्यतिलुनन्तीत्यत्रैव स्यात्, एवं मन्यते-इह `कर्त्तरि व्यतीहारे'इतीयता सिद्धं, करणादिव्यतीहारे कस्मान्न भवति, उच्यते;क्रियायाः साध्यत्वात् प्राधान्यं क्रिययाप्तुमिष्टतमत्वात्तादर्थ्येते;तद्यदि साधनं कर्म गृह्येत, तदा क्रियाया अपि संदर्शनप्रार्थनाध्यवसायैराप्यमानत्वात् कृत्रिमकर्मत्वमिति पुनरुभयोरपि ग्रहणात् कर्मग्रहणमनर्थकं स्यात्। किं चात्मनेपदेनाक्षिप्तोऽनुवृत्तो वा धातुः कर्मव्यतिहारेण विशेष्यते-तत्र वर्त्तमानाद्धातोरिति, न च साधनकर्मणि धातोर्वृत्तिः सम्भवति, तस्य क्रियावाचित्वादिति। विनिमयो व्यत्यास इत्यर्थः। एतदेव स्पष्टयति-यत्रेति। योग्यतावशादस्येदं साधनम्, अस्येयं क्रिया साध्येति निर्ज्ञातयोर्विपर्यासः साध्यसाधनभावस्य स व्यतीहार इति विवक्षितम्। यत्रेत्युपक्रमात्तु स व्यतीहारस्य विषयो विवक्षित इत्यर्थः। परस्परकरणमपि कर्मव्यतीहार उच्यते-संप्रहरन्ते राजानः, व्यात्युक्षीमभिसरणग्लहामदीब्यन्निति। व्यतिलुनत इति । `लुञ् छेदने' `आत्मनेपदेष्वनतः'इत्यदादेशः, `श्नाभ्यस्तयोः'इत्याकारलोपः, `प्वादीनां ह्रस्वः'। अन्योन्ययोग्यमन्योन्यविषये वा लवनं कुर्वन्तीत्यर्थः । एवंरूपश्चार्थोऽनेककर्तृकत्वे सति प्रतीयत इत्येकवचनं न भवतीति केचिदाहुः। व्यत्यसे, व्यतिहे इत्येकवचनमपि तत्र तत्रोदाहरिष्यते। `अन्यो व्यतिस्ते तु ममापि धर्मः' इति भट्टिप्रयोगः। कर्मव्यतीहार इति किमिति । कर्तृग्रहणमेव व्यतिलुनत इत्यादौ प्रापकत्वेनोपयोक्ष्यत इति भावः।

अथ कर्तृग्रहणं किमर्थम् ? भावकर्मनिवृत्त्यर्थं न वा पूर्वेण भावाद्। भावकर्मणोर्हि पूर्वेणात्मनेपदं भवत्येव--व्यतिलूयते व्यतिपूयत् इति, तेन यथा स्याद्, अनेन मा मूत्, कः पुनरत्र विशेषः ? तेन वा स्यादनेन वा ? अयमस्ति विशेषः-अनेन सति `न गतिहिंसार्थेभ्यः' इति प्रतिषेधः प्राप्नोति--व्यतिगम्यते ग्रामः, व्यतिहन्यन्ते दस्यव इति। न वानन्तरस्य प्रतिषेधाद् व्यतिहन्यत इत्यत्र द्वे प्राप्ती--`भावकर्मणोः'इति च । तथा `अनन्तरस्य विधिर्भवति प्रतिषेधो वा'इति अनन्तरा कर्मव्यतीहारलक्षण प्राप्तिः प्रतिषिध्यते, पूर्वा तु भविष्यति, नार्थं एतेन कर्तृग्रहणेनेत्यत आह--कर्तृग्रहणमिति। `शेषात्कर्तरि'इति प्रदर्शनमेतद् । `आङो दोऽनास्यविरहणो'इत्यादावप्यस्योपयोगं वक्ष्यामः।।

पदमञ्जरी

न गतिहिंसार्थेभ्यः।। 1.3.15 ।।

व्यतिगच्छन्तीत्यादि। `गम्लृ सृप्लृ गतौ'`तृहि हिसि हिंसायाम्' `हन हिंसागत्योः',गमेः `इषुगमियमां छः'`छे च'इति तुक्, सृपेर्लधूपधगुणः, हन्तेर्गमहनेत्युपधालोपः, `हो हन्तेः'इति कुत्वम्।

हसादीनामिति। हसिप्रकाराणां शब्दक्रियाणामित्यर्थः।

उपसंख्यानमिति। संख्यायते=संक्षिप्य प्रतिपाद्यतेऽनेनार्थ इति संख्यानम्=सूत्रम्, तस्योपोच्चारितमुपसंख्यानं सूत्रम्, समीप इदमपि सूत्रं पठितव्यमित्यर्थः। हरतेरप्रतिषेघ इति। अर्थग्रहणसामर्थ्याद्यो शब्दान्तरनिरपेक्षागतिहिसयोर्वर्तन्ते त इह गृह्यन्त इति उपसर्गवशेन हिसार्थत्वाद्धरतेरप्रतिषेध इत्याहुः। इह तु `ततः संप्रहरिष्यन्तौ द्दष्ट्वा कर्णधनञ्जयौ'इति योत्स्यमानाविति विवक्षितम्, न व्यतीहारः। इह च संव्यवहरन्ते गर्गैरिति वहेरगत्यर्थत्वादप्रतिषेधः, देशान्तरप्रापणं हि वहेरर्थः- भारं वहतीति;नान्तरीयकस्तु गतिप्रत्ययः कन्याप्रापणमुखेन गर्गैः सम्बध्यन्त इत्यर्थः।।

पदमञ्जरी

इतरेतरान्योऽन्योपपदाच्च।। 1.3.16 ।।

उपोच्चारितं पदमुपदम्, न पारिभाषिकम्;असम्वाद्। असत्युपपदग्रहणे पञ्चमीतिर्देशे परस्यैवानन्तरस्य स्यात्; `तस्मादित्युत्तरस्य'इति वचनात्। सप्तमीनिर्देशे तु `तस्मिन्निति निर्दिष्टे पूर्वस्य'इति पूर्वस्यैवानन्तरस्य स्यात्। तत्र यद्यपि लकारोऽनन्तरः परो न सम्भवति, धातुस्तु सम्भवति;पूर्वस्तु धातुरनन्तरो न सम्भवति, लकारस्तु संभवति। तृतीयानिर्देशस्तु पञ्चमीसाधारणत्वादनध्यवसान इत्युपपदग्रहणं क्रियते। इतरेतरस्यत्यादि। लौकिके तु शब्दव्यवहारे लाघवं प्रत्युनादराद् इतरेतरादिशब्दस्तङ् उपसर्गाश्च कर्मव्यतीहारद्योतनाय समुच्चीयन्ते । कर्मव्यतीहारे `सर्वनाम्नो द्वे भवतस्समासवच्च बहुलम्'यदा न समासवत् प्रथमैकवचनं तदा पूर्वपदस्येति षष्ठ्येकवचनान्तस्येतरशब्दस्य द्विर्वचने समासवद्भावेन सुब्लुकि समासत्वादेव प्रातिपदिकत्वात् पुनः षष्ठ्येकवचनम्। अन्यशब्दस्य तु बहुलग्रहणादसमासवद्भावे पूर्वपदस्थस्य षष्ठ्येकवचनस्य प्रथमैकवचनम्। एवं परस्परस्येत्यत्रापि सूत्रवाक्ययोः प्रकृतिभागमात्रस्यानुकरणं द्रष्टव्यम्।।

पदमञ्जरी

नेर्विशः।। 1.3.17 ।।

शेषात्कर्त्तरि परस्मैपदे प्राप्ते इति। अनारम्भस्यापि शेषपक्षे निक्षेपात्। आत्मनेपदं विधीयत इति। यद्यपि तिबादिसूत्रापेक्षया सर्वस्यैव प्रकरणस्य नियमार्थत्वम्, `अनुदात्तङित आत्मनेपदम्'`भावकर्मणोः' इति सूत्रद्वयायेक्षया तु विध्यर्थत्वमपि सम्भवतीति मत्वैवमुक्तम्। एवं सर्वत्र द्रष्टव्यम्। न्यविशतेत्यत्र लङि निविश् ल् इति स्थिते लादेशो लकारमात्रापेक्षत्वाद् अन्तरङ्गः, अडागमस्तु लुङादिविशेषापेक्षत्वाद्वहिरङ्ग इति पूर्वं लादेशे विकरणश्च प्राप्नोति अडागमश्च, नित्यत्वाद्विकरणः। अडागमो हि विकरणे कृते तदन्तमेव लङि परतोऽङ्गम् तदादिग्रहणस्य स्यादिनुमर्थत्वादिति तस्यैव प्राप्नोति, अकृते विकरणे धातुमात्रस्योति शब्दान्तरप्राप्तेरनित्यः;ततश्च विकरणान्तस्य विधीयमानोऽडागमो धातुमात्रं प्रत्यभक्त इति नेश्च धातोश्च व्यवधायक इत्यात्मनेपदं न प्राप्नोतीत्यत आह-यदागमा इत्यदि। एवं मन्यते-बाह्योपसर्गसम्बन्धापेक्षत्वादयं विधिर्बहिरङ्गः, अस्मिंश्चाप्रवृत्ते लादेशोऽप्यप्रवृत्त एव, अपवादविषयपरिहारेण हि तेन प्रवर्तितवयम्। अनिर्वृत्तश्च लादेशो विकरणोत्पत्तौ न निमित्तम्, तेन लावस्थायामेवाड् भवन् धातुमात्रस्यैव भवति, ततश्च

तदवयवत्वान्न तस्यैव वयवधायक इति । कथं तर्ह्युक्तम्--व्यवधानेऽपि भवतीति? श्रुतिमात्रापेक्षया। क्वचित्तु-अटा नास्ति व्यवधानमित्येव पाठः। मधुनि विशन्तीति अङ्गभक्तो नुम् ङेरनवयव इति निशब्दस्यानर्थक्यम्। क्वचित्तु मधूनि निविशन्ति भ्रमरा इति शसन्तं पठ्यते।।
पदमञ्जरी

परिव्यवेभ्यः क्रियः।। 1.3.18 ।।

पर्यादय उपसर्गा गृह्यन्त इति कथं `क्रियः' इति षष्ठी, उसर्गैरेव पर्यादिभिरर्थद्वारको विशेषणविशेष्यभावलक्षणसम्बन्धः, न च क्रियो चे उपसर्गास्तेभ्यः परं धात्वन्तरं सम्भवतीति क्रीणातेरेवात्मनेपदं भवतीति। यद्वा--पर्यादिविशेषणाय षष्ठीमनुभूयात्मनेपदसम्बन्धे `क्रियः'इति पञ्चमी सम्पद्यते, तदाह--इत्येतेभ्य उतरस्मात् क्रीणातेरिति।

बहुवीति। बहवो वयः पक्षिणोऽस्मिन्निति बहुव्रीहिः, कर्मपदं चैतत्, पक्षिवाचिनो विशब्दस्य नपुंसकत्वाभावाद् विभक्त्यास्य व्यवधानात्केवलो नोदाहृतः। ननु बहुव्रीहावपि जहत्स्वार्थायां वृत्तौ वेरानर्थक्यम्, अजहत्स्वार्थायामपि तदर्थस्योपसर्जनत्वमिति न भविष्यति ? एवं तर्ह्युदाहरणदिगियं दर्शिता। इद तत्रोदाहरणम्-वे क्रीणासि, अत्रैकदेशविकृतस्यानन्यत्वात्प्रसङ्गः, वी क्रीणीतः- अत्रैकादेशस्य पूर्वं प्रत्यन्तवद्भावात्प्रसङ्गः।।
पदमञ्जरी

विपराभ्यां जेः।। 1.3.19 ।।

साहचर्यादिति। द्वयोर्दृष्टापचारत्वेऽपि परस्परसाहचर्यादित्यर्थः। `नेर्विशः' इत्यादिप्रकरणसाहचर्याद्वा । बहुवीति। अत्रापि वे जयसि, वी जयत इत्युदाहार्यम्। परा उत्कृष्टा। अथ कथं जेरिति निर्देशः, यावता प्रकृतिवदनुकरणं भवतीति `अचि श्नुधातु' इत्यादिनेयङादेशेन भवितव्यम्, न च दीर्घेषु सावकाशमियङं परत्वाद् `घेर्ङति' इति गुणो बाधत इति युक्तम्;ह्रस्वेष्वपि पूर्वविप्रतिषेधेन इयङ इष्टत्वात्. तथा च `क्षियः' इति निर्देशः? उच्यते; धातुत्वं तावदर्थाश्रयम्--क्रियावचनो धातुरिति, इह वा विवक्षितार्थं रूपमात्रमनुकृतमिति। अनुकार्यस्यापि धातुत्वं नास्ति प्रागेवानुकरणस्य।।
पदमञ्जरी

आङो दोऽनास्यविहरणे।। 1.3.20 ।।

यथैवावत्सा धेनुरानीयतामित्युक्ते सम्भवद्वत्ससम्बन्धा गोधेनुरेवानोयते, न महिष्यादिधेनुः, तथेहापि सम्भवदास्यविहरणस्य `डुदाञ् दाने' इत्यस्यैव ग्रहणम्, न तु `गामादाग्रहणेष्वविशेषः' इति सर्वेषां दारूपाणामित्याह-आङ्पूर्वाद्दाञ इति।। आदत्त इति । श्लौ द्विर्वचनम्, पूर्ववदाकारलोपः, दकारस्य चर्त्वम्। क्वचिद्-आङो ङिद्विशिष्टस्य किम् ? भिक्षामाददातीति पठ्यते, तत्र स्मृतावाकारः।

आस्यविहरणसमानक्रियादपीति। कथमिह `आङो दोऽनास्ये'इतीयता सिद्धं द्रव्ये धातोर्वृत्त्यसम्भवादास्यसमवायिन्यां क्रियायां वर्तमानस्य समुदायस्य निषेधो विज्ञायते, नचैवं स्वं मुखमादत्त इत्यत्रापि मुखविषयत्वादानस्य प्रतिषेधप्रसङ्गः, ग्राह्यास्य एव समवेता क्रिया, तस्यां वर्तमानो ददातिरास्ये वृत्तिर्भवति, ग्रहणन्तु ग्राह्यहिणोरुभयोरपि समवेतम्। अनास्य इति पर्युदासः, आस्यानास्यसमुदायश्चास्यादन्य इति विधिरेव भविष्यति । एवं सिद्धे विहरणग्रहणं विहरणविशेषोपलक्षार्थम्, तेनासत्यप्यास्ये तादृशे विहरणे भविष्यति यादृशमास्यविहरणम् आस्यव्यादानम्। विपादिकेति । पादस्फोटः=विपादिका। स्वाङ्गकर्मकाच्चेति। स्वमङ्गं स्वाङ्गम् न तु पारिभाषिकमद्रवादिलक्षणम्। एतच्च न्यायसिद्धमेवोक्तम्, कथम् ? कर्तरीति वर्तते, आस्यशब्दश्चायं सम्बन्धिशब्दः, कस्यास्यमित्यपेक्षायां यस्मिन् कर्तर्यात्मनेपदं तस्य चेत्तदास्यमिति विज्ञाते तेन परकीयास्यविहरणे विधिरेव भवति।।
पदमञ्जरी

क्रीडोऽनुसंपरिभ्यश्च ।। 1.3.21 ।।

माणवकमनुक्रीडतीति। माणवकेन सह क्रीडतीत्यर्थः। `तृतीयार्थ' इत्यनुः कर्मप्रवचनीयसंज्ञकः। कर्मप्रवचनीयसंज्ञकः। आगमेरिति ण्यन्तस्येदं ग्रहणम्। आगमयस्व तावदिति। सहस्व कञ्चित्कालं मा त्वरिष्ठा इत्यर्थः।

शिक्षेरिति। `शिक्ष विद्योपादाने' इत्यस्यानुदत्तेत्वादेव सिद्धमिति शकेः सन्नन्तस्य ग्रहणम्। शिक्षत इति। `सनि मीमाघु' इत्यच इस्, `स्कोः संयोगाद्योः' इति सलोपः, `अत्र लोपोऽभ्यासस्य' धनुर्विषये ज्ञाने शक्तौ भवितुमिच्छतीत्यर्थः। क्रियाविषयो हि शकेः प्रयोगः- भोक्तुं शक्नोति, गन्तुं शक्नोतीति। तदिह ज्ञानं विषयः, आत्मनेपदेनैव ज्ञानविषयत्वस्य गमितत्वाज्ज्ञानमिति न प्रयुज्यते।

आशिषि नाथ इति। `नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु' अनुदात्तेत्। नियमार्थतु वचनम्-आशिष्येव यथा स्याद् याञ्चादिषु मा भूदिति। अनुदात्तेत्त्वं युजर्थम्। सर्पिषो नाथ इति । `आशिषि नाथः' इति कर्मणि षष्ठी सर्पिर्मे भूयादित्याशास्त इत्यर्थः। हरतेरिति। गतिः प्रकारः। पैतृकमिति। पितुरागतं प्रकारं सततं शीलयन्तीत्यर्थः `ऋतष्ठञ्'। प्रत्युदाहरणे सादृश्यमात्रं विक्षितम्, न प्रकारताच्छील्यम्।

किरतेरिति। विक्षेपार्थः किरतिः। हर्षादयस्तु विषयत्वेनोपत्ताः । तत्र हर्षो विक्षेपस्य कारणम्। जीविकाकुलायकरणे तु फलम्। एतेष्वर्थेषु अपाच्चतुष्पात् इति सुसुड्विधीयते। आपृच्छत इति। `प्रच्छ ज्ञीप्सायाम्' तुदादिः, ग्रहीत्यादिना सम्प्रसारणम्। वाचा शरीस्पर्शनमिति । `त्वत्पादौ स्पृशामि, नैतन्मया कृतम्' इत्येवंरूपः शपथविशेषः। देवदत्तायेति। `श्लाघह्नुङ्स्थाशपाम्' इति सम्प्रदानसंज्ञा ।।
पदमञ्जरी

समवप्रविभ्यः स्थः।। 1.3.22 ।।

सन्तिष्ठत इति। पाघ्रादिसूत्रेण तिष्ठादेशः। अत्राप्युपसर्गग्रहणादिह न भवति-वे तिष्ठसि, वी तिष्ठत इति।

अस्तिं सकारमिति। "स्तः सन्तीत्यादौ सकारमात्रस्य दर्शनात् `स भुवि' इत्यवे धातुः पाठ्यः, अस्तीत्यादौ पिति सार्वधातुके अडागमो विधेयः, आस्ताम् आसन्नित्यादौ आडागमः स्यात्" इति आपिशला मन्यन्ते । गुणस्य त्वागमत्वे उदाहरणं मृग्यम्।।

पदमञ्जरी

प्रकाशनस्थेयाख्ययोश्च।। 1.3.23 ।।

स्वाभिप्रायकथनमिति। कथनमाविष्करणमात्रं न तु शब्देनैव, तेनाभाषमाणायामपि कन्यकायां भवति। तिष्ठत्यस्मिन्निति। प्रकरणादिनात्र विवादपदनिर्णेतुः प्रतीतिः, न तु शाब्दीति विग्रहवाक्ये आत्मनेपदं न कृतम्। संशय्य कर्णादिष्विति। संशयस्थानेषु कर्णादीन् निर्णेतृत्वेनाश्रयतीत्यर्थः।।

पदमञ्जरी

उदोऽनूर्ध्वकर्मणि।। 1.3.24 ।।

कर्मशब्दः क्रियावाचीति। साधनकर्मणि धातोर्वृत्त्यसम्भवादिति भावः। उद ईहायामिति । ईहा=परिस्पन्दः। ईहाग्रहणमित्यादि। ईहात्मकं यदनूर्ध्वकर्म इत्येवमनूर्ध्वकर्मण एव विशेषणमीहाग्रहणम्, न पुनरनूर्ध्वकर्मग्रहणमपनीय ईहाग्रहणं कर्त्तव्यमित्युच्यते इत्यर्थः। तथा हि सत्यासनादुत्तिष्ठतीत्यत्रापि स्यात्, परिस्पन्दरूपत्वादुत्थानस्येति भावः। उद ईहायामित्येतत्कर्मग्रहणात् सिद्धमित्याहुः। कथम्? `ईहाऽनूर्ध्व' इत्येतावताऽनूर्ध्वताविशिष्टं क्रियावाचित्वं सिद्धम्, धातोः क्रियावाचित्वात्। एवं सिद्धे कर्मग्रहणाल्लोकप्रसिद्धं परिस्पन्दात्मकं कर्म गृह्यत इति।।

पदमञ्जरी

उपान्मन्त्रकरणे।। 1.3.25 ।।

पारिभाषिकमत्र करणं गृह्यते, मन्त्रः करणं यस्यार्थस्य तस्मिन्वर्त्तमानादित्यर्थः।

उपादित्यादि। अमन्त्रकरणार्थमिदम्। सङ्गतकरणमुपश्लेष इति। विनापि मैत्रीसम्बन्धात्। स्त्रु घ्नमुपतिष्ठते इति। प्राप्नोतित्यर्थः।

भिक्षुक इति। लिप्सया हेतुभूतया ब्रह्मणकुलमुपगच्छतीत्यर्थः।।

पदमञ्जरी

अकर्मकाच्च।। 1.3.26 ।।

अत्रासम्भवात् क्रिया कर्म न गृह्यते, न ह्यास्ति सम्भवः=धातुश्च भवत्यक्रियावचनश्चेति।। ननु च साधनकर्मणाम्यकर्मकत्वमव्यभिचारादविशेषणम्, न हि शब्दात्मकस्य धातोः कर्मणा योगवियोगौ सम्भवतः, साधनयोगस्य क्रियाधर्मत्वादत आह-अकर्मकक्रियावचनादिति। एतेनाद्वारकमेतद् धातोर्विशेषणमिति दर्शयति। यावद्भुक्तमिति। यथार्थे यदव्ययमिति वीप्सायामव्ययीभावः। सप्तम्यन्तं चैतत्। संनिधीयत इत्यर्थ इति। भावे लकारः। अर्थतोव्याख्यानं चैतत्-यो ह्युपतिष्ठते स संनिधत्ते, यश्च संनिधत्ते तेन संनिधीयते।

अकमकादिति किमिति। पूर्वसूत्रे `उपात्' इति योगविभागादिष्टस्य सिद्धंपश्यति। न चैवमतिप्रसङ्गः, `मन्त्रकरणे' इत्यस्य नियमार्थत्वात्-सकर्मकाद्यदि भवति मन्त्रकरण एवेति। राजानमुपतिष्ठतीति। विपरीतोऽपि नियमः स्यात्-करणे यदि भवति मन्त्रकरण एवेति, ततश्चात्र स्यादेवेति भावः।।

पदमञ्जरी

उद्विभ्यां तपः।। 1.3.27 ।।

उत्तपति सुवर्णमित्यत्र सन्तापने विलापने वा तपिर्वर्तत इति सकर्मकत्वम्।

स्वमङ्गं स्वाङ्गमिति। यस्मिन्कर्तर्यात्मनेपदं तस्य चेत् स्वमङ्गमित्यर्थः। यद्यन्वर्थग्रहणम्? ततोऽप्राणिन्यपि कर्त्तरि यस्य यदङ्गं तत्कर्मकादपि प्रसङ्गः। पारिभाषिके त्वेष दोषो न भवति; तस्य प्राणिस्थत्वात्। अन्वर्थेऽपि न दोषः, तपेः प्राणिकर्तृकत्वात्। पारिभाषिकस्य त्वसम्बन्धिशब्दत्वात् कर्तुश्चेत्स्वमङ्गमित्येवं न प्रतीयेतेति भावः।।

पदमञ्जरी

आङो यमहनः।। 1.3.28 ।।

आहतेति।`अनुदात्तोपदेश'इत्यनुनासिकलोपः। आघ्नत इति। पूर्ववदादेशोपधालोपौ कुत्वं च । आहन्ति शिरः परकीयमिति। `आजघ्ने विषमविलोचनस्य वक्षः' इत्यत्र तु गाण्डीवी विषमविलोचनस्य वक्ष एत्य स्वं वक्षो हतवानित्यर्थः । मल्लोऽप्युत्साहवर्धनाय स्वं वक्ष एत्य एवं वक्षो हतवानित्यर्थः। मल्लोऽप्युत्साहवर्धनाय स्वं वक्ष आस्पालयति।।

पदमञ्जरी

समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः।। 1.3.29 ।।

`समो गम्यच्छिभ्याम्' इत्येतावत्सूत्रम्। प्रच्छ्यादयस्तु वार्त्तिकदृष्टाः सूत्ररूपेण पठिताः, सूत्रकारवद्वार्त्तिककारोऽपि शास्त्रस्य कर्ता, न व्याख्यातेति दर्शयितुम्। तत्र हीति। उत्तरार्थमनुवर्तमानमपि योगविभागसामर्थ्यात् तत्र न सम्बध्यत इत्यर्थः।

न लाभार्थस्येति। सत्ताविचारणार्थयोस्त्वनुदात्तेत्त्वादात्मनेपदेन भाव्यमेवेति भावः। दृशेश्चेत्यादि। इदं वक्तव्यरूपेणैव पठितम्। विचित्रा हि वृत्तेः कृतिः वृत्तिकारेण। अथास्मिन्नकर्मकाधिकारे ये सकर्मका हनिगमिप्रभृतयः, तेषां कथमकर्मकत्वम्? उच्यते--

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।

प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया।।

वहति भारमिति-प्रापणे सकर्मको वहिः, स्यन्दने त्वकर्मकः। वहन्ति नद्य इति--प्रापणे सकर्मको वहिः, स्यन्दने त्वकर्मकः। वहन्ति नद्य इति--प्राणविशिष्टं धारणं जीवतिराह,तत्र प्राणानां धातुनैवोपात्तत्वान्न तेन कर्मणा सकर्मकत्वम्, न च प्राणकर्मके धारणेऽन्यस्य कर्मत्वमिति जीवतिरकर्मकः। प्रसिद्धेर्यथा--वर्षतीत्यनुपात्ते कर्मान्तरे नियमेन जलं प्रतीयत इति न तेन सकर्मकत्वम्, तेन `वृष्टे देवे' इति कर्तरि क्तो भवति। व्यभचारिणा तु रुधिरादिना सकर्मक एवः रुधिरं वर्षति, शरान्वर्षतीति । कर्मविवक्षायां तत्कर्मिकैव क्रिया प्रतिषिद्धा स्याद्, न पाकमात्रमित्यविवक्षा कर्मणः।।

पदमञ्जरी

निसमुपविभ्यो ह्वः।। 1.3.30 ।।

निह्वयते इति। कथं पुनरत्रात्मनेपदम्, यावता `ह्वा' इत्याकारान्तादियं पञ्चमि, एकारान्तश्चायम्, न च विकृतिः प्रकृतिं संगृह्णाति? सत्यम्; आकारान्तात्पञ्चमी, न त्विदं प्रयोगस्थस्याकारान्तस्यानुकरणम्, किं तर्हि? धातुपाठेऽवस्थितैकारान्तस्य तस्यैव लक्षणवशादात्वम्। न चातुक्रियमाणरूपविनाशप्रसङ्गः; शास्त्रवासनया तस्यैव प्रतीतेः, यथा--`यस्येति च' इतीकाराकारयोः।।

पदमञ्जरी

स्पर्द्धायामाङः।। 1.3.31 ।।

सविषय इति । हेतुभावेन च विषयत्वम्, अत एव हेतौ शानच् प्रयुक्तः। स्पर्द्धमानस्तस्याह्वानमिति। शब्दक्रिय एवेति। यद्यपि स्पर्द्धायां पठ्यते, तथाप्याङ्पूर्वस्तत्र न वर्तते, किं तर्हि? शब्दनक्रियावाचीत्यर्थः।।

पदमञ्जरी

गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः।। 1.3.32 ।।

अपकारप्रयुक्तमिति अपकारेण प्रयुक्तमनेन मेऽपकृतमित्येतया बुद्ध्या कृतमित्यर्थः। अथ वा--कथं मयाऽपकृतं स्यादिति बुद्ध्या प्रवर्तितमित्यर्थः। हिसात्मकमिति। सूचितस्य वधबन्धनादिका हिंसा, इह तु तत्करणत्वात्सूचनमेव हिंसा स्वभावमित्युक्तम्। कथं पुनर्ज्ञायते गन्धनं हिंसात्मकमित्यत आह--तथा हीति। चुरादाविति। स्वभावानुवादः। साहसिक्यमिति। सहसा वर्तते साहसिकः `ओजःसहोम्भसा वर्तते' इति ठक्, तस्य कर्मणि ष्यञ् । वर्तिका=शकुनिविशेषः। एधोदकस्येति। समाहारद्वन्द्वः। `कृञः प्रतियत्ने' इति षष्ठी। उपस्कुरुत इति। `उपात्प्रतियत्न' इत्यादिना सुट्।।

पदमञ्जरी

अधेः प्रसहने।। 1.3.33 ।।

प्रसाहनमभिभव इति। `सा साहया युधा नृभिः पृतनाषाड्' इत्यादौ दर्शनात्। केचित्तु `षह मर्षणेऽभिभवे छन्दसि' इति पठन्ति, तत्र `छन्दसि' इति प्रायिकं द्रष्टव्यम्। अपराजयो वेति। पराजेतुं समर्थस्यैव क्षमया यस्तदभावः स इत्यर्थः। तथा च भारविः- `भवादृशाश्चेदधिकुर्वते परान्' इति, भवादृशाश्चेत्परानधिकुर्वते= क्षमया न पराजयन्ते, क्षमन्त इत्यर्थः, तदहन वा तेन पराजित इत्यर्थ इति। तेनात्मनेपदवाच्येन कर्त्रा तमित्येद्वाच्यः कर्मभूतो न पराजित इत्यर्थः। पृथग्योगकरणमित्यादि। प्रकथनोपयोगप्रसहनेषु `अधेः' इत्युच्यमाने गन्धनादिष्वपि अधिपूर्वादेव स्यात्। अथ तत्राधिग्रहणं न क्रियेत, प्रसहनेऽप्यध्यभावेऽपि प्रसङ्गः;अत उत्सर्गेण प्रसहनं विशेषयिस्यामीति प्रसहने वा उत्सर्गं विशेषयिष्यामीति योगविभाग इत्यर्थः।।

पदमञ्जरी

वेः शब्दकर्मणः।। 1.3.34 ।।

`उदोऽनूर्ध्वकर्मणि' इत्यादिवत् कर्मशब्दः क्रियावाची मा विज्ञायीत्याह-- कर्मशब्द इत्यादि। विपूर्वस्य करोतेः शब्दक्रियायां वृत्यसम्भवात्, कृत्रिमसम्भवे लौकिकस्य ग्रहणायोगाच्च। किंच `वेः शब्दः' इत्येव वक्तव्यम्, कर्मग्रहणमनर्थकम्, विकरेति पय इति सकर्मकत्वाद् उत्तरेणापि न भवति।।

पदमञ्जरी

अकर्मकाच्च।। 1.3.35 ।।

ओदनस्य पूर्णा इति। सुहितार्थयोगे षष्ठी भवति, ज्ञापनात्, यदयं पूरणगुणसुहितार्थेति सुहितार्थयोगे या षष्ठी सा न समस्यत इत्याह, तज्ज्ञापयत्याचार्यः-भवति सुहितार्थयोगे षष्ठीति। अकर्मकादिति किमिति। पूर्वसूत्रे वेरिति योगविभागेनेष्टसिद्धिं मन्यते, न चैवमतिप्रसङ्गः, शब्दकर्मण इत्यस्य नियमार्थत्वात्--कर्मणि यदि भवति शब्द एवेति, कटं विकरोतीति। विपरीतोऽपि नियमः सम्भाव्येत-शब्दे यदि भवति कर्मण्येवेति, ततश्चात्रापि स्यादिति भावः।।

पदमञ्जरी

सम्माननोत्सञ्जानाचार्यकरणज्ञानमृतिविगणनव्ययेषु नियः।। 1.3.36 ।।

सम्माननादिषुविशेषणेषु सत्स्विति। युक्तं सम्माननाचार्यकरणवेतनानां विशेषणत्वम्, तत्र हि प्रापणमेव धात्वर्थः, सम्माननादीनि तु तमेव विषयतया व्यवच्छिन्दन्ति। उत्सञ्जनादीनां त्वयुक्तम्; तेषामेव धात्वर्थत्वात्, तद्व्यतिरिक्तस्य विशेष्यस्यासम्भवात्, उच्यते; सम्माननादेरुत्सञ्जनादेश्च विशेषणत्वं समानं पूर्वोक्तं धात्वर्थविशेषणम्, उत्तरस्तु धातुविशेषणमिति विशेष्यमात्रं भिद्यते, अतः सुष्ठूक्तम्--सम्माननादिषु विशेषणेष्विति। चार्वि बुद्धिरिति। चारुशब्दात् `वोतो गुणवचनात्'इति ङीष्। आचार्योऽपि चार्वीति । यथा यष्टीः प्रवेशयेति पुरुषेष्वजहत्स्वलिङ्ग एव यष्टिशब्दः, तद्वच्चार्वीशब्दः। ते युक्तिभिरित्यादि। पूर्वस्मिन् वाक्ये गुणभावेनापि प्रकृते। ते शिष्याः युक्तिभिः प्रतिपाद्यमानाः, निष्पाद्यमाना इत्यर्थः। स्थाप्यमाना इति तु व्याख्याने पदार्थानामचेतनत्वात् न मुख्यं सम्माननम्।

उत्क्षिपतीत्यर्थ इति। तेनोत्सञ्जनं नयतेरर्थ इति दर्शयति।
आचार्यकरणमाचार्यक्रियेति। सूत्रवृत्तौ च कारणावस्थाया विवक्षितत्वात् च्विः प्राप्तोऽपि विकल्पाधिकारान्न कृतः। तथा चाचार्यीकुर्वन्निति च्विः प्रयुक्तः। ननुपनयनं माणवकस्य संस्कारः, येनासावध्ययने योग्यो भवति, न त्वनेनाचार्ये कश्चिदतिशयो जन्यते; आचार्यशब्दस्य तु प्रवृत्तिनिमित्तमुपनीयाध्यापनं नाम क्रियाविशेषः, यथोपाध्यायशब्दस्यैकदेशाध्यापनं तत्कथमाचार्यकरण आत्मनेपदं विधीयते इत्यत आह--माणवकमीदृशेनेत्यादि । एवं मन्यते--उपनियाध्यापनेनादृष्टरूपः कश्चिदतिशय आचार्ये जन्यते, तदेव प्रवृत्तिनिमित्तमाचार्यशब्दस्येति तदाह--स्वयमाचार्यः सम्पद्यते इति । `आत्मानमाचार्यीकुर्वन्' इति च हेतुलक्षणे लटः शत्रादेशः। ईदृशेनेति । यादृशः शास्त्रोक्तो विधिस्तादृशेनेत्यर्थः। ननु यद्याचार्यकमुपनयनस्य प्रयोजनं तत्कर्त्रभिप्रायमिति नार्थ आचार्यकरण आत्मनेपदविधानेन? उच्यते; नोपनयनेनाचार्यकं जन्यते, किं तर्हि? तत्पूर्वकेणाध्ययनेन। उपनयनक्रियायास्तु माणवकसंस्कारः साक्षात्फलम्। एवं संस्कृतस्य माणवकस्य यदध्यापनं तेनाचार्यकं जन्यते इति न तदुपनयनायः क्रियायाः फलम्। पच्च तस्याः फलं तन्माणवकगामि, न कर्तृगामि। निश्चिनोतीत्यर्थ इति । अनेन ज्ञानं नयतेरर्थ इत्याह। कारं विनयते इति। कर एव कारः, प्रज्ञादिः, राजग्राह्यो भागः कर्षकैः कल्पितः।।
पदमञ्जरी
कर्तृस्थे चाशरीरे कर्मणि।। 1.3.37 ।।
नयतेरात्मनेपदविधानात्तत्सम्बन्ध्येव कर्त्ता लकारवाच्यः प्रत्यासन्नो गृह्यत इत्याह--नयतेः कर्त्तेति. तदेकदेशोऽपि शरीरमिति। अपिशब्दोऽवधारणे। इह शरीरस्यैव चैतन्यविशिष्टस्य कर्तृत्वं लौकिकाः प्रतियन्ति, न तद्व्यतिरिक्तस्य बुद्धीन्द्रियादिमतश्चतनस्य । न च शरीरमेवशरीरस्थं भवति, अतस्तदेकदेश एव तद्ग्रहणेन गृह्यते इत्यर्थः। अत्र क्रोधाद्यपनयनफलं कर्त्रभिप्रायमिति `स्वरितञितः'इत्येव सिद्धे नियमार्थमिदम्-- कर्तृस्थे कर्मण्यशरीरस्थ एवेति । अथ कथम् `विगण्य्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः' इति? केचिदाहुः-अपगमे वर्तमानादिदमात्मनेपदविधानं भवति, अत्र तु करोत्यर्थे प्राप्त्यर्थे प्राप्त्यर्थे वा वर्तते, अनेकार्थत्वाद्धातूनामिति।।
पदमञ्जरी
वृत्तिसर्गतायनेषु क्रमः।। 1.3.38 ।।
सर्ग उत्साह इति । `सृष्टश्चेद्ब्राह्मणवधे', `येनेन्द्रलोकापजयाय सृष्टः'इत्यादौ दर्शनात्सृजिरुत्सहार्थः। वृत्त्यादिष्विति किम्? अपक्रामति।।
पदमञ्जरी
उपपराभ्याम्।। 1.3.39 ।।
उपपराभ्यामिति माणवकः कुतुपमिति। उपसर्गनियमः किमर्थ इत्यर्थः। संक्रामतीति। `क्रमः परस्मैपदेषु' इति दीर्घः।।
पदमञ्जरी
आङ उद्गमने।। 1.3.40 ।।
आक्रामति माणवकः कुतुपमिति। अवष्टभ्नातीत्यर्थः। ह्रस्वा कुतूः कुतुपः, `कुत्वा डुपच्'। कुतुपमिति पाठे कुतपो दर्भसंस्तरः। आक्रामति धूमो हर्म्यतलमिति। उद्गमनपूर्विकायां व्याप्तावत्र क्रमिर्द्रष्टव्यः। इह तु `नभः समाक्रामति चन्द्रमाः क्रमात्' इति क्रमिर्व्याप्तौ वर्तते; नोद्गमने।।
पदमञ्जरी
वेः पादविहरणे।। 1.3.41 ।।
विक्रामत्यजिनसन्धिरिति। द्विधा भवति, स्फुटतीत्यर्थः।।
पदमञ्चरी
प्रोपाभ्यां समर्थाभ्याम्।। 1.3.42 ।।
अन्योऽन्यसाहचर्यात्प्रोपयोरुपसर्गयोर्ग्रहणम्, न प्रातिपदिकान्तकर्मप्रवचनीययोः, नापि क्रियान्तरसम्बन्धिनोः, नाप्यनर्थकयोरित्याह-प्र उप इत्येताभ्यामुपसर्गभ्यामिति। तुल्यार्थाविति। एतेन समोऽर्थो ययोरितिसमर्थौ, शकन्ध्वादित्वात्पररूपम्, संशब्दस्यैव वाऽनेकार्थत्वात्तुल्यार्थत्वमिति दर्शयति। ननु `समर्थः पदविधिः'इत्यादौ सम्बन्धार्थत्वं प्रसिद्धम्, सत्यम्; इह तु धात्वर्थ प्रति पारतन्त्र्यान्न परस्परेण सम्बन्धार्थत्वम् । धातुना चोपसर्गयोः सम्बन्धोऽव्यभिचारी, तस्मात्पूर्वोक्त एवार्थः। प्रक्रमते इति । आरभत इत्यर्थः।।
पदमञ्जरी
अनुपसर्गद्वा।। 1.3.43 ।।
अप्राप्तविभाषेयमिति। `उपपराभ्याम्' इत्यस्य नियमार्थत्वाद् वृत्त्यादिसूत्रमनुपसर्गविषयमेवेति न तत्रायं विकल्प इति भावः।।
पदमञ्जरी
अपह्नवे ज्ञः।। 1.3.44 ।।
शेषादित्यादि। असत्यस्मिन् सूत्रे अयमविशेष एव भवतीति भावः। सोपसर्गाश्चेति। तेन `अनुपसर्गाज् ज्ञः' इत्यनेन कर्त्रभिप्राये क्रियाफले न सिद्ध्यतीति भावः। उपजानीते इति । `ज्ञाजनोर्जा'।।
पदमञ्जरी

अकर्मकाच्च।। 1.3.45 ।।

अकर्त्रमिप्रायार्तमिदमिति। अथ कर्त्रभिप्राये कथम्, तत्राह-कर्त्रभिप्रायो हीति। ननु सोपसर्गात्कर्त्रभिप्रायेऽप्यनेनैवात्मनेपदमेषितव्यम्--औषधस्यानुजानीते, औषधस्यानुजिज्ञासत इति; तस्मात्सर्पिषो जानीते इत्युदाहरणाभिप्रायमेतद्वेतव्यम्। कथं चायमकर्मक इति। `सर्पिषः' इति कर्मणि शेषत्वेन षष्ठी, न माषाणामश्नीयादितिवत्। तेन सर्पिरादिना ज्ञेयेन सकर्मक इति मत्वा प्रश्नः।

अकर्मकादिति किमिति। यदि सर्पिरादि करणत्वेन विविक्षितम्, तर्हि करणादिति वक्तव्यमित्यभिप्रायः। एवमुच्यमाने सकर्मकादपि स्यादेवेति दर्शयतिस्वरेणेति।।

पदमञ्जरी

सम्प्रतिभ्यामनाध्याने।। 1.3.46 ।।

उत्कण्ठास्मरणम् उत्कण्ठापूर्वकं स्मरणम्। मातुरिति। `अधीगर्थदयेशाम्'इति षष्ठी । ननु `शेष' इति तत्रानुवर्त्तते, तेन कर्म शेषत्वेन विवक्षितव्यमिति अकर्मकत्वात्पूर्वेणात्रात्मनेपदप्रसङ्गः। `अनाध्याने' इत्यस्य तु मातरं संजानातीति व्यावर्त्यं स्याद्यत्र कर्मतैव विवक्षिता, नैष दोषः; `अनाध्याने'इति विभज्यते, तेन पूर्वयोगस्यापि शेषो भविष्यति।।

पदमञ्जरी

भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः।। 1.3.47 ।।

भासनादिष्विति। अत्रापि किञ्चिद्धातोर्विशेषणम्, किञ्चिद्धात्वर्थस्य। उपसान्त्वनम् = उपच्छन्दनम्, धातोः, भासनादि धात्वर्थस्य । भासमान इति । हेतौ लटः शानजादेशप्रयोगेण भासनं हेतुत्वेन विशेषणमित्याह । शिष्यैः स्तूयमानो भासते। तथा चोपर्युपरि शास्त्रार्थस्य प्रतिभासनात् सुष्ठु वदनं भवति, तेजोभङ्गे तु न शक्नुयाद्वदितुम्। जानाति वदितुमिति। `शकवृष' इत्यादिना तुमुन्, अत्र वदत्यर्थो ज्ञानस्य विषयः, ज्ञानं विषयि। तद्विषयमित्यादि। अत्र यत्नस्याविष्करणरूपस्य वदत्यर्थस्य कर्म।

विमतिपतिता इति हेतुगर्भविशेषणं प्रयुञ्जानो विमतिर्हेतुत्वेन विशेषणमित्याह। विमतौ हि सत्यां विचित्रभाषणरूपो वदत्यर्थो निवर्तते। उपच्छन्दयतीति। `भद्रे भजस्व मास्, इदं ते दास्यामि' इति, स्वाभिलषिते प्रवर्तयतीत्यर्थः।।

पदमञ्जरी

व्यक्तवाचां समुच्चारणे।। 1.3.48 ।।

मनुष्याः प्रसिद्धा इति। यद्यपि कुक्कुटादिरुतमपिस्वरूपेम व्यक्तम्-अस्येदं रुतमस्येदमिति। मनुष्यवाक्तु व्यक्ततरा भवति, वर्णात्मकत्वाद्, अर्थावगतिहेतुत्वाच्च, अतस्त एव गृह्यन्ते। शुकशारिकादीनां तु पुरुषप्रयत्नवशेन क्वाचित्कं व्यक्तवाक्त्वम्, न स्वभाविकमिति ने तेषां ग्रहणम्।

वरतनु सम्प्रवदन्ति कुक्कुटा इति।

अपनय पादसरोजमङ्कतः, शिथिलय बाहुलतां गलाद्दताम्।

क्व च वदनेंऽशुकमाकुलीकृतम्,......इति पूर्वपादाः।

क्व् चित्तु कृत्स्न एव श्लोकः पठ्यते, तत्र वरतनुरिति बहुव्रीहौ यदि ह्रस्वन्तस्तनुशब्दः, ततः `संबुद्धौ च' इति गुणप्रसङ्गः, दीर्घान्ते तु नदीलक्षणः कप् प्राप्नोति। केचिदाहुः-तनुशब्दः स्त्रीजातौ कविभिः प्रयुज्यते, तस्माद् `ऊङुतः' इति ऊङि कृते कर्मधारयोऽयमिति।।

पदमञ्जरी

अनोरकर्मकात्।। 1.3.49 ।।

व्यक्तवाचामिति वर्त्तत इति। न तु समुच्चारण इति सर्वानुवृत्तौ वचनमिदमनर्थकं स्यादिति भावः। तद्व्यक्तवाक्सम्बन्धिनो वदेरिति सूत्रार्थमाह--व्यक्तवाग्विषयादिदि। अनुः सादृश्ये इति। तेन कलापस्येति तुल्यार्थयोगे शेषलक्षणा षष्ठीति भावः। यथेत्यादि। वदनमात्रसादृश्ये तात्पर्यमिति कर्म न विवक्षितमिति भावः। अनुवदति। पुनर्वदतीत्यर्थः।।

पदमञ्जरी

विभाषा विप्रलापे।। 1.3.50 ।।

संवत्सरान् वदन्तीति सांवत्सराः=ज्यौतिषिकाः। एवं मौहूर्तिकाः।।

पदमञ्जरी

अवाद् ग्रः।। 1.3.51 ।।

`गिरः' इति पाठे धात्वनुकरणत्वाद् विभक्तावित्वम् । `ग्रः'इति तु पाठे रूपमात्रानुकरणं द्रष्टव्यम्। तस्य ह्यवपूर्वस्येति। नियतविषयाण्यपि क्रियाविशेषणानि भवन्ति, यथा--उर्यादयः कृभ्वस्तिभ्योऽन्यविषया न भवन्तीति भावः।।

पदमञ्जरी

समः प्रतिज्ञाते।। 1.3.52 ।।

प्रतिज्ञानमभ्युपगम इति । केचिदाहुः-"परोपदेशनिरपेक्षमात्मनैव विप्रतिपन्नस्य पक्षघ्य परिग्रहोऽभ्युपगमः, परेण प्रार्थितस्यार्थस्य नियमवचनम् `एतावद्दास्यामि' इति, `अस्मिन्काले दास्यामि' इत्येवंरूपः प्रतिश्रवः। परेण युक्त्या साधितस्यार्थस्य सम्मान्नम्--समीचीनमुक्तमत्र भवतेत्येवं रूपमङ्गीकरणमिति,

प्रतिज्ञासामान्यावान्तरभेदा एते, न तु पर्यायाः" इति। वृत्तिकारस्तु परस्परविषयोऽङ्गीकरणादिव्यहारदर्शनात् पर्यायत्वमेव मन्यते।।
पदमञ्जरी
उदश्चरः सकर्मकात्।। 1.3.53 ।।
उत्क्रम्येति उल्लङ्घयेत्यर्थः। उच्चरतीति उपरिष्टद् गच्छतीत्यर्थः।।
पदमञ्जरी
समस्तृतीयायुक्तात्।। 1.3.54।।
विभक्तिर्गृ ह्यते इति । तत्रैव तृतीयाशब्दस्य मुख्यत्वात् । यद्येवम्, तया सह धातोः सम्बन्धो न भवति; न हि तृतीया धातुवाच्या, नापि धातुस्तृतीयान्त इत्यत आह-तयेत्यादि। तृतीयार्थेन धात्वर्थस्य योगादौपचारिको धातोस्तृतीयायोग इत्यर्थः। यद्यप्यत्रेति। न हि चेष्टारूपसञ्चरणमन्तरेम करणं सम्भवति, अतोऽश्रुतेऽपि करणपदे तपसा श्रुतेन वेति गम्यमानत्वात्तदर्थयोगस्य सम्भवः। तृतीया त्विति। एतदर्थमेव हि पूर्वमुक्तम्--विभक्तिर्गृ ह्यत इति। तृतीयायुक्तादिति वाऽनर्थकं स्तात्। यदि तदर्थयोगः स्यात्, सर्वत्रैवं तदर्थभावादिति भावः।।
पदमञ्जरी
दाणश्च सा चेच्चतुर्थ्यर्थे।। 1.3.55 ।।
वक्तव्यमेवैतदिति। सूत्रे चेच्छब्दश्चशब्दश्चार्थे, अनेकार्थत्वान्निपानामिति। केचिद्-दाणस्तृतीयायुक्तादात्मनेपदं भवति, सा च तृतीया चतुर्थ्यवेदितव्याचक्षते; एवमपि `अशिष्टव्यवहारे' इति वक्तव्यमेव, अशिष्टानां सङ्कीर्णाचाराणां यो व्यवहार आचारः तस्मिन्नित्यर्थः। दास्या सम्प्रयच्छत इति । यो दास्या सह भुञ्जानस्तया दत्तं स्वयं च तस्यै ददाति तद्विषयोऽयं प्रयोग इत्याहुः। कथमात्मनेपदमिति। न कथञ्चित्, `तस्मादित्युत्तरस्य' इत्यत्र निर्दिष्टग्रहणस्यानन्तर्यार्थत्वादिति भावः। विशेषणषष्ठीति । एवं च पूर्वसूत्रेऽप्यश्वेन समुदाचरत इत्यादावपि भवितव्यम्।।
पदमञ्जरी
उपाद्यमः स्वकरणे।। 1.3.56 ।।
इह स्वस्य सतो रूपान्तरेण यत्करणं तत्स्वकरणमिति न गृह्यते, किं तर्हि? यदाऽस्वं स्वं करोति तदा भवितव्यम्, च्विप्रत्ययस्तु विकल्पितत्वान्न भवति। पाणिग्रहणविशिष्टमिति। पाणिग्रहणं नाम कश्चित्कन्यासंस्कारस्तद्विशिष्टमित्यर्थः। भाष्ये तु-अस्वस्य सतः स्वत्वापादनमेव स्वकरणमित्युक्तम्। भट्टिकाव्येऽपि तदनुगुणः प्रयोगः- उपायंस्त महास्त्राणि, उपायंसत नासतम्, नोपायंस्त दशानन इति। देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छति, यज्ञदत्तसम्बन्धिनीं भार्यां दास्यादिरूपेण स्वीकरोतीत्यर्थः। पाणिग्रहणाभावाद् वृत्तिकारमते युक्तं प्रत्युदाहरण, भाष्यकारमते त्वत्रापि भवितव्यम्।।
पदमञ्जरी
ज्ञाश्रुस्मृकद्दशं सनः।। 1.3.57 ।।
श्रुद्दशोरपौति। श्रुवः सूत्र एव निर्देशाद् द्दश उपसंख्यानात्।।
पदमञ्जरी
नानोर्ज्ञः।। 1.3.58 ।।
पूर्वेणेति। अनन्तरसूत्रेण यत्प्राप्तं तत्प्रतिषिध्यते, कुत एतत्? `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति। तथा चेति। अनन्तरस्य प्रतिषेध इत्युक्तम्, एवं सति सकर्मकस्यैवायं प्रतिषेधः सम्पद्यते, अनन्तरयोगस्य सकर्मकविषयत्वाद्, अकर्मकाविषयत्वाद् `अकर्मकाच्च' इति प्रागेव विहितत्वात्। तेनाकर्मकात् `पूर्ववत्सनः' इत्यात्मनेपदं भवत्येव-औषधस्यानुजिज्ञासत इति। औषधेन प्रवर्तितुमिच्छतीत्यर्थः।।
पदमञ्जरी
प्रत्याङ्भ्या श्रुवः।। 1.3.59 ।।
उपसर्गग्रहणं चेदमिति। परस्परसाहचर्यात्। देवदत्तं प्रतीति। `लक्षणेत्थंभूत' इत्यादिना प्रतिः कर्मप्रवचनीयः, नोपसर्गः।।
पदमञ्जरी
शदेः शितः।। 1.3.60 ।।
यद्यत्र शदेः परो यः शित्, तत आत्मनेपदं भवतीत्येवं व्यधिकरणे पञ्चम्यावाश्रित्य व्याख्यायेत, ततोऽपि विकरणे सत्यनेन विधिना भवितव्यम्। सार्वधातुके च परतो विधीयते, ततश्च प्रागेवास्मद्विधेः सार्वधातुकं भवच्छेषत्वत्परस्मैपदं स्यात्, तस्मिंश्च सति तन्निमित्ते शिति विकरणे कृते परस्मैपदस्य निवृत्तिर्न सिद्ध्येत्। न हि निर्वृत्तस्य निर्वृत्तिर्वचनशतेनापि शक्यते कर्तुमिति-इमं व्यधिकरणपक्षे दोषं द्दष्ट्वा सामानाधिकरण्ये पञ्चम्याविति दर्शयन्नाह-शदिर्यः शिदिति। कथं पुनः शदिः शिद्भवती, विकरणे हि शकार इद् भवति, तत्राह-शिद्भावीति । शिद्भावी यस्मात् स तथोक्तः। शिद्भावित्वाद् उपचारेण शदिरेव शिदित्युक्तमित्यर्थः। शितो वा सम्बन्धीति । `शितः' इत्यस्य षष्ठ्यन्ततां दर्शयति। कश्च शदिः शितः सम्बन्धी? यस्तस्य प्रकृतिः। प्रागेव च शिदुत्पत्तियोग्यतया तत्प्रकृतित्वमस्त्येव । शीयत इति । पाघ्रादिसूत्रेण शीयादेशः।।
पदमञ्जरी
म्रियतेर्लुङ्लिङोश्च ।। 1.3.61 ।।

लुङ्लिङोः इति स्थानषष्ठीयम्, विषयसप्तमी वा। नियमार्थमिति। यदि नियमः क्रियते, ङित्करणं किमर्थम्, यावताऽप्राप्ते विधिरवास्तु? इह मा हि मृतेति लुङि `तास्यनुदात्तेत्' इति ङिल्लक्षणः सार्वधातुकनिघातो यथा स्यात्। तिङ्निघातोऽत्र `हि च' इति प्रतिषिद्धः।।
पदमञ्जरी
पूर्वत्सनः।। 1.3.62 ।।
पूर्ववदिति। `तेन तुल्यम्' इत्यादिना तृतीयचान्ताद्वतिः, न पञ्चम्यन्तात्; लक्षणाभावात् । यथा च ब्राह्मणेन तुल्यं वैश्यादधीत इत्युक्ते ब्राह्मणादिवद् वैश्यादधीते इति पञ्चम्यर्थो गम्यते, तथेहापि पूर्वस्मादिव सनन्तादप्यात्मनेपदमित्यर्थो लभ्यते। `तुल्यार्थैः' इति हि तृतीया सर्वविभक्त्यर्थानन्तर्भावयति। यदि सनः पूर्वो यो धातुरिति। एतेन `सनः' इति पूर्वस्यावधिनिर्देशः., न त्वात्मनेपदापेक्षया परपञ्चमीति दर्शयति।
यद्येवम्, सनन्तादात्मनेपदमिति न लभ्येत, `सनः' इत्यस्य सकृच्छ्रुतस्यावधिनिर्देशेनोपक्षीणत्वाद्, अत आह-तद्वत्सनन्तादपीति। अवधित्वेनापि तावत्सनः श्रुतत्वात् प्रत्यासत्या तदन्तादेव विधिर्विज्ञायत इति भावः। अथैवं कस्मान्न विज्ञायते सनन्तादात्मनेपदं भवति, पूर्ववदिति श्रौतोऽन्वयः, तत्र कुतः पूर्ववदित्यपेक्षायां सन्निहितत्वात्सन एव पूर्ववदिति विज्ञास्यत इति ? एवं मन्यते-एवं विज्ञायमानेऽयमेव योगः पूर्वस्यावधिः सम्भाव्येत, यथा-`पूर्वत्रासिद्धम्' इत्यत्र तत एव योगात् पूर्वत्रेति। ततश्चायमर्थः स्याद्-`अनुदात्तङितः' इत्यारभ्येतः पूर्वं ये धातवो निर्दिष्टास्तेभ्यः सनन्तेभ्यस्तद्वदेवात्मनेपदं भवतीति, ततश्चोत्तरो विधिः सनन्तान्न स्यात्-`भुजोऽनवने',बभुक्षत इति,तस्मात्सनः पूर्ववदित्येव श्रौतोऽन्वय एष्टव्य इति। यद्ययं कार्यातिदेशः शास्त्रातिदेशो वा विज्ञायेत, तदा सन्प्रकृतौ प्रयोगान्तरे दृष्टमित्येव निमित्तनिरपेक्षं कार्यं शास्त्रं वातिदिश्यमार्नीमहाप्यतिदिश्येत-शिशत्सति, मुमुर्षति; शीयते, म्रियते इत्यत्र दृष्टत्वादिति मतेऽनयोः पक्षयोर्दोषं दृष्ट्वा निमित्तातिदेशमाश्रित्याह-येन निमित्तेनेति। निमित्तस्य तुल्यत्वात्तद्द्वारकं यदात्मनेपदाविधेस्तुल्यत्वं तदाश्रीयते इत्यर्थः। पूर्वमिति। सनुत्पत्तेः प्राक् प्रयोगान्तर इत्यर्थः। पूर्वस्मादिति युक्तः पाठः, तथा च सनन्तादपीति सङ्गच्छते। यद्यपि प्रकृतिगतं ङित्त्वादिकं सनन्ते धातौ वचनशतेनापि प्रापयितुमशक्यम् निमित्तं भवतीत्यतिदेशार्थः, तावता च निमित्तातिदेशवाचोयुक्तिः। आसिसिषत इति । इटि कृते `अजादेर्द्वितीयस्य' इति सिशब्दस्य द्विर्वचनम्। निविविक्षत इति।`हलन्ताच्च' इति सनः कित्त्वम्, व्रश्चादिषत्वम्, `षढोः कः सि'। आचिक्रंसत इति । आङ आत्मनेपदनिमित्तत्वात् `स्नुक्रमोः' इतीड् नैव भवति।
निमित्तातिदेशाश्रयणस्य फलमाह-इहेति। कारणमाह-न हीति । शिदाद्यपीति। शिद्भावित्वादिकमपीत्यर्थः। आदिशब्देन लुङ्लिङोर्ग्रहणम्, तच्चेह नास्ति। कृते सनि तदन्तमेव शिद्भावि, न शदिम्रियतिभ्यात्। शिशयिषत इत्यादौ तु कृतेऽपि सनि तदानीमपि ङित्त्वादिकं प्रकृतिगतं विद्यत इति भावः।
यदि तर्हि निमित्तातिदेशः, अनुचिकीर्षतीत्यत्रापि प्रसङ्गः; गन्धनादेरर्थस्य ङित्त्वस्य चात्मनेपदनिमित्तस्य सन्यपि परस्मैपदे निमित्तत्वात्। कार्यातिदेशे तु न दोषः;`अनुपरभ्यां कृञः' इति परस्मैपदेनापवादेनात्मनेपदस्य बाधितत्वादत आह--यस्य चेति । न योग्यतामात्रेण निमित्तत्वम्, किं तर्हि? कुर्वद्रूपस्येति स्नुक्रमोरित्यत्र वक्ष्यत इति भावः। यदि कुर्वद्रूपं निमित्तम्, जुगुप्सत इत्यादौ कथम्, न ह्यत्र प्रकृतिगतमनुदात्तेत्त्वं तत्रात्मनेपदं कदाचिदपि करोति नित्यसनत्वाद् गुपादीनामत आह--इहेत्यादि। न वात्रानेनात्मनेपदम्, किं तर्हि? `अनुदात्तङितः' इत्यनेनेत्यर्थः। कथं पुनः समुदायस्य जुगुप्सादेरनुदात्तेत्त्वमत आह--अवयव इति। अवयवे ह्यचारितार्थं लिङ्गं सामर्थ्यात्समुदायस्य विशेषकं भवति। यद्येवम्, गोपयति तेजयतीत्यदावपि प्रसङ्गः। अथ यं समुदायं योऽवयवो न व्यभिचरति, तत्र कृतं लिङ्गं तस्य विशेषकं भवति; णिजन्तं च व्यभिचरति, विनापि तेन जुगुप्सत इति गुपेः प्रयोगादित्युच्येत। वक्तव्यो वा विशेषः, अयमुच्यते-`गुप गोपने' इत्यस्य सन्विधौ ग्रहणम्, तस्माच्च नित्यं सनेव भवति, नापरः प्रत्ययः प्रत्ययः। गोपायतीत्यादिकस्तु प्रयोगः `गुपू रक्षणे' इत्यस्य, स चान्य एव। अवश्यञ्चैतदेवं विज्ञेयम्-अन्य एव सन्प्रकृतिः तस्माच्च सनेव भवतीति; अन्यथा निन्दाया अन्यत्र यथा णिज् भवति तथा लङादिरपि स्यात्। एवं तिजिप्रभृतयोऽपि, क्षमाद्यर्थे यत्र सन्निष्यते तत्रानुदात्तेतो नित्यसनन्ताश्च; क्षमादिभ्योऽन्यत्र तु तत्र णिजिष्यते तत्राननुबन्धका एव चुरादौ पठितव्याः।।
पदमञ्जरी
आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ।। 1.3 63 ।।
नन्वामन्तस्याधातुत्वाददृष्टमात्मनेपदम्, तत्कथं कृञोऽतिदिश्यते? स्यादियमनुपपत्तिः, यदि प्रत्ययग्रहणं न क्रियते, कृतेऽपि वा तस्मिन् प्रत्ययग्रहणे कर्मधारयस्तद्गुणसंविज्ञानो वा बहुव्रीहिराश्रीयेत; इह त्वतद्गुणसंविज्ञानो बहुव्रिहिः,धातुरन्यपदार्थस्तदाह--आम्प्रत्ययो यस्मादिति। विग्रहः समुदायः समासार्थ इति, आम् प्रत्ययो यस्येति वग्रहः स्यात्; प्रतियोगिनि षष्ठीनिर्देशात्, `तत्र तस्य' इति षष्ठ्यान्ताद्वतिरित्याह--आम्प्रत्ययस्यैवेति कृञोऽनुप्रयोगस्येति। समानाधिकरणे षष्ठ्यौ। अनुप्रयोगशब्दः कर्मसाधनः। ईक्षाञ्चक्र इति ।`ईक्ष दर्शने' `ईह चेष्टायाम्' लिट्, `इजादेश्च' इत्याम्, `आमः' इति लेर्लुक्। `अकर्त्रभिप्रायार्थोऽयमारम्भः' इति ब्रुवता विध्यर्थमेवैतदित्युक्तम्। तत्र दोषमुद्भावयितुमाह--यदीति। किं पुनः कारणं विध्यर्थत्वमङ्गीकृत्य तदनुगुणो दोष उद्भाव्यते, न पुनर्नियमार्थत्वमङ्गीकृत्य तदनुगुणो दोष उद्भाव्येत? सत्यम्; अकर्त्रभिप्राये याचयाञ्चक्रे, उब्जाञ्चकारेति प्राप्ते आम्प्रत्ययवदेव, तत्र विधिनियमसम्भवे विधिरेव ज्यायान्, तस्मादेवमुच्यते--`उब्ज आर्जवे', `उन्भ पूरणे'। उभयमित्यादि परिहारः। कथमिति। नैकेनैव यत्नेनोभयं लभ्यमिति भावः।
ईक्षाम्बभूवेति। `भवतेरः' `भुवो वुग् लुङ्लिटोः'। कथं पुनरिति। `कृञः' इत्यत्र स्वरूपग्रहणं मन्यमानस्य प्रश्नः। प्रत्याहारग्रहणमिति। यदि तत्र स्वरूपग्रहणं स्याद्, इह कृञ्ग्रहणमनर्थकं स्याद्; अन्यस्यानुप्रयोगस्याभावादिति भावः। अत एव विपर्ययोऽपि न भवति-तत्र स्वरूपग्रहणं स्याद् इहि प्रत्याहारग्रहणमिति,

इह हि प्रत्याहारग्रहणे भ्वस्त्योरप्यात्मनेपदविधिः प्रयोजनम्। यदि चानुप्रयोगविधिना कृञ् एवानुप्रयुक्तः स्यात्, तदा भ्वस्त्योरनुप्रयोगाभावादात्मनेपदविधिरनुपपन्नः स्यात्। तस्मादिह स्वरूपग्रहणम्, आमनुप्रयोगविधौ प्रत्याहारस्येति सिद्धम्। `अभिविधौ सम्पदा च' इति सम्पदोऽपि तत्रान्तर्भावादनुप्रयोगः प्राप्तः `सनाद्यन्ता धातवः' इत्यतो धात्वधिकाराद्धातूपसर्गसमुदायस्य न भवति। योऽत्र धातुस्तस्यापि न भवति; अर्थविप्रतिषेधादिति तत्रैव वक्ष्यामः।।

पदमञ्जरी

प्रोपाभ्यां युजेरयज्ञपात्रेषु।। 1.3.64 ।।

प्रोपाभ्यां युजेरयज्ञपात्रेषु।। युजिर्योगे इति । `युज समाधौ' इत्यस्य,न दैवादिकस्य, अनुदात्तेत्त्वादेव सिद्धम्, युजरिति च विवक्षित इकारः, न त्वागन्तुकः। यज्ञपात्रविषयता चास्यैव सम्भवतीति भावः। प्रयुङ्क्त इति। `रुधादिभ्यः श्नम्' `श्नसोरल्लोपः' कुत्वचर्त्वे, अनुस्वारपरसवर्णौ।

स्वराद्यन्तोपसृष्टदिति। स्वरः=अ इ, आदिरन्तो वा यस्य स स्वराद्यन्तः। तेनोपसर्गेण सम्बन्धः, स्वराद्यन्तोपसृष्टः- सम् निस् दुस् इत्येतान् वर्जयित्वा सर्व एवोपसर्गास्संगृहीताः।।

पदमञ्जरी

समः क्ष्णुवः।। 1.3.65 ।।

इह `शर्परे विसर्जनीयः' इत्यस्यावकाशो यत्र कुप्वोरसम्भवः-पुरुषः त्सरुकः; `कुप्वोः कः पौ च' इत्यस्य यत्र शर्परौ कुपू न सम्भवतः- पुरुषः करोतीति; शर्परयोरुभयोः प्रसङ्गे पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति `शर्परे विसर्जनीयः' इति नित्यं विसर्जनीय एव भवति । तेन `समः क्ष्णुवः' न कर्तव्यमिति भावः। संक्ष्णुवत इति। अदादित्वाच्छपो लुक्, `आत्मनेपदेष्वनतः' इति झस्यादादेशः,`अचि श्नुधातु'इत्यादिनोवङ्।।

पदमञ्जरी

भुजोऽनवने।।1.3.66 ।।

अनवनप्रतिषेधेनेत्यादि। संसर्गवद्विप्रयोगोऽपि विशेषस्मृतिहेतुः। यथा दोग्ध्रीपर्यायो धेनुशब्दः संसर्गिभिः विशेषेऽवस्थाप्यते--सवत्सा धेनुरानीयतां सकिशोरा सवर्करेति, तथाऽवत्साऽकिशोराऽवर्करेति। यस्या आनयने द्दष्टः संसर्गः सैव तत्र गृहीता आनीयते; तद्वदिहापीत्यर्थः।।

पदमञ्जरी

णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने ।। 1.3.67 ।।

अत्र `णेः' इति यद्यपि सामान्यनिर्देशः,तथापि पुच्छभाण्डादिणिङ् न गृह्यते; अणौ कर्मणो णावसम्भवात्, कमेर्णि ङस्तु`आयादय आर्द्धधातुके वा' इति वचनादण्यन्तावस्था सम्भवति। कर्मणश्च कर्तृत्वम्--कमिष्यते योषितं देवदत्तः कामयिष्यते योषित्स्वयमेवेति, तथापि ङित्त्वादेव सिद्धे सोऽपि न गृह्यत इति णिच एव ग्रहणमित्याह--णिचश्चेति कर्त्रभिप्राये क्रियाफले सिद्धमेवात्सनेपदमिति। अकर्त्रभिप्रायार्थ इति। उपलक्षणमेतत्, कर्त्रभिप्राये पदान्तरेण द्योतिते `विभाषोपपदेन प्रतीयमाने' इति विकल्पं बाधित्वा नित्यो विधिर्यथा स्यादित्यपि द्रष्टव्यम्। अत्रैकवाक्यतायामयमर्थो भवति--ण्यन्तादात्मनेपदं भवत्यण्यन्तावस्थायां यत्कर्म ण्यन्तावस्थायां यदि स कर्त्ता भवति आध्यानादन्यत्रेति। तत्र कर्मान्तरनिवृत्तिर्न कृता स्यात्, ततश्चेहापि प्रसज्येत--आरोहन्ति हस्तिनं हस्तिपकास्तानारोहयति हस्तीति। किं च उक्तेऽर्थे `णेरणौ कर्मणि' इत्येतावदेव वाच्यम्; कर्त्तरीत्येव ण्यन्तादात्मनेपदं भवति, `अणौ कर्मणि कर्तरि' इत्युक्ते को नाम विवक्षितोऽर्थो न सिद्ध्यति। `सः' इत्येतच्चानर्थकम्; यत्तदोर्नित्यसम्बन्धादेवाध्याहारतः सिद्धेः। तस्माद्यथाश्रुतमात्रं न विवक्षितमिति मत्वा पृच्छति--कथमिति।

इतरोऽपि वाक्यभेदाश्रयणेन परिहरति--अणौ यत्कर्मेत्यादि। णेरात्मनेपदं भवति आध्यानादन्यत्रेत्येकं वाक्यम्, ततोऽणौ यत्कर्मेति द्वितीयम्। अत्र वाक्ये यत्तदोर्नित्यसम्बन्धाद्यच्छब्देन तच्छब्द आक्षिप्यते। कर्मान्तरस्य चानिर्देशाद् उद्देश्यतयापि श्रुतं कर्मत्वमेव विधीयते। तच्च विधीयमानं सामर्थ्याण्णोरिति सन्निहितत्वाण्णयन्तावस्थायामेव विधीयते । किं तत्सामर्थ्यम्? अणौ यत्कर्मेत्यनुवादसामर्थ्यादेवाणौ कर्मत्वसिद्धेस्तत्रैव तद्विधानस्यासम्भवः। तदेवमणौ यत्कर्मेत्येतावत एवाणौ यत्कर्म णौ चेत्तत्कर्मेत्यर्थो भवति। अनेन च कर्मान्तरनिवृत्तिः क्रियते, न त्वणौ कर्मणो णौ कर्मभावः प्रतिपाद्यते। स कर्तेति वाक्यान्तरेण तस्य कर्तृत्वप्रतिपादनात् एकस्य युगपदेकस्यां क्रियायां कर्मत्वकर्तृत्वयोरुभयोरसम्भवात्। ततो णौ चेदिति तृतीयं वाक्यम्--अणौ यदित्येव, अणौ यत्प्रतिपाद्यं वस्तु णौ चेत्तदेव प्रतिपाद्यमित्यर्थः। ततः स कर्तेति चतुर्थम्। अत्राणौ यत्कर्म णौ चेदिति सर्वमनुवर्त्तते। `अनाध्याने' इत्येतदपि प्रसज्यप्रतिषेधे पञ्चमं वाक्यम्।

तत्र वृत्तिकारेण त्रीणि वाक्यानि स्ववाचा दर्शितानि-ण्यन्तादात्मनेपदं भवतीत्येकं वाक्यम्, अणौ यत्कर्म णौ चेत्तदेव कर्मेति द्वितीयम्, स एव कर्ता भवतीति तृतीयम्।`णौ चेद्' ग्रहणं समानक्रियार्थमिति तु वक्ष्यति, अतस्तदपि वाक्यमभ्युपगतमेव।

आरोहन्तीत्यादि। अणौ कर्मप्रदर्शनार्थमिदमुक्तम्, इदं तत्रोदाहरणम्--आरोहयते हस्ती स्वयमेवेति। आङ्पूर्वो रुहिः न्यग्भवनोपसजंने न्यग्भावने वर्तते, न्यग्भवन्तं हस्तिनं न्यग्भवयतीत्यर्थः। यदा तु हस्तिनः सौकर्यातिशयप्रतिपादनाय हस्तिपकव्यापारो न विवक्ष्यते, तदा न्यग्भवमात्रे रुहिर्वर्तते, तत्र च हस्तिनः कर्तृत्वम्। उक्तं च--

निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितम्।
निवर्तमाने कर्मत्वे स्वकर्तृत्वेऽवतिष्ठते।। इति

अस्य च कर्तुः कर्मस्थक्रियेषु कर्मकार्याण्यतिदिश्यन्ते-`कर्मवत्कर्मणातुल्यक्रियः' इति, तद्यथा-लूयते केदारः स्वयेवेति। लुनातिर्हि द्विधाभवनोपसर्जने द्विधाभावने वृत्तः कर्तृव्यापाराविवक्षायां द्विधा भवनमात्रे वर्तते। दुहिस्तु कर्तृस्थक्रियत्वात् कर्मकार्याणि न लभत इत्येतावत्। ततो न्यग्भवनवृत्ते रुहेर्हस्तिपकव्यापारे णिजुत्पद्यते, तदा च य एवार्थ आरोहयन्ति हस्तिनं हस्तिपकाः, स एवार्थ आरोहयन्ति हस्तिपका इति । पुनः सौकर्यातिशयविवक्षायामविवक्षिते हस्तिपकव्यापारे न्यग्भवनमात्रे रोहिर्वर्तते-आरोहयते हस्ती स्वयमेवेति। सुष्ठु न्यग्भवतीत्यर्थः। उक्तं च-
न्यग्भावनं न्यग्भवनं रुहौ शुद्धे प्रतीयते।
न्यग्भावनं न्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते।।
अवस्थां पञ्चमीमाहुर्ण्यन्तानां कर्मकर्तरि।
निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते।। इति।
एवं सिञ्चतेरप्यार्द्रीभवनोपसर्जनमार्द्रीभावनमर्थः। ततो निवृत्तप्रेषणमित्यादि पूर्ववत्। सेचयते हस्ती स्वयमेव, सेचनेऽत्यन्तमनुकूलो भवतीत्यर्थः। एवं दृशिरपि कर्मव्यापारमात्रवृत्तिः,णिजुत्पन्ने पुनस्तत्रापरोऽपि, तदुदाहरणम्-दर्शयते राजा स्वयमेव, दर्शनेनानुकूलो भवतीत्यर्थः। सोऽयं निवृत्तप्रेषपक्ष उच्यते।
अपरः प्रकारः-आरोहन्ति हस्तिनं हस्तिपकाः, तान् सौकर्यातिशयाद्धस्ती प्रयुङ्क्ते इति; हस्तिव्यापारे णिजुत्पद्यते-आरोहयति हस्ती हस्तिपकानिति। तत्र सौकर्यातिशयप्रतिपादने तात्पर्यमिति कर्म न विवक्ष्यते, ततोऽकर्मको भवति; यथा-नेह पच्यते, नेह भुज्यते इति पाकमात्रप्रतिषेधे तात्पर्यमिति कर्माविवक्षायां भावे लो भवति-आरोहयते हस्ती स्वयमेव, सुष्ठु न्यग्भवतीत्यर्थः। एष एव हि हस्तिनः प्रयोजकव्यापारः। एवमितरयोरपि द्रष्टव्यम्।
सोऽयमध्यारोपितप्रेषणपक्ष इति गीयते।
तदेवमुभयोरपि पक्षयोः सैव क्रिया, याऽण्यन्तावस्थायाम्। न च कर्मान्तरमस्ति, कर्तापि स एवेत्युदाहरणोपपत्तिः। स्वयमिति वचनं कर्त्रन्तरव्युदासार्थम्। णेरिति किमिति। अणौ कर्मत्वानुवादेन णौ कर्तृत्वविधानात् प्राधान्याण्ण्यन्तादेव भविष्यतीति प्रश्नः। साध्वारोहतीति। साधु न्यग्भवतीत्यर्थः। अत्र कर्मव्यापारमात्रे रुहिर्वर्तते, कर्तृस्थक्रियत्वात्तु कर्मवद्भावाभावाद्यगात्मनेपदे न भवतः, शप्परस्मैपदे भवतः, अणौ यत्कर्मेत्यण्यन्तावस्थायामपि श्रुतत्वात्ततोऽपि स्यादिति भाव। ननु प्राधान्याण्ण्यन्तादेव भविष्यतीत्युक्तम्, किमर्थमणौ यत्कर्म णौ चेत्स कर्तेति? अयमुपाधिर्यस्मिन्नेव प्रयोगे संभवति, तत्रैवात्मनेपदं युक्तम्, साध्वारोहतीत्यत्र च नायं प्रकारः सम्भवति। आरोहयते हस्तीत्यत्र तु णिचः प्रकृतिभूते रुहावण्यन्ते यत्कर्म ण्यन्ते स एव कर्त्तेति तत्रैव भविष्यति, सत्यम्; तदेवमुत्तरार्थमवश्यं णेरिति वक्तव्यमिहापि विस्पष्टार्थं भविष्यतीति मन्यते।
अणाविति किमिति। कर्मत्वकर्त्तृत्वयोर्यौगपद्यासम्भवात् णौ च कर्तृत्वस्य श्रुतत्वादवस्थान्तरे णावेव कर्मत्वं विज्ञास्यत इति प्रश्नः। गमयतीति। `गणसंख्याने' चुरादावदन्तः पठ्यते, अतो लोपस्य स्थानिवद्भावाद् उपधावृद्ध्यभावः। गण्यमानो गणो यदा गणनक्रियायामानुकूल्यं प्रतिपद्यते, तदा तद्व्यापारमात्रवृत्तेर्हेतुमण्णिचि पुनः कर्मव्यापारमात्रे आरोपितस्यैवायं प्रयोगः। गणयति गणः स्वयमेवेति। अत्र णावेव गणेः कर्म, णावेव कर्ता इत्यात्मनेपदं न भवति। कर्मवद्भावेनापि न भवति; कर्तृ स्थक्रियत्वात्। गणनं हि संख्यानिमित्तः परिच्छेदो ज्ञानविवेषः। भाष्ये तु भागशोऽवस्थापने गणिर्वर्तते। भागशोऽवतिष्ठमानं गणं गोपालकोऽवस्थापयतीत्यर्थमङ्गीकृत्य तत्रानुकूलत्वाद् गणस्यैव कर्तृ त्वविवक्षायामस्ति कर्मस्थभावकत्वमिति कर्मवद्भावादात्मनेपदमुदाहृतम्। ननु चाणावकर्मकादित्यत्र वक्ष्यति-`हेतुमण्णिचो विधिः' इति, प्रतिषेधोऽपि प्रत्यासत्तेस्तस्यैव न्याय्य इति, तच्चेत्, सत्यम्; इदमपि प्रत्युदाहरणमयुक्तमेव, उच्यते-युक्तं तत्र हेतुमण्णिचो विधिरिति; तत्र बुधादिसूत्रे `णः' इति वर्तते, बुधादिभ्यश्च हेतुमण्णिजेव सम्भवति। इह तु सामान्येन ग्रहणं विशेषहेत्वभावात्। ननु चाणौ यत्कर्मेत्युच्यते चुरादीनां च नित्यण्यन्तत्वात्केवलानां प्रयोगाभवाद् अणौ कर्मणोऽसम्भवाद् अत्रापि हेतुमण्णिच एव विधिः, नेत्याह; `आ धृषाद्वा' इति विभाषितणिचामपि केषाञ्चित्सम्भवात्। भाष्ये तु हेतुमण्णिचो विधिरिति स्थितम्। लावयति दात्रं स्वयमेवेति। करणस्य दात्रस्यापि तैक्ष्ण्यातिशयेन लवने यदानुकूल्यं तत्प्रतिपादनाय लावकान्प्रति प्रयोजकत्वविवक्षायां णिच्।
इह ण्यन्तादात्मनेपदं भवत्यणौ यत्कर्म स चेत्कर्तेत्युक्ते गम्यत एतद्यस्माद् ण्यन्ताद्विधिः तत्रैवाण्यन्ते यत्कर्म स चेत्कर्तेति, अतो णौ चेद्ग्रहणमर्थकम्, तत्राह-णौ चेद्ग्रहणं समानक्रियार्थमिति। प्रयोज्यप्रयोजकभावलक्षणेऽपि क्रियाभेदे मा भूत्, णिच्प्रकृत्यर्थभूतायामेव क्रियायां यथा स्यादित्यर्थः। यथा पुनरयं शब्दार्थस्तथोक्तं पुरस्तात्। आरोहयमाणो हस्ती भीतान् सेचयति मूत्रेणेति। येन प्रयोज्यप्रयोजकभावलक्षणेऽपि क्रियाभेदे आत्मनेपदं वार्यत एवानेन धातुभेदादत्यन्तभेद इति मत्वैतत्प्रत्युदाहृतम्, भीताश्चात्रारोहयतेः कर्म। आरोहयमाण इति। `णिचश्च' इत्यात्मनेपदं शानच्, भीता ह्यारेह्यमाणा भीत्या मूत्रयन्ति, तेन हस्ती सिच्यते। कर्माविवक्षायां तु सेचयतेरकर्मकत्वम्।
उद्देशप्रतिनिर्देशात् लब्धे यत्सग्रहे पुनस्तद्ग्रहो वाक्यभेदेन कर्मान्तरनिवृत्तये इत्याह-यत्सग्रहणमनन्यकर्मार्थमिति। स्थलमारोहयति मनुष्यानित्यत्र कर्मान्तरमप्यस्ति मनुष्याः, रुहेर्गत्यर्थत्वान्मनुष्याणां कर्मसंज्ञा। कथं पुनरत्राणौ कर्मणो णौ कर्तृत्वम्,यावता स्थलमणौ कर्म हस्ती तु णौ कर्त्ता? स्यादेतत्आरोहयमाण इत्यत्राणौ कर्मणो हस्तिन एव कर्तृ त्वम्, स एव च स्थलमारोहयतीत्यत्रापि कर्त्तेति। एवमपि प्रत्यासत्तेरेवात्र न भविष्यति, तथा हि ण्यन्तादात्मनेपदं भवति। अणौ यत्कर्म णौ चेत् स कर्त्तेत्युक्ते प्रत्यासत्तेरेतद् गम्यते-येन णिचा ण्यन्तादात्मनेपदं विधित्सितं तेनैव णिचाऽण्यन्ते तत्प्रकृतिभूते धातौ यत्कर्म स एव चेत्कर्ता तस्मिन्नेव ण्यन्त इति। अत्र च यत्रायमुपाधिः, कृतमेव तत्रात्मनेपदम्-आरोहयमाण इति। यत्रतु न कृतम्-स्थलमारोहयतीति, न तत्रायमुपाधिरिति नैवात्मनेपदप्रसङ्गः। इह तर्हि-आरोहन्त हस्तिनं हस्तिपकाः, तानारेहयति हस्तीति? किं पुनरत्र नेष्यते? वृत्तिकृता नेष्यते, भागवृत्तिकारेण त्विष्यते। तथा माघः प्रयुङ्क्ते-`करेणुरारोहयते निषादिनम्' इति।
कतेति किमिति। भावकर्मणोः सिद्धत्वात् कर्त्तर्येव भविष्यतीति मन्यते। अणौ यत्कर्म तस्मिन्नेव कर्त्तरि यथा स्यात्, कर्त्रन्तरे मा भूदित्येवमर्थं कर्तृग्रहणमिति दर्शयन्नाह-तानारोहयति महामात्र इति। गत्यर्थत्वच्च रुहेः हस्तिपकानां कर्मसंज्ञा । यद्येवम्, कर्मान्तरसम्भवादेवात्र न भविष्यति? नैतदेवम्? अस्तीत्यत्राणौ

कर्मणो हस्तिनो णावपि कर्मत्वेनान्वयः। न वा सति कर्तृ त्वविधौ कर्मान्तरव्यावृत्तिर्लभ्यते। यद्वा-प्रयोजकव्यापारमात्रे तात्पर्याद्यदा हस्तिपकाः कर्मत्वेनाविवक्षिताः, तदेदं प्रत्युदाहणं द्रष्टव्यम्। वनगुल्मस्येति। कर्मोपलक्षणमेतत्, न त्वत्र वनगुल्मस्य कर्मत्वमस्ति; शेषत्वेन विवक्षित्वात्। तस्माद्वनगुल्ममिति प्रदर्शनीयम्। स्मरयत्येनमिति। `स्मृ आध्याने' घटादिः, वनगुल्मस्य रमणीयत्वप्रतिपादनाय प्रयोजकत्वे विवक्षिते णिच्। एनमिति। बुद्ध्यर्थत्वात्कोकिलस्य कर्मसंज्ञा। एतदप्युपलक्षणम्, अत्रहि कर्मान्तरसद्भावादेव प्राप्तिर्नास्ति कर्माविवक्षायां प्रत्युदाहरणं द्रष्टव्यम्।
ननु चात्र कर्मकर्तरि मूलोदाहरणानीति। ननु चाध्यारोपितप्रेषणपक्षे आरोहयतो हस्तिनः कर्मत्वाभावात्कर्मणा समानधातौ तुल्यक्रियत्वाभावात् पचत्योदनं देवदत्तो राध्यत्योदनं स्वयमेवेतिवत्कर्मवद्भावो न प्राप्नोति, सत्यम्; आरब्ध एवास्मिन् सूत्रे सोऽपि पक्षः सम्भवात् प्रदर्शितः, अनारब्धे तु निवृत्तप्रेषणपक्षप्रक्रियैवाश्रयिष्यते। ननु तत्रापि व्यापारद्वयाभिधायिषु रुहादिषु भवत्येवम्, ये तु केवलकर्तृ व्यापारवाचिनो दृश्यादयः तेषु कथम्, न हि दृशिः कर्मव्यापारं कञ्चदाचष्टे? स्यादेतत्-विषयभावापत्तिः कर्मव्यापारस्तदापादनं कर्तृ व्यापार इति। यद्येवम्, इच्छापि दृश्यर्थः स्यात्। नन्वत्रापि विषयभावापत्तिः, तदापादनं च विद्यते, अथ दर्शनविषयभावापादनं दृश्यर्थः, ननु तदेव निरूप्यते किं नाम तद्दर्शनम् इति, अत्रोच्यते; मा नामाख्यातकर्मव्यापारः, अस्ति तावत्कर्मणोऽपि व्यापारः, कारकत्वात्, तत्र णिजुत्पत्तिदशायां तावत्येव वर्त्तिष्यते, उदाहरणदशायां ण्यन्तोऽपीति मन्यते। तथा च रुहिः कर्तृ युक् कर्मणाभिधेय इति युक्तं केवलकर्तृ व्यापारवाचिनां गमिदृशिप्रभृतीनां कर्तृ स्थक्रियत्वम्; कथं तु विक्लित्युपसर्जनविक्लेदवचनः पचिः, द्विधाभवनोपसर्जनद्विधाभावनवचनश्च लुनातिः कर्मस्थकियः, न्यग्भवनोपसर्जनन्यग्भावनवचनस्तु रुहिः कर्तृ स्थक्रियः? उच्यते; रुहिरपि गत्यर्थः, तथा च `यद्धितुपरिं छन्दसि' इत्यत्र भाष्यकारो वक्ष्यति-हस्तिनमारोहतीत्यत्र हि उपरिगमनलक्षण एव रुहेरर्थः, तत्पुनर्न्यग्भवनहेतुत्वाद् न्यग्भावनमित्युच्यते, उपरिगमनरहितं तु न्यग्भावनमात्रं रुहेरर्थो न भवति, यदा खलु क्वचिद् भूमावेव तिष्ठन् वृक्षस्य शाखां हस्ताभ्यामवनमयति, तदा नासावारोहतीत्युच्यते। तस्माद् गतिविशेष एव रुहेरर्थः। कस्तर्हि क्रियाणां कर्मकर्तृ स्थतायां हेतुः? उक्तमत्र-
विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता।
क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता।। इति।
विशेषदर्शनेन शब्दानुसारेण वा क्रियायास्तात्स्थ्यं कथ्यते। एतच्च कारणगतमारोहस्य कर्तृस्थत्वं प्रतिपादयति, न तु कर्मस्थताम्। न हि हस्तिनामारोहति, वृक्षमारोहति, पर्वतमारोहतीत्यादौ कर्मभेदेऽप्यारोहणे रूपभेदः प्रतीयते, यथा-घृतमासतण्डुलादिषु पाकः। न च हस्ती न्यग्भवत्वित्येवं कारकव्यापारः, किं तर्हि? हस्तिपका उपर्यासीरन्निति। पाके तु तण्डुलादिगतो विक्लित्यादिरूपो विशेषो यथा स्यादित्येव कारकव्यापारः। तस्मत्कर्मभेदे रूपभेदादुद्देशस्य च कर्मगतत्वात् पचिः कर्मस्थक्रियः,विपर्ययपाद्रुहिः कर्तृ स्थक्रिय इति सिद्धम्। एव चारुह्यते हस्ती स्वयमेवेति कर्मवद्भावं प्रर्शयन्तो भाष्यन्यायविरोधादुपेक्ष्याः। दृशिकर्तृ स्थभावक इति। अथ सिचिः कस्मादुपेक्षितः? कर्मस्थक्रियत्वाद्। आर्द्रीभवनं ह्यत्र प्रधानम्, तदर्थत्वात्कारकव्यापारस्य। किमर्थं तर्ह्युदाहृतः? विशेषाभावात्। न ह्यत्रानेन `कर्मवत्कर्मणा' इत्यनेन वा आत्मनेपदे सति कश्चिद्विशेषः, तेनापि सति यक्चिणौ न भवतः, `णिश्रन्थिग्रन्थि 'इति प्रतिषेधात्। भाष्येऽपि कर्मवद्भावात् सिद्धिमाशङ्क्याध्यानप्रतिषेधार्थमित्युक्त्वा स्मरतेः कर्तृ स्थभावकत्वात् कर्मवद्भावस्य प्राप्तिर्नास्तीत्यभिधायोक्तम्। एवं तर्हि सिद्धे सति यदाध्यानप्रतिषेधं शास्ति, तज्ज्ञापयत्याचार्यः-भवत्येवञ्जातीयकानामात्मनेपदमिति। किमेतस्य ज्ञापने प्रयोजनम्? पश्यन्ति भृत्या राजानम्; दर्शयते भृत्यान् राजा स्वयमेव-अत्रात्मनेपदं सिद्धं भवतीति। एवञ्जातीयकानामिति कर्तृ स्थक्रियाणामित्यर्थः। एवं च ब्रुवता विध्यर्थमेतदित्युक्तं भवति, विशेषप्रतिषेधेन सामान्यविधेरनुमानात्। अत्र दर्शयते भृत्यान् राजेत्येतदेकमुदाहरणमनुपपन्नम्; कर्मान्तरसद्भावात्। तत्र वृत्तिकारः `त्यजेदेकं कुलस्यार्थे' इति न्यायाद् उदाहरणमेतदगमयितव्यं मन्यते। अस्मिन्नुदाहरणे कमव्यापारमात्रे विवक्षिते सिद्धं भवतीत्यर्थः।
अन्ये त्वाहुः-अस्मादेवोदाहरणादणौ ये कर्तृ कर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भाव एवात्मनेपदं न भवति, यथा-स्थलमारोहयति मनुष्यानिति, इह त्वणौ कर्तृणां भृत्यानां णौ कर्मत्वमिति। एवं स्मारयत्येनमिति कोकीलस्य कर्मत्वेऽपि प्रत्युदाहरणमुपपन्नम्, `करेणुरारोहयते निषादिनम्' इति प्रयोगश्चोपपन्न इति तेषां सूत्राक्षराण्येव तावदधिकानि, भाष्यं च सर्वमुदाहरणवर्जमनुपपन्नम्।।
प्रयोगाणां तु निर्वाहो णिचश्चेत्यात्मनेपदात्।
जयादित्यस्य हृदयं गूढमेतत्प्रकाशितम्।।
पदमञ्जरी
भीस्म्योर्हेतुभये।। 1.3.68 ।।
भयमनिष्टापातशङ्गासाधनमात्रं लोकिको हेतुः, न वान्तरेण साधनं क्रिया सम्भवतीति विशेषणसामर्थ्यात् कृत्रिमत्वाच्च पारिभाषिकस्य हेतोर्ग्रहणमित्याह--हेतुः प्रयोजक इत्यादि। ततश्चेद्भयं भवतीति। यद्येवम्, स्मयत्यर्थो न विशेषितः स्यात्, न हि स्मयतेर्भयमर्थः, अऽत आह-भयग्रहणमिति।
चित्तविकारस्योपलक्षणमित्यर्थः। विस्मयोऽपि तत एवेति। अत्र चेद्भवतीत्यनुषङ्गः। भीषयत इति। `भियो हेतुभये षुक्'। भाययत इति।`बिभेतेर्हेतुभये' इति वैकल्पिकमात्वम्। एवं च अत्र षुक् न भवति; तद्विधावाकारप्रश्लेषात्। विस्मापयत इति। `नित्यं स्मयतेः' इत्यात्वम्। `अर्तिह्री' इत्यादिना पुक्।
कुञ्चिकयेति। कारणादत्र भयम्, न हेतोः। यद्यपि तद्व्यापारे णिज्विधानात् प्रयोजकसाध्यमेव भयम्, तथापि विशेषणोपादानसामर्थ्यादेवं विज्ञायते-अन्यनिरपेक्षाद्धेतोरेव यद्भयमिति। एवं च मौण्ड्यैनं भाययतीत्यत्रापि गुणगुणिनोर्भेदविवक्षायां न भवति। उदाहरणे तु तादात्म्यस्य विवक्षितत्वाद्धेतोरेव भयम्।।
पदमञ्जरी

गृधिवञ्च्योः प्रलम्भने।। 1.3.69 ।।
परिहरतीत्यर्थ इति। वर्जयतीति यावत्।।
पदमञ्जरी
लियः सम्माननशालीनीकरणयोश्च।। 1.3.70 ।।
विशेषाभावादिति। निरनुबन्धकपरिभाषा तु `वामदेवाद् ड्यड्ड्यौ' इत्यत्र ज्ञापिता प्रत्ययग्रहणविषयैवेति मन्यते। संमानने शालीनीकरणे च वर्तमानादिति। संमाननं विषयः,न धात्वर्थः। यदाह--पूजामधिगच्छतीत्यर्थ इति। धात्वर्थे तु पूजयतीति वाच्यं स्यात्, यथा न्यक्करोतीत्यर्थ इति। अकर्मकश्चायचमस्मिन् प्रयोगे पूजाख्यस्य कर्मण आत्मनेपदसहितेन धातुनैवोपात्तत्वात् पुत्रीयतीतिवदित्याहुः। जटाभिरिति। हेतौ तृतीया, यस्य हि जटाः सन्ति लोके स पूज्यते।।
पदमञ्जरी
मिथ्योपपदात् कृञोऽभ्यासे।। 1.3.71 ।।
उपोच्चारितं पदमुपपदम्,मिथ्याशब्द उपपदंयस्य स तथोक्तः। मिथ्या कारयते इति आत्मनेपदेनैवाभ्यासस्य द्योतितत्वात् `नित्यवीप्सयोः' इति द्विर्वचनं न भवति। सदोषमिति। एतेन मिथ्याशब्दस्यार्थमाचष्टे। अस्यैव विवरणम्-स्वरादिदुष्टमिति। आदिशब्देन रूपं गृह्यते। असकृदिति अभ्यासं दर्शयति। उच्चारयतीत्यर्थ इति ण्यन्तस्य करोतेरुच्चारणे वृत्तिरनेकार्थत्वाद्धातूनाम्। एवं च प्रकृतिभूतः करोतिरुच्चारणे वर्त्तते, अकर्मकश्च।।
पदमञ्जरी
स्वरितञितः कर्त्रभिप्राये क्रियाफले।। 1.3.72 ।।
कर्तारमभिप्रैतीति कर्त्रभिप्रायम्,`कर्मण्यण्',क्रियाफलं चेह कर्मैवेति नास्ति नियमः तेनाकर्मकेभ्योऽपि यजिप्रभृतिभ्यः स्वर्गादिके फले कर्तृ गामिन्ययं विधिर्भवत्येव। कर्तारं चेदिति। क्रियाफलस्य कर्तृ गामित्वद्योतनायात्मनेपदं भवतीत्यर्थः। यदि यच्च यावच्च क्रियानन्तरभावि फलं तत्र कर्तृ गामिन्ययं विधिर्भवति, इहापि स्याद्-यजन्ति याजकाः, पचन्ति पाचका इति; दक्षिणादेः कर्तृ गामित्वादित्यत्र आह-प्रघानभूतमिति। किं पुनस्तदित्यत आह-यदर्थमिति। यदुद्दिश्येत्यर्थः। क्रिया आरभत इति। सामग्रीसमवधानात्मिका आद्या प्रवृत्तिः=आरम्भः, यामन्तरेण याजकादीनामप्रवृतिः, स्वर्गादिकं हि फलं प्रेक्षुः सामग्रीं समवधाप्य प्रवर्तयति, सा प्रवर्तिता यथायथं प्रवर्त्तते। कथं पुनरेतल्लभ्यते-प्रधाने फले कर्त्रभिप्रायइति? प्रधानत्वादेव। किञ्च-यत् किचन फलं सर्वत्र कर्त्रभिप्रायं भवति। ननु यत्र क्रियाभ्यासमात्रे तात्पर्यम्, तत्र न किञ्चित्पलं कर्तृगामि, तत्रापि किञ्चित्फलं कर्तृगामि, तत्रापि किञ्चित्फलं कर्तृगामि, किं कौशलम्? पुनः पुनरभ्यासे हि क्रियासु कौशलं भवति, तस्मात्प्रधाने फले कर्त्रभिप्राय इति सिद्धम्। यजत इति। केचिदाहुः- `देवतायै इदं न मम' इत्येवंविधो मानसः सङ्कल्पो याग इति, तेषां यजन्ति याजका इति ऋत्विग्व्यापारे प्रयोगो नोपपद्यते। अन्ये त्वाहुः-`होमादिष्वभिष्ट्वादिऋत्विग्व्यापारो यागः' इति, तेषां यजतिव्यापापारप्रयोगो नोपपद्यते। एवं तर्ह्युभयं यजेरर्थः-ऋत्वग्व्यापारश्च, यजमानव्यापारश्च। तदुक्तम्-यजादिषु चाविपर्यासो नानाक्रियाणां यज्यर्थत्वादिति।
न तदर्थः क्रियारम्म इति। ननु ऋत्विजामारम्भस्तदर्थ एव, नैतदेवम्; `आद्या प्रवृत्तिरारम्भः' इत्युक्तम्, सा च यजमानस्य- स्वर्गमहं लभेयेति, न पुनरिमे दक्षिणां लभेरन्निति। यथा-अवघाते क्रियमाणे स्वेदश्च भवति वैतुष्यं च भवति, भृतिश्च लभ्यते, अथ च वैतुष्यार्थ एवावघागः, तद्वदत्रापि। तदुक्तं हरिणा-
यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः।
तत्प्रधानं फलं न लाभादि प्रयोजनम्।। इति ।
इह स्वामिदासौ पचत इति। क्रियामात्रविवक्षायां परस्मैपदं भवति। स्वामिगते तु धर्मे दास आरोपिते स्वामिदासौ पचेते इत्यात्मनेपदं भवति। अथाभिप्रग्रगणं किमर्थम्? विप्रकृष्टेऽपि फले यथा स्याद्। द्विविधं क्रियाफलम्, दृष्टम्--अन्नपुत्रवृष्टिशत्रुवधादिकम्, अदृष्टं च स्वर्गादि। तत्र पूर्वं प्रत्यासन्नमवश्यंभावीति प्रधानम्, इतरत्तु विधुरप्रत्ययोपनिपाते सति व्यभिचारसंभवाद्विप्रकृष्टत्वच्चाप्रधानम्। संभवति ह्यविकलमनुष्ठातुं यागस्यापि मध्ये वैराग्योत्पत्तौ मोक्षार्थप्रवृत्तौ सत्यामनुत्पत्तिः स्वर्गस्य। ततश्चेह तस्य ग्रहणं न स्याद्। अभिप्रग्रहणे तु सति अभिराभिमुख्ये वर्तते, प्रशब्दस्त्वारम्भ इति कर्त्तारं प्रत्याभिमुख्येन क्रियाफलं चेत्तत्प्रैति एतुम् आरभते एवमात्मनेदं भवतीत्यर्थो भवति। तथा च यद्यपि स्वर्गादिकं स्वरूपेणान्नादिवत् तदानीं नैति तस्य त्वङ्कुरावस्था कर्त्तारमेतीति तद्द्वारेण फलमेवैतुमारभत इति सर्वत्र सिद्ध्यति। फलस्यैव ह्यङ्करावस्था पूर्वशब्दवाच्या।।
अपाद्वदः।। 1.3.73 ।।
पदमञ्जरी
णिचश्च।। 1.3.74 ।।
अत्र कश्चिदाह-इदमात्मनेपदं चुरादिणिचो न भवति, कुतः? ज्ञापकात्। किं ज्ञापकम्? लक्षणतेः स्वरितेत्त्वमिति। नात्राप्राप्तभाषित मस्ति। पारायणेऽपि चुरादिणिच आत्मनेपदमुदाहृतम्-एष विधिश्चुरादिणिजन्तात्स्यादिति। कश्चन निश्चुनुते स्म-अप्राप्तवचनेऽत्र न किंचन दृष्टम्, लक्षयतेः स्वरितेत्त्वमनार्षम्।।
पदमञ्जरी
समुदाङ्भ्यो यमोऽग्रन्थे।। 1.3.75 ।।
उद्यच्छति चिकित्सामित्यत्र अधिगमपूर्वके उद्यमे यमिर्वर्त्तते, चिकित्साशास्त्रमधिगन्तुमुद्यमं करोतीत्यर्थः।
पदमञ्जरी
अनुपसर्गाज्ज्ञः।। 1.3.76 ।।

सकर्मकार्थमिदम्, अन्यत्र `अकर्मकाच्च' इति सिद्धत्वात्। गां जानीत इति ।स्वर्ग लोकं न प्रतिजानातीति। `संप्रतिभ्यामनाध्याने' इत्यनेनापि न भवति; आध्यानविषयत्वात्। प्रजानातीति वा पाठः।।

पदमञ्जरी

विभाषोपपदेन प्रतीयमाने।। 1.3.77 ।।

अप्राप्तविभाषेयमित्याह-तदुपपदेनेति। अत्र च `स्वरितञितः' इत्यारभ्य पञ्च सूत्राण्यनुवर्तन्ते। समीपे श्रूयमाणमिति। न तु पारिभाषिकम्;असंभवात् । एवं पञ्चसूत्र्यामुदाहार्यमिति। न केवलमुदाहृतयोर्द्वयोः; अपि तु पञ्चस्वपि सूत्रेष्वित्यर्थः। स्वं यत्नं कारयते कारयति वा। स्वं व्रीहिं संयच्छते संयच्छतीति वा। स्वं गां जानीते जानीते वा।।

पदमञ्जरी

शेषात्कर्त्तरि परस्मैपदम्।। 1.3.78 ।।

आत्मनेपदनियमः कृत इति। प्रकृत्याश्रयोऽर्थाश्रयश्च, अनुदात्तङितोरेवात्मनेपदं भावकर्मणोरेवेति। सर्वत इति सर्वाभ्यः प्रकृतिभ्यः सर्वेषु चार्थेष्वित्यर्थः। तदर्थमिति। सर्वतः प्राप्तिनिवृत्त्यर्थमित्यर्थः। येन विशेषणेनेति। अनुबन्धादिना। याति वातीत्यनुबन्धशेषः, आविशति प्रविशतीत्युपसर्गशेषः, गन्धनादेरन्यत्र करोतीत्यादिरर्थशेषः। गन्धनादिविशिष्टो हि कृञादिः शेषग्रहणेन पञ्चम्यन्तेन निवर्त्यमानो नागृहीतविशेषणन्यायेन विशेषणं गन्धनाद्यपि व्यावर्त्तयति। शेषादेव नान्यस्मादिति। उपलक्षणमेतत्, कर्तर्येव नान्यत्रेत्यपि द्रष्टव्यम्।

पच्यते, गम्यत इति। ननु क्रियमाणेऽपि कर्तरिग्रहणे यदि तावदेवं नियमः- कर्तरि यदि भवति शेषादेवेति; ततोऽशेषात्कर्तरि मा भूत्, शेषात्तु भावकर्म कर्तृ षु त्रिष्वपि प्राप्नोति। अथाप्येवं नियमः- शेषाद्यदि भवति कर्तर्येवेति, ततः शेषाद्भावकर्मणोर्मा भूद्, अशेषात्तु त्रिष्वपि प्राप्नोति । उक्तोऽत्र परिहारः-

`योगविभागोऽत्राभिप्रेतः'इति। तत्र प्रथमे योगे शेषादेवेति नियमः, द्वितीये तु कर्तर्येवेति। कर्मकर्तरीत्यपि भावकर्मणोरित्यत्रोक्त एवार्थो विस्मरणशीलाननुग्रहीतुं पुनरपि स्मारितः।।

पदमञ्जरी

अनुपराभ्यां कृञः।। 1.3.79 ।।

अत्रापि द्वितीयं कर्तृ ग्रहणमनुवर्तते। अनुक्रियते स्वयमेव, पराक्रियते स्वयमेव।।

अभिप्रत्यतिभ्यः क्षिपः।। 1.3.80 ।।

प्राद्वहः।। 1.3.81 ।।

परेर्मृषः।। 1.3.82 ।।

व्याङ्परिभ्यो रमः।। 1.3.83 ।।

पदमञ्जरी

उपाच्च।। 1.3.84 ।।

उपपूर्वो रमिर्निवृत्तिविनाशयोर्वर्तते, उपरतोऽध्ययनाद्, उपरतोनिधनादिदि। न चानयोरुभयोरप्यर्थयोः सकर्मकत्वमुपपद्यते, तत्कथं सकर्मकस्योदाहरणम्? अत आह-उपरमयति यावदिति। कथं पुनरण्यन्तो ण्यर्थे वर्तते? अत आह-अन्तर्भावितण्यर्थ इति।।

विभाषाऽकर्मकात्।। 1.3.85 ।।

पदमञ्जरी

बुधयुधनशजनेङ्प्रुद्रुस्त्रुभ्यो णेः।। 1.3.86 ।।

प्राप्नोतीति। गम्यत इति वचनं तु प्राप्तिहेतुर्व्यापारः।

कुण्जिका स्त्रवतीति। कुण्डिकायामुदकं कुण्डिकोदकव्यापारो वा कुण्डिकायां छिद्रवत्यामुपचर्यते। ननु स्यन्दनमपि द्रवद्रव्यकर्तृकं चलनमेव; तथा प्रसिद्ध्यभावात्।।

पदमञ्जरी

निगरणचलनार्थेभ्यश्च।। 1.3.87 ।।

चलयतीति। `चल कम्पने' घटादिः। आदयते देवदत्तेनेति। `गतिबुद्धि' इत्यादिनाऽणौ कर्तुः कर्मसंज्ञा प्राप्ता, `अत्तिखाद्योः प्रतिषेधः' इति वचनान्न भवति।।

पदमञ्जरी

अणावकर्मकाच्चित्तवत्कर्तृकात्।। 1.3.88 ।।

अणाविति किमिति। ण्यन्तस्य प्रयोज्येन कर्मणा सकर्मकत्वमवश्यम्भावीति मन्यमानस्य प्रश्नः। चेतयमानमिति। `चिती संज्ञाने' चुरादिः। हेतुमण्णिचो विधिरिति। बुधादिसूत्रादिह णिज्ग्रहणमनुवर्तते, बुधादिभ्यश्च हेतुमत्येव णिच् सम्भवति, तस्मादिहापि तस्यैव ग्रहणमिति भावः। तत्र यथा-`ब्राह्मण आनीयन्तामन्यत्रानधीयानेभ्यः' इत्युक्ते प्रत्यासत्तेर्यदध्ययनं ब्रह्मणानां सम्भवति तदधीयानेभ्य इति गम्यते, न त्वध्येत्वयमात्रमधीयानेभ्य इति, तद्वदिहापि तस्यैव गम्यते यज्जातीयस्य विधौ ग्रहणमिति।

आरोहयमाणमिति। `णेरणौ' इत्यात्मनेपदं शानच् तत्रैवास्याकर्मकत्वमुपपादितम्। प्रयुङ् क्त इति पाठः। प्रयोजयतीति पाठे णेरर्थो मृग्यः।।

पदमञ्जरी

न मादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः।। 1.3.89 ।।

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ग्रहणमिति पिबतिवसत्योर्ग्रहणम्, न पातिवस्त्योः; तेनाणावकर्मकत्वविवक्षायां परस्मैपदं भवत्येव। पाययते इति। `शाच्छासाह्वाव्यावेपां युक्'।

पादिष्विति।। धेडप्यस्मिन् सुत्रे पठितव्य इत्यर्थः। समीचि इति प्रथमाद्विवचने `वा छन्दसि' इति पूर्वसवर्णदीर्घः।।

पदमञ्जरी

वा क्यषः।। 1.3.90 ।।

लोहितायते इति। अलोहितो लोहितो भवतीत्यत्रार्थे क्यष्, `अकृत्सार्वधातुकयोः' इति दीर्घः। पटपटायतीति। पटच्छब्दस्य डाज्विषये द्विर्वचनम्, `अव्यक्तानुकरणात्' इति डाच्, टिलोप; `नित्यमाम्रेडिते डाचि'। कथमिति। न कथञ्चिदित्यर्थः। किं कारणमित्याह-यावतेति। न नियमेन व्यावर्त्तितमात्मनेपदमनेन शक्यं प्रापयितुम्,न ह्यशक्यार्थेवचनस्य व्यापारः, वावचनं तु केवलस्य लस्य प्रयोगर्थ स्यादिदि भावः। । एवं तर्हीत्यादि परिहारः। विकल्पितं विभाषितम्,पाक्षिकमित्यर्थः। कथं पुनः परस्मैपदप्रकरणेन विच्छिन्नमात्मनेपदं शक्यं विधातुम्,अत आह-तच्चेति। ननु शाब्दः सन्निधिः सम्बन्धकारणम्, प्रतिषेधेन चापवादभूतस्य भावामात्रं प्रतिपाद्यते, आत्मनेपदं तु स्वेनशास्त्रेण भवति, न भावना तस्य सन्निधिर्भवति, उच्यते; तात्पर्यतोऽपि सन्निधिः, सन्निधिरेवापवादापनयनस्य चोत्सर्गप्रवृत्तौ तात्पर्यम्, तेन परस्मैपदं भवतीत्यस्यात्मनेपदं भवतीति तात्पर्यार्थः। यद्वा-इहापि प्रतिषेध एव विधेयः, स च पूर्वसूत्रवदिहात्मनेपदं प्रवर्त्तयिष्यति। किं तर्हि उच्यते-अनन्तरं सन्निधापितामिति, नन्वेवमिहैव सन्निधापितं भवति? स्यादेवम्, यदि परस्मैपदेन क्यषन्तादात्मनेपदं बाधितं स्याद्, नियमेन तद्व्यावृत्तिः, तत्र स्वविषये परस्मैपदप्रतिषेधो विकल्प्यमानः किं कारणमात्मनेपदं प्रवर्त्तयेत्? पूर्वत्र त्वपवादमपनयता प्रतिषेधेनात्मनेपदं प्रवर्त्त्यते, तस्मादिहापि तदनुवृत्तिसामर्थ्यात् यादृशः प्रतिषेध आत्मनेपदप्रवृत्त्यविनाभावी प्रकृतः, तादृश एव विधीयत इति मत्वोक्तम्-`अनन्तरं सन्निधापितम्' इति। यद्यात्मनेपदं विधीयते, केनेदानीं परस्मैपदं पक्षे भवतीत्यत आह-तेन मुक्त इति। इह `प्रोपाभ्यां समर्थाभ्याम्' `अनुपसर्गाद्वा' इत्यनन्तरं `क्यषः' इति सूत्रं कर्त्तव्यम्- क्यषन्तादात्मनेपदं भवतीति, नेदं दुःखमनुभवितव्यं भवति, `वा' ग्रहणञ्च न कर्तव्यं भवति, उत्तरमपि योगद्वयं तत्रैव कार्यम्? तथा तु न कृतमित्येव।।

पदमञ्जरी

द्युद्भ्यो लुङि।। 1.3.91 ।।

द्युतेरेकत्वाद्बहुवचनमनुपपन्नमित्याशङ्क्याह-तत्साहचर्यादिति। छत्रिन्यायेनेति भावः। लुठादयोऽपीति। प्रत्यासन्नानामेव साहचर्यात् प्रतीतिः स्यादित्याशङ्कामपनेतुं दूरवर्तिनामुपादानम्। क्वचित् श्वित्यादय इत्यनन्तराणामेव पाठः़ष कृपूपर्यन्ता इति। तदनन्तरं वृत्करणाद एतदुक्तं भवतीत्याह-बहुवचननिर्देशादिति। व्यद्युतदिति। `पुषादि' इति सूत्रेणाङ्। न च तत एवाङ्विधानात् परस्मैपदं शक्यं विज्ञातुम; नित्यत्वप्रसङ्गात्, लुङोऽन्यत्रापि प्रसङ्गच्च। अनुदात्तेत्त्वं तु युजर्थं स्यात्।।

पदमञ्जरी

वृद्भ्यः स्यसनोः।। 1.3.92 ।।

`स्यसनोः' इति सत्सप्तमी। द्यु तादिष्वेव वृतादयः पठ्यन्त इति। यद्येवमियं प्राप्तिर्वृद्भ्यः पूर्वां प्राप्तिं बाधेत, ततश्च अवृतत्, अवर्त्तिष्टेति लुङि विकल्पो न स्यात् तथा चोत्तरत्र चकारः क्रियते-इमां प्राप्तिं पक्षे इतराप्राप्तिर्न बाधेतेति, द्युतादिपाठसार्थ्यात्सोऽपि भविष्यति। यद्वा-लुङीत्यत्र स्वरयिष्यते, वर्त्यतीत्यादौ `न वृद्भ्यश्चतुर्भ्यः' इति इट्प्रतिषेधः।।

पदमञ्जरी

लुटि च क्लृपः।। 1.3.93 ।।

एवं तर्हीति। सामान्यस्य विशेषो वाधक इति भावः। कल्प्तेत्यादौ `तासि च क्लृपः' इतीट्प्रतिषेधः।।

इति हरदत्तविरचितायां पदमञ्जर्यां प्रथमाध्यायस्य तृतीयः पादः।।

1.4

अथ प्रथमाध्याये चतुर्थः पादः

पदमञ्जरी

आ कडारादेका संज्ञा।। 1.4.1 ।।

आ कडारादेका संज्ञा।। आङ्मर्यादाभिविध्योरिति। समासस्य विकल्पितत्वाद्। `आकडारात्' इति निर्देशः, समासे त्वाकडारमिति स्यात्। इह द्वौ कडारशब्दौ भवतः-`प्राक्कडारात् समासः', `कडाराः कर्मधारये' इति च, तत्र कोऽवधिरित्यत आह-`कडाराः कर्मधारये' इति वक्ष्यतीति। कुतः पुनरेतत्?

स्वातन्त्र्यात्। स्वतन्त्रो ह्यसौ प्रथमानिर्देशेन स्वयं कार्ययोगित्वात्। प्राक्कडारादित्ययं तु परतन्त्रोऽवधित्वेन स्वयं कार्ययोगित्वाभावाद्,व्याप्तेश्च न्यायाद्। एवं हि भूयसामनुग्रहो भवति। लिङ्गच्च, यदयं `तत्पुरुषः' `द्विगुश्च' इति द्विगोस्तत्पुरुषसंज्ञां शास्ति, तज् ज्ञापयति-अनुवर्त्तते द्वितीयेऽप्येकसंज्ञाधिकार इति; अन्यथा `दिक्सङ्ख्ये संज्ञायाम्' इत्यत्र तत्पुरुषाधिकारादेव समावेशसिद्धेस्तदर्थो यत्नोऽपार्थकः स्यात्। किमर्थ, पुनरियानवधिरुपादीयते, न आ द्वन्द्वात् इत्येवोच्येत, न हि `चार्थे द्वन्द्वः' इत्यतः परत्रास्योपयोगः? उच्यते; `द्वन्द्वश्च प्राणितूर्य' इत्ययमप्यवधिः सम्भाव्यते, ततश्च सम्बुद्धिसंज्ञामन्त्रितसंज्ञयोः समावेशो न स्यात्।

का पुनरसाविति। एका संज्ञा भवतीत्येतावत् सूत्रव्यापारः, तत्र विशेषादर्शनात् प्रश्नः। `या परानवकाशा च' इति वचनाद् न्यायाच्च व्यवस्थेति भावः। ननु यद्यारब्धेऽप्यस्मिन् परत्वानवकाशत्वाभ्यामेव व्यवस्था वाच्या, अनारब्धेऽप्यस्मिन् आभ्यामेव व्यावस्था भविष्यति,नार्थ एतेन ? तत्राह-अन्यत्रेति। अयम्भावः-यत्र प्रयोजनमेकं भवति, सहानवस्थानलक्षणे वा विरोधः, तत्रैवानवकाशः सावकाशं बाधते, यथा-नैवारश्चरुर्नखावपूतानामिति, नखावपनेन वैतुष्यफलकेन तत्फलकोऽघातो बाध्यते। अष्टाश्रियूपः कर्त्तव्यः, वाजपेयस्य तु चतुरश्र इति, अष्टाश्रित्वचतुरश्रत्वयोर्विरोधात् बाध्यबाधकभावः। विप्रतिषेधोऽपि विरोधात्मकत्वात्तत्रैव भवति, तद्यथा-कृत्कृत्यप्रत्ययसंज्ञानां तद्धिततद्राजप्रत्ययसंज्ञानां च। सति त्वस्मिन् सूत्रे एकस्यैकैवेति नियमाद्विरोधो जायते, विरोधे च सति परत्वानवकाशत्वाभ्यां व्यवस्था शक्यते वक्तुमिति, तत्रानवकाशाया उदाहरणमाह-वक्ष्यतीति। शिक्षा, मिक्षेति। `गुरोश्च हलः' इत्यकारप्रत्ययः। यद्यप्यत्र समावेशेऽपि न कश्चिद्दोष, तथापि वस्तुतः समावेशो नास्तीस्येतावता इदमुदासमावेशेऽपि न कश्चिद्दोषः, तथापि वस्तुतः समावेशो नास्तीत्येतावता इदमुदाहरणम्। सम्प्रति यत्र समावेशे सति दोषः, तद्दर्शयति-अततक्षदिति। परस्यास्तूदाहरणम्-धनुषा विध्यतीति, शराणामपायं प्रत्यवधिभूतस्यैव धनुषो व्यधनं प्रति साधकतमत्वमित्युभयप्रसङ्गे परत्वात्करणसंज्ञापादानसञ्ज्ञां बाधते। तथा `कास्यपात्र्यां भुङ्क्ते' इत्यधिकरणसञ्ज्ञा, धनुर्विध्यतीति कर्तृसंज्ञा। उक्तं च-अपादानमुत्तराणीति। इह गार्ग्यो धानुष्क इति अनवकाशाभ्यां भपदसंज्ञाभ्यामङ्गसंज्ञाया धातुप्रत्ययेषु सावकाशाया बाधः प्राप्नोति? ज्ञाप कात्सिद्धम्, यदयम्`सुपि च',बहुवचने झल्येत्',`तद्धितेष्वचामादेः' इति स्वादिषु तद्धितेषु चाङ्गस्य सतः कार्यं शास्ति, तज् ज्ञापयति-समाविशत्यसंज्ञा भपद संज्ञाभ्यामिति। द्वये हि स्वादयः-यजादयो हलादयश्च; तत्र यजादषु भसंज्ञा, हलादिषु पदसंज्ञेति अङ्गस्य सतः कार्यविधानमनुपपन्नं स्यात्। गुरुलघुसंज्ञे वर्णमात्रस्य विधीयेते, नदीघिसंज्ञे तु तदन्तस्येति ताभ्यां समाविशतः, तद्यथा-वात्सीबन्धुरिति। `नदी बन्धुनि' इति पूर्वपदान्तोदात्तत्वं वात्सीबन्धो इति `गुरोरनृतः' इति प्लुतश्च भवति। विश्च ना च विनरौ, `द्वन्द्वे घि' इति पूर्वनिपातः, विन्नोर्भावो वैन्नम् `इगन्ताच्च लघुपूर्वात्' इत्यण्,विनरावचष्टे इति विनयति, प्रविनय्य गतः `ल्यपि लघुपूर्वात्' इत्ययादेशो भवति।

भाष्ये त्विष्टविषये समावेशो न्यासान्तरेण साधितः- प्राक्कडारात् परं कार्यमिति। तत्रायमर्थः- प्राक्कडारात् संज्ञाख्यं कारयं परं भवतीति संज्ञाप्रकरणात् संज्ञैवात्र कार्यमित्युच्यते, परा संज्ञेत्येव तु नोक्तम्,`विप्रतिषेधे वा' इति वक्ष्यति, तत्र परं कार्यमित्यनुवृत्तिर्यथा स्यादिति तत्र यस्याः संज्ञायाः परस्याः पूर्वयाऽनकाशया बाधः प्राप्तः, सा परा भवतीति विधिरूपेणास्य प्रवृत्तिः। नन्वनकाशयापिपूर्वया नैव परस्या बाधः प्राप्नोति; विरोधाभावात्, विरोधाभावात्, फलैक्याभावाच्च, संज्ञानामन्यत्र समावेशस्य दृष्टत्वात्, सत्यम्; एतदेव ज्ञापयति--भवत्यत्र प्रकरणे संज्ञानां बाध्यबाधकभाव इति। तेन परयानवकाशया पूर्वा बाध्यते, द्वयोश्च सावकाशयोर्विप्रतिषेधे परमिति परैव भवतीति। नियमफलस्यापि सिद्धिरस्ति न्यासेऽङ्गसंज्ञा परा कार्या, पूर्वे न भपदसंज्ञे। एवं सर्वत्र यत्र समावेश इष्टोऽस्मिन्पक्षे-`ऋतोरण्',`छन्दसि घस्',ऋत्विय इति, अत्र`सिति च' इति-पदसंज्ञाविषये परं कार्यमिति वचनाद् भसंज्ञापि स्यात्। ततश्च `ओर्गुणः' प्राप्रोति, सित्करणं पदत्वे सति अवग्रहार्थं स्यात्। `शेषो बहुव्रीहिः' इत्यत्र च शेषग्रहणं कर्त्तव्यम्, अन्यथा `अन्यपदार्थे च संज्ञायाम्' इति अव्ययीभावसंज्ञैव बाधिकेति शेषग्रहणमनर्थकम्। तदेवं शेषग्रहणमेव प्रमाणम्--न्यासान्तरमपि सूत्रकारस्यवाभिमतमिति।।

पदमञ्जरी

विप्रतिषेधे परं कार्यम्।। 1.4.2 ।।

विप्रतिषेध इति। `षिधु शास्त्रे',`षिधु गत्याम्' इति भौवादिकयोरन्यतरस्य रूपम्, तस्य हि `सेधसिचसञ्जस्वञ्जाम्' इति षत्वमिति। उपसर्गवशाच्च विरोधार्थत्वम्। धातुनां ह्युपसर्गवशादन्यश्चार्थ उपजायते,तद्यथा--प्रहारः, उपहारः, अनुहारः, संहार इति। `षिधू संराद्धौ' इत्यस्य तु दैवादिकस्य षत्वं नास्ति, `सेधषिच' इति शपा निर्देशात्। `आदेशप्रत्यययोः' इति विहितस्य तु `सात्पदाद्योः' इति निषेधः। ननु `गतिकारकोपपदानां कृद्भिः सह सामासवचनं प्राक् सुबुत्पत्तेः'इति वचनान्नायं सकारः पदादिः। षत्वविषये परिभाषेयं न भवति, यदि स्याद्, गोष्ठः, भूमिष्ठ इत्यादौ सकारस्यापदादित्वात् `आदेशप्रत्यययोः'इत्येव षत्वसिद्धेरम्बादौ गावादिग्रहणमनर्थकं स्यात्।

परशब्दोऽयं त्रिलिङ्गः-परो देशः, परा सेना, परं कार्यमिति। अतोऽयमव्युत्पन्नः, पचाद्यजन्तो वा, न तु `ऋदोरप्' इत्यबन्तः,तथा हि सति त्रिलिङ्गता न स्यात्।।

कृल्ल्युट् नपुंसके भावे स्त्रियां क्तिन्नादयो यतः।
अतो घञाद्याः पुंस्येव यथा पाकश्चयो लवः।।

वासरूपविधिर्न्नास्ति, कृल्ल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीति वचनात्। स्त्रियामपि नास्ति, `अस्त्रियाम्' इति प्रतिषेधात्। अतो भावघञादयः पुंस्येव। कर्तृवर्जिते तु कारके पुंनपुंसकयोः, न कथाञ्चित् स्त्रियाम्। परं कार्यमिति । परं यत्कार्यमेत्त्वादि तद्भवतीत्यर्थः, अथ वा-यत्परं तत्कार्यं भवति, कर्तव्यं भवतीत्यर्थः।

अन्ये त्वाहुः- न क्रियापदत्वेन कार्यशब्दस्यान्वयः, नापि परं कार्यं भवति, न तु शास्त्रमित्येवं शास्त्रादिव्यावृत्तये कार्यशब्दः, किं तर्हि? यत्कार्यं कृत्यर्हं परं तद्भवतीति वचनव्यक्तिः। अर्हे कृत्यप्रत्ययः, किं सिद्धं भवति? तुल्यबलविरोध इति सिद्धं भवति। न ह्यपवादादीनां सन्निधावुत्सर्गादीनां कृत्यर्हत्वम्, तैर्बाधितत्वादिति। विशेधो विप्रतिषेध इति। तद्वाचित्वेनैव लोके प्रसिद्धत्वाद् विप्रतिषिद्धमित्युक्ते विरुद्धमिति गम्यते, तस्य विषयं दर्शयति-यत्रेत्यादि। यत्र विषये, वृक्षाभ्याम्, वृक्षोष्वित्यादौ चरितार्थावित्यर्थः। व्यक्तिपक्षे तु तद्विषययोः= विध्योरन्यत्र चरितार्थत्वासम्भवाद् अन्योऽर्थः प्रयोजनमनयोस्तावन्यार्थौ। द्वौ प्रसङ्गौ=कार्ये दीर्घत्वेत्त्वादिके युगपत्प्राप्नुतः। स विप्रतिषेधः, विप्रतिषेधस्य विषय इत्यर्थः, तुल्यबलयोर्विरोधो यस्मिन् स तथोक्तः। परं कार्ये भवतीति। यत्कार्यं कृत्यर्हं परं तद्भवतीत्यर्थः।

तुल्यबलविरोध इत्यस्य व्यावर्त्यं दर्शयति-उत्सर्गापवादेत्यादि। तत्र `श्याद्व्यध' इत्याकारान्तलक्षणो णप्रत्यय उत्सर्गः, तं परमप्यनुपसर्ग सावकाशं बाधित्वाऽनवकाशत्वात् `आतश्चोपसर्गे' इति क एव भवति-सग्लः, सम्लः। रधेर्णिचि `रधिजभोरचि' इति नुम् कृताकृतप्रसङ्गित्वान्नित्यः, `अत उपधायाः' इति वृद्धिरनित्या, नुमि कृतेऽकारस्यानुपधात्वादप्राप्तेः। तत्र पूर्वोऽपि नुमेव भवति-रन्धयतीति। अशिश्रियद्, अदुद्रुवद् इत्यात्रान्तर्भूतचङपेक्षत्वाद् इयङुवान्तरङ्गौ बहिरङ्गं लघूपधगुणं परमपि बाधेते, अपवादादीनां तु परस्परसंप्रधारणायां नित्यादप्यन्तरङ्गम्, तस्मादपवादः। उक्तं च--

परं विदुः पूर्वपरोपपत्तौ परस्य नित्यस्य च नित्यमेव।

नित्यान्तरङ्गोपगमेऽन्तरङ्गं तस्माद्विधिः प्रातिपदो बलीयान्।। इति।

द्वयोरेकत्रोपनिपातः=उपपत्तिः, परस्य नित्यस्य चेति। अत्र उप समस्तद्याकृतौ पदार्थे द्वयोरप्यन्यत्र कृतार्थत्वाद्विप्रतिषेधे सति परस्परप्रतिबन्धादप्रवृत्तिरेव प्रप्नोति, तद्यथा--यो हि द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति स तयोः पर्यायेण कार्यं कारोति; यदा तमुभौ युगपत्प्रेषयतो नाना दिक्षु च कार्ये भवतस्तदा यद्यसावविरोधार्थो भवति उभयोर्न करोति, तत्र विध्यर्थमिदं परं भवतीति तस्मिन् कृते यदि पूर्वस्यापि निमित्तमस्ति तदपि भवत्येव। यथा--भिन्धकीति, भिन्द् हि इति स्थिते परत्वाद्धिभावेपुनः प्रसङ्गविज्ञानादकज् भवति। व्यक्तौ तु पदार्थे सर्वव्यक्त्युद्देशेन शास्त्रस्य प्रवृत्तेस्तद्विषयोपनिपातिनोऽन्यत्र चरितार्थत्वात्पर्यायेण प्रवृत्तौ प्राप्तायां नियमार्थमिदम्-विप्रतिषेधे परमेव भवति, न पूर्वमिति। एतत्सूत्रारम्भाच्च पूर्वस्य लक्षणस्य तत्रानारम्भोऽनुमीयते, तदुच्यते-`सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति। तद्यथा-जुहुतात् त्वमिति परत्वात्तातङादेशे कृते स्थानिवद्भावेन प्राप्तं धित्वं न भवति। लक्ष्यानुरोधेन व्यक्त्याकृतिपदार्थाश्रयणादनयोः परिभाषयोर्विषयविभागोऽवसेयः।।

पदमञ्जरी

यू स्त्र्याख्यौ नदी।। 1.4.3 ।।

अत्र ह्रस्वयोरिदुतोर्ग्रहणे यद्यपि सवर्णग्रहणाद्दीर्घयोरपि संज्ञा लभ्यते, ह्रस्वयोरपि तु स्यात्;ततश्च हे शकटे, हे धेनो अत्रापि प्राप्नोति; इह च शकटिबन्धुः- `नदी बन्धुनि' इति पूर्वपदान्तोदात्तत्वं प्रसज्यते; इह च बहुशकटिः बहुधेनुरिति-नद्यृतश्च' इति नित्यः कप्स्यात्, नैष दोषः, `ङिति ह्रस्वश्च' इत्येतन्नियमार्थं भविष्यति-ङित्येव ह्रस्वौ नदीसंज्ञौ भवतः, नान्यत्रेति। कैमर्थ्यान्नियमो भवति विधेयं नास्तीति कृत्वा, इह चास्ति विधेयम्, किम? नित्या नदीसंज्ञा प्राप्नोति, सा विभाषा विधेया, अतो हुस्वयोरपि स्यादेवेति दोषं दृष्ट्वा दीर्घयोर्ग्रहणमिति दर्शयति--ई च ऊ च यू इति। समासविधौ सुबधिकारान्नैतद् द्वन्द्वस्य विग्रहवाक्यम्, किं तर्हि? अर्थप्रदर्शनम्। अत्र चानुकार्यानुकरणयोरभेदविवक्षया विभक्तिर्न कृता । क्वचित्तु विभक्त्यन्तमेव पठ्यते। ननु दीर्घयोर्ग्रहणे `यू' इति निर्देशो नोपद्यते, `दीर्घाज्जसि च' इति पूर्वसवर्णप्रतिषेधाद्, अत आह-अविभक्तिकोऽयं निर्देश इति। `दीर्घाज्जसिसुलुक्' इति लुप्तत्वाद् `वा छन्दसि' इति पूर्वसवर्णेनापह्नतत्वाद्वा नास्मिन् विभक्तिः श्रुयते इत्यविभक्तिकः।

अन्ये तु नैवायं द्वन्द्वः, किन्तु पृथक् पदे इत्युक्तमित्याहुः। अविभक्तिकत्वं चातुकार्यानुकरणयोरभेदविवक्षया। स्त्रियमाचक्षाते स्त्र्याख्याविति। ननु स्त्र्याख्या इति प्राप्नोति, `अनुपसर्गे' इति को विधीयते, यस्तु `आतश्चोपसर्गे' इति कः, अयमकर्मोपपदे चरितार्थः, कर्मणि त्वणा बाध्यते, यथा वक्ष्यति--

अकारादनुपपदात् कर्मोपपदे विप्रतिषेधेनेति तत्राह--मूलविभुजादिषु दर्शनादिति। एवं च कृत्वा इदमपि सिद्धं भवति--

यस्मिन् दशसहस्त्राणि पुत्रे जाते गवां ददौ।

ब्राह्मणेभ्यः प्रियाख्येभ्यः सोऽयमुञ्छेन जीवति ।। इति।।

इह ईदूतोरेवेयं संज्ञा विधीयेत? तदन्तस्य वा? आद्ये पक्षे कृत् स्त्रियां न स्याद्--आध्यै, ब्राह्मण्यै, हे लक्ष्मि, हे यवाग्विति; समुदायो ह्यत्र स्त्र्याख्यः, न त्वीदून्मात्रम्; ङ्यूङोरेव तु स्यात्, स्त्रियां विधानादन्वयव्यतिरेकाभ्यां च स्त्र्याख्यात्वादिति द्वितीयं पक्षमाशित्याह--ईकारान्तमित्यादि। वर्णग्रहणे सर्वत्र तदन्तविधिरिति तदन्तविधिलाभः, `सुप्तिङन्तम्' इत्यत्र सुप्तिङोः प्रत्ययत्वादन्यत्रापि प्रत्ययग्रहणेषु तदन्तविधिर्निवारितः। कथं पुनर्ज्ञायतेवर्णयोरेवेदं ग्रहणं न प्रत्ययोरिति, इयङुवङ्स्थानप्रतिषेधात्। यदि तदन्तस्य संज्ञा, कथं वक्ष्यति-शीनद्योः परतः नद्यन्तादङ्गादुत्तरस्य इति? समुदायस्य नदीत्वात्तदवयवभूतावीदूतावपि तथोक्तौ।

अन्ये त्वाहुः- वर्णयोरेव संज्ञा, समुदायधर्मस्य स्त्रित्वस्यावयव आरोपात्। कृत् स्त्रियामपि भवति, अत्र च लिङ्गम्-इयङुवङ्स्थानप्रतिषेध इति; तेषां गुरुनदीसंज्ञयोः समावेशो न स्याद्, एकविषयत्वात्।

यू इति किमिति। `ङेराम्नद्याम्नीभ्यः' इत्यत्र पृथगाब्ग्रहणाद् आपो न भविष्यतीति मन्यते। मात्रे दुहित्रे इति `न्द्यृतश्च' इति ऋकारग्रहणमस्त्र्यर्थं स्याद्। बहुपितृक इत्यत्रेत्यज्ञापकम् ऋकारान्तानां संज्ञाभावस्य। ग्रामणीः खलपूरिति। रूपोदाहरणमेतत्सम्बुद्ध्यन्तं वा द्रष्ट्व्यम्। अथाख्यग्रहणं किमर्थम्, यावता यु स्त्रियामित्येतावता स्त्र्यर्थवृत्तित्वं लभ्यते, तत्राह--आख्याग्रहणमिति। आङ्पूर्वस्य `ख्या' इत्यस्य धातोर्ग्रहणमित्यर्थः। क्वचित्तु आख्यग्रहणं किमिति प्रश्नः।

शब्दार्थस्त्रीत्व इति आख्याग्रहणसामर्थ्यात्पदान्तरमनपेक्ष्य यौ स्वयमेव स्त्रियमाचक्षाते इत्याश्रीयते। इष्वशनिप्रभृतीनां तूभयलिङ्गानां शब्दार्थ एव स्त्रीत्वमिति `ङिति ह्रस्वश्च' इति नदीसंज्ञा भवत्येव। एवं पटुरानीयतामित्युक्ते स्त्रियमप्यानीय कृतीभवति।

अन्ये त्वाहुः-आख्याग्रहणसामर्थ्यान्नियम आश्रीयते-स्त्रियमेव यावाचक्षाते न तु लिङ्गन्तरयुक्तम् इति। ग्रामणीखलपूशब्दयोस्तु क्रियाशब्दत्वेन त्रिलिङ्गत्वान्न भवति। इष्विशनिप्रभृतीनां तु स्त्रीविषयन्तवाभावेऽपि `ङिति ह्रस्वश्च' इत्यायत्र केवलस्य स्त्रीशब्दस्यैवानुवृत्तिर्नाख्याग्रहणस्येति भवतीति तेषामाङ्पूर्वस्य ध्यायतेः क्विपि सम्प्रसारणे-आध्यै ब्राह्मण्यै इत्यत्रापि न स्यात्। तस्मात्पूर्व एव प्रकार आश्रयणीयः।

कथं तर्हि प्रत्युदाहरणम्-ग्रामण्यै स्त्रियै इति, खलप्वै स्त्रियै इति? उच्यते; क्रियाशब्दत्वेऽप्येतयोः पुंसि मुख्या वृत्तिः, पुंसामेव ह्यमुचितो धर्मो यदुत ग्रामनयनं नाम। एवं खलपवनमपि। आध्यानं तु स्त्रिपुंससाधारणमिति विशेषः।

`पथमलिङ्गग्रहणं च प्रयोजनं क्विब्लुप्समासाः,' यः शब्दः प्रथमस्त्रित्वयुक्तद्रव्यमभिधाय पश्चाद्येन केनचित्प्रकारान्तरेण लिङ्गान्तरसंयुक्तं द्रव्यान्तरमाह, तस्य तदानीमस्त्र्याख्यत्वादप्राप्ता संज्ञा विधीयते। क्विप्--कुमारीमिच्छति कुमारीयति, कुमारीयतेः क्विप्, कुमारी ब्राह्मणः, तस्मै कुमार्यै ब्राह्मणाय। लुप्--`लुम्मनुष्ये' इति लुप्, खरकुट्यै ब्राह्मणाय। यद्यप्यत्र यचुक्तवद्भावात् स्त्रीत्वमप्यस्ति, तथापि स्वाश्रस्य पुंस्त्वस्यानिवृत्तेर्नाऽयं स्त्रियामेव वर्त्तत इत्याख्याग्रहणादप्राप्तिः । समासः- अतितन्त्र्यै ब्राह्मणाय। अवयवस्त्रीविषयत्वात् सिद्धम्, समासे तावदवयवस्तन्त्रीशब्दः स्त्रियामेव वर्तत इति तदानीमेव संज्ञा, ततश्च वर्णसंज्ञापक्षे समुदायस्य नद्यन्तत्वात् कार्यसिद्धिः; तदन्तपक्षे तु `अङ्गधिकारे तस्य च तदुत्तरपदस्य च' इति वचनाद् अतितन्त्रीबन्धुरित्यत्रापि `नदी बन्धुनि' इति स्वरः सिद्धः; नद्या पूर्वपदस्य विशेषणात्, क्विब्लुपोरपि पूर्व स्त्रियामेव वर्तित्वात्, पश्चादपि तदपरित्यागेनार्थान्तरे वृत्तिः। तत्रार्थान्तरसंसर्गात्प्रागेवान्तरङ्गत्वात्प्रवृत्ता संज्ञा सत्यपि पश्चाल्लिङ्गान्तरयोगे तस्य च बहिरङ्गत्वान्न निवर्तिष्यते। यद्येवम्, इयङुवङ्स्थानप्रतिषेधे यण्स्थानप्रतिषेधप्रसङ्गः; अवयवयोरियङुवङ्स्थानत्वाद्। यथा ह्यवयवस्य स्त्रिविषयत्वात्समुदायस्य संज्ञा भवति, तथावयवस्येयुवस्थानत्वात् समुदायस्य यण्स्थानस्यापि प्रतिषेधप्रसङ्गः, यथा--धियौ, आध्याविति? सिद्धं त्वङ्गरूपग्रहणाद, यस्याङ्गस्येयुवौ तत्प्रतिषेधादङ्गस्येयङुवङ्विधनासमर्थ्यादङ्गस्याक्षेपः, तेन यस्याङ्गस्येयङुवङौ निर्वर्त्तेतेतस्य नदीसंज्ञा निषेधः। आध्यै इत्यत्र त्ववयवस्याङ्गत्वं नास्ति, अङ्गस्य `एरनेकाचः' इति यण्विधानाद् इयङुवङ्स्थानता नास्तीति निषेधाभावः। एतदर्थमेव तत्र स्थानग्रहणम्--इयङुवङोर्यदा स्थितिस्तदा प्रतिषेधो यथा स्याद्, यदा त्वपवादेन बाधस्तदा मा भूदिति। एवं `ङिति ह्रस्वश्च' इत्यत्राप्यङ्गस्याक्षेपात् सोऽपि विधिरङ्गस्यैव स्त्रीत्वे भवति, नावयवस्य--शकट्यै, अतिशकटये ब्राह्मणाय; श्रियै, अतिश्रिये ब्राह्मणाय।।

पदमञ्जरी

नेयङुवङस्थानावस्त्री।। 1.4.4 ।।

इयङुवङो स्थानमनयोरिति। वैयधिकरण्येऽपि गमकत्वाद्बहुव्रीहिः। अन्ये त्वधिकरणे ल्युटं विधाय कर्तरि षष्ठ्याः समासं कुर्वन्ति। अथ कथम् `विमानना सुभ्रु कुतः पितुर्गृहे' इति? प्रमाद एवायम्। अन्येत्वाहुः-अनित्योऽयं प्रतिषेधः, सकृद्वद्धत्वात् । तथा च परिभाषा-`सकृद्वद्धमनित्यं द्विर्बद्धञ्च सुबद्धम्' इति। अत्र ज्ञापकं तदो दावचनमित्याहुः।।

पदमञ्जरी

वाऽऽमि।। 1.4.5 ।।

संहितासाम्येऽपि षष्ठीबहुवचनस्य ग्रहणम्, न तु द्वितीयैकवचनस्य, नदीकार्याभावात्। नापि सप्तम्येकवचनस्य; तस्य नदीसंज्ञोत्तरकालम्`ङेराम्नद्याम्नीभ्यः' इति विधानात्। न च `आमि इति विषयसप्तमी युज्यते;`तस्मिन्निपिनिर्दिष्टे' इति वचनात्, तदाह-आमि परतो वा नदीसंज्ञौ न भवत इति। श्रीणामिति । नदीसञ्ज्ञापक्षे `ह्रस्वनद्यापो नुट्'।।

पदमञ्जरी

ङिति ह्रस्वश्च।। 1.4.6 ।।

यद्यत्र ह्रस्वविशेषणार्थम् `यू' इति नानुवर्त्यत, तदेहापिस्याद्--मात्रे दुहित्रे इति, तस्मात्तदिहानुवर्तते। नन्वेवमपि विशेषणं न प्रकल्पतेयू ह्रस्वाविति; यदि यू, न ह्रस्वौ; अथ ह्रस्वौ, न यू;यू ह्रस्वौ चेति विप्रतिषिद्धम्; आहायं यू ह्रस्वाविति, तत एवं विज्ञास्यामः- य्वोः ह्रस्वाविति, कौ च य्वोः ह्रस्वौ सवर्णौ ? तदाह--ह्रस्वश्च य्वोः सम्बन्धी यः स्त्र्याख्य इति। अत्रापि समुदायधर्मस्यावयव आरोपाद् ह्रस्वयोः स्त्र्याख्यत्वम्, तदन्तविशेषणं वा। इयवङुङ्स्थानौ च यू इति। नन्वेकं `यू' ग्रहणमनुवर्तते, तच्च ह्रस्वविशेषण एवोपक्षीणम्, तत्कथं पुनः `यू' इति लभ्यते ? उच्यते; चकारोऽत्र क्रियते, स संज्ञिनः समुच्चयार्थः, इयङुवङ्स्थानाविति प्रकृतं य्योरेव च तत्स्थानत्वमित्यर्थाद् `यू' इति लभ्यते। स्वरितत्वादनुवृत्तं तु `यू' इत्येतद् ह्रस्वविशेषणमिति न कश्चिद्दोषः।।

पदमञ्जरी

शेषो घ्यसखि।। 1.4.7 ।।

`आ धृषाद्वा' इत्यस्मिन्नधिकारे `शिष असर्वोपयोगे, विपूर्वोऽतिशये' इति पठ्यते, तत्र णिच्पक्षे कर्मणि `एरच्', अन्यथा घञ्। ह्रस्व इति वर्त्तत इति। अन्यथा ग्रामण्यादेरपि स्याद् अस्त्र्याख्यत्वेन शेषत्वाद्, यस्य नदीसंज्ञा न विहिता तस्य शेषत्वे मात्रे इत्यत्रापि स्यादिति मत्वा पृच्छति--कश्चेति। इतरस्तु ह्रस्वविशेषणार्थं `यू' इत्यस्यानुवृत्तिमाश्रित्याह--ह्रस्वमिति। ह्रस्वान्तमित्यर्थः। यदाह--इवर्णोवर्णान्तादिति। क्वचितु ह्रस्वेर्णोवर्णान्तमिति पाठः, ह्रस्वात्मको य

इवर्ण उवर्णश्च तदन्तमित्यर्थः। ह्रस्वेन शेषस्य विशेषणत्वात् तदन्तविधिः। एवं च `असखि' इति सखिशब्दस्य प्रतिषेधो न तत्सम्बन्धिन इकारस्य, किं सद्धं भवति? इह शोभनस्सखा अस्य सुसखिः, सुसखेरागच्छतीति घिसंज्ञा सिद्धा भवति। न ह्ययं समुदायः सखिशब्दः, तदन्तविधिश्च ग्रहणवता प्रातिषेधादिहापि न स्यात्। यदि तदन्ते निषेधो न भवति `यस्येति च' इत्यत्र इवर्णस्य ई इति यदुदाहरणं सखिशब्दात् `सख्यशिश्रीति भाषायाम्' इति ङीषि सखि ई इति स्थिते इकारस्य लोपः। असति तु लोपे सवर्णदीर्धस्य पूर्व प्रत्यन्तवद्भावात् सखीमतिक्रान्तोऽतिसखिः, अतिसखेरागच्छतीत्यत्रासखीति धिसंज्ञाप्रतिषेधः स्यादिति तन्नेपपद्यते। सत्यप्यन्तवद्भावेन सखिग्रहणेन ग्रहणे समुदायस्य सखिशब्दादन्यत्वात्। यदा खलु पुंल्लिङ्गेप्यतिसखिरिति भवति, तदा कः प्रसङ्गो यदन्तवद्भावेन स्यात्? यत्तु तत्रोदाहरिष्यते सोऽनास्थावादो द्रष्ट्व्यः। शेषग्रहणं चिन्त्यप्रयोजनम्। एकसंज्ञाधिकारादेव हि स्त्र्याख्यस्य ङिति नदीसंज्ञापक्षे घिसंज्ञा न भवष्यति।।

पदमञ्जरी

पतिः समास एव।। 1.4.8 ।।

सिद्धायामिति। प्राप्तायामित्यर्थः, न पुनर्निष्पन्नायाम्, न हि निष्पन्नायां नियमेन निवृत्तिः शक्या वक्तुम्। पतिशब्दः समास एव घिसंज्ञो भवतीति। किं पुनरिदं समासावयवस्य पतिशब्दस्य संज्ञा विधीयते? आहोस्वित्तदन्तसमासस्य? यदि समासस्य ? पतिश्च गृहं च पतिगृहे-अत्र द्वन्द्वे घिः इति पूर्वनिपातो न प्राप्नोति; अथ पतिशब्दस्य? प्रजापतिनेत्यादिकस्य घिसंज्ञाकार्थ न प्राप्नोति। अथ वा `पतिः समासएव' इति नियमेन किं व्यावर्त्यते? असमस्तः पतिशब्दः। पतिशब्दस्य व्यावर्त्यमाना केन तदन्तस्य व्यावर्त्यते? पतिशब्दसम्बन्धी य ईकारस्तदाश्रया सा घिसञ्ज्ञा भवति, यदि समास एवेत्यर्थो विवक्षितः। तेन समासे पतिशब्दस्यानन्त्यस्यापि भवति-पतिश्च गृहश्च पतिगृहे, `द्वन्द्वे घिः' इति पूर्वनिपातः। पतिशब्दान्तस्य समासस्यापि भवति-प्रजापतिनेति, अत एव वृत्तिकृता पतिशब्दानुरूपसूत्रार्थो दर्शितः। उदाहरणन्तु तदन्तानुरूपं दर्शितम्। अथ कथम्

नष्टे मृते प्रव्रजिते क्लीबेऽथ पतिते पतौ।

पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते।। इति?

छन्दोवद्दषयः कुर्वन्ति। अथ पूर्वत्रैव `असखिपती' इति कस्मान्नोक्तम्? उत्तरत्र पत्युरेव विकल्पो यथा स्यात्। किञ्च `असखिपती' इत्युच्यमाने पतिशब्दस्य समासेऽपि न स्यात्--पतिगृहे इति। तथा च सखिशब्दस्य समासावयवस्यापि घिसञ्ज्ञाया अभावात्--सखिगृहे,गृहसखायाविति चानियमः पूर्वनिपातस्य।।

पदमञ्जरी

षष्ठीयुक्तश्छन्दसि वा।। 1.4.9 ।।

षष्ठ्यन्तेन शब्देनेति। षष्ठ्या विभघक्त्या युक्त इति तु न भवति। तथा हि-षष्ठ्यामित्येव ब्रूयाद्, युक्तग्रहणमनर्थकं स्यात्। षष्ठीग्रहणं किमिति। अत्र केचिद्योगस्यावर्जनीयत्वाद्युक्त इत्येव विशिष्टो योगः प्रत्येष्यत इति मन्यन्ते, वचनमन्तरेण विशेषो दुर्ज्ञान इत्युतरम्। अयमत्र योगविभागः कर्त्तव्यः-`षष्ठीयुक्तः छन्दसि',षष्ठीयुक्तः पतिशब्दः छन्दसि घिसञ्ज्ञो भवति; ततो `वा', छन्दसीत्येव, यच्च यावच्च शास्त्रे कार्यं तत्सर्वं छन्दसि विकल्पेन भवतिः सर्वे विधयश्छन्दसि विकल्प्यन्त इत्यर्थः। उभयत्रविभाषा चेयम्, `बहुलं छन्दसि' इत्यादिकस्त्वस्या एव प्रपञ्चः।।

पदमञ्जरी

ह्रस्वं लघु।। 1.4.10 ।।

इह सर्पिष्ट्वामित्यत्र `ह्रस्वात्तादौ तद्धिते' इति षत्वार्थं ह्रस्वसंज्ञया गरुसंज्ञाया समावेश इष्यते। अततक्षदित्यत्र तु सन्वद्भावनिवृत्त्यर्थं लघुसंज्ञाया गुरुसंज्ञया बाध इष्यते। अतो ह्रस्वप्रदेशेषु संयोगपरस्यापि मात्रिकस्यग्रहणं यथा स्यात्, लघुप्रदेशेषु मा भूदिति यथाप्रदेशे संज्ञाद्वयं कर्त्तव्यम्।।

संयोगे गुरु।। 1.4.11 ।।

दीर्घ च।। 1.4.12 ।।

पदमञ्जरी

यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्।। 1.4.13 ।।

कर्तेति। लुट्। करिष्यतीति। लृट्। अकरिष्यदिति। लृङ्,`ऋद्धनोः स्ये' इतीट्। यस्मादिति संज्ञिनिर्देशाथमिति। ननु तदादीत्यनेन संज्ञी निर्दिश्यते, न यस्मादित्यनेन तत्राह-तदादीतिसंबन्धादिति। सति हि यस्मादित्यस्मिन् तदादीत्यनेन संज्ञा निर्देष्टुं शक्यते, नान्यथा । सति हि परामर्शनीये तदित्यनेन परामर्शो भवति, अन्यथा तदादीत्यसंबद्धमेव स्यात्। `नेर्विशः' इत्युपसर्गाद्विधिरस्तीति। यद्यपि निरत्र धातुविशेषणम्-- नेः परो यो विशिरिति, धातोस्तङ्विधानाद् नियमविधिरपि धातोरिव नोपसर्गात्, तथाप्युपसर्गस्यापि तत्रान्वयोऽस्तीति मत्वा एवमुक्तम्।

विधिग्रहणं किमिति। `यस्मात्प्रत्यय' इत्युकते साकाङ्क्षत्वाद् यस्माद्विधीयत इत्यध्याहरिष्यत इति प्रश्नः । परशब्दस्याप्यध्याहारः स्यादित्युत्तरम्। स्त्री इयतीति। इदं परिमाणमस्याः `किमिदभ्यां वो घः' इयादेशः,`इदंकिमोरीश्की',`यस्येतिच' इति लोपः,`उगितश्च' इति ङीप्, स्त्रीशब्दात् सोर्हल्ङ्यादिलोपः। अत्र इयच्छब्दे परतोऽङ्गसंज्ञा स्याद् भसंज्ञा चेति तन्निमित्तो यस्येति लोपः प्रसज्येत। इशादेशस्य यस्येति लोपः, तस्याभीयस्याप्यसिद्धत्वं न भवति, प्राग्भादसिद्धत्वमिति केषाञ्चिदभ्युपगमाद्। स्थानिवद्बावोऽपि नास्ति, पदान्तरनिरपेक्षे हीयतीशब्दे व्युत्पाद्यमाने स्त्रीशब्दोऽनादिष्टादचः पूर्वः। ननु क्रियमाणे विधिग्रहणे स्यादेव संज्ञा, अस्त्येव ह्यत्र स्त्रीशब्दाद् विभक्तेः प्रत्ययस्य विधिरियत्प्रत्ययश्च परः, नैषः; सति विधिग्रहणे प्रत्यासत्तेर्यस्माद्यः

प्रत्ययो विहितस्तस्मिन्नेव प्रत्यये परतस्तदाद्यङ्गमित्यर्थो भवति। इह च स्त्रीशब्दाद्विहितो लुप्तः, श्रुयमाणश्च न ततो विहितः, तदादिग्रहणमनर्थकम्, यत्तदोर्नित्यसम्बन्धादेव यस्मात्प्रत्ययो विधीयते तदङ्गमित्यर्थलाभाद् अत आह-तदादिवचनमिति। स्यादयो विकरणाः। आदिशब्देन शबादेर्ग्रहणम्। असति तदादिग्रहणे यच्छब्दवत्तच्छब्दस्याध्याहाराद् यस्मात्प्रत्ययविधिस्तस्यैव संज्ञा स्याद् न तु तत आरभ्य आ तस्मात्प्रययाद्यः संघातः तस्य। ततश्च करिष्यावः, पचावः, दीव्यावः, तुदाव इत्यादौ `अतो दीर्घो यञि ' इति दीर्घो न स्यात्; स्याद्यन्तस्य समुदायस्यानङ्गत्वात्। ततश्च पापाव इत्यादावेव स्यात्, `पयगतौ' यङ्लुगन्तस्य `लोपो व्योर्वलि' इति लोपे रूपम्। कुण्डानीति। यदा नुम् परादिः, तदा `सुपि च' इति दीर्घः सिध्यति। दधीनीत्यादावनकारान्तत्वान्न सिध्यति, पूर्वान्तपक्षे सामानीत्यादिवत्सिध्यति। यदा त्वभक्तपक्षः तदैतत्प्रयोजनं तदादिग्रहणस्य, पूर्वान्तपक्षस्तु तत्र स्थित इत्यप्रयोजनमेतत्।
ननु च `प्रातिपदिकान्तनुम्विभक्तिषु च' इति नुम्ग्रहणं कुर्वतः सूत्रकारस्याभक्तो नुमित्यभिप्रायो लक्ष्यते, अन्यथा माषवापाणीत्यत्र प्रातिपदिकान्तत्वाद्विभक्तिनकारत्वाद्वा णत्वसिद्धेरनर्थकं तत्स्यात्? नैतत्सूष्ठूच्यते; तत्र हि समासप्रातिपदिकान्तो न गृह्यते, किं तर्हि? पूर्वपदादित्यनुवृत्तेस्तदाक्षिप्तस्योत्तरपदप्रातिपदिकस्यान्तो गृह्यते, समुदायभक्तश्च नुम् उत्तरपदप्रातिपदिकान्तो न भवति। ततश्च यथा गर्गाणां भगिनी गर्गभगिनीत्यत्र णत्वं न भवति, तथा नुमोऽपि न स्यात्। न तर्हिदानीमिदं भवति-गर्गभगिणीति? भवति, यदैतद्वाक्यं भवति-गर्गाणां भगो गर्गभगः सोऽस्या अस्तीति। तदा ह्यनुत्तरपदस्थत्वात् पूर्वपदात् सञ्ज्ञायामेवेति नियमाभावः, तद्यथा- मातृभोगाय हितो मातृभोगीण इति। एवमपि माषान् वप्तुं शीलमस्याः माषवापिणी-अत्र न प्राप्नोति, ङीबत्रोत्तरपदस्यान्तो न तु नकारः। नकार एवात्रान्तः, कथम्? गतिकारकोपपदानां कृद्बिः सह समासवचनं प्राक् सुबुत्पत्तेः, अतः स्याद्यर्थं क्रियमाणं तदादिग्रहणं नुम्यपीष्टं साधयतीति मत्वा नुम्ग्रहणं कृतम्। यदि तदादीत्युच्यते कर्तेत्यादौ न प्राप्नोति, न ह्यत्र तदादि किञ्चिदस्ति, किं तर्हि? तदेव, व्यपदेशिवद्भावाद्भविष्यति, वाक्यभेदाद्वा, यस्मात्प्रत्ययविधिस्तदङ्गम्, तदादि च। इह`प्रकृत्यादि प्रत्ययेऽङ्गम्' इति इयता सिद्धे गुरुनिर्देश एव लिङ्गं वाक्यभेदस्य।
अथ कथं भिनत्ति, संचस्करतुरित्यत्र सनुम्कस्य च समुदायस्याङ्गसंज्ञा? कथं च न स्याद्? इह तस्य वा ग्रहणं भवति? तदादेर्वा? न चेदं तन्नापि तदादि। इदमपि तदादि, कथम्? नैवं विज्ञायते-स आदिरस्यतत्तदादीति। कथं तर्हि तस्यादिस्तदादिस्तदादिरस्येति? तथापि उष्ट्रमुखवदेकस्यादिशब्दस्य लोपः। एवं हि विज्ञायमाने भिनत्तीत्यत्र यस्मात्प्रत्ययविधिभिदेस्तस्य आदिर्भकारः, स आदिः सन्नन्तस्य समुदायस्येति सिध्यति। एवं संचस्करतुरित्यत्रापि `तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति चात्रोभयत्र सञ्ज्ञासिद्धिः। अथात्र श्नमः पूर्वस्य भिशब्दस्यङ्गसञ्ज्ञा कस्मान्न भवति? भवतु, को दोषः? गुणस्तावत्`सार्वधातुकमपिद्' इति ङित्त्वादेव न भविष्यति। इह अनक्ति, भनक्ति- `अतो दीर्घो यञि' इति दीर्घः प्राप्नोति, तिङीति तत्र वर्त्तते। अथ वा- `यस्मात्प्रत्ययविधिः' इति दीर्घः प्राप्नोति, तिङीति तत्र वर्त्तते। अथ वा-`यस्मात्प्रत्ययविधिः' इति वचनाद्यस्मिन् प्रत्यये विधीयमाने यत्पञ्चम्या निर्दिष्टं तत्र तदेवाङ्गम्, श्नमि च विधीयमाने ये पञ्चम्या निर्दिष्टा रुधिरादयो न ते तत्र परतः, येऽत्र श्नमि परतोतिऽप्रभृतयो न ते पञ्चम्या निर्दिष्टा इति सञ्ज्ञाभावः।
श्यर्थमिति। `चतुर्थी तदर्थ' इति समासः। अस्ति ह्यत्र चतुर्थ्येकवचनस्य विधिरित्यसति पुनः प्रत्ययग्रहणेङ्गशब्दस्य सम्बन्धिशब्दत्वाभावात् वस्तुतोऽङ्गमात्राश्रय इयङ् स्यात्। सति तु सप्तमीनिर्दिष्टप्रत्ययग्रहणेऽङ्गशब्दः सम्बन्धिशब्दो भवति, ततश्चाङ्गस्येयङ् भवति। अचीत्यक्ते यदपेक्षं यदङ्गम्, तत्र तस्याजादाविति विज्ञानादर्थशब्दे परत इमङुवङौ न भविष्यतः।
किं पुनरङ्गसंज्ञायाः प्रयोजनम्? अङ्गस्येत्यधिकारः। नैतदस्ति; यदेतदङ्गस्येत्येतत् प्रत्यय इति वक्ष्यामीति। एवमपि प्राकरोत् प्रैहिष्ट-सोपसर्गस्याडाटौ प्राप्नुतः, नैष दोषः, प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं भवतीति। क्व पुनरेषा परिभाषा? नन्वेषाप्यत्रैव योगविभागेन सिद्धा, `यस्मात्प्रत्ययविधिस्तदादि प्रत्यये' इत्येतावानेको योगः। प्रत्यये गृह्यमाणे यस्मात् तस्य विधिस्तदादि गृह्यत इत्यर्थः, तेन `ञ्नित्यादिः' इत्यादौ यत्र प्रत्ययः सप्तम्या निर्दिश्यते तत्र तदादेर्ग्रहणम्, तेन देवदत्तो गार्ग्य इति संघातस्य ञित्स्वरो न भवति। `सुपआत्मनः क्यच्' इत्यत्र तु सुपा कर्मणो विशेषणात्तदन्तविधौ सिद्धे महान्तं पुत्रमित्यादावतिप्रसङ्गे तदादिनियमेन व्युदासः। यदि तदादिनियमः क्रियते स्त्रीप्रत्ययेऽपि स्यात्, ततः ष्यङन्तस्य पूर्वपदस्योच्यमानं संप्रसारणं परमकारीषगन्धीपुत्र इत्यत्र न स्याद्-यत्पूर्वपदं न तत्ष्यङन्तम्, यत्ष्यङन्तं न तत्पूर्वपदम्, नैष दोषः, `नेयङुवङ्स्थानावस्त्री' इत्यतः`अस्त्री' इत्यनुवर्त्तते, तच्च स्वरूपपदार्थकत्वेन प्रकृतमपीहार्थपदार्थकं संपद्यते, तदयमर्थो भवति-प्रत्ययग्रहणे तदादि गृह्यते प्रकृतमपीहार्थपदार्थकं संपद्यते, तदयमर्थो भवति-प्रत्ययग्रहणे तदादि गृह्यते स्त्री चेन्नाभिधीयते। स्त्रीप्रत्यये तदादिनियमो नास्तीत्यर्थः। यद्येवम्,अतिकारीषगन्ध्यापुत्रः-अत्रापि प्राप्नोति, प्रधानं या स्त्री तस्यामेव तदादिनियमप्रतिषेधः, अप्रधानस्त्रियां तु तदादिनियमो भवत्येव। तेन यावानंशः स्त्रियं प्राधान्येन प्रतिपादयति, तावतः स्त्रीप्रत्ययान्तस्य ग्रहणं भवति। तद्ग्रहणे तु गतिकारकपूर्वस्यापि ग्रहणं भवतीति `गतिरनन्तरः' इत्यनन्तरग्रहणं ज्ञापयिष्यते।
पदमञ्जरी
सुप्तिन्तं पदम्।। 1.4.14 ।।
सुप्तिङिति प्रत्याहारग्रहणमिति। सुबिति सप्तमीबहुवचनस्य ग्रहणं न भवति; यदि स्यात्, ङिसंबुद्ध्योः पदत्वाभावादेव नलोपस्याप्रसङ्गात् `न ङिसंबुद्ध्योः' इति प्रतिषेधोऽनर्थकः स्यादिति भावः। सप्तमीबहुवचनस्य च पकारेण प्रत्याहारो न कपः पकारेण; तस्याहारस्तदा स्वरविधावपि तथैवेति सुप्त्वादेव स्वरसिद्धेः पित्त्वमनर्थकमेव स्यात्। यदि च सुब्ग्रहणेषु कपः पकारेण प्रत्याहारोऽभिमतः स्यात् `सुप्यसर्वनामस्थाने' इत्येव ब्रूयात्, `स्वादिषु' इति गुरुनिर्देशोऽनर्थकः स्यात्। ब्राह्मणा इति। पदत्वाद्रुत्वविशर्जनीयौ।

ननु यस्मात्प्रत्ययविधिस्तदादीत्यनुवृत्तस्य सुप्तिङ्भ्यां विशेषणादेव तदन्तस्य ग्रहणं सिद्धम्, नार्थोऽन्तग्रहणेन, तत्राह-पदसंज्ञायामिति। इहासत्यन्तग्रहणे सुप्तिङामेव संज्ञा स्यात्, ततश्चाग्निष्वित्यादौ `सात्पदाद्योः' इति षत्वनिषेधः स्यादित्याशङ्क्य क्रियमाणमन्तग्रहणमुक्तस्यार्थस्य ज्ञापकं संपद्यते। गौरीब्राह्मणितरेति। तरबन्तस्य घसंज्ञायां सत्यां तत्रोत्तरपदे परतो गौरीशब्दस्य पुंवद्भावं बाधित्वा परत्वाद् ह्रस्वत्वं स्यात्। तरपि तु परतो ब्राह्मणीशब्दस्य न स्यात्; ततश्च गौरीब्राह्मणतरेति स्याद्, गौरब्राह्मणितरेति चेष्यते। वृत्तौ तु समासप्रदर्शनपरं वाक्यमुपात्तम्, न त्वेतत्कार्योदाहरणम्। गौरब्राह्मणितरेति समासे रूपम्।।

पदमञ्जरी

नः क्ये।। 1.4.15 ।।

क्य इति क्यच्क्यष्क्यङामिति। `संज्ञायां समज' इत्यस्य तु क्यपोग्रहणं न भवति; प्रयोजनभावात्। न तावन्मन्येत्यत्र नलोपः प्रयोजनम्, सत्यपि पदत्वेऽप्रातिपदिकत्वात्;सुबन्तमित्यनुवृत्तेर्वा क्यपि विध्यर्थमेतन्न भवति।

ननु क्यजादयः सुबन्ताद्विधीयन्त इति प्रत्ययलक्षणेन सिद्धं पदत्वम्, नार्थ एतेन तत्राह-सिद्धे सतीति। नान्तमेवेति। क्य एव नान्तमित्येवं तु विपरीतनियमो न भवति; `न ङिसम्बुद्ध्योः' इति निषेधात्। वाच्यतीति। अत्र पदत्वाभावात्कुत्वजश्त्वे न भवतः ये तु गोसमानाक्षरनान्तादेव क्यज् भवति, नान्येभ्य इत्याहुः, तेषां क्यङ्क्यषोरेव नियमस्य व्यावर्त्त्यं प्रदर्शनीयम्-तपस्यतीत्यादौ।।

पदमञ्जरी

सिति च ।। 1.4.16 ।।

भवदीय इति। पदत्वाज्जत्वम्। ऊर्णायुरिति पदसंज्ञाया निरस्तत्वाद् यस्येति लोपाभावः। एवम् ऋत्विय इति `ओर्गुणः' न भवति, चकारोऽनुक्तसमुच्चयार्थः तेन भुवद्धारयतोर्मतोश्छन्दसि `तसौ मत्वर्थे' इति भसंज्ञां बाधित्वा पदसंज्ञा भवति, तेन भुवद्वद्भ्यः, धारयद्वद्भ्यः।।

पदमञ्जरी

स्वादिष्वसर्वनामस्थाने।। 1.4.17 ।।

स्वादिष्विति सुशब्दादेकवचनादिति। सप्तमीबहुवचनादारभ्य ग्रहणं न भवति; `असर्वनामस्थाने' इति निषेधात्, यदि हि राजश्रित इत्यादौ सर्वनामस्थाने `सुबन्तम्' इति प्राप्तायाः संज्ञायाः निषेधोऽभीष्टः स्यात्, तत्रैव `असर्वनामस्थाने' इति ब्रूयात्। अथ राजवानित्यादावन्तर्वर्तिनिषेध इति चेद्, न; लुमता लुप्ते प्रत्ययलक्षणाभावात्, `तसौ मत्वर्थे' इति पदसंज्ञाबाधनाय भसंज्ञाविधानाच्च। आ कप इति। यदि पुनः सप्तमीबहुवचनपर्यन्ता एकविंशतिः प्रत्यया गृह्येरन्, तदा सुब्ग्रहणमेव कुर्याद्, अनुवर्त्तयेद्वा; `असर्वनामस्थाने' इत्यनेन सम्बन्धात्सप्तम्या विपरिणामात् सिद्धम्। किमथ पुनरा कपः प्रत्यया गृह्यन्ते, यावता सुबन्तात्तद्धितोत्पत्तिः समर्थाधिकारात्, स्वार्थिका अपि सुबन्तादेव,`घकालतनेषु' इति लिङ्गत्, ततश्च राजत्वं राजतेत्यादावन्तर्वर्तिन्या विभक्त्या सुबन्तं पदमित्येव सिद्धम्? सत्यम्; भसंज्ञार्थं त्वा कपः प्रत्यया गृहीताः। राजत्वमित्यादि। सुबन्तत्वेऽपि। परत्वादनेन पदत्वं युक्तमित्येषामुपन्यासः। राजानौ, राजान इति। अत्रापदत्वान्नलोपाभावः, राजेत्यत्र तु प्रत्ययलक्षणेन निषेधो न भवति `न ङिसम्बुद्ध्योः' इति लिङ्गान्नैतल्लिङ्गमुपपद्यते। हे वर्मन्निति नपुंसके लुमता लुप्ते सर्वनामस्थाने निषेधाभावादस्त्येव पदत्वमिति तत्रार्थवान् प्रतिषेधः। एवं तर्हि नायं प्रसज्यप्रतिषेधः- सर्वनामस्थाने नेति, किं तर्हि? पर्युदासोऽयम्-पदन्यत्सर्वनामस्थानदिति। सर्वनामस्थाने न विधिर्न प्रतिषेधः; यदि केनचित्प्राप्नोति, भवत्येव, पूर्वेण प्राप्नोति, अथ वा-अनन्तरा या प्राप्तिः सा प्रतिषिध्यते । कुतः पुनरेतद्? `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा'। अथ वा-`सर्वनामस्थाने' इत्यत्र यचीत्यपकृष्य सम्बध्यते, तेन यजादौ पदसंज्ञा निषिध्यते, न हलादाविति राजेत्याते, स्वादौ, एवं हि `असर्वनामस्थाने' इति न वक्तव्यं भवति? उत्तरार्थ सुठ्यपि नपुंसके भसंज्ञा यथा स्यात्, साम्नी इत्यत्र मा भूद्। भसञ्ज्ञा `विभाषा ङिश्योः' इति वचनसामर्थ्यादेवाभस्याप्यल्लोपो भविष्यति। तत्रायमप्यर्थो यस्येत्यादौ `श्यां प्रतिषेधः' इति न वक्तव्यं भवति; अभत्वादेव सिद्धम्। इह तर्हि सुपदी ब्राह्मणकुले इति पद्भावो न स्यादभत्वात्, इह च सामानि पश्येति भत्वादल्लोपः स्यादिति यथान्यासमेवास्तु।।

पदमञ्जरी

यचि भम्।। 1.4.18 ।।

यकारादावित्यादि। `यस्मिन्विधिस्तदादावल्ग्रहणे' इति तदादिविधिः। गार्ग्य इत्यादौ भत्वाद्यस्येति लोपः। नभोऽङ्गिरोमनुषां वत्युपसंख्यानमिति। द्वे अप्येते उपसंख्याने छन्दोविषये इत्याहुः। नभ इवेति। तृतीयासमर्थाद्वतेर्विधानात् तुल्यार्थापदर्शनमेतत्, नभसा तुल्यं वर्त्तत इति विग्रहः।

पदनिबन्धनकार्यनिवृर्त्त्यथमेव चैषां भसञ्ज्ञा विधीयते, न तु भत्वनिमित्तं कार्यं यथा स्यादिति; असम्भवात्।

नभस्वद्, अङ्गिरस्वदिति। अत्रापदत्वाद्रुत्वाभावो मनुष्वदित्यत्र पदत्वे रुत्वं स्याद् न तु षत्वम्; अपदान्तस्येति वचनात्।

वृषण्वसुः वृषणाश्व इति। पदत्वे सति `पदान्तस्य' इति प्रतिषेधाण्णत्वं न स्यात्, नलोपश्च स्याद्। भत्वेऽप्यल्लोपो न भवति; अनङ्गत्वात्।।

पदमञ्जरी

तसौ मत्वर्थे।। 1.4.19 ।।

नभस्वद्, अङ्गिरस्वदिति। अत्रापदत्वाद्रुत्वाभावो मनुष्वदित्यत्र पदत्वे रुत्वं स्याद्, न तु षत्वम्; अपदान्तस्येति वचनात्।

वृषण्वसुः, वृषणश्व इति। पदत्वे सति `पदान्तस्य' इति प्रतिषेधाण्णत्वं न स्यात्, नलोपश्च स्याद्। भत्वेऽप्यल्लोपो न भवति; अनङ्गत्वात्।।

तसौ मत्वर्थे।। मत्वर्थीयेनाक्षिप्तायाः प्रकृतेस्तकारसकाराभ्यां विशेषणात्तदन्तविधिरित्याह-तकारसकारान्तमिति। मत्वर्थे प्रत्यये इति। व्यधिकरणे सप्तम्यौ, मतोरर्थो मत्वर्थस्तत्र यः प्रत्ययो वर्त्तते तस्मिन्नित्यर्थः। अथ वा समानाधिकरणे मतुशब्देन साहचर्यात्तदर्थो लक्ष्यते-मतुरर्थो यस्य तस्मिन्नित्यर्थः। उदश्वित्वानिति। भत्वात् पदत्वाभावे जश्त्वं न भवति, `झयः' इति वत्वम्। उदकेन श्वयति वर्द्धते उदश्वित्, क्विपि `उदश्वितोऽन्यतरस्याम्' इति निपातनात् संप्रसारणाभावः, संज्ञायामुद्भावः। पयस्वीति। `अस्मायामेधास्त्राजो विनिः' भत्वाद्रुत्वाभावः।

अथार्थग्रहणं किमर्थम्, न `मतौ'इत्युच्यते, स्वादिष्विति वर्त्तते, व्यधिकरणे सप्तम्यौ, मतौ ये स्वादयः। कथं पुनः शब्दे नाम शब्दे वर्त्ततेऽसम्भवात्, अर्थे वृत्तिर्विज्ञास्यते? यद्येवं लभ्येत, कृतं स्यात्; तत्तु न लभ्यम्, न हि सामानाधिकरण्ये सम्भवति वैयधिकरण्यं शक्यं विज्ञातुम्, ततश्च मतावेव स्यात्-पयस्वान् यशस्वानिति, इह तु न स्यात्-पयस्वी, यशस्वीति, अतोऽर्थग्रहणं कर्तव्यम्। यद्यर्थग्रहणं क्रियते, मतुपि न प्राप्नोति; तस्यार्थविशेषणत्वात्, सत्यम्; अर्थविशेषणं मतुब्, विशेष्याकारोऽपि तत्रास्ति। अस्यास्त्यस्मिन्निति च मतुपोऽर्थः, स च विन्यादीनामिव मतुपोऽप्यविशिष्टः, यथा-देवदत्तशालायामासीना ब्राह्मणा आनीयन्तामित्युक्ते विशेषणभूतोऽपि देवदत्तः सित ब्राह्मणये आनीयते। यत्र उपलक्ष्याकारस्यासम्भवः तत्रैवोपलक्षणस्य कार्थायोगः, तद्यथा- चित्रगुरानीयतामिति, न हि चित्रगवीणां गावः सन्ति।।

पदमञ्जरी

अयस्मयादीनिच्छन्दसि।। 1.4.20 ।।

यदि संज्ञा विधीयेत आनन्तर्थाद्भसंज्ञाविधानद्वारेणैव निपातनं स्यात्, पदसंज्ञा न स्याद्, भपदसंज्ञयोः समावेशो न स्यात्, तस्मात्साधुत्वमेव युक्तं विधातुमिति मत्वाह-अयस्मयादिनीत्यादि। साधुत्वे प्रकारविशेषं दर्शयति। भपदसंज्ञाधिकार इत्यादि। द्वारम्=उपायः। अयस्मयमिति। अयसो विकारः `द्व्यचश्छन्दसि' इति मयट्।।

पदमञ्जरी

बहुषु बहुवचनम्।। 1.4.21 ।।

बहुवचनं विहितमिति। ततश्च तस्य विधेयविभक्तिनिर्द्दिष्टस्यापि प्राप्तत्वादनुवाद्यत्वम्, न तु विधेयत्वमिति भावः।

बहुत्वसंख्यानुभूतविभक्तिर्निर्दिष्टाप्यप्रत्वाद्विधीयत इत्याह-तस्यानेनेति। इहं चापरमनेन ग्रन्थेन दर्शितम्-स्वादिविधिवाक्येन हि भिन्नमेतद् वाक्यम्,। तत्रापि विध्यर्थं न तु नियमार्थमिति। यदाह-बहुवचनं विहितमिति। बहुत्वसंख्यावाच्यत्वेन विधीयत इति च। यदि पुनरेकवाक्यतया विशिष्टविधिः स्याद्,इतरेतरश्रयं प्राप्नोति-विहितानां जसादीनां बहुवचनसंज्ञा,संज्ञया च विधानमिति। किं चाव्ययेभ्यो निःसंभ्यः स्वदयो न स्युरतो भिन्नवाक्यत्वमेव युक्तम्,तत्रापि विध्यर्थत्वमेव।

इह केचिन्मन्यन्ते-स्वार्थद्रव्यलिङ्गसंख्याकर्माद्यात्मकः पञ्चकः प्रातिपदिकार्थ इति। आदितस्त्रिक इत्यन्ये। तत्र शब्दप्रवृत्तिनिमित्तं स्वार्थः, स चानेक प्रकारः- स्वरूपं जातिर्गुणः क्रिया द्रव्यं सम्बन्धश्चेति, डित्थो गौः शुक्लः पाचकः यष्टिः पुरुषः दण्डीति। जात्यादिशब्देष्वपि जात्यादिमात्रनिष्ठेषु स्वरूपमेव प्रवृत्तिनिमित्तम्। अभिधानाभिधेययोरभेदाध्यासात् शब्दरूपानुरक्तोऽर्थोऽभिधीयते। अस्य गौरिति नाम, अयं गौरिति च प्रतीतिवेषो भिद्यते। अत्र हेतुर्वैयधिकरण्यम्, सामानाधिकरण्यं च। तत्र जात्यादिवत् स्वरूपमपि शब्दत एव प्रतिपन्नमप्यर्थस्य विशेषणं मन्यन्ते। उक्तं च-

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।

तथैव सर्वशब्दानामेते पृथगवस्थिते ।। इति।

तेन स्वरूपमपि स्वार्थो युज्यते।

स्वार्थस्य यत्र विश्रान्तिर्वाच्यं द्रव्यं तदिष्यते।।

पर्यवसानभूमिरित्यर्थः। तच्चानेकप्रकारम्-जातिर्गुणः क्रिया द्रव्यं स्वरूपमिति; गौ सूक्लः, पाकः, डित्थः,`तूष्णीमि भूवः' इति। लिङ्गं स्त्रीत्वादि। संख्याएकत्वादि, कर्मादयो वक्ष्यमाणाः कारकविशेषाः।

तदिह द्वितीयं दर्शनं वृत्तिकारेणाश्रितम्। अन्वयव्यतिरेकाभ्यां हि शब्दार्थनिश्चयः, यस्य शब्दस्यान्वये योऽर्थः प्रतीयते, व्यतिरेके च व्यतिरिच्यते स तस्यार्थः। वृक्षः वृक्षौ इत्यादौ च तत्तद्वचनान्वये सा सा संख्या प्रतीयते वयतिरेके च व्यतिरिच्यते सत्यपि प्रकृत्यन्वये, तेन मन्यामहे-वचनार्थः संख्येति। तथा वृक्षं वृक्षेण वृक्षायेत्यादौ तत्तत्त्रिकान्वये स स कर्मादिः प्रतीयते, व्यतिरेके च व्यतिरिच्यते, तेन मन्यामहे-त्रिकार्थः कर्मादिरिति। यद्यपि पयो दधि मध्वित्यादावन्तरेण वचनमन्तरेण च त्रिकं स सोऽर्थः प्रतीयते, नैतावता विभक्त्यर्थत्वं हीयते , न हि गर्गा इत्यत्रान्तरेणापि यञमपत्यार्थः प्रतीयते इति गार्ग्य इत्यत्रापि प्रकृतेरिवापत्यमर्थ इति युक्तं वक्तुम्, पचति पचतः पचन्तीत्यादौ वचनान्वये संख्यान्वयाद्व्यतिरेके च व्यतिरेकाद् वचनार्थ एव संख्या, न धात्वर्थः। अबिभर्भवानित्यादौ यद्यप्यन्तरेणापि तिङं कर्त्ता संख्या च प्रतीयते, तथापि नैतावता तर्वत्र प्रकृत्यर्थत्वं यक्तम्। न हि भित्, छिदित्यादौ अन्तरेणापि प्रत्ययं कर्त्ता प्रतीयते इति भेत्तेत्यादावपि कर्त्ता प्रकृत्यर्थो भवति। तदेवं त्रिक एव प्रातिपदिकार्थः।

धातोश्च क्रियैव वाच्येत्यसत्यस्मिन्ननिर्द्दिष्टार्थत्वात्स्वार्थे त्रिक एव जसादिबहुवचनं स्याद्, न बहुत्व इति बहुत्वसंख्यावाच्यत्वेन विधियते। सूत्रेऽप्यन्तरेणापि भावप्रत्ययं भावप्रधानो निर्देशः, बहुत्व इत्यर्थः। आश्रयागतस्य बहुत्वस्य गुणे आरोपाद् बहुष्विति बहुवचनम्। आरोपस्य प्रयोजनं नानाऽऽधारस्य संख्यारूपस्य बहुत्वस्य ग्रहणं यथा स्यात्। तेनैकाश्रयं वैपुल्यं बहुवचनस्य वाच्यं न भवतिबहुरोदन इति।

केचिन्मन्यन्ते-संख्याकर्मादयश्च परस्परमनन्विताः, प्रकृत्यर्थेन चान्विता विभक्तिभिरभिधीयन्ते-वृक्षान्पश्य, कोऽर्थः? बहवो वृक्षाः कर्मेति, न तु कर्मीभूता वृक्षा

बहव इति; नापि बहवः कर्मेति। एवमेकवचनेऽपि `पशुना यजेत' इति पशुरेकः पशुः करणमित्यर्थः, न तु करणीभूतः पशुरेक इति, नाप्येकः पशुः करणमिति करणत्वैकत्वयोर्युगपदभिधानादिति तान्निराकरोति-कर्मादयोऽप्यपर इत्यादि। तदीये बहुत्वे इति। कर्मादिगतमेव बहुत्वं बहुवचनस्य वाच्यम्, न तु केवलप्रातिपदीकार्थगतमित्यर्थः। प्रकृत्यर्थगतमेव बहुत्वं वाच्यम्, वृक्षशब्दस्यावयवी वाच्यः, न त्ववयवा इति द्रव्यपदार्थपक्षे तावद् वृक्षं पश्येति मूलस्कन्धफलपलाशादीनां बहुत्वेऽपि तेषामनभिधेयत्वाद्बहुवचनाभावः। आकृतिपक्षेऽपि प्रत्यासत्तेस्तदाधारगतं बहुत्वामाश्रीयते न त्ववयवगतम्, भिन्नवाक्यतया विधिरित्युक्तं तत्प्रयोजनमाह यत्र चेत्यादि। भाष्ये तु पञ्चकपक्षाङ्गीकारेण नियमपक्षः स्थापितः। तत्र ह्यनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे इति स्वार्थेऽपि जसादि बहुवचनं बहुत्वेऽपि सिद्धम्, तस्यापि स्वार्थत्वात्तत्राप्यर्थनियमाद्-बहुषु बहुवचनमेव, द्व्येकयोर्द्विवचनैकवचने एवेति। एवं `कर्मणि द्वितीया' इत्यादावपि कर्मणि द्वितीयैवेत्येवमादिकोऽर्थनियमो वेदितव्यः। एवं हि प्रत्ययानामनियतत्वादव्ययेभ्ये निःसंख्येभ्यो निष्कारकेभ्यश्च स्वादयः सिद्ध्यन्ति। अथ वा, प्रत्ययनियमः-बहुष्वेव बहुवचनं द्व्येकयोरेव द्विवचनैकवचने। तुल्याजातीयस्य च नियमेन व्यावृत्तिः-बहुष्वेव बहुवचनं न द्व्येकयोः, एकस्मिन्नेवैकवचनं न संख्यान्तरे, द्वयोरेव द्विवचनं न संख्यान्तर इति। `कर्मणि द्वितीया' इत्यादावप्येवम्-कर्मण्येव द्वितीया, न कारकान्तर इति। एवमपि ह्यव्ययेभ्यः स्वादयः सिद्ध्यन्ति।।

पदमञ्जरी

द्व्येकयोर्द्विवचनैकवचने।। 1.4.22 ।।

द्विशब्देन साहचर्यादेकशब्दः संख्यावाची। अयमपि भावप्रधानो निर्देशः, अत एव`द्व्येकयोः' इति द्विवचनम्, तदाह-द्वित्वैकत्वयोरिति। एतदपीत्यादि। अनेनास्यापि विध्यर्थत्वं दर्शयति। कथं तर्हि सामान्यविहितयोरिति, यावता नियमार्थत्वे एतद् घटते? उच्यते; साधारणपर्यायः सामान्यशब्दः ससंख्यनिःसंख्यसाधारण्येन विहितयोरित्यर्थः। अर्थाभिधानमिति। अर्थः=वाच्योऽभिधीयते=कथ्यते येन तदर्थाभिधानम्। द्व्येकयोरितयत्र `संख्याया अल्पीयस्यः' इत्येकशब्दस्य पूर्वनिपातोऽस्मादेव निपातनान्न भवति। संख्येयवचनष्वेवार्थद्वारकमल्पीयस्त्वमित्यन्ये।।

पदमञ्जरी

कारके।। 1.4.23 ।।

अधिकारोऽनेकप्रकारः। संज्ञा, विशेषणम्, स्थानी, प्रकृतिः, निमित्तम्, आदेश इति। `प्रत्ययः', `शेषे', `पूर्वपरयोः' `ङ्याप्प्रातिदिकात्' `धातोः'`आर्द्धधातुके मूर्द्धन्यः' इति तदिह विधेयानिर्देशात् स्वरितत्वाच्चाधिकारत्वे स्थिते प्रकारमाह-कारक इति विशेषण...मधिक्रियत इति। न तावत्सञ्ज्ञात्वेनाधिकारः; सञ्ज्ञाया भाव्यमानत्वात्सप्तम्यनुपपत्तेः। अथ सञ्ज्ञानुरूपः प्रथमानिर्देश एव कस्मान्न कृतः, युक्तं चैतद् कारकसंशब्दनेषु वक्ष्यमाणानामपादानादीनामेव षण्णां ग्रहणस्येष्टत्वाद्; अन्यथा नटस्य श्टणोतीति कारकशेषस्यापि प्रसङ्गात्? उच्यते; सञ्ज्ञापक्षे--अपाये यद् ध्रुवं तत् कारकसञ्ज्ञं भवति, अपादानसञ्ज्ञं चेत्ययमर्थो भवति, एवमन्यत्रापि; ततश्च कारकापादानसञ्ज्ञयोर्युगपद्विधानात् परस्परं निमित्तनिमित्तिभावाभावादकारकस्यापि व्यापारशून्यस्यापादानसञ्ज्ञा प्राप्नोति। विशेषणाधिकारे तु-कारकेषु मध्ये यदपाये ध्रुवं सा न प्राप्नोति। अतो विशेषणानुरूप एव निर्देशः कृतः, न तु सञ्ज्ञानुरूपः। कारकसञ्ज्ञा त्वन्वर्थत्वाद् व्यापारशून्यस्य न भवति। किं च कारकसंज्ञाया अपादानादिसञ्ज्ञाभिः समावेशो न प्राप्नोति, ततश्च`स्तम्बेरमः' इत्यत्र सप्तम्यां श्रुयमाणायां गतिकारकोपपदादिति स्वरो न स्यात्, `कारके' इति निर्धारणे सप्तमी, सामान्यापोक्षं चैकवचनम्। कारकशब्दोऽयमस्ति ण्वुलन्तः-करोतीति कारकमिति, अस्त्यव्यत्पन्नः सञ्ज्ञाशब्दो निमित्तपर्यायः; तत्र पूर्वस्य ग्रहणेऽपादानादिषु कारकशब्दो न प्रवर्त्तोत, यथा कर्तृशब्दः, तेषामस्वतन्त्रत्वात्; स्वातन्त्र्ये वा पक्षे कर्तृसञ्ज्ञा प्रसज्येत, नैष दोषः; सर्वमेव खलु कारकं यथायथमवान्तरव्यापारं निर्वर्तयत् प्रधानक्रियायामुपयुज्यते, सा च सकलकारकजन्या फलभूता विक्लित्यादिरूपा क्रिया प्रधानक्रिया। यद्वा-सामान्यभूता क्रिया प्रधानक्रिया फलजनना नाम, सर्वाणि हि कारकाणि फलजननाय प्रवर्तन्ते, अतो यद्यत्फलजननारूपं तत्सर्वेष्वेव कारकेष्वविशिष्टम्। किञ्चित्खलु कारकं केनचिदेव रूपेण फलं जनयतीति फलजनना सर्वेषामभिन्नरूपा। अवान्तरभेदविवक्षायां तु करणादिरूपोन्मेषः।

न च वैशेषिकाणामिवास्माकमेका क्रिया नानेकत्र समवेता, धात्वर्थो हि क्रिया, न परिस्पन्द एव। धातुना च सकलकारकानुयाय्योदनादिफलावच्छेदेन एकीकृतो व्यापारोऽभिधीयते। तस्यामेकस्यां प्रधानक्रियायामुपयोगो यथायथमवान्तरव्यापारमुखेन, तद्यथा-अपादानस्यावधिभावोपगमनं व्यापारः, सम्प्रदानस्यतु प्रेरणानुमत्यनिराकरणादिः, करणस्य काष्ठादेर्ज्वलनादिः, अधिकरणस्य सम्भवनधारणादिः, कमंणो निर्वृत्त्यादिः, कर्तुः प्रसिद्ध एव, प्रयोजकस्य प्रेषणादिः। न चैवं सति करणादीनामपि कर्तृसञ्ज्ञाप्रसङ्गः, परतन्त्रत्वत्। प्रधानेन हि कर्त्रा समवाये करणादीनि परतन्त्राणि, व्यवाये स्वतन्त्राणि;तद्यथा-अमात्यानां राज्ञा सह समवाये पारतन्त्रम्, व्यवाये स्वातन्त्र्यम्। यद्येवम्, कारकव्यपदेशोऽपि करणाद्यवस्थायां न स्यात्? करणम् कारकमिति अधिकारसामर्थ्यात्। कारकशब्दोपनीतस्वातन्त्र्यमवस्थान्तरगतं विज्ञास्यते। अवस्थान्तरे यत् स्वतन्त्रं तत्साधकतमं करणमिति कर्तुरेव त्वेकस्य सांप्रतिकं स्वातन्त्र्यम्, तच्च कर्तृसञ्ज्ञाङ्गतया चोदितम्। यदि तर्हि व्युत्पत्तिपक्षेऽप्यवस्थान्तरगतमेव स्वातन्त्र्यम्, एवं तर्हि करणाद्यवस्थायां निमित्तभाव एवाभ्युपगतो भवति? यद्येवम्, किं दोषप्रतिविधानव्यसनेन। निमित्तपर्यायस्यैव ग्रहणमस्त्विति मन्यमान आह- कारकशब्दश्चेति। कस्य हेतुरिति। द्रव्यगुणविषयोऽपि हेतुः कारकं प्राप्तमित्यभिप्रायः। कारकशब्दोऽयं क्रियाहेतावेव प्रसिद्ध इत्याह-क्रियाया इति। अनाश्रितव्यापारं निमित्तं हेतुः, आश्रितव्यापारं कारकम्, उक्तं च--

द्रव्यादिविषयो हेतुः कारकं नियतक्रियम्। इति।

अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते।। इति च।

कथं तर्हि पूर्वमुक्तम्-अनर्थान्तरमिति, न हि सामान्यविशेषवचनानामनर्थान्तरवाचित्वम्? सत्यम्; सामान्यशब्दयोरपि अर्थप्रकरणादिना विशेषवृत्तिमभिप्रेत्य तु

तथोक्तम्। वृक्षस्य पर्णं पततीति। पर्णविशेषणत्वेनात्र वृक्षो विवक्षितः, न त्वपायस्य निमित्तत्वेनेत्यपादानसंज्ञा न भवति, न वापायस्याविवक्षितत्वात्। सति ह्यवधौ गतिरपायो भवति, नान्यथा। न चात्र वृक्षोऽवधित्वेन विवक्षितः। तथा हि--वृक्षमजहत्यपि पर्णे वृक्षस्य पर्णं पततीति भवति प्रयोगो यदा वृक्षः छिन्नः पततीति, सत्यम्; अत एवास्मिन्नतृप्तः सन्नाह--माणवकस्य पितरमिति। अत्र पितुः सम्बन्धित्वेन माणवको विवक्षितः, न तु प्रश्नक्रियां प्रति निमित्तत्वेनेति कर्मसंज्ञा न भवति; असति तु कारकाधिकारे तस्यापि स्यात्। शेषलक्षणा तु षष्ठी अकथिते दुह्यादिपरिगणनाद्राज्ञः पुरुष इत्यादौ सावकाशा। यदि तर्हि विशेषणमिदम्, ध्रुवादीनां न संज्ञा, `कारकद्दत्तश्रुतयोरेवाशिषि'--इत्यादौ यत्र कारकशब्दः संशब्द्यते तत्रापादानादीनां वक्ष्यमाणानां पण्णामेव ग्रहणमिष्यते, तन्न सिद्ध्यति। संज्ञापक्षे तु न दोषः, संज्ञा ह्यावर्तमाना संज्ञिनं प्रत्यायति। स्यादेतत्-प्रदेशेष्वपि क्रियानिमित्तपर्यायस्य कारकशब्दस्योपादानम्, तच्च निमित्तमपादानाद्येवेति, तदसत्; नटस्य श्टणोतीत्यादौ कारकशेषस्य आह-कारकसंशब्दनेषु चेति। कारकग्रहणं प्रदेशेषु स्वर्यते, स्वरितेनाधिकारावगतिर्भवतीति भावः।।

पदमञ्जरी

ध्रुवमपायेऽपादानम्।। 1.4.24 ।।

ध्रवमिति। ध्रु गतिस्थैर्ययोः इत्यस्मात्कुटादेः पचाद्यचि रूपम्। ये तु `ध्रुव गतिस्थैर्ययोः' इति पठन्ति, तेषामिगुपधलक्षणः कः प्रत्ययः। अपायः= विश्लेषः, विभागस्तद्धेतुभूतश्च गतिविशेषोऽवधिसापेक्षः, तत्र विभागस्य द्विष्ठत्वात् न केवलमपयन्नेव तेन युक्तः, किं तर्हि? यतोऽपैति सोऽपि युक्त एवेत्याह-ध्रुवं यदपाययुक्तमिति। कथं पुनः सप्तमीनिर्द्देशेऽप्यपाययुक्तमिति प्रतिपद्येमहीत्यत्राह-अपाये साध्य इति। साध्यत्वेन विषयत्वात् सामर्थ्यलभ्यो योग इति भावः। ध्रुवमित्येकरूपमुच्यते- ध्रुवमस्य शीलम्, ध्रुवमस्य रूपमिति, इह तदपायेन विशेष्यते-उपाये यद् ध्रुवमिति, न तु सार्वत्रिकम्, तच्चापाये ध्रुवमुच्यते-यदपायेनानाविश्यते उपयुज्यते चापाये, तच्चार्थादवधिभूतमित्याह-यदवधिभूतमिति। एवं च सार्थाद् हीनः, रथात्पतितः, धावतः पतित इत्यादौ क्रियान्तरावेशाच्चलत्वे तत्तद्धावनादिक्रियानावेशात्तन्निमित्तमपायं प्रत्यौदासीन्यादस्त्येव ध्रुवत्वमिति भवत्येव संज्ञा। उक्तं च--

अपाये यदुदासीनं चलं वा चदि वा चलम्।
ध्रुवमेवातदावेशात् पदपादानमुच्यते।। इति।

पततः पतित इत्यत्रापि परगतपातापेक्षया ध्रौव्यमेव। तथा हि-

पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ।
तस्य त्वश्वस्य पतने कुड्यादिर्ध्रुव उच्यते।।

इह तु परस्परम्मान्मेषावपसर्पत इति

मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्।
मेषयोः स्वक्रिययापेक्षं कर्तृत्वं च पृथक्पृथक्।।
गतिर्विना त्ववधिना नापाय इति कथ्यते।।

जुगुप्सेति। प्रश्लेषपूर्वको विश्लेषोऽपायः, स चात्र नास्ति; बुद्धिपरिकल्पितस्तु गौणः, न च मुख्ये संभवति गौणस्य ग्रहणं युक्तम्। अत एव `भीत्रार्थानाम्' इत्यादेरारम्भ इति वाक्यकारस्याभिप्रायः। अत्र च कारकशेषत्वात् षष्ठी प्राप्नोति-नटस्य श्टणोतीति यथा। प्रत्याख्यानं तु साधकतममिति तमब्ग्रहणं लिङ्गम, कारकप्रकरणे यथासम्भवमेव साधकत्वमिति। तदिह-अधर्माज्जुगुप्सते इत्यादौ जुगुप्सादिपूर्विकायां निवृत्तौ जुगुप्सादीनां वृत्तिरिति स्थिते य एष मनुष्यः प्रेक्षापूर्वकारी भवति, स पश्यति- दुःखहेतुरधर्मो नैनं करिष्यामीति; स बुद्ध्या तं प्राप्नोति, प्राप्य तच ततो निवर्त्तते। धर्मात्प्रमाद्यति धर्मान्मुह्यतीति। य एष नास्तिकः पुरुषः, स पश्यति-नानेन धर्मेण किंचिदाप्यते, नैनं करिष्यामीति स बुद्ध्या तं प्राप्नोति, प्राप्य च ततो निवर्त्तते, तत्र ध्रुमपायइत्येव सिद्धमिति। तच्चैतत्--

निर्द्दिष्टविषयं किञ्चिदुपात्तविषयं तथा।
अपेक्षितक्रियं चेति त्रिधाऽपादानमुच्यते।।

यत्र धातुनापायलक्षणः संज्ञाविषयो निर्दिश्यते, यथा-ग्रामादागच्छतीति, तन्निर्दिष्टविषयम्। यत्र धातुर्धात्वन्तरार्थाङ्गं स्वार्थमाह, यथा-बलाहकाद् विद्योतते विद्युद् इति, अत्र हि निः सरणाङ्गविद्योतने विद्युतिर्वर्त्तते-बलाहकन्निः-सृत्य विद्योतत इत्येव; कुसुलात्पचतीत्यत्राऽऽदानाङगे पाके पचिर्वर्त्तते-कुसूलादादाय पचतीति, तदुपात्तविषयम्। अपेक्षितक्रियं तु-यत्र क्रिया न श्रुयते, प्रमाणान्तरेण तु प्रतीयते, यथा-आगच्छन्तं पुरुषं प्रत्यक्षेण पश्यन्नाह-कुतो भवानिति, सोऽपि तदेव प्रत्यक्षसिद्धमागमनमुपजीवन्नाह-पाटलिपुत्रादिति।

ध्रुवग्रहणं किम्? ग्रामादागच्छति शकटेन--अत्र शकटस्य मा भूत्। अथ क्रियमाणेऽपि ध्रुवग्रहण इह कस्मान्न भवति--धनुषा विध्यतीति, अत्र हि शराणामपायं प्रति अवधिभावेनैव धनुषः साधकतमत्वम्? सत्यम्; उभयप्रसङ्गे परत्वात्करणसंज्ञा भविष्यति। नन्वेवमक्रियमाणेऽपि शकटस्य नैव भविष्यति, एवं संज्ञान्तरविषये सर्वत्र। वृक्षस्य पत्रं पततीत्यत्र त्वपायस्याविवक्षितत्वादकारकत्वाच्च न भविष्यति । संज्ञिनिर्देशार्थं तु न हि `कारके' इति सप्तम्यन्तेन शक्यः संज्ञी निर्देष्टुम्, सिद्धं तु निर्द्धार्यमाणस्य संज्ञित्वादपायविषयेषु कारकेषु मध्ये यत्कारकं संज्ञान्तरस्याविषयस्तदपादानमिति, तदेवं ध्रुवग्रहणं चिन्त्यप्रयोजनम्।।

पदमञ्जरी

भीत्रार्थानां भयहेतुः।। 1.4.25 ।।

भयं भीः, त्राणं त्राः, सम्पदादित्वाद्भावे क्विप्। भीत्रौ अर्थौ येषां ते भीत्रार्थाः, षष्ठीप्रयोगापेक्षया कारकापेक्षया चेत्याह--बिभेत्यर्थानामित्यादि। अत्र बिभेतित्रायतिशब्दौ तदर्थयोर्वर्तेते, तदर्थोऽर्थो येषामित्यर्थः। त्राणं बाधकेभ्यो रक्षणम्, बाधकाश्च भयहेतव इति त्रार्थानामपि भयहेतुः कारकं भवत्येव। चोरेभ्य इति । चोरयतेः पचाद्यचि चोरः। क्वचित् चौरेभ्य इति पाठः। तत्र स्वार्थिकः प्रज्ञाद्यण्। छत्त्रादिषु वा चुराशब्दः पठ्यते, स चाऽप्रत्ययादित्यस्य `ण्यासश्रन्थो युच्' इति युचि बाधके प्राप्ते तस्मादेव निपातनादकारप्रत्यये णिलुकि च व्युत्पाद्यते, ततश्चुरा स्तेयं शीलमस्येति णे कृते स एवार्थो भवति। बिभेतीति। `ञिभी भये' जुहोत्यादिः। उद्विजते इति। `ओविजीभयचलनयोः' तौदादिकोऽनुदात्तेत्। अरण्ये इति। अत्र तत्स्थेभ्यो वृक्षादिभ्यो भयम्, नारण्यात्। ननु च ध्रुवमित्यनुवर्तिष्यते, न चारण्यमविधित्वेन विवक्षितम्, परत्वाच्चाधिकरणसञ्ज्ञैव भविष्यति, सत्यम्; पूर्वस्यैवायं प्रपञ्चः, कथम्? भयादिपूर्विकायां निवृत्तौ भ्यादयो वर्तन्ते-बिभेतीति कोर्थः? भीत्या निवर्तत इत्यर्थः, त्रायत इति कोऽर्थः? चोरकृताद्वधादेस्त्राणेन निवर्त्तयतीत्यर्थः। कथं तर्हि चोरमध्यवर्त्तिनि चोरेभ्यो बिभेतीति प्रयोगः, न ह्यत्र निवृत्तिरस्ति? अत्रापि भीत्या निवर्त्तितुमिच्छतीत्यर्थो द्रष्टव्यः। तदेवं बुद्धिपरिकल्पितोऽपायोस्तीत्युपात्तविषयमिदमपादानमिति। कृतस्न एव प्रयोगप्रपञ्चे किमवयवपर्यनुयोगेन! ।।

पदमञ्जरी

पराजेरसोढः।। 1.4.26 ।।

अत्र धातुपाठगतस्य जीत्येतावन्मात्रस्यानुकरणम्। ततः परापूर्वो जिः पराजिरित्युत्तरपदलोपी समासो द्रष्टव्यः। ननु `प्रकृतिवदनुकरणं भवति' इत्यधातुरिति प्रातिपदिकसञ्ज्ञायाः प्रतिषेधादसुबन्तत्वात्समासो न प्राप्नोति, न; अप्रतिषेधात्, नायं प्रसज्यप्रतिषेधः-धातोर्नेति, किं तर्हि? पर्युदासोऽयम्--यदन्यद् धातोरिति, धातोर्न विधिर्न प्रतिषेधः। एवमपीयङादेशः प्राप्नोति, परत्वाद् घेर्ङितीति गुणो भविष्यतीति, समुदायस्य वा, समुदायोऽनुकरणम्, क्वस्थस्यसमुदायस्य? प्रयोगस्य। यद्येवम्, अध्ययनात्पराजयते-अत्र प्राप्नोति, न ह्यत्र पराजीति रूपमस्ति, क्व तर्हि स्याद्? यत्र पराजीति रूपमस्ति-अध्ययनात्पराजित इति। उदाहरणे पराजिर्न्युनीभावे वर्तते-अध्येतुं ह्रसति ग्लायतीत्यर्थः। अकर्मकश्चायमत्रार्थे, तत्र षष्ठ्यां प्राप्तायां वचनम्, प्रत्युदाहरणे त्वभिभवे वर्तते। `विपराभ्यांजेः' इत्यत्रार्थद्वयेऽपि वर्तमानस्य ग्रहणम्। अयमपि प्रपञ्चो न्यूनीभावपूर्विकायां निवृत्तौ वृत्तेः सिद्धम्। अध्ययनात्पराजयते-कोऽर्थः? न्यूनीभावेन ग्लान्या ततो निवर्त्तते इत्यर्थः। तेन प्रत्युदाहरणे परत्वात्कर्मसञ्ज्ञा भविष्यतीति न चोदनीयम्।।

पदमञ्जरी

वारणार्थानमीप्सितः।। 1.4.27 ।।

ईप्सितशब्दोऽयमस्त्यभिप्रेतपर्यायः, तस्य ग्रहणे यवानामान्मीयत्वे गवां च परकीयत्व एव स्याद्, न विपर्यते? न खल्वस्यैतदभिप्रेतं यदुतात्मीया गावः परकीयान्यवान्मा घसन्निति, मा भूवन्यवा वारयितुमीप्सिताः; वार्यमाणानां तु गवामीप्सिताः, न वात्र विशेषः श्रुतः कर्तुरीप्सित इति। इह तर्हि न स्याद्-अग्नेर्माणवकं वारयति कूपादन्धमिति, न ह्यग्रिकूपौ वारयितुर्वार्यमाणस्य वाभिप्रेतौ? क्रियाशब्दस्य तु ग्रहणे वार्यमाणस्यान्धादेर्गमनादिक्रियया कूपादेराप्यमानत्वात् सिद्ध्यति, अन्धश्चापश्यन्नपि गन्तव्यं जिगमिषति, अन्यथा न क्वचित्तस्य प्रवृत्तिः स्यात्। यवेभ्यो गा वारयतीति। `वृञ् आवरणे' चुरादिः। अथात्र गवामपादानसंज्ञा कस्मान्न भवति, ईप्सिततमोऽपीप्सितो भवत्येव, यथा शुक्लतमोऽपि शुक्लः? परत्वात्कर्मसंज्ञा भविष्यति। कर्मसंज्ञाया अवकाशः- वारणार्थेभ्योऽन्यत्र, अपादानसंज्ञायास्तु प्रकर्षरहितमीत्सितम्, इप्सिततमस्य तूभयप्रसङगे परत्वात्कर्मसंज्ञा। अयमपि प्रपञ्चः, अस्ति ह्यत्रपि बुद्धिव्यवस्थितोऽपायः, कथम्? पश्यत्ययम्-यदि गावः क्षेत्रे गच्छेयुर्ध्रुवं सस्यविनाशः, सस्यविनाशेऽधर्मश्च राजभयं च; स बुद्ध्या संप्राप्य निवर्तयतीत्यतो न चोदनीयम्-प्रत्युदाहरणे क्षेत्रस्याधिकरणसंज्ञा भविष्यतीति।।

पदमञ्जरी

अन्तर्द्धौ येनादर्शनामच्छति।। 1.4.28 ।।

अन्तर्द्धौ इति नेयं `निमित्तात्कर्मयोगे' इति सप्तमी, यथा हि-वेतनेन धान्यं लुनातीत्यत्र वेतनस्य धान्येन योगोऽस्ति,तथेहाप्यदर्शनमिच्छतीतीच्छाकर्मणाऽदर्शनेनान्तर्द्धेर्योगो नास्ति। अथादर्शनस्य यत्कर्म आत्माख्यमात्मनोऽदर्शनमिच्छतीति तेनान्तर्द्धेर्योगोऽस्ति? यस्यैवादर्शनंतस्यैवान्तर्द्धानमित्युच्येत। एवमपि `निमित्तात्कर्मयोगे' इति किं निमित्तं गृह्यते, कारणम्? प्रयेजनं वा? कारणं चेज्जाड्येन बद्धः- अत्रापि प्राप्नोति, य एव बद्ध्यते तत्रैव जाड्यमिति; तस्मात् प्रयोजनस्य तत्र ग्रहणम्। यथा-चर्मणि द्वीपिनं हन्तीति चर्म द्वीपिहननस्य प्रयोजनम्। इह त्वन्तर्द्धानमदर्शनस्य कारणम्, अन्तर्हितः खल्वसौ न दृश्यते। तस्माद्विषयसप्तम्येषा, सत्सप्तमी वा। येनेति कर्त्तरि तृतीया। ननु च दर्शनेन योगात् `कर्तृ कर्मणोः कृति' इति षष्ठ्या भाव्यम्। उभयप्राप्तौ कर्मण्येवेति नियमात् तृतीया भविष्यति। कम त्वत्रादर्शनस्यात्मा। नन्वात्मने इति न श्रूयते, मा श्रावि; येनादर्शनमिच्छतीत्युक्ते कस्येत्यपेक्षायामात्मन इति गम्यते। अन्तर्द्धिनिमित्तमिति। अन्तर्द्धिना कारणेनेत्यर्थः। `निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्' इति प्रथमा। अथ वा-बहुब्रीहिरदर्शनस्य समानाधिकरणं विशेषणम्। सूत्रऽनुपात्तोऽपि तच्छब्दो यत्तदोर्नित्यसम्बन्धाल्लभ्यत एवेत्याह-तत्कारकमिति। अन्तर्द्धत्ते इति। तिरोभवतीत्यर्थः। निलीयते इति। `लीङ् श्लेषणे' दैवादिकः।

चौरान्न दिदृक्षते इति। आत्मानं ते मा द्राक्षुरित्येवमर्थम्। ननु परत्वात्कर्मसंज्ञा भविष्यति, सत्यम्; अयमपि प्रपञ्चः, कथम्? पश्यत्येवम्-यद्युपाध्यायः पश्येद् ध्रुवं मे प्रेषणमुपालम्भो वा भवेदिति, स बुद्ध्या संप्राप्य निवर्तते। येनेत्यस्मिन्नसत्यदर्शनमिच्छतः शिष्यस्यैव स्यात्, ध्रुवमित्यनुवर्तिष्यते। एवं तर्हि सूत्रस्यावाचकत्वं मा भूत्। असति हि तस्मिन्नन्तर्द्धौ ध्रुवमपादानसंज्ञं भवति तच्चेद् ध्रुवमदर्शनमिच्छतीत्यर्थः स्यात्। न च ध्रुवमिच्छति, यच्चेच्छति न तद्

ध्रुवमित्यवाचकं स्यात्।।
पदमञ्जरी
आख्यातोपयोगे।। 1.4.29 ।।
नियमपूर्वकं विद्याग्रहणमिति। तत्रैवोपयोगशब्दस्य रूढत्वात्। यथा तेषां मन्त्राणामुपयोगे द्वादशाहमधः शय्योति नियमो भिक्षाचरणादिः। नटस्य श्रृणोतीति। किं पुनर्नटः कारकम्? उताहो न ?, यदि कारकम्? कर्म संज्ञा प्राप्नोति-`अकथितं च' इति। अथाकारम्? उपयोगग्रहणमनर्थकं स्यात्। अस्तु कारकम्, न ह्युपाध्यायान्नटस्य व्यापारे कश्चिदन्यो विशेषः; अन्यदतो नियमात्। दुह्यादिपरिगणनात्तु कर्मसंज्ञा न भवति। क्वचित्तु नटस्य गाथां श्रृणोति, ग्रन्थिकस्य कथां श्रृणोतीति पाठः, तत्रापि नटादिनिमित्तं गाथादेः श्रवणं करोतीत्यर्थ; न तु गाथादिविशेषणं नटादिः; अकारकत्वप्रसङ्गात्। ग्रन्थिकः=कथाया वाचयिता। अयमपि प्रपञ्चः, कथम्? उपाध्यायान्निस्सरन्तं शब्दं गृह्णातीति स्फुट एवात्रापायः। इदं तर्हि प्रयोजनम्-`उपयोग इति वक्ष्यामि, नटस्य मा भूत्' इति? ननु नटस्य सत्यप्यवधित्वे शेषरूपेण विवक्षणात् षष्ठी भविष्यति, यथा न माषाणामश्नीयादिति वस्तुतः कर्मत्वं माषाणाम्, सत्यम्; स एव विवक्षानियमः सूत्रकारेण प्रदर्श्यते-उपयोगेऽवधित्वं विवक्षितम्, अन्यत्र शेषत्वमिति।।
पदमञ्जरी
जनिकर्तुः प्रकृतिः।। 1.4.30 ।।
जनेः कर्ता जनिकर्तेति कर्मणि षष्ठ्याः समासः। अयमेव च निर्देशो ज्ञापयति-`कर्त्तरि च' इति प्रतिषेधोऽनित्य इति। कः पुनरसावित्यत आह-जन्यर्थस्येति। एतदुक्तं भवति-जनिशब्दोऽयम्`इञ्जादिभ्यः' इति जनेर्भाव इञमुत्पाद्य व्युत्पादितः। `जनिवध्योश्च' इति वृद्धिप्रतिषेधो जन्यार्थवाची, न तु `इक्श्तिपौ धातुनिर्देशे' इति इक्प्रत्ययान्तः, `गमहन' इत्युपधाया लोपप्रसङ्गत्। नाप्यागन्तुकेनेकारेण धातोर्निर्देशः; शब्दात्मकस्य धातोः कर्त्रा सम्बन्धायोगात्। अथाप्यर्थद्वारको योगः स्याद्? एवमपि धातुनिर्देशे तस्यैव प्रयोगे स्याद्, न पर्यायस्य; अङ्गादङ्गास्तम्भवोऽस्तीति। अर्थग्रहणे त्वत्रापि भवतीति। प्रकृतिरित्यस्य विवरणम्--कारणमिति। उपादानकारणमित्यर्थः।
अन्ये तु ध्रुवग्रहणानुवृत्तेरेव प्रकृतिपरिग्रहे सिद्धे प्रकृतिग्रहणं कारणमात्रपरिग्रहार्थं वर्णयन्ति। अत एव वृत्तावुक्तम्-कारणमिति, न पुनरुपादानकारणमिति। तेन च पुत्रात्प्रमोदो जायत इत्यादावपि भवतीति। किं पुनः सत् जायते? उतासत्? न तावत्सत्; जन्मवैयर्थ्यात्। यदि जन्मनः प्रागेव सत्, किं जन्मना? अथैवमपि जन्म, जायस्व जायस्वेत्येव घटो जायते। नाप्यसत्; असतः कर्तृत्वायोगात्, शशविषणादेरपि जन्मप्रसङ्गच्च। उक्तमत्र--
पूर्वावस्थामविजहत्संस्पृशन् धर्ममुत्तरम्।
संमूर्छित इवार्थात्मा जायमानोऽभिछीयते।। इति।
एतच्च `आन्महतः' इत्यत्रोपपादयिष्यामः। किञ्चास्माकमनेन दुस्तर्केण, अस्ति तावत् `श्रृङ्गाच्छरो जायते' इति प्रयोगः, स उपपादनीय इत्येतावत्! अयमपि प्रपञ्चः। लोके हि यद्यस्माज्जायते तत्ततो निर्गच्छतीत्युच्यते, लोकप्रसिद्ध्यनुसारेण शब्दप्रयोगः, अर्थतत्त्वं तु तथा भवत्वन्यथा वा।।
पदमञ्जरी
भुवः प्रभवः।। 1.4.31 ।।
भवनं भूः, सम्पदादित्वात्क्विप्। अत्रापि प्रशब्दो द्रष्टव्यः। न हि कोवलस्य भवत्यर्थस्य प्रभवनेन योगः किं तर्हि? सोपसर्गस्य भुवः। कर्तेति। भवत्यर्थस्य कर्तेत्यर्थः, भुवो वा धातोः। कथं पुनर्धातोर्नाम कर्त्ता स्याद्, धातुर्वै शब्दः, शब्देऽसम्भवेऽर्थे कार्थं विज्ञास्यते। `तसु उपक्षये' भावे क्तः, `वि गतौ' तस्ता, वितस्तेति, अशोष्येत्यर्थः। प्रथमत उपलभ्यते इति। उपलभतेः कर्मव्यापारे प्रभवतिः, प्रवर्तत इत्यर्थः। प्रकाशत इति यावत्। एतेन जन्यर्थाभावात्पूर्वेणासिद्धं दर्शयति। अनेकार्थत्वाद्धातूनामस्मिन्नर्थे वृत्तिः। अयमपि प्रपञ्चः। कथम्? भवनपूर्वके निःसरणे प्रभवतिर्वर्त्तते।।
पदमञ्जरी
कर्मणा यमभिप्रैति स संप्रदानम्।। 1.4.32 ।।
कर्मणा करणभूतेनेति। कथं पुनरेकमेव वस्तु युगपत्कर्म च करणं च भवति? क्रियाभेदाद्दानक्रियायां कर्माभिप्रायेण क्रियायां करणम्, दीयमानाया हि गवा शिष्य उपाध्यायामभिप्रैति संबध्नाति ईप्सति वा, अभप्रपूर्वो हीण् ईप्सतिना समानार्थः। अभिप्रेर्तामत्युक्ते ईप्सितमिति गम्यते। उक्तं च--
अनिराकरणात्करत्तुस्त्यगाङ्गं कर्मणोप्सितम्।
प्रेरणानुमतिभ्यां वा लभते सम्प्रदानताम्।। इति।
त्यागो दानम्, त्यागस्याङ्गं शेषभूतं कर्मणा गवादिनेप्सितमाप्तुमिष्टं संप्रदानतां लभते, अनिराकरणाद्वा, एवमस्त्विति अनुमानाद्वा, देवेभ्यः सुमनसो ददाति, याचकाय भिक्षा ददाति, उपाध्यायाय गां ददाति; न तु निराकुर्वन् संप्रदानं भवतीति श्लोकार्थः।
अत्र केचिदाहुः- `कुगतिप्रादयः' इत्यत्र वार्तिकम्- `उदात्तवता तिङा गतेः समासवचनम्' इति। यो जात एव प्रथमोमहस्वावो देवा क्रतुना पर्यभूषत्, यो यः शम्बरमन्वविन्दत्, यस्मान्न ऋते किं वजयन्ते, यो वै प्रयवयतामप्येनं प्रतिपद्यते-इत्याद्युदाहरणानि। अत्र सर्वत्र `यद्वृतान्नित्यम्' इति निपातप्रतिषेधात् तिङन्तमुदात्तवत्, ततश्चायमभिप्रैतीत्यत्रापि समासे सति प्रातिपदिकत्वात् विभक्त्युत्पत्तिः स्यादिति।
नेति वयम्; तस्य छन्दोविषयत्वात्। यदि कर्मणा यमभिप्रैति स संप्रदानम्, अजां नयति ग्राममिति अजैर्नयतिक्रिया कर्मभिस्संबध्यमानस्य ग्रामस्य संप्रदानतां प्राप्नोति? न प्राप्नोति, किं कारणम्? कर्मणेति करणे तृतीयेत्यक्तम्। न च यथा शिष्यस्योपाध्यायसम्बन्धे गौः करणम्, एवमजा ग्रामसम्बन्धे। ईप्सतिना

समानार्थे तु सुतरामप्राप्तिः। तथा हि- `यमभिप्रैति' इत्युक्ते यमिति निर्दिष्टस्य शेषित्वम्, कर्मणेति निर्दिष्टस्य गवादेः करणस्य शेषत्वं च प्रतीयते; यथा- `कर्त्रभिप्राये क्रियाफले' इति कर्तुः शेषित्वं क्रियाफलस्य शेषत्वम्, न चात्र शेषशेषिभावः प्रतीयते। किं च `नीवह्योर्हरतेश्च' इति द्विकर्मकेषु नयतिः परिगण्यते, अतोऽपि ग्रामस्य न भविष्यति।

अथ किमर्थं महती संज्ञा क्रियत इत्याह-अन्वर्थसंज्ञाविज्ञानादिति। सम्यक्प्रदीयते यस्मै तत्संप्रदानमित्यन्वर्थत्वात्सञ्ज्ञाया ददातिकर्मणा यमभिप्रैति स संप्रदानमित्यर्थः। एवमपि रजकस्य वस्त्रं ददाति, घ्नतः पृष्ठं ददातीत्यत्र कस्मान्न भवति? अदानत्वात्, किं पुनर्दानम्? दानं किञ्चदुद्दिश्यापुनर्ग्रहणाय स्वद्रव्यत्यागाः, यथा-वृक्षाय जलं ददाति, देवेभ्यः सुमनसः, याचकाय भिक्षाम्, उपाध्यायाय गाम्, खण्डिकोपाध्यायस्तस्मै चपेटिकां ददाति, न शूद्राय मतिं दद्यादिति। करतलप्रहारः=चपेटिका। रजके तु पुनर्ग्रहणाद्दानाभावः, उपमानात्तु ददातिप्रमोगः,तत्र कारकशेषत्वान्नटस्य श्रृणोतीतिवत् षष्ठी

कर्मणेति किम्, यावता उपाध्यायाय गां ददातीत्यत्र गोरुपाध्यायस्य वाभिप्रेयमाणत्वम्,यतो गौर्दानक्रियया करणभूतयाभिप्रेयते, गवा तूपाध्यायः; तत्र परत्वाद्गोः कर्मसंज्ञेति पारिशेष्याद् उपाध्यायस्यैव संप्रदानसंज्ञा भविष्यति? नैतदस्ति;सत्यप्युभयोरभिप्रेयमाणत्वेऽन्तङ्गत्वात्कर्मण एव गवादेः स्यात्। कर्मसज्ञा तु ददातिकर्मणोऽन्यत्र सावकाशा, कारकप्रकरणे च प्रकर्षो नाश्रीयते, न त्वन्तरङ्गबहिरङ्गभावोऽपि । यंसग्रहणेऽक्रियमाणेऽभिप्रेतुरेव संप्रदानसंज्ञा स्यात्; श्रुतपदार्थसम्बन्धे सति तेनैव निराकाङ्क्षत्वादध्याहारानुपपत्तेः। सत्यपि वाध्याहारे यः स इत्येवाध्याहारात् तत उपाध्यायाय शिष्येण गौर्दीयत इत्यत्रार्थे शिष्यायोपाध्यायस्य गौर्दीयत इति स्यात्। कर्मसंज्ञायां हि कर्तृग्रहणं स्वतन्त्रोपलक्षणार्थमिति तेन शिष्यस्य कर्तृ त्वाभावेऽपि गोः कर्मसंज्ञा युज्यत एव। तथा च सार्थाद्धीयत इति कर्मणि लकारोत्पत्तिः।

अभिप्रग्रहणं किम्, यावता कर्मणा यमेति गच्छति प्राप्नोति संबध्नातीत्यर्थः, अभिप्रैतीत्युक्ते स एव? अभिप्रग्रहणेऽक्रियमाणे कालविवक्षा स्यात्; ततश्च यमेव संप्रत्येति तत्रैव स्यात्, यमगात् यं चैष्यति तत्र न स्यात्; अभिप्रग्रहणे पुनः क्रियमाणे न दोषो भवति। अभिराभिमुख्ये वर्तते, प्रशब्दश्चादिकर्मणि, ततश्चोपसर्गद्वयोपादानसामर्थ्यात्कालान्तरावच्छिन्ना क्रिया नाश्रीयते। ननु यथा `तेन दीव्यति' इत्यादौ सङ्ख्याकालयोरविवक्षा, तथेहापि संख्यावत्कालस्याप्यविवक्षा सिद्धा, सत्यम्; अयमेव न्यायसिद्धोऽर्थ उपसर्गद्वयोपादानेन प्रदर्श्यते। यदा त्वभिप्रैतीत्यस्य ईप्सतीत्यर्थः, तदाभिप्रग्रहणं कर्तव्यमेव।

क्रियाग्रहणमपि कर्तव्यमिति वार्त्तिकम्, एतद्व्याचष्टे-क्रिययेत्यादि। ननु क्रियामपि लोके कर्मेत्युपचरन्ति-किं कर्म करिष्यसि, कां क्रियामिति, तत्र कर्मणा यमभिप्रैतीत्येव सिद्धम्। एवमपि कर्तव्यम्; `कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति' संदर्शनप्रार्थनाध्यवसायैराप्यमानत्वात्। क्रियापि कृत्रिमं कर्म, तथा हि-य एव मनुष्यः प्रेक्षापूर्वकारी भवति, स बुद्ध्या तावत्कञ्चिदर्थं संपश्यति-इदमीदृशमिति, तद् दृष्टं प्रार्थयते-अयि ममेदं स्यादिति, ततस्तदुपायभूतां क्रियां पश्यति-अस्या एतत्फलमिति, ततः प्रार्थयते-कथमियं निष्पपाद्यतामिति, ततस्तत्साधनानि समवधार्य कर्तुमध्यवस्यति। प्रतीयमानक्रियापेक्षोऽपि कारकभावो भवत्येव, यथा-प्रविश पिण्डीमित्यत्र भक्षयेति गम्यते। सूत्रकारश्च सूत्रयति-`क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति। एवमपि क्रियाग्रहणं कर्तव्यम्; ददातिकर्मत्वात्। निगर्हते इति। नास्तिक्यान्निन्दतीत्यर्थः। `गर्ह गल्ह कुत्सायाम्' अनुदात्तेत्। युद्धायेति। युद्धविषयं संनाहपूर्वकं निश्चयं करोतीत्यर्थः। नह्यतिः स्वरितेत्। पत्ये शेते इति। पतिमुपसृत्य शेत इत्यर्थः। यदि तर्हि क्रिययाभिप्रेयमाणस्यापि भवति कटङ्करोतीत्यादावपि प्राप्नोति, वचनाद्धि कर्मसंप्रदानसंज्ञयोः पर्यायः स्यात्? नैतत्सार्वत्रिकम्, किं तर्हि? प्रयोगदर्शनवशेन नियतविषयम्।

कर्मणः करणसंज्ञेत्यादि। एतच्छन्दोविषयम्, सर्वे विधयश्छन्दसि विकल्पन्ते, इति यथाप्राप्तमपि प्रयोगो भवति। भाष्ये तु ददातिकर्मणेति नाश्रितम्, प्रयोगाश्च बहवः-अर्यम्णे चरुं निर्वपेत्, देवेभ्यो ब्रह्मोदनमपक्षत्, देवेभ्यो हव्यं वहन्तः छन्दांसि वै देवेभ्यो हव्यमूर्धा, यदङ्गमाशुषे त्वम्, शं नः करत्पर्वते इत्यादयः, तन्मते क्रियाग्रहणं न कर्तव्यम्। कथं यत्र संप्रदानत्वमिष्यते? तत्र संदर्शनादीनां क्रियायाश्च भेदो विवक्ष्यते, ततश्च तैराप्यमाना क्रियापि कृत्रिमं कर्मेति सिद्धं तयाभिप्रेयमाणस्य संप्रदानत्वम्, यत्र तु नेष्यते तत्र भेदो न विवक्ष्यते, ततश्चौदनाद्येकफलावच्छेदेनैकीकृतया क्रिययाऽऽप्यमानस्य कर्मत्वमेव भविष्यति-कटङ्करोति, ओदनं पचतीति। गत्यर्थेषु तूभयं विवक्ष्यते-भेदः, अभेदश्च; तत्र भेदविवक्षायां ग्रामं गच्छतीति प्रयोग इति `गत्यर्थकर्मणि' इत्येतदपि न वक्तव्यं भवति।।

पदमञ्जरी

रुच्यर्थानां प्रीयमाणः।। 1.4.33 ।।

रुचिना समानार्था इति। वस्तुकथनमेतत्। विग्रहस्तु रुचिरर्थो येषामिति। ते च रुचिना धातुना धातुना समानार्था भवन्ति। प्रीयमाण इति। `प्रीञ् तर्पणे' इत्यस्मात् क्रैयादिकात् सकर्मकात्कर्मणि लः। दैवादिकस्तु ङिदकर्मकः, तर्पमाण इत्यर्थः। अन्यकर्तृक इति। योऽभिलाषस्याश्रयः प्रीयमाणस्ततोऽन्यकर्तृक इत्यर्थः। कथं पुनरन्याश्रयस्याभिलाषस्यान्यः कर्त्ता भवति, यावता यदाश्रयव्यापारं धातुः प्राधान्येनाचष्टे स कर्त्ता? नेदं कर्तृ लक्षणम्, किन्तु स्वातन्त्र्यमेव। तच्च क्वचिद्वास्तवम्, क्वचिद्वैवक्षिकम्। तदत्र माधुर्यातिशयेन स्वविषयं देवदत्ताश्रयमभिलाषं जनयन्मोदकस्तत्र कर्तेति गीयते। न चैवं लषेरपि प्रसङ्गः, देवदत्तो मोदकमभिलष्यतीति? अभिधानशक्तिवैचित्र्यादाश्रयकर्तृ कोऽभिलाषो लषेर्वाच्यः, रुचेस्तु विषयकर्तृकः। दृष्टश्चायमभिधानप्रकारनियमोऽन्यत्रापि, तद्यथा-घटः पश्यतीति दृशेराश्रयकर्तृ कं ज्ञानं वाच्यम्। घटः प्रकाशते इत्यत्र प्रकाशेर्विषयकर्तृकम्। विषय एव हि स्पष्टालोकमध्य वर्तित्वादिना सौकर्येण देवदत्ताश्रये ज्ञाने कर्तेति व्यपदिश्यते, न तु ज्ञानेन कश्चिदतिशयो विषयो जन्यते।

कोऽयं प्रकाशो नाम, यं प्राकठ्यमाचक्षते भाट्टाः, तत्र कारकशेषत्वेन षष्ठीप्रसङ्गे वचनम्। अन्ये तु प्रीयमाणं देवदत्तं मोदकः प्रीणयतीति कर्मसंज्ञां प्राप्तां

मन्यन्ते। अपरे त्वेवमाहुः- देवदत्तो रोचयति मोदकमिति हेतुत्वे प्राप्ते वचनमिति, देवदत्तं हि प्राप्य रोचते मोदको न सर्वान्, नानेच्छा हि प्राणिन इति। एवमुत्तरेष्वपि योगेषु द्रष्टव्यम्। उक्तं च--
हेतुत्वे कर्मसंज्ञायां शेषत्वे चापि कारकम्।
रुच्यर्थादिषु शास्त्रेण संप्रदानाख्यमुच्यते।। इति।
पथीति। हेतुकर्मसंज्ञावदधिकरणसंज्ञा बाध्येतेति भावः। किं च प्रीयमाणग्रहणादेवादित्यो रोचत इति दीप्तिवाचिनामग्रहणम्।।
पदमञ्जरी
श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः।। 1.4.34 ।।
ज्ञीप्स्यमान इति। `मारणतोषणनिशामनेषु ज्ञा' इति घटादिषु पठ्यते, तस्मान्निशामनेऽर्थे हेतुमण्णिचि सनि `आप्ज्ञपृधामीत्',`अत्र लोपोऽभ्यासस्य',कर्मणि लटः शानजादेशः। निशामनं चेह ज्ञानमात्रमुच्यते, न चक्षुर्विज्ञानमेव, यदाह-बोघयितुमभिप्रेत इति। कथं तर्हि प्रयुज्यते--तज्ज्ञापयत्याचार्थः, विज्ञापना भर्तृषु सिद्धिमेतीति? तस्मान्निशानेष्विति पाठः। `शो तनूकरणे' ल्युडन्तः, संज्ञपितः पशुरित्युदाहरणम्। ज्ञीप्स्यमानो ज्ञपयितुमिष्यमाण इति प्रयोगः`ज्ञप मिच्च' इति चुरादिणिजन्तस्य। अन्ये तु -`मितां ह्रस्वः' इत्यत्र `वा चित्तविरागे' इत्यतो वेत्यनुवृत्तेर्व्यवस्थितविभाषाविज्ञानाच्चानिष्टे विषये ह्रस्वाभावमाहुः। देवदत्तं प्रति श्लाघमानास्तां श्लाघां तमेव ज्ञपयितुमिच्छतीत्यर्थ इति। श्लाघा स्तुतिः, प्रत्यक्षेण देवदत्तं स्तौतीति यावत्। एवं हि तां देवदत्तः शक्यते ज्ञापयितुम्। अन्ये त्वाहुः- देवदत्तायात्मानं परं श्लाघ्यं कथयतीत्यर्थ इति। तथा च भट्टिकाव्यम्--
श्लाघमानः परस्त्रीभ्यस्तत्रागाद्राक्षसाधिपः।। इति।
आत्मानं श्लाघ्यं परस्त्रीभ्यः कथयन्नित्यर्थः। एवं देवदत्ताय निह्नुत इति। `ह्नुङ् अपनयने' देवदत्तं प्रति निह्नवानस्तां निह्नुतिं तमेव ज्ञापयितुमिच्छतीत्यर्थः। इत्येष एवंशब्दस्यार्थः। निह्नुतिरपलापः, संनिहितमेव देवदत्तं धनिकादेरपलपतीत्यर्थः। अन्ये तु ह्नोतव्यं किञ्चिद्देवदत्तं ज्ञापयतीत्यर्थ इत्याहुः- देवदत्ताय तिष्ठत इति। ईदृशोऽहमिति देवदत्तस्य स्थनेन प्रकाशयतीत्यर्थः। देवदत्ताय शपते इति। शपथेन किञ्चित्प्रकाशयतीत्यर्थः। देवदत्तः श्लाघते इति। ज्ञीप्स्यमानवचनात् कर्मसंज्ञैव बाध्यते, न कर्तृसंज्ञेत्यर्थः। एवं गार्गिकया श्लाघते सभायामिति करणाधिकरणसंज्ञे न बाध्येते। क्वचित्तु देवदत्तं श्लाघते इति पाठः। तत्रायं भावः-यस्मायाख्यायते स ज्ञीप्स्यमान इत्याख्यायामाना द्विनीयैव न्याय्येति। ये त्वाख्यायमानं ज्ञीप्स्यमानं वदन्ति तेषां यस्मायाख्यायते ततः षष्ठी भवति--देवदत्ताय श्लाघते यज्ञदत्तो विष्णुमित्रस्येति।।
पदमञ्जरी
धारेरुत्तमर्णः।। 1.4.35 ।।
उत्तममृणं यस्येति। उत्तमम्=उत्कुष्टतमम्, उत्कृष्टार्थवृत्तेरुच्छब्दात्तमपि द्रव्यप्रकर्षत्वादामभावः। अर्त्तेः क्तः, ऋणम् `ऋणमाधमर्ण्ये' इत्यत्र कालान्तरे देयद्रव्यविनिमयोपलक्षणार्थमाधमर्ण्यग्रहणमित्युत्तमर्णेऽपि नत्वं भवति। अत्र बहुव्रीहौ निष्ठायाः पूर्वनिपाते `जातिकालसुखादिभ्यः'परवचनम् इति सुखादेराकृतिगणत्वादस्मादेव वा निपातनादृणशब्दस्य परनिपातः। शतं धारयतीति। `धृङ् अवस्थाने',ध्रियमाणं स्वरूपेणावतिष्ठमानं स्वभावादप्रच्यवमानं शतं प्रयुङ्क्त इति णिच्। ग्राम इति। नन्वत्र परत्वादधिकरणसंज्ञैव भविष्यति; उत्तमर्णेऽपि तर्हि हेतुसञ्ज्ञा स्यात्।।
पदमञ्जरी
स्पृहेरीप्सितः।। 1.4.36 ।।
चुरादावदन्तः पठ्यत इति। तेन स्पृहयतीत्यत्रातो लोपस्य स्थानिवद्भावाल्लघूपधगुणो नेति भावः। ईप्सित इति। `मतिबुद्धि' इत्यादिना वर्त्तमाने क्तः। ईप्सितमात्रे इयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञैव भवति--पुष्पाणि स्पृहयतीति। यदा त्वीप्सितमीप्सिततमं वा शेषत्वेन विवक्ष्यते, तदा षष्ठी भवति।।
पदमञ्जरी
क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः।। 1.4.37 ।।
गुणेष्विति। शौचाचारादिषुः दाषा विष्करणमिति। दम्भादिदोषाध्यास इत्यर्थः। तत्र क्रुधद्रुहावकर्मकाविति कारकशेषत्वान्नटस्य श्रृणोतीतिवत् षष्ठ्यां प्राप्तायां वचनम्, इतरयोस्तु सकर्मकत्वाद् द्वितीया प्राप्नोति। अत्र च चित्तदोषरूपत्वं यद्यपि क्रोधादीनामविशिष्टम्, तथाप्यन्येषामेवञ्जातीयकानां द्वेषादीनामग्रहणार्थमवान्तरभेदविवक्षया पृथगिमे निर्दिष्टाः, न तु चित्तदोषार्थानामिति। तेनास्मान् द्वेष्टीत्यत्र न भवति, अनभिनन्दनं ह्यस्यार्थः। तथा चाचेतनेष्वपि प्रयुज्यते--औषधं द्वेष्टीति। कथं पुनरेकेन क्रुधिना सर्वे क्रुधादयः शक्या विशेषयितुमत आह--क्रोधस्तावदिति। भार्यामीर्ष्यतीत्यत्र केवलं परैर्दृश्यमानां भार्यां, न तु तां प्रति कोपः।।
पदमञ्जरी
क्रुधद्रुहोरुपसृष्टयोः कर्म।। 1.4.38 ।।
उपसर्गेण सम्बद्धयोरिति। `उपसर्गाः क्रियायोगे' उपसृजन्तीत्युपसर्गाः, पचाद्यचि न्यङ्क्वादित्वात् कुत्वम्। तेनोपसृष्टयोरित्यस्योपसर्गेण सम्बद्धयोरित्ययमर्थो भवति। स्वनिकायप्रसिद्धिर्वा।।
पदमञ्जरी
राधाक्ष्येर्यस्य विप्रश्नः।। 1.4.39।।

यस्येति कर्मणि षष्ठी, यद्विविधं पृच्छ्यत इत्यर्थः। यत्सम्बन्धीत्यादि। यत्सम्बन्धिनः शुभाशुभस्य विप्रश्न इति। देवदत्ताय राध्यतीति। `राधोऽकर्मकाद्वद्धावेव' इति दिवादौ, तत्र वृद्धावित्युपलक्षणमकर्मकादिति वचनाद् वृद्धावकर्मकत्वाव्यभिचारात्। एवकारस्तु भिन्नक्रमः- राधोऽकर्मकादेव श्यन् भवति, यथा-वृद्धाविति। तेन सत्यप्येवकारे पर्यालोचनस्य वृत्तिरविरुद्धा। तत्र धात्वर्थेनोपसंग्रहाज्जीवत्यादिवद् राधोऽकर्मत्वमविरुद्धम्। निमित्तं वेद नैमित्तिकः, उञ्छादिषु वसन्तादिषु वा निमित्तशब्दो द्रष्टव्यः। यस्यग्रहणमनर्थकम्, यं प्रतीत्येव, तत्र यं प्रति विप्रश्न इत्यन्वये किं नाम विवक्षितं न सिध्यति।।

पदमञ्जरी

प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता।। 1.4.40 ।।

द्विवचननिर्देशात् प्रत्येकमुपसर्गसम्बन्ध इत्याह-- आङ्पूर्वस्य प्रतिपूर्वस्य चेति। कः पुनरत्र पूर्वो व्यापार इत्यत्राह--प्रत्याङ्पूर्वश्चेत्यादि परेण प्रयुक्तस्येति। इदं मे देहीत्येवं प्रार्थितस्येत्यर्थः। पूर्वस्याः क्रियाया इति। सूत्रे तु व्यापाररूपविवक्षया पूर्वस्येति निर्देशः, यत्र हेतुसञ्ज्ञायां प्राप्तायां देवदत्तेन प्रतिश्रावयतीति प्रयोगनिवृत्तये वचनमित्याहुः। विवक्षान्तरे च देवदत्तो गां प्रतिश्रावयतीति भवत्येव।।

पदमञ्जरी

अनुप्रतिगृणश्च।। 1.4.41 ।।

पूर्वेण साहचर्यादत्रापि प्रत्येकमुपसर्गसम्बन्ध इत्याह--अनूपूर्वस्य प्रतिपूर्वस्य चेति। कः पुनरत्र पूर्वो व्यापार इत्यत्राह--होता प्रथममित्यादि। अन्य इति। अध्वर्युः। कथं पुनर्ज्ञायते-अनुप्रतिपूर्वो गृणातिः शंसितुः प्रोत्साहने वर्त्तत इत्याह--अनुगरः प्रतिगर इत्यादि। अनुगीर्यते प्रोत्साह्यते येन शब्देन सोऽनुगरः। एवं प्रतिगरः, ओथामो दैवेत्येवमादिकः शब्दः; तेन हि प्रतिगीर्यते।

पदमञ्जरी

साधकतमं करणम्।। 1.4.42 ।।

`षिधू संराद्धौ' इत्यस्य हेतुमण्ण्यन्तस्य `सिद्ध्यतेरपारलौकिके' इत्यात्वे `राध साध संसिद्धौ' इत्यस्य वा ण्यन्तस्य साधकशब्दः। क्रियात्मकश्चार्थः। प्रयोज्यः कर्ता, सिध्यतः साध्यवतो वा क्रियात्मनोऽर्थस्य प्रयोजकतमं साधकतमम्। ननु सामग्र्यधीना क्रियासिद्धिर्नो खलु कर्त्रादीनामन्य तमापायेऽपि क्रिया निष्पद्यते, तत्किमपेक्षः कारकाणां मध्ये एकस्यातिशययोगः स्यात्? उच्यते; छेद्यद्रव्यानुप्रवेशो व्यापारः, काष्ठादे पाके प्रज्वलन जनितोष्णस्पर्शानुप्रवेशः, तदनन्तरमेव क्रियासिद्धिः नैवं कारकान्तरेष्वनुप्रवेशः तद्व्यापारानन्तरं वा क्रियानिष्पत्तिः समस्ति, अतः-

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।

विवक्ष्यते यदा तत्र करणं तत्तदा स्मृतम्।।

`विवक्ष्यते' इत्यनेनैतद् दर्शयति-देशकालावस्थादिवशेन यस्य क्रिया प्रत्युपयोगातिशयेन व्यापारः प्रत्यासीदन् विवक्ष्ये, तदा तस्य करणत्वं भवतीति। यथा स्थाल्यधिकरणत्वेन प्रसिद्धा, तस्या अपि तनुतरकपालतया प्रकर्षविवक्षायां करणत्वं भवति-स्थाल्या पच्यत इति। उक्तं च--

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।

स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः।। इति।

न चैवं कर्तुरपि करणत्वविवक्षाप्रसङ्गः; भिन्नजातीयत्वात्। सकलसाधनविनियोगकारी खल्वसौ, न च शतधनो निष्कधनेन सह स्पर्द्धते!कथं तर्ह्यश्वेन दीपिकया रथेन सञ्चरते इति बहूनां करणत्वम्, यावता तेष्वपि यदासन्नोपकारकं तदेव करणं युक्तम्? उच्यते; कारकान्तरापेक्षः करणस्यातिशयः, न स्वकक्षायाम्; तेन सर्वेषां क्रियानिष्पत्तौ संनिपत्योपकारकत्वात् सिद्धं करणत्वम्।

तमब्ग्रहणं किमिति। कारकाधिकारात् सिद्धे साधकत्वे पुनः साधकश्रुतिः प्रकर्षार्था भविष्यतीति प्रश्नः। गङ्गायां घोष इति। असति तमब्ग्रहणे आधारो नाम यत्राधारात्मा व्याप्तो भवत्याधेयेन, तेनेहैव स्यात्- तिलेषु तैलम्, पयसि सर्पिरिति; गङ्गायां घोष इत्यत्र न स्यात्। तमब्ग्रहणं तु ज्ञापयति-इह प्रकरणे सामर्थ्यगम्यः प्रकर्षो नाश्रीयते, तेनेहापि भवति। यदा च देशधर्मो घोषं प्रत्याधारभावः स्त्रोतस्युपचर्यते, तदेवं तमब्ग्रहणस्य प्रयोजनम्; यदा तु गङ्गाशब्दस्तीरे वर्त्तते तदा न प्रयोजनम्. आधेयेन व्याप्तिसम्भवान्मुख्य एवाधारभाव इति।।

पदमञ्जरी

दिवः कर्म च।। 1.4.43 ।।

ननु चाक्षान् दीव्यतीत्यत्र पातयतीत्यर्थस्तत्र कर्मत्वं सिद्धम्; अक्षैर्दीव्यतीति, क्रिडतीत्यर्थः, तत्र करणत्वं सिद्धम्, किमर्थमिदमित्याशाङ्क्याह--पूर्वेण करणसंज्ञायामिति। अक्षैः क्रीडतीत्यस्यामेव विवक्षायामक्षान् दीव्यतीतीष्यते, अत्र च करणसंज्ञैव प्राप्नोति, अक्षान्पातयतीत्यत्र चार्थेऽक्षैर्दीव्यतीति नेष्यते, अतः साधकतमस्यैव करणसंज्ञायां प्राप्तायामयमारम्भ इत्यर्थः। अथ किमर्थश्चकारः? करणसंज्ञापि यथा स्यात् नैतदस्ति प्रयोजनम्; वक्ष्यमाणमन्यतरस्यांग्रहणमिहैव करिष्यामि, तत्राह--चकारात्करणसंज्ञं चेति। युगपत्संज्ञाद्वयं यथा स्यादिति भावः। अन्यतरस्यांग्रहणे तु पर्यायः स्यात्--यदा कर्म न तदा करणम्, यदा करणं न तदा कर्म; चकारात्तु युगपदेव संज्ञाद्वयं भवतीत्यर्थः। यौगपद्यप्रयोजनं मनसा दीव्यतीति कर्मत्वादण् प्रत्ययः, करणत्वाच्च तृतीया`मनसः संज्ञायाम्' इत्यलुक्-मनसा देवः। इह चाक्षैर्देवयते देवदत्तो यज्ञदत्तेनेति, अक्षैरिति तृतीयाप्रयोगेऽपि धातोः सकर्मकत्वाद् `गतिबुद्धि' इत्यादिनाऽण्यन्तावस्थायां कर्त्तुर्यज्ञदत्तस्य कर्मसंज्ञा न भवति, `अणावकर्मकात्' इति परस्मैपदं च। यदि तर्हि समावेशः- अक्षान् दीव्यतीति परत्वात् तृतीया प्राप्नोति; पर्यायै तु नायं दोषः, कर्मसंज्ञापक्षे करणसंज्ञाया अभावात्। समावेशे तु करणसंज्ञाया अवकाशः-विदेवना अक्षाः,

`करणाधिकरणयोश्च' इति ल्युट्; कर्मसंज्ञाया अवकाशः-दीव्यन्ते भवताक्षाः, `भावकर्मणोः' इति यगात्मनेपदे; अक्षानित्यत्र भयसंज्ञाकार्यप्रसङ्गे परत्वात्तृतीया स्यात्, नैष दोषः; कार्यकालं हि संज्ञापरिभाषम्, ततश्च `कर्मणि द्वितीया' इत्यत्र यदस्योपस्थानं तदनवकाशमिति द्वितीया भविष्यति। अयं तर्हि समावेशे दोषः- दीव्यन्तेऽक्षा इति कर्मण्यभिहितेऽपि करणस्यानभिहितत्वात्तृतीया स्यात्, देवना अक्षा इति ल्युटा करणस्याभिधानेऽपि कर्मणोऽनभिधानेन द्वितीया स्यात्? नैष दोषः; एकैव कारकशक्तिः संज्ञाद्वययोगिनी। ततश्चैकस्मिन् कारकेऽभिहिते कारकान्तरमप्यभिहितमेव भवति; शक्तेरेकत्वात्।।
पदमञ्जरी
परिक्रयणे संप्रदानमन्यतरस्याम्।। 1.4.44 ।।
परिक्रयणशब्दे धातुगतमेव रेफमाश्रित्य `रषाभ्याम्' इत्येव णत्वम्, प्रथमोपनिपतितत्वाद्, यथोपसर्गाभावे क्रयणमिति; न तूपसर्गस्थमाश्रित्य `कृत्यचः' इत्यनेन तस्य पश्चादुपनिपतितत्वेन बहिरङ्गत्वात्। वेतनादिनेति। वेतनं भृतिः, नियतकालत्वमेव स्पष्टयति। नात्यन्तिकः क्रय एवेति। परिशब्दः सामीप्यं द्योतयति। क्रयो नामात्यन्तिकं स्वीकरणम्, नियतकालं तु तस्य समीपमेवेति परिशब्दस्यार्थः।।
पदमञ्जरी
आघारोऽधिकरणम्।। 1.4.45 ।।
आध्रियन्तेऽस्मिन् क्रिया इत्याधार इति `अध्यायन्यायोद्याव' इत्यादिनाऽधिकरणे घञ्। क्रियापेक्षत्वात् कारकभावस्य क्रियाग्रहणम्। यदि क्रियाधारस्याधिकरणसंज्ञा, कर्तृकर्मणोरेव स्यात्। कर्तृस्था हि क्रिया भवति कर्मस्था वा। कर्तृसंज्ञायाः कोऽवकाशः? ये कर्मस्थक्रियाः- पचत्योदनं देवदत्त इति। नन्वत्राप्यधिश्रयणादेराधारः कर्तेति स्यादेव प्रसङ्गः? अयं तर्ह्यवकाशः- देवदत्ताय रोचते मोदक इत्युक्तम्, अत्र देवदत्तस्थस्याभिलाषस्य मोदकः कर्तेति। अथाप्यनवकाशा कर्तृसंज्ञा? एवमपि पर्यायः स्यात्। अथ कर्मसंज्ञायाः कोऽवकाशः? ये कर्तृस्थक्रियाः-आदित्यं पश्यतीति। अतः कर्तृकर्मणोरेवाधिकरणसंज्ञाप्रसङ्ग इत्यत आह--कर्तृ कर्मणोरित्यादि। कथं पुनः साक्षात्क्रियाधारे सम्भवति क्रियाधारभूतकर्तृ कर्मव्यवधानेन क्रियाधारस्य गौणस्य ग्रहणं शक्यं विज्ञातुम्? करणसंज्ञायां तमब्ग्रहणेन ज्ञापितमेतद्-यथाकथञ्चित्क्रियाधारस्यापि करणसंज्ञा भवतीति। मुख्यस्यापि तु कस्मान्न स्याद्? आस्त इति कर्तृस्थायाः क्रियाया उदाहरणम्। पचतीति कर्मस्थायाः।
त्रिविधं च तदधिकरणम्--औपश्लेषिकम्, वैषयिकम्, अभिव्यापकं चेति। कटे आस्ते,गुरौ आवसति, तिलेषु तैलमिति।।
अधिशीङ्स्थासां कर्म।। 1.4.46 ।।
पदमञ्जरी
अभिनिविशश्च।। 1.4.47 ।।
नेरल्पाच्तरस्यापूर्वनिपाताद् `अभिनि' इति समुदायानुकरणमित्याह--अभिनिपर्वूस्येति। अन्यथाऽभिपूर्वस्य निपूर्वस्य चेति ब्रूयात्।।
पदमञ्जरी
उपान्वध्याङ्वसः।। 1.4.48 ।।
वसरेश्यर्थस्येति। अर्थशब्दो निवृत्तिवचनः, व्यधिकरणे षष्ठ्यौ, अश्यर्थस्य यो वाचकस्तस्येत्यर्थः। भोजननिवृत्तिवाचिन इति यावत्। यद्वा--शीङोऽर्थः श्यर्थः, न श्यर्थस्तस्य, अस्थानार्थस्येत्यर्थः। स्थानेऽपि हि शीङ् वर्तते-जलाशयमिति। तेन ग्रामे तिष्ठतीत्यत्रार्थे ग्राममुपवसतीति भवति। अस्थानार्थत्वे ग्राम उपवसतीति, स तर्हि प्रतिषेधो वक्तव्यः? न वक्तव्यः, कथम्? नात्रोपपूर्वस्य वसेः ग्रामोऽधिकरणम्, किं तर्हि? अनुपसर्गस्य--ग्रामे वसन् त्रिरात्रमुपवसति। एतदुक्तं भवति--विशिष्टाधारावस्थितत्वेन निश्चिते देवदत्ते भोजननिवृत्तिविशिष्टकालं प्रतिपादयितुमिदं प्रयुज्यते--ग्राम उपवसतीति, तत्रान्तरङ्गत्वात् प्रतीयमानवसिक्रियापेक्षो ग्रामस्याधिकरणभावः। उपवसनं तु स्वरूपेणैव कालमपेक्षत इति कालेनैवान्तरङ्गः सम्बन्धः, ग्रामादिना तु बहिरङ्ग इत्यप्रयुक्तमपि त्रिरात्रादिकं कर्म भवति।।
पदमञ्जरी
कर्तुरीप्सिततमं कर्म।। 1.4.49 ।।
कर्तुः क्रिययेत्यादि। कर्तुर्यदाप्तुमिष्टतममित्यन्वयः, कर्तुरिति चेप्सितापेक्षाया `क्तस्य च वर्तमाने' इति कर्त्तरि षष्ठी। ईप्सित इति `मतिबुद्धि' इत्यादिना वर्त्तमाने क्तः। क्रिययेति करणे तृतीया, कर्ता हि नाम यः क्रियामनुतिष्ठति तेन कर्तुर्यदिष्टतममित्युक्ते तत्क्रियावेशादसौ कर्त्ता भवति तया करणभूतयेति गम्यते, कर्त्रा यदाप्तुमिष्यते आत्मीयया क्रिययेत्यर्थः। ईप्सितशब्दोऽयमस्त्यभिप्रेते रूढः-ईप्सितोऽभिप्रेत इति; अस्ति क्रियाशब्दः- `आप्लृव्याप्तौ' सन्, `आप्ज्ञपृधामीत्', आप्तुमिष्टमीप्सितमिति; तत्र क्रियाशब्दस्येह ग्रहणमिति दर्शितम्--आप्तुमिष्टतममिति।
कर्मण इति। अश्वस्य। स हि भक्षणक्रियया माषानाप्तुमिच्छति। यद्येवम्, यथाश्वस्य वस्तुतो भक्षणे कर्तृत्वे सत्यपि सम्प्रति बन्धनं प्रति कर्मत्वेन विवक्षितत्वादकर्तृत्वाद् माषाणां कर्मसंज्ञया न भवति, तथा सार्थाद्धीयत इत्यत्रापि हीयमानं सार्थो जहातीति वस्तुवृत्तेन त्यागेन कर्त्तुरपि सार्थस्य संप्रत्यपादानरूपेण विवक्षितत्वाद् अकर्तृत्वात्कर्मणि यगात्मनेपदे न स्याताम्।
अत्राहुः- कर्मकर्तर्यत्र यगात्मनेपदे, कथम्? जहातिरयं गमनायां वर्ततेदेवदत्तं सार्थो जहाति, अपगमयतीत्यर्थः, एषैव च सार्थस्यापगमना यदुत क्षुदुपघातादिना देवदत्तस्यापगमे तत्समर्थाचरणम्। यदा तु क्षुधादिना स्वयमेवापगच्छति, तदा कर्मकर्तृ त्वम्, तदायं प्रयोगः। ततश्च हीयत इति सार्थः स्वयमेवापगच्छतीति, पुनः कुतो हीयते? इत्यपेक्षायां सारर्थेन सम्बन्ध इति।

तमब्ग्रहणं किमिति। ईप्सिततमस्यापीप्सितत्वसम्भवाद् उदाहणसिद्धिं मन्यते। पयसौदनं भुङ्क्त इति। करणसंज्ञा तु दात्रेण लुनातीत्यादौ सावकाशा, न हि दात्रं लवनेप्सितम्। `तथा युक्तम्' इत्यनेनापि न भवति, द्वेष्योदासीनप्राप्ययोस्तत्र गहणात्। सत्यप्यत्र पयसो भुजिक्रियायां प्रकृष्टोपकारकत्वे ईप्सायाः प्रकर्षाभावः। यत्र तर्हि पय एवेप्सिततमम्, तत्र प्राप्नोति, तद्यथा कश्चित् कञ्चिदाह-सिद्धं भुज्यतामिति, स आह-प्रभूतं भुक्तमस्माभिरिति, इतर आह-पयो भविष्यतीति, अपरस्त्वरमाण आह-पयसा खलु भुञ्जीयेति, अत्र प्राप्ताप्राप्तविवेकेन पयस एवेप्सिततमत्वं न त्वोदनस्य, अत्राप्योदनमेवेप्सिततमम्; पयसस्तु संस्कारकत्वात्करणत्वम्। न त्वस्य केवले गुणे आदरः, किं तर्हि? तत्संस्कृते ओदने, न ह्यसौ केवलस्य पयसः पानेन संतुष्यतीति। यदि तमब्ग्रहणं क्रियते, पयसौदनं भुङ्क्त इत्यत्रैव स्यात्, पचत्योदनमित्यादौ न स्यात्, न हीप्सिततमं युक्तम्, असति प्रतियोगिनि वस्तु यत्तुल्यजातीयं तदेव प्रतियोगितां भजते। कारकं चात्र न किञ्चिदिष्टमीप्सितं पयसस्त्वीप्स्यमानात्वाद् युज्यते प्रतियोगिता,नैष दोषः; अत्रापि क्रियापेक्षः प्रकर्षः, आदौ हि कर्त्ता फलार्थ क्रियामभीप्सति, अतः फलार्थमिष्यमाणत्वादीप्सिता क्रिया। फलं तु स्वरूपेणेष्यमाणमीप्सिततमं क्रियाया अपि कर्मत्वं संदर्शनादिविशेषान्तरस्पर्धया। यत्र तर्हि फलाभावस्तत्र न स्यात्, क्व च फलाभावः ? विकार्ये-काष्ठनि भस्मीकरोतीति, न हि काष्ठानि फलरूपाणि। मा भूवन् तानि स्वरूपेण फलानि, भस्मात्मना तु फलानि? प्राप्ये तर्हि न स्यात्--आदित्यं पश्यति, हिमवन्तं श्रृणोतीति, न ह्यत्र क्रियया कश्चिदतिशयो जन्यते। अत्राप्यतिशयो जन्यते--प्राकट्यं नाम? यो हि यं पश्यति शृणोति वा तस्यासौ प्रकटो भवति, प्रतिपत्राद्यतिरिक्तपुरुषापेक्षया तु विशेषोनास्तीत्युच्यते। यद्वा--तमब्ग्रहणेन यत्रापकृष्टेच्छा तदेव व्यावर्त्यते, तेन पश्यतीत्यादावादित्यादीनामपि प्रतियोगिनोऽसत्त्वेनापकर्षाभावाद् भविष्यति, अत्र च लिङ्गम् `ललाटकुक्कुट्यौ पश्यति' इति। कर्मेत्यनुवर्त्तमान इति। अधिशीङ्स्थासामित्यतः। आधारनिवृत्त्यर्थमिति। प्राच्यं कर्मग्रहणामाधारेण संबद्धमिति तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यादिति भावः। आधारानुवृत्तौ को दोषस्तत्राह--आधारस्यैव हि स्यादिति। क्वेत्याह--गेहमित्यादि। यत्र तु न स्यात्तदाह--ओदनं पचतीत्यादि।

एतच्चेप्सिततमं कर्म त्रिविधम्--निर्वर्त्यम्, विकार्यम्, प्राप्यमिति। तथायुक्तमपि द्विविधम्--द्वेष्यम्, इतरच्च। `अकथितं च' इत्यपरम्। संज्ञान्तरप्रसङ्गे चान्यत्--`दिवः कर्म च' इत्यादि। तदेवं सप्तविधं कर्म। उक्तं च--

निर्वर्त्य च विकार्यं च प्राप्यं चेति त्रिधा मतम्।
तच्चेप्सिततमं कर्म चतुर्धाऽन्यत्तु कल्पितम्।।
औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम्।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्।। इति।

तथा--

यदसत्, जायते सद्वा जन्मना यत् प्रकाश्यते।
तन्निर्वर्त्यं विकार्यं तु कर्म द्वेधा व्यवस्थितम्।।
प्रकृत्युच्छेदसम्भूतं किञ्चित्काष्ठादि भस्मवत्।
किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।।
क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ।। इति।

तत्र निर्वर्त्यम्--घटं करोतीति, व्यक्त्यभिप्रायोण जन्मसामान्याभिप्रायेण प्रकाशनम्। ननु च यदि घटः? न कर्त्तव्यः; अथ कर्तव्यः? न घटः ; इत्यनुपपन्न घट करोतीति? नैष दोषः; तथाविधं वस्तु करोति यस्य निष्पन्नस्य घट इति संज्ञेति--अयमत्रार्थः। एवमोदनं पयतीत्यादावपि। विकार्यम्--काष्ठानि भस्म करोति, सुवर्णं कुण्डलं करोतीति। प्राप्यम्--आदित्यं पश्यतीति। न ह्यत्र प्रत्यक्षेण अनुमानेन वा क्रियाजन्यः कश्चिदतिशयो गम्यते, यथा--निर्वर्त्यविकार्ययोः रज्जुं सृजति, काष्ठं दहति, देवदत्तं रोषयतीति। कारकत्वं तु प्राप्यस्याभासोपगमादिभिः, आदित्यो ह्यभासमुपगच्छति, यतो द्दश्यते अभिव्यक्तिमुपयाति, यतो व्यक्तमुपलभ्यते सहते च दर्शनम्, यतः शक्यते द्रष्टुं तदेवाभासोपगम; व्यक्तिः, सोढत्वमिति कर्मणो विशेषाः प्राप्यमाणस्य क्रियासिद्धौ विवक्षिताः।।

पदमञ्जरी

तथा युक्तं चानीप्सितम्।। 1.4.50 ।।

तथेति पृथक् पदम्, नोपसमस्तम्; लक्षणाभावात्। चकारोऽवधारणे, अनेकार्थत्वान्निपातानाम्, तथेत्यस्य चानन्तरे द्रष्टव्य इत्याह--तेनैवेति। ईप्सितादन्यत्सर्वमनीप्सितमिति।

यथा अधर्मानृतादिभिरुत्तरपदार्थप्रतिपक्षभूतं यद्वस्तु तत्प्रतिषेधद्वारेणाभिधीयते, तथेहानीप्सितशब्देनेप्सितप्रतिपक्षभूतं न द्वेष्यमेवाभिधीयते, किं तर्हि? अश्व--लोष्ट--इत्यादिवदीप्सितव्यतिरिक्तं सर्वमिति सर्वशब्दस्यार्थः। विषं भक्षयतीति। न कस्यापि विषमीप्सिततममिति भावः। ननु य एव मनुष्यो व्याध्यादिना सर्वतः पीडितो मरणमेव ज्यायो मन्यते, तस्य विषमपीप्सिततममेव; यदिष्टं गुडादिभ्रान्त्या विषे प्रवर्तते तस्यापि तदीप्सिततममेव, यदिष्टं गुडादि, तद्बुद्धिरेव तत्र प्रवर्तते; अतोऽत्र पूर्वेणैव सिद्धमित्युदाहरणान्तरोपन्यासः। ग्रामं गच्छन्निति। नात्र वृक्षमूलानीप्सिततमानि पूर्वमनभिसंहितत्वान्नान्तरीयकं हि तदुपसर्पणम्। न चात्रापि यावद् ग्रामं गच्छन्निति न प्रयुज्यते तावन्नान्तरीयकता न प्रतीयत इति पूर्वेणैव सिद्धम्, यथा--नदी कूलं कषतीत्यत्राचेतनत्वादीप्साभावः, पदान्तरसम्बन्धात्प्रतीयमानो बहिरङ्गत्वात्कर्मसंज्ञां न प्रतिबध्नाति? भवत्वयं प्रतिपत्तारं प्रति उपपादनप्रकारः, यस्तु प्रयुङ्क्ते स पूर्वमेवेप्साप्रकर्षाभावं जानन् तत्कथं प्रयुक्तमिति पूर्वेणासिद्धिरेव। एवं च नदीकूलमित्यत्रापि अनेनैव कर्मसंज्ञा। तथा यत्र क्रियायामेव तात्पर्यं न फले,

नान्तरीयका तु फलसिद्धिः, तत्राप्यनेनैव भवति।
अथ क्रियाफलयोगि कर्मेति कस्माद् नोक्तम्? यदीप्सिततमं यद् द्वेष्यमितरच्च तत्र सर्वत्रानुगतमेतद्, यदुत क्रियाफलयोगित्वं कर्तुरपि तर्हि कर्मत्वं स्यात्, क्रियाफलस्य संयोगस्य तत्रापि भावात्। भावात्। अथ परसमवेतक्रियाफलयोगीति लक्षणम्? एवमप्यात्मा ज्ञातव्य इत्यत्र न स्यात् , संविदश्च स्वयं प्रकाशाभिमतायाः कर्मत्वं स्यात्। घटमहं जानामीत्यत्र हि त्रितयमेव भासते--घटः, ज्ञानम्, आत्मा चेति। तत्र ज्ञानं क्रिया, तत्फलं शब्दप्रयोगादिरूपो व्यवहारः, तेन युज्यमानस्य घटस्य यथा कर्मत्वं तथा ज्ञानस्यापि स्यात्। ज्ञानं हि क्रिया भवति व्यवहाररूपस्य फलस्याश्रयभूतम्, तस्यैव ज्ञानस्य यत् स्वरूपं तदपेक्षया यः पर आत्मा तत्र च समवैतीत्यलमियता। चोरानित्यत्रापि मर्तृकामो वा मित्रादिरूपेण विपर्यस्यमानो वा चोरानुपसर्पतीति पूर्वेणैव सिद्धम्।।
पदमञ्जरी
अकथिनं च।। 1.4.51 ।।
अकथितशब्दोऽयमस्त्यप्रधाने रूढः, तद्यथा--अकथितोऽहमस्मिन् ग्रामे, अप्रधानभूत इति गम्यते। अस्ति च क्रियाशब्दोऽकीर्तितपर्यायः। `कथ वाक्यप्रवन्धे', चुरादावदन्तः पठ्यते, तत्र पूर्वस्य ग्रहणे `पाणिना कांसपात्र्यां दोग्धि पयः' इत्यत्र पाणिकांसपात्र्योरपि स्यात्। करणाधिकरणसंज्ञयोस्तु पचत्यादिरवकाशः, न हि तत्रास्य प्रसङ्गः; `दुहियाचि' इति परिगणनात्, अतो द्वितीयस्य ग्रहणम्, तदाह--केनाकथितम्? अपदानादिभिर्विशेषकथाभिरिति। किमत्र प्रमाणं तदाह--केनेति। करणनिर्देशः। रूढिशब्देषु हि व्युत्पत्त्यर्थमेव क्रियोपादीयते; न तत्र करणादि सम्बध्यते, न हि गच्छतीति गौरित्यत्र केनेति प्रश्नो रथेनेति प्रतिवचनं वा भवति। इह `कारके' इत्यनुवर्तनात् सत्येव कारकत्वेऽकथितस्य संज्ञया भाव्यमिति सामर्थ्याद्विशेषकथाभिरित्युक्तम्।
परिगणनं कम धर्मादीति। तस्य तु प्राधान्यं तदर्थत्वात् प्रवृत्तेः। सम्बध्यत इति। सचत इत्यस्यार्थकथनमेतत्,`षच समवाये' स्वरितेत्। केचित्तु परस्मैपदिभिः सह धातुमेनं पठन्ति `षच सवाये'`रप लप व्यक्तायां वाचि' इति। तत्राहुः-`षचसेवने' इत्यस्यानुदात्तेतोऽनेकार्थत्वात्समवाये प्रवृत्तिरिति, सम्बध्नातेश्च कर्मव्यापारे सचिर्वर्तत इति कर्तृपदस्य कर्मपदेनार्थकथनं नानुपपन्नम्, यथा--राध्यत्योदन इत्यस्य पच्यत इति। उक्तमिति। आचरितमित्यस्य विवरणम्।
सूत्रकारेणेति। कविशब्दो मेधाविमात्रवचनोऽपि प्रकरणात् सूत्रकारे प्रयुक्त इति दर्शयति। गां दोग्धि पय इति। ननु चात्रायमर्थः- गौः पयस्त्यजति, दोग्धा गवा पयस्त्याजयतीति; तत्र प्रयोजकव्यापारेणाप्यमानत्वात् सिद्धा गोः कर्मसंज्ञा। न च वाच्यम्--`प्रयोजकव्यापारेणाप्यमानस्य यदि भवति गत्यर्थादिष्वेवेत्युत्तरसूत्रे नियमादत्र न प्राप्नोपि, यथा--पचन्तं देवदत्तं प्रयुङ्क्ते, पाचयति देवदत्तेनेत्यत्र' इति;ण्यन्तष्वेव स नियमः, अयं तु प्रकृत्यन्तः, नैतदस्ति; यथा ण्यन्तेषु धातुषु क्रियाविशिष्टस्य प्रयुक्तिः प्रतीयते--गमयतीति, नैवमत्र विष्क्रियस्यापि गवादेर्दोहननयनादिषु विनियोगात्। तथा ह्यदुहानापि गौर्दुह्यते, अगच्छन्तो भारादयः शिरसा नीयन्ते, तस्माद्देग्धीत्येकस्या एव क्रियायाः श्रवणाद् गोपयसोर्भेदेन कर्मत्वं न भवति। णिचि तु सति प्रकृत्यंशस्य प्रत्ययांशस्य च भेदेन द्वे वाच्ये इति कर्मभेदोपपत्तिः।
गमयति ग्रामं देवदत्तमिति। यदा तु दुहेः क्षरणमर्थः-क्षरति गौः क्षीरम्, क्षीरं क्षारयति देवदत्त इति, तदा यद्यपि गोरपायेऽवधिभावो विद्यते; तथाप्यविवक्षिते तस्मिन्निमित्तत्वमात्रापेक्षायामुदाहरणोपपत्तिः। एवं चावधित्वविवक्षायामपादानसंज्ञायां भवत्येव--गेर्दुह्यते पय इति। यदा तु पयस्येव विशेषणं गौः, तदा षष्ठी--गोः पयो दोग्धीति।
पौरवं गां याचते इति। पुरोरपत्यं पौरवः। ननु विहितात्रापादानसंज्ञा पौरवादसौ गामादत्ते, न याचनादेव तत आदत्ते, याचितोऽसौ यदि ददाति तत आदत्ते, ननु मा नामादिताऽऽदित्सते तावत्, तदपि न; यतः स्वभावपरिचिच्छित्सुरनादित्समानोऽपि याचते। गामवरुणद्धि व्रजमिति। ननु च गां व्रजं प्रवेशयतीत्ययमत्रार्थः, ततश्च सिद्धं व्रजस्य कर्मत्वम्? अथ व्रजे गामवस्थापयतीत्यर्थः, तर्हि कथितात्राधिकरणसंज्ञा; यदा तर्ह्यवरोधनक्रियां प्रति निमित्तत्वमात्रं विवक्ष्यते न कर्मत्वं नाधिकरणत्वं तदेदमुदाहरणम्। व्रजेन हेतुनाऽवस्थापयतीत्यर्थः।
माणवकं पन्थानं पृच्छतीति। `प्रच्छ ज्ञीप्सायाम्', तुदादिः, ग्रहिज्यादिना संप्रसारणम्। ननु च कथितात्रापादानसंज्ञा, स हि तस्मादुपदेशमादत्ते न प्रश्नमात्रादादत्ते, पृष्टोऽसौ यद्युपदिशति तत आदत्ते। मा नामादिता, आदित्सते तावत् तदपि न, अनादित्समानोऽपि स्वभावपरिज्ञानाया पृच्छति।
भिक्षिर्याचिवद्व्याख्येयः। किमर्थं पुनर्याचिभिक्ष्योरुभयोरुपादानम्, न ह्यनयोरर्थे भेदोऽस्ति, अर्थाश्रया चेयं संज्ञा, न दुह्यादिस्वरूपाश्रया। समानार्थेऽपि हि गृह्यते--देवदत्तं शतं प्रार्थयत इति? उच्यते, अननुयार्थस्य याचतेर्ग्रहणार्थम्। तेनाविनीतं विनयं याचते, क्रुद्धं प्रसादं याचत इत्यत्रापि भवति। सकृदुपात्तस्य चोरभयरूपानुपपत्तेः भिक्षिरपि गृहीतः।
वृक्षमवचिनोति फलनीति। यद्यप्यवचिन्वद् वृक्षान् फलमादत्ते इत्यपादानसंज्ञाया अयं विषयः, तथापि यदा वृक्षो नावधित्वेन विवक्ष्यते निमित्तरूपेणैव तु विवक्ष्यते, तदेदमुदाहरणम्।
ब्रूतेऽनुशास्तीति। `ब्रूञ् व्यक्तायां वाचि' `शासु अनुशिष्टौ', अदादी, यद्यद्यप्यत्र धर्मेण वचनानुशासनकर्मणा माणवकस्याभिप्रेयमाणत्वम्, तथापि ददातिकर्माभावात्संज्ञाया अप्रसङ्गः। ये तु तत्र ददातिकर्मणेति नाश्रयन्ति, तेषामपि निमित्तत्वमात्रं विवक्षितं नाभिप्रेयमाणत्वमित्युदाहरणोपपत्तिः।।
अथान्येऽपि द्विकर्मकाः-
नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च।
द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः।।
`गत्यर्थानाम्' इत्युत्तरसूत्रोपलक्षणम्। नी--अजां नयति ग्रामम्। वहिवहति भारं ग्रामम्। हरति--भारं हरति ग्रामम्। चकारेण जयत्यादयः समुच्चीयन्ते--शतं जयति देवदत्तम्, शतं मुष्णाति देवदत्तम्, शतं दण्डयति देवदत्तम्, कर्षति ग्रामं शाखाम्।

इदं विचार्यते--द्विकर्मकेभ्यो धातुभ्यः कर्मणि लादय उत्पद्यमानाः किमीप्सिततमे कर्मणि प्रधाने उत्पद्यन्ते? आहोस्विदनेन यस्य कर्मत्वं तस्मिन् गुणकर्मणीति? तत्रोक्तम्--
प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः।। इति।।
अयमर्थः- ये द्विकर्मका धातवस्तेषां प्रधाने कर्मणीप्सिततमे वाच्ये लादीनाहुः=लादयो भवन्तीत्याहुः। लादयः=लकृत्यक्तखलर्थाः। प्रधानाप्रधानयोर्भिन्नकक्षयोर्युगपदभिधानासंभवे प्रधानस्यैवाभिधानं न्याय्यम्, प्रधानत्वादेवेति भावः। नी--नीयते ग्राममजा, नेया, नीता, सुनया। वहि--उह्यते भारो ग्रामम्, वोढव्यः, ऊढः, सुवहः। हृञ्--ह्रियते भारो ग्रामम्, हर्त्तव्यः, हृतः, सुहरः। कृष्--कृष्यते शाखा ग्रामम्, क्रष्टव्या, कृष्टा, सुकर्षा।
अप्रधाने दुहादीनामिति। अत्र दण्डिप्रभृतयोऽपि गृह्यन्ते, न तु दुहियाचीति श्लोकपठिता एव। एतेषां दुहादीनामप्रधाने कर्मण्याख्येये लादीनाहुः । एतदपि न्यायसिद्धम्; यतः पयोऽर्थी पूर्वं गवि प्रवर्त्तते, अतः शूद्धस्य दुहेर्गवाभिसम्बन्धः, गोदोहेन तु पयस इत्यन्तरङ्गत्वादकथितकर्मणस्तत्रैव लादयो भवन्ति। एवं सर्वत्र।
दुहि--गौर्दुह्यते पयः, दोह्या, दुग्धा, सुदोहा। याचि--पौरवो गां याच्यते, याच्यः, याचितः, सुयाचः। रुधि--व्रजोऽवरुध्यते गाम्, अवरोध्यः, अवरुद्धः,स्ववरोधः। प्रच्छि--माणवकः पन्थानं पृच्छ्यते, प्रष्टव्यः, पृष्टः, सुप्रच्छः। भिक्षि--पौरवो गां भिक्ष्यते, भिक्षितव्यः, भिक्षितः, सुभिक्षः। चिञ्--वृक्षोऽवचीयते फलानि, अवचेतव्यः, अवचितः, स्ववचयः। ब्रूञ्--उच्यते माणवको धर्मम्, वक्तव्यः, उक्तः, सुवचः। शामु--अनुशिष्यते माणवको धर्मम्, अनुशासितव्यः, अनुशिष्टः, स्वनुशासः। दण्डि--गर्गाः शतं दण्ड्यन्ते, दश्ड्याः, दण्डिताः, सुदण्डाः। जि-शतं जीयते देवदत्तः, जेतव्यः, जितः, सुजयः। मुषि--मुष्यते देवदत्तः शतम्, मोषितव्यः, मुषितः, सुमोषः।
ण्यन्ते कर्तुश्च कर्मण इति। अभिधान इति शेषः। अण्यन्तावस्थायां कर्तुर्ण्यन्तावस्थायां कर्मणः सतोऽभिधाने लादीनाहुरित्यर्थः। एतदुक्तं भवति-ये गत्यर्थादयोऽण्यन्तावस्थायामपि सकर्मका ण्यन्तावस्थायामुत्तरसूत्रेण द्विकर्मका जाताः, तेषु ण्यन्तावस्थायां यदुत्तरसूत्रेणोपजातं कर्म तत्र लादयो भवन्तीत्यर्थः। गमयति ग्रामं देवदत्तम्, गम्यते ग्रामं देवदत्तः, गमयितव्यः, गमितः; सुगमः। बुध्यर्थः- बोध्यते माणवको धर्मम्, बोधयितव्यः, बोधितः, सुबोधः। प्रत्यवसानार्थः- भोज्यते माणवक ओदनम्, भोजयितव्यः, भोजितः, सुभोजः। शब्दकर्म-पाठ्यते माणवको वेदम्, पाठयितव्यः, पाठितः, सुपाठः। अकर्मकः- आस्यते माणवको मासम्, आसयितव्यः, आसितः, स्वासः।
बुद्धिप्रत्यवसानार्थशब्दकर्मकेषु गुणकर्मणि लादय इति मतान्तरम्। बोध्यते माणवकं धर्मः, भोज्यते माणवकमोदनः, पाठ्यते माणवकं वेद इत्यादि। तदयमत्र निर्णयः- नीवहिहृकृषिभ्यः प्रधानकर्मणि लादयः; तत्सम्बन्धस्य पूर्वभावित्वात्। दुह्यादिभ्यो जिदण्डमुषिभ्यश्चाप्रधाने; तत्सम्बन्धस्यानन्तरङ्गत्वात्। बुद्धिप्रत्यवसानार्थशब्दकर्मकेषु गुणकर्मणि प्रधाने वा यथेष्टम्; गत्यर्थाकर्मकयोः हृक्रोश्च ण्यन्तयोः प्रयोज्ये कर्मणीति। प्रयोज्यस्य च प्राधान्येनाभिधीयमानाप्रयोजकव्यापारेणाप्यमानत्वात् प्राधान्यम्। गुणभूतप्रयोज्यव्यापारकर्मणस्तु गुणभाव आर्थन न्ययेन प्रयोज्यव्यापारप्राधान्यम्, तदर्थत्वात् प्रयोजकव्यापारस्य। तत्प्राधान्याच्च तत्कर्मणोऽपि प्राधान्यमित्यन्ये। सर्वथा लादयः प्रयोज्यकर्मणीति स्थितम्।
अकर्मकाणां च धातूनां कालभावाध्वगन्तव्यदेशाः कर्मसंज्ञका इष्यन्ते। उक्तं च--`कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्, देशश्चाकर्मकाणां तु कर्मसंज्ञो भवतीति वक्तव्यम्' इति। अध्वगन्तव्येति--गन्तव्योऽध्वा, अध्वा गन्तव्यः, कडारादिष्वध्वशब्दे द्रष्टव्यः। गन्तव्यत्वेन प्रसिद्धस्य नियतपरिमाणस्य क्रोशादेर्ग्रहणार्थं गन्तव्यग्रहणम्, तेनाध्वानं स्वपितीति न भवति। ननु च `कालाध्वनोः' इति सिद्धा द्वितीया, किं कर्मसंज्ञया? देशस्य तावद्वक्तव्या। कालाध्वनोरपि लादिविधानार्थ कर्मत्वमेषितव्यम्। आस्यते मासः, आसितः, आसितव्यः,स्वासः। एवं शय्यते क्रोश इत्यादि। भावः- गोदोहमास्ते। यावता कालेन गौर्दुह्यते तावन्तं कालमास्त इत्यर्थः। गोदोहादीनां मासादिवत् कालत्वेनाप्रसिद्धत्वाद्भावस्य पृथग् ग्रहणम्। देशः- कुरून् स्वपिति, कुरवः सुप्यन्त इत्यादि। `कालाध्वनोरत्यन्तसंयोगे' इति तु सूत्रमक्रियात्यन्तसयोगार्थम्--मासं गुडधानाः, सर्वरात्रं कल्याणी, क्रोशं कुटिला नदीति। न तर्हि वक्तव्यम्--कालाभावाध्वगन्तव्या इति? न वक्तव्यम्, नात्रासिरासनमात्रे वर्त्तते, किं तु तत्पूर्वके व्यापने वर्त्तते--मासमास्ते । कोऽर्थः? मासमासनेन व्याप्नोतीति। एवं वदेमधीते, मासं वेदाध्ययनेन व्याप्नोतीत्यर्थः। अथ `कर्तृ कर्मणोः कृति' इति षष्ठी द्विकर्मकेषु किं प्रधाने कर्मणि भवति? आहोस्विद् गुणे भवति? आहोस्विदुभयोः? उभयोरिति प्राप्तं द्वितीयावद्भाष्यकारवचनात्तु गुणकर्मणि विकल्पेन षष्ठी। प्रधानकर्मणि नित्या--नेताऽश्वस्य स्त्रुघ्नमिति वा। इहाकथितं कर्मेत्येतावदस्तु, मास्तु पूर्वसूत्रद्वयम्, तद्विषयस्याप्यकथिइतत्वात्, सत्यम्; नटस्य श्रृणोतीत्यत्र मा भूदिति दुह्यादिपरिगणनमवश्यं कर्तव्यम्, तस्मिंश्च क्रियमाणे ओदनं पचति, वृक्षमूलान्युपसर्पतीत्यत्र न स्यादिति पूर्वमपि योगद्वयमारभ्यत इति।।
पदमञ्जरी
गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ।। 1.4.52 ।।
गमयति माण वकं ग्राममिति। कथमत्र ग्रामस्य कर्मत्वम्, यावता कर्तुरीप्सिततमं कर्मेत्युच्यते,न च संप्रति माणवकः कर्त्ता; अनेन कर्मसंज्ञकत्वात्। तत्र यथा माषेष्वश्वं बध्नातीत्यत्र वस्तुतो बक्षणेनेप्सिततमानामपि माषाणां कर्मसंज्ञा न भवति, तत्कस्य हेतोः? अश्वस्य संप्रत्यकर्तृत्वात्, तद्वदत्रापि न प्राप्नोति; मा भूण्णिच्युत्पन्ने माणवकः कर्ता, प्राक्तदुत्पत्तेः प्रकृत्यर्थे कर्त्ता भवति, तदानीमेव च ग्रामस्याभिसम्बन्धः ग्रामकर्मण्यसौ गमने प्रेष्यते--ग्रामं गच्छेति। अतो यस्यामवस्थायां ग्रामस्य कर्मत्वं न तस्यां माणवकस्य कर्मत्वम्, यस्यां च ण्यन्तावस्थायां माणवकस्य कर्मत्वं न तस्यां ग्रामस्य कर्मत्वम्; पूर्वप्रवृत्तत्वाद्।

माषेष्वश्वमित्यत्र तु नैवं संभवति। यापयतीति। `या प्रापणे' इत्यत्र प्राप्त्या गतिर्लक्ष्यतइति यातिर्गत्यर्थः।

नीवह्योरिति। नन्वेतयोर्गतिफलं प्रापणमर्थो न गतिः, `न गतिहिंसार्थेभ्यः' इत्यत्र च भाष्यम्--न `वहिर्गत्यर्थः' इति, सत्यम्; गुणभावेनापि गतिः प्रतीयत इति मत्वा प्रतिषेध उक्तः।

वहेरनियन्तृकस्येति। वक्ष्यामीति चोपक्षेपः। वाहयति बलीवर्दान्यवानित्यत्राणौ बलीवर्दाः कर्त्तारः, ण्यन्ते तु नियन्ता सारथिः कर्त्ताः, तत्र प्रतिषेधप्रतिषेधाद्विधिरेव भवति। बुध्यर्थग्रहणेन ज्ञानमात्रवाचिनामेव ग्रहणम्, न तु तद्विशेषवाचिनां स्मरत्यादीनामित्याहुः। वृत्तावपि तथैवोदाहृतम्।

आदिखाद्योरिति। अपर आह--सर्वमेव प्रत्यवसानकार्यमदेर्न भवति, नावश्यमियमेव कर्मसंज्ञेति `निगरणचलनार्थेभ्यश्च' इति पदमपि न भवति, इदमेकमिष्यते--`क्तेऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः'--इदमेषां जग्धमिति।

भक्षेरिति। गत्यर्थादिषु प्रायेण हेतुमण्णिच एव संभवाद् हेतुमण्णिचो विधिरिति प्रतिषेधोऽपि प्रत्यासत्तेस्तस्यैव न्याय्य इति चुरादिणिजन्तोऽप्यण्यन्तएवेति भक्षेः प्राप्तिः। भक्षयति बलीवर्दान् सस्यमिति। क्षेत्रस्थानां यवानां भक्ष्यमाणानां हिसा भवति, तस्यामवस्थायां कैश्चिच्चैतन्याभ्युपगमात्। स्वामिनो वा हिसा द्रष्यव्या।

इह कर्मशब्देन क्वचित्क्रिया गृह्यते, यथा--`कर्त्तरि कर्मव्यतीहारे' इति, क्वचित् साधनकर्मा--`वेः शब्दकर्मणः' इति, इह शब्दक्रियाणामिति चेत्? `ह्वयत्यादीनां प्रतिषेधः'--ह्वयति पुत्रं देवदत्तः, ह्वापयति पुत्रं देवदत्तेन; क्रन्दति पुत्रं देवदत्तः, क्रन्दयति पुत्रं देवदत्तेन; शब्दायते देवदत्तः, शब्दाययते देवदत्तेन। अकर्मकत्वादथात्र प्रसङ्गः, शब्दलक्षणकस्य कर्मणोऽन्तर्भावात् कर्मान्तरायोगाच्च। `श्रृणोतेश्चोपसङ्ख्यानम्' --अशब्दक्रियत्वात् श्रृणोति श्लोकं देवदत्तः, श्रावयति श्लोकं देवदत्तम्; न च बुध्यर्थत्वादत्र सिद्धिः, चेतत्यादयो हि ज्ञानमात्रवचना बुध्यर्थाः। अस्तु तर्हि साधनकर्मणो ग्रहणम्, शब्दकर्मण इति चेत्? जल्पतिप्रभृतीनामुपसंख्यानम्, जल्पति पुत्रं देवदत्तः, जल्पयति पुत्रं देवदत्तम्; विलपति पुत्रं देवदत्तः, विलापयति पुत्रं देवदत्तम्; आभाषते पुत्रं देवदत्तः आभाषयति पुत्रं देवदत्तम्। दृशेः सर्वत्र, यद्यपि क्रियाग्रहणम् अथापि साधनग्रहणम्, अथाप्युभयग्रहणम्-सर्वथा दृशेरुपसंख्यानम्। पश्यति रूपतर्क कार्षापणम्, दर्शयति रूपतर्कं कार्षापणम्। यदा चायंदृशिः चक्षुः साधनके ज्ञानविशेषे वर्तते तदेतद्वक्तव्यम्; ज्ञानमात्रवचनत्वे तु बुध्यर्थत्वादेव सिद्धम्; तदेवमुभयोरपि पक्षयोर्द्दोषान्तं भाष्यं नान्यतरः पक्षो निरणायि।

वृत्तिकारस्तु ये शब्दक्रियाः शब्दसाधनकर्माणश्च तानविवादसिद्धानुदाहरतिवचनेन बोधयतीत्यर्थः। एमन्यत्रापि। तत्र बुद्ध्यर्थत्वादेव सिद्धम्। यद्यप्यन्या बुद्धिरन्या बोधना, उपसर्जनीभूतापि तावद्बुद्धिरस्तीति बुद्धर्थत्वमस्त्येव, उपसर्जनीभूतोऽपि च गत्यादिरर्थो गृह्यते, अन्यथा गमयतीत्यादीनामगत्यर्थत्वादेवाप्रसङ्गादणिग्रहणमनर्थकं स्यादिति, अस्तु चेतनविषये, एवमचेतनविषये कथम्? यः कंचिज्जल्पति तमन्यो जल्पयति, न ह्यत्र प्रबोधनाप्यस्ति।

अकर्मकाणामिति। कालभावाध्वगन्तव्यदेशव्यतिरिक्तकर्मरहितानामित्यर्थोऽत्र ग्राह्यः, अन्यथा मासमास्ते देवदत्तः, मासमासयति देवदत्तम्, गोदोहमासयति, क्रोशमासयति, कुरूनासयतीत्यत्र न स्यात्; कालादिकर्मणा सकर्मकत्वात्। एवं `लः कर्मणि च' इत्यादावपि यत्राकर्मकग्रहणं तत्र सर्वत्र द्रष्टव्यम्, तेन मासमास्यते देवदत्तेनत्यादौ भावे लादयः सिद्धा भवन्ति। उक्तञ्च--सिद्धं तु कालकर्मणाकर्मकत्वद्वचनादिति। कालग्रहणमुपलक्षणम्। वत्करणात्स्वाश्रयमपि भवति--मास आस्यते देवदत्तेन--मासकर्मणि लो भवति। स तर्ह्यकर्मकवचनाद् भावे वक्तव्यः? न वक्तव्यः; अकर्मकाणामित्युच्यते, न च कालादिभिः केचिदकर्मकाः। कालादिभिरप्यकर्मकाः यदा ते न विवक्ष्यन्ते, तद्यथा--शेते देवदत्तो न भुङ्क्ते इति। नाप्यविवक्षितकर्माणोऽकर्मकाः, किं तर्हि? येऽत्यन्ताविद्यमानकर्माणो धातवोऽकर्मकाः, नार्थाः। यस्य धातोः स्वरूपावधिकमकर्मकत्वम्, न च कालादिकर्मकाः, नार्थाः। यस्य धातोः स्वरूपावधिकमकर्मकत्वम्, न च कालादिकर्मणा स्वरूपावधिकमकर्मकत्वं कस्यापि सम्भवतीति सामर्थ्यातद्व्यतिरिक्तेन कर्मणाऽकर्मकत्वं विज्ञायते। किमर्थं पुनरिदमुच्यते, यावता स्वव्यापारे स्वतन्त्रस्यापि प्रयोज्यस्य प्रयोजकव्यापारे विवक्षिते तेन प्रधानभूतेनाप्यमानत्वाद् अन्तरङ्गत्वेन पूर्वप्रवृत्तामपि कर्तृ संज्ञां बाधित्वा कर्मसंज्ञा भविष्यतीति? एवं तर्हि सिद्धे सत्यारम्भो नियमार्थः-प्रयोजकव्यापारेणाप्यमानस्य यदि भवति गन्यर्थादीनामेव, नान्येषामिति। तेन पाचयत्योदनं देवदत्तो यज्ञदत्तेनेत्यत्र पूर्वं प्रवृत्ताया एव कर्तृ संज्ञाया अवस्थानात् कर्तरि तृतिया भवति। उक्तं च--

गुणक्रियायां स्वातन्त्र्यात्प्रेषणे कर्मतां गतः।
नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते।। इति।

कर्तुः स्वधर्मार्त्तृतीया। अथ कथम्--

अयचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक। इति?

स्वतन्त्राः कवयः। यद्वा--सुतां प्रति किञ्चिदुद्वाहविषये ग्राहयितुं बोधयितुं न शशाकेत्येवं व्याख्येयम्; तत्र बुध्यर्थत्वात् सिद्धम्।।

पदमञ्जरी

हृक्रोरन्यतरस्याम्।। 1.4.53 ।।

गत्यर्थादयो निवृत्ताः तेनोभयत्र विभाषेयम्। यदा हरतिर्गतौ वर्तते-हरति भारं देवदत्त इति, अभ्यवहारे वा-अभ्यवहरति माणवकमोदनमिति।

करोतिश्चाप्यकर्मकः- ओदनस्य पूर्णाः छात्राः विकुर्वत इति, तदा पूर्वेण प्राप्ते। ननु `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति नियमस्यैव विकल्पो युक्तः, गत्यर्थादिष्वेवेति योऽयं नियमः स `हृक्रोरन्यतरस्याम्' इति, ततश्च पक्षे नियमाभावात् गत्याद्यर्थादन्यत्र पक्षे कर्मत्वं पक्षान्तरे च कर्तृ त्वं भवतु, गत्याद्यर्थत्वे तु नित्यवत् कर्मसंज्ञा प्राप्नोति। एवं तर्हि वार्त्तिककारेण उभयत्रविभाषास्त्वियं पठिता, तत्सामर्थ्यादनन्तरस्य विधिरिति नाश्रीयते, अविशेषेण हृक्रोर्विकल्पः

प्रवर्तते।

अभिवादिदृशोरिति। अभिवादयतेरप्राप्ते विभाषा दृशेर्बुध्यर्थत्वात् दृशेः सर्वत्रेति वा प्राप्ते। अभिवादयते इति। `णिचश्च' इत्यात्मनेपदम्। परस्मैपदे तु अभिवादयति गुरुं देवदेत्तेनेति कर्तृ संज्ञैव भवति।

दर्शयते इति। कर्मसंज्ञाभावपक्षे कर्मान्तरस्याभावात् `णेरणौ' इत्यात्मनेपदम्, अन्यत्र तु `णिचश्च' इति।।

पदमञ्जरी

स्वतन्त्रः कर्ता।। 1.4.54 ।।

स्वतन्त्रशब्दोऽयं तन्तुवायवचनोऽप्यस्ति--स्वं तन्त्रमस्य स्वतन्त्रः, वितातास्तन्तवस्स्वतन्त्रमित्युच्यते; अस्ति च साधारणद्रव्ये पुरुषे वर्तते साधारणं भवेत्तन्त्रम्, स्वं धनं तन्त्रं साधारणमस्य स्वतन्त्रः; अस्ति च प्रधानवचनः- स्व आत्मा तन्त्रं प्रधानमस्य स्वतन्त्र इति। तत्राद्ययोर्ग्रहणे तयोरपादानादिविषये कर्तृसंज्ञा स्यात्, परत्वाद्विशेषविहितत्वाच्च तन्तुवायादागच्छतीत्यादौ; इह च न स्यात्-देवदत्तो गच्छतीति, इदमाद्ययोर्ग्रहणे दोषं दृष्ट्वा तृतीयमर्थमाश्रित्याह--स्वतन्त्र इति। प्रधानभूत उच्यत इति। स्वतन्त्रशब्दस्य तत्रैव प्रसिद्धतरत्वादिति भावः। किं च कारकधिकारात् क्रियाविषयं स्वातन्त्र्यं गृह्यते, न च तन्तुवायस्तन्तुवायतया क्रियायामुपयुज्यते, किं तर्हि? प्रधानतयैवेति तद्वाचिन एव ग्रहणं युक्तम्। यदि प्रधानभूत उच्यते, एवं सत्यप्रधानापेक्षत्वात् प्रधानभावस्य यत्राधिकरणादीन्यप्रधानानि कारकाणि सन्ति--काष्ठैः स्थाल्यामोदनं पचतीति अत्रैवः स्यात्; न त्वास्ते शेते इत्यादावित्यशङ्क्य प्राधान्येनागुणभावो लक्ष्यत इति दर्शयति--अगुणीभूत इति। तेन यस्य गुणभावो नास्ति, स कर्त्ता। कारकान्तराविवक्षायामपि चागुणभावोऽस्त्येव। कः पुनरत्र कारकाणां गुणगुणिभावः? यदा एकापायेऽपि क्रिया न निर्वर्तते, उक्तमत्र--

प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि।

तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात्।।

अदृष्टत्वात्प्रतिनिधेः प्रविवेकेऽपि दर्शनात्।

आरादप्युपकारित्वात् स्वातन्त्र्यं कर्तुरिष्यते ।। इति।

काष्ठादीनि कर्त्रा प्रवर्तितानि करणादिशक्तिं प्रतिलभन्ते, कर्त्ता तु प्रागेव। कर्तृ संनिधौ च करणादिनि न्यग्भवन्ति, तदधीने च तेषां प्रवृत्तिनिवृत्ती। प्रधानकर्तृश्च प्रतिनिधिर्न दृष्टः, करणादीनां तु दृष्टः-व्रीह्यपचारे नीवारैरिज्यते। प्रविवेकः= अभावः। करणाद्यभावेऽप्यास्ते, शेते इत्यादौ केवलः कर्ता दृश्यते, न तु कर्तुरभावे करणादीनि दृश्यन्ते।

आरादप्युपकारित्वादिति। यद्यप्यसौ तटस्थः फलसिद्धावुपकरोति, न तु करणादिवदनुप्रविश्य तथापीत्यर्थः। एतच्च प्रायेण चेतनेष्वेव सम्भवति, नाचेतनेषु--रथो यातीत्यादौ, नैष दोषः; उक्तलक्षणे कर्त्तरि द्वयं दृष्टम्--प्रधान्यम्,आगुणभावश्च। तत्रागुणभावः अचेतनेषु चेतनेष्वपि सम्भवति। स चायमगुणभावो न प्रतिनियतविषयः, यस्यैव तु विवक्ष्यते, तस्यैवेत्याह--स्वातन्त्र्येण विवक्ष्यत इति। विवक्ष्यत इत्यस्योदाहरणम्--स्थाली पचतीति।

अन्ये तु व्याचक्षते--अगुणभावेनाभिधीयमानव्यापारो गुणभूतो गुणभूतधातूपात्तव्यापारः कर्तेत्यर्थः। कस्य च व्यापारो धातुनाऽगुणभावेनोपादीयते? यस्य विवक्ष्यते तस्येति सर्वत्र सिद्धमिति।।

पदमञ्जरी

तत्प्रयोजको हेतुश्च।। 1.4.55 ।।

तदित्यनेनन कर्त्ता सम्बद्ध्यते इति। कर्तृ संज्ञाविशिष्टः स्वतन्त्र इत्यर्थः। ननु च प्रयोजकसन्निधौ प्रयोज्यस्य पारतन्त्र्यं कर्तृ सन्नि धाविव करणादीनाम्, तत्कथं स्वतन्त्रः परामृश्यते? कथन्तरां च कर्तृ संज्ञाविशिष्टः? कथन्तमां च पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति? प्रयोज्ये तृतीया भवति, पूर्वमेव च स्वतन्त्रस्य कर्तृः सतः प्रयुक्तिरपि किमर्था? मायं विरंसीदिति प्रयुङ्क्ते इति चेद्, भवत्वेवं प्रवृत्तप्रवर्तने, यत्र तु बलात्कारेण प्रवर्त्यते तत्र कथम्? उच्यते; अप्रवृत्तप्रवर्तनेऽपि यावत्स्वार्थादर्शनात् प्रयोज्ये न प्रवर्तते तावत्प्रयोजकः पाचयतीति न व्यपदिश्यते, तदानीमपि च स्मृत्यारूढा प्रयुक्तिर्विद्यत इति अनुवर्तमाना हि प्रसक्तिः प्रयोज्यस्याफलनिष्पत्तेः प्रवृत्तौ हेतुर्न मध्ये विच्छिन्ना। लोडादिवाच्यस्तु प्रैषः प्रयोज्यस्या प्रवृत्तावपि भवति। उक्तं च--

द्रव्यमात्रस्य तु प्रैषे पृच्छादेर्लोड् विधीयते।

प्रवृत्तस्य यदा प्रैषस्तदा स विषयो णिचः।। इति।

तदेवं णिज्वाच्या प्रयुक्तिः प्रवृत्तप्रवर्तनारूपेण प्रतीयत इति प्रकृत्यर्थे कर्तृः सतः प्रयोजक इत्यविरुद्धम्। इममेव चार्थ दर्शयितुं तच्छब्दोपादानम्; अन्यथा कस्य प्रयोजक इत्यपेक्षायाम्, प्रकृतत्वादेव स्वतन्त्रस्य प्रयोजक इति लाभादनर्थकं तत् स्यात्। तस्य प्रयोजकस्तत्प्रयोजक इति। ननु `तृजकाभ्यां कर्तरि'`कर्तरि च'

xxxxxतिषेधात् कथमत्र समास इत्यत आह-निपातनात्समाप्त इति। अत्र विचxxxxxxपासप्रकरण एव विचारयिष्यामः।

संज्ञासमावेशार्थश्चकार इति। असति हि तस्मिन् एकसंज्ञाधिकारात् कर्तृ संज्ञा न स्यात्। कुर्वाणं प्रयुङ्क्ते इति। कुर्वाणदशायां या प्रयुक्तिः स्मृत्यारूढा, सैव णिज्वाच्येत्येवं विग्रहः। हेतुत्वादित्यादिना समावेशस्य प्रयोजनं दर्शयति।।

पदमञ्जरी

प्रागीश्वरान्निपाताः।। 1.4.56 ।।

प्राग्रीश्वरान्निपाताः।। प्राचि काले देशे वा प्राक्। अधिरीश्वरे इति वक्ष्यतीति। ईश्वरप्रकृतिभागस्य पूर्वपदान्तेन रेफेण सहानुकरणं द्रष्टव्यम्।

अनुकार्येणार्थेनार्थवत्त्वात् विभक्त्यत्पत्तिः, च वा इत्यत्र निपातत्वे सति `स्वरादिनिपातमव्यम्' इत्यव्ययसंज्ञा भवति। `निपाता आद्युदात्ताः' इति तु स्वरो न भवति, उदाहृतानामनुदात्तानां गणे पाठात्। अन्येषां तु तदपि भवति।

ननु यथा `प्रत्ययः' इत्यादिरधिकारो विनाप्यवधिनिर्देशेनाभिमतविषये प्रवर्तते, तथायमपि प्रवर्तिष्यते, निपाताः' इत्येवास्तु, नार्थोऽवधिनिर्देशेनेत्यत आह--प्राग्वचनमिति। प्राग्वचनद्वारेणावधिनिर्देशस्य प्रयोजनमुक्तम्। अयमर्थः- असत्यवधिनिर्देशे `निपाताः' इत्यस्य प्रतियोगमनुवृत्तौ सत्यामप्येकसंज्ञाधिकारात् पर्यायः स्यात्, न तु समावेशः; सति तु तस्मिन् ईश्वरात् प्राग्यावन्तः संज्ञिनः सर्वास्तान्नैकध्यमिहापेक्ष्य सकृत्संज्ञा विधीयते, प्रतिसूत्रमधिकारात्त्वपरावृत्तिः, तस्याश्च समावेशः प्रयोजनमिति।

अथ वा प्राग्वचनं किमर्थम्, यावता पञ्चम्येव प्रागिति दिक्शब्देऽध्याहरिष्यते, परागित्यस्य त्वध्याहारो न भविष्यति, `चादयोऽसत्वे' ,`प्रादयः' इत्यनयोर्विधेयासम्भवेनानर्थक्यप्रसङ्गात्? अत आह--प्राग्वचनमिति। अयं भावः- अध्याहारेण सिद्धे प्राग्ग्रहणसामर्थ्यात्तन्त्रेण द्वौ प्राक्छब्दावुच्चार्येते। तेनायमर्थो भवति--प्राग्रीश्वराद्ये व्यवस्थितास्ते प्राक् निपातसंज्ञा भवन्ति, निपाताः सन्तो गत्यादिसंज्ञा इति। तेन निमित्तमेव निपातसंज्ञा गत्यादिसंज्ञानामिति समावेशसिद्धिरिति।

रीश्वरादिति सह रेफेणानुकरणे प्रयोजनमाह--रीश्वराद्वीश्वरान्मा भूदिति। रीश्वरादित्युच्यते, `अधिरीश्वरे' इत्ययमीश्वरशब्दोऽवधिर्यथा स्यात्,`शकिण्यमुल्कमुलौ' `ईश्वरे तोमुन्कसुनौ' इत्ययं मा भूद् इत्येवमर्थमित्यर्थः। यदा संहीतया सूत्राणि पठ्चन्ते, तदा शीश्वरशब्दोऽस्तीत्यभिप्रेत्य रीश्वरादित्युक्तम्। ज्ञापकात्, सिद्धम्, यदयं `कृन्मेजन्तः' इति कृतो मान्तस्यैजन्तस्य वाऽव्ययसंज्ञां शास्ति, तज्ज्ञापयति--अनन्तर ईश्वरशब्दोऽवधिर्न व्यवहित इति, अन्यथा सेसेन्प्रभृतीनां णमुल्कमुलोश्च निपातत्वादेवाव्ययसंज्ञायाः सिद्धत्वादनर्थकं तत्स्यात्? नैतदस्ति ज्ञापकम्, कृन्मेजन्तः परोऽपि सः, `ईश्वरे तोसुन्कसुनौ' इत्यस्मात्परोऽपि कृन्मान्त एजन्तश्चस्ति कृत्यार्थे तवैकेनित्याद्येजन्तः, णमुलादिश्च मान्तः, तदर्थमेतत् स्यात्।

यत्तर्ह्यव्ययीभावस्याव्ययत्वं शास्ति, तज्ज्ञापयति--अनन्तरस्य ग्रहणमिति; अन्यथा द्वितीये निपातसंज्ञाव्यापाराद् अव्ययीभावस्य निपातत्वादेवाव्ययसंज्ञायाः सिद्धत्वादनर्थकं तत्स्यात्, नैतदस्ति; `समासेष्वव्ययीभावः' तुल्यजातीयव्यावृत्तये नियमार्थमेतत्स्यात्, न त्वनन्तरस्य ग्रहणे ज्ञापकमित्यर्थः। एवं तर्हि लौकिकन्यायादेवानन्तरस्य ग्रहणं भविष्यति, लौकिके ह्योदकान्तात्प्रियं प्राप्यमनुव्रजेदिति य एवानन्तर उदकान्त आ ततोऽनुव्रज्य बान्धवा निवर्तन्ते तद्वदत्रापि? तत्राह--लौकिकं चातिवर्तते इति। लौकिकं न्यायं लोक एवातिवर्त्तते; यतो द्वितीयमप्युदकान्तं स्नोहातिशयादनुव्रज्य निवर्तन्ते तस्माद्रीश्वरादित्युच्यते वीश्वरान्मा भूदिति स्थितम्। ननु च `न लोकाव्यय' इत्यत्र लोकादीनामव्ययत्वादेव षष्ठीप्रतिषेधे सिद्धे पुनरुपादानं ज्ञापकं भविष्यती--अनन्तरस्य ग्रहणमिति, नैतदस्ति; अव्ययसंज्ञाया एवाभावं ज्ञापयेत्, निपातसंज्ञा तु स्यादेव; ततश्च चिकीर्ष्वर्थ इत्यादौ`निपात एकाजनाङ्' इति प्रगृह्यसंज्ञा स्यातु। प्रोथमिति। पर्याप्तमित्यर्थः। `प्रोथ यर्याप्तौ', पचाद्यचि क्रियाविशेषणत्वान्नपुंसकत्वम्।।

पदमञ्जरी

चादयोऽसत्त्वे।। 1.4.57 ।।

न चेत्सत्त्वे वर्त्तते इति। सत्त्वे चेद् वर्तते तदा संज्ञा न भवतीत्यर्थस्तदाह--प्रसज्यप्रतिषेधोऽयमिति। अथ पर्युदासे को दोषः? पशुशब्देऽत्र पठ्यते सा जातिविशिष्टे द्रव्ये वर्तते, तस्य निपातत्वं स्यात्, जातिद्रव्यसमुदायरूपो ह्यर्थः केवलादन्यो भवति; तथा प्रादय इत्यत्र विप्रातीति विप्रः, `आतश्चोपसर्गे' इति कः। अत्र प्रशब्दः क्रियाविशिष्टे द्रव्ये वर्तते। तत्र क्रियाद्रव्यसमुदायस्य द्रव्यादन्यत्वान्निपात्वान्निपातत्वे सत्यव्ययसंज्ञायां तदन्तविधेरभ्युपगमात् विप्रशब्दस्याव्ययसंज्ञा स्यात्, प्रसज्यप्रतिषेधे तु यत्र द्रव्यगन्धस्तत्र सर्वत्र प्रतिषेधो भवति। क्व तर्हि वर्तमानः पशुशब्देऽसत्त्ववचनो भवति? दृश्यर्थे, लोधं नयन्ति पशु मन्यमाना इत्यत्र दृश्यर्थेन मननं विशेष्यते--दर्शनमेतन्मननम्, सम्यक् मन्यमाना इत्यर्थः। सत्त्वशब्दोऽयं सतो भावः सत्त्वमिति सत्ताजातिवचनो गृह्यत इति भ्रान्तिमपनयति--सत्त्वमिति च द्रव्यमुच्यते इति। इदं तदिति सर्वनामपरामर्शयोग्यं वस्तु द्रव्यमुच्यते। उक्तञ्च--

वस्तुपलक्षणं यत्र सर्वनाम प्रयुज्यते।

द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः।। इति।

स्वार्थेनेति शेषः। सिद्धरूपो योऽर्थः स्वार्थेन विशेष्यतया विवक्षितस्तद् द्रव्यमित्यर्थः। उक्तं च--

स्वार्थस्त यत्र विश्रान्तिर्वाच्यं द्रव्यं तदुच्यते। इति।

एवं च कृत्वा--सीदति, निविशते यत्र जात्यादिकं शब्दप्रवृत्तिनिमित्तं विशेषणभावेनेति सत्त्वं द्रव्यम्। सदेरौणादिकस्त्वप्रक्ययः `ताभ्यामान्यत्रोणादयः' इत्यधिकरणसाधनः। चणिति पठ्यते, स चेदर्थे वर्तते, णकारश्चण्कच्चिद्यत्रयुक्तमिति विशेषणार्थः। नञो ञकारः `नलोपो नञः' इति विशेषणार्थः। नलोपो नस्येत्युच्यमाने वामनपुत्रः- अत्रापि प्राप्नोति? पाक्षिक एष दोषः; `अलुगुत्तरपदे' इति वर्तते, तत्र यदोत्तरपदेनाक्षिप्तं पूर्वपदं नस्य विशेषणम्, तदा पूर्वपदभूतस्य नस्य लोप इत्युच्यमाने नैवात्र प्राप्नोति, नशब्देन पूर्वपदे विशेष्यमाणे तदन्तविधिसद्भावादत्रापि स्यात्। अथास्मिन्पक्षे `नञः' इत्युच्यमानेऽपि स्त्रैणपुत्र इत्यत्र नञः कस्मान्न भवति? अतुल्यत्वात्प्रत्ययस्य ञकारो वृद्धिस्वरयोश्चरितार्थः, निपातस्य त्वचरितार्थः। तथेति पठ्यते, सोऽव्युत्पन्नः समुच्चये वर्तते, तस्य तु थालन्तस्य लित्स्वरेणाद्युदात्तत्वं सिद्धम्। अव्ययत्वमपि `तद्धितश्चसर्वविभक्तिः' इत्येव सिद्धम्। नन्वव्युत्पन्नस्यापि विभक्तप्रतिरूपका इत्येव सिद्धम्, सत्यम्; प्रपञ्चार्थः पाठः। एवं वेलायाम्, मात्रायामित्यादेरपि।

स्वरप्रतिरूपका इति। ऋति ॠ वा वचनमित्यादयः, तेषां निपातसंज्ञाविधानद्वारेण सद्भाव एव प्रतिपाद्यते, न पुनरेषां निपातत्वे किञ्चित्प्रयोजनमस्तीति।।

पदमञ्जरी

प्रादयः।। 1.4.58 ।।
अयं योग उत्तरस्माद्विभज्यते, पूर्वस्माच्च; यदि पुनः`प्रादय उपसर्गाः क्रियायोगे' इत्युच्यते, नैवं शक्यमित्याह-पृथग्योगकरणमिति। उत्तरस्या उपसर्गसंज्ञाया एव `क्रियायोगे' इति विशेषणं यथा स्यात्, निपातसंज्ञायां मा भूदित्येवमर्थमुत्तरस्माद् योगादस्य विभाग इत्यर्थः। अथ वा--चादिष्वेव प्रादीनपि पठित्वा पूर्वस्माद्योगात् किमर्थ विभज्यते, तत्राप्याह--उपसर्गाः क्रियायोग इति। वादीनामिति। चलोपोऽत्र द्रष्टव्य इति च--वदीनामिति। परा जयन्ति सेना इति। परा उत्कुष्टाः। परदेशस्थिता वा द्रव्यत्वात्तत्र वर्तमानस्य पराशब्दस्य न भवति, यत्र त्वेकवचनं पठ्यते--परा जयति सेनेति, तत्र रूपोदाहरणं द्रष्टव्यम्; हल्ङ्याबिति सुलोपात्, पराशब्दस्याद्युदात्तत्वाच्च।।
पदमञ्जरी
उपसर्गाः क्रियायोगे।। 1.4.59 ।।
क्रियायोगे इति तृतीया, निपातनात् समासः, `कर्तृ करणे कृता' इति बहुलवचनाद्वा। यद्वा--क्रियया करणभूतया प्रादीनां धातुभिर्योगात् करणे तृतीयया एव समासः। प्रणयतीति। `उपसर्गादसमासेऽपि इति णत्वम्। प्रनायक इति। नन्वत्रापि गमिक्रियायोगोऽस्त्येव, सत्यम्; प्रादयः पुनरेवमात्मकाः, यदुत श्रुतायां क्रियायां तामेव विशिंषन्ति, अश्रुतायां तु ससाधनां क्रियामाक्षिपन्ति। तत्र क्रियायोगग्रहणसामर्थ्याद् यत्क्रियायुक्ताः प्रादयस्तं प्रत्युपसर्गसंज्ञा भवतीत्ययमर्थो भवति। अत्र च यत्क्रियायुक्तः प्रादिः स गमिर्न प्रयुज्यते, यश्च प्रयुज्यते न तत्क्रियायुक्त इति नास्ति णत्वप्रसङ्गः।
मरुच्छब्दस्येति। उपसर्गसंज्ञैवेष्यते, न निपातसंज्ञा। तस्यां हि सत्यां निपाताद्युदात्तत्वम्`तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरेण स्यात्, अन्तोदात्तश्च मरुत्तशब्द इष्यते। ननूपसर्गसंज्ञायामपि `उपसर्गाश्चाभिवर्जम्' इत्याद्युदात्तत्वं स्यादेव, न; नानेनापूर्वमाद्युदात्तत्वं विधीयते, किं तर्हि? `निपाताः' इत्येव सिद्धेऽथेः प्रतिषेधार्थमेतत्। किं च निपातसंज्ञायामव्ययसंज्ञा स्यात्। अथ `उपसर्गे धोः किः'`आतश्चोपसर्गे' इत्येतौ विधी कस्मान्न भवतः? अनभिधानात्। मरुत्त इति। मरुच्छब्दतकारस्य `अनचि च' इति द्विर्वचने `झरो झरि' इति मध्यमस्य मध्यमयोर्मध्यमानां वा लोपे त्रैरूप्यं भवति, कथं पुनरत्र तत्वम्, यावतायमनजन्त इत्यत आह--संज्ञाविधानसामर्थ्यादिति। उक्तः प्रयोजनान्तराभावः। एवं तु मरुन्नयतीति तकारव्यवायेऽपि णत्वं प्राप्नोति तस्मात्तत्वविधावेवेष्यते।
श्रच्छब्दस्येति। अङ्विधावेवेष्यते, किप्रत्ययो हि न भवति, तदाह--आतश्चोपसर्गे इति। भिदादिपाठात् `प्रज्ञाश्रद्धार्चा' इति निपातनाद्वा सिद्धम्।।
पदमञ्जरी
गतिश्च।। 1.4.60 ।।
`गतिरनन्तरः' इति पुंल्लिङ्गनिर्देशाद् गम्यत इति गतिः, `क्तिच्क्तौ च संज्ञायाम्' इति क्तिचम, निपातनाच्च `न क्तिचि दीर्धश्च' इति न भवति। प्रकृत्येति। अत्र गतित्वात् कृत्स्वरो भवति, समासस्तु प्रादित्वादेव सिद्धः। प्रादिभ्योऽन्यत्र समासोऽपि प्रयोजनम्। प्रकृतमिति। `गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरः। यत् प्रकरोतीति। तिङ्लक्षणस्य निघातस्य `निपातैर्यद्यदि' इति निषेधे तिपः पित्त्वादनुदात्तत्वम्, विकरणस्य प्रत्ययस्वरो धातोः शेषनिघातः, `तिङिचोदात्तवति' इति प्रशब्दस्यानुदात्तत्वम्। एतच्च प्रयोजनचतुष्टयं गतिसंज्ञा प्रकरणे सर्वत्र द्रष्टव्यम्।
चकारः संज्ञासमावेशार्थ इति। अन्यथैकसंज्ञाधिकारादेकत्र संज्ञाद्वयविधानाच्च पर्यायः स्यादिति भावः। कारिकाशब्दस्येति। कारिका क्रिया मर्यादास्थितिरित्यर्थः। यत्न इत्यपरे, धात्वर्थनिर्देश इति ण्वुल्। यस्तु कर्तरि कारिकाशब्दः कारिका दासीति, यच्च श्लोकवाची--तयोर्ग्रहणं न भवति; क्रियायोगग्रहणेन कारिकाशब्दस्य विशेषणात् क्रियावृत्तर्ग्रहणात्। यत्कारिकां करोतीति। निपातत्वादव्ययत्वे सति विभक्तेर्लुक्।
पुनरुत्स्यूतमिति। गतित्वात्समासः। `गतिर्गतौ' इति निघातो भवतीति। यद्यप्यत्र `प्रवृद्धादीनां च' इत्युत्तरपदान्तोदात्तत्वेन शेषनिघातः सिद्धः, तथापि परत्वादयमेव निघातो युक्त इति भावः। इह च पुनराधेयमिति। गतित्वात्समासे कृते कृदुत्तरपदप्रकृतिस्वरेण`यतोऽनावः' इति धेयशब्द आद्युदात्तः। चनोहित इति। निपातत्वादाद्युदात्तस्य चनःशब्दस्य `गतिरनन्तरः' इति प्रकृतिस्वरः।।
पदमञ्जरी
ऊर्यादिच्विडाचश्च।। 1.4.61 ।।
च्व्यन्ता डाजन्ताश्चेति। यद्यपि पदसंज्ञायामन्तग्रहणेन `संज्ञाविधौ प्रतययग्रहणे तदन्तविधिर्नास्ति' इति ज्ञापितम्, तथापि`क्रियायोगे' इत्यनुवृत्तेस्तदन्तग्रहणमिति भावः। न हि प्रत्ययमात्रस्य क्रियायोगः सम्भवति, स्वार्थिकत्वेन स्वयमनर्थकत्वात्, च्वेरश्रावित्वाच्च। कृभ्वस्तियोग इति। न केवलम्, संज्ञाप्रयोगोऽप्यन्यत्र भवति, न हि भवति उरीसंपद्यते इति, श्रौषडादीनां स्वाहापर्यन्तानां चादिषु पाठाद् अक्रियायोगेऽपि निपातत्वम्। आविःशब्दस्य साक्षात्प्रभृतिषु पाठात् कृञो योगे विकल्पः, कृभ्वस्तियोगे त्वनेन नित्यम्। कथं तर्हि `आविश्चक्षुषोऽभवदसाविव रागः', `अभवन् युगपद्विलोलजिह्वा युगलीढोभयसृक्कधारमाविः इति? स्वतन्त्रा कवयः। शुक्लीकृत्येति। `अस्य च्वौ' इतीत्वम्। पटपटाशब्दः `वा क्यषः' इत्यत्र व्युत्पादितः।।
पदमञ्जरी
अनुकरणं चानितिपरम्।। 1.4.62 ।।
इतिः परो यस्मादिति। पञ्चमीसमासस्तु लक्षणाभावान्नाश्रितः। तेनेति खाट्कृत्येत्यत्र इतेः परत्वेऽपि भवति। खाडिति कृत्वा निरष्ठीवदिति। अत्रासति प्रतिषेधे गतिसंज्ञायां समासः स्यात्, धातोश्चानन्तरः प्रयोग इति रूपमेवैतन्न सिध्येत्। `ष्ठिवु निरसने', `ष्ठिवुक्लमुचमां शिति' इति दीर्घः। भूतकालोपन्यासः किमर्थः? कस्यचित्कवेरयं प्रयोग उदाहृतः-

`चुम्बनसक्तः सोऽस्याः च्युतमूलं दशनमात्मनो वदने।
जिह्वामूलस्पृष्टं खाडिति कृत्वा निरष्ठीवत्।।'
पदमञ्जरी
आदरानादरयोः सदसती।। 1.4.63 ।।
प्रीतिसंभ्रम इति। प्रीतिपूर्विका प्रत्युत्थानादिविषया त्वरेत्यर्थः। परिभवौदासीन्यमिति। अवज्ञया कर्तव्यं प्रत्यत्थानादिक प्रत्युपेक्षेत्यर्थः। असदनादरग्रहणं किमर्थम्? असत्कृत्येत्यत्रापि यथा स्यात्। मा भूदसच्छब्दस्य गतिसंज्ञा, सत्कृत्येत्यनेन नञ्समासो भविष्यति? नैवं शक्यम्; सति शिष्टत्वात् कृदुत्तरपदप्रकृतिस्वरं बाधित्वा अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं स्याद्। असत्कृतमित्यत्र तु सत्कृतशब्दे `गतिरनन्तरः' इति स्वरे प्रवृत्ते प्रश्चान्नञ्समासेऽपि तस्येव स्वरः। असच्छब्दस्यापि कृतशब्देनापि समासे तस्य निपातत्वादाद्युदात्तस्य गतित्वात्प्रकृतिभावेऽपि स एव स्वर इति नास्ति विशेषः। इह च यदासत्करोतीत्यसच्छब्दस्य निघातो न स्याद्, अव्ययसंज्ञापि तस्य न स्यादित्यसच्छब्दस्यैव गतिनिपातसंज्ञे एषितव्ये। न चात्र सच्छब्देन तदन्तविधिर्लभ्यते; विशेष्यस्याभावात्।
नन्वत्र सच्छब्दस्यैव संज्ञास्तु, कार्यप्रदेशेषु प्रकृतस्य तेन तदन्तविधिर्भविष्यति, अव्यसंज्ञायां तावदस्त्येव तदन्तविधिः-परमोच्चैरिति, यथा `कुगतिप्रादयः' इत्यत्रापि सुबिति प्रवर्तते, सुपेत्येव निवृत्तम्, तद्गतिना विशेष्यते `गतिरनन्तरः' इत्यत्र पूर्वपदम् `गतिर्गतौ' इत्यत्रापि पदस्येति प्रकृतम्। भवतु तदन्तविधिना कार्यम्, अनादरावगतिस्तु कुतः? असत्यनादरग्रहणे, न सदसदित्यादरनिषेधान्नैव शक्यम्, आदरप्रसङ्ग एव हि स्यात्, गुरुमसत्कृत्येति चाण्डालमसत्कृत्येत्यत्र न स्यात्। यथाऽब्राह्मण इति क्षत्रियादिरेवोच्यते, न लोष्टादिः, अनादरग्रहणे तु सति बहुव्रीहिर्विज्ञायते--अविद्यामानादरोऽनादर इति। बहुव्रीहिश्चात्यन्ताभावे, प्रसक्ताभावे, अप्रसक्ताभावे च भवतीति सर्वत्र संज्ञा सिध्यति, तस्मादनादरग्रहणं कर्तव्यम्। असद्ग्रहणं तु शक्यमकर्तुम्। आदरानादरयोः सदित्येवास्तु, तत्र यथा गोष्पदं सेवित्यत्रासेविते गोष्पदशब्दो न संभवतीत्यगोष्पदार्थमसेवितग्रहणम्; एवमनादरेऽपि सच्छब्दो न सम्भवतीत्यसच्छब्दार्थमानदरग्रहणं भविष्यति।
सत्कृत्वा, असत्कृत्वेति। शोभनवचनो विद्यमानवचनो वा सच्छब्दः तद्विपरीतवचनोऽसच्छब्दः।।
पदमञ्जरी
भूषणेऽलम्।। 1.4.64 ।।
अलमिति प्रतिषेध इत्यादि। तद्यथा अलं--कृत्वा, अलं भोक्तुम्, अलं भुङ्क्ते, अलं करोति कन्यामिति।।
पदमञ्जरी
अन्तरपरिग्रहे।। 1.4.65 ।।
अन्तर्हत्वा, मध्ये हत्वेत्यर्थः। अन्तः शब्दस्येत्यादि। उपसर्गसंज्ञायामेवैतन्नोक्तम्--अन्तः शब्दप्रसङ्गेन वक्ष्यामीति। यदा चोपसर्गसंज्ञोच्यते; तदान्तर्णयतीत्यादिवदन्तर्हण्यात्, अन्तर्हणनमित्यादावपि `हन्तेरत्पूर्वस्य' इति णत्वं सिद्धम्। अन्तरयणमित्यत्रापि `कृत्यचः' इत्येव सिद्धमिति `अन्तरदेशे'`अयनं च' इति सूत्रद्वयमपि देशप्रतिषेधार्थं द्रष्टव्यम्।।
पदमञ्जरी
कणेमनसी श्रद्धाप्रतीघाते।। 1.4.66 ।।
कणेशब्दः सप्तमीप्रतिरूपको निपातोऽभिलाषातिशये वर्तते। मनःशब्दोऽपि साहचर्यादभिलाषावृत्तिरेव विज्ञेयः। कणेहत्येति। अतिशयेनाभिलष्य तन्निवृत्तिपर्यन्तं पिबतीत्यर्थः। तदाह--तावदिति। श्रद्धा प्रतिहन्यत इत्यर्थः। इति यावदस्येत्यपेक्षते। प्रत्युदाहरणे कणेशब्दः पूक्ष्मतण्डुलावयवोऽधिकरणभूते वर्त्तते। मनःशब्दोऽपि चेतसि।।
पदमञ्जरी
पुरोऽव्ययम्।। 1.4.67 ।।
असिप्रत्ययान्तः पुरः शब्दोऽव्ययमिति। `पूर्वाधरावाराणामसिपुरधवश्चैषाम्' इत्यसिप्रत्ययः, पूर्वशब्दस्य पुरादेशः, `तद्धितश्चासर्वविभक्ति' इत्यव्ययसंज्ञा, विसर्जनीयस्थानिकः सकार उपचारः। पुरस्कृत्येति। पूर्वस्मिन्देशे कृत्वेत्यर्थः। पूः पुरौ, पुरः कृत्वेति। एतदत्र प्रत्युदाहरणम्।
इतरयोस्तूपन्यासस्तत्साहचर्यात्पुर इति शसन्तम्, नाव्ययमिति प्रदर्शनार्थः। अत्र `नमस्पुरसोर्गत्योः' इति सत्वं न भवति, समासश्च न भवति।।
पदमञ्जरी
अस्तं च।। 1.4.68 ।।
अस्तं कृत्वेति। `असु क्षेपणे',निष्ठा, उदितो वा' `यस्यविभाषा' इति इट्प्रतिषेधः। ननु लाक्षणिकत्वादेवात्र न भवति, किमव्ययग्रहणानुवृत्त्या? एवं तर्ह्यस्तंशब्दोः अव्ययमिति ज्ञाप्यते। न ह्ययं चादिषु स्वरादिषु वा पठ्यते।।
पदमञ्जरी
अच्छ गत्यर्थवदेषु।। 1.4.69 ।।
अच्छेत्यनुकरणत्वेऽविभक्तिको निर्देशः, `सुपां सुलुक्' इति विभक्तेर्लु प्तत्वात्। अभिशब्दस्यार्थ इति। आभिमुख्ये। अच्छोद्योति। यजादित्वात् संप्रसारणम्, उदकमच्छं गच्छति, अकलुषमित्यर्थः।।

पदमञ्जरी

अदोऽनुपदेशे।। 1.4.70 ।।

उपदेशः परार्थः इति। वाक्यप्रयोग इत्यर्थाद् गम्यते। अदः- कृत्येति। एतत्कर्तव्यमिति स्वयमालोच्येत्यर्थः।।

पदमञ्जरी

तिरोऽन्तर्द्धौ।। 1.4.71 ।।

तिरोभूयेति। समासकृत्स्वरौ प्रयोजनम्। तिरोभूतमिति। भवतेरकर्मकत्वात्कर्त्तरि क्तः `गतिरनन्तरः' इत्यत्र च कर्मणीति वर्तते, तस्मात् समासथाथादिस्वरावत्र प्रयोजनम्। तिरो भूत्वेति। पार्श्वतो भूत्वेत्यर्थः।।

पदमञ्जरी

विभाषा कृञि।। 1.4.72 ।।

तिरस्कृत्येति। `तिरसोऽन्यतरस्याम्' इति सत्वम्। प्रत्युदाहरणे तु न भवति, तत्र गत्यनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात् सूत्रे विभक्त्यभावः।।

पदमञ्जरी

उपाजेऽन्वाजे।। 1.4.73 ।।

साक्षात्प्रमृतीनि च।। 1.4.74 ।।

साक्षात्प्रभृतिष्विति। असाक्षाद्भूतं यदा साक्षात्क्रियते तदा यथा स्यात् यदा यत्तु साक्षाद्भूतमेव रूपान्तरेण क्रियते तदा मा भूदित्येवमर्थम्। मिथ्याप्रभृतिष्वपि द्रष्यव्यम्। एतच्चान्तरङ्गत्वाल्लभ्यते, तथा हि--साक्षात्कृतमित्युक्ते श्रुतस्य तस्यैव रूपस्य करणं प्रतीयते, न त्वश्रुतरूपान्तरस्य।

नन्वसत्यामपि प्रकृतिविवक्षायां तस्यैव रूपस्य करणं प्रतीयते, अथ च च्व्यर्थवृत्तिता नास्ति, तस्माच्च्व्यर्थग्रहणमेव कर्तव्यम्। अथ च्व्यन्तेष्वपि साक्षादादिषु अयं विकल्पः कस्मान्न भवति? अस्तु, अनेन मुक्ते पुनः प्रसङ्गविज्ञानाद् `ऊर्यादिच्विडाचश्च' इत्येषा भविष्यति? नैवं शक्यम्, यदेतल्लवणादीनां मकारान्तत्वनिपातनं तदपि च्व्यन्तेषु स्यात्। एवं लवणादीनां मान्ता लवणादय आदेशाः करिष्यन्ते, तत्र यद्येकदेशविकृतस्यानन्यत्वाल्लवाणीशब्दस्यापि पक्षे लवणमादशः क्रियते न कश्चिद् दोषः; त्रैशब्द्यं हि नः साध्यम्--लवणंकृत्य, लवणं कृत्वा, लवणीकृत्येति, तच्चैवं सिद्धम्। वृत्तिकारस्तु `मकारान्तत्वं निपात्यते' इति वदति, स मन्यते--च्व्यन्तेषु पूर्वविप्रतिषेधेन नित्या संज्ञा भवति, विकल्पेन तु सन्नियुक्तं मान्तत्वं निपातनमिति। अग्नौ, वशेप्रभृतयो विभक्तिप्रतिरूपका निपाताः, प्रादुराविशब्दयोरूर्यादित्वात् प्राप्ते विभाषा।।

पदमञ्जरी

अनत्याधान उरसिमनसी।। 1.4.75 ।।

उरसिमनसिशब्दौ निपातौ। उरसिकृत्येति। अभ्युपगम्येत्यर्थः। मनसिकृत्य, निश्चित्येत्यर्थः।।

पदमञ्जरी

मध्ये पदे निवचने च।। 1.4.76 ।।

मघ्ये पदे निवचने च ।। अविभक्तिको निर्देशः, मध्येपदेशब्दौ निपातौ। निवचनं वचनाभाव इति। तत्र निपातनादेकारान्तत्वं न पुनरेषा सप्तमी। वाचं नियम्येति। व्याख्यानान्निपातनं चाविशेषेण, न तु संज्ञासन्नियुक्तं निवचने कृत्वेति उदाहृतत्वादित्याहुः।।

पदमञ्जरी

नित्यं हस्ते पाणावुपयमने।। 1.4.77 ।।

दारकर्मेति। अन्ये तु स्वीकरणमात्रमिच्छन्तिहस्तेकृत्य महास्त्राणीति, हस्तेपाणौ शब्दौ निपातौ।।

पदमञ्जरी

प्राध्वं बन्धने।। 1.4.78 ।।

मकारान्तमव्ययमिति। चादिषु पाठात्। आनुकूल्ये वर्तते इति। तेन बन्धने वर्तमानः प्राध्वंशब्दः इत्ययमर्थो न भवति। कथं तर्हि बन्धने इत्यस्यान्वय इत्यत आह--तदिति।

बन्धन इति। सत्सप्तम्यर्थद्वारकश्च प्राध्वमित्यनेन सम्बन्धः, बन्धने सति यदानुकूल्यं तद्बन्धनहेतुकमिति भावः।

प्राध्वं कृत्वा गत इति। प्रस्थितोऽध्वानं प्राध्वः, `अत्यादयः क्रान्ताद्यर्थे' इति समासः, `उपसर्गादध्वनः' इत्यच् लाक्षणिकत्वादेवात्र न भविष्यति; तस्मादव्ययस्यैवायं प्रयोगः, आनुकूल्यं तु बन्धनहेतुकं न विवक्षितमिति व्याचक्षते।।

पदमञ्जरी

जीविकोपनिषदावौपम्ये।। 1.4.79 ।।

जीविका=जीवनोपायः, `संज्ञायाम्' इति करणे ण्वुल्। ण्यन्ताद्वा कर्त्तरि उपिनिपूर्वात्सदेः `सत्सूद्विष' इति क्विप्, `सदिरप्रतेः' इति षत्वम्, उपनिषद्=रहस्यं वेदान्तजन्यं ज्ञानम्, वेदान्तभागो वा। आपम्य इति। उपमीयतेऽनयेत्युपमा `आतश्चोपसर्गे' इत्यङ्, तस्या भाव औपम्यम्। विषयसप्तमी चैषा, उपमानोपमेयसम्बन्धनिमित्तादभेदोपचाराद्यावुपमेयनिष्ठौ भवतः, तावौपम्यविषयौ। जीविकाकृत्य, उपनिषत्कृत्येति। जीविकामिव कृत्वा, उपनिषदमिव

कृत्वेत्यर्थः। यद्यपि गतिसमासो नित्यः, तथापीवशब्दप्रयोगे स्वार्थनिष्ठत्वादीदृशवाक्यं भवत्येव।।
पदमञ्जरी
ते प्राग्धातोः।। 1.4.80 ।।
नियमार्थमिदम्। स पुनर्नियमः संज्ञानियमो वा स्यात्, प्रयोग नियमो वा स्यात्? तत्र संज्ञानियमे तेशब्देन प्रादय उपनिषत्पर्थन्ताः स्वरूपेण परामृश्यन्ते, न गत्युपसर्गसंज्ञाविशिष्टेन रूपेणा; संज्ञयोरनिष्पादनात्। अनेनेकवाक्यतापन्नैः पूर्वसूत्रैस्तयोर्विधानात्। ते प्रादय उपनिषत्पर्यन्ता धातोः प्रागेव प्रयुज्यमाना गत्युपसर्गसंज्ञा भवन्तीत्यर्थः। प्रयोगनियमे तु लब्धगत्युपसर्गसंज्ञाः परामृश्यन्ते। ते गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोक्तव्या इत्यर्थः।
तत्राद्ये पक्षे स्वरूपेण परामर्शः प्रादीनामिव चादीनामपि स्यात्, ततश्च निपातसंज्ञाया अपि नियमः स्यात्। अथापि गत्युपसर्गसंज्ञयोरेव नियमः, एवमप्यनर्थकं वचनम्, प्रयोग एव हि तेषामप्राङ् नेष्यते। न पुनरप्राक् प्रयुज्यमानानां संज्ञायां किञ्चिदनिष्टमापद्यते। `छन्दसि परेऽपि' व्यवहिताश्च' इति रूपद्वयं चानर्थकम्,परव्यवहितानां संज्ञैव निषिद्धा, न तु प्रयोगः। न च तेनापि संज्ञैव विधीयते, निष्प्रयोजनत्वात्। किंच `अनुकरणं चानितिपरम्' इत्यनितिपरग्रहण मनर्थकं स्यात्, `खाडिति कृत्वा निरष्ठीवत्' इत्यत्र व्यवहितस्यानुकरणस्य गतिसंज्ञैव निषिद्धा, प्रयोगस्तु केन वार्यते! प्रयोगनियमे तु धातोः प्रागेवानुकरणस्य प्रयोगः स्याद्, न त्वितिशब्देन व्यवहितस्येति अनितिपरमिति वक्तव्यम्। अतः प्रयोगनियम एवायं युक्त इति मत्वाह--ते गत्युपसर्गसंज्ञका इति।
अथास्मिन्नपि पक्षे निपातानामपि तेशब्देन परामर्शः कस्मान्न भवति? व्यवहितत्वात्। कथं तर्ह्युपसर्गाणां परामर्शः, नोपसर्गास्तेन रूपेण परामृश्यन्ते, किं तर्हि? गतिरूपेण, तेषामपि गतित्वात्। अनेनैवाभिप्रायेण वृत्तावुपसर्गाणां पृथग् ग्रहणम्। चादयस्तु नैवमिति न ते परामृश्यन्ते। ननु यत्र लोके संकीर्णः प्रयोगः- गौर्गावीति, तत्र साधुपरिज्ञानाय शास्त्रमर्थवत्। यत्र त्वसंकीर्ण एव प्रयोगो न तत्र शास्त्रकृत्यमस्ति; न च कश्चित् प्रपचतीति प्रयोक्तव्ये पचतीति प्रेति प्रयुङ्क्ते। यद्यपि लोके प्रयोगो न दृश्यते विपरीतः, छन्दसि तु परव्यवहितप्रयोगदर्शनाद् भाषायामपि तथा प्रयोगः शङ्क्येत, दर्शितश्चाद्यत्वेऽपि भाषायामेव गतेराविःशब्दस्य परव्यवहितप्रयोग ऊर्यादिसूत्रे। किं च `उदि कूले रुजिवहोः' कूलमुद्वह इत्यत्र `उदि' `कूल' इति द्वयोरपि सप्तमीनिर्देशादुपपदत्वात्समासे कृते `उपसर्जनं पूर्वम्' इति शास्त्रवशात्पर्यायेण पूर्वनिपातं मन्येरन् इत्युपसर्जनसंनिपाते पूर्वपरव्यवस्थार्थमिदं वक्तव्यम्। यद्येवम्, `कर्तृकर्मणोश्च भूकृञोः'- सुखेन कटः क्रियते, सुकटंकराणि वीरणानि, दुष्कटंकराणि, अत्र सुदुसोः प्राग्धातोः प्रयोगः प्राप्नोति--कटं सुकराणीति। खलः खित्करणमिदानीं किमर्थं स्यात्? अनव्ययस्य हि मुमुच्यते, खित्करणसामर्थ्याद् अव्ययस्य भवतु, यदि वा `कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति सुकरशब्दे परतः कटस्य भविष्यति, कर्त्तव्योऽत्र यत्नः।
धातुग्रहणमनर्तकम्, कुतः? प्रागित्यपेक्षायां यत्क्रियायुक्ताः प्रादयस्ततः प्रागिति विज्ञास्यते; नैवं शक्यम्, इह च कर्तुं प्रेच्छति प्रचिकीर्षतीति सन्वाच्यया इच्छया प्रशब्दस्य योग इति सन एव प्राक् प्रशब्दः प्रयुज्येत, धातुग्रहणात् तु धातोरेव चिकीर्षतेः प्राक् प्रयुज्यते।
तेग्रहणमुपसर्गार्थमिति। ननु यदि गतिसंज्ञारहिताः केवलोपसर्गसंज्ञा एव प्रादयः स्युः, ततोऽसति तेग्रहणे गतीनामनन्तरत्वात्त एव संबध्येरन्, न तूपसर्गा इति तदर्थं तेग्रहणं कर्तव्यम्? तेऽपि तु गतिसंज्ञकाः, ततश्चानन्तराणां गतीनामपि सम्बन्धे प्रादीनामपि गतित्वादेव ग्रहणं सिद्धम्। स्यादेतत्--असति तेग्रहणे गतिसंज्ञैव केवला येषाम्, तेषामेव स्याद्; नोभयसंज्ञकानां प्रादीनामिति? न; केवलगतेरभावात्। ननु चायमस्ति `अनुकरणं चानिति परम्' इति, न; तस्यापि निपातत्वात्, उच्यते; असति तेग्रहणे प्रकृतेष्वपेक्षा चेत् कतिपये संबध्येरन्; नोपसर्गपर्यन्ताः। व्याप्तिन्यायात्तु भूयसामपेक्षायां न प्रादिष्वेव पर्यवसाने कारणमस्तीति चादयोऽप्यपेक्ष्येरन् । तेग्रहणे तु सति गतिसंज्ञाया अनन्तरत्वात्तेन रूपेण परामर्शो न कतिपयानामेव भवतीति प्रादीनपि व्याप्नोति, चादींश्च परिसंचष्टे इति तेग्रहणमुपसर्गार्थं भवति। तत्पर्यन्तानां च यथा स्यात् तेषामेव च यथा स्यादित्यर्थः। गतयो ह्यनन्तरा इति। येऽनन्तरास्त एव कतिपये गृह्येरन्, प्रत्यासत्ताविति भावः। व्याप्तौ तु दोषः सुज्ञानत्वान्न कण्ठोक्तः।।
पदमञ्जरी
छन्दसि परेऽपि ।। 1.4.81 ।।
न च परेषामिति। नच `गतिर्गतौ' इत्यस्यापि सम्भवः, परभूतानामेकाकिनामेव दर्शनादिति मन्यते।।
पदमञ्जरी
व्यवहिताश्च।। 1.4.82 ।।
दिक्छब्दानामव्यवहिते मुख्या वृत्तिरिति प्राक् परस्ताच्च व्यवहितानां प्रयोगार्थमिदं वचनम्। अत एव भाषायां व्यवहितानामप्रयोगः। कथं तर्हि गतिव्यवाये प्रयोगः-अभ्युद्धरति, समुदाहरतीति? न तुल्यजातीयं व्यवधायकं भवति, तद्यथा--किमनन्तरे एते ब्राह्मणकुले इति पृष्टः सन्नाह--नानन्तरे, वृषलकुलमनयोर्मध्य इति विजातीयं व्यवधायकं निर्दिशति, जातेर्वा समाश्रयणान्नास्ति व्यवधायकत्वम्। एवं च गतिरनन्तरग्रहणम्, `गतिर्गतौ' इति वचनम्, `अभिप्रैति' इतिनिर्देशश्चोपपन्नो भवति।।
पदमञ्जरी
कर्मप्रवचनीयाः।। 1.4.83 ।।
वक्ष्यामाणानां संज्ञिनां बहुत्वाद्बहुवचनम्, यथा--निपाताः, कृत्या इति। क्वचितु सामान्यविवक्षयैकवचनम्, `गतिश्च',`प्रत्ययः'`कृत्' इति।
महासंज्ञाकरणमन्वर्थसंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थम्--कर्म=क्रियां प्रोक्तवन्तः कर्मप्रवचनीया इति। भूते `कृत्यल्युटो बहुलम्' इति कर्त्तरि कृत्यः। के च कर्म

प्रोक्तवन्तः? ये प्रयुज्यमाने क्रियापदे--`अनुभूयते कम्बलः' इत्यादौ क्रियाविशेषं द्योतितवन्तः, न संप्रति क्रियाविशेषं द्योतयन्ति, किं तर्हि? सम्बन्धविशेषम्, तद्यथा--शाकल्यस्य संहितामनुप्रावर्षदिति। न ह्यत्रानुरनुभूयते इत्यादाविव क्रियाविशेषं द्योतयति, क्रियापदाभावात्; नापि षष्ठीवत्सम्बन्धमाचष्टे--संहितामिति; द्वितीयायास्तदर्थत्वात्। नापि क्रियापदमाक्षिपति, यथा--प्रादेशं विपरिलिखतीति, विशब्दो विमानक्रियां प्रादेशं विमाय परिलिखतीति । तथा हि--सति प्रादेशमितिवत् कारकविभक्तिप्रसङ्गः, शेषसम्बन्धस्य वा प्रतीतिप्रसङ्गः। तदेवमनुः संहिताप्रवर्षणयोर्यः शेषसम्बन्धो द्वितीयाभिहितस्तं विशेषेऽवस्थापयति। हेतुहेतुमद्भावेन रूपेण विशिष्टक्रियाजनितत्वेन वा सम्बन्धस्य तत्संनिधौ सम्प्रत्ययात् संहितामनुनिशम्य प्रावर्षदिति। उक्तं च--
क्रियाया द्योतको नायं न सम्बन्धस्य वाचकः।
नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः।। इति।
क्वचित्तु प्रवृत्तिनिमित्ताभावेऽपि वचनसामर्थ्यादियं संज्ञा प्रवर्तते, यथा--`सुः पूजायाम्' `अतिरतिक्रमणे च इति।।
पदमञ्जरी
अनुर्लक्षणे।। 1.4.84 ।।
यावतेति। यावताशब्दो निपातो नन्वित्यर्थे। अन्येत्यर्थ इत्यन्ये। लक्षणेत्थम्भूताख्यानेतिष सिद्धेति। तत्र चावश्यमनोर्ग्रहणं कर्तव्यमिर्त्थभूताख्यानादिषु याथा स्यात्। लक्षणग्रहणं च प्रत्याद्यर्थम्, अतोऽर्थान्तरसंज्ञान्तरसंज्ञान्तरसाधारणत्वात्तदेवास्तु, इदं तु न कर्तव्यमिति भावः। हेत्वर्थन्त्विति । तु शब्दः पक्षं व्यावर्तयति। हेतुः= करणम्, अर्थः= प्रयोजनं प्रयोजकोऽस्य वचनस्येत्यर्थः। ननु च तत्र चात्र च लक्षणग्रहणमेव क्रियते, तद्यदि हेतुर्लक्षणं न भवति, इहापि न गृह्यते, अथ भवति तत्रापि नार्थ एतेन? तत्राह--हेतुतृतीयामिति। सत्यम्; लक्ष्यतेऽनेन तल्लक्षणम्= चिह्नं ज्ञापकम्, कारणमपि नियतं कार्यविशेषावगतिहेतुत्वाद् लक्षणं भवत्येव। उक्तं भाष्ये--लक्षणेन हेतुरपि व्याप्तो नावश्यं तदेव लक्षणं येन पुनः पुनर्लक्ष्यते,किं तर्हि? यत्सकृदपि निमित्तत्वाय कल्पते पदपि लक्षणमिति। किन्तु येन नाप्राप्तिन्यायेन कर्मप्रवचनीययुक्ते द्वितीया षष्ठ्या एवापवादः। ततश्च लक्षणेत्थंभूतेत्यनोर्लक्षघणे कर्मप्रवचनीयसंज्ञाया अवकाशो यो हेतुर्न भवति-वृक्षमनुविद्योतते, हेतुतृतीयाया अवकाशः- धनेन कुलमिति; हेतुभूते तु लक्षणे उभयप्रसङ्गे परत्वात् तृतीया स्यात्, तामपि बाधित्वा द्वितीयैव यथा स्यात्। पुनः संज्ञाविधाने कक्षान्तरप्राप्तत्वाद् द्वितीयैव तृतीया बाधते। उक्तं च--
हेतुहेतुमतोर्योगपरिच्छेदोऽनुना कृते।
आरम्भाद्बाध्यते प्राप्ता तृतीया हेतुलक्षणा।। इति।
`तृतीयार्थ' इत्यनेन तु पुरस्तादपवादन्यायेन `सहयुक्तेऽप्रधाने' इत्यस्यैव बाधः, न हेतुतृतीयाया इति वक्तव्यमेतत्।।
पदमञ्जरी
तृतीयार्थे।। 1.4.85 ।।
नदीमन्ववसितेति। सहार्थोऽत्र तृतीयार्थः। अन्ववपूर्वात्`षिञ् बन्धने' इत्यस्मात् कर्त्तरि क्तः।।
पदमञ्जरी
हीने।। 1.4.86 ।।
हीनेत्कृष्टसम्बन्धे संज्ञेति। कर्मप्रवचनीयविभक्तिस्तु तेन व्यतिरिच्यमान उत्कृष्ट एव भवति, न हीने, अभिधानाशक्तिस्वाभाव्यात् नोभाभ्यामेकयैव द्वितीयया द्विष्ठस्यापि सम्बन्धस्याभिधानात् षष्ठीत्।।
पदमञ्जरी
उपोऽधिके च।। 1.4.87 ।।
अत्राप्यधिकिना विनाधिकस्यासम्भावद् अधिकाधिकिसम्बन्धे संज्ञा विधीयते। विभक्तिरप्यधिकिन एव भवति, नाधिकात्। उपखार्यो द्रोण इति। खारशब्दो गौरादिः, खारी तावदस्ति, अधिकोऽपि तस्यां द्रोणोऽस्तीत्यर्थः। `यस्मादधिकम्' इति सप्तमी।।
अपपरी वर्जने।। प्रकृतेन वाक्ये प्रतिपाद्यमानेनेत्यर्थः। परिपरित्रिगर्त्तेभ्य इति `पञ्चम्यपाङ्परिभिः' इति पञ्चमी, `परेर्वर्जने' इति द्विर्वचनम्, कर्मप्रवचनीयेन पञ्चमीसहितेन द्योतितेऽपि वर्जने भवति, उभयोरपि विधानसामर्थ्यात्। परिषिञ्चतीति। परिः सर्वतो भावे, अत्रास्याः संज्ञाया अभावाद् उपसर्गत्वे सति `उपसर्गात्सुनोति' इति षत्वं भवति, `शे मुचादीनाम्' इति नुम्।।
पदमञ्जरी
आङ् मर्यादावचने।। 1.4.89 ।।
मर्या मरणधर्माणो मनुष्याः, औणदिको यप्रत्ययः, तैरादीयते मर्यादा, `आतश्चोपसर्गे' इत्यङ्प्रत्ययः। अवधिर्मर्यादेति। ननु यत्रावधिः कार्येण युज्यते सोऽभिविधिः, यत्र न सा मर्यादा; अवधिस्तु साधारणं तत्काथमवधिर्मर्यादा? नायमत्रार्थो योऽवधिः सा सर्यादेति, किं तर्हि? या मर्यादा सोऽवधिरित्यर्थः। वचनग्राणदिति। इह मर्यादायामिति वाच्ये वचनग्रहणं क्रियते, तस्यैतत्प्रयोजनमेवं यथा विज्ञायेत--उच्यतेऽस्मिन्निति वचनम्, मर्यादाया वचनमिति कर्मणि षष्ठ्याः समासः। मर्यादाशब्दो यत्रोच्यते `आङ्मर्यादाभिविध्योः' इति तस्याङो ग्रहणम्, स चाभिविधिवृत्तिरपीत्यत्राप्यभिविधेर्ग्रहणं भवति।
यद्वा--वचनग्रहणसामर्थ्यादवान्तरभेदो न विवक्ष्यते, अवधिमात्रं गृह्यते। आ मथुराया इति। वृष्टो देव इत्यपेक्ष्यते, `मन्थ विलोडने' औणादिकः कुरच् प्रत्ययः। ईषदर्थे क्रियायोगे च मा भूदिति। वाक्यस्मरणयोस्त्वङित्त्वादेवाप्रसङ्गः, तत्रेषदर्थे आ कडारः पञ्चमी न भवति, क्रियायोगे समाहार इति `गतिर्गतौ' इति

निघातो भवति।।
पदमञ्जरी
लक्षणेत्थंभूताख्यानभागवीप्ससु प्रतिपर्यनवः।। 1.4.90 ।।
लक्ष्यते येन तल्लक्षणम्= चिह्नं ज्ञापकम्। अयं प्रकार इत्थम्, प्रथमान्तादिदमस्थमुः इह त्विदमा प्रत्यवमृश्यस्य सन्निहितस्य कस्यचिदभावात्प्रकारविशेषमात्रवृत्तिरित्थंशब्दः। `भू प्राप्तौ' आत्मनेपदी, `आ धृषाद्वा' इति णिजभावपक्षे गत्यर्थत्वात्कर्तरि क्तः। तत इत्थंशब्दादव्ययादपि वृत्तिविषये सत्त्वधर्मोपादानात्कर्मणि द्वितीया, श्रितादिषु गम्यादीनामिति सामसः, कञ्चित् प्रकारं प्राप्त इत्थंभूतः, इत्थंभूतस्याख्यानमित्थंभूताख्यानम्। स्वीक्रियमाणोंऽशो भागः, यस्त्वंशमात्रे प्रयोगः प्रियङ्गोर्भाग इति स भागसादृश्यात्। व्याप्तुमिच्छा वीप्सा, सा चाष्टमे स्षष्टयिष्यते, एते लक्षणादयो यथा विभक्तिसमीपादयोऽव्ययार्था नेवं प्रत्यादीनामर्थाः, किं तर्हि? संज्ञायाः प्रत्यादीनां विषयत्वेन निर्दिष्टाः इत्याह--वीप्सायां च विषयभूतायामिति। एतच्च लिङ्गविपरिणामेन लक्षतणादिभिरपि सम्बन्धनीयम्। वृक्षं प्रतीति। अत्र वृक्षो लक्षणं विद्योतनस्य, प्रत्यादयस्तु प्राप्तिक्रयाजनितो लक्ष्यलक्षणभाव इत्येवं सम्बन्धविशेषेऽवस्थापयन्ति--वृक्षं प्राप्य विद्योतते, वृक्षे प्रदेशे विद्योतत इत्यर्थः। साधुरिति। अत्रापि प्राप्तिक्रियाजनित एव विषयविषयिभावसम्बन्धः, यथा वृक्षे दृष्टे विद्योतनं लक्ष्यते, नैवमत्रासाधुत्वापत्तिरितीत्थम्भूताख्यानग्रहणम्। यदत्र मामिति। यो मम भागः स दीयतामित्यर्थः। अत्र स्वीकरणक्रियाजनितः स्वस्वामिसम्बन्धः। वृक्षं वृक्षमिति। वीप्सा द्विर्वचनेन द्योत्यते। परिशब्दस्तु क्रिययैव सम्बध्यते, द्वितीया चेह कर्मणि। कर्मप्रवचनीयसंज्ञा तूपसर्गसंज्ञा--निवृत्त्यर्था तेन `उपसर्गात्सुनोति' इति षत्वं न भवति। अशब्दसाहचर्यादिति। परिशब्दोऽयं दृष्टापचारो वर्जने चावर्जने च कर्मप्रवचनीयः। अपशब्दस्तु वर्जने एव। कर्मप्रवचनीयाधिकारे पञ्चमी विधीयते, तत्र साहचर्यं व्यवस्थाहेतुः।।
पदमञ्जरी
अभिरभागे।। 1.4.91 ।।
अभागइति किमिति। अभिधेयं प्रयोजनं च परिज्ञातुं प्रश्नः। अत एवोभयं दर्शयति । भागः स्वीक्रियमाणोंऽशः। यदत्र ममाभिष्यादिति। ननु अन्वर्थसंज्ञाविज्ञानादेवात्र न भविष्यति, संप्रत्येव ह्यसौ विभजनक्रियां द्योतयति? प्रत्यादीनामपि तर्हि न स्याद्? वचनाद्भविष्यति। अभेरपि तर्हि प्राप्नोति, तस्माद् `अभागे' इति वक्तव्यम्, तत्रोपसर्गत्वात् `उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' इति षत्वम्। अथैवं कस्मान्न कृतम्--`लक्षणेत्थंभूताख्यानवीप्सास्वभिः, प्रतिपरी भागे च, चकाराल्लक्षणादिषु च, अनुर्लक्षणतृतीयार्थयोश्च, चकाराद्भागे लक्षणादिषु च, ततो हीने, उपोऽधिके च'; इत्येवं हि द्विरनोर्ग्रहणम्, अभाग इति च न वक्तव्यं भवति। एवं हि द्विश्चग्रहणं क्रियते इति पदयोः साम्यम्, अक्षरलाघवं तु नादृतम्।।
पदमञ्जरी
प्रतिः प्रतिनिधिप्रतिदानयोः।। 1.4.92 ।।
मुखसदृश इति। मुख्यः क्वचित्कार्ये शत्रुवधादौ दृष्टसामर्थ्यः। यस्तु तदभावे तत्कार्यकरणाय प्रतिनिधीयते उपादायते स प्रतिनिधिः, कर्मणि किप्रत्ययः। दत्तस्येति उत्तमर्णेन । प्रतिनिर्यातनमिति। प्रत्यर्पणम्। अर्जुनतः प्रतीति। `प्रतिनिधिप्रतिदाने च यस्माद्' इति पञ्चमी, प्रतियोगो पञ्चम्यास्तसिः। माषानिति। तिलान् गृहीत्वा माषान् ददातीत्यर्थः।।
पदमञ्जरी
अधिपरी अनर्थकौ।। 1.4.93 ।।
ननु चानर्थकयोः क्रियायोगाभावाद् गत्युपसर्गसंज्ञयोः प्राप्त्यभावान्न तद्बोधनार्थं कर्मप्रवचनीयसंज्ञाविधानमुपपद्यते, नापि परिशब्दयोगे पञ्चमीविधानार्थम्, तद्विधौ वर्जनार्थस्य ग्रहणाद्। अपादानत्वाच्च सिद्धा पञ्चमी, यथाऽधिशब्दस्य प्रयोगे--कुतोऽध्यागच्छतीति। अत एव द्वितीयाविधानार्थमपि नोपपद्यते; तस्मादनर्थकयोः संज्ञाविधानमनर्थकमित्यत आह--अनर्थान्तरवाचिनाविति। यथा तिष्ठति, नितिष्ठति, परिभवतीत्यादौ धातूपात्तादर्थादर्थान्तरवाचित्वम्, नैवमत्रार्थान्तरवाचित्वम्; किन्त्वागच्छतीति प्रयोगे योऽर्थः स एवाधिपरियोगे ताभ्यामुच्यते तदत्र विषये धातोरधिपर्योश्च सहाभिधायित्वम्; यथागजशब्दे योऽर्थः स एव मतङ्गज इति सर्वैः सहाभिधीयते। एवं वृषशब्दे योऽर्थः स एव वृषभशब्दे। तदेवमनर्थान्तरवाचित्वादनर्थककल्पत्वादनर्थकावित्युक्तम्, न त्वभावात्। तयोश्च गतिसंज्ञाबाधाय कर्मप्रवचनीयसंज्ञा विधेयेति दर्शितं भवति। कुतोऽध्यागच्छतीति। किंशब्दात् `अपादाने चाहीयरुहोः' इति तसिः, तस्य `तसेश्च' इति तसिलादेशः, `गतिर्गतौ' इति निघाताभावः।।
पदमञ्जरी
सुः पूजायाम्।। 1.4.94 ।।
सुसिक्तं भवतेति। भवच्छब्दात्कर्त्तरि तृतीया। कर्मप्रवचनीययुक्ते द्वितीया न भवति; `उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति। सुषिक्तं किं तवात्रेति। क्षेपोऽयम्, न पूजा।।
पदमञ्जरी
अतिरतिक्रमणे च।। 1.4.95 ।।
पदमञ्जरी
अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु।। 1.4.96 ।।

पदान्तरस्येत्यादि। स्वार्थस्तावदव्यभिचारान्न गृह्यते इति पदान्तरस्यार्थः पदार्थः। तत्रापि पदान्तरप्रयोगे सत्यपिः प्रयुज्यमानस्तदर्थे कञ्चिद्विशेषमाधत्ते। यथा--नीलशब्द उत्पले, न तु तस्मिन्नेवान्यूनानतिरिक्ते वर्तते; तथा सति पर्यायत्वप्रसङ्गेनाप्रयोगार्हत्वात्। अतः पदान्तरस्याप्रयोग एव तदर्थे प्रवृत्तो भवतीति भावः। सर्पिषोऽपि स्यादिति। प्रार्थनायां लिङ्, तस्या एव दुर्लभविषयतामपिशब्दो द्योतयन् स्यादित्यनेन सम्बध्यते इति षत्वप्रसङ्गः, दुर्लभत्वं च विषयस्यैव भवति, यदि तस्या बिन्दुमात्रमपि न लभ्यत इत्यत्रापिशब्दसामर्थ्याद्बिन्दुरिति गम्यते, तदाह--मात्राबिन्दुस्तोकमित्यस्यार्थेऽपिशब्दो वर्त्तत इति। तदुपजनिते च व्यतिरेके सर्पिष इति षष्ठी। द्वितीया तु न भवति, अपिना योगाभावात्। स हि स्यादित्यनेन सम्बध्यत इत्युक्तम्। अधिकार्थवचनेनेति तत्सम्भावनमित्यर्थः। अपि सिञ्चेदिति। सम्भावने लिङा तस्यैव दुष्करविषयतामपिराह। कामचार इच्छाप्रवृत्तिः। अपि सिञ्चेदेति । सिञ्च वा मा वा, स्तुहि वा मा वा, यथेष्टं कुर्वित्यर्थः। जाल्मोऽपशब्दः। अपि सिञ्चेदिति। गर्हार्थे लिङ्। उपसर्गसंज्ञाबाधनादिति। स्यादित्यत्र `उपसर्गप्रादुर्भ्याम्' इति सिचः `उपसर्गात्सुनोति' इति षत्वप्रसङ्गः।।

पदमञ्जरी

अधिरीश्वरे।। 1.4.97 ।।

तदयमिति। यथा `हीने इत्यत्र हीनोत्कृष्टसम्बन्धे संज्ञा, `उपोऽधिके च' इत्यत्राधिकाधिकिसम्बन्धे, तथात्रापीत्यर्थः। विभक्तिस्तु तत्रान्यतरस्मादुच्यते, इह तु न तथेत्याह--तत्र कदाचिदिति। `यस्य चेश्वरवचनम्' इत्यत्रार्थद्वयम्--ईश्वरशब्दो भावप्रधानः, यस्य स्वस्येश्वर उच्यते तम्मात्स्वात्सप्तमीत्यपरः। तत्र यदा स्वाम्यर्थे व्यतिरेकविवक्षा तदा ततः सप्तमी, स्वस्य तु व्यतिरेके तत इति। न पुनरुभाभ्यां युगपद्भवति, एकयैव विभक्त्या द्विष्ठस्यापि सम्बन्धस्याभिधानादिति मत्वा `कदाचिद्' इत्यक्तम्। ब्रह्मदत्त इति। ब्रह्मदत्तस्य स्वाः पञ्चाला इत्यर्थः। आधपञ्चालेष्विति। पञ्चालनां ब्रह्मदत्तः स्वामीत्यर्थः।।

पदमञ्जरी

विभाषा कृञि।। 1.4.98 ।।

`अधिरीश्वरे' इत्यनुवृत्तेः प्राप्ते विभाषेयम्। यदत्र मामधिकरिष्यतीति। अधिपूर्वः करोतिर्विनियोगे वर्तते, यथा--अधिकृतोऽयमिह ग्रामे। `स्वरितेनाधिकारः' इति च, ईश्वरो भवत्येवमत्र मां विनियोक्ष्यत इत्यर्थः। कर्मणि द्वितीयैषा। यद्येवम्, संज्ञाविधानस्य किं प्रयोजनं तत्राह--कर्मप्रवचनीयसंज्ञापक्ष इति। `निपातैर्यद्यदि' इति निघातप्रतिषेधात् स्यप्रत्ययस्वरेण तिङन्तमुदात्तवत्।।

पदमञ्जरी

लः परस्मैपदम्।। 1.4.99 ।।

ल इति षष्ठीति। अथ प्रथमाबहुवचने को दोषः, `आमः' इति लावस्थायामेव लुप्यमानस्य लिटः संज्ञा स्यात्। ततश्चेक्षामित्यत्राम्न स्याद्, न ह्यतो लिट्परः सम्भवति, शेषादेव, शेषादेव परस्मैपदमिति नियमात्? ज्ञापकात् सिद्धम्, यदयमाम्प्रत्ययवदित्याह, तज् ज्ञापयति--भवत्यात्मनेपदिभ्योऽप्यामिति। अयं तर्हि दोषो लकारस्यैव संज्ञा स्यान्न तदादेशानां तिबादीनामिति? स्थानिवद्भावात्तेषामपि भविष्यति। `तङानावात्मनेपदम्' इत्यत्र तर्हि `ल' इति प्रथमान्तस्य तङानाभ्यां सम्बन्धो न स्यात्, न हि तङानौ लौ भवतः। ननु चैवं विज्ञास्यतेतङानभावी लकार एव, तङानावित्यक्त इति। एवमपि गत्यन्तरे सति न क्लिष्टकल्पना युक्ता, तस्मात् `लः' इति षष्ठी। आदेशापेक्षेति। न च संज्ञापेक्षा, लकारस्य परस्मैपदमिति संज्ञा भवतीति, कुतः? सामानाधिकरण्येन प्रायेण संज्ञाविधानात्। किञ्च--जसि यो दोषः, सोऽस्मिन्नपि स्यात्; उभयत्र लकारस्य संज्ञित्वात्। तस्मादादेशापेक्षा षष्ठी। यद्येवम्, अनवकाशा पुरुषसंज्ञा परस्मैपदसंज्ञां शतृक्वसोः सावकाशां बाधेत। जसि तु लकारस्य परस्मैपदसंज्ञा तिङां तु पुरुषसंज्ञेति भिन्नविषयत्वान्नास्ति बाधप्रसङ्गः। यद्यपि जस्पक्षेऽपि तिबादीनामादेशानामपि `स्थानिवदादेशः' इत्यनेन परस्मैपदसंज्ञा भविष्यति; तथापि तस्या अनाकडारीयत्वात्समावेशसिद्धिः। षष्ठीपक्षेऽपि ज्ञापकात्सिद्धम्, यदयम् `सिचि वृद्धिः परस्मैपदेषु' इत्याह, तज् ज्ञापयति--भवति तिङामप्येषा संज्ञेति। न हि सिज्विषये शतृक्वसू सम्भवतः, सामान्यापेक्षं च ज्ञापकमिति आत्मनेपदसंज्ञया पुरुषसंज्ञानां समावेशसिद्धिः, अन्यथा परस्मेपदेषु सावकाशाः पुरुषसंज्ञाः तङ्क्ष्वनवकाशयात्मनेपदसंज्ञया बाध्येरन्। अथ वा--पुरुषसंज्ञायां परस्मैपदात्मनेपदग्रहणानुवृत्तेरयमर्थो भवति, लटः परस्मैपदात्मनेपदसंज्ञकाः सतस्त्रीणि त्रीणि पदानि भूत्वा प्रथमादिसंज्ञा भवन्तीति तेन समावेशसिद्धिः।।

पदमञ्जरी

तङानावात्मनेपदम्।। 1.4.100 ।।

अथ कस्माल्लस्येत्यस्यानन्तरमेते संज्ञे न विहिते, एवं हि पुरुषसंज्ञाभिरन्यत्रसिद्धोऽनयोः समावेशो भवति, तत्राह--पूर्वेणेति। आत्मनेपदसंज्ञया परस्मैपदसंज्ञाया बाधो यथा स्यादित्येवमर्थमस्मिन् प्रकरणेऽनयोर्विधानमिति भावः। महासंज्ञाकरणं पूर्वाचार्यानुरोधेन।।

पदमञ्जरी

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः।। 1.4.101 ।।

त्रीणि त्रीणीति वीप्सायां द्विर्वचनम्। तत्र च समुदायस्यावयवस्च पृथक्पदत्वमिष्यते, आ पचसि पचसि देवदत्तेत्येकान्तता यथा स्यात्, कुण्डं कुण्डं वाग् अपचन्नपचन्नित्यादौ पूर्वपदेऽप्यनुस्वारादि पदकार्यं यथा स्यादिति; तेन पदच्छेदकाले त्रीणित्रीणीत्येकं पदम्, द्वे वा। इह तिङां त्रिकाः संज्ञास्तु तिस्त्र इति वैषम्यात् संख्यातानुदेशो न प्राप्नोति। अत्र यद्यप्येकैकस्य त्रिकस्यानेकसंज्ञाविधाने प्रयोजनं नास्ति, नैतावता यथाभिमतविषयलाभः, तत्राह--तिङोऽष्टादश प्रत्यया इति।

एवं मन्यते--संज्ञा अपि षडेव, कथमेकशेषनिर्देशोऽयम्? तत्र यदि प्रथमश्च प्रथमश्च प्रथमौ, मध्यमश्च मध्यमश्च मध्यमौ, उत्तमश्च उत्तमश्चोत्तमौ; प्रथममध्यमोत्तमा इति कृतैकशेषाणां द्वन्द्वः क्रियेत, ततो नाभिमतसंख्यातानुदेशः स्यात्। तस्मात्कृतद्वन्द्वानामेकशेषः-प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमाश्च प्रथममध्योत्तमा इति। न चैवमपि विज्ञायते, किमादित आरभ्य त्रीणि वचनानि गृह्यन्ते? आहोस्विदिच्छतस्त्रिकपरिग्रहेऽपि यथासंख्यशास्त्रं क्रमते, किं तर्हि? विहितेषु संज्ञानां क्रमेण सम्बन्धं विधत्ते। एवं तर्हि लोकत एतत्सिद्धम्, तद्यथा--विहव्यस्य द्वाभ्यामग्निरुपस्थेय इति, न चोच्यते आनुपूर्व्यणेति, अथ च विहव्याख्यस्य सूत्रस्यादित आरभ्य आनुपूर्व्येण द्वाभ्यां द्वाभ्यामृग्भ्यामग्निरुपस्थीयते, न याभ्यां काभ्याञ्चित्; तत्र तिङोऽष्टादश प्रत्यया इत्यनेनादित आरभ्य त्रिकाणामानुपूर्व्येण ग्रहणं नेच्छात इति दर्शयितुं तिङ्ग्रहणेन संनिवेशोऽस्तीति दर्शितम्। न च `परस्मैपदसंज्ञकः' इत्यादिना तु कृतद्वन्द्वानामेकशेषो न कृतैकशेषाणां द्वन्द्व इति दर्शितम्। यदि वा परस्मैपदग्रहणमात्मनेपदग्रहणं चानुवर्तते, तिङ्ग्रहणं तु सतृक्वसोर्निवृत्त्यर्थम्। तदनुवृत्तौ च द्वौ राशी भवतः, तयोश्च व्यापारभेदेन सूत्रमेतत्प्रवर्तते। तत्र चैकैकं त्रयस्त्रिका इति। यथासंख्यसिद्धिः। तत्र न चेत्यादिना राशिद्वयं द्वर्शितम्। तत्रेत्यादिना तु व्यापारभेदः। अत्रापि महासंज्ञाकरणं पूर्ववत्।।

पदमञ्जरी

तान्येकवचनद्विवचनबहुवचनान्येकशः।। 1.4.102 ।।

एकश इति। `संख्यैकवचनाच्च वीप्सायाम्' इति प्रथमान्ताच्छस्। प्रकृतत्वादेव त्रीणीत्यस्य सम्बन्धे सिद्धे तानिवचनं पुरुषवचनसंज्ञयोः समावेशार्थम्, अन्यथा ह्येकसंज्ञाधिकारे वचनप्रामाण्यात्पर्यायः स्यात्, ततश्च `आडुत्तमस्य पिच्च' `नित्यं ङितः' इति कार्यं वचनसंज्ञापक्षे उत्तमसंज्ञाया अभावान्न स्यात्। तानीत्यस्मिंस्तु सति तान्येतानि प्रथमादिसंज्ञाविशिष्टानि त्रीणित्रीणीत्येवं परामर्शाल्लब्धप्रथमादिसंज्ञाविधानाद् भवति समावेशः।

ननु त्रिकाणां पुरुषसंज्ञा एकैकस्य वचनसंज्ञेति विषयभेदान्नायमेकसंज्ञाधिकारविषयः, तन्न; यथा वृद्धिसंज्ञा प्रत्येकमादैचां भवति, तथा पुरुषसंज्ञापि त्रीपित्रीणीति वचनात् त्रिषु प्रवर्तमानापि तिबादिषु प्रत्येकमेव प्रवर्त्तते, न समुदाये; तस्य प्रयोगेऽभावात्, प्रत्येकमेव तेषां धातोरुत्पत्तेः। त्रिग्रहणं तु मर्यादार्थमादित आरभ्य त्रयाणां प्रथमसंज्ञा भवतीति, न पुनः समुदाये संज्ञाप्रवृत्तर्थं तानि तिङस्त्रीणित्रीणि पदानि भूत्वेति। तिबादिसूत्रे समाहारद्वन्द्वेऽष्टादशावयवपदानि तिङ्शब्दस्य त्रीणित्रीणीति समानाधिकरणस्यापि पुंल्लिङ्गतापि सूत्रवद्भवति।।

पदमञ्जरी

सुपः।। 1.4.103 ।।

सुबिति प्रत्याहारग्रहणं प्रथमैकवचनादारभ्य सुपः पकारात्। कपस्तु पकारेण न भवति, प्राग्दिशीयानां विभक्तिसंज्ञाविधानात्; अन्यथा विभक्तिसंज्ञायामपि इदमेव सुब्ग्रहणमनुवर्त्तत इति सुप्त्वादेव सिद्धेऽनर्थकं तत्स्यात्। तिङां त्रिकेष्विति। किमर्थं पुनरिदमुक्तम्? इह कश्चिन्मन्यते--सूत्रे चकारस्याकरणात्संज्ञामात्रमिह सम्बध्यते, नान्यत्किञ्चिदिति तत्र दृष्टान्तप्रदर्शनेन त्रीणित्रीण्येकश इत्यनयोरनुवृत्तिं यथा तिङां वचनसंज्ञा विहिता तथैव सुपामपीत्यर्थः। तथा च स्वयं च शब्दं पठित्वा व्याचष्टे--सुपश्चेत्यादि।।

पदमञ्जरी

विभक्तिश्च।। 1.4.104 ।।

चकारः पुरुषवचनसंज्ञाभ्यां समावेशार्थः। तिङां व्यवहितानामपि स्वरितत्वादनुवृत्तिः। तिङां विभक्तित्वे प्रयोजनम्--आतामादौ `न विभक्तौ तुस्माः' इति निषेधः, सुपां तु त्यदाद्यत्वादिकमपि।।

पदमञ्जरी

युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः।। 1.4.105 ।।

`लस्य तिबादयः' इत्यनेनैकवाक्यतामापन्नेनानेन तिबादीनां विशिष्टविधानम्, उत विहितानां तिबादीनां भिन्नेनानेन वाक्येन नियमः? इति संशये नियम इत्याह--लस्येत्यधिकृत्येति। विशिष्टविधाने त्वितरेतराश्रयं स्यात्--सतां तिबादीनां प्रथमादिसंज्ञा, संज्ञायां च तिबादयो भाव्यन्त इति। स पुनर्नियम उपपदनियमो वा स्याद्--युष्मदि मध्यम एव अस्मद्युत्तम एव, शेषे प्रथम एवेति; पुरुषनियमो वा--युष्मद्येव मध्यमः, अस्मद्येवोत्तमः, शेष एव प्रथम इति। तत्राद्ये पक्षे कुर्वंस्त्वं कुर्वाणस्त्वमिति युष्मदि शतृशानचौ च न स्याताम्, तृजादयश्च न स्युः--कर्ता त्वं कारकस्त्वमिति? नैष दोषः; एतावान् विषयो युष्मदस्मदुपपदं शेषश्च सर्वश्चासौ पुरुषेषु नियतः। उच्यन्ते च तृजादयस्ते वचनादभविष्यन्ति। तुल्यजातीयस्य च नियनेन व्यावृत्तिः--युष्मदि मध्यम एव, न प्रथमोत्तमौ; अस्मद्युत्तम एव, न प्रथममध्यमौ; शेषे प्रथमोत्तमाविति। एवं तर्हि तिबादिसूत्रे विधीयमानत्वात् प्राधान्यात्तेषामेव नियमो युक्तः, शेषग्रहणाच्चोपपदनियमे हि युष्मदस्मदी नियते, पुरुषा अनियताः, शेषश्चानियतः। तत्र प्रथम इत्येतावदप्युच्यमानं नियमार्थं विज्ञायते, तत्र च नियमान्तरस्यासंभवात् प्रथम एवेति नियमः; यत्र च प्रथमाप्रथमप्रसङ्गस्तत्रैवंविधो नियमः कर्त्तव्यः; शेष एव च तथा प्रसङ्ग इति तत्रैव नियमो भविष्यति, किं शेषग्रहणेन! पुरुषनियमे तु मध्यमोत्तमौ नियतौ युष्मदस्मदी वा नियते, प्रथमश्च तत्र युष्मदस्मदोरपि प्रथमप्रसङ्गो शेष एव प्रथम इत्येवं प्रथमनियमः कर्त्तव्यः। न चान्तरेण शेषग्रहणमेवंनियमः शक्यते कर्त्तुमिति कर्त्तव्यमेव शेषग्रहणम्। अतः शेषग्रहणम्।

सूत्रकारस्यापि पुरुषनियम एवाभिप्रेत इति तमेवाश्रयति--तेषामयं पुरुषनियमः क्रियत इति। तेषामित्युद्भूतावयवभेदस्तिबादिसमुदाय उच्यते, पुरुषापेक्षयाऽवयवषष्ठी। तेषां तिबादीनामवयवो यो मध्यमपुरुषस्तस्योपपदनियमः क्रियत इत्यर्थः, सापेक्षस्यापि पुरुषशब्दस्य गमकत्वात् समासः। अथ वा तेषामिति कर्मणि षष्ठी, पुरुषद्वारको नियमः पुरुषनियमः, पुरुषद्वारेण ते नियम्यन्त इत्यर्थः। उपोच्चरितं तदमुपपदम्, शाकपार्थिवादित्वादुत्तरपदलोपी

समासः, उपशब्दः सामीप्ये, ततश्च व्यवहिते न भवितव्यमिति शङ्गामपनयति। व्यवहिते चेति। समीप इत्येव सिद्धे उपपदग्रहणादापेक्षिकस्यापि सामीप्यस्य ग्रहणम्। व्यवहितमपि च व्यवहिततरापेक्षया संनिकृष्टमिति भावः। उपपदग्रहणं तु पूर्वभूतेऽपि युष्मदि यथा स्याद्, अन्यथा `तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परभूते एव स्यात्। ननु यथा स्थानिन्यपीति वचनात् सर्वथाऽप्रयुज्यमानेऽपि भवति तथा पूर्वप्रयोगेऽपि परभूतस्याप्रयोगात् स्थानिनीति भविष्यति, नैतदस्ति; सप्तमीनिर्देशात् प्रयोगपक्षे परभूत एव स्यात्।

समानाभिधेय इति। अधिकरणशब्दोऽभिधेयवचन इति दर्शयति। पुनः समानाभिधेये लकारेण नियिम्यमानेन वा पुरुषेणः त्रिविधं चाभिधेयं लकाराणाम्भावः कर्म कर्ता च, तत्र द्रव्यवाचिनोर्युष्मदस्मदोर्भाववाचिना लान्तेन सामानाधिकरण्यासंभवात् कर्तृकर्मणोरेव ग्रहणमित्याह--तुल्यकारक इति। तुल्यमेकं कारकं यस्य तत्तथोक्तम्, स्थानिन्यपीति स्थानशब्द प्रसङ्गवाची, स्थानमस्यास्तीति स्थानी। तत्र च प्रयुज्यमानस्याप्रयुज्यमानस्य च प्रसङ्गोऽस्ति। उच्यते चेदं स्थानमस्यास्तीति, तत्र सामर्थ्यादवधारणं विज्ञायते--प्रसङ्ग एव यस्य, न तु प्रयोग इति। यद्वा स्वनिकायप्रसिद्धिरेषा--यस्य स्थाने आदेशो विधीयते स स्थानीति। इह त्वप्रयुज्यमानता साद्दश्यात् युष्मदि प्रयुज्यते, सर्वथा स्थानिन्यपीत्यस्याप्रयुज्यमानेऽपीत्यर्थः। अपिशब्दात्प्रयुज्यमानेऽपि, तदाह--स्थानिन्यपीत्यादिना। स्थानिन्यपीति कोऽर्थः? प्रयुज्यमानेऽप्यप्रयुज्यमानेऽपीत्यर्थः। उपपदग्रहणप्राप्तस्य चार्थस्यापिशब्दोऽनुवादः। समानाधिकरण इति किम्? त्वया गम्यत इत्यत्र मा भूत्।

क्वचित्तु वृत्तावेवायं ग्रन्थः पठ्यते, इह च अतित्वं पचति अत्यहं पचतीत्यत्रातिक्रान्तप्रधाने समासे युष्मदस्मदोरसामानाधिकरण्यात् प्रथम एव भवति, इह त्वीषदसमाप्तस्त्वं त्वत्कल्पः पचसि, मत्कल्पः पचामीति कालान्तरद्दष्टगुणरहितो युष्मदस्मदर्थ एव त्वत्कल्पमत्कल्पशब्दाभ्यामुच्यत इति मध्यमोत्तमौ भवतः, तत्सद्दशपदार्थान्तराभिधाने तु प्रथमः, तथा त्वत्तरः पचसि, मत्तरः पचामि, परमत्वं पचसि,परमाहं पचामीति, कालान्तराद्दष्टगुणातिशयविशिष्टो युष्मदस्मदर्थ एवोच्यते इति भवत्येव। एवं च युष्मदर्थे मध्यमः, अस्मदर्थ उत्तम इतीयता सिद्धं युष्मदस्मदर्थे चेल्लकार उत्पन्नस्तर्ह्येव मध्यमोत्तमावित्यर्थः, तथा तु न कृतमित्येव। इह चात्वं त्वं संपद्यत इति त्वद्भवतीति भवति; प्रकृतेरेव विकाररूपेण सम्पत्तौ कर्तृत्वात्। एतच्च ` आन्महतः' इत्यत्रोपपादयिष्यामः। तथा च मन्त्रे--`यदग्ने स्यामहं त्वं त्वं वास्या अहम्' इति, अहं त्व स्यां त्वं वाहं स्याम्' इति प्रकृत्याश्रयः पुरुषो द्दश्यते। इह भवान्पचत्विति युष्मदर्थप्रतीतेः स्थानिन्यपीति मध्यमः प्राप्नोति, न वा युष्मदर्थत्वात्, अलिङ्गः सम्बोधनविषयश्च युष्मदर्थः। भवदर्थस्तु लिङ्गवान् न च सम्बोधनैकविषयः। यथैव हि माणवकाधीष्टेत्यभिमुखीभावो गम्यते, एवं त्वमधीष्वेत्यपि। तथा च युष्मदः सर्वत्रैव संबोधने प्रथमा आमन्त्रिताद्युदात्तत्वं च भवति, पदात्परत्वे च निघात इति केचिदाहुः। उक्तं च---

सम्बोधनार्थः सर्वत्र मध्यमे कैश्चिदिष्यते।
तथा सम्बोधने सर्वा प्रथमां युष्मदो विदुः।।
युष्मदर्थस्य सिद्धत्वान्नियतावाद्युदात्तता।
युष्मदः प्रथमान्तस्य परश्चेन्न पदादसौ ।। इति।

सत्यम्; सम्बोधनैकविषयो युष्मच्छब्दः, प्रथमा तु शुद्धैव; अभिमुखीभावेऽस्यापि प्रातिपदिकार्थ एवान्तर्भावात्, यत्र त्वनन्तर्भावः, तत्र तदभिद्योतनाय सम्बोधने चेति प्रथमा विधीयते स्वरोपि; अन्यथा युवं हि स्थः स्वर्पती, यूयं यात स्वस्तिभिः, हये देवा यूयमिदापयस्थ' इति पादादावप्यन्तोदात्तत्वं पदात्परत्वेऽप्यनिघातः। तदेवं भवच्छब्दस्यासम्बोधनविषयत्वाल्लिङ्गवत्त्वाच्चायुष्मदर्थत्वाद् मध्यमो न भवतीति स्थितम्।।

पदमञ्जरी

प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च।। 1.4.106 ।।

प्रहासे गम्यमान इति। यत्र भूतार्थाभावाद्वञ्चनैव केवलं तत्र वक्तुरभिप्रायाविष्करणे प्रहासो गम्यते। मन्यति शब्दस्यैकदेशानुकरणं मन्येति, मन्य उपपदं यस्य स तथोक्तः। लस्य धातोर्विधानात्तदादेशत्वाच्च मध्यमस्य धातुरन्यपदार्थ इत्याह। मन्योपपदे धाताविति। प्रकृतिभूते सतीत्यर्थः। स चैकवदिति। अर्थद्वारकश्चोत्तमस्यैकवद्भावः, एकस्य वाचको भवतीत्यर्थः, द्वयोर्बहुषु मन्तृषु एकवचनमेव भवतीति यावत्। यत्र हि द्वौ मन्तारौ बहवो वा, तत्रैकवद्भावो विधेयः; अन्यत्र तु मन्तुरेकत्वादेव सिद्धम्। एकवच्चेति। च शब्देन्वाचये, तेनैकवद्भावावेऽपि एकस्मिन्नपि मन्तरि प्रधानशिष्टौ मध्यमोत्तमौ भवतः। अन्वाचयमेव दर्शयितुमयत्नसाध्यमेकं मन्तारमुदाहरति--एहि मन्ये ओदनं भोक्ष्यस इति। सत्यप्योदने भोक्तुमागतं श्यालादिकं प्रति एतत्प्रयुज्यत इति परिहासावगतिः। द्विबह्वोस्तूदाहरणे--एहि मन्ये ओदनं भोक्षघ्येथे नहि भोक्ष्येथे भुक्तः सोऽतिथिभिः; एहि मन्ये रथेन यास्यथ यातस्तेन पिता इति। मध्यमोत्तमयोः प्राप्तयोरिति। युष्मदस्मदर्थस्य गम्यमानत्वात् प्रत्युदाहरणवत् प्रकृतमुपपदग्रहणं युष्मदा सम्बद्धम्। तच्च तथैवेहाप्यनुवर्त्यमिह मा भूत्--एतु भवान्मन्यते ओदनं भोक्ष्ये भुक्तः सोऽतिथिभिरिति। तदशक्यं मन्यतिना सम्बन्धुमिति पुनरिहोपपदग्रहणम्, अनयथा मन्यतौ परत एव स्यात्। श्यनानिर्देशान्मन ज्ञानइत्यस्य ग्रहणम्, न तु `मनु अवबोधने' इत्यस्य, एहि मनुषे रथेन यास्यामीति एवं तस्य भवति। प्रत्युदाहरणे अतिथिं प्रति तथाभूतार्थवाचनम्।।

पदमञ्जरी

अस्मद्युत्तमः।। 1.4.107 ।।

यत्र युष्मदस्मदी द्वे अप्युपपदे भवतस्तत्र यदि कर्तृशक्ती स्वाधारनियते विवक्ष्येते, तदा लकारोऽपि भेदेनोत्पद्यते--त्वं चाहं च पचसि, पचामि चेति। सहविवक्षायां तु द्वयोरपि शक्त्योरेको लकार उत्पद्यते। तत्र युष्मदि मध्यमः, अस्मद्युत्तमो विप्रतिषेधेन--त्वं चाहं पचावः, अहं च त्वं च वृत्रहन् संयुज्यावः'

इति। यदापि त्यदादीनां यद्यत्परमित्यस्मदः शेषस्तदापि स्यानिन्यपीति मध्यमप्राप्तौ परत्वादुत्तम एव भवति--आवां पचावः।।
पदमञ्जरी
शेषे प्रथमः।। 1.4.108 ।।
उपपद इति निवृत्तम्। शेष इति विषयसप्तमी, न पुनः परत इति तदाह--शेष इति। मध्यमोत्तमविषयादन्य उच्यत इति। अन्यो विषय इत्यर्थः। यत्र युष्मदस्मदी समानाधिकरणे न स्तस्तत्र शेष इत्यनेन युष्मदस्मदोरभावः शेषः, न पुनरन्यसद्भाव इति दर्शयति। किं सिद्धं भवति? त्वं च देवदत्तश्च पचथः, अहं च देवदत्तश्च पचावः, त्वं चाहं च देवदत्तश्च पचाम इति। अत्र यद्यपि युष्मदस्मदोरन्यस्य च यः समुदायः स युष्मदस्मद्भ्यामन्यः, तथापि युष्मदस्मदी तावत्स्त इति तत्सद्भावनिमित्ते स्यादेव प्रथमः। यदाह--तत्र युष्मदन्येषु प्रथमप्रतिषेधः शेषत्वादिति।।
पदमञ्जरी
परः सन्निकर्षः संहिता।। 1.4.109 ।।
परशब्दोऽतिशये वर्त्तत इति। यथा परं सुखं परं दुःखमिति, दिगादिषु वर्तमानस्य ग्रहणं न भवति सन्निकर्षस्य दिग्देशकालायोगात्। अर्थान्तरापेक्षमन्यत्वम्, अव्यभिचारिसन्निकर्षः प्रत्यासत्तिरिति, न तु संश्लेषः, तस्य वर्णेष्वसंभवात्। स हि संयोगश्चेद् द्रव्यधर्मत्वान्न शब्दस्य गुणस्य संभवति। समवायश्चेन्न वर्णे वर्णः समवैति; शब्दस्याकाशसमवायित्वात्। येषां तु शब्दो द्रव्यं तेषां न क्वापि शब्दः समवैति। अतिशयोऽपि संयोगसमवाययोः कीदृश इति न विद्मः। प्रत्यासत्तेस्त्वपेक्षाभेदात् सम्भवति प्रकर्षाप्रकर्षयोगः, तस्मात्प्रत्यासत्तिरेव सन्निकर्षः।
ननु च क्रमेणोच्चार्यमाणेषु वर्णेषु पूर्वस्य वर्णस्य ये निष्पादकाः स्थानादयस्तेषां व्यापरोपरतौ वर्णान्तरस्य ये निष्पादकास्तेषां व्यापारारम्भः। तत्रावश्यंमध्ये कियत्यपि कालकला भवति, सूक्ष्मत्वात्तु नोपलभ्यते; पद्मपत्रशतव्यक्तिभेदवत्, तत्कथं परः सन्निकर्ष इत्यत्राह--अर्धमात्राकालव्यवधान इति। सत्यम्, एतावद्व्यवधानमवर्जनीयत्वात्सह्यते, अधिकेन तु कालेन व्यवधानं परग्रहणेन व्यावर्त्यत इत्यर्थः। यद्येवम्, द्रुतायामेव वृत्तौ स्यान्न मध्यमायां विलम्बितायां वा, न हि तथा तयोः सन्निकर्षो यथा द्रुतायां तुल्यः सन्निकर्षः। सर्वासु वृत्तिषु नैरन्तर्येणोच्चारणाद्यवर्णोपलम्भकभेदात्तु वृत्तिविशेषः। द्रुतायां स्वल्प उपलब्धिकालः, मध्यमायामधिकः, विलम्बितायामधिकतरः। द्विविधा हि ध्वनयः- प्राकृताः, वैकृताश्च। प्राकृता वर्णानामुत्पादकाः, वैकृते तु पुनः पुनरुपलम्भः, मध्यवर्ती तु कालः सर्वासु वृत्तिषु तावानेव। यद्वा--यस्यां वृत्तौ यावता कालेन व्यवायोऽवश्यम्भावी, ततोधिकेन व्यवायः परग्रहणेन व्यावर्त्यते। पदस्य पदान्तरेण यदानन्तर्थं तत्रैव लोके संहिताशब्दः प्रसिद्धः। तथा च--संहितामधीते न पदानि, ततश्च कुमार्यावित्यादौ पदावयवे संहिताकार्यं न स्यादितिसूत्रारम्भः।।
पदमञ्जरी
विरामोऽवसानम्।। 1.4.110 ।।
विरतिर्विराम इति। विराम इति भावे घञ्। विरामः= वर्णोच्चारणाभावः। अर्थान्तरमाह--विरम्यतेऽनेनेति वा विराम इति। `कृत्यल्युटो बहुलम्' इत्यसंज्ञायामपि `हलश्च' इति करणे घञ्, पूर्वत्राभावः संज्ञी उत्तरत्रान्त्यो वर्णः, तेन हि विरम्यते। तत्राद्ये पक्षे`खरवसानयोः' इति परसप्तमी, कथं पुनरवसानेन, पौर्वापर्यमभावो हि सः, खरा वा, कथम्? न हि यदा खरस्ति तदा रेफः, यदा रेफस्तदा खर्; वर्णानां क्रमभावित्वाद्, उच्चरितप्रध्वंसित्वाच्च। अथ तत्र बुद्धिपरिकल्पितं पौर्वापर्यं तदभावेऽपि समानम्। एवं `वावसाने' इत्यत्रापि। द्वितीये तु पक्षे खरवसानयोरित्येकापि सप्तमी विषयभेदाद्भद्यते--खरि परतो रेफस्य विसर्जनीयो भवति, अवसाने च रेफे स्थानिनि विसर्जनीय इति स्थन्यादेशस्य विषयता विवक्ष्यते। एवं `वाऽवसाने' इत्यत्रापि। दधिं मधुँ इति । `अणोऽप्रगृह्यस्यानुनासिकः' अत्र `वावसाने' इति वर्तते। ननु च लोकएवावसानशब्दो विरामे प्रसिद्धः, यद्यप्यवपूर्वः स्यतिरवगतौ वर्तते केनैतदवसीयत इति? पराभवेऽपि अवसितो देवदत्त इति। अवसानशब्दस्तु विराम एव प्रसिद्धः। न च रेफस्यावगतिपराभवयोः करणत्वं सम्भवतीति नार्थः संज्ञाकरणेन, तदाह--संहितावसानयोर्लोकविदितत्वात् सिद्धमिति। संहिताशब्दोऽपि सन्निकर्षमात्रे प्रसिद्धः, न पदयोरेव सन्निकर्ष इति वार्त्तिककारो मन्यते।।
हरदत्तमिश्रविरचितायां पदमञ्जर्यो प्रथमाध्यायस्य चतुथः पादः।।

2.1

काशिकावृत्तिः - 2
पदमञ्जरी
अथ द्वितीयाध्याये प्रथम पादः
1 समर्थः पदविधिः ।। 2-1-1 ।।
परिभाषेयमिति। नाधिकारः, पदविधिग्रहणात्, अन्यथा वक्ष्यमाणानां पराङ्वद्भावदीनां पदविधित्वाव्यभिचारादनर्थकं तत्स्यात्। परितः = सर्तत्र, परत्र, व्यवहिते च, अनन्तरे च - भाष्यते कार्यमानयेति करणे `गुरोश्च हलः' अत्यकारप्रत्ययः। भावसाधन एव वाऽभेदोपचारात्सूत्रे प्रयुज्यते। इदंशब्दस्य सूत्रे प्रयुक्तस्यापि विधेयपरिभाषाशब्दसामानाधिकरण्यात् स्त्रीलिङ्गता। स कर्व इति। ननु यः कश्चित्पदविधिरिति सामान्यनिर्देशेनैव तध्दर्मभूता व्याप्तिरुक्ता, किं

कर्मग्रहणेन? नैतदस्तिः `यः कश्चिद् ब्राह्मण आनीयताम्' इत्युक्ते क्षत्रियादिनिवृत्तिः प्रतीयते, न व्याप्तिः। प्रथमपठितमपि समर्थसब्दमुल्लङ्घ्योद्देश्यसमर्पकत्वबलादार्थेन क्रमेण प्रथमे भाविनं पदविधिशब्दं व्याख्यास्यान्विधिशब्दः कर्मसाधन इति दर्शयति-विधीयत इति विधिरिति। कार्यमित्यर्थः। पदानामिति। शेषलक्षणा षष्ठी। पदानां सतां यत्कार्यं विधीयत इत्यर्थः। यदि तु भावसाधनो विधिशब्द आश्रीयेत-विधानं विधिरिति, ततः पदेषु कृद्योगलक्षणा कर्मणि षष्ठ

ी-पदानामसतां निष्पादनं पदविधिरिति, तत्र समासतध्दितसुब्धातुवृत्तयो न संगृहीताः स्युः। तत्र हि पदानां सतां समासादिकार्यं विधीयते, न पुनः पदत्वम्। ननु च कर्मसाधनपक्षेऽपि विभक्तिविधानमसंगृहीतं स्यात्, पदान्येव हि तत्र विधीयन्ते न तु पदानां सतां किञ्चिद्? उच्यते-`कर्मणि द्विताया' इत्यादिना तु नियमः क्रियते, न पदविधिः। अथाप्येकवाक्यतया स्वादिसूत्रेण विभक्तीनां विधानम्? एवमपि कारकविभक्तिषु तावत्क्रियाकारकयोरविनाभूतः सम्बन्धः, उपपदविभक्तीनां तु `अनतरान्तरेणयुक्ते' इत्यादीनामुपसर्गविभक्तीनां च `नेर्विशः' इत्यादीनामेकवाक्यतायां भिन्नवाक्यतायां च पदविधित्वमस्त्येव; उपपदानामुपसर्गाणां च पदत्वात्। समासादिरित्यादिशब्देन तध्दितवृत्त्यादीनां ग्रहणम्, तध्दिता अपि सुबन्तादुत्पद्यन्ते। `समर्थानां प्रथमाद्वा' इत्यस्य तु समर्थग्रहणस्य प्रयोजनं तत्रैव वक्ष्यामः। एवम् `इसुसोः' सामर्थ्ये' इत्यादीनामपि समर्थः शक्त इति; तत्रैव समर्थसब्दस्य रूढत्वात्। स्वकार्यनिष्पादनक्षमो हि लोके `समर्थः' इत्युच्यते। अर्थप्रतिपादनं च शब्दानां स्वकार्यव्युत्पाद्यत्वेन चाधिकृता लौकिकाः वैदिकाञ्च यस्य कस्यचित्प्रतिपादने समर्थाः, उच्यते चेदं समर्थ इति, तत्र सामर्थ्याद्विशेषोऽवगम्यते, स तु विशेषः प्रत्यासत्तेरेवंरूप इत्याह-विग्रहवाक्यार्थाभिधाने इति। विशेषेण गृह्यते = ज्ञायतेऽनेन समासार्थ इति विग्रहः। तादृशं च तद्वाक्यं चेति विशेषणसमासः। यद्वा-विशेषेण ग्रहणं विग्रहः, तदर्थं वाक्यं विग्रहवाक्यम्, अश्वघासादिवत्षष्ठीसमासः। अथ वा-अभेदोपचाराद्विग्रहार्थवाक्यं विग्रह इति विशेषणसमासः, तद्यथा-राजपुरुष इत्ययं समासः, तदर्थं विग्रहवाक्यं राज्ञः पुरुष इति, अस्य योऽर्थस्तदभिधाने राजपुरुषशब्द समर्थः, अतोऽपि तत्प्रतीतेः, स पुना राजविशिष्टः पुरुषः। समर्थो वेदितव्य इति। साधुत्वेनेति शेषः। यः पदविधिः स विग्रहवाक्यार्थाभिधाने समर्थः सनासाधुर्भवतीत्यस्मिन्पक्षे सूत्रार्थः, नार्थान्तरं साधीयः पश्यामः। तत्तु सामर्थ्यं प्रयोगतोऽनुसर्त्तव्यम्। न पुनरियं वृत्तिरस्य वाक्यस्यार्थाभिधानसमर्था, नान्यस्येत्येतत्सूत्राक्षरैर्लभ्यते। अत एवास्मिन्व्याख्यानेऽपरितुष्टः सन्व्याख्यानान्तरमाह--अथ वेति। अत्र पक्षे उपचरितवृत्तिः समर्थशब्दः, तदाहसमर्थपदाश्रयत्वादिति। समर्थानां पदानां सम्बध्दार्थानां संसृष्टार्थानासिति। यः पदानां विधिः स समर्थानांं विदितव्यः। समर्थानामिति कोऽर्थः? संबध्दार्थानां संसृष्टार्थानां वेत्यर्थः। तत्र वाक्ये संबध्दार्थता। व्यपेक्षा हि तत्र सामर्थ्यम्। अन्योऽन्यापेक्षा = व्यपेक्षा। आकांक्षामन्निधियोग्यत्वेषु सत्सुः यः परस्परसम्बन्धः सा व्यपेक्षा। वाक्ये हि `राज्ञः' इति पदनियतसंबन्ध्यपेक्षयोद्भूतसंबन्धं विशेषणभूतमर्थमाचष्टे, स्वसंनिहितं योग्यं च पुरुषमपेक्षते। ममायमिति `पुरुषः' ईत्येनेनापि पुरुषः स्वनिष्ठोऽभिधीयमानः स्वसंनिहितं राजत्वमवच्छेदकत्वेनापेक्षते-अहमस्येति। अतो विशेषणविशेष्यभावेन सम्बन्धोऽनियतसंबन्धिविषयत्वाच्चापेक्षया यो यः सन्निहितो योग्यश्च तेन सम्बध्यते-राज्ञः पुरुश्चाश्चश्च, राज्ञो देदत्तस्य च पुरुष इति, नार्थान्तरस्य। वृत्तो तु संसृष्टार्थता। एकार्थीभावो हि तत्र सामर्थ्यम्। वृत्तौ हि राजपदं राजानमभिधाय न तावति पर्यवस्यति, पुरुषमप्याचष्टे, यथा-`गङ्गायां घोषः' इति गङ्गापदं तीरम्। यदि तु तावत्येव पर्यवस्येत्ततो यथा वाक्ये राज्ञः पुरुषोऽश्वश्चेति द्वाभ्यां सम्बन्धो भवति, तथा राजपुरुषोऽश्वश्चेत्यत्रापि स्यात्। स्वविशेषणसम्बन्धोऽपि स्याद्-ऋध्दस्य राडपुरुष इति यथा ऋध्दस्य राज्ञः पुरुष इति तथा पुरुषपदमपि राजविशिष्टमेव पुरुषमाचष्टे, न पुरुषमात्रम्। यदि तथा स्यात्ततो यथा वाक्ये राज्ञः पुरुषो देवदत्तस्य चेति द्वाभ्यां सम्बन्धो भवति, तथा रापुरुषो देवदत्तस्य चेत्यपि स्यात्। अतो यस्य विशेषस्य भावादयं विशेषः स एकार्थीभावः। भाष्योक्ताश्चापरे विशेषाः-`सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभिसम्बन्धः स्वरभेदश्च संख्याविशेषो व्यक्ताभिधानमुपसर्जनविशंषणं च योगश्च ' इति। तथा सुपि अलोपश्च भवति वाक्ये-राज्ञः पुरुषः, नीलमुत्पलमिति समासे तु द्योरेकस्मिन्विशिष्टेऽर्थे वृत्तेः पृथगर्थाभावात्स्वभावत एव विभक्तनिवर्त्तते। सैव च स्वाभाविकी निवृत्तिः शास्त्रेणान्वाख्यायते-`सुपो धातुप्रातिपदिकयोः' इति प्रत्ययलक्षणेन नलोपादिकार्थं यथा स्यादिति। पृथगर्थाभावे तु पथग्विभक्तिर्न भवति। तथा वर्णेषु व्यवधानं च पृथगपर्थत्व एव दृष्टः--राज्ञः पुरुष इति द्वावपि नित्स्वरेणाद्युदात्ती। अभेदेन दृष्टः, यथा--पुरुष इति वृत्तौ चैकस्वर्यं दृश्यते। किं च, संख्याविशेषोऽवगम्यते पृथगरेथेषु--राज्ञः राज्ञोः राज्ञां पुरुष इति। वृत्तौ त्वव्यक्तमभिधानं विष्ठति, ब्राह्मणकम्बल इति मन्देहो भवति-संबुध्दिर्वा स्यात्? षष्ठीसमासो वा? इति, न चात्रस्वरान्नर्णयः। वाक्येऽप्यामन्त्रितनिघातः कम्बलशब्दो घृतादितावादन्तोदात्तः, समासेऽप्यन्तोदात्तता। उपसर्जनविशेषणं च व्याख्यातम्। योगश्च भवति पृथगर्थेषु-राज्ञो गौश्चाश्चश्च कम्बलश्चेति। वृत्तौ त्वेकार्थ्याद्भेदनिबन्धनस्य समुच्च यस्याभावाच्चशब्दो निवर्त्तत-राज्ञो गवाश्वकम्बला इति, तदेतैर्विशेषैर्वज्ञायते संभिन्नोभयरूपः पासूदकवदविभागापन्नो वृत्तावर्थ इति। तेन राज्ञः पुरुषमानय राजपुरुषमानयेति च यद्यचप्येक एवानीयत इति कार्ययोगिनोऽभेदस्तथाच्यभिधानप्रकारो भिद्यते, यथा-ब्राह्मणानां शतं भोज्यतामिति। तदेवं वृत्तिवाक्ययोरर्थो भिद्यत इति स्थितम्। एवं च त्र तत्र वावचनं चिन्त्यप्रयोजनम्; भिन्नार्थया वृत्त्या वाक्यस्य बाधाऽप्रसङ्गात्। अन्ये तु जहत्स्वार्था वृत्तिरिति वदन्तो वर्त्तिपदानामानर्थक्यमेवाहुः, तत्तु न रोचयामहे। किं राजपुरुष इत्यत्र राजार्थो न गम्यते? ओमिति चेत्, पुरुषमात्रानयनं प्राप्नोति। अथ गम्यते? किंनिबन्धना तस्यावगतिः? न तावत् समासस्य तत्र शाक्तिः कल्प्या; राजशब्दनिबन्धनायामपि तस्यामनर्थाभावात्। न च वाक्ये राजपदं व्युत्पन्नं पुनः समासे वियुत्पत्तिमपेक्षते, तावत्येव च प्रतिपद्यते राजार्थः। अते न जहत्स्वार्था वृत्तिः, अर्थाभिधानप्रकारभेद इत्येतदेव सांप्रतम्। तत्र सम्बध्दार्थानां संसृष्टार्थानामिति स्थतं परिभाषाप्रवृत्तौ हेतुर्नान्यतरत्, यतो मा भूद्व्यपेक्षामात्राश्रयेण सापेक्षस्यापि वृत्तिः। यदेयेवम्, पराङ्गवद्भावे विभक्तिविधाने च सा न प्रवर्त्तेत; तत्रैकार्थीभावस्यासम्भवात्। मा प्रवर्त्तिष्ट, पराङ्गवद्भावेत्न्निमित्तग्रहणं नोदयिष्यति। विभक्तिविधानेऽपि क्रियाकारकयोर्व्यपेक्षाऽविनाभाविनी क्वचिद्युक्तग्रहणम्; क्वचिद्योगग्रहणम्, क्वचित्-

तृतीयया योगस्याक्षेप इति न क्वापि दोषः। अत एवानन्तरमपि पराङ्गवद्भावमुल्लङ्घ्य समासमुदाहरति--वक्ष्यतीति। समर्थग्रहणं किमिति। सूत्रं किमर्थमित्यर्थः। न हि केवलेन पदविधिग्रहणेन किञ्चत्क्रियते। पश्येत्यादि। ननु च श्रितादिभिर्द्वितीयां विशेषयिष्यामः-श्रितादियोगे या द्वितीयोति। एवमपि सापेक्षस् प्रसङ्गः-महत्कष्टं श्रित इति, भवति ह्यत्र श्रितादिनिमित्ता द्वितीया, समर्थग्रहणे तु सति न भवति। यद्यप्यत्र वाक्यावस्थायां व्यपेक्षानक्षणसामर्थ्यमस्ति, वृत्त्यवस्थायान्तु नैकार्थीभावः संभवतीत्यवोचाम। कथं तर्हि देवदत्तस्य गुरुकुलमिति सापेक्षस्य वृत्त? नात्र गुरुण देवदत्तस्य सम्बन्धः; किं तर्हि? समुदायेन, गुरुद्वारकश्च सुलेन सम्बन्ध इत्यर्थाद् गुरुणापि योगो भवति। उक्तं च-
समुदायेन सम्बन्धो येषां गुरुकुलादिना।
संस्पृश्यावयवांस्तेऽपि युज्यन्ते तद्वता सह।। इति
अथ वा--परिपरूर्णार्थस्यान्येन सहैकार्थीभावः स्वार्थपरिपूर्त्तिश्च समाबन्धि शब्दस्य प्रतियोगिनेति भवति तदपेक्षस्यापि वृत्तिः। उक्तं च -
सम्बन्धिशब्दः सापेक्षो न्त्यं सर्वः प्रयुज्यते।
स्वार्थवत्सा व्यपेक्षाऽस्य वृत्तावपि न हायते।। इति
किं त्वं करिष्यसीत्यादि अत्र शक्यं वक्तुम्। तत्कृतार्थेनेति। तच्छब्दः प्रकृतपरामर्शाय तृतीयान्तं समस्यत--तदर्थेन यः कृचो गुणस्तद्वचनेनेति। अत्र च यस्य समासः शह्क्यते--शंकुलयेति, न तदर्थेन कृतं खण्डनम्; यदथंन च कृतं खण्डनमुपलेनेति, न तस्य समासः शङ्क्यच इति न भविष्यतीति। तस्मान्महत्या शंकुलया खण्ड इति सापेक्षमुदाहर्त्तव्यम्। गच्छ त्वं यूपायेति। `गत्यर्थकर्मणि' इति चतुर्थी। तद्वा-`क्रियार्थापपदस्य च कर्मणि' इति, यूपमाहर्त्तु गच्छेति, अत्राप्येतदर्थत्वादेव दारुणो न भविष्यतीति सापेक्षं प्रत्युदाहर्त्तव्यम्-महते यूपाय दार्विति। यणादेशो नित्यश्च तुग्भवतीति। द्वावप्येतौ वर्णविधी, नित्यस्तुक् च `दीर्घात्' इत्यायमेव, यस्तु `पदान्ताद्वा' इति विकल्पितस्तुक् स पदविधित्वादत्र न भवति। अन्ये तु यणादेशोऽनित्यश्च तुगभवतीत्यकारप्रश्लेषं वर्णयन्तः `पदान्ताद्वा' इति विकल्पितस्तुग्भवतीति व्याचक्षते। नन्वसौ पदविधिर्नेति? आह-तत्रन्तग्रहणं एवं सिध्देऽन्तग्रहणस्यैतत्प्रयोजनम्-पदान्तस्य दूर्घस्य वर्णस्य विधिस्तुग् यथा स्याति, दीर्घान्तस्य पदस्य मा भूदिति।।

2 सुबामन्त्रिते पराङ्वत्स्वरे ।। 2-1-1 ।।
परस्याङ्गवदिति। तस्यैव पदस्यामन्त्रितस्याङ्गवदेकदेशवद्भवति, तद्ग्रहणेन गृह्यत इत्यर्थः। तादात्म्यातिदेशोऽयमिति। अङ्गश्बदस्यावयववचनत्वात् तस्यामन्त्रितस्यात्मा तदात्मा, तस्य भावस्तादात्म्यम्, तत्स्वभावत्वमित्यर्थः। एतदेव स्पष्टयति-सुबन्तमिति। अनुप्रविशति = अन्तर्भवति, सुबन्तामन्त्रितसमुदाय एकस्मिन्नामन्त्रिते संपन्ने यः स्वरः शक्यते कर्तुं स कर्त्तव्य इत्यर्थः। कः पुनरसौ? आद्युदात्तत्वम्, समुदायस्य च पदात्परत्वे निघातः। कुण्डेनाटन्निति। नन्वत्र सति तावत्पराङ्गवद्भावे समुदायस्याद्युदात्तत्वं शेषनिघामन्त्रितं निहन्यते। यदा तर्ह्यटन्नित्येतत्पादादौ वर्त्तते तदा नास्ति निघात इति द्वयोराद्युदात्तत्वं स्यात्। किं च पुंल्लिङ्गोऽपि कुण्डशब्दोऽस्ति-पत्यौ जीवति कुण्डः स्यान्मृते भर्त्तरि गोलकः। इति।
कुण्डीति च जानपदादिसूत्रेण ङीषि भवति। परशुना वृश्चन्निति। `आङ्परयोः खनिश्रृभ्यां डिच्च' इति कुप्रत्ययान्तत्वादन्तोदात्तः परशुशब्दः, मद्रशब्दः `मदेश्च' इति रक्प्रत्ययान्तः, कश्मीरशब्दो धृतादित्वादन्तोदात्तः, `सुबन्तस्य पराङ्गवद्भावे तन्निमित्तग्रहणम्' तस्यामन्त्रितवाच्यस्यार्थस्य यन्निमित्तं तदभ्धाय्येव सुबन्तं पराङ्गवदित्यर्थः। उदाहरणेषु तृतीयान्तस्य तावन्निमित्तत्वमस्त्येव;षष्ठ्यन्तस्याप्यस्ति, भृत्यनिमित्ता हि राजता, देशनिमित्ता वा। एवं गोषु स्वामिन्नित्यत्रापि भवति। तन्निमित्तत्वाभावे तु न भवति-मरुत्वां इन्द्र वृषभो रणाय, मरुद्भिरिन्द्र सख्यं ते अस्तु, मायाभिरिन्द्रमायिनम्, एतेनाग्ने ब्रह्मणा वावृधस्व, क्षेत्त्रेणाग्ने स्वायुस्सम्भरस्व, मित्रेणाग्ने मित्रधेये यतस्व। सुबिति किमिति। तन्निमित्तग्रहणादेव तिङन्तस्य सिध्दो निरास इति प्रश्नः। पीड्ये पूड्यमानेति। न हि सूत्रकारो वार्त्तिककारवचनेनातिव्याप्तिनिवारणं मन्यत इति भावः। `पीड अवगारहने' चुरादिणिच्, उभयत्र कर्मणि लट्, एकत्रोत्तमैकवचनमिट्, अवपत्र शानच्, यकि णिलोपः, `तास्यनुदात्तेत्' इति इटोऽ नुदात्तत्वम्, यकः प्रत्ययस्वरः, `एकादेश उदात्तेनोदात्तः' इत्येकार उदात्तः, पीड्यमानेत्यत्रामन्त्रितनिघातः। ननु च समर्थग्रहणानुवत्तयैवात्र न भविष्यति, अस्त्य त्रापि सामर्थ्यम्, कथम्? सम्बोधनपदं क्रियाया एव विशेषकम्, तथा च ब्रजानि देवदत्तेत्यत्रामन्त्रितनिधातो भवति। उक्तं च
सम्बोधनपदं यद्यत्तत्क्रियाया विशेषकम्।
ब्रजानि देवदत्तेति निधातोऽत्र तथा सति।। इति।
अथ वा- हेतुहेतुमद्भावलक्षणोऽत्र सम्बन्धः, हे पीड्यमान त्वत्पीडयाहमपि पीड्य इति। गेते गार्ग्य इति। गेहशब्द उञ्छादित्वादन्तोदात्तः, एकस्यामासनादिकायां क्रियायां द्वयोरपि कारकत्वात्तद्द्वारेणास्ति सामर्थ्यम्। परग्रहणं किमिति। सन्निधानादामन्त्रितस्यैव भविष्यतीति प्रश्नः। पूर्वस्य मा भूदिति। निमित्तभाव एवामन्त्रितस्योपक्षीणतया पूर्वस्यापि स्यादिति भावः. एवं च पूर्वस्यामन्त्रितत्वमतन्त्रम्। गार्ग्यः कुण्डेनाटन्नित्यादावपि भवति सन्निधानात्। अमन्त्रितत्वमपि तन्त्रमिति चेत; यद्येवम्, परमेव संनिहितमिति न पूर्वं प्रत्यङ्गत्वप्रसहगः। देवदत्तः कुण्डेनाटन्नित्यत्र पूर्वं प्रत्यङ्गत्वे सति समुदायस्याद्युदात्तत्वं शेषनिघातः। अटन्नित्यामन्त्रितनिघात इति स्वरः. परग्रहणे तु सति देवदत्तशब्दस्यामन्त्रिताद्युदात्तत्वम्। तथा कुण्डेनाटन्नित्यम्यापि निधातस्तु न भवति; `अमन्त्रितं पूर्वमविद्यमानवत्' इति देवदत्तशब्दस्याविद्यमानवत्त्वाद्। छन्सि तु परमपि पूर्वस्याङ्गवद्ष्यते-आ ते पितर्मरुतां सुम्नमेतु। पुतरित्यनेन सह मरुतामित्यस्यापि निघातः। यथा मत्पुण्डीभूतः। तत्र सुबन्तस्य मृत्पिण्डात्मना परणामासम्भवादेकीभावप्रतिपादनपरमेतत्। मृत्पिण्ड इवैकतामापन्न इत्यर्थः। यद्वा, पिण्डीशब्दोऽप्यस्ति-प्रविश पिण्डीमिति, तस्यायं प्रयोगः. भूतशब्दउपमार्थः-पितृभूत इति यथा। किमर्थं पुनरेवंभूतस्यस्वरप्राप्तये

यत्न इत्यत आह-उभयोरपीति। असत्यङ्गग्रहणे कार्यव्यपदेशशास्त्राणामन्यतमातिदेशः स्याद्। यथा परस्य कार्यमामन्त्रितस्य स्वरः आमन्त्रितव्यपदेशः स्वरशास्त्रं वा, तथा सुबन्तस्यापि तद्भवतीति। एवं चोभयोराद्युदात्तत्वं स्यात्। ननु च पदात्परस्य निघातादुभयोरनुद्त्तत्वं मा भूद्ति वाच्यम्; सत्यम्, आमन्त्रितस्यापादादित्वे सति, पादादित्वे तदुक्तम्। वत्करणं किमिति। परत्र परशब्दप्रयोगादेव वत्यर्थो लप्स्यत इति प्रश्नः। स्वाश्रयमपि यथा स्यादिति। नानेन क्वाचित्कत्वमस्योच्यते। एवं हि विषयविभागे न ज्ञायते-क्वाह्ग्गवद्भवति? क्व नेति? नापि कादाचत्कत्वम्-कदाचिदङ्गवत्, कदाचिन्नेति, एवं हि सर्वत्र विकल्पः स्यात्। तस्मादमयत्रार्थ--असति वद्ग्रहणे आम् कुण्डेनाटन्निति स्थिते अटन्नित्यस्य निघाते प्राप्ते कूण्डेनेत्यस्यानुप्रवेशात्कुण्डेनाटन्नित्येकमामन्त्रितं सम्पन्नम्। न च तदेकान्तरमिति प्रतिषेधाभावान्निघात एव स्यात्। वत्करणे तु सति अटन्नित्यस्य तावदेकान्तरत्वान्निघातप्रतिषेधे आद्युदात्तत्वं प्राप्तम्। तस्यां दशायां कुणडेनेत्यम्यानुप्रवेशात्समुदायस्याद्युदात्तत्वं भवति। तदेवं समुदायस्यानैकान्तरत्वेऽपि अटन्नित्यस्य यदेकान्तरत्वं वत्करणेन लब्धं तेनैव समुदायस्य निघातनिवृत्तिराद्युदात्तत्वं च भवति। कूपे स्ञ्चन्निति। अत्र पराङ्गवद्भावे सति ऐकपद्यत्षत्वप्रसङ्गः, स्वाश्रयं पदादित्वं भविष्यति, सर्वातिदेशेषु ह्यविरुध्दं स्वाश्रयं भवति। किं च नात्रातिदेशिकं सकारस्य किञ्चिच्छास्त्रीयं कार्यमस्ति, अतोऽपि स्वाश्रयं भवत्येव, यथा नमते दण्डः स्वयमेवेत्यत्र यक्प्रतिषेधे शप्। इदं तर्हि-`चर्म नम्न्', अत्र पराङ्गवद्भावे सति समानपदस्थत्वाण्णात्वं स्यात्। सत्यपि समानपदत्वे `पर्वपदात्संज्ञायामगः' इति नियमादसंज्ञायां न भविष्यति। नायं नियमस्य विषयः, पूर्वपदशब्दो हि समासावयवे रूढः। तेन समास ए नियम्। अथ तु पूर्वं पदं पूर्वपदंपूर्वपदादत्यविशेषेण नियमो व्याख्यायेत, ततः स्वरग्रहणं शक्यमकर्तुम्। अक्रियमाणे च तस्मिन्, समानाधिकरणस्योपसंख्यानमित्येतदमपि शक्यमकर्त्तुम्। कथं परस्याङ्गवद्भावे कृते चिणो लुङ्न्यायेन विष्यभेदाल्लक्षणस्यावृत्तौ पूर्वस्यापि पराङ्गवद्भावो भविष्यति? सति तु स्वरग्रहणे स्वहादन्यत्र परशुना वृश्चन्नित्यत्र वृश्चन्निति प्रतिपदिकम्; न च प्रत्ययलक्षणेनाप्रत्यय इति प्रतिषेषः, `न ङिगंबुध्द्योः' इति निषेधाल्लिङ्गात्; तत्र पराङ्गवद्भावेन प्रातिपदिकानुप्रवेशात् `सुपो धातुप्रातपदिकयोः' इति सुब्लुक् प्रसज्येत; स्वहग्रहणे तु सतु सुब्लुकि कर्त्तव्ये पराङ्गवद्भावाभावः? नैतदस्ति; पराङ्गवदित्यामन्त्रितं संनिधानात्परशब्देन गृह्यते; तस्य रूपस्य सूबन्तैकान्तत्वात्सुबन्तकार्य एव पराङ्गवद्भावः, न प्रातिपदिककार्ये। उच्चैरधीयानेति। उच्चैर्नीचैः शब्दौ स्वराद्ष्वन्तोदात्तौ पठितौ, अधिकरणशक्तिप्राधान्याञ्च तस्मिन्निमित्तं च ।।

3 प्राक्कडारात्समासः ।। 2-1-3 ।।`यथाऽसादृश्ये' इति अनन्तरसूत्रातिक्रमे न किञ्चत्कारणम्। ननु `प्रत्ययः' इत्यादिवत्समास इत्येव स्वरितत्वादध्कारोऽस्तु, किं प्राग्वचनेन? तत्राह-प्रागावचनमिति। प्राक्कडारादित्यवधितनिर्देश इत्यर्थः। संज्ञासमावेशार्थमिति। अन्यथैकसंज्ञाध्कारात्पर्यायः स्यात्। अवधिनिर्देशे तु सति तत्सामर्थ्यात्प्राग्ग्रहणमावर्त्तते। तेन प्राक् समाससंज्ञा भवन्ति, समासाः सन्तोऽव्ययीभावादिसंज्ञा इति समावेशसिध्दिः. अथ वा-कडारादिति पञ्चम्यैव प्रागिति दिक्शब्दोऽध्याहरिष्यते। न च प्रागित्यस्याध्याहारप्रसङ्गः, तदध्याहारे हि `दिक्समासे बहुव्रीहौ' `तृतीयासमासे' `द्वन्द्वे च ' समास इत्याद्यनुपपन्नं स्यात्; कडारात्प्राङ्निर्दिष्टानां समाससंज्ञाया अबावात्। तस्मात्प्रागित्येवाध्याहरिष्यते, नार्थः प्राग्वचनेन, तत्राह-प्राग्वचनमिति।।

4 सह सुपा ।। 2-1-4 ।।
सहवचनं किमर्थम्, यावता तृतीयैव सहार्थमाक्षेप्स्यति, यथा `वृध्दो यूना' इति? सहभूतयोः समाससंज्ञा यथा स्याद् एकैकस्य मा भूद्; अन्यथा पूत्रेण सहागतः पितेत्यत्र यथा द्वयोरप्यागमनेन सम्बन्धः, एवं समाससंज्ञापि प्रत्येकमेव स्यात्, सहग्रहणे तु सहभूतयोरेका संज्ञा भवति। किं च स्याद् यद्येकैकस्य संज्ञा स्यात्? इह ऋक्पाद इति समासान्तः प्रसज्येत, द्वौ च स्वरौ स्याताम्। `कृत्तध्दितसमासाश्च' इत्यत्र तु समासश्च समासश्चोत्योकशेषो व्याख्यास्यते, तेन समाससमूहस्य संज्ञाविधिनियमार्थ इति वाक्यस्य न भविष्यति; अन्यथा त्वेकैकस्य समासस्य प्रत्ययान्तत्वाद्विध्यर्थं समासकग्रहणं स्यत्। `समासाञ्च तद्विषयात्' इत्यत्रापि प्रातिपदिकादित्यनुवर्त्तते, समूहस्य च प्रातिपदिकत्वम्, न त्वेकाकस्य समासस्येति समासादित्येकत्वादिवक्षया समूहादेव सिध्दः प्रत्ययः। तदेवं समुदायस्य यथा स्यादेकैकस्य मा भूदिति सहग्रहणम्। नैतदस्ति प्रयोजनम्, `समासः' इति महती संज्ञा क्रियते-अन्वर्थसंज्ञा यथा विज्ञायेत। यस्मिन्समुदायो दपद्वयं परस्परं समस्यते स समासः। `हलश्च' इत्यधिकरणे घञ्। तस्मादनर्थकं सहग्रहणम् तत्राह-सहग्रहणं योगविभागार्थमिति। सहेत्येको योगः, सुबित्येव, सुप् सह समस्यते, केन? पदविधित्वात्समर्थेन। अनुव्यचलदिति। तत्र सुबित्येकत्वस्य विवक्षितत्वाध्देः पूर्वं समासः, पश्चादनोः, तत्र नित्यसमासत्वाध्देः शाकलाभावः। समासान्योदात्तत्वं तु न भवति;`तिङ्ङतिङः' इति निघातात्। अनोः `गतिर्गतौ' इति निघातः, वेैर्यणादेशे `उदात्तस्वरितयोः' इत्यटः स्वरितत्वम्। अन्ये तु-सतिशिष्टं समासान्योदात्तत्वं भवतीत्याहुः। विभक्तिस्तु सत्यपि समासत्वेन प्रातिपदिकत्वेन भवति; तिङैकत्वस्योक्तत्वात्। यद्वा-वचनग्रहणमुक्तेष्वप्येकत्वादिषु यथा स्यादिति प्रथमैकवचनम्, हल्ङ्यादिलोपः। एवं चैकपद्यादामनुव्यचलद्देवदत्तेति `आम एकन्तरमामन्त्रितमनन्तिके' इति निघातप्रतिषेधो भवति। यौगविभागश्चेष्टसिध्द्यर्थ इत्यतिप्रसङ्गो नीद्भावनीयः।।

5 अव्ययीभावः ।। 2-1-5 ।।
इह लघ्वर्थ संज्ञाकरणमित्येकाक्षरा संज्ञां कार्या, किमर्थं महती क्रियते इत्याह्र-अन्वथसंज्ञा चेयमिति। अनवव्ययमव्ययं भवतीत्यव्ययीभावः, `भेवतेर्ण उपसंख्यानम्' इति णप्रत्ययः। अन्वर्थत्वे किं सिध्यतीत्यत आहतेनेति। पूर्वपदग्रङणमव्ययस्योपलक्षणार्थम्। सूपप्रति, शाकप्रतीत्यादावुत्तरपदार्थप्रधान्यान्न स्यात्तस्मादव्ययीभावेऽव्ययार्थः प्रधानमिति सूत्यते। एवं ह्यव्ययानव्ययसमुदायोऽव्ययधर्मभादव्ययं भवतीति। किं सिध्दं भवति? समृध्दा मद्राः समद्रा इत्यादावुत्तरपदार्थप्रधान्येऽव्ययीभावस्यातिप्रसङ्गः परिह्वतो भवति। पारेगङ्गम्, द्विमुनि, उन्मत्तगङ्गमित्यादौ चच वचनादव्ययीभावः। एवं चानव्ययमव्ययं

भवतीत्यन्वर्थतयैवाव्ययकार्यस्यापि लाभाद् `अव्ययीभावश्च' इत्येतदपि न तदिति चोत्, न; अत्रैव परिगणय्यान्वर्थत्वेन वा विशिष्टकार्यविषयमव्ययत्वमनुनीयताम्।।

6 अव्ययं विभाक्तसमीपसमृध्दिव्यृध्द्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यम्पत्तिसाकन्यान्तवचनेषु ।। 2-1-6 ।।
श्रुतत्वादव्ययस्यैव विभक्त्यदयो विशेषणानि, न समासस्येत्याह-विभक्त्यादिष्विति। समस्यत इति। यद्यपि `समास' इति संज्ञामात्रं विधूयते, तथाप्ययमबुधवोधनाय भ्नयोः शब्दयोः संश्लेषः प्रक्रियायां क्रियत इति `समस्यते' इत्युक्तम्। वचनग्रहणं प्रत्येकमभिसम्बध्यत इति। तञ्च कर्मसाधनं विभक्त्यादिभिः समानाधिकरणम्। विभक्त्यादिषु वाच्येषु यदव्ययं वरत्तते = विभक्त्यादीनर्थान्यदव्ययं वक्ति, द्यौतयतीत्यर्थः। विभक्तिशब्देन कारकशक्तिरभिधायते विभज्यतेऽनया प्रतिपदिकार्थ इति कृत्वा। स्त्रीष्वधिकृत्येति। स्त्रीषु कथा प्रवर्त्यत इत्यन्वयः। अधिकृत्येति, प्रस्तुत्येत्यर्थः। संनिधानाञ्च स्त्रिय एव प्रसुतत्येति गम्यते, स्त्रीविषया कथा प्रवर्त्यत इत्यर्थः। प्रायेण तु प्रवर्त्तते इति। अत्राहुः-अधिकृत्य या कथा मा स्त्रीषु प्रवर्त्तत इकत्यर्थः, तत्र प्रस्तावने कथने च कर्तुरेकत्वात्सिध्दः कृत्वाप्रत्यय इति। अन्ये त्वाहुः-कृत्यस्य कथा कर्तव्यकथेत्यर्थः, सा स्त्रीषु अधिप्रवर्तते स्त्रीष्वधाति च प्रक्रियावाक्यम्, न त्वेतत्प्रयोगार्हम्; समासस्य नित्यत्वात्। अधिस्त्रीति। `अव्ययूभावश्च' इति नपुंसकत्वाद `ह्रस्वो नपुंससके' इति ह्रस्वः। सप्तम्यर्थे यदव्ययमिति। विभक्तिवचनतां दर्शयति। उपकुम्भमिति। कुम्भस्योपेति प्रक्रियावाक्यं षष्ठ्यन्तेन समासः। दुःशकम् दुर्यवनमिति। मनुष्यजातिवचनौ शकयवनशब्दौ, किमर्थं पुनर्वृध्दिग्रहणम्, अर्थाभाव इत्येव सिध्दम्? न सिध्द्यति; येन समस्यते तद्रथस्याभावोऽर्थाभावः, न चात्र शकानामभावः, किं तर्हि? तदीयाया ऋध्देः। अर्थाभाव इत्यर्थग्रहणं यत्र धर्मिस्वरूपस्यैवाभावस्तत्र यथा स्यात्, धर्ममात्रप्रतिषेधे मा भूत्, तद्यथा-ब्राह्मणेन ब्राह्मण्यामुत्पादितत्वेन कस्यचिद्ब्राह्मणत्वं प्रसज्य प्रतिषेधति-नायं ब्राह्मणो यस्तिष्ठन्मूत्रयति। इतरेतराभावे च मा भूत्-गौरश्चो न भवतीति; अत्रापि वस्त्वन्तनं प्रतिषिध्यते, न धर्मिस्वरूपम्। अतिशीतमित्यरिथाभावः। कालनवच्छिन्नोऽभाव आश्वीयते, इह तु संप्रत्यभाव इत्ययस्य भेदेनोपादानम्। अतितैसृकमिति। तिसृका नाम ग्रामः, `तिसृभावे संज्ञायां कन्युपसङ्ख्यानम्' तत्र भवं तैसृकम् = आच्छादनम्। तच्च कालविशेष उपभोग्यम्। उष्णे शीते वा अतिशब्दो नेदानीमित्यस्यार्थे वर्तते। उपभोगक्रिया च वृत्तौ स्वावादेवान्तर्भवति, यथा-दध्युपसिक्त ओदनो दध्योदन इति। तद्ध्दरेण पूर्वोत्तरपदयोः सामर्थ्यम्, नेदानूमुपभोगार्हं तैसृकमाच्छादनमित्यर्थः। आच्छादनापेक्षस्यापि दैसृकशब्दस्य गमकत्वात्समासः। नात्र तैसृकस्य कालानवच्छिन्नो भावः, नापि संप्रति तसायाभावः, किं तर्हि? तदुपभोगस्येत्यर्थाभावादत्ययाच्चासंप्रतिभिद्यते। तत्पाणिनीति। तच्छब्दो निपातोऽप्यस्ति। प्रत्यर्थमिति। अर्थमर्थं प्रतीति वाक्यमप्यत्र भवति; भाष्यप्रयोगात्। यदि वा नात्राव्ययं वीप्सावृत्ति, किं तर्हि? कर्मप्रवचनूयत्वात्सम्वन्धमवच्छिनत्ति। वीप्सा तु द्विर्वचनद्योत्या। अनुपूर्वस्य भाव आनुपूर्व्यम्-ब्राह्मणादित्वात्ष्यञ्, ष्यञः षित्करणात्स्त्रियामपि भवति तस्य प्रयोगः। एवं ज्येष्ठ
ानुपूर्व्येणेति। सचक्रमित. सहशब्दसस्य समासः, `अव्यीभावे चाकाले' इति सभावः, एवमुत्तरेष्वप्युदाहरणेषु। गुणभूतेऽपीत्यादि। यदि `सादृश्ये' इति नोच्यते, िपूर्वपदार्थप्रधानोऽव्ययीभाव इति यदा सादृश्यं विशंष्यत्वात्प्रधावनं तदैव स्यात् सादृश्यं किख्येति, गुणभूते न स्यात्। सदृशः किख्येति। सादृश्यवतः प्राधान्यदर्शनेन सादृश्यस्य गुणभावं दर्शयचति। सरिखीति। पूर्ववद्ध्रस्वः। अपचितपरिमाणः श्रृंगालः किखी। अप्रसिध्दोदाहणम्; चिरन्तनप्रयोगात्। सम्पत्तिशब्दस्य समृध्दौ रूढत्वात्पुनरुपादानं व्यर्थमित्याशङ्क्याह-सम्पत्तिरनुपरूप आत्मभाव इति। सब्रह्म ब्राभ्रवाणामिति। तेषामनुरूपो ब्रह्मभाव इत्यर्थः। सतृणामिति। न चात्र तृणभक्षणं वास्तवमित्याह--न किञ्चिदति। तृणभक्षणमधिकोऽर्थः, तद्वचनेन किंचिदभ्यवहार्यं न परित्यजतीत्ययमर्थः प्रतिपद्यते तृणानि भक्षयन्कथमन्यत्परित्यजेदिति। परग्रहापेक्षयेति। `इदानीमेतावान्प्रदेशोऽध्येतव्यः' इति यावतः प्रदेशस्य परग्रहस्तदपेक्षया समाप्तिः = अनुतः, स चासकलेऽप्यध्ययने भवतीति भावः। साग्नीति। अग्न्यादयः शब्दास्तदर्थे ग्रन्था वर्त्तन्ते, तदानीं परिगृपीतस्य प्रदेशस्याग्न्यादिरन्तः, न तु ततः परेणाध्ययनं नास्ति; ततश्च न साकल्यमित्याह इयमिति।।

7 यथाऽसादृश्ये ।। 2-1-7 ।।
सादृश्ये समासस्य पूर्वेणैव सिध्दत्वादसंदेहार्थं सादृश्ये यथेत्यवचनाच्च नञोऽत्र प्रश्लेषः। असादृश्ये इति कितिति। सूत्रं किमर्थमित्यर्थः। यथा देवदत्त इति । देवदत्तस्य यज्ञदत्तं प्रत्युपमानत्वं यथाशब्दो द्योतयति। तत्रोपमानस्योपमेयापेक्षत्वेऽपि यथा-देवदत्तशब्दयोः सामर्थ्यात्परस्परेम समासप्रसङ्ग इति भावः। अथ पूर्वेणात्र सादृश्य इति वा, यथार्थ इति वा कस्मान्न भवतीत्याह पूर्वेणैवेति।।

8 यावदवधारणे ।। 2-1-8 ।।
यावन्ति पात्राणीति। यावदित्यव्ययं चास्ति, तध्दितान्तं च विद्यते, अतो नित्यमसासेऽपि तध्दितान्तेन विग्रहः।

9 सुप्प्रतिना मात्रार्थे ।। 2-1-9 ।।
अस्त्यत्र किचित्सूप इति किञ्चिदित्यव्ययं सूप इति पुंल्लिङ्गेन समानाधिकरणम्। सुबिति वर्त्तमान इति। `सुबामन्त्रिते' इत्यतः। अव्ययनिवृत्त्यर्थमिति। पूर्वहि सुब्ग्रहणमव्ययग्रहणेन सह विग्रहः कृतः। स्वरादीनां च दोषामन्यमहः, दिवामन्या रात्रिरिति वृत्तिविषयो सत्त्वप्रधानतादर्शनान्मात्रावति वृत्तिरविरुध्देत्यव्यस्यैव समासः स्यात्।।

10 अक्षशलाकासङ्ख्या परिणा ।। 2-1-10 ।।

अक्षशालाकासङ्क्याशब्दा इति। अक्षशलाकाशब्दौ सह्क्यावाचिनश्च शब्दा इत्यर्थः। क्वचित्तु-अक्षशब्दः शलाकाशब्दः सङ्ख्याशब्दाश्चोति पाठः। कितवव्यवहार इति कितवा = द्यूतकाराः, तेषां व्यवहालेऽक्षशलाकानां पाततं तत्रैवायं समास इष्यते, एतच्चाभुधानस्वाभाव्याल्लभ्यते। कर्व उत्ताना इति। शलाकानामपि प्रकृतत्वात्सर्वे च सर्वाश्च सर्वे, उत्तानाश्च उत्तानाश्च उत्तानाः, अवाश्चश्चावाच्यशाचावाञ्चः, `पुमान्स्त्रिया' इति पुंसः शेषः। तस्यैवास्येति। पातयितुरित्यर्थः। विपातः = पराजयः। अन्यथापाते सति, जये यादृशः पातः सर्वे उत्तानाः पतन्त्यवाञ्चो वेति ततोऽन्यादृशेषु केषुच्जुत्तानेषु, केषुचिदवाक्षु पतत्सिवत्यर्थः। अक्षेशेति। वृत्तापेक्षया कर्त्तरि तृतीया। परमेणेति। अतिशयेनातः परमित्यर्थः पञ्चपरूति न भवतीति यावत्। अस्योपपदानं स्लोकेन क्रियते। पञ्चसु त्वेकरूपेष्विति। अत्रापि पुंसः शेषः। एकरूपास्विति प्रायेण पाठः। तत्र शलाकानामेव ग्रहणम्। जय एव भविष्यतीति। लृटोऽर्थो मृग्यः, यतः पञ्चस्वेकरूपेषु जय एव भवति, तेन परमेण चतुःपरीत्यन्वयः। अक्षादयस्तृचीयान्ता इति। अन्यथा वृत्तावयं समास इष्यते, तत्र चाक्षादीनां कर्तृत्वात्त्ृतीयैव युक्तेति भावः। पूर्वक्तस्येति। पूर्ववृत्तस्येत्यर्थः। अनेकार्थत्वाध्दातूनां वचिरिह वर्त्तने वर्त्तते, तदेव यथा न तदिति तच्छब्देन परामृश्यते। पूर्वजये वृत्तस्याक्षादेर्यथा दत्वृत्तमभूत्, यदि संप्रति तथा न भवति एवं समासो भवतीत्यर्थः। पूर्वोक्तस्येति सामान्यापेक्षमेकवचनम्। जयकालेऽक्षादीनां यदेकरूपं वर्त्तनं तध्दिपरीते वर्त्तने परिणा द्योत्ये समास इति यावत्। एकतेवऽक्षशलाकयोरिति। अक्षशलाकाशब्दयोरेकवचनान्तयोः समास इत्यर्थः। इदमप्यभिधानस्वाभाव्यादेव लभ्यते, अन्था `राजपुरुषः' इत्यादाविवाभेदैकत्वमवगम्येत, न तु शुध्दमेकत्वम्। प्रायेण तु `कितवव्यवहारे च एकत्वेऽक्षशलाकयोः' इति श्लोकरूपेम पठ्यते, तत्रार्थान्तरं मृग्यं संहिताकार्यप्रसङ्गश्च। कितवव्यवहार इति किम्? अक्षेणेदं न तथा वत्तं यथा पूर्वशकटे। एकत्व इति किम्? अक्षाभ्यामक्षैर्वा इदं न तथा वृत्तम्। अक्षादय इति किम्? प्रसङ्गेनेदं न तथा पूर्वजये, परिणेति वचनात्सुबन्तमात्रेण न भवति।।

11 विभाषा ।। 2-1-11 ।।

12 अपपरिबहिरञ्चवः पञ्चम्या ।। 2-1-12 ।।

ननु बहिःशब्देन योगे न केनचित्पञ्चमी विधीयते, तत्कथं यस्य पञ्चम्यन्तेन समासः? बहिर्गतो ग्रामादित्यत्र त्वसामर्थ्यान्नैव समासेन भवित्वयमत आह-बहिःशब्देनेति। न च वचनसामर्थ्याद्वहिः शब्दस्यापञ्चम्यन्तेन समासो भवत्विति वाच्यम्; पञ्चमीग्रहणाद्। इह ह्यपपरिशब्दौ परस्परसाहचर्ययाद्वर्जनार्थौ गृह्यते, तौ च कर्मप्रवचनीयौ, तद्यौगे च पञ्चम्येव विहिता। अञ्चतिरप्यपपरिसाहचर्यादव्ययमेव गृह्यते, तद्योगेऽप्यञ्चूत्तरपदलक्षणा पञ्चम्येवास्ति। तदेतत्पञ्चमीग्रहणं ज्ञापयति-षष्ठीविषये बहिर्योगे पञ्चमी भवतीति।

13 आङ् मर्यादाभिविध्योः ।। 2-1-13 ।।

`मर्यादाभिविध्योः' इति शक्यमकर्त्तुम्, कथम्? पञ्चम्येति वर्त्तते, आङा च कर्मप्रवचनूयेनैव योगे पञ्चमी विहिता, एतयोश्यैवार्थयोराङः कर्मप्रवचीयसंज्ञा-`आङ् मर्यादावचने' इति। तत्र हि वचनग्रहणं मर्यादोक्तिमात्रे यथा स्याद् इत्यभिविधावपि भवति। तत्रैव वाऽभिविधिग्रहणमेवास्तु।।

14 लक्षणेनाभिप्रती आभिमुख्ये ।। 2-1-14 ।।

अभ्याग्न, प्रत्यग्नीति। अग्नि प्रतीति विग्रहः, `अभिरभागे' `लक्षणेत्थम्भूत' इति अभिप्रत्योः कर्मप्रवचनीयत्वाद् द्वितीया। तत्राग्निर्लक्षणम्, तेन हि शलाभानां पातो लक्ष्यते, अभिप्रती च लक्ष्यलक्षणभावं द्योतयित्वाभिमुख्यमपि द्योतयतः। स्रुघ्नं प्रतिगत इति येन देशेनाग्निर्गतस्तेनेति प्रतीतिर्भवति, गमनस्याग्निर्लक्षणभाभिमुख्यं चास्ति, `येन-तेन' शब्देन सह समासः स्यात्। अभ्यङ्काः, प्रत्यङ्काः इति। अभिनवोऽङ्क आसाम्, प्रतिनवोऽङ्क आसामिति बहुव्रीहिः। अङ्कोऽत्र भवति गवां लक्षणम्, आभिमुख्यं तु नास्ति। ननु च सति संभवेऽव्ययार्थे प्रधानेऽव्यीभाव इत्युक्तम्, कथमत्र प्रसङ्गः? एवं तर्ह्येतज्ज्ञापयति-भवतियत्र प्रकरणे बहुव्रीहिविषयेऽव्ययीभाव इति। तेन `संख्या वंश्येन', द्विमुनि व्याकरणमित्येतत्सिध्दं भवति।।

15 अनुर्यत्समया ।। 2-1-15 ।।

यत्समयेति षष्ठीसमासोऽयम्। कथं पुनः समायाशब्देन योगे षष्ठी, यावता `अभितः परितः समया' इति द्वितायया भवितव्यम्? नैष दोषः; समयाश्बदस्य मुख्योऽर्थः सामीप्यम्, तद्योगे द्वितीया। इह तु समयाशब्दवाचिन्यनुशब्दे समयाशब्दो वर्त्तते, तदाह--अनर्यत्समया। समयावाचीति। यस्य समयेति कोऽर्थः? समयावाचीत्यर्थः, तदिह मुख्येनार्थेनायोगद् द्वितीया न भवति, षषठ्चेव तु भवति, तस्याश्च समासः। न च पूरणगुणेति प्रतिषेधः; अनव्ययत्वात्। सामीप्ये हि वर्त्तमान- समयाशब्दोऽसत्तववाचित्वादव्ययम्। इह त्वनूशब्दार्थे वर्त्तते, तत्र यथा `अभिराभागे' इत्यादावनुकरणस्याव्ययसंज्ञा न भवति, तथास्यापि। एवं च यत्समयेत्यविभक्तिकः सौत्रो निर्देशः। वृत्तावपि यत्समयेति सूत्रानुकरणेन विभक्त्यभावः। तेनेति। तद्वाचिना शब्देनेत्यर्थः. अनुवनमिति। वनस्यान्विति सामूप्यसम्बन्धे षष्ठीसमासः, अस्यार्थमाह-वनं समयेति।।

16 यस्य चायामः ।। 2-1-16 ।।
लक्षणेनेति वर्त्तत इति। अन्यथा आयामो गङ्गाया इत्यस्यार्थेऽनुगङ्गमिति स्यात्। अत्राप्यायामवाचित्वादनुरेवायामशब्देनोच्यते, इत्याह अनुर्यस्यायामवाचीति। अनुगङ्ग वाराणसीति। षष्ठ्यन्तेन गङ्गाशब्देन समासः। गङ्गाया अन्विति। आयामो लक्षमत्वं चानुना द्योत्यते, लक्षणस्य लक्ष्यापेक्षत्वाल्लक्ष्यं समासार्थ इत्यर्थादुपमानोपमेयभावे समास इति वाराणस्या सामानाधिकरण्यम्-गङ्गाया इवायामो यस्याः, गङ्गेवायता वाराणसीत्यर्थः। तद्वदत्यन्तायतेत्यर्थ इति केचित्। तथा च `अनुगङ्गमेतत्सुत्रम्' इत्येकशेषसूत्रे भागवृत्तिकारः प्रयुङ्क्ते। नेति वयम्। किं प्रागायता वाराणसी? उतोदगायता? इति संदेहे इदमुच्यते-अनुगङ्गं वाराणासीति, यथोदगायता गङ्गा तथोदगायता वारामसीत्यर्थः। गङ्गायामानुसारेण वाराणस्यायाम इत्यर्थः। यमुनायामेन मथुरायामो लक्ष्यत इति। न यमुना स्वरूपेण लक्षणम्, किं तर्हि? आयामेन, मथुरापि न स्वरूपेण लक्ष्यम्, किं तर्हि? आयामेन। तत्र प्राप्ताप्तविवेकेनेदमुच्यते-यमुनायामेन मथुरायामो लक्ष्यत इति।।

17 तिष्ठद्गुप्रभृतीनि च ।। 2-1-17 ।।
समुदाया एव निपात्यन्त इति । गणे तथा पाठ एव तेषां निपातनम्। तेन शतृशानजाद्यपि भवति। `सुपो धातुप्रातिपदिकयोः' इति च प्रक्रियाकार्यं न कर्त्तव्यमिति भावः। अव्ययीभावसंज्ञानि भवन्तीति। समाससंज्ञापि विधेया, अन्तोदात्तत्वं च । प्रातिपदकसंज्ञा च यथा स्यादिति। तिष्ठद्गु कालविशेष इति। कालविशेष इत्येतदुत्तरैरपि सम्बध्यते, अत एवान्ते वक्ष्यति-`एते कालशब्दाः' इति, एतावान्कालविशेष इत्यस्याधिकार इत्यर्थः। विभक्त्यन्तरेण न समाबध्यन्ते इति। अव्यतिरिक्त एव प्रातिपदिकार्थे प्रयोग एषां कर्त्तव्यः, नान्यत्रेत्यर्थः। अन्यपदार्थे च वर्त्तन्त इति। तिष्ठद्गु, वहद्गु, आयतीगवमित्येतैरप्यस्य सम्बन्धः; अन्यथा कालशब्दत्वायोगात्। चकारोऽवधारणार्थ इति। अनेकार्थत्वान्निपातानाम्। अपरः समासो न भवतीति। वृत्यन्तरं न भवतीत्यर्थः। `आतिष्ठद्गुजपन्सध्याम्' इति तु पञ्चम्या `अव्ययात्' इति लुक्, न समासः। तिष्ठद्गु, वहद्ग्विति। लटः शत्रादेशो निपातनात्, `गोस्त्रियोः' इति ह्रस्वः। आयतीवगमित्यत्र तु पुंवद्भावाभावः शत्रादेशयः समासन्तश्च। खलेयवं खलेबुसमिति सप्तम्या अलुक्। लूयमानयवादिषु शानजादेशः। समभूमि, समपदातीति।। समत्वं भूमेरिति पूर्वपदार्थप्राधान्येऽव्ययीभावः। कचित् समंभूमि समंपदातीति पाठः, तत्र पूर्वपदस्य मुमागमः. अन्ये तु संभूमि संपदातीति पठन्ति, तत्र समस्यान्तलोपः, संशब्दस्य वा समासः। सुषामादौ शोभनत्वं समस्य विगतत्वं दुष्टत्वं निर्गतत्वमपगतत्वं समस्येति। विग्रहः। आयतोसमा आयतीसमम्, शत्रादेशः, पूर्ववत् पुंवद्भावश्च । समा = संवत्सरः। एवं पापसमं पुण्यसममिति। प्राह्वादिषु चतुर्षु प्रगतत्वमह्न इत्यादिविग्रहः। सङ्गतं प्रतिगतमस्य सम्प्रति। विपरीतम् असम्प्रति। इच् कर्मव्यतीहार इति। अयमेव द्विदण्ड्यादिष्वपि विधीयत इति तत्राप्यव्ययीभावः. दण्डादण्डीति। दण्डेश्च दण्डैश्च प्रहृत्येदं युध्दं प्रवृत्तम्, `तत्र तेनेदमिति सरूपे' इति बहुव्रीहिः। `अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घः। इच अव्ययीभावत्वेनाव्ययत्वात्सुपो लुक्।।

18 पारे मध्ये षष्ठ्या वा ।। 2-1-18 ।।
वावचनादिति। ननु महाविभाषयैवापवादेऽव्ययीभावे विकल्पिते पक्षे षष्ठी समासोऽपि भविष्यति, सोऽपि विकल्पित इति वाक्यमपि भविष्यति? उच्यते--इह वाक्येनाभिधाने प्राप्ते वृत्तिरारभ्यमाणा वाक्यस्य बाधिका प्राप्नोतीति विकल्पेन वाक्यमेव पक्षेऽभ्यनुज्ञायते। तत्रापवादविकल्पो वाक्यस्यैव प्रापक इत्युत्सर्गस्य नित्यो बाधकः स्याद्, वावचनात्सोऽपि पक्षेऽभ्यनुज्ञायत इति त्रैरूप्यसिध्दिः। एतदेव वावचनं ज्ञपकम्--यत्रोत्सर्गापवादौ महाविभाषया विकल्पितौ तत्रापवादेन मुक्ते उत्सर्गो न भवतीति। तेन पूर्वं कायस्येत्यत्रैकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति, दक्षस्यापत्यं दाक्षिरित्यत्र इञा मुक्तेऽण्न भवति। एकारान्तत्वनिपातनं यत्र सप्तम्यर्थो न सम्भवतिपारेगङ्गादानयेति, तदर्थम्। म्बवे तु `तुत्पुरुषे कृति बहुलम्' इति बहुलवचनादलुका सिध्दम् ।।

19 संख्या वंश्येन ।। 2-1-19 ।।
एकलक्षण इति। एकस्वभावः सन्तानः = सम्बन्धः, सन्तानिनामेकलक्षणत्वात्सन्तानस्यैकलक्षणत्वम्। द्वौ मुनी इति। पाणिनिकात्यायनौ। त्रिमुनीति। तौ च भाष्यकारश्च। जन्मना त्वेकलक्षणस्योदाहरणम्-एकविंसति भारद्वाजमिति। यदा तु विद्यया सहेति `लक्षणेनाभिप्रती' इत्यत्र प्रकारान्तरेणाप्ययमर्थः साधितः ।।

20 नदीभिश्च ।। 2-1-20 ।।
नदीवचनैः शब्दैरिति। नदीभिरिति बहुवचननिर्देशात्स्वरूपस्य संज्ञा नद्याश्च ग्रहणमिति भावः। समाहारे चायमिष्यत इति। अन्यथा पुरस्तादपवादन्यायेन `पूर्वकालैक' इत्यस्यायं बाधकः स्यात्। समाहारे तु परत्वाद् द्विगुहेव स्यात्, ततश्चैकनदीत्यत्राव्ययीभावे सति तन्निबन्धनः `नदीपौर्णमास्याग्रहायणीभ्यः' इति टच् प्राप्नोति नपुंसकत्वं च, न ह्यत्र विशेषवाचिनामेव ग्रहणमिति प्रमाणमस्ति। यस्तु `गोदावर्याश्च नद्यश्च' इत्यच् समासान्तः, स पञ्चनदमित्यादावव्ययीभाव एव भवति, एकनदीत्यत्र तत्पुरुषे न भवति। समाहारविवक्षायां च एकापूपीवदेकनदमित्यपि भवति। तथान्यपदार्थेऽप्यव्ययीभावः स्याद् द्वीरावतीको देश इति। न चात्र परत्वाद्बहुव्रीहिः; अशेषत्वात्, न ह्यसति समाहारग्रणेऽयं शेषो भवति। तस्मात्सुष्ठूक्तम् - समाहरे चायमिष्यत इति। एतच्चाभिधानस्वाभाव्याल्लभ्यते।।

21 अन्यपदार्थे च संज्ञायाम् ।। 2-1-21 ।।

22 तत्पुरुषः ।। 2-1-22 ।।
उत्तरपदार्थप्रधान इति। पूर्वाकायः, अर्ध्दपिप्पलीत्यादौ त्वधिकार वशात्तत्पुरुष इति संज्ञा।।

23 द्विगुश्च ।। 2-1-23 ।।
समासान्ता इति। यद्यपि `राजाहःसखिभ्यष्टच्' `तत्पुरुषस्यांगुलेः संख्याव्ययादेः' इति टजचौ तत्पुरुषनिबन्धनौ, तथापि प्रकृतिभेदाद्भेदविवक्षयां वहुवचनम्। पञ्चराजमिति। उकत्तरपदस्यानकारान्तत्वात्स्त्रीत्वाभावः. समासार्थोत्तरपदस्यान्ताः समासान्ता इति तु पक्षे पात्रादित्वात्। क्वचत् पञ्चराजीति स्त्रील्ङ्गस्य पाठः, स भाष्यविरोधादपपाठः। द्व्यह इति। 1`अह्नष्टखोरेव' इति टिलोपः, `रात्राह्नाहाः पुंसि'। पञ्चगवमिति। `गोरतध्दितलुकि' इति टच्, पूर्ववत्स्त्रीत्वाभावः।।

24 द्वितीयाः श्रितातीतपतितगतात्यस्तप्राप्तापन्नः ।। 2-1-24 ।।
श्रितादिषु गत्यर्थत्वात्कर्त्तरि क्तः। पतिरपि सकर्मकः, नेज्जिह्मायन्तो नरकं पतामेति यथा। अत्यासः = व्यतिक्रमः, गतिविशेष एव। प्राप्तिरप्यत्र गतिरेव, न फलम्। एवमापत्तिरपि। इह श्रितपतितगतैरयं सासो न विधेयः, कथम्? यः कष्टं श्रितः कष्टं तेन श्रितं भवति तत्र बहुव्रीहिणा सिध्दम्; नार्थभेदः, न रूपभेदः, न स्वरभेदः। तत्पुरुषेऽपि `अहीनेद्वितीया' इति श्रितपतितागेभ्यः पुर्वपदप्रकृतिस्वर एव भवति। अतीतादिभिस्तु स्वरसिध्दये विधेयः, तथा हि-तैस्तत्पुरुषे थाथादिस्वरेण भाव्यम्, नाहीनस्वरेण; `अतीतात्यस्तयोरहीने' इति निषेधात्, प्राप्तापन्नयोस्त्वहीने द्वितीयानुपसर्ग इति वचनात्। बहुव्रीहौ तु पूर्वपदप्रकृतितस्वरेण भाव्यम्, तस्माच्छ्रितादिभिरयं समासो न विधेयः। तत्रायमब्यर्थः, `अहीने द्वितीया' इत्येतदपि न वक्तव्यं भवति। जातिस्वरप्रसङ्गस्तु, यदा जातिकालसुखादिभ्यः परे श्रितादयो भवन्ति तदा पूर्वपदप्रकृतिस्वरं बाधित्वा `जातिकालसुखादिभ्योऽनाच्छादनात्' इत्यन्तोदात्तत्वप्रसङ्गः। ननु च तत्पुरुषारम्भोऽपि बहुव्रीह्यर्थविवक्षायां न दण्डवारितो बहुव्रीहिरिति जातिस्वरः स्यादेव? एवमप्यस्ति भेदः, तत्पुरुषे `अहीने द्वितीया' इति पूर्वपदप्रकृतिस्वरः, बहुव्रीहो `जातिकाल' इत्यन्तोदात्तत्वमिति द्वौस्वरौ भवतः; अनारम्भे तु जातिस्वर एव स्यादिति। एवं तर्हि यदेतद्वा जात इति तद्वा जातश्रितपतितगतेष्विति वक्तव्यम्? एवमपि `अहीने द्वितीया' इत्येतदपि न वक्तव्यमित्यस्त्येव लाघवम्। एतावाँस्तु विशेषः - तत्पुरुषारम्भे तत्र पूर्वपदप्रकृतिस्वरत्वम्, बहुव्रीहौ तु जातिस्वर इति द्वयोः समासयोर्द्वैस्वर्यम्; अनारम्भे तु बहुव्रीहावेव द्वैस्वर्यमिति? अत्रोच्यते - जातिकालसुखादिव्यतिरिक्तैः सह बहुव्रीहौ श्रितादीनां निष्ठेति पूर्वनिपादप्रसङ्गाद्रूपभेतः, तथा सर्वत्र कबपि प्राप्नोति। नन्वसौ `शेषाद्विभाषा' इति विकल्पितः, स च तत्पुरुषारम्भेऽपि भवत्येव, बहुव्रीहेरप्यभ्युपगमात्? एवमपि बहुव्रीहावपि द्वैस्वर्याभ्युपगमात्पुर्वपदप्रकृतिस्वरपक्षेऽपि बहुव्रीहित्वानपायात्पक्षे कपः प्रसङ्गः; तत्पुरुषारम्भे तु तत्रैव `अहीने द्वनिताया' इति पूर्वपदप्रकृतिस्वरः, बहुव्रीहौ तु जातिस्वर एव नित्यमित्यन्तोदात्तादेव कब्न पूर्वपदप्रकृतिस्वरादित्यस्त्येव विशेषः। तथाऽर्थभेजोऽपि `गत्यर्थाकर्मक' इति कर्तरि क्तो धात्वर्थस्य सर्वात्मनाऽनिष्ठितत्वेऽपि भवति - आरुढो वृक्षं देवदत्त इति वृक्षस्य एवोच्यते। कर्मणि तु भवन्सर्वात्मना निष्ठ्तत्वे भवति - आरूढो वृक्षो देवदत्तेनेति, तथेहापि कष्टं श्रित इति कष्टमनुभवन्नेवमुच्यते, कष्टं श्रितमनेनेत्यनुभूतकष्टः श्रितशबदविवक्षितस्यार्थस्य साक्षादवगतिर्भवति तत्पुरुषे। बहुव्रीहौ त्वर्थात्, तद्यथा - राज्ञः सखेत्युक्ते नूनं हाजाप्यस्य सखेति स एष सूक्ष्मदृशामेव विषयः। गमिगाम्यादीनामिति। उणादीनामन्येषां च संग्रहार्थमुभयोरुपादानम्। ग्रामं गमीति। `गमेरिनिः' इत्यौणादिक इनिप्रत्ययः `भविष्यति गम्यादयः' इति भविष्यति काले। ग्रामं गामीति। आवश्यके णिनि। `गत्यार्थकर्मणि' इत्यत्र द्वितीयाग्रहणमपवादविषयेऽपि विधानार्थमिति कृत्प्रयोगे द्वितीयैव भवति। ओगनं बुभुक्षुरिति। भुजेः सन्, `सनाशंसभिक्ष उः'। `न लोकाव्यय' इति षष्ठीनिषेधः।।

25 स्वयं क्तेन ।। 2-1-25 ।।
`धावु गतिशुध्द्योः', `उदितो वा' इति क्त्वायां विकल्पितेट्त्वात् `यस्य विभाषा' इतीट्प्रतिषेधः, `च्छ्वोः शूडनुनासिके च' इत्यूठ्, `एत्येदत्यूठ्सु' इति वृध्दिः। स्वयंविलीनमिति। `लीङ् श्लेषणे', `स्वादयओदितः', `ओदितश्च' इति निष्ठानत्वम्, कृदग्रहणे गतिकारकपूर्वस्यापि ग्रहणाद्विलीनशब्दः क्तान्तः। ऐकपद्यमैकस्वर्ये समासत्वादिति। समसनं समासः, संज्ञा वा, ततो हेतोरित्यर्थः ।।

26 खट्वा क्षेपे ।। 2-1-26 ।।
खट्वारोहणं चत्यादि। विनिन्दितो मार्गः = विमार्गः। भूमिशयनार्हो ब्रह्मचारी, वेदाध्ययनकाले तेनाधीत्य स्नात्वा गुरुभिरनुज्ञातेन खट्वा रोढव्या। यत्त्वन्यथा खट्वारोहणं तद्विमार्गप्रस्थानम्। तच्चोदाहरणमन्यस्याप्येवंविधस्योपलक्षणम्, तेन खट्वामारोहतु मा वाऽरुक्षद्विमार्गप्रस्थितः खट्वारूढ इत्युच्यत इत्यर्थः।

27 सामी ।। 2-1-27 ।।

तस्यासत्त्ववाचित्वादिति। द्रव्याधारा हि कर्मशक्तिः; अतो द्रव्यवाचिन एव द्विताया भवति, नाद्रव्यवाचिन इत्यर्थः।।

28 कालाः ।। 2-1-28 ।।
इह `काला अत्यन्तसंयोगे' इत्येको योगः कर्त्तव्यः, तत्र `क्तेन' इत्यस्य निवृत्तत्वात्सर्वत्र समासः सिध्द्यति, किमर्थं योगविभागे क्तान्तेन समासो विधीयत इत्यत आह - अनत्यन्तसंयोगार्थ वचनमिति। अनत्यन्तसंयोगमेव दर्शयति - षण्मुहूर्त्ता इति। चराचरा इति। चरेः पचाद्यचि `चरिचलिपतिवदीनामुपसंख्यानमाक् चाभायासस्य' इति द्विर्वचनमागागमश्चाभ्यासस्येति। चरन्तोऽनवस्थिता इत्यर्थः। कदाचिदहरिति। उत्तरायणे। कदाचिद्रात्रिमिति। दक्षिणायने। ततस्तैश्च षड्भिर्मुहूर्तैरह्नो रात्रेश्च नास्त्यत्यन्तसंयोगः। मासप्रमित इति। माङ आदिकर्मणि कर्त्तरि क्तः, मासं परिच्छेत्तुमारब्धवानित्यर्थः। प्रतिपच्चन्द्रमा इति। न च तेन मासस्यात्यन्तसंयोग इति भावः।।

29 अत्यन्तसंयोगे च ।। 2-1-29 ।।

30 तृतीया तत्कृतार्थेन गुणवचनेन ।। 2-1-30 ।।
तृतीयायाश्छन्दसे लुकि `गूणवचनेन' इत्यनेन सामानाधिकरण्यम्। अर्थेनेति पृथक् पदम्, अत एव गुणवचनेनार्थशब्देन चेति। कीदृशेन गुणवचनेन? तत्कृतेनेति। तदिति सर्वनाम्ना प्रकृतस्य तृतीयान्तस्य प्रत्यवमर्शः, स च शब्दः। न च शब्देन गुणवचनस्य करणं सम्भवतीत्यतः सामर्थ्यात्तदर्थकृतेनेति विज्ञायत इत्याह - तृतीयान्तार्थकृतेनेति। यावदिति। यावच्छबदो निपातस्तात्पर्यपर्यायतां दर्शयति। अर्थद्वारकं चेदं गुणवचनस्य विशेषयणम्, अर्थ एव हि तृतीयार्थेन क्रियते, न गुणवचनः शब्दः। वचनग्रहणं किम्, यावार्थेन समासासम्भवाद् गुणवचनेवैव भविष्यति? एवं यथा विज्ञायेतगुणमुक्तवान् गुणवचनः, `कृत्यल्युटडो बहुलम्' इति लक्षितो गृह्यते, न तु यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेश इति तच्छब्दप्रवृत्तिनिमित्तम्; तृतायान्तार्थकृते सर्वत्रैव तस्य भावात्। शंकुलाखण्डः, किरिकाण इति। `खडि भेदने', `कण निमीलने' इत्याभ्यां घञि व्युत्पादितावेतौ क्रियारूपापन्ने गणे वर्त्तित्वान्मतुब्लोपादभेदोपचाराद्वा त्वदति द्रव्ये वर्त्तेत इति गुणवचनौ भवतः। धान्येनार्थ इति। अर्थ्यत इत्यर्थः = प्रयोजनम्, अर्थनं वार्थः = प्रार्थना, अभिलाषः। सर्वत्र करणे तृतीयाःः समासः। अक्ष्णा काण इति। नात्राक्षणत्म्, किं तर्हि? अन्येनैव केनापि किर्यादिना, अक्ष्णा तु केवलं काणो लक्ष्यत इति तत्कृतत्वाभावः। किंच दघ्ना पटुनित्यत्र मा भूदित्येवमर्थमपि तत्कृतग्रहणं कर्त्तव्यम्। ननु यदि दधिकृतं पाटवं विवक्षितम् - दध्ना कृतः पटुरिति, ततो भवितव्यमेव समासेन; अथ भोजनाद्यपेक्षो दध्नः करणभावः - दध्ना भुङ्क्ते पटुरिति, ततोऽसामर्थ्यादेव न भविष्यति? इहापि तर्हि न स्यात् - कुंकुमेन लोहितं कोपेनं मुखमिति, अत्रापि हि कोरोतिक्रियया करण्सय सम्बन्धः - कुंकुमेन कृतं लोहितामिति। क्व तर्हि स्यात्? शंकुलया खण्ड इत्यादावेव तु स्यात्, यत्र पूर्वोत्तरपदयोः क्रियाकारकलक्षणः सम्बन्धः। तस्माद्यत्रोत्तरपदे क्रिया न गम्यते तत्रापि तत्कृतत्वे सति यथा स्याद्भोजनादिद्वारके सामर्थ्ये मा भूदिति तत्कृतग्रहणम्। गुणवचनेनेति किमिति। जातिवचनेषु जातेर्नित्यत्वात्तत्कृतस्यासम्भवः। क्रियावचने त्विष्यत एव। `कर्तृकरणे कृता बहुलम्' इति द्रव्यवाचिष्वपि तत्कृतस्यासम्भव एव। न ह्याकाशस्य तत्त्वं केनचित् क्रियते, अतो गुणवचनेनैव भविष्यतीति प्रश्नः। गोभिर्वपावानिति। गोसम्बन्धिदध्याद्युपयोगादेव तस्य वपावत्त्वं पूवरत्वमित्यस्ति तत्कृतत्वम्, न त्वसौ गुणवचनः।।

31 पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ।। 2-1-31 ।।
पूर्वसूत्रेऽर्थशब्देन समासस्य साध्तत्वादिहार्थग्रहणमर्थनिर्देशार्तम्। तच्चानन्तरेणोनशब्देनैव सम्बध्यते, न पूर्वादिभिः; समसदृशब्दयोः पृथगुपादानात्। एतदेवेत्यादि। समसदृशशब्दाभ्याम्न्यत्रेदं तद्योगे तुल्यार्थैरिति तृतीयास्ति। इह तुल्यार्थयोगे षष्ठ्यपि पक्षे विधीयते, ततस्तस्याः समासे मातुः सदृशो मातृसदृश इति सिध्दम्, किमर्थमिह सदृशग्रहणम्? `तत्पुरुषे तुल्यार्थतृतीया' इति पूर्वपदप्रकृतिस्वरो यथा स्यात्, सिध्दोऽत्र प्रकृतिस्वरः - `सतृशप्रतिरूपयोः सादृश्ये' इति । तच्च तत्र सदृशग्रहणमवश्यं कर्त्तव्यम्, यदा षष्ठीसमासस्तदान्तोदात्तत्वं मा भूदिति। ननु चेदानीमनभिधानात् षष्ठीसमासो न भविष्यति? नैवं शक्यम्, अनुक्समासे हि दोषः स्यात्,
`षष्ठ्या आक्रोशे' - दास्याः सदृशः, वृषल्याः सदृश इति, तस्मात्तत्कर्तव्यम्, इदं तु न कर्त्तव्यम्? इदमपि कर्त्तव्यम्, हेतुतृतीयार्थं विद्यया हेतुना सदृशो विद्यासदृश इति, न ह्यत्र `तुल्यार्थैः' इति षष्ठी भवति, प्रतियोगिन्येव हि सा विधीयते। एवमपि न कर्त्तव्यम् - तत्कृततत्वात्पुर्वेणैव सिध्दम्, यो हि विद्यया सदृशः, विद्याकृतं हि तत्सादृश्यम्, तत्र पूर्वेणैव सिध्दम्। `मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम्' गुडसंमिश्रा धाना इत्येवमर्थम्? ज्ञापकात्सिध्दम्, यदयं `मिश्रं चानुपसर्गमसन्धौ' इत्यनुपसर्गग्रहणं करोति, तज्ज्ञापयति - मिश्रग्रहणे सोपसर्गस्यापि ग्रहणमिति। पूर्वादिष्विति। अवरशब्दोऽपि सूत्रे पठितव्य इत्यर्थः।।

32 कर्तृकरणे कृता बहुलम् ।। 2-1-32 ।।
`कर्तृकरणे' इति प्रथमाद्विवचनम्। वृत्तौ वस्तुव्याख्यानं कृतम् - कर्त्तरि करणे च या तृतीयेति। तथा चोत्तरत्र वक्ष्यति `कर्तृकरणे कृत्यैः सहाधिकार्थवचने समस्येते' इति। पर्वोपाधिव्यभिचारार्थमिति। अव्याप्त्यतिव्याप्तिपरिहार्थमित्यर्थः। पादहारक इति। ह्रियत इति हारक इति `कृत्यल्युटो बहुलम्' इति कर्मणि

ण्वुल्, पादाभ्यामित्यपादानपञ्चम्यन्तस्य समासः। गले चोपक इति। `चुप मन्दायों गतौ', हेतुमण्णिजन्तात्कर्मणि ण्वुल्, `अमूर्ध्दमस्तकात्' यत्युल्क्। कृद्ग्रहणमनर्तकम्; अन्यस्याभावात्। इह कर्तृकरण क्रियाया एव भवतः क्रिया च धातुव्च्या, ध्तोश्च द्वये प्रत्ययाः - कृतस्तिङश्च। तत्र सुपेत्यधिकारात्तिङन्ते न प्रसङ्गः। तद्वितनिवृत्यर्थं तु - इह काष्ठैः पचतितराम्, काष्ठैः पचतिरूपम्, काष्ठैः पचतिदेश्यम्, हस्तेन कृतपूर्वी, दध्ना भुक्तपूर्वी, धृतेनेष्टीति।।

33 कृत्यैरधिकार्यवचने ।। 2-1-33 ।।
स्तुतिनिन्दाप्रयुक्तमिति। स्तुत्या निन्दया च प्रवर्त्तितं स्तोतुं निन्दितं च कृतमित्यर्थः। अध्यारोपितार्थवचनमिति। असन्नेवारोपितोऽध्यारोपितः। काकपेयेति। एवं नाम पूर्णतोया नदी यत्तटस्थैः काकैरपि शक्या पातुमिति स्तुतिः; एवं नामाल्पतोया चत्काकैरपि शक्या पातुमिति निन्दा; उभयत्र शक्यार्थे कृत्यः। श्वलेह्य इति। एवं नामाशुचिः कूपो यज्जलं श्वान एव लेढुमर्हन्तीति निन्दा; अह्रार्थे कृत्यः। बाष्पच्छेद्यानीति। एवं नाम कोमलानि तृणानि यद्बाष्पेणापि छेत्तुं शक्यानीति स्तुतिः; एवं नाम कथितानि तृणानि यद्बाष्पेणापि छेत्तुं शक्यानीति निन्दा। कण्टकसंचेय इति। एवं नाम क्लिन्न ओदनो यत्कण्टकैः शक्यः संचेतुमिति स्तुतिः; एवं नामाल्प ओदनो यत्कण्टकैः संचीयत इति निन्दा। पूर्वस्यैवायं प्रपञ्च इति। यद्यपि स्तुतिनिन्दापरत्वात्क्रियोपादानस्य कर्तृकरणयोर्गौणत्वम्, तथापि बहुलवचनात्पूर्वेणैव सिध्दम्, तथा च काकपीता नदात्यत्राकृत्यैरप्यधिकार्थवचनैः समासो दृश्यते, अतः प्रपञ्च एवायम्, नाप्राप्तविधिः, नापि नियम इत्यर्थः।।

34 अन्नेन व्यञ्जनम् ।। 2-1-34 ।।
दध्योदन इति। ननु च नेह क्रिया श्रूयते, न चान्तरेण क्रियां द्रव्याणां परस्परेण सम्बन्ध इत्यसामर्थ्यादत्र समासो न प्राप्नोति, अथासप्यपि सामर्थ्ये वचनाप्समासः? इहापि तर्हि स्यात् - किं दध्ना, ओदनो भूज्यतामिति, तत्राह - वृत्तौ क्रियाया अन्तर्भावादिति। स्वभावादेव वृत्तावन्तर्भूता क्रियेति तद्द्वारकस्य सम्बन्धस्य सद्भावात्सामर्थ्यमित्यर्थः।।

35 भक्ष्येण मिश्रीकरणम् ।। 2-1-35 ।।
खरविशदमिति। खरम् = कठिनम्, विभक्तावयवम्; खरं च तद्विशदं च खरविशदम्, हनुचलनेनादनीयमित्यर्थः। यदभ्यवहार्यं तद्भक्ष्यमित्युच्यते; तत्रैव यदन्तस्य एरजन्तस्य च भक्षयते रूढत्वात्। भक्षयतिस्त्वन्यत्रापि भवति-अब्भक्षः, वायुभक्ष इति। गौणोऽत्र भक्षयतिरित्यन्ये ।।

36 चतुर्थी तदर्थार्थबलिहितसुखरक्षतै ।। 2-1-36 ।।
अर्थः पराभृश्यत इति। यद्यपि चतुर्थीति चतुर्थ्यन्तः शब्दः सन्निहितः, तथापि शब्दं प्रति तादर्थ्यासम्भावात्तदर्थ एव परामृश्यते इत्यर्थः। इत्येतैः शब्दैः सहेति। तत्र तदर्थेन सुबन्तेनेत्यर्थध्दरकं विशेषमम्, स्वरूपेण सुबन्तस्य तादर्थ्यासम्भवात्। द्वितीयस्त्वर्थशब्दः पृथगेव निभत्तम्। प्रकृतिविकारभावे समास इष्यत इति। ज्ञापकात्। यदयं बलिरक्षितग्रहणं करोति तज्ज्ञापयति - विकृतिश्चतुर्थ्यन्ता प्रकृत्या समस्यत इति; अन्यथा कुबेरबलिः, गोरक्षितमित्यत्रापि तादर्थ्यसम्भवादनर्थकं तत्स्यात्। हितसुखग्रहणं तु `हितयोगे चतुर्थी वक्तव्या', `चतुर्थी चाशिषि' इत्यतादर्थ्येऽपि चतुर्थीसम्भवान्न ज्ञापकम्। यदि विकृतिः प्रकृत्या समस्यते - अश्वेभ्यो घासः, अश्वेभ्यः सुरा ऽश्वसुरम्, `विभाषासेना' इति नपुंसकत्वम्, हस्तिभ्यो विधा हस्तिविधा, विधा = अन्नविशेषः; अत्र न प्राप्नोति? अश्वघासादयः षष्ठीसमासा भविष्यन्ति। ननु स्वरे विशेषो भवति चतुर्थीसमासे हि सति `चतुर्थी तदर्थ' इति पूर्वपदप्रकृतिस्वरेण भाव्यम्, षष्ठीसमासे तु समासान्तोदात्तत्वेन? नैषोऽस्ति विशेषः; चतुर्थीसमासेऽपि नैव पूर्वपदप्रकृति स्वरेण भाव्यम्; ज्ञापकात्, यदयं `क्ते च' इति चतुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं भवतित्याह, तज्ज्ञापयति - प्रकृतिविकारभावाभाव एष स्वरो न भवतीति; अन्यथा गोरक्षितमित्यत्रापि `चतुर्थी तदर्थ' इत्येव सिध्देरनर्थकं तत्स्यात्। नैतदस्ति ज्ञापकम्; हितार्थमेतत्स्यात् - गोहितमित्यत्र हि तादर्थ्यं नास्ति। एवमपि `हिते च' इति वक्तव्ये `क्ते च' इति साम्यवचनं ज्ञापकमेव, सर्वथा कुबेरवलिरित्याद ौ मा भूदित्येवमर्थ प्रकृतिविकारभावे स्वर एषितव्यः। अथ रन्धनाय स्थालीत्यत्र षष्ठीसमासः कस्मान्न भवति? कश्चिदाह भवत्येव, तद्यथा - गोग्रासः, लालाम्बुजम्, क्रीडासरः, वासभवनम्, नाट्यशालेति। अपर आह - रन्धनस्थाल्यादयोऽनभिधानात् षष्ठीसमास न भवन्तीति। उभावपि प्रतिब्रूमः येषु षष्ठीसमास इष्यते तेषु चतुर्थीसमास एवास्तु, येषु तु नेष्यते तेषु तु चतुर्थीसमास एवानभिधानान्नेष्यताम्, माकारिज्ञापनार्थं बलिरक्षितग्रहणम्, स्वरस्तु चतुर्थीसमासेऽपि पूर्वोक्तेन प्रकारेण प्रकृतिविकारभाव एव व्यवस्थास्यते। किं चैवं सति सूत्रमेवैतदनर्थकम्, यूपदार्वादावपि षष्ठीसमास एवास्तु, `चतुर्थी तदर्थ' इत्येतत्तु `षष्ठी तदर्थ' इति क्रियताम्, ज्ञापकाच्च स्वरस्य व्यवस्था क्रियत्म्। नन्वर्थभेद। भवति-षष्ठीसमासे सम्बन्धमात्रं गम्यते, चतुर्थीसमासे तु तादर्थ्यं सम्बन्धविशेषः? नैषोऽस्ति विशेषः, आरभ्यमाणेऽपि चतुर्थीसमासे न दण्डवारित- षष्ठीसमासः, तत्रार्थप्रकरणादिना विशेषोऽवसेयः। यद्येवम्, केवलेऽपि षष्ठीसमासे तथा विशेषोऽवसंस्यते, किञ्च सिध्दन्तेऽश्ववघासादिषु तावदर्थप्रकरणादिना तादर्थ्यविसायः सर्वत्रैव तथास्तु, नार्थोऽनेन? उच्यते-हितशब्देन तावत्षष्ठीसमासो न भवति; तद्योगे चतुर्त्या नित्यत्वादिति चतुर्थीसमास एव वक्तव्यः। ततश्च `क्ते च' इत्यत्रापि चतुर्थीग्रहणं कर्तव्यं गोहितमित्याद्यर्थम्। एवं च गोरक्षितमित्यत्र न स्यात्, चतुर्थ्या असम्भवात्। `षष्ठी तदर्थ' इत्यस्य चाप्रसङ्गः, प्रकृतिविकाराभावादिति रक्षितेनापि चतुर्थीसमास एव विधेयः। अर्थशब्देनापि योगे तादर्थ्यसंबद्धविशेषस्यनियमेन प्रतीयमानत्वाच्चतुर्थ्या सम्भवितव्यमिति नेनापि चतुर्थीसमास एव चर्तव्यः। बलिसुखग्रहणमपि कर्त्तव्यम्, तादर्थ्यस्य समासे नियमेन प्रतीतिर्यथा समयादित्येवमर्थम्। तस्मादारब्धव्यमेव सूत्रम्।

प्रकृतिव्कारभाव एव समास इत्यस्य तु प्रयोजनं चिन्त्यम्। अर्थेन नित्यसमासवचनमिति। अन्था महाविभाषाधिकाराद् ब्राह्मणायार्थ इति वाक्यमपि स्यात्। सर्वेलिङ्गता चेति। परलिङ्गताया अपवादः, अभिदेयवशेन च सर्वलिङ्गता न सर्वत्रेति दर्शयति। ब्राह्मणार्थे पय इत्यादि। सर्थबिति चेत्, इत्संज्ञाभावः, इयङुवङ्प्रसङ्श्च। स्यादेतत् - तदर्थं विकृतेः प्रकृतावित्यत्र तदर्थे सर्थविति सूत्रं कर्तव्यम्, चतुर्थी वर्तते, चतुर्थसिमर्थात्तदर्थेऽभिधेये सर्थप्रत्ययो भवति, सकारः पदसंज्ञार्थः - राजार्थः, गवार्थः, पित्त्वादनुदात्तत्वम्; एवं चार्थ इति पूर्वपदप्रकृतिस्वरो न विधेयः, प्रत्ययत्वाच्च न तेन विग्रहः, तध्दितत्वाच्चाभिधेयवल्लिङ्गता सिध्यतीति? तन्न; सकारस्येत्संज्ञाभावप्रसङ्गात्। अथ `आदिर्ञिटुडवः' `षः प्रत्ययस्य' इति द्विषकारकनिर्देशाश्रयणेनेत्संज्ञा स्याद्? एवमपि वुञ्छणादिषु तृणादिभ्यः से प्रसङ्गः, श्र्यर्थम् भ्वर्थमित्यत्र चेयङुवङौ स्याताम्, बहुव्रीहावात्वकपोः प्रसङ्गः। स्यैदेतत् - यद्ब्राह्मणार्थः पयस्तस्य ब्राह्मणोऽर्थः प्रयोजक इति शक्यते वक्तुम्, अतो ब्राह्मणोऽर्थोऽस्येति विगृह्य बहुव्रीहिः करिष्यते, तेन चतुर्थ्यन्तेन । विग्रहाभावः पूर्वपदप्रकृतिस्वरत्वमभिधेयवन्नङ्गता च सिध्यतीति? तन्न; महदर्थमित्यत्रत्वकपोः प्रसङ्गात्। तदर्थस्यार्थादेश उदभावप्रसङ्गः। स्यादेतत् - `चतुर्थी तदर्थ' इत्यनेन समासं विधायार्थ इत्यनेनाशेन तदर्थवाचन उत्तरपदस्यार्थशब्द आदेशो विधीयते, विभाषाधिकाराच्च यूपार्थं दारु यूपदार्वितुभयं भाविष्यति, ततो बलिरक्षितयोरपि विभाषार्थशब्द आदेशो भवति कुबेरार्थो बलिः कुबेरबलिरित्यादि। किमर्थमिदम्, पूर्वेणैव सिध्दम्? ज्ञापकार्थम्, एतज् ज्ञापयति - प्रकृतिविकाराभावादन्यत्र नित्योऽर्थादेश इति। तेन रन्धनार्था स्थालीत्यादि भवति, न तु रन्धनस्थालीत्यादि। अश्वघासादयस्तु पूर्ववत्। अत्र समासे कृते उत्तरपदस्य विधीयमानेनार्थशब्देन विग्रहो न भविष्यति, यस्यावस्थानेऽर्थादेशस्तल्लिङ्गता स्थानिवद्भाधेन भविष्यति, अर्त इति पूर्वप्रदप्रकृतिस्वरस्तु विधेय एवेति, तन्न; उदकार्थो वीवध इति वीवधशब्दस्यार्थादेशे कृते स्थानिवद्भावेन मन्थौदनादिसूत्रेणोदभावप्रसङ्गात्। अतश्चतुर्थीसमास एव विधयः। तथा चार्तेन नित्यसमासः सर्वलिङ्गता च वक्तव्या? न वक्तव्या, ब्राह्मणायेति चतुर्थ्या तादर्थ्यस्योक्तत्वादर्थशब्देन विग्रहो न भविष्यति। `लिङ्गमशइष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति कर्वलिङ्गता च सिध्दा।
तदेतत्प्रतिपद्यन्तां भाष्ये कृतपरिश्रमाः।
नान्ये सहस्त्रमप्यन्धाः सूर्यं पश्यन्ति नाञ्जसा।।

37 पञ्चमी भयेन ।। 2-1-37 ।।
भेयेनेति स्वरूपग्रहणादव्याप्तिरिति मत्वाऽऽह -- भयभीभीतिभीभिरिति वक्तव्यमिति। एवं सूत्रन्यासः कर्तव्य इत्यर्थः। व्याख्यानात्त्वर्थग्रणे `वृकेभ्यस्त्रासः' इत्यादावपि प्रसङ्गः इति भावः। स तर्हि तथा न्यासः कर्तव्य? नेत्याह - पूर्वस्यैव बहुलग्रहणस्येति। यथा हि `पादहारकः' इत्यादै बहुलग्रहणात्सर्वेपाधिव्यभिचारार्थाद्भवति, एवमत्रापि भविष्यतीत्यर्थः। अधमजुगुप्सुरिति `जुगुप्साविराम' इत्यधर्मस्यापादानसंज्ञा।।

38 अपेतापोढमुक्तपतितापत्रस्तैरल्पशः ।। 2-1-38 ।।
अल्पशब्दाद् `बह्वल्पार्थात्' इति शस, `शसि बह्वल्पार्थस्य' इति पुंवद्भावः। कारकत्वं तु समसनक्रियायां कर्मत्वात्। अत एव पञ्चमी समस्यत इति कर्मणि लकारः। तत्र तु बह्वल्पार्थान्मङ्गले वचनमिति वक्ष्यति। तस्मादत एव निपादनादत्र शसति युक्तम्। अल्पा पञ्चमीति। अल्पाभ्यः प्रकतृतिभ्य उत्पन्नेत्यर्थः।

39 स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ।। 2-1-39 ।।

40 सप्तमी शौण्डैः ।। 2-1-40 ।।
अत्र साहचर्याद् धूर्त्तादिष्वजहत्स्वार्थ एव शौणडशब्दः प्रयुज्यते, यथा - छत्त्रिणो गच्छन्तीति। अत्र च प्रमाणं बहुवचननिर्द्देशः, अतेऽन्तरेणाप्यादिशब्दं तदर्थो गम्यते इत्याह - शौण्हादिभिरिति। गणपाठसामर्थ्यात्तु बहुवचननिर्देशोऽर्थनिर्देशार्यः, बहुवचनान्तस्य वा समासार्थ इति न चान्यत्सप्तम्या निम्त्तमस्ति। न चैतदेव ज्ञापकं शक्यमाश्रयितुम्; शौण्डो देवदत्त इत्यादावपि प्रसङ्गाद्, अत आह - वृत्ताविति। अन्तःशब्दोऽत्र पठ्यते, तद्योगेऽवयविन आधारत्वविवक्षायां सप्तमी, यथा वृक्षे शाखेति, वनेऽन्तर्वनान्तः। अस्य विकल्पितत्वादव्ययीभावोऽपि भवति, अन्तर्वणम्, `प्रनिरन्तः' इति णत्वम्। अधिशब्दः पठ्यते, तस्याविकरणप्राधान्येऽव्ययीभावः - अधिसत्रीति। आधेयप्राधान्ये ह्ययं तत्पुरुषः - ब्राह्मणाधईनमिति। `अद्युत्तरपदात्खः' इति खः। ब्राह्मणेष्वधीति वाक्यम्।।

41 सिध्दशुष्कपक्वन्धैश्च ।। 2-1-41 ।।
साङ्काश्यसिध्दिः काम्पिल्यसिध्द इति। सङ्काशेन निर्वृत्तं वनं साङ्कायम्। कम्पिलेन निर्वृत्तं काम्पिल्यम्। चातुर्थिकः सङ्काशादिभ्योण्यः तत्र तपसा सिध्द इत्यर्थः।।

42 ध्वाङ्क्षेण ।। 2-1-42 ।।
`स्वं पूपं शब्दस्य' इति वचनात्पर्यायाणां न प्राप्नेतीत्य आह - ध्वाङ्क्षेणेत्यर्थग्रहणमिति। व्याख्यानाच्चैतदवसीयते। तीर्थे ध्वाङ्क्ष इवेति। उपमानोपमोयभावे

सति क्षेपो गम्यते, नान्यथेतीवशब्दः प्रयुक्तः। यथा तीर्थे ध्वाङ्क्षा न चिरं स्थातारो भवन्ति, एवं कार्येष्वनवस्थितस्तीर्थध्वाङ्क्ष इर्तर्थः, तदाह - अनवस्थित इत्यर्थ इति। वृत्तौ त्विवार्थस्यान्तर्भावादिवशब्द्सयाप्रयोगः।।

43 कृत्यैर्ऋणे ।। 2-1-43 ।।
यत्प्रत्ययान्तेनैवेष्यते इति । `अल्पशः' इत्यनुवृत्तेरेतल्लभ्यते। कृत्यैरिति बहुवचनं तु प्रकृतिभेप्रायम्। ऋणग्रहणं च नियोगोपलक्षणार्थमिति। नियोगः = अवश्यम्भावः। ऋणमवश्यदेयमिति नियोगसाहचर्यान्नियोगमात्रमुपलक्षयति। तेन किं सिध्दं भवतीत्याह - इहापीति। पूर्वाह्णोगेयमिति। `तत्पुरुषे कृति बहुलम्' इत्युलुक्। यथा ऋणमवश्यं देयम्, एवमिदमपि पूर्वाह्णेऽवश्यं गेयमिति नियोगोऽस्ति।।

44 संज्ञायाम् ।। 2-1-44 ।।

45 क्तेनाहोरात्रावयवाः ।। 2-1-45 ।।
दिवा वृत्तमिति। ऐकपद्यमैकस्वर्यं च न भवति। ननु च दिवाशब्दोऽधिकरमशक्तिप्रधानः तत्रभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः सम्पन्न इति प्रथमैवास्माद्भवति, अतः सप्तम्यभावादेवात्राप्रसङ्गः। नैषोऽस्ति नियमः - अधिकरणक्तिप्रधान इति; दिवामन्या रात्रिरित्यपि दर्शनात्। कथं `रात्रिवृत्तमनुयोक्तुमुद्यत' इति? `कर्तृकरणे कृता बहुलम्' इति मन्यते। एवं चान्यजन्मकृतमित्याद्यपि भवति।।

46 तत्र ।। 2-1-46 ।।
तत्रेत्येतत्सप्तम्यन्तमिति। तत्रभवानित्यादौ विभक्त्यन्तरेऽपि दर्शनादध्रकणप्रतिपादने तत्रशब्दादपि सप्तम्येवापेक्ष्येति मन्यते।।

47 क्षेपे ।। 2-1-47 ।।
अवतप्तेनकुलस्थितं तवैतदिति चिरन्तनप्रयोगः, तस्यार्थमाह - चापलमेतत्तवेत्यर्थ इति। यथा अवतप्ते प्रदेशे नकुला न चिरं क्थातारो भवन्ति, एवं कार्याण्यारभ्ययश्चापलेन न चिरं तिष्ठति स एवमुच्यत इत्यर्तः। `कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति नकुलस्थितशब्देन समासः, पूर्ववदलुक्।।

48 पात्रेसमितादयश्च ।। 2-1-48 ।।
युक्तारोह्यादिपरिग्रगर्थमिति। युक्तारोह्यादयश्चेत्यत्रैषामपि परिग्रहो यथा स्यादित्यर्थः। प्रत्र एव समिता इति। भोजनसमय एव सङ्गता इत्यर्थः। पात्रेबहुला इति। भोजनसमय एव सङ्घीभवन्ति, नान्यकार्य इत्यर्थः। उबुम्बरमशकादिष्विति। यस्तत्रैव तृप्तो नास्मात्परमस्तीति मन्यते, सोऽयमदृष्टविस्तारः पुरुष उदुम्बरमशकादिरुच्यत इत्यर्थः। प्रतिषिध्दसेवनेनेति। शत्रुषु भार्यायां वा पुरुषायितव्यम्, मातरि पुरुषायितं प्रतिषिध्दप्। निरीहतयेति। पिण्डी = ओदनपिण्डः, तत्रैव शूरो नान्यत्रेति निरीहता। परमपात्रेसमिता इति। एवंरूपं वृत्त्यन्तरं न भवति, परमाः पात्रेसमिता इति वाक्यमेव भवतीत्यर्थः।।

49 पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ।। 2-1-49 ।।
भिन्नप्रवृत्तिनिमित्तस्येत्यादि। भिन्नग्रहणं पर्यानिवृत्त्यर्थम्। एकग्रहणं गौरश्च इत्यादिनिवृत्त्यर्थम्। क्वचिद् भिन्नन्मित्तप्रयुक्तस्येति पाठः, भिन्नेन निमित्तेन प्रवृत्तिनिमित्तेन प्रवर्त्तितस्येत्यर्थः। `विशेषणं विशेष्येण' इति सिध्दे पूर्वकालादीनां पूर्वनिपातार्थं वचनम्, एकशब्दस्य तु `दिक्संख्ये संज्ञायाम्' इति नियमात्प्राप्त्यर्थमेव। पूर्वकाल इत्यर्थग्रहणमिति। पूर्वः कालोऽस्य पूर्वकालः, पूर्वमनुष्ठत इत्यर्थः। स च चरमानुष्ठितमपेक्ष्य भवतीत्यर्थात्तेनैव समासो विज्ञायत इत्याह - परकालेनेति। स्नातानुलिप्त इति। पूर्वं स्नातः पश्चादनुलिप्त इत्यर्थः। अत्र क्रियाशब्दत्वात्पाचकपाठकादिवत्पूर्वनिपातः पर्यायात्स्यात्। एकशाटिति। शाटशब्दाज्जतिलक्षणो ङीष्, `एकतध्दिते च' इति ह्रस्वः। सर्वमनुष्य इति। अत्र विशेषणमित्यपि समेसे न दोषः, तस्मात्क्रियावाचिनां कूणवाचिनां वा समासो दर्शनीयः। एवं जरदादिष्विपि एकस्याः शाटीति। अत्र भवितव्यमेव षष्ठीसमासेन, तस्मादेकरस्याः शौक्ल्यगिति प्रत्युदाहर्त्तव्यम्। अत्र हि गुणेन नेति प्रतिषेधः।।

50 दिक्संख्ये संज्ञायाम् ।। 2-1-50 ।।
`विशेषणं विशेषण' इति सिध्दे नियमार्थमेतत् - संज्ञायामेव ,नान्यत्रेति। पूर्वसूत्रमित्यादौ त्वदिग्वाचित्वात् समासः।।

51 तध्दितार्थोत्तरपदसमाहारे च ।। 2-1-51 ।।
तध्दितार्थोत्तरपदसमाहारे च ।। `विशेष्येण' इति सिध्दस्य पूर्वेशानियमादप्राप्तविधिरयम्। अगृह्यमाणविषयत्वाद्वायमपि नियमः शक्यते वक्तुम् - अयं नियमः पूर्वो विधिरिति। एकापि सप्तमी विषयभेदाद्भिद्यत इत्याह - तध्दितीर्थे विषयभूत इत्यादिना। तध्दितार्थेऽभिधेय इत्येवं तु विज्ञायामाने पाञ्चनीपितिरित्यादौ दध्दितो दुर्लभः स्यात्; तदर्थस्य समामेनैवोक्तत्वादिति भावः। अस्मिन् पक्षेऽर्थग्रहणं चिन्त्यप्रयोजनम्। दध्दिते विषय इत्येवास्तु, तध्दिते परत इति तु

विज्ञायमाने इतरेतराश्रयं प्राप्नोति - समासात्तध्दितो विधेयः, तध्दिते च समास इति। किञ्च - `तध्दितार्थेऽभिधेये' इत्यास्मन् पक्षे न दोषः, `द्विगोर्लुगलपत्ये' इति लुग्वचनं ज्ञापकमुत्पद्यते - द्विगोस्तध्दित इति सर्वतध्दितसाधारणो द्विगुः, तत्रावश्यं विशेषाभिधआनाय तध्दित उत्पद्यत इत्यपि श्कयं विज्ञातुम्। अथेवं कस्मान्न वज्ञायते - तध्दितार्थे द्विगुर्भवति, तध्दितो यथा स्यादिति द्विगुर्भवतीति, यथादारार्थं घटामहे, दारा यथा स्युरिति घटामह इति? नेवं शक्यं विज्ञातुम्; एवं हि विज्ञायमाने दध्दितोत्पत्तये विधीयमाना समाससंज्ञा विषयान्तरे न स्यात्। एवं तस्यैव समासस्य विधीयमाना द्विगुसंज्ञापि, ततश्च पञ्चारत्निरित्यत्र इगन्ते द्विगाविति स्वरो न स्यात्, तस्य तु समाहारद्विगुरवकाशः, यथा - स्वरे विधीयमानः पराङ्गवद्भावः षत्वणत्वयोर्न भवति, तथात्रापि। पौर्वशाल इति। पूर्वस्यां शालायां भव इति तध्दितार्थे विवक्षते समासः, ततस्तध्दितः। पूर्वशालाप्रिय इति। पूर्वा शाला प्रियास्येति त्रिपदे बहुव्रीहौ प्रियशब्दे उत्तरपदे परतः पूर्वयोस्तत्परुषे सति समासान्तोदात्तत्वं शालाशब्दस्य भवति, असति त्ववान्तरतत्परुषे सतदि समासान्तोदात्तत्वं शालाशब्दस्य भवति, असति त्ववान्तरतत्पुरुषे पूर्वपदप्रकृतिस्वरेण पूर्वशब्दस्याद्युदात्तत्वमवतिष्ठेत। समाहारे दिक्शब्दो न सम्भवतीति। स हि समूहरुपत्वाद्भेदनिबन्धनः, संख्यैव च भेदमाचष्टे, दिक्शब्दस्तु प्रत्यर्थनियतः। विभक्तिरपि समासे निवर्त्तते। ननु यथा `काकसमूहः' इत्यत्र विभक्त्यभावेऽपि भेदावगतिस्तथात्रापि भविष्यति, तस्मात्प्रयोगाभावादित्येवात्र हेतुर्वक्तव्यः। पाञ्चनापितिरिति। पञ्चानां नीपितानामपत्यमिति समासे, अत इञ्। पञ्चकपाल इति। पञ्चसु कपालेषु संस्कृत इति समासे `संस्कृत भक्षाः' इत्यणः `द्विगोर्लुगलपत्ये' इति लुक्। पञ्चगवधन इति। पञ्च गावो धवमस्येति त्रिपदे बहुव्रीहौ कृते धनशब्द उत्तरपदे परतः पूर्वयोस्तत्पुरुषे `गोरतध्दितलुकि' इति टचि। अयमुत्तरपदे तत्पुरुषो महाविभाषाधिकाराद्विकल्पेन प्राप्नोति, नित्यो बक्तव्यः; अन्यथा पञ्चगोधन इत्यपि स्यात्। उक्तं च `द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्' इति, वाक्च दृषच्च प्रिये अस्य वाग्दृषदप्रिय इति त्रिपदबहुव्रीहौ पूर्वयोर्द्वन्द्वः, स च नित्य इष्यते - नित्यं समासान्तो यथा स्यादिति। पञ्चपूलिति। पञ्चानां पूलानां समाहार इति विग्रहः, न तु पञ्चपूलाः समाहृता इति। भावसाधनो हि समाहारशब्दः - समाहरणं समाहारः = विप्रकीर्णानामेकत्र राशीकरणम्। पञ्चग्रामः, षण्णगरी, त्रिपुरीत्यत्रैकस्मिन् क्षणे क्रियायां समन्वयाद्भिन्नदेशानामपि बुध्द्या राशोकरणं भवति। अथ कर्मसाधने को दोषः? इह पञ्चकुमारीति, कुमार्यर्थप्रधान्यात्समासशास्त्रे चाप्रधमानिर्द्दिष्टत्वादेकविभक्तित्वाभावाच्चोपसर्जनत्वाभावाद् `गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वो न स्यात्, काममत्र नुपंसकह्रस्वत्वं सिध्दम्। इह पञ्च खट्वाः समाहृताः पञ्चखट्वीति वा टाबन्त इति सत्रीलिङ्गपक्षे ह्रस्वाभावाद् `द्विगोः' इति ङीब् न स्यात्। भावसाधने तु समासार्थे समाहारे नानाविभक्तिभिर्युज्यमानेऽपि कुमारीशब्दस्य नित्यं षष्ठ्यैव योग इतेयकविभ्क्तिकत्वात्सिध्दमुपसर्जनत्वम्। तस्माद्भावसादनः। द्विगुरेकवचनमित्येतत्तु `स नपुंसकम्' इति वक्ष्यामीत्याहभ्यते, कथं पञ्चपूलामानयोत्युक्ते पूलानामानयनम्, नान्तरेण द्रव्यानयनं भावानयनं सम्भवति, यथा नान्तरेण प्रत्रानय्नमग्नेरानयनं सम्भवति? एवमपि समाहारग्रहणमनर्थकम्, भावसाधनो हि समाहारशब्दः समूहपर्यायः, समूहश्च तध्दितार्थस्तत्र `तध्दितार्थ' इत्येव सिध्दम्। यद्येवम्, दध्दितोत्पत्तिः प्राप्नोति? उत्पद्यतां दध्दितः, `द्विगोः' इति लुग्भविष्यति। लुक्कृतानि प्राप्नुवन्ति, पञ्चपूली-`अपरिमाणबिस्ताचित' इति ङीप्प्रातिषेधः प्राप्नोति, `पञ्चगवम्, `गोरतद्वितलुकि' इति टच् न प्राप्नोति? नैष दोषः; अपरिमाणेत्यत्र न तध्दितलुकीत्यपास्य `समाहार' इति वक्तव्यम्, तन्नियमार्थम् - अविशेषेण द्विगोङीब्भवति, अपरिमाणान्ताद्विस्ताचितकम्बल्यान्ताच्च समाहार एवेति, पञ्चानामश्वानां समाहारः पञ्चश्वी। क्व मा भूत्? पञ्चभिरश्वैः क्रीता पञ्चाश्वा। `गोरतद्वितलुक्' इत्यत्राप्यतध्दितलुकीत्यपास्य `द्विगोः समाहार' इति वक्तव्यम्, तन्नियमार्थम् - गोशब्दन्तस्य तत्पुरुषस्याविशेषेण टज् भवति, द्विगोस्तु समाहार एवेति, पञ्चानां गवां समाहारः पञ्चगवम्। क्व मा भूत्? पञ्चभिर्गोभिः क्रीतः पञ्चगुः पटः। एवमपि पञ्चकुमारीत्यत्र `लुक् तध्दितलुकि' इति स्त्रीप्रत्ययस्य लुक् प्राप्नोति। तस्मात्तध्दितनिवृत्त्यर्थम्। समाहारग्रणात्तु समासस्यैव समाहारो वाच्यः, न तध्दितस्येति व्याख्यानात्तध्दितो नोत्पद्यत इति सिध्दमिष्टम्। इह पञ्च गावोऽस्य सन्ति पञ्चगुः पुरुष इति मत्वर्थम्य तध्दितार्थत्वादयं समासः प्राप्नोति, न बहुव्रीहिः; अशेषत्वात्, तस्य तु चित्रग्वादिरवकाशः, यत्र दिक्संख्ये न स्तः। सति चास्मिन्समासे मतुपः श्रवण स्यात्। अप्राग्दीव्तीयत्वाद् द्विगोर्लुगापि नास्ति। तस्मान्मत्वर्थे प्रतिषेधो वक्तव्यः।।

52 संख्यापूर्वो द्विगः ।। 2-1-52 ।।

क्वचिदनन्तरोऽपोक्ष्यते, यत्रैतदुच्यते - 'अनन्तस्य विधिर्वा भवति प्रतिषेधो वा' इति; क्वचित्समुदायः, यथा - `न षट्स्वस्रादिभ्यः' इत्यत्र वक्ष्यते - तस्मान्नोभाविति, तदिह समुदायोऽपेक्ष्ते? अनन्तरो वा? इति संशयेऽनन्तर इत्याह - तध्दितार्थ इत्यादि। अयं भावः - समुदायापेक्षायां संख्यापूर्वपदसमानाधिकरमसमासमात्रपरिग्रहे द्विमुनि व्याकरणस्येत्यव्ययीभावस्यापि स्यादितीगन्ते द्विगाविति स्वरप्रसङ्गः। समानाधिकरणतत्पुरुषापेक्षायामपि एकशाटीत्यत्रापि स्यात्। संख्याशब्दोपादनविहितत्पुरुषपरिग्रहेऽपि `दिक्सख्ये संज्ञायाम्' इत्यस्यापि ग्रहणात्सप्तरषय इत्यत्र द्विगुस्वरप्रसङ्गः। योगविभागश्चानर्थकः, `दिक्सख्ये संज्ञायां तध्दितार्थोत्तरपदसमाहारे' इत्येकयोगः कर्त्तव्यः स्यादिति। कथमेकापूपीति? अत्र ह्येकश्चासावपूपश्चेति पूर्वकालेति समासे कृते द्विगत्वे सति `अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते' इति `द्विगोः' इतईकारः सिध्द्यति, नान्यथा। न चैकशाटीतिवज्जातिङीष्नेन समासः सक्यतेकर्तुम्, केवलस्यापूपशब्दस्य पूंल्लिङ्गत्वात्? उच्यते - अत्रानन्तरसूत्रेण समाहार एव समासः। नन्वनेकविषयः समाहारो नेकस्य सम्भवति, कथम्? एहैसमप्यपूपं कश्चित्कृपणो दददनेकं मन्यते, तथा दानश्रध्दातिशयादपूपमहत्तवाद्वाऽनेकस्मिन्यः संगमस्तमेकस्मिन्नपि करोति। अनेन प्रतिग्रहीता कृपणो व्याख्यातः, तत्ररोपितबहुत्वाश्रयः समाहार इति सध्दम्।।

53 कुत्सितानि कुत्सनैः ।। 2-1-53 ।।
कुत्सितानीति। `कुत्स अवक्षेपणे' मत्यादिसुत्रे चकारस्यानुक्तसमुच्चयार्थत्वाद्वर्त्तमाने क्तः। बहुवचननिर्देशादुभयत्रार्थग्रहणं न स्वरूपग्रहणमित्याह - कुत्सितवाचीनीति। वैयाकरणखसूचिरिति। सूचयतेः `इच्च' इतीकारः। यः पृष्टः सन् प्रश्नं विस्मारयितुं खं सूचयति = खं निरीक्षते - अहो निर्मलं गगलमिति, स एवसुच्यते। अत्र व्याकरणस्य वेदाङ्गस्याध्ययनं प्रशस्तमपि प्रतिभानाभावेन निष्फलत्वात्कुत्स्यते। याज्ञिककितव इति। किं तवास्तीति धनमात्रप्रश्नेन जात्यादिनिरपेक्षो द्यूते प्रवर्त्तमानः कितवः। इह तु कितव इव कितवः, यो याज्ञिको याज्यस्य धनसत्तामेवापेक्षते न यागार्हताम्, स याज्ञिककितव इत्युच्यते, तदाह - अयाज्ययाजकस्तृष्णपपर इति। मीमांसकदुर्दुरूट इति। `दुल उत्क्षेपे', दुःपुर्वः औणादिकः कूटप्रत्ययः। `बहुलमन्यत्रापि' इति णिलुक्, लरयोरेकविषयत्वस्मरणाद् दुर्दुरुट इति भवति। वैयाकरणश्चौर इति। कथमेतत्प्रत्युदाहरणम्, यावता चौरतवेन गर्ह्यमाणत्वाद्भवत्येव वैयाकरणकुत्सा, तत्रह - न ह्यत्रेति। प्रत्यासत्तेः शब्दप्रवृत्तेः शब्दप्रवृत्तिनिमित्तकुत्सायां समासेन भवितव्यम्, अत्र च वैयाकरणः कुत्स्यते चौरत्वेन, न तु वैयाकरणत्वम्। कुत्सिनो ब्राह्मण इति। अत्र `विशेषणं विशेष्यण' इति भवितव्यमेव समासेन। यदि नेष्यते, बहुलग्रहणं शरणम्।।

54 पापाणके कुत्सितैः ।। 2-1-54 ।।

55 उपमानानि सामान्यवचनैः ।। 2-1-55 ।।
उपमीयतेनेऽनेत्युपमानमिति। उपपूर्वान्माङः करणे ल्युटि समास इति दर्शयति। भाष्ये तु मानस्य समीपमुपमानमित्यर्थकथनमात्रम्। अव्ययीभावे उपमानानीति रूपासिधिदिप्रसङ्गादिति भावः। उपपूर्वकश्च माङ्सादृश्यहेतुके परिच्छेदे रूढः। येन वस्त्वन्तरं सादृश्येन परिच्छिद्यते तदुपमानम्, तद्यथा - गौरिव गवय इति; गौः करणम्, पुरुषः परिच्छेत्ता, स हि गोः सादृश्येन गवयं परिच्छिनत्ति - गोसदृशो गवय इति। सामान्यवचनैरिति। समानशब्दः धर्मः - सामान्यम्, चच्चोपमानस्य श्रुतत्वात्तस्य चोपमेयापेक्षत्वात्तयोरेव साधारणो धर्मो विज्ञायत इत्याह - उपमानोपमययोरित्यादि। तद्विशिष्टोपमेयवनैरिति। तेन साधारणेन धर्मेण विशिष्टं यदुपमेयं तद्वचनैः, न तु साधारणधर्ममात्रवचनैरितियर्थः। वचनग्रहणाच्चायमर्थौ लभ्यते, सामान्यमुक्तवन्तः = सामान्यवचनाः। ये सामान्यमुक्त्वा तद्वति द्रव्ये पर्यवस्यन्ति ते तथोक्ताः, यथा गुणमुक्तवान् गुणवचन इति। तच्च सामान्यवदुपमानशब्दस्य संबन्धिश्बदत्वात्तदाक्षिप्तमुपमेयमेव विज्ञायत इति सुष्ठूक्तम् - तद्विशिष्टोपमेवचनैरिति। शस्त्रीश्यामेति। अत्र श्यामगुणविशिष्टत्वेन प्रमिध्दत्वादुपमानं शस्त्री, उपमेया देवदत्ता, तयोः सािधारणो धर्मः श्यामत्वम्, तदभिधाय तद्विशिष्टायां श्यामाशब्दः पर्यवस्यातीति भवति सामान्यवचनः। ननु च समानाधिकरणेनेति। वर्त्तते, इह च शस्त्रीशब्दः शस्त्र्यां वर्त्तते, श्यामाशब्दस्तु देवदत्तायाम्, यदाह - `उपमानवाचीनि सुबन्तानि तद्विशिष्टोपमेयवचनैः' इति; तथा विग्रहवाक्ये इवशब्दः प्रयुक्तः - शस्त्रीव श्यामेति? सत्यम्; वचनसामर्थ्यात्तु वैयधिकरण्येऽपि समासः। यद्येवम्, मृगीव चपला मृगचपला, हंसीव गद्गदा हंसगद्गदा, पुंवत्कर्मधारयेति सामानाधिकरण्यलक्षणः पुवद्भावो न प्राप्नोति? नैष दोषः; जातायन्तरनिवृत्तिपरायां चोदनायां स्त्रीत्वमकिञ्चित्करम्, तत्र कुक्कुटाण्डम्, मृगक्षीरमित्यादिवदिदमपि सिध्दम्। ननु चान्यदेव चापलं स्त्रियाः, अन्यदेव पुंसः? सत्यम्; जातिमात्रोपादानेऽपि प्रकरणादिवशात् स्त्रीत्वं प्रत्यायिष्यते, तच्च बहिरङ्गत्वान्न स्त्रीप्रत्ययस्य निमित्तम्। अन्यथा पुंवद्भावेन निवृत्तौ स्त्रीप्रत्ययस्य तवापि कथं विशंषावगतिः। अस्त्वेवम्, यदि तु मृगीव चपलेति स्त्रीप्रत्ययान्तस्य समासः क्रियते, तदा मृगीचपलेति प्राप्नोति, न हि तेन समासो दण्डवारितः, समानाधिकरणाधिकारश्च बाध्येत। एवं तर्हि समानाधिरकणसमास एवायम् - शस्त्री चासौ श्यामा चेति, कथं पुनर्देवदत्तायां शस्त्रीश्बदः, जातिवचनो ह्यसौ सादृश्यनिमित्तादभोदोपचारात्, यथा - गौर्वाहीक इति। यद्येवम्, शस्त्रशब्दोऽप्युपमेये संक्रान्त इत्युपमानवाचित्वं नोपपद्यते? सत्यम्; पूर्वावस्थाश्रयेण तूपमानत्वं द्रष्टव्यम्। इवशब्दप्रयोगस्तूपमानप्रदर्शनार्थः, न प्रक्रियावाक्याङ्गमिति न कश्चिद्दोषः। ननु श्यामगुणत्वेन साधर्म्येण शस्त्रीशब्दो देवदत्तायां प्रयुज्यत इति श्यामशब्दो न प्रयोगार्हः, तन्न; बहवो हि शस्त्र्यां गुणाः - तीक्ष्णा सूक्ष्मा पृथुः श्यामेति, तत्रासति श्यामगुणेन शस्त्रीत्वसारोपितमिति। ननु सदपि श्यामपदं देवदत्तामुपस्थाप्य चरतार्थमिति नैव शस्त्रीगुणो निर्‌द्दिश्यते, नैतदस्ति; नैवमत्र वचनं व्यज्यते या श्यामा सा शस्त्रीवेति। कथं तर्हि शस्त्रीव श्यामा देवदत्तेति? अस्यां तु वचनव्यक्ताविवशब्देन तावदुपमेयनिष्ठत्वेन प्रतीयते, उपमेयनिष्ठो गुण उपमानं स्पृशत्येव। अथ वा चन्द्रमुखीत्यादावनिर्दिष्टोऽपि गुणः प्रियदर्शनत्वादिः प्रसिध्दिवशादुपमाननिमित्तत्वेन प्रतीयते, तदोपमेयेऽपि तावच्श्रुतः कथमुपमानं न स्प्रक्ष्यति। फाला इव तण्डुला। दीर्घत्वादिना धर्मेण।।

56 उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ।। 2-1-56 ।।
उपमितमित्यत्र भूतकालो न विवक्ष्यत इत्याह - उपमोयमुपमितमिति। सामर्थ्यादिति। उपमेयमुपमानापेक्षमित्येतत्सामर्थ्येन चेत्सामान्यवाचीति यदा प्रकरणादिवशान्नियतः साधारणगुणः प्रतीयते तदा समासः, यदा तु गुणान्तरव्यवच्छेदाय विशिष्टः साधारणगुणवचनः शब्दः प्रयुज्यते तदा न समास इत्यर्थः। पुरुषोऽयं व्याघ्र इवेति। उपमानप्रदर्शनमेतत्, अत्र हि वैयधिकरण्यात्समासस्याप्रसङ्गः। यदा तु व्याघ्रश्बदस्ताध्दर्म्यात्पुरुषे वर्त्तते तदा सामानाधिकरण्ये सति समासः। अत एवोक्तम् - विशेषणं विशेष्येणेति प्राप्ते इति। पुरुषोऽयं व्याघ्र इव शूर इति। ननु सामान्यशब्दप्रयोगे सति तदपेक्षत्वादसामर्थ्यादेव न भविष्यति, एवं तर्ह्यतज्ज्ञापयति - भवति प्रधानस्य सापेक्षस्य वृत्तिरिति। तेन राजपुरुषोऽभिरुप औपगवः शोभन इत्यादि सिध्दं भवति। न्यायसिध्द एवार्थे लिङ्गदर्शनमिदम्। प्राधान्यादेवानेकोपकार्यत्वसम्भवात्पुरुषव्याघ्रोऽभिरुप इति भवत्येव। शौर्यं ह्यत्र समानधर्मः, नाभिरुपम्। अत

एव `सामान्याप्रयोगे' इत्युक्तम्, न तु `गुणाप्रयोगे' इति।।

57 विशेषणं विशेष्येण बहुलम् ।। 2-1-57 ।।
भेदकमिति। असिश्छिनत्तीतिवत् करणस्य कर्तृत्वविवक्षायां ण्वल्। विशेषणमिति। `शिष्लृ शेषणे' विपूर्वः, विशेष्यतेऽनेनेति विशेषणम्, करणे ल्यट्। यत्साधारणाकारेण प्रतिपन्नं बहुप्रकारं वस्तु प्रकारान्तरेभ्यो व्यवच्छद्य एकस्मिन्प्रकारे व्यवस्थापयति तत्पदं विशेषणं भेदकमिति चोच्यते। वियवस्थाप्यमानं विशेष्यं भेद्यमिति च। ननु च विशेष्यमिति च सम्बन्धिशब्दावेतौ, ततश्च विशेषणमित्युक्ते गम्यत एव - विशेष्येणेति, एवं विशेष्येणेत्युक्ते गम्यते-विशेषणमिति, तत्किमर्थमुभयमुपादीयते? यत्र पूर्वोत्तरपदयोर्द्वयोरपि प्रत्यकं विशेषणविशेष्यभावस्तत्रैव यथा स्याद्, यथा-नीलोत्पलमिति। अत्र हि नीलार्थो भ्रमरादिसाधारणरुपेण प्रतिपन्न उत्पलार्थेनोत्पले व्यवस्थाप्यते, उत्पलार्थो हि रक्तादिसाधारणरुपेण प्रतिपन्नो नीलार्थेन नीले व्यपस्थाप्यत इति भवति प्रत्येकमुभयभावः। यत्र तु स नास्ति न तत्र समासो भवति, यथा प्रत्युदाहरणे-तक्षकः सर्प इति, न हि तक्षकः सर्पत्वं व्यभिचरति। ननु व्यभिचरति, क्रियानिमित्तकोऽपि तक्षकशब्दोऽस्ति - तक्ष्णोतीति तक्षत इति? सत्यमस्ति; न त्वसौ नामधेयेन गाहते तुल्यकक्षताम्, द्रागेव रूढौ प्रतिभा क्रियाशब्दो विलम्बिता। इह तु शिंशपावृक्ष इति, शिशंपाशब्दस्य फलेऽपि दर्शनाद्वक्षव्यभिचाराद्भवत्येव समासः, न चात्र वृक्षप्रतीतिपूर्विका फले प्रतीतिर्येन बहिरङ्गा स्यात्। यथेव हि पञ्चालादयः शब्दा जनपदिनां जनपदस्य च साधारण्येनान्योऽन्ययोगमपेक्षन्ते तद्वदेदेऽपि। यथोवाच भगवान्-`लुब्योगाप्रख्यानात्' इति इह तर्हि कथम् `अथ जयाय नु मेरुमहीभृतः' इति, न मेरुर्महीभृत्त्वं व्यभिचरति? निरंकुशाः कवयः। यदि तर्हि यत्र प्रत्येकमुभयभावस्तत्र समासः, उभयोरपि विशेषणत्वमिति प्रथमानिर्दिष्टत्वादुपसर्जनत्वे सति पूर्वनिपातानियमः स्याद् - नीलोत्पलम्? अर्थ तश्चाप्राधान्यम्। तदिह द्रव्यगुणोपनिपाते द्रव्यं प्रधानम्, अप्रधानं गुणः। द्रव्यं हि क्रियासिध्दौ साक्षादुपयुज्यते, गुणस्तु द्रव्यावच्छेदद्वारेण। अतो गुणवचनस्यैव पूर्वनिपातः, न द्रव्यवचनस्य। ननूत्पलशब्दोऽपि जातिशब्दः, न द्रव्यशब्दः; यदि तु जातिविशिष्टे द्रव्ये पर्यवसानाद् द्रव्यशब्दत्वम्, हन्तैवं नीलशब्दोऽपि गुणिविशिष्टे द्रव्ये पर्यवस्यन् द्रव्यशब्दः स्यात्? अत्रोच्यते-उत्पत्तेः प्रभृत्या विनाशाज्जातिर्द्रव्यं न जहाति, न तु भवति शाबलेयस्य गौरिति। तस्माज्जात्यात्मकमेव द्रव्यं प्रतीयत इति जातिशब्दो द्रव्यत्वेन व्यवस्थाप्यते। गुणाः पुनः सत्येव द्रव्ये कदाचिदुपयन्ति, कदाचिदपयन्ति - पटस्य शक्ल इति, व्यतिरिक्ता अपि द्रव्यात्स्वशब्दैः प्रत्याय्यन्त इति न गुणात्मकं द्रव्यं भवतीति न गुणशब्दो द्रव्यशब्दत्वे व्यवस्थातुमर्हति। अत एव `श्वेतं छागमालभेत' इति चोदनायां श्वेताभावे कृष्णाश्छाग आलभ्यते, न तु छागाभावे पिष्टपिण्डीमालभ्य कृती भवति। क्रियाद्रव्ययोरुपनिपातेऽप्येवमेव द्रष्टव्यम् - याचकब्राह्मण इति। यत्र तु गुणशब्दयोः, क्रियाशब्दयोः, गणक्रियाशब्दयोश्चोपनिपातः, तत्रानियम एव भवति - खञ्जकुब्जः, कुब्जखञ्जः; पाचकपाठकः, पाठकपाचकः; खञ्जपाचकः, पाचकखञ्ज इति। शिशपावृक्ष इति। द्रव्यशब्दयोरेवोपनिपातेऽपि वृक्षत्वस्य व्यापकत्वान्महाविषयत्वाद् दूरात्प्रथमत एवोपलम्भाच्च प्राधान्यम्, शिशपात्वस्य तु विपर्ययादप्राधान्यमिति न तत्राप्यनियमः। विशेषणमिति किमिति।। विशेष्यशब्दस्य सम्बन्धिशब्दत्वादेव विशेषणमिति लप्स्यत इति प्रश्नः। तक्षकः सर्प इति। ननु तक्षकशब्दोऽपि विशेषणं भवत्येव? एवं मन्यते-विशेष्यशब्दस्य सम्बन्धिशब्दत्वादेव पूर्वपदस्य विशेषणत्वे लब्धे पुनर्विशेषणग्रहणमुत्तरपदस्य विशेषणत्वप्रतिपत्त्यर्थम्-विशेषेयेण विशेषणं समस्यते, तच्चेद्विशेष्यं विशेषणमिति। न चात्रोत्तरपदं विशेषणम्; तक्षकस्य तपंत्वाव्यभिचारादिति। लोहितस्तक्षक इति। नात्र तक्षतो विशेष्यः, तस्य लोहितत्वाव्यभिचारात्। यद्येवम् लोहितो विशेषणं न स्यात्; तस्यापि विशेष्यापेक्षत्वात्? एवं तर्हि `पाठक्रमादथक्रमो बलायम्' इति तक्षको लोहित इति पाठो द्रष्टव्यः, अत्र हि तक्षको विशेषणं भवति; लोहितत्वस्य तक्षतकत्वव्यभिचारात्। यद्येवम्, लोहितत्वस्य विशेष्यत्वमपि स्यात्? अस्त्येव तस्य विशेष्यत्वम्, पूर्वपदस्य तु विशेष्यत्वाभावात्प्रत्युदाहणत्वम्। एवं च कृत्वा तक्षकः कर्प इत्येतदेवास्मिन्नपि प्रश्ने प्रत्युदाहरणं भवति। विस्पष्टार्थं तूभयोरुपादानम्।।

58 पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ।। 2-1-58 ।।
पूर्वस्यैवायं प्रपञ्च इति। गुणक्रियाशब्देन सह समासे पूर्वादीनां पूर्वनिपातनियमार्थं तु न भवति, बहुंलग्रहणेनैव सिध्दत्वादिति मन्यते।।

59 श्रेण्यादयः कृतादिभिः ।। 2-1-59 ।।
एकेन शिल्पेन पण्येन वा येदीवन्ति, तेषां समूरः = श्रेणिः। तत्र पृथक्स्थितानां श्रेणिकरणे यथा स्यात्, श्रेणिस्थानामेव तु दण्डादिरूपेण करणे मा भूदित्याह - श्रेण्यादिषु च्व्यर्थव्चनमिति इति। श्रण्यादयः पठ्यन्ते इति। तेन तत्रादिशब्दो व्यवस्थावाची। कृतादिराकृतिगण इति। प्रयोगदर्शनेनाकृतिग्राह्यो गणः = आकृतिगणः। अत्रादिशब्दः प्रकारे। च्व्यन्तानामित्यादि। परत्वादिति भावः। आकृतिगणेऽप्युदाहरणरुपेण कतिपयान्पठति। कृत...मतेत्यादि।।

60 क्तेन नञ्विशिष्टेनानञ् ।। 2-1-60 ।।
विशिष्टशब्दोऽयमधिके वर्त्तते, तच्चाधिक्यं क्वचित्सावधारणम्, तद्यथा - देवदत्तो यज्ञदत्तात्स्वाध्यायेन विशिष्टः, स्वाध्यायेनैव विशिष्टोऽन्ये गुणाः समा इति गम्यते। क्वचिन्निरवधारणम्, तद्यथा - देवदत्तो यज्ञदत्स्वाध्यायेन विशिष्टः, स्वाध्यायेन तावद्विशिष्टोऽन्ये गुणाः समा भूयांसो वा नेतन्निरुप्यते। वाक्यस्यैकरूपत्वेऽर्थप्रकरणादिना विशेषनिर्णयः। तत्र निरञ्धारणपक्षे - सिध्दं च तदभक्तं चेत्यत्रापि स्यात्, क्तान्तयोः प्रकृतिभेदेऽपि नव तावधिक इति विशिष्टग्रहणं चानर्थकं स्यात्, क्तेन सनञा नञित्येव वाच्यं स्यात्, अतः सावधारणपक्षमाश्रित्याह - नञैव विशेषो यस्येति। प्रकृत्यादिकमित्यादिशब्देन

प्रत्ययोपसर्गयोर्ग्रहणम् तत्र सिध्दं च तदभक्तं चेति प्रकृतिरतुल्या, कर्त्तव्यमकृतमिति प्रत्ययः, प्रकृतं चानपकृतं चेत्युपसर्गः, एवं च पूर्वपदमपि क्तान्तमेव लभ्यत इत्याह - अनञ्क्तान्तमिति। अनञिति शक्यमकर्त्तुम्, न हि पूर्वपदे सनञि उत्तरपदे नञधिको भवति। कृतं च तदकृतं चेति। अवयवधर्मेणायं समुदायस्य व्यपदेशः, एकमेव च वस्त्वेकदेशकरणात्कृतं च भवत्येकदेशाकरणादकृतं चेति नात्र कश्चिद्विरोधः। यदि तर्हि सावधारणपक्ष आश्रीयते, एवं सति यस्य नुडपरो।धिकइडागमे वा, तेन सह समासो न स्यादित्यत आह -- नुडिटाविति। नुडिड्ग्रहणमागमोपलक्षणम्, न्यायस्य तुल्यत्वात्तेनच्छन्नाच्छन्नमिति तुगधिकस्यापि गहणम्। अशितानशितेनेति। `अश भोजने' `तस्मन्नुडचि'। क्लिष्टाक्लिशितनेति। `क्लिशः क्त्वानिष्ठयोः' इति पक्षे इट्; तत्र नुट् प्रत्ययान्तभक्तः, इट् प्रत्ययभक्तस्तुक् नञ्भक्त इति सर्वेषामुत्तरपदेऽन्तर्भावः। इह तु छाताच्छितमिति `शाच्छोरन्यतरस्याम्' इतीत्वे कृते नेनाधिक्यात्समासो न प्राप्नोति? अत्र केचिदाहुः - नुडिड्ग्रहण मर्थाभेदकस्य विकारमात्रस्योपलक्षणम्, तेनेहापि समासो भवतीति। त्रातात्राण मर्थाभेदकस्य विकारमात्रस्योपलक्षणम्, तेनेहापि समासो भवतीति। त्रातात्राणमित्यत्र तु निष्ठानत्वस्यासिध्दत्वाद्भेदकत्वाभावः, गौणत्वात्सामानाधिकरण्यस्य पूर्वेण न प्राप्नोतीत्यारम्भः। पूर्वनिपातनियमार्थश्च - कृताकृतमित्येव यथा स्यात्, अकृतमिति मा भूत्। कृतापकृमिति। एकदेशस्येष्टस्य करणादेकदेशस्य चानिष्टस्य करणादेकमववस्तु कृतं भवत्यपकृतं च। भुक्तं च तदत्यवहऋतत्वात्, विभुक्तं चाशोभनत्वाद्भुक्तविभुक्तम्, विशब्दोऽत्रोशोभनत्वं द्योतयति विरूपम्। एवं पीनविपीतम्। गमनम् = गतम्, प्रत्यागमनम् = प्रत्यागतम्, तत् क्षुण्णभुवा प्रत्यागमनेन सह चरितं गमनं गतप्रत्यागतम्, यातं च तदनुयातं तदानीमेव पुनर्गमनात् यातानुयातम्। क्रयाक्रयिकेति। `अल्पे' इति कप्रत्ययः, तदन्तश्च स्वभावात्स्त्रियां वर्त्तते। क्रयाक्रयिकेति `अन्येपामपि दृश्यते' इति दीर्घः। महान् क्रयः क्रयशब्देनोच्यते गोबलीवर्दन्यायेन। एवं पुटापुटिका, फलाफलिका, मानोन्मानिकेति। शाकपार्थवादीनामिति। `सिध्दये' इति शेषः। पृथोरपत्यं पार्थवः, केचित्पाथिवेति पठन्ति, पृथिव्या ईश्वरः पार्थिवः, `तस्येश्वरः' इत्यञ्, तस्याभ्यवहार्येषु शाकं प्रियत्वात्प्रधानम्। तत्र साहचर्यादेव तद्व्यपदेशत्वलाभादुत्तरपदलोपो न वक्तव्यः। समासस्तु वक्तव्यः, गौणत्वात्सामानाधिकरण्यस्य।।

61 सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ।। 2-1-61 ।।

पूज्यमानैरिति वचनादिति। पूज्यमानस्य पूजापेक्षत्वादिति भावुः। अत एव सदिति स्वरूपग्रहणं न शतृशानचोः, न हि तौ पूजामाहतुः। उत्कृष्टो गोरिति। उधृदृत इत्यर्थः। महाजनः, महोदधिरित्यादौ पूजाभावेऽपि विशेषणं विशेष्येणेति समासः। वचनं तु गुणक्रियाश्बदैरपि समासे सदादीनामेव पूर्वनिपातनियमार्थम्।।

62 वृन्दरकनागकुञ्जरैः पूज्यमानम् ।। 2-1-62 ।।

वृन्दाकरश्बदो देवजातिवचजनः, इतरौ हस्तिजातिवचनौ, तत्रोपमानत्वे सति पूजावचनता सम्भवति। तत्र व्याघ्रादेराकृतिगणत्वात्सिध्दे समासे पूजायामेव यथा स्यान्निन्दायां मा भूदित्येवमर्थं वचनम्। इह मा भूत् - माणवकोऽयं नागो यस्मान्मूर्क इति। समान्यप्रयोगेऽपि यथा स्यादित्यन्ये। सुषीम इति संज्ञेयं नागविशेषस्य। यद्येवम्, विशेषणं विशेष्येणेत्यधिकारादेवात्र न भविष्यति, न ह्यनागः सुषीमोऽस्ति? तस्यम्; प्रत्युदाहरणदिगियं दर्शिता, माणवकोऽयं नाग इति प्रत्युदाहरणम्।।

63 कतरकतमौ जातिपरिप्रश्ने ।। 2-1-63 ।।

कतरकठ इति। `गोत्रं च चरणैः सह' इति जातिः तथा च प्रत्युदाहरणमिति। पूर्वं वृत्तिषूपन्यस्तमुपपन्नं भवतीति शेषः।।

64 किं क्षेपे ।। 2-1-64 ।।

65 पोटायुवतिस्तोककतिपयकृष्टिधेनुवशावेहब्दष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ।। 2-1-65 ।।

उभयव्यञ्जनेति। व्यज्यतेऽनेन स्त्रीत्वादिकमिति व्यञ्जनम् = स्तनादि, उभयोः स्त्रीपुंसयोर्व्यञ्जनं यस्याः सा तथोक्ता, नपुंसके पोटेत्यर्थः। पोटाशब्दस्तु तत्रपि स्त्रीत्वयुक्तः प्रवर्तते। शब्दानां चित्रशक्तित्वात् षण्डशब्दो यथा पुमान्।। धूर्त्तग्रहणमकुत्सार्थमिति। कुत्मायां तु `कुत्सितानि कुत्सनैः' इति सिध्दमिति भावः। तत्र कठधूर्त्त इति। यः कठः स धूर्त्त इत्यर्थः, न तु कठत्वं कुत्स्यते।।

66 प्रशंसावचनैश्च ।। 2-1-66 ।।

रूढिशब्दाः प्रशंसावचना गृह्यन्त इति। प्रशंसयेति वक्तव्ये वचनग्रहणादिह ग्रहणं रूढिशब्दानां प्रशंसामात्रवाचिमाम्। तेन ये यौगिकाः प्रशस्तशोभनरमणीयादयः, ये च विशेषवचनाः शुचिमृद्वायः, ये च जातिशब्दाः सन्तः परत्र प्रयोगात्प्रशंसां गमयन्ति सिंहो माणवक इति, ते सर्वे व्युदस्ता भवन्ति। मतल्लिकादय इति। `मतल्लिका मचर्चिका प्रकाण्डमुध्दतल्लजौ। प्रशस्तवाचकान्यमूनि' इत्यमरः। आविष्टलिङ्गत्वादिति। नियतलिङ्गत्वादित्यर्थः। स्वलिङ्गोपादाना इति। स्वस्यैव लिङ्गस्योपादानं येषु ते तथोक्ताः। `प्रशंसावचनपोटायुवति' इत्येकयोगे कर्त्तव्ये योगविभागश्चिन्त्यप्रयोजनः।।

67 युवा खलतिपालितवलिनजरतीभिः ।। 2-1-67 ।।
संज्ञायूनो गहणे गार्ग्यायणः खलतिरित्यादाबेव तु स्यान्न च तस्य जरतीशब्देन सामानाधिकरण्यम्। न च गार्ग्यायणी युवतिरस्ति; सत्रियां युवसंज्ञाप्रातिषेधात्, अतो युवेति स्वरूपग्रहणमित्याह - युवाशब्द इति। खलत्यादिभिः समानाधिकरणैरिति। कथं पुनर्युवशब्दस्य जरतीशब्देन सामानाधिकरण्यम् पुंल्लिङ्गस्य स्त्रीलिङ्गेनेति, तत्राह - स्त्रीलिङ्गनिर्देश इति। अस्यां हि परिभाषायां सत्यां युवशब्दस्य ग्रहणे युवतिशब्दस्यापि ग्रहणादुपपद्यते युवतिजरतीशब्दयोः समानाधिकरण्यम्, असत्यां तु नोपपद्यत इत्यर्थापत्त्या परभाषा ज्ञायते। युवखलतीति। `कृदिकारादक्तिनः' `सर्वतोऽक्तिन्नर्थादित्येके' इति ङीष्। वलिशब्दः पामादिः। युवजरन्निति। जरद्भिरित्यपि पाठः केनचिदाचार्येण बोधित इति पुल्लिङ्गेनापि समासो भवतीति भावः। युवतिर्जरतीति। कथं विरुध्दवाचनोः सामानाधिकरण्यम्, अन्योऽन्याधर्मोपलम्भात्तद्रूपत्वारोपाद्भविष्यति। यद्येवम्, विभिन्नलिङ्गयोरप्येवमेव समानाधिकरण्यसम्भवात्कथं परिभाषा ज्ञाप्यत इति चिन्त्यम्; युवशब्दस्य पूर्वानिपातनियमार्थं वचनम्, अनियमो हि गुणशब्दत्वात्स्यात्।।

68 कृत्यतुल्याख्या अजात्या ।। 2-1-68 ।।
तुल्यापर्यायाश्चेति। आख्याग्रहणं स्वरूपनिराकरणार्थमिति भावः। भोज्योष्णादावनियमे प्राप्ते पूर्वनिपातनियमार्थं वचनम्। तुल्यमहानिति। `सन्महत्' इत्यस्याकृत्यतुल्याख्येषु सावकाशत्वात्कृत्यतुल्याख्येषु परत्वादयमेव समासो यक्त इति भावः। भोज्य ओदन इति। प्रतिषेधसामर्थ्याद् विशेषणमित्यपि न भवति।।

69 वर्णो वर्णेन ।। 2-1-69 ।।
`विशेषणं विशेष्येण' इति वर्त्तते, तत्र द्वयोः स्वरूपग्रहणेन विशेषणता भवेत्। वर्णश्चासौ वर्णइति। किं व्यावृत्तम्? किमन्वितम्? अथैकत्र विशेषाणां रूपस्यान्यत्र च ग्रहः? शक्लश्चासौ वर्ण इति न स्यात्, वर्णो विशेषणं शुक्लस्य वर्णत्वाव्यभिचारात्, तस्मादुभयत्र विशेषग्रहणमित्याह - वर्णविशेषवाचीत्यादि। कृष्णसारङ्ग इत्यादि। नानावर्णसमाहारः सारङ्गः, तथा सबलः, तस्य वर्णान्तरसमाहारेऽपि भावात्कार्ष्यान्वयो नियते न स्यादिति कृष्णो विशेणम्। एवं लोहिताशब्देऽपि द्रष्टव्यम्। ननु च कृष्णशब्दोऽत्रावयवे वर्त्तते, न समुदाये; तस्य सारङ्गत्वात्, तत्कथमवयववृत्तेः कृष्णशब्दस्य समुदायवृत्तिना सारङ्गशब्देन सामानाधिकरण्यमत आह - अवयवद्वारेणेत्यादि। कृष्णावयवसम्बन्धात्समुदाय एव कृष्ण उच्यत इत्यर्थः। अत एवात्र गौणं सामानाधिकरण्यमिति सूत्रारम्भः। ननु `तृतीया तत्कृतेन' इत्येवात्र सिध्दः समासः कथम्? सारङ्गशब्दो गुणवचनः सारङ्गत्वं कृष्णावय्वकृमित्यस्त्येव सिध्दिः; तत्रायमप्यर्थः - `वर्णो वर्णेष्वनेते' इति पूर्वपदप्रकृतिस्वरो न वक्तव्यो भवति, तत्पुरुषे तुल्यार्थतृतीयेत्येव सिध्दत्वात्, तदवयवं वक्तव्यमेतत्प्रतिषेधार्थम्, इह मा भूत् - कृष्णैतो लोहितैत इति। इदं तु न वक्तव्यम्? इदमपि वक्तव्यम्, इहापि यथा स्यात्-शुक्लबभ्रुः कृष्णशुक्ला हरितशुक्लः बभ्रूकपिलः, यस्य कश्चिदवयवः शुक्लः कश्चिद् बभ्रुः स समुदायोऽवयवय्वशब्दाभ्यां तथोच्यत इति नात्र तत्कृतत्वसंभवः। अत्र कृष्णसारङ्ग इत्यादौ यत्रैकोऽवयवयवशब्दः, अपरः समुदायशब्दः, तत्राव्यवस्याप्रधानत्वादुपसर्जनत्वात्पुर्वनिपातः। द्वयोस्त्ववयवशब्दयोः पर्याय इति द्रष्टव्यम्। इह यस्मिन् प्रयोगे वीरैः पुरषंस्तद्वान् ग्रामः प्रतिपादयितमिष्टस्तत्र प्रथममेवान्यपदार्थविवक्षा कार्या वीराः पुरुषा अस्मिन्सन्तीति वीरपुरुषको ग्राम इति बहुव्रीहिरेव नित्यं यथा स्यात्; अन्यथा पूर्वमनपेक्षितेऽन्यपदार्थे वीराः पुरुषा वीरुपुरुषा इति कर्मधारये कृते पश्चादन्यपदार्थविवक्षायां मत्वर्थीये सति वीरपुरुषवान् ग्राम इत्याद्यनिष्टमपि कदाचिदनुषज्येत। सर्वशब्दस्य त्वकारान्तैः कर्मधारयोऽपीष्यते। तस्माच्च मत्वर्थविवक्षायाम् `अत इनिठनौ' इति ठनं बाधित्वा इनिरेव भवतीति वक्तव्यम् सर्व धनं सर्वधनं तदस्यास्तीति सर्वधनी, सर्वबीजी, कर्वकेशी। यत्र कर्मधारयो जातिविशेषवचनः, तत्र कर्मधारयान्मत्वर्थीयो भवति - कृष्णसर्पवान्वल्मीकः, लोहितशालिमान् ग्रामः, गौरखरवदरण्यम्, गौरमृगवदिति। न हि बहुव्रीहिणा तज्जात्या तद्वत्तवं शक्यं प्रतिपादयितुम्।।

70 ।। कुमारः श्रमणादिभिः ।। 2-1-70 ।।
कुमारशब्दस्य पूर्वनिपातनियमार्थ वचनम् ।।

71 चतुष्पादो गर्भिण्या ।। 2-1-71 ।।
चतुष्पाज्जातिरिति। केचिदाहुः - पोटादिसूत्राज्जातिग्रगणमनुवर्त्यमिति। अन्ये त्वाहुः - ये शब्दान्तरनिरपेक्षाश्चतुष्पाज्जातिवचनाः, त एवान्तरङ्गत्वाद् गृह्यन्ते, न तु कालाक्ष्यादयो यौगिकाः शब्दान्तरसंनिधानाच्चतुष्पाद्विषया इति। गर्भिणीशब्दस्य परनिपादार्थं वचनम्।।

72 मयूरव्यंसकादयश्च ।। 2-1-72 ।।
व्यंसकः = धूर्त्तः, मयूरश्चासौ व्यंसकश्येति व्यंसकशब्दस्य गुणवचनत्वात्पुर्वनिपाते प्राप्ते वचनम्। एवं छात्रव्यसकादीनां कम्बोजमुण्डपर्यन्तानाम्। अन्ये त्वाहुः - मयूरइव व्यंसकः, छात्रइव व्यंसकः कम्बोज इव मुण्डः, यवन इव मुंडः, उमानसमासोऽयम्, `उपमानानि समान्यवचनैः' इत्येव सिध्दे पूनर्विधानं तत्पुरुषं तुल्यार्थतृतीयेति पूर्वपदप्रकृतिस्वरो मा भूदिति, स ह्युपमानसंश्बदेनेन विहिते समासे विधीयत इति। पुनर्दायेति। `पुनश्चनसौ छन्दसि' इति

गतिसंज्ञा वार्त्तिककारीयेति।। गणकारेणेदं पठितम्, एहि इडेति यस्मिन्कर्मणि तद् एहीडम्, एवम् एहीयवम्। एहि वाणिजेति यस्यां क्रियायां सा एहिवाणिजा। एवम्-अपेहि वाणिजा, प्रेहिवाणिजा। एहि स्वागतमिति यस्यां क्रियायां सा एहिस्वागता। इहवितर्का, लोण्मध्यमैकवचनम्। प्रोह करटमिति यस्यां सा प्रोहकरटा; एवं प्रोहकर्दमादय आहरवसनान्ताः। `कृती छेदने' तदेव वचनम्, मुचादित्वान्नुम्। कृन्त विचक्षणेति यस्यां क्रियायां सा कृन्तविचक्षणा। उध्दर उत्सृजेति यस्यां सोध्दरोत्सृजा। `आख्यातमाख्यातेन' इति सिध्देऽसातत्यार्थ वचनम्। एवम् उध्दमविधमा, उत्पचविपचा, उत्पतनिपता। उदक्च अवाक्च उच्चावचम्, उच्चैश्च नीचैश्च उच्चनीचम्, आचितं चोपचितं च आचोपचम्, निश्चितं च प्रचितं च निश्चप्रचम् - सर्व एते निपात्यते। न किञ्चन विद्यते यस्य सोऽकिञ्चनः, स्नात्वाकालकादिषु समासान्तोदात्तत्वं ल्यबभावश्च निपातनात्। प्रतीयमानक्रियापेक्षं च समानकतृकत्वम्-स्नात्वाकालकः संपन्न इति। जहि कर्मणेति। जहीति लोण्यमध्यमैकवचनम्; तदेतत्कर्मणा बहुलं समस्यते आभीक्ष्ण्ये गम्यमाने समासेन चेत्कर्ता विधीयते। जहि जोडमित्याभीक्ष्ण्येन य आह स जहिजोडः। अश्नीत पिबतेत्येवं यत्र सततमभिधीयते सा अश्नातपिबता। एवं पचतभृज्जता, `भ्रस्ज पाके' भिन्धि लवणमिति यस्यामभिधीयते सा भिन्धिलवणा। एवं पचलवणा। अविहितलक्षमस्तत्पुरुष इति। यस्य तत्तपुरुषस्य लक्षणं न कृतम्, प्राप्तप्रयोगश्च भवति, स मयूरख्यंसकादेराकृतिगणत्वादत्रैव द्रष्टव्य इत्यर्थः।।
इति श्रीहरदत्तमिश्रविचितायां पदमञ्जयौ द्वितीयाध्यायस्य प्रथम पादः ।।

2.2

अथ द्वितीयाध्याये द्वितायः पादः

1 पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ।। 2.2.1 ।।

एकदेशोऽस्यास्तीत्येकदेशीति। एकगोपूर्वादिति ठञ् प्राप्नोति, अत एव निर्देशादिनिर्द्रष्टव्यः। एकदण्डीत्ययं त्वपशब्दः एको दण्डो यस्येति बहुव्रीहिणैव गतत्वान्मत्वर्थ एव दुर्लभः, किं पुनरिनिष्ठञा बाधितः? एकदेशब्दस्तु कर्मधारय एवावयववचन इति न तत्र बहुव्रीहिणा गतत्वम्, यथा - कृष्णसर्पवानिति। सामर्थ्यादेकदेशवचना इति। एकदेशमपेक्ष्यैकदेशी भवति, नान्यथेत्येतत्सामर्थ्यम्। एकाधिकरणग्रहणमेकदेशिनो विशेषणमिति। सत्सप्तम्यन्तवैयधिकरण्येनेति भावः, तदाह - एक चेदिति। एकत्वसंख्याविशिष्टमित्यर्थः। समानाभिधेयवचन एकाधिकरणशब्दो न भवति, अवयवावयविशब्दयोः सामानाधिकरण्यानुपपत्तेः, समानाधिकरण्येनेति प्रकृतत्वाच्च। स्यादेतत् - `समुदायेषु हि दृष्टाः शब्दाः अवयवेष्वपि वर्त्तन्ते' इति न्यायेन समानाधिकरण्ये सति पूर्वश्चासौ कायश्चेति विशेषणमित्येव सिध्दः समासो नार्थ एतेन, एवं च कृत्वा परवल्लिङ्गमित्यत्र तत्पुरुषग्रहणं न कर्तव्यं भवति, कथम्? उत्तरपदार्थप्रधानत्वादेव सिध्दमिति, तत्रह - षष्ठीसमासापवादोऽयं योग इति। सिध्दं तु कथञ्चित्पूर्वकाय इति, कायपूर्व इत्यस्य निवृत्त्यर्थमेव तु सूत्रं कर्तव्यमित्यर्थः। पूर्वे कायस्येति। यद्यपि दिशि दृष्टः शब्दो दिक्शब्द इत्याश्रयणात्सम्प्रत्यदिग्वृत्तिनीपि योगे पञ्चमी भवति, `तस्य परमाम्रेडितम्' इति लिङ्गादवयववृत्तिभिर्योगे षष्ठी भवति। पूर्वे नाभेः कायस्येति। नाभेरिति दिग्योगलक्षणा पञ्चमी, मायसम्बन्धी नाभ्यपेक्षया पूर्वो भाग इत्यर्थः। तत्र नाभिरेकदेशी न भवतीति न तेन समासो भवति। यस्त्वेकदेशी कायस्तेन समासो भवत्येव - पूर्वकायो नाभेरिति, पूर्वशब्दस्य सम्बन्धिशब्दत्वेन नित्यसापेक्षत्वादिति केचिदाहुः। अन्ये तु - यत्रार्थप्रकरणादिनावधिर्गम्यते तत्रैव समासः, न शब्दोपादाने इत्याहुः। पूर्वे छात्राणामिति। नेयं निर्ध्दारणे षष्ठी, किं तर्हि? समुदायः छात्राणामित्यनेनोच्यत इति बहुवचनम्, यथा-छात्राणां पञ्चम इति, ततश्च छात्राणामेकदेशित्वमस्त्येव, किं तु बहुत्वसंख्याविशिष्टानामिति समासाभावः। संख्याविसायपूर्वस्येत्यादि। न ह्यन्यथा सायपूर्वत्वमह्नवस्योपपद्यते इति भावः। केचित्तु - सर्वैणैकदेशवाचिना कालवाचिनः समासो भवति, न त्वमहन्शब्दस्यैवेति ज्ञापकशरीरं वर्णयन्ति, तेन मध्यरात्र इत्यपि सिध्दं भवति।।

2 अर्ध्दं नपुंसकम् ।। 2.2.2 ।।

आविष्टलिङ्ग इति। नियतलिङ्ग इत्यर्थः। तस्येदं ग्रहणमिति। तत्रैवार्थे नपुंसकत्वस्याव्यभिचाराद्। अवयववाची ह्यभिधेयवुशेन त्रिलिङ्गः - अपूपार्ध्दं मया भक्षितम्, दन्तार्ध्दमास्यात्पतितम्, ग्रामार्ध्दः, नगरार्धः, सर्पिषार्ध्या व्यनक्ततोति। `तस्यार्ध्दाः शस्त्वार्ध्दाः परिशिष्य मध्ये निविदं दधाति' इति। भाष्ये त्ववयववाची पुंलिङ्ग इत्युपलक्षणम् । क्वचित्तु समप्रविभागे स्त्रीलिङ्गता दृश्यते - एकान्तृचेर्ध्दा युग्मासु' इति, यग्मासु ऋक्षु अर्ध्दाः शस्त्वा निविदं दध्यादित्यर्थः, तस्यार्षत्वेन निर्वाहः। अर्धमिति नपुसकनिर्देशः शब्दरूपापेक्षयापि सम्भाव्येत, यथा `स्वमज्ञातिधनाख्यायाम्' `बन्धुनि बहुव्रीहौ' इति, तस्मान्नपुंसकमित्युक्तम्। अर्ध्दपिप्पलीति। पिप्पलीशब्दस्य `एकविभक्ति च' इत्युपसर्जनसंज्ञा न भवति; एकविभ्कायवषष्ठ्यन्तमिति वचनात्। अर्ध्दं पिप्पलीनामिति। न तर्हीदानीमिदं भवति - अर्ध्दानि पिप्पलीनामर्ध्दपिप्पल्य इति; नैतदस्मिन्विग्रहे भवति, खण्डसमुदाये भवति - अर्ध्दपिप्पली चार्ध्दपिप्ली चार्ध्दपिप्पल्य इति। देवददत्तशब्देन समासो न भवतीति। देवदत्तोऽत्र स्वामी, न त्वेकदेशी। यस्त्वेकदेशी पशुस्तेन भवत्येव समासः - अर्ध्दपशुर्देवतदत्तस्येति, देवदत्तस्वामिकं पशोरर्ध्दमित्यर्थः। तत्र समुदायेन सम्बन्धान्नास्ति सापेक्षत्वम्। अयं योगः शक्योऽवक्तुम्। कथमर्ध्दपिप्पली? सामानाधिकरण्ये भविष्यति अर्ध्दं चासौ पिप्पली चेति। ननु च यद्यर्ध्दं न पिप्पली, अथ पिप्पली नार्ध्दम्, अर्ध्दं पिप्पली चेति विप्रतिषिध्दम्? नास्ति

विप्रातिषेधः; समुदाये हि दृष्टाः शब्दा अवयवेष्वपि वर्तन्ते। किञ्च समप्रविभागादन्यत्रार्ध्दन्द्रादावयमेव गतिप्रकारः, समप्रविभागेऽपि तथास्तु। इदं तर्हि प्रयोजनम् -- म्प्रविभागे षष्ठीसमासो मा भूदिति? इष्यते षष्ठीसमासोषऽपि, तथा च भगवान्पिङ्गलनागः प्रयुङ्क्ते `स्वरार्ध्दं चार्यार्ध्दम्' इति। एवं तर्हि गौणत्वात्सामानाधिकरण्यस्य विशेषणसमासो न किल स्यादित्यमारम्भः।।

3 द्वितायतृतीयाचतुर्थतुर्याण्यन्यतरस्याम् ।। 2.2.3 ।।
अन्यतरस्यांग्रहणात्सोऽपि

काशिकावृत्तौ
पदमञ्जरी
द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्। 2.2.3।।
द्विदीयतृतीयचतुर्थतुर्याण्यन्यतरस्यात्।। अन्यतरस्यांग्रहणात्सोऽपि भवतीति ननु च पूरणप्रत्ययान्ता एवैते द्वितीयादयः, तत्र पूरणगुणसुहितेत्यादिना प्रतिषेधेन भवितव्यम्, यदापि `पूरणाद्भगे तीयादन्'इति स्वार्थिकोऽन्प्रत्ययः क्रियते, तदापि `पूरणगुणसुहितार्थ' इत्यर्थशब्दस्य प्रत्येकमभिसम्बन्धात्पूरणार्थग्रहणम्, न तु तदधिकारविहितप्रत्ययग्रहणमिति भवितव्यमेव प्रतिषेधेन, तत्कथं सोऽपि भवतीत्याह--पूरणगुणेत्यादि। वाक्यस्य महाविभाषयैव सिद्धत्वात्षष्ठीसमासप्राप्त्यर्थमेवान्यतरस्यांग्रहणमिति भावः। पूर्वं तु षष्ठीसमासापवादो योग इत्याद्यप्राप्त्यभिप्रायेणोक्तम्। यद्वा---सत्यस्मिन्योगे षष्ठीसमासप्रतिषेधस्यास्य च षष्ठीसमासबोधकत्वमविशिष्टमिति मत्वा तथोक्तम्।
अयमपि योगः शक्योऽवक्तुम्, कथम्? समुदायावयवयोरौपचारिके सामानाधिकरण्ये सति द्वितीयभिक्षादि सिद्धम्, मुख्यार्थवृत्तौ षष्ठीसमासे तु भिक्षाद्वितीयमित्यादि भविष्यतीति। नैतत्सुष्ठूच्यते, अनेनैव खल्वन्यतरस्यांग्रहणेन षष्ठीसमासः प्राप्यते, कथमस्मिन्योगेऽसति भविष्यति।।
प्राप्तापन्ने च द्वितीयया।। 2.2.4 ।।
प्राप्तापन्ने च द्वितीयया।। प्राप्तजीविक इति। `एकविभक्ति' इत्युपसर्जनत्वाद् ह्रस्वत्वम्। प्राप्ता जीविका येनेति कर्मणि क्तान्तेन बहुव्रीहावप्येतत्सिद्धम्, समासान्तोदात्तत्वार्थं तु वचनम्। इह प्राप्तमुखः, प्राप्तदुः ख इत्यादिषु `जातिकालसुखादिभ्यः' इति प्राप्तापन्नयोः परनिपातप्रसङ्गश्च। इह लिङ्गविशिष्टपरिभाषया प्राप्ताशब्दस्याप्ययं समासो भवति---प्राप्ता जीविकां प्राप्तजीविका इति पुवद्भावो वक्तव्यः। भाष्ये त्वकारः पूर्वपदस्य विधीयत इत्युक्तम्। चकारेण समुच्चयार्थेनाकारप्रश्लेषोऽनुमीयते, सौत्रत्वाच्च निर्देशस्य प्रकृतिभावाभावः, प्राप्तापन्ने द्वितीयान्तेन सह समस्येते, अ च अत्वं च भवति प्राप्तापन्नयोरित्यर्थः।।
कालाः परिमाणिना।। 2.2.5 ।।
कालाः परिमाणिना।। सामर्थ्यात्परिमाणवचना इति। परिमाणमपेक्ष्यपरिमाणो भवति, नान्यथेत्येतत्सामर्थ्यम्। तत्र च यद्यपि कालः प्रस्थादिवत्सर्वतो मानं न भवति, तथापि परिच्छेदहेतुत्वात्परिमाणमित्युच्यते। मासो जातस्येति कस्य पुनरयं मासः परिच्छेदकः; न तावज्जातस्य, तस्य हि दिष्ट्यादि परिमाणं न तु मासः; नापि जननक्रिया, तस्या एकक्षणभावित्वान्मासेन सम्बन्धाभावात्? उच्यते---जननक्रियावधिर्मासे न परिच्छद्यते। मासो जातस्येति, कोऽर्थः? जननक्रियाया ऊर्ध्वमस्य मासो जातः, अतीते मासेऽस्य जननमिति यावत्। अनेन प्रकारेण मासो जातस्य परिमाणम्, यथा---मासे देयमृणमिति ऋणदानस्यावधिर्मासेन परिच्छिद्यते। मासजात इति। यथा गावोऽस्य सन्तीति गोमानिति वाक्ये षष्ठीनिर्दिष्टस्यापि तद्वतो वृत्तौ प्राधान्यम्, तत्कस्य हेतोः? अभिहितः षष्ठ्यर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्न इति, यथा---चित्रा गावोऽस्य चित्रगुः पुरुष इति बहुव्रीहाविति, तद्वदत्रापि वाक्ये षष्ठीनिर्दैष्टस्यापि तद्वतो जातस्य वृत्तौ प्राधान्यां द्रष्टव्यम्। तथा च मासजातो दृश्यतामिति क्रियायोगो जातस्यैव भवति, न पुनरर्द्धपिप्पल्यादिवत्पूर्वपदार्थस्य। द्व्यहजात इति। द्वयोरह्नोः समाहारः `राजाहः सखिभ्यष्टच,'`न संख्यादेः समाहारे' इत्यह्नादेशस्य प्रतिषेधः। कथं तर्हि द्व्यहजात इति, द्वे अहनी अस्य जातस्येति त्रयाणां पदानां युगपदनेन समासे कृते जातशब्द उत्तरपदे परतः पूर्वयोर्द्विगुर्भविष्यति? ननु च `सुप्सुपा'इत्येकत्वसंख्याया विवक्षितत्वाद् द्वयोर्द्वयोः न बहूनां युगपत्? उच्यते----वक्तव्यमेवैतद् उत्तरपदेन परिमाणिना द्वयोः समासवचनमिति; परिमाणिवचनेनोत्तरपदेन द्विगोः सिद्धये समासो वक्तव्यः। अथ द्वयोर्युगपदिति गम्यते, तस्माद्वचनाद्बहूनामप्ययं समासो भवति। एवं द्वौ मासौ जातस्य द्विमासजातः, त्रिपदे तत्पुरुषे जातशब्द उत्तरपदे परतः पूर्वयोस्तत्पुरुषे सति कालान्ते द्विगावपि पूर्वपदप्रकृतिस्वरो भवति। द्वयोर्मासयोः समाहारो द्विमासम् पात्रादि, द्विमासं जातस्येति विगृह्य समासे क्रियमाणे सति शिष्टत्वात्समासान्तोदात्तत्वं स्यात्। इह मासौ जातस्य, मासा जातस्येति द्विवचनबहुवचनान्तानामयं समासो भवति। वृत्तौ विभक्तौ निवृत्तायां द्वित्वबहुत्वावगतौ प्रमाणाभावाद् अभेदैकत्वसंख्याप्यत्र न भवति, शुद्धमेव त्वेकत्वं गम्यते। यत्र द्वयोर्बहुषु वानुस्यूत एकः शब्दार्थस्तत्रैवाभेदैकत्वसंख्य, मासशब्दस्त्वक्तपरिमाणमर्थमाचष्ट इति द्वित्वबहुत्वावगतौ विभक्तिमपेक्षते, स्वतस्त्वेकत्वस्यैवासाधारणः।।
नञ्।। 2.2.6 ।।
नञ्।। विभक्तिञकारयोर्विशेषाभावाद् ञकारोच्चारणम्। सुपानशब्दस्य विशेषणात्पामादिलक्षणस्य नस्यासुवन्तत्वादेवाग्रहणं सिद्धम्। इहाब्राह्मणादिशब्दैः क्षत्रियाद्यभिधानमिष्यते, तत्र जातिमात्रपरे ब्राह्मणशब्दे न विद्यते ब्राह्मण्यं यस्य सोऽब्राह्मणः क्षत्रियादिरित्यन्यपदार्थप्रधानः समासो भवति। तत्र नाप्राप्ते बहुव्रीहावारम्भादनेन तस्य बाधनादब्राह्मणको देश इत्यपि न सिद्ध्यति; न हि प्रवृत्तिनिमित्तमात्रनिष्ठेषु ब्राह्मणादिशब्देष्वयं समासः, नद्वन्निष्ठेष्विति

नियामकमस्ति। इह चावर्षा हेमन्त इति हेमन्तस्य यद्वचने तत्समासस्य प्राप्नोति, लिङ्गे तु परवल्लिङ्गमिति वचनाद्दोषाभावः। इह च असोऽसर्वस्मै इत्युत्तरपदार्थस्योपसर्जनत्वात्त्यदादिकार्यं सर्वादिकार्यं च न स्यात्। यदा त्वसत्सामान्यवर्तमानो नञ् ब्राह्मणादिभिर्विशेष्यते, ब्राह्मणत्वेनासत्क्रियान्तरेण तु सन् क्षत्रियादिकोऽब्राह्मण इति, तदा पूर्वपदार्थप्रधानम्; तत्र नञर्थस्य प्राधान्यात्संख्यायोगः चसमासस्य न स्यात्, वाचनिकी तु परवल्लिङ्गता भवतु। स्यादेतत्----शब्दशक्तिस्वाभाव्यादसत्त्वरूपमर्थं वाक्ये न नञाचष्टे, समासे तु सत्त्वरूपम्, तेन सिद्धः संख्यायोगः? एवमप्यपवादेनानेनाव्ययीभावस्य बाधादमक्षिकमिति न सिद्ध्यति, तस्य तु निर्मक्षिकमित्यादिरवकाशः, असोऽसर्वस्मै इति च पूर्ववत्स्मायाद्यसिद्धिः। अस्तु तर्ह्यत्रोत्तरपदार्थप्रधानः? यद्येवम्, ब्राह्मणमात्रस्यानयनं प्राप्नोति? यद्युत्तरपदार्थप्रधानता तत्र हेतुः, इहापि तर्हि राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति? अस्त्यत्र विशेषः, राजा विशेषकः प्रयुज्यते। इहापि तर्हि नञ् विशेषकः प्रयुज्यते? कथं नञ् नाम स्यात्, अनियतगुणस्य गुणविशेषप्रतिपादनाय हि विशेषणं प्रवर्त्तते, न तदुपघाताय। नञा च ब्राह्मणार्थः सर्वात्मना प्रतिषिध्यमानः प्रतिषिध्यत इति कथमसतः प्राधान्यं स्यात्!तस्मादुत्तरपदार्थप्राधान्यमिच्छताऽस्मिन्विषये नञनर्थकः, अन्वाख्यनसामर्थ्यात्तु साधुत्वमेवंभूत स्यार्थवदनर्थकावयवस्य समासस्येति वाच्यम्, ततश्च ब्राह्मणमात्रस्यानयनं प्राप्नोति? नैष दोषः; निवृत्तपदार्थकोऽत्र ब्राह्मणशब्दः, सा च निवृत्तिः स्वाभाविकी नञा द्योत्यते, कोऽपर्थः? केवलो ब्राह्मणशब्दः प्रयुज्यमानः प्रसिद्धिवशान्मुख्यमेव ब्राह्मणमाचष्टे; नञ्प्रयोगेण तु क्षत्रियादौ सादृश्यादिना निमित्तेनाध्यारोपितं ब्राह्मण्यं न तात्त्विकमिति द्योत्यते। तदेवं मुख्यो ब्राह्मणशब्दस्यार्थो निवृत्तः जातश्चामुख्यः क्षत्रियादिरिति न ब्राह्मणमात्रानयनम्, नापि न कस्यचिदानयनमिति सिद्धम्। उक्तं च----

`प्राक् समासात्पदार्थानां निवृत्तिर्द्योत्यते नञा।
स्वभावतो निवृत्तानां रूपभेदादलक्षिता।।' इति।

स्यादेतत्---अर्थप्रत्यायनाय शब्दः प्रयुज्यते ब्राह्मणार्थश्चेन्निवृत्तिः, किं मुधा ब्राह्मणपदं प्रयुज्यते? तन्न; असति ब्राह्मणपदे नेत्येतावत्सुच्यमाने कस्यार्थोऽत्र निवर्त्तयितुमिष्ट इति न ज्ञायते। ब्राह्मणपदे तु सति तदर्थस्य क्षत्रियादौ मुख्यः सत्ताविरहः प्रतीयते।

अन्यद्दर्शनम्---सर्व एते शब्दा गुणसमुदाये वर्त्तन्ते, स्मर्यन्ते च----

`तपः श्रुतं च योनिश्चेत्येतद्ब्राह्मण्यकारणम्।
तपः श्रुताभ्यां यो हीनो जातिब्राह्मण एव सः।।"इति

तथा च श्रुतिः----

`षड् व्याधयो यं पुरुषं तपन्ति जैह्वो हार्द औदरो रैतसश्च।
तप्तश्च घर्मः शिशिरश्च शीतः ब्राह्मणस्तं स्मरार्थं गरुत्मन्'।। इति

गौरः शुच्याचारः पिङ्गलकेश इत्यादयश्च धर्माः, तदेषां समुदाये ब्राह्मणशब्दः, एवं क्षत्रियादिशब्देष्वपि द्रष्टव्यम्। एवं स्थिते समुदायेषु वृत्ताः शब्दाः अवयवेष्वति वर्त्तन्त इति न्यायाज्जातिभिन्ने गुणभिन्ने वा यदा ब्राह्मणशब्दो वर्त्तते तदा स्वाभाविकी जातिगुणनिवृत्तिर्नञा द्योत्यते, अविष्टांशसद्भावप्रतिपादनाय ब्राह्मणशब्दप्रयोगः। यद्येवम्, द्वयोरपि भिन्नविषयत्वप्रसङ्गः, कथम्? यस्यांशस्य सद्भावं ब्राह्मणशब्द आह, न तस्याभावं नञाह; यस्याभावं नञाह, न तस्य सद्भावं ब्राह्मणशब्द आह? नैष दोषः; द्वावप्येतौ समुदायावलम्बिनौ कृतवत्, तद्यथैकदेशकरणाकरणाभ्यामेकमेव वस्तु कृतं चाकृतं च भवति, तथेहाप्येकदेशविभागात् समुदाय एव निवृत्त उत्यते, एकदेशसद्भावाच्च स एव सन्नभिधीयत इति सर्वमनवद्यम्।

इहानेको जन आगत इति द्व्यादिष्वेकत्वमारोपितं प्रतीयते, मुख्यं तु प्रतिषिध्यते, क्षत्रियादाविव ब्राह्मण्यमित्येकवचनमेव भवति द्व्यादिसंख्या प्रतीयते। तदेवमुत्तरपदार्थप्रधान इति स्थितम्। अत्र च लिङ्गम्---`एतत्तदोः सुलोपोऽकोरनञ्' इत्यत्रानञ्समासग्रहणम्। अन्यथैतत्तदोरर्थद्वारेण सम्बन्धिनः सोर्लोपो विधीयमानो नैषो ददात्यसो ददातीत्यत्र कथं प्राप्नुयात्। इह न ब्राह्मणस्य भाव इति भावेन नञा च युगपत्सम्बन्धे विवक्षिते त्वतलौ च प्राप्नुतः, समासश्च; तत्र यदि परत्वात्त्वतलौ कृत्वा पश्चात्पुनः प्रसङ्गविज्ञानान्नञ्समासः, क्रियते, ततः `तत्पुरुषे तुल्यार्थ' इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तं पदं स्यात्, प्रत्ययस्वरो नञ्स्वरश्चेष्यत इति समासे कृते त्वतलौ कार्यौ। आह च---त्वतल्भ्यां नञ्समासः पूर्वविप्रतिषिद्धं त्वतलोः स्वरसिद्ध्यर्थमिति। तत्र भावप्रत्ययस्तावत्प्रकृत्यर्थस्य सापेक्षत्वेनासामर्थ्यान्न भवति, नञ्समासस्तु प्रधानस्य सापेक्षत्वाद्भवति।।

ईषदकृता।। 2.2.7 ।।

ईषदकृता।। ईषद् गुणवचनेनेति वक्तव्यमिति। अकृतेत्यपनीय सूत्रे गुणवचनग्रहणं कर्तव्यमित्यर्थः। अकृतेति चोच्यमान ईषद्गार्ग्य इत्यादावतिव्याप्तिः, ईषदुन्नतित्यादावव्याप्तिः स्यादिति भावः। ईषद्गार्ग्य इति। ननु च गार्ग्यो भवति वा न वा न पुनरीषद्गार्ग्यः कश्चित? उच्यते; गार्ग्यत्वेन सह य एकार्थसमवेताः क्रियागुणास्तदपेक्षया जातेः प्रकर्षादियोगः----गार्ग्यतरः, गार्ग्यकल्पः, ईषद्गार्ग्यः, गार्ग्यपाश इति; यथा----गोतरः, गोकल्पः, गोपाश इति।।

षष्ठी।। 2.2.8 ।।

षष्ठी।। कृद्योगा चेत्यादि। `कर्तृकर्मणोः कृति' इति कृच्छब्दोपादानेन या विहिता सा कृद्योगा। इध्मप्रव्रश्चन इति। `ओव्रश्चू च्छेदने', `करणे ल्युट्। पलाशशातन इति। पलाशानि शात्यन्ते=पात्यन्ते येन दण्डादिना स पलाशशातनः। किमर्थमिदमुच्यत इति। सूत्रेण सिद्धिं मन्वानस्य प्रश्न। प्रतिपदविधाना चेत्यादि। यदा तस्य वक्तव्यस्यारम्भः तदेदमपि वक्तव्यम्। तस्य त्वनारभ्यतां तत्रैव वक्ष्यामः। अपकर्ष इति। अपवाद इत्यर्थः।।

याजकादिभिश्च।। 2.2.9 ।।

याजकादिभिश्च।। प्रतिप्रसवार्थमिति। अन्येन निवर्त्तितस्य पुनः प्रवृत्त्यभ्यनुज्ञानम्=प्रतिप्रसवः। तत्स्थैश्च गुणैः षष्ठी समस्यत इति वक्तव्यमिति क्वचिद्वृत्तौ पठ्यते, तस्यार्थः----तच्छब्देन सन्निधानाद् गुणा एव परामृश्यन्ते, तस्मिंस्त्वात्मनि ये गुणाः स्थितास्तैः षष्ठी समस्यते। न च स्वात्मन्यवस्थानं कस्यचित्सम्भवति, भेदनिबन्धनो ह्याधाराधेयभावः; विशेषतो गुणानां द्रव्याश्रितत्वात्। तस्मादभिधानव्यापारापेक्षया तत्स्थत्वमुच्यते। गन्धादयो हि गुणाः स्वशब्दैर्द्रव्यात्पृथक्कृता एव च प्रत्याय्यन्ते ---चन्दनस्य गन्ध इति, न तु कदाचिद् द्रव्येणैकत्वमापन्नाः न हि भवति चन्दनं गन्ध इति। शुक्लादयस्तु कदाचिद् द्रव्यात्पृथग्भूताः प्रत्याय्यन्ते--पटस्य शुक्ल इति, कदाचिद् द्रव्यस्योपञ्जकास्तेनैकत्वमापन्नाः----शुक्लः पट इति। तत्र ये गुणा द्रव्यात्पृथग्भूता एव स्वशब्देन प्रत्याय्यन्ते तत्परिग्रहाय `तत्स्थैः' इत्युक्तम्। बलाकायाः शौक्ल्यमित्यत्र तु यद्यपि शौक्ल्यशब्देन द्रव्यात्पृथग्भूतस्यैवाभिधानम्, तथापि तदेव शौक्ल्यं शुक्लः पट इत्यत्र द्रव्येणैकतामापन्नं प्रत्याय्यते। अर्थस्य तत्स्थत्वमाश्रीयते, इति शब्दभेदेऽप्यर्थः स एवेति नास्ति शौक्ल्यस्य तत्स्थत्वमिति समासाभावः। रूपवान्पट इत्यत्र भेदाश्रयेणैव मत्वर्थीयेनाभेदोऽध्यवसीयते इति तत्स्थमेव रूपमिति पटरूपमिति भवत्येव समासः। अयमपि `गुणेन न' इति प्रतिषेधस्य पुरस्तादपकर्षः। चन्दनगन्ध इति। `गन्धं विक्रीणीते'इति चन्दनगन्धादौ गन्धशब्दो जातिनिमित्तकः, न गुणशब्दः; मालतीकुसुमादिष्वदर्शनादिति तत्स्थ एव गन्धः। भाष्ये तु `न तु तद्विशेषणैः' इति पठितम्, तेषां गुणानां यानि विशेषणानि तैः सह समासो न भवति---घृतस्य तीव्रो गन्धः, चन्दनस्य मृदुः स्पर्श इति तीव्रमृदुशब्दाभ्यां समासो न भवति। तदिदमन्यथासिद्धमिति वृत्तिकारेण उपेक्षितम् कथम्? घृतस्य गन्धेन सम्बन्धः, न तद्विशेषणेन तीव्रेण। यदापि प्रकरणादिवशात्तीव्रशब्द एव विशेषे गन्धे वर्तते, तदुपजनित एव व्यतिरेके घृतस्येति षष्ठी, तथापि तीव्रं घृतमिति दर्शनात्तत्स्थत्वाभावादेव समासाप्रसङ्गः।।
----------*************------------

काशिकावृत्तिः

द्वितीयाध्याये द्वितीयः पादः <पदमञ्जरी>

न निर्धारणे।। 2.2.10 ।।

न निर्द्धारणे।। जातिगुणक्रियाभिरिति। उपलक्षणमेतत्; कतरो भवतोर्देवदत्त इति संज्ञायामपि निर्द्धारणदर्शनात्। क्षत्रियो मनुष्याणां शूरतम इति। अत्र क्षत्रियशब्देन समासप्रसङ्गः; तदपेक्षया हि मनुष्याणामिति षष्ठी, न शूरतमापेक्षया, गुणशब्दत्वाच्च न तेन समासप्रसङ्गः। कृष्णा गवामिति। नात्रायमर्थः----गवां मध्ये या कृष्णा सा सम्पन्नक्षीरतमेति, एवं हि कृष्णाशब्दस्य गवामित्यनेन सम्बन्धः। न च तस्य समासप्रसङ्गः; गुणेन नेति प्रतिषेधात्। तस्माद्गवां मध्ये या सम्पन्नक्षीरतमा सा कृष्णेत्ययमत्रार्थः। धावन्नध्वगानामिति। अत्र धावच्छब्देन समासाप्रसङ्गः; सत्संज्ञकत्वात्। शीघ्रतमशब्दस्तु गुणशब्दो न वेति चिन्त्यम्। प्रतिपदविधाना चेति। शेषलक्षणां मुक्त्वा सर्वान्या प्रतिपदविधाना षष्ठी। कथं गृहस्वामी, विद्यादायादः, पृथिवीश्वर इति, यावता `स्वामीश्वर' इत्यादिना प्रतिपदमत्र षष्ठी ? नानेन षष्ठी विधीयते, किं तर्हि? सप्तमी। सा तु षष्ठीं मा बाधिष्टेति चकारेण शेषलक्षणैवाभ्यनुज्ञायते। अत एव `न निर्द्धारणे' इति सूत्रारम्भः। `यतश्च निर्द्धारणम्' इत्यत्रापि हि चकारेण शेषलक्षणैव षष्ठी प्रतिप्रसूयते; अन्यथा सापि प्रतिपदविधानैव स्यादिति किं `न निर्द्धारणे' इत्यनेन। सर्पिषो ज्ञानमिति। `ज्ञोऽविदर्थस्य करणे' इति षष्ठी। अत्राहुः---`ज्ञोऽविदर्थस्य करणे' इति षष्ठीप्रकरणे `शेषे' इति वर्त्तते, तत्र न माषाणामश्नीयादितिवत् `षष्ठी शेषे' इत्यनेनैव सिद्धा षष्ठी, प्रकरणं तु नियमार्थम्। षष्ठी भवत्येव श्रूयत एव, न तस्याः समासो भवतीत्यर्थः। समासे `सुपो धातुप्रातिपदिकयोः' इति सुब्लुक् स्यात्। तस्मात्प्रतिपदविधाना चेति न वक्तव्यम्, एवं च कृत्वा `कृद्योगा च' इत्यपि न वक्तव्यम्, `कर्तृकर्मणोः कृति' इत्यत्र हि `शेषे' इति निवृत्तमिति वक्ष्यते, तेन कर्तृकर्मविवक्षायामप्राप्तैव षष्ठी तेन विधीयत इति कुतः समासनिवृत्तिरिति।।

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन।। 2.2.11 ।।

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन।। प्रत्येकमिति। पूरणादिभिरित्यर्थः। स्वरूपविधिरिति। पूरणादीनामर्थपर्यन्तानां चतुर्णामित्यर्थः। अत एव गुणशब्देन नादेङां ग्रहणम्, किं तर्हि ? `सत्त्वे निविशतेऽपैति' इत्यादिलक्षणलक्षितस्य गुणस्य ग्रहणम्; नापि नञो गुणप्रतिषेधे यस्य गुणस्य हि भावादिवत्प्रवृत्तिनिमित्तमात्रस्य ग्रहणम्, सामान्यादेरपि प्रसङ्गात्; नापि लोकप्रसिद्धस्य शुक्लादेरेव ग्रहणम्, कण्टकस्य तैक्ष्ण्यमित्यादेरपीष्टत्वात्; गुणशब्देन च केवलगुणवाचिनो गुणोपसर्जनद्रव्यवाचिनश्च व्याप्तिन्यायाश्रयेण गृह्यन्ते। तत्र गुणस्य गुण्यपेक्षत्वात्केवलगुणवचनैर्गुणेन समासनिषेधः----कण्टकस्य तैक्ष्ण्यमिति। गुणवचनैस्तु तत्सम्बन्धिनो निषेधः----ब्राह्मणस्य शुक्ला दन्ता इति, न चात्र दन्तापेक्षया ब्राह्मणस्येति षष्ठी, ततश्च शुक्लेनासम्बन्धादप्रसङ्ग एव समासस्य। यदा तर्ह्यर्थात्प्रकरणाद्वा दन्ता द्यर्थं एव शुक्लादिशब्दस्य वृत्तिर्विज्ञाता भवति, तदा तत्सम्बन्ध एव षष्ठीत्यस्ति समासप्रसङ्गः, `शतसहस्रान्ताच्च निष्कात्', `क्रोशशतयोजनशतयोरुपसंख्यानम्' `खारीशतमपि न ददाति' इत्यादि मुनित्रयप्रयोगाद् गोविंशतिरित्यादौ संख्यया समासो न निषिध्यते। संज्ञाप्रमाणत्वादुत्तरपदार्थप्राधान्यमित्यादिप्रयोगदर्शनादनित्यो गुणेन निषेध इति करणपाटवं बुद्धिमान्द्यं यत्नगौरवमित्यादिसिद्धिः। फलानां सुहित इति। करणस्यैव शेषत्वविवक्षया षष्ठी, शेषत्वविवक्षैव च नियता सुहितार्थयोगे करणस्येत्याहुः, कृद्योगलक्षणाया एव षष्ठ्या निष्ठायोगे निषेधः। ब्राह्मणस्य कुर्वन्निति। नेयं घटाद्यपेक्षया षष्ठी---ब्राह्मणस्य घटं कुर्वन्निति, एवं ह्यसामर्थ्यादेव समासस्याप्रसङ्गः; किं तर्हि? कुर्वन्निति किङ्कर उच्यते, स हि कुर्वन् भवति, ततो यथा ब्राह्मणस्य पाचक इति साक्षादेव पाचकेन सम्बन्धो न पुनरोदनद्वारेण, तद्वदिहापतीति द्रष्टव्यम्। चोरस्य द्विषन्निति च सत उदाहरणम्, अत्र `द्विषः शतुर्वा वचनम्' इति पक्षे षष्ठी भवति। ब्राह्मणस्य कृत्वेति। ब्राह्मणार्थं कृत्वेत्यर्थः, सम्बन्धसामान्यरूपेण विवक्षितत्वात् षष्ठी। पुरा सूर्यस्योदेतोरिति चोदाहरणम्, अत्र ह्यव्ययप्रपिषेधे `तोसुनोरप्रतिषेधः' इति कर्त्तर्येव षष्ठ्यस्ति। एवं वृक्षस्योपरीत्यादिकमप्युदाहरणम्। तव्यता

सानुबन्धकेनेति। `निरनुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणम्' इति भावः। ब्राह्मणकर्त्तव्यमिति। कर्त्तरि षष्ठ्याः समासः कृदुत्तरपदप्रकृतिस्वरेणान्तस्वरितमेतत्, निरनुबन्धकेन तु समासे उत्तरपदं मध्योदात्तं स्यात्, सोऽयं स्वरार्थस्तव्येननिषेधः। शुकस्य माराविकस्येति। मा रावीत्याहेति माराविकः, `तदाहेति मा शब्दादिभ्य उपसंख्यानम्' इति ठक्, शब्देन क्रियायाः प्रतिषेधको माराविकः, संज्ञैषा शुकविशेषस्य, क्वचित्तु माराविदस्येति पाठः, तत्र माराविशब्दं ददातीति माराविदः, स एवार्थः। किं च स्यादिति। भवितव्यमेवात्र विशेषणसमासेन, तत् षष्ठीसमास एवास्तु, को दोष इति प्रश्नः। पूर्वनिपातानियमः स्यादिति। द्वयोरपि प्रथमानिर्दिष्टत्वेनोपसर्जनत्वादिति भावः। ननु विशेषणसमासेऽपि द्वयोरपि यत्र विशेषणविशेष्यभावस्तत्रेष्युक्तम्, अतस्तेनापि समासे विशेषणमिति प्रथमानिर्देशो द्वयोरपि तुल्यः। अथ तत्राप्रधानमुपसर्जनमार्थं चाप्राधान्यमिति द्रव्यगुणादिषु तेन प्रकारेण व्यवस्था, षष्ठीसमासेऽपि तथैव व्यवस्था भविष्यति। तस्माद्यत्तत्र प्रत्युदाहरणम्---तक्षकः सर्प इति, तयोः षष्ठ्यन्तयोः समासप्रसङ्ग एव दोषः, तन्निवृत्तये च प्रतिषेध इति वाच्यम्। तदिह `किं च स्यात्' इत्यादिकमेवानुपपन्नम्, उदाहरणं तूपपन्नम् यदि माराविकशब्दः संज्ञा। अथ सोऽपि योगवृत्तिः तर्हि तदप्यनुपपन्नम्। एवं पाटलिपुत्रकेऽपि द्रष्टव्यम्।।

क्तेन च पूजायाम्।। 2.2.12 ।।

क्तेन च पूजायाम्।। तस्येति। मत्यादिसूत्रविहितस्य सर्वस्यैव क्तस्य ग्रहणं न तु पूजायामेव विहितस्येत्यर्थः। कथं तर्हि पूजाग्रहणमित्याह----पूजाग्रहणमिति। विवक्षितस्य क्तस्य तटस्थमुपलक्षणं पूजाग्रहणम्, गृहस्येव काकः, न तु समासनिषेधार्थमित्यर्थः। तेन मतिबुद्ध्योरपि विहितस्य ग्रहणं भवतीति भावः। पूजायां विहित इति। वर्त्तमानादिति शेषः। राज्ञामिति। `क्तस्य च वर्तमाने' इति षष्ठी। कथं राजाभिमत इति, अस्ति हि भट्टिकाव्ये प्रयोगः----`कानहं स राममहितः कृतवान्' इति, `मह पूजायाम्' रामस्य महित इत्यर्थः? कश्चिदाह----"यदा वर्तमाने क्तस्तदा षष्ठीसमासनिषेधश्च, यदा भूते क्तस्तदा कर्तरि तृतीयैव भवति, यथा----`पूजितो यः सुरैरपि' इति, तस्याः `कर्तृ करणे कृता बहुलम्' इति समासः" इति। स्यादेवं यदि भूते क्तो लभ्यः, न; नाप्राप्ते तस्मिन्नारभ्यमाणः `भतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तस्तस्य बाधको भवति, यथा च वडवाया वृषे वाच्य इति अपत्ये प्राप्तो ठक् ततोऽपकृष्य विधीयते, अपत्ये त्वणेव भवतीति वक्ष्यति। एवं च `पूजितो यः सुरैरपि' इत्यचिकत्स्योऽपशब्दः। त्वया ज्ञातो मया ज्ञात तु भवत्येव; तेनेत्यधिकारे उपज्ञात इति निर्देशात्।

अपर आह---`क्तेन च पूजायाम्' इत्यादिषु कारकषष्ठ्या एव निषेधः। तदेव तु कर्त्तादिकारकं यदा शेषरूपेण विवक्ष्यते तदा भवत्येव समास इति। तत्र स्वरे विशेषः, कारकषष्ठ्याः समासे कृत्स्वरो भवति, शेषषष्ठ्याः समासे समासान्तोदात्तत्वमिति। एवं तु यत् `जनिकर्तुः प्रकृतिः', `तत्प्रयोजको हेतुश्च' इत्यादावुच्यते---`निपातनात्समासः' इति, तदनुपपन्नम्; शेषषष्ठ्या एव समासस्य सिद्धत्वात्। अथ येऽमी नवीना वैयाकरणा आरभन्ते तदपार्थकमापद्येत। तस्मादाप्तप्रयोगस्य यथाकथंचिन्निर्वाहः, न तु यथारुचि पद्ययोग इति धीरा मन्यन्ते।।

`क्तेन' इति निवृत्तम्। कर्मग्रहणं षष्ठीविशेषणम्। कर्मणि च या षष्ठी सा न समस्यते। `उभयप्राप्तौ कर्मणि' इति षष्ठ्या इदं ग्रहरगम्। आश्चर्यो गवां दोहोऽगोपालकेन। रोचते ओदनस्य भोजनं देवदत्तेन। साधु खलु पयसः पानं देवदत्तेन। विचित्रा सूत्रस्य कृतिः पाणिनिना।।

अधिकरणवाचिना च।। 2.2.13 ।।

अधिकरणवाचिना च।। `अधिकरण' इत्येव सिद्धे वाचिग्रहणं चिन्त्यप्रयोजनम्, कथम्? `कवृत्ते लिप्सायाम्',`यद्वृत्तान्नित्यम्' इति, नायमधिकरणे क्तः, क तर्हि? भावे। किमो वृतं यस्मिन् यदो वृतं यस्मिन्निति व्यधिकरणपदो बहुव्रीहिः।।

कर्मणि च।। 2.2.14 ।।

कर्मणि च ।। उभयप्राप्तौ कर्मणीति। अनेकार्थत्वान्निपातानामितीत्यर्थे चशब्दोऽयम्, तेन कर्मणीत्युच्चार्य या षष्ठी विधीयते सा न समस्यत इत्यर्थः। यदि च या काचन कर्मणि षष्ठी गृह्येत `कर्तरि च' इति निषेधं न कुर्याद्; अनेनेव सिद्धत्वात्। साधु पयसः पानमिति। कर्मणि च येन संस्पर्शादिति नित्यसमासार्थवचनमिति वक्ष्यति, तत्र पयः सुखमित्युदाहरिष्यते। इदं तु शरीरसुखस्याविवक्षायां रोगाद्यभिभूतोऽशक्नुवन्नेव यदा साधु पिबति, तदा द्रष्टव्यम।।

तृजकाभ्यां कर्तरि।। 2.2.15 ।।

तृजकाभ्यां कर्तरि।। कर्तृ ग्रहणं षष्ठीविशेषणमिति। अथ कस्माद्विपर्ययो नाश्रीयते---इह तृजकविशेषणं कर्तृ ग्रहणमुत्तरत्र षष्ठीविशेषणमिति, एवं तृज्ग्रहणमुत्तरार्थमिति न वक्तव्यं भवति? उच्यते; `नित्यं क्रीडाजीविकयोः' इत्यत्र तृज्ग्रहणस्याननुवृत्तिः शङ्क्येत `कर्त्तरि च' इत्यत्र सम्बन्धासम्भवात्, न हि तृज्प्रयोगे कर्तरि षष्ठी सम्भवतीति। ननु च `तृज्क्रीडाजीविकयोर्नास्तीत्यकएवोदाह्रियते' इति वक्ष्यति, एवं तर्हि तथानाश्रितमित्येव। भवतः शायिकेति। `पर्यायार्हणोत्पत्तिषु ण्वुच्'। तृच्प्रयोगे कर्त्तरि षष्ठी नास्तीति। तेनैव कर्तुरभिहितत्वात्।

इक्षुभक्षिकामिति। कर्मणि षष्ठ्या समासः। म इति। `धारेरुत्तमर्ण' इति संप्रदाने चतुर्थी।।

कर्त्तरि।। 2.2.16 ।।

कर्त्तरि।। सम्भवे व्यभिचारे च सति विशेषणविशेष्यभावो भवतीत्याह सामर्थ्यादिति। सम्बन्धिशब्दस्येति। अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसीति भावः। अन्यस्त्वाह---होतृशब्दसाहचर्यादिति; तन्न, न हि तत्र बह्वचो होता गृह्यते। स एव सम्बन्धिशब्दः क्षीरहोतेत्यादौ क्षीप्तेत्येव गम्यते।।

नित्यं क्रीडाजीविकयोः।। 2.2.17 ।।

नित्यं क्रीडाजीविकयोः।। नेति निवृत्तमिति। नित्यग्रहणाद्, महाविभाषाधिकाराद्विलक्ल्पेनैव पाक्षिकस्य प्रतिषेधस्य सिद्धत्वान्नित्यः प्रतिषेधो भविष्यति, किं नित्यग्रहणेन ! तृच् क्रीडाजीविकयोर्नास्तीति। वामनस्तु `अके जीविकार्थ' इत्यत्र `अक इति किं रमणीयकर्ता' इति जीविकायां तृचं प्रत्युदाहरिष्यति। स मन्यते---मा भूत्क्रीडायां तृच्, लक्षणाभावात्, जीविकायां तु ण्वुल्तृचाविति ण्वुलिव तृच् कस्मान्न स्यादिति। अन्ये तु तदनुसारेणेदमप्येवं व्याचक्षते---क्रीडाजीविकयोर्नास्तीति द्व्योर्नास्ति, किन्त्वन्यतरत्रैवेत्यर्थः। अक एवोदाह्रियत इति। उभयत्रेत्यर्थः। उद्दालकपुष्पभञ्जिकेत्यादौ। संज्ञायामिति ण्वुल। नित्यग्रहणमुत्तरार्थम्। न हि वाक्येन क्रीडाजीविकयोरवगतिरस्ति, क्रियाकारकसम्बन्धमात्रावगमात्।।

कुगतिप्रादयः।। 2.2.18 ।।

कुगतिप्रादयः।। कुशब्दोऽव्ययं गृह्यत इति। स्वरादिष्वपठितोऽप्ययं पठितव्य इति भावः। नित्यसमासविषयस्यास्य पूर्वपदप्रकृतिस्वराणामव्ययत्वम्, यथा वक्ष्यति---अव्यये नञ्कुनिपातानामिति वक्तव्यमिति। न द्रव्यवचन इति। पृथिव्यादिद्रव्ये यो वर्तते स न गृह्यत इत्यर्थः। दुर्निन्दायामिति। प्रशप्ते द्वेषान्निन्दा भवति, पापं तु वस्तुस्थित्या गर्हितमिति द्वयोरप्युपादानम्।

प्रायिकमिति। अन्यथेषदर्थे चेति कोः कादेशविधानमनुपपन्नं स्यात्। दुष्कृतमिति। दुर्निन्दायामिति विषयनिर्देशो गतित्वेन प्राप्तस्यापि समासस्य नियामकः स्यादिति मन्यते। यदा तु प्रादिग्रहणप्राप्तस्यैव नियामकस्तदा गतित्वादेवात्र सिद्धः समासः। दुरत्र कृच्छ्रार्थोऽनभिधानात्कृतेः खल् न भवति, दुष्कर इत्यादावुपपदसमासः, आमन्द्रैरिन्द्र हरिभिरित्याङो मन्द्रं प्रत्यगतित्वादनीषदर्थत्वाच्च समासाभाव इत्यैकस्वर्थं न भवति। सुष्टुतमिति। सुशब्दोऽतिशये, न पूजायाम्। अत एवोपसर्गनिबन्धनं षत्वम्। अतिस्तुतमिति। `अतिरतिक्रमणे च' इति कर्मप्रवचनीयत्वात्षत्वाभावः।।

प्रादयो गताद्यर्थ इति। वृत्तिविषये गताद्यर्थवृत्तयः प्रादयो गतित्वाभावेऽपि प्रादिग्रहणेन समस्यन्त इति।

पर्यध्ययन इति। परिश्रान्तोऽध्ययनार्थमित्यर्थः।

वाससी इवेति। `वसेर्णिच्च' इत्यसुन्प्रत्ययान्तो वासः शब्दः, वस्त्रशब्दः ष्ट्रन्प्रत्ययान्तः, द्वावपि नित्याद्युदात्तौ।

प्रादिप्रसङ्ग इति। सूत्रे प्रादिग्रहणमगत्यर्थमिति कर्मप्रवचनीयानां प्रतिषेध उच्यते, प्रत्यादिविषयश्चायं निषेधः। स्वत्योस्तु समासो भवत्येव। वृक्षं प्रतीति। कर्मप्रवचनीयेन योगाद् द्वितीयावत्समासस्यापि प्रसङ्गः, उदात्तवता सिङा गतेः समासवचनम्---यो जात एव पर्यभूषत्, यः शम्बरमन्वविन्दत्, योऽन्तरिक्षं विममे, यौ वै प्रजवं याताम्, अपथेन प्रतिपद्यते।।

उपपदमतिङ्।। 2.2.19 ।।

उपपदमतिङ्।। एधानाहारको व्रजतीति। `तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति ण्वुल्। अतिङिति किमिति। येनाभिप्रायेण पृष्टं तमाविष्करोति। ननु चेति। एतज्ज्ञापयतीति। स्यादेतत्---मुख्यस्य तिङन्तस्य प्रतिषेधोऽनर्थक इति। यस्तेन समानार्थः सुबन्तस्तस्य प्रतिषेधो विज्ञायते। तत्र यद्यपि कालकारकसंख्योपग्रहयुक्तः पूर्वापरीभूतः क्रियारूपस्तिङन्तार्थप्रधानोऽर्थो न सुबन्तस्य सम्भवति, तथापि क्रियावाचित्वमात्रेण तदर्थत्वमाश्रीयते, क्रियावाच्युपपदं न समस्यत इत्यर्थः। तेन कारको गतः, कारकस्य व्रज्येति गतव्रज्याशब्दयोः कारकशब्देन समासो न भवति; अन्यथा हि क्रियार्थायामिति सप्तमीनिर्देशेनोपपदत्वादनयोरपि समासः स्यादिति? तन्न; अनुपपदत्वात्। क्रियायां क्रियार्थायामिति सप्तमीनिर्देशेन क्रियावाचिन उपपदत्वम्, धातुरेवात्र क्रियावचनस्तदाश्रयश्च ण्वुल् प्रत्ययः। गतशब्दस्तु क्रियोपसर्जनं कर्त्तारमाह, व्रज्याशब्दोऽपि यस्तस्य सिद्धता नाम धर्मस्तत्र धञादयो भवन्तीति धात्वर्थस्य सिद्धतायां वर्तन्ते, अतो यत्क्रियावाचित्वादुपपदं न तत्सुबन्तम्, यत्मुबन्तं न तत्क्रियावाचि नाप्युपपदमिति नार्थ एवमनातिङ्ग्रहणेन।

एतयोर्योगयोरिति। ननु चास्मिन्नेव योगे तदनभिसम्बन्धो युक्तः, यत्रातिङ्ग्रहणमस्ति, न पूर्वत्र? एवं मन्यते---योगविभागेनातिङ्ग्रहणं पूर्वसूत्रेणापि सम्बन्धनीयमिति। यद्येवम्, कुशब्दे प्रादिषु चातिप्रसङ्गः, तत्रापि प्राक् सुबुत्पत्तेः समासः स्यात्? एवं तर्हि पूर्वसूत्रे गतिग्रहणं पृथक्कृत्य तेनैवातिङ्ग्रहणं सम्बन्धनीयम्।

गतिकारकोपपदानाम्, अस्यायमर्थः---गतीनां कारकाणामुपपादानां च कृद्भिः सह यः समासस्तेनतेन लक्षणेन स उत्तरपदात्सुबुत्पत्तेः प्रागेव कार्यः, पूर्वपदन्तु सुबन्तमेव समस्यत इति। गतीनां तावत्---व्याजिघ्रतीति व्याघ्री,`पाघ्राध्माधेट्दृशः शः' इति प्राप्तस्य जिघ्रतेः `संज्ञायां प्रतिषेधो वक्तव्यः' इति निषेधात् `आतश्चोपसर्गे' इति कः, व्याङोर्घ्रशब्देन गतिसमासः, स यद्युत्तरपदे सुबन्ते जाते पश्चात्स्यात्, ततः सुबुत्पत्तये संख्याकर्मादियोगो विवक्षितव्यः, तद्योगाच्च प्रागेव लिङ्गयोगः स्वार्थमभिधाय शब्द इति न्यायात्, ततश्च लिङ्गनिमित्तः प्रत्ययो भवन् घ्रशब्दमात्रस्याजातिवाचित्वादाप् स्यात्, ततश्च व्याङोर्घ्राशब्देन समासः, ततो व्याघ्राशब्दस्य जातित्वेऽप्यनकारान्तत्वाज्जातिलक्षणो ङीष् न स्यात्; प्राक् सुबुत्पत्तेः समासो भवन् लिङ्गयोगमपि नापेक्षत इत्यन्तरङ्गत्वात्स एव तावद्भवति पश्चात्स्त्रीप्रत्ययो भवन्ङीषेव भवति, पूर्वपदस्य तु सुबन्तत्वात्पदकार्याणि भवन्ति, निर्गत इति रुत्वम्, संय्यन्तेति परसवर्णविकल्प इत्यादीनि। कारकाणाम् अभ्रेर्लिप्ताऽभ्रलिप्ती, `कर्तृ करणे कृता बहुलम्' इति समासः, यद्युत्तरपदस्य सुबन्तत्वं स्यात्पूर्ववट्टाप् स्यात्, ततः `क्रीतात्करणपूर्वात्' `क्तादल्पाख्यायाम्' इति ङीष् न स्याद्; अत इत्यधिकारात्, वचनसामार्थ्याद्वा पूर्वशब्दं व्यवस्थावचनमाश्रित्य वाक्यावस्थायामेव स्यात्, अत इत्यधिकारो वा व्यवच्छिद्येत। प्राक् सुबुत्पत्तेः समासे पूर्ववत्सिद्धमिष्टम्। अत्रापि पूर्वपदस्य सुबन्तात्वाच्चर्मक्रीतीत्यादौ नलोपादिकार्याणि भवन्ति। उपपदानाम्--कच्छेन पिबतीति `सुपि स्थः' इत्यत्र सुपीति योगविभागात्कः, कच्छपी, व्याघ्रीतुल्यम्, माषान्वपति `सुप्यजातौ णिनिस्ताच्छील्ये' माषवापिणी, ङीपः प्राक् समासे प्रातिपदिकस्यान्तो नकार इति णत्वं भवति। सुबन्तस्य तु समासे ङीप्समासस्यान्तो न तु नकार इति न स्यात्। अत्रापि पूर्वपदस्यसुबन्तत्वाच्चर्मकारादौ नलोपादिपदकार्य भवत्येव। अत्रोपपदग्रहणं गतिकारकव्यतिरिक्तोपपदपरिग्रहार्थम्--मृषावापिणी, इषद्दर्शाया अपत्यं ऐषद्दर्शेयः,

अत्र दर्शशब्देन समासे सति समुदायात्स्त्रीभ्यो ढकं बाधित्वा दर्शाशब्दात् स्त्रीप्रत्ययलक्षणो ढक् स्यात्, स्त्रीप्रत्यये तदादिनियमाभावेऽपि दर्शाशब्दादपि कदाचित्स्यादित्येषा दिक्।

जातान्यस्याः परिभाषायाः प्रयोजनानि। कथं पुनतिङ्ग्रहणेनायमर्थः साधयितुं शक्यः, यावता प्रथमान्तमतिङ्ग्रहणं प्रथमान्तस्यैव सुब्ग्रहणस्य निवृत्तिं सूचयेदिति पूर्वपदे पदकार्याणि न स्युः, उत्तरपदे चोक्तमिष्टं न सिध्यति, तदेतत्क्रियमाणमतिङ्ग्रहणं विपर्ययमेव साधयति, तदपि गत्युपपदयोरेव कारकेषु तु `कर्तृ करणे कृता बहुलम्' इत्यादावस्याः कथाया अप्रसङ्ग एव? उच्यते---योगविभागेनातिङ्ग्रहणं गतिनापि संबध्यत इत्युक्तम्, एवं स्थिते योगद्वयविहितसमासमतिङ्ग्रहणेन विशेषयिष्यामः----गतिः समस्यते अतिङ् समासो भवति, उपपदं समस्यते अतिङ् च समासो भवतीति। तदेवम्` माङि लुङ्' मा कार्षीदित्यादौ तिङन्तेन समासो मा भूदित्येवमर्थं क्रियमाणमतिङ्ग्रहणं सुपेति तृतीयान्तस्य निवृत्तिं साधयतीति गत्युपपदयोस्तावत्सिद्धिमिष्टम्। वृत्तावपि `सुप् सुपेति न संबध्यते' इति समुदायस्य निवृत्तिर्विवक्षिता, न केवलस्य सुब्ग्रहणस्य। प्रत्युदाहरणमपि दिङ्मात्रं प्रदर्शितम्, न हि तत्र तिङन्तेन समासः, कि तर्हि? तिङन्तस्य सुबन्नेन, `कर्त्तृ करणे कृता बहुलम्' इत्यत्रापि कृतेति न वक्तव्यम्, कथम् ? कर्त्तृ करणयोः क्रियापेक्षत्वात्क्रियावचनेन तावत्समासः,धातुश्च क्रियावचनः, धातोश्च द्वये प्रत्ययाः---कृतस्तिङश्च, तत्र सुबधिकारात्तिङन्तेनाप्रसङ्गः, तदेतत् कृद्ग्रहणं कृदन्तावस्थायामेव यथा स्यादित्येवमर्थमिति केचित्।

नेति वयम्। काष्ठैः पचतितराम्, दध्ना भुक्तपूर्वीत्यादौ तद्धितान्तेन समासो मा भूदित्येवमर्थं कृद्गहणं कर्त्तव्यं कष्टश्रितादिषु प्राक्सुबुपत्तेः समासो न साधित इति कष्टश्रितेत्यादि न सिद्ध्यति। एव तर्हि गतिकारकोपपदानामिति परिभाषा पूर्वाचार्यैः पठिता सूत्रकारेणाप्यतिङ्ग्रहणेन तद्देश आश्रीता। तत्र सामान्यापेक्षां ज्ञाप्रकमिति कृत्स्नमेव परिभाषार्थं ज्ञापयतीति सिद्धमिष्टम्।

तदेतत्प्रतिपद्यन्तां भाष्ये कृतपरिश्रमाः।

नान्ये सहस्रमप्यन्धाः सूर्य पश्यन्ति नाञ्जसा।।

अमैवाव्ययेन ।। 2.2.20 ।।

अमैवाव्ययेन।। स्वादुङ्कारमिति। स्वादुमि णमुल्, स्वादुमीत्यत एव निपातनात्पूर्वपदस्य मान्तत्वम्। स्वादुमीत्यर्थग्रहणम्, तेन संपन्नकारमित्यत्रापि भवति। ननु सिद्धे विधिरारभ्यमाणो नियमाय भवति, एवकारः किमर्थः? इष्टतोऽवधारणार्थः, एवं यथा विज्ञायेत---अमैवाव्ययेनेति, मैवं विज्ञायि---अमाव्ययेनैवेति। अनव्ययस्यासम्भवादेवायं नियमो न भविष्यति। ननु चायमस्ति स्वशयं ब्राह्मणकुलमिति---`अधिकरणे शेतेः' इत्यच्, `अतोऽम्' इति सोरम्भावः, अनेनानव्यवेन समासो मा भूदित्येवमर्थो नियमः स्यात्, न; अत्र ह्यन्तरङ्गत्वादनुत्पन्न एव सावुपपदसमासेन भाव्यम्, पश्चात्सुपेति विधानवेलायामनव्ययस्यामोऽसम्भवान्नियमान्तरेण वचनस्य चरितार्थत्वाद्विपरीतनियमो न भविष्यतीत्यत आह----एवकारकरणमिति। अमैव यदुपपदं तत्समस्यते, तदेव समस्यत इत्यक्षरार्थः, न पुनरमैव समस्यत इति। तत्रामैव यदुपपदमित्यत्र तुल्यविधानमिति वाक्यशेषः। किं चामैव तुल्यविधानं येन वाक्येनामेव केवलो विधीयते, न प्रत्ययान्तरसहितस्तेन वाक्येन यदुपपदं विधीयते तत्र सप्तमीनिर्देशात्तदमैव तुल्यविधानम्। नियमाङ्गभूतस्त्वेवकारो नियमस्वभावादेव लभ्यते---अमैव यत्तुल्यविधानं न तु प्रत्ययान्तरोत्पत्तौ निमित्तमिति तदपेक्षयाऽनुपपदत्वाद् अव्ययान्तरेण समासो नाशङ्कनीयः। अग्रे भोजमिति। `विभाषाग्रेप्रथमपूर्वेषु' इति क्त्वाणमुलौ। अव्ययग्रहणं किम्? असत्यव्ययग्रहणे `अमैव तुल्यविधानं तदेवोपपदं समस्यते' इत्युच्यमाने कुम्भकारादाविपि न स्यात्। अथ पूर्वसूत्रस्यानवकाशत्वादमैव तुल्यविधानस्योपपदस्याव्ययविषयत्वात्तद्विषय एव नियमो विज्ञास्यत इत्युच्यते? एवं त्वमैव नियमः स्याद्---अमन्तेनोपपदस्य यः समासः सोऽमैव तुल्यविधानस्येति, तत्र को दोषः? अग्रेभोजमित्यत्रैव न स्यात्, अग्रे भुक्त्वा, कालो भोक्तुमित्यत्र तु स्यादेव; अव्ययग्रहणे तु सति अव्ययेनोपपदस्य यः सोऽमैव तुल्यविधानस्येति विज्ञानान्न कश्चिदोषः।।

तृतीयाप्रभृतीन्यतरस्याम्।। 2.2.21 ।।

तृतीयाप्रभृतीन्यतरस्याम्।। तृतीयाप्रभृतीनीति। यत्पुनरमा चान्येन तस्याप्राप्त इति उपपदविशेषणार्थ एवकारोऽत्र नानुवर्त्तत इति भावः। उच्चैः कारमिति। यदा समासस्तदा कृदुत्तरपदप्रकृतिस्वरः, `आदिर्णमुल्यन्यतरस्याम्' इत्याद्युदात्तत्वम्। यदा तु न समासः, तदोच्चैरित्यन्तोदात्तम्; स्वरादिषु तथा पाठात्। कारमित्याद्युदात्तम्।।

क्त्वा च।। 2.2.22 ।।

क्त्वा च।। क्त्वेति तृतीयान्तम्। `आतः' इत्याकारलोपः, यथा---`समासेऽनञ्पूर्वे क्त्वे ल्यप्' इति `क्त्वि स्कन्दिस्यन्द्योः' इति।।

शेषो बहुव्रीहिः।। 2.2.23 ।।

शेषे बहुव्रीहिः।। उपयुक्तादन्यः शेष इति। `शिष असर्वोपयोगे' इत्यस्मात्कर्मणि घञ्। कश्च शेष इति। ननु चोपयुक्तादन्यः शेष इत्युक्तम्, सत्यम्, सर्वेषामेव पदानां सामान्यविशेषरूपेणोपयोगात्सर्वेषु च पूर्वोत्तरान्यपदार्थेषु यथायोगं तत्पुरुषाव्ययीभावयोर्विधानादुपयुक्तादन्यो न सम्भवतीति पुनः प्रश्नः। उक्तं च---`शेषग्रहं पदतश्चेन्नाभावादर्थतश्चेदविशिष्टम्' इति। यत्रान्यः समासो नोक्त इति। येषां पदानां यस्मिन्नर्थेऽव्ययीभावादिकः समासो न विहितः स शेष इत्यर्थः। अथैवं कस्मान्न विज्ञायते----स्पतसु सुपां त्रिकेषु यस्य त्रिकस्य श्रृङ्गग्राहिकया समासो नोक्तः, यथा---प्रथमायाः,स शेष इति? कण्ठेकाल इत्यादावप्रथमान्तानामपि समासस्येष्टत्वात्। शेषग्रहणं प्राक्कडारात्परं कार्यमित्यस्मिन्पक्षे कर्तव्यम्, एकसंज्ञाधिकारपक्षे न कर्तव्यमित्याकडारसूत्र एव प्रतिपादितम्।।

अनेकमन्यपदार्थे।। 2.2.24 ।।

अनेकमन्यपदार्थे।। अनेकं सुबन्तं सह समस्यत इति। परस्परमित्यर्थः। तदनेन सुबित्येतदत्रानुवर्तते, न सुपेत्येतद्; उत्तरपदस्याप्यनेकमित्यनेनैव प्रतिपादितत्वादिति दर्शयति। सर्वेषु विभक्त्यर्थेष्विति। पदेन प्रकृत्यर्थोपसर्जनः प्रत्ययार्थोऽभिधीयत इति विभक्त्यर्थस्य प्राधान्यात्तस्यैवान्यपदार्थग्रहणेन प्रहणमिति भावः। अत एव प्राप्तोदकोऽयं ग्राम इति ग्रामशब्दानुप्रयोगः, अन्यथा यावानेवार्थो ग्रामपदस्य तावतोऽभिधाने गतार्थत्वान्न स्यात्, यथा---द्वन्द्वे च--शब्दस्य। यदा तु समासेन विभक्त्यर्थ एव सम्बन्धादिरभीप्स्यते तदा विभक्तिर्मानुप्रयोजि, द्रव्यस्यानभिहितत्वात्तद्वाचिनोऽनुप्रयोगः कस्मान्न स्यात् यदि विभक्त्यर्थोऽभिधीयते, कथं ग्रामादिभिः सामानाधिकरण्यं तल्लिङ्गसंख्यायोगे वा बहुव्रीहिर्भवतिप्राप्तोदको ग्रामः, उद्धृतौदना स्थालीति? उच्यते---विभक्त्यर्थस्य सम्बन्धादेराश्रितत्वेन गुणत्वादभेदोपचारात्सामानाधिकरण्यमाश्रयतश्च लिङ्गवचनानि भविष्यन्ति शुक्लादिवत्, यथा---शुक्लं वस्त्रम्, शुक्ला पटी, शुक्लः कम्बलः, शुक्लैः, शुक्ला इति। नन्वेवं यथा शुक्लशब्देन कदाचिद्गुण उच्यते, कदाचित् गुणी; तथा बहुर्वीहावपि प्राप्नोति। नैषोऽस्ति नियमः----गुणशब्देन कदाचिद्गुणमात्रमभिधीयत् इति, पट्वादिष्वदर्शनात्, न हि भवति देवदत्तस्य पटुरिति; तद्वदिहापि नित्यमेव गुणिनिष्ठता भविष्यति। एवमपि बहुव्रीहिणा यथा विभक्त्यर्थस्याभिधानात् षष्ठ्यादयो न भवन्ति, तथा लिङ्गसंख्ययोरप्यभिधानात्तयोर्वाचकाः प्रत्यया न प्राप्नुवन्ति ? नैष दोषः; स्वार्थिकाष्टाबादयः, स्त्रियां यद्वर्तते तस्मात्स्वार्थिकाष्टबादयो भवन्तीति तेन बहुव्रीहिणाऽभिहितेऽपि स्त्रीत्वे भविष्यन्ति। एवं च कृत्वा `अनो बहुव्रीहेः' इत्याद्युपपन्नं भवति।

समासेन च बाह्यक्रियापेक्षा या कर्मादिशक्तिस्तद्रहितसमासप्रातिपदिकार्थमात्रस्यैवैकत्वादेरुक्तत्वादिति कर्मादिगतैकत्वादिप्रतिपादनाय वचनानि भविष्यन्तिचित्रगुं पश्य, चित्रगुणा कृतमिति। एवमपि प्रथमा न प्राप्नोति, समासेन संख्याया अभिधानात्? वचनग्रहणादेकः, द्वौ, बहव इतिवद्भविष्यति। अथ वा----लिङ्गमात्रं संख्यामात्रं बहुव्रीहिणाभिहितं न विशेषस्तत्रावश्यं विशैषार्थिना तद्वाची शब्दः प्रयोक्तव्यः, एवं च कृत्वा सह प्रकृत्वा सह प्रकृत्यर्थेन विभक्त्यर्थे बहुव्रीहिणाभिधीयमानेऽपि न कश्चिद्दोषः। कथं सामान्यमनभिहितं विशेषस्यानुप्रयोगः? सामान्यस्य तर्हि न प्राप्नोति----देवदत्तः कश्चिदिति, सामान्यमपि विशेषः, यथा विशेषेण विशेषान्तरं व्यावर्त्यते तद्वत्सामान्येन विशेषो व्यावर्त्यते, अन्यथा सन्देहः स्यात्---सामान्यमत्र विवक्षितम्? विशेषो वा ? इति।

प्राप्तोदको ग्राम इत्यादिनि द्वितीयाद्यर्थेषु यथाक्रममुदाहरणानि। ऊढो रथो येन, उपहृतः पशुर्यस्मै, उद्धृत ओदनो यस्याः, चित्रा गावो यस्य, वीराः पुरुषा यस्मिन्निति विग्रहाः। प्रथमार्थे तु न भवतीति। अनभिधानात्, एवमनन्तरादिषु न भवति----चित्रा गावो यस्यानन्तरा इति। अनेकमिति किमिति। सुप्सुपेत्यधिकारादेव तत्पुरुषवद्बहुव्रीहिरप्येकस्य न भविष्यतीति प्रश्नः। बहूनामपि यथा स्यादिति। अन्यथा सुप्सुपेति संख्याया विवक्षितत्वाद्यथा तत्पुरुषो बहूनां न भवति---महत्कष्टं श्रित इति, तथा बहुव्रीहिरपि न स्यादिति भावः। ज्ञापकात्सिद्धिम्, यदयं तद्धितार्थेत्युत्तरपदे द्विगुं रास्ति तज्ज्ञापयति---बहूनामपि समास इति। यद्येवम्, तत्पुरुषेऽपि प्रसङ्गः, अथ चित्रगुरित्यत्रोत्तरपदस्याप्युपसर्जनसंज्ञा प्रयोजनं कस्मान्न भवति, सत्यनेकग्रहणे सुपेत्यस्य निवर्तितत्वादुत्तरपदमपि तेनैव प्रत्याय्यते, तदपि समासशास्त्रे प्रथमानिर्दिष्टं भवति, नान्यथा? एवं मन्यते----चित्रगुस्तिष्ठति, चित्रगुं पश्येति प्रधानस्यान्यपदार्थस्य नानाविभक्तियोगेऽपि वर्त्तिपदयोर्नित्यप्रथमान्तत्वादेकविभक्तीत्येव सिद्धमुपसर्जनत्वमिति।

सुसूक्ष्मजटकेशेनेति। सुष्ठु सूक्ष्मा जटाः केशा अस्येति चतुर्णां बहुव्रीहौ `ङ्यापोः संज्ञाछन्दसोर्बहुलम्' इति बहुलवचनाद्ध्रस्वत्वम्,यद्वा सुष्ठु सूक्ष्मा जटा येषु ते सुसूक्ष्मजटास्तादृशाः केशा अस्येति पुनर्बहुव्रीहिः। एवं सुष्ठु गजाजिनं वास आच्छादनं यस्य तेन सुगजाजिनवाससा, तृतीयान्तोदाहरणम्; श्लोके तथा पठितत्वात्।

`सुसूक्ष्मजटकेशेन सुगजाजिनवाससा।

समन्तशितिरन्ध्रेण द्वयोर्वृत्तौ न सिद्ध्यति'।।

इति भाष्ये श्लोकः पठितः तत्र तु श्लोकपूरणार्थं तृतीयानिर्देशः। अन्यग्रहणं बहुव्रीहितत्पुरुषयोर्विषयविभागार्थम्, असति तस्मिन् कण्ठेकाल इत्यादौ व्यधिकरणपदे सावकाशं बहुव्रीहि स्वपदार्थ इव नीलोत्पलं सर इत्यादौ समानाधिकरणे तत्पुरुषो बाधेत। अन्यग्रहणे तु सति स्वपदार्थे सावकाशं तत्पुरुषं परत्वाद्बहुव्रीहिर्बाधत इति न कश्चिद्दोषः।

पदग्रहणं किम्? पदार्थे यथा स्याद्वाक्यार्थे मा भूत्। कश्चित्कञ्चिन्नद्यां सिष्णासुमाह----नद्यां ग्राहाः सन्तीति, एतानि पदानि`तस्मात्तत्र मा स्नासीः' इति वाक्यार्थं गमयन्तीति तेषां बहुव्रीहिसंज्ञा प्राप्नोति। अर्थग्रहणं किम्, यावता पदेपदान्तरस्य वृत्त्यसम्भवादेव पदार्थे भविष्यति? कृत्स्ने पदार्थे यथा स्यात्, अन्यथा प्राधान्याद्विभक्त्यर्थ एव स्यान्न प्रकृत्यर्थे द्रव्ये। तत्र यदुक्तम्----अभेदोपचाराद्धर्मिणोऽभिधाने सिद्धेऽपि शुक्लादिवद्धर्ममात्रस्यापि कदाचिदभिधानं प्राप्नोति, तदनेनापाक्रियते। पट्वादिशब्दवन्नित्यं धर्मिनिष्ठो बहुव्रीहिरिति प्रतिपादनेन बहुव्रीहिः समानाधिकरणानामित्यादिरभिधानसिद्धस्यार्थस्य प्रपञ्चः। उच्चैर्मुख इति। उच्चैसोऽथिकरणप्रधानत्वाद्वैयधिकरण्याद्वचनम्।

सप्तम्युपमानेति। सप्तम्यन्तमुपमानवाचि च पूर्वपद यस्य तस्य शब्दान्तरेण समासस्तत्रस्थस्योत्तरपदस्य लोप इत्यर्थः। कण्ठेस्थ इति। `सुपि स्थः' इति कः। `अमूर्द्धमस्तकात्' इत्यलुक्। कण्ठेस्थित इति पाठेतु सप्तमीति योगविभागात्समासः। समानाधिकरणत्वात्समासे सिद्धे वचनमुत्तरपदलोपार्थम्, तेन वैयधिकरण्येऽप्यत्र गमकत्वमस्तीति प्रदर्श्यते। उष्ट्रखमिवोति। अवयवधर्मेण समुदायव्यपदेशादुष्ट्रस्योपमानतेत्युपमानपूर्वपदमुष्ट्रमुखशब्दः, अत्रोपमानोपमेययोर्वैयधिकरण्यवद्वचनमुत्तरपदलोपार्थं च। उष्ट्रमुख इति। उष्ट्रो मुखमस्येति। विग्रहः, न च प्राणी प्राण्यन्तरस्य मुखमुपपद्यत इति सामर्थ्यात् सादृश्यावगतिः, मुखेन च सुखस्य सादृश्यं प्रसिद्धमित्युष्ट्रमुखमिव मुखमस्येत्ययमर्थो भवति। तस्मादुत्तरपदलोपो न वक्तव्यः।

समुदायविकारषष्ठ्या इति। समुदायावयवसंबन्धे प्रकृतिविकारसंबन्धे च या षष्ठी तदन्तात्परं यदुत्तरपदं तदन्तस्य समासस्य शब्दान्तरेण सह

बहुव्रीहिरित्यर्थः। केशचूड इति। इदमपि केशसमाहारे केशशब्दस्य वृत्तेः सिद्धम्। एवं स्वर्णविकारे स्वर्णशब्दस्य वृत्तेः स्वर्णालङ्कार इति सिद्धम्। वचनं तु केशमसाहारचूडः, स्वर्णविकारालङ्कार इत्युत्तरपदस्य श्रवणं मा भूदिति।

प्रादिभ्यो धातुजस्येति। इदं न वक्तव्यमेव, प्रादयो हि ससाधनां क्रियां प्राहुः---यथा निष्कौशाम्बीः, निर्वाराणसिः, प्राचार्य इति। एवं नञोऽस्त्यर्थानामित्येतदपि।

सुबधिकार इति। अस्तीति तिङन्तमिति मत्वा वचनं निपातत्वात्सिद्धम्। उपसर्गविभक्तिप्रतिरूपका निपाताः, स्वरादिषु चास्तिशब्दः पठ्यते। इह किं सब्रह्मचारीति? बहुव्रीहिरयम्। के सब्रह्मचारिणस्तव, किं सब्रह्मचारी त्वमिति पूर्वपदप्रकृतिस्वरो ह्यत्रेष्यते, तत्र कठसब्रह्मचार्यहमिति सम्भावितम्प्रतिवचनम्। यत्तु कठोऽहमिति न तत्साक्षात्प्रतिवचनम्,किं तर्हि? आर्थिकम्। अहं तावत्कठ इत्युक्ते गम्यत एतन्नतु तेऽपि कठा इति। कठस्य हि कठा एव सब्रह्मचारिणो भवन्ति, नान्ये। समाने ब्रह्मणि व्रतचार्येव सब्रह्माचारी भवति। के सब्रह्मचारिणस्तवेति वाक्येन तु प्रश्ने कठा इति प्रतिवचनम्। समासेन तु प्रश्ने कठा इति प्रतिवचनं कदाचिदपि न भवति; वर्तिपदार्थानामुपसर्जनत्वात्, किं सब्रह्मचारीतिसमासेन सब्रह्मचारिणामभिधानात्। इह द्वौ द्रोणावर्द्धद्रोणाश्चार्द्धतृतीया द्रोणा इति? अर्द्धस्तृतीयो येषामिति बहुव्रीहावुद्भूतावयवभेदः समुदायः समासार्थ इति बहुवचनं द्रोणशब्दश्च द्रोणयोरर्द्धद्रोणेऽपि लक्षणया वर्त्तत इति सामानाधिकरण्यं च भवति।।

संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये।। 2.2.25 ।।

संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये।। उपदशा इति। `बहुव्रीहौ संख्येये डजबहुगणात्' इति डचि टिलोपः, दशानां समीपे ये भवन्ति त उच्यन्ते, ते पुनर्नवैकादश वा। पूर्वपदार्थप्रधानोऽयं समासः। उपशब्दोऽयमाराच्छब्देनैकार्थत्वात्समीपे समीपिनि च वर्तते। तत्र समीपिप्राधान्येऽयं बहुव्रीहिः। सामीप्यप्राधान्ये `अव्ययं विभक्तिसमीप' इत्यव्ययीभावः। उपदशं दन्तोष्ठा इति। अत्र धर्मधर्मिणोपभेदोपचारात्सामानाधिकरण्यम्। उपविशा इति। `ति विंशतेर्डिति' इति लोपः। आसन्ना दशानामासन्नदशाः, तेऽपि नवैकादश वा। अधिकदशास्त्वेकादश। द्वौ वा त्रयो वा द्वित्राः, वार्थेऽयं समासः। वार्थश्च यदि विकल्पः स्यात्, ततो यदि द्वौ भवतस्तदा बहुवचनं न स्यात्। तस्मात्संशयोऽत्र वार्थः, स चानियतसंख्याविमर्शः, तत्र तु त्रयोऽपि सर्वदा परिस्फुरन्तीति तदपेक्षं बहुवचनम्। अथ वा----पञ्चैवात्र सर्वदा भवन्ति, कथम्? विमर्शज्ञानमुभयपक्षालम्बि एकं च तत्र, यथा---द्वौ वा त्रयो वा पुरुषा आनीयन्तामित्यत्र पुरुषशब्दे तिङन्ते च बहुवचनमेव भवति, कस्य हेतोः? मिश्रितेषु तयोर्वृतेः। एवं द्वित्रिपदमपि मिश्रितेषु वर्तत इति सैषा पञ्चाधिष्ठाना वाक्, अतो बहुवचनमेव भवति। आनयनादिकार्थं तु द्वयोस्त्रयाणां वा यथारुचि भवति। वाक्यवदेव समासस्य चैषा हि आपत्, अतस्तेषु मिश्रितेषु वृत्तिः, तेन द्वौ वा पुरुषा आनीयन्तामिति वाक्ये द्विशब्दाद् द्विवचनमेव भवति। त्रिचतुरा इति। `चतुरोऽच्प्रकरणे त्र्युपाभ्यामुपसंख्यानम्' इत्यच्। द्विदशा इति। अत्र द्विशब्देन दशत्वावृत्तिगता द्वित्वसंख्या प्रतिपाद्यते, न दशत्वसंख्या; एकत्वात्। नापि संख्यायुक्ताः, बहुत्वात्। तत्र वाक्ये सुचमन्तरेणाभ्या वृत्तेरनवगमात्सुच् भवति, ततश्चास्वपदविग्रहः क्रियते---द्विर्दश द्विदशा इति। वृत्तौ तु स्वभावादेव सुचमन्तरेणाभ्यावृत्तिसंख्यां द्विशब्द एवाहेति संख्यावाचित्वात्समस्यते। नन्वत्र वार्थः सुजर्थश्चान्यपदार्थे इति पूर्वेणैव सिद्धम्, तन्न; सुचः स्वार्थिकत्वात्तदर्थोऽपि पदार्थ एव। मत्वर्थे पूर्वयोगः; अमत्वर्थार्थोऽयमारम्भः। ननु प्राप्तोदकादि प्रथमार्थं वर्जयित्वा सर्वविभक्त्यर्थेषु यथाभिधानं भवतीत्युक्तम्, एवं तर्हि प्रथमार्थेऽपि यथा स्यादित्ययमारम्भः। अथ प्रथमार्थं वर्जयित्वेत्येतदनादृत्य यथाभिधानं भवतीत्युच्यते, एवं तर्हि तस्यैव प्रपञ्चः संख्यायाः समासः, अव्ययानां तु चतुर्दशादिभिः संख्येयवाचिभिः समासो विधेय एव। केचित्तु ये विंशत्यादयः संख्याने वर्त्तन्ते तैः पूर्वेणैव सिद्धम्---अधिका विंशतिर्येषां त इमेऽधिकविंशाः, विंशतिसंख्या आसन्ना येषां ते आसन्नविंशा इति, तत्र `सर्वनामसंख्ययोः' इति विंशतिशब्दस्य पूर्वनिपातः प्राप्नोति, तस्माद्विंशत्याद्यर्थमप्यव्ययादीनां ग्रहणं कर्तव्यमेव।।

दिङ्नामान्यन्तराले।। 2.2.26 ।।

दिङ्नामान्यन्तराले।। दक्षिणपूर्वेति। अन्तरालस्यान्यपदार्थत्वात्पूर्वेणैव सिद्धे वचनमिदं त्वमत्वर्थेपि यथा स्यात्प्रथमार्थेपि यथा स्याद्वैयधिकरण्येऽपि यथा स्यात्। किं च `विभाषा दिक्समासे बहुव्रीहौ' इत्यत्र दिशां प्रतिपदोक्तस्य बहुव्रीहेर्ग्रहणं यथा स्यात्, यास पूर्वा सोत्तरास्योन्मुग्धस्य तस्मै उत्तरपूर्वाय देहीत्यत्र मा भूदित्येवमर्थः। अतस्तदर्थोऽप्ययमारम्भः। कबभावार्थं च `शेषाद्विभाषा' इत्यत्र शेषाधिकारविहितस्य बहुव्रीहेर्ग्रहणम्। `अनेकमन्यपदार्थे' इत्यत्रैव शेषग्रहणमनुवर्त्तते, तेनात्र कप्न भवति। `सर्वनाम्नो वृत्तिमात्रे' इति मात्रग्रहणाद् `विभाषा दिक्समासे' इति यदा सर्वनामसंज्ञा नास्ति तदापि भवति।।

तत्र तेनेदमिति सरूपे।। 2.2.27 ।।

तत्र तेनेदमिति सरूपे।। इतिकरण इत्यादि। ततः समासाल्लौकिककस्य यदि विवक्षा भवति---एवमर्थं समासो भवति, नान्यार्थमित्येवमर्थं सूचयितुमितिशब्द इत्यर्थः, तेन किं सिद्धं भवतीत्याह---लौकिकमर्थमिति। कः पुनरसौ लौकिकोऽर्थ इत्याह---ततश्चेत्यादि। एतदेव विवृणोति---यत्तत्रेत्यादि। गृह्यतेऽस्मिन्निति ग्रहणम्=केशादि, प्रहरणम्=दण्डादि, कर्मव्यतीहारः===परस्परग्रहणं परस्परप्रहरणं च। स चाव्ययमिति। तिष्टद्गुप्रभृतिषु पाठेनाव्ययत्वात्। नन्वत्र युद्धस्यान्यपदार्थत्वात्पूर्वेणैव सिद्धम्, न; वैयधिकरण्यादेकशेषप्रसङ्गाच्च। तथा हि---ग्रहणप्रहरणे च केशादीनां सहविवक्षितत्वादेकविभक्तित्वाच्चैकशेषः प्राप्तोऽनेन वचनेन बाध्यते। कथम्? न समूहविवक्षायां बहुव्रीहिसंज्ञा, समूहश्चैकशेषे नोपपद्यते। ननु चासत्यस्मिन्पूर्वयोगेनैव परत्वादेकशेषो बाधिष्यते? न शक्यते बाधितुम्; अन्तरङ्ग एकशेषः बहुव्रीहिश्चान्यपदार्थापेक्षत्वाद्बहिरङ्गः।।

तेन सहेति तुल्ययोगे।। 2.2.28 ।।

तेन सहेति तुल्ययोगे।। तुल्ययोग इति। तुल्ययोगः==समानसम्बन्धः। सपुत्र इति। `वोपसर्जनस्य' इति सभावः। नन्वत्र पिता प्रधानमन्यपदार्थोऽभिधेयः,

सत्यम्; व्यधिकरणयोः प्रथमार्थेऽपि यथा स्यादित्ययमारम्भः, कबभावार्थं च। उक्तश्चात्र कबभावः। दशभिः पुत्रैरिति। इत्थम्भूतेत्यर्थः। प्रायिकमिति। ज्ञापकात्, यदयं `विभाषा साकाङ्क्षे', `छन्दस्यनेकमपि साकाङ्क्षम्', `पूर्वादिनिः' `सपूर्वाच्च', `सपूर्वायाः प्रथमायाः',`विभाषा सपूर्वस्य' इति विद्यमानार्थेऽपि समासं निर्द्दिशति, तज्ज्ञापयति----प्रायिकं विशेषणमिति।।

चार्थे द्वन्द्वः।। 2.2.29 ।।

चार्थे द्वन्द्वः।। समुच्चयेत्यादि। यदा परस्परनिरपेक्षाः पदार्था एकस्मिन्प्रतिसम्बन्धिनि समुच्चीयन्ते तदा समुच्चयः, यथा---अहरहर्नयमानो गामश्वं पुरुषं पुशुं वैवस्वतो न तृप्यति सुराया इव दुर्मदीति। दुर्मदी यथा सुराया न तृप्यति तथा यमो गवादीन्नयमान इत्यर्थः। अत्र नयतिक्रियायामेकस्यां गवादीनां समुच्चयः, गम्यमानत्वाच्च च--शब्दस्याप्रयोगः। एवं राज्ञो गौश्चाश्वश्चेति द्रव्ये द्रव्ययोः, रक्तः शुक्लश्चेति द्रव्ये गुणयोः, रक्तः पटः कुण्डलं चेति गुणे द्रव्ययोः समुच्चय इत्यादि द्रष्टव्यम्। यदानेकस्य प्राधान्यात्तदनुरोधेन त्वितरदन्वाचीयते तदान्वाचयः, यथा---भिक्षामट गाञ्जानयेति। अत्र ह्यदर्शनादनानयन्नपि गामटत्येव भिक्षाम्, अनटँस्तु भिक्षां न गामानयति,अटन्नपि नान्विष्य गामानयति। इतरेतरयोगस्तु परस्परापेक्षाणामवयवभेदानुपगमेन समुदायरूपतामापन्नानामेकस्मिन्नर्थेऽन्वये सति भवति, यथा----देवदत्तयज्ञदत्ताभ्यामिदं कार्यमिति। तथैकापायेऽपि तद्भवति, उद्भूतावयवभेदत्वाच्च द्विवचनबहुवचने भवतः, तादृशानामेवावयवतिरोधानसंहतिरूपेणान्वये तत्समाहारः, यथा---छत्त्रोपानहमिति, संहतिप्रधानत्वात्त्वेकवचनम्। तत्रेत्यादि। स्यादेतत्----समुच्चये परस्परानपेक्षत्वेऽपि गवादीनामेकक्रियाद्वारकं सामर्थ्यं दध्योदनादिवदस्त्येवेति, तन्न युक्तम्; दध्योदनादावेकत्वात् क्रियायाः। इह तु कर्मभेदात्क्रिया भिद्यते, तथा च ` समुच्चयेऽन्यतरस्याम्' इत्यत्र भ्राष्ट्रमट मठमटेत्यादिकं कर्मभेदनिबन्धनं क्रियाभेदमाश्रित्योदाहरिष्यते। अन्वाचये त्वप्रधानमेव चार्थे वर्त्तते, न प्रधानमित्यनेकस्य पदस्य चार्थे वृत्त्यभावादपि समासाभावः। इह पटुश्चासौ खञ्जश्चेत्येकस्मिन्धर्मिण्यनेकधर्मसमुच्चयाच्चार्थसद्भावात्समानाधिकरणयोरपि द्वन्द्वसंज्ञाप्रसङ्गः, ततश्च `द्वन्द्वे घि' इति नियमः स्यात्, विशेषणमित्यादिना तु तत्पुरुषकरणे खञ्जपटुरित्यपि सिद्ध्यति? नैष दोषः; एकसंज्ञाधिकाराद्विशेषविहितत्वात्तेत्पुरुषसंज्ञैव भविष्यति, अन्यथा नीलं च तदुत्पलं चेत्यादावपि द्वन्द्वः स्यात्। यद्वा---`शेष' इति वर्त्तते, अतो विशेषणमित्यत्रोपयुक्तत्वान्न भविष्यति। सामानाधिकरण्याभावे तु द्वन्द्व एव---पटुखञ्जावागताविति। प्लक्षन्यग्रोधाविति। चशब्दस्याव्ययत्वेऽपि तदर्थे विधीयमानस्य द्वन्द्वस्य स्वभावादेव लिङ्गसंख्यायोगः। कथं पुन रत्र द्विवचनम्, यावता शब्दपौर्वापर्यादर्थाभिधानेऽपि पौर्वापर्यम्, ततश्च प्लक्षशब्दः सहार्थेन निवृत्तः न्यग्रोधशब्द उपस्थितः, एक एवार्थस्तस्यैकत्वादेकवचनमेव प्राप्नोति, तथा च `आद्यन्तौ टकितौ' इति क्रमेण प्रतीतिमङ्गीकृत्य यथासंख्यमित्यस्य प्रवृत्तिः, न च क्रमेण द्वयोरर्थयोः प्रतीतौ द्विवचनं भवति;यथा वा वाक्ये प्लक्षश्च न्यग्रोधश्चेति, अत्र न्यग्रोधार्थप्रतीतिदशायां प्लक्षार्थस्याप्रतीतितरेव कारणम्? अस्तु तर्हि युगपदधिकरणवचने द्वन्द्वः। किमिदं युगपदधिकरणवचन इति? अधिकरणं वर्तिपदार्थः, अधिकरणे युगपद्वचनं युगपदधिकरणवचनम्, तत्र द्वन्द्वो भवति। केन पुनर्युगपद् द्वयोर्वचनम्? एकैकेन पदेन। एतदुक्तं भवति---यावतां पदानां द्वन्द्वो यदि तावतामन्योऽन्यार्थाभिधानं युगपद्भवत्येवं द्वन्द्वो भवतीति। अत्र हि द्विवचनबहुवचनान्यथानुपपत्तिरेव प्रमाणम्; विग्रहे चापि दर्शनात्। विग्रहे खल्वपि युगपद्वचनता दृश्यते---प्रमित्रयोर्वरुणयोः, द्यावाचिदस्मै पृथिवी नमेते इति; किं पुनः समासे, यत्र चान्याचान्या च शक्तिः प्रादुर्भवति! कथं पुनः प्लक्षशब्देन न्यग्रोधाभिधानम्, तेन वा तस्य? साहचर्यादिति। यद्वा तद्वा निमित्तं भवतु, यद्यपि य लोकव्यवहारे केवलस्य प्लक्षशब्दस्य न्यग्रोधाभिधायित्वं न दृष्टं न्यग्रोधशब्दस्य वा प्लक्षाभिधायित्वम्, द्वन्द्वावयवानां त्वनेकार्थाभिधायित्वं न केवलानामित्यदोषः। नियतविषयाश्चापि शब्दार्था भवन्ति, यथा---भ्रातृशब्दस्यैकशेष एव स्वसरि वृत्ति, पुत्रशब्दस्य दुहितरि। एतेनैतदपि निरस्तम्----एकेनोक्तत्वात्तस्यार्थस्य परस्य प्रयोगो नोपपद्यत इति। कथं द्वन्द्वावयवानामेव परस्परसन्निधानादेषा शक्तिर्वह्निसन्निधाविव घृते द्रवता, नो खलु वह्निविगतौ भवति, यदि तर्हि प्लक्षोऽपि द्व्यर्थो न्यग्रोधोऽपि द्व्यर्थः, बहुत्वाद्बहुचनं प्राप्नोति? नात्र चत्वारोऽर्थाः, किं तर्हि? याभ्यामेवात्रैको द्व्यर्थस्ताभ्यामेवापरोऽपि। स्यादेतत्---उभयोरत्र पर्यायत्वे यथा प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधाविति द्विर्वचने प्रतीतिः, एवं प्लक्षन्यग्रोधावित्यत्रापि प्राप्नोति, तन्न; युगपदुत्पादात्। तद्यथा द्वयोरक्ष्णोर्युगपद्विस्फारितयोः पुरोवर्त्तिन्यर्थद्वये युगपदेका प्रतीतिर्जन्यत तथेहापि द्रष्टव्यम्। ननु यदा प्लक्षशब्दो न तदा न्यग्रोधशब्दः, यदा न्यग्रोधशब्दो न तदा प्लक्षशब्द इति कथमत्र युगपद्व्यापारः? स्मृतिस्थयोर्युगपद्व्यापाराददोषः। पदानि हि श्रुतमात्राणि स्वं स्वमर्थं स्मारयन्ति, पश्चादाकाङ्क्षासन्निधियोग्यत्वेषु परामृष्टेषु स्मृतिस्थान्यभिदधति, तस्यामेव स्मृतौ युगपदारोहात्सम्भवत्येव युगपद्व्यापारः। या च सा पदार्थानां स्मृतिः सा क्रमभाविनीति तत्क्रमेणैव यथासंख्यादिव्यवस्था युगपदभिधानेऽप्युपपद्यते। तदेवं युगपदधिकरणवचने द्वन्द्व इति स्थितम्। इहैकविंशतिर्द्वाविशतिरिति, यद्ययं द्वन्द्व स्याद् एकं च विंशतिश्चेतीतरेतरयोगे द्विवचनबहुवचनप्रसङ्गः, समाहारे च `स नपुंसकम्' इति नपंसकप्रसङ्गः, अत एव एकाधिका विंशतिरेकविशतिरिति शाकपार्थिवादित्वात्समासः क्रियते? नैवं शक्यम्, `राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु संख्या' इति पूर्वपदप्रकृतिस्वरो न स्यात्। तस्माद् द्वन्द्व एवायम्। स समाहारे नेतरेतरयोगे, अनभिधानात्। नपुंसकत्वन्तु `लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति न भवति।।

उपसर्जनं पूर्वम्।। 2.2.30 ।।

उपसर्जनं पूर्वम्।। आनयमो हि स्यादिति। यद्यपि विपरीतप्रयोगो लोके न दृष्टः परपुरुषापराधात्तु वाक्यवत्सम्भाव्येतेत्यर्थः। इह राज्ञः पुरुषस्य पुत्रो राजापुरुषपुत्र इति षष्ठीसमासशास्त्रे द्वयोरपि प्रथमानिर्द्दिष्टत्वेऽप्युपसर्जनसंज्ञाऽन्वर्थत्वादप्रधानस्यैव भवति, पुरुषश्चात्र राजापेक्षया प्रधानमिति पूर्वनिपातनियमः।।

राजदन्तादिषु परम्।। 2.2.31 ।।

राजदन्तादिषु परम्।। न केवलमित्यादि। अत्र विहितपूर्वनिपातस्येति पाठे विहितः पूर्वनिपातो यस्य तस्येत्यर्थः। प्रायेण तु विहितस्येति पाठः। तत्रापवाद इति शेषः। अन्यस्यापि घ्यादेर्यः पूर्वनिपातो यथालक्षणं विहितस्तस्याप्यपवाद इत्यर्थः। अग्रे वणमिति। `वनं पुरगा' इत्यादिना णत्वम्। तदेव तर्हि णत्वविधानं परनिपातस्य ज्ञापकं भविष्यति? तन्न, `उपसर्जनं पूर्वम्' इति नियमो न प्रवर्त्तत इत्येतावतोऽप्यर्थस्य ज्ञापकत्वेन तदुपपन्नम्, तस्मात्कथं नियमेन परनिपातः स्यात्! इह च निपातनादलुगिव णत्वमपि न भविष्यतीति तत्राग्रेग्रहणं शक्यमकर्तुम्। पूवेकालस्येति। `पूर्वकालैक' इति प्रथमानिर्द्देशादुपसर्जनस्येत्यर्थः। उलूखलमुसलादिद्वन्द्वेषु क्वचिदल्पाक्षरत्वात्क्वचिद् घ्यन्तत्वात्क्वचिदजाद्यदन्तत्वात्पूर्वनिपातप्रसङ्गः, क्वचिदनियमः। द्दषदुपलमिति। प्रमाद पाठः; तेन परनिपातस्यापि सिद्धत्वादिह पाठः शक्योऽकर्तुम्।।

द्वन्द्वे घि।। 2.2.32 ।।

द्वन्द्वे घि।। द्वन्द्वेऽनेकमिति प्रथमानिर्देशात्सर्वेषामेवोपसर्जनत्वादनियमे प्राप्ते वचनम्। अनेकप्राप्ताविति। आकृतौ पदार्थे समुदाये सकृल्लक्षणं प्रवर्त्तते, न प्रतिव्यक्त्यावृत्त्या। तत्रैकस्यैव पूर्वनिपातेन जातौ लक्षणं प्रवृत्तमेवेति न पुनः प्रवर्तते। नन्वाकृतिपक्षेऽपि पटुगुप्तौ मृदुगुप्तावित्यादिषु बहुषु व्यक्तिषु यथा युगपत्प्रवर्तते, तथात्रापि प्रवर्तताम्? एवं मन्यते---एकस्य युगपदवध्यवधिमद्भावो विरोधान्न सम्भवति। न चान्तमपेक्ष्योभयोः पूर्वत्वमन्यतरेण व्यवधानादिति, अत्र च यदा पटुमृद्वोर्द्वन्द्वं कृत्वा पश्चाच्छुक्लशब्दस्य द्वन्द्वः कियते तदाल्पाच्तरत्वात्तस्य पूर्वनिपाते शुक्लमृदुपटवः, शुक्लपटुमृदव इति च भवति। विस्पष्टपटुरिति। विस्पष्टशब्दः प्रवृत्तिनिमित्तस्य पाटवस्य विशेषणमिति विस्पष्टं पटुरिति विगृह्य `सुप्सुपा' इति समासः।।

अजाद्यदन्तम्।। 2.2.33 ।।

अजाद्यदन्तम्।। अजादीति पृथक् पदम्, विशेषणसमासो वा। अश्वेन्द्ररथा इति। रथशब्दस्य पश्चात्समासे रथाश्वेन्द्रा इत्यपि भवति। द्वन्द्वे घ्यन्तादजाद्यदन्तं विप्रतिषेधेनेति। `द्वन्द्वे घि' इत्यस्यावकाशः---पटुगुप्तौ; `अजाद्यदन्तम्' इत्यस्यावकाशः---उष्ट्रखरम्; इन्द्राग्नी इत्यत्रोभयप्राप्तौ परत्वाद् `अजाद्यदन्तम्' इत्येतद्भवति विप्रतिषेधेनेति।।

काशिकावृत्तौ

द्वितीयाध्याये प्रथमः पादः <पदमञ्जरी>

अल्पाच्तरम्।। 2.2.34 ।।

अल्पाच्तरम्।। अत एव निपानतात्स्वार्थे तरप्, कुत्वाभावश्च। यदि तु प्रकर्षे तरप् चेत्तदा `धवखदिरपलाशाः' इत्यादौ बहुषु सन्निहितेषु द्विवचनोपपदत्वाभावादस्याप्रवृत्तावनियमः स्यात्। द्वयोरेव तु स्यात्---प्लक्षन्यग्रोधाविति। शङ्खदुन्दुभिवीणा इति। तूर्याङ्गानामित्येकवद्भावो न भवति; तूर्यशिल्पोपजीविनामेव तत्र ग्रहणात्। नियतद्रव्यविवक्षायां जातिरत्वाभांवात् `जातिरप्राणिनाम्' इत्येतदपि न भवति। शङ्खवीणाभ्यां दुन्दुभेर्द्वन्द्वे दुन्दुभिशङ्खवीणा इत्यपि भवति। एवं मृदङ्गश्च शङ्खपणवौ च मृदङ्गशपणङ्खवाः, धनपतिश्च रामकेशवौ च प्रासादो धनपतिरामकेशवानामित्यादि भवति। तथा होता च पोता च नेष्टा चोद्गाता चेति बहूनां युगपद् द्वन्द्वे तृतीयस्योत्तरपदमनन्तरमिति तस्यैवानङ् भवति, नेतरयोः---होतृपोतृनेष्टोद्गातारः। द्वयोर्द्वयोर्द्वन्द्वे त्रयाणामप्यानङ् भवति---होतापोतानेष्टोद्गातार इति। एवमन्यत्रापि द्वन्द्वक्रियायामानुपूर्व्यविशेषाद्रूपविशेषो वेदतव्यः। पूर्वाभ्यामल्पाच्तरमित्येतत्पूर्वानुसारेण गम्य मानत्वाद् वृत्तौ न पठितम्। `द्वन्द्वे घि' इत्यस्यावकाशः---पटुगुप्तौ, `अल्पाच्तरम्' इत्यास्यावकाशः---प्लक्षन्यग्रोधौ; वागग्नी इत्यत्रोभयप्राप्तौ अल्पाच्तरमित्येतद्भवति। अजाद्यदन्तमित्यस्यावकाशः----उष्ट्रखरम्, अल्पाच्तरमित्यस्य स एव; वागिन्द्रावित्यत्रोभयप्राप्तौ `अल्पाच्तरम्'इत्येतद्भवति।

ऋतुनक्षत्राणामिति। ऋतूनामानुपूर्व्यं प्रादुर्भावकृतम्, नक्षत्राणामुदयकृतम्। मातापितराविति। `आचायं!श्रेष्ठो गुरूणाम्, मातेत्येके, इति स्मृतिः। `पितुर्दशगुणं माता गौरवेणातिरिच्यते' इति च।

श्रद्धामेधे इति। सत्यां श्रद्धायामर्थक्रियाकारिणी मेधेत्यभ्यर्हितत्वं श्रद्धायाः। दीक्षातपसी इति दीक्षार्थं तप इत्यभ्यर्हितत्वं दीक्षायाः। लघ्वक्षरादपि तपसो विप्रतिषेधादभ्यर्हितमित्येतदेव भवति।

समानाक्षराणामित्यत्र नास्तीति। तेन ऋतुनक्षत्राणामित्यत्रैव वर्णग्रहणं न कृतमिति भावः। वर्णानामुत्पत्तिकृतमानुपूर्व्यं श्रूयत एव---`मुखतो ब्राह्मणमसृजद्बाहुभ्यां राजन्यमूरुभ्यां वैश्यं पद्भ्यां शूद्रम्' इति।

संख्याया अल्पीयस्या इति। द्वन्द्वे चाद्वन्द्वे चेत्याहुः। अल्पीयस इति पाठे अल्पीयसोऽर्थस्य वाचिकाया इत्यर्थः। नवतिशतमिति। द्वन्द्वः, `द्व्येकयोः' इति तु सौत्रो निर्देशः।।

सप्तमीविशेषमे बहुव्रीहौ।। 2.2.35 ।।

सप्तमीविशेषमे बहुव्रीहौ।। कण्ठेकाल इति। यदा कण्ठे किञ्चिदस्तीति निर्ज्ञाते काल इति विशेषणं प्रयुज्यते तदा सप्तमीग्रहणेन प्रयोजनम्, अन्यदा तु विशेषणत्वादेव सिद्धम्। सम्प्रधारणायामिति। इदमस्तु इदमेवेति निरूपणा===सम्प्रधारणा। परत्वादिति। शब्दपरविप्रतिषेधादित्यर्थः। एवमर्थमेव च `संख्यासर्वनाम्नोः' इति नोक्तम्। गड्वादिभ्य इति गड्वादयः प्रयोगतो द्रष्टव्याः।।

निष्ठा।। 2.2.36 ।।

निष्ठा।। अवमुक्तोपानत्क इति। उरः प्रभृतित्वात्कप्। ननु चेत्यादि। यथा चित्रगुरिति। गुणद्रव्यशब्दयोरुपनिपाते गुणशब्दस्य विशेषणत्वम्, क्रियाद्रव्य

शब्दयोरपि क्रियाया एव विशेषणत्वम्। ततश्च पूर्वेणैव सिद्धमिति भावः। विवक्षानिबन्धनत्वादिति। यदा कृत किञ्चिदनेनेति निर्ज्ञाते कट इति प्रयुज्यते तदा कटो विशेषणमिति मन्यते। कटे कटेन कृतमिति वा विग्रहीतव्यमिति। एवं विग्रहे कृतस्य विशेषणत्वशङ्कैव नास्तीति भावः। क्वचित्तु वाशब्दो न पठ्यते, तत्र विवक्षानिबन्धनत्वादित्युक्ते तामेव विवक्षां दर्शयतीति व्याख्येयम्।
जातिकालसुखादिभ्यः परवचनमिति। ज्ञापकात्सिद्धम्, `जातिकालसुखादिभ्योऽनाच्छादनाद्' इत्याह, तज्ज्ञापयति---जात्यादिभ्यः परा निष्ठा निपततीति। शाङ्र्गजग्धीति। शाङ्र्गं जग्घमनयेति बहुव्रीहिः। `क्तादल्पाख्यायाम्',`अस्वाङ्गपूर्वपदाद्वा' इति ङीष्। अत्राहुः----निष्ठाशब्देन या विहिता निष्ठा तस्या ग्रहणम्। तेन सुस्थितम्, चारुहसितमित्यादौ `नपुंसके भावे क्तः' इत्यस्य परनिपात इति।।
वाऽऽहिताग्न्यादिषु।। 2.2.37 ।।
कडाशः कर्मधारये।। 2.2.38 ।।
कडाराः कर्मधारये।। बहुवचननिर्दशादाद्यर्थोऽवगम्यत इत्याह---कडारादय इति।।
इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां
द्वितीयाध्यायस्य द्वितीयः पादः।।

-----******-----

2.3
काशिकावृत्तौ
अथ द्वितीयाध्याये तृतीयः पादः
अनभिहिते।। 2.3.1 ।।
अनभिहिते।। अनभिहितशब्दोऽयमनेकार्थः, तथा हि---अभिपूर्वस्य दधातेर्हिनोतेश्चैतद्रूपं सम्भवति; अभिपूर्वश्च दधातिर्बन्धनेऽपि दृष्टः----अश्वाभिधानीमादत्त इति, उच्चारणेऽपि---अभिहितः श्लोक इति, प्रतिपादनेऽपि----अभिहितोऽर्थ इति; हिनोतिरपि गतौ वृद्धौ च वर्तते, इह तु वक्ष्यमाणानां कर्मादीनां बन्धनाद्यर्थचतुष्टयासम्भवात्प्रतिपादनवचनोऽभिहितशब्द इत्याह---अनभिहिते अनिर्दिष्टे अनुक्त इति। वचिरत्र प्रतिपादनवचनः। उक्तार्थानामप्रयोग इति यथा सामान्येन `अभिहिते' इत्येतावत्युच्यमाने कटं करोति भीष्णमुदारं दर्शनीयमित्यत्र कटशब्दाद्विशेष्यवाचिन उत्पद्यमानया द्वितीययाऽनवयवेन कटगतस्य कर्मत्वस्याभिहितत्वाद्भीष्मादिभ्यो द्वितीया न स्यादिति मन्यमानः पृच्छति---केनानभिहित इति। इतरोऽपि विदिताभिप्राय आह---तिङ्कृत्तद्धितसमासैरिति। बहुषु प्रयुक्तेषु केषाञ्चिद्वर्जनेन केषाञ्चित्कार्यान्वप्रतिपादनम्===परिसंख्यानम्, प्रत्युदाहरणेषु सर्वत्र द्वितीया न भवति।
कटं करोति भीष्मित्यादि। कटः कृतो भीष्म उदारो दर्शनीय इति करोतेरुत्पद्यमानः क्तप्रत्ययोऽनवयवेन सर्वकर्माभिधत्ते तद्वद् द्वितीयापीति यो मन्दधीर्मन्यते तं प्रतीदं परिगणनभ्, सूक्ष्मदृशस्तु प्रति न वक्तव्यमेव। तथा हि प्रातिपदिकादुत्पद्यमाना द्वितीया यदाकारविशिष्टोऽर्थः प्रातिपदिकेनाभिधीयते तदाकारविशिष्टस्यैव कर्मभावमाचष्टे। कठशब्देन कटत्वजातिविशिष्टोऽर्थोऽभिधीयते,न भीष्माद्याकारविशिष्ट इति तत्प्रतिपादनाय यथा भीष्मादिशब्दप्रयोगो भवति तथा तदाकारविशिष्टस्य कर्मत्वाभिधानाय द्वितीया भविष्यति। क्तप्रत्ययस्तु प्रकृत्यर्थस्य न कर्मतामाचष्टे, किन्तु प्रकृत्यर्थं प्रति यस्य कर्मभावः तमिति युक्तं यदनवयवेन सर्वकर्माभिधत्ते। ननु च कर्मादयो विभक्त्यर्थास्तेषां च तिङादिभिरभिरितवचनमनर्थकम्, अन्यत्रापि विहितस्याभावादभिहिते, यत्राप्यनभिहिताधिकारो न क्रियते तत्रापि शब्दान्तरप्रतिपादितेऽर्थे नैव विहितं भवति, तद् यथा---बहुपटुरिति बहुचोक्तत्वादीषदसमाप्तेः सत्यपि सम्भवे कल्पबादयो न भवन्ति, द्विर्दश द्विदशाः---समासेनोक्तत्वात्सुजर्थस्य सुज्न भवति, पटुगुप्तौ---द्वन्द्वेनोक्तत्वाच्चार्थस्य च--शब्दो न प्रयुज्यते; तद्वदत्रापि तिङादिभिरभिहितत्वादेव द्वितीयादयो न भविष्यन्ति।
नन्वभिहितार्थस्यापि प्रयोगो दृष्टः----अपूपौ द्वाविति, सत्यम्; अयं तु न्यायः यदुताभिहिते विहितं न स्यात्, न हि व्यसनितया शब्दः प्रयुज्यते, अपि त्वर्थाभिधानाय, स चेदर्थः शब्दान्तरेणाभिहितः किमिति शब्दान्तरं प्रयुज्यते, अक्षिनिकोचादिभिरप्यवगतेऽर्थे शब्दो नैव प्रयुज्यते, किं पुनः शब्देनैवाभिहिते। अपूपौ द्वावित्यादौ तु द्वावानय कौ द्वौ ताविति सामान्योपक्रमे वाक्यमिति यथाकथञ्चिदुपपादनीयम्, तस्मान्नार्थ एतेनेत्याशङ्क्य संख्यापि विभक्त्यर्थ इति दर्शयन्नाह---बहुषु बहुवचनमित्येवमादिनेति।
अयमर्थः----`त्रिकः प्रातिपदिकार्थः' इत्यस्मिन्दर्शने कर्मादिवदेकत्वादिसंख्याविभक्त्यर्थः, तत्र कर्मादीनां युगपद्विभक्तिभिरभिधीयमानानां परस्परं विशेषणविशेष्यभावमनापन्नानां केवलप्रातिपदिकार्थगतानामभिधानं वृक्ष एको वृक्षः कर्म पशुरेकः पशुः करणमिति वाभिधानम्, पश्चाच्चैकक्रियान्वयबलेन परस्परसम्बन्ध इति प्राभाकरा मन्यन्ते।
भाट्टास्तु परम्परासम्बद्धस्य स्वतन्त्रस्यानेकार्थस्याक्षाः, पादाः, माषा इत्यादावभिधानदर्शनेऽप्येकशेषमन्तरेणादर्शनात् यजेतेत्यादौ च कृतिकार्ययोर्युगपल्लिङाभिधीयमानयोरपि विशेषणविशेष्यभावस्य प्राभाकरैरप्यभ्युपगमात्तद्वदेव विशिष्टाभिधानं मन्यन्ते।
अस्माकमप्ययमेव पक्षः। तत्र कर्मादयो विशेषणम्, एकत्वादयो विशेष्याः, कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमिति। विपर्ययो वा---एकत्वादिविशिष्टं यत्कर्म

तत्र द्वितीयेति। तत्र यद्यपि कर्मादिप्राधान्यपक्षे तिङादिभिः प्रधानभूतानां कर्मादिनामभिहितत्वादप्रसङ्गः, द्वितीयादीनां संख्याप्राधान्यपक्षे कर्मादिष्वभिहितेष्वपि प्रधानभूतसंख्याभिधानाय द्वितीयादयः स्युरेव। प्राभाकरे तु पक्षे कर्माद्यंशाभिधानेऽपि संख्यांशस्यानभिहितस्याभिधानाय द्वितीयादयः स्युरिति।
अनभिहितकर्माश्रयेष्विति। अनभिहितानि कर्मादीन्याश्रयो येषां तेष्वित्यर्थः। एतेन कर्मणीत्यादिसप्तमीनिर्द्देश एकत्वादीनामाधारतया, न पुनरभिधेयतयेति दर्शितम्। अनभिहित इति। यदि प्रसज्यप्रतिषेधः स्यात्ततो द्वयोः क्रिययोः कारकेऽन्यतरेणाभिहितेऽपि विभक्त्यभावप्रसङ्गः, प्रासाद आस्ते इत्यत्र सदिक्रियाया आसिक्रियायाश्चैकमधिकररगं प्रासादाख्यं तच्चान्यतरेण सदिप्रत्ययेन घञाभिहितम्---प्रसीदन्त्यस्मिन्प्रासाद इति, तत्राभिहिते न भवतीत्युच्यमाने सप्तमी न स्यात्। पर्युदासे त्वासिप्रत्ययेन यदनभिधानं तदाश्रया सप्तमी सिद्व्यति। ननु च प्रासादाख्यस्य द्रव्यस्य कारकत्वादभिहितत्व दन्यत्वं नास्ति? नैष दोषः; शक्तिः कारकम्, तत्र सदिक्रियाशक्त्यभिधानेऽप्यासिक्रियाशक्तेरनभिधानम्। नन्वेवं प्रसज्यप्रतिषेधेऽपि या शक्तिरभिहिता तत्र मा भूद्विभक्तिः, या त्वनभिहिता तत्र भविष्यति? उच्यते---अनभिहिते कर्मणीत्येकत्वादीनामाधारनिर्द्देशः संख्या च द्रव्यधर्मः, अतोऽनभिहिते कर्मणीत्यादिभिरपि शक्तिद्वारेण द्रव्यमेवोच्यते----अनभिहिता या कर्मादिशक्तिस्तदाधारभूतं यद् द्रव्यं तस्यैकत्वादिषु विभक्तय इति। एवं च यदि प्रसज्यप्रतिषेधः स्यात्ततोऽभिहितशक्तिद्वारेण द्रव्यस्याभिहितत्वात्प्रतिषेधः स्यात्; पर्युदासे तु अनभिहितशक्तिद्वारे विधिरिति स्पष्ट एव फलभेदः। यत्र तर्हि शक्तिभेदो नास्ति तत्र कथम्---आसने आस्ते, शयने शेत इति? अत्राप्यासनशयनादिशब्दैरासनादिक्रियायोग्यं वस्तुमात्रमनुद्भुतशक्तिकमभिहितमिति तस्य शक्त्युद्भवप्रतिपादनाय विभक्तिर्भविष्यति।
यदि तर्हि पर्युदासोऽयमिति निर्मीयते, इह पक्त्वा भुज्यत ओदना इति भुजिप्रत्ययेनाप्यभिहित ओदने क्त्वाप्रत्ययेनानभिधानमाश्रित्य द्वितीया प्राप्नोति, भावे हि क्त्वाप्रत्ययः; प्रसज्यप्रतिषेधे तु भुजिप्रत्ययेनाभिधानमाश्रित्य प्रतिषेधः सिद्ध्यति? उच्यते; नात्रौदनस्य युगपदुभाभ्यां शाब्द एवान्वयः, किं तर्हि? भुजिनैव, सन्निधानात्तु पचिनान्वयः। केवलशब्दव्यापारनिरूपणे तु किमिष्टकाः पक्त्वौदनो भुज्यते, उतौदनमेवेति न ज्ञायते, अतः शब्दव्यापारापेक्षयाभिधानमेवेति द्वितीया न भविष्यति। अनभिहितवचनमनर्थकम्; प्रथमाविधानस्यानवकाशत्वात्। कृतः कट इत्यादिषु द्वितीयादयो मा भूविन्निति सूत्रारम्भः। यदि चात्रापि स्युः, क्वेदानीं प्रथमा स्यात्। नन्वनवकाशत्वात्प्रथमा भवन्ती कृतः कट इत्यादावेव भवतीति न पुनः कटं करोतीत्यादावपीति कुतोऽयं नियमः? उच्यते---कृतः कट इत्यादौ यद्यपि कृतशब्दसन्निधाने कटस्य कर्मता प्रतीयते, तथापि तत्र वाक्यार्थत्वादव्यतिरिक्त एव प्रातिपदिकार्थ इति प्रथमा भविष्यति, यथा---विरः पुरुष इति। कटं करोतीत्यत्र तु कटशब्देनैव कर्मशक्तिमानर्थोऽभिधीयत इति व्यतिरिक्तत्वात्प्रातिपदिकार्थस्य प्रथमा न भविष्यति। नन्वकारकेषु सावकाशा प्रथमा,यथा---वृक्ष इति? अत्राप्यस्तीति प्रतीतेः कर्तृ त्वात्तृतीयाप्रसङ्गः। यत्र ह्यन्यक्रियापदं न श्रूयते तत्रान्तरङ्गत्वादस्तीति गम्यते, लब्धसत्ताकस्य हि विशेषणान्तरयोगो भविष्यति। अथापि यत्र विशेषणान्तरनिवृत्तौ तात्पर्यम्, न क्रियासम्बन्धे, यथा---नीलमुत्पलं न रक्तम्, राज्ञोऽयं पुरुषो न देवदत्तस्येति, न ह्यत्र नीलमुत्पलमुत्पलमस्ति, राज्ञः पुरुषोऽस्तीति प्रतीतिः, अतोस्त्येवाकारकमवकाश इत्युच्येत? एवमपि विप्रतिषेधात्प्रथमा भविष्यति। द्वितीयादीनामवकाशो यत्र प्रातिपदिकार्थस्य व्यतिरेकः----कटं करोतीति; प्रथमायास्त्वकारकमवकाशः----नीलमुत्पलमिति; कृतः कट इत्यत्रोभयप्रसंगे परत्वात्प्रथमैव भविष्यति। ननु तामपि बाधित्वा परत्वात्, षष्ठी प्राप्नोति, शेषलक्षणा षष्ठी प्रातिपदिकार्थमात्रस्य प्रथमाविधावुपयोगादशेषत्वान्न भविष्यति। इह तर्हि कर्त्तव्यः कट इति कृत्प्रयोगे प्रथमां बाधित्वा `कर्तृ कर्मणोः कृति' इति षष्ठि स्यात्, तत्प्रतिषेधार्थमनभिहिताधिकारः कर्तव्यः। तदेवं संख्याविभक्त्यर्थ इत्यस्मिन्पक्षे कर्तव्यं सूत्रमिति स्थितम्।।
कर्मणि द्वितीया।। 2.3.2 ।।
कर्मणि द्वितीया।। द्वितीयादयः शब्दा इति। स्वनिकायप्रसिद्धिरेषेत्यर्थः।
उभसर्वतसोरिति। उभयसर्वशब्दयोस्तसिलन्तयोः प्रयोग इत्यर्थः। उभयशब्दैकदेश उभशब्दोऽनुकृतः; उभशब्दस्य तसिलन्तस्याभावात्, तस्य द्विवचनटाब्विषयत्वात्। धिगित्यविभक्तिको निर्द्देशः। आम्रेडितान्तेष्विति। कृतिद्वर्वचनेष्वित्यर्थः। उभयतः सर्वत इति। पञ्चम्यास्तसिल्। धिगिति। निन्दार्थोऽयम्। उपर्युपरीति। `उपर्यध्यधसस्सामीप्ये' इति द्विर्वचनम्। ततोऽन्यत्रापीत्युक्तम्, तानेवान्यान्परिगणयति---अभित इत्यादि। अभितो ग्राममिति। उभयत इत्यर्थः। परित इति। सर्वत इत्यर्थः। `पर्यभिभ्यां च' इति तसिल्। आभिमुख्यवृत्तिरपि विभक्तिप्रतिरूपको निपातोऽभितः शब्दोऽस्ति, सोऽपि गृह्यते। समयानिकषाशब्दौ समीपवचनौ गृह्येते। हाशब्दः शोकादिवृत्तिः हा कन्ये इत्यादौ कारकविभक्तित्वादन्तरङ्गत्वात्सम्बोधनविभक्तिर्मवति। बुभुक्षितं न प्रतिभातीति। प्रतिरत्र क्रियाविशेषकत्वा दुपसर्गो न कर्मप्रवचनीय इति पठ्यते।
तृतीया च होश्छन्दसि।। 2.3.3. ।।
तृतीया च होश्छन्दसि।। यवाग्वाग्निहोत्रमिति। क्व पुनरग्निहोत्रशब्दो वर्त्तते? हविषि; तेष्वग्निहोत्रमधिश्रयेत्, अग्निहोत्रं शरशरायत्, तदाहुर्यस्याग्निहोत्रमधिश्रितममेध्यमापद्येतेत्यादिषु दर्शनात्। जुहोतिरपि प्रक्षेपे। एकस्मिन्नेव प्रयोगे यवागूशब्दात् तृतीया, अग्निहोत्रशब्दाद् द्वितीया; यवाग्वाख्यं हविर्देवतोद्देशेन प्रक्षिपतीत्यर्थः।
अयं योगः शक्योऽवक्तुम्, कथम्? अग्निहोत्रशब्दो ज्योतिष्यति वर्त्तते---अग्निहोत्रं प्रज्वलितमिति। जुहोतिरपि प्रीणने। तद्यदा यवागूशब्दात् तृतीया तदा यवाग्वाग्निहोत्रं प्रीणयतीत्यर्थः, यदा तु द्वितीया तदा यवाग्वाख्यं द्रव्यमग्निहोत्रं हविरग्नौ प्रक्षिपतीत्यर्थः।
मीमांसकास्त्वाहुः----अग्निहोत्रशब्दः कर्मनामधेयमिति, दृश्यते च---स एष यज्ञ पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासावित्यादि। तस्य वा एतस्याग्निहोत्रस्य सप्त च शतानि च, एतद्वा अग्निहोत्रमन्येद्युर्हूयते अजरामर्य वा एतद्यदग्निहोत्रमिति च त इत्याहुः। करणत्वात् तृतीयायां प्राप्तायां पक्षे द्वितीयार्थं वचनम्। इदं च सूत्रानुगुणं न भवति, कर्मणीति हि वर्त्तते।।

अन्तरान्तरेण युक्ते।। 2.3.4 ।।

अन्तरान्तरेण युक्ते।। अन्तरान्तरेणशब्दावित्यादि। ननु यथा नौर्नावि बद्धा नेतरेतरत्राणाय भवति तादृगेतत्, द्वयोरपि निपातत्वव्यभिचारात्, सत्यम्; साहचर्यात्साजात्यं लक्ष्यते, सजातीयविजातीयभावे सजातीयप्रत्ययो भवति, तद्यथा--गुरुभार्गवावित्युक्ते ग्रहयोरेव प्रतीतिर्भवति, न त्वाचार्यपरशुरामयोः। यद्वा अन्तराशब्देनातृतीयान्तेन साहचर्यादन्तरेणेत्यस्याप्यतृतीयान्तस्य ग्रहणम्, स च निपात एव। तथान्तरेण शब्देनाटाबन्तेन साहचर्यादन्तराशब्दस्याप्यटाबन्तस्यैव ग्रहणम्, स च निपात एव। षष्ठ्ेयपवादो योग इति। असत्यस्मिन्योगे शेषत्वात् षष्ठी प्राप्नोति। सति त्वस्मिन्नुपयुक्तत्वात् षष्ठी न भवतीत्यपवादत्वमेतत्। मध्यमाधेयेति। आधेयपरतन्त्रमित्यर्थः। सपब्तम्यन्तस्य मध्यशब्दस्यार्थे वर्त्तत इति यावत्। अन्तरा त्वां च मां च कमण्डलुरिति. तव च मम च मध्ये कमण्डलुरित्यर्थः। अत्र यथा मध्यस्यावध्यपेभायामवधिभूताभ्यां युष्मदस्मद्भ्यां योगः, तथाऽऽधारस्याधेयपरतन्त्रत्वादाधेयेन कमण्डलुनापि योगत्ततोऽपि द्वितीया प्राप्नोति, नैष दोषः, कमण्डलुरित्यत्र तिष्ठत्यस्तीति वा क्रियापदानुषङ्गात्कमण्डलुः कर्त्ता, स च तिङाभिहित इति प्रथमैव भविष्यति, कारकविभक्तित्वात्। तदेतत् `सहयुक्तेऽप्रधाने' इत्यत्रोपपादयिष्यामः। निपातयोर्ग्रहणादिह न भवति, किं तेन तयोरन्तरेण ज्ञातेन! विशेषवचनोऽयम्---अन्तरायां पुरि वसतीति स्रुघ्नस्य प्राकार इति, नात्र स्रुघ्नस्यान्तराशब्दार्थेन योगः, किं तर्हि? प्राकारेण।।

कालाध्वनोरत्यन्तसंयोगे।। 2.3.5 ।।

कालाध्वनोरत्यन्तसंयोगे।। मासमधीत इति। ननु कर्मत्वादेवात्र द्वितीया सिद्धा, कथम्? `कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्'। अवश्यं कर्मसंज्ञैवाश्रयणीया---आस्यते मासः, आसितव्यः आसित इति कर्मणि लकृत्यक्तखलर्था यथा स्युरिति, सत्यम्; इदमप्यवश्यं वक्तव्यम्---द्रव्यगुणाभ्यामत्यन्तसंयोगे द्वितीयायथा स्यादिति। तत्र क्रियात्यन्तसंयोगेऽपि परत्वादनेनैव युक्ता द्वितीया। मासस्येति`कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' इति षष्ठी।।

अपवर्गे तृतीया।। 2.3.6 ।।

अपवर्गे तृतीया।। अपवर्गः फलप्राप्तौ सत्यां क्रियापरिसमाप्तिरिति। तत्रैवापवर्गशब्दो लोके प्रसिद्ध इति भावः। कर्तृव्यावृत्ताविति। अशक्त्यादिना कर्त्तुरुपरमादित्यर्थः, तत्र मध्ये क्रिया विच्छिन्नेति प्रवृत्त्यपायः, न त्वपवृक्तेति।।

सप्तमीपञ्चम्यौ कारकमध्ये।। 2.3.7 ।।

सप्तमीपञ्चम्यौ कारकमध्ये।। कारकमध्य इति। मध्यस्यावधिद्वयापेक्षत्वाद् द्विवचनान्तेन समासः, कालाध्वनोश्चैतद्विशेषणमित्याह---कारकयोर्मध्ये यौ कालाध्वानाविति। अद्य भुक्त्वेत्यादि। ननुं चात्र देवदत्त एकः कर्त्ताः तत्कथं कारकयोर्मध्ये काल इत्याह---कर्तृशकत्योरिति। स्यादेवं यदि द्रव्यं कारकं स्यात्, शक्तिस्तु कारकम्, सेह भिद्यते--एका अद्य भुजेः साधनम्, अपरा द्व्यहभुजेः, तेनानयोर्मध्ये काल इत्यर्थः। कर्तृकर्मणोरिति। इषूनस्यतीष्वासः पुरुषः स कर्त्ता, इष्वसने व्यधने स्थाने वा कर्म लक्ष्यम्। अर्मापादानयोरिति। कर्म तदेव सामर्थ्याद् गम्यमानं धनुरपादानं यतः शरा अपयन्ति। कर्माधिकरणयोर्वेति। कर्म तदेवाधिकरणमिहेति निर्द्दिष्टः प्रदेशः। इह कालाध्वानौ द्वौ, सप्तमीपञ्चम्यावपि द्वे, ततश्च संख्यातानुदेशः प्राप्नोति---कालात्सप्तमी, अध्वनः प्रञ्चमीति, अत आह---संख्यातानुदेश इत्यादि। अस्वरितत्वादिति। स्वरितेन लिङ्केन यथासंख्यमित्येतत् तत्रैव प्रतिपादितम्।।

कर्मप्रवचनीययुक्ते द्वितीया।। 2.3.8 ।।

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी।। 2.3.9 ।।

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ।। यस्मादधिकं तदस्मिन्नधिकमिति च निर्देशादधिकशब्दयोगे पर्यायेण सप्तमीपञ्चम्यौ भवतः। उपखार्थो द्रोण इति। `उपोऽधिके च' इति कर्मप्रवचनीयसंज्ञा। यस्य चेश्वरवचनमित्यादि। द्वयमनेनोच्यते, द्वयोरपि भवति, तत्रापि पर्यायेणेति तत्र द्वयोरपि तावद्भवति, कथम्? ईश्वर उच्यते येन तदोश्वरवचनमैश्वर्यम्, अथ वा ईश्वरशब्दो भावप्रधानः ईश्वरः तस्योक्तिरीश्वरचनम्, यस्य स्वामिन ईश्वरत्वमुच्यते ततः सप्तमीत्यर्थः। अथ वा---यस्येति स्वं निर्दिश्यते, यस्य स्वस्येश्वर उच्यते ततः स्वात्सप्तमीत्यर्थः। पर्यायेण वा भवति; शेषविषये कर्मप्रवचनीयविभक्त्यारम्भादेकत उत्पन्नया विभक्त्या द्विष्ठस्यापि संबन्धस्याभिधानात्। अधि ब्रह्मदत्त इति। `सप्तमी शौण्डैः' इति समासपक्षे ब्रह्मदत्ताधीना इति भवति विभक्त्यर्थवृत्तित्वेऽधिब्रह्मदत्तमित्यव्ययीभावः। अयं योगः शक्योऽवक्तुम्, स्वामिन्याधारे पञ्चालाः स्थिता स्वेष्वाधारेषु ब्रह्मदत्तः स्थितः, तत्र यदा यदधिकरणं तत्र सप्तमी भविष्यति, एवं च कृत्वा `अधिरीश्वरे' इति कर्मप्रवचनीयसंज्ञा न वक्तव्या, ऐस्वर्यवषयश्चाधिः क्रियया नैव युज्यते। अतो गत्युपसर्गत्वबाधार्थापि न युज्यते।।

पञ्चम्यपाङ्परिभिः।। 2.3.10 ।।

प्रतिनिधिप्रतिदाने च यस्मात्।। 2.3.11 ।।

प्रतिनिधिप्रतिदाने च यस्मात्।। यस्मादित्यनेनैव सूत्रैण पञ्चमी। मुख्यसदृशः प्रतिनिधिरिति। मुख्यः क्व चित्कार्ये रूढः, यश्च तदभावे तत्कार्ये प्रतिनिधीयते स तत्प्रतिनिधिः। कर्मणि `उपसर्गे घोः किः'। एवं प्रतिदानमित्यपि, कर्मण्येवल्युट्। दत्तस्येति। अथात्रानेनैव सूत्रेण पञ्चमी प्राप्नोति, यथा----यस्मादिति, एवं तर्हि कर्मणि षष्ठी। ननु न दत्तमेव प्रत्यर्प्यते, किं तर्हि? द्रव्यान्तरम्, सत्यम्; तुल्यमूल्यत्वात्तदेव प्रत्यपितमिति प्रतिपत्तिः, प्रतिनिर्यातनम्=प्रत्यपंणम्, अत्र भावे ल्युट। यस्मात्प्रतिनिधिरिति। सूत्रवदेव पञ्चमी। एवं यतश्चेत्यत्रापि। उर्जुनतः। प्रतीति। प्रतियोगे पञ्चम्यास्तसिः। अर्जुनो युद्धादौ

प्रसिद्धस्तत्सदृशोऽभिमन्युरित्यर्थः। माषानित्यादि। ये पूर्व गृहीतास्तिलास्तेभ्यो माषाः प्रतिदानम्। संबन्धिसंभबन्धादिति। प्रतिनिधिर्मुख्यमपेक्ष्य भवति, प्रतिदानमपि पूर्वदत्तम्, ततश्च यस्य कर्मप्रवचनीयस्य प्रतिनिधिप्रतिदानाभ्यां योगस्तस्य ताभ्यामपि मुख्यपूर्वदत्ताभ्यां तद्द्वारको योगोऽस्तीत्यर्थः।।

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि।। 2.3.12 ।।

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि।। चेष्टाक्रियाणामिति। वस्तु व्याख्यानमेतत्, सूत्रे तु सप्तमी चेष्टायामिति। परिस्पन्दनक्रियाणामिति। परिस्पन्दन एव चेष्टाशब्दः प्रसिद्ध इति भावः। `स्वं रूपम्' इति वचनात्स्वरूपग्रहणाशङ्कायामाह---अध्वन्यर्थग्रहणमिति। सप्तमीनिर्देशादिति भावः। सप्तमीनिर्देशे ह्यनध्वनिकर्मणीत्यन्वयः। नानध्वनः प्रकृतेरिति अर्थ एव कर्म नाध्वशब्दः, तेनाध्वपर्यायेभ्योऽपरि चतुर्थी न भवति। द्वितीया तु `कर्मणि द्वितीया' इति भवति।

आस्थितः संप्राप्त इति गन्त्राधिष्ठित इत्यर्थः। यत्र त्विति। यदोत्पथेन पन्था एवाक्रमितुमिष्यते तदा भवत्येव चतुर्थीत्यर्थः। इह कस्मान्न भवति---अजां नयति ग्रममिति? अगत्यर्थत्वात्। प्रतीता ह्यत्र गतिर्न त्वसौ नयतेरर्थः; प्रापणवाचित्वात्। इह तर्हि स्त्रियं गच्छतीति चतुर्थी प्राप्नोति? सिद्धं त्वसंप्राप्तवचनात्, असंप्राप्तं यद्वस्तु गमनेन संप्रेप्स्यते तस्मिन्कर्मणीति वक्तव्यम्, स्त्री तु संप्राप्तैवेति चतुर्थ्यभावः। अध्वनश्चानपवादः। संप्राप्तो ह्यध्वा, यदा त्वसंप्राप्तः संप्रेप्स्यते तदा भवितव्यमेव चतुर्थ्येत्युक्तं पुरस्तात्।

न चतुर्थ्येवेति। नञः काक्वा प्रयोगाद्विकल्पेतेत्यनेनान्वयः। कर्मणि चतुर्थ्यां विकल्पितायाम् ` तथायुक्तं कर्मणि द्वितीया' इत्येव द्वितीया भविष्यतीति भावः। ग्रामाय गन्तेति। द्वितीया तावत्कृद्योगे षष्ठीं बाधते, तया च तुल्यकक्षा चतुर्थी द्वन्द्वेन प्रतिपाद्यत इति चतुर्थ्यपि कृद्योगे भवतीति भावः।

अयं योगः शक्योऽवक्तुम्, कथम्? संदर्शनप्रार्थनाध्यवसायैराप्यमानत्वात्क्रियापि कृत्रिमं कर्म। तत्र यदा गमनस्य संदर्शनादीनां च स्वरुपभेदो विवक्ष्यते तदा संदर्शनादिकर्मणा गमनेनाभिप्रेयमाणस्य ग्रामस्य संप्रदानत्वाच्चतुर्थी। अभेदविवक्षायां तु गमनस्य कर्मत्वाभावाद् ग्रामः कर्मैव भवतीति द्वितीया सिद्धा नार्थ एतेनेति भा,यकारस्य पक्षः। तत्र कृत्प्रयोगे षष्ठ्येव भवति।

चतुर्थी संप्रदाने।। 2.3.13 ।।

चतुर्थी संप्रदाने।। तादर्थ्य इति। तच्छब्देन कार्थं प्रति निर्दिश्यते, तस्मै इदं तदर्थमिति समासेन विशिष्टकार्यप्रयोजनं कारणमभिधीयते। तदर्थस्य भावस्तादर्थ्यमिति ष्यञा कार्यकारणसम्बन्धोऽभिधीयते; समासकृत्तद्धितेषु सम्बन्धाभिधानां भावप्रत्ययेनेति वचनात्। तत्र द्विष्ठत्वेऽपि सम्बन्धस्य षष्ठीवद्विशेषणादेव चतुर्थी भवती---यूपाय दार्विति। हेतुतृतीयापि विशेष्यान्न भवति। हेतुहेतुमद्भावस्यापि चतुर्थ्यैव प्रत्यायितत्वात्, षष्ठीविषये च हेतुतृतीया। इह तु प्रातिपदिकार्थस्याव्यतिरेकात्प्रथमैव भवति। यदि तर्हि तादर्थ्य उपसंख्यानं क्रियते, नार्थः संप्रदाने चतुर्थ्या, योऽपि ह्युपाध्यायाय गौर्दीयते उपाध्यायार्थः स भवति। अवश्यं संप्रदानग्रहणं कर्तव्यम् `रुच्यर्थानां प्रीयमाणः' इत्याद्यर्थम्।

क्लृपि संपद्यमान इति। संपत्तिरभूतप्रादुर्भावरूपोत्पत्तिरिह गृह्यते, तत्र यद्रूपमुपजायते ततो विकाराच्चतुर्थी। मूत्राय कल्पते यवागूरिति । प्रकृतिविकारयोर्भेदविवक्षायां चतुर्थी। अभेदविवक्षायां तु मूत्रं संपद्यते यवागूरिति प्रथमैव भवतीति केचिदाहुः। अन्ये त्वभेदविवक्षायामेव चतुर्थीमिच्छन्ति। यदा तु `जनिकर्त्तुः प्रकृतिः' इत्यपादानत्वं विवक्ष्यते, तदा विकाराच्चतुर्थी न भवतीति केचिदाहुः---मूत्रं संपद्यते यवाग्वा इति। अन्ये तत्रापि चतुर्थीमिच्छन्ति---मूत्राय संपद्यते यवाग्वा इति।

उत्पातेनेति। प्राणिनां शुभाशुभयो सूचको भूतविकार उत्पातः। अरोचकिन इति। अरुचिः=अरोचकम्, `रोगाख्यायाम्' इति ण्वुल्, बहुलवचनादस्त्रीलिङ्गता।।

क्रियार्थोपपदस्य च कर्मणि स्थानिनः।। 2.3.14 ।।

क्रियार्थोपपदास्य च कर्मणि स्थानिनः।। क्रिया क्रियार्थोपपदं यस्येति। ननु नास्मिन्नर्थेऽक्षराणि सन्ति तत्राह---तुमुन्ण्वुलावित्यादि। परिभाषितमुपपदं क्रियार्थमन्यत्र सम्भवतीत्ययमेव विषयो गृह्यते। अत्र च विषये क्रियैव क्रियार्थोपपदं तेनायमर्थो लभ्यते इति भावः। `यत्र गम्यते चार्थो न च प्रयुज्यते शब्दः स स्थानी' इति स्वनिकायप्रसिद्धिमाश्रित्याह---स्थानिनोऽप्रयुज्यमानस्येति। एधेभ्यो व्रजतीति। ननु चात्र `तादर्थ्ये' इत्येव चतुर्थी सिद्धा, इहापि तर्हि प्राप्नोति--एधानाहर्त्तु व्रजतीति? हरणार्था व्रजिक्रिया, न पुनरेधार्था चेदुदाहरणेऽपि तर्ह्येवमेव। एतावांस्तु विशेषः---प्रत्युदाहरणे शब्दः प्रयुज्यते, उदाहरणे तु नेति प्रतीयमाना च क्रिया कारकव्यपदेशस्य निमित्तम्। तत्र यथा प्रत्युदाहरणे आहरणापेक्षया द्वितीया सम्भवत्येवमुदाहरणेऽपि प्रतीयमानहरणापेक्षा द्वितीयैव स्यादित्ययमारम्भः। भक्षिरत्र स्थानीति। प्रविश गृहं पिण्डीं भक्षयेति गम्यमानत्वात्। न तु क्रियार्थोपपद इति। यद्यपि पिण्डीभक्षणार्थं गृहप्रवेशनं तथापि पारिभाषिकमुपपदं न भवतीति भावः। शकटेनेति। ननु `मध्येऽपवादाः' इति द्वितीयामेव चतुर्ती बाधिष्यते, न करणतृतीयाम्, एवं तर्हि प्रत्युदाहरणदिगियं दर्शिता। इदं त्वत्र प्रत्युदाहरणं द्रष्ट्व्यम्---ब्राह्मणस्यैधेभ्यो व्रजतीति। असति कर्मग्रहणे इतरोपपदविभक्तिवदियमपि शेषविषयैव स्यात्।।

तुमर्थाच्च भाववचनात्।। 2.3.15 ।।

तुमर्थाच्च भाववचनात्।। तुमुना समानार्थस्तुमर्थ इति। वस्तुव्याख्यानमेतत्, विग्रहस्तु तुमर्थोऽस्येति तुम्शब्देन तुमर्थो लक्ष्यते। तुमर्थभाववचनप्रत्ययान्तादिति। तुमर्थो भाववचनः प्रत्ययोऽन्तेऽस्य तत्तथोक्तम्। तस्येदं ग्रहणमिति। स एव हि तुमर्थो भाववचनः, नान्यः। पाकाय व्रजतीति। नन्वत्र तादर्थ्यैव सिद्धम्; न चैवं पाचको व्रजतीत्यभाववचनादपि प्रसङ्गः, अत्र कर्त्ता प्रधानं न च तं प्रति तादर्थ्यमस्ति, किं तु प्रक-त्यर्थ प्रति; एवं तर्हि भाववचनेनैव तादर्थ्यस्य द्योतितत्वाच्चतुर्थी न सिद्ध्यतीति सूत्रारम्भः। न ह्योतल्लक्षणनेत्रो ज्ञातुमर्हति---धञादीनां चतुर्थीसापेक्षाणामेव तादर्थ्यप्रकाशने शक्तिरिति।

तुमर्थग्रहणं शक्यमकर्त्तुम्, कथम्? पाकः, त्यागः, राग इति क्रियार्थो पपदग्रहणमनुवर्त्तिष्यते। नन्वेतत् षष्ठीनिर्दिष्टम्, पञ्चमीनिर्देषेटेन चेहार्थः; अर्थाद्विपरिणामो भविष्यति, भाववचनादित्यनेन सम्बन्धात्। न वै भाववचनस्य क्रियार्थोपपदत्वं सम्भवति, किं तर्हि? धातोः। धातोर्भाववचनस्यासम्भवादेवं विज्ञास्यते--क्रियार्थोपपदाद्धातोर्यो विहितो भाववचन इति।।

नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च।। 2.3.16 ।।

नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च।। अलमिति पर्याप्त्यर्थग्रहणमिति। अलमित्यर्थग्रहणं तत्रापि पर्याप्तिग्रहणमित्यर्थः। तत्र तावदर्थग्रहणं तस्मै प्रभवतीति निर्देशात्, इह चालं कुरुते कन्यामिति `उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति द्वितीया भविष्यति। एवमलमोदनेनेत्यत्रापि करणे तृतीया, ओदनेन न किञ्चित्साध्यमित्यर्थावगमात्, तेन भूषणप्रतिषेधयोरग्रहणात्पर्याप्तेरेवग्रहणम्। चकारः पुनरित्यादि। अन्यथा स्वस्तियोगे चतुर्थ्या अवकाशः---स्वस्ति जाल्माय, जाल्मत्वादाशीरभावाद् भूतकथनमेतत्; कुशलार्थैराशिषि चतुर्थी चेत्यस्यावकाशः---अन्ये कुशलार्थाः, कुशलं देवदत्तस्य कुशलं देवदत्ताय; स्वस्ति गोभ्यो भूयात्, उभयप्रसङ्गे परत्वात्पक्षे षष्ठी स्यात्।।

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु।। 2.3.17 ।।

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु।। मन्यतेः कर्म मन्यकर्मेति। `मन ज्ञाने'इत्यस्य दैवादिकस्य धातोः श्यना उपलक्षणम्, न तु प्रयोगस्थस्य श्यनन्तस्यानुकरणमित्यर्थः। तेन श्यनोऽभावेऽपि भवति---`तृणाय मत्वा रघुनन्दनोऽपि बाणेन रक्षः प्रधनान्निरास्थत्' इति। श्याना तु तानादिकस्य ` मनु अवबोधने' इत्यस्यैव निरासः। अनादरस्तिरस्कार इति। न त्वादराभावमात्रम्, कथम्? अनृतादिवन्नञः प्रतिपक्षवाचित्वादिति भावः। मन्यकर्मणि प्रकृष्टकुत्सितग्रहणमिति वार्त्तिकम्, यद्वाचिनश्चतुर्थी विधीयते ततः प्रकर्षेण यदि कुत्सा प्रतिपादयितुमिष्यते तदा चतुर्थी भवति, न तु सामान्यविवक्षायाम्। तेन प्रतिषेधयुक्तायां कुत्सायां चतुर्थीविधानं संपद्यत इति मत्वाह---न त्वा तृणायेति। `मन्यकर्मण्यनादर उपमाने विभाषा प्राणिषु' इति आपिशलिरधीते स्म, न तत्र प्रतिषेधापेक्षा, तथा च भट्टिप्रयोगो निदर्शनीयः।

अश्मानं दृषदमित्यादि। तत्त्वाख्यानमेतत्। यस्य माता न पश्यतीति। दर्शनयोग्यम्। व्यवस्थितविभाषा चेति। ननु येषु प्राणिषु नेष्यते, ते नावादयो भविष्यन्तीति किं व्यवस्थितविभाषया? वृत्तिकार एवात्र साक्षात्प्रयोजनं वक्ष्यति।

नत्वा नावमिति। नावा तार्यमुदकं नाव्यं तद्यदैव तीर्णं तदैव नावमपि सन्तीं त्वां नाहं नावं मन्ये, प्रयोजनस्य निष्पन्नत्वादिति भावः। एवं यावन्नभुक्तं श्राद्धिमित्यत्रापि द्रष्टव्यम्। प्राणिषु तूभयमिति। विषयविभागेन। एतदपीति। एतदेव साक्षात्प्रयोजनमन्यत्र नावादित्वादेव सिद्धेरित्यवोचाम।।

कर्तृकरणयोस्तृतीया।। 2.3.18 ।।

कर्तृकरणयोस्तृतीया।। प्रकृत्याभिरूप इति। क्रियाया अश्रवणात्कर्तृकरणयोरभावात्षष्ठी प्राप्नोति।

प्रायेण याज्ञिक इति। प्रायशब्दो बह्वर्थः, बहवो याज्ञिका इत्यर्थः। गार्ग्योऽस्मीति। प्रथमा षष्ठी वा प्राप्नोति। समेनेति। अत्र द्वितोया प्राप्नोति। द्विद्रोणेनेति। द्वयोर्द्रोणयोः समाहारो द्विद्रोणं पात्रादिः, द्वौ द्रोणौ कृत्वेत्यर्थः, अत्रापि द्वितीया प्राप्नोति। पञ्चकेनेति। पञ्च पात्रादिः, द्वौ द्रोणौ कृत्वेत्यर्थः, अत्रापी द्वितीया प्राप्नोति। पञ्चकेनेति। पञ्च परिमाणमस्य पञ्चकः सङ्घः, तत्र संघसंधिनोरभेदविवक्षायां पशूनित्यनेनैतत्समानाधिकरणमित्यत्रापि द्वितीयैव प्राप्नोति। साहस्रेणेति। सहस्रपरिमाणः संघः साहस्रः। सर्वमन्यत्पूर्ववत्। इत्युपसंख्यानमारभमाणस्याभिप्रायः।

प्रत्याख्यानं तु---इह तावत्प्रकृत्याभिरूप इति गम्यमानापि क्रिया करणादिव्यपदेशस्य निमित्तम्। इह च करोतिक्रिया गम्यते, करणान्तरव्युदासाय च प्रकृतेः करणत्वं विवक्षितं स्वभावेनायमभिरूपः कृतः, न वस्त्रालङ्कारादिनेत्यर्थः। प्रायेणेत्ययमर्थः---अस्मिन् ग्रामे ये विप्राः सन्ति ते बाहुल्येन यज्ञमवीयत इति तत्र याज्ञिकशब्दाभिधेयमध्ययनं प्रति बाहुल्यस्य करणत्वं संधीभूय यज्ञमधीयत इति तत्र याज्ञिकशब्दाभिधेयमध्ययनं प्रति बाहुल्यस्य करणत्वं संधीभूय यज्ञमधीयत इत्यर्थः। इह तर्हि कथं विशिष्टवेषं कंचित् दृष्ट्वाध्यवस्यति---प्रायेणायं याज्ञिक इति? अत्राप्ययमर्थः----

अस्मिस्तावद्याज्ञिकानामाचारादिबाहुल्यमुपलभ्यते, अतोऽनेनाचारादिबाहुल्येन याज्ञिकोऽयं जनैर्ज्ञायत इति। तत्र प्रतीयमानज्ञानं प्रति करणत्वम्। केचित्---प्रायेणशब्दो विबक्तिप्रतिरूपको निपातो ज्ञातमित्यस्यार्थे वर्त्तते इत्याहुः। दृश्यते च प्रायेण सामग्र्यविधौ गुणानामिति, प्रायेण निष्क्रामति चक्रपाणाविति च। गात्रेणेति। अनेनाहं ज्ञाये इति ज्ञानक्रियायामस्मीति भवनक्रियायां वा गोत्रस्य करणत्वम्। समेनेति। पथो गमने करणत्वं समेन पथेत्यर्थः। द्विद्रोणेनेति। द्विद्रोणाद्यर्थे मूल्ये द्विद्रोणादिशब्दस्तस्य च क्रयं प्रति कारणत्वम्, द्विद्रोणादीनां च मूल्यम्, तेन द्विद्रोणाद्येव क्रीयते इत्यर्थभेदोऽपि नास्ति।।

सहयुक्तेऽप्रधाने।। 2.3.19 ।।

सहयुक्तेऽप्रधाने।। क्रियागुणद्रव्यैर्द्वयोः सम्बन्धे सति सहशब्दस्य प्रयोगो भवति, अतः `पुत्रेण सहगतः पिताः' इत्यादीनि क्रियादिसम्बन्धे यथाक्रममुदाहणान्युपन्यस्तानि। नन्वत्र सर्वतः सहार्थस्वभावादेव पितुः पुत्रस्य वा गमनादिना सम्बन्धः प्रतीयते, तत्कुतः पितुः प्राधान्यम्? केचिदाहुः----यस्य क्रियादिसम्बन्धो विशिष्टकालः प्रज्ञातः स यदान्यस्याप्रज्ञातविशिष्टकालक्रियासम्बन्धस्य तत्प्रतिपादनार्थमुपादीयते, यथा---`अयं पुरुषः कदागतः' इत्यपेक्षायाम् `राज्ञा सहागतः' इति पुरुषागमनं विषिष्टकालमुपपादयितुं वाक्यं प्रवर्त्तत इति पुरुषस्य प्राधान्यम्, राज्ञस्तूपलक्षणत्वेनोपात्तत्वादप्राधान्यमिति। एवं तु `भृत्यैः सह राजागतः' इत्यत्र न स्याद्, न हि भृत्यागमनं प्रसिद्बकालं येन तत्कालत्वं राजागमनस्य प्रतिपाद्येत। यत्र चोभयोरप्यज्ञातक्रियादिसम्बन्धस्तत्रापि न स्यात्---पुत्रेण सहागतः पितेति। तस्माद्वक्तव्यमप्राधान्यमत आह----पितुरत्रेत्यादि। पूर्वं प्रज्ञातोऽप्रज्ञातो वा यस्य क्रियादिसम्बन्धः शब्देनोच्यते तस्य प्राधान्यम्। यस्य तु सहार्थान्यथानुपपत्त्या प्रतीयते तस्याप्राधान्यम्।

कस्य तुनः शब्देनोच्यते? कस्य वा प्रतोयते? यस्य विवक्ष्यते। एतदुक्तं भवति---द्वयोस्तावत्क्रियासम्बन्धे सति सहशब्दस्य प्रयोगः, तत्र यदा द्वयोरपि क्रियादिसम्बन्धः शब्देनोच्यते--सहागतौ पितापुत्राविति, तदा द्वयोरपि प्राधान्यान्न भवति; यदा त्वेकस्य क्रियादिसम्बन्धं शब्देन प्रतिपिपादयिषत्यपरस्य सहार्थान्यथानुपपत्त्या तदा तस्याप्राधान्यात्तद्वाचिनस्तृतीयेति। एवं च कृत्वा सह शाखया प्रस्तरं प्रहरतीति यद्यपि प्रस्तरस्य प्रहरणसम्बन्धः प्रज्ञातः, सूक्तवाकेन प्रस्तरं प्रहरतीति, शाखायास्त्वज्ञातः; तथाप्युक्तेन न्यायेन शाखाशब्दात्तृतीया सिद्ध्यतीति विभक्तिव्यत्यासो न वाच्यः। ननु पुत्रेण सहागत इत्यादौ पितुरेव कर्त्तुः क्तादिभिरभिधानम्, न त्वप्रधानस्य पुत्रादेस्तस्यापि तु सहार्थसामर्थ्यात्कर्तृत्वं प्रतीयत--इत्यनभिहिते कर्तृकरणयोरिति तृतीया सिद्धा। इह तर्हि पुत्रेण सहागमनं पितुरिति `कर्तृ कर्मणोः कृति' इति षष्ठी प्राप्नोति, इह च तिलैः सह माषान्वपति तिलान्माषान्वपतीत्यर्थप्रतीतेर्द्वितीया प्राप्नोति, इह च पुत्रेण सह स्थूलः, पुत्रेण सह गोमानिति द्रव्यगुणसम्बन्धप्रतिपादन एव तात्पर्थमिति क्रियागन्धस्यैवाभ◌ावात्कर्तृगन्धोऽपि नास्तीत्यारभ्यमेवावश्यं सूत्रम्। सहार्थेन योगे विधानादिति। युक्तग्रहणादर्थग्रहणं लभ्यते, अन्यथा `सहे प्रधाने' इत्येव वाच्यं स्यात्। विनापि सहशब्देन वृद्धो यूनोति निपातनादिति क्वचित्पठ्यते।

इहाप्रधानवचनं प्रधाननिवृत्त्यर्थ क्रियते, पितुस्तृतीया मा भूदिति; तत्र प्रातिपदिकमात्रापेक्षत्वादन्तरङ्गत्वात्प्रथमा भविष्यति, नार्थोऽप्रधानवचनेनेति मन्यमानः पृच्छति---ऊ प्रधान इति किमिति। शिष्येण सहोपाध्यायस्य गौरिति। यथात्राप्रधाने षष्ठीविषये तृतीया, एवं प्रधानेऽपि स्यादिति मन्यते। अत्राहुः----यथा ग्रामं न गच्छतीत्यादौ ग्रामगमनयोः पूर्वमभिसम्बन्धः प्रश्चान्नञा प्रति षिध्यते, एवमुपाध्यायस्य पूर्वं गवा सम्बन्धः पश्चात्तत्सम्बन्धविषिष्टस्य गोः सहार्थेन योगः; अन्यथा कस्य सहत्वं प्रतिपाद्येत, अतो गवा सम्बन्धस्यान्तरङ्गत्वा दुपाध्यायात् षष्ठी भविष्यतीति नार्थ एतेन।।

येनाङ्गविकारः।। 2.3.20 ।।

येनाङ्गविकारः।। अङ्गशब्दोऽवयववाची प्रसिद्ध; ततश्चायं सूत्रार्थः स्याद्---येन गुणेनाङ्गस्याक्ष्यादेर्विकारस्ततस्तृतीयेति, ततश्चाक्षि काणमस्येत्यादावेव तु स्यात्, काणादेर्गुणवचनादेव च स्याद्; अक्ष्णा काण इत्यादावक्ष्यादेर्न स्यादित्यालोच्यान्यथा व्याचष्टे--अङ्गशब्दोऽत्रेत्यादि। अर्श आद्यच्प्रत्ययान्तः शरीरवचनोऽङ्गशब्दः सूत्रे उपात्त इत्यर्थः। येनेति च यदपेक्षमङ्गिनोऽङ्गित्वं स हेतुत्वेन निर्दश्यते, हेतुत्वेनेतिवदन्येनेति हेतौ तृतीयेति दर्शयति। विकृतेनेति। सामर्थ्यादेवैतल्लभ्यते, न ह्यविकृतमङ्गमङ्गिनो विकारं प्रति हेतुः। अक्ष्णा काण इति। कथं पुनः पुरुषः काणः यावताक्षिधर्मः काणता, तेनाक्ष्येव काणं भवति न पुरुषः? इत्याह---अवयवधर्मेणेति। तदेवं यदङ्गगतो विकारोऽवयवधर्मः समुदाय आरोपादङ्गिनः प्रतिपाद्यते, तत्र यदङ्गगतो विकारस्ततस्तृतीया भवति। कथं पुनरक्षिशब्दः प्रयुज्यते, यावता काणशब्दोऽक्षिगतमेव विकारमाचष्टे, तत्र काणो देवदत्त इत्युक्ते नैव संदेहो भवति---किं स्वयमेव काणः, किं वाक्ष्णः काणतयेति,नाप्येवं संदेहः----किमक्ष्णः काणतयासौ काणः, किं वा पादस्येति,तदनर्थकोऽक्षिशब्दस्य प्रयोगः? एवं पादेन खञ्जः, पाणिना कुणिरित्यादौ पादादीनाम्? उच्यते---अक्ष्याद्युपक्रमे वाक्येऽक्ष्णेत्युक्ते न ज्ञायते किं निरूपयति? किं वा काण इति? तत्र निरूपयत्यादिनिवृत्तये काणशब्दप्रयोगः, यथा---द्वावानय कौ तौ द्वावित्युक्ते ब्राह्मणावति। अङ्गविकार इति किमिति। अङ्गगहणं प्रति प्रश्नः। क्वचित्तु तथैव पाठः। अक्षि काणमस्येति। नन्वत्र परत्वात्प्रथमा भविष्यति, न; असत्यङ्ग्रहणेऽवैव स्यात् मुख्यो ह्यत्र विकारः। उदाहरणे तु गौणः, अवयवधर्मस्यावयविन्यारोपात्।।

इत्थम्भूतलक्षणे।। 2.3.21 ।।

इत्थम्भूतलक्षणे।। इदंशब्दात्सन्निहितवाचिनः प्रकारवचने थाल्, `इदमस्थमुः' इति थमुप्रत्यये कृते इत्थमिति भवति। न चात्र किञ्चित्सन्निहतमस्तीतीत्थंशब्दः सन्निहितपरित्यागेन प्रकारविशेषमाचष्टे, `भू प्राप्तावात्मनेपदी च',`आ धृषाद्वा' इति णिजभावपक्षे गत्यर्थत्वात्कर्त्तरि क्तप्रत्ययस्तदाह--कञ्चिदिति। तस्येति कर्मणि षष्ठी। लक्ष्यते येनेति लज्ञणम्। येन श्वेतच्छत्त्रादिना राजत्वादिप्रकारविशेषापन्नतयान्यो लक्ष्यते तदित्थम्भूतलक्षणम्। तत्रेति। वर्त्तमानादित्यर्थः। कमण्डलुना छात्त्रोपाध्याययोर्गच्छतोश्छात्त्रस्य हस्ते कमण्डलुर्भवति, कमण्डलुना छात्त्रोऽयमिति ज्ञातवानित्यर्थः। यद्येवम्, ईद्दशे ज्ञाने कमण्डलोः करणत्वादेव तृतीया सिद्ध्यति? एवं तर्हि प्रमाता प्रमिति दशायामेवात्मनः प्रमितिविशेषं प्रतिपादयितुं वाक्यं प्रयुङ्क्ते--कमण्डलुनायं छात्त्र इति, तदा ज्ञानक्रियाया अप्रतिभासादप्रतिपाद्यत्वाच्च करणत्वासम्भवः। उदाहरणं त्वेवं व्याख्येयम्---कमण्डलुना छात्त्र इत्येवं रूपं ज्ञानमभूदिति। कोऽर्थः? अद्राक्षीदिति निदिष्टस्य द्रष्टुर्ज्ञानविशेपोऽत्र कथ्यते, न प्रयोक्तुरित्यर्थः।

इह कमण्डलुपाणिश्छात्र इति बहुव्रीहौ कृते कमण्डलुशब्दात्तृतीया प्राप्नोति; न च प्रत्यलक्षणेनाप्रत्यय इति प्रातिपदिकसंज्ञाप्रतिषेधः, `न ङिसंबुद्ध्योः' इति लिङ्गत्; न च `सुपो धातुप्रातिपदिकयोः' इति संप्रत्युत्पन्नायास्तृतचीयाया लुग्लभ्यते, तस्याः समासप्रातिपदिकं प्रत्यनव्ययवत्वादित्यत आह---इह न भवतीति। समासेऽन्तभूतत्वादिति। समासार्थं प्रति गुणभूतत्वादित्यर्थः। इत्थम्भूतस्य लक्षणं यत्प्रधानं तत्र तृतीया। बहुव्रीहौ तु वर्त्तिपदानां स्वार्थोपसर्जनान्यपदार्थाभिधायित्वान्नास्ति प्राधान्यम्।।

संज्ञोऽन्यतरस्यां कर्मणि।। 2.3.22 ।।

संज्ञोऽन्यतरस्यां कर्मणि।। संजानीत इति। `संप्रतिभ्यामनाध्याने' इत्यात्मनेपदम्, `ज्ञाजनोर्जा' इति जादेशः। आध्याने तु `अधीगर्थदयेशाम्' इति षष्ठी भवति---मातुः संजानातीति। कृत्प्रयोगे त्वनाध्यानेऽपि परत्वात्`कर्तृ कर्मणोः कृति' इति षष्ठी भवति---मातुः संज्ञातेति।।

हेतौ।। 2.3.23 ।।

हेतौ।। `तत्प्रयोजको हेतुश्च' शास्त्रीयस्य हेतोश्चकारेण कर्तृसंज्ञाविधानात्कर्तृकरणयोरित्येव तृतीयायाः सिद्धत्वाल्लौकिकौ हेतुर्गृह्यत इत्याह---

फलसाधनयोग्य इत्यादि। लोके ह्यङ्कुरादिकार्योत्पादने योग्यतामात्रप्रयुक्तोऽनाश्रितव्यापारो द्रव्यगुणक्रियाविषयो बीजादिर्हेतुः। उक्तं च----
द्रव्यादिविषयो हेतुः कारकं नियतक्रियम्। इति।
अनाश्रिते तु व्यापारे निमित्तं हेतुरुच्यते।। इति च।
उदाहरणेषु क्रियाया अभावात्करणत्वमनाशङ्कनीयम्। यूपाय दार्वित्यत्र तादर्थ्य विवक्षितम्, न तु सदपि हेतुत्वमिति दारुशब्दात् प्रथमैव भवति।।
अकर्तर्यृणे पञ्चमी।। 2.3.24 ।।
अकर्तर्यृणे पञ्चमी।। बन्धित इति। बन्धेर्ण्यन्तस्य निष्ठान्तस्य रूपम्' शतमृणं च भवतीति। उत्तमर्णाय धार्यमाणत्वात्। प्रयोजकत्वाच्च कर्तृसंज्ञकमिति।
`तत्प्रयोजको हेतुश्च' इति चकारेण कर्तृ संज्ञाविधानात्। ननु च पूर्वसूत्रे लौकिकस्य हेतोर्ग्रहणम्, अयं तु शास्त्रीयः; शास्त्रीयस्यापि लौकिकत्वमस्त्येव।
अथ वा कस्य हेतोः पूर्वसूत्रे शास्त्रीयस्याग्रहणम्---कर्त्तरि सिद्धा तृतीयेति? न त्वेवम्, पञ्चम्या असिद्धत्वादिहार्थमेव सामान्यग्रहणं स्यात्।।
विभाषा गुणेऽस्त्रियाम्।। 2.3.25 ।।
विभाषा गुणेऽस्त्रियाम्।। `सत्त्वे निविशतेऽपैति' इति लक्षितस्य गुणस्य ग्रहणम्; तदनुरूपत्वादुदाहरणप्रत्युदाहरणयोरिति केचित्। अन्ये तु `पर्वतो वह्निमान्
धूमवत्त्वात्' इत्यादावनेनैव पञ्चमीमिच्छन्तः परतन्त्रमात्रस्य ग्रहणं वर्णयन्ति, यथा---यस्य हि गुणस्य भावादिति। `विभाषा गुणे' इति योगविभागात्
`नास्तीह पटोऽनुपलब्धेः' इति स्त्रियामपि क्वचिद्भवति। केचित्त्वपादानपञ्चमीमेतामिच्छन्ति, तथा च `नास्तीह घटोऽनुपलब्धितः' इति `अपादाने
चाहीयरुहोः' इति तसिलपि भवति, योगविभागवादिनां त्वाद्यादित्वात्तसिः।।
षष्ठी हेतुप्रयोगे।। 2.3.26 ।।
षष्ठी हेतुप्रयोगे।। हेतुशब्दस्येति। प्रयोगस्य शब्दधर्मत्वादेवमुक्तम्, न त्वनेनार्थग्रहणं व्यावर्त्त्यते; यर्यायप्रयोगेऽपि `निमित्तकारणहेतुषु' इति वक्ष्यमाणेन
षष्ठ्या इष्टत्वात्। हेतुशब्दस्य प्रयोगे सति हेतुहेतुमद्भावलक्षणस्यैव सम्बन्धविशेषस्य नियमेन प्रतीतौ `हेतौ' इति ततीयापवादो योगः।।
सर्वनाम्नस्तृतीया च।। 2.3.27 ।।
सर्वनाम्नस्तृतीया च।। `सर्वनाम्नः' इति प्रयोगापेक्षा षष्ठी। सर्वनाम्नी हेतुशब्दस्य च प्रयोग इति। पञ्चम्यां तु हेतुशब्दादयं विधिर्न स्यात्। कथं तर्हि
सर्वनाम्नस्तृतीया भवतीति? अत्रापि सर्वनाम्नः प्रयोग इत्यर्थो द्रष्ट्व्यः।
निमित्तकारणहेतुष्विति। यद्यप्यस्मिन् सूत्र इदं वृत्तिकारेण पठितम्, भाष्यकारेण तु `हेतौ' इत्यत्र पठितत्वादसर्वनाम्नोऽप्येतद्विभक्तिविधानं गम्यते, तत्र च
प्रायग्रहणादेवासर्वनाम्नः प्रथमाद्वितीये न भवतः, अन्यास्तु यथादर्शनं भवन्ति---अन्नेन कारणेन वसति, अन्नाय कारणाय वसति, अन्नात्कारणाद्, अन्नस्य
कारणस्य, अन्ने कारणे इति।
पर्यायोपादानं त्विति। ननु विपरीतमिदं स्वरूपविधौ पर्यायोपादानं कर्त्तव्यम्, अर्थग्रहणे तु न कर्त्तव्यमिति; किं चार्थग्रहणे सत्येकशेषप्रसङ्गः, विरूपाणामपि
समानार्थानामेकशेषवचनात्? एवं मन्यते---यथा आकृतिगमेषु केचिदुपलक्षणार्थं पठ्यन्ते, एवमिहापि स्वरूपपरा एव निमित्तादिशब्दा उपलक्षणार्थाः----
एवमर्थानां शब्दानामिति।।
अपादाने पञ्चमी।। 2.3.28 ।।
अपादाने पञ्चमी।। प्रासादादिति। अत्र ल्यबन्तस्याप्रयोगेऽप्यर्थो गम्यत इति द्वितीया प्राप्नोति।
आसनादिति। सप्तम्यत्र प्राप्नोति। प्रत्याख्यानं तु---प्रेक्षणम्=चक्षुषा पदार्थानां ज्ञानम्, तैजसं चक्षुर्बहिर्निः सृत्य विषयान् गृह्णाति, निःसरणाङ्गके च प्रेक्षणे
धातुर्वर्तते, तत्राङ्गभूतनिः सरणं प्रति प्रासाद उपात्तविषयमपादानं भवति---प्रासादात्प्रेक्षत इति, कोर्थः? प्रासादप्रदेशाच्चाक्षुषं तेजो निः सार्य पदार्थान्
गृह्णातीति।
प्रश्नाख्यानयोश्चेति। विशिष्टे प्रश्नाख्याने गृह्येते यत्र लोके पञ्चमी प्रयुज्यते। इह न भवति--कस्यायमर्थो राज्ञोऽर्थ इति। कुतो भवानिति। क्रियाया
अभावादनपादानत्वात् फलवद्वचनप्रत्यक्षादिप्रमाणसिद्धामागमनादिक्रियामपेक्ष्येदं प्रयुज्यते, तत्र प्रयोक्तुराख्यातुश्च मनसि विपरिवर्तमानमागमनं
प्रत्यपेक्षितक्रियमपादानम्---पाटलिपुत्रादिति।
यतश्चेति। यदवधित्वेनाश्रित्याध्वकालयोः परिच्छेदस्तत इत्यर्थः। गवीधुमन्नाम नगरम्, सांकाश्यं तपोवनम्।
कृत्तिकायुक्ता पौर्णमासी कार्त्तिकी, पौर्णमास्याम् `लुबविशेषे' इति लुब्न भवति `सास्मिन्पौर्णमासी' इत्यधिकारे `विभाषा फल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः' इति
निर्देशात्। अग्रे हायनमस्या इत्याग्रहायणी, प्रज्ञादेराकृतिगणत्वात्स्वार्थिकोऽण्, `आग्रहायण्यश्वत्थात्' इति निपातनाण्णत्वम्। तद्यु क्तादिति। तेन
पञ्चम्यन्तार्थेनार्थद्वारेण युक्तात्काले वर्त्तमानान्मासादिशब्दादित्यर्थः। यद्वा---तया पञ्चम्या युक्तो योऽर्थः कार्त्तिक्यादिस्ततः परो यः कालो मासादिस्तत्र
वर्त्तमानादित्यर्थः। अर्थतश्च परत्वं न शब्दत इति व्यवहितेऽपि भवति, कार्त्तिक्याग्रहायण्योर्मध्यवर्त्ती मासः कार्त्तिक्याः परो भवति।
अध्वन इति। तद्युक्तादित्यपेक्ष्यते। प्रत्याख्यानं तु-वाक्यैकदेशस्यात्र प्रयोगः। तदयमर्थः----गवीधुमतो निःसृत्य यदा चत्वारि योजनानि गतानि बवन्ति ततः
सांकाश्यम्, चतुर्षु योजनेषु गतेषु सत्सु सांकाश्यमितिष गतानिति क कर्मणि निष्ठा, यदा जनैर्योजनानि गतानि भवन्ति ततस्तैः सांकाश्यं प्राप्यत इत्यर्थः।
यद्वा----अध्ववर्त्तिनां निः सरणं गमनं वाध्वन्यारोप्य निःसृत्य गतानिति ल्यपः कर्त्तरि क्तस्य च प्रयोगः तस्य प्रतीयमाननिः सरणक्रियापेक्षपापादानत्वम्,
गतानीति च प्रातिपदिकार्थस्याव्यतिरेकात्प्रथमा गतेषु सत्स्विति `यस्य च भावेन भावलक्षणम्' इति सप्तमी, आग्रहायणी माम इति कार्त्तिक्याः परत्र मासे

गते सति आग्रहायणी भवतीत्यर्थः। तत्र दिग्योगलक्षणा पञ्चमी, सप्तमी पूर्ववत्।।

अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते।। 2.3.29 ।।

अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते।। अन्य इत्यर्थग्रहणमिति। व्याख्यानात्। निर्दिश्यमानप्रतियोगीति। यथा देवदत्तयज्ञदत्तयोः प्रकृतयोराह---देवदत्तः शूरः, इतरः कातर इति; तस्यान्यार्थान्तर्भावोऽस्तीति चिन्त्यम्। ऋते यज्ञदत्तादिति। कथं यत्किञ्चिद्राजसूयमृते सोममिति? छान्दसत्वात्, कथं `न मामृते राम बाली'इति? क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते' इति च? निरंकुशाः कवयः।

शब्दग्रहणमिति। सति हि तस्मिन् दिशि दृष्टः शब्दो दिक्शब्द इत्युत्तरपदलोपी समासो लभ्यते, तेन यदा कदाचिद्दिशि दृष्टेन संप्रति देशकालवर्त्तिनापि योगे भवति---ग्रामात्पूर्वो देशश्चैत्रात्पूर्वः फाल्गुन इति। अवयववाचिभिस्तु योगे न भवति---पूर्व कायस्येति, `तस्य परमाम्रेडितम्' इति निर्देशात्।

ननु चायमपीति। सध्ग्रङ् देवदत्तेनेत्यादावदिक्शब्दार्थमञ्चूत्तरपदग्रहणं न भवति, दिक्शब्दैः साहचर्यादस्यापि दिक्शब्दस्यैव ग्रहणादिति भावः। दक्षिणेति। `दक्षिणादाच्' ; आहि च दूरे' उत्तराच्च' इत्याजाही प्रत्ययौ।।

षष्ठ्यतसर्थप्रत्ययेन।। 2.3.30 ।।

षष्ठ्यतसर्थप्रत्ययेन।। अत्र तस्यतेर्नञ्पूर्वस्य क्विप्यतसिति रूपसम्भवेऽपि प्रत्यक्षश्रुतत्वात्प्रत्ययाप्रत्ययपरिभाषया च प्रत्ययस्यैव ग्रहणमिति सिद्धं नार्थः प्रत्ययग्रहणेन। पुरस्तादिति। `पूर्वाधरावराणामसिपुरधवश्चैषाम्' `अस्ताति च' इति पूर्वशब्दस्य पुरादेशः। उपर्य परिष्टादिति। ऊर्ध्वशब्दस्योपशब्द आदेशो रिल्रिष्टातिलौ प्रत्ययौ भवतः, `ततः पश्चाद्धस्ती' इति भाष्यकारप्रयोगात्पञ्चमी।।

एनपा द्वितीया।। 2.3.31 ।।

एनपा द्वितीया।। `तत्रागारं धनपतिगृहादुत्तरेणास्मदीयम्'---स्त्र्यधिकारात्परेण वासरूपविधिनाऽवश्यं भवति, ततः परेण नायमनुवर्तत इत्यादीनां चिन्त्यं साधुत्वम्।।

पृथग्विनानानाभिस्तृतीयान्यतरस्याम्।। 2.3.32 ।।

पृथग्विनानानाभिस्तृतीयान्यतरस्याम्।। अन्यतरस्यांग्रहणेन पक्षे यथाप्राप्तस्याभ्यनुज्ञानात् तृतीयया मुक्ते शेषत्वात्पक्षे षष्ठी प्राप्नोति। अथ स्यादनेकार्थत्वान्निपातानामन्यतरस्यांग्रहणं समुच्चयार्थम्, न विकल्पार्थमिति? एवमप्यनन्तरा द्वितीया समुच्चीचेत। अथापि योगविभागेनास्या अपि सिद्धिः, एवमपि तदनन्तरा षष्ठी समुच्चीयेत न कथञ्चन पञ्चमी, सा चेष्यते, तत्कथमित्याह---पञ्चमीग्रहणमिति। इहेति। न पूर्वयोर्योगयोः मण्डूकगतयोऽधिकारा भवन्ति, यद्यनुवृत्तिसामर्थ्यात्पञ्चमी, अन्यतरस्यांग्रहणं तर्हि किमर्थम्? समुच्चयार्थम्। तत्र किं समुच्चीयते? इत्यपेक्षायाम् `पञ्चमीग्रहणमिहानुवर्त्तते' इत्युच्यते। योगविभागः कर्त्तव्य इति। असत्यपि मुनित्रयवचने प्रयोगबाहुल्यादेवं व्याख्यातम्।।

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य।। 2.3.33 ।।

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य।। यदा धर्ममात्रमिति। यद्योगाद् द्रव्यं स्तोकादिव्यपदेशमासादयति ते गुणा धर्माः, उभयवचना ह्येते द्रव्यमाहुर्गुणं च शुक्लादिवत्। यदा गुणवचनास्तदाऽसत्त्ववचनतेत्यर्थः। क्रियाविशेषणे कर्मणीति। आख्यातेन हि क्रिया साध्यमानावस्थोच्यते---चलति, चलनं करोतीति। अतस्तद्विशेषणं स्तोकादि कर्म भवति---स्तोकं चलनं ,करोतीति। एवं तु विशेष्यवचनस्स्तोकशब्दो द्रव्यवचन इति नात्र प्रसङ्गः। यत्र च फलान्तरं साव्यं प्रति धात्वर्थः करणतया विवक्ष्यते तत्र विशेषणत्वं न स्यात्--शोभनं ज्योतिष्टोमेन स्वर्गकामो यजेतेति। अत्र हि यथा फलभावनायां करणभूतस्य यागस्याभिधायकाद् ज्योतिष्टोमशब्दात् तृतीया भवति, तथा तद्विशेषणाच्छोभनशब्दादपि स्यात्। अन्यस्त्वाह---संदर्शनप्रार्थनाध्यवसायैराप्यमानत्वात्क्रियायाः कर्मत्वात् तद्विशेषणस्य कर्मत्वं स्यादिति तस्यापि संदर्शनादीनां क्रियायाश्चाभेदविवक्षायां कर्मत्वं न स्याद्, न हि तत्र क्रियायाः कर्मत्वमस्ति।।

दूरान्तिकार्थैः षष्ठ्यन्तरस्याम्।। 2.3.34।।

दूरान्तिकार्थैः षष्ठ्यन्तरस्याम्।। पक्षे पञ्चम्यर्थे वचनम्, षष्ठी तु शेषत्वादेव सिद्धा। यद्येवम्, अन्यतरस्यांग्रहणमनर्थकं षष्ठीमात्रवचने वैय्यर्थ्यादेव प्रकृता पञ्चमी विधायिष्यते, तत्राह---अन्यतरस्यांग्रहणमिति। वचनसामर्थ्याद्धि प्रकृतविधाने विज्ञायमाने तृतीयाया अपि विधिः स्यात्। ननु कृतमप्यन्यतरस्यां ग्रहणं विकल्पार्थम्, समुच्चयार्थं वा; विकल्पार्थे तावत् षष्ठ्या मुक्ते स्वादिसूत्रेणा प्राप्ताः सर्वा एव विभक्तयः स्युः, समुच्चयार्थेऽपि प्रकृता तृतीया कस्मान्न समुच्चीयते? उच्यते---`पृथग्विनानानभिः' इत्यत्र तावद् `अन्यतरस्यांग्रहणेन पञ्चमी समुच्चीयते' इत्युक्तम्, अत इहाप्येकप्रघट्टकत्वात्सैव समुच्चीयते। अत एतदपि न चोदनीयम्---`अन्यतरस्यांग्रहणे प्रकृते पुनरन्यतरस्यांग्रहणं किमर्थम्' इति; तत्रापि हि पक्षे तृतीया स्यात्।।

दूरान्तिकार्थेभ्यो द्वितीया च।। 2.3.35 ।।

दूरान्तिकार्थेभ्यो द्वितीया च।। प्रातिपदिकार्थे विधानमिति। अर्थान्तरस्यानिर्द्देशादिति भावः। नन्वनिर्देशेऽप्यर्थान्तरस्य शेषविषये पूर्वविभक्तिविषये च विधानमेतद्युक्तम्, प्रथमाविषये तु परत्वात्सैव प्राप्तोति? नेष दोषः; उत्तरत्राप्येतदनुवर्त्तते, तेनोत्तरविभक्तिविषयेऽपि सर्वत्र यथाभिधानं भवति। तथा च दूरादावसथान्मूत्रमित्यधिकरणेऽपि भवति----आवसथस्य दूर इत्यर्थः। प्रातिपदिकार्थे विधानमित्येतत्तदाहृतविषयं द्रष्टव्यम्। तथा च---`सत्त्ववचनेभ्यो यथायथं विभक्तयो भवन्ति' इति वक्ष्यति, प्रतिपदिकार्थ एव तु विधाने यथायथमित्यनुपपन्नम्, प्रथमैव भवतीति वाच्यं स्यात्।।

सप्तम्यधिकरणे च।। 2.3.36 ।।

सप्तम्यधिकरणे च।। क्तस्येन्विषयस्येति। इन्नन्तः शब्दो विषयो वृत्तिभूमिर्यस्यक्तान्तस्य तस्येत्यर्थः। अधीती व्याकरण इति। अधीतमनेनेति विगृह्य श्राद्धमनेनभुक्तमित्यतोऽनेनेति वर्त्तमाने `इष्टादिभ्यश्च' इतीनिप्रत्यये कृते तद्धितार्थेन कर्त्रा सहैकीभूतस्याधीतस्य निष्कृष्य व्याकरणादिना सम्बन्धाभावात् क्तप्रत्ययेनानभिहिते व्याकरणादौ गुणभूतयापि प्रकृतिवाच्ययाऽध्ययनक्रिययाऽधीतवान् व्याकरणमितिवत् कर्मतया सम्बन्धमाने कृतपूर्वी कटमितिवद् द्वितीयायां प्राप्तायां सप्तमी विधीयते। इह मासमधीती व्याकरण इति कालकर्मणोर्बहिरङ्गत्वात्सप्तम्यभावः।

साधुर्देवदत्तो भातरीति। अत्र साधुत्वासाधुत्वयोर्मातापितृविषयत्वेऽपि क्रियाया अभावादधिकरणत्वाभावाद्वचनम्। `साधुनिपुणाभ्याम्' इत्येव सिद्धेऽनर्चार्थमत्र साधुग्रहणम्, तेन तत्त्वकथनेऽपि भवति। अर्चाग्रहणं तत्र निपुणार्थम्। कथं तर्हि तत्र प्रत्युदाहरिष्यते--अर्चायामिति किं साधुर्भृत्यो राज्ञ इति? उच्यते,राज्ञौ भृत्येन सह शाब्दोऽन्वयः, न साधुना---राज्ञो भृत्यः स साधुरिति। तत्र राजनि वान्यत्र वेति नैतच्छब्देन स्पृश्यते, प्रत्यासत्त्या तु राजविषयमेव साधुत्वं गम्यत इत्येतावता तं प्रत्युदाहरणं द्रष्टव्यम्।

कारकार्हाणामिति। कारकशब्दो भावसाधनः, कारकत्वार्हाणामित्यर्थः। ऋद्धेष्विति। ऋद्धा भोजनक्रियामर्हन्तीति कारकर्हाः, लक्ष्यलक्षणभावाविवक्षायामपि यथा स्यादिति वचनम्। दरिद्रेष्वासीनेष्विति दरिद्रा भोक्तुं नार्हन्तीत्यकारकार्हाः।

तद्विपर्यासे चेति। कारकार्हाणामकारकत्वेऽकारकार्हाणां च कारकत्व इत्यर्थः।

निमित्तात्कर्मयोग इति। यत् क्रियाप्रयोजनं यदर्थः क्रियारम्भस्तत्फलमिह निमित्तम्, तद्वाचिनः सप्तमी भवति। यदि तस्य निमित्तस्य कर्मणा कर्त्तुरीप्सिततमेन सह समवायादिलक्षणः सम्बन्धो भवतीत्यर्थः, तत्र हेतुतृतीयायां प्राप्तायां वचनम्, तत्र हन्तिकर्मणा द्वीप्यादिना चर्मादेर्निमित्तस्य समवायः सम्बन्धः। चमरीमिति। चमरशब्दाज्जातिलक्षणो ङोष्। पुष्कलकः=शंकुः, स सीम्नि सीमाज्ञानार्थ हतो निखात इत्यर्थः, तेन च निहन्यमानेन शङ्कुना सीम्नः संयोगः सम्बन्धः। कर्मसम्बन्ध इति किम्? वेतनेन धान्यं लुनाति।।

यस्य च भावेन भावलक्षणम्।। 2.3.37 ।।

यस्य च भावेन भावलक्षणम्।। इह भूयो दर्शनाश्रयो लक्ष्यलक्षणभावः, यथा---अग्निधूमयोः, ततश्चोदित आदित्ये तमो नष्टम्, उदिते चन्द्रमसि समुद्रः प्रवृद्ध इत्यादावेव स्याद्; त्वग्निषु हूयमानेषु गत इत्यग्निहवनं यदा गमनेन सह पुनः पुनर्न दृष्टचनं तदा न तत्तस्य लक्षणमितीह न स्यादित्याशङ्क्याह---प्रसिद्धा च क्रियेति। प्रसिद्धिरेव क्रियायाः क्रियां प्रति लक्षणत्वे उपयुज्यते, न पुनर्दर्शनम्, एतदुक्तं भवति---निर्ज्ञातकाला क्रिया अनिर्ज्ञाताया क्रियायाः सकृदपि कालपरिच्छेदहेतुत्वेनोपात्ता भवत्येव लक्षणमिति।।

षष्ठी चानादरे।। 2.3.38 ।।

षष्ठी चानादरे।। `अनादरे' इति पूर्वेण सप्तमी, एतच्च भावलक्षणभावस्य विशेषणम्, यश्चानादरे सति भावलक्षणः, सोऽनादराधिको भवतीत्याह---अनादराधिक इति। अनादरविषिष्टेऽनाद्रियमाण इत्यर्थः। रुदतः प्राव्राजीदिति। पित्रादिकस्ये रोदनमनादृत्य प्रव्रज्यां कृतवानित्यर्थः।।

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च।। 2.3.39 ।।

स्वामीश्वराधिपरिदायादसाक्षिप्रतिभूप्रसूतैश्च।। गवां दायाद इति। दीयत इति दायः= अंशः, दायमादत्त इति सोपसर्गादपि दायाद इति निपातनात्कः। गवामित्येतत्समुदायस्य विशेषणमवयवमपि दायांशं स्पृशतीति गवात्मकस्य दायस्यादातेत्ययमर्थो भवति। गवां प्रसूत इति। गा एवानुभवितुं जात इत्यर्थः।।

आयुक्तकुशलाभ्यां चासेवायाम्।। 2.3.40 ।।

आयुक्तकुशलाभ्यां चासेवायाम्।। आयुक्तो गौः शकट इति। आङीषदर्थे ईषद्युक्त इत्यर्थः।।

यतश्च निर्धारणम्।। 2.3.41 ।।

यतश्च निर्धारणम्।। जातिगुणक्रियाभिरिति। प्रदर्शनमेतत्। अमीषां छात्त्राणां देवदत्तः पटुरिति संज्ञयापि निर्धारणदर्शनात्।।

पञ्चमी विभक्ते।। 2.3.42 ।।

पञ्चमी विभक्ते।। विभक्तमस्यास्तीति। निर्द्धार्यमाणात्। एतदुक्तं भवति---निर्द्धार्यमाणस्य निर्द्धारणाश्रयस्य च विभागे सति निर्द्धारणं भवति, ततश्च सर्वत्रैव निर्द्धारणाश्रये विभक्तमस्तीति सामर्थ्यादवधारणमाश्रीयते---यस्मिन्निर्धारणाश्रये विभाग एव, न केनचिदात्मभाव इति। तेन गवां कृष्णेत्यादौ यद्यपि गोमण्डलात्कृष्णा गौः पृथक् क्रियते, तथापि गवात्मनान्तर्भावोऽस्तीति न भवति। उदाहरणे चु माथुपाटलिपुत्रेषु प्राणित्वेनान्तर्भावेऽपि शब्दोपात्ताकारापेक्षयानन्तर्भावाद्विभाग एव भवति। प्रत्याख्यातं चैतत्सूत्रमपादानप्रकरणे---

बुद्ध्या समीहितैकत्वात्पञ्चालान् कुरुभिः पृथग्।

यदाः विभजते वक्ता तदाऽपायः प्रतीयते।। इति।।

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः।। 2.3.43 ।।

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः।। साधुशब्दः `कृवापाजिमि' इत्युणन्तः, `पुण कर्मणि शुभे' इत्यस्मान्निपूर्वात् `इगुपपध' इति के, निपुण इति भवति। `अर्च भाव्यम्' इत्यस्माद्भौवादिकात्`गुरोश्च हलः' इत्यकारः, चौरादिकात्तु युचा भाव्यम्। अप्रतेरित्यत्र प्रयोग इत्यध्याहार्यम्, तदाह---न चेत्प्रतिः प्रयुज्यत इति साधुर्मृत्यो रा5 इति। पूर्वमेवैतद् दूषितमुपपादितं च। निपुणः पुत्रो मातुरिति तु ततत्वकथने न्याय्यं प्रत्युदाहरणम्।।

प्रसिदोत्सुकाभ्यां तृतीया च।। 2.3.44 ।।

प्रसिदोत्सुकाभ्यां तृतीया च।। `षिञ् बन्धने' प्रकर्षेण बद्धः===प्रसितः, तदाह---यस्तत्रनित्यमवबद्ध इति नित्यमित्यनेन प्रशब्दस्यार्थमाचष्टे। अवबद्ध

इवावबद्धः, यो हि यत्र प्रसक्तः स तत्रावबद्ध इव भवतीति भावः। तेन प्रकषण मितः शुक्लतर इत्यस्य ग्रहणं न भवतीति प्रदर्शितं भवति। केशेषु प्रसित इति। तत्पर इत्यर्थः।

नक्षत्रे च लुपि।। 2.3.45 ।।

नक्षत्रे च लुपि।। नक्षत्रे प्रकृत्यर्थे सति यो लुप्संज्ञया लुप्यमानस्य प्रक्ययस्यार्थस्तत्र वर्त्तमानादिति सूत्राक्षरान्वयः। यच्चोच्यते---नक्षत्रे लुपीतित पञ्चम्यर्थे सप्तमी लुबन्तान्नक्षत्रवाचिन इत्यर्थ इति, तत्रोत्तराभ्यां फल्गुनीभ्यां नोत्तरा गच्छेदिति विशेषणान्नस्यात्, तस्यालुबन्तत्वात्। कथं तर्हि लुबन्तान्नक्षत्राभिधायिनः शब्दादिति वृत्तिः? प्रायोवृत्त्यैतदुक्तम्---लुबन्तार्थाभिधायी प्रायेण लुबन्तो भवति। लुबर्थाभिधायिनः शब्दमात्रादित्यर्थः। लुबन्तादिति। लुबन्ते समाप्तावस्येति बहुव्रीहिः, स्थानिर्वारकं च लुपोऽन्त्यावयवत्वं द्रष्टव्यम्।

अधिकरण इति वर्त्तत इति। एवं च पुष्यं प्रतीक्षते, पुष्याय स्पृहयति, पुष्यस्य समीप इत्यादावपि न भवति।।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा।। 2.3.46 ।।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा।। प्रातिपदिकाथः सत्तेति। अत्र जिघृक्षितस्येदं लक्षणम्, न प्रातिपदिकार्थमात्रस्य; गौः, शुक्लः, पाचकः, डित्थ इत्यादावसम्भवात्। योऽर्थः सन्नेव केवलं न जात्यादिरूपो न लिङ्गसंख्याकारकशक्तियोगी, स इह प्रातिपदिकार्थत्वेन विवक्षितः, यथा---अव्ययार्थ इत्यर्थः। अव्ययार्थो हि केवलमस्तीति शक्यते वक्तुम्, न पुनरीदृशस्तादृश इति। गौः शुक्ल इत्यादौ तु सत्त्वरूपेऽर्थे लिङ्गग्रहणादेव सिद्ध्यतीति भावः।

अन्ये त्वाहुः----अन्वयव्यतिरेकाभ्यां यस्य योऽर्थः प्रतीतो यमर्थं प्रातिपदिकं न व्यभिचरति येन विना प्रातिपदिकस्याप्रयोगः, स सर्वः प्रातिपदिकार्थः। सत्ताग्रहणं तूपलक्षणम्, तेन सत्ता गोत्वं शोक्ल्यं शुक्लो गुणः पाचको डित्थो गौः शुक्ल इत्यादिकमप्युदाहरणमिति। नन्वत्र सर्वत्र लिङ्गग्रहणादेव सिद्धम्, न; मात्रग्रहणं क्रियते, तच्चावधारणार्थम्, पयोमात्रं व्रतयतीतिवत्। ततश्च स्त्री पुमान्नपुंसकमित्यादावेव तु स्याद्---यत्र लिङ्गमेवार्थः, सत्तेत्यादौ तु जात्याद्यविकार्थसद्भावान्न स्यात्। अथ कन्यामात्रं वरयतीतिवन्मात्रशब्दस्य व्याप्तिवचनत्वाल्लिङ्गमात्रे प्रथमा लिङ्गमस्तीत्येव प्रथमा भवतीति व्याख्यानादधिकार्थसद्भावेऽपि प्रथमा भवतीति? उच्यते---हन्तैवं वृक्षं पश्येत्यादौ कर्मादिसद्भावेऽपि चलिङ्गमस्तीत्येव प्रथमा स्यात्; कर्मण्येव द्वितीयेत्यस्मिन्प्रत्ययनियमपक्षे कर्मादीनां द्वितीयादिष्वनियतत्वात्! वचनमेकत्वादीति। पूर्वाचार्यप्रसिद्धेरिति भावः।

उच्चैरिति। अत्र प्रथमायां सत्यां ग्राम उच्चैस्तव स्वमित्यादौ `सपूर्वायाः प्रथमाया विभाषा' इति तेमयादिविकल्पो भवति, पदत्वं तु षठ्यापि सिद्धम्, यस्मिन् ह्यर्थे द्वितीयादयो न विहिताः स शेषः। नन्वसङ्ख्यत्वादव्ययार्थस्य कथं षष्ठी स्यात्? एकत्वाद्यर्थनियमे षठ्याः सङ्ख्यायामनियतत्वात्, प्रत्ययनियमेऽपि तुल्यजातीयापेक्षत्वान्नियमस्यैकत्वादिभिः परस्परमेव व्यावर्त्तनात्। विधिवाक्यपक्षे तु स्वादिसूत्रेण भिन्नवाक्यस्य `बहुषु बहुवचनम्' इत्यादेः सङ्ख्यासम्भवे विध्यर्थत्वात्।

ननु ङ्याप्प्रातिपदिकात्स्वादयो विधास्यन्ते, तत्रार्थे प्रथमेत्युक्ते कस्यार्थ इत्यपेक्षायां यस्मात्स्वादिविधिस्तदर्थ इति विज्ञास्यते, नार्थः प्रातिपदिकग्रहणेन,तत्रायमप्यर्थः---लिङ्गग्रहणं न कर्त्तव्यं भवति कुमारी सीमेत्यादावप्यत एव सिद्धम्, प्रातिपदिकग्रहणे तु क्रियमाणे सीमादिशब्दानां स्त्रीयुक्तार्थाव्यभिचारेऽपि प्रत्ययान्तत्वेनाप्रातिपदिकत्वात्तदर्थे प्रथमासिद्ध्यर्थं लिङ्गग्रहणं कर्त्तव्यं स्यात्? उच्यतेप्रातिपदिकग्रहणं तावदर्थपदेनासम्बद्धमित्यत्रैव वक्ष्यते, लिङ्गहणमनेकलिङ्गार्थम्--तटः, तटम्, तटी; कुमारः, कुण्डम्, कुण्डः, कुण्डिका; अन्यथा येनार्थेन विना प्रकृतेरप्रयोगस्तदर्थमात्रे विधीयमाना प्रथमा नानालिङ्गेभ्यस्तत्तद्विशेषमन्तरेण प्रयुज्यमानेभ्यो न स्यात्। अथ मात्रग्रहणमकृत्वा व्याप्तिवचनं वाङ्गीकृत्याधिकार्थसद्भावेऽपि प्रकृत्यर्थस्यान्वय इति स्यात्? यद्येवम्, वृक्षं पश्येत्यादौ कर्माद्याधिक्येऽपि स्यात्प्रत्ययनियमपक्षे, तदिह वृत्तौ कुमारी, कुण्डमित्युदाहरणम्, वृक्षशब्दस्त्वर्थादुदाहृतः। ननु मा भून्मात्रग्रहणम्, मा च भूल्लिङ्गग्रहणम्, मा च कारि `संबोधने च' इति सूत्रम्, सर्वत्रार्थ इत्येव प्रथमा भविष्यति; न चैवं कर्मादिष्वपि प्रसङ्गः, कर्मणि द्वितीयेवेत्येवमर्थनियमस्याश्रयणात्? एवमपि `राज्ञः पुरुषः' इति षष्ठ्यर्थेऽपि स्यात्, शेषलक्षणा हि षष्ठी, उपयुक्तादन्यश्च शेषः, तत्र यदि प्रकृत्यर्थस्याधिक्येऽपि प्रथमा स्यात्। ततस्तस्यापि प्रथमाविधावुपयुक्तत्वात्षष्ठी न स्यात्। अथ वचनसामर्थ्यात्स्वस्वामिभावादौ षष्ठी भवन्ती लिङ्गाधिकोऽपि स्याद्। अतो मात्रग्रहणं तावत्कर्त्तव्यम्, तस्मिंश्च क्रियमाणे लिङ्गग्रहणम्, `संबोधने च' इति सूत्रं च कर्त्तव्यम्; तदाधिक्येऽपि यथा स्यादिति।

परिमाणग्रहणं किमिति। अर्थ इति वा लिङ्ग इति वा सिद्धिं मन्यते। द्रोणः, खारीति। अयं भावः----येनार्थेन विना प्रकृतेरप्रयोगस्तस्मिन्नर्थे प्रथमा। द्रोणादयश्च लौहं दारुमयं परिमाणमेवार्थ न व्यभिचरन्ति। यदा तु द्रोणादिपरिमिते व्रीह्यादौ वर्त्तन्ते तदा तस्य व्यभिचारित्वान्न स्यात्। न च लिङ्गग्रहणादपि सिद्धिः----तदाधिक्यमात्रे हि तेन स्यादिति, परिमाणग्रहणं चोन्मानादीनामुपलक्षणम्, तेन घृतं पलमित्यादावपि भवति। अथ लवणेन संसृष्टः, लवणः सूपः, लवणं शाकमित्यत्र कथं प्रथमा, लवणशब्दो हि लवणजातीयमेव द्रव्यं न व्यभिचरति, व्यभिचरति तु संसृष्टम्? उच्यते---साधारणशब्दोऽयम्, लवणजातीयस्य संसृष्टस्य चाक्षादिशब्दवत्। एवं च `लवणाल्लुक्' इति वचनाद्विज्ञायते। तत्र यथा दधिदादिकशब्दयोः प्रथमा भवत्येवमत्रापि भविष्यति। इह तर्हि कथं शुक्लः पट इति, शुक्लशब्दो गुणमेव न व्यभिचरति, व्यभिचरति तु तद्वन्तम्, पटस्य शुक्ल इति दर्शनात्? अत्रापि `गुणवचनेभ्यो मतुपो लुग् वाच्यः' इति वचनात्साधारणशब्दतैव। इह तर्हि कथं गौर्वाहीक इति, गोशब्दो हि सास्नादिमन्तमेव न व्यभिचरति, व्यभिचरति तु वाहीकम्? अत्रापि वाहीके सास्नादिमद्रूपारोपाद्गोशब्दः प्रयुज्यते, तत्र यथा सास्नादिमद्वृत्तेर्भवत्येवं वाहीकवृत्तेरपि भविष्यति। यद्येवम्, द्रोणः खारीत्यादावप्येवमेव भविष्यति, लवणादिशब्दवत्साधारणशब्दाः स्युः गौर्वाहीक इत्यादिवद्गौणा वा, गङ्गायां घोष इतिवल्लाक्षणिका वा; नान्या गतिरस्ति, सर्वथा सिद्धा प्रथमा। किं च परिमेयवृत्तिभ्यो द्वितीयादयो यथा भवन्ति तथा प्रथमापि भवति। अथ प्रस्थेन परिमिता व्रीहय इत्येवं प्रातिपदिकार्थव्यतिरेकेऽपि

यथा स्यादिति परिमाणग्रहणम्। यद्येवम्, प्रस्थेनेति तृतीया न स्यात्, शेषविवक्षायां च षष्ठी न स्यात्, प्रास्तिक इति तद्धितश्च न स्यात् तदेतत्परिमाणग्रहणं चिन्त्यप्रयोजनम्।

उक्तेष्वपीति। अन्यथानभिहिताधिकारात् `बहुषु बहुवचनम्' इत्यादिनास्यैकवाक्यत्वात्तिङ्कृत्तद्धितसमासैरिति परिगणनस्य प्रत्याख्यातत्वादेकादिशब्दैरेकत्वादीनामभिहितत्वादुक्तार्थत्वाद् वा न स्यादिति भावः। एकः द्वो बहव इति। अथ कथमेकं कृतमित्यादौ द्वितीयादयो भवन्ति, न हि तत्र कश्चिद्यत्नोऽस्ति? उच्यते, तत्रार्थद्वयमस्ति---कर्मादयः, एकत्वादयश्च। तत्रैकत्वादीनामभिधानेऽपि कर्मादिप्रतिपादनाय द्वितीयादयो भविष्यन्ति; इह त्वनभिहितार्थान्तराभावान्न स्यात्। नन्वत्राप्येकादिभिः शब्दैरेकत्वादिविशिष्टं द्रव्यमभिधीयते तत्रैकत्वादिगुणस्य निष्कृष्याभिधानाय प्रथमा भविष्यति, यथा गुणोपसर्जनद्रव्यवचनाच्छुक्लादिशब्दात्प्रवृत्तिनिमित्तभूतस्य गुणस्य निष्कृष्याभिधाने भावप्रत्ययः---पटस्य शौक्लमिति। तदेवं वचनग्रहणमपि शक्यमकर्तुम्। प्रातिपदिकग्रहणं किमिति। उक्तोऽत्र प्रष्टुरभिप्रायः। निपातस्यानर्थकस्येति। अन्यथार्थाभावान्न स्यादिति भावः। प्रलम्बत इति। किं पुनरत्र प्रथमया प्रार्थ्यते? पदत्वम्; षष्ठ्यामप्येतत्सिद्धम्, तथा हि--कर्मादिषु द्वितीयादयो विहिताः प्रक-त्यर्थमात्रे प्रथमा, तत्र प्रकृत्यर्थाभावे स्वस्वामिभाबादिर्सबन्धसद्भावे चापयुक्तादन्यत्वात्सिद्धा षष्ठी। न च तस्या एकत्वादिषु नियमः; उक्तोत्तरत्वात्। तदेवमर्थलिङ्गमात्रे प्रथमेत्येतावदेवावश्यं कर्त्तव्यम्, मात्रग्रहणमपि न कर्त्तव्यम्। कर्माद्याधिक्ये कस्मान्न भवति? ज्ञापकात्, यदयम् `संबोधने च' इत्याह। यदि ह्याधिक्येऽपि स्यात्तदनर्थकं स्यात्। उत्तरार्थे हि `संबोधने सामन्त्रितम्' इत्येव वक्तव्यं किं योगविभागेन! इहावधारणार्थान्मात्रग्रहणात् `संबोधने च' इति ज्ञापकाद्वाऽऽधिक्ये प्रथमया न भवितव्यम्, ततश्च `वीरः पुरुषः' इत्यादौ पदसामानाधिकरण्ये विशेषणविशेष्यभावस्याधिकार्थस्य प्रतीतेः प्रथमा न प्राप्नोति, न; वाक्यार्थत्वात्। यदत्राधिक्यं स वाक्यार्थः, पूर्व स्वार्थमात्रनिष्ठाभ्यामुभाभ्यां प्रथमा विधीयते, पश्चात्त्वाकांक्षावशेनान्योन्यान्वये विशेषावगतिरुपजायमाना बहिरङ्गत्वात्प्रथमप्रवृत्तं संस्कारं न बाधत इत्यर्थः। अपर आह---अभिहिते प्रथमेति लक्षणं कर्त्तव्यम्, तिङादिभिरभिहिते कर्त्रादौ वृक्षस्तिष्ठति, कृतः कटः, शत्यः, प्राप्तोदको ग्राम इत्यादौ प्रथमा भवतीत्यर्थः, तत्र वीरः पुरुषः इत्यादावाधिक्येऽप्यभिहितत्वात्सिद्धा प्रथमेति। अत्र को दोषः? यत्र क्रिया नास्ति तत्र न स्यात्---वृक्षः, प्लक्षः। तत्रापि क्रियाऽस्ति, कथम्? वृक्षः प्लक्षः, अस्तीति गम्यते। इह तर्हि प्रासाद आस्त इति सदिक्रयायाः, आसिक्रियायाश्चैकमधिकरणं प्रासादाख्यम्, तच्च सदिप्रत्ययेन घञाभिहितं प्रसीदत्यस्मिन्प्रासाद इति आसिप्रत्ययेन तिङानभिहितम्, तत्र सदिप्रत्ययेन यदभिधार्न तदाश्रया प्रथमा प्राप्नोति। यत्र च विशेषणसंबन्धे तात्पर्यम्---नीलमुत्पलं न रक्तमिति, तत्रापि न स्यात्; क्रियाया अभावात्।

अन्यस्त्वाह---तिङ्समानाधिकरणे प्रथमेति लक्षणं तिङन्तेन यत्समानाभिधेयं देवदत्तः पचतीति, तत्र प्रथमा; प्रासाद आस्त इत्यत्र तु वैयधिकरण्यात्तदभावः, वीरः पुरुष इत्यादौ चाधिक्येऽपि तिङ्सामानाधिकरण्यं प्रति योग्यत्वाद्भवतीति। अत्र को दोषः? देवदत्तः पचतीति देवदत्तः पच् लट् इति स्थिते यावत्तिङामुत्पत्तिर्नास्ति तावत्तिङ्सामानाधिकरण्याभावात्प्रथमैवेति नियमस्याप्रवृत्तौ देवदत्तशब्दादविशेषेण विहिताः स्वादयः स्थिता इति शतृशानचोर्निमित्तस्याप्रथमासामानाधिकरण्यस्य विद्यमानत्वात्तावेव स्याताम्, तिङां त्वाभावः स्यात्। न च तिङ्विधेरानर्थक्यम्; तिङादिषु सावकाशत्वात्। प्रथमैवेति। नियमस्यापि स एव विषयः स्यादिति दोष। पक्षे चायं दोषः, कतरस्मिन् पक्षे? `लटः शतृशानचौ' इत्यत्र द्वौ पक्षौ--अप्रथमेति पर्युदासः, प्रसज्यप्रतिषेधो वेति। तथा `कर्मणि द्वितीया' इत्यादावपि प्रकरणे द्वैतं भवति--विभक्ति नियमः स्यात्, अर्थनियमो वेति; तद्यदार्थनियमः पर्युदासश्चाश्रीयते तदाऽयं दोषः। कथम्? अर्मणि द्वितीयेवेत्यस्मिन् नियमे द्वितीयादीनामनियतत्वात् प्रातिपदिकार्थमात्रेऽपि भावात्तदाश्रयौ शतृशानचौ प्राप्नुतः, प्रसज्यप्रतिषेधे तु प्रथमाया अपि तत्र भावात्तदाश्रयः प्रतिषेधः प्रतिषेधः प्रवर्त्तत इति न दोषः; शतृशानचोरभावात्तिङ्क्षु सत्सु तत्सामानाधिकरण्यात्प्रथमैवेति नियमेन द्वितीयादीनां व्यावर्त्तितत्वात्। यदा तु द्वितीयादीनां कर्मादिषु नियमः---कर्मण्येव द्वितीयेति, तदा तदभावे तासामभावादनियतायाश्च प्रथमायाः सन्निधानात्पर्युदासे प्रसज्यप्रतिषेधे च नास्ति शतृशानचोः प्रसङ्गः; तदभावे च तिङ्भु सत्सु तत्सामानाधिकरण्यात्तत्रैव प्रथमा भवतीति नियमेन कर्मादिषु प्रथमाव्यावृत्तिरिति न दोषः।

ननु च विभक्तिनियमे कर्माद्यभावेन यद्यपि द्वितीयादीनां तत्राभावस्तथापि शेषषष्ठी प्राप्नोति, तथा हि---यदि तिङ्सामानाधिकरण्य एव प्रथमेत्यस्मान्नियमात्प्रागेव द्वितीयादिवत् षष्ठ्यपि नियता स्यात्? स्यात्तत्राप्रसङ्गस्तस्याः। सा तु शेषलक्षणा। यत्र च विभक्त्यन्तरस्य नियमो न कृतः स शेषः, ततश्च तिङ्सामानाधिकरण्यात्प्राक् शेषत्वात् षष्ठी प्राप्नोतीति तत्समानाधिकरण्याच्छतृशानचावेव स्याताम्। पर्युदासे प्रसज्यप्रतिषेधे तु न दोषः, प्रथमाया अपि भावात्? सत्यम्; द्वयोरपि पक्षयोः पर्युदासे भवत्येव दोषः। भाष्ये तु विभक्तिनियमे पर्युदासेऽपि न दोष इत्यनास्थावादः पाक्षिक एष दोष इत्यत्रैव तात्पर्यम्। क्षन्तव्यं च किञ्चिदुद्ग्रन्थाभिधानमित्युपरम्यते।।

सम्बोधने च।। 2.3.47 ।।

सम्बोधने च।। आभिमुख्यकरणमिति। यद्वस्तु येनाकारेण सिद्धं तस्य तेनाकारेणाभिमुखीकरणं सम्बोधनम्, न त्वेकश्रुतिविधाविव कस्यचिदर्थस्यानुष्ठेयता प्रत्यायनम्; वाक्यार्थो हि सः। अभिमुखीकरणं तु न वाक्यार्थः, येन वीरः पुरुष इत्यादिवद्यदत्राधिक्यं स वाक्यार्थ इति प्रथमा सिद्ध्येत्। यस्य पदान्तरसंप्रयोगे सत्येव प्रतीतिः स वाक्यार्थः। इह तु देवदत्तेत्येतावत्युक्ते आभिमुख्यकरणं गम्यते, अतः पदार्थ पदार्थ एवात्राधिक्यमिति षष्ठ्यां प्राप्तायामिदं वचनं तदाह---तदधिके प्रातिपदिकार्थ इति। असिद्धेन चाकारेणाभिमुखीकरणं न संभवति---राजा भव युध्यस्व स्वाहेन्द्रशत्रुर्वर्द्धस्वेति। हे पचन् हे पचमानेत्यादौ शतृशानचोः संबोधने विधानेऽपि विभक्तिरहितयोस्तयोः कर्त्राद्यभिधान एव सामर्थ्यम्; यथा लोटो द्विर्वचननिरपेक्षस्येत्यनेन प्रथमा भवति। यद्वा---अभिहितः सोऽर्थोऽन्तभूतः प्रातिपदिकार्थः संपन्न इति पूर्वेण भविष्यति, योगविभाग उत्तरार्थः।।

साऽऽमन्त्रितम्।। 2.3.48 ।।

सामन्त्रितम्।। तदन्तं यच्छब्दरूपमिति। महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थम्--आमन्त्रणमामन्त्रितमिति। अभेदोपचारात्तत्साधने शब्दे वर्त्तते विभक्त्यन्तेन केवलया संज्ञाविधौ प्रत्ययग्रहणे तदन्तस्य ग्रहणमिति भावः। उदाहरणेषु `आमन्त्रितस्य च' इत्याद्युदात्तत्वं भवति, सेति वचनं प्रातिपदिकार्थसूत्रेणापि संबोधने विहिता या प्रथमा तदन्तस्यापि संज्ञा यथा स्यात्---हे पचन्! हे पचमान!;असति तु तस्मिन् `अनन्तरस्य विधिर्वा प्रतिषेधो वा' इत्यनन्तरसूत्रविहिताया एव स्यात्।।

एकवचनं संबुद्धिः।। 2.3.49 ।।

एकवचनं संबुद्धिः।। हे पटो इति। संबुद्धौ च `ह्रस्वस्य गुणः' इति गुणः, `सुः संबुद्धिः' इति वक्तव्ये एकवचनग्रहणमेकोऽर्थ उच्यते येन तावन्मात्रस्य प्रत्ययस्य संज्ञार्थम्; अग्न्यथा प्रक्रमाभेदाय तदन्तस्य स्यात्।।

षष्ठी शेषे।। 2.3.50 ।।

षष्ठी शेषे।। उपयुक्तादन्यः शेषः, कर्मादयश्च प्रातिपदिकार्थपर्यन्ता उपयुक्ता इत्याह---कर्मादिभ्योऽन्य इति। ननु न कर्मादिभ्योऽन्यः प्रातिपदिकार्थस्य व्यतिरकः संभवति, कथम्? क्रियामन्तरेण संबन्धानुपपत्तेः, सर्वत्र स्यास्तन्निमित्तानां कर्मादीनां चावश्यम्भावात्। तथा हि---राज्ञः पुरुष इति राजा कर्त्ता; राजा द्रव्यं पुरुषाय ददातीत्यर्थसंप्रत्ययात्। वृक्षस्य शाखेति। लोकप्रसिद्ध्या वृक्षोऽधिकरणम्, तार्किकप्रक्रियया तु शाखा। देवदत्तस्य गौरित्यादौ तु प्रतिग्रहणादौ कर्तृत्वं प्रतीयते---देवदत्तः प्रतिग्रहीता क्रेता विनिमाताऽपहर्त्ता वेति; उच्यते, नटस्य शृणोतीत्यत्र तावत्क्रियाकारकसंबन्धरूप एव शेषः, कथम्? `आख्यातोपयोगे' इत्युपयोगग्रहणान्नटस्यापादनसंज्ञा नास्ति, दुह्यादिपरिगणनाच्चाकथितत्वेऽपि कर्मसंज्ञा नास्ति, तदयं नटः कारकमेव शेषः। यच्चोक्तम्---क्रियायास्तन्निमित्तानां च सर्वत्र भावान्नान्यः प्रातिपदिकार्थस्य व्यतिरेक इति, तन्न;प्रतिग्रहक्रयादिजन्यस्य सर्वलोकप्रसिद्धस्य स्वस्वामिभावादिसंबन्धस्यापि दुरपलापत्वात्। यदि च परस्परमुपकार्योपकारकभावे संबन्धानुपपत्तेः क्रियाकारकसंबन्धोऽपि सर्वत्र वस्तुस्थित्याऽस्तीत्युच्येत्, अस्तु तथा, न कश्चिद्दोषः; न हि यद्यद्वस्तुस्थित्यास्ति तत्तदभिधातव्यम्, यदेव तु विवक्षितं तदेव स्वनिमित्तां विभक्तिं प्रसूते। तत्र स्वस्वामिभावादिसंबन्धविवक्षायां सन्नपि क्रियाकारकसंबन्धो न विवक्ष्यत इति द्वितीयाद्यभावे षष्ठी भविष्यति। एवं च मातुः स्मरति, न माषाणामश्नीयात्, अनुकरोति भगवतो नारायणस्येत्यादौ श्रूयमाणेऽपि क्रियाशब्दे मातृसंबद्धं स्मरणमिति संबन्धमात्रं विवक्षितम्, कर्मत्वं तु सदप्यविवक्षितमिति षष्ठी भवति। उक्तं च---

संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।

श्रुतायामश्रुतायां च क्रियायां सोऽभिधीयते।। इति।।

`षष्ठी शेषे' इति चेद्विशेष्यस्य प्रतिषेधः स्वस्वामिभावादिसंबन्धः षष्ठ्यर्थः, स च द्विष्ठः। तत्र यद्यप्येकस्मादप्युत्पन्नयापि षष्ठ्या द्विष्ठस्यापि संबन्धस्यावगमादुभाभ्यां षष्ठी न भवति, तथापि कदाचिद्विशेष्यादपि प्राप्नोति, प्रथमा च न प्राप्नोति; संबन्धस्याधिकस्य भावात्, न वा वाक्यार्थत्वात्। यदत्र पुरुषस्याधिक्यं स वाक्यार्थः, राज्ञ इत्येतत्पदसन्निधानात्पुरुषस्य संबन्धः प्रतीयते, पुरुषप्रातिपदिकं तु स्वार्थमात्रे वर्त्तत इति तत्र प्रथमा च भविष्यति, षष्ठी च न भविष्यतीति। एतदुक्तं भवति---राज्ञ इति केवलपद उच्चार्यमाणे संबन्धित्वमनियतप्रतियोगिकमवगम्यते, पुरुषपदसन्निधौ तु सविशेषस्य प्रतीतिरित्येतावत्, ततश्चानियतं स्वमपेक्ष्य प्रथममेव संबन्धाश्रया षष्ठी भवति। ननु च षष्ठ्युच्चारणानुच्चारणकृतो यो विशेषोऽङ्ग भवान् पुरुषपदादपि षष्ठीमुच्चारयतु, गंस्यते स विशेषः? नैतत्सुष्ठूच्यते, न हि शब्दस्य भावाभावाभ्यामर्थस्य भावाभावौ क्रियेते, किं तर्हि? विद्यमान एवार्थः प्रतिपिपादयिषितश्च वाचकपदप्रयोगे हेतुर्भवति। तत्र गुणस्य परोपकाकत्वेन विवक्षितत्वात्तदन्ते षष्ठी भवति, पुरुषस्य तूपकार्यत्वात्वात्स्वनिष्ठत्वेन विवक्षितत्वात्प्रथमा भवति। तत्र च संबन्धो गुणे पदं निधाय प्रधानमपि स्पृशति, गुणश्च प्रधानोपकाराय प्रवृत्तोऽन्यथानुपपत्ते रूपान्तरमाश्रयति। प्रधानं तु स्वनिष्ठत्वेन न रूपान्तरं भजते, उक्तं च----

द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते।

तत्राभिधीयमानः सन् प्रधानेऽप्युपयुज्यते।। इति।

यदा तु पुरुषस्याप्रधान्यं राज्ञश्च प्राधान्यं विवक्ष्यते, तदा पुरुषस्य राजेत्यपि भवत्येव; यदा च राज्ञः पुरुषस्य गृहमिति तत्पुरुषस्य गृहादिसंबन्धो विवक्ष्यते तदैकस्यापि वस्तुनो भिन्नविषयो गुणप्रधानभावो न विरुद्ध्यत इति द्वाभ्यामपि षष्ठी भवति। राज्ञ इति हि षष्ठ्या राजपुरुषयोरेव संबन्धोऽभिहितः, न पुरुषस्य गृहस्य च। इह पञ्चके प्रातिपदिकार्थे `कर्मणि द्वितीया' इत्यादौ चार्थनियमपक्षे शेषग्रहणं शक्यमकर्तुम्, कथम्? कर्मादयो नियताः, शेषोऽनियतः, ततश्च स्वादिसूत्रेण द्वितीयादिषु षष्ठ्यां च शेषे प्राप्तेषु षष्ठीत्येतावदप्युच्यमानं नियमार्थं सम्पद्यते---षष्ठ्येव भवतीति। यत्र च षष्ठी च प्रत्ययान्तरं च प्राप्नोति तत्रैवंविदधो नियम इत्यर्थाच्छेष एव भविष्यतीति उत्तरार्थमेव तदवश्यं शेषग्रहणं कर्त्तव्यम्। त्रिकपक्षे तु स्वार्थे षष्ठी मा भूदिति द्वितीयादीनामिव कर्मादिः शेषो वाच्यत्वेन विधातव्यः। तथा प्रत्ययनियमपक्षे कर्मादीनामनियतत्वात्तेष्वपि षष्ठ्यां प्राप्तायां शेष एव षष्ठी न कर्मादिष्विति षष्ठीनियमार्थं शेषग्रहणं कर्त्तव्यम्।।

ज्ञोऽविदर्थस्य करणे।। 2.3.51 ।।

ज्ञोऽविदर्थस्य करणे।। असंदेहार्थं विदर्थस्य ज्ञः करण इत्येव वक्तव्ये तदकरणादविदर्थस्येति पदच्चेदः, लुग्विकरणश्च विदिर्गृह्यते तदर्थ एव जानातेर्वृत्तिसंभवात्, तदाह---अविदर्तस्याज्ञानार्थस्येति। सर्पिषो जानीत इति। `अपह्नवे ज्ञः' `अकर्मकाच्च' इत्यात्मनेपदम्। प्रवृत्तिवचन इति ज्ञानपूर्विकायां प्रवृत्तौ वर्त्तमान इत्यर्थः। सर्पिषि रक्त इति। रागो मिथ्याज्ञानस्य हेतुः, द्रौपद्यां रक्तो हि कीचको रहसि भीमसेनमालिङ्ग्यावोचद्---अहो उत्तमाङ्गनामीदृशी

सुस्पर्शतेति। प्रतिहितो वेति। प्रतिघातो द्वेषस्य हेतुः, द्वेषश्च मिथ्याज्ञानस्य हेतुः, यो हि परिहासशीलेन केनचित्पूयादिकमशुचि द्रव्यं निर्द्दिश्योक्तः----सर्पिरेतत्पिबेति, स तत्र प्रतिहतस्तत आरभ्य सर्पिद्वेष्टि, द्विषतश्चातस्मिन्नपि तज्ज्ञानमुत्पद्यते। यदि सर्वमेव ग्राह्यम्, तदात्मना सर्पिः स्वभावतया प्रतिपद्यते, एवं सत्यविदर्थत्वं नोपपद्यते तत्राह--मिथ्याज्ञानमेवेति। ज्ञानकार्याकरणादिति भावः। अविप्लुतविषयपरिच्छेदो हि ज्ञानकार्यम्, तच्च मिथ्याज्ञानेन न क्रियते, अस्मिन्पक्षे उदकादिकर्मणासकर्मकत्वाद् `अकर्मकाच्च' इत्यात्मनेपदानुपत्तेः परस्मैपदमुदाहार्यं मन्यते।।

अधीगर्थदयेशां कर्मणि।। 2.3.52 ।।

अधीगर्थदयेशां कर्मणि।। `इक् स्मरणे' ककारोऽत्रैव विशेषणार्थः, अधिपूर्वस्यैवोच्चारणमेवमेवायं प्रयोक्तव्य इति ज्ञापनार्थम्। शेषत्वेन विवक्षित इति। ननु शेषत्वेन विवक्षिते पूर्वेणैव सिद्धा षष्ठी, यथा---न माषाणामश्नीयाद्, अनुकरोति भगवतो नारायणस्येति? सत्यम्, प्रकरणं तु नियमार्थम्----अस्मिन्विषये षष्ठी भवत्येव श्रूयत एव न लुप्यत इति। किं कृतं भवति? समासो निवर्त्तितो भवति---मातुः स्मरणमिति। एवं पूर्वसूत्रे परत्र च प्रकरणे सर्वत्र द्रष्टव्यम्। समासे सति `सुपो धातुप्रातिपदिकयोः' इति षष्ठी लुप्येत, तेन प्रतिपदविधानषष्ठी न समस्यत इति सिद्धं भवति। कथं तर्हि विशेषस्मृतेः संशय इति समासः? उच्यते; शेषषष्ठ्या एव समासनिषेधः इह तु `कर्तृकर्मणोः कृति' इति कर्मरूपविवक्षायामेव षष्ठी समासो भविष्यति। कः पुनरत्र विशेषः---शेषषष्ठ्याः समासः स्यात्, कारकषष्ठ्या वा? अयमस्ति विशेषः---कारकषष्ठ्याः समासे कृत्स्वरो भवति, शेषषष्ठ्याः समासे तु समासान्तोदात्तत्वं स्यात्, अन्तोदात्तसमासनिवृत्तये प्करणम्। यत्र च कारकषष्ठी प्रतिषिध्यते, यथा---मातुः स्मृतमिति, तत्र समासोऽपि मा भूत्। एवं चात्र प्रकरणे येऽनुपात्ताः, यानि चात्र प्रत्युदाहरणानि, तेषूभयेष्वपि निष्ठायोगे शेषषष्ठ्याः समासः, अन्यत्र कारकषष्ठ्या अपीति वेदितव्यम्। गुणैरिति। गुणेषु शेषत्वेन विवक्षितेषु अस्य नियमस्याभावात्समासो भवत्येवेत्यर्थः। इयमेवास्मिन्प्रकरणे प्रत्युदाहरणगतिरिति।।

कृञः प्रतियत्ने।। 2.3.53 ।।

कृञः प्रतियत्ने।। एधोदकस्येति। `जातिरप्राणिनाम्' इत्येकवद्भावः। उपस्कुरुत इति। गन्धनादिसूत्रेणात्मनेपदम्। `उपात्प्रतियत्न'इत्यादिना सुट्।।

रुजार्थानां भाववचनानामज्वरे।। 2.3.54 ।।

रुजार्थानां भाववचनानामज्वरे।। `रुजो भङ्गे'भिदादिपाठादस्मादेव निपातनाद्वाऽङ्। भाववचनानामिति। नायमर्थो भाववाचिनामिति, धातूनां भाववाचित्वाव्यभिचारात्। किं तर्हि? भावशब्देन घञादिवाच्यः सिद्धरूपो भाव उच्यते। वचन इति कर्त्तरि ल्युट्। तत्र प्रकृत्यर्थो न विवक्ष्यते, न हि रुजार्थानां भावो वक्ता प्रतिपादयितोच्चारयिता वोपपद्याते। तस्मात्प्रत्ययार्थ एव कर्ता विवक्षितः--भावो वचनः कर्त्ता येषामित्यर्थः, तदाह--भावकर्तृकाणामिति। चौरस्यामयतीति। `अम रोगे' चुरादिः,`नान्ये मितोऽहेतौ' इति चुरादौ वचनात् `जनीजृष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वं न भवति। `ज्ञप मिच्च' इत्यारभ्य `नान्ये मितोऽहेतौ' इतः प्राग्ये पठितास्त एव चुरादिषु मितो भवन्ति, नान्य इत्यर्थः। आमय इति आङ्पूर्वस्य मीनातेरेच्, `मीनातिमिनोति' इत्यात्वस्य `निमिमीलीयां खलचोः' इति प्रतिषेधः। नदीकूलं रुजतीति। अत्र नदी कर्त्री, न भावः। ननु रुजाशब्दो व्याधौ रूढ इति नात्र प्रसङ्गः? एवं तर्हि प्रत्युदाहरणदिगियं दर्शिता, इदं तु प्रत्युदाहरणम्---श्लेष्मा पुरुषं रुजतीति, व्याधिना कासादिना ग्राहयतीत्यर्थः। ज्वरयतीति। `ज्वर रोगे' घटादिः। सन्तापयतीति। `हेतुमति च' इति णिच्, सन्तापोऽत्र भावः, कर्त्ता च।।

आशिषि नाथः।। 2.3.55 ।।

आशिषि नाथः।। नाथत इति। `आशिषि नाथः' इत्युपसंख्यानादात्मनेपदम्, तच्चानुदात्तेत्त्वादेव सिद्धे नियमार्थम्---आशिष्येव नाथ इति, तेन प्रत्युदाहरणे परस्मैपदम्।।

जासिनिप्रहणनाटक्राथपिषां हिंसायाम्।। 2.3.56 ।।

जासिनिप्रहणनाटक्राथपिषां हिंसायाम्।। न दैवादिकस्येति। `जासि' इति निर्देशाद् `हिसायाम्' इति वचनाच्च निप्राभ्यां यथासंभवमुपसृष्टो हनो निप्रहणः, `हन्तेरत्पूर्वस्य' इति णत्वम्। प्रणिहन्तीति। `नेर्गद' इत्यादिना णत्वम्। `नट अवस्यन्दने' चुरादिः, `नट नृत्तौ' इत्यस्य तु घटादिपठितस्याग्रहणम्, विकृतनिर्देशात्। निपातनाद्वृद्धिरिति। घटादिपाठस्तु `घटादयः षितः' इत्यातिदेशिकोऽङ्यथा स्यात्, `चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' इति दीर्घश्च यथा स्यादित्येवमर्थः।।

व्यवहृपणोः समर्थयोः।। 2.3.57 ।।

व्यवहृपणोः समर्थयोः।। समर्थयोरिति। संशब्दो वृत्तौ समानार्थः, समशब्दस्य वा निपातनात्पररुपमिति भावः। संबद्धार्थयोरिति तु न विज्ञायते, व्याख्यानात्। संभवति हि व्यवहृपणोर्हेतुहेतुमद्भावः संबन्धः। शतस्य व्यवहरतीति। शतं क्रयविक्रयरूपेण विनियुङ्क्ते, दीव्यति वेत्यर्थः। शलाकां व्यवहरतिगणयतीत्यर्थः।।

दिवस्तदर्थस्य।। 2.3.58 ।।

दिवस्तदर्थस्य।। अत्र `शेष' इति नानुवर्त्तते, उत्तरसूत्रद्वयारम्भसामथ्यर्त्। अथ पूर्वसूत्र एव दिविरपि कस्मान्न पठितः, एवं हि तदर्थस्येति न वक्तव्यं भवति? तत्राह---योगविभाग इति।।

विभाषोपसर्गे।। 2.3.59 ।।

विभाषोपसर्गे।। शलाकां प्रतिदीव्यतीति। अत्र विजिगीषादौ दिविर्वर्त्तते, न व्यवहारे।।

द्वितीया ब्राह्मणे।। 2.3.60 ।।

द्वितीया ब्राह्मणे।। मन्त्रव्यतिरिको वेदभागः===ब्राह्मणम्। गामस्य तदहः सभायामिति। गामस्य सभायामित्यन्वयः। तदहरित्येतदुदाहरणम्, `स्वमोर्नपुंसकात्' इति लुक्, `अहन्' इति रुत्वम्।

अनुपसर्गस्य नित्यं षष्ठ्यां प्राप्तायामिति। `दिवस्तदर्थस्य' इत्यनेन' अथ सोपसर्गस्यापि पूर्वेण षष्ठ्यामपि प्राप्तायां नित्यद्वितीयार्थं कस्मान्न भवतीत्याह--सोपसर्गस्येत्यादि।।

प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने।। 2.3.61 ।।

प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने।। इष्यतेर्दैवादिकस्येति। `इषु गतौ' इत्यस्य श्यना निर्देश इच्छतीष्णात्योरिच्छाभीकृष्ण्यार्थयोर्निवृत्त्यर्थः। तद्विषय एवेति। लोण्मध्यमैकवचनान्तः। देवतासंप्रदान इति। देवता संप्रदानं यस्यार्थस्य तत्र वर्तमानयोः कर्मणि कारक इत्यन्वयः। हविषः हविर्विशेषवाचिन इत्यर्थः। प्रे3ष्येति। `ब्रूहिप्रेष्य' इत्यादिना प्लुतः। अग्नये गोमयानि प्रेष्येति। गोमयं हविष्ट्वेन क्वापि न चोदितम्। हविषः प्रस्थितस्येति। प्रस्थितशब्देन यद्विशेष्यते तस्येत्यर्थः। इदं च भाषायामपि भवति; उत्तरत्र छन्दोग्रहणात्।।

चतुर्थ्यर्थे बहुलं छन्दसि।। 2.3.62 ।।

चतुर्थ्यर्थे बहुलं छन्दसि।। या खर्वेणेति। रजस्वलायाः खर्वपानादिप्रतिषेधार्तोऽयमर्थवादः। तत्तर्हि वक्तव्यम्---षष्ठ्यर्थे चतुर्थीति? न वक्तव्यम्, योगविभागात्सिद्धम्। चतुर्थ्यर्थ इति नायं समासः, किं तर्हि? चतुर्थी अर्थ इति योगो विभक्तव्यः, षष्ठीत्यनुवर्त्तते---अर्थे षष्ठी भवति, चतुर्थी चेति, तत्र स्वार्थ एव षष्ठीचतुर्थ्योर्विधानमनर्थकमित्यन्योऽन्यसन्निधानादन्योऽन्यार्थे विभक्तिद्वयं विज्ञायते।।

यजेश्च करणे।। 2.3.63 ।।

कृत्वोऽर्थप्रयोगे कालेऽधिकरणे।। 2.3.64 ।।

कृत्वोऽर्थप्रयोगे कालेऽधिकरणे।। कृत्वसुचोऽर्थो लक्ष्यते, कृत्वोऽर्थो येषां ते कृत्वोऽर्थाः। पञ्चकृत्व इति। `संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' द्विरिति। `द्वित्रिचतुर्भ्यः सुच्' अर्थग्रहणमेतदर्थम्।।

कर्तृकर्मणोः कृति।। 2.3.65 ।।

कर्तृकर्मणोः कृति। इह क्रियायाः साधनं भवतीति। कर्तृकर्मभ्यां क्रिया सन्निधाप्यते, धातुरेव क्रियावाची, धातोश्च द्वये प्रत्ययाः---कृतस्तिङश्च। तत्र तिङ्प्रयोगे `न लोकाव्यय' इति लप्रतिषेधेन भाव्यम्। स चावश्यं लप्रतिषेधः कर्त्तव्यः, ये कृतो लादेशास्तदर्थम्---ओदनं पचन्, ओदनं पचमानः पपिः सोमम्,ददिर्गा इति, इह तु नार्थः कृद्ग्रहणेनेति मत्वा पृच्छति---कृतीति किमिति। कृतपूर्वी कटमिति। ननु कृतः कटः पूर्वमनेनेत्यस्मिन्विग्रहे क्तस्य कर्मणि विधानात्तेनैव कर्मणोऽभिहितत्वान्नैव द्वितीया भाव्यम्, एवं च तदपवादः षष्ठ्यपि न प्राप्नोति; इहाप्यनभिहिताधिकारात्, कृतशब्दस्य च कटापेक्षस्य समासो दुर्लभः, एतेन तद्धितो व्याख्यातः, तस्मादयमसाधुरेव प्योगः? सत्यम्, विशेषविवक्षायां नैव समासतद्धितौ भवतः, यदा तु कृतं पूर्वमनेनेति कर्मसामान्ये भावे वा क्त उत्पद्यते तदा सापेक्षत्वाभावात्समासः, केन? `सुप्सुपा' इति, ततः `पुर्वादिनिः',`सपूर्वाच्च'इतीनिः प्रत्ययः। न च कटस्य क्तेनाभिधानं करोतेरुत्पद्यमानः क्तप्रत्ययः कर्मसामान्यमेवाह, विशेषकर्मसंबन्धात्तु तस्याभिधानम्, न चात्र तद्धितेनैकार्थीभूतस्य निष्कृष्य कटेन संबन्धः सम्भवति, क्रियया तु गुणभूतया कारकाणां सम्बन्धो भवति, यथा---कटं कृतवानिति। कृतपूर्वीशब्दश्चायं पूर्व कृतमनेत्यस्मिन्नर्थे व्युत्पादितः पूर्वं कृतवानित्यनेन समानार्थः संपद्यते, तत्र करोतिक्रियापेक्षमस्ति कटस्य कर्मत्वम्, अनभिहितं च तदिति कृद्ग्रहणे षष्ठी स्याद्। यत्र च निष्ठान्तेन शब्देन कर्तृकर्मणोः संबन्धस्तत्रैव निष्ठाश्रयः प्रतिषेधः, यथा----कटं कृतवान्, कृतः कटो देवदत्तेनेति, इह तु कृतस्य कटेन संबन्धो न भवतीत्युक्तमेव। अथ तु वस्तुतो निष्ठान्ते पदे धातुवाच्यक्रियापेक्षे ये कर्तृकर्मणी तयोः प्रतिषेधः, तथा सति नेदं कृद्ग्रहणस्य प्रयोजनम्, तेनैतदपि निरस्तम्।

असति कृद्ग्रहणे, कटं कारयति पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति णिच्प्रकृतेः पचेरर्थं प्रति कर्तृकर्मणोः षष्ठीप्रसङ्गः। सति तु कृद्ग्रहणे, णिचोऽकृत्त्वान्न भवतीति कथमिव निरस्तम् `न लोक' इत्यत्र नैवं ज्ञायते---लप्रकृतिभूतस्य धातोर्ये कर्तृकर्मणी इति, किं तर्हि? लान्ते पदे या क्रियोच्यते प्राधान्येन गुणभावेन वा, तत्र ये कर्तृकर्मणी तयोः षष्ठी न भवतीति तेनेदमप्यप्रयोजनम्।

अथ स्याद्--`नलोकाव्यय' इत्यत्राव्ययविशेषणार्थं कृद्ग्रहणम्, तेनोच्चैः कटानां स्रष्टेत्यत्राकृतोऽप्यव्ययस्य प्रयोगे निषेधाभाव इति, तदपि न; अव्ययेन कर्तृकर्मणी विशेषयिष्यामः----अव्ययस्य ये कर्तृकर्मणी तयोः षष्ठी नेति, न चाकृत उच्चैसः कर्तृकर्मणी सम्भवतः। इह तर्हि करोतीति कृदिति कृच्छब्देन कर्त्तोच्यते, तत्र कर्तृकर्मणोरित्येव षष्ठ्यामपि सिद्धायां पुनर्विधानं गुणभूतेऽति कर्त्तरि यथा स्यात्----भेदिकादेवदत्तस्य यज्ञदत्तस्य काष्ठानामिति, भिदेर्ण्यन्तात्पर्यायादिनाण्वुच्, अत्र ण्यर्थस्य प्राधान्यात्प्रयोजककर्त्ता प्रधानम्, प्रयोज्यकर्त्ता तु प्रकृत्यर्थस्य गुणभावाद्गुणभूत इति प्रधानेतरसन्निधौ प्रधानादेव स्यात्, कृद्ग्रहणादप्रधानादपि भवति, एतदपि नास्ति प्रयोजनम्; तृतीयावत् सिद्धम्, तद्यथा---पाचित ओदनो देवदत्तेन यज्ञदत्तेनेत्यादौ प्रधानाप्रधानयोर्द्वयोरपि कर्त्रोस्तृतीया भवति, तत्कस्य हेतोः? एकशब्दवाच्यत्वाभावेन विरोधाभावात् तथा षष्ठ्यपि भविष्यति।

इह तर्हि प्रयोजनम्, `उभयप्राप्तौ कर्मणि' इति बहुव्रीहिर्यथा स्याद्, अन्यथान्यपदार्थस्यानुपात्तत्वात्तत्पुरुषः स्यात्तत्र चानिष्टं वक्ष्यते। यद्येवम्, उत्तरत्रैव कृद्ग्रहणम् कर्त्तव्यम्, अथ वा---अनुपात्तेऽप्यन्यपदार्थे व्याख्यानाद् बहुव्रीहिर्भविष्यति, यथा---`एकाचो द्वे प्रथमस्य' इति, तदेतत्कृद्ग्रहणं चिन्त्यप्रयोजनम्। केचिदाहुः---इहैव तद्धितनिवृत्त्यर्थं कृद्ग्रहणमिति प्रजानातिति प्रज्ञः प्रज्ञ एव प्राज्ञः `प्रज्ञादिभ्यश्च'इति स्वार्थिकेऽणि कृते व्याकरणं प्राज्ञ इत्यत्र षष्ठी न भवति। ननु क्रियमाणेऽपि कृद्ग्रहणे कस्मादेवात्र न भवति, यावता भवत्येव कृतोऽत्र प्रयोगः,न ह्यत्रैतच्छक्यं वक्तुम्---प्रत्ययार्थेनैकार्थीभूतस्य कृदन्तस्य

निष्कृष्य व्याकरणेन संबन्धो न सम्भवतीति प्रत्ययस्य स्वार्थिकत्वेनार्थान्तराभावात्? नैष दोष;कृद्ग्रहणसामर्थ्यात्कृदन्तेनैव योगे षष्ठी विज्ञास्यते, इह तु कृता तद्धितेन चैकरूपः संबन्ध इति न भविष्यतीत्यलमतिक्षोदेन!
शेष इति निवृत्तमिति। तेनाप्राप्ता षष्ठी विधीयत इत्यस्याः समासो भवतीति कृद्योगा च षष्ठी समस्यत इति न वक्तव्यं भवति।।
उभयप्राप्तौ कर्मणि।। 2.3.66 ।।
उभयप्राप्तौ कर्मणि।। उभयशब्देन प्रकृतत्वात्कर्तृ कर्मणी संबध्येते। उभयप्राप्ताविति बहुव्रीहिरिति। न तत्पुरुषः। उभयोः कर्तृकर्मणोः षष्ठीप्राप्तौ सत्यामिति। अत्र प्रयोजनं वक्ष्यति---कर्मण्येवेति। विपरीतस्तु नियमो न भवति---उभयप्राप्तावेव कर्मणीति। एवं हि पूर्वसूत्रे कर्मग्रहणमनर्थकं स्याद्, अनेनैव विशिष्टविधानमाश्रयणीयं भावः। आश्चर्य इति। सकर्मकेभ्यो भावे कृति विहिते कर्मणि कर्त्तरि च षष्ठी प्राप्ता नियमेन कर्त्तुरपनीयते। प्राप्तिग्रहणाच्च प्राप्तिमात्रे नियम इति कर्तृकर्मणोः प्रयोगेऽपि कर्त्तरि तृतीया भवति, `अन्तर्धौ येनादर्शनमिच्छति' इति अत्र ह्यात्मन इति गम्यमानत्वादस्त्युभयोः प्राप्तिः। अत्र च `अनन्तरस्य विधिर्वा प्रतिषेधो वा' इति कर्तृकर्मणोरिति प्राप्तिर्नियम्यते, शेषषष्ठी तु कर्मर्यति भवत्येव। नियमस्य प्रयोजनं पक्षे तृतीयाश्रवणम्। कर्मापि यदा शेषत्वेन विवक्ष्यते तदा तत्रापि शेषषष्ठी भवत्येव। तस्याश्च `कर्मणि च' इति निषेधाभावात्समासेऽपि भवति। निषेधस्य तु प्रयोजनं कृत्स्वरो मा भूदिति। एतदपि सूचितम्---पूर्वेण षष्ठी प्राप्तौ नियम्यत इति। आश्चर्यमिदमित्येतावदेकं वाक्यम्, किं तदित्याह---ओदनरयेति। अत्र पाके ओदनस्य कर्मत्वम्, प्रादुर्भावे च ब्राह्मणानां कर्तृत्वमित्यनेकत्वात्कृदुभयप्राप्तिर्भवति भेदिकेति। पर्यायादिषु ण्वुच्। चिकीर्षेति। `अ प्रत्ययात्'। अत्रोभयत्रापि कर्त्तरि तृतीया न भवति। षष्ठी तु शेषविवक्षयापि सिद्ध्यति। समासोऽप्यत्र भवति---धर्मजिज्ञासा देवदत्तस्य, शिष्यस्याचार्यशुश्रूषेति `शेषे विभाषा' इति। तत्र यदा नियमेन कर्त्तरि तृतीया तदा `कर्मणि च' इति निषेधात्पाणिनिना सूत्रकृतिः, आचार्येण शब्दानुशासनमित्यसाधुः समासः; पाणिनेः सूत्रकृतिः, आचार्यस्य शब्दानुशासनमिति तु साधुः।।
क्तस्य च वर्तमाने।। 2.3.67 ।।
क्तस्य च वर्तमाने।। राज्ञां मत इति। `मतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तः। शेषविज्ञानादिति। उपसंख्यानं प्रत्याचष्टे, सदप्यत्र छात्त्रस्य कर्तृत्वमविवक्षायां तिरोधीयते, संबन्धित्वमात्रमेव तु विवक्षिष्यते, ततश्च न माषाणामश्नीयदितिवत्सिद्धा षष्ठीत्यर्थः। तथा चेति। उपसंख्याने त्वेतन्न सिद्ध्यतीति भावः।।
अधिकरणवाचिनश्च।। 2.3.68 ।।
अधिकरणवाचिनश्च।। तस्य च प्रयोगे षष्ठी विभक्तिर्भवतीति। यथासम्भवं यत्र कर्तैव सम्भवति तत्र कर्तरि--इदमेषामासितमिति, सकर्मकेभ्यस्त्वधिकरणे क्ते विहिते द्वयोरपि कर्तृकर्मणोरनभिहितन्वाद् द्वयोरपि षष्ठी भवति---इदमेषां भुक्तमोदनस्येति। उभयप्राप्तौ कर्मणीत्ययं तु नियमः `कर्तृकर्मणोः कृति' इत्यस्या एव प्राप्तेः। वाचिग्रहणं किम्? अधिकरण' इत्युच्यमाने क्तोपलक्षणं विज्ञायेत, ततश्चार्थान्तरवृत्तेरपि ध्रौव्यादेरुत्पन्नस्य क्तस्य प्रयोगे षष्ठी स्यात्; वाचिग्रहणे तु सति यदाधिकरणं कर्ति तदैव षष्ठी भवति, पदार्थान्तरे तदा कर्तरि तृतीया कर्मणि द्वितीया भवति---इहैभिरासितं ग्रामे गत इति; इह गत्यर्थे चातुश्शब्द्यं भवति--इदमेषां गतमित्यधिकरणे, इदमेते गता इति कर्तरि, इहैभिर्गतमिति नपुंसके भावे, कर्तृविवक्षायां इदमेषाङ्गतमिति तत्रैव शेषविवक्षायाम्।।
न लोकाव्ययनिष्ठाखलर्थतृनाम्।। 2.3.69 ।।
न लोकाव्ययनिष्ठाखलर्थतृनाम्।। जिघृक्षितरूपविनाशप्रसङ्गात् तृनामित्यत्र णत्वाभावः। उ उकेति। अनेनोकारप्रश्लषं दर्शयति। तत्र लश्चेति पूर्वद्वन्द्वे उकारस्य पूर्वनिपातः स्यात्, परनिपातेऽपि लवुकेति स्यात्; तस्मात्परयोर्द्वन्द्वं कृत्वा पश्चाल्लशब्दस्य द्वन्दः कार्यः, उकारेण च कृतो विशेषणात्तदन्तविधिः, व्यपदेशिवद्भावात्केवलस्यापि ग्रहणम्। शतृशानचाविति। तेन शानजर्थं तृन्निति प्रत्याहारो नाश्रयणीय इति भावः। किकिनौ चेति। ननु लग्रहणेन लकारास्तदादेशाश्च ग्रहीतुं युक्ताः---कटं कारयाञ्चकार, ओदनं पाचयति; किकिनोस्त्वयुक्तं ग्रहणम्, अलत्वादलादेशत्वाच्च, नैष दोषः; `किकिनौ लिट् च' इत्यनेन लिट्त्वातिदेशः क्रियते, न लिट्संज्ञा। तत्र `कारयाम्' `पचानः' इत्यादौ लिटि तदादेशे च दृष्टः प्रतिषेध किकिनोरपि भविष्यति। उदाहरणेषु सर्वत्र कारकषष्ठ्याः प्रतिषेधः। शेषषष्ठी तु भवत्येव---ब्राह्मणस्य कुर्वन्, ओदनस्य पचन्, अपां पेरुरसि, नरकस्य जिष्णवो गुणैः, तानि द्विषद्वीर्यनिराकरिष्णुरिति। आगामुकमिति। `लषपतपद' इतायदिनोकञ्, रक्षांसि वाराणसीं प्रत्यागमनशीलानि भवन्ति, शापादिमोक्षार्थमित्यर्थः। दास्याः कामुक इति। द्वितीया निवृत्त्यर्थ वचनम्, षष्ठी तु शेषविज्ञानादेव सिद्धा। पुरा सूर्यस्येति। `भावलक्षणे' इत्यादिना तोसुन्। विसृप इति। `सृपितृदोः कसुन्' `पूङ्यजोः शानन्' `ताच्छील्यवयोवचनशक्तिषु चानश्' `इङ्धार्योः शत्रकृच्छ्रिणि' इत्येतेषु `ल' इति नानुवर्त्तत इति स्थापयिष्यते, तेन लग्रहणादसिद्धिरिति मत्वाऽऽह---- तृन्निति प्रत्याहारग्रहणमिति।
द्विषः शतुर्वा वचनमिति। `द्विषोऽमित्रे' इति योऽयं शतृप्रत्ययः, तत्प्रयोगे विकल्पेन प्रतिषेधो वक्तव्य इत्यर्थः। प्रत्याख्यानं तु शेषविवक्षायां षष्ठ्यन्यत्र द्वितीयेति, सता च समासप्रतिषेधात्समासे कृत्स्वरार्थ कारकषष्ठी विधेयेत्यपि नास्ति।।
अकेनोर्भविष्यदाधमर्ण्ययोः।। 2.3.70 ।।
अकेनोर्भविष्यदाधमर्ण्ययोः।। अकस्य भविष्यति काले इनस्तु आधमर्ण्ये चेति। संख्यातानुदेशस्तु व्याख्यानान्न भवतीति भादः। ग्रामं गमीति। `भविष्यति गम्यादयः' ननुच नात्र षष्ठ्याः प्रसंगः, कथम्? गत्यर्थकर्मणीत्यत्रोक्तम्---`द्वितीयाग्रहरगं किम्? न चुतर्थ्येव विकल्प्येत, अपवादविषयेऽपि यथा स्याद्ग्रामस्य गन्ता' इति, सत्यम्; श्रौते तावत् प्रतिषेधे लभ्यमाने किं द्वितीयाग्रहणसामर्थ्याश्रयणेनेति मन्यते।।
कृत्यानां कर्तरि वा।। 2.3.71 ।।

कृत्यानां कर्तरि वा।। कर्त्तरोति किमिति। `तयोरेव कृत्यक्तखलर्थाः' इति वचनादकर्मकेभ्यो भावे सकर्मकेभ्यश्च कर्मणि कृत्यानां विधानात्कर्त्तुरेव तैरनभिधानं सम्भवतीति कर्तृकर्मणोर्द्वयोरधिकारेऽपि कर्तर्येव षष्ठी भविष्यतीति प्रश्नः। गेय इति। `भव्यगेय' इत्यादिना कर्त्तरि यत्प्रत्ययः। साम्नामिति। कर्मणि नित्यमेव षष्ठी भवति।

उभयप्राप्तौ कृत्य इति। उभयो कर्तृकर्मणोः प्राप्तिर्यस्मिन् कृत्ये तत्र द्वयोरपि कर्तृकर्मणोः षष्ठी न भवतीत्यर्थः। क्रष्टव्येति। कृषेद्विकर्मकत्वात्प्रधाने कर्मणि कृत्यप्रत्ययः, न त्वप्रधान इति तस्मिन् कर्मणि कर्तरि च प्राप्ता षष्ठी न भवति। एतच्चयोगविभागाल्लभ्यते, कथम्? कृत्यानामित्येको योगः, अत्रोभयप्राप्तौ नेति च वर्तते, युगपदुभयप्राप्तीनां कृत्यानां प्रयोगे षष्ठी न भवतीत्यर्थः; ततः कर्तरि वा, अत्र षष्ठीत्येवानुवर्तते, अन्यत्सर्वं निवृत्तम्।।

तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्।। 2.3.72 ।।

तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्।। शेषविषये विधानादिति। शेषइत्यधिक्रियत इति भावः। बहुवचननिर्देशादेव स्वरूपग्रहणाभावे सिद्धेऽर्थग्रहणं पदान्तरनिरपेक्षा ये तुल्यानाहुस्तत्परिग्रहार्थम्। तेन द्योतका इवादयो निवर्त्तिता भवन्ति---गौरिव गवयः, यथा गौस्तथा गवय इति। तुला देवदत्तस्येति। तुलोपमाशब्दौ कर्मसाधनौ तुल्यार्थौ तत्र प्रतिषेध्या तृतीया, षष्ठी तु भवत्येव। इह `स्फुटोपमं भूतिसितेन शम्भुना' इति श्म्भुना स्फुटोपमा यस्येत्युपमाशब्देनापि योगे करणे तृतीया भवति, भावसाधनत्वात्तस्य, यथा---उपमीयतेऽनेनेत्यादौ; इतरथा हि तृतीयानुकृष्येतेति तस्यानन्तरसूत्रे श्रुतत्वाद् अन्यतरस्यांग्रहणे तु सति तस्य प्रयोजनान्तराभावात्तदेव चकारेणानुकृष्यते।।

चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः।। 2.3.73 ।।

चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः।। आयुष्यादीनां सुखपर्यन्तानां द्वन्द्वं कृत्वार्थशब्देन बहुव्रीहीविधानादर्थशब्देनायुष्यादिभिः प्रत्येकं सम्बन्धः। तत्र मद्रभद्रशब्दयोः पर्यायत्वात्सूत्रे भद्रशब्दो न पठितव्य इति केचिदाहुः। अन्ये त्वर्थशब्दोऽपि पृथगेव निमित्तम्, व्याख्यानाच्च सर्वत्रार्थग्रहणं वर्णयन्ति। वृत्तावपि क्वचिदर्थशब्दोऽप्युदाह्रियते।

हितं देवदत्तस्येति। `हितयोगे चतुर्थी वक्तव्या' इत्यस्यानाशिषि चरितार्थत्वादाशिषि हितयोगेऽप्यनेन विकल्पेन भाव्यम्; अन्यथाऽत्र हितग्रहणमनर्थकमिति मन्यते।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्या

द्वितीयाध्यायस्य तृतीयः पादः।।

2.4

काशिकावृत्तौ< पदमञ्जरी>

अथ द्वितीयाध्याये चतुर्थः पादः

द्विगुरेकवचनम्।। 2.4.1 ।।

द्विगुरेकवचनम्।। अत्र यदि पारिभाषिकमेकवचनं गृह्येतानुप्रयोगत एकवचनं न स्यान्---पञ्चपूलीयं शोभनेति, तस्याद्विगुत्वाद् `द्विगोः' इति पञ्चम्या च निर्द्देशः स्यात्, अतोऽन्वर्थस्यैकवचनस्येदं ग्रहणमिति मत्वाऽऽह---एकस्य वचनमेकवचनमिति। वक्तीति वचनम्, `कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट्, एकस्यार्थस्य वचनमेकवचनमिति कर्मणि षष्ठ्याः समासः। तत्र चैकस्यार्थस्य वाचर्क भवतीति सामान्यनोपक्रमः, पश्चात्किं तदित्यपेक्षायां द्विगुरित्यस्य पुंल्लिङ्गस्य सम्बन्ध इत्येकवचनमिति नपुंसकोपपत्तिः। एतदेव व्यनक्ति---एकस्यार्थस्येति। एवं च द्विगुरेकार्थस्य वाचको भवति। यदि द्विग्वर्थ एको भवति, न च वस्तुतोऽनेकार्थस्य वचनशतेनाप्येकार्थत्वामापादयितुं शक्यमिति सामर्थ्याददतिदेशो विज्ञायते, तदाह--तदनेन प्रकारेणेति। तदिति वाक्योपन्यासे किमुक्तं भवतीत्याहद्विग्वर्थ एकवद्भवतीति। समाहारद्विगोश्चेदं ग्रहणमिति। तद्धितार्थे यो द्विगुस्तस्यैकवद्भावो मा भूदित्येवमर्थ पञ्चभइर्गोभिः क्रीताः पञ्चगवः पटा इति। अथ क्रियमाणेऽपि समाहारग्रहणे इह कस्मान्न भवति---पञ्चपूली च पञ्चपूली च पञ्चपूल्य इति, शिष्यमाणस्यद्विगुत्वात्तदर्थस्यैकवद्भावः प्राप्नोति? न वा; बहिरङ्गत्वाद, बहिरङ्गोऽयं द्विग्वर्थः सत्येव द्विगावेकशेषात्प्रगभावादेकशेषे सति पश्चादुपजायमान्तवादन्तरङ्गे प्राथमकल्पिके द्विग्वर्थे चरितार्थ एकवद्भावोऽत्र न भविष्यति। यद्येवम्, पञ्चगवः पटा इत्यत्राप्येवमेव भविष्यति? सत्यम्; यदा पटाः प्रत्येकं पञ्चभिर्गोभिः क्रिताः, यदा तु बहवः पटाः संहताः पञ्चभिर्गोभिः क्रियन्ते तदाऽयमेकशेषस्याविषयः। यदि तर्हि समाहारद्विगोर्ग्रहणम्, नार्थोऽनेन, कथम्? समाहारः= समूहः, तस्यैकत्वाद्यूथं वनमित्यादिवदेकवचनं भविष्यति।

यदि तर्हि समाह्रियत इति समाहार इति कर्मसाधनः समाहारशब्दः, तदाऽपेक्षितपरस्पराः पञ्चपूलाः समासार्थ इति बहुवचनप्रसङ्गेऽतिदेश आरभ्यते, तदाह---प्रत्यधिकरणं वचनोत्पत्तेः संख्यासामानाधिकरण्याच्च द्विगोरेकवचनविधानमिति। अधिकरणं द्रव्यम्, संख्यावाची पञ्चादिशब्दः, यत्संख्याविशिष्टं द्रव्यमभिधीयते तदभिधानयोग्यं वचनमुत्पद्यते। पञ्चपूलीशब्देन पञ्चपूलाः समाह्रियमाणा उच्यन्ते, अतः समासार्थस्य पञ्चादिभिः सामानाधिकरण्याद् द्विवचनबहुवचनप्रसङ्गे एकवचनं विधीयत इत्यर्थः। संख्यासामानाधिकरण्यादित्यनेन कर्मसाधनत्वं समाहारशब्दस्य दर्शयति, भावसाधने तु

वैयदिकरण्यंपञ्चानां पूलानाम्। न वा समाहारैकत्वादिति, अयमर्थः----तिरोहितावयवभेदः समूहरूपः समाहारो द्विग्वर्थस्तस्यैकत्वाद्वनादिवदेकवचनसिद्धेर्नात्र सूत्रेण प्रयोजनम्। अवश्यं च तद् भावसाधनः समाहार आश्रयणीयः अन्यथा पञ्चानां खट्वानां समाहारः पञ्चखट्वीत्यत्र वा टाबन्त इति स्त्रीत्वपक्षेखट्वाशब्दस्यानुपसर्जनत्वात् ह्रस्वो न स्यात्। अनुपसर्जनत्वं चाप्रथमानिर्दिष्टत्वादनेकविभक्तित्वाच्च। भावसाधने तु पञ्चानां खट्वानां समाहारः, समाहारं समाहारेणेति समासार्थस्य नानाविभक्तियोगेऽपि खट्वाशब्दस्य नित्यं षष्ठ्यन्तत्वात् `एक विभक्ति च' इत्युपसर्जनत्वाद् ह्रस्वत्वं सिध्यति, एकवचनमित्येतदुत्तरार्थं कर्तव्यमेव। पञ्चपूलीति। `अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते' इति स्त्रीलिङ्गत्वाद् `द्विगोः' इति ङीप्।।

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्।। 2.4.2 ।।

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्।। इह यस्य द्वन्द्वस्य कश्चिदवयवः प्राण्यङ्गवाची, कश्चित्तूर्याङ्गवाची, कश्चित्सेनाङ्गवाची; यथा---पाणिमार्दङ्गिकाश्वारोहा इति, स व्यतिकीर्णावयवोऽपि प्राण्यङ्गादीनां द्वन्द्वी भवत्येवेत्येकवद्भावः प्राप्नोति, तत्राह---अङ्गशब्दस्येत्यादि। ननु पूर्वपक्षेऽपि प्रत्येकमेव परिसमाप्तिरङ्गशब्दस्य, न हिप्राणितूर्यसेनानामेकमङ्गं सम्भवति? एवं तर्ह्यङ्गानामेव रूपस्य बहुवचनान्तस्य सतोऽङ्गशब्दस्य प्रत्येकं सम्बन्धः, न तु प्रत्येकपरिसमाप्तस्य पश्चाद्बहुवचनसम्बन्धः। त्रीणि वाक्यानि संपद्यन्त इति। सूत्रं तु तेषामेव ग्रहणकवाक्यमिति भावः। तत्र प्रथमेन वाक्येन प्राण्यङ्गानां प्राण्यङ्गयोरेव द्वन्द्वः कृतस्तस्यैकवद्भावो विधीयते, द्वितीयेन तूर्याङ्गानां तूर्याङ्गैरेव, तृतीयेन सेनाङ्गानां सेनाङ्गैरेवेति न संकरप्रसङ्गः। तथा तूर्याङ्गानामिति द्वन्द्व एकवद्भवतीत्यपेक्षते, अत्राङ्गब्द उपकारकवचनः पूर्वत्रोत्तरत्र चावयववचनः सेनाङ्गानां चेति पूर्ववदपेक्षा। पाणिपादमिति। अत्र `जातिरप्राणिनाम्' इत्येव सिद्धे व्यतिकरनिरासार्थं वचनम्। मार्दङ्गिकपाणविकमिति। `शिल्पम्' इति ठक्। वीणावादकेति। `नित्यं क्रीडाजीविकयोः' इति समासः, विपञ्ची परिवादिनी, तज्जीविकः= परिवादकः। पणवमृदङ्गमित्यादौ तु `जातिरप्राणिनाम्' इत्येव सिद्धम्। रथिकाश्वारोहमिति। कथं रथवाजिपत्तिकरिणीसमाकुलमिति, यावतैकवद्भावे सति नपुंसकह्रस्वत्वेन भाव्यम्? निरङ्कुशाः कवयः। रथवाजिपत्तिसहिताः करिण्यो रथवाजिपत्तिकरिण्यस्ताभिः समाकुलमिति वा समर्थनीयम्।

द्वन्द्वश्चेत्यारभ्य `विभाषा समीपे' इत्यन्तस्य प्रकरणस्यानारम्भणीयतां शङ्कतेइतरेतरयोग इत्यादि। सिद्धमेवैकवचनमिति। ततश्चानारम्भणीयं प्रकरणमिति भावः। परिहरति--इदं त्विति। कः पुनरसौ विषयविभाग इत्याह---प्राण्यङ्गादीनामिति। कथं पुनः प्राण्याङ्गादीनां द्वन्द्व एकवचनो भवतीत्यस्य वचनस्य प्राण्यङ्गादीनां समाहार एवेत्यर्थो भवतीति? वचनव्यक्तिभेदात्। एवं ह्यत्र वचनं व्यज्यते--य एकवचनो द्वन्द्वः स एषां भवतीति, न पुनः प्राण्यङ्गादीनां यो द्वन्द्व इत्यनूद्य तस्यैकवचनता विधीयते। एकवचनान्तश्च द्वन्द्वः समाहारद्वन्द्वः, स प्राण्यङ्गदीनामपि `चार्थे द्वन्द्वः' इत्येव सिद्ध इति स एवैषामिति नियमः संपद्यते; दधिपय आदिष्विपि येषां ब्रह्मप्रजापत्यादीनामनेन प्रकरणेन नियमस्याप्राप्तिस्तेषां तावत् `चार्थे द्वन्द्वः' इत्यनेन प्राप्तो द्वन्द्वः प्रतिषिध्यते। य एकवचनो द्वन्द्वः स एषां न भवतीति वचनव्यक्त्या श्रयेण येषामपि दधिपयसी इत्यादीनां `जातिरप्राणिनाम्' इति नियमस्य प्राप्तिस्तेषाम् `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति यद्यपि नियमस्य प्रतिषेधो युक्तः, तथापि ब्रह्मप्रजापत्यादिभिः साहचर्यादेकवचनो द्वन्द्व इत्येतावन्मात्रस्यापेक्षणात्समाहारद्वन्द्व एव प्रतिषिध्यते, न नियमः। वृक्षादिविभाषाप्रयोजनं तु तत्रैव वक्ष्यामः।

अथैवं कस्मान्न विज्ञायते----इतरेतरयोगपक्षेऽप्राप्त एकवद्भावो विधीयत इति? उच्यते--यदीतरेतरयोगविहितद्वन्द्वस्यैकवद्भावो विधीयेत, `द्वन्द्वाच्चुदषहान्त' इत्यादिना समाहारनिबन्धनं कार्थ न स्याद्। दधिपयआदिषु तु यस्य द्वन्द्वस्यैकवचनप्राप्तिस्तस्य प्रतिषिध्येतेति समाहारद्वन्द्वस्यैकवचनतायां प्रतिषिद्धायामपि द्वित्वबहुत्वाभावाद् द्विवचनबहुवचने न स्यातामतो नियम एवाङ्गीकर्त्तव्यः। अत्र च व्याख्यानमेव शरणम्। अथ नियमोऽपि भवन्नेवमेव कस्माद्भावति---प्राण्यङ्गादीनां समाहार एवेति? न पुनः-----प्राण्यङ्गादीनामेव समाहार इति? उच्यते---एवं हि विज्ञायमाने दधिपयआदिषु येषामनेन प्रकरणेन नियमो न प्राप्नोति तेषु प्रतिषेधोऽनर्थकः स्यात् तिष्यपुनर्वस्वोरिति बुवचनग्रहणमनर्थकं स्यात्। तद्धितसमाहारद्वन्द्वपक्षे तिष्यपुनर्वस्विदमित्यत्रैकवचनस्य प्रसङ्गे द्विवचनं मा भूदित्येवमर्थम् यदि च त्वदुक्तो नियमः स्यात्तिष्यपुनर्वस्वोरत्र प्रकरणेऽसङ्कीर्त्तितयोः समाहारद्वन्द्वाभावादनर्थकं तत्स्यात्, अतो वृत्तिकारोक्तमेव नियमस्वरूपमिति निरवद्यम्।।

अनुवादे चरणानाम्।। 2.4.3 ।।

अनुवादे चरणानाम्।। चरणसब्दः कठकालापादिषु शाखाभेदेषु मुख्यः, तदध्यायिषु पुरुषेषु गौणः। उभयेषां चैषां `गोत्रञ्च चरणैः सह' इति चातिसंज्ञा, तत्र शाखाभेदवाचिनः `जातिरप्राणिनाम्' इत्येकवद्भावस्य सिद्धत्वाद् गौणोऽपि पुरुषवृत्तिरेव गृहयत इत्याह---चरणशब्दः शाखानिमित्तक इति। शाखाध्ययननिमित्तक इत्यर्थः। गौण इति क्वचित्पठ्यते, क्वचिन्न। प्रमाणान्तरावगतस्येति। शब्दादन्यत्प्रमाणं प्रमाणान्तरम्= प्रत्यक्षादि। सङ्कीर्त्तिनमात्रमिति। मात्रशब्दोऽवगतिव्युदासाय। नन्वर्थप्रतिपादनाय प्रयोगः, स चेदर्थुः प्रमाणान्तरेणावगतः, किमिति शब्दः प्रयुज्यते? कार्यान्तरविधानार्थम्। यदा हि कठकालापेषूदितेषु आवाभ्यां तत्र गन्तव्यमिति संवादः कृतो भवति, स च विस्मृत्योदास्ते तदा तं प्रतीदमुच्यते---ननूदस्थात्कण्ठकालापं किमास्यते इति। कठेन प्रोक्तमधीयते कठाः, वैशम्पायनान्तेवासित्वाण्णिनिः, `कठचरकाल्लुक्', कलापिशब्दात् `कलापिनोऽण', नान्तस्य टिलोपे सब्रह्मचारीत्यादिना टिलोपः, उभयत्राध्येत्रणो लुक्। एतेन कौथुमो व्याख्यातः। यदा तु प्रथमत एव शब्दोपदेश इति। प्रमाणान्तरेणानवगतस्य शब्देनाद्यं प्रत्यायनमित्यर्थः। उदगुरिति। `आतः' इति झेर्जुस्, `उस्यपदान्तात्' इति पररूपत्वम्। `अद्यतनी' इति लुङः पूर्वाचार्यसंज्ञा। अनन्दिषरिति। `टुनदि समृद्धौ',`सिजभ्यस्त' इति जुस्।

अध्वर्युक्रतुरनपुंसकम्।। 2.4.4 ।।

अध्वर्युक्रतुरनपुंसकम्।। अध्वर्युशब्द ऋत्विग्विशेषे प्रसिद्धः, न च तेन क्रतोर्विशेषणमुपपद्यते, न हि सोऽस्ति क्रतुर्यत्राध्वर्योरनन्वयः, नापि सोऽस्ति यत्राध्वर्योरेवान्वय इति मुख्यार्थासम्भवादौपचारिकग्रहणमित्याह---अध्वर्युवेद इति। यजुर्वेद इत्यर्थः। तत्र ह्याध्वर्यवं विधीयते। कर्मस्वरूपस्येतिकर्त्तव्यतायाः। फलस्य चोपदेशः===विधानम्। अध्वर्युक्रतुवाचिनां शब्दानामनपुंसकलिङ्गानामिति। कथं तर्हि सूत्रे सामानाधिकरण्यमित्याह---अध्वर्युक्रतुरिति। तादृशावयवत्वाद् द्वन्द्व एव तथोक्त इत्यर्थः। यदि पुनरनपुंसकमित्यनेन मुख्यया वृत्त्या द्वन्द्व एवोच्येत तदा `स नपुंसकम्' इत्यस्यायमपवादो विज्ञायेत। न वाऽबाधेनोपपत्तौ सत्यां बाधो न्याय्यः। अर्कश्चाश्वमेधश्च अर्काश्वमेधम्। सायाह्नश्चातिरात्रश्च सायाह्नातिरात्रम्।
इषुवज्राविति। सामवेदे एषां विधानम्। राजसूयवाजपेयशब्दावर्द्धर्चादिषु पठितौ, ततस्तौ नपुंसकलिङ्गौ प्रत्युदाहरणम्।।
अध्ययनतोऽविप्रकृष्टाख्यानाम्।। 2.4.5 ।।
अध्ययनतोऽविप्रकृष्टाख्यानाम्।। आख्यायतेऽनेनेत्याख्येति शब्दमात्रमिहाख्याशब्देनोच्यते, न रूढिशब्द एव। असंदेहार्थं विप्रकृष्टाख्यानामध्ययनत इत्यकरणादविप्रकृष्टेति पदच्छेदः। आख्यानञ्च न स्वरूपेणाविप्रकर्षः, किन्तु प्रवृत्तिनिमित्तद्वारेण, तच्चेहाध्ययनम्, तदाह---अध्ययनत इति। अधीतिः=अध्ययनम्, अध्ययनेनाध्ययनतः, आद्यादित्वात्तसिः, प्रवृत्तिनिमित्तभूतस्याध्ययनस्याविप्रकृष्टत्वात्तद्द्वारेणाविप्रकृष्टा आख्या येषां तेऽध्ययनतोऽविप्रकृष्टाख्याः। एतदेवाह---अध्ययनेन निमित्तेनेत्यादि। पदकक्रमकमिति। पदान्यधीते पदकः, `क्रमादिभ्यो वुन्,' एवं क्रमकः। वृत्तिः= संहिता, तामधीते वार्त्तिकः, उक्थादित्वाट् ठक्, अत्र प्रवृत्तिनिमित्तस्याध्ययनस्याविप्रकर्षं दर्शयति---संपाठ इति। संपाठ इति। संपठनं संपाठः, अध्ययनमित्यर्थः। प्रत्यासन्न इति। पदान्यधीत्य क्रमोऽध्येतव्य इति कृत्वा। एवं क्रमकवार्तिकमित्यत्रापि नानधोत्य संहितां क्रमोऽध्येतुं शक्य इति प्रत्यासत्तिर्विज्ञेया।।
जातिरप्राणिनाम्।। 2.4.6 ।।
जातिरप्राणिनाम्।। जातिवाच्यवयवत्वाज्जातिर्द्वन्द्व इति गौणो निर्द्देशः। आराशस्त्रीति। आरा=प्रतोदः। धानाशष्कुलीति। षण्णां रसानां कुलं शष्कुली, गौरादिपाठाद्रूपसिद्धिः। नन्दकपाञ्चजन्याविति। सञ्ज्ञाशब्दावेतौ, `खड्गोऽस्यनन्दकः, शङ्खः पाञ्चजन्यः प्रकीर्त्तितः।
जातिपरत्वे चेति। जातिप्राधान्ये इत्यर्थः। न नियतद्रव्यविवक्षायामिति। यदा क्वचिद्देशादौ नियतानां द्रव्यविशेषाणां विवक्षा तदा जातिशब्दत्वेऽप्येकवद्भावो न भवतीत्यर्थः। बदरामलकानीति। फलजातिवाचिनावेतौ।।
विशिष्टलिङ्गो नदी देशोऽग्रामाः।। 2.4.7 ।।
विशिष्टलिङ्गो नदी देशोऽग्रामाः।। विशिष्टलिङ्गानामित्यस्य विवरणम्---भिन्नलिङ्गानामिति। विपूर्वः शिषिर्भिदिना समानार्थः। तथा च भेदक विशेषणं भेद्यं विशेष्यमित्युच्यते। `क्तेन नञ्विशिष्टेन' इत्यत्रापि भेदद्वारेणैवाधिक्यमर्थो व्याख्यातः---यस्य हि नञ् भेदकः स नञाधिको भवति। नदीवाचिनामित्यादि। कथं तर्हि सूत्रे विशिष्टलिङ्गादिशब्दानां द्वन्द्वेन सामानाधिकरण्यमित्याह---नद्यवयव इत्यादिना। अग्रामावयवोऽग्राम इत्यपि द्रष्टव्यम्। अग्रामा इति चैकवचनस्थाने बहुवचनम्। असमासनिर्देश एवायमिति। समासे हि व्यतिकीर्णावयो द्वन्द्व एकवत्स्यात्। गङ्गाकुरुक्षेत्रे इति समासो हि भवन्नितरेतरयोगे चेद् द्विवचनप्रसङ्गः, समाहारे चेन्नपुंसकत्वप्रसङ्ग इति भावः। उध्यैरावतीति। `उज्झ उत्सर्गे', `भिद्योध्यौ नदे'। देशः खल्वपीति। उदाह्रियत इति शेषः जाम्बवशालूकिन्याविति। जाम्बवं नगरम्, शालूकिनी ग्रामः, तत्रोभयतश्च ग्रामाणामिति प्रतिषेध एव भवति। ग्रामोभयावयवस्तु द्वन्द्वो नोदाहृतः। जनपदो हि देश इति। जना यत्र सञ्चरन्ति स देश इत्यर्थः। अवश्यं जनपदो देश इत्यङ्गीकर्त्तव्यमित्याह---तथा चेति। ग्रामे नाध्येयम्।
अभक्ष्या ग्रामकुक्कुटा इत्यादौ ग्रामग्रहणेन नगरमपि गृह्यते, तद्वदिहापिनगरावयवस्यापि द्वन्द्वस्यात्र प्रतिषेधः स्यात्, ज्ञापकात्सिद्धम्, यदयम् `प्राचां ग्रामनगरावयवस्यापि द्वन्द्वस्यात्र प्रतिषेधः स्यात्, ज्ञापकात्सिद्धम्, `प्राचां ग्रामनगराणाम्' इति ग्रामग्रहणे नगरग्रहणं करोति, तज्ज्ञापयति----इह शास्त्रे ग्रामग्रहणे न नगरं गृह्यत इति? नैतत्सुष्ठूच्यते, वक्ष्यति हि तत्र `ग्रामत्वादेव सिद्धे नगरग्रहणं प्रवृत्तिभेदज्ञापनार्थम्, ग्रामग्रहणमङ्गविशेषणम्----पूर्वैषुकामशमी, नगरग्रहणं तूत्तरपदविशेषणम्---पूर्वपाटलिपुत्रकः' इति, वाहीकग्रामेभ्यश्च उदीच्यग्रामाच्चेत्यादौ ग्रामग्रहणेन नगरग्रहणं न स्यात्तस्मादाह---अग्राम इत्यत्र नगरप्रतिषेध इति। ग्रामाश्रयस्य प्रतिषेधस्य प्रतिषेध इत्यर्थः।
उभयतश्चेति। ग्रामनगरात्मके उभयस्मिन्सति ग्रामाश्रयः प्रतिषेध एव वक्तव्यः, न पुनर्नगराश्रयः प्रतिषेध इत्यर्थः।।
क्षुद्रजन्तवः।। 2.4.8 ।।
क्षुद्रजन्तवः।। क्षुद्रशब्दोऽयमस्त्येव कृपणे---क्षुद्रोऽयं पुरुष इति, अस्त्यङ्गहोने शीलहीने च---`क्षुद्राभ्यो वा' इति, अस्ति परिमाणापचये---क्षुद्रास्तण्डुला इति; इह तु जन्तुशब्दसमभिव्याहारादन्तिमस्य ग्रहणमित्याह--अपचितपरिमाणः क्षुद्र इति। अल्पशरीर इत्यर्थः।
अपचयस्यापेक्षिकत्वादनवस्था मा भूदिति स्मृतिमुपन्यस्यति---क्षुद्रजन्तुरनस्थिः स्यादिति। यस्यास्थीति न विद्यन्ते सोऽनस्थिः। स्मृत्यन्तरमाह---अथ वेति। क्षोत्तव्यः क्षुद्रः, अर्हार्थेऽपि `स्फायीतञ्चि' इत्यादिना रक् प्रत्ययः, यः क्षुद्यमानोऽपि न म्रियते, यथा---जलूका, स क्षुद्रजन्तुः; यस्तु म्रियते स पापनिमित्तत्वान्न क्षोदार्हः। क्षुद्र एव य इति व्युत्पत्तिवशादेवायं प्रसिद्ध इत्यर्थः। स्मृत्यन्तरमाह----शतं वेति। प्रसृतिरञ्जलेरर्द्धं येषां शतं प्रसृतौ भवति, शतेनार्द्धाञ्जलिः पूर्यत इत्यर्थः। स्मृत्यन्तरमाह---केचिदा नकुलादपीति। नकुलपर्यन्ताः क्षुद्रजन्तव इत्यर्थः।
इतरासां तद्विरोधादिति। अनस्थादिभिः स्मृतिभिर्ये प्रयोगा उपदर्शिता न ते सर्वे ताभिः संगृह्यन्त इत्ययमत्र विरोधः।।
येषां च विरोधः शाश्वतिकः।। 2.4.9 ।।
येषां च विरोधः शाश्वतिकः।। विरोधो वैरमिति। न सहानवस्थानादिः, छायातपावित्यादावपि प्रसङ्गात्। पूर्वसूत्राच्चानुवृत्तेन जन्तुग्रहणेन विरोधस्य

विशेषणात्। जन्तूनां हि विरोधो वैरमेव भवति। शाश्वतिको नित्य इति। शश्वदिति त्रैकाल्यमाह। `तत्र भवाः' इति कालाट्ठञि तान्तादपि निपातनादिकादेशः, अव्ययानां भमात्रे टिलोपाभावश्च। गोपालस्यापत्यानि गौपालयः, अत्र कादाचित्को विरोधः। चकारः पुनारित्यादि। पशुशकुनिद्वन्द्वावकाशः----महाजोरभ्रं महाजोरभ्राः, हंसचक्रवाकं हंसचक्रवाकाः; विरोधिनामेकवद्भावस्यावकाशः---श्रमणब्राह्मणम्, मार्जारमूषिकम्; अश्वमहिषं काकोलूकमित्यत्रोभयप्रसङ्गे परत्वात्पशुशकुनिविभाषा स्यात्, चकारादयमेव भवति।।

शूद्राणामनिरवसितानाम्।। 2.4.10 ।।

शूद्राणामनिरवसितानाम्।। शूद्रशब्दोऽत्र त्रैवर्णिकव्यतिरिक्तजातिमात्रवचनः, न वृषलपर्यायः, निरवसितप्रतिषेधात्। निरवसित इति। निरवपूर्वात्स्यतेः कर्मणिक्तः। तत्र प्रकृत्यर्थमाह----निरवसानं बहिष्करणमिति। अनेकार्थत्वाद्धातूनामुपसर्गवशाद्वेति भावः। पात्राद्बहिष्करणमिह विवक्षितमित्याह---यैरिति। संस्कारेणापीति। `भस्मना शुध्यते कांस्यम्' इत्यादिना स्मृतिकारैरुक्तेन न शुध्यति, तेन तत्र भोक्तुं न लभन्त इति ततो बहिष्कृता भवन्ति।।

गवाश्वप्रभृतीति च।। 2.4.11 ।।

गवाश्वप्रभृतीति च।। द्वन्द्वरूपाणीति अन्वयात्प्रभृतीनीति नपुंसकोपपत्तिः। गवाश्वप्रभृतीनि कृतैकवद्भावान्येव पठ्यन्ते, तेषामनेन साधुत्वमात्रं विधीयते, न त्वेकवद्भाव इत्याह---गवाश्वप्रभृतीनीति। गवाश्वादीनां चतुर्णाम्पशुद्वन्द्वे विभा षायां प्राप्तायां वचनम्। एवमुष्ट्रखरम्, उष्ट्रशशमिति। दर्भशरादीनां तृणोलपपर्यन्तानां तृणद्वन्द्वे विभाषायां प्राप्तायां दासीदासादीनाम् `पुमान्स्त्रिया' इत्येकशेषाभावोऽपि निपातनात्। शाटीपटीकमित्यादीनामप्राणिजातिवचनानामबहुप्रकृत्यर्थः पाठः। अन्येषां कुब्जवामनादीनामप्राप्ते वचनम्। यथोच्चारितं द्वन्द्ववृत्तमिति। गणे यादृशाः कृतावङादेशाः पठितास्तादृशानामेव द्वन्द्ववृत्तं द्वन्द्वकार्यमेकवद्भावलक्षणं भवति। रूपान्तरेष्विति। `अवङ् स्फोटायनस्य' इति विकल्पितत्वाद्यदा नास्ति तदेत्यर्थः। एतेन गणपाठे रूपमेषां विवक्षितम्, न पूर्वोत्तरपदनिर्देशमात्रे तात्पर्यमित्युक्तं भवति।।

विभाषा वृज्ञमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडपूर्वापराधरोत्तराणाम्।। 2.4.12 ।।

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडपूर्वापराधरोत्तरणाम्।। अत्र वृभादिभिः प्रत्येकं द्वन्द्वे विशेष्यते। न चैको वृक्षशब्दो द्वन्द्वः, न च द्वयोः सहप्रयोगः, एकशेषात्। न च पर्यायाणामपि सहयोगः, विरूपाणामपि समानार्थानाम्' एकशेषवचनात्, नापि विशेषेण सहप्रयोगः----वृक्षश्च धवश्चेति, वृक्षशब्देनैवाशेषविशेषाक्षेपाद्धवादिशब्दप्रयोगस्य निष्फलत्वात्। कथं तर्हि `गोबलीवर्दौ' इत्यादौ सामान्यविशेषयोः सह प्रयोगः? बलीवर्दशब्दसंनिधौ गोशब्दस्य स्त्रीगवीष्वेव वृत्तेर्द्वयोरपि विशेषवचनत्वादिति चेद्, इहापि तर्हि धवपदसंनिधौ वृक्षशब्दस्य तद्व्यतिरिक्तविषयतया द्वन्द्वप्रसङ्गः? किं च वाक्येऽपि कथं सहप्रयोगः----ब्राह्मणा आगता वसिष्ठोऽप्यागत इति ? प्रादान्यख्यापनार्थमुक्तार्थस्यापि प्रयोग इति चेद्, द्वन्द्वेऽपि तर्हि प्राप्नोति। तस्मानदनभिधानमेवाश्रयणीयम्, न हि वृक्षधवमिति लोकेऽभिधानमस्ति, अतो वृक्षविशेषवाचिनां ग्राहणम्। एवं मृगादिष्वपि द्रष्टव्यम्। इत्येतेषां द्वन्द्व इति। एतेषामित्येकापि षष्ठी विषयभेदाद्भिद्यते---वृक्षादीञ्छकुनिपर्यन्तान्प्रत्यवयवषष्ठी, अश्ववडवादीन् प्रति निर्द्धारणषष्ठी। येऽत्राप्राणिनस्तेषां `जातिरप्राणिनाम्' इति नित्यं समाहारद्वन्द्वे प्राप्ते उभयत्र विधीयते । यो विभाषाप्राप्तैकवचनो द्वन्द्वः स एषां भवतीति वचनव्यक्त्याश्रयणेन तेषामेव वृक्षादीनामन्यैः सह द्वन्द्वे यथाप्राप्तं नित्यो विकल्पितो वा एकवद्भावो भवति----व्रीहिकुशप्लक्षमिति, `जातिरप्राणिनाम्' इति नित्यः, प्लक्षशब्दस्पर्शा इत्यत्राद्रव्यवाचित्वात्`जातिरप्राणिनाम्' इत्यस्याप्रवृत्तौ `चार्थे द्वन्द्वः' इत्युभयत्र प्राप्तो भवति। पशुग्रहणं हस्त्यश्वादिषु परत्वात् सेनाङ्गलक्षणस्य नित्यविधेर्बाधनार्थम्।

मृगशकुनिग्रहणं किमर्थम्, न ह्येतेषामनेन प्रकरणेन नित्य एकवद्भावः प्राप्तः, यद्बाधनाय विकल्पोऽभ्यनुज्ञायते, अन्यत्र प्राप्त्यभावादेषामुभयत्रैव द्वन्द्व इति नियमो न सम्भवति? अथैषामेवोभयत्र द्वन्द्व इति नियमः स्यात्, क्व तर्ह्येषां स्यात्? क्वचिदिति चेत्, यद्येवम्, `चार्थे द्वन्द्वः' इति सामान्यलक्षणमनवकाशस्यात्, विषिष्टविधानमेव तदानीमाश्रयणीयं स्यात् प्राण्यङ्गादीनां समाहारे दधिपयआदीनामितरेतरयोगे वृक्षादीनामुभयत्रेति? अथैषामेवोभयत्रेत्यनेनान्येषामुभयत्रापि द्वन्द्वो वार्यते, अन्यतरत्र तु भवत्येव। एवमपि क्वान्यत्रेति न ज्ञायते, `सर्वो द्वन्द्वो विभाषयैकवद्भवति' इति चानुपपन्नं स्यात्? उच्यते---यत्तुल्यजातीयानामेवायं विकल्पस्तत्रैव नियमः प्रवर्तते---मृगविशेषवाचिनां मृगविशेषवाचिभिरेवोभयत्र द्वन्द्वः, अन्यैस्तु सहान्यतरत्रेति। नन्वेमपि न ज्ञायते---क्वान्यतरत्रेति, स्यादेतद् एवम्, यद्युभयत्रैषां द्वन्द्व इति श्रुतं स्यात्। इह तु विभाषैकवचनो द्वन्द्व इति श्रूयते, ततश्च यो विभाषाप्राप्त एकवचनो द्वन्द्वः स मृगविशेषवाचिनां मृगविशेषवाचिभिरेव नान्यैरिति वचनव्यक्तौ व्यक्तमेव ज्ञायते---अन्यैः सहेतरेतरयोगद्वन्द्व इति। अथास्यां वचनव्यक्तौ विभाषाग्रहणं किमर्थम्, यावता विभाषैवैकवचनान्तो द्वन्द्वः प्राप्तस्तत्रैतावदेवास्तु--य एकवचनो द्वन्द्वः स एषामेभिरेवेति ? उच्यते---असति विभाषाग्रहणे वचनव्यक्त्यन्तरमपि सम्भाव्येत---एषामेभिः सहैकवचन एव द्वन्द्व इति, यथा प्राण्यङ्गदिषु। सति तु तस्य नियमस्यासम्भवादभिमतो नियमः संपद्यते। एवं पूर्वापरम्, अधरोत्तरमित्यत्रापि नियमस्वरूपं विज्ञेयम्।

`पशुद्वन्द्व' इत्येव सिद्धेऽश्ववडवग्रहणं प्रतिपदविधानार्थम्। तत्र प्रतिपदविधानादश्ववडवमित्येकवद्भावपक्षे `पूर्ववदश्वडवौ' इत्येतद्बाधित्वा `स नपुंसकम्' इत्येतदेव भवति, तच्छब्देन ह्येकवद्भावभाजं परामृश्य विधीयमानं नपुंसकत्वमेकवद्भाववदेव प्रतिपदविहितं भवति। `पूर्ववदश्ववडवौ' इत्येतत्तु एकवद्भावाभावपक्षे प्रवर्तते----अश्वडवौ, अश्ववडवान् इति। एतदेवाभिप्रेत्य वृत्तिकारस्तत्र वक्ष्यति---अश्ववडवयोर्विभाषैकवद्भाव उक्त इत्यादि। बहुप्रकृतिरिति। बहवो बहुत्वसंख्यायुक्ता वर्त्तिपदार्थाः प्रकृतिः कारणं यस्य द्वन्द्वार्थस्य स बहुप्रकृतिः, तदर्थाभिधायित्वाद् द्वन्द्वोऽपि बहुप्रकृतिः। नेदं स्वतन्त्रं लक्षणम्, स्वातन्त्र्ये नित्यं चेद्वनस्पत्यादीनामपि एतत्सूत्रविहितं विकल्पं बाधित्वा बहुप्रकृतित्वे नित्य एकवद्भावः स्यात्, विकल्पे फलादीनामपि

`जातिरप्राणिनाम्' इत्यादिलक्षणान्तरेण प्राप्तं नित्यमेकवद्भावं बाधित्वा बहुप्रकृतित्वे विकल्पः स्यात्। अतो लक्षणान्तरस्य शेषोऽयम्। तत्रापि यदि `विभाषा वृक्ष' इत्यत्र पठितत्वादस्यैव शेषत्वं स्यात्ततो वनस्पत्यादिष्वबहुप्रकृतित्वे एवद्विकल्पाभावेऽपि `जातिरप्राणिनाम्' इति नित्यो विधिः स्यात्, फलादिषु तु न दोषः; एतद्विकल्पप्राप्त्यभावाल्लक्षणान्तरप्राप्तेरेव नियमनात् तस्मात्सर्वस्यैव प्रकरणस्यार्थशेषस्तदेतदाह---एषां बहुप्रकृतिरेवेति। एषां फलादीनां द्वन्द्वोऽनेन लक्षणान्तरेण वा एकवद्भवन् बहुप्रकृतिरेवैकवद्भवतीत्यर्थः। बदरामलके इति। अत्र `जातिरप्राणिनाम्' इति न भवति। रथिकाश्वारोहाविति। अत्र सेनाङ्गलक्षणः। प्लक्षन्यग्रोधाविति। अत्रायं विकल्पः, `जातिरप्राणिनाम्' नित्यश्च न भवति। अवनस्पतीनां तु वृक्षिविशेषाणामबुहुप्रकृतित्वेऽप्ययं विकल्पो भवत्येव---आम्रपलाशम्, आम्रपलाशौ। अन्ये तु वनस्पतिग्रहणं वृक्षमात्रोपलक्षणं मन्यन्ते। रुरुपृषतौ, हंसचक्रवाकाविति। अत्राप्यस्य विकल्पस्याभावः। यूकालिक्षे इति। `क्षुद्रजन्तवः' इत्यस्याभावः। व्रीहियवौ, कुशकाशावित्यत्र तूभयोः।।

विप्रतिषिद्धं चानधिकरणवाचि।। 2.4.13 ।।

विप्रतिषिद्धं चानधिकरणवाचि।। पस्परविरुद्धमिति। सहानवस्थानादिलक्षणो विरोधः, `विप्रतिषिद्धानाम्' इत्यादिसूत्रे तु तद्वाच्यवयवत्वाद् द्वन्द्वरूपमेव तथोक्तमिति भावः। अद्रव्यवाचिनामिति। एतेनाधिकरणशब्दो द्रव्ये वर्तते, नाधार इति दर्शयति। न हि द्वन्द्वावयवानामाधारे वृत्तिः सम्भवति; विभक्त्यर्थत्वादाधारस्येति भावः। अयमपि नियमार्थः प्रारम्भ; नियमस्वरूपं च---य एकवचनो द्वन्दो विभाषाप्राप्तः स यदि विप्रतिषिद्धवाचिनां भवत्यद्रव्यवाचिनामेव, द्रव्यवाचिनां त्वितरेतरयोग इति।।

न दधिपय आदीनि।। 2.4.14 ।।

न दधिपय आदीनि।। यथायथमिति। व्यञ्जनत्वाद्विकल्पस्य प्राप्तिस्तत्रादितिस्त्रिषु, पूर्वसूत्रविकल्पस्य शुक्लकृष्णाविति, न त्विह। यद्येवम्, प्रतिषिद्धेऽस्मिन्विकल्पे जातिलक्षणो नित्यः स्यादेकवद्भावः? परिहारोऽत्र वक्ष्यते---स्त्रियां यदुक्तं तन्नेति। यथा षट्स्वभिधास्यते तथात्राप्येकवद्भावमात्रमेव निषिध्यते । किं च, ब्रह्मप्रजापत्यादिष्वत्र पठितेषु समाहारद्वन्द्वनिषेधमुखेनेतरेतयोगद्वन्द्वो व्यवस्थाप्यते, तत्साहचर्यादेतेष्वपि चतुर्षु तदेव युक्तम्।।

अधिकारणैतावत्त्वे च।। 2.4.15 ।।

अदिकारणैतावत्त्वे च।। वृत्तिर्वर्तः= समासः, सोऽस्यास्तीति समासावयवभूतं वर्त्तिपदम्, तस्यार्थोऽधिकरणमित्युच्यते, कथं पुनस्तदधिकरणमित्याह--स हीति। नियमस्य चात्र प्रतिषेधः प्राण्यङ्गादीनां समाहार एवेति नियमो वर्त्तिपदार्थस्येयत्तायां गम्यमानायां न भवतीति, न पुनः पूर्वसूत्रवत्समाहारद्वन्द्वस्य प्रतिषेधः। यद्येवम्, प्रतिषिद्धेऽपि नियमे `दश दन्तोष्ठाः' इत्यधिकरणैतावत्त्वेऽपि `चार्थे द्वन्द्वः' इत्यनेन समाहारेऽर्थे द्वन्द्वः स्यादेव, ये चात्र प्रकरणेऽसंकीर्त्तितास्तेषु नियमस्याप्रसङ्गादसत्यस्मिन्प्रतिषेधे `चार्थे द्वन्द्वः' इत्यनेन समाहारे द्वन्द्वः स्यादेव---दश ब्राह्मणक्षत्त्रिया इति, अतः प्रकृतानामन्येषां च सर्वेषामेकवचनो द्वन्द्वो न भवति, `अधिकरणैतावत्त्वे' इति समाहारद्वन्द्व एव प्रतिषेध्यः? उच्यते---`अधिकरणं वर्त्तिपदार्थः' इत्युक्तम्, न च समाहारद्वन्द्वे वत्तिपदार्थस्यैतावत्त्वं शक्यं प्रतिपादयितुम्, दशादिशब्दप्रयोगेऽपि हि तस्यैव द्वन्द्वार्थस्य समाहारस्य सङ्ख्याविशेषोऽवगम्यते, न वर्तिपदार्थस्य, यथा द्विगौ---दशपञ्चपूल्य इति। अतो वर्तिपदार्थस्य सङ्ख्याविशेषं प्रतिपिपादयिषताऽवश्यमितरेतरयोग द्वन्द्वो विधेय इति दशब्रह्माणक्षत्त्रिया इत्यादौ तावददोषः। यद्येवम्, अनेनैव न्यायेन `दश दन्तोष्ठः' इत्यादावपि समाहारद्वन्द्वो न भविष्यतीति नार्थः प्रतिषेधेन? मैवम्; असत्यस्मिन्प्रतिषेधे प्राण्यङ्गादीनां समाहार एवेति नियमादितरेतरयोगद्वन्द्वो न स्यात्। न च समाहारद्वन्द्वे दशादिप्रयोगेऽपि वर्त्तिपदार्थस्य सङ्ख्याविशेषः प्रतिपादयितुं शक्य इति अधिकरणैतावत्त्वे प्रतिपिपादयिषिते द्वन्द्व एव न स्यादित्यारभ्यः प्रतिषेधः। दश दन्तोष्ठा इति। अत्र दशशब्दस्य प्रत्येकं सम्बन्धाद्वर्त्तिपदार्थस्येयत्ता गम्यते, समुदायसम्बन्धेऽपि दन्तोष्ठात्मकवर्त्तिपदार्थगतैव सङ्ख्या।।

विभाषा समीपे।। 2.4.16 ।।

विभाषा समीपे।। `अधिकरणैतावत्त्वे' इत्यधिकारात्समीपरूप एतस्मिन्निति गम्यते, वृत्तौ त्वर्थमात्रं दर्शितम्। अधिकरणैतावत्त्वस्य समीप इति। अत्र च भावप्रधानः समीपशब्दः, अधिकरणैतावत्त्वस्य सामीप्ये परिच्छिन्ताविन्यर्थः। अत्र विस्पष्ट एव नियमस्य प्रतिषेधः, न हि विभाषा समाहारद्वन्द्वः प्रतिषेध्यः। अव्ययीभावो विहित इति। `अव्ययं विभक्ति' इत्यादिना। यद्यप्यत्र सङ्ख्ययेति नास्ति, सङ्ख्ययापि तु भवत्येव। बहुव्रीहिरिति। `सङ्ख्ययाव्ययासन्न' इत्यादिना। तत्रैकवद्भावपक्षेऽव्ययीभावोऽनुप्रयुज्यत इति एकार्थस्यैकार्थ इति भावः। ऐकार्थ्यञ्च तस्य सामीप्यप्रधानत्वात्। यद्यप्यव्ययीभावोऽव्ययत्वान्निः----सङ्ख्यस्तथापि भेदाभावरूपमैकार्थ्यमस्त्येव। सामानाधिकरण्यं च सामीप्यतद्वतोरभेदाश्रयेण प्रतिपाद्यम्। अधिकरणैतावत्त्वमपि समाहारसमाहारिणोर्भेदाविवक्षयैवोपपाद्यम्। इतरत्र बहुव्रीहिरिति। बह्वर्थस्य बह्वर्थ इति भावः। बह्वर्थत्वं च तस्य समीपिप्रधानत्वात्। ननु द्वन्द्वार्थस्यैकवद्भावादनुप्रयोगस्याप्येकवचनता सिद्धा, किमेतया क्लिष्टकल्पनया? उच्यते--अव्ययीभावस्यैवानुप्रयोगे तस्याव्ययत्वा द्बहुत्वाभावाद् बहुवचनं न स्यात्,सत्यपि वा तस्मिन्नम्भावे कृते उपदशा इति न स्यात्। बहुव्रीहेरेव चानुप्रयोगे उपदशस्य पाणिपादस्येति षष्ठी स्याद्, उपदशम्पाणिपादस्येति चेष्यते; अतो यथोक्तमेव साधीयः।।

स नपुंसकम्।। 2.4.17 ।।

स नपुंसकम्।। परवल्लिङ्गतापवादो योगः। सग्रहणं व्यवहितस्य द्विगोरपि यथा स्याद्, अन्यथाऽव्यवहितस्य द्वन्द्वस्यैव स्यात्, नैतदस्ति; एकवचनमित्येतावन्मात्रमेवापेक्षिष्यामहे, नैकवचनविशेषं द्वन्द्वम्। एवं तर्हि योऽत्र प्रकरणेऽसङ्कीर्त्तितः समाहारद्वन्द्वस्तस्यापि यथा स्यात्? अन्यथा प्रकृतस्यैव द्वन्द्वस्य द्विगोश्च स्यात्। ननु प्रकरणमपि नापेक्षिष्यते, यद्येवम्, एकसङ्ख्य इत्यादावेकार्थस्य स्यात्, अतोऽवश्यापेक्ष्यं प्रकरणम्। तस्मिंश्चापेक्ष्यमाणे

प्राण्यङ्गादिसम्बन्धादिरूपेण द्वन्द्वः प्रकृत इति तस्यैव स्यात्। स इत्येतस्मिंस्तु सति अपेक्ष्यमाणेऽपि प्रकरणे प्राण्यङ्गादिसम्बन्धपरित्यागेन योऽत्र प्रकरणे संकीर्तितो द्वन्द्वो द्विगुश्च `स नपुंसकम्' इति सर्वस्य समाहारद्वन्द्वस्य नपुंसकत्वं लभ्यते, एकादौ चातिप्रसङ्गो न भवति। तथा च `युवोरनाकौ' इत्यादावुच्यते---युवोरिति समाहारद्वन्द्वे स नपुंसकप्रसङ्गः। अतो यावान्कश्चन समाहारद्वन्द्वः प्राण्यङ्गादिसम्बन्धी, अन्यो वा, सर्वस्यास्य नपुंसकत्वं विधीयत इति सिद्धम्।
अकारान्तोत्तरपद इति। अत्रात इत्यधिकारे `द्विगोः' इति ङीब्विधानं लिङ्गम्। पञ्चखट्वीति। स्त्रीत्वपक्षे उपसर्जनह्रस्वत्वम्।
अनो नलोपश्चेति। `उत्तरपदत्वे चापदादिविधौ' इति प्रत्ययलक्षणप्रतिषेधात्पदत्वाभावान्नलोपवचनम्।
पात्रादिभ्य इति तादर्थ्य एषा चतुर्थी पात्राद्यन्तानां द्विगूनां सिद्धय इत्यर्थः। पात्रादिराकृतिगणः।।
अव्ययीभावश्च।। 2.4.18 ।।
अव्ययीभावश्च।। पूर्वपदार्थप्रधानस्येति। अधिस्त्रीत्यादौ पूर्वपदार्थस्यालिङ्गत्वादिलिङ्गतैव प्राप्नोति। अन्यपदार्थप्रधानस्येति। उन्मत्तगङ्गमित्यादेः. पुष्याहमिति। कर्मधारये `राजाहः सखिभ्यष्टच्', `रात्राह्नाहाः पुसि' इत्यस्यापवादः। सुदिनमिति। सुदिनशब्दः प्रशस्तवचनः। सुदिनासु समासु कार्यमेतदिति तथा। त्रिपथमिति। षष्ठीसमासः। द्विगोः पात्रादित्वात्सिद्धम्। विरूपः पन्था विपथम्,प्रादिसमासः।
क्रियाविशेषणानां चेति। क्रियाद्वारेण स्त्रीलिङ्गत्वे प्राप्ते वचनम्।।
तत्पुरुषोऽनञ्कर्मधारयः।। 2.4.19 ।।
तत्पुरुषोऽनञ्कर्मधारयः।। असन्देहार्थं नञ्कर्मधारयस्तत्पुरुष इत्यन्यासादनञ्कर्मधारय इति पदच्छेदः। अत्र कर्मधारयशब्दो भावप्रधानः, नञ्च कर्मधारयश्च नञ्कर्मधारयौ, तौ न विद्येते यस्मिंस्तत्पुरुषे सोऽनञ्कर्मधारय इति बहुव्रीहिः। तत्पुरुषे त्वस्मिन्नञ्मात्रस्य तत्पुरुषस्याभावात्तद्युक्ततत्पुरुषो नञ्शब्देन लक्षणोयः स्यात्, लिङ्गवचनयोश्चान्यतरस्य व्यत्ययो वाच्यः स्यात्, अतो बहुव्रीहिरेव न्याय्यः। वृत्तौ वस्तुमात्रं दर्शितम्---नञ्समासं कर्मधारयं च वर्जयित्वेति। विभाषा सेनेति। अनन्तरेषु सूत्रेष्वस्य नातीवोपयोगः, `सञ्ज्ञायां कन्था' इत्यत्र तावदनादिः सञ्ज्ञा गृह्यते, न वा तत्पुरुषो नञ्समासः कर्मधारयो वा उशीनरेषु सञ्ज्ञास्ति, उपज्ञोपक्रममित्यत्रापि षष्ठीतत्पुरुषाद्विना तदादित्वासम्प्रत्ययः। `छाया बाहुल्ये' इत्यत्रापि पूर्वपदार्थधर्मो बाहुल्यं षष्ठीतत्पुरुषमन्तरेण न गम्यते। सभाराजेत्यत्र तु राजाऽमनुष्यपूर्वेति वचनान्नञ्समासस्य कर्मधारयस्य च सभान्तस्याप्रसङ्गः। द्वन्द्वस्य तु प्राप्नोति---ईश्वरश्च सभा च ईश्वरसभे इति, अतस्तत्रापि तत्पुरुष इत्यस्यांशस्योपयोगोऽस्त्येव। `अशाला च' इत्यत्र समूहवचनः सभाशब्दः, समूहस्य च समूह्यपेक्षा स्फुटतरेति षष्ठी तत्पुरुषस्यैव भविष्यति, नान्यस्य, ब्राह्मणश्च सभा च ब्राह्मणसभे, असभा, परमसभेति। अतः `विभाषासेना' इत्यत्रैवास्य साक्षादुपयोग इति भावः।।
संज्ञायां कन्थोशीनरेषु।। 2.4.20 ।।
संज्ञायां कन्थोशीनरेषु।। तत्पुरुषस्य कन्थया विशेषणात्तदन्तविधिरित्याह---कन्थान्तस्तत्पुरुष इति। सौशमिकन्थमिति। सुशमस्यापत्यानि सौशमयः।।
उपज्ञोपक्रमं तदाद्याचिख्यासायाम्।। 2.4.21 ।।
उपज्ञोपक्रमं तदाद्याचिख्यासायाम्।। उपज्ञायत इत्युपज्ञेति। कर्मणि `आतश्चोपसर्गे' इत्यङ्प्रत्ययः। उपक्रम्यत इत्युपक्रम इति कर्मण्येव घञ् । `नोदात्तोपदेशस्य' इति वृद्धिप्रतिषेधः। उपज्ञा चोपक्रमश्चेति समाहारद्वन्द्वः। तदन्तस्तत्पुरुष इति। सूत्रे तु उपज्ञोपक्रमं तत्पुरुषरूपमित्येवं सामानाधिकरण्येन विशेषणम्,तयौरुपज्ञोपक्रमयोरित्यादेर्विवरणम्---यदीति। आदिः=प्राथम्यम्। पाणिन्युपज्ञमिति। कर्तरि षष्ठ्याः समासः। पूर्वाणि व्याकरणान्यद्यतनादिकालपरिभाषायुक्तानि, तद्रहितं तु व्याकरणं पाणिनिप्रभृतिप्रवृत्तमित्यस्ति तदादित्वस्याख्यानम्। व्याड्यु पज्ञमिति। अडः वृश्चिकलाङ्गूलम्, तेन च तैक्ष्ण्यं लक्ष्यते, विगताडो व्यडः, तस्यापत्यंव्याडिराचार्यः। स्वागतादिपाठात् `न य्वाभ्याम्' इत्येष विधिर्न भवति। दुषिति सङ्केतशब्दः, यथात्र वृत्करणम्। नन्दो राजा। मानानि प्रस्थादीनि। वाल्मीकिश्लोका इति षष्ठीसमासः। अस्त्यत्र तदादित्वस्याचिख्यासा; वाल्मीकिः प्रथमं श्लोकप्रबन्धं ददर्शति प्रसिद्धेः। देवदत्तो यज्ञदत्तेनोपज्ञायते यज्ञदत्तेनोपक्रम्यते इति क्रियासम्बन्धमात्रमत्र विवक्षितम्।।
छाया बाहुल्ये।। 2.4.22।।
छाया बाहुल्ये।। पूर्वपदार्थधर्मो बाहुल्यमिति। कथम्? बाहुल्य इति निमित्तसप्तमी। बाहुल्ये सति या छाया तद्वाची यश्छायाशब्दस्तदन्तस्तत्पुरुष इति सूत्रेऽक्षरान्वयः। तत्र कस्य बाहुल्यमित्यपेक्षायामावारकरद्रव्यनिमित्तकत्वाच्छायायास्तद्बाहुल्य इति गम्यते। तेन यानि बहूनि सम्भूयोपलम्भयोग्यामुपजीव्यां वा छायामारभन्ते तेष्वयं विधिः।।
सभा राजाऽमनुष्यपूर्वा।। 2.4.23 ।।
सभा राजामनुष्यपूर्वा।। इह सभाशब्दः शालावचनः। इह कस्मान्न भवतीति। `स्वं रूपम्' इति वचनादिहैव भवितुं युक्तमिति प्रश्नः। पर्यायवचनस्यैवेति। न स्वरूपस्य, नापि विशेषाणां चन्द्रगुप्तादीनामित्यर्थः। एतदेवाप्तोक्तेन द्रढयति----तदुक्तमिति। कथं पुनरेतल्लभ्यते? द्वावत्र नञौ---अराजपूर्वा, अमनुष्यपूर्वाचेति, तत्र नञिवयुक्तन्यानयेन राजशब्दसदृशाः पर्याया एव गृह्यन्ते, अमनुष्यशब्दो रूढिरूपेणेति। कथं तर्हि `अमनुष्यकर्तृके च' इत्यत्र पित्तघ्नं घृतमित्युदाहरिष्यते? व्याख्यानात्तत्र मनुष्यादन्यमात्रस्य ग्रहणं न रूढिरित्यर्थः।।
अशाला च।। 2.4.24 ।।
अशाला च।। सभाशब्दोऽयं शालावचनः, संघवचनश्च, तत्र शालाप्रतिषेधादितरस्य ग्रहणमित्याह---संघातवचन इत्यादि। तत्र पूर्वसूत्रेण राजामनुष्यपूर्वत्वे

शालावचनस्यापि भविष्यति, अशालावचनस्य त्वनेन राजामनुष्यपूर्वत्वाभावेऽपीति।।

विभाषा सेनासुराच्छायाशालानिशानाम्।। 2.4.25 ।।

विभाषा सेनासुराच्छायाशालानिशानाम्।। तत्पुरुष इति प्रकृतं षष्ठीबहुवचनान्तं विपरिणम्यते, नपुंसकमिति च भावप्रधानं संपद्यते। सेनाद्यन्तानां तत्पुरुषाणां नपुंसकत्वमित्यक्षरार्थः। वृत्तौ तु वस्तुमात्रं दशितम्। यद्वा---प्रथमास्थाने षष्ठी। कुड्यच्छायमिति। बाहुल्याभावेऽनेन विकल्पः, बाहुल्ये नित्यार्थम् `छाया बाहुल्ये' इत्युक्तम्। श्वनिशमिति। यस्यां निशायां श्वान उपवसन्ति सा श्वनिशमित्युच्यते। सा पुनः कृष्णचतुर्दशी तस्यां हि श्वान उपवसन्तीति प्रसिद्धिः।।

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः।। 2.4.26 ।।

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः।। किमर्थमिदम्? इह द्वन्द्वे त्रीणि दर्शनानिअवयवार्था एवापेक्षितपरस्पराः द्वन्द्वार्थो न तु तद्व्यतिरिक्तः समुदायो नामेत्येकम्; अवयवार्थव्यतिरिक्त एव समुदायो द्वन्द्वर्थः, स चावयवलिङ्गेन लिङ्गवानिति द्वितीयम्; स एव स्वयं लिङ्गशून्य इति तृतीयम्। तत्र पूर्वके दर्शनद्वये विभिन्न लिङ्गावयवद्वन्द्वे युगपदुभयलिङ्गतानुपपत्तेः पर्यायेण लिङ्गद्वयप्रसङ्गे परस्यैव लिङ्गं भवतीति नियमार्थ भवति। तृतीये तु समासार्थस्यालिङ्गस्य परवल्लिङ्गता भवतीति विध्यर्थः। तत्पुरुषोऽपि द्विविधः----पूर्वपदार्थप्रधानोऽर्धपिप्पाल्यादिः; उत्तरपदार्थप्रधानो राजकुमार्यादिः। तत्रोत्तरपदार्थप्रधाने प्राधान्यादेव परवल्लिङ्गस्य सिद्धत्वात्पूर्वपदार्थप्रधाने विध्यर्थ भवति। तत्र वृत्तिकारेण विधिपक्ष आश्रितस्तदाह---परस्य यल्लिङ्गं तद्भवतीति। एवं हि सूत्रस्यैकरूपा वचनव्यक्तिर्भवति, इतरथा तत्पुरुषे विधिरूपा द्वन्द्वे नियमरूपेति वचनव्यक्तिभेदः स्यादिति भावः। द्वन्द्वस्य तत्पुरुषस्य वेति। एतेन द्वन्द्वतत्पुरुषयोरिति षष्ठीयमिति दर्शयति। सप्तम्यां त्वयमर्थो भवति---द्वन्द्वे तत्पुरुषे च यत्परं तद्वल्ल्िङ्गं भवतीति। तत्र कार्यिणोऽनुपादानात्परशब्दत्वात्तदाक्षिप्तस्य पूर्वपदस्य लिङ्गविधिर्भवति।

यद्वा---द्वन्द्वे तत्पुरुषे च विषये परस्यैव लिङ्गं भवतीत्यक्षरार्थः। तत्रापि पूर्वपदस्यैव लिङ्गविधिः। अत्र पक्षे मयूरीकुक्कुटावित्यत्रोत्तरपदार्थलिङ्गे पूर्वपदार्थस्यातिदिष्टे स्त्रीप्रत्ययस्य निवृत्तिः प्राप्नोति; कुक्कुटमयूर्यौ, राजकुमारी, अर्द्धपिप्पलीत्यादौ पूर्वपदे स्त्रीप्रत्ययप्रसङ्गः। कि पुनरस्मिन्पक्षे किंचिदिष्टं सिध्यति? आहोस्विद्दोषान्तमेव? सिध्यतीत्याह। इह पूर्वकायः अर्धद्रोण इति, यत्र पूर्वपदं नपुंसकमुत्तरपदं च पुंल्लिङ्गम्, तत्र परस्य लिङ्गे पूर्वस्यातिदिष्टे समासस्यापि तदेव भवति, न च पूर्ववदिह किंचिदनिष्टमापद्यते। द्वन्द्वेऽपि पूर्वके दर्शनद्वये गुणकर्मणी द्रव्यगुणावित्यादौ यत्र पुंनपुंसकाभ्यां भिन्नलिङ्गे पूर्वोत्तरपदे, यत्र वाऽवर्णान्तं स्त्रीप्रत्ययान्तं वा पदं न भवति----गतिस्थाने, योषित्पूरुषौ, तित्तिरिबलाके इति, तत्रोत्तरपदार्थलिङ्गे पूर्वपदार्थस्यातिदिष्टे द्वन्द्वस्य पर्यायेण द्वयोरपि लिङ्गे प्रवृत्तेऽपि सर्वमिष्टं सिध्यति, पूर्ववदेव न किं ञ्चिदनिष्टमापद्यते। `व्यतिरिक्तो द्वन्द्वार्थः स्वयं लिङ्गशून्यः' इत्यत्र तु पक्षे द्वन्द्वार्थस्यालिङ्गत्वं तदवस्थमेवेतॎि दोषान्तमेव। द्वन्द्वस्य तत्पुरुषस्य चेति। द्वन्द्वार्थस्य तत्पुरुषार्थस्य चेत्यर्थः। तेनानुप्रयोगेऽपि तदेवं लिङ्गं भवति। यदि तर्हि षष्ठ्याश्रयणेन समासार्थस्य परवल्लिङ्गमतिदिश्यते, `पूर्ववदश्ववडवौ' इत्यत्रापि पूर्वपदार्थलिङ्गं समासार्थेऽतिदिश्यते, ततश्चोत्तरपदार्थस्य स्त्रीत्वं स्थितमेवेति टापः श्रवणप्रसङ्गः। सप्तमीपक्षे तु `पूर्ववदश्ववडवौ' इत्यत्रापि पूर्वपदार्थलिङ्गमुत्तरपदार्थस्यातिदिश्यत इति वडवाशब्दस्य पुंस्त्वातिदेशात् स्त्रीत्वाभावे टापोनिवृत्तिः सिध्यति। निपातनात्सिद्धम्। किं निपातनम्? न तावत् `पूर्ववदश्ववडवौ' इति निपातनमाश्रयितुमुचितम्, वचनान्तरेऽनतिदेशप्रसङ्गाद् अश्ववडवान्, अश्ववडवैरिति। एवं तर्ह्यश्ववडवपूर्वापराधरोत्तराणामित्यत्र टापोऽनुच्चारणान्निपातानादश्ववडवयोर्द्वन्द्वे टाब्निवर्तिष्यते।

अपर आह---`चार्थे द्वन्द्वः' इत्यत्रानेकमित्यधिकारात्सर्वेषामेव वर्तिपदार्थष्यति। इहापि तर्हि प्राप्नोति----कुक्कुटमयूर्याविति? अस्तु, का रूपसिद्धिः? परवल्लिङ्कमिति शब्दशब्दार्थो, कोऽर्थः? लिङ्गशब्देन लिङ्गाभिधायी प्रत्ययोऽर्थश्चतन्त्रेणैकशेषेण वाच्यते। तदयमर्थो भवति---द्वन्द्वार्थस्य तत्पुरुषार्थस्य परस्येव लिङ्गं भवति, तदभिधायी प्रत्ययश्च परस्यैव भवति ताभ्यामिति। तत्र च यत्र द्रव्यगुणौ गुणकर्मणी----अर्द्धद्रोण इत्यादौ, लिङ्गाभिधायी प्रत्ययो न संभवति तत्रार्थ एवातिदिश्यते, उभयसम्भवे तूभयम्---यथा कुक्कुटमयूर्याविति, ततश्चौपदेशिकस्य ह्रस्वत्वेऽप्यातिदेशिकस्य श्रवणं भविष्यति; तस्य चानुपसर्जनत्वात्तदन्तस्य चाप्रातिपदिकत्वात्पुनर्ह्रस्वत्वाभावः। इह तर्हि दत्तागार्ग्यायण्यौ, दत्ताकारीषगन्ध्ये इति ह्रस्वत्वे कृते समासात्पुनः ष्फष्यङौ प्राप्नुतः? स्ताम्, `भस्याऽढे तद्धिते' इति पूर्वोत्पन्नयोर्निवृत्तिर्भविष्यति। यत्र तर्हि पुंवद्भावो नास्ति अभत्वाद्, यथा---दत्ता च युवतिश्च दतायुवती इति, तत्र द्वयोः स्त्रीप्रत्यययोः श्रवणप्रसङ्गः, तस्मादुपसर्जनह्रस्वत्वं द्वन्द्वे न भवति। अन्वर्था ह्युपसर्जनसंज्ञाऽप्रधानस्य विधीयते, द्वन्द्वे चावयवार्थानामेव कार्यान्वयादप्राधान्याभावः। परवल्लिङ्गमिति चार्थ एवातिदिश्यते, अश्ववडवाविति च निपातनादित्येतदेव सम्प्रति।

द्विगुप्राप्तापन्नेत्यादि। स तर्हि प्रतिषेधो वक्तव्यः? न वक्तव्यः, तत्पुरुषग्रहणं न करिष्यते, परवल्लिङ्गं द्वन्द्वस्येत्येव। कथं पूर्वकायः, अर्धपिप्पलीति? एकदेशिसमासो नारप्स्यते, कर्मधारय एवात्र भविष्यति---पूर्वश्चासौ कायश्च, अर्धं चासौ पिप्पली चेति। पूर्वादयः शब्दा एकदेशे वर्त्तन्ते, कायादयस्तु समुदाये, कथमेषां सामानाधिकरण्यम्? अवयवेन समुदायोपचारात्। तदेवं कर्मधारये कृते प्राधान्यादेवोत्तरपदार्थस्य लिङ्गं भविष्यति, नार्थस्तत्पुरुषग्रहणेन, नाप्येकदेशिसमासेन षष्ठीसमासप्रङ्गः इति चेन्न; इष्टत्वादनभिधानाच्च। तत्रैत्स्यात्--यद्यपि पूर्वकाय इत्यादीति रूपाणि कर्मधारयेणापि सिध्यन्ति, तथापि मुख्यार्थवृत्तिषु कायादिशब्देषु यथा पूर्वं कायस्येत्येवमादि वाक्यं भवति, तथा कायपूर्व इत्यादि षष्ठीसमासोऽपि स्याद्, अतस्तन्निवृत्तये एकदेशिसमास आरब्ध इति? तच्च नैवम्; इष्टत्वादनभिधानाच्च। तत्र तावद् `द्वितीयतृतीय' इत्यत्रान्यतरस्यांग्रहणात्सूत्रकारस्य षष्ठीसमास इष्टः---भिक्षाद्वितीयमिति, `अर्द्धं नपुंसकम्' इत्यत्रापि भाष्यकार आह---`इष्यतेऽत्र षष्ठी समासोऽपि, तद्यथा---अपूपार्धं मया भक्षितम्' इति। अस्ति च पैङ्गलेसूत्रे प्रयोगः---स्वरार्धं चार्याधमिति। पूर्वापरेत्यत्र त्वनभिधानात् षष्ठीसमासो न भविष्यति।।

पूर्ववदश्ववडवौ।। 2.4.27 ।।

पूर्ववदश्ववडवौ।। अश्वडवयोरिति। `विभाषा वृक्ष' इत्यत्र `पशुद्वन्द्व' इत्येव सिद्धेऽश्ववडवग्रहणं प्रतिपदविधानार्थम्, तत्र प्रतिपदविधानादश्ववडवमित्येकवद्भावपक्षे इमं विधं बाधित्वा `स नपुंसकम्' इत्येतदेव भवति। तच्छब्देन ह्येकवद्भावभाजं परामृश्य विधीयमानं नपुंसकत्वमप्येकवद्भाववदेव प्रतिपदविहितं भवति। यस्तु पूर्ववदित्यतिदेशः स एकबद्भावाभावपक्षे चरितार्थः, तदाह---तत्रैकवद्भावादन्यत्रेति। न निपातनमिति। निपातने हि पूर्ववदिति वचनमनर्थकम्, अविवक्षितमित्यर्थः। निपातने तु तद्विवक्षितं स्याद्, यथोच्चारितरूपविषयत्वान्निपातस्य।।

हेमन्तशिशिरावहेरात्रे च च्छन्दसि।। 2.4.28 ।।

हेमन्तशिशिरावहेरात्रे च च्छन्दसि।। हेमन्तशिशिराविति। अत्र नपुंसकत्वं प्राप्तं शिशिरशब्दस्य नपुंसकत्वात्। केचित्तु `हेमन्तः शिशिरोऽस्त्रियाम्' इत्युभयलिङ्गंमन्यन्ते, तेषामत्र हेमन्तशिशिरावित्यनर्थकम्। अहोरात्रे इति। अत्र `रात्राह्नाहाः पु`स' इति पुंस्त्वं प्राप्तम्। लिङ्गव्यत्यय उक्त इति । `व्यत्ययो बहुलम्' इत्यनेन।।

रात्राह्नाहाः पुंसि।। 2.4.29 ।।

रात्राह्नाहाः पुंसि।। इत्येते पुंसि भाष्यन्ते इति। केचिदाहुः---रात्रादीनामेवानेन पुंस्त्वं विधीयते, तदन्तस्य तु परवल्लिङ्गमित्येव सिद्धमिति। एवं तु समाहारे `स नपुसकम्' इत्येतदेव स्यात्, परवल्लिङ्गपवादत्वात्तस्य, तस्माद्रात्राद्यन्तस्य समासस्यैवेदं लिङ्गविधानं युक्तम्,। एवं हि समाहारेऽपि परत्वादिदमेव प्रवर्त्तते। इत्येते पुंसि भाष्यन्ते इत्यत्र त्वेतदन्ता इत्यर्थो द्रष्टव्यः। त्रिरात्र इति। समाहारे द्विगुः, `अहः सर्वैकदेशे' इत्यच् समासान्तः। पूर्वाह्ण इति। अह्नः पूर्वो भागः, एकदेशिसमासः। `राजाहः सखिभ्यष्टच्',`अह्नेह्न एतेभ्यः' इत्यह्नादेशः, `अह्नोऽदन्तात्' इति णत्वम्। द्व्यह इति। `न संख्यादेः समाहारे' इत्यह्नादेशाभावः, `अह्नष्टखोरेव' इति टिलोपः।

अनुवाकादयः पुंसिति। वाक्यविशेषस्य ताः संज्ञाः कर्मणि घञन्ता इति नपुंसकत्वे प्राप्ते वचनम्।।

अपथं नपुंसकम्।। 2.4.30 ।।

अपथं नपुंसकम्।। `पथः संख्याव्ययादेः' इत्यस्यापरकालभावित्वादयमारम्भः। अपथमिति। `पथो विभाषा' इति यदा समासान्तप्रतिधेषो न भवति तदा `ऋक्पूरब्धूः' समासान्तः। समासान्तनिर्देशाच्च तदभावपक्षे पुंस्त्वमेव भवति--अपन्था इति। तत्पुरुष इति वर्ततइति। एतदर्थमेव `स नपुंसकम्' इत्यस्यानन्तरं न कृतम्।।

अर्धर्चाः पुंसि च।। 2.4.31 ।।

अर्धर्चाः पुंसि च।। साहचर्याच्छत्त्रिन्यायेन कार्षापणादीनामप्यर्धर्चशब्देन ग्रहणमित्याह----अर्धर्चादय इति बहुवचनमत्र प्रमाणम्। शब्दरूपाश्रया चेयं द्विलिङ्गतेति। अस्मिंश्छब्दरूपे लिङ्गद्वयं भवतीत्येतावदत्र विवक्षितम्, न पुनरस्य शब्दस्य यावानर्थस्तत्र सर्वत्र लिङ्गद्वयं बवतीत्येवमपीत्यर्थः। किमेवं सति सिद्धं भवतीत्याह----क्वचिदिति। अर्थभेदेन व्यवस्थयापि भवल्लिङ्गद्वयं तत्रैव शब्दे संप्रवृत्तमिति भावः। अत्रोदहरणमाह---यथेति। `शङ्खः पद्मश्च विज्ञेयौ धनदस्य महानिधी'। क्रियाशब्दस्येति। तद्यथा---भूतं काण्डम्, भूता शाला, भूतो घट इति। यौगिकस्याभिधेयवल्लिङ्गमिति। यद्यपि लवणवृत्तेरपि सैन्धवशब्दस्य योगोऽपि निमित्तम्, तथापि रूढिशक्तिरपि तत्र निमित्तम्। अतो यौगिकस्येति केवलयोगनिमित्तस्येत्यर्थः। अभिधेयवल्लिङ्गमिति, यथा---सिन्धौ भवं सैन्धवं जलम्, सैन्धवो मत्स्यः, सैन्धवी शफरीति। उत्कर्षे तुंल्लिङ्ग इति। चन्दनसारः, खदिरसार इति। धर्म इत्यपूर्वे पुंल्लिगा इति। यागादिक्रियाजन्यः स्वर्गादिफलानुगुणः कर्तर्युत्पन्नः संस्कारविशेषः==अपूर्वम्। भाट्टास्तु अपूर्वसाधने यागादावेव धर्मशब्दं पुंल्लिङ्गम्मन्यन्ते----`चोदनालक्षणोऽर्थो धर्मः', `द्रव्यक्रियागुणादीनां धर्मन्वं स्थापयिष्यते' इति। शाबरेऽप्युक्तम्----`यो यागमनुतिष्ठति तं धार्मिक इत्याचक्षते' इति।।

इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ।। 2.4.32 ।।

इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ।। अन्वादेशोऽनुकथनमिति। शब्दार्थकथनमेतत्, यादृशस्त्वत्राभिप्रेतस्तादृशं पश्चाद्वक्ष्यति। आभ्यां छात्त्राभ्यामिति। आदेश एषः। अथो आछभ्यामिति। एषोऽन्वादेशः। अथोशब्देन चात्रान्वादेशऽभिव्यज्यते।

ननु तृतीयादावयमादेशस्ततत्र च टायामोसि चैनादेशो वक्ष्यते, अन्याः सर्वा हलादयः, तत्र हलिलोपेनैवाभ्यामित्यादिरूपं सिद्धम्; नार्थ आदेशवचनेन, तत्राह--आदेशवचनमिति। अज्ञाताद्यर्थविवक्षायामकचि कृते `हलि लोपः' इत्यत्र `अनाप्यकः' इत्यतोऽक इत्यधिकारादिद्रूपलोपो न स्यात्, सत्यपि च तस्मिन्नाभ्यामित्यादि रूपं न सिद्ध्यत्; तस्मात्साकच्कार्थमादेशवचनम्। साच्कार्थे चास्मिन् शित्करणं सर्वादेशार्थम्, न वान्त्यस्य विकारवचनानर्थक्यात्। यदि ह्ययमन्त्यस्य विकारः स्याद्वचनमिदमनर्थकं स्यात्; त्यदाद्यत्वेनैव सिद्धेः। अर्थवद्वादेशप्रतिषेधार्थम्। अन्त्यस्यापि विकारवचनमर्थवदेव, येऽन्य आदेशा आभ्यामित्यादौ दीर्घादयस्ते मा भूवन्नित्यकारस्याप्यकारवचनं स्यात्, यथा---मोराजिसमः क्वौ' इति मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थम्। ननु च कृतेऽप्य कचि अनेनादेशे सत्याभ्यामित्यादिरूपस्य साधारण्या9दज्ञाताद्यर्थगतिः प्रकरणाधीना। यद्येवम्, अनुत्पत्तिरेवाकचोऽस्तु, प्रकरणादिनैवाज्ञाताद्यर्थः प्रतिपत्स्यते,. अतोऽनुदात्तत्वमेव विधेयम्, नादेशः? उच्यते----असत्यादेशे प्रकरणादिकमन्तरेणाकचैव कश्चिदज्ञातादिकं प्रतिपादयेत्, मैवं प्रतिपीपदित्यादेशवचनम्। उत्तरार्थ च। अनुदात्तवचनं किमर्थम्, यावता `ऊडिदम्पदादि' इति विभक्तेरुदात्तत्वं शेषनिघातेनैव सिद्धम्। अनुदात्तवचनं विभक्त्वयन्तस्यानुदात्तार्थम्, शेषनिघातेन हि प्रकृतेरेवानुदात्तत्वं सिद्ध्यति। कथं पुनरिदमस्तृतीयादावशादेशो भवति, स चानुदात्त इत्यनेन विभक्त्यन्तस्यानुदात्तत्वं विधातुं शक्यम्? नानेन विभक्त्यन्तस्यानुदात्तत्वं विधीयते, किं त्वनेन प्रकृतेरनुदात्तत्वे कृते `ऊडिदम्'

इत्यत्रान्तोदात्तादित्यदिकारादसति विभक्तेरुदात्तत्वे `अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वादाभ्यामित्यादि पदं कृत्स्नमेवानुदात्तं भवति। यद्यन्वादेशोऽनुकथनम्, इहापि प्राप्नोति---देवदत्तं भोजजय, इमं च यज्ञदत्तमिति, अस्ति ह्यत्रान्वादेशः, तत्र द्विदीयाटौस्स्वेनः' इत्येनादेशः प्राप्नोति? इत्यत आह---नेहेति। एकस्यैवाभिधेयस्येत्यादि। तत्रैवान्वादेशशब्दः प्रसिद्धतर इति भावः।।

एतदस्त्रतसोस्त्रतसौ चानुदात्तौ।। 2.4.33 ।।

एतदस्त्रतसोस्त्रतसौ चानुदात्तौ।। पुनर्वचनमनुदात्तार्थमिति। पाञ्चमिकोऽशादेश उदात्तः स्याद्, अनुदात्तश्चेष्यते इत्यनुदात्तार्थ पुनर्वचनम्। त्रतसोरिति वचनं निमित्तभावार्थम्; अन्यथा `त्रतसौ चानुदात्तौ' इत्यन्वाचयो विज्ञायेत---यत्र त्रतसौ पश्यसि तत्र तावनुदात्ताविति। किमर्थं पुनस्त्रतसोरनुदात्तत्वमिष्यते, यावताऽत्रात इत्यादौ त्रतसोः कृतयोः प्रकृतेर्लित्स्वरे कृते शेषनिघातेन प्रत्ययानुदात्तत्वेसत्यशनुदात्तः करिष्यते? यद्येवं लभ्यते, कृतं स्यात्; तत्तु न लभ्यम्। इह हि त्रतसोः कृतयोर्लित्स्वरश्च प्राप्नोति, अनेन चानुदात्तोऽशादेशः, तत्र येन नाप्राप्तिन्यायेनापवादत्वान्नित्यत्वाच्चानुदात्तेऽशादेशे कृते तद्विधानसामर्थ्यादपवादस्य लित्स्वरस्याप्रवृत्तानुत्सर्गः प्रत्ययस्वर एव त्रतसोः स्यात्, यथा---गोष्पदप्रमित्यत्र णमुल उलोपेन सहि विधानाल्लित्स्वराप्रवृत्तौ प्रत्ययाद्युदात्तत्वे सति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तं पदं भवति। तस्मात् `त्रतसौ चानुदात्तौ' इति वक्तव्यम्।।

द्वितीयाटौस्स्वेनः।। 2.4.34 ।।

द्वितीयाटौस्स्वेनः।। अनन्तरत्वादेतद एवैनादेशः प्राप्नोति, इदमोऽपीष्यते, तदिदमो ग्रहणं कर्त्तव्यम्? न कर्त्तव्यम्, `इदमोऽन्वादोशे' इत्यत इदम इत्यनुवर्त्तिष्यते, एतदस्त्रतसोरित्यत्रापि संबन्धात्तस्यापि त्रतसोरादेशप्रसङ्गस्तत्राह---इदमो मण्डूकप्लूतिन्यायेनानुवृत्तिरिति। इदमप्यत्र वक्तव्यम्----इदमो हप्रत्ययेन बाधितत्वात्त्रलोऽसम्भावात्तत्तसोहित्यत्रासम्बन्ध इति। यदि परमनुवृत्तिसामर्थ्यात्तस्याप्यादेशेन भाव्यम्, न चासति त्रलि तद्विधानमुपपद्यत इति त्रलः सत्ता परिकल्प्यते? कल्प्यते? तदपि न; उत्तरार्थमप्यनुवृत्तिसम्बवादिति। एनदिति नपुंसकैकवचने वक्तव्यमिति। एनादेशे कृते `अतोऽम्' इत्यम्भावे सत्येनमिति प्राप्नोत्यत एनदादेशो वक्तव्यः। यद्येवम्, अयमेव सर्वत्रास्तु, नार्थ एनादेशेन, कथम्---एनम् एनौ एनान्, ऐनेन, एनयोरिति? त्यदाद्यत्वे कृते भविष्यति, नपुंसकैकवचने तु नित्यत्वात् `स्वमोर्नपुंसकात्' इति लुकि कृते एनदिति स्यादिति सिद्धम्, इह त्वेनं श्रित इति द्वितीयासमासे यद्यप्येनादेशोऽथाप्येनदादेशः, उभायभ्यामपि न भाव्यम्, कथम्? `अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते',तस्मादेतच्छ्रित इति भवति। एकमेव विधानमिति। `अयं दण्डः' इत्यनेन दण्डस्य सत्तामात्रमुपलक्ष्यते, न तु किञ्चिद्विधीयते। एवमीषदर्थ इत्यादिना आकारस्य स्वरूपमात्रं निर्दिश्यते, न तु किञ्चिद्विधीयते।।

आर्धधातुके।। 2.4.35 ।।

आर्धधातुके।। वध्यादिति। आशिषि लिङ्, `लिङाशिषि' इत्यार्धधातुकसंज्ञा। हन्यादिति। विध्यादिलिङ्। विषयसप्तमी चेयमिति। सामान्यनिर्देशोऽयम्। तत्र व्यापित्वान्नित्यत्वाच्च न तेन सह देशकालकृतं पौर्वापर्यं सम्भवति, तस्याद्विषयसप्तमी। यदि तु व्यक्तिनिर्देशेन परसप्तमी स्यात्, भव्यमित्यादि न स्यात्। तथा हिहलन्तत्वादस्त्यादीनाम्`ऋहलोर्ण्यद्' इति ण्यति कृते तत्र परत आदेशैर्भाव्यम्। तत्र द्वयोर्वृद्धौ कृतायां तृतीयस्य च युकि---भाव्यम्, प्रवैयम्, आख्याय्यमिति प्रसज्येत। इह च `ब्रुवो वचिः' ब्रुवोऽजन्तत्वाद्यति कृते वच्यादेशे च वच्यमिति प्राप्नोति, विषयसप्तम्यां तु नैष दोष इत्याह---तेनेति। यथाप्राप्तमिति। यो यतः प्राप्नोति, स ततो भवतीत्यर्थः। `असिद्धवदत्राभात्' इत्यस्य भावाभावव्यवस्थार्थम्। अत्र चाङ्गाधिकारे च द्विरार्धधातुकाधिकारः क्रियते। यदि ह्येतेऽप्यादेशास्तत्रैववीधीरेयन्, जक्षतुः, अधिजगे, अध्यगीष्ट, बभूव, विव्यतुरिति घसाद्यादेशानामसिद्धत्वादुपधालोपातल्लोपे त्ववुग्यणो न स्युः। यदि त्वतोलोपादयोऽप्यत्रविधीयेरन्; गतः, गतवानित्यनुनासिकलोपस्यासिद्धत्वात्`ग्रतो लोपः' स्यादित्येषा दिक्।।

अदो जग्धिर्ल्यप्ति किति।। 2.4.36 ।।

अदो जग्धिर्ल्यप्ति किति।। `ल्यप्' इति पृथक् पदं लुप्तसप्तमीकम्। इह पदद्वयापेक्षं समासमपेक्षमाणो ल्यब्बहिरङ्गः, क्त्वाप्रत्ययमात्रापेक्षस्तु जग्ध्यादेशोऽन्तरङ्गः; तत्र क्त्वावस्थायामेव जग्धौ कृते प्रजग्ध्येति सिद्धम्, नार्थो ल्यब्ग्रहणेन। एवं तर्हि ल्यब्विषयेऽप्यन्तरङ्गत्वात्ति कितीत्येव सिद्धे जग्धौ ल्यबिति यदुच्यते तज्ज्ञापयति---अन्तरङ्गाणामपि विधीनां हिप्रभृतीनां ल्यपा भवति बाधनमिति। विधाय,विहाय, प्रदाय, प्रखाय, प्रखन्य, प्रस्थाय, प्रकम्य, आपृच्छ्य, प्रदीव्य, प्रपठ्येत्येषु विधिषु `दधातेर्हिः' `जहातेश्च क्त्वि' दो दद् घोः' `जनसनखनां सञ्झलोः' `द्यतिस्यतिमास्थामित्ति किति' `अनुनासिकस्य क्विझलोः क्ङिति' `च्छ्वोः शूडनुनासिके च' `आर्धधातुकस्येड्वलादेः' इत्येते विधयः क्त्वावस्थायामेव प्राप्ता बहिरङ्गेन ल्यपा बाध्यन्ते। एष एवार्थः श्लोकान्तरेण भाष्ये कथितः----जग्धिविधिर्ल्यपि यत्तदकरणम्। अकरणं निष्प्रयोजनमित्यर्थः। सिद्धमदस्ति कितीति विधानात्। अदो जग्धिविधानमित्यर्थः। ज्ञापकार्थ ल्यपि जग्धिविधानमित्याह---हिप्रभृतीस्तु सदा बहीरङ्गो ल्यब्भरतीति कृतं तदु विद्धि। ल्यब्भरतीति, ल्यबादेशो हरति=व्यपनयति, बाधते इत्यर्थः। `उ' इति निपातोऽवधारणे। तदेवास्य प्रयोजनमित्यर्थः।।

लुङ्सनोर्घस्लृ।। 2.4.37 ।।

लुङ्सनोर्धस्तु।। ननु `सृघस्यदः क्मरच्' इति वचनाद् xxxxxxxxxत्यन्तरमस्ति? सत्यम्; अदेरात्सीद् अत्सिषतीत्यनिष्टं रूपं मा भूदिति योगारम्भः। प्रात्तीति प्रघस इति, पचाद्यच्। अस्यापि सूत्रवदेव प्रयोजनम्।।

घञपोश्च।। 2.4.38 ।।

बहुलं छन्दसि।। 2.4.39 ।।

बहुलं छन्दसि।। घस्तामिति। लुङि `मन्त्रे घस' इत्यादिना चलेर्लुक्, `बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः। सग्धिरिति। `घसिभसोः' इत्युपधालोपः, `झलो झलि', समाना ग्धिरिति च`समानस्य छन्दसि' इति सभावः। अन्यतरस्यांग्रहणमेव कस्मान्न क्रियत इति, कः पुनरेवं सति गुण इत्याह----तदेवेति। प्रकृत्यन्तरस्य सद्भावादस्य प्रयोजनं प्रयोजनं मृग्यम्।।

लिट्यन्यतरस्याम्।। 2.4.40 ।।

लिट्यन्यतरस्याम्।। प्रकृत्यन्तरस्यासर्वविषयत्वज्ञापनार्थमिदम्। तेन यत्र लिङ्गं वचनं वा नास्ति, तत्र तस्य प्रयोगो न भवति। तत्र लृदित्करणं लुङि प्रयोगस्य लिङ्गम्, घसिश्च सान्तेष्वित्यनुदात्तपाठो वलादावार्द्धधातुक, `सृघस्यदः क्मरच्' इति वचनं क्मरचि। भूवादौ परस्मपदिषु पाठात्परस्मैपदे प्रयोगः।।

वेञो वयिः।। 2.4.41 ।।

हनो वध लिङि।। 2.4.42 ।।

हनो वध लिङि।। यकारान्तश्चायमादेश इति। कुत एतत्? शैलीयमाचार्यस्य यत्र व्यञ्जनान्त आदेशस्तत्रेकारमुच्चारयति, यथा जग्ध्यादौ। तस्मादिकाराकरणादकारान्तोऽयमादेशः। हलन्तलज्ञणा वृद्धिर्न भवतीति। उत्तरसूत्रेण वधादेशे कृत इति भावः।।

लुङि च।। 2.4.43 ।।

आत्मनेपदेष्वन्यतरस्याम्।। 2.4.44 ।।

आत्मनेपदेष्वन्यतरस्याम्।। आहसतेति। `आङो यमहनः' इत्यात्मनेपदम्। `आत्मनेपदेष्वनतः, `हनः सिच्' इति सिचः कित्त्वात् `अनुदात्तोपदेश' इत्यनुनासिकलोपः।।

इणो गा लुङि।। 2.4.45 ।।

इणो गा लुङि।। अगुरिति। `गातिस्था' इति सिचो लुक्, `आतः' इति झेर्जुस्, `उस्यपदान्तात्'। इण्वदिक इति वक्तव्यमिति। यद्यस्यैवायं प्रकरणस्य शेषः स्यात् `इणिकोर्गा लुङि---इति सूत्रन्यासः कर्तव्यः' इत्यवक्ष्यत; यतस्तु खलु पृथगिण्वदिक इत्याह, तेन मन्यामहे---सर्वस्य शास्त्रस्य शेषोऽयमिति। तेन `इणो यण्' `एतिस्तु शासु' इत्याद्यपि भवति----अधियन्ति, अधीत्येति।।

णौ गमिरबोधने।। 2.4.46 ।।

सनि च।। 2.4.47 ।।

इङश्च।। 2.4.48 ।।

गाङ् लिटि।। 2.4.49 ।।

गाङ् लिटि।। द्विलकारकोऽयं निर्देशः---लिटि लकारादाविति। तेन प्रागेवादेशेभ्यो लावस्थायामेवादेशो भवति। किं सिद्धं भवति? अधिजगे---`द्विर्वचनेऽचि' इति स्थानिवद्भावो न भवति। ङित्करणमनर्थकं स्थानिवद्भावादेव सिद्धमात्मनेपदमित्याशङ्क्याह---गाङ्यनुबन्धकरणमिति। गाङिति ग्रहणं यथा स्यादिति। ननु चैतदपि स्थानिवद्भावादेव सिद्धम्, नेत्याह---न हीति। `गाङ्कुटादिभ्यः' इति उच्यमाने `कै गै रै शब्दे' इणो गा लुङीत्येतयोरपि ग्रहणं प्राप्नोति, ततश्चागासीन्नटः, अगासातां ग्रामौ देवदत्तेनेत्यत्रापि घुमास्थादिसूत्रेणेत्त्वं प्रसज्येत।

अपर आह---यत्र सानुबन्धकात्षष्ठ्युच्चार्यते, तत्राकृतायामेवेत्सञ्ज्ञायामादेशः प्रवर्त्तते, सत्यामपि वा तस्यामनुबन्धकार्यमादेशे न भवतीत्यस्यार्थस्य ज्ञापनार्थ गाङ्यनुबन्धकरणमिति। किं प्रयोजनम्? `चक्षिङः ख्याञ्'ङित इत्यात्मनेपदं न भवति; ञिदादेशकरणसामर्थ्यात् `स्वरितञितः' इत्येतदेव भविष्यति। इह तर्हि `लटः शतृशानचौ', लट इति सानुबन्धकात्षष्ठी, पचमानः, `टितः' इत्येत्त्वं न भवतीति?प्रकृतानामात्मनेपदानामेत्त्वविधानादिह न भवति। इह तर्हि`युवोरनाकौ' इत्यत्र भुज्यः, शंयुरित्यत्र मा भूदिति, अनुनासिकोकारानुबन्धौ युवू सूत्रे निर्दिष्टौ; ततश्च नन्दनः, कारकः, नन्दना, कारिका स्थानिवद्भावादुगिल्लक्षणौ ङीब्नुमौ प्राप्नुतः, अस्माज् ज्ञापकान्न भवतः। अनुनासिकयणोस्तत्र ग्रहणम्, न त्वनुनासिकोकारानुबन्धयोरिति नात्रोगित्कार्यप्रसङ्गः। इह हि `सेर्ह्यपिच्च,'सिपो हिरिति वक्तव्यम्, अपिच्चेति न वक्तव्यम्, इह च `तुह्योस्तातङ् इति तिप्सिपोस्तदाशिषीति सानुबन्धकात्षष्ठीमुच्चार्थादेशो विधेयः, ङित्करणं न कर्तव्यम्। इह च `तस्थस्थमिपाम्' इति पकारो नोच्चार्थः, तेनाचिनवमित्यादौ गुणसिद्धिः, `अणिञोरनार्षयोः क्त्वो ल्प्' इत्यादौ यत्र स्थान्यनुबन्धकार्यमिष्यते तत्राननुबन्धकः स्थान्युपादेयः। वाराह्या प्रकृत्येत्यादौ वृद्धिर्गुणप्रतिषेधश्च भब्रति तदेवमस्य पक्षस्य मन्दत्वादनुपन्यासः।।

विभाषा लुङ्लृङो।। 2.4.50 ।।

णौ च संश्चेङोः।। 2.4.51 ।।

णौ च संश्चेङो।। अध्यापिपयिषतीति। `क्रीङ्जीनां णौ' इत्यात्त्वम्। अध्यजीगपदिति। लुङि चङि `णौ चङ्युपधाया ह्रस्वः',`सन्वल्लघुनि', `दीर्घो लघोः'।।

अस्तेर्भूः।। 2.4.52 ।।

अस्तेर्भूः।। भवतेरेव भवितेत्यादौ सिद्धेऽसेतरसितेत्यादिनिवृत्तये योगारम्भः।

अनुप्रयोगे त्विति। अनुप्रयोगे=विषये भुवा=भूभावेनास्तेरनिवृत्तिं मनीषिणः स्मरन्ति। कर्तुः== सूत्रकारस्य वचनात्। मनीषिणः कर्तुरिति वा।।

ब्रुवो वचिः।। 2.4.53 ।।
ब्रु वो वचिः।। ब्रुव आर्धधातुके प्रयोगनिवृत्त्यर्थ वचनम्। वक्तेत्यादिकं तु वचेरेव सिद्धम्।।
चक्षिङः ख्याञ्।। 2.4.54 ।।
चक्षिङः ख्याञ्।। कर्त्रभिप्राये क्रियाफले आख्यास्यते, आचख्ये इत्यात्मनेपदं यथा स्यात्, तृजादौ चक्षितेत्यादि मा भूदिति च योगारम्भः। आख्यातेत्यादि `ख्या प्रकथने' इत्यस्यैव सिद्धम्। अत्र यथान्यासे आकारात्पूर्वो भागः खकारयकारात्मेति स्यादाख्यातेति, ककारशकारात्मापि त्विष्यते---आक्शातेति, तदेतदाह--क्शादिरप्ययमिति। ककारेऽकार उच्चारणार्थः।
अपर आह---ख्यादिरेवायमादेश इति। अत्राप्यकार उच्चारणार्थः। तत्र चर्त्वे कृते क्शातेत्यादि भवति। कथमाख्यातेति खकारयकारयोः श्रवणम्? असिद्धकाण्डे णत्वविधानानान्तरं ख्शाञः शस्य यो वेति शस्य यत्वं विभाषा वक्तव्यम्। तत्र चर्त्वे यत्वं सिद्धमित्याख्यातेत्यादि यत्वपक्षे रूपम्, अन्यदा कशातेति रूपम्। अवश्यं च शस्य यत्वमित्याश्रयणीयम्। इह सुप्रचष्टे सुप्रख्यः, `आतश्चोपसर्गे' इति कः, ततो यत्वस्यासिद्धत्वात्सुप्रख्यस्य भाव इति `योपधाद्गुरूपोत्तमात्' इति वुञ् न भवति, अयोपधत्वात्। तस्मिन्सति ष्यञ् भवति----सौप्रख्यमिति। तथा सुप्रख्येन निर्वृत्ते देशे भवः सौप्रख्यीयः, सौप्रख्यीयः, धन्वयोपधादिति वुञ् न भवति, `वृद्धाच्छः' एव भवति। अख्यातः, यत्वस्यासिद्धत्वाद्यण्वत्त्वा भावात् `संयोगादेः' इति नत्वं न भवति, `न ध्याख्यापृमूर्छिमदाम्' इत्यत्र ख्याग्रहणं न कर्तव्यं भवति। पुंसः ख्यानं पुंख्यानमित्यत्र यत्वस्यासिद्ध्त्वात् `पुमः खय्यम्परे'इति रुविधिर्न भवति। पर्याख्यानम्, यत्वस्यासिद्धत्वाच्छकारेणानटा व्यवायात् `कृत्यचः' इति णत्वाभावः। नटः ख्यातेत्यत्र यत्वस्यासिद्धत्वात् खरः शर्परत्वात् `शर्परे विसर्जनीयः' इतेयष विधिर्भवति। नन्वसिद्धे शस्य यवचनेऽपि `ख्या प्रकथने' इत्यस्यौत्पत्तिक एव यकार इति तत्र वुञादिप्रसङ्गः? एवं तर्हि सोऽपि ख्शादिः, शस्य यवचनमपि साधारणं द्रष्टव्यम्।
नृचक्षा रक्ष इति। छान्दसः प्रसोगः। भाषायां तु नृचक्षौ रक्ष इति। विचक्षण इति। `अनुदात्तेतश्च हलादेः' इति युच्। वधक इति। अतो लोपस्य स्थानिवत्त्वाद्वृद्ध्यभावः। गात्रमिति। ष्ट्रनिगादेशः। अजिरमिति। `अजिरशिशिर' इति निपातनमनादृत्योक्तम्।।
वा लिटि।। 2.4.55 ।।
अजेर्व्यघञपोः।। 2.4.56 ।।
अजेर्व्यघञपोः।। प्रवयणीयः, प्रवायक इत्यादौ गुणवृद्धिविषये ह्रस्वदीर्घयोरविशेषं मन्वानः पृच्छति---दीर्घोच्चारणं किमिति। दीर्घव्याख्यानमित्यर्थः। घञपोः प्रतिषेधे क्यप उपसङ्ख्यानमिति। क्यपि यः प्रतिषेधस्तस्य क्यप्सम्बन्धी भवतीति क्यप इत्युक्तम्। यस्त्वाह---अपीत्येव क्यपि सिद्धः प्रतिषेधः, कथम्? अबिति प्रत्याहारः, अपोऽकारादारभ्या क्यपः पकाराद् इति, तस्य संवीतिरिति क्तिन्यपि प्रतिषेधः प्राप्नोति, तस्मात्संज्ञाग्रहणात्समज्येत्यत्र वीभावाभावः। न ह्यादेशेन संज्ञा गम्यते। वलादावार्धधातुके वेष्यत इति। नार्थोऽनयेष्ट्या, नापि घञपोः प्रतिषेधेन, नापि क्यप उपसङ्ख्यानेन, नापि `वा यौ' इति सूत्रेण; एतावदस्तु---`वा लिटि', अजेर्वीत्येव, व्यवस्थितविभाषेयम्, तेन घञपाः क्यपि नैव भवति, वलादौ यौ च विकल्पः, अन्यत्र नित्यम्।।
वा यौ।। 2.4.57 ।।
ण्यक्षत्त्रियार्षञितो यूनि लुगणिञोः।। 2.4.58 ।।
ण्यक्षत्त्रियार्षञितो यूनि लुगणिञोः।। ण्यादयो गोत्रप्रत्यया इति। `गोत्राद्यून्यस्त्रियाम्' इति गोत्रप्रत्ययान्तादेव यूनि प्रत्ययविधानात्। क्षत्त्रियगोत्रस्यक्षत्त्रियादभेदोपचारात् क्षत्त्रियशब्देनाभिधानम्। ऋषेरपत्यमार्षम्, `इतश्चानिञः' इति ढकि प्राप्ते शिवादिपाठादण्। ढगपीष्यते----आर्षेयं वृणीते इति। तस्माच्छुभ्रादिष्वपि पठनीयः। एवं गोत्ररूपाभ्यां क्षत्त्रियार्षाभ्यां प्रत्ययस्योपलक्षणाद् ण्यादयो गोत्रप्रत्यया इत्युक्तम्। क्षत्त्रियादिति। क्षत्त्रियगोत्रप्रत्ययान्तादित्यर्थः। आर्षादिति। ऋष्यभिधायिनो गोत्रप्रत्ययान्तादित्यर्थः। प्रथमनिर्दिष्टाद् ण्यान्तादणोऽसम्भवाच्चरमनिर्दिष्टोऽपीञेव प्रथममुदाहृतः। क्षत्त्रियगोत्रस्य तत्र ग्रहणमिति। औरसशब्देन साहचर्यात्। स हि `जनपदशब्दात् क्षत्त्रियादञ्' इत्यञन्तत्वात्क्षत्त्रियशब्दः। उरसशब्दः सकारोपधो जनपदवाची, तस्माद्यूनि प्राग्दीव्यतीयोऽणिति। `फेश्छ च' इति च ञच्छौ तु न भवतः, यमुन्दश्च सुयामा चेति परिगणनात्। कण्वादिभ्यो गोत्रे इति शैषिकोऽणिति। वामरथस्य कण्वादिवत्स्वरवर्जमिति कुर्वादिषु पाठादिति भावः।
अब्राह्मणगोत्रमात्रादिति। अत्र भाष्ये त्रीणि वाक्यान्युपन्यस्तानि---अणिञोर्लुकि तद्राजाद्युवप्रत्ययस्योपसंख्यानमिति प्रथमम्, अस्योदाहरणम्---बौधिः पिता, बौधिः पुत्रा; औदुम्बरिः पिता, औदुम्बरिः पुत्रः, बुधोदुम्बराभ्यां शाल्ववयवालक्षण इञ् `यञिञोश्च' इति फक्, तस्य लुक्। अनणिञर्थमेतद्वचनभ्। शाल्वावयवेत्यत्रोदुम्बरास्तिलखिला इत्यादि संभवोदाहरणं न परिगणनमिति बुधशब्दादपीञ् भवति। क्षत्त्रियगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानमिति द्वितीयम्। मात्रशब्दो व्याप्त्यर्थः, तद्राजादिति नियमो नास्ति---क्षत्त्रियगोत्रमात्रादिति। तेन जाबालशब्दादत इञोऽतद्राजादपि परस्य फको लुग् भवति---जाबालिः पिता, जाबालिः पुत्रः। वृत्तिकारेणोन्यस्तं तृतीयम्। अत्रापि मात्रशब्दो व्याप्त्यर्थः। क्षत्त्रियादित्यापि नियमो नास्ति---अब्राह्मणगोत्रमात्रादिति, तेन वैश्यगोत्रादपि भवति। भाण्डिजङ्घकर्णखरकौ वैश्यौ, ताभ्यामत इञ् तदन्तात्फको लुक्। व्यापकत्वाच्चेदमुपन्यस्तं वृत्तिकारेण।।
पैलादिभ्यश्च।। 2.4.59 ।।
पैलादिभ्यश्च।। पीडयतेः पचाद्यचि कपिलादिदर्शनादस्य लत्वे पीला। अन्ये पैलादय इञन्ता इति। तत्र बाह्वादिषु `उदञ्चु' इति पठ्यते। उकार उच्चारणार्थः,क्विनि नोपधत्वं निपात्यते। औदञ्चिः। `अचः' इत्यकारलोपः, `उद ईत्' इतीत्त्वं च न भवति; लुप्तनकारस्य तत्र ग्रहणात्। भूलिङ्गशब्दः

शाल्वावयवः। सात्यकिशब्दमपि केचित्पठन्ति, सोऽपि बाह्वादीञन्तः। सत्यकशब्दाद् `ऋष्यन्धक' इत्यणा भाव्यम्। शेषा अत इञन्ताः। शालङ्किरिति। अस्मादेव निपातनाच्छलङ्कोरिञ्, शलङ्कादेशश्च। तद्राजाच्चाण इति। तद्राजसंज्ञकादणः परस्य युवप्रत्ययस्य लुग्भवति। `द्व्ञ्मगध' इत्यणन्तादाङ्गशब्दात् `अणो द्व्यचः' इति फिञो लुक्। आङ्गः पिता, आङ्गः पुत्रः। तदेवं गणवाक्यमेतदेकम्, पूर्वपतठ
ितानि त्रीणीति चत्वारि यथोत्तरमधिकविषयाणि।।

इञः प्राचाम्।। 2.4.60 ।।

इञः प्राचाम्।। `प्राचामवृद्धम्' इत्यादौ प्राग्ग्रहणं विकल्पार्थम्, इह तु न तथेत्याह---गोत्रविशेषणमिति। युवप्रत्ययस्य लुग्विधानादर्थादाक्षिप्तं गोत्रमिति भावः। पन्नम् = प्राप्तम् अगारं येन स पन्नागारः। मन्थरा = मन्दीभूता ेषणा यस्य स मन्थरैषणः।।

न तौल्वलिभ्यः।। 2.4.61 ।।

न तौल्वलिभ्यः।। `तुल उपमाने', औणादिको वलच्। तुल्वलः। धारयतिपारयतिभ्यां नन्द्यादिल्युः---धारणः, पारणः। देवा मित्रमस्येति देवमित्रः। देवेभ्यो यज्ञोऽस्य देवयज्ञः। `पुष पुष्टौ', क्यप्, पुष्यः। विलक्षणौ कर्णावस्य विकर्णः। करेणुं पालयति करेणुपालः। `असु क्षेपणे', कुरच्---असुरः। `ह्वञ्हरणे', अनुपूर्वाल्लटः शत्रादेशः, पुष्करे सीदतीति पुष्करसत्, बाह्वादी अनुशतिकादी च। परिशिष्टाः पारायणे द्रष्टव्याः।।

तद्राजस्य बहुषु तेनैवास्त्रियाम्।। 2.4.62 ।।

तद्राजस्य बहुषु तेनैवास्त्रियाम्।। इह बहुष्वित्यनेन जसादिबहुवचनं वा गृह्येत? अर्थो वा ? आद्ये पक्षेऽयमर्थो भवति---जसादिषु बहुवचनेषु परतस्तद्राजस्यास्त्रीलिङ्गस्य लुगिति। द्वितीये---बहुष्वर्थेषु वर्तमानस्येति। बहुवचनशब्दे हि जसादिषु विनियुक्ते तदेकदेशेन बहुशब्देनापि जसादि शक्यं लक्षयितुम्। संज्ञानामेकदेशस्यापि प्रयोगदर्शनाद् भीमो भीमसेनः, सत्या सत्यभामेति। जसादीनां च बहुत्वाद् बहुष्विति बहुवचनोपपत्तिः। नन्वेवमपि मुख्यत्वादर्थग्रहणमेव युक्तम्? सत्यम्; तेनैव ग्रहणादस्य पक्षस्य सम्भवः। तद्धि प्रियवाङ्गा इत्यादौ बहुवचनं परमिति लुकः प्रसक्तस्य निवृत्तये कृतम्। अर्थग्रहणे चात्र तद्राजस्य बहुत्वे वृत्त्यभावादेव लुकोऽप्रसङ्गः। यद्येवम्, अस्मादेव लिङ्गाद् बहुवचनस्यैव निश्चयादर्तग्रहणस्यासम्भवः? उच्यते---अस्त्रियामिति प्रतिषेधादस्य पक्षस्य सम्भवः। तद्ध्याङ्ग्यः स्त्रिय इत्यादौ तद्राजस्य बहुषु वर्तमानस्य लुङ्मा भूदिति कृतम्। बहुवचनग्रहणे चात्र स्त्रीप्रत्ययेन व्यवधानादेव लुकोऽप्रसङ्गः। न चाम्बष्ठस्यापत्यानि बह्व्यः स्त्रियः `वृद्धेत्कोसलाजादाञ् ञ्यङ्' `यङश्चाप्' आम्बष्ठ्या इत्यत्रेकादेशस्यान्तवद्भावादव्यवधानाल्लुक्प्रसङ्गः; एकादेशस्य पूर्वविधौ स्थानिवद्भावादत्रापि चापा व्यवधानात्। तदेवं लिङ्गद्वयदर्शनात्पक्षद्वयसम्भवः। एवमुत्तरेष्वपि योगेषु द्रष्टव्यम्। तत्राद्यो पक्षेऽतिक्रान्तोऽङ्गानत्यङ्गः, अतिगर्गः, अङ्गेभ्य आगतोऽङ्गरूप्यः, गर्गरूप्य इत्यादौ बहुवचनपरत्वाभावाल्लुङ्न स्यात्। न चच वृत्त्यर्थे वाक्ये यच्छसादि बहुवचनं तत्रैव परतस्तस्यामेवावस्थायां लुग्लभ्यतेऽन्तरङ्गत्वादिति वाच्यम्; `अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति वचनात्। न च लुप्तेऽपि तस्मिन्प्रत्ययलक्षणेन लुग्लभ्यः, `न लुमताङ्गस्य' इति निषेधात्। ननु च न लुगङ्गस्य कार्यम्, किं तर्हि? तदेकदेशस्य प्रत्ययमात्रस्य, अङ्गरूप्य इत्यादौ च समर्थात्तद्धितोत्पत्तेः वृत्त्यर्थे वाक्ये यद्बहुवचनमङ्गेभ्य इत्यादि तत्रैव लुक् भविष्यति। इदं तर्हि----अत्रेरपत्यानि बहूनि `इतश्चानिञः' इति ढक्, तस्य `कितः' इत्यन्तोदात्तत्वम्, तस्य जसि परतः `अत्रिभृगु' इति लुकि कृते उदात्तनिवृत्तिस्वरः प्राप्नोति, तस्माद् द्वितीयं पक्षमाश्रित्याह---बहुषु वर्तमानस्येति।

नन्वत्रापि पक्षे आङ्गश्च वाङ्गश्च सौह्मश्र अङ्गवङ्गसुह्माः, गार्ग्यश्च वात्स्यश्च वाजयश्च गर्गवत्सवाजा इत्यादौ द्वन्द्वे लुग्न स्यात्; अत्र ह्येकैकस्मिन्नेवार्थे प्रत्यय उत्पन्नः, पूर्वत्र तु पक्षेऽन्तिमस्यापि तावत्सिद्ध्यति, बहुवचनपरत्वात्? नैष दोषः; युगपदधिकरणतायां द्वन्द्वः, तत्रैकैकस्य वर्त्तिपदस्य बह्वर्थकत्वाल्लुग्भविष्यति। नन्वेवमपि तद्धिते उत्पत्तिदशायामेकैकस्मिन्नेवार्थे उत्पन्न इति तद्राजो यो बहुषु यञ् यो बहुषु अञ् यो बहुष्वित्युच्यमानो लुङ् न स्यादेव। नन्वत्र बहुष्वित्यनेन न प्रत्ययमात्रं विशेष्यते, किं तर्हि? प्रत्ययग्रहणपरिभाषया तदन्तग्रहणे सति तदन्तं विशेष्यते---तद्राजान्तं यद्बहुषु यञन्तं यद्बहुषु अञन्तं यद्बहुष्विति। यद्येवम्, कश्यपस्यापत्यं काश्यपः बिदाद्यञ्, तस्य प्रतिकृतय इति `इवे प्रतिकृतौ' इति कन्, तस्य `जीविकार्थे चापण्ये' इति देवपथादिषु अर्चासु पूजनार्थास्विति पाठाद्वा लुपि कृते काश्यपा इत्यञन्तस्य प्रतिकृतिबहुत्वे लुक् प्राप्नोति? नैष दोषः; `यञञोश्च' इत्यत्र `यस्कादिभ्यो गोत्रे' इत्यतो `गोत्रे' इत्यनुवर्तते, तेन गोत्रबहुत्वे लुक् प्रतिकृतिबहुत्वे न भविष्यति। नन्वेवमप्याङ्गस्यैकस्य प्रतिकृतयो बह्व्य इति तद्राजान्तस्य बहुषु वृत्तेर्लुक्प्रसङ्गः। नह्यत्रेदमस्ति---तद्राजान्तं यदपत्यं बहुत्वे वर्तत इति । एवं तर्हि तेनैव ग्रहणमस्मिन्पक्षे न कर्तव्यमित्युक्तं तदत्रोपयोक्ष्यामहे---यस्मिन्नर्थे लुग्भावी प्रत्यय उत्पन्नस्तेनैव चेत्कृतं बहुत्वमिति। इह चापत्ये प्रत्यय उत्पन्नः प्रतिकृतिकृतं च बहुत्वम्, यद्येवम्, आङ्गस्यापत्यानि `अणो द्व्यचः' इति फिञ्, तस्याब्राह्मणगोवमात्रादिति वा `तद्राजाच्चाणः' इति वा लुक्, अङ्गाः, बैदस्यापत्यानि `अत इञ्', `ण्यक्षत्त्रिय' इति लुक्, बिदाः, अत्र गोत्रे प्रत्यय उत्पन्नो युवकृतं चात्र बहुत्वामिति लुङ् न स्यात्? नैष दोषः; तेनैवेत्यस्य तज्जातीयेनैवेत्यर्थः, युवा चापत्यतया तज्जातीयो न प्रतिकृतिः। एवं च कृत्त्वा द्वन्द्वो यदा लोपिनामलोपिनां च भवति तदा न भवति----आङ्गदेवदत्तयज्ञदत्ताः, गार्ग्यदेवदत्तयज्ञदत्ताः। इह तु भार्गवश्च वात्स्यश्चाग्रायणश्च भृगुवत्साग्रायणा इति, यद्यपि नलोपिभिरेव कृतं बहुत्वम्, आग्रायणे नडादिफको लुगभावात्; तथाप्यपत्यतया तज्जातीयत्वमस्तीति लुग्भवत्येव। यद्येवम्, गार्ग्यश्च काश्यपश्च गालवश्च गार्ग्यकाश्यपगालवानामित्यत्र गालवे ऋष्यणो लुगभावेऽप्यपत्यतया तज्जातीयत्वाद्यञञोर्लुक्प्रसङ्गः। एवं तर्हि भृगुवत्साग्रायणेषु `अगार्ग्यकाश्यपगालवानाम्' इति निर्देशद्वयाल्लोपिभिरपत्यप्रत्ययैः कृते बहुत्वे विकल्पः। तदेवं तद्राजान्तस्य बहुत्वे वर्तमानस्येति स्थितम्। वृत्तौ तु तद्राजसञ्ज्ञकस्य प्रत्ययस्य बहुषु वर्तमानस्येति व्यधिकरणो षष्ठ्यो, बहुषु वर्तमानस्यास्त्रीलिङ्गस्य तद्राजान्तस्य योऽवयवः प्रत्ययस्तस्येत्यर्थः।

तेनैव चेत्तद्राजेनेति। अत्रापि तद्राजान्तेनेत्यर्थः। तद्राजेत्यापि लोपिप्रत्ययोपलक्षणम्। अङ्गगर्गलोहध्वजा इत्यादावपि भवतीत्याहुः। इहाङ्गस्यापत्यानि बहून्यङ्गास्तेषामपत्यं युवा युवानौ वा आङ्गः आङ्गाविति युवसङ्क्रान्तेः प्राग्गोत्रेऽलुगचीति प्रतिषेधाल्लुगभावः, पश्चात्तु बहुत्वाभावाद्। अचीति च विषयसप्तमी, तेन युवप्रत्यये पश्चाल्लुमता लुप्तेऽपि विषयभूत एव तस्मिन् प्रागेव लुकः प्रतिषेधः, लुप्तेऽपि वा प्रत्ययलक्षणेन। नन्वचीति वचनाद्वर्णाश्रयोऽयम्, नेत्याह; अचीति प्राग्दीव्यतीयस्य प्रत्ययस्य विशेषणं प्रत्ययश्च लुकि निमित्तम्।

आङ्ग्यः स्त्रिय इति। इह च आङ्गी च वाङ्गश्च सौह्मश्चेति द्वन्द्वे आङ्गोतिशब्देन स्त्रीत्वयुक्तानामभिधानात्तदणो लुग्न भवति, आङ्गीवङ्गसुह्मा इति भवतीत्याहुः।।

यस्कादिभ्यो गोत्रे।। 2.4.63 ।।

यस्कादिभ्यो चगोत्रे।। प्रत्ययविधेश्चान्यत्रेति। गोत्रे यत्र प्रत्ययो विधीयते `गोत्रे कुञ्जादिभ्यश्च्फञ्' इत्यतोऽन्यत्रेत्यर्थः। तत्र तावदपत्याधिकारे गोत्रग्रहणादेव पारिभाषिकस्य ग्रहणम्, अन्यत्र लौकिकस्येत्यत्र ज्ञापकं वक्ष्यामः। पुष्करसच्छब्दस्येति। किमर्थ पुनरयमत्र पठ्यते, यावता `बह्वच इञः प्राच्यभरतेषु' इत्येव सिद्धं पुष्करसदः प्राच्यत्वात्, तथा चेतः प्राचामिति प्राप्तस्य लुकः प्रतिषेधाय तौल्वल्यादिषु पठितः? एवं तर्हि गोपनादिषु केचित्तौल्वल्यादयश्चेति पठन्ति, तौल्वल्यादिषु प्रकृतिभागा अपि गोपवनादिषु द्रष्टव्या इत्यर्थः। तेन `न गोपवनादिभ्यः' इति निषेधे प्राप्तेऽत्रास्य पाठः। अयमेव च पाठो ज्ञापयति---गोपवनादिषु तौल्वल्यादयोऽपि पठिता इति।।

यञञोश्च।। 2.4.64 ।।

यञञोश्च।। गोत्रप्रत्ययस्य बहुषु वर्तमानस्येति। अत्रापि व्यधिकरणे षष्ठ्यौ। बहुषु वर्तमानस्य समुदायस्य सम्बन्धी यो गोत्रप्रत्ययो यत्र अञ् च तस्येत्यर्थः। तेन द्वन्द्वेऽपि भवति---गर्गवत्सवाजाः, बिदौर्वभरद्वाजा इति। गार्ग्यः स्त्रिय इति। `यञश्च' इति ङीप्, `हलस्तद्धितस्य'। बैद्य इति। `शाङ्गर्रवाद्यञो ङीन्'।

एकद्वयोरिति। एकत्वद्वित्वयोरित्यर्थः। `संख्याया अल्पीयस्याः' इत्येकशब्दस्य पूर्वनिपातः। `द्व्येकयोः' इति निर्देशाद् द्विशब्दस्यापि भवति। गार्ग्ययोः कुलं गार्ग्यकुलमिति। प्रकरणादिवशाद् द्वित्वावगतौ द्विवचनान्तस्यापि विरुद्धः समासः।।

अत्त्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च।। 2.4.65 ।।

बह्वच इञः प्राच्यभरतेषु।। 2.4.66 ।।

बह्वच इञः प्राच्यभरतेषु।। भरतापत्येषु भरतशब्दाऽभेदोपचाराद्वर्तते, यथा----`रघूणामन्वयं वक्ष्ये' इति। युधिष्ठिरार्जुनशब्दाभ्यां कुर्वाणोऽपवादो बाह्वादिलक्षण इञ्। बलाकाशब्देऽपि बाह्वादिः।

भरताः प्राच्या एवेति। `प्राच्यभरतेषु' इति द्वन्द्वस्तु सामान्यविशेषवाचिनोर्गोबलीवर्दन्यायेनेति भावः।।

न गोपवनादिभ्यः।। 2.4.67 ।।

न गोपवनादिभ्यः।। परिशिष्टानां हरितादीनां प्रमादपाठ इति। ननु चेह स्थाने न गोपवनादयः पठ्यन्ते, किं तर्हि? चतुर्थ एव बिदादिषु तदुपजीवनेनैतत्प्रवर्तते। अथ चतुर्थ पाठः प्रमादज इत्युज्यते, बिदाद्यञपि तर्हि न प्राप्नोति। अथ गोपवनादिभ्यः परत्र पाठः प्रमादजः पूर्वत्र पाठ्यः---- इत्युच्येत्, एवमपि `हरितादिभ्योऽञ्' इत्येष विधिर्गोपवनादीनामपि प्राप्नोति। तस्माद्यथाव्यवस्थित एव पाठे मध्ये वृत्करणं वर्तव्यम्, इह वा प्राक् हरितादिभ्य इति वक्तव्यम्। यथोक्तम्----`गोपवानादिभ्यः प्रितिषेध प्राग्घरितादिभ्यः' इति। वृत्तिकारस्तु चतुर्थेऽत्र चपृथक् पाठं मन्यते।।

तिककितवादिभ्यो द्वन्द्वे।। 2.4.68 ।।

तिककितवादिभ्यो द्वन्द्वे।। द्वन्द्वरूपाण्येव गणे पठ्यन्ते। तिकादीनि पूर्वपदानि कितवादीन्युत्तरपदानि, तत्र `तिकादिभ्यो द्वन्द्वे' इत्युच्यमाने पूर्वपदेष्वेव लुगाशङ्क्येत उत्तरपदेष्वपि यथा स्यादिति तिककितवादिभ्य इत्युक्तम्। आदिशब्दः प्रत्येकमभिसम्बध्यते, तदाह---तिकादिभ्यः कितवादिभ्यश्चेति।।

उपकादिभ्योऽन्यतरस्यामद्वन्द्वे।। 2.4.69 ।।

उपकादिभ्योऽन्यतरस्यामद्वन्द्वे।। द्वन्द्वे चाद्वन्द्वे चेति। कथम् `अद्वन्द्वे' इत्युच्यमाने द्वन्द्वे चाद्वन्द्वे च भवति, तदाह----अद्वन्द्वग्रहणं द्वन्द्वाधिकारनिवृत्त्यर्थमिति। नात्र शास्त्रीयोऽधिकारः स्वरितत्वनिबन्धनो विवक्षितः न हि पूर्वसूत्रे द्वन्द्वशब्द आसक्तस्वरित, तस्माल्लौकिकोऽधिकारो व्यपेक्षालक्षणः। तदिह द्वन्द्वशब्देन तद्विषया व्यपेक्षाभिधीयते, तस्या नञा निषेधः---अद्वन्द्वे इति। किमुक्तं भवति? द्वन्द्व इति नापेक्ष्यत इति, तदनपेक्षायां द्वद्वे चाद्वन्द्वे च भवति। `अद्वन्द्व' इत्यस्मिन्नसति लौकिकोऽधिकारो द्वन्द्वस्य शङ्क्येत्, द्वन्द्वचैषामेव परस्परं गृह्यते, तेषां पूर्वेण नित्यं लुग्भवतीति। भाष्ये तु भ्राष्टकिकापिष्ठलय इत्युदाहरणात्तिककितवादिष्वस्य पाठोऽनार्ष इति निश्चयः।।

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्।। 2.4.70 ।।

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्।। कुण्डिनोशब्दस्य यञि `भस्याऽढे तद्धिते' इति पुंवद्भावे `नस्तद्धिते' इति लोपे कौण्ड्य इति प्राप्नोति, अस्मादेव निपातनात्पुंवद्भावः। असति च तस्मिन्नीकारस्य यस्येति लोपः, तस्य स्थानिवत्त्वादाभीयत्वेनासिद्धत्वाद्वा टिलोपाभावः।

आगस्त्यकौण्डिन्येत्येतयोर्गोत्रप्रत्यययोरिति व्यधिकरणे षष्ठ्यौ, एतयोर्यावयववावीत्यर्थः। तावेव स्वरूपेण दर्शयति---अणश्च यञश्चेति। मध्योदात्तो हि कुण्डिनीशब्द इति। कुण्डमस्यातीति `अतइनिठनौ' प्रत्ययस्वरः, ङीबनुदात्तः। ननु मानुवृत्तं लुग्ग्रहणम्, प्रत्ययान्तयोरवादेशौ स्तामत आह---तयोरित्यादि।

यदि हि प्रत्ययान्तयोरेवादेशौ स्याताम्---`गोत्रेऽलुगचि' इति प्रतिषेधो न स्याद्, लुको ह्यसौ निषेधो नादेशस्य, ततश्चादेशे सत्यवृद्धत्वादणेव स्यात्; लुकि तु सति तस्य प्रतिषेधे तत्सन्नियोगशिष्टस्यादेशस्याप्यभावाद्वृद्धलक्षणश्चो भवति। तत्र विशेषो नास्तीति किमर्थ तर्हीदमुक्तम्---अणश्च यञश्च बहुषु लुग्भवतीति? एवं मन्यते----यदि कुण्डिनजादेशः समुदायस्य स्याद् अगस्त्यादेशोऽपि तथा स्याद्; अतोऽवश्यं लुगनुवर्त्त्यः, अनुवृत्तस्य च कौण्डिन्येनापि संबन्धः; विरोधाभावादिति।।

सुपो धातुप्रातिपदिकयोः।। 2.4.71 ।।

सुपो धातुप्रातिपदिकयोः।। अत्र `सुपः' इति सप्तमीबहुवचनं न गृह्यते; `पञ्चम्या स्तोकादिभ्यः' इत्यादिना पञ्चम्यादीनामलुग्विधानात्। नापि कपः पकारेण प्रत्याहारः, तद्धितानां विधानसामर्थ्यात्; अन्यथा तद्धितान्तस्य प्रातिपदिकत्वात्तदवयवस्य सर्वस्यैव तद्धितस्य लुक् स्यात्, `द्विगोर्लुगनपत्ये' इत्येतच्चानर्थकं स्यात्। अतः सुशब्दादारभ्य सुपः पकारेण प्रत्याहार इत्याह--सुपो विभक्तेरिति। धातुप्रातिपदिकयोरिति यदि सप्तमी स्याद् धातुप्रातिपदिकयोः परतः सुपौ लुक् स्यात्---काष्ठैः पचति, शोभनैः काष्ठैरिति, तस्मात्षष्ठीयमित्याह---सुपो विभक्तेर्धातुसंज्ञायाः प्रातिपदिकसंज्ञाया इति। धातुः संज्ञा यस्यास्तस्या इत्यर्थः। कथं पुनर्विभक्तिर्धातुसंज्ञा प्रातिपदिकसंज्ञा वा भवति, तत्राह---तदन्तर्गता इति। एवमपि धातुप्रातिपदिकयोरवयवभूता विभक्तयः स्युर्न तत्संज्ञाः? नेष दोषः; समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते. धातुप्रातिपदिकयोरवयवस्य सुप इत्यपि व्याख्याने न कश्चिद्दोषः। प्रत्युत `सुपः' इत्यस्य द्विवचनान्तेन सम्बन्धो न दुरुपपादो भवति, तथा तु न व्याख्यातमित्येव।।

अदिप्रभृतिभ्य शपः।। 2.4.72 ।।

अदिप्रभृतिभ्य शपः।। कथम् ` न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेद्' इति, तथा भट्टिकाव्ये---`आश्वसेयुर्निशाचराः' इति, तथा `न विश्वसेत्पूर्वविरोधितस्य' इति? निरङ्गशाः कवयः। अपर आह---`क्षमूष् सहने' घटादिः; तत्र `घटादयः षितः' इति सिद्धे षित्करणं ज्ञापकम्---अनित्यं गणकार्थमिति, तेनैवमादिप्रयोगोपपत्तिरिति नात्र किञ्चिदपभाषितमस्ति।।

बहुलं छन्दसि।। 2.4.73 ।।

यङोऽचि च।। 2.4.74 ।।

यङोऽचि च।। अचि प्रत्यये परत इति। पचाद्यचीत्यर्थः। एतदेव ज्ञापकम्---सर्वधातुभ्यः पचाद्यच् भवतीति। प्रत्याहारग्रहणं तु न भवति, तथा हि सति---अणीत्येव वक्तव्यम्; अन्याजादेः प्रत्ययस्यासंभवात्। न तु छन्दसीति। `हुश्नुवोः सार्वधातुके' इत्यत्र वार्त्तिकम्---`हुश्नुग्रहणमनर्थकमन्यस्याभावात्'। यान्ति वातीत्यत्र क्ङितीत्यधिकारान्न भविष्यति, यातः वातः, अचीत्यनुवर्तते। यान्ति वान्ति, ओरिति। युवन्ति रुवन्ति, अनेकाच इति वर्तते। अयुवन्, अरुवन्, अडागमोऽसिद्धः। प्रोर्णवन्ति, असंयोगपूर्वस्येति वर्तते। यङ्लुङ्निवृत्त्यर्थ तर्हि हुश्नुग्रहणम्---योयुवति, रोरुवति। यङ्लुगर्थमिति चेदार्धधातुकत्वास्तिद्धम्, छान्दसो यङ्लुक्, तत्र `छन्दस्युभयथा' इत्यार्धधातुकत्वादेव न भविष्यति। तदेवं यङ्लुकश्छान्दसत्वमभ्युपगम्य हुश्नुग्रहणं प्रत्याख्यातं वार्त्तिककारेण। स मन्यते---चकारेणात्र `बहुलं छन्दसि' इति सर्वमनुवर्त्तिष्यते, तेनाचि प्रत्यये परतः छन्दसि भाषायां यङो लुग् भवतीत्येकं वाक्यम्, छन्दसि बहुलमनैमित्तिको लुगिति द्वितीयम्, प्रसिद्धश्च तथा छान्दसो यङ्लुगिति। प्रयोगश्च चिरन्तनः पद्ये गद्ये च काव्याख्यायिकादौ विकटपदोपन्यासप्रधानैरपि कविभिर्न कृतो दृश्यते।

भाष्यकारस्तु `हुश्नुवोरिति वक्ष्यन्ति, एवं तर्ह्येतज्ज्ञापयति---भाषायामपि यङ्लुक्' इति, तेन चेचिदीति, चेच्छिदीति, योयवीतीत्यादि सिद्धं भवति। वृत्तिकारस्तु मन्यते----`यदि ज्ञापकेनापि तावद्भाषायामपि यङ्लुकः प्रयोगे भवति, हन्तैवमत्रैव छन्दोग्रहणं मानुवृतत्! प्रयेगस्तु ज्ञापकाश्रयेणैव यथाभिधानं व्यवस्थास्यते' इति, अतो न भाष्यवार्त्तिकविरोधो वृत्तेः शङ्कनीयः।।

जुहोत्यादिभ्यः श्लुः।। 2.4.75 ।।

जुहोत्यादिभ्यः श्लुः।। शबनुवर्त्तते, न यङिति। श्लाविति द्विर्वचनविधानात्। यङ्नुवृत्तौ हि श्लुना तत्र लुप्तेऽपि `सन्यङोः' इति षष्ठ्याश्रयणाद् द्विर्वचनसिद्धेरनर्थकं तत्स्यात्। बिभर्तीति। `भृञामित्' इत्यभ्यासस्येत्त्वम्। नेनेक्तीति। `णिजिर्शौचपोषणयोः',`णिजां त्रयाणां गुणः श्लौ'।।

बहुलं छन्दसि।। 2.4.76 ।।

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु।। 2.4.77 ।।

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु।। अभूदिति। `भूसुवोस्तिङि' इति गुणप्रतिषेधः। लुगनुवर्त्तते, न श्लुरिति। व्याख्यानात्। इण्पिबत्योर्ग्रहणमिति। इणादेशो गा इणित्युक्तः, तत्र गातीत्यादाविकस्येणोय आदेशस्तदनुकरणो गा तिपि शब्लुका निर्दिष्टः, स्थानिवद्भावात्प्रकृतिवदनुकरणं भवतीति चच। तेन `गामादाग्रह8णेष्वविशेषः' इति लाक्षणिकस्यापि गारुपस्य यद्यपि ग्रहणं प्राप्तम्, तथापि गातीति निर्देशादेव तस्य निवृत्तिः। तथा `लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्' इति पिबतेरेव ग्रहणम्। अगासीत्, अपासीदिति। `कै गै रै शब्दे' पा रक्षणे' यमरमनमातां सक्च' इति सगागमः, सिचश्चेट्, `अस्तिसिचोऽपृक्ते' इतीट्, `इट ईटि'। पै ओवै शोषणे' इत्यस्य लाक्षणिकं पारूपमिति ग्रहणाभावः। अगासातामिति। कर्मण्यात्मनेपदम्, आताम्।।

विभाषा घ्राधेट्शाच्छासः।। 2.4.78 ।।

विभाषा घ्राधेट्शाच्छासः।। धेटः सानुबन्धकस्य निर्देश आत्वपरिहारार्थः। `धा' इत्युच्यमाने प्रतिपदोक्तत्वाद्धाञ एव ग्रहणं स्यात्। ननु सत्यप्यनुबन्धो

च्चारणेऽनुबन्धानामनेकान्तत्वात् `नानुबन्धकृतमनेजन्तत्वम्' इत्युदीचां माङ इतिवदात्त्वं प्राप्नोति? सत्यम्; अयमेव निर्देशो ज्ञापयति---सानुबन्धानुकरणे नावश्यकमात्त्वमिति। तेन सूत्राद्बहिरपि वेञः, धेटः, दैप इत्यादि प्रयोगोपपत्तिः। अघ्रासातामिति। कर्मण्यात्मनेपदम्, आताम्। सुमनसाविति। `स्त्रियः सुमनसः पुष्पम्' इत्यमरसिंहः, `अप्सुमनस्समासिकतावर्षाणां बहुत्वं च' इति पाणिनीयं सूत्रम्। तद्बहुत्वं प्रायिकं मन्यते, एका च सिकता तैलदाने समर्था' इति भाष्ये प्रयोगात्।।

तनादिभ्यस्तथासोः।। 2.4.79 ।।

तनादिभ्यस्तथासोः।। उदाहरणेषु स्वरितेत्त्वादात्मनेपदम्। थासा साहचर्यादिति। यद्यपि तावदयं तशब्दो दृष्टापचारः---अस्त्यात्मनेपदमस्ति च परस्मैपदम्, अस्ति चैकवचनमस्ति च बहुवचनम्। अयं तु खलु थाः शब्दोऽदृष्टापचार---आत्मनेपदमेकवचनं च, तस्यास्य कोऽन्यः सहायो भवितुमर्हति, अन्यदत आत्मनेपदादेकवचनाच्चेति भावः। आत्मनेपदस्येति। उपलक्षणमेतत्। एकवचनस्येत्यपि द्रष्टव्यम्।।

मन्त्रे घसह्वरणशवृदहाद्वृचकृगमिजनिभ्यो लेः।। 2.4.80 ।।

मन्त्रे गसह्वरणशवृदहाद्वृचकृगमिजनिभ्यो लेः।। च्लेरेवात्र ग्रहणमिष्यते, न लिङादीनाम्, तदर्थं `सिचः' इत्यनुवर्तयन्ति---सिचो यो लिः स्थानिभूतस्तस्येति व्याचक्षते। सिचि प्रकृते लिग्रहणम् `आदिः सिचोऽन्यतरस्याम्' इत्यादिसिच्कार्यं मा भूदिति। पूर्वत्र हि मा हि दातामिति सिच्स्वरो भवत्येव। ह्वरेति विहितगुणस्यानुकरणम्, अकारश्चागन्तुक उच्चारणार्थः। अक्षन्निति। `लुङ्सनोर्घस्लृ', `गमहन्' इत्युपधालोपः, `शासिवसि' इति षत्वम्। प्राणडिति। ब्रश्चादिना षत्वे जश्त्वचत्वे। प्राणगिति पाठे `नशेर्वा' इति कुत्वम्। आप्रादिति। `प्रा पूरत्तौ' आङ्पूर्वः। अज्ञतेति। `जनी प्रादुर्भावे', अनुदात्तेत्। बहुवचनस्य `आत्मनेपदेष्वनतः' इत्यदादेशः, पूर्ववदुपधालोपः, श्चुत्वम्। ब्राह्मणे प्रयोगोऽयमिति। मन्त्रव्यतिरिक्तो वेदभागः=ब्राह्मणम्। यथाह भगवाञ्जैमिनिः----`यच्चोदकेषु मन्त्राख्या इति मन्त्रलक्षणान्तरम्, शेषे ब्राह्मणशब्दः' इति। बह्वचानां हरिश्चन्द्रब्राह्मणे हरिश्चन्द्रं प्रति वरुणस्यैतद्वाक्यम्---अज्ञत वा अस्य दन्ता इति। कथं पुनर्मन्त्रग्रहणे ब्राह्मणग्रहणं भवति? तत्राह---मन्त्रग्रहणन्त्विति। मन्त्रस्य छन्दोरूपत्वात्तेन तदुपलक्ष्यते। बाहुल्येन तु मन्त्रे दर्शनान्मन्त्राग्रहणं कृतम्।।

आमः।। 2.4.81 ।।

आमः।। आम उत्तरस्य लेर्लुग्भवतीति। यद्यपि सिचा लिर्विशेषितः, तथापीह लेरित्येवानुवर्तत इति भावः। विदामक्रन्विदाङ्गुर्वन्त्वित्यत्र लुङ्लोटोर्निपातनाल्लुग्भवति। तरबादीनां चामन्तादनुत्पत्तिरेव, तस्यानभिव्यक्तपदार्थत्वात्। अयं च लुग्नाप्राप्तेषु तिबादिषु विधीयमानत्वाल्लादेशानामपवादः। तेनामन्तस्यातिङ्न्तत्वाच्चक्षुः कामम्, याजयाञ्चकारेत्यत्र `तिङ्ङतिङः' इति, तस्य चानिघातः, तस्माच्च निघातः सिद्धो भवति। कथमामन्तस्य पदत्वम्? सुबन्तत्वात्। लकारस्य कृत्त्वात्प्रातिपदिकत्वम्। तिङ्भाविनो हि लकारस्यातिङिति प्रतिषेधः, न चायं तिङ्भावी। सुपः श्रवणं कस्मान्न भवति? आमः स्वरादिषु पाठादव्ययत्वात्। तद्धितेनामा साहचर्येऽपि तद्धित एव न गृह्यते, अपि तु व्याप्तेरतद्धितोऽपि नञा तुच समासप्रसङ्गः, न कारयां न हारयां `नञ्' सुबन्तेन समस्यत इति समासः प्राप्नोति? नैष दोषः; अभिव्यक्तपदार्थेन हि याजयाञ्चकारेति नञः सामर्थ्यम्, न त्वनभिव्यक्तपदार्थेनामन्तमात्रेण। आमन्तेभ्यो णलः प्रतिषेधः----शशाम, तताम;वृद्धौ कृतायां स्थानिवद्भावेन णलो लिग्रहणेन ग्रहणे लुक् प्राप्नोति? अर्थवद् ग्रहणात्सिद्धम्। अर्थवत आमन्तस्य ग्रहणम्, न चैषोऽर्थवान्। एवमपि `अमगत्यादिषु', तिपो णल्, आम----अत्र प्राप्तोति, अर्थवत्त्वात्? `लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति अत्र न भविष्यति।।

अव्ययादाप्सुपः।। 2.4.82 ।।

अव्ययादाप्सुपः।। तत्र शालायामिति। शालाशब्दसन्निधौ स्त्रीत्वयुक्तद्रव्यगतकारकशक्त्यभिधानात्तस्यामितिवत्तत्रेत्यत्रापि यदि स्त्रीप्रत्ययः स्यात्पदादेव स्त्रीत्वं प्रतीयेतेति व्यामोहनिवृत्त्यर्थ टापो लुग्वक्तव्यः, यथा----षट्सञ्ज्ञकेभ्यः प्रतिषेध इति भावः। वार्तिककारस्त्वाह----`अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावात्' इति। कृत्वा, हृत्वेति। यदा `बहुषु बहुवचनम्' इत्यादेः स्वादिविधिवाक्येनैकवाक्यता, तदा निस्सङ्ख्येभ्यो निष्कारकेभ्यश्चाव्ययेभ्योऽस्मादेव लुग्विधानाल्लिङ्गत्स्वादयो भवन्ति, भिन्नवाक्यतायामपि नियमपक्षे तुल्यजातीयस्य नियमेन व्यावृत्तिः----बहुष्वेव बहुवचनं न द्वयोरेकस्मिन्, द्वयोरेव द्विचनं नैकस्मिन्न बहुषु, एकस्मिन्नेवैकवचनं न द्वयोर्न बहुषु, इत्यव्ययेभ्यः स्वादीनां सम्भवः। त्रिकपक्षे तु यत्र सङ्ख्या सम्भवति तत्रैव सा वाच्यत्वेन विधीयते, अव्ययेभ्यस्तु निः सङ्ख्येभ्यः सामान्यविहिताः स्वादयो विद्यन्त एवेति सर्वथाव्ययेभ्यः सुबुत्पत्तिरेषितव्या---प्रत्ययलक्षणेन पदसञ्ज्ञा यथा स्यादिति। तुबिति च सप्तमीबहुवचनस्य पकारेण प्रत्याहारः, न कपः; आपः पृथगुपादानात्।।

नाव्ययीभावादतोऽम्त्वपञ्चम्याः।। 2.4.83 ।।

नाव्ययीभावादतोऽम्त्वपञ्चम्याः।। किमर्थः प्रतिषेधः? पूर्वसूत्रेण लुङ्माभूदिति। अमत्र विधीयते, स नाप्राप्ते लुकारभ्यमाणस्तस्य बाधको भविष्यति, यत्र तर्हि प्रतिषिध्यते, पञ्चम्यास्तत्र लुक् प्राप्नोति। प्रतिषेधे तु सतित तत्सामर्थ्याद् द्वे वाक्ये भवतः-----नाव्ययीभावादित्येकम्, अम्त्वपञ्चम्या इति द्वितीयम्। अत्र चात इत्यपेक्ष्यते। तत्रापञ्चम्या इत्यनेनानन्तरस्य विधिर्वा भवति प्रतिषेधो वेति पञ्चम्या आदेशः प्रतिषिद्ध्यते, न पूर्ववाक्यविहितः प्रतिषेधः। इममेवार्थ तुशब्देन द्योतयति---अविशेषेण प्रितषेधः अम्त्वपञ्चम्या इति, तदेतदुक्तम्----तस्मिन्प्रतिषिद्धे पञ्चम्याः श्रवणमेव भवतीति। वाक्यभेदस्तु वृत्तावेव स्पष्टः। उपकुम्भादिति। समीपभूतात्कुम्भादित्यर्थः। कुम्भस्य समीपादित्यपरे। उन्मत्तगङ्गादिरन्यपदार्थप्रधानः सत्त्ववाच्यव्ययीभावः क्रियासम्बन्धसद्भावादपादानत्वात्पञ्चम्या मुख्यमुदाहरणम्।।

तृतीयासप्तम्योर्बहुलम्।। 2.4.84 ।।

तृतीयासप्तम्योर्बहुलम्।। सुभद्रमिति। मद्राणां समृद्धिरित्यव्ययीभावः, ततः सप्तमी, तस्या नित्यमम्भावः। एकविशतिभारद्वाजमिति। एकविशतिर्भरद्वाजा वंश्या इति `सङ्ख्या वंश्येन' इति समासः। तत्र वर्त्तिपदार्थानां स्वार्थोपसर्जनार्थान्तराभिधायित्वाद्भारद्वाजशब्द एकत्वविशिष्टार्थान्तरे सङ्क्रान्त इत्यञो लुगभावः। नेति वयम्, गर्गाणां कुलं गर्गकुलमित्यादावपि प्रसङ्गात्। तस्माद् भाष्यकारप्रयोगादत्र लुगभावः।।

लुटः प्रथमस्य डारीरसः।। 2.4.85 ।।

लुटः प्रथमस्य डारीरसः।। परस्मीपदस्यात्मनेपदस्य चेति। यद्येवं परस्मैपदे त्रयः प्रथमपुरुषसंज्ञकास्तिबादयः, आत्मनेपदेष्वपि त्रयस्तादय इति षट् स्थानिनस्त्रय आदेशा इति वैषम्यात्संख्यातानुदेशो न प्राप्नोति। मा भूत्संख्यातानुदेशः, आन्तर्यतो व्यवस्था भविष्यति? अर्थतश्चान्तर्यम्, एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थः। कथं पुनर्डादीनामैकार्थ्याध्यवसायः, यावता यस्तिपः स्थाने स एकार्थः, यस्तस्स्थाते स द्व्यर्थः यो झेः स्थाने स बह्वर्थः? नेत्याह, प्रयोगदर्शनादप्यैकार्थ्यादिकमध्यवसातुं शक्यम्। अथ वाऽऽदेशा अपि षडेव निर्दिश्यन्ते, कथम्? एकशेषनिदशात्, डारौरसश्च डारौरसश्चेति कृतद्वन्द्वानामेकशेषः। यदि तु डा च डा च डा, रौ च रौ च रौ, रस् च रस् च रस्, डा च रौ च रस् च डारौरस इति कृतैकशेषणां द्वन्द्वः स्यात्? अनिष्टः संख्यातानुदेशः प्राप्नोति तिप्तसोर्डा, झितयो रौ, आतांझयो रसिति। कर्तिति। लुट्,तिप्, तस्य डा इत्ययं सर्वादेशः। नानुबन्धकृतमनेकाल्त्वम्। अस्तु तर्ह्यन्त्यस्यैव, तिपस्तकारेण सह टिलोपो भवति। ननु तकारान्तमङ्गं न भवति, डित्करणसामर्थादनङ्गस्यापि भविष्यति, यथा---सिद्धान्तेऽभस्यापि। अथ वाऽऽनुपूर्व्यात्सिद्धम्, कथम्? अन्त्यस्याप्ययं स्थाने भवन्नप्रत्ययः स्याद्, असत्यां प्रत्ययसंज्ञायां डकारस्येत्संज्ञा नास्ति, असत्यां चेत्संज्ञायामनेकाल्, यदानेकाल् तदा सर्वादेशः, यदा सर्वादेशस्तदा प्रत्ययः, यदा प्रत्ययस्तदेत्संज्ञा, यदेत्संज्ञा तदा लोपस्तदैकाल्, न चेदानीं प्रत्यावृत्त्यान्तादेशो भवितुमर्हति? तदेतदानुपूर्व्यात्सिद्धम्। कर्तारौ, कर्तार इति। `रि च' इति तासस्त्योर्लोपः। अध्येतेति। `इङ् अध्ययने'। अथात्र डारौरस्सु कृतेषु टेरेत्त्वं कस्मान्न भवति? पूर्वमेवास्मिन्योगे स्थानिषु प्रवृत्तत्वात्। इह हि तशब्दस्य टेरेत्त्वं च प्राप्नोति, डादेशश्च; द्वयोरपि शब्दान्तरप्राप्तेरनित्यत्वात्परत्वाट्टेरेत्त्वे कृते पुनः प्रसङ्गविज्ञानाड्डादेशः। एवं रौरसोरपि द्रष्टव्यम्। अथ वा--- पूर्वमेव डारौरसो भवन्तु, थासः सेवचनं ज्ञापकम्----ये तिङादेशास्तेषां टेरेत्त्वं न भवतीति, अन्यथा `थासः स' इत्येव वाच्यं स्यात्। कर्तासीति। `तासस्त्योः' इति सलोपः।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्चर्यो द्वितीयाध्यायस्य तुरीयश्चरणः।।

* समाप्तोऽयं द्वितीयोऽध्यायः *

-------******-------

3.1

तस्मै श्रीगुरवे नमः

काशिकावृत्तिः

अथ तृतीयाध्याये प्रथमः पादः < पदमञ्जरी >

प्रत्ययः।। 3.1.1 ।।

प्रत्ययः।। इह यदि सर्वानेव संज्ञिनः स्वरूपेण निर्दिश्य संज्ञा विधीयेत---सन् प्रत्ययः क्यच् प्रत्ययः, क्यङ् प्रत्यय इति, ततो गौरवं स्यात्। अथ `सप्' प्रत्यय इति सनः सशब्दादारभ्य कपः पकारेण प्रत्याहाराश्रयेणात्र वा प्रदेशान्तरे वा संज्ञा विधीयेत, तदानेकस्य पकारस्य सम्भवात्सन्देहः स्यात्। तथा हि पर्यासत्तिन्याये आश्रीयमाणे सिपः पकारेण स्याद्, व्याप्तौ तु `तप्तनप्तनथनाश्च' इति तनपः। स्यादेतत्----व्याप्तिरेवाश्रयिष्यते, अथ च तनपः पकारेण प्रत्याहारो न भविष्यति; ज्ञापकात्, यदयम् `इच एकाचोऽम्प्रत्ययवच्च' इत्यमः प्रत्ययवद्भावं शास्ति, अन्यथा षष्ठेऽपि प्रत्ययसंज्ञाव्यापारादमोऽपि स्वत एव प्रत्ययत्वात्तद्वद्भावो नातिदेश्यः स्यादिति ? तन्न; तत्र ह्यमिति द्विरावर्त्तते, ततश्चाप्रत्ययप्रतिबद्धम् `औतोऽम्शसोः' इत्यादिविशिष्टं कार्यं यथा स्यादिति सोऽतिदेशः स्यात्। नन्वेवमपि प्रत्ययग्रहणमनर्थकम्, अम्वदिति वक्तव्यम्, अतः प्रत्ययग्रहणात्प्रत्ययप्रयुक्तमपि कार्यमतिदेश्यमति प्रतीयते, तज्ज्ञापकमुक्तार्थस्य भविष्यति? एवमप्यम आगमत्वात्पुगादिवदप्राप्तेः प्रत्ययत्वातिदेशः स्यात्। अस्तु वा ज्ञापकम्, एवमपि कुत एतद्व्याप्तिराश्रीयते, न पुनः प्रत्यासत्तिरिति? किञ्च यथान्यासाद्गौरवं स्थितमेव, सबित्यस्याधिकस्य करणात्? अतो गौरवातिप्रसङ्गपरिहारायाधिकारेणेयं संज्ञा विधीयते। तदाह---प्रत्ययशब्दः संज्ञात्वेनाधिक्रियते इति।`कारके' इति तद्विशेषणमधिक्रियते, स्वादिषु कप्पर्यन्तेषु प्रकृतिरियमधिक्रियत इतिवत्। `प्रत्ययशब्दः संज्ञाधिक्रियते' इति वक्तव्ये संज्ञात्वेनेति वचनमनर्थभेदात्। तथा ह्यमत्र कर्मकरत्वेनाधिकृतः, अयमत्र कर्मकरोऽधिकृतः, नार्थभेदोऽस्ति; किन्तु `कर्मकरोऽधिकृतः' इत्युक्ते यः कर्मकरः

सोऽधिकृतो रूपान्तरेणेत्यपि गम्यते, कर्मकरत्वेनेति पुनरुच्यमाने तस्यैवाकारस्याधिकृतत्वं गम्यते। अधिक्रियते= विनियुज्यते सूत्रकारेण। यान्= नादीननुक्रमिष्यामः= अनुक्रमेण विधास्यामः। सूत्रकारायमाणस्य वृत्तकारस्यैतद्वचनम्।

यदि तर्ह्यधिकारेण संज्ञा क्रियते, प्रतियोगमुपस्थानात्प्रकृत्युपपदोपाधिविकारागमानामपि प्राप्नोति---`हरतेर्दृतिनाथयोः पशौ' हरतेरिति प्रकृतिः, दृतिनाथयोरित्युपपदम्, पशावित्युपाधिः; `हनस्त च' इत्यादिर्विकारः, `त्रपुजतुनोः पुक्' इत्यागमः। सत्यां च संज्ञायां प्रकृतिप्रत्यययोः तर्यायेण परस्परापेक्षं परत्वं स्यात्; शब्दान्तरापेक्षं वा प्रकृतेः, प्रकृत्यपेक्षं तु प्रत्ययस्य? उपपदस्यापि परत्वात् `उपसर्जनं पूर्वम्' इत्येतद्राजपुरुषादिषु सावकाशं बाधित्वा परत्वं स्यात्, यत्र समासाभावात्`उपसर्जनं पूर्वम्' इत्यस्याप्रसङ्गः, तत्रोपपदस्य परत्वं स्यात्? एवं च सति भोक्तुं व्रजतीत्येवमेव नित्यं स्यान्न तु व्रजति भोक्तुमिति, उपाधेरप्यर्थस्य परत्वासम्भवेऽपि तद्वाचिनः प्रयोगानियमे प्राप्ते परश्चेति नियमः स्यात्? आद्युदात्तत्वं च यथायथं स्वरान्तरं बाधित्वा स्यात्? अङ्गसंज्ञा तु विधानप्रतिबद्धा, न चेह प्रकृत्यादयः कुतश्चिद्विधीयन्ते इति न सा प्रकृत्यादिषु परतः पूर्वस्य प्राप्नोति? ननु च प्रतियोगमुपस्थानेऽपि वाक्यभेदप्रसङ्गात्प्रकृत्यादीनां संज्ञा न भविष्यति, तथा हि---हरतेर्दृतिनाथयोः कर्मणोरुपपदयोः पशौ कर्त्तरीन् प्रत्ययो भवतीत्येकं वाक्यम्, ते च हरत्यादयः प्रत्ययसंज्ञका इति द्वितीयम्, सम्भवत्येकवाक्यत्वे वाक्यभेदस्तु नेष्यते? नैतदस्ति; सनादीनामप्यसतां संज्ञानुपपत्तेर्वाक्यभेदेनैव संज्ञा विधेया, ततश्च सनादीनामेकेन वाक्येन विधिरपरेण संज्ञाविधिः, एवं प्रकृत्यादीनामपि प्राप्नोति? तत्राह---प्रकृत्युपपदेत्यादि। अयमभिप्रायः----प्रकृत्यादीनां सनाद्युत्पत्तौ निमित्तत्वेनोपादानात्पारार्थ्यात्स्वसंस्कारं प्रति प्रयोजकत्वाभावः यथा--यः पीठे स देवदत्त इति पीठस्य देवदत्तसंज्ञा न भवति।

ननु सनाद्युत्पत्तिवाक्ये प्रथमे तेषां पारार्थ्यम्, न द्वितीये संज्ञासंज्ञिसम्बन्धप्रतिपादनपरे वाक्ये, ततश्च संज्ञाविधानपरमेवंरूपमेव---गुप्तिज्किद्भ्यः सन् प्रत्यय इति, ततश्च तत्रापि भूतविभक्त्यानिर्द्देशान्निमित्तत्वात्पारार्थ्यं स्थितमेव। किञ्च, योग्यविभक्त्यभावाच्च न प्रकृत्यादीनां संज्ञा, प्रथमान्तस्य षष्ठ्यन्तस्य वा संज्ञासम्बन्धः `वृद्धिरादेच्' `स्वं रूपं शब्दस्य' इति। न च द्वितीये वाक्ये योग्यविभक्त्यध्याहारेण संज्ञा भवितुमर्हति; योग्यविभक्तिनिर्द्दिष्टेषु सनादिषु चरितार्थत्वात्। उपपदसंज्ञा तु सप्तमीनिद्दिष्टस्य विधीयमाना युक्तं यद्वाक्यभेदेन योग्यविभक्त्यध्याहारेण च भवतीति। किञ्च, प्रधानेतरसन्निधौ प्रधाने कार्यसंप्रत्ययो भवति, यस्य चापूर्वविधानं तत्प्रधानम्; अतः प्रथमवाक्ये तावत्सनादीनामेव प्राधान्यम्, द्वितीयेऽपि संज्ञा संज्ञिनमपेक्षमाणा यत्पूर्ववाक्ये प्रधानतयावगतं तदेवापेक्षते, न तु पारतन्त्र्यादप्रधानमिति सिद्धमिष्टम्। एवमपि विकारागमानां प्राप्नोति? नैष दोषः; महती संज्ञा क्रियते, अन्वर्थसंज्ञा यथा विज्ञायेत---प्रतियन्त्यनेनार्थमिति प्रत्यय इति। न च विकारागमाभ्यामर्थं प्रतियन्ति। यद्येवम्, `अवेः कः' इत्यादीनां समासान्तानां च न स्याद्, न ह्येषामन्वयव्यतिरेकाभ्यां कश्चिदर्थोऽवधार्यते, तदभावेऽपि केवलाया एव प्रकृतेस्तदर्थावगमात्।

यदप्युच्यते----अनिर्द्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति स्वार्थ एवैषामर्थ इति, तदपि कल्पनामात्रम्; अन्वयव्यतिरेकगम्यत्वादर्थवत्त्वस्य। इतरेतराश्रयत्वं च भवति---सति प्रत्ययत्वे स्वार्थे विधानम्, स्वार्थे विधानाच्चार्थवत्त्वे सति प्रत्यय संज्ञेति। एवं तर्हि प्रयोजनाभावान्न भविष्यति? तथा हि तेषां स्थानषष्ठ्यासम्बन्धस्यावयसम्बन्धस्य च प्रतिपादनात्परत्वं तावन्न सम्भवति, आगमानां चानुदात्तत्वविधानादाद्युदात्तत्वस्यासम्भवः, सति तु प्रयोजने आगमस्यापि श्नमः शकारस्येत्संज्ञार्थ भवत्येव संज्ञा। अथ `हनश्च वधः' `नाभि नभञ्च' `विराग विरङ्गञ्च' इत्यादौ वधादीनामनेकालानामादेशानां संज्ञा कस्मान्न भवति, सम्भवति हि तेषु परत्वं प्रयोजनम्? यद्यपि स्थानिन आदेशेन निवर्त्तितत्वान्न तदपेक्षं परत्वम्, शब्दान्तरापेक्षया स्यादेव परत्वम्। यथोक्तं प्राक्--गुपादिषु अर्थवत्त्वं च तेषामस्ति, विधेयत्वात्प्राधान्यं च, योग्या च विभक्तिः। अतः सर्वथा वधादिषु संज्ञानिवृत्तये यत्नः कर्त्तव्यः। कर्त्तव्यम्, करणीयामति। अत्र प्रत्ययसंज्ञायां धातोरङ्गसंज्ञा, अङ्गस्य गुणः। अनन्तरमपि सनादिकमतिक्रम्य व्यवहितोऽपि तव्यदादिरुदाहृतः, तत्राद्युदात्तादेरपि प्रत्ययकार्यस्य सम्भवात्। सनादौ तु नित्स्वरेण धातुस्वरेण च तद्वाध्यते।।

परश्च।। 3.1.2 ।।

परश्च।। अयमप्यधिकार इति। न केवलम् `प्रत्यय' इत्ययमेवेत्यपिशब्दार्थः। योगे योगे उपतिष्ठते इति। अनेन परिभाषातोऽधिकारस्य भेदको धर्मो दर्शितः। परिभाषा हि न प्रतियोगमुपतिष्ठते, किन्त्वेकदेशस्थितैव सर्वशास्त्रे व्याप्रियते। परश्च स भवतीत्यादि। अनेनेहस्थाया एवास्याः परिभाषायाः प्रत्ययविधौ सर्वत्र व्यापारो दर्शितः। लिङ्गवती चेयं परिभाषा, प्रत्ययसंज्ञा च लिङ्गम्। धातोर्वेति। क्रियावाचिन्याः प्रकृतेस्तिङन्तादेरप्युपलक्षणमेतत्। प्रातिपदिकाद्वेति। अक्रियावाचिन्याः प्रकृतेरिदमुपलक्षणम्, तेन ङ्यापोरपि ग्रहणम्। तैत्तिरीयमिति। तित्तिरिणा प्रोक्तमधीते, `तित्तिरिवरन्तुखण्डिकोखाच्छण्' `छन्दोब्राह्मणानि च तद्विषयाणि',`तदधीते तद्वेद', `प्रोक्ताल्लुक्', ब्राह्मणकुलस्याभिधेयत्वान्नपुंसकन्वम्। चकारः पुनरस्यैव समुच्चयार्थ इति। अन्यस्य समुच्चेतव्यस्याभावात्। तेनेति। अन्यथा बहुलवचनस्य सर्वोपाधिव्यभिचारार्थत्वादुणादिषु परत्वस्यापि विकल्पः सम्भाव्येत, इह `गुप्तिज्किद्भ्यः सन्' इत्यादौ दिग्योगलक्षणा पञ्चमी, तत्र पूर्वः पर इति वा दिक्शब्दस्याश्रवणादनियमेनाध्याहारे सत्यनियमेन प्रयोगप्रसङ्गे नियमार्थमिदम्---पर एव प्रत्ययो न पूर्व इति। `गापोष्टक्' इत्यादौ षष्ठीनिर्द्देशेऽप्यानन्तर्यसम्बन्धे षष्ठीविज्ञानादानन्तर्यस्य च पूर्वत्वेऽपि भावादनियमप्रसङ्ग एवेति तत्रापि नियमार्थमेव। नैतदस्ति प्रयोजनम्, `विभाषा सुपो बहुच् पुरस्तात्तु' इत्येतन्नियमार्थ भविष्यति---बहुजेव पुरस्ताद्भवति नान्यः प्रत्यय इति, ततश्च बहुचि पूर्वत्वस्य नियतत्वादन्यः प्रत्ययः पर एव भविष्यति, षष्ठीनिर्देशेषु मध्यशब्दाध्याहारेण मध्येऽपि प्रसङ्ग इति चेत्, न;`अव्ययसर्वनाम्नामकच् प्राक्टेः' इति नियमात् अकजेव प्रकृतिमध्ये भवति, नान्य इति? नैतदेवम्; यदि तावदेवं नियमः----बहुजेव पुरस्तादकजेव मध्ये इति, ततो बहुजकचोर्नियमो न स्यात्। अथ बहुच् पुरस्तादेव अकज्मध्य एवेति, ततो देशस्यानियतत्वात्तत्र प्रत्ययान्तरं स्यादेवेति सर्वथानिष्टप्रसङ्गः। किञ्च अकजेव प्राक् टेरित्येवं नियमे प्राक् टेः प्रत्ययान्तरं मा भूत्, मध्यान्तरे तु स्यादेव; मध्यविशेषाश्रयत्वान्नियमस्य। न च `तस्मादित्युत्तरस्य' इत्यनया परिभाषयात्र परत्वं सिद्ध्यति, यत्र हि प्रागोव सतः कस्यचित् किञ्चिद्विधीयते, यथा---

पदात्परयोरपादादौ वर्त्तमानयोर्युष्मदस्मदोर्वानावौ भवत इति, स तस्या विषयः; इह तु प्रागसन्त एव सनादयो विधीयन्ते, न तेषां सम्बन्धि किञ्चित्, प्रत्ययसंज्ञैव तेषां कार्यमिति चेत्, न; एवमपि प्रागुत्पत्तिरनिवारिता स्यात्। तथा हि---असतां सनादीनां सञ्ज्ञाविधिरनुपपन्न इत्येकेन वाक्येन सनादीनां विधिर्द्वितीयेन च तेषामेव संज्ञाविधिरित्यङ्गोकरणीयम्, ततश्च द्वितीये वाक्ये सतः कार्यमिति कृत्वा परिभाषोपस्थानेन प्राक् प्रयुक्तानां संज्ञैव केवलं न स्यादुत्पत्तिस्त्वनियतदेशैव स्यात्; प्रथमवाक्ये परिभाषानुपस्थानात्। स्यादेतत्---`गुप्तिज्किद्भ्यः सन्' इत्यादावेकैव पञ्चमी, सा चैकमेव दिक्शब्दमध्याहरेत्, तत्र पूर्वः परो वेति संशये पूर्वशब्दाध्याहारे द्वितीयस्य वाक्यस्य स्वरसभङ्गः स्यात्। गुपादिभ्यः परः सन् प्रत्ययसंज्ञो भवतीति हि तस्य स्वरसतः प्राप्तोऽर्थः, स च पूर्ववाक्ये पूर्वशब्दाध्याहारे सति भग्नः स्यात्, अतस्तत्परिरक्षणाय परशब्द एवाध्याहरिष्यते। भवतु वोत्पत्तिरनियतदेशा, पश्चात्तु सत एव परस्य यत्कृत्यप्रत्ययसंज्ञादिशास्त्रकार्यम्, तन्नान्यदेशस्य,यद्देशस्य च शास्त्रीयं कार्यं तद्देशोऽन्यदेशं निवर्त्तयिष्यति; विशेषशास्त्रान्वितत्वेन तस्यैव साधुत्वादिति? अस्त्वेवम्, अथ येषु प्रत्ययसंज्ञैव न भवति----`शमेः खः' शङ्खः, `कणेष्ठः' कण्ठ इत्यादिषु, तेषु कथं परत्दम्, द्वितीयवाक्यव्यापाराभावात्? भवतो वा कथं भवानपि हि `यः प्रत्ययः स परः' इति प्रत्ययपूर्वकं परत्वं परिभाषते? सत्यम्; परिभाषापक्षे न स्यात्परत्वम्, अधिकारपक्षे तु प्रत्ययत्वपूर्वकं परत्वं न भवति; किन्तु परत्वविशिष्टस्यैवोत्पन्नस्य पश्चात्प्रत्ययसंज्ञा, इह तु बहुलवचनात्प्रत्ययत्वाभावेऽपि परत्वमविरूद्धम्। एवमपि नार्थ एतेन, बहुलवचनादेव परत्वमेवात्र व्यवस्थास्यते? एवं तर्हि प्रयोगनियमार्थमिदम्---पर एव प्रत्ययो न केवल इति; अन्यथा प्रत्ययार्थमात्रविवक्षायां केवलोऽपि प्रत्ययः प्रयुज्येत, यथा---किमस्य द्वयसम्, किमस्य मात्रमिति; यथा वा प्रकर्षविवक्षायां तरतमभावः तारतम्यमिति। ननु प्रकृतिविशेषं निर्दिश्यैव विधीयते, तत्र पूर्वोक्तया नीत्या परत्वविशिष्टस्यैव विधानमिति नास्ति केवलस्य प्रयोगः? एवमपि प्रकृत्यर्थमात्रविवक्षायां केवलायाः प्रकृतेः प्रयोगः स्यादेव, यथा---पच्, वृक्षेति। यत्र पुनरुभयं विवक्षितम्----प्रकृत्यर्थः, प्रत्ययार्थश्च, न तत्र केवलायाः प्रकृतेः प्रयोगप्रसङ्गः ; न केवला प्रकृतिः प्रत्ययार्थमभिधातुं समर्थेति। लक्षणया समर्थेति चेत्? नो खल्वारभ्यमाणमप्येतल्लक्षणया प्रयोगं निवारयितुमर्हति, अतः केवलप्रकृत्यर्थविवक्षायां केवला प्रकृतिर्मा प्रयोजीति सूत्रारम्भः। चशब्दश्चावधारणे, प्रत्ययः परो भवत्येव, न तु कदाचिन्न भवतीति वचनव्यक्तिः। आ पदत्वनिष्पत्तेश्चायं नियमः, निष्पन्ने तु पदे तावदेव प्रयुज्यते। अपत्याद्यर्थान्तरविवक्षायां तु तस्मादपि प्रत्ययान्तरं भवति।।

आद्युदात्तश्च।। 3.1.3 ।।

आद्युदात्तश्च।। उहास्वरकस्याच उच्चारणासम्भवात्सर्व एव स्वरविधिर्नियमार्थः, तत्र `चितः' एवान्त उदात्तः, रित्येव मध्य उदात्तः, तिदेव स्वरितः, सुप्पितावेवानुदात्तो, दूरात्सम्बुद्धावेवैकश्रुत्यमति। स्वरान्तराणामन्यत्र नियमात् पारिशेष्यादाद्युदात्त एव प्रत्ययो भविष्यति, नास्वरकः नाप्यन्यस्वरकः, तत्राह---अनियतस्वरप्रत्ययप्रसङ्ग इति। अनियतः स्वरो यस्य सोऽनियतस्वरः, स चासौ प्रत्ययश्चानियतस्वरप्रत्ययः तस्य प्रसङ्गे प्रत्ययोऽनियतस्वरो मा भूदित्येवमर्थमित्यर्थः। अनियतस्वरप्रसङ्ग इति पाठे त्वनियतस्य स्वरस्य प्रसङ्ग इत्यर्थः। अयमभिप्रायः---आद्युदात्तत्वमपि `ञ्नित्यादिर्नित्यम्' इत्यादौ नियतत्वान्न स्याद्, अन्यत्रानियमः स्यादेव यत्रायं नियमो नास्ति। किञ्च त्वदुक्ते नियमे चिदातीनामनियमः स्याद्। अतश्चितोऽन्त एव, तित्स्वरित एवेत्यादिकं तत्र तत्र नियमस्वरूपमाश्रणीयम्, ततश्च प्रत्ययस्यानियतस्वरत्वमेव स्यात्। किञ्च, रित्येवोपोत्तमनुदात्तमित्यपि नियमेऽन्यत्रोपोत्तमनुदात्तं मा भूद्। मध्यान्तरं तु स्यादेव; मध्यविशेषाश्रयत्वान्नियमस्य। तस्माद्ये एकाचः प्रत्ययास्तेष्वनियतस्वरप्रसङ्गे वचनमिदमुदात्तार्थम्। ये पुनरनेकाचः प्रत्ययास्तेषु देशस्याप्यनियमः प्राप्नोतिकदाचिदादेः, कदाचिन्मध्यस्य, कदाचिदन्त्यस्येति। तेषु वचनमिदमुदात्तार्थम्, तत्राप्यदेरुदात्तार्थमिति। किमर्थं पुनः प्रत्ययसंज्ञासन्नियोगेनायं स्वर उच्यते, न `ञ्नित्यादिर्नित्यम्' प्रत्ययस्य च लसार्वधातुकमनुदात्तं सुप्पितौ चेति स्वरप्रकरण एवोच्येत, एवं हि प्रकरणमभिन्नं भवति? किञ्च, द्विराद्युदात्तग्रहणं द्विश्चाद्युदात्तग्रहणं न कर्त्तव्यं भवति?

स्यादेतत्--तत्र क्रियमाणे प्रत्ययग्रहणपरिभाषया तदन्तस्य स्वरः प्राप्नोति, इह तु क्रियमाणे नायं दोषो भवेद्, उत्पन्नो हि प्रत्ययस्तदाश्रयाणां तदन्तविध्यादीनां निमित्तं भवति, न तूत्पद्यमानः, न खलूत्पद्यमानो घट उदकाहरणादीनां निमित्तमवकल्पते, ततश्च `आद्युदात्तश्च' इत्यस्य प्रतियोगमुपस्थाने सति उत्पद्यमान एव तव्यदादिराद्युदात्तो भवति, एवं तिबादिरनुदात्त इति दोषाभावः, अतः प्रत्ययसंज्ञासन्नियोगेन चस्वरो विधीयत इति? तन्न; ज्ञापकात्सिद्धम्, यदयं ञ्नित्यादिरुदात्तो भवतीत्याह, तज् ज्ञापयति---प्रत्ययस्य चेत्यत्र न तदन्तविधिर्भवतीत्यनुदात्तत्वमपि तदन्तस्य न भविष्यति; धातोरन्त उदात्तो भवतीत्यादेः प्रकृतिस्वरस्य विधानसामर्थ्यात्। यत्र ह्यनुदात्तः प्रत्ययः----याति, वृक्षाभ्यामित्यादौ, तत्र प्रकृतिस्वरः श्रूयते; यातः, यान्ति, वृक्षत्वमित्यादौ सतिशिष्टेन प्रत्ययाद्युदात्तत्वेन बाध्यते। यदि च प्रत्ययान्तस्यानुदात्तत्वं स्याद् निर्विषयं धातुप्रातिपदिकान्तोदात्तत्वं स्यात्। इदं तर्हि प्रयोजनम्---लवितव्यमित्यादौ प्रत्ययोत्पत्तिकाले एवाग्युदात्तत्वे कृते पश्चाद्भवन्निडनुदात्तो यथा स्यात्, अन्यथा लू+तव्य इति स्थिते आद्युदात्तत्वं शब्दान्तरप्राप्त्याऽनित्यम्, इट् तु स्वरभिन्नस्य प्राप्नोति, उभयोरनित्ययोः परत्वादिटि कृते तस्य प्रत्ययग्रहणेन ग्रहणे सति इट एवाद्युदात्तत्वं स्यात्? एतदपि ज्ञापकात्सिद्धम्, यदयम् `यासुट्परस्मैपदेषूदात्तो ङिच्च' इत्याह, तज्ज्ञापयति---आगमा अनुदात्ता इति; अन्यथा चिनुयातामित्यादौ यासुटः प्रत्ययादित्वात्सिद्धमुदात्तत्वमित्यनर्थकं तत्सस्यात्। ननु पिदर्थमेतत्सस्यात्, अन्यथा चिनुयादित्यादौ पिद्भक्तो यासुङनुदात्तः स्यात्? यद्योतावत्प्रयोजनं स्याद्, यासुट् परस्मैपदेषु भवति, अपिच्च लिङ्भवतीति पित्त्वमेव प्रतिषेधेत्। अवश्यं चैतज्ज्ञापकमाश्रयणीयम्, अन्यथा प्रत्ययसंज्ञासन्नियोगेनाद्युदात्तत्वविधावपि लविषीयेत्यादौ लावस्थायामनच्कत्वादसति स्वरे विशेषविहितत्वात्परत्वाच्च सीयुटि कृते पश्चाल्लादेशे प्रत्ययाद्युदात्तत्वमित्यानुपूर्व्या सीयुट एव स्यात्। ज्ञापकाश्रयणे तु सीयुडनुदात्तः `इटोऽत्' इत्यकार उदात्तो भवति। कथं भवति, यावता सीयुटि कृतेऽकारस्य विच्छिन्नमादित्वम्? नैष दोषः; यासुट उदात्तवचनं ज्ञापकम्---प्रत्ययाद्युदात्तत्वे कर्त्तव्ये आगमा अविद्यमानवद्भवन्तीति; अन्यथा

चिनुयातामित्यादौ यासुटः प्रत्ययादित्वात्सिद्धमुदात्तत्वमित्यनर्थकं तत्स्यात्। किञ्च, लवितव्यमित्यादौ पूर्वमाद्युदात्तत्वे सत्यपि पश्चाद्भवन्निट् किमित्यनुदात्तो भवति शेषनिघातेन? नायं शेषनिघातस्य विषयः, स्वरविधिशेषत्वात्तस्य। यस्मिन्पदे यस्यामवस्थायां यस्याच उदात्तः स्वरितो वा विधीयते तस्मिन्पदे तस्यामवस्थायां सन्निहितमजन्तरं निहन्यत इत्यर्थः। न चायं प्रकारोऽत्र सम्भवति। इह तर्हि स्त्रुघ्ने भवा स्त्रौघ्नी प्रत्ययसन्नियोगेनाण उदात्तत्वे सति ङीप उदात्तनिवृत्तिस्वरः सिद्धो भवति; अन्यथा स्त्रौघ्न ई इति स्थिते `प्रत्ययस्य च' इत्याद्युदात्तत्वं बाधित्वा परत्वाद्यस्येति लोपे कृते उदात्तनिवृत्त्यभावान्न स्यात्, न वा बहिरङ्गलक्षणत्वात्। लोपो हि ङीप उत्पत्तिमपेक्षते, स्वरस्तु निरपेक्षः। अवश्यं चात्रान्तरङ्गत्वमेवाश्रयणीयम्, अन्यथा कंसेन क्रीता `कंसाट्टिठन्' टित इति ङीप्, कंस ठ ई इति स्थिते `ञ्नित्यादिः' इत्याद्युदात्तत्वं बाधित्वा परत्वाद्यस्येति लोपः स्यात्, ततश्च नित्स्वरे लोपेन बाधिते प्रत्ययसंज्ञासन्नियोगेन विधीयमानमाद्युदात्तत्वमकारस्य स्थितमिति तस्य लोपे ङीप उदात्तनिवृत्तिस्वरः स्यात्। ननु च ठचश्चित्करणात्पूर्वमिकारदेशस्ततः प्रत्ययाद्युदात्तत्वमिति नास्त्युदात्तलोपः। इह तर्हि उत्से जाता `उत्सादिभ्योऽञ्',ङीप्, उत्स अ ई इति स्थिते ञित्स्वरं बाधित्वा परत्वाद्यस्येति लोपे पूर्वोक्तया नीत्या ङीप उदात्तनिवृत्तिस्वरः स्यात्? नैष दोषः; नित्स्वरो हि प्रत्ययस्वरस्यापवादः, न चापवादविषय उत्सर्गोऽभिनिविशते, तत्र तावदत्र प्रत्ययाद्युदात्तत्वं भवति, अपवादं ञ्नित्स्वरं प्रतीक्ष्यत इति कुत उदात्तलोपः! इह तर्हि अत्रेरपत्यम् `इतश्चानिञः' इति ढक्, आयन्नादिषूपदेशिवचनं स्वरसिद्ध्यर्थमिति प्रत्ययस्वरात्पूर्वमेयादेशः, ङीप् आत्रेय ई इति स्थिते तद्धितस्य कित इति स्वरं बाधित्वा परत्वाद्यस्येति लोपे कृते उदात्तनिवृत्तिस्वर ईकारस्य न प्राप्नोति तस्मादान्तरङ्गत्वमेवाश्रयणीयम्। एवं च स्त्रौघ्नीत्यत्रापि अन्तरङ्गत्वादेव सिद्धमिष्टमिति नार्थ एतदर्थेन प्रत्ययसंज्ञासन्नियोगेनाद्युदात्तवचनेन। इदं तर्हि प्रयोजनम्---गोपायाति धूपायति, उत्पत्तिसन्नियोगेनाद्युदात्तत्वे पश्चात् `सनाद्यन्ता धातवः' इति धातुसंज्ञायां धातोरित्यन्तोदात्तत्वं भवति। यदि तु ञ्नित्यादिर्नित्यं प्रत्ययस्य चेत्युच्येत, परत्वाद्धातुस्वरं प्रत्ययस्वरो बाधेत। स्यादेतत्।
अनुदात्तस्य तर्ह्यत्र प्रदेशे करणे किं प्रयोजनम्? स्यादेतत्----कार्यशब्दाट्टापि स्वरितत्वात्प्रागेकादेशे कृते तस्य पूर्व प्रत्यन्तवद्भावात्तित्स्वरितश्च प्राप्नोति, परं प्रत्यादिवद्भावात्पित्स्वरश्च, परत्वात्स्वरितो भवति। यदि तु लसार्वधातुकमनुदात्तं सुप्पितौ चेत्युच्येत परत्वादनुदात्त्वं स्यादिति? तन्न; तत्र हि टाबु त्पत्तेरपि प्रागेव स्वरितो भवति, सत्यपि वा टापि स्वरितैकादेशयोरुभयोरनित्ययोः परत्वात्स्वरितत्वे कृते आन्तर्यतः स्वरितानुदात्तयोरेकादेशः स्वरितो भविष्यति। इदं तर्हि---आम्बष्ठ्या यङश्चाप्येकादेशे कृते पित्स्वरश्च प्राप्नोति चित्स्वरश्च, परत्वाच्चित्स्वरो भवति, अन्यत्र क्रियमाणो पित्स्वरः स्यात्? अत्रापि चापश्चित्करणसामर्थ्यादेवच चित्स्वरो भविष्यति। सामान्यग्रहणाविघातार्थे हि चकारे टाप्प्रकरण एव यङष्टापं विदधीत। एवं तर्हि तदेव तस्मिन्प्रयोजनं तदन्तविधिर्मा भूदिति। यदुक्त प्रकृतिस्वरस्य विधानसामर्थ्यादिति? तत्र आस्ते शेत इत्यादौ लसार्वधातुकमात्रस्यानुदात्तत्वे सति धातुस्वरस्य सावकाशत्वात्। प्रातिपदिकान्तोदात्तत्वमपि अग्निमान्, वायुमान्, अग्नीनामित्यादौ `ह्रस्वनुड्भ्यां मतुप्' `नामन्यतरस्याम्' इति स्वरसिद्ध्यर्थ स्यात्, अत्र ह्यन्तोदात्तादिति वर्त्तत इत्यलमपि कर्कशेन क्षोदेन।।
अनुदात्तौ सुप्पितौ।। 3.1.4 ।।
अनुदात्तौ सुप्पितौ।। सुबिति प्रत्याहारस्येदं ग्रहणम्, न स्पतमीबहुवचनस्य; पित्त्वादेवानुदात्तत्वस्य सिद्धत्वात्। अत एव वृत्तौ `सुपः' इति बहुवचनम्। पित एतत्तु प्रक्रमानुरोधेन बहुवचनम्। सुपश्च पकारेण प्रत्याहारः, न कप; टाबादीनां पित्करणात्। पचतीति। शबन्तोदाहरणम्, तिपस्त्वदुपदेशात् `लसार्वधातुकम्' इत्येव सिद्धम्।।
गुप्तिज्किद्भ्यः सन्।। 3.1.5 ।।
गुप्तिज्किद्भ्यः सन्।। गुप गोपने इति। `गुप व्याकुलत्वे', `गुपू रक्षणे'इत्येतयोस्तु ग्रहणं न भवति; तिजिना सह गणे पठितस्यानुदात्तेन एव गुपेरिहापि ग्रहणात्। प्रत्ययसंज्ञा चाधिकृतैवेति। का पुनरत्र विस्मरणाशङ्का, किन्त्वन्वर्था प्रत्ययसंज्ञा, अनर्थकस्य गुपादिसनो न स्यादित्याशङ्कानेन निवार्यते। अधिकारसामर्थ्यादनर्थकस्यापि भवतीत्यर्थः। अन्वर्थता त्वर्थवदनर्थकसम्भवेऽर्थवतो ग्रहणेहेतुः। निन्दादयस्तु गुपादीनामर्था न सनः, अन्यथा गुपादीनामानर्थक्यप्रसङ्गात्। धातूनां चानेकार्थत्वं तत्र तत्र दृश्यते। प्रत्ययास्तु स्वार्थिका अपि भवन्ति समासान्तादिवत्। जुगुप्सते इति। धातोरित्येवमनभिधानादस्य सनोऽनाद्धधातुकत्वादिडभावः। निन्दाक्षमेति। प्रायिकमेतदुपाधिवचनम्। तथा च `क्षेत्रियच् परक्षेत्रे चिकित्स्यः' इत्यत्र ग्रन्थः---- `अथ वा क्षेत्रियाणि तृणानि सस्यार्थे क्षेत्रे जातानि चिकित्स्यानि विनाशयितव्यानि, अथ वा क्षेत्रियः पारदारिकः, परदाराः परक्षेत्रेम्, तत्र चिकित्स्यो निगृहीतव्यः' इति। संशयेऽपि दृश्यते----तद्व्यचिकित्सन्, य एवं विद्वान्विचिकित्सति, तच्छुश्रुवानृषिर्व्यचिकित्सदिति च। अन्यत्रेति। अर्थान्तरवृत्तेर्द्धात्वन्तरादित्यर्थः। एतच्च `पूर्ववत्सनः' इत्यत्र निपूणतरमुपपादितम्। गुपादिष्वनुबन्धकरणमात्मनेपदार्थमिति। एतदपि तत्रैवोपपादितम्। गुपादीष्विति बहुवचनं मान्वधादिसूत्राभिप्रायम्। कितिस्तुपरस्मैपदी, तथा चानन्तरमेव प्रयोगा दर्शिताः। सनो नकारः स्वरार्थः, नित्करणसामर्थ्याद्धातुस्वरो न भवति---यत्स्तोतारं जिघांससि सखायम्। विशेषणार्थश्च---`अज्झनगमां सनि' `हनेः सः' हंस इत्यत्र मा भूत्। `स्तौतिण्योरेव षण्यभ्यासात्',सुषुपिष इन्द्रमित्यत्र मा भूत्। `सन्यङोः' इत्यत्रापि `लिटि धातोः' इत्यतो धातोरित्यनुवृत्तैर्यद्यपि तृणादिभ्यः सेऽप्रसङ्गः। हंसः, वत्स इत्यादौ तु स्यादेवोणादीनां व्युत्पत्तिपक्षे। प्रतीषिषतीत्यत्र प्रतिपूर्वादिणः सनि विहिते `अजादेर्द्वितीयस्य' इति शब्दस्य द्विर्वचनं यथा स्यादेवमर्थः। `यथष्टं नामधातूनामिति वक्तव्यम्' पुत्रीयिषिषति। अन्यत्र त्वार्द्धधातुके `अतो लोपः' सार्वधातुके शपा सहैकादेश इति नास्ति विशेषः।।
मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य।। 3.1.6 ।।
मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य।। अत्र मान्बधी अनुदात्तेतौ, शेषौ स्वरितेतौ। अभ्यासस्य चेकारस्यदीर्घो भवतीति। `सन्यतः' इतीत्वे दीर्घो भवतीत्यर्थः।

ननु विशेषविहितो दीर्घः सामान्यविहितमित्त्वं बाधित्वाऽवर्णस्यैव प्राप्नोति? ज्ञापकात्सिद्धम्, यदयं `दीर्घोऽकितः', इत्यत्राकित इत्याह, तज्ज्ञापयति----नाभ्यासविकारेषु बाध्यबाधकभाव इति। तद्धि यंयम्यते इत्यादौ नुकि कृते मा भूदिति। यदि चाभ्यासविकारेषु बाध्यबाधकभावः स्यात्ततो विशेषविहितत्वान्नुकि कृतेऽनजन्तत्वादेव न भविष्यति दीर्घः, किं प्रतिषेधेन? अत एव डीढोक्यते इत्यादौ ह्रस्वत्वे कृते गुणो भवति, अन्यथा बबाधे चरितार्थं ह्रस्वं पापच्यते इत्यादौ चरितार्थो दीर्घः परत्वाद्बाधेत।

अपर आह---सूत्रोपात्त एवार्थो वृत्तिकारेणोक्त इति कथमभ्यासस्येति पदच्छेदः, अभ्यासस्य विकार अभ्यासः, स चेत्त्वमेव। तथा हि---लोपस्य तावदभावरूपत्वाददैशो विधातुमशक्यः, यदि च ह्रस्वस्य दीर्घत्वं स्यात्च तद्धितनिर्देशोऽनर्थकः स्यात्, दीर्घश्रुत्या `अचश्च' इत्युपस्थानादजन्तस्य दीर्घविधानाद्दीर्घस्य ह्रस्वस्य वा दीर्घो विशेषाभावात्तस्मादित्त्वमेव तद्धितेन प्रत्याय्यते। अथ वा सन्याहत्य विहितस्य विकारस्य ग्रहणं तदाह---अभ्यासस्य चेकारस्येति। सर्वशेष इति । न केवलं तस्यैवापि तु पूर्वयोरपि द्वयोरित्यर्थः। तेन क्वचिन्न भवतीति। अर्थान्तरवृत्तिभ्यो दात्वन्तरेभ्य इत्यर्थः। एतच्च `पूर्ववत्सनः' इत्यत्रोपपादितम्। मानयतीत्यादयश्चुरादिण्यन्ताः। निशान इति ण्यन्तादेव पचाद्यच्। मानेर्जिज्ञासायामिति। यद्येवम्, ज्ञानार्थवृत्तेर्मानेरुत्तरसूत्रेणैव सन् सिद्धः? सत्यम्, दीर्घविघानार्थं वचनमिडभावार्थं च। बधेर्वैरुप्ये इति। चित्तस्य दुर्गन्धाद्यनुभवनिमित्तो विकारो वैरूप्यम्। शानेर्निशाने इति। निशानम्=तीक्ष्णीकरणम्, यत्रैवायं पठितः `शान तेजने' इति तत्रैवेत्यर्थः।।

धातोः कर्मणः समानकर्तृकादिच्छायां वा।। 3.1.7 ।।

धातोः कर्मणः समानकर्तृकादिच्छायां वा।। कर्मत्वसमानकर्तृकत्वयोः क्रियापेक्षत्वादिच्छायायश्च प्रत्ययार्थत्वेनापि तावच्छ्रुतत्वात्तदपेक्षे एव ते विज्ञायेते इत्याह ---इषिकर्म यो धातुरिषिणैव समानकर्तृक इति। अर्थद्वारकमिति। धात्वर्थस्य कर्मत्वात्समानकर्तृकत्वाच्च धातुस्तथा व्यपदिश्यते न स्वरूपेणेत्यर्थः, किं कारणम्? असम्भवात्। यद्यपि करोतिमिच्छतीत्यादौ धातोः स्वरूपेणापि कर्मत्वसम्भवः, तथापि न तस्य स्वरूपेणार्थद्वारेण वा समानकर्तृकत्वं सम्भवति। किं चात्र श्तिपा निर्देशात्स्वरूपपरत्वम्, सन्प्रकृतेस्तु लोकव्युत्पत्त्यनुसारेणार्थपरत्वमेव, अतः सुष्ठूक्तम्---धातोरर्थद्वारकं विशेषणमिति। इच्छायाः क्रियायाः कर्मभूत इच्छयैव समानकर्तृकोऽर्थो यस्य धातोस्तस्मात्सन् भवतीत्यर्थः। चिकीर्षति, जिहीर्षतीति। कृहृञ्भ्यां सन्, `इको झल्' इति कित्त्वम्, `अज्झनगमां सनि'इति दीर्घः, `ऋत इद्धातोः',`हलि च' इति दीर्घ;, सनः षत्वम्, द्विर्वचनम्, हलादिशेषः, ह्रस्वः, `कुहोश्चुः' इति चुत्वम्---ककारस्य चकारः, हकारस्य झकारः, `अभ्यासे चर्च' इति जश्त्वम्---जकारः, `सनाद्यन्ता धातवः' इति धातुसंज्ञायां लडादिः।

धातुग्रहणं किमिति। `कर्मणः समानकर्तृकात्' इति वचनाद्वाक्यान्न भविष्यति। न ह्येतदुभयं वाक्यार्थस्य सम्भवति, सुबन्तादपि---पुत्रमिच्छतीत्यादौ असमानकर्तृकत्वान्न भविष्यति, यत्रापि समानकर्तृकत्वम्---गमनमिच्छति, आसनमिच्छतीत्यादौ, तत्रापि क्यज्बाधको भविष्यति। यद्यपि पुत्रमिच्छतीत्यादौ असमानकर्तृके क्यच् सावकाशः तथापि चिकीर्षतीत्यादावसुबन्ते सावकाशं सनं सुबन्तेषु समानकर्तृकेषु परत्वाद्बाधिष्यते। यत्रापि क्यच् प्रतिषिध्यते क्यचि मान्ताव्ययप्रतिषेध इति----कर्त्तुमिच्छतीति, तत्रापि काम्यज्बाधकः।ङ्याप्प्रातिपदिकेष्वपि खट्वाकुमारीपुत्रादिषु न समानकर्तृकत्वम्। आसनशयनादौ त्वकर्मत्वम्, न हि ङ्याप्प्रतिपदिकं कर्माभिधायि, विभक्त्यभिधेयत्वात्कर्मादीनाम्। धातोरपि तर्हि न स्यात्? अथ तत्र वस्तुतो धात्वर्थस्येच्छया व्याप्यमानत्वात्कर्मत्वम्, प्रातिपदिकादपि स्यात्, अथात्र कर्मरूपानभिधानान्न स्यात्, धातोरपि न स्यादिति समानं वचः? एवं तर्ह्यसमानकर्तृकत्वादेवात्र न भविष्यति। शयनासनादौ हि प्रकृत्यर्थस्यैव समानकर्तृकत्वक्रियारूपत्वाद्, न प्रत्ययार्थस्याक्रियारूपस्य, `क्रियारूपस्य सिद्धता नाम यो धर्मस्तत्र घञादयः' इति स्मरणात्। तिङन्तादपि यत एव हेतोः पाकमिच्छतीत्यत्रार्थे पचतीच्छतीति न भवति, तत एव हेतोः सन्नपि न भविष्यति। तदेवं न धातुमपहाय क्वचिदपि प्रसङ्ग इति प्रश्नः।

सोपसर्गादुत्पत्तिर्मा भूदिति। अन्यथा सङ्घातस्य विशिष्टक्रियावचनत्वात्तत एव सन्स्यात्, ततश्च सन्नन्तत्वेन तस्यैव धातुत्वात्तत एव लङ्युपसर्गात्पूर्वोऽडागमः प्राप्नोति। ननु लिङ्यप्युपसर्गस्य द्विर्वचनप्रसङ्गो दोषः शक्यो दर्शयितुम्? सत्यम्; अट्प्रसङ्गमप्यपरं दोषं दर्शयितुं लङुदाहृतः। ननु धातुरेव विशिष्टक्रियावाची, उपसर्गस्तु सन्निधिमात्रेणोपकारको न तु कस्यचिदर्थस्याभिधानेन, यथा---भुङ्क्ते इत्यत्र भुजिरेवाभ्यवहारे वर्त्तते, आत्मनेपदं तु कर्तरि, अथ चान्तरेणात्मनेपदं नाभ्यवहारो गम्यते; तद्वदुपसर्गसन्निधाने धातुरेव विशिष्टां क्रियामाह, ततश्चार्थद्वारके कर्मत्वसमानकर्तृकत्वे अपि धातोरेव, न सङ्घातस्य, अवश्यं चैतदेवं विज्ञेयम्----धातुरेव च क्रियावची, कथम्? यो हि मन्यते सङ्घातः क्रियावाचीति, क्रियमाणेऽति, क्रियमाणेऽपि तस्य धातुग्रहणे योऽत्र धातुर्न तस्मादुत्पत्तिः प्राप्नोति, अकर्मत्वादसमानकर्तृत्वाच्च? एवं मन्यते---प्रशब्दसन्निधौ तावत्प्रकर्षाख्यो विशेषो गम्यते, न च प्रकर्षमपि धातुरेवाचष्टे; प्रशब्दस्य वैयर्थ्यप्रसङ्गात्; सति चैवं समुदायस्यैव कर्मत्वम्। न ह्यसौ करोत्यर्थमात्रेण सन्तुष्यति, नापि प्रकर्षमात्रेण। न चैवं योऽत्र धातुस्तस्मादनुत्पत्तिप्रसङ्गः, तस्यापि कर्मत्वात्। तथा च कटं करोति, भीष्ममुदारं दर्शनीयमिति समुदायचिकीर्षायामपि भीष्मादिभ्यो द्वितीया भवति; तेषामपि कर्मत्वात्। नन्वेवमपि यथा जनपदसमुदायो जनपदग्रहणेन न गृह्यते, तथा कर्मसमुदायस्याकर्मत्वात्समुदायादुत्पत्तिर्न भविष्यति। यत्र तर्हि समुदायस्यैव कर्मत्वं तत्र कथम्, यथा---प्रस्थातुमिच्छति प्रतिष्ठासत इति, अत्र हि तिष्ठतीति गतिनिवृत्तिः प्रतीयते, प्रशब्दासन्निधौ तु गतिः, तत्र यथा जिगमिषतीत्येकमेव कर्म तद्वदत्रापि ततश्च समुदायादेव स्यात्? यद्येवम्, योऽत्र धातुः कथं ततः सन्, न ह्यसौ कर्म, कर्मण इति नैषा धातुसमानाधिकरणा पञ्चमी, किं तर्हि? षष्ठी---कर्मणोऽवयवाद्धातोरिति? चिकीर्षतीत्यादावपि केवलस्यापि व्यपदेशिवद्भावेन कर्मावयवत्वम्। एवमप्यसमानकर्तृत्वान्न प्राप्नोति, धातुमात्रस्याक्रियावाचित्वात्। अतः समानकर्तृकादित्यपि षष्ठ्यर्थे पञ्चमीति व्याख्येयम्। तदेवं सङ्घातनिवृत्त्यर्थं धातुग्रहणमिति स्थितम्।

कर्मम इति किमिति। जिगमिषतीत्यादौ प्रयोगे प्रत्ययवाच्याया इच्छायाः कर्मापेक्षायां प्रत्यासत्त्या प्रकृत्यर्थ एव कर्म प्रत्येष्यते। यद्यपि क्रिया करणमप्यपेक्षते,

स्फुटतरा त्विच्छायाः कर्मापेक्षेति सैव प्रकृत्यर्थेन पूरयिष्यते, नार्थः कर्मग्रहणेनेति प्रश्नः। गमनेनेच्छतीति। अस्यां विवक्षायां गमेर्मा भूदित्यर्थः। असति हि कर्मग्रहणे सत्यापरीच्छायाः कर्मापेक्षायां यथैतद्वाक्यं भवति---गमनेनेच्छतीति, तथा सन्नपि स्यादिति भावः। इच्छायामिति किमिति। शब्दवैरादिसूत्रे यत् `करणे' इति तदिहैवास्तु, अभिधानशक्तिस्वाभाव्याच्च करणविशेष इच्छायामेव सन् भविष्यति, नमस्प्रभृतिभ्यः क्यजिति प्रश्नः। कर्तुजानातीति। लक्षणैकशरणो नैवं प्रतिपाद्येतेति भावः।

वावचनाद्वाक्यमपि भवतीति। ननु `समानकर्तृकेषु तुमुन्' इति तुमुन्विधानसामर्थ्यादेव वाक्यं भविष्यति, अस्ति तस्यावकाशः---चिकीर्षितुमिच्छतीति। न ह्यत्र सनः प्रसङ्गः; `सनन्तान्न सनिष्यते' इति वक्ष्यमाणत्वात्। धातोरिति विधानादित्यादिना धातुग्रहणस्य प्रयोजनान्तरं दर्शयति। न पूर्वत्रेति। तथा च जुगुप्सते इत्यादाविडभावः।

आशङ्कायामिति। आशङ्का=सम्भावना, प्रयोक्तृधर्मः, तद्विशिष्टक्रियावचनात्स्वार्थे प्रत्ययः। कूलं पिपतिषतीति। कूलस्याचेतनत्वादिच्छाया असम्भवः। श्वामुमूर्षतीति। शुनश्चेतनत्वेऽपि जीवितस्य प्रियत्वाद्व्याध्याद्यभिभवेऽपि तिर्यक्त्वान्मर्तुमिच्छा न भवतीति, शङ्के पतिष्यति कूलम्, शङ्के मरिष्यति श्वेत्यत्रार्थः। प्रत्याख्यानं तु---यो यदिच्छति स तस्य पूर्वरूपाणि करोति, यथा---देवदत्तः कटं चिकीर्षुः सन्नह्यति रज्जुकीलपूलादिकं चादत्ते; कूलस्यापि च पूर्वरूपाणि दृश्यन्ते---लोष्टाः शीर्यन्ते, भिदा जायन्ते। श्वानः खल्वपि मुमूर्षव एकान्तशीलाः स्थूलाक्षाश्च भवन्ति, तदिह पूर्वरूपदर्शनादिच्छाध्यारोप्यते---इच्छत्येवायं य एवमिच्छाविनाभूतानि पूर्वरूपाणि करोति। गौणमुख्यन्यायश्च क्वचिल्लक्ष्यापेक्षया नाश्रीयते, ततश्चाध्यारोपितेच्छाश्रयः प्रत्यय इति। विशेषणं किमिति। इच्छाग्रहणं किमित्यर्थः।

शेषिकादिति। सन्प्रसङ्गादन्योऽनिष्टः प्रत्ययो वार्यते। शेषाधिकारविहितः शैषिकः मतुबर्न्थे भवो मतुबर्थीयः, गहादेराकृतिगमत्वाच्छः, मतुपोऽर्थो मतुबर्थः, सोऽस्यास्तीति मतुबर्थिकः। `अत इनिठनौ'। शैषिकप्रत्ययान्ताच्छैषिकः सरूपप्रत्ययो नेष्टः, तद्यथा---शालायां भवो घटः शालीयः, तत्र भवमुदकम्, पुनश्छो न भवति; विरूपस्तु भवत्येव---अहिच्छत्रे भवमाहिच्छत्रम्, तत्र भवमाहिच्छत्रीयम्, अणन्ताच्छो भवति। तथा दण्डोऽस्यास्तीति दण्डिकः, `अत इनिठनौ' सोऽस्यास्तीति पुनष्ठन्न भवति; विरूपस्तु भवत्येव---दण्डिमती सेनेति। सननन्तान्न सनिष्यते इति। सरूप इत्येव। सारूप्येण चात्र सादृश्यं लक्ष्यते, तच्चार्थद्वारकमिति इच्छासनन्तादिति पूर्वोक्त एवार्थो भवति, एतच्च न्यायसिद्धम्। तथा हि---जातौ पदार्थे समुदाये सकृल्लक्षणं प्रवर्त्तते, ततश्च तत्प्रवृत्तेः प्राक् तत्प्रत्ययान्तप्रकृत्यसम्भवात्तदन्तान्नास्ति तत्प्रत्ययप्रसङ्गः। इह यो ग्रामं गन्तुमिच्छति तस्य यद्यपि ग्रामो न स्वरूपेणेष्टः----ग्रामो मे स्यादिति, तथापि गम्यमानतारूपेण सोऽपीष्ट एव। ग्रामो जिगंस्यते, जिगमिषितः, जिगमिषितव्यः, सुजिगमिष इति इच्छा वाचिनः सनन्तात् ग्रामे कर्मणि लादयो भवन्ति। गमिं प्रति कर्मत्वं ग्रामस्य स्पष्टमेव। अत एव ग्रामं जिगमिषति, ग्रामाय जिगमिषतीति `गत्यर्थकर्मणि' इति द्वितीयाचतुर्थ्यौ भवतः।।

सुप आत्मनः क्यच्।। 3.1.8 ।।

सुप आत्मनः क्यच्।। अत्रापीच्छायामित्यनुवृत्तेस्तदपेक्षमेव सुबन्तस्य कर्मत्वं विज्ञायते इत्याह---इषिकर्मण इति। आत्मशब्दोऽयं परव्यावृत्तिवचनः स्वशब्दपर्यायो गृह्यते, न चेतनद्रव्यवचनः। स हि गृह्यमाण इच्छया वा सम्बध्येत, सुबन्तेन वा। तत्रेच्छया सम्बन्धे कर्त्तरि षष्ठी, आत्मनः इच्छायामात्मककर्तृकायामिच्छायामात्मा चेदिच्छतीत्यर्थः स्यात्, ततश्चात्मग्रहणमनर्थकं स्यात्, सर्वैवेहेच्छाऽऽत्मकर्तृका, तस्यास्तद्धर्मत्वात्। सुबन्तसम्बन्धे तु देवदत्तस्य पुत्रमिच्छति यज्ञदत्त इत्यत्रापि प्राप्नोति, परस्यापि हीष्यमाण आत्मन एवेष्टो भवति; तस्याप्यात्मत्वात्। अनर्थकं चात्मग्रहणं स्याद्; व्यावर्त्त्याभावात्। वृक्षस्य जलमिच्छति, खट्वायाः पादमिच्छतीत्यादौ यत्राचेतनार्थ किञ्चिदिष्यते तद्व्यावर्त्त्यमिति चेत्, न; तत्रापि चेतनस्यैव परमशेषित्वात्। सर्वमेव हि भोग्यं चेतनानामेव शेषभूतं खट्वायाः पादमिच्छतीत्यत्रापि यस्य तत् ख्टवादिकमुपभोग्यं तदर्थमेव तदिष्यते, खट्वादिकं तु तस्यैव द्वारमात्रम्; अतः परव्यावृत्तिवचन एवात्मशब्दः। तत्रापि यदीच्छया सम्बन्धः स्यात्, पूर्ववत् कर्त्तरि षष्ठ्यामात्मग्रहणमनर्थकं स्यात्, सर्वस्या एवेच्छाया एषितृकर्तृकत्वा दिति सुबन्तेन सम्बध्यते, सुबन्तात्कर्मण इच्छायामभिधेयायां क्यज् भवलि, तच्चेत्सुबन्तमात्मनः स्वस्य सम्बन्धि भवति। कस्य स्वस्येत्यपेक्षायामिच्छया एषितुः सन्निधापितत्वात् तस्येवैषितुरात्मनः सम्बन्धि इति विज्ञायते, तदाह----एषितुरेवात्मसमम्बन्धिनः सुबन्तादिति। न चैवमात्मनः पुत्रं परस्य दासमिच्छतीत्यत्रापि सुबन्तस्यात्मसम्बन्धित्वात्प्रसङ्गः, नात्र यथाकथंचिदात्मसम्बन्धित्वं विवक्षितम्, किं तर्हि? इष्यमाणमेव रूपमात्मसम्बन्धित्वेन यदेष्यते तदा प्रत्ययः। पुत्रीयतीति। `क्यचि च' इतीत्त्वम्।

सुप इति किमिति। कर्मण इति वचनात्तिङन्तादप्रसङ्गः, न हि तिङन्तं कर्म। धातोश्चाप्रसङ्गः विशेषविहितेन सना बाधितत्वात्।

ङ्याप्प्रातिपदिकादुत्पत्तावपि न कश्चिद्दोषः; `नः क्ये' इति पदसंज्ञाविधानात्। तच्च क्रियमाणे सुब्ग्रहणे नियमार्थम्---नान्तमेव क्ये पदमिति। तदेव ङ्याप्प्रातिपदिकादुत्पत्तौ विध्यर्थ भविष्यति। नन्वसति सुब्ग्रहणे ङ्याप्प्रातिपदिकात्सुबन्ताच्चोत्पत्त्व्यमविशेषात्, ततश्च `नः क्ये' इत्येतद्यद्येवं विध्यर्थम्, उभयथापि दोषः; नियमार्थे हि वाच्यतीत्यादौ प्रातिपदिकात्सुबन्ताच्चोत्पत्तौ यद्यपि दोषाभावः, नकारान्तेषु प्रातिपदिकादुत्पत्तिपक्षे नलोपो न स्यात्। अथ तेषु प्रातिपदिका दुप्त्तौ विध्यर्थम्, एवं सति वाच्यतीत्यादौ सुबन्तादुत्पत्तिपक्षे जश्त्वादिपदकार्यं स्यात्, अतः सुबन्तादेव यथा स्यात्प्रातिपदिकान्मा भूदिति नियमार्थं सुब्ग्रहणं कर्त्तव्यमेव। एवं तर्हि कर्मग्रहणाद् ङ्यप्प्रातिपदिकादप्रसङ्गः सुबन्तमेव हि कर्माभिधायि; पञ्चकपक्षेऽपि द्योतकविभक्तेरपेक्षितत्वात्। तदेवं सुबन्तमपहाय न क्वचित्प्रसङ्ग इति मत्वा प्रश्नः।

वाक्यादिति। पदसमूहादित्यर्थः। महन्तं पुत्रमिच्छतीति। किं च स्याद्यद्यत्र स्यात्? प्रत्ययार्थे गुणभूतयोर्महत्पुत्रशब्दयोरसति परस्परसम्बन्धे समासो न स्यात्, तथा च तन्निबन्धनमात्वं न स्यात्। किमिदानीं न भवति---महापुत्रीयतीति? भवति, यदैतद्वाक्यं भवति----महान्पुत्रो महापुत्रः महापुत्रमिच्छीति। अथ

क्रियमाणेऽपि सुब्ग्रहणे कस्मादेवात्र न भवति? प्रत्ययग्रहणपरिभाषया समुदायस्यासुबन्तत्वात्। किं पुनरयं कर्मणोः समुदायः? आहोस्वित्समुदायः कर्म? किं चातः? यदि कर्मणोः समुदायः, न कर्मग्रहणेन गृह्यते इति समुदायादप्रसङ्ग? अथ समुदायः कर्म, अवयवाद् द्वितीया न प्राप्नोत्यकर्मत्वात्? एवं तर्हि कर्मणोरेवायं समुदायः, सुब्ग्रहणं तु यदत्र कर्म तस्मान्मा भूदिति। अथ क्रियमाणेऽपि सुब्ग्रहणे कस्मादेव तस्मान्न स्यात्, सुबन्तमेव हि तत्? असामर्थ्यात्। कथमसामर्थ्यम्? सापेक्षमसमर्थ भवतीति। अक्रिययाणे पुनः सुब्ग्रहणे नायं पदविधिर्भवति। यत्र हि पदस्यैवासाधारणं किञ्चिद्रूपमाश्रितं स पदविधिः, कर्मग्रहणं तु न पदस्यैवासाधारणम्, `धातोः कर्मणः' इत्यपदेपि दृष्टत्वात्।

अन्ये त्वाहुः----समुदायस्यापि कर्मत्वमवयवयोश्च महत्त्वविशिष्टस्य पुत्रस्यैष्यमाणत्वादिति तेषां समुदायादवयवाच्च मा भूदिति सुब्ग्रहणम्। राज्ञः पुत्रमिच्छतीति। नन्वसामर्थ्यादेवात्र न भविष्यति, कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति? यत्र तर्ह्यन्तरेणापि तृतीयस्य पदस्य प्रयोगं परस्येति गम्यते तत्र मा भूत् यथा---अघमिच्छति, व्यसनमिच्छतीति, न हि कश्चिदात्मनोऽघमिच्छति। ककार इत्यादि। स्यादेतत्----`नः क्ये' इत्यत्रापि मा कारि ककार इति? यद्येवम्, सामसु साधुः अत्रापि प्राप्नोति। चकात्स्तदविघातार्थ इति। स्वरस्तु प्रत्ययस्वरेण सिद्धो धातुस्वरेण वा, अकारस्तु दृषदमिच्छति दृष्यद्यति, दृषद्यतेर्ण्वुल्, `अतो लोपः',`यस्य हलः',`क्यस्य विभाषा'----दृषदकः, अत्रातो लोपस्य स्थानिवद्भावात् `अत उपधायाः' इति वृद्धिर्मा भूत्। मृदमिच्छति मृद्यति, मृद्यतेः `अचो यत्', अतो लोपादि पूर्ववत्---मृद्यम्, `यतोऽनावः' इत्याद्युदात्तत्वं यथा स्यादिति। पुत्रीयतीत्यादौ च शपा सहैकादेश उदात्तो भवति। क्यचि मान्ताव्ययप्रतिषेध इति। मान्तग्रहणं प्रातिपदिकस्य विशेषणम्, न सुबन्तस्य । तेन पुत्रमिच्छतीत्यादौ क्यज् भवति, काविच्छति कानिच्छतीत्यादौ च न भवति। उच्चौर्नीचैरिति। अधिकरणप्रधानयोरप्यनयोराधेये यदा वृत्तिस्तदा कर्मत्वम्, गोसमानाक्षरनान्तादित्येके। गोशब्दात्समानाक्षरान्नान्ताच्च क्यज् भवतीत्येके मन्यन्ते। अकारादयो दश समानाक्षराः; तत्र लृवर्णान्तस्य, ऋकारान्तस्य च प्रातिपदिकस्याभावादेकारान्पूर्वेषां सप्तानामचां ग्रहणम्। अस्मिन्पक्षे वाच्यतीत्यादि न सिद्ध्यति, तस्मान्नायं स्थितः पक्ष इत्याहुः। अत एवास्य वृत्तावनुपन्यासः। परेच्छायामिति। शेषष्ठ्याः समासो न कर्तृषष्ठ्याः, सुबन्तद्वारकश्च परस्येच्छया सम्बन्धः, परस्य सुबन्तार्था या इच्छा तस्यामित्यर्थः। अघायव इति। `क्याच्छन्दसि' इत्युप्रत्ययः, `अश्वाघस्यात्' इत्यात्वम्। एतदेव क्यचि परत आत्वविधानं ज्ञापकम् छन्दसि परेच्छायामपि क्यज् भवतीति, न हि कश्चिदात्मनोऽघमिच्छति। न चाचारक्यजर्थम्, छन्दस्यघशब्दाचारे क्यचोऽदर्शनात्। अथास्मात्क्यजन्ताल्लकृत्यक्तखलर्था भवन्तः क्व भवन्ति? यथायोगं भावे कर्त्तरि च, न तु कर्मणि। प्रकृत्यर्थविशिष्टाया नियतविषयाया इच्छायाः क्यजन्तेनाभिधानम्, न सा वस्त्वन्तरं विषीयकरोति, अतो जीवत्यादिवदकर्मकः क्यजन्तः। आचारक्यजन्ते तूपमानकर्मणः पुत्रादेरन्तर्भावेऽपि उपमेयस्यच्छात्रादेरनन्तर्भावात्तस्मिन्कर्मणि लादयो भवन्त्येव---पुत्रीय्यतेच्छात्रः पुत्रायितव्य इत्यादि, यथा----श्येनायते काक इति उपमानकर्तुरन्तर्भावेऽपि उपमेयकर्त्तरिलो भवति, तद्वत्। इह च माणवकं मुण्डं करोति मुण्डते माणवकः, मुण्डयितव्यो माणवक इति ण्यन्तो धातुर्मौण्ड्यगुणविशिष्टद्रव्यमात्रमन्तर्भावयितुं शक्तः, न तु माणवकादिकं विशेषमिति तस्य धातावनन्तर्भावात्तत्र लादयो भवन्ति। यद्येवम्, अनेन हेतुना क्यजन्तादपि प्राप्नोति। माणवकं मुण्डमिच्छति मुण्डीयति माणवकम्, मुण्डीय्यते माणवक इति, नात्र क्यचा भवितव्यमसामर्थ्यात्? कथमसामर्थ्यम्? सापेक्षमसमर्थ भवतीति। णिजपि तर्हि न प्राप्नोति? स्यादेतत्----नोभौ करोतियुक्तौ मौण्ड्यं माणवकश्च, न हि माणवकत्वं क्रियते, ततश्च मुण्डं करोतीत्यत्रैवार्थे मुण्ड्यतोति णिजुत्पद्यते। मुण्डं करोति माणवकमित्यत्र वाक्येऽपि मुण्डस्यैव कर्मत्वम्, तत्सामानाधिकरण्यात्तु माणवकाद् द्वितीयोत्पत्तिः। तदेवं माणवकादयो मौण्ड्यस्याधारविशेषप्रतिपादनार्थमुपादीयमानाः करोतियुक्ता न भवन्ति। यदा पुनरुभौ करोतियुक्तौ भवतः, न भवति तदा वृत्तिः, तद्यथा---बलीवर्द्दं करोति तं च मुण्डं करोति मुण्डयति बलीवद्दमिति णिज्भवति। यद्येवम्, अनेनैव हेतुना क्यजपि न प्राप्नोति। यदि चाधारत्वेनापि माणवकोऽपेक्ष्यते, पुनरपि सापेक्षता।

किञ्च, यदि न माणवकः करोतियुक्तः, कथं तत् लकार उत्पद्यते---मुण्ड्यते माणवक इति? कश्चायं न्यायो न माणवकः करोतियुक्त इति? न ह्यसौ मौण्ड्यमात्रेण सन्तुष्यति,माणवकस्थमसौ मौण्ड्यभिनिर्वर्त्तयति, ततश्च स्वरूपेणाक्रियमाणोऽपि माणवको मुण्डपरूपेण क्रियते, इष्यते च। तदेवं सति यदि णिज् भवति क्यजपि स्याद् अथ क्यज्न भवति णिजपि न स्यादिति समानं वचः। एवं तर्हि मुण्डादयो गुणवचनाश्च सापेक्षाः, उच्यते च णिच्, स वचनात्सापेक्षेभ्योऽपि भविष्यति, क्यच् पुनरनपेक्षेभ्यः पुत्रादिभ्यः सावकाश इति माणवकं मुण्डमिच्छतीत्यादौ सापेक्षेभ्यो न भविष्यतीति? यद्यप्ययमपि णिज् गुणमात्रकरणविवक्षायां सावकाशः---मुण्डयत्ययं नापितः प्रवीणो मौण्ड्यकरणइति, तथापि तत्करोतीति सिद्धे णिचि पुनर्विधानमिदं सापेक्षेभ्योऽपि यथा स्यादित्येवमर्थमेव। यद्वा--द्विविधा मुण्डाद्यः---धातवः, प्रातिपदिकानि च। तत्र सूत्रे धातव उपात्तास्तेभ्यः स्वभावत एव विशिष्टक्रियावचनेभ्यो णिज्भविष्यति, प्रातिपदिकानां तु विग्रह एव---माणवकं मुण्डं करोतीति। अथ वा नेदं युगपदुभयं भवति----वाक्यं च प्रत्ययश्च, ततश्च मुण्डयतीति द्रव्यमात्रं प्रतीयते, तत्र विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः। अथ वा---मुण्डस्यैव शुद्धेन करोतिनाऽन्वयः, मौण्ड्यविशिष्टेन तु माणवकस्य, यथा---गां दोग्धि पय इति शुद्धस्य दुहेः पूर्वं गवभिसम्बन्धः, पश्चात्तु गोदुहिना पयसः। क्यच्प्रत्ययस्त्वनभिधानान्न भवति। माणवकं मुण्डयतीत्युक्ते माणवकं मुण्डमिवाचरतीत्यर्थान्तरमेव प्रतीयते। तदेवमिच्छाक्यजन्ताद्भावे कर्त्तरि च लादय इति स्थितम्।।

काम्यच्च।। 3.1.9 ।।

काम्यच्च।। किमर्थो योगविभागः, न `सुप आत्मनः क्यच्काम्यचौ' इत्येकयोग एव क्रियते, एवं हि चकारो न कर्त्तव्यो भवति? तत्राह---योगविभाग इत्यादि। एकयोगे हि सति उत्तरसूत्रे द्वयोरप्यनुवृत्तिः स्यात्। ननु योगविभागेऽप्यानन्तर्यात्काम्यच एवानुवृत्तिः प्राप्नोति? नैष दोषः; चकारोऽत्र क्रियते, स क्यचोऽनुकर्षणार्थः, तदनुकर्षणस्य चैतदेव प्रयोजनम्--उत्तरत्रानुवृत्तिर्यथा स्यात्। काम्यचस्तु योगविभागसामर्थ्यादननुवृत्तिः। प्रयोजानाभावादिति।

अग्निकाम्यतीत्यादौ गुणनिषेधो न प्रयोजनम्, अनार्द्धधातुकत्वादेव गुणस्याप्रङ्गत्। `विजुपे छन्दसि' उपयट्, उपयजमिच्छति उपयट्काम्यतीत्यत्र न संप्रसारणं प्रयोजनम्; यजादिभिः कितो विशेषणात्---यजादिभ्यो यो विहितः किदिति। वाक्काम्यतीत्यत्रापि धातोः सरूपग्रहणे कार्यविज्ञानान्न संप्रसारणं प्रयोजनम्।

चकारादित्वाद्वेति। केचिद्व्याचक्षते---अन्तेऽस्य चकारोऽनर्थकः, धातुस्वरेणैवान्तोदात्तत्वस्य सिद्ध्त्वात्, स आदौ कर्त्तव्यः। अथ वा---अन्तेऽपि कृतो नियमार्थः संपद्यते---चिद्वायं व्यपदेष्टव्यो नानुबन्धान्तरेणेति तेनान्ते कृत आदित्वफलसंपादनादादितः संपद्यत इति। अन्ये तु `सुप आत्मनः क्यच्' `काम्यच्च' इति द्विचकारकनिर्देशाश्रयेण चकारादित्वं वर्णयन्ति' चित्करणं तु पुत्रकामिष्यतीत्यत्र सति शिष्टमपि स्यस्वरं चित्स्वर एव यथा स्यादिति।।

उपमानादाचारे।। 3.1.10 ।।

उपमानादाचारे।। `कुड्ये' इत्युपमेये सप्तमीश्रवणादुपमानमपि सप्तम्यन्तमेवेति कर्मविवक्षायामेतत्प्रयोगसम्भवाद्वचनारम्भः। कुट्यामिति तु युक्तः पाठः।।

कर्त्तुः क्यङ् सलोपश्च।। 3.1.11 ।।

कर्त्तुः क्यङ् सलोपश्च।। आचार इति वर्त्तत इति तेन तदपेक्षमुपमानस्य कर्तृत्वं विज्ञायत इति भावः। सलोपश्चेति। यद्ययं चशब्दः समुच्चयवृत्तिर्गृह्येत तदेकमेव वाक्यं स्यात्----क्यङ्सलोपौ भवति इति, ततश्च यत्रैव सलोपस्तत्रैव क्यङ्पि स्याद्---ओजायत इति, इह तु न स्यात्----श्येनायते काक इति। अतोऽन्वाचये चशब्दे वाक्यभेदश्चाश्रयणीयः---अविशेषेणोपमानात्कर्तुः क्यङ् भवति, यत्र तु सकारः सम्भवति तत्र तस्य लोप इति तदिदमुक्तम्। अन्वाचयशिष्टः सलोपस्तदसम्भवेऽपि क्यङ् भवतीति। श्येनायत इति `अकृत्सार्वधातुकयोर्दीर्घः'।

सलोपविधावपीति। सलोपस्यान्वाचयशिष्टत्वेन वाक्यभेदे सत्ययमपि गुणो भवतीत्यर्तः।

अपिशब्देनैतद्दर्शयति---क्यङ्विधौ तावत्सम्बद्ध्यते वाक्यसंपादनाय, एवं सलोपविधावपीति। ओजायत इति। ओजः शब्दो वृत्तिविषये तद्वति वर्त्तते। ओजसोप्सरसोनित्यं पयसस्तु विभाषयेति। अन्यस्य तु यशः प्रभृतेर्नैव भवतीत्येके, नेति वयम्। ओजोप्सरोव्यतिरिक्तस्य सकारान्तस्योपलक्षणार्थं पयोग्रहणम्। अत एव सलोपो वा। ओजसोप्सरसोर्नित्यमिति सामान्येन वार्त्तिकम्; तेन यशायते इत्याद्यपि भवतिसलोपोऽप्सरस एवेत्ययं तु पक्षो भाष्येऽपि न स्थितः। सलोपविधो कर्त्तुरिति स्थानषष्ठी संपद्यते इति। प्रत्ययविधौ यत्पञ्चम्यन्तं तदेव लोपेन सम्बन्धेऽर्थाद्विभक्तिविपरिणामो भवतीति षष्ठ्यन्तं सम्पद्यत इत्यर्थः। तत्रालोऽन्त्यस्येति नियमे सतीति। सकारेण कर्तुर्विशेषणात्तदन्तविधिविज्ञानात्तदर्थमेव च सेति पृथक् पदं लुप्तषष्ठीकम्। क्वचित् अलोऽन्त्यनियमे सतीति पाठः, तत्र सूत्रैकदेशानुकरणत्वात्समासेऽपि विभक्तेर्लुगभावः, यथा----अस्यवामीयमिति।

आचार इत्यादि। क्यङ्पवादोऽयम्। `गल्भ धार्ष्ट्ये, `क्लीबृ अधार्ष्ट्ये' `होड़ृ अनादरे'---एते पचाद्यजन्ता गृह्यन्ते, त्सय चाकारस्य वाक्येऽनुदात्तत्वानुनासिकत्वे प्रतिज्ञायेते, तेन क्विबन्तादात्मनेपदं भवति। वावाचनात्क्विपा मुक्ते क्यङ् भवति, क्विप्सन्नियोगेनानुनासिकत्वप्रतिज्ञानात् क्यङ्पक्षे इत्संज्ञा न भवति। किमर्थ पुनरिदम्, यावता गल्भादयो धातव एवानुदात्तेनः पठ्यन्ते, तेभ्यो गल्भत इत्यादि सिद्ध्यति, एतेभ्य एव पचाद्यजन्तेभ्यः क्यङि अवगल्भायते इत्यादि, यद्यपि धार्ष्ट्याादावर्थे गल्भादयः पठ्यन्ते, तथाप्यनेकार्थत्वाद्धातूनाम् अवगल्भ इवाचरतीत्यत्रार्थेऽपि त एव वर्त्तिष्यन्ते? सत्यम्; अवगल्भांचक्रे इत्यादौ प्रत्ययान्तत्वादाम्यथा स्यादित्येवमर्थ क्विब् विधीयते।

अथ यदा धातुभ्य एव लिड् विधीयते तदा कथं भवितव्यम्? अवजगल्भे, विचिक्लीबे, विजुहोडे इति। अन्ये तु---धातुभ्य एव क्विब् विधीयते इति वदन्त एतानि रूपाणि न सम्भवन्तीत्याहुः, भाष्यविरोधात्। भाष्यकारस्तावत्सर्वप्रातिपदिकेभ्य इत्यनेन सिद्धिमाशङ्कते---न तर्हीदानीमित्यादिना। न हि धातुग्रहणे सति तेन सिद्धिशङ्कोपपद्यते। वार्त्तिककारोऽपि `सर्वप्रातिपदिकेभ्यः' इति वदन् गल्भादिष्वपि प्रापितदिकग्रहणमेव मन्यते। न केवलं गल्भादिभ्य एव, अपि तर्हि सर्वेभ्य एव प्रातिपदिकेभ्य इति हि तस्यार्थः। `सर्वप्रातिपदिकेभ्यः' इत्यत्र `सर्वेभ्यः' इति वक्तव्ये प्रातिपदिकग्रहणात् प्रातिपदिकादेव क्विब् विधीयते, न सुबन्तात्; तेन पदत्वाभावादश्वतीति `अतो गुणे' इति शपा पररूपं भवति, विधुरविशब्दाभ्यां क्विपि शपि गुपे `एङः पदान्तादति' इति न भवति। विधवति, रवयति, राजनतीति नलोपो न भवति। वाचतीत्यादौ तु कुत्वजश्त्वादि न भवति। येऽपि सर्वप्रातिपदिकेभ्यः क्विपमिच्छन्ति, तैरपि गल्भाद्यनुक्रमणं कर्त्तव्य मात्मनेपदार्थाननुबन्धानासंक्ष्यामीति।।

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः।। 3,1,12 ।।

भृशादिभ्यो बुव्यच्वेर्लोपश्च हलः।। लोपविधौ `भृशादिभ्यः' इति पञ्चमी स्थानषष्ठ्या विरिणम्यते, हला च भृशादयो विशेष्यन्ते, तत्र तदन्तविधौ सति हलन्तानां लोपो विधीयमानो भृशायते इत्यादावहलन्तेन चभवति, तदाह----हलन्तानां च विज्ञायमानेऽहलन्तानां पाठोऽनर्थकः स्यात्। अच्वेरिति प्रत्येकमभिसम्बन्धयते इति। तेनैकवचनमुपपद्यते इति भावः। किमर्थे पुनरिदमुच्यते इति। `अच्वेः' इत्येतदधिकृत्य प्रश्नः। तेनेति। अनुप्रयुज्यमानेन भवतिनेत्यर्थः। न च भवतेरनुप्रयोगं बाधित्वा क्यङ् भवितुमर्हति, अच्व्यन्तेषु सावकाशत्वात्। किञ्च, भवतेरभावे च्वेरपि निवृत्तिप्रसङ्गः, तद्योगे तस्य विधानात्। कथं तर्हि डाजन्तात्क्यष् भवति, यावता डाजपि भवतियोगे विधीयते? अत्र परिहारं वक्ष्यति---कृभ्वस्तिभिरिव क्यषापि योगे डाज् भवतीत्येतदेव ज्ञापकमिति। तत्सदृशप्रतिपत्त्यर्थ तर्हीति। नञिवयुक्तन्यायेन च्व्यन्तसदृशा भृशादयः कथन्नाम प्रतीयेरन्निति च्व्यन्तपर्युदासः क्रियते, सादृश्यं चाभूतद्भावविषयत्वेनेत्याह---अभूततद्भावविषयेभ्यो मृशादिभ्य इत्यादि। भृशायते इत्यादि। अजन्तानाम् `अकृत्सार्वधातुकयोः' इति दीर्घः, हलन्तानां तु लोपः----असुमनाः सुमना भवति सुमनायते, दुर्मनायते इत्यादि।

भृशीभवतीति। इदानीमेवोक्तम्---नास्त्यत्र प्रसङ्गः इति, तस्मादच्व्यर्थविषयं प्रत्युदाहरणं प्रदर्शनीयम्----क्व दिवा भृशा भवन्तीति। ये रात्रौ भृशा नक्षत्रादयस्ते दिवा क्व प्रदेशे भवन्तीत्यर्थः। इह मनः शब्दः सोपसर्गः पठ्यते----सुमनस्, दुर्मनस्, अभिमनस्, उन्मनस्; अत्र किं

सोपसर्गात्सङ्घातात्प्रत्ययो भवति? आहोस्विदुपसर्गरवितान्मनः सब्दादेव? इति विचारः तदर्थ च किमुपसर्गः प्रकृत्यर्थविशेषणं सुमनः शब्दादिति? उत प्रत्ययार्थविशेषणम्---सुभवतो, दुर्भवतौ, अभिभवतौ, उद्भवताविति ? कथं पुनर्मनः शब्देन सह पठित उपसर्गे प्रत्ययार्थविशेषणमाशङ्क्यते, तद्विशेषणत्वे हिप्राग्भवतेः पठ्येत? नैष शक्यः प्राग्भवतेः पठितुम्, एवं हि सर्वेभ्य एव भशादिभ्य उपसर्गविशिष्ट एव भवत्यर्थे प्रत्ययः स्याद्, मनः शब्दादेव च विशिष्टेऽर्थे इष्यत इत्येवमर्थो मनः----शब्देन सह पाठः स्यात्। तत्र यदा मनाः शब्देन स्वादीनां बहुव्रीहीस्तदा प्रकृत्यर्थविशेषणं ते भवन्ति; यदा त्वसमस्ता एव तदा प्रत्ययार्थविशेषणम्। मनः शब्दश्च वृत्तिविषये तद्वति वर्त्तते मनस्वी सुष्ठु भवतीत्यादावर्थे क्यङ् प्रत्ययः। प्राप्त्यर्थस्य वा भवतेः `आ धृषाद्वा' इति विकल्पितणिचोऽत्र विषये ग्रहणम्, तेन मनः कर्म शोभनं प्राप्नोतीत्यादिरर्थो भवति। तत्राद्ये पक्षेऽडाड्ल्यब्द्विर्वचनेषु दोषः, अट्---स्वमनायत, दुरमनायत। आट्---अभ्यमनायत, उदमनायत। उपसर्गस्यापि क्यङन्ते धातावन्तर्भावात्ततः पूर्वमडाटौ प्राप्नुतः, परौ चेष्येते। ल्यप्---सुमनाय्य, अभिमनाय्य, उपसर्गस्य क्त्वान्तेऽनुप्रवेशात्तद्व्यतिरिक्तपदाभावादसति समासे ल्यपोऽभावात्सुमनायित्वेति स्यात्। द्विर्वचनम्---क्यडन्तात्सनि कृते उपसर्गस्य सनन्तेऽनुप्रवेशात्तस्य द्विर्वचने सति सुसुमनायिषते अबिभिमनायिषते इति स्याद्, सुमिमनायिषते अभिमिमनायिषत इति चेष्यते? नैष दोषः, चुरादौ `संग्राम युद्धे' इति पठ्यते, स न पाठ्यः; संग्रामशब्दाद् युद्धवाचिनः `तत् करोति तदाचष्टे' इत्येव णिचः सिद्धत्वात्। पठ्यमानस्तु ज्ञापयति----
सोपसर्गात्सङ्घाताद्धातुसंज्ञानिमित्तकप्रत्यये विधित्सिते उपसर्गाः पृथक् क्रियन्ते, परिशिष्टादेव तु प्रत्यय इति। संग्रामशब्दो हि सोपसर्गः संघात एव चुरादावपि पठ्यते, न तूपसर्गसदृशावयवं शब्दान्तरम्। तथा च `वा पदान्तस्य' इति परसवर्णविकल्पो भवति, अन्यथा स न स्यात्। स एवमर्थः पठ्यते---असंग्रामयत शूरः, संग्रामयित्वा, सिसंग्रमयिषत इत्यादि रूपं यथा स्यादिति, ततश्चोक्तस्यार्थस्य ज्ञापकः। नियमार्थो वा---धातुसंज्ञाहेतुः प्रत्ययः सोपसर्गाद्यदि भवति संग्रामशब्दादेवेति। ननु चात्रानुदात्तेदयं संग्रामयतिरिष्यते, ततश्चात्मनेपदार्थमनुबन्धमांक्ष्यामीति पाठः स्यादिति कथं ज्ञापको नियमार्थो वा भवेत्? स्यादेतत्---अनुबन्धासञ्जनार्थे हि पाठे `ग्राम युद्धे' इत्येव पठितव्यम्, संशब्दस्तु द्योतकः प्रयोगदर्शनादेव लभ्यते इङ्किोरिवाधिः, नियमार्थस्तु संग्रामेति पाठ इति। एवमपि यथा इङ्किोरधेः पूर्वमाण् न भवति, तथाऽस्यापि न स्यात्, तस्माद् द्वितीयः पक्ष आश्रीयते। यद्येवम्, यथा श्येनायत इति आचारार्थस्य क्यङोक्तत्वादाङः प्रयोगो न भवति तथा स्वदीनामपि न स्यात्। तद्विशिष्ट एवार्थे क्यङो विधानाद् युक्तमेको पसर्गेण विशिष्टार्थे क्यङुत्पद्यत इति तस्य तेनाभिधानम्, इह पुनरनेकेन। तत्र---मनायत इत्युक्ते संदेहः स्यात् सुभवतौ दुर्भवतौ वेति? तत्रासंदेहार्थमुपसर्गः प्रयोक्तव्यः। अयं तर्हि दोषः---मनः शब्दात्क्यङि कृते मनायत इत्यस्य तिङन्तस्य स्वादेरतिङन्तादुत्तरस्य निघातः प्राप्नोति। पक्षान्तरे तु सुमनायत इत्यादि तिङन्तं संपद्यते इतः तद्व्यतिरिक्ताभावान्निघाताभावः। एवं तर्हि भृशादिषूपसर्गस्य पराङ्गवभावं वक्ष्यामि `सुबामन्त्रिते' इत्यस्यानन्तरं भृशादिषूपसर्ग इति। इहापि तर्हि प्राप्नोति---अभिभृशायते सुभृशायत इति? यदि नेष्यते `मनस्युपसर्गे' इति वक्ष्यामि, मनः शब्दे परत उपसर्गस्तस्यैव परस्य मनः शब्दस्याङ्गवद्भवति स्वरे कर्त्तव्ये इति। एवं च देवदत्तः सुमनायत इत्यादौ उपसर्गस्यापि `तिङ्ङतिङः' इति निघातो भवति। योऽप्याह---सुमनःशब्दात्प्रत्यये विधित्सिते उपसर्गः पृथक् क्रियते, परिशिष्टादेव प्रत्यय इति, तेनापि स्वरे पराङ्गवद्भावो वक्त्व्य एव। तदेवं प्रत्ययार्थविशेषणं स्वादयः, मनः शब्दादेव केवलात्प्रत्यय इति स्थितम्। यदि तु सामान्येन ज्ञापकमिष्यते सङ्घातात्प्रत्यये विधित्सिते उपसर्गाः पृथक् क्रियन्ते इति, नात्रैव, यथा `प्रभौ परिवृढः' इत्यत्र वक्ष्यते----परिवृढमाचष्टे इति णिचि कत्वाप्रत्यये कृते परिवृढय्येति ल्यब् भवतीति, ततो ज्ञापकान्तरं मृग्यम्। च किंचिदुद्ग्रन्थाभिधानं सूरिभिरित्युपरम्यते।।

लोहितादिढान्भ्यः क्सष्।। 3.1.13 ।।

लोहितादिडाजभ्यः क्सष्।। पटपटायतीति। अव्यक्तानुकरणादिति डाचि विवक्षिते `डाचि बहुलं द्वे भवतः' इति द्विर्वचनम्, ततो डाप्, पटत्पटा इति स्थिते `नित्यमाम्रेडिते डाचि' इति पटच्छब्दस्य यस्तकारे यश्च परः पकारस्तयोः पररूपं पकारः, लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि' इति वार्त्तिकम्, तदेतत्पठिताभिप्रायं न पुनरनेनादिग्रहणं प्रत्याख्यायत इत्याह---यानि पठ्यन्ते इति। निद्राकरुणाकृपाशब्दा वृत्तिविषये तद्वति वर्त्तन्ते, अनिद्रो निद्रावान् भवति, अकरुणः करुणावान् भवति, अकृपः कृपावान् भवतीत्यत्रार्थे प्रत्ययः। ऊपरिपठितेभ्यस्तु क्यषेव भवतीत्यस्योपपादनम्। आकृतिगणश्चायमिति। कुत इत्यत आह---तथा चेति। क्व पुनः सामान्यग्रहणार्थः ककारः? क्यच्व्योश्चेति। `आपत्यस्य' इति वर्त्तते, न चायमापत्यादिष्यते। इह तर्हि `क्यस्य विभाषा'? `हलः' इति वर्तते, न चायं हलन्तादिष्यते। इह तर्हि `क्याच्छन्दसि' ? एतद्याच्छन्दसीति वक्तव्यम्----भुरण्युस्तुरण्युरिति, कण्ड्वादियगन्तादपि यथा स्यादिति। `वा क्यषः' इत्येतद्वा यादित्येवास्तु। न चैवम् `पाशादिभ्यो यः' पाश्या, अत्र प्रसङ्गः? सामान्यविहितानान्तिङां नियमार्थ प्रकरणम्। न च पाशादियात्परस्मैपदमात्मनेपदं वा प्राप्तमस्ति। अथाप्याचारक्विबन्तात्सम्भवेद्? एवमपि `वा यषः' इत्येवास्तु तत्राह--नः क्ये इति। ककारमनुबन्धमासञ्जतः सूत्रकारस्याप्याकृतिगणत्वमभिप्रेतमित्याह---न हीति। भाष्ये त्वादिग्रहणप्रत्याख्यानपरमेव वार्त्तिकं व्याख्यातम्। ककारोऽपि प्रत्याख्यातः। कथं पुनः पटपटायताति क्यष्योगे डाज् भवति, यावता कृभ्वस्तियोगे स विधीयते? तत्राह---कृभ्वस्तिभिरिवेत्यादि। भवत्यर्थे क्यष् विधीयते, स भवतिप्रयोगे न भवति, तेनैवोक्तत्वात्तस्यार्थस्य। अतो भवतेरप्रयोग एव क्यषा भवितव्यम्। यदि च क्यषा योगो डाज्च न स्याड्डाजन्तात् क्यष्विधानमनुपपन्नं स्यादिति भावः। अथ किमर्थम् `वा क्यष'इति सूत्रमारभ्यते, न क्यष् चेति चकारोऽत्र कर्तव्यः, लोहितादिभ्यः क्यष् भवति चकारात् क्यङ् च, तत्र क्यङ्पक्षे आत्मनेपदम्, क्यष्पक्षे परस्मैपदमिति सिद्धमिष्टम्? अहो सूक्ष्मदर्शी देवानांप्रियः, यदिदमपि न दृष्टम्---`क्यङ्मानिनोश्च' इति। इह तर्हि `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति लोहिनीशब्दादप्ययं क्यष् भवति, सति चैवं क्यङन्तादात्मनेपदं क्यषन्तात्परस्मैपदमिति विज्ञायमाने आत्मनेपदपक्षे `क्यङ्मानिनोश्च' इति पुंवद्भावे सति अलोहिनी लोहिनी भवति लोहितायत इति प्राप्नोति, अद्य पुनः क्यषन्तादात्मनेपदे विकल्पिते लोहिनीयते लोहिनीयतीतीष्टं सिद्ध्यतीति स्पष्ट एव फलभेदः।।

कष्टाय क्रमणे।। 3.1.14 ।।

कष्टाय क्रमणे।। चतुर्थीसमर्थादिति। सङ्गतार्थः===समर्थः, `चतुर्थ्या समर्थ' इति तृतीयासमासः। प्रत्ययार्थेन क्रमणेन सह सङ्गतार्थत्वं यस्य चतुर्थीकृतं तस्मादित्यर्थः। एतच्च `कष्टाय' इति निर्देशादेव लभ्यते। क्रमणशब्दस्य पादविहरणे प्रसिद्धत्वात्तत्रैव प्रत्ययो मा विज्ञायीत्याह---क्रमणेऽर्थेऽनार्जव इति। अनार्जवं कौटिल्यम्, इह त्वनार्जवशब्दोऽनाकरणरूपे क्रमणे पर्यवस्यत्यर्थात्। किं पुनः क्रमणम्? उत्साहः, यथा व्याकरणाध्ययनाय क्रमते उत्सहत इत्यर्थ इति व्याख्यातम्। कष्टाय कर्मणे क्रमत इति। `कृच्छ्रगहनयोः कषः' इति कृच्छ्र इडभावः, कृच्छ्रम्=दुः खम्। इह तु तत्कारणं पापं कर्म, कृच्छ्रं पापं कर्म कर्तुमुत्सहत इत्यर्थः। `वृत्तिसर्ग' इत्यात्मनेपदम्। प्रायेण तु परस्मैपदं पठ्यते, तत्र पापं कर्म कर्तुकामः कुटिलमाचरतीत्यर्थः अनुत्साहत्वात्परस्मैपदम्। अत्यल्पमिदमुच्यत इति। सर्वलक्ष्यासंग्रहात्। कथं तर्हि वक्तव्यमित्याह---सत्त्रकक्षेत्यादि। अस्मिन्पक्षे द्विदीयान्तेभ्यः प्रत्ययः; चिकीर्षां प्रति कर्मत्वात्। कण्वचिकीर्षायामिति। प्रकृतिप्रत्ययसमुदायस्यायमर्थनिर्देशः। कण्वम्=पापम्। सत्त्रादयो हि वृत्तिविषये पापपर्यायास्तेभ्यश्चिकीर्षायां प्रत्ययः, पापं चिकीर्षतीत्यस्वपदेन विग्रहः। अजः कष्टं क्रामतीति। क्रमिरत्र पादविहरणे वर्तते, कष्टं गहनदेशं क्रामति गच्छतीत्यर्थः।।

कर्मणो रोमन्थतपोभ्यां वर्तिचरोः।। 3.1.15 ।।

कर्मणो रोमन्थतपोभ्यां वर्तिचरोः।। `कर्मणः' इति पञ्चमी, रोमन्थतपोभ्यामित्यनेन सामानाधिकरण्यात्। प्रत्येकसम्बन्धात्त्वेकवचनम्। वर्त्तीति। ण्यन्ताद् वृतेः `ण्यासश्रन्थो युच्' इति युचि प्राप्तेऽस्मादेव निपातनात् क्तिन्। युजपि भवति---वर्तना । चरणं चर्, संपादित्वाद्भावे क्विप्। हनुचलन इति। हनुचलनसहचरितं चर्वितस्य मुखप्रदेशे आकृष्य चर्वणं तत्रेत्यर्थः। कीटो रोमन्थं वर्तयतीति। अवगीर्णमपादानप्रदेशान्निः सृतं रोमन्थाख्यं द्रव्यं वर्तयति= वृत्तं करोति, गुलिकां करोतीत्यर्थः। नात्र हनुचलनमस्ति। तपसः परस्मैपदं चेति। एवं च `नमोवरिवः' आदिसूत्रे तपः शब्दः पठितव्यस्तथा तु न कृतमित्येव। इह `तपस्यते लोकं जिगीषुरग्नेः' इति `तपस्यते लोकं जिगीषुरग्नेः' इति छान्दसत्वादात्मनेपदम्।।

बाष्पोष्मभ्यामुद्वमने।। 3.1.16 ।।

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे।। 3.1.17 ।।

सुखादिभ्यः कर्तृवेदनायाम्।। 3.1.18 ।।

सुखादिभ्यः कर्तृवेदनायाम्।। वेदनायामिति। `विद चेतनाख्याननिवासेषु' इत्यस्माच्चुरादिण्यन्ताद्भावे `ण्यासश्रन्थो युच्' , `घट्टिवन्दिविदिभ्यश्च' इत्यौपसंख्यानिको वा। वेदनायामर्थेऽनुभव इति। प्रत्यक्षज्ञानम्=अनुभवः। यद्यपि वेदनाशब्दो ज्ञानमात्रवचनस्तथापि कर्तृग्रहणेन सुखादीनि विशेष्यन्ते, कर्तृगतानां च सुखादीनां वेदनाऽनुभवरूपैवेति मत्वैवमुक्तम्। क्रियापेक्षं कर्तृत्वं वेदनासंनिधानात्तदपेक्षमेव विज्ञायते। कर्त्रा च सुखादीनि विशेष्यन्ते न वेदना; व्यभिचाराभावात्। सर्वैव हि वेदना वेदयितुरेव भवति, तदेतदाह----वेदयितुश्चेत्कर्तुः सुखादीति भवन्तीति। आश्रयाश्रयिभावलक्षणश्च सम्बन्धः, न जन्यजनकभावलक्षणः। एवं च कर्तृग्रहणं लुप्तषष्ठीकं पृथक्पदम्। वेदयत इति। `आ कुस्मादात्मनेपदी' इत्यधिकारे वेदिः पठितः। एवं च प्रत्युदाहरणे परस्मैपदपाठः प्रमादजः। प्रसाधकः = अभ्यङ्गादेः कर्त्ता, संप्रसाध्यमानस्य नेत्रविकारादिना सुखमनुमानतो जानाति।।

नमोवरिवश्चित्रङः क्यच्।। 3.1.19 ।।

नमोवरिवश्चित्रङः क्यच्।। करणविशेषे पूजादाविति। `करणे' इति सामान्यानुवृत्तावप्यभिधानशक्तिस्वाभाव्याद्विशेष उपलभ्य इति भावः। नमस्यति देवानिति। `नमः स्वस्तिस्वाहा' इति चतुर्थी न भवति, प्रत्ययार्थे गुणीभूतस्य नमः शब्दस्य निष्कृष्य सम्बन्धाभावात्। अथ वा---नमस्यति नमस्कारेण पूजयतीत्यर्थः। तत्र `उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति द्वितीयेव भवति। एवं च नमस्करोति देवानित्यादावपि द्वितीयेव भवति। परिचर्यायामिति। परिचर्या= शुश्रूषा। चित्रीयते इति। अवयवकृतं लिङ्गं समुदायस्य विशेषकं भवतीति क्यजन्तादात्मनेपदं भवति, `क्यचि च' इतीत्त्वम्। एतदर्थमेव च शब्दवैरादिसूत्रे चित्रशब्दो न पठितः। चित्रीयत इति। विस्मयत इत्यर्थ इत्येके। विस्मापयत इत्यर्थ इत्यन्ये। तथा च भट्टिकाव्ये मायामृगं प्रकृत्य भवति `ततश्चित्रीयमाणोऽसौ' इति।।

पुच्छभाण्डचीवराण्णिङ्।। 3.1.20 ।।

पुच्छभाण्डचीवराण्णिङ्।। पुच्छादुदसने पर्यसने वेति। उदसनम्=उत्क्षेपणम्। पर्यसनम्=परितः क्षेपणम्। उत्पुच्छयत इति। ननु यथाऽऽचारे क्यङि विहिते आङः प्रयोगो न भवति, तत्कस्य हेतोः? आङ्विशिष्टस्यैव चरत्यर्थस्य क्यङाभिधानात्, तद्वदिहाप्युत्क्षेपणे णिङो विधानादुदः प्रयोगो न प्राप्नोतीति? अस्त्यत्र विशेषः----पर्यसनेऽप्ययं विधीयते। तत्रोदसनं द्योतयितुमुच्छब्दः, पर्यसनं द्योतयितुं परिशब्दश्च प्रयोक्तव्यः। समाचयनम्=राशीकरणम्, अर्जनम्= द्रव्यलाभोपायः, याच्ञादि। ङकार आत्मनेपदार्थ इति। तेनोत्तरसूत्रे पुच्छादयो न शक्याः पठितुमिति भावः।।

मण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्।। 3.1.21 ।।

मण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्।। किमर्थमिदम्, न प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धम्; न च तत्करोतीत्यादिना तत्र धात्वर्थनियमः क्रियते, राजानमतिक्रान्तवानत्यरराजदित्यपि दर्शनात्? मुण्डं करोति माणवक मित्यादौ' सापेक्षेभ्योऽपि णिज् यथा स्यादित्येवमर्थ प्रपञ्चार्थ वा। हलिकल्योस्त्वदन्तत्वनिपातनार्थम्, अन्यथा हलि इ कलि इ इति स्थिते `अचो ञ्णिति' इति वृद्धिः प्राप्नोति, `णाविष्ठवत्' इति टिलोपश्च; तत्र लोपः शब्दान्तरप्राप्त्याऽनित्यः, वृद्धिस्तु टिलोपे कृतेऽप्राप्तेवैत्युभयोरनित्ययोः परत्वाद् वृद्धौ कृतायामैकारस्य लोपस्तन्नाग्लोप्यङ्गं भवतीति `सन्वल्लघुनि' इति सन्वद्भावः स्यात्, `दीर्घो लघोः' इति दीर्घश्च, अत्वनिपातने तु यद्यपि परत्वाद् वृद्धिस्तथाप्यगेव लुप्यते इति सन्वद्भावो न भवति, तदाह---

हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थमिति। उपलक्षणमेतत्, `दीर्घो लघोः' इति दीर्घाभावार्थ च। `दीर्घो लघोः' इत्यत्राप्यनग्लोप इति वर्त्तते। एवं च बलिपटुप्रभृतिभ्यो णिचि अबिवलत्, अपीपटदिति भवति, न त्वबबलत् अपपटदिति। `सत्यापपाश' इत्यत्र मुण्डादयः पठितव्यास्तथा तु न कृतमित्येव।।
धातोरेकाचो हलादेः क्रियासमभिहारे यङ्।। 3.1.22 ।।
धातोरेकाचो हलादेः क्रियासमभिहारे यङ्।। `हलादेः' इति विशेषणादेकाच इति बहुव्रीहिः। क्रियासमभिहारे वर्त्तत इति। समभिह्रियमाणायां क्रियायां हि वर्त्तत इत्यर्तः। अनेन समभिहारस्य प्रकृतिविशेषणत्वं दर्शयति। क्रिया हि धातुवाच्या। समभिहारविशिष्टापि क्रियैव भवति, अतः प्रकृतिविशेषणत्वमेव युक्तम्, यथा अतिशयेन शुक्लोऽपि शुक्ल एवेत्यतिशयानं प्रकृत्यर्थस्तद्वत्। तस्माद्यङ्प्रत्ययो भवतीति। क्व? अनिर्दिष्टार्याः प्रत्ययाः स्वार्थे भवन्तीति तत्रैव। समभिहारे द्योत्ये प्रकृत्यर्थसमभिह्रियमाणत्वद्योतनायेत्यर्थः, यथा प्रकृत्यर्थस्यातिशयद्योतनाय तरबादयस्तद्वत्। इह बिप्रकीर्णानं मूर्त्तानामेककालानामेकत्र राशीकरणं समुदायभावापत्तिर्मुख्यः समभिहारः, यथा---पूलादीनाम्। धातुवाच्या तु क्रियैकैव। यद्यपि `दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिषु' इत्यनेकार्थे दिविः पठ्यते, तथापि न युगपदनेकार्थमाचष्टे, किं तर्हि? प्रयोगभेदेन। यद्यपि चाश्रयभेदाद्विषयभेदाच्च भिद्यते पाकः----अन्य एव हि देवदत्तकर्तृकः पाकः, अन्य एव चान्यकर्तृकः, अन्यश्चौदनस्य पाकोऽन्य एव तैलादीनाम्; तथापि धातुना निवृत्तभेदैव सा प्रत्याय्यते। अत एव भवद्भिरास्यत इत्यादौ बहुवचनं न भवति। न खलु कर्तृभेदः कर्तृ-भेदः क्रियाव्यक्तिभेदेन व्याप्तः, एकफलावच्छिन्नामेकामेव क्रियां कुर्वत्स्वपि बहुषु पचन्तीति दर्शनात्। तदेवं धातुवाच्या समूहरूपा प्रधानक्रियैकैवेति समभिहाराभावः। अधिश्रयणादीनां तु गुणक्रियाणां युगपदेकधातुवाच्यत्वेऽपि क्रमजन्यत्वादुत्पन्नापवर्गित्वेन युगपदवस्थानाभावादमूर्त्तत्वाच्च कधातुवाच्यत्वेऽपि क्रमजन्यत्वादुत्पन्नापवर्गित्वेन युगपदवस्थानाभावादमूर्त्तत्वाच्च समभिहाराभावः। तदेवं मुख्यस्य समभिहारस्य धात्वर्थविषयेऽसम्भवाद् गौणो गृह्यते, तद्दर्शयति, तद्दर्शयति---पौनः पुन्यं भृशार्थो वेति। द्रव्याणां द्रव्यान्तरैरव्यपेतानां समभिहारो भवति, तथा क्रियाणामपि क्रियान्तरैरव्यपेतानामेतदुभयं भवति। तत्र प्रधानक्रियाणां पौनः युन्यं समभिहारः, पुनः पुनरनुष्ठीयमानविषयं हि तत्। प्रधानक्रियैव च पुनः पुनरनुष्ठीयते। अवयवक्रियाणां तु भृशार्थता समभिहारः, बुद्धिगोचरानेकसकलावयवक्रियाविषया हि सा। पापच्यत इति। `दीर्घोऽकितः' इति दीर्घः। देदीप्यत इति। `गुणो यङ्लुकोः' यङैव समभिहारस्य द्योतितत्वात्। `क्रियासमभिहारे द्वे भवतः ' इति वा `नित्यवीप्सयोः' इति वा द्विर्वचनं न भवति। धातोरिति किमिति। अन्यस्य क्रियासमभिहारे वृत्त्यसंभवात्प्रश्नः। भृशं प्राटतीति। अत्र धातूपसर्गसमुदायस्य विशिष्टक्रियावचनत्वात्ततो यङ्स्यात्, ततश्चोपसर्गस्य द्विर्वचनं स्यात्। यदि सोपसर्गसंघातस्यैव क्रियासमभिहारे वृत्तिः, प्रपापच्यत इत्यादौ यङ् न प्राप्नोति ? योऽत्र धातुः स न क्रियासमभिहारे, यश्च क्रियासमभिहारे न स धातुरिति। तस्माद्धातुरेव समभिहारविशिष्टक्रियावाची, उपसर्गस्तु सन्निधिमात्रेणोपकारकः। ततश्च संघातात्प्राप्त्यभावान्नार्थो धातुग्रहणेन। यत्र तर्हि संघातेनैव विशिष्टा क्रियोच्यते----प्रतेष्ठीयत इति, अत्र हि केवलस्तिष्ठतिर्गतिनिवृत्तिवचनः प्रपूर्वेण तु संघातेन गतिक्रियैवोच्यते, यथा---जङ्गम्यत इति? अत्राप्यनेकार्थत्वाद्धातूनां तिष्ठतिरेव गतौ तन्निवृत्तौ च वर्त्तते, उपसर्गस्तु सन्निधिमात्रेणोपकारक इति धातोरुत्पत्तिरविरुद्धा, तस्मादार्धधातुकसंज्ञार्थमेव धातुग्रहणम्। तेन `ब्रुवो वचिः' इत्यादि भवति। आनुषङ्गिकी त्वथातुनिवृत्तिः।
अथ कथं यङन्तादात्मनेपदं भवति? कथं च न स्यात्? ङितो धातोरात्भनेपदमुच्यते, यश्चात्र धातुर्न स ङित्, न ह्ययं समुदायस्यानुबन्धः। यश्च ङित्प्रत्ययो नासौ धातुः। यत्र चावयवे कृतं लिङ्गमचरितार्थ तत्र समुदायस्य विशेषकं भवति, अयं ङकारस्तु बेभिद्यत इत्यादौ गुणनिषेधादौ चरितार्थः? कश्चिदाह---क्रियासमभिहारे यङित्यकारोऽत्र प्रश्लिष्यते, स चानुदात्तोऽनुनासिकः प्रतिज्ञायते,तत्रानुदात्तत्वमवयवेऽचरितार्थ समुदायस्य विशेषकं भवति, `अनुदात्तेतश्च हलादेः' इत्येतच्च न भवति `जुचङ्क्रम्यदन्द्रम्य' इत्यत्र चङ्क्रम्यदन्द्रम्यग्रहणाल्लिङ्गदिति, स वक्तव्यः। अथ कथं ऋतेरोयङन्तादात्मनेपदं भवति, सोऽपि हि ङकारो गुणनिवृत्तौ चरितार्थ इति? स चेद् ब्रूयात्तस्याप्यादित इकार ईकारे वा अनुदात्तः प्रश्लिष्यत इति, प्रतिब्रूयादेनम्---इकारे नुम्प्रसज्येत, ईकरे `श्वीदितो निष्ठायाम्' निष्ठायाम्' इतीण्निषेधः स्यादिति? नैष दोषः; नुम्विधौ `गौः पादान्ते' इत्यतोऽन्तग्रहणमनुवर्तते, तेनान्ते इकार इत्सञ्ज्ञको येषां तेषां नुम्। `श्वीदितो निष्ठायाम्' इत्यत्राप्येकाच इति वर्तते? सत्यम; प्रतिविहितमायुष्मता, मुधा पुनरयं प्रयासः, तथा हि---`अनुदात्तङितः' इत्यत्र न धातुग्रहणमस्ति, ततः किम? इदं ततो भवति---प्रत्ययमेव ङितमाश्रित्यात्मनेपदं सिद्धं भवति। न चैवमशिश्रियद् अवोचदित्यादौ चङङ्भ्यामपि प्रसङ्गः; प्रागेव विकरणेभ्यः `अनुदात्तङितः' इत्येतत्प्रकरणं प्रवर्त्तते; अन्यथा `वर्तते' इत्यादौ विकरणव्यवधानान्नियमो न स्यात्। यथा च प्रागेव विकरणेभ्यो नियमः प्रवर्त्तते, प्रवृत्ते तु नियमे विकरण इति तथा तत्रैव प्रतिपादितमित्यलमियता।
सूचिसूत्रीत्यादि। सूच्यादिभ्यो यङ् वक्तव्यः, किमर्थम्? सूच्यादीनामनेकाजर्थम्, अशादीनामहलाद्यर्थम्, ऊर्णोतेस्त्वनेकाजर्थमहलाद्यर्थं च। सोसूच्यत इति। `सूच पैशुन्ये', सूत्र अवमोचने', मूत्र प्रस्रवणे' चुरादिण्यन्ताः। अत्र णिलोपोऽपि यङ आर्धधातुकत्वे प्रयोजनम्। अटाट्यते। `अट पट गतौ', `अजादेर्द्वितीयस्य'इति ट्यशब्दस्य द्विर्वचनम्। अशर्यते इति। `ऋ गतौ' `गुणोऽत्तिसंयोगाद्योः' `यङि च' इति गुणः, ` न न्द्राः संयोगादयः' इत्यत्र `यदा रपरस्य प्रतिषेधः' इति वचनाद्रेफस्य द्विर्वचनम्। अशाश्यते इति। अश्नोतेरशेश्च ग्रहणमित्यागमः। प्रोर्णोनूयते इति। `ऊर्णुञ् आच्छादने' नोपधोऽयम्, आष्टमिकं तु णत्वम्, तस्यासिद्धत्वान्नुशब्दस्य द्विर्वचनम्। ननु `पूर्वत्रासिद्धयिमद्विर्वचने? स्यादेतत्----आष्टमिकं तु द्विर्वचनमभिप्रेत्य तदुच्यते, यथा चौजढदित्यत्र ढत्वादीनामसिद्धत्वाद्धत इत्येतद् द्विरुच्यते इति? तन्न; एवं हि षुपिभूतो द्विरुच्यत इति वक्ष्यमाणं व्याहन्येत। एवं तर्हि पूर्वत्रासिद्धीयमद्विर्वचन इत्येतदनित्यम्, `उभौ साभ्यासस्य' इति लिङ्गात्; अन्यथा `अनितेः' इति णत्वे कृते तस्य सिद्धत्वाण्णिशब्दस्य द्विर्वचने सति सिद्धं स्यात्प्राणिणिषतीति। इह कस्मान्न भवति---लुनीहि लुनीहित्येवायं लुनातीति? भवत्येव। लोलूयत इति लोट् तर्हि न प्रप्नोति यङा बाधितत्वात्, अन्तरङ्गो यङ् क्रियासमभिहारमात्रापेक्षत्वात्; लोट् तु बहिरङ्गः, क्रियाभेदाश्रये धातुसम्बन्धे भावकर्मकर्तृषु च विधानात्। सावकाशश्च लोट्, कोऽवकाशः?

अनेकाजहलादिश्च---जागृहि जागृहीत्येवायं जागर्त्ति, ईक्षस्वेक्षस्वेत्येवायमीक्षत इति। एवं तर्हि वेत्यनुवृत्तेः पक्षे पङ्, यदा न यङ् तदा लोङ् भविष्यति। यङोऽकारोऽटाट्चते इत्यादौ द्विर्वचनार्थः।।

नित्यं कौटिल्ये गतौ।। 3.1.23 ।।

नित्यं कौटिल्ये गतौ।। `धातोः' इति वर्त्त, गताविति तस्य विशेषणम्, गतौ वर्त्तमानाद्धातोरिति। कौटिल्ये इति। संनिधानाद् गतिविषयमेव कौटिल्यं गम्यते। चक्रम्यते, दन्द्रम्यत इति `क्रमु पादविक्षेपे', द्रम मीमृ गतौ, `नुगताऽनुनासिकान्तस्य', योऽल्पीयस्यध्वनि गतागतानिकरोति स कुटिलां गति सम्पादयन्नेवमुच्यते।

नित्यग्रहणमनर्थकम्, अनभिधानादेव वाक्यं न भविष्यति, न हि चंक्रम्यत इति वृत्तेरर्थं कुटिलं क्रमातीति वाक्यं शक्नोति गमयितुम्; संशयो हि वाक्याद्भवति----किं गतिकौटिल्यम्? उत वक्रहृदयत्वनिबन्धनं जिह्वाचरणमिति? वृत्तौ तु गतिकोटिल्यमेव नियतं गम्यते, कौटिल्यमात्रप्रतिपादने च वाक्यं निवारयितुमशक्यमनिष्टं चात आह---नित्यग्रहणं विषयनियमार्थमिति। गतिकौटिल्यं विषयः, तत्रैव यङ् यथा स्यादित्येवमर्थमित्यर्थः, तदाह---गतिवचनान्नित्यं कौटिल्य एव भवतीति। व्यवच्छेद्यं दर्शयति---न तु क्रियासमभिहार इति। ननु यथा `वडवाया वृषे वाच्ये' इत्यपत्येप्राप्तस्ततोऽपकृष्य विधीयते, यथा वा `ञीतः क्त' भूते प्राप्तस्ततोऽपकृष्य वर्त्तमाने विधीयते, एवमत्रापि धातुमात्रात्क्रियासमभिहारे यङ् विहितः, गतिवचनात् तु कौटिल्य इति? तक्रकौडिन्यन्यायेनैव बाधः सिद्धः। यथा वा विवक्षितार्थानभिधानाद्वाक्यं न भवति तथा समभिहारानवगमाद्त्र प्रत्ययो न भविष्यति। अथैवमपि वचनापेक्षा? वाक्यनिवृत्तावपि वचनमपेक्षस्व! तदेतन्नित्यग्रहणं चिन्त्यप्रयोजनम्।।

लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्।। 3.1.24 ।।

लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्।। लुप्लृ च्छेदने', `षद्लृ विशरणगत्यवसादनेषु'। `आङः सदिः पद्यर्थे' इत्यस्य तु चोरादिकणिजन्तस्य एकाच इत्यस्यानुवृत्तेरग्रहणम्। `चर गत्यर्थः',`जप जल्प व्यक्तायां वाचि',`जभी जृभी गात्रविनामे',`दह भस्मीकरणे', `दन्श दशने'। अनुनासिकलोपनिर्देशो यङ्लुक्यप्यनुनासिकलोपार्थ---दन्दशीतीति। `गृ निगरणे' तुदादिः, `गृ शब्दे' क्र्यादिः, तत्राकारान्तविकरणेन साहचर्यादाद्यस्य ग्रहणमित्येके। द्वयोरपीत्यपरे। धात्वर्थगर्हायामिति। भावशब्दो धात्वर्थे वर्त्तत इति दर्शयति। गर्हितमिति क्रियाविशेषणम्, तेन भावगर्हाऽत्र गम्यते। गर्हितत्वं तु छेदनस्य, निषिद्धतृणादिविषयत्वात्, `लोष्ठमर्दी तृणच्छेदी नखखादी च यो नरः' इति एवमुत्तरत्रापि यथासम्भवं गर्हितत्वं भेदेन द्रष्टव्यम्। चञ्चूर्यते इति। `चरफलोश्च' इति नुक्, `उत्परस्यातः', `हलि च' इति दीर्घः। जञ्जप्यते इत्यादौ `जपजभदहदशभञ्जपशां च' इति नुक्। निजेगिल्यत इति। `ऋत इद्धातोः', रपरत्वम्, द्विर्वचनम्, अभ्यासस्य गुणः, जेगिर्य इति स्थिते `ग्रो यङि' इति लत्वं च प्राप्नोति, `हलि च' इति दीर्घश्च, तत्र दीर्घस्यासिद्धत्वाल्लत्वे कृते विहतनिमित्तत्वाद्दीर्घाभावः। अन्ये तु `न मु ने' इत्यत्र नेति योगविभागेनासिद्धत्वं बाधित्वा दीर्घे कृते लत्वामिच्छन्ति, नात्राप्तवाक्यमस्ति। गर्हायामिति किमिति। भावस्येत्येव तद्धर्मविशेषो लप्स्यते इति प्रश्नः। धर्मविशेषानुपादाने प्रशंसायामपि स्यादित्याह---साधु जपतीति। जपति वृषलो मन्त्रमिति। अत्र स्वरवर्णादिभ्रेषाभावाद्भावगर्हा नास्ति। वैदिकमन्त्रजपं प्रति शूद्रस्यानधिकारात्तु साधनभावे गर्हितः, यस्य खल्वीदृशी गतिः----`शूद्रस्य वेदमुपश्रृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम्, उच्चारणे जिह्वाच्छेदः धारणे शरीरभेदः' इति नासौ जपितुमर्हति। नित्यग्रहणमित्यादि। पूर्ववदेतद्व्याख्येयम्।।

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवमवर्णचूर्णचुरादिभ्यो णिच्।। 3.1.25 ।।

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवमवर्णचूर्णचुरादिभ्यो णिच्।। स्त्यापेत्यकार उच्चारणार्थः। सत्यमाचष्ट इति। ननु भाष्ये सत्यस्य कृञ्यापुक्, सत्यशब्दात्कृञि करोत्यर्थे णिज्भवति आपुक्च, सत्यं करोति सत्यापयतीत्युक्तम्? सत्यम्; कृञ्ग्रहणमनार्षम्, प्रदर्शनार्थो वा करोतिर्द्रष्टव्य इति मन्यते। आपुग्वक्तव्य इति। आपुग्वचनसामर्थ्याट्टिलोपो न भवति। क्वचित्तु वृत्तावेवायं ग्रन्थः पठ्यते। अथ कथं पुनः शब्दापयेदिति? छन्दोवद्दषयः कुर्वन्ति। एतेन प्रक्षालापयेदिति गृह्यप्रयोगो व्याख्यातः। पाशाद्विमोचने इति। प्रायिकोऽयमर्थनिर्देशः, अन्यत्रापि भवति; अन्यथा विपाशतीति विशब्दस्य प्रयोगो न स्यात्, विशब्दविशिष्टस्यैव मोचनस्य ण्यर्थत्वात्, यथाचारक्यच्याङः प्रयोगो न भवति। एवमुपवीणयदीत्यादावपि द्रष्टव्यम्। तूलम्=तृणाग्रं तेनानुकृष्णाति अनुघट्टयतीत्यर्थः। अनुगृहणातीति तु पाठें न समीचीनोऽर्थः। अभिषेणयतीति। `उपसर्गात् सुनोति' इत्यादिना षत्वम्। अकारान्तस्त्वचशब्द इति। `त्वच संवरणे' इत्यस्माद्धातोः `पुंसि संज्ञायाम्' इति घः। अवध्वंसयतीति। विकिरतीत्यर्थः। `प्रातिपदिकाद्धात्वर्थे' इत्येव सिद्धे सत्यस्यापुग्विधानार्थं वचनमन्येषां प्रपञ्चार्थम्। भालिन्यो ह्युपश्लोकयन्तीत्यादौ सापेक्षेभ्यो यथा स्यादित्येवमर्थं वा। कथं पुनर्विमोचनादिरर्थोऽनिर्दिष्टो लभ्यत इत्यत आह---स्वाभाविकत्वादिति। प्रत्ययार्थो निर्दिश्यत इति। सूत्रकारेणानिर्दिष्टोऽपि प्रत्ययार्थो व्याख्याकारैर्निर्दिश्यत इत्यर्थः।।

हेतुमति च।। 3.1.26 ।।

हेतुमति च।। लोके फलसाधनयोग्यः पदार्थो हेतुरित्युच्यते, तस्य ग्रहणे अध्ययनेन वसतीत्यत्रापि प्रसज्येत, हेतुमद्ग्रहणं चानर्थकं स्यात्, कथम्? `करणे' इति वर्त्तते, तस्य विशेषणं हतुमतीति, करणं क्रिया, सर्वैव च क्रिया हेतुमतोति किं विशेषणोपादानेन ! ननु शब्दोपात्ते हेतौ यथछा स्यादित्येवमर्थमेतत्स्याद्यथा `समस्तृतीयायुक्तात्' इत्यत्र श्रयमाणायां तृतीयायामात्मनेपदं यथा स्यात्तदर्थयोगमात्रे मा भूदित्येवमर्थं तृतीयायुक्तग्रहणम्। एवं तर्ह्यसति विरोधे कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणं युक्तमिति `तत्प्रयोजको हेतुश्च' इति यस्य संज्ञा विहिता तस्यैव पारिभाषिकस्य ग्रहणमिति मत्वाऽऽह---हेतुः स्वतन्त्रस्य कर्त्तुः प्रयोजक इति। तदीयो व्यापार इति। प्रवर्त्तना। तस्यास्त्ववान्तरभेदमाह----प्रेषणाध्येषणादिलक्षण इति। भृत्यादेर्निकृष्टस्य प्रवर्त्तना=प्रेषणम्, आज्ञेत्यर्थः। गुर्वादेराराध्यस्य प्रवर्त्तना= अध्येषणम्, प्रार्थनेत्यर्थः। आदिशब्देन तत्स्थमर्थाचरणं गृह्यते, तच्च बहुधा भिद्यते---अनुमतिः,

उपदेशः, अनुग्रह इति। तत्र यस्यानुमतिमन्तरेणार्थो न निर्वर्त्तते तस्य राजादेरनुमत्या प्रयोजकत्वम्, वैद्यादेस्तु `मुस्तापर्पटकं पिबेज्ज्वरितः' इत्याद्युपदेशेन प्रवर्त्तकत्वम्, यः पुनः केनचिज्जिघांसितं पलायमानं निरुणद्धि, निरुणद्धिश्च हन्यते, तत्र निरोद्धा हन्तुरनुग्रहं करोतीत्यनुग्रहेण तस्य प्रवर्त्तकत्वम्। सर्वश्चायं विशेषः प्रकरणादिगम्यः। सर्वत्रानुगतं प्रवर्त्तमानमेव तु णिजर्थः। ननु यथा पितृमानित्युक्ते यं प्रति पितृत्वं स एव गम्यते तथात्रापि यं प्रति हेतुत्वं स एव हेतुमानिति युक्तम्, कञ्च प्रति हेतुत्वम्? `तत्प्रयोजकम्' इति वचनात्कर्त्तारं प्रतीति प्राप्तं `कारके' इत्यधिकारात्क्रियापेक्षत्वाच्च कारकभावस्य यस्मिन्व्यापारे प्रयोजकरूपेणोपयुज्यते तमेव प्रति, स च प्रयोज्यव्यापारोऽधिश्रयणादिः सर्वसाधनसाध्यो विक्लित्यादिर्वेति तयोरेव हेतुमत्त्वं युक्तम्, न पुनः प्रयोजकव्यापारस्य। न हि तत्रासौ प्रयोजकरूपेणोपयुज्यते, किं तर्हि? कर्तृरूपेण, यथा काष्ठस्य पाकापेक्षं करणत्वं न तु ज्वलनापेक्षम्, तदपेक्षं तु कर्तृत्वमेव? उच्यते---णिचः प्रकृतिभूतेन धातुनैवाभिधीयते सोऽर्थस्तेन फलाभावात्तत्र णिज्न भविष्यति। ननु पचतीत्युक्ते न ज्ञायते----किं स्वयमेव पचति? उतान्येन प्रवर्त्तितः? इत्यतोऽन्येन प्रवर्त्तितस्येयं प्रवृत्तिरिति द्योतनाय णिज् भवतु? एवं तर्हि हेतोरिति वक्तव्यम्, `करणे' इत्येव, हेतोः करणे व्यापारे अभिधेये णिज् भवतीत्यर्थः। तथा तु न कृतम्। का गतिरिदानीं सूत्रस्य? अभिधानस्वाभाव्यमत्र हेतुः, स्वभावतो हि णिच् प्रत्ययः प्रयोजकव्यापारमाचष्टे। तेन पाकाद्यपेक्षया यो लब्धहेतुव्यपदेशः स हेतुत्वेनोपलक्षितो यस्यास्तीत्येवं प्रयोजकव्यापार एव मतुपोच्यते। अत्र द्वौ पक्षौ सम्भवतः----हेतुमतीति प्रकृत्यर्थनिर्द्देशः----हेतुमति यो धातुर्वर्तत इति, प्रत्ययार्थो वा---हेतुमति करणेऽभिधेये णिज् भवतीति।

ननु पचति पाचयतीति च व्यक्तमर्थान्तरं गम्यते, तत्कथमस्य प्रकृत्यर्थत्वं शङ्क्यते? उच्यते---इह हि कः पचेः प्रधानार्थः? यासौ तण्डुलानां विक्लित्तिः, अधिश्रयणादीनां तु तादर्थ्यात्तदवच्छेदेन पच्यर्थता। यो हि पानार्थमुदकमाहरति, विक्रयार्थ च काष्ठान्याहरति, शीतं चापनेतुमग्निं समिन्धे नासौ पचतीत्युच्यते, तत्कस्य हेतोः? विक्लित्ति प्रति तादर्थ्याभावात् तदवच्छेदाभावाच्च। अतस्तादर्थ्यादेवाधिश्रयणादीनां पच्यर्थता, तद्वत्प्रयोजकव्यापारोऽपि तादर्थ्यादेव पच्यादिवाच्यो भविष्यति। णिच्प्रत्ययस्तु द्योतकः, तथा च योऽप्येकान्ते तूष्णीमासीनो भक्तबीजबलीवर्द्दैः प्रतिविधत्ते, स उच्यते----पञ्चभिर्हलैः कृषतीति। तदेवं पक्षद्वयसम्भवे यद्याद्यः पक्ष आश्रीयते ततो यथा प्रकृत्यभिहिते णिज् भवति, एवमुक्तप्रेषितादिशब्दाभिरितेऽपि स्याद्--उक्तः करोति, प्रेषतितः करोतीति, हेतुमद्विषयत्वात्करोत्यर्थस्य, प्रत्ययार्थपक्षे तूक्तार्थत्वाण्णिजभावः? नैष दोषः; प्रयोजकव्यापारस्य द्योतनाय णिज्विधीयते तस्य स्वशब्देन द्योतितत्वाद् द्योत्याभावान्न भविष्यति। इह तर्हि पाचयत्योदनं देवदत्तो यज्ञदत्तेन द्वयोः कर्त्रोर्लेनाभिधानं प्राप्नोति, धातुवाच्यव्यापारे हि कर्तरि लो भवति पचिना च प्रयोजकव्यापारोऽप्यभिधीयते, प्रत्ययस्तु द्योतक इति धातुवाच्यव्यापारत्वसाम्यात् कर्त्रोरपि साम्यमिति द्वयोरप्यभिधानं प्राप्नोति---पाचयतो देवदत्तयज्ञदत्ताविति। प्रत्ययार्थपक्षे तु प्रकृत्यर्थोपसर्जनस्य ण्यर्थस्य प्राधान्यात्तस्यैव कर्त्तरि लकारः। इह च गमितो ग्रामं देवदत्तो यज्ञदत्तेनेति प्रयोजकव्यापारस्यापि गमिवाच्यत्वादव्यतिरिक्तो गत्यर्थ इति कृत्वा गत्यर्थानां कर्त्तरि क्तः प्राप्नोति, प्रयोज्यस्य तु कर्मत्वात्तत्रैवेष्यते। उक्तं हि `ण्यन्ते कर्तुश्च कर्मणः' इति। इह च व्यतिच्छेदयन्ते, व्यतिभेदयन्ते---अव्यतिरिक्तो हिसार्थ इति कृत्वा प्रयोजकव्यापारव्यतिहारविवक्षायामपि `न गतिहिंसार्थेभ्यः' इति प्रतिषेधः प्राप्नोति।

तदेवमाद्ये पक्षे दोषदर्शनाद् द्वितीयं पक्षमाश्रित्याह---तस्मिन्नभिधेय इति। किं चान्वयव्यतिरेकाभ्यां शब्दार्थावसायः। न च पचति पठति गच्छतीत्यादावन्तरेण णिचं क्वचिदपि प्रयोजकव्यापारोऽवसीयते, उत्पन्ने तु णिचि प्रतीयते, अतस्तदर्थत्वमेव युक्तम्। पञ्चभिर्हलैः कृषतीत्यत्र त्वनेकार्थत्वाद्धातूनां कृषिरेव प्रतिविधानेऽपि वर्त्तत इति युक्तम्, न पुनस्तद्दर्शनेन सर्वत्र प्रकृत्यर्थत्वम्। नन्वत्रापि पक्षे पाचयत्योदनं देवदत्तो यज्ञदत्तेनेत्यत्र ण्यर्थस्य प्राधान्यात्तेन व्याप्यमानस्य प्रयोज्यस्य कर्मसञ्ज्ञा प्राप्नोति? गतिबुद्धिप्रत्यवसानार्थेति नियमान्न भविष्यति। इह तर्हि ग्रामं गमयति, ग्रामाय गमयतीति व्यतिरिक्तो गत्यर्थ इति कृत्वा `गत्यर्थकर्मणि' इति द्वितीयाचतुर्थ्यौ न प्राप्नुतः? नैष दोषः; ग्रामोऽत्र गमेरेव कर्म, ग्रामकर्मकं गमनं कुर्विति प्रैषार्थः। इह तर्हि एधो दकस्योपस्कारयतीति व्यतिरिक्तः करोत्यर्थे इति `कृञः प्रतियत्ने' इति षष्ठी न प्राप्नोति, सुट् तु करोतिधातुमात्राश्रयत्वाण्णिजुत्पत्तावपि तस्य रूपस्य भावात्सिद्ध्यति? अत्राप्येधोदककर्मके करोत्यर्थे प्रयुज्यते इति षष्ठी भविष्यति। इह तर्हि अभिषावयतीति व्यतिरिक्तः सुनोत्यर्थ इति `उपसर्गात्सुनोति' इति षत्वं न प्राप्नोति? अथात्राप्यभिषवं कुर्वित्युपसर्गविशिष्टे प्रकृत्यर्थे प्रयुक्तिरिति सिद्धं षत्वम्, यदा तु ण्यत्नैनैवोपसर्गस्य संबन्धस्तदा षत्वं भवति न वेति चिन्त्यम्। इह तर्हि भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामिति प्रयोज्ये कर्त्तरि कृद्योगलक्षणा षष्ठी न प्राप्नोति, अप्रधानत्वात्? तृतीयावद्भविष्यति, तद्यथा---पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति प्रयोज्ये कर्त्तर्यप्रधानेऽपि तृतीया भवति व्याप्तेस्तथा षष्ठ्यपि भविष्यति। अथेह कथं णिज् भवति----भिक्षा वासयन्ति, कारीषोग्निध्यापयतीति? कथं च न स्यात्? अचेतनत्वात्, चेतनावत एतद्भावति---प्रेषणम्, अध्येषणमिति? नैष दोषः; नावश्यं स एव वासं प्रयाजयति य आह---उष्यतामिति, योऽपि तूष्णीमासीनस्तत्समर्थमा चरति सोऽपि वासं प्रयुङ्क्ते, भिक्षाश्च प्रचुराश्च व्यञ्जनवत्यश्च लभ्यमाना वासं प्रयुञ्जते। तथा कारीषोऽग्निर्निर्वात एकान्ते सुप्रज्वलितः शीतकृतमध्ययनविरोधिनमुपद्रवमपनयन् अध्ययनेऽनुकूलो भवति। तत्र यथा--
अनुमतिरुपदेशोऽनुग्रहः----इत्येतेषु णिज् भवति तथाऽत्रापि भविष्यति। यद्यप्यनुमत्यादिषु प्रयोज्यव्यापारचोद्देशेन प्रवृत्तिः, इह तु न तथा; तथाप्यनुकूलाचरणमेव प्रयोजकव्यापारत्वेनाध्यारोप्यते। इह कश्चित्कञ्चिदाह---पृच्छतु मां भवान्, अनुयुक्तां मां भवानिति, तत्र प्रष्टा प्रयोज्यस्तस्य प्रेरकः प्रयोजक इति तद्व्यापारे णिज् प्राप्नोति, एकविषयत्वच्च णिचो लोडादीनां च पर्यायप्रसङ्गः? नैष दोषः, कर्त्तुः प्रयोजको हेतुरित्युक्तम्, प्रयोज्यश्चात्र न कर्त्ता। न ह्यसौ सम्प्रति पृच्छति तूष्णीमास्ते तस्य निर्व्यापारत्वात् कारकत्वमेव नास्ति कुतस्तद्विशेषः कर्तृत्वम्? कर्त्तृत्वमेव हि तस्य विधीयते प्रश्नक्रियायां कर्त्ता भवेति, यथा----राजा भव युध्यस्वेति राजत्वमेव विधीयते तत्र तदेवं प्रयोज्योऽकर्तेति प्रयोजकोऽपि न हेतुः, किमिदानीं पूर्वमेव कर्त्तुः सतः प्रयोजको हेतुः! यद्येवम्, व्यर्था प्रयुक्तिः। अथाप्युपरतिशङ्कया कचित्प्रयुक्तेरर्थवत्त्वं तथापि यत्राप्रवृत्तो बलादिना प्रवर्त्त्यते तत्र णिज् न प्राप्नोति? न ब्रूमः----

प्रवृत्तिप्रवर्त्तन एव णिजिति, किन्तु प्रवर्तत्तितोऽपि प्रयोज्यो यत्र प्रवर्त्तत एव, न तु निवर्त्तते तत्र णिज् भवति। अनुवर्त्तमाना प्रयुक्तिः प्रयोज्यप्रवृत्तौ हेतुः, न मध्ये विच्छिन्ना। अतः प्रयोज्यप्रवृ-त्तिवेलायामपि बुद्धौ विपरिवर्त्तमाना सैव प्रवृत्तिहेतुस्तस्यामेव च दशायां णिज्वाच्यो भवति। तदेवं प्रयोज्यप्रवृत्त्युपहितप्रयुक्तिर्णिजर्थः, केवला तु लोडर्थ इति विवेकः। उक्तं च----

द्रव्यमात्रस्य तु प्रैषे पृच्छ्यादेर्लोड् विधीयते।

सक्रियस्य यदा प्रैषेस्तदा स विषयो णिचः।। इति।।

किश्च---प्रयोक्तृधर्मः प्रयुक्तिर्लोडर्थः अनियतकर्तृकातु प्रयुक्तिर्णिजर्थः।

तत्करोतीत्युपसंख्यानमिति। तदिति कर्मपरमेतत्, तेन द्वितीयान्तात्प्रत्ययः करोतीत्यत्र प्रकृत्यर्थमात्रं विवक्षितं न प्रत्ययार्थः, तेन ण्यन्ताद्भावकर्मणोर्भूतभविष्यतोर्द्धित्वबहुत्वयोश्च लो भवति। सूत्रं करोति सूत्रयतीति। इह व्याकरणस्य सूत्रं करोतीति वाक्ये द्रव्यरूपं सूत्रं सूत्रशब्देनोच्यते, तत्र व्यपदेशिवद्भावेन व्यतिरेकनिबन्धना षष्ठो, वृत्तौ तु व्याकरणं सूत्रयतीति प्रत्ययार्थभूतकरोत्यर्थाभिधायी सूत्रशब्दः सम्पद्यते। उक्तं हि`परार्थाभिधानं वृत्तिः' इति। तेन सत्त्वभावो निवृत्त इति सूत्रव्याकरणयोरभिसम्बन्धो निवर्त्तते। अस्ति च व्याकरणस्य करोतिना सामर्थ्यमिति द्वितीया भवति। यदि तु व्याकरणं सूत्रं करोतीति वाक्ये एव सामानाधिकरण्यं तदा माणवकं मुण्डयतीतिवद् व्याकरणं सूत्रयतीत्ययत्नसिद्धम्। `सूत्र अवमोचने'`मूत्र प्रस्रवणे' इति चुरादौ पाठादेव सूत्रयतीति सिध्यति। अनेकार्थत्वाच्चार्थान्तरेऽपि भविष्यति। गणपाठसिद्ध एव त्वर्थ उपसंख्यानेनापि प्रदर्शितः।

आख्यानादिति वाक्यं व्याचष्टे----आख्यानात्कृदन्तादिति। आख्यायत इत्याख्यानम्, `कृत्यल्युटो बहुलम्' इति कर्मणि त्लुट्। यत्किञ्चिदाख्यायते तत्सर्वं राजागमनादिकमप्याख्यानमिहाभिप्रेतम्,न कंसवधनलोचपाख्यानादिकमेव संज्ञा भूतम्। कृदन्तादिति कृद्ग्रहणेन गतिकारकपूर्वस्यापि ग्रहणमिति कंसवधराजागमनसूर्योद्गमनादेररि कृदन्तत्वम्। प्रकृतिप्रत्यापत्तिरिति। कृतो या प्रकृतिः सा विकारपरित्यागेन स्वेनैव रूपेणावतिष्ठत इत्यर्थः। प्रकृतिवच्च कारकमिति। यत्तत्र कृदन्ते संनिहितं कारकं तत्प्रकृतिवद्भवति। कृत्प्रकृतेः शुद्धे णिचि यादृशं भवति तादृशमस्यापि ण्यन्तस्य भवतीत्यर्थः। कंसं घातयतीति हन्तेः `हनश्च वधः' इत्यप् प्रत्ययो वधादेशश्च। हननम्=वधः , कंसस्य वध इति कर्मणि षष्ठ्या समासः, ततो णिच्, कृतो लुक्, प्रकृतेः प्रत्यापत्तिर्वधादेशपरित्यागेन हन्तिरूपेणावस्थानम्। यद्यप्यत्र सन्नियोगशिष्टानामन्यतराभावादुभयोरप्यभाव इत्येव वधादेशनिवृत्तिः सिद्ध्यति; तथापि पुष्येण योगं जानाति, पुष्येण योजयतीत्यत्र कुत्वस्यासन्नियोग शिष्टत्वात्तन्निवृत्तिर्न सिद्ध्यतीति प्रकृतिप्रत्यापत्तविचनम्। अथ कथं कंसमघातयत्, राजानमजीगमत्, यावता कंसवधराजागमनशब्दाभ्यां णिचि विहितेऽङ्गसंज्ञा नामधातुत्वं च तयोरेव स्याताम्, ततश्चाड्द्विर्वचने अपि तयोरेव स्याताम्? नैष दोषः; `प्रकृतिवच्च कारकम्'इत्युक्तम्। कृत्प्रकृतेश्च शुद्धे णिचि विहिते कंसादिकारकं कीदृशं भवति? धातावनन्तर्भूतं द्वितीयाद्यन्तम्, तेनात्रापि तादृशेनैव रूपेण भवितव्यम्। तेन राजानमागमयतीत्यत्र नलोपाभावोऽप्युपपन्नो भवति। एवमपि कंसं घातयतीत्यत्र `हो हन्तेर्ञ्णिन्नेषु' इति कुत्वम्, `हनस्तो चिण्णलोः' इति तत्वं च न प्राप्नोति, किं कारणम्? धातोः स्वरूपग्रहणे तत्प्रत्यये कार्य विज्ञायते। एवं तर्हि प्रकृतिवच्च कारकमिति चकारोभिन्नक्रमः कारकमित्यस्यानन्तरं द्रष्टव्यः, कार्यशब्दश्चाध्याहार्यः। एतदुक्तं भवति----कृत्प्रकृतिर्हन्त्यादिः, तस्याः शुद्धे णिचि यादृशं रूपं भवति तथाऽस्यापि ण्यन्तस्य भवति, कार्यं च तद्वदेव भवतीति । एतेनाड्द्विर्वचने अपि व्याख्याते। बलिबन्धमिति। बन्धनम्=बन्धः, पूर्ववत्कर्मणि षष्ठ्याः समासः। शेषं पूर्ववत्। राजागमनमिति। अत्र कर्तरि षष्ठ्याः समासः। राजानमागमयतीति। अत्र कृत्प्रकृतौ राजा कर्ता, तस्य गमेः शुद्धे णिचि `गतिबुद्धि'इत्यादिना कर्मसंज्ञा भवतीत्यस्मिन्नप्यौपसंख्यानिके णिचि तथैव कर्मसंज्ञा भवति। इह तु देवदत्त पाकमाचष्टे इति णिचि विहिते देवदत्तेन पाचयतीति भवति। न हि देवदत्तस्य शुद्धे णिचि कर्मसंज्ञाऽस्ति; गत्यर्थादीनामेवेति नियमात्। इह तु मृगरमणमाचष्टे मृगान् रमयतीति यदा प्रतिपाद्यस्य दर्शनार्थमाख्यानं तदा णिजिष्यते, नान्यदा। तत्र यदाऽरण्यस्थो रममणान्मृगान्प्रतिपाद्यमाचष्टे----एत स्मिन्नवकाशे एवं मृगा रमन्त इति, तदा तस्य प्रतिपाद्यदर्शनार्था प्रवृत्तिरिति णिज् भवति। यदा तु ग्रामे मृगरमणमाचष्टे तदा तत्र मृगाणामसम्भवान्न तद्दर्शनार्था प्रवृत्तिरिति मृगरमणमाचष्ट इति वाक्यकेव भवति। एतच्च मृगरमणादिविषयमेव, राजागमनादौ त्वन्यदापि भवति। आङ्लेप इति। अत्राख्यानादिति न स सम्बद्ध्यते, मर्यादायां य आकारस्तस्य लोपो भवति। कृल्लुगित्यादि पूर्ववत्। आरात्रिविवास इति। विवसनम्=विवासः, अतिक्रमणम्, रात्रेर्विवासो रात्रिविवासः, कर्त्तरि षष्ठ्याः समासः, ततः `आङ् मर्यादाभिविध्योः' इत्यव्ययीभावः। यावद्रात्रेरतिक्रमणं तावत्कथाः कथयतीत्यर्थः। वसेरकर्मकत्वाद् `गतिबुद्धि' इत्यादिना रात्रेः कर्मसंज्ञा हेतुमण्णिचि भवति, तद्वदस्मिन्नपि णिचि भवति---रात्रि विवासयतीति। चित्रीकरणे प्रापीति। तदित्येव। चित्रीकरणम्=आश्चर्यकरणम्। प्रापि=प्राप्नोत्यर्थे चित्रीकरणे गम्यमाने तत्प्राप्नोतीत्यस्मिन्नर्थे णिच् भवति, कृल्लुगित्यादि पूर्ववत्। सम्भावयते इति `भू प्राप्तावात्मनेपदी', उज्जयित्या माहिष्मती विदूरे देश इति तावतो देशस्य प्रागुदयादतिक्रमणमाश्चर्यम्। सूर्यमुद्गमयतीति। `प्रकृतिवच्च कारकम्' इति सूर्यशब्दस्य पृथक्करणम्। संग्रामयतेरेव सोपसर्गादिति न्यायादुच्छब्दस्यापि पृथक्करणम्। अत्रापि सूर्यस्य हेतुमण्णिचि कर्मत्वादस्मिन्नपि णिचि कर्मत्वम्।

नक्षत्रयोगे ज्ञीति। तदित्येव। ज्ञि जानात्यर्थेनक्षत्रयोगे यत्कृदन्तं वर्त्तते तस्मात्तज्जानातीत्यस्मिन्नर्थे णिज् भवति, कृल्लुगित्यादि पूर्ववत्। पुष्ययोगमिति। पुष्येण चन्द्रमसो योगः पुष्ययोगः, पुष्येणेति कर्तरि तृतीया, `उभयप्राप्तौ कर्मणि' इति नियमात् षष्ठी न भवति। चन्द्रमस इति। नियमेन गम्यमानत्वादुभयप्राप्तिः, पुष्यो हि चन्द्रमसं युनक्ति=सम्बध्नाति, तत्र युजेर्गत्यादिष्वनन्तर्भावादणौ कर्त्तुः पुष्यस्य सुद्धे णिचि कर्तृत्वमेवेत्यस्मिन्नपि णिचि कर्तृत्वात्तृतीया भवति। पुष्येण योजयतीति। लकारस्तु प्रधान एव कर्त्तरि बवति, यथा शुद्धे णिचि। तत्तर्हीदं बहु वक्तव्यम्? वक्तव्यम्, इह तावत्सूर्यमुद्गमयतीति यो यस्य प्रवर्त्त्यः स तस्याभिप्रायं निर्वर्त्तयति। गन्तुश्चायमभिप्रायः---माहिष्मत्यां सूर्योद्गमनं सम्भावयेयमिति, तं च सूर्यो निर्वर्त्तयति, एनदेव प्रवर्त्त्यस्य प्रवर्त्त्यत्वं यदुत प्रवर्त्तयितुरभिप्रायसम्पादनम्। न हि कश्चित्परोऽनुगृहीतव्य इति प्रवर्त्तन्ते सर्व इमे स्वभूत्यर्थम्। ये तावदेते

गुरून् शुश्रूषन्ते, तेऽपीह---प्रीतो गुरुरध्यापयिष्यति परत्र चाभ्युदेष्याभ इति प्रवर्त्तन्ते। दासाश्चापि---भक्तं च लप्स्यामहे, परिभाषाश्च न नो भविष्यन्तीति प्रवर्द्धन्ते। `यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम्'। शिल्पिनोऽपि---मित्राणि च नो भविष्यन्ति वेतनं च लप्स्यामह इति प्रवर्त्तन्ते। यद्यप्यत्र सर्वत्र तत्तदुद्देशेन प्रवृत्तिः, सूर्ये तु नः तथाप्यभिप्रायसंपत्तिमात्रेण प्रयोज्यप्रयोजकभावाध्यारोपेण णिज् भविष्यति। इह च कंसं घातयतीति----ये तावदेते कंसधातानुकारिणां नटानां व्याख्यानोपाध्यायास्ते कंसानुकारिणं नटं सामाजिकैः कंसबुद्ध्य गृहीतं तादृशेनैव वासुदेवेन घातयन्ति, येऽपि चित्रं व्याचक्षते---अयं मथुराप्रासादः, अयं कंसः अयं भगवान्वासुदेवः प्रविष्टः, एताः कसंकर्षिण्यो रज्जवः, एते उद्गूर्णा निपातिताश्च प्रहाराः, अयं हतः कंसः अयमाकृष्ट इति, तेऽपि चित्रगतं कंसं तादृशेनैव वासुदेवेन घातयन्ति, चित्रेऽपि हि तद्बुद्धिरेव पश्यताम्। एतेन चित्रलेखला व्याख्याताः। येऽपि ग्रन्थं वाचयन्तः कंसवधमाचक्षते काथिका नाम, तेऽप्युत्पत्तिप्रभृत्या विनाशात्कंसादीन् वर्णयन्ति, तेऽपि वर्ण्यमानाः श्रोतृणां बुद्धिस्थाः प्रत्यक्षवद्भवन्ति। चित्तमपि तेषां तदात्मकमिव भवति, अत एव व्याश्रिताश्च भवन्ति।नानापक्षसमाश्रयः=व्याश्रयः। केचित्कंसभक्ताः, केचिद्वासुदेवक्ताः। वर्णान्यत्वं खल्वपि पुष्यन्ति---केचिद्रक्तमुखाः केचित्कालमुखाः। त्रैकाल्यमपि लोके लक्ष्यते, कथायां वाच्यमानायां हि वक्तारो भवन्ति---गच्छ हन्यते कंसः, गच्छ घानिष्यते कंसः, किं गतेन---हतः कंसः! इति। तदेवं काथकोऽपि बुद्धिस्थेन वासुदेवेन घातयति, श्रोतापि।।

शब्दोपहितरूपाँश्च बुद्धेर्विषयतां गतान्।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते।।
एवं राजानमागमयतीत्यादावपि यथासम्भवं द्रष्टव्यम्।।

कण्ड्वादिभ्यो यक्।। 3.1.27 ।।

कण्डवादिभ्यो यक्।। यदीमे कण्ड्वादयो धातव एव स्युस्ततो वाग्रहणमनुवर्तते वा? न वा? अनुवृत्तौ यगभावपक्षे लडादिषु सत्सु कण्डवतीत्याद्यनिष्टं प्रसज्येत्, कण्डूरित्यादि च न स्यात्; धातो- सुबभावात्। क्विबन्तात्सुप्सम्भवेऽपि कण्डूरिति न वेदनामात्रं गम्यते; कर्तरि क्विपो विधानात्? संपदादित्वाद्भावे क्विब्भविष्यति। एवमिप कण्ड्वौ कण्ड्वः, `अचिश्नुधातु' इत्युवङ् प्राप्नोति, कण्ड्वा, कण्ड्वे `नोङ्धात्वोः' इति विभक्तेरुदात्तनिषेधः स्यात्, मन्तुवल्गुरित्यत्र च तुक् प्रसङ्गः? अथ नानुवर्त्तते, कण्डूरिति न सिध्यति, यगन्तात्सम्पदादित्वाद्भावे क्विप्यल्लोपयलोपयोः कृतयोर्भविष्यति? न चैवमल्लोपस्य स्थानिवत्त्वादुवङ् `क्वौ लुप्तं न स्थानिवत्' इति वचनात्। ननु च क्वौ विधि प्रति स प्रतिषेधः, अन्यथा लवमाचक्षाणो लौरित्यत्र क्वौ लुप्तस्य णेः स्थानिवत्त्वाभावेऽपि स्थानिवत्त्वाभावेऽपि णौ कृतस्य टिलोपस्य स्थानिवत्त्वादूठ् न स्यात्, अतोऽत्र स्थानिवत्त्वे सत्युवङ् स्यादेव? छस्तु `च्छ्वोः शूङ्' इत्यूठ् करिष्यते। न चोठ्यपि कर्तव्ये स्थानिवत्त्वम्; तस्यक्वौ विधित्वाद् आदिष्टादचः पूर्वत्वाच्च, अत एवोठि कृते पुनरुवङोऽप्रसङ्गः। एवमपि कण्ड्वौ, कण्ड्वः, कण्ड्वे---धातुविधिः प्राप्नोति, मन्तुर्वल्गुरिति च न सिद्ध्यति, यकि दीर्घे कृते मन्तूर्वल्गूरिति स्यात्। अथ प्रातिपदिकान्येव? तत्रापि वाग्रहणाननुवृत्तौ स एव दोषो यो धातुपक्षे। अनुवर्त्ततां तर्हि वाग्रहणम्, सन्तु च प्रातिपदिकान्येव, तत्राप्ययमर्थः-----ककारो नानुबन्धव्यो भवति अनार्द्धधातुकत्वादेव गुणो न भविष्यति? नैवं शक्यम्; इह हि सुख्यति, दुःख्यति, मगध्यतीत्यतो लोपो न स्याद्; अनार्धधातुकत्वादेव। न च व्यञ्जनान्त एव शक्यः पठितुम्, यगभावपक्षेऽपि तथा प्रयोगप्रसङ्गदत उभये कण्ड्वादय इत्याह----द्विविधाः कण्ड्वादय इति। धातुभ्य एव प्रत्ययो विधीयत इति। नित्यमिति भावः। तेन पक्षे कण्डवतीत्यादि न भवति। न तु प्रातिपदिकेभ्य इति। तेन कण्ड्वौ, कण्ड्वः, मन्तुरित्यादिप्रयोगसिद्धिः। न चास्मिन्नपि पक्षे यगन्तात्सम्पदादिक्विब्विधीयते तदा पूर्वोक्तदोषानुषङ्गः, किं कारणम्? दृशिग्रहणादेतेभ्यः क्विब् स्याद्, न चैतेभ्य इदानीं क्विब् दृश्यते। पूर्वत्र तु पक्षे कण्डूरित्यादिसिद्ध्यर्थमेव क्विब् द्रष्टव्यः।

कथं पुनर्ज्ञायते---उभये कण्ड्वादय इति? तच्चलोकेन दर्शयति----घातुप्रकरणादिति। अनुवृत्तेन धातुग्रहणेन विशेषणात्ककारासञ्जनाच्च धातुत्वमेषाभिमतमिति विज्ञायत इत्यर्थः। यतस्तु खल्वयमाचार्यः क्वचिद्दीर्घमुच्चारयति---कण्डूञ् ह्णीञ् महीङिति, ततो मन्ये---धातुर्विभाषित इति। धातुत्वमेषां विभाषितमिति मन्य इत्यर्थः।

अथ कण्ड्वादीनार्थनिर्देशः। कण्डूञ् गात्रविकर्षणे। मन्तु अपराधे। ह्णीङ् रोषे। वल्गु पूजामाधुर्ययोः। अस्मनस् उपतापे। महीङ् वृद्धिपूजनयोः। लेट ् लोट् धौर्त्ये पूर्वभावे स्वप्ने। इरस इरज् इरञ् ईर्ष्यायाम्। द्रवस् परिचरणे. मेधा आशुग्रहणे। कुषुभ क्षेपे। मगध परिवेष्टने। तन्तस् पम्पस् दुःखे। सुख दुःख तत्क्रियायाम्। सपर पूजायाम्। अरर आराकर्मणि। भिषज् चिकित्सायाम्। भिष्णज्उपसेवायाम्। इषुध शरधारणे। चरण भुरण गतौ। चुरण चौर्ये च। तुरण त्वरायाम्। भुरण धारणपोषणयोः। गद्गद वाक्स्खलने। एला केला खेला विलासे। लिट् अल्पार्थे कुत्सायां च। लोट् दीप्तौ।।

गुपूधूपविच्छिपणिपनिभ्य आयः।। 3.1.28 ।।

गूपूधूपविच्छिपणिपनिभ्य आयः।। विच्छायतीति। विच्छिरयं तुदादौ पठ्यते, तत्सामर्थ्यादायप्रत्ययान्तादपि शविकरणो भवति, न तु शप्, यथा---जुगुप्सते इत्यात्मनेपदम्, तेन विच्छायन्ती विच्छायतीति `आच्छीनद्योर्नुम्' इति नुम्विकल्पो भवति। अन्ये तु सार्वधातुकेऽप्यायप्रत्ययस्यैव तुदादिपाठसामर्थ्येन विकल्पमाहुः। स्तुत्यर्थेनेति। भट्टिकाव्ये तु व्यवहारार्थादप्यायः---`न चपोलेभे वणिजां पणायान्' इति। अनुबन्धः केवलेऽचरितार्थ इति। अवयवेष्वचरितार्थ लिङ्गं समुदायस्य विशेषकं भवति, यथा---गुपादीनामनुदात्तत्वमिति भावः। ये तु व्यवहारार्थादप्यायमिच्छन्ति तेषामपि पणिष्यते पाणयिष्यतीत्यादावनुबन्धः केवले चरितार्थः।।

ऋतेरीयङ्।। 3.1.29 ।।

ऋतेरीयङ्।। सौत्र इति। अस्मिन्नेव सूत्रे उच्चरित इत्यर्थः। घृणायां वर्त्तत इति। नात्र कृपायां घृणाशब्दः, किं तर्हि? जुगुप्सायास; `घृणा जुगुप्साकृपयोः'

इति वचनात्। जुगुप्सा=निन्दा, बीभत्सेत्यर्थः। ऋतीयाशब्दो बीभत्सापर्यायो निघण्टुषु पठितः। अथ कस्मादीयङुच्यते न छङेवोच्यते, तस्य ईयादेशे कृते ऋतीयत इति सिद्धम्, परत्वादिडागमे कृते सत्यप्रत्ययादित्वादीयादेशोच न स्यादिति चेत्? न; अन्तङ्गत्वात्, आयन्नदिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति वचनादन्तरङ्गत्वम्। ज्ञापनार्थ तु, एतज्ज्ञापयति---धातुप्रत्ययानामयन्नादयो न भवन्तीति, तेन `कणेष्ठः' इत्यत्रेकादेशो न भवति। क्वचित्तु वृत्तावेवं पठ्यते---`ऋतेश्छङ्' इत्येव सिद्धे ईयङ्वचनं ज्ञापक्---धातुविहितानामायन्नादयो न भवन्तीति। अत्र ब्रूमः---`द्विवचनविभज्योपपदे तरप्छसुनौ' इत्येव सिद्धे ईयसुन्वचनं ज्ञापकं प्रातिपदिकप्रत्ययानामायन्नादयो न भवन्तीति। उच्यन्ते चायन्नादयस्ते वचनादुभयेषामपि स्युः, तस्माद्दतेश्छङित्यादि वृत्तौ न पठनीयमिति।।

कमेर्णिङ्।। 3.1.30 ।।

कमेर्णिङ्।। इह णिङो णकारः `णेरनिटि' इति विशेषणे चरितार्थो ङकारोऽप्यात्मनेपदार्थ इत्युभयोश्चरितार्थयोः प्राप्नोति, ज्ञापकात्सिद्धम्, यदयम् `न कम्यमिचमाम्' इति कमेर्मित्संज्ञायां प्रतिशेधं शास्ति, तज् ज्ञापयति---भवत्यत्र वृद्धिरिति, तस्य हि प्रयोजनम्---`मितां ह्रस्वः' इति ह्रस्वो मा भूदिति यदि चात्र वृद्धिर्न स्याद् ह्रस्व एवोपधेति कृत्वा नित्संज्ञाप्रतिषेधोऽनर्थकस्स्यात्। नैतदस्ति ज्ञापकम्, यदा णिङन्ताद्धेतुमण्णिच् क्रियते तदा णिङन्तस्य णिचि या वृद्धिस्तस्या ह्रस्वो मा भूदित्येवमर्थमेतत्स्यात्, न च णिजपेक्षाया अपि वृद्धेर्णिङमेव ङितमपेक्ष्य प्रतिषेधः। किं कारणम्? ङितीति निमित्तसप्तमी। ननु च न णिङन्तस्य णिचि वृद्ध्या भवितव्यम्; णिङा व्यवहितत्वात्, णिलोपे कृते स्थानिवद्भावाद्व्यवधानमेव। यदा तर्हि णिङन्ताच्चिण्णमुलौ सवतस्तदा `चिण्णमुलोदीर्घोऽन्यतरस्याम्' इत्येव विधिर्मा भूदित्येवमर्थो मित्संज्ञाप्रातिषेधः स्यात्। किं पुनः कारणम्? तत्र `दीर्घोऽन्यतरस्याम्' इत्युच्यते न प्रकृतो ह्रस्व एव विकल्प्येत, एवं हि कमेर्मित्संज्ञाप्रतिषेधो न र्तव्यो भवति। कथम्? यदा णिङि वृद्धिर्नास्ति तहा ह्रस्व एवोपधेति सत्यपि ह्रस्वविकल्पे नैवानिष्टप्रसङ्गः, अशमि अशामीत्यादि च सिद्धम्? नैवं शक्यम्; यदा शमिप्रभृतिभ्यो णिजन्तेभ्यो द्वितीयो णिच् क्रियते तदा न स्यात्। यश्च णमुल्परो णिज् द्वितीयः, न तस्मिन् प्रथमेन णिचा व्यवहितत्वात्। यस्मिश्च मिदङ्गं प्रथमे णिचि, नासौ चिण्णमुल्परः, द्वितीयेन व्यवहितत्वात्। णिलोपेऽपि कृते स्थानिवद्भावाद्व्यवधानमेव। `दीर्घोऽन्यतरस्याम्' इत्युच्यमाने पुनरत्रापि भवति, दीर्घविधिं प्रति स्थानिवद्भावनिषेधात्। तथा शमिप्रभृतिभ्यो यङन्तेभ्यो णिच्यल्लोपयलोपयोरल्लापस्य स्थानिवद्भावादसत्यां वृद्धौ चिण्णमुलोः कृतयोरशंशमि, असंशामि, शंशमम्, शंशाममिति न स्यात्। दीर्घः पुनर्विकल्प्यमानोऽत्रापि भवति; तद्विधौ स्थानिवद्भावप्रतिषेधात्। तथा `हेडृ अनादरे' घटादिः, `एच इग्घ्रस्वादेशे', हिड्यति, तत्र चिण्णमुलोः कृतयोर्ह्रस्वे विकल्प्यमाने अहिडि, अहेडीति स्यात्; दीर्घे तु पुनरहिडि, अहीडीति भवति। तस्माद्दीर्घ एव विकल्पनीयः, ततश्च मित्संज्ञाप्रतिषेधोऽपि तन्निवृत्तये वक्तव्यः। तथा `आयादय आर्द्धधातुके वा' इति णिङभावे णिचि सति वृद्धौ कृतायाम् `मितां ह्रस्वः' इति ह्रस्वो मा भूदित्येवमर्थोऽपि सित्संज्ञाप्रतिषेधो वक्तव्य एवेत्यज्ञापकमेतत्। एवं तर्ह्यस्थानेऽयं यत्नः क्रियते, नैवात्र प्रतिषेधः प्राप्नोति, किं कारणम्? इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः न चैषा इग्लङणा वृद्धिरित्यलमति कर्कशप्रक्रियातर्कानुसरणेन।।

आयादय आर्द्धधातुके वा।। 3.1.31 ।।

आयादय आर्द्धधातुके वा।। `आर्द्धधातुके' इति परसप्तम्यामायादिविधिभिरेकवाक्यता स्यात्, भिन्नवाक्यतायामयमर्थो भवति----गुपादिभ्य आर्द्धधातुके परतो वाऽऽयप्रत्ययो भवति, एवमुत्तरत्रापि, ततश्चार्द्धधातुके एव विकल्पेनायादयः स्युः, सार्वधातुके नैव स्युः? नैष दोषः, पृथागारम्भाद्यदि ह्यार्द्धधातुक एवायादीनामुत्पत्तिः स्यात्ततो गुपादिभिः संयुज्यैव निर्दिशेत्---गुपादिभ्य आर्द्धधातुके वेति, एवं हि आयादय इति न वक्तव्यं भवति। पृथकतं निर्दिशति, तेन मन्यामहे---व्यापारभेदेनैकवाक्यतेति। ततश्चायमर्थो भवति---गुपादिभ्यो नित्यमायादयो भवन्त्यार्द्धधातुके वेति। एवमपि गुपादेर्यदार्द्धधातुकं प्राप्तं तत्र ततो विहिते विकरणविकल्पे नायादयः स्यु; ततश्च स्त्रीभावविवक्षायं गुपेरप्रत्ययान्तत्वाभावात् क्तिनि कृते यदायप्रत्ययो न भवति तदा गुप्तिरिति काममिष्टं सिद्ध्यति। यदा तु भवति तदाऽल्लोपयलोपयोर्गोपातिरित्यनिष्टं प्राप्नोति, गोपायेति चेष्टं न सिद्ध्यति। भिन्नवाक्यतायामायाद्यन्ताद्यदार्द्धधातुकं प्रप्तं तत्र ततो विहिते आयादयो वा भवन्तीत्यर्थः स्यात्। तत्र चायाद्यान्ताद्यदार्द्धधातुकमिति वदता तेषामुत्पत्तिस्तावदङ्गीकृता। न चोत्पन्नानामुत्पत्तिविकल्पः शक्यते कर्तुमिति लोकन्यायेन निवृत्तिविकल्पो भवति। ततश्चायप्रत्ययान्तात् स्त्रीभावविवक्षायामप्रत्ययादित्यकारे कृते निवृत्त्यभावपक्षे गोपायेति काममिष्टं सिद्ध्यति। निवृत्तिपक्षे तु गोपेत्यनिष्टं प्राप्नोति, गुप्तिरिति चेष्टं न सिद्ध्यति। लिटि च निवृत्त्यभावपक्षे गोपायाञ्चकारेति काममिष्टं सिद्ध्यति, निवृत्तिपक्षे तु यदि लिटि परतो निवृत्तिस्तथापि प्रत्ययलक्षणेन कास्प्रत्ययादित्यामा भवितव्यम्, अथाप्यामि कृते निवृत्तिस्तथापि तस्यैव श्रवणं प्राप्नोतीति सर्वथा गोपांचकारेत्यनिष्टं प्राप्नोतीति, जुगोपेति चेष्टं न सिद्ध्यति। तस्माद् दुष्ट एवायं परसप्तमीपक्ष इति मत्वाह---आर्द्धधातुके विषय इति। कोऽर्थः? इत्याह---आर्द्धधातुकविवक्षायामिति। आर्धधातुकमिहोत्पादयिष्यामीति बुद्धौ सत्यामित्यर्थः। विषयसप्तमीपक्षेऽपि भिन्नवाक्यतायामार्द्धधातुके विधित्सिते आयादयो भवन्तीत्युक्ते, कुतो विधित्सिते? इत्यपेक्षायामायाद्यन्तस्यापि धातुत्वात्तत इति गम्यते ततश्च निवृत्तिपक्ष एवाश्रित इति स एव दोषो यं पूर्वमवोचाम। तस्मादेकवाक्यतयोत्पत्तिविकल्प इत्याह---नित्यप्रत्ययप्रसङ्गे तदुत्पत्तिरार्द्धधातुकविषये विकल्प्यत इति। किमेवं सति सिद्धं भवतीत्याह--तत्रेति।।

सनाद्यन्ता धातवः।। 3.1.32 ।।

सनाद्यन्ता धातवः।। सनादयोऽन्ते येषामिति। अन्तशब्दः समीपवचनः, वैयधिकरण्येऽपि गमकत्वाद्वहुव्रीहिः। अथ वा---वृत्तावर्थमात्रं दर्शितम्, सूत्रे त्ववयववाचिनोऽन्तशब्दस्य समानाधिकरणस्यैव बहुव्रीहिः। सनादयोऽन्तावयवा येषां समुदायानामित्यनेन तद्गुणसंविज्ञानो बहुव्रीहिरिति दर्शयति। धातुसंज्ञा इति। धातुशब्दोऽत्र स्वरूपपदार्थः, न भूवादिपदार्थकः; तावतीनां संज्ञानां विधाने प्रयोजनाभावात्। `सुप्तिङन्तम्' इत्यत्रान्तग्रहणज्ञापिता संज्ञाविधौ

प्रत्ययग्रहणे प्रत्ययग्रहणपरिभाषा न प्रवर्तत इति, ततश्चासत्यन्तग्रहणे तदन्तविधिर्न स्यादित्यत्रान्तग्रहणं कृतम्। एवं स्थिते यद्यपूर्व एवानेन तदन्तविधिः क्रियते, ततो देवदत्तश्चिकीर्षतीत्यत्र देवदत्तादेः समुदायस्य संज्ञा प्रसज्येतेति मत्वाह----प्रत्ययग्रहणपरिभाषैवेत्यादि। अपूर्वविधौ गौरवम्, प्रतिप्रसवे तु यत्नस्य लाघवं भवतीति भावः। `भूवादयः' इत्यस्यानन्तरं सनाद्यान्ताश्चेत्युच्यमाने सनादीनामियत्तापरिच्छेदो न स्यात्। एवं तर्हि `सङन्ताश्च' इत्युच्यताम्, सङिति प्रत्याहारः सनः सशब्दारभ्या णिङो ङकारात्। एवमपि सन्देहस्स्यात्, चङादिष्वपि ङकारस्य भावात्। एवं तर्हि `सनाद्यन्ताः' इत्यस्यानन्तरम् `भूवादयश्च' इति वक्तव्यम्। स्यादेतत्----एवमुच्यमाने सनाद्यन्तशब्दवद् भूवादिशब्दोऽपि प्रकृतापेक्षः स्यात्ततश्चानुक्रान्तानां गुपादीनामेव स्यादिति? एवमपि भूवादिग्रहणमनर्थकं गुपादयश्चेति वक्तव्यम्। नानर्थकम्; भुवो वादयो भूवादय इत्येवमर्थमेव स्याद्। भूवादिपाठ इदानीं किमर्थः स्याद् ? अन्तर्गणकार्यार्थः, अनुबन्धासञ्जनार्थश्च। येषां तर्हि तदुभयं न संभवति भूरणिप्रभृतीनां तेषां पाठः किमर्थः? अलमतिनिर्बन्धेन।।

स्यतासी लृलुटोः।। 3.1.33 ।।

स्यतासी लृलुटोः।। इह यद्यपि `लृ' इत्यनुकरणमुच्चारितमेकमेव, तथापि तस्य प्रतिपाद्यभूतमनुकार्थं भिद्यते---लृट्, लृङ् इति। यत्र च प्रतिपाद्यानां संख्यांसाम्यं तत्र संख्यातानुदेशः, न तूच्चारितरूपसाम्ये; अन्यथा परस्मैपदानामित्येकं णलादयस्तु नवेति वैषम्यान्त स्यात्। तथा डारौरसः प्रथमस्येत्यत्रापि न स्यात्। तदेवम् `लृ' इत्यस्य द्वे प्रतिपाद्ये, लुटिति चापरमिति त्रीणि निमित्तानि, निमित्तिनौ तु द्वाविति वैषम्यात्संख्यातानुदेशो न प्राप्नोतीत्यत्राह----लृरूपमुत्सृष्टानुबन्ध सामान्यमेकमेवेति। नात्र प्रतिपाद्यं भिद्यते यत्तदुभयानुगतमुत्सृष्टानुबन्धम् `लृ' इति सामान्यरूपं तदनुक्रियते। एतच्च लृलुटोरिति द्विवचन निर्देशादवसीयते, तत्रयथानुकरणे न भेदस्तथानुकार्येऽपीत्यर्थः। करिष्यतीति। `ऋद्धनोः स्ये' इतीट्। श्वः कर्त्तेति। `श्वः' इत्यस्योपन्यासस्तृजन्तशङ्कानिवृत्त्यर्थः। इदित्करणमिति। इत्संज्ञकस्येकारस्य करणमित्यर्थः। अनुनासिकलोपप्रतिषेधार्थमिति। अन्यथा मन्तास् आ इति स्थिते टिलोपे कृते नकार उपधेत्यात्मनेपदे ङिति परतः `अनिदिताम्' इति नलोपः प्राप्नोति, तस्य `अनिदिताम्' इतीदित्त्वनिबन्धनः प्रतिषेधो यथा स्यादित्यर्थः। मन्ता, सङ्गन्तेति। कोऽर्थः? मन्तेत्येतत्पदं सङ्गन्तं भविष्यतीत्यर्थः, न तु सङ्गन्तेत्येतदुदाहरणम्; अनोपधत्वात्। अनुस्वारपरसवर्णयोः कृतयोरपि तयोरसिद्धत्वादनोपध एव।

अन्ये त्वाहुः----यद्यसिद्धत्वात्सङ्गन्तेत्येतदनुदाहरणम्, मन्तेत्येतदपि उदाहरणं न भवति, अत्रापि टिलोपस्याभीयस्यासिद्धत्वाद् मन्तास् आ इति स्थिते नकार उपधा न भवतीति।

यदि मतम्----आ भाच्छास्त्रीयमसिद्धत्वमनित्यम्, `श्नसोरल्लोपः' इति तपरकरणात्? तद्ध्यास्तामासन्नित्यादौ मा भूदित्येवमर्थम्, तत्राटोऽसिद्धत्वादेव लोपो न भविष्यति, किं तन्निवृत्त्यर्थेन तपरत्वेन! तज्ज्ञापयति----असिद्धत्वमनित्यमिति। तेन देभतुर्देभुरित्यत्र `श्रन्थिग्रन्थिदम्भिस्वञ्जिनाम्' इति लिटः कित्त्वान्नलोपे तस्यासिद्धत्वाभावादेत्त्वाभ्यासलोपौ भवतः, तदत्र टिलोपस्यासिद्धत्वान्मन्त आ इति स्थिते उपधैव नकार इत्युदाहरणमिति। यद्येवम्, पूर्वत्रासिद्धीयमसिद्धत्वमप्यनित्यम् `न मु ने' इत्यत्र नेति योगविभागात्, तथा चैकादेशस्वरोऽन्तरङ्गः सिद्धो भवति, सिज्लोप एकादेशे सिद्धो भवति, निष्ठादेशः षत्वादिषु सिद्धो भवति, द्विर्वचनविषये च पूर्वत्रासिद्धीयं न भवति, ततश्चानुस्वारपरसवर्णयोः सिद्धत्वात् सङ्गन्तेत्येतदप्युदाहरणमेवेति। अन्ये तु संहन्तेति पठन्ति, हन्तेः `भावकर्मणोः' इत्यात्मनेपदम्, तत्र सम्पूर्वस्य पाठे प्रयोजनं मृग्यम्। एवं तावज्जयादित्येनासिद्धत्वमनित्यमाश्रित्य `तासेरिदित्करणमनुनासिकलोपप्रतिषेधार्थम्' इत्युक्तम्। वामनस्तु टिलोपस्य सिद्धत्वादेव नलोपो न भविष्यतीति मन्यमानः `इदितोo' इत्यत्र वक्ष्यति---`तासि सिचोरिदित्कार्य नास्तीत्युच्चारणार्थो निरनुनासिक इकारः पठ्यते' इति। यदि तु तासेरिकारोऽनुबन्धः स्यात्ततो नुम्विधौ धातोस्तासेर्मा भूदित्येवमर्थं स्यात्, ततश्चधातूपदेशावस्थायामेव नुम् भवतीत्ययमर्थो न साधितः स्यादिति तस्याभिप्रायः। जयादित्यस्तु `नुम्विधावुपदेशिवद्वचनं प्रत्ययसिद्व्यर्थम्' इति वचनमेव शरणमशिश्रयत्।

इह विकरणाः केचन लकारोपादानेन विधीयन्ते, यथा-----स्यादयः, ते किं लावस्थायामेव भवन्ति ? उताहो आदेशेषु कृतेषु? यदि लावस्थायामेव, ततस्तास्यनुदात्तेदित्यत्र यद्वक्ष्यते----तासेः परस्य लसार्वधातुकस्यानुदात्तवचनं ज्ञापकम्, सतिशिष्टोऽपि विकरणस्वरो लसार्वधातुकस्वरं न बाधत इत्यस्यार्थस्येति, तन्नोपपद्यते; लावस्थायामेव तासौ कृते तस्य च प्रत्ययाद्युदात्तत्वे पश्चाल्लादेशेषु क्रियमाणेषु तेषामेव स्वरः सतिशिष्टो भवति, ततश्चानुदात्तवचनमप्राप्तविधिरेव स्यात्। तत्र को दोषः? चिनुतः चिन्वन्तिः, चिन्वन्ति; क्रीणीतः, क्रीणन्ति, सतिशिष्टो विकरणस्वर एव प्राप्नोति, द्वितीये तु पक्षे पूर्व तिबादयः पश्चात्तासिरिति तस्यैव स्वरः सतिशिष्टः, ततश्च निघातस्वरेणैव सार्वधातुकानुदात्तत्वे सिद्धे तासिग्रहणं क्रियमाणमुक्ता र्थस्य ज्ञापकं सम्पद्यते। अस्तु तर्हि तथा। यद्येवम्, धातुमात्रात्सार्वधातुकमात्रे भावकर्मणोर्यक् कर्त्तरि तु शब्विधीयत इति यक्शपावुत्सर्गौ तेष्वेवार्थेषु धातुमात्रात्सार्वधातुकविशेषे स्यादय इति तेऽपवादाः? तथा दिवादेर्धातुविशेषात्कर्तरि श्यनादयः शपोऽपवादाः, तत्र देविष्यति तनिष्यतीत्यादावुभयप्रसङ्गेऽपवादविप्रतिषेधात् श्यनादयः स्युः? पक्षान्तरे त्वन्तरङ्गाः स्यादय एव सिद्ध्यन्ति? नैष दोषः; `दिवादिभ्यः श्यन्' इत्यादिषु स्यादयोऽनुवर्तिष्यन्ते---दिवादिभ्यः श्यन् भवति, लृलुटोस्तु स्यतासी भवतो दिवादिभ्य इति। एवं सर्वत्र। एतेनैतदपि निरस्तं यत्खल्विदमाशंक्यते----परेण लावस्थायां विधीयमानाः स्यादयः किमिति सार्वधातुकोत्पत्तिं प्रतीक्षन्त इति, कथम्? उत्तरत्रानुवृत्तेरेव, सार्वधातुके यग्भवति, भावकर्मणोर्लृ लुटोस्तु स्यतासी भवतः सार्वधातुके। एवं सिजादिष्वपि द्रष्टव्यम्। तदेवमादेशेषु कृतेषु स्यादय इति स्थितम्।।

सिब्बहुलं लेटि।। 3.1.34 ।।

सिब्बहुलं लेटि।। जोषिषन्मन्दिषदिति। `जुषी प्रीतिसेवनयोः' `मदि स्तुतिमोदस्वप्नगतिषु', अनुदात्तौ, व्यत्ययेन परस्मैपदम्, सिच इट् `लेटोऽडाटौ' इति

तिपोऽट्, `इतश्च लोपः परस्मैपदेषु' इतीकारलोपः, तत्र च वेति वर्तते। तारिषदिति। `तृ प्लवनतरणयोः',`सिब्बहुलं छन्दसि णिद्वक्तव्यः' इति वचनाद्वृद्धिः, अमीषां भविता भाविषदिति यथा। छान्दसो वा दीर्घः। पतातीति। `शल हुल पत्लृ गतौ', लेटोऽडाटौ' इत्याट् शपासहैकादेशः। च्यावयातीति। `च्युङ् प्रुङ् प्लुङ् गतौ' ण्यन्तः। इहावयासिषीष्ठा इति यातेरवपूर्वाल्लिङि बहुलवचनास्तिप्, थासः सीयुट्, इट्। `एकाच उपदेशेऽनुदात्तात्' इति तु प्रतिषेधो न भवति; सिपा व्यवधानात्।।

कास्प्रत्ययादाममन्त्रे लिटि।। 3.1.35 ।।

कास्प्रत्ययादाममन्त्रे लिटि।। आम् प्रत्ययो भवतीति। हलन्तपक्षे एतदुक्तम्, अदन्तपक्षे त्वामः प्रत्ययो भवतीति वक्तव्यम्। अमन्त्रविषय इति। मन्त्रविषयश्चेत्प्रयोगो न भवतीत्यर्थः। ऋग्यजुः सामलक्षणो मन्त्रम्, तत्रैवाभियुक्तैर्मन्त्रशब्दस्य प्रयोगात्। आथर्वणा अपि मन्त्रा ऋग्यजुष एवान्तर्भवन्ति। तान्त्रिकेषु मन्त्रशब्दप्रयोगो मन्त्रवदुपचारात्। छन्दसीति नोक्तम्, ब्राह्मणेऽपि यथा स्यात्---अथ ह शुनः शेप ईक्षांचक्रे ते ह तदन्तर्वेद्यासाञ्चक्रिरे अविज्ञातानि च दर्शयाञ्चकार। कासाञ्चक्र इति। आमन्तस्य पदत्वम्` आमः' इत्यत्रोपपादितम्। नोनावेति। नौतेर्यङ्लुगन्तात्प्रत्ययलक्षणेन प्राप्त आम् न भवति। कारयनेकाच इति वक्तव्यमिति। यथान्यासे हि कशब्दादशब्दाद्वागादिभ्यश्चाचारक्विबन्तेभ्य एकाज्भ्योऽपि प्रत्ययान्तत्वादाम्प्रसङ्ग, चुलुम्पादिभ्यश्चाप्रत्ययान्तत्वादप्रसङ्गः; अतोऽव्याप्त्यतिव्याप्तिपहिहाराय प्रत्ययग्रहणमपनीयानेकाज्ग्रहणं कर्तव्यमित्यर्थः। तत्र कशब्दस्य णलि `अचो ञ्णिति' इति वृद्धौ `आत औ णलः' चकौ, अन्यत्र `अतो लोपः' चकतुः, चकुः; अशब्दस्य णलि रूपम्---औ इति, अन्यत्र `अत आदेः' इति दीर्धत्वे `आतो लोप इटि च'अतुः, उः। चकासांचकारेति। `चकासृदीप्तौ'। दरिद्राञ्चकारेति। `आत औ णलः' इत्यत्र ओकारे विधातव्ये औकारविधानं दरिद्रातेरार्द्धधातुकलोप उत्याकारलोपेऽप्यौकारस्य श्रवणार्थम्, तेन ददरिद्रावित्यपि भवतीत्याहुः। चुलुम्पाञ्चकारेति! चुलुम्पतिर्वार्त्तिककारवचनात्साधुः। आमो मकारस्य `हलन्त्यम्' इतीत्संज्ञा कस्मान्न भवतीत्याह---आमो मित्त्वमिति। कारयाश्चकारेत्यादौ प्रयोगे य आम्शब्दस्तस्यामित्त्वं मकार इत्संज्ञको यस्य नास्ति सोऽमित् तस्य भावः अमित्त्वम्। कुत इत्याह? अदन्तत्वादिति। अद् अन्ते समीपे यस्य सोऽदन्तः, सूत्रे विधानवेलायां समीपेऽकारवत्त्वादित्यर्थः। तेनैतन्न चोदनीयम्---आम् चेत्कथमदन्तः, अथादन्तः कथमामिति। सूत्रे विधीयमानस्यैव वा प्रत्ययस्योपलक्षणमाम इति। अगुणत्वं विदेस्तथेति। विदाञ्चकारेत्यत्र विदेरामि गुणाभावोऽपि तथा, अदन्तत्वादेवेत्यर्थः। अदन्तत्वादित्येतत्प्रसङ्गेन चेदमिहोक्तम्, `उषविदजागृभ्योऽन्यतरस्याम्' इत्यत्र तु वक्तव्यम्। तत्र हि विदेरकारान्तत्वमाम्प्रत्ययसन्नियोगेन निपात्यते, तत्रातो लोपस्य स्थानिवत्त्वाद् गुणो न भवति। न पुनः `विद ज्ञाने' इत्यकारो विवक्षित इत्युच्यते; वेत्तीत्यादौ श्रवणप्रसङ्गात्। अभ्युपेत्यापि मकारान्तत्वमित्संज्ञाभावमाह---आस्कासोराम्विधानाच्चेति। आमोऽमित्त्वमित्यनुषङ्गः, सति हि मित्त्वे आस्कासोराम् भवन्नप्यचामन्त्यात्परः स्यात्, तथा च सवर्णदीर्घत्वे सत्यकिञ्चित्करः स्यात्। अतः `दयायासश्च' कास्प्रत्ययादिति आस्कासोराम्विधानादप्यामऽमित्त्वमवसीयते ित्यर्थः। आस्चकासोर्विधानाच्च इत्यन्ये पठन्ति, तदयुक्तम्; न हि सूत्रे चकास आम्विधानमस्ति। यदपि कास्यनेकाज्ग्रहणं तदपि चुलुम्पादौ सावकाशम्। नन्वदन्तत्वपक्षे आमामन्त्र इति निर्देश्यं स्यात्तत्राह---पररूपं कतन्तवदिति। यथा `सर्वत्र लोहीतादिकतन्तेभ्यः' इत्यत्र पररूपम्, एवमत्रापि निपातनात्पररूपमित्युक्तं भवति।।

इजादेश्च गुरुमतोऽनृच्छः।। 3.1.36 ।।

इजादेश्च गुरुमतोऽनृच्छः।। ऋच्छतिवर्जित इति। ऋच्छतिना त्यक्तः तद्रूपरहित इत्यर्थः। ऋच्छतेरन्य इति यावत्। इयज, उवपेति। यजिवप्योरुत्तमे णलि `णलुत्तमो धा' इति णित्त्वाभावपक्षे वृद्ध्यभावाद् गुरूपोत्तमत्वाभावः। अथ थलि प्रत्युदाहरणम्---इयजिथ, इयष्ठ; उवपिथ, उवप्थेति। नन्वत्र सन्निपात परिभाषयैव न भविष्यति, लिट्सन्निपातजं हि अभ्यासम्य संप्रसारणं तद्विघातकस्यामो निमित्तं न भवति, आमि हि सति लेर्लुका भवितव्यमिति लिट्सन्निपातमसौ विहन्यात्? इदं तर्हि प्रत्युदाहरणम्---इयेषेति, न ह्यत्र लिट्सन्निपातजमिजादित्वम्। अथ क्रियमाणेऽपि गुरुमद्ग्रहणे कस्मादेवात्र न भवति, यावता गुणे कृते गुरुमानेष भवति? एवमीषतुरित्यादावपि सवर्णदीर्धत्वे कृते गुरुमानेव भवति? सत्यम्; सति गरुमद्ग्रहणे सन्निपातपरिभाषयैवात्राप्याम् न भवति, लिडानन्तर्यहेतुकत्वाद् गुरुमत्तायाः। अथ वा `गुरुनतः' इति नित्ययोगे मतुप्, नित्यं यस्य गुरुणाभिसम्बन्धः। यद्येवम्, `उछी विवासे' व्युच्छाञ्चकार, `उछ उञ्छे' उच्छाञ्चकार आगमनिमित्ता चास्य गुरुमता, तस्मादाम् न प्राप्नोति? ज्ञापकात्सिद्धम्, यदयमनृच्छ इत्याह, तज्ज्ञापयति---भवत्येवञ्जातीयके आमिति। स तर्हि ज्ञापकार्थमृच्छतिप्रतिषेधो वक्तव्यो भवति। ननु चचाम्निवृत्यर्थ एवासौ कर्तव्यः, नार्थ आम्निवृत्त्यर्थेन? ज्ञापकात्सिद्धम्, यदयम् `ऋच्छत्यृताम्' इति लिटि परतो गुणं शास्ति, तज्ज्ञापयति---नास्मादाम् भवतीति। न च तत्रर्छतीत्यर्तेश्तिपानिर्द्देशः; `ऋच्छति ॠ ॠताम्' इत्यर्तेरपि स्वरूपेणैव प्रश्लेषात्। प्रश्लेषे बहुवचनमत्र प्रमाणम्। अर्तेश्च लिटि गुणवि धाने प्रयोजनं तत्रेव वक्ष्यामः। तस्माद्दच्छतेर्गुणविधानं ज्ञापकमेव। तस्मादाम्न भवतीति स एषोऽनृच्छ इति प्रतिषेधो ज्ञापकार्थ एव कर्तव्यः स्यात्। एवं हि लिटीति विहितविशेषणम्----इजादेर्गुरुमतो यो लिड्विहितस्तत्रेति। तेन लिड्निमित्ता यस्य गुरुमत्ता तस्माच्च न भविष्यति, आगमनिमित्ता यस्य गुरुमत्ता तस्माच्च भविष्यति। `अनृच्छ' इति प्रतिषेधस्तु क्रियताम्, मा वा कारि। क्वचित्तु गुरुमत इति किम्, उबोषेति पठ्यते, तत्र उवोषेत्युदाहरणमयुक्तम्, `उषविदजागृभ्यः' इति विकल्पविधानमनवकाशं स्यात्। प्रोर्णुनावेति।`अजादेर्द्धितीयस्य' `न न्द्राः संयोगादयः' इति नुशब्दस्य द्विर्वचनं कार्यान्तरसिद्ध्यर्थम्, अवश्यमूर्णोतेर्णुवद्भाववो वाच्यः, तेनैवामोऽपि प्रतिषेधः सिद्ध इत्याह---अथ वा वाच्य इति। तत्र यङि भावातिदेशः, आमिटोस्त्वभावातिदशः; नौतेस्तयोरभावात्। उडुपग्रहः===इट्प्रतिषेधः, `विभाषा गुणे' इति पञ्चमी। फलस्य चात्र हेतुत्वं यथा---अध्ययनेन वसतीति। एकाच इति वर्तमाने `श्र्युकः किति' इति य इट्प्रतिषेधः ततोऽपि हेतोर्णुवद्भावो वाच्य इत्यर्थः। उदाहरणानि---प्रोर्णोनूयते, प्रोर्णुनाव, प्रोर्णुतः, प्रोर्णुतवानिति।।

दयायासश्च।। 3.1.37 ।।

दयायासश्च।। दयायासः सर्वऽप्यनुदात्तेतः। पलायाञ्चक्रे इति। `उपसर्गस्या यतौ' इत्युपसर्गस्य लत्वम्।।

उषविदजागृभ्योऽन्यतरस्याम्।। 3.1.38 ।।

उषविदजागृभ्योऽन्यतरस्याम्।। विद ज्ञाने इति। सत्ताविचारणार्थयोस्त्वात्मनेपदिनोर्लाभार्थस्य चोभयपदिनो ग्रहणं न भवति, परस्मैपदिभ्यामुषिजागृभ्यां जागर्तिनाऽऽदादिकेन साहचर्यादिति भावः। विवेदेति। आम्प्रत्ययसन्नियोगेनादन्तत्वप्रतिज्ञानादत्र गुणो भवत्येव। अत एवाह---विदेरदन्तत्वप्रतिज्ञानादामि गुणो न भवतीति।।

भीह्रीभृहुवां श्लुवच्च।। 3.1.39 ।।

भीह्रीभृहुवां श्लुवच्च।। श्लुवत्कार्यापेक्षया सूत्रे षष्ठी, सन्नियोगरिष्टत्वाच्चाम्, प्रत्ययोऽपि तेभ्य एव विज्ञायते। द्वित्वेत्त्वे इति। `श्लौ' इति द्विर्वचनम्, `भृञामित्' इतीत्त्वम्, तत्र `श्लौ' इति वर्तते। `न लुमताङ्गस्य' इति गुणप्रतिषेधस्तु न भवति, किं कारणम्? `प्रत्ययलोपे प्रत्ययलक्षणम्' इत्यस्याः प्राप्तेरयं प्रतिषेधः। श्रूयमाणत्वादामः'।।

कृञ्चानुप्रयुज्यते लिटि।। 3.1.40 ।।

कृञ्चानुप्रयुज्यते लिटि।। अनुप्रयुज्यत इत्यनुशब्दः पश्चादर्थे। तत्र कस्य पश्चादित्यपेक्षायामामः प्रकृतत्वात्तस्यैवेति विज्ञायत इत्याह---आम्प्रत्ययस्येति। योऽयमाम्प्रत्ययो विहितः----कर्मधारयोऽयम्, न तु बहुव्रीहिः---आम्प्रत्ययो यस्मात्सोऽयमाम्प्रत्ययस्तस्येति। तथा हि सत्याम्प्रत्ययवदितिवादमः प्रत्ययस्य प्रकृत्युपलक्षणत्वाद्धातोरामश्च मध्ये कृञः प्रयोग उक्तः स्यात्। पश्चात्कृञनुप्रयुज्यत इति। पश्चाच्छब्दसन्निधावनुशब्दोऽयमनुवादः। लिटि परत इति। लिटि परतः स्थितो यः कृञ् सोऽनुप्रयुज्यत इत्यर्थः। सूत्रेऽपि लिटीति नानुप्रयोगस्य निमित्तनिर्देशः, किं तर्हि? `परोक्षे लिट्' इत्यनेन विहिते लिटि परभूते यः कृञ् सोऽनुप्रयुज्यत इति वचनव्यक्तिः। चकारेत्यादिपदमनुप्रयुज्यत इति यावत्। कृजिति प्रत्याहारेणेति। `कृभ्वस्तियोगे' इति कृशब्दादारभ्य' कृञो द्वितीय' इत्या कृञो ञकारात्प्रत्याहारः। अत्र च प्रमाणमाम्प्रत्यय इत्यत्र कृञ्ग्रहणम्। यदि ह्यत्र स्वरूपग्रहणं स्यात्तदान्यस्यानुप्रयोगस्याभावादनर्थकं तत्र कृञ्ग्रहणं स्यात्। अत एव विपर्ययोऽपि न भवति---तत्र प्रत्याहारग्रहणम्, इह स्वरूपग्रहणमिति; न ह्यत्र स्वरूपमात्रग्रहणे तत्र कृभ्वस्तीनामनृप्रयोगत्वानुवाद उपपद्यते। तत्सामर्थ्यादिति। प्रत्याहारग्रहणमामर्थ्येत्यर्थः। अस्तेर्भूभावो न भवतीति। अन्यथाऽसन्देहार्थं `कृभ्वनुप्रयुज्यते लिटि' इत्येव ब्रूयादिति भावः। तत्र एषि इटि च रूपे विप्रतिपन्ना उभयत्र `ह एति----ईक्षामाह इति केचित्। अन्ये तु तासिमाहचर्यादिट्येव हत्वमिति! अपरे तु साहचर्यादेव सार्वधातुक एवेति हत्वमित्युभयत्र ईक्षामास इति रूपमिति स्थिताः।

इहामन्तमेतदनभिव्यक्तपदार्थकम्, नास्माद्भावकर्मकर्तृविशेषः पुरुषविशेषः संख्याविशेषो वा गम्यते, केवलं पूर्वापरीभूतानद्यतनकालं परोक्षे साधनादिविशेषाकाङ्क्षं क्रियारूपमर्थमाह। तत्रावश्यं तदाकाङ्क्षनिवृत्तये विशेषवाचिपदमनुप्रयोक्तव्यम्, तस्मादनुप्रयुज्यत इत्यंशो न विधातव्यः? इदं तर्हि प्रयोजनम्-----कृभ्वस्तीनामेव यथा स्याद्धात्वन्तरस्य मा भूत्। कस्य पुनः प्राप्नोति? सामान्यवचनस्यानुप्रयुज्येत---कारयां पपाचेति। विशेषवचनस्य वा, तत्रापि सोऽनुप्रयुज्येत----उषामुवोष, विदांविवेद, जागराञ्जजागारेति। तत्समानार्थो वा---उषान्ददाहे तीत्यादि। अर्थान्तरवचनो वा---उषाम्पपाचेति। प्रथमे पक्षे यावदपेक्षमेव नानुप्रयुक्तं स्यादधिकोऽप्यर्थो गम्येत पाकादिविशेषो नाम, द्वितीयतृतीययोस्त्वनुप्रयोगेणैव सकलार्थावगतेरासप्रयोगो व्यर्थः स्यात्, चतुर्थे त्वर्थान्तरगत एव विशेषो गम्येत, न त्वामवगतः, तद्गतविशेषाभिधानाय त्वामनुप्रयोगव्यसनम्। अत एव प्रत्याहारान्तर्भूतस्यापि सम्पद्यतेरनुप्रयोगो न भवति, अन्यथा तस्यापि स्यात्। `सनाद्यन्ता धातवः' इत्यतो धात्वधिकाराद्वा धातूपसर्गसमुदायस्य न भविष्यति। एवमपि योऽत्र धानुप्रयोक्ष्यते। एवं हि सामान्यस्य सन्निहिते एव विशेषे पर्यवसानात्तद्गतसाधनादिविशेषाभिधानमामन्तर्गतविशेषाभिधानमेव संवर्त्तते। तथा भ्वस्त्योरनुप्रयुज्यमानयोरामन्तवशेन सकर्मकत्वं भवति----`तस्यातपत्रं विभराम्बभूवे,' `अहं किल व्यपेक्षामास' इति, तदुपपद्यते, तेन द्वयोः सहप्रयोगः। यदि तु सामान्यवचन एव प्रयुज्येत; क्रियाविशेषो न गम्येत, आमन्तस्यैवानभिव्यक्तिः। तस्मात्कृञ्चेत्ययमप्यंशो न विधेयः। इदं तर्हि प्रयोजनं लिट्परस्यैव यथा स्यात्, प्रत्ययान्तरपरस्य मा भूत्। किंपरस्य पुनः प्राप्नोति? कृत्परस्य। न कृत्परस्यानुप्रयोक्ष्यमाणपुरुषविशेषाभिव्यक्तिः। लिटि तु विरुद्धकालतैव लृलुटोरपि। लिङादिष्वपि विध्याद्यर्थान्तरप्रतीतिप्रसङ्गः, लुङि भूतमात्रं गम्येत नानद्यतनविशेषः, लटि न पारोक्ष्यं गम्येत।

ननु च यथानुप्रयोगे प्रकृतिवाच्यस्य सामान्यस्यामन्तर्वाच्ये विशेषे पर्यवसानम्, एवं प्रत्ययवाच्यस्याप्यामन्तर्वाच्येऽनद्यतने परोक्षे च विशेषे पर्यवसानाद्युज्यत एव लुङोऽनुप्रयोगः, तथा `हशश्वतोर्लङ् च' इति लिडर्थ एव लङ् विधीयते, लङन्तस्यानुप्रयोगः प्राप्नोति? नैष दोषः; एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतीयस्याश्चभविष्यति। कोऽर्थः? यया प्रकृत्या प्रयोगः प्रारभ्यते तयैव समापनीयः, यथा---खादिरे बध्नाति पालाशे बध्नातीति यूपद्रव्यविकल्पे खादिरेण प्रयोगे प्रारब्धे दैवान्मानुषाद्वा कस्माच्चिदपराधात्खादिरापचारे मुख्ये पलाशे लभ्यमानेऽपि तत्परित्यागेनालभ्यमानस्यापि खादिरस्य प्रतिनिधिना बादरादिना प्रयोगः परिसमाप्यते। एवं हि प्रारब्धः प्रयोगः परिसमापितो भवति। द्रव्यान्तरोपादाने तु प्रयोगान्तरं स्याद्; द्रव्यभेदे क्रियाभेदात्। प्रतिनिधिस्तु मुख्यबुद्ध्यैवोपादीयते; तदवयवानां तत्र भूयसां सम्भवात्। तथेहाप्यामन्तेन लिट्प्रयोगः प्रारब्धोऽपरिसमाप्तः साकाङ्क्षः तस्याकाङ्क्षापूरणेन स एव प्रयोगोऽनुप्रयोगेण परिसमाप्यमानो युक्तं यल्लिट्परस्यैवानुप्रयोगेण परिसमाप्यते, तस्मान्नास्ति प्रत्ययान्तरपरस्यानुप्रयोगप्रसङ्गः। तस्माल्लिटीत्ययमप्यंशो न विधातव्यः। इदं तर्हि प्रयोजनम्--अनुप्रयोगः=पश्चात्प्रयोगो यथा स्यात्-ईक्षांचक्रे, चक्रेईक्षामिति मा भूत्। व्यवहितनिवृत्त्यर्थ च--ईक्षां देवदत्तश्चक्रे। कथं व्यवहितनिवृत्तिः? आमपेक्षया पश्चाद्भावस्य तत्रैव मुख्यत्वात्। तदेवं पूर्वनिवृत्तिर्व्यवहितनिवृत्तिश्च प्रयोजनमिति स्थितम्। इह तु तान्ह राजा मदयामेव चकारेति बह्वृचब्राह्मणे व्यवहितप्रयोगश्छान्दसः। कथं भट्टिकाव्ये `उक्षां प्रचक्रे नगरस्य मार्गान्, `बिभयां प्रचकारासौ' इति? कथं वा `तं तातयां

प्रथममास',`प्रभ्रंशयां यो नहुषं चकार' इति? वार्त्तिककारः पृच्छ्यताम्, यः पठति---`विपर्यासनिवृत्त्यर्थं वाच्यम्, व्यवहितनिवृत्त्यर्थं च' इति!।।
विदांकुर्वन्त्वित्यन्यतरस्याम्।। 3.1.41 ।।
विदांकुर्वन्त्वित्यन्यतरस्याम्।। इहोत्तरत्र चानुप्रयोगानुसारेण आमन्ते लकार उन्नेयः। विदेर्लोट्याम्प्रत्यय इति। निपात्यत इत्यनुषङ्गः, तथा गुणाभावश्चेत्यत्र। एवं लोटो लुगित्यत्र, तथा कृञश्च लोट्परस्यानुप्रयोग इत्यत्र। सर्वमेतदप्राप्तमिति निपात्यते। इतिकरणः प्रदर्शनार्थ इति। सर्वेषां लोड्वचनानामुपलक्षणार्थ इत्यर्थः। किमेवं सति सिद्धं भवतीत्याह---न केवलमिति। प्रचुरप्रयोगत्वात्तु सूत्रे बहुवचनं पठितम्। कश्चित्तु भाष्यवार्त्तिककारानुक्तत्वादुपलक्षणत्वं नेच्छति, स इतिकरणस्य प्रयोजनं ब्रवीतु।।
अभ्युत्सादयांप्रजनयांचिकयांरमयांमकः पावयांक्रियाद्विदामक्रिन्निति च्छन्दसि।। 3.1.42 ।।
अभ्युत्सादयांप्रजनयांचिकयांरमयांमकः पावयांक्रियाद्विदामक्रिन्निति च्छन्दसि।। अकरिति। कृञो सिपि च्लेः `मन्त्रे घस' इत्यादिना लुक्, सिपो हल्ङ्यादिलोपः। क्रन्निति। तत्रैव बहुवचनं झिः। क्रियादिति। तस्यैवाशिषि लिङ्, `लिङाशिषि' इत्यार्द्धधातुकत्वाद्विकरणाभावः, `रिङ्शय' इति रिङ्। द्विर्वचनं चेति। चकारात्कुत्वं न। अभ्युदसीषददिति! सदेर्ण्यन्ताल्लुङि चङ्युपधाया ह्रस्वः, `चङि' इति द्विर्वचनम्। `हलादिः सेषः',`सन्वल्लघुनि' इतीत्त्वम्, `दीर्घो लघोः'। भाषायामिति। अन्यतरस्यामित्यनुवृत्तेश्छन्दस्यपि यथादर्शनं भवत्येव। भाषायां त्वेतदेव रूपमिति अभ्युदसीषददिति भाषायामित्युक्तम्।।
च्लि लुङि।। 3.1.42 ।।
च्लि लुङि।। इकार उच्चारणाथ इति। चकारलकारसंयोगचस्यकेवलस्योच्चारयितुमशक्यत्वात्। न त्वयमनुबन्धः, प्रयोजनाभावात्। चकारः स्वरार्थ इति। एतदुत्तरसूत्रे वक्ष्यामः। अस्य सिजादीनादेशान्वक्ष्यतीति। यद्येवम्, किमर्थोऽयमु पदिश्यते, यावता श्रवणार्थो वा भवत्युपदेशः? कार्यार्थो वा? न चायं च्लिः क्वचिच्छ्रुयते, नापि क्विबादीनामिवाश्रीयमाणस्यैवास्य किञ्चित्कार्यं दृश्यते, तस्मात् सिचमेवोत्सृज्य तस्यापवादाः क्सापवादाः विधीयेरन्? नैवं शङ्क्यम्, एवं हि `मन्त्रे घस' इत्यादिसूत्रे बहूनां ग्रहणं कर्तव्यं स्याद्---गम्यर्थमङो ग्रहणम्, आकारान्तेषु धेटोन्तर्भावात्तदर्थं च चङो ग्रहणम्, तस्य हि `विभाषा धेट्श्व्योः' इति चङ्, धात्वन्तरार्थ सिचो ग्रहणम्, यदि जनेः----`दीपजन' इति विहितस्य चिणो लुक् छन्दसि दृश्यते ततस्तस्यापि; तान्येतानि त्रीणि चत्वारि वा ग्रहणानि भवन्ति। च्ल्युत्सर्गे पुनः सर्वेषां स्थानिभूतस्य तस्यैवैकस्य ग्रहणम्। ननु च क्रियमाणेऽप्युत्सर्गे तान्येव त्रीणि ग्रहणानि भवन्ति----`च्लि लुङि', `च्लेः' सिच्',`मन्त्रे घस' आदिसूत्रे च यदेतल्लेरिति। एवं तर्हि यदेतद् `गातिस्थाघुपाभूभ्यः सिचः' इति च्लेरिति वक्ष्यामि, तदेव च मन्त्रेघसादिसूत्रेऽप्यनुवर्तिष्यते, तल्लाघवं भवति। यदि लेरित्युच्यते, किं ल्यवस्थायामेव लुकं करिष्यति? उताहो आदेशेषु कृतेषु स्थानिवद्भावेन? यदि ल्यवस्थायामेव लुक्; अगुः, अस्थुः----`सिजभ्यस्तविदिभ्यश्च' इति जुस् न प्राप्नोति ? मा भूत् `सिज्' इत्येवम्, `आतः' इत्येवं भविष्यति? तत्रापि सिज्ग्रहणमनुवर्त्तते। सिज्ग्रहणं निवर्तिष्यते? यदि निवर्तते, अभूवन्नित्यत्रापि प्राप्नोति। केन? `सिजभ्यस्त' इति। नेत्याह; इदानीमेव ह्युक्तम्---ल्यवस्थायामेव लुगिति।
तदेवम् `आतः' इत्यत्र `ङितः' इत्येवानुवर्त्तते, न `सिचः' इति, लङ्यपि तथैव स्यात्। धेटश्च `विभाषा धेट्' `लङ शाकटायनस्यैव' इति नियमाद्विकल्पो भविष्यति। एवमपि मा हि स्थाताम्, `आदिः सिचोऽन्यतरस्याम्' इत्येव स्वरो न प्राप्नोति। अथादेशेषु कृतेषु ततोः `विभाषा घ्राधेट्' इत्यत्रापि तथैव स्यात्, धेटश्च `विभाषा धेट्श्व्येः' इति चङपि विकल्पितः। तत्र यथा सिचा लुगलुकौ, तथाऽधात् अधाताम् अधुः, अधासीत् अधसिष्टां आधासिषुरिति सिद्धमिष्टम्; चङोऽपि लुगभावपक्षे अदधत्, अदधताम्, अदधन् इति सिद्धम्, लुक्पक्षे तु प्रत्ययलक्षणेन द्विर्वचनेऽदधादित्यपि चतुर्थं रूपं प्राप्नोति? न चङो लुकि द्विर्वचनम्; `न लुमताङ्गस्य' इति प्रतिषेधात्। बहुवचने तर्हि चङो लुकि अधानित्यनिष्टं रूपं प्राप्नोति, त्रैशब्द्यमेव चेष्यते----अधुः, अधासिषुः, अदधन्निति? ननु च चङोऽपि लुकि आत इति जुस् भविष्यति, यथा सिचः? नैतदस्ति; सिज्ग्रहणं तत्रानुवर्त्तते। निवर्तिष्यते सिज्ग्रहणम्? यदि निवर्तते, `आतः' इत्येतद्धेटश्चङो लुकि विध्यर्थत्वसम्भवान्नियमार्थं न स्यात्, ततश्चाभूवन्नित्यत्र प्रत्ययलक्षणेन सिच इति जुस् प्राप्नोति, इदानीमेव ह्यक्तं कृतेष्वादेशेषु लुगिति? एवं तर्हि यदेतत्स्तिजभ्यस्तेति, एनत् `च्ल्यभ्यस्त' इति वक्ष्यामि। किं कृतं भवति? लुङ्लुक्यपि च्ल्यभ्यस्तेति जुस् सिद्धो भवति, `आतः' इत्यत्रापि सिज्ग्रहणानुवृत्तेर्नियमादभूवन्नित्यत्र जुसभावश्च सिद्धो भवति। कृतेष्वादेशेषु लुगिति सिज्लक्षणः स्वरः सिद्धो भवति। यदि च्ल्यभ्यस्तेत्युच्यते, च्ल्यङ्चङ्क्षु दोषः----अधुक्षन्, अवोचन, अपीपचन्नत्रापि जुस् प्राप्नोति। तस्मात्सिजभ्यस्तेत्येव वक्तव्यम्। `आतः' इत्यत्रापि सिज्ग्रहणमेवानुवर्त्तनीयम्----नियमो यथा स्याद्विदिर्मा भूदिति। ततश्च तदेव स्थितम्----बहुवचनेऽधानिति प्राप्नोति। यदा च धेटश्चङो लुक् क्रियते तदा न केवलं बहुवचने, सर्वेष्वेव वचनेषु सिज्लक्षणस्वराभावात्स्वरे चातुः शब्द्यप्रसङ्गः। तस्माद् `गातिस्थाघुपा' इत्यत्र सिच इत्येव वक्तव्यम्, ततश्च तदेव स्थितम्----तान्येव त्रीणि ग्रहणानिति। प्रत्युताक्रियमाणे उत्सर्गे मन्त्रेघसादिसूत्रे द्वयोरेव ग्रहणम्, कथम्? धेटो जनेश्च चङ्चिणौ विकल्पितौ, तत्र यानि लुक उदाहरणानि, सिच एव तानि भविष्यन्ति । को न्वत्र विशेषः? अयमस्ति विशेषः---सिचो लुकि `आदिः सिचोन्यतरस्याम्' इत्यनेन स्वरेण भवितव्यम्, चङ्चिणोस्तु नेति। तस्माद् द्वयोरपि पक्षयोस्त्रीमि ग्रहणानि, नार्थश्चोत्सर्गेण? तदुच्यते---असति ह्युत्सर्गे `मन्त्रेघस' इत्यत्र येभ्यः सिचो लुक् क्रियते तेषाम् `आदिः सिचोऽन्यतरस्याम्' इत्येष स्वरः प्राप्नोति। सति त्वस्मिंल्लेरिति तदवस्थायामेव लुग्विधानात् सिजभावात् यथायथं स्वरः सिद्धो भवति। तथाऽऽकारान्ते सिचो लुकि क्रियमाणे `सिजभ्यस्त' `आतः' इति जुस् प्राप्नोति, लेस्तु लुक्यन्तर्भाव एव भवति। तस्मादुत्सर्गः कर्त्तव्यः। तथा `शल इगुपधादनिटः क्सः' इत्यत्रानिट इति लेर्विशेषणं यथा स्याद्। असति पुनश्च्ल्युत्सर्गे तस्यैव तद्विशेषणं भवति धातोः न विद्यते यस्मात्परस्येडिति, तत्र च लुङादेशानां सार्वधातुकत्वात्सम्प्रतिपन्नमनिट्त्वमव्यभिचारादविशेषणमिति प्रत्ययान्तरगतं तदाश्रयणीयम्----न विद्यते प्रत्ययान्तरस्य यस्मात्परस्येडिति। ततो गुहेर्न

स्यात्---अघुक्षदिति, विद्यते ह्यस्मात्परस्य गूहितेत्यादाविट् स्वरत्यादिसूत्रेण विकल्पितम्। अथापि पाक्षिकेणेडभावेनानिडिति व्यपदिश्येत? नित्यं क्सः प्राप्नोति, ह्युत्सर्गे पुनरनिड् इति तस्यैव विशेषणं भवति। स च कदाचिदनिट् कदाचित्सेट्। यदानिट् तदा क्सः, यदा सेट् तदा सिजिति सिद्धमिष्टम्---अघुक्षत्, अगुहीदिति। तस्माच्च्ल्युत्सर्गः कर्तव्य इति। स्थानित्वेन विधानं कर्त्तव्यमित्यर्थः।।

च्लेः सिच्।। 3.1.44 ।।

च्लेः सिच्।। इकार उच्चारणार्थ इति। न त्वनुबन्धः। यद्येवम्, असंस्तेत्यत्र सिजन्तस्याङ्गस्यात्मनेपदं ङितमपेक्ष्य `अनिदिताम्' इति नलोपः प्रपानोति? ज्ञापकात्सिद्धम्, यदयम्, `हनः सिच्' इति हन्तेः परस्य सिचः कित्त्वं शास्ति, तज् ज्ञापयति---न सिजन्तस्योपधालोपो भवतीति। यथा चैतज्ज्ञापकं तथा तत्रैवोक्तमिति तत्रैवावधार्यम्। चकारः स्वरार्थः इति। अन्तोदात्तार्थः। ननु सिचोऽनच्कत्वात् कथं चकाराः स्वरार्थः, इति कृते साच्को भवति? एवमपि प्रत्ययस्वरेण सिद्धम्। न सिद्ध्यति, नाप्राप्ते स्वरान्तरे विधीयमानमागमानुदात्तत्वं प्रत्ययस्वरं बाधेन? एवं तर्हि च्लेश्चित्त्वात्स्थानिवद्भावाच्चित्स्वरो भविष्यति, तत्राह---आगमानुदात्तत्वं हीति। चित्स्वरमपि बाधेतेति। स्थानिवद्भावकृतम्। ननु च यदि मा हि लावीदित्यत्रागमानुदात्तत्वं स्यात्, च्लेश्चित्करणमनर्थकं स्यात्? एवं मन्यते---च्लेश्चकारो मन्त्रेघसादिसूत्रे सामान्यग्रहणे चरितार्थः; अन्यथा निरनुबन्धकत्वादस्यैव ग्रहणं स्यात्, न लिटः, ततश्च `आमः' इत्यत्र निरनुबन्धकस्य लेरसम्भवाल्लेरिति नानुवर्तेत, ततश्च परत्वादन्तरङ्गत्वाच्च तिबादिषु कृतेषु पश्चाल्लुकि कारयामित्यस्य प्रत्ययलक्षणेन तिङन्तत्वाद् देवदत्तः कारयाञ्चकारेति तस्य च निघातः, तस्माच्चानिघातः स्यात्। तस्मादाम इत्यत्र लेरित्यनुवर्त्तनीयम्। तस्य च तत्रानुवृत्तिः पूर्वत्रसामान्यग्रहणे सत्युपपद्यते। तस्माच्च्लेश्चकारस्य चरितार्थत्वात्स्थानिवद्भावात्प्राप्तं चित्स्वरमपि बाधेतेति सम्भावने लिङ्, सम्भाव्येत बाधनमित्यर्थः। अनुबन्धान्तरेणापि सामान्यग्रहणसिद्धे चकारानुरोधेन चित्स्वर एव भविष्यतीति शक्यते वक्तुमिति भावः।

स्पृशभृशेति। `स्पृश स्पर्शने',`मृश आमर्शने' `कृष विलेखने'---- इत्येतेभ्यः क्से आप्ते,`तृप प्रीणने' `दृप हर्षविमोचनयोः' ----आभ्यां पुषादित्वादङि प्रप्ते सिजपि पक्षेऽभ्यनुज्ञायते। अस्पृक्षदिति। व्रश्चादिषत्वे `षढोः कः सि' कत्वम्। कअस्प्राक्षीदिति। `अनुदात्तस्य चर्दुपधस्य च' इति पक्षे अमागमः, ऋकारस्य यण, `वदव्रज' इत्यादिनाकारस्य वृद्धिः, अमभावपक्षे ऋकारस्यैव वृद्धिः। एवमुत्तरत्रापि।।

शल इगुपधादनिटः क्सः।। 3.1.45 ।।

शल ङगुपधादनिटः क्सः।। शलन्तो यो धातुरिगुपध इति ननु च्लेर्गुणनिमित्तत्वादकृत एव क्से लावस्थायामेव गुणः प्रप्नोति, ततश्चेगुपधादिति विशेषणं न प्रकल्प्यते? नैष दोषः; विशेषणसामर्थ्यात्प्रागेव गुणात् क्सो भविष्यति। ननु च कृतेऽपि गुणे भूतपूर्वगत्या विहितविशेषणाश्रयणेन वा क्सो भविष्यति, कित्करणमिदानीं किमर्थं स्यात्? `क्सस्याचि' इति विशेषणार्थम्। `सस्याचि' इत्युच्यमाने पुनर्वदिहनिकमिकषिभ्यः से वत्सौ वत्साः---अत्रापि प्राप्नोति? `उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' इत्यनर्थकत्वान्न भविष्यति। एवमपि वुञ्छणादिषु तृणादिभ्यः से प्रसङ्गः---तृणान्यस्मिन्देशे सन्ति तृणसौ तृणसा इति? नैतदेवम्; `घोर्लोपो लेटि वा' इति प्रकरणे---धातुप्रत्ययानां ग्रहणम्, किं च `लुग्वादुहदिह' इत्यत्राचि' इत्यतः क्सस्येति वर्त्तते, तेच दुहादिषु यस्य सम्भवः, पूर्वसूत्रेऽपि तस्यैव ग्रहणं भविष्यति। तदेवं कित्करणसामर्थ्याद् गुणो न भवतीति स्थितम्। च्लेरनिट इति। यद्यपि च्लेः सिजादिभिरादेशैर्भवितव्यमिति क्वचिदप्यश्रवणान्न सेट्त्वमनिट्त्वं वा, तथापि दुह् ल इति स्थिते क्सस्यायं विषय इति सिचा न भाव्यम्। क्सोऽपि तावन्न भवति, यावदस्यानिट्त्वं न ज्ञातम्, तत्र लकारस्यैवेटः प्राप्तौ तन्निषेधात्सेट्त्वमनिट्त्वं च निरूप्यते इति विशेषणोपपत्तिः। अघुक्षदित्यादि। `दादेर्द्धातोर्घः', `एकाचो वशो भष्'। अलिक्षदिति। `लिह आस्वादने' `हो ढः'। `भिदिर् विदारणे' `छिदिर् द्वैधीकरणे',`कुष निष्कर्षे',`मुष स्तेये'।।

श्लिष आलिङ्गने।। 3.1.46 ।।

श्लिष आलिङ्गने।। श्लिपेर्धातोरिति। `श्लिष आलिङ्गने' इत्यस्य, न तु `श्रिषु श्लिषु प्रुषु प्लुषु दाहे' इत्यस्य; आलिङ्गने वृत्त्यभावाद्, अनिट इति चाधिकारात्सानुबन्धकत्वाच्च। अत्र नियमार्थमेतदिति। ननु श्लिषिरयं पुषादिः, तथा च प्रत्युदाहरणे अङ् भवति, ततश्च पुषादिपाठात्प्रप्तमङं बाधित्वाऽऽलिङ्गने क्सो यथा स्यादित्येवं विधिसम्भवान्नियमो नोपपद्यते। अस्तु विधिः, एवमप्यालिङ्गने क्सः, अन्यत्राङिति सिद्धमिष्टम्? सत्यम्; सिद्धं परस्मैपदे, आत्मनेपदे त्वङभावादालिङ्गनेऽनालिङ्गने च पूर्वेण क्सः प्राप्नोति, इष्यते च तत्राप्यालिङ्गने क्सोऽन्यत्र सिच्, तच्च नियमे सत्युपपद्यते। स च नियमो नोपपद्यते; विधेयभावात्? योग विभागात्सिद्धम्---`श्लिषः इत्यको योगः श्लिषश्च क्सो भवति। किमर्थमिदम्? पुषाद्यङो बाधनार्थम्। यथैब तर्ह्यङं बाधते तथा चिणमपि बाधेत---समाश्लेषि कन्या देवदत्तेनेति? `पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान्' इति तत्रालिङ्गनेऽनालिङ्गने च श्लिषः क्सो भवति। इदमिदानीं किमर्थम्? नियमार्थम्---आलिङ्गन एव, नान्यत्र। योगविभागसामर्थ्याद्या च यावती च क्सस्य प्राप्तिः सा सर्वा नियम्यते, न त्वनन्तरस्य विधिर्वा भवतीति। श्लिष इति या प्राप्तिः, ङबाधनार्था सैव। एवमपि नियमो नोपपद्यते, कथम्? श्लिष इत्येतदङ्बाधनार्थम्। न च तदत्यन्तायाङं बाधितुं प्रभवति; पुषादिपाठसामर्थ्यात्, ततश्चाङ्क्सयोः सर्वत्र विकल्पे प्राप्ते, द्वितीयो योगः-----आलिङ्गने क्स एव नित्यं यथा स्यान्मा कदाचिदङ् भूदित्येवमर्थः स्यात्, किं तर्ह्युच्यते---नियमो नोपपद्यते इति! ननु तत्रभवतापि मुखान्तरेण नियम एवोक्तः? एतावांस्तु विशेषः-----मया प्रत्ययनियम उक्तः---आलिङ्गन एव क्स इति, त्वया पुनरर्थनियमः---आलिङ्गने क्स एवेति, सर्वथा नियमान्न मुच्यामहे। तत्र लक्ष्यानुरोधाद्विधेयविभक्तिनिर्द्देशेन प्रधानत्वाद्वा प्रत्ययनियम एव भविष्यति।।

न दृशः।। 3.1.47 ।।

न दृशः।। पूर्वेणेति। `शल इगुपधात्' इत्यनेन। अङ्सिचौ भवत इति। परस्मैपदेष्वन्यत्र सिजेव। अदर्शदिति। `ऋदृशोऽङि गुणः'। अद्राक्षीदिति।

`सृजिदृशोर्झल्यमकिति'। अथ `च्लेः सिच्' इत्यस्यानन्तरं क्सस्य बाधनार्थ सिजेव कस्मान्न विहितः, इरित्त्वसामर्थ्यादङपि भविष्यति? सत्यम्; तत्रापि `दृशश्च' इति चकारः कर्त्तव्य इति लाघवे नास्ति विशेषः।।

णिश्रिद्रुस्रुभ्यः कर्तरि चङ्।। 3.1.48 ।।

णिश्रिद्रुस्रुभ्यः कर्तरि चङ्।। चकारो विशेषणार्थ इति। `चङि' इत्यत्र `अङि' इत्युच्यमाने `अस्यतिवक्तिख्यातिभ्योऽङ्' `षिद्भिदादिभ्योऽङ्' अत्रापि प्राप्नोति। यदि पुनरयं ङो विधीयते चकारः शक्योऽकर्तुम्। चिन्त्यं प्रयोजनमस्य। अशिश्रियदित्यादि। अत्र चङि धातुरङ्गं चङन्तं तु तिपि तत्र चङाश्रयस्य गुणस्य चङमेव ङितमपेक्ष्य प्रतिषेधः, किं कारणम्, क्ङितीति निमित्तसप्तमी? नैष दोषः; अन्तरङ्गवियङुवङौ अन्तर्भूतचङपेक्षत्वात्, बहिरङ्गो गुणो बहिर्भूततिबपेक्षत्वात्। अकारयिषातामिति। ण्यन्तात्कर्मणि लुङ्, द्विवचनम्, आताम्। कमेरुपसङ्ख्यानमिति। ननु कमेर्णिङ् विहितः, न च प्रकृत्यन्तरं कमिः सम्भवति, णिङन्तात्तु सूत्रेणैव सिद्धं तत्राह---आयादय आर्द्धधातुके वेति यदा णिङ् नास्तीति। णिङ्पक्षे सन्वद्भाव इति। सन्वत्सूत्रे चङ्परो णिरित्याश्रयणात्। तत्र हि `सन्वल्लघुनि चङि' इति वक्तव्ये परग्रहणं बहुब्रीह्यर्थम्, तत्र णिरन्यपदार्थः, अन्यस्यासम्भवात्।।

विभाषा धेट्श्व्योः।। 3.1.49 ।।

विभाषा धेट्श्व्योः।। अङोऽप्यत्र विकल्प इति। `जृस्तम्भु' इत्यादिना। अश्वदिति। `श्वयतेरः'। अश्वयीदिति। `ह्म्यन्त'इत्यादिना सिचि वृद्धेः प्रतिषेधाद् गुणः। अधिषातामिति। कर्मणि द्विवचनम्, आताम्। `स्थाघ्वोरिच्च' इति कित्त्वेत्त्वे।।

गुपेश्छन्दसि।। 3.1.50।।

गुपेश्छन्दसि।। यस्मादायप्रत्ययो नास्ति तत्रायं विधिरिति। सूत्रे केवलस्योच्चारणाद् `गुप गोपने' `गुप व्याकुलत्वे' इत्यनयोस्तु ग्रहणं न भवति; छन्दसि दृष्टानुविधानात्। दर्शने तु तयोरपि ग्रहणम्। अजूगुपतमिति। `गुपू रक्षणे' `तस्थस्थमिपाम्' इति थसस्तम्, `तुजादीनां दीर्घोऽभ्यासस्य'। अगौप्तमिति। ऊदित्त्वादिङभावपक्षे `झलो झलि' इति सिचो लोपः। अगोपायिष्टमिति। आयप्रत्ययान्तात्सिच्।।

नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः।। 3.1.51 ।।

नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः।। अर्द गतौ याचने चेति। `अर्द हिंसायाम्' इत्यस्यापि ग्रहणम्, यदिच्छन्दसि दर्शनमस्ति। एतेभ्य इति। तत्रोनयतिश्चुरादिः,ध्वनिरपि `गर्व माने इति प्रागेतस्माददन्ताः' इत्यधिकारे चुरादिः पठितः, घटादौ चापि पठ्यते। एलयतिश्चुरादिः, अर्दयतिर्हेतुमण्ण्यन्तः। पूर्वेणेति। `णिश्रि'इत्यादिना। ऊनयीरिति। मध्यमपुरुषैकवचनम्, पूर्ववद्वृद्धौ प्रतिषिद्धायां गुणः, `न माङ्योगे' इत्याडागमप्रतिषेधः। मा त्वायतो जरितुः काममूनयीः---इदं प्रतिसव्यस्य ऋषेर्वचनम्। त्वायतः==त्वामिच्छतः, जरितुः==स्तोतुर्मम, कामम्=अभिलाषं मा ऊनयीः=ऊनं मा कार्षीरित्यर्थः। प्रायेण तु तिबन्तं पठ्यते, कृताडागमं च, तदन्यत्र द्रष्टव्यम्। औनिन इति। सिपि चङि `अजादेर्द्वितीयस्य' इति नशब्दस्य द्विर्वचनम्। प्रायेण तूदाहरणवदिदमपि तिबन्तं पठ्यते। ध्वनयीदिति। तिप्, `न माङ्योगे' इत्यडागमप्रतिषेधः। आर्द्दिददिति। `अजादेर्द्वितीयस्य' `न न्द्राः संयोगादयः' इति दशब्दस्य द्विर्वचनम्।।

अस्यतिवक्तिख्यातिभ्योऽङ्।। 3.1.52 ।।

अस्यतिवक्तिख्यातिभ्योऽङ्।। ब्रूआदेशो वेति। वाशब्दः समुच्चये। एवमुत्तरत्रापि। पुषादित्वादेव सिद्ध इति। परस्मैपदेषु। पर्यास्थतेति। `उपसर्गादस्यत्यूह्योर्वावचनम्' इत्यात्मनेपदेऽङि `अस्यतेस्थुक्'। अवोचदिति। `वच उम्'। आख्यदिति। `आतो लोप इटि च'।।

लिपिसिचिह्वश्च।। 3.1.53 ।।

लिपिसिचिह्वश्च।। लिपिसिचिसहितो ह्वा---इति `मयूरव्यंसकादयः' इति समासः। समाहारद्वन्द्वे तु नपुंसकह्रस्वत्वं स्यात्, इतरेतरयोगे बहुवचनम्। ङसौ `आतो धातोः' इत्याकारलोपः। योगविभाग उत्तरार्थ इति। `अस्यतिवक्तिख्यातिलिपिसिचिह्वः' इत्येकयोगे त्वस्यादीनामप्युत्तरत्रानुवृत्तिः स्यात्, ततश्च तेभ्योऽप्यात्मनेपदे विकल्पः स्यात्।।

आत्मनेपदेष्वन्यतरस्याम्।। 3.1.54 ।।

आत्मनेपदेष्वन्यतरस्याम्।। अलिप्त, असिक्तेति। `झलो झलि' इति सलोपः, `लिङसिचावात्मनेपदेषु' इति कित्त्वाद् गुणाभावः।।

पुषादिद्युताद्य्लृदितः परस्मैपदेषु।। 3.1.55 ।।

पुषादिद्युताद्य्लृदितः परस्मैपदेषु।। एकेनैवादिशब्देन प्रत्येकं सम्बन्धादेव सिद्धे द्वयोरुपादानं चिन्त्यप्रयोजनम्। दिवाद्यन्तर्गण इति। `पुष पुष्टौ' `शुष शोषणे' इत्येवमादिरा गणसमाप्तेः। यत्तु मध्ये `ष्णिह प्रीतौ वृत्' इति वृत्करणं तद्रधादिपरिसमाप्त्यर्थम्। एतच्च `अस्यतिग्रहणमात्मनेपदार्थ पुषादित्वात्' इति वार्त्तिकारवचनाद्विज्ञायते। न भूवादिरिति। `पुष पुष्टौ',`श्रिषु श्लिषु प्रुषु प्लुषु दाहे' इत्येवमादिः, अस्य यदि ग्रहणं स्यात्पुषाद्यनन्तरं पाठाद् द्युतादीनां पृथग्ग्रहणं न कुर्यात्। क्र्याद्यन्तर्गणो वेति। `पुष पुष्टौ' `मुष स्तेये' इत्येवमादिः। तत्र हि चत्वार एव पठ्यन्ते, तत्र यदि ते जिघृक्षिताः स्युर्लृदित एव तान् कुर्यात्; स्वरितेत्त्वादेरपि नेनैव सिद्धत्वात्। अथ पुषादयो द्युतादयश्च लृदित एव कस्मान्न पठिताः? अशक्यस्ते तथा पठितुम्; आदितामौदितामुदितामूदितां च तत्र भावात्। तद्यथा---पुषादिषु तावत् `ञिष्विदा गात्रप्रक्षरणे',`मदी हर्षे',`समु उपशमने',`षिधू राद्धौ' इति; द्युतादिष्वपि `श्विता वर्णे',`ञिमिदा स्नेहने' `ञिक्ष्विदा स्नेहविमोचनयोः',`स्रंसु ध्वंसु भ्रंसु अवस्रंसने' `स्यन्दू प्रस्रवणे' `कृपू सामर्थ्ये' इति। अद्युत्, अश्वितदिति। `द्युद्भ्यो लुङि' इति पक्षे परस्मैपदम्। अलोटिष्टेति। `लुट लुठ प्रतिघाते'।।

सर्त्तिशास्त्यर्त्तिभ्यश्च।। 3.1.56 ।।

सर्त्तिशास्त्यर्त्तिभ्यश्च।। शासेरदादित्वाच्छपो लुक्, इतरत्र निपातनात्। शासु अनुशिष्टाविति। सर्त्त्यर्त्तिभ्यां परस्मैपदिभ्यां साहचर्यादस्यैव ग्रहणम्, न तु `आङः शामु इच्छायाम्' इत्यात्मनेपदिन इति दर्शयति। ऋ गताविति। `ऋ गतिप्राणयोः' इति भौवादिकः, `ऋ सृ गतौ' इति जौहोत्यादिकः। दुयोरप्यत्र निर्द्देश इति केचित्, वयं तु जौहात्यादिकयोरेवार्त्तिसर्त्त्योर्ग्रहणं मन्यामहे। असरदिति। `ऋद्दशोऽङि गुणः'। अशिषदिति। `शास इदङ्हलोः'। `शासिवसिघसीनाञ्च' इति षत्वम्।
पृथग्योगकरणमात्मनेपदार्थमिति। अन्यथा पुषादिद्युताद्य्लृदित्सर्त्तिशास्त्यर्त्तिभ्यः' इत्येकमेव योगं कुर्यात्। एवं हि पृथग्विभक्तिनिर्द्देशश्चकरश्च न कर्त्तव्यो भवति। समरन्तेति। `समो गम्यृच्छि' इत्यात्मनेपदम्, `बहुलं छन्दस्यमाङ्योगेऽपि' इत्याड्भावः, छान्दसत्वादस्य प्रयोगस्य----समन्यवो यत्समरन्त सेनाः, सङ्कल्पा अस्य समरन्त। तथा भट्टिकाव्ये `समारन्त ममाभीष्टाः सङ्कल्पास्त्वय्युपागते' इति। कश्चिदाह---भाष्यविरुद्धमिदम्, भाष्यकारेण हि `समो गम्युच्छि' इत्यत्र मासमृषातां मासमृपतेति आत्मनेपदे सिजुदाहृत इति। अत्राहुः--शासिसाहचर्यादर्त्तिसर्त्त्योरविद्यमानशपोजौहोत्यादिकयोरिह ग्रहणम्; `समो गम्यृच्छि' इत्यत्र तु भौवादिकस्याप्यर्त्तेर्ग्रहणम्, तत्र भौवादिकेऽर्त्तौ सिच उदाहरणमविरुद्धमिति।।
इरितो वा।। 3.1.57 ।।
इरितो वा।। अभित्तेति। स्वरित्त्वादात्मनेपदम्।।
जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च।। 3.1.58 ।।
जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च।। अस्तम्भदिति। `अनिदिताम्' इत्युपधालोपः। अन्यतरोपादानेऽपि रूपत्रयं सिद्ध्यतीति। कथम्? यदि तावद् ग्लुचिरुपादीयते तस्मादङ्सिचोः----ग्लुचत्, अग्लोचीदित्येतद् द्वयं सिद्ध्यति, ग्लुञ्चेस्तु सिचि तृतीयमग्लुञ्चीदिति। अथ ग्लुञ्चिरुपादीयते तस्याग्लुचत् अग्लुञ्चोदिति रूपद्वयं सिद्ध्यति, ग्लुचेस्तु सिचि तृतीयमग्लोचीदिति, किमर्थ तर्हि उभयोरुपादानमित्यत्राह---अर्थभेदात्त्विति। केचिदित्यादि। इदं भाष्यविरुद्धम्; भाष्यकारो हि `अनेकार्थत्वाद्धातूनामर्थभेदो न प्रयोजक उभयोपादानस्य' इत्यन्यतरोपादानं प्रत्याख्यातवान्।।
कृमृदृरुहिभ्यश्छन्दसि।। 3.1.59 ।।
कृमृदृरुहिभ्यश्छन्दसि।। अमरदिति। व्यत्ययेन परस्मैपदम्।।
चिण् ते पदः।। 3.1.60 ।।
चिण् ते पदः।। सामर्थ्यादिति। धातोरात्मनेपदित्वात्परस्मैपदबहुवचनस्य स्थाने यस्तशब्दः `तस्थस्थमिपाम्' इति विहितः, तस्यास्मिन्विषयेऽसम्भवः। सामर्थ्यादुदपादीति। `चिणो लुक्'। उदपत्सतेति। `आत्मनेपदेष्वनतः' इत्यदादेशः। इह वेति निवृत्तम्; उत्तरत्रान्यतरस्यां ग्रहणात्।।
दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्।। 3.1.61 ।।
दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्।। जनी प्रादुर्भावे, बुध अवगमने इति । `जन जनने' बुध बोधने' सइत्येतयोस्तु परस्मैपदिनोरिह ग्रहणं न भवति; दीप्यादिभिरात्मनेपदिभिः साहचर्यात्। तेन परस्मैपदिभ्यां कर्मव्यतीहारे आत्मनेपदैकवचनेऽपि तशब्दे चिण् न भवति। यदि परस्मैपदिनोरिह ग्रहणं स्यात्, आत्मनेपदिनोर्न स्यात्; सानुबन्धकत्वात्। कर्तरि चायं विकल्पः, भावकर्मणोस्तु `चिण् भावकर्मणोः' इति नित्यमेव चिण् भवति, परत्वादिह कर्तरीत्यनुवृत्तेर्वा।।
अचः कर्मकर्त्तरि।। 3.1.62 ।।
अचः कर्मकर्त्तरि।। कर्मकर्त्तरीरि। यत्कर्म भूत्वा कर्त्ता भवति तत्रैत्यर्थः। प्राप्तविभाषेयमिति। `कर्मवत्कर्मणा' इत्यतिदेशेन नित्यं चिणः प्राप्तेः। अकारि कटो देवदत्तेनेति। अत्र शुद्धे कर्मणि `चिण् भावकर्मणोः' इति नित्यमेव चिण् भवति। नन्विह कर्त्तरोत्यनुवर्त्तिष्यते, यद्येवम्, शुद्धे कर्त्तरि स्यात्, कर्मणीति वाक्यभेदेन कर्ता विशेषयिष्यते----कर्मणि कर्तरीति ? नैतदेवं शक्यते लब्धुम्; कर्मणीत्युच्यमाने कर्तुर्निवृत्तिरेव स्यात्, चकारेऽपि क्रियमाणे कर्मणि च भवति कर्तरि च भवतीत्यधिकरणयोरेव समुच्चयः स्याद्, न सामानाधिकरण्ये प्रमाणमस्ति।।
दुहश्च।। 3.1.63 ।।
दुहश्च।। अप्राप्तविभाषेयम् `न दुहस्नुनमां यक्चिणौ' इति चिणः प्रतिषेधात्। तत्र दुहिग्रहणे यक्प्रतिषेधार्थ चिण्ग्रहणं स्न्वाद्यर्थम्। अदुग्धेति। `क्सस्याचि'`लुग्वा दुहदिह' इति क्सस्य लुक्।।
न रुधः।। 3.1.64 ।।
न रुधः।। रुधिर आवरणे इति। `अनो रुध कामे' इत्यस्य तु ग्रहणं न भवति, कर्तृस्थभावकत्वेन कर्मकर्तुरभावात्।।
तपोऽनुतापे च।। 3.1.65 ।।
तपोऽनुतापे च।। कर्मकर्तरीति। `तपस्तपः कर्मकस्यैव' इति यत्र कर्मवद्भावोविहितः। तत्र भावकर्मणोरपीति। अपिशब्दात् `कर्मवत्कर्मणा' इति यत्र कर्मवद्भावोऽतिदिष्टस्तत्रापि भवति। अतप्त तपस्तापस इति। अस्यार्थम् `तपस्तपः कर्मकस्यैव' इत्यत्र वृत्तिकार एव वक्ष्यति। अन्ववातप्त पापेनेति। पापेनेति पूर्व यत्पापं कर्म कृतं तेन पश्चात्तप्तोऽभ्याहत इत्यर्थः। शुद्धे कर्मणि लकारः, पापेनेति कर्त्तरि तृतीया। कर्माविवक्षायान्तु शोकार्थे वा तपौ बावे लकारः, पापेनेति हेतौ तृतीया। यदाभ्याहननार्थस्य कर्मकर्त्ता विवक्ष्यते, तदा कर्मवत्कर्मणेत्यतिदेशादात्मनेपदम्, तदापि हेतौ तृतीया।।
चिण् भावकर्मणोः।। 3.1.66 ।।

चिण् भावकर्मणोः।। चिण्ग्रहणं विस्पष्टार्थमिति। `चिण् ते पदः' इत्यतस्तेशब्दवदनुवृत्तेः। यत्तु दीपजनेत्यादावन्यतरस्यांग्रहणम्, तन्न; `रुध' इति तत्प्रतिषेधविधावेव निवृत्तम्, अन्यथा प्रतिषेधविधानमनर्थकं स्यात्। न च प्रतिषेधस्यानुवृत्तिशङ्का, प्राप्तिपूर्वको हि प्रतिषेधः। न च भावकर्मणोः केनचिच्चिणः प्राप्तिरस्ति।।

सार्वधातुके यक्।। 3.1.67 ।।

सार्वदातुके यक्।। इहाशिषि लिङि लिटि चान्तरेणापि विकरणं सर्वेष्वेव धातुषु तिङामेव सद्भावे भावकर्मकर्त्तारस्त्रयोऽपि प्रतीयन्ते-----भविषीष्ट त्वया, कृषीष्ट घटः, भूयात्, क्रियात्, बभूवे, चक्रे घटः, बभूव, चकारेति। अत्तिजुहोल्यादौ कर्त्ता।

क्वचित्तिङामभावेऽपि प्रतीयन्ते त्रयोऽप्यमी।

अशाय्यकारि गच्छेति चिणः सन्निधिमात्रतः।।

अधोगबिभरित्यादौ धातुमात्रेऽपि कर्तृधीः।

तथा व्यतिस इत्यादौ धात्वभावेऽपि कर्तृधीः।।

एवं स्थिते भूयोविषयाभ्यामन्तवयव्यतिरेकाभ्यां शब्दार्थावसायः। व्यभिचारभूमिषु तु तस्मिंस्तस्मिन्विषये तस्य तस्य शब्दस्य स स महिमेति कल्पयितुमुचितम्। न पुनः क्वचिद्व्यभिचारदर्शनेन सर्वत्रानाश्वासः। तादृशौ चान्वयव्यतिरेकौ तिङामेवेति तेषामेव भावकर्मकर्त्तारो वाच्याः। सूत्रकारोऽप्याह---`लः कर्मणि च भावे चाकर्मकेभ्यः' इति, लादेशाश्च तिङः, ततोऽपि तेषामेव तेऽर्था इति मन्यमान आह----भावकर्मवाचिगि सार्वधातुके परत इति। उत्तरसूत्रे च कर्तृवाचिनि सार्वधातुके परत इति शय्यत इति। `अयङ् चि क्ङिति'। अथ यदा द्वौ कर्त्तारौ बहवो वा, तदा कथमास्यते भवद्भ्याम्, आस्यते भवद्भिः----द्विवचनबहुवचने कस्मान्न भवतः? भावे भेदाभावाद्। धत्वर्थो हि भावः।

कर्तृभेदेऽपि नावश्यं धात्वर्थो भिद्यते यतः।

एकामेव क्रियाव्यक्ति बहुषूत्पादयत्स्वपि।।

दृष्टमेते पचन्तीति कर्मभेदोऽपि तादृशः।

पश्यैकस्यां क्रियाव्यक्तौ पच्यन्ते तण्डुला इति।।

न कालभेदे शब्दैक्यमास्यासिष्यत आस्यते।

पाकौ पाका इति त्वत्र शब्दैक्यादेकशेषता।।

अतश्च---

निवृत्तभेदा सर्वैव क्रियाऽऽख्यातेभिधीयते।

श्रुतेरशक्या भेदानां प्रविभागप्रकल्पना।। इति।

तदेवमाख्यातेन भावस्वरूपगतो भेदः प्रतीयत इति द्विवचनबहुवचनाभावः। यत्र तु स्वरूपगत एव भेदस्तत्र भवत्येव, यथा----उष्ट्रासिका आस्यन्ते, हतशायिकाः शय्यन्ते इति। उष्ट्राणां ह्यासिकाः स्वत एव विलक्षणाः, हताश्च नानाप्रकारं शेरते उत्ताना अवाताना विकीर्णकशा विस्रस्तवस्त्रा इति तत्साम्यादाख्यातवाच्यस्यापि भावस्य स्वरूपगतभेदावभासाद् बहुवचनम्। इवशब्दप्रयोगमन्तरेणापि चेवार्थावगतिर्भवति, तदयमर्थः----यादृशानि हतानामनेकप्रकाराणि शयनानि तादृशानि देवदत्तादिभिः क्रियन्त इति। केचित्त्वत्र कर्मणि लकारमिच्छन्ति, उष्ट्रासिकाहतशायिकालक्षणस्य भावस्यः `कालाभावाध्वगन्तव्याः' इति कर्मत्वात्, यथा----गोदोहः सुप्यते इति।

ककारो गुणवृद्धिप्रतिषेधार्थ इति। मृज्यत इत्यत्र वृद्धिप्रतिषेधः। यग्विधान इति। ननु च `कर्मवत्कर्मणा तुल्यक्रियः' इत्यतिदेशादेव यक् सिद्धः, किमुपसङ्ख्यानेन तत्राह---विप्रतिषेधाद्धीति। यदा `कर्मवत्कर्मणा' इत्ययं शास्त्रातिदेशः, तदा तेनतेन शास्त्रेण कर्मकार्याणि भवन्ति। तत्र कर्मणि यग्भवतीत्यस्यावकाशः----शुद्धं कर्म, पच्यते ओदन इति; कर्त्तरि शबित्यस्यावकाशः----शुद्धः कर्त्ता, भवति पचतीति; कर्मकर्त्तर्युभयप्रसङ्गे परत्वाच्छबेव स्यादित्यर्थः। तर्त्तहि उपसङ्ख्यानं कर्तव्यम्? न कर्तव्यम्; `न दुहस्नुनमां यक्चिणौ' इति यक्प्रतिषेधो ज्ञापयति----भवति कर्मकर्त्तरि यगिति। कार्यातिदेशे तु तस्मिंस्तेनैव सूत्रेण भवन्यगेव परो भवति।।

कर्त्तरि शप्।। 3.1.68 ।।

कर्त्तरि शप्।। पकारः स्वरार्थ इति। उपलक्षणमेतत्, ङित्त्वप्रतिषेधार्थः, `शप्श्यनोर्नित्यम्' इति विशेषणार्थश्च। शकारः सार्वधातुकार्थ इति। सञ्ज्ञापरोऽत्र सार्वधातुकशब्दो न सञ्ज्ञिपरः, सार्वधातुकसञ्ज्ञार्थ इत्यर्थः। कर्तृग्रहणस्य `कर्मवत्कर्मणा' इत्यत्रोपयोगः। इह तु सार्वधातुके शब् भवति, श्यन् भवतीति सामान्यविधानेऽपि भावकर्मणोर्यगपवाद इति कर्त्तर्येव शबादयो भविष्यन्ति।।

दिवादिभ्यः श्यन्।। 3.1.69 ।।

दिवादिभ्यः श्यन्।। `मृग अन्वेषणे' इति चुरादावदन्तेष्वात्मनेदी पठ्यते, तत्र मृगयत् इति भवितव्यम्। दिवादिष्वपि पाठान्मृग्यतीति साधुः। कण्ड्वादिषु वा मृगशब्दो द्रष्टव्यः।।

वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः।। 3.1.70 ।।

वा भ्राशभ्लशभ्रमुक्रुमुक्लमुत्रसित्रुटिलषः।। उभयत्रविभाषेयम्। अनवस्थानार्थो भ्रमिः, क्रमित्रसी च दिवादयः, त्रुटिस्तौदादिकः, इतरे भौवादिकाः। भ्राम्यतीति। `शमामष्टानां दीर्गः श्यनि' इति दीर्घः। भौवादिकस्य तु न भवति, अशमादित्वात्। क्रमेः `क्रमः परस्मैपदेषु' इति दीर्घः। क्लमेस्तु `ष्ठिवुक्लम्वाचमां शिति'

इति त्रसेर्दिवादिपाठे चिन्त्यं प्रयाजनम्। क्लमेस्तु पुषादिकार्यार्थः।।

यसोऽनुपसर्गात्।। 3.1.71 ।।

यसोऽनुपसर्गात्।। दैवादिक इति। दिवादिपाठोऽस्य सोपसर्गार्थः। अनुपसर्गादिति किमिति। `सम्यसश्च' इत्येतत्सम एवोपसर्गान्नान्यस्मादिति नियमार्थ भविष्यतीति भावः। आयस्यति, प्रयस्यतीति। तुल्यजातीयानां हलन्तानामेव व्यावृत्तिः स्यादिति मन्यते।।

संयसश्च।। 3.1.72 ।।

संयसश्च।। इह `समः' इत्येवास्तु, `यसः' इत्यनुवर्त्तिष्यते, `षम ष्टम् वेक्लव्ये' इत्यस्य ग्रहणशङ्कानिवृत्त्यर्थ तु `संयसः' इत्युक्तम्। एवं तर्हि `समो यसः', `अनुपसर्गाच्च' इत्यस्तु।।

स्वादिभ्यः श्नु।। 3.173 ।।

स्वादिभ्यः श्नु।। सिनोतीति। `षिञ् बन्धने' क्र्यादिपाठात्सिनातीत्यपि भवति।।

श्रुवः श्रृ च।। 3.1.74 ।।

अक्षोऽन्यतरस्याम्।। 3.1.75 ।।

तनूकरणे तक्षः।। 3.1.76 ।।

तनूकरणे तक्षः।।अनेकार्थत्वादिति । अत एव विशेषणोपादानादनेकार्थ्वं विज्ञायते। प्रदर्शनार्थस्तु गणे धातूनामर्थनिर्द्देशः। सन्तक्षति वाग्भिरिति। निर्भर्त्सयतीत्यर्थः।।

तुदादिभ्यः शः।। 3.1.77 ।।

तुदादिभ्यः शः।। तुदतीति। तुद्+ति इति स्थिते परत्वात्प्राप्तमपि गुणं नित्यः शो बाधते।।

रुधादिभ्यः श्नम्।। 3.1.78 ।।

रुधादिभ्यः श्नम्।। श्नम्प्रत्ययो भवतीति। यद्यपि प्रत्ययसंज्ञायां प्रकृत्युपपदोपाधिकारागमान्वर्जयित्वेत्युक्तम्, तथापि विधीयमानत्वेन प्राधान्यात् शबादिवदर्थवत्त्वाच्श्नमः प्रत्ययसंज्ञा भवतीति भावः। तेन शकारस्य प्रत्ययादित्वादित्संज्ञा। शपोऽपवाद इति। देशभेदेनोभयोः सत्यपि सम्भवे नाप्राप्ते तस्मिन्नारभ्यमाणत्वादेकार्थत्वाच्चापवादत्वम्। विकरणा हि सार्वधातुकस्य धातोश्चार्थाभिधाने सहायतां प्रतिपद्यन्ते। शकारः श्नान्नलोप इति विशेषणार्थ इति। अथार्द्धधातुकसंज्ञा मा भूदित्येवमर्थः कस्मान्न भवति? सत्यां हि तस्यामनक्ति, भनक्ति----`अतो लोपः'स्यात्, रुणद्धि, गुणः स्यात्; हिनस्ति, तृणेढि---इडागमः स्यात्; `नेड्वशि कृति' इत्येतदपि नास्ति, अकृत्त्वात्? सर्वमेतत् श्नमः पूर्वभागस्यानङ्गत्वान्न भविष्यति। कथमङ्गत्वम्? यस्मात्प्रत्ययविधिरिति। कोऽर्थः? प्रत्यये विधीयमाने यत्पञ्चम्या निर्द्दिष्टं धातोः प्रारिपदिकादिति तदादि तस्मिन्प्रत्यये परतोऽङ्गमिति। यच्चाम्या निर्द्दिष्टं रुधादिभ्यो धातुभ्य इति न तस्मात्प्रत्ययः, यस्माच्च प्रत्ययः पूर्वभागात्स न तस्मिन्विधीयमाने पञ्चम्या निर्दिष्टः, तस्माच्छनादिति वििशेषणार्थ एव शकारः। `नान्नलोपः' इत्युच्यमाने `यजयाचयतविच्छप्रच्छरक्षो नङ्' यज्ञानाम्, यत्नानामत्रापि प्राप्नोति, `नामि' इति दीर्घत्वे कृते नादिति व्यपदेशाभान्न भविष्यति, परत्वाल्लोप एव प्राप्नोति। यत्तु `अतो दीर्घो यञि',`सुपि च' इति दीर्घत्वम्, न च तदत्र प्रवर्त्तते, किं कारणम्? `सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति। इहापि तर्हि न स्याद्---वृक्षायेति? `कष्टाय क्रमणे' इति निर्देशाद्भविष्यति। इहापि तर्हि---यत्नानामिति? निर्द्दिशात्सामान्यापेक्षाया ज्ञापनाद्दीर्घो भविष्यति। एवमपि तस्य पूर्वस्माद्विधौ स्थानिवत्वान्नशब्द एवायमिति नलोपः स्यादेव। तस्माद्विशेषणार्थः शकारः कर्त्तव्यः। अथ क्रियमाणेऽपि शकारे इह कस्मान्न भवति----विश्नानाम्, प्रश्नानामिति? `लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणम्'।।

तनादिकृञ्भ्य उः।। 3.1.79 ।।

तनादिकृञ्भ्य उः।। तनीतीत्यादि। `तनु विस्तारे',`षणु दाने',`क्षणु हिसायाम्'।

अन्यत्तनादिकार्यमिति। तनादिकार्यापेक्षो नियम इत्यर्थः। व्यावर्त्त्यदर्शयति---तनादिभ्यस्तथासोरिति विभाषा सिचो लुग् न भवतीति। नन्वस्तु लुग्विकल्पः, तदभावे `ह्रस्वादङ्गात्' इति लोपो भविष्यति, न च विकल्पेन बाधः, विकल्पं प्रति नित्यस्यासिद्धत्वात्; न च तनादिपाठसमार्थ्यादपदावो वचनप्रामाण्यादिति न्यायेनासिद्धत्वबाधाद्विकल्पेन नित्यस्य वाधः,तनादिपाठस्य विकरणविधौ चरितार्थत्वात्; विकल्पोऽप्यततः अतथा इत्यादौ चरितार्थः; प्रत्युत क्रियमाणे कृञ्ग्रहणे तनादिषु कृञः पाठस्यानन्यार्थत्वाद्येननाप्राप्तिन्यायेन विकल्पो नित्यविधिं बाधेत? इदं हि कृञ्ग्रहणविधौ तनादिषु पाठश्चरितार्थो मा विज्ञायीत्येवमर्थमेव स्यादिति कृञ्ग्रहणप्रत्याख्यानमेव न्याय्यं मन्यामहे।।

धिन्विकृण्व्योर च।। 3.1.80 ।।

धिन्विकृण्व्योर च।। अतो लोपस्य स्थानिवद्भावाद् गुणो न भवतीति। तेन प्रक्रियालाघवाय धिन्विण्व्योर्लोप एव नोक्त इति भावः। लोपे हि गुणस्स्यात्। न चच `न धातुलोप आर्द्धधातुके' इति निषेधः, प्रत्ययसन्नियोगशिष्टत्वेन लोपस्यानार्द्धधातुकनिमित्तत्वात्। ननु नुमनुषक्तयोर्ग्रहणं किमर्थम्? नुमि कृतेऽत्वं यथा स्याद, `धिविकृव्योः' इत्युच्यमानेऽत्वे कृतेऽत एव परो नुम् प्रसज्येत; अत्वं ह्यन्तरङ्गं प्रत्ययसन्नियोगेन विधानात्; नुमागमस्तु बहिरङ्गः, उत्पन्ने प्रत्ययेऽङ्गस्य सतो विधानात्। ननु चास्त्वङ्गस्य नुम्, लावस्थायामेव भविष्यति; तिबादीनामन्तरङ्गत्वात्। तिबादिष्वेव तर्हि भविष्यति, न; नित्येनात्वेन बाधनात्। नुमागमस्तु शब्दान्तरप्राप्तेरनित्यः। अन्तरङ्गस्तर्हि नुमागमस्तद्विधौ धातुग्रहणात्? तद्धि धातुसंज्ञाप्रवृत्तिकाल एव नुम् यथा स्यादित्येवमर्थम्;

अन्यस्योदितोऽसम्भवात्। कथमसम्भवः? यदिदानीमेवोक्तम्----तासेरिदित्करणमनुनासिकलोपप्रतिषेधार्थमिति। नन्वत्रापि पक्षे `नुम्विधावुपदेशिवद्वचनं प्रत्ययसिद्ध्यर्थम्' इति वचनादुपदेश एव नुम् भविष्यति ? एवं तर्ह्यन्तरङ्गत्वादेव प्राप्तस्य नुमोऽयं निर्देशः।।

क्र्यादिभ्यः श्ना।। 3.1.81 ।।

स्तम्भुस्तुम्भुम्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च।। 3.1.82 ।।

स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च।। उदित्त्विप्रतिज्ञानादिति। एषां ह्युकारोऽनुनासिक इत्संज्ञकः प्रतिज्ञायते, तस्य प्रयोजनम्----`उदितो वा' इति क्त्वाप्रत्यये इड्विकल्पः। यदि चैतद्विकरणविषया एवैते स्युस्तन्नोपपद्यते। तस्मादुदित्त्वेन प्रतिज्ञानात्सर्वार्थत्वं विज्ञायते, सर्वे प्रत्ययाः प्रयोजनमेषामित्यर्थः। सर्वप्रत्ययशेषत्वभिति वा।।

हलः श्नः शानज्झौ ।। 3.1.83 ।।

हलः श्नः शानज्झौ।। पुषाण, मुषाणेति। लोट्, सिप्, तस्य हिः, `क्र्यादिभ्यः श्ना',तस्य शानच्। चकारः स्वरार्थः। अत्र सन्निपातपरिभाषया अनित्यत्वाद् `अतो हेः' इति हेर्लुक्।

ननु च श्नाप्रत्ययस्य प्रकृतत्वात्तस्यैव शानजादेशो भविष्यति, नार्थः श्न इति स्थानिनिर्द्देशेनात आह---श्न इति स्थानीत्यादि। आदेश इत्येष संप्रत्ययः---अवगमो यथा स्यादित्येवमर्थः। असति तु तस्मिन् किं स्यादित्याह---प्रत्ययान्तरमिति। अस्तु प्रत्ययान्तरम्, `क्र्यादिभ्यः' इत्यनुवृत्तेस्तेभ्य एव हलन्तेभ्यो भविष्यतीति न कश्चिद्दोष इत्यत आह----सर्वविषयमिति। अक्र्यादिविषयमपीत्यर्थः। क्र्याद्यनुवृत्तिर्दुर्ज्ञानेति मन्यते। शानचः शित्करणञ्चिन्त्यप्रयोजनम्; स्थानिवद्भावेनैव सिद्धेः। इह `ञिमिदा स्नेहने' दिवादिः, व्यत्ययेन छन्दसि श्ना, तस्य शानजादेशः, मिदान। `मिदेर्गुणः' इति प्रतिषेधविषये विधीयमानो गुणो न भवति, पुनः शित्करणेन `सार्वधातुकमपित्' इत्यस्यापि पुनः प्रवृत्तेरिति केचित्। नेति वयम्; यथैव व्यत्ययेन श्ना भवति, एवं गुणविषये इकारो भविष्यति।।

छन्दसि शायजपि।। 3.1.84 ।।

छन्दसि शायजपि।। गृभायेति। ग्रहिज्यादिसूत्रेण संप्रसारणम्, `हृग्रहोर्भश्छन्दसि' इति हकारस्य भकारः। बधानेति। `बन्ध बन्धने',`अनिदिताम्' इति नलोपः।।

व्यत्ययो बहुलम्।। 3.1.85 ।।

व्यत्ययो बहुलम्।। यथायथमिति। स्वस्मिन् स्वस्मिन्विषये इत्यर्थः। व्यतिगमनं व्यत्यय इति। व्यतिपूर्वादिणो भावे `एरच्'। अन्योऽन्यविषयावगाहनमित्यर्थः। क्वचिदित्यादिना व्यत्ययस्य प्रकारं दर्शयति। न मरतीति। परस्मैपदमप्यत्र व्यत्ययेन। नेषत्विति। नयतेर्लोटि शप्सिपौ। तरुषेमेति। तरतेर्विध्यादौ लिङ्, तथा च `तरेमेति प्राप्ते' इति वृत्तिः;इतरथा `तीर्यास्मेति प्राप्ते' इति वक्तव्यं स्यात्, ततश्शप् सिप् उ त्यय इति त्रयो विकरणाः, धातोर्गुणः। तरुषमस्, ततो यासुट्, `लिङः सलोपोऽनन्त्यस्य' `नित्यं ङितः' `अतो येयः' यलोपः, `आद्गुणः' तरुषेम।

बहुलग्रहणमनर्थकम्, पूर्वसूत्रादपिशब्दस्यानुवृत्तौ छन्दसि व्यत्ययोऽपि भविष्यति, अपिशब्दाद्यथाप्राप्तञ्चेति सर्वमिष्टं सिद्ध्यति। अत आह----बहुल ग्रहणमिति। सर्वस्य प्रकृतस्याप्रकृतस्य च विधेर्व्यभिचारो व्यत्ययलक्षणो यथा स्यादित्येवमर्थमित्यर्थः।

एवमर्थे बहुलग्रहणे सति यदिष्टं सिद्ध्यति तत्श्लोकेन दर्शयति---सुप्तिङुपग्रहेत्यादि। तत्र सुपाम् व्यत्ययः---धुरि दक्षिणायाः। दक्षिणस्यामिति प्राप्ते। तिङाम्----चषालं ये अश्वयूपाय तक्षति। तक्षन्तीति प्राप्ते। लादेशव्यङ्ग्यः क्रियासाधनविशेषः स्वार्थपरार्थत्वव्यक्तवाक्त्वादिको यः स मुख्य उपग्रहः। यथोक्तम्----

य आत्मनेपदाद्भेदः क्वचिदर्थस्य गम्यते।।

अन्यतश्चापि लादेशान्मन्यन्ते तमुपग्रहम्।। इति।

आत्मनेपदाद्धेतोरित्यर्थः। एवमन्यतश्चापि लादेशदिति, इह तु तद्व्यक्तिनिमित्तत्वात्परस्मैपदात्मनेपदयोरुपग्रहशब्दो वर्त्तते। स ब्रह्मचारिणमिच्छते। इच्छतीति प्राप्ते। ऊर्मिर्युव्यति, युध्यत इति प्राप्ते। लिङ्गम---मधोस्तृप्ता इवासते, मधुन इति प्राप्ते। भाषायामपि मधुशब्दं पुंल्लिङ्गं प्रयुञ्जते----`मधूंश्च बिभ्रति र्मयसुरविटपिन इति', तच्चिन्त्यम्। नरः=पुरुषः----अधा स वीरैर्दशभिर्वियूयाः, वियूयादिति प्राप्ते, `यु मिश्रये' `विपूर्वः, आशिषि लिङ्। कालवाची प्रत्ययः कालः----श्वोऽग्नीनाधास्यमानेन, लुटो विषये लृट्। हल्---त्रिष्टुभौजः शुफितमुग्रवीरम्,`शुभ शोभार्थे' भकारस्य फकारः। आश्वलायनसूत्रे तैत्तिरीये च भकार एव पठ्यते अच्----उपगायन्ति मा पत्नयो गर्भिणयः, दीर्घस्य ह्रस्वः। स्वरव्यत्ययः----`परादिश्छन्दसि बहुलम्' इत्यत्र वक्ष्यते। कर्तृ शब्दः कारकमात्रस्योपलक्षणार्थः, तद्वाचिनां शब्दानां व्यत्यय इत्यर्थः। विभक्तीनां व्यतत्य इति यावत्। यङाम्---यङिति प्रत्याहारः यङो यशब्दादारभ्य `लिङ्याशिष्यङ्' इति ङकारेण, तेषां व्यत्ययः----आण्डा शुष्मस्य भेदतीत्यादिना वृत्तावेव दर्शितः। एषां सुप्रभृतीनां व्यत्ययमिच्छति चशास्त्रकृत् पाणिनिराचार्यः। सोऽपि तथाविधो व्यत्ययो बाहुलकेन सिद्ध्यति। बहुलस्य भावो बाहुलकम्, मनोज्ञादित्वाद्वुञ्। तत्पुनर्बहुलशब्दस्य प्रवृत्तिनिमित्तं यद्बह्वर्थादानम्। च---शब्दो हेतौ। यस्मादेवमुक्तप्रकारो व्यत्ययो बहुलग्रहणेनैव सिद्ध्यति, तस्माद्बहुलग्रहणं कृतमित्यर्थः।।

लिङ्याशिष्यङ्।। 3.1.86 ।।

लिङ्याशिष्यङ्।। शषोऽपवाद इति। लिङाशिषीत्यार्द्धधातुकत्वात्कथमत्र शपःप्राप्तिरित्यत आह---छन्दस्युभयथेति। शब्ग्रहणं चोपलक्षणम्। शकेः

श्नोरपवादः, स्थादिष्वेवायमङ् प्रायेण दृश्यत इत्याह----स्थागागमीत्यादि। उपस्थेयमिति। उपपूर्वात्तिष्ठतेराशिषि लिङ्, मिपोम्भावः, यासुटस्सार्वधातुकत्वात् `लिङः स्सलोपोऽनन्त्यस्य', अङि `आतो लोप इटि च', `अतो येयः',`आद्गुणः'। एवमुपगेयमिति। गमेमेति। मस्। वोचेमेति। अङ्, `वच उम्', यासुट्, इयादेशः,वलि लोपः। दृशेरग्वक्तव्य इति। अङि हि सति `ऋद्दशोऽङि' इति गुणस्स्यात्।।

कर्मवत् कर्मणा तुल्यक्रियः।। 3.1.87 ।।

कर्मवत् कर्मणा तुल्यक्रियः।। कर्मणा, तुल्यं वर्त्तत इति कर्मवत् `तेन तुल्यम्' इत्यादिना वतिः,न तु `तत्र तस्येव' इति; तुल्यक्रिय इति प्रतियोगिनि प्रथमानिर्देशात्। अन्यथा तुल्यक्रिये तुल्यक्रियस्येति वा निर्द्देश्यं स्यात्। तथा हि वाक्ये तावद्यतो वतिर्भवति, यश्य प्रतियोगी---उभाभ्यामपि ताभ्यां षष्ठीसप्तम्यौ भवतः,विप्रस्येवास्य शीलम्, मथुरायामिव पाटलिपुत्रे प्राकार इति; उभयोरपि सम्बन्धित्वाद्, आधारत्वाच्च। ततश्चोत्पन्नेऽपि वतौ प्रतियोगिनस्ते एव षष्ठीसप्तम्यावुपतिष्ठेते। तुल्यार्थयोगे तु या तृतीया सोपमानादेव भवति, नोपमेयात्; तुल्यशब्दस्योपमेयनिष्ठत्वात्, तद्यथा---चन्द्रेण तुल्यं मुखमिति ततश्योत्पन्नेऽपि वतावुपमेयात्प्रथमैवावतिष्ठते।

कर्मणेति परिभाषिकं कर्म गृह्यते, न लौकिकं क्रिया कर्म; तस्य हि ग्रहणे क्रियया तुल्या क्रिया यस्येति किमुक्तं स्यात् क्रियायाः, यया कयाचन क्रियया तुल्यत्वाद्! अतस्साधनकर्मणो ग्रहणम्। तत्र साध्यसाधनयोरत्यन्तभेदान्मुख्येन कर्मआ क्रियायाः सादृश्यासम्भवात्कर्मशब्देन तत्स्था क्रिया लक्ष्यते। भवति हि तात्स्थ्यात्ताच्छब्द्यम्, यथा---मञ्चाः क्रोशन्तीति। तदेतदाह---कर्मणि क्रिया कर्मेति।

विशेषणस्य वैयर्थ्यं न चेदानीं प्रसज्यते।

कर्मणः क्रियया तुल्या न सर्वस्य क्रिया यतः।। इति ।।

कर्मणः क्रियया तुल्यक्रियः, न साधानान्तरस्येत्येवं प्रतिपत्त्यर्थत्वादित्याह---कर्मस्थया क्रियया तुल्यक्रिय इति। तुल्यशब्दस्य नित्यसापेक्षत्वात्कर्मस्थया क्रिययेत्येतदपेक्षस्यापि सूत्रवद्बहुव्रीहिर्नानुपपन्नः। तुल्यशब्दोऽयमस्ति साधारणवचनः----एतौ तुल्यधनाविति, सादृश्यवचनस्तु प्रसिद्ध एव; तत्राद्यस्य ग्रहणे कर्मणेति यदि मुख्यवृत्तिस्तदा कर्त्तुः कर्मणश्च या साधारणी क्रिया, तत्र यः कर्त्ता कर्मणा सह साधारणक्रियः सकर्मकेषु यः कर्त्तेत्युक्तं भवति। तत्र तुल्यक्रिय इत्यनर्थकम्, कर्मणेत्येव वाच्यं स्यात्। कर्मणा सह यः कर्त्ता प्रतिपाद्यत इत्यर्थः। अथ गौणवृत्तिस्तदायमर्थ----क्रियया हेतुना साधारणक्रियः। कया क्रियया? कर्मस्थया क्रिययेति। एवमपि पचत्योदनं देवदत्त इत्यत्रापि प्राप्नोति, यासौ कर्मस्था विक्लित्तिरूपा क्रिया तया साधारणक्रियत्वात्। अतोऽस्मिन्पक्षेऽनिष्ट्रप्रसङ्गः, प्रसिद्धतरश्च सदृशपर्यायस्तुल्यशब्द इति प्रयुञ्जानः `सादृश्यवचनस्तुल्यशब्दः, न साधारणवचनः' इत्याचष्टे। कर्तृभूत इति। कर्त्तरि सम्पन्न इत्यर्थः। च्वेर्विकल्पितत्वादत्राभावः। अथ वा--कर्तृशब्दः कर्तृत्वे वर्तते, भूत इति `भू प्राप्तौ' इत्यस्य `आ धृषाद्वा' इति णिजभावे रूपम्, कर्तृत्वं प्राप्त इत्यर्थः। तत्र पचत्योदनमित्यत्र कर्तृकर्मव्यापारह योरतन्यन्तभेदेन सादृश्याभावात्कर्मवद्भावाभावः। एवमपि भिद्यमानः कुसुलः पात्राणि भिन्नत्तीत्यत्रापि प्राप्नोति, यादृशी हि पात्रेषु क्रियाऽवयवविशरणात्मिका तादृश्येव कुसूलेऽपि कर्त्तरि लक्ष्यत इति? नैष दोषः; कर्मस्थया क्रियया तुल्या क्रिया यस्य कर्त्तुरित्युक्ते कर्तुत्वोपयोगिनी या क्रिया यदावेशादसौ कर्त्ता भवति सैव क्रिया गम्यते; इह तु पात्रेषु दृश्यमानं द्विधाभवनं कुसूलेऽपि दैवगत्या दृष्टमित्येतावन्न पुनस्तत्समावेशादसौ भिनत्ति, स्वयमभिद्यमानोऽपि कुसूल उपरि पतन् पात्राणि भिनत्त्येव। एवमप्यन्योऽन्यमाश्लिषतः, अन्योऽन्यं स्पृशतः, अन्योऽन्यं गृह्णीतः ----अत्र प्राप्नोति, अत्र हि यत्क्रियावेशात्कर्त्ता भवति सैव कर्मण्यपि दृश्यते? सत्यं दृश्यते; न सा कर्मत्वोपयोगिनी, न ह्यसौ तदावेशात्कर्म भवति; स्वयमनाश्लिष्यतोऽपि परेणाश्लिष्यमाणस्य कर्मत्वसम्भवात्। तदेतदुक्तं भवति----कर्मणः कर्मत्वोपयोगिनी या क्रिया तया तुल्या यस्य कर्तृत्वोपयोगिनी क्रिया स कर्मण तुल्यक्रियः। एवञ्च यस्यैव कर्मणः कर्मावस्थायां या क्रिया कर्त्रवस्थायामपि यदि सैव क्रिया भवति स कर्त्ता कर्मवदित्युक्तं भवति। इदमप्यत्रैवोक्तम्----`यस्मिन् कर्मणि कर्तृभूतेऽपि' इति। तस्मिन्नेव कर्मणि कर्त्रवस्थां प्राप्त इति ह्यत्रार्थः। एवञ्च कर्तृकर्मावस्थाभेदादेकस्या अपि क्रियाया भेदाश्रयं सादृश्यमुपपाद्यम्।

अतिदेशो रूपनिमित्ततादात्म्यव्यपदेशशास्त्रकार्यातिदेशभेदेनानेकविधः, तवादिस्त्रयाणामसम्भवः। व्यपदेशातिदेशस्तु संज्ञापक्षान्न भिद्यते। तत्र वक्तरणमनर्थकम्। अतः शास्त्रातिदेशः, कार्यातिदेश इति द्वावेव पक्षौ। तत्र शास्त्रातिदेशे `भावकर्मणोः' इत्यादिषु शास्त्रेष्वतिदिष्टेषु तेन तेन शास्त्रेण तत्तत्कार्यं प्रवर्त्तते, ततश्च `भावकर्मणोः' इत्यस्यावकाशः---शुद्धं कर्म, पच्यते ओदनः, `शेषात्कर्तरि परस्मैपदम्' इत्यस्यावकाशः---शुद्धः कर्त्ता, पचति पठति; कर्मकर्त्तर्युभयप्रसङ्गे परत्वात्परस्मैपदं प्राप्नोति? नैष दोषः; `कर्त्तरि कर्मव्यतीहाहे इत्यतः कर्तृग्रहणमनुवर्तते, तेन कर्तैव यः कर्त्ता तत्र परस्मैपदम्, कर्मकर्तरि न भविष्यति। इह तर्हि कर्मणि यग् भवतीत्यस्यावकाशः---शुद्धं कर्म, पच्यते, ओदनः, `कर्तरि शप्' इत्यस्यावकाशः---शुद्धः कर्त्ता, पचति पठति; कर्मकर्तर्युभयप्रसङे परत्वाच्छप् प्राप्नोति? नैष दोषः; `कर्तरि शप्' इत्यत्र कर्तृग्रहणन्न कर्तव्यम्, सार्वधातुके शबिति सामान्यस्य भावकर्मणोर्यगपवादो भविष्यति, एवं सिद्धे यत्कर्तृग्रहणं क्रियते तस्यैतत्प्रयोजनम्----कर्तैव यः कर्ता तत्र शबादयो यथा स्युः, कर्मापदिष्टे मा भूवन्निति? सत्यं प्रतिविहितमायुष्मता! वृथा पुनरयम्प्रयासः, कार्यातिदेशाश्रयेणैव सिद्धेः। तत्र ह्यनेनैवात्मनेपदम्, अनेनैव यगिति परत्वाद्यगात्मनेपदे सिद्ध्यतः। प्रधानं च कार्यम्, तदर्थत्वाददतिदेशान्तराणाम्। अतः कार्यातिदेश कर्तृग्रहणमस्ति, यदपि प्रकृतम्`कर्तरि शप्' इति, तदपि सप्तम्यन्तम् `तुल्यक्रिय' इति प्रथमान्तेन सम्बद्धुं नार्हति, तत्राह---कर्तरि शबित्यत इति।

यगात्मनेपदेत्यादि। लान्तस्य कर्त्ता कर्मवदिति वक्ष्यमाणत्वाद्यगादीनामेव सम्भव इति भावः। मिद्यते इत्यादीनि त्रीण्यात्मनेपदस्योदाहणानि यगादीनां क्रमेण। कथं पुनः काष्ठस्य भिदां प्रति कर्तृत्वम्, यावता भिद्यतेऽसौ देवदत्तेन? यो ह्युद्यमननिपातनादि कुठारस्य करोति स भेदने कर्त्ता उच्यते। सर्वेषामेव कारकाणां प्रातिस्विकोऽवान्तरव्यापारोऽस्ति, अकिंचित्करस्य कारकत्वानुपपत्तेः। एतच्च कारकप्रकरणे एवोपपादितम्। तत्र च स्वव्यापारे स्वतन्त्रत्वं

सर्वत्रैवास्ति। कारके कर्तृव्यापारेण तिरस्कृतत्वात्तु न्यग्भूतं स्वातन्त्र्यमिति कर्तृत्वं न भवति, करणादिसंज्ञैव भवतीत्येतावत्। सकर्मकास्तु केचिद्धातवः कर्मव्यापारमप्यभिधाय तावत्येवापर्यवस्यन्तस्तदुपसर्जनं कर्तृव्यापारमाचक्षते, तद्यथा----भिदिर्द्विधाभवनोपसर्जनं द्विधाभावनमाह। न खल्वयमुद्यमननिपातनमात्रवचनः; रजकेऽपि प्रसङ्गात्, सोपि हि वस्त्रमुद्यच्छति निपातयति च। अथ च न भिनत्तीत्युच्यते; द्विधाभवनाभावात्। एतेन छिनत्तिलुनत्ती व्याख्यातौ। तथा पचिरपि विक्लित्युपसर्जनं विक्लेदनमाह। तत्र यदा कर्मणः सौकर्यातिशयप्रतिपादनाय कर्तृव्यापारो न विवक्ष्यते, तदा निवृत्तप्रेषणं कर्म स्वक्रियावयवस्थितं निवर्त्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते। धातुरपि तद्व्यापारमात्रे वर्तते। कथं पुनरुभयवचनो धातुः कर्मव्यापारमात्रवचनो भवति? को विरोधः? अनेकार्था धातवः, समुदायेषु च वृत्ताः शब्दा अवयेष्वपि वर्तन्ते, तदेवं कर्मव्यापारमात्रवाचिषु कर्तृत्वमेव काष्ठादीनाम्, न तु कर्मत्वगन्धोऽप्यस्ति; धातवश्चैते प्रयोगेऽस्मिन्नकर्मकाः, यथा---विक्लिद्यति द्विधा भवतीति; कथं तर्हि कर्मणा तुल्यक्रियः कर्त्ता? न ब्रूमः----अस्मिन् प्रयोगे यत्कर्म तेन तुल्यक्रिय इति, किं तर्हि? प्रयोगान्तरे यत्कर्म तेन तुल्यक्रिय इति। नन्वेवं पचत्योदनं देवदत्तः, राध्यत्योदनः स्वयमेव---अत्रापि प्राप्नोति? अत्र परिहारं वक्ष्यति---धात्वधिकारादिति। कर्तृकर्मणोर्धातोरन्यत्रासम्भवादेव सिद्धेस्तदनुवृत्तिरेकत्वविक्षार्था----यस्मिन्नेव धातौ यत्कर्म तेन तुल्यक्रियस्तस्यैव धातोः कर्तेति। तेन धातुभेदे न भविष्यति?

आह--अध्यारोपोऽयमस्तु, कोऽर्थः? कृत्स्न एव धात्वर्थः कर्मण्यध्यारोप्यते किमत्र देवदत्तेन ओदन एव पाकं करोतीति। एवं हि सौकर्यातिशयः सुतरां प्रतिपादितो भवति, करणाधिकरणवत्, यथा---साध्वसिश्छिनत्ति, साधु स्थाली पचतीति। तत्र येषु तावत्कृत्स्न एव धात्वर्थः कर्मण्यपि सम्भवति---आत्मना बुद्ध्यते, आत्मना मुच्यते, आत्मना हन्यते, आत्मना ताड्यते इति, तेषु शुद्धे कर्मणि लकारः केन चिद्रूपेण कर्तृत्वम्, केनचिद्रूपेण कर्मत्वमिति। तथा भिद्यते कुसूल इति यत्रापि चेतनो भेत्ता न दृश्यते तत्र वातातपकालाभिवर्षणानामन्यतमस्य कर्तृत्वम्, अध्यारोपो वा। पच्यते ओदनः स्वयमेव, लूयते केदारः स्वयमेवेत्यादावध्यारोप एव, आत्मनैवोवनः पच्यते, न तु देवदत्तेनेति, कएवं नाम पाकेऽनुकूलो भवतीत्यर्थः। तदेवं शुद्धे कर्मणि लकारोत्पत्तेर्नार्थ एतेन। यद्येवम्, भिद्यते कुसूलेनेति भावे लो न स्यात्, सकर्मकत्वात्? अथाप्यत्र भिद्यते कुसूलेनात्मेति कर्मणि व्याख्यायेत। एवमपि भेत्तव्यं कुसूलेन, ईषद्भेदं कुसूलेनेति भावे कृत्यक्तखलर्था न स्युः? न च तत्रापि कर्मणीति शक्यमाश्रयितुं नपुंसकलिङ्गदर्शनात्। तथा नमते दण्डः स्वयमेव, कारयते कटः स्वयमेव, अचीकरत कटः स्वयमेव---यक्चिणोः प्रतिषिद्धयोरपि शप्चङौ न स्याताम्, अकर्तृत्वात्। तस्मात्कर्मव्यापारमात्रवाचिभ्यः कर्तरि भावे च लादय इत्येतदेव साधीयः। तथा च श्रुतं पाक इत्यत्र पचेः कर्मव्यापारे कर्तृव्यापारे च श्रुतमिति भवति; द्वयोरपि पाकशब्दाभिधेयत्वात्।

एवं हि या विमृष्टा शास्त्रं न करिष्यामिति मतिः, सापि त्याज्या। असति सूत्रे `न दुहस्नुनमां यक्चिणौ' इति प्रतिषेधस्य विषयो न प्रदर्शितः स्यात्। किञ्च, यद्यपि पच्यते ओदनः स्वयमेवेत्यादिकः प्रयोगः कर्मणि समर्थ्यते, कर्तरि तु लकारोत्पत्तौ पचत्योदन इत्यादिकः प्रयोगोऽपि प्रसज्येत। तस्मादारब्धव्यं सूत्रम्। अत्रोदाहरणेषु कर्त्रन्तरव्युदासार्थ स्वयमिति प्रयुज्यते, न त्वेतदुदाहरणाङ्गम्। प्रयुक्त एतस्मिन्नात्मनेत्यस्यार्थे वृत्तेः प्राकृतमेवैतत्कर्म स्यात्---स्वाश्रयमपि यथा स्यादिति। असति वत्करणे कर्तुः कर्मसंज्ञा ज्ञायेत, ततश्चानेन कर्मणा सकर्मकत्वाद् `भावे चाकर्मकेभ्यः' इति भावे लो न स्यात्। सति तु तस्मिन्स्वतः प्राप्तस्याकर्मकव्यपदेशस्यानिवर्तनादकर्मकाणां भावे लः सिद्धो भवति, अकर्म काणां भावे यो लो विधीयते स सिद्धो भवतीत्यर्थः। कथं सिद्धो भवति, यावता नित्योऽयमतिदेशः, नित्ये चास्मिंस्तत्र लविधिरपि कर्मकार्यमेवेति स्यादेवातिदेशः? आतिदेशिकाविरुद्धं स्वाश्रयं वतिना प्राप्तते, न तु विरुद्धमपि। न ह्ययं विकल्पार्थः---कदाचित्कर्मवत्, कदाचिन्नेति। अथ लान्तस्य कर्तेति वक्ष्यमाणत्वादेतत्सूत्रप्रवृत्तेः प्रागेव `लः कर्मणि च' इत्येतत्प्रवृत्तिरङ्गीक्रियते, तच्च प्रवर्तमानमकर्मकत्वाद्भावे कर्तरि च प्रवर्तते, यदा कर्त्तरि तदाऽयमतिदेश इति भावे लविधिः समर्थ्येत। यद्येवम्, मा भूद्वतिः, लकारवाच्यस्य कर्त्तुः कर्मसञ्ज्ञैवास्तु, यगात्मनेपदयोस्त्वप्रसिद्धिः परत्वाच्छबादीनां परस्मैपदस्य च प्रसङ्गः; न च कर्मसञ्ज्ञया कर्तृसञ्ज्ञाया बाधः, एकसञ्ज्ञाधिकारादन्यत्र सञ्ज्ञानां समावेशात्? सत्यम्; उक्तोऽत्र परिहारः----तदेतद्वत्करणं सर्वसादृश्यार्थम्। तेनोदाहरणेषु काष्ठादिभ्यो द्वितीया न भवति; इत्यरथा कर्मकार्यत्वात्प्राप्नोति, अभिहितत्वान्न भविष्यति। भवेदयं परिहारः शास्त्रातिदेशे, कार्यातिदेशे त्वनेनैव कर्मकार्याणि प्राप्यन्ते, न चात्रानभिहिताधिकारोऽस्तीति स्यादेव द्वितीया। वत्करणात्तु सर्वसादृश्यार्थाद्यथा कर्मण्यभिहितेन भवति, एवं कर्तर्यपीति द्वितीयाभावः। यदा तर्ह्यकर्मकत्वाद्भावे लकारस्तदा प्राप्नोति, तत्राह-----लिङ्याशिष्यङित्यादि। तत्र लग्रहणमनुवृत्त षष्ठ्या विपरिणम्यते इत्यभिप्रायेणाह---लान्तस्य कर्त्तेति। लकारवाच्यः कर्तेत्यर्थः। कुसूलाद् द्वितीया न भवतीति। भिद्यते कुसूलेनेत्यनन्तरोदाहृतेषु उदाहरणेषु तु वत्करणादेव सर्वसादृश्यार्थाद् द्वितीयाया अभाव इति भावः। तदेवं वृत्तिकारस्याभिप्रेतम्----एतद्वतिः सर्वसादृश्यार्थ इति। किञ्च, नावश्यं द्वितीयैव, कृत्यक्तखलर्था अप्यस्मिन्विषये कर्तर्यतिदेशेन प्राप्नुवन्ति----भेत्तव्यः कुसूलः स्वयमेव, भिन्नः कुसूलः स्वयमेव, ईषद्भेदः कुसूलः स्वयमेवेति; भाव एव चेष्यन्ते---भेत्तव्यं कुसूलेन कुसूलस्य वा, `कृत्यानां कर्तरि वा',`भिन्नं कुसूलेन, ईषद्भेदं कुसूलेनेति। अत्र वार्तिके क्तग्रहणमन्यत्र सहपाठात्पठितम्, यथा-----ककारो गुणवृद्धिप्रतिषेधार्थ इति। भवत्येव ह्येभ्योऽकर्मकत्वाद् `गत्यर्थाककर्मक' इति कर्तरि क्तः। तथा च `सिनोतेर्ग्रासकर्मकर्तृकस्येति वक्तव्यम्' इति निष्ठा---नत्वे। सिनो ग्रासः स्वयमेवेति कर्तरि क्त उदाहरिष्यते। तस्मात्कृत्यखलर्थेष्वेवैष दोषः, अतस्तत्र लान्तस्य कर्तेत्याश्रयणादेवातिदेशाभावः।

कर्मणेति किमिति। धातुवाच्या क्रिया कर्तृ कर्मणोरेव समवेता, तत्र सादृश्यस्य भेदाधिष्ठानत्वात्कर्तृस्थया क्रियया तुल्यक्रियः कर्त्ता न सम्भवतीति कर्मस्थैव क्रिया आश्रयिष्यत इति मत्वा प्रश्नः। करणाधिकरणाभ्यामिति। तत्स्थक्रिययेत्यर्थः। साध्वसिश्छिनत्तीति। किं पुनरत्र करणाधिकरणव्यापारमात्रे धातुर्वर्तते? आहो स्वित्तत्र कृत्स्नधात्वर्थाध्यारोपः? न तावदाद्यकल्पः, तावति धातोरवृत्तेरसिना छिनत्तत्यत्रापि नैव करणव्यापारो धातुनोपादीयते, केवलं करणत्वादवान्तरव्यापारोऽस्तीत्येतावत्। द्वितीये तु भिन्नक्रियत्वादेवाप्रसङ्गः। तस्मात्करणाधिकरणव्यापारमात्रेऽपि धातोर्वृत्तिमङ्गीकृत्य प्रत्युदाहृतं द्रष्टव्यम्।

क्वचितु करणेनापि तुल्यक्रियस्य कर्मवद्भाव इष्यते, यदाह---करणेन तुल्यक्रियः कर्त्ता बहुलमिष्यते, परिवारयति कण्ट कैर्वृक्षम्, परिवारयन्ते कण्टका वृक्षम्----आत्मनेपदं भवति। वृत्तिकारस्तु `णिचश्च' इत्यात्मनेपदमुपपद्यत इति मन्यमानो नैतदुपसमचष्ट। धात्वधिकारात्समाने धाताविति। एकस्यैव धातोरित्यर्थः। एतच्च प्रागेव व्याख्यातम्।

कर्मस्थभावकानामित्यादि। यद्यपि क्रियाभावशब्दयोरभिन्न एवार्थः, तथा च `यस्य च भावेन भावलक्षणम्' इति क्रियापि गृह्यते, `लक्षणहेत्वोः क्रियायाः' `कर्मणा तुल्यक्रियः' इति च वाचोऽपि; तथाप्यस्मिन् ग्रन्थे भेदेनोपादानादर्थभेदो द्रष्टव्यः---अपरिस्पन्दरूपो धात्वर्थो भावः, परिस्पन्दरूपस्तु क्रिया। क्व पुनरसौ कर्मस्थः? क्व ववा कर्तृ स्थः? केचिदाहुः----येषु कर्मब्यापारोपसर्जनः कर्तृव्यापारोऽभिधीयते तेषु कर्मस्थः, येषु कर्तृ व्यापार एव तेषु कर्तृ स्थ इति। नेति वयम्; प्रधानक्रिया यत्र समवैति कर्तरि कर्मणि वा तत्स्थो धात्वर्थः, यदुद्देशेन कारकव्यापारः सा प्रधानक्रिया, यथा---पचेर्विक्लित्तिः, गमेर्देशान्तरप्राप्तिः। एवञ्च कृत्वा न्यग्भवनोपसर्जनन्यग्भाववचनोऽपि रुहिः कर्तृस्थक्रियः---आरोहन्ति हस्तिनं हस्तिपका इति; उपरिदेशप्राप्तेरुद्देश्यायाः कर्तरि समवायात्, तत्रेह कर्मस्थेन व्यापारेण कर्तृव्यापारस्योपमानात्।

अस्य चार्थस्य कर्तृस्थव्यापारेष्वसम्भवान्न्यायप्राप्त एवार्थो वृत्तिकारेण दर्शितः। तत्र कर्तस्थव्यापारस्य कर्तृस्थस्य चोदाहरणमात्रं श्लोकेन दर्शयति----कर्मस्थः पचतेर्भाव इति। पच्यते घट इत्यत्र तद्देशस्यैव घटस्य पाक इति भावोऽसौ भवति, कर्मस्थश्च---पच्यते ओदन इत्यत्र परिस्पन्दत एव, पाक्यस्य पाकाभिनिर्वृत्तिरिति कर्मस्थैव पचेः क्रिया भवति। कर्मस्था च भिदेः क्रियेति। भिद्यते कुसूल इत्यत्रावयवविशरणात्मिका भिदिक्रिया भेदस्य परिस्पन्दे सति भवतीति कर्मस्था च भिदेः क्रिया भवति। मासासिभावः कर्तृस्थ इति। मासमास्ते इत्यत्र `कालभावाध्वगन्तव्याः कर्मसञ्ज्ञा ह्यकर्मणाम्' इति मासकर्मकोऽयमासिधातुः, तत्र मासासिधातौ प्रतीयमानोऽर्थो भावः; अपरिस्पन्दरूपत्वात्, स च कर्तृस्थ इत्यर्थः। कर्तृ स्था च गमेः क्रियेति। गमेरर्थः क्रिया, सा च कर्तृ स्थेत्यर्थः। तेनास्यते मासः स्वयमेव, गम्यते ग्रामः स्वयमेवेति न भवति। अथेह कथं कर्मवद्भावः---तस्मादुदुम्बरः सलोहितं पच्यते फलमिति? अत्राहुः---पचिरत्र विषये द्विकर्मकः, वृक्षस्य पाकमन्तरेण फलस्य पाकासम्भवात्। तत्र `अप्रधाने दुहादीनाम्' इति वृक्षोऽकथितं कर्मेति तत्र लकारः, कालस्तु कर्त्तेति। इदं तु वक्तव्यमेव, `सृजियुज्योः श्यंस्तु' इति `सृजि विसर्गे',`युजिर्योगे'---अनयोः सकर्मकयोः कर्त्ता कर्मवद्भवति; तत्र सृजेः श्रद्धोपपन्ने कर्त्तरि कर्मवद्भावः, यग्विषये च श्यन्, चिण्विषये तु चिणेवेष्यते; सृज्यते मालां देवदत्तः, श्रद्धया निष्पादयतीत्यर्थः। श्यनि सति प्रकृतेराद्युदात्तत्वं भवति, यकि तु सार्वधातुकानुदात्तत्वे यक एवोदात्तत्वं स्यात्-----असजि मालाम्, श्रद्धया निष्पादयति स्मेत्यर्थः। `युजिर्'---युज्यते ब्रह्मचारी योगेन।।

तपस्तपः कर्मकस्यैव।। 3.1.88 ।।

तपस्तपः कर्मकस्यैव।। `क्रियाभेदाद्विध्यर्थमिदम्' इति वक्ष्यति। कथं तर्ह्येवकारस्यान्वय इत्याशङ्क्य वाक्यभेदेन व्याचष्टे---तप सन्तापे, अस्य कर्त्ता कर्मवद्भवति, स च तपः कर्मकस्यैवेति। एवकारस्य व्यवच्छेद्यं दर्शयति----नान्यकर्मकस्येति। एतच्च श्रुतस्यैवकारस्यान्वयो वक्तव्य इति मत्वोक्तम्, न पुनरस्य किञ्चित्प्रतोजनमस्ति। क्रियाभेदादिति। अत्यन्तभेदादित्यर्थः। नियमपक्षेऽपि क्रियाणां च भेदोऽपेक्षितः; तुल्यत्वस्य भेदाधिष्ठानत्वात्। क्रियाभेदमेव दर्शयति---उपवासादीनीति। दुः खयन्तीत्यर्थ इति। `सुखदुःख तत्क्रियायाम्' इति चुरादिपाठाण्णिच्। अनेन तापसस्य कर्मत्वे तपेर्दुः खनमर्थ इति दर्शितम्। अर्जयतीत्यर्थ इति। अनेनापि तापसस्य कर्तृत्वे तपेरर्जनमर्थ इति दर्शितम्। क्वचित्तु आर्जयतीति पाठः, तत्राङ्पूर्वस्य प्रयोगः। नन्वेमपि शरीरसन्तापलक्षणा क्रियाऽवस्थाद्वयोऽपि तुल्या, न हि शरीरसन्तापादन्यदर्जनं तापसस्य व्यापारः? तदसत्; वस्तुस्थित्या सतोऽपि शरीरसन्तापस्याशब्दार्थत्वात्, कथमन्यथा तपसः कर्मत्वम्! तस्मादर्जनम्= निष्पादनम्, अलब्धस्य लाभः; दुःखं तु शरीरसन्ताप एवेति स्पष्ट एव क्रियाभेदः। विध्यर्थमेतदिति यदुक्तं तदेवोपसंहरति---पूर्वेणाप्राप्तः कर्मवद्भावो विधीयत इति। अतप्त तपस्तापस इति। `तपोऽनुतापे च'इति चिणः प्रतिषेधात्सिच्, `झलो झलि' इति लोपः।।

न दुहस्ननमां यक्चिणौ।। 3.1.89 ।।

न दुहस्ननमां यक्चियौ।। `दुह प्रपूरणे',`ष्णु प्रस्रवणे'। `टुदु उपतापे', `हमे हसने',`णु स्तवने' इत्येतेषां तु ग्रहणं न भवति, नौतिहसत्योरकर्मस्थक्रियत्वात्। यदि च तेषां ग्रहणामिष्टं स्यादसन्देहार्थम् `न दुनुहस्नमाम्' इत्येव ब्रूयात्, अवयवप्रसिद्धेश्च समुदायप्रसिद्धिर्बलीयसी। कर्मवद्भावापदिष्टाविति। एतेन `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति कर्मवत्कर्मणेति प्राप्तयोर्यक्चिणोरयं प्रतिषेधः; न तु `चिण् भावकर्मणोः', `सार्वधातुके यक्'इति शुद्धे कर्मणि भावे प्राप्तयोरिति दर्शयति। दुग्ध इति। यकि प्रतिषिद्धे शप्, तस्य अदादित्वाल्लुक्, `दादेर्धातोर्घः', `झषस्तथोर्धोऽधः' जश्त्वम्। दुहिरयं द्विकर्मकः, तत्र `अप्रधाने दुहादीनाम्' इति यस्मिन्कर्मणि लकारस्तस्य कर्तृत्वविवक्षा, प्रधानं तु कर्म कर्मैवेति, यथा----`स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी' इति। अदुग्धेति। णिच् भावे क्सः, `लुग्वा दुह' इत्यादिना तस्य लुक्। नन्विदानीमेवोक्तम्----`दुहेरनेन यक् प्रतिषिध्यते, चिण् तु `दुहेश्च' इति पूर्वमेव विकल्पितः' इति, तस्मान्नैतदत्रोदाहर्त्तव्यम्। प्रस्नुत इति। यकि प्रतिषिद्धे पूर्ववच्छपो लुक् प्रास्नोष्टेति। चिण्प्रतिषेधे सिच्। नमत इति। अन्तर्भावितण्यर्थोऽत्र नमिः। तत्र यथा नयमति दण्डं देवदत्तः, नमयते दण्डः स्वयमेवेति ण्यन्तस्य कर्मस्थक्रियत्वम्, एवमस्यापि द्रष्टव्यम्।

णिश्रन्थिग्रन्थीत्यादि। णीति णिङो णिचश्च सामान्येन ग्रहणम्। `श्रन्थ ग्रन्थ सन्दर्भे' चुरादावाधृषीयौ, तयोर्णिजभावपक्षे ग्रहणम्। तथा क्र्यादिष्वपि पठ्येते तयोरपि ग्रहणम्। `ब्रूञ् व्यक्तायां वाचि'। आत्मनेपदविधावकर्मका ये धातवो निर्दिष्टास्ते यदान्तर्भावितण्यर्थाः सकर्मका भवन्ति त इमे आत्मनेपदाकर्मकाः। वृत्तौ क्वचिदेषामुदाहरणानि पठ्यन्ते, क्वचिन्न। णिचि-----कार्यते कटः स्वयमेव, अचीकरत कटः स्वयमेव, यक्चिणोः प्रतिषिद्धयोः शप्चङौ भवतः। णिङ्---

--पुच्छमुदस्यति, उत्पुच्छयते गौः, स यदान्तर्भावितण्यर्थस्तदा उत्पुच्छयते गाम्। पुनः सौकर्यातिशयेन कर्तृत्वविवक्षायामुत्पुच्छयते गौः स्वयमेव, उदपुपुच्छत गौः स्वयमेव। श्रन्थिग्रन्थ्योराधृषीययोः-----ग्रन्थति ग्रन्थं देवदत्तः, श्रन्थति मेखलाम्, ग्रन्थते ग्रन्थः स्वयमेव, अग्रन्थिष्ट ग्रन्थः स्वयमेव; श्रन्थते मेखला स्वयमेव, अश्रन्थिष्ट मेखला स्वयमेव। क्रैयादिकयोस्तु----ग्रथ्नीते ग्रन्थः स्वयमेव, श्रथ्नीते मेखला स्वयमेव। ब्रञ्---ब्रवीति कथां देवदत्तः, ब्रूते कथा स्वयमेव। वचनं शब्दप्रकाशनफलत्वात्कर्मस्थम्। आत्मनेपदाकर्मक-----`वेः शब्दकर्मणः' `अकर्मकाच्च' विकुर्वते सैन्धवाः, वल्गन्तीत्यर्थः। तान्यदाऽन्यो वल्गयति तदा तेषां कर्मत्वम्। पुनः सौकर्यातिशयात्कर्तृत्वविवक्षायाम्----विकुर्वते सैन्धवाः स्वयमेव, व्यकृषत सैन्धवाः स्वयमेव, यक्चिणौ न भवतः। क्वचित्तु बृत्तौ---आहन्ति माणवकम्, आहते माणवकः स्वयमेवेति पठ्यते, तदयुक्तम्; आहन्ति माणवकमिति सकर्मकत्वादात्मनेपदाभावाच्च। अन्ये पुनराहुः-----आत्मनेपदाकर्मकेति धातुपलक्षणम्, हन्तिश्रायम् `आङो यमहनः' इत्यत्र यदा कर्माविवक्षयाऽकर्मकस्तदात्मनेपदस्य निमित्तं स्यात्, तस्याद्यसकर्मकत्वेऽप्यविरुद्धमुदाहरणमिति।

भूषाकर्मकिरादिसनां यक्चिणोः प्रतिषेधो वक्तव्यः। कर्मशब्दः क्रियावाची, भूषाफलं च शोभाख्यं कर्मणि दृश्यत इति कर्मस्था भूषा। अलंकुरुते कन्या स्वयमेव, अलंकरिष्यते कन्या स्वयमेव, अलमकृत कन्या स्वयमेव; अवकिरते हस्ती स्वयमेव, अवाकीर्ष्ट हस्ती स्वयमेव, अवकरिष्यते हस्ती स्वयमेव----यक्चिण्चिण्वद्भावा न भवन्ति। सन्---मुमुक्षते वत्सः स्वयमेव, अमुमुक्षिष्ट वत्सः स्वयमेव; चिकीर्षते कटः स्वयमेव, अचिकीर्षिष्ट कटः स्वयमेव----प्रकृत्यर्थापेक्षमत्र कर्मस्थक्रियत्वम्, इच्छा तु कर्तृस्था। आर्थ च प्रकृत्यर्थस्य प्राधान्यम्; तदर्थथ्वादिच्छायाः।।

कुषिरजोः प्राचां श्यन् परस्मैपदं च।। 3.1.90 ।।

कुषिरजोः प्रायां श्यन् परस्मैपदं च।। यगात्मनेपदयोरपवादाविति। श्यन्यकोऽपवादः, परस्मैपदमात्मनेपदस्य। श्यन्यकोश्चात्र नुमिस्वरे च विशेषः----कुष्यन्ती जङ्घा, श्यनि `शप्श्यनोर्नित्यम्' इति नित्यं नुमागमः, नित्त्वाच्चाद्युदात्तत्वं भवति; यकि तु `आच्छीनद्योर्नुम्' इति नुम्विकल्पः, लः सार्वधातुकानुदात्तत्वे च यक एवोदात्तत्वं स्यात्।रज्यतीति। `अनिदिताम्' इति नलोपः। कुष्यते, रज्यते इति पक्षे यगात्मनेपदे भवतः। लिङ्लिटोरिति। आशिषि लिङ्त्र गृह्यते, यदुक्तम्---कुषइरजोः श्यन्विधाने सार्वधातुकवचनम्, अवचने हि लिङ्लिटोः प्रतिषेध इति। स्यादिविषये चेति। आदिशब्देन सिजादीनां ग्रहणम्। चुकुषे, ररञ्च इति। लिट्, आत्मनेपदम्, तस्य एशादेशः। कोषिषीष्टेति। `लिङः सौयुट्', `सुट् तिथोः' लघूपधगुणः। रङ्क्षीष्टेति। `एकाचः' इतीट्प्रतिषेधः, `चोः कुः' इति कुत्वम् गकारः, तस्य चर्त्त्वम्ककारः। अकोषि, अरञ्चीति। चिण्।।

धातोः।। 3.1.91 ।।

धातोः।। आ कुतोऽयमधिकारः किं प्राग्लादेशाद्? आहोस्विदाध्यायपरिसमाप्तेः? इति विचारे द्वितीयं पक्षमाश्रयति--आ तृतीयाध्यायपरिसमाप्तेरिति। एशः शित्करणात्, तद्धि धातोरित्यधिकारे सति `तस्मादित्युत्तरस्य' `आदेः परस्य' तकारस्य स्थाने एत्वे सति अकारस्य स्थाने टेरेत्वे अयादेशे च सत्ययेशब्दस्य श्रवणं मा भूदित्येवमर्थ कियते। प्राग्लादेशात्पुनर्द्धात्वधिकारेऽलोऽन्त्यस्य विधयो भवन्तीति एकारस्यैकारवचने प्रयोजनं नास्तीति कृत्वान्तरेणापि शकारमन्त्येऽल्यनुसंहारं बाधित्वा सर्वादेशो भविष्यति, किं शकारेण! यद्याध्यायपरिसमाप्तेरयमधिकारः? आद्ये योगे न व्यवाये तिङःस्युः, आद्ये योगे तिबादिसूत्रे येऽमी लावस्थायां स्यादयो विधीयन्ते तेषु कृतेषु तैर्व्यवधाने तिबादयो न स्युः। करिष्यति, हरिष्यति, कर्त्ता, शबादिषु तु न दोषः; तेषां सार्वधातुकाश्रयत्वादकृते लादेशे प्राप्त्यभावात्; तिबादयश्च तत्र सावकाशाः।

न स्यादेत्वम्, टेष्टितां व्यवाय इत्येव---पचते यजते, क्व तर्हि स्यात्? आस्ते, शेते, धत्ते, रुन्धे, बेभिदाते इत्यादौ यत्र न विकरणाः सन्ति।

एशः शित्त्वम् `लिटस्तझयोरेश्' इत्ययमेश् शित्कर्तव्यः। एतच्चोपक्रम एव व्याख्यातम्।

यच्च लोटो विधत्ते तच्च विकरणव्यवाये न स्यात्---`लोटो लङ्वत्'`एरुः' `सेर्ह्यपिच्च' इत्यादि, पचतु, पचतमित्यादि, स्तौतु, जुहोतु, भिनत्तु, आस्तामित्यादावेव स्यात्।

यच्चाप्युक्तं लङ्लिङोस्तच्च न स्यात्---`नित्यं ङितः',`इतश्च',`तस्थस्थमिपां तान्तन्तामः' `लिङः सीयुट्' `यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यादि, तथा `थासः से' पचसे इत्यादौ न स्यात्? नैष दोषः; विहितविशेषणं विज्ञास्यते---धातोर्विहितस्य लोट इति। यद्येवम्, `विदो लटो वा' इत्यत्रापि विदेर्द्धातोर्विहतस्य लटस्तिबादीनां णलादय इति विज्ञायमाने विन्दति, विन्दतः, विन्दन्तीति लाभार्थस्य विकरणेन व्यवायेऽपि णलादयः प्राप्तुवन्ति? न क्वचिद्धिहितविशेषणं धातुग्रहणमिति सर्वत्र तथा भवितव्यम्। अथ वात्र धातुना विहितं विशेषयिष्यामः, विदिनाऽऽनन्तर्यम्---धातोर्विहितस्य लटो विदेरनन्तरस्येति, `सिजभ्यस्तविदिभ्यश्च' इत्यवापि धातुना विहितं विशेष्यते, अभ्यस्तेन चानन्तर्यम्---धातोर्विहितस्याभ्यस्तादनन्तरस्य ङितो झेरिति; तेनाजक्षिष्यन्, अजागरिष्यन्नित्यादौ न भविष्यति। `आतः' इत्यत्र कथम्, यदि तावद्धातोर्विहितस्याकारादनन्तरस्येति, अलुनन् अपुनन् अत्रापि प्राप्नोति? अथ आकारान्ताद्धातोर्वेहितस्येति, अपिबन्नित्यत्र प्राप्नोति? अस्तु धातोर्विहितस्याकारादनन्तरस्येति, अलुनन् इत्यत्र लुना झि इति स्थिते `श्नाभ्यस्तयोरातः' इति लोपे कृते आकाराभावान्न भविष्यति, नात्र लोपः प्राप्नोति? `ई हल्यघोः' इतीत्वेन बाध्यते। एवमप्याकारान्न भविष्यति? नात्रेत्वं प्राप्नोति, अन्तिभावेन बाध्यते? नात्रान्तिभावः प्राप्नोति, जूस्भावेन बाधनात्? तदेवं लोप ईत्वेन्, ईत्वमन्तिभावेन, अन्तिभावो जुस्भावेन, जुस्भावो लोपेन, लोप ईत्वेनेति लोप ईत्वेनेति चक्रकमव्यवस्था प्राप्नोति? नैष दोषः; आयन्नादिषूपदेशिवद्वचनादुपदेशकाल एव झस्यान्तिभावे कृते लोपः, लोपेन व्यवस्था। किं चात इत्यत्र सिज्ग्रहणमनुवर्तते---आकारान्तात्सिज्लुगन्तादिति, तेन न क्वाप्यनिष्टप्रसङ्गः। तदेवमाध्यायपरिसमाप्तेर्धात्वधिकार इति स्थितम्।

वक्ष्यति तव्यत्तव्यानीयर इति। किं च स्यात् यदि तव्यादिविधो धातोरितित नानुवर्त्तेत ङ्याप्प्रातिपदिकादपि तव्याद्यः स्युः? साधने तव्यादयो विधीयन्ते,

साधनं च क्रियायाः। क्रियाया अभावात्साधनाभावः, साधनाभावाद् ङ्याप्प्रातिपदिकात्तव्यादयो न भविष्यन्ति। कथं तर्हि कर्मादिषु विधीयमाना द्वितीयादयो भवन्ति, नैव प्रातिपदिकार्थस्य साधने द्वितीयादयः, किं तर्हि? शब्दान्तरवाच्यक्रियापेक्षे तस्यैव कर्मादिभावे; तव्यादयस्तु प्रकृतिवाच्यक्रियापेक्षे साधने चरितार्था न ङ्याप्प्रातिपदिकाद्भविष्यन्ति? इदं तर्हि प्रयोजनम्----सत्याणवयेत्यादयो येऽपभ्रंशाः क्रियावचनास्तेभ्यस्तव्यादयो मा भून्निति; न हि ते धातवः, भूवादिपाठाश्रयत्वाद्धातुसंज्ञायाः। किञ्च, सोपसर्गाल्लङादयो मा भूवन्निति धात्वधिकारः क्रियते; अन्यथा प्राकरोत, प्रास्थित, अध्यैष्टेति धातूपसर्गसमुदायस्य विशिष्टक्रियावचनत्वात्ततः प्रत्ययविधावङ्गसंज्ञायामडादिप्रसङ्गः। चोदयति----धातुग्रहणमनर्थकम्, यङ्विधौ धात्वधिकारादिति। `धातोरेकाचः' इत्यत्र यङ्विधौ धात्वधिकारादिति `धातोरेकाचः' इत्यत्र यङ्विधौ यद्धातुग्रहणं तस्येहाधिकारादित्यर्थः। परिहारति-----कृदुपपदसंज्ञार्थं त्विति। एतदेव व्याचष्टे----अस्मिन्निति। अस्मिन्नेवेत्यवधारणं द्रष्टव्यम्। तद्दर्शयति---पूर्वत्र मा भूतामिति। असत्यस्मिन्नधिकारे धात्वधिकारे यत्सप्तम्या निर्द्दिष्टं तदुपपदमित्येतावानर्थः स्यात्, ततश्च पूर्वत्रापि स्यात्-----`च्लि लुङि' लुङन्त उपपदे च्लिरिति। एवं कृत्संज्ञापि धातोर्विहितस्यातिङो भवतीति पूर्वत्रापि स्यात्, ततश्च करिष्यतीत्यत्र स्यप्रत्ययस्य कृत्संज्ञायां कृदन्तं प्रातिपदिकमिति प्रातिपदिकत्वे सति तिङोक्तेऽप्येकत्वे वचनग्रहणादेकवचनस्य चोत्सर्गत्वात्सोरुत्पत्तिः प्रसज्येत। तस्मादस्मिन्धात्वधिकारे यथा स्यातां पूर्वत्र मा भूतामिति पुनर्द्धात्वधिकारः क्रियते।

ननु चाधिकारेण ते संज्ञे विधास्येते, प्रत्ययसंज्ञा च तत्र, ते पूर्वत्र भविष्यत इत्याशंक्य प्रयोजनान्तरमाह----आर्द्धधातुकसंज्ञार्थे चेति। कः पुनरार्द्धधातुकसंज्ञायां द्वितीयधातुग्रहणस्योपयोग इत्यत आह----धातोरित्येवं विहितस्येति। लूभिरिति। अत्र सत्यपि प्रातिपदिकत्वे धातुत्वमप्यस्ति; पूर्वप्रवृत्ताया धातुसंज्ञाया अनिवर्तनात्। ततश्च धातोरेवायं विहित इति आर्धधातुकसंज्ञा स्यादेव। यदि तु शमिधातोरित्यत्र धातुग्रहणस्य द्वितीयस्यार्द्धधातुकसंज्ञार्थं स्वरितत्वं प्रतिज्ञायेत, अयमप्यधिकारः शक्योऽकर्तुम्। वासरूपविधिरप्यधिकारेण सिद्धः, तेन क्सादिभिः सिचः समावेशो न भविष्यति।।

तत्रोपपदं सप्तमीस्थम्।। 3.1.92 ।।

तत्रोपपदं सप्तमीस्थम्।। `सप्तमोस्थम्' इत्यस्यार्थमाह--सप्तम्या निर्दिष्टमिति। सप्तम्या विभक्त्योच्चारितमित्यर्थः। सप्तम्यन्तेन पदेन प्रिपादितमिति वा। अस्मिन्पक्षे सूत्रे सप्तमोशब्देन सप्तम्यन्तमुच्यते। सप्तम्यन्तेपदे कर्मणीत्यादौ प्रतिपाद्यत्वेन स्थितं कुम्भादिकमित्यर्थः। प्रथमे तु पक्षे कमणीत्यादेर्यः सप्तम्या निर्देशः, स एव कुम्भमित्यादेरपि प्रयोगगतस्य सप्तम्या निर्देशः, यथा----`तस्यापत्यम्' इत्यादौ तस्येति सामान्यं विशेषापलक्षणार्थमिति तदोयमेव प्राथम्यं विशेषाणामपि भवति, तद्वदत्रपि। कुम्भकार इति अत्रोपपदत्वात्समासः, कृदुत्तरपदप्रकृतिस्वरत्वं च भवति।

स्थग्रहणमित्यादि। सूत्रेषु यः सप्तम्या विभक्त्या निर्देश उच्चारणं सप्तम्यन्तेन वा पदेन प्रतिपादनं तदेव संज्ञाङ्गमिति प्रतिपत्त्यर्थमित्यर्थः। ननु सप्तमीशब्देन साहचर्यात्सूत्रादिषु सप्तम्या निर्दिष्टं ग्रहीष्यते, नार्थ एतदर्थेन ग्रहणेन? तत्राह----अन्यथा हीति। मुख्यार्थसम्भवे गौणस्याग्रहणात् सप्तम्या एव संज्ञास्यात्; संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधात्। न चासतस्संज्ञिनः संज्ञाशक्या विधातुमिति यत्र सप्तमी श्रूयते तत्रैव स्यादित्यर्थः। स्तम्बेरम इति। `स्तम्बकर्णयोरमिजपोः' इत्यच्, `तत्पुरुषे कृति बहुलम्' इत्यलुक्। यत्र वेति। यत्र सूत्रे सप्तमीश्रुतिः, सप्तमीशब्दस्य श्रवणमित्यर्थः। अशब्दसंज्ञेति स्वरूपग्रहणप्रतिषेधादभ्युपगम्यवादोऽयम्, सर्वथेष्टं सिध्यतीत्यत्र तात्पर्यम्। स्थग्रहणात्त्विति। स्थग्रहणे सति सौत्रसप्तम्युपलक्षितस्य संज्ञाविधानात्सर्वत्र सिध्यतीत्यर्थः।

ननु च लघ्वर्थं संज्ञाकरणम्, तत्किमर्थं गुर्वी संज्ञा क्रियत इत्यत आह----गुरुसंज्ञाकरणमिति। `उपोच्चारितं पदमुपपदम्'---इत्येवमर्थानुगता संज्ञा अन्वर्थसंज्ञा। समर्थपरिभाषाव्यापारार्थमिति। इह यदा स्वार्थद्रव्यलिङ्गात्मकस्त्रिकः। प्रातिपदिकार्तः, तदा नान्तरेण विभक्रिं कर्माधिकरणाद्युपपदमुपपद्यत इत्यवश्यमुत्पाद्या विभक्तिरिति पदविधित्वादेव सिद्धः परिभाषाव्यापारः, पञ्चकपक्षेऽपि तु प्रातिपदिकस्यैव कर्माद्यभिधायित्वेन पदविधित्वाभावात्परिभाषाव्यापारो न स्यादित्यन्वर्थया संज्ञया बलात्प्रवर्त्त्यते? नैतदस्ति; पञ्चकपक्षेऽपि विभक्त्युत्पत्त्या पदत्वे सत्येव प्रत्यय इति प्रतिपादनात्। ननु `गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति वचनात्कथमुपपदस्य मुबन्तत्वम्----सामि स्मर्त्ता भवान्? `उपपदमतिङ्' इत्यत्र हि सुपेति तृतीयान्तमेव निवृत्तम्, सुबिति प्रथमान्तमनुवर्तत इत्यवोचाम, कथमपरथा चर्मकारादौ नलोपादि स्यात्! पश्य कुम्भं करोति कटमिति। धातोरिति वर्त्तते, कर्मादिशब्दाश्च सम्बन्धिशब्दाः, तत एवं विज्ञास्यामः----यस्य धातोर्यत्कर्मेति। एवमपि महान्तं कुम्भं करोतीत्यत्र प्राप्नोति? न वा भवति; धातोर्यत्कर्मेति। एवमपि महान्तं कुम्भं करोतीत्यत्र प्राप्नोति? न वा भवति; महाकुम्भकार इति भवति, यदेतद्वाक्यम्----महान् कुम्भो महाकुस्भः महाकुम्भं करोतीति। यदा त्वेतद्वाक्यम्-----महान्तं कुम्भं करोतीति, तदा नेष्यते। किं च स्याद् यद्यत्र स्यात्? कुम्भशब्दस्य कारशब्देन समासे कृते तदर्थ एकार्थीभावात् महच्चब्देन समासो न स्याद्, अन्वर्थत्वादेव संज्ञायाः सप्तमीनिर्दिष्टत्वेऽपि प्रकृत्यर्थविशेणात्तद्विशेषणानां च उपोच्चारितपदत्वाभावादुपपदसंज्ञा न भवति।

अथ तत्र---ग्रहणं किमर्थम्? धात्वधिकारः प्रतिनिर्दिश्यते------तत्रैतस्मिंस्तृतीये धात्वधिकार इति। नैतदस्ति प्रयोजनम्, अधिकारादप्येतत्सिद्धम्? इदं तर्हि प्रयोजनम्---सप्तमीस्थस्य प्रत्ययोत्पत्तिं प्रति निमित्तत्वं यथा स्यादिति, कथम्? प्रत्यय इति वर्त्तते---सप्तमीस्थमुपपदसंज्ञं भवति, तत्र चोपपदे सत्येव प्रत्यय इति। अथ कर्मणीत्यादिका सत्सप्तमी, तत्कुतोऽसत्युपपदे प्रत्ययप्रसङ्गः? न; कर्मणीत्यादिका सौत्री स्पतम्यर्थापेक्षा, तथा हि सत्यणप्रत्ययस्याभिधेयं कर्म स्यात्----यथा---`धः कर्मणि ष्ट्रन्' इति, तथा चोपपदत्वं न प्रतीयेत, अतो यथेत्संज्ञार्थमनुनासिकत्वं प्रतिज्ञायते तथार्थनिरपेक्षा केवलमुपपदसंज्ञाया लिङ्गं सप्तमी, तथा न छातोरण् भवति कर्म चोपपदमित्येतावानर्थः स्यात्। कर्मणः प्रत्ययोत्पत्तिं प्रति निमित्तत्वं न प्रतीयेत, तस्मात्तदर्थं तत्र---ग्रहणम्, किमिदानीं हेय एवायं ग्रन्थस्तत्रैतस्मिन्धात्वधिकार इति? न ब्रूमो हेय इति, सोपस्कारस्तु भवति---एत---स्मिन्धात्वधिकारे यत्सप्तम्या निर्दिष्टं तदुपपदसंज्ञं भवति, तत्र

च सति प्रत्यय इति।।
कृदतिङ्।। 3.1.93 ।।
कृदतिङ्।। तिङ्वर्जित इति। तिङ्त्वेन त्यक्तस्तिङ्त्वेन रहितः, तिङोऽन्य इति यावत्।
अतिङिति किमिति। इह क्रियमाणोऽप्ययं प्रतिषेधः स्वाश्रयामेव तिङः कृत्सञ्ज्ञां बाधीतुं प्रभवति, न तु लकारस्य कृत्त्वात्स्थानिवद्भावेन प्राप्ताम्; `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति वचनादिति मत्वा प्रश्नः। तिङ्भाविनो लकारस्यैव कृतसञ्ज्ञा प्रतिषिद्ध्यते, प्रतिषेधसामर्थ्याद्वा स्थानिवद्भावो न भविष्यतीत्युत्तरम्। चीयात्स्तूयादिति। ननु च ज्ञापकादेतत्सिद्धम्, यदयम् `अकृत्सार्वधातुकयोः' इति पृथक् सार्वधातुके प्रतिषेधं शास्ति, तद् ज्ञापयति----अकृदिति प्रतिषेधो न तिङ्क्षु भवतीति। यदि स्यात्; चिनुयात्, सुनुयादित्यादौ सार्वधातुकेऽपि कृत्प्रतिषेधादेव दीर्घो न भविष्यति, किं पृथक् सार्वधातुकपर्युदासेन! इह तर्हि पचति, पठति----`ह्रस्वस्य पिति कृति तुक्' इति तुङ् मा भूदिति? तुग्विधौ धात्वादेरित्यतो धातुग्रहणमनुवर्तिष्यते। एवमपि---चिकीर्षति, जिहीर्षतीत्यत्र प्राप्नोति? शपा व्यवधानान्न भविष्यति। एकादेशे कृते नास्ति व्यवधानम्? `एकादेशः पूर्वविधौ स्थानिवद्भवति' इति व्यवधानमेव। नात्र स्थानिवद्भावः प्राप्नोति; परत्वादन्तवद्भावेन बाद्ध्यते। तस्माच्चिकीर्षतीत्यादौ तुङ्मा भूदित्यतिङिति प्रतिषेधः कर्त्तव्यः। किञ्च, तिङन्तस्य कृदन्तं प्रातिपदिकमिति प्रातिपदिकसंज्ञायां पचेरन्---नलोपः प्राप्नोति, पपाच ब्राह्मणी-----टाप्प्राप्नोति, सर्वत्र च स्वद्युत्पत्तिः प्रसज्येत, तदेतदस्मादन्यार्थादतिङिति प्रतिषेधादेव सिद्धे चीयादित्यादौ ज्ञापकं नाश्रयितव्यमिति वृत्तिकारो मन्यते स्म।।
वाऽसरूपोऽस्त्रियाम्।। 3.1.94 ।।
वाऽसरूपोऽस्त्रियाम्।। `असरूपः' इति पदच्छेदः, अन्यथा लाधवे विशेषाभावलादसन्देहर्थं `सरूपोऽस्त्रियां वा' इति ब्रूयात्। अपवादविषयेऽपि केषाञ्चित्कृतां प्रवृत्तिर्यथा स्यादित्येवमर्थमिदं वचनम्। यथोक्तम्-----असरूपस्य वावचनमुत्सर्गस्य बाधकविषये निवृत्त्यर्थमिति। परिभाषा चेयम्, अस्मिन्धात्वधिकारे स्त्र्यधिकारव्यतिरेकेण यान्यसरूपस्यापवादस्य विधायकानि शास्त्राणि तच्छेषभूता, तत्र तत्र वचने क्रियमाणे गौरवं स्यादिति साधारणरूपेण परिभाष्यते। तत्र च `असरूपः' इति व्यर्थ कृण्मात्रस्य विकल्पने सर्वस्यैवासरूपत्वाद्यत्किञ्चित्कृदपेक्षया; असरूपपदं चैतत्सापेक्षं प्रतियोगिनि यतोऽत्र भिन्नरूपत्वमसरूपत्वमित्यते। केनचिद्धि किञ्चित्सरूपमसरूपं वा भवति, तत्र केनासरूप इत्यपेक्षायां स्वविधानवेलायां यः स्वस्मिन्विषये प्राप्तः स एव बुद्धिस्थः प्रतियोगी गम्यते, अपवादविधानसमये चोत्सर्गः, तमपि विषयमवागात्रृद्धुमुढौकमान उपारूढो बुद्धौ भवतीति तदपेक्षया भिन्नरूपोऽपवाद एवात्रासरूपो विवक्षित इत्याह---असरूपोऽपवादप्रत्यय इति। एवं स्थिते यद्ययमुत्पत्तिविकल्पस्स्याद्, अपवादप्रत्ययो वा भवतीति, ततः स्वविषये कामं विकल्पस्तस्य लभ्यते, न तूत्सर्गः प्रवर्त्तेत। तत्रातद्विषयो ह्यसौ, उत्सर्गापवादशास्त्रयोर्हि प्रमितिव्यापारे पर्यवसिते पश्चादियमत्रैव प्रदेशेस्थिताऽपवादस्य पक्षे प्रवृत्तिं प्रतिबध्नाति। अपवादशास्त्रेण यः स्वीकृतो विषयस्तद्व्यतिरिक्तविषया सामान्यशास्त्रस्य प्रमितिरित्यपवादस्याप्रवृत्तावपि नैवोत्सर्गस्य तस्मिन्विषये प्रमितिः प्रवृत्तिर्वोपपद्यते, तद्धितवत्; तद्यथा----दक्षस्यापत्यम् अत इञि विकल्पिते पक्षेऽण् न भवति, अपि तु वाक्यमेव भवति, तत्कस्य हेतोः? `समर्थानां प्रथमाद्वा' इति तटस्थेन पक्षे प्रवृत्तिर्निरुद्ध्यते, न पुनरेकवाक्यतया प्राप्तिरेव विकल्परूषितेति, तथेहापीति। अपवादाभावपक्षे प्रकृतिरेव कर्त्राद्यभिधानायानुज्ञाता स्याद्, यथाग्निचिदित्यादौ क्विबादिलोपे, तदाह---तत्रोत्पत्तिर्वा प्रसङ्गो यथा तद्धित इति।
तमिममुत्पत्तिविकल्पपक्षे दोषं द्दष्ट्वा बाधकत्वं विकल्प्यत इत्याह---वाबाधको भवतीति। उक्तं च `सिद्धं त्वसरूपबाधकस्य वावचनात्' इति, असरूपो वा बाधको भवतीति वक्तव्यमित्यर्थः। ननु तत्रतत्रोच्यते---यत्रान्यत्क्रियापदं न श्रूयते तत्रास्तिर्भवतिपर इति, ततश्चासरूपो वेत्युक्ते भवतीत्येवाध्याहारो युक्तः, न पुनर्वा बाधक इति? उच्यते---उत्पत्तिविकल्पस्य प्रयोजनं केवलायाः प्रकृतेः प्रयोगः, केवला च प्रकृतिः स्वार्थमात्रमभिधातुमसमर्था, किं पुनः कर्त्रादिकमभिधास्यति! प्रकृतिप्रत्ययसमुदाये हि प्रयुज्यमानेऽन्वयव्यतिरेकाभ्यामयं प्रकृत्यर्थः, अयं प्रत्ययार्थ इति व्यवस्थाप्यते; अनुत्पन्नप्रत्यया तु प्रकृतिर्न कञ्चिदप्यर्थ गमयति। प्रयोगोऽपि हि तस्या दुर्लभः; परश्चेति नियमात्। तद्धिते त्वनुत्पत्तिपक्षेऽप्युत्सर्गप्रवृत्तिव्यतिरेकेण प्रत्ययान्तरमस्ति षष्ठी, इह तु न तथेति सामर्थ्याद्बहिरङ्गमपि बाधकत्वमपि कल्प्यते। ननु चच शास्त्रं शास्त्रेण बाद्ध्यते, न पुनः कार्य कार्येण, निदानोच्छेदेनैव हि निदानिन उच्छेदः शक्यते कर्त्तुम्, न हि प्रदीपेऽनुच्छिन्ने तत्प्रकाश उच्छिद्यते, तत्किमुच्यते---अपवादप्रत्यय इति, एवं तु वक्तव्यम्----अपवादशास्त्रमिति? उच्यते----सर्वस्यैवापवादशास्त्रस्य स्वगतमसारूप्यमव्यभिचारीति प्रत्ययद्वारकं तदाश्रयणीयमित्यपवादप्रत्यय इत्युक्तम्। एवम्भूतस्य प्रत्ययस्य विधायकं शास्त्रमित्यर्थः। यद्वा----प्रत्ययस्य बाधकत्वविकल्पसामार्थ्याच्छास्त्रमपि पक्षे बाधकं भविष्यति।
अथ वा वृत्तौ वस्तुमात्रं दर्शितम्; यथा त्वयमर्थ उपपद्यते तथा सूत्रं व्याख्येयम्। तत्रेदं व्याख्यानम्---परिभाषेयमित्युक्तम्, तत्रेक्परिभाषावदियमपि पदमुपस्थापयति----अस्मिन्धात्वधिकारे यत्रासरूपोऽपवादप्रत्ययो विधीयते तत्र वेत्युपतिष्ठते, स्त्र्यधिकारे तु नेति। किं कृतं भवति? `ददातिदधात्योर्विभाषा' इत्यादिवत् प्रमितिरेव विकल्परूषिता भवति, ततस्तद्वदेवोत्सर्गस्य प्रवृत्तिसिद्धिरिति। अथ `असरूप उत्सर्गप्रत्ययोऽपवादविषये वा भवति' इति विज्ञायमाने को दोषः? न खलु कश्चिद्दोषः; अपवादविकल्पे प्राप्ते विभाषा, उत्सर्गविकल्पे त्वप्राप्तविभाषेति, किन्तु प्रतियोग्यपेक्षमसरूपपदमप्यपवादमेव गोचरयतीत्युक्तम्।
`अस्त्रियाम्' इत्यत्र पक्षत्रयं सम्भवति---अभिधेयसप्तमी वा स्यात्---स्त्रियामभिधेयायां वासरूपो न भवतीति, स्त्रियामित्येव वा विहितस्यासरूपस्य निषेधः स्यात्---स्त्रियामित्युच्चार्य ये विधीयन्ते ते नेति, स्त्रीग्रहणं वा स्वर्यते स्वरितेनाधिकारावगतिर्भवतीति---स्त्रियां क्तनिन्नित्यस्मिन्नधिकारे नेति। तत्राद्ये पक्षे विक्षिपा, विक्षोपिका, विक्षेप्तेति कविषये ण्वुल्तृचौ न स्याताम्। द्वितीये तु `कर्मव्यतिहारे णच् स्त्रियाम्' व्यावक्रोशी, व्यावक्रुष्टिरिति णयो विषये क्तिन् न

स्यात्, द्वयोरपि स्त्रियामित्युच्चार्य विधानादिति, ममाद्ययोः पक्षयोर्दोषं दृष्ट्वा तृतीयं पक्षमाश्रित्याह----स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वेति। केचिदाहुः---- अपवादप्रत्ययं वर्जियित्वेति वक्तव्ये प्रत्ययं वर्जयित्वेति वचनं प्रत्ययमात्रपरिग्रहार्थम्, तेनोत्सर्गापवादयोर्द्वयोरपि स्त्र्यधिकारनिवेशिनोरयं प्रतिपेधः। किं सिद्धं भवति? आसना, आस्या-----स्त्र्यधिकारविहितेनापि युचापवादेन ऋहलोर्ण्यतः समा वेशः सिद्धो भवति। घञस्तु क्तिन्नादिभिरनभिधानादसमावेश इति। अन्ये तु----अपवादो वा बाधको भवतीति प्रकृतत्वात्स एवात्र प्रत्यय इति व्याचक्षते, तेन घञः क्तिन्नादिभिरसमावेशः। आस्येत्यत्र कृत्यल्युटो बहुलमिति ण्यदिति। ण्वुल्तृचावुत्सर्गाविति। चावुत्सर्गाविति। धातुमात्रे विधानात्। इगुपधज्ञाप्रीकिरः क इत्यपवाद इति। धातुविशेषे विधानात्। किं पुनः प्रयोगगतमसारूप्यम्? आहोश्विदुपदेशगतम्? किं चातः? प्रयोगे लादेशेषु प्रतिषेधः----ह्योऽपचदित्यत्र लुङपि प्राप्नोति, प्रयोगे ह्यसरूपत्वात्, लङ्यनच्कस्तकारः प्रत्ययः लुङि अपाक्षीदितीच्छब्दः; श्वः कर्तेत्यत्र लृडपि प्राप्नोति? ज्ञापकात्सिद्धम्, यदयम् `हशश्वतोर्लङ् च' इति लिड्विषये लङं शास्ति, तज् ज्ञापयति----न लादेशेषु वासरूपविधिरिति। एवमपि ग्रामणीः, ग्रामनाय इति क्विबादिविषयेऽणादयो न स्युः, न हि क्विबादयः प्रयोगे रूपवन्तः, लोपविधानात्तेषाम्। तस्मादुपदेशगतमसारूप्यम्। यद्येवम्, अनुबन्धभिन्नेषु विभाषाप्रसङ्गः, काणोरपि ह्युपदेशे भिन्नं रूपम्, प्रयोगे तु समानम्, तत्राह---नानुबन्धकृतमिति। अनुबन्धानामनेकान्तत्वात्तत्कृतमसारूप्यं नाश्रीयते, तथा च `उदीयां माङः' इति श्रूयमाणेऽपि ङकारे तस्यानेकान्तत्वादव्याहतमेजन्तत्वमित्यात्वं प्रयुक्तम्। `ददातिदधात्योर्विभाषा' इति विभाषाग्रहणं च लिङ्गमस्यार्थस्य; अन्यथाऽनुबन्धकृतादसारूप्यादेव शविषये णो भविष्यतीति किं तेन!

इह क्तल्युट्तुमुन्खलर्थेषु वासरूपवधिः प्राप्नोति। हसितं छात्रस्य शोभनं हसनं छात्रस्य, अत्र क्तल्युडविषये घञपि प्राप्नोति। तुमुन----इच्छति भोक्तुम्, अत्र `इच्छार्थेषु लिङलोटौ' इति लोट् प्राप्नोति, तुमुना च बाध इष्यते, लिङ् तु `लिङ् च' इति वचनादभवत्येव। यद्येवम्, अस्मादेव नियमाल्लोडपि न भविष्यति। कलर्थ----आतो युच्' ईषत्पानः, अत्र खलपि प्राप्नोति। ननु स्त्र्यधिकारे तावदस्त्रियामिति प्रतिषेधादस्याप्रवृत्तिः परस्तादपि विच्छिन्नत्वादेव न भविष्यति? स्यादेतदेवम्, यद्ययमधिकारः स्यात्, परिभाषा त्वेषेत्युक्तम्। इष्यते च स्त्र्यधिकारादूर्ध्वमपि वासरूपविधिः-----आसित्वा भुङ्क्ते,आस्यते भोक्तुमित्यपि यथा स्याद्; अन्यथा भोजनार्थत्वादासनस्य पौर्वकाल्यमवगम्यते तुमर्थाधिकाराद्भावे क्त्वाप्रत्ययस्तत्रैव च लकार इति समानविषयत्वाद्वाध्यबाधकभावः स्यात्। तथा कालो भोक्तुम्, कालो भोजनस्य---मुमुना ल्युटो बाधः स्यात्। तस्मात् स्त्र्यधिकारस्य परस्तादपि वासरूपविधिरेषितव्यः, `अर्हे कृत्यतृचश्च' इत्यत्र कृत्यतृज्ग्रहणं ज्ञापकम्---स्त्र्यधिकारस्य परस्तादनित्यैषा परिभाषेति। तस्मात् क्तल्युट्तुमुन्खलर्थेषु प्रतिषेधो।वक्तव्य एव।।

कृत्याः प्राङ् ण्वुलः।। 3.1.95 ।।

कृत्याः प्राङ् ण्वुलः।। ण्वुलतृचाविति वक्ष्यतीति। `रोगाख्यायां ण्वुल् बहुलम्' मित्ययं त्ववधिर्न भवति; `अर्हे कृत्यतृचश्च' इति पृथक् तृचो ग्रहणात्। यद्येवम्, `प्राङ् ण्वुलः' इति न वक्तव्यम्, `कृत्याः' इत्येवास्तु, तृज्ग्रहणादेव ज्ञापकात्परतोऽनुवृत्तिर्न भविष्यति, योगापेक्षं च ज्ञापकम् `ण्वुल्तृचौ' इत्यस्माद्योगात्प्राक् कृत्यसञ्ज्ञाधिकार इति? सत्यम्; `कृत्याः' इत्येतावदेव पठितं सूत्रकारेण। वृत्तिकारस्तु, भाष्ये पूर्वपक्षरूपेण पठितं सूत्रे प्रचिक्षेप। विचित्रा हि वृत्तेः कृतिर्वृत्तिकारेण! `कृत्याः' इति बहुवचनमनुक्तसमुच्चयार्थम्, तेन `केलिमर उपसङ्ख्यानम्' इत्यादि नोपसंख्येयं भवति।।

तव्यत्तव्यानीयरः।। 3.1.96 ।।

तव्यत्तव्यानीयरः।। वसेरिति। `वस निवासे' इत्यस्य ग्रहणम्, न तु `वस आच्छादने' इत्यस्य लुग्विकरणस्य। `तयोरेव कृत्यक्तखलर्थाः' इति वचनात्कर्त्तरि न प्राप्नोतीति वचनम्, णिद्वद्भावार्थं च। वास्तव्य इति। तद्धितान्तो वा पुनरेषभविष्यति, वास्तुनि भावो वास्तव्यः, दिगादित्वाद्यत्। अवास्तव्य इत्यत्र स्वरभेदो नास्ति, `कृत्योकेष्णुच्' इति यदन्तोदात्तत्वं तदेव `ययतोश्चातदर्थे' इत्यनेन भविष्यति। केलिमर इति। ककारो गुणवृद्धिप्रतिषेधार्थः, रेफस्स्वरार्थः। कर्मकर्त्तरि चायमिष्यत इति। भाष्ये तु `पचेलिमा माषाः, पक्तव्याः; भिदेलिमास्सरलाः, भेत्तव्याः' इति शुद्धे कर्मणि प्रदर्शितम्।।

अचो यत् ।। 3.1.97 ।।

अचो यत्।। अज्ग्रहणं किमिति। पूर्वसूत्र एव यद्ग्रहणं कर्त्तव्यमिति प्रश्नः। यावतेत्यादि। द्वये हि धातवः----अजन्ताः, हलन्ताश्च। तत्र हलन्ताद् ण्यतं वक्ष्यति, अतः पारिशेष्यादजन्तादेव यद्भविष्यतीत्यभिप्रायः।

अजन्तभूतपूर्वादपीति। पूर्व भूतो भूतपूर्वः सुप् सुपा' इति समासः, अजन्तश्चासौ भूतपूर्वश्च अजन्तभूतपूर्वः। दित्स्यं धित्स्यमिति। दाञो धाञश्च सन्, द्विर्वचनम्, `सनिमीमाघु' इत्यादिना इस, `सः स्यार्द्धधातुके' इति तत्वम्, `अत्र लोपोऽभ्यासम्य' दित्स धित्स इति स्थिते, अनुत्पन्न एवार्द्धधातुके बुद्धिस्थे एवातो लोपे कृते सम्प्रत्ययं कृते सम्प्रत्ययं हलन्त हि ण्यत् स्याद्; अज्ग्रहणात्तु भूतपूर्वमजन्तत्वमाश्रित्य यद्भवति। तेन `यतोऽनावः' इत्याद्युदात्तत्वम्, ण्यति तु तित्स्वरितं स्यात्। चिकीर्ष्यमित्यादौ तु ण्यद्यतोर्विशेषाभावः। `यतोऽनावः' इत्यत्र हि `द्व्यचः' इति वर्त्तते। यदा त्वार्द्धधातुके परतो लोपः, तदैतदज्ग्रहणं न कर्तव्यमेव।

तकिशसीत्यादि। `तकि हसने',`शसु हिसायाम्',`चते चदे याचने',`यती प्रयत्ने',`जनी प्रादुर्भावे',`यतोऽनावः' इति स्वरार्थ जनेर्यद्विधानं जन्यमिति रूपम्, न तु ण्यतापि सिद्धम्; `जनिवध्योश्च' इति वृद्धिप्रतिषेधात्। शसिमपि केचित्पठन्ति-----तद्वा नाराशंस्यं राद्व्यं च।

हनो वा वध चेति। हन्तेर्वा यत्प्रत्ययो भवति, तत्सन्नियोगेन च वधादेशः। वध्यमिति। तद्धितान्तो वा पुनरेष भविष्यति---वधमर्हतीति वध्यः, `दण्डादिभ्यः' इति यत्।यदि तद्धितः, समासो न प्राप्नोति---असिवध्यः, मुसलवध्य इति, कृति पुनः सति `कृर्तृकरणे कृता बहुलम्' इति समासः सिद्धो भवति। घात्यमिति। `हनस्तोचिण्णलोः' इति तत्वम्, `हो हन्तेर्ञ्णिन्नेषु' इति कुत्वम्।।

पोरदुपधात् ।। 3.1.98 ।।
पोरदुपधात्।। पाक्यं वाक्यमिति। `चजोः कु घिण्ण्यतोः' इति कुत्वम्। कोप्यं गोप्यमिति। `कुप कोपने', `गुप व्याकुलत्वे'। आप्यमिति। `आप्लृ व्याप्तो' एषु त्रिषु `यतोऽनावः' इत्याद्युदात्तत्वं न भवति, तित्स्वरित एव तु भवति।।
शकिसहोश्च।। 3.1.99 ।।
शकिसहोश्च।। शक्लृ शक्ताविति। उपलक्षणमेतत्, `शक विभाषितो मर्षणे' इत्यस्यापि ग्रहणम्। षह मर्षण इति। ननु `षह शक्यर्थे' इत्यस्यैव परस्मैपदिनोऽननुबन्धकस्य ग्रहणं प्राप्तम्, नैष दोषः; प्रत्ययविधिविषयत्वादननुबन्धकपरिभाषायाः, तस्माद् द्वयोरपि ग्रहणम्। अन्ये तु `कृत्यल्युटो बहुलम्' इति वृत्तिकारोक्तयोरेव ग्रहणमिच्छन्ति।।
गदमदचरयमश्चानुपसर्गे।। 3.1.100 ।।
गदमदचरयमश्चानुपसर्गे।। अनुपसर्गेम्य इति। सूत्रे `अनुपसर्गे' इति व्यत्ययेन पञ्चम्यर्थे सप्तमीति भावः। अत एवोपसर्गादन्योऽनुपसर्गस्तस्मिन्ननुपसर्गे उपपद इत्यर्थो न भवति। एवं हि केवलेभ्यो न स्यात्, `वदः सुपि क्यप् च' इत्यत्र सुब्ग्रहणमनर्थकं स्यात्? `अनुपसर्गे' इति हि वर्त्तते तत्र नञिवयुक्तन्यायेयेनोपसर्गसदृशस्य सुबन्तस्य ग्रहणं भविष्यति।
नियमार्थमिति। अनुपसर्गादेव यथा स्यात्सोपसर्गान्मा भूदिति। कथं तर्हि तेन न तत्र भवेद्विनियम्यमिति? प्रमादपाठोऽयम्, विनियाम्यमिति पाठः। एतेन `इति यत्नोपचर्यम्' इति व्याख्यातम्।
चरेराङि चागुराविति। सोपसर्गार्थं वचनम्। आचया देश इति गन्तव्य इत्यर्थः। उपनेता=गुरुः।।
अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु।। 3.1.101 ।।
अवद्यपण्यवर्या गह्यपणितव्यानिरोधेषु।। अवद्यमिति। निपात्यत इति। वदेर्नञ्युपपदे `वदः सुपि क्यप् च' इति यत्क्यपोः प्राप्तयोर्यदेव यथा स्याद्----गर्ह्य एव च यथा स्यादित्युभयार्थं निपातनम्। अवद्यं पापमिति। अवदनार्हत्वात्। अनुद्यमन्यदिति। गुरुनामादि। तद्धि गर्ह्यं न भवत्यथ च वदनार्हमपि न भवति। अत्र क्यबेव भवति, यजादित्वात्सम्प्रसारणम्, `नलोपो नञः',`तस्मान्नुडचि'। पण्यं व्यवहर्त्तव्यमिति। निपातनस्य रूढ्यर्थत्वात् पण्यशब्दस्य च तत्रैव रूढत्वात्। उक्तं च-----
धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च।
अनुबन्धविकाराणां रूढ्यर्थं च निपातनम्।। इति।
पाण्यमन्यदिति। स्तुत्यमित्यर्थः। वर्येति स्त्रियां निपात्यत इति। सूत्रेऽवद्यादीनि अविभक्तिकानि पृथक् पदानि, न तु द्वन्द्वस्य जसन्तनिर्देश इति भावः। शतेन वर्येति। `वृङ् सम्भक्तौ' इत्यस्येदं निपातनम्; तत्रैवानिरोधसम्भवात्। वृत्यान्येति। `वृञ् वरणे' `एतिस्तुशास्वृ' इत्यादिना क्यप्। वार्या ऋत्विज इति। `एतिस्तुशास्वृ' इत्यत्र वृञो ग्रहणम्, वृङस्तु स्त्रीलिङ्गादन्यत्र ऋहलोर्ण्यदेव भवति। भट्टिकाव्ये तु पुँल्लिङ्गेऽपि यदेव प्रयुक्तः----`सुग्रीवो नाम वर्योऽसौ भवता चारुविक्रमः' इति।।
वह्यं करणम्।। 3.1.102 ।।
वह्यं करणम्।। वहेर्द्धातोः करणे यत्प्रत्ययो निपात्यत इति। अर्थव्याख्यानमेतत्। `वह्यमिति निपात्यते करणं चेद्भवति' इति वक्तुं युक्तम्।।
अर्यः स्वामिवैश्ययोः।। 3.1.103 ।।
अर्यः स्वामिवैश्ययोः।। स्वमिन्यन्तोदात्तत्वञ्चेति। अथ यो वैश्यः स्वामी च, तत्र कथम्? उच्यते-----वैश्याख्यायामाद्युदात्तत्वम्, स्वाम्याख्यायामन्तोदात्तत्वम्। तथा च `अर्यस्य स्वाम्याख्यायाम्' इति फिट्सूत्रे आख्याग्रहणं कृतम्। आर्यो ब्राह्मण इति। प्राप्तव्य इत्यर्थः।।
उपसर्या काल्या प्रजने।। 3.1.104 ।।
उपसर्या काल्या प्रजने।। उपपूर्वात्सर्त्तेरिति। भौवादिकस्य जौहोत्यादिकस्य च `सर्त्तिशास्त्यर्त्तिभ्यश्च' इति निर्देशात्सूत्राद्बहिरपि लुका निर्द्देशः। प्राप्तकाला काल्येति। `तदस्य प्राप्तम्' इति वर्त्तमाने `कालाद्यत्' इति यत्। प्रजननम्=प्रजनः, भावे घञ्, `जनिवध्योश्च' इति वृद्धिप्रतिषेधः। उपसर्या गौरिति। गर्भाधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः, वृषभोपगमनस्य प्राप्तकालेति यावत्। उपसार्येति। उपसरणीया, प्राप्तव्येत्यर्थः।।
अजर्यं सङ्गतम्।। 3.1.105 ।।
अजर्यं सङ्गतम्।। सङ्गमने कर्त्तरीति। सूत्रे `सङ्गतम्' इति `नपुंसके भावे क्तः।' इति दर्शयति। कर्त्तरीति `तयोरेव कृत्यक्तखलर्थाः' इति भावे भा भूदिति निपातनाश्रयणम्। तेन भावे सङ्गतकर्तृकेऽपि ण्यदेव भवति----अजार्यं सङ्गतेनेति। अजरितेति। तृच्।।
वदः सुपि क्यप् च।। 3.1.106 ।।
वदः सुपि क्यप् च।। अनुपसर्गे इति वर्त्तत इति। `सत्सूद्विष' इत्यादौ सूत्रे वक्ष्यति----उपसर्गग्रहणं ज्ञापकमन्यत्र सुब्ग्रहणे उपसर्गग्रहणं न भवतीति। तच्चावश्यं तथैवाश्रयणीयम्----`सुप्यजातौ' `स्पृशोऽनुदके क्विन्' इत्यादावुपसर्गग्रहणं मा भूदिति, ततश्च नार्थ इहानुपसर्गग्रहणानुवृत्त्या। सुबन्ते उपपदे अनुपसर्ग इति। यद्यपि पूर्वं बहुव्रीहेः पञ्चम्यर्थे सप्तमीति व्याख्यातम्, इह तु विरोधाभावात्तत्पुरुषात्स्वार्थ एव सप्तमीति भावः। ब्रह्मोद्यमिति। भावे क्यप्, पूर्ववत्संप्रसारणम्। ब्रह्मवेदः, तस्य वदनमित्यर्थः। कथं पुनः सकर्मकाद्भावे कृत्यप्रत्ययः यावता भावे चाकर्मकेभ्यः `तयोरेव कृत्यक्तखलर्थाः' इति वक्ष्यति;

न च कर्माविवक्षयाऽकर्मकत्वम्; ब्रह्मेति कर्मणः श्रुतत्वात्? तस्मादुत्तरसूत्रादिह भावग्रहणमपेक्षणीयमित्याहुः।।

भुवो भावे।। 3.1.107 ।।

भुवो भावे।। यत्तु नानुवर्तत इति पूर्वसूत्रे चानुकृष्टत्वात्। ननु `तयोरेव कृत्यक्तखलर्थाः' इति भावकर्मणोः कृत्या विधीयन्ते, `अनुपसर्गे' इति चानुवर्त्तते, अनुपसर्गश्च भवतिरकर्मक एव, अतः सामर्थ्याद्भाव एव भविष्यति? ननु च प्राप्त्यर्थः सकर्मक एव? सत्यम्; व्यक्तिनिर्द्देशात्, प्राथम्याच्च सत्तार्थस्यैव ग्रहणम्। न चच कालादिकर्मणि प्रसङ्गः अनभिधानात्, तत्किमर्थ भावग्रहणम्? इत्यत्राह---भावग्रहणमुत्तरार्थमिति। `हनस्त च' इति सकर्मकादपि हनो भावे यथा स्याद्---ब्राह्महत्या वर्तत इति, कर्मणि मा भूत्----त्वया घात्यो वृषल इति।।

हनस्त च।। 3.1.108 ।।

हनस्त च।। ब्रहामहत्येति। स्वभावतः स्त्रीलिङ्गत्वमस्य क्यबन्तस्य, यथान्येषां भावे कृत्यानां नपुंसकत्वम्। छन्दसि तु क्यबन्तस्यापि नपुंसकत्वमिष्यते----सनादेव दस्युहत्याय जज्ञिषे। छन्दिस च स्त्रियां चिद्वक्तव्यः----अस्यै ब्रह्महत्यायै तृतीयं परिगृहाणेति। प्रघातो वर्तत इति। किं पुनः कारणं घञ् प्रत्युदाह्रियते, न ण्यदित्यत आह----ण्यत्तु भावे न भवतीति। कर्माविवक्षायामकर्मकत्वे सत्यपीति भावः। सकर्मकात्तु भावे ण्यतः प्राप्तिरेव नास्ति।।

एतिस्तुशास्वृदृजुषः क्यप्।। 3.1.109 ।।

एतिस्तुशास्वृदृजुषः क्यप्।। `एति' इति तिपा निर्द्देशः किमर्थः? धातोर्ग्रहणं यथा स्यादिवर्णान्तस्य मा भूदिति। अत्र चेण एव ग्रहणम्, नेङिकोः, तयोरधिपूर्वयोरेव प्रयोगादेतीति निर्देशानुपपत्तेः। तथा च----`रक्षार्थ वेदानामध्येयं व्याकरणम्' इति भाष्ये यदेव प्रयुक्तः। केचित्तु `इण्वदिक इति वक्तव्यम्' इति वचनादधीत्या मातेत्यप्युदाहरन्ति। स्तुत्य इति। ह्रस्वस्य तुक्। शिष्य इति। `शास इदङ्हलोः' इतीत्त्वम्, `शासिवसिघसीनां च' इति षत्वम्, `आङः शासु इच्छायाम्' इत्यस्यापि ग्रहणमविशेषात्। तेनाशास्यमिति धातुस्वरेण मध्योदात्तं पदं भवति। ण्यति तु `गतिकारकोपपदात्कृत्' इति अन्तस्वरितत्वं स्यात्। केचित्तु `शासु अनुशिष्टौ' इत्यस्यैव ग्रहणमिच्छन्ति। ओरावश्यक इत्यादि। इह स्तुग्रहणस्यावकाश आवश्यकाविवक्षायाम्----स्तुत्य इति; `ओरावश्यके' इत्यस्यावकाशः----अवश्यलाव्यमिति; अवश्यस्तुत्य इत्यत्रोभयप्रसङ्गे परत्वाद् ण्यत्स्यात्, पुनः क्यब्ग्रहणात्क्यबेव भवति। वृग्रहणे वृञो ग्रहणमिष्यते न वृङ इति। ज्ञापकात्, यदयम् `ईडवन्दवृशंसदुहां ण्यतः' इति वार्यशब्दस्याद्युदात्तत्वं शास्ति, तत्र चेडिवन्दिभ्यां साहचर्यादात्मनेपदिनो वृङो ग्रहणम्।

शंसिदुहीत्यादि। `शंसु स्तुतौ' `दुह प्रपूरणे' गुहू `संवरणे' । शस्यमिति। क्यप्पक्षे उपधालोपः। भाष्ये एतदुपसङ्ख्यानं न द्दष्टम्।

आङ्पूर्वादिति। `अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु'। आज्यमिति। `कृत्यल्युटो बहुलम्' इति करणे क्यप्, पूर्वदुपधालोपः। अथ कस्माद् ण्यत्येवोपधालोपो नोक्तः? कुत्वप्रसङ्गात्तित्स्वरप्रसङ्गाच्च। तस्मात्क्यबन्त एषः। यद्येवम्, अवग्रहः प्राप्नोति---आज्यमित्या अज्यमिति? अवगृह्यताम्, को दोषः? न हि लक्षणेन पदकारा अनुवर्त्त्याः, किन्तु पदकारैर्नाम लक्षणमनुवर्त्त्यम्। पदविच्छेदो हि पौरुषेयः, संहितैव तु नित्या। अर्थ चार्थनिश्चयाभावे नावगृह्णन्ति; यथा---- हरिव इति, किं हरिशब्द इकारान्त उत हरिच्छब्दस्तकारान्त इति सन्देहात्।

कथमिति। इण एवैतद्रूपमिति मन्यमानस्य प्रश्नः। एरिति। `इ गतौ' इत्यस्य।।

ऋदुपधाच्चाक्लृपिचृतेः।। 3.1.110 ।।

ऋदुपधाच्चाक्लृपिचृतेः।। क्लृपिचृती वर्जयित्वेति। `क्लृपू सामर्थ्ये' `चृती हिंसाग्रन्थनयोः' कृपेर्लत्वस्यासिद्धत्वादृकारलृकारयोस्सवर्णसंज्ञाविधानाच्च ऋदुपधात्वम्। कृत संशब्दने ण्यदेव भवतीति। `अनित्यण्यन्ताश्चुरादय' इति णिजभावपक्ष इति भावः। इदमेव च तपरकरणं लिङ्गम्----अनित्यण्यन्ताश्चुरादय इति। णिजन्तात्तु णिलोपे कृते चाकृते च दित्स्यं धित्स्यमितिवद्यदेव भवति।

पाणिसर्ग्येति। पाणिभ्यां सृज्यत इत्युपपदसमासः, पूर्ववत्कुत्वम्। एवं समवसर्ग्येत्यत्रापि।।

ई च खनः।। 3.1.111 ।।

ई च खनः।। दीर्घोच्चारणं किमर्थम्, न `इ च खनः' इत्येवोच्येत, दीर्घस्य ह्रस्वस्य वा आद्गुणे नास्ति विशेषः, ह्रस्वादेशे `षत्वतुकोरसिद्धः' इत्येकादेशस्यासिद्धत्वाद् ध्रस्वाश्रयस्तुक् स्यादिति चेत्? न; पदान्तपदाद्योरेकादेशस्तुग्विधावसिद्धः, अन्यथा वृक्षेच्छत्रमिति ङावाद्गुणस्यासिद्धत्वाद् `छे च' इति ह्रस्वाश्रयो नित्यस्तुक् स्यादित्यत आह----दीर्घनिर्द्देश इत्यादि। एतेन ह्रस्वद्वयमत्र विधीयते, न दीर्घ इति दर्शयति। पूर्व तु यथाश्रुताश्रयणेनोक्तमीकारश्चान्तादेश इति। तत्रेति। प्रश्लेषे सति। ये विभाषेत्यात्वबाधनार्थ इति। अन्यथा `ये विभाषा' इत्यस्यावकाशः---खायते, खन्यते; अस्य त्ववकाशः----यस्मिन्पक्षे आत्वं नास्ति; आत्वपक्षे उभयप्रसङ्गे परत्वादन्तरङ्गत्वाच्चात्वं स्यात्। एतच्च `ये विभाषा' इति विषयसप्तमीपक्ष उच्यते। तदा हि यकारादौ बुद्धिस्थ एव भवदात्त्वमन्तरङ्गम्, अयं त्विकारः क्यपा सह विधानाद्बहिरङ्गः। परसप्तमीपक्षे त्विदमेवेत्त्वमन्तरङ्गम्, परनिमित्तमनपेक्ष्य विधानात्।।

भृञोऽसंज्ञायाम्।। 3.1.112 ।।

भृञोऽसंज्ञायाम्।। भर्तव्या इत्यर्थ इति। एतेन क्रियाशब्दत्वं दर्शयन् संज्ञात्वमपाकरोति। संपूर्वाद्विभाषेति। असंज्ञायामेव सूत्रेण नित्यं प्रसक्तस्य क्यपोऽयं विकल्पः। प्राप्तविभाषेत्यर्थः।

संज्ञायामित्यादि। प्रतिषेधस्येति शेषः। असंज्ञायामित्यस्य प्रतिषेधस्य भार्यो नाम क्षत्रिय इत्यत्र पुंसि द्दष्टत्वाच्चरितार्थत्वान्न ते=सूत्रकारस्य भार्या शब्दः

सिद्ध्यतीत्यपर्थः। पुंसि चरितार्थे हि प्रतिषेधे स्त्रियां क्यपा भवितव्यम्। ननु भार्याशब्दोऽपि संज्ञा, अभ्रियमाणापि हि भार्या भार्येत्युच्यते, तत्कुतोऽस्य क्यपः प्रसङ्गः? न ब्रूमोऽनेन क्यपा भवितव्यमिति; यस्तु संज्ञायामेव विधीयते `संज्ञायां समजनि' इत्यादिना, तस्यात्र प्रसङ्गः। न च तस्यापि प्रतिषेधसामर्थ्यान्निवृत्तिः, पुंसि प्रतिषेधस्य चरितार्थथ्वादिति चोद्यम्। उत्तरमाह---स्त्रियां बावाधिकारोऽस्तीति। ननु `सञ्ज्ञायां समजनिषद' इत्यत्र वक्ष्यति--- `भाव इति न स्वर्यते पूर्वक एवार्थाधिकारः' इति, यथा---समजन्ति तस्यामिति समज्या, निषदन्ति तस्यामिति निषद्येत्यादि भवति, तत्कथमिदमुच्यते---- स्त्रियां भावाधिकारोऽस्तीति? नेदमपूर्व चोद्यम्, वृत्तिकार एव हि तत्र वक्ष्यति----कथं तदुक्तं स्त्रियाम् भावाधिकारो ऽस्तीति। स्त्रियां स्त्रीप्रकरणे `संज्ञायां समजनि' इत्यादिना क्यपि विधीयमाने भावस्याधिकारोऽभिधेयभावोपगमलक्षणो व्यापारोऽस्ति; शब्दशक्तिस्वाभाव्याद्। भाव एव तेन क्यब् भवति, न कर्मणि, तेन भार्या प्रसिद्ध्यतीति कर्मणीत्यभिप्रायः। `एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य' इति `भृञ् भरणे' इत्यस्यैव क्यब्विधौ ग्रहणम्, न `डुभृञ् धारणपोषणयोः' इत्यस्य। अतस्तस्माद्वा `भृञ् भरणे' इत्यस्माद्दीर्घान्ताद्वा भार्येति प्रसिद्ध्यतीति परिहारान्तरमप्यत्र सम्भवति।।

मृजेर्विभाषा।। 3.1.113 ।।

मृजेर्विभाषा।। परिमार्ग्य इति। `मृजेर्वृद्धिः' पूर्ववत्कुत्वभ्।।

राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः।। 3.1.114 ।।

राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः।। राज्ञा सोतव्य इति। अभिषिक्तः क्षत्रियो राजा, तेन सोतव्योऽभिषवद्वारेण निष्पादयितव्य इत्यर्थः, कर्मणि क्यब् दीर्घत्वं च निपात्यते। राजा वा इह सूयत इति। अत्र पक्षे लतात्मकः सोमो राजा, राजानं क्रीणन्तीत्यादौ दर्शनात्। सुनोतिरत्राप्यभिषवे। अधिकरणे क्यब्निपातनं रूढ्यर्थम्, तेन ज्योतिष्टोमादौ न भवति। पूर्वस्मिन्नपि पक्षेऽश्वमेधादावतिप्रसङ्गः। सूसतिभ्यामिति। ननु `सर्तेरुत्वं सुवतेर्वा रुडागमः' इत्यभिधानाद्विकल्पोऽत्राभिप्रेत इति चार्थाभावाद् द्वन्द्वानुपपत्तिः? भाष्यकारप्रयोगात्तु द्वन्द्वः। प्रयुक्तं हि भाष्ये `सूसर्त्तिभ्यां च सर्त्तेरुत्वं सुवतेर्वा रुडागमः' इति। सर्तरुत्वमिति। दीर्घत्वं तु रपरत्वे सति `हलि च' इत्येव सिद्धम्। सुवतेर्वा रुडागम इति। सुवतेरिति पञ्चमी, सुवतेः परस्य क्यप इत्यर्थः। रुगागम इति पाठे षष्ठी। सरतीति आकारो। `षू प्रेरणे' तुदादिः, कर्मणि लोकं प्रेरयतीत्यर्थः, उदिते हि तस्मिन्क्रियासु लोकस्य प्रवृत्तिः। कर्तृ प्रत्ययेन कर्त्तरि निपातनं दर्शयति। एवं रुच्याव्यथ्ययोरपि द्रष्टव्यम्। आह च `सूर्यरुच्याव्यथ्याः कर्त्तरि' इति। कुप्यमिति। संज्ञायामेतदिष्यते, सुवर्णरजतव्यतिरिक्तस्य धनस्येयं संज्ञा। सर्वत्रातिप्रसङ्गो निपातनाश्रयेण परिहार्यः। कर्मकर्तरि निपातनमिति। अन्तोदात्तस्य चेति द्रष्टव्यम्। आह हि----`कृष्टपच्यस्यान्तोदात्तत्वं कर्मकर्तरि च' इति। शुद्धे तु कर्मणि कृष्टपाक्य इत्येव भवति।।

भिद्योद्ध्यौ नदे।। 3.1.115 ।।

पुष्यसिद्ध्यौ नक्षत्रे।। 3.1.116 ।।

पुष्यसिद्ध्यौ नक्षत्रे ।। पुष्यन्त्यस्मिन्नर्था इति। आरब्धा इति शेषः। सिद्धन्त्यस्मिन्निति। अत्रार्था इत्यपेक्ष्यते। पुष्यसिद्धशब्दौ पर्यायौ। स्वरूपपरत्वात्तु सूत्रे द्वन्द्वः।।

विपूयविनीयजित्या मुञ्जकल्कहलिषु।। 3.1.117 ।।

लिपूयविनीयजित्या मुञ्जकल्कहलिषु।। विपूयो मुञ्ज इति। रज्वादिकरणाय शोधयितव्य इत्यर्थः। विनीयः कल्क इति। कल्कशब्दोऽयमस्ति पिष्ट औषधे--- -`पथ्या सुण्ठी सैन्धवांशस्य कल्कः पेयो नित्यं सर्वरोगक्षयाय' इति, तैले घते वा औषधे प्रक्षिप्ते यदजीषं तत्रापि वर्त्तते, तापे च प्रसिद्धः----`तपो न कल्कोऽध्ययनं न कल्कः' इत्यादौ; इह तु प्रथमस्य ग्रहणमिति केचित्। विशेषेणेति वयम्, तथा च माघः प्रायुङ्क्त----`अविनीय संभ्रमविकासिभक्तिभिः' इति। जित्य इति। बलेनाक्रष्टव्यः। कृष्टसमीकरणार्थं स्थूलं काष्ठं हलिरिच्युत्यते।।

प्रत्यपिभ्यां ग्रहेश्छन्दसि।। 3.1.118 ।।

पदास्वैरिबाह्यापक्ष्येषु च।। 3.1.119 ।।

पदास्वैरिबाह्यापक्ष्येषु च।। अस्वैरिणीति। `ईर प्रेरणे' स्वयमेवेरितुं शीलमस्या इति ताच्छीलिको णिनिः, `स्वादीरेरिणोः' इति वृद्धिः। बाह्यायामिति। बहिर्भवा `बहिषष्टिलोपश्च' इति यञ्टिलोपौ, पक्षे भवः पक्ष्यः दिगादित्वाद्यत्। यस्य प्रगृह्यसंज्ञा विहितेति। ननु पदावयवस्य द्विवचनादेः प्रगृह्यसंज्ञा, न तु पदस्य? सत्यम्; यौगिकस्त्वयं पदशब्दः----पद्यते मग्यतेऽनेनार्थ इति। यद्वा प्रातिशाख्ये द्विवचनान्ते पद एव प्रकृह्यशब्दः प्रसिद्धः। सन्निकर्षोऽत्र गृह्णातेरर्थः। स्वरसन्ध्यभावादग्नी इत्यादौ कियतापि कालेन व्यवधानात्परस्परमचो न सन्निकृष्यन्ते। अवगृह्यमिति। समासे पूर्वपदम्, तत्र हि पदकालेऽवग्रहो विच्छेदः गृह्यका इमे गृहीतिका इत्यर्थ इति। उभयत्रानुकम्पायां कन्। पञ्जरादिबन्धेन परतन्त्रीकृताः शुकादय उच्यन्ते। ग्रामगृह्येति। शेषलक्षणायाः षष्ठ्याः समासः। वासुदेवगृह्येत्यत्र तु कर्त्तरि षष्ठ्याः शेषषष्ठ्या वा समासः।।

विभाषा कृवृषोः।। 3.1.120 ।।

विभाषा कृवृषोः।। वृष्यमिति। `वृषु सेचने'।।

युग्यं च पत्त्रे।। 3.1.121 ।।

युग्यं च पत्त्रे।। पतत्यनेनेति पत्त्रमिति। `दाम्नीशस' इत्यादिना करणे ष्ट्रन्। `तद्वहति रथयुगप्रसङ्गम्' इति प्राग्दीव्यतीयेनैव यथा सिद्धम्। स्वरेऽपि नास्ति भेदः----क्यपि धातुस्वरः, यत्यपि `यतोऽनावः' इत्याद्युदात्तत्वम्, अयुग्यमित्यत्रापि न स्वरे भेदः, `ययतोश्चातदर्थे' `कृत्योकेष्णुच्चार्वादयश्च'

इत्युभयत्रान्तोदात्तविधानात्।।
अमावस्यदन्यतरस्याम्।। 3.1.122 ।।
अमावस्यदन्यतरस्याम्।। अमाशब्दः सहार्थे वर्तत इति। अमात्य इत्यादौ दर्शनात्। तस्मिन्नुपपद इति। उपपदत्वमपि निपातनादेव, अमेति वा सप्तम्या लुका निर्देशः। तकारोच्चारणात्प्रकृतस्य क्यपस्तावन्निपातनं न भवति। यदि तु परमप्रकृतस्य यतो निपातनं स्यात् स्वरे दोषः----स्यात्---यति सति वस्याशब्दे `यतोऽनावः' इत्याद्युदात्तत्वम्; कृदुत्तरपदप्रकृतिस्वरत्वेऽपि स एव स्वरोऽवतिष्ठेत, ण्यति त्वन्तस्वरितत्वं भवति। तथा यता मुक्तेऽमावास्येत्यधिकरणे ण्यन्न प्राप्नोति, `कृत्यल्युटो बहुलम्' इति भविष्यति। एवमप्युपपदसमासो न प्राप्नोति? मयूरव्यंसकादित्वाद्भविष्यति। एवमपि `गतिकारकोपपदात्' इति स्वरो न प्राप्नोति? तथा `अमावास्याया वा' इति ण्यदन्तस्य यत्कार्थं तद्यदन्तस्यामावस्यशब्दस्य न स्याद्, भिन्नत्वात्? इति यदन्तपक्षे दोषं दृष्ट्वा प्रकृतस्यापि ण्यत एव निपातनमित्याह----ण्यत्प्रत्ययो भवतीति। किं तर्हि उच्यते-----ण्यत्प्रत्ययो भवतीति, न पुनर्ण्यत्प्रत्ययो निपात्यत इति? सत्यम्, स एवार्थः, निपातनाद् ण्यत्प्रत्यो भवतीत्यर्थः। अन्यतरस्यां वृद्ध्यभावो निपात्यत इति। ण्यत्प्रत्ययो नित्यः, वृद्ध्यभावस्तु पाक्षिक इत्यर्थः। सह वसत इति। सन्निकृष्टौ वसत इत्यर्थः। यदुक्तम्---ण्यत्प्रययो निपात्यत इति, तत्रायं गुण इत्याह---एकदेशविकृतस्यानन्यत्वादिति। ण्यति ह्यमावास्येति स्वतः प्राप्तं रूपम्, वृद्ध्यभावस्तु तस्यैव विकार इति भावः। यद्वा-----ण्यति वृद्धौ कृतायां पक्षे ह्रस्वोऽपि निपात्यते, स एव वृद्ध्यभाव उक्तः। एवं श्लोकेऽप्यवृद्धितामिति।
किमत्र निपात्यत इत्याशङ्कायां श्लोकः-----अमावसोरित्यादि। वृद्धिभावाभावकृतविशेषाश्रयो द्विवचननिर्द्देशः। निपातयामीति। एकस्यैवेति शेषः, अभापूर्वयोर्वसोर्ण्यन्तयोर्मध्य एकस्य वृद्ध्यभावमहं निपातयामीत्यर्थः। सूत्रकारेणैक्यमापन्नस्यैतद्वचनम्। तथा सति किं सिद्धमित्यत्राह---तथेति। एका तद्धितवृत्तिरेकदेशविकृतस्यानन्यत्वाद् एतयोर्द्वयोरपि सिद्ध्यतीत्यर्थः। स्वरश्च मे प्रसिद्ध्यतीति। एवं निपातयतो मम स्वरोऽपि सिद्ध्यति। व्याख्यातः स्वरः।।
छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्थस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि।। 3.1.123 ।।
छन्दसि निष्टर्क्यदेबहुयचप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृदानि।। नुगभावश्चेति। यदा जुहोतेस्तदेति भावः। उपचाय्यपृडमिति। `मृड सुखे'`पृड च' इत्येतस्मात् `इगुपधलक्षणः कः, उपचाय्यं च तत्पृडं चेति कर्मधारयः। हिरष्ये चेति वक्तव्यमिति। हिरण्येऽभिधेय इत्यर्थः। व्यत्ययमिति। आद्यन्तविपर्यास इत्यर्थः।
ण्यदेकस्मादिति। एकस्माद्वातोर्ण्यत्प्रत्ययो निपात्यते, तदनन्तरेषु देवहूयादिषु चतुर्षु चतुर्भ्यो धातुभ्यः क्यब् निपात्यते, उपसर्गभेदान्नयतेर्भेदः। द्वौ क्यपाविति। द्वाभ्यां धातुभ्यां द्वौ क्यपौ निपात्येते इत्यर्थः। ण्यद्विधिश्चतुरिति। सुजन्तमेतत्, क्रियाभ्यावृत्तिवाचिचतुरो वा ण्यद्विधीयत इत्यर्थः।।
ऋहलोर्ण्यत्।। 3.1.124 ।।
ऋहलोर्ण्यत्।। ऋवर्णान्तादिति। अर्त्तेस्तु ग्रहणं न भवति; हला साहचर्यात्, परं कार्यमिति निर्द्देशाद्, `ईडवन्दवृशंसदुहां ण्यतः' इति लिङ्गाच्च।।
ओरावश्यके।। 3.1.125 ।।
ओरावश्यके।। अवश्यं भाव आवश्यकमीति। मनोज्ञादित्वाद् वुञ्, अव्ययानां भमात्रे टिलोपः। किं पुनरवश्यार्थवाचिन्युपपदे प्रत्यये? आहोस्विदावश्यके द्योत्ये? तत्राद्ये पक्षे उपपदरहितात्प्रत्ययो न स्यात्---लाव्यं पाव्यमिति, तस्माद् द्वितीयः पक्ष आश्रीयत इत्याह---आवश्यके द्योत्य इति।
स्वरसमासानुपपत्तिरिति। उपपदपक्षे उपपदसमासो लभ्यते, गतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिस्वरत्वं च; द्योत्यपक्षे त्वेतदुभयमपि न सिद्ध्यतीत्यर्थः। अवश्यलाव्यमीति। `लुम्पेदवश्यमः कृत्ये' इति मलोपः। द्योतितार्थस्यापि क्वचित्प्रयोगो दृश्यते, लाघवं प्रत्यनादरात्। न त्वेतदत्र वक्तव्यम्; `लुम्पेदवश्यमः कृत्ये' इति वचनादेव द्योतिते अवश्यमः प्रयोग इति तस्यावश्यकर्त्तव्यादौ चरितार्थत्वात्। मयूरव्यंसकादित्वादिति। तस्याकृतिगणत्वादिति भावः। उत्तरपदप्रकृतिस्वरत्वे चेति । मयूरव्यंसकादिनिपातनादेव स्वरोऽपि भविष्यतीत्यपि शक्यं वक्तुम्।।
आसुयुवपिरपिलपित्रपिचमश्च।। 3.1.126 ।।
आसुयुवपिरपिलपित्रपिचमश्च।। पुप्रभृतीनां द्वन्द्वेन आसुनोतेर्द्वन्द्व इत्याहुः। सुनोतेरभिसम्बन्धस्तदाह---आङ्पूर्वात्सुनोतेरिति। `षु प्रसवैश्वर्ययोः' इत्यस्यत्वग्रहणम् `कृत्यल्युटो बहुलम्' इति। `यु' इति `युमिश्रणे इत्यस्य ग्रहणम्। `युञ् बन्धने' इत्यस्य तु सानुबन्धकत्वादग्रहणम्। यतोऽपवाद इति। `अचो यत्' `पोरदुपधात्' इति यथायोगं प्राप्तस्य। दाभ्यमिति। दभेर्धातुष्वपठितस्यापि चुरादौ `बहुलमेतन्निदर्शनम्' इति वचनाच्छिष्टप्रयोगाच्च क्षपयत्यर्थयत्यवधीरयत्यादिवद्धातुत्वं द्रष्टव्यम्।।
आनाय्योऽनित्ये।। 3.1.127 ।।
आनाय्योऽनित्ये।। रूढिरेषेति। तेन घटादावतिप्रसङ्गो नोद्भावनीय इति। निपातनाच्च रूढित्वम्। उक्तं हि----रूढ्यर्थं च निपातनमिति। कुतः पुनरनित्यत्वमित्यत्राह---तस्य चानित्यत्वमिति। नित्यमजागरणादिति। सततमज्वलनादित्यर्थः, ज्वलनमेव हि तस्य जागरणम्। दक्षिणाग्नावपि विशिष्ट एवेष्यते, न सर्वत्रैवेति दर्शयति---यश्चेति। योनिः=उत्पत्तिस्थानम्। वैश्यकुलादित्यादिनायोनिविकल्पं दर्शयति।
आनाय्योऽनित्य इति चेदिति। घटादिष्वपि प्रसङ्ग इति शेषः। भवेदिति। सम्भावने लिङ्। निपातनादेव सम्भाव्यत इत्यर्थः। एकयोनाविति। आहवनीयेन। आनेयो ह्यन्यथा भवेदिति। घटादावनित्येभिन्नयोनौ च दक्षिणाग्नौ, `अचो यत्' इति यदेव भवतीत्यर्थः।।
प्रणाय्योऽसम्मतौ।। 3.1.128 ।।
प्रणाय्योऽसम्मतौ।। असम्मताविति बहुब्रीहित्याह---अविद्यमाना संमतिरस्मिन्निति। सम्मतिश्चात्र संमननं प्रीतिविषयभावोपगमनं कर्मव्यापारो विवक्ष्यते, न

संमन्तृव्यापारः; तथा सत्यसंमन्तरि निपातनप्रसङ्गात्, तस्य चानिष्टत्वादित्यभिप्रायेणाह----संमतता संमतिरिति। संमतिरमिलाषोऽप्युच्यत इति। भोगविषयोऽप्यादरः सम्मतिशब्देनोच्यते, तन्त्रेणेत्यर्थः।।

पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु।। 3.1.129 ।।

पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु।। मीयतेऽनेनेति मानम्, हूयत इति हविः, निवसत्यस्मिन्निति निवासः, समिधामाधानी ऋक् सामिधेनी। माङो ण्यत्प्रत्यय इति। करणे तत्र `आतो युक् चिण्कृतोः' इति युक्। मेयमन्यदिति। भावकर्मणोर्यदेव भवतीत्यर्थः। सान्नाय्यमिति। सम्यग्नीयते होमार्थमग्निं प्रतीति कर्मणि ण्यत्। हविर्विशेष इति। ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायामिति विहितयोर्दधिपयसोः। माघस्तु यथाश्रुतार्थग्राही हविर्मात्रे प्रायुङ्क्त----`हुतमयमवलीढे साधु सान्नाय्यमग्निः' इति। निचीयतेऽस्मिन्धान्यादिकमिति अधिकरणे ण्यत्। धाय्येति। धीयतेऽनया समिदिति करणे ण्यत्, पूर्ववद्युक्। ऋग्विशेषस्येति। `प्रवोवाजा अभिद्यवः' इत्यादिकस्य। कि तर्हि काचिदेवेति। समिध्यमानवतीं समिद्धवतीं चान्तरेण विकृतिषु प्रक्षिप्यमाणा पृथुयाजा अमर्त्य इत्यादिका। कथं पुनरयं विशेषो लभ्यत इत्याह----रूढिशब्दोह्य यमिति। अत एव निपातनाश्रयणमिति भावः। रूढित्वमेव द्रढयति----तथा चेति। धाय्याः शंसतीति ज्योतिष्टोमे मरुत्त्वतीये शस्त्रे विधानमेतत्। सामिधेनीग्रहणं प्रयोगविषयोपलक्षणार्थमिति भावः।।

क्रतौ कुण्डपाय्यसंचाय्यौ।। 3.1.130 ।।

क्रतौ कुण्यपाय्यसंचाय्यौ।।ण्यति प्रकृते यत्प्रत्ययान्तः कुण्डपाय्यशब्दो निपात्य इत्युक्तम्, तत्र प्रयोजनमाह---यतोऽनाव इतीति। यदुत्तरपदस्याद्युदात्तत्वं कृदुत्तरपदप्रकृतिस्वरेण स एव स्वरः सिद्धो भवतीत्यर्थः। ण्यति तु स्वरितत्वं स्यात्।।

अग्नी परिचाय्योपचाय्यसमूह्याः।। 3.1.131 ।।

अग्नी परिचाय्योपचाय्यसमूह्यः।। अग्नाविति। न ज्वलने, किं तर्हि? तदर्थइष्टकाचयनविशेषे; तत्रैव रूढत्वात्। इह संपूर्वात् `ऊह वितर्के, इत्यस्मादनेकार्थत्वाद्वहेरर्थे वर्त्तमानाद्धलन्तत्वाद् ण्यति समूह्यमिति सिद्धम्। तथा च----`समूह्यं चिन्वीत पशुकामः पशवो वै पुरुषः पशूनेवास्य तत्समूहति' इति वह्यर्थेनोहिना ब्राह्मणे समूह्यशब्दो निरुक्तः।।

चित्याग्निचित्ये च।। 3.1.132 ।।

चित्याग्निचित्ये च।। चित्योऽग्निरिति। कर्मणि यदपवादः क्यब् निपात्यते, तेनाद्युदात्तत्वं भवति। भावे यकारप्रत्यय इति। किमर्थ पुनरत्रापि क्यबेव न निपातितः, एवं हि तुग निपात्यो न भवति, तत्राह---तेनान्तोदात्तत्वं भवतीति। अग्नावित्येवेति। तच्च चित्यशब्दस्यैव विशेषणार्थम्, नाग्निचित्याशब्दस्य; तस्य भावे निपातितत्वात्। तदेतद्दर्शितम्---चेयमन्यदिति।।

ण्वुल्तृचौ।। 3.1.132 ।।

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।। 3.1.134 ।।

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।। आदिशब्दः प्रत्येकमभिसम्बद्ध्यत इति। गणपाठादिति भावः। अपोद्धृत्य ये पठ्यन्त इति। ते गृह्यन्त इत्यन्वयः। अपोद्धृत्येति बुद्ध्या पृथक्कृत्येत्यर्थः। किमर्थ पुनरपोद्धृत्य प्रत्ययविधानम्, यावता नन्दनादीनां गणपाठादेव सिद्धं साधुत्वम्? उच्यते---असत्यस्मिन्नष्टाध्याय्यां क्वचिदप्यनुपयोगाद्गणत्रपयाठोऽनार्षोऽध्यवसीयेत।

नन्दिवाशीत्यादि। `टुनदि समृद्धौ', `वाश्रृ शब्दे',`मदी हर्षे', `दुष वैकृत्ये',`राध साध संसिद्धौ',`वृधु वृद्धौ',`शुभ शुम्भ शोभार्थे',`रुच दीप्तौ'। दूषण इति। `दोषो णौ' इत्यूत्वम्। सहितपीत्यादि। `षह मर्षणे', तप सन्तापे',`शमु दमु उपशमे'। जल्पन इत्यादि। `जल्प जप वक्तायां वचि'। `रमु क्रीडायाम्',`दृप हर्षविमोचनयोः',`क्रदि आह्वाने रोदने च'। `कृष विलेखने',`ह्वषु अलीके'। `अर्द हिंसायाम्',जनमर्दयतीति जनार्दनः, कर्मण्यणि प्राप्ते। एवमुत्तरत्रापि कर्मण्युपपदे द्रष्टव्यम्। `यु मिश्रणे',`षूद क्षरणे'। मधुनाऽसुरः, तं सूदयतीति मधुसूदनः। `ञिभी भये', णिचि `भियो हेतुभये षुक्'। `लूञ् छेदने',`णश अदर्शने',`दमु उपशमे,----ण्यन्तौ, चित्तं नाशयतीति चित्तनाशनः, कुलं दमयतीति कुलदमनः।

ग्राहीत्यादि। `ग्रह उपदाने',`षह मर्षणे',`तसु उपक्षये',`दसु च',`भस भर्त्सनदीप्त्योः'। तिष्ठतेरातो युक्। `मत्रि गुप्तभाषणे' चुरादिः, अर्द हिसायाम्। रक्षेत्यादि। `रक्ष पालने',`श्रु श्रवणे',`डुवप् बीजसन्ताने',`शो तनूकरणे'---एषा निशब्द उपपदे णिनिः। याचीत्यादि। `टुयाचृ याच्ञायाम्',`हृञ् हरणे',`व्रज गतो'`वदव्यक्तायां वाचि',`वस निवासे'---एषां प्रतिषिद्धानां णिनिभवति, प्रातषिद्धार्थानामित्यर्थः। प्रतिषिद्धार्थता च नञ्पूर्वाणां भवतीति दर्शयति। अयाचीत्यादि। यद्यपि विशब्दोऽपि विगर्द्दभरथिरित्यादौ प्रतिषेधे दृष्टः, याच्यादीनां तु विपूवाणा णिनिर्न दृश्यत इति नञ्येव णिनिर्विज्ञायते। अचामित्यादि। अजन्तानां धातूनामचित्तकर्तृकाणां प्रतिषिद्धार्थानां णिनिर्भवति, न विद्यते चित्तमस्येत्यचित्तः स कर्त्ता येषां ते तथोक्ताः। विशयी विषयीति। `शीङ् स्वप्ने',`षिञ् बन्धने', वृद्ध्यभावो निपातनात्। अभिभावी भूत इति। अभिभूतवानभिभावी। अपराधी, अवरोधी। `राध साध संसिद्धौ',`रुधिर् आवरणे'। परिभवी, परिभावीति। पक्षे वृद्ध्यभावः।

पचेत्यादि। `डुपचष्पाके'। `वच परिभाषणे',डुवपिरुक्तार्थः, एवं वदिरपि। `चल कम्पने',`पत्लृ गतौ'। नदडिति। `नद अव्यक्ते शब्दे'। ठकारो ङीबर्थः, एवमुत्तरत्रापि। `भष भर्त्सने',प्लुङ् गतौ',`चर गत्यर्थः',`गृ निगरणे',`तृ प्लवनतरणयोः',`चुर स्तेये',`दिवु क्रीडादौ',`सूदिरुक्तार्थः,`जृष् वयोहानौ',मृङ् प्राणत्यागे',`क्षमूष् सहने',`षिवु तन्तुसन्ताने',`मिष स्पर्द्धायाम्',`कुप क्रोधे',`मिधृ मेधाहिसनयोः',`व्रण गात्रचूर्णने'चुरादिः, `नृती गात्रविक्षेपे',`दृशिर् प्रेक्षणे',`सृप्लृगतौ'। `डुभृञ् धारणपोषणयाः',जारं विभर्तीति जारभरा। एवं श्वानं पचतीति श्वपचा, न्यङ्क्वदिषु श्वपाकशब्दस्य पाठात्पक्षे कर्मण्यणपि

भवति। पचादिराकृतिगण इति। तत्सम्बन्धिन आदिशब्दस्य प्रकारवचनत्वात्। तथा च `शिवशमरिष्टस्य करे' इति कृञोऽच् प्रत्ययः कृतः। घटेश्च `कर्मणि घटोऽठच्' इति। तथा यङन्तानां `यङोऽचि च' इति यङोऽस्मिन्नचि लुगुक्तः। भाष्ये च `अजपि सर्वधातुभ्यो वक्तव्यः' इत्युक्तम्। पचाद्यनुक्रमणं तु नदडित्यादावनुबन्धासञ्जनार्थम्, कर्मोपपदानाम् इगुपधानां च बाधकबाधनार्थम्, देवेडित्युभयार्थम्, अन्येषां तु प्रपञ्चार्थं द्रष्टव्यम्।।

इगुपधज्ञाप्रीकिरः कः।। 3.1.135 ।।

इगुपधज्ञाप्रीकिरः कः।। इगुपधादीनां समाहारद्वन्द्वे नपुंसकत्वेन ह्रस्वप्रसङ्गदितरेतरयोगे द्वन्द्वः, व्यत्ययेन भ्यसः पञ्चम्येकवचनम्। तत्र कृशब्दस्य धात्वनुकरणत्वात्प्रकृतिवदनुकरणम्, विभक्तावित्वम्। ज्ञ इति। `आतो लोप इटि च' प्रिय इति। `प्रीञ् तर्पणे',इयङादेशः। किर इति। `कृ विक्षेपे',`ऋत इद्धातोः'। पचादिषु द्रष्टव्या इति यद्यप्यजपि तृजादिवत्सर्वधातुभ्यो भवति, तथाप्यपवादबाधनार्थमेते पचादिष्ववश्यं पाठ्या इत्यर्थः।।

आतश्चोपसर्गे।। 3.1.136 ।।

पाघ्राध्माधेट्दृशः शः।। 3.1.137 ।।

पाघ्राध्माधेट्दृशः शः।। `पा पाने',`घ्रा गन्धोपदाने',`ध्मा शब्दाग्निसंयोगयोः',`धेट् पाने',`दृशिर् प्रेक्षणे'।`पा रक्षणे' इत्यस्य तु लुग्विकरणत्वादग्रहणम्। उत्पिब इत्यादि। पाघ्रादिसूत्रेण यथायोगं पिबादय आदेशाः। व्याघ्र इति। अत्र `आतश्चोपसर्गे' इति क एव भवति; अत्र च `व्याघ्रादिभिः' इति वचनं लिङ्गम्।।

अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च।। 3.1.138 ।।

अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च।। `अनुपसर्गात्' इति व्यत्ययेनैकवचनमित्याह----अनुपसर्गेभ्य इति। `लिप उपदेहे',`विद्लृ लाभे'आगामिना नुमा सनुम्कयोर्ग्रहणम्, तेन विध्यन्तराणामग्रहणम्। `धृञ् धारणे',`धृञ् अवस्थाने'----ण्यन्तयोर्द्वयोरपि ग्रहणम्। `पार तीर कर्मसमाप्तौ',`विद चेतनाख्यानादिषु' चुरादिः, ज्ञानाद्यर्थानामन्यतमो वा हेतुमण्ण्यन्तः। `एजृ कम्पने'ण्यन्तः, `चिती संज्ञाने' चुरादिः, सातिर्हेतुमण्ण्यन्तः, `षह मर्षणे' चुरादिर्हेतुमण्ण्यन्तो वा। लिम्पः, विन्द इति। `तुदादिभ्यः शः' `शे मुचादीनाम्' इति नुम्। धारयादिषु शब्गुणायादेशाः।
नौ लिम्पेरिति। छन्दसि तु `छर्त्ता च विधर्त्ता च विधारय' इति दृश्यते।
अरविन्द इति। अराकाराणि दलान्यरशब्देनोच्यन्ते।।

ददातिदधात्योर्विभाषा।। 3.1.139 ।।

ददातिदधात्योर्विभाषा।। ददः, दध इति। शपः श्लुः, द्विर्वचनम्, `श्नाभ्यस्तयोरातः' इत्याकारलोपः। `दद दाने',`दध धारणे'इत्येताभ्यामचि कृते ददः दध इति सिद्धम्, दाधाभ्यामपि णे कृते दायो धाय इति, इदं तु वचनं स्वरार्थम्---अददः अदध इति `अच्कावशक्तौ' इत्यन्तोदात्त्वं मा भूत्, नञ्स्वर एव यथा स्यादिति।।

ज्वलितिकसन्तेभ्यो णः।। 3.1.140 ।।

ज्वलितिकसन्तेभ्यो णः।। इतिशब्द आद्यर्थ इति। अनेकार्थत्वान्निपातानाम् `उच्चावचेष्वर्थेषु निपतन्तीति निपाताः' इति निरुक्तकारो निपातशब्दं निराह। ज्वलितीत्यविभक्तिको निर्द्देशः, ज्वलादिभ्य इत्यर्थः। कसिरन्ते येषां ते कसन्ताः, तत्र ये कसमधीत्य वृदिति पठन्ति तेषां मते कसन्तग्रहणं चिन्त्यप्रयोजनम्। ननु च `ज्वल दीप्तौ' इति द्विः पठ्यते----घटादिषु, परस्ताच्च; तेषामसत्यस्मिन्विशेषणे सन्देहः स्यात्----किं पूर्वो ज्वलिरादिः? उत पर इति? अतः कसः समीपभूतेभ्यो ज्वलादिभ्य इति विशेषणमर्थवत्, नैतत्सुष्ठूच्यते; यद्यन्तशब्दः समीपवचनः, बहुव्रोहौ तत्पुरुषे च कसेर्ग्रहणं न प्राप्नोति, पूर्वत्र ज्वलतावादावभिप्रेते तदनन्तर एव धातुरुपादीयेत; परोपदेशेनैव ज्वलतेर्ग्रहणसिद्धेः। घटादिपाठश्च मित्संज्ञायां चरितार्थः, इतरस्त्वचरितार्थ इति स एवादिर्भविष्यति। अचोऽपवाद इति। तस्यापि सर्वधातुविषयत्वादिति भावः। `भ्रमु चलने' इत्यस्य ज्वलादिपाठः किमर्थः,यावता पचाद्यचि भ्रम इति सिद्धम्, णेऽप्येतदेव रूपम्, `नोदात्तोपदेशस्य' इति पृद्धिप्रतिषेधात्? इहाभ्रम इति `अच्कावशक्तौ' इति स्वरो मा भूदिति।।

श्याद्व्यधास्रु संस्वतीणवसावहृलिहश्लिषश्वसश्च।। 3.1.141 ।।

श्याद्व्यधासु संस्वतीणवसावहृलिहश्लिषश्वसश्च।। अनुपसर्गादिति निवृत्तमिति। उत्तरसूत्रे पुनरनुपसर्गग्रहणात्। विभाषेति चेति। निवृत्तमित्यपेक्ष्यते। विभाषा ग्रहणं ह्यनुपसर्गग्रहणेन सम्बद्धम्, अतस्तन्निवृत्तावस्यापि निवृत्तिः। श्यैङ् इति । `श्यैङ् गतौ' इत्यस्मात् शी आत् श्यादिति शीङो यणादेशेन ग्रहणं न भवति; व्याख्यानात्, झटिति प्रतीतावनारोहाच्च। आकारान्तेभ्य इति। एतेन अत्तेरच्छब्दान्तानां पतिप्रभृतीनामकारान्तानां च ग्रहणं न भवतीति दर्शयति। एतदपि व्याख्यानादेव। `व्यध ताडने',`स्रु गतौ' आङ्पूर्वः, संपूर्वश्च, `इण् गतौ' अतिपूर्वः, `षोऽन्तकर्मणि' `हृञ् हरणे' अवपूर्वौ, `लिह आस्वादने',`श्लिष आलिङ्गने',`श्वसप्राणने'। येऽत्र सोपसर्गास्तेभ्यः सोपसर्गेभ्य एव भवति, शेषेभ्यस्त्वविशेषेण। बाधकबाधनार्थमिति। `आतश्चोपसर्गे' इति विशेषविहितः कः सामान्यविहितस्य णस्य बाधकः, तद्बाधनार्थमिदम्। एतेनावस्यतेरुपादानं व्याख्यातम्। अवश्याय इति। पूर्ववद्युक्।।

दुन्योरनुपसर्गे।। 3.1.142 ।।

दुन्योरनुपसर्गे।। दाव इति। वनवह्निः। कथं तत्रैव दव इति? नयतिसाहचर्यात्सानुबन्धकस्य दुनोतेरिह ग्रहणम्। निरनुबन्धकाद्दवतेः पचाद्यचि भविष्यति। करणसाधनो वा `ऋदोरप्' इत्यबन्तः।।

विभाषा ग्रहः।। 1.3.143 ।।

विभाषा ग्रहः।। व्यवस्थितविभाषा चेयमिति। एतदेव स्पष्टयति---जलचर इति। भव इति। भवत्येव न तु कदाचिन्न भवतीति भवः=देवः, संसारश्च। भावाः=पदार्थाः।।

गेहे कः।। 3.1.144 ।।

गेहे कः।। गेह इति। प्रत्ययाथंस्य कर्त्तुर्विशेषणम्, नोपपदम्; `गृहपतिना संयुक्तः' इति निर्देशादित्याह---गेहे कर्त्तरीति। तास्त्थ्याद्दाराश्चेति। गेहमित्यपेक्ष्यते, तेन गौणस्यापि गेहस्य ग्रहणमिति दर्शयति। तच्च तन्त्रावृत्त्योरन्यत राश्रयणेन लभ्यते, तत्र वेश्मनि पुंल्लिङ्गबहुवचनान्त एव----गृहान्ह दाहको भवति, गृहानुत्तरया संकाशयते, गृहान्गच्छ, गृहानहं सुमनसः प्रपद्य इति। नपुंसकलिङ्गोऽभिधेयवचनः, एवं दारेष्वपि। अन्ये तु---गृहशब्दो वेश्मन्येव मुख्यः, दारेषु गौण इति वदन्ति, तथा `न गृहं गृहमित्याहुर्गृ हिणी गृहमुच्यते' इति वेश्मन्येव मुख्यतां दर्शयन्ति। यथा वृत्तिकारेणोक्तं तथा दारेष्वपि मुख्य एवेति लक्ष्यते।।

शिल्पिनि ष्वुन्।। 3.1.145 ।।

शिल्पिनि ष्वुन्।। पूर्वेण साहचर्यात् सिल्पिनीत्यपि प्रत्ययार्थस्य विशेषणम्, नोपपदमित्याह----शिल्पिनि कर्त्तरीति। क्रियासु कौशलं शिल्पं तद्यस्यास्तीति सिल्पो।

नृतिखनीत्यादि। एतद्वचनमेव; तेनाह्वाता, आह्वायक इत्यादौ न भवति। रञ्जेनुनासिकलोपश्चेति। एतत्तु ज्ञापकात्सिद्धम्, यदयम् `जनीजृष्क्नुसुरञ्जोऽमन्ताश्च' इति मित्संज्ञां शास्ति, तज्ज्ञापयति----रञ्जेरकित्त्वेऽप्यनुनासिकलोपो भवतौति।।

गस्थकन्।। 3.1.146 ।।

गस्थकन्।। गायतेरिति। `कै गै शब्दे',`गामादाग्रहणे ष्वविशेषः' इति `गाङ् गतौ' इत्यस्यापि ग्रहणं प्राप्तम्, अनभिधानान्न भवति। थकन्प्रत्ययो हि गायत्यर्थविषयमेव शिल्पिनमभिधातुं समर्थः।।

ण्युट् च।। 3.1.147 ।।

ण्युट् च।। णकारो युगर्थः, टकारो ङीबर्थः। योगविभाग उत्तरार्थ इति। उत्तरत्र ण्युट एवानुवृत्तिर्यथा स्यात्, थकनो मा भूदिति।।

हश्च व्रीहिकालयोः।। 3.1.148 ।।

हश्च व्रीहिकालयोः।। जहातेरिति। `ओहाक् त्यागे'। जिहातेरिति। `ओहाङ्गतौ'। प्रायेण जिहीतेरिति पाठः, स त्वयुक्तस्तिपः पित्त्वादीत्वाभावात्। जहातेः ककारोऽत्र सामान्यग्रहणार्थः, अन्यथा एकानुबन्धकत्वादस्यैव स्यात्। अथ हाङ इत्युच्येत, एवमपि तस्यग्रहणं न स्यात्, तस्माद् द्वयोरपि ग्रहणम्। `ब्रीहिकालयोः' इति कर्त्तुर्विशेषणम्, नोपपदम्; त्रिचतुर्भ्यो हायनस्य `दामहायनान्ताच्च' इति वचनादिति मत्वाह---व्रीहौ काले च कर्त्तरीति। जहत्युदकमिति। कृत्वेति। व्रीहौ हायनशब्दस्य प्रवृत्तिनिमित्तं दर्शितम्। जाङ्गलदेशोद्भवाः केचिद् व्रीहयो हायना इत्याहुः। जिहीते भावानिति। भावाः पदार्थास्तान् जिहीते गच्छति परिच्छेदकत्वेन व्याप्नोतीत्यर्थः।।

प्रुसृल्वः समभिहारे वुन्।। 3.1.149 ।।

प्रुसृल्वः समभिहारे वुन्।। `प्रुसृल्व' इति पञ्चम्याः स्थाने जस्, `ओस्सुपि' इति यणादेशः। साधुकारित्वं लक्ष्यत इति। प्रायः सहचरित्वात् पुनः पुनरनुष्ठानं समभिहारः, यश्च यां क्रियां पुनः पुनरनुतिष्ठति तस्य प्रायेण कौशलमुपजायते, अतः प्रायः साहचर्यात्साधुकारित्वं लक्ष्यते, लक्षणया तत्र वर्त्तत इत्यर्थः, तेन किं सिद्धं भवतीत्याह----सकृदपीति।।

आशिषि च।। 3.1.150 ।।

आशिषि च।। आशिषि गम्यमानायामिति। न वाच्यायाम्; कर्त्तरि कृत्' इति कर्त्तुरेव वाच्यत्वात्। प्रार्थनाविशेष इति। अप्राप्तस्याभिलषितस्य प्राप्तुमिच्छा प्रार्थना=आशीः। स चेत्क्रियाविषय इति। `धातोः' इत्यधिकाराद, धातोश्च क्रियावचनत्वात्। अमुष्याः क्रियाया इति। जीवनादिकायाः, अनेन प्रयोक्तृधर्मत्वमाशिषो दर्शयति। जीवतादिति। आशिषि लोट्प्रयोगेणोदाहरणे आशिषं दर्शयति।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यो तृतीयस्याध्यायस्य प्रथमः पादः।।

--------***********--------

3.2

काशिकावृत्तौ

अथ तृतीयाध्याये द्वितीयः पादः <पदमञ्जरी>

कर्मण्यण्।। 3.2.1 ।।

कर्मण्यण्।। कर्मणीति। नेदं स्वरूपग्रहणम्; अशब्दसंज्ञा इति प्रतिषेधात्। ननु चार्थस्येयं सञ्ज्ञा न शब्दस्य, अशब्दसञ्ज्ञेति नैवं विज्ञायते-----शब्दस्य सञ्ज्ञा शब्दसञ्ज्ञेति, किं तर्हि? शब्दे संज्ञा सब्दसंज्ञेति। शब्दशब्देन शब्दानामनुशासनं व्याकरणमुच्यते, असति च बाधे कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणं

युक्तम्। तस्मात्पारिभाषिकस्य कर्मणो ग्रहणमङ्गीकृत्य तस्यावान्तरभेदमाह----त्रिविधं कर्मेति। ता एव तिस्रो विधा दर्शयति---निर्वर्त्ये विकार्ये प्राप्यं चोति। यदसज्जायते सद्वा जन्मना यत्प्रकाशते तन्निर्वर्त्त्यम्, यथा-----कुम्भं करोति, पुत्रं प्रसूत इति। यस्य तु सत एव कश्चिद्विकारः क्रियते तद्विकार्यम्, स च विकारः क्वचित्प्रत्यक्षगम्यः, यथा---काष्ठानि भस्म करोति, सुवर्ण कुण्डलं करोतीति, क्वचिच्छास्त्रगम्यः----ब्रीहीन् प्रोक्षतीति, अत्र प्रोक्षणेन ब्रीहीषु कश्चिदतिशयो जन्यत इति शास्त्रादेव गम्यते। एतावता च भेदेन संस्कार्यमेतत्कर्मेति चातुर्विध्यं मीमांसका मन्यन्ते। क्रियाकृतविशेषाभावे तु प्राप्यं कर्म, यथा-----वेदमधीते, चर्च्चां पारयतीति। ननु न `कर्त्तुरीप्सिततमम्' इत्येतदेव कर्म त्रिविधम्, अन्यदप्यस्ति `तथायुक्तं चानीप्सितम्' इति, तच्च द्विविधम्---द्वेष्यमितरच्च; तथा `अकथितं च', एवं `दिवः कर्म च', तथा `अधिशीङ्स्थासां कर्म' इति। तदेवमवान्तरभेदविवक्षायां सप्तविधं कर्म। उक्तं च----

निर्वर्त्य च विकार्य च प्राप्यं चेति त्रिधा मतम्।
तत्रेप्सिततमं कर्म चतुर्धान्यत्तु सञ्ज्ञितम्।।
औदासीन्येन यत्प्राप्यं यच्च कर्त्तुरनीप्सितम्।
सञ्ज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्।। इति।

तत्किमुच्यते त्रिविधं कर्मेति? केचिदाहुः----कर्त्तुरीप्सिततममेवात्र गृह्यतेऽन्यत्राण् न भवतीति। अन्ये त्वाहुः-----आदित्यं पश्यतीत्यादौ मा भूदित्येवमर्थ कर्मणि निर्वर्त्यमाने विक्रियमाण इति वक्तव्यमित्याशङ्क्य वार्त्तिककारेणोक्तम्----कर्मणि निर्वर्त्त्यमानेविक्रीयमाण इति चेद्वेदाध्यायानामुपसंख्यानमित्यादि। तदनेन प्रदर्श्यते त्रिविधमपि कर्म गृह्यते, न पुनः प्राप्यं न गृह्यत इति, न तु सूत्रान्तरोक्तं व्यावर्त्त्यते। तथा च `दिवः कर्म च' इत्यत्र समावेशस्य प्रयोजनमुक्तम्---मनसा देव इत्यत्र कर्मत्वादण्, करणत्वात्तृतीयेति। एवं च वृक्षावासः पर्वताधिवास इत्याद्यपि यथादर्शनं भवतीति। अनभिधानादिति। तच्चानभिधानं यत्राप्तैरुक्तं तत्रैव। अन्यत्र तु यथालक्षणं भवत्येव, तथा च पठति----यथालक्षणमप्रयुक्ते'इति।

शीलिकामीत्यादि। `शील समाधो',`भक्ष अदने' चुरादिः, `कमु कान्तौ' णिङन्तः, `चर गत्यर्थे' आङ्पूर्वः, णस्य णित्करणं चरेर्वृद्ध्यर्थम्। पूर्वपदप्रकृतिस्वरत्वं चेति। कृदुत्तरपदप्रकृतिस्वरस्यापवादः। मांसशीलेति। अत्राणि सति ङीप्स्यात्, णेऽपि क्वचिदण्कृतं भवतीत्येतत्तु ताच्छीलिक एव णे भवति। `मनेर्दीर्घश्च' इति सप्रत्ययान्तो मांसशब्दः। कल्याणशब्दः `लघावन्ते द्वयोश्च बह्वषो गुरुः' इति मध्योदात्तः। अस्यायमर्थः----अन्ते लघोः परतो द्वयोश्चान्तयोर्लघ्वोः परतो बह्वषः शब्दस्य यो गुरुः स उदात्तो भवति। बह्वष इति बह्वच इत्यर्थः।`अष्' इत्यचः पूर्वाचार्यसञ्ज्ञा।

ईक्षिक्षमिभ्यां चेति। अत्रापि पूर्वपदप्रकृतिस्वरत्वं चेत्येव, वाक्यभेदस्तु वैचित्र्यार्थः। इह यो मासं भक्षयति मांसं तस्य भक्षो भवति, तत्र भक्षयतेः कर्मण्येरजन्तस्य बहुव्रीहिणा सिद्धम्। एवमन्यत्रापि। यः पुनरण्यन्तस्तस्य घञन्तस्य बहुव्रीहिः, नार्थ एतेन। ननु बहुभक्ष इत्यत्र बहोर्नञ्वदित्युत्तरपदान्तोदात्तत्वं प्राप्नोति? एवं तर्हि भावेऽजन्तेन व्यधिकरणपदो बहुव्रीहिर्भविष्यति----बहुषु भक्षोऽस्य बहुभक्ष इति, तत्रोत्तरपदार्थस्य बहुत्वाभावाद्बहुस्वरो न भविष्यति? सत्यम्; अण्बाधनार्थ तु वचनम्, अकारादनुपपदात्कर्मोतपपदो विप्रतिषेधेन। पचादिभ्योऽच्, अनुपपदोऽकारस्तस्यावकाशः----पचतीति पचः, कर्मोपपदस्यावकाशः----काण्डलावः शरलावः; ओदनपाव इत्यत्रोभयप्रसङ्गे परत्वादयमेवाण् भवति। तेनोपधावृद्धिः, उपपदसमासश्च नित्यो भवति। अचि तु षष्ठीसमासो विकल्पितः स्यात्। न चच वाच्यं युगपद्विवक्षायां भवतु विप्रतिषेधः, केवले पच्यर्थे विवक्षितेऽचि कृते पश्चादोदनसम्बन्धे विवक्षिते ओदनपच इत्यपि प्राप्नोति? एकत्वात्प्रयोगस्य। न हि तस्मिन्नेव प्रयोगे विवक्षितं चाविवक्षितं च कर्म भवति। तस्मादोदनपच इत्यसाधुरेव। गङ्गाधरः, श्रीधरः, वज्रधरः, भूधरः, स्रग्धरेति तु सञ्ज्ञाशब्दाः। यदा त्वजपि सर्वधातुभ्य इति पक्षः, तदापवादत्वादेव तस्याण् बाधकः। तथा `इगुपधज्ञाप्रीकिरः कः' अनुपपदस्तस्यावकाशः---विक्षिपः, विलिखः, कर्मोपपदस्य स एव; काष्ठभेद इत्यत्रोभयप्रसङ्गे परत्वादयमेवाण् भवति। तथा `अनुपसर्गाल्लिम्पविन्द' इत्यनुपपदः शस्तस्यावकाशः----लिम्पतीति लिम्पः, कर्मोपपदस्य स एव; कुङ्मलेप इत्यत्रोभयप्रसङ्गे परत्वादयमेवाण् भवति। `आतश्चोपसर्गे' इति कोऽनुपपदस्तस्यावकाशः----सुग्लः सुम्लः, कर्मोपपदस्य स एव; गोसन्दाय इत्यत्रोभयप्रसङ्गे परत्वादयमेवाण् भवति।।

ह्वावमश्च।। 3.2.2 ।।

ह्वावमश्च।। वेञ् तन्तुसन्ताने इति। `वा गतिगन्धनयोः' इत्यस्य ग्रहणं न भवति; अकर्मकत्वात्। भ्रमणार्थो ह्यसौ----सर्वा दिश आवाति वात आवातु भेषजमिति। सोपसर्गस्य तु सकर्मकत्वेऽप्यग्रहणम्; पूर्वेणैवाणः सिद्धत्वात्। वाता वान्ति दिशो दशेति प्रयोगश्चिन्त्यः। अथापि क्वचित्कथञ्चित्सकर्मकत्वम्, तथापि ह्वेञा साहचर्यात्सानुबन्धकस्यैव वेञो ग्रहणम्। माङ् माने इति। ङितो मारूपस्योपलक्षणमेतत्, तेन `मेङ् प्रणिदाने' इत्यस्यापि ग्रहणम्। `मा माने' इत्यस्य तु संभावनार्थस्याकर्मकत्वादग्रहणम्।

आतोऽनुपसर्गे कः।। 3.2.3 ।।

आतोऽनुपसर्गे कः।। कविधौ सर्वत्र प्रसारणिभ्यो डो वक्तव्यः। संप्रसारणभाजः===प्रसारणिनः। `ज्या वयोहानौ' ब्रह्म जिनातीति ब्रह्मज्यः, सर्वत्रग्रहणान्नावश्यमिहैव `आतश्चोपसर्गे'आह्वः प्रह्वः, के हि संप्रसारणप्रसङ्गः, आह्व अ इति स्थिते संप्रसारणे पूर्वत्वे च कृते उवङादेशे आहुवः प्रहुव इति प्राप्नोति, एवं ब्रह्मजिय इति प्राप्नोति। ननु संप्रसारणे कृते आतो लोपस्तस्य स्थानिवद्भावादियङुवङौ न भविष्यतः, लोपो न सिद्ध्यति----अन्तरङ्गत्वात्पूर्वत्वं प्राप्नोति, समानाश्रये च वार्णादाङ्गं बलीय इति? एवं तर्हि प्रागेव संप्रसारणादातो लोपो भविष्यति, परत्वाद् नित्यं संप्रसारणम्, कृताकृतप्रसङ्गित्वात्' आतो लोपस्त्वनित्यः, कृते संप्रसारणे पूर्वत्वेन बाद्ध्यते---यस्य च निमित्तं लक्षणान्तरेण विहन्यते तदनित्यम्। तदेवं परत्वादातो लोपः, ततः संप्रसारणम्, तत इयङुवङौ प्रसक्तावाल्लोपस्य स्थानिवत्त्वान्न भविष्यतः। ननु योऽनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः,

आदिष्टाच्चैषोऽचः पूर्वम्---इदानीमेव ह्युक्तं पूर्वमल्लोपः पश्चात् संप्रसारणमिति? एवं तर्ह्याकारलोपस्यासिद्धत्वादुवङ् न भविष्यति। इहापि तर्हि जुहुवतुः जुहुवतुः आल्लोपस्यासिद्धत्वादुवङ् न प्राप्नोति? आभीयमसिद्धत्वमनित्यमित्यत्र न भविष्यति। अथ वा `संप्रसारणाच्च' `एङः पदान्तात्' इत्यत्र एङ इति योगविभागः---संप्रसारणादेङि परतः पूर्वपरयोः पूर्वमेकादेशो भवतीति। किमर्थमिदम्, न `संप्रसारणाच्च' इत्येव सिद्धम्? ज्ञापनार्थम्-----यत्र संप्रसारणात्पर एङ् संभवति तत्र `आदेच उपदेशेऽशिति' इत्यात्वं न भवतीति। यदि स्यात्पूर्वत्वेन तस्य निवृत्तिविधानमनुपपन्नं स्यात्। तेन जुहुवतुरित्यत्रानैमित्तिकत्वेनान्तरङ्गमप्यात्वमकृत्वा एङ्भावादेव लिटि विहिते संप्रसारणे पूर्वत्वे न स्थानिवत्त्वं नासिद्धत्वमिति सिद्धमिष्टम्। आह्वः, प्रह्वः, ब्रह्मज्य इत्यत्र त्वाकारान्तलक्षणः प्रत्ययो नासत्यात्वे भवितुमर्हतीति पूर्वमात्वम्, ततः प्रत्ययः, आल्लोपः, संप्रसारणम्, असिद्धत्वादियङुवङोरभावः।।

सुपि स्थः।। 3.2.4 ।।

सुपि स्थः।। सुपीति न सप्तमीबहुवचनस्य ग्रहणम्, किं तर्हि? प्रत्याहारस्य; `सुप्तिङन्तं पदम्',`सुप आत्मनः क्यच्',`सुपो धातुप्रतिपदिकयोः',`अव्ययादाप्सुपः' इत्यादौ तस्यैव प्रसिद्ध्वात्। द्वाभ्यं पिबतीति। ननु रूढिशब्दा द्विपादयः, ततश्चासन्तमप्यवयवार्तमाश्रित्य कर्मोपपद एव कः करिष्यते? नैतदेवम्; द्वाभ्यां पिबतीत्यादेरवयवार्थस्य सम्भवतोऽपरित्यागेनैव व्युत्पत्तौ सम्भवत्यामस्याः कल्पनाया अयुक्तत्वात्। यत्र त्वत्यन्तमसम्भवः, युक्ता तत्रैव सा कल्पना, यथा---तैलतपायिकादौ। अनेन भावे यथा स्यादिति। आरम्भसामर्थ्यात्तावदयं कर्तुरपकृष्यते, न चान्योऽर्थो निर्द्दिश्यते। अनिर्दिष्टार्थाश्च प्रत्ययाः स्वार्थे भवन्ति, स्वार्थस्च धातूनां भाव एव। ननु `घञर्थे कविधानम्' इति भावे कः सिद्धः? सत्यम्; नित्यसमासार्थन्तु वचनम्, अन्यर्था पाक्षिकः षष्ठीसमासः स्याद्। नित्य एव तूपपदसमासो भवति, तथा चाखूनामुत्थानमित्यस्वपदेन विग्रहः कृतः। घञर्थे कविधानमित्यत्र स्थग्रहणं कर्तृवर्जिते कारकेऽपि यथा स्यादिति।।

तुन्दशोकयोः परिमृजापनुदोः।। 3.2.5 ।।

तुन्दशोकयोः परिमृजापनुदोः।। तुन्दपरिमृज इति। मृजेरजादौ संक्रम इत्यत्र `यस्मिन्विधिस्तदादौ' इत्येव सिद्धे आदिग्रहणं मुख्याजादिपरिग्रहार्थम्, तेन व्यपदेशिवद्भावेनाजादावत्र के वृरद्धिर्न भवति।

आलस्य इत्यादि। आलस्ये गम्यमाने सुखोत्पादने च प्रत्यय इत्यर्थः। तत्र सामर्थ्यादलसे कर्त्तरि सुखस्य चाहर्तरि प्रत्ययो भवतीत्युक्तं भवति। शोकापनोद एवान्य इति। यस्संसारानित्यताद्युपदेशेन शोकमेव केवलमपनुदति, न तु सुखमुत्पादयति स शोकापनोदः। मूलविभुजादिभ्य इति। तादर्थ्य एषा चतुर्थी, मूलविभुजादिसिद्ध्यर्थमिर्त्थः। आकृतिगणश्चायम्, तेन महीध्र---कुध्र---शिरोरुहादि सिद्धं भवति। काकगुहा इति। काकेभ्यो गूहितव्या इति कर्मणि कप्रत्यय इष्यते, अतो घञर्थे कविधानमित्यत्रेदं द्रष्टव्यम्।।

प्रे दाज्ञः।। 3.2.6 ।।

प्रे दाज्ञः।। ददातेरिति। उपलक्षणमेतत्। `गामादाग्रहणेष्वविशेषः' इति सर्वेषामेव दारूपाणां ग्रहणमिष्यते। जानातेश्चेति। जनेस्त्वल्लोपेनायं निर्देशो न भवति; `खनो घ च' `हनश्च वधः' इत्यादौ धातुनिर्द्देशेऽल्लोपस्याकरणात्। प्रेणोपसृष्टादिति। प्रशब्देनोपसर्गेण सम्बद्भादित्यर्थः। `अनुपसर्गे' इति चानुवर्तते, तेन केवलेन प्रेणोपसृष्टादित्यर्थः। अतश्च गोसम्प्रदाय इत्यणेव भवति।।

समि ख्यः।। 3.2.7 ।।

गापोष्टक्।। 3.2.8 ।।

गापोष्टक्।। गायतेरिति। `गामादाग्रहणेष्वविशेषः' इति गाङो लुग्विकर रणस्यापि ग्रहणं प्राप्तं पिबतिसाहचर्यात्तु न भवति। सामगीति। टकः कित्त्वादातो लोपः, टित्त्वान् ङीप्।

सुराशीध्वोः पिबतेरिति वक्तव्यमित्य। पिबतेरिति लुग्विकरणालुग्विकरणपरिभाषालभ्यस्यैवार्थस्य कथनम्, उपपदपरिगणनं तु वाचनिकमेव। क्षीरपेति। स्त्रियामेव विशेषात् स्त्रीलिङ्गमुदाहृतम्।।

हरतेरनुद्यमनेऽच्।। 3.2.9 ।।

हरतेरनुद्यमनेऽच्।। अच्प्रकरण इति। लिङ्गविशिष्टपरिभाषयैव घटग्रहणेन घटीग्रहणेऽपि सिद्धे घटीग्रहणम् परिभाषाया अनित्यत्वज्ञापनार्थम्। सूत्रग्राह एवान्य इति। यस्सूत्रं केवलमुपादत्ते, न तु धारयति तत्राणेव भवतीत्यर्थः।।

वयसि च।। 3.2.10 ।।

वयसि च।। संभाव्यमानं वेति। तेनासत्यपि कवचग्रहणे वयसि गम्यमाने कवचहर इति भवतीति भावः।।

आङि ताच्छील्ये।। 3.2.11 ।।

आङि ताच्छील्ये।। पुष्पाद्याहरणे इत्यादिना ताच्छील्यमुदाहरणे दर्शयति। स्वाभाविकीति। स्वभावे भवा स्वाभाविकी, अध्यात्मादिः। स्वशब्दो द्वारादिषु पठ्यते, तदादिविधिश्च तत्रेष्यते। भाष्यकारप्रयोगात्तु द्वारादिकार्याभावः, स्वार्थिकस्वाभाविकश्ब्दौ भाष्ये प्रयुक्तौ। अस्य विवरणम्---फलानपेक्षेति। कथं पुनः फलमनपेक्ष्य तत्र प्रवर्त्तते, न हि स्वभावः पर्यनुयोगमर्हति।।

अर्हः।। 3.2.12 ।।

स्तम्बकर्णयो रमिजपोः।। 3.2.13 ।।

स्तम्बकर्णयो रमिजपोः।। रमेरकर्मकत्वादिति। ननु `व्याङ्परिभ्यो रमः' `उपाच्च' इत्यत्रोदाहृतम्---देवदत्तमुपरमतीति? एवं मन्यते---`अनुपसर्गे' इति वर्तत इति। जपेश्च शब्दकर्मकत्वादिति। मन्त्रं जपतीत्यादौ तत्रैव प्रयोगदर्शनात्। कर्म न संभवतीति। केवलस्य रमेर्जपेश्च कर्माद्यशब्दात्मकमिति भावः। सूचकः==पिशुनः। स्तम्बेरम इति। `तत्पुरुषे कृति बहुलम्' इत्यलुक्। कर्णे जपिता मशक इति। उपांशुशब्दायितेत्यर्थः।।

शमि धातोः संज्ञायाम्।। 3.2.14 ।।

शमि धातोः संज्ञायाम्।। धातुमात्रादिति। मात्रग्रहणेनापवादविषयेऽपि विधानं भवतीति दर्शयति। शङ्कर इति। एहिकमामुष्मिकं मोक्षाख्यं च सुखं करोतीति शङ्करः। धातुग्रहणस्य प्रयोजनं दर्शयन्मात्रग्रहणप्रतिपादितमेवार्थ स्पष्टीकरोति---शमिसंज्ञायामिति। अस्मिन्सूत्र इत्यर्थः। असति धातुग्रहणे शमिशंज्ञायामित्यस्यावकाशः----शम्भवः, शंवद इति, `कृञो हेतुताच्छील्ये' इत्यस्यावकाशः----श्राद्धकर इति; शङ्करा इत्यत्रोभयप्रसङ्गे परत्वाट्ट एव स्याद्, धातुग्रहणसामर्थ्यादजेव भवति। कुण्डखाडवस्त्वाचार्यो मन्यते---गृणातेः शब्दकर्मण एतद्रूपम्, पृषोदरादित्वाद्रकारस्य ककार इति, तन्मते धातुग्रहणं चिन्त्यप्रयोजनम्।।

अधिकरणे शेतेः।। 3.2.15 ।।

अधिकरणे शेतेः।। पर्श्वादिष्विति। अनधिकरणार्थमिदम्। तद्विग्रहेण दर्शयति----पार्श्वाभ्यामिति। दिग्धसहशय इति। दिग्धेन सह शेते इत्यचि कृते मयूरव्यंसकादित्वात्समासः। दिग्दसहशब्दो मयूरव्यंसकादिस्तस्योपपदसमासः। अवमूर्द्धशय इति। अवनतां मूर्द्धा यस्य अवमूर्द्धा अधोमुखः शेत इत्यर्थः। गिरौ डश्चन्दसीति। यदि छन्दसीत्युच्यते, कथम् `गिरिशमुपचचार प्रत्यहं सा सुकेशी',`आरोपितं यद्गिरिशेन पश्चात्' इति? निरंकुशाः कवयः। अन्ये त्वाहुः-----इह यो गिरौ शेते गिरिस्तस्यास्तीति लोमादिषु दर्शनाच्छप्रत्ययः। तथा चात्रैव वार्त्तिकम्----तद्धितो वेति। न च लोमादिष्वपि छन्दोग्रहणमस्ति, तेन भाषायामपि गिरिश इति भवति। एवं च कृत्वा निघण्टुषु पाठोऽप्युपन्नो भवति। गिरौ शेत इति। गिरावास्त इत्यर्थः।।

चरेष्टः।। 3.2.16 ।।

भिक्षासेनादायेषु च।। 3.2.17 ।।

भिक्षाशेनादायेषु च।। भिक्षाचर इति। चरतिरत्र तत्पूर्वके अर्जने वर्त्तते, चरणेन भिक्षामर्जयतीत्यर्थः। सेनाचर इति। सेनां प्रविशन्नुच्यते। आदायचर इति। आदाय गच्छतीत्यर्थः, भक्षयतीति वा। कथं सहचरः, सहचरीति? पचादिषु चरडिति पठ्यते, सुप्सुपेति समासः।।

पुरोऽग्रतोऽग्रेषु सर्त्तेः।। 3.1.18 ।।

पुरोऽग्रतोऽग्रेषु सर्त्ते।। अग्रे इत्येतेष्विति। एतेनाग्रशब्दस्यैकारान्तत्वं निपात्यत इति दर्शयति। एतच्चाग्रेशब्दस्यच परनिपातनादेव विज्ञायते, अन्यथा `अजाद्यदन्तम्' इति पूर्वनिपातः स्यात्। किमर्थ पुनरेकारान्तत्वं निपात्यते, यावता सप्तम्या अलुकाप्यग्रेसर इति सिद्धम्? यदा तर्ह्यग्रं सरति अग्रेण सरतीति वा विगृह्यते तदाप्यग्रेसर इत्येव यथा स्यात्। कथं `यूथं तदग्रसरगर्वितकृष्णसारम्' इति? `कृत्यल्युटो बहुलम्' इति समर्थनीयम्।।

पूर्वे कर्त्तरि।। 3.2.19 ।।

कृञो हेतुताच्छील्यानुलोम्येषु।। 3.2.20 ।।

कृञो हेतुताच्छील्यानुलोम्येषु।। करोतेर्द्धातोरिति। प्रसिद्धतरत्वाद् द्व्यनुबन्धकस्याप्यस्यैव ग्रहणम्, न तु `कृञ् हिसायाम्' इत्यस्येति भावः। आनुलोम्ये च गम्यमान इति। एतेन हेत्वादीनि नोपपदानीति दर्शयति, एतच्च `शमि धातोः' इत्यत्र धातुग्रहणात्कृञो हेत्वादिषु टप्रतिषेधार्थाद्विज्ञायते। उपपदत्वे हि शम्यपपदे टप्रत्यस्य प्राप्त्यभावादनर्थकं तत्स्याद्। अतो नैषामुपपदत्वम्, नापि प्रत्ययार्थत्वम्,`कर्त्तरि कृत्' इत्सस्य बाधप्रसङ्गात्। न चासति विरोधे बाधा युक्ता। हेतुरैकान्तिक कारणमिति। एकान्तशब्दो विनयादिषु द्रष्टव्यः, नियतमव्यभिचारीत्यर्थः। एतेन लौकिकस्य हेतोर्ग्रहणमिति दर्शयति। न हि केवले कृञि प्रयोजककर्त्ता सम्भवतीति भावः। ननु लौकिकेनापि हेतुना कर्त्तुर्विशेषणमयुक्तम्, अव्यभिचारात्, न हि कर्तुरनिमित्तत्वमस्ति? सत्यम्; पुनर्हेतुशब्दोपादनादैकान्तिकत्वमाश्रीयते, अन्यथा निमित्तमात्रमुपादीयेत। अनुकूलता==आराध्यचित्तानुवर्तनम्। यशस्करी विद्येति। `अतः कृकमि' इत्यादिना विसर्जनीयस्य सत्वम्।।

दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु।। 3.2.21 ।।

दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रत्रेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु।। यथायोगमिति। तत्र दिवाशब्दोऽह्नीति सप्तम्यन्तस्यार्थे वर्तत इति तस्य कर्मत्वानुपपत्तेः `सुपि' इत्यनेनाभिसम्बन्धः, शेषाणां तु कर्मणीत्यनेन। यदि तु दोषामन्यमहः, दिवामन्या रात्रिरितिवद् वृत्तिविषये कर्मत्वमभ्युपगम्येत, तदा दिवाशब्दस्यापि कर्मणीत्यनेन संबन्धः। सकारस्येति। भास्करान्तेति भाशब्दस्य प्रत्ययसन्नियोगेन सकारो निपात्यते, तस्माद्भास्कर इत्यत्र विसर्जनीयजिह्वामूलीयौ न भवतः। अथ वा----सकारस्य विसर्जनीयजिह्वामूलीयौ न भवतः, कुतः? निपातनात्। भास्करान्तेति सूत्रे सकारोच्चारणमेव निपातनम्। कारकर इति। कर एव कारः, प्रज्ञादित्वात्स्वार्थेऽण। अनन्तकर इति। अन्तकरशब्देन नञ्समासेऽप्येतद्रूपं सम्भवति, स्वरे हि दोषः स्यात्----सतिशिष्टोऽव्ययपूर्वपदप्रकृतिस्वरः प्रसज्येत, इष्यते हि गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वम्। बहुकर इति। बहुशब्दो वैपुल्यवचनः, संख्यावचनस्य तु चसंख्याग्रहणेनैव सिद्धम्। लिपिलिबिशब्दौ पर्यायौ। अहस्कर इति। अहन् `रोः सुपि' इति रोफः, पूर्ववत्सत्वम्। धनुष्करः, अरुष्कर इति।

`नित्यं समासेऽनुत्तरपदस्थस्य' इति षत्वम्, `किंयत्तद्बहुषु कृञोऽज्विधानम्' इति वार्त्तिकेन सूत्रस्य बाधितत्वाट्टस्याभावाद्धेत्वादिष्वन्यत्र

किंकरीत्यसाधुरित्याहुः। क्वचिद् ग्रन्थः---अथ वा वचादिषु पाठः करिष्यत इति। तत्रायमर्थः----इह किमादिग्रहणमपनीय पचादिष्वेव `किंयत्तद्बहुषु कृञः' इति पठितव्यमिति।।

कर्मणि भृतौ।। 3.2.22 ।।

कर्मणि भृतौ।। कर्मणीति स्वरूपग्रहणमिति। अनुवृत्तेन कर्मणीत्यनेन विशेषणात्। कर्मनिर्वेश इति। कर्म क्रिया, तस्य निष्क्रयाय देयं भक्तादिद्रव्यमित्यर्थः।।

न शब्दश्लोककलहगाथावैरचाटुमूत्रमन्त्रपदेषु।। 3.2.23 ।।

स्तम्बशकृतोरिन्।। 3.2.24 ।।

स्तम्बशकृतोरिन्।। स्तम्बकरिरिति। नित्त्वात्कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदमाद्युदात्तं भवति।।

हरतेर्दृतिनाथयोः पशौ।। 3.2.25 ।।

हरतेर्दृतिनाथमोः पशौ।। पशौ कर्त्तरीति। एतेन प्रत्ययार्थस्य कर्तुः पशुर्विशेषणम्, न तु तस्य बाधक इति दर्शयति। धातोर्हि प्रत्ययविधानात्तदर्थस्य येन सम्बन्धस्तत्र वाच्ये प्रत्ययो भवितुमर्हति। धात्वर्थस्य च क्रियायाः साधनेन सम्बन्धः। पशुशब्दस्तु चतुष्पाज्जातीयं वस्तुस्वरूपेणाचष्टे, न शक्तिमद्रूपेण, नतरां शक्तिरूपेणेति। न पश्वर्थः स्वरूपेण प्रत्ययार्थो भवितुमर्हतीति युक्तमुक्तम्पशौ कर्तरीति। एवं सर्वत्र प्रत्ययार्तविशेषणं द्रष्टव्यम्।।

फलेग्रहिरात्मम्भरिश्च।। 3.2.26 ।।

फलेग्रहिरात्मम्भरिश्च।। उपपदस्यैकारान्तमिति। छन्दस्यकारान्तत्वमपि दृश्यते---या वनस्पतीनां फलग्रहिरिति। स कुक्षिम्भरिवच्चकारेण समुच्चेतव्यः।।

छन्दसि वनसनरक्षिमथाम्।। 3.2.27 ।।

छन्दसि वनसनरक्षिमथाम्।। वन षण संभक्ताविति। गणे सहपठितयो र्भौवादिकयोरेव ग्रहणम्, न तु `वनु याचने' `षणु दाने' इति तानादिकयोरिति भावः। अत्र साहचर्यमेव हेतुः, निरनुबन्धकत्वं च। ब्रह्मवनिमिति। ब्रह्म वनति, क्षत्रं वनतीति विवक्षयामिन् प्रत्ययः, तदन्ताद् द्वितीयैकवचनम्। गौसनिमिति। गांसनतोति विग्रहः। पथिरक्षी इति। पन्थानं रक्षत इति विग्रहः। हविर्मथन्तीति हविर्मथयस्तेषां हदिर्मथीनाम्।।

एजेः खश।। 3.2.28 ।।

एजेः खश।। ण्यन्तादिति। एजेस्त्वयमिका निर्देशो न भवति; खशः शित्करणात्। तद्धि सार्वधातुकत्वे सति शब्यथा स्यादिति। न चैजेः प्रकृत्यन्तरस्य शपि सत्यसति वा विशेषोऽस्ति। न चेवमिहार्थत्वे सम्भवति, केवलोत्तरार्थत्वं युक्तम्। सित्करणं मुमर्थमिति। खित्कार्योपलक्षणमेतत्। शुनिन्धयः नाडिन्धयः, नासिकन्धय इति ह्रस्वत्वमपि प्रयोजनम्। शकारः सावधातुकार्थ इति। सार्वधातुकसंज्ञार्थ इत्यर्थः। वातशुनीत्यादि। वातादिषु यथासंख्यमुपपदेषु अजादिभ्यो धातुभ्यः खश् प्रत्ययो भवति। शर्द्धजहा इति। `ओहाक् त्यागे' जुहोत्यादित्वाच्छपः श्लौ द्विर्वचने `श्नाभ्यस्तयोरातः' इत्याकारलोपः।।

नासिकास्तनयोर्ध्माधेटोः।। 3.2.29 ।।

नासिकास्तनयोर्ध्माधेटोः।। नासिकन्धम इति। पाघ्रादिसूत्रेण धमादेशः। तच्चैतदित्यादिना यथासंख्याभावे हेतुमाह, तच्चैतत् यथासंख्याभावलक्षणं कार्यम्। एतेन च व्याख्यातृणां मूलत्वेन सूत्रकारस्याप्यत्र किंचिदभिप्रेतमित्येतावत्प्रदर्श्यते। तेनैतन्न नोदनीयम्-----उत्तरसूत्रवत्प्रत्येकमभिसम्बन्धः कस्भान्न भवति, विपर्ययो वा कस्मान्न भवतीति। स्तनन्धयति। अत्रैव ङीबिष्यते, नान्यत्रेत्याहुः।।

नाडीमुष्ट्योश्च।। 3.2.30 ।।

नाडीमुष्ट्योश्च।। घटिन्धमः, खरिन्धम इति। घटी=घटः, खरी=गर्दभी, जातिलक्षणो ङीष्। खारीत्यन्ये पठन्ति स च परिमाणवचनः। वातशब्दो न दृष्टः।।

उदि कूले रुजिवहोः।। 3.2.31 ।।

उदि कूले रुजिवहोः।। यत्र प्रत्येकमुपपदत्वमिच्छति तत्र समुदायात्सप्तमीमुच्चारयति, यथा---नाडीमुष्ट्योरिति। इह तु विपर्ययः कृतः; तस्मात् `उदि' इति सत्सप्तमी। `कूले' इति त्वर्थनिरपेक्षैवोपपदसंज्ञायां लिङ्गम्। तत्र च `ते प्राग्धातोः' इति उच्छशब्दस्य धातोः प्राक् प्रयोगः। ततः पूर्वः कूलशब्दः। तदेतद्दर्शितम्----उत्पूर्वाभ्यां कूले कर्मण्युपपद इति।।

वहाभ्रे लिहः।। 3.2.32।।

परिमाणे पचः।। 3.2.33 ।।

परिमाणे पचः।। परिमाणशब्दः काष्ठादिनिर्मिते प्रस्थादौ वर्त्तते, न तस्य लिक्लेदवाचिना पचिना कर्मत्वेनान्वयः। अतो न स्वरूपग्रहणम्, किं तर्हि? तद्विशेषाः प्रस्थादयो गृह्यन्ते, ते च परिमेये परिमेये व्रीह्यादौ च वर्त्तन्ते। तत्र परिमाणनिष्ठानां न पचिनान्वय इति परिमेयनिष्ठेषु प्रत्ययः। न तर्हि परिमाणवाचित्वम्, न; परिमामाध्यारोपेण परिमेये प्रस्थादिशब्दस्य प्रवृत्तेः।।

मितनखे च।। 3.2.34 ।।

मितनखे च।। नखम्पचेति। पचिरत्र तापवचनः।।

विध्वरुषोस्तुदः।। 3.2.35 ।।

विध्वरुषोस्तुदः।। अरुन्तुद इति। `अरुर्द्विषदजन्तस्य मुम्' इति उकारात्परो मुम्, संयोगान्तस्य लोपः।।

असूर्यललाटयोर्दृशितपोः।। 3.2.36 ।।

असूर्यललाटयोर्दृशितपोः।। असूर्यम्पश्या इति। पाघ्रादिसूत्रेण पश्यादेशः। गुप्तपरं चैतदिति। यद्वचनम्---`असूर्यम्पश्या राजदाराः' इति, एतद् गुप्तिप्रधानम्;

तेन सत्यपि सूर्यदर्शने प्रयोगो न विरुद्ध्यत इति भावः। गुप्तिपरत्वमेव प्रकटयति एवं नामेति।।
उग्रम्पश्येरम्मदपाणिन्धमाश्च।। 3.2.37 ।।
उग्रम्पश्येरम्मदपाणिन्धमाश्च।। उग्र पश्यतीति। क्रियाविशेषणमेतत्। इरम्मद इति। `मदी हर्षे' दिवादित्वाच्छ्यनि प्राप्ते तदभावो निपातनात्। इरा=उदकम्। पाणिन्धमाः पन्थान इति। ते पुनर्येषु गच्छद्भिः सर्पाद्यपनोदनाय पाणयो ध्मायन्ते=शब्द्यन्ते।।
प्रियवशे वदः खच्।। 3.2.38 ।।
प्रियवशे वदः खच्।। चकारः खचि ह्रस्वः इति विशेषणार्थ इति। `खे ह्रस्वः' इत्युच्यमाने `एजेः खश्' अङ्गमेजयः, जनमेजयः---अत्रापि प्राप्नोति?`एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य' इत्यत्र न भविष्यति। इह तर्हि---`कुलात्खः' कुलीनः, यस्येति लोपनिवृत्तये ह्रस्वः स्यात्? तत्र धातुप्रत्ययस्य ग्रहणं तत्प्रकरणसाहचर्यादेष चिन्त्यप्रयोजनश्चकारः। प्रत्ययान्तरकरणमुत्तरार्थमिति। `द्विषन्तपः' इत्यत्र ह्रस्वणिलोपौययास्याताम्, शप् च मा भूदिति। यद्येवम्, उत्तरत्रैव कर्तव्ये इह करणे किं प्रयोजनम्? अन्येभ्योऽपि भवतीति ज्ञापनार्थम्। तेन `गमेः सुप्युपसंख्यानम्' इति न वक्तव्यं भवति। मितङ्गम इति। असंज्ञार्थमिदम्, संज्ञायां तु `गमश्च' इति वक्ष्यमाणेनैव सिद्धम्।
द्विषत्परयोस्तापेः।। 3.2.39 ।।
द्विपत्परयोस्तापेः।। द्विषन्तप इति। मुमि संयोगान्तलोपः। द्वितकारको निर्देश इति। तत्रैकेन द्विषच्छब्दो विशेष्यते-----तकारान्तो यो द्विषच्छब्द इति, सौत्रत्वान्निर्द्देशस्य विशेषणस्य परनिपातः। तेन स्त्रियां न भवतीति। अन्यथा लिङ्गविशिष्टपरिभाषया स्यादेव प्रसङ्ग इति भावः।।
वाचि यमो व्रते।। 3.2.40 ।।
वाचि यमो व्रते।। शास्त्रि इति। शास्त्रशब्दाद्विधाने धात्वर्थे णिच्, तदन्तात्कर्मणि क्तः। शास्त्रे विहितः, शास्त्रेण वा=शास्त्रितः। नियम इति। सङ्कल्पविशेषः। वाचंयम इति। `वाचंयमपुरन्दरौ च' इति पूर्वपदस्यामन्तत्वम्। तत एव तर्हि निपातनात्प्रत्ययो भविष्यति। व्रतादन्यत्रापि तर्हि प्राप्नोति? तत्रैव ब्रतग्रहणं करिष्यते----`वाचंयमो ब्रते पुरन्दरश्च' इति, तदेतच्चिन्त्यप्रयोजनम्। एतेन पुरन्दरो व्याख्यातः।
वाग्याम इति। योऽशक्त्यादिना वाचं यच्छति तत्राणेव भवति।।
पूः सर्वयोर्दारिसहोः।। 3.2.41 ।।
पूः सर्वयोर्दारिसहोः।। `दृ विदारणे' इत्यस्य ग्रहणम्; न `दृ भये',`दृङ् आदरे'-----इत्येतयोरित्युपदेशः। असंज्ञार्थं सहिग्रहणम्, संज्ञायां तु वक्ष्यति। सर्वसहो राजेति। सर्व संपादयितुं समर्थ इत्यर्थः।।
सर्वकूलाभ्रकरीषेषु कषः।। 3.2.42 ।।
मेघर्त्तिभयेषु कृञः।। 3.2.43 ।।
मेघर्त्तिभयेषु कृञः।। करोतेरिति। कृणोतेस्तु पूर्ववदेवाग्रहणम्। शिवंकर इत्यपि छन्दसि दृश्यते----शिव एको ध्येयः शिवंकर इति।।
क्षेमप्रियमद्रेऽण् च।। 3.2.44 ।।
आशिते भुवः करणभावयोः।। 3.2.45 ।।
आशिते भुवः करणभावयोः।। अत्र सुपीत्युपतिष्ठते इति। न तु कर्मणीति, भवतेरकर्मकत्वात्। सोपसर्गात्प्राप्त्यर्थाच्च खचा न भवितव्यम्, अनभिधानादिति भावः। आशितशब्दोऽयम् `अश भोजने' इत्यस्मादाङ्पूर्वादविवक्षिते कर्मणि क्तप्रत्ययान्तो गृह्यते---आशितः कर्त्तेति, यस्याद्युदातत्वं विधास्यते। यस्तु `ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' इति भावकर्माधिकरणेषु क्तः, न तदन्तो गृह्यते, अनभिधानादित्याहुः। अन्ये त्वशेर्ण्यान्तात्प्रयोज्ये कर्मणि क्तप्रत्यये कृते य आशितशब्दः स गृह्यते। एवमाशितः कर्तेति यस्याद्युदात्तत्वं तत्रापि प्रयोज्य एव भूतपूर्वगत्या कर्त्तोच्यते, `गतिबुद्धिप्रत्यवसानार्थ'इति अणौ कर्तुर्णौ कर्मसंज्ञाविधानात्। तथा च कृषन्नित्फाल आशितं कृष्णोतीति आद्युदात्तस्यावग्रहो न दृश्यते। कर्तृग्रहणं तु तत्र भावनिवृत्त्यर्थमिति। आशितम्भव ओदन इति। यावतौदनेनातिथ्यादिराशितो भवति स एवमुच्यते।।
संज्ञायां भृतृवृजिधारिसहितपिदमः।। 3.2.46 ।।
संज्ञायां भृतृवृजिधारिसहितपिदमः।। संज्ञावशादित्यादि। `शत्रुन्तपः' इत्यादौ यत्र कर्मार्थानुगमस्तत्र कर्मणीति सम्बध्यते। यत्र तु न रथन्तरमित्यादौ तत्र सुपीति। अरिन्दम इति। अन्तर्भावितण्यर्थो दमिः सकर्मको भवति।।
गमश्च।। 3.2.47 ।।
गमश्च।। योगविभाग उत्तरार्थ इति। उत्तरत्र गमेरेवानुवृत्तिर्यथा स्याद्, भृतृप्रभृतीनां मा भूत्।।
अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः।। 3.2.48 ।।
अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः।। अनुबन्धकरणसामर्थ्यादिति। श्रवणार्थस्तु डकारो न भवति, `पादस्य पदाज्यातिगोपहतेषु' इति कृतटिलोपस्य डप्रत्ययान्तस्य निर्देशात्। अत्रात्यन्तानन्तग्रहणमनर्थकम्, अन्तशब्दोऽत्र गृह्यते, तेन कर्मणो विशेषणात्तदन्तविधिर्भविष्यति। उपपदविधौ तु न सर्वत्र तदन्तविधिः, उपपदविधौ तदाद्यादिग्रहणमिति नियमात्। पन्नं पतितं यथा गच्छतीति पन्नगः। `सुदुरोरधिकरणे' इति कर्मणि खलेव भवति----सुगमः, दुर्गम इति। अन्यत्रापि दृश्यत इति। एवं च सूत्रमपि प्रपञ्चार्थम्।।
आशिषि हनः।। 3.2.49 ।।

आशिषि हनः।। दाराविति। दारुशब्द इत्यर्थः। शब्दापेक्षया पुंल्लिङ्गः,टविधानार्थ वचनम्, अण् `कर्मण्यण्' इत्येव सिद्धः। अन्तग्रहणं विस्पष्टार्थम्, `अलोऽन्त्यस्य' इत्येव सिद्धम्।।

अपे क्लेशतमसोः।। 3.2.50 ।।

कुमारशीर्षयोर्णिनिः।। 3.2.51 ।।

कुमारशीर्षयोर्णिनिः।। `सुप्यजातौ' इति सिद्धेऽताच्छीत्यार्थमिदं वचनम्,शिरसः, शीर्षभावार्थ च।।

लक्षणे जायापत्योष्टक्।। 3.2.52 ।।

लक्षणे जायापत्योष्टक्।। लक्षणवतीति। एतेनार्श आद्यच्प्रत्ययान्तो लक्षणशब्द इति दर्शयति। एतच्च सूत्रारम्भादेवावसीयते, केवले हि लक्षणे उत्तरेणैव सिद्धः प्रत्ययः। जायाघ्नो ब्राह्मण इति। यस्य तिलकालादि जायामरणलिङ्गमस्ति स तां हन्तीति गौणो गदः। एतेन पतिघ्नी व्याख्याता। `गमहन' इत्युपधालोपः, टित्त्वान्ङीप्।।

अमनुष्यकर्तृके च।। 3.2.53 ।।

अमनुष्यकर्तृके च।। अमनुष्यशब्दो रक्षः पिशाचादिषु रूढ इति पूर्वमुक्तम्, इह तु मनुष्यादन्यः सर्व एव गृह्यते। ननु यथा पूर्वसूत्रे लक्षणग्रहणं प्रत्ययार्थस्य कर्तुविशेषणम्, एवमिहाप्यमनुष्यग्रहणं भविष्यतीति नार्थः कर्तृग्रहणेन? `अमनुष्ये' इत्युच्यमाने उपपदत्वमपि विज्ञायेत, तस्मात्कर्तृ ग्रहणम्। कृतघ्नशब्दो मूलविभुजादिषु द्रष्टव्यः।।

शक्तौ हस्तिकपाटयोः।। 3.2.54 ।।

शक्तौ हस्तिकपाटयोः।। विषेण हस्तिनं हन्तीति। नन्वत्राप्यशक्तस्य कर्तृत्वानुपपत्तेरस्त्येव शक्तिः? सत्यम्;

शक्तिग्रहणसामर्थ्यात्प्रकर्षविज्ञानादन्यतिरपेक्षस्वबलेनैव हन्तुं या शक्तिः सा गृह्यते, तद्दर्शयति----हस्तिनं हन्तुं समर्थो हस्तिघ्नो मनुष्य इति। एवं च हस्तिनं हन्तु मा वा वधीत् सामर्थ्ययोगाद्धस्तिघ्न इत्युच्यते।

कं पाटयति प्रविशत इति। कपाटशब्दं व्युत्पादयति। कवाटमिति तु प्रसिद्धः, तत्राटतेः पचाद्यच्। `कवङ् चोष्णो' इति योगविभागात्कोः कवादेशः।।

पाणिघताडघौ शिल्पिनि।। 3.2.55 ।।

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्।। 3.2.56 ।।

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्।। आढ्यादिष्विति। अनेन आढ्यादीनामुपपदत्वं दर्शयति। करणे कारके इत्यनेनापि करणस्य प्रत्ययार्थत्वम्। अथैवं कस्मान्न विज्ञायते---करण उपपदे आढ्यादिषु कर्तृष्विति? उच्यते----`च्व्यर्थेष्वच्चौ' इति वचनाद् आढ्यादिशब्दाः स्वरूपप्रधानाः, न च शब्दानां कर्तृत्वमुपपद्यते। ननु च श्रवणेन करोति सुखमाढ्याशब्द इत्यत्र शब्दस्यापि कर्तृत्वं सम्भवति? एवं तर्हि व्याख्यानात्तथा नाश्रीयते। अच्वाविति तत्पुरुषो बहुव्रीहिर्वा, अच्व्यन्त इत्यर्थः। प्रत्येकं सम्बन्धात्त्वेकवचनम्। कथं पुनच्व्यर्थाश्च भवन्त्यचव्यन्ताश्च भवन्तीत्याह----च्वेविकल्पेन विधानादिति। आढ्यङ्करणमिति। ख्युनः खकारो मुमर्थः, लिङ्गविशिष्टपरिभाषया स्त्रालिङ्गष्वाढ्यादिषूपपदेषु ह्रस्वार्थश्च। नकारः स्वरार्थः। योरनादशः।

अभ्यञ्चयन्तीत्यर्थ इति। अनेकार्थत्वाद्धातूनाम्। तेनात्र प्रागनाढ्यः सन्नाढ्यः क्रियत इति अभूततद्भावाभावः। भवतु वाऽभूततद्भावः, तथापि युक्तमेवेदं प्रत्युदाहरणमित्याह---प्रकृतेरविवक्षायामिति। प्रकृतिरेव परिणामित्वेन यत्र विवक्ष्यते, यथा-----तन्तवः पटो भवतीति, तदा च्विप्रत्ययः, तथा च वार्त्तिकम्----`प्रकृतिविवक्षाग्रहणं च' इति, प्रकृतिः कार्यस्य पूर्वावस्था।

अच्वाविति किमिति। अस्य वक्ष्यमाणोऽभिप्रायः, तमाविष्करोति----ननु चेति। ल्युटात्र भवितव्यमिति। `करणाधिकरणयोश्च' इति। न च ल्युटः ख्युनश्च विशेषोऽस्तीति, ल्युटि तावदाढ्योकरणमिति रूपम्, स्वरोऽपि लित्स्वरेणोत्तरपदाद्यु9दात्तत्वम्; ख्युन्यपि नित्स्वरेणाद्युदात्तत्वम्, `खित्यनव्ययस्य' `अरुर्द्विषदजन्तस्य मुम्' इति ह्रस्वत्वम्, मुम् चानव्ययस्य विधीयते, च्व्यन्ताश्चाव्ययम्; `ऊर्यादि च्विडाचश्च' इति निपातत्वात्। स्त्रियामप्युभयत्र `टिड्ढाणञ्' इत्यादिना ङीब् भवति, अतो रूपे स्वरे च नास्ति विशेषः। उत्तरार्थश्चोति। उत्तरसूत्रे खिष्णुच्खुकञ्भ्यां मुक्ते तृजादिभिर्भवितव्यमित्यस्ति विशेषः, कथं तर्हि पूर्वमुक्तम्---प्रतिषेधसामर्थ्यादिति? अस्मिन्सूत्रे प्रतिषेधसामर्थ्यादिति भावः। केवलोत्तरार्थत्वे हि तत्रैव `अच्वौ' इत्यवक्ष्यत्, यथा वक्ष्यते----इह किंचित्त्रपो इति। भाष्ये तूत्तरार्थमेव स्थितम्।।

कर्त्तरि भुवः खिष्णुच्खुकञौ।। 3.2.57 ।।

कर्त्तरि भुवः खिष्णुच्खुलञौ।।कर्त्तग्रहणं करणनिवृत्त्यर्थम्, उत्तरार्थं च, खकारो मुमर्थः, चकारः स्वरार्थः, ञकारो वृद्ध्यर्थश्च। किमर्थं खिष्णुजिकारादिः क्रियते, न ख्स्नुरित्येवोच्येत, तत्रायमप्यर्थः---स्वरार्थश्चकारो न कर्त्तव्यो भवति, प्रत्ययस्वरेणैव सिद्धम्? केनेदानीमिकारादित्वं सिद्ध्यति? तत्राह---उदात्तत्वादिति। भवतिरयमुदात्तः, तस्योदात्तत्वादिड् भविष्यति। नञस्त्विति। `नञः' इति पञ्चमी, नञ उत्तरस्य खिष्णुजन्तस्य स्वरमिद्ध्यर्थमित्यर्थः। यद्ययमिकारादिर्नक्रियेत्, ततः सत्यपीटि `कृत्योकेष्णुच्चार्वादयश्च' इत्यस्य ग्रहणं न स्याद् अस्य चकाराभावात्। अथास्यापि चकारः क्रियेत? एवमपि लाक्षणिकत्वात् षत्वणत्वयोश्चासिद्धत्वादिष्णुजिति रूपाभावाद् ग्रहणं न स्यादेव, तत इकारादित्वं क्रियते। ननु च सत्यपीकारादित्वे `तदनुबन्धकग्रहणे नातदनुबन्धकस्य',`एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य' इति वा अलंकृञादीष्णुच एव ग्रहणेन भवितव्यम्,नास्य? इकारोच्चारणसामर्थ्यादस्यापि ग्रहणं

भविष्यतीति मन्यते। यद्येवम्, ख्ष्णुजयमस्तु, तत्र षत्वणत्वयोश्चकारस्य चज करणसामर्थ्यादिदि कृतेऽस्यापि ग्रहणं सिद्धमिति चिन्त्यप्रयोजनमिकारादित्वम्।।

स्पृशोऽनुदके क्विन्।। 3.2.58 ।।

स्पृशोऽनुदके क्विन्।। ननु चेत्यादि। `सुपि स्थः' इत्यत्रोक्तम्----सकर्मकेषु कर्मणीत्युपतिष्ठतेऽन्यत्र सुपीति, ततश्च सुबन्त उपपदे क्विन् प्रत्यय इत्युक्तमनुपपन्नमिति भावः। तत्कर्तृप्रचयार्थमिति। `कर्त्तरि कृत्' इत्येव कर्त्तरि क्विनः सिद्धत्वात्कर्त्रनुवृत्तेर्नान्यत्प्रयोजनमस्तीति भावः। कर्तृप्रचयो लभ्यत इति। कर्मण्युपपद एकः कर्त्ता, करणादौ चापर इत्येवं प्रचयो भवति। घृतस्पृगिति। `क्विन्प्रत्ययस्य कुः' इति शकारस्य षकारः सोष्मत्वेनान्तरतम्यात्, `झलां जशोऽन्ते'। क्विनः ककारो गुणवृद्धिप्रतिषेधार्थः, इकारः `वेरपृक्तस्य' इति विशेषणार्थः। नकारः किमर्थः, एकाज्भ्यो ह्ययं विधीयते तत्र धातुस्वरेणैव सिद्धम्? यस्तर्ह्यनेकाज्----दधृगिति, वक्ष्यत्येतद्धृषेर्द्विर्वचनमन्तोदात्तत्वञ्चेति? एवं तर्हि `क्विन्प्रत्ययस्य कुः' `क्विप्रत्ययस्य' इत्युच्यमाने सन्देहः स्यात्----क्वेः क्विपो वा निर्देश इति। क्वेरपि निर्देशे पकारस्य `अनचि च' इति द्विर्वचनम्।।

ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च।। 3.2.59 ।।

ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च।। ऋतौ यजतीति। वसन्तादिके। ऋतुं यजतीति। यस्मिन्यागे ऋतुर्द्देवता, यथा-----वसन्ताय कपिञ्जलानालभते पिशङ्गास्त्रयो वासन्ता इत्यृतुपशूनालभते, ग्रीष्मो हेमन्त उत नो वसन्तः शरद्वर्षा इत्यादौ तदभिप्रायमेतत्। ऋतुप्रयुक्तो वेति। वसन्ते वसन्ते ज्योतिषा यजेतेत्यादौ यत्कर्तृत्वं तदभिप्रायमेतत्। षत्वञ्चेति। अन्यथा `सात्पदाद्योः' इति निषेधः स्यात्। सुबन्तमात्र इति। अन्यथा सकर्मकत्वात्कर्मण्येव स्यात्। केवलादेवेति। एतत्तु क्विन्विधानसामर्थ्यादपि लभ्यते, न हि सोपपदाद्युजेः क्विनि क्विपि वा विशेषोऽस्ति, कुत्वस्य `चोः कुः' इत्यनेनैव सिद्धत्वात्। अनुपपदे तु `युजेरसमासे' इति नुमि कृते नकारस्य कुत्वार्थ क्विनो विधानं भवति सार्थकम्। यदि तु निपातनसाहचर्यात्सोपपदादनुपपदाच्च युजेः क्विन् भवतीत्युच्येत, तदा `सत्सूद्विष' इत्यत्र युजिग्रहणं शक्यमकर्त्तुम्। नलोपः कस्मान्न भवतीति। `कुञ्च क्रुञ्च कौटिल्याल्पीभावयोः' इति नोपधावेतौ धातू। तथा निकुचितिरिति नलोपो दृश्यते, चुत्वेन तु जकारस्य श्रवणम्, तस्यासिद्धत्वाच्चकारे परतः `चोः कुः'इति कुत्वं न भवति। कुञ्चौ कुञ्च इत्यादौ नकारोपधं तु पठतां स्यात्, तत्र सञ्झिलीति वचनान्न भवतीति वक्तव्यम्। सञिति प्रत्याहारः सनः सशब्दादारभ्या महिङो ङकारात्। अन्ये तु कुञ्चिरेक एव धातुः, तस्य ककारात्परो रेफोऽपि क्विन्सन्नियोगेन निपात्यते इत्याहुः। तदेतत् `चोः कुः' इत्यत्र वामनो वक्ष्यति।।

त्यदादिषु दृशोऽनालोचने कञ्च।। 3.2.60 ।।

त्यदादिषु दृशोऽनालोचने कञ्च।। `पश्यार्थैश्च' इत्यत्र वक्ष्यति----आलोचनं चक्षुस्ताधनं विज्ञानमिति, इह तु ज्ञानमात्रप्रतिषेधं मन्यते। यादृक् तादृगिति। `दृग्दृशवतुषु' इति वर्त्तमाने `आ सर्वनाम्नः' इत्यात्वम्। ञकारो विशेषणार्थ इति। आद्युदात्तत्वस्य नकारेणापि सिद्धत्वात् ञकारोपधस्य प्रयोजनं विशेषणमेवेत्यर्थः, न तु स्वरो न प्रयोजनमित्युच्यते। तं पश्यति तद्दर्श इति चक्षुर्विज्ञानेऽणेव भवति। कथं पुनः प्रयुज्यमानस्यैव दृशेरनालोचनार्थत्वमित्याह---तादृशादयो रूढिशब्दा इति। ततः किमित्याह---नैवात्रेति। रूढिशब्दा ह्यसताप्यवयवार्थेन व्युत्पाद्यन्ते, यथा----तैलपायिकादयः। एतदर्थमेवानालोचन इत्युक्तम्। दृश्यर्थाभावेऽयं विधिः, सति तु दृश्यर्थेऽणेव भवतीति। भाष्ये तु कर्मकर्तरि व्युत्पत्तिर्दर्शिता----तमिवेमं पश्यन्ति जनाः सोऽयं स इव दृश्यमानस्तमिवात्मानं पश्यतीति। तत्र कर्मव्यापारमात्रे वा दृशेर्वृत्तिः, कृत्स्नधात्वर्थाध्यारोपो वा सौकर्यादिशयप्रतिपादनायेति द्रष्टव्यम्।

समानान्योश्चेति। समानस्य दृग्दृशवतुषु सभावविधानात्सिद्धम्।

क्सश्चेति। त्यदादिषु समानान्योश्च। तादृक्षः, सदृक्षः, अन्यादृक्ष इति। `दृक्षे चेति' वक्तव्यम्' इति सभाव आत्वं च।।

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्।। 3.2.61 ।।

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्।। अतः प्रभृतीति। भाष्यकारप्रयोगात्प्रभृतिशब्दयोगे पञ्चमी। वदः सुपि क्यप् चेति। प्रयोजनदिगियं दर्शिता। अत्र ह्यनुपसर्ग इति वर्त्तते, तस्मात् `स्पृशोऽनुदके क्विन्' इत्यादौ प्रयोजनं द्रष्टव्यम्। सुवतेरिति। न्यायस्य तुल्यत्वाद्दैवादिकस्याप्यग्रहणम्।

शुचिषदिति। छान्दसोऽयं प्रयोगः-----हंसः शुचिषदिति। `पूर्वपदात्' इति षत्वम्। शुचिसदिति पाठे लौकिकः प्रयोगः। कथमत्र णत्वमिति। ग्रामणीविषयः प्रश्नः। प्रणीरित्यत्र तु `उपसर्गादसमासेऽपि' इति णत्वमस्त्येव। ज्ञापकादिति। पूर्वपदस्थान्निमित्तादुत्तरस्य नयतिनकारस्यासञ्ज्ञायामपि णत्वं भवतीति सामान्येन ज्ञापकमित्यर्थः। तेनाग्रणीरित्यत्रापि भवति। कर्मण्यणि तु न भवति, नीरूपविषयत्वाज् ज्ञापनस्य । अन्ये तु `अग्रग्रामाभ्यां नयतेरिति वक्तव्यम्' इति वचनाज्ज्ञापनमपि तद्विषयम्, तत्रापि नीरूपविषयमिति स्थिताः।।

भजो ण्विः।। 3.2.62 ।।

छन्दसि सहः।। 3.2.63 ।।

छन्दसि सहः।। तुरासाहं पुरोधाय, पृतनाषाट् द्विषो योद्धुं पुरुहूतः पृतनाषाड् इति भाषायां प्रयोगाश्चिन्त्याः।।

वहश्च।। 3.2.64 ।।

कव्यपुरीषपुरीष्येषु ञ्युट्।। 3.2.65 ।।

हव्येऽनन्तः पादम्।। 3.2.66 ।।

जनसनखनक्रमगमो विट्।। 3.2.67 ।।

जनसनखनक्रमगमो विट्।। विशेषणार्थश्चोति। `विवनोः' इत्युच्यमाने हि क्विबादीनामपि ग्रहणं स्यात्। अथात्र निरनुबन्धकत्वादस्यैव ग्रहणम्? `वेरपृक्तस्य' इत्यत्राप्यस्यैव ग्रहणं स्यात्। अथात्र क्विबादीनामपि ग्रहणं स्यात्? `विड्वनोरनुनासिकस्यात्' इत्यत्रापि स्यादिति समानं वच इति भावः। गोषा इति। `सनोतेरनः' इति षत्वम्। अग्रेगा इति। पूर्ववदलुक्।।

अदोऽनन्ने।। 3.2.68 ।।

अदोऽनन्ने।। अन्नाद इति। भाषायामणेव भवति। छन्दसि त्वकारादनुपपदादित्यणि प्राप्ते पचाद्यजिष्यते, तेनान्नाद इत्यन्न इत्यन्न अद इत्यवग्रहो भवति।।

क्रव्ये च।। 3.2.69 ।।

क्रव्ये च।। वाऽसरूपबाधनार्थमिति। तथा च वार्त्तिकम्----अदोऽनन्ने क्रव्यग्रहणं वासरूपनिवृत्त्यर्थमिति। कथं तर्हीति। यदि वाऽसरूपविधिबाधनार्थमिति भावः। कृत्तविकृत्तेति। कृत्तं छिन्नं तदेव पुनर्विशेषतः कृत्तमिति `पूर्वकाल' इति समासः, तस्य पक्वशब्देन पुनः स एव समासः, ततो मांसशब्देन पुनर्विशेषणसमासः। पृषोदरादित्वात्क्रव्यभाव इति। यद्येवम्, क्रव्याद इत्यस्य रूपस्यावर्जनीयत्वादलं वाऽसरूपबाधनार्थेनानेन वचनेन, वार्त्तिकविरोधश्चैवं वदत इत्याशङ्क्याह----कृत्तविकृत्तेत्यादि। अर्थमेदादुभयमपि नास्ति किलेत्ययमभिप्रायः।।

दुहः कब्धश्च।। 3.2.70 ।।

दुहः कब्धश्च।। कामदुधेति। काम्यन्ते इति कामाः, तान् दुग्धे कामदुघा अर्घः=मधुपर्कः।।

मन्त्रेश्वेतवहोक्थशास्पुराडाशो ण्विन्।। 3.2.71 ।।

मन्त्रेश्वेतवहोक्थशास्पुराडाशो ण्विन्।। एतेभ्य इति। श्वेतादिपूर्वेभ्यो वहादिभ्यो धातुभ्य इत्यर्थः। धातूपपदसमुदाया इति। किमर्थमित्याह---अलाक्षणिकेति। `श्वेतवाः' इत्यादिषु `अवयाः श्वेतवाः पुरोडाश्च' इति निपातनाद्रुत्वम्। उक्थशा इति। नलोपे `अत उपधायाः' इति वृद्धिः, रुत्वम्।

ङस्पदस्येति। प्रत्येकमभिसम्बद्ध्यते, भाविपदत्वाश्रयेण चेदमुच्यते, यत्र ङसन्तस्य पदत्वं भविष्यति तत्र ण्विनोऽपवादो ङस्प्रत्ययो वक्तव्य इत्यर्थः। यद्येवम्, अनेन ङसि कृते सौ `अत्वसन्तस्य' इति दीर्घे रुत्वे च श्वेतवा इत्यादि सिद्धम्, नार्थः `अवयाः श्वेतवाः' इति निपातनेन? एवं तर्हि सम्बुद्ध्यर्थ निपातनम्---हे श्वेतवा इन्द्रेति, `अत्वसन्तस्य' इत्यत्र हि `असम्बुद्धौ' इति वर्तते, ङसपि वक्तव्यः। उत्वार्थम्----श्वेतवोभ्याम्, उक्थशोभ्यामिति। एवं चोक्यशा इत्यपि सम्बुद्ध्यर्थ निपातनं कर्तव्यं यदि मन्त्रे दर्शनमस्त्रि।।

अवे यजः।। 3.2.72 ।।

अवे यजः।। अवया इति। निपातनाद्रुत्वम्। योगविभाग उत्तरार्थ इति। `पुरोडाशवयजो ण्विन्' इत्येकयोगे श्वेतवहादीनामप्युत्तरत्रानुवृत्तिः स्यात्, यजेश्चावपूर्वस्यैवानुवृत्तिः स्यात्, केवलस्यैव चेष्यते, तदर्थो योगविभाग इत्यर्थः।।

विजुपे छन्दसि।। 3.2.73 ।।

विजुपे छन्दसि।। अथ छन्दोग्रहणं किमर्थम्, यावता मन्त्र इत्यनुवृत्तेरेवभाषायां न भविष्यति, तत्राह---छन्दोग्रहणं ब्राह्मणार्थमिति। मन्त्रव्यतिरिक्तो वेदभागः=ब्राह्मणम्, यथोक्तम्---तच्चोदकेषु मन्त्राख्या, शेषे ब्राह्मणशब्द इति।

किमर्थ पुनरिदमिति। उत्तरसूत्र एव विज्ग्रहणं छन्दोग्रहणं च क्रियतामिति प्रश्नः। नियमार्थमिति। ननु दृशिग्रहणादेव भाषायां न भविष्यति, सत्यम्; तस्यैव प्रपञ्चार्थमिदम्।।

आतो मनिन्क्वनिब्वनिपश्च।। 3.2.74 ।।

आतो मनिन्क्वनिब्वनिपश्च।। अश्व इव तिष्ठति अश्वत्थामा, पृषोदरादित्वात्सकारस्य तकारः। सुधीवा, सुपीवेति। घुमास्थादिसूत्रेण ईत्वम्। चकारो विचोऽनुकर्षणार्थः। यद्येवम्, उत्तरत्रानुवृत्तिर्न स्यात्? एवं तर्हि चकारोऽप्युत्तरत्रानुवर्त्तिष्यते।।

अन्येभ्योऽपि दृश्यते।। 3.2.75 ।।

अन्येभ्योऽपि दृश्यते।। अपिशब्दः सर्वविधिव्यभिचारार्थ इति। विधीयतेऽनेनेति विधिः=उपाधिः। सर्वोपाधिव्यभिचारार्थ इति युक्तः पाठः। दृशिग्रहणं प्रयोगानुसरणार्थमिति। `यथा प्रयोगे दृश्यन्ते तथैव भवन्ति' इति वचनव्यक्त्याश्रयेणेति भावः।।

क्विप् च।। 3.2.76 ।।

क्विप् च।। निरुपपदेभ्यश्चेति। एतदपिशब्दस्य सर्वोपाधिव्यभिचारार्थश्यानुवृत्तेर्लभ्यते, न तु सुपीत्यस्य निवृत्तेः; उत्तरसूत्रे `सुप्युपसर्गेऽपीति वर्त्तते' इति वक्ष्यमाणत्वात्, `छन्दसि भाषायाञ्च' इति पूर्वसूत्र एव `छन्दसि' इत्यस्य निवृत्तत्वात्। उखास्रदिति। `स्रंसु ध्वंसु भ्रंसु अवस्रंसने',`अनिदिताम्' इत्युपधालोपः, `वसुस्रंसु' इत्यादिना दत्वम्। वाहभ्रडिति। `भ्रंशु अधः पतने',व्रश्चादिना षत्वम्, `अन्येषामपि दृश्यते' इति दीर्घः। उखायाः स्रंसते पर्णानि, ध्वंसते, वाहाद् भ्रश्यतीति विग्रहः। ध्वंसिरन्तर्भावितण्यर्थः सकर्मकः। क्वचित्तु वृत्तावेव विग्रहवाक्यानि पठ्यन्ते।।

स्थः क च।। 3.2.77 ।।

स्थः क च।। केत्यविभक्तिको निर्देशः। अन्येभ्योऽपि दृश्यत इति। क्विबिति सिद्ध एवेत्यपेक्षते। ननु तच्छीलादिग्रहणं तत्रानुवर्त्तते, तस्मात् `क्विप् च' इति क्विप् सिद्ध एवेति वक्तव्यम्। यद्वा तच्छीलादिग्रहणं तत्र न सम्बन्धनीयमिति मन्यते। नन्वेवमपि `सुपि स्थः' इति विशेषविहितः कः सामान्यविहितं क्विपं

बाधेत? वाऽसरूपविधिना सोऽपि भविष्यति। शमि धातोः संज्ञायामचम् बाधत इति। अन्यथा यथा कृञो हेत्वादिषु टं बाधते धातुग्रहणात्तथा तिष्ठतेरपि कक्विपौ बाधेत, अतस्तमप्यचं बाधित्वा कक्विपावेव यथा स्यातामिति पुनर्वचनमित्यर्थः। शंस्था इति। क्विपि लुप्ते प्रत्ययलक्षणेन घुमास्थादिसूत्रेणेत्वमत्र प्राप्नोति, भाष्यकारप्रयोगात्तु न भवति। केचित्तु---ईत्वमवकारादाविति वचनं पठन्ति, तेषां सुपीवा सुधीवा, अत्रापि न स्यात्।।

सुप्यजातौ णिनिस्ताच्छील्ये।। 3.2.78 ।।

सुप्यजातौ णिनिस्ताच्छील्ये।। ब्राह्मणानामन्त्रयितेति। ताच्छील्यस्य विवक्षितत्वात्तृन् प्रत्युदाहृतः, `न लोकाव्यय' इति षष्ठीप्रतिषेधः।
उत्प्रतिभ्यामिति। पुनः सुब्ग्रहणस्योपसर्गनिवृत्त्यर्थत्वादयमारम्भः।
साधुकारिणि चेति। अताच्छील्यार्थमिदम्, तच्चैतज्ज्ञापकात्सिद्धं यदयम् `आक्वेस्तच्छील' इत्यत्र तच्छीलेत्यभिधाय साधुकारिग्रहणं करोति, तज्ज्ञापयति---साधुकारिण्यताच्छील्येऽपि णिनिर्भवतीति।
ब्रह्मणि वद इति। ब्रह्म=वेदः। इदमप्यताच्छील्यार्थम्।।

कर्त्तर्युपमाने।। 3.2.79 ।।

कर्त्तर्युपमाने।। उपमानस्योपेमेयापेक्षत्वात् कर्तरि च प्रत्ययविधानात्तस्यैवोपपदकर्त्तोपमानं विज्ञायेत इत्याह---उपपदकर्त्तेति। उष्ट्रक्रोशीति।
इवशब्दो गतार्थत्वाद्वृत्तौ नैव प्रयुज्यते।
समास उपमानानां शस्त्रीश्यामादिके यथा।।

व्रते।। 3.2.80 ।।

व्रते।। समुदायोपाधिश्चायमिति। न प्रत्ययार्थविशेषणम्। तथा हि सति व्रत एव कर्तरि प्रत्ययः स्यान्न तद्वतीति भावः। समुदायोपाधित्वमेव स्पष्टयति---धातूपपदेत्यादि। कामचारः=इच्छाप्रवृत्तिः, तत्प्राप्तौ सत्यां नियमः, स च द्विविधः सम्भवति---स्थण्डिले शेते एव अश्राद्धं भुङ्क्ते एवेत्येवंरूपो वा। तत्र पूर्वके नियमे यदैवासावशक्त्यादिनाऽश्राद्धं न भुङ्क्ते तदैव व्रतलोपः प्राप्नोति। न चैवंविधं शास्त्रमस्ति---स्थण्डिले शयितव्यमेव, अश्राद्धं भोक्तव्यमेवेति। अस्ति तु स्थण्डिल एव शयितव्यम्, अश्राद्धमेव भोक्तव्यमिति। `व्रते' इति तु शास्त्रितो नियमाः---इत्युक्तम्, तस्माद् द्वितीयो नियमो विज्ञायत इत्याह---सति शयन इत्यादि।।

बहुलमाभीक्ष्ण्ये।। 3.2.81 ।।

बहुलमाभीक्ष्ण्यो।। आभीक्ष्ण्यं पौनः पुन्यमिति। पुनः पुनर्भवितरि वर्तमानाभ्यामव्ययाभ्यां भावे ष्यञ्, अव्ययानां भमात्रे टिलोपः। ताच्छील्यादन्यदिति। एतेन`सुप्यजातौ' इत्यनेनागतार्थत्वं दर्शयति। फलानपेक्षा प्रवृत्तिः=ताच्छील्यम्। गान्धारादयस्तु वातादिसाम्यार्थ देशाचारवशेन कषायादिपाने प्रवर्तन्ते। उदाहरणेषु `आतो युक् चिण्कृतोः' इति युक्, `प्रातिपदिकान्तनुम्विभक्तिषु च' इति णत्वम्।।

मनः।। 3.2.82 ।।

मनः।। मन्यतेर्ग्रहणमिति। `मन ज्ञाने' इत्यस्य दैवादिकस्य। न मनुतेरिति। `मनु अवबोधने' इत्यस्य तानादिकस्य। तिपि गुणेन भवितव्यम्। यदि नेष्यते, संज्ञापूर्वको विधिरनित्यः। किं पुनः कारणं प्रयत्नेन मनोतेर्ग्रहणं निवार्यते, यावता इह द्वयोरपि णिनिः तदेव रूपम्, न चार्थभेद इत्याह----उत्तरसूत्र इति।।

आत्ममाने खश्च।। 3.2.83 ।।

आत्ममाने खश्च।। चकाराण्णिनिश्चेति। वाऽसरूपविधिना सिद्धोऽपि णिनिरविच्छेदाय समुच्चीयते। तेन `करणे यजः' इत्यत्र णिनेरेवानुवृत्तिर्भवति, नानन्तरस्य खशः। आत्मशब्दोऽयं परव्यावृत्तिं कुर्वाणो यस्तत्प्रतियोगिनमर्थमाचष्टे स स्वशब्दपर्यायो गृह्यते, न चेतनद्रव्यवचनः। मननं मानः, भावे घञ्, आत्मनो मान आत्ममानः----कर्मणि षष्ठ्या समासः। तत्र कस्येत्यपेक्षायां प्रत्ययार्थस्य सन्निहितस्य मन्तुरेवात्मन इति गम्यते, तदाह---प्रत्ययार्थः कर्त्तेति। दर्शनियत्वादिना धर्मेणेति विशिष्टमिति शेषः। कर्तरि षष्ठ्यास्तु समासो न भवति, सर्वस्या एव मतेर्मन्तृकर्तृकत्वाव्यभिचाराद्। एवं चेतनद्रव्यवचनेऽप्यात्मशब्दे कर्तरि षष्ठ्यामव्यभिचारादविशेषणं कर्मणि षष्ठ्या, न तु चेतनान्तरे कर्मणि प्रत्ययप्रसङ्गः, तस्मात्स्वशब्दपर्याय एवात्मशब्दः।
दर्शनीयम्मन्य इति। शरीरधर्ममपि दर्शनीयत्वादिकमात्मधर्ममेव मन्यन्ते संसारिणः शरीरशरीरिणोरग्न्ययोगोलकयोरिवाभेदं मन्यमानाः। पण्डितम्मन्य इति। एकस्याप्यात्मनस्स्वरूपेण कर्तृत्वं पण्डितत्वादिविशिष्टरूपेण कर्मत्वं च युज्यत एव। यथोक्तमाचार्यैः----
अस्मत्प्रयोगसम्भिन्ना ज्ञानस्यैव च कर्तरि।
भवन्ती तत्र संवित्तिर्युज्येताप्यात्मकर्तृका।। इति।
खशः खकारो मुमर्थः, दर्शनीयम्मन्या कुमारीत्यादौ ह्रस्वार्थश्च। शकारः सार्वधातुकसंज्ञार्थः, दिवादित्वाच्छ्यन्। स्वरस्तु सतिशिष्टोऽपि विकरणस्वरः सार्वधातुकस्वरं न बाधते इति खश एव भवति, न नित्स्वरः। दर्शनीयमानी देवदत्तो यज्ञदत्तस्येति। कर्मणि षष्ठी, तदपेक्षयास्यापि दर्शनीयशब्दस्य गमकत्वात्समासः।।

भूते।। 3.2.84 ।।

भूते।। यस्य सत्ता व्यपवृक्ता तत्सर्व भूतशब्देनोच्यते, तत्र न ज्ञायते कस्मिन् भूते? किं वा धात्वर्थे? तत्राह---धात्वधिकाराच्चेति। चशब्दः पूर्वोक्तेनार्थेनास्य सङ्गतिं द्योतयति। धात्वर्थभूत इति। ननु धात्वधिकाराद्धातौ भूत इति युक्तम्, न धात्वर्थे भूत इति? उच्यते---प्रयोगे प्रत्ययस्य द्योत्यं भूतत्वमर्थस्यैव विशेषणं भवितुर्हति, विशेषणान्तरवत्, न तु शब्दस्य; तस्य स्वाभिधेयप्रतिपादने व्यग्रत्वाद्विशेषणसम्बन्धं प्रत्ययोग्यत्वात्। किञ्च---नित्योधातुरनित्यत्वेऽपि

भूतात्प्रत्ययविदिरनुपपन्नः, उच्चारितलक्षणे भूतत्वे विशेषणं व्यर्थ तर्ह्यनुच्चारितात्प्रत्ययविधिः सम्भवति। नित्यश्चायं भूतशब्दोऽतिक्रान्तवाचीति निष्ठायामितरेतराश्रयत्वादप्रसिद्धिरित्यचोद्यम्।।

करणे यजः।। 3.2.85 ।।

करणे यजः।। णिनिरनुवर्तते न खशिति। अत्रोक्तो हेतुः। अग्निष्टोमयाजीति। ननु चाग्निष्टोमशब्दः कर्मनामधेयम्, तत्कथमग्निष्टोमस्य यजिं प्रति करणत्वम्, न हि तदेव तत्र करणं भवति; इदं तु युक्तमुदाहरणम्---सोमेनेष्टवान् सोमयाजी, सान्नाय्येनेष्टवान् सान्नाय्ययाजीति? तत्राह---अग्निष्टोमः फलभावनायां करणं भवतीति। सत्यं याग एवाग्निष्टोमः; यागोऽपि फलभावनायां करणम्, फलस्य स्वर्गादेर्भवतो या भावना उत्पादना तस्यामित्यर्थः। ननु दीक्षणीयादिरुदवसानीयान्तो ज्योतिष्टोमाख्यो याग एव स्वर्गभावना न तदतिरिक्तः कश्चिद्व्यापारो यजनस्यास्ति यत्रः यागः कारण्यमश्नुते? उच्यते, द्विविधो यजमानव्यापारः---सामान्यरूपः, विशेषरूपश्चेति। तत्र समान्यरूप आभ्यन्तर औदासीन्यप्रच्युतिरूपः कृतिप्रयत्नादिपदाभिलप्यः; बाह्यस्तु दीक्षणीयादिरुदवसानीयान्तः प्रसिद्ध एव। एवमोदनं पचनीत्यादिष्वप्यात्मगुणः प्रयत्नः बाह्यश्चादिश्रयणादिर्द्रष्टव्यः। फलं हि प्रेप्सन् तदर्थ प्रयतते, नोदास्ते; यतोऽयमुपायं जिज्ञासते, जानीते च, ज्ञात्वा चोपायमनुतिष्ठति। सैषा स्वर्गादिफलोद्देशेन प्रवृत्ता कृतिर्भावनेत्युच्यते। सा च भाव्यम्, करणम्, इतिकर्तव्यतां चेति त्रितयमपेक्षते---इदमनेनेत्थं भावयेदिति। यथाह----

भावनापेक्ष्यमाणा हि साधनं किं फलस्य मे।

साधनानुग्रहः को वेत्यनृस्यूतमपेक्षते।। इति।।

सैषा सामान्यरूपा वृत्तिर्न शास्त्रकटाक्षमपेक्षते। विशेषरूपा त्वपेक्षते, तथा हि---फलार्थी तदुपायं जिज्ञासते, तदुपायं जिज्ञासमानः श्रृणोति---ज्योतिष्टोमेनस्वर्गकामो यजेतेति। तत्र च पुरुषप्रवर्तनारूपो विधिः श्रूयते, न चापुरुषार्थे पुरुषः प्रवर्तत इति विध्यवरुद्धा भावना भाव्यापेक्षायां समानपदोपात्तमपि दुःखरूपं धात्वर्तमपहाय पदान्तरोपात्तमपि पुरुषोपसर्जनमपि सुखरूपं स्वर्गमेवावलम्बते। ततः करणापेक्षायां समानपदोपात्तो धात्वर्थः करणं भवति, पश्चात्सन्निधिसमाम्नातं दीक्षणीयादीतिकर्तव्यतयान्वेतीत्येषा मीमांसकमर्यादा। यत्र तु न विध्यवरोधो भावनायास्तत्र धात्वर्थ एव भाव्यो भवति, यथा---पचति पाकं करोति, गच्छति गमनं करोतीत्यादि निर्दिश्यते। ननु भावनया सम्पद्यमानस्य ब्राह्यव्यापारस्य कथं तत्र करणत्वम्? को दोषः? करणं खलु सर्वत्र कर्तृव्यापारगोचरः, कुठारेण छिनत्तीत्यत्रापि उद्यमननिपातनरूपेण कर्तृव्यापारेणाप्यमानस्यैव कुठारस्य तत्र करणत्वम्, तदेव कथं द्विधाभवनरुपेण फलेनावच्छिन्नयोस्तयोश्छेदनरूपत्वं न स्वरूपत्वम्, न स्वरूपेण रजके दर्शनात्, सोऽपि हि वस्त्रमुद्यच्छते निपातयति च। अथ द्विधाभवनाभावान्न छिनत्तीत्युच्यते, तदेवमुद्यमननिपातयोश्छेदरूपत्वं कुठारगोचरत्वनिबन्धनमिति तस्य तत्र करणत्वम्, तथेहापि भावनायां स्वर्गभावनारूपत्वमग्निगटोमाख्ययागगोचरत्वनिबन्धनमिति तस्य तत्र करणत्वम्। तदिदमुक्तम्---फळभावनायां करणमिति। इयं हि फलं धात्वर्थं च सम्पादयति, तत्र फलभावनारूपत्वे ब्राह्यो व्यापारः करणमित्यर्थः। नन्वेवमपि यज्यर्थ प्रति अग्निष्टोमः करणं न भवति? मा भूत्तत्र करणत्वम्, करणं तावत् सम्बन्धि च यजिना सामानाधिकरण्येन । अथ वा---भावनापि धातोरेव वाच्या, न प्रत्ययस्य; तत्र धात्वर्थैकदेश एकदेशान्तरस्य करणम्, अग्निष्टोमशब्दश्च तत्रैकदेशान्तरे वर्तत इति न किञ्चिदनुपपन्नम्।।

कर्मणि हनः।। 3.2.86 ।।

कर्मणि हनः।। कुत्सितग्रहणमिति। पितृव्यवधादिना यः कर्त्ता कुत्स्यते तत्रायं प्रत्यय इति वक्तव्यमित्यर्थः।।

ब्रह्मभ्रूणवृत्रेषु क्विप्।। 3.2.87 ।।

ब्रह्मभ्रूमवृत्रेषु क्विप्।। धातूपपदकालप्रत्ययविषयः। भाष्ये तूपपदविषयनियमद्वयं प्रदर्शितम्, तदुपलक्षणम्, न तु नियमान्तरव्यावृत्त्यर्थमिति गम्यते। ब्रह्मादिष्वेव हन्तेरिति धातुनियमः, अत्रापि नियमे भूत इत्याश्रयणात् कालान्तरे उपपदान्तरेऽपि भवत्येव----पुरुषं हन्ति हनिष्यति वा पुरुषहेति। ब्रह्मादिषु हन्तेरेवेत्युपपदनियमः, अत्रापि भूत इत्याश्रयणात्कालान्तरे धात्वन्तरादपि भवत्येव---वृत्रं जयति जेष्यति वा वृत्रजिदिति। भूतकाले क्विबेवेति कालनियमः। नान्यः प्रत्यय इति। यथा `कर्मणि हनः' `कर्णण्यण्' इति। उपपदान्तरे तु भतेऽपि प्रत्ययान्तरं भवत्येव--पितृव्यं हतवान्पितृव्यघातीति, सोपपदश्च प्रत्ययो नियमेन व्यावर्त्त्यते। निष्ठा तु भवत्येव---वृत्रं हतवानिति। तथा भूत एवेति प्रत्ययनियमः, अत्रापि ब्रह्मादिषु हन्तेरित्याश्रयणादुपपदान्तरे धात्वन्तराच्च कालान्तरेऽपि भवत्येव। कथं पुनरेकस्मिन्नेव योगे चतुर्विधो नियमो लभ्यते? इत्याह---तदेतदिति। अगृह्यमाणविशेषत्वादेव चतुर्विधो नियमो लब्धुं शक्यते, तत्रैव तूपोद्वलकमेतदुक्तं वेदितव्यम्।

बहुलं छन्दसि।। 3.2.88 ।।

सुकर्मपापमन्त्रपुण्येषु कृञः।। 3.2.89 ।।

सुकर्मपापमन्त्रपुण्येषु कृञः।। स्वादिष्विति। सुशब्दं वर्जयित्वेत्यनन्तरमेवाभिधानादतद्गुणसंविज्ञानो बहुव्रीहिः, बाहुल्याश्रयणेनैवमुक्तम्, आढ्यो ग्राम इतिवत्। त्रिविधश्चेति। एतद्बहुलग्रहणानुवृत्तेरेव लभ्यते। कालोपपदप्रत्ययविषय इति। तत्र कालनियमात्कर्म कृतवान्कर्मकार इत्यण् न भवति। उपपदनियमात् मन्त्रमधीमधीतवान्मन्त्राध्याय इत्यणेव भवति, न तु क्विप्। प्रत्ययनियमात् मन्त्रं करोति करिष्यति वेति विवक्षायामणेव भवति, न तु क्विप् शास्त्रकृदिति। `क्विप् च' इति क्विप्।।

सोमे सुञः।। 3.2.90 ।।

सोमे सुञः।। कालधातूपपदप्रत्ययविषय इति। तत्र भूतकालस्य क्विपि नियतत्वात्सोमं सुतवान्सोमसाव इत्यण् न भवति। तथा धातोः सोम एवोपपदे

नियतत्वात्सुरां सुतवान्सुरासाव इत्यणेव भवति। तथा सोमस्य सुनोतावेव धातौ नियतत्वात्सोमं क्रीतवान् सोमक्रीरिति क्विब् न भवति, अणेव तु भवति। तथा क्विपो भूते नियतत्वात्सोमं सुनोति सोष्यति वेति विवक्षायां क्विब् न भवति, अणेव तु भवति।।

अग्नौ चेः।। 3.2.91 ।।

अग्नौ चेः।। अत्रापीत्यादि। तत्र भूतकालस्य क्विपि नियतत्वादग्निं चितवानग्निचाय इत्यण् न भवति। धातोश्चाग्नावुपपदे नियतत्वादिष्टकाचिदिति न भवति। अग्नेश्चिनोतावेव नियतत्वादग्निभृदिति न भवति। क्विपश्च भूत एव नियतत्वादग्निं चिनोति चेष्यति वेत्यत्राभावः।।

कर्मण्यग्न्याख्यायाम्।। 3.2.92 ।।

कर्मण्यग्न्याख्यायाम्।। `कर्मणि हनः' इत्यतोऽनुवृत्तं कर्मग्रहणमुपपदम्, इदं तु कर्मप्रत्ययार्थमित्याह---कमण्येव कारक इति। एवकारः पौनर्वचनिकः। उपपदं तावत्कर्मप्रत्ययार्थोऽपि कर्मैवेति। आख्याग्रहणं रूढिसम्प्रत्ययार्थमिति। अग्निशब्दो लोके ज्वलने रूढः, वेदे त्वग्न्यर्थ इष्टकाचयेऽपि प्रचुरः प्रयोगः----य एवं विद्विानग्निं चिनुते, अग्निं चेष्यमाण इति, स मुख्यो जघन्यो वा भवतु; इह त्वसत्याख्याग्रहणे लोकप्रसिद्धिवशेन ज्वलन एव गृह्येत, मा ग्राहि, इष्टकाचय एव गृह्यतामित्याख्याग्रहणमित्यर्थः।।

कर्मणीनिर्विक्रियः।। 3.2.93 ।।

कर्मणीनिर्विक्रियः।। कर्मणीति वर्तमान इति। `कर्मणि हनः' इत्यतः कर्त्तुः कुत्सानिमित्ते कर्मणीति यत्कर्म क्रियासम्बद्धं कर्तुः कुत्सामावहति तत्रेत्यर्थः। सोमादीनां विक्रयः शास्त्रे निषिद्धः।।

दृशेः क्वनिप्।। 3.2.94 ।।

दृशेः क्वनिप्।। प्रत्ययान्तरनिवृत्त्यर्थमिति। प्रत्ययान्तरं सह निर्दिष्टं मनिनादि, अणादि च। सोपपदान्निष्ठा तु भवत्येव---पलोकं दृष्टवानिति।।

राजनि युधिकृञः।। 3.2.95 ।।

राजनि युधिकृञः।। ननु च युधिरकर्मक इति। तत्कथं राजन्शब्दे कर्मवाचिन्युपपद इत्युक्तमिति भावः। अन्तर्भावितण्यर्थ इति। अनेकार्थथ्वाद्धातूनां लक्षणया वा यदा ण्यर्थमपि युधिरेवान्तर्भावयति तदा प्रयोज्येन कर्मणा सकर्मको भवतीत्यर्थः।।

सहे च।। 3.2.96 ।।

सहे च।। असत्त्ववचनत्वान्नोपपदं कर्मणा विशेष्यत इति। अतश्च `कर्मणि'इति नानुवर्तते इति भावः। न पुनरनुवर्तमानस्यैवान्नासम्बन्धः, उत्तरत्राप्यनुपयोगात्।।

सप्तम्यां जनेर्डः।। 3.2.97 ।।

सप्तम्यां जनेर्डः।। मन्दुरज इति। `वाजिशाला तु मन्दुरा'। `ङ्यापोस्संज्ञाछन्दसोर्बहुलम्' इति ह्रस्वः।।

पञ्चम्यामजातौ।। 3.2.98 ।।

पञ्चम्यामजातौ।। बुद्ध्यादय आत्मगुणाः, खेदः=रागः, खेदात् स्त्रेषु प्रवृत्तिरिति दर्शनात्।।

उपसर्गे च संज्ञायाम्।। 3.2.99 ।।

उपसर्गे च संज्ञायाम्।। प्रजेति प्राणिजातस्यैषा संज्ञा।।

अनौ कर्मणि।। 3.2.100 ।।

अनौ कर्मणि।। पुमांसमनुजात इति। पुमांसमनुरुद्ध्य जात इत्यर्थः, तेनास्य सकर्मकत्वम्। पुमनुज इति पुंसः संयोगान्तलोपः।।

अन्येष्वपि दृश्यते ।। 3.2.101 ।।

अन्येष्वपि दृश्यते।। द्विर्जात इति।
मातुरग्रे विजननं द्वितीयं मौञ्जिबन्धनम्।
तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते।।

निष्ठा।। 3.2.102 ।।

निष्ठा क्तक्तवतू निष्ठेत्युक्तमिति। ककारः कित्कार्यार्थः, उकार उगित्कार्यार्थः, `अत्वसन्तस्य' इति विशषणार्थश्च। निष्ठायामित्यादि। अप्रसिद्धिः=अनिष्पत्तिः, कस्य? संज्ञायाः, संज्ञिनो वा। कथमित्याह---संज्ञयेति। यदि द्विः क्तक्तवतूपग्रहणं क्रियेत--इह, संज्ञाविधौ च, ततो न स्यादितरेतराश्रयत्वमिति संज्ञयेत्युक्तम्। सतोश्च तयोरिति। लोके शास्त्रे वा न तावल्लोके सानुबन्धावेतौ स्तः, शास्त्रेऽपि यद्यपि `ञीतः क्तः' `नपुंसके भावे क्तः'इति क्तः स्वरूपेण विहितोऽस्ति, भूते तु काले नास्ति, क्तवतुस्तु न क्वाप्यस्तीति भावः। भाविनी संज्ञेति। संज्ञिनो भावित्वात् संज्ञापि भाविनी सूत्रशाटकवत् तद्यथा----अस्य सूत्रस्य शाटकं वयेति तन्तुवाय उक्तः, स पश्यति यदि शाटको न वातव्यः, अथ वातव्यो न शाटकः, शाटको वातव्यश्चेति विप्रतिषिद्धम्, मन्ये स वातव्यो यस्मिन्नुते शाटक इत्येतद्भवतीति। सामर्थ्यादिति। `क्तक्तवतू निष्ठा'इति वचनात् अन्यस्योत्पन्नस्य निष्ठेति संज्ञाया अभावः=सामर्थ्यम्। आदिकर्मणीति। कर्मशब्दः क्रियावाची, एकफलोद्देशप्रवृत्तक्षणसमूहरूपा क्रिया, तत्राद्ये क्रियाक्षणेऽपवृक्तेऽपि धात्वर्थरूपायाः क्रियाया अनपवृक्तत्वाद्वचनम्। न्याय्या त्वाद्यपवर्गात्। न्याय्या त्वेषा भूतकालता, कुतः? आद्यपवर्गात्। आदिभूतक्रियाक्षणोऽपवृक्तः तस्मिन्नेव चावयवे समूहरूपो धात्वर्थः परिसमाप्तः उक्तं च----
समूहः स तथाभूतः प्रतिभेदं समूहिषु।

समाप्यते ततो भेदे कालभेदस्य सम्भवः।। इति।
तथा च प्राकार्षीत्कटं देवदत्त इति लुङपि प्रयुज्यते। कटावयवे वा कटशब्दो द्रष्टव्यः, ततः केषाञ्चित्कटावयवक्षणानामपरिसमाप्तेः प्रकरिष्यति कटं देवदत्त इति लृट्प्रयोगोऽप्यविरुद्धः।
अपर आह---ज्ञापकात्सिद्धं यदयम् `आदिकर्मणि क्तः' `कर्तरि च'`उदुपधाद्भावादिकर्मणोरन्यतरस्याम्' इति चाह, तज्ज्ञापयति---भवत्यादिकर्मणि क्त इति। नैतदस्ति ज्ञापकम्, `ञीतः क्तः' इति योऽयं वर्तमाने क्तस्तद्विषयमेतत्स्यात्? यदि तद्विषयमेव स्याद्वर्तमानग्रहणमेव कुर्यात्।।
सुयजोर्ङ्वनिप्।। 3.2.103 ।।
सुयजोर्ङ्वनिप्।। सुनोतेरिति। `सु स्त्रु गतौ',`सु प्रसवैश्वर्ययोः'----इत्यनयोरेव निरनुबन्धकयोर्ग्रहणं प्राप्तम्; अनभिधानादुभयपदिना साहचर्याद्वा न भवति। ङकारः सुनोतेर्गुणप्रतिषेधार्थः, इकार उच्चारणार्थः, पकारः स्वरार्थस्तुगर्थश्च।।
जीर्यतेरतृन्।। 3.2.104 ।।
छन्दसि लिट्।। 3.2.105 ।।
छन्दसि लिट्।। आततानेति। `णलुत्तमो वा' इति णित्त्वपक्षे वृद्धिः। धातुसम्बन्धे स विधिरिति। `धातुसम्बन्धे प्रत्ययाः' इत्यधिकारात्। लिट इकारटकारौ विशेषणार्थौ, `लिटः कानज्वा' `लिट्यभ्यासस्योभयेषाम्' इत्यादौ `ल' इत्युच्यमानेऽन्येषामपि लङादीनां ग्रहणं स्यात्, निरनुबन्धकत्वादस्यैव ग्रहणं भविष्यति। परोक्षे लिटोऽपि तर्हि न प्राप्नोति? टकारष्टेरेत्वार्थश्च।।
लिटः कानज्वा।। 3.2.106 ।।
लिटः कानज्वा।। चिक्यान इति। `चिञ् चयने',`विभाषा चेः' इति कुत्वम्, `एरनेकाचः' इति यणादेशः। न च भवतीति। वावचनस्य प्रयोजनं दर्शयति। वाऽसरूपविधिश्च लादेशेषु नास्ति, `हशश्वतोर्लङ् च' इति वचनादित्युक्तम्। नन्वनन्तरसूत्रविहितस्य लिटो नित्यमादेशोस्तु, यस्तु `छन्दसि लुङ्लङ्लिटः' इति लिट्, तत्र तिङां श्रवणं भविष्यति? न; तस्य धातुसम्बन्धविषयत्वादधातुसम्बन्धे तिङां श्रवणं न स्यात्। लिण्मात्रस्य च ग्रहणमित्यनन्तरमेव वक्ष्यति। पूर्वस्यैवेत्यादि। प्रत्ययान्तरं तु कानज् न भवति, वावचनाद्वाऽसरूपविधिनैव लुङादीनां सिद्धत्वादिति भावः। लिण्मात्रस्येति। भाष्ये त्वन्तरस्यैव लिटोऽयमादेशः, लिङ्ग्रहणं च प्रत्ययान्तरत्वं मा विज्ञायीति। वावचनं चोत्तरार्थमिति स्थितम्।
कानचश्चित्करणं स्वरार्थम्। कित्करणं किमर्थम्, न `असंयोगाल्लिट् कित्' इत्येव सिद्धम्, तेन ईजानस्तेपान इत्यादौ संप्रसारणैत्वाभ्यासलोपादिकार्य भविष्यति? संयोगान्तार्थम्----`बन्ध बन्धने' `वृत्तस्य यद्बद्बधानस्य, त्वमर्णवान् बद्बधाना अरम्णा'अत्र `अनिदिताम्' इति नलोपः, छान्दसत्वादभ्यासधकारस्य हलादिश्शेषेण निवृत्त्यभावे `झलां जश् झशि' इति जश्त्वं दकारः। ननु छान्दसः कानच् लिट् च छन्दसि सार्वधातुकमपि भवति, `छन्दस्युभयथा'इति वचनात्, तत्र `सार्वधातुकमपित्' इति ङित्त्वं ङितीत्युपधालोपो भविष्यति? न च संयोगान्तेषु कित्त्वङित्त्वयोर्विशेषोऽस्ति। ऋकारान्तगुणप्रतिषेधार्थ तु, `ऋच्छत्यृताम्'इति ऋकारान्तानां प्रतिषेधविषये गुण आरभ्यते स यथेह भवति---परितस्तरे इति, एवमिहापि स्यात्----परितितिस्तिराण इति, तस्मात्कित्करणम्। कित्करणसामर्थ्याद्भाषायामपि कानजस्तीत्येतत्तु भाष्यविरोधातुपेक्ष्यम्।।
क्वसुश्च।। 3.2.107 ।।
क्वसुश्च।। क्वसोरुकार उगित्कार्यार्थः, जक्षिवानित्यादौ `उगिदचाम्' इति नुम्, उपसेदुषीत्यादौ `उगितश्च' इति ङीप्, `वसोः संप्रसारणम्'इत्यत्र सामान्यग्रहणमप्युकारस्य प्रयोजनम्। कित्करणं किमर्थ न `असंयोगाल्लिट् कित्' इत्येव सिद्धम्? संयोगान्तार्थम्।अञ्जेः आजिवान्---उपधालोपो भवति, छान्दसः क्वसुः लिट्। छन्दसि सार्वधातुकमपि तत्र `सार्वधातुकमपित्' इति। तत्त्वङितीत्युपधालोपो भविष्यति। ऋकारान्तगुणप्रतिषेधार्थन्तु', `ऋच्छत्यृताम्' इत्ययं गुणः प्रतिषेध आरभ्यते स यथेह भवति---तेरतुस्तेरुरिति, तथा तितीर्वानित्यत्रांपि स्यात्। कित्करणसामर्थ्याद्भाषायामपि क्वसुर्भवतीत्येत्तु भाष्यविरोधादुपेक्ष्यम्। उत्तरसूत्रानर्थक्यं च, यदि भाषायामपि क्वसुर्भवति।।
भाषायां सदवसश्रुवः।। 3.2.108 ।।
भाषायां सदवसश्रुवः।। आदेशविधानादेवेत्यादि। यदि भाषायां सदादिभ्यो भूतसामान्ये लिण्न स्यात्, ततस्तादृशस्य लिट आदेशविधानमनुपपन्नं स्यादिति मन्यते। ननु च `लिटः कानज्वा' इत्यत्र पुनर्लिङ्गहणस्य प्रयोजनमुक्तम्---योऽपि परोक्षे लिड्विहितस्तस्याप्ययमादेशो भवतीति, तच्चेत्सत्यम्, इहापि यः परोक्षे लिट् स भाषायामपि सदादिभ्यः सम्भवतीति तस्येवेदमादेशविधानं स्यात्? उच्यते---लिङ्लिङ्विषयेऽपि परस्तादनुवृत्तेर्भवतीति वक्ष्यति, ततो नानेन परोक्षे लिट आदेशाभिधानम्, किं तर्हि? भूतसामान्ये, ततश्चादेशविधानादेव लिडपि तद्विषयोऽनुमातव्यः। यद्येवम्, तस्य पक्षे क्वस्वादेशः पक्षान्तरे तिङां श्रवणं प्राप्नोति? न वावचनेन क्वसुरभिसम्बद्ध्यते क्वसुर्वा भवतीति, किं तर्हि? लिडभिसम्बद्ध्यते, भाषायां सदादिभ्यो वा लिट्; तस्य नित्यं स्वसुरादेशो भवतीति। वृत्तिग्रन्थोऽप्यस्मिन्नेवार्थ योजनीयः। उपासददिति। लृदित्त्वादङ्। उपासीददिति पाघ्रादिसूत्रेण सीदादेशः। अनूषिवानिति।
यजादित्वात्सम्प्रसारणम्`शासिवसिघसीनां च' इति षत्वम्। अन्ववात्सीदिति। `सस्यार्द्धधातुके' इति तत्वम्। अनूवासेति। `लिट्यभ्यासस्योभयेषाम्' इत्यभ्यासस्य सम्प्रसारणम्। लुङ्लङ् विषयेऽपि परस्तादनुवृत्तेर्भवतीति। अन्यथा भूतसामान्ये लुङ् विहितस्त्रैव धातुविशेषेऽनेनादेशविधानेनानुमितो लिडपवादः। तथा भूतविशेषे लङ्लिटौ लुङ् एवापवादौ। सदादिभ्यस्तु भूतविशेषे एतत्सूत्रविहितं च कार्य प्राप्नोति, लङ्लिटौ च; अपवादविप्रतिषेधाल्लङ्लिटावेव स्याताम्।।

उपेयिवानाश्वाननूचानश्च।। 3.2.109 ।।

उपेयिवानाश्वननूचानश्च।। उपपूर्वादिणः क्वसुरिति। निपात्यत इत्यर्थः। लिडादेशश्चायम्; अन्यथा द्विर्वचनाभ्यासदीर्घत्वे अपि निपातयितव्ये स्याताम्। तथा ग्राममुपेयिवानित्यत्र `न लोकाव्यय' इति षष्ठीप्रतिषेधो न स्यात्। द्विर्वचनमिति। इडागमात्पूर्व नित्यत्वात्क्रित इत्यर्थः। अभ्यासदीर्घत्वमिति। `दिर्घइणः किति' इत्यनेन। तत्सामर्थ्यादिति। यदि ह्येकादेशः स्याद्दीर्घविधानमनर्थकं स्याद्; एकादेशेनैव दीर्घस्य सिद्ध्त्वात्। ननु चाभ्यासदीर्घत्वस्येयतुरित्यादिरवकाशः स्यात्, अत्र हि इ इ अतुस् इति स्थिते दीर्घत्वमेकादेशश्च प्राप्नोति, `इणो यण्' इति यणादेशश्च; तत्र `वार्णादाङ्गं बलीयः' इति बह्वाश्रयत्वेनैकादेशस्य बहिरङ्गत्वाद्वा यणेव भवति, ततश्च दीर्घविधानमर्थवद्भवति ? एवं मन्यते----अत्रापि पूर्वपरविधिरेकादेशः पूर्वविधिरिति, तत्र कर्त्तव्ये यणादेशस्य स्थानिवत्त्वात्स्यादेवैकादेशः; तदेवमभ्यासदीर्घत्वमनवकाशत्वात्सवर्णदीर्घत्वं बाधत इति। तस्मात्सुष्ठूक्तम्-----तत्सामर्थ्यादेकादेशप्रतिबन्ध इति। तत्रेति। एवं सतीत्यर्थः। स निपात्यत इति। निपातनाश्रयणमिडर्थम्। अन्यत्सर्वं पूर्वत्रैवेण्ग्रहणादेव सिद्धमित्यर्थः। यदि तहीडर्थमेतन्निपातनं संप्रसारणविषयेऽपि प्राप्नोति; अत्र वलादेरिति विशेषानुपादानात्, यथा वक्ष्यति----नित्यश्चायं वल्निमित्तो विघातीति, तत्राह-----क्रादिनियमात्प्राप्तश्चेति। चशब्दो हेतौ। नात्रापूर्व इङ् विधीयते, किं तर्हि? योऽयं वलादिलक्षण इट् क्रादिनियमेन प्राप्तः `वस्वेकाजाद्घसाम्' इति नियमेन प्रतिषिद्धः, स एव प्रतिप्रसूयते=प्रतिबन्धपनयनेन पुनः प्रवर्त्यते। तेनाजादा वतिप्रसङ्गो न भवतीत्यर्थः। अन्ये तु----अभ्यासदीर्घत्वे कृते धात्विकारस्य व्यञ्जनं यणादेशं निपातयन्ति, ईय्वसु इति स्थिते `वस्वेकाजाद्घसाम्' इत्येवेट् सिद्धः, स च वलादिलक्षण इति नास्त्यतिप्रसङ्गः।

अपर आह---पूर्वसूत्र एवेग्रहणं कर्त्तव्यम्, नार्थो निपातनाश्रयणेन। अत्र यदुक्तम्---ईयतुरित्यत्राभ्यासदीर्घत्वे कृते एकादेशात्पूर्व वार्णादाङ्गं बलीय इति यणि कृतेऽपि तस्य स्थानिवत्त्वादेकादेशः प्राप्नोति, ततश्चावश्यमभ्यासदीर्घत्वेन बाधितव्य एकादेश इति, तन्न; न हि स्थानिवद्भावेन रूपमतिदिश्यते, रूपाश्रयश्च पूर्वपरयोरेकादेशो न यकारस्य भवितुमर्हति। किञ्च, यणादेशेन बाधितस्यैकादेशस्य पुनस्स्थानिवद्भावेनापि प्रवृत्त्यभावो बाधितत्वादेव। किमतो यद्येवामिदं ततो भवति? इणः क्वसौ विहिते द्विर्वचनं च प्राप्नोति, `वस्वेकाजाद्घसाम्' इतीडागमश्च। किमत्र कर्त्तव्यम्? परत्वादिट् नित्यं द्विर्वचनं कृतेऽपीटि प्राप्नोति, अकृतेऽपि प्राप्नोतीति। इडपि नित्यः, कृते द्विर्वचनेऽभ्यासदीर्घत्वे एकादेशे च एकाच्त्वात्प्राप्नोति; इदानीमेव ह्युक्तम्---अभ्यासदीर्घत्वेन न बाधितव्य एकादेश इति। तदेवमुभयोर्नित्ययोः परत्वादिट्, द्विर्वचनम्, अभ्यासदीर्घत्वं परस्य यणादेशः ईयतुरित्यादिवत्सिद्धमुपेयिवानिति। बिभिद्वानित्यादौ नित्यत्वात्पूर्व द्विर्वचनमेव भवति।

न चात्रोपसर्गस्तन्त्रमिति। एवमाचार्याणामुपदेश इति भावः। अनुपसर्गाच्चेति। `ईयिवांसमतिस्त्रिधः' इति हि छन्दसि दृश्यते। लुङादयो भवन्तीति। लङ्लिड्विषयेऽपि परस्तादनृवृत्तेरयं विधिर्भवतीति दर्शयति। उपागादिति। `इणो गालुङि',`गातिस्थाघुपाभूभ्यः' इति सिचो लुक्। उपैदिति। अदादित्वाच्छपो लुक्,`आडजादीनाम्',`आटश्च'। उपेयायेति। तिपो णलि वृद्ध्यायादेशौ, `द्विर्वचनेऽचि' इति स्थानिवद्भावादिकारस्य द्विवचनम् `अभ्यासस्यासवर्णे'। अश्नातेरिति। `अश भोजने'। नञ्पूर्वादिति। तेनान्यपूर्वात्केवलाच्च न भवति। नाशीदिति। तिपि सिचि `नेटि' इति वृद्धिप्रतिषेधः, `आडजादीनाम्' `आटश्च', नञा सह सवर्णदीर्घत्वम्। नाशेति। तिपि णलि द्विर्वचने `अत आदेः' इत्यभ्यासदीर्घः, नञा परेण च सवर्णदीर्घत्वम्।

वचेरिति। `ब्रुवो वचिः' इत्यस्य। तथा च लङि अन्वब्रवीदित्युदाहरिष्यते। अन्ये तु `वच परिभाषणे' इत्यस्यापि ग्रहणमिच्छन्ति। कर्त्तरीति। न भावकर्मणोः। एतच्च निपातनाल्लभ्यम्। अन्ववोचदिति। `वच उम्'। अन्वब्रवीदिति। `ब्रु व ईट्'। अनूवाचेति। पूर्ववदभ्याससंप्रसारणम्।

लुङ्।। 3.2.110 ।।

लुङ्।। इह भूतसामान्ये लुङ् विधीयते, तस्य विशेषेऽनद्यतने लङ्लिटावपवादौ, तद्विषयेऽपि लुङ् दृश्यते, आगमाम घोषात्, अपास पयः, अशेयिष्महि पूतीकतृणेषु, अभून्नृपो विवुधसखः परन्तपः, इति चिरवृत्तं कथयतः प्रयुञ्चते? नैष दोषः; विशेषे सामान्यमस्ति, तत्र विशेषाविवक्षायां सामान्याश्रयणेन वस्तुतोऽनद्यतनेऽपि लुङुपपद्यते, द्रूपविवक्षायामेव तु लङ्लिटौ, विवक्षोपारूढो ह्यर्थः शब्दप्रयोगनिमित्तः, न वस्तुतः सन्निति। गतमेतत्। वसेरिति। `वस निवासे' रात्रेश्चतुर्थे यामे पृष्टो यदा वाक्यं प्रयुङ्क्ते तदा तस्यातिक्रान्तरात्रिप्रहरत्रयवसनमनद्यतनमिति लङ्प्रयोगे लुङ् वक्तव्यः। लङ्निवृत्तिपरं चैतत् लुङ् भूतसामान्यविवक्षया सिद्धः।

जागरणसन्तताविति। यदा प्रयोक्ता सकलमतिक्रान्त रात्रिप्रहरत्रयं जागरिवतान् तदा लुङ्प्रयोगः यदा सुप्त्वा प्रबुद्ध्य तदा लङ्प्रत्यय एवेत्यर्थः।।

अनद्यतनेलङ्।। 3.2.111 ।।

अनद्यतनेलङ्।। `अनद्यतने' इति तत्पुरुषपक्षे पर्युदासश्चेद्व्यामिश्रेऽपि प्राप्नोति---अद्य ह्यो वाऽभुक्ष्महीति, भवति ह्यद्यतनानद्यतनसमुदायोऽद्यतनादन्यः, प्रसज्य प्रतिषेधे तु योऽत्राद्यतनस्तदाश्रयः प्रतिषेधो भवति, किन्तु भूतसमान्ये प्राप्नोति, भूतविशेषे हि प्रतिषेधः। न च सामान्यं विशेशो भवति। पर्युदासेऽप्ययं दोषो द्रष्टव्यः। बहुव्रीहौ न विद्यतेऽद्यतनो यस्मिन् सोऽनद्यतनो भूतो धात्वर्थः, तत्र वर्त्तमानाल्लङ् भवति, ततश्चाद्यतनसमुदायेऽद्यतनस्यैकदेशस्य सम्भवान्न भवति प्रसङ्गः। भूतसामान्येऽपि न भवत्येव, विद्यते हि सामान्ये विशेषः, अतो बहुव्री---हिरेवायं युक्त इत्याह---अनद्यतन इति बहुव्रीहिनिर्देश इति। बहुव्रीहिणा विवक्षितार्थस्य प्रतिपादनं बहुव्रीहेर्वोच्चारणमित्यर्थः। यदि बहुव्रीहिनिर्द्देशः, एवं सत्यद्यतने प्राप्नोति, न ह्यद्यतनेऽद्यतनो विद्यते? अद्यतनेऽपि मुहूर्त्तादिरद्यतनो विद्यते, मुहूर्त्तादावपि क्षणादिः, कथम्? व्यपदेशिवद्भावेन यथा मुख्ये भेदे आधाराधेयभावो भवति---तटे तिष्ठतीति, तथेहापि समुदायावयवभेदाश्रयेण समुदायेऽद्यतनेऽवयवा अद्यतनाः सन्तीत्यनद्यतनो न भवतीत्युच्यते, न तु तत्त्वतः अवयवव्यतिरिक्तोऽत्र समुदाय आधारोऽस्ति।

तदुक्तं हरिणा-----

कालस्याप्यपरं कालं निर्द्दिशन्त्येव लौकिकाः।

न च निर्द्देशमात्रेण व्यतिरेकोऽनुगम्यते।। इति।

अद्य ह्य इति।। अद्य ह्यश्चेत्यर्थः। गामश्वं पुरुषं नयमान इतिवच्चशब्दस्याप्रयोगः। अभुक्ष्महीति। `भुजोऽनवने' इत्यात्मनेपदम्, महिङि `लिङ्सिचावात्मनेपदेषु' इति सिचः कित्त्वाद् गुणाभावः, `चोः कुः' इति कुत्वम्---गकारः, `खरि च' इति चर्त्त्वम्----ककारः, सिचः सस्य षत्वम्। परोक्षे चेत्यादि। परोक्षशब्दोऽयमतीन्द्रियार्थे वर्त्तते, लोकविज्ञाते लोकप्रसिद्धे प्रयोक्तुर्दर्शनविषये लङन्तस्य शब्दरूपस्य यः प्रयोक्ता तस्य दर्शनविषये लङ् वक्तव्यः। ननु विप्रतिषिद्धमिदम् यदि परोक्षः, कथं दर्शनविषयः? अथ दर्शनविषयः, कथं परोश्रः? शक्यदर्शनत्वाद्दर्शनविषयः, क्वचिद्व्यासङ्गादननुभूतत्वात्परोक्षइति विरोधाभावः। अरुणदिति। `रुधिर् आवरणे',`रुधादित्वात् श्नम्, तिपो हल्ङ्यादिना लोपः। साकेतरोधस्तदानीं प्रयोक्तुर्दर्शनविषयः, शक्यदर्शनत्वात्। लोकप्रसिद्धश्च, क्वचिद्व्यासङ्गादननुभूतत्वात्परोक्षश्च। परोक्ष इति किम्? उदगादादित्यः, इणो लुङ्, गादेशादिकार्यम्।

लोकविज्ञात इति। किम? चकार कटं देवदत्तः। प्रयोक्तुदर्शनविषये इति। किम्? जघान कंसं किल वासुदेवः, हन्तेः परोक्षे लिट्,द्विर्वचनम्,`अभ्यासाच्च'इति कुत्वम्---हकारस्य घकारः। कंसवधश्चिरकालान्तरवृत्तत्वादिदानीं प्रयोक्तुर्दर्शनविषयो न भवति। यस्तु कंसवधेन तुल्यकालः प्रयोक्ता स लङमेव प्रयुक्तवान्----आहत कंसं वासुदेव इति। मूलोदाहरणेऽपि प्रयोक्ता साकेतरोधेन तुल्यकालो वेदितव्यः, तस्येव ह्यसौ दर्शनविषयः, नान्यस्य।।

अभिज्ञावचने लृट्।। 3.2.112 ।।

अभिज्ञावचने लृट्।। वत्स्याम इति। वसेलृट् मस्, `स्यतासां लृलुटोः' इति स्यप्रत्ययः, `सस्यार्द्धधातुके' इति सस्य तकारः, `अतो दीर्घो यञि' इति दीर्घः। वचनग्रहणमित्यादि। असति वचनग्रहणेऽभिज्ञाशब्द एवोपपदे स्यात्, तस्मिंस्तु सति यावन्तोऽभिज्ञानवचनास्तेषु भवति। बुद्ध्यसे चेतयसे इति। अर्थप्रकरणादिना स्मृतिरूपे ज्ञाने यदानयोर्वृत्तिस्तदात्रापि भवतीति भावः।।

न यदि।। 3.2.113 ।।

न यदि।। यदीति सतिसप्तमीयम्। अभिज्ञावचनं चानुवर्त्तते, तेन यत्र यच्छब्दोऽस्ति, तत्र यदभिज्ञावचनं तन्नियोगतो यच्छब्देन सहितं भवतीत्यभिप्रेत्याह-----यच्छब्दसहित इत्यादि। अवसामेति। वेसर्लङ् मस्, `नित्यं ङितः' इति सलोपः, दीर्घः, वासमात्रमित्यादिनोत्तरसूत्रस्य नायं विषय इति दर्शयति। यदि तत्रापरं किञ्चिल्लक्ष्यमपेक्ष्येत तदोत्तरसूत्रेण पाक्षिको विधिस्स्यात्, तच्च नेष्यते, तस्मान्न तस्य विषयः।।

विभाषा साकाङ्क्षे।। 3.2.114 ।।

विभाषा साकाङ्क्षे।। उभयत्रविभाषेयमिति। प्राप्ते चाप्राप्ते च। असति यच्छब्दे `अभिज्ञावचने लृट्' इति प्राप्ते सति यच्छब्दे प्रतिषेधे प्राप्ते। आकाङ्क्षणम्=आकाङ्क्षा, आकाङ्क्षया सह वर्त्तते साकाङ्क्षः। आकाक्षङ्क्षा च चेतनावतो धर्मः, तस्मात्साकाक्षङ्क्ष इत्येतत्प्रयोक्तृविशेषणम्, तेन सकर्मक इत्यादिवत्समासः। साकाङ्क्षश्चेत्प्रयोक्तेति। `अङ्गयुक्तं तिङाकाङ्क्षम्' इत्यत्र तु प्रयोक्तृगताकाङ्क्षाध्यारोपेण तिङन्तमाकाङ्क्षमिति वक्ष्यते। इह तु मुख्ये प्रयोक्तरि सम्भवति, गौणकल्पनया धात्वर्थविशेषणमयुक्तमिति भावः। ईद्दशे पुनर्विषये प्रयोक्ता साकाङ्क्षो भवतीत्याह---लक्ष्यलक्षणयोः सम्बन्धे इति। यत्रैको धात्वर्थो लक्ष्यः, अपरो लक्षणम्, तत्र द्वयोर्लक्ष्यलक्षणभावेन सम्बन्धे सति प्रयोक्तुराकाङ्क्षा भवति, तत्र न वासमात्रं प्रतिपाद्य प्रयोक्ता चरितार्थो भवति, किन्तु तेन प्रसिद्धेन भोजनादिकं स्मारयितुं प्रवर्त्तते।।

परोक्षे लिट्।। 3.2.115 ।।

परोक्षे लिट्।। परोक्षशब्दोऽयमतीन्द्रियवाचो प्रसिद्धः। व्युत्पत्तिस्तु परमक्ष्णः परोक्षम्, मयूरव्यंसकादित्वात्समासः, `अच्प्रत्यन्ववपूर्वात्' इत्यत्राजिति योगविभागादच् समासान्तः। वृत्तिविषये चाक्षिशब्दः सर्वेन्द्रियवचनः, न चक्षुः पर्यायः; अन्यथेन्द्रियान्तरविज्ञातं वस्तु परोक्षमापद्येत । एवं च कृत्वा दर्शनपर्यायोऽक्षिशब्दो न भवतीति `अक्ष्णोऽदर्शनात्' इत्येवाच् समासान्तोऽस्तु। अन्ये तु `प्रतिपरसमनुभ्योऽक्ष्णः' इति शरत्प्रभृतिषु पाठादच् समासान्त इत्याहुः। स च यद्यप्यव्ययीभावे विधीयते, तथापि परशब्देनाव्ययीभावासम्भवात्समासान्तरे विज्ञायते। एवं तु `क्रियायां परोक्षायाम्' इति भाष्यप्रयोगे टिल्लक्षणो ङीप् प्राप्नोति, तस्मादजन्त एवायम्। तत्र परतः परशब्दस्य परो भावोऽस्मादेव निर्द्देशाद्भवति, परशब्दादुत्तरस्याक्षिशब्दस्यादेरुत्वं वा। ननु चेत्यादि। एकफलोद्देशेन प्रवृत्तत्वादैक्यमिवापन्ना विततरूपः क्षणप्रवाहो धात्वर्थः, स कार्त्स्न्येनैकस्मिन्क्षणे न सम्भवतीति सद्वस्तुविषयैरिन्द्रियैर्न गह्यते, ततश्चैकैकस्य क्रियाक्षणस्य प्रत्यक्षत्वेऽपि समूहरूपो धात्वर्थः सर्वः परोक्ष एव, ततश्चाव्यभिचारादविशेषणमिति भावः। सत्यमेतदिति। अनन्तरोक्तं मन्यते। किमर्थ तर्हि परोक्षग्रहणमित्याह---अस्त्विति। यत्र साधनशक्त्याश्रयभूतं फूत्कारसीत्कारादिविशिष्टं संरब्धरूपं द्रव्यं प्रत्यक्षम्, तत्र धात्वर्थ एव प्रत्यक्षाभिमानो लौकिकानाम्। अभिमानः=मिथ्याज्ञानम्, तद्व्यावृत्तये परोक्षग्रहणम्। यदि तर्हि यत्र साधनशक्त्याश्रयं द्रव्यं परोक्षम्, तत्र लिङ् भवति तर्हि उत्तमो न प्राप्नोति, तत्र हि बुद्धीन्द्रियशरीरादिसंघातः कर्ता, स चात्मनः प्रत्यक्ष एव। `परस्मैपदानाम्' इति तु णलादेशवचनं `णलुत्तमो वा' इति च, `छन्दसि लुङ्लङ्लिटः',`अत्यन्तापह्नवे' इति चापरोक्षे यो लिट् तद्विषयं भविष्यतीत्यत आह---उत्तमविषयेऽपि चित्तव्याक्षेपादिति। मदस्वप्नादिभिश्चित्ते व्याक्षिप्ते भवति वै कश्चित्स्वकृतमेव न जानाति, पश्चादेव त्वया कृतमिति पार्श्वस्थेभ्यः श्रुत्वा प्रयुंक्ते---सुप्तोऽहं किल विललापेति। किलेत्यज्ञानं सूचयति। अत्यन्तापह्नव इति। अपह्नवः=अलापः। कलिङ्गो नामजुगुप्सितो देशः, तत्र प्रविश्य त्वया चिरकालं स्थितमिति कश्चिदुक्तस्सन्नाह---नाहं कलिङ्गं जगामेति। न केवलमवस्थानमेव प्रतिषिध्यते, किं तर्हि? तद्धेतुभूतगमनमपीति भवत्यत्यन्तापह्नवः। तथा दक्षिणापथं प्रविश्यायाज्ययानादिकं त्वया कृतमिति कश्चिदुक्तः सन्नाह---नाहं दक्षिणापथं प्रविवेशेति। अत्राप्ययाज्ययाजनादेर्हेतुभूतः प्रवेश एव प्रतिषिद्ध्यत इत्यत्यन्तापह्नवः। क्वचित् दक्षिणापथं प्रविष्टोऽसीति वृत्तावेव पठ्यते, तत्र प्रविश्येदं कृतवानित्यर्थः।।

हशश्वतोर्लङ् च।। 3.2.116 ।।

प्रश्ने चासन्नकाले ।। 3.2.117 ।।

प्रश्ने चासन्नकाले।। भूतानद्यतनपरोक्ष इति वर्त्तत इति। अयमर्थोऽनुवर्त्तत इत्यर्थः,न पुनरेवंविधस्समासः प्रकृतोऽस्ति। प्रष्टव्यः प्रश्न इति। कर्मसाधनं प्रश्नशब्दं दर्शयति। करणसाधने तु प्रश्नक्रियासाधनभूते धातावासन्नकाल इत्यर्थस्स्यात्, तत्रासन्नकाल इत्यनर्थकम्, न ह्यनुच्चारितात्प्रत्ययविधानम्, उच्चारितश्चासन्नकाल एव। भावसाधनेऽप्यासन्नकाले प्रश्ने वर्त्तमानादित्यर्थस्स्यात्, ततश्चार्थान्तरवाचिभ्यो लङ् न स्यात्, अतः कर्मसाधनोऽयं प्रश्नशब्दः। तत्र पञ्चवर्षाभ्यन्तरमासन्नकालम्, पञ्चवर्षातीतं तु विप्रकृष्टकालमिति वर्णयन्ति।।

लट् स्मे।। 3.2.118 ।।

लट् स्मे।। नडेन स्म पुराधीयते इति। अधिपूर्वादिङः कर्मणि लकारः, कर्माविवक्षायां वा भावे, नडेनेति कर्त्तरि तृतीया। अथ वा---अधीयते इति कर्त्तरि बहुवचनम्, `आत्मनेपदेष्वनतः' इत्यदादेशः, नडेनेति सहयोगे तृतीया। अन्ये तु व्याचक्षते---पुराकल्पे---पुराकल्पे नडाख्यं तृणविशेषं हस्ते गृहीत्वाधीयाना अधीयते स्मेति।।

अपरोक्षे च।। 3.2.119 ।।

अपरोक्षे च।। पूर्वसूत्रेण परोक्षे विधानादपरोक्षे न प्राप्नोतीत्ययमारम्भः, पूर्वसूत्र एव परोक्षग्रहणं निवर्तिष्यते। यद्येवम्, तत्सम्बन्धादनद्यतनग्रहणमपि निवर्तेत मा निवृतदित्येवमर्थमिदम्, द्वयोर्हि प्रकृतयोरेकनिवृत्तिर्यत्नेन क्रियमाणा इतरस्यानिवृत्तिमनुमापयति।।

ननौ पृष्टप्रतिवचने।। 3.2.120 ।।

ननौ पृष्टप्रतिवचने।। पृष्टमिति कर्मणि क्तः, पृष्टस्य प्रतिवचनं पृष्टप्रतिवचनम्। वृत्तौ तु वस्तुमात्रं दर्शितम्। प्रश्नपूर्वके प्रतिवचन इति। उदाहरणे पूर्वशः प्रश्नः,उत्तर उदाहरणम्। पृष्टग्रहणार्थकं प्रश्नपूर्वकमेव प्रतिवचनम्? तन्न; विरुद्धमपि वचनं प्रतिवचनं वचनाभिमुखं प्रतिवचनमित्यपि सम्भवात्। तस्मात् पृष्टग्रहणम्। अत्यन्तासन्नकाले चायं विधिरिष्यते, तत्र निर्वृत्तायामपि पाकादिक्रियायां तत्कृतस्य श्रमादरेनुवृत्तिः। एवं च श्रमादिदर्शनेन सैव क्रिया वर्त्तत इति शक्यं वक्तुमिति। `वर्त्तमाने लट्' इत्येव सिद्धेः प्रत्याख्यातमिदम----`ननौ पृष्टप्रतिवचने'इत्यशिष्यम्, क्रियासमाप्तेरविवक्षितत्वादिति।।

नन्वोर्विभाषा।। 3.2.121 ।।

पुरि लङ् चास्मे।। 3.2.122 ।।

पुरि लङ् चास्मे।। अनद्यतनग्रहममित्यादि। लुङ्ग्रहणं चात्र लिङ्गम्। यदि हि भूतमात्रेऽयं विधिः स्यात् विभाषा लटो विधानात्तेन मुक्ते लुङपि भविष्यति, किं लुङ्ग्रहणेन! अनद्यतनग्रहणानुवृत्तौ तु लटा मुक्ते लङेव स्यादिति कर्त्तव्यं लुङ्ग्रहणम्। अन्येऽपीति। लङ्लिटौ, अभिज्ञावचने लृट्---अभिजानासि देवदत्त वत्स्यन्तीह पुरा छात्रा इति।।

वर्त्तमाने लट्।। 3.2.123 ।।

वर्त्तमाने लट्।। प्रारब्धोऽपरिसमाप्तश्चेति। अधिश्रयणादिरधः श्रयणपर्यन्त ओदनफलावच्छिन्नो विततरूपो व्यापारनिचयः पचेरर्थः। एवं सर्वत्र स यावता कालेन निवर्तते स कालो वर्त्तमानः, तद्योगाद्वर्त्तमानो धात्वर्थ इत्यर्थः। तेन निष्पन्नस्यार्थस्य भूतत्वादनिष्पन्नस्य च भावित्वान्निष्पन्नानिष्पन्नव्यतिरेकेण राश्यन्तरस्याभावाद्वर्त्तमानाभाव इति चोद्यं परिहृतम्। इहाध्ययने प्रवृत्ता यदा भोजनादिक्रियां कुर्वन्तो नाधीयते तदा अधीयत इति प्रयोगो न प्राप्नोति? नैष दोषः; आफलनिष्पत्तेरध्ययनमपरिसमाप्तमन्तरालवर्तितु भोजनादिक्वं नान्तरीयकं तस्यैव वावयवक्रिया। यमपि भवान्मुक्तसंशयं वर्त्तमानकालं न्याय्यं मन्यते----भुङ्क्ते देवदत्त इति, अत्राप्यवश्यं भुञ्जानो हसति जल्पति पानीयं वा पिबति, तत्र चेद्युक्ता वर्त्तमानकालता, इहापि युक्ता दृश्यताम्। उक्तं च----

व्यवधानमिवोपैति निवृत्त इव दृश्यते।
क्रियासमूहो भुज्यादिरन्तरालप्रवृत्तिभिः।।
न च विच्छिन्नरूपोऽपि स विरामान्निवर्त्तते।
सर्वैव हि क्रियाऽन्येन सङ्कीर्णैवोपलभ्यते।।
तदन्तरालदृष्टा वा सर्वैवावयवक्रिया।
सादृश्यात्सति भेदे तु तदङ्गत्वेन गृह्यते।। इति।

एतदप्यनेनैवोक्तं प्रारब्धोऽपरिसमाप्तश्च वर्तमान इति। इह तिष्ठन्ति पर्वताः, स्रवन्ति सिन्धव इति पर्वतादिस्थित्यादेः सर्वदाभावाद् भूतभविष्यदभावात्तत्प्रतिद्वन्द्विरूपस्य वर्तमानस्याप्यभाव इति लण् न प्राप्नोति? नैष दोषः; कालत्रयवर्तिनां राज्ञां याः क्रियाः पालनादिका भूतादिभेदेन भिन्नास्ताः पर्वतस्थित्यादेर्भेदिकाः, ततश्च ये सम्प्रति राजानस्तत्क्रियाभेदेन भिन्नाया पर्वतादिस्थितेर्वर्तमानत्वम्। एवं च कृत्वा भूतभविष्यत्कालयोगोऽप्युपपद्यते-----तस्थुः पर्वता नलदुष्यन्तादिकाले, स्थास्यन्ति पर्वताः कल्किविष्णुकाले। लटष्टकारष्टेरेत्वार्थः।।

लटः शतृशानचावप्रथमासमानाधिकरणे।। 3.2.124 ।।

लटः शतृशानचावप्रथमासमानाधिकरणे।। शकारः सार्वधातुकसंज्ञार्थः, ऋकार उगित्कार्यार्थः, चकारः स्वरार्थः। प्रथमाशब्दस्सुपामाद्ये त्रिके प्रसिद्धः, प्रथमाया अन्याऽप्रथमा=द्वितीयादिः, तत्र प्रत्ययग्रहणपरिभाषया तदन्तविधिः, अप्रथमान्तं द्वितीयाद्यन्तमित्यर्थः। अधिकरणम्=अभिधेयम्, समानम्=साधारणम्, अभिधेयं यस्य तत्समानाधिकरणम्, अप्रथमान्तेन समानाधिकरणमप्रथमासमानाधिकरणम्। तृतीयेति योगविभागात्समासः। द्विपदो वा बहुव्रीहीः-----

अप्रथमासमानाधिकरणं यस्येति। `यस्य च भावेन' इति सप्तमी अप्रथमासमानाधिकरणे लटि सति, तस्य लट इति षष्ठ्यर्थे सप्तमी। एष पर्युदासपक्षो दर्शितः। प्रसज्यप्रतिषेधपक्षे तु नञो भवतिना संबन्धः। प्रथमाशब्देन प्रथमान्तं गृह्यते। शेषं समानम्।

तत्राद्ये पक्षे कुर्वतोऽपत्यं कौर्वतः, पाचतः, कुर्वतो भक्तिः कुर्वद्भक्तिः कुर्वाणभक्तिरिति प्रत्ययोत्तरपदयोः शतृशानचौ न स्याताम्, न ह्यत्र द्वितीयाद्यन्तेन सामानाधिकरण्यम्, न हि कुर्वतो देवदत्तस्य भक्तिः कुर्वतो देवदत्तस्यापत्यमित्यत्र समासतद्धितौ भवतः, सापेक्षत्वात् पदान्तरनिरपेक्षत्वे प्रथमान्तेन सामानाधिकरण्याभावः। प्रसज्यप्रतिषेधे तु प्रथमान्तेन सामानाधिकरण्याभावाददोषः। अस्तु तर्हि स एव? एवमपि कुर्वतो भक्तिरस्य कुर्वद्भक्तिः, कुर्वाणभक्तिरत्र न प्राप्नोति, ये चाप्येते समानाधिकरणवृत्तयस्तद्धितास्तेषु न स्यात्---कुर्वत्तरः, कुर्वाणतरः; कुर्वद्रूपः कुर्वत्कल्प इति? पर्युदासेऽप्येष दोषो द्रष्टव्यः।

एवं तर्हि `प्रत्ययोत्तरपदयोश्च' इति लक्षणशेषः कर्त्तव्यः, तत्र पृथगुत्तरपदग्रहणम् `अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति समासार्थाया विभक्तेर्लुकिकृते प्रत्ययलक्षणप्रतिषेधात्प्रत्ययपरत्वार्थम्। ननु च प्रत्ययोत्तरपदयोः सतोः शतृशानचौ भवतः, तयोश्च कृत्त्वात्प्रातिपदिकत्वे सति विभक्त्युत्पत्तौ सत्यां तद्धिताः, समासश्च, समासे च सत्युत्तरपदं तदितरेतराश्रयं भवति? नैष दोषः; ङ्याप्प्रतिपदिकात्तद्धिताः, ते लकारस्य कृत्त्वाद्भविष्यन्ति, उत्तरपदेऽपि विधानसामर्थ्यात्तिङादेशं बाधित्वा लान्तस्य प्रातिपदिकत्वमाश्रित्य सुबुत्पत्तौ समास इति सिद्धम्। एवमपि वीक्षमाणस्यापत्यं वैक्षमाणिरित्यकृते शानचि अकारान्तत्वाभावादत इञोऽप्रसङ्गः, पचतितरामित्यत्र शतृशानचौ प्राप्नुतः, तथा पचतिरूपमित्यादौ `तिङश्च' इत्येतत्तु लङादिविषयमेव स्यात्।

तदेवं सर्वत्र दोषसद्भावे समासोऽपि तावन्न्याय्यो भवतीति पर्युदासमाश्रित्याह----अप्रथमान्तेन चेदित्यादि। तस्येति। लटः। कथं पुनर्लटो द्वितीयाद्यन्तेन सामानाधिकरण्यम्, यावता `लः कर्मणि च' इत्यनेन कर्तृकर्मणोर्विधीयमानो लकारः क्रियां प्रति गुणभूते कर्तृकर्मणी प्रतिपादयति, तथा च क्रियाप्रधात्वादाख्यातस्य क्रियान्तरयोगाभावाच्छक्त्यन्तरावेशाभावः, न हि भवति पचत्योदनं देवदत्तं पश्य पच्यते ओदनेन तृप्तः अपचदोदनं देवदत्तं पश्य पच्यते ओदनेन तृप्त इति, यथा----अन्येषु कृत्सु पाकं पश्य, पाकेन तृप्त इति? सत्यम्; तिङ्भाविनो लकारस्यायं स्वभावः यदुक्तगुणभूते कर्तृकर्मणी प्रतिपादयति, शत्रादिविषयस्य क्रियोपसर्जनकर्त्राद्यभिधानम्, ततश्च क्रियान्तरयोगे सति तन्निमित्तं द्वितीयाद्यन्तसामानाधिकरण्यमुपपद्यते। यद्यपि केवलस्य लटः प्रयोगाभावादप्रथमान्तेन सामानाधिकरण्यं न क्वचिदुपलब्धम्, तथापि तदादेशयोः शतृशानचोर्दर्शनात् स्थानिनो लकारस्यापि तद्योग्यत्वमनुमीयते, तेन लटः प्रक्रियार्थ विहितस्य काल्पनिकप्रथमान्तेन सामानाधिकरण्यमस्तीति दोषाभावः।

अथ लड्ग्रहणं किमर्थम्----आदेशौ यथा स्यातां प्रत्ययान्तरं मा भूतामिति? नैतदस्ति; पूर्वसूत्रत एव लड्ग्रहणं स्वरयिष्यते, तस्येहानुवृत्तस्यार्थात् षष्ठ्या विपरिणामे तस्यैवादेशौ भविष्यतः, न प्रत्ययान्तरमत आह----लडिति वर्तमाने पुनर्लड्ग्रहणमिति। क्वचित्प्रथमासामानाधिकरण्येऽपि भवत इति। अप्रथमासमानाधकरणत्वाभावोपलक्षणमिदम्, तेन कौर्वतः, कुर्वद्भक्तिरित्यादयोऽपि भवन्ति। सन्निति। `अस् भुवि',`श्नसोरल्लोपः'। विद्यमान इति। `विद सत्तायाम्',`दिवादिरनुदात्तेत्। जुह्वदिति। `नाभ्यस्ताच्छतुः' इति नुमभावः।

माङ्याक्रोश इति। माङि लुङोऽपवादः, तथा पुनर्लड्ग्रहणाद्योऽपि भूते लट् `ननौ पृष्टप्रतिवचने' इति तस्यापि भवतः----ननु मां कुर्वन्तं पश्य, ननु मां कुर्वाणम्पश्येति। एतच्च `ननौ पृष्टप्रतिवचने' इत्यत्र भाष्यकारेणोक्तम्।

केचिदित्यादि। न चैवं पचन्तम्पश्येत्यादावपि विकल्पप्रसङ्ग इत्यत आह---व्यवस्थितविभाषा चेयमिति। यथादर्शनमिति। प्रथमासमानाधिकरणे विकल्पः, पचन्तं पश्येत्यादौ `प्रत्ययोत्तरपदयोश्च'नित्यम्पचतितरामित्यादौ नैव भवतः, अन्यथा तिङोऽपि स्थानिवद्भावात्स्यात्प्रसङ्गः। न तर्हीदानीमिदं वक्तव्यम्---अप्रथमासमानाधिकरण इति? वक्तव्यं च। किं प्रयोजनम्? नित्यार्थम्। नन्वेतदपि विभाषयैव सिद्धम्? सत्यम्; स एवार्थो वचनेन स्पष्टीक्रियते। एतेन `सम्बीधनै च' `लक्षणहेत्वोः' इति च व्याख्यातम्।।

सम्बोधने च।। 3.2.125 ।।

सम्बोधने च।। हे पचन्निति। संयोगान्तलोपस्यासिद्धत्वान्नलोपाभावः। अत्र सम्भोधने प्रथमा, अयमादेशश्चेत्युभयं मिलितं सम्बोधनं द्योतयति।।

लक्षणहेत्वोः क्रियायाः।। 3.2.126 ।।

लक्षणहेत्वोः क्रियायाः।। लक्ष्यते चिह्न्यते येनेति। चिह्नयतिरवधारयत्यादिवच्चुरादिषु द्रष्टव्यः। धात्वर्थविशेषणं चैतदिति। नोपपदं क्रियाया इति वचनात्। उपपदं हि धातोर्भवति, स च क्रियावचन इति क्रियाग्रहणमनर्थकमुपपदत्वे स्यात्। क्रियायाश्च लक्षणापेक्षया कर्मत्वम्, हेत्वपेक्षया तु शेषत्वम्, तत्रोभयानुग्रहाय कर्मणोऽपि शेषत्वविवक्षया शेषलक्षणैव षष्ठी, वृत्तौ तु वस्तुमात्रं प्रादर्शि। क्रियाविषयाविति। शयाना भुञ्जत इति। अत्र शयनं लक्षणं भोजनस्य। तिष्ठन्तोऽनुशासतीति। अत्रापि स्थानमनुशासनस्य। अर्जयन्वसतीति। `अर्ज प्रतियत्ने' चुरादिराङ्पूर्वः।

लक्षणहेत्वोरिति किमिति। क्रियासम्बन्धिन्यर्थे वर्तमानादिति विज्ञायमाने लक्षणहेत्वोरपि भविष्यत इति प्रश्नः, अतिप्रसङ्गेन तूत्तरम्। पचति च पठतिचेति। अत्र द्वयोः क्रिययोरेकस्मिन्साधने समुच्चयात्तद्द्वारेण परस्परसम्बन्धोऽप्यस्तीत्युभयत्रापि प्रसङ्गः। यः कम्पते सोऽश्वत्थ इति। बहुषु वृक्षेषु तिष्ठत्सु कम्पनेनाश्वत्थो लक्ष्यते, तच्च द्रव्यम्। यदुत्प्लवते तल्लघ्विति। अत्राप्युत्प्लवनेन लाघवं गुणो लक्ष्यते। निषदनं निमज्जनं तेन गौरवं गुणो लक्ष्यते। इह तु योऽधीयान आस्ते स देवदत्त इति आसिक्रियाया एवाध्ययनक्रियालक्षणम्, न देवदत्तस्य, आसिक्रिया तु तस्य लक्षणम्। एवं यस्तिष्ठन्मूत्रयति स ब्राह्मणब्रुव इति, अत्रापि स्थितिक्रिया मूत्रणक्रियाया एव लक्षणम्, सैव तु देवदत्तस्याशौ चादेर्लक्षणं न स्थितिक्रियेति सूत्रेणैव सिद्ध आदेशः। कथं शयाना वर्धते दूर्वा, आसीनं वर्धते विषमिति, न ह्यासनशयते वृद्धेर्लक्षणम्, किं तर्हि? स्वभावमात्रकथनमेतत्? भवति वै स्वभावाख्यानमपि लक्षणम्, यथा----चैतन्यलक्षणं पुरुष

इति। पूर्वनिपातव्यमिचारलिङ्गमिति। `द्वन्द्वे घि',`अल्पाच्तरम्' इति यौ पूर्वनिपातौ तयोर्व्यभिचारे लिङ्गमित्यर्थः। तेन धूमाग्नी, मृदङ्गशङ्खपणवा इत्यादिप्रयोगोपपत्तिः।।

तौ सत्।। 3.2.127 ।।

तौ सत्।। तौग्रहणं किमर्थम्, संज्ञाविधिर्यथा स्यात् सदित्यस्य प्रत्ययस्य विधिर्मा भूदिति? नैतदस्ति प्रयोजनम्, पूर्वसूत्रे शतृशानचौ स्वरयिष्येते, तत्सामर्थ्यात्तयोरनुवृत्तयोः संज्ञैव भविष्यति, तत्राह----तौग्रहणमुपाध्यसंसर्गार्थमिति। लट्स्थानिकत्वाद् वर्त्तमानकालविहितत्वं चोपाधिः, तेनोपाधिनाऽसंबन्धार्थः, तौग्रहणमित्यर्थः, किं सिद्धमित्याह---शतृशानज्मात्रस्येति। असति तौग्रहणे यादृशौ शतृशानचौप्रकृतौ लट्स्थानिकौ वर्त्तमानकालौ च तादृशयोरेव संज्ञा स्यात्, ततश्च लृडादेशयोर्न स्यात्। `लृटस्सद्वा' इत्येतत्तु वचनं सत्संज्ञकप्रतिरूपयोर्विधानार्थ स्यात्, यथा----अमी पिष्टपिण्डाः सिंहाः क्रियन्तामिति तदाकाराः क्रियन्ते। विहितयोस्तूत्तरकालं संज्ञा न सिध्यति, ततश्च ब्राह्मणस्य पक्ष्यन्, ब्राह्मणस्य पक्ष्यमाण इति समासप्रतिषेधो न स्यात्; तस्यां दशायां सत्संज्ञाया अभावात्। एवं भूतकालयोरपि न स्यात्। `वर्त्तमानसामीप्ये वर्त्तमानवद्वा' इति वचनाद्भूतेऽपि शतृशानचौ भवतः। एवं तत्रापि वर्त्तमानवदित्यतिदेशेन विधानमेव तयोर्भूते सिद्ध्यति, न तु संज्ञा। प्रत्ययाधिकाराद्धि प्रत्यय एवातिदिश्यते, न सज्ञा। तथा `ननौ पृष्टप्रतिवचने'इत्यपि लटः शतृशानचौ भवत इत्युक्तम्, तयोरपि संज्ञा न भवेत्, तौग्रहणे सति तयोरपि संज्ञा भवति----ननु मां ब्राह्मणस्य कुर्वन्तम्पश्य ननु मां ब्राह्मणस्य कुर्वाणम्पश्येति। अथ क्रियमाणेऽपि तौग्रहणे कथमिव कालान्तरविहितयोः संज्ञा सिद्ध्यति, यावता प्रकृतस्यैव वस्तुनस्सर्वनाम्ना परामर्शः? सत्यम्; तौग्रहणसामर्थ्यात्तु विशेषणांशरित्यागेन शतृशषानचो रूपमात्रं परामृश्यते।।

पूङ्यजोः शानन्।। 3.2.128 ।।

पूङ्यजोः शानन्।। इहैते शानन्नादयो यदि लटोऽनुवृत्तिमाश्रित्य तस्यैवादेशाः क्रियेरन्, वेति वक्तव्यम्, पवमानः यजमानः, पवते यजत इत्यपि यथा स्यात्, वाऽसरूपविधिना तिङो बविष्यन्ति, न लादेशेषु वाऽसरूपविधिरस्तीत्युक्तम्। साधनाभिधानम्---साधनस्य चाभिधानं प्राप्नोति `लः कर्मणि च भावे चाकर्मकेभ्यः' इति भावकर्मणोरपि प्रसङ्गः। परस्स्वरश्च न सिद्ध्यति---कतीह पवमानाः, `अदुपदेशाल्लसार्वधातुकम्' इत्यनुदात्तत्वं प्राप्नोति। आत्मनेपदसंज्ञा---`तङानावात्मनेपदम्' इत्यात्मनेपदसंज्ञा च प्राप्नोति, ततश्च परस्मैपदिभ्यश्चानश् न स्यात्कतीह नन्दमानाः। तस्मादशक्या एवैते लादेशा विज्ञातुमिति मत्वाह---शानन्प्रत्ययो भवतीति। शकारस्सार्वधातुकसंज्ञार्थः, नकारस्स्वरार्थः।

यदीत्यादि। `न लोकाव्यय' इत्यत्र स्वरूपस्य ग्रहणं मन्यमानस्य प्रश्नः। तृन्निति प्रत्याहारनिर्देशादिति। षष्ठीप्रतिषेध इत्यनुषङ्गः।

द्विषश्शतुर्वा वचनमिति। `द्विषोऽमित्रे' इति योऽयं शतृप्रत्ययस्तस्य प्रयोगे वा षष्ठी भवति, प्रत्याहारेऽन्तर्भावान्नित्यं प्रतिषेधे प्राप्ते वचनम्। यस्यापि तन्निति स्वरूपग्रहणं तेनाप्येतद्वक्तव्यम्---पक्षे षष्ठी यथा स्यान्नित्यं मा भूदिति। शेषविज्ञानात्सिद्धम्, कर्मणि शेषत्वेन विवक्षिते षष्ठी, कर्मरूपेण विवक्षिते द्वितीयेति।।

ताच्छील्यवयोवचनशक्तिषु चानश्।। 3.2.129 ।।

ताच्छील्यवयोवचनशक्तिषु चानश्।। मण्डयमाना इत्यादि। `मडि भूषायाम्',`भूष अलङ्कारे' चुरादी, `असु क्षेपणे',पर्यासः===सन्नहनम्, शिखापर्यायः शिखण्डशब्दः। वचनग्रहणं विस्पष्टार्थम्।।

इङ्धार्योः शत्रकृच्छ्रिणि।। 3.2.130 ।।

इङ्धार्योः शत्रकृच्छ्रिणि।। अकृच्छ्रः सुखसाध्यो यस्य धात्वर्थ इति। अस्तीति शेषः। `अत इनिठनौ' इतीनिः, अपुत्रा भार्यादिवद् बहुव्रीहिणैव सिद्धे तत्पुरुषान्मत्वर्थीयः कृतः; लघुत्वम्प्रति सर्वत्रानादरात्। इङ आत्मनेपदित्वाद्धारयतेश्च कर्त्रभिप्राये शता न सिद्ध्यति, लसार्वधातुकानुदात्तत्वं च प्राप्नोतीत्ययमारम्भः।।

द्विषोऽमित्रे ।। 3.2.131 ।।

द्विषोऽमित्रे।। असन्देहार्थम् `मित्रे द्विषः' इति सूत्रान्यासादकारप्रश्लेषो विज्ञायत इत्याह---अमित्रश्शत्रुरिति। अमेर्द्विषतीति त्रच्प्रत्ययः, न पुनरयं नञ्समासः, परवल्लिङ्गप्रसङ्गात् लोकाश्रयत्वाल्लिङ्गस्य। स्वरे दोषः, चित्स्वरो हीष्यते। बह्वचास्तु मध्योदात्तममित्रशब्दमधीयते---अमित्रस्य व्यथया मन्युमिन्द्रः, अमैरमित्रमर्दय। द्विषेस्स्वरितत्वात्कर्त्रभिप्राये शता न प्राप्नोतित्ययमारम्भः।।

सुञो यज्ञसंयोगे।। 3.2.132 ।।

सुञो यज्ञयंयोगे।। कर्मसाधनस्संयोगशब्द इत्याद---यज्ञसंयुक्तेऽभिषव इति। सर्वे सुन्वन्त इति। प्रयोगः। तस्य विषयमाह---सर्वे यजमानास्सत्त्रिण उच्यन्ते इति। सूत्रेषु हि ये यजमानास्ते ऋत्विज इति सर्वे प्रधानकर्त्तारः। इह `सुञो यज्ञे' इत्येव सिद्धम्, यज्ञविषयश्चेत्सुनोत्यर्थो भवतीत्यर्थः, तत्किं संयोगग्रहणेन? तत्राह---संयोगग्रहणमिति। `लटः शतृशानचौ' इत्यनेनाप्यप्रधाने कर्त्तरि न भवति, संयोगग्रहणसामर्थ्यात्प्रधानकर्त्ता=अधिकारी।।

अर्हः प्रसंसायाम्।। 3.2.133 ।।

अर्हः प्रसंसायाम्।। अर्हति चौरो वधमिति। `लटः शतृशानचौ' इत्यनेनापि न भवति, प्रथमासमानाधिकरणत्वात्। अस्तु वा `अदुपदेशाल्लसार्वधातुकम्' इत्यनुदात्तः।।

आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु।। 3.2.134 ।।

आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु।। तदित्यादि। `धातोः' इति वर्तते, धातुश्च शब्दः, न तस्य शीलादिप्रतिविशेषणत्वमुपपद्यते, तस्मात्तस्य योऽर्थः स

शीलादीनां त्रयाणां विशेष्याणां विशेषणत्वेन त्रिभिस्तच्छब्दैर्निर्दिश्यते। तत्र धात्वर्थे शीलं यस्य स धात्वर्थो धर्मो यस्य तस्य धात्वर्थस्य साधुकारीत्येवमित्यर्थः।

तद्धर्मा तदाचार इति। धर्मशब्दस्याचारे प्रसिद्धत्वात्। विनापि शीलेनेति। तच्छीलाद्भेदं दर्शयति। यो धात्वर्थ साघु करोतीति। विनापि शीलेनेत्यनुषङ्गः।।

तृन्।। 3.1.135 ।।

तृन्।। मुण्डयितार इति। श्राविष्ठायनानां गोत्रविशेषाणामेष कुलधर्मः। अपहर्त्तार इति। अह्वरदेशे भवा आह्वरकाः, `रोपधेतोः प्राचाम्' इति वुञ्, तेषामेव देशधर्मः। श्राद्धे सिद्धेः। निर्वृत्ते। उन्नेतार इति। अयमपि कुलधर्मः।

तृन्विधाविति। अताच्छील्याद्यर्थ आरम्भः। तृजेव भवतीति। तृन्तृचौ `शंसिक्षदादिभ्यः संज्ञायां चानिटौ' इत्यनेन। स्वरे विशेष इति। तृनि `तादौ च निति कृत्यतौ' इति गतेः प्रकृतिस्वरस्स्यात्, तचि तु कृत्स्वरो भवति। `तृन्तृचौ' इत्यस्यैव विषयव्यवस्थार्थमिदम्। अनुपसर्गेभ्यस्तृन्, सोपसर्गेभ्यस्तृजिति प्रपञ्चार्थ वा, तथा च प्रशास्तेति। तृच्यपीण्नास्ति।

नयतेः षुक् चेति। गुणे कृते षुग् वेदितव्यः, प्रकृत्यन्तरं वा; नेषति, नेषतुः, नेषिथेति दर्शनात्।

अनिट्त्वं चोत। त्विषः स्वत एवानिट्त्वादुक्तवक्ष्यमाणसर्वोपसंख्यानशेषभूतमिदम्। तेन पोता, क्षत्तेत्यनिटत्वं भवति।

क्षदेरिति। धातुष्वपठितोऽपि क्षदिरस्मादेव वचनादभ्युपगम्यते, आत्मनेपदी चायम्। उक्षाणा वा वहतं वाक्षदन्त इति बह्वृचब्राह्मणप्रयोगात्। क्वचिदधिकृत इति। द्वाररक्षणे, रथप्राजने च।।

अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्।। 3.2.136 ।।

अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्।। कृञिति करोतेर्ग्रहणम्, प्रसिद्धेः, न हिसार्थस्य। `जनी प्रादुर्भावे' `डुपचषपाके',`पचि व्यक्तीकरणे इत्यस्येदित्त्वान्नुमा भाव्यमिति नायं निर्द्देशः सम्भवति। `शल हुल पत्लृ गतौ' `उत्पतिष्णू च चेरतुः खरदूषणौ' इति भट्टिकाव्ये प्रयोगः।`पद गतौ' इत्यन्ये पठन्ति। `मदो हर्षे',`मद तृप्तियोगे' इत्ययं तु चुरादिः, तस्योन्मदेति निर्द्देशो न सम्भवति। `रुच दीप्तौ',`त्रपूष् लज्जायाम्',`वृतु वर्तने' `वृधु वृधौ',`षह मर्षणे',`चर गत्यर्थः। येऽत्र सोपपदा उपात्तास्तत्रोपात्तादेव रूपाद्भवति, तत एतन्न नोदनीयम्----`उदः पचपतमद' इति वक्तव्यम्, किं स्वरूपतः? प्रत्येकमुत्पूर्वपाठेनेति तेन समुत्पतिष्णुरिति न भवतीत्याहुः। ये तु निरुपपादा उपात्तास्तेभ्यो यथादर्शनं भवति।।

णेश्छन्दसि।। 3.2.137 ।।

णेश्छन्दसि।। पारयिष्णव इति। `अयामन्ताल्वाय्येत्न्विष्णुषु' इत्ययादेशः।।

भुवश्च।। 3.2.138 ।।

भुवश्च।। छन्दसीत्युच्यते, तत्कथम्----`जगत्प्रभोरप्रभविष्णु वैष्णवम्' `विष्णवे प्रभविष्णवे' इति? निरंकुशाः कवयः। भ्राजिष्णुनेति। नैतद्भाष्ये समाश्रितम्।।

ग्लाजिस्थश्च ग्स्नुः।। 3.2.139 ।।

ग्लाजिस्थश्च ग्स्नुः।। चर्त्वभूत इति। चरत्वं प्राप्तश्चर्त्वेन वा प्राप्त इत्यर्थः। श्र्युकः कितीत्यत्रापीति। गकारोऽपि चर्त्वभूतो निर्द्दिश्यत इत्यनुषङ्गः। वस्नोर्गित्त्वान्न स्थ ईकारः। स्थास्नुरित्यत्र ईकारो न भवति, क्स्नोर्गित्त्वात्। कङितोरीत्वशासनात्। ककारेऽकार उच्चारणार्थः। क्ङितोर्हीत्त्वमुच्यते, अयं तु गित्। यद्येवं जिष्णुर्भूष्णुरित्यत्र गुणः प्राप्नोति? ----गुणाभावस्त्रिषु स्मार्यः। गित् कित् ङिदिति त्रिषु गुणाभावः स्मर्तव्यः; `क्ङिति च' इत्यत्र गकारप्रश्लेषात्। इह तर्हि भूष्णुरिति `श्र्युकः किति' इतीट्प्रतिषेधो न प्राप्नोति?----श्र्युकोऽनिट्त्वं गकोरितोः। श्र्युकः परस्य यदनिट्त्वं तद्गकारककारयोर्द्वयोरपीतोर्भवति, न केवलं ककारे; तत्रापि गकारस्य चर्त्वभूतस्य निर्द्देशात्। यद्येवम्, चर्त्वस्यासिद्धत्वाद् `हशि च' इत्युत्वं प्राप्नोति? सौत्रो निर्द्देशः, असंहितया वा निर्द्देशः करिष्यते छन्दसि। दंक्ष्णवः पशव इति। क्स्नोर्गित्त्वादुपधालोपाभावः।।

त्रसिगृधिधृषिक्षिपेः क्नुः।। 3.2.140 ।।

त्रसिगृधिधृषिक्षिपेः क्नुः।। त्रस्नुरिति। `नेड्वशि कृति' इतीट्प्रतिषेधः।।

शमित्यष्टाभ्यो घिनुण्।। 3.1.141 ।।

शमित्यष्टाभ्यो घिनुण्।। इतिशब्द आद्यर्थे इति। अनेकार्थत्वान्निपातानाम्। तत्र `शम्' इति आदिर्येषामिति बहुव्रीहौ सुपो लुक्, `शमु उपशमने',`तमु काङ्क्षायाम्',`दमु उपसमने',`श्रमु तपसि खेदे च',`भ्रमु अनवस्थाने',`क्षमूष् सहने',`क्लमु ग्लानौ',`मदी हर्षे'। उकार उच्चारणार्थ इति। नानुबन्धः, अनुबन्धे हि सति शमिनौ शमिन इत्यत्र `उगिदचाम्' इति नुम् प्रसज्येत;शमिनितरा, शमिनितमेत्यत्र नद्याः शेषस्यान्यतरस्याम् `उगितश्च' इत्यन्यतरस्यां ह्रस्वः स्यात्; `घरूपकल्पचेलड्' इति नित्यमिष्यते, तस्मान्नायमनुबन्धः, किं तूच्चारणार्थ इति व्याचक्षते। भाष्ये तु `अकार उगित्कार्यार्थोऽनुबन्ध एव' इति स्थितम्। तत्र ह्रस्वत्वं विकल्पेनेष्यते, न नित्यम्। नुम्विधौ तु झल्ग्रणमनुवर्त्तिष्यते, अझलन्तत्वान्न प्रविष्यति। शमीति। `नोदात्तस्य' इति वृद्धिप्रतिषेधः। उन्मादीति। ननु मादीत्यत्र चरितार्थमेतत्, उत्पूर्वात्त्वलंकृञादिसूत्रेण विशेषविहित इष्णुजेव प्राप्नोति, वाऽसरूपविधिना घिनुण् भविष्यति, ताच्छीलिकेषु वाऽसरूपविधिर्नास्तीत्येतत्तु प्रायिकमिति वक्ष्यते। असितेति। `असु क्षेपणे',तृन्नेव भवति।।

सम्पृचानुरूधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरामुषाभ्याहनश्च।। 3.2.142 ।।

सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रहदुहयुजाक्रीविविचत्यजरजभजातिचराचरामुषाभ्यहनश्च।।
`पुची संपर्के', रुधिर् आवरणे'; `अनो रुध कामे' इत्यस्य तु दैवादिकस्याग्रहणम्; पृचिना साहचर्यात्। अनुना सह पठितस्य दैवादिकस्य ग्रहणमित्यन्ये।
`यम उपरमे',`यसु प्रयत्ने', `सृ गतौ',`सृज विसर्गे', देवृ देवने',`ज्वर रोगे',`क्षिप् प्रेरणे',`रट परिभाषणे',`वद व्यक्तायां वाचि',`दह भस्मीकरणे',`मुह वैचित्ये',`दुष वैकृत्ये',द्विष अप्रीतौ',`द्रुह जिघांसायाम्',`दुह प्रपूरणे',`युजिन् योगे',`क्रीडृ विहारे, `विचिर् पृथग्भावे',`त्यज हानौ',`रञ्ज रागे',`भज सेवायाम्',`चर गत्यर्थः, `मुष स्तेये',`हन हिसागत्योः'। परिदेविर्बूवादिरिति। गृह्यते इति सम्बन्धः। क्रीडार्तस्य तु ण्यन्तस्याग्रहणम्, अण्यन्तैः साहचर्यात्, प्रतिपदोक्तत्वाच्च। अत एव `दिव परिकूजन' इत्यस्य चौरादिकस्यापि न भवति। संपर्कीति। `चजोः कु घिण्ण्यतोः' इति कुत्वम्। येऽत्र संपूर्वाः तेषां द्वन्द्वं कृत्वा `सम एतेभ्यः' इति वक्तव्यम्, एवमाङ्पूर्वेषु परिपूर्वेषु च, एवं सिद्धे यत्प्रतिपदं पठति तस्यैतत्प्रयोजनम्---उपात्तादेव रूपाद्यथा स्यात्, उपसर्गान्तरयुक्तान्मा भूदिति।।
वौ कषलसकत्थस्रम्भः।। 3.2.143 ।।
अपे च लषः।। 3.2.144 ।।
प्रे लपसृद्रुमथवदवसः।। 3.2.145 ।।
प्रे लपसृद्रुमथवदवसः।। `रप लप व्यक्तायां वाचि',`सृ गतौ,'`द्रु गतौ', `मथे विलोडने'।।
निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ्।। 3.2.146 ।।
निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिधादिव्याभाषासूयो वुञ् ।। `णिदि कुत्सायाम्' `तृह हिसि हिंसायाम्',`क्लिश विबाधने',`खाद्द भक्षणे',`णश अदर्शने' ण्यन्तः, भाविना णिलोपेन निर्देशः, अकारस्त्वागन्तुकः। केचित्तु विनाशीति ण्यन्तमेव पठन्ति। क्षिपिरटी उक्तार्थौ, वदिर्ण्यन्तः, `भाष व्यक्तायां वाचि',असूयतिः कण्ड्वादियगन्तः।
अथ किमर्थ निन्दादिभ्यो वुञ् विधीयते, न `ण्वुल्तृचौ' इति ण्वुलैव सिद्धम्, तदेव रूपम्, स्वरोऽप्यसूयतिमेकं वर्जयित्वान्यत्र स एव; असूयतेस्तु ण्वुलि प्रत्ययात्पूर्वमुदात्तं स्यात्, वुञि तु `ञ्नित्यादिः' इति। तस्मादेवैकस्माद् वुञ् विधेयः, अन्येभ्यस्तु ण्वुलैव सिद्धम्, योऽयं तच्छीलादिषु तृन्विधीयते स बाधकः प्राप्नोति, वाऽसरूपविधिना ण्वुलपि भविष्यति, तत्राह---ण्वुलैव सिद्ध इति। तृजादयो न भवन्तीति। न केवलं ण्वुल्विषयमेव ज्ञापकम्, किं तर्हि? प्रत्ययमात्र विषयमित्यर्थः।।
देविक्रुशोश्चोपसर्गे।। 3.2.147 ।।
देविक्रुशोश्चोपसर्गे।। देवयतेरिति। दीव्यतेर्हेतुमण्णिजन्तस्य, `दिवि कूजने' इत्यस्य चुरादिण्यन्तस्य च।।
चलनशब्दार्थादकर्मकाद् युच्।। 3.2.148 ।।
चलनशब्दार्थादकर्मकाद् युच्।। चोपन इति। `चुप मन्दायां गतौ'। शब्दन इति। `शब्द शब्दने' चुरादिः, शब्दप्रातिपदिकाद्वा `तत्करोति' इति णिच्।।
अनुदात्तेतश्च हलादेः।। 3.2.149 ।।
अनुदात्तेतश्च हलादेः।। जुगुप्सन इति। `गुपादिष्वनुबन्धकरणमात्मनेपदार्थम्' इत्युक्तत्वाद् `अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति' इति समुदायस्यानुदात्तेत्वम्। तत्रासत्यादिग्रहणे तदन्तविधिः स्यात्, ततश्चात्र न स्यात्, अतस्तदन्तविधिर्मा बूदित्येवमर्थमादिग्रहणम्।।
जुचंक्रम्यदंद्रम्यसृगृधिज्वलशुचलषपतपदः।। 3.2.150 ।।
जुचंक्रम्यदंद्रम्यसृगृधिज्वलशुचलषपतपदः।। `जु' इति सौत्रो धातुः। गतिवचन इत्येके। वेगवचन इत्यन्ये। `क्रमु पादविक्षेपे',`द्रम हम्म मीमृ गतौ',`सृ गतौ',`गृधु अभिकांक्षायाम्',`ज्वल दीप्तौ',`शुच शोके',`लष इच्छायाम्',`शल हुल पत्लृ गतौ',`पद गतौ'।
ननु चात्र चंक्रम्यप्रभृतयः केचिच्चलनार्थः पदिस्त्वनुदात्तेत्, तेभ्यो यथायोगं पूर्वसूत्राभ्यामेव युच् सिद्धः, किमर्थमिह ग्रहणमित्यत्राह---चलनार्थानामित्यादि। प्रपूर्वः पदिः सकर्मकः। ज्ञापकार्थमिति। ज्ञापनं ज्ञापकम्, भाष्यकारप्रयोगादभावे ण्वुल्। अन्ये पदिग्रणं वर्णयन्तीति। भाष्यकारादयः। ते हि मन्यन्ते---सकर्मकात्पदेर्युचा न भवितव्यम्; अनिभाधानादिति। यथाह---पदिग्रहणमनर्थकमनुदात्तेतश्च हलादेरिरि सिद्धत्वात्? वासरूपनिवृत्त्यर्थ त्विति। ताच्छीलिके वाऽसरूपविधिर्नास्तीति निन्दादिसूत्रे तच्छीलादिषु कर्तृषु वाऽसरूपविधिना तृजादयो न भवन्तीति ज्ञापितम्। इह तु ताच्छीलिकेषु परस्परं वाऽसरूपविधिर्नास्तीति ज्ञाप्यते। अलंकर्तेति। एवमलंकृञास्तृन्न भवतीत्यर्थः। यथा तु पदिग्रहणं ज्ञापकं तथा दर्शयति----तथा हीति। उकञा विशेषविहितेनेति। `लशेषविहितेनेति। `लषपतपद' इत्यादिना। प्रायिकं चैतदिति। एतच्च `सूददीपदीक्षश्च' इत्यत्र वक्ष्यते। गन्तेति। गमेर्लषपतपदाद्युकञ्विषये तृन् भवति। विकत्थन इति। `वौ कषलष' इति घिनुण्विषयेऽनुदात्तेल्लक्षणो युज् भवति।।
क्रुधमण्डार्थेभ्यश्च।। 3.2.151 ।।
न यः।। 3.2.152 ।।
नयः।। `अय वय नय तय गतौ' इति नयतेरनुदात्तेत्त्वादेव युचः सिद्धत्वान्नतस्येदं ग्रहणम्, किं तर्हि? प्रतिषेध एवेति मत्वाऽऽ----यकारान्तादिति। पूर्वेणेति। `अनुदात्तेतश्च' इत्यादिना। क्नूयिता, क्ष्मायितेति। `क्नूयी शब्दे',`क्ष्मायी विधूनने'।।
सूददीपदीक्षश्च।। 3.2.153 ।।

सूददीपदीक्षश्च।। `षूद क्षरणे',`दीपी दीप्तौ',`दीक्ष मौण्ड्ये'।
ननुताच्छीलिकेषु वासरूपविधिर्नास्तीति ज्ञापितम्, तत्कथं वाऽसरूपेण युजिह प्राप्नोति? तत्राह---ताच्छीलिकेष्विति। प्रायिकत्वस्य चायमेव प्रतिषेधो लिङ्गम्, सर्वत्र वाऽसरूपविधेरभावे विशेषविहितेन रप्रत्ययेन बाधितत्वादेव युज् न भविष्यतीति प्रतिषेधोऽयमनर्थकस्स्यात्। तथा चेत्यादिना प्रायिकत्वस्य प्रयोजनं दर्शयति। नानेन प्रतिषेधेन युञ्रयोरेव समावेशो ज्ञाप्यते, यथा भाष्ये प्रतिभासः, किं तर्हि? ज्ञापकस्यैव प्रायिकत्वम्। तेन `गन्ता खेटं विकत्थनः' इत्यपि भवति। एतच्च पूर्वमेवोक्तम्।
अथ वा नन्द्यदिष्विति। योगविभागस्त्विदानीं वैचित्र्यार्थः।।
लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्।। 3.2.154 ।।
लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्।। अपलाषुकमिति। अशोभनमित्यर्थः। नन्वत्र विशेषविहितत्वाद् `अपे च लषः' इति घिनुणा भाव्यम्, अयं तु केवलेऽन्योपसर्गपूर्वे च लषौ चरितार्थः, वाऽसरूपविधिनोकञ् भविष्यति? ताच्छीलिकेषु वाऽसरूपविधिर्नास्तीत्येतत्तु प्रायिकमित्युक्तम्। आघातुकं पाकलिकस्य मूत्रमिति। पाकलो नाम गजानां व्याधिविशेषः, स यस्यास्ति स पाकलिकोः, `द्वन्द्वोपतापगर्ह्यात्' इतीनिरेव प्राप्नोति, व्रीह्यादिपाठान्न भवति। पाकलिको गजस्तस्य मूत्रं स्पृष्टमाघ्रातं वान्यान् गजान्हन्ति, एष तस्य स्वभावः। आगामुकं वाराणसी रक्ष आहुरिति। यः शापादिना रक्षोभूतः तं मोक्षार्थ वाराणसीं प्रत्यागमनशीलमाहुरित्यर्थः।।
जल्पभिक्षकुट्टलुण्टवृङः षाकन्।। 3.2.155 ।।
जल्पभिक्षकुट्टलुण्टवृङः षाकन्।।`जल्प जप व्यक्तायां वाचि', `भिक्ष याच्ञायाम्',`कुट्ट छेदने' `लुण्ठ स्येये----चौरादिकौ, `वृङ् सम्भक्तौ'।।
प्रजोरिनिः।। 3.2.156 ।।
प्रजोरिनिः।। इनेरिकारो नकारस्येत्संज्ञा मा भूदिति।।
जिद्दक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च।। 3.2.157 ।।
जिद्दक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च।। `जी जये' जि अभिभवे'---द्वयोरपि ग्रहणम्, `दृङ् आदरे',`श्रिञ् सेवायाम्',`इण् गतौ,`टुवम् उद्गमने',`व्यथ भयचलनयोः' नञ्पूर्वः, नञः कृतलोपस्य निर्द्देशः, निपातनाच्च नञो धातुना समासः, ततो वलोपः, ततः प्रत्ययः। `अम रोगे',`भू सत्तायाम्'। द्वयोरपि ग्रहणमिति। `क्षिष् हिंसायाम्' इत्यस्य तु सानुबन्धकत्वादग्रहणम्। षू प्रेरण इत्यस्य ग्रहणमिति। `षूङ् प्राणिगर्भविमोचने'`षूङ् प्राणिप्रसवे' इत्येतयोस्तु सानुबन्धकत्वादग्रहणम्। प्रजोरप्यत्रैव ग्रहणं कर्तव्यम्, एवं हि चकारो न वक्तव्यो भवति? तथा तु न कृमित्येव।।
स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्।। 3.2.158 ।।
स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्.। चुरादावदन्ताः पठ्यन्त इति। तेन णौ कृतस्यातो लोपस्य स्थानिवद्भावात्पतयतेः `अत उपधायाः' इति वृद्धिर्न भवति, स्पृहयतिगृहयत्योश्च लघूपधगुणो न भवतीति भावः। श्रत्पूर्वो धाञिति। धेटस्तु श्रत्पूर्वस्याप्रयोग एव। अथ किमर्थमालुज्विधीयते, न लुजेवोच्येत? का रूपसिद्धिः? स्पृहयालुः शपि कृते `अतो दीर्घो यञि' इति दीर्घो भविष्यति? तत्र हि `तुरुस्तुशम्यमः सार्वधातुके' इति सार्वधातुकग्रहणमनुवर्तते, न तु तिङ्ग्रहणम्, लकारस्येत्संज्ञाप्रयोजनाभावान्न भविष्यति, यकारादित्वाद्वा। किं यकारो न श्रूयते? लुप्तनीर्दिष्टो यकारः, एवमपि श्रद्धालुर्न सिद्ध्यति, कथम्? शपः श्लुर्द्विर्वचनम्, `श्नाभ्यस्तयोरातः' श्रद्दध्लुरिति प्राप्नोति? अथापि `संज्ञापूर्वको विधिरनित्यः' इति द्विर्वचनं न प्रवर्तिष्यत इत्युच्येत? एवमपि ज्ञापनार्थमालुज् विधीयते, एतज् ज्ञापयति---यत्रालुचैव रूपसिद्धिस्ततोऽप्ययं भवतीति। तेनालुचि शीङो ग्रहणमित्येतन्न वक्तव्यं भवति।।
दाधेट्सिशदसदो रुः।। 3.2.159 ।।
दाधेट्सिशदसदो रुः।। `गामादाग्रहणेष्वविशेषः' इति दारूपाणां यथाभिधानं ग्रहणम्। धेट् पाने, `षिञ् बन्वने', `शद्लृ शातने',`षद्लृ विशरणगत्यवसादनेषु।।
सृघस्यदः क्मरच्।। 3.2.160 ।।
सृघस्यदः क्मरच्।। घसिः प्रकृत्यन्तरमस्ति।।
भञ्चभासमिदो घुरच्।। 3.2.161 ।।
भञ्चभासमिदो घुरच्।।`भञ्चो आमर्दने',`भासृ दीप्तौ,'`ञिमिदा स्नेहने'।।
विदिभिदिच्छिदेः कुरच्।। 3.2.162 ।।
विदिबिदिच्चिदेः कुरच्।। न लाभार्थस्येति। ज्ञानार्थस्येदमुपलक्षणं न लाभार्थस्येत्यर्थः। कुत इत्याह---स्वभावादिति। तेन `लुग्विकरणालुग्विकरणयोरित्येतदपि न प्रवर्तत इत्यर्तः। विदिभिदिच्छिदेर्ङिदिति प्रकृतस्यैव घुरचो ङित्त्वातिदेशेनैव सिद्धे `प्रत्ययान्तरकरणमातिदेशिकं ङित्त्वमनित्यम्' इति ज्ञापनार्थम्। तेन `धू विधूनने' कुटादिः, ततः `अर्त्तिलूधू' इतीत्रप्रत्ययो कृते ङित्कार्य न भवति। केचितु---धुवित्रमित्येवेच्छन्ति, प्राणा वै धुवित्राणीति छान्दसं तदनुसारेण कल्पसूत्रेषु प्रयोगः। कर्मकर्त्तरीति। माघस्तु शुद्धे कर्तरि प्रयुङ्क्ते---`गुरुमत्सरच्छिदुरया दुरयाचितमङ्गना' इति।।
इण्नश्जिसर्त्तिभ्यः क्वरप्।। 3.2.163 ।।
इण्नश्जिसर्त्तिभ्यः क्वरप्।। क्वरपः पकारः स्वरार्थः, तुगर्थश्च। इत्वरीति। `टिड्ढाणञ्' इत्यादिना ङीप्।।

गत्वरश्च।। 3.2.164 ।।
जागरूकः।। 3.2.165 ।।
यजयपदशां यङः।। 3.2.166 ।।
नमिकम्पिस्म्यजसकमहिंसदीपो रः।। 3.2.167 ।।
नमिकम्पिस्म्यजसकमहिंसदीपो रः।। अजसेत्यकार आगन्तुकः। क्रियासातत्ये इति। क्रियाणामविच्छेदेन प्रवृत्तिः===क्रियासातत्यम्। कथं तर्हि अग्निषु प्रयोगः----अजस्रानजुहूत इन्धीरन्निति, आधानाद् द्वादशरात्रमजस्रा इति? अत्राप्यजस्रजागरणादजस्राः।।
सनाशंसभिक्ष उः।। 3.2.168 ।।
सनाशंसभिक्ष उः।। न सनिर्धातुरिति। `षणु दाने' `वन षण संभक्तौ' इति च धातुर्न गृह्यते, कुतः? गर्गादिषु विजिगीषुशब्दस्य पाठात्। न शंसेः स्तुत्यर्थस्येति। एतदाङा सह निर्द्देशाद्विजायते---इच्छार्थो हि स तेन सह पठ्यते, न स्तुत्यर्थः।।
विन्दुरिच्छुः।। 3.2.169 ।।
विन्दुरिच्छुः।। विदेरिति। ज्ञानार्थस्य ग्रहणं नेतरेषाम्, अभिधानात्, निपातनाद्वा। बिन्दुशब्दस्तु पवर्गादिः `बिदि अवयवे' इत्यस्मादौणादिके `मृगय्वादयश्च' इत्युप्रत्यये भवति। वकारस्यच्छन्दसि पक्षे भकार इष्यते---वैश्वदेवा भिन्दव इति। इषेरिति। `इषु इच्छायाम्' इत्यस्य। `इषु गतौ' `इष `आभीक्ष्ण्ये' इत्येतयोस्तु पूर्ववदग्रहणम्।।
क्याच्छन्दसिः।। 3.2.170 ।।
क्याच्छन्दसिः।। क्य इति क्यच्क्यष्कयङां सामान्येन निर्देश इति। सूत्रे वृत्तौ च ककारानुबन्धवतो धातुसंज्ञानिमित्तस्य प्रत्ययस्योपलक्षणात् कण्ड्वादियकोऽपि ग्रहणम्, तेन भुरण्युः तुरण्यवोऽङ्गिरसो नक्षत्रसपर्येम सपर्यव इत्यादि भवति। भाषायां च सुम्नयुशब्द उणादिषु मृगय्वादिषु पाठाद् द्रष्टव्यः। मित्रयुरिति। `क्यचि च' इतीत्वम्, `अकृत्सार्वधातुकयोः' इति दीर्घत्वं च न भवति, `न छन्दस्यपुत्रस्य' इति निषेधात्।।
आदृगमहनजनः किकिनौ लिट् च।। 3.2.171 ।।
आदृगमहनजनः किकिनौ लिट् च।। किकिनौ लिट् चापरार्थे प्रयुज्यमानाः शब्दा वतिमन्तरेणापि वत्यर्थ गमयन्ति, गौर्वाहीक इतिवदित्याह---लिड्वच्च तौ भवति इति। किकिनौ भवतः, लिट् च प्रत्ययो भवतीत्ययं त्वर्थो न भवति; तथा हि सति `लिट् किकिनः' इत्येव ब्रूयात्। कार्यातिदेशश्चायम्। यद्येवम्, `लः परस्मैपदसंज्ञा किकिनोः स्यात्, ततश्च देङ्दङादिभ्य आत्मनेपदिभ्यो न स्याताम्। न लकारस्य परस्मैपदसंज्ञा, किं तर्हि? तदादेशानाम्, न चैतावादेशौ। एवमपि भावकर्मकर्तृषु त्रिष्वपि लिड्वद्भावात्किकिनौ प्राप्नुतः? नैषः;उत्पन्नयोर्लिट्कार्यमतिदेश्यम्। उत्पत्तिश्च तयोः कर्त्तर्येव भवति; `कर्तरि कृत्' इत्यनेनास्यैकवाक्यत्वात्। अनभिधानाद्वा भावकर्मणोर्न भविष्यतः। वर्तमानाधिकाराच्च वर्तमाने किकिनोर्विधानमिति भूतकालतापि विरोधान्नातिदिश्यते। स्वरूपाबाधेन च कार्यादिदेशः प्रवर्तत इति तिबादीनां कानच्क्वस्वोश्चाभावः। आदिति दकारो मुखसुखार्थ इति। आदित्ययं दकारः, स च मुखसुखार्थ इत्यर्थः। न त्वयं तपर इति। तश्चासौ परश्च तपरो नायमकारात्परस्तकारो जश्त्वेन निर्द्दिष्ट इत्यर्थः। किं कारणमित्याह---मा भूदिति। तकारो मुखसुखार्थ इति पाठे तु आदित्ययं तकारः स मुखसुखार्थः, न तु तपरकार्यसम्पादनार्थ इत्यर्थः। पपिः सोममिति। `न लोकाव्यय' इति षष्ठीप्रतिषेधो लिटः कार्यमिति सोमशब्दाद् द्वितीया। ततुरिरिति। `बहुलं छन्दसि' इत्युत्वम्। `द्विर्वचनेऽचि' इति स्थानिवद्भावात् `तृ' इत्येतद् द्विरुच्यते। जज्ञिरिति। `गमहन' इत्युपधालोपः, चुत्वम्।
तद्बाघनार्थ कित्त्वमिति। अर्तेर्ऋकारान्तानां च किकिनोर्गुणो मा भूदित्येवमर्थमित्यर्थः।
उत्सर्ग इति। धातुमात्राद्विधानं कर्तव्यमित्यर्थः। कस्मादित्यत्राह---सदादिभ्यो दशनादिति। सेदिः नेमिरिति। सदेर्नमेश्चैत्वाभ्यासलोपौ। सहिवहित्यादि। अत्र भाषायामित्यपेक्ष्यते। पापतिरिति। `नीग्वञ्चु' इत्यादिना नीगागमः प्राप्तः सासहिवावहिचाचलिपापतीनां निपातनम्' इति वार्त्तिककारवचनान्न भवति। इदं तु वृत्तौ पठितं वाक्यम्। अपर आहेति भाष्ये पठितम्, तत्रापि भाष्यकारवचनान्नीगभावः। उक्तं हि तेन---तान्येवोदाहरणानीति।।
स्वपितृषोर्निजिङ्।। 3.2.172 ।।
शृवन्द्योरारुः।। 3.2.173 ।।
भियः क्रुक्लुकनौ।। 3.2.174 ।।
स्थेशभासपिसकसो वरच्।। 3.2.175 ।।
स्थेशभासपिसकसो वचच्।। ईश्वर इति। `नेड्वशि कृति' इतीट्प्रतिषेधः। स्त्रियामीश्वरा। विन्यस्तमङ्गलमहौषधिमीश्वरायाः। `ईश्वरीं सर्वभूतानाम्' इति तु छान्दसः। औणादिको वरडित्यन्ये। `पुंयोगादाख्यायाम्' इत्यन्ये। `अन्येभ्योऽपि दृश्यन्ते' इति क्वनिपि `वनो र च' इति ङीब्रावीत्यन्ये।।
यश्च यङः।। 3.2.176 ।।
यायावर इति पूर्ववदिटि प्रतिषिद्धे `अतो लोपः',`लोपो व्योर्वलि',`अल्लोपस्य स्थानिवत्त्वादाल्लोपः प्राप्तो वरे कृतस्य स्थानिवत्त्वनिषेधान्न भवति।।
भ्राजभासधुर्विद्यु तोर्जिपृजुग्रावस्तुवः क्विप्।। 3.2.177 ।।

भ्राजभासधुर्विद्यु तोर्जिपृजुग्रावस्तुवः क्विप्।। `भ्राजृ दीप्तौ',`भासृ दीप्तौ',`तुर्वी थुर्वी धुर्वी हिंसायाम्',`द्युत दीप्तौ',`उर्ज बलप्राणनयोः',`पृ पालनपूरणयोः',`जु' इति सौत्रो धातुः,`ष्टुञ् स्तुतौ' ग्रावपूर्वः।

जवतेर्दीर्घत्वं चेति। केचिदाहुः---सूत्रे `जू' इति दीर्घः पठितव्य इति। विध्य न्तरोपसंग्रहार्थ दृशिग्रहणमुत्तरसूत्रादपकृष्टव्यमित्यन्ये। ग्रावस्तुदिति। ग्रावशब्दः सप्तमीनिर्देशाभावेऽप्युपपदसंज्ञ इष्यते। अन्ये तु सूत्रनिर्देशाद्धातुनैव समासे पश्चात्क्विपं कुर्वन्ति।।

अन्येभ्योऽपि दृश्यते।। 3.2.178 ।।

अन्येभ्योऽपि दृश्यते।। विध्यन्तरोपसंग्रहार्थमिति। दृशिग्रहणे सति यथा क्विबन्ता धातवो दृश्यन्ते, तथैव तेऽनुगन्तव्या इत्यर्थो भवति। एवं च ते तथानुगता भवन्ति यदि यथायोगं द्विर्वचनादयो--भवन्ति। विध्यन्तरमेव दर्शयतिक्वचिदिति। तथा चाहेति। वार्त्तिककारः। आयतं स्तौत्यायतस्तूः। कटं प्रवते कटप्रूः। दिद्युदिति। `द्युतिस्वाप्योः सम्प्रसारणम्' इत्यभ्यास्य सम्पसारणम्। कथं पुनरभ्याससंज्ञा, यावता प्रत्यासत्तेः षाष्ठिक एव द्विर्वचने सा विधीयते, अत एवाष्टमिके न भवति? एवं तर्हि दृशिग्रहणादेव सम्प्रसारणम्, अभ्याससंज्ञा च द्रष्टव्या। जगदिति। `गमः क्वौ' इति मलोपः। अत्रापि पूर्ववदेxxxxxxसकार्यम्।

द्वे चेति चकारेण दीर्घः समुच्चीयमानो दीर्घश्रुत्या `अचश्च' इत्युपस्थानादचा च तदन्तविध्याश्रयणाज्जुहोतेरेवाजन्तस्य विज्ञायते, न द्युतिगम्योरित्याह---जुहोतेर्दीर्घत्वं चेति। जुहूरिति। करणस्यात्र कर्तृत्वविवक्षा।

धीरित्यत्रापि करणस्यैव कर्तृत्वविवक्षा, पुरुषो हि ध्यायति, न धीः।।

भुवः संज्ञान्तरयोः।। 3.2.179 ।।

भुवः संज्ञान्तरसोः।। धनिकाधमर्णयोरिति। यस्मै ऋणं धार्यते स धनिकः, यो धारयति सोऽधमर्णः, तयोरन्तरे मध्ये यस्तिष्ठति विश्वासार्थ स प्रतिभूरित्युच्यते। ग्रामयोरन्तरे यस्तिष्ठति तत्र न भवति। एतच्च दृशिग्रहणानुवृत्तेर्लभ्यते। यद्येबम्, संज्ञेयं भवति, तत्र `संज्ञायाम्' इत्येव सिद्धम्? अत्राहुः-----यावद्भव्यभाविन्यः संज्ञा भवन्ति, प्रतिभूशब्दस्तु सत्येव तस्मिन्नृणप्रतिदाने निवर्तते।।

विप्रसंभ्यो ड्वसंज्ञायाम्।। 3.2.180 ।।

विप्रसंभ्यो ड्वसंज्ञायाम्।। मितद्रवादिभ्य इति। मितादिपूर्वेभ्यो धातुभ्य इत्यर्थः। शम्भुरिति। अन्तर्भावितण्यर्थोऽत्र भवतिः।।

धः कर्मणि ष्ट्रन्।। 3.2.181 ।।

धः कर्मणि ष्ट्रन्।। कर्मणि कारक इति। उपपदं तु कर्म न स्मभवति, यदि स्यात् `कर्मण्यण्' इत्यस्मिन्नेव प्रकरणे ष्ट्रनं विदध्यात्। ननु चोत्तरसूत्रे पुनः ष्ट्रन्ग्रहणं कर्त्तव्यं स्यात्, अस्तु लघीयो हि कर्मग्रहणात्ष्ट्रन्ग्रहणम्। न चेह वर्त्तमानकाले ष्ट्रन्प्रत्ययः, धात्रीत्युक्ते क्रियाकारकसम्बन्धमात्रं गम्यते। अतः `कर्मणि' इति प्रत्ययार्थ एव, नोपपदम्।।

दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे।। 3.2.182 ।।

दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे।। दाप् लवन इति। `दैप् शोधने' इत्यस्य त्वग्रहणम्, अनभिधानात्। युजिर्योग इति। `युज समाधौ' इत्यस्य तु पूर्ववदेवाग्रहणम्, अनभिधानात्। युजिर्योग इति। `युज समाधौ' इत्यस्य तु पूर्ववदेवाग्रहणम्। करणे कारके इति। उपपदं तु करणं न भवति, अजादिषु दंष्ट्राशब्दस्य पाठात्। अत एव च पाठात्सूत्रेऽनुनासिकलोपेन निर्द्देशेऽपि ष्ट्रनि न भवति ल्युट्चेव तु भवति। योऽत्र सेट् ततः `तितुत्र' इत्यादिनेट्प्रतिषेधः।।

हलसूकरयोः पुवः।। 3.2.183 ।।

हलसूकरयोः पुवः।। तच्चेत्करणं हलसूकरयोरवयवो भवतीति। एतेन हलसूकरयोरभिधेयत्वमुपपदत्वं च निरस्यति। मुखमुच्यते इति। नान्यः कर्णादिः। एतदपि स्वभावादेव लभ्यते।।

अर्त्तिलूधूसूखनसहचर इत्रः।। 3.2.184 ।।

अर्त्तिलूधूसूखनसहचर इत्रः।। इकारोपदेशः `तितुत्र' इति `एकाचः' इति च यथायोगमिट्प्रतिषेधो मा भूदिति। स्वरार्थश्च, इटि हि सत्यागमानुदात्तत्वं स्यात्, इका तु प्रत्ययाद्युदातद्तत्वम्।।

पुवः संज्ञायाम्।। 3.2.185 ।।

पुवः संज्ञायाम्।। बर्हिष्पवित्रमिति। बर्हिषा कृतं बर्हिषः पवित्रं भवति, तत्र षष्ठीसमासः, `नित्यं समासेऽनुत्तरपदस्थस्य' इति षत्वम्। येनाज्यमुत्पूयते तत्पवित्रम्। अनामिकायाश्चाङ्गुलेर्वेष्ठनं जपादिषु।।

कर्त्तरि चर्षिदवतयोः।। 3.2.186 ।।

कर्त्तरि चर्षिदेवतयोः।। ऋषौ करणे इति। ऋषिः==वेदमन्त्रः, `तदुक्तमृषिणा' इति दर्शनादित्याहुः।।

ञीतः क्तः।। 3.2.187 ।।

ञीतः क्तः।। भूते निष्ठा विहितेत्यादि। तत्र येननाप्राप्तिन्यायेन क्तस्यैव वर्त्तमानविषयतया भूतविषयता बाध्यते, यथा---`वडवाया वृषे वाच्ये' इत्यत्र वक्ष्यते---अपत्ये प्राप्तस्ततोऽपकृष्य वृषे विधीयत इति। एवमुत्तरविहितस्यापि। ज्ञातमित्येतत्तु भूतेऽपि भवति, तेनेत्यधिकारे उपज्ञात इति तद्धितविधानात्। वर्त्तमाने

हि `क्तस्य च वर्त्तमाने' इति षष्ठ्या भाव्यम्। एवं च `पूजितो यः सुरैरपि' इत्यादीनां साधुत्वं चिन्त्यम्।।
मतिबुद्धिपूजार्थेभ्यश्च।। 3.2.188 ।।
मतिबुद्धिपूजार्थेभ्यश्च।। मतिरिच्छेति। बुद्धेः पृथगुपादानाद् बुद्धिर्न गृह्यते। मत इति। `अनुदात्तोपदेश' इत्यनुनासिकलोपः।
शीलित इत्यादि। `शील समाधौ',`रक्ष पालने',`क्षमूष् सहने',`क्रुश आह्वाने रोदने च',`जुषी प्रीतिसेवनयोः',`रुष रोषे',`ह्वञ् हरणे';`हृषु अलीके',`हृष् तुष्टौ' इति वा; `तुष तुष्टौ',`कमु कान्तौ',`यम उपरमे',`कष हिंसायाम्' मृङ् प्राणत्यागे'। तत्राद्यौ सेटौ, उदितामुदितां च `यस्य विभाषा' इतीट्प्रतिषेधः, ईदितः `श्वीदितो निष्ठायाम्' इति। हृष्ट इति। `हृषेर्लोमसु' इति। कषेः `कृच्छ्रगहनयोः कषः' इति। रुषेः `रुष्यमत्वरसंधुषास्वनाम्' इति विकल्पः।
सुप्त इति। सुपेः `त्रीतः क्तः' इत्येव सिद्धे नजिङा तच्छीलादिषु बाद्या मा भूदिति समुच्चीयते। क्वचित्तु सृप्त इति पठ्यते।।
इति श्रीहरदत्तमिश्रविरचितायां पदमञ्चर्यो
तृतीयस्याध्यायस्य द्वितीयः पादः।।
----*****----

3.3

अथ तृतीयाध्याये तृतीयः पादः
उणादयो बहुलम् ।। 3.3.1 ।। पदमञ्जरी
वर्तमाने इत्येवेति । `वर्त्तमाने लट्' इत्यतो वर्त्तमानग्रहणानुवृत्तेरविच्छेदमेवकारेण दर्शयति । संज्ञायामिति चेति । `पुवः संज्ञायाम्' इत्यतः ।।
`उणादयः' इत्येव सूत्रमुणादीनां शास्त्रान्तरपरिपठितानां साधुत्वानुज्ञानार्थमस्तु, किं बहुलग्रहणेन ? तत्राह---बाहुलकमिति । `ला आदाने', बहूनर्थान् लाति---बहुलम्, तस्य भावो बाहुलकम्, मनोज्ञादित्वाद् वुञ् । तत्पुनर्बह्वर्थादानं बहुलशब्दप्रवृत्तिनिमित्तम् । बहवः पुनरर्थाः---क्वचित्प्रवृत्तिः, क्वचिदप्रवृत्तिरिति वक्ष्यमाणलक्षणाः । प्रकृतेरिति । जातावेकवचनम् । तनुशब्दोऽत्र वृत्तिविषये गुणमात्रवचनः । प्रकृतीनां तानवमल्पत्वं दृष्ट्वा तद्बाहुलकमुक्तम्, तेनापठिताभ्योऽपि प्रकृतिभ्य उणादयो भवन्ति, यथा---हृषेरुलजुक्तः शकेरपि भवति---शङ्कुलेति । तथा तेषामुणादीनां पञ्चपाद्यां प्रायेण समुच्चयनं कृतम्, न तु साकल्येन; बहुलवचनात्त्वविहिता अपि भवन्ति, यथा---अर्तेः फिडफिड्डौ भवतः---ऋफिडः, ऋफिड्ड इति ।
कार्यसशेषविधेश्च । कार्याणि च सशेषाणि विहितानि न निः शेषाणि । बहुलवचनात्त्वविहितान्यपि भवन्ति । `षणु दाने', `ञमन्ताड्डः', `धात्वादेः पः स' इति सत्वं न भवति, कृते वा सत्वे षत्वं भवति । स्यादेतत्---यावत्यः प्रकृतयः पञ्चपाद्यामुपात्ताः, यावन्तश्च प्रत्ययाः, यावन्ति च कार्याणि विहितानि तावन्त्येव भवन्तु, मा भूदन्येषां बहुलग्रहणेन संग्रह इति ? तत्राह---नैगमरूढिभवं हि सुसाध्विति । निगमः=छन्दः, तत्र भवा नैगमाः । निगमशब्दस्थाथादिस्वरेणान्तोदात्त इति `बह्वचोऽन्तोदात्ताट्ठञ्' इति ठञि प्राप्ते ऋगयनादिपाठादण् । रूढिः=प्रसिद्धिः, तत्र भवा रूढिभवाः=संज्ञाशब्दाः, तेषां साधुत्वमनुपात्तानां प्रकृत्यादीनां बहुलग्रहणेन संग्रहे सति भवति, नान्यथा । हिशब्दो हेतौ । यस्मादेवं तस्माद्बाहुलकमुक्तमित्यर्थः ।
अन्यैरप्याचार्यैर्नैगमरूढिभवानां प्रकृत्यादिविभागेन व्युत्पादनं कृतम्, अतोऽस्माभिरपि तत्कर्त्तव्यमेवेत्यभिप्रायेणाह---नाम चेति । निरुक्तकारो हि यास्क आचार्यः स्वशास्त्रे निरुक्तैः सर्वमेव नाम धातुजमाह । तोकमित्यपत्यंनाम । शकटस्य तोकम् शाकटायनः । यन्नेति । पदमर्थः प्रयोजनमप्स्य व्युत्पाद्यत्वेनेति पदार्थः=प्रकृत्यादिः, पदार्थश्चासौ विशेषश्च पदार्थविशेषः, तस्मात्समुत्थितं पदार्थविशेषसमुत्थम् । यदेवंविधं न भवति, प्रकृत्यादिविशेषोपादानेनाव्युत्पादितमित्यर्थः, तद्धातुजत्वेनोह्यम् । कथमूह्यम् ? प्रत्ययतः प्रकृतेश्च । यत्र शब्दरूपे परभागः प्रत्ययत्वेन प्रसिद्धेन केनचित्सदृशः श्रुतः, तत्र तं भागं प्रत्ययं कल्पयित्वा परिशिष्टो भागः प्रकृतित्वेनोह्यते । `हृषेरुलच्' इति प्रत्ययं दृष्ट्वा शङ्किः प्रकृतिरूह्यते, तेन सिद्धं शङ्कुलेत्यस्य धातुजत्वम् । यत्र तु पूर्वो भागो धातुत्वेन प्रसिद्धेन केनचित्सदृशस्तत्र तं भागं प्रकृतिं कल्पयित्वा परिशिष्टो भागः प्रत्ययन्वेनोह्यः । यथा----ऋफिडः, ऋफिड्ड इति, फिडफिड्डौ प्रत्ययौ ।
स चायमूहोऽनादिप्रत्युक्तास्वेव संज्ञासु, न सर्वत्रेत्याह---संज्ञास्विति । कार्याद् गुणप्रतिषेधादिकाद् अनूबन्धं ककारादिकं विद्यात् । तेन फिडफिड्डौ कितावूह्यौ । एतदेवानन्तरोक्तमूहात्मकं शास्त्रमुणादिष्वनुक्तेषु ।।
भूतेऽपि दृश्यन्ते ।। 3.3.2 ।।
पूर्वत्र वर्तमानाधइकारादिति । तत्रैव वर्तमानग्रहणं न निवर्त्तितम्, बाहुल्येन वर्तमाने भवन्ति, क्वचिदेव भूते भवन्तीति किल विवेकप्रदर्शनायेति भावः । उदाहरणेषु `ताभ्यामन्यत्रोणादयः' इति संप्रदानापादानव्यतिरिक्ते कारके मनिन् प्रत्ययः, `नेड्वशि कृति' इतीट्प्रतिषेधः ।।
भविष्यति गम्यादयः ।। 3.3.3 ।।
यथा `स्यदो जवे' इत्युक्ते जवशब्दपर्यायः स्यदशब्दो भवति, तथेहापि भविष्यच्छब्दपर्याया गम्यादयः प्राप्नुवन्तीत्याशङ्क्याह---प्रत्ययस्यैवेत्यादि । प्रकृत्यर्थगता भविष्यत्कालता । प्रत्ययस्यैव द्योत्यत्वेन विधीयते, न पुनः प्रकृत्यर्थपरित्यागेन समुदायस्येत्यर्थः । न प्रकृतेरिति । न प्रकृतेरपीत्यर्थः । गम्यादिषु केचिदुणादयः, केचिदष्टाध्यायीगताः । गमी, आगामीति । `गमेरिनिः' `आङि णिच्च' इतीनिः । भावी, प्रस्थायीति । अस्मिन्नेवाधिकारे `भुवश्च' `प्रात्स्थः' इतीनिः, णित्त्वाद् वृद्धिर्युक्च । रुधिबुधियुधियातिभ्यः प्रतिपूर्वेभ्यो प्रहादिनिः । अस्मादेव निपातनादित्यन्ये । `सुप्यजातौ' इत्यन्ये । प्रतियोगीति ।

संपृचादिसूत्रेण घिनुणि `चजोः कु घिण्ण्यतोः' इति कुत्वम् । णिनि प्रत्यय एव न्यङ्क्वादिपाठादस्मादेव निपातनाद्वा कुत्वमित्यन्ये ।
अनद्यतन उपसंख्यानमिति । किं पुनः कारणं न सिद्ध्यति ? लृटायं निर्देशः क्रियते लृ
ट् चानद्यतने लुटा बाध्यते, तेन लुट एव विषये एते स्युः । न वा वाक्यार्थत्वाद् गम्यादयः शब्दा विशेषे यत्सामान्यं तदाश्रयेण प्रवर्त्तन्ते । अनद्यतनाख्यस्तु विशेषः श्वः शब्दमहिम्ना गम्यते । विशेषविवक्षायां तु लुडेव भवति---श्वो गन्ता ग्राममिति । वासरूपविधिना च लृडपि भवति । तेन भविष्यति, गमिष्यतीत्यादयः प्रयोगा उपपद्यन्ते ।।
यावत्पुरानिपातयोर्लट् ।। 3.3.4 ।।
`पुरा' इत्यविभक्तिको निर्देशः, कर्मधारयो वा । निपातनाद्विशेषणस्य परनिपातः । निपातौ चैतौ निश्चयं द्योतयतः । एतयोश्च प्रयोगे वर्त्तमाने लण्न भवति; भविष्यत्कालतया वर्त्तमानकालताया बाधनात् ।
यावद्दास्यतीति । यत्परिमाणमस्य `यत्तदेतेभ्यः परिमाणे वतुप्', `आ सर्वनाम्नः' इत्यात्वम् । पुरा व्रजिष्यतीति । `पृ पालनपूरणयोः' `भ्राजभास' इत्यादिना क्विप्, `उदोष्ठ्यपूर्वस्य' इत्युत्वम् । अस्य तृतीयान्तत्वं द्योतयितुं करणभूतयेत्युक्तम् । प्रतिपदोक्तत्वादेव निपातयोर्ग्रहणे सिद्धे निपातग्रहणं लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वज्ञापनार्थम् । तेन `आतां पुग्णौ' इत्यत्र लाक्षणिकरयाप्याकारान्तस्य पुग्भवति, `क्रीङ्जीनां णौ' क्रापयति, जापयतीति ।।
विभाषा कदाकर्ह्योः ।। 3.3.5 ।।
`अनद्यतने लुट्' इत्यत्राप्ययं योगोऽनुवर्त्तनीयः, तेन लुड्विषयेऽपि पक्षे लड् भवति । अत एव पक्षे लुडप्युदाहृतः । एतच्च पूर्वयोगेऽपि द्रष्टव्यम् । कर्हि भोक्ष्यते इति । ननु च कर्हिशब्दोऽनद्यतनविषयः, तत्प्रयोगे लुडेव भवितुमर्हति, न लृट्; न वा वाक्यर्थत्वात् । भोक्ष्यत इति पदं भविष्यत्सामान्ये वर्त्तते, अनद्यतनावगतिस्तु कर्हि-शब्दाधीना । न च वाक्यार्थः पदसंस्कार उपयुज्यते ।।
किंवृत्ते लिप्सायाम् ।। 3.3.6 ।।
किमो वृत्तं किंवृत्तमिति । वर्त्ततेऽस्मिन्निति वृत्तम्, `क्तोऽधिकरणे च' इत्यधिकरणे क्तः । अस्मादेव निपातनाद् `अधिकरणवाचिंना च' इति षष्ठीसमासप्रतिषेधाभाव, शेषषष्ठ्या वा समासः । यत्र किंशब्दोऽवयवत्वेन वर्त्तते तत्सर्वं किंवृत्तम् । ततश्च कीदृशः, किमीयः, किन्तरामित्यादावतिप्रसङ्गात्परिगणनम् । वृत्तग्रहणेनेति । तदिति शब्दरूपापेक्षं नपुंसकत्वम् । डतरडतमौचेति । डतरडतमान्तं किंशब्दरूपमित्यर्थः । कं भवन्तो र्भोजयितार इति । अस्यापि `अनद्यतने लुट्' इत्यत्रानुवृत्तिरिति भावः । एवमुत्तरेष्वपि योगेषु द्रष्टव्यम् ।।
लिप्स्यमानसिद्धौ च ।। 3.3.7 ।।
`लिप्स्यमानसिद्धौ' इति षष्ठीसमासः । वृत्तौ तु वस्तुमात्रमदर्शि । लिप्स्यमानात्सिद्धिरिति । अस्मादेव निपातनाद्वा पञ्चमीसमासः । लिप्स्यमानं भक्तादि तन्निमित्ता या स्वर्गादेः सिद्धिस्तस्यामित्यर्थः । ननु च यत्र लिप्स्यमानस्य सिद्धिर्गम्यते, लिप्सापि तत्र भवति, ततश्च पूर्वेणैव सिद्धं नार्थ एतेन ? तत्राह---अकिंवृत्तार्थोऽयमारम्भ इति । पूर्वसूत्रे किंवृत्तग्रहणं लिप्स्यमानसिद्धिरहिते लिप्सामात्रे किंवृत्त एव यथा स्याद्, अकिंवृत्ते मा भूदित्येवमर्थम् ।।
लोडर्थलक्षणे च ।। 3.3.8 ।।
अध्ययनप्रैषस्येति । `कर्तृकरणे कृता बहुलम्' इत्यत्र साधनं कृतेति वा पादहारकाद्यर्थमिति वचनात्सप्तमीसमासः ।।
लिङ् चौर्ध्वमौहूर्त्तिके ।। 3.3.9 ।।
निपातनात्समास उत्तरपदवृद्धिश्चेति । ठञ्प्रत्ययश्चाध्यात्मादित्वात् । `बह्वचोऽन्तोदात्तात्' इत्यत्र तु `व्याख्यातव्यनाम्नः' इति वर्त्तते । उपाध्यायश्चेदागन्तेति । ऊर्ध्वमौहूर्त्तिकेऽनद्यतनत्वं सम्भवतीति चिन्त्यम् ।।
तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ।। 3.3.10 ।।
भिक्षिष्य इत्यस्य जटा इति । अत्र भिक्षणक्रियार्थत्वं जटानाम्, न तु क्रियात्वम्; द्रव्यत्वाज्जटानाम् । धावतस्ते पतिष्यति दण्ड इति । अस्त्यत्र धावनक्रियोपपदम्, न त्वसौ दण्डपातनार्थं धावति, किं तर्हि ? धावतोऽर्थात्पतिष्यति दण्डः । उद्दे शेन हि तादर्थ्यं विविच्यते, न तु हेतुत्वमात्रेण तादर्थ्यम् । अथेत्यादि चोद्यम् । परिहरति---लृटा क्रियार्थोपपदेनेति । तुमुना तु बाधो नाशङ्कनीयः; भिन्नार्थत्वात्---कर्त्तरि ण्वुल्, तुमुन् पुनर्भावे । कथम् ? `तुमर्थे सेसेन्' इत्यत्र तुमर्थग्रहणात् । यदि हि `कर्त्तरि कृत्' इति वचनात्कर्त्तरि तुमुन् स्यात्तद्वदेव सेसेन्प्रभृतयोऽपि कर्त्तरि भविष्यन्ति । अतस्तुमर्थग्रहणात्कर्त्तुस्तावदयमपकृष्यते । न चान्योऽर्थो निदिश्यते, अनिदिष्टार्थाश्च प्रत्ययाः स्वार्थे भवन्ति । कश्च धातोः स्वार्थः ? भाव एव । लृट् तु यद्यपि भावकर्मणोश्चरितार्थस्तथापि क्रियायां क्रियार्थायामुपपदे भविष्यति काले च विधानाद्विसेषविहितः । ण्वुल्विधौ तु कर्त्तरीति न श्रूयते, अतोऽसौ विशेषविहितेन लृटा बाध्यते । अथ वा किं न एतेन विशेषविहित इति, द्वयोःसावकाशत्वेऽपि परत्वाल्लृट् ण्वुलं बाधेत । पुनश्चोदयति---वासरूपविधिनेति । परिहरति---एवं तर्हीति । नन्वसति प्रयोजने ज्ञापकं भवति, अस्ति चात्र प्रयोजनम्, किम् ? `अकेनोर्भविष्यदाधमर्ण्ययोः' इति षष्ठीप्रतिषेधो भविष्यदधिकारविहितस्याकस्य प्रयोगे यथा स्यात्, वर्षशतस्य पूरकः पुत्त्रपौत्त्राणां दर्शक इत्यत्र मा भूदिति ? एवं मन्यते---पदान्तरसन्निधानादत्र भविष्यत्कालत्वं गम्यते । यदा हि बालविषयमेतत्प्रयुज्यते तदा तस्यामवस्थायां वर्षशतपूरणस्य पुत्त्रपौत्त्रदर्शनस्य चासम्भवात्तावन्तमसौ कालं जीविष्यतीत्यर्थाद्गम्यते, न त्वत्र पदार्थो भविष्यत्कालत्वमिति । स्थिते त्वस्मिन् ण्वुल्विधाने `वषशतस्य पूरकः' इत्यादौ भविष्यत्कालस्य पदार्थत्वेऽपि न

दोष इत्यभिप्रायेण `अकेनोर्भविष्यदाधमर्ण्ययोः' इत्यत्रोक्तम्---भविष्यदधिकारविहितस्याकस्येदं ग्रहणम्, तेन वर्षशतस्य पूरकः पुत्त्रपौत्त्राणां दर्शक इत्यत्र न भवतीति ।।

भाववचनाश्च ।। 3.3.11 ।।

वक्तीति वचनः, `कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट्, करण एव वा---भाव उच्यते येन स भाववचनः । अत्र पुरुषाः कर्त्तारः, भावाधिकारविहिता एव भाववचना भवन्तीत्याह---भाव इति प्रकृत्येति । तुमुना बाध्येरन्निति । लृट् तु भावकर्मकर्तृषु त्रिषु विधानादसमानार्थः । किञ्चि, धात्वर्थस्य सिद्धतायां घञादयः, शुद्धे तु धात्वर्थे लकारः, अतोऽप्यसमानार्थत्वम् ।

इह `भावे' इत्येतावद्वक्तव्यम्, एवमपि ह्युच्यमाने भावे ये विहितास्ते क्रियायां क्रियार्थायामुपपदे भवन्तीत्यर्थो लभ्यत एव, तदपार्थकं वचनग्रहणमिति मत्वा पृच्छति---अथेति । वाचका यथा स्युरिति । वचनग्रहणे हि सति भाववचनाः सन्तो घञादयोऽस्मिन्विषये भवन्तीत्यर्थो भवति, भावस्य वाचकाः सन्तो भवन्तीत्यर्थः । एतदेव प्रश्नपूर्वकं विवृणोति---कथं चेति । याभ्य प्रकृतिभ्य इति । इवर्णान्तेभ्योऽच्, ऋवर्णान्तेभ्य उवर्णान्तेभ्यश्चाबिति । एवम् येन विशेषणेनेति । `हस्तादाने चेरस्तेये', `श्रिणीभुवोऽनुपसर्गे' इत्यादिना । असामञ्जस्यम्=व्यतिकरः, अन्योऽन्यविषयावगाहनमिति यावत् । पाकायेत्यादौ `तुमर्थाच्च भाववचनात्' इति चतुर्थो ।।

अण् कर्मणि च ।। 3.3.12 ।।

चकारः सन्नियोगार्थ इति । अन्यथा पर्यायेण स्यात्---कदाचित्क्रियार्थायामेव क्रियायामुपपदे, कदाचित्कर्मण्येव केवले; वचनं तु भविष्यति काले कादीनामपवादानां बाधनार्थं स्यात् । चकारात्तु सन्नियोगार्थात्समुदायस्यैव प्रत्ययोत्पत्तिं प्रति निमित्तत्वम् । उपपदसंज्ञा तु प्रत्येकमेव भवति; प्रत्येकं सप्तमीनिर्देशात् । तेन केवलस्यापि कर्मणः समासो भवति । काण्डलावो व्रजतीति । सोऽपवादत्वात् ण्वुलं वाधत इति । ण्वुल्विधाने च क्रियायां क्रियार्थायामुपपदे वासरूपेण तृजादयो न भवन्तीति ज्ञापितम्, न पुनरस्मिन् प्रकरणे वासरूपविधिर्नास्तीति । तेन योऽयम् `तुमुन्ण्वुलौ' इति ण्वुल्, सोऽस्याणो विषयेऽपि वासरूपविधिना भवत्येव---एधानाहारको व्रजतीति । तथा च `अकेनोर्भविष्यदाधमर्ण्ययोः' इति भविष्यदधिकारविहितस्याकस्य भविष्यति प्रयोगे कर्मणि षष्ठी प्रतिषिद्ध्यते । परत्वाच्च कादीनिति । ननु चापूर्वविधानात्प्रतिप्रसववचनस्य लाघवमस्तीति अण्विषय एव ण्वुलं बाधित्वाण स्यान्नापवादविषये ? एवं मन्यते---इह कर्मणीति न वक्तव्यं वचनग्रहणानुवृत्तेरेव यो वचनेऽण् सोऽस्मिन्विषये भवतीति वचनव्यक्तथा कर्मण्येवोपपदेऽण् सिद्धः, तत्र पुनः कर्मग्रहणं कर्ममात्रपरिग्रहार्थमित्यपवादविषयेऽपि भवतीति । एवं च परत्वादिति कोऽर्थः ? उत्कृष्टत्वादाधिक्यादित्यर्थः । अन्ये तु विप्रतिषेधमेव व्याचक्षते ।।

लृट् शेषे च ।। 3.3.13 ।।

शेषः क्रियार्थोपपदादन्य उच्यते इति । क्रिया क्रियार्थोपपदं यस्मिन् भविष्यति काले ततोऽन्यो भविष्यदित्यर्थः । चकारादिति । यदि तर्हि शेषे चाशेषे च भवति लृडित्येवास्तु, क्रियायां क्रियार्थायामिति निवर्त्तिष्यते, तेन सर्वत्र भविष्यति ? एवमपि शेष एव स्यात्, अशेषे तु तुमुन्ण्वुलौ बाधकौस्याताम् । वासरूपविधिना लृडपि भविष्यति । तदेतत् `शेषे च' इति वचनं चिन्त्यप्रयोजनम् । करिष्यामीति व्रजतीति । इतिशब्दः परस्परसम्बन्धज्ञापनार्थः ।।

लृटः सद्वा ।। 3.3.14 ।।

`लृटः' इति वचनं स्थानिनिर्देशार्थम्, अन्यथा सत्संज्ञकौ प्रत्ययौ स्वतन्त्रौ स्यातां न त्वादेशौ । अप्रथमासमानाधिकरणादिष्विति । आदिशब्देन `सम्बोधने च' `लक्षणहेत्वोः क्रियायाः' इत्यस्मिन्विषये, तथा `प्रत्ययोत्तरपदयोश्च'---करिष्यतोऽपत्यं कारिष्यतः, कारिष्यमाणिः, करिष्यतो भक्तिः करिष्यद्भक्तिः, करिष्यमाणभक्तिः, करिष्यन्ती भक्तिरस्य करिष्यद्भक्तिः, करिष्यमाणा भक्तिरस्य करिष्यमाणभक्तिः, करिष्यत्तरः, करिष्यमाणतरः, करिष्यमाणतमः, करिष्यद्रूपः, करिष्यमाणरूपः, करिष्यत्कल्पः, करिष्यमाणकल्पः । कथं `श्वोऽग्नीनाधास्यमानेन' इत्यनद्यतने शतृशानचौ भवतः ? उक्तोऽत्र परिहारः---`व्यत्ययो बहुलम्' इति कालव्यत्ययेन लृट् । अथ वा---उत्तरत्रानद्यतन इति योगविभागः, `लृटः सद्वा' इत्येव अनद्यतने यो लृट् तस्यापि सत्संज्ञकौ भवतः । केन पुनरनद्यतने लृट् भवति ? एतदेव ज्ञापयति---भवत्यनद्यतने लृडिति, यदयमनद्यतने लृटः सत्संज्ञकौ शास्ति ।।

अनद्यतने लुट् ।। 3.3.15 ।।

अनद्यतन इति बहुव्रीहिनिर्द्देश इति । `अनद्यतने लङ्' इत्यत्रैवैतद्व्याख्यातं तत एवावधार्यम् ।

परिदेवने इति । परिदेवनम्=अनुशोचनम् । श्वस्तनीति । लुटः पूर्वाचार्यसंज्ञा । भविष्यन्त्यर्थ इति । भविष्यन्तीति लृटः संज्ञा, तस्या अर्थे भविष्यत्सामान्यइत्यर्थः । भावष्यदर्थ इति वा पाठः । भविष्यत्सामान्यरूपेऽर्थ इत्यर्थः । येवमिति । विलम्बितम् । अनभियुक्तः=परिचयरहितः ।।

पदरुडविशस्पृशो घञ् ।। 3.3.16 ।।

पद्यतेऽसाविति । करणस्यात्र कर्तृत्वेन विवक्षा । पदमित्येतत्तु `खनो घ च' इत्यत्र साधयिष्यते । रोग इति । `चजोः कु घिण्ण्यतोः' इति कुत्वम् । स्पृश उपतापे इति । उपतापः=रोगः ।।

सृस्थिरे ।। 3.3.17 ।।

`सृ' इत्यविभक्तिको निर्देशः । सर्त्तेरिति । `सृ गतौ', `ऋ सृ गतौ' इति द्वयोरपि ग्रहणम् । स्थिरे कर्त्तरीति । एतेन स्थिरग्रहणं प्रत्ययार्थस्य कर्त्तुर्विशेषणं नोपपदमिति दर्शयति । एतच्चार्धर्चादिषु सारशब्दपाठाद्विज्ञायते । ननु स्थिरशब्दस्तिष्ठतेर्गतिनिवृत्तिवाचिन उणादिषु करिच्प्रत्ययान्तो निपातितः, सत्तिस्तु

गतिवचनः, तत्कथं सरणस्य स्थिरकर्त्ता युज्यते ? इत्याह---स्थिर इति कालान्तरस्थायीत्यादि । यतः कालान्तरगमनं सम्भवति, ततश्च सर्त्तेर्धातोरर्थस्य कर्त्ता युज्यत इत्यर्थः । तिष्ठन्निति च हेतौ शतृप्रत्ययः । खदिरसार इति खदिरास्थि, तत् दृढत्वात् स्थिरम् । अतीसारो व्याधिरिति । शरीरान्तरावस्थितं रुधिरादिद्रव्यमतिशयेन सारयतीति कृत्वा । अन्तर्भावितण्यर्थोऽत्र सरतिः । `उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति दीर्घः । विसारो मत्स्य इति । विविधं सरतीति कृत्वा । सारो बलमिति । सारयति चेष्टयतीति कृत्वा । अत्राप्यन्तर्भावितण्यर्थः । सरतिः । बलवान्हि चेष्टते, सारशब्द उत्कर्षे पुंल्लिङ्गः, न्यायादनपेते नपुंसकलिङ्ग इति च दृश्यते ।।

भावे ।। 3.3.18 ।।

नित्यानामेव शब्दानां साङ्कर्यस्य निवृत्तये ।
अन्वाख्यानाद्भावशब्दे घञि नान्योऽन्यसंश्रयः ।।

राग इति । `रन्जेश्च' `घञि च भावकरणयोः' इति नलोपः । कथं पुनः पाकादिरुदाहरणं भवति, यावता भवतिनार्थनिर्देशः क्रियमाणोऽस्तिभवतिविद्यतिविषय एव कृतो भवति, न पचादिविषयः ? तत्राह---क्रियासामान्यवाची भवतिरिति । सत्ताख्यं सामान्यमपि भवतिना साध्यत्वेनाभिधीयत इति क्रियासामान्यवाची भवतिर्भवति । तेनार्थनिर्द्देशः क्रियमाण इति । हेतौ शानच्, यस्मात्सामान्यवाचिनार्थनिर्देशः क्रियते, न विशेषवाचिना पचादिना; तस्मात्सर्वधातुविषयः कृतो भवति सामान्यस्य, सर्वेष्वे विशेषेषु भावात्, षण्डादिषु गोत्ववत् विशेषरूपाश्रयनिषेधस्याभावाच्च । इह भावो धात्वर्थः, स च पूर्वापरीभूतोऽपरिनिष्पन्नः, तस्य घञ्वाच्यस्य कथं लिङ्गसङ्ख्यायोग इत्याह---धात्वर्थश्चेति । यथा पचति पाचक इत्यादौ प्रकृतिभागेन क्रियोच्यते, प्रत्ययभागेन तु तदीयं साधनम्; तथा पाकादिषु प्रकृतिभागः साध्यरूपमर्थमाह, प्रत्ययभागस्तु तस्यैव सिद्धरूपतां द्रव्यधर्मैर्लिङ्गसङ्ख्याकारकशक्तिभिः सम्बन्धयोग्यमाकारमाहेत्यथः । उक्तं च---

आख्यातशब्दे भागाभ्यां साध्यसाधनवर्त्तिता ।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ।।
साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।
सत्त्वभावस्तु यस्तस्याः स घञादिनिबन्धनः ।। इति ।।

बहुवक्तव्योऽयमर्थः । इह `भावे' इति पुंल्लिङ्गेनायं निर्देशः क्रियते, एकवचनेन च तत्र पुंल्लिङ्ग एव, भावे एकवचन एव च प्रत्ययाः स्युर्न लिङ्गान्तरे, न च सङ्ख्यान्तरे; ततश्च `स्त्रियां क्तिन्' इत्यत्र स्त्रियां भाव इति सामानाधिकरण्येन सम्बन्धासम्भवात्---स्त्रियामकर्त्तरि कारके क्तिन् प्रत्ययः स्यात्, भावे तु पुंसीव `नपुंसके भावे क्तः' इत्यत्र `अकर्त्तरि च कारके' इत्यस्य निवृत्तत्वान्नपुंसके कर्त्तरि क्तः स्याद्भावे तु पुंसि, द्वित्वबहुत्वयोश्च पाकौ पाका इत्यादौ प्रत्यया न स्युरित्यत आह---पुंल्लिङ्गमेकवचनं चातन्त्रमिति ।।

न विना लिङ्गसङ्ख्याभ्यां सत्त्वभूतोऽर्थ उच्यते ।
इत्यतन्त्रमुपादानं तयोर्न तु विवक्षितम् ।।
धान्याथिनामुपादानं पलालादेर्यथा मतम् ।
शब्दसंस्कारमात्रं तु तन्निर्देशप्रयोजनम् ।।

अकर्तरि च कारके संज्ञायाम् ।। 3.3.19 ।।

प्रासः=कुन्तः, प्रसेवः=सूच्या प्रसेवनेन निष्पाद्य आवपनविशेषः । मधुराहार इति । कर्मधारयः, षष्ठीसमासो वा ।

मेष इति । पचादिषु पाठमनपेक्ष्यैतदुदाहृतम्, तथा च `इगुपधज्ञाप्री' इत्यत्रोक्तम्---देवसेवमेषादयः पचादिषु द्रष्टव्या इति । न हि पाठे सति द्रष्टव्यत्ववचनमुपपद्यते । अथ वा---प्रत्युदाहरणदिगियं दर्शिता, इदं तु प्रत्युदाहरणम्---बिभर्त्यसौ भर्त्तेति ।

चकार इत्यादि । चकारोऽयं भिन्नक्रमः---`संज्ञायां च' इति, तेनासंज्ञायामपि घञ् भवति । यद्येवम्, मा भूत्संज्ञायामिति, मा च भूच्चकारः `अकर्त्तरि कारके' इत्येवास्तु ? सत्यम्; बाहुल्येन संज्ञायां भवति, क्वचिदेवासंज्ञायामिति सूचयितुं संज्ञाग्रहणं कृतम् । दाय इति । दीयमानं सर्वमुच्यत इति नेयं संज्ञा, एवं लाभ इत्यत्रापि, उभयत्र कर्मणि घञ् । कारकग्रहणमित्यादि । पर्युदासे हि नञिवयुक्तन्यायेन कर्तुरन्यस्मिंस्तत्सदृसे कारक एव प्रतीतिर्भवति, यथा---अब्राह्मण इति क्षत्रियादौ । तस्मात्पर्युदासे कारकग्रहणं न कर्त्तव्यम् । प्रसज्यप्रतिषेधे तु वाक्यभेदेन संज्ञायां घञ् भवति, कर्त्तरि तु न भवतीत्येषोऽर्थो भवति । तत्र प्रथमे वाक्येऽर्थनिर्देशाभावाद् `अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' इति स्वार्थ एव स्यात् । ननु च विहितः स्वार्थे पूर्वेणैव ? नेत्याह; धात्वर्थस्य हि सिद्धताख्ये धर्मे घञादयो भवन्तीत्युक्तम्, इह तु साध्यरूपे शुद्धे प्रकृत्यर्थेस्यात् । ननु च कर्त्तरि प्रतिषेधसामर्थ्यादनिर्दिष्टार्थोऽपि घञ् धात्वर्थसम्बन्धिनि कारक एव विज्ञास्यते ? नैतदस्ति; असति हि प्रतिषेधे `कर्त्तरि कृत्' इति वचनान्नायमनिर्दिष्टाथः स्याद् । अतः प्रसज्यप्रतिषेधार्थं काकग्रहणम् । पर्यदासे तु न कर्त्तव्यम् । यद्येवम्, स एवाश्रयिष्यते, किं कारकग्रहणेन ? तत्राह---तत्क्रियत इति । किं पुनः कारणं प्रसज्यप्रतिषेधे प्रत्यत्नलभ्यः समासः ? असामर्थ्यात्तत्र हि नञः क्रियया सन्बन्धः, कर्त्रि न भवतीति न कर्तृशब्देन । आदेच उपदेशेऽशितीति । अत्र यदि `अशिति' इति पर्युदासः स्यात्, तदा शितोऽन्यत्र तृजादौ प्रत्ययो परत आत्वेन भवितव्यम् । ततश्च सुग्लः, सुम्ल इत्यत्र `आतश्चोपसर्गे' इति को न स्यात्, प्राक् प्रत्ययोत्पत्तेरनाकारान्तत्वात्। प्रतिषेधेत्वनैमित्तिकमात्वम्, शिति तु प्रतिषेध इति सिद्धमिष्टम् ।।

परिमाणाख्याया सर्वेभ्यः ।। 3.3.20 ।।

परिमाणाख्यायामिति । भावसाधनः परिमाणशब्दः, आख्यानमाख्या = उक्तिः, परिच्छित्तेरुक्तौ सत्यामित्यर्थः । कस्य पुनः परिच्छित्तिः ? प्रत्ययार्थस्य भावस्य कर्तृवजितस्य कारकस्य च । परिमाणाख्यायां गम्यमानायामिति वृत्तेरप्ययमेवार्थः । तण्डुलनिचाय इति । निचीयते राशीक्रियते इति निचायः=राशिः, तण्डुलानां निचाय इति षष्ठीसमासः । अत्र राश्येकत्वेन परिच्छित्तिर्गम्यते । अत्रैरचि प्राप्ते घञ् । प्रायेण तु निश्चाय इति पाठः, तत्राप्यर्थः स एव, `ग्रहवृदृनिश्चिगमश्च' इत्यपि प्राप्ते घञ् शूर्पनष्पावाविति । निष्पूयते शोद्ध्यते तुषाद्यपनयनेन यस्तण्डुलादिः । शूर्पेण निष्पावः शूर्पनिष्पाव इति `कर्तृकरणे कृता बहुलम्' इति समासः । अत्र शूर्पसङ्ख्यया परिच्छित्तिः । यद्यप्यत्र `निरभ्योः पूल्वोः' इति घञ् सिध्यति, तथापि सर्वापवादार्थसर्वग्रहणोपादानादनेनैव घञ् भवितुमर्हतीत्यस्योपन्यासः । काराविति । `क विक्षेपे' कर्मणि घञ्, विक्षिप्तो धान्यादिः= कारः, अत्रापि सङ्ख्यया परिच्छित्तिः । ननु च धातोरिति सामान्याधिकारादन्तरेणापि सर्वग्रहणं धातुमात्राद् घञ् भविष्यति, नार्थः सर्वग्रहणेन ? तत्राह---सर्वग्रहणमिति । किं पुनः कारणमपो बाधनं यत्नसाध्यमित्यत आह---पुरस्तादिति निश्चय इति । अत्र न केनचिदियत्ता गम्यते । ननु च परिमाणशब्दस्य प्रस्थादिषु रूढत्वात्प्रस्थस्तण्डुलनिश्चाय इत्यादावेव युक्तं भवितुम्, न तु द्वौ शूर्पनिष्पावावित्यत्र ? इत्यत आह---आख्याग्रहणं रूढिनिरासार्थमिति । प्रस्थादिषु जिघृक्षितेषु परिमाण इत्येव वक्तव्यं किमाख्याग्रहणेन ? आख्याग्रहणात्तु मात्रचो लोपो विज्ञायते परिमाणमात्रस्याख्यायामुक्तौ सत्यामिति । तेन परिमाणशब्दः क्रियाशब्द उपजायते---परिमितिः=परिमाणम् परिच्छित्तिरिति, सङ्ख्ययापि परिच्छित्तिर्भवति । एवञ्चोन्मानादावपि यथाभिधानं घञ् भवति । यदि तर्हि सर्वग्रहणात्परमप्ययं घञमं बाधते, स्त्रीप्रत्ययानपि बाधेत, तत्राह---घञनुक्रमणमजपोर्विषय इति । एतच्च `सर्वेभ्यः' इति पञ्चमीनिर्देशाल्लभ्यते । पञ्चम्यन्तो हि सर्वशब्दो धातुशब्देन समानाधिकरणो भवति, तेन प्रकृत्याश्रय एवापवादो बाध्यते, नार्थाश्रयः । तिलोच्छित्तिरिति । कर्मणि भावे वा क्तिन् । ऊर्ध्वीकृतो राशिः ।

णिलुक्चेति । णिलोपे सति तस्य स्थानिवद्भावाद् घञाश्रया वृद्धिर्न स्यादिति लुग्विधीयते, तस्य परनिमित्तकत्वात्क्विलुगुपधात्वेति प्रतिषेधाद्वा स्थानिवत्त्वाभावाज्जारशब्दः सिध्यति । जरयन्तीति । `जनीजृष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वाद् ह्रस्वत्वम् । जारः= प्रच्छन्नपतिः ।।

इङश्च ।। 3.3.21 ।।

उपाध्याय इति । उपेत्यस्यादधीयत इति अपादाने घञ् । अध्याय इत्यत्र कर्मणि घञ् ।

अपादाने स्त्रियामिति । `घञनुक्रमणमजपोर्विषये' इति वचनात् स्त्रियामप्राप्तो घञ् विधीयते । उपाध्याया, उपाध्यायीति । या स्वयमध्यापयति तस्यामेतद्रूपम् । पुंयोगे तु नित्यमेव ङीष् भवति । अत्र च `उपाध्यायमातुलाभ्यां वा' इति वचनात्पक्षे आनुगागमः---उपाध्यायी, उपाध्यायानी ।

`शृवायुवर्णनिवृतेध्विति । शृ' इत्यविभक्तिको निर्देशः । शारो वायुरिति । करणे घञ्। शारो वर्ण इति । चित्रीकरणमत्र धात्वर्थः---चित्रीक्रियतेऽनेनाश्रय इति, अत्रापि करणे घञ् । वर्णान्तरसंपृक्तश्चेद्वर्णः शारः । निव्रियते आव्रियतेऽनेन शरीरमिति निवृतमावरणमुच्यते, `कृत्यल्युटो बहुलम्' इति करणे क्तः । नीशार इति । पूर्ववद्दीर्घः । अकृतनीशार इति । अकृतप्रावरण इत्यर्थः । `प्रदक्षिणप्रसव्यगामिनां शाराणाम्' इति वार्त्तिककारप्रयोगादक्षेष्वपि शार इति भवति ।।

समि युद्रुदुवः ।। 3.3.23 ।।

संयावः=पिष्टविकारोऽपूपविशेषः, सम्पूयते मिश्रीक्रियते गुडजीरकादिभिरिति कृत्वा ।।अवोदोर्नियः ।। 3.3.26 ।।

अधो नयनमवनायः, ऊर्ध्वं नयनमुन्नायः, उन्नयस्तु उत्प्रेक्षा ।।

निरभ्योः पूल्वोः ।। 3.3.28 ।।

निष्पाव=कोशी धान्यविशेषः, निष्पूयते शूर्पादिभिरिति कृत्वा ।।

उन्योर्ग्रः ।। 3.3.29 ।।

उद्गारः=अतिप्रवृद्धः शब्दः; निगारोः=भक्षणम् ।।

कृ धान्ये ।। 3.3.30 ।।

धान्यमिह प्रकृत्यर्थो वा स्यात्प्रत्ययार्थस्य वा कारकस्योपाधिः ? प्रकृत्यर्थस्तावन्नोपपद्यते, धान्यस्य द्रव्यत्वात्, धातोश्च क्रियावाचित्वात् । प्रत्ययार्थोपाधित्वे तु प्रत्ययेनाभिहितात्वादुत्कारो धान्यस्येति धान्यशब्दस्य प्रयोगो न प्राप्नोति । अथापि विस्पष्टप्रतिपत्त्यर्थं प्रयोगः स्यात् । एवमपि प्रत्ययार्थेऽन्तर्भूतत्वाद्धन्ये षष्ठी न स्यात्, दृतिहरिः पशुरितिवत्सामानाधिकरण्यमेव तु स्यात् । तस्मान्नायं प्रत्ययार्थस्योपाधिः; नापि प्रकृत्यर्थः; किन्तु प्रत्ययार्थस्य विषयत्वेन विशेषणमित्याह---धान्यविषयश्चेदिति । उपपदत्वमपि न न भवति, व्याख्यानात् । अनभिधानादिति । शब्दशक्तिस्वाभाव्यात् । उत्करनिकारशब्दाभ्यां धान्यविषयो विक्षेप एवाभिधीयते, न हिंसा । सापि धान्यस्य कीदृशीति चिन्त्यम् ।।

यज्ञे समि स्तुवः ।। 3.3.31 ।।

समेत्य स्तुवन्ति यस्मिन्देश इति । अधिकरणे ल्युटोऽपवादो घञिति दर्शयति । संस्तवः=परिचयः ।।

प्रे स्त्रोऽयज्ञे ।। 3.3.32 ।।

`यज्ञे' इति प्रकृतत्वाद् `अयज्ञे' इति पदच्छेदः । शङ्खादिषु प्रस्तारः=विस्तारः ।

बर्हिष्प्रस्तर इति । प्रस्तरः=मुष्टिविशेषः । बर्हिर्विकारः प्रस्तरो बर्हिष्प्रस्तरः, `ऋदोरप्' इत्यप्, `इदुदुपधस्य च' इति षत्वम् ।।

प्रथने वावशब्दे ।। 3.3.33 ।।
विस्तारः= तिर्यगायतिः ।।
छन्दोनाम्नि च ।। 3.3.34 ।।
अक्षराणामियत्ताविशिष्टो विन्यासविशेषोः=वृत्तम् । यस्य गायत्र्यादय इति । प्रसदिद्धत्वादेवमुक्तम् । न मन्त्रब्राह्मणमिति । `बहुलं छन्दसि' इत्यादौ यद्यपि तेषामेव ग्रहणं प्रसिद्धं तथापीह तेषां ग्रहणं न भवति, कुतः ? इत्याह---नामग्रहणादिति । विष्टारपङ्क्तिरिति । विस्तीर्यन्तेऽस्मिन्नक्षराणीत्यधिकरणे घञ्, ततः कर्मधारयः, `छन्दोनाम्नि च' इति षत्वम् । यद्यप्यत्र प्रथनं गम्यते, तथापि शब्दविषयत्वात्पूर्वेण न सिध्यति । केचित्तु `वौ' इति नानुवर्त्तयन्ति, तेन प्रस्तारपङ्क्तिः, आस्तारपङ्क्तिः, संस्तारपङ्क्तिरित्यपि भवतीत्याहुः । `कर्मण्यग्न्याख्यायाम्' इत्यादौ यथा प्रत्यययान्तश्चेदाख्या भवतीत्ययमर्थो भवति, एवमिहापि प्रत्ययान्तश्चेच्छन्दोनाम भवतीत्यर्थः स्याद् ? इति शङ्कमानं प्रत्याह---विष्टारपङ्क्तिशब्दोऽत्र छन्दोनामेति । अवयवत्वेन वर्त्तत इति । घञन्तशब्दरूपमित्यनुषङ्गः । क्वचित्तु तद्वर्त्तत इति तच्छब्दः पठ्यते, तत्र नानुषङ्गः । कथं तर्हि छन्दोनाम्नीत्यस्य निर्वाहः ? इत्याह---छन्दोनाम्नीत्याधकरणसप्तम्येषेति । प्रत्ययान्तस्याधिकरणं छन्दोनाम, अवयवाश्चावयविनि वर्त्तन्त इति लौकिका मन्यन्ते, तेन न काचिदनुपपत्तिरिति भावः ।।
उदि ग्रहः ।। 3.3.35 ।।
अपवाद इति । `ग्रहवृदृनिश्चिगमश्च' इति प्राप्तस्य ।
छन्दसि नीत्यादि । अवयवसन्निवेशविशिष्टा यज्ञपात्रविशेषाः स्रुचः । इह तु जुहूपभृतोर्ग्रहणम्; `उद्ग्राभं चेति जुहूमुद्यच्छति निग्राभं चेत्युपभृतं नियच्छति' इति वचनात् । `हृग्रहोर्भश्छन्दसि' इति भत्वम् ।।
समि मुष्टौ ।। 3.3.36 ।।
मुष्टिविषयश्चेद्धात्वर्थो भवतीति । `कृ धान्ये' इत्यत्र धान्यविषयश्चेद्धात्वर्थो भवतीति एतदनुसारेणायं ग्रन्थो योज्यः । मुष्टिशब्दोऽयमस्त्येव परिमाणे---चतुरो मुष्टीन्निर्वपतीति, अङ्गुलीनां रचनाविशेषवचनोऽप्यस्ति---मुष्टिना हन्तीति; तत्र पूर्वस्य ग्रहणे परिमाणाख्यायामित्येव सिद्धत्वाद् द्वितीयस्य ग्रहणमित्याह---मुष्टिरङ्गुलिसन्निवेश इति । अहोशब्द आश्चर्ये । मुष्टौ कुशलो मुष्टिकः, आकर्षादिपाठात्कन्।।
परिन्योर्नीणोर्द्यूताभ्रेषयोः ।। 3.3.37 ।।
अक्षादिभिः क्रीडनं द्यूतम् । `भ्रेष चलने' भ्रेषणं भ्रेषः=चलनम् । अभ्रेषः=अचलनम् । भ्रेषविषयश्चेदिति । अयमपि ग्रन्थः पूर्वानुसारेण योज्यः । अनपचार इति । कुत्सितश्चारोऽपचारः, तस्मादन्यः प्रशस्तः चारोऽनपचारः । एतदेवस्पष्टयति---यथाप्राप्तस्येति । यथा येन प्रकारेण प्राप्तिर्यस्येति बहुव्रीहिः । अव्ययीभावे त्वम्भावः प्राप्नोति । क्वचित्तु यथाप्राप्तकरणमिति पठ्यते । परिणायेनेति । `उपसर्गादसमासेऽपि' इति णत्वम् । हन्तीति बाधते । समन्तान्नयनेनेति । परिणायेनेत्यस्येदमर्थकथनम् । एषोऽत्र न्याय इति । एतदत्र यथाप्राप्तमित्यर्थः । परिणयः=विवाहः । न्ययः=नाशः ।।
परावनुपात्यय इणः ।। 3.3.38 ।।
इह द्विः परिग्रहणम्, द्विश्चेण्ग्रहणं क्रियते, सकृदेव तु कर्त्तव्यम्, एवं वक्ष्यामि---परौ नियो द्युते इणोऽनुपात्यये नावभ्रेष इति ? सत्यम्; तथा तु न कृतमित्येव ।।
व्युपयोः शेतेः पर्याये ।। 3.3.39 ।।
पूर्वसूत्रेणानुपात्यये पर्यायशब्दो व्युत्पादितः, ततश्चानुपात्यय इत्यधिकारेणैव सिद्धे पर्यायग्रहणं पुनर्विधानार्थम् । तेनाभिविधिविवक्षायां परमपीनुणं बाधित्वाऽयमेव घञ् भवति । राजानमुपशयितुं पर्याय इत्यर्थ इति । `कालसमयवेलासु तुमुन्' इत्यत्र कालेऽत्यर्थग्रहणम् । पर्यायोपादानं तु प्रपञ्चार्थम्, यथा---`निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्' इति । तेन पर्यायशब्दयोगेऽपि तुमुन् भवति । तथा चावसरो भोक्तुम्, अवकाशो भोक्तुमित्याद्यपि दृश्यते । विशयः= संशयः, उपशयः=समीपशयनम् ।।
हस्तादाने चेरस्तेये ।। 3.3.40 ।।
हस्तादानग्रहणेनेत्यादि । यत्रोपायान्तरनिरपेक्षेण हस्तेनैवादेयमादीयते, तत्रावश्यमादेयस्य ग्राह्यस्य प्रत्यासत्तिर्भवति, अतः साहचर्यं लक्षणाहेतुः । वृक्षशिखर इति । वृक्षाग्रे यानि फलानि तेषां यष्ट्यादिना प्रचयं करोतीत्यर्थः । यद्वा---आरुह्य हस्तेनादानेऽप्यादेयस्य प्रत्यासत्त्यभावाद् घञभावः ।।
निवासचितिशरीरोपसमाधानेष्वादेश्च कः ।। 3.3.41 ।।
एतेष्वर्थेष्विति । अत्रोपसमाधानं धात्वर्थः, अन्ये प्रत्ययार्थस्य कारकस्योपाधिभूताः । चिखल्लिनिकाय इति । चिखल्लिः---जनपदविशेषः, तत्सम्बन्धी ग्रामादिर्निवासदेश इत्यर्थः । आकायमिति । आचीयतेऽस्मिन्नष्टका इत्यधिकरणे घञ् । काय इति । चीयन्तेऽस्मिन्नस्थ्यादीनि, अधिकरण एव घञ् । गोमयनिकाय इति । प्रकीर्णानां गोमयानामेकत्र राशीकरणमित्यर्थः ।
बहुत्वमत्र गम्यते इति । तत्र तत्र विक्षिप्तानामेव काष्ठानामित्यर्थः । `चः कः' इति वक्तव्ये आदेरिति वचनं यङ्लुगन्तेऽप्यादेरेक्यथा स्याद्, अनन्त्यस्याभ्यासस्य चोभयोर्मा भूदिति---गोमयानां निकेचायः, गोमयानां पुनः पुना राशीकरणमित्यर्थः ।।
सङ्घे चानौत्तराधर्ये ।। 3.3.42 ।।

प्राणिनां समुदायः सङ्घ इति । `सङ्गोद्घौ गणप्रशंसयोः' इति गणमात्रे निपातितोऽपि सङ्घशब्दः प्राणिनामेव समुदाये रूढ इति भावः ।
एकधर्मसमावेशेनेति । एकधर्मोऽनुगतः । औत्तराधर्येणेति । उत्तरे चाधरे चोत्तराधराः, तेषां भाव औत्तराधर्यम् ।
सूकरनिचय इति । स्तनपानाय यदोत्तराधरभावेन शेरते तदेदं प्रत्युदाहरणम्, यदा तु भिक्षुवत्पृथक्पृथगेव तिष्ठन्ति, तदेदमुदाहरणमेव भवति ।।
कर्मव्यतिहारे णच् स्त्रियाम् ।। 3.3.43 ।।
`धातुः' इति वर्त्तते, तस्य विशेषणं कर्मव्यतिहारग्रहणम्, कर्मव्यतिहारे वर्त्तमानादित्यर्थः । धातोश्च क्रियावाचित्वम्, न तस्य साधनकर्मव्यतिहारे वृत्तिः सम्भवति, अतो लौकिकस्य क्रियाकर्मणो ग्रहणमित्याह---कर्मव्यतिहारः क्रियाव्यतिहार इति । स्त्रीलिङ्गे भावे इति । कर्तृवर्जिते तु कारके न स भवति; अनभिधानादिति भावः । चकारो विशेषणार्थ इति । न स्वारार्थः, प्रत्ययस्वरेणैव सिद्धत्वात् । अस्य चाकारो न क्वापि श्रूयते, णजन्ताञ्च नित्यमञ् विधीयते, तत्र सतिशिष्टत्वाञ्ञित्स्वरेणैव भवितव्यम् । णचः स्त्रियामित्यत्र णास्त्रियामित्युच्यमाने `ज्वलितिकसन्तेभ्यो णः' इत्यस्यापि ग्रहणं स्यात् ।
व्यावक्रोशीत्यादि । `क्रुश आह्वाने', `लिख अक्षरविन्यासे', `हसे हसेन' णजन्तादञ् । स च कृद्ग्रहणपरिभाषया सोपसर्गादपि भवति, तद्धितत्वादादिवृद्धिः । `न य्वाभ्याम्' इत्ययं तु विधिर्न भवति; न कर्मव्यतिहार इति प्रतिषेधात् । `स्त्रियां क्तिन्' इत्यत्र प्रकरण एतन्नोक्तम् वासरूपविधिर्यथा स्यात्, तेन व्यावक्रुष्टिरिति क्तिन्नपि भवति । व्यावचोरीत्यत्र `ण्यासश्रन्थोयुच्' इति युच् प्राप्नोति, क्तिनोऽपवादः, तथाऽयमपि णच् येन नाप्राप्तिन्यायेन क्तिन एवापवादः, तत्रापवादविप्रतिषेधाद्युचि प्राप्तेऽयमेव णजिष्यते । व्यतीक्षा, व्यतीहेति । अत्र क्तिनपवादः `गुरोश्च हलः' इत्यकार एवेष्यते । व्यात्युक्षीति `उक्ष सेचने', अत्राकारविषयेऽप्ययमेवेष्यते । तदेतद्वैचित्र्यं कथं भवतीति । न कथञ्चिदिति भावः । कृत्यल्युटो बहुलमिति । एवंविधं वैचित्र्यं कर्त्तुं बहुलग्रहणमेव भवतीति भावः ।।
अभिविधौ भाव इनुण् ।। 3.3.44 ।।
क्रियागुणाभ्यामिति । अभिविधिस्वरूपकथनमेतत्, इह तु धातोः प्रत्ययविधानात्क्रियाविषय एवाभिविधिर्गृह्यते । सांकूटिनमिति । `कूट दाहे' दीर्घोपधादिनुण्, `अणिनुणः' इतीनुणन्तात्स्वाथिकोऽण् प्रत्ययः, स च पूर्ववत्सगतिकारकादभवति, `इनण्यनपत्ये' इति प्रकृतिभावात् `नस्तद्धिते' इति टिलोपाभावः ।
समन्ताद्दाह इत्यर्थः संशब्दोऽभिविधिद्योतकः । सांराविणमिति । `उपसर्गे रुवः' इति घञ् उपसर्गान्तरेऽनभिवैधौ चरितार्थः । संराव इति । अत्र संशब्दः पूजायाम् । क्वचित्सन्द्राव इति प्रत्युदाहणं पठ्यते, तदयुक्तम्; `समियुद्रुदुवः' इत्यस्यानवकाशात् । ननु च `भावे कारके' इति द्वयेऽपि प्रकृते शब्दस्वाभाव्यात्पूर्ववत्कारके न भविष्यति, तत् किं भावग्रहणेन ? तत्राह---भाव इति वर्त्तमान इति । तेन घञ्, `नपुंसके भावे क्तः' इति क्तश्च न भवति ।
ल्युटा त्वित्यादि । गतार्थम् । स्वभावतश्चेदमिनुणन्तं नपुंसकलिङ्गम् ।।
आक्रोशेऽवन्योर्ग्रहः ।। 3.3.45 ।।
`ग्रहवृदृनिश्चिगमश्च' इत्यापि प्राप्तेऽयमारम्भः । दृष्टानुवृत्तिसामर्थ्यादिति । दृष्टमनुवृत्तिसामर्थ्यं यस्येति बहुव्रीहौ `द्व्येकयोः' इतिवद्भावप्रत्ययमन्तरेणापि भावप्रधानो निर्देशो दृष्टानुवृत्तिसामर्थ्यत्वादित्यर्थः । यद्वा---अनुवृत्तौ सामर्त्यमनुवृत्तिसामर्थ्यम्, ततो दृष्टशब्देन कर्मधारयः । आक्रोशः शपनमिति । न क्षेपः, स्वभावतो घञन्तस्य शपनविषयत्वात् । शपनम्=अनिष्टाशंसनम् । अवग्रहः=अभिभवः । निग्रहः=बाधः । हन्तशब्दः कोपं द्योतयति । अवग्रहः=पदस्य छेदः । निग्रहः निरोधः ।।
प्रे लिप्सायाम् ।। 3.3.46 ।।
लब्धुमिच्छा लिप्सा । पात्रप्रग्राहेण चरतीति । भिक्षापात्रोपादानेन गृहीतपात्र इति यावत् । स्रुवग्रहणं तु दक्षिणार्थिनो लिङ्गम्, दाक्षिणहोमस्य स्रुवसाधनत्वात् । प्रग्रहो देवदत्तस्येति । प्रग्रहो मदः, प्रकृष्टो वाभिनेवेशः ।।
परौ यज्ञे ।। 3.3.47 ।।
ुत्तरपरिग्राह इति । भावे घञ् । वेदेः स्फ्येन स्वीकरणं परिग्राहः, ततः कर्मधारयः । क्वचिदुत्तरः परिग्राह इत्यसमास एव पठ्यते ।।
नौ वृ धान्ये ।। 3.3.48 ।।
नीवारा नाम व्रीहय इति । धान्यसामान्योक्तावपि धान्यविशेषरूपव्रीहिविशेषे स्वभावतो घञन्तस्य वृत्तिरिति दर्शयति । अत्र कर्मणि घञ्, पूर्ववदुपसर्गस्य दीर्घः । निवरा कन्येति । `ग्रहवृदृनिश्चिगमश्च' इत्यप् कर्मण्येव । ननु च क्तिना स्त्रियां भवितव्यम्, `अजब्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेन' इति वचनात् ? सत्यम्; `कृत्यल्युटो बहुलम्' इति बहुलवचनात् क्वचित् क्तिनादिविषयेऽप्यच् भवति, प्रवरा सेना, प्रवरा गौरितिवत् । एवं च `घञजबन्ताः पुंसि' इति प्रायिकं द्रष्टव्यम् ।।
उदि श्रयतियौतिपूद्रुवः ।। 3.3.49 ।।
वक्ष्यमाणमिति । एवं च यौतिप्रभृतिभ्यो विकल्पः प्राप्नोति । यदि नेष्यते, `कृत्यल्युटो बहुलम्' इति न भविष्यति ।।
अन्ये तु भाष्येऽनुक्तत्वादसाधुरेवायं प्रयोगः । प्रदर्शितस्तु भारतप्रयोग आर्षत्वेन निर्वाह्य इत्याहुः ।।
अवे ग्रहो वर्षप्रतिबन्धे ।। 3.3.51 ।।
कुतश्चिन्निमित्तादिति । `सत्त्वकर्मापराधादेरनावृष्टिर्भवेन्नृणाम्'। सत्त्वशब्दः प्राणिवचनः, कर्मापराधः=कर्मविषयो दोषः, विहितानाचरणप्रतिषिद्धाचरणनिमित्तं पापं सत्त्वकर्मापराधः । आदिशब्देन `तयोर्मध्यगतो भानुः समुद्रमपि शोषयेत्' इत्यादेर्ग्रहणम् ।

अवग्राहो देवस्येति । देवकर्तृको वर्षाभाव इत्यर्थः ।।

प्रे वणिजाम् ।। 3.3.52 ।।

पणन्ते व्यवहरन्तीति वणिजः, `पणेरिज्यादेश्च वः', `पण व्यवहारे' इत्यस्मादिजिप्रत्ययो भवत्यादेश्च वकारः । वणिक्सम्बन्धेनेति । तुलासूत्रं प्रायेण वणिजां भवतीति साहचर्यं लक्षणाहेतुः । अनयो वेति । न तु वणिजस्तन्त्रमित्यस्येदं प्रयोजनम् ।।

रश्मौ च ।। 3.3.53 ।।

रथादियुक्तानामिति । आदिशब्देन शकटस्य ग्रहणम् । अश्वादेरिति । अनुडुदादेरप्युपलक्षणमेतत् । संयमनम्=नियमनम् । सा रश्मिरिह गृह्यत इति । रश्मिशब्दः पुंल्लिङ्गः, सेति रज्जुपरामर्शात्स्त्रीलिङ्गता । चन्द्रादिसम्बन्धिनां तु रश्मीनामग्रहणम्; अनभिधानात् । इह तु बहुकृत्वो ग्रहिरुपादीयते, सकृदेव तु कर्त्तुं शक्यम्; कथम् ? एवं वक्ष्यामि `उदि ग्रहः समि मुष्टौ आक्रोशेऽवन्यो प्रे लिप्सायां परौ यज्ञेऽवे वर्षप्रतिबन्धे विभाषा प्रे वणिजाम्' इत्यादि, `परौ भुवोऽवज्ञाने' इत्यस्यानन्तरमाङि रुप्लुवोरिति ? तथा तु न कृतमित्येव ।।

वृणोतेराच्छादने ।। 3.3.54 ।।

अत्राप्याच्छादन इति सामान्येनोक्तावपि पूर्ववद्विशेषप्रतिपत्तिरित्याह---प्रत्ययान्तेन चेदिति । प्रावार इति । पूर्ववद्दीर्घः । प्रवरा गौरिति । प्रशस्तेत्यर्थः ।।

एरच् ।। 3.3.56 ।।

चकारो विशेषणार्थ इति । विना हि तेन थाथादिसूत्रेऽप्रत्ययादित्यस्यापि ग्रहणं स्यात् । वर्षमिति । वृषभो वर्षणादिति भाष्यकारप्रयोगादूर्षणमित्यपि भवति । जवसवाविति । अपि प्राप्तेऽज् विधीयते । स्वरे विशेषः । एरजण्यन्तानामिति तु नास्ति वचनम्, `कल्प्यादिभ्यः प्रतिषेधवचनम्' इत्येतदेवास्ति । कल्प्यते इति कल्पः, अर्थ्यते इत्यर्थः, मन्त्र्यते इति मन्त्रः । अचि प्रतिषिद्धे घञेव भवति ।।

ॠदोरप् ।। 3.3.57 ।।

लव इति । न च तादपि परस्तपर इति उकारस्य तपरत्वान्नात्रापा भवितव्यम् ? तत्राह---दकारो मुखसुखार्थ इति । नायं तकारः, किं तर्हि ? दकारः । एतच्च `निरभ्योः पूल्वोः' इत्याद्यारम्भाद्विज्ञायते । मुखशब्देन ताल्वादिश्थानमुच्यते, तस्य सुखमनायासः । अचोर्हि हल्व्यवहितयोरुच्चारणे मुखस्य लाघवं भवति । असन्देहः, यस्यानुषङ्गिकं प्रयोजनम् ।।

ग्रहवृदृनिश्चिगमश्च ।। 3.3.58 ।।

निश्चिनोतेस्त्वचोपवाद इति । `एरच्' इति प्राप्तस्य यस्तु `हस्तादाने चेरस्तेये' इति घञ् स निपूर्वादपि पूर्वविप्रतिषेधेनेष्यते, यथोक्तम्---अस्तेयार्थमिति चेन्नानिष्टत्वादिति । कः पुनर्निश्चय इत्यत्राजपोर्विशेषः, यावता तदेव रूपं स एव स्वरोऽपि; थाथादिसूत्रेणोभयत्रान्तोदात्तत्वविधानादित्यत आह---निश्चिग्रहणं स्वरार्थमिति । निश्चिग्रहणसामर्थ्यात् थाथादिस्वरोऽत्र न प्रवर्त्तते, कृत्स्वरेण तु मध्योदात्तत्वमेव भवतीति भावः ।

वशिरण्योरिति । घञि प्राप्ते वचनम् । वशनं वशः । रणन्ति शब्दायन्तेऽस्मिन्निति रणः संग्रामः ।

घञर्थ इति । भावः कर्तृवर्जितं च कारकं घञर्थः । प्रस्थः सानुः, प्रस्नः कटाहः, प्रपा पानीयशाला---सर्वत्र `आतो लोप इटि च' इत्याकारलोपः । आविध इति । ग्रहिज्यादिसूत्रेण सम्प्रसारणम् । आयुधशब्दपर्यायोऽयम् ।।

उपसर्गेऽदः ।। 3.3.59 ।।

अदेर्धातोरिति । दारूपाणां धातूनामयं निर्देशो न भवति; `घञपोश्च' इत्यपि परतोऽदेर्घस्लादेशविधानात् । व्यद्यत इति विघसः= वैश्वदेवशिष्टमन्नम् । घासस्तु चतुष्पदां भक्ष्यम् । घसिः प्रकृत्यन्तमस्ति तस्मादेवाब्विधेयः । एवं ह्यदेरपि घस्लृभावो न वक्तव्यो भवति । उत्तरार्थं त्वदेर्ग्रहणम्---नौ ण `च' अदेर्यथा स्याद्, घसेर्मा भूदिति ।।

व्यधजपोरनुपसर्गे ।। 3.3.61 ।।

व्यधजपोरिति पञ्चम्यर्थे षष्ठी, अनुपसर्ग इति प्रसज्यप्रतिषेधः---उपसर्गे सति न भवतीति । तेन केवलाभ्यामेव भवति, न तूपसर्गव्यतिरिक्तेऽन्यस्मिन्नुपपदे । वृत्तिग्रन्थोऽप्यस्मिन्नेवार्थे व्याख्येयः । उपजापः=मन्त्रभेदः ।।

क्वणो वीणायां च ।। 3.3.65 ।।

सोपसर्गार्थमिदं वीणाग्रहणमिति । निव्यतिरिक्तोपसर्गार्थमिदं द्रष्टव्यम्; निपूर्वादनुपसर्गाच्च सामान्येन विधानात् । कल्याणप्रक्वाणेति बहुव्रीहिः ।।

मदोऽनुपसर्गे ।। 3.3.67 ।।

विद्यामद इत्यादि । `कर्तृकरणे' इत्यादिना समासः । `क्वणो वीणायां च' इत्यस्यानन्तरं `नित्यं मदः प्रमदसंमदौ हर्षे पणः परिमाणे' इति यदि सूत्रन्यासः क्रियेत, अत्रानुपसर्गग्रहणं शक्यमकर्त्तुम्, अनुवृत्तेरेव सिद्धत्वात् ? सत्यम्; एवं विन्यासे हि क्रियमाणे `पणः परिमाणे' इत्यत्राप्यनुपसर्ग इत्यस्यानुवृत्तिः शङ्क्येत । यथान्यासे तूत्तरत्राप्यनुपसर्ग इति वचनात् `नित्यं पणः परिमाणे' इत्यत्रानुपसर्ग इति न संबद्ध्यत इति विज्ञायते । तेनोपसर्गेऽपि भवति यदि परिमाणाभिधानमस्ति ।

अपर आह---"मदोऽनुपसर्गे' इति सूत्रप्रणयनमस्य विधेरनित्यत्वज्ञापनार्थम्, तेन माद इति सिद्धं भवति" इति, नात्राप्तभाषितमस्ति ।।

प्रमदसंमदौ हर्षे ।। 3.3.68 ।।

निपातनं रूढ्यर्थमिति । उपात्तस्यैव रूढिरूपस्य साधुत्वं यथा स्यादित्यर्थः । `प्रसंभ्याम्' इत्युच्यमाने प्रसंमदः, संप्रमदः, विप्रमद इत्यादावपि प्राप्नोतीति मन्यते ।।

अक्षेषु ग्लहः ।। 3.3.70 ।।

अक्षस्य ग्लह इति । भावेऽप्, अक्षस्य ग्रहणमित्यर्थः । अन्ये त्वाहुः---अक्षशब्देनात्र तत्साधनं देवनं लक्ष्यते, अक्षकर्मणि देवनविषये यत्पणरूपेण ग्राह्यं तद् ग्लहशब्देनोच्यते । तथा च माघः---`व्यात्युक्षीमभिरणग्लहामदीव्यन्' इति । वृत्तावप्यक्षस्य ग्लह इत्यक्षसाधनस्य देवनस्य पणबन्ध इत्यर्थः ।।

प्रजने सर्तेः ।। 3.3.71 ।।

प्रजननं प्रजनः, भावे घञ्, `जनिवध्योश्च' इति वृद्धिप्रतिषेधः, ण्यन्ताद्वैरच् । प्रशब्दो धात्वर्थं विपरीतयति, यथा---प्रतिष्ठते इत्यत्र प्रादुर्भावस्य च वैपरीत्यं गर्भग्रहणम्, तदाह---प्रजनः प्रथमं गर्भग्रहणमिति । कथमवसरः, प्रसर इति ? अधिकरणे `पुंसि संज्ञायां घः प्रायेण' ।।

ह्वः संम्प्रसारणं च न्यभ्युपविषु ।। 3.3.72 ।।

निहव इत्यादि रूपं तु जुहोतेरेव सिद्धम्; अनेकार्थत्वाद्धातूनाम् । अथेभेदोऽप्यकिञ्चित्करः । इदं तु वचनं ह्वयतेर्घञि निह्वाय इति रूपं मा भूदिति ।।

निपानमाहावः ।। 3.3.74 ।।

आहाव इति रूपं तु जुहोतेरेव सिद्धम्, अनेकार्थत्वाद्धातूनाम् । अर्थभेदोऽप्यकिञ्चित्करः । इदं तु वचनं ह्वयतेर्घञि आह्वाय इति रूपं मा भूदिति । आहाव इत्यधिकरणे निपातनमित्याह---तत्र हीति ।।

भावेऽनुपसर्गस्य ।। 3.3.75 ।।

भावग्रहणमित्यादि । ननु च द्वयेऽप्यधिकृते लक्ष्यदर्शनवशाद्भाव एवार्थे विधिर्भविष्यति, यथा---`कर्मव्यतिहारे णच् स्त्रियाम्' इत्यत्र ? सत्यमेष एवार्थो भावग्रहणेनाक्यायते । अथ यथा---`अभिविधौ भाव हनुण्' इत्यत्र वासरूपनिवृत्त्यर्थं भावग्रहणम्, तथेहापि कस्मान्न भवति ? असरूपस्य बाधनीयस्याभवात् । घञ् तावत्सरूपः, क्तल्युट्क्तिनस्तु नास्योत्सर्गाः, न हि तेषु नाप्राप्तेष्वस्यारम्भः, इष्यन्ते च ते---हूतः, ह्वानम्, हूतिरिति ।।

हनश्च वधः ।। 3.3.76 ।।

स चान्तोदात्त इति । सूत्रे तथैवोच्चारणात् । किमर्थं पुनरकारान्तत्वम्, किमर्थं चान्तोदात्तत्वम्, यावता नायमकारः क्वचिच्छ्रू यतोऽतो लोपोऽस्य भवति ? तत्राह---तत्रेति । अन्तोदात्तत्वे सतीत्यर्थः । उदात्तनिवृत्तिस्वरेणेति । `अनुदात्तस्य च यत्रोदात्तलोपः' इत्येव उदात्तनिवृत्तिनिमित्तत्वादुदात्तनिवृत्तिस्वरः । घात इति । अत्र कर्मादौ कारके घञ् । किं तर्हि प्रकृतेन प्रत्ययेनेति । अथ धातोरनन्तरं श्रुतः प्रकृतेन धातुना कस्मान्न सम्बद्ध्यते---हनश्च वधादेशो भवति, ह्वयतेश्चेति ? पूर्वसूत्रे' सम्प्रसारणविधानसामर्थ्यात् ।।

मूर्त्तौ घनः ।। 3.3.77 ।।

अभ्रघन इति । अभ्रस्य काठिन्यमित्यर्थः । धर्मशब्देनेति । शुल्कादिवदिति भावः । यद्येवम्, गुणेनेति प्रतिषेधात्समासो न प्राप्नोति, तत्स्थैश्च गुणैरित्येतदपि नास्ति ? इदानीमेव ह्युक्तम्---`धर्मशब्देन धर्मी भण्यते' इति वक्तव्योऽत्र समासः ।।

अन्तर्घनो देशे ।। 3.3.78 ।।

तदपि ग्राह्यमेवेति । उभयथाप्याचार्येण शिष्याणां प्रतिपादितत्वात् ।।

अगारैकदेशे प्रघणः प्रघाणश्च ।। 3.3.79 ।।

द्वारप्रकोष्ठो बाह्य उच्यत इति । द्वार प्रदेशे द्वौ प्रकोष्ठावलिन्दौ---आभ्यन्तरः, बाह्यश्च । तत्र बाह्ये प्रकोष्ठे निपातनम्, नागारैकदेशमात्रे । ऐतच्च निपातनाल्लभ्यते । प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यत इति अप् कर्मणि, पक्षे वृद्धिश्च ।।

उद्घनोऽत्याधानम् ।। 3.3.80 ।।

अत्याधानमिति । अतिशब्द उपरिभावे वर्तते, आदधातिः स्थापने, अधिकरणे ल्युट् । उद्घन इत्यत्राप्यधिकरण एवाप् ।।

अपघनोऽङ्गम् ।। 3.3.81 ।।

अपघन इति । करणेऽप् ।।

करणेऽयोविद्रुषु ।। 3.3.82 ।।

द्रुघन इति । द्रुरिति वनस्पतिनाम्, `वनस्पतयो वै द्रवः' इति निगमो भवति । पूर्वपदात्संज्ञायामग इति वेति । संज्ञा चैषा कुठारविशेषस्य ।।

स्तम्बे क च ।। 3.3.83 ।।

तत्र चेति । अनन्तरोक्तेऽपि के तु घनादेशो न भवति; पूर्वमेव घनादेशस्याप्सम्बन्धित्वात् । स्तम्बघ्न इति । उपपदसमासः, `गमहन' इत्युपधालोपः, `हो हन्तेः' इति कुत्वम् । स्त्रियामित्यादि । एतच्च कापोः प्रतिपदविधानात्सर्वापवादत्वात् `कृत्यल्युटो बहुलम्' इति वचनाद्वा लभ्यते अन्ये पुनः `ऊतियूतिजूतिसातिहेति' इति हन्तेः क्तिनि निपातनान्निपातनस्य च सर्वापवादत्वात् स्तम्बहेतिरितीच्छन्ति । अपरे तु `करणाधिकरणयोश्च' इति ल्युटि स्तम्बहननीति भवितव्यम्, यथा---रक्षोयातूनां हननीत्युक्तमित्याहुः । स्तम्बघात इति । भावे घञ्, षष्ठीसमासः ।।

प्रग़ौ घः ।। 3.3.84 ।।

पलिघ इति । `परेश्च घाङ्कयोः' इति विभाषा लत्वम् ।।

उपघ्न आश्रये ।। 3.3.85 ।।

आश्रयशब्द इत्यादि । आश्रयणमाश्रयः, स प्रत्यासत्त्याऽविनाभावीत्येतल्लक्षणहेतुः । पर्वतोपघ्न इति । पर्वतेनोपहन्यते=सामीप्येन गम्यत इति कर्मण्यम् ।।

संघोद्घौ गणप्रशंसयोः ।। 3.3.86 ।।

संहननं सङ्घः, भावेऽप् । उद्घन्यते=उत्कृष्टे ज्ञायत इति कर्मण्यप् । गत्यर्था बुद्ध्यर्था इति हन्तिर्ज्ञाने वर्तते । उद्घो मनुष्याणामिति । मनुष्याणां मध्ये प्रशस्त इत्यर्थः ।।

निघो निमितम् ।। 3.3.87 ।।

समारोहपरिणाहमिति । आरोहः=उच्छ्रायः, परिणाहः=विस्तारः, तौ समानौ यस्य तत्तथोक्तम् । निघा वृक्षा इति । निविशेषं हन्यन्ते ज्ञायन्ते इति कर्मण्कम् ।।

ड्वितः क्त्रिः ।। 3.3.88 ।।

भावेऽकर्तरि च कारके इति वर्तत इति । अधिकारस्याविच्छेदं दर्शयति । अयं तु क्त्रिप्रत्ययः स्वभावाद्भाव एव भवति---पाकेन निर्वृत्तं पक्त्रिममित्युच्यते, न तु पक्वेनेति । केवलो न प्रयुज्यत इति । तेनावश्यमन्यशब्देनैव विग्रहः कर्तव्यः । तद्दर्शयति---पाकेन निर्वृत्तं पक्त्रिममिति । उप्त्रिममिति । यजादित्वात्सम्प्रसारणम् । अथ ड्विनः क्त्रिममित्येव कस्मान्नोक्तम्, एवं हि `क्त्रेर्मम् नित्यम्' इति न वक्तव्यं भवति ? नैवं शक्यम्, `भावे' इत्यधिकाराद्भावेऽपि कृत्रिममिति प्राप्नोति । अथाप्यभयानुवृत्तावप्यभिधानस्वाभाव्यात्कारक एव कर्मणि भवेत् ? एवमपि भूतकालो न गम्येत । एतदप्यभिधानस्वाभाव्याद्भवतु नाम ? एवमर्थाभिधाने प्रकारभेदो न स्यात्, न हि पक्वपक्त्रिमशब्दयोः पर्यायतां मन्यन्ते ।।

ट्वितोऽथुच् ।। 3.3.89 ।।

अयमपि स्वभावाद्भाव एव भवति । घञादेरपवादः । वासरूपविधना सोऽपि भवत्येव ।।

यजयाचयतविच्छप्रच्छरक्षो नङ् ।। 3.3.90 ।।

नङो ङकारो विच्छेर्गुणप्रतिषेधार्थः, अन्यथान्तरङ्गत्वात्तुकि `चछ्वोः शूडनुनासिके च' इति सतुक्कस्य छस्यादेशे कृते लघूपधत्वाद् गुणः स्यात् । नङन्ताः सर्वे पुंल्लिङ्गाः । याचिस्तु स्त्रीलिङ्गः । वासरूपविधिश्च यथाभिधानं भवति । प्रश्न इति । अत्र ग्रहिज्यादिसूत्रेण सम्प्रसारणं कस्मान्न भवतीत्याह---प्रच्छेरिति ।।

कर्मण्यधिकरणे च ।। 3.3.93 ।।

कर्माधिकरणयोः पृथक् पृथक् सप्तमीनिर्देशान्न तावदुभयोरुपपदत्वम्, तत्र व्याख्यानात्कर्मोपपदम्, अधिकरणं तु प्रत्ययार्थ इत्याह---कर्मण्युपपद इति । अथिकरणग्रहणमर्थान्तरनिरासार्थमिति । अर्थान्तरं भावः, करणादि च कारकम् ।।

स्त्रियां क्तिन् ।। 3.3.94 ।।

घञजपामपवाद इति । येन नाप्राप्तिन्यायेन घञोपवादः, अजपोस्तु परत्वादपवादो बाधक इत्यर्थः । उक्तं च `अजव्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेने' इति । अजपोरवकाशः--चयः, जयः, लव इति, क्तिनोऽवकाशः---कृतिः, दृतिः, चितिः, स्तुतिरित्यत्रोभयप्राप्तौ क्तिन् भवति विप्रनिपेधेन । लब्धिः । षित्त्वादङपि भवति---लभेति । ननु निष्ठायां वा सेटोऽकारवचनात्सिद्धमिति ब्रुवतो वात्तिककारस्य `गुरोश्च हलः' इत्यकारप्राप्तावेवाबादिभ्यश्चेति क्तिन्नभिमत इति गम्यते, तत्कथमङ्विषये क्तिन्नुदाहृतः ? सत्यम् ; प्रयोगबाहुल्यादिदमपि भवतीति मन्यते । एवं च युज्विपयेऽपि क्तिन्प्रयुज्यते---आस्तिरिति । अत एवाबादयः प्रयोगतोऽनुसर्त्तव्या इत्युक्तम् ।

श्रुयजिस्तुभ्यः करण इति । ल्युटि प्राप्ते वचनम्, श्रुतिः श्रोत्रम्, इज्यतेऽनया देवता इष्टिः । ऋकारल्वादिभ्य इति । ऋकारान्तेभ्यो ल्वादिभ्यश्च परः क्तिन्निष्ठाकार्यं लभते---`रदाभ्यां निष्ठातो नः', `ल्वादिभ्यः' इति च; निष्टायां विधीयमानं नत्वं क्तिनोऽपि भवतीत्यर्थः ।

क्तिन्नपीष्यते इति । `अस्त्रियाम्' इति प्रतिपेधाद्वासरूपविधेरभावादिदमुक्तम् ।।

स्थागापापचो भावे ।। 3.3.95 ।।

अङोऽपवादस्य बाधक इति । स्थादिभ्यः `आतश्चोपसर्गे' इति प्राप्तस्य । पचेस्तु पित्त्वात्प्राप्तस्याङोऽपवादः । कांस्थायिकाम्, स्थायिमित्यत्र `विभाषाख्यानपरिप्रश्नयोः' इति प्राप्तयोर्ण्वुलिञोरपि बाधकः कस्मान्न भवति ? `पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरान्' इति । कथमिति । न कथञ्चिद्; वासरूपबिधेरभावात् । नात्यन्तायेति । नियमेन चतुर्थ्यन्तप्रतिरूपकोऽयं निपातः, यथा---चिरायेति ।।

मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ।। 3.3.96 ।।

प्रकृतिप्रत्यययोरिति । प्रकृतिसामान्यविवक्षायां द्विवचनम्; अन्यथा बहुत्वात्प्रकृतीनां बहुवचनप्रसङ्गात् । विभक्तिविपरिणामेनेति । वृषादीनां द्वन्द्वे या प्रथमा तस्याः पञ्चमीभावेन यो विपरिणामस्तेन प्रकृतिप्रत्यययोः संबन्धः, अन्यथा संबन्धानुपपत्तिरित्यर्थः । `वृषु सेचने', `इषु इच्छायाम्' वृषिसाहचर्यादुदितो ग्रहणम् । सूत्रे त्वकारो न विवक्षितः । `मन ज्ञाने', `मनु अवबोधने' द्वयोरपि ग्रहणम् । विदादीनामपि यथादर्शनम् । सर्वत्रेति । मन्त्रे चामन्त्रे चेत्यर्थः । वृषादिभ्यः क्तिप्रत्यये विधातव्ये उदात्तवचनमुत्तरार्थम्, व्रजयजोर्भावे क्यबुदात्तो यथा स्यात् । प्रमतिरित्यादौ च `तादौ च निति कृत्यतौ' इति

पूर्वपदप्रकृतिस्वरार्थं च । पिबतेरपि मन्त्रे क्तिन्नुदात्तो दृश्यते---त्वं सुतस्य पीतये, मध्वः सोमस्य पीतये इति ।।

ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च ।। 3.3.97 ।।

मन्त्रे इति नानुवर्त्तत इति । तेन ब्राह्मणे भाषायां चाथं विधिर्भवति । स्यतेरिति । `षोऽन्तकर्मणि' इत्यस्य । हत्वाभाव इति । `द्यतिस्यति' इत्यादिना प्राप्तस्येत्वस्याभावः । सनोतेर्वेति । `षणुदाने' इत्यस्य । हन्तेर्हिनोतेर्वोत । यदा हन्तेस्तदा नकारस्येत्वं निपात्यते, यदा हिनोतेस्तदा तु गुणः । कीर्त्तयतेरिति । `कृत संशब्दने' इत्यस्य चुरादिणिजन्तस्य `ण्यासश्रन्थो युच्', इति युचोऽपवादः क्तिन्निपात्यते, उदांत्तत्वं च । इडभावस्तु `तितुत्र' इत्यादिना सिद्धः, `उपधायाश्च' `हलि च' `उपधायां च' इति दीर्घत्वम् । कालापास्तु युचमपीच्छन्ति---कीर्त्तनेति ।।

व्रजयजोर्भावे क्यप् ।। 3.3.98 ।।

इज्येति । वच्यादिसूत्रेण संप्रसारणम् । यद्युदात्त इति वर्त्तते, पित्करणं किमर्थमित्यत आह--पित्करणमुत्तरत्र तुगर्थमिति ।।

संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ।। 3.3.99 ।।

भाव इति न स्वर्यत इति । पूर्वसूत्रे यद्भावग्रहणं तस्येहास्वरितत्वान्नानुवृत्तिरित्यर्थः । समज्येति । घञपोः प्रतिषेधे क्यप उपसंख्यानमिति वचनाद्वीभावाभावः । अन्ये तु सज्ञायामित्येव क्यपो विधानात् रूढ्यनुगमार्थत्वाच्च संज्ञाग्रहणस्य वीभावाभावमाहुः । न हि वीभावे सति संज्ञा गम्यते । समज्या=सभा, निषद्या=आपणः, निपत्या=पिच्छिला भूमिः, मन्या= गलपार्श्वशिरा मन्यन्तेऽनयेति कृत्वा । तया हि क्रुद्धो ज्ञायते । क्यपोऽझलादित्वाद् `अनुदात्तोपदेश' इत्यनुनासिकलोपोन भवति, तदभावात्तुगपि न भवति । अन्ये तु---संज्ञायामिति वचनाद्यथा समज्येत्यत्र वीभावो न भवति, एवं मनेरनुनासिकलोपस्तत्र कृते तुगपीत्याहुः; नात्राप्तवचनमस्ति । विद्यते गृह्यतेऽनयार्थइति विद्या । सूयतेभिषूयते सोमोऽस्यामिति सुत्या=अभिषवदिवसः । सुत्यमहरुत्तममिति त्वार्षं नपुंसकत्वम्, शय्यतेऽस्यामिति शय्या=खट्वादिः, भरणं भृत्या=जीविका, ईयते गम्यतेनयेतीत्या=दीपिका ।

`भृञोसंज्ञायाम्' इत्यत्रोक्तम्---`स्त्रियां भावाधिकारोऽस्ति तेन भार्या प्रसिद्ध्यति' इति, इह तु `भाव इति न स्वर्यते' इत्युक्तम्, तत्र पूर्वापरविरोधं मन्यमानः पृच्छति---कथं तदुक्तमिति । परिहरति---भावाधिकार इति । संज्ञायामित्युच्यते, भञ्ञश्च भाव एवोत्पद्यमानेन क्यपा संज्ञा गम्यते अतः संज्ञावशाद्योऽयं भावस्य भृत्याशब्दवाच्यत्वेन व्यापारः स एव तंत्र भावाधिकारो विवक्षितः, न तु शास्त्रीयः स्वरितत्वनिबन्धन इत्यर्थः । संज्ञायामिति वर्तमाने पुनः संज्ञाग्रहणं भावार्थम्, पूर्वकं हि संज्ञाग्रहणं कारकेण सम्बद्धम् । असंज्ञायां तु क्तिन्नेव भवति ।।

कृञः श च ।। 3.3.100 ।।

योगविभाग इति । कृञः क्यब् भवति, ततः श च, चकाराद्यथाप्राप्तं चेति । तेन त्रीणि रूपाणि भवन्ति; अन्यथा चकारेणानन्तरस्य क्यप एव समुच्चयः, न तु क्तिन इति क्तिन्न स्यात् । शकारः सार्वधातुकसंज्ञार्थः, तत्र यदा भावकर्मणोः शस्तदा `सार्वधातुके यक्' `रिङ्शयग्लिङ्क्षु' इति रिङादेशः, अन्यत्र शकार एव परतो रिङादेशः, `अचि श्नुधातु' इत्यादिनेयङ् ।।

इच्छा ।। 3.3.101 ।।

इषेर्धातोरिति । `इषु इच्छायाम्' इत्यस्माद्भावे शप्रत्ययो भवतीति; न त्वकर्त्तरि कारके, स्वभावात् ।

परिचर्येत्यादि । परिचर्यादीनामपि निपातनस्योपसंख्यानम्, परिचर्यादयोऽपि शप्रत्ययान्ता निपातयितव्या इत्यर्थः । तत्र सर्वत्र शप्रत्ययो यक्च निपात्यते । परिचर्या=पूजा । परिसर्या= परिसरणम्, अत्र गुणोऽपि निपात्यते । `मृग अन्वेषणे' चुरादावदन्तः, अत्रातो लोपाभावः; निपातनात् । शे यकिणिलोपः---मृगया । अटतेः शे यकि यका सह टकारस्य द्विर्वचनम्, पूर्वभागे यकारस्य निवृत्तिर्दीर्घत्वमित्येतत्सर्वं निपात्यते । हलादिशेषस्तु नास्ति; षाष्ठिके द्विर्वचनेऽभ्याससंज्ञाविधानाद् । यदा त्वट्यर्त्त्यसूर्णोतीनामिति यङन्तात् `अप्रत्ययात्' इत्यकारः, तदातो लोपे यलोपे चाटाटेति भवति । जागर्त्तेरकारो वेति । वाशब्दात्पक्षे शः, तदा सार्वधातुके यक्, `जाग्रोऽविचिण्णल्ङित्सु' इति गुणः ।।

गुरोश्च हलः ।। 3.3.103 ।।

प्रकृतस्य धातोर्हला विशेषणात्तदन्तविधिरित्याह---हलन्तो यो धातुरिति । अज्विशेषवाचिनो गुरुशब्दस्य हलन्ते धातौ न मुख्या वृत्तिः सम्भवतीति तद्वति तच्छब्दो विज्ञायत इत्याह---गुरुमानिति । विपर्ययस्तु न न भवति---गुर्वन्तो यो धातुर्हल्वानिति; `चेष्टायामनध्वनि' `आशंसायां भूतवच्च' इति निर्देशात् । कुण्डा, हुण्डेति । `कुडि दाहे', `हुडि संघाते' ।।

षिद्भिदादिभ्योऽङ् ।। 3.3.104 ।।

गणपरिपठितेष्विति । गणे तावद्भिदा छिदेत्यङन्ता एव समुदायाः पठ्यन्ते, तेषु भिदिच्छिदिप्रभृतयोऽङः प्रकृतयो यास्ता इह भिदादिशब्देन निर्दिश्यन्त इत्यर्थः । कुत एतत् ? धात्वधिकारात् । भिदादिभ्यो धातुभ्य इति । `भिदिर् विदारणे', `छिदिर् द्वैधीकरणे', `विद ज्ञाने', `क्षिप प्रेरणे', `गुहू संवरणे', `डुधाञ् धारणपोषणयोः', `मिधृ मेधृ हिसासंक्लेशनयोः', `ऋ गतौ', `हृञ् हरणे', `क्षि क्षये', अथ वा `क्षि निवासगत्योः', `तृप्लवनतरणयोः', `धृञ् धारणे', `लिख अक्षरविन्यासे', `चुद प्रेरणे', `पीड अवगाहने', `डुवप् बीजतन्तुसन्ताने', `वस निवासे', `मृजूष् शुद्धौ', `क्रप कृपायाम्' इत्येते वेदितव्याः । जरेति । `ऋदृशोऽङि गुणः' । गुहा गिर्योषध्योरिति । गिरिशब्देन तदेकदेश उच्यते, अन्यत्र गूढिः, क्तिन्नेव भवति । आरा.......धारेति । गुणे कृते दीर्घत्वं च निपात्यते । रेखा, लेखेति । लिखेः पक्षे लकारस्य रेफो निपात्यते, गुणश्च । चूडेति । चुदेर्डत्वं दीर्घत्वं च निपात्यते । मित्तिरन्येति । भिद्यत इति भित्तिः=कुड्यम्, छित्तिः=छिद्रम् । आरा शस्त्र्यामिति । शस्त्री शस्त्रजातिः, स्वभावाच्च विशेषः परिगृह्यते । आरा=प्रतोदः, अर्यन्ते प्रेर्यन्तेऽनयाश्वा इति

कृत्वा । आर्त्तिरन्येति । आङोऽर्तेश्च `उपसर्गादृति धातौ' इति वृद्धिः । धार्यते प्रपात्यते इति धारा । धृतिरन्येति । प्रीतिर्धैर्यं च ।।
चिन्तपूजिकथिकुम्बिचर्चश्च ।। 3.3.105 ।।
युचि प्राप्त इति । सर्वेषामेव ण्यन्तत्वात् । कुम्ब्रा=अग्रम् । `उदीचीनकुम्बां शम्याम्' इति हि दृश्यते । चकारोऽनुक्तसमुच्चयार्थः---तुलयतेस्तुला । अथ `गुरोश्च हलः' इत्यस्यानन्तरं कस्मान्न कृतम्, किमङ्विधानेन ? तत्राऽपि कर्तव्यम्, को न्वत्र विशेषः । अपर आह---अङ्विधानसामर्थ्यात्पक्षे णिलोपो न भवति, चिन्तियेत्यादि भवतीति, नात्राप्तभाषितमस्ति ।।
आतश्चोपसर्गे ।। 3.3.106 ।।
श्रदन्तरोरित्यादि । उपसर्गे यादृशी वृत्तिः प्रत्ययोत्पत्तिलक्षणा तादृश्येव तयोरपि भवतीत्यर्थः । तत्र श्रद्धाशब्दस्तारकादिपाठात्सिद्धः, यदयम् `अन्तर्धौ इत्युसर्गनिबन्धनं किप्रत्ययं निद्दिशति तद् ज्ञापयति---अन्तः-शब्दः उपसर्गवृत्तिरिति । एवं च कृत्वा अन्तर्णयतीति `उपसर्गादसमासेऽपि' इति णत्वमपि भवति ।।
ण्यासश्रन्थो युच् ।। 3.3.107 ।।
ण्यद्भविष्यतीति । ननु वासरूपविधिना ण्यत्स्यात् स चास्त्रियामिति प्रतिषिद्धः ? तत्राह---वासरूपप्रतिषेधश्चेति । उत्सर्गापवादस्येति । समाहारद्वन्द्वः । द्वयोरप्युत्सर्गापवादयोः स्त्र्यधिकारावस्थितयोरित्यर्थः । घट्टिवन्दिविदिभ्यश्चेति । विदिर्लाभार्थो गृह्यते, न ज्ञानार्थः; `विद चेतनाख्याननिवासेषु' इत्यस्यैव चुरादेर्वेदनेति ज्ञाने सिद्धत्वात् । न च वेत्तेः क्तिनो निवृत्त्यर्थं वचनम्; संवित्तिरिति दर्शनात् । अन्वेषणेति । `इष आभीक्ष्ण्ये' `इषगतौ' इति वा । युचश्चकारश्चिन्त्यप्रयोजनः, `उदात्तः' इति हि वर्त्तते तत्सामर्थ्यादन्तोदात्तत्वं भविष्यति; प्रत्ययस्वरैणैवाद्युदात्तत्वसिद्धेः ।।
रोगाख्यां ण्वुल्बहुलम् ।। 3.3.108 ।।
आख्याग्रहणमित्यादि । यदि प्रत्ययान्तं रोगस्य नाम भवति, एवं प्रत्ययो भवति, नान्यथेत्येवमर्थमाख्याग्रहणमित्यर्थः । तेन पदान्तरद्योत्ये रोगे न भवति---बुभुक्षा भस्मकेनेति । भस्मको नाम रोगविशेषस्तत्राशितपीतादिकं शरीरस्य व्यापकं न भवति, सर्वदा च बुभुक्षा भवति । बहुलग्रहणं व्यभिचारार्थमिति । `क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव' इत्ययं व्यभिचारः । प्रच्छदिकेति । विचचिकेति । `चर्च अध्ययने' प्रत्ययोपसर्गाभ्यां रोगप्रतीतिः, पामा विचचिका । शिरोत्तिः=शिरस्तोदः । `अर्द हिंसायाम्', `तितुत्र' इतीडभावः, पूर्वपदस्य रुत्वम्, `अतोरोरप्लुतात्' इत्युत्वम्, आद्गुणः', `एङः पदान्तादति' ।
धात्वर्थनिर्देश इति । क्रियानिर्देश इत्यर्थः ।
इक्श्तपौ धातुनिर्देश इति । धात्वनुकरण इत्यर्थः । बहुलवचनाच्च क्वचिन्न भवति---`गुप्तिज्किद्भ्यः सन्', `मान्वधदान्शान्भ्यः' इति । श्तिपः शित्करणसामर्थ्यादकर्तृवाचिन्यप्येतस्मिन् शबादयो भवन्ति । एवमभावकर्मवाचिन्यपि । क्वचिद्यगपि भवति, यथा---`विभाषा लीयतेः', अत्र लीलीङोर्यका निर्देशः कृतः, श्यनि तु लीङ एव ग्रहणं स्यात्, न तु लीनातेः । कथं पुनः शित्करणस्य सामर्थ्यम्, यावता पिबतिजिघ्रतिरित्यादौ श्तिपि पिबाद्यादेशार्थं ग्लायत्यदावात्वप्रतिषेधार्थं च शित्करणं स्यात् ? एवं तर्हि `उपसर्गात्सुनोतिसुवतिस्यति', `विभाषा लीयतेः', `भवतेर्ण उपसंख्यानम्', `ध्यायतेः सम्प्रसारणं च' इत्येवमादिनिर्देशाच्छबादयो भविष्यन्ति ।
वर्णादिति । वर्णवाचिनो वर्णानुकरणादित्यर्थः, न तु वर्णादुच्चार्यमाणादिति । किं सिद्धं भवति ? ककार इत्यादौ साच्कादपि संघातात्कारः सिद्धो भवति; अकारस्योच्चारणाथत्वेन वर्णमात्रस्यानुकार्यत्वात् । ककारस्येत्संज्ञा प्रत्योजनाभावान्न भवति । बहुलग्रहणाद् `अस्य च्वौ' `यस्येति च' इत्यादौ कारप्रत्ययो न भवति । बहुलवचनादेव क्वचिद्वर्णसङ्घातादनुकरणादपि भवति---एककार इति । अधातु विहितत्वेऽपि कारप्रत्ययस्य कृत्संज्ञाधिकारसामर्थ्याद्भवति । तेन कृदन्तत्वात्प्रातिपदिकसंज्ञा भवति, इडागमस्त्वनार्द्धधातुकत्वान्न भवति । किमर्थं पुनः कारप्रत्ययो विधीयते, यावता करणं कारः, अस्य कारोऽकार इत्येवमस्तु ? नैवं शक्यम्; एवं हि विज्ञायमाने ककारकरणमिति न स्यात्, करोतेः पौनरुक्त्यात् ।
रादिफ इति । कारस्यायमपवादः । कथं तर्हि `रकारादानि नामानि'? वासरूपविधिना कारोऽपि भविष्यति, पूर्ववत्कृत्संज्ञायां प्रातिपदिकत्वम् । मत्वार्थाच्छ इति । मतुना समानार्थो मत्वर्थस्ततः स्वार्थे छः । बहुलवचनादभत्वेऽपि यस्येति लोपः, पूर्ववत्प्रतिपदिकत्वम् । बहुलवचनात्क्वचिन्न भवति, यथा---`तसौ मत्वर्थे' इति । बहुलवचनादेव च मतुबर्थशब्दादपि भवति---शैषिकान्मतुबर्थीयादिति ।
आजिरिति । बहुलवचनाद्वीभावाभावः ।
इक्कृष्यादिभ्य इति । धात्वर्थनिर्देशे ण्वुलोऽपवादः ।।
संज्ञायाम् ।। 3.3.109 ।।
उद्दालः=श्लेष्मतकः, तस्य पुष्पाणि भज्यन्ते यस्यां सा उद्दालपुष्पभञ्जिका । वरणपुष्पाणि प्रचीयन्ते यस्यां वरणपुष्पर्पचायिका ।
अभ्यूषः=पूलिकाऽपूपविशेषः, स खाद्यते यस्यां सा अभ्यूषखादिका । तालस्य भञ्जनं यस्यां सा तालभञ्जिका । एवं शालभञ्जिका ।।
विभाषाख्यानपरिप्रश्नयोरिञ्च ।। 3.3.110 ।।
ननु पूर्वं परिप्रश्नः, पश्चादाख्यानं भवति, तत्कथं क्रमव्युदासेन सूत्रे पूर्वमाख्यानस्य निर्देशः, पश्चात्परिप्रश्नस्य ? तत्राह---पूर्वं परिप्रश्न इत्यादि । सत्यं पूर्वं प्रश्नः पश्चादाख्यानमिति, सूत्रे तु लक्षणवशाद्विपर्यय आश्रित इत्यर्थः । स्वयं तु व्यत्यासेन व्याचक्षाणोऽर्थक्रमेण व्याचष्टे, उदाहरति च । कारिकामिति ।

ण्वुल् । क्रियां कृत्यामिति । `कृञः श च', चकारात्क्यप्च । कृतिमिति । योगविभागात् क्तिन् । गणिमिति । `गण सङ्ख्याने' चुरादिरदन्तः । गणनामिति । युच् । एवमित्यादि । कां पाचिकां, पचाम् । षित्त्वादङ् । पक्तिः---`स्थागापापच' इति क्तिन् । कां याजि याजिकामिम् । कां पाठि पाठिकां पठितिम् । तितुत्रेष्वग्रहादीनामिति वचनादिट् ।।

पर्यायार्हर्णोत्पत्तिषु ण्वुच् ।। 3.3.111 ।।

परिपाटीति । पटेः परिपूर्वात् `इणजादिभ्यः' इति इण् तदन्तात् `कृदिकाराक्तिनः' इति ङीष् । तद्योरयतेति । तच्छब्देन धात्वर्थ उच्यते । परस्मै इति । `धारेरुत्तमर्णः' इति सम्प्रदानसंज्ञा । परस्येति तु पाठे परस्य विस्त्वित्यर्थः । धार्यते=बाध्यते । ग्राममामिकेति । कर्मणि षष्ठ्याः समासः । उदपादीति । `चिण् ते पदः' इति कर्त्तरि चिण् । स्वरार्थमिति । `चितः' इत्यन्तोदात्तत्वं यथा स्यात् । ण्वुलि तु `लिति' इति प्रत्ययात्पूर्वमुदात्तं स्यात् ।।

आक्रोशे नञ्यनिः ।। 3.3.112 ।।

आक्रेशः=शपनम्, न क्षेपः; स्वभावाद् । अकरणिरित्यादिकं शपनवाक्यम् ।।

कृत्यल्युटो बहुलम् ।। 3.3.113 ।।

स्नानीयमिति । करणे कृत्यः । दानीय इति । संप्रदाने अवसेचनादौ कर्मणि ल्युट् ।

प्रस्कन्दनः, प्रपतन इति । कर्त्तरि । बहुलग्रहणं न कर्तव्यम्, आरम्भसामर्थ्यादेव कृत्यल्युटो यत्र विहितास्ततोऽन्यत्र भविष्यन्ति, ततो बहुलग्रहणात् कृन्मात्रस्य स्वार्थव्यभिचारः साधितो भवति । `तयोरेव कृत्यक्तखलर्थाः' `कर्तरि कृत्' इत्ययं त्वर्थनिर्देशः `बाहुल्याद्भावादिषु भवन्ति, क्वचिदेव त्वन्यत्र' इति ज्ञापनार्थः ।

पादहारक इति । कर्मणि ण्वुलि पञ्चम्यन्तस्य साधनं कृतेति समासः । गलेचोपक इति । `अमूर्द्धमस्तकात्' इत्यलुक् ।।

नपुंसके भावे क्तः ।। 3.3.114 ।।

ननु च `तयोरेव कृत्यक्तखलर्थाः' इति नपुंसके भावे क्तः सिद्धः ? सत्यं भूते सिद्धः, कालसामान्ये तु नपुंसके न प्राप्नोतीत्ययमारम्भः । इह सकर्मकेभ्योऽपि यथा भावे घञादयो भवन्ति---ओदनस्य पाकः, ओदनस्य भोजनमिति, तथायमपि क्तः सकर्मकेभ्यो भावे भवति; अत्राकर्मकेभ्य इत्यवचनादिति केचिदाहुः । अथ तदा कर्मणि का विभक्तिर्भवति ? कृद्योगलक्षणा कर्मणि षष्ठी । सा निष्ठायोगे प्रतिषिध्यते ? नपुंसके भावे उपसंख्यानमिति षष्ठी भविष्यति---ओदनस्य भुक्तमुदकस्य पीतमिति । अस्मिन्पक्ष एतदर्थोप्ययमारम्भः, न हि तयारेवेत्यनेन सकर्मकेभ्यो भावे क्तः सिद्ध्यति । अन्ये तु तयोरेवेत्येतदस्यापि क्तस्य विषयव्यवस्थापकं मन्यन्ते । तद्धि `निष्ठा' इति विहितस्य क्तस्य भावमर्थं विद्यत्ते, `अकर्मकेभ्यः' इति च विषयं व्यवस्थापयति । अस्य तु `भावे क्तः' इत्यनुवादेनाकमकेभ्य इति विषयं व्यवस्थापयति ।।

ल्युट् च ।। 3.3.115 ।।

योगविभाग उत्तरार्थ इति । उत्तरत्र ल्युट एवानुवृत्तिर्यथा स्यात्, क्तस्य मा भूदित्येवमर्थम् ।।

कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम् ।। 3.3.116 ।।

कर्तुरिति कर्मणि षष्ठी । `उभयप्राप्तौ कर्मणि' इति नियमाद्येनेति कर्तरि तृतीया, तदाह---येन कर्मणा संस्पृश्यमानस्येति । कस्य शरीरसुखमित्यपेक्षायां कर्तुः सन्निधानात्तस्यैव विज्ञायत इत्याह---कर्त्तुः शरीरसुखमुत्पद्यत इति । किमिदं शरीरस्य सुखमिति ? ननु शरीरव्यतिरिक्तस्यात्मनो धर्मः सुखम् ? सत्यम्; यस्मिन् सुखे समुत्पन्ने शरीरेऽपि स्वास्थ्यमुत्पद्यते तच्छरीरसुखमित्युच्यते । नित्यसमासार्थं वचनमिति । कथं तर्हि `उभयप्राप्तौ कर्मणि' इत्यत्रोदाहृतम्---साधु खलु पयसः पानं देवदत्तेनेति ? यत्र प्रतिकूलतया सुखं नोत्पद्यते तत्र तदुदाहृतं द्रष्टव्यम् । पयः पानं सुखमिति । तत्र पानेन सुखं न स्पर्शेन, इदं तूदाहर्तुमुचितम्---चन्दनानुलेपनं सुखमिति ? नैषदोषः; यत्र संस्पर्शनमन्तरेण न सुखमुत्पद्यते तद्विषयोपलक्षणं संस्पर्शग्रहणम् । तत्र स्पर्शनादेव सुखं भवतु तत्पूर्वकात्पानादेर्वा सर्वत्र भविष्यति ।

तूलिकाया इति । तूलेन निर्मितः कशिपुस्तूलिका, तत्र शयित्वोत्थानं सुखम् । अग्निकुण्डस्योपासनमिति । अत्राग्निकुण्डेनास्पृश्यमानस्यैव सुखम् । गुरोः स्नापनमिति । यद्यप्यत्र गुरुः सुखानुभवस्य कर्त्ता, तथापि न तदत्राश्रितम्; अव्यभिचारात्, किं तर्हि ? ल्युट् प्रकृतौ यत्कर्तृत्वं तदाश्रितम्, तदाह---स्नापयतेर्न गुरुः कर्तेति । मानसी तु प्रीतिरिति । पुत्त्रेण बलवत्परिष्वज्यमानस्य शरीरतोद एव भवति, मानसी तु प्रीतिः । ननु प्रत्युदाहरणेष्वपि सर्वत्र ल्युट् प्रयुज्यते, तत्कथं प्रत्युदाहरणत्वम् ? तत्राह---सर्वत्रासमासः प्रत्युदाह्रियत इति ।।

करणाधिकरणयोश्च ।। 3.3.117 ।।

करणे चाधिकरणे चाभिधेये इति । उपपदे तु करणाधिकरणे न भवतः, करणाधिकरणयोरित्यत एव निर्देशात् । क्रियतेऽनेनेति करणम्, अधिक्रियतेऽस्मिन्नित्वधिकरणमिति करणाधिकरणसाधनौ ह्येतौ । यद्येवम्, सति निर्देशे प्रत्ययविधानम्, सति च प्रत्ययविधाने निर्देश । इतीतरेतराश्रयः प्राप्नोति ? न; नित्यात्वाच्छब्दानां नास्मान्निर्देशात्करणाधिकरणशब्दौस्तः । इध्मप्रव्रश्चन इति । कर्मणि, षष्ठ्याः समासः । दात्रादिरुच्यते । पलाशशातन इति ।। `शद्लृ शातने' हेतुमण्णिच, `शदेरगतौ तः' इति तत्वम् । येन दण्डेन वृक्षस्य पर्णानि पात्यन्ते स एवमुच्यते । गोदोहनी, सक्तुधानी पात्री । योगश्चायं येन नाप्राप्तिन्यायेन घञोऽपवादः । अजपौ स्त्रीप्रत्ययांश्च परत्वाद्बाधते । उक्तं हि ---`अजब्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेन' इति ।।

पुंसि संज्ञायां घः प्रायेण ।। 3.3.118 ।।
दन्तच्छद इति । `छद आवरणे' चुरादिः,`छादेर्घेऽद्व्युपसर्गस्य' इति ह्रस्वः । एत्यास्मिन्कुर्वन्ति व्यवहारमित्याकरः= उत्पत्तिस्थानम् ।।
गोचरसंचरवहव्रजव्यजापणनिगमाश्च ।। 3.3.119 ।।
गावश्चरत्यस्मिन्निति । रूढिशब्दोऽयं विषयपर्यायः, तस्य यथाकथंचिन्निर्वचनम् । तथा च गोचरः, इन्द्रियगोचर इत्याद्यपि । सञ्चरन्तेऽनेति । `समस्तृतीयायुक्तात्' इत्यात्मनेपदम् । सञ्चरः=मार्गः, वहः= स्कन्धः, व्रजः=गोष्ठम्, व्यजः=तालवृन्तम्, आपणः= पण्यस्थानम्, निगमः=छन्दः । अयं योगः शक्योऽवक्तुम्, पूर्वेणैवघः सिद्धः । `हलश्च' इति घञ् कस्मान्न भवति ? प्रायेणग्रहणं तत्रानुवर्त्तते, यथा---कषो निकष इत्यत्र घञ् न भवति, एवं गोचरादिष्वपि न भविष्यति ।।
अवे तृस्त्रोर्घञ् ।। 3.3.120 ।।
अवतारः=रूपादिः, अवस्तारः=जवनिकादिः । नद्यवतारः=तीर्थम् । प्रायेणग्रहणानुवृत्तेरसंज्ञायामपि भवतीति । ननु घञ् विधेयः प्रधानम्, तस्य प्रायग्रहणमुपाधिः, ततश्च संज्ञायामेव क्वचिन्न भवतीत्यर्थः स्यात् ? एवं मन्यते---संज्ञायामित्युपाधेरेव प्रायग्रहणमुपाधिः । उपादेरुपाधिर्भवति, विशेषणस्यैव वा विशेषणमिति तु नाश्रीयते; लक्ष्यानुरोधादिति ।।
हलश्च ।। 3.3.121 ।।
लेखः=लेखनी । वेष्टः= वस्त्रादिः । `विष्ट वेष्टने' । विद्येते ज्ञायेते अनेन धर्माधर्माविति वेदः । अपमृज्यतेऽनेन व्याध्यादिरित्यपामार्गः= वीरुद्विशेषः । वीमार्गः= समूहनी, पूर्ववत्कुत्वदीर्घत्वे ।।
अध्यायन्यायोद्यावसंहाराधारावायाश्च ।। 3.3.122 ।।
आवयन्तीति । एत्यावयन्तीत्यर्थः ।
चकारोऽनुक्तसमुच्चयार्थ इति । `घञ्विधाववहारावायानामुपसंख्यानम्' वार्त्तिकम् । वृत्तिकारस्तु आधारावायशब्दौ सूत्रे प्रक्षिप्य चकारेणावहारशब्दं साधयति स्म, विचित्रा हि वृत्तेः कृतिर्वृत्तिकारेण ।।
उदङ्कोऽनुदके ।। 3.3.123 ।।
तैलमुदयच्यते, उद्ध्रियतेऽस्मिन्निति तैलोदकम्=चर्ममयं भजनम् ।।
घः कस्मादिति । `पुंसि संज्ञायाम्' इत्यादिना घे प्राप्ते घञ्विहितः, ततश्च तेन मुक्ते घ एव भवितुमर्हतीति भावः । विशेषाभावादिति । ननु घे सति प्रत्ययस्वरः घञि ञित्स्वरेणाद्युदात्तः, तत्कथं विशेषाभावः ? स्तत्राह---घञ्यापहीत्यादि ।।
जालमानायः ।। 3.3.124 ।।
`जल घात्ये' इत्यतः `ज्वलितिकसन्तेभ्यो णः' इति णे कृते जालमिति भवति । आनीयन्ते मत्स्यादयोऽनेनेत्यानायः ।।
खनो घ च ।। 3.3.125 ।।
घित्करणं किमर्थम्, यावता न खनः कश्चिदवयवः कुत्वभागस्ति ? ज्ञापनार्थं तु, एतज् ज्ञापयति---अन्येभ्योऽप्ययं भवतीति । तेन भजेर्भगः, पदेः पदम्---करणे घः, `खल सञ्चलने' अधिकरणे घः खल एवमादि सिद्धं भवति । आखनादयः खनित्रवचनाः ।।
ईषद्दुः सुषु कृच्छ्राकृच्छ्रार्थेषु खल् ।। 3.3.126 ।।
तद्दुर इति । `सुदुरोरधिकरणे' इतिनिर्देशाद् दुः शब्दो रेफान्तोऽप्यस्ति । साम्भवादिति । दुर एव कृच्छ्रे सम्भवः इतरयोरेवाकृच्छ्रे, अतः सामान्येनोक्तावपि विशेषणस्य विषयविभागो लभ्यत इति भावः । ईषत्कार्यमिति । मनागित्यर्थे ईषच्छब्दः ।।
कर्तृकर्मणेश्च भूकृञोः ।। कर्त्तरि कर्मणि चोपपदे इति । प्रत्ययार्थत्वं तु कर्तृकर्मणोर्न भवति; चकारस्योपपदसमुच्चयार्थत्वात् । किं च, यदि तयोः प्रत्ययार्थत्वं स्याद् ईषदादिष्वेवोपपदेषु प्रत्ययः स्यात्, तश्च खित्करणमनर्थकंस्याद्; अनव्ययस्य हि नुम् विधीयते । तस्मात्सुष्ठूक्तम्---कर्तरि कर्मणि चोपपदे इति । अत्र चकारः सन्नियोगार्थः क्रियते, यदा कर्तृकर्मणेरीषदादीनां च युगपदुपपदत्वं तदा प्रत्ययो भवति, समासस्तु युगपत्पर्यायेण वा भवति । किं पुनरत्र परमुपपदम् ? कर्तृकर्मणी । कुत एतत् ? खलः खित्करणात् । तद्धिमुमर्थम्, मुमागमश्चानव्ययस्य । तत्रेषदादीनां धातोश्चानन्तर्ये खित्करणमनर्थकंस्यात् । ननु मा भूदीषदो धातोश्चानन्तर्यम्, यत्रैतन्नास्ति---ते प्राग्धातोरिति, यत्र त्वस्ति सुदुरोः, तत्र तयोरेव प्राक् प्रयोगो युक्तः, खित्करणं त्वीषदाढ्यम्भवन्तीम् इत्यादौ मुमर्थं स्यात्, सुदुरोरपि `कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति तत्रापि मुमर्थं स्यात्, यथा `उदिकूले रुजिवहोः' कूलमुद्रुज इति ? वक्तव्योऽत्र परिहारः---कृत्यल्युटो बहुलमिति । बहुलग्रहणं वाऽत्राश्रयणीयम् । ईषदाढ्यम्भवमिति । अनाढ्येन भवता सुखेनाढ्येन भूयत इत्यर्थः । ईवदाढ्यङ्कर इति । अनाढ्यो देवदत्तः सुखेनाढ्यः क्रियत इत्यर्थः । स्वाढ्येन भूयत इति । प्रमाद पाठोऽयम् । अत्र हि खलभावात्सुशब्दस्य धातोः प्राक् प्रयोगेण भाव्यम्, तस्मादाढ्येन सुभूयते इति पाठः ।।
अन्येभ्योऽपि दृश्यते ।। 3.3.130 ।।
अन्येभ्योऽपि चातुभ्यो गत्यर्थेभ्य इति । गत्यर्थेभ्यो येऽन्ये धातवस्तेभ्य इत्यर्थः । अथ वा नञोऽत्र प्रश्लेषः---अन्येभ्योऽपि धातुभ्यः, कोऽर्थः ? अगत्यर्थेभ्य इति ।

भाषायामिति । `छन्दसि' इत्यधिकारादयमारम्भः । `शासु अनुशिष्टौ', `युध संप्रहारे', दृशिर् प्रेक्षणे', `ञिधृषा प्रागलभ्ये', `मृष तितिक्षायाम्'।।
वर्तमानसामीप्ये वर्त्तमानवद्वा ।। 3.3.131 ।।
अत्र केचिद्व्याचक्षते---"समीपस्य भावः सामीप्यम्, भावे ष्यञ्, वर्तमानस्य सामीप्यं वर्तमानसामीप्यम्, षष्ठीसमासः, वर्तमानस्य भूतभविष्यन्तौ प्रति यत्सामीप्यं तत्र वर्त्तमानवत्प्रत्ययातिदेशोऽनर्थकः, ये हि वर्तमाने प्रत्ययास्ते समीपभूतेऽपि तस्मिन् भवन्त्येव, अतो वर्तमानं प्रति भूतभविष्यतोर्यत्सामीप्यं तदत्र वर्तमानसामीप्यमित्युच्यते, समीपद्वारकाच्च वर्तमानस्य सामीप्येनाभिसम्बन्धात्समासो नानुपपन्नः, यथा---देवदत्तस्य गुरुकुलमिति । गुणेन नेति प्रतिषेधोऽपि न भवति; यस्माद्गुणशब्दस्य सम्बन्धिशब्दत्वाद् गुणाक्षिप्तस्य गुणिन एव समासनिषेदः । न च वर्तमानः सामीप्यस्य गुणी, भूतभविष्यतोस्तद्गुणित्वात्" इति । तदिदं क्लिष्टं व्याख्यानम्, ष्यञ्निर्देशश्च केवलं गौरवायैव स्यादित्यन्यथा व्याचष्टे---समीपमेव सामीप्यमिति । न चास्मिन् पक्षे ष्यञो वैयर्थ्यमित्याह---ष्यञः स्वार्थिकत्वं ज्ञाप्यत इति । स्वार्थेऽपि ष्यञ् भवतीति एतमर्थं ज्ञापयितुं ष्यञा निर्देशः कृतः इत्यर्थः । चातुर्वर्ण्यादिसिद्ध्यर्थमिति । आदिशब्देन चातुराश्रम्यम्, अन्यस्य भावोऽन्यभावः, अन्यभाव एवान्यभाव्यमित्येवमादीनां ग्रहणम् । कदा देवदत्त आगतोऽसीति । भूतकालेन प्रश्नः, उदाहरणे भूतकालाभिव्यक्तयेऽयमेष इत्यागमनाविनाभूतं यद्रूपं श्वेतपरिकरबन्धादियुक्तं तद्रूपं प्रतिनिर्दिश्यते । इदानीमागममित्यर्थः । एवं च कदेति प्रश्ने चोत्तरं सङ्गच्छते, सामीप्यं च द्योतितं भवति । आगममिति । लुङ्, मिपोऽम्भावः, लृदित्त्वादङ् । कदा देवदत्त गमिष्यसीति । अत्रापि भविष्यत्कालेन प्रश्न उदाहरणे भविष्यत्कालाभिव्यक्तये । गन्तास्मीति । अनद्यतने लुट् । अत्रापि सामीप्यं यथासम्भवं द्रष्टव्यम् ।
अथ वत्करणं किमर्थम्, यावताऽसत्यपि तस्मिन् प्रत्ययाधिकाराद्वर्तमाने ये प्रत्यया विहितास्ते वर्तमानसामीप्ये भवन्तीत्येषोऽर्थो लभ्यत एव, नार्थो वत्करणेनात आह---वत्करणं सर्वसादृश्यार्थमिति । असति वत्करणे वर्तमाने ये प्रत्यया इत्यनेन प्रत्ययानां रूपमात्रं लक्ष्येत, ततश्च सङ्करोऽपि स्यात्---अन्यस्माद्धातोर्यो वर्तमाने विहितः प्रत्ययः स धात्वन्तरादपि स्यात् । वत्कणे तु सति सर्वसादृश्यावगतेः सङ्करो न भवति । सर्वसादृश्यावगतेः सङ्करो न भवति । सर्वसादृश्यमेव दर्शयति---येन विशेषणेनेति । आदिशब्देनोपाधेरभिधेयस्य च ग्रहणम् । पचमानो यजमान इति । वर्तमाने पूङ्यजोः शानन्विहितः, सामीप्ये स ताभ्यामेव भवति । अलङ्करिष्णुरिति । तच्छीलादिविशिष्टे कर्त्तर्यलम्पूर्वात्कृञ् इष्णुज्विहितः, स सामीप्येऽपि तस्मादेव तत्पूर्वादेव तस्मिन्नेवार्थे भवति ।
परुत् पूर्वस्मिन् संवत्सरे ।
यो हि मन्यते इत्यादिना प्रतिपत्तृविशेषं प्रति प्रकरणं प्रत्याचष्टे । कालान्तरगतिस्त्विति । कालान्तरं वर्तमानसमीपो भूतो भविष्यंश्च कालः तस्य या गतिः= प्रतीतिः सा `अयं गच्छामि' इत्यतो वाक्यात् `कदा देवदत्त गमिष्यसि' इत्यस्योत्तरत्वेन प्रयुक्ताद्भवति, ततः किमित्यत्राह---न चेति ।
वाक्यार्थप्रतिपत्तारमिति । वाक्यार्थोऽयं न पदार्थ इति यः प्रतिपद्यते स वाक्यार्थप्रतिपत्ता, कर्मणि षष्ठ्याः समासः । `कर्तरि च' इति प्रतिषेधस्त्वनित्यः; `जनिकर्त्तुः' इति निर्देशात्, शेषषष्ठ्या वा समासः । प्रकरणमिति । इत आरभ्याष्टडसूत्री प्रकरणशब्देनोच्यते । तथा च श्वः करिष्यतीत्यादि । यदि वाक्यगम्योऽपि कालः पदसस्कार उपयुज्यते, तदा नैवमाद्युपपद्यते---अनद्यतने लुटैव भवितव्यमिति कृत्वा ।।
आशंसायां भूतवच्च ।। 3.3.132 ।।
तस्याश्च भविष्यत्कालो विषय इति । भविष्यत्कालोऽस्येति भविष्यत्कालो धात्वर्थः, स आशंसाविषयः, सा तु वर्तमानकालैव । एवं च सामर्थ्याद्भविष्याद्विषयोऽयमतिदेशो विज्ञायत इत्याह---भविष्यत्काल इति । आशंसायां गम्यमानायामिति । आशंस्यमानक्रियावचनाद्धातोरित्यर्थः । उपाध्याश्चेदित्यादिकमांशसावाक्यम्, तत्रोपाध्यायागमनं व्याकरणाध्ययनं चोभ्यमाशंस्यमानमित्युभयत्रापि प्रत्ययः । अध्यगीष्महीति । `विभाषा लुङ्लृटोः' इति इङोः गाङादेशः, `गाङ्कुटादिभ्यः' इति सिचो ङित्त्वम्, घुमास्थादिसूत्रेणेत्वम् ।
सामान्यातिदेशे इति । अत्र सूत्रे भूतशब्देन भूतमात्रमुच्यते, न तु तद्विशेषोऽनद्यतनः । सामान्यातिदेशे च विशेषो नातिदिश्यते, व्राह्मणवदस्मिन्क्षत्रिये वत्तितव्यमित्युक्ते ब्राह्मणमात्रप्रयुक्तं कार्यंगम्यते, न तु माठरादिविशेषप्रत्युक्तम्, तेनानद्यतनप्रयुक्तौ लङ्लिटौ न भवतः । इहानिष्पन्ने निष्पन्नशब्दः शिष्यः शासितव्यः, देवश्चेद्वृष्टो निष्पन्नाः शालय इति वस्तुस्वरूपकथनमेतत्, नात्राशंसा, तेन सूत्रेणाप्राप्तिः ? नैष दोषः; अप्शालिबीजसंयोग एव निष्पत्तिः शालीनां तत्रैव निष्पत्तेर्वृत्तेः । अत एव लोको भविष्यद्वाचिनः शब्दस्य प्रयोगं न मृष्यति । देवश्चेद्वृष्टः सम्पत्स्यन्ते शालय इति उक्ते, वक्तारो भवन्ति---मैवं वोचः, सम्पन्नाः शालय इति ब्रूहीति, हेतुभूतकालसम्प्रेक्षितत्वात्सिद्धम् । हेतुभूतस्य वर्षादेर्यः कालः स एव कार्यस्य सम्प्रेक्षितः स एव कार्यस्यापि कालो व्यवस्थाप्यते कारणान्तरापेक्षाभावप्रतिपादनाय । ततश्च कारणस्यैव कार्यरूपेण विवक्षितत्वादभेदाध्यवसायात्कारणस्य भूतत्वात्कार्यस्यापि भूतत्वं सिद्धमित्यर्थः ।
इह तु कश्चिदध्वानं जिगमिषुः पश्यति अमुष्मिन्नवकाशे कूपो भविष्यतीति, अनद्यतने कूपो भवितेति समासाद्य कूपोऽस्तीति, अतिक्रम्यकूपोऽभूदिति, अतिक्रम्योषितत्वात् कूप आसीदिति, अतिक्रम्याषित्वा विस्मृत्य कूपो बभूवेत; तदत्र सर्वत्र कूपसत्ताया वतेमानत्वं भूतभविष्यद्रूपत्वमिति सर्वत्र लडेव प्राप्नोति, लुङादयस्तु वक्तव्याः ? तदाह---`अस्त्यर्थानां भवन्त्यर्थे सर्वा विभक्तयः कर्तुविद्यमानार्थत्वात्' इति । भवन्तीशब्दो लटः पूर्वाचार्याणां संज्ञा । यदि वचनेन वर्तमान एव लुङादयो विधीयन्ते कूपोऽभूदिति प्रयोक्तव्ये कूपो भविष्यतीत्यपि प्रयुज्येत, तस्माद्यथास्वमेता विभक्तयः कालेषु प्रयुज्यन्ते । कथम् ? इन्द्रियव्यापारस्य कालस्य कूपसत्तां प्रति भेदकत्वेनाश्रयणात्तस्या अपि तत्कालत्वम्; ततश्चेन्द्रियव्यापारे भाविनि भविष्याद्विभक्तिः, वर्तमाने वर्तमानविभक्तिः, भूते भूतविभक्तिरिति सिद्धमिष्टम् । उक्तं च---
सत्तामिन्द्रियसम्बन्धात्सैव सत्ता विशेष्यते ।

भेदेन व्यवहारो हि वस्त्वन्तरनिबन्धनः ।।
अस्तित्वं वस्तुमात्रस्य बुद्ध्या तु परिगृह्यते ।
यः समासादनाद्भेवः स तत्र न विवक्षितः ।। इति ।।
क्षिप्रवचने लृट् ।। 3.3.133 ।।
वचनग्रहणं पर्यायार्थमिति । असति तस्मिन् `स्वं रूपं शब्दस्य' इति वचनात्क्षिप्रशब्द एवोपपदे स्यात्, सति तु पर्यायेष्वपि भवति । ननु भूतवच्चेत्यस्यायमपवादः, स च भविष्यत्कालविषयस्तत्र नेत्येव वक्तव्यम्, तस्मिन्प्रतिषिद्धे `लृट् शेषे च' इत्यनेनैव लृट् सिद्धः, तत्किं लृड्ग्रहणेन ? तत्राह---नेति वक्तव्ये इत्यादि । नेत्युच्यमाने `लृट् शेषे च' इत्यनेन लृड् भवन्ननद्यतने न स्यात्; लुटा बाधितत्वाद् । अतो लुड्विषयोऽपि यथा स्यादिति लृड्ग्रहणं क्रियत इत्यर्थः ।।
आशंसावचने लिङ् ।। 3.3.134 ।।
अधीयीयेति । इङो लिङः `इचोऽत्', सीयुट्, लिङः सलोपः, धातोरियङ्, उपसर्गेण सह सवर्णदीर्घत्वम् । क्षिप्रवचने लृट्, आशंसावचने लिङ् विप्रतिषेधेन । क्षिप्रवचने लृडित्यस्यावकाशः---क्षिप्रमध्येष्यामह इति, आशंसावचने लिङित्यस्यावकाशः---आशंसे युक्तोऽधीयीयेति; इहोभयं प्राप्नोति---आशंसे क्षिप्रमधीयीयेति, लिङ् भवति विप्रतिषेधेन । तदेतदुदाहरणे दर्शयति---आशंसे क्षिप्रमधीयीयेति ।।
नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः ।। 3.3.135 ।।
कालानां सामीप्यमिति । `वर्तमानसामीप्ये' इत्यारभ्य कालप्रायत्वादस्य प्रकरणस्य सामान्येनोक्तावपि कालसम्बन्धिन एव सामीप्यस्याश्रयणमिति भावः । लुल्यजातीयेनेति । तत्रैव लोके सामीप्यव्यवहारादिति भावः । अदादिति । `गातिस्था' इत्यादिना सिचो लुक् । अध्यापिपदिति । इङो णिच्, `क्रीङ्जीनां णौ' इत्यात्वम्, `अर्त्तिह्री' इत्यादिना पुक्, लुङि चङि `अजादेर्द्वितीयस्य' इति पिशब्दस्य द्विर्वचनम्, णिलोपः ।
येयं पौर्णमास्यतिक्रान्तेति । पोर्णमास्यन्तरेणाव्यवहिता या पौर्णमासी तामधिकृत्येदमुच्यते । सापि यद्यप्यमावास्ययान्याभिश्च तिथिभिर्व्यवहिता; तथापि तुल्यजातीयेन पोर्णमास्याख्येनाव्यहितत्वात्समीप्यं नातिवर्त्तते । आधितेति । दधातेराङ्पूर्वस्य `स्थाघ्वोरिच्च' इतीत्त्वम्, `ह्रस्वादङ्गात्' इति सिचो लोपः । अयष्टेति । `झलो झलि' इति सिचो लोपः, व्रश्चादिसूत्रेण षत्वम् । अदितेति । ददाते रूपं पूर्ववत् । यक्ष्यते इति । व्रश्चादिषत्वे `षढोः कः सि' इति कत्वम्, सर्वत्र `स्वरितञितः' इत्यात्मनेपदम् ।
इह क्रियाप्रबन्धसामीप्ययोरद्यतनप्रत्ययौ लुङ्लृटौ इष्येते, नानद्यतनप्रत्ययौ लङ्लृटौ, तौ च लुङ्लृटौ `अद्तनवत् क्रियाप्रबन्धसामीप्ययोः' इत्यच्यमानेऽपि सिद्ध्यत एव, किमर्थं द्वौ प्रतिषेधावुच्येते ? इत्यत आह---द्वौ प्रतिषेधाविति । यथाप्राप्तस्येति । यथा येन प्रकारेण प्राप्तं प्राप्तिर्यस्येति बहुव्रीहिः । अव्ययीभावे त्वम्भावः स्यात् । इहाद्यतनवचने सति विधानमिदं विज्ञायते, तत्र लड्विधिप्रसङ्गे पूर्वविधाने ह्यद्यतनसंशब्दनेन विहितस्य कस्यचित्प्रत्ययस्याभावादद्यतने दृष्टस्यातिदेशः, लट् चाप्यद्यतने दृष्टस्तेन तस्यापि भूतभविष्यतोः प्रसङ्गः, लुङ्लृटोश्चायथाकालं विधिः प्रसज्येत---लुङो विषये लृट्, लृटश्च विषये लुङ् । ननु च वत्करणात्सादृश्यार्थात्सङ्करो न भविष्यति ? नैतदस्ति; इह लुङ्लृटौ भूतभविष्यतोरद्यतने च दृष्टौ, तत्राद्यतनवदित्युच्यमाने तस्मिन्नेवाद्यतने तयोरतिदेशोऽनथक इति कश्चिदंशो हातव्यः । तत्राद्यतनांशत्यागेनातिदेशे विज्ञायमाने भूतानद्यतने लुङ्, भविष्यदनद्यतने लृडिति सिद्धम् । यदा तु भूतभविष्यदशपरित्यागेनातिदेशः; तदा भूताद्यतने दृष्टस्य भविष्यदद्यतने, भविष्यदनद्यतने च दृष्टस्य भूताद्यतने विधानमिति सङ्करः स्यादेव, लट् चोभयत्र प्रसज्येत । वत्करणंतु यस्माद्धातोर्यस्मिन्नुपाधौ यः प्रत्ययो विहितः स तस्मादेव तस्मिन्नुपाधावेव यथा स्यादित्येवमर्थं स्यात् । तेन---`पूङ्यजोः शानन्' इत्यादौ कालव्यत्यास एव भवति, न धात्वादिव्यत्यासः । यदि पुनरयं द्वौ प्रतिषेधौ कृत्वा तूष्णीमास्ते, स्वैरेव विधायकैर्लडादय उत्सर्गाः स्वेषु स्वेषु कालेषु अपवादविनिर्मुक्तेषु भवन्तीति न सङ्करप्रसङ्गः । अतो यथाप्राप्तस्याभ्यनुज्ञानान्नायं वतिः; किं तर्हि ? मतुप्---अनद्यतनमस्यास्तीत्यनद्यतनवत्, सामान्यविवक्ष्यां नपुंसकत्वम् । अनद्यतनवत्प्रत्ययविधिर्न भवतीति । अस्याप्यनद्यतनवांश्चासौ प्रत्ययश्च तस्य विधिरित्यर्थ इति सर्वथा यदनद्यतने विहितं तत्सर्वं न भवति । वत्तौ `लङ्लुटौ विहितौ तयोः प्रतिषेधः' इत्युपलक्षणम् ।।
भविष्यति मर्यादावचनेऽवरस्मिन् ।। 3.3.136 ।।
अक्रियाप्रबन्धार्थमसामीप्यार्थं च वचनमिति । `क्रियाप्रबन्धसामीप्ययोः' इति नानुवर्त्तते, तदनुवृत्तौ हि नियमार्थमेतत् स्याद्---भविष्यत्येव मर्यादावचन एवावरस्मिन्नेवेति वा । विधिनियमसम्भवे च विधिरेव ज्यायानिति भावः । मर्यादावचने सतीति । मर्यादोक्तौ सत्यामित्यर्थः । वचनग्रहणमभिविध्यर्थम्, वचनग्रहणे हि सति मर्यादामात्रवचने मर्यादावचन इत्यर्थो भवति । सैव हि मर्यादा यदा कार्येणाभिसम्बद्ध्यते तदा `अभिविधिः' इत्युच्यते ।
अवरस्मिन्प्रविभाग इति । अपरभागविषयश्चेद्धात्वर्थो भवतीत्यर्थः, अपरस्मिन्निति वचनाद्यस्य मर्यादा तस्य द्वौ भागौ कल्पयितव्याविति गम्यते । गन्तव्य इति । अध्वगमनस्य भविष्यत्वं दर्शयँस्तत्र कर्त्तव्यस्य भोजनादेर्भविष्यत्त्वं दर्शयति । तस्य यदपरमिति । अनेनाध्वनो विभागो द्विरित्यनेनापि क्रियाप्रबन्धाभावो द्विरेव, नानवरतमिति ।
योऽयमध्वागत इति । भूतकालतां दर्शयति । अध्यैमहीति । इङो लङ्, शपो लुक्, `आडजादीनाम्', `आटश्च'। अभुञ्ज्महीति । `भुजोऽनवने' इत्यात्मनेपदम्, `श्नसोरल्लोपः', चुत्वम् ।
तत्र उत्तरसूत्रे विशेषं वक्ष्यतीति । अनहोरात्राणामित्यनेन ।।

कालविभागौ चानहोरात्रणम् ।। 3.3.137 ।।
कालमर्यादाविभागे सतीति । मर्यादा च विभागश्च मर्यादाविभागम्---समाहारद्वन्द्वः, तेन कालशब्दस्य षष्टीसमासः । न चेदहोरात्रसम्बन्धी विभाग इति । एतेनानहोरात्राणामिति सम्बन्धसामान्ये षष्ठी, न `कर्तृकर्मणोः' इति दर्शयति । एवं सति यदिष्टं सिद्धं तद्दर्शयति---तैरिति । तैरन्यस्य कालस्य विभागोऽन्येन वा तेषां तैरेव वा सर्वथा प्रतिषेधः । ननु पूर्वसूत्रे एवानहोरात्राणामिति वक्तव्यम्, एवमपि हि सामर्थ्यात्कालविभागस्यैव प्रतिषेधो विज्ञायते, न हि देशविभागस्याहोरात्रैः सम्बन्धोऽस्ति, तत्किं योगविभागेन ? तत्राह---योगविभाग उत्तरार्थ इति । उत्तरसूत्रे कालविभाग एव विभाषा यथा स्याद्, देशविभागे मा भूदिति । आग्रहायणी=मार्गशीर्षी ।
त्रिविधमुदाहरणमिति । प्रथमं तैविभागस्य, द्वितीयं तेषां विभागस्य, तृतीयं तैस्तेषामहोरात्रसंस्पर्शे = अहोरात्रगन्धे, एतच्च प्रसज्यप्रतिषेधसमाश्रयणाल्लभ्यते । दर्शितश्च प्रसज्यप्रतिषेधः `न चेदहोरात्रसम्बन्धी विभागः' इति; अन्यथा `अनहोरात्रसम्बन्धिनि विभागः' इत्यवक्ष्यत् ।।
लिङ्निमित्ते लृङ् क्रियातिपत्तौ ।। 3.3.139 ।।
कुतश्चिद्वैगुण्यादिति । प्रतिबन्धकोदयः सामग्रीवैकल्यं वा वैगुण्यम् । दक्षिणेन मार्गेण न शकटं पर्याभविष्यदिति । तस्यमार्गस्य ऋजुत्वात्स्थाण्वादेरभावाच्च । पर्याभवनम्=भङ्गः । कमलकः=कश्चित्पुरुषः, स शकटादीनां विषमेष्वपि स्थानेषु मुसलाद्यवष्टम्भयोगेन नेता । अमोक्ष्यत भवान् घृतेनेति । घृतमात्रस्यातिपत्तौ भोजनक्रियाभिनिर्वृत्तावपि लृङ् भवति; कारणभेदाद्विभिन्नैव भोजनक्रिया, ततो घृतातिपत्तौ घृतभोजनक्रियाप्यतिपन्नैव । भविष्यत्कालविषयमेतद्वचनमिति । कथं तर्हि भविष्यतोऽर्थस्येदानीमवगतिस्तत्राह---भविष्यदपर्याभवनमिति । हेतुमत् तत्र हेतुभूतमिति । एतेन लिङ्निमित्तं हेतुहेतुमद्भावं दर्शयति । लिङ्गेन बुध्वेति । असकृत्प्राक्कमलकाह्वाने सति शकटापर्याभवनं दृष्ट्वा भाविनोऽपि कमलकाह्वानस्य शकटापर्याभवनं दृष्ट्वा भाविनोऽपि कमलकाह्वानस्य शकटापर्याभवनहेतुभूत्वं लिङ्गेन बुध्वा । लिङ्गं पुनः कमलकाह्वानत्वम् । `भविष्यत्कमलकाह्वानमपि शकटापर्याभवनस्य हेतुः कमलकाह्वानत्वात्पूर्वकमलकाह्वानवत्' इति एवं बुध्वेत्यर्थः । तदतपत्तिमिति । प्रकरणाद् द्विचनान्तस्य समासः, तयोराह्वानापर्याभवनयोरतिपत्तिमित्यर्थः, तत्र कमलकस्य देशान्तरगमनादिना तदाह्वानस्यातिपत्तिरवसीयते; तदतिपत्त्यैव च पर्याभवनस्याप्यति पत्तिः, शकटस्य गुरुतरभारारोपणादिना । भविष्यत्कालयोरतिपत्तिरितो वाक्याद् गम्यति इति । नेदानीं कमलक आह्वातुं शक्यते, तच्च शकटमपि पर्याभविष्यत्येवेत्यवगमात् ।।
भूते च ।। 3.3.140 ।।
अन्नार्थी चङ्क्रम्यमाण इति । भोक्तुकामः क्षुधा कुटिलं गच्छन्नित्यर्थः । अपरश्च द्विजो ब्राह्मणार्थीति । चङ्क्रम्यमाणो दृष्ट इत्यनुषड्गः । ब्राह्मणार्थो भोक्तारं मार्गयमाण इत्यर्थः । सोऽपि संभ्रमात्कुटिलं गच्छति । ततः किमित्यत आह---यदीत्यादि । यदि दृष्टोऽभविष्यदिति क्वचित्पठ्यते तत्तु `यदायद्योरुपसंख्यानम्' इति यदिलिङ्निमित्तत्वात् लृङ्, किं तूत्तरसूत्रेण विकल्पितः । दृष्ट इत्येव तु पाठो युक्तः । न तु भुक्तवानिति । क्रियातिपत्तिं दर्शयति । तत्र हेतुः---अन्येन पथा स गत इति ।।
वोताप्योः ।। 3.3.141 ।।
वा आ उताप्योरिति आङः प्रश्लेषं दर्शयति । तत्राङ उताप्योरित्यनेन सम्बन्धादल्पापेक्षत्वेनान्तरङ्गत्वाद्वा पूर्वं परेण सहाद्गुणे कृते पूर्वं प्रत्यन्तवद्भावाद् `ओमाङोश्च' इति पररूपम्, यथा---आ+ऊढा = ओढा, अद्य ओढा अद्योढा, कदोढेति । अत्रोताप्योः समर्थयोरिति यत्सप्तम्यन्तं तदवधित्वेनापादीयते, तत्र प्रकृतिवदनुकरणं भवतीत्यनुकरणस्याप्यप्रत्यय इति प्रतिषेधेनाप्रातिपदिकत्वादाङोऽपि योगे पञ्चम्यभावः । मर्यादायामाङिति । एतच्च विभाषा गर्हाप्रकृतौ प्रागुतापिभ्यामिति स्मरणादवसीयते । गर्हाप्रकृतौ गर्हाविशिष्टे प्रकृत्यर्थे । गर्हाग्रहणमनवक्लृप्त्यादेरपि लिङ्निमित्तस्योपलक्षणम् । `विभाषा कथमि लिङ्च' इति लिङ्निमित्ताभावादुत्तरसूत्रातिक्रमः ।।
गर्हायां लडपिजात्वोः ।। 3.3.142 ।।
कालसामनये न प्राप्नोतीति । विधीयते इत्यनेन भविष्यतीत्यादेः कालविशेषवाचिनो निवृत्तिं सूचयन् कालसामान्ये विधिरिति दर्शयति । कालविशेषविहितांश्चेत्यादि । भाष्ये त्वेष निर्णयः---`गर्हायां लड्विधानानर्थक्यम्, क्रियासमाप्तेरविवक्षितत्वात् । ताच्छील्यप्रतिपादनेनात्र गर्हा, ततश्च यदनेन क्रियते तत्सर्वं वृषलयाजनार्थमिति सर्वदासौ वृषलं याजयन्नेव भवति, ततश्च क्रियायाः समाप्तिरविवक्षितेति `वर्तमाने लट्' इत्येव सिद्धः । यद्येवम्, शतृशानचावपि प्राप्नुतः, दृश्येते च शतृशानचावपि मां याजयन्तं पश्यत, अपि मां याजमानं पश्येति, प्रत्युत सूत्रारम्भे सत्यवर्त्तमानकालविहितत्वाल्लुटस्तौ न न प्राप्नुत इति दोषवानेन सूत्रारम्भः' इति ।।
विभाषा कथमि लिङ् च ।। 3.3.143 ।।
विभाषाग्रहणमित्यादि । स्वस्मिन् स्वस्मिन् काले ये लृडादयो विहितास्तेषां च बाधा मा भूदित्येवमर्थमित्यर्थः । यद्येवम्, विभाषाग्रहणादेव लडपि भविष्यति, नार्थश्चकारेण ? सत्यम्; वर्त्तमाने सिद्ध्यति, कालान्तरे तु न सिद्ध्यति तस्मात्तदर्थश्चकारेण लटः गमुच्चयः । अत्र लिङ्निमित्तमस्तीति । कथमीत्येतद्गर्हा च ।।
किंवृत्ते लिङ्लृटौ ।। 3.3.144 ।।
`किंवृत्ते लिप्सायाम्' इत्यत्र किंवृत्तं व्याख्यातम् । इह किंवृत्ते लृट् चेति वक्तव्यम्, चकारात्प्रकृतो लिङ् भविष्यति, नार्थो लिङ्ग्रहणेन ? तत्राह---
लिङ्ग्रहणमिति । चकारेण लिङ इव लटोऽपि समुच्चयः स्यात्; तस्यापि प्रकृत्वात्, तस्मात् तन्निवृत्त्यर्थमिति भावः ।।

अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ।। 3.3.145 ।।

अपिग्रहणं शक्यमकर्त्तुम्, कथम् ? यथा `उपकादिभ्योऽन्यरस्यामद्वन्द्वे' इत्यत्राद्वन्द्वग्रहणं द्वन्द्वाधिकारनिवृत्त्यर्थम्, तथेहाप्यकिंवृत्तग्रहणं किंवृत्ताधिकारनिवृत्त्यर्थम्, अस्मिन्नवृत्ते किंवृत्ते चाकिंवृत्ते च प्रत्ययद्वयं भविष्यति, तत्क्रियते विस्पष्टार्थम् । तथाऽकिंवृत्त इत्यपि विस्पष्टार्थमेव, अस्वरितत्वादेव `किंवृत्ते' इत्यस्याननुवृत्तेरविशेषेण प्रत्ययद्वयं भविष्यति । आह च---किंवृत्तस्यानधिकारादुत्तरत्राकिंवृत्तग्रहणानर्थक्यमिति । नु चाकिंवृत्तग्रहणेन किंवृत्तादन्यत्पदं पर्युदासाश्रयणेन गृह्यते, तस्योपपदसञ्ज्ञां वक्ष्यामीत्यकिंवृत्तग्रहणं स्यात् । किं पुनरुपपदसंज्ञायाः प्रयोजनम् ? समासः ? न; अतिङिति प्रतिषेधात् । यदा तर्हि लृटः सत्संज्ञकौ भवतस्तदा समासो यथा स्यात्, नास्य लृटः सत्संज्ञकौ भवतः, `लटः सद्वा' इत्यत्र भविष्यतीत्यधिकाराद्भविष्यतीत्येवं विहितस्य लृटो ग्रहणम् । अयं तु कालमात्रे विधानाद्यद्यपि भवति, तथापि भविष्यदधिकारविहितो न भवतीति नास्य शतृशानचौ भवतः ।।

किंकिलास्त्यर्थेषु लृट् ।। 3.3.146 ।।

समुदाय उपपदमिति । केवलस्य किंशब्दस्यानवक्लृप्त्यमर्षयोर्वृत्त्यसम्भवात् । लिङोऽपवाद इति । पूर्वेणाप्रप्तस्य । अस्तितामेत्यादि । भवत्कर्तृकं वृषलयाजनमस्तीत्यर्थः । उक्तं हि `पच्यादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति' इति ।।

जातुयदोर्लिङ् ।। 3.3.147 ।।

लृटोऽपवाद इति । अनवक्लृप्त्यादिसूत्रेण लिङ्लृटोर्द्वयोरपि प्राप्तयोर्लिङेव यथा स्यात्, लृण्मा भूदित्यवमर्थ इत्यर्थः ।
यदायद्योरुपसङ्ख्यानमिति । सूत्रवत् लृटोऽपवादः ।।

यच्चयत्रयोः ।। 3.3.148 ।।

लृट एवापवाद इति । पूर्ववत्प्राप्तस्य । एवकारः पौनर्वचनिकः । योगविभाग उत्तरार्थ इति । उत्तरत्र यच्चयत्रयोरेवानुवृत्तिर्यथा स्यात्, जातुयदोर्माभूदिति । इहानवक्लृप्त्यमर्षौ द्वौ, यच्चयत्रयोरित्युपपदे अपि द्वे एव, ततश्च यथासङ्ख्यं प्राप्नोति ? तत्राह---यथासङ्ख्यमिह नेष्यते इति ।
पूर्ववल्लक्षणव्यभिचारचिह्नात् बह्वचः पूर्वनिपातात् ।।

गर्हायां च ।। 3.3.149 ।।

दरिद्रश्चेद्वृषलयाजनमपि युक्तं स्यात्, तत उक्तम्---ऋद्धइति । ऋद्धस्याप्युपभोगबाहुल्येन सम्भाव्येत, अत उक्तम्---वृद्ध इति । वृद्धस्यापि जातिमात्रब्राह्मणस्य युक्तं स्यात्, अत उक्तम्---सद्ब्राह्मण इति । सद्वंशजः सदाचारश्चेत्यर्थतो गर्हामर्ह इति ।।

शेषे लृजयदौ ।। 3.3.151 ।।

यच्चयत्राभ्यामिति । चित्रीकरणापेक्षस्तु शेषो न भवति, तस्येह स्वरितत्वेनाधिकारात् । आश्चर्यं यदि स भुञ्जीतेति । अत्रानवक्लृप्तिराश्चर्यं च द्वयं गम्यते, तत्राश्चर्यनिमित्ते लृटि प्रतिषिद्धे जातुयदोर्लिङ्विधाने यदायद्योरुपसङ्ख्यानमित्यनवक्लृप्तौ लिङ् । भाष्ये तु "सम्भावनार्थो यदिशब्दः प्रयुज्यते, ततश्च सम्भावनमत्र तात्पर्यार्थः, न चित्रीकरणम्; ततश्चायदाविति न वक्तव्यम्, लिङपि `सम्भावनेऽलम्' इत्यनेनैव" इत्युक्तम् । यदाह---चित्रीकरणे यदिप्रतिपेधानर्थक्यमर्थान्यत्वादिति ।।

उताप्योः समर्थयोर्लिङ् ।। 3.3.152 ।।

समर्थयोरिति । सूत्रे समशब्दस्य निपातनाद् `अतोलोपः' शकन्ध्वादित्वाद्वा पररूपत्वम् । संशब्द एव वा वृत्तौ समशब्देन समानार्थः, यथा---`प्रोपाभ्यां समर्थाभ्याम्', यथा---मुखसंमुखस्येत्यत्रेति भावः ।
प्रश्नः प्रच्छादनं च गम्यत इति । आद्ये प्रश्नो गम्यते, द्वितीये प्रच्छादनम् । ननु चापिशब्दोऽपि प्रश्ने दृष्टः---`अप्यग्रणीर्मन्त्रकृतृमृषीणाम्' अपि प्रसन्नं हरिणेषु ते मनः' इति ततश्च प्रश्नेऽपि समानार्थत्वमनयोरिति उत दण्जः पतिष्यतीति प्रत्युदाहरणानुपपत्तिः ? एवं मन्यते---अप्यग्रणीरित्यादौ प्रष्टव्यमर्थान्तरमपेक्ष्य समुच्चयार्थ एवापिशब्दः, प्रश्नस्त्वर्थः प्रकरणादिना गम्यते; तेन नानयोः प्रश्ने समानार्थत्वमिति ।।

कामप्रवेदनेऽकच्चिति ।। 3.3.153 ।।

स्वाभिप्रायाविष्करणं कामप्रवेदनमिति । एतदेवावयवार्थप्रकाशनेनोपपादययति---काम इच्छेति ।
माराविद त्वां पृच्छामीति । माराविशब्दं ददातीति माराविदः, माराविं रवो माकारीत्यर्थः । संज्ञैषा शुकविशेषस्य, तं हस्ते निधाय कश्चिल्लालयति । पार्वत्यपि शुकस्यैव काचिदिष्टा । प्रायेण तु मातापितरौ पृच्छामीति पाठः, तत्र तदुपक्रमं वाक्यम्---मातापितरौ पृच्छामि । किमत्र पृच्छ्यते ? कच्चिज्जीवति ते मातेति ।।

संम्भावनेऽलमिति चेत्सिद्धाप्रयोगे ।। 3.3.154 ।।

योग्यताध्यवसानमिति । योग्यताया निश्चयः । एतदेव स्फोरयति---शक्तिश्रद्धानमिति । शक्तिः= सामर्थ्यम्, श्रद्धीयते विषयीक्रियते येन ज्ञानेन तत्तथोक्तं तदिति । सम्भावनपर्याप्त्येत्येतेन पर्याप्ताविहालंशब्दः, न भूषणादावित्याह---यद्येवं सम्भावन इति । सप्तम्यन्तस्य कथमलमिति चेदित्येद्विशेषणमुपपद्यत इत्याशङ्क्य विपरिणामेन व्याचष्टे---तच्चेत्सम्भावनमिति । सम्भावनमलमिति चावर्तते---सम्भावने लिङ् भवति तच्चेत्सम्भावनमलमात्मकं भवतीति । एवं पर्यवसानेनालमा सम्बन्धः, अतोऽत्रेतिशब्दो न सम्बन्धनीयः । ततोऽलमित्यस्मिन् सिद्धाप्रयोगे सतीत्यन्वयः । अत्र चेच्छब्दो न सम्बन्धनीयः; सप्तम्यन्तेन

सम्बन्धासम्भवात् । वृत्तौ तु वस्तुमात्रं दर्शितम्---सिद्धश्चेदलमोऽप्रयोग इति, न पुनरत्र चेच्छब्दस्यान्वयः । पर्याप्तमिति । स्वकार्यनिर्वर्त्तने समर्थम्, स्वकार्यं पुनस्तस्याविपरीतमविषयपरिच्छेदः, तद्दर्शयति---अवितथमिति । अतथाभूतार्थविषयत्वं ज्ञानस्य वैतथ्यम्, यथा---शुक्तिकायां रजतज्ञानस्य; तद्विपरीतमवितथम्, तथाभूतार्थविषयमित्यर्थः । तदीदृशसम्भावनोपाधिक इति । तदिति वाक्योपन्यासे ईदृशमलमर्थविशिष्टं सम्भावनमुपाधिर्यस्येतेि त्रिपदो बहुव्रीहिः । क्वचित्तुईदृशे सम्भावनोपाधक इत्यसमासः पठ्यते, तत्रेदृश इति न सङ्गच्छते; न हि धात्वर्थस्य किञ्चिद्रूपं प्राङ्निदर्शितं यदीदृशमित्युच्येत । सर्वलकाराणमपवाद इति । सम्भावनस्य भविष्यद्विषयत्वाद्भविष्यद्विषयाणां सर्वलकाराणामित्यर्थः । अपि पर्वतं शिरसा भिन्द्यादिति । अत्र यत्पर्वतभेदविषयं सामर्थ्यं पुंसः सम्भाव्यते तद्यस्य भीमसेनादेर्विद्यत एव, तत्र सम्भावनमवितथमिति तद्विषयमुदाहरणम् । अपि द्रोणपाक भुञ्जीतेति । यत्पक्वस्य भोजनं तदेव पाकस्य भोजनम्, कर्मसाधनो वा पाकशब्दः । विदेशस्थायी=देशान्तरगतः । प्रायेणगमिष्यतीति । प्रायिकस्वदक्षिणाक्षिस्पन्दनादेर्लिङ्गाभासादागमनं सम्भाव्य तत एतत्प्रयुज्यते, तत्तथ्यमपि भवति, विपरीतमपि भवति । अलं देवदत्त इति । पर्याप्तं हनिष्यतीत्यर्थः । भाविविषयत्वात् सम्भावनस्य सर्वत्र लृट् प्रत्युदाहृतः ।

अपरा व्याख्या---सम्भावनं भाविवस्तूत्प्रेक्षणम्, असति विरुद्धप्रत्ययोपनिपाते भवितव्यमनेनेति ज्ञानम्, यथा प्रत्युदाहरणे---प्रायेणागमिष्यतीति, तस्य विशेषणमलमिति चेदिति, अलमिति चेत् तत्सम्भावनमिति विपरिणामेनान्वयः । तत्र यथा घट इति ज्ञानं पट इति ज्ञानमित्युक्ते ज्ञानस्य विषयनिर्देशः प्रतीयते, तथेहापि सम्भावनाख्यस्य ज्ञानस्य विषयनिर्देशोऽयमलमिति चेत् तत्सम्भावनमलमर्थविषयं चेदित्यर्थः । अलमर्थश्च पर्याप्तिर्न भूषणादिः, धातोश्च प्रत्ययविधानात्तदर्थगोचरमेव सामर्थ्यं गृह्यते । इमं धात्वर्थमनुष्ठातुं समर्थ इत्येवं रूपं चेत् तत्सम्भावनमित्यर्थः । सिद्धाप्रयोगे कस्मिन् सन्निधानादलंशब्दः । एवं तावत्सूत्राक्षराणां निर्वाहः । वृत्तेस्तु---यत्क्रियासु योग्यताध्यवसानमिति तदिह सूत्रे जिघृक्षितस्य सम्भावनस्य लक्षणं न सम्भवनमात्रस्य; अन्यथा प्रत्युदाहरणमनुपपन्नं स्यात्, न हि तत्र शक्तिश्चद्धानं गम्यते । कथं पुनरत्रेदृशं सम्भावनं गृह्यत इत्यत्राह---तदिदानीमिति । तत्खलु सम्भावनमेतत्सूत्रप्रणयनकालेऽस्मिन्सूत्र इत्यर्थः । अलमर्थेन विषयेणाविशेष्यते अलमिति चेत् सम्भावनमिति, पर्याप्तिमिति । पर्याप्तिमितेि । पर्याप्तिरलमर्थः, न भूषणादिरित्यर्थः । विपरिणामेनान्वयं दर्शयति---तच्चेत्सम्भावनमिति । पर्याप्तिविषयत्वात् पर्याप्तम्, अवितथविषयत्वात् अवितथम्, एतद्धात्वर्थानुष्ठाने पर्याप्तो वितथारम्भोऽयमस्मिन् धात्वर्थ इत्येवंरूपं चेत्सम्भावनमित्यर्थः । अपि पर्वतं शिरसाभिन्द्यादिति । एवं नामायं बलवानित्यर्थः, पर्वतं तु भिनत्तु मा वा भिदत् ।।

विभाषा धातौ सम्भावनवचनेऽयदि ।। 3.3.155 ।।

सम्भावयामि भुञ्जीत भवानिति । भोजने भवांश्छक्त इत्युत्प्रेक्ष इत्यर्थः ।।

हेतुहेतुमतोर्लिङ् ।। 3.3.156 ।।

भविष्यति च काल इति । इष्यत इत्यपेक्ष्यते । कथं पुनरेतद् द्वयं सूत्रेऽनुपात्तमेव लभ्यते ? इत्याह---तत्रेति । लिङिति वर्त्तमाने इति । `उताप्योः' इत्यादेः सूत्रात् । हन्तीति पलायत इति । अत्र हननं हेतुः, पलायनं हेतुमत् । वर्षणं हेतुः, सरणं हेतुमत् । पलायत इति । `उपसर्गस्यायतौ' इति लत्वम् । अत्र `लक्षणहेत्वोः क्रियायाः' इति शत्रादेशोऽपि न भवति, `हतियोगे च सद्विधिः' इति व्यवस्थितविभाषासु पठितत्वात् ।।

इच्छार्थेषु लिङ्लोटौ ।। 3.3.157 ।।

कामप्रवेदन इति वक्तव्यमिति । `कामप्रवेदनेऽकच्चिति इत्ययं तर्हि योगः किमर्थः, यावता कामो मे भुञ्जीत भवान्, अभिलाषो मे भुञ्जीत भवानित्यत्राप्यनेनैव सिद्धम् ? यत्रेच्छार्थमुपपदं न भवति, अर्थप्रकरणादिना तु कामप्रवेदनं गम्यते, तत्रापि लिङ् यथा स्यात् । इदं तर्हि किमर्थम् ? लोर्ड्थम्, लिङ्ग्रहणं तु लोटा बाधा मा भूदिति । एवमपि `लेट् च' इति वक्तव्ये किं लिङ्ग्रहणेन ? प्रकृतं लिङ्ग्रहणं विभाषासम्बन्धम्, अतस्तदनुकर्षणे विभाषाग्रहणस्याप्यनुकर्षणं सम्भाव्येत ।।

समानकर्तृकेषु तुमुन् ।। 3.3.158 ।।

तुमुन्प्रकृत्यपेक्षमिति । तुमुन्प्रकृतौ यः कर्त्ता स चेदिच्छार्थेष्वपि भवतीति, एतच्च सान्निध्याल्लभ्यते । इच्छति भोक्तुमिति । आत्मनो भोजनमिच्छतीत्यर्थः । य एवेषेः कर्त्ता स एव भुजेरपीत्यस्तीह समानकर्तृकत्वम् । इच्छाया भुजिक्रियां प्रति तादर्थ्यस्याप्रतीतेः `तुमुन्ण्वुलौ' इत्यादिना तुमुन् न सिद्ध्यतीत्ययमारम्भः । अथापि कथञ्चित्तादर्थ्यं स्यात्, एवमपि समानकर्तृकेष्विति वक्ष्यामीत्यायमारम्भः, तेन देवदत्तेन भोक्तुमिच्छति यज्ञदत्त इति न भवति । इच्छन्करोतीति । अत्रार्थे इच्छन्कर्तुमिति न भवतीत्यर्थः । इच्छन्कर्तुं गच्छतीत्यादौ `तुमुन्ण्वुलौ' इत्यादिना तुमुन् । ननु भावे तुमुन् विधीयते, तत्कथमिच्छन्करोतीत्यत्र कर्त्तरि प्रसङ्गः ? एवमपीच्छता क्रियते इत्यत्र प्रसङ्गादनभिधानमेवाश्रयणीयम् ।।

लिङ् च ।। 3.3.159 ।।

किमर्थमिदमुच्यते ? लिङ् यथा स्यात् । सिद्धोऽत्र लिङ् `इच्छार्थेषु लिङ्लोटौ' इति ? तस्य समानकर्तृकेषु तुमुन् बाधकः प्राप्तः । वासरूपविधिश्च क्तल्युट्तुमुन्खलर्थेषु प्रतिषिद्धस्तत्र यथा लोण्न भवति एवं लिङपि नस्यात् । अथापि वासरूपविधिः स्याद् ? एवमपि लिङेव यथा स्याल्लोण्माभूदित्येवमर्थमेतदारब्धव्यमेव ।।

इच्छार्थेभ्यो विभाषा वर्तमाने ।। 3.3.160 ।।

अश्यादिति । `वश कान्तौ' अदादिः ग्रहिव्यादिना सम्प्रसारणम् ।।

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ।। 3.3.161 ।।

विधिः प्रेरणमिति । भृत्यादेर्निकृष्टस्य क्वचित्प्रवर्तनमाज्ञापनमित्यर्थः । नियोगतोऽवश्यम्भावेन यत्करणमनुष्ठानं तन्निमन्त्रणम्, स निमन्त्रणस्य विषय इत्यर्थः । अवश्यकर्त्तव्ये, श्राद्धभोजनादौ दौहित्रादेः प्रवर्त्तनेति यावत्, श्राद्धे हि निमन्त्रितो दौहित्रादिरभुञ्जानः प्रत्यवैति । कामचारकरणमिति । कामचार इच्छाप्रवृत्तिस्तया यत्करणमनुष्ठानं तदामन्त्रणम्, तद्विषयमामन्त्रणमित्यर्थः । यत्राननुष्ठानेऽपि न प्रत्यवायस्तत्र प्रवर्त्तनेति यावत् । कल्याणादौ ह्यामन्त्रितोऽभुञ्जानोऽपि न प्रत्यवैति । अधीष्टमिति । अधिपूर्वादिच्छतेर्नपुंसके भावे क्तः । पुंल्लिङ्गेन पाठस्त्वयुक्तः । सत्कारपूर्वको व्यापार इति । गुर्वादेरारीध्यस्य व्यापारणेत्यर्थः, ण्यन्तादेरच् । इदं वा कर्त्तव्यमिदं वा कर्त्तव्यमित्येव भूतविचारणासम्प्रधारणम् । यथेदमिह सम्प्रधार्यते इति याच्ञा प्रसिद्धा ।

न्यायव्युत्पादनार्थं च प्रपञ्चार्थमथापि वा ।
विध्यादीनामुपदानं चतुर्णामपदितः कृतम् ।।
अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि ।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ।।

अयं विध्यादिः प्रकृत्यर्थः, प्रत्ययार्थः, प्रकृत्यथेविशेषणम्, प्रत्ययार्थविशेषणं वेति चत्वारः पक्षाः । तत्राद्ये पक्षे विध्यादिषु वत्तमानाद्धातोरित्यर्थः स्यात्, ततश्च यत्र प्रकृतिरेव विध्यादीनाचष्टे तत्रैव स्यात्---विदध्यान्निमन्त्रयेत, आमन्त्रयेत, अधीच्छेत, संप्रच्छेत्, प्रार्थयेतेति; तत्रापि प्रकृत्यर्था भावकर्मकर्त्तारश्चेत्येतावदगम्येत, न प्रकृत्यर्थव्यतिरेकेणापरं विध्यादिकम् । यथा चेच्छार्थेभ्यः `विभाषा वर्त्तमाने' इत्यत्र लिङि इच्छेदिति लडादयश्च न स्युः; अनेन लिङा बाधितत्वात् । द्वितीये नाप्राप्तेपु भावकर्मकर्तृपु विध्यादयोऽर्था निद्दश्यमानास्तेषां बाधकाः स्युरिति लिङा कर्त्रादीनामभिधानं न स्यात्, द्विवचनबहुवचनानुपपत्तिश्च, विध्यादीनामेकत्वात् । तृतीये तु यत्र प्रकृतिरेव विध्यादीनाचष्टे तत्र न स्यात्---विदध्यान्निमन्त्रयेतेति, न ह्यत्र प्रकृत्यर्थादन्ये तद्विशेषणभूता विध्यादयः सन्ति । चतुर्थे तु विध्यादीनां कर्त्रादीनां च स्पष्ट एव भेद इति दोषाभाव इति तमेवाश्रयति---विध्यादयश्चैत इति । विध्यादिविशिष्टेष्विति । विध्यादयः प्रवर्त्तनाविशेषास्तैर्विशिष्टेषु प्रवतितेष्वित्यर्थः । सम्प्रश्नप्रार्थनयोस्तु सम्पृच्छ्यमाने प्रार्थ्यमाने च कर्त्तरि । ननु च प्रकृत्या योऽर्थो नाभिधीयते तत्रैव प्रत्ययेन भाव्यम्, न तु प्रकृत्याभिहिते; `उक्तार्थानामप्रयोगः' इति न्यायात्, ततश्चास्मिन्नपि पक्षे विदध्यादित्यादौ तदवस्थ एवाप्रसङ्गः ? एवं तर्हि सन्त्येवात्र व्यतिरिक्ता विध्यादयो विषयभेदात्, तथा हि---श्राद्धे मां निमन्त्रयेत भवानिति मत्कर्मकं निमन्त्रणं तवानुष्ठेयमित्यर्थः, तत्र प्रकृत्यभिहितं निमन्त्रणं भोजनविषयम्, लिङभिहितं तु निमन्त्रणविषयमिति विस्पष्ट एव निमन्त्रणभेदः । यथैषितुमिच्छतीति कालसाधनभेदादिच्छयोर्भेदाश्रयो योगस्तद्वत् । एवं विध्यादिष्वपि द्रष्टव्यम् । एवं च कृत्वा प्रकृत्यर्थविशेषणपक्षेऽपि नातीव दोषः । आमन्त्रणे इह भवान् भुञ्जीतेति । यदीच्छतीत्यर्थः । अध्येप्यामह इत्यपपाठोऽयम्; न हीच्छतेरेतद्रूपं सम्भवति, इष्यतिरपि परस्मैपदी, गुणश्च श्यनि दुर्लभः; इङश्चात्रार्थो नास्ति, सूत्रे चाधीष्टेति इङ् न प्रयुक्तः, तस्मादधीच्छाम इति पाठः । उपनयेतेति । आचार्यकरण आत्मनेपदम् ।।

लोट् च ।। 3.3.162 ।।

योगविभाग उत्तरार्थ इति । उत्तरत्र लोट एवानुवृत्तिर्यथा स्याल्लिङो मा भूदिति । अध्ययै इति । इट्, उत्तमैकवचनम्, टेरेत्वम्, `एत ऐ', `आहुत्तमस्य पिच्च' इत्याडागमः, `आटश्च' इति वृद्धिः, प्रकृतेर्गुणायादेशौ ।।

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ।। 3.3.163 ।।

कृत्य इति । `विभाषा कृवृषोः' इति क्यप् । भवान् हि प्रेषित इत्यादिर्वाक्यशेषः सर्वेष्वेवोदाहरणेषु योज्यः ।

न सामान्येनेति । भावकर्मणोरित्युपलक्षणम्; भव्यगेयादीनां कर्त्तर्यपि भावात् । एवं तर्ह्येतज्ज्ञापयतीति । `प्रैषादिष्वेव कृत्या भवन्ति नान्यत्र' इति नियमार्थं चैतन्न भवति, अनिष्टत्वात् । अन्यत्रापिकृत्यादृश्यन्ते---तृणेनशोष्यम्, बुधेन बोध्यमिति, अग्निस्तोकं तृणेन दीपनीय इति । वस्तुस्वरूपकथनमेतत्, न त्वत्र प्रैषादिप्रतीतिः । अधिकारात्परेणेति । एनपा योगे पञ्चमी मृग्या । नावश्यमिति । क्वचिद्भवति, क्वचिन्नेत्यर्थः ।

को विशेष इति । विधिः प्रेरणमिति पूर्वत्र व्याख्यातत्वात् नास्त्येव भेद इति प्रश्नः । यद्यविशेषः, कथं द्वन्द्वनिर्देश इति चेत् ? शब्दरूपस्याभिधेयत्वात् । `को विशेषः' इति कोऽनयोः शब्दयोविशेषोऽभिधेय इत्यर्थः । केचिदिति । एवमामन्त्रणातिसर्गयोरपि विशेषो ज्ञेयः । केचिदिति वचनादपरेऽनयोर्विसेषं नेच्छन्तीत्युक्तं भवति । तेषामपि प्रैषातिसर्गग्रहणं कर्त्तव्यमेव, तत्रैव कृत्या यथा स्युरिति । `प्राप्तकाले च' इति ह्युक्ते निमन्त्रणादावपि कृत्याः स्युः । चकारेण लोडप्यनुकर्षणीयः---प्राप्तकाले यथा स्यादिति ।।

लिङ् चोर्ध्वमौहूर्तिके ।। 3.3.164 ।।

चकाराद्यथाप्राप्तं चेति । लोट्, कृत्याश्च ।।

स्मे लोट् ।। 3.3.165 ।।

लिङ्कृत्यानामपवाद इति । अनन्तरसूत्रेण प्राप्तानाम् । करोतुस्मेति । स्मशब्दोऽधिकारं सूचयति---भवानत्राधिकृत इत्यर्थः ।।

अधीष्टे च ।। 3.3.166 ।।

अङ्ग स्म राजन्निति । अङ्गशब्दोऽनुनये । ब्राह्मणानामेवाध्यापनं वृत्तिरतो राजन्नित्यभ्यर्हितेत्यर्थः ।।

कालसमयवेलासु तुमुन् ।। 3.3.167 ।।

प्रैषादिग्रहणं सम्बद्ध्यते इति । न चेह प्रैषादयो गम्यन्त इति भावः । इह कस्मादिति । कालो भोजनस्येति । तस्माद्भुङ्क्तां भवानिति वाक्यार्थः, तेन गम्यतेऽत्र प्रैष इति प्रश्नः । वासरूपविधिनेति । ननु प्रैषादिषु कृत्यविधानात् स्त्र्यधिकारात्परेण वासरूपविधिरनास्तीति ज्ञापितम् ? तत्राह---उक्तमिति । अनित्यत्वमेव तत्र ज्ञापितं न सर्वथाभाव इत्यर्थः । पर्यायोपादानं पर्यायान्तरविवृत्त्यर्थम् । अन्ये त्वाहुः---अवसरो भोक्तुमित्यादावपि तुमुन् दृश्यते, `व्युपयोः शेतेः' इत्यत्र राजानमुपशयितुं पर्याय इति प्रयुक्तोवृत्तिकारेण । तस्मादर्थग्रहणार्थं पर्यायोपादानम्, यथा---`निमित्तकारणहेतुषु' इत्यत्रेति ।।

लिङ् यदि ।। 3.3.168 ।।

तुमुनोऽपवाद इति । कर्तृकर्मणोः सावकाशोऽपि लिङ् प्रतिपदविधेर्बलीयस्त्वात्परत्वाच्च भावे तुमुनो बाधक इत्यर्थः ।।

अर्हे कृत्यतृचश्च ।। 3.3.169 ।।

अर्हतीत्यर्ह इति । पचाद्यच् । तद्योग्य इति । तच्छब्देन धात्वर्थः परामृश्यते । अर्हे कर्त्तरि गम्यमान इति । क्वचिद्वाच्ये, क्वचिद्गम्यमान इत्युभयथानुग्रहाय गम्यमान इत्युक्तम् । क्वचिद् वाच्ये गम्यमाने वेति पाठः, तत्र यथासम्भवमित्यन्वयः । तत्र तृच् अजर्यकुप्यादिषु, कृत्याश्च वाच्यत्वे भवन्ति; लिङ् भव्यगेयादिषु, कृत्याश्चोभयत्र भवन्ति । अथ कस्मात् `कृत्यतृचौ' इति सूत्रे कृत्यभेदविवक्षया बहुवचनम्, इह तु सामान्यविवक्षया द्विवचनम् ? क्वचित्तु वृत्तावपि बहुवचनमेव पठ्यते । तेन बाधा मा भूदिति । वासरूपविधिश्च नावश्यं भवतीत्यनन्तरमेवोक्तम् ।।

आवश्यकाधमर्ण्ययोर्णिनिः ।। 3.3.170 ।।

अवश्यं भाव आवश्यकमिति । मनोज्ञादित्वाद् वुञ्, अव्ययानां भमात्रे टिलोपः । उपाधिरिति । प्रत्ययार्थविशेषणमित्यर्थः । नोपपदमिति । `शीतोष्णाभ्यां कारिणि', `सेनान्तलक्षणकारिभ्यस्च' इति निर्देशात् । उपपदत्वे हि केवलाण्णिनिर्न स्यात्, तत्साहचर्यादाधमर्ण्यमप्युपाधिरेव, नोपपदम् । शतं दायीति । `अकेनोर्भविष्यदाधमर्ण्ययोः' इति षष्टीप्रतिषेधाद् द्वितीयैव भवति ।।

कृत्यश्च ।। 3.3.171 ।।

भव्यगेयादयः कर्तृवाचकाः कृत्या इति । भव्यगेयादिष्ववयत्वेन स्थिताः कृत्या इत्यर्थः । आदिशब्देन न भव्यगेयादिसूत्रनिर्द्दिष्टानामेव ग्रहणम्, किं तर्हि ? अजर्यरुच्यकुप्यकृष्टपच्याव्यथ्याव्यथ्यादीनामपि ग्रहणम् । योगविभाग उत्तराथेः ।।

शकि लिङ् च ।। 3.3.172 ।।

प्रकृत्यर्थविशेषणमिति । नोपपदम्, `क्षय्यजय्यौ शक्यार्थे' इति लिङ्गात्, उपपदत्वे हि केवलौ क्षय्यजय्यौ शक्यार्थे न सम्भवतः । भवान्खलु शक्त इति वाक्यशेषः सर्वेषु योज्यः । लिङा बाधा मा भूदिति । स्त्रियाः परेण वासरूपविधेरनित्यत्वाल्लिङा बाधाशङ्का । `पराजेसोढः' इत्यत्रासोढो योऽर्थः----सोढुं न शक्यत इति । शक्यार्थे क्तप्रत्ययो व्याख्यातः स `कृत्यल्युटो बहुलम्' इति वा, वासरूपविधिना वा समर्थनीयः ।।

आशिषि लिङ्लोटौ ।। 3.3.173 ।।

आशीर्विशिष्ट इत्याशास्यमान इत्यर्थः । विध्यादिसूत्र एवाशीर्ग्रहणं न कृतम्, `स्मे लोट्' इत्यादिविषयेऽपि परत्वादेष विधिर्यथा स्यादिति । अवश्यं चोत्तरार्थमिहाशीर्ग्रहणं कर्त्तव्यम् ।।

क्तिच्क्तौ च संज्ञायाम् ।। 3.3.174 ।।

तन्तिरिति । `अनुदात्तोपदेश' इत्यादिनानुनासिकलोपः प्रापनोति, `अनुनासिकस्य क्विझलोः क्ङिति' इति दीर्घत्वं च, तदुभयमपि न भवति; `न क्तिचि दीर्घश्च' इति प्रतिषेधात् । सातिरिति । सनः क्तिचि `लोपश्चास्यान्यतरस्याम्' इत्यात्वम् । क्तिचश्चकारश्चिन्त्यप्रयोजनः; `न क्तिचि दीर्घश्च' इत्यत्र एकानुबन्धकपरिभाषया क्तिनो निवृत्तेः सिद्धत्वात् ।।

स्मोत्तरे लङ् च ।। 3.3.175 ।।

अत्रोत्तरशब्द आदिक्यवचनो न दिग्वचनः, तेन पूर्वभूतेऽपि स्मशब्दे भवति, तद्दर्शितम्---स्मशब्दसहित इति ।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां तृतीयाध्यायस्य तृतीयः पादः ।।

3.4

अथ तृतीयाध्याये चतुर्थः पादः

पदमञ्जरी

धातुसम्बन्धे प्रत्ययाः ।। 3.4.1 ।।

प्रयोगे स्वार्थाभिधानव्यग्रयोर्धात्वोः परस्परेण सम्बन्धाभावादुपचरितवृत्तिरत्र दातुशब्द इत्याह---धात्वर्थे धातुशब्द इति । धात्वर्थानां सम्बन्धो धातुसम्बन्ध इति । सम्बन्धस्यानेकाधिष्ठानत्वात् वृत्तावपि संख्याविशेषोऽवगम्यत इति भावः । सकलविषयापेक्षया च बहुवचनम् । एकैकं विवक्षायां तु धात्वर्थयोः सम्बन्ध इति द्रष्टव्यम् । यदि तु कर्मत्वं समानकर्तृकत्वं च धातोरर्थद्वारकं विशेषणमितिवद्धात्वोरेवार्थद्वारकः सम्बन्ध आश्रीयेत, इह तु न स्यात्---गोमानासीत्, गोमान् भवितेति, द्वयोर्हि प्रयुज्यमानयोः सम्बन्धो भवति, न चात्र वर्तमानकालेऽस्तिः प्रयुज्यते । कीदृशः पुनरयं धातुसम्बन्धः ? इत्याह---विशेषणविशेष्यभाव इति ।

तत्र तिङन्तवाच्योऽर्थो विशेष्यं तत्प्रधानत्वाद्वाक्यस्य; सुबन्तवाच्यस्तु विशेषणम्, कारकस्य क्रियां प्रति गुणभावात् । अयथाकालोक्ता अपीति । यस्मिन्काले विहितास्ततोऽन्यत्रापि प्रयुक्ता इत्यर्थः । एतेन कालमात्रस्यात्र बाधः, न तूपपदोपाधिप्रकृतिप्रत्ययार्थानामिति दर्शयति । एतच्च `वर्त्तमानसामीप्ये' इत्यारभ्य प्रायेण कालान्यत्वप्रतिपादनाल्लभ्यते । अग्निष्टोमयाजीति भूतकाल इति । भूतः कालो यस्येति बहुव्रीहिः, एतेन भविष्यत्काल इति व्याख्यातम् । तत्रेति । तयोर्मध्ये । भूतकालोऽग्निष्टोमयाजीत्येवशब्दो भविष्यत्कालेन जनितेत्यनेन सम्बद्ध्यमानः साधुर्भवति । अयमपि भविष्यत्कालः सन्साधुर्भवतीत्यर्थः । अथ वा---स्वयमपि भविष्यत्कालेना भिसम्बद्ध्यमानः, स्वकालपरित्यागेन भविष्यत्कालः सन्नित्यर्थः । अयं ह्यत्रार्थः---पुत्त्रोऽस्य जनिता स चाग्निष्टोमेन यष्टेति, तत्र यदि भूतकाल एव णिनिरवतिष्ठेन तदा यागस्य भविष्यत्तावगमो न प्राप्नोतीत्ययमारम्भः । एवमितरयोरप्युदाहरणयोर्द्रष्टव्यम् । अथ विपर्ययः कस्मान्न भवति, भविष्यत्कालो भूतकालेनाभिसम्बद्ध्यमानः स्वकालपरित्यागेन भूते साधुर्भवति, ततश्चाग्निष्टोमयाज्यस्य पुत्त्रो जात इत्ययं वाक्यार्थ इति ? तत्राह=विशेषणं गुणत्वादिति । प्रधानानुवर्त्ती गुणः, न गुणानुवर्ति प्रधानम्, उभयोश्च स्वकालनिष्ठयोः सम्बन्धानुपपत्तिरिति प्रधानानुरोधेन गुणस्य कालपरित्याग इत्यर्थः ।

प्रत्ययाधिकार इति । यद्यपि प्रकृतः प्रत्ययशब्दः स्वरूपपदार्थकः, तथापीह संज्ञेनामनिर्देशात्संज्ञिपदार्थको विज्ञास्यत इति भावः । अधात्वधिकारविहिता अपीति । अन्यथा प्रकृतानां धातुप्रत्ययानामेव ग्रहणं स्यात् । प्रत्ययग्रहणात्तु सर्वपरिग्रहार्थात्तद्धितानामपि कालान्तरेऽपि साधुत्वं भवति । गोमानासीत्, गोमान्भवितेति । `तदस्यास्त्यस्मिन्' इति मतुप्प्रत्ययो वर्त्तमानसत्ताविशिष्टेन प्रकृत्यर्थेन विशिष्टेऽर्थे विहितः । धातुसम्बन्धे तु प्रकृत्यर्थस्य भूतभविष्यत्वेऽपि साधुर्भवति । ततश्चायमत्रार्थः---गावोऽस्यासन् गोमानासीत्, गावोऽस्य भवितारः गोमान् भवितेति । धात्वधिकारादेव धातुग्रहणे सिद्धे पुनर्धातुग्रहणं धातुविशेषपरिग्रहार्थम्, तेनास्तिभूजनिसम्बन्धे तद्विशेषणानामेव कालान्यत्वेन साधुत्वं भवतीति केचित् । न चायं पक्षो भाष्ये सिद्धान्तत्वेन स्थापितः, तस्मादविशेषेण भवतीत्यन्ये । दृश्यते चान्यत्रापि कालान्यत्वलम्---`साटोपमुर्वीमनिशं नदन्तो ये प्लावयिष्यन्ति समन्ततोऽमी' इत्यत्र । नदन्त इति वर्त्तमानकालः प्लावयिष्यन्तीति अवर्त्तमानेनाभिसम्बद्ध्यमानो भविष्यत्कालः सम्पद्यते ।

सूत्रप्रत्यख्यानं तु---अग्निष्टोमयाजीति भूत एव णिनिः, जनितेत्येतत्सम्बन्धात्तु केवलं व्यपदेशस्य भावित्वप्रतीतिः, अस्य सूत्रस्य शाटकं वयेतिवत् । ततश्च भाविव्यपदेशविज्ञानाद्विशेषणस्य कालान्यत्वं वाक्यार्थवशादसत्यपि सूत्रारम्भे प्रत्येष्यते । अवश्यं च स्वकाल एव प्रत्ययविधिरेष्टव्यः, अन्यथा भाविकृत्यमासीदित्यत्र भाविशब्दस्य भूतकालत्वे भाव्यासीच्छब्दयोः पर्यायत्वाद्युगपत्प्रयोगो न स्यात् । तस्मादिदानीमासीदित्येवं तत्रार्थः । गोमानासीदित्यत्रापि देवदत्तस्य विधमानत्वेऽपि गोमद्रूपस्यातीतत्वाद् भूतप्रत्ययः । तत्रार्थाद् गवामप्यतीतत्वं प्रतीयते, गोमच्छब्दस्तु स्वमहिम्ना वर्त्तमानसत्ताविशिष्टमेव प्रकृत्यर्थमाह ।।

क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ।। 3.4.2 ।।

धातुसम्बन्ध इति वर्त्तत इति । अनुप्रयोगधातुना च सम्बन्धः । क्वचित्त्वयं ग्रन्थो न पठ्यते । प्रकृत्यर्थविशेषणं चैतदिति । उपपदत्वाशङ्कां निरस्यति । व्याख्यानाच्चोपपदत्वाभावः । समभिहारविशष्टक्रियावचनादिति । क्रियाधर्मे समभिहारमात्रे धातोर्वृत्त्यसम्भवादेतदुक्तम् । अत्र यदि `लोटो हिस्वौ' इति वचनात्तस्यैव हिस्वौ स्याताम्, तदा सामान्यविहितानां तिङां शतृशानउभ्यामिव हिस्वाभ्यां बाधा स्यात्, ततस्तध्वमोर्लोट्स्थानिकयोरभावात् `वा च तध्वमोः' इति तयोः स्थानित्वेनोपादानमनुपपन्नमिति लोट्शब्देन तदादेशानां ग्रहणमित्युपलक्ष्यते । अस्तु तथा, को दोषः ? इह हि तिप्सिप्मिपां स्थाने विहितस्य हेः स्थानिवद्भावेन पित्त्वान्ङित्त्वाभावाल्लुनीहितीत्त्वं न स्यात्, ब्रूहीति `ब्रुव ईट्' स्यात्, तृण्ढीति `तृणह इम्' स्यात्, अनुदात्तत्वं च हेः प्रसज्येत ? नैष दोषः; `सेर्ह्यपिच्च' इत्यत्र योगविभागः करिष्यते, तत्सामर्थ्याद् `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति नाश्रीयते, सेर्हिर्भवति अपिच्च भवति यावान्कश्चिद्धिर्नामेति । यौ तर्ह्युत्तमादेशौ हिस्वौ, तरोयराडागमः प्राप्नोति---लुनीहिलुनीहीत्येवाहं लुनामि, अधीष्वाधीध्वेत्येवाहमधीय इति ? नैष दोषः; आटि कृते साट्कस्यादेशौ भविष्यतः, सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात् । हिस्वयोः पुनराट् न भविष्यति, इह ह्याट् क्रियातां हिस्वाविति सम्प्रधारणायामुभयोरनित्ययोः `शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति' इति परत्वादाटि कृते साट्कस्य हिस्वाविति सिद्धमिष्टम् । एवमपि हेर्योगविभागेन पित्त्वाभावेऽपि स्वशब्दस्योत्तमादेशस्य पित्त्वाद्भुङ्क्ष्वभुङ्क्ष्वेत्येवाहं भुञ्जे इत्यत्र `श्नसोरल्लोपः' इत्यकारलोपो न प्राप्नोति, ब्रूष्वब्रूप्वेत्येवाहं ब्रुवे `ब्रुव ईट्' प्राप्नोति, सर्वेषां च तिङां द्वावपि हिस्वौ पर्यायेण स्यातां न तु `परस्मैपदानां हिः, इतरेषआं स्वः' इति नियामकमस्ति । तस्माद्दुष्ट एवायं पक्ष इति मत्वा लकारस्यैवादेशौ हिस्वावाश्रयणीयाविति दर्शयति । तस्य च लोट इति । नन्वस्मिन्पक्षे `वा च तध्वमोः' इत्यनुपपन्नमित्युक्तं तत्राह---तध्वम्भाविनस्तु वा भवति इति । मुख्यार्थासम्भवे तध्वम्भावी लोडेव तथोच्यते इत्यर्थः ।

यदि तर्हि लोट एव हिस्वावादेशौ न तदादेशानाम्, `लः परस्मैपदम्' इति द्वयोरपि परस्मैपदसंज्ञा स्यात्, ततश्च द्वावपि परस्मैपदिभ्य एव स्याताम् । तिङ्क्ष्वसन्निवेशाच्च तदन्तस्य तिङन्तता न स्यात्, ततश्च `तिङ्ङतिङः' इति निघातो न प्राप्नोति । हिस्वयोश्च कृत्त्वात्तदन्तस्य शतृशानजन्तस्यैव प्रातिपदिकत्वात्स्वाद्युत्पत्तिः प्राप्नोति, तत्र च विभक्तिसंज्ञकहिस्वसदृशत्वादनयोर्हिस्वयोः `विभक्तिस्वरप्रतिरूपकाश्च निपाताः' `निपातोऽव्ययम्' इत्यव्ययसंज्ञायां यद्यपि विभक्तीनां श्रवणं न भवति, तथापि ततः परस्य `तिङ्ङतिङ' इति निघातः प्राप्नोति, द्वावपि च कर्तर्येव स्याताम्, न तु स्वादेशो भावकर्मकर्तृषु स्यात् । तस्मादयमपि पक्षो दुष्ट एव, तत्राह---लोडित्येवेति । एतेन द्वितीययोगे प्रथमान्तस्य लोड्ग्रहणस्यानुवृत्ति दर्शयति । तत्र च सामानाधिकरण्येन लोडित्यनेन हिस्वौ विशेष्येते, न षष्ठ्या विपरिणामेन, च न हिस्वौ लोटौ भवतः; उच्यते चेदं लोटो हिस्वाविति, ततश्च धर्मातिदेशो विज्ञायते, तदाह---लोड्धर्माणौ तौ भवत इत्यर्थ इति । अत्र च लोट्शब्देन लोट्संबन्धिनौ हिस्वावुच्येते मुख्यलोट्संबन्धिनो धर्मस्यातिदेश्यस्यासम्भवात्प्रसिद्धौ लोट्संबन्धिनौ यौ हिस्वौ, `सेर्ह्यपिच्च' `सवाभ्यां वामौ' इति विहितौ, तद्धर्माणावित्यर्थः । किं सिद्धं भवति ? तद्दर्शयति-

--तेनेति । तयोहि परस्मैपदात्मनेपदत्वं भेदेन व्यवस्थितम्---हेः परस्मैपदत्वम्, स्वस्यात्मनेपदत्वमिति । अतस्तद्धर्मातिदेशादिहापि तदुभयं भेदेन, व्यवतिष्ठते, भेदेन भविष्यतीत्यर्थः । तिङ्त्वं च भवतीति । तथा च---हीत्यस्य कर्त्ता वाच्यः, स्वशब्दस्य तु भावकर्मकर्त्तारः । पुरुषैकवचनसंज्ञे तु विधानसामर्थ्यान्न भवतः, यदि हि ते अपि स्याताम्, हिस्वयोरनेन विधानमनुपपन्नं स्याद्; वचनान्तरेणैव तयोस्तादृशयोः सिद्धत्वात् ।

लुनीहि लुनीहीत्यादि । पुनः पुनर्लवनमयं करोतीत्यादिरर्थः । तत्र च लोडन्तं पुनः पुनर्लवनमाह, अनुप्रयोगधातुस्तु कृतिं तद्विषयां वदन् अभिव्यनक्ति, संमुग्ध तद्गतं साधनादिकम् । एवं च सामान्यविशेषयोर्विशेषणविशेष्यभावाद् धातुसम्बन्ध उपपद्यते, इत्येवशब्दौ, लोडन्तानुप्रयोगयोः सम्बन्धार्थौ, अयन्त्वमहंशब्दाः पुरुषविशेषाभिव्यक्तिहेतवः । अथ वेति । `वा च तध्वमोः' इत्यस्य फलं दर्शयति ।

अलावीदिति । लुङ्, सिचि वृद्धिः, सिच इट्, तिपः `अस्तिसिचोऽपृक्ते' इतीट्, `इट ईटि' इति सिचो लोपः, `सिज्लोप एकादेशे सिद्धो वक्तव्यः' इति सवर्णदीर्घत्वम् । एवं मध्यमोत्तमयोरुदाहार्यमिति । लुनीहि तुनीहीत्येव त्वमलावीः अलाविष्टमलाविष्ट । अथा वा लुनीत लुनीतेत्येव यूयमलाविष्ट । लुनीहि लुनीहीत्येवाहमलविषम् अलाविष्व अलाविष्म । एवं मध्यमोत्तमयोरपीति । लुनीहि लुनीहीत्येव त्वं लविष्यसि लविष्यथः लविष्यथ । अथ वा लुनीत लुनीतेत्येव यूयं लविष्यथ । लुनीहि लुनीहीत्येवाहं लविष्यामि लविष्यावः लविष्यामः । एवं सर्वेषु लकारेषूदाहार्यमिति । लुनीहिलुनीहीत्येवायमलुनात् लुनातु लुनीयात् लूयात् लुलाव लविता लविष्यति अलविष्यत्; अधीष्वाधीष्वेत्येवायमध्यैत अधीताम् अधीयीत अध्येषीष्ट अधिजगे अध्यगीष्ट अध्यैष्ट अध्येता अध्यैष्यत अध्येष्यते । कर्मणि---लूयस्व लूयस्वेत्येवायं केदारो लूयत इत्यादि । भावे तु प्रसिद्धः स्वशब्दो दृष्टो न वेति चिन्त्यम् ।

अथोदाहरणेषु कथं द्विर्वचनम्, यावता क्रियासमभिहारं द्योतयितुं द्विर्वचनं विधीयते, स चात्र तस्मिन्नेव विधीयमानेन लोटैव द्योतितः, अथ द्योतितेऽपि तस्मिन् `क्रियासमभिहारे द्वे भवतः' इति वचनसामर्थ्यादत्र द्विर्वचनं यङन्तेऽपि प्राप्नोति, वक्तव्यो वा विशेषः ? तत्राह---क्रियासमभिहाराभिव्यक्ताविति । `लः कर्मणि च' इति वचनाद्भावकर्मकर्त्तारोऽस्य वाच्याः, समभिहारस्तु द्विर्वचनेनैव द्योत्यः, यङस्तु न किञ्चिदन्यद्वाच्यं द्योत्यं वा विद्यते इति तेनैव क्रियासमभिहारस्य द्योतितत्वाद् द्विर्वचनाभावः । ननु च सन्तु भावकर्मकर्त्तारोऽस्य वाच्याः, समभिहारोऽप्युपाधित्वेन श्रुतः, सोऽपि लोटो द्योत्यो भवतु, यथा---लडादिषु वर्त्तमानादयः ? एवं तर्ह्यसति द्विर्वचने शुद्धस्य लोटोऽस्य च साधारणं रूपमिति समभिहाराभिव्यक्तयेऽवश्यं द्विर्वचनमपेक्ष्यते । शब्दशक्तिवैचित्र्यं चात्र हेतुः, यथा स्त्रीत्वं क्वचिदेकेनैव प्रत्ययेन द्योत्यते, क्वचिद् द्वाभ्याम्, क्वचित् दृषदित्यादो प्रातिपदिकेनैवेत्यलं प्रबन्धेन ।।

समुच्चयेऽन्यतरस्याम् ।। 3.4.3 ।।

`समुच्चये' इति समान्योक्तावपि क्रियासमुच्चय एव दृश्यते, धातोः प्रत्ययविधानादित्याह---अनेकाक्रयाध्याहारः समुच्चय इति । अनेकासां क्रियाणामेकस्मिन् सम्बन्धिनि निचीयमानतेत्यर्थः । एतेनैकक्रियाविषयात्समभिहारात्समुच्चयस्य भेदो दर्शितः । धातोः क्रियावाचित्वात्क्रियाधर्मे समुच्चयमात्रे वृत्तिर्न भवतीत्यभिप्रायेणाह---समुच्चीयमानक्रियावचनादिति । एकस्मिन्साधने याः क्रियाः समुच्चीयन्ते तद्वाचिभ्यो धातुभ्यः प्रत्य इत्यर्थः ।

भ्राष्ट्रमटेत्यादि । भ्राष्ट्राटनादीनि करोतीत्यर्थः । तत्रानुप्रयुज्यमानो धातुः साधनभेदेन भिन्नेष्वटनेष्वनुवर्तमानं कृतिव्यापारं वदँस्तद्गतानि साधनादीनि प्रिकाशयतीति परस्परसम्बन्धः । भ्राष्ट्रम्=चुल्लि, खस्य दूरं खदूरम्=अपवरकम्, स्थाल्यः प्रक्षालिता यत्र निधाय पिधीयन्ते तत्स्थाल्यपिधानम् ।

अथ वेति । प्रथमेनाथवाशब्देन `वा च तध्वमोः' इत्यस्य व्यापारं दर्शयति, द्वितीयेनान्यतरस्याङ्ग्रहणस्य । एवं द्वितीयेऽप्युदाहरणे द्रष्टव्यम् ।।

यथाविध्यनुप्रयोगः पूर्वस्मिन् ।। 3.4.4 ।।

यथाविधीति । पदार्थनतिवृत्तौ `यथार्थे यदव्ययम्' इत्यव्ययीभावः, अनुप्रयोग इत्यनुशब्दो धात्वर्थानुवादी, न पश्चाद्भावेनानन्तर्येऽर्थे । तेन पूर्वव्यवहितप्रयोगोऽपि भवति । पूर्वस्मिन्निति वचनं विस्पष्टार्थम् । समुच्चये हि सामान्यवचनस्यानुप्रयोगं वक्ष्यति, तेन ततोऽन्यत्रायं विधिरन्यश्च विषयः पूर्वमेव लोड्विधानम् । धातुसम्बन्धे प्रत्ययविधानादिति । ननु च हिस्वान्तमेतदनभिव्यक्तपदार्थकम्, सख्याकालपुरुषाणामनभिव्यक्तत्वात्, अतस्तदर्थाभिव्यक्त्यर्थमेवानुप्रयोगः सिद्धः ? अस्त्वेवम्, किमेतावता वृत्तिकारोक्तो हेतुर्न भवति । अथ वा यावन्तमर्थमभिव्यङ्क्तुं हिस्वान्तं समर्थं तावतो विवक्षायामनुप्रयोगासिद्धि मत्वैवमुक्तम् । यथाविध्यर्थ वचनमिति । ननु च `समुच्चये सामान्यवचनस्य' इति वक्ष्यति, तत्र नियमो विज्ञास्यते---समुच्चय एव धात्वन्तरस्यानुप्रयोग इति, ततश्च क्रियासमभिहारे यथाविध्यनुयोगो भविष्यति ? एवं मन्यते---समुच्चये सामान्यवचनस्यैवानुप्रयोग इति नियमादन्यत्र धात्वन्तरस्यापि स्यादिति छिनत्तीति नानुप्रयुज्यत इति । पचतीत्यादेभिन्नार्थस्य त्वप्रसङ्गः, लोडन्तेनानन्वयात् । समानार्थस्य तु सम्भवति सम्बन्धः, यथा--तस्यैव । एवं सामान्यवचनस्य करोत्यादेरप्यनुप्रयोगप्रसङ्गः, तस्यापि हि सन्निहेतलोडन्तवाच्ये विशेषे पर्यवसानात्सम्भवत्येवान्वयः । ननु चैकस्या आकृतेश्चरितः प्रयोगो न द्वितीयस्यास्तृतीयस्याश्च भवति, एतच्च `कृञ्जानुप्रयुज्यते' इत्यत्र व्याख्यातम्, तत्र यथा गवां स्वामी अश्वेषु चेति न भवति, तथेहापि येनैव धातुना लोट्प्रयोगः प्रारब्धस्तेनैवासौ समापयिष्यते ? न; अस्यापि न्यायस्य वेदे लोके च व्यभिचारात् । वेदे तावत्---इन्द्राय राज्ञे सूकर इति चतुर्थोप्रयोगप्रकरणे क्षिप्रश्येनस्य वर्त्तिका ते धातुरिति षष्ठी, मयुः प्राजापत्य इति तद्धितश्च देवतासम्बन्धे दृश्यते । लोकेऽपि---सस्नुः, पयः पपुरिति लिटा सहानेनिजुरिति लङ् प्रयुक्तः । तस्मादारभ्यमेवैतत् ।।

समुच्चये सामान्यवचनस्य ।। 3.4.5 ।।

ननु च हिस्वान्तस्यानभिव्यक्तपदार्थकत्वाद्धातुसम्बन्धे प्रत्ययविधानाच्चानुप्रयोगः सिद्धः, नार्थ एतेन ? तत्राह---सर्वविशेषेति । असत्यस्मिन्यतो धातोर्लोड्विहितः स तस्यानुप्रयुज्येत । एवमपि हिस्वान्तार्थस्याभिव्यक्तिर्भवत्येव धातुसम्बन्धश्चोपपद्यते ।

ननु च सर्वेषु विशेषेषु यदनुगतं सामप्त्न्यं तद्वाचिनोऽनुप्रयोगेऽपि तस्य सामान्यस्य सन्निहितेषु विशेषेषु पर्यवसानादर्थाभिव्यक्तिश्च सर्वेषां भवति, धातुसम्बन्धश्च । तत्र सामान्यवचनस्यैकस्यानुप्रयोगोऽस्तु, बहूनां विशेषवाचिनां वेति सम्प्रधारणायामेकस्यैव भविष्यति, लघुत्वात्तत्राह---लाघवं चेति ।

अन्यथा तरुद्रुमादीनामेव प्रयोगः स्यात्, न वनस्पत्यादिशब्दानामिति भावः । ननु भ्राष्ट्रमटेत्यादौ तस्यैवानुप्रयोगात्कथं सामान्यवचनता ? तत्राह--- भ्राष्ट्रमटेत्यादि । कारकभेदात् क्रियाभेदे सतीति । भेदनिबन्धनः समुच्चयोऽप्येवमेवात्रोपपाद्यः ।।

छन्दसि लुङ्लङ्लिटः ।। 3.4.6 ।।

उदाहरणेषु धातुसम्बन्धो मृग्यः । अकरदिति । `कृमृदृरुहिभ्यश्छन्दसि' इति च्लेरङादेशः, `ऋदृशोऽङि गुणः' ।।

लिङर्थे लेट् ।। 3.4.7 ।।

जोषिषदिति । `जुषी प्रीतिसेवनयोः' अनुदात्तेत्, व्यत्ययेन परस्मैपदम्, `इतश्च लोपः परस्मैपदेषु', `लेटोऽडाटौ' इति तिपोऽडागमः, `सिब्बहुलं लेटि' इति सिप्, इडागमः । तारिषदिति । सिब्विधौ बहुलं णिद्वद्भाव उक्तः, ततो वृद्धिः । पतातीति । `पत्लृ गतौ', तिप आडागमः ।।

उपसंवादाशङ्कयोश्च ।। 3.4.8 ।।

यदि मे भवानित्यादिनोपसंवादस्य स्वरूपं दर्शयति । कारणत इत्यादिना । शङ्कायाः अनुसरणमनुगमनमित्यर्थः । अहमेवेत्यादि । त्रिपुरविजये देवैः प्रर्थितस्य देवस्यैतद्वचनम् । `ईश ऐश्वर्ये', उत्तमैकवचनमिट्, टेरेत्वम्, `वैतोन्यत्र' इत्यैकारः । पशवो द्विपादश्चतुष्पादश्च । `वायुं देवा अब्रुवन्सोमं राजानं हनामेति, सोऽब्रवीदूरं वृणै, मदग्रा एव वो ग्रहा गृहायान्तै इति । मद्ग्रहोऽग्रं प्रथमं येषां ते तथोक्ताः, ग्रहेः कर्मण्यात्मनेपदं यक्, ग्रहिज्यादिना सम्प्रसारणम्, झस्याडागमः, पूर्ववदैत्यम् । `देवाः सोममघ्नन्, सोऽपूयदशक्यतामागमत्, ते वायुमब्रुवन् इमं नः स्वदयेति, सोऽब्रवीद्वरं वृणै, मद्देवतान्येव वः पात्राण्युच्यान्तै इति । अहं देवता येषां तानि तथोक्तानि । उच्यान्तै इति वचेः `वचिस्वपि' इत्यादिना सम्प्रसारणम्, शेषं पूर्ववत् । नेज्जिह्मायन्त इति । इच्छब्द आशङ्कां द्योतयति । जिह्मचरणेन नरकपातः सम्भाव्यते, स मा भूदित्यर्थः । जिह्मम्=कुटिलं पापम्, `छन्दसि परेच्छायाम्' इति क्यच्, `अश्वाघस्यात्' इति योगविभागोनात्वम् । वृत्तौ तु वस्तुमात्रं दर्शितम् । जिह्माचरणेनेति । न पुनराचारे उपमानादन्यत्र क्यजस्ति । हेतौ शतृप्रत्ययः । लिङर्थ एवायमिति । हेतुहेतुमद्भावे, कथम् ? उपसंवादे तावत्करणं हेतुः, दानं हेतुमत्; अन्यथा यदि मे भवानिदं कुर्यादिति लिङ् न स्यात्, विभाषा तु लिङिति । अहमपि ते इदं दास्यामीति लृट् । भाष्ये तु ददातेरपि लिङ् प्रयुक्तः । आशङ्कापि कारणतः कार्यानुसरणम्, तत्र कारणं हेतुः, कार्यं हेतुमत् । अथापि करणमवधिः, दानमवधिमदित्यवध्यवधिमद्भाव उपसंवादे प्रतीयते, न हेतुहेतुमद्भावः, आशङ्कायामपि निश्चितो हेतुहेतुमद्भावो नास्तीत्युच्येत, तथापि लिङ्प्रयोगसिद्धयेऽवश्यं वक्तव्योऽत्र हेतुहेतुमद्भावः, अतो लिङर्थ एवायमित्यर्थः । नित्यार्थं तु वचनमिति । छन्दसि नित्योऽत्र लिङ् दृश्यत इति मन्यते, तथापि व्यवस्थितविभाषया सिद्धमिति चेत्तदेव तर्हि वचनेन ज्ञाप्यते ।।

तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ् तवेनः ।। 3.4.9 ।।

कथं ज्ञायत इति । `कर्तरि कृत्' इति वचनात् भावस्तुमर्थो नोपपद्यत इति प्रश्नः । अपकर्षः=अपनयः, स्वार्थश्च धातूनां भाव इति साध्यमानरूपः । स एव हि धातुवाच्यो भावः । घञादिवाच्यस्तु भावो धात्वर्थव्यतिरिक्तः सिद्धतारूपः । पिबध्यै इति । `यको बहुलं छन्दसि' इति लुकि पिबादेशः । मादयध्यै इति । यकः प्रसङ्गे व्यत्ययेन शप् ।।

दृशे विख्ये च ।। 3.4.11 ।।

योगविभागश्चिन्त्यप्रयोजनः ।।

ईश्वरे तोसुन्कसुनौ ।। 3.4.13 ।।

वितृद इति । `ओतृदिर् हिंसानादरयोः' ।।

कृत्यार्थे तवैकेन्केन्यत्वनः ।। 3.4.14 ।।

कृत्यानामर्थो भाकर्मणी इति । यद्यपि भव्यगेयादिषु कर्त्ताप्यर्थः, वह्यं करणम्, स्नानीयं चूर्णित्यादिषु करणादयः; तथापि न तत्र कृत्यत्वेन कर्त्रादिषु विधानम्, किं तर्हि ? स्वरूपेण, अतः कृत्यतया विधानं भावकर्मणोरेवेति भावः । दिदृक्षेण्य इति । दृशेः सन्नन्तात्केन्यः । शुश्रूषेण्य इति । श्रृणोतेः । सयादिसूत्रेऽपीति । येन सयादयो विधीयन्ते तत्र `तुमर्थे सेसेनसे' इत्यत्रेत्यर्तः । तस्य तुमर्थादन्यत्रेति । अन्यथाऽनेनैव तुमर्थे भावेऽपि सिद्धत्वादनर्थकं तत्स्यात् ।।

अवचक्षे च ।। 3.4.15 ।।

एश्प्रत्यय इति । शित्करणं सार्वधातुकत्वार्थम्, तेन चक्षिङः ख्याञ् न भवति ।।

भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् ।। 3.4.16 ।।

संस्थानादीनामवधित्वेन लक्षणभावः । आ समाप्तेरिति । सम्पूर्वो हि तिष्ठतिः समाप्तौ रूढः; सन्तिष्ठते पिण्डपितृयज्ञ इत्यादौ दर्शनात् । आतामितोरिति । `तमु ग्लानौ' ।।

अलंखल्वाः प्रतिषेधयोः प्राचां क्त्वा ।। 3.4.18 ।।

`तुमर्थे' इत्येव । अलंकृत्वेति । `अमैवाव्ययेन' इति नियमादुपपदसमासाभावः । न कर्त्तव्यमित्यर्थः ।

वासरूप इति चेदिति । पूर्वं तु प्रैषादिषु कृत्यानां वचनेन `स्त्र्यधिकाराधूर्ध्वं वासरूपविधिर्नावश्यमस्ति' इति ज्ञापितत्वादिह तदभावमभिप्रेत्य प्राग्ग्रहणं विकल्पार्थमित्युक्तम् ।।

उदीचां माङो व्यतीहारे ।। 3.4.19 ।।

अपमित्येति । `मेङ् प्राणिदाने' क्त्वो ल्यपि `गयतेरिदन्यतरस्याम्' इतीत्वं, ह्रस्वस्य तुक् । अपूर्वकालत्वादिति । पूर्वं ह्यसौ याचते पश्चादपमयते । यदा चास्माद्वचनान्मयतेः क्त्वो भवति तदा `समानकर्तृकयोः' इत्यादिना याचने भवति, अनेन बाधितत्वात्, यथा---द्वितीयद्विर्वचनेन प्रथमद्विर्वचनम् । अनभिधानाद्वा । मेङ इत्यादि । मेङोऽयं कृतात्वस्य निर्देशः कृतः, न पुनः `माङ् माने' इत्यस्य, तस्य व्यतिहारे वृत्त्यसम्भवादित्यर्थः । यद्येवम , मेङ इत्येव वक्तव्यम्, तत्रायमप्यर्थो व्यतीहारग्रहणं न कर्त्तव्यं भवति, तत्राह---ज्ञापनार्थमिति । किं ज्ञाप्यत इत्याह---नानुबन्धकृतमिति । प्रयोजनमाह---तेनेति । यद्ययमर्थो न ज्ञाप्येत, ततः श्रूयमाणे पकारे दैप आत्वं न स्यात्; अनेजन्तत्वात्, ततश्चादाबिति प्रतिषेधे तस्य ग्रहणं न स्यात्, `दाप् लवने' इत्यस्यैव तु स्यात् ।।

परावरयोगे च ।। 3.4.20 ।।

परावरशब्दयोः सम्बन्धिशब्दत्वाद्यपदेक्षं परावरत्वम्, तयोः पूर्वपरयोरेव परावराभ्यां योगो गम्यते, इत्याह---परेण पूर्वस्येति । पूर्वशब्देनात्रावरो विवक्षितः । अप्राप्य नदीमिति । नद्याः पूर्वदेश इत्यर्थः । ततश्च नदी परा भवतीति । परनदीयोगेन पर्वतो विशेष्यति । अतिक्रम्य पर्वतमिति । पर्वतस्य परस्तादित्यर्थः । ततश्चावरः पर्वतो भवति तेनावरपर्वतयोगेन नदी विशेष्यते । अयमप्यपूर्वकालार्थ आरम्भः, अतिक्रमोऽत्र कीदृश इति चिन्त्यम् ।।

समानकर्तृकयोः पूर्वकाले ।। 3.4.21 ।।

क्रियापेक्षत्वात्कर्तृभावस्य धात्वधिकारेऽपि तदर्थस्यैव समानर्त्कृकत्वं विज्ञायते, न धातोरित्याह---समानः कर्त्ता ययोर्धात्वर्थयोरिति । कमानशब्दोऽयमेकवाची, तत्रेति निर्द्धारणे सप्तमीं दर्शयति । षष्ठ्यामपि न दोषः । सप्तमी त्वाश्रिता । पूर्वकाले धात्वर्थे वर्तमानादिति । प्राभाकरास्तु पूर्वप्रयुज्यमानादिति व्याचक्षते, अनुष्ठाने पौर्वकाल्यं नाद्रियन्ते; तद्भाष्यवार्त्तिकविरोधादुपेक्ष्यम् । उक्तं हि---आस्यं व्यादाय स्वपिति संमील्य हसतीत्युपसंख्यानमपूर्वकालत्वादिति । ननु च शक्तिः कारकम्, सा च प्रतिक्रियं भिद्यते, तत्कुतः समानकर्तृकत्वम् ? इत्यत आह---शक्तिशक्तिमतोरिति । इह समानकर्तृकयोरिति द्विवचननिर्देशः क्रियते, तेन द्वयोरेव पौर्वकाल्ये स्यात्, बहूनांन स्यात्, तत्राह---द्विवचनमतन्त्रमिति । अवश्यं येन केनचिद्ववचनेन निर्देशः कर्त्तव्यः, तत्र समानकर्तृकत्वस्य पूर्वकालत्वस्य च भेदाधिष्ठानत्वाद्भेदनिबन्धनयोर्व्दिवचनबहुवचनयोः प्रथमभावित्वाद् द्विवचनं प्रयुक्तम्, न त्वैतत्तन्त्रमित्यर्थः । एवमपि लोकविज्ञानान्न सिद्ध्यति, तद्यथा लोके---अमीषां ब्राह्मणआनां पूर्वं आनीयताम् इत्युक्ते सर्वपूर्व एवानीयते, एवमिहापि सर्वपूर्वायाः क्रियायाः प्राप्नोति, तस्मादेवं वक्तव्यम्---सर्वेषामेवात्र व्रजि प्रति पौर्वकाल्यम्, स्नात्वा व्रजति भुक्त्वा व्रजति पीत्वा व्रजतीति । आख्यातवाच्या हि क्रिया विशेष्यत्कात्प्रधानम्, तेन तां प्रति सर्वासां विशेषणत्वात्परस्परेणासम्बन्धः, तदुक्तम्---`गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यात्' इति । एवं च कृत्वा प्रयोगोऽप्यनियतो भवति---स्नात्वा भुक्त्वा पीत्वा व्रजति, पीत्वा स्नात्वा भुक्त्वा व्रजतीति ।

भुक्तवति ब्राह्मण इति । ननु तुमर्थाधिकाराद्भावे क्त्वाप्रत्ययः, क्तवतुस्तु कर्तरि ? एवं तर्ह्यस्मिन्विषये भावे न भवतीति प्रत्युदाहरणत्वं वाच्यम्, `श्रीशैलशिखरं दृष्ट्वा सर्वपापैः प्रमुच्यते' इत्येवमादीनां कर्तृभेदविषयाणां प्रयोगाणामसाधुत्वमेव । व्रजति जल्पति चेति । यौगपद्यादिह पूर्वकालता नास्ति । अपूर्वकालत्वादि । पूर्वं ह्यसौ स्वपिति पश्चाद्व्याददाति, यदैव हसति तदैव संमीलयति, न वा स्वप्नस्यापरकालत्वात्, अस्यं त्वसौ व्यादाय मुहूर्त्तमपि स्वपिति संमील्य च हसति, ततश्चोत्तरकालभाविस्त्वापहासाद्यपेक्षं पौर्वकाल्यं तदाश्रयश्च प्रत्ययः । इह कस्मान्न भवति---पूर्वं भुङ्क्ते, ततो व्रजतीति ? स्वशब्देनोक्तत्वात् । `विभाषाग्रे' इत्यनेनापि न भवति, किं कारणम् ? साधनपौर्वाकाल्यविषयाणामग्र्यादीनां तत्र ग्रहणम्, अन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वा ततो व्रजतीति । इह तु व्रज्यपेक्षं भोजनस्य यत्पौर्वकाल्यं तत्र क्त्वाप्रत्ययश्चोद्यते, तत्पूर्वशब्देनोक्तम् । न च वचनसामर्थ्यादुक्तेऽपि प्रसङ्गः; साधनपौर्वकाल्यविषयेऽग्र्यादावुपपदे चरिताथेत्वात् । क्रियाविषयत्वाच्च कालव्यवहारस्य तद्द्वारकमेव साधनपौर्वकाल्यं द्रष्टव्यम् । उक्तं हि---
क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका । इति ।

इहास्यते भोक्तुमिति वासरूपेण लड् भवति, यदा आसेः क्त्वा भवति तदा भुजेर्लडादय एव भवन्ति---आसित्वा भुङ्क्त इति, न तु तुमुन् ; अनभिधानात् । आसित्वा भोक्तुमित्युक्ते प्रक्रमत इत्यादीनां सम्बन्धः प्रतीयते ।।

आभीक्ष्ण्ये णमुल् च ।। 3.4.22 ।।

द्विर्वचनसहिताविति । केन पुनरत्र द्विर्वचनमित्याह---आभीक्षण्ये द्वे भवत इत्युपसङ्ख्यानाद् द्विर्वचनमिति । `नित्यवीप्सयोः' इत्यत्र तु वामनो वक्ष्यति---`तिङ्क्षु नित्यता अव्ययकृत्सु च' इति । तन्मते नित्यग्रहणादेवात्र द्विर्वचनम् । पायंपायमिति । `आतो युक्' ।।

न यद्यनाकाङ्क्षे ।। 3.4.23 ।।

अनाकाङ्क्ष इति । पचाद्यजन्तेन नञ्समासः, तद्दर्शितम् । नापरं किञ्चिदाकाङ्क्षते इति । क्त्वा तु पूर्वसूत्रविहितोऽपीति । णमुल् चेत्युक्तम्, तदपेक्षं पूर्वत्वमपिशब्दादनन्तरसूत्रविहितोऽपि आभीक्ष्ण्येनाभीक्ष्ण्ये च क्त्वामात्रस्य प्रतिषेध इत्यर्थः । एतच्च पूर्वकाले यत्प्राप्नोति तन्न भवतीत्येवं प्रकरणापेक्षया प्रतिषेधविज्ञानाल्लभ्यते ।।

विभाषाग्रेप्रथमपूर्वेषु ।। 3.4.24 ।।

अग्रशब्दो देशविशेषवचनोऽप्यस्ति---प्रभोरग्रे भुङ्क्ते इति, इह तु प्रथमशब्दसाहचर्यात्कालविशेषवाचिनो ग्रहणम् । अनुकरणत्वाच्चाग्रे इति विभक्तेर्लुगभावः---अस्यवामीयमिति यथा । आमीक्ष्ण्य इति नानुवर्त्तत इति । अप्राप्तविभाषेयमित्यत्रेयंयुक्तिः । तदनुवृत्तौ हि पूर्वसूत्रेण प्राप्ते विभाषा स्याद्, एवं च ब्रुवता साधनपोर्वकाल्यविषया अग्र्यादय इत्युक्तं भवति । क्रियापौर्वकाल्ये हि अग्र्यादिभिरेव तस्योक्तत्वादाभीक्ष्ण्येऽपि क्त्वाणमुलोरप्राप्तिरिति `आभीक्ष्ण्ये'

इत्यनुवृत्तावप्यप्राप्तविभाषैव स्यात् । न च द्विर्वचनमन्तरेणाभीक्ष्ण्यं द्योतयितुं शक्यमिति न तद्द्योतनायापि क्त्वाणमुलोर्विधानमुपपद्यते । नन्वननुवर्तमानेऽप्याभीक्ष्ण्यग्रहणे पूर्वसूत्रस्यावकाशो यत्राग्र्यादयो न सन्ति, अस्य तु यत्राभीक्ष्ण्यं नास्ति सोऽवकाशः; आभीक्ष्ण्ये चाग्र्यादिषु च सत्सूभयप्रसङ्गे परत्वादियमेव विभाषा प्राप्नोतीत्युभयत्र विभाषेयं युक्ता ? एवं मन्यते---पूर्वविप्रतिषेधेनाभीक्ष्ण्ये नित्य एव विधिर्भवतीति---अग्रेभोजंभोजं व्रजति, अग्रेभुक्त्वाभुक्त्वा व्रजति । एवं पूर्वप्रथमयोरपि द्रष्टव्यम् । नन्वेवं णमुल्यप्राप्ते क्त्वाप्रत्यये तु `समानकर्तृकयोः' इत्यादिना प्राप्ते सत्ययमारम्भ इति पुनरप्युभयत्रविभाषैव युक्ता ? नैतदस्ति; सह विहितौ यौ क्त्वाणमुलौ यद्विषये वासरूपविधेरभावो ज्ञापयितुमिष्टः, तावनन्तरसूत्रविहितौ क्त्वाणमुलावभिप्रेत्याप्राप्तविभाषेयमुच्यते, न तु क्त्वाणमुल्मात्रपेक्षया । क्त्वाणमुलौ प्रत्ययौ भवत इति । किमर्थं पुनः क्त्वा विधीयते, यावता नाभीक्ष्म्येऽपि समानकर्तृकयोरित्येवासौ सिद्धः ? सत्यम् ; विभाषाग्रहणेन वासरूपविधेरभावो ज्ञाप्यत इति वक्ष्यति । न च केवलं णमुल्विधौ तदभावो ज्ञापयितुमिष्यते, किं तर्हि ? क्त्वासहितणमुल्विधौ । तस्माण्णमुलः क्त्वासहितस्य विधिर्यथा स्यादिति णमुल् चेत्यनुवृत्त्या क्त्वोऽप्यनुवादः क्रियते । एवं हि द्वयोः सह विधातुमुपादीयमानं विभाषाग्रहणं तादृश एव विषये वासरूपविधेरभावं ज्ञापयतीति सिद्धमिष्टम् । अग्रेभोजं व्रजतीति । अन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वा व्रजतीत्यर्थः । आमीक्ष्ण्ये लडादयो न भवन्तीति । अग्रे भुङ्क्ते भुङ्क्ते ततो व्रजतीत्येवं न भवतीत्यर्थः ।

उपपदसमासः कस्मान्न भवतीति । प्राप्तविभाषायामस्यामग्र्यादीनां पक्षे प्रत्ययनिवृत्तौ निमित्तत्वम्, न तु प्रत्ययोत्पत्तौ, तयोः `आभीक्ष्ण्ये णमुल् च' इत्यनेनाविशेषेण विहितत्वादित्यनुपपदत्वम् । अप्राप्तविभाषायां त्वग्र्यादीनां प्रत्ययोत्पत्तिं प्रति निमित्तत्वान्निमित्तस्य चोपपदसंज्ञाविधानादुपपदसमासः प्राप्नोतीति भावः । अमैव यत्तुल्यविधानमिति । एतच्च तत्रैव व्याख्यातम् ।।

कर्मण्याक्रोशे कृञः खमुञ् ।। 3.4.25 ।।

उदाहरणेषु करोतिरुच्चारणे वर्त्तते, तस्य शब्दात्मकमेव कर्म भवति । तत्र चोरादिशब्दाः शब्दप्रधानाः । चोरङ्कारम् । कोऽथेः ? चोरशब्दमुच्चार्येत्यर्थः, तदाह---चोरोऽसीत्यादि । चोरकरणमिति । चोरशब्दोच्चारणम् । आक्रोशसम्पादनार्थमिति । निन्दितशब्दोच्चारणमन्तरेण तस्य सम्पादयितुशक्यत्वात् । न त्वसाविति । न हि चोरोऽसीति वचनेन चोरः क्रियते ।।

स्वादुमि णमुल् ।। 3.4.26 ।।

स्वादुमीत्यर्थग्रहणमिति । एतच्च व्याख्यानाल्लभ्यते । स्वाद्वर्थेष्विति । मान्तत्वमपि सर्वेषां भवति; अर्थे सम्भावत् । लवणसम्पन्नशब्दावपि स्वादुशब्दापर्यायो । अथ `स्वादुमि' इति मकारान्तनिपातनं किमर्थम्, याषता खमुञ् प्रकृतः, सोऽनुवत्तिष्यते, तत्र `अरुद्विषदजन्तस्य मुम्' इति मान्तत्वं सिद्धमिति ? तत्राह---मकारान्तनिपातनमीकाराभावार्थमिति । भावप्रत्ययविषये मान्तत्वे निपात्यमाने `वोतो गुणवचनात्' इति ङीप् न भवति, मकारान्तत्वादुकारान्तत्वाभावादित्यर्थः । च्व्यन्तस्येति । खमुञ्यपि न सर्वत्र मुम् सिद्ध्यति; तद्विदौ `अनव्ययस्य' इत्यधिकारादिति भावः । एवं तर्हि मान्तत्वमेव निपात्यताम्, प्रत्ययस्तु प्रकृतः खमुञेव विधेयः ? नैतदस्ति; अव्ययार्थमेव मान्तनिपातनं स्यादिति ङीप्स्यादेव । णमुलि तु मान्तत्वमपूर्वं विधीयमानमीकाराभावार्थं च च्व्यन्तस्य च मकारान्तार्थं विज्ञायते । अवश्यं चोत्तरत्र णमुल् विधेय इति लाघवाभावादिहैव कृतः । अस्वाद्वीं स्वाद्वीं कृत्वेति । द्वयोर्वाक्ययोस्तन्त्रेणोपादानमेतत् । स्वाद्वीं कृत्वा यवागूं भुङ्क्त इतीकाराभावस्योदाहरणम्, अस्वादुं स्वादुं भुङ्क्त इत्यव्ययस्य । इह यदि क्त्वादयः प्रत्ययाः `कर्त्तरि कृत्' इति वचनात्कर्त्तरि स्युः, इह पक्त्वोदनो भुज्यते देवदत्तेनेति देवदत्तात्तृतीया न स्यात्, क्त्वाप्रत्ययेनाभिहितः कर्त्तेति । अथ क्त्वाप्रत्ययेनाभिधाने सत्यपि भुजिप्रत्ययेनानभिहितः कर्तेति कृत्वाऽनभिहिताश्रया विभक्तिर्भवति तृतीया ? यद्येवम्, ओदने द्वितीया प्राप्नोति, किं कारणम् ? भुजिप्रत्ययेनाभिधानेऽपि क्त्वाप्रत्ययेनानभिहितं कर्मेति । तथा यदि कर्मणि स्युः, पक्त्वौदनं भुङ्क्ते देवदत्तेन, पक्त्वौदनं भुङ्क्ते देवदत्त इत्येव तु भवति । तथास्मिन् णमुल्यपि स्वादुङ्कारं भुज्यते यावगूर्देवदत्तेनेति यवाग्वा द्वितीया न भवति, स्वादुङ्कारं यवागूं भुङ्क्ते देवदत्त इत्यत्रापि कर्मणि द्वितीया भवति, कर्त्तरि तृतीया च न भवति । एवमा तुमुनो द्रष्टव्यम् । तथा `तमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' `समानकर्तृकेषु तुमुन्' इत्यत्रापि तुमुनि भोक्तुमोदनः पच्यते देवदत्तेन, इष्यते ग्रामो गन्तुं देवदत्तेन, भोक्तुमोदनं पचति देवदत्तः, ग्रामं गन्तुमिच्छति देवदत्त इति सर्वत्रानुप्रयोगात् यत्र लादयस्तदनुरोधेनैव कर्तृकर्मणोर्विभक्तिर्भवति । तस्मादव्ययकृतः समानाधिकरण इति वक्तव्यम्, केन सामानाधिकरण्ये ? अनुप्रयोगेण । एतदुक्तं भवति---अनुप्रयुज्यमानाद्धातोर्यस्मिन्कारके लादयो विहितास्तत्रैवाव्ययकृतोऽपि भवन्तीति । एवं ह्युभाभ्यां कर्तृकर्मणोरभिहितत्वाद्यथायथं विभक्तयः सिद्ध्यन्ति । वृत्तिकारस्त्विममर्थमन्यथा साधयितुमाह---तुमर्थाधिकाराच्चेति । तत्र सयादिसूत्रे तुमर्थग्रहणात्तमुन् भावे भवतीति ज्ञापितम्, तदेव च तुमर्थग्रहणं `शकधृषज्ञा' इतियावदनुवर्त्तते, अतः सर्व एते क्त्वादयो भावे भवन्तीति तत्र चोदयति----यद्येवमिति । तृतीया कस्मान्न भवतीति । एतच्चोपलक्षणम्, स्वादुङ्कारं यवागूःभुज्यते देवदत्तेनेत्यत्र कर्मणि द्वितीया कस्मान्न भवतीत्यपि द्रष्टव्यम् । `अनभिहिते' इति पर्युदासे चैतच्चोद्यम्---तदा हि सत्यभिधानेऽनभिधाने च यतोऽनभिधानं तदाश्रया विभक्तिः प्राप्नोति । परिहरति---भुजिप्रत्ययेनेति । `अनभिहिते' इति प्रसज्यप्रतिषेध आश्रीयते इति भावः । तदा हि यतोऽभिधानं तदाश्रयः प्रतिषेधो भवति । ननु च शक्तिः कारकम्, अन्या च करणविषया शक्तिः, अन्या च भुजिविषया, तत्र यद्येकस्या शक्तेरभिधानमनभिधानं च स्यात्, स्यादयं परिहारः, यतोऽभिधानं तदाश्रयः प्रतिषेध इति शक्तिभेदात्त्वयुक्तः ? इत्यत्राह---न चास्मिन्निति । किं कारणं भेदो न विवक्षितः ? इत्याह---समानकर्तृकत्वं हि विरुध्यत इति । ननु च मा नामास्मिन्प्रकरणे शक्तिभेदो विवक्षितः, `अनभिहितेन' इत्यत्र कस्मान्न विवक्ष्यते ? असम्बद्धमेतत् ; कथं हि तस्मिन्नेव प्रयोगे तदैव विवक्षाविवसे स्याताम् । किञ्चि---`अनभिहिते' इत्येकत्वादीनामाधारनिर्देशोऽनभिहिते कर्मादौ यदेकत्वादि तत्रेति, द्रव्यमेव चैकत्वादीनामाधारो न शक्तिः, अतस्तत्रापि द्रव्यमेवानभिहितमित्युच्यते, तस्य च शक्तिद्वारेणाभिधानानभिधानयोः सतोर्यतोऽभिधानं तदाश्रयः प्रतिषेधो भवतीति युक्तमेव । अभ्युपेत्यापि शक्तिभेदविवक्षां परिहारमाह---प्रधानशक्त्यभिधाने चेति । आख्यातपदवाच्या क्रिया विशेष्यत्वात्प्रधानम्,

विशेषणभूता त्वप्रधानम्, तद्द्वारेण तद्विषययोः शक्त्योरपि गुणप्रधानभावः । तत्र प्रधानानुवतित्वाद् गुंणानां तन्मुखप्रेक्षित्वात्तद्विरुद्धस्वकार्यारम्भाभावाद्यथायथं विभक्तिसिद्धिरित्यर्थः । उक्तं च---
प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथके ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुद्ध्यते ।।
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
यदा गुणे तदा तद्वदनुक्तापि प्रतीयते ।। इति ।
वयं तु ब्रूमः---सकृत् श्रुतस्य युगपदुभाभ्यां सम्बन्धाभावादेकेनैव प्रधानेन शाब्दोऽन्वय इति, इतरेण तु सन्निधानादार्थ इति ।।
अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् ।। 3.4.27 ।।
कथं पुनरसौ सिद्धाप्रयोग इति । सिद्ध ओदन इत्यादौ सिद्धशब्दो निष्पन्नवचनः, ततश्च सिद्धश्चेदप्रयोगः कथमप्रयुज्यमानात्ततो णमुल्विधिरिति प्रश्नः । `सिद्धे सत्यारम्भोनियमार्थः' इतिवत्प्राप्तवचनः सिद्धशब्द इत्युत्तरम् । निर्थकत्वादिति । निष्प्रयोजनत्वात् । एवमेवेति । निरर्थक एव सन्नित्यर्थः । एतदेव स्फोरयति---अन्यथा भुङ्क्त इति । यावानर्थ इति । उदाहरणेष्वनुप्रयोगेषु या क्रिया तत्प्रकारवचना अत्रान्यथादयः । अन्यथा कृत्वा शिरो भुङ्क्त इति । अत्र तु विना करोतिना शिरसोऽन्यथाकरणं न प्रतीयते, भुजिक्रियागत एव प्रकारे गम्यते, अतोऽवश्यं प्रयोज्यः करोतिः ।।
यथातथोरसूयाप्रतिवचने ।। 3.4.28 ।।
यद्यसूयन् पृच्छति प्रतिवक्तीति । पृच्छति सति यद्यसूयन्प्रतिवक्तीत्यर्थः । `असु मानसोपतापे' कण्ड्वादिः । तत्रेति । एवम्भूते विषये यत्प्रतिवचनं तदसूयाप्रतिवचनमित्यर्थः । यथाकारमिति । प्रष्टुमनर्हः सन्यदि पृच्छति तदेदमुत्तरम् । यथा कृत्वाहं भोक्ष्य इति । तत्त्वकथनमेतत् । कथं पुनरत्र क्त्वाप्रत्ययः, यावता `सिद्धाप्रयोगे' इति वचनादनर्थकोऽत्र करोतिः, ततश्च भेदनिबन्धनस्य पौर्वकाल्यस्य समानकर्तृकत्वस्य चाभावान्नात्र प्राप्नोति, णमुल् पुनरुभयाभावेऽपि वचनसामर्थ्याद्भवति ? उच्यते; क्रियासामान्यवचनः करोतिस्तद्विषयप्रकारो यथातथाशब्दाभ्यामुच्यते, तत्र सामान्यस्य सन्निहिते विशेषे पर्यवसानात्तद्विषय एव प्रकार उक्तो भवदि, ततश्च यथा भोक्ष्यते इति यावानर्थस्तावानेन सत्यपि करोतावित्येतावता सिद्धाप्रयोगत्वमुच्यते, न पुनरत्यन्तमबिदेयाभावात्, ततश्च क्रियाभेदनिबन्धन उपपन्न एव क्त्वाप्रत्ययः । एवं च कृत्वा पूर्वसूत्रेऽपि वासरूपेण क्त्वा भवति । भाष्येऽपि तत्र तत्र प्रयुज्यते--`अन्यथा कृत्वा चोदितमन्यथा कृत्वा परिहार उक्तः', `कथं कृत्वा बाधकम्' इत्यादि ।।
कर्मणि दृशिविदोः साकल्ये ।। 3.4.29 ।।
कर्मण्युपपदे साकल्यविशिष्ट इति । सकलस्य भावः साकल्यम्, तद्विशिष्टे कर्मण्युपपदे इत्यर्थः । कन्यादर्शं वरयतीति । अत्र दर्शनविषयभूतानां सर्वासामेव कन्यानां वाक्यार्थेनान्वयात्साकल्यम्, सर्वाः कन्या वरयतीत्यत्रापि दर्शनविषयभूता इत्यर्थः । अतिशयप्रतिपादनपरं चैतत्; यस्मात्कस्याश्चित्परित्यागेऽपि भवत्येव । जानाति लभते विचारयति वेति । सत्तार्थस्य तु विदेरकर्मकत्वादग्रहणमिति भावः ।।
यावति विन्दजीवोः ।। 3.4.30 ।।
विन्देति विदेर्लाभार्थस्यानुकरणम्, तस्य हि विन्दतीत्यादौ `शे मुचादीनाम्' इति नुमस्ति । यावल्लभते ताक्द् भुङ्क्ते इत्यर्थ इति । एतेनासाकल्यं दर्शयति, साकल्ये हि पूर्वेणैव सिद्धम् ।।
चर्मोदरयोः पूरेः ।। 3.4.31 ।।
कर्मणीत्यनुवृत्तेः पूरेरिति ण्यन्तस्येदं ग्रहणम्, केवलस्याकर्मकत्वादित्याह---पूरयतेरिति । उदरपूरं भुङ्क्त इति । उदरं पूरयन् भुङ्क्त इत्यर्थः । एवमादिषु प्रायेण पौर्वकाल्यं नास्ति, तस्मात् `पूर्वकाले' इति न सम्बन्धनीयमित्याहुः ।।
वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ।। 3.4.32 ।।
गोष्पदपूरमिति । गोः पदं पूरयन्वृष्ट इत्यर्थः, वृषरेकर्मकत्वात्कर्त्तरि क्तः । अत्रापि `पूर्वकाले' इति न सम्बन्धनीयमित्याहुः । सीतापूरमिति । सीता=लाङ्गलपद्धतिः ।
अस्यग्रहणं किमर्थमिति । सन्निधानादेव पूरयतेरूलोपो विज्ञास्यत इति प्रश्नः । उपपदस्य मा भूदिति । अस्येत्यनुच्यमाने वर्षप्रमाणवदूलोपोऽपि समुदायविषयो विज्ञायेत---प्रकृत्युपपदसमुदाये सन्निहितो य ऊकारस्तस्य लोप इति, ततश्चोपपदस्यापि स्यादिति भावः ।
`ऊलोपश्चास्यान्यतरस्याम्' इति शक्यमकर्तुम् । कथं गोष्पदप्रमिति ? `प्रापूरणे' इत्यस्माद्धातोः `आतोऽनुपसर्गे कः', क्रियाविशेषणत्वात्कर्मत्वनपुंसकत्वे, न रूपभेदः, नार्थभेदः, न स्वरभेदः । कप्रत्यये थाथादिसूत्रेणान्तोदात्तत्वम्; णमुल्यूलोपे कृते पूर्वस्य स्वरभाजोऽभावात् `लिति' इत्यस्याप्रवृत्तौ प्रत्ययखरः, तस्य कृदुत्तरपदप्रकृतिस्वरेणावस्थानमित्यन्तोदात्तत्वमेव । ननु च णमुलि सति `कृन्मेजन्तः' इत्यव्ययत्वाद्विभक्तीनां श्रवणं न भवति, तरपि च गोष्पदप्रतरपमिति भवति, कल्पबादौ च गोष्पदप्रकल्प इति भवति, अज्ञातादिषु चाव्ययत्वादकज्भवति, के तु सति सर्वमेतन्न सिद्ध्यति ? उच्यते; इष्यते तावद्विभक्तीनां श्रवणमेकेन गोष्पदप्रेणेति, तरबादिषु चोपन्यस्तानि रूपाणि नेष्यन्त एव । एतच्च भाष्ये ऊलोपप्रत्यख्यानादवसीयते ।
ननु च गोष्पदपूरमित्याद्यपि घञैव सिद्धम् ? न सिद्ध्यति, यदि तावत्करणे घञं विधाय तदन्तेन कर्मणि षष्ठ्याः समासः क्रियते, ततस्थाथादिस्वरेणान्तोदात्तत्वं स्याद् । अथ भावे घञि व्यधिकरणपदो बहुव्रीहिः क्रियते---गोष्पदस्य पूरणमस्मिन्वर्ष इति, ततः पूर्वपदप्रकृतिखरप्रसङ्गः । गोष्पदपूरन्तराम्, गोष्पदपूरङ्कल्पमित्यादि च न सिद्ध्यति, तस्माद् `वर्षप्रमाणे' इति वक्तव्यम् ।।

चेलेः क्नोपेः ।। 3.4.33 ।।

अस्माद्धातोर्ण्यन्तादिति । पुका निर्देशादेव ण्यन्तत्वमवसीयते, व्याख्यानाच्चेल इत्यर्थग्रहणमित्याह---चेलार्थेष्विति । चेलक्नोपं वृष्ट इति । चेलं क्नोपयन्=शब्दाययन्वृष्ट इत्यर्थः । यथा वर्षणे चेलानि शब्दायन्ते तथा वृष्ट इति यावत् ।।

निमूलसमूलयोः कषः ।। 3.4.34 ।।

अत्र प्रकरणे समानकर्तृकत्वमेव । निमूलकाषमिति । कषतिर्हिंसार्थः । एकस्यैव धात्वर्थस्य सामान्यविशेषभावेन भेदे सति विशेषणविशेष्यभावः । निगतं मूलमस्य निमूलम् । सह मूलेन समूलं कषणं करोति, सह मूलेन कर्षतीत्यर्थः । एवं सर्वत्र प्रकरणे द्रष्टव्यम् ।।

समूलाकृतजीवेषु हन्कृञ्ग्रहः ।। 3.4.36 ।।

जीवग्राहमिति । जीवतीति जीवः, इगुपधलक्षणः कः । जीवन्तं गृह्णातीत्यर्थः ।।

करणे हनः ।। 3.4.37 ।।

नित्यसमासार्थं चेति । `हिसार्थानाम्' इत्यनेन णमुलि `तृतीयाप्रभृतीन्यन्यतरस्याम्' इति विकल्पितः समासः स्याद्, अतो हिंसार्थेऽप्यनेनैव णमुलेषितव्य इत्यर्थः ।

कथं पुनरिष्यमाणोऽपि लभ्यते, यावताऽहिंसार्थे हन्तौ सावकाशोऽयं विधिः, `हिंसार्थानाम्' इत्यस्य तु हन्तिव्यतिरिक्तो हिंसार्थोऽवकाशः; हिंसार्थे हन्तावुभयप्रसङ्गे परत्वात्स एव विधिः प्राप्नोति ? तत्राह--पूर्वविप्रतिषेधेनेति । कथं तर्हि `हिंसार्थानाम्' इत्यत्रोदाहरिष्यते---दण्डोपघातं गाः कालयति, दण्डेनोपघातं वेति ? अत्राहुः---यत्रैक एव धात्वर्थः सामान्यविशेषभावेन भिद्यमानो विशेषणविशेष्यबावमनुभवति सोऽस्य विषयः; `कषादिषु यथाविध्यनुप्रयोगः' इति वचनात् । अत्यन्तभिन्नधात्वर्थसम्बन्धे तु तेनैव णमुल् भवतीति । एवं च नित्यसमासार्थो यथाविध्यनुप्रयोगार्थश्चेति, कोऽर्थः ? यथाविध्यनुप्रयोगार्थः सन्नित्यसमासार्थ इत्यर्थः ।

इह द्वर्हन्ग्रहणं समूलग्रहणं च क्रियते, सकृदेव तु शक्यं कर्तुम्, कथम् ? एवं वक्ष्यामि---जीवाकृतयोर्ग्रहकृञः; शुष्कचूर्णरुक्षेषु पिषः, निमूले कषः, समूले हनश्च, चकारात्कषश्च, ततः करणे हन इत्येव, यदेतत्कषादिषु यथाविध्यनुप्रयोग इति एतद्ग्रहादिष्विति वक्तव्यम् । तथा तु न कृतमित्येव ।।

स्नेहने पिषः ।। 3.4.38 ।।

व्याख्यानात्स्नेहने इत्यर्थग्रहणमित्याह---स्नेहनवाचिनीति । उदपेषमिति । `पेषंवासवाहनधिषु च' इत्युदकस्योदभावः । `शुष्कचूर्ण' इत्यत्र स्नेहनग्रहणं न कृतम्, कर्मणि तत्र प्रत्ययः, इह तु करणे ।।

हस्ते वर्त्तिग्रहोः ।। 3.4.39 ।।

`जीवे ग्रहः, हस्ते च, वर्त्तेश्च' इति नोक्तम्, तत्र कर्मोपपदम्, इह तु करणम् । वर्त्तिर्ण्यन्त इति । निर्देश एवात्र प्रमाणम् । हस्तवर्त्तं वर्त्तयतीति । हस्तेन वर्त्तयति, गुलिकां करोतीत्यर्थः ।।

स्वे पुषः ।। 3.4.40 ।।

स्वपोषमिति । पित्पर्यायवचनस्य चेति । स्वरूपेऽपि भवति ।।

संज्ञायाम् ।। 3.4.42 ।।

अनधिकरणार्थोऽयमारम्भः, पूर्वयोगस्त्वसंज्ञार्थः । कथं तर्हि ग्रामे बन्ध इति ? वासरूपविधिना घञ् भविष्यति ।।

कर्त्रोर्जीवपुरुषयोर्नशिवहोः ।। 3.4.43 ।।

जीवेन नष्ट इति । जीवेन करणेनापदं प्राप्त इत्यर्थः । पुरुषेणोढ इति । पुरुषेण करणेन देशान्तरं प्रापितो देवदत्तादिरित्यर्थः ।।

ऊर्ध्वे शुषिपूरोः ।। 3.4.44 ।।

ऊर्ध्वशोषं शुष्यतीति । वृक्षादिरूर्ध्व एव तिष्ठन् शुष्यतीत्यर्थः । ऊर्ध्वः पूर्यत इत्यर्थ इति । ऊर्ध्वमुख एव सन् घटादिर्वर्षोदकादिना पूर्णो भवतीत्यर्थः ।।

उपदंशस्तृतीयायाम् ।। 3.4.47 ।।

इतः प्रभृति पौर्वकाल्यमप्यस्ति । मूलकोपपदंशं भुङ्क्ते इति । ननु च नात्र तृतीयान्तस्योपदंशिना संबन्धः, न हि मूलकेनान्य उपदश्यते, किं तर्हि ? तदेवोपदश्यते, भुजिना तु संबन्ध उपपद्यते ; तम्प्रति करणत्वात्, किं तूपदंशिना समार्थ्याभावात्प्रत्ययो न प्राप्नोति, उपपदसंज्ञा च नस्यात्, तदभावादुपपदसमासोऽपि न प्राप्नोति, वचनस्य तु दशनैरुपदश्य भुङ्क्ते इत्यादिरवकाशः स्यात् ? इत्यत आह---मूलकादि चेति । सत्यं मूलकादेर्भुजिनैव शाब्दोऽन्वयः, उपदंशिना तु कर्मापेक्षायां सन्निधानाद्योग्यत्वाच्च वस्तुतः सम्बन्धोऽस्त्येव, भुजिं प्रति करणत्वमन्यथा नोपपद्यते, ततश्चायमर्थः---मूलकेन भुङ्क्ते, किं कृत्वा ? उपदश्य, किमुपदश्य ? तदेव मूलकमिति । यदि तु यत्र तृतीयान्तेनैव शाब्दोऽन्वयस्तत्रैवायं प्रत्ययोऽभिमतः स्यात्, करण इत्येव ब्रूयाद्, यथा--करणे हन इति । तस्मादार्थेन सम्बन्धेन सामर्थ्ये सति प्रत्ययादिकं सर्वं भविष्यति ।।

हिसार्थानां च समानकर्मकाणाम् ।। 3.4.48 ।।

`धातुसम्बन्धे' इत्यधिकारादनुप्रयोगधातुना समानकर्मत्वं विज्ञायते, इत्याह---अनुप्रयोगधातुनासमानकर्मकाणामिति । कालयति । `कल विक्षेपे' चुरादिः । दण्डताडमिति । `तड आघाते' चुरादिरेव । उपहत्येति । `वा ल्यपि' इत्यनुनासिकलोपः, ह्रस्वस्य तुक् ।।

सप्तम्याञ्चीपपीडरुधकर्षः ।। 3.4.49 ।।
उपशब्दः प्रत्येकमिति । पीडादीनां समाहारद्वन्द्वं कृत्वोपपूर्वः `पीडरुधकर्ष' इत्युत्तरपदलोपी समासः । सौत्रः पुंल्लिङ्गनिर्देशः । करणाधिकरणविवक्षाभेदेनोपपदेषु विभकर्तिदूयम् । कर्षतेरिति भौवादिकस्य, न कृषतेरिति; तौदादिकस्य शपा निर्देशात् । शपा निर्देशस्तु विहितगुणस्योच्चारणाद्विज्ञायते । सूत्रे तु पञ्चम्यर्थे प्रथमा, किञ्च स्याद्यदि तौदादिकस्य ग्रहणं स्यात्, यावतोभयोरपि विलेखनार्थत्वान्नार्थभेदो नापि रूपभेदः ? यद्याप्युभयोरपि विलेखने पाठः, तथापि तौदादिकस्य क्षेत्रविषये विलेखने वृत्तिः---पञ्चभिर्हलैः कृषतीति । तेन क्षेत्रे उपकृष्य हलेनोपकृष्येति तौदादिकात् क्त्वाप्रत्यय एव भवति, न णमुल् ।।
समासत्तौ ।। 3.4.50 ।।
सप्तम्यां तृतीयायामित्यनुवर्त्तते इति । पूर्वसूत्रेऽपि स्वरितत्वादेव तृतीयाऽनुवर्त्तते, सप्तम्यां तु तस्या निवृत्तिर्मा विज्ञायीति चकारः क्रियते । तेन चानुकृष्टमुत्तरत्र नानुवर्त्तते इति न चोदनीयम् । युद्धसंरम्भादिति । कोपादिना मनः क्षोभपूर्वको वाक्कायविकारः=संरम्भः, युद्धार्थः संरम्भो युद्धसंरम्भः, अश्वघासादिवत्षष्ठीसमासः । अत्यन्तं सन्निकृष्य युद्ध्यन्ते इत्यर्थ इति । सन्निकर्षप्रतिपादनपरमेतत्केशग्रहणं भवतु, मा वा भूदिति ।।
प्रमाणे च ।। 3.4.51 ।।
तृतीयासप्तम्योरित्येवेति । अर्थानुवृत्तिप्रदर्शनमेतत्, न ह्येवंविधः शब्दः प्रकृतोऽस्ति । द्व्यङ्गुलोत्कर्षमिति । द्वयोरङ्गुल्योः समाहारो द्वयङ्गुलम्, `तत्पुरुषस्याङ्गुलेः' इत्यच्समासान्तः, द्व्यङ्गुलेनोत्कृष्य परिच्छिद्येत्यर्थः । ह्रस्वाः खण्डाः=खण्डिकाः ।
अपादाने परीप्सायाम् ।। 3.4.52 ।।
परीप्सा त्वरिति । `ञित्वरा सम्भ्रमे' घटादिः, `घटादयः षितः', षित्त्वादङ् । शय्योत्थायमिति । `उदः स्थास्तम्भोः' इति तिष्ठतिसकारस्य तकारः, पूर्वद्युक् । अवश्यकर्त्तव्यमपीति । अक्षिप्रक्षालनादिकम् । द्वितीयायां परीप्सायामित्येवेति । `अनुदात्तं पदेमकवर्जम्' इत्यत्रापि परीप्सा भवत्येव, कथम् ? परिभाषेयम्, पदग्रहणं च परिभाषार्थम् । तेनोदात्तः स्वरितो वा यत्र विधीयते तत्र तत्समकालमेवैकमचं वर्जयित्वा परिशिष्टमनुदात्तं कर्त्तव्यम्, न विलम्बितव्यमिति ।।
स्वाङ्गेऽध्रुवे ।। 3.4.54 ।।
स्वाङ्गलक्षणं चतुर्थे वक्ष्यते---अद्रवं मूर्त्तिमदित्यादि । अक्षिनिकाणमिति । `कण निमीलने' चुरादिनिपूर्वः । उत्त्रिप्य शिरः कथयतीति । ननु च ध्रुवमिति नित्यमुच्यते---ध्रुवा द्यौर्ध्रुवा पृथिवीति यथा; अध्रुवमनित्यम्, शिरश्चाप्यनित्यमेव, प्राणिनामेवानित्यत्वादत आह---यस्मिन्नङ्ग इति । अयं भावः---विशेषणसामर्थ्यात्प्रकर्ष आश्रीयते, प्रकर्षेण यदध्रुवमिति । प्रकर्षश्च जीवत्यपि प्राणिनि कदाचिदभाव इति ।।
परिक्लिश्यमाने च ।। 3.4.55 ।।
परिक्लिश्यमान इति । `क्लिशू विबाधने' इत्येतस्यैतद् रूपम्, न तु `क्लिश उपतापे' इत्यस्य, परिश्च सर्वतो भाव इत्याह---परिक्लेशः सर्वतो विबाधनमिति ।।
विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ।। 3.4.56 ।।
अनवयवेनेति । साकल्येन । पदार्थानामिति । गेहादीनाम् । तात्पर्यमिति । पौनः पुन्यमाभीक्ष्ण्यमित्यर्थः । द्रव्ये व्याप्तिरित्यादिना व्याप्त्यसेवयोर्विषयविभागं दर्शयति । गेहानुप्रवेशमिति । ननु व्याप्तौ वीप्सा गम्यते, आसेवायां च नित्यत्वमिति `नित्यवीप्सयोः' इति द्विर्वचनं प्राप्नोति, तत्कस्मान्न भवतीत्याह---समासेनेति । यद्यपि समास एतयोरर्थयोर्न विधीयते, तथापि स्वभावत एतयोस्तेनाभिदानम्, यथा---सप्तपर्वा इति, पर्वगताया वीप्सायाः---पर्वणिपर्वणि सप्त पर्णान्यस्येति । तथा च वक्ष्यतीति । `नीत्यवीप्सयोः' इत्यत्र वक्ष्यति । भाष्यकारः । तिङ्क्षु नित्यतेति । उपलक्षणम्, `अव्ययकृत्सु च' इत्यपि द्रष्टव्यम् । क्त्वानिवृत्त्यर्थमिति चेदिति । `आभीक्ष्ण्ये णमुल् च' इत्यनेन क्त्वाणमुलौ द्वावपि विहितौ, तत्र विश्यादिभ्यो णमुलेव यथा स्यात्, क्त्वाप्रत्ययो मा भूदित्येवमर्थं पुनर्णमुलुच्यत इति चेदित्यर्थः । दूषयति---नेष्टत्वादिति । इष्यते ह्यासेवायां विशिप्रभृतिभ्यः क्त्वा---गेहमनुप्रविश्यानुप्रविश्यास्त इति । द्वितीयोपपदार्थं तर्हीति । अत्र हि `द्वितीयायां च' इत्यधिकारद् द्वितीयान्तस्योपपदसंज्ञा लभ्यते, किमर्थं पुनरुपपदत्वमिष्यते ? इत्याह---उपपदसमास इति । `तृतीयाप्रभृतीन्यन्यतरस्याम्' इति वचनात्पक्ष इत्युक्तम् । तेन हि सत्युपपदाभाव इति । सप्तमीस्थस्य कस्यचिदभावात् ।।
अस्यतितृषोः क्रियान्तरे कालेषु ।। 3.4.57 ।।
`असु क्षेपणे', `ञितृषा पिपासायाम्' । क्रियामन्तरयतीति क्रियान्तर इति । व्यवधानवाचिनोऽन्तरशब्दात्तत्करोतीति णिचि `कर्मण्यण्' । पाययतीति । पिबतेर्णिचि `शाच्छासाह्वा' इत्यादिना युक् । अत्यसनेनेत्यादि । यच्चाद्य पानं यच्च द्व्यहे गते भविता, तन्मध्यवर्त्तित्वादत्यसनतर्षणयोः, एतदेव स्पष्टयन्नुदाहरणस्यार्थमाह---अद्य पाययित्वेत्यादि ।
द्व्यहमुपोष्येति । उपपूर्वाद्वसेः क्त्वा ल्यप्, यजादित्वात्सम्प्रसारणम्, `शासिवसिघसीनां च' इति षत्वम्, अत्रोपवासेन भोजनं व्यवधीयते । अहरिति । `कालाध्वनोः' इति द्वितीया । कृत्स्नमहरिषूनत्यस्य क्षिप्त्वा गत इत्यर्थः । योजनमत्यस्येति । क्वचित्स्रुघ्नादौ पाययित्वा तता योजनमतिक्रम्य पाययतीत्यर्थः ।।
नाम्न्यादिशिग्रहोः ।। 3.4.58 ।।
आदिशेर्ग्रहेश्चेति । एतेनाङो दिशिनैव सम्बन्धः, न ग्रहिणेति दर्शयति ।।

अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ ।। 3.4.59 ।।

`अयथाभिप्रेताख्याने' इति नञः प्रश्लेषः पश्चान्निर्देशाद्विज्ञायते, अन्यथाऽसन्देहार्थं पूर्वं निर्दिशेत्, अयथाभिप्रेतशब्दश्चाख्यानक्रियाविशेषणं यथाभिप्रेतं न भवति तथाख्यान इत्यर्थः । पुत्त्रजन्म प्रार्थमानं ब्राह्मणं गत्वा केनचिद्गोपनीयवन्नीचैराख्यातम्--ब्राह्ण पुत्त्रस्ते जात इति तममृष्यमाणो ब्राह्मण आह--किं तर्हीति । पुत्त्रजन्माख्यानस्य प्रियत्वेऽपि आख्यानप्रकारस्यानभिप्रेतत्वाद्भवत्युदाहरणम्, त एवायथाभिप्रेताख्यान इत्युक्तम्, न पुनरप्रियाख्यान इति । आचक्ष इति । लट्, `थासस्से', शपो लुकि `स्कोः संयोगाद्योः' इति ककारलोपः, `षढोः कः सि' । उदाहरणेऽयथाभिप्रेताख्यानं दर्शयति---उच्चैर्नामेति । नामशब्दः प्रसिद्धौ, न पुनरिदं ब्राह्मणवाक्यमुक्तमिति `उपदंशस्तृतीयायाम्' इत्यत्रेदमुक्तम् । समासार्थं वचनमिति । एतदेवोपपादयति---तथा हीति । `क्त्वा च' इत्यत्र `तृतीयाप्रभृतीन्यन्यतरस्याम्' इति वर्त्तते, तस्मादनेन यः क्त्वा विहितस्तेनैव पक्षे समासो लभ्यते, न तु समानादिसूत्रविहितेन, न हि तेन तृतीयाप्रभृतिषूपपदेषु क्त्वा विधीयत इत्यर्थः । णमुल्ग्रहणमनर्थकम्, प्रकृतो ह्यसौ तत्र क्त्वा चेति वक्तव्यम् ? इत्यत आह---णमुलधिकार इत्यादि । तुल्यकक्षत्वम्=तुल्यबलत्वम् ।। तेनेत्यादि । यदि तु चकारेण णमुलनुकृष्येत, उत्तरत्र नानुवर्त्तेत; यत्नाभावात् । पुनर्णमुल्ग्रहणे तु द्वन्द्वनिर्दिष्टयोर्द्वयोरप्युत्तरत्रानुवृत्तिः सिद्धा भवति ।।

तिर्यच्यपवर्गे ।। 3.4.60 ।।

तिर्यवकृत्येति । तिरोऽञ्चतीति `ऋत्विग्' इत्यादिना क्विन्, `तिरसस्तिर्यलोपे' इति तिर्यादेशः । व्युत्पत्तिमात्रं चैतत्, न त्वत्रावयवार्थोऽस्ति, समुदायो ह्ययमपवर्गे वर्त्तते तद्दिर्शितम् । समाप्य गत इत्यर्थ इति । तिर्यवकृत्वेति । अनृजु कृत्वा, अग्रतः स्थितं पार्श्वे क्षिप्त्वेत्यर्थः । `तिर्यचि' इत्ययुक्तोऽयं निर्देशः, भसंज्ञायां सत्याम्, `अचः' इत्यकारलोपे तिरश्चीति भवितव्यम् ? अत आह--तिर्यचीति शब्दानुकरणमेतदिति । `अच' इत्यर्थवतोऽजित्यस्य ग्रहणम् । स चार्थो लोकप्रसिद्धो गृह्ते; `अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः' इति न्यायात् । अतोऽञ्चेः स्वार्थे वर्तमानस्याल्लोपः । एतत्तु तत्र स्थितस्य शब्दरूपस्यानुकरणम्, तेनानुकार्येण रूपेणार्थवन्न तु लौकिकार्थेन, तेन लोपाभाव इति भावः । नन्वेवमपि `प्रकृतिबदनुकरणं भवति' इति लोपः प्राप्नोत्येवात आह---न च प्रकृतिवदनुकरणेन भवितव्यमिति । कस्मादित्याह---अनुक्रियमाणरूपविनाशप्रसङ्गादिति । यादृशं रूपमनुकर्तुमिष्टं तादृशं न प्रतीयेत, लौकिक एव त्वर्थः प्रतीयेतेत्यर्थः । क्व च यथा प्रकृतिवदनुकरणं भवतीत्याह---एतदोऽशित्यादि । यद्यनुक्रियमाणरूपविनाशेऽपि प्रकृतिवदनुकरणं स्यात्, एतदः, अदस इत्यत्रोभयत्रापि त्यदाद्यत्वादिके प्रकृतिकार्ये सति एतस्य, अमुष्येति रूपं स्यात् । ननु प्रयोजनानुवत्तिं प्रमाणं ततश्चेल्लोपः प्राप्नोति कर्त्तव्य पवायम् ? कथम् ? `यत्तदेतेभ्यः' इति त्यदाद्यत्वम् , अस्यवामीयमिति यस्येति लोपः, गवित्ययमाहेत्यवादेशः, पटिति करोतीत्यनुक्रियमाणरूपविनाशे सत्यपि `अव्यक्तानुकरणस्यात इतौ' इति पररूपत्वं वा भवति । तस्मादुभयथा निर्देशदर्शनात् क्वचित्प्रकृतिबदनुकरणं भवति, क्वचिन्नेति वाच्यम् । तथा चास्मिन्नेव सूत्रे भाष्यम्---सौत्रो निर्देश इति ।।

स्वाङ्गे तस्प्रत्यये कृभ्वोः ।। 3.4.61 ।।

`तस्प्रत्यये' इति बहुव्रीहिनिर्देश इत्याह---तस्प्रत्यययोयतः स्वाङ्गात्तदेवमुच्यत इति । न च `क्विन्प्रत्ययस्य कुः' इतिवत्कदाचित्तस्प्रत्ययान्तत्वेन दृष्टे संप्रत्यतदन्तेऽपि स्वाङ्ग प्रसङ्गः, तस्प्रत्ययग्रहणसामर्थ्यात् । कर्मधारयो वायम्---तस्प्रत्यये परतो यत्स्वाङ्गं तस्मिन्नुपपदे इति । वृत्तौ तु वस्तुमात्रं प्रदर्शितम् । यथासंख्यमत्र नेष्यत इति । व्याख्यानात् । मुखत इति । आद्यादित्वात्सप्तम्यर्थे तसिः ।

मुखे तस्यतीत्यादि । `तसु उपक्षये' इत्यस्मान्मुखशब्द उपपदे `अन्येभ्योऽपि दृश्यते' इति क्विप्---मुखतः, `अत्वसन्तस्य च' इति दीर्घो न भवति; `अधातोः' इति प्रतिषेधात् ।

प्रत्ययाप्रत्ययपरिभाषयैवात्राप्रसङ्गात् नार्थः प्रत्ययग्रहणेन ।।

नाधार्थप्रत्यये च्व्यर्थे ।। 3.4.62 ।।

नार्थो धार्थश्चेति । नाधासहचरितोऽर्थो नाधा शब्दाभ्यामुक्तः, नार्थो यस्य स नार्थः, नार्थार्थ इत्यर्थः । एतेन धार्थो व्याख्यातः । प्रत्ययो यस्मादिति । यदि पञ्चम्यां विग्रहः क्रियते, ततः प्रकृतेरुपलक्षणं नाधार्थग्रहणं स्यादिति सम्प्रत्यतदन्तत्वेऽपि प्रकृतिमात्रे प्रसङ्गः ? न प्रसङ्गः, एवं हि विनञ्सङ्ख्यास्विति वक्तव्यं स्यात्, षष्ठ्या विग्रहः कर्त्तव्यः---नाधार्थः प्रत्ययो यस्य समुदायस्यावयव इति । ल्यब्लोपे वा पञ्चमी व्याख्येया यं समुदायामुद्दिश्य नाधार्थः प्रत्ययो विधीयत इति । विनाकृत्य नानाकृत्येति । `विनञ्भ्यां नानाञौ नसह' इति नानाञौ । द्विधाकृत्येति । `सङ्ख्याया विधार्थे धा' । द्वैधंकृत्येति । `द्वित्र्योस्च धमुञ्' । हिरक्पृथक्शब्दौ विनार्थे ।

नाना कृत्वा काष्ठानि गत इति । पूर्वमेव नाना सन्ति काष्ठान्यन्यत्र कृत्वा गत इत्यर्थः । धार्थमर्थग्रहणमिति । बहवो हि धार्थाः प्रत्ययाः, तत्रासत्यर्थग्रहणे प्रत्ययस्यैव ग्रहणं स्यात्, नान्येषाम्; तदर्थानामर्थग्रहणे तु तेषामपि भवति । यश्चाधादेशो धार्थः `धमुञन्तात्स्वार्थे डदर्शनम्' इति तदर्थमर्थग्रहणम्---द्वैधकृत्य द्वैधकारं द्वैधभूय द्वैधभावमिति । धमुञादीनां तु स्थानिवद्भावादेव सिद्धं तद्विधौ ध इत्यधिकारेणादेशपक्षस्याश्रयणात् । अथ नार्थमप्यर्थग्रहणं कस्मान्न भवतीत्यत आह---ना पुनरेक एवेति । ननु च नाप्रत्ययावपि द्वौ भवतः---निरनुबन्धकः, सानुबन्धकश्चेति, तत्रासत्यर्थग्रहणे निरनुबन्धकस्यैव ग्रहणं स्यात्, नेतरस्य ? एवं मन्यते---तन्त्रावृत्त्यैकशेषाणामन्यतमस्याश्रयणात्तस्यापि भविष्यति ।।

अन्वच्यानुलोम्ये ।। 3.4.64 ।।

अन्वग्भूयेति । अग्रतः पार्श्वत- पृष्ठतो वाऽनुकूलो भूत्वाऽऽस्ते इत्यर्थः । अन्वग्भूत्वेति । पृष्ठतो भूत्वेत्यर्थः । अनुकूलोऽननुकूल इति शब्देन न स्पृश्यते ।।

शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ।। 3.4.65 ।।

अत्रानन्तरेणास्तिशब्देनैवार्थशब्दः सम्बद्ध्यते, शकधृषज्ञानां घटाईयोश्च पृथगुपादानात्, तदाह---शकादिषूपपदेषु अस्त्यर्थेषु वैति । तुमुन् प्रत्ययो भवतीति । भावे । अक्रियार्थोपपदार्थ आरम्भ इति । `क्रियार्थोपपदे तुमुन्ण्वुलौ' इत्यादिनैव सिद्धत्वात् । तत्र तावत् शक्नोति भोक्तुम्, धष्णोति, जानातीति भोजने प्रावीण्यं गम्यते । ग्लायति भोक्तुमिति । तत्राशक्तिः । घटतेऽर्हतीति योग्यता । आरभते प्रक्रमत इति । भुजेरेवाद्यावस्था । लभते भोक्तुमिति । अप्रत्याख्यातं भोजनं लभते इत्यर्थः । उत्सहते भोक्तुमिति । भोजने व्याप्रियत इत्यर्थः । अस्ति भोक्तुमिति । भोजनमस्तीत्यर्थः । प्रवीणो भोक्तुम्, कुशलो भोक्तुम्, पटुर्भोक्तुमित्यादौ पर्याप्तिविवक्षायामुत्तरसूत्रेण तुमुन् भवति ।।

पर्याप्तिवचनेष्वलमर्थेषु ।। 3.4.66 ।।

पर्याप्तिः=अन्यूनता, परिपूर्णतेत्यर्थः । अन्यूनता च द्विधा सम्भवति---भोजनस्य प्रभूततया वा, भोक्तुः समर्थतया वा, अतः सामर्थ्येनालमर्थेन विशिनष्टि । अलमर्थेषु पर्याप्तिवचनेष्विति । प्रयाप्तो भोक्तुमिति । भोजने न न्यूनीभवति समर्थ इत्यर्थः । पुर्यप्तमिति । प्रभूतमित्यर्थः । शक्यमेवं कर्त्तुमिति । सुकरमेतदित्यर्थः । सम्भवमात्रं वाऽत्र विवक्षितम्---सम्भवत्येवंविधस्य करणमिति ।।

कर्त्तरि कृत् ।। 3.4.67 ।।

किमर्थमिदमुच्यते ? कर्त्तरिकृद्वचनमनोदेशे स्वार्थविज्ञानात् । यत्र वचनेनार्थो निर्दिश्यते तत्र प्रत्यासत्त्या प्रकृत्यर्थ एव प्रत्ययो भवति, तद्यथा--- `गुप्तिज्किद्भ्यः सन्', `यावादिभ्यः कन्' इति, एवमिमेकृतः स्वार्थे स्युः, स्वार्थे मा भूवन् कर्त्तरि स्युरिति । ननु च यमिच्छति स्वार्थे, आह तं भावे घञ् भवतीति ? तन्नियमार्थं भविष्यति---घञेव भावे नान्यः कृदिति । असति ह्यतेतस्मिन्सूत्रे घञित्येतावत्सूत्रं कर्त्तव्यम्---धातोर्घञ् भवतीति, तत्रानिर्दिष्टार्थत्वाद्भाव एव घञ भविष्यतीति; ततः `पदरुजविश' इति द्वितीयं सूत्रं कर्त्तव्यम्, ततश्च `भावे' इति न कर्त्तव्यम्, क्रियमाणं तु नियमार्थं भविष्यति---घञेव भावे नान्यः कृदिति, ततश्चान्यः कृद्धात्वर्थाक्षिप्ते कर्त्तरि भविष्यति । स्यादेतत्---कर्मादीनामपि धात्वर्थेनाक्षेपात्तेष्वपि कृतः स्युरिति ? न; `धः कर्मणि ष्ट्रन्', `करणाधिकरणयोर्ल्युट्', `दाशगाघ्नौ सम्प्रदाने', `भीमादयोऽपादाने' इत्यत्र `ष्ट्रनेव कर्मणि नान्यः' इत्यादिको नियमो विज्ञास्यते । यद्येकं कर्मादि नियतं प्रत्ययास्त्वनियता इति कारकान्तरेऽपि ष्ठ्रनादयः स्युः ? नैष दोषः; एकमिदं वाक्यम्---धः कर्मणि ष्ट्रनिति, तेन च कर्मणि विधीयमानः कथं कारकान्तरेऽपि स्यात् ! द्वितीयोऽपि वा नियमो विज्ञास्यते---कर्मण्येव ष्ट्रनिति, एवं सर्वत्र । य इदानीमतोऽन्यः प्रत्ययः शेषः सोऽन्तरेणापि वचनं कर्त्तर्येव भविष्यति । `कर्त्तरि भुवः खिष्णुच्खुकञौ' `कर्त्तरि चर्षिदेवतयोः' इत्युभयत्रापि करणनिवृत्त्यर्था कर्तृश्रुतिर्विध्यर्थैवेति खिष्णुजादिषु कर्तृनियमो न भविष्यति । तदेव तर्हि प्रयोजनम्---स्वार्थे मा भूवन्निति ? ननु चोक्तम्---`भावे इति नियमो विज्ञास्यते' इति ? स्वार्थादन्यः स भावो धात्वर्थस्य सिद्धता नाम । शुद्धे स्वार्थे कृतः स्युः, लः कर्मणि च भावे चेति । अयं तर्हि नियमो भविष्यति---ल एव भावे इति ? नायं नियमः शक्यो विज्ञातुम्, कर्तृकर्मणोर्निर्देशेन निर्दिष्टार्थत्वात् लकाराः स्वार्थे न स्युः, `अकर्म्केभ्यः' इति च वक्ष्यामीत्येवमर्थमेतत्स्यात् । अतः सुष्ठूक्तम्---कर्त्तरि कृद्वचनमनादेशे स्वार्थविज्ञानादिति ।

अत्र च द्वैधम्---एतद्वाक्यनिरपेक्षैः स्वैर्विधायकैर्वाक्यैर्विहितानां कृतां पश्चादेनेनार्थ आदिश्येत ? कृदुत्पत्तिवाक्यानां वायं शेषः स्यात् ण्वुल्तृचौ कर्त्तरि नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः कर्त्तरीति ? तत्राद्ये पक्षे यथानेन तृजादीनामर्थ आदिश्यते, तथा ख्युनादीनामप्यादिश्येत; विशेषानुपादानात् । ततश्चैतेऽप्यनेन कर्त्तरि च स्युः, स्वेषु स्वेषु विधिवाक्येषु करणादीनामप्युपादानात्करणादिषु च । ननु च ख्युनादिषु करणादिरर्थो विशेषविहितत्वात् कर्त्तुश्च बाधको भविष्यति ? न; नानावाक्यत्वात् । इह `दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय' इति अभिन्नकालत्वादेकं वाक्यं विशिष्टदानस्य प्रतिपादकमिति तक्रेण दधि बाध्यते । यदा तु पूर्वाह्णे ब्राह्मणभोजनप्रकरणे `दधि ब्राह्मणेभ्यो दीयताम्' इत्युच्यते, अपराह्णे तु `तक्रं कौण्डिन्याय दीयताम्' इति, न तदा बाध्यबाधकभावः । तथास्मिन्पक्षेऽपि कालभेदेन वाक्यद्वयोच्चारणाद्बाध्यबाधकभावो न लभ्यते । तस्माद् दुष्ट एवायं पक्ष इति द्वितीयं पक्षमाश्रित्याह--- कृदुत्पत्तिवाक्यानामयं शेषः स्यादिति । प्रागुक्तो दोषस्तदवस्थ एव ? तत्राह---येष्वित्यादि । कुत एतदित्याह---अर्थाकाङ्क्षत्वादिति । येषु वाक्येष्वर्थो न निर्दिश्यते तान्यर्थाकाङ्क्षाणि । तथा हि---`ण्वुल्तृचौ भवतः' इत्युक्तेऽर्थविषया आकाङ्क्षा जायते---क्वैतौ भवति इति ? `कर्तरि कृत्' इत्यस्याकाङ्क्षा भवति---कः कृत् कर्त्तरि भवतीति ? अतस्तृजादिविध्यनुपस्थाने शेषशेषिणोरुभयोरप्याकाङ्क्षापूतये ततस्तत्रैवोपतिष्ठत इत्यर्थः । ख्युनादिवाक्येष्विति । उपतिष्ठत इत्यनुषङ्गः । कारणमाह---साक्षादर्थनिर्देशे सति तेषां निराकाङ्क्षत्वादिति । न च रक्तपटन्यायेनाकाङ्क्षोत्थापनेनोप्रस्थानं युज्यते; स्वत एव साकाङ्क्षे तृजादिविध्यनुपस्थानेन शेषस्यापि चरितार्थत्वात् । रक्तः पटो भवतीत्यत्र तु पटो भवतीत्यस्य निराकाङ्क्षत्वेऽपि रक्तपदार्थस्य साकाङ्क्षत्वादाङ्क्षोत्थापनेनान्वयः । न च विदेशस्थानां कथमेकवाक्यत्वमिति वाच्यम्; शास्त्रे विदेशस्थानामप्यवान्तरवाक्यानामाकाङ्क्षावशादेकवाक्यत्वदर्शनात् । यथा ---द्वितीयेऽध्याये लुगुच्यते, तस्य चतुर्थषष्ठयोरलुगपवादः `गोत्रेऽलुगचि', `अलुगुत्तरपदे' इति ।।

भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा ।। 3.4.68 ।।

भव्य इति । `अचो यत्', गुणः, `वान्तो यि प्रत्यये' इति वान्तादेशः । गेयो माणवकः साम्नामिति । एतेन `कै गै शब्दे' इत्यस्येदं निपातनम्, न `गाङ् गतौ' इत्यस्येति दर्शयति । एतच्च निपातनाल्लभ्यते । `ईद्यति' इतीत्वम् । जन्य इति । `अचो यत्' इत्यत्र `तकिशसिचतियतिजनीनामुपसङ्ख्यानम्' इति वचनाद्यत् । आप्लाव्य इति । `ओरावश्यके' । आपात्य इति । `ऋहलोर्ण्यत्' ।।

लः कर्मणि च भावे चाकर्मकेभ्यः ।। 3.4.69 ।।

`लः' इति लङ्लटोरकारानुबन्धयोः सामान्येन ग्रहणमेकवचनं चेति शङ्कामपाकरोति---ल इत्युत्सृष्टानुबन्धसामान्यमेकं गृह्यत इति । प्रथमाबहुवचनं चैतदिति । सामान्यस्यैकत्वेऽपि `जात्याख्यायामेकस्मिन् बहुवचनम्' । अथादेशापेक्षया षष्ठ्येकवचनं कस्मान्नाश्रीयते---लः लस्य य आदेश इति, यथा---`लः परस्मैपदम्' इति ? उच्यते; एवं विज्ञायमाने लादेशानामनेनार्थो निदिश्येत, ततश्चाम्विषयस्य लकारस्यार्थो न निर्दिष्टः स्यात्, लुगत्रादेशः । न चाबावरूपस्य तस्यार्थादेशनं युज्यते, ततश्चासौ `कर्त्तरि कृत्' इति कर्तर्येव स्यात् । ननु च तस्य आमः' इति लुकापहारे सत्यनुप्रयोगे ये लादेशास्तैरेव भावादीनामभिव्यक्तिर्भविष्यति ? नैतदस्ति; यदा ह्यम्विषयो लकारः कर्तर्येवेति स्थितम्, तदा विरोधाद्भावकर्मवाचिप्रत्ययपरोऽनुप्रयोगो नैव प्राप्नोति, श्रुतस्यैव च संबन्धोपपत्तावादेश इत्यध्याहारो न युक्तः । तस्मात्प्रथमाबहुवचनान्तमेव युक्तम् । तत्र द्विविधो लकारः---तिङ्भावी, अतिङ्भावी च । तत्र तिङ्भावनिनः कृत्संज्ञानिषेधात् `कर्तरि कृत्' इत्यस्यानुपस्थानात्स्वार्थे भावे विधानं प्राप्नोति, अतिङ्भाविनस्तु `कर्तरि कृत्' इति वचनात्कर्त्तर्येव साधुत्वं प्राप्नोति, न भावकर्मणोः---आस्यमानं शय्यमानमित्यादाविति वचनमिदमारभ्यते ।

ननु च भावकर्मणोरात्मनेपदं विधीयते, शेषात्कर्तरि परस्मैपदम्, ततश्च लकारस्य भावकर्मकर्त्तारोऽर्था अनुमास्यन्ते । यद्वा लकारस्य प्रयोगेऽसमवायादादेशानामेव तेऽर्था भविष्यन्ति, नार्थ एतेन ? इत्याशङ्क्याह---सकर्मकेभ्यो भावे न भवन्तीति । अनारभ्यमाण एतस्मिन्यथा भावे विधीयमाना घञादयः सकर्मकेभ्योऽपि भावे भवन्ति---ओदनस्य पाकः, सूत्रस्य कृतिरिति, तथा `भावकर्मणोः, इत्यनेन भावे आत्मनेपदं सकर्मकेभ्योऽपि स्यात्, ततश्तच पच्यते यवगूं देवदत्तेनेति प्रयोगः प्राप्नोति, अतः `भावे चाकर्मकेभ्यः' इति वक्ष्यामीत्ययमारब्धः । अथ तत्रैव `भावकर्मणोरकर्मकात्' इत्युच्यते, तत्राकर्मकग्रहणं कर्तव्यं स्यात्, ननु चेहापि क्रियते ? इहावश्यं कर्तव्यम्---`तयोरेव कृत्यक्तखलर्था भावे चाकर्मकेभ्यः' इति, तस्मात्सकर्मकेभ्यो भावे मा भूदित्यवमर्थमयमारम्भ इति स्थितम् । किं चाम्विषयस्य लकारस्यार्थादेशनार्थमपीदं वक्तव्यम्; इतरथा पूर्वोक्तदोषप्रसङ्गादित्यलमियता ।।

तयोरेव कृत्यक्तखलर्थाः ।। 3.4.70 ।।

तयोर्भावकर्मणोरिति । पूर्वसूत्रे साक्षात् श्रुतयोर्भावकर्मणोस्तच्छब्देन परामर्शः, न चकारेण संनिधापितस्य कर्तुरिति भावः । अत एवोत्तरसूत्रे पुनः `कर्तरि च' इत्युक्तम् । यदि ह्यनन्तरवाक्ये चकारेण संनिधापितस्य कर्तुर्भावस्य चात्र इत्यवमर्शः स्यात् तत्र कर्तृग्रहणमनर्थकं स्यात् ; कर्तर्यनेनैव सिद्धत्वात् । एवकार इत्यादि । कृत्त्वात्कर्तरि कृत्याः प्राप्ता एवकारेण कर्तुरवकृष्यन्ते=व्यावर्त्यन्ते । ननु च तक्रकौण्डिन्यन्यायेन न कर्तुरप कर्षो भविष्यति, यथा `वडवाया वृषे वाच्ये' इत्यत्र वक्ष्यते---अपत्ये प्राप्तस्ततोऽपकृष्य वृषे विधीयते, अपत्ये त्वणेव भवति इति ? सत्यम् ; न्यायप्राप्त एवाथं एवकारेणानूद्यते ।

शयितमिति । `निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृषः' इत्यकित्त्वाद्गुणो भवति । भावे चाकमकेभ्य इति वर्त्तत इति । वयं तु ब्रूमः---एवकारः कर्तुरपकर्षणाय न कर्तव्य इत्युक्तम्, तस्यात्रोपयोगः---ययोर्भावकर्मणोर्लकार उक्तस्तयोरेवान्यूनानतिरिक्तयोः कृत्यादयो भवन्तीति । यदि च सकर्मकेभ्यो भावे स्युस्तयोस्तादृशयोरेव तु न कृताः स्युरिति ।।

आदिकर्मणि क्तः कर्त्तरि च ।। 3.4.71 ।।

कर्मधारयः, कर्मशब्दश्च क्रियावचन इत्याह---आदिभूतः क्रियाक्षण आदिकर्मेति । साधनकर्म तु न गृह्यते, आदिशब्देन विशेषणात् । बहूनां समवाये आदिमध्यान्तभावः, साधनकर्म कत्वेमेवेति कि तत्रादिशब्देन । तस्मिन्नादिकर्मणि भूतत्वेन विवक्षित इति । एतेन `निष्ठा' इत्यनेनैवादिकर्मणि क्तः सिद्धः, न पुनरादिकर्मणि निष्ठा वक्तव्येति दर्शयति । आद्ये हि क्रियाक्षणे भूते समूहरूपारोपादेकदेशे समूहे चेति न्यायाद्वा धात्वर्थ एव भूतो भवतीति युक्त एव क्तः । प्रकृतः कटं देवदत्त इति । प्रारब्धवानित्यथः । प्रकृतं देवदत्तेनेति । अत्र कर्मणोऽविवक्षितत्वेन धातोरकर्मकत्वाद्भाव एव क्तः । एवं प्रभुक्तं देवदत्तेनेत्यत्रापि ।।

गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ।। 3.4.72 ।।

अनूषित इति । `वसति क्षुधोरिट्' । अनुप्राप्य जातोऽनुजातः । एवमनुजीर्णः । सकर्मकेभ्यः कर्माविवक्षायां भावे क्तः ।।

दाशगोघ्नौ संम्पदाने ।। 3.4.73 ।।

गोघ्न इति । अत्र दानपूर्वके हनेन हन्तिर्वर्तते । अर्घार्ह इति । अर्घः=मधुपर्कः, तदङ्गत्वेन गोहननं विहितम् । एतावद् गोरालम्भनस्थानम्---अतिथिः, पितरः, विवाहश्चेति । यदि सम्प्रदाने गोघ्न इति निपात्यते चाण्डालादेरपि तेनाभिधानं प्राप्नोति, अस्मै अपि ह्यागताय गां दातुमर्हन्ति सुहृदादयः ? अत आह---निपातनसामर्थ्यादिति । असत्यपि चेति । यथाऽपचन्नपि योग्यतया `पाचकः' इत्युच्यते, तथेहापीत्यर्थः ।।

भीमादयोऽपादाने ।। 3.4.74 ।।

उणादिप्रत्ययान्ता एत इति । बाहुल्यादेतदुक्तम्, प्रस्कन्दनप्रपतनयोरप्यौणादिकत्वात् । ताभ्यामन्यत्रोणादय इति पर्युदासे प्राप्त इति ।

यद्यप्यसत्यस्मिन्सूत्रेऽपादानस्य प्रकृतत्वात्ताभ्यामिति निर्देशो नोपपद्यो तथाप्ययमर्थस्तावत्तत्र वक्तव्यः---ततोऽपादानाच्चान्यत्रोणादय इति, ततश्च स्यादेव पर्युदास इत्यर्थः ।।

ताभ्यामन्यत्रोणादयः ।। 3.4.75 ।।

ननु च `अन्यत्रोणादयः' इत्यप्युक्ते प्रकृतत्वादेव ताभ्यामन्यत्रेति विज्ञास्यते ? अत आह---सम्प्रदानार्थ इति । कृषित इत्यादिना कर्मणि वृत्तिं दर्शयति । अत्रेडागमश्चिन्त्यः । एवं तनित इत्यत्रापि ।

केचिदाहुः---`यस्य विभाषा' इतीट्प्रतिषेधोऽनित्यः, कृतिनृत्योरीदित्करणात् । तद्धि `श्वीदितो निष्ठायाम्' इतिट्प्रतिषेधार्थं क्रियते तत्र `सेऽसिचि कृति'

इति विभआषितेट्त्वादेव `यस्य विभाषा' इतीट्प्रतिषेधो भविष्यतीति किमीदित्करणेन ।
अपर आह---चुरादावदन्तौ कृपितनी पठितव्याविति ।।
क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः ।। 3.4.76 ।।
स्वनिकायप्रसिद्धिरिति । यथा यूपचषालादयो याज्ञिकानामेव प्रसिद्धास्तथा वैयाकरणानां निकाये एषां प्रसिद्धिः । निघण्टुषु तु अभ्यवहारपर्यायतया प्रत्यवसानशब्दस्य पाठो वैयाकरणप्रसिद्धिमूलः । इदमेषामासितमिति । `अधिकरणवाचिनश्च' इति षष्ठी ।
कथमित्यादि । कर्तरि निष्ठां मन्यमानस्य प्रश्नः । अकारो मत्वर्थीय इति । अर्शआदेराकृतिगणत्वादच् प्रत्यय इत्यर्थः ।
इह द्विर्गत्यर्थाकर्मकग्रहणं च क्तग्रहणं च क्रियते, सकृदेव तु शक्यं कर्तुम्, कथम् ? एवं वक्ष्यामि---`क्त्वोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः, ततो गत्यर्थाकर्मकेभ्यः कर्तरि च, चकारादधिकरणे च, अनुवृत्ताच्चकाराद्यथाप्राप्तं च, ततः श्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च, कर्तरीत्येव, एतेभ्यश्च कर्तरि क्तो भवति चकाराद्यथाप्राप्तं च, अधिग्रहणग्रहणं तु नात्रानुवर्तते, योगविभागकरणसामर्थ्यात्, तत आदिकर्मणि च कर्तरि क्तो भवति चकाराद्यथाप्राप्तं च, ततो दाशगोघ्नावित्यादि ? तथा तु न कृतमित्येव ।।
लस्य ।। 3.4.77 ।।
अकार उच्चारणार्थ इति । नानुबन्धः, अन्यथा लङ्लंटोरेव ग्रहणं स्यात् ; ततश्च परस्मैपदानां णलादयः, `लोटो लङ्वत्', `एरुः' इत्यादिकार्यविधानमनुपपन्नं स्यात् ; लिङ्लोटोस्तिबादीनामभावात् । लकारमात्रं स्थानित्वेनाधिक्रियत इति । ननु चेत्संज्ञायां लोपः प्राप्नोति ? वचनसामर्थ्यात्सत्यामपीत्संज्ञायां लोपो न भविष्यति । एवमपि लित्स्वरः प्राप्नोति ? णलो लित्करणं ज्ञापकम्---न लादेशेषु लित्स्वरो भवतीति ।
किञ्चेदमिति । लकारमात्रस्य ग्रहणं प्राप्नोतीति मन्यमानस्य प्रश्नः । `धात्वधिकारोऽनुवर्तते' इति वक्ष्यमाणाभिप्रायेणाह---दश लकारा इति ।
अक्षरसमाम्नाये ययानुपूर्व्याऽकारादयः्ष तदानुपूर्वोविशिष्टैरकारादिभिरनुबन्धैः कथ्यन्ते; न तु विधानक्रमेणेत्यर्थः ।
लकारमात्रस्य ग्रहणं कस्मान्न प्राप्नोतीति । विशेषानुपादानात्प्राप्नोत्येवेति भावः । वर्णग्रहणेषु चार्थवद्ग्रहणपरिभाषा न प्रवर्तते, तथा च यस्येति लोपोऽनर्थकस्यापि भवति---दैवदत्तिरिति, अकुर्वह्यत्रेति यणादेशः । धात्वधिकारोऽनुवर्तत इति । धातुग्रहणमनुवर्तत इत्यर्थः । एवमप्यग्निचिल्लुनाति---अत्रापि प्राप्नोति ? विहितविशेषणं धातुग्रहणम् । एवमपि `शामामलिभ्यो लः' औणादिकः---शाला, माला, मल्लः, अत्रापि प्राप्नोति ? उणादयोऽव्युत्पन्नानि प्रातिपदिकानि । तथापि परिहारान्तरमाह---कर्त्रादय इति । `लः कर्मणि च' इत्यत्र निर्दिष्टा अर्थाः कर्तृकर्मभावा इहानुवर्तन्ते, तैश्च लकारो विशिष्यते---कर्त्रादिषु विहितस्य लस्येति, तेन विशिष्टविषयस्यैव लस्य ग्रहणम्, न सर्वस्य ।।
तिप्तस्झिसिप्थस्थामब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ।। 3.4.78 ।।
तिबादीनां समाहारद्वन्द्वः । पकारः स्वरार्थ इति । प्रदर्शनमेतत्, `सार्वधातुकमपित्' इत्याद्यपि प्रयोजनम् । इटष्टकार इत्यादि । ननु `इटोऽत्' इत्यत्र लिङित्यनुवर्तते, तेनेकारस्यात्वविधानेऽपि नास्त्यतिप्रसङ्गः ? एवमपि तिबाद्यवयवस्य प्राप्नोति, यथा `एरुः' इत्येतल्लोट इत्यनुवृत्तावपि तिबाद्यवयस्य भवति । न हि तत्रावयवषष्ठी, लिङ इति तु स्थानषष्ठीत्यत्र प्रमाणमस्ति । अथ `आद्यन्तौ टकितौ' इति देशविध्यर्थष्टकारः कस्मान्न भवतीत्याह---
तिबादिमिरित्यादि । तुल्यत्वम्=सदृशत्वम्, तच्चैकयोगनिर्दिष्टत्वेन लस्येत्येका षष्ठी, तत्र तिबादयः सप्तदशादेशाः स्थाने योगं प्रयोजयन्ति, तानेको नोत्सहते विहन्तुमित्यर्थः । महिङो ङकार इत्यादि । तिङित्युपलक्षणम् । तङित्यपि प्रत्याहारो भवति । चिनुमहे इत्यादौ तु गुणप्रतिषेधार्थो न भवति ; सार्वधातुकमपित्' इत्यनेनैव सिद्धत्वात् । यत्र ह्यार्धधातुकम्एषिषिमहीति, तत्र ङित्त्वार्थः कस्मान्न भवति ? प्रत्याहारे चरितार्थस्य समुदायानुबन्धस्यावयवानुबन्धत्वे प्रमाणाभावात् । तृनि कथम् ? तस्यापि हि नकार `न लोकाव्यय' इत्यत्र प्रत्याहारे चरितार्थः, `औङ आपः' इत्यत्र च वक्ष्यते---`सामान्यग्रहणार्थो ङकारः, अन्यथा निरनुबन्धकस्य प्रथमाद्विवचनस्यैव ग्रहणं स्याद्, न सानुबन्धकस्यौटः' इति, तच्च विरुध्यते; तस्यापि टकारस्य सुडिति प्रत्याहारे चरितार्थतया औकारस्य निरनुबन्धकत्वात् । तस्मान्महिङो ङकारः प्रत्याहारार्थः, न त्ववयवानुबन्ध इत्याचार्याणां स्मृतिपरम्परैवात्र शरणम् ।।
टित आत्मनेपदानां टेरे ।। 3.4.79 ।।
टितो लकारस्य स्थआने इति । एतेन टितः, आत्मनेपदानामिति व्यधिकरणे षष्ठ्याविति दर्शयति । यदि तु प्रत्येकसंबन्धादेकवचनमित्याश्रित्य टितामात्मनेपदानामित्याश्रीयते, अकुर्वीत्यत्रापि प्रसज्येतेति भावः ।
प्रकृतैरित्यादि । य एते तिबादयः प्रकृतास्तेषआं मध्ये यान्यात्मनेपदानि विहितानीत्येवमात्मनेपदानि विशिष्यन्ते । न च तिबादीनां मध्ये शानच् सन्निविशिष्टस्ततो न तस्य प्रसङ्ग इत्यर्थः । एवं च तङामित्येव वक्तव्यम् । केचित्तु `आने मुक्' इति निर्देशं ज्ञापकं वर्णयन्ति---तिङामेवैत्वं नान्येषामिति; इतरथा ह्यानयीति वक्तव्यं स्यात् । नेति वयम्, योऽलादेश आनः `पूङ्यजोः शानन्' तस्यायं निर्देशः स्याद्---वयमानः, यजमान इति ।।
थासः से ।। 3.4.80 ।।
पेचिषे इति । लिट्, `अत एकहलमध्ये' इत्यादिना एत्वाभ्यासलोपौ, क्रादिनियमादिट् । इह `थः सः' इति वक्तव्यम्, थकारस्य सकारे कृते परभागस्य टेरेत्वे सति सिद्धमिष्टम् । पचथः पचथ अत्रापि प्राप्नोति ? `आत्मनेपदानाम्' इति वर्तते । एवमप्याथामस्थकारस्य प्राप्नोति ? धातोरिति वर्तते---धातोरनन्तरो यस्थकार इति । इहापि तहि न प्राप्नोति---पचसे, चिनुषे इति ? विकरणेन व्यवधानात् । क्व तर्हि स्यात् ? य एते लुग्विकरणाः,

श्लुविकरणाः, श्नम्विकरणाः । तस्मात् `थासः से' इति वक्तव्यम् । एवमपि सशब्द एवादेशो विधेयो टेरेत्वेनैव सिद्धम् ? ज्ञापकार्थम् । एतज्ज्ञापयति---आत्मनेपदानां य आदेशास्तेषां टेरेत्वं न भवतीति । तेन पक्ता, पक्तारौ, पक्तार इति डारौरसामेत्वं न भवति ।।

लिटस्तझयोरेशिरेच् ।। 3.4.81 ।।

पूर्वसूत्रे ज्ञापितम्---आत्मनेपदादेशानां टेरेत्वं न भवतीति, तेन इशिरच् इत्येतावादेशौ न विहितौ । शकारः सर्वादेशार्थ इति । अन्यथा धातोरित्यधिकाराद् `आदेः परस्य'इति तकारस्य प्रसज्येत । अथ `शे' इत्येव कस्मान्नोक्तम्, शइरेजिति ह्युक्ते मात्रालाघवं भवति ? नैवं शक्यम् ; `शे' इति प्रगृह्यसंज्ञा स्यात् । इह च पपे सोममिति पिबादेशः प्राप्नोति, जग्ले मम्ले इत्यादौ चात्वं न स्यात् । एशि तु न दोषः, `वर्णे यत्स्यात्तच्च विध्यात्तदादौ' इति न्यायात् ।।

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ।। 3.4.82 ।।

तिबादीनामिति । एतच्च प्रकरणाल्लभ्यते, तेन क्वसोर्णलादयो न भवन्ति, विधानसामर्थ्याद्वा क्वसोर्णलाद्यभावः । लकारः स्वार्थ इति । अन्यथा प्रत्ययस्य पित्त्वादनुदात्तत्वेऽपि धातुस्वरे कृते द्विः प्रयोगो द्विर्वचनमिति द्वयोरप्युदात्तत्वं प्राप्नोति । `अनुदात्तं पदमेकवर्जम्' इति नास्ति, यौगपद्येन सम्भवः पर्यायेण प्रसज्येत । णकारो वृद्ध्यर्थ इति । इदमन्यथासिद्धम्, `णलुत्तमो वा' इत्यत्र योगविभागः---अल् णिद्भवतीति, तत उत्तमो वा---वा णिद्भवतीति । पपाचेति । कथमयं सर्वादशः, यावता `नानुबन्धकृतमनेकाल्त्वम्', ततश्च `धातोः' इत्यधिकाराद् `आदेः परस्य' इति वकारस्य प्राप्नोति ? अनित्त्वात्सिद्धम् ? न ह्ययं णल्विधानसमये प्रत्यय इत्यनित्त्वाद् णकारस्यानेकालत्वात्सर्वादेशः, ततो णकारस्योत्संज्ञेत्यानुपूर्व्यात्सिद्धम् । ननु च णकारो न कर्तव्य इत्युक्तम् ? एवं तर्हि लकार आदौ क्रियते तस्याप्यनित्त्वात्सिद्धम्, ल उत्तमो वेति वक्तव्यम्, एवम् आत औ लस्येति, हल्ङ्यादिसूत्रे चाप्यपृक्तं हलिति हल्ग्रहणं लिङ्गं सर्वादशो णलिति, तद्धि पपाचेत्यादौ मा भूदिति । सर्वादेशत्वे च तदुपपद्यते । पपक्थेति । क्रादिनियमात्प्राप्त इट् `उपदेशेऽत्वतः' इति प्रतिषेधान्न भवति । क्वचित्पेचिथेति पाठः, `ऋतो भारद्वाजस्य' इति नियमादिट्, `थलि च सेटि' इत्येत्वाभ्यासलोपो । पेचेति । धातोरित्यधिकारात् `तस्मादित्युत्तरस्य `आदेः परस्य' इति थकारस्याकारे द्वयोरतो गुणे पररूपत्वम् ।।

विदो लटो वा ।। 3.4.83 ।।

विद ज्ञाने इति । सत्ताविचारार्थयोस्त्वात्मनेपदित्वात्तिबादीनामसम्भवः, लाभार्थस्यापि विकरणेन व्यवधानादनन्तराणामसम्भव इति भावः ।।

ब्रुवः पञ्चानामादित आहो ब्रुवः ।। 3.4.84 ।।

पञ्च णलादय इति । आदेशा अपि पञ्चैव, तत्राप्यादितो णलादयः पञ्च, न पुनरिच्छातः पञ्चेत्यर्थः । कथं पुनर्द्वितीयं पञ्चग्रहणमादिग्रहणं चान्तरेणादेशेष्वयं विशेषो लभ्यते, ननु सर्वैरेव णलादिभिः पञ्चानां स्थाने युक्तम्भवितुम् ? उच्यते; पूर्वसूत्रे तावद्यथासङ्ख्यं प्रवर्तते, ततश्च तत्रैव निर्ज्ञातः स्थानिविशेषेण णलादीनां सम्बन्धः, त एवेहानुवर्तन्त इत्यत्रापि तथैव भविष्यति, ततश्च स्थानिसम्बन्धादिति पूर्वसूत्रे स्थानिविशेषेण सम्बन्धस्य निर्ज्ञातत्वादित्यर्थः । आत्थेति । `आहस्थः' । परेषामिति । थादीनाम् । ननु च `ब्रुवः' इति यदेतत्पञ्चम्यन्तं तदेवार्थाद्विभक्तिविपरिणामो भवतीत्यादेशसम्बन्धे षष्ठ्यन्तं विज्ञास्यते, नार्थो ब्रुव इति पुनर्वचनेन ? तत्राह---ब्रुव इति । पुनर्वचनमित्यादि । परस्मैपदानामेव हि स्यादिति । असति श्रुते सम्बन्धिनि विभक्तिविपरिणामो भवति, इह तु परस्मैपदानामिति श्रुतत्वात्तेषामेव स्यादित्यर्थः ।।

लोटो लङ्वत् ।। 3.4.85 ।।

लोटो लङ्वत्कार्यं भवतीति । अत्र लोडादेशेषु लोट्शब्दो वर्तते, लङादेशेषु च लङ्शब्दः, लोडादेशानां लङादेशवत्कार्यं भवतीत्यर्थः, तदाह---तामादयः सलोपश्चेति । यद्यप्येते लङ्याहत्य न विहितास्तथापि लङिदृष्टत्वादतिदिश्यन्ते । अडाटौ कस्मान्न भवति इति । लङ्येवाहत्य विहितत्वात्, प्रत्युत तचोरेवातिदेशो युक्त इति प्रश्नः । तथा झेर्जुसादेश इति । कस्मान्न भवतीति विभक्तिविपरिणामेनानुषङ्गः । `लङः शाकटायनस्य' इति जुस्भावोऽपि लङ एवाहत्य विहितः । इह तु जाग्रतु, विदन्तु `सिजभ्यस्तविदिभ्यश्च' इति लङि दृष्टो जुस्भावः प्राप्नोति । वाग्रहणमनुवर्तत इति । लोट इत्युपमेये षष्ठीनिर्देशादुपमानं पष्ठ्यन्तं विज्ञायते---लङो यत्कार्यं तल्लोटो भवतीति, न तु लङि यत्कार्यं तल्लोटीत्यडाटोः परिहारान्तरम् । झेर्जुस्भावस्य तु परिहारान्तरम् `लङः शाकटायनस्य' इत्यत्र स्वयमेव वक्ष्यति ।।

एरुः ।। 3.4.86 ।।

लोडादेशानामिकारस्येति । अथ तु---लोडादेशो य इकारस्तस्य इत्यर्थोऽभिप्रेतः स्यादिट इत्येव ब्रूयात, `तुह्योः विदाङ्कुर्वन्तु' इति च निर्देशोऽनुपपन्नः स्याद् । अथेदानीमिटोऽपि व्यपदेशिवद्भावेनेत्वं कस्मान्न भवति ? पुनः प्रसङ्गविज्ञानात् टेरेत्वं भविष्यति । न वोच्चारणसामर्थ्यादिति । यदि हिन्योरुत्वं स्यात् `सेर्हुः' `मेर्नुः' इत्येव ब्रूयाद्, एवं हि प्रक्रियालाघवं भवतीति भावः । `आनि लोट्', हुझल्भ्यो हेधिः' इति लिङ्गं हिनयोरुत्वाभावस्य ।।

सेर्ह्यपिच्च ।। 3.4.87 ।।

लुनीहीति । पित्त्वाभावान्ङित्त्वे सति `ई हल्यघोः' इतीत्वं भवति । राघ्नुहीत्यत्र गुणाभावः । इह सेहिर्ङिच्चेति वक्तव्यम् । नन्वेवं ङित्त्वान्ङित्कार्यं भवतु, स्थानिवद्भावेन पित्त्वमप्यस्तीत्यनुदात्तत्वमपि प्राप्नोति ? `ङिच्च पिन्न भवति' इति वचनान्न भविष्यति, यथा---अपि स्तुयाद्राजानमिति, अत्र `उतो वृद्धिर्लुकि हलि' इति पिति विधीयमाना वृद्धिर्न भवति । ब्रूताद्भवानिति, ब्रुव इण्न भवति । किं च नाप्रप्ते पित्त्वे ङित्त्वमारभ्यमाणं तद्बाधिष्यते ।।

वाच्छन्दसि ।। 3.4.88 ।।

अपित्त्वं विकल्प्यत इति । अनन्तरत्वात् । नादेश इति, व्यवहितत्वात् । युयोधीति । `बहुलं छन्दसि' इति शपः श्लौ द्विर्वचनम् । अत्र पित्त्वान् ङित्त्वाभावे `अङितश्च' इति धिभावः ।।
मेर्निः ।। 3.4.89 ।।
उत्वलोपयोरपवाद इति । यथाक्रमम् `एरुः' `लोटो लङ्वत्' इति प्राप्तयोः, `इतश्च' इतीकारलोपस्यापि लङि दृष्टत्वादतिदेशतः प्राप्तिः । वयं तु ब्रूमः--- `लोटो लङ्वत्' इति प्राप्तस्यामादेशस्यापवाद इति ।।
आमेतः ।। 3.4.90 ।।
लोट्सम्बन्धिन इति । लोडादेशसम्बन्धिन इत्यर्थः । एतेन लोटैकारो विशेष्यत इति दर्शयति । एकारेण तु लोटि विशेष्यमाणे तदन्तविधौ सत्येकारान्तस्य लोट आम्विधीयमानोऽनेकाल्त्वात्सर्वादेशः स्यात्, तत्र हि `निर्दिश्यमानस्यादेशा भवन्ति' इति परिहारो वाच्यः स्यादित्यर्थः ।।
आडुत्तमस्य पिच्च ।। 3.4.92 ।।
स चोत्तमपुरुषः पिद्भवतीति । आट एव पित्त्वं कस्मान्न विज्ञायते, तुल्यविभक्तिकयोहि युक्तः सम्बन्धः---आट् पिदिति ? निर्थकत्वात् । अनुदात्तत्वं तावदागमत्वादेव सिद्धम् ; करवाणि, मार्जानीत्यादौ गुणवृद्ध्योरपि प्रत्यय एव निमित्तं न त्वागमः ।।
एत ते ।। 3.4.93 ।।
इह कस्मादिति । गुणस्यान्तवद्भावेन लोड्ग्रहणेन ग्रहणादस्ति प्रसङ्ग इति भावः । बहिरङ्गलक्षणत्वादिति । द्विपदाश्रयत्वाद् गुणस्य बहिरङ्गत्वम्, ऐकारस्त्वेकपदाश्रयत्वादन्तरङ्गः, अत एव हेतोः `आमेतः' इत्ययमपि विधिर्न भवति ।।
लेटोऽडाटौ ।। 3.4.94 ।।
पर्यायेणति । न यौगपद्येन; अड्विधानसामर्थ्यात्, अन्यथा सवर्णदीर्घत्वे सत्यड्विधानमकिञ्चित्करं स्यात् ।
आत ए ।। 3.4.95 ।।
करवैते इति । `छन्दस्युभयथा' इति सार्वधातुकत्वाद्विकरणः, आर्द्धधातुकत्वान् ङित्त्वाभावे विकरणस्य गुणः, करोतेश्चोत्वाभावः, पवैते, अश्नवैथे, प्रवैते, विग्रन्थैथे ।।
वैतोऽन्यत्र ।। 3.4.96 ।।
एतद्विषयमिति । षष्ठीसमासः । एवंविषयमिति तु युक्तः पाठः । उदाहरणानि `उपसंवादाशङ्कयोश्च' इत्यत्र व्युत्पादितानि ।
दधस इति । `थासः से', शपः श्नुः, अट्, `घोर्लोपो लेटि वा' इत्याकारलोपः ।।
इतश्च लोपः परस्मैपदेषु ।। 3.4.97 ।।
परस्मैपदग्रहणमित्यादि । अन्यथा टेरेत्वस्यावकाशः---अन्ये लकाराः, लेट्यपीकारादन्यत्र इतो लोपस्य---परस्मैपदानि; इडादिषूभयप्रसङ्गे परत्वादितो लोपः स्यात् ।।
स उत्तमस्य ।। 3.4.98 ।।
करवाव, करवामेति । पूर्ववद्गुणोत्वाभावौ, `लेटोऽडाटौ' इत्याट् । उत्तरग्रहणमित्यादि । इह वस्मस्ग्रहणमेव कर्तव्यम् । `तत्रायमप्यर्थः---स इति न वक्तव्यं भवति, `अलोऽन्त्यस्य' इत्येव सिद्धम् । यदा च पुरुषान्तरस्य स्थाने वस्मसौ भवतः, एतयोश्च स्थाने सकारान्तं पुरुषान्तरम्, तदापि वाग्रहणानुवृत्त्यैव लोपालोपौ यथादर्शनं व्यवस्थितौ भविष्यतः । यथाक्रियमाणेऽप्युत्तम प्रहणे वाग्रहणं चानुवर्तते, उत्तरत्र नित्यग्रहणं स्यात् `नित्यं ङितः' ।।
लिङः सीयुट् ।। 3.4.102 ।।
लिङ्शब्दोऽत्र लिङादेशेषु स्थानिवद्भावात् प्रयुक्त इत्याह लिङादेशानामिति । सीयुट्सकारस्यार्धदातुके लिङि श्रवणम्, सार्वधातुके `लिङः सलोपोऽन्त्यस्य' इति सलोपः । यकारस्याजादिषु श्रवणम्, अन्यत्र लोपः ।।
यासुट् परस्मैपदेषूदात्तो ङिच्च ।। 3.4.103 ।।
परस्मैपदविषयस्येति । लिङः परेषा परस्मैपदानामसम्भवात् । सीयुटोऽपवाद इति । नाप्राप्ते तस्मिन्नारम्भात्, तेन यासुटि कृते तस्य तिङ्भक्तत्वात्तदादेः सीयुट्प्रसङ्ग इति न चोदनीयम् । सत्यपि हि सम्भवे सामान्यविधेर्वशेषविधिर्बाधकः । कथं तर्हि कृषीष्ट इत्यादिषु सुटि कृते सीयुड् भवति, ननु तत्रापि सुटा सींयुड् बाधनीयः ? अत्र परिहारं सुड्विधौ वृत्तिकारः स्वयमेव वक्ष्यति । आगमत्वादनुदात्तत्वे प्राप्त इति । अत एव यासुडुदात्तवचनाद्विज्ञायते--- आगमा अनुदात्ता भवन्तीति, अन्यथा यासुटः प्रत्ययभक्तत्वात्प्रत्ययस्वरेणैव सिद्धमुदात्तत्वम् । नैतदस्ति ज्ञापकम्, यानि पिद्वचनानि तदर्थमेतत्स्यात् । यद्येतावत्प्रयोजनम्, अपिदित्येव ब्रूयात् ! तदेतदुदात्तवचनं ज्ञापकमेव---आगमा अनुदात्ता भवन्तीति । तत्र तत्कार्याणां सम्भवादिति । ग्रहिज्यादिसूत्रेऽपि धातोः स्वरूपग्रहणे तत्प्रत्ययो कार्यविज्ञानात्प्रत्ययस्यैव ग्रहणम् । कुर्यादिति । विकरणाश्रयो धातोर्गुणः, `अत उत्सार्वधातुके' इत्युत्वम्, `ये च' इत्युकारलोपः । कुर्युरिति । झेर्जुस्, `लिङः सलोपोऽनन्त्यस्य' `उस्यपदान्तात्' ।
स्थानिविद्भावादेवेति । `सार्वधातुकमपित्' इत्यतिदेशादिति नोक्तम् ; पिदर्थत्वान् ङिद्वचनम्य । यासुटो ङिद्वचनमिति । यासुडादेर्लिङो ङिद्वचनमित्यर्थः । इदानीमेव ह्युक्तम्--ङित्त्वं तु लिङ एव विधीयते इति ? एतच्च ज्ञापनम्---`पिच्च ङिन्न भवति' इत्येतदनाश्रित्योच्यते । तदाक्षयणे तु स्थानिवद्भावेन प्राप्तं

ङित्त्वमौपदेशिकेन पित्त्वेन बाध्यते इति प्राप्त्यर्थमेव ङिद्वचनं स्यात् ।।
किदाशिषि ।। 3.4.104 ।।
तस्य यासुट्...किद्वद्भवतीति । तस्य यासुड् भवति स च लिङ्किद्वद्भवतीत्यर्थः । अन्यथा `प्रत्ययस्येदं कित्त्वम्' इत्यनन्तरग्रन्थेन विरोधः स्यात् । प्रयोजनाभावादिति । `वचिस्वपि' इत्यत्रापि `धातोः स्वरूपग्रहणे' इति प्रत्यस्यैवेदं ग्रहणं स्यात्; अन्यथा वाच्यति वाचिकं कथयति, वाग्जहातीत्यत्रापि स्यात् । गुणवृद्धिप्रतिषेधस्तुल्य इति । किमर्थं तर्हि कित्त्वविधानमित्यत आह---सम्प्रसारणमिति । जगर्यादिति । `जाग्रोऽविचिण्णल्ङित्सु' इति गुणः ।।
झस्य रन् ।। 3.4.105 ।।
झस्येत्यकारोच्चारणात्सङ्घातस्यैव ग्रहणं न वर्णस्य, अन्यथान्तादेशविधाविव `झः' इत्येव ब्रूयादिति मन्यमान आह---लिङादेशस्य झस्येति । झोऽन्तापवाद इति । झकारस्य योऽन्तादेशस्तस्यापवाद इत्यर्थः । `झोऽन्तः' इत्यस्य वा विधेरपवाद इत्यर्थः । ननु झवर्णस्यान्तादेशः समुदायस्य रन्निति कथं भिन्नविषययोर्बाध्यबाधकभावः ? विरोधात्, येन नाप्राप्तिन्यायाच्च । झोऽन्तापवाद इत्युपलक्षणम् ; कृषीरन्, तृषीरन्नित्यत्र `आत्मनेपदेष्वनतः' इत्यस्याप्यपवादः । ननु चापवदाविप्रतिषेधाददभाव एव प्राप्नोति, न; प्रतिपदविधेर्बलीयस्त्वात्, प्रतिपदविहितो हि रन्भावः । यद्वा---कृषीरन्, तृषीरन्नित्यत्रापि प्रवर्त्ततामद्भावः, सत्यपि तु तस्मिन्पुनः प्रसङ्गविज्ञानात्सङ्घातस्य रन् भविष्यति ।।
इटोऽत् ।। 3.4.106 ।।
नैवायमादेशावयव इति । ते नास्तेत्संज्ञया प्रयोजनम्, स्वयमेव निवृत्तत्वादित्यर्थः । प्रत्युतेसंज्ञायां स्वरितत्वं स्यात्, `न विभक्तौ तुस्माः' इत्यत्राभ्युपगमवादेनोक्तम्---`किमोदिटोदिति चात्र प्रातेषेधो न भवत्यनित्यत्वादस्य' इति । अर्थवद्ग्रहण इत्यादि । ल स्थाने य इडिति विशेषणादप्यागमस्येटो ग्रहणाभावः ।।
सुट् तिथोः ।। 3.4.107 ।।
`तिथोः' इति सप्तमी वा स्यात् ? षष्ठी वा ? आद्ये पक्षे `यस्मिन्विधिस्तदादावल्ग्रहणे' इति तकारथकारोदेर्लिङादेशस्य सुटा भाव्यमिति कृषीष्ट कृषीष्ठा इत्यत्रैव स्यात्, कृषीयास्तां कृषीयास्थामित्यत्र न स्यात्; सुटा च सीयुटो बाधः स्यात्, उभयोरपि लिङआदेशभक्तत्वादिति द्वितीयं पक्षमाश्रित्याह---लिङ्सम्बन्धिनोस्तकारथकारयोरिति । एतदेव स्पष्टयति---तकारथकाराविति । लिङ् तद्विशेषणमिति । लिङ्शब्देन तदादेशा उच्यन्ते । एवं लिङ्संबन्धिनोरित्यत्रापि कृषीष्टेति । विध्यादौ लिङि सार्वधातुकत्वात् `लिङः सलोपः' इति लोपेन सुटः श्रवणाभावादाशिषु लिङेवोदाहृतः ।।
झेर्जुस् ।। 3.4.108 ।।
झोऽन्तापवाद इति । पूर्ववद् व्याख्येयम् । जागृयुरित्यादौ च पूर्ववदेव `अदभ्यस्तात्' इत्यस्यापि बाधः । पचेयुरिति । `अतो येयः' इतीयादेशः, शपा सह `आद्गुणः' ।।
सिजभ्यस्तविदिभ्यश्च ।। 3.4.109 ।।
सत्ताविचारणार्थयोर्विदोरात्मनेपदित्वादसम्भव एव झेः, लाभार्थस्यापि विकरणेन व्यवधानादनन्तरस्य झेरसम्भवः, तस्माल्लुग्विकरणस्यैव विदेर्ग्रहणमित्याह---वेत्तेश्चेति । अभ्यस्तविदिग्रहणमसिजर्थमिति । न चैवं लोडादिष्वपि प्रसङ्ग इत्याह---ङित इति चानुवर्तत इति ।।
आतः ।। 3.4.110 ।।
सिच आकारान्ताच्च परस्य झेरिति । द्वाभ्यामनन्तरस्येत्यर्थः । कथमिति । आतः सिचा व्यवधानाद् द्वाभ्यामानन्तर्य न सम्भवतीति प्रश्नः । सिज्लुगन्ताद् झेर्जुस् भवतीत्युक्तं भवति । अभूवन्निति । `भुवो वुग्लुङ्लिटोः' इति वुक् । तुल्यजातीयापेक्षत्वाच्चेति । द्वाभ्यामानन्तर्यस्याश्रवणात् सिज्लुगन्तस्य ग्रहणमित्युक्तम् । तेन---सिज्लुगन्ताद्यदि भवति आत एवेति नियमाश्रयणात् श्रूयमाणे सिचि अकार्षुरित्यादावनाकारान्तादपि भवत्येवेत्यर्थः ।।
लङः शाकटायनस्यैव ।। 3.4.111 ।।
अयुः, अवुरिति । शपो लुक्, `उस्यपदान्तात्' इति पररूपत्वम् ।।
लङेवेति । लुङ्लिङोस्तावद्भवितव्यम्, लृङस्तु स्यप्रत्ययेन झेर्व्यवधानमिति भावः । यान्तु, वान्त्विति । `लोटो लङ्वत्' इत्यत्र तु वाग्रहणानुवृत्त्याप्ययमर्थः साधितः । ननु च लङ्ग्रहणाद्यत्नज्जुस्भावोऽयं लोटो मा भूत्, `सिजभ्यस्त' इत्ययं तु स्यादेव ? तत्राह---सिजभ्यस्तेत्यादि । कथमित्यत्राह---जुस्भावमात्रं हीति । कथं पुनः `आतः' इत्यनुवर्तमाने जुस्भावमात्रं मुख्येन लङा शक्यं विशेषयितुम् ? `लङः' इति योगविभागः कर्तव्य इति मन्यते । ननु च `आत इत्येतत्सिज्ग्रहणानुवृत्त्या नियमार्थम्' इत्युक्तम् , ततश्चायुरित्यत्र केनचिदप्राप्तत्वाद्विध्यर्थमेतत्किमेवकारेण ? इत्यत्राह---एवकार उत्तरार्थ इति । `लिट् च', `लिङाशिषि' इत्यत्रास्य प्रयोजनं दर्शयिष्यति ।।
द्विषश्च ।। 3.4.112 ।।
द्विषिरदादिः ।।
तिङ्शित्सार्वधातुकम् ।। 3.4.113 ।।
तरति नयतीति । तिङः सार्वधातुकत्वाच्छप्, शपः सार्वधातुकत्वाद्धातोर्गुणः । रोदितीति । शपो लुकि `रुदादिभ्यः सार्वधातुके' इतीट् । पवमानो यजमान इति । पूर्ववच्छब्गुणौ ।।

आर्धधातुकं शेषः ।। 3.4.114 ।।

धातुसंशब्दनेनेति । धातुशब्दमुच्चार्येत्यर्थः । अत्र हि यङ्विधौ यद्धातुग्रहणं शमिधातोरिति वा, यच्च धातोरिति, तदुभयमनुवर्तते; तत्रैकेनाधातुप्रत्ययो व्यावर्त्यते, अपरेण धातुप्रत्ययो विशिष्यते, धातोरित्येवं यो विहित इति, तेनायमर्थः । लूभ्याम्, लुभिः, जुगुप्सते इति । यद्यप्यत्र धातोरेव विहिस्तथापि धातुशब्दमुच्चार्य न विहित इति भवति प्रत्युदाहरणम् । शेषग्रहणम्---तिङ्शितोर्मा भूत; अन्यथैकसंज्ञाधिकाराभावात्प्रत्ययादिसंज्ञानामिव समावेशः स्यात् । सद्येवकारोऽनुवर्तते शक्यं शेषग्रहणमकर्तुम् ।।

लिट् च ।। 3.4.115 ।।

पेचिथ, शेकिथेति । `ऋतो भारद्वाजस्य' इति नियमादिट्, `थलि च' सेटि' इत्येत्वाभ्यासलोपौ । जग्ले मम्ल इति । आर्धधातुकत्वात् `आतो लोप इटि च' इत्याकारलोपः । यदुक्तम्---सार्वधातुकसंज्ञाया अपवाद इति, तद्विघटयति---ननु चेति । सत्यमित्यादिना अपवादत्वं समर्थयते ।।

छन्दस्युभयथा ।। 3.4.117 ।।

सर्वमेव प्रकरणमिति । `तिङ्सित्सार्वधातुकम्' इत्यारभ्य चतुः सूत्रीप्रकरणम् ।

भूभावो न भवतीति । तदानीभेवार्धधातुकत्वात् `श्नसोरल्लोपः' इत्यस्याभावः ।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां तृतीयाध्यायस्य चतुर्थः पादः

4.1

काशिकावृत्तिः--4

पदमञ्जरी

ङ्याप्प्रातिपदिकात् ।। 4.1.1 ।।

अधिकारोऽयमिति । विधेयपरिभाष्ययोरनिर्देशाद्वक्ष्यमाणानां च स्वादीनां प्रकृत्यपेक्षत्स्वरितत्वाच्च । आ पञ्चमाध्यायपरिसमाप्तेरिति । अधिकारस्यावधिं दर्शयति । अधिकारोऽनेकप्रकारः----संज्ञाधिकारः, विशेषणाधिकारः, प्रकृत्यधिकारश्चेति, तत्र कीदृसोऽयमधिकारः ? इत्यत आह---स्वादिषु कप्पर्यन्तेषु प्रकृतिरधिक्रयते इति । टाब्डाप्चापामाग्रितीति । सामान्यहणमित्यनुषङ्गः । समाहारनिर्देश इति । समाहारद्वन्द्वेन तेषां ङ्यादीनामयं निर्देश इत्यर्थः । ततश्च समाहारस्यैकत्वादेकवचनमेव युक्तम्, न बहुवचनमिति भावः ।

किमर्थमिदमुच्यते ? ङ्याप्प्रातिपदिकात्परे स्वादयो यथा स्युरिति केवलानां प्रयोगो मा भूत् । `परश्च' इति वचनात्केवलानां प्रयोगो न भविष्यति ? इदं तर्हि प्रयोजनम्---ङ्याप्प्रातिपदिकादेव यथा स्युरित प्रकृत्यन्तरान्मा भूवन् । असतिह्यस्मिन्नधिकारे धातुः, तिङन्तम्, वाक्यम्, सुबन्तं चेति ङ्याप्प्रातिपदिकव्यतिरिक्ताति चतुर्विधा प्रकृतिरस्ति, वक्ष्यमाणाश्च प्रत्ययाश्चतुर्विधाः---स्वादयः, टाबादयः, अणादयः, स्वार्थिकाश्चेति; तदिह चतुर्विधाभ्यः प्रकृतिभ्यश्चतुर्विधाः प्रत्यया मा भूवन्निति कर्तव्य एवायमधिकारः ।

न कर्त्तव्यः । ननु चासत्यस्मिन् धात्वधिकाराद्धातोरेव स्युः, कृदुपपदसंज्ञे च स्याताम्, वासरूपविधिश्चस्यात् ? न; निवृत्तत्वाद्धातुग्रहणस्य । यदि परं धातोरपि स्युः, तदपि न; कर्मादीनामभावात् । कर्मादिषु च कारकेष्वेकत्वादिकायां च संख्यायां स्वादयो विधीयन्ते, न च धात्वर्थस्य कर्मादिभिर्योगः सम्भवति । कथं तर्हि कर्मणि तत्र्यदादयो भवन्ति ? नैव धात्वर्थस्य कर्मत्वे तव्यदादयो भवन्ति, किं तर्हि ? धात्वर्थं प्रति यत्कर्म तस्मिन्वाच्ये---कर्त्तव्यः कट इति । स्वादयस्तु प्रकृत्यर्थस्य कर्मत्वे चरितार्था नान्यस्य कर्मत्वे भवितुमर्हन्ति, तव्यदादिभिश्च बाधितत्वाद्धातोः स्वादीनामभावः । ननु च धात्वर्थस्यैव कर्मत्वं दृष्टम्---सन्प्रकृतौ चिकीर्षतीत्यादौ ? एवमपि संख्याभावः सिद्ध एव, अव्ययेभ्यस्तु `अव्ययादाप्सुपः' इति ज्ञापकात्स्वादयो भवन्ति । यत्पुनः `बहुषु बहुवचनम्' इत्यत्रोक्तम्---यत्र च संख्या सम्भवतीति, तदस्यां दशायां तथा नाश्रीयते । टाबादयस्तर्हि धातोर्मा भूवन्निति ? स्त्रियां टाबादयो विधीयन्ते, न च धात्वर्थस्य स्त्रीत्वेन योगोऽस्ति । कथं तर्हि स्त्रियां क्तिन्नादयो विधीयन्ते ? नैवात्र धात्वर्थस्य स्त्रीत्वे क्तिन्नादयः स्मर्यन्ते, कस्य तर्हि ? यस्तस्य सिद्धत्वं नाम धर्मस्तस्य । क्तिन्नादिभिश्च बाधितत्वाट्टाबादीनामभावः ।

अणादयस्तर्हि धातोर्मा भूवन्निति ? अपत्यादिष्वर्थेष्वणादयो विधीयन्ते, न च धात्वर्थस्यापत्यादिभिर्योगोऽस्ति, समर्थविभक्त्यभावाच्चाणादीनामनुत्पत्तिः, `तस्यापत्यम्', `तेन रक्तम्', `तत्र भवः' इत्येवमादिभिः षष्ठ्यादिविभक्त्यन्तादणादयो विधीयन्ते, न च धातोर्विभक्तिः सम्भवति । स्वाथिका अपि स्वार्थकैस्तुमुन्नादिभिर्बाधितत्वादेव धातोर्न भविष्यन्ति ।

तिङन्तात्तर्हि स्वादयो मा भूवन्निति ? तिङन्तेषु क्रिया प्रधानभूता, साधनं गुणभूतम्, तत्र प्रधानभूतायाः क्रियायाः कर्मादीनामभावात्स्वादयो न भविष्यन्ति । पचति भवति, भवति वै किञ्चिदाचार्याः क्रियमाणमपि चोदयन्तीत्यादौ कर्तृत्वं दृष्टमिति चेत्, एवमपि संख्याया अभावः सिद्ध एव । यस्तु गुणभूतः कर्त्ताऽभीधीयते; तत्र अभिहितत्वादेव विभक्त्यभावः सिद्धः । न च गुणभूतस्य कर्तुः क्रियान्तरावेशः सम्भवति; यतः पाचकं पश्येत्यादिवद् द्वितीयादयो भवेयुः । ननु पुत्रीयवदेतत्स्यात्, तद्यथा---पुत्रीयशब्दादन्तर्भूतक्रियाकर्मवाचिनः कर्त्तरि लकार उत्पद्यते---पुत्रीयतीति, तथेहापि पचतिशब्दात् कर्तृविशिष्टक्रियावाचिनः क्रमादिषु द्वितीयादयः स्युरेव ? नैष दोः ; उक्तमेतत्---प्रकृत्यर्थस्य कर्मत्वे चरितार्थाः स्वादयो नान्यस्य कर्मत्वे भवितुमर्हन्तीति । न चैकक्रियापेक्षयोर्भिन्नयोः साधनयोरेकस्मिन्पदे युगपदभिधानं सम्भवति । पुत्रीयशब्दस्तु जीवत्यादिधातुवद्विशिष्टक्रियावचन इति, ततः कर्त्तरि

लकारोत्पत्तिरविरुद्धा । अवश्यं चैतदेवं विज्ञेयम्---अर्थाभावादेव तिङन्ताद् द्वितीयादयो न भवन्तीति । यो हि मन्यते---ङ्याप्प्रातिपदिकाधिकारान्न भवन्तीति; रूपबाद्यन्तात्तस्य द्वितीयादयः स्युरेव, पचतिरूपं पश्य, पचतिरूपेण कृतमित्यादि, भवति ह्येतत्प्रातिपदिकम् । कथं तर्हि रूपबाद्यन्तात्प्रथमैकवचनमपि भवति ? उक्तत्वात्सङ्ख्यायाः, न हि तत्कर्तुः सङ्ख्यायामेकवचनम् । यदि तथा स्यात् पचतेरूपं पचन्तिरूपमिति द्विवचनबहुवचने स्याताम् । `प्रातिपदिकार्थे' इत्यत्र तु प्रातिपदिकग्रहणात्प्रातिपदिकमात्रानुबन्धिनी प्रथमा भवति । तत्राप्येकवचनमेव; `एकवचनमुत्सर्गः करिष्यते' इति वचनात् । न चैवं तिङन्तेऽपि प्रसङ्गः तस्याप्रातिपदिकत्वात् ।
टाबादयस्तर्हि तिङन्तान्मा भूवन्निति ? स्त्रियां टाबादयो विधीयन्ते, न च तिङन्ते प्रधानस्यार्थस्य स्त्रीत्वेन योगोऽस्ति । यदि परं साधनस्य स्त्रीत्वे टाबादयः स्युः पचेद् ब्राह्मणः, पचेरन् ब्राह्मण्य इति ? तदपि न; स्वभावतो हि तिङन्तानि साधनाश्रयां सङ्ख्यामेवोपाददते, न लिङ्गम् । उक्तं च---
एकत्वेऽपि क्रियाख्याते साधनाश्रयसंख्यया ।
भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रयः ।। इति ।
शोभनं पचतीत्यादौ क्रियाविशेषणस्यैव लिङ्गेन योगः, न क्रियायाः, तत्रापि नपुंसकेन । पचति रूपमित्यादावपि रूपबाद्यन्तवाच्यायाः क्रियायाः स्वभावतो लिङ्गेन योगः, तत्रापि नपुंसकेन । विचित्रा हि शब्दानां शक्तयो यथादर्शनमभ्युपगन्तव्याः, न सामान्यतो दृष्टेनानुमानेन व्यवस्थापयितुं शक्यन्ते । अवश्यं चैतदेवं विज्ञेयम्---स्त्रीत्वाभावात्तिङन्तात्टाबादयो न भवन्तीति, अन्यथा पचतिरूपं ब्राह्मणीत्यादौ रूपबाद्यन्तात्टाप्स्यादेव ।
अणादयस्तरिहि तिङन्तान्मा भूवन्निति ? अपत्यादिष्वर्थेष्वणआदयो विधीयन्ते, न च तिङन्ते प्रधानस्यापत्यादिभिर्योगोऽस्ति । अप्रधानस्य त्वप्रधानत्वादेवापत्यादिभिर्योगाभावः, समर्थविभक्त्यभावाच्चाणाद्यभावः सिद्धः । अवश्यं चैतदेवं विज्ञेयम्, अन्यथा यः पचतिरूपं तस्यापत्यमिति रूपबाद्यन्तादणादयः स्युरेव ।
स्वाथिका अपि ज्ञापकात्तिङन्तान्न भविष्यन्ति, यदयं क्वचित्तद्धितविधौ तिङ्ग्रहणं करोति---`अतिशायने तमबिष्ठनौ', `तिङश्च' इति । वाक्यादपि नैव स्वादयो भवितुमर्हन्ति; अर्मादीनामभावात् । न खलु क्रियारूपस्य संसर्गरूपस्य भेदरूपस्य वा वाक्यार्थस्य कर्मादिभि स्त्रीत्वेनापत्यादिभिर्वा योगः सम्भवति । `पश्य मृगो धावति' इत्यादौ दृष्टमिति चेत् ? एवमपि संख्यायोगाभावः सिद्धः । स्वार्थिका अप्यभिधानाभावान्न वाक्याद्भविष्यन्ति । तथा हि---
`देवदत्तारोहाश्वम्' इत्यस्माद्वाक्यात्प्रागिवीयेष्वर्थेषु के सुल्बुकि च कृते वाक्यार्थस्यासत्त्वभूतत्वाच्छक्तिलिङ्गसङ्ख्यायोगाभावात्स्वाद्युत्पत्तेरभावाद् देवदत्तारोहाश्वकेति भवितव्यम्, न चैवम्भूतेन वाक्यार्थगताः कुत्सादयो गम्यन्त इति ।
सुबन्तादपि नैव स्वादयो भवितुमर्हन्ति । नहि स्वादिषु विधीयमानेषु तदन्ता प्रकृतिः सम्भवति, यथोक्तम्---`सनन्तान्न सनिष्यते' इति । किञ्च सुबन्तमपि सङ्ख्याप्रधानं कारकशक्तिप्रधानं वा, न चास्यापरैः कर्मादिभिर्योगः सम्भवति ।
टाबादयोऽपि स्त्रीत्वाभावान्न भविष्यन्ति । अणादिषु पुनर्नास्ति विशेषः, सुबन्ताद्वोत्पत्तौ सत्यां प्रातिपदिकाद्वा । यथा चैतत्तथा `समर्थानां प्रथमाद्वा' इत्यत्र प्रतिपादयिष्यामः । सर्वथा रूपबाद्यन्तात्प्रातिपदिकादप्यनिष्टः प्रत्ययो यद्वात् तद्वद्धात्वादिकादपीति नार्थ एतेनेत्याक्षेप्ता शङ्कते तावत्---यद्यपीति । प्रत्ययपरत्वेन प्रकृतिर्लभ्यते । पारिशेष्याच्चेयमेव प्रकृतिर्लभ्यत इत्यर्थः ।
परिहरति---तथापीति । वृद्धादयो लक्षणं निमित्तं यस्य प्रत्ययविधेस्तत्र ङ्याप्प्रातिपदिकस्य विशेष्यत्वेन सम्प्रात्ययो यथा स्यादित्येवमर्थमित्यर्थः । इतरथा हीति । यदि ङ्याप्प्रातिपदिकग्रहणं न क्रियेतेत्यर्थः । समर्थविशेषणमेतत्स्यादिति । `समर्थानां प्रथमाद्वा' इत्यधिकारात् । किं च समर्थम् ? सुबन्तम् । समर्थविशेषणे सति को दाषः ? `उदीचां वृद्धादगोत्रात्' इति फिन् । इह च प्रसज्येत---ज्ञानां ब्राह्मणानामपत्यमिति, एतद्धि समर्थवृद्धम् । इह च न स्यात्---ज्ञानां ब्राह्मणानामपत्यमिति, न ह्येतत्समर्थमवृद्धम् । यत्र ह्यादेशादिवशेन सङ्ख्याविशेषाभिव्यक्तिर्भवति न भवति तत्र द्विवचनबहुवचनान्तानामपि वृत्तिः---तावकः, मामक इति । यथा इह च फिञुत्पद्यमानो बहुत्वमन्तरेण वृद्धत्वानुपपत्तेर्बहुत्वं गमयेत्, एवं फिन्नपि द्वित्वमिति स्यादेवायं प्रसङ्गः । अवर्ण---`अत इञ्' इहैव स्यात् दक्षस्यापत्यमिति, दक्षयोः दक्षाणामित्यत्र तु न स्यात् । स्वर---`अनुदात्तादेरञ्', इह च प्रसज्येत---वाचो विकारः, त्वचो विकारः, एतद्धि समर्थमनुदात्तादि, `सावेकाचः' इति विभक्तेरुदात्तत्वात् । नन्वत्रैकाचो नित्यं मयटमिच्छन्तीति मयटा भाव्यम् ? इदं तर्हि पञ्चानां विकार इति `षट्त्रिचतुर्भ्यो हलादिः' इति विभक्तेरुदात्तत्वे सति समर्थमनुदात्तादि, प्रातिपदिकं तु `न्रः सङ्ख्यायाः' इत्याद्युदात्तम् । इह च न स्यात्---सर्वेषां विकार इति, `सर्वस्य सुपि' इत्याद्युदात्तं पदम्, प्रातिपादिकं त्वन्तोदात्तं निपातितम् । द्व्यच्---`नौद्व्यचष्ठन्', इह च प्रसज्येत---वाचा तरति, त्वचा तरति,एतद्धि समर्थं द्व्यच् । नौग्रहणं तु नियमार्थं स्यात्---औकारान्ताद्यदि भवति नौशब्दादेवेति । इह च न स्यात्---घटेन तरतीति । साम्ना तरतीत्यादौ पुनरुभयथापि सिद्धम् । ङ्याप्प्रातिपदिकग्रहणे तु सति तत्सामर्थ्यात्तस्यैव विशेषणं वृद्धादि भवति, समर्थाधिकाराच्च समर्थात्प्रत्ययः । तत्रैवमभिसम्बन्धः---वृद्धादि यद् ङ्याप्प्रातिपदिकं तस्मात् समर्थात् प्रत्ययः इति ।
`यस्मात्प्रत्ययविधिः' इति प्रत्ययविधौ पञ्चमीनिर्दिष्टस्य विधीयमाना अङ्गभपदसंज्ञा ङ्याप्प्रातिपदिकस्य यथा स्युरित्येतत्तु प्रयोजनंन भवति, कथम् ? दैवेन हि जानता यतः प्रत्ययो विहितस्तस्यैताः संज्ञाः पञ्चम्या निर्द्दिश्यतां मा वा निर्देशि । इह च `कंसीयपरशव्ययोर्यञञौ लुक्च' इति प्रातिपदिकात्परयोश्छयतोर्लुग्यथा स्यादौणादिकयोरुकारसशब्दयोर्मा भूदित्येतदपि न प्रयोजनम्, कथम् ? `उणादयोऽव्युत्पन्नानि प्रातिपदिकानि', उणआदिषु नावश्यं व्युत्पत्तिकार्यं भवतीत्यर्थः । एतच्च `अतः कृकमिकंस' इत्यत्र कमिग्रहणेनैव सिद्धे पुनः कंसग्रहणाद्विज्ञायते, तस्माद् वृद्धाद्येव प्रयोजनमधिकारस्य । ङ्याब्ग्रहणं क्रियते; प्रत्ययान्तत्वेनाप्रातिपदिकत्वात् । `यूनस्तिः' युवतिरित्यस्य तु तद्धितान्तत्वात्प्रातिपदिकत्वम् । `ऊङुतः' इत्युवर्णान्तादूङ् विधीयते,

तत्रैकादेशस्यान्तवद्भावात्प्रातिपदिकत्वम् । `श्वशुरस्योकाराकारलोपश्च' इति श्वश्रूरित्यत्र `श्वशुरः श्वश्र्वश्च' इति निपातनाद्विभक्त्यादिसिद्धिः, एवं स्थिते चोद्यम्---अथेति । न प्रातिपदिकग्रहण इति । नञः काक्वा प्रयोगात्सिद्धमेवेत्यथः । अनेकार्थत्वाद्वा निपातानाम् । ननुशब्दस्यार्थे नशब्दो द्रष्टव्यः । लिङ्गविशिष्टस्येति । लिङ्गनिमित्तप्रत्ययेनाधिकस्येत्यर्थः ।

अस्याश्च परिभाषायाः प्रयोजनम्---सर्वनामस्वरसमासोपचारेष्ठवद्भावाः । सर्वनाम---भवच्छब्दस्य विधीयमाना सर्वनामसंज्ञा भवतीशब्दस्यापि भवति, `सर्वनाम्नास्तृतीया च', भवता हेतुना, भवतो हेतोः, भवत्या हेतुना, भवत्या हेतोरिति । स्वर---`कुशूलकूपवुम्भशालं बिले', कुशूलबिलं कुशूलीबिलम् । समास---`पूर्वसदृश', मातृसदशः, मातृसदृशी; `सदृशप्रतिरूपयोः' इति स्वरोऽप्यत्र भवति । तथा `कुमारः श्रमणादिभिः' । कुमारीश्रमणा, कुमारश्रमणा, एवं युवतिर्वलिना, युववलिना । उपचार---`अतः कृकमिकंसकुम्भ', अयस्कुम्भः, अयस्कुम्भी । इष्ठवद्भाव---`णाविष्ठवत्प्रातिपदिकस्य', कुमारीमाचष्टे कुमारयति । इह तु `अचित्तहस्तिधेनोष्ठक्', हस्तिनीनां समूहो हास्तिकरमिति, `भस्याढे तद्धिते' इति पुंवद्भावेन ङीपि निवृत्ते हस्तिशब्द एवायमिति ठक्सिद्धिः । `तद्धिते' इत्येषा हि विषयसप्तमी । अवश्यं च पुंवद्भाव एवाश्रयणीयः, अन्यथा हस्तिनीशब्दाट्ठकि यस्येतिलोपग्य स्थानिवद्भावात् `नस्तद्धिते' इति टिलोपो न स्यात् । इह च `नेन्त्सिद्धबध्नातिषु च स्थण्डिलशायिनि' इति `गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति वचनादनुत्पन्न एव ङीपि समासे सतीनन्तमेवोत्तरपदमित्यलुक्प्रतिषेधः सिद्धः । एवं `शयवासवासिष्वकालात्' ग्रामेवासिनीत्यलुक् । तथा `क्यङ्मानिनोश्च' `स्वाङ्गाच्चेतोमानिनि' दर्शनीयमानिनी, दीर्घमुखमानिनी---मानिन्शब्द एवोत्तरपदमिति पुंवद्भावः सिद्धः । इह च `तृजकाभ्यां कर्त्तरि' `कर्त्तरि च' इति कर्त्तरि यौ तृजकौ ताभ्यां योगे या षष्ठी तस्या येन सह समासः प्राप्तः स सर्वो न भवतीति विज्ञानादपां स्त्रष्ट्रीत्यत्रापि समासनिषेदः सिद्धः । यदि `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' भवति, अतिप्रसङ्गो भवति---`द्विषत्परयोस्तापे' द्विषतीतप इत्यत्रापि स्यात्, उक्तमत्र---`द्विषत्परयोरिति द्वितकारकोऽयं निर्देशः तकारान्तो द्विषच्छब्दः' इति । इह च गार्ग्या अपत्यम्, दाक्ष्या अपत्यमिति `यञिञोश्च' इति फकं परत्वात् स्त्रीभ्यो ढग्बाधते । इह च `ञ्नित्यादिर्नित्यम्' दाक्षिः, ग्लुचुकायनिरित्यस्यामवस्थायामाद्युदात्तत्वे कृते पश्चात् `इतो मनुष्यजातेः' इति ङीषि सति शिष्टः प्रत्ययस्वर एव भवति---दाक्षी, ग्लुचुकायनी । न चास्यामवस्थायामाद्युदात्तत्वं पुनः प्रवर्त्तते; पूर्वमेव प्रवृत्तत्वात् । तथा बहवो गोमन्तोऽस्यां बहुगोमतीति प्रागेव बहुस्वरे प्रवृत्ते पश्चान्ङीप्, पित्त्वादनुदात्तो भवति । न च पुनरपि `बहोर्नञ्वद्' इत्यम्य प्रवृत्तिः पूर्वमेव प्रवृत्तत्वात्समासाच्चात्र ङीबुत्पन्न इत्युत्तरपदं न लिङ्गविशिष्टम् । इह तर्हि `राजाहः सखिभ्यष्टच्' मद्राणां राज्ञीति टच् स्यात्, ततश्च `भस्याढे तद्धिते' इति पुंवद्भावेन ईकारे निवृत्ते टिलोपे च टित्त्वान्ङीपि मद्रराजीति स्यात्, मद्रराज्ञीति चेष्यते । तथा महती प्रिया यस्य महतीप्रिय इति पुंवद्भावप्रतिषेधविषये `आन्महतः' इत्यात्वं स्यात् । तथाऽऽर्ययोर्ब्राह्मणकुमारयोः, राजा च राजब्राह्मणीत्यत्रापि स्यात् । तथा विभक्त्याश्रयं यत्कार्यं विभक्तौ परतो विभक्तेर्वा तत्रापि दोषः, यथा---`न गोश्वन्साववर्ण' इति शुना, शुन इत्यत्र `सावेकाचः' इति प्राप्तं विभक्तेरुदात्तत्वं न भवति । तथा गौरादिङीषन्तात् शुन्या, शुन्यै इत्यादावपि `उदात्तयणो हलपूर्वात्' इत्यस्यापि निषेधः स्यात् । `उगिदचाम्' इति नुम् गोमतीत्यादावपि स्यात् । `चतुरनडुहोराम्' अनडुहीत्यत्रेकारात्परः स्याद् । `पथिमथ्यृभुक्षामात्' शोभनः पन्था अस्यामिति `न पूजनात्' इति समासान्ते निषिद्धे ऋन्नेभ्यो ङीपि भस्य टेर्लोपे सुपथीत्यत्रापि स्यात् । अङ्गाधिकारे तदन्तस्यापि ग्रहणात्सुपन्था इतिवत् `पुंसोऽसुङ्' सुपंसीत्यत्रापि स्यात् । शोभनाः पुमांसोऽस्यामिति, उरः प्रभृतिषु पुमानिति विभक्त्यन्तस्य पाठादेकवचनान्तादेव नित्यं कप् भवति, बहुवचनान्तस्य तु `शेषाद्विभाषा' इति विकल्पित एवेति कबभावपक्षे पूङो ह्रस्वः, मसुश्च प्रत्ययः, आकार उच्चारणार्थः, तत्र प्रत्यस्योगित्त्वात् `उगितश्च' इति ङीप् । `सख्युरसम्बुद्धौ' `अनङ् सौ' इति णित्त्वानङौ सखौ सख्यावित्यादावपि स्याताम् । `सख्यशिश्वीति भाषायाम्' इति ङीष्विधानं तु सखीभ्यामित्याद्यर्थं स्यात् । `विभाषा भवद्भगवदघवताम्' इत्यत्र त्ववशब्दः सम्बुद्धाविति विशिष्यते, तत्र `येन नाव्यवधानम्' इत्येकेन वर्णेन व्यवाये ओत्वं प्रवर्त्तमानमिह न भवति---हे भगवति, हे अघवतीति, तदभावात्तत्सन्नियोगशिष्टस्य रुत्वस्याप्यभावः । `श्वयुवमघोनामतद्धिते' इत्यत्रापि `अल्लोपोऽनः' इत्यतः `अनः' इत्यपकर्षाद्युवतीः पश्येति सम्प्रसारणाभावः ।

तदेवं लिङ्गविशिष्टपरिभाषायाः सन्ति प्रयोजनानि, सन्ति च दोषाः । यानि प्रयोजनानि तदर्थमेषा कर्तव्या, प्रतिविधेयं दोषेषु । प्रतिविधानं च `शक्तिलाङ्गल' इत्यत्र घटग्रहणेनैव सिद्धे घटीग्रहणमस्याः परिभाषाया अनित्यत्वज्ञापनार्थमिति । तदेवं स्थितमेतत्---ङ्याब्ग्रहणमनर्थकं प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणादिति ।

परहरति---नैतदस्तोति । स्वरूपविधिविषय इति । स्वरूपाश्रयो विधिः स्वरूपविधिः, स चासौ विषयश्च तत्रेत्यर्थः । किमुक्तं भवतीत्याह---प्रातिपदिकस्वरूप ग्रहणे सतोति । कुत एतदित्यत आह---तथा चेति । यथा च युवञ्छब्दस्य जरतीशब्देन समासवचनमत्रार्थे ज्ञापकं तथा तत्रैव प्रतिपादिकम् । तादृशमेवेति । `प्रातिपदिकस्वरूपग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' इति यदुक्तं तदनुगुणमेवेत्यर्थः । यदि स्वरूपविधिविषये परिभाषेयम्, कथमिष्ठवद्भावः---कुमारीमाचष्टे कुमारयतीति ? बाहुलकात्सिद्धिं मन्यते, चुरादौ हीदं पठ्यते---`प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इति । भाष्ये तु यथाकथंचित्प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति स्थितम् । तथा च `सर्वप्रातिपदिकेभ्य इत्येके' इति क्विप् ङ्यन्तादपि भवति---यामिनयन्त्यहानीति ।

किञ्चेत्यादिना प्रयोजनान्तरं समुच्चिनोति । कालितरेति । कालशब्दात् जानपदादिसूत्रेण ङीषि तरपि `घरूपकल्प' इत्यादिना ह्रस्वः । किं पुनः कराणं तदन्तात्तद्धितविधिर्न सिध्यतीत्याह--- विप्रतिषेधाद्धीति । स्त्रीप्रत्ययस्यावकाशः---प्रकर्षाविवक्षायां कालीति, प्रकर्षप्रत्ययस्यावकाशः---स्त्रीत्वाविवक्षायां कालतर इति ; उभयविवक्षायामुभयप्रसङ्गे परत्वात्तद्धितः स्यात् । ङ्याब्ग्रहणे तु सति तरब्विधौ प्रकृतित्रयाधिकारसामर्थ्यात्पूर्वं ङ्यापौ भवतः,

पश्चात्तरबिति सिद्धमिष्टम् ।
ननु च स्त्रीत्वस्यान्तरङ्गत्वात्तन्निमित्तः प्रत्ययोऽन्तरङ्गः, प्रकर्षस्तु बाह्यप्रतियोग्यपेक्षत्वाद्बहिरङ्गः, ततस्तन्निमित्तस्य प्रत्ययस्यापि बहिरङ्गत्वम् । योऽप्यज्ञातादिष्वर्थेषु `प्रागिवात्कः' विधीयते सोऽप्यज्ञाताद्यर्थापेक्षत्वाद्बहिरङ्ग एव, विभक्त्यन्तस्य हि सतः पश्चादज्ञातादियोगो भवति, विभक्तयश्च संख्याकर्माद्यपेक्षाः । प्रागेव संख्याकर्मादियोगाल्लिङ्गेन प्रातिपदिकं युज्यते । उक्तं च---`स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम्, समवेतस्य तु वचने लिङ्गं संख्यां विभक्तिं चाभिधाय तान्विशेषानवेक्षमाणश्च पूर्णमात्मानमप्रियकुत्सनादिषु ततः विशेष्ये बुद्धिरिति पूर्वं विशेषणभूतः स्वार्थोऽभिधातव्यः, पश्चात्तद्विशिष्टं द्रव्यम्; तस्य धर्मित्वेन प्रधानत्वात्, ततो लिङ्गमन्तरङ्गत्वात् । संख्या हि भेदापेक्षत्वाद्बहिरङ्गा, सापि तु सजातीयापेक्षा विजातीयकर्मादिकारकशक्त्यपेक्षेभ्यः कारकेभ्योऽन्तरङ्गेति ततस्तस्या अभिधानम्, ततः कारकाणाम्, एवं परिपूर्णार्थस्य पश्चात्कुत्सनादिभिर्योगः । स्वार्थादयो हि कुत्सनादिहेतवः, द्रव्यस्य पण्डितक इत्यादौ तथावसायात् । तदेवमन्तरङ्गः स्त्रीप्रत्ययः, बहिरङ्गास्तद्धिताः, अन्तरङ्गबहिरङ्गयोश्चायुक्तो विप्रतिषेधः ? इह तर्हि `वर्णे चानित्ये', `रक्ते' `कालाच्च' इत्यस्यावकाशः स्त्रीत्वाविवक्षायां कालक इति, स्त्रीप्रत्ययस्य कालीत्यवकाशः; कालिकेत्यत्रोभयप्रसङ्गे परत्वान्कन् स्यात् । तस्य चात्यन्तस्वाथिकत्वान्न तदपेक्षं स्त्रीप्रत्ययस्यान्तरङ्गत्वमस्ति । नास्त्यत्र विशेषः, कालशब्दादप्युत्पत्तौ `प्रत्ययस्थात्' इतीत्वे कालिकेति सिद्धम् ? यदा तर्हि हरितशब्दात् `न सामिवचने' इति ङीब्नकारौ बाधित्वा परत्वात्कन् स्यात्, ततश्च हरिणिकेति न स्यात् । हरितशब्देन समानार्थो हरिणशब्दोऽस्ति, ततः कर्मत्वे च भविष्यति, हरितशब्दात्तु हरितिकेति ? अयं तर्हि---`लोहितान्मणो' इत्यत्यन्तस्वर्थिकः कन् `वर्णादनुदात्तात्' इति ङीब्नकारौ परत्वाद्बाधेत, ततश्च लोहितिकेत्येव स्यात्, न लोहिनिकेति;उभयमपीष्यते, तदर्थं ङ्याब्ग्रहणम् ।
ननु च `लोहिताल्लिङ्गबाधनं च' इत्यनेनैवैतत्सिद्धम्, तन्न वक्तव्यं भवति, कथम् ? `वर्णादनुदात्तात्' इत्यत्र वेति वर्तते, तत्र ङ्याबन्ताभ्यां लोहिनीलोहिताशब्दाभ्यां कनि विहिते यतायोगं ह्रस्वत्वेत्वयोः कृतयोर्लोहिनिका लोहितिकेति सिद्धमिष्टम् । तदेवं सति ङ्याब्ग्रहणे लिङ्गनिमित्तेन प्रत्ययेन विकल्पेन बाधा यथा स्यान्नित्यं मा भूदित्येवमर्थं तावन्न वक्तव्यम्---लोहिताल्लिङ्गबाधनं वेति । नापि प्रतिपदविहितत्वेन कना लिङ्गनिमित्तस्य प्रत्ययस्य नित्ये बाधे प्राप्ते । विकल्पेन बाधा यथा स्यादित्येवमर्थमपि वक्तव्यम्; ङ्याब्ग्रहणस्यानन्यार्थत्वात् । यदि ह्येतश्वेतशब्दाभ्यामत्यन्तस्वार्थिकः कन्निष्यते, तदा तत्र ङ्याब्ग्रहणस्य चरितार्थत्वाल्लोहितशब्दात्प्रतिपदविहितेन कना ङीपो नित्ये बाधे प्राप्ते तद्वक्तव्यम् ? तदापि वा न वक्तव्यम्, `लोहितान्मणौ' इत्यस्यापि पुनन्नपुंसकयोश्चरितार्थत्वात् । तदेवमत्यन्तस्वार्थिकोऽपि कन् ङ्यन्ताद्यथा स्यादिति ङीब्ग्रहणं तावत्कर्त्तव्यम् ।
आब्ग्रहणं तु विस्पष्टार्थम् । तत्र समासान्तेषु दोषः---बहवो गोमन्तोऽस्यां नगर्यामिति बहुव्रीहौ कृते स्त्रिया अन्यपदार्थत्वान्ङीप् च प्राप्नोति कप् च, ङ्याब्ग्रहणान् ङीपि कृते कप् स्यात्, ततश्च बहुगोमतीकेति रूपं स्यात्, बहुगोमत्केति चेष्यते ? नैष दोषः समासार्थादुत्तरपदादकृत एव समासे समासान्ता भवन्ति पश्चात्तदन्तेन समासः, एवं हि समासं प्रत्यन्तावयवत्वमुपपद्यते समासान्तानाम्, तथा च `न कपि' इत्यत्र वक्ष्यति । तत्र चोत्तरपदे समासार्थाया विभक्तेः पुरस्तात्समासान्ता इति केचित् । परस्तात्समासान्तेषु सुब्लुकि तद्धितान्तत्वेन ततः सुपि सुबन्तस्य समास इत्यन्ये । सर्वथा बहुचर्मिकेतीत्वं प्राप्नोति, `असुपः' इति प्रतिषेधात्, यथा बहुपरिव्राजका मदुरेति ? कर्त्तव्योऽत्र यत्नः । `नञस्तत्पुरुषात्' इत्यादौ तु ग्रन्थविरोधं तत्र तत्र परिहरिष्यामः । तदेवं स्थितमेतत्---तदन्तात्तद्धितविधानार्थं ङ्याब्ग्रहणं विप्रतिषेधाद्धि तद्धितबलीयस्त्वमिति ।
यद्येवम्, `यूनस्तिः' `ऊङुतः' इति त्यूङोरपि ग्रहणं कर्त्तव्यं तदन्तात्तद्धितविधानार्थम्---युवतितरा । भाष्यकारप्रयोगात् `तसिलादिष्वाकृत्वसुचः' इति पुंवद्भावो न भवति, खिद्धादिषु पुंवद्भावाद् ह्रस्वत्वं विप्रतिषेधेनेति वा पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वेन बाधितत्वात् । ब्रह्मबन्धूतरा `नद्याः शेषस्यान्यतरस्याम्' इति ह्रस्वाभावपक्षे `जातेश्च' इति पुंवद्भावप्रतिषेधः । पूर्वत्र त्वनेन प्रतिषेधो न लभ्यते; यौवनस्याजातित्वात् । यावद्द्रव्यभाविनी हि जातिः, तथा च युवजानिरित्युदाहृतम् । नन्वत्रान्तरङ्गत्वादेव त्यूङौ भविष्यतः, अत्यन्तस्वार्थिके तु कनि ब्रह्मबन्धुकेत्यत्र `केऽणः' इति ह्रस्वे सति नास्ति विशेषः---ऊङन्ताद्वोत्पत्तौ सत्याम्, उकारान्ताद्वा, युवतिशब्दादपि कनि पुंवद्भावेन भ्वायमिति नास्त्येव विशेषः । न चास्मात्कन्निष्यत इत्यत्रापि प्रमाणमस्ति । तस्मान्नार्थस्त्यूङोर्ग्रहणेन ।।
स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ।। 4.1.2 ।।
उकारादयोऽनुबन्धा इत्यादि । तत्र प्रथमैकवचनस्योकारः `एतत्तदोः सुलोपः', `दीर्घात्सुतिसि' इत्यत्र केवलस्य व्यञ्जनस्योच्चारयितुमशक्यत्वादुच्चारणार्थः । अत्र तु सूत्रे औकारोपश्ले षाच्छक्यते सकारमात्रमुच्चारयितुम् । `अनङ्सौ' इत्यत्र विशेषणार्थस्तु न भवति; व्यावर्त्त्यस्याभावात् । न च `अनङ्सि' इत्युच्यमाने वर्णनिर्देशे च तदादिविधिसम्भवात्सप्तमीबहुवचनेऽपि प्रसङ्गः; `सर्वनामस्थाने' इत्यनुवृत्तेः । जसो जकारोऽस्मिन्नेव सूत्रेऽसन्दिग्धोच्चारणार्थः; अन्यथा ह्यौकारस्यावादेशे सन्देहः स्यात्---किमौकारस्योच्चारणम्, अथावित्यस्येति । `जसः शी' इत्यादौ विशेषणार्थस्तु न भवति; `असः शी' इत्युच्यमानेऽप्यतिप्रसङ्गाभावात्, शसादीनां सानुबन्धकत्वात् । शसश्शकार औटष्टकारस्यासन्दिग्धोच्चारणार्थः; अन्यथा डकारष्टकार इति सन्देहः स्यात्। `तस्माच्छसः' इत्यादौ विशेषणार्थस्तु न भवति; जसादीनां सानुबन्धकत्वात् । `टा' इत्यत्र टकारः `टाङसिङसामिनात्स्याः' इति विशेषणार्थः; अन्यथा `सुपां सुलुक्' इत्यादिना विहितस्याकारस्यापि ग्रहणं स्यात् । तदेवमेषां चतुर्णामुकारादय उच्चारणविशेषणार्थाः । इत्संज्ञाप्येषां प्रयोगे श्रवणं मा भूदिति, न पुनरित्कार्यं किञ्चिदस्ति । औटष्टकारः सुडिति प्रत्याहारग्रहणार्थः । ङेप्रभृतिषु ङकारः `घेर्ङिति' इति विशेषणार्थः । ङसेरिकारः `युष्मदस्मद्भां ङसोऽश्' इत्यत्र ग्रहणं मा भूदित्येवमर्थः । पकारः प्रत्याहारग्रहणार्थ इति । उकारादयोऽनुबन्धा यथायोगमुच्चारणविशेषणार्था इत्यनेनागतार्थत्वादिदमुक्तम् । एवं च---`औटष्टकारः सुडिति प्रत्याहारार्थः' इत्यग्रिमग्रन्थेन भवितव्यम् ।

क्व पुनरिमेऽर्थे स्वादयो भवन्तीत्याह---संख्याकर्मादयश्चेति । शास्त्रान्तरेणेति । `बहुषु बहुवचनम्', `कर्मणि द्वितीया' इत्यादिना । तेन सहास्यैकवाक्यतेति । पूर्वं त्ववान्तरवाक्यभेदापेक्षया शास्त्रान्तरेणेत्युक्तम् । आकांक्षायोग्यतावशेन भिन्नप्रकरणपठितानामप्येकवाक्यता भवत्येव । प्रकरणभेदेन तु पाठस्तिङादिविधिनाप्येकवाक्यत्वं यथा स्यादिति । `बहुषु बहुवचनम्' इत्यत्र तु भिन्नवाक्यत्वमाश्रित्योक्तम्-ङ्याप्प्रातिपदिकात्स्वादयो लस्य तिबादय इति बहुवचनं विहितं तस्यानेन बहुत्वं संख्यावाच्यत्वेन विधीयते इति । अव्ययेयस्तु निः संख्येभ्यः सामान्यविहिताः खादयो विद्यन्त एवेति च । एकवाक्यतायां तु विशिष्टे एवार्थे कर्मादिसम्बन्धिन्येकत्वादौ स्वादीनां विधानात्सामान्यविहितत्वं नोपपद्यते । तस्माद् `अव्ययादाप्सुपः' इत्यव्ययादुत्पन्नस्य सुपो लुग्विदानाल्लिङ्गादव्ययेभ्योऽस्मिन्पक्षे स्वाद्युत्पत्तिः । उदाहरणानि यथायोगं स्वे स्वे वाक्ये प्रकटीकरिष्यन्ते ।।

स्त्रियाम् ।। 4.1.3 ।।

ङ्यापोरनेनैव विधानादिति । प्रातिपदिकमात्रमत्र प्रकरणेऽभिसम्बध्यत इत्यत्रायं हेतुः । प्रकरणापेक्षया चैतदुच्यते, सूत्रान्तरव्यापारसमये तु सूत्रान्तरविहितप्रत्ययान्ता प्रकृतिः सम्भवत्येव । ननु चात्र प्रकरणे सर्वत्र सति सम्भवे `अतः' इति सम्बध्यर्ते, न च ङ्याबन्तमदन्तम् । उक्तार्थत्वाच्च ङ्याबन्तात् ङ्यापोरप्रसङ्गः ? सत्यम् ; न्यायस्तु निरूप्यते ।

चोदयति---स्त्रियामित्युच्यते इति । सप्तमीनिर्देशेन कार्यान्तरविधानार्थमनूद्यते इत्यर्थः । ततः किमित्याह---केयं स्त्री नामेति । इह शास्त्रे स्त्रिया अपरिभाषितत्वाल्लौकिकस्त्रीग्रहणे च खट्वादावव्याप्तिप्रसङ्गात्प्रसिद्धवदनुवादोऽनुपपन्न इत्यर्थः । स्वरूपस्य च जिज्ञासितत्वात्प्रथमान्तेन प्रश्नः, कस्यां स्त्रियामिति तूच्यमाने विशेषविषयः प्रश्नः स्यात् । स्त्रीग्रहणं च प्रसङ्गेन पुन्नपुंसकयोरपि प्रदर्शनार्थम् । अत एवोत्तरे सामान्यविशेषाः स्त्रीत्वादय इति त्रयाणां स्वरूपं दर्शितम् । एवं च प्रथमोपनिपातिनि `ह्रस्वो नपुंसके' इत्यत्र लिङ्गस्वरूपनिरूपणमुचितम्, तथा तु न कृतमित्येव । तत्र लौकिकानां लक्षणम्---

स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च तदभावे नपुंसकम् ।। इति ।

भूमादौ मतुप्, तथैव लोमश इति शः । स्तनकेशवत्त्वं च प्रसिद्धत्वादन्यस्यापि कुमार्यादिगतस्य स्त्रीप्रतिपत्तिहेतोरुपलक्षणम् । लोमशत्वं च पुंविज्ञानहेतोः कुमारादिगतस्य । उभयोरपि स्त्रीपुंसयोर्यदन्तरं सदृशं स्तनलोमाद्युभयव्यञ्जनं तन्नपुंसकमित्यर्थः । तेनाव्ययाख्यातार्थस्य स्त्रीपुंसत्वाभावेऽपि नपुंसकत्वं न भवति, अन्यथा `तदभावे' इत्येतावत्युक्ते स्यात्पसङ्गः, तदभाव इत्यनेन कुक्कुटमयूर्यादेः स्त्रीपुंससमुदायरूपस्य द्वन्द्वार्थस्य नपुंसकत्वं न भवति । भवति हि समुदायः समुदायिनः सदृश इति स्यात्प्रसङ्गः । नायं प्रसङ्गः, `परवल्लिङ्गम्' इत्यनेन समुदायस्य परवल्लिङ्गातिदेशात् ? सत्यम्; इदं तु वस्तुस्वरूपनिरूपणपरं द्रष्टव्यम् । तदनेन स्तनकेशादिसम्बन्धः, स्तनादय एव वा विशिष्टसंस्थानाः, तदुपव्यञ्जना वा जातयः स्त्रीत्वादय इत्युक्तं भवति । अत्र पक्षे भ्रुकुंसे टाप् प्रसज्येत, भ्रुकुंसः=स्त्रीवेषधारी नटः, तस्य स्तनकेशसम्बन्धं उपलभ्यते, खरकुट्यादीनां च लोमशत्वात्पुंस्त्वे सति खरकुटीः पश्येत्यत्र नत्वं प्राप्नोति । खरकुटी=नापितगृहमुच्यते । ननु च स्वाभाविकपरिणामशालिभिः स्तनादिभिरत्र सम्बन्धो विवक्षितः, न यथाकथञ्चित् ; स्तनादि च प्रसिद्धस्यान्यस्याप्युपलक्षणमुक्तं तत्कुतोऽयं प्रसङ्गः ? एवं तहि खट्वावृक्षौ न सिध्यतः, खट्वावृक्षादीनां स्तनलोमाद्यभावात् । स्यादेतत्---यथा वस्त्रान्तर्हितानि द्रव्याणि नोपलभ्यन्ते, तद्वत्खट्वावृक्षयोः सदेव लिङ्गं नोपलभ्यत इति ? तन्न; वस्त्रान्तर्हितानि द्रव्याणि वस्त्रापाये उपलभ्यन्ते खट्वावृक्षयोस्तिलशस्तत्क्षणेऽपि लिङ्गं नोपलभ्यते । यथा तर्ह्यादित्यगतिः सती प्रत्यक्षेण नोपलभ्यते देशान्तरप्राप्त्या त्वनुमीयते, तथा खट्वावृक्षयोरपि सदेव लिङ्गं सूक्ष्मत्वान्नोपलभ्यते ।

सतामपि हि भावानां षड्भिः प्रकारैरनुपलब्धिर्भवति---अतिसन्निकर्षाद्, यथा---स्वचक्षुर्गतस्याञ्जनादेः । अतिविप्रकर्षात्, यथा-उड्डीनस्य शकुनेः । मूर्तान्तर्द्धानात्, यथा---कुड्यादिव्यवहितस्य सुवर्णादेः । अन्धकारावृतत्वात्, यथाअन्दकाराक्रान्तस्य घटादेः । इन्द्रियदौर्बल्यात्-तिमिराद्युपघाते चक्षुरादेः । अतिप्रमादात्---`प्रामादोऽनवधानता', विषयान्तरव्यासक्तचित्तो हि सन्निकृष्टमप्यर्थं नोपलभ्यते । सौक्ष्म्यं तु---इन्द्रियदौर्बल्य एवान्तर्भूतम्, दिव्यचक्षुः श्रोत्रो हि सूक्ष्ममप्यर्थमुपलभते । एवं समानाभिहारोऽपि तत्रैवान्तर्भूतः, तद्यथा माषराशौमाषः प्रक्षिप्तः पृथग्नोपलभ्यते । एवमभिभवोऽपि, तद्यथा---सौरीभिः प्रभाभिरभिभूतानि नक्षत्राणि दिवा नोपलभ्यन्ते । केम पुनरेतदवसीयते खट्वावृक्षयोः सदेव लिङ्गं नोपलभ्यत इति ? टाबादेस्तत्कृतस्यानन्यकार्यस्य दर्शनात् । यद्येवम्, इतरेतराश्रयं प्राप्नोति---लिङ्गावगमाट्टाबादिशब्दप्रयोगः, तद्योगाल्लिङ्गावगतिरिति ? इन्द्रियदौर्बल्यं कदाचिदुपलब्धस्य कदाचिदनुपलम्भे कारणं शक्यमभिधातुम्, खट्वादिषु च लिङ्गस्य कदाचिदप्यनुपलम्भाल्लिङ्गविविक्तखट्वादिवस्तुग्राहिणा प्रत्यक्षेण लिङ्गाभावनिश्चयात्तद्विरुद्धमनुमानं नोदेतुमर्हति । न हि शक्यते वक्तुम्---भिक्षुगृहं गजवद् देशत्वाद्गजशालावत्, प्रत्यक्षेणेन्द्रियदौर्बल्यात्तु गजो नोपलभ्यत इति, तस्मादसदेव लिङ्गं शब्दप्रयोगमहिम्न खट्वादिषु प्रतीयते । भवत्वेवं श्रोतुः प्रतीतिः, यस्त्वसौ प्रयोक्ता स केन लिङ्गमगम्य तदनुरूपं शब्दं प्रयुङ्क्ते ! किञ्च---कुमार्यर्थः, कुमारी वस्त्विति कुमार्यादिष्वर्थवस्तुशब्दयोः पुन्नपुंसकयोरनुपपत्तिः । भाष्ये तु---

आविर्भावस्तिरोभावः स्थितिश्चेत्यनपायिनः ।
धर्मा मूर्त्तिषु सर्वासु लिङ्गत्वेनानुदर्शिताः ।।

आविर्भावः=उपचयः, पुंस्त्वम् ; तिरोभावः=अपचयः, स्त्रीत्वम् ; अन्तरालावस्था स्थितिर्नपुंसकत्वमित्यर्थः । कस्य पुनराविर्भावादिकं लिङ्गम् ? सत्त्वरजस्तमसां गुमानां तत्परिणामरूपाणां च तदात्मकानां शब्दस्पर्शरूपरसगन्धानाम् । शब्दादिसङ्घातरूपाश्च सर्वा मूर्तयः प्रतिक्षणपरिणामस्वभावाश्च सत्त्वादयो गुणा न स्वस्मिन्नात्मनि मूहूर्तमप्यवतिष्ठन्ते । एवं शब्दादय आकाशादयो घटादयश्च ।

उक्तञ्च---
सर्वमूर्त्त्यात्मभूतानां शब्दादीनां गणे गणे ।
त्रयः सत्त्वादिधर्मास्ते सर्वत्र समवस्थितः ।। इति ।
क्वथितोदकवच्चैषामनवस्थितवृत्तिता ।
अजस्रं सर्वभावानां भाष्य एवोपवर्णिता ।। इति च ।
तथा---
रूपस्य चात्ममात्राणां शुक्लादीनां प्रतिक्षणम् ।
काचित्प्रलीयते काचित् कथंचिदभिवर्धते ।। इति ।
प्रवृत्तिमन्तः सर्वे हि तिसृभिश्च प्रवृत्तिभिः ।
सततं न वियुज्यन्ते वाचश्चैवात्र सम्भवः ।। इति च ।
टाबाद्यन्तः शब्द एवैता अवस्था गोचरयतीत्यर्थः । पुरुषो यद्यप्यपरिणामी, तथापि---
उचेतनेषु सङ्क्रान्तं चैतन्यमिव दृश्यते ।
प्रतिबिम्बकधर्मेण यत्तद्वाचो निबन्धनम् ।।
ततश्च---
यश्चाप्रवृत्तिधर्मार्थस्चितिरूपेण गृह्यते ।
अनुयातीव सोऽन्येषां प्रवृत्तिविष्वगाश्रया ।।
सामान्यमपि गोत्वादि व्यक्तेरव्यतिरेकतः ।
प्रवृत्तिधर्मं तद्द्वारा शशश्रृङ्गादिवाक्षु तु ।।
तस्मादुक्तपदार्थस्य सम्भवाल्लिङ्गयोगिता ।
प्रवृत्तेरपि विद्यन्ते तिस्रो ह्येताः प्रवृत्तयः ।।
पुन्नपुंसकता स्त्रीत्वं तेन स्यादन्यलिङ्गता ।
तदेवं सर्वपदार्थव्यापित्वादुपचयान्तरालावस्थास्त्रीणि लिङ्गानि । एवं च नक्षत्रे तारका तिष्यः, कुमार्यर्थो वस्तु इति एकस्याप्यर्थस्य नानालिङ्गयोग उपपद्यते; आविर्भावादित्रयस्यापि गुणभेदेन नस्मिन्नेवार्थे सर्वदा सम्भवात् । न चैवं तद्वृत्तेः सर्वस्यैव शब्दस्य त्रिलिङ्गताप्रसङ्गः; न ह्यस्ति नियमः---यः शब्दो यत्रार्थे पर्यवस्यति तत्र विद्यमानः सर्व एवाकारस्तेन शब्देनाभिधातव्य इति, किन्तु य आकारोऽभीधीयते तेन सता भवितव्यमित्येतावत् । तद्यथा---तक्षा, युवा, कृष्णः, कामुक इति तक्षादशब्दानामेकार्थपर्यवसितानामपि व्यवस्थित एवाकारो वाच्यः । तथा लिङ्गेष्वपि द्रष्टव्यम् । उक्तं च---
सन्निधाने पदार्थानां किञ्चिदेव प्रवर्तकम् ।
यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा ।। इति ।
उपचीयते कुमारीत्यत्रापि कुमारीशब्दः स्वमहिम्ना कस्यचिद्धर्मस्यापचयमेवाह । शब्दान्तरप्रयोगात्तु धर्मान्तरस्योपचयः प्रतीयते । एवं क्षीयते वृक्ष इत्यत्रापचयः, तदेवं सर्वमनाकुलमिदं दर्शनम् ।
वृत्तिकारस्तु लौकिकानामेवं प्रतिपत्तेरभावात्तत्प्रतिपत्यनुगुणं पक्षं दर्शयति---सामान्यविशेषा इति । कानिचित्सामान्यानीत्यर्थः ।
यद्वा---सत्ताव्यतिरिक्तेषु सामान्येषु सामान्यविशेषशब्दो रूढः । तिस्रोऽवान्तरजातय इत्यर्थः । उक्तं च---
तिस्रो जातय एवैताः केषाञ्चित्समवस्थिताः ।
अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः ।।
हस्तिन्यां वडवायां च स्त्रीत्वबुद्धेः समन्वयः ।
अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीम् ।। इति ।
ननु चैषां त्रयाणामपि सामान्यविशेषाणां सर्वार्थेषु सद्भावोऽभ्युपगन्तव्यः, न गोत्वादिकत्कतिपयेष्वेवार्थेषु, कथमन्यथार्थव्यक्तिवस्त्वादिशब्दानां भिन्निलिङ्गानामेकस्मिन्नर्थे प्रयोगः स्यात् । ततश्च सर्वत्र त्रिलिङ्गपतिभासंप्रसङ्ग इत्यत आह---बहुप्रकाराव्यक्तय इति । व्यज्यन्ते सामान्यविशेषा आभिरिति व्यक्तयः= आश्रयाः । एतदुक्तं भवति---विचित्रत्वादाश्रयाणां व्यञ्जकानां कश्चिदाश्रयः कस्यचित्सामान्यविशेषस्य व्यञ्जकः, न सर्वः सर्वस्येति । तत्र चेतनेषु स्तनादिमती व्यक्तिः स्त्रीत्वस्य व्यञ्जिका, लोमशत्वादिमती पुंस्त्वस्य, उभयव्यञ्जना नपुंसकत्वस्य ; अचेतनेषु कथम्, न हि तत्र किञ्चिदपि लिङ्गं व्यज्यते ? तथा चेतनेऽप्यर्थव्यक्तिवस्त्वादिशब्दानां भिन्निलिङ्गानामप्यनुपपत्तिः, दारशब्दस्य च पुंल्लिङ्गस्य भार्यायामनुपत्तिः ? अत आह---क्वचिदाश्रयविशेषाभावादिति । तदभिव्यञ्जनसमर्थ आश्रयविशेषः । तत्राचेतनेषु सर्वत्रोपदेशादेवाभिव्यक्तिः । उपदेशः पुनर्लिङ्गानुशासनादिषु । अत्रैव दृष्टान्तमाह---यथा ब्राह्मणत्वादय इति । ब्राह्मणक्षत्रियादिव्यक्तीनामत्यन्तसादृश्यादुपदेशादेव ब्राह्मणत्वादीनामभिव्यक्तिर्भवति; नो खलु ब्राह्मणक्षत्रिययोः पुरोऽवस्थितयोरयं ब्राह्मणः, अयं क्षत्रिय इति प्रागेवोपदेशात्प्रत्यय उदेति । यथा गवाश्वव्यक्त्योरभावे शशविषाणादावप्युत्तरपदार्थद्वारकः सामान्ययोगः, सामान्यं जातिः, स्त्रीत्वं स्त्रीता पुंस्त्वं पुंस्तेत्यादौ सामान्वेऽपि सामान्यान्तरस्य सद्भावः, यथा---गोत्वादौ सत्तासामान्यस्य । न ह्यस्माकं वैशेषिकाणामिव निः सामान्यानि सामान्यानि ।

स्त्रीशब्दोऽयं शुक्लादिशब्दवद्गुणमात्रे गुणिनि च वर्तते, तत्र यदा गुणमात्रे स्त्रीशब्दो वर्तते तदा द्रव्यवाचिनः प्रातिपदिकात्स्त्रीत्वेऽभिधेये टाबादयो भवन्तीति स्त्रीत्वं प्रत्ययार्थ इति पक्षो भवति । यदा तु स्त्रीत्वयुक्तं द्रव्यं स्त्रीशब्देनोच्यते तदा परं पक्षद्वयं सम्भवति---स्त्रीत्वमुपलक्षणम्, विशेषणं वेति । तत्राद्ये स्त्रीत्वोपलक्षितद्रव्याचिनः प्रातिपदिकाट्टाबादय इति, अयं स्त्रीसमानाधिकरणादिति पक्षो भवति । द्वितीये तु स्त्रीत्वयुक्तद्रव्यवाचिनोऽङ्गोकृतस्त्रीत्वात्प्रातिपदिकादिति प्रकृत्यर्थविशेषणं स्त्रीत्वमिति पक्षो भवति । तत्र स्त्रीसमानाधिकरणादिति चेद् भूतादिष्वतिप्रसङ्गः---बूतमियं ब्राह्मणी, प्रधानमियं ब्राह्मणी आवपनमियमुष्ट्रिकेति । उभयोस्तु पक्षयोर्नैष दोषः, कथम् ? भूतादयः चैतन्यप्राधान्यसम्भवनवद्वृत्तयः, न तु स्त्रीत्वाङ्गीकारेण वर्तन्ते । तदेवमत्र पक्षे दोषदर्शनादितरयोरन्यतरदाश्रयणीयमित्याह---स्त्रीत्वं चेति । उभयथापि युज्यते इति । ननु प्रत्ययार्थपक्षे द्विवचनबहुवचनानेकप्रत्ययानुपपत्तिः, कथम् ? एकोऽयमर्थः स्त्रीत्वं नाम, तदेव च प्रकृत्यर्थोपसर्जनं प्रत्ययेनाभिधीयते, तस्यैकत्वादेकवचनमेव प्राप्नोति ? अनेकश्च प्रत्ययो नोपपद्यते---गार्ग्यायणी, कारीषगन्ध्या, कालितरेति, कथम् ? एकोऽयमर्थः स्त्रीत्वं नाम तस्यैकेनोक्तत्वाद् द्वितीयः प्रत्ययो न प्राप्नोति---उक्तार्थानामप्रयोग इति ? स्त्रीशब्दे चेकारो न प्राप्नोति, संस्त्याने `स्त्यायतेर्ड्रट्' इति ड्रट्प्रत्ययान्तेन स्त्रीशब्देनोक्तत्वात् संस्त्यानं स्त्रीत्वम् ? सामानाधिकरण्यं च न स्यात्---कुमारी देवदत्तेति, स्वस्वप्रकृत्यर्थावच्छिन्नयोः स्त्रीत्वयोः प्राधान्येनाभिधानात्, तत्र व्यतिरिकिनिबन्धा षष्ठी प्राप्नोति, कुतः ? न तावदन्यऽन्यतः ; परस्परं गुणगुणिभावाभावात्, नापि स्त्रीप्रत्ययप्रकृतेः ; टाबादिभिर्बाधित्वात् ? यत्र तर्हि प्रतियोगिनि स्त्रीप्रत्ययः प्रतिषिध्यते तत्र षष्ठी प्राप्नोति---पञ्च ब्राह्मण्यः, स्वसाभिरूपेति ? पक्षान्तरे तु द्वयोरपि द्रव्यनिष्ठत्वाद्व्यतिरेकाभावः सामानाधिकरण्यं च भवति, द्रव्यस्य चानेकत्वाद् द्विवचनबहुवचने अपि युक्ते । यथैव च प्रातिपदिकेनोक्तेऽपि स्त्रीत्वे टाबादयो भवन्ति, तथानेकोऽपि प्रत्ययो नानुपपन्नः, तद्द्योतको हि तदा नानाप्रत्ययः, प्रदीपादेश्चानेकस्यापि द्योतकत्वं दृष्टम् । प्रत्ययार्थपक्षेऽपि न दोषः । यद्यपि स्त्रीत्वमात्रे वाच्ये प्रत्ययः क्रियते, तथापि स्त्रीत्वतदाश्रययोरभेदविवक्षया स्वाभाविकत्वाद्वा गुणप्रधानभावस्य द्वयोरपि दृष्टत्वेन सामानाधिकरण्यं वचनभेदश्च भविष्यति । गार्ग्यायणीत्यादौ च द्वाभ्यामेव स्त्रीत्वमभिधातुं शक्यते, नैकेन; स्वभावात् । यद्वा---ष्फस्य षित्करणसामर्थ्यान्ङीष् सिद्धः, ष्यङि `यङश्चाप्' इति वचनसामर्थ्याच्चाब् भविष्यति । तथा हि---अत्र यङ्ष्यङोः सामान्यग्रहणाय तदविघाताय च ष्यङोनुबन्धद्वयं कृतम्, कालितरेत्यत्रान्यः प्रकर्षयुक्तोऽन्यश्चाप्रकर्षयुक्तः, तत्रावस्थाभेदादेक एवार्थो भिद्यत इति प्रकर्षयुक्तस्यानभिहितं स्त्रीत्वमिति तदभिधानाय टाबपि भविष्यात । स्त्रीशब्देऽपि `स्त्रियाम्' इत्यस्मादेव निपातनादीकारः सिद्ध इति सुष्ठूक्तम्---उभयथापियुज्यत इति ।।

अजाद्यतष्टाप् ।। 4.1.4 ।।

अदन्ताच्चेति । अकारान्तादित्यर्थः । स्वरूपग्रहणं तु न भवति; अच्छब्दान्तात् नीतत् परीतत् कलिङ्गगदित्यादेः स्त्रीलिङ्गादिति, `तदाद्याचिख्यासायाम्' इत्यादेर्निर्देशात् । पकारः सामान्यग्रहणार्थ इति । `ङ्याप्प्रातिपदिकात्' इत्यादौ । पकारानुरोधस्तु टाब्डापोः स्वर्थः । टकारः सामान्यग्रहणाविघातार्थ इति । अन्यथैकानुबन्धकत्वादस्यैव ग्रहणं स्यात्, न तु डाप्चापोः । खट्वेति । कथं पुनरत्राकारान्ता प्रकृतिरवधार्यते, यावता नित्यमेवायमाबन्तः स्त्रियां वर्तते ? शास्त्रात्प्रयोगाच्च । शाकटायनदर्शने हि सर्वेषामेव व्युत्पत्तिः । पञ्चभिः खट्वाभिः क्रीतः पञ्चखट्व इत्यादौ स्त्रीप्रत्यये लुप्ते प्रयोग एवाकारान्तत्वं दृश्यते । शुभंयाः, कीलालपा इति । `अन्येभ्योऽपि दृश्यन्ते' इति विच् । कः पुनरत्र टापि सति दोष इत्याह---हल्ङ्याब्भ्य इति सुलोपः स्यादिति । क्वचिज्जातिलक्षण इति । गणपाठावसरे विभागं दर्शयिष्यति ।

हलन्तानां त्वित्यादि । अजादिग्रहणमिति । प्रकृतस्य प्रथमान्तस्यान्वयासम्भवात्तदर्थमजादिग्रहणमिति शेषः ।

अमहत्पूर्वेति । महच्छब्दस्यानुकरणत्वाल्लौकिकार्थाभिधायित्वाभावात् `आन्महतः' इत्यात्वं न भवति । पुंयोगे तुङीषेवेति । जातिग्रहणस्य प्रयोजनमाह । ननु पुंयोगे सोऽयमित्यभिसम्बन्धात्परशब्दः परत्र वर्तत इति गौणत्वादेव न भविष्यति ? तस्मात्सुखप्रतिपत्यर्थं जातिग्रहणम् । अमहत्पूर्वेत्यस्याथेमाह---महत्पूर्वस्वेति । अत्रापि जातिरिति सम्बध्यते, इह प्रतिषेधो मा भूत्---महती शूद्रा महाशूद्रेति, न ह्यत्र महत्पूर्वः समुदायो जातिवचनः । क्व तर्हि प्रतिषेधः ? यत्र समुदायो जातौ वर्तते । तदिदं दर्शितम्---महाशूद्रशब्दो ह्याभीरजातिवचन इति । यद्येवम्, समुदाये जातिवचने गौरखरादिवदवयवार्था भावाद्व्युत्पत्तिमात्रं क्रियते, तत्रावयवार्थस्य स्त्रीत्वस्याविवक्षितत्वात् पुंसि समासे कृते टापः प्रसङ्ग इति ? तत्रामहत्पूर्वेति प्रतिषेधः सार्थकः । ततः किम् ? अमहत्पूर्वेत्यत्र जातिरिति न सम्बन्धनीयम् । कथं महती शूद्रा महाशूद्रेत्यत्रान्तरङ्गत्वाट्टापि कृते पश्चात्सुप्, सुबन्तस्य समासः, ततश्चाभिनिर्वृत्तत्वाट्टापः प्रतिषेधस्याप्रसङ्गः ? सत्यम्, विस्पष्टार्थमेवात्रापि जातिरिति सम्बध्यते । ननु च शूद्रशब्दः पठ्यते, कः प्रसङ्गो यन्महाशूद्रशब्दात्स्यात् ? अत आह---तदन्तविधिर्नेति । अतिधीवरी, अतिपीवरीति । दधातेः पिबतेश्च `आतो मनिन्क्वनिब्वनिपश्च' इति क्वनिपि कृते घुमास्थादिसूत्रेणेत्वम्, धीवानमतिक्रान्ता पीवानमतिक्रान्तेति प्रादिसमासः, अत्र `वनो र च' इति ङीब्रौ भवतः । असति तु ज्ञापने वन इति प्रत्ययग्रहणम् । अथापि कृद्ग्रहणम् ? सर्वथातिक्रान्तप्रधाने समासे न स्यात् । अतिभवती, अतिमहतीति । `उगितश्च' इत्यत्रोगिदित्युगित्प्रातिपदिकस्यैवं ग्रहणमित्यङ्गीकृत्येदं प्रयोजनं दर्शितम् । तत्र तु वक्ष्यति---`उगिदिति प्रातिपदिकाप्रातिपदिकग्रहणम्, तेन ग्रहणवता प्रातिपदिकेनेति निषेधाभावात्तदन्तविधिः' इति । यदाह---`उगिद्यस्य सम्भवति यथाकथ्चिदिति तदन्तात्प्रातिपदिंकात्' इति च ।।

अतिमहतीत्यत्र शतृवद्भावादौणादिकादुगिल्लक्षणो ङीप् । केचिद्गौरादिपाठाद् ङीषं वर्णयन्ति, तदयुक्तम् ; अनुपसर्जनाधिकारात् । किञ्च, गौरादिपाठस्य प्रयोजनमपि न पश्यामः । ननु च महतीशब्दोऽन्तोदात्त इष्यते, सत्यम्; `शतुरनुमः' इत्यत्र नद्यजाद्युदात्तत्वे `बृहन्महतोरुपसंख्यानम्' इत्यनेनैव सिद्धम् । विभवत्युदात्तार्थं तदिति चेत् ? तदेव ङीबुदात्तार्थमपि भविष्यति । अतिमहतीत्यादौ च ङीषभावस्योक्तत्वान् ङीबुदात्तार्थमप्युपसंख्यानमेष्टव्यम्, युदि

तदन्तविधिर्ज्ञाप्यते, पञ्चानामजानां समाहारः पञ्चाजी---द्विगोरपि टाप् प्राप्नोति ? अत्राहुः---`अजाद्यतः' इति षष्ठी अजादीनामजन्तानां च या स्त्री तद्वाच्येऽर्थे यत् स्त्रीत्वं समवेतं तत्र टाबिति, प्रत्यासत्या च स्त्रीत्वविशेषोपलक्षणानामेव प्रकृतित्वं विज्ञायते इति मत्वा वृत्तिकारेणोक्तम्---`अजादिभ्यः प्रातिपदिकेभ्योऽदन्ताच्च' इति । न च पञ्चाजीत्यत्राजार्थे समवेतं स्त्रीत्वम्, किं तर्हि ? समाहारे ।

एवं चामहत्पूर्वेति प्रतिषेधः शक्योऽकर्तुम्, न हि महाशूद्रीत्यत्र शूद्रार्थगतं स्त्रीत्वम् । तदन्तविधिस्तु ` अनुपसर्जनात्' इत्यत्र ज्ञापयिष्यते । सत्प्राक्काण्डेति । पाककर्णेत्यत्र वार्त्तिकम्---`सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्प्रतिषेधः' इति, तत्रैव भाष्यम्---`प्राक्पुष्पा च प्रत्यक्पुष्पा च' इति । तस्मादत्रापि प्राक्शब्दो न पठनीयः, सदच्काण्डेत्येव पठनीयम् ।।

ऋन्नेभ्यो ङीप् ।। 4.1.5 ।।

ङकारः सामान्यग्रहणार्थ इति । `ङ्याप्प्रातिपदिकात्' इत्यादौ ।

`पकारः सामान्यग्रहणाविघातार्थः' इति तु पूर्वानुसारेण गम्यमानत्वान्नोक्तम्, अत्रापि पकारानुरोधोऽनुदात्तार्थः ।।

उगितश्च ।। 4.1.6 ।।

यथाकथञ्चिदिति । यदि वर्ण उगित् संभवति, यदि वा प्रत्ययः, अथापि प्रातिपदिकम्---सर्वथा यत्रैषामन्यतमः प्रकारः संभवतीत्येष यथाकथञ्चिदित्यस्यार्थः । एतदेव स्पष्टयति---तदुगिच्छब्दरूपमिति । प्रत्ययाप्रत्यययोः प्रातिपदिकाप्रातिपदिकयोः शब्दरूपमन्यपदार्थः, न प्रातिपदिकमेव, नापि प्रत्यय एवेत्यर्थः । तत्रोगिता प्रातिपदिकस्य विशेषणत्तदन्तविधिर्भवतीत्याह---तदन्तादिति । पचन्तीति । अत्र शतृप्रत्यय उगित् तदन्तं प्रातिपदिकम्---अतिभवती अतिमहतीत्यत्रापि भवति । `ग्रहणवता प्रातिपदिकेन' इत्ययं तु प्रतिषेधो यत्र सूत्रोपात्तं प्रातिपदिकस्यासाधारणं रूपं तत्रैव भवतीत्यत्रापि व्यपदेशिवद्भावेन भवति । `व्यपदेशिवद्भावोऽप्रातिपदिकेन' इत्ययं तु निषेधः प्रातिपदिकस्यैवा साधारणरूपग्रहणे अतिगोमतीत्यत्रापि भवति । प्रत्ययग्रहणपरिभाषा तु प्रत्ययस्यैवासाधारणरूपग्रहणे भवति ।

धातोस्तूगितः प्रतिषेध इति । वक्तव्य इति शेषः । स तर्हि वक्तव्यः ? न वक्तव्यः, `उगिदचाम्' इत्यत्रोगित्त्वादेव सिद्धेऽञ्चतिग्रहणं नियमार्थम्---इह शास्त्रे उगितो यत्कार्यं विधीयते तद्धातोर्यदि भवति अञ्चतेरेवेति कार्यमात्रं नियम्यते, न नुमागम एव । अधातुग्रहणं चाधातुपूर्वस्यापि नुमर्थमिति तत्रैव वक्ष्यते । अपर आह---`उगितश्च' इति योऽयं चशब्दः सोऽञ्चतेर्लुप्तनकारस्याकरणम्, विभक्तेश्च `सुपां सुलुक्' इति लुक्, भाविनं चाकारलोपमाश्रित्य चेति निर्देशः कृतः, ततश्चाञ्चतिग्रहणं नियमार्थम्---"अकारनकारलोपयोश्चातन्त्रत्वात् `नाञ्चेः पूजायाम्' इति लोपनिषेधविषयेऽपि ङीब् भवति, प्राञ्ची प्रत्यञ्ची ब्राह्मणी" इति । उखास्रत्, पर्णध्वदिति । `क्विप् च' इत्यत्रानयोर्व्युत्पत्तिः कृता ।।

वनो र च ।। 4.1.7 ।।

`वनः' इति क्वनिब्वनिब्ङ्वनिपां प्रत्ययानां सामान्येन ग्रहणम्, न `वन षण संभक्तौ', `वनु याचेन' इति धात्वोर्विजन्तयोः, कुतः ? `प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्' इति । अत एव शुनो निष्क्रान्ता युवानमतिक्रान्ता निः शुनी अतियूनीत्यत्रापि न भवति, अनर्थकत्वाद्वा । शर्वरीति । `शृ हिंसायाम्', `अन्येभ्योऽपि दृश्यन्ते' इति वनिप् । परलोकदृश्वरीति । `दृशेः क्वनिप्' ।

वनो न हश इति । विहितविशेषणं हश्ग्रहणम्, हशन्ताद्धातोर्यो वन्विहितस्तदन्तात्प्रातिपदिकान् ङीब्रौ न भवत इत्यर्थः, तेन शर्वरीत्यत्र प्रतिषेधाभावः । तथा `ओणृ अपनयेन' वनिपि `विड्वनोरनुनासिकस्यात्' इत्यात्त्वे अवादेशेअवावन्नित्यत्र संप्रति हशः । परत्वाभावेऽपि हशन्ताद्विहितत्वात् प्रतिषेधो भवत्येव---अवावा ब्राह्मणीति । तष एव स्थितः सिद्धान्तः ।

बहुलं छन्दसि ङीब्रौ वक्तव्यौ---यज्वरीरिषः । प्रईरिशवोस्तुट् च---प्रेर्त्वरी ।।

पादोऽन्यतरस्याम् ।। 4.1.8 ।।

पाद इति कृतसमासान्तः पादशब्दो निर्दिश्यत इति । उत्तरसूत्रे ऋच्यभिधेयायां तस्यैव सम्भवात्, तेन पादयते क्विबन्तस्य ग्रहणं न भवति । द्विपदीति । द्वौ पादावस्य इति `बहुव्रीहौ संख्यासुपूर्वस्य' इत्यकारलोपे `पादः पत्' इति पद्भावः ।।

टाबृचि ।। 4.1.9 ।।

ऋचीत्यभिधेयनिर्देश इति । व्याप्तेः । विषयनिर्देशे हि ऋग्वेदविषय एव प्रयोगे स्यात्, नान्यत्र ।।

न षट्स्वस्रादिभ्यः ।। 4.1.10 ।।

`टाबृचि' इति पादन्ताद्विहितस्य टापोऽत्राप्रसङ्गात्तदनन्तरस्य ङीपोऽयं प्रतिषेध इत्याशङ्कामपनयति---यो यत इति । तत्र सर्वेभ्य एव ङीप्प्राप्नोति, टाप्तु नलोपे सत्यकारान्ततायामुपजातायां षड्भ्य एव । यो यः प्राप्त इति तु युक्तः पाठः, अन्यथा स ततो न भवतीति वाच्यं स्यात्, व्याप्तिश्च न गम्येत । पञ्च ब्राह्मण्य इति । ननु चात्र ब्राह्मणीशब्दसामानाधिकरण्यात् स्त्रीत्वावगतिः, संख्याशब्दस्तु स्वमहिम्ना भेदगणनमाह । तथा हि---पञ्चेत्युक्ते नानात्वमात्रं द्रव्यस्य गम्यते, न लिङ्गविशेषः ; तथा च लिङ्गानुशासनेषु `ष्णान्ता संख्या' इत्यलिङ्गत्वमुक्तम् । यद्येवम्, एका, द्वे, बह्व्य इत्यत्रापि प्रत्ययो न स्यात् ? संख्याशब्दत्वेन भेदगणनामात्रस्य शब्दार्थत्वात् । अथ तत्र स्त्रीत्वमपि शब्दार्थः ? पञ्चादिष्वपि स्यात् । वक्तव्यो वा विशेषः---सति तस्मिन् प्रतिषेधे नान्तरेणानुप्रयोगं पञ्चेत्यादौ स्त्रीत्वाद्यभिव्यक्तिरिति लिङ्गानुशासनेष्वलिङ्गत्वमुक्तम् ; असति तु प्रतिषेधे पञ्चादिभ्यः स्त्रीप्रत्ययो न भवति, एकादिभ्यस्तु भवतीति न शास्त्रैकशरणः प्रतिपत्तुमर्हति । ननु विभक्तौ परतः `त्रिचतुरोः स्त्रियाम्' तिसृचतसृभावः, तत्रं संनिपातपरिभाषयैव ङीबभावः सिद्धः, तत्किं

तिसृचतसृशब्दयोः स्वस्रादिपाठेन ? ज्ञापनार्थ तु । एतज्ज्ञापयति---अनित्या संनिपातपरिभाषेति, तेन त्यदाद्यत्वे कृते टाब् भवति---या, सा, इमे, द्वे इति । ङीपोऽनन्तरस्यायं प्रतिषेधो युक्त इत्याश्रित्य चोदयति---षट्संज्ञानामिति । कस्मान्न स्यादिति । अत इति हि प्राप्नोति, असिद्धो नलोपः, तस्यासिद्धत्वान्नैतददन्तम् । परिगणितेषु कार्येषु नलोपोऽसिद्धो भवति, `नलोपः सुप्स्वर' इत्यस्य नियमार्थत्वात् । नेदं तत्र परिगण्यते ? इदमपि तत्र पिगण्यते, कथम् ? सुबिति न सप्तमीबहुवचनेन प्रत्याहारः, किं तर्हि ? यङ्श्चाबिति चापः पकारेण, ततश्च टापोऽपि प्रत्याहारेऽन्तर्भावात्तद्विधिरपि सुब्विधिरेवेति । तदेतदाह---प्रत्याहाराच्चापेति । न स्यादित्यनुषङ्गः, कस्मान्न स्यादिति प्रश्नः । चापा प्रत्याहारान्न स्यादिति परिहारः । इदं चाचार्यदेशीयस्य वचनम् ।

आचार्यसिद्धान्तं दर्शयितुमेतद् दूषयति---सिद्धं दोषस्त्वित्त्व इति । सत्यं सिद्धमिदं चापा प्रत्याहारे, इत्त्वे तु दोषो भवति---सिद्धं दोषस्त्वित्त्व इति । सत्यं सिद्धमिदं चापा प्रत्याहारे, इत्त्वे तु दोषो भवति---बहूनि चर्माण्यस्याः बहुचर्मिकेति, कथम् ? तत्र सुब्विधिरित सर्वविभक्यन्तावयवः समास आश्रितः---सुपो विधिः, सुपि विधिरिति; ततश्च यथा राजभ्यामित्यत्र `सुपि च' इति दीर्घत्वं न भवति, तथा टापि सुपि विधीयमानमित्त्वमपि सुब्विधिरिति तत्र वर्तव्ये नलोपस्यासिद्धत्वात्कात् पूर्वोऽकारो न भवतीतीत्वं न स्यादित्यर्थः । सिद्धान्तमाह---तस्मान्नोभाविति । `स्त्रियाम्' इत्यर्थमात्रमपेक्ष्य तत्र यदुक्तं तन्न भवति, इत्येवं ङीप्टापावुभावपि प्रतिषेध्यावित्यर्थः । ननु च सकृत्प्रतिषेधस्य प्रवृत्तिः, स च स्वप्रवृत्तिसमये यस्य प्रसङ्गस्तमेव प्रतिषेधति, ततश्च पूर्वं ङीपि प्रतिषिद्धे नलोपे च कृते पश्चात्प्राप्नुवतष्टापः कथं प्रतिषेधः ? आत्माश्रयो हि स्यात्---स्वप्रवृत्तिमपेक्ष्य स्वप्रवृत्तिरिति । तस्मात्तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणेन द्विरस्य प्रवृत्तिः, तत्र द्वितीयया प्रवृत्त्या टापः प्रतिषेधः ।।

मनः ।। 4.1.11 ।।

अनिनस्मन्ग्रहणानीति । अन्, इन्, अस्, मन्---इत्येतेषां ग्रहणे अर्थवत्परिभाषा न व्याप्रियते, तेनैषामनर्थकानामपि ग्रहणं भवति । एभिश्चार्थवद्भिरनर्थकैश्च तदन्तविधिर्भवतीत्यर्थः । सीमन्शब्दोऽव्युत्पन्नं प्रातिपदिकम् । अतिक्रान्ता महिमानमतिमहिमा, अत्रापीमनिच एवार्थवत्त्वम्, न तु मनः ।।

अनो बहुव्रीहेः ।। 4.1.12 ।।

ञनुपधालोपी बहुव्रीहिरिहोदाहरणमिति । कुत एतत् ? इत्याह---उपघालोपिनो हीत्यादि, विभाषां वक्ष्यतीति । `अन उपधालोपिनोऽन्यतरस्याम्' इत्यनेन । सुपर्वेत्यादि । शोभनं पर्वास्याः, शोभनं चर्मास्या इति बहुव्रीहिः । अयं च `न संयोगाद्वमन्तात्' इत्यल्लोपस्य प्रतिषेधातनुपधालोपी । बहुव्रीहेरिति किमिति । समासादिति वाच्यमिति भावः ।

अतिराज्ञीति । `राजाहः सखिभ्यः' इति ट्ज् न भवति; समासान्तविधेरनित्यत्वात् ।

डाबुभाभ्यामन्यतरस्याम् ।। 4.1.13 ।।

अन्तरस्यांग्रहणं किमिति । डापा मुक्ते प्रतिषेधो यथा स्यादित्येवमर्थं तावदेतन्न कर्तव्यम्, कथम् ? डाबुप्युच्यते, प्रतिषेधोऽपि तावुभौ वचनाद्भविष्यतः । यदि हि नकारान्तस्य श्रवणं न स्यात्, तदा डापैवापवादेन ङीपो बाधात् प्रतिषेधोऽनर्थकः स्यात् । अथ डाप्प्रतिषेधाभ्यां मुक्ते ङीबपि यथा स्यादित्येवमर्थमन्यतरस्यांग्रहणम् ? तदपि न; बहुराज्ञीत्यादौ `अन उपधालोपिनोऽन्यतरस्याम्' इत्यनेनैव ङीपः सिद्धत्वात् । यत्र तर्हि तेन न सिद्ध्यति---अतिशर्मेत्यादौ, तदर्थमेतत्स्यात् ? यद्येवम्, अनेनैवोपधालोपिनोऽपि सिद्धत्वाद् `अन उपधालोपिनः' इत्येतदनर्थकं स्यात् । एवं तर्हि तदन्यतरस्यां ग्रहणं न करिष्यामीतिदमन्यतरस्यांग्रहणं क्रियते, कथम् ? अनेनैवान्यतरस्यांग्रहणेनोपधालोपिनोऽनुपधालोपिनश्च ङीपि प्रापिते सति `अन उपधालोपिनः' इत्येतावदपि क्रियमाणं नियमार्थं भविष्यति---अनो बहुव्रीहेर्यन् ङीब्विधानं तदुपधालोपिन एवेति, ततश्च तदन्यतरस्यांग्रहणं न कर्त्तव्यं भवति ? तदवश्यं कर्तव्यम्, असति हि तस्मिन्ननेनान्यतरस्यांग्रहणेन बहुव्रीहिमात्राद् डाप्प्रतिषेधङीप्सु त्रिष्वपि प्राप्तेषूपधालोपिनो डाप्प्रतिषेधौ बाधित्वा नित्यं ङीबेव यथा स्यादित्येवमर्थं तत्स्यात् । अतस्तदवश्यं कर्तव्यम्, इदं तु न कर्तव्यमिति प्रश्नः ।

परिहरति---बहुव्रीहाविति । अयमभिप्रायः---डाप्प्रतिषेधाभ्या मुक्ते ङीबपि यथा स्यादित्येवमर्थमिदं तावदन्यतरस्याग्रहणम् । न च `अन उपधालोपिनः' इत्यस्य वैयर्थ्यम् ; नियमार्थत्वात्---अनो बहुव्रीहेर्यदन्यतरस्यां ङीब्विधानं तदुपधालोपिन एवेति । तेन सुपर्वा, सुशर्मेत्यादावनेनान्यतरस्यांग्रहणेन प्रापितो ङीब् न भवति, बहुराज्ञीत्यादावेव तु भवति । नन्वेवमिदमन्यतरस्यांग्रहणं मा भूत्, `अन उपधालोपिनः' इत्येतदेव विध्यर्थमस्तु, को वा विशेषः ? अनेनान्यतरस्यांग्रहणेन बहुव्रीहिमात्रान् ङीपि प्रापिते तन्नियमार्थं स्याद्, असति वास्मिन् डाप्रतिषेधयोरेव प्राप्तयोरुपधालोपिनोऽप्राप्तो ङीप् पक्षे विधीयते इति ? अयमस्ति विशेषः---अस्मिन्नन्यतरस्यांग्रहणे सति डाप्प्रतिषेधाभ्यां मुक्ते स्वेन स्वेन सास्त्रेण ङीब् भवन् वन्नन्तेषु `वनो र च' इत्यनेनैव भवतीति बहुधीवरीत्यादौ रेफोऽपि भवति । एवमनेन वन्नन्तादुपधालोपिनोऽनुपदालोपिनश्च बहुव्रीहेर्बहुधीवन्सुपर्वन्नित्यादेर्ङीब्रेफयोः प्रापितयोरन्यत्र बहुराजन्सुशर्मन्नित्यादौ केवले ङीपि प्रापिते सति`अन उपधालोपिनोऽन्यतरस्याम्' इत्येतन्नियमार्थं भवति, तेन च नियमेन सुशर्मेत्यादौ ङीब् व्यावर्त्यते । सुपर्वेत्यादौ ङीपि व्यावर्त्तिते तत्सन्नियोगशिष्टत्वाद्रेफोऽपि न भवति । बहुराज्ञीत्यादौ तु यथाप्राप्तो ङीबवस्थितः, बहुधीवरीत्यादौ च `वनो र च' इत्यनेन प्राप्तौ ङीब्रेफाववस्थिताविति सर्वमिष्टं सिध्यति । असति त्वस्मिन्, तस्मिंश्च विध्यर्थेऽपूर्व एव ङीप् तेन विधीयत इति वन्नन्ते बहुव्रीहौ `ऋन्नेभ्यो ङीप्' इत्येतत्सन्नियुक्तं `वनो र च' इत्येतन्न प्रवर्तेतेति केवले ङीपि सति बहुधीव्नीति स्यात् । अतः `अन उपधालोपिनः' इत्यतन्नियमार्थं यथा स्यात्स्वतन्त्रो विधिर्मा भूदित्येवमर्थमिहान्यतरस्यांग्रहणं क्रियत इति । तदिदम् `अन उपधालोपिनः' इत्यत्र वृत्तिकारः स्पष्टयिष्यति । यद्यनेनान्यतरस्यांग्रहणेन पक्षे ङीबपि प्राप्यते दामेत्यादौ मन्नन्तादपि प्राप्नोति ? नैष दोषः; योगविभागः क्रियते---डाबुभाभ्यां भवति, ततः `अन्यतरस्याम्;' `अनो बरुव्रीहेः' इत्येव वर्त्ते, `मनः'

इति निवृत्तम् ।।

अनुपसर्जनात् ।। 4.1.14 ।।

प्रसज्यप्रतिषेधोऽयमित्याह---उत्तरसूत्रेषूपसर्जनप्रतिषेधं करोतीति । पर्युदासे को दोषः ? कुक्कुटीपाद इत्यत्र न स्यात् पूर्वपदस्योपसर्जनत्वात्, न; अन्तरङ्गत्वात्प्रागेव ङीषि कृते तदन्तस्य समासः । न चेदानीमुपसर्जनत्वे ङीषः पर्युदासः, पूर्वमेवाभिनिर्वृत्तत्वात् । किञ्च प्रसज्यप्रतिषेधेऽप्येष दोषः समानः । कुक्कुटीत्यत्रैव तर्हि न प्राप्नोति, किं कारणम् ? अन्वर्थमुपसर्जनम्, अप्रधानमुपसर्जनमिति ? अस्त्वेवम् ; अनुपसर्जनं तूपसर्जनादन्यत्सर्वम्, न तु प्रधानमेव, तेनापेक्षणीयस्याभावेऽप्यप्रधानादन्यत्वाद्भविष्यति । यदा तर्ह्यधर्मानृतादिवद्विरोधिवचनोऽनुपसर्जशब्दस्तदा न प्राप्नोति, तस्मात्प्रसज्यप्रतिषेधः । अनुपसर्जनादित्येवं तदिति । उपसर्जनान्न भवतीत्येवमित्यर्थः । वक्ष्यति---टिड्ढाणञिति ङीबिति । कथं प्रथमान्तस्य वक्ष्यतीत्यनेन सम्बन्धः ? अत्राहुः---वक्ष्यति टिड्ढाणञित्येतावान् ग्रन्थः । टिड्ढाणञिति वक्ष्यतीत्यर्थः । कः पुनरत्र प्रत्यय इत्यत्राह---ङीबिति । एवं जातेरिति ङीष् इत्यत्रापि ग्रन्थच्छेदः, तत्र च पूर्वस्मिन् `वक्ष्यति' इत्यनुषङ्गः . कुरुचरीति । `चरेष्टः' बहुकुरुचरेति । बहुव्रीहिः सर्वोपसर्जनः ।

कथं पुनरित्यादिः । प्रत्युदाहरणे यदुपसर्जनं न तत् स्त्रियां वर्त्तते, यदा च स्त्रियां वर्तते तदा भवत्येव प्रत्ययः---बह्व्यः कुरुचर्योऽस्यां बहुकुरुचरीका, बहुकुक्कुटीका मदुरेति, यः स्त्रियां वर्तते बहुव्रीहिस्ततोऽटित्त्वादजातित्वाच्चाप्रसङ्गः । तथा हि---टित्प्रातिपदिकं गृह्यते, तच्च किञ्चित्साक्षाट्टिद्भवति, यथा---नदट्, चोरडिति; किञ्चित्त्ववयवटित्त्वद्वारेण । यत्र ह्यवयवटित्त्वमकिञ्चित्करं तत्र समुदायार्थं तद्विज्ञायते । स चावयवः क्वचिद्धातुः---स्तनन्धयीति, क्वचित्कृल्ल्युडादिः, क्वचित्तद्धितष्ट्युट्युलादिः । तत्र यं समुदायं योऽवयवो न व्यभिचरति तदर्थं तस्य टित्त्वमिति कुरुचरशब्द एव टित्, तत्कुतो बहुकुरुचरशब्दात्प्रसङ्ग इति प्रश्नः । परिहरति---तदन्तविधिनेति । ननु ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते, ग्रहणं चोपादानमात्रम्, न तु स्वरूपेणोच्चारणमेव, तत्कथं तदन्तविधिः ? स्यादेतत्--यत्र गृह्यमाणं रूपं प्रातिपदिकस्यैवासाधारणं तत्र तदन्तविधिप्रतिषेधः, इह चोरडित्यादि प्रातिपदिकमपि टित्, ल्युडादिप्रत्ययोऽपि, धेडिति धातुरपि, ततश्च यथा `उगितश्च' इत्यत्र वर्णोऽप्युगित्प्रत्ययोऽपि प्रातिपदिकमपीति तदन्तविधिर्भवति, तथेहापि प्रसङ्ग इति ? स्यादयं प्रसङ्गो यदि टिता प्रातिपदिकं विशिष्येत, टिति च प्रातिपदिकेन विशेष्यमाणे नानेन विशेष्येण तदन्तविधिः, प्रातिपदिकेन चासम्भवादिति नैव बहुकुरुचरशब्दात्प्रसङ्ग इत्यत आह---ज्ञापितं चैतदिति । `शूद्रा चामहत्पूर्वा' इत्यत्र ज्ञापितमेतत् । अवश्यञ्चैतज् ज्ञापितमुत्तरत्रापि परिपालनीयमित्याह---तथा चेति । अनाश्रीयमाणे ज्ञापकेऽणन्ताद्विधीयमानो ङीप् प्रत्ययग्रहणपरिभाषया कारशब्दादेव स्याद्, न त्वणन्तात्कुम्भकारशब्दात् । ज्ञापकात्तु ततोऽपि भवतीत्यर्थः ।

ननु च कृद्ग्रहणपरिभाषया कुम्भकारशब्दस्याणन्तत्वम् ? नेत्याह---न चाणिति । कृद्ग्रहणमिति । किं कारणमित्यत्राह---तद्धितोऽप्यणस्तीति । यत्र तु गृह्यमाणं रूपं कृत एवासाधारणं तत्रैषा परिभाषा । इह त्वौपगवीति तद्धितस्यापि ग्रहणमिति नायमस्या विषय इत्यर्थः । अथ कारशब्दादुत्पत्तौ सत्यां को दोषः ? कौम्भकारेयो न सिध्यति, प्रत्ययग्रहणपरिभाषया कारीशब्दात्स्त्रीभ्यो ढकि तस्यैव वृद्धिस्वरौ स्याताम् । ष्यङः सम्प्रसारणवद्भविष्यति, तद्यथा---ष्यङन्तस्योच्यमानं सम्प्रसारणं परमकारीषगन्धीपुत्र इत्यत्रापि भवति, स्त्रीप्रत्यये तदादिनियमाभावात्; तथा कारशब्दादप्युत्पत्तौ कुम्भकारीशब्दस्यापि स्त्रीप्रत्ययान्तत्वाद्भविष्यति, एवमपि कारीशब्दादपि कदाचित्स्यात् ।

अथ ब्रूयाः---कारीशब्देन कुम्भशब्दः समसिष्यते, `स्त्रीभ्यो ढक्' इत्यत्र च `ङ्याप्प्रातिपदिकात्' इति त्रितयाधिकारसामर्थ्यात्स्त्रीप्रत्ययान्तात्प्रातिपदिकादिति प्रत्ययो विधास्यते, स्त्रीप्रत्ययान्तस्य च प्रातिपदिकत्वं समाससमन्तरेणानुपपन्नमिति कुम्भकारीशब्दादेव ढगुत्पत्स्यते, ढ्याब्ग्रहणामुवृत्त्या च सौपर्णेय इत्यत्रापि भविष्यतीति ? एवमपिङ्याबनुवृत्तेः सौपर्णेय इतिवत् कारीशब्दादपि स्यात् । `गतिकारकोपदानाम्' इतिवचनाच्चङ्यन्ते समासो दुर्लभः, ततः कुम्भकारशब्दादेवङीब्यथा स्यादित्युत्तरत्रापि तदन्तविधिरभ्युपगन्तव्यः । न च कुम्भकारशब्दादप्युत्पत्तौ तदादिनियमाभावात्कारीशब्दादपि ढक्प्रत्ययप्रसङ्गः, किं कारणम् ? `स्त्रीप्रत्यये चानुपसर्जने न' इत्यनेन, प्रत्यग्रहणे यस्मात्स तदादेरधिकस्य ग्रहणमभ्यनुज्ञायते, न न्यूनस्यापि । ननु च सत्यप्युत्तरत्र तदन्तविधौ कुम्भकारीत्यत्र समुदायादपि भवतु, केवलात्कारशब्दादपि प्रसङ्गः, यथा---औपगवीत्यादौ, ततश्च कौम्भकारेयः पक्षे दुष्यत्येव ? एवं तर्हि कारशब्दादप्युत्पत्तौ कुम्भेनैकार्थीभूतस्य तावतो निष्कृष्यापत्येनायोगात्तदादिनियमाभावाच्च समुदायादेव ढ्गभविष्यति ।

यद्वा---कुम्भेनैकार्थीभूतस्य कारस्य स्त्रीत्वेनायोगात्स्त्रीप्रत्यय एव न भविष्यति, असति पुनरुत्तरत्र तदन्तविधौ स्त्रीप्रत्ययस्यात्राप्रसङ्गः, किं कारणम् ? यदणन्तं न तस्य निष्कृष्य स्त्रीत्वेन योगः, यस्य च स्त्रीत्वेन योगो न तदणन्तम्, अत उत्तरत्राप्यवश्यं प्रधानेन तदन्तविधिरभ्युपगन्तव्यः, तत्र यथा प्रधानेन भवति तथोपसर्जनेनापि स्यादिति प्रतिषेधोऽयमारभ्यते । तथा च पूर्वत्रोपसर्जनेनापि तदन्तविधिर्भवति, `न षट्स्वस्रादिभ्यः'----प्रियपञ्चा द्रौपदीति, अतिक्रान्ता भवन्तमतिभवतीति । स्यादेतत्---पूर्वत्रोपात्तं तदन्तं वा `स्त्रियाम्' इत्यनेन विशेष्यते, `टिड्ढाणञ्' इत्यादिषूपात्तेमेव टिदादिकम्, तेन ज्ञापितेऽपि तदन्तविधौ बहुकुरुचरेत्यादौ टिदादेरस्त्रीत्वान्न भविष्यति, कुम्भकारीत्यत्र त्वणन्तस्य स्त्रियां वृत्तेस्तदन्तादपि भविष्यति, नार्थ एतेनेति ? तन्न; त्वदुक्तस्य विषयविभागस्य दुर्ज्ञानत्वात्, अतो विषयविभागज्ञापनार्थमदमारभ्यते ।

नन्वारब्धेऽप्यस्मिन्नैष विषयविभागः शक्य आस्थातुम्, पञ्चाजीत्यत्राजानामस्त्रीत्वेन तदन्तस्य स्त्रियां वृत्तेः `अजाद्यतष्टाप्' इति टाप्प्रसङ्गात् । अतो विशेषणविशे,यभावं प्रति कामचारात् `अजाद्यतष्टप्' इत्यत्र `टिड्ढाणञ्' इत्यादौ चोपात्तं स्त्रीत्वेन विशेष्यते, `वनो र च' इत्यादावुपात्तं तदन्तस्य चेति नार्थ एतेन ? एवं तर्हि तदन्तविधिज्ञापनार्थमिदमारभ्यते । अमहपूर्वेत्येतत्तु शक्यमकर्तुम्, न हि महाशूद्रेत्यत्र समुदाये जातिवचने शूद्रशब्दः स्त्रियां वर्त्तते । अपर आह---लौकिकस्याप्रधानस्योपसर्जनस्येह ग्रहणम्, तेनापिशिलिना प्रोक्तम्, `इञश्च' इत्यण्, ततोऽध्येत्र्याम् `तदधीते' इत्यण्, तस्य `प्रोक्ताल्लुक्' इति

लुक् आपिशिला ब्राह्मणी, अत्र `इञश्च' इति विहितस्य प्रोक्तप्रत्ययस्याणोऽप्रधानत्वात्तदन्तान्ङीब् न भवति । नन्विदानीमध्येतृप्रत्यये लुप्ते प्रकृतिरेव तदर्थमाहेति प्रधानस्त्रियामध्येत्र्यामणन्तस्य वृत्तेः स्यादेव ङीप् प्रत्ययः ? स्यादेतदेवम्, यद्यणन्तादनुपसर्जनादित्युच्येत । वयं त्वणमेवानुपर्सजनत्वेन विशेषयिष्यामः---अम्योऽनुपर्जन इति, अर्थद्वारकं चाणः प्राधान्यम्, अप्राधान्यं च । तदेतदुक्तं भवति---यस्मिन्नर्थेऽणुत्पन्नः स यदा प्राधान्येनोच्यते तदा तदन्तान्ङीब् भवति; यदा तु गुणभावेने, तदा नेति । इह चाध्येत्र्यां सङ्क्रान्तत्वात्प्रथमस्याणोऽर्थो गुणभूत इति तदाश्रयस्तावन्ङीब् न भवति । यस्त्वध्येत्र्यामुत्पन्नस्तदाश्रयोऽपि न भवति; तस्य लुप्तत्वात् । प्रत्ययलक्षणेनापि न भवति, अणआकारस्य विशेषणात् । `टिड्ढाणञ्' इत्यत्र ह्यत इति वर्तते । तत्राणन्तादकारान्तादिति । विज्ञायमाने स्यात् प्रत्ययलक्षणम्, अणा त्वकारे विशेष्यमाणे वर्णनिमित्तो ङीप्रत्ययः कथं प्रत्ययलक्षणेन स्यात् ! ननु स्त्रियामित्यनुवृत्तेनाणं विशेषयिष्यामः---योऽण् स्त्रियां विहित इति ? एवमपि काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी, तामधीते काशकृत्स्ना ब्राह्मणीति द्वितीयेऽणि `प्रोक्ताल्लुक्' इति लुप्तेऽपि प्रथमोऽप्यण्स्त्रियामेवोत्पन्नः,तदन्ताद् ब्राह्मण्यां वतमानान्ङीप्रसङ्गः । तस्मात्प्रधानाद्यथा स्यादप्रधानान्मा भूदित्येतत्प्रयोजनं सूत्रस्येति ।।

टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्ख्युनाम् ।। 4.1.15 ।।

इह कस्मादिति । लडादेशस्य स्थानिद्भावेन टित्त्वमस्तीति प्रश्नः । पवामाना, यजमानेति । ननु शानन्नादिषु लट इत्यस्य निवृत्तत्वाद् अनादेशपक्षः स्थापितः, पवमानेत्यादिषु शानजुदाहर्तव्यः । द्व्यनुबन्धकत्वाल्लट इति । लडादिष्वकारादयोऽप्यनुबन्धा इति भावः । एतेन लिड्लृटौ व्याख्यातौ---अनूचाना, यक्ष्यमाणेति ।

ल्युडादिषु कथमिति । द्व्यनुबन्धकत्वात्तेषामपि ग्रहणे न भाव्यमिति प्रश्नः । टित्करणसामर्थ्यादिति । न च लडादिष्वपि टित्करणसामर्थ्यमित्याह---इतरत्रेति । पठिता विद्येति । कथमित्यनुषङ्गः । इटष्टित्त्वमुभयार्थं स्यादिति प्रश्नः । आगमटित्त्वमनिमित्तमिति । आगमानां टित्त्वं ङीपो निमित्तं न भवतीत्यर्थः । कुत इत्यत आह---ट्युट्युलौ तुट् चेति लिङ्गादिति । यद्यागमटित्त्वं ङीपो निमित्तं स्यात्ततः सायन्तनीत्यादौ तुट आगमस्य टित्त्वान्ङीप् सिद्ध इति ट्युट्युलोष्टित्करणमनर्थकं स्यादिति भावः । ननु च `पुराणप्रोक्तेषु' इति निर्देशेन यदा तुड् न भवति तदा ङीबर्थं तयोष्टित्त्वं स्यात् ? तन्न; पुराणशब्दाद्बह्वादिषु पाठान्ङीषा भवितव्यम्, अन्तोदात्तो हि पुराणीशब्दः---पुनः पुनर्जायमाना पुराणीति यथा । एवमपि न ज्ञापकम्, `बह्वादिभ्यश्च' इत्यत्र वेति वर्तते, ततश्च ङीषा मुक्ते ङीब् यथा स्यादिति ट्युट्युलोष्टित्त्वं स्यादिति चिन्त्यमेतत् ।

सौपर्णेयीति । सुपर्णशब्दात्पाककर्णादिङीषन्तात्स्त्रीभ्यो ढक् । ननु च सानुबन्धकत्वादस्य ग्रहणेन भवितव्यमत आह---निर नुबन्धक इति । यद्यपि `शिलायाढः' इति निरनुबन्धको ढशब्दोऽस्ति, स इह स्वभावान्नपुंसकलिङ्ग इति स्त्रियां नास्तीत्युक्तम् । योऽपि `सभाया यः', `ढश्छन्दसि' इति ढः, सोऽपि स्त्रियां न वर्तते, कथम् ? तत्र `तत्र साधुः' इति वर्तते, कथं च स्त्री नाम सभायां साध्वी स्याद्यज्ञसभायां हि विदुषामधिकारः ! ननु मा नाम भूद्यज्ञसभायां साध्वी, शालायां स्त्रीसभे च साध्वी भविष्यति, तत्र यज्ञसभायां साध्वी ब्राह्मणपरिषदित्यत्रापि प्रसङ्गः ? एवं तर्ह्येवंविधे विषये छन्दसि सभेयीशब्दस्य प्रयोगाभावोऽत्र हेतुः ।

णेऽपि क्वचिदण्कृतं कार्यं भवतीति । शीलम् `छत्त्रादिभ्यो णः' इति यो णस्तत्राण्कृतं कार्यं भवतीति । कथम् ? ज्ञापकात्, यदंयम् `कार्मस्ताच्छील्ये' इति टिलोपार्थं निपातनं करोति । यदि हि ताच्छीलिके णेऽण्कृतं कार्यं न स्यान्निपातनमनर्थकं न स्यात्, कर्मशब्दाच्छत्त्रादिलक्षणे णे कृते `नस्तद्धिते' इत्येव टिलोपस्य सिद्धत्वात् । न च `अन्' इति प्रकृतिभावः, अणि हि स प्रकृतिभावः । चौरी, तापसीति । चुरातपः शब्दौ छत्त्रादिषु पठितव्यौ । क्वचिदित्यस्य व्यावर्त्त्यं दर्शयति---दाण्डा, मौष्टेति । द्रण्डमुष्टिशब्दाभ्यां `तदस्यां प्रहरणम्' इति णः ।

औत्सी, औदपानीति । उत्सोदपानशब्दाभ्यां भवार्थे `उत्सादिभ्योऽञ्' । अथ साङ्गर्रवादिसूत्रे पुनरञ्ग्रहणं किमर्थम्, यावताऽनेनैव सिद्धम्, न रूपभेदो न स्वरभेदः ? तत्राह---शाङ्गर्रवाद्यञ इत्यादि । बिदस्यापत्यं बैदी, `अनुष्यानन्तर्ये बिदादिभ्योऽञ्' गोत्रं च चरणैः सह' इति जातिः, तत्रौत्सीत्यादौ चरितार्थमिमं ङीपं बाधित्वा जातिलक्षणो ङीष् प्राप्नोति । यदि तर्हि तस्य निबन्धनमस्ति तदेवाञ्ग्रहणमस्तु, किमत्राञ्ग्रहणेन ? न वा जात्यधिकारात्, `जातेः' इति हि तत्र वर्तते, अनधिकारे हि पुंयोगादाख्यायां ङीप्रसङ्गः---बैदस्य स्त्री बैदी ।

उरुद्वयसीत्यादौ `प्रमाणे द्वयसच्दघ्नञ्मात्रचः' ।

पञ्चतयीति । `सख्याया अवयवे तयप्' । द्वयसजादिषु अनुबन्धोच्चारणं प्रातिपदिकानां ग्रहणं मा भूत्---किमस्य द्वयसम्, किसमस्य मात्रमिति । तयशब्दोऽपि तयतेः पचाद्यजन्तः सम्भवति ।

ठनादिनिवृत्त्यर्थमिति । दण्डोऽस्या अस्ति `अत इनिठनौ' इण्डिका, `काश्यादिभ्यष्ठ
ञ्ञिठौ' काशिकेत्यादौ मा भूदित्येवमर्थम् ।

तादृशीति । `त्यदादिषु दृशोऽनालोचने कञ्च', `आ सर्वनाम्नः' । कञो ञकारोच्चारणम् `आतोऽनुपसर्गे कः' गोदेत्यादौ मा भूत् । इत्वरीति । `इण्नश्जिसर्त्तिभ्यः क्वरप्' । आढ्यङ्करणीति । `आढ्यसुभग' इत्यादिना ख्युन् ।

नञ्स्नञीकक्तरुणतलुनानामिति । भाष्ये तु `कञ्क्वरपः' इत्येतावत्सूत्रम्, ख्युनः पाठोऽनार्ष इति तस्याप्युपसंख्यानमेव कृतम् । स्त्रैणी, पौंस्नीति । `स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' । शक्तीकी, याष्टीकीति । प्रहरणाधिकारे `शक्तियष्ट्योरीकक्' । तरुणी, तलुनीति । एतयोरवयोऽर्थं ग्रहणम्---तरुणी सुरति, वयसि तु `वयसि प्रथमे' इत्येव सिद्धम् ? न सिध्यति; गौरादिपाठान्ङीष प्राप्नोति । तस्माद्वयस्यवयसि च ङीब्ङीषोविकल्पः । क्वचिद्

गौरादिपाठात्सिद्धमिति पठ्यते, तद्रूपमात्रसिद्ध्यभिप्रायं द्रष्टव्यम्, स्वरार्थं तूपसंख्यानं कर्तव्यमेव ।।
यञश्च ।। 4.1.16 ।।
आपत्यग्रहणमिति । अपत्ये भव आपत्यः, यञ्, आपत्यादिति सूत्रं कर्तव्यमित्यर्थः । द्वैप्येति । भवादावर्थे यञ् ।
योगविभाग उत्तरार्थ इति । उत्तरत्र यञ एवानुवृत्तिर्यथा स्यात्, टिदादीनां मा भूदिति ।।
प्राचां ष्फ तद्धितः ।। 4.1.17 ।।
षकारो ङीषथे इति । ननु च ष्फप्रत्ययेनैव स्त्रीत्वस्य द्योतितत्वान्ङीषा न भाव्यम् ? तत्राह---प्रत्ययद्वयेनेति । तद्धितग्रहणं प्रातिपदिकसंज्ञार्थमिति । प्रातिपदिकसंज्ञा तु ङीषर्था । ननु च सिद्धोऽत्र ङीष्, पित्करणसामर्थ्यात्, धातोस्तु त्रपादेः षित्त्वमङ्विधौ चरितार्थमिति त्रपा, क्षमेत्यादौ ङीषभावः ? तदेतत्सान्यासिकं तिष्ठतु तावत् ।
सर्वत्रग्रहणमित्यादि । सर्वत्रग्रहणं तावद् उत्तरसूत्रे न कर्तव्यम्, आरम्भसामर्थ्यादेव `प्राचाम्' इत्यस्य निवृत्तौ सर्वत्र सिद्धत्वात्, अतस्तदिहापकृष्यते, तदयमर्थो भवति---सर्वत्र बाधकविषयोऽपि प्राचां मतेन यञन्तात्ष्फो भवतीति । एवं सप्तम्यर्थोऽपि समञ्जसो भवति । आवट्याच्चापं वक्ष्यतीति । असति पुनरपकर्षे आवट्याच्चाबुदीचां मते सावकाशः परत्वात्ष्फं बाधेत, सर्वत्रग्रहणात्ष्फ एव भवति । एवं च `षाच्च यञः' इति चाब्विषयेऽपि प्राचां ष्फ एव भवति---शार्कराक्ष्यायणी, पौतिमाष्यायणी, गोकक्ष्यायणीति ।।
सर्वत्र लोहितादिकतन्तेभ्यः ।। 4.1.18 ।।
लोहितादीति पृथक्पदं लुप्तविभक्तिकम्, पूर्वत्र च प्राचां मते ष्फो विहितः, इह तु सर्वत्र मते । कोऽर्थः ? सर्वेषआं मत इत्यर्थः, तदाह---सर्वेषामाचार्याणां मत इति । मतेनेति तृतीयान्तपाठे सूत्रे पष्ठ्यन्तात्त्रल् । स्वतन्त्रमिति । योऽन्यस्यावयवो न भवति तत्स्वतन्त्रं प्रातिपदिकम्, कः पुनरसावित्यत्राह---कपिशब्दात्पर इति । लौहित्यायनीत्यादिर्गर्गाद्यन्तर्गणः । बभ्रुशब्दोऽपि तत्रैव पठ्यते, यञ्तु `मधुबब्भ्र्वोर्ब्राह्मणकौशिक्योः' इत्यननैव भवति । कण्वात्त्वित्यादि । कण्वशब्दात्पूर्वः कतशब्दात्तूत्तरः शकलशब्द इष्यते, कतशकलकण्वेत्येवभेषां संनिवेशः कार्य इत्यर्थः । किमेवं सति भवति ? इत्याह---पूर्वोत्तराविति । शकलशब्दोऽन्त आदिश्च यथाक्रमं ययोः पूर्वोत्तरयोर्गणयोस्तौ तथोक्तौ । पूर्वो गणो लोहितादिः शकलशब्दान्तो भवति, उत्तरश्च गणः शकलशब्दादिर्भवतीत्यर्थः । सत्यमेवं भवति, प्रयोजनं तु किम् ? इत्यत आह---ष्फाणाविति ।
श्लोकं व्याटष्टे---प्रातिपदिकेष्वन्यथा पाठ इति । कपिकत, कुरुकत, अनडुह्, कण्व, शकलेत्येवं गर्गादिषु गणसन्निवेशः । स एवं व्यवस्थापयितव्य इति । एवमिति श्लोकोक्तयाऽऽनुपूर्व्येत्यर्थः । अनडुह्कुरुकतशब्दावस्मात्स्थानादपकृष्यान्यत्र पाठ्यौ, शकलशब्दस्तु कतकण्वयोर्मध्ये पठितव्य इति यावत् । नन्वेवं गणद्वयादपि प्रच्युतः शकलशब्दः ष्फाणौ द्वावपि न प्रतिपद्येत, तत्राह---कतन्तेभ्य इति । बहुव्रीहितत्पुरुषयोरेकशेष इति । कतस्यान्तः समीपभूतः कतन्त इति तत्पुरुषेण शकलशब्द उच्यते, शकन्ध्वादित्वान्निपातनाद्वा पररूपम् । तथा कतोऽन्तो येषां तानि कतन्तानीति बहुव्रीहिः, तत्र बहुव्रीहितत्पुरुषयोः सह विवक्षायां बहुव्रीहिः शिष्यते; `स्वरभिन्नानां यस्योत्तरस्वरविधिः स शिष्यते' इति वचनात् । तथेत्यादि । `कण्वादिभ्यः' इत्यपि बहुव्रीहितत्पुरुषयोरेकेशेष इत्यर्थः । कण्वस्यादिः समीपभूतः कण्वादिः शकलशब्दः, कण्व आदिर्येषां तानि कण्वादीनि, ततः पूर्ववदेकशेषः । तत्र बहुव्रीहितत्पुरुषयोर्मध्ये तत्पुरुषसमासेन । मध्यवर्त्तीति । गणद्वयस्य । प्रत्ययद्वयमपीति । ष्फाणावित्यर्थः । शाकला इति । `आपत्यस्य च' इति यलोपः ।
अपर आह---पूर्वोत्तरौ तदन्तादी ग्राह्याविति शेषः, पूर्वो गणस्तदन्तो ग्राह्यः---सर्वत्र लोहितादिशकलान्तेभ्य इति, उत्तरो गणस्तदादिर्ग्राह्यः---शकलादिभ्यो गोत्र इति । एवं ष्फाणौ प्रयोजनमिति ।।
कौरव्यमाण्डूकाभ्यां च ।। 4.1.19 ।।
कौरव्यमाण्डूकयोरित्यादि । अस्मिन्सूत्रे आसुरेरपि ग्रहणं कर्तव्यम् । आसुरिकौरव्यमाण्डूकेभ्यश्चेति वक्तव्यमित्यर्थः ।
आसुरायणीति । ष्फस्य तद्धितत्वाद् `यस्येति च' इति इञो लोपः । तदिदं तद्धितग्रहणमेव लिङ्गं भवति---आसुरेरपि ष्फ इति । यञादिष्वकारान्तेषु सवर्णदीर्घत्वेनापि रूपं सिद्धम् । शैषिकेषु चार्थोष्वति । आसुरीप्रसङ्गादिदमत्रोक्तम् ; अन्यथा द्विरासुरिग्रहणं कर्तव्यं स्यात् । आसुरीय इति । असुरस्यापत्यमासुरिः, तेन प्रोक्त आसुरीयः कल्प इति ।।
वयसि प्रथमे ।। 4.1.20 ।।
श्रुत्येति । श्रवणमात्रेण प्रकरणाद्यनपेक्षयेत्यर्थः । कुमारीति । प्रथमवयोवचन एवायम्, न पुंयोगाभावहेतुकः पुंस्यपि प्रयोगात् । यस्तु वृद्धायां प्रयोगः---वृद्धकुमारीति, स पुंयोगाभावात्साधर्म्याद्वेदितव्यः ।
वयस्यचरम इति । चरम् = अन्त्यम्, अचरमे = अनत्ये । इह केचिच्चत्वारि वयांसीच्छन्ति---कौमारप्, यौवनम्, मध्यत्वम्, वृद्धत्वमिति । यथाहुः---
`प्रथमे वयसि नाधीतं द्वितीये नार्जितं धनम् ।
तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति' ।। इति ।
अन्ये तु त्रीणि---
`पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थविरिभावे न स्त्री स्वातन्त्र्यमर्हति' ।। इति ।

अन्ये तु बालत्व-मध्यत्व-वृद्धत्वानि त्रीणि---
`आषोडशाद्भवेद्बालो यावत् क्षीरान्नवर्तकः ।
मध्यमः सप्ततिर्यावत्परतो वृद्ध उच्यते' ।। इति ।
एषु सर्वेषु दर्शनेषु यौवनं द्वितीयं वयो भवति, यौवनवचनौ च वधूटचिरण्टशब्दौ, अतो न प्राप्नोति, तदाह---द्वितीयवयोवचनावेताविति । यदा तु द्वे एव वयसी उपचयापचयलक्षणे, तदैतन्न वक्तव्यम् ; यौवनस्यापि प्रथमवयोरूपत्वात् ।
श्रुत्या वर्तते इति यदुक्तं तस्य व्यावर्त्यं दर्शयति---उत्तानशया लोहितपादिकेति नैता वयः श्रुतय इति । श्रुत्या = श्रवणमात्रेण नैते वयः प्रतिपादयन्तीत्यर्थः । इह तावदुत्तानशयेति क्रियाकारकसम्बन्धमात्रं प्रतीयते, तदेव च प्रवृत्तिनिमित्तम् । उत्तानादिषु कर्तृष्विति शेरतेरच् प्रत्ययः, सर्वैव च कदाचिदुत्ताना शेते, उच्यते चेदम्---उत्तानशयेति, तत्र नियमो गम्यते---अन्यथा स्वप्तुमसामर्थ्यादुत्तानैव शेत इति । एवमपि सन्देहः---बाला, वृद्धेति ? तस्मादुत्तानैव शेत इति नियमे वृद्धत्वाभावे च प्रकरणादिनाऽवसिते बाल्यं गम्यते, लाहितपादिकेत्यत्रापि अन्यपदार्थमात्रं श्रुत्या प्रतीयते । प्रकरणादिना स्वभावत एवास्य रक्तौ पादो नालक्तकादिनेति प्रतीतौ सत्यां बालेति गम्यते । इतिशब्दः प्रकारे, एवप्रकारा न वयःश्रुतय इत्यर्थः । अत एव बहुवचनम्, तेन द्विवर्षेत्यादावपि न भवति । अत्रापि प्रकरणादिना वयो गम्यते, परिमाणमात्रं तु शब्दार्थः, शालादावपि प्रयोगात् । द्वे वर्षे भूता इति ठञः `वर्षाल्लुक्च', `चित्तवति नित्यम्' इति लुक् ।।
अपरिमाणविस्ताचितकम्बल्येभ्यो न तद्धितलुकि ।। 4.1.22 ।।
परसप्तमी त्वषा नोपपद्यते, अभावरूपेण लुका पौर्वापर्यासम्भवात् । सर्वतो मानं परिमाणमिति । `परिमाणं तु सर्वतः' इत्यस्य ग्रहणम्, न परिच्छेदकमात्रस्येत्यर्थः ।
पञ्चमिश्वैः क्रीतेति । तद्धितार्थे द्विगुः, आर्हीयष्ठक् ।
कालः सङ्ख्या च न परिमाणमिति । न हि ताभ्यां सर्वत आरोहतः परिणाहतश्च मीयते । एवं च कालः सङ्ख्या चेति प्रदर्शनार्थत्वात्प्रमाणमपि परिमाणं न भवति, तथा चोत्तरसूत्रे `काण्डशब्दस्यापरिमाणवाचित्वात्' इति वक्ष्यति, `प्रमाणविशेषः काण्डम्' इति च । तेन द्वौ शमौ प्रमाणमस्या इति मात्रचः `प्रमाणे लो द्विगोर्नित्यम्' इति लुकि द्विशम्, त्रिशमेति भवति । यद्येवम्, उन्मानमपि परिमाणं न स्यात् ? कश्चिदाह---इष्टमेवैतत्, उन्मानमपि नैवात्र परिमाणग्रहणेन गृह्यते---द्वाभ्यां निष्काभ्यां क्रीता, प्राग्वतीयस्य ठञोः `द्वित्रिपूर्वान्निष्कात्' इति लुक्, द्विनिष्का त्रिनिष्वेति भवतीति । अपर आह---बिस्तकम्बल्यग्रहणं ज्ञापकम्---उन्मानमप्यत्र परिमाणग्रहणेन गृह्यत इति; तयोरुन्मानविशेषत्वात्, सुवर्णबिस्तौ हेस्नोऽक्षे, `कम्बलाच्च संज्ञायाम्' कम्बल्यमूर्णापलशतमिति । न्यासकारस्तु द्वौ विस्तौ परिमाणमस्येति विगृह्णन् बिस्तं परिमाणं मन्यते । द्विवर्षेति । कृतव्युत्पादनमेतत् । द्विशता, त्रिशतेति । द्वाभ्यां शताभ्यां क्रीतेति `पणपादमाषशताद्यत्' इति नित्ये यति प्राप्ते `शाणाद्वा' इत्यत्र `शताच्चेति वक्तव्यम्' इति वचनात्पक्षे `सङ्ख्याया अतिशदन्तायाः कन्' इति कन्, तस्य `अध्यर्धपूर्वात्' इति लुक् ।
द्विबिस्तेति । परिमाणत्वे ठञो लुक्, उन्मानत्वे ठकः । द्व्याचितेति । आचितो दशभाराः स्युः । द्वावाचितौ पचति, `आढकाचितपात्रात्खोन्यतरस्याम्', `द्विगोष्ठंश्च' इति पक्ष ठन्खौ, ताभ्यां मुक्ते प्राग्वतीयष्ठञ्, तस्य पूर्ववल्लुक् । द्विकम्बल्येति । क्रीतार्थे ठञो लुक् । द्व्याढकी द्व्याचितेत्यनेन तुल्यम् । पञ्चाश्वीति । समाहारे द्विगुः । इमौ द्वौ प्रतिषेधावुच्येते, तत्रैकः शक्योऽवक्तुम्, कथम् ? एवं वक्ष्यामि---परिमाणान्तात्तद्धितलुकीति, तन्नियमार्थं भविष्यति---परिमाणान्तादेव तद्धितलुकि ङीब् भवतीति, तेन द्व्याढकीत्यादौ च भविष्यति, पञ्चाश्वेत्यादौ च न भविष्यति, ततो बिस्ताचिकम्बल्येब्योनेति ? नैवं शक्यम् ; विपरीतोऽपि नियमः सम्भाव्येत---द्विकुडवी, पञ्चाढकी । पञ्चाश्वेत्यादौ तु व्यावर्तकाभावात्स्यादेव ङीप् । तस्माद्यथान्यासमेवास्तु ।।
काण्डान्तात्क्षेत्रे ।। 4.1.23 ।।
मानदण्डः=काण्डम् । `द्विगोः' इत्यधिकारादेव पूर्वसूत्रवत्तदन्तविधौ सिद्धे किमर्थमन्तग्रहणम् ? अक्रियमाणेऽन्तग्रहणे क्षेत्र इत्येतत् काण्डस्यैव विशेषणं विज्ञायेत---क्षेत्रे यः काण्डशब्दः, तदन्ताद् द्विगोरिति श्रुतत्वात् न तदन्तस्य, यथोत्तरसूत्रे प्रमाणे यः पुरुषशब्दस्तदन्तादिति, ततश्चेह प्रसज्येत---द्वाभ्यां काण्डाभ्यां काण्डामिताभ्यां क्षेत्राभ्यां क्रीता द्विकाण्डी वडवेति; इह तु न स्यात्---द्वे काण्डे प्रमाणमस्याः द्विकाण्डा क्षेत्रभक्तिरिति । अन्तग्रहणे तु सति तदन्तस्यैव विशेषणं क्षेत्रम्, न काण्डस्य; बहुव्रीहौ गुणभूतत्वात् ।।
पुरुषात्प्रमाणेऽन्यतरस्याम् ।। 4.1.24 ।।
प्रमाणे यः पुरुषशब्द इति । पञ्चारत्निः पुरुष इति शुल्बविदः, तत्र द्वौ पुरुषो प्रमाणमत्या इति वाक्ये प्रमाणशब्देन सम्बन्धाज्जातिवचनोऽपि पुरुषशब्दः प्रमाणे वर्तते । वृत्तौ तु तत्स्वभावादेव प्रमाणे वृत्तिर्द्रष्टव्या ।।
बहुव्रीहेरूधसो ङीष् ।। 4.1.25 ।।
`ऊधसोऽनङ्' इति । समासान्ते कृत इति समासार्थादुत्तरपदाद्भवन्समासान्तः पूर्वं भवति, ततः स्त्रीप्रत्ययः । अनो बहुव्रीहेरिति । उपल7णमेततत् । `अनो बहुव्रीहेः', `डाबुभाभ्याभन्यतरस्याम्' इति चेत्यर्थः । कुण्डोध्नीति । कुण्डमिव ऊधोऽस्या इति विग्रहः, ङीषि `अल्लोपोऽनः' इत्यकारलोपः । प्राप्तोधा इति । `प्राप्तापन्ने च द्वितीयया' इति तत्पुरुषः, `अत्वसन्तस्य' इति दीर्घः ।
अन उपधालोपिन इत्यादि । असत्यां पुनरनुवृत्तौ मध्येऽपवादन्यायेन डाप्प्रतिषेधयोरेवायं ङीष् बाधकः स्यात्, न `अन उपधालोपिनः' इत्यस्य ङीपः । ननु च `डाबुभाभ्याम्' इत्यत्रानेनान्यतरस्यांग्रहणेन ङीबपि प्राप्यते, `अन उपधालोपिनः' इत्यय तु नियम इत्यावीदीति कुतोऽयमनिष्टप्रसङ्गः ? सत्यम् ;

अन `उपधालोपिनः' इत्यस्य तु विधित्वाभ्युपगमेनैतदुक्तम् । इह बहुव्रीहेरूधसो ङीष् नश्चेति वक्तव्यम्, ऊधः शब्दान्ताद्बहुव्रीहेः स्त्रियां ङीष् भवति तत्सन्नियोगेन चान्त्यस्य नकारः, समासान्तप्रकरणे तु ऊधसऽनङिति न वक्तव्यम्, `धनुषोऽनङ्' इत्येव पठितव्यम्, कः पुनरेवं सति गुणो भवति ? `अन उपधालोपिनः' इत्यत्रास्यानुवृत्तिर्नाश्रयितव्या भवति; अपि च महोधाः पर्जन्यः, वुण्डोधो धैनुकमिति सिद्धं भवति, अन्यथा `ऊधसोऽनङ्' इत्यत्र स्त्रियामिति वक्तव्यं स्यादत आह---समासान्तश्च स्त्रियामेवेति । इष्यत इत्यनुषङ्गः, तत्रैव स्त्रियामिति वक्तव्यमित्यर्थः, इतरथा हि कब्विधिप्रसङ्गः । कपोऽवकाशोऽन्यो बहुव्रीहिः---अयवकः अव्रीहिकः, ङीषस्तु---विभाषा कप्, यदा न कप् सोऽवकाशः; कप्प्रसङ्गे उभयं प्राप्नोति परत्वात्कप् स्यात् ।।

संख्याव्ययादेर्ङीप् ।। 4.1.26 ।।

पूर्वेण ङीषि प्राप्ते ङीब् विधीयत इति । यत्र पूर्वपदप्रकृतिस्वरस्तत्र बहुव्रीहौ । अन्तोदात्ते तु बहुव्रीहौ ङीब्ङीषोर्नास्ति विशेषः, सूध्नी, `नञ्सुभ्याम्' इत्यन्तोदात्तत्वम्, तत्राल्लोपे ङीबप्यदात्तनिवृत्तनिवृत्तस्वरेणोदात्तो भवति । द्व्यूध्नीत्यादि । द्वे ऊधसी यस्याः, अतिगतमूधोऽस्याः, निर्गतमूधोऽस्या इति विग्रहः ।

आदिग्रहणं किमिति । संख्याव्ययाभ्यामुत्तरो य ऊधः शब्दस्तदन्ताद्बहुव्रीहेरिति विज्ञायमाने द्वयूध्नीत्यादि सिद्धमिति प्रश्नः । द्विविधोध्नीति । असत्यादिग्रहणे `संख्याव्ययाभ्याम्' इति पञ्चमीनिर्देशात्ताभ्यामनन्तरो य ऊधः--शब्दस्तदन्तादेव स्यात्, पदान्तरव्यवाये तु न स्यादिति भावः ।।

दामहायनान्ताच्च ।। 4.1.27 ।।

`स्वीरितेनाधिकारः' इत्यत्र द्वौ पक्षौ---शब्दाधिकारः, अर्थाधिकारश्चेति । तत्राद्ये पक्षे यस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञातं स एवानुवर्तते, द्वितीये तु द्वन्द्वार्थस्यैकत्वात्तस्यैवानुवृत्तिः स्याद्वा न वा, तदिहाद्यं पक्षमाश्रित्याह---सख्याग्रहणमनुवर्तते नाव्ययग्रहणमिति ।

हायनो वयसि स्मृत इति । प्रकृतिरिति शेषः । हायनान्तो बहुव्रीहिर्वयसि गम्यमाने ङीपः प्रकृतिराचार्यैः स्मृत इत्यर्थः । त्रिहायना शालेति । प्राणिधर्मो वयः शालाया न सम्भवति । अथ मूलोदाहरणवत् `त्रिचतुर्भ्यां हायनस्य' इत्यौपसंख्यानिकं णत्वं कस्मान्न भवतीत्यत आह---णत्वं चेत्यादि । बहुव्रीह्यधिकारादेव तदन्तविधिसिद्धेरन्तग्रहणं विस्पष्टार्थम् ।।

अन उपधालोपिनोऽन्यतरस्याम् ।। 4.1.28 ।।

इति परत उपधालोपे यस्य सम्भवति स उपधालोपी ।

ननु सिद्धा एवेत्यादि । एतच्च `डाबुभाभ्याम्' इत्यत्रैव व्याख्यातम् ।

अनुपधालोपिनो ङीप्रतिषेधार्थं वचनमिति । अनो बहुव्रीहेर्यदन्यतरस्यां ङीब्विधानं तदुपधालोपिन एवेत्येवं नियमार्थमित्यर्थः । अस्य च नियमस्यानुपधालोपिनो ङीब्निवृत्तिः फलमिति फलतः प्रतिषेधवाचो युक्तिः । बहुराजे इति । `औङ आपः' इति शीभावः । द्विवचननिर्देशो डापोऽभिव्यक्तये; एववचने डाप्प्रतिषेधयो रूपस्य तुल्यवात् ।

बहुमत्स्येति । `सूर्यतिष्यागस्त्य' इत्यादिना उपधालोपविधानादुपधालोप्येष बहुव्रीहिः । सुपर्वेति । `न संयोगाद्वमन्तात्' इति निषेधान्नायमुपधालोपी ।।

नित्यं संज्ञाछन्दसोः ।। 4.1.29 ।।

ननु छन्दसि दृष्टमेवानुविधीयते नापूर्वमुत्प्रेक्ष्यते; तत्र च ङीबेव चेद् दृश्यते तस्य च लक्षणमस्ति, क इदानीं तदभावं प्रयोक्तुं प्रभवति, संज्ञाशब्दा अप्यनदिप्रयुक्ता नियतानुपूर्वीकास्तत्रापि ङाबेव चायं दृश्यते न तदभावः शक्यते कर्तुम्, किमर्थमिदं सूत्रम् ? संज्ञाछन्दसोरिति पदमुत्तरार्थं वक्तव्यम् । नित्यग्रहणमुत्तरत्र विकल्पनिवृत्त्यर्थम् ।।

केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ।। 4.1.30 ।।

केवलेति भाषायामिति । असंज्ञाविषये इति भावः । मामकीति । ममेयमिति `युष्मदस्मदोरन्यतस्यां खञ्च' इत्यम्, `तवकममकावेकवचने' इति ममकादेशः, तत्राणन्तत्वात् `टिड्ढाणञ्' इत्येव सिद्धे नियमार्थं मामकग्रहणम्---संज्ञाछन्दसोरेव ङीब्नान्यत्रेति । मामिकेति । टापि `मामकनरकयोरुपसंख्यानम्' इतीत्वम् । भागधेयीति । भागशब्दापुंल्लिङ्गात्स्वार्थे धेयप्रत्ययः, स्वाथिकाश्च क्वचिदतिवर्तन्ते प्रकृतितो लिङ्गमिति स्त्रीलिङ्गता । पापेति । अभेदोपचारात्तद्वति वर्तमानः पापशब्दोऽभिधेयवल्लिङ्गः । अवरीत्यत्र द्वितीयो वर्णो दन्त्योष्ठ्यः, न पवर्ग्यः । आर्येण कृतेति । प्राक् सुबुत्पतेः समासेऽकारान्तत्वम् । भेषजीति । भिषज इयमित्यणि आदिवृद्धेरभावोऽस्मादेव निपातनादेकारः । एवं च भेषजग्रहणमपि नियमार्थम् ।।

रात्रेश्चाजसौ ।। 4.1.31 ।।

कथमित्यादि । दीर्घान्ताज्जसि `दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घप्रतिषेधाद्यणादेशे `रात्र्यः' इति प्रयोग उपपद्यते, ह्रस्वान्तस्य तु `जसि च' इति गुणे `रात्र्यः' इति रूपं स्यात् । दीर्घान्तश्च रात्रिशब्दः संज्ञाछन्दसोरपि जसि न सम्भवति, अजसाविति प्रतिषेधात्, किं पुनर्भाषायामिति प्रश्नः । ङीषयमित्यादि । बह्वादिषु रात्रिशब्दो न पठ्यत इति चेत्, तत्राह-तत्र हीति । कृत इकारः कृदिकारः, तदन्तान्ङीष् भवति `दृजागृभ्यां विः', दविः, दर्वी; यस्तु क्तिन्सम्बन्धी तदन्तान्न भवति---कृतिः, हृतिः । सर्वत इति । कृदिकारादकृदिकाराच्चेत्यर्थः । यस्तु क्तिन्नर्थस्तस्मान्न भवति---`आक्रोशे नञ्यनिः', अकरणिः, अहरणिः । रात्रिशब्दोऽयम् `राशदिभ्यां त्रिप्' इति व्युत्पत्तिपक्षे कृदिकारान्तः, अव्युपत्तिपक्षे `सर्वतोऽक्तिन्नर्थात्' इति ङीष् । सूत्रं तु ङीबर्थम्---रात्री व्यख्यात्, रात्रीभिरस्मा अहभिर्दशस्येत्; अत्राद्युदात्तत्वं भवति ।।

अन्तर्वत्पतिवतोर्नुक् ।। 4.1.32 ।।

निपातनसमार्थ्याच्चेति । कार्यान्तरवदर्थविशेषवृत्तिरपि लभ्यत इति भावः । कस्मिन्विशेष इत्यत्राह अन्तर्वत्पतिवदिति । गभभर्तृसंयोगे इति । अन्तर्वदिति ।

गर्भसंयोगे, गर्भिण्यामित्यर्थः । पतिवदिति । भर्तृसंयोगे, भर्तृमत्यामित्यर्थः, जीवपत्यामिति यावत् । इह न भवति अन्तरस्यां शालायां विद्यते इति । अस्मिन्विषये एवंविधं वाक्यमेव भवति, न तु मतुबादीत्यर्थः । क्वचिद् अन्तर्वती शालेति पठ्यते, तदयुक्तम् ; अत्र मतुबभावस्योक्तत्वात् । पतिमती पथिवीति । स्वामिपर्यायोऽत्र पतिशब्दः ।
मतुब्निपात्यत इति । अधिकरणप्रधानस्यान्तः शब्दस्यास्तिनाऽसामानाधिकरण्यान्न प्राप्नोतीति कृत्वा ।
वत्वं तु सिद्धमिति । `मादुपधायाश्च' इत्यनेनादुपधत्वात् ।
अन्तर्वत्पतिवतोरित्यादि । एतयोः शब्दयोर्निपातनान्मतुब्वत्वे भवतः, नुक्तु विधीयते यथाक्रमं गर्भिण्यां जीवपत्यां चाभिधेयायाम्--जीवः पतिरस्याः जीवपतिः `विभाषा सपूर्वस्य' इति ङीम्नकारयोरभावपक्षे रूपम् । तत्र ङितिह्रस्वश्च' इति नदीसंज्ञापक्षे `इदुद्भ्याम्' इति ङेरामादेशः, जीवपत्यामिति भवति । वा तु छन्दसि नुग्विधिः । छन्दसि विषये तु विकल्पेन नुग्विधिर्भवति---अन्तर्वती, अन्तर्वत्नी । पुंस्यापि दृश्यते---सोऽन्तर्वानभवत् ।।
पत्यर्नो यज्ञसंयोगे ।। 4.1.33 ।।
यद्यत्र यज्ञशब्देन पतिशब्दस्य सम्बन्धात् यज्ञसंयोग इत्यर्थः स्यात् ? यज्ञस्य पतिरियं ब्राह्मणीत्यत्रैव स्यात्, अस्ति ह्यत्रार्थद्वारकः सम्बन्धः, स्वरूपेण चानन्तर्यलक्षणः । अथ यज्ञवाचिना संयोगो यज्ञसंयोगः ? तथापि पत्नीसंयाज इत्यादावेव स्यात्, न त्वियमस्य पत्नीत्यादौ । तस्माद्यज्ञशब्दस्य योऽर्थस्तेन पतिशब्दार्थस्य सम्बन्धो यज्ञसंयोग इत्याह---यज्ञेन संयोग इति । अन्यथा `यज्ञशब्देन' इत्यवक्ष्यत् । एवं च पतिशब्दार्थस्येत्यप्युक्तं भवति, न हि पतिशब्दस्य यज्ञेनार्थेन वाच्यवाचकभावः सम्बन्धान्तरं वा सम्भवति । तत्साधनत्वादिति । देवतोद्देशेन स्वद्रव्यत्यागः =यागः । मध्यकंचदम्पत्योर्धनम्, `कुटुम्बिनौ धनस्येशाते जायापत्योर्न विभागो विद्यते' इति हि स्मर्यते, ततश्च त्यागे भार्याया अप्यनुमतिरपेक्ष्यत इति तत्रास्या अनुमत्या साधनत्वम् । मदर्थं कर्मेत्येवंरूपोऽधिकारलक्षणसम्बन्धोऽस्तीत्याह---फलग्रहीतृत्वादिति । कर्तृत्वमात्रं विवक्षितम्, न स्त्रीत्वमिति ङीब्न कृतः । `कर्तरि च' इति समासप्रतिषेधः कर्मणि षष्ठ्या एव, न शेषपष्ठ्या इति तस्यानेनोपपन्नः समासः । फलगृहीतत्वादिति पाठे गृहीतं फलं ययेति बहुव्रीहौ फलशब्दस्य जातिवचनत्वाद् निष्ठायाः पूर्वनिपाते `जातिकालसुखादिभ्यः परवचनम्' इति गृहीतशब्दस्य परनिपातः ।
कथमित्यादि । शूद्रस्यैव यज्ञेऽनधिकृतत्वाद्यज्ञेनासंयोगात्कथं तद्भार्याया यज्ञसंयोग इति प्रश्नः । उपमानादिति । अग्निसाक्षिकं यत्पाणिग्रहणं तद् वृषलादीनामप्यस्ति, तदाश्रयमुपमानम् ।।
विभाषा सपूर्वस्य ।। 4.1.34 ।।
सहशब्दोऽयमस्ति तुल्ययोगे, यथा---सशिष्यो गुरुरागत इति; अस्ति च विद्यमानवचनः, यथा---`सहैव दशभिः पुत्रैर्भारं वहति गर्दभी' इति, इत्थम्भूतलक्षणे तृतीया, विद्यमानेष्वेव पुत्रेष्वित्यर्थः । पूर्वशब्दोऽप्यस्ति व्यवस्थावचनः---पूर्वं मधुरायाः पाटलिपुत्रमिति; अस्ति चावयवशब्दः---पूर्वं कायस्येति । तत्र तुल्ययोगे सहशब्दः, पूर्वशब्दश्च व्यवस्थायामिति पक्षे ग्रामस्य पतिरियमिति वाक्ये प्राप्नोति, पूर्वस्य चापि प्राप्नोति, विद्यमानवचनसहशब्दः पूर्वशब्दश्च व्यवस्थावचन इति पक्षे पूर्वस्य मा भूत्, वाक्ये तु स्यादेव । अपयववचनः पूर्वशब्दः तुल्ययोगे सहशब्द इति पक्षे वाक्येऽपि स्यात्, तत्रापि पतिशब्दस्य पूर्वोऽवयवः पकारस्तस्यापि स्यात्, तस्माद्विद्यमानवचनः सहशब्दः पूर्वशब्दश्चावयववचन इति पक्ष आश्रीयते । `तेन सह' इत्यत्र `तुल्योगे' इति विशेषणस्य प्रायिकत्वात्समासः । एवं च स्थिते `सपूर्वस्य' इति पतिशब्दविशेषणं नोपपद्यते, कथम् ? पकारेण सपूर्वत्वमव्यभिचारादविशेषणम् । शब्दान्तरं तु पतिशब्दस्यावयवो न सम्भवति, ततश्च सामर्थ्यात् प्रातिपदिकं पतिशब्देन विशेष्यते, न तु तेन । पतिशब्द इति । पतिशब्देन तदन्तस्य ग्रहणम्, अनुपसर्जनग्रहणेनापि तदन्तं प्रातिपदिकमेव विशेष्यते, न विशेषणभूतः पतिशब्दः, अन्यथा बहुंव्रीहौ न स्यात्---जीवः पतिरस्याः जीवपतिर्जीवपत्नीति । षष्ठी समास एव तु स्याद्---आशापतिः, आशापत्नीति । तदेतत् सर्वमालोच्याह---पतिशब्दान्तस्य सपूर्वस्यानुपसर्जनस्येति । ग्रामस्य पतिरियमिति । असति सपूर्वग्रहणे तदन्तविधेरभावादत्रैव स्यात् । अथाप्यमहत्पूर्वेति ज्ञापकात्तदन्तेऽपि भवेत् केवलस्यापि स्यादेव । तस्मात् `सपूर्वस्य' इति वक्तव्यम् ।।
नित्यं सपत्न्यादिषु ।। 4.1.35 ।।
यानि समानादिपूर्वपदानि पत्यन्तानि प्रातिपदिकानि ते सपत्न्यादयः । कुत एतत् ? समानादीनामेव गणे पठात्, सपत्न्यादीनां चापाठात् । यद्येवम्, समानादिष्विति वक्तव्यम्, पूर्वग्रहणानुवृत्तेः; समादिषु पूर्वेष्ववयवेषु सत्स्वित्यर्थः ? सत्यम् ; समानस्य सभावार्थं तु `सपत्न्यादिषु' इत्युक्तम् । क्वचित्तूदाहरणानन्तरं समानादिष्विति वक्तव्यं सभावार्थमेवमुक्तमिति वृत्तावेव पठ्यते ।
अपर आह---समुदायोच्चारणसामर्थ्यात्सपत्नीभार्य इत्यत्र पुंवद्भावो न भवतीति नात्राप्तोक्तिरस्ति । किञ्च---सभावार्थं समुदायोच्चारणमिदमिति सामर्थ्यमपि चिन्त्यम् । तथा हे सपत्नि, निःसपत्निः, सपत्न्यृच्छति, सपत्न्या, सपत्न्यै इत्यादावपि ह्रस्वयणादेशौ न स्याताम् । तस्मात्सभावार्थमेव सपत्न्यादिष्वित्युक्तम् । नित्यग्रहणं विस्पष्टार्थमिति । आरम्भसामर्थ्यादेव नित्यं भविष्यतीति भावः । दासाच्छन्दसीति । दासपत्नीरहिगोपाः ।
पूतक्रतोरै च ।। 4.1.36 ।।
यद्ययमैकारः प्रत्ययः स्यादुत्तरसूत्रे उदात्तवचनमनर्थकं स्यात्; प्रत्ययत्वादेव सिद्धेः । तस्मादादेशोऽयं विज्ञायत इत्याह---ऐकारश्चान्तादेश इति । त्रय एते योगा इति । `पुंयोगादाख्याम्' इत्यत्रानुवर्तयितव्या इत्यर्थः । इह करणसामर्थ्याच्च ङीप्सहिता एवानुवर्तन्ते, तेन यदा पुंयोगात्स्त्रियां पूतक्रत्वादयो वर्तन्ते तदा ङीषं बाधित्वा ऐकारादिसहितो ङीब् भवति ।।
वृषाकप्यग्निकुसितकुसीदानासुदात्तः ।। 4.1.37 ।।

वृषाकपिशब्दो मध्योदात्त इति । `लघावन्ते द्वयोश्च बह्वषो गुरुः' इति वचनात् । अस्यार्थः---अन्ते एकस्मिन्लघौ द्वयोश्च लघ्वोः परतो बह्वषः शब्दस्य गुरुरुदात्तो भवतीति । `बह्वषः' इति वह्वच इत्यर्थः । योऽस्माकं चकारेण प्रत्याहारः सोऽन्येषां षकारेण । अग्न्यादिषु पुनरिति । `फिषः' इत्यनेनाग्न्यादीनामन्तोदात्तत्वम् । फिषिति प्रातिपदिकस्यान्याचार्यसंज्ञा । ये तु कुसीदेति मध्ये गुरुमधीयते तेषाम् `लघावन्ते' इति मध्योदात्तप्रसङ्गः ।।

मनोरौ वा ।। 4.1.38 ।।

ऐकारश्चोदात्त इति । औकारस्त्वनुदात्त एव । वाग्रहणेन द्वावपि विकल्प्येते इति । यदा च द्वावपि न भवतस्तदा ङीबपि न भवति; सन्नियोगशिष्टत्वात् । मनुशब्द आद्युदात्त इति । `मन ज्ञाने', `मृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः' इति वर्त्तमाने `धान्ये नित्' इति च, `शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च' इति उप्रत्ययः, नित्त्वादाद्युदात्तत्वम्, भरुः, मरुः, शयुः, तरुः, चरुः, त्सरुः, तनुः, धनुः, मयुः, मद्गुः, न्यङ्क्वादिपाठात् कुत्वम्---प्रथमस्योदाहरणानि । शरुः, स्वरूः, स्नेहुः, त्रपु, असुः, वसुः, हनुः, क्लेदुः, बन्धुः, मनुः---इति द्वितीयस्य ।।

वर्णादनुदात्तात्तोपधात्तो नः ।। 4.1.39 ।।

वर्णानां तणतिनितान्तानामिति । तशब्दान्तानामेतादीनां णशब्दान्तानां सोणादीनां तिशब्दान्तानां शितिप्रभृतीनां निशब्दान्तानां पृश्निप्रभृतीनां तकारान्तानां च पृषत्प्रभृतीनां वर्णवाचिनामादिरुदात्तो भवतीत्यर्थः । गतिस्वरेणेति । `गतिरनन्तरः' इत्यनेन । घृतादित्वादिति । `घृतादीनि' इति फिषि पठ्यते । पिशङ्गादिति । `लघावन्ते' इति मध्योदात्तत्वादुत्तरसूत्रेण ङीषि प्राप्ते हीब्विधीयते ।

असितपलितयोरिति । `वर्णानां तणतिनितान्तानाम्' इत्याद्युदात्तावेतौ ।

छन्दसीत्यादि । `तो नः' इति नकारे प्राप्ते क्नशब्दं ङीप्सहितमिच्छन्ति ।

भाषायामपीष्यते इति । भाष्ये तु नैतत्प्रदशितम् । अवदातशब्दो न वर्णवाची, किं तर्हि ? विशुद्धवाची । एवं ह्याह---

त्रीणि यस्यावदातानि विद्या योनिश्च कर्म च ।
एतत्त्रयं विजानीहि ब्राह्मणाध्यस्य लक्षणम् । इति ।

तेनावदातेत्यत्र ङीब्न भवति ।

अन्यतो ङीप् ।। 4.1.40 ।।

सारङ्गकल्माषशब्दौ `लघावन्ते' इति मध्योदात्तो, `शप आक्रोशे', `कल तृपः', `शपेर्बश्च' इति कलप्रत्ययः, पकारस्य बकारः, प्रत्ययस्वरेण मध्योदात्तः शबलशब्दः । खट्वाशब्दो नित्स्वरेणाद्युदात्तः, `खट् काङ्क्षे', `असूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' । कृष्णशब्दोऽन्तोदात्तः, `कृषेर्वर्णे' इति नक् प्रत्ययः, इलचि प्रकृते `कपेश्च' इति उणादिषु सूत्रम् । कपिः सौत्रो धातुः, कपिलशब्दोऽन्तोदात्तः ।।

षिद्गौरादिभ्यश्च ।। 4.1.41 ।।

षिद्भ्यः प्रातिपदिकेभ्य इति । ष्वुनादेः प्रत्ययस्य षित्त्वमवयवेऽचरितार्थं समुदायस्य विशेषकं भवतीति प्रातिपदिकानां षित्त्वम्, धातोस्तु त्रपादेः षित्त्वमङ्विधौ चरितार्थमिति न तेन प्रातिपदिकं षिद्भवति । रजकीति । `शिल्पिनि ष्वुन्' इत्यत्र व्युत्पादितम् ।

गौरादिषु गौरशब्दस्य वर्णवाचिनोऽप्यन्तोदात्तत्वात्पाठः । मत्स्यादानां योपधानाम् `अयोपधात्' इति जातिलक्षणस्य ङीषः प्रतिषेधात्पाठः । अन्येषां जातिशब्दानां स्त्रीविषयार्थः पाठः । श्वन्नक्षन्निति एतयोर्ङापि प्राप्ते । अनडुही, अनड्वाहीति । अनकारान्तत्वादप्राप्ते ङीषि सप्रत्यययोः पाठः, ङीषि परतो विकल्पेनान्यथा स्यात् । एषणः करण इति । करणसाधन एषणशब्दो ङीषमुत्पादयति---इष्यतेऽनयेत्येषणी । अधिकरणे ल्युडिति टित्त्वान् ङीबेव भवति । अन्येषामपि ल्युङन्तानां ङीपि प्राप्ते पाठः । मेधशब्दस्याजातिवाचित्वाद्, गौतमस्य शाङ्र्गरवादित्वान् ङीनि प्राप्ते वचनात्पक्षे सोऽपि भवति । आयस्थूणशब्दः शिवाद्यणन्तः । भौरिक्यादय इञन्ताः, तेषाम् `अणिञोः' इति ष्यङ्प्राप्तौ । आपिच्छिका नाम राजानः, `जनपदशब्दात्क्षत्रियादञ्', `तस्य आतश्च' इति लुकि कृते प्रत्ययलक्षणेन ङीप्प्राप्नोति । अग्रे हायनमस्य आग्रहायणः, प्रज्ञादित्वात्स्वार्थिकोऽण्, अस्मादेव निपातनाण्णत्वम्---आग्रहायणः, ङीपि प्राप्ते पाठः । केचिदाग्रहायणीति इकारान्तं पठन्ति, तस्य प्रयोजनम्---आग्रहायणीभार्य इत्यादौ पुंवद्भावो मा भूदित्याहुः । एतेन प्रत्यवरोहणीति व्याख्यातम् । सुमङ्गलात्संज्ञायामिति । `केवलमामक' इति ङीपि प्राप्ते पक्षे सोऽपि भवति । स्वरे विशेषः, सुमङ्गलशब्दो बहुव्रीहिः, तत्र `नञ्सुभ्याम्' इत्यन्तोदात्तत्वान्ङीप्यपि सत्युदात्तनिवृत्तस्वरेण भाव्यमिति नास्ति विशेषः । तथा च छन्दसि । सुमङ्गलीरियं वधूरित्यन्तोदात्तत्वं दृश्यते । तस्माज्जातिवचनोऽव्युत्पन्नः स्त्रीविषयः सुमङ्गलशब्दः `लघावन्ते' इति मध्योदात्तो द्रष्टव्यः । तरुणतलुनयोः `नञ्स्नञीकक्तरुण' इति ङीपि प्राप्ते पक्षे सोऽपि भवति । बृहन्महच्छब्दयोरनर्थकः पाठ इति प्रागेवोक्तम् । ऋष्यणन्तः सौधर्मशब्दः । रोहिणी नक्षत्रे इति । नक्षत्रादन्यत्र रोहिणी । रेवती नक्षत्र इति । रयिरिति धननाम, रयिर्विद्यतेऽस्या इति मतुपि `रयेर्मतौ बहुलम्' इति सम्प्रसारणम्, निपातनाद्वत्वम् । नक्षत्रादन्यत्र ङीब् भवति । विकलादीनां टापि प्राप्ते । कटाच्छ्रोणिवचने । कटी श्रोणिः, अन्यत्र कटा । पिप्ल्यादयश्चेति । गणसूत्रम्, पिप्पलि, हरीतकीत्यादिकं तु तस्योदाहरणप्रदर्सनम् । पृथिवीति । `प्रथेः षिवन्सम्प्रसारणं च' इति षित्त्वादेव सिद्धे प्रत्ययान्तस्य पाठः पुंवद्भावनिवृत्त्यर्थः---पृथिवीभार्य इति । स्त्रीविषयस्यास्य पुंवद्भावप्राप्तिश्चिन्त्या । क्रोष्टुशब्दस्य `स्त्रियां च' इति तृज्वद्भावः । क्रोष्ट्रीत्यत्र निरूपणीयमस्ति `स्त्रियां च' इत्यत्र निरूपयिष्यामः ।

षित्त्वादेव सिद्ध इति । `मातरि षिच्च' इति वार्त्तिककारवचनात्षित्त्वम्, निपातनसामर्थ्याद्वा । उक्तं हि---

धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च ।
अनुबन्धविकाराणआं रूढ्यर्थं च निपातनम् ।। इति ।

दंष्ट्रेति । येषामजादिषु दंष्ट्रेति पाटो नास्ति तेषामिदं प्रयोजनम् ।।
जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद् वृत्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु ।। 4.1.42 ।।
वर्ततेऽनया सा वृत्तिः = जीविका । स्वरे विशेष इति । तमेव दर्शयति---उत्सादिपाठादञि कृत इति । अमत्रम्=भाजनम् । कुण्डान्येति । क्रियाशब्दोऽयम् । `कुडि दाहे', `गुरोश्च हलः' इत्यकारप्रत्ययः । अवटपर्यायस्तु कुण्डशब्दो नपुंसके नियतः । यस्तु `पत्यौ जीवति कुण्डः स्यात्' इति मनुष्यजातिवचनस्ततो जातिलक्षणो ङीष् भवत्येव---कुण्डीयं न गोलीति । अमत्रवाचिनस्तु जातिशब्दादपि स्त्रीविषयत्वान्ङीष् विधीयते । आवपनं चेदिति । यत्र धान्यादि प्रक्षिप्य नीयते सा गोणी, यस्याः पुनर्यादृच्छिकं नाम सा गोणा । स्थलान्येति । कृत्रिमा पुरुषव्यापारेण निष्पादिता, यथा---स्थलयोदकं परिगृह्णन्तीति । भाजीति । `भज विश्राणने' चुरादिः, `ण्यासश्रन्थो युच्' इति युचि प्राप्तेऽसमादेव निपातनात् स्त्रियामप्येरच् । श्राणेति । `श्रा पारे', क्तः, `संयोगादेः' इति नत्वम् । स्थौल्यं चेदिति । द्रव्ये वर्तमानस्य नागशब्दस्य स्थौल्यं चेत्प्रवृत्तिनिमित्तमित्यर्थः । नागशब्दो गुणवचन इति । गजवाची नागशब्दस्तत्सहचरितं स्थोल्यमुपादाय स्त्र्यन्तरे प्रयुक्त उदाहरणम् । सर्पे दृष्टस्तद्गतं दैर्घ्यमुपादाय स्त्र्यन्तरे प्रयुक्तः प्रत्युदाहरणमित्यर्थः । वर्णश्चेदिति । प्रवृत्तिनिमित्तमित्यर्थः । कालान्येति । यस्या यादृच्छिकीयं संज्ञा । नीलान्येति । नील्या रक्ता शाटी, `नील्या अन्वक्तव्यः' इत्यन् । अयोविकारश्चेदिति । `फाल' इति यस्याभिधानम् । कुशान्येति । छन्दोगाः स्तोत्रिया गणनार्थानौदुम्बरान् शङ्कून `कुशा' इति व्यवहरन्ति । कामुकान्येति । यस्या मैथुनादन्यत्कामयितुं शीलम् । मैथुनेच्छावतो भण्यत इति । कामुकशब्दस्य `लषपतपद' इति कर्तरि व्युत्पादितत्वात्, इच्छामात्रे वृत्त्यभावात् । सूत्रे तु प्रवृत्तिनिमित्तमात्रं निष्कृष्योक्तम् । मैथुने इच्छा यस्याः सा मैथुनेच्छेति व्यधिकरणपदो बहुव्रीहिराश्रयणीय इति भावः । केशवेश इति । केशसन्निवेशविशेष इत्यर्तः ।।
शोणात्प्राचाम् ।। 4.1.43 ।।
शोणशब्दोऽयं वर्णवाची `वर्णानां तणतिनितन्तानाम्' इत्याद्युदात्तः, तत्र `अन्यतो ङीष्' इत्येव सिद्धे नियमार्थं वचनम्---प्राचामेव नान्येषामिति ।।
वोतो गुणवचनात् ।। 4.1.44 ।।
गुणमुक्तवान्गुणवचन इति । `कृत्यल्युटो बहुलम्' इति भूते कर्तरि ल्युटं दर्शयति । स पुनर्यः प्राग्गुणमभिधाय पश्चान्मतुब्लोपादभेदोपचाराद्वा तद्वति वर्तते स वेदितव्यः । शुचिरिति । उत इत्यस्मिन्नसत्त्वेऽपि पट्वीत्यादिसिध्यर्थमेवात इत्यस्यासम्बन्धो व्याख्येयः, ततश्चेहापि प्रसङ्ग इति भावः । गुणवचनान्ङीबिति । `मनोरौ वा' इत्यस्यानन्तरमिदं पठितव्यमित्यर्थः । उत्तरसूत्रम् `बह्वादिभ्यो वा' इति पठितव्यम् ।
आद्युदात्तार्थमिति । आद्युदात्तेषु गुणवचनस्य ङीब्विधानस्य प्रयोजनमित्यर्थः । अन्तोदात्तेषु `उदात्तयणो हल्पूर्वात्' इति ङीबप्युदात्त इति नास्ति विशेषः । आद्युदात्तेषु तु ङीबनुदात्त एवावतिष्ठते । वस्वीति । `शृस्वृस्निहि' इत्यादिना वसेरुप्रत्ययः, नित्त्वादाद्युदात्तो वसुशब्दः, गुणवचनश्चायं नैर्मल्यवचनः । प्रशस्तवचन इत्यन्ये । तथा च---अतिशयेन वसुर्वसिष्ठो भवति पटुशब्दोऽप्याद्युदात्तः, `धान्ये नित्' इत्यधिकारे `फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च' इति उप्रत्ययः, फलेर्गुगागमः, पाटेश्च पटिरादेशः, फल्गुः, पटुः, नाकुः, मधुः, जतु---इत्युदाहरणानि । मृदुशब्दस्त्वन्तोदात्तः, `म्रद क्षोदे' `कुर्भ्रश्च' इत्यधिकारे `प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च' इति कुप्रत्ययः, पृथुः, मृदुः । `भ्रस्जेः सलोपः सम्प्रसारणञ्च', न्यङ्क्वादित्वात्कुत्वम्, भृगुः । खरुरीति । `खरुः कन्या पतिवरा' इति निघण्टुः, तत्र पाणिग्रहणोत्कण्ठाभिधायित्वाद् गुणवचनत्वाम् । तपरकरणं किम् ? पटुमिच्छति पटूयति, पटूयतेः क्विप्, पटूः स्त्री---अत्र मा भूत् । यद्यप्ययं सम्प्रति क्रियावचनः, तथापि पूर्वं गुणमुक्तवानिति कृत्वा स्यात्प्रसङ्गः ।
इह `उतः इति विशेषणाद्वचनग्रहणाच्च शास्त्रीयोऽदेङ्गुणो न गृह्यते । लोके तूपसर्जनं मुण उच्यते, शास्त्रेऽपि यस्य गुणस्य हि भावादिति विशेषणमात्रं गुणो गृह्यते, शुक्लादौ च प्रसिद्धतरो गुणशब्दः, वैशेषिकादयस्तु रूपरसादयश्चतुर्विंशतिर्गुणा इति प्रतिपन्नाः; तदिह जिघृक्षितं गुणं लक्षयति---सत्त्वे निविशत इत्यादि । सीदन्त्यस्मिञ्जातिगुणक्रिया इति सत्त्वम्=द्रव्यम् । तत्र यो निविशते=समवैति स गुणः । `यो निविशते स गुणः' इत्युच्यमाने गुणक्रियाजात्योर्गुणत्वप्रसङ्गात्सत्त्व इत्युक्तम् । एवमपि सत्ता जातिर्गुणः स्यात्, सा हि द्रव्यगुणकर्मसु त्रिष्वपि समवैति ? तदर्थं द्रव्य एवेत्यवधारणं द्रष्टव्यम् । एवमपि द्रव्यत्वजातिर्गुणः स्यात्सत्त्वे निवेशात्तत्रैव च निवेशात् ? इत्यत आह---अपैतीति । ततः सत्त्वादपैति=अपगच्छति, क्वचिद्वा कदाचिद्वा न भवतीत्यर्थः । यथा---आम्रफले श्यामता पूर्वमुपैति, रक्ततायां तत्र जातायामपैति च द्रव्यत्वजातिस्तु सर्वदा द्रव्ये निविशते नापैति, यदि हि कदाचित्क्वचिद्वा न स्याद् द्रव्यमेवैतन्न स्यात् । एवमपि गोत्वादिजातिर्गुणः स्यात्, सा हि सत्त्वे निविशते, अपैति च, ततोऽश्वादिष्वभावात् ? इत्यत आह---पृथग् जातिष्विति । पृथगिति पृथक्पदम्, पृथग्भूतासु जातिष्वित्यर्थः । जात्याधारेषु द्रव्योषु दृश्यमानो जातिषु दृश्यत इत्युपचर्यते, समासे तु सति `जात्यन्ताच्छः' इति नित्याधिकारपरिगणितश्छः प्रसज्येत । तदेवमुक्तलक्षणोपेतो यः पृथग्जातीयेषु दृश्यते स गुणः, न चैवंरूपा गोत्वादिजातिः । यद्यपि खण्डमुण्डादिरूपेण खण्डमुण्डादयः पृथग्जातीयाः, तथापि गोत्वेन तासामेकजातीयत्वमेव । ये त्वपैतीत्यस्य सत्येवाधारे तत्परित्यागमर्थमाहुः, तेषां `पृथग्जातिषु' इत्यनर्थकम् ; गोत्वादिजातेरप्यपैतीत्यनेनैव व्यावृत्तिसिद्धेः । तस्मात्पूर्वोक्त एवार्थः ।
एवमपि हि क्रिया गुणः स्यात्, सा हि द्रव्ये निविशते यदा सक्रियं तत्रैव च निविशते, अपैति च ततो यदा निष्क्रियं द्रव्यं पृथग्जातीयेषु गवाश्वादिषु दृश्यते ? अत आह---आधेयश्चेति । आधेयः=निष्पाद्यः, यथा---पाकनिक्षिप्तेषु घटादिषु रक्तता गुणः । अक्रियाजः=अनुत्पाद्यः, यथा---तेजः परमाणुषु स एव रक्तता गुणः । तदेवमाश्रयभेदेनोत्पाद्यानुत्पाद्यस्वभावो गुण इति नित्योत्पाद्यस्य कर्मणो गुणत्वाभावः।
एवमपि द्रव्यं गुणः प्राप्नोति, तदपि शरीरादिकं पादादिषु द्रव्येष्वेव पृथग्जातीयेषु निविशते संयोगविनाशे च ततोऽपैति, आधेयं चाक्रियाजम्,

अवयविद्रव्यस्योत्पाद्यत्वादाकाशादेश्चानुत्पाद्यत्वादित्यत आह---सोऽसत्त्वप्रकृतिर्गुण इति । य उक्तलक्षणोपेतः सत्त्वप्रकृतिर्न भवति=द्रव्यस्वभावको न भवति, स गुण इत्यर्थः । अत्रोत्तरार्द्धेनैव सर्वजातीनां व्यावृत्तिसिद्धेः पूर्वार्द्धं व्यर्थम्, जातीनां नित्यत्वेनोत्पाद्यत्वाभावात् ? नैतदेवम् ; असति पूर्वार्द्धे न जातिर्व्यावर्तते, यथा---तैजसानां परमाणूनां यद्रूपम्, यच्चेष्टकादिपाक्यद्रव्यगतम्---तदुभयं मिलतमुत्पाद्यानुत्पाद्यस्वभावमित्युभयोरपि गुणत्वं भवति, न पुनः प्रत्येकम्; उभयस्वभावत्वात् । तथा पाक्यद्रव्यरूपं जातिश्च---इत्युभयं मिलितमुत्पाद्यानुत्पाद्यस्वभावमिति जातिरपि गुणः स्यादेव, न हि सजातीयत्वे सतीति विशेषणमुपात्तम्, अतः पूर्वार्द्धेन जातिव्यावृत्तिः ।

नन्वेवमपि `पृथग्जातिषु दृश्यते' इत्यनेनैव सर्वजातिव्यावृत्तिसिद्धेः पूर्वकं विशेषणद्वयं व्यर्थमेव, तस्मात् `सत्त्वे निविशते' इति स्वभावकथनम् । ततः `अपैति' `पृथग्जातिषु दृश्यते' इति च विकल्पेन जातीर्व्यावर्तयतः, अपैतीत्यस्य च तत्रैव कियन्ताञ्चित्कालं स्थित्वा तमाधारं त्यजतीत्ययमर्थः ।

नन्वेवमपि `पृथग्जातिषु दृश्यते' इत्यनेनैव सर्वजातिव्यावृत्तिसिद्धेः पूर्वकं विशेषणद्वयं व्यर्थमेव, तस्मात् `सत्त्वे निविशते' इति स्वभावकथनम् । ततः `अपैति' `पृथग्जातिषु दृश्यते' इति च विकल्पेन जातीर्व्यावर्तयतः, अपैतीत्यस्य च तत्रैव कियन्ताञ्चित्कालं स्थित्वा तमाधारं त्यजतीत्ययमर्थः ।

तदेवम् `सत्त्वे निविशते अपैति आदेयश्चाक्रियाजश्च' इत्येकं लक्षणम् । `सत्त्वे निविशते पृथग्जातिषु' इत्यादिकं चापरमिति लक्षणद्वयमनुसर्त्तव्यम् ।।

बह्वादिभ्यश्च ।। 4.1.45 ।।

शक्तिः शस्त्र इति । शक्तिशब्दः शस्त्रेऽभिधेये ङीषमुत्पादयति---शक्तिः, शक्ती । शस्त्र इति किम् ? शक्तिः=सामर्थ्यम् । अन्ये शक्तिशस्त्री इति शब्दद्वयं पठन्ति---शस्त्रिः, शस्त्री । इतः प्राण्यङ्गादित्यादीनि त्रीणि वाक्यानि यथोत्तरमधिकविषयाणि । तत्रोत्तरं वाक्यद्वयम् `रात्रेश्चाजसौ' इत्यत्रैव व्याख्यातम् । इकारान्तात्प्राण्यङ्गवाचिनो वा ङीष् भवति---धमनिः, धमनी । `सर्वतोऽक्तिन्नर्थात्' इत्येव ङीषि सिद्धे शकट्यादीनामिकारान्तानां पाठः प्रपञ्चार्थः । पद्धतिशब्दः क्तिन्नन्तः, पादस्य हतिः पद्धतिः, `हिमकाषिहतिषु च' इति पद्भावः । अहन्निति पठ्यते, न स केवलः स्त्रियां वर्तते, तस्मात्तदन्तो बहुव्रीहिरुदाहार्यः---दीर्घमहरस्याः दीर्घाह्नी शरत्, पाठसामर्थ्यात् `अनुपसर्जनात्' इति न प्रवर्तते । अस्य ङीषो विकल्पितत्वाड् डाप्प्रतिषेधावपि भवतः, `अन उपधालोपिनः' इति ङीप् च ।

बहुशब्दो गुणवचन इति । अन्तोदात्तश्च `लङ्घिबंह्योर्नलोपश्च' इत्यप्रत्ययान्तः । किमर्थं तर्हि तस्येह पाठः ? इत्यत आह---तस्येति ।।

नित्यं छन्दसि ।। 4.1.46 ।।

नित्यग्रंहणमुत्तरार्थमिति । इह त्वारम्भसामर्थ्यादेव नित्यो विधिः सिद्धः, योगारम्भश्चिन्त्ययोजनः ।।

भुवश्च ।। 4.1.47 ।।

विभ्वी, प्रभ्वीति । `विप्रसंभ्यो ड्वसंज्ञायाम्' इति डुप्रत्ययान्ताद् ङीष् । स्वयंभूरिति । भवतेः क्विप् ।

ह्रस्वादेवेयमिति । यद्येवं `घेर्ङिति' इति गुणे कृते `भोः' इति निर्देशः प्राप्नोति तत्राह---सौत्रोऽयं निर्देश इति । गुणस्यैव कृतस्य छान्दस उवङादेश इत्यर्थः ।।

पुंयोगादाख्यायाम् ।। 4.1.48 ।।

पुंसा योगः पुंयोग इति । योगः = सम्बन्धः । पुंयोगाद्धेतोरिति । हेतौ पञ्चमीं दर्शयति । आख्याग्रहणं गुणभूतेनापि पुंसैव सम्बध्यते; अन्येन सम्बन्धासम्भवात् । गणकादयो हि शब्दाः पुंयोगात्स्त्रियां वर्तमाना न पुंयोगस्याख्या भवन्ति, स्त्रियां च पुंयोगमन्तरेण न प्रवर्तन्ते इति स्त्रिया अपि नाक्यास्तदाह---पुंस आख्याभूतमिति । बूतग्रहणेनैतद्दर्शयति---यत्प्रातिपदिकं प्राक् पुंसो वाचकमभूत्, सम्प्रति तु पुंयोगाद्धेतोः स्त्रियां वर्तत इति । गणकीत्यादि । गणयतीति गणकः, ण्वुल । प्रतिष्ठते प्रष्ठः, `प्रष्ठोऽग्रगामिनि' इति षत्वम् । कथं पुनरेते पुंशब्दाः ? इत्यत आह---पुंसि शब्दप्रवृत्तिनिमित्तस्य सम्भवादिति । गणयति प्रतिष्ठत इति व्युत्पत्त्या पुंसि रूढा एते, न स्त्री गणयति प्रतिष्ठते वा । महामात्रशब्दस्यापि प्रवृत्तिनिमित्तं हस्तिपकानामाज्ञापनम् । हस्तिपकाधिपतिर्हि महामात्रः । या तु स्वयं गणयति प्रतिष्ठते वा, न तस्यां पुंयोगाच्छब्दप्रवृत्तिः, अपि तर्हि स्वयमेव क्रियासम्बन्धादिति टापैव तत्र भाव्यम् । कथं तर्हि स्त्रियां प्रवृत्तिरित्य आह---तद्योगादिति । कोऽर्थः ?

तस्येदमिति सम्बन्धादिति चेत्तद्धितो भवेत् ।

ङीषेव बाधक- स्याच्चेन्नित्यं बाधः प्रसज्यते ।।

गणकस्येयमिति भेदसम्बन्धे विवक्षिते `तस्येदम्' इति तद्धितः प्राप्नोति । अथ नाप्राप्ते तद्धिते ङीषारभ्यमाणस्तस्य बाधक इत्युच्यते, कदाचिदपि तद्धितो न स्यात, उभयमपि त्विष्यते---प्राष्ठी, प्रष्ठीति ? स्यान्मतमेतत्---`एतदेव ङीष्विधानं ज्ञापकम्---भेद विवक्षायामपि तद्धितमन्तरेण प्रष्ठादयः स्त्रियां वर्त्तते' इति । तेन `न केवला प्रकृतिः प्रयोक्तव्या' इति नियमोऽत्र बाध्यते, सति हि तद्धिते प्राष्ठीत्यणि ङीबेव सिद्धः, तस्य चोदात्तनिवृत्तिस्वरेणोदात्तत्वमिति किं ङीष्विधानेनेति ? तन्न; येऽनीकारान्तास्तद्धिताः---भानोरियं भानवीयेति, तदर्थमेतत्स्यात् । एवं तर्ह्याख्याग्रहणं ज्ञापकम्---नात्र तद्धितोत्पत्तिरिति, न हि तद्धितान्तः प्रकृत्यर्थे पुंसि वर्तते ? एवमपि ज्ञापकेन तद्धितस्य नित्यं बाधात्प्राष्ठीति न स्यात् । तस्माद् दुष्ट एवायं पक्षः ।

एवं तर्हि यथा---मञ्चाः क्रोशन्ति, गौर्वाहीकः, गङ्गायां घोषः, यष्टीः प्रवेशयेत्यादौ तात्स्थात्ताद्धर्म्यात्तत्सामीप्यात्तत्साहचर्याच्चातस्मिन्नपि तत्त्वाध्यारोपेण तच्छब्दप्रवृत्तिस्तद्वदत्रापि प्रष्ठादिसाहचर्यात्तच्छब्दप्रवृत्तिर्भविष्यति ? तत्राभेदेन भेदसम्बन्धस्य निवृत्तत्वान्न तद्धितप्रसङ्गः । विवक्षिते च भेदे तद्धितोत्पत्त्या प्राष्ठीत्यादि भविष्यति ? तत्राहुः---यस्त्वया धर्मश्चरितव्यः सोऽनया सहेति भार्यायाः शास्त्रसिद्धं साहचर्यमिति तस्यामेवैतन्ङीष्विधानमिति । भट्टिकाव्ये तु

दुहितृष्वपि दृष्टः प्रयोगः---`कौसल्ययाऽसावि सुखेन रामः प्रक्केकयीतो भरतस्ततोऽभूत्' इति, केकयस्य दुहिता केकयी, जनपदशब्दादपत्यप्रत्यये तु कैकयीति प्राप्नोति, न च तस्य `आतश्च' इति लुक्, न प्राच्यभर्गादीति प्रतिषेधात्तत् । तस्मात्सोऽयमित्यभिसम्बन्ध इत्ययमेव पक्षो ग्राह्यः ।

यद्वा---यथा स्वामिदासौ पचत इति स्वामिनः संविधातृत्वात्पक्तृत्वम्, दासस्य तु साक्षात्; तथा पुरुषः साक्षात्प्रतिष्ठते स्त्र्यपि संविधातृत्वात्पुरुषगतायाः प्रस्थानक्रियायास्तस्यामारोपात्प्रतिष्ठत इति, तस्यामेव प्रष्ठशब्दो व्युत्पाद्यते, न तु पुरुषे व्युत्पादितः सन् तेन सहाभेदोपचारात्तस्यां वर्तते । न चैतावता पुंयोगादेव हेतोः स्त्रियां वर्तत इत्यस्य हानिः, साक्षात्स्वयमकर्तृत्वात् । अत्र पक्षे प्रस्थ इति स्थिते सुबन्तस्य समासः, सुप् च संख्यानिमित्तम्, प्रातिपदिकं च पूर्वं लिङ्गमभिधत्ते, पश्चात्सङ्ख्यामिति तन्निमित्तसुबपेक्षात्समासात्प्रागेवोत्तरपदात्स्थशब्दाट्टाप्प्रसङ्गः, न च स्थशब्दादप्यनेनैव ङीष् लभ्यते, प्रष्ठशब्दो हि पुंस आख्या, न तु स्थशब्दमात्रम्, ? नैष दोषः; `गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति कृदन्तावस्थायामेव समासः, सा पुंस आख्येति ङीष् भविष्यति । परिभाषाप्रयोजनानि `उपपदमतिङ्' इत्यत्र प्रतिपादितानि ।

देवदत्तेति । स्त्रिया एव कस्याश्चिदेषा संज्ञा---परिसृष्टा, प्रजातेति । प्रसूतेत्यर्थः । पुंयोगादेते शब्दाः स्त्रियां वर्तन्त इति । परिसर्गः, प्रसवः, प्रजन इत्यर्थान्तरम् । स च न पुंयोगमन्तरेण सम्भवति, तस्मात्पुंयोगाद्धेतोः स्त्रियां वर्तते । परिसृष्टा प्रजातेति । द्वौ प्रकृतौ । एते शब्दा इति बहुवचनं तु एवंजातीयकाः शब्दाः प्रसूतादयस्तदपेक्षं द्रष्टव्यम् । गोपालिकादीनामिति । सिद्धये इति शेषः ।

सूर्याद्देवतायां चाब्वक्तव्य इति । ङीष एव प्रतिषेधे वक्तव्यें चाब्विधानमन्तोदात्तार्थम् । सूर्यशब्दोऽयमाद्युदात्तः, तत्र टापि सति आद्युदात्तत्वमेवावतिष्ठेन । सूरीति । सूर्यस्य स्त्री मानुषी कुन्त्यादिः, `सूर्यतिष्य' इति यलोपः ।।

इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ।। 4.4.49 ।।

येषायिति । इन्द्रादीनां मृडान्तानां मातुलाचार्ययोश्च । अन्येषामिति । हिमादीनाम् ।

हिमारण्ययोर्महत्त्व इति । महत्त्वयोगेनानयोः स्त्रीत्वम्, अन्यत्र नपुंसकत्वम् । दुष्टो यव इति पाठः । यवानीति । जात्यन्तरमेवाभिधीयते, अयमेव च दोषो यदुत यवत्वजातेरभावे तदाकारानुकृतिः ।

यवनाल्लिप्यामिति । केचिज्जनपदिनो यवनास्तेषां लिपिः, `तस्येदम्' इत्यणो बाधको ङीष् । लिपिशब्दः स्त्रीलिङ्गः ।

उपाध्यायमातुलाभ्यां वेति । उपाध्यायमातुलाभ्यां यो ङीष् तत्सन्नियोगेनानयोर्वाऽऽनुगागमो भवतीति वक्तव्यमित्यर्थः । तत्रोपाध्यायस्याप्राप्तो मातुलस्य तु नित्यं प्राप्त आनुग्विकल्प्यते ।

आचार्यादणत्वं चेति । क्षुभ्नादिषु पठितव्यमित्युक्तं भवति ।

अर्यक्षत्त्रियाभ्यां वेति । ङीषानुकौ द्वावप्यप्राप्तौ विकल्प्येते । स्वार्थ एवायं विधिरिति । यदि तु पुंयोगेऽयं विधिः स्याच्छूद्रापि क्षत्त्रियस्य भार्या क्षत्त्रियाणी स्यात्, ब्राह्मणभार्या च क्षत्त्रियाणी न स्यात् । तस्मात्स्वार्थ एव स्त्रीत्वविशिष्टोऽयं विधिः ।

मुद्गलादिति । ङीषो लित्त्वादानुगाकारस्य लित्स्वरः । अथ किमर्थमानुग्विधीयते, न अनुगेवोच्येत, अकारोच्चारणसामर्थ्यादतो गुणे पररूपं बाधित्वा सवर्णदीर्घत्वं भविष्यति, अन्यथा नुगेवोच्येत, यथैव तर्हि पररूपं न भवति तथैव सवर्णदीर्घत्वमपि न स्यात् ? नैष दोषः; यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, तस्य तु विधेर्निमित्तमेव नासौ बाध्यते, तस्मादानुगेव वक्तव्यः ।

अपर आह---`इन्द्रमाचष्टे इन्द्रयति, इन्द्रयतेः क्विप्, णिलोपः, इन्द्रः स्त्री इन्द्राणी, अत्र दीर्घस्य श्रवणम्, दीर्घाच्चारणसामर्थ्यादत इत्यधिकारो बाध्यते' इति, एवमपि क्विबन्तः पुंस आख्या न भवति ।।

क्रीतात्करणपूर्वात् ।। 4.1.50 ।।

पूर्वशब्दोऽवयववचन इत्याह---करणं पूर्वमस्मिन्नित्यादि । व्यवस्थावाचिनि तु पूर्वशब्दे करणं पूर्वमस्मादिति वाच्यं स्यात् । एवं च क्रीतस्य करणवाचिशब्दान्तरमवयवो नोपपद्यत इति तद्व्यतिरिक्तमेव प्रातिपदिकं करणपूर्वत्वेन विशेष्यते, क्रीतशब्देनापि विशेषितस्यैव विशेषणात्तदन्तविधिरित्याह---क्रीतशब्दान्तात्प्रातिपदिकादिति । यदि तु व्यवस्थावाचिनं पूर्वशब्दमाश्रित्य क्रीतशब्दो विशेष्यति---करणं पूर्वमस्मादिति, ततो वाक्येऽपि स्याद्---अश्वेन क्रीतेति । तस्मादवयववाची पूर्वशब्दः, प्रातिपदिकं च विशेष्यमिति सम्यगुक्तम् । वस्त्रक्रीतिति । `गतिकारकोपपदानाम्' इति वचनात् प्रागेव सुबुत्पत्तेः क्रीतशब्देन सह समासः ।

चाबन्तेन समास इति । एकादेशस्य पूर्वं प्रत्यन्तवत्त्वात्कृदन्तताया अविघातादविरुद्धष्टाबन्तेन समासः । अथ टाबन्तेनापि समासे कस्मादेवात्र न भवति ? तत्राह---अत इतीति । ननूदाहरणवत्प्रागेव टाबुत्पत्तेरत्रापि समासः प्राप्नोति, वक्तव्यो वा विशेषः ? अत आह---गतिकारकोपपदानामित्यादि । न तत्र बहुलग्रहणमस्तीति चेत्तत्राह---कर्तृकरणे कृता बहुलमिति । `कर्तृकरणे कृता बहुलम्' इत्यनेन तावदत्र समासः, स च बहुलग्रहणात् प्राक् सुबुत्पत्तेः क्वचिद्भवति, क्वचिदुत्पन्ने सुपीति मन्यते । एतावतैव च बहुलं तदुच्यते इति सामन्येनोक्तम्, न पुनः `कर्तृकरणे कृता बहुलम्' इत्ययमेव समासः प्राक् सुबुत्पत्तरिष्यते । यथा तु भाष्यं तथा नैतदिष्यते ।।

क्तादल्पाख्यायाम् ।। 4.1.51 ।।

अल्पाख्यायामिति समुदायोपाधिरिति । ननु चाल्पैरभ्रैर्विलिप्तेति पूर्वपदार्थस्यैवाल्पता गम्यते, न विलिप्तार्थस्य ? एवं मन्यते---अभ्राणांमल्पत्वे सति तद्विलेपनस्याल्पत्वमवश्यम्भावीति । अभ्रविलिप्तीति । वृत्तौ गतार्थत्वादल्पशब्दस्याप्रयोगः ।

चन्दनानुलिप्तेति । बहुलेन चन्दनेनानुलिप्तेत्यर्थः । कृद्ग्रहणपरिभाषया समुदायस्य क्तान्तत्वम् ।।

बहुव्रीहेश्चान्तोदात्तात् ।। 4.1.52 ।।

बहुव्रीहिर्योऽन्तोदात्त इति । अत्र `क्तात्' इत्यनुवृत्तिसामर्थ्यात्प्रत्ययग्रहणपरिभाषा, कृद्ग्रहणपरिभाषा च न प्रवर्तते इति बहुव्रीहेः क्तान्तत्वम् । शङ्खभिन्निति । `निष्ठा' इति पूर्वनिपातो न भवति; `जातिकालसुखादिभ्यः परवचनम्' इति वचनात् । शङ्खादयो हि जातिवचनाः, अत एव `जातिकालसुखादिभ्यः' इत्यन्तोदात्तत्वं भवति । गलोत्कृत्तीति । `कृती छेदने', उत्पूर्वात् क्तः । गलमुत्कृत्तमस्या इति विग्रहः ।

पादपतितेति । `कर्तृकरणे कृता बहुलम्' इति समासः, थाथादिस्वरेणान्तोदात्तत्वम् ।

अन्तोदात्ताज्जातप्रतिषेध इति । अन्तोदात्ताद्बहुव्रीहेर्ङीष्विधाने जातशब्दान्तात्प्रतिषेधो वक्तव्यः, स त्वन्तग्रहणादेव सिद्धः । कथम् ? इहान्तग्रहणं न कर्तव्यम्, वर्णादनुदात्तादितिवद् उदात्तान्तादिति विज्ञास्यते, तत् क्रियते नित्ययोगे यथा बहुव्रीहिर्विज्ञायेत । दन्तजातादौ तु `वा जाते' इति विकल्पेनान्तोदात्तत्वम् ।

पाणिगृहीत्यादीनां विशेष इति । सिद्धये इति शेषः । अग्निसाक्षिकं यस्याः पाणिर्गृह्यते सा पाणिगृहीतीति भवति । कथञ्चिदिति । यथोक्तात्प्रकारादन्येन प्रकारेणेत्यर्थः ।

अबहुनञित्यादि । बह्वादिपूर्वपदाद्बहुव्रीहेर्ङीष् न भवतीति वक्तव्यमित्यर्थः । बहुकृतेति । बहुनि कृतान्यनयेति विग्रहः, `बहोर्नञ्वदुत्तरपदभूम्नि' इत्यन्तोदात्तत्वम् । अकृता, सुकृतेति । न विद्यते कृतमनया, शोभनं कृतमनयेति विग्रहः, `नञ्सुभ्याम्' इत्यन्तोदात्तत्वम् । मासजातेति । मासो जातोऽतीतोऽस्याः । सुखं जातं प्राप्तमनया, दुः खं जातमनयेति विग्रहः । सुखादयः `सुखादिभ्यः कर्तृवेदनायाम्' इत्यत्र पठिता गृह्यन्ते । अथ वा---बहुव्रीहेश्च जातिपूर्वादिति वक्तव्यम्, बहुव्रीहावन्तोदात्तनिमित्तेष्वन्येषु प्रतिषिद्धेषु जातिरेवान्तोदात्तनिमित्तं क्तान्तस्यावशिष्यते इति जातिग्रहणमेवात्र कर्तव्यमित्यर्तः ।।

अस्वाङ्गपूर्वपदाद्वा ।। 4.1.53 ।।

शार्ङ्गजग्धीत्यादि । शार्ङ्गं जग्धमनया, पलाण्डुर्भक्षितोऽनयेति विग्रहः । शार्ङ्गादिरभक्ष्यजातिः । सर्वत्र `जातिकालसुखादिभ्यः' इत्यन्तोदात्तत्वम् । वस्त्रच्छन्नेति । `छद अपवारणे' चुरादिः, `वा दान्तशान्त' इत्यादिनो छन्न शब्दो निपातितः, अत्र `अनाच्छादनात्' इति प्रतिषेधात्पूर्वपदप्रकृतिस्वरत्वमेव भवति ।

प्रवृद्धा चेत्यादिना विग्रहविशेषेण तत्पुरुषं दर्शयति ।।

स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् । अतिकेशीति । अतिक्रान्ता केशानिति तत्पुरुषः, `एकविभक्ति च' इति केशशब्दस्योपसर्जनत्वम् । अशिखेति । असत्युपसर्जनग्रहणेऽत्रैव प्राप्नोति, न मूलोदाहरणेषु; `अनुपसर्जनात्' इत्यधिकारात् । अथ बहुव्रीह्यधिकारादत्र न भविष्यतीत्युच्येत ? अतिकेशीत्यत्रापि तर्हि न स्यात् । `अङ्गात्र' इत्यादिभाष्येऽनुक्तमप्येतत्प्रयोगबाहुल्याद् वृत्तिकारेणोक्तम् ।

यद्यत्र स्वमङ्गं स्वाङ्गं गृह्येत---श्लक्ष्णमुखा शाला, अत्रापि प्राप्नोति, मुखस्य शालाङ्गत्वात् ; दीर्घकेशी रथ्येत्यत्र च न स्यात्, केशानां रथ्याङ्गत्वाभावात् ? तदव्याप्त्यतिव्याप्तिपरिहारार्थं स्वाङ्गं परिभाष्यते---अद्रवमिति । तत्र प्राणिस्थं स्वाङ्गमित्यनेन श्लक्ष्णमुखा शालेत्यत्र न भवति । एवमपि बहुकफा अत्र प्राप्नोति ? तदर्थमाह---अद्रवमिति । द्रवतीति द्रवम्, ततोऽन्यदद्रवम् । एवमपि बहुज्ञाना---अत्रापि प्राप्नोति ? अत आह---मूर्त्तिमदिति । असर्वगतद्रव्यपरिमाणा मूर्तिः, असर्वगतानि यानि द्रव्याणि तेषां यत्परिमाणं ह्रस्वत्यादि सा मूर्तिः; स्पर्शवद् द्रव्यपरिमाणं मूतिरित्यन्ये, सा यस्यास्ति तन्मूर्तिमत् । एवमपि बहुशोफा अत्र प्राप्नोति ? इत्यत आह---अविकारजमिति । विकारः=वातादिवैषम्यम्, ततो यज्जायते तन्न भवतीत्यविकारजम् । शोफस्तु श्वयथुसंज्ञको विकारजः । यदि प्राणिस्थं स्वाङ्गम्, रथ्यादिपरिगतानां केशानां स्वाङ्गत्वं न स्यात्, सम्प्रत्यप्राणिस्थत्वात्, ततश्च दीर्घकेशी रथ्येति न सिद्ध्यत्यत आह---अतत्स्थमिति । सम्प्रत्यप्राणिस्थमपि कदाचित्प्राणिनि दृष्टं चेत्तदपि स्वाङ्गं भवत्येवेत्यर्थः । एवमपि प्रतिमावयवानां मुखादीनां स्वाङ्गत्वं न प्राप्नोति, अप्राणिस्थत्वात्, ततश्च दीर्घमुखी प्रतिमेत्यत्र न सिद्ध्यति ? तत्राह--तेन चेदिति । अतत्स्थमित्यनुषङ्गः । अप्राणिस्थमपि मुखादि स्वाङ्गं तेन चेन्मुखादिना तदप्राणिद्रव्यं तथा युतं भवति यथा प्राणिद्रव्यमित्यर्थः । अन्येषां पाठः---तस्य चेत्तत्तथा युतमिति । तत्रार्थः---अप्राणिस्थमपि मुखादि स्वाङ्गं तस्य चेदप्राणिनः तन्मुखादि तथा युतं भवति, तादृशं संस्थानं भवति यादृशं संस्थानं प्राणिन इत्यर्थः ।।

नासिकोदरौष्ठजङ्घादन्तकर्णश्रृङ्गाच्च ।। 4.1.55 ।।

सहनिञ्विद्यमानलक्षणस्तु प्रतिषेधो भवत्येवेति । कथम् ? नासिकोदरयोस्तावदयं योगः पुरस्तादपवादन्यायेनानन्तरं बह्वज्लक्षणमेव प्रतिषेधं बाधते, ओष्ठादिष्वपि मध्येऽपवादन्यायेन पूर्वं संयोगोपधलक्षणंमेव प्रतिषेधं बाधते, न सहादिलक्षणम्; अतोऽसौ भवत्येव---सनासिका, अनासिका, विद्यमाननासिकेति । बिम्बोष्ठीति । `ओत्वोष्ठायोर्वा समासे पररूपं वक्तव्यम्' इति पररूपम् ।

कबरपुच्छीति । कबरम्=नानावर्णं पुच्छमस्याः सा मयूरी । मणिः पुच्छमस्याः मणिपुच्छी, विषं पुच्छमस्याः विषपुच्छी वृश्चिकी । उलूक इव पक्षोऽस्याः उलूक इव पुच्छमस्या इति विग्रहः ।।

न क्रोडादिबह्वचः ।। 4.1.56 ।।

कल्याणक्रोडेति । अश्वानामुरः क्रोडा, स्त्रीलिङ्गोऽयम् । तत्र बहुव्रीहौ पूर्वपदस्य पुंवद्भावः, उत्तरपदस्योपसर्जनह्रनस्वत्वम् । अल्याणनखेति । अग्रन्थोऽयम्; `नखमुखात्संज्ञायाम्' इति प्रतिषेधात्, असंज्ञायां ङीष इष्टत्वात्, तस्मात् कल्याणेखेति पाठः । उखेति हि पठ्यते---`क्रोडा बालसुरोखाः शफो गुदं भगगलौ च' इति ।।

सहनञ्विद्यमानपूर्वाच्च ।। 4.1.57 ।।
पूर्वग्रहणमकृत्वा `सहनञ्विद्यमानेभ्यः' इत्युच्यमाने सहादिभ्यः परं यत्स्वाङ्गं तदन्तान्ङीष् न भवतीत्यर्थो भवति, ततश्चेह प्रतिषेधः प्रसज्येत---विद्यमानं मुखमस्य विद्यमानमुखः, कल्याणो विद्यमानमुखोऽस्याः कल्याणविद्यमानमुखीति, भवति ह्येतद् यथोक्तविशेषणम्; इह च न स्याद्---विद्यमानकल्याणमुखेति, न ह्यत्र यथोक्तं विशेषणमस्ति, तस्मात्पूर्वग्रहणम् ।।
नखमुखात्संज्ञायाम् ।। 4.1.58 ।।
शूर्पणखेति । `पूर्वपदात्संज्ञायायामगः' इति णत्वम् । एवं च शूर्पणखा वा राक्षसी शूर्पनखी वा । यदि योगमात्रं न संज्ञा---शूर्पनखी, संज्ञायाम्---शूर्पणखा; न पुनः शूर्पणखीति णत्वङीषो समावेशः साधुः ।।
दीर्घजिह्वी चच्छन्दसि ।। 4.1.59 ।।
निपातनं नित्यार्थमिति । `दीर्घजिह्वात्' इत्युच्यमाने प्रकृतस्य ङीषो विकल्पितत्वादिहापि विकल्पो विज्ञायते ।।
दिक्पूर्वपदान्ङीप् ।। 4.1.60 ।।
दिक्पूर्वपदान्ङीषोऽनुदात्तत्वम्, `स्वाङ्गाच्च' इत्यादिना विहितस्य ङीष एवास्मिन्विषयेऽनुदात्तत्वं वक्तव्यम्, ङीब्विधाने ह्यन्यत्रापिङीष्विषयान्ङीप्प्रसङ्गः । अपूर्वे हि ङीपि विधीयमाने प्राग्गुल्फा, प्राग्जघनेति ङीष्विषयादन्यत्रापि ङीप्प्राप्नोति; ङीषः प्रतिषेधाभावात् ? इत्यस्मिन्पूर्वपक्षे इदमाह---विधिप्रतिषेधविषयः सर्वोऽप्यपेक्ष्यते इति । तत्र विधिविषयापेक्षायाः फलं दर्शयति---यत्र ङीष्विहित इति । स्वरे बिशेष इति । ङीपः पित्त्वादनुदात्तत्वं भवति, ङीषस्तु प्रत्ययाद्युदात्तत्वप्रसङ्गः । प्राङ्मुखेति । ङीपा मुक्ते `स्वाङ्गाच्चो पसर्जनात्' इति ङीषपि न भवति, कथम् ? उक्तमेतत्---`यत्रोत्सर्गापवादौ द्वावपि विकल्पितौ तत्रापवादेन मुक्ते उत्सर्गो न प्रवर्तते' इति ।
प्रतिषेधापेक्षायाः फलं दर्शयति---इह न भवतीति । एवं च कृत्वा वाक्यभेदः कर्त्तव्यः---दिक्पूर्वपदादसंयोगोपधस्वाङ्गान्तान्नासिकाद्यन्तान्ङीष् भवति; क्रोडादिबह्वजन्तात्तु नेति अपरः कल्पः, अत्र ङीषनुवर्तते, तस्य दिक्पूर्वपदादिति पञ्चम्या षष्ठी प्रकल्प्यते, दिक्पूर्वपदादुत्तरस्य ङीषो ङीबादेशो भवतीत्यर्थः । तेन यत्र ङीष् तत्रैव ङीबिति सिद्धम् । एवं चोत्तरत्र ङीषेव स्वर्यत इत्युपपन्नं भवति ।।
वाहः ।। 4.1.61 ।।
सामर्थ्यादिति । कर्मण्युपपदे वहेर्ण्विधानात्केवलस्य वाहः सम्भवो नास्तीत्येतत्सामर्थ्यम् । दित्यौहीति । `छन्दसिसहः', `वहश्च' इति ण्विः, उपधावृद्धिः, ङीषि `वाह ऊठ्', तत्र सम्प्रसारणमित्यनुवृत्तेः `सम्प्रसारणाच्च' इति पूर्वरूपत्वम्, `एत्येधत्यूठ्सु' इति वृद्धिः ।।
सख्यशिश्वीति भाषायाम् ।। 4.1.62 ।।
भाषायामित्युच्यते, तत्रैतन्न सिध्यति---सखी सप्तपदी भव, आ धेनवो धुनयन्तामशिश्वीरिति ? नैष दोः; इतिकरणोऽत्र क्रियते, स भिन्नक्रमो भाषायामित्यस्यानन्तरं द्रष्टव्यः, स च प्रकारे वर्तते, तेन छन्दस्यपि क्वचिद्भविष्यति । भाषाग्रहणं तु नित्यार्थम् ।।
जातेरस्त्रीविषयादयोपधात् ।। 4.1.63 ।।
अस्त्रीविषयादित्यनन्यभावे विषयशब्द इत्याह---न च स्त्रइयामिति । स्त्रियामेव यस्य नियमेन वृत्तिस्तत्स्त्रीविषयम्, ततोऽन्यदस्त्रीविषयमित्यर्थः । इह लौकिकजातिग्रहणे ब्राह्मणत्वादीनां गोत्रस्य च नाडायनादेर्जातित्वे वादिनां विप्रतिपत्तेः, चरणशब्दानां च कठादीनामध्ययनक्रियासम्बन्धनिबन्धनत्वेन पाचकादिवत्क्रियाशब्दत्वेनाव्याप्तिरित्यभिमतां जाति लक्षयति---आकृतिग्रहणा जातिरिति । गृह्यतेऽनेनेति ग्रहणमिति करणसामान्ये पदं संस्क्रियते, पश्चादाकृतिशब्दसमवधाने स्त्रीत्वं प्रतीयमानं बहिरङ्गत्वात् प्रत्ययस्य निमित्तं न भवति । ग्रहणमाकृतिर्यस्या इति ग्रहणरूपोद्देशेनाकृतिरूपता विधीयते, न त्वाकृतिरूपोद्देशेन ग्रहणरूपतेत्यर्थः । आकृतिः=संस्थानम्, सा ग्रहणं यस्याः साऽऽकृतिग्रहणा, अवयवसन्निवेशविशेषव्यङ्ग्येत्यर्थः । अनेन गोत्वादिजातिर्लक्षिता । ब्राह्मणत्वादिजातिस्तु न संगृहीता भवति, ब्राह्मणक्षत्त्रियादीनां संस्थानस्य सदृशत्वादिति तत्संग्रहायाऽऽह---लिङ्गानां चेति । सर्वाणि लिङ्गानि न भजतीत्ययमर्थो विवक्षितः । तत्र सर्वशब्दस्य लिङ्गापेक्षत्वेऽपिगमकत्वाद्भजो ण्विप्रत्ययः, समासश्च । `लिङ्गानाम्' इति कर्मणि षष्ठी । अप्राप्तप्रापणार्थं चेदं वचनम्, न त्वाकृतिग्रहणेत्यस्य सङ्कोचकम्; तेन तटादेः सर्वलिङ्गत्वेऽपि आकृतिग्रहणत्वाज्जातित्वं भवत्येव । इह कस्मान्न भवति---देवदत्तः, देवदत्तेति ?उपदेशापेक्षमिदं लक्षणम् । कोऽर्थः ? असर्वलिङ्गेषु येषु जातिवाचित्वमाचार्या उपदिशन्ति तेष्वेव भवतीत्यर्थः । आकृतिग्रहणाया जातेरेकत्वनित्यत्वप्रत्येकपरिसमाप्तत्वलक्षणान् धर्मानाह---सकृदिति । एकस्मिन्पिण्डे सकृदुपदिष्टा `अयं गौः' इति पिण्डान्तरे निर्ग्राह्या, निश्चेतुं शक्येत्यर्तः । यदि चैका न स्यात्, नैव गृह्येत । तथा नित्यत्वाभावेऽपि पिण्डेन सह विनाशात्पिण्डान्तरे न गृह्येत । यदि च प्रत्येकं सर्वात्मना परिसमाप्ता न स्यात्, तस्मिन्नपि तावत्पिण्डे सर्वात्मना न गृह्येत यत्राख्याता, किं पुनः पिण्डान्तरे ! कथं पुनरेकमेव वस्तु बहुत्र युगपत्कार्त्स्येन वर्तते, न हि देवदत्तस्तदानीमेव स्रुघ्ने भवति मधुरायां च ? दृश्यते चेत्को दोषः, न हि दृष्टेऽनुपपन्नं नाम ! गोत्रमिति । अपत्यमित्यर्थः । चरणशब्देन शाखाध्यायिनो गृह्यन्ते, गोत्रस्यानाकृतिग्रहणत्वात् सर्वलिड्गत्वाच्च पृथगुपादानम्, `नाडायनं नपुंसकम्' इति दर्शनात् । चरणशब्दस्त्वध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात्क्रियाशब्द एव, न जातिशब्दः ।
कुक्कुटी, सूकरीति । आकृतिग्रहणाया जातेरुदाहरणम् । ब्राह्मणई, वृषलीत्यसर्वलिङ्गायाः । तत्र ब्राह्मणीति रूपोदाहरणम् । शार्ङ्गरवादिष्वस्य पाठाद् वृषलीत्येतदेव ङीप उदाहरणम् । नाडायनी, चारायणीति । गोत्रलक्षणायाः `नडादिभ्यः फक्' । अपत्यमात्रस्य ग्रहणादनन्तरापत्येऽपि भवति---अवन्ती,

कुन्तीति, `इतो मनुष्यजातेः' इति ङीष्भवति । इह तु कुलस्यापत्यं कुलीना ब्राह्मणीति ङीष् न भवति; अजादिषु दर्शनादित्याहुः । कठीति । कठेन प्रोक्तम्, वैशम्पायनान्तेवासित्वाण्णिनिः, तस्य `कठचरकात्' इति लुक्, ततः `तदधीते' इत्यण्, तस्य `प्रोक्ताल्लुक्' इति लुक् । बहवृचीति । बह्व्य ऋचोऽस्या इति बहुव्रीहिः, `बह्वृश्चरणाख्यायाम्' इत्यकारः समासान्तः । कथं पुनः स्त्री नामाधीते ? मा नामाधिगीष्ट, तद्वंश्यत्वात्तु ताच्छद्ब्यं भविष्यति, यथा---अनधीयमाने माणवके ।
अत्रापरं जातिलक्षणमुक्तं भाष्ये---
प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः ।
असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः ।। इति ।
सत्त्वस्य प्रादुर्भावविनाशाभ्यां याऽऽविर्भावतिरोभावो प्राप्नोति, यावद्द्रव्यभाविनीत्यर्थः । गुणैश्च युगपद् द्रव्येण सम्बध्यते यथा निर्गुणं द्रव्यं न भवति, तथा जातिरहितमपीत्यर्थः । बह्वर्थामिति । अर्थशब्दो विषयवाची, बहुविषयां बहुव्यक्तिव्यापिनीमित्यर्थः । असर्वलिङ्गामिति । पूर्वल्लक्षणान्तरम् । तत्र यथा पूर्वलक्षणं तथा कुमारीभार्या इति भवितव्यम्, कथम् ? कौमारमयावद्द्रव्यभाव्यपि आकृतिग्रहणत्वाद्भवनति जातिः, ततश्च `जातेश्च' इति पुंबद्भावप्रतिषेधः । वृद्धा, स्थविरेत्यादौ च जातिलक्षणो ङीष्प्राप्नोति, यथा पुनरुत्तरं तथा कौमारादिकं जातिर्न भवति; अयावद्द्रव्यभावित्वात् । तत्र पूर्वकं लक्षणं भाष्यकारस्याभिमतम्, नोत्तरम्; अपर आहेत्यभिधानात् । तथा च ङ्याप्सूत्रे युवतितरेत्यत्र `तसिलादिषु' इति प्राप्तस्य पुंवद्भावस्य `जातेश्च' इति निषेध आश्रितः । अत एव वृत्तिकारेणाप्येतदेव लक्षणमुपन्यस्तमिति केचिदाहुः । एवमपि युवजानिरित्यत्र पुंवद्भावो न प्राप्नोति, तस्माद् द्वितीयमेव लक्षणं साधीयो मन्यामहे । अत एव वृद्धा, स्थविरेति जातिलक्षणो ङीष्न भवति । युवतितरेत्यत्र तु भाष्यकारप्रयोगात्पुंवद्भावाभावः ।
मुण्डेति । गुणशब्दोऽयम् । मक्षिकेति । स्त्रियामेवायं नियतः । इह कस्मान्न भवति---माला, बलाकेति ? मालाशब्दो मलनं माल इति घञन्तः पुंल्लिङ्गः, क्षेत्रविशेषे नपुंसकः, स्रजि स्त्रीलिङ्गः । बलाकाशब्दो हि बलां कायतीति यौगिकः सर्वलिङ्गः, बकजातिवचनः स्त्रीलिङ्गः । नात्र यथाकथञ्चिदस्त्रीलिङ्गविषयत्वं विवक्षितम् , किं तर्हि ? यस्मिन्प्रवृत्तिनिमित्ते स्त्रीलिङ्गस्तस्मिन्नेव निमित्ते यल्लिङ्गान्तरेऽपि वर्त्तते तदस्त्रीविषयम् । यथा पुनरयं शब्दार्थस्तथा `स्त्रियाः पुंवत्' इत्यत्र वक्ष्यामः । तेन निमित्तभेदेन नानालिङ्गेषु नायं विधिर्भवति । यद्येवम्, द्रोणी, वुटी, पात्रीत्यत्र न प्राप्नोति ? द्रोणशब्दः प्रमाणविशेषे पुंल्लिङ्गः; गवादिन्यां तु स्त्रीलिङ्गः; कुटशब्दो घटे पुंल्लिङ्गः, गेहे तु स्त्रीलिङ्गः; गौरादिपाठात्सिद्धम् ।
हयगवयेत्यादि । गौरादिष्विदानीन्तनैर्हयादयः प्रक्षिप्ता इति वार्तिककारवचनाद्विज्ञायते ।।
पाककर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च ।। 4.1.64 ।।
स्त्रीविषयत्वादेतेषामिति । पूर्वत्र समानायामाकृतौ यदस्त्रीविषयमित्याश्रयणान्निमित्तभेदेन नानालिङ्गानामेषां न सिध्यतीति भावः । ओदनपाकादयः संज्ञाशब्दा यथाकथञ्चिद्व्युत्पाद्याः ।।
इतो मनुष्यजातेः ।। 4.1.65 ।।
अवन्ती, कुन्तीति । अवन्ति-कुन्तिशब्दाभ्यामपत्येऽर्थे `वृद्धेत्कोसलाजादाञ्ञ्यङ्' तस्य `स्त्रियामवन्तिकुन्तिकुरुभ्यश्च' इति लुक् । दाक्षई, ल्पाक्षीति । `अत इञ्' ।
विट्, दरदिति । विट्शब्दाज्जनपदशब्दात्क्षत्त्रियादञ्, दरच्छब्दाद् `द्व्यञ्मगध' इत्यादिनाण, तयोः `अतश्च' इति लुक् । उदाहरणसिद्ध्यर्थमेव `अतः' इत्यस्यानुवृत्तिर्न शक्याऽऽश्रयितुमित्यत्रापि प्रसङ्गः ।
औदमेयीति । उदकं मेयमस्य उदमेयः, `उदकस्योदः संज्ञायाम्' इत्युदभावः, `तस्यापत्यम्', `अत इञ्'।
सौतङ्गमी, मौनिचित्तीति । सुतङ्गममुनिचित्तशब्दाभ्यां `तेन निर्वृत्तम्' इत्यत्रार्थे इञ्प्रत्ययः ।।
ऊङुतः ।। 4.1.66 ।।
कुरुरिति । `कुरुनादिभ्यो ण्यः' तस्य `स्त्रियामवन्ति' इत्यादिना लुक् । ब्रह्मबन्धूर्जीवबन्धूरिति । वृत्तस्वाध्यायहीनाया ब्राह्मणजातावेतौ बहुव्रीही वर्तेते । ङकार इत्यादि । `नोधात्वोः' इत्युच्यमाने, यवाग्वा, यवाग्वै---अत्रापि `उदात्तयणो हल्पूर्वात्' इति प्राप्तस्य विभक्त्युदात्तस्य निषेधः स्यात्, वर्णग्रहणे ह्यर्थवद्ग्रहणपरिभाषा नोपतिष्ठते । अथ दीर्घोच्चारणं किमर्थम्, न `उङुतः' इत्येवोच्येत, सवर्णदीर्घत्वेन सिद्धम् ? न सिध्यति; सत्यपि सवर्णदीघत्वे, `गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वं प्राप्नोति । न प्राप्नोति, किं कारणम् ? `उभयत आश्रयणे नान्तादिवत्', तथा हि एकादेशस्यान्तवत्त्वेन प्रतिपदिकसंज्ञा सम्पाद्या, `अप्रत्ययः' इति निषेधात् । आदिवत्त्वेन च स्त्रीप्रत्ययत्वं सम्पाद्यम् । इति तर्हि ब्रह्मबन्धूच्छत्त्रम्---षत्वतुकोरसिद्धत्वाद् ह्रस्वलक्षणो नित्यस्तुक् प्रसज्येत, दीर्घोच्चारणात्त्वेकादेशस्यासिद्धत्वेऽपि दीर्घ एवायमिति `दीर्घात्पदान्ताद्वा' इति विकल्पः सिध्यति ? एतदपि नास्ति प्रयोजनम् ; पदान्तपदाद्योरेकादेशोऽसिद्धः, न चैप पदान्तपदाद्योरेकादेशः । तस्मादनर्थकं दीर्घोच्चारणम् ? इत्याशङ्क्याह---दीर्घोच्चारणं कपो बाधनार्थमिति । `शेषाद्विभाषआ' इति कपोऽवकाशः---अयवकः, अव्रीहिकः, ऊङोऽवकाशः--कुरूरिति; ब्रह्मबन्ध्वादेर्बहुव्रीहेरुभयप्रसङ्गे परत्वात्कप् प्राप्नोति, दीर्घोच्चारणान्न भवित, कथम् ? उकारद्वयं दीर्घेण निर्दिष्टम्, तत्र द्वितीय उकारः कपो बाधनार्थः । अध्वर्युरिति । अध्वरं यातीति `मृगय्वादयश्च' इत्युणादिषु दर्शनात् कुप्रत्ययोऽध्वरशब्दस्यान्तलोपश्च । चरणलक्षणेयं जातिः, अध्वर्युशाखाध्यायिनि वंशे भवेत्यर्थः ।
अप्राणिजातेश्चेति । अत्र `उतः' इति नापेक्ष्यते तेनालाबू-कर्कन्धूशब्दाभ्यां दीर्घान्ताभ्यामपि भवति । `कृषिचमितनिधनिसजिखर्जिभ्य ऊः' इति वर्तमाने

`णित्कशिपद्यर्तेः' इत्यतो णिदिति च, `नञि लम्बेर्नलोपश्च', `लबि अवुस्रंसने', तस्मान्नञ्पूर्वादूप्रत्ययो भवति नलोपश्च णित्त्वाद् वृद्धिः, `अन्दूदृम्भूकर्कन्धूः' इति निपातनादूकारान्तः कर्कन्धूशब्दः । एवमलाबू-कर्कन्धूशब्दौ दीर्घान्तौ । ऊङ्विधानमलाब्वा, कर्कन्ध्वा इत्यादौ `नोङ्धात्वोः' इति विभक्त्युदात्तत्वप्रतिषेधार्थम् । कृकवाकुरिति । `कृके वचः कश्च' कृकशब्द उपपदे वकेर्धातोरुण् प्रत्ययो भवति, कश्चनान्तादेशः । रज्जुरिति । `सृजेरसुम् च', आदिलोपः प्रकृतः, सृजेरु प्रत्ययः, आदेश्च लोपोऽसुगागमश्च, ऋतो यणादेशः, सकारस्य जश्त्वचर्त्वे, सृज्यतेऽसौ रज्जुरिति । हनुरिति । `युस्निहि' इत्यादिना हन्तेरुप्रत्ययः ।।

पङ्गोश्च ।। 4.1.68 ।।

श्वशुरस्येति । पुंयोगलक्षणस्य ङीषोऽपवाद ऊङ् विधीयते, `शावशेराप्तौ' शुशब्देऽश्नोतेरुरन् प्रत्ययो भवति । किमिदं शु इति ? आशुशब्दस्यायमादिलोपो निपातितः । आश्वाप्तव्यः श्वशुरः, तस्य स्त्री श्वश्रूः, `श्वशुरः श्वववा' इत्यदिनिपातनाद्विभक्त्यादि प्रातिपदिककार्यं भवति ।।

ऊरूत्तरपदादौपम्ये ।। 4.1.69 ।।

उपमीयतेऽनयेत्युपमा, तद्भाव औपम्यम् । कथं `विचकरे च करेणुकरोरुभिः' इति ? निरङ्कुशाः कवयः; `करेण वरोरुभिः' इति पाठः---करेण विचकरे वरोरुभिरिति ।।

संहितशफलणक्षवामादेश्च ।। 4.1.70 ।।

संहितशब्दः सहितपर्यायः, लक्षणशब्दोऽर्शआद्यच्प्रत्ययान्तः, वामशब्दः शोभनपर्यायः ।

सहितसहाभ्यां चेति । `समो वा हिततत्तयोः' इति मलोपे सति यः सहितशब्दस्तस्य संहितग्रहणेनैव सिद्धम्, एकदेशविकृतस्यानन्यत्वात् । यस्तु सह हितेन वर्तते इति व्युत्पन्नः सहितशब्दस्तस्येदं ग्रहणमित्याहुः । सहोरूरिति । सहेते इति सहौ, तादृशावूरू यस्या इत्यर्थः । विद्यमानस्य वा सहशब्दस्य ऊर्वतिशयप्रतिपादनाय प्रयोगः ।।

कद्रुकमण्डल्वोश्छन्दसि ।। 4.1.71 ।।

गुग्गुल्वादीनां छन्दसि व्यत्ययेन स्त्रीत्वम् । पतयालुशब्दः `स्पृहिगृहि' इत्यादिनाऽऽलुजन्तः ।।

शाङ्गर्रवाद्यञो ङीन् ।। 4.1.73 ।।

एतेऽणन्त इति । श्रृङ्गरु, कपटु, गुग्गुलु, ब्रह्मन्---इत्येतेभ्यः प्राग्दीव्यतोऽण्, गोतमशब्दादृष्यण्,, गौरादिष्वप्ययं पठितः । एते ढगन्ता इति । बाहुल्यादेवमुक्तम् । कणण्डलुशब्दाच्चतुष्पाद्भ्यो ढञ्, इतरेभ्यस्तु शुभ्रादिलक्षणो ढक् । एतौ फगन्ताविति । वात्स्यशब्दाद् गर्गादियञन्ताद्यूनि `यञिञोश्च' इति फक् । ननु न स्त्रियां युवसंज्ञा, `गोत्राद्यून्यस्त्रियाम्' इति वचनात्, गोत्रे च `एको गोत्रे' इति नियमः ? एवं तर्हि वात्स्यायनशब्दस्यास्मिन् गणे पाठसामर्थ्यात्स्त्रियां युवसंज्ञा भविष्यति, गोत्र एव वा प्रत्ययद्वयम् । मुञ्जशब्दो नडादिः । जातिरिति । गोत्रलक्षणा । ढगन्त इति । कीकसाशब्दः शुभ्रादिः । ञ्यङन्ताविति । `वृद्धेत्कोसलाजादाञ्ञ्यङ्' इति कवि-शिविभ्यां ञ्यङ्, `यङश्चाप्' अत्र प्राप्नोति । एहि, पर्येहीति । `ईह चेष्टायाम्' आङ्पूर्वात्पर्याङ्पूर्वाच्च `सर्वधातुभ्य इन्' इतीन् प्रत्ययः, अश्मरथशब्दो गर्गादिः, उदपानशब्दः शुण्डिकादिः, उत्सादिश्च, तत्राह---शुण्डिकाद्यणन्तः प्रयोजयतीति । अन्ते तु ङीपो ङीनो वा नास्ति विशेषः । जातिरिति । अराल--चण्डालयोरसर्वलिङ्गत्वाज्जातित्वम् । वतण्डशब्दस्य गोत्रत्वात् । वतण्डस्यापत्यं स्त्री `वतण्डाच्च' इति यञ्, `लुक् स्त्रियाम्' इति तस्य लुक् । भोगवद्गोरिमतोरिति । मत्वन्तत्वात् `उगितश्च' इति ङीपि प्राप्ते वचनम् । ननु भोगशब्दो घञन्तः, गौरिशब्दः `अत इञ्' इतीञन्तः, तौ ञित्स्वरेणाद्युदात्तौ, ताभ्यां मतुप्, पित्त्वादनुदात्तः, ततश्च न ङीब्ङीनोरत्रास्ति विशेषः ? तत्राह---घादिषु नित्यमिति । उगिल्लक्षणे ङीपि सति `नद्याः शेषस्यान्यतरस्याम्', `उगितश्च' इति विकल्पेन ह्रस्वत्वं स्यात्, ङीनि तु सति `घरूपकल्प' इति नित्यं सम्भवति । कथं भवति, यावता उगितः परा या नदी तस्या विकल्पो विहितः, ङीनपि चोगितः परा नदी, बोगवद्गौरिमतोरुगित्त्वात् ? नैष दोषः; `उगितश्च' इति इत्यर्थेऽयं चशब्दः, उगित इत्येवमुगित्संशब्दनेन या नदी विहिता न चानेन विहितो ङीनेवं विहिता नदी भवति । यथा तु `युवोरनाकौ' इत्यत्र भाष्यम्, तथोगितः परा या नदीत्येतदेव स्थितम् । संज्ञाया अन्यत्र हीबेव भवति ह्रस्वश्च विकल्पितः ।

नृनरयोर्वृद्धिश्चेति । नृशब्दादृन्नेभ्यो ङीपि, नरशब्दाज्जातिलक्षणे ङीषि प्राप्ते वचनम् । वृद्धिश्चेति, वक्ष्यामीति च अन्यतरस्य ग्रहणेऽपि नारीतीष्टं सिद्धम्, अन्यतरस्यानिष्टनिवृत्त्यर्थं तु द्वयोरुपादानम् । तत्र नरशब्देऽन्त्यस्य वृद्धौ सत्यां यस्येतिलोपादानर्थक्यमिति यस्येति लोपस्तावद्भवति, तत्र कृते रेफस्य वृद्धिः प्राप्नोति, का ? अविशेष्त्पर्यायेण सर्वैव ? नैष दोषः; `स्थानेऽन्तरतमः' इत्यत्रान्तरतमे स्थाने षष्ठीत्यपि पक्षो व्याख्यातः, ततो नृनरयोरिति यैषा षष्ठी सा वृद्धेरन्तरतमे नृनरावयवे स्थानिन्यनुसंह्रियते । यत्र च षष्ठी तत्रादेश इत्यकारस्यैव भविष्यति । अत्र पुत्त्रशब्दं केचित्पठन्ति, न स केवलः स्त्रियां वर्तत इति तदन्तस्य समासस्य ग्रहणम् । तत्रापि बहुपुत्त्रा, अतिपुत्त्रेत्यादावनुपसर्जनाधिकारान्न भवति । क्व तर्हि भवति ? पुत्त्रप्रधाने । ननु पुत्त्रप्रधानं समासे सैव पुंल्लिङ्गता ? सत्यम् ; `सूतोग्रराजभोजमेरुभ्यो दुहितुः पुत्रड् वा' इति वातिककारेण यत्र पुत्रडादेशो विहितस्तान्युदाहरणानि । सूतपुत्त्री, राजपुत्त्रीति---अत्र स्वभावात्पुत्त्रशब्दो दुहितृशब्देन समानार्थः, न पुत्रडादेश इति पठतामभिप्रायः ।

अन्ये तु `प्रद्योतपुत्त्री शैलपुत्त्रीति वार्त्तिकविषयादन्यदेव ङीन उदाहरणम्, पुत्रडादेशस्तु ङीपि स्वरार्थः' इति मन्यन्ते, नात्राप्तभाषितमस्ति ।।

यङश्चाप् ।। 4.1.74 ।।

पकारः ङ्याप्प्रातिपदिकात्' इत्यत्र सामान्यग्रहणार्थः, स्वरस्तु परत्वाच्चित्स्वर एव भवति । ञ्यङः ष्यङश्च सामान्यग्रहणमिति । यद्यपि ष्यङ्स्त्रियामेव

विधीयते, तथापि डित्करणसामर्थ्यात्तस्याप्यत्र ग्रहणमिति भावः । आम्बष्ट्येत्यादि । अम्बष्ठादिभ्योऽपत्ये `वृद्धेत्कोसलाजादाञ्ञ्यङ्' । कारीषगन्ध्येति । स्वादिसूत्रे व्युत्पादितम् । वराहशब्दात् `अत इञ्'। शर्कराक्ष-पूतिमाषगोकक्षशब्दा गर्गादयः ।

ननु च गौकाक्ष्यशब्दः क्रौड्यादिषु पठ्यते, ततः ष्यङिः `यङ' इत्येव चाप् सिद्धः ? मा पाठि, तत्र `षाच्च यञः' इत्यनेनैव शर्कराक्ष्यादिवद् गौकाक्ष्येति सिद्धम् । यद्येवम्, गौकाक्षीपुत्रः---ष्यङः सम्प्रसारणं न प्राप्नोति ? नात्र सम्प्रसारणमिष्यते, गौकाक्ष्यापुत्र इत्येव भवति । एवं हि सौनागाः पठन्ति---`ष्यङः सम्प्रसारणे गौकक्ष्यायाः प्रतिषेधः' ।।

तद्धिताः ।। 4.1.76 ।।

युवतिरिति । तद्धितसंज्ञायां सत्यां `कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञा भवति । बहुवचनमित्यादि । `प्रत्ययः' इत्यादिवदेकवचन एव कर्तव्ये बहुवचनेनसंज्ञिनां बहुत्वसूचनादनुक्तोऽपि तद्धितः परिगृह्यत इति मन्यते । स्त्रीप्रत्ययानामादितस्तद्धिताधिकारे क्रियमाणे `प्राचां ष्फ तद्धितः' इत्यत्र तद्धितग्रहणं न कर्तव्यम्, `यस्येति च' इत्यत्र चकारग्रहणम्, `ङ्याप्प्रातिपदिकात्' इत्यत्र तु तदन्तात्तद्धितविधानार्थं ङ्याव्ग्रहणं कर्तव्यमेव ? सत्यम्; ङीबादीनां ङकारस्येत्संज्ञा न स्यात्, `अतद्धिते' इति प्रतिषेधात् । सत्यामपि वा पट्वीत्यादौ `ओर्गुणः' स्यात् । तस्माद्यथान्यासमेवास्तु ।।

यूनस्तिः ।। 4.1.77 ।।

युवतिरिति । त्यन्तात् `इतो मनुष्यजातेः' इति ङीष्न भवति; तिप्रत्ययेनैव स्त्रीत्वस्योक्तत्वात् , यौवनस्य वाऽजातित्वात् ।।

अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ।। 4.1.78 ।।

इह सम्भवे व्यभिचारे च सति विशेषणविशेष्यभावो भवति, तेन `गोत्रे' `अनार्षयोः' इति चाणिञ्मात्रस्य विशेषणम्, `गुरूपोत्तमयोः' इत्येतत्तदन्तस्य, तदाह---गोत्रे यावणिञौ विहितावनार्षौ तदन्तयोरिति । यद्यप्यपत्याधइकारादन्यत्र लौकिकस्य गोत्रस्य ग्रहणम्, तथाप्यत्र पारिभाषिकस्य ग्रहणम् ; लौकिकग्रहणस्य `अनार्षयोः' इति पर्युदासाश्रयणेनैव सिद्धत्वात् । इहायं ष्यङ् प्रत्ययो वा स्यात् ? आदेशो वा ? प्रत्ययविधावपि हि गापोष्टक्' इत्यादौ षष्ठीदर्शनात्, उत्तरत्र `क्रौड्यादिभ्यश्च' इति पञ्चमीनिर्देशाच्च प्रत्ययपक्षोऽपि सम्भवत्येव । तत्राद्यपक्षे उदमेघस्यापत्यं स्त्री, `अत इञ्', औदमेघि इति स्थिते तदन्तात् ष्यङि विहिते औदमेघ्यायाश्छात्त्रा औदमेघाश्छात्त्राः, औदमेघ्यानां सङ्घः, `इञश्च' `सङ्घाङ्कलक्षण' इति च इञन्ताद्विधीयमानोऽण् न स्यात् । अथापि लिङ्गविशिष्टपरिभाषया इञन्ताद्विधीयमानोऽण् ष्यङन्तादपि स्यात्, एवमपि `आपत्यस्य च तद्धितेऽनाति' इति यलोपो न स्यात्, ष्यङोऽनापत्यत्वात् ? नैष दोः ; `भस्याढे तद्धिते' इति पुंवद्भावात्प्रागेवण उत्पत्तेः ष्यङ्निवर्तते, तस्मिन्निवृत्ते `इञः' इत्यण्भविष्यति, यकारस्य च श्रवणंन भविष्यति । इह तर्ह्यौदमेघ्याया उपत्यम् `स्त्रीभ्यो ढक्', औदमेघेय इति यलोपो न स्यात्, पुंवद्भावश्च नास्ति, `अढे' इति प्रतिषेधात् ? इतीममाद्ये पक्षे दोषं दृष्ट्वा द्वितीयं पक्षमाश्रित्याह---ष्यङादेशो भवतीति ।

नन्वस्मिन्पक्षे उडुलोम्नोऽपत्यं स्त्री बाह्वादिषु लोमन्शब्दस्य पाठात्केवलस्यापत्येन योगाभावात्सामर्थ्यात्तदन्तस्य ग्रहणादिञि तस्य ष्यङादेशे सति `ये चाभावकर्मणोः' इति प्रकृतिभावात् `नस्तद्धिते' इति टिलोपो न स्यात्, ततश्चौडुलोमन्येति स्यात्, औडुलोम्येति चेष्यते, प्रत्ययपक्षे इञा व्यवधानान्नास्ति प्रकृतिभावः, यस्येति लोपेऽपि कृते स्थानिद्भावाद्व्यवधानमेव ? नैष दोषः ; नात्राकृते टिलोपे ष्यङ् प्राप्नोति, किं कारणम् ? अगुरूपोत्तमत्वात्, तस्मादिञ्येव टिलोपः, ततो गुरूपोत्तमत्वम्, ततः ष्यङित्यानुपूर्व्यात्सिद्धम् । अयं तर्हि दोषः---प्रत्ययग्रहणपरिभाषयाऽणिञन्तयोर्ग्रहणम्, तयोर्विधीयमानः ष्यङनेकाल्त्वात्सर्वादेशः प्राप्नोति ? `ङिच्च' इत्यन्त्यस्य भविष्यति, तातङ्न्यायेन सर्वादेशः प्राप्नोति । यत्र हि ङकारस्य प्रयोजनान्तरमपि सम्भाव्यते तत्र `ङिच्च' इत्येतदनन्यार्थङित्त्वेष्वनङादिषु सावकाशं बाधित्वा `अनेकाल्शित्सर्वस्य' इत्येतद्भवति, यथा तातङि । इह च सर्वादेशत्वेऽपि `यङश्चाप्' इति विशेषणं प्रयोजनं सम्भवति, तस्मात्सर्वादेशः प्राप्नोति, तत्राह---निर्दिश्यमानस्येत्यादि ।

यद्ययमुत्तमशब्दो व्युत्पन्नः स्यात्, तदोच्छब्दात्तमपि कृते `किमेत्तिङव्ययघाद्' इत्याम्प्राप्नोति ? न वा द्रव्यप्रकर्षत्वात् । उच्छब्दो हि ससाधनक्रियावचन उद्गते वर्तते, तस्य क्रियाद्वारकः प्रकर्षः---अतिशयेनोद्गत इति, ततश्च द्रव्यनिष्ठत्वात्प्रकर्षस्य `अद्रव्यप्रकर्षे' इति प्रतिषेधो भविष्यति । एवमपि तमपः पित्त्वादाद्युदात्तत्वप्रसङ्गः ? न वोञ्छादिषु पाठात्, उञ्छादिषु हि उत्तमशश्वत्तमौ सर्वत्रेति पठ्यते । एवमपि स तावत्पाठः कतेव्यः, क्रियामात्रस्य च प्रकर्षे उत्तमामित्याम्प्रसङ्गश्च, अतोऽनभिदानावुच्छब्दात्तमपोऽनुत्पत्तिरेषितव्या । किञ्चव्युत्पन्न उत्तमशब्दश्चतुष्प्रभृतिषु वर्तते, कथम् ? ऊर्ध्वमुच्चारित उद्गतः, स च प्रथमोच्चारितमपेक्षते, ततश्च त्रिषु द्वावुद्गतौ, तयोश्च द्वितीयोऽतिशयेनोद्गतः, द्वयोश्च सम्प्रधारणायां तरपा भाव्यम्, ततश्च यत्रोद्गता एव त्रयस्तत्रैव स्यात्---कारीषगन्ध्येत्यादौ; वाराह्येत्यादौ तु न स्यात् । तदेवं व्युत्पत्तिपक्षे दोषं पश्यन्नव्युत्पत्तिपक्षमाश्रित्याह---उत्तमशब्द इति । स्वाभावादिति । न व्युत्पत्तिवशादित्यरयथः । त्रिप्रभृतीनामिति वचनाद्दाक्षी प्लाक्षीत्यादौ न भवति ।

टिड्ढाणञिति ङीबेव भवतीति । प्राप्तिमात्राभिप्रायेणेदमुक्तम् । अत्र हि जातित्वात् `शार्ङ्गरवाद्यञः' इति ङीना भाव्यम् । वासिष्ठीति । `ऋष्यन्धक' इत्यादिनाण् ।

आहिच्छत्रीति । जातादावर्थेऽण् । एवमत्रादेशपक्षः स्थापितः ।

यद्येवम्, हस्तिशिरसोऽपत्यम्, बाह्वादित्वादिञ्, `अचि शीर्षः' इति शीर्षादेशः, इञः ष्यङादेशः, ततः स्थानिवद्भावेन शीर्षशब्दस्य शिरोग्रहणेन ग्रहणाद् `ये च तद्धिते' इति शीर्षन्नादेशः प्राप्नोति ? अस्तु; `नस्तद्धिते' इति टिलोपो भविष्यति । `ये चाभावकर्मणोः' इति प्रकृतिभावः प्राप्नोति, ततश्च हास्तिशीर्षण्येति स्यात्, प्रत्ययपक्षे त्विञाऽव्यवहितत्वान्नास्ति शीर्षन्नादेशः, यस्येति लोपेऽपि कृते स्थानिवद्भावाद्व्यवधानमेव, तेन हास्तिशीर्षेति सिद्ध्यति, तस्मात्प्रत्ययपक्ष

आश्रणीयः । तदेतद् `ये च तद्धिते' इत्यत्र वामनो वक्ष्यति---`यदि प्रत्ययः, कथमौदमेघेय इति, आपत्याद्विहितः ष्यङ् सोऽप्यापत्य एव, तत्र यलोपे सिद्धम्' इति ।

जयादित्यस्तु मेने---शीर्षादेशसन्निपातेन ष्यङ्, स तद्विघातं न करिष्यतीति । यद्येवम्, अजादिप्रत्ययनिबन्धः शीर्षादेशः कथं तमजादि विहन्यात् ? ततः किम् ? ष्यङादेशोऽपि न प्राप्नोति, अनित्या सन्निपातपरिभाषा, तेन ष्यङ् भवति, शीर्षादेशश्च न भविष्यति । अयं तर्ह्यादेशपक्षे दोषः---अनुबन्धौ कर्तव्यौ यङश्चाबिति सामान्यग्रहणतदविघातार्थौ, अन्यथाऽणादेशे ष्यङि `टिड्ढाणञ्' इत्यादिना ङीप्स्यात्, इञादेशे तु `इञ उपसङ्ख्यानम्' इति ङईष्प्रसङ्गः ? नैष दोषः; `टिड्ढाणञ्' इत्यत्रात इति वर्तते, तत्र चाणाऽकारो विशेष्यते---अण्योऽकार इति । तत्र ष्यङादेशे `अनल्विधौ' इति स्थानिवद्भावाभावान्ङीब्न भविष्यति । अणन्तादकारान्तादिति हि विज्ञायमाने स्वाश्रयमकारान्तत्वं स्थानिवद्भावादणन्तत्वं चेति स्यान्ङीपः प्रसङ्गः । `इञ उपसङ्ख्यानम्' इत्यत्रापि `इतो मनुष्यजातेः' इत्यत `इतः' इत्यपेक्ष्यते---इञ्य इकारः तदन्तादिति । इञन्तादिकारान्तादिति वा विज्ञायमाने ष्यङादेशे सति वाराह्येत्यादिविकाराभावान्ङीषभावः सिद्धः । एवमपि स्वरार्थश्चाबेष्टव्यः, अन्यथा इञादेशः ष्यङ् स्थानिवद्भावेन ञित्, टाबपि पित्त्वादनुदात्त इति ञित्स्वरेणाद्युदात्तं पदं स्यात् । स्यादेतत्---इञो ञकारस्येत्संज्ञायाः प्रागेव प्रतिपदविधानात्ष्यङादेशः कारिष्यते, तत्र ञित्स्वराभावात् प्रत्ययस्वरे सति टाप्यपि सिद्धः स्वर इति, यथैव तर्हि ञित्स्वरो न भवति एवं वृद्धिरपि न स्याद्, अतो ञकारस्य सत्यामित्संज्ञायामादेश इत्यास्थेयम्, ततश्च स्वरे दोषप्रसङ्गाच्चाबर्थमनुबन्धौ कर्तव्यावेव । प्रत्ययपक्षे तु सति शिष्टे ष्यङः प्रत्ययस्वरे कृते तदन्तादापि सिद्धमिष्टम्, न रूपभेदो न स्वरभेदः । ननु च ष्यङैव स्त्रीत्वस्य द्योतितत्वादाब्न स्यात् ? नैष दोषः; यथा गार्ग्यायणीत्यादौ द्वाभ्यां स्त्रीत्वं द्योत्यते, तथाऽत्रापि द्वयोरेव सामर्थ्यमिति टाबपि भविष्यति । `ष्यङः सम्प्रसारणम्' इत्यत्र विशेषणार्थं तर्हि त्वयाप्यनुबन्धौ कर्तव्यौ, इह मा भूत्---पाशानां समूहः पाश्या, `पाशादिभ्योयः', पाश्यापतिरिति ? एवं तर्ह्येकोऽनुबन्धः करिष्यते, क एवः ? षकीरे ङीष्प्रसङ्गः । ङकारे `यङः सम्प्रसारणम्' इत्युच्यमाने लोलूयापुत्त्र इत्यत्रापि प्राप्नोति ? अप्रत्ययादित्यकारेऽतो लोपे च सति अकारेण व्यवहितत्वान्न भविष्यति । वाराहीपुत्त्र इत्यत्रआपि तर्हि टापा व्यवधानम् ? एकादेशस्य पूर्वं प्रत्यन्तवत्त्वान्नास्ति व्यवधानम् । ननु `,ष्यङः सम्प्रसारणम्' इत्यत्र `लिटि धातोः' इत्यतोधातुग्रहणमनुवर्तते, `आदेच उपदेशेऽशिति' इत्यात्त्वं धातोर्यथा स्याद्, गोभ्यामित्यादौ मा भूदित्येवमर्थम् । तत्र यङन्तस्य धातोः पुत्त्रपत्योरनन्तरयोः सम्प्रसारणं भवतीत्युक्ते यो धातुर्लोलूयादिर्नासावनन्तरः, यश्चानन्तरो वाराह्यादिर्न स धातुः, तत्र धातुत्वानन्तर्ययोरन्यतररूपपरित्यागेन भवत्सम्प्रसारणं यथा वाराहीपुत्त्र इत्यादौ असत्यपि दातुत्वे आनन्तर्यमात्राश्रयणेन भवति, तथा लोलूयापुत्त्र इत्यत्रासत्यप्यानन्तर्ये धातुत्वाश्रयणेन स्यात् ।

अथ ब्रूयाः---यङ्धात्वोर्न परस्परेण विशेषणविशेष्यभावः, अपि तर्हि समुच्चयः---पुत्त्रपत्योरनन्तरस्य यङो धातोश्चेति ? तत्र वाराहीपुत्त्र इत्यादौ भविष्यति, न तु लोलूयापतिरित्यादौ; धातोर्व्यवधानात् । ततश्च सामर्थ्याद्धातुग्रहणस्योत्तरार्थैवानुवृत्तिः सम्पद्यत इति । यद्येवम्, वाक्पतिरित्यत्र वचेः सम्प्रसारणप्रसङ्गः ? एवं तर्हि धातोरिति निवर्त्तिष्यते, आत्त्वं पुनर्गवादेः प्रातिपदिकस्य न भवति; उपदेशोभावात् । स्वरूपज्ञापनप्रधानो निर्देश=उपदेशः । `गोद्व्यचः', `नौद्व्यचः' इत्यादो तु कार्यान्तरार्थमुच्चारणम्, न स्वरूपज्ञापनार्थम् । तदेवं प्रत्ययपक्ष एक एवानुबन्धः कर्तव्यः । अत्र संग्रहश्लोकाः---

पुंवद्भावाद्यजातौ यलुगणपि परस्मिन् ष्यङि ह्यौदमेघे
स्वार्थे ष्यङ् तद्यलुग्ढे क्रमत इह भवेदौडुलोम्या परस्मिन् ।
ष्यङ्शीर्षाधीनलाभस्तदभिविहतये न प्रभूर्हास्ति शीर्ष्ये
सर्वादेशोऽपि तातङ्ङिव न यङणिञोः स्थानिनोरुक्तिहेतोः ।।
स्त्र्युक्तावप्याप्परस्मिन्निह सुलभ इति ष्ङौ विधेयौ न वा ये-
ऽणादेशे ङीनिवृत्त्यै त्वण इञ इति चेद् द्वौ विशेष्यौ न दोषः ।
ञित्त्वादादेरुदात्तः प्रसजति सहजादेशने वृद्ध्यभावः
पाश्यापुत्त्रे निवृत्त्यै यण इक इह षित्त्वेकके ङीष्यङोस्तु ।।
लोलूयापुत्त्र इत्यद्व्यवहित इतरत्रापि दीर्घाऽन्तवत्स्याद्
धात्वानन्तर्ययोगे विधिरिति स यथानन्तरेऽधौ तथा धोः ।
धात्वानन्तर्ययोश्चेन्मिथ इह न हि तेऽपेक्षिता वाक्पताविक्
धोर्नात्राधिक्रियात्वे ह्युपदिशिरिति गोर्नो तदेवं ममैकः ।।

गोत्रावयवात् ।। 4.1.79 ।।

गोत्रशब्दोऽयमस्ति पारिभाषिकः `अपत्यं पौत्त्रप्रभृति गोत्रम्' इति, अस्ति च लौकिकोऽपत्यमात्रवचनः, अस्ति च व्युत्पन्नः---गूयन्ते शब्द्यन्तेऽनेन स्वसन्तानप्रभवा इति प्रधानभूत आदिपुरुषः, स्वप्रभवस्यापत्यं सन्तानस्य संज्ञाकारी गोत्रमित्युच्यते, यथा---भरतः, रघुः, यदुरिति । अवयवशब्दोऽप्यस्ति एकदेशे यत्सम्बन्धादवयवतीति समुदाय उच्यते; अस्ति च पृथग्भावे, अवयुत्यानुवाद इत्यादाववपूर्वस्य यौतेः पृथग्भावेऽपि दर्शनात्; अस्ति चाप्रधाने---अवयवभूतोऽयमस्मिन् ग्राम इति । तत्र पारिभाषिके गोत्रे एकदेशे चावयवे च वचनमनर्थकमिदं स्यात्, कथम् ? पौत्त्रप्रभृत्यपत्यसमुदायो गोत्रं तदवयवश्चतुर्थादिस्तदपि गोत्रमेव, तद्वाचिनोऽणिञन्तात्पूर्वेणैव सिद्धः ष्यङ् । अथ कस्मिंश्चिन्महागोत्रे यान्यवान्तरगोत्राणि, यथा---भार्गवगोत्रस्य च्यवनादीनि, ते गोत्रावयवास्तेष्वगुरूपोत्तमार्थोऽयमारम्भः । यद्येवम्, सप्तर्षीणामगस्त्याष्टमानामष्टौ महागोत्राणि प्रवराध्याये पंठ्यन्ते तद्व्यतिरिक्तेभ्यः

सर्वेभ्यः ष्यङः प्रसङ्गः; न चैतदिष्टम्, अगुरूपोत्तमेभ्योऽपि पुणिकादिभ्य एवेष्यते । पृथग्भाववचने त्ववयवशब्दे गोत्रादन्यवाचिनोऽणिञन्तात्ष्यङि विधीयमाने पूर्वसूत्रे गोत्रग्रहणमनर्थकम् । अथाप्रधानवचनोऽवयवशब्दः, पारिभाषिकमेव गोत्रं प्रवराध्याये पाठाच्चाप्राधान्यम्, ततोऽयमर्थः स्यात्---येऽणिञन्ता गोत्रापत्यवाचिनः प्रवराध्याये न पठ्यन्ते तेभ्यः ष्यङिति । तत्रानृषिभ्यो गुरूपोत्तमेभ्यः पूर्वेणैव सिद्धः, अगुरूपोत्तमेभ्यस्तु संज्ञाकारिभ्य एवेष्यते, पारिभाषिके च गोत्रे संज्ञाकारित्वं विशेषो न लभ्यत इति । इहापि प्रसज्येत---तुषजको नाम कश्चित्तस्य गोत्रं स्त्री `अत इञ्' तौषजकी, अपत्यमात्रे तु गोत्रे यद्येकदेशोऽवयवस्ततोऽपत्यसमुदायस्य पौत्त्रप्रभृत्यपत्यमवयव इति तद्वाचिनोऽणिञन्तात्पूर्वेणैव सिद्धः । पृथग्भावे त्वपत्यादन्यवाचिन आहिच्छत्रादेरेव प्रसङ्गः । अप्रधाने त्वप्रधानापत्यवाचिनोऽणिञन्ताद् गुरूपोत्तमान्न सर्वत्रेष्यते, किन्तु संज्ञाकारिभ्यः, तत्रापि गोत्रे । व्युत्पन्ने गोत्रे एकदेशवचनोऽवयवशब्दो न सम्भवति, न हि येन पुरुषेण स्वसन्तानप्रभवा गूयन्ते तदवयवाद्धस्तपादादेर्गोत्रेऽणिञोऽसम्भवः । अथ गोत्रं च तदवयवश्चेति कर्मधारयस्तदा भार्गवादिगोत्रेषु येऽवान्तरव्यपदेशकारिणश्च्यवनादयस्तेभ्यः प्रसङ्गः । पृथग्भावे च ये संज्ञाकारिभ्यः पृथग्भूतास्तुषजकादयस्तेभ्य एव स्यात् । अत एवमेषु पक्षेषु दोषसम्भवाद्व्युत्पन्नो गोत्रशब्दः, अप्रधानावचनोऽवयवशब्दः, कर्मधारयश्चसमासः । निपातनाद्विशेषणस्य परनिपातः, प्रवराध्यायेऽपाठाच्चाप्राधान्यम् । तदेतदाह---गोत्रावयवा गोत्राभिमता इति । गोत्रमित्येवमभिमताः, गोत्राभिधायिन इत्येव लोके प्रसिद्धाः, न पुनः प्रवराध्याये पठिता इत्यर्थः । काः पुनस्ता इत्यत्राह---कुलाख्या इति । कुलमाख्यायते आभिरिति कुलाख्याः, पुणिकादिभिर्हि कुलमाख्यायते---पुणिकावयंगोत्रेणेत्येवमादि । तत इति । तथोक्तविशेषणविशिष्टाभ्यः कुलाख्याभ्यः । अगुरूपोत्तमार्थ आरम्भ इति । `गुरूपोत्तमयोः' इति निवृत्तम्, अन्यत्सर्वमनुवर्तत इति भावः । पौणिक्येत्यादिः । पुणिक-भुणिक-मुखरशब्देभ्यः `अत इञ्', तस्य ष्यङादेशः । ते क्रौड्यादिषु द्रष्टव्या इति । अवृत्कृतत्वात्तस्येति भावः ।।

क्रौड्यादिभ्यश्च ।। 4.1.80 ।।

ष्यङ् प्रत्ययो भवतीति । क्रौड्यादिभ्य इति पञ्चमीनिर्देशात्प्रत्ययपक्षेऽप्यत्र दोषाभावाच्चैवमुक्तम् । अगुरूपोत्तमार्थ इत्यादि । तत्र क्रोड्यादयः प्राक्चोपयतशब्दादत इञन्ताः, चौपयतप्रभृतयः प्राग् सौधातकिशब्दादणन्ताः, सौधातकिशब्दः `सुधातुरकङ्च' इति इञन्तः । सूत युवत्यामिति । सूतशब्दः ष्यङमुत्पादयति युवत्यां प्राप्तयौवनायामभिधेयायाम्---सूत्या, अन्यत्र क्रियाशब्दाट्टाब् भवति---सूता, जातिवाचिनस्तु ङीष् भवति---सूती । भोज क्षत्त्रिये इति । जातिलक्षणस्य ङीषोऽपवादः---भोज्या, क्रियाशब्दात्तु टाबेव भवति---भोजयतीति भोजा, ततः परे इञन्ताः । गौकक्ष्यशब्दो गर्गादियञन्तः ।।

दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्भिभ्योऽन्यतरस्याम् ।। 4.1.81 ।।

देवा यज्ञा यष्टव्या अस्य देवयज्ञः, शुचिर्वृक्षोऽस्य शुचिवृक्षः, सत्यमुग्रमस्य सत्यमुग्रः, निपातनाद्विशेष्यस्य पूर्वनिपातो मुमागमश्च, कण्ठे विद्धमस्य कण्ठे विद्धमस्य कण्ठे वा विद्धः, `अमूर्द्धमस्तकात्' इत्यलुक् । काण्डेविद्भिभ्य इत्यन्ये पठन्ति, काण्डेन विद्धः, `कर्तृकरणे कृता बहुलम्' इति समासः, निपातनात्काण्डशब्दस्यैकारः । सर्वे इञन्ताः ।।

समर्थानां प्रथमाद्वा ।। 4.1.82 ।।

प्रत्येकमत्र पदानां स्वरितत्वं प्रतिज्ञायते, न समुदायस्यैकमित्याह---त्रयमपीति । अत्र च प्रयोजनम्---एकस्य निवृत्तावपरस्य निवृत्तिर्मा भूदिति । एतदेव स्पष्टयति---समर्थानामिति चेति । स्वार्थिकप्रत्ययावधिश्चायमिति । स्वस्याः प्रकृतेरर्थे भवाः स्वार्थिकाः, अध्यात्मादिः, भाष्यकारप्रयोगाद् द्वारादिकार्याभावः, स्वशब्दस्य तु द्वारादिषु पाठादस्ति प्रसङ्गः । तदादिविधिर्हि तत्र भवति; आद्यज्विशेषणत्वाद् द्वारादीनाम्, यथा---द्वारपालस्येदं दौवारपालमिति । प्राग्दिशो विभक्तिरिति यावदिति । तत आरभ्य हि स्वार्थिकाः प्रत्यया विधीयन्ते, किं पुनः कारणं स्वार्थिकेष्वेष न प्रवर्तते ? इत्याह---स्वार्थिकेष्वित्यादि । तत्र समर्थानामिति सम्बद्धार्थानां चेत्यर्थः । तत्र वाक्ये सम्बद्धार्थता, व्यपेक्षा हि तत्र सामर्थ्यम्, अपेक्षा आकाङ्क्षा, अन्योऽन्यापेक्षा=व्यपेक्षा । अनयाऽऽकाङ्क्षासन्निधियोग्यत्वेषु सत्सु यः सम्बन्धः स लक्ष्यते । वृत्तौ संसृष्टार्थता । एकार्थीभावो हि तत्र सामर्थ्यम् । वृत्तौ ह्युपसर्जनपदानि स्वार्थमुपसर्जनीकृत्य प्रधानार्थपराणि भवन्ति, यथा---गङ्गायां गोष इति गङ्गोपसर्जनं तीरमाह । तथौपगव इत्यत्रोपगुशब्दः खार्थोपसर्जनमपत्यमाह । अत एव ऋद्धस्यौपगव इति ऋद्धत्वमुपगोर्विशेषणं न भवति । यत्र हि शब्दः पयवस्यति तत्रैव विशेषणसम्बन्धः । यदि च वाक्यवद् वृत्तावपि खार्थ एव पर्यवस्येत्तद्वदेव विशेषणसम्बन्धो भवेत्, प्रधानपदान्यप्युपसर्जनविशिष्टमेव खार्थं ब्रुवते । यदि तु वाक्यवद् वृत्तावपि प्रधानपदानि स्वार्थमेव ब्रुवीरन् ततो यथोपगोरपत्यं देवदत्तः कल्याणश्चेत्युभाभ्यामपत्यार्थस्य सम्बन्धः, तथौपगवः कल्याणश्चेत्यप्युक्तेस्यात्, न चैवम् । अतो यादृशस्य सम्बन्धस्य भावादयं विशेषः स एकार्थीभावः । न च स्वार्थिकेषु प्रकृत्यर्थादर्थान्तरं सम्भवति यत्प्रत्यायनाय शब्दन्तरं प्रयुज्येत, येन सह समर्थता स्यात् । एतेन प्राथम्यं व्याख्यातम् । अतः प्रतियोग्यपेक्षया सामर्थ्यप्राथम्ययोरभावात्स्वाथिकेषु नास्योपयोग इति सिद्धम् । विकल्पोऽपि तत्रानवस्थित इति । क्वचित्प्रवर्तते । एतच्चाषडक्षादिसूत्रे वक्ष्यते । इह `प्रथमात्' इत्येतद्विशेषणं शास्त्रवाक्यगतमाश्रीयते, न विग्रहवाक्यगतम्; अनियतत्वात् । वाक्ये हि प्रयोगोऽनियत इति सर्वेषां प्राथम्यसम्भवात् । कदाचिदपत्यवद्वाचिनोऽपत्ये प्रत्ययः स्यात्, कदाचिदपत्यवाचिनस्तद्वति । अयं च प्रकारोऽसत्यपि `प्रथमात्' इत्यस्मिल्लभ्यत इत्यनर्थकं तत्स्यात् ।

ननु च यस्मिन्वाक्ये यत्प्रथमोच्चारितं तस्मिस्तत एव यथा स्यात्, चरमोच्चारितान्मा भूदित्येतत्प्रयोजनं स्यात् ? तन्न; न हि वृत्तिवाक्ययोः सहप्रयोगः, ततश्च वाक्यगते प्राथम्ये व्यवस्थापके सति वृत्तेः प्रयोगो न नियत इति व्यर्थमेव `प्रथमात्' इति विशेषणं स्यात्, तस्माच्छास्त्रवाक्यगतमेव प्राथम्यं व्यवस्थापकमित्याह---लक्षणवाक्यानीत्यादि ।

समर्थानामिति निर्धरणे षष्ठीति । ततश्च निर्धारणस्य तुल्यजातीयविषयत्वात्प्रथमात्समर्थात्प्रत्ययो भवति, तत्र `समर्थात् प्रथमात्' इति वक्तव्ये `समर्थानां प्रथमात्' इति वचनं प्रधानपदस्याप्युपसर्जनपदेनैकार्थीभावप्रतिपादनार्थम्; अन्यथा वाक्यवद् वृत्तादपि प्रधानपदस्यान्येनापि सम्बन्धः शङ्क्येत । यदि तर्हि

लक्षणवाक्ये प्रथमोच्चारितात्प्रत्ययः, एवं सति `तस्यापत्यम्' इत्यादौ सर्वनाम प्रथमनिर्दिष्टमिति तत एव प्रत्ययः स्यात्, नोपग्वादेः, न हि तल्लक्षणवाक्ये प्रथमनिर्दिष्टमित्यत आह---तस्येति । सामान्यमित्यादि विशेषलक्षणम्, विशेषोषलक्षणमित्यर्थः । `तस्मापत्यम्' इत्यादौ हि विशेषा एव निर्देष्टुमिष्टाः, तेषां तु सर्वेषां प्रत्यकमुपादाने गौरवं स्याद्, एकस्योपादानेऽनुपात्ताद्विशेषान्तरान्न स्याद्, यथा---अद्भिः संस्कृतमित्यादाविति सर्वेषामुपलक्षणत्वेन तस्येत्यादिकमुपात्तम् । तस्योपग्वादेरिति । न तु स्वयं कार्यितया, न हि तस्येत्यस्य सामान्यवचनस्य प्रकरणाद्यभावेन विशेषेऽनवस्थितस्यापत्यं प्रति सम्बन्धिविशेषप्रतिपादनेन सग्बन्ध्यन्तरव्यवच्छेदाख्य उपकारः सम्भवति । सम्बन्धिसामान्यंत्वपत्यशब्दस्य सम्बन्धिशब्दत्वादेवावगतम्, अतो यत्सूत्रे साक्षात्प्रथमोच्चारितं सामान्यवाचि न तस्मात्प्रत्ययः, यस्माच्च प्रत्ययो न तत्सूत्रे साक्षात्प्रथमोच्चारितमिति अगत्या उपलक्षणगतं प्राथम्यमुपलक्ष्याणां विज्ञायते । तदाह---तदीयं प्राथम्यं विशेषणां विज्ञायत इति ।

कम्बल उपगोरित्यादि । यथापत्यशब्दस्य पूर्वपराभ्यां यथेष्टमभिसम्बन्धो भवति, एवमणोऽपि सम्भाव्येतेति भावः । अत्र च प्रत्यये सत्यनर्थकस्यापि समुदायस्य तद्धितान्तत्वेन प्रातिपदिकसंज्ञायामेकत्वाद्यभावेऽपि अव्ययेभ्य इव स्वादयः स्युः । ननु `तस्यापत्यम्' इति श्रूयमाणसम्बन्ध्यपेक्षायां विभक्तौ विज्ञायमानायां नात्र प्रसङ्गः ? नैतदेवम्; न हि लक्षणवाक्ये विभक्त्युच्चारणम्, सम्बन्धप्रतिपादनार्थसामान्यस्य सम्बन्धासम्भवात्, किं तर्हि ? षष्ठ्यन्तात्प्रत्ययविध्यर्थम् । तथापि विशेषोपलक्षणद्वारेण सम्बन्धः स्याद् ? एवमपि ऋद्धस्योपगोरपत्यमित्यादौ सापेक्षादपि स्यादेव । समर्थपरिभाषया तर्हि व्यवस्था भविष्यति ? स्यादेव यद्येतस्मात्सूत्रात्प्रागेव सुबन्तात्तद्धिता इति व्यवस्थितं स्यात् । इह तु ङ्याप्प्रातिपदिकाधिकारात् षष्ठ्यादिविभक्त्यर्थवृत्तेस्तत एव तद्धिताः स्युः । सति त्वस्मिन्सम्बन्धप्रतिपत्तेर्विभक्त्यायत्तत्वात्सुबन्तादेव तद्धिता भवन्ति, न चैवं सति पदकार्यप्रसङ्गः । तथा हि---राजन्ये वार्त्रघ्न इत्यादौ भसंज्ञयोपजातया लुप्तविभक्त्याश्रयापि पदसंज्ञा एकसंज्ञाधिकाराद् बाधिष्यते । राजत्वं राजतेत्यादौ तु प्रातिपदिकादप्युत्पत्तौ `स्वादिषु' इति पदसंज्ञा भवत्येव । ननु तद्धितलुकि सर्वनामस्थाने दोषः, काश्यपेन प्रोक्तमधीयते `काश्यपकौशिकाभ्यामृषिभ्यां णिनिः', `छन्दोब्राह्मणानि' इति तद्विषयतायाम् । `तदधीते तद्वेद' इति द्वितीयान्तात्काश्यपिन्शब्दादुत्पन्नस्याणः प्रोक्ताल्लुकि यद्यपि काश्यपिन इत्यादौ भसंज्ञाया लुप्तविभक्तिनिमित्तया अपि पदसंज्ञाया बाधाददोषः, काश्यपिभ्यामित्यादौ तु भवत्येव पदसंज्ञा; तथापि काश्यपनौ, काश्यपिन इत्यादौ सर्वनामस्थाने भसंज्ञाया अभावाल्लुप्तामन्तर्वर्तिनीं विभक्तिमाश्रित्य पदसंज्ञा स्यात् । न चासर्वनामस्थान इति प्रतिषेधः, किं कारणम् ? स्वादिष्विति या प्राप्तिस्तस्या एव सनिषेधः । एवं तर्हि `असर्वनामस्थाने' इति विभज्यते, प्रसज्यप्रतिषेधश्चाश्रीयते, तत्सामर्थ्याद् `अनन्तरस्य विधिर्वा' इत्येतन्नाश्रीयते, तेन सर्वनामस्थाने परतः पूर्वस्यावधेर्या च यावती पदसंज्ञा स्वादिष्विति वा सुबन्तमिति वा सा सर्वा प्रतिषेत्स्यते । यद्येवम्, राजा दण्डीत्यादौ सावपि न स्यात्, `यच्चिभम्' इत्यतोऽचीत्येतदसर्वनामस्थाने इत्यत्रापेक्ष्यते, तेनाजादावेव सर्वनामस्थाने सर्वा पदसंज्ञा निषेत्स्यते ? सौ हलादौ स्वादिष्विति वा सुबन्तमिति वा भविष्यतीत्यदोषः । तदेवं सत्यस्मिन् वचने सुबन्तात्तद्धिते न कश्चिद्दोष इति स्थितम् ।

अत एव पूर्वाह्णेतरां पूर्वाह्णेतमामित्यादौ `घकालतनेषु' इत्यलुक् विधास्यते । ननु सत्यप्यस्मिन् स्वार्थिकेष्वस्याव्यापारात्कथं सुबन्तात्तरप् स्यात् ? एवं तर्ह्यर्थक्रम एवायमीदृशो यदुत पूर्वं विभक्त्या योगः, पश्चात्तरपा । उक्तं हि प्रियकुत्सनादिषु ततः प्रवर्त्ततेऽसौ विभक्त्यन्त इति । एवं च कृत्वाऽलुग्विधानमप्युपद्यते । यदि तु तदेवालुग्विधानं ज्ञापकम्, तस्यापत्यमित्यादौ न विभक्त्यर्थमात्रे तात्पर्यम्, किन्तु षष्ठ्यादिविभक्त्यन्ता एवोपलक्षयितुमिष्टाः । ङ्याप्प्रातिपदिकाधिकारस्तु वृद्धादिविशेषण्त्वेनैवोपयुज्यत इति, तथा सति पदविधित्वात् समर्थपरिभाषयैव व्यवस्था सिद्ध्यति । किञ्चि---अनभिधानादसामर्थ्येन भविष्यति, नार्थः समर्थवचनेन ।

इदं तर्हि प्रयोजनम्---यदर्थाभिधानसमर्थं तस्माद्यथास्यात् । किं पुनस्तत् ? कृतवर्णआनुपूर्वीकं पदम्---सौत्थितिः, वैक्षमाणिरिति, अत्र सवर्णदीर्घत्वे कृते प्रत्ययो भवति, सु+उत्थित वि+ईक्षमाण---इत्यस्यामवस्थायां न भवति । यदि स्यात्, सावुत्थितिः वायीक्षमाणिरिति प्राप्नोति, `वार्णदाङ्गं बलीयः' इति वृद्धिप्रसङ्गात् । नन्वन्तरङ्गत्वाद्वार्णेषु कृतेषु प्रत्ययो भविष्यति ? एवं तर्ह्येतदर्थं समर्थवचनं कुर्वन्नेतज्ज्ञापयति---अस्तीयं परिभाषा `अकृतव्यूहाः पाणिनीयाः' कृतमपि शास्त्रं निवर्तयन्तीति । व्यूहः=शास्त्रकार्यम्, तदन्तरङ्गत्वात्प्राप्तमपि पश्चादस्य निमित्तविघातो भविष्यतीति बुद्ध्या न कृतं यैस्तेऽकृतव्यूहाः, एवंभूता भवन्ति पाणिनीया इत्यर्थः । कृतमपीत्यत्र वाशब्दोऽध्याहार्यः, कृमपि वा शास्त्रकार्यं निवर्तयन्ति निमित्ताभाव उत्पत्स्यमाने इत्यर्थः । तेन पपुष इत्यादि सिद्धं भवति । अत्रान्तरङ्गत्वात्पूर्वकृतोऽपीडागम एतत्परिभाषावशान्निवर्तते, पूर्वमेव वान क्रियते, ततः शसि सम्प्रसारणे कृते वलादित्वादिडभावः । प्रथमान्तादिति । प्रथमानिर्दिष्टादपत्यविशेषवाचिनो देवदत्तादिशब्दादित्यर्थः । अन्यथा `सास्य देवता' इति यथा इन्द्रो देवतास्य ऐन्द्रः स्थालीपाक इति प्रथमान्तात् षष्ठ्यर्थे प्रत्ययो भवति, एवमिहापि स्यात्---देवदत्तोऽपत्यमस्य दैवदत्तिरुपगुरिति ।

वाग्रहणं किमिति । वृत्तिवाक्ययोर्व्यपेक्षैकार्थीभावलक्षणादर्थभेदादेव बाध्यबाधकभावो न भविष्यतीति प्रश्नः । वाक्यमपि यथा स्यादिति । तद्यथा गोशब्देन गावीशब्दो निवर्तते सत्यामपि स्त्रीत्वप्रतिपत्तौ, तथेहाप्यौपगवमानयेत्युक्ते य एवानीयते `उपगोरपत्यमानय' इत्युक्ते स एवेति प्रधानार्थभेदाद् वृत्त्या वाक्यं बाध्येतेति भावः । यद्येवं समासवृत्तिस्तद्धितवृत्त्या बाध्येतेति । `यत्रोत्सर्गापवादौ विभाषा तत्रापवादेन मुक्ते उत्सर्गो न प्रवर्तते' इति राज्ञोऽनन्तरो राजानन्तर इत्यादिषु सावकाशा समासवृत्तिस्तद्धितवृत्त्या बाध्येत, यथा---दाक्षिरित्यण् प्रत्यय इञेति भावः । एतदपीति । समासवृत्त्याख्यं कार्यमित्यर्थः ।।

प्राग्दीव्यतोऽण् ।। 4.1.83 ।।

तेन दीव्यतीति वक्ष्यतीति । यदि तस्येदमनुकरणं प्राग्दीव्यतेरिति वक्तव्यम्, कथं प्राग्दीव्यत इति निर्देशः ? अत आह---तदेकदेश इति । भवति हि समुदायगुणीभूतस्याप्येकदेशस्य पृथक्कृत्यानुकरणम्, यथा---अस्यवामीयमित्यत्रेति भावः । `प्रत्ययः' इत्यादिवदणित्येवाधिकारे सति `अत इञ्'

इत्यादिनापवादप्रकरणेन विच्छिन्नस्याणः `तेन रक्तं रागात्' इत्यादिष्वर्थेषूपस्थानं न स्यात् । तस्मादधिकारपरिमाणख्यापनार्थं प्राग्दीव्यंत इत्युक्तम् । त्रिष्वपि दर्शनेष्वित्यादि । नन्वधिकारपक्षेऽपि प्रतियोगमुपस्थानादत इञ् अण्वेत्यणपि प्राप्नोति, परिभाषापक्षेऽपि प्राग्दीव्यतीयाः प्रकृतयस्ताभ्यः सर्वाभ्योऽण् परिभाष्यमाणः केनापवादविषये न स्यात्, एवं विधिपक्षेऽपि सर्वत्र प्रसङ्गः ? एवं मन्यते---यदयं `पीलाया वा' इति सूत्रमारभते, तद् ज्ञापयति---नापवादविषयेऽण् भवतीति; अन्यथा `द्वयचः' इति ढक् सिद्धः, अनेन चाणित्यनर्थकं तत्स्यादिति । `उदश्वितोऽन्यतरस्याम्' इति विकल्पवचनमप्यस्मिन्नर्थे लिङ्गम् ।

वयं तु ब्रूमः---`प्राग्दीव्यतः' इति नेदं दीव्यतीतिशब्दैकदेशस्य दीव्यच्छब्दस्यानुकरणम्, किं तर्हि ? तत्रत्योऽर्थो निर्दिश्यते---दीव्यतोऽर्थात्प्रागिति । तत्र दिवेर्लटि कृतेऽर्थादित्यनेन गम्यमानार्थत्वादप्रयुक्तेनाप्यप्रथमान्तेन सामानाधिकरण्याल्लटः शत्रादेशः कृतः । तत्रावधेरर्थत्वादवधिमन्तोऽप्यर्था एव प्रतीयन्ते, सजातीयविषयत्वेन प्रसिद्धतरत्वादवध्यवधिमद्भावस्य, ततश्च प्राग्दीव्यतो येऽर्थास्तेष्वेवास्य त्रिष्वपि पक्षेषु व्यापारः । तत्र समानेऽर्थे प्रकृतिविशेषादुत्पद्यमानोऽपवादोऽणं बाधत इति सिद्धमिष्टम् ।।

अश्वपत्यादिभ्यश्च ।। 4.1.84 ।।

प्राग्दीव्यतीयेष्विति । `अपपरिबहिरञ्चवः पञ्चम्या' इत्यव्ययीभावाद्भवार्थे `वृद्धाच्छः' । `अव्ययानां भमात्रे' इति टिलोपो न भवति; `लुङ्मुखस्वरोपचाराः' इति परिगणनात् । अत एवाव्ययात्तयबपि न भवति, `अमेहक्वतसित्रेभ्यः' इति परिगणनाद्वा । गणपतिशब्दस्यात्र पाठाद्गाणपत्यो मन्त्र इत्यपशब्दः । एतेन क्षैत्रपत्यं व्याक्यातम् । `क्षैत्रपत्यं चरु निर्वपेत्' इति तु छान्दसम् । क्षेत्रपत्यं प्राश्नन्तीति, छन्दोवदृषयः कुर्वन्ति ।।

दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ।। 4.1.85 ।।

पतिशब्दस्योत्तरपदशब्देन बहुव्रीहौ कृते पश्चाद् द्वन्द्वः, न तु द्वन्द्वस्योत्तरपदशब्देन बहुव्रीहिरित्याह---पत्युत्तरपदाच्चेति । एतच्च प्रत्यासत्तेर्व्याख्यानाद्वा लभ्यते । अदितिग्रहणं तु तदुत्तरपदपरिग्रहार्थं स्यात्, न ह्यदित्युत्तरपदं दित्युत्तरपदं भवति । पत्यन्तादिति नोक्तम्, बहुच्पूर्वान्मा भूदिति ।

वाडमतिपितृमतामिति । कुर्वादिषु मतिपुतृमच्छब्दयोः पाठोऽपत्यार्थो भाषायामपि ण्यो यथा स्यादिति । अनेन तु छन्दसि सर्वेष्वेव प्राग्दीव्यतीयेषु ण्यविधिः । केचिद्वाक्शब्दमपि तत्रैव पठन्ति, तेन `याना वाच्या एते वत्साः' इति प्रयोगोपपत्तिः ।

यमाच्चेति । यमशब्दोऽपि सूत्रे पठितव्य इत्यर्थः ।

पृथिव्या ञाञाविति । ञाञोः स्त्रियां विशेष इत्याह---पाथिवा, पार्थिवीति ।

स्थाम्न इति । बलवचनोऽयम् । तस्य केवलस्य यद्यप्यपत्येन योगो नास्ति, जातादिना तु योगः सम्भवत्येव । सर्वेषु च प्राग्दीव्यतीयेष्वयं विधिः, तस्मादश्वत्थाम इति भाष्योदाहरणादत्र तदन्तविधिर्भवति । अश्वत्थाम इति । अश्वस्येव्र स्थाम यस्येति बहुव्रीहौ अकारष्टिलोपः, पृषोदरादित्वात्सकारस्य तकारः ।

लोम्नोऽपत्ये बहुष्विति । बाह्वादिष्वयं पठ्यत इतीञि प्राप्ते बहुष्वकारः, केवलस्यापत्येनायोगात्समर्थ्यात्तदन्तविधिः । उडुलोमा इति । उडूनीव लोमान्यस्य, शरा इव लोमान्यस्येति बहुव्रीहिः । ननु बाह्वादिलक्षणे इञ्यपि कृते तस्य बह्वच इति लुकि सुबन्तादिञुत्पन्न इति प्रत्ययलक्षणेन `सुबन्तं पदम्' इति पदसंज्ञायां नलोपेन सिद्धम् ? सिद्ध्यतु नामेदम् ; उडुलोमेभ्य इत्येवमादौ सुब्विधौ नलोपस्यासिद्धत्वादैसादिर्न स्यात्, इञो लुगपि प्राच्यभरतगोत्रादन्यत्र न सिध्यति, न वात्र पदसंज्ञा, `असर्वनामस्थाने' इति निषेधात् । यथा च प्रत्ययलक्षणेन प्राप्तायाः सुबन्तमित्यस्या अपि पदसंज्ञायाः स निषेधस्तथोक्तं पुरस्तात् ।

सर्वत्रेति । नापत्य एव । यद्वा प्राग्दीव्यतीयेऽन्यत्र च, तेन गवा चरतीत्यत्रापि गव्य इति भवति । गोरूप्यमिति । `हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः', `मयड् च' इति रूप्यमयटौ । ण्यादय इति । येन नाप्राप्तिन्यायेनाण एव ण्यादयोऽपवादाः, अमापवादैस्तु ढगादिभिः सह सम्प्रधाराणायां परत्वात्त एव स्युरिति वार्त्तिकारम्भः । अर्थविशेषोऽपत्यादिलक्षणं निमित्तं यस्य सोऽर्थविशेषलक्षणः । यस्तु तस्वेदमित्यर्थसामान्यलक्षणोऽणपवादः स परत्वाद्भवति, उष्ट्रपतिर्नाम पत्त्रं तस्येदमौष्ट्रपतम् `तत्त्राध्वर्युपरिषदश्च' इत्यञ् भवति, न तु ण्यः । दितेरपत्यमिति । अत्र `इतश्चानिञः' इति ढग्न भवति, डौलेय इत्यादावेव तु भवति । वानस्पत्यमिति । अचित्तादिलक्षणष्ठग्न भवति, आपूपिकादावेव तु भवति ।

कथं दैतेय इति । अत्र तर्हीति । गम्यमानत्वान्न प्रयुक्तम् । यदि ण्यादयोऽर्थविशेषलक्षणादणपवादात्पूर्वविप्रतिषेधेन भवन्ति, कथं तर्हि दैतैयः सिध्यतीत्यर्थः । दितिशब्दादित्यादि । ननु `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति ङीषन्तादपि ण्य एव प्राप्नोति ? तत्राह---लिङ्गविशिष्टपरिभाषा चानित्येति । अन्ये तु भाष्यार्त्तिकयोरनुक्तत्वाद् दैतेय इत्यसाधुरिति स्थिताः ।।

उत्सादिभ्योऽञ् ।। 4.1.86 ।।

तदपवादानां चेति । इञादीनाम् । बष्कयास इति । बष्कयशब्दोऽञमुत्पादयति, असे, असमास इत्यर्थः । पूर्वाचार्यसंज्ञेयम्, बाष्कयः । अस इति किम् ? गोबष्कयिः । ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधादेवात्र न भविष्यति ? ज्ञापनार्थं तु । एतज्ज्ञापयति---भवत्यत्र तदन्तविधिरिति । किं सिद्धं भवति ? धेनुशब्दोऽत्र पठ्यते, तदन्तादपि भवति---अधेनूनां समूह आधेनवमिति । उदस्थान देश इति । उदस्थानशब्दोऽञमुत्पादयति देशे वाच्ये---औदस्थानो देशः । देशादन्यत्र यदृच्छया कश्चिदुदस्थानः, तस्यापत्यमौदस्थानिः । पृषदंश इति । पृषच्छब्दोऽञमुत्पादयति अंशे वाच्ये---पार्षतोंऽशः, अंशादन्यत्राणेन भवति । ग्रैष्मी त्रिष्टुबिति । ग्रीष्मो देवता अस्या इत्यशेषार्थविवक्षायामौत्सर्गिकोऽणेव भवति, ग्रीष्मे भवेत्यादिशेषविवक्षायां तु ऋत्वणेव सिद्धम् । न

ह्यनेनाञा शैषिकस्याणो बाधप्रसङ्गः, अर्थविशेषलक्षणानामेव प्रत्ययानां ण्यादिभिर्बाधनात् । ऋत्वण् तु शेषमात्रे विधानान्नार्थविशेषलक्षणः, कक्षान्तरप्राप्तश्च । कथम् ? `कालट्ठञ्' अणोऽपवादः, त्सयाप्यृत्वण् । छन्दश्चेह वृत्तं गृह्यत इति । यस्य त्रिष्टुबादयो विशेषाः । न वेद इति । तेन वेदविषयेऽपि वृत्तेऽभिधेयेऽञः प्रतिषेधादणेव भवति---ग्रैष्मी त्रिष्टुबिति ।

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ।। 4.1.87 ।।

स्त्रीशब्दात्पूंशब्दात्पुंस्शब्दाच्चेति । स्त्र्यधिकारविहितानां टाबादीनां `पुंसि संज्ञायां घः' इत्येतदधिकारविहितानां च प्रत्ययानां ग्रहणं न भवति, स्त्रीपुंस्शब्दयोरस्वरितत्वात् । नापि स्त्रीपुंसार्थग्रहणम्, `स्वं रूपं शब्दस्य' इति वचनात् । पौंस्नमिति । संयोगान्तस्य लोपः' इति पुंस्शब्दसकारस्य लोपः, तत्र कर्त्तव्येऽनुस्वारस्यासिद्धत्वात्सकारस्य संयोगान्तत्वात् । अत एव संयोगान्तलोपप्रसङ्गान्नञेवोभाभ्यां न विधीयते । एवं हि मा भून्नञ्, मा च भूत्स्नञ् , अञ् प्रकृतस्तत्रैतावदस्तु स्त्रीपुंसयोर्नुक्येति; तत्रायमप्यर्थः, स्त्रैणी पौस्नी अञ इतीकारः सिद्धो भवति ? नैव शङ्क्यम्; स्त्रैणाः, पौंस्नाः---`यञञोश्च' इति बहुषु लुक् प्राप्नोति । इह च स्त्रैणानां सङ्घः `सङ्घाङ्कलक्षणेष्वञ्यञिञाम्' इत्यण् प्राप्नोति ? नैष दोषः; उभयत्रापि गोत्र इति वर्तते, लौकिकस्य च गोत्रस्य ग्रहणं ऋषिप्रजनं च लोके गोत्रमुपचरन्ति, न च स्त्र्यर्षिणापि पुंशब्दवाच्यं सामान्यम् । `नस्तद्धिते' इति टिलोपस्तर्हि प्राप्नोति ? `प्रकृत्यैकाच्' इति प्रकृतिभावो भविष्यति, `इष्ठेमेयस्सु' इति तत्रानुवर्तते । एवं तर्हि नुग्विधानसामर्थ्याट्टिलोपो न भविष्यति ? यं विधि प्रत्युपदेशोऽनर्थकः स विधिबाध्यते, यस्य तु विधेर्निमित्तमेव नासौ बाध्यते, तत्र टिलोपार्थमेव नुग्विधानं स्यात् । स्त्रीशूब्दस्यापि नुगेव लोपस्य निमित्तम्, अन्यथा यस्येति लोपात्परत्वाद् वृद्धिः स्यात्, यथा---श्रीर्देवता अस्य श्रायं हविरिति । तस्माद्यथान्यासमेवास्तु ।

योगापेक्षं चेति । स्त्रीपुंसाभ्यामित्ययं योगो वत्यर्थे न प्रवर्तत इत्येवं ज्ञापनशरीरम्, न तु स्नञ् वत्यर्थे न प्रवर्तत इतियर्थः । कथं स्त्रीत्वं स्त्रीता पुंस्त्वं पुंस्ता चेति ? `आ च त्वात्' इत्यत्र परिहारो भविष्यति ।।

द्विगोर्लुगनपत्ये ।। 4.1.88 ।।

द्विगोरिति षष्ठीति । आनन्तर्यलक्षणायां तु पञ्चम्यां पञ्चकपालस्य पुरोडाशस्येदम् `तस्येदम्' इत्यण्, पाञ्चकपालमित्यत्रापि प्राप्नोतीति भावः । षष्ठ्यपि यद्यानन्तर्ययोगे स्यात्स एव दोषो यः पञ्चम्याम्, ततश्च षष्ठ्याश्रयणमनर्थकं स्यादिति मत्वाऽऽह---द्विगोर्यः सम्बन्धी निमित्तत्वेनेति । यस्य तद्धितस्यार्थे `तद्धितार्थोत्तरपद' इति द्विगुविहितः स निमित्तत्वेन सम्बन्धी । पञ्चकपाल इति । `संस्कृतं भक्षाः' इत्यत्रार्थे विवक्षिते द्विगुः, अम्, तस्य लुक् । द्विवेद इति । `तदधीते तद्वेद' इत्यत्रार्थे द्विगुः ।

द्वैदेवदत्तिरिति । द्वयोर्देवदत्तयोरपत्यम्, `अत इञ्', अपतनादपत्यम्, यस्य पित्रादिषु द्वौ देवदत्तसंज्ञकौ स एवमुच्यते, एकस्य वा दत्तपुत्रोऽन्यस्य साक्षात्पुत्रः ।

द्विगुनिमित्तविज्ञानादिति । द्विगुनिमित्तस्य प्रत्ययस्य लुग्विधानादित्यर्थः । पञ्चकपालस्येदमिति । अत्र संस्कृतार्थे यः प्रथममुत्पन्नः प्रत्ययः स एव---द्विगोर्निमित्तं न द्वितीय इति तस्य लुग्न भवति । अथ वैत्यादि । पूर्वं लुगित्यनेनोपस्थापतिस्य प्रत्ययस्य द्विगोरित्यनेन वैयधिकरण्यमाश्रित्य व्याख्यातम्, इदानीं सामानाधिकरण्यमित्येष विशेषः । कथं पुनद्विगोरेव लुग् लभ्यत इत्याह---द्विगोरिति स्थानषष्ठीति ।

ननु चेत्यादि । `प्रत्ययस्य लुक्श्लुलुपः' इति प्रत्ययादर्शनस्य लुगादयः संज्ञा विहिताः, ततश्च द्विगोर्लुगिति नैव समञ्जसमिति भावः । उपचारेण त्वित्यादि । अतस्मिंस्तद्रूपारोपः=उपचारः, परत्र परशब्दप्रयोगः=लक्षणा, उपचारेण निमित्तेन या लक्षणा तयेत्यर्थः । अन्ये तूपचारेणेत्यस्य विवरणं लक्षणयेत्येतदित्याहुः । अद्विगुरूपस्तद्धितो द्विगुरूपतया यथा बुद्ध्या विवक्ष्यते सा लक्षणा उपचार एवेति । उपचारस्य निबन्धनं द्विगुनिमित्तत्वम् । भवति हि कारणे कार्योपचारः---आयुर्घृतमिति यथा । द्विगुनिमित्तकोऽपि तर्हीत्यादि । कार्येऽपि कारणवदुपचारो दृश्यते, यथा---पुरातनं कर्म भुज्यत इति, ततश्च द्विगुर्यस्य प्रत्ययस्य निमित्तं सोऽपि गुणकल्पनया गुणशब्देनोपचारस्य निमित्तभूतो धर्मो विवक्षितः, तन्निमित्ता कल्पना गुणकल्पना, मा पुनरुपचारात्मिका बुद्धिः, तया कस्मान्न द्विगुरित्यच्यते ? अर्हत्येवायमेवंविधं वचनमित्यर्थः । परिहरति---न तस्येति । तत्र हि सन्निहितमपि द्विगुत्वं प्रत्ययोत्पत्तौ नोपयुज्यते, न ह्यसौ द्विगोरित्येवं विधीयते, किं तर्हि ? प्रातिपदिकादित्येवमित्यर्थः । इतरस्त्विति । प्रत्ययः, यस्य लुग्दर्शितः । द्विगुत्वस्यैव निमित्तमिति । तदर्थे हि समासो विधीयते, तस्यैव च द्विगुसंज्ञा, तेनासौ द्विगुत्वस्यैव निमित्तम् ।

यद्येवमित्यादि । उभयोरपि पक्षयोरेतच्चोद्यम् । न ह्यत्र द्विगोर्निमित्तत्वेन सम्बन्धी तद्धितः, नापि द्विगुनिमित्तत्वादु पचारेण तद्व्यपदेशार्हः, अत्र हि समाहारे द्विगौ निष्पन्ने पश्चात्तद्धित उत्पद्यते, स च द्विगोर्निमित्तं न भवतीति चोद्यार्थः । परिहरति---नैवात्र तद्धित उत्पद्यत इति । अनभिधानादिति भावः । यदि नोत्पद्यते, कथमस्मिन्नर्थे पञ्चकपाल इति रूपसिद्धिस्तस्मादुत्पद्यत एवात्र तद्धितः, तस्य च लुग्विधेयः ? इत्यत आह---त्रैशब्द्यं हीति । त्रय एव शब्दास्त्रैशद्ब्यम्=चातुर्वर्ण्यादिः । इह ह्यस्माभिस्त्रैशद्ब्यं साध्यम्, तच्च पञ्चकपालीशब्दात्तद्धितोत्पत्तिमन्तरेणापि सिद्ध्यतीति नास्मात्तद्धित उत्पद्यते । तानेव त्रीन् शब्दान्दर्शयति---पञ्चसु कपालोष्विति । द्वयोः शब्दयोरिति । यः समाहारे द्विगुः, यश्च तद्धितार्थे, द्वावपि तौ समानार्थौ, तयोरेकेन पूर्वेण विग्रहः । अवधारणमत्र द्रष्टव्यं विग्रह एव, न तद्धितोत्पत्तिः; अनभिधानात् । अपरस्मात् पञ्चकपालादुत्पत्तिः । सोऽयमव्यविकन्याय उच्यते, तद्यथा अवेर्मांसमित्यविशब्देन विग्रह एव, अविकशब्दादुत्पत्तिर्विग्रहश्च आविकमविकस्य मांसमिति ।

सा च व्यवस्थितविभाषेति । एवं कृत्वा त्रैविद्यः, पाञ्चनदम्, षाट्कुल इत्यत्रापि लुग्न भवति । अथ वा---त्र्यवयवा विद्या त्रिविद्या, शाकपार्थिवादिः, तामधीते त्रैविद्यः, विद्यात्रयरूपस्य च समुदायस्य विद्यात्वं विवक्षितमित्यर्थभेदाभावः । पञ्चानां नदीनां समाहारः पञ्चनदम्, `नदीभिश्च' इत्यव्ययीभावः

`गोदावर्याश्च नद्याश्च' इत्यच्समासान्तः, पञ्चनदे भवः पाञ्चनदः । अथ वा---अभिधाने हि सति समाहारद्विगोरपि भवत्येव तद्धितः । तथा षण्णामादिपुरुषाणां कुलानि तत्र भवः षाट्कुलः । अव्यविकन्यायाच्च तिस्रो विद्या अधीते, पञ्चसु नदीषु भवः, षट्सुकुलेषु भव इति विग्रह एव; न द्विगुः, नापि तद्धितः ।।

गोत्रेऽलुगचि ।। 4.1.89 ।।

पूर्वत्रोत्तरत्र च लुग्विधानादिह नञ् प्रश्लिष्यते । यस्कादिभ्यो गोत्र इत्यादिनेति । `प्राग्दीव्यतः' इत्युपजीवनाय तु प्रकरणोत्कर्षः, प्रसज्यप्रतिषेधश्चायम् । अचीति । यद्येषा परसप्तमी स्याच्छविधावितरेतराश्रयं प्राप्नोति---गार्गीया वात्सीया इतिच्छे परतोऽलुका भवितव्यम्, अलुकि च सति वृद्धत्वाच्छेन भवितव्यमिति । ननु च छे परतोऽलुग्विधीयते, किं तर्हि ? `अजादिमात्रे, तत्र य एवाजादिः सम्भवति तत्रैवालुग्भविष्यति, तद्यथा---गर्गाणां छात्त्राः, `प्राग्दीव्यतोऽण्', तत्र परतः `यञञोश्च' इति प्राप्तस्य लुकः प्रतिषेधे गर्गा इति भवति । यद्यप्यत्र सत्यसति वा लुकि नास्तिविशेषः, `आपत्यस्य च तद्धिते' इति यलोपविधानात् । इह त्वत्त्रेरपत्यानि बहूनि `इतश्चानिञः' इति ढकः `अत्त्रिभृगु' इति लुकि कृतेऽत्त्रीणां छात्त्रा इत्यणि परतः प्रतिषेधे सति आत्त्रेया इति भवति, असति तु प्रतिषेधे आत्त्रा इति स्यात् ? स्यादेतदेवं यदि लुप्तस्य प्रत्ययस्य पुनः प्रादुर्भावो विधीयतेत, इह त्वलुगिति वचनाल्लुकः प्रतिषेधो विधेयः, प्राप्तस्य चानभिनिर्वृत्स्य प्रतिषेधेन निवृत्तिः शक्यते कर्तुम्, ततश्च यद्यत्राणजादिरभिप्रेतः स्यात्, प्रागेव लुकः प्रवृत्तिरभ्युपगन्तव्या; अन्यथा वृद्धत्वाच्छ एव स्यात्, लुक चेत्प्रवृत्तः प्रतिषेधः किं करिष्यति ! यो हि भुक्तवन्तं प्रति ब्रूयान्मा भुङ्क्था इति, किं तेन कृतं स्यात् ! तदिहाजादौ प्रवृत्तेऽलुका भवितव्यम्, अलुकि च प्रवृत्तेऽजादिना भवितव्यमिति व्यक्तमितरेतराश्रयम् । विप्रतिषेधात्सिद्धम्, लुकोऽवकाशो यत्र प्राग्दीव्यतीयार्थो न विवक्ष्यते---गर्गा वत्सा इति, छस्यावकाशः---शालीय इति; गर्गाय इत्यत्रोभयप्रसङ्गे परत्वाच्छो भविष्यति । तत्र परतो लुकः प्रतिषेधः, अन्तरङ्गो लुग् अपत्यबहुत्वमात्रापेक्षत्वात्, बहिरङ्गश्छः प्राग्दीव्यतीयार्थापेक्षित्वात्, अन्तरङ्गबहिरङ्गयोश्चायुक्तो विप्रतिषेधः । एवं तर्ह्युच्यते चेदमजादौ परतो लुग्भवतीति, यदि च तावत्येव निमित्तमस्तीति बहुत्वमात्रापेक्षो लुक् प्रवर्तेत प्रतिषेधविधानमनर्थकं स्यादिति यावत्प्राग्दीव्यतीयोऽजादिर्नोत्पद्यते तावल्लुग् न प्रवर्तत इति कल्प्यते, ततश्च वृद्धत्वाच्छे सति लुकि प्रतिषिद्धे गर्गीय इति सिद्धमिष्टम् । विषयसप्तम्यां तु न किञ्चिद्यत्नसाध्यम्, गर्गाणां छात्त्रा इत्यर्थविवक्षायामजादौ प्रत्यये विवक्षिते बुद्धिस्थेऽनुत्पन्न एव लुकि प्रतिषिद्धे वृद्धत्वाच्छो भवतीति, तस्माद्विषयसप्तमीमाश्रित्याह---प्राग्दीव्यतीये प्रत्यये विषयभूत इति । खारपायणीया इति । खरपस्यापत्यानि बहूनि `नडादिभ्यः फक्', `यस्कादिभ्यो गोत्रे' इति प्राप्तस्य लुकः प्रतिषेधः । कौबलम्, बादरमिति । कुबली-बदरीशब्दौ गोरादिङीषन्तावन्तोदात्तौ, ताभ्यां फले विकारे `अनुदात्तादेश्च' इत्यञ्, तस्य `फले लुक्' इति प्राप्तस्य लुकः तस्येदमित्यर्थविवक्षायां प्रतिषेधो न भवति, तेनावृद्धत्वादणेन भवति । गर्गरूप्यमिति । यद्यत्रालुक् स्याद्, सार्ग्यरूप्यमिति स्यात् । गार्गीयमिति । `तस्मै हितम्' इति प्राक्क्रीताच्छः ।

विषयसप्तम्या एव फलं दर्शयति---गोत्रस्येत्यादि । गोत्रस्येति गोत्रप्रत्ययस्येत्यर्थः । वहुषु लोपिन इति । बहुष्वर्थेषु विधीयमानलोपस्येत्यर्थः । बहुवचनान्तस्य प्रंवृत्ताविति । प्रवृत्तिः=अर्थान्तरसंक्रान्तिः, बहुवचनान्तस्य सतोऽर्थान्तरसंक्रान्तौ सत्यामित्यर्थः । द्व्येकयोरिति । यत्रार्थान्तरे संक्रान्तस्य द्वित्वैकत्वयोः सतोरित्यर्थः । सा चार्थान्तरसंक्रान्तिस्तदन्ताद्यदा यनि प्रत्यय उत्पद्यते तस्य च लुक् क्रियते तदा भवति लुप्ते हि युवप्रत्यये प्रकृतिरेव तदर्थमाहेति भवति संक्रान्तिः । बिदानामिति । बदस्यापत्यानि बहूनि, `अनृष्यानन्तर्ये बिदादिभ्योऽञ्', बिदाः, तेषां बिधानामपत्यं युवा युवानौ वेति विवक्षायाम् `अतः' इति इञि विवक्षिते गोत्रप्रत्ययस्याञो लुकः प्राप्तस्यानेन प्रतिषेधः । इञः `ण्यक्षत्त्रियार्ष' इति लुकि बैदः, बैदाविति भवति । परसप्तमीपक्षे त्वलुग्न प्राप्नोति; अजादेरभावात् ।

इदमिह सम्प्रधार्यम्---इञो लुक् क्रियतामयं वाऽलुगिति ? परत्वादलुग्भवति । इञो लुग्नित्यः, कृतेऽप्यस्मिन्नलुकि प्राप्नोति अकृतेऽपि, अयं पुनरलुगनित्यः, न हीञो लुकि कृते प्राप्नोति; अजादेरभावात् ? प्रत्ययलक्षणेन भविष्यति । वर्णाश्रये नास्ति प्रत्ययलक्षणम् ? नात्र वर्णो निमित्तम्, किं तहि ? प्रत्ययः, तस्यैव तु विशेषणमचीति । तत्र यथा हलादौ पिति सार्वधातुके विधीयमानः `तृणह इम्' अतृणेडित्यत्रापि भवति प्रत्ययलक्षणेन तद्वदिहापि भविष्यति ? सत्यम्; विषयसप्तमीपक्षे नैवं क्लेशोऽनुभवनीयो भवति । ननूभयोरपि पक्षयोरिहापि न प्राप्नोति---बिदानामपत्यं बहवो माणवका बिदा इति ? नैष दोषः; द्वे अत्र बहुत्वे---युवबहुत्वं गोत्रबहुत्वं च, तत्र गोत्रबहुत्वाश्रयस्य लुकः प्रतिषेधोऽस्तु पुनर्युवबहुत्वाश्रयो लुग्भविष्यति । लुग्विधौ हि लौकिकस्य गोत्रस्य ग्रहणम्, युवापि च लोके गोत्रमित्युपचर्यते---गार्ग्यायणोऽस्मि गोत्रेणेति ।

अथ युवबहुत्वाश्रयस्यापि लुकः पुनः प्रतिषेधः कस्मान्न भवति ? विषयसप्तम्यां तावद् यस्यामवस्थायां लुक् प्राप्तः तस्यामवस्थायां यदि कश्चिदजादिर्विषयभूतस्ततोऽलुका भवितव्यम्, इह चाजादिर्विषयभूत उत्पन्नो लुप्तश्च, पश्चाद्युवसु बहुषु संक्रान्तौ सत्यां लुक् प्राप्तः, न चास्यामवस्थायां कश्चिदजादिविषयभूत इति पुनर्लुग्न भविष्यति । परसप्तम्यामपि गोत्रे वर्तमानस्या लुग्भवत्यजादौ परतः । कस्मिन्नजादौ ? प्राग्दीव्यतो येऽर्थास्तेषु योऽजादिस्तस्मिन्निन्त्युच्यमाने यस्मिन् गोत्रे वर्तमानस्य लुक् प्राप्तस्तद्व्यतिरिक्ते प्राग्दीव्यतीयेऽर्थे योऽजादिस्तत्रेति गम्यते । इह चेञेवाजादिस्तदर्थ एव च गोत्रे लुगिति प्रतिषेधो न भविष्यति ।

यद्वा---`समर्थानां प्रथमात्' इत्यतः प्रथमादिति वर्तते, तच्च षष्ठ्यन्तं विपरिणम्यते, प्रथमार्थवृत्तित्वाच्च प्राथम्यमाश्रीयते, तदयमर्थो भवति---प्रथमस्य गोत्रप्रत्ययस्य लुग्न भवति, यस्मिन्नर्थे प्रत्यय उत्पन्नस्तत्रैवार्थे वर्तमानस्य यो लुक् प्राप्तः स न भवति । इह तु द्वितीयमर्थमुपसंक्रान्तस्य लुक् प्राप्त इति न प्रतिषिध्यते । अवश्यं चैतदेवं विज्ञेयम्---प्रथमस्य लुक् प्रतिषिध्यत इति, अन्यथा अत्त्रेरपत्यम् `इतश्चानिञः' इति ढक्, तस्यापत्यं बहवो युवानः, अत इञः

`ण्यक्षत्त्रियार्ष' इति लुक्, ढकः `अत्रिभृगु' इति लुक्, अत्त्रयः; भरद्वाजशब्दाद्विदाद्यञ्, तदन्ताद्युवबहुत्वे इञो लुक्, अञः `यञञोश्च' इति लुक्, अत्त्रयश्च भरद्वाजाश्च अत्त्रिभरद्वाजास्तेषां मैथुनिकाद् द्वन्द्वाद् वुन्---अत्त्रिभरद्वाजिका, तत्रालुक् प्राप्नोति; कुत्सादृष्यणः `अत्त्रिभृगु' इति लुक्, कुशकादञन्तादिञो लुकि कुशिकाः, कुत्सकुशिकिकाः, वसिष्ठकश्यपिकाः, भृग्वङ्गिरसिकाः । अय वा--गोपवनादिषु गर्घभार्गविकाशब्दः पठ्यते, भार्गवशब्दस्य युवबहुत्वे प्राप्तस्य लुकः प्रतिषेधार्थं तन्नियमार्थं भविष्यति---एतस्यैव द्वितीयमर्थमुपसंक्रान्तस्यालुग्भवतीति । नैव वा पुनरत्र युवबहुत्वे वर्तमानस्यालुक्प्राप्नोति, किं कारणम् ? गोत्र इत्युच्यते, यद्यप्यपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यते, इह तु पारिभाषिकस्य ग्रहणम्, युवशब्दसाहचर्यात् ; अन्यथा गोत्रयुवसंज्ञयोः समावेशे योऽयं दोषो वक्ष्यते---शालङ्केरपत्यं `यञिञोश्च' इति फक्, तस्य `पैलादिभ्यश्च' इति लुक्, शालङ्केर्यूनश्छात्रा इत्यर्थविवक्षायाम् `गोत्रेऽलुगचि' इत्यलुक् प्राप्नोति, ततश्च `यूनि लुक्' इत्यस्य `फक्फिञोरन्यतरस्याम्' इति विकल्पितत्वात्पक्षे फकः श्रवणं प्राप्नोतीति स तदवस्थ एव स्यात्, असमावेशेऽपि यूनो लौकिकगोत्रत्वादेवालुक्प्रसङ्गात् । तदेवं गोत्रस्य बहुषु लोपिन इत्यादि न वक्तव्यमिति स्थितम् ।

एकवचनद्विवचननान्तस्येत्यादि । एकवचनान्तस्य गोत्रप्रत्ययस्य द्विवचनान्तस्य वा बहुष्वर्थेषु युवसंज्ञकेषु प्रवृतौ संक्रान्तौ सत्यामित्यर्थः । लोप इति । लुगित्यर्थः । लोपे हि प्रत्ययलक्षणेन वृद्धिस्वरप्रसङ्गः । ननु च युवबहुत्वाश्रयो `यञञोश्च' इत्येवात्र लुक् सिद्धस्तत्राह---न ह्यत्राञ्बहुषूत्पन्न इति । अञ्यो बहुषु, यञ्यो बहुष्विति विज्ञायमाने लुग्न सिध्यतीत्यर्थः । यदा त्वञन्तं यद्बहुषु, यञन्तं यद्बहुष्विति विज्ञायते; तदाञन्तस्य बहुषु युवसु वृत्तेर्लौकिकस्य च गोत्रस्यापत्यमात्रस्य तत्र ग्रहणात्सिद्ध एव लुक् । तथा च---गार्ग्यश्च वात्स्यश्च वाज्यश्च गर्गवत्सवाजाः, बैदश्च और्वश्च भारद्वाजाश्च बिदौर्वभारद्वाजा इति यञञोरुत्पत्तिवेलायामबहुत्वेऽपि द्वन्द्वे युगपधिकरणवचनतया यञन्तस्याञन्तस्य बहुत्वोपजनाल्लुग्भवति । न चैवं काश्यपस्यैकस्य बह्व्यः प्रतिकृतयः काश्यपा इति `इवे प्रतिकृतौ' इति विहितस्य कनः `जीविकार्थे चापण्ये' इति लुप्, `हरीतक्यादिषु व्यक्तिः' इति वचनाद् युक्तवद्वचनाभावेऽञन्तस्य बहुषु वृत्तेर्लुक्प्रसङ्गः; गोत्रबहुत्वे लुग्विधानात् ।।

यूनि लुक् ।। 4.1.90 ।।

अत्रापि यद्यचीति परसप्तमी स्यात्, प्रत्ययस्य यथेष्टप्रसङ्गः । युवप्रत्यये श्रूयमाणे यः प्राप्नोति स तावत्कत्तव्यः, तत्र कृते युवप्रत्ययस्य लुकि तस्य श्रवणं प्राप्नोति, विषयसप्तम्यां त्वजादौ विषयभूत एव युवप्रत्यये लुप्ते यो यतः प्राप्नोति ततः स स भवतीति सिद्धमिष्टम् । एतच्चोदाहरणेषु व्यक्तीकरिष्यते, तदेतदाह---अजादौ प्रत्यये विवक्षित इत्यादि । इञश्चेत्यण् भवतीति । परससप्तम्यां तु वृद्धाच्छ एव स्यात् ।

फेश्छ चेति । `यमुन्दश्च सुयामा च वार्ष्यायणिः फिञः स्मृताः' इति परिगणनं भाष्यकारेण नाश्रितम्, तेन तैकायनेरपिच्छो भवति । तैकायनीया इति । अत्र परसप्तम्यामप्यदोषः, `ण्यक्षत्त्रियार्षञितः' इत्यत्र तु वृत्तिकारेणाणो लुगुदाहृतः---तैकायनिः पिता तैकायनिः पुत्त्र इति, स परिगणनाश्रयेण द्रष्टव्यः, तदा च तैकायनीया इत्यनुदाहरणम् ।

कापिञ्जलादा इति । अत्रापि परसप्तम्यां वृद्धाच्छः स्यात् । एवं ग्लौचुकायना इत्यत्रापि द्रष्टव्यम् । इह तु औपगवेर्यूनश्छात्त्रा इञो लुकि वृद्धाच्छो भवति, परसप्तम्याम्, `इञश्च' इत्यण्स्यात् । नैतदस्य योगस्योदाहरणम्, कथम् ? `इञश्च' इत्यत्र `गोत्रे' इति वर्तते, तेनेञं विशेषयिष्यामः---गोत्रे य इञ् विहित इति पारिभाषिकं च गोत्रं गृह्यते, कथम् ? `कण्वादिभ्यो गोत्रे' इत्यत्र तावद् `गोत्रेकुञ्जादिभ्यः' इत्यस्य गोत्रस्यानुवादः---कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितस्तदन्तादण् भवतीति, तत्र च पारिभाषिकं गृह्यते तस्यैव चानुवादः, तदेव च `इञश्च' इत्यत्राप्यनुवर्तते, तत्कुतो युवप्रत्ययान्तादणः प्रसङ्गः ! अवश्यं चैतदेवं विज्ञेयम्, अन्यथा लुप्तेऽपीञि प्रत्ययलक्षणेनाण् स्यादेव ।

इमानि तर्ह्यत्रोदाहरणानि---यत्खच्छान्ताः । यत्---`राजश्वशुराद्यत्', श्वशुरस्यापत्यं श्वसुर्यः, तस्यापत्यं श्वाशुरिस्तस्य छात्त्रा इति लुकि `प्राग्दीव्यतोऽण्' भवति श्वाशुरः, अन्यथा `वृद्धाच्छः' स्यात् ; `कुलात्खः' कुलीनः, तस्यापत्यं कौलीनिः, तस्य छात्त्राः, इञो लुकि कौलीनः; `स्वसुश्छः', स्वस्रीयः, तस्यापत्यं स्वास्रीयिः, तस्य छात्त्रा इञो लुकि स्वस्रीयाः ? नैतान्युदाहरणानि; `अब्राह्मणाद् गोत्रमात्राद्युवप्रत्ययस्योपसङ्ख्यानम्' इतीञो लुकि कृते श्वशुर्यः पिता श्वशुर्यः पुत्रः, कुलीनः पिता कुलीनः पुत्रः, स्वस्रीयः पिता स्वस्रीयः पुत्र इति भवितव्यम् । न च ब्राह्मणगोत्रे कश्चिदवृद्धिनिमित्तः प्रत्ययः सम्भवति, यत इञि कृते छः प्राप्नोति; वृद्धिनिमित्ते तु गोत्रप्रत्यये नास्ति विशेषः, यतः श्रूयमाणोऽपीञि छेन भवितव्यम् । लुप्तेऽपि तस्मिन् गोत्रप्रत्ययान्तस्यापि वृद्धत्वाच्छेन भवितव्यम्, तद्यथा---औपगवीया इति । तदेवमिञ उदाहरणं न सम्भवतीति स्थितम् ।

यदि तु पूर्वसूत्रे लौकिकस्य गोत्रस्य ग्रहणं तदा स्यादेवेञ उदाहरणम् । तथा हिश्वशुर्यादिभ्य उत्पन्नस्येञः, सत्यप्यौपसङ्ख्यानिके लुकि तस्य प्राग्दीव्यतीयविवक्षायाम् `गोत्रेऽलुगचि' इति प्रतिषेधेन पुनः प्रादुर्भावादिञाश्रयः `वृद्धाच्छः' स्यात्, यदि तस्य `यूनि लुक्' इति लुग्न क्रियेत । अतोऽस्मादिञ उदाहरणत्वप्रतिषेधायप्यवसीयते---पारिभाषिकं गोत्रं पूर्वसूत्रे भाष्यकारस्याभिमतमिति ।

किमर्थं पुनरिदमुच्यते, यावता यूनोऽपिगोत्ररूपे विवक्षिते गोत्रप्रत्ययेनाभिधानात्तन्निबन्धन एव प्रत्ययो भविष्यति, अर्थप्रकरणादिना च युवविशेषसिद्धिः, अवश्यं चार्थप्रकरणादिनैव विशेषोऽवसातव्यः, आरब्धेऽपियस्मिन्सूत्रे शब्दस्य साधारणत्वात् । न हि ज्ञायते---किं भागवित्तेश्छात्त्रा भागवित्ताः ? आहोस्विद्भागवित्तिकस्येति ? यदा तर्हि विशेषविवक्षा, तदापि भागवित्ता इत्येव यथा स्याद्, भागवित्तिकीया इति जातुचिन्मा भूदित्येवमर्थमिदम् ।।

फिक्फञोरन्यतरस्याम् ।। 4.1.91 ।।

किमर्थमिदम्, यावता युवरूपविवक्षायां गार्ग्यायणीय इति, गोत्ररूपविवक्षायां च गार्गीया इति शब्दस्य साधारणत्वात् ? इत्यत आह---पूर्वसूत्रेणेति । `यूनि लुक्' इत्येतदारम्भणीयमित्युक्तम्, तस्मिंश्चारभ्यमाणे यदीदं नोच्येत, फक्फिञोरपि नित्यमेव लुक् स्यात्, ततश्च गार्ग्यायणीया इति न स्यात् ।

तस्मादिदमप्यारम्भणीयमित्यर्थः ।।

तस्यापत्यम् ।। 4.1.92 ।।

अर्थनिर्देशोऽयमिति । प्रकृत्यर्थविशिष्टः षष्ठ्यर्थोऽपत्यरूपः प्रत्ययार्थोऽनेन निर्दिश्यत इत्यर्थः । तेन समर्थविभक्तेरपि षष्ठ्या निर्देशो दर्शित एव । पूर्वैरुत्तरैश्चेति । पूर्वैस्तावदणादिभिः सम्बद्ध्यते; असंयुक्तविधानात्, अन्यथा `तस्यापत्यमत इञ्' इत्येकं योगमेव कुर्यात्, यतस्त्वसंयुक्तं करोति, ततो ज्ञायते---पूर्वैः सम्बध्यत इति । उत्तरैरपि सम्बध्यते; स्वरितत्वात्साकांक्षत्वाच्चतेषाम् । तस्येति षष्ठीसमर्थादिति । तस्येति सामान्यं षष्ठ्यन्तविशेषोपलक्षणार्थम्, `समर्थानाम्' इति च निर्द्धारणे षष्ठी । तत्र तुल्यजातीयस्य निर्द्धारणादयमर्थः सम्पद्यते---षष्ठ्यन्तात्समर्थादिति । अपत्यमित्येतस्मिन्नर्थ इति । प्रथमान्तस्यापत्यशब्दस्यान्यथासम्बन्धानुपपत्तेरयमध्याहारो लब्धः । यथाविहितमिति । `यथार्थे यदव्ययम्' इति वीप्सायामव्ययीभावः । `प्राग्दीव्यतोऽण्' इत्यादिभिर्यो यतो विहितः स तस्मादित्यर्थः । इह `तस्य' इति पुंनपुंसकयोरन्यतरेणायं निर्देशः क्रियते, एकवचनान्तेन च, तेन लिङ्गान्तराद्वचनान्तराच्च न स्यात्---सुमातुरपत्यं सोमात्रः, क्षत्तरस्यापत्यं क्षात्त्रिः, उपगोरपत्यमौपगव इति । अपत्यमिति चैकवचनेन नपुंसकेन च निर्देशः क्रियते, तेनैकस्मिन्नेवापत्ये स्यात्, न द्वयोः, नापि बहुषु, नपुंसक एव स्यात्, न स्त्रीपुंसयोरित्याशङ्क्याह--प्रकृत्यर्थेत्यादि । प्रकृत्यर्थ उपग्वादिर्विशेषः; तस्येत्यस्य विशेषोपलक्षणार्थत्वात् । अपत्यमात्रं चेति । मात्रशब्दोऽयं लिङ्गवचनयोर्व्यवच्छेदाय । लिङ्गवचनादिकमिति । आदिशब्देन कालस्य ग्रहणम्; अत्र हि वर्तमानकालेन निर्देशोऽस्तीति प्रतीतेः, यथोक्तम्---यत्रान्यत्क्रियापदं नास्ति तत्रास्तिर्भवतिपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति गम्यत इति । ततश्च तस्य कालस्य विवक्षायतं कालान्तरे न स्यात् । सर्वमविवक्षितमिति । नान्तरीयकत्वादुपादानस्यावश्यं हि केनचिल्लिङ्गादिना निर्देशः कर्तव्यः ।

तस्येदमित्यपत्येऽपीति । अणादीनां विधानं सिद्धमिति शेषः । तस्येदंविशेषा ह्यपत्यसमूहविकारादयः; सम्बन्धसामान्येऽपि सर्वविशेषान्तर्भावात्, ततश्च `तस्येदम्' इत्यनेनैवापत्येऽप्यणादीनां विधानं सिद्धम्, तत्किं योगविभागेनापत्येऽणादयो विधीयन्ते, न `तस्यापत्यमत इञ्' इत्यपवादैः संयुक्त एवापत्यार्थो निर्दिश्यते इति चोद्यार्थं परिहरति---बाधनार्थं कृतं भवेदिति । `तस्येदम्' इत्यनेन विधीयमानानामणादीनां यो बाधकश्छः, तस्य बाधनार्थमपत्येऽणादीनां विधानं कृतं भवेदित्यर्थः । ननु शैषिकश्छः, अपत्यादिचतुर्थपर्यन्तेभ्यो योऽन्योऽर्थः स शेषः, तत्कथमपत्ये छस्य प्रसङ्गो येन तद्बाधनार्थमिदम् ? इत्याह---उत्सर्गः शेषं एवासविति । यदि योगविभागमकृत्वा `तस्यापत्यमत इञ्' इत्युच्येत तदा प्रकृतिविशेषसम्बद्धस्यैवापत्यार्थस्योपयोगः, अतोऽन्योऽपत्यार्थः शेष एव स्यादिति स्यादेव वृद्धादपत्ये छः । योगविभागे तु---अपत्यार्थस्याणादिविधावुपयोगाच्छेषत्वाभावाच्छस्याप्राप्तिरेव, सैवात्राप्राप्तिर्बाधेत्युच्यते । उत्सर्ग इति प्रकृतिसामान्यसम्बद्धः सामान्यभूतोऽपत्यर्थ उक्तः । बाधनार्थस्योदाहरणमाह--वृद्धान्यस्य प्रयोजनमिति । श्यामगव इति । श्यामा गावोऽस्य श्यामगुरिति ।।

एको गोत्रे ।। 4.1.93 ।।

एकशब्दोऽयमन्यप्रधानासहायसङ्ख्याप्रथमसमानसाधारणवाची, अन्यार्थे तावद्---`एकान्याभ्यां समर्थाभ्याम्', `प्रजामेका रक्षत्यूर्जमेका', `एकान् बन्धुरपरान्निरासुः', `इत्येके मन्यन्ते', `यजुष्येकेषाम्' इति; केचित्त्वनयोः प्रयोगयोः केचिच्छब्दपर्याय एकशब्द इत्याहुः । `एकः पार्थो धनुष्मताम्' इति प्रधानार्थे । `आद्यन्तवदेकस्मिन्', `एकहलादौ', `एकहल्मध्ये' इत्यसहायार्थे । `एको द्वौ बहवः' इति सङ्ख्यार्थे । `एकेऽल्पप्राणः ।' इति प्रथमार्थे । `तेनैकदिक्' इति समानार्थे । `देवदत्तयज्ञदत्तावेकधनौ' इति साधारणार्थे । तत्र सङ्ख्यावचनः साधारणवचनः, प्रथमवचनो वा गृह्यते; अर्थान्तराणामसम्भवात् । गोत्रं पारिभाषिकम्; कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययात्, अपत्याधिकारे गोत्रग्रहणाच्च ।

किमर्थमिदमुच्यते, पौत्त्रप्रभृतावपत्ये विवक्षिते मूलप्रकृतेरुपरवादेरेव प्रत्ययो यथा स्याद्, औपगवादेः प्रत्ययान्तान्मा भूदिति । नैतदस्ति प्रयोजनम्, सन्विधिवदेतद्भविष्यति, तद्यथा---धातोर्विधीयमानः सन् सनन्तान्न भवति, तत् कस्य हेतोः ? आकृतौ पदार्थे समुदाये सकृल्लक्षणं प्रवर्त्तते, न च सनि विधीयमाने सनन्तो धातुः सम्भवति, तद्वदिहाप्यपत्यप्रत्यये विधीयमानापत्यप्रत्ययान्ता प्रकृतिः सम्भवतीति ततः प्रत्ययो न भविष्यति ? विषम उपन्यासः; एकः सन् प्रत्ययः, विधायकं च लक्षणमेकमेव तत्र युक्तम्, न तस्मिन्विधीयमाने तदन्ता प्रकृतिः सम्भवतीति ।

इह पुनः `तस्यापत्यम्' `अत इञ्' `यञिञोश्च' इति बहूनि लक्षणानि, प्रत्ययाश्च बहवः; तत्र कस्मिंश्चित्प्रत्यये विधीयमाने प्रत्ययान्तरेण तदन्ता प्रकृतिः सम्भवत्येव, तथा च गुपादीनां सनः सन् भवति---जुगुप्सिषते इति ? किं पुनः स्याद्यद्येतन्नारभ्येत ? उच्यते; इह केचिन्मन्यन्ते---पुत्रशब्दपर्यायोऽपत्यशब्दः; निघण्टुषु तथा पाठाल्लोके च दृष्टत्वात् । तद्यथा पितामहस्योत्सङ्गे दारकमासीनं दृष्ट्वा कश्चित्पृच्छति---कस्य पुत्रोऽयमिति, कस्यापत्यमिति ? स देवदत्तस्य यज्ञदत्तस्य वेत्युत्पादयितारं व्यपदिशति, नात्मानम्, ततश्च यथा पितामहं प्रति पुत्त्रो न भवति तथापत्यमिति । उत्पादयितैवैकोऽपत्येन युज्यते, न तु पितामहादयोऽपीति । अन्ये तु---क्रियानिमित्तकोऽपत्यशब्दः, न पतन्त्यनेनेत्यपत्यमिति औणादिको यत्प्रत्ययः, यस्य च येनापतनं तत्तस्यापत्यम् । व्यवहितजनितोऽपि पौत्रादिः पितामहादेरपतनहेतुर्भवति, श्रूयते हि---`जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षइभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः, एष वा अनृणो यः पुत्री' इति, एतेन पुत्रमुत्पाद्य पितृणामनृणो भवतीति प्रतिपादनात् पुत्रोत्पादितया प्रजया पितृणामुपकारी दृश्यते । स्मर्यते च---

पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ।। इति ।

इतिहासेषु च जारत्कारवादिषु महती वार्ता---व्यवहितजनितोऽप्युपकारक इति । सूत्रकारश्च शब्दविदां मूर्द्धाभिषिक्तः सूत्रयति---`अपत्यं पौत्रप्रभृति गोत्रम्'

इति, ततो विज्ञायते क्रियानिमित्तकोऽप्यपत्यशब्द इति; अन्यथा यथा पौत्रप्रभृतिः पुत्र इत्यनुपपन्नं तादृगेव तत्स्यात् । एवं सति साक्षात्परम्परया वा यस्य य उत्पाद्यः स तं प्रत्यपत्यामिति सर्वेऽपि पितामहादयोऽप्यपत्येन युज्यन्ते, न तूत्पादयितैवेति । तत्राद्ये पक्षे यद्येतन्नारभ्येत, ततस्तत्र तत्रापत्ये तत्तत्पितृवचनात्स स प्रत्ययः स्यात्, तद्यथा---उपगोरौपगवः, तस्यौपगविः, तस्यौपगवायनः । एवं शततमेऽपत्ये एकोनशतमपत्यप्रत्ययाः---इत्यनिष्टं प्राप्नोति, इष्टं च न सिद्ध्यति---औपगव इति, तृतीयादेरुपगुं प्रत्यनपत्यत्वात् । द्वितीये तूपगोः पञ्चमः पूर्वेषां चतुर्णामपत्यं ततो यदोपगोः प्रत्ययस्तदौपगव इतीष्टं तावत्सिद्ध्यति; अनिष्टमपि च प्राप्नोति, तच्चानिष्टमनियतमौपगविः, तत औपगवायनः, तत औपगवायनिरिति । पञ्चमे त्रीण्यनिष्टानि, षष्ठे चत्वारीत्येवं यावतिथमपत्यमभिधित्सितम्, तावन्ति द्व्यूनान्यनिष्टानि प्राप्नुवन्ति, तद्यथा---शततमेऽष्टौ नवतिश्चेति । एवं स्थिते इदमारभ्यते । आरभ्यमाणेऽप्येतस्मिन्यदि प्रथमः पक्ष आश्रीयते ततो विध्यर्थमेतत्स्याद्, नियमार्थं वा ? कथं चेदं विध्यर्थं कथं वा नियमार्थम् ? यदि गोत्रशब्देन पौत्रप्रभृत्यपत्यसमुदाय एकैकमपत्यमभिधीयते ततो विध्यर्थम्, तर्हि तथा नियमार्थः सम्भवति, एकस्मिन्नपत्येऽनेकप्रत्ययप्रसङ्गस्याभावाद् । न तावदेकस्मिन्प्रयोगे एकस्याः प्रकृतेरनेकप्रत्ययप्रसङ्गः; एकेनैवोक्तत्वात्तस्यार्थस्य । नापि प्रयोगभेदेन नानाप्रकृतिभ्यो नानाप्रत्ययप्रसङ्गः, सर्वदा स्वपितृवचनादेव प्रसङ्गादिति परमप्रकृतेस्तृतीयादावपत्येऽप्राप्तः, एवमौपगवाच्चतुर्थादाविति, ततः किं न विधीयते वचनव्यक्तिभेदात् ? एवं ह्यत्र वचनं व्यज्यते---गोत्र एकः प्रत्ययो भवति, यत एक एव प्रत्ययः कर्तुं शक्यते, तत एव प्रत्ययो भवतीत्यर्थः । एकग्रहणसामर्थ्याच्चायमर्थो लभ्यते । ननु विधीयमानेऽपि प्रत्यये प्रकृतिप्रत्ययावसम्बन्धौ स्याताम् ? वचनसामर्थ्यादपत्यापत्यस्यापत्यत्वोपचारात् प्रत्ययो भविष्यतीत्यदोषः ।

मुख्येऽपत्ये चरितार्थः प्रत्ययो न स्यादिति विधातव्यमपि, अस्मिन्पक्षे सर्वेष्वौपगव इतीष्टं सिद्ध्यति, प्रत्ययमालाप्रसङ्गस्तदवस्थ एव । न ह्यनेन तत्तत्पितृवचनात्प्राप्तः प्रत्ययः प्रतिषिद्ध्यते । तथा पञ्चमेऽपत्ये उपगुशब्दादनेन प्रत्यये विहिते तस्यापत्यमिति षष्ठ औपगविः स्यात् । यदा तु `अपत्यं पौत्रप्रभृतिगोत्रम्' इत्यपत्यशब्देन पौत्रप्रभृत्यसमुदायं लक्षयित्वा तस्यैव गोत्रसंज्ञा विधीयते, एकैकस्मिन्नपत्ये गोत्रशब्दप्रयोगः, समुदायेषु वृत्ताः शब्दा अवयवेष्वपीति न्यायात् । अत्रत्येन वा गोत्रशब्देनावयवधर्मेण समुदायव्यपदेशात्पौत्रप्रभृत्यपत्यसमुदायोऽभीधीयते तदा नियमार्थम्---गोत्रसमुदाये एक एव प्रत्ययो भवतीति ।

यद्यप्येकैकस्मिन्नपत्ये एकैकः प्रत्ययः प्राप्नोति, तथापि पौत्र एकस्तदपत्ये चापर इति सकलनिरूपणे समुदाये बहवः प्रत्ययाः कृताः स्युरिति नियम उपपद्यते । अस्मिन्पक्षे दोषः---अनन्तरापत्यप्रत्ययान्तात्तृतीये प्रत्ययः प्राप्नोति, गोत्रशब्दोपादानेन हि नियमः क्रियते---गोत्र एक एवेति, ततश्च गोत्रेऽनेकः प्रत्ययो मा भूत् । अनन्तर एकस्तृतीये चापर इत्येवमनेकः कस्मान्न स्यात् ? एवमपि गोत्रे एक एव हि कृतो भवति । अथ वा---गोत्रसमुदाये एव एवेत्यनेन किं क्रियते ? तृतीयादेश्चतुर्थादौ प्राप्तः प्रतिषिध्यते । यदि तृतीयादेः स्यात्समुदायेऽनेकः प्रत्ययः कृतः स्यादिति । यस्त्वनन्तरस्तृतीये प्राप्तः सोऽभ्यनुज्ञायते---एक एवेतीतरव्यावृत्तौ नियमेषु तात्पर्यम् । ततश्च यतः प्रत्यये क्रियमाणे समुदायेऽनेकः प्रत्ययः कृतो भवति । ततो न भवतीत्येव वचनार्थो भवति । एवं चतुथस्यापत्यप्रत्ययेनाभिधानं न प्राप्नोति, द्वितीयादुत्पन्नस्तृतीयमेवाचष्टे न तृतीयादुत्पद्यत इति, किन्तु औपगवेरपत्यमिति वाक्यमेव । पञ्चमादेस्तु वाक्येनाप्यभिधानं न प्राप्नोति, न हि तत्तत्पितृवचनः कश्चिदपत्यप्रत्ययान्तः शब्दोऽस्ति येन विगृह्येत । परमवकृतेश्च तृतीयादौ न कुत्रचित्प्रत्ययः प्राप्नोति, ओयोगात् । तदेवमस्मिन्पक्षे परमप्रकृतेश्चोत्पत्तिर्वक्तव्या, अनन्तराच्च तृतीये प्राप्तस्य प्रतिषेधो वक्तव्यः ।

स्यादेतत्---न परमप्रकृतेरुत्पत्तिर्वक्तव्या, अभेदोपचारेणैव सिद्धेः । अभेदोपचारश्चोपग्वौपगवयोरौपगवतदपत्ययोर्वा । तदेवं शततमेऽप्यपत्येऽभेदोपचारपरम्परया औपगव इत्यभिधानं सिध्यति, न चैवमभेदोपचारेणैवेष्टस्य सिद्धेः सूत्रस्य वैयर्थ्यम्, भेदविवक्षायां प्रत्ययमालाप्रसङ्गनिवृत्त्यर्थत्वादिति ? एवमप्यनन्तरस्य तृतोयस्य च भेदविवक्षायां तृतीय औपगविः स्यात्, तथाऽनन्तरे तृतीयादौ च यत्र प्रत्ययो भिद्यते, यथा---गर्गादौ, तत्राप्यनिष्टप्रसङ्गः । यदि तावद् गार्ग्ये गर्गापचारस्तदा तदपत्यमपि गार्गिः स्याद्, गार्ग्यश्चेष्यते । अथापि गर्गेस्तदपत्यस्य चाभेदोपचारः, एवमपि गार्गिः स्यादितीत्यादौ विषये दोषवानेवाभेदोपचारः । तदेवं प्रथमपक्षे विधौ नियमे च दोषप्रसङ्गाद् द्वितीयः पक्ष आश्रीयते, तत्रापि नियमः । यद्यप्येकैकस्मिन्प्रयोगे एकस्याः प्रकृतेरेक एव प्रत्ययः प्राप्नोति, तथाप्युपगोः पञ्चमे पूर्वाभ्यश्चतसृभ्यः प्रकृतिभ्यः प्रयोगभेदेन नानाप्रत्ययप्रसङ्गे नियमः क्रियते---एव एवेति । तदिदमुक्तम्---भेदेन प्रत्ययप्रसङ्गे नियमः क्रियते ।

ननु न ज्ञायते--क एवो भवतीति, यो वा परमप्रकृतेर्यो वा प्रत्ययान्तादिति ? नन्वेक इत्युच्यते, यदि च प्रत्ययान्तात्प्राप्तः प्रत्ययः स्यादनेकः कृतः स्यात् । क्व ? न तावत्पञ्चमे; पूर्वेषां प्रत्ययानामस्मिन्प्रयोगे प्रसङ्गोऽपत्यान्तरविषयत्वात् । अथ गोत्रसमुदाये केनासौ निवार्येत ? न तावदनेनैव, न हि गोत्रसमुदायो गोत्रग्रहणेन गृह्यते । अथापि गृह्येत, एवमपि न ज्ञायते---यो वा परमप्रकृतेः, यो वाऽनन्तरादिति ? यदि पुनर्गोत्रग्रहणं न क्रियते, क्रियमाणं वाऽपत्यमात्रपरं विज्ञायते, न स्यादेष दोषः; अपत्ये समुदाये एक एवेति नियमात् । अपत्याधिकारे गोत्रग्रहणात्त्वेष दोषो जायते ? नैष दोषः; अपत्यमिति वर्तते, गोत्रेऽपत्ये एक एवापत्यप्रत्ययो भवतीति वचनव्यक्तिः । यदि च प्रत्ययान्तात्प्रत्ययः स्यादपत्यप्रत्ययोऽनेको गोत्रे कृतः स्यात्, सामर्थ्येन वा प्रत्ययो विशेष्यते---गोत्राभिधाने समर्थानां मध्ये एक एवेति । यदि च प्रत्ययान्तात् प्रत्ययः स्याद् गोत्राभिदानसमर्थोऽनेकः कृतः स्यात्प्रथमस्यापि समर्थत्वात् । यद्यप्यस्मिन्प्रयोगेऽपत्यान्तरे वर्तते पञ्चमं प्रत्यपि सामर्थ्यं तावदस्ति, यदि वा `तस्यापत्यम्' इत्यादिलक्षणैरेक एव प्रत्ययः कर्तव्यः, क्व ? गोत्रे, यस्मिन्प्रत्यये गोत्रम्भिदित्सितं तत्रेत्यर्थः । प्रत्ययान्ताच्च प्रत्यये तस्मिन्नेव प्रयोगे प्रकृतिरूपसम्पादनायापि तावदनेक कृतः स्यात् ।

यदि वा प्रथमवचन एकशब्दः, कश्च प्रथमः ? यमकृत्वा प्रत्ययान्तरं कर्तुं न शक्यते । साधारणवचनो वा, अपत्याधिकाराच्च यः सर्वापत्यसाधारणः स एव गोत्रे भवतीति, गर्गशब्दाद्यञेव भवतीति । गर्गशब्दाद्यो यञ् प्राप्तः स एव भवति, न प्रकृत्यन्तरेभ्यः प्राप्ताः प्रत्यया इत्यर्थः, तदाह---प्रत्ययो नियम्यत इति ।

प्रत्ययान्तरं वार्यत इत्यर्थः । एतेन प्रकृतिर्नियम्यते इत्यपि व्याख्यातम् ।
अथ वेत्यादि । अस्मिन्पक्षे प्रथमवचन एव शब्द इति दर्शितम् । प्रथमा प्रकृतिरिति । सूत्रे तु शब्दापेक्षया पुंल्लिङ्गनिर्देश इति दर्शितम् । एक एव शब्द इति । अथ वा---अस्मिन्पक्षे साधारणवचन एकशब्दः परमप्रकृतिश्च सर्वप्रत्ययसाधारणी, सङ्ख्यावचनो वा प्रथमातिक्रमे कारणाभावात्परमप्रकृतिरेकशब्देन गृह्यते । अनयोः पक्षयोः प्रथमा प्रकृतिरिति । एकशब्दस्यार्थतो विवरणं द्रष्टव्यम् ।।
गोत्राद्यून्यस्त्रियाम् ।। 4.1.94 ।।
अत्राप्यनारभ्यमाणेऽस्मिन्योगे उत्पादयितर्यपत्ययुक्ते गोत्रसंज्ञाया युवसंज्ञया बाधितत्वादसति पूर्वसूत्रव्यापारे चतुर्थे तृतीयात्पञ्चमे चतुर्थात्षष्ठे पञ्चमादौ यूनि तृतीयादुत्पत्तिर्न प्राप्नोति, तं प्रत्यनपत्यत्वादितीष्टं न सिध्यति । सर्वेषु त्वपत्ययुक्तेषु पञ्चमे यूनि पूर्वेभ्यश्चतुर्भ्यः प्रत्ययः प्राप्नोति । तत्र यदा तृतीयात्तदा गार्ग्यायण इतीष्टं तावत्सिध्यति, अनिष्टमपि प्राप्नोति; प्रकृत्यन्तरेभ्योऽपि प्रत्ययप्रसङ्गादित्यत इदमारभ्यते ।
अत्रापि यदि पूर्वः पक्ष आश्रीयते ततो विध्यर्थमेतत्स्यात्, नियमार्थं वा ? यदि युवशब्देनैकमपत्यमुच्यते, तत एकस्मिन्यूनि गोत्रादगोत्राच्च प्राप्त्यभावात् चतुर्थेन व्यवहिते पञ्चमादौ यूनि गोत्राद्विध्यर्थं भवति । अथ चतुर्थप्रभृत्यपत्यसमुदायो युवशब्देनोच्यते, ततो गोत्राच्चतुर्थे चतुर्थादगोत्रात्पञ्चम इति गोत्रादगोत्राच्च युवसमुदाये प्रत्ययप्रसङ्गे गोत्रादेवेति नियमार्थं भवति । तत्र विधौ गर्ग्यायण इतीष्टं सिध्यति, प्रत्ययमालाप्रसङ्गदोषः स्यादेव; तत्पितृवचनात्प्राप्तस्य प्रत्ययस्यानिषिद्धत्वात् । नियमे चतुर्थादेः प्राप्तस्य प्रत्ययस्य प्रतिषेधोऽयं सम्पद्यते---यदि चतुर्थादेः स्याद् युवसमुदाये गोत्रादपि प्रत्ययः कृतः स्यादिति, ततश्च नानिष्टप्रसङ्गः; किन्तु पञ्चमादौ यूनि गोत्रादुत्पत्तिर्न प्राप्नोति, तं प्रत्यनपत्यत्वादिति पञ्चमस्य वाक्येनाभिधानंस्याद्---गार्ग्यायणस्यापत्यमिति । षष्ठस्य तु वाक्येनापि न सिद्ध्यति, न हि तत्पितृवचनोऽपत्याप्रत्ययान्तः शब्दोऽस्ति, येन विगृह्येत । तदेवमत्रापि द्वितीयः पक्ष आश्रीयते, नियमश्च, तदाह---अयमपि नियम इति । गोत्रादेवेति । यून्येवेत्येष विपरीतं नियमो न भवति; `एको गोत्रे' इति नियमाद्यूनोऽन्यत्र गोत्रप्रत्ययस्य प्रसङ्गाभावात् । न परमप्रकृत्यनन्तरयुवभ्य इति । अन्यथा प्रयोगभेदेन तेभ्योऽपि स्यात् ।
कि पुनरत्र प्रतिषिध्यत इति । सर्वस्मिन्नपि प्रतिषिध्यमाने दोषदर्शनात्प्रश्नः । तमेव दोषमाविष्करोति---यदि नियम इति । तदेकवाक्यत्वात्प्रतिषेधस्येति भावः । स्त्रियामनियमः प्राप्नोतीति । परमप्रकृत्यनन्तरयुवलक्षणाः प्रत्ययाः प्रयोगभेदेन पर्यायेण स्युरित्यर्थः । अथ युवप्रत्ययः प्रतिषिध्यत इति । अस्त्रियामिति योगविभागेन प्रसज्यप्रतेषेधाश्रयेण चेति भावः । गोत्रप्रत्ययेनाभिधानं न प्राप्नोतीति । तद्यथा `गर्गादिभ्यो यञ्' गार्गी गार्ग्यायणी, अपत्यसामान्यलक्षण एव तु प्रत्ययः स्यात् । किं कारणमनभिधानं प्राप्नोतीत्यत आह---गोत्रसंज्ञाया युवसंज्ञया बाधितत्वादिति । यथा च बाधस्तथा तत्रैव वक्ष्यते । स्यादेतत्---युवप्रत्ययस्य स्त्रियां लुक्करिष्यते, कथम् ? `यूनि लुक्' इत्यस्यानन्तरं स्त्रियां चेति वक्ष्यामि, यूनि लुगित्येव, `प्राग्दीव्यतः' इत्येतन्निवृत्तम् । यद्वा `वतण्डाच्च, लुक् स्त्रियाम्, यूनि च' इति वक्ष्यामि, लुक् स्त्रियामित्येव, ततश्च गार्ग्यशब्दादुत्पन्नस्य फको लुकि कृते लुप्तस्याप्यर्थं प्रकृतिरेवाहेति यञन्तात्स्त्रियां वर्तमानान्ङीष्ष्फौ भविष्यत इति ? एवमप्यौपगवशब्दादत इञो लुकि कृते, अनुपसर्जनाधिकारादण्योऽनुपसर्जनमित्युच्यमान ईकारो न प्राप्नोति; अणर्थस्याप्रधानत्वात्, यूनि संक्रान्तत्वात् । मा भूदेवमण्योऽनुपसर्जनमिति, अणन्तादनुपसर्जनादित्येवं भविष्यति ? नैवं शक्यम्; इह हि दोषः स्याद्---आपिशलिना प्रोक्तं व्याकरणम्, `इञश्च' इत्यण्, तदधीते आपिशला ब्राह्मणी, `तदधीते' इत्यणः प्रोक्ताल्लुकि अणन्तस्याध्येत्र्यां प्रधानस्त्रियां संक्रान्तत्वान्ङीप्प्राप्नोति, तस्मादण्योऽनुपसर्जनमित्येवाश्रयणीयम्, स्त्रियां योऽण्विहित इति वा । यथा च सत्यौपगवीतीकारो न प्राप्नोति । यद्यप्यत्र प्रत्ययलक्षणेन इञ उपसङ्ख्यानमितीकारः स्यात्, इह तु ग्लुचुकायनेरपत्यमौत्सर्गिकस्याणो लुकि ङीन्न प्राप्नोति, `इतो मनुष्यजातेः' इति ङीष् भविष्यति । इह तर्हि यस्कस्यापत्यं शिवाद्यण् यास्कः, तस्यापत्यं स्त्री, `अणो द्व्यचः' इति फिञ्, स्त्रियां लुकि ईकारो न प्राप्नोति ? न ह्यत्र लुप्तः प्रत्यय ईकारस्य निमित्तम्, यश्च श्रूयते न स स्त्रियां विहित उपसर्जनं च । तर्हि का गतिः ? इत्यत आह---तस्मादिति । युवसंज्ञैव प्रतिषिध्यत इति । ननु यूनि यदुक्तं तत्स्त्रियां न भवति' इत्युक्तम्, न च युवसंज्ञा यून्यूक्ता, नहि युवसंज्ञायाः प्राग्युवसंज्ञास्ति ? चतुर्थादेर्जीवद्वंश्यस्यापत्यस्योपलक्षणं युवशब्द इत्यदोषः । अपर आह---स्वरूपपरो युवशब्दः, परिभाषा चेयम्---यत्र युवशब्दः श्रूयते तत्र `अस्त्रियाम्' इत्युपतिष्ठते । `जीवति तु वंश्ये युवा अस्त्रियाम्' इति वा व्यक्तमेव पठितव्यमिति ।।
अत इञ् ।। 4.1.95 ।।
अकारान्तात्प्रातिपदिकादिति । `अत सातत्यगमने' इत्यस्य वाऽच्छब्दान्तानां वा कुर्वदादीनां ग्रहणं न भवति, यदि स्याच्छिवादिषु येषामस्येञो बाधनार्थः पाठः, शिवप्रोष्ठप्रौष्ठिकप्रभृतीनां तेषां पाठोऽनर्थकः स्यात् । व्यपदेशिवद्भावादिहापि भवति---अस्यापत्यमिरिति, यस्येति लोपे प्रत्ययमात्रस्य श्रवणम् । इह तु---एरपत्यमस्य युव्रेति, `यञिञोश्च' इति फकि यस्येतिलोपं बाधित्वा परत्वादादिवृद्धौ कृतायाम्---आयायन इति भवति ।।
बाह्वादिभ्यश्च ।। 4.1.96 ।।
क्वचिदिति । अजीगर्त्तादिषूदङ्कपर्यन्तेष्वदन्तत्वात्पूर्वेणेञ् प्राप्तः, तस्य `ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यण् बाधकः प्राप्तः । अन्ये सर्वेऽनकारान्ताः, तेषु च बाहुप्रभृतिषूवर्णान्तेषु, पुष्करसदादिषु हलन्तेषु चाण् प्राप्तः । चूडाशब्दाद् `द्व्यचः' इति ढक्, वृकलादिभ्यस्तन्नामिकण्प्राप्तः । शिरस्, लोमन्निति तदन्तयोर्ग्रहणम् । `सम्भूयोम्भोमितौजसां सलोपश्च' इत्येव वक्तव्ये पृथक् सलोपश्चेति वचनं वैचित्र्यार्थम् । उदञ्चु इति पठ्यते, तत्र नायमुकारान्तात्प्रत्ययः; किन्तु क्विन्नन्तात्प्रत्ययः, नलोपाभावस्तु निपात्यते---उदीचोऽपत्यमौदञ्चिः । एतत्सर्वं पैलादिष्वौदञ्चिशब्दपाठाद्विज्ञायते । बाह्वादिप्रभृतिष्विति । प्रभृतिग्रहणेन वक्ष्यमाणानां कुञ्जादीनां ग्रहणम् । लोके विदितो लौकिको गोत्रभावः, संज्ञाकारित्वम् आदिपुरुषत्वमित्यर्थः । एतच्च

न्यायसिद्धम्, कथम् ? अर्थवद्ग्रहणे नानर्थकस्येति अर्थवतां बाह्वादीनां ग्रहणम्, स चार्थः प्रसिद्धः; झटिति प्रतीतेः । स्मृतिशास्त्रस्य चार्थतोऽनादित्वादनाद्यर्थाभिधायिनामेव ग्रहणं न्याय्यम् । बाहुर्नाम कश्चिदिति । एवं कुञ्चो नाम नडो वा, तस्मादिञेव भवति---कौञ्जिः, नाडिरिति । यत्तु कार्यं न स्वरूपोपादानेन विधीयते, किन्तु प्रकारान्तरेण; तदिदानीन्तनार्थाभिधायिनामपि भवति, `अत इञ्', दैवदत्तिरिति । सम्बन्धिशब्दानां चेति कार्यापेक्षया षष्ठी, सम्बन्धिशब्दानां श्वशुरादीनां यत्कार्यमुच्यते तस्य तत्सदृशे प्रतिषेधो भवति । संज्ञाश्वसुरस्येति । संज्ञया यः श्वसुरः, न सम्बन्धेन । श्वासुरिरिति । उणादिषु नावश्यं व्युत्पत्तिकार्यं भवति, तेन `सावसेराप्तौ' इति व्युत्पन्नस्य श्वसुरशब्दस्य `न य्वाभ्याम्' इत्येष विधिर्न भवति । तथा `मातृपितृभ्यां स्वसा' इति षत्वं धान्यमतरि न भवति । इदमपि न्यायसिद्धम्; संज्ञाश्वशुरस्यादिमत्त्वात्सम्बन्धिशब्दस्यानादित्वात् । मातृपितृभ्यामित्यत्रापि प्रसिद्धतरत्वाज्जननीवाचिनो ग्रहणम् । उक्तं च---
अभिव्यक्तपदार्था ये स्वतन्त्राः लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु ।। इति ।
चकारोऽनुक्तसमुच्चयार्थ आकृतिगणतामस्य बोधयतीति । पठितशब्दापेक्षः समुच्चय इति भावः ।।
सुधातुरकङ् च ।। 4.1.97 ।।
व्यासरुडेत्यादि । वेदं व्यस्यतीति देवव्यासः, `करण्यण्', तस्यैकदेशप्रयोगः---व्यास इति, भीमसेनो भीम इतिवत् । वरुडादयो जातिविशेषाः । तत्तर्हि वक्तव्यम् ? न वक्तव्यम् ; प्रकृत्यन्तराण्येवैतानि स्वार्थिककन्प्रत्ययन्तानि, अव्यविकन्यायेन च कन्, न हि तैर्वाक्यमेव भवति । व्यासशब्दादृषिवाचिनोऽपि बाह्वादेराकृतिगणत्वादिञ् भवति ।।
गोत्रे कुञ्जादिभ्यश्च्फञ् ।। 4.1.98 ।।
चकारो विशेषणार्थ इति । यद्यत्र चकारो न क्रियेत ततो `व्रातफञोरस्त्रियाम्' इति वक्तव्यम्, ततोः `अश्वादिभ्यः फञ्' इत्यस्याग्रहणं स्यात् । कौञ्जायन्य इति । स्वार्थे ञ्यः बहुषु तु `ञ्यादयस्तद्राजाः' इति तद्राजत्वात् `तद्राजस्य बहुषु' इत्यादिना लुक् ।
किं पुनरत्र ञित्स्वरो भवति ? उत चित्स्वरः ? इत्यत्राह---एकवचनद्विवचनयोरिति । तत्र हि ञ्यप्रत्ययः श्रूयते, स च पश्चाद्भावीति तन्निबन्धनो ञित्स्वरः सतिशिष्टः । बहुवचने तु ञ्ये निवृत्ते सम्प्रधारणा---ञित्स्वरो वा, चित्स्वरोवेति ? तत्र परत्वाद् ञित्स्वरः प्राप्नोति, चित्करणसामर्थ्याच्चित्स्वरो भविष्यति । ञित्करणसामर्थ्याद् ञित्स्वरः प्राप्नोति, अस्त्यन्यत् ञित्करणस्य प्रयोजनम्, किम ? वृद्ध्यर्थो ञकारः । चित्करणेऽपि तर्ह्यस्त्यन्यत्प्रयोजनम्, किम् ? विशेषणम् । शक्योऽत्र विशेषमार्थोऽन्योऽनुबन्ध आसंक्तुम् । तत्र चकारानुरोधाच्चित्स्वरो भविष्यति । वृद्ध्यर्थोऽपि तर्ह्यन्योऽनुबन्धः आसंक्तुम् । तत्र चकारानुरोधाच्चित्स्वरो भविष्यति । वृद्ध्यर्थोऽपि तर्ह्यन्योऽनुबन्धः शक्य आसंक्तुम्, तत्र ञकारानुरोधाद् ञित्स्वरः प्राप्नोति ? एवं स्थिते इदमुच्यते---परमपि ञित्स्वरं त्यक्त्वा चित्स्वर एवेष्यत इति । एवं मन्यते---स्वरे योगविभागः कर्त्तव्यः, इतमस्ति `चितः'---चितोऽन्त उदात्तो भवति, ततः `तद्धितस्य' चित इत्येव, तद्धितस्य चितोऽन्त उदात्तो भवति । किमर्थमिदम् ? परत्वात्प्राप्तस्य ञित्स्वरस्य बाधनार्थम् । ततः `कितः', कितश्च तद्धितस्यान्त उदात्तो भवतीति । यदि तु क्फप्रत्ययः क्रियते, तद्धितस्येति योगविभागः शक्योऽकर्तुम् । अथैवं कस्मान्न क्रियते---`गोत्रे कुञ्जादिभ्यश्च्फञ्, बहुषु फक्, नडादिभ्यस्च' इति ? नैवं शक्यम्; इह हि दोषः स्यात्---कौञ्जायनानामपत्यं माणवकः कौञ्जायन्यः, कौञ्जायन्यौ; ऐकेन यशब्दः श्रूयते, द्व्येकयोर्हि च्फञ्विधीयते । यदा तु च्फञन्तात् ञ्यो विधीयते तदा यून्युत्पन्नस्येञः `ण्यक्षत्त्रियार्षञितः' इति लुकि कृते `तद्राजस्य' इतिञ्यस्य लुकि प्राप्ते `गोत्रेऽलुगचि' इति प्रतिषेधाद्यशब्दस्य श्रवणं भवति । यथा कौञ्जायन्यस्यापत्यानि बहूनि, अत इञो लुकि तद्राजस्यैव बहुषु वर्त्तमानत्वाद् ञ्यस्य लुकि कौञ्जायना इति भवति ।।
नडादिभ्यः फक् ।। 4.1.99 ।।
शलङ्कु शलङ्कं चेति । द्वे अपि प्रथमान्ते । शब्दरूपापेक्षया नपुंसकनिर्देशः । `शलङ्कु' इत्येतच्छब्दरूपं शलङ्कं भवति, तद्रूपेण परिणमते इत्यर्थः । इञेवान्यत्रेति । बाह्वादेराकृतिगणत्वादिति भावः । अभ्युपेत्यापि गोत्रमात्रे फको विधानम्, परिहारमाह---अथ वेति । इञो भावस्येति । शलङ्कभावापत्तेरप्युपलक्षणमेतत्, पूर्वत्र परिहारे तस्याः स एव पाठो ज्ञापको वेदितव्यः ।
अग्निशर्मन्वृषगण इति । अग्निशर्मन्शब्दः फकमुत्पादयति वृषगणे गोत्रे, आग्निशर्मायणो भवति वार्षगण्यश्चेद्, आग्निशर्मोऽन्यः । अमुष्येति पठ्यते, तत्रादः शब्दे प्रातिपदिकमात्रे पठितव्ये विभक्त्यन्तस्य पाठादुत्पन्नेऽपि फकि लुग्न भवति । आमुष्यायणा, आमुष्यपुत्रिकेत्यलुग्विधावस्य ग्रहणं न कर्त्तव्यं भवति । कृष्णरणौ ब्राह्मणवासिष्ठयोरिति । कार्ष्णायनो भवति ब्राह्मणश्चेत्, कार्ष्णिरन्यः । राणायनो भवति वासिष्ठश्चेद्, राणिरन्यः । क्रोष्टु क्रोष्टं चेति । क्रौष्टायनः ।।
हरितादिभ्योऽञः ।। 4.1.100 ।।
`हरितादिभ्यः', `अञः' इति व्यधिकरणे पञ्चम्यौ । हरितादिभ्यः परो योऽञ् तदन्तात्प्रातिपदिकादित्यर्थः । वृत्तिकारोऽप्येतदेव वस्तुतो व्याचष्टे---हरितादिभ्योऽञन्तेभ्य इति । `हरितादिभ्यो गोत्रापत्येऽञ्प्रत्ययो भवति' इत्ययं त्वर्थो न भवति; बिदादिषु पाठात् ।
सामर्थ्यादिति । गोत्रप्रत्ययान्तादपरो गोत्रप्रत्ययो न भवतीत्येतत्सामर्थ्यम् । तस्माद्गोत्राधिकारेऽपि यूनि प्रत्ययो विज्ञायते । न चैवं गोत्राधिकारस्य विच्छेद इत्याह---गोत्राधिकार इति । उत्तरार्थं गोत्रग्रहणमनुवर्त्तत एवेत्यर्थः ।।
यञिञोश्च ।। 4.1.101 ।।

गोत्रग्रहणेन यञिञौ विशेष्येति इति । गोत्रे यौ यञिञौ विहिताविर्त्येवम् । न चैव प्रत्ययार्थस्यापत्यस्याविशेषितत्वादपत्यमात्रे प्रत्ययप्रसङ्ग इत्याह---तदन्ताद्यून्येवायं प्रत्यय इति । एवकारः पौनर्वचनिकः--न केवलं पूर्व एव प्रत्ययो यूनि भवति,ऽयमपि यून्येवेति । कस्मात् ? इत्याह---गोत्राद्यूनीति वचनादिति ।।

शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु ।। 4.1.102 ।।

शरद्वदादीनां भृग्वादिवंशप्रभवानां कृत्रिमा अपि पुत्राः सन्ति, स्ववंशप्रभवा अपि, तत्रापत्यविशेषणं क्रियते । तत्र भृगुः शरद्वतोऽपत्यं न भवति; पूर्वभावित्वात् । एवं शुनकस्य वत्सः, तस्माद्भार्गवश्च वात्स्यश्च आग्रायणश्चेति द्वन्द्वे युगपदधिकरणवचनतया वर्त्तिपदस्य बहुषु वृत्तेरत्त्रिभृग्वित्ति `यञञोश्च' इति च गोत्रप्रत्ययस्य लुक्, तदाह---भार्गवश्चेद्वात्स्यश्चेदिति । दार्भिरिति । दर्भशब्द ऋषिवचनो न भवति, बाह्वादिषु वा पाठ्यः ।।

द्रोणपर्वतजीवन्तादन्यतरस्याम् ।। 4.1.103 ।।

पूर्वमुक्तम्--गोत्राधिकारश्च शिवादिभ्योऽण् इति यावदिति, इहाप्युक्तम्---गोत्र इत्येवेति, तत्र नोदयति---कथमिति । नैवात्रेति । यस्य ग्रहणमूरीकृत्य भवानानन्तर्ये दोषमाह, स नैव गृह्यत इत्येवशब्दस्यार्थः । महाभारतेद्रोणोमहाभारतद्रोणः । अनादिरिति । इदानीमेव ह्युक्तम्---बाह्वादिप्रभृतिष्वित्यादि । नन्वेवं प्रयोगस्यात्यन्तमनुपपत्तिः ? इत्यत आह---इदानीं त्विति । अर्वाचीनादित्यर्थः, न पुनर्महाभारतद्रोणो वृत्तिकारेण समानकालः; अनादेरिदानीन्तनस्य च द्रोण इति श्रुतिः समाना । तत्रानादिद्रोणस्य ये वंश्या अश्वत्थाम्ना समानकालास्ते द्रोणायना इत्युच्यन्ते । तत्र यद् दृष्टं गोत्रत्वं तदश्वत्थाम्न्यपि द्रोणशब्दावाच्यापत्यत्वात् स्खलितबुद्धयः प्रतिपत्तारोऽध्यारोपयन्ति । तेनाध्यारोपेणआश्वत्थामनि तथा द्रौणायन इत्येतद् गोत्रप्रत्ययेनाभिधानं भवति ।।

अनृष्यानन्तर्ये बिदादिभ्योऽञ् ।। 4.1.104 ।।

गोत्र इत्येवेति । एतेन येऽत्र ऋषिशब्दा बिदौर्वप्रभृतयस्तेभ्यो गोत्र एवान्यथा स्यादिति गोत्र इत्येतदिहानुवर्त्तनीयमिति दर्शयति---ये पुनरित्यादि । कथं पुनर्गोत्राधिकारे सत्ययमर्थो लभ्यते ? इत्यत्राह---अनृष्यानन्तर्य इत्यस्यायमर्थ इति । `अनृषि' इति पञ्चम्या लुका निर्देशः, `आनन्तर्ये' इति स्वार्थेष्यञ् । एवं च पौत्रा इत्यादावनन्तरस्यैवाभिधानम्, न गोत्रस्य, नापत्यसामान्यस्य च । यद्ययमर्थ इति । अस्मिन् ह्यर्थेऽनृषिभ्योऽनन्तरापत्ये विध्यर्थमिदं भवति, ततश्च ऋष्यपत्यनैरन्तर्ये, ऋषयश्च तेऽपत्यानि च ऋष्यपत्यानि, तेषां नैरन्तर्ये, ऋषिरूपाण्यपत्यानि निरन्तराणि यत्र तस्मिन्विषये प्रतिषेधो न कृतः स्यात्, तत्र को दोषः ? इत्यत्राह---तत्रेदमिति । कश्यप ऋषिस्तस्यापत्यमप्यृषिः, एवम् `सप्त नैरन्तर्येण ऋषयस्तेषां सप्तम इन्द्रहूर्नाम तत्र काश्यपानाम्' इति प्रयोगो नोपपद्यते; अञि सति `यञञोश्च' इति लुक्प्रसङ्गात् । तस्माद् `अनृष्यानन्तर्ये' इत्यस्य ऋषीणामानन्तर्येऽव्यवधाने प्रत्ययो न भवतीत्ययमर्थो व्याख्येय इति भावः । प्रयोगं तावदुपपादयति---अनन्तरापत्यरूपेणेति । अपत्यसामान्यरूपेणेत्यर्थः । न पुनर्ऋष्यणनन्तरापत्ये विधीयते । तत्र यथा `अभूनृपः' इत्यादौ वस्तुतो भूतविशेषेऽपि सामान्यविवक्षया लुग् भवति, तद्वदिहापि वस्तुतो गोत्रेऽपि तद्रूपतिरस्कारेणापत्यसामान्यरूपविवक्षया ऋष्यण्भवतीत्यर्थः । किं पुनः कारणमियं क्लिष्टकल्पनाऽऽश्रीयते ? इत्याह---अवश्य चैतदेवं विज्ञेयमिति । ऋषीणामपत्यानां नैरन्तर्यं विषयो यस्य प्रतिषेधस्य स तथोक्तः । कौशिको विश्वामित्र इति दुष्यतीति । कि कारनम् ? विश्वामित्रस्तपस्तेपे---नानृषिः स्यामपि तु ऋषिरेवस्यामिति, तत्र भवानृषिः सम्पन्नः; स पुनस्तपस्तेपे---नानृषेः पुत्रः स्यामिति, तत्र भावन् गाधिरप्यृषिः सम्पन्नः; स पुनस्तपस्तेपे---नानृषेः पौत्रः स्यामिति, तत्र भवान्कुशिकोऽपि ऋषिः सम्पन्नः । तदेतदृष्यानन्तर्यं सम्भवति ।

परस्त्री परशुं चेति । द्वितीयानिर्देशादापद्यते इति शेषः । परस्त्रीशब्दः प्रत्ययमुत्पादयति, परशुं चादेशमापद्यते, परस्त्रिया अपत्यं पारशवः, ब्राह्मणस्य शूद्रायामूढायामुत्पन्नः, सा च जातितः वरस्त्री भवति । यस्तु परभार्यायामुत्पन्नः पारस्त्रैणेयः स भवति कल्याण्यादिः, अनुशतिकादिश्च । पारशव इत्यत्र पूर्वोत्तरपदसम्प्रमोहादनुशतिकादिकार्याभावः ।।

गर्गादिभ्यो यञ् ।। 4.1.105 ।।

अपत्यसामान्ये भविष्यतीति । अन्ये तु---`मनुतन्तुशब्दसमुदाय एकः, न तु द्वौ शब्दौ पठितौ इति वदन्ति, तथा च ब्राह्मणे---मानुतन्तव्यमुवाचेति प्रयोगः । कालवमनुतन्तुकुशिकानामिति च प्रवरे ।

कथं मानवीति । लोहितादिपाठान्नित्येन ष्फेण भाव्यमिति भावः । अनन्तरापत्यविवक्षायां त्विति । गोत्रस्यापीति बोद्धव्यम्, तथा च जामदग्नाः, वात्सा इति प्रवरे प्रयोगः । वाजाऽसे इति । वाजशब्दो यञमुत्पादयति, असे=असमासे । समासे तु सौवाजिः, `ग्रहणवता प्रातिपदिकेन' इत्यस्यानित्यत्वज्ञापनार्थः---`असे' इति प्रतिषेधः ।।

मधुबभ्र्वोर्ब्राह्मणकौशिकयोः ।। 4.1.106 ।।

गण एव बभ्रुकौशिक इति वक्तव्यम्, एवं हि द्विबेभ्रुग्रहणं न कर्त्तव्यं भवति ? तथा तु न कृतमित्येव ।।

कपिबोधादाङ्गिरसे ।। 4.1.107 ।।

कापेय इति । `इतश्चानिञः' इति ढक् । बौधिरिति । अनृषित्वादिञ्, बाह्वादिर्वा ।।

वतण्डाच्च ।। 4.1.108 ।।

किमर्थमिति । `वतण्डाल्लुक् स्त्रियाम्' इत्येव कस्मान्नोक्तम्, किमर्थो योगविभाग इति प्रश्नः । परिहरति---शिवादिष्वपीति । वतण्डो नाम ऋषिः, तत ऋषित्वादेवाणि सिद्धे शिवादिषु तस्य पाठो गोत्रे गर्गादियञा समावेशार्थः । तत्र यथाऽनाङ्गिरसे समावेशो भवति, एवमाङ्गिरसेऽपि स्यादिति तन्निवत्त्यर्थो

योगविभाग इत्यर्थः ।।

लुक् स्त्रियाम् ।। 4.1.109 ।।

वातण्ड्यायनीति । लोहितादिलक्षणः ष्फः । वातण्डीति । ऋषित्वात् ष्यञ्न भविष्यति ।।

अश्वादिभ्यः फञ् ।। 4.1.110 ।।

ये त्वत्र गोत्रप्रत्ययान्ताः पठ्यन्त इति । वैल्य, आनडुह्य, आत्त्रेय---इत्येते । तत्र बैल्यशब्द `वृद्धेत्कोसलाजादाञ्ञ्यङ्' इति ञ्यङन्तः, विलिर्नाम राजर्षइः, आनडुह्यशब्दो गर्गादियञन्तः, आत्त्रेयः `इतश्चानिञः' इति ढगन्तः ।

शय आत्त्रेये इति । शयशब्दात्फञ् भवति आत्त्रेयश्चेत्, शायायनः । आत्त्रेयादन्यत्र शायिः, अनृषित्वादिञ्, बाह्वादिर्वा । अन्ये त्वणमेव प्रत्युदाहरन्ति । पुंसि जात इति । पुंसीति प्रकृतिविशेषणम्, जातस्यापत्यं जातायनः । स्त्रियां तु जाताया अपत्यं जातेय इति ढगेव भवति, अन्यथा लिङ्गविशिष्टपरिभाषया फञेव स्यात् । आत्त्रेय भरद्वाजे इति । आत्त्रेयायनो भवति भारद्वाजश्चेत्, अन्यत्रात इञः `ण्यक्षत्त्रिय' इति लुक् । भारद्वाजात्त्रेये इति । अत्त्रिगोत्रजो यदा भारद्वाजगोत्रजेन पुत्रत्वेन स्वीक्रियते तदा प्रत्ययः । स ह्यत्त्रेयश्च भवति भारद्वाजस्य च गोत्रं भवति । भारद्वाजायन आत्त्रेयश्चेद्, भारद्वाजोऽन्यः, बिदाद्यञेव भवति ।।

शिवादिभ्योऽण् ।। 4.1.112 ।।

यथायथमित्यादि । तत्रादन्तेष्विञोऽपवादः, मुनि--सन्धिभूमिप्रभृतिषु `इतश्चानिञः' इति ढकः, स्त्रीप्रत्ययान्तेषुं `स्त्रीभ्यो ढक्' `द्व्यचः' इति प्राप्तस्य ढकः, गङ्गाविपाट्शब्दयोस्तु यस्मिन्प्राप्ते स वृत्तिकारणैवोक्तः, जरत्कारुशब्दस्य तु पाठे प्रयोजनं चिन्त्यम् । केचिदाहुः---शुभ्रादिष्वयं पठनीयः, जारत्कारेय इति यथा स्यात्, तत्र तु ढका समावेशार्थोऽस्य पाठ इति ।

ण्यप्रत्ययस्य तु बाधो नेष्यत इति । अत्रा हेतुम् `उदीचामिञ्' इत्यत्र वक्ष्यति ।

शुभ्रादिढका चेति । `शुभ्रादिभ्यश्च' इत्यत्र वक्ष्यति--`चकारोऽनुक्तसमुच्चयार्थ आकृकिगणतामस्य बोधयति, तेन गाङ्गेयः पाण्डवेय इत्यादिसिद्धं भवति' इति, तदभिप्रायेणेदमुक्तम् । रवणविश्रवणशब्दौ पठ्येते, तौ विश्रवः शब्दस्यादेशौ प्रकृत्यन्तरे वा वृत्तिविषये तत्समानार्थे, विश्रवसोऽपत्यं वैश्रवणो रावणः । द्व्यचो नद्या इति । नदीवाचिनो ये द्व्यचः कुल्याप्रभृतयस्तेभ्यस्तन्नामिकाणोऽपवादे `द्व्यचः' इति ढकि प्राप्तेऽण् भवति । त्रिवेणी त्रिवणं चेति । त्रिवेण्या अपत्यं त्रैवणः, तन्नमिकाणि सिद्धे आदेशार्थं वचनम् । अथाण्ग्रहणं किमर्थम्, न यताविहितमित्येवोच्येत, एवगुच्यमाने इञादय एव स्युस्ते विहिताः, पुनरारम्भसामर्थ्याद्यो विहितो न च प्राप्नोति स एवाण् भविष्यति ? इदं तर्हि प्रयोजनम्---ऋष्टिषेणशब्दोऽत्र पठ्यते, तत्र यथाविहितमित्युच्यमाने `अत इञ्' प्राप्तः, तस्य सेनान्तलक्षणो ण्यो बाधकः प्राप्तः, तत्रारम्भसामर्थ्यादिञ् प्रसज्येत, पुनरण्ग्रहणादणेव भवति ।।

अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः ।। 4.1.113 ।।

अपत्यमन्तर्हितं वृद्धमिति शास्त्रान्तरे यत्परिभाषितं तस्यापि ग्रहणं दृष्टम्, वृद्धस्य च पूजायाम् `वृद्धो यूना इति, इह तु प्रत्यासत्तेरेतच्छास्त्रसिद्धस्यैव वृद्धस्य ग्रहणमित्याह---वृद्धिर्यस्येति । अवृद्भाभ्य इति शब्दधर्म इति । वृद्धपर्युदासे सति नञिवयुक्तन्यायेन तत्सदृशस्यैव शब्दस्य सम्प्रत्ययात् ।

स्त्रीलिङ्गनिर्देशस्तु `नदीमानुषीभ्यः' इत्यनेन सामानाधिकरण्यात् । कथं पुनरर्थवृत्तेः शब्दवृत्तिना सामानाधिकरण्यम् ? अभेदोपचारात् ।

अवृद्धशब्दवाच्यत्वान्नदीमानुष्य एवावृद्धा उक्ताः । नदीमानुषीभ्य इत्यर्थधर्म इति । स्वरूपग्रहणं तु न भवति, बहुवचननिर्देशात्, वृद्धपर्युदासाच्च संज्ञानद्या अपि ग्रहणं न भवति; लौकिकार्थवृत्तिना मानुषीशब्देन साहचर्यात् । तन्नामिकाभ्य इति सर्वनाम्ना प्रत्ययप्रकृतेः परामर्श इति । ता अवृद्धाः प्रकृतयो नामानि यासां नदीमानुषीणामिति बहुव्रीहिः । तदेवं त्रिभिरपि पदैरर्थ एव निर्दिश्यते, तत्रार्थात्प्रत्ययविधानानुपपत्तेस्तद्वाचिनीभ्यः प्रकृतिभ्यः प्रत्ययो विजायते । तदिदमुक्तम्---तेनाभेदात्प्रकृतयो निदिश्यन्त इति । तेनार्थोनाबेदात् । एतदुक्तं भवति---अवृद्धशब्दाच्यास्तन्नामिका या नदीमानुष्यस्ताभ्योऽण् प्रत्ययो भवति, कोऽर्थः ? तद्वाचिनीभ्यः प्रत्ययो भवतीति । तदेतदाह---आवृद्धानि यानीत्यादि । एवं च कृत्वा---अवृद्धेभ्यो नदीमनुषीनामभ्य इति वक्तव्यम्, तथा तु न कृतमित्येव । ढकोऽपवाद इति । स्त्रीलिङ्गनिर्देशात् भइद्योद्ध्यशोणादिष्वयं विधिर्न भवतीति भावः ।।

ऋष्यन्धकवृष्णिकुरुभ्यश्च ।। 4.1.114 ।।

ऋषयः प्रसिद्धा वसिष्ठादय इति । ऋषयः=मन्त्रदर्शिनः, ते च प्रसिद्धा वसिष्ठादयः, यथा इन्द्रादयो देवताः, तेन तेन परिभाषणीया इति भावः । वंशाख्या इति । केषाञ्चिद्वंशानामेता आख्या इत्यर्थः । एवं केचिद्वंशा आख्यायन्त इति यावत् । `मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरान्' इत्यभिप्रायेणाह---इञोंऽपवाद इति । अत्र्यादिभ्य इति । तत्र ऋष्यणोवकाशः---वासिष्ठः, `इतश्चानिञः' इति; ढकोऽवकाशः---डुलेरपत्यं डौलेयः; आत्त्रेय इत्युभयप्रसङ्गे परत्वाड्ढग् भवति । सेनान्तलक्षणस्य ण्यस्यावकाशः--- हारिषेण्यः, अत्र हि `एति संज्ञायामगात्' इति षत्वस्यासिद्धत्वात्सेनान्तमेतद्भवति, ऋष्यणः स एव; जातसेनो नाम ऋषिः, तस्मादुभ्यप्रसङ्गे परत्वाद् ण्यो भवति--जातसेन्यः । एवमुदीचामिञ्---जातसेनिः, अन्धकाणोऽवकाशः---श्वाफल्कः, ण्यस्य स एव, उग्रसेनादन्धकादुभयप्रसङ्गे परत्वाण्ण्यो भवति---औग्रसेन्यः । वृष्ण्यणोऽवकाशः---वासुदेवः, ण्यस्य स एव; विष्वक्सेनाद् वृष्णेर्वैष्वक्सेन्यः । कुर्वणोऽवकाशः---नाकुलः, ण्यस्य स एव, भीमसेनात्कुरोर्भैमसेन्यः ।

काकतालीयन्यायेनेति । यदृच्छया । असङ्करेणेति । शब्दान्तरैरसङ्कीर्णा इत्यर्थः । सङ्कलिताः=संहताः । सुबहव इति । व्युत्पादयिषिताः सर्वे इत्यर्थः । अनित्योऽपाश्रयेणापि नित्यस्यान्वाख्यानं दृष्टम्, यथा---शकाश्रयेण कालस्य । अथ वेत्यादि । `त्रिपुरुषानूकं नाम कुर्यात्' इत्यनेन

न्यायेनान्धकादिवंशा अपि नित्या एव । तेषु ये शब्दा इति । अन्धकादिष्वेवाद्यत्वेऽपि ये शब्दाः प्रयुज्यन्ते तेभ्य इत्यर्थः ।
मातुरुत्संख्यासम्भद्रपूर्वायाः ।। 4.1.115 ।।
द्वैमातुर इति । तद्धितार्थ द्विगुः, पश्चात्तद्धितः । एकस्या औरसः सुतोऽपरस्याः कृत्रिम इति द्वैमातुरत्वम् । साम्मातुर इति । प्रादिसमासात्तद्धितः । भाद्रमातुर इति । विशेषणसमासादण् ।
तेनेत्यादिनाऽर्थापेक्ष्यस्य स्त्रीलिङ्गनिर्देशस्य फलं दर्शयति । धान्यमातुरिति । धान्यं यो मिमीते स धान्यमाता, याजकादित्वात्षष्ठीसमासः । धान्यमातरि यो मातृशब्दस्तस्य ग्रहणं न भवतीत्यर्थः, तेन सम्मिमीते तस्याप्तयं साम्मात्र इत्युत्वं न भवति, न्यायानुवादश्चायं स्त्रीलिङ्गनिर्देशः । सम्बन्धिशब्दस्य हि प्रसिद्धतरत्वात्तस्यैव ग्रहणं न्याय्यम् ।
सङ्ख्यासम्भद्रपूर्वाया इति किमिति । न तावत्केवलात्प्रसङ्गः, न हि मातुरपत्यमिति विशेषणं सम्भवति; अपत्ये मातृसम्बन्धस्याव्यभिचातत् । तेन तदन्तस्य ग्रहणात् सङ्ख्यादिपूर्वस्य तावत्सिद्धमिति प्रश्नः । अन्यपूर्वस्यापि स्यादित्युत्तरम् । सौमात्र इति ।
क्वचिदस्यानन्तरं ग्रन्थः---शुभ्रादिपाठाद्वैमात्रेय इति । तेन विपूर्वो मातृशब्दो न प्रत्युदाहर्तव्य इति भावः । वयं ब्रूमः---`स्त्रीभ्यो ढक्' इत्यत्र स्त्रीप्रत्ययविज्ञानादसत्यर्थग्रहणे इह न भवति । ऐडविडो दारदः (4.1.120 सूत्रे) इत्यस्यानन्तरमयं ग्रन्थः, इह तु लेखकैः प्रमादाल्लिखित इति ।।
कन्यायाः कनीन च ।। 4.1.116 ।।
ढकोऽपवाद इति । `द्व्यचः' इति प्राप्तस्य । कन्याया अपत्यं कानीन इति । शास्त्रोक्तविवाहसंस्कारपूर्वस्य पुरुषसम्प्रयोगस्याभावः कन्याशब्दनिमित्तं नाक्षतयोनित्वम् । या तु विवाहसंस्कारेण विना पुरुषेण सम्प्रयुज्यते सा कन्यात्वं न जहाति । तेनैतन्न नोदनीयम्---यदि कन्या नापत्यम्, अथापत्यं न सा कन्या, कन्या चापत्यं चेति विप्रतिषिद्धमिति । अपर आह---मुनिदेवतामाहात्म्याद्या पुंयोगेऽपि न कन्यात्वं जहाति, यथा---कुन्ती, यथा---सत्यवती, सात्रोदाहरणमिति, तदाह---कानीनः कर्णः, कानीनो व्यास इति ।।
विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्त्रिषु ।। 4.1.117 ।।
अत्र वत्सादीनां मूलप्रकृतीनां वकर्णादीन्प्रत्यपत्यत्वायोगादपत्यप्रत्ययान्तानां वात्स्यादीनां शब्दानां द्वन्द्वेयुगदधिकरणवचनतया प्रत्येकं बहुत्वोपजननात्तस्य बहुत्वस्य लोपिभिरेव कृतत्वादपत्यप्रत्ययस्य लुका निर्देशः, तदाह---वैकर्णो भवति वात्स्यश्चेदित्यादि ।।
स्त्रीभ्यो ढक् ।। 4.1.120 ।।
स्त्रीग्रहणेनेत्यादि । स्वरूपग्रहणं तु न भवति; बहुवचननिर्देशात् । स्त्र्यर्थस्यापि ग्रहणं न भवति; विमातृशब्दस्यार्थस्य सुभ्रादिषु पाठात् । तस्य तु स्त्र्यर्थत्वं विधवाशब्दसाहचर्याद्विज्ञेयम् । किञ्च---स्त्रीशब्दस्य स्वरितत्वं प्रतिज्ञायते, स्वरितेन चाधिकारावगतिर्भवति, तेन टाबादिस्त्रीप्रत्ययान्तानामेव ग्रहणं युक्तम् । क्तिन्नादयस्तु व्यवधानान्न गृह्यन्ते । ऐडविडः, दारद इति । इडविट्शब्दात् `जनपदशब्दात्क्षत्त्रियादञ्', दरच्छब्दाद् `द्व्यञ्मगध' इत्यण्, तयोः स्त्रियाम् `अतश्च' इति लुक्, ततस्तदपत्येऽणेव भवति ।
वृष वाच्ये इति । वृषः=बीजाश्वः, तेन चार्थेन विशेषविहितेनापत्यलक्षणेऽर्थे ढका बाध्यते, तेनापत्येऽणेव भवति । वाडव इति । चतुष्पाल्लक्षणो ढञपि न भवति; अचतुष्पाद्वाचित्वात् ।
अण् क्रुञ्चेति । वृष इति नापेक्ष्यते, अपत्य एवायं विधिः । ढकोऽपवादः । क्रुञ्चा च कोकिला च समाहारद्वन्द्वे नपुंसकह्रस्वत्वम् ।।
द्व्यचः ।। 4.1.121 ।।
तन्नामिकाणोऽपवाद इति । अन्यत्र पूर्वेणैव सिद्धत्वात् ।।
शुभ्रादिभ्यश्च ।। 4.1.123 ।।
यथायोगमित्यादि । तत्रादन्तेष्विञोऽपवादः, शलाकादिषु तन्नामिकाणः, विधवाशब्दात्तु क्षुद्रालक्षणस्य द्रकः, चतुष्पाद्वाचिषु चतुष्पाल्लक्षणस्य ढञः, गोधाशब्दाद्गोधाया द्रकः; वचनात्सोऽपि भवति । क्वचिदौत्सर्गिकस्याणः । पाण्डवेय इति । `ढेलोपोऽकद्रवा' इति लोपो न भवति, कद्रूपर्युदासेन स्त्रीलिङ्गस्य ग्रहणात्, पाण्डवशब्दाद्वा प्रत्ययः ।
लक्षणश्यामयोर्वासिष्ठ इति । लाक्षणेयो भवति वासिष्ठश्चेत्, लाक्षणिरन्यः; श्यामेयो वासिष्ठः, श्यामायनोऽन्यः, अश्वादित्वात्फञ् ।।
कुलटाया वा ।। 4.1.127 ।।
कुलान्यटतीति कुलटेति । मूलविभुजादिषु दर्शनात्कः प्रत्ययः । पचाद्यच् तु न लभ्यते, अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेनेत्यणप्रसङ्गात् । या तु कुलान्यटन्ती शीलं भिनत्तीति । एकत्र कुले प्रविष्टा स्वैरिणी या कुलान्तरमटति सा दुः शीला कुलटेत्यर्थः । क्षुद्राभ्यो वेति परत्वादिति । क्षुद्राः=अङ्गहीनाः शीलहीनाश्च । या पुनर्भिक्षालिप्सया सुशीलापि कुलान्यटति, तस्या इह ग्रहणम् ।।
चटकाया ऐरक् ।। 4.1.128 ।।
स्त्रीलिङ्गनिर्देशात्पुंल्लिङ्गात्र प्रसज्यत इत्याह---चटकाच्चेति वक्तव्यमिति । एवं च पुंल्लिङ्गनिर्देश एव कर्तव्यः, लिङ्गविशिष्टपरिभाषया स्त्रीलिङ्गादपि भविष्यति, तथा तु न कृतमित्येव ।
स्त्रियामपत्ये लुग्वक्तव्य इति । चटकाया अपत्यमिति । चटकस्यापीति द्रष्टव्यम् । चटकेति । `लुक्तद्धितलुकि' इति टापो लुकि कृते पुनरजादिलक्षणष्टाप् कर्तव्यः ।।

आरगुदीचाम् ।। 4.1.130 ।।

रका, सिद्धत्वादिति । `न लक्षणेन पदाकारा अनुवर्त्याः' इत्यवग्रहेऽपि नास्ति विशेषः । ज्ञापकार्थं त्विति । भावप्रधानो ज्ञापकशब्दः । ज्ञापनार्थमिति वा पाठ्यम् . जाडारः, पाण्डारइति । ह्रस्वान्तादयं प्रत्यय इति रका नास्ति सिद्धिः ।।

क्षुद्राभ्यो वा ।। 4.1.131 ।।

अङ्गहीना इति । काणादयः । शीलहीना इति । अनियतपुंस्कादासीप्रभृतयः ।।

ढकि लोपः ।। 4.1.133 ।।

कथं पुनरित्यादि । ढग्विधौ टाबादिस्त्रीप्रत्ययान्तानां ग्रहणाच्छुभ्रादिष्वस्यापाठात् प्रश्नः । एतदेवेत्यादि । न ह्यसतो निमित्तभावः सम्भति ।।

मातृष्वसुश्च ।। 4.1.134 ।।

पितृष्वसुरित्येतपेक्ष्यते इति । चकारेणानुकृष्यत इत्यर्थः । तदनुवृत्तौ योऽर्थः सम्पद्यते, तं दर्शयति---पितृष्वसुर्यदुक्तमिति । किं पुनस्तदित्याह---छण् प्रत्ययो ढकि लोपश्चेति । तेन `अनन्तरस्य विधिर्वा भवति प्रति षेधो वा' इति ढकि लोप एव प्राप्नोति, न तु छणिति न चोदनीयमिति भावः ।।

चतुष्पाद्भ्यो ढञ् ।। 4.1.135 ।।

कमण्डलुशब्दश्चतुष्पाद्वचनोऽस्ति, दृश्यते हि---कमण्डलुपद आदधीतेति । जम्बुः=श्रृगालः ।।

गृष्ट्यादिभ्यश्च ।। 4.1.136 ।।

अणादीनामिति । आदिशब्देन ढकः । बहुवचनं तु प्रकृतिभेदेन तयोरेव बहुत्वात् तत्राजबस्ति-मित्रयुशब्दयोरणोऽपवादः, शेषाणाम् `इतश्चानिञः' इति ढकः ।

गृष्टिशब्दो य इति । सकृत्प्रसूता स्त्री सर्वेव गृष्टिर्न धेन्वादिश्चतुष्पादेवेति भावः । अपर आह---सकृत्प्रसूतत्वसाधर्म्येणाचतुष्पदीष्वपि गौणो गृष्टिशब्द इति ।।

राजश्वशुराद्यत् ।। 4.1.137 ।।

क्षत्त्रियजातिश्चेदिति । प्रकृतिप्रत्ययसमुदायेन क्षत्त्रियजातिश्चेद् गम्येतेत्यर्थः । राजन्य इति । `ये चाभावकर्मणोः' इति प्रकृतिभावः । राजनोऽन्य इति । स पुनर्वैश्याशूद्रयोरुत्पन्नः, `अन्' इति प्रकृतिभावः ।।

क्षत्त्राद्धः ।। 4.1.138 ।।

घप्रत्ययो भवतीति । घशब्द एव, न तरप्तमपौ; अन्यथा सर्वत्रैव प्रत्ययविधौ घ इति तरप्तमपोर्ग्रहणात्प्रत्ययादेर्घकारस्येयादेशवचनमनुपपन्नं स्यात्, न च `तुग्राद्धन्', `घच्छौ च' इति घन्घचाववकाशौ, तत्रापि संज्ञाशब्दः सानुबन्ध उपात्तः । अनुबन्धस्तु संज्ञ्यर्थ इति सम्भवात्, `ङमुण्नित्यम्' इतिवत् । `किमिदभ्यां वो घः' इत्यत्रापि तरप्तमपोरेवादेशत्वं विज्ञआयते । अयमपि जातिशब्द एवेति । राजन्यजात्यभिधाने घो भवति, वैश्याशूद्रयोरुत्पादिते तु इञेवेत्यर्थः ।।

कुलात्खः ।। 4.1.139 ।।

उत्तरसूत्र इत्यादि । पूर्वपदप्रतिषेधस्यैतत्प्रयोजनम्---आढ्यकुलादेर्माभूदिति । ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधादेवाढ्यकुलादेर्न भविष्यति, पश्यति त्वचार्यः---नायं प्रतिषेधः कुलशब्दे प्रवर्तत इति । तेनात्र तावत्तदन्तस्य ग्रहणम् `येन विधिस्तदन्तस्य' इत्यत्र स्वरूपमित्यनुवृत्तेः केवलस्याति ग्रहणम् । सामान्यापेक्षं च ज्ञापकम्---`प्रातिपदिकश्रुतिमती परिभाषा कुशलशब्दे न प्रवर्तते इति, तेन `व्यपदेशिवद्भावोऽप्रातिपदिकेन' इत्यस्या अप्यप्रवृत्तिः । कुलीन इति उत्तरसूत्रेऽन्यतरस्यांग्रहणात्केवलादप्यनेन खो भवति । प्रशस्तो वंशः=कुलम्, तस्यापत्यं तत्प्रभवस्यापत्यमित्यर्थः ।।

अपूर्वपदादन्यतरस्यां यड्ढकञौ ।। 4.1.140 ।।

ननु च पूर्वपदशब्दः समासावयवे रूढः, न स्य कुलशब्दे प्रसङ्गः ? इत्यत आह---समाससम्बन्धिन इत्यादि । समाससम्बन्धिपूर्वपदं कुलशब्दस्यापि कथञ्चित्सम्बन्धि भवति, द्वयोरप्येकसमासावयवत्वात् । व्यवस्थावचनस्तु नैवात्र शङ्कनीयः; पूर्वपदसभ्दस्य समासावयवे रूढत्वात् । तेन `देवदत्तः कुलीनः' इत्यादौ वाक्ये प्रतिषेधशङ्का न कार्या ।

बहुच्पूर्वादपीति । अपूर्वादित्युच्यमाने बहुकुलशब्दो बहुचा सपूर्व इति, ततः प्रत्ययो न स्यात् । किञ्च---देवदत्तः कुलीन इत्यादावपि प्रतिषेधः स्यात् । तस्माद्रूढिपरिग्रहार्थमपि पदग्रहणं कर्त्तव्यम् ।।

व्यन्सपत्ने ।। 4.1.145 ।।

ननु च `नित्यं सपत्न्यादिषु' इति सपत्नीशब्द एव स्त्रीलिङ्गो व्युत्पादितः, तत्कथं पुंल्लिङ्गस्य प्रयोगस्तत्राह---सपत्नशब्द इत्यादि । इवार्थ इति । सादृश्ये, यथा पत्नी दुः खहेतुस्तथा शत्त्रुरपीत्येतत्सादृश्यम् । समुदायेन चेदिति । एतेन समुदायार्थः सपत्नो न प्रकृत्यर्थः, नापि प्रत्ययार्थविशेषणम्, अनर्थकावेवात्र प्रकृतिप्रत्ययाविति दर्शयति । अथानुवृत्तस्यापत्यस्य विशेषणमेव सपत्नः कस्मान्न भवति ? तत्राह---अपत्यार्थोऽत्र नास्त्येवेति । एतदेवोदाहरणेन स्पष्टयति---पाप्मना भ्रातृव्येणेति । न हि पाप्मा भ्रातुष्पुत्रो भवति, अतः सपत्नमात्रे भ्रातृव्यशब्दस्य दर्शनादपत्यार्थोऽत्र नास्ति । किञ्च, योऽपि सपत्नो भ्रातुरपत्यं सम्भवति, सोऽप्याद्युदात्ताद् भ्रातृव्यशब्दात्सपत्नरूपेणैव प्रतीयते, नापत्यरूपेण । तथा च भ्रातृव्यो भ्रातृव्य इति सहप्रयोगोऽपि

व्यन्व्यदन्तयोर्भवति, अतः सुष्ठूक्तम्---`अपत्यार्थो नास्त्येव' इति ।।

रेवत्यादिभ्यष्ठक् ।। 4.1.146 ।।

ढगादीनामपवाद इति । तत्र रेवतीशब्दो ङीषन्तः, अश्व, मणि, द्वारशब्दोपपदात्पालयतेः कर्मण्यणि ङीप्, तेषु ढक्प्राप्तः । `वञ्चु प्रलम्भने', अस्माद्वृकोपपदात् `कर्त्तर्युपमाने' इति णिनिः, अस्मादणप्राप्तः वृककर्णदण्डोपपदाद् ग्रहेः `कर्मण्यण्', कुक्कुटस्येवाक्षिणी यस्य स कुक्कुटाक्षः, एष्विञ् प्राप्तः ।।

गोत्रस्त्रियाः कुत्सने ण च ।। 4.1.147 ।।

पारिभाषिकस्य गोत्रस्य ग्रहणमित्याह---अपत्यं पौत्रेति । लौकिकस्य त्वपत्यमात्रस्य ग्रहणं न भवति, यदि स्यात् `तत्स्त्रियाः' इत्येव ब्रूयात्, तच्छब्देन प्रकृतस्यापत्यस्य परामर्शादेव तदर्थलाभात् । गार्ग इति । गार्गीशब्दो `यञश्च' इति ङीबन्तः, तस्य `भस्याऽढे तद्धिते' इति पुंवद्भावेन पुंशब्दस्यातिदेशात्गार्ग्यशब्दाद्गोत्रस्त्र्यभिधायिनः प्रत्ययः, `यस्येति च', `आपत्यस्य च तद्धितेऽनाति' इत्यल्लोपयलौपौ । ग्लौचुकायन इति । ग्लुचुकस्यापत्यम् `प्राचामवृद्धात्फिन्बहुलम्' इति फिन्, `इतो मनुष्यजातेः' इति ङीष्, तस्य पुंवद्भावेन निवृत्तिः, ततः प्रत्ययः, णस्य णित्कणभत्र वृद्ध्यर्थम्, गार्ग्यादौ प्रकृतेरेव वृद्धत्वात् । इह तु वतण्डस्यापत्यं गोत्रं स्त्री, `वतण्डाच्च लुक् स्त्रियां' वतण्डी, तस्या अपत्यं वातण्डो जाल्म इति पुंवद्भावेन ङीनि निवृत्ते `लुक्' स्त्रियाम्' इत्यस्य `गोत्रेऽलुगचि' इति प्रतिषेधाद्वातण्ड्यशब्दादेव प्रत्ययः । इह च गार्ग्या अपत्यं स्त्री गार्गा, सा भार्या यस्य स गार्गाभार्य इति `जातेश्च' इत्येव पुंवद्भावप्रतिषेधसिद्धिः, `गोत्रं च चरणैः सह' इत्यपत्यमात्रं गृह्यते, तेन वृद्धिनिमित्तस्य चेति पुंवद्भावप्रतिषेधो न प्रयोजनम् । किञ्च---गार्ग्या अपत्यं स्त्रीत्यत्रार्थे नास्ति प्रत्ययः, `अस्त्रियाम्' इति युवसंज्ञाया निषेधाद्गोत्रसंज्ञैवावतिष्ठते, तत्र `एको गोत्रे' इति नियमान्नैव गोत्रप्रत्ययान्तादपरो गोत्रप्रत्ययः सम्भवति, तेन नास्ति गार्गा, नतरां गार्गाभार्यः ।

अपर आह---अस्ति गार्गा, कथम् ? गार्ग्या अपत्यं या स्त्री न सा युवतिर्नापि गोत्रम्; न हि सा गर्गस्यापत्यं पौत्रप्रभृतेश्चापत्यस्य सोत्रसंज्ञा विधीयते, तदभावाद् `एतो गोत्रे' इति नियमाभावः, ततश्च णस्य भावादस्ति गार्गेति ।

ये तु नास्ति गार्गेत्याहुः, तेन मन्यन्ते---मातृवंशः पितृवंशश्च द्वावपि वंशौ प्रतीयमपत्यं भवति; अपातहेतुत्वात् । ततश्च गार्ग्या अपत्यं यत्र स्त्री सा गर्गस्यापत्यं भवत्येव, `पौत्रप्रभृतिग्रहणं च व्यवहितापत्योपलक्षण्, तेन गर्गापेक्षया तस्या गोत्रत्वाद् `एको गोत्रे' इति नियमात्प्रत्ययान्तराभाव इति । वृत्तौ तु क्वचित्पठ्यते---गोत्राद्यूनीति यूनि प्रत्ययो भवतीति । तदप्यस्मिन्नेव पक्षे घटते, तदाह---गार्ग्या अपत्यं पुमान्युवा भवति गार्गेयो माणवक इति । मातामहादेरुपलक्षणार्थोऽयं प्रयोग इति नास्ति कुत्सा ।।

वृद्धाट्ठक् सौवीरेषु बहुलम् ।। 4.1.148 ।।

अत्र `वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति वृद्धं गृह्यते, न त्वपत्यमन्तर्हितं वृद्धमिति शास्त्रान्तरपरिभाषितम् । उत्तरसूत्रे हि वक्ष्यति---फिञो ग्रहणं न फिनः, वृद्धाधिकारादिति । सौवीरेष्विति प्रकृतिविशेषणमिति । `गोत्रस्त्रियाः' इत्यतो गोत्रग्रहणानुवृत्तेर्गोत्रप्रत्ययान्ता या प्रकृतिस्तस्या विशेषणमित्यर्थः । वृद्धात्सौवीरगोत्रादिति । इदमपि पारिभाषिकस्यैव वृद्धस्य ग्रहणे घटते, अन्यथा सौवीरेषु यद्वृद्धं तस्मादिति वक्तव्यम् । भागवित्तायन इति । `यञिञोश्च' इति फक् । तृणबिन्दोरपत्यमिति औत्सर्गिकोऽण्तार्णबिन्दवः, ततष्ठक् । पूर्वठग्ग्रहणं णेन सम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यादिति पुनरिह ग्रहणम् ।

भागपूर्वपदौ वित्तिरिति । वित्त्यन्त इत्यर्थः । भागवित्तिशब्द इति यावत् । गोत्राट्ठग्बहुलं तत इति । `गोत्रस्त्रियाः' इत्यतो गोत्रग्रहणानुवृत्त्या गोत्रवचनात्प्रातिपदिकाद्बहुलं यष्ठगुच्यते स ततस्तेभ्य एव भागवित्तिप्रभृतिभ्यस्त्रिभ्य एव भवति, नान्येभ्य इति परिगणनश्लोकार्थः ।

ननु गोत्रग्रहणमनुवर्त्तते, यच्च सौवीरसगोत्रवृत्तिप्रातिपदिकं तद्वृद्धमेव, तत्किमर्थं वृद्धग्रहणम् ? अत आह---वृद्धग्रहणं स्त्रीनिवृत्यर्थमिति । तद्धि गोत्रग्रहणं स्त्रिया विशेषणम्, अतस्तदनुवृत्तौ स्त्रीग्रहणमप्यनुवर्त्तेत, वृद्धग्रहणसामर्थ्यात्तु गोत्रग्रहणमेवानुवर्तते, न स्त्रीग्रहणमिति व्याचक्षते । अपत्यमन्तर्हितं वृद्धमित्यस्य तु वृद्धस्य ग्रहणेऽसमञ्जसोऽयं ग्रन्थः स्यात् । औपगविरिति ।

ननु च परिगणनादेवात्र न भविष्यति ? तन्न; न हि सूत्रकारोऽर्वाचीनपरिगणनाश्रयेणातिप्रसङ्गनिवारणं मन्यते, वाग्रहण एव कर्त्तव्ये यद्बहुलग्रहणं कृतं तस्य प्रयोजनमाह---बहुलग्रहणमित्यादि । वैचित्र्यमेव दर्शयति---गोत्रस्त्रिया इत्यारभ्येति । तत्रान्त्यः सौवीरगोत्र एवेति । अयमेवार्थो यत्नसाध्यः ।।

फेश्छ च ।। 4.1.149 ।।

यमुन्दश्चेत्यादि । अत्र वार्ष्यायणीति शब्दरूपापेक्षाया नपुंसकनिर्देशः । फिञ इति । फिञन्ता इत्यर्थः । स्मृता इति । एते त्रयः फिञन्ताः प्रकृतयः स्मृता इत्यर्थः । सौवीरेषु च कुत्सायामिति । पुनश्चकारो वृत्तभङ्गभयान्न पठितः । बहुलग्रहणात्सिद्धोऽयमर्थः पूर्वं वृत्तिकृता दर्शितः, इदानीं तु श्लोकवार्त्तिककारेणेत्यपौनरुक्त्यम् । सुयामशब्दोऽपि तिकादिः । वृषस्यापत्यं वार्ष्यायणिः । अयमपि तिकादिरेव, `दगुकोसलकर्मारच्छागवृषाणां युड् वादिष्टस्य' इति वचनाद् आयनादेशे कृते युडागमः ।।

फाण्टाहृतिमिमताभ्यां णफिञौ ।। 4.1.150 ।।

तेन यथासंख्यामिह न भवतीति । एवं च कृत्वा णस्य णित्करणमर्थवद्भवति, तद्धि मिमतशब्दे वृद्ध्यर्थम् । यथासंख्ये तु फाण्टाहृतेर्वृद्धत्वाणिणत्करणमनर्थकं स्यात् । इह तु फाण्टाहृताभार्य इति गार्गाभार्य इतिवत्पुंवद्भावप्रतिषेधादिकं द्रष्टव्यम् । यथा तु वार्त्तिकं तथा

यथासंख्यमत्रेष्यते, यथाह---`फाण्टाहृतेर्णस्य णित्करणानर्वस्यं वृद्धत्वात्', `प्रातिपदिकस्य पुंवद्भावप्रतिषेधार्यं तु', `उक्तं वा' इति ।।

कुर्वादिभ्यो ण्यः ।। 4.1.151 ।।

ननु च `कुरुनादिभ्यो ण्यः' इत्येव कुरुशब्दाण्णयः सिद्धः, किमर्थमिह पठ्यते ? अत आह---कुरुशब्दादपरोऽपीति । सत्यमपरोऽपि ण्यप्रत्ययो भविष्यति । स तु त्रत्त्रियादित्यनेनार्थभेदमाह । तद्राजसंज्ञक इत्यजेन रूपभेदमाह । तिकादिषु पाठादिति । कुरुकौरव्यशब्दौ द्वावपि पठ्येते ।

कारिणस्तु रथकारशब्दादिति । कारिणः=शिल्पिनः । रथकारजातिस्तु शिल्पिवृत्तिर्न भवतीति मन्यते ।

तस्य पुंवद्भावो न भवतीति । `भस्याऽढे तद्धिते' इति विधीयमानः, यदि हि स्यात् `नस्तद्धिते' इति टिलोपः स्यात् । कस्मान्न भवतीत्याह---स्त्रीप्रत्ययनिर्देशसामर्थ्यादिति । पुंलिङ्गस्यापि पाठे लिङ्गविशिष्टपरिभाषया केशिनीशब्दादपि सिद्धः प्रत्ययः, पुंल्लिङ्गात्त्वनभिधानान्न भविष्यतीति भावः । वामरथस्य कण्वादिवत्स्वरवर्जमिति गणवाक्यं व्याचष्टे---वामरथशब्द इत्यादि । तस्येति प्रकरणाण्ण्यप्रत्ययान्तस्येति विज्ञेयम् । कण्वादिबदिति । केवलानां तेषां कस्यचित्कार्यस्याविधानाद्यञन्तानां कण्वादीनां यत्कार्यं तस्यातिदेशः । लुगादिकमिति । कण्वादिषु यञन्तेषु दृष्टमात्रस्य कार्यस्यातिदेशः, न तु कण्वादित्वप्रत्युक्तस्य, अत एव स्वरवर्जमित्याह । तेन लुगादिकमप्यतिदिश्यते, न तु `कण्वादिभ्यो गोत्रे' इत्येव प्रत्ययविधिः । वामरथा इति । `यञञोश्च' इति बहुषु लुक् । यञश्च `प्राचांष्फ तद्धितः', यूनि `यञिञोश्च' इति फक्; शैषिकेष्वर्थेषु छे प्राप्ते `कण्वादिभ्यो गोत्रे' `सङ्घाङ्कलक्षणेषु' इति चाण् भवति । सम्राजः क्षत्त्रिय इति । सम्राजोऽपत्यं साम्राज्यो भवति, क्षत्त्रियश्चेत्; साम्राजोऽन्यः ।।

सेनान्तलक्षणकारिभ्यश्च ।। 4.1.152 ।।

लक्षणेति स्वरूपग्रहणमित्याह---लक्षणशब्दादिति । कारीत्यर्थग्रहणमित्याह---कारिवचनेभ्यश्चेति । साधु कुर्वन्तीति कारिणः=शिल्पिनः । नापित्य इति । प्राचां मते ण्य उदाहृतः । उदीचां तु मते परत्वाद् `उदीचां वृद्धात्' इति फिञेव भवति---नापितायनिरिति ।।

उदीचामिञ् ।। 4.1.153 ।।

ताक्ष्ण इति । `षपूर्वहन्धऋतराज्ञामणि' इत्यल्लोपः । ताक्षण्य इति । `ये चाभावकर्मणोः' इति प्रकृतिभावः । इह `सेनान्तलक्षणकारिभ्यो वा' इति वक्तव्यम्, नार्थोऽनेनेञ्वचनेन, नापि शिवादिषु तक्षन्शब्दस्य पाठेन, ण्ये हि विकल्पिते यो यतः प्राप्नोति सततो भवतीति लक्ष्णः `प्राग्दीव्यतोऽण्', अन्येभ्यश्च `अत इञ्' भविष्यति ? नैवं शक्यम्; एवं हि जातसेनादिभ्य ऋष्यादिलक्षणोऽण् प्राप्नोति ।।

तिकादिभ्यः फिञ् ।। 4.1.154 ।।

क्षत्त्रियवचन इति । यः `कुरुनादिभ्यो ण्यः' इति व्युत्पादितः । औरशशब्देनेति । उरसा शेते उरशः क्षत्रियः, पृषोदरादित्वाद्रूपम्, तस्यापत्यम् `जनपदशब्दात्क्षत्रियात्' इत्यञ् ।

किं पुनरेवं प्रयत्नेन क्षत्त्रियवचनस्य ग्रहणं व्याख्यायते ? इत्यत्राह---तथा चेति । उदाहृतमिति । पूर्वैरपि वृत्तिकारैरित्यर्थः ।

तिक्नोतेरिगुपधात्कः, तिकः । किं तवास्तीति प्रवर्त्तते कितवः, पृषोदरादिः । सम्पूर्वाज्जानातेः `आतश्चोपसर्गे' इति कः, स्त्रियां टाप्, संज्ञा । बालैर्बद्धा शिखास्य स बालशिखः । द्वौ शब्दावित्यन्ये, बलतेर्णिजन्तादच् बालः, तस्य बालायनिः । शिखाशब्देन तद्वान् लक्ष्यते, शैखायनिः । उरशशब्दो व्युत्पादितः । `शटकुत्सायाम्' पचाद्यच्, ततो गर्गादित्वाद्यञ्---शाट्यः; ततो यूनि फिञ् । सिन्धुशब्दाद् `द्व्यञ्मगध' इत्यण्, सैन्धवः, अत्रापि यूनि फिञ् । यममुनत्तीतियमुन्दः, शकन्ध्वादि । प्रशस्तं रूपमस्यास्ति `रूपादाहतप्रशंसयोर्यप्', रूप्यः । ग्रामे भवो ग्राम्यः । नील वर्णे, इगुपधात्कः नीलः । `अम् रोगे', औणआदिक इत्रः, अमित्रः । गौकाक्ष्यो गर्गादियञन्तः । `कृग्रोरुः', कुरुः । देवस्येव रथोऽस्य देवरथः । तिलेतिलः, तितिलः, पृषोदरादिः, ततो मत्वर्थीय इन्, तितिलिनोऽपत्यमौत्सर्गिकोऽण्, `नस्तद्धिते' इति टिलोपः, तैतिलः । औरशशब्दो व्युत्पादितः । `कुरुनादिभ्यो ण्यः', कौरव्यः । भूरि अस्यास्ति भूरिको व्रीह्यादिः, तस्यैव पक्षे कपिलादित्वाल्लत्वं भूलिकः, ताभ्यामत इञ्, भौरिकिः, भौलिकिः । `चुप मन्दायां गतौ' ण्यन्ताल्लटः शत्रादेशः, तस्यापत्यं चौपयतः, एवं चैतयतः । `चिट परप्रेष्ये', ण्यन्ताल्लटः शत्रादेशः, तस्यापत्यं चैटयतः । `शीकृ सेचने', णिजादि पूर्ववत्, शैकयतः । क्षितमाचष्टे क्षितयन्, तस्यापत्यं क्षैतयतः । ध्वजोऽस्यास्ति ध्वजवान्, तस्यापत्यं ध्वाजवतः । द्वौ शब्दावित्यन्ये, `ध्वज गतौ' ण्यन्तात्पचाद्यच्, ध्वाजः; वनोतेस्तःष वतः । `चदि आह्लादने', ततो रमस् चन्द्रमाः, तस्यापत्यं चान्द्रमसायनिर्बुधः । शोभतेऽसौ शुभः, इगुपधात्कः । गमेर्गन्, गङ्गा । वृञ एण्यः, वरेण्यः । सर्वधातुभ्यो मनिन्, यानं यामा, शोभनं यामास्य सुयाम् । आरदो नाम जनपदः, ततोऽपत्ये `जनपदशब्दात्' इत्यञ्---आरदः । वह्यं करणम्, वह्यमेव वह्यका, निपातनादित्वाभावः । खलाय हिता खल्या, `खलयव' इति यत् । `वृषु सेचने' इगुपधात्कः---वृषः । लोमानि कामयति लोमका । उदकमिच्छत्यात्मन उदन्यः, `अशनायोदन्यधनाय' इत्युदकस्योदन्भावः, ततः पचाद्यच् । यज्ञयोगाद्यज्ञः । एते तिकादयः ।।

कौसल्यकार्मार्याभ्यां च ।। 4.1.155 ।।

कोसलशब्दाद् `वृद्धेत्कोसलाजादाञ् ञ्यङ्', कर्मारशब्दात्कारिलक्षणो ण्यः, एतयोरिह ग्रहणमिति शङ्कामपाकरोति---परमप्रकृतेरेवेति । कथं तर्हि विकृतं प्रकृतिरूपं श्रूयते ? तत्राह---प्रत्ययसंयोगेन त्विति । न चेयं स्वमनीषिकेत्याह---तथा चेति । युड्वादिष्टस्येति । पूर्वान्तकरणे दांगव्यायनिः, ओर्गुणो न स्यात्, अतः परादिकरणम् । आदिष्टेस्येति । कृतायनादेशस्येत्यर्थः । एतस्मिन्ननुच्यमानेऽनवकाशत्वाद्युटि कृतेऽनादित्वादायनादेशो न स्यात् ।।

अणो द्वयचः ।। 4.1.156 ।।

कार्त्रायणिरिति । कर्तुरपत्यमित्यण्, कार्त्रः, ततो यूनि फिञ्, तस्याब्राह्मणगोत्रादिति लुग्न भवति, विधानसामर्थ्यात् । अपर आह--- कर्तुश्छात्त्रः कार्त्रः,

`तस्यापत्यम्' इत्यादावगोत्रे चरितर्थं वचनमिति । अपर आह---अपत्यग्रहणमावर्तते, तत्रैकेनाण् विशेष्यते, अपरेण प्रत्ययार्थो निदिश्यते, ततश्चापत्यस्यैवाणो ग्रहणादस्त्येव वचनसामर्थ्यमिति ।।

उदीचां वृद्धादगोत्रात् ।। 4.1.157 ।।

कारिशब्दादपीति । कारिलक्षणस्योदीचामिञोऽवकाशः---तान्तुवायिः, फिञोऽवकाशः---आम्रगुप्तायनिः; नापितादुभयप्रसङ्गे फिञ् भवति । याज्ञदतिरिति । `वा नामदेयस्य वृद्धसंज्ञा वक्तव्या' । पक्षे याज्ञदत्तायनिरिति भवत्येव ।।

वाकिनादीनां कुक् च ।। 4.1.158 ।।

यदिह वृद्धगोत्रमिति । वाकिन-गारेध-काक--इत्येते त्रयः । वचनं वाकः सोऽस्यास्ति वाकिनः, बर्हिणवदुपपाद्यः । अगारे एधते गारेधः, पृषोदरादित्वादादिलोपः, शकन्ध्वादित्वात्पररूपम् । कायतेः काकः, `अन्येषामपि' इति कः । कर्कटस्यापत्यं कार्कट्यः, गर्गादिः, कुर्वादिर्वा । `लंघयतेर्लङ्का, अस्मादेव निपातनाद् घस्य कादेशः । वर्मचर्मशब्दौ व्रीह्यादी ।

इञाद्यपवाद इति । वर्मिचर्मिणोरण् प्राप्तः, लङ्काशब्दात् `द्व्यचः' इति ढक् प्राप्तः, यञन्ताद् `यञिञोश्च' इति फक्; सेषभ्य इञ् प्राप्तः, `वर्मिचर्मिणोर्नलोपश्च' इति कुकि कृते प्रातिपदिकस्यानकारान्तत्वान्नलोपो न प्राप्नोतीति विधीयते । यदि पुनरयं कुक् परादिः क्रियते, आयनादेशो न स्यात्; फस्यानादित्वात् । यदा न लिङ्गविशिष्टपरिभाषया वर्मिणी-चर्मिणीशब्दाभ्यां प्रत्ययो भवति, तदा `भस्याऽढे तद्धिते' इति पुंवद्भावो न स्यात् ।।

पुत्रान्तादन्यतरस्याम् ।। 4.1.159 ।।

पूर्वेणऐव प्रत्ययः सिद्ध इति । तेनासाविह विधीयते । कथं तर्हि पञ्चम्या निर्देश इत्याह---पुत्रान्तादित्यादि ।।

प्राचामवृद्धात्फिन्बहुलम् ।। 4.1.160 ।।

विकल्पार्था इति । विकल्पप्रयोजनम् । तत्राऽऽचार्योपादानं मतान्तरे प्रत्ययस्याभावं द्योतयति, बहुलग्रहणं तु क्वचित्प्रवृत्त्यादिकम्, अन्यतरस्यांशब्दस्तु विकल्पमेव, तेषामेकेनैव सिद्ध्यतीति प्रकरणाद्विकल्प इति गम्यते । किमर्थं तर्हि सर्वेषां ग्रहणम् ? तत्राह---तत्रेति । बहुलग्रहणं वैचित्र्यार्थमिति । पारिशेष्यादन्यस्य ग्रहणं विकल्पार्थमित्युक्तं भवति । वैचित्र्यमेव दर्शयति---क्वचिदिति ।।

मनोर्जातावञ्यतौ षुक्च ।। 4.1.161 ।।

तथा चेति । अपत्यार्थे तु सति `यञञोश्च' इति बहुषु लुक् प्रसज्येत; लौकिकस्य गोत्रस्य तत्र ग्रहणात् ।

अपत्ये कुत्सित इति । णत्वविधानार्थमिदम्, अणः सिद्धत्वात् । न च `न दण्डमाणवान्तेवासिषु' इति णत्वसिद्धिः, अर्थविशेषस्यानिश्चायाद् । अनधीतवेदत्वान्मूढत्वम् । विहिताकरणात्प्रतिषिद्धसेवनाच्च कुत्सितत्वम् ।।

अपत्यं पौत्रप्रभृति गोत्रम् ।। 4.1.162 ।।

तद्गोत्रसंज्ञं भवतीति । अपत्यमात्रस्य लोके गोत्रत्वादपत्यविशेषे गोत्रशब्दस्य नियमात्परिभाषेयं युक्ता, न संज्ञेति चेत् ? न; लिङ्गवती परिभाषा भवति, यथा---`इको गुणवृद्धी' इति, विध्यन्तरशेषभूता वा, यथा---`विप्रतिषेधे परं कार्यम्' इति, न चेयं तथा; किञ्च वृद्ध्यादयोऽपि सर्वार्थप्रत्यायनयोग्याः संज्ञिविशेषे शक्त्यवच्छेदेन नियम्यन्ते । अथ च ताः संज्ञास्तथेयमपि भविष्यति । उक्तं च---

व्यवहाराय नियमः संज्ञानां संज्ञिनि क्वचित् ।
नित्य एव तु सम्बन्धो डित्थादिषु गवादिवत् ।।
वृद्ध्यादीनां च शास्त्रेऽस्मिन् शक्त्यवच्छेदलक्षणः ।
अकृत्रिमो हि सम्बन्धो विशेषणविशेष्यवत् ।। इति ।

यदि पौत्रप्रभृतेरपत्यस्य गोत्रसंज्ञा क्रियते, गर्गस्यापि प्राप्नोति, सोऽपि कञ्चित्प्रति पौत्रो भवत्येव, तत्र को दोषः ? `गोत्राद्यून्यस्त्रियाम्' इति यूनि प्रत्ययप्रसङ्गः, गार्ग्यादेव तु यूनीष्यते ? नैष दोषः; इहापत्यग्रहणं न कर्तव्यम्, पौत्रस्यापत्यत्वात्तत्प्रभृतेरपत्यस्यैव ग्रहणं सिद्धम्, तत् क्रियते---अपत्यरूपेण प्रतिभासामानस्य यथा स्यात्, वस्तुतोऽपत्यस्य मा भूदित्येवमर्थम् । अतोऽपत्यरूपेण प्रतिभासमानस्य गर्गस्य न भविष्यति । ननु चासत्यप्यपत्यग्रहणे पौत्रप्रभृतिरूपेण प्रतिभासमानस्य संज्ञाया विज्ञानात्तेन रूपेणाप्रतिभासमानस्य मर्गस्य न भविष्यतीति किमपत्यग्रहणेन ! यद्येवम्, औपगवस्यापि न स्यात्, सोऽपि ह्यपत्यरूपेण प्रतिभासते, न तु पौत्रप्रभृतिरूपेण, अपत्यमात्रे प्रत्ययविधानाद् गार्ग्यादेरेव तु स्याद्---यत्र गोत्र एव प्रत्ययः । कुतश्चायमर्थो लभ्यते---पौत्रप्रभृतिरूपेण प्रतिभासमानस्येति ? तद्ग्रहणसामर्थ्यादिति चेत्, सर्वस्यापि यत्किञ्चित्प्रतिवस्तुतः पौत्रप्रभृतित्वाव्यभिचारात् पौत्रप्रभृतिग्रहणं न कर्त्तव्यं भवति । तद्ग्रहणसामर्थ्यादयमर्थो लभ्यत इति ? तन्न; संज्ञिनिर्देशार्थत्वादचेतनव्यावृत्त्यर्थत्वाच्च । `गोत्रम्' इत्येतावति ह्युक्ते कस्य संज्ञा स्यात्, रथादीनां च वस्तुतोऽपि पौत्रप्रभृतित्वं नास्ति । अतो वस्तुतः पौत्रप्रभृतेर्गर्गस्य मा भूत्, अपत्यरूपेण प्रतिभासमानस्य यथा स्यादित्येवमर्थं त्वपत्यग्रहणं कर्तव्यम् । सम्बन्धिशब्दत्वाच्च पौत्रप्रभृत्यपत्यशब्दयोर्यं प्रति पौत्रप्रभृतित्वमपत्यत्वं च तमेव प्रति गोत्रसंज्ञा विज्ञायते । तेनाङ्गिरसः पौत्रे गर्गस्यानन्तरे न भवति `गर्गादिभ्यो यञ्' । तदेतत्सर्वमुक्तम् ।

सम्बन्धिशब्दत्वादित्यादि । यस्य यदपत्यमिति । प्रतिभासत इति भावः । तदयमत्र सूत्रार्थः---वस्तुतः पौत्रप्रभृतिरपत्यरूपेणं प्रतिभासमानोऽर्थो यं प्रत्यपत्यरूपेण प्रतिभासते यं च प्रति वस्तुतः पौत्रप्रभृतिः, तं प्रति गोत्रसंज्ञ इति ।

अपत्यमिति व्यपदेशायेति । संज्ञिन इति शेषः । अपत्यरूपेण प्रतिभासमानस्य संज्ञिनो व्यपदेशो यथा स्यादित्येवमर्थमित्यर्थः । इह कस्मान्न भवति---गर्गापत्यस्य तृतीयादेरपत्यमिति, अत्र हि गर्गापत्यशब्देन गर्गं प्रत्यपत्यरूपेण प्रतिभासमानस्य वस्तुतः पौत्रप्रभृतेर्गर्गं प्रति गोत्रसंज्ञायां सत्यां गर्गस्य चतुर्थे जीवद्वंश्ये `गोत्राद्यूनि' इति गर्गापत्यशब्दात्प्रत्ययः प्राप्नोति ? नैष दोषः; संज्ञाप्रकरण एवास्मिन्कर्तव्येऽपत्यप्रत्ययेषु विधीयमानेषु मध्ये संज्ञाकरणं प्रत्ययवाच्यस्यापत्यस्य परिग्रहार्थम् । यदिदं `तस्यापत्यम्' इत्यारभ्य प्रत्ययार्थत्वेन निर्दिष्टमपत्यं तद्गोत्रसंज्ञमिति, तेनापत्यशब्देन प्रतिभासमानस्यापत्यस्य संज्ञा न भविष्यति । ननु च `ते तद्राजाः' इत्यत्र तच्छब्देनाजादीनामेव परिग्रहो यथा स्यात्पूर्वेषां मा भूदिति मध्ये संज्ञाकरणं स्यात् । यद्येतावत्प्रयोजनं स्याद्, `अञादयस्तद्राजाः' इत्येव ब्रूयात्, तस्मादुक्तमेव साक्षात्प्रयोजनमस्मिन् प्रकरणे संज्ञाकरणस्य । स्थिते त्वेवमुक्तमपि प्रयोजनं भवत्येव, अत एव तत्र वक्ष्यति---गोत्रयुवसंज्ञा काण्डेन व्यवहितत्वादिति ।।

जीवति तु वंश्ये युवा ।। 4.1.163 ।।

अभिजनप्रबन्धो वंश इति । अभिजनाः=पित्रादयः, अभिजायन्ते येभ्यः पुत्रादय इति कृत्वा । प्रबन्धः=सन्तानः । तत्र भवो वंश्य इति । दिगादित्वाद्यत् । पौत्रप्रभृत्यपत्यमिति षष्ठीसमासः, यद्यत्रापि पूर्ववत् `पौत्रप्रभृति' इत्येतत्सामानाधिकरण्येनापत्यं विशेषयेत्, तृतीयस्यापि जीवद्वंश्यस्य युवसंज्ञा स्यात्; तत्र को दोषः ? युवसंज्ञया गोत्रसंज्ञाया बाधितत्वाद्गर्गादिभ्यो यञ् स्यात्, न कश्चिदपत्यप्रत्ययः । किं कारणम् ? गोत्रादेव यूनीति नियमात्, नानन्तरान्न मूलप्रकृतेः । तस्माद्वाक्येनैवाभिधानं प्राप्नोति---गर्गस्यापत्यं गार्गेरपत्यमिति । एतेनोपगोस्तृतीयो जीवद्वंश्यो व्याख्यातः, तस्माद्वैयधिकरण्येन विशेषणमित्याह---पौत्रप्रभृतीति । षष्ठी विपरिणम्य इति । अत्र च व्याख्यानमेव शरणम् ।

तुशब्दोऽवधारणार्थ इति । अनेकार्थत्वान्निपातानां भिन्नक्रमो युवशब्दानन्तरं द्रष्टव्य इत्याह---युवैव भवति, न गोत्रमिति । असत्यवधारणे एकसंज्ञाधिकारादन्यत्र संज्ञायां समावेशाभ्युपगमात्कृत्यप्रत्ययसंज्ञानामिव गोत्रयुवसंज्ञयोः समावेशः स्यात् । अस्तु, को दोषः ? यस्कस्यापत्यं गोत्रम् `शिवादिभ्योऽण्' तदन्ताद्यूनि `अणो द्व्यचः' इति फिञ्, वृद्धौ, यस्येति लोपे कृते यास्कायनिरिति । बहुषु `यस्कादिभ्यो गोत्रे' इति फिञो लुक् प्रसज्येत; एकदेशविकृतस्यानन्यत्वात् । यस्कादिभ्योऽनन्तरस्य गोत्रप्रत्ययस्थ लुगुच्यते, न चात्रानन्तरः फिञ् । शिवाद्यणो यस्येति लोपः, तस्य पूर्वस्मादपि विधौ स्थानिवद्भावाद्यस्कादिभ्योऽनन्तरस्य विहितस्येति वा विज्ञास्यते । इह च कण्वस्यापत्यं काण्व्यः, तस्यापत्यं युवा काण्व्यायनः, तस्यच्छात्त्राः काण्वायनीया इति, `कण्वादिभ्यो गोत्रे' इत्यण् न भवति, कण्वादिभ्यः परो योऽनन्तरो यो वा तेभ्यो गोत्रे विहितस्तदन्तादित्याश्रयणात् । इह च औपगवस्यापत्यमौपगविरिति `गोत्राद्यूनि' इति प्रतिपदविधानात्, `एको गोत्रे' इति नियमो बाधिष्यते । यदि बाध्यते, औपगवेर्यूनोऽपत्यमिति चतुर्थस्य यूनो गोत्रत्वात्पञ्चमे यूनि फक् प्राप्नोति ? नैष दोषः; पञ्चमे यूनि विवक्षिते उत्पन्नस्येञः यूनि `लुक्' इति लुकि कृते औपगवशब्दादणन्तात्पुनरपीञेव भविष्यति । इह तर्हि दाक्षेरपत्यं दाक्षायणस्यापत्यमित्यर्थविवक्षायाम् `फक्फिञोरन्यतरस्याम्' इति फको लुगभावपक्षे तदन्तादिञ् प्राप्नोति ? किञ्च औपगवेरपत्यमित्यत्रापि लुप्तेऽपीञि प्रत्ययलक्षणेन फक्प्राप्नोति ? एवं तर्हि `गोत्राद्यूनि' इत्यत्र एकग्रहणनुवर्तिष्यते, तेनानेकः प्रत्ययो न भविष्यति । यस्तर्हि `गोत्रेऽलुगचि' इत्युलक् सोऽत्तरीणां यूनां छात्त्र इत्यादौ प्राप्नोति, यूनोऽपि गोत्रत्वात् ? प्राप्नोतु, तं बाधित्वा परत्वाद्यूनि लुग्भविष्यति ? नैवं शक्यम्, फक्फिञोर्हि दोषः स्यात्---शालङ्केरपत्यं शालङ्किः, पैलादिषु पाठादिञ् शलङ्कादेशश्च, ततः शालङ्केरपत्यं युवा `यञिञोश्च' इति फक्, `पैलादिभ्यश्च' इति लुक्, ततः शालङ्केर्यूनश्छात्त्रा इति प्राग्दीव्यतीयार्थविवक्षायाम् `गोत्रेऽलुगचि' इति पैलादिषु लुकः प्रतिषेधे सति `यूनिलुक्' इति लुकि नित्ये प्राप्ते `फक्फिञोरन्यतरस्याम्' इति पक्षे फकः श्रवणप्रसङ्गः । असत्यां तु यूनो गोत्रसंज्ञायाम् `गोत्रेऽलुगचि' इत्यस्याप्रवृत्तौ पैलादिषु लुग्भवत्येव । `फक्फिञोरन्यतरस्याम्' इत्ययं तु विकल्पोः यूनि `लुक्' इत्यस्यानन्तरस्य, न तु पैलादिषु लुको व्यवहितस्यान्तरङ्गस्य, तत `इञश्च' इत्यण्---शालङ्का इति भवति । तथा पीलाया अपत्यम्, `पीलाया वा' इत्याण्, पैलः, तस्यापत्यं युवा, `अणो द्व्यचः' इति फिञ्, तस्य `पैलादिभ्यश्च' इति लुक्, ततः पैलस्य यूनश्छात्त्राः पैलीया इति ।।

भ्रातरि च ज्यायसि ।। 4.1.164 ।।

कनीयान् भ्रातेति । भ्रातृज्यायः---शब्दयोः सम्बन्धिशब्दत्वादयमर्थो लभ्यते । अकारणत्वादिति । यः साक्षात्परम्परया वा कारणं भवति, स लोके `वंश्य' इत्युच्यते । गार्ग्ये जीवतीति । ज्यायसि भ्रातरि जीवतीत्यर्थः । एवं वात्स्यायनादावपि द्रष्टव्यम् ।।

वान्यस्मिन् सपिण्डे स्थविरतरे जीवति ।। 4.1.165 ।।

सप्तमपुरुषावधय इति । आत्मनः प्रभृति पित्रादिषु पुत्रादिषु वा गण्यमानेषु सप्तमपुरुषोऽवधिर्येषां ते तथोक्ताः । प्रायेण तु पूरणप्रत्ययो न पठ्यते, सप्तपुरुषावधय इत्येव पठ्यते, न तत्र समीचीनमर्थं पश्यामः । समानः पिण्डो येषामिति सपिण्डाः, निपातनात्सभावः । स्मर्यन्त इति । तद्यथा---`सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते' इति । सप्तमेऽतीते विनिवर्तत इत्यर्थः । उभयत्रेति । जनेन मरणे चेत्यर्थः ।

एवमादिकायां क्रियायामिति । आदिशब्देन `दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते' इत्यादिका क्रिया गृह्यते । जीवदेवेति । वस्तुव्याख्यानमेतत् । सूत्रे तु जीवतीत्याख्यातपदम्, तच्चेदपत्यं जीवतीति, प्रथमार्थे वा शत्रन्तात्सप्तमी व्याख्येया । तरब्निर्देश इत्यादि । असति तस्मिन्स्थविरशब्दाद्वयः प्रकर्षमात्रं गम्येत, तरपा तु स्थानप्रकर्षो द्योत्यते, ततस्तदु पादानसामर्थ्यात्, यथा गोतरः, अश्वतर इत्यादावप्रवृत्तिनिमित्तभूतस्यापि वाहदोहादेः प्रकृत्यर्थसम्बन्धिनः प्रकर्षेतरब् भवति, तथात्रापि । स्थानम्=पदम्, पितृत्वादिकम् ।

स्थानवयोन्यूने इति । स्थानेन वयसा च न्यूने इत्यर्थः । ननु च ज्यायसीत्यनुवृत्तेरेवोभयोः प्रकर्षो लभ्यते, `प्रशस्यस्य श्रः', `ज्य च', `वृद्धस्य च'

इत्युभयोर्ज्यादेशविधानात् ? तन्न; नहि सकृत्प्रयुक्तः शब्दोऽनेकार्थमभिधातुं समर्तः । एवमपि तरब्निर्देशो न कर्तव्यः, ज्यायसीत्यनुवृत्तेरेव स्थानप्रकर्षलाभात् ? एतदपि नास्ति; स्थविर इति विशेषणान्तरोपादाने सति ज्यायसीत्यस्यनुवृत्तेरेव दुर्ज्ञानत्वात् । जीवतीति किमिति । श्रुतं प्रकृतं चोभयमधिकृत्य प्रश्नः । अत एवोभयोः प्रयोजनं दर्शयति---मृते मृतो वेति । तत्र मृत इति स्वपितरि, मृतो वेति पौत्रप्रभृतेरपत्यभूतोऽर्तः ।।

वृद्धस्य च पूजायाम् ।। 4.1.166 ।।

अपत्यमन्तर्हितमित्यादि । एतच्चापत्यग्रहणेन वृद्धस्य विशेषणाद् इह परिभाषितस्य च शब्दात्मकस्यापत्यत्वासम्भवात् विज्ञायते । पूजायां गम्यमानायामिति । का पुनरत्र पूजा ? यद्युवत्वमेव । यद्यपि युवशब्दोऽनपेक्षितप्रवृत्तिनिमित्तमेव संज्ञा, तथापि प्रायेणाल्पवयसो जीवद्वंश्यत्वं सम्भवतीति तदध्यारोपे सति तत्सहचरितं वयोऽपि प्रत्यायितं भवतीति पूजा भवति । संज्ञासामर्थ्यादिति । गोत्रस्य सतो युवसंज्ञा विधीयते, गोत्रसंज्ञा चेत्प्रवृत्ता `एको गोत्रे' इति नियमः प्राप्नोति, ततश्च परमप्रकृतेरेवोत्पन्नेन प्रत्ययेनाभिहितत्वादप्राप्तोऽपि प्रत्ययोऽस्माद्वचनादभवतीत्यर्थः । इह पूर्वत्र सामानाधिकरण्येन संज्ञाविधानात्प्रक्रमाभेदाय तथैव संज्ञा विधातुं युक्ता, कोऽयं वृद्धस्येति षष्ठीनिर्देशः इत्यत्राह---वृद्धस्येति । षष्ठीनिर्देश इति । इतिकरणो हेतौ, वार्त्तिककारीयं चेदं सूत्रम् । वृत्तिकारेण तु सूत्रेषु प्रक्षिप्तम् । एतेनोत्तरसूत्रं व्याख्यातम् ।।

यूनश्च कुत्सायाम् ।। 4.1.167 ।।

निवृत्तिप्रधानो विकल्प इति । न पुनः प्रवृत्तिप्रधान इति; पूर्वमेव प्रवृत्तत्वात् । यदाह---यूनश्चेति । न ह्यप्रवृत्तायां तस्यामेष निर्देश उपपद्यते । ननु च निवृत्तिरप्यनिर्वृत्ता या न शक्यते कर्तुम्, यो हि भुक्तवन्तं ब्रूयान्मा भुङ्क्था इति किं तेन कृतं स्यात् । तस्माद् `यूनश्च' इति निर्देशो युवसंज्ञाविषयो ल7णार्थः । जीवद्वंश्यस्य चतुर्थादेरिति, न तु युवसंज्ञाशिष्टस्य निर्देश इति वक्तव्यम् । एवं च प्रवृत्तिविकल्पोऽप्युपपद्यते, सा त प्रवृत्तिरसत्यपि सूत्रे लभ्यत इति मत्वा निवृत्तिप्रधान इत्युक्तम् । युवसंज्ञायां प्रतिषिद्धायामिति । तस्या अभावपक्ष इत्यर्थः । गार्ग्यो जाल्म इति । का पुनरत्र कुत्सा ? गोत्रत्वारोपिणामेव, अजीवद्वंश्या हि गोत्रसंज्ञकाः, ते प्रायेण चरमवयसो भवन्तीति तदारोपे भवति कुत्सा ।।

जनपदशब्दात्क्षत्त्रियादञ् ।। 4.1.168 ।।

जनपदशब्दोयः क्षत्त्रियवाचीति । नन्वेते पञ्चालादयः शब्दाः क्षत्त्रियशब्दा एव, तत्सम्बन्धात्तु `तस्य निवासः' इति तद्धिते कृते `जनपदे लुप्' इति च लुपि जनपदे वर्तन्ते, तत्कथमवरकालया जनपदशब्दतया नित्यक्षत्त्रियशब्दता लक्ष्यते ? कः पुनराह---क्षत्त्रियसम्बन्धादेव ते जनपदे वर्तन्त इति, सूत्रकारस्तावत् `लुब्योगाप्रख्यानात्' इति वदन् क्षत्त्रियेष्विव जनपदेऽपि स्वाभाविका पञ्चालादिशब्दस्य प्रवृत्तिरित्याह---पाञ्चाल इति । यदपि पञ्चालादयः शब्दा जनपदे बहुवचनान्ताः, क्षत्त्रिये त्वेकवचनान्ताः, तथापि प्रातिपदिकस्य विशेषणं जनपदत्वम्, न सुबन्तस्येत्येकवचनान्तादपि प्रत्ययो भवत्येव । ऐक्ष्वाक इति । इक्ष्वाकुशब्दस्य दाण्डिनायनादिसूत्रे टिलोपो निपातितः ।

द्रौह्यव इति । क्षत्त्रियवचन एवायं न जनपदशब्दः । ब्राह्मणस्य पञ्चालस्येति । बाह्वादिप्रभृतिषु येषां दर्शनमित्युक्तत्वात्कथमत्र प्रसङ्ग इति चिन्त्यम् । क्षत्त्रियसमानशब्दादिति । समानः शब्दो यस्य यमानशब्दः, क्षत्त्रियेण यस्य समानशब्दस्तस्माज्जनपदशब्दात् तस्येति षष्ठीसमर्थाद्राजन्यभिधेयेऽपत्यवत्प्रत्ययो भवति । अवृद्धादपीति प्राप्तस्य वुञोऽपवादः । क्वचितु वृत्तावेवाय ग्रन्थः पठ्यते । मागध इति । `द्व्यञ्मगध' इत्यण् ।।

वृद्धेत्कोसलाजादाञ्ञ्यङ् ।। 4.1.171 ।।

ङ्यण्वक्तव्य इति । डकारष्टिलोषार्थः, णकारो वृद्धिनिमित्तस्येति पुंवद्भाव प्रतिषेधार्थः । अन्यस्मादिति । गुणवचनाद्युधिष्ठिरपितृवचनाच्च । पुरीरण्वक्तव्यः पौरव इति क्वचित्पठ्यते, तत्र पुरुशब्दस्याजनपदशब्दत्वात्प्राग्दीव्यतीयेऽणि सिद्धे तद्राजसंज्ञार्थं वचनम् । जनपदवाचित्वे `द्व्यञ्मगध' इत्येव सिद्धम् ।।

कुरुनादिभ्यो ण्यः ।। 4.1.172 ।।

आदिशब्दो नकारेणैव सम्बध्यते, न कुरुशब्देन; तदादेर्जनपदस्याभावात्, तदाह---कुरुशब्दान्नकारादिभ्यश्चेति । अमञोरपवाद इति । कुरुशब्दाद् `द्व्यञ्मगध' इत्यणोऽपवादः, नादिभ्यस्त्वञः । नैषध्य इति । कथं `नैषधोऽर्हति चेदघम्' इति ? स्वच्छन्दवाच ऋषयः । कथं `स नैषधस्यार्थपतेः सुतायाम्' इति ? निराङ्कुशाः कवयः । शेषविवक्षायां वोभयत्राण्समर्थनीयः ।।

साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् ।। 4.1.173 ।।

सल्वा क्षत्त्रियेति पाठः, तन्नामिकेति वचनात्, इदं हि तन्नामिकाणः प्राप्त्यर्थमुक्तम् । न च साल्वाशब्दात्तस्य प्राप्तिः, वृद्धत्वात, सलेर्वप्रत्ययः । अणपीष्यत इति । साल्वावयवे अपदातौ साल्वादिति निर्देशात्, न च निपातितोऽण् ढकोऽपवादः, `साल्वेयगान्धारिभ्या च' इति निर्देशात् । तेभ्यः क्षत्त्रियवृत्तिभ्य इति । `जनपदशब्दात्क्षत्त्रियात्' इत्यनुवृत्तेरेतल्लभ्यते ।

`उदुम्बरास्तिलखलाः' इति श्लोकः प्रदर्शनार्थः । तेन बुस, अजमीढ, आजकन्द--इत्येतेभ्यो।ञपि भवति; तथा च भाष्य उदाहृतम्---बौसिः, आजमीढिः, आजकन्दिरिति । साल्वावयवसंज्ञिता इति । साल्वावयव---इत्येवं शब्दिता इत्यर्थः ।।

ते तद्राजाः ।। 4.1.174 ।।

तथा चैवोदाहृतमिति । तत्र `तद्राजस्य बहुषु तेनैवास्त्रियाम्' मित्यत्र कार्याश्रयमुदाहृतम्, इह तु प्रकरणे रूपाश्रयम् ।।

कम्बोजाल्लुक् ।। 4.1.175 ।।

चोलः, शक इति । `द्व्यञ्मगध' इत्यस्याणः । केरल इत्यत्राञः ।।
स्त्रियामवन्तिकुन्तिकुरुभ्यश्च ।। 4.1.176 ।।
अवन्ती, कुन्तीति । लुकि कृते `इतो मनुष्यजातेः' इति ङीष । कुरूरिति । `ऊङुतः' ।।
अतश्च ।। 4.1.177 ।।
तकारो विस्पष्टार्थ इति । असति हि तस्मिन् `अस्य' इति निर्देशः स्यात्, ततश्च सन्देहः स्यात्---किमयं वर्णनिर्देशः ? आहोस्विदिदम इति ? इदमश्च निर्देशेऽनन्तरस्येञो लुक् प्रसज्येत, तकारे सत्येष दोषो न भवति, तपरनिर्देशस्य भूयसा वर्णेष्वेव प्रसिद्धत्वात् `तपरस्तत्कालस्य ' इति संज्ञाकरणाच्च । कथं `माद्रीसुतौ पुष्फले समृद्धे' इति ? स्वच्छन्दवाच ऋषयः, मद्रीसुतावित्येव वा पाठ्यम् ।
अवन्त्यादिभ्यो लुग्वचनादिति । यद्यत्र तदन्तविधिः स्यादवन्त्यादिभ्यो लुग्वचनमनर्थकं स्याद्; अनेनैव सिद्धत्वात् । तदन्तविधौ त्वसति अकारमात्रस्य ग्रहणेन सिध्यतीत्यवन्त्यादिभ्यो लुग्वचनमर्थवद् भवति ।।
न प्राच्यभर्गादियौधेयादिभ्यः ।। 4.1.178 ।।
पाच्चालीत्यादि । पञ्चालादयः शरवत्याः प्राञ्चो जनपदाः । भर्गादिग्रहणमप्रागर्थम् । भृञो गः, भर्गः । कृञ उः, करुः, तमोषति=द्वेष्टि, मूलविभूजादित्वात्कः, करूषाः । चिनोतेः कयः आदेश्च कः, बहुलवचनादित्संज्ञाभावः, केकयः । कशेर्मिरः, कश्मीरः । साल्वशब्दो निरुक्तः । शोभनानि स्थलान्यस्य सुस्थलः । उरसा शेते उरशः । `कुरुनादिभ्यो ण्यः' कौरव्यः । यौधेयीत्यादि । युधाया अपत्यम्, शुभ्राया अपत्यम्, `द्व्यचः' इति ढक् । शुभ्राशब्दात् `शुभ्रादिभ्यश्च' इति, ततः स्वार्थे `पर्श्वादियौधेयादिभ्यः' इत्यञ् । यद्यञो लुक् स्याड्ढग्लक्षणे ङीपि सति उतादत्तनिवृत्तिस्वरः स्यात्, लुकि तु प्रतिषिद्धे `शाङ्र्गरवाद्यञः' इति ङीनि सत्याद्युदात्तं भवति ।
कस्य पुनरिति । अस्य वक्ष्यमाणोऽभिप्रायः, तमेव प्रकाशयति---कथं पुनरिति । परिहरति---एतदेवेति पर्शुरिति । पर्शुः क्षत्रियो जनपदेन समानशब्दः, तस्यापत्यं सङ्घः, स्त्रीत्वविशिष्टः, `द्व्यञ्मगध' इत्यण्, तस्य `अतश्च' इति लुक्, पुनः पर्श्वादिलक्षणः स्वार्थिकोऽण्, तस्यापि लुक् । एवं रक्षा इति । रक्षसः क्षत्त्रियस्यापत्यम्, स्त्रीत्वविशिष्टः सङ्घः, पूर्ववदण्, द्वयस्यापि लुक्, `अत्वसन्तस्य' इति दीर्घः । आसुरीति । जनपदलक्षणस्याञो लुकि पर्श्वादिलक्षणस्याणो लुक्, जातिलक्षणो ङीष् । ज्ञापकत्वमेव द्रढयति---तथा चोक्तमिति । वार्त्तिककारेणैदुक्तम् । यौधेयादिषु त्रयो निरुक्ताः; ज्यायासहितो बाणो यस्याः सा ज्याब्राणा, तस्या अपत्यं ज्याबाणेयः । ज्यावानेय इत्यन्ये पठन्ति, तत्र ज्यावानो यस्या ज्यावाना । `घृ क्षरणे' `धृ धारणे' आभ्यां क्तिजन्ताभ्याम् `इतश्चानिञः' इति ढक्, घार्त्तेयः, धार्त्तेयः । त्रयो गर्त्ता येषां ते त्रिगर्त्ताः । `भृञोऽतच्', भरतः । वशेः कर्मणि किः, उशिः, उशयः, उष्टा नरा यस्य स उशीनरः, `अन्येषामपि दृश्यते' इति दीर्घः ।।
इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां चतुर्थाध्यायस्य प्रथमः पादः
-------------------*********************------------------

4.2

अथ चतुर्थाध्याये द्वितीयः पादः ---4
पदमञ्जरी
तेन रक्तं रागात् ।। 4.2.1 ।।
रञ्जिरयमस्त्येवाभिष्वङ्गे----भोजने रक्त इति; अस्ति वर्णविशेषे---रक्ता गौः, लोहितेत्यर्थः; अस्ति शुक्लस्य वर्णान्तरापादने---रक्तः पट इति ।
तत्राद्ययोरर्थयोर्ग्रहणे, रूपेण कान्तायां रक्तः, कोपेन रक्तं मुखमित्यत्रापि प्राप्नोतीति मन्यमानस्तृतीयमर्थमाश्रित्याह---शुक्लस्येत्यादि ।
एतच्चाभिधानस्वाभाव्याल्लभ्यते । रज्यतेऽनेन राग इति । `घञी च भावकरणयोः' इति नलोपः । भावसाधनस्तु रागशब्दो न भवति, न हि रञ्जनक्रियैव रञ्जनक्रियायाः करणं भवति । रागविशेषवाचिन इति । स्वरूपग्रहणं तु न भवति; उत्तरत्र लाक्षादीनां रागग्रहणेन विशेषणात् ।
रागादिति किमिति । अनभिधानादेव कर्तृवाचिनो न भविष्यति, `दैवदत्तं वस्त्रम्' इति ह्युक्ते स्वस्वामिभावस्यैव सम्प्रत्ययादिति प्रश्नः । लक्षणैकशरणो नैतत्प्रतिपत्तुमर्हतीत्युक्तम् ।
कथमिति । न ह्यत्र वर्णान्तरमाहितमिति प्रश्नः उपमानादिति । रूपसादृश्यनिमित्तात् ।।
लाक्षारोटनाट्ठक् ।। 4.2.2 ।।
शकलकर्दमयोर्वार्त्तिके दर्शनात्सूत्रे प्रक्षेपः ।
नील्या इति । ओषधिविशेषो नीलि, अम्बाधनार्थवचनम्, नीलशब्दस्तु गुणशब्दत्वादेव नीलीरक्ते वस्त्रे सिध्यति ।
पीतादिति । रागविशेषिवाची पीतशब्दः । इदमपि वचनमण्बाधनार्थमेव । स्वार्थिककन्प्रत्ययान्तस्तु पीतकशब्द गुणवचनो वस्त्रे लभ्यते ।।
नक्षत्रेण युक्तः कालः ।। 4.2.3 ।।

इह पारमर्षाः कालं क्रियात्मानमिच्छन्ति, यथोक्तम्---
आदित्य---ग्रह---नक्षत्र---परिस्पन्दमथापरे ।
भिन्नमावृतिभेदेन कालं कालविदो विदुः ।। इति ।
वैशेषिकास्तु द्रव्यमाकाशकल्पम्, उक्तं च---
व्यापारव्यतिरेकेण कालमेके प्रचक्षते ।
नित्यमेकं विभु द्रव्यं परिमाणं क्रियावताम् ।। इति ।
द्वयोरपि दर्शनयोर्नक्षत्रेण कालस्य योगो न सम्भवति, किं कारणम् ? अप्राप्तिपूर्विका प्राप्तिः=योगः, कालविशेषावधारणार्थो हि लोके पौषादिशब्दप्रयोगः, एवंविध एव च योगः कालविशेषावधारणहेतुर्भवति । द्रव्यपक्षे तावद् द्वयोरपि नक्षत्रकालयोर्नित्यत्वात्कालस्य च सर्वगतत्वान्न कदाचिदयोगः । क्रियापक्षेऽपि नक्षत्रगतायाः क्रियायाः कालख्यायाः समवायलक्षणो योगोऽव्यभिचारादविशेषणम् । सूर्यादिगतायास्त्वसम्भवादविशेषणम् । यदि तु यथाकथञ्चिद्योगः, तदा व्यभिचाराभावः । न हि सोऽस्त्यहोरात्रो यः पुष्येण न युक्तः । तस्मात् `नक्षत्रेण युक्तः कालः' इत्यनुपपन्नो निर्देशः ।
कथं तर्हि निर्देशः कर्त्तव्यः, नक्षत्रादेर्युक्तान्ताद्युक्ते काले प्रत्ययविधानं युक्तलोपश्च, पुष्येण युक्तश्चन्द्रमां पुष्ययुक्तः, पुष्ययुक्तेन युक्तः काल इति पुष्ययुक्तशब्दाच्चन्द्रमसि वर्त्तमानात्प्रत्ययः, युक्तशब्दस्य च लोपः, पौषी रात्रिः, पौषमहः, एवं सर्वत्र । तत्र युक्तवद्भावे दोषः, मघायुक्तशब्दात्प्रत्यये क्रियमाणे तस्य लुपि मघा इति स्त्रीत्वबहुत्वे न सिद्ध्यतः, युक्तस्यैव तु चन्द्रमसो लिङ्गवचनप्रसङ्गः, अतो नक्षत्रवाचिन एव प्रत्यययोर्योगः सम्भवतीति मत्वा पृच्छति---कथं पुनरिति । न चन्द्रमसैव योगे पुष्यादीनां नक्षत्रता; ज्योतिर्मात्रवचनत्वान्नक्षत्र शब्दस्य । ये तु पुष्यादीनामावस्थिकी नक्षत्रता चन्द्रमसा योगे भवतीत्याहुः, तेषामयं प्रश्नोऽनुपपन्नः । पुष्यादिसमीपस्थ इति । मुख्यार्थासम्भवे गौणस्याश्रयणमिति भावः । तत्र मघादयः शब्दा अपरित्यक्तस्वलिङ्गसङ्ख्या एव चन्द्रमसि वर्त्तन्ते, यथा---मञ्चादयः, मञ्चान् स्त्रियः पश्येति । तेन युक्तवद्भावविषयेऽपि दोषाभावः । पुष्यसमीपस्थेन चन्द्रमसा युक्त इत्यर्थ इति । यद्यपि चन्द्रमसा कालस्य योगो नित्यः, चन्द्रमसो नित्यत्वात्; पुष्यसमीपेन तु कादाचित्कः, पुष्यसमीपतायाः कादाचित्कत्वात् । पौषीति `सूर्यतिष्य' इत्यादिना यलोपः ।।
लुबविशेषे ।। 4.2.4 ।।
यद्यविशेषे लुब् भवति, इहापि प्राप्नोति---पौषी रात्रिः, पौषमहरिति, अत्राप्यद्य ह्यो वेति विशेषो न गम्यते । अथ रात्रिरहरिति । विशेषा वसायात्तदाश्रयः प्रतिषेधो भवति, इहापि तर्हि न स्याद्---अद्य पुष्यो ह्यः कृत्तिका इति, अद्यत्वादिविशेषावसायात्; `पुष्ये पायसमश्नीयात्' इत्यादावेव तु स्याद् यत्र नमनागपि विशेषावसायः ? अत आह---नचेदित्यादि । रात्र्यादिरित्यादिशब्देन मुहूर्त्तादेः परिग्रहः । विशेषोऽभिधीयते इति । प्रत्ययान्तेन । एतदेव स्पष्टयति--यावानिति । कियाँश्च कालो नक्षत्रेण युज्यते ? इत्याह---अहोरात्र इति । षष्टिनाडिकात्मक इत्यर्थः तावन्तं हि कालमेकस्य नक्षत्रस्य समीपे चन्द्रमा वर्त्तते । तदेतदेवं यावान्कालो नक्षत्रेण युज्यते तस्य सर्वस्य प्रत्ययान्तेनाभिधानमविशेषः, तदेकदेशस्याभिधानं विशेषः । एतच्च प्रत्ययान्तेऽनुप्रवेशादन्तरङ्गत्वाच्च लभ्यते । प्रसज्यप्रतिषेधश्चायम्, तेन पौषोऽहोरात्र इत्यत्र समुदायेनापि प्रतीयमानोऽवयवद्वयात्मकः प्रतीयत इति तदाश्रयः प्रतिषेधो भवति, इह पुष्येण युक्ता पौर्णमासी पौषी, मघाभिर्युक्ता माघीत्यादौ लुप् प्राप्नोति ? ज्ञापकात्सिद्धम्, यदयम् `विभाषा फल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः' इति निर्दिशति, तज्ज्ञापयति---पौर्णमास्यां लुब्न भवतीति । श्रवणाशब्दात्तु भवति---`श्रवणाकार्त्तकी' इति निर्देशादेव । कथं तर्हि श्रावण्यां पौर्णमास्यामिति ? अबाधकान्यपि निपातनानि भवन्ति ।।
संज्ञायां श्रवणश्वत्थाभ्याम् ।। 4.2.5 ।।
विशेषार्थोऽयमारम्भ इति । न तु संज्ञायां नियमार्थः; विधिसम्भवे नियमायोगात्, `श्रवणाकार्त्तिकी' इत्यसंज्ञायामपि लुपो दर्शनाच्च ।
लुपि युक्तवद्भावः कस्मान्न भवतीति । श्रवणा रात्रिरित्यत्र । निपातनादिति । ङीप्त्वत्र प्रत्ययलक्षणेन भवति; `अण् योऽकारः' इति विज्ञानात् ।।
द्वन्द्वाच्छः ।। 4.2.6 ।।
नक्षत्रग्रहणमनुवृत्तं षष्ठ्यन्ततया विपरिणम्यते, तच्च द्वन्द्वस्य विशेषणमित्याह---नक्षत्रद्वन्द्वादिति । राधानुराधीया रात्रिरिति । एकदेशद्वारेण रात्र्यादेर्नक्षत्रद्वययोगः । अद्य राधानुराधीयमिति । अद्येत्यस्यालिङ्गत्वेऽपि तद्विशेषणस्य नपुंसकत्वम्, लोकाश्रयत्वाल्लिङ्गस्य, लुपं परत्वाद्बाधते । छ इति । ननु युगपत्प्राप्तयोर्विप्रतिषेधः, न च लुप्छयोर्युगपत्प्रसङ्गः, प्रत्ययादर्शनस्य हि लुपसंज्ञा, तस्य कथं प्रत्ययेन सह प्रसङ्गः ? तस्मादयमत्रार्थः---`मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरान्' इति, एवमयं लुबण एव भवति, नास्य छस्य । तेनायं छो लुपो विषये श्रूयते, एतदेव लुपं परत्वाद्बाधते च्छ इति बाधकत्वम् । परत्वादिति । यतोऽयं परस्तेन लुबस्य न भवति, तेन तद्विषयेऽप्यसौ श्रूयत इति ।।
दृष्टं साम ।। 4.2.7 ।।
यस्य साम्नो विशिष्टकार्यविषये विनियोगो येन ज्ञातस्तेन दृष्टमित्युच्यते ।।
कलेर्ढक् ।। 4.2.8 ।।
सर्वत्रेति । न केवलमग्नेः `सास्य देवता' इत्यस्मिन्नेवार्थे ढक्, नापि केवलं दृष्टं सामेत्यत्रैवार्थे कलेर्ढग्; अपि तु सर्वेष्वे व प्राग्दीव्यतीयेष्वित्यर्थः ।
संग्रहश्लोके जति च द्विरण् डिद्वा विधीयते इति पाठः । जातेऽर्थे योऽण् विधीयते स वा डिद्भवतीत्यर्थः ।

न विद्याया इति । विद्यावाचिन ईकग् न भवतीत्यर्थः ।

गोत्रादङ्कवदिति । अङ्के यो दृष्टः प्रत्ययः स सर्वोऽतिदिश्यते, न त्वङ्क एवाहत्य विहितः, तेन `सङ्घाङ्कलक्षणेषु' इत्यस्याणः `गोत्रचरणाद् वुञ्' इत्यस्य च वुञोऽतिदेशः ।।

वामदेवाद् ड्यड्ड्यौ ।। 4.2.9 ।।

डिस्कारणं किमर्थमिति । यस्येति लोपेनैव सिद्धि मत्वा प्रश्नः । अनयोर्ग्रहणं मा भूदिति । अथ `क्रियमाणेऽपि डित्करणे कस्मादेवानयोर्ग्रहणं न भवति ? तत्राह---अननुबन्धकेति । `अननुबन्धकस्य ग्रहणे न सानुबन्धकस्य' इति यग्रहणे ड्यड्यतोर्ग्रहणं न भवति, एकानुबन्धकपरिभाषया तु यद्ग्रहणे ड्यतो ग्रहणाभावः । अवामदेव्यमिति । अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमेव भवति ।

संग्रहश्लोके अतदर्थे इत्यनेन `ययतोश्चातदर्थे' इत्येतत्सूत्रं लक्ष्यते । नञ्स्वर इति । नञाश्रयः स्वरो नञ्स्वरः, उत्तरपदान्तोदात्तत्वं तस्मिन्विधीयमाने इत्यर्थः ।।

परिवृतो रथः ।। 4.2.10 ।।

चार्मण इति । `अन्' इति प्रकृतिभावः । परिवृतो रथ इति । तदेकान्तग्रहणम्, येन परिवृतो रथस्तदेकान्तश्चेद्भवतीति वक्तव्यम् । तेन चर्मवस्त्रादावेव भवति, इतरथा छात्त्रादावपि प्रसङ्ग इत्याह---समन्ताद्वेष्टित इत्यादि । वृणोतिर्वेष्टने परिः सर्वतो भावे । यस्य न कश्चिदवयव इति ।

बाहुल्याभिप्रायमेतत्, न हि चक्रनेमिप्रभृतयश्चर्मणा पिधीयन्ते नाप्यन्तरावयवाः । ननु तत्कारी चायं यदाह---छात्त्रैः परिवृत इति । तद्द्वेषी च, यदाह---समन्ताद्वेष्टित इत्यादि । नायं तत्कारी, औपचारिकोऽयं प्रयोगः, परिवृतः इव परिवृतः ।।

पाण्डुकम्बलादिनिः ।। 4.2.11 ।।

मत्वर्थीयेनैव सिद्ध इति । यो हे येन परिवृतः स तस्यास्ति । अणो निवृत्त्यर्थमिति । यद्येतन्नारभ्येत, परिवृतो रथ इति विवक्षायां पूर्वेणाण् प्रसज्येत ।।

द्वैपवैयाघ्रादञ् ।। 4.2.12 ।।

द्वीपिव्याघ्रयोरिति । `विरूपाणामपि समानार्थानाम्' एकशेषः प्राप्नोति, तत्रावान्तरजातिभेदेन भिन्नार्थत्वान्न भविष्यतीति समाधातव्यम् । चर्मणैव रथस्य परिवरणं सम्भवति, न विकारमात्रेणेति `चर्मणी' इत्युक्तम् । द्वीषिव्याघ्रशब्दाभ्याम् प्राणिरजतादिभ्योऽञ्' इत्यञ्प्रत्ययः, द्वीपिनष्टिलोपः ।।

कौमारापूर्ववचने ।। 4.2.13 ।।

अपूर्ववचन इति । अपूर्वशब्दो भावप्रधानः । अपूर्वत्वस्य वचनमपूर्ववचनम्, तस्मिन्नपूर्ववचने । कस्य पुनरपूर्वत्वोक्तावित्याह---पाणिग्रहणस्येति । एतच्च निपातनसामर्थ्याल्लभ्यते । उभयतः । आद्यादित्वात्तसिः । स्त्रीपुंसयोरुभयोरप्येतन्निपातनमिष्यते, उभयोश्च पक्षयोरपूर्वत्वं स्त्रिया एव, न पुंस इत्यर्थः । तत्र कौमारेति स्त्रीपुंससाधारणप्रातिपदिकमात्रनिर्देशादवसीयते---उभयोरपि निपातनमिति । स्त्रिया एवापूर्वत्वमित्येतत्तु निपातनबलाल्लभ्यते । अपूर्वपतिमिति । यस्याः पाणिर्न केनचिद्गृहीतपूर्वः साऽपूर्वपतिः, न विद्यते पूर्वः पतिरिति कृत्वा, तामुपपन्नः=प्राप्तः, भार्यात्वेन स्वीकृतवानित्यर्थः । स तु पूर्वकृतोद्वाहो भवतु मा वा भूत् । अपूर्वपतिरिति । अयमपि बहुव्रीहिः, अत्रापि पुरुषः पूर्ववत् ।

कोमारेत्यादि । कौमारेति निपात्यतेऽपूर्वचने । किमत्र निपात्यते ? कुमार्या अण् विधीयते । कदा ? अपूर्वत्वं यदा तस्याः । यदा कुमार्या अपूर्वत्वं न पुंसस्तदेत्यर्थः । कुमार्या भवतीति वेति । अनेन योगः प्रत्याख्यायते; यः कुमारीमुपपन्नस्तस्यामसौ भवति, तदायत्तत्वाद्धर्माचरणादेः, ततश्च `तत्र भवः' इत्यवाण सिद्धः । यद्यपि वाण्याद्यपि कुमार्यां भवति तथापि सत्यभिधाने `तत्र भावः' इति भवत्येव । सूत्रारम्भेऽपि हि नासौ दण्डवारितः, एवं तावत्कौमार इति सिद्धम् । स्त्रियामपि सिद्धम्, कथम् ? कौमारस्य स्त्री कौमारी, प्रत्यासत्त्या च यस्यामसाभवन् कौमारव्यपदेशं लभते सैवाभिधीयते न स्त्र्यन्तरम्, एतच्च सूत्रारम्भेऽप्यङ्गीकर्तव्यम् ।।

तत्रोद्धृतममत्रेभ्यः ।। 4.2.14 ।।

अत्रोद्धरतिरुद्धरणपूर्वके निधाने वर्तते, तेन सप्तमीसमर्थाद् विभक्तिर्नोपपद्यतदे । भुक्तोच्छिष्टमिति । शिष्टमेवोच्छिष्टम्, यथा वच्छिनष्टि न सर्वं जुहोतीति भुक्तशिष्टमित्यर्थः । यस्योद्धरणमिति प्रासिद्धिरिति । कृत्यल्युटो बहुलम्' इति भूते कर्मणि ल्युट् । शरावेषूद्धृत इति । उद्धृत्यनेहित इत्यर्थः ।।

स्थण्डिलाच्छयितरि व्रते । 4.2.15 ।।

शास्त्रित इति । संजातशास्त्र इत्यर्थः । यद्वा---तृतीयासमर्थाद्विधानेऽर्थे `प्रातिपदिकाद्धात्वर्थे' इति णिच्, कर्मणि क्तः, शास्त्रेण विहित इत्यर्थः । स्थण्डिले शयितुं व्रतमस्येति । तुमुनत्र वक्तव्यः; व्रतस्याक्रियारूपत्वात् ।।

संस्कृतम्भक्षाः ।। 4.2.16 ।।

संस्कृतमित्येतत् कर्मसामान्ये व्युत्पाद्यते, तेन नपुंसकलिङ्गमेकवचनं च, भक्षा इत्येतत्तु अपूपाद्यभ्यवहार्यविशेषे व्युत्पाद्यते, तेन पुलिङ्गं बहुवचनं च । तत्र वाक्यार्थगम्यस्यार्थस्य पदसंस्कारेऽनुपयोगात्संस्कृतमित्येनद्भवति, अत एव विरम्य सम्बन्धं दर्शयति---यत्तत्संस्कृतम्भक्षास्ते चेद् भवन्तीति, अणौ यत्कर्म णौ चेत् स कर्तेतिवत्, तच्छब्दस्य प्रतिनिर्दिश्यमानलिङ्गता । खरविशदमिति । खरम्= कठिनम्, विशदम्= विभक्तम् । भक्षशब्देनोच्यत इति । यद्यप्यब्भक्षो वायुभक्ष इति भक्षयतेरन्यत्रापि प्रयोगः, भक्षशब्दस्तु तत्रैव प्रसिद्ध इति भावः ।।

शूलोखाद्यत् ।। 4.2.17 ।।

शूलोखादिति । समाहारद्वन्द्वः, उखा=पात्रविशेषः । यस्तु स्वाङ्गवाच्युखाशब्दस्तस्येह ग्रहणं न भवति; स्वाङ्गे संस्कर्तव्यस्याभावात् । कथमुख्योऽग्निरिति । न ह्यसौ भक्षः, भवार्थे दिगादित्वाद् द्रष्टव्यः ।।

दध्नष्ठक् ।। 4.2.18 ।।

इह तु दधि केवलमाधारभूतमिति । यथा शूरे संस्क्रियमाणस्यमांसस्य शूलम् । यद्यप्यत्र दध्यपि संस्कारकम्, तथापि न तद्विवक्षितम्, किन्तु तदाधारस्य द्रव्यान्तरेण यः संस्कारः स एव विवक्षित इति भावः ।।

उदश्वितोऽन्यतरस्याम् ।। 4.2.19 ।।

औदश्वित्क इति । `इसुसुक्तान्तात्कः' ।।

क्षीराड्ढञ् ।। 4.2.20 ।।

अत्र संस्कृतमित्येव सम्बध्यते, न भक्षा इति; तेन यवाग्वामपि भवति । क्षेरैयीति । `टिड्ढाणञ्' इत्यादिना ङीप् ।।

सास्मिन्पौर्णमासीति संज्ञायाम् ।। 4.2.21 ।।

ततश्चेद्विवक्षेति । ततः प्रत्ययान्ताल्लोकस्य विवक्षा भवति चेद् एवं प्रत्ययो भवति, नान्यथेत्यर्थः । संज्ञायामिति समुदायोपाधिरिति । एतदेव स्पष्टयति---प्रत्ययान्तेन चेदिति । पौषी पौर्णमासीति । `लुबविशेषे' इति पौर्णमास्यां लुब्न भवतीति पूर्वमेवोक्तम् । भृतकमासे चेति । भृता एव भृतकाः, कर्मकरास्तेषां यो मासः कर्मकरणादारभ्य त्रिशद्रात्रलक्षणः स यदा पौष्या पौर्णमास्या तद्वान् भवति । वस्तुतश्च न माघादिव्यपदेशभाक् तत्रेत्यर्थः ।

तुल्यमेव फलमिति । कि पुनस्तदित्याह---प्रयोगानुसारणमिति । ण्यर्थाल्ल्यट् । संज्ञाशब्देन तुल्यतामिति । तुल्यफलतामित्यर्थः । इति कणस्य ज्ञापयितुमिति । किं पुनरिदं ज्ञापकसाध्यम् ? तत्राह---न ह्ययमिति । ज्ञापनस्य प्रयोजनं दर्शयति--संज्ञार्थत्वे त्विति । संज्ञाब्देन तुल्यफलत्वे इत्यर्थः । प्रवृत्तिभेदेन चायमर्थो ज्ञाप्यत इति । संज्ञायामिति द्वितीयाप्रवृत्तिः, इह शाल्त्रे `संज्ञायाम्' इत्यस्यार्थे इतिशब्दो वेदितव्य इति परिभाषा सम्पद्यते । पूर्णमासादणिति । पूर्णो मासोऽस्यां तथाविति बहुव्रीहौ प्रज्ञादेराकृतिगणत्वादस्मादेव वा निपातनादण् । मा इति चन्द्रमा उच्यत इति । चन्द्रमश्शब्दैकदेशप्रयोगः, सत्याभामा भामेतिवत् ।।

आग्रहायण्यश्वत्थाट्ठक् ।। 4.2.22 ।।

अग्रे हायनमस्या इत्याग्रहायणी, प्रज्ञादेराकृतिगणत्वादण्, `पूर्वपदात्संज्ञायाम्' इति णत्वम् । अश्वत्थेन युक्ता पौर्णमासी अश्वत्थ इति । निपातनात्पौर्णमास्यामपि लुप् ।।

सास्य देवता ।। 4.2.24 ।।

यागसम्प्रदानं देवतेति । यद्यपि देवशब्दो मनुष्यादिवज्जातिवचनः, स्वार्थिकश्च तल्; तथापि समुदायशक्त्या देवताशब्दो यागे दर्श पूर्णमासौ यद्यत्सम्प्रदानत्वेन चोदितं तत्र सर्वत्र वर्तते, न स जातिविशेष इत्यर्थः । देयस्य पुरोडाशादेः स्वामिनीति । दिवेरैश्वर्यकर्मणो देवताशब्दव्युत्पत्ति दर्शयति, एवं च कृत्वा `वायृवृतुपित्रुषसो यत्',`कालेभ्यो भववत्' इति वचनमुपपद्यते, न ह्यृतुषु पितृषु उषसि वा जातिरस्ति । तथा पितृदेवत्यम्, देवदेवत्यमिति प्रयोगोऽप्येवमेवोपपद्यते ।

कथमिति । पुरोडाशादिकस्य देयस्याभावादिन्द्रस्य सम्प्रदानत्वं नास्तीति प्रश्नः । मन्त्रस्तुत्यामपीत्यादि । नानेनौपचारिकत्वं प्रयोगस्योच्यते, अपि तु मुख्य एव प्रयोगः, यागसम्प्रदाने सार्वलौकिकः प्रयोगः, अयं तु नैरुक्तानामित्येतावान्विशेषः । उपचरन्तीति ब्रुवते, प्रयुञ्जत इत्यर्थः ।

कथमित्यादि । पूर्वोक्तं प्रकारद्वयमत्र नास्तीति प्रश्नः । उपेमानादिति । काषायौ गर्दभस्य कर्णाविविद् गौणोऽयं प्रयोग इत्यर्थः । सेति प्रकृत इति । प्रकृतं हि साग्रहणं संज्ञया सम्बद्धमिति तदनुवृत्तौ संज्ञाया अप्यनुवृत्तिः स्यात् ।।

कस्येत् ।। 4.2.25 ।।

किमो विभक्तौ कादेशं कृत्वा कस्येति निर्दिष्टमित्याशङ्कामपनयति---कशब्द इति । एवं च कृत्वा कायानुब्रूहीति सम्प्रैषः । कस्मै अनुब्रूहीति, `न कस्मै देवाय हविषा विधेम' इति तु छान्दसः स्मैभावः, यदिन्द्राग्नी अवमस्यामित्यादिवत् । कायमिति । इत्वे कृते यस्येति लोपः प्राप्तः परत्वादादिवृद्ध्या बाध्यते, श्रीर्देवतास्य श्रायमितिवत् । `सोमाट्ट्यण्' इत्यत्र कग्रहणे च क्रियमाणे यद्यपि यस्येति लोपात्परत्वाद् वृद्धिर्भवति, कृतायामपि वृद्धौ यस्येति लोपः स्यादेव ।।

अपोनप्त्रपान्नप्तृभ्यां घः ।। 4.2.27 ।।

अपोनपात् अपांनपादिति देवतानामधेये इति । पृषोदरादित्वादनयोः साधुत्वम् । तयोस्तु प्रत्ययसन्नियोगेनेति । एवं च अपोनपाते अनुब्रूहि, अपांनपातेऽनुब्रूहि, अपोनपात्तं यज, अपां नपातं यजेति सम्प्रैषः । वेदे तु अपोनप्त्रे स्वाहेति छान्दसः प्रयोगः ।।

छ च ।। 4.2.28 ।।

योगविभाग इत्यादि । पूर्वसूत्र एव छग्रहणे सति घच्छौ द्वौ प्रत्ययौ, प्रकृती अपि द्वे इति स्यात्सङ्ख्यातानुदेशः । शतरुद्रीयमिति । शतशब्दोऽनन्तवचनः, शतं रुद्रा देवताऽस्येति घच्छौ, तयोर्विधानसामर्थ्याद् `द्विगोर्लुगनपत्ये' लुग्न भवति ।।

महेन्द्राद्घाणो च ।। 4.2.29 ।।

सौमीति । टित्त्वान्ङीप्, `हलस्तद्धितस्य' इति यलोपः ।।

वाय्वृतुपित्रुषसो यत् ।। 4.2.31 ।।

वायव्यमिति । `ओर्गुणः', `वान्तो यि प्रत्यये' पित्र्यमिति । `रीङृतः' इति रीङ्, यस्येति लोपः ।।

द्यावापृथिवीशुनासीरमरुत्त्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च ।। 4.2.32 ।।

अणो ण्यस्य चापवाद इति । वास्तोष्पतिशब्दात्पत्युत्तरपदस्य ण्यस्यापवादः, शेषेभ्योऽणः । द्यावापृथिव्याविति । `दिवो द्यावा', `दिवसश्च पृथिव्याम्' इति द्यावादेशः । शुनासीराविति । `देवता द्वन्द्वे च' इत्यानङादेशः । शुनो वायुः, सीर आदित्य इति । अन्ये तु एकमेव शुनसीरमिन्द्रस्य, गुणममन्यन्त, यथाहश्वलायनः---`इन्द्रो वा शुनासीरः' इति । मन्त्रलिङ्गञ्च भवति---इन्द्रं वयं शुनासीरमस्मिन्यज्ञे हवामहे' इति । मरुतोऽस्य सन्ति मरुत्वानिन्द्रः । अग्नीषोमीयमिति । `ईदग्नेः सोमवरुणयोः' वास्तोः पतिर्वास्तोष्पतिः, अस्मादेव निर्देशात्साधुः । गृहमेधशब्दमकारान्तं बह्वृचा मन्यन्ते । `मरुद्भ्यो गृहमेधेभ्य उत्तरा' इत्याश्वलायनः । `गृहमेधास आगता' इति च मन्त्रलिङ्गम् । `मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायमोदनम्' इति तु तैत्तिरीयकम् । तत्र देकारान्तो नकारान्तो वेति विप्रतिपन्नाः ।।

अग्नेर्ढक् ।। 4.2.33 ।।

कलेर्ढगित्यत्रोक्तमेवार्थं स्मरयति---प्राग्दीव्यतीयेष्विति ।।

कालेभ्यो भववत् ।। 4.2.34 ।।

कालविशेषवाचिभ्य इति । स्वरूपग्रहणं तु न भवति; बहुवचननिर्देशात् । वत्कारणमित्यादि । असति वत्करणे `कालेभ्यो भवः' इत्युच्यमाने यदि तावदेवं सम्बन्धः, कालेभ्यो भवे ये प्रत्यया विधास्यन्ते ते `सास्य देवता' इत्यत्रार्थे भवन्तीति देवताप्रकृतिरविशेषिता स्यात्, ततश्च `कालट्ठञ्' इति ठञिन्द्रादेरपि प्राप्नोति । अथ पुनरेवं सम्बन्धः---भवे ये प्रत्यया विधास्यन्ते ते भवन्ति कालेभ्यो देवताभ्य इति ? एवमपि भवप्रत्यया न विशेषिताः स्युः, ततश्च `दिगादिभ्यो यत्' इति यत् प्रत्ययोऽपि भवे विहितः कालवाचिभ्योऽस्मिन्नर्थे प्राप्नोति । अथाप्येवं सम्बन्धः---कालेभ्यो भवे ये प्रत्ययास्ते भवन्ति, कालेभ्य एव देवतार्थे इति तत्र सकृत् श्रुतस्य तस्य कालशब्दस्यैवमुभयसम्बन्ध एव तावद् दुर्लभः । अथापि लभ्येत, एवमपि यः कश्चित्कालाद्भवे प्रत्ययो यतः कुतश्चिदेवतायाः स्याद् ऋतुभ्योऽण् मुहूर्त्तादेरपि प्राप्नोति । वतिनिर्देशे तु सति सादृश्यपरिग्रहो भवति, तेन याभ्यः प्रकृतिभ्यो येन विशेषणेन भवेऽर्थे विधास्यन्ते ये प्रत्ययाः, इहापि ताभ्य एव प्रकृतिभ्यस्तेनैव विशेषणेन त एव प्रत्यया भवन्तीति न किञ्चिदनिष्टम् ।।

महाराजप्रोष्ठपदाट्ठञ् ।। 4.2.35 ।।

महाराजो वैश्रवणः, प्रोष्ठपदशब्दात्पूर्वेण नक्षत्राणि प्राप्ते वचनम्, नवयज्ञ आग्रयणम् । पूर्णमासादणिति । अस्मिन्वर्तत इत्येव । पौर्णमासीति । पूर्णो मासोऽस्या तिथौ वर्तत इति विग्रहः, एषेव च व्युत्पत्तिः `सास्मिन्पौर्णमासी' इत्यत्रापि दर्शिता ।।

पितृव्यमातुलमातामहपितामहाः ।। 4.2.36 ।।

पितृमातृभ्यामिति । स्वरूपपदार्थकत्वेनाभ्यर्हितत्वे विशेषाभावाल्लघ्वक्षरस्य पूर्वनिपातः, अयोनिसम्बन्धवाचित्वादनङोऽभावश्च । डामहजिति । कथं तर्ह्याकारेऽवग्रहः---माता + महः, पिता + मह इति ? तसमान्महप्रत्ययः पितृमातृभ्यां निपातितस्तयोश्चानङादेश इति केचित् । वृत्तिकारस्तु संहितापाठस्यैव नित्यत्वात् `नलक्षणेन पदकारा अनुवर्त्त्याः' इति न्यायेनावग्रहो मा कारीति मन्यते । मातरि षिच्छेति । षित्त्वमुपसङ्ख्येयमित्यर्थः । न पुनः षकारोऽनुबन्धः कर्तव्य इति देशाभावात्---मातामहा इत्यपि मन्त्रे दृश्यते ।

अवेर्दुग्ध इति । दुग्धं क्षीरम् । सोढादीनाम् `आदेशप्रत्ययोः' इति षत्वं न भवति, सकारोच्चारणसामर्थ्यात् ।

निष्फलस्तिल इति । सस्यावस्थायां फलरहित उच्यते, धान्यावस्थायां प्रयोजनशून्य इत्यन्ये ।।

तस्य समूहः ।। 4.2.37 ।।

सर्वस्यैव विषयस्यापवादैरवष्टब्धत्वात्पृच्छति---किमिहोदाहरणमिति । काकशुकवकशब्दा आद्युदात्ताः `प्राणिनां कुपूर्वाणाम्' इत्यनेन, अस्यार्थः---व्यधिकरणे षष्ठ्यौ, अथादिः प्राक् शकटेरित्यत आदिरित्यनुवृत्तं षष्ठीबहुवचनान्तं विपरिणम्यते, प्राणिवाचिनां ये आदिभूताः कवर्गात्पूर्वे अचस्तेषामुदात्तो भवतीति । तत्र शौकमित्यनुदाहरणम् ; खण्डिकादिषु पाठात् । वकशब्दस्तूदाहार्यः ।।

भिक्षादिभ्योऽण् ।। 4.2.38 ।।

अणग्रहणं बाधकबाधनार्थमिति । भिक्षाशब्दोऽयम् `गुरोश्च हलः' इत्यकारप्रत्ययान्तत्वादन्तोदात्तः, ततः `अनुदात्तादेः' इत्यञ् अणो बाधकः प्राप्नोति, तस्य बाधनार्थमणग्रहणम् । ननु च यद्यत्राञ्, स्यात्पुनर्वचनमनर्थकं स्यात् ? नानर्थकम्; परत्वादचि तत्तल्लक्षणष्ठक् प्राप्नोति, तद्बाधनार्थमत्र पुनर्वचनं स्यादित्यञ् स्यादेव, पुनरणग्रहणादणेव भवति । गार्भिणमिति । `भस्याऽढे तद्धिते' इति पुंवद्भावेन ङीपो निवृत्तिः, ततोऽणि `इमण्यनपत्ये' इति प्रकृतिभावात् `नस्तद्धिते' इति टिलोपाभावः । तस्य ग्रहणसामर्थ्यात्पुंवद्भावो न भवतीति । यदि स्यात्, `सिद्धत्वात्प्रत्ययविधौ' इति वचनादनुत्पन्न एव तद्धिते पुंवद्भावेन भवितव्यम् । युवशब्दश्च' कनिन्युवृष' इति कनिन्प्रत्ययान्तत्वादाद्युदात्त इत्यौत्सगिक एवाण् सिद्ध इति तस्येह पाठोऽनर्थकः स्यात् । यौवतमिति । यथा तु वात्तिकं तथा पुंवद्भाव इष्यते । आह हि---`भिक्षादिषु युवतिग्रहणानर्थक्यं पुंवद्भावस्य सिद्धत्वात् प्रत्ययविधौ' इति ।।

गोत्रोक्षोष्ट्रोरभ्रराजाराजन्यराजपुत्रवत्समनुष्याजाद् वुञ् ।। 4.2.39 ।।

अपत्याधिकारादन्यत्रेति । यद्येवम्, राजन्यमनुष्ययोरुपादानमनर्थकम्, गोत्र इत्येवसिद्धम् । न तावपत्यप्रत्ययान्तौ; जातेः प्रत्ययार्थत्वात् । उक्तं हि---

`राज्ञोऽपत्ये जातिग्रहणम्, मनोर्जातावञ्यतौ षुक्चेति । किंतर्ह्युच्यते `प्रकृत्याऽके राजन्यमनुष्ययुवानः' इति यलोपो न भवतीति, यावताऽनापत्ययकारत्वेनैव न भविष्यति ? सत्यम् ; अपत्यार्थत्वमभ्युपेत्यैतदुच्यते । यद्यपत्यार्थत्वमभ्युपेयते, राजन्यमनुष्ययोर्ग्रहणमनर्थकम् ? नानर्थकम्; ज्ञापनार्थत्वात्, एतज् ज्ञापयति---नैतयोरपत्यकृतं भवतीति, तेन यलोपो न भवति, सर्वथा `प्रकृत्याऽके राजन्यमनुष्ययुवानः' इति न वक्तव्यम् । औपगवकमिति । यथात्र परोऽप्यनुदात्तादेरञ् न भवति, तथा `खण्डिकादिभ्यश्च' इत्यत्र वक्ष्यते ।।

ब्राह्मणमाणववाडवाद्यन् ।। 4.2.42 ।।

नकारः स्वार्थ इति । `ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वं यथा स्यात् । किमर्थं पुनर्ब्राह्मणादिभ्यो यन्विधीयते, न प्रकृतो यञेव विधीयते, न हि वृद्धेषु यञो यनो वा विशेषोऽस्ति---तदेव रूपम्, स एव स्वरः, ठञस्त्वस्वरितत्वादननुवृत्तिः ? ज्ञापनार्थं तु । एतज् ज्ञापयति---अन्येभ्यऽप्ययम् । किं सिद्धं भवति ? पृष्ठादुपसङ्ख्यानं चोदयिष्यति तन्न वक्तव्यं भवति ।

पृष्ठानां समूह इति । पृष्ठशब्दः स्तुतिविशेषवचनः । पृष्ठ्यः षडह इति । तद्वति तदुपचारः ।

णस्वक्तव्य इति । सकारः पदसञ्ज्ञार्थः, तेन पार्श्वमित्यत्र भत्वाभावादोर्गुणो न भवति ।।

अनुदात्तादेरञ् ।। 4.2.44 ।।

अचित्तात्परत्वाद् ठका भवितव्यमिति । चित्तवन्त उदाहृताः, कपोतमयूरशब्दौ `लघावन्ते' इति मध्योदात्तौ, इगुपधात्कः, तरतेः सन्वत्तुक् चाभ्यासस्येति किप्रत्ययान्तस्तित्तिरिशब्दः प्रत्ययस्वरेणान्तोदात्तः । सन्वद्भावेनाद्युदात्तत्वं न भवति; `उणादयो बहुलम्' इति बहुलवचनात् ।।

खण्डिरकादिभ्यश्च ।। 4.2.45 ।।

क्षुद्रकाश्चेति । क्षुद्रकस्यापत्यानि, जनपदशब्दादिति विहितस्य तद्राजस्य लुक्, मालवात्तु वृद्धलक्षणस्य ञ्यङः । पूर्वेणाञि सिद्धे इति । समासान्तोदात्तत्वे सति शेषनिघातेनानुदात्तादित्वात् ।।

ननु च परत्वादिति । अभ्युपेत्य गोत्रत्वमेतदुक्तम्, तदेव तु नास्तीत्याह---न च गोत्रसमुदायो गोत्रमिति । तत्र च यथा जनपदसमुदायो जनपदग्रहणेन न गृह्यत इति काशिकोसलाया इत्यत्र छ एव भवति, न जनपदलक्षणो वुञ्, तद्वदत्रापि गोत्रलक्षणो वुञ् न प्राप्नोतीति भावः । स्यादेतत्---मा भूत्समुदायो गोत्रम्, मालवशब्दस्तु गोत्रं भवति, ततश्च तदन्तविधिना समुदायादपि वुञ्प्राप्नोतीति ? तत्राह---न चेति । `येन विधिस्तदन्तस्य' इत्यत्र हि `समासप्रत्ययविधौ प्रतिषेधः' इत्युक्तम् । एवं तर्हीत्यादि । कथमेकेन यत्नेनोभयं शक्यं ज्ञापयितुम् ? शक्यमित्याह, अन्यथानुपपत्त्या ज्ञापकं भवति, उभयेन च विना नास्मादञ्विधानमुपपद्यत इति । किमात्रानुपपन्नम् ? तत्र पूर्वविप्रतिषेधज्ञापनस्य प्रयोजनमौपगवकं कापटवकमिति । वुञोऽवकाशः यदाद्युदात्तम्---ग्लुचुकस्यापत्यं ग्लुचुकायनिः, `प्राचामवृद्धात्फिन्' तेषां समूहो ग्लौचुकायनकमिति; अञस्तु कापोतमित्याद्यगोत्रमवकाशः; गोत्रादनुदात्तादेरुभयप्रसङ्गे परत्वादञ्, स्यात्, अस्मात्तु ज्ञापकाद् वुञेव भवति । तदन्तविधिज्ञापनस्य प्रयोजनम्---वनहस्तिनां समूहो वानहस्तिकम् । गौधेनुमिति । `जङ्गलधेनुवलजानतस्य' इत्युत्तरपदवृद्धिविकल्पः ।

पुनरस्यैव नियमार्थत्वं वर्णयिष्यन् कथमेकेन यत्नेनोभयं लभ्यम्---ज्ञापनं च नियमश्च ? इत्याशङ्क्याह---क्षुद्रकमालवादित्येतावतेति । योगविभागेन यत्नद्वयमाश्रीयत इत्यर्थः । क्षौद्रकमालवी, क्षौद्रकमालवकमिति । उभयत्रापि मालवादुत्पन्नस्य ञ्यङः `गोत्रेऽलुगचि' इति लुकि प्रतिषिद्धे `आपत्यस्य' इति यलोपः ।

अञ्सिद्धिरित्यादि अनुदात्तादेरिति । हेतुगर्भं विशेषणम्; यतोऽयं क्षुद्रकमालवशब्दोऽनुदात्तादिस्तेन तस्यादनुदात्तादेरित्येवाञः सिद्धिरस्ति । कोर्थः तस्य गणपाठेनेति शेषः । न किञ्चित्प्रयोजनम् इत्यर्थः । गोत्रलक्षणो वुञ् प्राप्नोति, अतस्तद्बाधनार्थः पाठ इति चेत्तत्राह---गोत्राद्वुञिति । गोत्राद्वुञ् विधीयते, न च तत्क्षुद्रकमालवेतिशब्दरूपगोत्रमित्यर्थः । तदन्तादिति । मालवशब्दस्य गोत्रत्वात्तदन्तविधिना प्राप्नोत्येव । न स सर्वत इति ।

आद्यादित्वात्सप्तम्यन्तात्तसिः, स तदन्तविधिः सर्वत्र न भवतीत्यर्थः । तदन्तत्वे इति । तदन्तविधिरस्तीत्यस्मिन्नर्थ इत्यर्थः । तथा चेति ।

धेनुरनञिकमुत्पादयतीति आपिशलेः सूत्रम् । अत्र वृद्ध्यर्थोऽनुबन्धो मृग्यः, इकस्यैव चेसुसुक्तान्तात्परस्य कादेशो द्रष्टव्यः । अर्थमात्रं वा भाष्कारेण निर्दिष्टम् । इकगिति ठकमित्यर्थः । धेनूनां समूहो धैनुकम् । अनञिति किम् ? अधेनूनां समूह आधेनवम्, उत्सादिपाठादञ् । यद्यपि धेनुशब्दः सूत्रे पठ्यते, तथापि बष्कयास इति लिङ्गादधेनुशब्दादपि भवति । तत्र यदि सामूहिकेषु तदन्तविधिर्न स्यात्, अनञिति प्रतिषेधोऽर्थकः स्यात् ।

प्रयोजनान्तरमप्याह---सेनायामिति । यथेति । पूर्वविप्रतिषेधेन वुञाऽञो बाधा यथा स्यादित्येवमर्थश्च तस्य गणे पाठ इत्यर्थः । उलूकशब्दोऽत्र पठ्यते स `लघावन्ते' इति मध्योदात्तः । छन्दसि तु यदुलूको वदति मोघमेतत्, इत्था उलूक आपप्तदिति यदाद्युदात्तत्वम्, तच्छान्दसम् । भाषायां तु मध्योदात्तमेव, तत्र पूर्वेणैवाञ् सिद्धः, तस्मादेवं वक्तव्यम्---औलूक्यशब्दो गर्गादियञन्तः, यतः `यञञोश्च' इति बहुषु लुकि कृते रूपम्, तदिह पठ्यत इति । असति हि तस्य पाठे उलूकानां समूह इत्यर्थविवक्षायां `गोत्रेऽलुगचि' इति लुकः प्रतिषेधादौलुक्यशब्दाद् गोत्राश्रयो वुञ्प्रप्नोति । शुकशब्दोऽत्र पठ्यते, `तस्य समूहः' इत्यत्र तु `यस्य च नान्यत्प्रतिपदविधानमस्ति' इत्युक्त्वोदाहृतम्--काकं शौकमिति, तस्मात्तत्र शौकमित्यस्य स्थाने बाकमिति पठितव्यम् । बकशब्दः `प्राणिनां कुपूर्वाणाम्' इत्याद्युदात्तः । युगवरत्रेति पठ्यते, तत्सङ्घातविगृहीतार्थमिच्छन्ति---यौगवरत्रम्, यौगम्, वारत्रमिति, तत्र सङ्घातपक्षे `जातिरप्राणिनाम्' इति द्वन्द्वैकवद्भावे नपुंसकह्रस्वत्वे सति युगवरत्रेति दीर्घनिर्देशोऽनुपपन्नः, तस्माद्युगसहिता वरत्रेति समासः कर्तव्यः, जातिपरत्वाभावाद्वा एकवद्भावाभावः ।।

चरणेभ्यो धर्मवत् ।। 4.2.46 ।।

गोत्रचरणाद्वुञित्यारभ्य प्रत्यया वक्ष्यन्ते इति । ननु च न तत्र धर्मग्रहणमस्ति, तत्कथं धर्मवदित्यतिदेशो युज्यत इत्याह---तत्रेदमिति । इदमेव धर्मवदितिवचनं लिङ्गमस्ति, तत्र चरणाद्धर्माम्नाययोरिति । वतिः सर्वसादृश्यार्थ इति । असति तस्मिन् `चरणेभ्यो धर्मः' इत्युच्यमाने यदि तावदेवं सम्बन्धः, चरणेभ्यो धर्मे ये प्रत्यया विधास्यन्ते ते भवन्ति, समूह इति समूहप्रकृतिरविशेषिता स्यात्, ततश्च काकादिभ्योऽपि वुञादयः प्रसज्येरन् । अथ पुनरेवं सम्बन्धः---धर्मे ये प्रत्यया विधास्यन्ते ते चरणेभ्यः समूहे भवन्तीति ? एवमपि धर्मप्रत्यया न विशेषिताः स्युः, ततश्च `तस्येदम्' इति विधास्यमाना अणादयोऽपि कठादिभ्य आपद्येरन् । अथाप्येवं सम्बन्धः---चरणेभ्यो धर्मे ये प्रत्ययास्ते भवन्ति चरणेभ्य एव समूह इति ? तत्र सकृत् श्रुतस्य चरणशब्दस्यैवमुभयसम्बन्ध एव तावद् दुर्लभः, अथापि लभ्येत ? एवमपि यः कश्चिद्धर्मे प्रत्ययो यतः कुतश्चिच्चरणशब्दात्स्यात्, `कौपिञ्जलहास्तिपदादण्' कठादिभ्योऽपि स्यात्, वतिनिर्देशे तु सति सर्वसादृश्यपरिग्रहो भवति । तेन याभ्यः प्रकृतिभ्यो येन विशेषणेन ये प्रत्यया धर्मे विधास्यन्ते, इहापि ताभ्यः प्रकृतिभ्यस्तेनैव विशेषणेन त एव भवन्तीति न किञ्चिदनिष्टम् । काठकम्, कालापकमिति । गोत्रचरणाद्वुञ् । छान्दोग्यमिति । `छन्दोगौक्थिक' इति ञ्यः । आथर्वणमिति । `आथर्वणिकस्येकलोपश्च' इत्यण्, इकलोपश्च ।।

अचित्तहस्तिधेनोष्ठक् ।। 4.2.47 ।।

अणञोरपवाद इति । अचित्तार्थेषु येननाप्राप्तिन्यायेनाणोऽपवादः । कपोतादिषु चित्तवत्सु चरितार्थस्याञोऽपि परत्वाद्बाधक इत्यर्थः । हस्तिधेनुशब्दयोस्तु प्रत्ययस्वरेणान्तोदात्तयोरनुदात्तादिलक्षणस्याञोऽपवादः । हस्तिशब्दः `हस्ताज्जातौ' इतीनिप्रत्ययान्तः । धेनुशब्दः `घेटोऽनुश्च' इति नुप्रत्ययान्तः । आधेनवमिति । अत्सादिपाठादञ्, `जङ्गलधेनुवलजान्तस्य' इति पक्षे वृद्ध्यभावः ।।

पाशादिभ्यो यः ।। 4.2.49 ।।

यप्रत्ययान्तं स्वभावतः स्त्रीलिङ्गम् । वातशब्दोऽत्र पठ्यते---वातानां समूहो वात्या, पृथग्वातादर्शनादयुक्तोऽत्र समूहः, तस्माच्छीघ्रत्वे प्रत्ययो वक्तव्यः ? नैष दोषः; एकस्यापि वातावयविनो दिग्भेदेन भेदोऽध्यारोपः, तदाश्रयश्च समूहः । अथ वा---प्रतिदिशं वातावयविन एव भिद्यन्ते, तथा च प्रतिभासः---वूर्वोवातः, उत्तरो वातः, सर्वतो वान्ति वाता इति । आह च---वायोर्वायुसम्मूर्छनं नानात्वे लिङ्गमिति ।

खलगोरथात् ।। 4.2.50 ।।

अथ कस्मात्खलादयोऽपि पाशादिष्वेव न पठिताः, एवं हि विभक्तिर्नोच्चारयितव्या भवति ? तत्राह---पाशादिष्वपाठ इति ।।

इनित्रकट्यचश्च ।। 4.2.51 ।।

योगविभागो यथासङ्ख्यार्थः, अन्यता हनित्रकट्यचस्त्रयश्चकाराद्यश्चेति चत्वारः प्रत्ययाः, प्रकृतयस्तु तिस्र इति वैषम्यं स्यात् ।
खलादिभ्य इति । खलादयः प्रयोगतो गम्याः । एतेऽपि प्रत्ययाः स्वभावतः स्त्रियामेव ।।

विषयो देशे ।। 4.2.52 ।।

ननु च विषयस्य देशत्वाव्यभिचाराद् देश इति विशेषणं व्यर्थमित्यत आह---विषयशब्दोऽयमिति । अत्यन्तशीलितः=अत्यन्ताभ्यस्तः । तत्र देशग्रहणं ग्रामसमुदायप्रतिपत्त्यर्थमिति । यद्येवम्, देशग्रहणमेवास्तु मा भूद्विषयग्रहणम् ? नैवं शक्यम्; देशशब्दोऽपि नानार्थः, देशनं देश इति क्रियाशब्दस्यापि भावात् । शिबीनां विषयो देशः शैब इति । कथं शिबयो देश इति ? निवासविवक्षायाम् `तस्य निवासः' `जनपदे लुप्' इति लुपि भविष्यति । नन्वर्थभेदो भवति, शिबीनां निवासो जनपद इत्यत्र स्वास्वामिभावो न प्रतीयते, अन्यदीयेऽपि जनपदे निवाससम्भावत्; शिबीनां विषय इत्यत्र तु स्वस्वामिभावः प्रतीयते, न तु निवासार्थः, तत्रावसतामपि स्वामित्वसम्भवात् ? सत्यम् ; य एवासौ येषां विषयस्तत्रैव तेषां निवासे जनपदे लुप् स्मर्यते, न निवासमात्रे । अत्र चाभिदानस्वाभाव्यं हेतुः । एवं च शिबीनां विषयः शैब इत्यत्रार्थे विबय इत्यपि भवति । एवं वसातीनां विषयो वासातः, तेषामेव निवासो वसातयः । तथा गान्धारीणां विषयो गान्धारः, निवासो गान्धारयः । अङ्गाः, वङ्गा, स्रुघ्नाः पुण्ड्रा इति---निवासरूपतैव विवक्ष्यते, न विषयरूपता ।
एषं राजन्यादिब्यो वुञित्यत्रापि विषयविवक्षायां राजन्यकम्, निवासो राजन्याः । तत्रैव बैल्वतादिषु विषयविवक्षैव, तेन बैल्वतकम्, आम्बरीषपुत्रकमित्याद्येव भवति । सर्वत्र चाभिधानशक्तिरेव हेतुः, तदाह---विषयाभिधाने जनपदे लुप्, बहुवचनविषयाद् गान्धार्यादिभ्यो वा राजन्यादिभ्यो नित्यम्, न वाभिधेयस्य निवासविषयत्वात् । निवासविवक्षायां लुप्, विषयविवक्षायां तु प्रत्यय इति ।।

सोऽस्यादिरितिच्छन्दसः प्रगाथेषु ।। 4.2.55 ।।

छन्दस इति न स्वरूपग्रहणम्, नापि मन्त्रब्राह्मणयोः, कस्य तर्हि ? अक्षराणामियतावचनश्छन्दः शब्दोऽस्ति, यस्य जगत्यादयो विशेषास्तस्य ग्रहणम् ; प्रागाथानामादौ तस्यैव सम्भवात्, तेन पङ्क्त्यादिशब्देभ्यः प्रत्ययः । यत्र द्वे ऋचौ तिस्रः क्रियन्त इति चतुर्थषष्ठौ पादौ बार्हतो प्रगाये पुनरभ्यसित्वोत्तरयोरवस्येदित्येवमादिना प्रकारेण । तद्यथा---यज्ञायज्ञा वः प्रियं मित्रं न शंसिषों प्रियं मित्रं न शंसिषमूजे निपातमिति । तत्र योऽयमुच्चारणप्रकारस्तद्ग्रथनम् । प्रग्रथनादिति । प्रगाथशब्दप्रवृत्तिनिमित्तं दर्शयति, प्रग्रथ्यत इति प्रगाथः, `अकर्तरि च कारके' इति कर्मणि घञ्, पृषोदरादित्वाद्रेफनकारयोर्लोपः । प्रागाणाद्वेति । `कृत्यचः' इति णत्वम्, `कौ गौ शब्दे', प्रगीयत इति प्रगाथः, `उषिकुषिगर्तिभ्यस्थन्' । त्रैष्टुभमिति । कुटीर इति स्वार्थिकस्यापि रप्रत्ययस्य यथा भिन्नलिङ्गता, तथेहापि नपुंसकत्वं द्रष्टव्यम् ।।

संग्रामे प्रयोजनयोद्धृभ्यः ।। 4.2.56 ।।

`समर्थानां प्रथमाद्वा' इति वचनात्संग्रामवाचिभ्यः प्रत्ययः प्राप्नोति, न प्रयोजनयोद्धृभ्यश्चरमनिर्दिष्टेभ्य इत्याशङ्क्याह--सोऽस्येति समर्थविभक्तिरित्यादि । प्रथमासमर्थविशेषणमिति । तेन विशेष्यद्वारेण प्रयाजनयोद्धार एव प्रथमनिर्दिष्टाः । प्रत्ययार्थविशेषणं संग्राम इति । तेन तद्द्वारेण संग्रामश्चरमनिर्दिष्टः ।।
घञः सास्यां क्रियेति ञः ।। 4.2.58 ।।
अस्यामिति प्रत्ययार्थः स्त्रीलिङ्ग इति । तेन लिङ्गस्य विवक्षितत्वं दर्शयति । घञन्तात्क्रियावाचिन इति । भावे यो घञ् तदन्तादित्यर्थः । श्यैनम्पातेति । पतनं पातः, श्येनानां पात इति कर्तरि षष्ठ्याः समासः, ततो ञः, `श्येनतिलस्य पाते ञः' इति मुम् । प्राकार इति । द्रव्यवचनोऽयं कर्मणि घञन्तः, `उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति प्रशब्दस्यदीर्घत्वम् । सामान्येन चेदं विधानमिति । एतदेवोदाहरणेन द्रढयात---दणअडपात इति ।।
तदधीते तद्वेद ।। 4.2.59 ।।
इह योऽयं ग्रन्थमधीते स तं स्वरूपता वेत्ति, यश्च वेत्ति सोऽवश्यमधीते---इत्यन्यतरोपादानेन सिद्धम्, किमर्थमिमावर्थावुपदिश्येते, नैतयोरावश्यकः समावेशः, अध्ययनम् = शब्दपाठः, अर्थावबोधः = वेदनम्, भवति च---कश्चित्संपाठं पठति नार्थं वेत्ति, कश्चिच्चार्थं वेत्ति न संपाठं पठति ।
द्विस्तद्ग्रहणमित्यादि । `तदधीते वेद' इत्युच्यमाने समुच्चयो विज्ञायेत, ततश्च यस्तदधीते वेद च तत्रैव स्यात्, यस्तु केवलमधीते वेद वा न तत्र स्यात्; द्विस्तद्ग्रहणे तु वाक्यभेदेनाधीयानविदुषोः पृथक्प्रत्ययविधानं सिध्यति । ननु च `तदस्य तदस्मिन्स्यात्' इत्यत्र नानार्थनिर्देशे प्रत्येकं समर्थविभक्तिः सम्बन्धनीयेति द्विस्तद्ग्रहणेन न्यायो व्युत्पादयिष्यते, अत एव `तेन दीव्यति' इत्यत्र प्रत्यर्थं प्रत्ययो भवति ? न ब्रूमः---इहैव द्विस्तद्ग्रहणमधीयानविदुषोः पृथग्विधानार्थमिति, किं तर्हि ? उत्तरत्र `क्रतूक्थादिसूत्रान्ताठ्ठक्', `वसन्तादिभ्यष्टक्' इत्यत्रापि, किं च कारणं न स्यात् ? क्रतुशब्दः कर्मनामदेयं वसन्तादयोऽप्यर्थाः, न तेषामध्ययनं सम्भवति, तस्य शब्दविषयत्वात्, तत्सहचरिते तु ग्रन्थे सम्भवति, गौणत्वात्तु न गृह्यते, मुख्य एव त्वर्थे वेदनं सम्भवतीति तेभ्यो विदुष्येव स्याद्, नाध्येतरि । पुनस्तद्ग्रहणात्तु यत्नाद् गौणस्यापि ग्रहणात्तत्रापि भवति ।।
क्रतूक्थादिसूत्रान्ताट्ठक् ।। 4.2.60 ।।
क्रतुविशेषवाचिभ्य इति । स्वरूपस्य तु ग्रहणं न भवति, यदि स्यादुक्थादिष्वेव पठेत् । क्रतुसामान्यवाचिनामपि सोभयागादीनां पर्यायाणां न भवति; उक्थादिषु यज्ञशब्दस्य पाठात् । तस्माद्विशेषवाचिनामेव ग्रहणं तेभ्यो मुख्यार्थवृत्तिभ्यो वेदितरि प्रत्ययः, तत्प्रतिपादनपरग्रन्थवृत्तिभ्यस्त्वध्येतरि । वार्त्तिकसूत्रिक इति । वृत्तौ साधु वार्त्तिकम् `कथादिभ्यष्टक्' । वार्त्तिकं च तत्सूत्रं चेति कर्मधारयात्प्रत्ययः । एवं सांग्रहसूत्रिक इति । कल्पसूत्रमिति कर्मधारयः, समाहारद्वन्द्वो वा ।
यज्ञायज्ञीयात्परेणेति । एनपा योगे पञ्चमी चिन्त्या, एनबपि परशब्दात्पाक्षिकः, यदा तद्विधौ `उत्तराधरदक्षिणादातिः' इति नानुवर्तते, दिक्शब्देभ्य इत्येवानुवर्तते । न च तान्यधीयाने प्रत्यय इष्यत इति । ठग्, अण्---च प्रत्ययद्वयमपि नेष्यते, तेनोक्थान्यधीयत इति वाक्यमेव भवति । अत्र च अभिधानमेव शरणम्, सामलक्षणं प्रातिशाख्यम् । औक्थिक्य इति । औक्थिकानामाम्नायः, इदमर्थे `छन्दोगौक्थिक' इति ञ्यः । औक्थिक्यशब्दाच्च प्रत्ययो न भवतीति । अण्प्रत्यय इत्यर्थः, इदं प्रसङ्गादुक्तम् । सूत्रान्तादिति । अत्यल्पमिदमुच्यत इत्याह---विद्यालक्षणकल्पसूत्रान्तादिति वक्तव्यमिति । विद्या चेत्यादिवाक्येनातिप्रसक्तस्यापवादः । अङ्गादिपूर्वो विद्याशब्दः प्रत्ययं नोत्पादयतीत्यर्थः । त्रैविद्य इति । त्र्यवयवा विद्या त्रिविद्या, तामधीते त्रैविद्यः । तिस्रो विद्या अधीत इति तु विग्रहे `द्विगोर्लुगनपत्ये' इति लुक्प्रसङ्गः ।
यावक्रीतिक इति । यवक्रीतमधिकृत्य कृतमाख्यानं यवक्रीतशब्देनोच्यते, एवं प्रैयङ्गवमधिकृत्य कृतमुपचारात्प्रैयङ्गवमुच्यते । वासवदत्तिक इति । वासवदत्तामधिकृत्य कृता आख्यायिका, `अधिकृत्य कृते ग्रन्थे' इत्यत्रार्थे `वृद्धाच्छः', तस्य `लुबाख्यायिकाभ्यो बहुलम्' इति लुप्, ततोऽनेन ठक् । एवं सौमनोत्तरिकः, ऐतिहासिक इति । इति हासीदिति यत्रोच्यते स इतिहासः, पृषोदरादित्वात्साधुः ।
सर्वसादेरिति । सर्वादेः, सादेर्द्विगोश्चोत्पन्नस्य पत्ययस्य लो भवति लुग्भवतीत्यर्थः, अर्थवतः सशब्दस्य ग्रहणात्सर्वशब्दः पृथगुपात्तः, `द्विगोश्च' इत्यनेन `द्विगोर्लुगनपत्ये' इत्ययमेव लुक् स्मारितः । सर्ववेद इति । सर्ववेदानधीते इत्यणो लुक् । सवार्त्तिक इति । वर्त्तिकान्तमधीते इति अन्तवचने सहशब्दस्याव्ययीभावः, `अव्ययीभावे चाकाले' इति सभावः, ततोऽणो लुक् ।
अनुसूरिति । अनुसूशब्दष्ठकमुत्पादयति, लक्ष्यलक्षणशब्दौ चेत्यर्थः । आनुसुक इति । अनुसूमधीत इति ठक्, तस्य `इसुसुक्तन्तात्कः' इति कादेशः, `केऽणः' इति ह्रस्वः ।
पदोत्तरपादिति । पदशब्द उत्तरपदं यस्य स तथोक्तः, पूर्वपदमधीते पूर्वपदिकः । एवमुत्तरपदिकः ।
शतषष्टेरिति । शतशब्दात्षष्टिशब्दाच्च परो यः पथिन्शब्दस्तदन्तात् षिकन् भवति । षकारो ङीषर्थः ।।
अनुब्राह्मणादिनिः ।। 4.2.62 ।।
ब्राह्मणासदृश इति । `यथार्थे यदव्ययम्' इति सादृश्येऽव्ययीभावः ।
चोदयति---मत्वर्थ इति । परिहरति---तत्रैतस्मादिति । दूषयति---अनभिधानादिति । साक्षात्परिहारमाह---अणो निवृत्त्यर्थं तु वचनमिति । क्वचित्तु मत्वर्थ इत्यादि न पठ्यते ।।
वसन्तादिभ्यष्ठक् ।। 4.2.63 ।।
वसन्तसहचरित इति । यत्र वसन्तो वर्ण्यते यो वा वसन्तेऽध्येयः । वसन्तसाहचर्यात्ताच्छब्द्यं लभते ।

उक्थादिष्वेते पठितव्याः, ते वा वसन्तादिषु ? तथा तु न कृतमित्येव । अथर्वन्शब्दोऽत्र पठ्यते, स उपचारेण प्रोक्ते ग्रन्थे वर्तते । अथर्वणमधीते आथर्वणिकः, `दाण्डिनायनहास्तिनायन' इति निपातनात् `नस्तद्धिते' इति टिलोपाभावः ।।

प्रोक्ताल्लुक् ।। 4.2.64 ।।

प्रोक्तसहचरित इति । अर्थस्य प्रोक्तत्वादर्थेन च प्रत्ययस्य पौर्वापर्यायोगान्मुख्यार्थासम्भवाद् गौणस्य ग्रहणमित्यर्थः । अपर आह---प्रोक्तशब्द इह स्वर्यते, तेन तदधिकारविहितः प्रत्ययो गृह्यत इति । यदि वा प्रोक्ते भवः प्रोक्त इति सौत्रोऽयमतद्धइतनिर्देशः । पाणिनीयमिति । ननु पणोऽस्यास्तीति पणी, तस्यापत्यं पाणिनः, पाणिनस्यापत्यं पणिनो युवा पाणिनिः, ततः `तेन प्रोक्तम्' इत्यर्थविवक्षायां `यूनि लुक्' इति इञो लुकि कृते प्रत्ययलक्षणेन `इञश्च' इत्यण् प्राप्नोति ? नैष दोषः; `इञश्च' इत्यत्र `कणअवादिभ्यो गोत्रे' इत्यतः `गोत्रे' इत्यनुवर्तते, तेनेञं विशेषयिष्यामः---गोत्रे य इञ् विहितस्तदन्तादिति । तत्र च पारिभाषिकं गोत्रं गृह्यते, तेन यूनीञो न भविष्यति, ततो वृद्धाच्छः; आपिशलिशब्दाद् `इञश्च' इत्यण्, उभयत्राध्येतृप्रत्ययस्य लुक् । नन्वत्र लुकि सति, असति वा तदेव रूपमिति नास्ति विशेषः ? तत्राह---स्त्रियां स्वरेच विसेष इति । असति लुकि स्त्रियाम् `टिड्ढाणञ्' इत्यादिना ङीप् स्यात्, अण्स्वरेणान्तोदात्तत्वं च । लुकि तु सति टाब् भवति, छस्वरेण मध्योदात्तत्वं च । आपिशले तु स्वरे नास्ति विशेषः, यथा तु लुकि सत्यपिशलेत्यत्र ङीब्न भवति, तथा `अनुपसर्जनाद्' इत्यत्र प्रत्यपादि ।।

सूत्राच्च सोपधात् ।। 4.2.65 ।।

अष्टकं सूत्रमिति । अष्टावध्यायाः परिमाणमस्य, `संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु' इति `संख्याया अतिशदन्तायाः कन्' ।

संख्याप्रकृतेरिति वक्तव्यमिति । संख्या प्रकृतिर्यस्य प्रत्ययस्य तदन्तात्कोपधादिति वक्तव्यमित्यर्थः । कालापकमधीते कालापक इति । कलापिना प्रोक्तमेधीयते कालापाः, `कलापिनोऽण्', `नान्तस्य टिलोपे सब्रह्मचारि' इत्यौपसंख्यानिकष्टिलोपः, ततः `तदधीते' इत्यण्, प्रोक्ताल्लुक् । कालापानामाम्नाय इति `गोत्रचरणाद् वुञ्', कालापकम्, ततः `तदधीते' इत्यण्, तस्य लुग्न भवति । यदि स्याद् ञित्स्वरेणाद्युदात्तत्वं स्यात्, लुगभावे त्वण एव स्वरो भवति, स्त्रियां च ङीब् भवति ।

चतुष्टय इति । चत्वारोऽवयवा अस्य `संख्याया अवयवे तयप्', `ह्रस्वात्तादौ तद्धिते' इति मूर्द्धन्यः ।।

छन्दोब्राह्मणानि च तद्विषयाणि ।। 4.2.66 ।।

प्रोक्तग्रहणमनुवर्तते इति । तद्ध्यनुवर्तमानमेव पूर्वसूत्र आरम्भसामर्थ्यान्न सम्बध्यते । छन्दांसि च ब्राह्मणानि चेति । तद्वाचीनि शब्दरूपाणीत्यर्थः । स्वरूपग्रहणं तु न भवति; बहुवचननिर्देशात्, अप्रोक्तप्रत्ययान्तत्वाच्च । प्रोक्तप्रत्ययान्तानीति । प्रोक्तादिति पञ्चम्यन्तं प्रकृतं प्रथमाबहुवचनान्तं विपरिणम्यते, `छन्दोब्राह्मणानि' इत्यनेन सामानाधिकरण्यादिति भावः । अध्येतृवेदितृप्रत्ययविषयाणीत्यनेनैतद्दर्शयति---तच्छब्देनाध्येतृवेदितृप्रत्ययः परामृश्यते, विधेयतया प्रधानत्वात्; नाध्येतृवेदितासवर्थौ, तयोः प्रत्ययविधौ गुणभावादिति । किं सिद्धं भवति ? अध्येतृविषयमपि वाक्यं निवर्त्तितं भवति । अनन्यभावो विषयार्थ इति । ग्रामसमुदायादिवृत्तिस्तु विषयशब्दोऽसम्भवान्न गृह्यते । अत्र यद्यधीते वेदेत्यनुवर्तेत, ततोऽध्येतृवेदितृविवक्षायामेव तद्विषयता विधीयेत, ततश्च तद्विषयमेव वाक्यं निवर्तयेत्, न क्रियान्तरविषयम्, नापि स्वातन्त्र्यमुपाध्यन्तरयोगं च । यदाह---तत्र `यथाधिकारात्तद्विषयप्रसङ्गः' इति । तस्मात्प्रोक्तग्रहणमेवानुवर्तते, नाधीयते वेदेति । तच्छब्देन च प्रत्ययः परामृश्यते, विषयशब्दश्च अनन्यभावार्थः । तेन सर्वमेतत्स्वातन्त्र्यादि निवर्तते । आह च---`सिद्धं तु प्रोक्ताधिकारे तद्विषयवचनात्' इति । प्रोक्तग्रहणमेवाधिक्रियते, नाधीते वेदेत्येतावर्थावित्यर्थः ।

इह प्रोक्तप्रत्ययान्तस्य बहुप्रकारता दृश्यते---स्वातन्त्र्यम्, उपाध्यन्तरयोगः, वाक्यम्, अध्येतृवेदित्रोः प्रत्यय इति । स्वातन्त्र्यं तावत्---पाणिनिना प्रोक्तं पाणिनीयमिति । प्रोक्तार्थ एव वृत्तिः; उपाध्यन्तरयोगः । महत्पाणिनीयमिति वाक्यम् । पाणिनीयमधीत इति प्रत्ययः---पाणिनीयाश्छात्त्रा इति । छन्दोब्राह्मणवाचिनां तु प्रोक्तप्रत्ययान्तानां नित्यमध्येतृवेदितृप्रत्ययान्तवैवेष्यते, न तु स्वातन्त्र्यादि, तदर्थमिदमारभ्यते, तदाह---तेनेति । एवं च कृत्वाऽर्थद्वयस्यापिं तन्त्रेण विग्रहः कर्तव्य इति दर्शयति । कठेन प्रोक्तमधीयते कठाः, वैशम्पायनान्तेवासित्वाण्णिनिः, तस्य `कठचरकाल्लुक्' इति लुक् ततः `तदधीते' इत्यण्, ततस्तस्यापि `प्रोक्ताल्लुक्' इति लुक् । मुदपिप्पलादशब्दाभ्यां प्रोक्तार्थो औत्सगिकोऽण् । शेषं यथायोगं पूर्ववत् ।

ऋचाभः=वैशम्पायनान्तेवासी । एवं ताण्ड्यः । वाजसनेयशब्दः शौनकादिः । ताण्डिन इति । `अपत्यस्य' इति यलोपः । भाल्लविशब्द इञन्तः । शाट्यशब्दाद् गर्गादियञन्ताद् `यञिञोश्च' इति फक् । ऐतरेयशब्दः शुभ्रादिढगन्तः, तेभ्यः `पुराणप्रोक्तेषु' इति णिनिः, सर्वत्राध्येतृप्रत्ययस्य लुक् । ब्राह्मणविशेषप्रतिपत्त्यर्थमिति । ब्राह्मणस्य विशेषः पुराणप्रोक्तत्वम् । याज्ञवल्क्यानीति । याज्ञवल्क्यशब्दः कण्वादिः, सुलभादौत्सर्गिकोऽण्, अत्र स्वातन्त्र्यं भवति । `पुराणप्रोक्तेषु' इत्यत्र वक्ष्यति---`याज्ञवल्क्यादयो ह्यचिरकालप्रवृत्ता इत्याख्यानेषु वार्ता' इति । काश्यपिनः, कौशिकिन इति । `काश्यपकौशिकाभ्यामृषिभ्यां णिनिः' । पाराशरिण इति । पाराशर्यशब्दाद् गर्गादियञन्तात् `पाराशर्यशिलालिभ्याम्' इति णिनिः, पूर्ववद्यलोपः । कर्मन्दिन इति । `कर्मन्दकृशाश्वादिनिः' । पिङ्गशब्दात्पुराणप्रोक्तेषु' इति णिनिः ।।

तदस्मिन्नस्तीति देशे तन्नाम्नि ।। 4.2.67 ।।

इतिकरणस्ततश्चेद्विवक्षेति । ननु तन्नामग्रहणादेवातिप्रसङ्गो न भविष्यति ? तन्न; द्विविधं नाम---कदाचित्केनचित्सङ्केतितम्, नित्यं व्यवहारानुपाति । तत्र द्वितीयस्य परिग्रहार्थमितिकरणः क्रियते, भूमादिविशेषपरिग्रहार्थं च । `तन्नाम्नि' इत्येतत्तु नामधेयताविरोधिनो बलीयसोऽपि प्रत्ययान् बाधितुम् , अन्यथा नाप्राप्ते मतुप्यारम्भात्तस्यायं बाधकः । तदपवादैस्त्विनिठनादिभिः सह सम्प्रधारणायामपवादविप्रतिषेधादिनिठनादय एव स्युः ।।

तेन निर्वृत्तम् ।। 4.2.68 ।।
निर्वृत्तमित्यन्तर्भावितण्यर्थाद् वृतेः कर्मणि क्तः ।।
तस्य निवासः ।। 4.2.69 ।।
ऋजुनावामिति । ऋज्वी नौर्येषां तेषामित्यर्थः ।।
अदूरभवश्च ।। 4.2.70 ।।
अदूरमन्तिकं तत्र भवतीत्यदूरभवः, निपातनात्सप्तमीसमासः । विदिशाया इति । `दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्' इति षष्ठी । चकार इत्यादि । असति तु तस्मिन्नानन्तर्यादयमेवार्थ उत्तरत्र सम्बध्येत ।।
औरञ् ।। 4.2.71 ।।
अरडुः=क्षत्त्रियविशेषः । नद्यां तु मतुप्परत्वादिति । आरडवमित्यादिरञोऽवकाशः, `नद्यां मतुप्' इत्यस्योदुम्बरावतीत्यादिः ।।
मतोश्च बह्वजङ्गात् ।। 4.2.72 ।।
चतुरर्थिक इति । चतुर्णामर्थानां समूहश्चतुरर्थी, तत्र भवः, अध्यात्मादित्वाट्ठञ् । तद्धितार्थे द्विगौ तु ठञो लुक् स्यात् ।
अङ्गग्रहणं किमिति । `मतोश्च वह्वचः' इत्येवास्तु, व्यधिकरणे पञ्चम्यौ, बह्वचो यो विहितो मतुप् तदन्तादिति विज्ञायमाने सिद्ध्यत्येव विवक्षितमिति प्रश्नः । मतुबन्तविशेषणं मा भूदिति । अन्यथा सामानाधिकरण्ये सम्भवति, वैयधिकरण्यस्यायुक्तत्वात् तस्यैव । वशेषणं स्यादिति विभावः । अस्ति चेदिदानीं क्वचिदबह्वञ् मत्वान्तो यदर्थं बह्वज्ग्रहणं स्यात् ? अस्तीत्याह---स्ववान्, श्ववान् ।।
उदक्च विपाशः ।। 4.2.74 ।।
महती सूक्ष्मेक्षिकेति । एवं नाम स्वरेऽप्याचार्योऽवहित इति आचार्यस्य प्रशंसैषा ।।
सुवास्त्वादिभ्योऽण् ।। 4.2.77 ।।
अञ इति । `अण्ग्रहणरहितसूत्राभिप्रायमेतत् । तस्य तु प्रयोजनं स्वयमेव वक्ष्यति---अण्ग्रहणं मतुपो बाधनार्थम्' इति । तेन वस्तुतो मतुपोऽप्ययमपवादः । अथाण्ग्रहणंकिमर्थम्, न सुवास्त्वादिभ्यो यथा विहितमित्येवोच्येत, पुनर्वचनाद्धइ को विहितो न च प्राप्नोति स एव भविष्यति स चाणेव ? तत्राह---अण्ग्रहणमिति । असत्यण्ग्रहणे मध्येऽपवादन्यायेन यताविहितमित्युच्यमानोऽणञ एव बाधकः स्याद्, नदीमतुपा तु परत्वाद्बाध्येत, पुनरण्ग्रहणात्तु मतुपो विषये भवतीत्यर्थः । किञ्च---`ओरञ्' इत्यस्य नद्यां मतुप्परत्वाद्बाधक इत्युक्तम्, तत्रासत्यण्ग्रहणे यताविहितमित्युच्यमाने नद्याम् `ओरञ्' एव स्याद्, वचनं तु मतुपो बाधनार्थं स्यात् । तस्मादेतदर्थमप्यण्ग्रहणं कर्तव्यम् ।।
रोणी ।। 4.2.78 ।।
केवलस्तदन्तश्चेति । अन्यथा ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात्केवलादेव स्यात्, न तदन्तात् । रोणीति पुनः शास्त्रनिरपेक्षेण निर्देशेन शास्त्रनिरपेक्षत्वमिह सच्यत इति परिभाषया अनपेक्षणात्तदन्तादपि भवति । ननु च रोणीति नेदं प्रातिपदिकम्, स्त्रीप्रत्ययान्तत्वात्; न च `ग्रहणवता प्रातिपदिकेन' इत्यत्र लिङ्गविशिष्टस्य ग्रहणम्, येन स्त्रीप्रत्ययान्तेनापि तदन्तविधिः प्रतिषिध्येत, स्वरूपविधिविषया परिभाषेयं प्रातिपदिकस्य स्वरूपग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीत्युक्तत्वात् ? यथाकथञ्चित्प्रातिपदिकग्रहणे लिङ्गविशिष्टस्य ग्रहणं भवतीति भाष्यकारपक्षः, तदाश्रयेणैतदुक्तम् । एवं च वृत्तिकारस्याप्ययमेव पक्षः । ङ्याप्सूत्रेतु परपक्षो दर्शित इति गम्यते । कि सिद्धं भवति ? कुमारीमाचष्टे कुमारयति---`णाविष्ठवद्' इति टिलोपः सिद्धो भवति ।।
वुञ्छण्कठजिलसेनिरढञ्णययफक्फिञिञ्ञ्यकक्ठकोरीहणकृशाश्वर्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः ।।
सूत्रे कुमुदशब्दो द्विरुपादीयते, तत्रारीहणकृशाश्वर्श्यकुमुदाश्च काशतृणादयश्चेति द्वन्द्वयोर्द्वन्द्करणादेकशेषाभावः । कुमुदादिष्विति । ऋश्यादेरनन्तरेषु औत्सर्गिकोऽपि तत्र इष्यत इत्यादि यदुक्तं तदेवाप्तप्रयोगेण द्रढयति---तथा चोक्तमिति । `लुपियुक्तवद्' इत्यत्र भाष्यकारणैतदुक्तम् । अथास्मात्प्रयोगाद्विशेषविहितानामेव पक्षे लुब् भवतीति कस्मान्नोच्यते ? तथा वा भवतु; सर्वथा चातूरूप्यमेवात्र नः समीहितम् ।।
शर्कराया वा ।। 4.2.83 ।।
कुमुदादिष्विति । ऋश्याद्यनन्तरेषु । पाठसामर्थ्यादिति । नित्ये हि लुपि गणयोरस्य पाठोऽनर्थकः स्यात् । शकरेति । अणे लुप् । शार्करमिति । तस्यैव श्रवणम् । शर्करिकमिति । कुमुदादित्वाट्ठच् । शार्करकमिति । वराहादित्वात्कक्, `केऽणः' इति ह्रस्वः । शार्करिकम्, शर्करीयमिति । उत्तरसूत्रेण ठक्छौ ।।
नद्यां मतुप् ।। 4.2.84 ।।
`तदस्यास्त्यस्मिन्' इति मतुपि सिद्धे वचनमिदं तदस्मिन्नस्तीति प्राप्तस्याणो बाधनार्थं निवृत्ताद्यर्थं च, तत्सूचितम्---चातुरथिंक इति । देशस्य विशेषणं नदीति । यद्यपि `विशिष्टलिङ्ग' इत्यत्रोक्तम्---`नदीग्रहणमदेशत्वात् जनपदो हि देशः' इति, इह तु नद्यां देश इति; सम्बन्धसामर्थ्यादजनपदो देशग्रहणेन गृह्यते, एवं च पर्वतेष्वपि चातुरर्थिको भवति । अन्ये त्वाहुः---नद्यपि देश एव, लोकप्रसिद्धेः; `विशिष्टलिङ्ग' इत्यत्र तु नदीग्रहणं यस्य द्वन्द्वस्य सर्व एवावयवो नदीवचनस्तत्परिग्रहार्थम्, यत्र कश्चिदवयवोनदीवचनः, कश्चिदन्यदेशवाची---तत्र मा भूदित्येवमर्थमिति । उदुम्बरावतीत्यादौ `मतौ बह्वचोऽनजिरादीनाम्' इति दीर्घत्वम् । भागीरथीति । `तेन निर्वृत्तम्' इत्यण् ।।

कुमुदनडवेतसेभ्यो ड्मतुप् ।। 4.2.87 ।।
कुमुद्वानित्यादौ झयः `मादुपधायाश्च' इति वत्वम् । अथ वकारादिरेव कस्मान्न विहितः ? ज्ञापनार्थम्, एतज्ज्ञापयति---अन्येभ्योऽप्ययं भवतीति । तेन महिष्मानिति सिद्धं भवति, महिषाच्चेति न वक्तव्यं भवति । एतेनैतदपि निरस्तम्---प्रकृतस्यैव मतुपो डित्त्वातिदेशेन सिद्धमिति, न हि डित्त्वातिदेशे पूर्वोक्तं ज्ञापनं समर्थितं भवति ।।
नडशादाड् ड्वलच् ।। 4.2.88 ।।
शादशब्दो दोपधः, `पङ्कोऽस्त्री शादकर्दमौ' इति ।।
शिखाया वलच् ।। 4.2.89 ।।
शिखाया वलज्वक्ष्यतीति । `दन्तशइखात्संज्ञायाम्' इत्यनेन ।
तददेशार्थं वचनमिति । इदं तु निवृत्ताद्यर्थम्, देशे तन्नाम्न्यणो बाधनार्थं च ।।
नडादीनां कुक् च ।। 4.2.91 ।।
तक्षन्नलोपश्चेति । यदि पुनरयं कुक् परादिः क्रियेत, नान्तस्य पदत्वात्सिद्धो नलोपः; किन्तु कुटि प्रत्ययादेरादेशानुपपत्तिः, छस्याप्रत्ययादित्वादीयादेशो न प्राप्नोति ।।
शेषे ।। 4.2.92 ।।
अपयुक्तादन्यः शेष इति । शब्दार्थकथनमेतत् । तस्यैव प्रकंरणादागतं विशेषमाह---अपत्यादिभ्य इति । एते ह्यत्रोपयुक्ताः । चतुरर्थपर्यन्तेभ्य इति । चत्वारोऽर्थाः `तदस्मिन्नस्ति' इत्यादयः पर्यन्तो येषामिति विपदो बहुव्रीहिः । चातुरर्थ्यपर्यन्तेभ्य इति पाठे समाहारद्विगोश्चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् । ये तु पठन्ति---चातुरर्थपर्यन्तेभ्य इति, ते प्रज्ञादेराकृतिगणत्वादणमिच्छन्ति । किमर्थं पुनः शेषवचनम् ? शेषे घादयो यथा स्युः, अपत्यादिषु मा भूवन् । चिरनिवृत्ता अपत्यादयः ? चतुर्ष्वर्थेषु तर्हि मा भूवन् ; अन्यथा `ओरञ्' इत्यादयः `नडादीनां कुक् च' इत्येवमन्ता यथा चतुरर्थेषु भवन्ति, तथा घादयोऽपि `विभाषआ पूर्वाह्णाभ्याम्' इत्येवमन्तास्तत्रैव स्युः । न ह्यकस्मात्प्रकरणं विच्छिद्यते । निवर्तिष्यते तर्हि चतुर्ज्ञ्थाः ? अस्वरितत्वाल्लिङ्गाच्च, यदयमुत्करादिषु कांश्चिद् वृद्धान् शब्दान्पठति---आर्द्रका, शालेति; अन्यथा `वृद्धाच्छः' इत्येव सिद्धः स्यात् । स्वार्थे तर्हि घादयो मा भूवन् ? अनिर्दिष्टार्थत्वाद्धि स्वार्थ एवस्युः, नामी अनिर्दिष्टार्थाः । जातादिष्वर्थेषु घादयोऽनुवर्तिष्यन्ते ? यद्यनुवर्तन्ते या या परा प्रकृतिः तस्यास्तस्याः पूर्वः पूर्वः प्रत्ययः प्राप्नोति । नार्थनिर्देशं प्रति व्यग्रयोरन्योऽन्यमभिसम्बन्धो भवति । लिङ्गाच्च, यदयं क्वचिच्चकारेण प्रकृतं समुच्चिनोति `रङ्कोरमनुष्येऽण् च' इति, तज्ज्ञापयति---न पूर्वः पूर्वः प्रत्ययः परस्याः परस्याः प्रकृतेर्भवतीति । अथ वा---लौकिकोऽधिकारोऽपेक्षालक्षणः । न च घादीनां प्रकृत्यन्तरापेक्षा, नापि ग्रामादीनां प्रत्ययान्तरापेक्षा, तस्मादप्रयोजनमेतत्स्वार्थे मा भूवन्निति । तदेव तर्हि प्रयोजनम्---अपत्यादिषु तर्हि मा भूवन्निति । ननु चोक्तम्---चिरनिवृत्ता अपत्यादयश्चातुरर्थी च नापेक्ष्यत इति ? न ब्रूमोऽपत्यादीनामत्राभिसम्बन्ध इति, किं तर्हि ? तस्येदमित्यनेनापत्यादिष्वपि प्राप्नुवन्ति । कथम् ? इत्याह---तस्येदंविशेषा ह्यपत्यसमूहादय इति । यथा `तस्येदम्' इत्यनेन पाणिनीयाश्छात्त्रा इति छात्त्रादिषु विशेषेषु प्रत्ययो भवति, एवमपत्यादिष्वपि विशेषेषु घादयः स्युः; विशेषेषु सामान्यभावात् ।
ननु च विशेषशब्दसंनिधौ सामान्यशब्द उपात्तः, तत्र विशेषे पर्यवस्यति---कौण्डिन्यो ब्राह्मण इति, विशेषान्तरे वा---दधि ब्राह्मणेभ्यस्तक्रं कौण्डिन्यायेति । तत्रापत्यादिविशेषसन्निधावुपात्तं तस्येदमिति सामान्यम्, यद्यपत्यादिष्वेव पर्यवस्येत् सामान्योपादानं व्यर्थं स्यादिति विशेषान्तर एव पर्यवसास्यति ।
किञ्च यद्यपत्यादिष्वपि घादयः स्युः, `प्राग्दीव्यतोऽण्' इत्यत्रैवाणादिभिः सह विधीयेरन्, लिङ्गाच्चापत्यादिषु घादयो न भविष्यन्ति, किं लिङ्गम् ? `फेश्छ च' इत्यत्र `फेर्वा' इत्येव ठग्विधानार्थं वक्तव्यम्, ठका मुक्ते `वृद्धाच्छः' इति तावच्छः सिद्धः, तदेव छविधानं ज्ञापनार्थम्---न ह्यपत्यादिषु घादयो भविष्यन्ति । तथा गोत्रचरणाद्वुञिति समूह इदमर्थान्तर्भूते वुञि सिद्धे `गोत्रोक्षोष्ट्र' इति पुनर्विधानमपि लिङ्गमस्यार्थस्य; तथा `राजन्यादिभ्यो वुञ्' इति राजन्यादिषु दैवयातशब्दः पठ्यते, स च देवयातूनामपत्यानि दैवयातवा इति गोत्रप्रत्ययान्तः; तथाऽरीहणादिषु भास्त्रायणशब्दो गोत्रप्रत्ययान्तः पठ्यन्ते, तत्रापि `गोत्रचरणाद् वुञ्' इत्येव सिद्धः; तदेतैर्लिङ्गैरपत्यादिषु घादयो न भविष्यन्ति । तदेवमेतत्प्रयोजनं नोपपद्यत इति प्रयोजनान्तरमाह---किञ्चेति । असति हे शेषग्रहणे प्रथमेनैवार्थेन सम्बन्धमनुभवतां कृतार्थता विज्ञायेत, द्वितीयादिषु त्वर्थेषु `प्राग्दीव्यतः' इति विशिष्टावधिपरिच्छिन्नेष्वर्थेषु विधीयमाना अणादय एव स्युः, शेषशब्दस्तूपयुक्तादन्यतमान् जातादीनर्थान्वीशीकृत्य शक्नोत्यभिधातुमिति सर्वत्र घादयः सिध्यन्ति । अतः साकल्यार्थमपि विशेषवचनं कर्तव्यम् । लक्षणं चाधइकारश्चेति । तत्र `तस्येदम्' इत्येव चाक्षुषादयः सिध्यन्ति, पार्षदादयस्तु `संस्कृतं भक्षाः' इति तस्माल्लक्षणत्वं नातीवोपयुज्यते ।।
राष्ट्रावारपाराद्घखौ ।। 4.2.93 ।।
विगृहीतादपीष्यते इति । सूत्रे तु संघातस्यैव ग्रहणम्; अन्यथा वैषम्यात्संख्यातानुदेशो न स्यात् । विपरीताच्चेति । इयमपीष्टिरेव ।।
ग्रामाद्यखञौ ।। 4.2.94 ।।
ग्रामशब्दः कत्र्यादिषु पठ्यते, तेन ढकञपि भवति ।।
कत्त्र्यादिभ्यो ढकञ ।। 4.2.95 ।।
कात्त्रेयक इति । कुत्सितास्त्रयः कत्त्रय इति बहुव्रीहिर्वा । अस्मादेव निपातनात्कोः कद्भावः, तेन कद्भावे `त्रौ उपसंख्यानम्' इति न वक्तव्यं भवति ।

कुल्याया यलोपश्चेति । केचित्तु तृतीयं वर्णं लकारं पठन्ति, अन्ये तु डकारम् ।।

कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु । अयं योगः शक्योऽवक्तुम् । कथम् ? कौलेयकः श्वा यदा कुलशब्दः श्वकुले वर्तते तदा तस्यापत्यमपि श्वैव भवति, तत्र `अपूर्वपदादन्यतरस्याम्' इति ढकञा सिद्धम्; कुक्षिग्रीवाशब्दाभ्याम् `दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्' इति ढञि कृते आस्यलङ्कारयोस्स्वार्थिकः कन् भविष्यति ।।

नद्यादिभ्यो ढक् ।। 4.2.97 ।।

गणे नदीति स्वरूपग्रहणम्, न संज्ञा; नद्याः मह्यादीनां पृथग्रहणात् । पौरेयमित्यादिषु पुरि भवम्, वने भवम्, गिरौ भवमिति विग्रहः । उभयमपि दर्शनं प्रमाणमिति । उभयथाप्याचार्येण शिष्याणां प्रतिपादितत्वात् ।।

दक्षिणापश्चात्पुरसस्त्यक् ।। 4.2.98 ।।

दक्षिणाशब्दः `दक्षिणादाच्' इत्याजन्तोऽव्ययं गृह्यते; पश्चात्पुरोभ्यां साहचर्यात् । तेन न टाबन्तस्य प्रवीणवाचिनो ग्रहणम् ।।

कापिश्याः ष्फक् ।। 4.2.99 ।।

बहल्युदिपर्दीति । `अवृद्धादपि' इति वुञि प्राप्ते वचनम् ।।

रङ्कोरमनुष्येऽण्च ।। 4.2.100 ।।

रङ्कवो नाम जनपदः, ततः `प्राग्दीव्यतोऽण्' प्राप्तः, तस्य `अवृद्धादपि' इति वुञ् बाधकः, तस्य ओर्देशे ठञ्, ततः कोपधादण्, ततः `कच्छादिभ्यश्च' इत्यण् प्राप्तः, ततः ष्फगणौ विधीयेते । कोपधत्वादेवाणि सिद्धे रङ्कुशब्दस्य कच्छादिषु पाठो मनुष्यतत्स्थयोर्वुञ्विधानार्थः । मनुष्ये परत्वादिति । उत्कृष्टत्वाद् अपवादत्वादित्यर्थः । कच्छादिपाठारमनुष्येऽणपि सिद्ध इति । ननु च मनुष्यतत्स्थयोर्वुञ्विधानार्थस्तत्र पाठः स्यात्, ततश्च तद्व्यतिरिकते विषये ष्फगेव स्यात्, यत्राण् विधीयते ? नैतदस्ति; कच्छादिपाठस्योभयार्थत्वे बाधकाभावात् । नञिवयुक्तन्यायेन मनुष्यसदृशे प्राणिनि प्रतिपत्तिः क्रियते इति । यस्त्वमनुष्यशब्दो रक्षः पिशाचादिषु रूढः, न तस्यैव ग्रहणम् ; अनभिधानादिति मन्यते, अथैवं कस्मान्न विज्ञायते---परत्वादेव वुञि सिद्धे मनुष्यप्रतिषेधो ज्ञापयति---`मनुष्यतत्स्थयोः' इत्यस्याप्येतौ ष्फगणौ बाधकाविति, तेन तत्स्थे ष्फगणावेव भवतो न वुञिति ? तन्न; अनिष्टत्वात् । न हि तत्स्थे ष्फगणाविष्येते, किं तर्हि ? वुञेव । राङ्कवः कम्बल इति ष्फग्न भवतीति । यथा तु वार्त्तिकं भाष्यं च तथात्र ष्फगिष्यते, मनुष्यप्रतिषेधश्च प्रत्याख्यातः । यथाऽऽह---`रङ्कोरमनुष्यग्रहणानर्थक्यं मनुष्यतत्स्थयोर्वुञ्विधानात्, तत्स्थे ष्फगणोर्ज्ञापकमिति चेन्नानिष्टत्वादण्ग्रहणानर्थक्यं च कच्छादिभ्योऽणिवधानात्' इति । विशेषविहितेन च ष्फकेति । अन्यथा कच्छादिपाठस्य प्राणिनि चरितार्थत्वात्प्राणिनि ष्फगेव स्यात् ।।

द्युप्रागपागुदक्प्रतीचो यत् ।। 4.2.101 ।।

`द्यु' इति दिव उत्त्वेन निर्देशः । द्युशब्दस्य तु ग्रहणं न भवति, व्याख्यानात् । अवाच्यमिति । अवाची = दक्षिणा दिक् ।

अव्ययात्तुकालवाचिन इति । यथाव्ययात्कालवाचिनः `कालाट्ठञ्' इति ठञ्न भवति; न्यायस्य तुल्यत्वात् ।।

वर्णौ वुक् ।। 4.2.103 ।।

तत्समीपो देशो वर्णुरिति । `अदूरभवश्च' इत्यर्थे `सुवास्त्वादिभ्योऽण्' इत्यण्, तस्य `जनपदे लुप्' इति लुप् । तद्विषयार्थवाचिन इति । स वर्णुर्देशो विषयो यस्यार्थस्य तद्वाचिन इत्यर्थः । विषयग्रहणेन वर्णाविति विषयसप्तमी दर्शयति ।।

अव्ययात्त्यप् ।। 4.2.104 ।।

अमेहेति । योऽव्ययात्त्यब्विहितः सोऽमादिभ्य एव स्मृत इत्यर्थः ।

अमाशब्दः समीपवाची स्वरादिः, अमा समीपे भवोऽमात्यः । औपरिष्ट इति । उपरिष्टाद्भव इत्यणि कृते `अव्ययानां भमात्रे टिलोपः' इति टिलोपः । परतः शब्दः `विभाषा परावराभ्याम्' इत्यतसुजन्तः, तत्र भवः । आरातीय इति । `बहिषष्टिलोपश्च' इत्यनित्यत्वज्ञापनादत्र टिलोपाभावः ।

त्यब्नेर्ध्रुव इति । निशब्दाद् ध्रुवे वाच्ये त्यब्भवति । नियतं सर्वकालं भवो नित्यः ।

निसो गते इति । निः शब्दाद् गते वाच्ये त्यब्भवति । निष्ट्य इति । `ह्रस्वात्तादौ तद्धिते' इति षत्वम्, तकारस्य ष्टुत्वम् । एवमाविर्भूतमाविष्ट्यम् ।

अरण्याण्ण इति । अणि सति ङीप् स्यादिति णो विधीयते ।

दूरेत्य इति । `तत आगतः' इत्यत्रार्थे एत्यः ।

उत्तरादाहञिति । आद्युदात्तार्थं वचनम् । औत्तराहमिति । `उत्तराच्च' इत्याहिप्रत्ययः, उत्तराहिशब्दात्परिगणनेन त्यपोऽभावादणि सति सिद्धम् ।।

ऐषमोह्यः श्वसोऽन्यतरस्याम् ।। 4.2.105 ।।

ठञपि तृतीयो भवतीति । विधिवाक्यापेक्षं तृतीयत्वम्, प्रत्ययापेक्षया तु ठञ् चतुर्थः, `श्वसस्तुट् च' इत्यत्र विकल्पाधिकारात् ट्युट्युलावपि भवतः ।।

तीररूप्योत्तरपदादञ्ञौ ।। 4.2.106 ।।

अञ्जपोः स्त्रियांविशेषः---काकतीरी, चाणाररूप्या । बहुच्पूर्वान्मा भूदिति । अन्यथा बहुतीरशब्दादपि स्यात्, उत्तरपदशब्दस्य तु समासविषये नियतत्वान्नास्ति बहुच्पूर्वात्प्रसङ्गः ।।

दिक्पूर्वपदादसंज्ञायां ञः ।। 4.2.107 ।।

असंज्ञायामिति । न चैवमसंज्ञाया इति पञ्चम्या निर्देशः, विषयसप्तम्यापि तदर्थलाभादित्याह---संज्ञाविषयादिति । पौर्वशाल इति । पूर्वस्यां शालायां भव

इति तद्धितार्थे समासः, ततः प्रत्ययः । पदग्रहणमित्यादि । `दिक्पूर्वाद्' इत्युच्यमाने स्वरूपं स्यात्, ततश्च दिग्गज इत्यादेरेवस्यात् । पदग्रहणे तु सति दिग्विशेषवाचिनां ग्रहणं भवति, कथम् ? व्यधिकरणपदो बहुव्रीहिः---दिशः पूर्वपदमस्मिन्निति, `दिशः' इति वाचकापेक्षया षष्ठी, दिशो वाचकं पूर्वपदस्मिन्नित्यर्थः ।।

मद्रेभ्योऽञ् ।। 4.2.108 ।।

मद्रशब्दो जनपदवचनः, बहुवचननिर्देशो जनपदवाचिनः परिग्रहार्थः, तेन मद्रपर्यायो न गृह्यते । पौर्वमद्र इति । मद्रैकदेशे मद्रशब्दस्य वृत्तेर्दिक्शब्देन सामानाधिकरण्ये सति `तद्धितार्थ' इति समासः ।।

उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् ।। 4.2.109 ।।

शैवपुरमिति । `प्रस्थपुरवहान्तात्' इति वुञ् न भवति; `वृद्धात्' इति तत्र वर्तते ।।

प्रस्थोत्तरपदपलद्यादिकोपधादण् ।। 4.2.110 ।।

उदीच्यग्रामलक्षणस्याञोऽपवाद इति । ततोऽन्यत्र व्रीहिप्रस्थ--गिरिप्रस्थ--करिकादावौत्सगिक एवाण्, कैलासप्रस्थ--काक--शाकादिषु वृद्धेषु `वृद्धाच्छः' भवति, देशवाचिनि तु मालाप्रस्थादौ `प्रस्थपुरवहान्ताच्च' इति वुञ्, इक्ष्वाकुप्रभृतिषु जनपदवुञोऽपवादः `कोपधादण्' इत्यण्वक्ष्यते, अरीहणकादौ च `वृद्धादकेकान्त' इति छो भवति, तस्मादञोऽपवाद इति सुष्ठूक्तम् । उत्तरपदग्रहणादिह न भवति---उत्तरोमाहकिप्रस्थ उत्तरमाहकिप्रस्थः, तत्र भ इति । `प्रस्थान्तात्' इति तूच्यमानेऽत्रापि स्यात् ।

अण्ग्रहणं बाधकबाधनार्थमिति । यद्यण्ग्रहणं न क्रियेत, तदा यदत्र वृद्धं वाहीकग्रामवाचि तस्मात् `प्राग्दीव्यतोऽण्' इत्यणि प्राप्ते `वृद्धाच्छः' प्राप्तः, तस्मिन्`वाहीकग्रासेभ्यश्च' इति ठञ्ञिठाभ्यां बाधिते पुनर्विधानाच्छ एव स्यात् । तस्माद्बाधकमपि तं छं बाधित्वा अण्ग्रहणादणेव भवति ।

यकृल्लोमशब्दः पठ्यते, यकृल्लोम्नि भः याकृल्लोमः, `अन्' इति प्रकृतिभावो न भवति, गणे नलोपनिपातनादित्याहुः ।।

कण्वादिभ्यो गोत्रे ।। 4.2.111 ।।

गोत्रमिह न प्रत्ययार्थ इति । शेषाधिकारस्य बाधप्रसङ्गात् । न च प्रकृतिविशेषणमिति । कण्वादीनामगोत्रप्रत्ययान्तानां गोत्रे वृत्त्यसम्भवात् । कण्वादिभ्यो गोत्रे यः प्रत्ययो विहित इति । प्रतिपदविहितो यञेव गृह्यते । एवं च कृत्वा गोत्रमपि पारिभाषिकं गृह्यते, न त्वपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यत इत्यपत्यमात्रस्य ग्रहणम्---कण्वो देवताऽस्येति । ननु `कण्वादिभ्यः' इत्युच्यमाने कथमणन्तात्प्रसङ्गः ? कथं वा यञन्तेभ्यः स्याद् येनेष्टं तावत्सिद्ति ? एवं मन्यते---केवलेभ्यः कण्वादिभ्य औत्सर्गिक एवाण्, सिध्यति, छापवादत्वाद्योगस्य कण्वाद्यवयवे तद्धितान्ते कण्वादिश्ब्दो वर्तिष्यत इति ।।

इञश्च ।। 4.2.112 ।।

गोत्र इत्येवेति । पूर्वत्र पारिभाषिकस्य गोत्रस्य ग्रहणमित्युक्तम्, इहापि तदेवानुवर्तते, तेनात्रापि पारिभाषिकस्यैव ग्रहणादिह न भवति---पाणिनेर्यूनच्छात्त्राः पाणिनीया इति सौतङ्गमेरिदमिति । सुतङ्गमशब्दाद् वुञ्छणादिसूत्रेण चातुर्थिक इञ् । अत्रापत्यत्वमेव नास्तीति सुतरामगोत्रत्वाद्भवति प्रत्युदाहरणम् ।।

न द्व्यचः प्राच्यभरतेषु ।। 4.2.113 ।।

ननु च भरताः प्राच्या एव, तत्किमर्थं तेषां स्वशब्देन ग्रहणम् ? तत्राह---ज्ञापकादन्यत्रेति । `बह्वच इञः प्राच्यभरतेषु' इत्यत्रायमर्थो ज्ञापतिः---`अन्यत्र प्राच्यग्रहणे भरतानां ग्रहणं न भवति' इति ।

अपर आह---ज्ञापकादन्यत्रेत्यन्वयः, अन्यत्रास्यार्थस्य ज्ञापितत्वादित्यर्थः ।।

वृद्धाच्छः ।। 4.2.114 ।।

अव्ययतीरेत्यादि । अव्ययात्त्यब् भवतीत्यस्यावकाशः---अमात्यः, छस्यावकाशः---शालीयो मालीयः, आराच्छब्दाच्छो भवति---आरातीयः ।

`अमेहक्वतसित्रेभ्यः' इति परिगणनमनपेक्ष्यायं विप्रतिषेधः । तीरोत्तरविधेरवकाशः---काश्यतीरः, छस्य स एव; वायसतीराच्छो भवति वायसतीरियः ।

रूप्योत्तरविधेरवकाशः---चाररूप्यः, छस्य स एव; माणिरूप्याच्छः प्राप्तः, तं चापि योपधलक्षणो वुञ् बाधते---माणिरूप्यकः । प्राप्तिमात्राश्रयेण तु छस्य रूप्योत्तरपदलक्षणस्य च ञस्य विप्रतिषेध उक्तः । उदीच्यग्रामलक्षणस्य विधेरवकाशः--शिवपुर---शैवपुरः, वाडवकर्षाच्छो भवति---वाडवकर्षीयः।

कोपधविधिः---`प्रस्थोत्तरपदपलद्यादिकोपधादण्' इत्ययं विवक्षितः, स तस्माद्धि परस्थस्तस्यावकाशः---`प्रस्थोत्तरपदपलद्यादिकोपधादण्' इत्ययं विवक्षितः, स तस्माद्धि परस्थस्तस्यावकाशः---निलीनक---नैलीनकम्, उलूका अस्मिन्सन्ति `तदस्मिन्नस्ति' इत्यण्, औलको नाम ग्रामस्तत्र भवः, तस्माच्छो भवति---औलूकीयः । यस्तु `कोपधादण्' इत्यण्, स जनपदवुञोऽपवादः, तस्यापि `वृद्धादकेकान्त' इत्यत्र `कोपधग्रहणं सोसुकाद्यर्थम्' इति विहितश्छो बाधको भवति ।।

भवतष्ठक्छसौ ।। 4.2.115 ।।

ठक्छस् इत्येताविति । सित्करणादवसीयते---छसोऽयं निर्देशः, न शस इति, शसि हि स्वादिपदत्वेनैव सिद्धम् । सकारः पदसंज्ञार्थ इति । तेन भवदीय इत्यत्र जश्त्वं भवति । भावत्क इति । `इसुसुक्तान्तात्कः' प्रक्रियालाघवार्थं ककि विधातव्ये ठग्विधानं स्त्रियां ङीबर्थम्---भावत्की ।

अवृद्धात्तु भवति इति । शत्रन्तात् । क्वचित्तु भवतः शतुरित्येव पाठः ।।

काश्यादिभ्यष्ठञ्ञिठौ ।। 4.2.116 ।।

वृद्धादित्येवेति । कथं तर्ह्यवृद्धेभ्यो युवराजादिभ्यः प्रत्यय इत्यत आह---ये त्विति ।
यद्यवृद्धेभ्यो वचनप्रामाण्यात्प्रत्ययौ भवतः, किमर्थं तर्हि वृद्धाधिकारः ? इत्यत आह---देवदत्तशब्द इत्यादि । कथं भाष्ये उदाहृतमिति । यद्यपि तत्र स्वयमपि छप्रत्ययमुदाहरत्येव, तत्तु भाष्यकारप्रामाण्येन न स्वातन्त्र्येणेति `भाष्ये' इत्युक्तम् ।
आपदादिपूर्वपदादिति । आपदादिराकृतिगणः । कालादिति । कालशब्दान्तादित्यर्थः ।।
वाहीकग्रामेभ्यश्च ।। 4.2.117 ।।
छस्यापवादौ इति । एवं च ये छेनैव बाधिता अव्ययतीररूप्योत्तरपदोदीच्यग्रामकोपधविषयास्तद्विषयेऽप्येतावेव भवतः, न चेदन्येन बाधः, तद्यथा---आरान्नाम वाहीकग्रामः आरात्की, आरात्का, `इसुक्तान्तात्कः' । तथा कास्तीरं नाम वाहीकग्रामः कास्तीरिकी, कास्तीरिका । इह तु दाशरूप्यं नाम वाहीकग्रामः, `धन्वयोपधात्' इति वुञ् ठञ्ञिठौ बाधते---दाशरूप्यकः । तथा शकलान्यस्मिन्सन्ति शाकलं नामोदीच्यग्रामः भूयो वाहीकग्रामः, ततष्ठञ्ञिठौ भवतः---शाकलिकी, शाकलिका । इह तु सौसुकं नाम वाहीकग्रामः प्रस्थोत्तरपदादिसूत्रेण प्राप्तं कोपधलक्षणमणं छो बाधते, परत्वात्तमप्यपवादत्वाद् `वृद्धादकेकान्त' इत्यत्र `कोपधग्रहणं सोसुकाद्यर्थम्' इति कोपलक्षणश्लो बाधते, सौसुकीयः ।।
ओर्देशे ठञ् ।। 4.2.119 ।।
नैषादकर्षुकः, शाबरजम्बुक इति । निषादकर्षू-शबरजम्बूशब्दाभ्यां ठञ्, `इसुसुक्तान्तात्कः', `केऽणः' इति ह्रस्वः ।।
वृद्धात्प्राचाम् ।। 4.2.120 ।।
वृद्धादेव प्राचामिति । विपरीतस्तु नियमो न भवति---प्राचामेव वृद्धादिति, अप्राग्देशवाचिनो वृद्धस्योवर्णान्तस्याभावाद् यत्र पूर्वसूत्रस्यातिप्रसङ्गः स्यात् । आढकजम्बुक इति । पूर्ववत्कादेशह्रस्वत्वे ।।
धन्वयोपधाद् वुञ् ।। 4.2.121 ।।
धन्ववाचिन इति । धन्वविशेषवाचिन ऐरावतादेरित्यर्थः । स्वरूपस्य पर्यायाणां च ग्रहणं न भवति, वृद्धाधिकारात् । पारेधन्वक इति । `पारेमध्ये षष्ठ्या वा' इत्यव्ययीभावः, `अचश्च' इति टच् समासन्तः, वुञि यस्येति लोपः । यदि तु धन्वशब्दो नपुंसकलिङ्गः, ततः `नपुंसकादन्यतरस्याम्' इति टजभावपक्षे वुञि' नस्तद्धिते' इति टिलोपः । साङ्काश्यकाम्पिल्यशब्दौ वुञ्छणादिसूत्रेण ण्यान्तौ ।।
प्रस्थपुरवहान्ताच्च ।। 4.2.122 ।।
वृद्धादिति वर्तते इति । यद्येवमन्तग्रहणनर्थकं प्रस्थादीनामवृद्धत्वादेव तदन्तविधिर्भविष्यति ? नैतदस्ति; `वा नामधेयस्य' इति प्रस्थादीनामेव पदानां वृद्धत्वसम्भवात् । अथाप्येवंनाम्नो देशस्याभावः, तथापि यथा पूर्वसूत्रे धन्वविशेषग्रहणं तथेहापि सम्भाव्येत नादीपुरं नाम वाहीकेषु ग्रामः, तत्र वाहीकग्रामलक्षणौ ठञ्ञिठौ छस्यापवादौ, अयमपि वुञ् छस्यापवादः । इह त्वपवादविप्रतिषेधाद् वुञ् भवति । एवं च पातनप्रस्थकः, कौञ्जीवहक इत्यत्रापि वुञेव भवति ।।
रोपधेतोः प्राचाम् ।। 4.2 123 ।।
ईकारान्ताच्चेति । ह्रस्वस्य तु ग्रहणं न भवति, तदन्तस्य प्राग्देशवाचिनोऽसम्भवात्। एकचक्र इति । एकचक्रा नाम पाग्देशे नगरी, तत्र `एङ् प्राचां देशे' इति वृद्धसंज्ञा, ककन्देन निर्वृत्ता नगरी काकन्दी, स्त्रीषु `सौवीरसाल्वप्राक्ष' इत्यञ् । तपरकरणं विस्पष्टार्थमिति । न तु ह्रस्वप्लुतयोनिवृत्त्यर्थम् ; तदन्तस्य प्राग्देशवाचिनोऽसम्भवात्, ईकारस्यानण्त्वेन तयोरग्रहणाच्च । असति तु तकारे `रोपधयोः' इत्युच्यमाने किमत्र गृहीतमिति विस्पष्टं न ज्ञायते । तकारे तु सति वर्णनिर्देशो निश्चीयते, तत्रैव तस्य प्रसिद्धत्वात् । `ईकाररोपधयोः' इति निर्देशे गौरवप्रसङ्गः ।।
जनपदतदवध्योश्च ।। 4.2.124 ।।
तदवधिरपि जनपद एव गृह्यते इति । स चासाववधिरिति कर्मधारय आश्रीयते, न तु तस्यावधिस्तदवधिरिति षष्ठीसमास इत्यर्थः । तथा हि सति मौञ्जी नामावधिभूतो ग्रामः, तत्र भवो मौञ्जीय इत्यत्रापि स्यात् । कस्य पुनरसाववधिरिति चेत् ? सन्निधानाज्जनपदस्यैवेति विज्ञायते ।।
गर्तोत्तरपदाच्छं बाधित्वेति । अन्यथा तु गर्तोत्तरपदाच्छो भवतीत्यस्यावकाशः---वृकगर्तीयः, जनपदवुञोऽवकाशः---आङ्गकः; त्रिगर्तशब्दादुभयप्रसङ्गे परत्वाच्छः स्यात्, ततश्च गर्तोत्तरपदाच्छविधेर्जनपदाद् वुञ् पूर्वविप्रतिषिद्ध इति पूर्वविप्रतिषेधः पठितव्यो भवति । त्रैगर्तक इति । उत्तरसूत्रेण वुञ् । एतेनोत्तरत्र तदवधिग्रहणस्योपयोगं दर्शयति ।।
अवृद्धादपि बहुवचनविषयात् ।। 4.2.125 ।।
अण्छयोरपवाद इति । अवृद्धादणोऽपवादो वृद्धाच्छस्य । इहावृद्धादपि बहुवचनादित्येव सिद्धम्; यौगिको बहुवचनशब्दः---बहूनामर्थानां वचनो बहुवचन इति । यदि वा बहुवचनाद्बहुवचनान्तादित्यर्थः, नार्थो विषयग्रहणेन ? तत्राह---जनपदैकशेषबहुत्व इति । जनपदस्यैकशेषवशेन यद्बहुत्वं तत्रेत्यर्थः । वर्तन्य इति । अवयवभेदेन भेदमाश्रित्य एकशेषः । नायं नित्यबहुवचनान्तः; द्व्येकयोरपि दर्शनात् । तक्रकौण्डिन्यायेनेति । पूर्वसूत्रे हि जनपदसामान्ये वृद्धाद् वुञ् विहितः, यथा---ब्राह्मणसामान्ये दधिदानम् । इह तु बहुवचनविषये विशेषेऽवृद्धाद् वुञ्, यथा---कौण्डिन्ये तक्रदानम्, ततश्च बहुवचनादपि वृद्धाद् वुञि प्राप्ते आरभ्यमाणोऽवृद्धाद् वुञ् वृद्धाद् वुञो बाधकः स्यादित्यापिशब्देन समुच्चीयत इत्यर्थः । इह बहुवचनविषयादित्येतावता सिद्धमवृद्धार्थोऽयमारम्भः । वृद्धाधिकारविच्छेदार्थं त्ववृद्धादपीति वचनम् ।।
काच्छाग्निवक्त्रगर्तोत्तरपदात् ।। 4.2.126 ।।

कच्छशब्दार्थमुत्तरपदग्रहणम् । स हि केवलोऽपि कूलाख्ये देशे वर्तते, इतरेषां तु केवलानां देशवृत्त्यसम्भवादेव तदन्तविधिः सिद्धः । कच्छाद्यन्तादित्युच्यमाने बहुच्पूर्वादपि स्यादित्युत्तरपदग्रहणम् ।।

धूमादिभ्यश्च ।। 4.2.127 ।।

अणआदेरपवाद इति । अवृद्धेभ्यो धूमादिभ्योऽणोऽपवादः, वृद्धेभ्यश्छस्य, उदीच्यग्रामेभ्यस्त्वञः, वाहीकग्रामेभ्यष्ठञ्ञिठयोः । कूलात्सौवीरेष्विति । कौलको भवति सौवीरेषु, कौलमन्यत्र ।।

नगरात् कुत्सनप्रावीण्ययोः ।। 4.2.128 ।।

केनेदं मुषितमिति प्रश्नः, इह नगरे मनुष्येणेत्युत्तरम् । सम्भाव्यत एतदित्यादि प्रष्टुर्वचनम् । संज्ञानगरं पठ्यत इति । माहिष्मतीशब्दसाहचर्यात् संज्ञानगरं संज्ञाभूतो नगरशब्द इत्यर्थः ।।

अरण्यान्मनुष्ये ।। 4.2.129 ।।

औपसंख्यानिकस्येति । `अरण्याण्णो वक्तव्यः' इत्युपसंख्यानप्राप्तस्य ।

`मनुष्ये' इत्यल्पमिदमुच्यते, इत्याह---पथ्यध्यायेति । आरण्यकोऽध्याय इति । योऽरण्येऽधीयते उपनिषद्भागः स उच्यते । विहारः = क्रीडा ।।

विभाषा कुरुयुगन्धाराभ्याम् ।। 4.2.130 ।।

कुरुशब्दः कच्छादिषु पठ्यते इति कथं तर्हि कुरुशब्दाद् वुञः प्राप्तिरुक्ता, ताभ्यामवृद्धादपीति नित्यं वुञि प्राप्त इति ? आद्यप्राप्त्यभिप्रायेण तदुक्तम्, न पुनर्योऽनेन विकल्पेन बाध्यते तदभिप्रायेण । येऽपि पठन्ति--वुञि सिद्ध इति, प्राप्त इत्यर्थः । यथा सिद्धे सत्यारम्भो नियमार्थ इति कुरुशब्दार्थं विभाषाग्रहणं न कर्तव्यमित्ति प्रतिपादयिष्यन्नाह---कुरुशब्दः कच्छादिषु पठ्यति इति । ततः किमित्यत्राह---तत्रेति । किमर्तं तर्हि विभाषाग्रहणमित्याह--सैषेति । ननु युगन्धरशब्दादपि `अवृद्धादपि' इति नित्ये वुञि सिद्धेऽन्तरेणापि विभाषाग्रहणं पुनर्वचनाद्विकल्पो विज्ञास्यते ? नैवं शक्यम् ; विपर्ययोऽपि स्यात् । युगन्धरशब्दान्नित्यो वुञ्, `अवृद्धादपि' इत्यनेन तु विभाषित इति पुनरारम्भो ह्येवमप्युपपद्यते । मनुष्यतत्स्थयोस्त्विति । एतच्च कच्छादिषु पाठसामर्थ्याल्लभ्यते, अन्यथाऽनयैव विभाषया वुञणोः सिद्धत्वात्तत्रास्य पाठोऽनर्थकः स्यात् ।।

मद्रवृज्योः कन् ।। 4.2.131 ।।

मद्रशब्दः `स्फायितञ्चि' इति रक्प्रत्ययान्तः, `वृजी वर्जने' `इगुपधात्किः' इति किप्रत्ययान्तो वृजिशब्दः । जनपदवुञोऽपवाद इति । `अवृद्धादपि' इति ।।

कोपधादण् ।। 4.2.132 ।।

किं पुनरदेशवाचिनोऽयं नेष्यते यतो देशग्रहणमनुवर्तते ? इत्यत आह---अन्यत्रेति । पूर्वेण, प्रस्थोत्तरपदादिसूत्रेण, एवं चोत्तरार्थं देशानुवृत्तिः न त्वदेशनिवृत्त्यर्था । नन्वदेशवाचिनः प्राग्दीव्यतीय एवाण् सिद्धः, प्रस्थोत्तरपदादिसूत्रं तु उदीच्यग्रामलक्षणाञो बाधनार्थम्, तत्किमुच्यते---अन्यत्र पूर्वेणैवेति, सत्यम् ; सति त्वेवमर्थे तस्यारम्भे प्रतिपदविधानात्तेनैव सर्वत्राण्विधिर्युक्तः, अथाण्ग्रहणं किमर्थम्, न कोपधाद्यथाविहितमित्येवोच्येत, आरम्भसामर्थ्याद्वियो विहितो न च प्राप्नोति स एव भविष्यति ? इत्यत आह---अण्ग्रहणमिति । इक्ष्वाकुशब्दाद् `ओर्देशे ठञ्' प्राप्तः, तस्मिन् जनपदवुञाबाधिते यद्यण्ग्रहणं नक्रियते पुनर्वचनाद् वुञेव स्याद्, अण्ग्रहणे त्वणेव भवति । ऐक्ष्वाक इति । दाण्डिनायनादिसूत्रेण टिलोपः, एवं चाण्ग्रहणादेवायमोर्देशे ठञो बाधको न परत्वात् ।।

कच्छादिभ्यश्च ।। 4.2.133 ।।

वुञोदेरपवाद इति । ये जनपदवाचिनो बहुवचनविषयाः, तेभ्यो वुञोऽपवादः, सिन्धुवर्णुशब्दाभ्यामोर्देशे ठञः । साल्वशब्दः पठ्यते---जनपदलक्षणो वुञ्मा भूदिति । `अपदातौ साल्वात्' `गोयवाग्वोश्च' इति नियमार्थं भविष्यति---अपदातावेव गोयवाग्वोरेवेति, वृद्धत्वाच्छः प्राप्नोति ।।

अपदातौ साल्वात् ।। 4.2.135 ।।

पादाभ्यामततीति `पादस्य पदाज्यातिगोपहतेषु' इति पदादेशः, न पदातिरपदातिः । अपदातिः=अश्वरोहादिः । अपदातावेव मनुष्ये तत्स्थे चेति । द्वन्द्वनिर्दिष्टत्वेन तत्स्थे चेत्युक्म्, न तु तत्स्थस्य पदातेः सम्भवोऽस्ति । अपदातौ साल्वादेवेत्येष तु विपरीतनियमो न भवति; `गोयवाग्वोश्च' इत्यारम्भात् ।।

गर्तोत्तरपदाच्छः ।। 4.2.137 ।।

वाहीकग्रामलक्षणमिति । यद्यपि `वाहीकग्रामेभ्यश्च' इति ठञ्ञिठौ विहितौ, तथाप्युत्सृष्टानुबन्धयोस्तयोष्ठरूपाविशेषाद्वाहीकग्रामलक्षणमित्येकवचननिर्देशः । श्वाविद्गर्तीयमिति । श्वानं विध्यतीति व्यधेः क्विप्, सम्प्रसारणम्, `नहिवृत्ति' इति दीर्घः, श्वाविधां गर्तः श्वाविद्गर्तः ।।

गहादिभ्यश्च ।। 4.2.138 ।।

अणादेरपवाद इति । तत्र माहकिप्रस्थशब्दात् `प्रस्थपुरबवन्ताच्च' इति वुञोऽपवादः, वाल्मीकिप्रभृतिभ्य इञन्तेभ्यः `इञश्च' इत्यणः, शेषेभ्य औत्सर्गिकस्याणः । सम्भवापेक्षमिति । येषां देशे चादेशे च वृत्तिः सम्भवति गहादीनां तेषामेव विशेषणम्, न त्वन्तस्थपूर्वपदादीनामित्यर्थः । पृथिवीमध्यस्येति । पृथिवीमध्यवाच्येव मध्यशब्दो ग्राह्यः, न मध्यान्तरवाचीत्यर्थः । चरणसम्बन्धेन निवासलक्षणोऽणिति । चरणसम्बन्धेन योऽण्विधीयतेऽण् चरण इत्यनेन स निवासलक्षणौ द्रष्टव्यः । `सोऽयं निवासः' इत्यञैवार्थे भवतीत्यर्थः, तेन पृथिवीमध्यं निवास एषां कठादीनां चरणानामित्यत्रार्थे मध्यमा इति भवति ।

मुखपार्श्वतसोर्लोप इति । मुखपार्श्वशब्दयोस्तसन्तयोः प्रत्ययसन्नियोगेन लोपो भवति, स च `अलोऽन्त्यस्य', तत्र कृते यस्येति लोपः, लोपवचनम्, `अव्ययानां भमात्रे टिलोपः' इत्यस्यानित्यत्वज्ञापनार्थम्, तेनारातीय इति सिद्धं भवति ।।

वृद्धादकेकान्तखोपधात् ।। 4.2.141 ।।

आरीहणकीयम्, द्रौहणकीयमिति । `तेन निर्वृत्तम्' इत्यत्रार्थे वुञ्छणादिसूत्रेण यो वुञ् तदन्ताभ्यां प्रत्ययः, उदाहरणदिक्चेयमकान्तस्य दर्शिता । `वृद्धाच्छः' इत्येव ह्यत्र चः सिद्धः, न ह्येतौ जनपदवाचिनौ, येन कोपधादणः प्रसङ्गः स्यात् । इदं त्वत्रोदाहरणं द्रष्टव्यम्---ब्राह्मणको नाम जनपदो यत्र ब्राह्मणा आयुधजीविनः `ब्राह्मणकोष्णिके संज्ञायाम्' इति निपातनात् साधुः, तत्र जातो ब्राह्मणकीय इति । अकेकान्तग्रहणे कोपधग्रहणमिति । सूत्रेऽकेकान्तग्रहणमपनीय कोपधादिति वक्तव्यम्, व्यापकत्वाल्लघुत्वाच्चेत्यर्थः ।।

अन्यापलदनगरग्रामह्रदोत्तरपदात् ।। 4.2.142 ।।

अन्तग्रहणेनैव सिद्धम्, नार्थ उत्तरपदग्रहणेन । न च बहुच्पूर्वे प्रसङ्गः, `प्राचां देशे' इत्यधिकारात् ।।

विभाषाऽमनुष्ये ।। 4.2.144 ।।

यद्यत्र नञः प्रश्लेषो न स्यादसन्देहार्थम् `मनुष्ये विभाषा इत्येव ब्रूयात्, लाघवे विशेषाभावादिति मत्वाऽऽह---अमनुष्येऽभिधेय इति । अमनुष्यशब्दो यौगिकोऽत्र गृह्यते, न तु रक्षः पिशाचादिषु रूढ इति दर्शयत्युदाहरणेन पर्वतीयानि फलानीति ।।

कृकणपर्णाद् भारद्वाजे ।। 4.2.145 ।।

न गोत्रशब्द इति । कुत इत्याह---प्रकृतिविशेषणं चैतदिति । चशब्दो हिशब्दार्थे ।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां चतुर्थस्याध्यायस्य द्वितीयः पादः

-------------------********************---------------------

4.3

अथ चतुर्थाध्ये तृतीयः पादः ---4

पदमञ्जरी

युष्मदस्मदोरन्यतरस्यां खञ्च ।। 4.3.1 ।।

षष्ठीनिर्देश उत्तरार्थः । एते त्रयः प्रत्यया भवन्तीति । ननु चान्यतरस्यांग्रहणेन खञ्छयोः पक्षेऽनुत्पत्तिः प्रतिपाद्यते, तदनुत्पत्तावपवादाभावात्स्वशास्त्रेण `प्राग्दीव्यतः' इत्यनेनैवाण् भवति, तत्कुतोऽनेन प्रत्ययत्रयस्य विधानम्, छोऽपि तर्हि नैवानेन विधीयते, तस्यापि हि चकारोऽभ्यनुज्ञापक एव---यद्यन्योऽपि कश्चित्प्राप्नोति सोऽपि भवतीति, ततश्छोऽपि स्वशास्त्रेण `वृद्धाच्छः' इत्यनेनैव भवति, एक एव त्वपूर्वः खञ् विधीयते । अथ यस्य प्रवृत्तावस्य तात्पर्यं स सर्वोऽनेन विधीयत इति छस्यानेन विधानम् । यद्येवम्, अणोऽप्यनेनैव विधानम्, न खञ्छयोरनुत्पत्तिमात्रेऽन्यतरस्यांग्रहणस्य तात्पर्यम्, तस्य महाविभाषयैव सिद्धत्वात्, किं तर्हि ? अणः प्रवृत्तावपि । तस्मात्तात्पर्यतस्त्रय एते प्रत्यया भवन्तीत्युक्तम्, प्रत्येकं प्रत्ययत्रयं विधीयत इति च । तत्र खञ्प्रत्ययो भवतीत्यनेन खञ एवापूर्वस्य विधानमिति दर्शितम् । अन्यतरस्यांग्रहणाद्यथाप्राप्तं चेत्यनेनाणोऽभ्यनुज्ञानम् । त्यदादित्वाद्युष्मदस्मदोश्छे प्राप्त इत्यनेनापि छंस्याभ्यनुज्ञानम् । भाष्ये तु योगविभागेन यथासंख्याभावः प्रतिपादितः---`युष्मदस्मदोः' इत्येको योगः, अत्र `गर्तोत्तरपदाच्छः' इत्यतश्छोऽनुवर्तते; ततः `खञ्च' इति द्वितीयो योगः ।।

तस्मिन्नणि च युष्माकास्माकौ ।। 4.3.2 ।।

साक्षादिति । प्रत्यक्षेण विहितः, स्वरूपोपादानेन विहित इत्यर्थः । हेतुगर्भं चेदं विशेषणम्---यतः साक्षाद्विहितः ततः खञेव निर्दिश्यत इति । तस्मिन्नियुक्ते तत्रैव झटिति प्रत्ययो भवति, न चानुकृष्टश्छ इति । चकारो हि समीपवर्तिनः खञः सहायतामात्रमभिधाय निवर्तते । तत्र सहायस्यानिर्देशात्प्रकृतान्वेषणम्, तत्र `गर्तोत्तरपदाच्छः' इति यावदन्वेषणे छस्य प्रतीतिश्चिरेण भवति, तेन च नासौ प्रत्यवमर्शार्हः । यदा तु यथासंख्यनिरासाय पूर्वसूत्रे योगविभागस्तदा नैव चकारेण छस्यानुकर्षणमिति न तस्य परामर्शशङ्का ।

निमित्तयोरित्यादि । द्वे हि निमित्ते---खञणौ, निमित्तिनावपि द्वावेव---आदेशौ, ततश्च साम्याद्यथासंख्येन भवितव्यमिति मत्वा प्रश्नः । योगविभागः करिष्यत इति । `खञणोर्युष्माकास्माकौ' इति वक्तव्ये `तस्मिन्नणि च' इति वचनाच्चकारेण वाक्यभेदस्य सूचनादादेशयोर्निमित्ताभ्यां प्रत्येकमनभिसम्बन्ध इत्यर्थः ।।

तवकममकावेकवचने ।। 4.3.3 ।।

`कृत्रिमाकृत्रिमयोः कृत्रिमस्यैकवचनस्य ग्रहणम्', तस्य च कृताकृतप्रसङ्गित्वेन `सुपो धातुप्रातिपदिकयोः' इति लुकि कृते युष्मदस्मदोरेकवचनपरता न सम्भवतीति प्रत्ययलक्षणेन समर्थयितव्या । तदपि प्रत्ययलक्षणं विघटयन्नाह---ननु चेति । वचनादिति । यदि पुनरेकवचनपरत्वेनाणाखञौ विशेष्येयाताम्,

को दोषः ? इह च स्याताम्---युष्माकं छात्त्रो यौष्माकीणः, आस्माकीन इतिः, इह च न स्याताम्---तव छात्त्रास्तावकीनाः, मामकीना इति । तस्मात्पूर्वसूत्रे खञण्परतया विशेष्येते---युष्मदस्मदी, एकवचनपरतथापि ते एवात्र विशेष्येते, ततश्च वचनाद् आस्माकीनः---प्रत्ययलक्षणं भवतीत्येषैव गतिः ।

अन्वर्थग्रहणमिति । एकोऽर्थ उच्यते येन तदेकवचनम् । अत्र च पक्षे `एकवचने' इति प्रथमाद्विवचनान्तम्, न सप्तम्यन्तम् ।

अर्द्धाद्यत् ।। 4.3.4 ।।

बल्यर्थं वस्तु बालेयम्, तस्यार्धम्=एकदेशः, तत्र भवं बालेयार्द्धिकम् ।।

परावराधमोत्तमपूर्वाच्च ।। 4.3.5 ।।

`सपूर्वपदाट्ठञ् वक्तव्यः' इत्यौपसङ्ख्यानिके ठञि प्राप्ते वचनम् ।

अर्द्धादिति वर्तते इति । ततश्च परावराधमोत्तमेभ्यः परो योऽर्द्धशब्द इत्येवं विशेषणसामर्थ्यादेवार्द्धशब्दस्य परावरादिपूर्वता विज्ञास्यते, तत्किं पूर्वग्रहणेनेति ? एवमनन्तरोक्तस्य चोद्यस्यैवैतत्समर्थनं परिहति---परावरशब्दाविति । अस्मात्तु पूर्वग्रहणाद्यत्प्रत्यय एव भवतीति । पूर्वविप्रतिषेधसूचनद्वारेणेति भावः ।

द्विक्पूर्वपदाट्ठञ्च ।। 4.3.6 ।।

अणोऽपवाद इति । सौत्रीं प्राप्तिमभिप्रेत्यैतदुक्तम्, `सपूर्वपदाट्ठञ् वक्तव्यः' इत्युक्तत्वात् ।

पदग्रहणमित्यादि । `दिक्पूर्वात्' इत्युच्यमाने स्वरूपविधिः स्यात्, ततश्च दिगर्धे जात इत्यत्रेव स्यात् । पदग्रहणे तु सति---पद्यतेऽनेनेति पदम्, दिशः पदं पूर्वमस्मादिति निपातनात्समासः ।।

ग्रामजनपदैकदेशादञ्ठञौ ।। 4.3.7 ।।

पौर्वार्द्धा इति । ग्रामस्य पूर्वस्मिन्नर्द्धे भव इति तद्धितार्थे समासः, ततः प्रत्ययः । यद्यप्यर्द्धशब्दो ग्राममपेक्षते, तथाप्यस्य नित्यसापेक्षत्वात्प्रधानत्वाच्च वृत्तिद्वयमप्यविरुद्धम्---समासवृत्तिः, तद्धितवृत्तिश्च । ठञ्ग्रहणं किमर्थम्, नाञ्चेत्येवोच्येत ? न चैवमुच्यमाने यतोऽपि समुच्चय प्रसङ्गः; पूर्वसूत्रे चानुकृष्टत्वात् । तस्माद्विस्पष्टार्थं ठञ्ग्रहणम् ।।

अ साम्प्रतिके ।। 4.3.9 ।।

साम्प्रतिकं युक्तं न्याय्यमुचितं सममुच्यत इति । कस्यचित्कश्चित्प्रसिद्ध इत्यनेकशब्दोपादानम् । सम्प्रतिशब्द इदानीमित्यत्रआर्थे प्रसिद्धोऽपि न्याय्येऽपि वर्तते । दृश्यते हि---`अनाप्तश्चतूरात्रोऽतिरिक्तः षड्रात्रोऽथ वा एष सम्प्रति यज्ञो यत्पञ्चरात्र इति', न न्यूनो नातिरिक्तः, सम इत्यर्थः । स च प्रज्ञादौ पठ्यते । तेन साम्प्रतम्, सम्प्रतीति च पर्यायौ ।।

द्वीपादनुसमुद्रं यञ् ।। 4.3.10 ।।

अनुसमुद्रमिति । `अनुर्यत्समया' इत्यव्ययीभावः । सप्तम्यन्तं चैतद्, तद् द्वीपस्य विशेषणम्, तदाह---समुद्रसमीपे यो द्वीप इति ।।

कालट्ठञ् ।। 4.3.11 ।।

कालविशेषवाचिन इति । स्वरूपस्य च पर्यायाणां च ग्रहणं न भवति; सन्धिवेलादिसूत्रेण सन्धिवेलात्रयोदशीप्रभृतिभ्योऽवृद्धेभ्योऽण्विधानात् । तद्धि ठञो बाधनार्थः, अर्थग्रहणे च तेभ्यष्ठञः प्रसङ्गः ।

इह `गौणमुख्ययोर्मुख्ये सम्प्रत्ययः' इति न्यायान्मुख्यया वृत्त्या ये काले वर्तन्ते मासोऽर्द्धमास इति, तत एवायं प्रत्ययः स्याद्; न तु गौणवृत्त्या कालवृत्तेः, कदम्बपुष्पसाहचर्यात्कदम्ब कालः, व्रीहिपलालसाहचर्याद् व्रीहिपलालं काल इत्यादेरित्याशङ्क्याह---यथाकथञ्चिदिति । येन केनचित्प्रकारेण । एतदेव स्पष्टयति---गुणवृत्त्यापीति । परत्र परशब्दप्रवृत्तेर्यन्निबन्धनं स गुणः, तन्निबन्धना वृत्तिर्गुणवृत्तिः । एतच्च सन्धिवेलादिसूत्रेऽनेन कालग्रहणेन नक्षत्राणि यद्विशिनष्टि ततो लभ्यते । न हि मुख्याथः कालशब्दोऽस्ति नक्षत्राणां सम्भवति । पुष्पादिसमीपस्थेन हि चन्द्रमसा योगाल्लक्षितलक्षणया पुष्पादिशब्दानां काले वृत्तिः । सैव च `लुबविशेषे' इति लुब्विधानेनाप्यन्वाख्यायते पौषादिनिवृत्त्यर्थम्, न त्वेतावता कालस्तेषां मुख्योऽर्थः ।।

श्राद्धे शरदः ।। 4.3.12 ।।

श्राद्ध इति कर्म गृह्यते इति । श्रद्धास्मिन्विद्यत इति `प्रज्ञाश्रद्धार्चा' इति मत्वर्थीयोऽणः, श्रद्धया सम्पाद्यं पित्र्यं कर्म श्राद्धशब्देन उच्यत इत्यर्थः । न श्रद्धावान् पुरुषं इति । यदा स एव णः षष्ठ्यर्थे भवति तदा पुरुषवृत्तिः श्राद्धशब्दः । कथं पुनः शब्दसाधारण्येऽप्ययं विशेषो लभ्यते ? इत्याह---अनभिधानादिति । शारदिकं श्राद्धमिति । यद्यत्र विहितं तत्तत्र भवमिति भवे प्रत्ययः ।।

श्वसस्तुट् च ।। 4.3.15 ।।

तस्य चेति । ठञः, न तु श्वः शब्दस्य । कुत एतत् ? ठञो विधेयत्वेन प्राधान्यात् । स च तुडागम इकादेशे कृते भवतीति वेदितव्यम् । ननु चान्तरङ्गत्वादिकादेशात्प्राक् ठञस्तुट् प्राप्नोति, इकादेशस्त्वङ्गाधिकारे विधानादसङ्गसंज्ञायामभिनिर्वृत्तायां पश्चाद् भवन्बहिरङ्गः, तुटि च कृते प्रत्ययादेष्ठस्येकादेशविधानाद्यथा कर्मठ इत्यत्र न भवति एवमत्रापि न स्यात्, यदि पुनरयं तुक् पूर्वान्तः क्रियते; नैवं शक्यम्, `इसुसुक्तान्तात्कः' इति कादेशः स्यात्, तस्मादस्तु परादिरेव । कथमिकादेशः ? ज्ञापकात्सिद्धम्, यदयं वुञ्छणआदिषु ठचश्चित्करणं करोति, तज्ज्ञापयति---अन्तरङ्गेभ्योऽपि पूर्वमिकादेश एव भवतीति । यदि न स्यात्, प्रत्ययसंज्ञासन्नियोगशिष्टे प्रत्ययस्वरे कृते पश्चादिकादेश इति सिद्धमन्तोदात्तत्वं स्यात् । ट्युट्युलावपि भवति इति । `सायंचिरम्' इत्यादिना श्वः शब्दोऽव्ययम्, कालवाची चेति कृत्वा । शौवस्तिकमिति । द्वारादित्वाद् वृद्धिप्रतिषेधः, ऐजागमश्च ।।

सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ।। 4.3.16 ।।
अण्ग्रहणं वृद्धाच्चस्य बाधनार्थमिति । असत्यण्ग्रहणे सन्धिवेलादिभ्यो यथाविहितमित्युच्यमाने यद्यप्यारम्भसामर्थ्यात्कालाट्ठञ् न भवति; तथापि सन्धिवेलादिषु पठितात्पौर्णमासीशब्दात्स्वात्यादेश्च वृद्धाच्छः स्याद्, वचनं तु कालाट्ठञो बाधनार्थं स्यात् । तस्मादण्ग्रहणं कर्तव्यं वृद्धाच्छस्य बाधनार्थम् । सौवातमिति । `अत सातत्यगमने' सुपूर्वात् `अज्यतिभ्यां च' इतीण् प्रत्ययः, स्वात्या युक्तः काल इत्यण्, तस्य `लुबविशेषे' इति लुप्, ततो भवादावर्थेऽनेनाण्, `न य्वाभ्याम्' इति वृद्धिप्रतिषेधः, ऐजागमश्च । जातार्थे तु `श्रीविष्टाफल्गुनी, इति लुकि स्वातिरिति भवति । तैषमिति । अत्रापि जातार्थे पूर्ववल्लुका भवतव्यमिति भवादौ प्रत्ययः, `तिष्यपुष्ययोर्नक्षत्राणि यलोपः' इति यलोपः । संवत्सरात्फलपर्वणोरिति । सांवत्सरं फलं पर्व वा, सांवत्सरिकमन्यत् ।।
प्रावृष एण्यः ।। 4.3.17 ।।
प्रवर्षतीति प्रावृट्, क्विपि `नहिवृति' इत्यादिना दीर्घः । प्रावृषेण्य इति । भवार्थे प्रत्ययः, जाते तु प्रावृषष्ठपं वक्ष्यति । `रषाभ्याम्' इत्येव सिद्धे प्रत्यये णकारोच्चारणम्---प्रावृषेण्यमाचष्टे प्रावृषेण्ययतेः क्विप्, णिलोपः, `लोपो व्योर्वलि' इति यलोपः, प्रावृषेणित्यत्र णत्वार्थम् ; अन्यथा `पदान्तस्य' इति प्रतिषेधः स्यात् ।।
वर्षाभ्यष्ठक् ।। 4.3.18 ।।
वार्षिकं वास इति । `कालात्साधुपुष्प्यत्पच्यमानेषु' इति साध्वर्थे ठक् ।।
छन्दसि ठञ् ।। 4.3.19 ।।
नभश्च नभस्यश्च वार्षिकावृत् इति । `तस्येदम्' इत्यत्रार्थे प्रत्ययः, ऋतुशब्दश्च ऋत्ववयवयोर्मासयोर्वर्तते, वर्षर्तोरेतौ मासाववयवावित्यर्थः ।।
सर्वत्राण् च तलोपश्च ।। 4.3.22 ।।
हैमनमिति । यदा तशब्दस्य समुदायस्य लोपस्तदा `अन्' इति प्रकृतिभावात् `नस्तद्धिते' इति टिलोपो न भवति । यदा तु तकारस्यानेन लोपोऽकारस्य तु यस्येति लोपः, तदा तस्य `असिद्धवदत्राभात्' इत्यसिद्धत्वात्स्थानिवद्भावाच्च टिलोपाभावः ।
ननु च छन्दसीति नानुवर्तिष्यत इति । अस्वरितत्वात् । सैवेत्यादि । यासावस्वरितत्वादनुवृत्तिः सैव सर्वत्रेत्यनेन शब्देनाख्यायते, किमर्थम् ? इत्याह--प्रत्यत्नाधिक्येनेति । ननु च तत एवास्वरितत्वात्पूर्वसूत्रेऽपि छन्दसीति नानुवर्तिष्यते, तस्माद्विस्पष्टार्थमेव सर्वत्रग्रहणम् । भाषायामपि ठञं स्मरन्तीति । भाष्ये तु नैतदिष्यते, तथा हि---सूत्रमिदं प्रत्याख्यातम्, कथम् ? हेमन्तपर्यायो हेमन्शब्दोऽस्ति---`हेमन्नागनीगन्ति कर्णौ, तस्मादेतौ हेमन्नशुष्यतः, तदि हेमन् प्रमीयते हेमन्तो भवति' इति दर्शनात्, तत्र भाषायां देमन्-हेमन्तशब्दयोर्ऋत्वणि हैमनं हैमन्तमिति रूपद्वयं सिद्धम्, छन्दसि तु हेम्नो हैमनम्, हेमन्तस्य `हेमन्ताच्च' इति ठञि हैमन्तिकम्, `सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति हेमन्तशब्दादेवाणि हैमन्तमिति रूपत्रयं सिद्धमिति । सूत्रकारेण तु भाषायामेतद्वृत्तिविषयादन्यत्रर्तुवाचिनो हेमञ्छब्दस्य प्रयोगाभावान् नलोपो विहितः, यथाप्राप्तं च ऋत्वणिति, अनन्तरस्तु ठञ् सर्वत्रग्रहणस्य पूर्वत्रान्वयेनैव सर्वत्र सिद्धिरिति नासौ समुच्चीयते । कः पुनरनयोर्विशेष इति । न कश्चिदिति भावः त्रीणिरूपाणि भवन्तीति । पूर्वेण ठञि एकम्, अनेनाण्तलोपयोर्द्वितीयम्, ऋत्वणि यस्येति लोपे परमिति त्रीणि रूपाणि ।।
सायम्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।। 4.3.23 ।।
इह `युवोरनाकौ' इत्यङ्गाधिकारे विहितत्वादनादेशो बहिरङ्गः, तुडागमस्तु प्रत्ययसन्नियोगेन विधानादन्तरङ्ग इति तेनैव तावद्भवितव्यम्, तत्र कृतेऽनादेशो न प्राप्नोति, किं कारणम् ? अङ्गस्य निमित्तं यो युस्तस्यानादेशः, तुटि त्वत्र सति त्युशब्दोऽङ्गस्य निमित्तं न युशब्दमात्रम्, ततश्च यथा मृत्युरित्यत्रानादेशो न भवति, तथात्रापि न स्यात् । यदि पुनरयं तुक् पूर्वान्तः क्रियते ? नैवं शक्यम् ; प्रातस्तनमित्यत्र ह्रि विसर्जनीयो न स्यात्, अपदान्तत्वात् । तस्मात्परादिरेवायं कर्तव्यः, तत्र चानादेशो न प्राप्नोति ? तत्राह---तयोश्चादिष्टयोस्तुडागमो भवतीति । आदिष्टयोरिति कृतादेशयोरित्यर्थः । एष चार्थ आदिष्टशब्दस्य अशेआद्यच्प्रत्ययान्तत्वेन लभ्यते, आदिश्यत इत्यादिष्टः, स ययोरस्ति तावादिष्टौ, तयोरादिष्टयोरिति । एतच्च `घकालतनेषु' इति निर्देशाल्लभ्यते, न ह्यनादिष्टयोस्तुड्विधाने नतशब्द उपपद्यते । प्रातस्तनमित्यत्र वृद्धाच्छं परत्वाद्बाधत इति नोक्तम् ; छस्य बाधकमपि ठञं बाधमानयोष्ट्युट्युलोरुत्कृष्टबलयोर्दुर्बलेन छेन सह सम्प्रधारणाभावात् । मकारान्तं पदमव्ययमिति । स्वरादिषु पठितम् । अन्तकर्मण इति । अन्तक्रियस्य, `षोऽन्तकर्मणि' इत्यस्येत्यर्थः । यद्यप्यसाववसानमात्रवनाची, घञन्तस्तु सायशब्दो दिवसान्तवचन इति न कालाधिकारस्य बाधशङ्का । प्रत्ययसन्नियोगेनेति । अन्यत्र त्वकारान्त एव, यथा---सायाह्नः, सायतर इति । आह च---संख्याविसायपूर्वस्याह्नस्येति । एकारान्तत्वमिति । निपात्यत इत्यनुषङ्गः । यत्र सप्तम्यर्थो नास्ति---प्राह्णः सोढोऽस्येत्यादौ, तदर्थं निपातनम् । जातादिके त्वर्थे `घकालतनेषु' इत्यलुका सिद्धम् ।
चिरपरुत्परारिभ्य इति । चिरशब्दस्य सूत्र उपादानात् ट्युट्युलावाप भवतः, न तु `कियत्तद्बहुषु कृञोऽज्विधानात्' इतिवत्सूत्रस्य बाधः । परुत् = पूर्वस्मिन् संवत्सरे, परारि = पूर्वतरे । प्रत्नशब्दः पुराणवचनः ।
अग्रपश्चाड्डिमजिति । केचिदत्रादिशब्दमपि पठन्ति---अग्रादिपश्चादिति, ते `मध्यान्मः' इत्यत्रादेश्चेति वक्तव्यमिति न पठन्ति । डित्करणं पश्चादित्यत्र टिलोपार्थम् । `अव्ययानां भमात्रे टिलोपः' इत्यस्यैवायं प्रपञ्चार्थः ।।
विभाषा पूर्वाह्णापराह्णाभ्याम् ।। 4.3.24 ।।

सप्तम्या अलुगिति `ङ्याप्प्रातिपदिकात्' इत्यत्र निरणायि---सुबन्तात्तद्धितोत्पत्तिरिति, तत्तत्रैव द्रष्टव्यम् । यदि सुबन्तात्तद्धित उत्पद्यते, कथं पूर्वाह्णतन इत्यत्र भवति ? तत्राह---यदा त्विति ।।

तत्र जातः ।। 4.3.25 ।।

तेषामतः प्रभृत्यर्थाः समर्थविभक्तयश्च निर्दिश्यन्त इति । तदिदमुभयमनिर्देश्यम्, कथम् ? `शेष इति लक्षणं चाधिकारश्च' इत्युक्तम्, तत्र लक्षणतया चाक्षुषं रूपमित्यादाविव जातादिष्वप्यर्थेष्वणादयः सिद्धाः, अधिकारतया च घादय इत्यर्थास्तावन्न निर्देश्याः प्रत्ययार्थेन चाभिदानस्वाभाव्येन समर्थविभक्तयोऽपि लभ्यन्ते इति तन्निर्देश्याः प्रत्ययार्थेन चाभिदानस्वाभाव्येन समर्थविभक्तयोऽपि लभ्यन्ते इति तन्निर्देशोऽपि न कर्तव्य एव । नियमार्थमिति चेन्न; अनिष्टत्वात् । तत्रैतत्स्यात्---जातादिष्वेव तद्धिता यथा स्युः, तत्रास्ते तत्र शेत इत्यादौ मा भूवन्निति जातादयोऽर्था अनुक्रम्यन्त इति ? तच्च नैवम्; अनिष्टत्वात् । अन्यत्रापि हि तद्धिता इष्यन्ते---चाक्षुषं रूपम्, श्रावणः शब्दः, चातुर्दशं रक्षः, दार्षदाः सक्तव इति । यत्र तु नेष्यन्ते, तत्रास्त इत्यादौ---तत्रानभिधानान्न भविष्यन्ति, यथा---अङ्गुल्या खनतीत्यादौ । तस्मान्नार्थो जाताद्यनुक्रमणेन ।

अपवादविधानार्थं तु, प्रावृषष्ठबादीनपवादाँस्तत्र तत्रासङ्करेण वक्ष्यामीति अवश्यानुक्रमितव्या अर्थाः, तेऽन्यार्थाः सन्तो योगविभागेनाणादीनामप्यर्था निर्दिश्यन्ते ।

विश्पष्टार्थम्, यानि पुनरनपवादान्यर्थादर्शनानि, यथा---`कृतलभ्धक्रीतकुशलाः' इति, तानि शक्यान्यवक्तुम् ।।

संज्ञायां शरदो वुञ् ।। 4.3.27 ।।

समुदायेन चेदिति । प्रकृतिप्रत्ययसमुदायश्चेत्संज्ञा भवतीत्यर्थः । कृतलब्धक्रीतकुशला इति यावदिति । यावच्छब्दोऽवधिद्योतको निपातः ।।

अमावास्याया वा ।। 4.3.30 ।।

एकदेशविकृतस्यानन्यत्वादिति । `अमावस्यदन्यतरस्याम्' इत्यत्र `अमापूर्वस्य वसेर्ण्यति पक्षे वृद्ध्यभावो निपात्यते' इत्युक्तम् । ण्यति च `अत उपधायाः' इति सामान्येन वृद्धिविधानात्, अमावास्याशब्दस्य न्याय्यत्वादवृद्ध्युपधस्तस्यैवैकदेशविकार इति भावः । ये त्विह सूत्रे सन्धिवेलादिषु च ह्रस्वोपधमधीयते, तेषां दीर्घोपधस्य न स्यात्; अतद्विकारत्वात् ।।

अ च ।। 4.3.31 ।।

किमर्थो योगविभागः, न च`अमावास्याया वा' इत्युच्येत, चकाराद्वुञ्, वावचनादुभयोरभावेऽणपि भविष्यति ? सयत्म् ; उत्तरत्र तु विकल्पानुवृत्तिः शङ्क्येत । योगविभागे तु सन्धिवेलाद्यणोऽभ्यनुज्ञानाय पूर्वसूत्रे वाग्रहणसामर्थ्यादस्यापि विकल्पसिद्धेरिह वाग्रहणँ नानुवर्त्त्यमिति व्यवधानादुत्तरत्र विकल्पस्य निवृत्तिः सिद्धा भवति ।।

अणञौ च ।। 4.3.33 ।।

योगविभागो यथासंख्यार्थः ।।

श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् ।। 4.3.34 ।।

कृत्तिकापर्यायस्य बहुलाशब्दस्यात्र द्वन्द्वैकवद्भावेन नपुंसकह्रस्वत्वेन निर्देशः, न बह्वर्थादाननिमित्तस्य बहुलाशब्दस्य; श्रविष्टादिभिः साहचर्यात् । चित्रेति । `लुक्तद्धितलुकि' इति लुकि कृते पुनष्टाप् ।

गौरादिपाठान् ङीषिति । `रेवती नक्षत्रे, रोहिणी नक्षत्रे' इति तत्र पठ्यते, न चेमौ नक्षत्रवाचिनौ; जातार्थवृत्तित्वात् । तस्माद् `गौरादिषु पिप्पल्यादयश्च' इति पाठात्तेषां चावृत्कृतत्वादत्र ङीषित्यर्थः ।

टानौ वक्तव्याविति । स्त्रियामित्यपेक्ष्यते, टकारो ङीबर्थः, नकारः स्वरार्थः, विधानसामर्थ्याच्चानयोर्लुग्न भवति ।

छणपि वक्तव्य इति । अत्र च `स्त्रियाम्' इति नापेक्ष्यते ।।

स्थानान्तगोशालखरशालाच्च ।। 4.3.35 ।।

गोशालेति । `विभाषा सेना' इति नपुंसकत्वे ह्रस्वत्वम् । तत्साहचर्यात्खरशालस्यापि नपुंसकस्य ग्रहणम्, न तु द्वन्द्वैकवद्भावेन ह्रस्वत्वम् । एकादेशस्य पूर्व प्रत्यन्तवद्भावाल्लिङ्गविशिष्टयपरिभाषया स्त्रीलिङ्गाभ्यामपि लुग्भवत्येव । यद्यपि टाबन्तयोरपि पाठे एकदेशविकृतस्यानन्यत्वान्नपुंसकाभ्यामपि लुक् सिद्ध्यति, लाघवार्थं तु ह्रस्वस्य पाठः ।।

वत्सशालाभिजिदश्वयुवछतभिषजो वा ।। 4.3.36 ।।

वत्सशालेति । ह्रस्वान्तस्य दीर्घान्तस्य वा ग्रहणम् । बहुलग्रहणस्यैवायं प्रपञ्च इति । अश्वयुक्शतभिपक्शब्दावभिप्रेत्यैतदुक्तम् ; अन्ययोरनक्षत्रवाचित्वात् । अभिजिदिति । यद्यपि नक्षत्रमप्यस्ति---`अभिजिन्नाम नक्षत्रपुमपरिष्टादषाढानामिति', मुहूर्तमप्यस्ति ।।

नक्षत्रेभ्यो बहुलम् ।। 4.3.37 ।।

वाग्रहणानुवृत्तेर्व्यवस्थितविभाषाविज्ञानाच्च लुग्व्यवस्थायां सिद्धायाम्, बहुलवचनं क्वचिदन्यदेवेत्येतदर्थम्, तेन टानौ वक्तव्यावित्यादि सिद्धं भवति । रोहिण इति । `चित्रारेवतीरोहिणीयः स्त्रियामुपसङ्ख्यानम्' इत्येतत्तु स्त्रियां नियमेन लुगर्थे, न तु स्त्रियामेव लुगर्थम् ।

कृतलब्धक्रीतकुशलाः ।। 4.3.38 ।।

यद्यत्र कृतं जातमपि तत्तत्र भवतीति । यद्यपि जातं सर्वं कृतं न भवति, स्वयं जातस्यापि भावात् ; कृतं तु सर्वं जातं भवति, न ह्यजननस्वभावंक्रियते,

यथा--व्योमेति भावः । यच्च क्रीत लब्धमपि तत्तत्र भवतीति । अत्रापि लब्धं सर्वं क्रीतं न भवति ; दानादिनापि लाभसम्भावात् । क्रीतं तु लब्धमेव ; क्रयस्यापि लाभहेतुत्वादित्यर्थः । तत्किमर्थं भेदेनोपादानं क्रियत इति । जातलब्धाभ्यामेव गतमिति प्रश्नः । शब्दार्थस्याभिन्नत्वादिति । परव्यापारोपहितं रूपं कृतमित्युच्यते, तद्रहितं तु जातमिति; तथा मूल्यप्रदानरूपो यः स्वीकर्तुर्व्यापारस्तदुपहितं रूपं क्रीतामत्युच्यते, तद्रहितं तु लब्धमिति । तत्र यथा---विक्लिन्न ओदनः, पक्व ओदन इति शब्दार्थाभेदः, तथात्रापीत्यर्थः । एतदेव स्पष्टयति---वस्तुमात्रेणेति । वस्तुत इत्यर्थः । एतदुक्तं भवति---क्रीतं वस्तुतो लब्धं भवतीत्येतावत्, शब्देन तु रूपान्तरमभिधीयते । एवं कृतमपि वस्तृतो जातं भवति, शब्देन तु रूपान्तरमभिधीयत इति द्रष्टव्यम् । उपसंहरति---शब्दार्थस्तुभिद्यत एवेति । तत्राक्रियमाणे कृक्रीतयोरुपादाने यथा---क्वायं घटः कृतः, क्रीतो वा इति पृष्टे स्रुघ्ने जातो लब्ध इति चोत्तरं नं प्रयुज्यते; तथा तद्धितोऽपि न स्यात्। तस्मात्कृतक्रीतयोस्तद्धितेनाभिधानाय भेदेनोपादानमिति ।।

प्रायभवः ।। 4.3.39 ।।

प्रायेण भवः, `कर्तृकरणे कृता बहुलम्' इति समासः ।

तत्र भवेन कृतत्वादिति । यत्प्रायभव इत्यस्य साध्यम्, तस्य `तत्र भवः' इत्यनेनैव साधितत्वादित्यर्थः । यो हि राष्ट्रे प्रायेण भवति तत्रैवासो भवतीति `तत्र भवः' इत्येव सिद्धम् । शङ्कते---अनित्यभवः प्रायभव इति चेदिति । यस्तत्र कदाचिद्भवति कदाचिन्न स प्रायभवः, यस्य तु नियत आधाराधेयभावः स `तत्र भवः' इति पृथगुपादानसामर्थ्याद्भेद आश्रीयत इति यद्युच्येतेत्यर्थः । निराकरोति---मुक्तसंशयेन तुल्यमिति । यं भवान्मुक्तसंशयं न्याय्यं तत्रभव उदाहरणं मन्यते---स्रौघ्नो देवदत्त इति, तेनैव तुल्यम्, सोऽपि हि कदाचित्तस्मादुदक्देशादभिनिष्क्रामति । तत्र चेद्युक्ता तत्र भवता, इहापि युक्ता दृश्यताम् । अथैतदपि प्रायभवस्योदाहरणम्---स्रौघ्नो देवदत्त इति । तत्रभवनस्य किमुदाहरणम् ? तत्र नित्यभवः स्रौघ्नः प्राकार इति । यद्येवम्, `तत्र भवः' इति प्रकृत्य जिह्वामूलाङ्गुलेश्छो विधीयते स तस्मिन्दृष्टापचारे न स्यात्, दृश्यते च--

वानरोऽहं महाभागे दूतो रामस्य धर्मतः ।
रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम् ।। इति ।

तस्मात्तत्रभवे सामान्ये प्रायभवस्य विशेषस्यान्तर्भावादनर्थकं प्रायग्रहणम् ? इदं तर्हि प्रयोजनम्---`उपजानूपकर्णोपनीवेष्ठक्' प्रायभवे यथा स्यान्नित्यभवे मा भूत्---उपजानु भवं गड्विति । अथेदानीं जानुसमीपस्थशरीरावयववाचिन उपजानुशब्दात्तत्र भव इति प्रकृत्य `शरीरावयवाद्यत्' इति यत्कस्मान्न भवति ? अनभिधानात् । ठगपि तर्ह्यनबिधानादेव न भविष्यति ? तदेवं स्थितम्---एतत्प्रायग्रहणमनर्थकम्, तत्र भवेन कृतत्वादिति ।।

उपाजानूपकर्णोपनीवेष्ठक् ।। 4.3.40 ।।

उपजान्वादयः सामीप्येऽव्ययीभावाः, समाहारद्वन्द्वस्य सौत्रः पुंल्लिङ्गनिर्देशः ।।

सम्भूते ।। 4.3.41 ।।

अवक्लृप्तिः प्रमाणनतिरेकश्चेति । सकृत्प्रयुक्तस्याप्यनेकार्थत्वमविरुद्धम्, तन्त्राद्याश्रयणआदिति भावः । तत्रावक्लृप्तिः = सम्भावना, इदमेवं भवेदिति बुद्धिः; प्रमाणानतिरेकः = आधारपरिमाणादाधेयपरिमाणास्यानतिरेकता, यस्यां सत्यां सर्वमाधेयमाधारेऽनुप्रविशति । स्रौघ्न इति । देवदत्त इदानीं स्रुघ्ने सम्भाव्यत इत्यर्थः, स्रुघ्नप्रमाणाद्वाऽनतिरिच्यते सेनादिकोऽर्थ इत्यर्थः ।।

कोशाड् ढञ् ।। 4.3.42 ।।

कौशीयं वस्त्रमिति । ननु च न वस्त्रं कोशे सम्भवति, वस्त्रदायां तत्कारणस्य कोशस्य परावृत्तत्वात्, न च कोशान्तरे वस्त्रस्य सम्भवः, न च तत्रेष्यते, तस्माद्विकारे कोशाड्ढञ् सम्भूते ह्यर्थानुपपत्तिरिति वार्त्तिकमेव शरणम् । `तस्य विकारः' इत्यत्र प्रकरणे `एण्या ढञ्' इत्यस्यानन्तरम् `कोशाच्चेति वक्तव्यम्' इत्यर्थः । अर्थानुपपत्तिरिति । कौशेयशब्दस्य योऽर्थो लौकिकः सूत्रवस्त्रलक्षणस्तस्यानुपपत्तिः स्यात्, लौकिकोऽर्थः शास्त्रेण नानुसृतः स्यात् । कृमिरेव त्वभिधेयः प्राप्नोति स हि कोशे सम्भवति । किञ्चाविशेषाभिधानात्खड्गकोशादपि प्रत्ययः प्रसज्येत, इत्यत आह---रूढिरेषेति । रूढिशब्देषु नावश्यमवयवार्थोऽन्वेष्यः, यथा तैलपायिकादिष्विति मन्यते । सूत्रकारेण तु सत्कार्यवलादाश्रयेण सम्भूते प्रत्ययो विहितः, तत्र हि कारणदशायामपि कार्यस्य सत्त्वात् तत्र तत्सम्भवति तदनुपपन्नम् । कार्यकारणयोर्हि तादात्म्यमभिसम्बन्धः, न त्वाधाराधेयभावः ।।

कालात्साधुपुष्यत्पच्यमानेषु ।। 4.3.43 ।।

कालविशेषवाचिभ्य इति । स्वरूपग्रहणं तु न भवति; उत्तरत्राश्वयुज्यादीनामनेन कालशब्देन विशेषणात् ।।

उप्ते च ।। 4.3.44 ।।

सूत्रे भूतकालस्याविवक्षां दर्सयति । हेमन्ते उप्यन्ते इति । योगविभाग उत्तरार्थ इति । उत्तरयोगयोरुक्त एव प्रत्ययो यथा स्यात्, साध्वादिषु मा भूत् ।।

आश्वयुज्या वुञ् ।। 4.3.45 ।।

वुञो ञकारः स्वरार्थः, उत्तरत्र वृद्ध्यर्थश्च, अश्वयुग्भ्यां युक्तेति पाठः, अश्वयुजोद्वित्वात् `नमोऽश्विभ्यामश्वयुग्भ्याम्' इति दर्शनात् । अश्विनीपर्याय इति पाठः । `तारा अश्वयुगश्विनी' इत्यमरसिहः । अश्वनीपर्यायइति प्रसिद्धः पाठः, तत्राशुपूर्वादनेरौणादिक इन्प्रत्ययः, पृषोदरादित्वादादेर्ह्रस्वः ।।

कलाप्यश्वत्थव्यवबुसाद् वुन् ।। 4.3.48 ।।

मयूरादिषु प्रसिद्धानां कलाप्यादीनां शब्दानां काले वृत्तिर्न सम्भवति, तत्कथम् `कालविशेषविचिभ्यः' इत्युक्तम् ? अत आह---कलाप्यादयः शब्दा इति ।

अश्वत्थेन वृक्षेण कालस्य सम्बन्धोऽव्यभिचारादविशेषणमिति `फले लुक्' इति लुगन्तोऽश्वत्थशब्द इत्याह---यस्मिन्नश्वत्थाः फलन्तीति । अपकृष्टे यवो यवबुसं जात्यन्तरं वा यवादिवत्, यवानामेव वा बुसं यवबुसम् ।।

ग्रीष्मावरसमाद्वुञ् ।। 4.3.49 ।।

अवरसममिति विशेषणसमासः । न चावरशब्दो दिग्वाची, येन `दिक्सङ्ख्ये संज्ञायाम्' इति नियमात्समासो न स्यात् । आवरसमकमिति । आगामिनां संवत्सराणामाद्यवत्सरे देयमित्यर्थः । अपर आह---अतीते वत्सरे देयं यदद्यापि न दत्तं तदावरसमकमिति ।।

संवत्सराग्रहायणीभ्यां ठञ्च ।। 4.3.50 ।।

वेति वक्तव्ये इति । वुञि विकल्पिते पक्षे यथा प्राप्तष्ठञेव भविष्यतीति मन्यते । ठञ्ग्रहणमित्यादि । असति ठञ्ग्रहणे सन्धिवेलादिषु `संवत्सरात्फलपर्वणोः' इति पाठात्फले ऋणत्वेन विवक्षिते वुञा मुक्तेऽणेत स्यात्, ठञ्ग्रहणात्तु ठञेव भवति ।।

व्याहरति मृगः ।। 4.3.51 ।।

व्याहरति = शब्दायते ।।

तदस्य सोढम् ।। 4.3.52 ।।

अस्येति । नेयं सोढापेक्षया कर्त्रि षष्ठी, `न लोकाव्यय' इति प्रतिषेधात्, किं तर्हि ? कर्तुरेव सम्बन्धित्वमात्रविवक्षया शेषलक्षणा षष्ठी । निशासहचरितमध्ययनमिति । कालस्य स्वरूपेणासोढत्वात्तत्सहचरितवृत्तेरत्र सूत्रे ग्रहणमिति दर्शयति ।।

तत्र भवः ।। 4.3.53 ।।

कालादिति निवृत्तमिति । `तत्र जातः' इति प्रकृतं तत्रग्रहणं कालाधिकारेण सम्बद्धमिति तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यादिति पुनरिह तत्रग्रहणं कृतम् `सप्तम्यर्थमात्रं यथा गृह्येत कालसम्बन्धविशिष्टः सप्तम्यर्थो मा ग्राहि' इत्यवमर्थमिति भावः । ननु च प्रकृतं तत्रग्रहणं पूर्वसूत्रे तदिति प्रथमया समर्थविभक्त्या व्यवहितम् ? नेत्याह, शक्यं हि तदन्यत्रापि पठितुम् ।।

दिगादिभ्यो यत् ।। 4.3.54 ।।

सेनामुख्यमिति । यदन्तस्य सेनाशब्देन षष्ठीसमासः, न तु सेनामुख्यशब्दात्प्रत्ययः; तदन्तविध्यभावात् ।।

शरीरावयवाच्च ।। 4.3.55 ।।

शरीरं प्राणिकाय इति । `व्याकरणस्य शरीरम्' इत्यादिकस्तु प्रयोगो गौणः । अणोऽपवाद इति । वृद्धात्तु छं परत्वाद्बाधते, पादे भवं पद्यम्, `पद्यत्यतदर्थे' इति पद्भावः । नासिकायां भवं नस्यम्, `नस नासिकाया यत्तस्क्षुद्रेषु' इति नस्भावः । कथम् `वेगो जङ्घोरस्यः' इति ? कथं च न स्यात्, न शरीरावयवसमुदायः शरीरावयवग्रहणेन गृह्यते । न च तदन्तविधिरस्ति ? निरङ्कशाः कवयः ।।

दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् ।। 4.3.56 ।।

दृतिश्चर्मविकारः, शरीरावयवश्च । कुक्षिशब्दो धूमादिः, वस्तिर्नाभेरधः शरीरावयवः । आहेयम् विषादि ।

अस्तिशब्दः प्रातिपदिकमिति । विभक्तिप्रतिरूपं निपातसंज्ञकम्, तच्च तिङन्तेन समानार्थम्---अस्तिक्षीरा गौरिति, धनवचनं च अस्तिमानिति ।।

ग्रीवाभ्योऽण्च ।। 4.3.57 ।।

धमनीवचन इति । धमनीसङ्घातवचन इत्यर्थः । स च यदोद्भूतावयवभेदे सङ्घाते वर्त्तते तदा बहुवचनम्, यदा तु तिरोहितावयवभेदे सङ्घाते वर्त्तते तदैकवचनान्तः प्रयोगः ।।

गम्भीराञ्ञ्यः ।। 4.3.58 ।।

बदिर्देवपञ्चजनेभ्यश्चेति वक्तव्यमिति । `प्राग्दीव्यतः' इत्यत्रोक्तम्---`देवस्य यञञौ, बहिषष्टिलोपश्च' इति । तच्चावश्यं वक्तव्यम्---अर्थान्तरेष्वपि यथा स्यादिति । तस्यैव प्रपञ्चार्थम्, इह तु बहिर्देवयोर्ग्रहणम् ।।

अव्ययीभावाच्च ।। 4.3.59 ।।

किं तर्हि परिमुखादेरिति । कथं पुनः सामान्योक्तावयं विशेषो लभ्यत इत्याह---परिमुखादीनां चेति । चशब्दो हेतौ । दिगादेरनन्तरं परिमुखादिगणः पठ्यते, तस्य नान्यत्प्रयोजनं सम्भवति अव्ययीभावग्रहणस्य, परिमुखादिविशेषणतयाऽन्वयसम्भवात्, तस्मात्परिमुखादेरेव भविष्यति, न सर्वस्मादव्ययीभावात् । यद्येवम्, परिमुखादेरित्येव वक्तव्यमत आह---तेषामेवेति । `परिमुखादेः' इत्युच्यमाने बहुव्रीहितत्पुरुषेभ्योऽपि ञ्यप्रत्ययः स्यात्, अव्ययीभावग्रहणात्तु तेभ्योऽणेव भवति । उत्तरार्थं चावश्यमव्ययीभावग्रहणं कर्त्तव्यम्, तत्र ये परिपूर्वास्तत्र यदि वर्जनं गम्यते ततः `अपपरिबहिरञ्चवः । पञ्चम्या' इत्यव्ययीभावः । अथ सर्वतो भावः, ततोऽस्मादेव निपातनादव्ययीभावः । उपपूर्वेषु सामीप्येऽनुपूर्वेषु `अनुर्यत्समया' `यस्य चायामः' `पश्चादर्थे यदव्ययम्' इति च यथाभिधानं समासः ।।

अन्तः पूर्वदाट्ठञ् ।। 4.3.60 ।।

आध्यात्मिकमिति । `अनश्च' इति टच् समासान्तः । आधिविदैकम्, आधिभौतिकमिति । अनुशतिकादित्वादुभयपदवृद्धिः । अध्यात्मादिराकृतिगण इति । एवं च समानशब्दादित्यादिरस्यैव प्रपञ्चः ।

ऊर्ध्वशब्देन समानार्थ ऊर्ध्वंशब्द इति । स चैतद्वृत्तिविषय एव । अपर आह---`ठञ्सन्नियोगेन दम शब्द उत्तरे ऊर्ध्वशब्दस्यैव मान्तत्वं निपात्यते' इति ।
ऊर्ध्वदेहाच्चेति । नात्र मान्तत्वम् ।
ऐहलौकिकमिति । पूर्ववदुभयपदवृद्धिः ।
मुखतीयम्, पार्श्वतीयमिति । मुख-पार्श्व-शब्दाभ्यां सप्तम्यान्ताभ्यामाद्यादित्वात्तसिः, तत ईयः, अव्ययत्वाट्टिलोपः । अयं गहादिपाठस्यैव प्रपञ्चः । एतेन परं व्याख्यातम् ।
मण्मीयाविति । गहादिषु `मध्यमध्यमं चाण् चरणे' इति यत्पठितं तत्र `पृथिवीमध्यवाची मध्यशब्दो गृह्यते' इत्युक्तम्, भवार्थे तु ततोऽन्यत्रापि मध्यमीयमिति यता स्यादिति मीयप्रत्ययवचनम् । जातादिषु पृथिवीमध्यवाचिन एव मध्यमीय इति भवति, न मध्यान्तरवाचिनः । तथा गहादिपाठेन पृथिवीमध्यं निवासा एषामित्यस्मिन्नेवार्थे माध्यमा इति सिध्यति, मध्यान्तरवाचिनो भवार्थेऽपि यथा स्यादिति मण् प्रत्यय उक्तः ।
मध्यो मध्यंदिनण् चास्मादिति । मध्यशब्दो मध्यभावमापद्यते दिनण्चास्मात् प्रत्ययो भवतीत्यर्थः ।
स्थाम्न इति । स्थामन्शब्दान्तादित्यर्थः । अश्वत्थामेति । अश्वस्येव स्थाम बलमस्येति बहुव्रीहिः, पृषोदरादित्वात्सकारस्य तकारः, ततो भवार्थे `स्थाम्नोऽकारः' इत्यकारः तस्मानेन लुक् ।
वृकाजिन इति । अणो लुक् ।
समानस्य तदादेश्चेति । आनन्तर्यत्वलक्षणा षष्ठी । अध्यात्मादिष्विति । विषयसप्तमी उर्ध्वन्दामाच्च देहाच्चेति । ऊर्ध्वंशब्दाद्दमशब्दान्ताच्चेत्यर्थः ।
ऊर्ध्वपूर्वादेव च देहान्तादिष्यते । उक्तं हि प्राक् `उर्ध्वदेहाच्च, और्ध्वदेहिकम्' इति । स्थाम्नो लुगजिनात्तथेति । पाठे उभयत्रापि तदन्तविधिः ।।
अशब्दे यत्खावन्यतरस्याम् ।। 4.3.64 ।।
वासुदेववर्गीय इति । `वृद्धाच्छः' इत्यस्य परत्वाद्यत्खौ बाधकाविति वृद्धादप्यनेन छ एषितव्यः ।।
तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः ।। 4.3.66 ।।
तस्येति षष्ठीसमर्थादिति । ननु चाधिकारार्थोऽयमिति वक्ष्यति, भव्याख्यानयोर्युगपदधिकारोऽपवादविधानार्थः, कृतनिर्देशौ हि ताविति, तत्किमित्यत्र यथाविहितविधानार्थत्वं व्याख्यायते ? उच्यते---तात्पर्यतोऽपवादविधानायाधिकारस्यानुषङ्गिकेऽणादिविधानार्थत्वे को दोष इति मन्यते, अगतिकगतिर्हि विशेषविवक्षायां सामान्याश्रयः प्रत्ययः । अत एव `कृतलब्धक्रीतकुशलाः' इत्यादीन्यनपवादान्यर्थादेशनानि भवन्ति । तत्र भवेचेति । अयमनुवादः; एतस्मिन्नेव विशेषे `तत्र भवः' इति विहितत्वात् । ननु च व्याख्यानस्य प्रत्ययार्थस्य समीपे श्रूयमाणश्चशब्दस्तत्समानजातीयस्यैव प्रत्ययार्थस्य समुच्चयं करोति, न समर्थविभक्तेः; यथा `केदाराद्यञ्च' इति प्रत्ययसमीपवर्त्तिना प्रत्यय एव समुच्चीयते, न प्रकृतिः; `ठञ्कवचिनश्च' इति प्रकृतेरेव न प्रत्ययः; ततश्चेह तस्येत्युपादानाद्भवार्थेऽपि षष्ठीसमर्थादेव प्रत्ययो युक्तः, तत्राह---वाक्यार्थसमीपे इति । इहेतिकरणः क्रियते---प्रकृतं वाक्यार्थं प्रत्यवमर्शामीति ।
प्रत्यवमर्शस्य च प्रयोजनम्---नत्तुल्यजातीयस्यैव समुच्चयो यथा स्यादित्येतदेवेति भावः । एतमेव च न्यायं निरूपयितुं पूर्वम् `तत्र भवे च' इत्यनुवादः कृतः ।
व्याख्यातव्यनाम्न इति किमिति । व्याक्यानशब्दस्य सम्बन्धिशब्दत्वाद्यप्रतिव्याख्यानं तदेव तस्येत्यनेन निर्दिष्टमिति गम्यत इति मत्वा प्रश्नः । पाटलिपुत्रं सुकोशलया व्याख्यायत इति नेयं कर्तरि तृतीया, किं तर्हि ? करणे सुकोशलया करणभूतया पुरुषैर्व्याख्यायत इत्यर्थः । कथमित्याह---एवंसन्निवेशमिति ।
तादृशो हि पाटलिपुत्रे प्राकारादिसन्निवेशो यादृशः सुकोशलायाम्, तेन तया तद्व्याख्यायते । यद्येवम्, तस्य व्याख्यातव्यस्य पाटलिपुत्रशब्दो नामापि भवति, तत्कथं प्रत्युदाहरणम् ? अत आह---न त्विति । यदिह व्याख्यातव्यमभिप्रेतम्, न तस्य नाम भवतीत्यर्थः । किं पुनरिहाभिप्रेतम् ? यद्व्याख्यातव्यतया लोके प्रसिद्धं ग्रन्थात्मकम्, एतदर्थमेव हि व्याख्यातव्यनामग्रहणं कृतम्, व्याख्यातव्यमात्रस्य व्याख्यानशब्दस्य सम्बन्धिशब्दत्वेनैवाक्षेपसिद्धेः । ननु च भवार्थमेतत्स्यात्, न हि तत्राक्षेपतो व्याख्यातव्यस्य लाभः ? एवं तर्हि नामग्रहणं प्रसिद्ध्युपसंग्रहार्थं भविष्यति ।
भवव्याख्यानयोरिति । नात्रायमर्थः---योऽयं भवव्याख्यानयोर्युगपदधिकारः सोऽपवादविधानार्थ इति; पूर्वमधिकारत्वस्याव्याख्याततत्वात् ।
तस्माद्भवव्याख्यानयोर्युगपदधिकारोऽयं न त्वणादीनामर्थनिर्देश इत्यर्थः । किमर्थोऽधिकारस्तत्राह---अपवादविधानार्थ इति । अणादीनां चायमर्थनिर्देशः कस्मान्न भवति ? तत्राह---कृतनिर्देशौ हि ताविति । एकः `तत्र भवः' इति, अपरः `तस्येदम्'---इत्येवं कृतनिर्देशौ हि तावर्थौ । तस्मात्तदर्थमेतन्न भवति ।
पूर्वं त्वधिकारार्थतयावश्यकर्त्तव्यस्यानुषङ्गिकमर्थनिर्देशार्थमिदमिति व्याख्यातम् ।।
बह्वचोऽन्तोदात्ताट्ठञ् ।। 4.3.67 ।।
अमोऽपवाद इति । वृद्धाच्छं तु परत्वाद्बाधते । सामस्तं नाम शास्त्रं तस्य व्याख्यानं सामस्तिकम् । षत्वादिविधायकं शास्त्रं षत्वादिशब्देनोच्यते । नतः = अनुदात्तः, अनतः = उदात्तः । अन्तोदात्ताः प्रकृतय इति । उदाहृतयोर्द्वित्वेऽप्येवञ्जातीयापरप्रकृत्यपेक्षं बहुवचनम्, ताश्च कुत्वरुत्वादयः ।
गतिस्वरेणेति । `गतिरनन्तरः' इत्यनेन । उदात्त इति वर्णग्रहणम्, तेन सिद्धस्तदन्तविधिः, यथा `वर्आदनुदत्ताद्' इत्यत्र । तस्मादन्तग्रहणं विस्पष्टार्थम् ।।
क्रतुयज्ञेभ्यश्च ।। 4.3.68 ।।
अग्निष्टोमाद्यर्थेषु मन्त्रब्रह्मणकल्पेषु वर्त्तमाना अग्निष्टोमादिशब्दा इहोदाहरणम् । अनन्तोदात्तार्थ आरम्भ इति । तत्र राजसूय---वाजपेयशब्दौ कृदुत्तरपदप्रकृतिस्वरेण मध्योदात्तौ, राजा सूयते, राज्ञा वेह सूयते, वयप्; तत एव निपातनात्समासः, षष्ठीसमासो वा । पीयतेऽस्मिन्निति पेयः `कृत्यल्युटो बहुलम्' इत्यधिकरणे यत्; वाजो यवागूभेदः, तस्य पेयः पायो वाजपेय इति । स्तुतिः=स्तोमः, अग्नेस्तोमोऽस्मिन्निति बहुव्रीहिः, `परादिश्च परान्तश्च'

इत्यन्तोदात्तः । नवैर्व्रीहिभिर्यजनं नवयज्ञः= आग्रयणम्, `कर्तृकरणे कृता बहुलम्' इति समासः, `कृदुत्तरपदप्रकृतिभावेन नञ एव स्वरोऽवतिष्ठते' इत्यन्तोदात्तः । अल्प पर्यायः पाकशब्दः, पाकश्चासौ यज्ञश्च पाकयज्ञः, समासस्वरेणान्तोदात्तः । सत्यन्यार्थ एतस्यारम्भे, अन्तोदात्तादपि यज्ञाभिधायिनः परत्वादनेनैव ठञ्प्रत्ययो युक्त इत्यन्तोदात्तानामुपन्यासः ।

क्रतुभ्य इत्येव सिद्ध इति । क्रतुयज्ञयोः पर्यायत्वादिति भावः । असोमयागेभ्योऽपीति । अन्यथा क्रतुशब्दस्य सोमयागे रूढत्वादन्यत्र न स्यात्, यज्ञग्रहणात्तु तेभ्योऽपि भवति । एवं केवलयज्ञग्रहणेऽपि स एव दोषो यः केवलकतुग्रहणे, तस्माद् गौणमुख्यपरिग्रहार्थमुभयोरुपादानम् ।।

अध्यायेष्वेवर्षेः ।। 4.3.69 ।।

अषिशब्दाः प्रवरनामधेयानीति । होत्राध्वर्युणा च प्रव्रियन्त इति प्रवराः = भृग्वादयः, तद्यथा भार्गवच्यावनाप्रवानौर्वजामदग्नेति होता, जमदग्निवदुर्ववदप्रवानवच्च्यवनवद्भृगुवदित्यध्वर्युः । एतेन यद्यपि मन्त्रदर्शिष्वृपिशब्दः प्रसिद्धः, तथापि प्रवराद्यायपठितानामे ग्रहणमिति दर्शयति । वसिष्ठस्य व्याख्यान इति । वसिष्ठेन दृष्टो मन्त्र उपचाराद् वसिष्ठ इत्युक्तः ।

वासिष्ठी ऋगिति भवार्थेऽण्, एवकारः सर्ववाक्यानां सावधारणत्वज्ञापनार्थः ।।

पौरोडाशपुरोडाशात्ष्ठन् ।। 4.3.70 ।।

पुरोडाशाः पिष्टपिण्डा इति । `दाश्रृ दाने' कर्मणि घञ्, पुरो दाश्यन्ते दीयन्त इति पुरोडाशाः, पृषोदरादित्वात्समासः, दकारस्य च डकारः, एतेनैतदाह--- आकृतिवचनः पुरोडाशशब्दः, न यूपाहवनीयादिवददृष्टनिमित्त इति । तेषां संस्कारको मन्त्र इति । `मखस्य शिरोऽसि' इत्येवमादिः । पुरोडाशसहचरितो मन्त्रः पुरोडाश इति । मन्त्र एव हि व्याख्यातव्यो न पुरोडाशः ।।

छन्दसो यदणौ ।। 4.3.71 ।।

अत्र भवव्याख्यानौ द्वावर्थौ, यदणौ प्रत्ययावपि द्वावेव, तथापि यथासंख्यं न भवति; `तस्य व्याख्याने' इति यदणौ भवतः, `तत्र भवः' इति चेत्येवं समुच्चयात् । द्व्यच इति ठकि प्राप्त इति । उत्तरसूत्रे द्व्यज्ग्रहणेन ठकि प्राप्त इत्यर्थः ।।

द्व्यजदब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट् ठक् ।। 4.3.72 ।।

अणादेरपवाद इति । आदिशब्देन ठञः । तत्र ऋक्छब्धे द्व्यक्षु चाणोऽपवादः, पुरश्चरणशब्दोऽपि ल्युडन्तः कृदुत्तरपदप्रकृतिस्वरेण मध्योदात्तः । असिप्रत्ययो हि सप्तम्यन्तादुत्पद्यत इति पुरः शब्दः कारकम्, `पुरोऽव्ययम्' इति वा गतिः । तेन तस्मादप्यण एवापवादः । ब्राह्मणादिष्वन्तोदात्तेषु ठञोऽपवादः, ऋकारान्तेष्वप्यणोऽपवादः । ये तु तत्र बह्वचोऽन्तोदात्तास्तेषु परत्वादयं ठञं बाधते । नामाख्यातग्रहणं सङ्घातविगृहीतार्थमिति । आख्यातार्थं विगृहीतग्रहणम्, नामशब्दात्तु द्व्यच्त्वादेव सिद्धम् ।।

अणृगयनादिभ्यः ।। 4.3.73 ।।

ठञादेरिति । आदिशब्देन ठकः छस्य च ग्रहणम् । तत्र विद्यान्यायशिक्षाशब्देभ्यो द्व्यज्लक्षणस्य ठकोऽपवादः, व्याकरणशब्दाद् वृद्धाच्छस्य, शेषा बह्वचोऽन्तोदात्ताः, तेष्वञः । अथाण्ग्रहणं किमर्थम्, न ऋगयनादिभ्यो यथाविहितमेवोच्येत, वचनप्रामाण्याद्यो विहितो न च प्राप्नोति अन्येन बाधितत्वात्, स एवाण् भविष्यति ? अत आह--अण्ग्रहणमिति । असत्यण्ग्रहणे यद् वृद्धमन्तोदात्तं बह्वच, यथा---बास्तुविद्येति, तस्माद् वृद्धाच्छे ठञा बाधिते पुनर्वचनाच्छ एव स्याद्, अण्ग्रहणात्त्वणेव भवति ।

ऋगयनमिति । `पूर्वपदात्संज्ञायामगः' इति णत्वं न भवति, `अगः' इति प्रतिषेधात् । अयनशब्दश्च भावसाधनोऽभेदोपचाराद् ग्रन्थे वर्तते, `अनो भाव कर्मवचने' इत्यन्तोदात्तः । पदव्याख्यानशब्दः `मन्क्तिन्व्याख्यान' इत्यन्तोदात्तः । छन्दोमानशब्द ऋगयनशब्देन व्याख्यातः । छन्दो भावेति कृत्स्वरेणान्तोदातः । छन्दोविचितिशब्दो मन्क्तिन्नित्यन्तोदात्तः । पुनरुक्तशब्दस्थाथादिस्वरेण । निरुक्तशब्दः `संज्ञायामनाचितादीनाम्' इति । निगमशब्दो गोचरादिसूत्रे घान्तो निपातितोऽन्तोदात्तः । वास्तुविद्या, क्षत्त्रविद्या, अङ्गविद्येति समासस्वरेण । उत्पातोत्पादशब्दौ थाथादिस्वरेण । अशेः सरन्, वसेः सम्पूर्वाच्चिदिति संवत्सरशब्दोऽन्तोदात्तः । मुहूर्त्तनिमित्तशब्दौ प्रातिपदिकस्वरेण । उपनिपूर्वात्सदेः क्विप्, उपनिषच्छब्दः कृत्स्वरेणान्तोदात्तः ।।

तत आगतः ।। 4.3.74 ।।

तत इति मुख्यं यदपादानं विवक्षितं तदिह गृह्यत इति । मुख्यत्वादेव । अपादानसंज्ञा तु नान्तरीयकस्यापि भवति, कारकप्रकरणे हि गौणमुख्यविबागो नाश्रीयते ।।

ठगायस्थानेभ्यः ।। 4.3.75 ।।

आय इति स्वामिग्राह्यो भाग इति । एत्येनं स्वामी, स्वामिनां वाऽयमेतीति कृत्वा ।।

शुण्डिकादिभ्योऽण् ।। 4.3.76 ।।

आयस्थानठकोऽपवाद इति । उपलक्षणमेतत् । कृकणशब्दात् `कृकणपर्णाद्भारद्वाजे' इति छस्याप्यपवादः । तीर्थशब्दाद् धूमादिलक्षस्य वुञोऽप्यपवादः । उदपानशब्दादुत्साद्यञोऽप्यपवादः ।

अथाण्ग्रहणं किमर्थं न शिण्डिकादिभ्यो यथाविहितमेवोच्येत, वचनसामर्ध्याद्धि, यो विहितो न च प्राप्नोति अन्येन बाधितत्वात्, स एवाण् भविष्यति ? अत आह---अण्ग्रहणमिति । उदपानशब्द इह पठ्यते, स चोत्सादिः तत्रासत्यण्ग्रहणे आयस्थानठकंबाधित्वा `उत्सादिभ्योऽञ्' इत्यञेव स्यात् ।

अण्ग्रहणात्त्वेणेव भवति ।।
विद्यायोनिसम्बन्धेभ्यो वुञ् ।। 4.3.77 ।।
विद्यायोनिकृत इति । बहुव्रीहौ गतार्थत्वात्कृतशब्दस्याप्रयोगः ।।
ऋतष्ठञ् ।। 4.3.78 ।।
एषूदाहरणेषु `इसुसुक्तान्तात्कः' । एवं च प्रक्रियालाघवाय कञेवायं विधेयः, तथा तु न कृतमित्येव ।।
पितुर्यच्च ।। 4.3.79 ।।
पित्र्यमिति । `रीङृतः', `यस्येति च' ।
गोत्रादङ्कवत् ।। 4.3.80 ।।
ऋङ्गग्रहणेन तस्येदमित्यर्थसामान्यं लक्ष्यत इति । कथं मुख्ये सम्भवति लक्षणाश्रीयते ? व्याख्यानमत्र शरणम् । अपर आह---अङ्के यद् दृष्टं तदतिदिश्यते, न त्वङ्क आहत्य विहितम् । `गोत्रचरणाद् वुञ्' इत्ययमपि वुञ् तस्येदमिति सामान्ये विहितोऽप्यञादिव्यतिरिक्ते विषयेऽङ्केऽपि दृष्ट इति तस्याप्यतिदेश इति । औपगवकमिति । वुञ उदाहरणम् । अणस्तु---वैदम्, गार्ग्यम्, दाक्षमिति । वतिः सर्वसादृश्यार्थः, `कालेभ्यो भववत्', `चरणेभ्यो धर्मवत्' इति यथा ।।
हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ।। 4.3.81 ।।
समादागतमिति । समाद्धेतोरागतमित्यर्तः । तत्र `हेतौ' इति तृतीया प्राप्नोति, ज्ञापकत्सिद्धम्, यदयं पञ्चम्यन्ताद्धेतोः प्रत्ययमाह तज्ज्ञापयति---भवति हेतौ पञ्चमिति । नैतदस्ति ज्ञापकम्, यत्र `विभाषा गुणे' इति पञ्चमी, तदर्थमेतत्स्यात्---जाड्यादागत इति ? तस्मात् `विभाषा गुणे' इत्यत्र विभाषेति योगविभागादगुणवचनादपि पञ्चमी भवति ।।
मयट् च ।। 4.3.82 ।।
योगविभागो यथासंख्यनिरासार्थ इति । विकल्पार्थेनान्यतरस्यां ग्रहणेन रूप्यमयटोः पक्षेऽभावः प्रतिपाद्यते, तदभावे स्वशास्त्रेणैव प्राप्तः प्रत्ययो भवति । तेन रूप्यमयटोरेवानेन विधानादसति योगविभागे स्यादेव यथासङ्ख्यमिति भावः ।।
प्रभवति ।। 4.3.83 ।।
प्राकाशते इति । उत्पत्तिवचनस्तु प्रभवतिर्न गृह्यते; `तत्र जातः' इत्यनेन गतत्वात्।।
विदूराञ्ञ्यः ।। 4.3.84 ।।
अयुक्तोऽयं निर्देश इत्याह---ननु चेति ।
वालवायो विदूरं चेति । वालवायशब्दः प्रत्ययमुत्पादयति, विदूरं चादेशमापाद्यते, सूत्रे त्वादेश एव निर्दिष्टः, तेनानुरूपः स्थानी वालवायशब्द आक्षिप्यते, यथा---शिवादिषु विश्रवणरवणेत्यादेशाभ्यां पठिताभ्यां विश्रवः शब्दः । प्रकृत्यन्तरमेव वेति । विदूरशब्दो नगरस्येव पर्वतस्यापि वाचकः, स एवात्र प्रकृतिरित्यर्थः । न वै तत्रेति चेदिति । चेच्छब्दोऽक्षमायाम्, पर्वतवाची विदूरशब्दो न प्रसिद्ध इति चेद् ब्रूयात्स जित्वरीवदुपचारेत् = व्यवहरेत्, यथा---वणिज एव मङ्गलार्थ वाराणसीं जित्वरीति व्यवहरन्ति, एवं वैयाकरणा एव वालवायं विदूरमुपचरन्ति । नियतपुरुषापेभापि प्रसिद्धिर्भवतीत्यर्थः ।
तद्गच्छति पथिदूतयोः ।। 4.3.85 ।।
प्राप्तिफले परिस्पन्दे गमिर्वर्तते, न च पथः परिस्पन्दोऽस्ति तस्मात्पुरुषवर्त्ति गमनं पथ्युपचर्यत इत्याह---तत्स्थेष्विति । अथवेति । प्राप्तावपि गमिर्वर्वते, यथा देवभूयङ्गत इति ।।
अभिनिष्क्रामति द्वारम् ।। 4.3.86 ।।
द्वारमभिनिष्कमणक्रियायामिति । अनेनैतदाह---तत्स्थेष्वभिनिष्क्रामत्सु करणभूते द्वारे तदारोपाद् द्वारमेवाभिनिष्क्रामतीत्युच्यत इति । अभिनिष्क्रमणं द्वारमिति नोक्तम् ; तदिति द्वितीयाधिकारात्, तदा हि कृद्योगलक्षणा षष्ठी प्राप्नोति ।।
अधिकृत्य कृते ग्रन्थे ।। 4.3.87 ।।
आख्यायिकाभ्य इति । तादर्थ्ये चतुर्थी, आख्यायिका=गद्यग्रन्थप्रभेदः, तदभिधानाय यः प्रत्यय उत्पन्नस्तस्य बरुलं लुब् भवतीत्यर्थः । न चेदं वक्तव्यम्, अभेदोपचारेण ताच्छब्द्यलाभाद् अभिधानलक्षणत्वाच्च क्वचित्तद्धित्त उत्पद्यते, क्वचिन्न ।।
शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः ।। 4.3.88 ।।
इन्द्रजननादिराकृतिगण इति । तेन `विरुद्धभोजनीयमध्यायं व्याख्यास्यामः' इति सिद्धं भवति ।।
सोऽस्य निवासः ।। 4.3.89 ।।
इह यस्य स्रुघ्नो निवासः स्रुघ्नेऽसौ भवति, ततः `तत्र भवः' इत्येव सिद्धम्, शब्दार्थभेदात्तु पृथगुपादानम् ।।
अभिजनश्च ।। 4.3.90 ।।
अभिजनाः पूर्वबान्धवा इति । अभिजायते तेभ्य इति कृत्वा, पूर्वबान्धवाः=पित्रादयः । बन्धुशब्दः प्रज्ञादिः । तत्सन्बन्धादेशोऽपीति । यथा

यष्टिसम्बन्धाद्यष्टिशब्दः पुरुषे वर्तते, तथाभिजनशब्दो देशे । कः पुनरसौ देशः ? इत्याह यस्मिन्निति । तदिहेत्यादि । तदिति वाक्योपन्यासे । कथं पुनर्मुख्येऽभिजने सम्भवति गौणात्प्रत्ययो भवति ? इत्याह---निवासप्रत्यासत्तेरिति । प्रत्यासन्नेनानन्तरसन्निहितेन निवासशब्देनाभिजनस्य विशेषणादित्यर्थः । इह हि निवासे योऽभिजन इति विशेषिते, तस्माद् देशवाचिन एव प्रत्ययः ।

निवासाभिजनयोः को विशेष इति । अभिजनस्यापि निवासभूतस्य ग्रहणान्नास्त्येव विशेष इत्यर्थः । तत्रेति । यत्र स्वयं निवसति स तस्य निवासः । यत्र तु पूर्वैः पित्रादिभिरुषितं सोऽभिजन इत्यर्थः ।

आयुधजीविभ्यश्छ पर्वते ।। 4.3.91 ।।

आयुधजीविभ्य इति तादर्थ्ये चतुर्थीत्यादि । यदि तु `आयुधजीविभ्यः' इति पञ्चमीस्यात्, पर्वतादिति ल्यब्लोपे पञ्चमी व्याख्येया स्यात्, ततश्चायमर्थः स्यात् आयुधजीविभ्यः पर्वतमुद्दिश्य पर्वतेऽभिधेये छो भवतीति, तत्र सोऽभिजन इत्यधिकारो बाध्यते ।।

शण्डिकादिभ्यो ञ्यः ।। 4.3.92 ।।

अणआदेरपवाद इति । आदिशब्देन छादेः । तत्र यदि शण्डिकादयः पर्वतशब्दाः, ततः पूर्वेण छः प्राप्तः; अथ जनपदशब्दाः, ततो `अवृद्धादपि बहुवचनविषयात्' इति वुञ्, शण्डिकाशब्दात्कोपधादण् प्राप्तः ।।

सिन्धुतक्षशिलादिभ्योऽणञौ ।। 4.3.93 ।।

सिन्धुवर्णुप्रभृतय इति । प्रभृतिशब्देन मधुमत, कम्बोज, साल्व, कश्मीर, गन्धार---इत्येते गृह्यन्ते । किष्किन्धादिभ्यश्चतुर्भ्यः `अवृद्धादपि' इति वुञि प्राप्ते वचनम् । तक्षशिलादिष्वपि वृद्धेभ्यश्छः प्राप्तः, शेषेभ्यः `प्राग्दीव्यतोऽण्' ।।

अचित्ताददेशकालाट्ठक् ।। 4.3.96 ।।

अचित्तवाचिन इति । स्वरूपग्रहणं तु न भवति, देशकालप्रतिषेधात् । तत्साहचर्याद्देशकालयोरपि स्वरूपग्रहणं न भवति ।।

वासुदेवार्जुनाभ्यां वुन् ।। 4.3.98 ।।

छाणोरपवाद इति । `वासुदेवशब्दः संज्ञा' इति वक्ष्यति, तेन तत्रोत्तरस्य वुञोऽप्राप्तिः । अर्जुनशब्दोऽपि यो वृक्षविशेषवचनो वणविशेषवचनो वा, न तत्र वुञः प्राप्तिः; क्षत्त्रियवचनादपि बहुलवचनाद् वुञोऽप्राप्तिरेवेति भावः ।

ननु चेत्यादि । वसुदेवस्यापत्यम्, `ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यण् । न चात्रेति । न तावद् वृद्धौ विशेषः; प्रागेव वृद्धत्वात् । योऽपि `वृद्धिनिमित्तस्य' इति पुंबद्भावप्रतिषेधः, सोऽस्यापि `न कोपधायाः' इत्यसत्येव । संज्ञेषा देवताविशेषस्येति । वसत्यस्मिन्सर्वमिति व्युत्पत्त्या परमात्मन एषा संज्ञा । न क्षत्त्रियाख्येति । उपलक्षणमेततत, नापि गोत्राशख्येत्यपि द्रष्टव्यम् ।

प्रासङ्गिकं प्रयोजनान्तरं वासुदेवग्रहणस्य दर्शयति---अजाद्यदन्तम्, अल्पाच्तरमिति चेति । इतिकरणः प्रत्येकमभिसम्बद्ध्यते । यद्यप्येतज्ज्ञाप्यते, तथापि `श्वयुवमघोनामतद्धिते' इति निर्देशात्क्वचिदन्यथापि भवति ।।

गोत्रक्षत्त्रियाख्येभ्यो बहुलं वुञ् ।। 4.3.99 ।।

गोत्रक्षत्रियाख्येभ्य इति । आङ्पूर्वात्ख्यातेर्मूलविभुजादित्वात्कः । आख्याग्रहणमिति । आङ्पूर्वस्य ख्यातेग्रहणमित्यर्थः । यथाकथञ्चिदिति । क्षत्त्रियशब्दसामानाधिकरण्याद्येषां क्षत्त्रिये वृत्तिः, यथा---शूरः क्षत्त्रिय इति, तेभ्यो मू भूदित्यर्थः ।।

जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने ।। 4.3.100 ।।

जनपदिनाम् जनपदिवाचिनां शब्दानाम् जनपदवत् जनपदवाचिनां शब्दानामिव, जनपदेन जनपदवाचिना शब्देन, समानशब्दानाम् समनश्रुतीनाम्, बहुवचने बह्वर्थाभिधाने । वृत्तेरप्येष एवार्थः । प्रत्ययः प्रकृतिश्चेति । अनेन सर्वशब्दस्यार्थो दर्शितः । जनपदिनो जनपदस्वामिन इति । स्वस्वामिभावसम्बन्धे मत्वर्थीयं दर्शयति । अङ्गा जनपदा इत्यादिना दृष्टान्ते प्रवृत्तिप्रकारमाह । तद्वदित्यादिना तूदाहरणम् । सर्वत्र बहुष्वर्थेषु `द्व्यञ्मगध' इत्यादिना विहितस्याणः `तद्राजस्य बहुषु' इति लुकि कृते समानशब्दादवृद्धादपि बहुवचनेति वुञि विवक्षिते `गोत्रेऽलुगचि' इति वचनादाङ्गशब्दाद् वुञ् । पञ्चाला ब्राह्मणा इति । अभेदोपवाराद् ब्राह्मणेषु पञ्चालशब्दस्य वृत्तिः, तत्रातिधेशाभावादणेव भवति ।

सर्वग्रहणमित्यादि । असति सर्वग्रहणे प्राधान्यात्प्रत्ययस्यैवातिदेशः स्यात्, न प्रकृतेः । वतिनिर्देशस्तु यैर्जनपदैर्ये जनपदिनस्तेषां तज्जनपदप्रत्यय एव यथा स्यात्, जनपदान्तरप्रत्ययो मा भूदित्येवमर्थं स्यात् । न त्वेनन प्रकृत्यतिदेशो लभ्यते, तस्मात्तदर्थं सर्वग्रहणं क्रियते । स च द्व्येकयोः प्रयोजयतीति पाठः । स च प्रकृत्यतिदेशः सर्वग्रहणं द्व्येकयोः प्रयोजयति, न बहुषु; तत्र रूपस्या भिन्नत्वात् । यदाह---`बहुवचने समानशब्दानाम्' इति । द्व्येकयोस्तु जनपदवाचिनो रूपं वृद्धम्, जनपदवाचिनस्त्ववृद्धमिति तत्रैव सर्वग्रहणस्य प्रयोजनमित्यर्थः । अतिदेशः प्रयोजयति, अतिदेशं प्रयोजयतीति वा पाठे न समीचीनमर्थं पश्यामः । वृद्धिनिमित्तेष्वित्यादि । तत्र ह्यतिदिष्टेऽपि प्रकृतिरूपे पुनर्वृद्ध्या भाव्यमिति नास्ति वेशेषः ।

मद्रवृज्योः कति विशेष इति । तत्र वृद्ध्यसम्भवात् । प्रकृतिनिर्ह्रासे कृत इति । निर्ह्रासः=अपचयः, अल्पत्वमित्यर्थः । मद्रकः, वृजिक इति । असति तु प्रकृत्यतिदेशे माद्रकको वार्ज्यक इति स्यात् ।

बहुवचनग्रहणमित्यादि । समानशब्दताया यो विषयस्तस्य लक्षणं प्रदर्शनं तदर्थम् । अन्यथा हीति । यदि बहुवचनग्रहणं न क्रियते । यत्रैवेति । बहुवचने, तत्रैव हि तद्राजस्य लुकि कृते समानशब्दता भवति । एकवचनद्विवचनयोर्न स्यादिति । लुगभावेन समानशब्दताया अभावात् । ननु सर्वग्रहणं प्रकृत्यतिदेशार्थम्, स च द्व्येकयोः प्रयोजयतीत्युक्तम्, तत्कथं द्व्येकयोर्न स्यात् ? तस्मात् सर्वग्रहणाध्यत्र क्वचित्समानशब्दानां सर्वत्रातिदेशः सिद्धः ।

अस्यैवार्थस्य विशपष्टप्रतिपत्त्यर्थम् `बहुवचने' इत्युपलक्षणमुपात्तम् ।।

तेन प्रोक्तम् ।। 4.3.101 ।।

प्रकर्षेणोक्तमिति । अध्यापनेनार्थव्याख्यानेन वा प्रकर्षेणाप्रकाशितमित्यर्थः । प्रकर्षेणेति वचनाद् ग्रामे ग्रामे यद्यपि काठकादिकं देवदत्तादिभिः प्रोच्यते, तथापि तेभ्यः प्रत्ययो न भवति । न तु कृतमिति । प्रपूर्वो वचिः करणेऽपि वर्तते इति भावः । मधुरायां भवो माधुरः, ततो वृद्धाच्छे प्राप्ते `कलापिनोऽण्' इत्यण्ग्रहणादधिकविधानार्थादणप्रत्ययः । पाणिनीयमिति । स्वयमन्येन वा कृतं यत्पाणिनिना प्रोक्तं तदुच्यते ।।

तित्तिरिवरतन्तुखण्डिकोखाच्छण् ।। 4.3.102 ।।

छन्दसि चायमिष्यत इति । छन्दस्यभिधेय इत्यर्थः । तित्तिरिणा प्रोक्तः श्लोक इत्यत्र न भवतीति । न केवलं छणेव, अपि त्वणपि न भवत्यनभिधानादित्याहुः । कथं पुनरिष्यमाणोऽपि छन्दसि लभ्यः ? इत्याह---शौनकादिभ्य इति ।

कास्यपकौशिकाभ्यामृषिभ्यां णिनिः ।। 4.3.103 ।।

णकार उत्तरत्र वृद्ध्यर्थ इति । इह तु पूर्वमेव वृद्धे सिद्धत्वात् । योऽपि `वृद्धिनिमित्तस्य' इति पुंवद्भावप्रतिषेधः, सोऽपि न प्रयोजनम्, णिन्यन्तस्याध्येतृवेदितृविषयत्वेन स्त्रियामवृत्तेः । वृत्तावपि `जातेश्च' इति सिद्धत्वात्, चरणत्वेन जातित्वात् । तस्यापि चेति । कथं छन्दोब्राह्मणानामुच्यमाना तद्विषयता कल्पस्य भवति ? तत्राह---शौनकादिभ्य इति । ननु च तत्रानुवृत्तौ सत्यामप्यस्य योगस्य न कल्पः छन्दो भवति, नापि ब्राह्मणम् ? अत आह---छन्दोऽधिकारविहितानां चेति । `छन्दोब्राह्मणानि' इत्यत्र छन्दोग्रहणं स्वर्यते, तत्र स्वरितेनाधिकारावगतिर्भवतीति छन्दः प्रकरणमध्यपातिनोऽस्यापि णिनेस्तद्विषयता भवतीत्यर्थः । यत्तु `छन्दोब्राह्मणानि' इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वमाश्रित्य कल्पादेस्तद्विषयत्वप्रतिपादनम्, तत्प्रकारान्तरं द्रष्टव्यम् । इदानीन्तनेन गोत्रकाश्यपेनेति । न ह्यसावृषिः; अमन्त्रदर्शित्वात् ।।

कलापिवैशम्पायनान्तेवासिभ्यश्च ।। 4.3.104 ।।

कलाप्यन्तेवासिनामित्यादि । सूत्रे त्वभेदोपचाराश्रयो निर्देशः । कलाप्यन्तेवासिनश्चत्वार इत्यादि । ननु च शिष्यशिष्येष्वपि शिष्यव्यवहारो लोके दृश्यते, तत्कथमियन्त एवेति नियमः ? तत्राहप्रत्यक्षकारिण इति । क्रियासामान्यवचनः करोतिः प्रकरणआदिहाध्ययने वर्तते । कलापिखाण्डायनग्रहणादिति । एतदेव विवृणोति---तथा हीति । वैशम्पायनस्यान्तेवासी कलापी, यदि चान्तेवास्यन्तेवासिनोऽपि गृह्येरन्, कलापिग्रहणमनर्थकम्, `वैशम्पायनान्तेवासिभ्यः' इत्येव सिद्धम् ; कलाप्यन्तेवासिनामपि वैशम्पायनान्तेवासित्वात् । तथा वैशम्पायनान्तेवासी कठः, कठान्तेवासी खाण्डायनः, तत्र व्यवहितानामपि ग्रहणे वैशम्पायनान्तेवासित्वादनेनैव सिद्धे शौनकादिषु खाण्डायनशब्दस्य पाठो निष्फलः स्यात् । उदाहरणेषु छन्दोब्राह्मणानीति तद्विषयता, अध्येतृप्रत्ययस्य `प्रोक्ताल्लुक्' इति लुक् ।

उलपेन चतुर्थेनेति । सहयोगे तृतीया । कलापिन इदं कालापकम्, `गोत्रचरणाद् वुञ्' । तत्र `धर्माम्नाययोः' इति पठ्यते, तस्मादिहोपमानाच्छिष्यसमूहे प्रयोगः । आलम्बिश्चरकः प्राचामिति । आलम्बिर्नाम प्राचां देश उत्पन्नश्चरकस्य शिष्यः । एवं फलिङ्गकमलावुभौ प्राचामेव त्रय एते प्राच्या उक्ताः । कठकला पिनोरिति । `कठचरकाल्लुक्' इति कठाल्लुगुक्तः । कलापिशब्दादपि `कलापिनोऽण्' त्यणुक्तः ।।

पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ।। 4.3.105 ।।

भाल्लविन इत्यादि । भल्लु, शाट्यायन, ऐतरेय, पिङ्ग, अरुण, पराजि इत्येतेभ्यो णिनिः ।

यज्ञवल्काश्मरथशब्दौ कण्वादी, ताभ्यां यञन्ताभ्यामपि `आपत्यस्य' इति यलोपः । ननु च याज्ञवल्कादीन्यपि पुराणप्रोक्तान्येव, शाट्यायनकादिभिर्ब्राह्मणान्तरैस्तुल्यकालत्वात् ? इत्यत आह---याज्ञवल्क्यादयो हीति । आख्यानानि=भारतादीनि । तया व्यवहरतीति । अर्थस्तु तथा वा भवत्वन्यथा वेति भावः । तद्विषयता कस्मान्न भवतीति । याज्ञवल्कादिविषयः प्रश्नः, `छन्दोब्राह्मणानि च' इत्यत्र पुराणप्रोक्तत्वविशेषस्यानाश्रयणात्प्राप्नोतीति भावः । प्रातपदमिति । एतल्लक्षणप्रतिपदोक्तपरिभाषया लभ्यते । एतदर्थमेव च तत्र ब्राह्मणग्रहम्; छन्दस्त्वादेव सिद्धेः ।

कल्पेषु तर्हि कस्मान्न भवति यथा---काश्यपिनः, कौशिकिन इत्यत्र ? इत्यत आह---न वायमिति । युक्तं तत्र छन्दोऽधिकारे तस्य योगस्यानुवृत्तेः, अयं तु न तथेति कल्पेष्वपि तद्विषयता न भवतीत्यर्थः । न चात्यन्तबाधैवेति । `सिद्धशुष्कपक्वबन्धैश्च' इति निपातनादेव सिद्धे, `शुषः कः' `पचो वः' इति लिङ्गम्---`बाधकान्यपि निपातनानि भवन्ति' इति । यथा तु सर्वादिसूत्रे `भाष्यम्, तथा `अन्यपराण्यपि निपातनानि बाधकान्येव' इति स्थितम् ।।

कलापिनोऽण् ।। 4.3.108 ।।

यथाविहितमेवोच्येतेति । तत्र वचनसामर्थ्याद्यो विहितो न च प्राप्नोति स एवाण् भविष्यतीति भावः । एवमादीनीति । आदिशब्देन मौदाः, पैप्पलादाः, शाकला इत्येतेषां ग्रहणम्। अत्र मुद-पिप्पलादःशाकल्य---इत्येतेभ्यः `पुराणप्रोक्तेषु' इति णिनेरपवादोऽण्भवति ।।

पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।। 4.3.110 ।।

तदर्थं छन्दोग्रहणमनुवर्त्त्यमिति । ननु तदनुवृत्तावपि कथं भिक्षुनटसूत्रयोश्छन्दस्त्वम् ? तत्राह---गुणकल्पनय चेति । उपचारस्य निमित्तभूतो धर्मो गुणो गुरुशुश्रूपणादिः, तन्निमित्ता कल्पना गुणकल्पना । पाराशरिण इति । पूर्ववद्यलोपः । शैलालिन इति । शिलामलते इति शिलाली, `अलं भूपणपर्याप्तिवारणेषु' इत्येतस्मात् `सुप्यजातो' इति णिनिः, ततोऽस्मिन् णिनौ टिलोपः ।

पाराशरमिति । कण्वाद्यण् । शैलालमिति । औत्सर्गिकेऽणि `नान्तस्य टिलोपे सब्रह्मचारि' इत्यादिना टिलोपः ।।

तेनैकदिक् ।। 4.3.112 ।।
सौदामनीति । `अन्' इति प्रकृतिभावः । सुदामादयः=पर्वतविशेषाः ।।
तसिश्च ।। 4.3.113 ।।
स्वरादिपाठादव्ययत्वमिति । तस्मिन्नेवार्थे विधईयमानस्याप्यस्य लिङ्गसंख्यानुपादानमपि स्वाभाविकं वेदितव्यम् ।।
उपज्ञाते ।। 4.3.115 ।।
विनोपदेशेन ज्ञातमुपज्ञातमिति । उपपूर्वो जानातिस्तत्र प्रसिद्ध इति भावः । अकालकमिति । आन्याय्यादुत्थानादित्यादिकालपरिभाषारहितमित्यर्थः । गुरुलाघवं नामार्थशास्त्रम्, यत्रोपायानां गौरवं लाघवं चिन्त्यते । `दूषू' इत्ययं सङ्केतशब्दो यत्र क्रियते, यथा पाणिनीये `वृत्' इति, तद् दुष्करणं व्याकरणम्; कामशास्त्रमित्यन्ये ।।
कृते ग्रन्थे ।। 4.3.116 ।।
`तित्तिरिवरतन्तु' इत्यादीनि सूत्राण्यत्र प्रकरणे न पठितानि । तित्तिर्यादयो हि छन्दसां प्रवक्तारो न कर्त्तारः; नित्यानि हि छन्दांसि न केनचित्क्रियन्ते ।।
संज्ञायाम् ।। 4.3.117 ।।
अग्रन्थार्थमिदम् ।।
क्षुद्राभ्रमरवटरपादपादञ् ।। 4.3.119 ।।
अणोऽपवाद इति । बाहुल्यादेवमुक्तम्, पादपशब्दाद्धि छः प्राप्नोति । अन्ये तु पादपशब्दस्य स्थाने पदपशब्दं पठन्ति ।।
तस्येदम् ।। 4.3.120 ।।
`तस्या पत्यम्' इत्यत्रोक्तमेवार्थं स्मारयति---प्रकृतिप्रत्ययार्थयोरित्यादि । प्रकृतौ षष्ठ्यर्थमात्रं विवक्षितम्, प्रत्ययार्थेऽपि तत्सम्बन्धिमात्रं यद्योगात्षष्ठी, तस्मिन्निभिधेये प्रत्ययः । मात्रशब्दव्यवच्छेद्यं दर्सयति---यदपरमिति । इदं शब्दः प्रत्यक्षवचंनः, तच्छब्दः परोक्षवचनः । आदिशब्देन सामान्याभिधायित्वं गृह्यते । तत्सर्वमविवक्षितमिति । अत्र कारणम् `तस्यापत्यम्' इत्यत्रैवोक्तम् ।
वहेस्तुरिति । तृन्तृचोः सामान्येन ग्रहणम् । सावहित्रमिति । ढत्वादीनामसिद्धत्वात्पूर्वमिहेटि कृते निमित्ताभावात्तेषामभावः ।
अग्नीध इति । अग्निमिन्ध इति क्विप्, अग्नीत् `ऋत्विग्विशेषः । `त्वमग्निदृतीयते' इत्यत्र तुछान्दसंह्रस्वत्वम् । शरणम्=गृहम्, स्थानम्, यत्राग्नीध्रीयं धिष्ण्यं तदाग्नीध्रम्, तात्स्थ्यात्तु मञ्चाः क्रोशन्तीतिवदृत्विजि प्रयोगः कल्पसूत्रकाराणाम्---`प्रत्याश्रावयेदाग्रीधः आग्नीध्रं पोतारं ब्रह्मणः' इति । छप्रत्ययं च ततः शरणे कुर्वन्ति, `आग्नीध्रीयसकाशमुत्तरेणाग्नीध्रीयं धिष्ण्यं परीत्य' इति शरणवचनाच्छः ।
समिधामाधान इति । यया समिध्यतेऽग्निः सा समित्, सम्पदादित्वात्करणे क्विप् । सा समिदाधीयते यया सा सामिधेनी ऋक्, षित्वान्ङीष्, `हलस्तद्धितस्य' इति यलोपः ।।
रथाद्यत् ।। 4.3.121 ।।
रथाङ्ग एवेष्यत इति । यस्तु रथस्य वोढा रथ्य इति वोढरि प्रयोगः, सः `तद्वहति रथयुगप्रासङ्गम्' इति द्रष्टव्यः । स्यादेतत्---अयमेव तद्वोढर्यपीष्यताम्, `तद्वहति' इत्यत्र रथग्रहणं मा कारीति ? नैवं शक्यम्, इह द्वौ रथौ वहति द्विरथ्य इति `द्विगोर्लुगनपत्ये' इति प्राग्दीव्यतीयो लुक् प्राप्नोति । यत्तु द्वयो रथयोरङ्गं तत्र द्विरथमित्येव भवति ।।
पत्त्रपूर्वादञ् ।। 4.3.122 ।।
पतन्त्यनेनेति पत्त्रमिति । `दाम्नीशस' इत्यादिना ष्ट्रन् । अश्वयुक्तो रथोऽश्वरथः, षष्ठीसमासे वृत्तिस्वभावाद्युक्तार्थावगतिः । तस्याङ्गमाश्वरथम् ।।
पत्त्राध्वर्युपरिषदश्च ।। 4.3.123 ।।
पत्त्रेत्यर्थग्रहणमितरयोः स्वरूपग्रहणम् । व्याख्यानं चात्र शरणम् ।।
द्वन्द्वाद् वुन् वैरमैथुनिकयोः ।। 4.3.125 ।।
वैरम् = विरोधः, वीराणामिदमिति कृत्वा, मिथुनकर्म मैथुनिका, मनोज्ञादित्वाद् वुञ् । मिथुनम् = दम्पती, कर्म = क्रियानिष्पादनम् । बाभ्रवशालङ्कायनिकेति । वुञन्तं स्वभावतः स्त्रियां वर्त्तते ।।
गोत्रचरणाद् वुञ् ।। 4.3.126 ।।
वुनि प्रकृते वुञो विधानमवृद्धेषु वृद्ध्यर्थम् । वृद्धेषु वुनि वुञि च विशेषो नास्ति---तदेव रूपं स एव स्वरः, पुंवद्भावप्रतिषेधोऽपि `न कोपधायाः' इत्यभयोरस्ति ।।
सङ्घाङ्कलक्षणेष्वञ्यञिञामण् ।। 4.3.127 ।।
पूर्वस्य युञोऽपवाद इति । गोत्रग्रहणानुवृत्तेरजादीनां गोत्रप्रत्ययानामत्र ग्रहणमिति भावः ।
घोषग्रहणमत्र कर्तव्यमिति । घोषः = आभीरस्थानम्, तत्रपि प्रत्ययो यथा स्यादित्येवमर्थम् । घोषग्रहणस्यानुषङ्गिकं प्रयोजनान्तरमाह---तेन वैषम्यादिति । अथाङ्कलक्षणयोः को विशेष इति ।। निघण्टुषु पर्यायतया पाठान्नास्त्येव विशेष इत्यर्थः । पृथुगुपादानसामर्थ्याद्विशेषोऽत्राश्रीयताम् ? इत्याह---लक्षणं लक्ष्यस्यैवेति । स्वमात्मीयं सम्बन्धीत्यर्थः । बेदी विद्या अस्येति । बिदानामसाधारणी या विद्या सा यस्यास्ति स बैदीविद्यः ।।

शाकलाद्वा ।। 4.3.128 ।।
वुञोऽपवाद इति । शाकलशब्दस्य चरणशब्दत्वात्, तद्दर्शयति---शाकलेन प्रोक्तमिति ।।
छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः ।। 4.3.129 ।।
वुञणोरपवाद इति । चरणशब्देभ्यो वुञोऽपवादः, नटादौत्सर्गिकस्याणः ।।
न दण्डमाणवान्तेवासिषु ।। 4.3.130 ।।
दण्डप्राधाना माणवा इति । अर्थकथनमेतत् समासस्तु कर्मधारयः । सदा दण्डधारणाद्दण्डशब्दो माणवेषु वर्तते ।।
रैवतिकादिभ्यश्छः ।। 4.3.131 ।।
पूर्वेणेति । `गोत्रचरणाद् वुञ्' इत्यनेन रैवतिकीय इति । रेवत्या अपत्यम् `रेवत्यादिभ्यष्ठक्' रैवतिकः, ततश्छः । अन्ये इञन्ताः, तत्रानन्तरसूत्रात्प्रतिषेधोऽनुवर्त्तिष्यते, रैवतिकादिभ्यो वुञः प्रतिषेधे विज्ञायमाने यत्रापवादो नास्ति---रैवतीकीय इति, तत्र `वृद्धाच्छः' इत्येव सिद्धः; क्षेमवृद्धिशब्ददपि गहादित्वाच्छः; अन्येषु `इञश्च' इत्यण् स्यात्, तस्माच्छग्रहणम् ।।
कौपिञ्जलहास्तिपदादण् ।। 4.3.132 ।।
गोत्रवुञोऽपवाद इति । कुत इत्याह---गोत्राधिकारादिति । कौपिञ्जल इति । कुपिञ्जलस्यापत्यम्, अस्मादेव निपातनादण्, तदन्तात्पुनरण् । हास्तिपद इति । हस्तिन इव पादावस्य हस्तिपादः, पादस्य लोपो न भवति; `अहस्त्यादिभ्य' इति वचनात् । हस्तिपादस्यापत्यम् `तस्यापत्यम्' इति अस्मादेव निपातनादण्, पद्भावश्च, हास्तिपदस्येदम्, पुनरण् । अथाण्ग्रहणं किमर्थम् ? असत्यण्ग्रहणेऽनन्तरश्छः प्राप्नोति । सिद्धोऽत्र छः `वृद्धाच्छः' इति ? न सिद्ध्यति; `गोत्रचरणाद् वुञ्' इति वुञ्प्राप्नोति । एवं तर्हि यद्येताभ्यां छ इष्टः स्यात्, रैवतिकादिष्वेमेवौ पठेत्, एवं हि विभक्त्यनुच्चारणाल्लाघवं भवति । तस्मात्पृथगारम्भादेव छो न भविष्यति । अन्यस्तु यो विहितो न च प्राप्नोति स एव भविष्यति, स चाणेव । एवं तर्ह्यसत्यण्ग्रहणे यत्र वुञ् प्राप्तः प्रतिषिध्यते, न दण्डमाणवान्तेवासिषु, तत्र वुञो विधानार्थमेतत्स्यात्तस्मादण्ग्रहणं कर्तव्यम् । णित्करणं ङीबर्थम्, पुंवद्भावप्रतिषेधार्थं च---कौपिञ्जली क्रिया अस्य कौपिञ्जलीक्रिय इति ।।
आथर्वणिकस्येकलोपश्च ।। 4.3.133 ।।
चरणवुञोऽपवाद इति । अथर्वणा प्रोक्तो वेदोऽभेदोपचारादथर्वा, तमधीते वसन्तादित्वाठ्ठक्,---आथर्वणिकः, दाण्डिनायनादिसूत्रे निपातनाट्टिलोपाभावः । अथ वा---अथर्वणा प्रोक्तो वेदः `तेन प्रोक्तम्' इत्यण् ततः `छन्दोब्राह्मणानि' इति तद्विषयतायामाथर्वणशब्दस्यापि वसन्तादिषु पाठादध्येतरि ठक्, तस्य विधानसामर्थ्यात् `प्रोक्ताल्लुक्' इति लुग्न भवति---आथर्वणिकः ।
पुर्वसूत्रमिदञ्च वार्त्तिके दर्शनात्सूत्रेषु प्रक्षिप्तम् ।।
तस्य विकारः ।। 4.3.134 ।।
प्रकृतेरिति । उपादानकारणस्य । अवस्थान्तरमिति अन्यथात्वम् । अपवादेनानाक्रान्तस्य विषयस्य दुर्लभत्वात्प्रश्नः । किमिहोदाहरणमिति । अप्राणीति । प्राणिभ्योऽञं वक्ष्यति । आद्युदात्तमिति । अनुदात्तादेरप्यञं वक्ष्यति । अवृद्धमिति । वृद्धान्मयटं वक्ष्यति । यस्य च नान्यदिति । यथा `गोपयसोर्यत्' इति । नित्स्वरेणेति । अश्मभस्मशब्दौ मनिन्प्रत्ययान्तौ । `मृदस्तिकन्', मृत्तिका ।
तस्य प्रकरणे इति । `तस्येदम्' इत्यस्मिन् । पुनर्वचन शैषिकनिवृत्त्यर्थमिति । प्रकृतं हि तस्यग्रहणं शैषिकैर्घादिभिः सम्बद्धम्, अतस्तदनुवृत्तौ तेऽप्यनुवर्तेरन्, इदं त्वपूर्वं तस्य ग्रहणं क्रियामाणं घादिसम्बद्धस्य तस्यग्रहणस्य निवर्त्तकं घादीनपि निवर्त्तयति । ननु च विधेयतया प्रधानभूता घादयः, न ते गुणभूते तस्यग्रहणे निवर्तमानेऽपि निवर्तितुमर्हन्ति, न हि गुणानुवर्ति प्रधानम्, किं तर्हि ? प्रधानानुवर्त्ती गुणः ? सत्यम् ; तस्य ग्रहणसामर्थ्यात्प्रधानभूतानामपि घादीनां निवृत्तिः, अणआदयस्तु ननिवर्तन्ते, `प्राग्दीव्यतः' `प्राग्भवानात्' इति च विशिष्टावधिपरिच्छेदेनाधिकृतत्वात् । विकारावयवयोरिति । परस्तात्तु प्राग्वहतेः `प्राग्घिताद्' इति चाधिकारान्तरेणावष्टब्धत्वादेव घादीनां निवृत्तिः सिद्धेति भावः । स्यादेतत्--मा भूवन्ननेन घादयः, तस्य ग्रहणेन निवर्तितत्वात् ; `तस्येदम्' इत्यनेन तु प्राप्नुवन्ति, तस्येदंविशेषत्वाद्विकारावयवयोरिति ? तन्न; `तस्येदम्' इत्येव विकारावयवयोरणादिषु सिद्धेषु पनस्तेषां विधानं शैषिकाणां बाधनार्थमेव । किं तर्ह्युच्यते---तस्येति पुनर्वचनं शैषिकनिवृत्त्यर्थमिति, यावता स◌ूत्रप्रकृत्तिरेव शैषिकनिवृत्त्यर्था ? सत्यम् ; तस्य ग्रहणे त्वसति सूत्रप्रवृत्तिः शैषिकानपि विषयीकुर्यादिति तस्यग्रहणस्यैवायं भारः यदुत वै शैषिका निवर्तन्ते । हालः सैर इति । हलशब्दः `नव्विषयस्यानिसन्तस्य' इत्याद्युदात्तः । सीरशब्दः कन्प्रत्ययान्तत्वान्नित्स्वरेणाद्युदात्तः, नात्र वक्ष्यमाणस्यापवादस्य कस्यचित्प्रसङ्ग इत्यण्भवति ।
इदं च योगविभागेनाणादिविधानस्य प्रयोजनं दर्शितम् । यदि हि `तस्य विकारः' `बिल्वादिभ्योऽण्' इत्येवापवादविधानार्थमुच्येत, ततो हलस्य विकार इत्यत्र `तस्येदम्' इत्यनेन प्रत्ययो विधातव्यः, ततश्चाणं बाधित्वा `हलसीराट्ठक्' इति ठक् प्राप्नोति, तथान्यस्मिंस्तस्येदंविशेषे; योगविभागेन त्वणादीनां विधानादणेव भवति, तस्यग्रहणे तु घादीनां निवृत्तिः प्रयोजनम् । वृजीनां विकारो वार्ज इति, वृजिशब्दस्य फिट्सूत्रेषु विकल्पेनान्तोदात्तत्वविधानात्पक्षे आद्युदात्तत्वादण् । यदि त्वत्र `तस्येदम्' इत्यण्प्रत्ययः स्यात्; यदि वानेन घादयो विधीयेरन् ततो मद्रवृज्योः कन्निति कन्स्यात् । तथा त्रिगर्तानां विकारः त्रैगर्त इति, त्रिगर्तशब्दो बहुव्रीहिपूर्वपदप्रकृतिस्वरेणाद्युदात्तः, अत्र प्रथमः `प्राग्दीव्यतोऽण्' प्राप्तः, जनपदलक्षणो वुञ् द्वितीयः, गर्तोत्तरपदलक्षणश्छस्तृतीयः, तदवधिग्रहणेन विहितो वुञ् चतुर्थः; अनेन त्वणेव भवति । यथा रंकूणां विकारो राङ्कव इति---अत्र `प्राग्दीव्यतोण्' प्रथमः, तदपवादयोः `अवृद्धादपि' इति

`ओर्देशेठञ्' इति वुञ्ठञोस्तुल्यकक्षयोरन्यतरो द्वितीयः, `कोपधादण्' इति वा कच्छादिपाठाद्वाऽण्तृतीयः, `मनुष्यतत्स्थयोर्वुञ्' चतुर्थः; अनेन त्वण् प्राप्त ओरञा बाधितः `कोपधाच्च' इति प्रतिप्रसूयते । यदि तर्हि विकारावयवयोर्घादयो न भवन्ति पाटलिपुत्रस्यावयवाः पाटलिपुत्रकाः प्रासादा दति, `तस्येदम्' इत्यत्रार्थे `रोपधेतोः प्राचाम्' इति वुञ्न प्राप्नोति ? नैष दोषः; प्राण्योषधिवृक्षेभ्यो हि घादीनामवयवे निवृत्तिः, तत्र कः प्रसङ्गो यदप्राण्योषधिवृक्षेभ्योऽवयवे निवृत्तिः स्यात् ! ।।

अवयवे च प्राण्योषधिवृक्षेभ्यः ।। 4.3.135 ।।

मौर्वमिति । मूर्वाशब्दः `तृणधान्यानां च द्व्यषाम्' इत्याद्युदात्तः . खदिरमिति । खादेः खदिरशब्दः किरच्प्रत्ययान्तो निपातितः, तेनानुदात्तादिलक्षणो वुञ् प्राप्नोति । यदि त्वणिष्यते, बिल्वादिषु पठितव्यः ।

कृतनिर्देशौ हि ताविति । `तस्येदम्' इत्यनेन । यद्यपि शैषिकनिवृत्त्यर्थत्वं पूर्वयोगस्य प्रयोजनमुक्तम्, तथापि तदनपेक्ष्य भास्मनम्, मार्तिकमित्यादौ तावदणादयः सिद्धा इत्यभिसन्धायेदमुक्तम् ।।

बिल्वादिभ्योऽण् ।। 4.3.136 ।।

अञ्मयटोरपवाद इति । तत्र काण्ड-पाटलीशब्दाभ्यां वृद्धलक्षणस्य मयटोऽपवादः, शेषेभ्यस्त्वनुदात्तादिलक्षणस्याञः, बिल्वशब्दस्य `विल्वतिष्योर्वान्तः स्वरितः' इत्यन्तः स्वरितः, उदात्तो वा । व्रीहिमुद्गशब्दौ घृतादित्वादन्तोदात्तौ । मसूर-गोधूम-गवीधुकशब्दाः `लघावन्ते द्वयाश्च' इति मध्योदात्ताः । इषेः क्सः, इक्षुः, प्रत्ययस्वरेणान्तोदात्तः । वेणुशब्दः `विभाषा वेण्विन्धानयोः' इति पक्षेऽन्तोदात्तः । कर्पासीशब्दो जातिलक्षणङीषन्तः । कर्कन्धूशब्दः `अलाबूकर्क्कन्धूदिधिषूः ' इति निपातनान्मध्योदात्तः, `कुटीशमीशुण्डाभ्यो रः' इति कुटीरशब्दः प्रत्ययस्वरेणान्तोदात्तः । मयड्बाधनार्थमिति । `मयड्वैतयोः' इत्यादिना प्राप्तस्य मयटो बाधनार्थम्, शेषेभ्यस्त्ववृद्धेभ्यः शब्देभ्यः पक्षे मयड् भवत्येव । अण्ग्रहणं बाधकबाधनार्थण् । बिल्वादिभ्यो यथाविहितमित्युच्यमानेऽपि हि पाटलीशब्दान्ङीषन्तादनुदात्तादिलक्षणस्याञो मयटा बाधे प्राप्ते पुनर्वचनादञेव स्यात् ; अण्ग्रहणात्त्वणेव भवति ।

कोपधाच्च ।। 4.3.137 ।।

अञोऽपवाद इति । `ओरञ्' `अनुदात्तादेश्च' इति प्राप्तस्य, तित्तिडीकादयः `लघावन्ते' इत्यादिना मध्योदात्ताः ।।

त्रपुजतुनोः षुक् ।। 4.3.138 ।।

अप्राण्यादित्वादिति । प्राण्योषधिवृक्षेष्वन्यतमत्वस्याभावादित्यर्थः ।।

ओरञ ।। 4.3.139 ।।

देवदारु-भद्रदारुशब्दौ `पीतद्रवर्थानाम्' इत्यादिनाद्युदात्तौ । पीतद्रुः = सरलो नवस्पतिः, पीतद्रुरर्थो येषां तेषामादिरुदात्तो भवतीत्यर्थः ।।

अनुदात्तादेश्च ।। 4.3.140 ।।

दाधित्थं कापित्थमिति । दधनि तिष्ठतीति `सुपि स्थः', उपपदसमासः, पृषोदरादित्वात्सकारस्य तकारः, कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वम् ।

पलाशादिभ्यो वा ।। 4.3.141 ।।

उभयत्रविभाषेयमिति । कथमित्याह---पलाशखदिरेत्यादि । पलाशशब्दो घृतादित्वादन्तोदात्तः । खदिरशब्दः `अजिरशिशर' इत्यादौ किरच्प्रत्ययान्तो निपातितः । शिंशपाशब्दो `द्वितीयं प्रागीषात्' इति वर्तमाने `पान्तादीनां गुर्वादीनाम्' इति मध्योदात्तः । `स्पदि किञ्चिच्चलने', `अनुदात्तेतश्च हलादेः' इति युच्, किरतेरीरन्, करीरम्, `कृह्रभ्यामीषन्', शृपृभ्यां किच्च', शिरीषम्, शेषे नित्स्वरेणाद्युदात्तावेतौ । विकङ्कतमूलासयवासशब्दाः `ग्रामादीनां च' इत्याद्युदात्ताः ।।

शम्याष्ट्लञ् ।। 4.3.142 ।।

अञोऽपवाद इति । शमीशब्दो गौरादिङीषन्तः । शामीली स्त्रुगिति । चातुर्मास्ये वरुणप्रघासेषु शमीमय्यः स्त्रुचो भवन्तीति श्रुतम् ।।

मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ।। 4.3.143 ।।

मौद्गः सूपः, कार्पासमाच्छादनमिति । उभयत्र बिल्वाद्यण्, विकारावयवयोरभक्ष्याच्छादनयोश्च यथासंख्यं न भवति; विकारावयवयोरसमासनिर्देशेन प्रत्येकमभिसम्बन्धात् ।

तद्विषयेऽपि यथा स्यादिति । यद्येतयोरिति नोच्येत, उत्तरैर्विशेषप्रत्ययैरञादिभिः सम्प्रधारणायां परत्वात्त एव स्युः, पूर्वेषां विशेषप्रत्ययानां मयडभावपक्षे सावकाशत्वान्मयट्पक्षे परत्वान्मयडेव लभ्यत इति प्राणिरजतादिभ्योऽञादय एत्युक्तम् । `एतयोः' इति वचनं पुनर्विधानार्थं सम्पद्यत इति परेषामपि विषये मयड् भवति ।।

नित्यं वृद्धशरादिभ्यः ।। 4.3.144 ।।

नित्यं मयट्प्रत्ययो भवतीति । प्राग्दीव्यतीयानामपवादः । अणं तु कोपधलक्षणमञेव परत्वाद्बाधते । शाकमयम्, आम्रमयमिति । आम्रशब्दः `अमितम्योर्दीर्घश्च' इति रन्प्रत्ययान्तः ।

तदनेन क्रियत इति । नित्यंशब्दोऽतिरिच्यमानः पूर्वाचार्यपठितस्य वाक्यस्य स्मारक इति । एवं च मृच्छब्दस्य शरादिषु पाठोऽस्यैव प्रापञ्चार्थो द्रष्टव्यः ।।

गोश्च पुरीषे ।। 4.3.145 ।।

गव्यं पय इति । कथं पुनरत्र प्रसङ्गः, यावता विकारावयवयोरिति वर्तते, पयश्च न विकारो नाषयवः ? तत्राह---पुरीषं नं विकार इत्यादि । अक्रियमाणे

पुरीषग्रहणे इष्टसिध्यर्थमेव `तस्येदम्' इत्यधइकारे `गोर्मयट्' इति सूत्रं कर्तव्यम्, ततश्चात्रापि प्रसङ्ग इत्यर्थः ।।
पिष्टाच्च ।। 4.3.146 ।।
पिष्टमंय भस्मेति ।। पैष्टी सुरेति तु सामान्यविवक्षायाम् `तस्येदम्' इत्यण्, `प्रदीयतां दाशरथाय मैथिली' इतिवत् ।।
असंज्ञायां तिलयवाभ्याम् ।। 4.3.149 ।।
यावक इति । यवशब्दाद्विकारेऽण्, तदन्ताद् `यावादिभ्यः' इति स्वार्थे कन् ।।
नोत्वद्वर्धबिल्वात् ।। 4.3.151 ।।
मौञ्जमिति । मुञ्जशब्दात् `तृणधान्यानां च द्व्यषाम्' इत्याद्युदात्तत्वादौत्सर्गिकोऽण् । गार्मुतमिति । गर्मुच्छब्दः `मृग्रेरुतिः', `ग्रोर्मुट् च' इत्युतिप्रत्ययान्तत्वादन्तोदात्त इति `अनुदात्तादेश्च' इत्यञ् । कथं तर्हि `तस्मा एतं गार्मुतं चरुं निर्वपेत्' इत्यन्तोदात्तत्वम् ? सर्वविधीनां छन्दसि विकल्पितत्वादण् भविष्यति । वाध्रीति । वर्ध्रशब्दः `लघावन्ते' इत्याद्युदात्तः, तमादण्, `टिड्ढाणञ्' इति ङीप् ।
मतुब्निर्देशे इत्यादि । असति तस्मिन्वर्णग्रहणं सर्वत्र तदन्तविधि प्रयोजयतीति तदन्तविधिः स्यात् । वैणवीति । बिल्वाद्यण् ।।
तालादिभ्योऽण् ।। 4.3.152 ।।
मयडादीनामपवाद इति । आदिशब्देनाञो ग्रहणम्, बहुवचनं तु तयोरेव प्रकृतिभेदेन बहुत्वात् । तत्र तालश्यामाकाभ्यां वृद्धत्वान्मयट् प्राप्तः बर्हिणस्य विकारो बार्हिणम्---`प्राणिरजतादिभ्योऽञ्', तस्माद् `ञितश्च तत्प्रत्ययात्' इत्यञ् प्राप्तः, शेषेभ्योऽनुदात्तादिलक्षणस्य । लिशिदृशिभ्यामिन्द्रशब्द उपपदे मूलविभुजादित्वात्कः, `अन्येषामपि दृश्यते' इति दीर्घत्वम् । `चप् सान्त्वने', पचाद्यच् । पीयूक्षाशब्दः `लघावन्ते' इति मध्योदात्तः, तत्र हि `फिष' इत्यधइकारात्प्रागेव टापः स्वरप्रवृत्तिः, इन्द्रायुधशब्द समासस्वरेणान्तोदात्तः ।
तालाद्धनुषीति । अन्यत्र तालमयमित्येव भवति । अण्ग्रहणं बाधकबाधनार्थम्, अन्यथा यथाविहितमित्युच्यमाने बार्हणशब्दाद्वृद्धलक्षणो मयट् स्यात्, वचनं तु `ञितश्च तत्प्रत्ययात्' इत्यञो बाधनार्थं स्यात् ।।
जातरूपेभ्यः परिमाणे ।। 4.3.153 ।।
मयडादीनामपवाद इति । आदिशब्देनाञो ग्रहणम्, बहुवचनं तु पूर्ववत् । तत्र वृद्धेभ्यो हाटकादिभ्यो मयटोऽपवादः, तपनीयादिभ्योनुदात्तादिभ्योऽञः ।।
प्राणिरजतादिभ्योऽञ् ।। 4.3.154 ।।
अणादीनामिति । आदिशब्देन मयड् गृह्यते, बहुवचनं तु पूर्ववत् । तत्राद्युदात्तेभ्यः प्राणिशब्देभ्योऽणोऽपवादः, वृद्धेभ्यो मयटः, रजतादिष्वपि यदाद्युदात्तं तस्मादणोऽपवादः अनुदात्तादेशतु मयटः । कापोतम्, मायूरम्, तैतिरमिति । तित्तिरिशब्दस्तरतेः ` सन्वच्चाभ्यासस्य' इति किप्रत्ययान्तोऽन्तोदात्तः, शेषौ `लघावन्ते' इति मध्योदात्तौ । परिशिष्टमिहादाहरणमिति चोक्तम्, तस्माच्छुक-बक-गृधादय इहोदाहार्याः । शुकबकशब्दौ `प्राणिनां कुपूर्वाणाम्' इत्याद्युदात्तौ । गृध्रशब्दो रन्प्रत्ययान्त आद्युदात्तः । कथं तर्हि कापोतमित्याद्युदाहृतम्, सत्युदात्तार्थे प्राणिग्रहणेऽनुदात्तादेरपि प्राणिनः परत्वादनेनैवाञ्भवितुमर्हतीति मन्यते, आह च `अनुदात्तादेरञः प्राण्यञ्विप्रतिषेधेन' इति ? कः पुनरत्र विशेषस्तेन वा सत्यनेन वा ? सापवादकः स विधिर्मयटा परेण बाध्यते, अयं पुनर्निरपवादः, अनेनैव हि परत्वान्मयड् बाध्यते । किं सिद्धं भवति ? श्वाविधो विकारः शौवाविध इति सिद्धं भवति । कथं सिद्धं भवति ? श्वानं विध्यतीति क्विप्, `नहिवृति' इति दीर्घः, ग्रहिज्यादिसम्प्रसारणम्, कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वादनुदात्तादिः । तत्रान्ुदात्तलक्षणस्याञो बाधकं मयटं परत्वादयमञ् बाधते, द्वारादित्वाद्वृद्धिप्रतिषेधः, ऐजागमश्च ।।
ञितश्च तत्प्रत्ययात् ।। 4.3.155 ।।
तयोर्वाचकत्वेन यः सम्बन्धी प्रत्यः स तत्प्रत्ययः षष्ठीसमासः । विकारावयवयोरेवेति । यदि तु ञित्प्रत्ययान्तः प्राण्योषधिवृक्षवाची सम्भवति ततोऽवयवेऽपि भवति; द्वयोः प्रकृतत्वात् । लक्ष्यमनपेक्ष्यैवमुक्तम् । ननु च पूर्वे पञ्चालाः, पटो दग्ध इत्यवयवे समुदायशब्दो दृष्टः, विकारे च प्रकृतिशब्दः---शालीन्भुङ्क्ते मुद्गैरिति शालिविकारान्मुद्गविकारैरित्यर्थः; ततश्च देवदार्वाद्यवयवविकारवृत्तेर्देवदार्वादिशब्दात्तद्विकारावयवयोस्तेन तेनाञादयो भविष्यन्ति, नार्थोऽनेनेत्याशङ्क्याह---मयटोऽपवाद इति । सत्यमस्ति यथाकथञ्चिदिष्टसिद्धः, तथापि वृद्धलक्षणो मयण्मा भूदित्येवमर्थमेवाञ्विधेयः । अन्यथा येनैव हेतुनैतद्वाक्यं भवति---दैवदारवस्य विकारः, शामलस्य विकारः, तेनैव मयडपि स्यात्, विकार्यात्तेनैव हेतुना मयडपि प्राप्नोति ? अनभिदानान्न भविष्यति, तदेव तर्ह्यनभिधानं विधानेन प्रतिपाद्यते । यद्येवम्, `तस्य विकारः', `उष्ट्राद् वुञ्', औष्ट्रकं चर्म, तस्य विकार औष्ट्रिकोपानदिति, `टिड्ढाणञ्' इति ङीप्प्राप्नोति, न चेष्यते, एवं हि सौनागाः पठन्ति---`वुञश्चाञ ईतः प्रसङ्गः' इति । तस्मादवयवे समुदायशब्दो विकारे च प्रकृतिशब्द इति तेन तेन लक्षणेनाञादयो भविष्यन्ति । अनभिधानात्तु विकारावयवप्रत्ययान्तान्न मयड् भविष्यतीत्येतदेव साम्प्रतम् । बैल्वमयमिति । `ञितो यत्नेन मयटं सूत्रकारो निवर्त्तयन् अन्यतो वष्टि मयटम्' इति वृत्तिकृतो मतम् । भाष्यवात्तिककारौ पुनराहतुः---`तच्चानभिदानमाश्रयितव्यम्, अभिधाने ह्यन्यतोऽपि मयटः प्रसङ्गः---बैल्वस्य विकारः' इति ।।
क्रीतवत्परिमाणात् ।। 4.3.156 ।।
`चरणेभ्यो धर्मवत्' इत्यनेन तुल्यमेतत् । सङ्ख्या च परिमाणग्रहणेन गृह्यत इति । चकारादुन्मानं च, परिमीयतेऽनेनेति परिमाणमितियौगिकः परिमाणशब्द इत्यर्थः । तदाह---न रूढिपरिमाणमेवेति । नैष्किक इति । `असमासे निष्कादिभ्यः' इति ठक् । शत्यः, शतिक इति । `शताच्च ठन्यतावशते' ।

साहस्रमिति । `शतमानविंशतिकसहस्रवसनादण्' ।
वतिः सर्वसादृश्यार्थ इति । किमेवं सति सिद्धं भवति ? तदाह---अध्यर्द्धपूर्वेत्यादि । आदिशब्देन प्रकृतिप्रत्यययोः प्राग्वतेः सङ्ख्यापूर्वपदानां तदन्तग्रहणमलुक' इति तदन्तविधेश्च परिग्रहः । एतदुक्तं भवति---याभ्यः प्रकृतिभ्यो येन विशेषणेन ये प्रत्यया विहितास्ताभ्यः प्रकृतिभ्यस्तेनैव विशेषणेन त एव प्रत्यया विकारे भवन्ति । द्विसाहस्रमिति । पक्षे लुक्, `सङ्ख्यायाः संवत्सरसङ्ख्यस्य च' इत्युत्तरपदवृद्धिः । द्विनैष्किकमिति । प्राग्वतीयस्य ठञः `द्वित्रिपूर्वान्निष्कात्' इति पक्ष लुक्, `परिमाणान्तस्य' इत्युत्तरपदवृद्धिः ।।
उमोर्णयोर्वा ।। 4.3.158 ।।
उमाशब्दस्तृणधान्यानां वेत्याद्युदात्तः, ऊर्णाशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, ताभ्यां वुञभावे यथाक्रममणञौ ।।
एण्या ढञ् ।। 4.3.159 ।।
स्त्रीलिङ्गनिर्देशस्य प्रयोजनमाह--पुंसस्त्वञव भवतीति ।।
गोपयसोर्यत् ।। 4.3.160 ।।
मयड्विषये त्विति । `मयड्वैतयोः' इति विहितस्य मयटो विषये ।।
द्रोश्च ।। 4.3.161 ।।
अञोऽपवाद इति । `ओरञ्' इत्यस्य, सूत्रप्राप्त्यभिप्रायं चैतत् । एकाचो नित्यं मयटमिच्छन्तीति मयट् त्वस्मात्प्राप्नोति । द्रव्यमिति । गुणैः संद्रूयते प्राप्यत इति गुणसंद्रावः ।।
माने वयः ।। 4.3.162 ।।
मीयते येन तन्मानं प्रस्थादि ।।
फले लुक् ।। 4.3.163 ।।
तद्विशेष इति ।। विकारावयवविशेषे । उदाहरणेषु आमलकीशब्दाद् वृद्धान्मयटो लुक्, इतरयोर्गौरादित्वान्ङीष्, ताभ्यामनुदात्तादिलक्षणस्याञः, सर्वत्र `लुक्तद्धितलुकि' इति स्त्रीप्रत्ययस्य लुक् । ननु च न फलं वृक्षस्य विकारः, स हि द्विविधो भवति---यो वा प्रकृतिमुपमृद्नाति खादिरं भस्मेति, यो वा प्रकृतेर्व्यपदेशान्तरं करोति खादिरः स्रुव इति; फलं तु नैवंविधमिति वृक्षे स्थितमपि काकादिवन्न तस्य विकारः, नाप्यवयवः, अनारम्भकत्वात् ; उत्पन्ने हि वृक्षे पश्चात्फलमुपजायते तत्कथं विकारावयवयोरुत्पन्नस्य प्रत्ययस्य लुग्विधीयते ? इत्याह---फलितस्येति । फलशब्दस्तारकादिः, `प्रकृतेरवस्थान्तरं विकारः' इत्युक्तम्, अफलितावस्थायाश्च फलिताऽवस्थान्तरं भवत्येव । तत्र वृक्षत्वं तूभयत्रानुवर्तते, सर्वत्र चोत्तरावस्था विकारः, सर्वश्चावयवः स्वोत्पत्तेः प्राग्नोपस्थितो नास्यारम्भकः, यथा श्रृङ्गदन्तादिरथ च गवादेरवयवो भवति, तदेतत्फलेऽपि समानम् । पल्लवशब्दोऽर्द्धर्चादिः । फले लुग्विधानमनर्थकम्; प्रकृत्यन्तरत्वात् । आमलकादिशब्दः फले वर्तते, न यौगिकः---आमलक्याः फलमिति, यथा नामलकयोगाद्वृक्षे आमलकशब्दः, आमलकफलस्येयमामलकीति, यथाङ्गादिशब्दः क्षत्त्रिये जनपदे च । प्रत्ययनिवृत्त्यर्थं तु यथैतद्वाक्यं भवति---आमलक्या विकारः कुवल्या विकार इति, तथा प्रत्ययोऽपि स्यात् ।।
प्लक्षादिभ्योऽण् ।। 4.3.164 ।।
अञोऽपवाद इति । शिग्रु-काक्षतुशब्दाभ्यामुवर्णान्तलक्षणस्य, शेषेभ्यस्त्वनुदात्तल7णस्य । तत्र प्लक्षशब्दः `फिषः' इत्यन्तोदात्तः, फिषिति प्रातिपदिकस्य नाम । न्यग्रोधशब्दः `लघावन्ते' इति मध्योदात्तः । अश्वत्थशब्दो घृतादित्वादन्तोदातः । इङ्गुदीबृहतीशब्दौ गौरादिङीषन्तौ । विधानसामर्थ्यादिति । यद्यस्य लुक् स्याद्विधानमनर्थकं स्यात् । न ह्यणोऽञो वा लुकि कृते कश्चिद्विशेषः । नैयग्रोधमिति । न्यग्रोधस्य च `केवलस्य' इत्यैजागमः ।।
जम्ब्वा वा ।। 4.3.165 ।।
अञस्तु भवत्येव । न ह्यञो विधानसामर्थ्यम् ; फलादन्यत्र श्रवणात् । जम्बूनीति । फलस्याभिधेयत्वान्नपुंसकह्रस्वे `जश्शसोः शिः', नुम्, `सर्वनामस्थाने च' इति दीर्घः ।।
लुप्च ।। 4.3.166 ।।
युक्तवद्भावे विशेष इति । लुपि हि सति `लुपि युक्तवद्व्यक्तिवचने' इति प्रकृत्यर्थगते लिङ्गवचने भवतः, लुकि त्वभिधेयवल्लिङ्गवचने स्याताम् । फलापाकशुषामिति । फलपाकेन शुष्यन्तीटि फलपाकशुषः । व्रीहयो मुद्गा इति । बिल्वाद्यणो लुक्, यवमाषतिलशब्दाः `तृणधान्यानां च द्व्यषाम्' इत्याद्युदात्ताः, तेभ्य औत्सर्गिकस्याणो लुक् । मल्लिकाशब्दो मादीनामिति मध्योदात्तः । अस्यार्थः---अत्र `द्वितीयः प्रागीषात्' इति त्र्यषामिति वर्तते, मकारादीनां त्र्यषां द्वितीयमक्षरमुदात्तं भवति । नवमालिकाशब्दः `लघावन्ते' इति मध्योदात्तो जातिशब्दः । विदारीबृहतीशब्दौ गौरादिङीषन्तौ । अंशुशब्दः प्रातिपदिकरवरेणान्तोदात्तः, ततो मतुप् `ह्रस्वनुड्भ्यां मतुप्' इति मतुबाद्युदात्तः, ङीबनुदात्तः । तदेवमंशुमतीशब्दे मतुबकार उदात्तः । पाटलानीति । बिल्वादित्वादण्, साल्वशब्दः प्रातिपदिकस्वरेणान्तोदात्तः । क्वचिदन्यदपि भवतीति । लुपोऽन्यदपि कचित्कार्यं भवति, तत्पुनर्लुग्लुपोरभावश्च । कदम्बमित्यादावनुदात्तादिलक्षणस्याञो लुक् । कदम्बादयः शब्दाः `लगावन्ते' इति मध्योदात्ताः । बैल्वानीति । अत्रोभयाभावः, बिल्वाद्यण् ।।
हरीतक्यादिभ्यश्च ।। 4.3.167 ।।
हरीतक्यादिषु द्राक्षाप्रभृतिभ्यो मयटो लुप्, उदात्तादिभ्योऽणः, अनुदात्तादिभ्योऽञः ।।

कंसीयपरशव्ययोर्यञञौ लुक् च ।। 4.3.168 ।।

प्राक् क्रीताच्छेन कंसीय इति । `प्राक् क्रीताच्छः' इत्यधिकारे `तस्मै हितम्' इतिच्छप्रत्ययेन कंसीयशब्दो व्युत्पाद्यत इत्यर्थः । एतेनोगवादिभ्यो यता परशव्यशब्द इति व्याख्यातम् । तत्सन्नियोगेन च कंसीयपरशव्ययोर्लुग्भवतीति । प्रत्ययादर्शनस्य लुक्संज्ञाविधानात्तदवयवयोः प्रत्यययोर्लुग्भवतीत्यर्थः । अथ `वृतृहनिकषिकमिभ्यः सः' इति सः, कंसशब्दे सप्रत्ययः । यश्च पराश्रृणोतीति परशुः, `आङ्परयोः खनिश्रृभ्यांणिच्च' इति कुप्रत्ययस्तयोर्लुक्कस्मान्न भवति ? तत्राह---प्रातिपदिकाधिकारादिति । प्रातिपदिकाधिकारे हि तत; परयोश्छयतोर्लुग्भवति, न धातुप्रत्ययस्य, आह---`ङ्याप्प्रातिपदिकग्रहणमङ्गपदसंज्ञार्थं यच्छयोश्च लुगर्थम्' इति, ननु च `अतः कृकमि' इत्यत्र कंसग्रहणं लिङ्गम्---नावयमुणादिषु व्युत्पत्तिकार्यं भवतीति, तेनोकारसकारयोर्लुग्न भविष्यति ? सत्यम् ; वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणप्रत्ययविधौ तत्सम्प्रत्ययार्थमवश्यकर्तव्यस्य ङ्याप्प्रातिपदिकग्रहणस्यानुषङ्गिकं प्रयोजनं दर्शितम् । अत एव च `ङ्याप्प्रातिपदिकात्' इत्यत्र नेदं वृत्तिकृता दर्शितम् ।।
इति श्रीहरदत्तमिश्रविरचितायां पदमञ्चर्यां चतुर्थस्याध्यायस्य तृतीयश्चरणः
----------------------*******************---------------------

4.4

अथ चतुर्थाध्याये चतुर्थः पादः---4
पदमञ्जरी
प्राग्वहतेष्ठक् ।। 4.4.1 ।।

तदाहेति । `वाक्यादेतत्प्रत्ययविधानम्' इति वक्ष्यति, न च वाक्याद् द्वितीया सम्भवति; अप्रातिपदिकत्वात् । तेन तदिति कर्ममात्रं निदिश्यते, न तु द्वितीयासमर्थविभक्तिः ।
माशब्द इत्याहेति । शब्दो माकारीत्याहेत्यर्थः । संसर्गरूपस्य वाक्यार्थस्येतिकरणेन प्रत्यवमर्शे सति वचनक्रियां प्रति कर्मत्वं सम्भवति, नान्यथेति मत्वैष विग्रहः । वाक्यादेतत्प्रत्ययविधानमिति । एतच्चाहौ प्रभूतादिभ्यः पुनर्वचनाल्लभ्यते, अन्यथा प्रभूतादयो माशब्दादय एव भवन्तु, किं पृथग्वचनेन !
आहाविति । आहेति पदे प्रकृतिभागस्यागन्तुकेनेकारेणेदमोऽनुकरणम् । तत्र शब्दे कार्यस्यासम्भवादर्थप्रत्ययविधिः क्रियाविशेषणादिति । तदन्ताभिधायिन इत्यर्थः ।
पृच्छताविति । तिङन्तानुकरणमेतत् । एवं गच्छताविति । तिङन्तार्थे तु प्रत्ययः । सुस्नातं पृच्छतीति । सुस्नातं भवता, सुस्नातो भवानित्येवं वा पृच्छतीत्यर्थः । सौखरात्रिक इति । सुखरात्रिं पृच्छति । एवं यः पृच्छति, सा एवमुच्यते । एतेन सौखशायनिको व्याख्यातः । अनुशतिकादित्वादुभयपदवृद्धिः । गौरुतल्पिक इति । तल्पशब्देन भार्या लक्ष्यते ।।
तेन दीव्यति खनति जयति जितम् ।। 4.4.2 ।।
सर्वत्र करणे तृतीयेति । दीव्यत्यादावभिहितत्वात्कर्तरि तृतीया नोपपद्यत इति तत्साहचर्याज्जितमित्यनेनापि योगे करण एव तृतीयेति सर्वशब्दार्थः । तेन देवदत्तेन न जितमित्यत्र न भवति । हेतुतृतीया तु नाशङ्किता; अनभिधानात् । न हि हेतुतृतीयान्तावुत्पद्यमानेन ठका विग्रहवाक्यार्थस्याभिधानमस्ति । प्रत्ययार्थ इति । निर्द्धारण एषा सप्तमी, सामान्यापेक्षमेकवचनम् । इह दीव्यतीत्यादौ तिपो बहवोऽर्थाः---एकत्वसङ्ख्या, वर्त्तमानकाले, युष्मदस्मद्व्यतिरेक इति, तेषु मध्य इत्यर्थः । तदेव दर्शितम् । सङ्ख्याकालयोरविवक्षेति । नान्तरीयकत्वात् । अवश्यं हि यया कयाचित्सङ्ख्या येन केनचित्कालेन निर्देश इति तयोरुपादानम्, न तु तयोर्विवक्षा । तत आक्षिकौ आक्षिका इति द्विबह्वोरपि भवति, अक्षैरदीव्यदित्यादौ कालान्तरे चाक्षिक इति भवति, न्यायस्य तुल्यत्वात् पुरुषस्याप्यविवक्षा, तेनाक्षिकस्त्वम्, आक्षइकोऽहमित्यत्रापि भवति । यथैव तर्हि सङ्ख्याकालपुरुषाणामविवक्षा तथा कर्तुरपि प्राप्नोति, एकप्रत्ययवाच्यत्वात् ? नैष दोषः; कर्तुरविवक्षायामाख्यातोपादानमकिञ्चित्करं स्यात् । विपर्ययस्तु न भवति---कर्तुरविवक्षा कालादीनां विवक्षेति; कर्तुः प्रधानत्वात् । सङ्ख्यादिविशिष्टो हि कर्त्ताऽऽख्यातानां प्रधानभूतोऽर्थः, तेन स तावद्विवक्ष्यते, इतरेषां नान्तरीयकत्वादविवक्षा । किञ्च, साधनस्याप्यविवक्षायां जितमित्यस्योपादानमनर्थं स्यात् ।
इहाख्यातेषु क्रिया प्रधानभूता, गुणभूतः कर्त्ता, अत एव किं करोति देवदत्त इति क्रियाप्रश्ने पचतीत्याख्यातेनोत्तरं दीयते, न तु कृदन्तेन पाचक इतिः तस्य सत्त्वप्रधानत्वात् । किञ्च, यदि कृदन्तेष्विवाख्यातेष्वपि कर्ता प्रधानभूतः स्याद्, यथा पाचकस्यापत्यमित्यपत्यादिभिर्योगो भवति, तथाऽऽख्यातवाच्यस्यापि स्यात् पचत्ययमिति, क्रियावेशः स्याद्, यथा---पाचकस्तिष्ठतीति । तस्मात्क्रियाप्रधानमाख्यातम् । ततश्च तद्रथे विधीयमानः प्रत्ययोऽपि क्रियाप्रधानः स्यादिति तदन्तस्यापत्यादिभिर्योगः क्रियावेशश्च न स्यात्---आक्षिकस्यापत्यमाक्षिकं पश्येति । तत्राह---क्रियाप्रधानत्वेऽपि चाख्यातस्येति । आख्यायतेऽनेन क्रिया प्रधानभूतेत्याख्यातस्तिङन्तः, `कृत्यल्युटो बहुलम्' इति करणे क्तः, स्वनिकायप्रसिद्धिरेषा । स्वभावादिति । यथा `तेनैकदिक्', `तसिश्च' इत्येतस्मिन्नर्थे विधीयमानयोरण्तयोस्सत्त्वभूतार्थाभिधायित्वम्, विपर्ययश्च---सौदामनी विद्युत्सुदामतो विद्युदिति, तथात्रापि । न हि स्वभावः पर्यनुयोगमर्हति ।।

संस्कृतम् ।। 4.4.3 ।।
योगविभाग उत्तरार्थ इति । उत्तरोऽपवादः संस्कृत एव यथा स्यात् ।।
कुलत्थकोपधादण् ।। 4.4.4 ।।
कुले तिष्ठति कुलत्थः, अस्मादेव निपातनात्सकारस्य तकारः । केचित्पुनः सकारमेवाधीयते ।।
नौद्व्यचष्ठन् ।। 4.4.7 ।।
इह ठगधिकारे सूत्रे क्वचित्प्रत्ययस्यानुबन्धो ङीषर्थः । सहि किं सांहितिकः, किं वानुबन्धः ? इति तत्र सन्देहे विपयपरिगणनं करिष्यन्श्लोकवार्तिककारः सर्वानेव षितः परिगणयति---आकर्षादिति---यदि तु यत्र सन्देहस्तानेवोपादायैतावन्तष्ठगधिकारे षित इत्युच्येत, तदा आकर्षादिषु प्रत्ययस्याषित्त्वमनार्षमाशङ्क्येत । कुसीदसूत्रादिति । कुसीदादिकं सूत्रं यस्य तत्कुसीदसूत्रं कुसीदशब्दश्च, दशैकादशशब्दश्च ।
ननु सप्तैते भवन्ति, कुसीदादिसूत्रेण द्वयोः षितोर्विधानात् ? इत्यत आह---विधिवाक्यापेक्षं च षट्त्वमिति । सप्तानां प्रत्ययानां विधिवाक्यापेक्षमौपचारिकं पट्त्वमाश्रित्य `षितः षडेते' इत्युक्तम् ।।
आकर्षात् ष्ठल् ।। 4.4.9 ।।
आकर्षेति । `पुंसि संज्ञायां घः प्रायेण' इति अधिकरणे घः ।।
पर्पादिभ्यः ष्ठन् ।। 4.4.10 ।।
पर्पादिषु `पादः पत्' इति पठ्यते, पादाभ्यां चरति पदिकः, `पद्यत्यतदर्थे' इत्यत्र वक्ष्यति--`पद्भाव इके चरतावुपसङ्ख्यानम्' इति, सोऽस्यैव प्रपञ्चार्थः ।।
श्वगणाट्ठञ् च ।। 4.4.11 ।।
श्वागणिक इति । ननु च श्वशब्दो द्वारादिषु पठ्यते, तदादिविधिश्च तत्रेष्यते, तत्कथं श्वागणिक इति ? तत्राह---श्वादेरिञीत्यत्रेति ।।
वेतनादिभ्यो जीवति ।। 4.4.12 ।।
धनुर्दण्डग्रहणं सङ्घातविगृहीतार्थमिति । तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणात् ।।
वस्नक्रयविक्रयाट्ठन् ।। 4.4.13 ।।
वसेर्वस्नम्=मूल्यम् । क्रियविक्रयग्रहणं सङ्घातविगृहीतार्थमिति । उक्तोऽत्र हेतुः । क्रयविक्रयेणेति समाहारद्वन्द्वः ।।
आयुधाच्छ च ।। 4.4.14 ।।
आयुध्यतेऽनेनेति आयुधम्, `घञर्थे कविधानम्' इति कप्रत्ययः ।।
हरत्युत्सङ्गादिभ्यः ।। 4.4.15 ।।
हरति = नयति, उपादत्ते वा ।।
भस्त्रादिभ्यः ष्ठन् ।। 4.4.16 ।।
भस्त्रम् = चर्मविकारः, येन लोहादि ध्मायते, येन वा धान्यादिकं नीयते, `हूयामाश्रुभसिभ्यस्त्रन्' इति करणए त्रन् । शीर्षभारः, शीर्षेभार इति पठ्यते, निपातनाच्छीर्षभावः सप्तमीसमासश्च, `तत्पुरुषे कृति बहुलम्' इति सप्तम्या अलुक् ।।
विभाषा विवधवीवधात् ।। 4.4.17 ।।
पर्याहारे चेति । परित आह्रियतेऽनेन तण्डुलादिकोऽर्थ इति पर्याहारः = उभयतो बद्धशिक्योंऽसवाह्यः काष्ठविशेष उच्यते ।
वीवधशब्दो वार्तिके दर्शनात्सूत्रे प्रक्षिप्तः ।।
अण्कुटिलिकायाः ।। 4.4.18 ।।
कुटिलव्याधानामुपरमणम् = कुटिलिका, संज्ञायां कन् ।।
त्रेर्मम्नित्यम् ।। 4.4.20 ।।
ड्वितः क्त्रिरित्ययं त्रिशब्दो गृह्यत इति । सङ्ख्यावचनस्त्वनभिधानान्न गृह्यते । उप्त्रिममिति । वच्यादिसूत्रेण संप्रसारणम् ।
नित्यगंरहणं स्वातन्त्र्यनिवृत्त्यर्थमिति । प्रत्ययरहितस्य त्र्यन्तस्य प्रयोगः स्वातन्त्र्यम्, स्वातन्त्र्यनिवृत्तौ सत्यां यो गुणस्तं दर्शयति---त्र्यन्तं नित्यं मप्प्रत्ययान्तमेव भवतीति । एवकारव्यवच्छेद्यं दर्शयति---विषयान्तरे न प्रयोक्तव्यमिति । ननु विभाषया वाक्ये प्रसक्ते नित्यग्रहणं क्रियमाणं निर्वृत्ताधइकारे तद्विषयमेव वाक्यं निवर्तयितुमर्हति---पक्त्रिणा निर्वृत्तमिति, यथा---`अन उपधालोपिनोन्यतरस्याम्' `नित्यं संज्ञाच्छन्दसोः' इति, ततश्च विषयान्तरगतत्र्यन्तस्य स्वातन्त्र्यं स्यादेव कृत्रिमर्हत्सुविहितमिति ? एवं मन्यते---योगविभागोऽत्र कर्तव्यः, `त्रेर्मब्भवति निर्वृत्ते' इत्येको योगः, ततः `नित्यम्' । अत्र त्रेर्मबित्येवापेक्ष्यते न निर्वृत्त इति; योगविभागसामर्थ्यात् । तेन सर्वविषयस्वातन्त्र्यस्य नित्यग्रहणेन निवृत्तिः क्रियत इति । नन्वेवमपि `नित्यम्' इत्यत्र निर्वृत्तमित्यस्यानपेक्षणात्स्वातन्त्र्यान्तरे । नित्यमुपाधिः प्राप्नोति ? सत्यम् ; अनभिधानात्तु तथानाश्रीयते ।
भावप्रत्ययान्तादिमब् वक्तव्य इति । `तेन निर्वृत्तम्' इत्येतस्मिन्नर्थे । पाकेन निर्वृत्तं पाकिममिति । एवं च त्र्यन्तादपि भावाभिधायिन इमपि कृते यस्येति लोपे च कृत्रिममित्यादि सिद्धं भवति, स्वरेऽपि नास्ति विशेषः, उदात्तनिवृत्तिस्वरेणैवोदात्तत्वम् । सूत्रारम्भस्तु नित्यग्रहणेन स्वातन्त्र्यं निवर्तयिष्यामीत्येवमर्थे

वेदितव्यः ।।

अपमित्ययाचिताभ्यां कक्कनौ ।। 4.4.21 ।।

अपमित्येति । `उदीचां माङो व्यतिहारे' इति क्त्वाप्रत्ययेऽपशब्देन समासे क्त्वो ल्यप्, `मयतेरिदन्यतरस्याम्' इतीत्वम्, `क्त्वातोसुन्कसुनः' इत्यव्ययसंज्ञा । तेन नात्र तृतीयासमर्थात्प्रत्ययः ।।

संसृष्टे ।। 4.4.22 ।।

ननु यद्येन संसृष्टं तत्तेन संस्कृतं भवति; ततश्च संस्कृतमित्येव संसृष्टेऽपि प्रत्ययः सिद्धः ? न सिध्यति; सत उत्कर्षाधानम् = संस्कारः, एकीभावस्तु = संसर्गः, न च यत्रासौ तत्रावश्यमुत्कर्षोऽस्ति, अशुचिद्रव्यसंसर्गे हि प्रत्युतापकर्ष एव भवति । तस्मात्संसृष्ट इति वक्तव्यम् । यद्यस्य निबन्धनमस्त्येतदेवास्तु, मा भूत्संस्कृतमित्येतत् ? तदवश्यं कर्तव्यम्, इहापि यथा स्यात्---विद्यया संस्कृतो वैद्यक इति, न ह्यत्र संसर्गोऽस्ति; मूर्त्तिधर्मत्वात् । किञ्च `कुलत्थकोपधादण्' संस्कृत एव यथा स्यात्ससृष्टे मा भूदित्येमवर्थं संस्कृतमित्येतद्भवतीति वक्तव्यम् ।।

चूर्णादिनिः ।। 4.4.23 ।।

चूर्णए ये संसृष्टास्तेषां चूर्णमस्तीति मत्वर्थीयेनैवेनिना सिद्धम् ? सत्यम् ; तद्रूपविवक्षायां सिद्धम् । संसर्गविवक्षायां तु ठक् प्राप्नोति । अनभिधानं तु दुर्ज्ञानम् ।।

लवणाल्लुक् ।। 4.4.24 ।।

लवणद्रव्यवाचीत्यादि । लवणशब्दोऽयमस्त्येव गुणवचनः--षण्णां रसानामन्यतमस्य वाचकः, अस्ति च द्रव्यवचनो यः सैन्धवादिषु वर्तते; तत्र यो गुणवचनः स न लुकं प्रयोजयति, मधुरादिशब्दवदभेदोपचारादेव द्रव्ये वृत्तिसिद्धेः । द्रव्यशब्दस्तु सोऽयमित्यभिसम्बन्धाद् द्रव्ये वर्तमानः । यद्यपि प्रष्ठी प्रचरी यष्टीः प्रवेशयेत्यादौ द्रव्यशब्दस्यापि क्वचिदभेदोपचारो दृष्टः, तथापि भेदविवक्षायां तत्स्थोऽपि दृश्यते---प्रष्टस्येयं प्राष्ठी यष्टिमतः पुरुषानिति । तस्माद् द्रव्यवाच्येव लवणशब्दो लुकं प्रयोजयति, स च प्रयोजयत्येव ।।

व्यञ्जनैरुपसिक्ते ।। 4.4.26 ।।

ओदनादिषु रसो येन व्यज्यते तद्व्यञ्जनम् । बहुवचननिर्देशः स्वरूपविधिनिरासार्थः । उपसिक्तः = सेचनेन मृदूकृतः । इह यद्येनोपसिक्तं तत्तेन संसृष्टं भवति, तत्र संसृष्ट इत्येव सिद्धे नियमार्थं वचनम्---व्यञ्जनेभ्य उपसिक्त एव संसृष्टे यथा स्यात्संसृष्टमात्रे मा भूत्, दध्ना संसृष्टा स्थालीति ।।

तत्प्रत्यनुपूर्वमीपलोमकूलम् ।। 4.4.28 ।।

क्रियाविशेषणमित्यादि । आख्यातं हि धात्वर्थस्य कर्तव्यतामाचष्टे---वर्तते = वर्तनं करोति, सुप्यते = स्वापः क्रियते, शोभनमोदनं पच्यते = ओदनकर्मकः पाकः शोभनः क्रियते इति । पचिधात्वर्थः कर्तव्य एव सम्बध्यमानः कर्म सम्पद्यते, तस्य यत्समानाधिकरणं विशेषणं तदपि कर्मैव भवति ।

प्रातीपिकः, आन्वीपिक इति । प्रतिगता आपोऽस्मिन्निति बहुव्रीहिः, `ऋक्पूरब्धूः' इत्यिकारः समासान्तः, `द्व्यन्तरुपसर्गेभ्योऽप ईत्' इतीत्वम् । व्युत्पत्तिमात्रं चैतत्, प्रतिकूलानुकूलपर्यायौ त्वेतौ । `ऊदनोर्देशे' इत्यूत्वमत्र न भवति; अदेशत्वात्, देशत्वे क्रियाविशेषत्वासम्भवात् । सूत्रे ईप्शब्दस्य निर्देशात् ।

प्रातिलोमिकः, आनुलोमिक इति । पूर्ववद्बहुव्रीहिः, `अच् प्रत्यन्ववपूर्वात्' इत्यच् समासान्तः । अत्रापि व्युत्पत्तिमात्रम्, अर्थस्तु पूर्वोक्त एव । प्रातिकूलिक इति । पूर्ववद्बहुव्रीहिः । अत्रापि कूलार्थो नास्ति । प्रतिसरणं चैतयोरर्थः ।।

परिमुखं च ।। 4.4.29 ।।

पारिमुखिक इति । परिरिह वर्तते, तस्य च `अपपरी वर्जने' इति कर्मप्रवचनीयसंज्ञा, `पञ्चम्यपाङ्परिभिः' इति पञ्चमी, `अपपरिबहिरञ्चवः' इत्यव्ययीभावः, अनेन ठक् । स्वामिनो मुकं वर्जयित्वा यः सेवको वर्तते स पारिमुखिकः । सर्वतो भावे वा परिशब्दः, परितो मुखम्, प्रादिसमासः, यतो यतः स्वमिनो मुखं ततस्ततो वर्तते इत्यर्थः । एवं पारिपार्श्विकः ।।

प्रयच्छति गर्ह्यम् ।। 4.4.30 ।।

द्विगुणार्थं द्विगुणमिति । द्वैगुणिक उत्तमर्ण उच्यते, न चासौ द्विगुणं प्रयच्छति, किं तर्ह्येकगुणं दत्त्वा द्विगुणं गृह्णाति, अत एव तद्गर्ह्यं भवतीति । तस्माद् द्विगुणार्थे द्विगुणशब्दो वर्तयितव्यः ।

वार्धुषिक इति । वृद्ध्यर्थे धने वृद्धिशब्दः । प्रकृत्यन्तरमेवेति । एतच्च वार्धुषिक इत्येतद्वृत्तिविषयमेव । नियतविषया अपि हि शब्दा भवन्ति, वृद्धिशब्दादनभिधानान्नैव भविष्यति, तेन वार्धिक इत्यनिष्टप्रसङ्गो नोद्भावनीयः । अत कथम् `वार्धुदासमकम्पत ववान्यस्य च वार्द्धुषेः' इति ? स्वच्छन्दवाच ऋषयः ।।

कुसीददशैकादशात् ष्ठन्ष्ठचौ ।। 4.4.31 ।।

तदर्थं द्रव्यं कुसीदमिति । अत्रापि कुसीदिक इत्युत्तमर्णस्याभिधानमिष्यते, न चोत्तमर्णः कुसीदं प्रयच्छति, किं तहि ? अधमर्णः, न च तस्य वृद्धिप्रदानं गर्ह्यम्, तस्मात्तादर्थ्यात्ताच्छद्व्यमिति भावः । एकादशार्थं दश दशैकादशशब्देनोच्यन्त इति तत्रैकादशशब्दस्यापि तदर्थेषु दशस्वेव वृत्तेः सामानाधिकरण्ये सति विशेषणसमासः, `संख्याया अल्पीयस्याः' इति दशशब्दस्य पूर्वनिपातः । दशैकादशादिति निर्देशादकारः समासान्तः । एवं वाक्यमप्यकारान्तेनैव भवति---दशैकादशान्प्रयच्छतीति ।।

रक्षति ।। 4.4.33 ।।

सामाजिक इति । समाजः = समूहः, समजत्यस्मिन्निति कृत्वा, एवं सन्निवेशः ।।

शब्ददर्दुरं करोति ।। 4.4.34 ।।

शब्दं करोतीति । करोतिरिह ज्ञाने वर्तते, प्रकृत्यादिविभागेन जानातीत्यर्थः । एतच्चाभिधानस्वाभाव्याल्लभ्यते, इह न भवति---शब्दं करोति खर इति । पात्रविशेषवाची दर्दुरशब्दः । अनुकरणशब्द इत्यन्ये ।।

पक्षिमत्स्यमृगान्हन्ति ।। 4.4.35 ।।

स्वरूपस्य तद्विशेषणां पर्यायाणां च ग्रहणमिष्यत इति । अत्र हेतुः `स्वं रूपम्' इत्यत्रैवोक्तः । मात्स्यिक इति । `सूर्यतिष्य' इति लोपो न भवति; मत्स्यस्य ङ्यामिति परिगणनात् । हारिणिकः, सौकरिक इति । अत्र मृगपर्यायस्योदाहरणं किमित न प्रदर्शितम्, यथा पूर्वयोः द्वावपि ह्येतस्माद्विशेषौ, आरण्याश्चतुष्पादो मृगाः उच्यन्ते, हरिणपर्यायोऽपि मृगशब्दोऽस्ति, तदपेक्षया हारिणिक इति पर्यायोदाहरणम् ।।

परिपन्थं च तिष्ठति ।। 4.4.36 ।।

तदिति द्वितीयासमर्थादिति । परिपन्थशब्दः परिमुखशब्दवदव्ययीभावः, तत्पुरुषो वा । तत्राप्यव्ययीभावपक्षे क्रियाविशेषणात्तिष्ठतेरकर्मकत्वेऽपि परिपन्थस्य कर्मत्वम्; तत्पुरुषे तु परितः पन्थाः परिपन्थ इति `कालभावाध्वगन्तव्याः' इति वचनात्कर्म, तदित्यधिकारसामर्थ्यादित्यन्ये । पारिपन्थिकश्चोर इति । यः पन्थानं वर्जयित्वा तिष्ठति यो वा पन्थानं व्याप्य तिष्ठति स एवमुच्यते ।

लौकिकवाक्यप्रदर्शनार्थमिति । परिपन्थं तिष्ठतीत्येतल्लौकिकवाक्यं तस्य प्रदर्शनार्थं द्वितीयोच्चारणम् । अथैवमर्थे द्वितीयोच्चारणे किं सिद्धं भवति ? इत्याह---परिपथपर्याय इत्यादि । किमेतस्य ज्ञापने प्रयोजनम् ? इत्याह---स विषयान्तरेऽपीति । असति तु ज्ञापने प्रत्ययसन्नियोगेन परिपन्थशब्दस्य निपातनं विज्ञायते, ततश्च ततोऽन्यत्र प्रयोगो न स्यात् ।।

माथोत्तरपदपदव्यनुपदं धावति ।। 4.4.37 ।।

माथशब्दः पथिपर्याय इति । मथ्यते प्रशाद्यते गन्तृभिरिति कृत्वा । दण्डाकारो मथो दण्डमाथः ।।

आक्रन्दाट्ठञ्च ।। 4.4.38 ।।

आक्रन्दो देश इति । दुः खितानां रोदनस्यायनमार्त्तायनमुच्यते, आर्त्तैरीयते प्राप्यत इति कृत्वा । आर्त्तायनमार्त्तानां त्राता आक्रन्द इत्युच्यते, आक्रन्द्यते आर्त्तैराहूयत इति कृत्वा ।।

पदोत्तरपदं गृह्णाति ।। 4.4.39 ।।

पदग्रहणे स्वरूपं गृह्यते, न सुप्तिङन्तमुत्तरपदस्य पदत्वाव्यभिचाराद्, अत एवाह---पदशब्द उत्तरपदं यस्येति ।।

प्रतिकण्ठार्थललामं च ।। 4.4.40 ।।

कण्ठं कण्ठं प्रति प्रतिकण्ठम्, `यथार्थे यदव्ययम्' इति वीप्सायामव्ययीभावः । आभिमुख्ये वा, `लक्षणेनाभिप्रती आभिमुख्ये' इति । यस्तु प्रतिगतः कण्ठं प्रतिकण्ठ इति प्रादिसमासः, तस्य ग्रहणं न भवति' अनभिधानात् ।।

धर्मं चरति ।। 4.4.41 ।।

अधर्माच्चेति वक्तव्यमिति । ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधाद्वचनम् । आधर्मिक इति । नञत्र विरोधिवचनः, पापाचार इत्यर्थः ।।

प्रतिपथमेति ठँश्च ।। 4.4.42 ।।

प्रतिपथमिति । पूर्ववद्वीप्सायामव्ययीभावः, `ऋक्पूरब्धूः' इत्यकारः समासान्तः ।।

समवायान् समवैति ।। 4.4.43 ।।

समवायः समूह उच्यत इति । समवयन्ति तस्मिन्निति कृत्वा । न सम्प्रधारणेति । समयपूर्वस्येणः सम्प्रधारणायामपि प्रयोगोऽस्तीतिमन्यते । समागत्य तदेकदेशीभवतीत्यर्थ इति । तत्र गुणभूतसमागमापेक्षया समवायमिति द्वितीयानिर्देशः । लोके तु प्रायेण सप्तमी प्रयुज्यते---द्रव्ये गुणाः समवयन्तीति ।।

परिषदो ण्यः ।। 4.4.44 ।।

परितः सीदन्त्यस्यामिति परिषत्, सम्पदादित्वादधिकरणे क्विप्, `सदिरप्रतेः' इति षत्वम् ।।

संज्ञायां ललाटकुक्कुट्यौ पश्यति ।। 4.4.46 ।।

संज्ञानं संज्ञा = प्रतीतिः, प्रसिद्धिरित्यर्थः । अभिधेयनियमार्थमिति । अभिधेये सेवकविशेषे भिक्षुविशेषे च नियमः, तत्रैव वृत्तिर्यथा स्यादित्येवमर्थमित्यर्थः । न रूढ्यर्थमिति । लालाटिक-कौक्कुटिकशब्दयोर्डित्थादिवदरूढत्वात् तन्नियोगेन वर्त्तते, यावद्योगे च वर्त्तते । योगेऽपि ललाटकुक्कुटीदर्शनमात्रेण ठञ् न भवतीत्येतावत्संज्ञाग्रहणेन प्रसिद्ध्युपसंग्रहार्थे न क्रियते ।

यादृशस्तु योगोऽत्र विवक्षितस्तं दर्शयति---सर्वावयवेभ्य इत्यादि । अनुपश्लेषस्य विवरणं कार्येष्वनुपस्थायित्वमिति, दूरे स्थितो ललाटमेव पश्यति, न पुनः कार्येषूपतिष्ठत इत्यर्थः ।

कुक्कुटीपातो लक्ष्यते इति । यावति देशे कुक्कुटी पतति यावन्तं देशं समतीत्य निपतीतुं समर्था स देशो लक्ष्यत इत्यर्थः । अनेनापि प्रकारेण देशस्याल्पत्वं लक्ष्यते, कुक्कुटी पततु मा वाऽपतदित्याह---देशस्याल्पतयेति । एतदेव स्पष्टयति---यो हि भिक्षुरिति । भिक्षुः = संन्यासी ।।

तस्य धर्म्यम् ।। 4.4.47 ।।
धर्मः = अनुवृत्त आचारः, ततोऽनपेतं धर्म्यम्, `धर्मपथ्यर्थन्यायादनपेते' इति वचनात्। दौवारिकमिति । `द्वारादीनां च' इति वृद्धिप्रतिषेधः, ऐजागमश्च ।।
ऋतोऽञ् ।। 4.4.49 ।।
होतुर्धर्म्यं हौत्रमिति । होतृशब्दस्य महिष्यादिषु पाठादपपाठोऽयम्, पोतुर्धर्म्यमिति तु पाठः । अपर आह---यजमानसाहचर्यादृत्विग्वचनस्य होतृशब्दस्य महिष्यादिषु पाठः, अयं तु क्रियाशब्द उदाहृत इति ।
नराच्चेति वक्तव्यमिति । नृशब्दात्सूत्रेणैवाञि नारमिति सिद्धे नरशब्दाट्ठको निवृत्त्यर्थं वचनम्, अनभिधानं तु दुर्ज्ञानम् ।।
अवक्रयः ।। 4.4.50 ।।
अवक्रीयतेऽनेनेत्यवक्रय इति । क्रयो नाम = स्वद्रव्यत्यागेन परद्रव्यस्वीकरणम्, तस्यावमत्वमवशब्दो द्योतयति । वाणिज्यार्थं तैलधान्यादिकं देशान्तरं नयताऽस्मिन् शुल्कस्थाने प्रतिभारमेतावद् देयमिति तद्देशादिपतिना यत्कल्पितं सोऽवक्रयः, पिण्डक इति चोच्यते । तत्र स्वद्रव्यमेव दत्वा स्वद्रव्यमेव स्वीक्रियते इत्ययमवक्रयो भवति, न तु मुख्यः ।
नन्वित्यादि । अवक्रयस्याप्यनादिप्रवृत्तत्वादिति भावः । लोकपीडयेति । अर्थलोभेन धर्मातिक्रमेण धर्मापेतत्वं दर्शयति ।।
तदस्य पण्यम् ।। 4.4.51 ।।
पण्यमिति विशेषणामत्यादि । इह यो विशेषणमुपाधिर्वोपादीयते द्येत्ये तस्मिस्तेन भवितव्यम्, तद्यथा---`सास्य देवता', इन्द्रो देवता अस्य ऐन्द्रः स्थालीपाक इति देवतात्वं वृत्तावन्तर्भवति, तद्वदत्रापि पण्यत्वमन्तर्भवतीति नात्रापूर्वं किञ्चित् ।।
किशरादिभ्यष्ठन् ।। 4.4.53 ।।
किशरादयो गन्धविशेषवचनास्तद्वति वर्तन्ते, गन्धान्पिनष्टीति यथा ।।
शलालुनोऽन्यतरस्याम् ।। 4.4.54 ।।
शलालुक इति । `इसुसुक्तान्तात्कः' ।।
शिल्पम् ।। 4.4.55 ।।
कौशलमिति । क्रियाभ्यासपूर्वको ज्ञानविशेषः । मृदङ्गवादनं शिल्पमस्येति । मृदङ्गो वाद्यते येन तन्मृदङ्गवादनं शिल्पम् भावसाधनस्य गौणं सामानाधिकरण्यम् । मृदङ्गवादनविषयं शिल्पमस्येत्यर्थः । मार्दङ्गिक इति ।
ननु मृदङ्गवादनं शल्पिमस्येति विग्रहः कृतः, ततश्च मार्दङ्गवादनिक इति भवितव्यम् ? तत्राह---मृदङ्गेत्यादि । मृदङ्गवादनशब्दात्तु प्रत्ययो न भवत्यनभिधानात्, किं तूपचरितवृत्तेरपि मृदङ्गशब्दादेव भवति । अत एवानभिधानात् मृदङ्गनिष्पादनं श्लिपमस्य मार्दङ्गिकः कुम्भकार इत्यत्र न भवति ।।
मड्डकझर्झरादणन्यतरस्याम् ।। 4.4.56 ।।
अयमेव निर्देशो ज्ञापयति---`तद्वादनवृत्तिभ्यो मृदङ्गादिभ्यः प्रत्ययः' इति । न हि मुख्यमड्डुकझर्झरयोः शिल्पेन समानाधिकरण्यमुपपद्यते ।।
प्रहरणम् ।। 4.4.57 ।।
प्रहरणमायुधम्, प्रह्रियतेऽनेनेति कृत्वा । धानुष्क इति । पूर्ववत् कादेशः, `इणः षः' इति विसर्जनीयस्य षत्वम् ।।
परश्वधाट्ठञ्च ।। 4.4.58 ।।
परश्वधः = परशु ।।
शक्तियष्ट्योरीकक् ।। 4.4.59 ।।
शक्यतेऽनया प्रहर्तुमिति शक्तिः, यष्टिशब्दोऽव्युत्पन्नं प्रातिपदिकम् । किमर्थमीकगुच्यते न कगेवोच्यते, का रूपसिद्धिः ? शक्तियष्टिशब्दाभ्यां बह्वादिङीषन्ताभ्यां लिङ्गविशिष्टपरिभाषया ककि कृते शाक्तीको याष्टीक इति सिद्धम् ; न सिध्यति ? `केऽणः' इति ह्रस्वत्वं प्राप्नोति । विभाषा ङीबुक्तः, तदभावपक्षे दीर्घस्य शङ्कैव नास्ति ? एवं तर्हि इकगेवोच्येत, इकारेऽपि हि सवर्णदीर्घत्वे सिध्यति, यस्येति लोप इकारोच्चारणसामर्थ्यान्न भविष्यति । पदस्यावग्रहनिवृत्तिरिकारस्य प्रयोजनम् । एवं तर्हि सूत्रारम्भो निष्फलः स्यात्, पूर्वसूत्रविहितेन ठकैवावग्रहनिवृत्तेः सिद्धत्वात् ? नानर्थकम् ; वाक्यनिवृत्त्यर्थत्वात् । एवमपि प्रत्ययान्तरमनर्थकं शक्तियष्ट्योरित्येतावद्वक्तव्यम्, ठक् प्रकृतः, तस्य पुनर्विधानं वाक्यनिवृत्त्यर्थं भविष्यति, किमीकको विधानेन, तद्विधानात्तुयस्येति लोपो न भविष्यति । यथैव तर्हि यस्येति लोपो न भवति एवं सवर्णदीर्घत्वमपि न स्यात्; यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, यस्य तु विधेर्निमित्तमेव नासौ बाध्यते, यस्येतिलोपं च प्रति इकारोच्चारणमनर्थकं सवर्णदीर्घस्य पुनर्निमित्तमेव ।।
अस्तिनास्तिदिष्टं मतिः ।। 4.4.60 ।।
यद्यस्ति मतिर्यस्य स आस्तिकः, चोरेऽपि प्राप्नोति, तस्यापि मतिसद्भावात् ? तत्राह---न चेति । तद्विपरीत इति । परलोको नास्तीति मतिर्यस्य तन्नास्तिकः= लौकायतिकः, न त्वचेतनः पदार्थः, मत्यभावमात्रे प्रत्ययस्यानिष्टत्वात् । दिष्टम् = दैवम्, तद्विषया मतिर्यस्य स दैष्टिकः, वृत्तावपि प्रमाणानुपातिनी मतिर्यस्येति दैववित्, प्रमीयते तेभ्यो दैवमिति । प्रमाणशब्देनेतिहासपुराणादिविवक्षितम् ।

अस्तिनास्तिशब्दौ निपाताविति । तेन प्रातिपदिकाधिकारो न बाध्यते इति भावः । वचनसामर्थ्याच्चेत्यभ्युपगम्यवादः ।।
शीलम् ।। 4.4.61 ।।
शीलं स्वभाव इति । शील्यते पुनः पुनः क्रियतेऽनेनेति कृत्वा । अपूपभ7णं शीलमस्येति । शीलविषये शीलत्वमारेप्य सामानाधिकरण्येन व्यपदेशः । भक्षणक्रियेत्यादि । शीलं तावदुपात्तत्वादन्तर्भवति, क्रियाविषयत्वाच्च शीलस्य क्रियाद्यन्तर्भवति, स्वभावाच्च भक्षणक्रिया, न निषादिका ।।
छत्त्रादिभ्यो णः ।। 4.4.62 ।।
छत्त्रशीलता शिष्यस्य दर्शयितुमाह---छादनादावरणाच्छत्रमिति । छादयतेः ष्ट्रनि `हस्मन्त्रन्क्विषु च' इति ह्रस्वः । छत्त्रशील इति । छत्त्रसहचरिता छादनक्रिया शीलमस्येत्यर्थ । यदि त्वपूपभक्षणं शीलमस्यापूपिक इतिवत् छत्त्रावरणं शीलमस्य छात्त्रिक इति व्युत्पाद्यते, तदा दासेऽपि प्राप्नोति; अभिधानस्वाभाव्यात्तु तथा नाश्रीयते ।
उपसर्गपूर्वो गृह्यते इति । ततश्च तस्य `आतश्चोपसर्गे' इत्यादिना व्युत्पत्तिः; केवलस्य स्थाशब्दस्याभावात् । केवलस्य तु पाठः सर्वोपसर्गग्रहार्थः । चुरेति पठ्यते, तत्र चोरयतेः `ण्यासश्रन्थो युच्' इति युचि प्राप्तेऽस्मादेव निपातनादकारः, गुणाभावश्च । न च युचोऽन्यत्र बाधः, चोरणेत्यपि भवति ।।
कर्माध्ययने वृत्तम् ।। 4.4.63 ।।
कर्म = क्रिया, तच्च स्खलितमपचाररूपं विवक्षितम्, न तच्छीलं कर्म, तेनेह न भवति---अध्ययने जपो वृत्तोऽस्येति । एतच्चभिधानस्वाभाव्याल्लभ्यते । तदेतद्वक्ष्यति---यस्याध्ययने नियुक्तस्येत्यादि । एकमन्यदिति । सम्यक्पाठापेक्षया ।।
बह्वच्पूर्वपदाट्ठच् ।। 4.4.64 ।।
स्वरभेदेऽप्यन्यत्वं भवति, न वर्णभेद एवेत्याह---उदात्ते कर्त्तव्ये इति । उदात्तग्रहणं सम्यक्स्वरस्योपलक्षणम् । अनुदात्तग्रहणं चासम्यक्स्वरस्य ।।
हितं भक्षाः ।। 4.4.65 ।।
हितम्, भक्षाः---इति पदयोः पर्यवसानेन सम्बन्धः । अत्र `हितम्' इति सामान्योपक्रमत्वादेकवचनं नपुंसकत्वं च । `भक्षाः' इत्यपूपादिविशेषेषूपसंग्रहात्पुंल्लिङ्गं बहुवचनं च । अत एवाह---यत्तत्प्रथमासमर्थं हितं चेत्तद्भवति तच्च भक्षा इति ।
एवं तर्हीति । एवं च चतुर्थ्यर्थे प्रत्ययो न षष्ठ्यर्थे । कथं तर्हि पूर्वमुक्तमस्येति षष्ठ्यर्थ इति ? एवं तर्ह्यधिकारमात्रापेक्षया तदुक्तम् । अपर आह---`हितं भक्षास्तदस्मै' इति सूत्रच्छेदः, ततः `दीयते नियुक्तम्' इति तस्या एवेति ।
हितार्थः क्रिया चेति । हितार्थस्तावदु पात्तत्वादन्तर्भवति । भक्षणक्रियाप्यपूपादिशब्दानां लक्षणया तत्र वृत्तेरन्तर्भवति ।।
तदस्मै दीयते नियुक्तम् ।। 4.4.66 ।।
अव्यभिचारोनियोग इति । अस्मिन्पक्षे नियुक्तमिति क्रियाविशेषणत्वात्कर्मणि द्वितीया । अग्रभोजनमस्मै नियुक्तं दीयत इति । यद्यग्रभोजनं दीयते तदास्मै एवेत्येष नियोगार्थः । तेन कदाचिल्लोपेऽपि न नियुक्तताया हानिः ।
केचित्त्विति । अत्र पक्षे नियुक्तमित्यन्तसंयोगे द्वितीया ।।
श्राणामांसौदनाट्टिठन् ।। 4.4.67 ।।
`श्रा पाके' क्तः, क्षीरहविषोरेव निपातनाच्छभावाभावे `संयोगादेरातो धातोः' इति निष्टातकारस्य नकारः । श्राणा = यवागूः । मांसमिश्र ओदनो मांसौदनः । ठञेव कस्मान्नोक्त इति । लाघावात्स एव युक्तो वक्तुमिति भावः । न ह्यत्रेति । द्वे अप्येते प्रकृती पूर्वमेव वृद्धे, योऽपि `वृद्धिनिमित्तस्य' इति पुंवद्भावप्रतिषेधः, स टिठन्यपि `न कोपधायाः' इति भवति । मासौदनग्रहणमित्यादि । ठञ्येव वक्तव्ये टिठनो वचनमेवात्र प्रमाणमिति तेषां भावः ।।
भक्तादणन्यतरस्याम् ।। 4.4.68 ।।
भजेर्भक्तम् = अन्नम् ।।
तत्र नियुक्तः ।। 4.4.69 ।।
नियुक्तमिति प्रकृते पुननियुक्तग्रहणमर्थभेदार्थमेव, तमेवार्थभेदं दर्शयति--नियुक्तोऽधिकृत इत्यादि । किञ्च--प्रकृतं नियुक्तग्रहणं प्रकृत्यर्थविशेषणस्य दीयत इत्यस्योपाधिः, न तस्येह प्रत्ययार्थत्वं शक्यं विज्ञातुम् ।।
अध्यायिन्यदेशकालात् ।। 4.4.71 ।।
अधीते इत्यध्यायी, आवश्यके णिनिः, ग्रह्यादिलक्षणो वा । अध्यनस्य यौ देशकालौ शास्त्रेण प्रतिषिद्धौ तावदेशकालशब्देनोच्येते इति । अप्रतिषिद्धाभ्यां देशकालशब्दाभ्यामन्यत्वात्पर्युदासवृत्त्या, अभक्ष्यास्पर्शनीयवत् । तद्यथा---शूद्रादिप्राणिभिर्भक्ष्यमाणमपि लशुनमभक्ष्यमित्युच्यते, स्पृश्योऽपि चण्डालोऽस्पृश्य इत्युच्यते, अप्रतिषिद्धाभ्यां भक्ष्यस्पृश्याभ्यामन्यत्वात्; तद्वदिहापि श्मशानचतुर्दश्यौ स्वरूपेण देशकालावेव सन्तावप्रतिषिद्धाभ्यां देशकालाभ्यामन्यत्वाददेशकालशब्देनोच्येते । `अध्यनस्य' इत्येतदध्यायिना प्रत्ययार्थेन सन्निधापितत्वाल्लभ्यते ।।
कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति ।। 4.4.72 ।।
व्यवहरति सम्भवति पणिना समानार्थः, आह हि---`व्यवहृपणोः समर्थयोः' इति; अस्ति विवादे---व्यवहारे पराजित इति, अस्ति विक्षेपे---शलाकां व्यहरतीति, अस्ति क्रियातत्त्वे; तदिह चरमस्य ग्रहणं तद्धितस्वभावादित्याह---व्यवहारः क्रियातत्त्वमिति । यत्र देशे या क्रिया यथानुष्ठेया तत्र

तस्यास्तथानुष्ठानमित्यर्थः । वंशाः=वेणवः कठिना यस्मिन्वंशकठिनो देशः । वर्ध्री = चर्मविकारः कठिना अस्मिन्वर्ध्रकठिनः, आहिताग्न्यादित्वाद्विशेषणस्य परनिपातः । चक्रयुक्तेन शकटेन चरतीति चक्रचरः, स देशाननुक्रमेण चरन् तत्रानुष्ठेयाविपरीतं चरन्नेवमुच्यते । संस्थानप्रस्तारौ सन्निवेशौ ।।

निकटे वसति । 4.4.73 ।।

अरण्यं निवासे यस्य स आरण्यकः, `अरण्यान्मनुष्ये' इति वुञ् । भिक्षुः - संन्यासी । ग्रामात्क्रोशे इति । `यतश्च निर्द्धारणम्' इति पञ्चमी । अयं च विविषोऽभिधानस्वभावाल्लभ्यते ।।

आवसथात् ष्ठल् ।। 4.4.74 ।।

आवसत्येतमिति आवसथः, `उपसर्गे वसेः' इतियथप्रत्ययः । ठकः पूर्णो विधिरिति । प्राग्वहतीयस्य ठको विधानं पूर्णामित्यर्थः, अवधिरिति पाठे पूर्णः प्राप्त इत्यर्थः ।।

तद्वहति रथयुगप्रासङ्गम् ।। 4.4.76 ।।

ननु य एवार्थो रथं वहतीति स एव रथस्य वोढेति, तत्र तस्येदं रथाद्यदित्येव सिद्धं नार्थो रथग्रहणेन ? ननु तत्रोक्तं रथाङ्गएवेष्यत इति, वोढर्यपि प्रयोगदर्शनादिष्यताम् ? इदं तर्हि प्रयोजनम्---द्वौ रतौ वहति द्विरथ्यः, `द्विगोर्लुगनपत्ये' इति प्राग्दीव्यतीयो लुग्मा भूत्, `रथसीताहलेभ्यो यद्विधौ' इति तदन्तविधिः । `युग्यं च पत्त्रे' इत्येव सिद्धम् । इह युगग्रहणमयुग्यमित्यत्र `ययतोश्चतदर्थे' इति स्वरार्थम्, निपातनस्य तु क्यबन्तत्त्रादेष स्वरो न स्यात् । रथाङ्गवचनोऽयं युगशब्दः, इह न भवति---युगं वहति राजा कलिं द्वापरं वेति । प्रासङ्गशब्दो वत्सानां दमनकाले स्कन्धे यत्काष्ठमासज्यते तद्वाची गृह्यते, प्रसज्यते इति प्रासङ्गः, इह न भवति---प्रसङ्गादागतः प्रासङ्गस्तं वहतीति । एतच्चाभिधानस्वभावाल्लभ्यते ।।

धुरो यड्ढकौ ।। 4.4.77 ।।

धूर्धूर्वतेः, `भ्राजभास' इति क्विप्, `राल्लोपः' । धुरं वहतीति धुर्य इति । `न भकुर्छुराम्' इति प्रतिषेधात् `हलि च' इति इति दीर्घाभावः । ढञत्र विधीयते, न तु ढकञ् । धौरेयो भविता पितुरिति च दृश्यते, धौरेयक इति स्वार्थिके कनि भवति ।

इह `धुरो ढक् च' इति वक्तव्यम्, चकारात्प्राग्घतीयो यद्भविष्यति ।।

खः सर्वधुरात् ।। 4.4.78 ।।

स्त्रीलिङ्गनिर्देशो न्याय्य इति । सर्वा चासौ धूश्चेति `पूर्वकाल' इत्यादिना समासः, `ऋक्पूरब्धूः' इत्यकारः समासान्तः, तत्र धूः शब्दस्य स्त्रीलिङ्गत्वात् `परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति वचनात् स्त्रीलिङ्गनिर्देशस्य न्याय्यत्वम्, यथा---`बन्धुनि बहुव्रीहौ' इत्यत्र । दक्षिणधुरीणः । दक्षिणां धुरं वहति, उत्तरां धुरं वहतीति तद्धितार्थे समासः, ततोऽकारः समासान्तः ।।

एकधुराल्लुक् च ।। 4.4.79 ।।

एकधुरादिति निर्देशः सर्वधुरादित्यनेन व्याख्यातः । चकारेण खोऽनुकृष्यते, तेन स तावद्विधेयः, प्रत्ययादर्शनस्य च लुक् संज्ञा । न चान्योऽत्र प्रत्ययः, तेन खस्यैव लुग्विज्ञायते, तस्य यदि लुक् स्याच्चकारेणानुकृष्य विधानमनर्थकं स्यात् । एकधुराल्लुगिति वक्तव्यम्, लुक् स्वभावादनन्तरस्व खस्य प्राकरणिकस्य यतो वा विधिरनुमास्यते, तदाह---तस्य च तुग्भवतीति एकधुरीण इति । एकां धुरं वहतीति तद्धितार्थे समासः, तत्रोक्तोऽकारः समासान्तः, ततः खः ।।

शकटादण् ।। 4.4.80 ।।

शकटादण्विधानमनर्थकम् । कथं शाक्ट इति ? `तस्येदम्' इत्यण् भविष्यति, यो हि शकटं वहति शकटस्यासौ वोढा भवति ? तत्राहुः---

आरम्भसामर्थ्यादत्रापि तदन्तविधिः, तेन द्वे शकटे वहति, द्वैशकट इति प्राग्दीव्यतीयो लुग्न भवति ।।

हलसीराट्ठक् ।। 4.4.81 ।।

इह यो हलं वहति सरीं च तस्यासौ वोढा भवति, तत्र तस्येदं हलसीराट्ठगित्येव हालिकः सौरिक इति सिद्धम्, नार्थोऽनेन ? अत्राहुः---

आरम्भसामर्थ्यादत्रापि तदन्तविधिः, द्वैहालिकः, द्वैसीरिकः, त्रैसीरिक इति लुङ् न भवतीति ।।

संज्ञायां जन्याः ।। 4.4.82 ।।

जामातुर्वयस्येति । सा हि प्रणयकलहादौ जनीं जामातुः समीपं प्रापयति । जनी वधूरुच्यत इति । जायतेऽस्यां गर्भ इति कृत्वा । `जनिवध्योश्च' इति वृद्धिप्रतिषेधे `कृदिकारादक्तिनः' इति ङीष् ।।

विध्यत्यधनुषा ।। 4.4.83 ।।

पादौ विध्यन्ति पद्या इति । तदन्तीत्यर्थः । `पद्यत्यतदर्थे इति पद्भावः । ऊरव्या इति । `ओर्गुणः', `वान्तो यि प्रत्यये' ।

नन्वसमर्थत्वादिति । सापक्षमसमर्थं भवतीत्यसामर्थ्यम्, प्रत्ययार्थो ह्यत्र बाह्यम्, करणं धनुरपेक्षते । ननु व्यधनमत्र सापेक्षम्, करणक्रिययोः सम्बन्धात्, व्यधनं च प्रधानम्, क्रियाप्रधानत्वादाख्यातस्य, भवति च प्रधानस्यं सापेक्षस्यापि वृत्तिः, यथा---राजपुरुषः शोभन इति ? भवतु क्रियाप्रधानमाख्यातम्, तद्धितस्तु स्वभावात्साधनप्रधानः । क्रिया तु गुणभूतेत्युक्तम् सा च धनुरपेक्षत इत्यसामर्थ्यम् । अनभिधानच्चेति । अत्रैकोपपत्यन्तरमनभिधानमेव दर्शयति । न हीति । `धनुषा पद्यः' इत्युक्ते इत्थम्भूतलक्षणा सहयोगलक्षणा वा तृतीया गम्यते, न तु पादौ धनुषा विध्यतीत्ययं विवक्षितोऽर्थः । अवश्यं चैतदेवं विज्ञेयम्---असमर्थत्वादनभिधआनाच्चात्र प्रत्ययो न भवतीति । यो हि मन्यते---`अधनुषेति प्रतिषेधात्प्रत्ययो न भवति' इति, तस्य शर्कराभिः पादौ विद्ध्यति

कण्टकैरूरू विद्ध्यतीत्यत्र प्रत्ययः स्यादेव ? एवं तर्हि विशेषोपलक्षणपरोऽत्र धनुषेति निर्देशः, न तु धनुषः करणत्वप्रतिषेधपर इत्यर्थः । धनुष्प्रतिषेधेनेति । `नित्यं समासेऽनुत्तरपदस्थस्य' इति षत्वमुपलक्षणत्वमेव प्रतिपादयति । यस्यामिति । तेनेह न भवति---चौरं विद्ध्यतीति । सम्भाव्यते हि प्रच्यवच्छेदनादिकायां चोरस्य व्यधनक्रियायां धनुषः करणत्वम् ।।

धनगणं लब्धा ।। 4.4.84 ।।

लब्धेति तृनन्तमेतत्, तृजन्ते तु `कर्तृकर्मणोः कृति' इति षष्ठ्या भवितव्यम् । तृनन्ते तु `न लोकाव्ययनिष्ठा' इति प्रतिषेधाद् द्वितीयैव भवति ।।

वशङ्गंतः ।। 4.4.86 ।।

`वश कान्तौ', वशनं वशः, `वशिरण्योरुपसङ्ख्यानम्' इत्यच् । कामः=इच्छा, तां प्राप्त इति । परेच्छानुगामीत्यर्थः ।।

पदमस्मिन् दृश्यम् ।। 4.4.87 ।।

निर्देशादेव प्रथमा समर्थविभक्तिरिति । द्वितीया तु न भवति; दृश्यमिति क्यपा कर्मणोऽभिहितत्वात् । शक्यार्थे कृत्यप्रत्यय इति । तेन योग्यत्वे सति पदस्पर्शनाभावेऽपि पद्यः कर्दम इति प्रयोग उपपद्यत इति भावः । मुद्रा= सन्निवेशः, प्रतिरूपा मुद्रा प्रतिमुद्रा । नातिद्रवो नातिशुष्क इति । पांसवोऽति नात्यल्पा नातिबहुलाः पद्याः ।।

मूलमस्यावर्हि ।। 4.4.88 ।।

प्रथमासमर्थादिति । द्वितीयाया निमित्ताभावान्निर्देशादेव प्रथमैव भवतीति भावः । `वृहू उद्यमने', वादिरयं न बादिः । दृश्यते हि `उद्वृह रक्षः सहमूलमिन्द्र ह्यस्मुष्मिक् प्रवृहाण', `तद्ववर्हात्मनोदेवा' इति च आवर्हणमावर्हः=उत्पाटनम्, आवर्होऽस्यास्तीत्यावर्हि, सुष्ठु पक्वा न शक्यन्ते संग्रहीतुम् । मध्यतो लूयमाने कोशस्था अपि यस्यामवस्थायां पतेयुस्तामवस्थां प्राप्ता इत्यर्थः ।।

संज्ञायां धेनुष्या ।। 4.4.89 ।।

यश्च प्रत्ययो निपात्यत इति । कुत्र ? अनिर्दिष्टार्थत्वात्स्वार्थे, तदाह---या धेनुरुत्तमर्णायेति । कथं पुनर्यति प्रकृते यप्रत्ययो निपात्यते ? तत्राहअन्तोदात्तोऽपि ह्ययमिष्यत इति । यति हि `तित्स्वरितम्' इति स्वरितः स्याद्, अन्तोदात्तश्चेष्यते, न केवलं संज्ञायाम्, अपि त्वन्तोदात्तोऽपीत्यपिशब्दस्यार्थः ।।

गृहपतिना संयुक्ते ञ्यः ।। 4.4.90 ।।

अन्यस्यापीत्यादि । गृहपतिर्हि यजमानः, स यथा गार्हपत्ये कार्याणि करोति तथा दक्षिणाग्नावाहवनीये च, भूयो वाऽऽहवनीये; तस्मादन्यस्यापि गृहपतिना योगोऽस्ति । यद्येवम्, तत्राप्यतिप्रसङ्गः ? इत्यत आह---तत्रेति । अपर आह---गृहपतिरग्निविशेषः, तेन संयोगो गार्हपत्यस्यैवाग्निहोत्रेऽपि गार्हपत्ये अग्नये गृहपतये प्रजापतये, पत्नीसंयाजेषु च तत्रैवेज्यते इति , तत्रापि गृहपतिरग्निर्गृह्यते न यजमान इत्यत्र संज्ञाधिकार एव शरणम् ।।

नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु ।। 4.4.91 ।।

तत्र नावादीनां प्रथममूलान्तानां पञ्चानां द्वितीयमूलादीनां च त्रयाणां पूर्वं पृथक्पृथक् द्वन्द्वं कृत्वा ततो द्वयोरपरो द्वन्द्वः कृतः, न त्वष्टानां युगपत्सहविवक्षा; कि सिद्धं भवति ? न मूलयोः सारूप्यादेकशेषो भवति । का पुनरत्र समर्थविभक्तिः ? इत्यत आह---प्रत्ययार्थद्वारेणेति । द्वारम् = मुखम्, उपायः । इह तार्यादयः प्रत्ययार्थाः, तत्सम्बन्धे करणे कर्तरि हेतौ तुल्यार्थयोगे च यथासम्भवं तृतीयैव भवति । नाव्यमिति । अत्र तावत्तरणक्रियायां करणत्वम् । वयसा तुल्य इति । तत्र हेतुमाह---यो येन वयस्तुल्यः स तं प्रति वयस्यः । शत्रौ न भवतीति । किं तु मित्त्र एव भवति ।

ननु चेति । धर्मेण प्राप्यं सुखादि, फलमपि धर्मादनपेतमेव; कार्यस्य कारणाविनाभावादिति प्रश्नः । धर्मं यदनुवर्तत इति । अनादिः शिष्टसमाचारस्तज्जन्यो वाऽऽत्मगुणो धर्मः, यदनुष्ठानमनुवर्तते तद्धर्मादनपेदतम्, फलं तु धर्मादपैत्येवेति कुतः ? इत्याह---कार्यविरोधित्वादिति । धर्मस्य कार्यं सुखानुभवः, कार्यं विरोधि नाशकं यस्य स कार्यविरोधी, तस्य भावः कार्यविरोधित्वं तस्मादित्यर्थः । उत्पन्ने हि फले धर्मो नश्यति, अन्यथा सकृद्धर्मे कृत स्वर्गमनुभवतः प्रभवो न स्यात् ।

वधमर्हतीत्यर्थ इति । वध्यशब्दस्य `दण्डादिभ्यो यः' इत्यत्रार्थे व्युत्पादितत्वात्।

अनाम्यमभिभवनीयमिति । अनेकार्थत्वाद्धातूनामापूर्वो नमिरभिभवे वर्तते ।

पटादीनामुत्पत्तिकारणमिति । पटादीनामुत्पत्त्यर्थं वणिग्भिर्विनियुक्तं यद्वस्तु तन्मूलशब्दवाच्यमित्यर्थः । तेनेति । मूलेन । तदिति । मूल्यम् । शेषीक्रियत इति । शेषीकरणमेवात्राभिभव इत्यर्थः । गुणभावमापद्यते कथमित्याह---मूलं हि सगुणं मूल्यं करोतीति । मूल्यमिह कर्तृ, मूलं कर्म, पटादिषु विक्रीयमाणेषु यन्मूलातिरिक्तं वस्तु लाभो नाम तन्मूल्यम्, गुणो भागः, स पुनरिह मूल्यमेव, तेन सह वर्तते सगुणः, हिशब्दो हेतौ । एतदुक्तं भवति---यस्मान्मूल्यमात्मनैव भागभूतेन सभागं मूलं करोति तस्मान्मूले मूल्यभिभूयते शेषीक्रियते, मूल्ये सति तेन गुणेन सगुणं मूलं भवतिः इयमेव चावनतिः, अयमेवाभिभवः, इदमेव शेषीकरणम् । लोके तु यावता द्रव्येण पटादिको विक्रीयते तत्र समुदाये मूल्यशब्दः प्रसिद्धः, नं मूलतिरिक्ते भागे, स च मूल्यसम्भवादौतत्रापि क्रयद्रव्ये मूल्यशब्दप्रयोगः सिद्धो भवति ।

सीता = हलाग्रम्, सम्पूर्वादिणः क्तः, समितम् = सङ्गतम्, निम्नोन्नतादिरहितं कृतमित्यर्थः, समीकृतमिति यावत् । द्विसीत्यमिति । द्वाभ्यां सीताभ्यां समीकृतमिति तद्धितार्थे समासः, ततः प्रत्ययः ।

तुलया सम्मितं तुल्यमिति । अत्र तुल्यार्थयोगे तृतीया । यद्यपि तद्योगे षष्ठ्यति भवति, तथापि नावादिभिस्साहचर्यात्तुलाशब्दादपि तृतीयासमर्थादेव प्रत्ययः

। अत एव पूर्वमुक्तम्---`तृतीयासमर्थविभक्तिर्लभ्यते' इति । षष्ठ्यन्तादपि न कश्चिद्दोषः, न्यायस्तु कथितः । कथं पुनस्तुल्यस्य तुलया सदृशत्वमत आह---यथेति । एवं तदपीति । तदपि तुल्यं प्रतियोगिनं सादृश्येन परिच्छिनत्ति, एतद् व्युत्पाद्यत्वेन प्रदर्शितम् । सदृशपर्यायस्तुल्यशब्दः, नावयवार्थः कश्चित्, अत एव `तुल्यास्यप्रयत्नं सवर्णम्' इत्यत्रोक्तम्---`तुल्यशब्दः सदृशपर्यायः' इति ।।

धर्मपथ्यर्थन्यायादनपेते ।। 4.4.92 ।।

निर्देशादेवेति । सत्यर्थसम्भवेऽर्थान्तरस्य वा सम्भवे सति निर्देशादिति द्रष्टव्यम्, `धुरो यड्ढको' इत्यत्रातिप्रसङ्गो नोद्भावनीयः । संज्ञाधिकारादभिधेयस्य नियत इति । शास्त्रीयात् पथो यदनपेतं तत् पथ्यम्, न तु तस्मादनपेतश्चोरः ।।

छन्दसो निर्मिते ।। 4.4.93 ।।

प्रत्ययार्थसामर्थ्यं लभ्यते इति । निर्माणे छन्दसः करणत्वात् । इष्टपर्यायश्चन्दः शब्दो गृह्यते इति न वेदवचनः, नापि त्रिष्टुबादिवचनः । एतच्च संज्ञाधिकाराल्लभ्यते । यद्यपि स्वच्छन्दतो हि वचसांप्रवृत्तिः, `छन्दानुवृत्तिदुत्साध्या' इत्यादावकरान्तश्छन्दशब्द इच्छापर्यायः, तथापि तस्यैव धातोरसुन्नन्तस्येच्छावाचित्वमविरुद्धं चेति मन्यते ।।

उरसोऽण् च ।। 4.4.94 ।।

औरसः पुत्र इति । आत्मनोत्पादित इत्यर्थः । संज्ञाधिकारादभिधेयनियम इति । उरसा निर्मितं सुखमित्यादौ न भवति ।।

हृदयस्य प्रियः ।। 4.4.95 ।।

हृदयम् = अन्तः करणम्, प्रियम् = प्रीतिकरम् । हृद्यमिति । `हृदयस्य हृल्लेखयदण्लासेषु' इति हृदादेशः ।।

बन्धने चर्षौ ।। 4.4.96 ।।

षष्ठीसमर्थादिति । बन्धनयोगे कृद्योगलक्षणा कर्मणि षष्ठी । ऋषिर्वेदो गृह्यते इति । `तदुक्तमृषिणा' इत्यादौ दर्शनात् । यत्स्वाध्यानसम्पन्ने वसिष्ठादवृषिशब्दः, तस्य ग्रहणं न भवति; संज्ञाधिकारात् ।।

मतजनहलात्कर्णजल्पकर्षेषु ।। 4.4.97 ।।

प्रत्ययार्थसामर्थ्यलब्धेति । करणादयः प्रत्ययार्थाः, तद्वचनाः करणादयः शब्दाः कृदन्ताः, तद्योगे यथायथम् `कर्तृकर्मणोः कृति' इति षष्ठी भवति । संज्ञाधिकाराद्धलसम्बन्धाच्च कर्षशब्दोऽपि क्रियावचनो गृह्यते, न परिमाणशब्दः । मतस्य करणमिति कर्मणि षष्ठी । जनस्य जल्प इति कर्त्तरि । जल्पशब्दो भावसाधनः, अत एवात्र भावः साधनं वेति नोक्तम् । हलस्य कर्षं इति कर्मणि षष्ठी, करणस्य वा कर्तृत्वविवक्षायां कर्तरि । द्विहल्य इति । `रथसीताहलेभ्यो यद्विधौ' इति तदन्तविधिः ।।

तत्र साधुः ।। 4.4.98 ।।

सामन्य इति । `ये चाभावकर्मणोः' इति प्रकृतिभावः । प्रवीणः = निपुणः, योग्यः = समर्थः । तत्र हि परत्वादिति । `तस्मै हितम्' इत्यनेन चतुर्थीसमर्थात्प्रत्ययो विधीयते, अनेन तु सप्तमीसमर्थात्तेन नात्र `विप्रतिषेधे परम्' इत्येतत्परत्वापरत्वं विवक्षितम्, कि तर्हि ? इष्टवाची परशब्दः, उपकारलक्षणे साधौ प्राक्क्रीतीयानामेवेष्टत्वात् `तस्मै हितम्' इत्यनेन विधिना भवितव्यमित्यर्थः । एतच्च संज्ञाधिकाराल्लभ्यते ।।

प्रतिजनादिभ्यः खञ् ।। 4.4.99 ।।

जनं जनं प्रति प्रतिजनमिति `यथार्थे--यदव्ययम्' इति वीप्सायामव्ययीभावः । प्रतिजने साधुरिति । `तृतीयासमप्तम्योर्वहुलम्' । परस्यकुलम्, अमुष्यकुलमिति । षष्ठीसमासेऽस्मादेव निपातनात षष्ठ्या अलुक् । पूर्वसूत्र उत्तम्---`साधुः प्रवीणो योग्यो वा गृह्यते, नोपकारकः', तत्र प्राक्क्रीतीयानामेवेष्टत्वादिति, इह तु न तथेत्याह---यत्रेति । प्राक्क्रीतीया बाध्यन्ते इति । अप्राप्तिरत्र बाधः; न हि चतुर्थ्यन्ताद्विधीयमानानां सप्तम्यन्तेभ्यः प्राप्तिरस्ति । तत्र प्राक्क्रीतीया न भवन्तीति वक्तव्ये बाध्यत इत्युक्तम्---`चतुर्थ्यन्तेभ्योऽप्यनभिधानात्प्राक्क्रीतीया न भवन्ति' इति दर्शयितुम् ।।

भक्ताण्णः ।। 4.4.100 ।।

भक्तास्तण्डुला इति । भक्तयोग्याः, त्रिफलीकृतत्वात् ।।

परिषदो ण्यः ।। 4.4.101 ।।

णप्रत्ययोऽप्यत्रेष्यते इति । `पारिषदा कृतिरेषा तत्रभवताम्', `सर्ववेदपारिषदं हीदं शास्त्रम्' इति च भाष्यकारप्रयोगात् ।।

पथ्यतिथिवसतिस्वपतेर्ढञ् ।। 4.4.104 ।।

पतन्त्यनेनेति पन्थाः, `गमेरिनिः' `पतेस्थ च'; अतति सततं गच्छतीत्यतिथिः, न विद्यते तिथिर्यस्य सोऽप्यतिथिः, एकमपि दिनमत्रास्थित इत्यर्थः । वसनं वसतिः, `वसेश्च' इत्यतिप्रत्ययः, तत्र योग्या वासतेयी रात्रिः । स्वपतिराढ्यः, स्वपतेर्योग्यं स्वापतेयं धनम् ।।

समानतीर्थे वासी ।। 4.4.107 ।।

वसतीति वासी, निपातनाण्णिनिः, ग्रह्यादेराकृतिगणत्वाद्वा साधुरिति । निवृत्तमिति । तेन किं सिद्धं भवति ? इत्याह---वासीति प्रत्ययार्थ इति । साधुरित्यस्यानुवृत्तौ तु तस्यैव विशेषणं वासिग्रहणं स्यात् । तीर्थशब्देनेह गुरुरुच्यत इति । प्रयागादितीर्थसाधर्म्यात् । तरन्त्यनेनेति तीर्थम्, तरतेः क्थन् । मुख्यस्य तीर्थस्य ग्रहणं न भवति; संज्ञाधिकारात् ।।

समानोदरे शयित ओ चोदात्तः ।। 4.4.108 ।।
ओकारश्चोदात्त इति । तित्स्वरितस्यापवादः । शयितः स्थित इति । शेतेः स्थितावपि वृत्तेः, आमाशयः, जलाशय इति यथा । समानोदर्य इति । उद्दीर्यत इत्युदरम्, उदि दृणातेरलचौ पूर्वपदान्तलोपश्चेत्यलचोरन्यतरः । समानं च तदुदरं च समानोदरम्, `पूर्वापरप्रथम' इत्यादिना समासःष ततः प्रत्ययः ।।
सोदराद्यत् ।। 4.4.109 ।।
यकारादौ प्रत्यये विवक्षित इति । `विभाषोदरे' इत्यत्र `तीर्थे यः' इत्यतो य इत्यनुवर्तते, तत्र य इत्येषा विषयसप्तमीति दर्शयति । ओ चोदात्त इति तु नानुवर्तत इति । यविधानसामर्थ्यात् ।।
भवेच्छन्दसि ।। 4.4.110 ।।
अणादीनां घादीनां चापवाद इति । `तत्र भवः' इति प्राप्तानाम् । सति दर्शनेतेऽपि भवन्तीति । तद्यथा---मुञ्जवान्नाम पर्वतस्तत्र भवो मौञ्जवतस्तस्येति भक्षः । मेध्यायेति । अत्र `यतोऽनावः' इत्याद्युदात्तत्वं प्राप्नोति, अन्तस्वरितं चाधीयत इति ।।
पाथोनदीभ्यां ड्यण् ।। 4.4.111 ।।
पाथोऽन्तरिक्षमिति । पाति भूताद्यवकाशदानेनेति कृत्वा । यद्यपि `पातेर्बलेर्जुट्', `उदके थुट्', `अन्न चे' इति अन्नोदकयोः पाथः--शब्दोऽसुनि व्युत्पाद्यते, तथापि बाहुलकादन्तरिक्षेऽपि भवति ।।
वेशन्तहिमवद्भ्यामण् ।। 4.4.112 ।।
वेशन्तः = पल्वलम्, `विशेर्झ च', तत्र भव आपः वैशान्त्यः ।।
स्रोतसो विभाषा ड्यड्ड्यौ ।। 4.4.113 ।।
`स्रुहीभ्यां तुट् च' इत्यसुन् । स्रेतः=नदीप्रवाहः ।।
सगर्भसयूथसनुताद्यन् ।। 4.4.114 ।।
`अर्त्तिगृभ्यां भन्', गिरति गीर्यते वा गर्भः । युता भवन्त्यस्मिन्यूथम्, `तिथपृष्ठगूथयूथप्रोथाः' इति क्थन्प्रत्ययान्तो निपातितः । नुतिर्नुतम्, `नपुंसके भावे क्तः'। सगर्भादयस्त्रयोऽपि कर्मधारयाः ।।
तुग्राद् घन् ।। 4.4.115 ।।
`तुरुस्तुशम्यमः सार्वधातुके' इत्यत औणादिको रन् गुडागमः ।।
अग्राद्यत् ।। 4.4.116 ।।
`ऋज्रेन्द्राग्र' इत्यग्रशब्दो निपातितः । सामान्येनेति । `भवे छन्दसि' इति । ताभ्यां बाधा मा भूदिति पुनर्विधीयत इति । एवमपि यद्ग्रहणमनर्थकम्, अग्रादित्येवास्तु, प्राकरणिको यद्भविष्यति; अथ वा `अग्राद् घच्छौ च' इति चकाराद्भविष्यति, `अग्रपश्चाडिडमच्' इत्यस्य समुच्चयो न शक्यः, विदेशस्थत्वात् ? एवमप्यनन्तरस्य घनः समुच्चयो विज्ञायेत । योगविभागे पुनरनन्तरो घनेव स्यात्, योगविभागसामर्थ्यान्न भविष्यति । अथ कथम् `ताश्च एव चाध्यजननः', `एतच्छिवे विजानीहि ब्राह्मणाध्यस्य लक्षणम्' इति भाषायां प्रयोगः ? छन्दोवदृषयः कुर्वन्ति ।।
घच्छौ च ।। 4.4.117 ।।
चकारस्तुग्राद्धनित्यस्यानुकर्षणार्थ इति । पूर्वमेव विहितस्य यतोऽनुकर्षणे प्रयोजनाभावात् ।।
समुद्राभ्राद घः ।। 4.4.118 ।।
समुनत्तीति समुद्रः, उन्देः `स्फायितञ्चि' इति रक्प्रत्ययः । अपो बिभर्त्तीत्यभ्रम्, मूलविभुजादित्वात्कः । तस्य लक्षणस्येति । तस्य पूर्वनिपातस्य यल्लक्षणं तस्येत्यर्थः । व्यभिचारित्वादिति । व्यभिचारस्य चायमेव निर्देशो लिङ्गम् ।।
बर्हिषि दत्तम् ।। 4.4.119 ।।
`बृहेर्नलोपश्च' इतीसिप्रत्ययः, बर्हिः ।।
दूतस्य भागकर्मणी ।। 4.4.120 ।।
दूताद्भागे `तस्येदम्' इत्यणि प्राप्ते वचनम्, कर्मणि तु दूतवणिग्भ्यां चेत्यौपसंख्यानिके ये ।।
रक्षोयातूनां हननी ।। 4.4.121 ।।
रक्षेरसुनि रक्षः `कमिमनिजनि' इत्यादिना । यातेस्तौ यातुः । यातुशब्दो रक्षः पर्यायः । `विरूपाणामपि समानार्थानाम्' इत्येकशेषस्तु न भवति; बह्वर्थाभिधायिस्वरूपपरत्वेन सूत्रे भिन्नार्थयोर्निर्देशात् । निर्देशादेव समर्थविभक्तिरिति । सा पुनः `कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी । वहुवचनं स्तुतिवैशिष्ट्यज्ञापनार्थमिति । तद्धि बहुवचनात्प्रत्ययविध्यर्थम्, अन्यथा द्वित्वाद् द्विवचनमेव न्याय्यं स्यात् । कथं पुनर्बहुवचनेन स्तुतिवैशिष्ट्यं ज्ञाप्यते ? तत्राह---बहूनामिति । बहुवचनान्तात्प्रत्यये बहूनां रक्षसां हनने सामर्थ्यमुद्भाव्यते मन्त्रे । तथा च स्तुतिविशिष्टा सम्पूर्णा भवति । योगश्चायं शैषिकयोरणछयोरपवादः ।।
रेवतीजगतीहविष्याभ्यः प्रशस्ये ।। 4.4.122 ।।

रयिरस्यास्तीति रेवती, `रयेर्मतौ बहुलम्' इति बहुलवचनात्सम्प्रसारणमम् । उगित्त्वान्ङीप्, नक्षत्रे तु गौरादित्वान्ङीष् । जगच्छब्दाच्छतृवद्भावान्ङीप् । षष्ठीसमर्थेभ्य इति । `शंसु स्तुतौ' इत्यस्मात् `कृत्यल्युटो बहुलम्' इति भावे क्यप्, तद्योगे कर्मणि षष्ठी भवति, हविषे हिता हविष्या, `उगवादिभ्यो यत्' ।।

असुरस्य स्वम् ।। 4.4.123 ।।

न सुरोऽसुरः = सुरप्रतिपक्षः । अथ वा `असेरुरन्', अस्यत्यस्यते वेत्यसुरः ।।

मायायामण् ।। 4.4.124 ।।

मीयतेऽनयेति माया = असदर्थप्रकाशनशक्तिः । माङ औणादिको यः । नेति वक्तव्येऽण्ग्रहणं लाघवे विशेषाभावात् ।।

तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः ।। 4.4.125 ।।

मतुनिर्ह्रासः = मतोरपचयः । तद्वानित्यवयवेन समुदायो निदिश्यत इति । स विवक्षितो वर्च शब्दादिरवयवोऽस्मिन्मन्त्रलक्षणे समुदायेऽस्तीत्येवमेकदेशार्थाभिधायिनः सर्वनाम्नः समुदाये मतुबयं विहित इत्यर्थः । वर्चः शब्दो यस्मिन्मन्त्रेऽस्तीति । स पुनः कुम्भेष्टकोपधानमन्त्रः---`भूतं च स्थ भव्यं च स्थ देवस्य वः सवितुः प्रसवः' इत्यादिकः । वर्चस्या उपदधातीति । यथा वर्चस्या भवन्ति तथोपधातीत्यर्थः । तेजस्वान्मन्त्रः---`वसु च स्थ वाम च स्थ देवस्य वः सवितुः' इत्यादिकः । वयस्वन्तो मन्त्राः---`त्र्यविर्वयस्त्रष्टुब्' इत्यादिकाः, ऋतुमन्तो मन्त्राः---`मधुश्च माधवश्च' इत्यादिकाः । मन्त्रसमुदायादेव मा भूदिति । ननु तद्वानित्यस्मिन्नसति `समर्थानां प्रथमाद्वा' इति वचनादासामिति प्रथमं निर्दिष्टत्वात् षष्ठ्यन्तादिष्टकावाचिन उपधाने मन्त्रे प्रत्ययविधिः प्रसज्जनीयः ? सत्यम् ; आसामिति प्रथमं न करिष्यत इति मत्वा प्रश्नप्रतिवचने, ततश्च तद्वानित्यस्याभावे `त्र्यविर्वयस्त्रिष्टुप्लन्दः' इत्यमुपधानमन्त्र आसामिष्टकानामिति वाक्यं स्यात्, ततश्चेतिना परामृष्टान्मन्त्रसमुदायादेव प्रत्ययः प्राप्नोति । वर्चस्वानुपस्यानमन्त्र इत्यादि । उपस्थानं मन्त्रेणाभिमन्त्रणं विवक्षितम्, `शिवेन मा चक्षुषा' इत्यादिकः कुम्भेष्टकाभिमन्त्रणे विनियुक्तः । अङ्गुलिमानित्यादि । यद्यपि सर्वासामिष्टकानामङ्गुलिमान्हस्त उपधानः, तथापि यास्तूष्णीमुपधेया इष्टकास्तासु मन्त्रव्यावृत्त्यर्थतया विशेषणमर्थवत्---एषां कपालानामित्यत्र मा भूदिति । स्त्रीलिङ्गनिर्देशादत्राप्रसङ्ग इति चेति ? एवमपि शर्करासु प्रसङ्गः ।

अनेकपदसम्भवेऽपीति । असति त्वितिकरणे मन्त्रे बहूनां सम्भवाद्येन केनचेत्पदेन तद्वान्मन्त्रो गृह्यं त तथा पदैकदेशेन वर्णसमुदायेन, इतिकरणात्त्वय मतिप्रसङ्गो न भवति ।

मतुब्ग्रहणमुत्तरार्थम् अश्विमानित्यत्र मतुप एव लुग्यथा स्यात्, हनेमाभूदिति । इह तु मत्त्वन्तात्प्रत्ययविधानात्तस्यैव तुग्भविष्यति । वर्चः शब्दादावसुप्रभृतेरप्रसङ्गः, उणादीनामव्युत्पन्नत्वात् इह `प्राणभृत उपदधाति' इत्यादावभेदोपचारात्प्रत्ययाभावः ।।

अश्विमानण् ।। 4.4.126 ।।

सोऽश्विमानिति । यद्यपि बहवोऽश्विमन्तो मन्त्राः `ध्रुवक्षितिः' इत्यादिकाः, तथापि सामान्यापेक्षमेकवचनम् ।।

वयस्यासु मूर्ध्नो मतुप् ।। 4.4.127 ।।

वयस्यास्विति । छन्दसि या वयस्या इष्टका उच्यन्ते तास्वित्यर्थः । ताश्च बह्व्यः, तास्वन्तश्चतस्रो मूर्धन्वत्यः, `विष्टम्भोवयः' इत्यादिवयस्वद्भिर्मन्त्रैरुपधेयाः, तत्र च यद्यपि मूर्द्धा वयः प्रजापतिश्छन्द इत्यन्तिम एकस्मिन्नेव मन्त्रे मूर्द्धशब्दोऽस्ति, तथापि साहचर्याद् `विष्टम्भो वयः' इत्याद्याश्चत्वारो मूर्धन्वन्त उच्यन्ते, यथा---छत्त्रिणो यान्तीति, तेन मूर्द्धन्वतीरुपदधातीति बहुवचनम् । मूर्द्धन्वानपि भवतीति । ननु `अनो नुट्' इति छन्दसि नुड् विधीयते ? सत्यम् ; यथा सूत्रकारेण छान्दसमेव पदं प्रयुक्तम्---`वयसस्यासु' इति, तथेदमपि वृत्तिकारेण, मूर्धन्वानपि भवति छन्दसीत्यर्थः । `वयस्याश्च ताः मूर्धन्वत्याश्च' इति `उभयथापि छन्दस्यभिधीयते' इत्युक्तं भवति ।

यत्र मूर्द्धन्शब्द एव केवल इति । यथा---`अग्ने यशस्विन्यशसे समर्पय' इत्यादिके मन्त्रे । ततो मा भूदिति । तदभिधायिनो मूर्द्धन्शब्दादित्यर्थः । मूर्द्धन्वत इति वक्तव्यमिति । `तद्वान्' इति च' लुक् च मतोः' इति चानुवर्तते, ततश्च मूर्द्धन्वत इति युक्तं वक्तुमिति भावः । इह तु गायत्रीः पुरस्तादुपदधाति, `तेजो वै गायत्री तेज एव मुखतो धत्ते मूर्द्धन्वती भवति' इति मुख्यो गायत्रीषु मूर्धन्वतीशब्दः प्रथमं मतुबन्तः प्रयुक्तः, किं कारणम् ? तदुपधानमन्त्रेषु `अग्निर्मूर्धा भुवः' इत्यादिषु वयः शब्दस्याभावात् ।।

मत्वर्थे मासतन्वोः ।। 4.4.128 ।।

मत्वर्थग्रहणाल्लब्धमर्थं दर्शयति---प्रथमासमर्थादित्यादि । मासतन्वोरिति `कृषिचमितनिधनिसज्जिखर्ज्जिभ्य ऊः' इत्यूकारान्तस्तनूशब्दः सूत्रे निर्दिष्टः, न तु `भृमृशीङ् तृचरित्सरितनिमिमस्जिभ्य उः' इत्युका रान्तः; `द्वन्द्वे घि' इति पूर्वनिपातप्रसङ्गात् । अनन्तरार्थे चेति । न केवलं मत्वर्थमात्र इति चशब्दस्यार्थः ।

लुगकारेकाररेफाश्चेत्यादि ।` रादिफः' इत्यत्र वर्णादिति न सम्बध्यते, तेन समुदायनिर्देशेऽपि इफः कृतः । अन्ये तु रशब्दा इति पठन्ति, प्रत्यय इत्यधिकारोऽकारादिभिः सम्बध्यते, न तु लुका । तपनं तपः, सहनं सहः, भावोऽसुन्, `तदस्मिन्नस्ति' इति सूत्रेण विहितस्य यतो लुक् । कथं पुनरत्र नपुंसकत्वम्, यावता तद्धितलुकि सत्यभिधेयवल्लिङ्गेन भवितव्यम् ? अत आह---नपुंसकलिङ्गं छान्दसत्वादिति । इट् = अन्नम्, इष्यमाणत्वात् । ऊर्क् = बलम्, `ऊर्ज बलप्राणनयोः', ताभ्यामकारः प्रत्ययः---इषः, ऊर्जः । शोचनं शुक्, पूर्ववत्क्विप्, आतपातिरेकेण शरीरादेः शोषः, तद्वान्मासः शुचिः । एवं

शुक्रः ।

अत्र छान्दसत्वादेवायस्मयादित्वद्भत्वाज्जश्त्वाभावः, तदेव छन्दोऽधिकारे लुगादीनां विधानाद्भाषायां शुचिशुकादीनामन्याय्यः प्रयोगः स्यात्, व्युत्पत्यन्तरेण वा, अव्युत्पन्ना वा नभस्यादयः शब्दा मासेषु वर्तन्ते । इषोर्जशब्दावर्शआद्यच्प्रत्ययान्तौ, मत्वर्थीये रप्रत्यये पृषोदरादित्वाज्जश्त्वाभावे शुक्र इति भवति, शोचतेरन्तर्भावितण्यर्थादौणादिके किप्रत्यये कृते शुचिरिति भवति, शोचयति संतापयति प्राणिन इति कृत्वा । अभेदोपचारान्नभः प्रभृतीनां मासेषु वृत्तिः, नभस्यप्रभृतयस्तु `तत्र साधुः' इति यदन्ताः, `मतौ छः सूक्तसाम्नोः' इत्यत्र यथान्तरेणाप्यर्थग्रहणं मत्वर्थे प्रत्ययो लभ्यते, तथेहापि लप्स्यते; नार्थोऽर्थग्रहणेन ।।

मधोर्ञ च ।। 4.4.129 ।।

अत्रापि भाषायां मधुयोगान्मासो मधुः, तस्य प्रज्ञादिषु पाठादाद्युदात्तत्वम् ।।

ओजसोऽहनि यत्खौ ।। 4.4.130 ।।

यद्ग्रहणमनर्थकम्, `खश्च' इत्येव वक्तव्यम्, चकारात्प्राकरणिको यद्भविष्यति ? नैवं शक्यम्; `खश्च' इत्युच्यमानोऽनन्तरसूत्रविहितस्य ञस्य समुच्चयो विज्ञायेत, तस्माद्यद्ग्रहणम् ।।

ख च ।। 4.4.132 ।।

योगविभाग इत्यादि । केचित्पुनरेकमेव योगमधीयते । तथा च---`यथासंख्यामनुदेशः समानाम्' प्रत्ययविध्यर्थो बहुवचननिर्देशः, बहुवचनान्तात् प्रत्ययोत्पत्तौ यथासंख्यमिष्यत इति । उत्तरार्थश्चेति । उत्तरत्र खस्यैवानुवृत्तिर्यथा स्यात्, यतो मा भूदिति ।।

पूर्वैः कृतमिनियौ च ।। 4.4.133 ।।

बहुवचनान्तेनेत्यादि । बहुवचनान्तात्प्रत्ययविध्यर्थो बहुवचननिर्देशः । बहुवचनान्तात्प्रत्ययोत्पत्तौ यथा प्रशंसा गम्यते---पूर्वैर्बहुभिः क्रियत इति प्रतीतेः, तेन पूर्वशब्दश्च वृद्धेषु पुरुषेषु प्रवर्तत इत्यर्थः ।।

सहस्रेण संमितौ घः ।। 4.4.135 ।।

निर्देशादेव समर्थविभक्तिरिति । सा पुनस्तुल्यार्थयोगे तृतीया । सम्मित एव लक्षयितव्य इति । किं कारण् ? इत्याह---तत्रेति । छन्दसि हि तत्र सम्मिते प्रयोगो दृश्यते ।।

सोममर्हति यः ।। 4.4.137 ।।

`छन्दसि' इत्यधिकाराद्भाषायां सोम्यशब्दस्य साधुत्वं चिन्त्यम्---`आयुष्मान्भव सोम्येति वाच्यो विप्रोऽभिवादने' इति । केचित्सौम्येति वृद्धिं पठन्ति । सौम्यशब्दो दर्शनीयवचनः सुखादिवत् ।।

मये च ।। 4.4.138 ।।

मय इति मयडर्थो लक्ष्यते इति । शब्दे कार्यस्यासम्भवात् । तत्र यथायोगं समर्थविभाक्तरिति । आगते पञ्चमी, विकारावयवयोः षष्ठी, प्रकृतवचने प्रथमा ।।

वसोः समूहे च ।। 4.4.140 ।।

ओश्रावयेत्यादिकस्याक्षराणि गण्यन्ते, सप्तदशात्मकश्छन्दस्योऽक्षरसमूहः । प्रजापतिः प्रजापतिना दृष्टः । हस्तौ पृणस्वेति पृणातिः पूरणकर्मा ।।

नक्षत्राद् घः ।। 4.4.141 ।।

समूह इति नानुवर्तत इति । तेनानिर्दिष्टार्थत्वात्स्वार्थे प्रत्यय उत्पद्यत इति भावः ।।

शिवशमरिष्टस्य करे ।। 4.4.143 ।।

करोतीति कर इति । पचाद्यच् । सामर्थ्यलभ्या षष्ठी समर्थविभक्तिरिति । सा पुनः कृद्योगलक्षणो कर्मणि । भाषायां शिवतातिप्रभृतीनां साधुत्वं चिन्त्यम् । इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां चतुर्थस्याध्यायस्य चतुर्थः पादः

* समाप्तोऽयं चतुर्थोऽध्यायः *

-------------------******************-------------------

5.1

* तस्मै क्षीगुरवे नमः *

काशिकावृत्तिः

पदमञ्जरी

प्राक् क्रीताच्छः आवत्सीय इति। ।। 5.1.1 ।।
अतिदोहनाद्वत्सान्प्रति हितो न भवति गोधुगित्येवं प्रकृत्या नञा च युगपत्प्रत्ययार्थस्य सम्बन्धः, प्रधानभूतश्च प्रत्ययार्थः। भवति च प्रधानस्य सापेक्षस्यापि वृत्तिः, प्रधानत्वादेवानेकोपकार्यत्वस्याविरोधात्, `सामान्याप्रयोगः' इति लिङ्गाच्च। किञ्च--विशेषतोऽत्र ज्ञापकमस्ति यदयं नञो गुणप्रतिषेधे `सम्पाद्यर्हहितालमर्थास्तद्धिताः' इत्याह, तज्ज्ञापयति--`भवत्येवञ्जातीयकेऽपि विषये तद्धितः' इति, अन्यथा सम्पाद्यर्हहितालमर्था ये तद्धितास्तदन्तान्युत्तरपदानि नञो गुणप्रतिषेधे प्रवृत्तिनिमित्तप्रतिषेधे वर्त्तमानात्पराणि न सम्भवेयुः। तत्र पूर्वं प्रत्ययः, प्रश्चान्नञ्समासः। अत एव यत्नसाध्यत्वादवत्सीय इत्यादेरुपन्यासः। यस्तु वत्सादन्यस्मै हितः, यो वा वत्सीयादन्यः, न तत्र किञ्चिदयत्नसाध्यम् ।
अथ किमर्थमियानवधिरुपादीयते, यावता न ह्यस्य `प्राग्वतेष्ठञ्' इत्यारभ्य ये योगाः `तेन क्रीतम्' इत्येतस्मात्प्राक् पठिताः, तेषु व्यापारोऽस्ति, न हि तत्र कश्चिदर्थो निर्दिश्यते, ततश्च `प्राक्ठञः' इति वक्तव्यम्, `प्राग्वतेष्टञ्' इत्ययमेव च प्रत्यासन्नष्ठञग्रहीष्यते, न विप्रकृष्टः `लोकसर्वलोकाट्ठञ्' इत्यादिः? इत्यत आहअर्थोऽवधित्वेन गृहीत इति। गृहीतो ग्रहीतुमिष्टः। अयमभिप्रायः-- अवश्यमत्रार्थोऽवधित्वेन ग्राह्यः, अन्यथा `प्राक् ठञः' इत्युच्यमानेऽवधिना सजातीयस्यावधिमतोऽभावादर्थाः, प्रकृतयो वाऽवधिमत्त्वेन गृह्योरन्-प्राक् ठञो येऽर्थाः, या वा प्रकृतय इति। तत्र प्रकृतिपक्षेऽधिकारस्य नदीस्रोतोरूपेण प्रतिप्रकृत्युपस्थानाद् `उगवादिभ्यो यच्छश्च' इति यच्छयोः सन्निधानादविशेषादुत्सर्गापवादभावो न स्यात्, तव्यत्तव्यानीयरामिव विकल्प एव स्यात्। अर्थे त्ववधित्वेन गृहीते प्राक् क्रीताद्येऽर्थास्तेष्वस्योपस्थानं भवति। अवधिसजातीयो ह्यवधिमान् भवति, यथा--`मासात्परः' इति कालः प्रतीयते, `ग्रामात्पूर्वः' इति देशः, `अलोऽन्त्यात्पूर्वः' इत्यलेव, ततोऽतिप्रसङ्गो न भवति। कथम्? समानार्थे प्रकृतिविसेषा दुत्पद्यमानो यदादिः प्रकृत्यन्तरे सावकाशं छं बाधते। यथा--तक्रंकौण्डिन्ये दधि, अतोऽर्थोऽवधित्वेन गृहीत इति। ननु च `प्राक ठञः' इत्युच्यमाने भवतु नामैघं प्राक्ठञो याः प्रकृतय इति, तथापि यदादिविषये छो न भविष्यति, ज्ञापकात्, यदयम् `विभाषा हविरपूपादिभ्यः' इति विभाषां शास्ति, तज्ज्ञापयति-नान्यविषये छो भवतीति, एवं च कृत्वा छ इत्येवाधिकारोऽस्तु, नार्थोऽवधिनिर्देसेन, ज्ञापकाच्च प्रतिसूत्रमुपस्थानेऽप्यन्यविषये न भविष्यति, प्राग्वतेष्ठञित्यादिके तु प्रकारणे नास्याधिकारः, अधिकारन्तरेणावष्टब्धत्वात् ? सत्यम्; प्रतिपत्तिगौरवपरिहारार्थस्त्ववधिनिर्देशः, स चावधिरर्थ एव निर्देश्यः, न प्रत्ययः, अन्यथा `लशुनं च भक्षितं व्याधिश्च न निवृत्तः' इत्येतदापद्येत ।।

उगवादिभ्यो यत् ।। उवर्णान्तात्प्रातिपदिकाद् गवादिभ्यश्चेति ।। 5.1.2 ।।
उवर्णादेर्गशब्दादेर्वशब्दादेश्च यद्भवतीत्यर्थो न भवति, गवादिगणपाठतः। सनंगुरित्यादि। चर्मविकारलक्षणस्याञोऽवकाशः-वार्ध्र चर्म, वारत्रं चर्मेति, उवर्णान्तलक्षणस्य यतोऽवकाशः--शङ्कव्यम्, पिचव्यमिति; सनङ्गोरुभयप्रसंङ्गे परत्वादञ्प्राप्नोति। चरुर्नाम इविरिति। स्थालीवचनस्य चरुशब्दस्य तकदधिकरणे हविष्युपचारद्वृत्तिः। `विभाषा हविरपूपादिभ्यः' इत्यत्र हविर्विशेषवाचिनां ग्रहणम्, न स्वरूपस्य; तस्य गवादिषु पाठात्। विपर्ययस्तु न भवति--इह विशेषग्रहणं तत्र स्वरूपग्रहणमिति; गवादिष्वसञ्जातविरोधित्वेन स्वरूपग्रहणे बाधकाभावात्। अतः `विभाषा इविरपूपादिभ्यः' इत्यत्रैव विशेशग्रहणमिति स्थिते तस्यावकाशः--आमिक्ष्यम्, आमिक्षीयम्; पुरोडाश्याः, पुरोडाशीया इति।
अन्नविकारेभ्यश्चेति पठ्यत इति। तस्यावकाशः--सुराः, सुर्याः, सुरीयाः, ओदन्याः, ओदनीया इति, उवर्णआन्तसक्षणस्य यतः स एव; चरुसक्तुभ्यामुभ्य प्रसङ्गे परत्वाद्विभाषा प्राप्नोति, तत्र सर्वत्र पूर्वविप्रतिषेधेन यत्प्रत्यय एवेष्यत इति। अयमेव नित्यो यत्प्रत्यय इत्यर्थः।
नभं चादेशमापद्यत इति। भसंज्ञकं च न भवतदीत्ययं त्वर्थो न भवति, व्याख्यानात्। तदर्थमेव हि गणसूत्रं व्याख्यातम्, प्रायेण हि वृत्तिकारो गणसूत्राणि न व्याचष्टे। नभ्योऽक्ष इति। छिद्रवद्रथाङ्गविशेषः-- नाभिः, तच्छिद्रानुप्रविष्टकाष्ठविशेषः--अक्षः, स तदनुगुणत्वात्तस्मै हित इत्युच्यते। अञ्जनं तैलकृताभ्यङ्गः, तदपि स्नेहनत्वान्नाभये हितम्। यत्तु भाष्य उक्तम्--`नाभेर्नभभावे प्रत्ययानुपपत्तिः प्रकृत्यभावात्' इति, तन्नभ्यं चक्रमिति प्रयोगाभिप्रायम्। न हि चक्रस्य नाभिविकृतिः, अपि त्ववयवः। नापि तादर्थ्यमस्ति; अवयविनोऽवयवार्थत्वाभावात्। तेन `तदर्थ विकृतेः प्रकृतौ' इत्यत्रार्थे नभ्यं चक्रमिति नैव सिद्धयति। हितार्थस्त्वाशङ्क्य एवेति न सर्वथा प्रत्ययानुपपत्तिस्तत्र विवक्षितेति भावः। शरीरावयवाद्यदिति यति कृते इति। परत्वादिति भाव। नाभ्यं तैलमिति भवितव्यमिति। अथात्रापि नभभावः कस्मान्न भवति ? इत्याह--गवादियतेति। शुन इत्यादि। श्वनित्यस्य सम्प्रसारणं यत्प्रत्ययश्च भवति, पक्षे दीर्घश्च तत्सञियोगेनेति। यदा दीर्घत्वं तदा शुने हितं शुन्यं शून्यमिति वा, `नस्तद्धिते' इति तत्र वर्त्तते, सम्प्रसारणे च कृते नेदमन्नन्तम्, कामं दीर्घपक्षे तद्विधानसामर्थ्याट्टिलोपो न स्यात्, पक्षान्तरे तु प्राप्नोति, सम्प्रसारणं बाधकबाधनार्थम्, अन्यथा प्रकृतिबावप्रसङ्गात् ? एवं तर्हि चकारद्वयमत्र पठ्यते, तत्रेकः सम्प्रसारणसमुच्चये द्रष्टव्यः, तत्रान्यस्य समुच्चेतव्यस्याभावात्सम्प्रसारणमेव पुनर्विधीयते। तत्र पुनर्विधानं तु तद्रूपस्यैवावस्थानार्थं भविष्यति। ऊधसोऽनङ् चेति। `नश्च' इति नोक्तम्; लाघवे विशेषाभावात्। ऊधःशब्दस्यानङादेशो भवति यत्सन्नियोगेन--ऊधन्यः, `ये चाभावकर्मणोः' इति प्रकृतिभावः ।।

कम्लाच्च संज्ञायाम् ।। 5.1.3 ।।
अयं योगः शक्योऽवक्तुम्। कथं कम्बल्य इति ? निपातनादेवैतत्सिद्धम् `अपरिमाणविस्ताचितकम्बल्येभ्यो न तद्धितलुकि' इति। इदं तर्हिप्रयोजनम्--संज्ञायामिति वक्ष्यामिति ? एतदपि नास्ति प्रयोजनम्; परिमाणपर्युदासेन पर्युदासे प्राप्ते तत्र कम्बल्यग्रहणम्--परिमाणस्य च संज्ञा कम्बल्यशब्दः। एवं तर्हि

स्वरार्थं वचनम्, निपातनेन हि परिमाणे कम्बल्यशब्दः साधुरित्येतावदवगम्यते, न तु यदन्तोऽयमिति, ततश्चान्तस्वरितत्वं न स्यात्। अथ निपातन एवान्तस्वरितत्वं पठ्येत ? तत्र व्याख्यानं शरणम्, व्याख्यानाच्च लघु सूत्रम् ।।

विभाषा हविरपूपादिभ्यः ।। 5.1.4 ।।
हविर्विशेषवाचिभ्य इति। स्वरूपस्य ग्रहणं न भवति; तस्य गवादिषु पाठात्। विपरर्ययस्तु न भवति-तत्र विशेषाणं ग्रहणमिह स्वरूपस्येति; असञ्जातविरोधित्वेन तत्रैव स्वरूपग्रहणस्य न्याय्यत्वात्। अन्नविकारेभ्यश्चेति। अन्नविकाराः=अन्नप्रकाराः, अदनीयविशेषा इत्यर्थः, तेभ्यश्च विभाषा यद् भवति-ओदन्याः, ओदनीयाः। यद्येवम्, अपूपादीनां किण्वपर्यन्तानां पाठोऽनर्थकः, अन्नविकारत्वादेव सिद्धेः, सुराप्रकृतिद्रव्यं किण्वम् ? नानर्थकः, प्रापञ्चार्थत्वात्।
अपर आह-यदा सादृश्यादिनापूपादिभ्योऽर्थान्तरे उपचर्यन्ते, तदर्थ एषां पाठ इति ।।

तस्मै हितम् ।। 5.1.5 ।।
तस्मै इति। `हितयोगे चतुर्थी वक्तव्या' इति चतुर्थी। अपर आह-अयमेव निर्देशो ज्ञापको हितयोगे चतुर्थी भवतीत्यस्येति, तच्चिन्त्यम्; `चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः' इति अशिषि विषयविशेषे हितयोगे चतुर्थ्याः सम्भवात् ।।

शरीरावयवाद्यत् ।। 5.1.6 ।।
शरीरं प्राणिकाय इति। एतेनैतद्दर्शयति-शीर्यत इति शरीरमिति श्रृणातेरीरन्प्रत्ययमुत्पाद्य यद्यपि शरीरशब्दो व्युत्पाद्यते, तथापि योगरूढत्वात्प्राणिकाय एव वर्त्तते, न घटादाविति ।।

खलयवमाषतिलवृषब्रह्मणश्च ।। व्रह्मण्यमिति। ।। 5.1.7 ।।
पूववट्टिलोपाभावः। वृषशब्दोऽयमकारान्तो गृह्यते, न तु नकारान्तः; अन्यथाऽसन्देहार्थं नकारलोपमकृत्वैव निर्दिशेत, यथा-आत्मन्विश्वजनेति। अस्ति च नकारान्तस्तत्र वक्तव्यम्, ततोऽपि यद्भवतीति, अन्यथा तत्र छे टिलोपे च वलृषीयमिति प्राप्नोति, तस्य च वृषशब्दे आदेशो वक्तव्यः, अन्यथा वृषण्य इति स्यात्; ब्रह्मशब्दो नकारान्तो गृहीतः, ब्राह्मणशब्दश्चाकारान्तोऽस्ति, तत्र वक्तव्यम्-ब्राह्मणशब्दादपि यद्भवतीति, अन्यथा ततश्छः स्यात्, तस्य च ब्रह्मन्-शब्द आदेशो वक्तव्यः; अन्यथा ब्राह्मयण्यमिति प्राप्नोति ? इत्यस्मिन्पूर्वपक्षे इदमाह---वृष्णो हितमित्यादि।
छप्रत्ययोऽपि न भवतीति। यत्प्रत्ययस्तु तावत्सूत्रेऽनुपादानादेव न भवति, न केवलं स एव, अपि तु छप्रत्ययोऽपीत्यपिशब्दस्यार्थः। कुत इत्याह--अनभिधानादिति। तदनेनाप्यव्यविकन्यायो दर्शितः। त्रैशब्द्यं हि नः साध्यम्--वृषाय हितम्, वृष्णे हितम्; तथा व्रह्मणे हितम्, व्रह्मण्यम्, ब्राह्मणाय हितमिति; तत्र द्वयोः शब्दयोः समानार्थयोरेकत्र विग्रह एव, अपरत्र विग्रहश्च वृत्तिश्च भविष्यति, तद्यथा--अविकस्य मांसम्, आविकम्, अवेर्मांसमिति। रथाय हितारथ्येति। हितार्थ एव यथा स्यादर्थान्तरे मा भूदित्येवमर्थं गवादिषु पाठो नाङ्गीकृतः।
केचित्तदन्तविधिमिच्छन्ति---रथसीताहलेभ्यो यद्विधाविति। अपरे तुहलसीताभ्यां साहचर्याच्चातुरर्थिक एव तदन्तविधिर्भवति, न त्वस्मिन्निति ।।

अजाविभ्यां थ्यन् ।। 5.1.8 ।।
अजशब्दोऽयमिह पुंल्लिङ्ग उपात्तः, अत एव `द्वन्द्वे घि' इत्यविशब्दस्य पूर्वनिपातं बाधित्वा `अजाद्यदन्तम्' इत्यजशब्दस्य पूर्वनिपातः कृतः, `प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति स्त्रीलिङ्गादपि थ्यन्भवत्येव--अजायै हितमजथ्यम्, `तसिलादिषु थ्यन्तालौ' इति परिगणनात्पुंवद्भावः ।।

आत्मन्विश्वजनभोगोत्तरपदात्खः ।। 5.1.9 ।।
इहोत्तरपदग्रहणं व्याप्तिन्यायेन सर्वैर्वा सम्बध्येत, प्रत्यासत्तिन्यायेन भोगशब्देनैव वा ? तत्राद्यं पक्षं निराकरोति---आत्मन्निति नलोपो न कृत इति। विवक्षितां प्रकृति कार्त्स्न्येन निर्द्दिशेयमिति नलोपो न कृतः, प्रत्येकं सम्बन्धे चोत्तरपदग्रहणस्य नैतावती प्रकृतिः स्याद्, अतो नलोपाकरणेन प्रत्येकं सम्बन्धे निवारिते भोगशब्देनैव सम्बध्यते इत्यर्थः। कर्मधारयादिष्यत इति। व्याश्यानमत्र शरणम्। षष्ठीसमासादिति। विश्वस्य जनो विश्वजनः=सर्वसाधारणो वेस्यादिः। बहुव्रीहेश्चेति। विश्वो जनोऽस्येति, स एव वेश्यादिरन्यपदार्थः।
पञ्चजनादिति। रथकारपञ्चमाश्चत्वारो वर्णाः= पञ्चजनाः। `दिक्संख्ये संज्ञायाम्' इति समासः। पञ्चजनीयमन्यदिति। षष्ठीसमासाद् बहुव्रीहेश्च छ एव भवतीत्यर्थः। यदा च प्रकरणादिवशाद्विशिष्टसंख्येयवृत्तित्वावसायः संख्या शब्दानां तदा सापेक्षत्वाभावादविरुद्धः समासः, जनादिनैव साक्षात्सम्बन्धाद्; अन्यथा तु संख्येयस्यैव जनापेक्षया व्यतिरेकः, तद्द्वारेण तु संख्यागुणस्येति साक्षात्सम्बन्धाभावाद् दुर्लभः षष्ठीसमासः।
सर्वजनादिति। `पूर्वकालैकसर्व' इति कर्मधारयः।

महाजनान्नित्यमिति। नित्यग्रहणं सर्वजनादुक्तो खो मा भूदिति।
तत्पुरुषादेविति। अत्र `कर्मधारयादेव' इति नोक्तम्, त्वनिर्देशेनैव षष्ठीसमासव्यावृत्तिसिद्धेः।
इह पितृभोगीणादिशब्दैः पित्रादिहितस्यार्थस्याभिधानमिष्यते, पित्रादिभोगहितस्य तु प्राप्नोति। भोगशब्दश्चायमस्त्येव द्रव्यपदार्थकः, तद्यथा-भोगवानयं देश उच्यते, यस्मिन् गावः सस्यानि च वर्द्धन्ते, भुज्यत इति भोगः; अस्ति च क्रियापदार्थः, तद्यथा-भोगवानयं ब्राह्मण उच्यते यः सम्यक् स्नानादिकाः क्रिया अनुभवति; अस्ति च शरीरवाची, अहिरिव भोगैः पर्येति बाहुमिति दर्शनात्, अत्र समुदाये प्रवृत्तस्य भोगशब्दस्यैकदेशेषु फणेषु प्रयोगः, न चाहेरेव शरीरं भोगः, अपि तु सर्वं शरीरम्; अनन्तत्वात्प्रयोगविषयस्यावधारणस्य कर्त्तुमशक्यत्वात्। निघण्टुषु तु प्रयोगबाहुल्यादहिशरीरे प्रयोगः। सर्वेष्वपि चार्थेषु विवक्षिताभिधानं न प्राप्नोति। तस्मान्नायं बोगोत्तरपदात्खो विधेयः, पित्रादिभ्य एव तु भोगीनच्प्रत्ययो विधेयः--पित्रे हितः पितृभोगीण इति। यद्येवम्, वावचनं कर्त्तव्यम्, मात्रीयं पित्रीयमिति यथा स्याद्; अन्यथा भोगीनचा बाधितत्वाच्छो न स्यात्। इह च ग्रामणिभोगीनः सेनानिभोगीन इति `इको ह्रस्वोऽङ्यो गालवस्य' इत्युत्तरपदनिबन्धनं ह्रस्वत्वं न स्यात्, इह चाब्बोगीन इति `अपो भि' इति भकारादौ ग्रत्यये विधीयमानं तत्वं प्राप्नोति, बोगोत्तरपदात्तु खविधाने नैते दोषाः। अर्थविरोधस्तु भवति, तं परिहरति--भोगशब्दः शरीरवाचीति। तत्र शरीरशरीरिणोरभेदाद्य एवार्थो मात्रे हित इति, स एव मातृभोगाय हित इत्यपि विग्रहे भवतीति भावः। एवं भोगोत्तरपदात्खविदानेऽप्यर्थविरोधं परिहृत्य तत्रैव गुणमाह--केवलेभ्यो मात्रादिभ्यश्छ एव भवतीति। एवकारो भवतीत्यस्यान्तरं द्रष्टव्यः। भोगीनच्प्रत्ययविधाने तु छो न स्यादेव--इत्येवशब्दस्यार्थः।
राजाचार्याभ्यामिति। राजाचार्याभ्यां हितार्थे यदि प्रत्ययो भवति नित्यम्, भोगोत्तरपदाभ्यामेव स च ख एवेत्यर्थः। न केवलाभ्यामिति। अत्र `प्रत्यय इष्यते' इत्येतावदपेक्ष्यते, न तु `खप्रत्यय इष्यते' इति; प्राप्त्यभावात्। अत एव केचित् `खः प्रत्यय इष्यते' इति व्यस्तं पठन्ति।
आचार्यादणत्वं चेति। भोगोत्तरपदादिति गम्यते, इदानीमेव ह्युक्तम्--राजाचार्याभ्यां नित्यं भोगोत्तरपदाभ्यामेवेति ।।

सर्वपुरुषाभ्यां णढञौ ।। सर्वादिति। ।। 5.1.10 ।।
अनुकरणत्वात्सर्वनामकार्याभावः, सर्वनामानि' इत्यन्वर्थसंज्ञाविज्ञानात् `प्रकृतिवदनुकरणम्' इत्यपि सर्वनामत्वं न भवति; अनाश्रितार्थस्य शब्दरूपस्यानुकरणात्।
पुरुषाद्वधेति। प्रत्ययार्थसामर्थ्येन षष्ठीसमर्थविभक्तिर्लभ्यते, कृते तु तेनत्युपात्तैव तृतीया। भाष्यकारप्रयोगाच्च द्वन्द्वमध्येऽपि तेनेत्यस्य निवेशः, तत्र वधे- `तस्येदम्' इत्यणोऽपवादः, विकारे--`प्राणिरजतादिभ्योऽञ्' इत्यञः, समूहेऽपि `तस्य समूहः' इत्यण एव, तेन कृतेऽपि ग्रन्थात्मके--`कृते ग्रन्थे' इत्यण एव। पौरुषेयः प्रासाद इत्यत्र न कस्यचिदपवादः ।।

माणवचरकाभ्यां खञ् ।। 5.1.11 ।।
मनोरपत्यं कुत्सितं माणवः, `अपत्ये कुत्सिते मूढः' इति णत्वम्, चरतीति चरः, `पचाद्यच्' `चरिचलिपतिवदीनाम्' इति द्विर्वचनं विकल्पितत्वादिह न भवति, ततः संज्ञायां कन्-चरकः। खञो ञित्करणं वृद्धयर्थं स्वरार्थं च। चरके वृद्ध्यर्थम्, माणवे `वृद्धिनिमित्तस्य च' इति पुंवद्भावप्रतिषेधार्थम्-माणवीभार्यः ।।

तदर्थं विकृतेः प्रकृतौ । प्रकृतिरुपादानकारणमिति। ।। 5.1.12 ।।
उपादीयतेऽस्मात्कार्यमित्यपादान्म्, उपादानं च तत्कारणं च उपादानकारणम्। कार्यस्य हि त्रीणि कारणानि-उपादानकारणम्, असमावायिकारणम्, निमित्तकारणमिति, तत्र कार्येणापृथग्देशं यद्बुद्धिः कार्येष्वनुवर्त्तते, तद्यथा-मृदयं कुम्भः, तन्तघः पट, हिरण्यं कुण्कडलमिति तदुपादानकारणम्। उपादानकारणप्रत्यासन्नमसमवायिकारणम्, यथा-तन्तुसंयोगः पटस्य। तटस्थं तु कारणं निमित्तकरणम्-तन्तु-वायदि, तदेतेषु त्रिषु यदुपादानं सा प्रकृतिः, तस्यवोपादानकारणस्योत्तरमवस्थान्तरं विकृतिरिति। अनेन कार्योपादानयोरभेदमाह। यथा हि-शिक्यं रज्जुरिति न तत्त्वान्तरम्, अथ न च रज्जुमात्रे शिक्यप्रतितिः, एवमत्रापि मृदेव घटः, तन्वव एव पटः, सुवर्णमेव कुण्डलम्, अथ च न मृदादिमात्रे घटादिप्रतीतिः। यद्यपि वृक्षादिषु न बीजादिप्रतीतिर्भवति, या तु बीजस्यानन्तरावस्था तत्र तत्प्रतीतिर्भव्त्येव। एवं तदनन्तरादिष्वप्यवस्थासु पूर्वपूर्वा प्रतीतिर्द्रष्टव्य। वृक्षस्य तु बीजं पर परयोपादानकारणमिति सर्वमवदातम्। विकृतिवाचिन इति। ननु `समर्थानां प्रथमात्' इति वचनात्तदर्खस्य चेह प्रथमनिर्देशात्परकृतेश्च तदर्थत्वात्तद्वाचिन एव प्रत्ययःप्राप्नोतीत्यत आह-तदिति सर्वनाम्ना विकृतिः प्रत्यवभृश्यत इति। तेन विकृतिरेव सर्वतः प्रथमनिर्दिष्टेति भावः। विकृत्यर्थायां प्रकृतौ प्रत्यय इति ।।
ऐतेन तदर्थमिति सप्तम्याः स्थाने प्रथमा, स्त्रीलिङ्गस्य च स्थाने नपुंसकलिङ्गमिति दर्शयति। तदर्थग्रहणेनेत्यादि। इह प्रकृतिविकारवाक्ये क्वचिद्योग्यतामात्रं विवक्ष्यते-मूत्राय कल्पते यवागूरिति; क्वचित्प्रकृत्यन्तरव्यावृत्तिः, यथा--यवानां धानाः, धानानां सक्तव इति; क्वचित्प्रकृतेरनन्यार्थता, यथा--अङ्गरेभ्य एतानि काष्ठानीति, तत्रेह चरमोऽर्थो विवक्षित इति प्रतिपादनाय तदर्थग्रहणं कृतमित्यर्थः। किं सिद्धं भवति ? तदाह--न प्रकृतिविकारेति। प्रत्ययार्थस्य चेत्यादि। विकृत्यर्थायां हि प्रकृतौ प्रत्यय उच्यते, तच्य तस्यास्तादर्थ्यं चतुर्थ्यैव शक्यते बोधयितुमित्येतत्सामर्थ्यम्। केचित्त्विति । तेषां वचनादेव लभ्या चतुर्थी।
यवानां धाना इति। येषां सामर्थ्यलभ्या चतुर्थी तेषामिदं प्रत्युदाहरणाम्। ये तु `तस्मै' इत्यनुवर्त्तयन्ति, तेषां मूत्राय कल्पते यवागूरिति द्रष्टव्यम्।
या काचिदिति। अनुपदानकारणभूतापीत्यर्थः। तत्रैतत्स्याद्--न कूप उदकस्य काचिदपि प्रकृतिस्तत्राह--भवतदि चेति। कुत इत्याह--तत्रेति। यथैव हि

प्रयाजादीनां धर्माणामुत्पत्त्याधारत्वाद्दर्शपूर्णमासौ प्रकृतिः सौर्यादीनाम्, एवमुदकधर्माणां क्षारत्वादीनामुत्पत्त्याधारत्वात्कूप उदकस्य प्रकृतिरित्यर्थः। यद्येवम्, उदकमपि तस्य विकृतिरेव सौर्यादिवत् ? इत्यत आह--न त्विति। कुत इत्यत आहअत्यन्तभेदादिति। तस्यैवोत्तरमवस्तान्तरं विकृतिरित्यत्र-कार्यकारणयोर्नात्यन्तभेदः, मृदयं कुम्भ इति प्रतीतेः. नाप्येकान्ततस्यत्त्वमः मृन्मात्रे कुम्भप्रतीतेर भावत्। तस्मात्कथञ्चिद् भेदः, कथञ्चिच्चाभेदः। एतेन जातितद्वतोर्गुणगुणिनोश्च भेदाभेदौ व्याख्यातौ।
न तु कोशी तस्य प्रकृतिरिति। अतत्कारणत्वादनुत्पत्त्याधारत्वाच्च, चर्मपिनद्धं दार्वादिनिर्मितमस्यादीनां प्रक्षेपस्थानं कोशी। ननु च प्रकृतिर्विकृतिरिति च सम्बन्धिशब्दावेतौ, सम्बन्धिशब्दाश्च नियतमेव सम्बन्धिनमुपस्थापयन्ति, तद्यथा--मातरि वर्त्तितव्यमित्युक्ते न चोच्यते स्वश्यामिति, अथ च या यस्या माता तस्यामिति गम्यते, एवं चात्रान्यतरोपदानेऽप्यन्यतरस्य प्रतीतिः सिद्धयति ? अत आह--द्वयोरपीति। एवं मन्यते--विपूर्वोऽयं करोतिररत्येवापकारे-दैवं मे दौस्थ्ये विकरोतीति, अस्ति चेष्टानानात्वे-विकुर्वते छात्त्रा इति, अस्त्यनौचित्येविकृतिरेषा स्त्रीणां यत्स्वातन्त्र्यं नामेति, अस्ति कार्ये--तन्तूनां विकारः पट इति; तथा प्रपूर्वोऽपि करोतिरनेकार्थः, आस्ति कारणे-तन्तवः प्रकृतिः पटस्येति, सांक्यास्तु सत्त्वरजस्तमसां गुणानां साम्यावस्थां प्रकृतिमाहुः, अस्ति दोषापगमेप्रकृतिस्थं मन इति, अस्ति स्वभावे-प्रकृत्याभिरूप इति, अस्ति धर्माणामुत्पत्त्याधारे--यथोक्तं पुरस्तात्, तदेवमनेकार्थत्वान्नानयोरैकान्तिकं सम्बन्धिशब्दत्वमित्यन्यतरोपादानेन विवक्षितः प्रकृतिविकारभावो लभ्यत इति। `तस्य विकारः' इत्यत्र तु अभिधातस्वभावादेव कार्यस्य ग्रहणम्, नापकारादेः ।।

छदिरुपधिबलेर्ढञ् ।। 5.1.13 ।।
छाद्यतेऽनेनेति छदिः, `अर्चिशुचिहुसृपिच्छदिभ्य इसिः' `इस्मन्त्रन्क्विषु च' इति ह्रस्वत्वम्। छादिषेयाणि तृणानीति। यधा तु चर्मविकारश्छदिस्तदा परत्वात् `चर्मणोऽञ्' इत्यञप्राप्नोति, तत्र पूर्वविप्रतिषेधेन ढञेवेष्यते-छादिषेयं चर्मेति, आह च `यञ्ञ्यावञः पूर्वविप्रतिषेधेन ढञ्च' इति। वृत्तिकारेण तु प्रतिपदविधेर्बलीयस्त्वान्नैतदुपन्यस्तमित्याहुः। नेति व्यम्; ढञोऽपि छादिषेयाणि तृणानीत्यत्र चरितार्थत्वात्। बालेयास्तण्कडुला इति। कथं पुनरत्र प्रकृतिविकृतिभावः, यदा बल्यवस्थायामपि त एव तण्कडुलाः ? नावश्यं यत्प्रकृत्युपमर्दनेनैव भवति स एव विकारः, तदेव गुणान्तरयुक्तमपि विकारः। अस्ति च बल्यवस्तायां हरिद्रायोगेन तण्डुलानां गुंणान्तरयोगः, अन्ततः प्रक्षालनेन श्वैत्यमार्द्रता मार्दवं सान्निवेशविशेषो वा भवति। उपधिशब्दात्स्वार्थे प्रत्यय इति। इष्टिरेषा। किं पुनः कारणमधिकारप्राप्तो नेष्यते ? इत्या--उपधीयत् इत्युपधिरित्यादि। यदेव हि तद्रथाङ्गमुपधीयमानत्वादुपधिशब्देन कर्मणि किप्रत्ययान्तेनोच्यते, यद्यपि तस्य प्रकृतिरस्ति, तथापि तत्र न ढञन्तं वर्तते, किं तर्हि? तत्रैव हि रथाङ्गे। स्वभावश्चात्र हेतुः, न च तदेव तस्य प्रकृतिर्भवति, अतः स्वार्थे प्रत्यय एषितव्यः। अथायमुपधानमुपधिरिति ? क्रियावचन उपधिशब्दस्तादर्थ्यमपि सम्भवति, उपधानक्रियार्थत्वाद् द्रव्यस्येत्युच्यते। एवमपि क्रियाविकारो न भवति, क्रियापि विकारो बवति; बहुविकारोऽयं मनुष्यो हसति नृत्यति गायतीति दर्शनात् ? सत्यम्; `तदर्थ विकृतेः प्रकृतौ' इत्यत्र तु विशिष्ट एव प्रकृतिविकारभावो गृह्यते--यत्र प्रकृतेरुच्छेदः, यत्र वा रूपान्तरापत्तिः। अत एव तत्र विवक्षितः प्रकृतिविकारभाव इत्युक्तम् ।।

ऋषबोपानहोर्ञ्यः ।। आर्षभ्यो वत्स इति। ।। 5.1.14 ।।
महाप्राणः संहननवान् सुजातावयवो यो वत्स ऋषभावस्थाप्राप्तये पोष्यते। चर्मण्यपीति। ञ्यस्यावकाशः--औपानह्यो मुञ्जः, अत्रोऽवकाशः--वाह्यं चर्म, उपानच्छब्दाच्चर्मणि प्रकृतित्वेन विवक्षिते सति परत्वादञ्प्राप्नोति पूर्वविप्रतिषेधेन ञ्य एव भवति। ये तु सावकाशत्वे स्त्यपि प्रतिपदविधानं बलीयस्त्वे कारणमाहुः, तेषामयं पूर्वविप्रतिषेदोऽसङ्तः स्यात् ।।

चर्मणोऽञ् ।। 5.1.15 ।।
चर्मण इति षष्ठीति। पञ्चम्यां तु चर्मन्शब्दात्यमर्थायां प्रकृतौ प्रत्ययः स्यात्--चर्मणे द्वीपीत्यादौ, न चैवमभिधानमस्ति ।।

तदस्य तदस्मिन् स्यादिति ।। 5.1.16 ।।
सम्भावने लिङिति। `सभ्यावनेऽलमिति च' इत्यादिना। इष्टकानां बहुत्वेनेत्यादिना सूत्रार्थमुदाहरणेषु दर्शयति।
प्रकृतिविकारभाव इत्यादिना `तदर्थ विकृतेः' इत्यादिना सिद्धं दर्शयन्सूत्रारम्बं समर्थयते। योग्यतामात्रामिति। तथा चान्यार्थास्वपीष्टकासु वक्तारो भवन्ति--प्राकारीया इष्टका इति। द्विस्तद्ग्रहणमित्यादि। ननु विपरीतमिदम्, प्रत्येकं सम्बन्धे ह्यत्र द्विस्तद्ग्रहणमनर्थकम्, अतोऽत्र द्विस्तद्ग्रहणादन्यत्र समुदायेन सम्बन्धो युक्त इति ? सत्यम्; अयमपि तु प्रकारः सम्भवतीति न्यायप्राप्तं प्रत्येकं सम्बन्धमस्मिन्सूत्रे स्थित्वा उदाहरणरूपेण दर्शयतीति तदिदमुक्तम्। न्यायप्रदर्शनार्थमिति। प्रदर्शनं दिगुदाहरणमित्यर्थ। यदि पुनरयं न्यायोऽत्र न प्रदर्श्येत, तदा `तदस्यास्त्यस्मिन्नति मतुप्' इत्यत्र समुदायेन समर्थविभक्तिसम्बन्धो विज्ञायेत, ततश्च शाकावान्वृक्ष इत्यादौ यत्र द्वाभप्यां प्रत्ययार्थाभ्यां समर्थविभक्तेः सम्बन्धः सम्भवति, तत्रैव स्यात्; यत्र त्वन्यतरेण सम्बन्धः---गोमान्देवदत्तो वृक्ष्वान्पर्वत इति, तत्र न स्यात्।
अथेहेति। यदा ब्राह्मणार्थं निर्मितं प्रासादं गुणवन्तं च देवदत्तं पश्यन्सम्भावयति तदा तस्य प्रसङ्गः ।।

प्राग्वतेष्ठञ् ।। 5.1.18 ।।
वक्ष्यति पारायणतुरायणेति। अत्र तु प्रदेशेऽस्य करणमुत्तरसूत्रे येषां पर्यु दासस्तेभ्यष्ठञ्यथा स्यादिति--गौपुच्छिकः, साम्प्रतिकः। ठञित्येवाधिकारे सिद्धे `प्राग्वतेः' इति वचनं मध्ये योऽधिकारवानपवादः `सर्वभूमिपृथिवीभ्यामणञौ', `शीर्षच्छेदाद्यच्च' इत्येवमादिस्तेन विच्छेदेऽपि `पारायणतुरायण' इत्येवमादौ ठञेव यथा स्यादित्येवमर्थम्। यद्यप्यत्र प्रत्ययोऽवधित्वेन गृहीतः, तथाप्यर्थेष्वेवोपतिष्ठते, न तु प्रकृतिषु; तेनापवादविषये न भवति। तता च `शूर्पादञन्यतरस्याम्' इत्यन्यतरस्यांग्रहणमर्थवद्भवति ।।

आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ।। 5.1.19 ।।
तदर्हतीति वक्ष्यतीति। तदेकदेशोऽर्हशब्दो निर्दिश्यत इति भावः, तदाह--आ एतस्मादर्हसंशब्दनादिति। तदर्हमित्ययंत्ववधिर्न भवति, यदि स्यादार्हादित्यनर्थकम्; प्राग्वतेरित्येव सिद्धत्वात्। ननु च वत्यर्थेऽपि ठको विधिर्यथा स्यादित्येवमर्थमार्हादिति वचनं स्याद् ? एवमप्याङ् एव निर्देशः कर्त्तव्यो वतेरित्येवाभिविधावाकारः। एवमपि `उपसर्गाच्छन्दसि धात्वर्थे' इत्यत्रापि वत्यर्थे ठक्प्राप्नोति। तस्माद्व्याख्यानमेवात्र शरणम्। गोपुच्छादीन्वर्जयित्वेति। अगोपुच्छशब्दात्सङ्खयावाचिनः परिमाणशब्दाच्चेत्ययं त्वर्थो न भवति। यदि स्यान्निष्कादिष द्रोणशब्दस्य परिमाणवाचिनः षष्ठिशब्दस्य सङ्ख्यावाचिनः पाठोऽनर्थकः स्याद् ? अनेनैव सिद्धत्वान्नानर्थकः। नियमार्थ पुनर्वचनं स्यात्-असमासएव यथा स्यादिति ? नैतदस्ति; विधिनियमसम्भवे विदेरेव ज्यायस्त्वात्। अभिविधो वायमाकार इति। यदि तु मर्यादायां स्यात्तस्य ग्रहणमनर्थकं स्यात्, प्राग्ग्रहणानुवृत्त्यैव सिद्धत्वात्, तेन किं सिद्धं भवति ? तदाह--अर्हत्यर्थेऽपि ठग्भवत्येवेति।
सङ्ख्यापरिमाणयोः को विशेष इति। परिमीयते परिच्छिद्यते येन तत्परिमाणम्, सङ्ख्यापि च परिचिछिद्यते इति प्रशनः। भेदगणनं सङ्खयेति। भिद्यत इति भेदः, मिथो भिन्नाः पदार्थाः ते गण्यन्ते येन तद् भेदगणनम्। एकत्वादिसङ्खषासामान्योपक्रमत्वाद् भेदगणनी संख्येति न भवति, भेदगणनमित्यनेन पृथक्तवनिवेशितत्वमाह। यथोक्तं पृथक्तवनिवेशितत्वात्सङ्ख्या कर्मभेदः स्यादिति। एकत्वसङ्खयापि बहुषु बुद्ध्या सन्निवेशितेषु भेदमेकमस्हायमाह। गुरुत्वमानमुन्मानमिति। तुलादावारोप्य येन द्रव्यान्तरपरिच्छिन्नगुरुत्वेन पलादिशब्दवाच्येन पाषाणादिना सुवर्णादेर्गुरुत्वमुन्मीयते, तदुन्मानमित्यर्थः। आयामामानं प्रमाणमिति। आयामः=दैर्घ्यम्, स येन मीयते तदायाममानम्। एतच्च क्वचित्तिर्यगभिमुखस्य वस्तुनो भवति, यथा--वस्त्रादेर्हस्तादि, क्वचिदूर्ध्वाधरदिगवस्थितस्य भवति--हास्तिनमुदकम्, ऊरुद्वयसमुदकमिति। आरोहपरिणाहमानं परिमाणमिति। आरोहः=उच्छ्रायः, परिणाहः= विस्तारः; ताभ्यामारोहपरिणाहाभ्यां स्वगताभ्यां येन काष्ठादिनिर्मितेन व्रीह्यादि परिमीयते तत्परिमाणम्। परिः सर्वतोभावे, संख्यापरिमाणयोर्विशेषे पृष्ठे उन्मानादविशेवप्रदर्शनं प्रसङ्गेन तद्विशेषस्याप्यज्ञानस्यापनयनार्थम्।
ऊर्ध्वमानमिति। ऊर्ध्वारोपणाद् गुरुत्वमानमुन्मानमिति पूर्वोक्त एवार्थः। किलशब्दः प्रसिद्धौ। परिमाणं तु सर्वत इति। ऊर्ध्वमानमित्युपसमस्तमपि मानमित्येतदत्रापेक्ष्यते। एतदर्थमे केचिद् ऊर्ध्वं मानमिति व्यस्तं पठन्ति। आयामस्तेति। मानमित्यपेक्ष्यते, कर्मणि षष्ठी। प्रसिद्धस्तु पाठः आयामस्त्विति। तत्रायामपरिच्छेद्यर्थ उपचारादायामशब्देनोक्तः। सहख्या बाह्य तु सर्वत इति। पूर्वोक्तादुन्मानादेः सर्वतो बाह्या, तत्रानन्तर्भावात्। तस्याश्च संख्यायतेऽनयेति निर्वचनं भेदगणनलक्षणत्वं व्याख्यातव्यमित्यनुसन्धातव्यम् ।।

असमासे निष्कादिभ्यः ।। 5.1.20 ।।
ठञोऽपवाद इति। येन नाप्राप्तिन्यायेन निष्कादिभ्यो हि द्रोणपर्यन्तेभ्यः परिमाणशब्दात्षष्ठिशब्दाट्ठकः पर्युदासे ठञेव प्राप्नोति, अतस्तस्यैवायमपवादः। तदन्ताप्रतिषेधस्येति। तदन्तविधावप्रतिषेधस्येत्यर्थः। यदि तर्हि तदन्तात्प्रत्ययो विज्ञायते, एवं तर्हि `व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति केवलेभ्यो नोपपद्यते ? नैष दोषः; अस्मासग्रहणेन हि ग्रहणवत्परिभाषाया निवृत्तिराख्याता, तन्निवृत्तौ `येन विधिस्तदन्तस्य' इति तदन्तता, अत्र स्वस्य च रूपस्य प्रकृतत्वात्केवलादपि भवति। यस्तु मन्यते---पूर्वत्रोपादानसामर्थ्यात्केवलादपि स्यादिति, तस्य हि लाघवार्थं केवलानां पाठः स्यादिति यत् किञ्चिदेतत्। इत उत्तरं चेति। कथं पुनरिष्यमाणोऽपि तदन्तविधिर्लभ्यते, यावता `ग्रहणत्रता प्रातिपदिकेन तदन्तविधिर्न भवति' इति प्रतिषिध्यते ? अस्याः परिभाषाया अनित्यत्वं च तस्या गर्गादिषु `वाजासे' इति समासप्रतिषेधाद् गम्यते। नित्यत्वे हि सति वाजशब्दादुत्पद्यमानस्य प्रत्ययस्य समासे प्राप्तिरेव नास्तीति समासे प्रतिषेधं न कुर्यात्। द्विशूर्पमिति। द्वाभ्यां शूर्पाभ्यां क्रीतमिति तद्धितार्थे द्विगुं कृत्वा न तावगदेषा लुगन्ता प्रकृतिरिति `संख्यापूर्वपदादपि `शूर्पादञन्यतरस्याम्' इत्यञेव क्रियते, तस्य `अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्' इति लुक्। द्विशोर्पिकमिति। `परिमाणान्तस्यासंज्ञाशाणयोः' इत्युत्तरपदवृद्धिः। यदुक्तम्--`इत उत्तरं संख्यापूर्वपदानं तदन्तविधिरिष्यते' इति, यच्चोक्तम्--`लुगन्तायास्तु प्रकृतेर्नेष्यते' इति, तदुभयमाप्तागमेन स्थिरीकर्तुमाह--तथा चोक्तमित्यादिना ।।

शताच्च ठन्यतावशते ।। 5.1.21 ।।
कनोऽपवाद इति। उत्तरसूत्रेण प्राप्तस्य।
शतकमिति। `तदस्य परिमाणम्' इति वर्त्तमामने `संक्यायाः संज्ञासंघसूत्राध्ययनेषु' इति संघे प्रत्ययार्थे विवक्षिते उत्तरसूक्षत्रेण कनेव भवति। प्रत्ययार्थोऽत्र सङ्घ इति। शतमध्यायानां परिमाणं यस्य निदानाख्यस्य ग्रन्थस्य स इह प्रत्ययार्थः, स च शतसंख्यावच्छिन्नाध्यायसमुदायात्मक इति संघः प्रत्ययार्थो

भवति। शतमेव वस्तुत इति। शतात्तस्यानन्यत्वात् ततश्च प्रकृत्यर्थान्न भिद्यते,यदेवाध्यायानां शतं प्रकृत्याभिधीयते प्रत्ययान्तेनापि तदेवेति नेह प्रकृत्यर्थात्प्रत्ययार्थस्य भेदः। एतेन यत्राव्यतिरिक्तः प्कय्ययार्थात्प्रकृत्यर्थस्तत्र प्रतिषेधो भवति, न व्यतिरिक्त इत्येतदाख्यातम्। ननु च `संघे चानौत्तराधर्ये', `सङ्ख्यायाः संज्ञासंघसूत्राध्ययनेषु' इत्यत्र च प्राणिसमूहे संघशब्दो गृङ्यते, तत्कथमत्र ग्रन्थविषयो गृह्यते ? उपचारेणेत्यदोषः। यदि वा संज्ञासंघसूत्रे शब्दसाहचर्याद्विशिष्टः संघो गृह्यते, `संघे चानौत्तराधर्ये' इत्यत्रापि `छन्दोनाम्नि' इत्यतश्छन्दोग्रहणानुवृत्तेः प्राणी गृह्यते। इह तु यत्नान्तराभावाद्ग्रन्थस्यापि ग्रहणमित्यदोषः। ननु च शतेऽभिधेये न भवितव्यम्, इहच शत्यं शाटकशतम्, शतिकं शाटकशतमित्युक्ते शतं प्रतीयत एव तत्किमिति प्रतिषेधो न भवति ? इत्यत आह--वाक्येनेत्यादि। शत्यशतिकशब्धौ सामान्यशब्दौ, सामान्यशब्दास्च प्रकरणादिकमन्तरेण न विशेषे वर्त्तन्ते। न यावच्छाटकशतमित्येतत्पदान्तरं प्रयुज्यते तावत्प्रत्ययार्थस्य शतत्वं नावसीयते। तस्मात्पदान्तरसन्निधौ गम्यमानत्वाद्वाक्यार्थोऽसौ भवति। न श्रुत्येति। गम्यते इति सम्बन्धः। यत्र प्रत्ययान्तेन पदान्तरनिरपेक्षेण प्रत्ययार्थस्य शतत्वमाख्यायते, तत्र श्रुत्या प्रत्ययान्तश्रवणमात्रेणैव गम्यते, यथा प्रत्युदाहरणे शतं परिमाणमस्य शतकमित्युक्ते गम्यते- एकत्प्रत्ययार्थोऽपि शतमेवेति। इह तु वाक्याच्छतत्वं प्रतीयते। न च पदसंस्कारकाले वाक्यार्थस्याङ्गभावोऽस्ति, तदा तस्यानुपथानात्। प्रकृत्यर्थादव्यतिरिक्ते प्रत्ययार्थे प्रतिषेधो भवति, न ह्यतिरिक्ते वाक्यगम्य इत्येतदाप्तवचनेन द्रढयितुमाह--तथा चोक्तमित्यादि। शतप्रतिषेधे कर्त्तव्ये प्रकृत्यर्थादन्यस्य च प्रत्ययार्थस्य शतत्वे सत्यप्रतिषेधः। एतदुक्तं भवति--यत्रान्यत् प्रकृत्यर्थं शतम्, अन्यत्प्रत्ययार्थशतम्, तत्र विधिरेव भवति न प्रतिषेधः।
केन पुनः समासे प्राप्नोति यतस्तत्प्रतिषेधार्थमसमासानुकर्षणार्थश्चकारः क्रियते ? इत्याह--प्राग्वतेरित्यादि ।।

संख्याया अतिशदन्तायाः कन् ।। 5.1.22 ।।
पञ्चकः पट इति। लौकिक्याः संख्याया उदाहरणम्। बहुक इति। पारिभाषिक्याः। चात्वारिशंत्क इति। `इसुसुक्तान्तात्कः'।
अर्थवतस्तिशब्दस्य ग्रहणादिति। अर्थवद्ग्रहणपरिभषया। डतेरिति। इत्यवयवस्य तिशब्दस्येत्यर्थः। पर्युदासो न भवतीति। न ह्यसावर्थवलान्। कतिक इति। का संख्या परिमाणं येषामिति `किमः संख्यापरिमाणे इति च' इति इतिः। सप्ततिशब्दे तु सप्तदशदर्थाभिधायिनः सप्तशब्दात्परिमाणोपाधिकादस्येति षष्ठयर्थे तिप्रत्ययो बवतीति तिशब्दोऽर्थवान्। एवं नवतिशब्दे। अशीतिशब्दे तु यद्यप्यशीशब्दस्याष्टस्वन्यत्र न दृष्टः प्रयोगः। शास्त्रो त्वेषा व्यवस्था-- अष्टानामशीभावस्तिश्च प्रत्यय इति। विशतिशब्दे तु द्वयोर्दशतोर्विन्बावः शतीश्च प्रत्यय इति तिशब्दोऽनर्थक एव, ततश्च ततः कन् भवत्येव-विंशतिकः। एवं च कृत्वा `विशतिकात्खः शतमानविशतिकः' इति निर्द्देश उपपद्ते; किन्तु `विशतित्रिंशद्भयां ड्वुनसंज्ञायाम्' इत्यसंज्ञायां डुवुन्विधानात्संज्ञायामेव कन् भवति। `अतिशदन्तायाः' इत्यत्रान्तग्रहणमेकसप्तत्या क्रीतमित्यत्रापि पर्युदासार्थम्, अन्यथा प्रत्ययग्रहणपरिभाषया न स्यात् ।।

वतोरिड् वा ।। 5.1.23 ।।
तस्य त्वनेनेति। `चरेष्टः' इत्यादिवत्प्रत्ययान्तरं त्विण्न भवति; टित्करणसामर्थ्यात्। अस्त्यन्यट्टित्करणस्य प्रयोजनं टित इति ङीब्यथा स्यात् ? अत इत्यधिकारे ङीप्, न चैषोऽकारान्तः, टित्करणसामर्थ्यादनदन्तादपि ङीप् स्यात्, यथा--डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् सरज इत्यत्र टिलोपः। एघं तर्हि स्वरितत्वप्रतिज्ञानेन कनोऽनुकर्षणसामर्थ्यादागमो भविष्यति ? अस्त्यन्यदनुवृत्तेः प्रयोजनम्--इटा बाधो मा भूत् कनोपि विधिर्यथा स्यादिति ? वावचनादेवल कन् भविष्यति ? इदं तर्हि प्रयोजनं स्यात्-इट्कनौ वा भवतः, पक्षे सामन्यविहितष्ठञिति ? तस्माद्व्याख्यानमेव शरणम्। ननु नेह कन्ग्रहणमस्ति, यदपि प्रकृतम्, तदपि प्रथमानिर्दिष्टम, षष्ठीनिर्दिष्टेन चेहार्थः, वतोरिति पञ्चमी कनिति प्रथमायाः षष्ठी प्रकल्पयिष्यति--`तस्मादित्युत्तरस्य' इति। तावत्क इति। तत्परिमाणमस्य `यत्तदेतेफभ्यः परिमाणे वतुप्', `आ सर्वनाम्नः'।।

विंशतित्रिशद्भ्यां ड्वुनसंज्ञायम् ।। 5.1.24 ।।
विंशक इति। `ति विंशतेर्डिति' इति तिशब्दस्य लोपः, `अतो गुणे' इति पररूपत्वम्। यस्येति लोपस्तु न भवति, `असिद्धवदत्राभात्' इति तिलोपस्यासिद्धत्वात्। ननु सुबन्तात्तद्धितोत्पत्तिः, ततश्चान्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदसंज्ञा भवति, तत्कथं पररूपत्म्; या तु ड्वुनमपेक्ष्य भसंज्ञा, सा येन नाप्रप्तिन्यायेन `स्वादिषु' इति या पदसंज्ञा तामेव वाधते, न `सुप्तिङन्तं पदम्' इत्येतामपि ? एतामपि बाधते। कथम् ? परत्वात्। अत एव `सामन्यः' इत्यादौ नलोपाद्यभावः।
कथं पुनरत्रेति। त्रिंशत्कमधिकृत्य प्रश्नप्रतिचने। विंशतिशब्दात्तु कनः सिद्धिः प्रागेव प्रतिपादिता। यदा तु द्वयोर्दशतोर्वलिशभावस्तिश्च प्रत्यय इति पक्षः, तदा विंशतिकमप्यधिकृत्य भवतः ।।

कंसाट्टिठन् ।। 5.1.25 ।।
कंसशब्दोऽयं कांस्यपात्रवाची परिमाणशब्दो गृह्यते, पूर्वोत्तरैः परिमाणशब्दैः साहचर्यात्, न लोहविशेषवचनः, नाप्युग्रसेनसुतवचन इति दर्शयति।
ठञोऽपवागद इति। इकार उच्चारणार्थ इति। एवं च प्रक्रियालाघवाय टिकनेव वक्तव्यः ? तथा तु न कृतमित्येव।
अधिकं इति। अर्धशब्दः कार्षापणस्यार्धे निरूढ इति भागवदपेक्षयार्धेऽसामर्थ्यं नाशङ्कनीयम्।
अपर आह--प्रकरणादिवशेन भागवद्विशेषे निश्चिते सति नासामर्थ्यमिति ।।

शूर्पादञन्यतरस्याम् ।। 5.1.26 ।।

ठञोऽपवाद इति। शूर्पशब्दस्य परिमाणवाचित्वात्। यद्यपि परिपवनविशेषः शूर्पम्, तथापि विशिश्टसंस्थानं धान्यादेः परिमाणमपि। शूर्पपरिमितो वा व्रीह्यदिः शूर्पशब्देनोच्यते।।

शतमानविशतिकसहस्रवसनादण् ।। 5.1.27 ।।

ठकठञोरपवाद इति। शतमानं। परिमाणम्, सहस्रं संख्या; ताभ्यां ठञोऽपवादः। विंशत्या क्रीतं विंशतिकं संज्ञाशब्दोऽयम्, असंज्ञायाम् `विंशतित्रिंशद्भयां ड्वुनसंज्ञायाम्' इति ड्वुना भवितव्यम्, सा यदि परिमाणस्य संज्ञा ? तदा ततोऽपि ठञोऽपवादः। अथ त्वर्थान्तरस्य, ततष्ठकः। वसनशब्दात्तु ठक एव ।।

अध्यर्धपूर्वद्विगोर्लुगसञ्ज्ञायाम् ।। 5.1.28 ।।

अध्यारूढमर्द्धमस्मिन्नत्यध्यर्धम्, प्रादिभ्यो धातुजस्येति बहुव्रीहिः। अध्यर्धपूर्वद्विगोरिति समाहारद्वन्द्वः, सौत्रः पुंल्लिङ्गनिर्द्देशः। तस्मादध्यर्धपूर्वात्प्रातिपदिकाद् द्विगोश्च परस्येति। तेन `अध्यर्धपूर्वद्विगोः' इति पञ्चम्याश्रितेति लक्ष्यते। यद्येवम्, द्विगोर्लुकि तन्निमित्तग्रहणम्, द्विगोर्निमित्तं यस्तद्धितस्तस्य लुग् भवतीति वक्तव्यम्, द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम्, द्विशूर्पेण क्रीतं द्विशौर्पिकमित्यत्र द्वितीयस्य मा भूत्। तथार्थविशेषासंप्रत्यये तन्निमित्तादपि यत्र तद्धितार्थद्विगुना सहार्थो न भिद्यते, तत्रातन्निमित्तादपि। स तद्धितो यस्य निमित्तं न भवति तस्मादपि द्विगोः परस्य लुग्भवतीति वक्तव्यम्-द्वयोः शूर्पयोः समाहारो द्विशूर्पी, द्वशूर्प्या क्रीतमित्यपि विग्रहे द्विशूर्पमित्येव यथा स्यात्। तस्माद् द्विगोरिति नैषा पञ्चमी, का तर्हि ? षष्टी--द्विगोर्यस्तद्धितः। कश्च द्विगोस्तद्धितः ? यस्तस्य निमित्तं यस्मिन् द्विगुर्मवति। द्विशूर्प्या क्रीतमित्यत्र त्वनभिधानात्प्रत्ययो न भविष्यति। त्र्यैशब्द्यं हि नः साध्यम्द्वाभ्यां शूर्पाभ्यां क्रीतम्, द्विशूर्पम्, द्विशूर्प्या क्रीतमिति; तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रह एव द्विशूर्प्या क्रीतमिति, न तु वृत्तिः, अनभिधानात्। अपरेण विग्रहश्च वृत्तिश्च-द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पमिति, अव्यविकन्यायेन। व्याख्यातोऽव्यविकन्यायः। इदं तावदर्थतत्त्वम्, `द्विगोर्लुगनपत्ये' इत्यत्र च वृत्तिकारेणाप्येवमेव व्याख्यातम्, इह तु तदनुसारेण गम्यमानत्वान्नैवं विविच्य व्याख्यातम्, यस्य तद्धितस्य लुगिष्यते सोऽपि द्विगोः पर इत्येतावता द्विगोः परस्येत्युक्तम्। पाञ्चलोहितिकम्, पाञ्चकलापिकमिति। पञ्च लोहिन्यः परिमाणमस्य, पञ्च कलापाः परिमाणमस्येति विगृह्य तद्धितार्थे समासः, `तदस्य परिमाणम्' इति ठञ्, `भस्याऽढे तद्धिते' इति पुंवद्भावाल्लोहिनीशब्दस्येकारनकारयोर्निवृत्तिः, परिमाणविशेषस्य नामधेये एते।

प्रत्ययान्तस्य विशेषणमसंज्ञाग्रहणामिति। न तु सन्निहितस्यापि द्विगोः; असंज्ञायामिति सप्तदमीनिर्द्देशात्। वार्त्तिककारस्तु मन्यते--`द्विगुविशेषणमसंज्ञाग्रहणं पञ्चलोहित-पञ्चकलापशब्दावपि द्विगू कृततद्धितलुकावेव संज्ञे, ततो नार्थोऽसंज्ञायामिति प्रतिषेधेन' इति, तदाह--`संज्ञाप्रतिषेधानर्थक्यं च तन्निमित्तत्वाल्लोपस्य' इति। तस्याः संज्ञायाः लोप एव निमित्तमित्यर्थः।

अध्यर्द्धशब्दः संख्यैवेति। संख्यावाच्येवेत्यर्थः। अध्यर्द्धस्याप्येकादिवत् परिच्छेदहेतुत्वात्। अत एवाध्यर्द्धेन क्रीतमध्यर्द्धकमति संख्यालक्षणः कन् भवति, अध्यर्द्धकंसमित्यादौ तद्धितार्थे द्विगुश्च। क्वचिदिति। कन्समासोत्तरपदवृद्धिभ्योऽन्यत्र। संख्यायाः क्रियाभ्यावृत्तिगणने इति। यदा सकृत्फलां तां क्रियामभिनिर्वर्त्त्य तामेव कुर्वन्नर्धे निवर्त्तते, तदा कृत्वसुचोऽभावदध्यर्ध करोतीत्येव भवति ।।

विभाषा कार्षापणसहस्राभ्याम् ।। 5.1.29 ।।

अध्यर्धसहस्रमिति। `शतमानविशतिक' इति विहितस्याणो लक्, अलुक्पक्षे `संख्यायाः संवत्सरसंख्यस्य च' इत्युत्तरपदवृद्धिः, इदानीमेव ह्युक्तम्--`अध्यर्धशब्दः संख्यैव' इति।

अध्यर्धसुवर्णमिति। ठञो लुग्, न तु ठकः, आर्हादित्यत्र क्रियानिमित्तकस्य परिमाणस्य ग्रहणाद्। येषां तु रूढिपरिमाणस्य तत्र ग्रहणम्, तन्मते ठको लुक्। अध्यर्द्धसौवर्णिकमिति। परिमाणान्तस्येत्युत्तरपदवृद्धिः, तत्र ह्युन्मानस्यापि ग्रहणम्; शाणप्रतिषेधात्। अध्यर्द्धे कार्षापणस्य, द्विगौ सहस्रस्येत्येवमत्र यथासंख्यं नेष्यते।।

द्वित्रिपूर्वान्निष्कात् ।। 5.1.30 ।।

अध्यर्द्धपूर्वग्रहणमुत्तरार्थमनुवर्त्तते, इह तु न सम्बध्यते। द्विगुग्रहणं तु सम्बध्यते, द्वयोर्निष्कं त्रयाणां निष्कमिति षष्ठीसमासे मा भूत्। अत्र च व्याख्यानमेव शरणम्; अन्यथा `अद्यर्धपूर्वाद् द्वित्रिपूर्वाच्च निष्कात्' इति समुच्चयो विज्ञायेत। द्विनैष्किकमिति। `ग्राग्वतेष्ठञ्', `परिमाणान्तस्य' इत्युत्तरपदवृद्धिः। द्वित्रिभ्यां निष्कादित्येव सिद्धे पूर्वग्रहणं चिन्त्यप्रयोजनम् ।।

विस्ताच्च ।। 5.1.31 ।।

चकारेणानुकृष्यत इति। तेन चानुकृष्टमुत्तरत्र नानुवर्त्तते इत्युत्तरत्रानुवृत्त्यभाव इति भावः। बिस्तशब्दः परिमाणवाची ।।

विंशतिकात्खः ।। 5.1.32 ।।
`शतमानविशतिक' इत्यणि प्राप्ते तस्य च लुकि खोऽत्र विधीयते।

खार्या ईकन् ।। 5.1.33 ।।
खारि परिमाणमिति ठञि प्राप्ते तस्य च लुकि ईकन्विधीयते।
केवलायाश्चेति। `अध्यर्द्धपूर्वद्विगोः' इत्यधिकारात्केवलाया न प्राप्नोतीति वचनम्। अथाध्यर्धपूर्वेति न सम्बध्येत, ततः केवलायामीकनश्चरितार्थत्वादध्यर्धपूर्वद्विगोर्लुक् प्राप्नोति, दीर्घोच्चारणं किमर्थं नेकनेवोच्येत, सवर्णदीर्घत्वे सति सिद्धम् ? यस्येतिलोपः प्राप्नोति, इकारोच्चारणसामर्थ्यान्न भविष्यति, अन्यथा कनमेव विदध्यात्, `केऽमः' इति ह्रस्वत्वे कृते सति सिद्धम्। अवग्रहः प्राप्नोति ? न लक्षणेन पदकारा अनुवर्त्त्याः, पदकारैर्नाम लक्षणमनुवर्त्त्यम् ।।

पणपादमाषशताद्यत् ।। 5.1.34 ।।
पद्बावोऽत्र न भवतीति। `पद्यत्यतदर्थे' इत्यनेन। किं कारणमित्याह--प्राण्यङ्गस्येति। `पादस्य पदाज्यातिगोपहतेषु' इत्यत्र तावत् प्राण्यङ्गस्य पादस्य ग्रहणं तस्यैवाज्यादिभिर्गतिवचनैः सबन्धसद्भावात् पद्यतीत्यादावपि तस्यैवानुवृत्तिः। इह तु परिमाणमिति। गृह्यते इति शेषः। पणमाभ्यां साहचर्यादिति भावः ।।

शाणाद्वा ।। 5.1.35 ।।
ठञोऽपवाद इति। यद्यप्युन्मानवचनः शाणशब्दः, तथाप्यार्हादित्यत्र क्रियापरिमाणस्य ग्रहणादस्यपि पर्युदासाट्ठञ एव प्रसङ्ग इति भावः।
शताच्चेति वक्तव्यमिति। पूर्वेण नित्ये यति प्राप्ते वचनम्। यदभावपक्षे सङ्खयालक्षणस्य कनो लुक् ।।

द्वित्रिपूर्वादण् च ।। 5.1.36 ।।
वार्तितके दर्शनात्सूत्रेष्वेतत्प्रक्षिप्तम्। त्रैरूप्यं भवतीति। अण्येकम्, यति द्वितीयम्, ठञो लुकि तृतीयम् ।।

तेन क्रीतम् ।। 5.1.37 ।।
तेषामिति। अस्य समर्थविभक्तय इत्यनेनैव सम्बन्धः, न प्रत्ययार्थ इत्यनेन। न हि तेषां प्रत्ययानां प्रत्ययार्था निर्दिशयन्ते इत्यन्वयो घटते। ओदनपाकं पचतीतिवद्वा कथञ्चिदन्वयः।
तेनेति मूल्यादिति। मूल्यभूतार्थाभिधायिनः करणे या तृतीया सा चेह समर्थविभत्मिरित्यर्थः। मूलेनानाम्यं मूल्यम्=लाभ इत्युक्तम्। अन्यत्रेति। अमूल्यादकरणे वा या कृतीया तत्रेत्यर्थः। अनभिधानादेवेति। एवकारः पौनर्वचनिकः। किञ्च- प्रस्थादयः शब्दा नियतपरिमाणानामर्थानां वाचका न मात्रयापि न्यूनाधिकभावे प्रवर्त्तन्ते, न हि यथा जलमिति प्रस्थेऽपि भवति, कुडवेऽपि भवति, यथा वाग्निरिति भ्राष्ट्राग्नावपि भवति, दावाग्नावपि भवति; यथा वा एको व्रीहिः सम्पन्न इत्यादौ जात्यात्मना सर्वासां व्यक्तीनामैक्यं प्रतीयते, तथा प्रस्थादिषु भवति। तस्मात्तेषु विभक्तयभावे यावतस्ये वाचकास्तावदेव गम्यते। वाक्ये तु प्रस्थाभ्याम्, प्रस्थैरिति द्विवचनबहुवचनबलात्तावतोऽनेकस्यावगतिर्भवति।
द्वकम्, त्रिकमिति। अत्र हि प्रकृतेरेव वाच्ये द्वित्वबहुत्वे विभक्तिस्तु करणत्वमात्रमाचष्टे, सा च प्रकृतिर्वृत्तावपि विद्यते। न ह्येकेन मुद्रेनेति। एकया मुद्गव्यक्त्येत्यर्थः। जात्याख्यायां त्वेकवचनान्तादपि भवत्येव। ननु यद् निष्केण क्रीतं तस्य निष्को वस्नो भवति, ततश्च `सोऽस्यांशवस्रभृतयः' इत्येव सिद्धः प्रत्ययः, नार्थ एतेन ? एवं तर्हि यस्य शतं मूल्यं न भवत्यथ च तेन क्रीतं कार्यवशातदर्थमिदम् ।।

तस्य निमित्त संयोगोत्पातौ ।। 5.1.38 ।।
शुभाशुभसूचक इति। तत्प्रयोजक इतिवत्वष्ठीसमासः। महाभूतानामिति। पृथिव्यादीनाम्। दक्षिणाक्षिस्पन्दनमिति। पाञ्चभौतिकशरीरे द्रव्यमेव च क्रियारूपेण परिणमते इति दक्षिणाक्षिस्पन्दनं महाभूतपरिणामः, तस्य च शुभस्य प्रति निमित्तत्वम्; ज्ञापकहेतुत्वाद्, न तु कारकहेतुत्वात्। वातिकमिति। शमनकोपने एवात्र प्रत्ययार्थौ, न तु निमित्तं ताभ्यां विशेष्यते। प्रकरणादिना च तयोरन्यतरावसायः।
सन्निपातः=वातादीनां युगपदुद्भवः ।।

गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ।। 5.1.39 ।।
ठञादीनामिति। आदिशब्देन ठको ग्रहणम्। अतद्गुणसंविज्ञानो बहुव्रीहिः, बहुवचनं तु ठक एवैकस्य विषयवहुत्वमाश्रित्य कृतम्, ठकोऽपवाद इत्यर्थः। किं पुनःकारणमेवं व्याख्यायते ? संख्यापरिमाणाश्वादिवर्जिताद्गोद्व्यचष्ठक एव प्राप्तत्वात्। ब्रह्मवर्चसादिति। ब्रह्मणो वर्चो व्रह्मवर्चसं वृत्तस्वाध्यायसंपत्,

`ब्रह्महस्तिभ्यां वर्चसः' इत्यच् समासान्तः ।।

पुत्राच्छ च ।। 5.1.40 ।।
कथं पुत्रीयः क्रतुरिति, न हि क्रतुः संयोग उत्पातो वा भवति ? संयुज्यतेऽनेनेति व्युत्पत्या क्रतुरपि संयोग एव। येन यागादिकरणेन पुरुषः फलेन संयुज्यते स यागादिरपि संयोगः, न केवलं सम्बन्ध एवेत्यर्थः। एतेन `पुरोडाशसं लोक्यम्' इत्यादिव्याख्यातम् ।।

सर्वभूमिपृथिवीभ्यामणञौ ।। 5.1.41 ।।
संयोगोत्पातौ प्रति यथासंख्यं न भवति, तयोः प्रत्ययार्थविसेषणत्वेन प्रकृतिभ्यां प्रत्ययाभ्यां चासम्बन्धात् ।।

तत्र विदित इति च ।। 5.1.43 ।।
योगविभागो यथासङ्ख्यनिरासार्थः, उत्तरार्थश्च ।।

तस्य वापः ।। 5.1.45 ।।
तस्येति वापापेक्षया कर्मणि षष्ठी, न तु कर्त्तरि, तेन देवदत्तस्य वापः क्षेत्रमित्यादौ न भवति ।।
तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते।। दीयत इत्येकवचान्तं वृद्ध्यादिभिः प्रत्येकमभिसम्बद्ध्यत इति। तेन वृद्धयादीनां बहुत्वेऽपि बहुवचनं न भवतीति भावः। प्रत्येकं सम्बन्धस्तु द्वन्द्वपर्त्तिनां पदानां बुद्ध्या निष्कर्षाल्लभ्यते एतच्च दीयत इत्यस्य विसेषणस्य वृद्ध्युपक्रमत्व उक्तम्, यदा तु यत्तत्प्रथमासमर्थ दीयते चेत्तद्भवतीत्येवमुपक्रम्यते, पश्चात्तु किं पुनस्तद्दीयत इत्यपेक्षायां वृद्ध्यादयः संतद्यन्ते तदा न किञ्चिद्यत्नसाध्यम्। उत्तमर्णधनातिरिक्तमिति। उत्तमर्णेन यद्दत्तम् धनं तस्मादधिकमित्यर्थः, संज्ञा वृद्धिस्तु न गृह्यते; आयादिभिः साहचर्यात्। उपादानमूलातिरिक्तमिति। पटादीनामुपादानं तन्त्वादि, तस्य मूलमुत्पत्तिकारणं द्रव्यम्, तस्मादधिकं पटादि विक्रयेण यल्लभ्यते स लाभः, निर्वेशो भृतिः, रक्षानिमित्तको निर्वेशो रक्षानिर्वेशः, सम्बन्धषष्ठ्या समासः। शुल्कग्रहणं प्रपञ्चार्थम्, तस्याप्यायविशेषत्वात्, तथा च `ठगायस्थानेभ्यः' इति शुल्कस्थानादपि भवति शौल्कशालिक इति। यत्र ग्रामादौ वृद्ध्यादि दीयते तत्र प्रत्ययो विधीयमानः संप्रदाने न प्राप्नोतीत्यत आह--चतुर्थ्यर्थ उपसंख्यानमिति। सिद्धं त्विति। विवक्षातः कारकाणि भवन्तीति संप्रदानस्यैवाधिकरणत्वेन विवक्षितत्वात्सिद्धमिष्टमित्यर्थः। क्व यथेत्याह--सममिति ।।

पूरणार्द्धाट्ठन् ।। 5.1.47 ।।
पूरणवाचिन इति। पूर्यते येनार्थः स पूरणः, तद्वाचिन इत्यर्थः। एतेन `पूरण' इत्यर्थस्येदं ग्रहणम्, न तु प्रत्ययस्येति दर्शयति। यदि तु पूरणग्रहणं स्वर्येत ततः स्वरितेनाधिकारगतिर्भवतीति `तस्य पूरणे डट्' इति पूरणाधिकारविहिता डटादयः प्रत्यया गृह्येरन्, यथा-गोस्त्रियोरित्यत्र स्त्र्यधिकारविहिताष्टाबादयः, ततश्च `पूरणाद्भागे तीयादन्' इत्यनन्तान्न स्यात्, अर्थग्रहणे ततोऽपि भवति, तहन्तमपि हि पूरण एवार्थे वर्त्तते, स्वार्थिकत्वादनः। तस्मादर्थग्रहणमेव न्याय्यम्। ठक्टिठनोरपवाद इति। पूरणादार्ङीयस्य ठकोऽपवादः। अर्द्धादपिअर्द्धाच्यति वक्तव्यमिति टिठनः। स्त्रियां च विशेषः, टिठिनि हि सति ङीप् स्यात्, ठनि तु टाप् भवति। अर्द्धशब्दो रूपकार्द्धस्य रूढिरिति। रूपकम्=कार्षापणम्, तदीयस्य भागस्यार्द्धशब्दो वाचकत्वेन प्रसिद्ध इत्यर्थः। तेनार्द्धिक इति भागवत्सापेक्षत्वेनासामर्थ्यं नोद्भावनीयमिति भावः ।।

भागाद्यच्च ।। 5.1.49 ।।
भागश्ब्दोऽपीति। न केवलमर्द्धशब्द एवेत्यपिशब्दार्थः ।।

तद्धरति वहत्यावहति भाराद्वंसादिभ्यः ।। 5.1.50 ।।
प्रकृतिविशेषणमिति । प्रकृतिः प्रातिपदिकम्, तस्य विशेषणम्, विशे,णप्रकारमेव दर्शयति--वंशादिभ्य इत्यादि। वंशादिभ्य इति किमिति। भारान्तादिति कस्मान्नोक्तमिति भावः। अत एव तदन्तं प्रत्युदाहरति--व्रीहिभारं वहतीति। भारभूतेभ्यो वंशादिभ्य इति। ननु वंशादयः शब्दास्ते कथं भारभूता इत्यत आह--बारशब्दोऽर्थद्वारेण वंशादीनां विशेषणमिति। बारभूतार्थाभिधायित्वाद्भारभूतेब्यो वंशदिभ्य इत्युक्तमित्यर्थः। सूत्रे तु प्रत्येकं सम्बन्धादेकवचनम् ।।

वस्नद्रव्याभ्यां ठन्कनौ।। 5.1.51 ।।
वस्नशब्देन मूल्यमुच्यते ।।

संभवत्यवहरति पचति ।। 5.1.52 ।।
प्रमाणानतिरेक इति। आधारग्रमाणादाधेयप्रमाणस्यानाधिक्यमित्यर्थः। तदुपसर्जने च धारणे संभवतेर्वृत्तिरिति सकर्मकत्वम्। उपसंहरणमवहार इति।

आधारप्रमाणादाधेयप्रमाणस्य न्यूनतेत्यर्थः, तदुपसर्जने च धारणेऽवहरतेर्वृत्तेः सकर्मकत्वम्, सूत्रे स्पष्ट उपसर्गः। नास्त्यत्र नियोग इति।
नियोगः=अवश्यम्भावः। तत्पचतीति द्रोणादण् चेति। पचतिग्रहणं सम्भवत्यवहरतीति निवृत्त्यर्थम्, द्रोणपरिमिते च व्रीह्यादौ द्रोणशब्दस्तस्य पाकसम्भवात् ।।

आढकाचितपात्रात्खोऽन्यतरस्याम् ।। 5.1.53 ।।
ठञोऽपवाद इति। न ठकः, आढकादीनां परिमाणत्वात्। पात्रं भाजनमप्यस्ति, तस्य तु सम्भवत्यादिभिः सम्बन्धानुपपत्तेः, आढकाचितसाहचर्यच्च परिमाणस्यैव ग्रहणम् ।।

द्विगोष्ष्ठँश्च ।। 5.1.54 ।।
द्व्याचितेति। ठञो लुक्, `अपरिमाणबिस्ताचित' इति ङीपः प्रतिषेधः ।।

कुलिजाल्लुक्खौ च । 5.1.55 ।।
अन्यतरस्यांग्रहणानुवृत्त्या लुगपि विकल्प्यत इति। तच्च लुक्खग्रहणाद्विज्ञायते, अन्यथा कुलिजाच्चेत्येव वक्तव्यम्, द्विगोश्चेत्येव खोऽन्यतरस्यामिति च तत्र ठन्खाभ्यां मुक्ते पक्षे ठञ्, तस्य `अध्यर्द्धपूर्व' इति लुक्। एवं रूपत्रये सिद्धे लुक्खग्रहणं कुर्वतः सूत्रकारस्य `लुकोऽपि विकल्प इष्ट इति लक्ष्यते' इति मन्यते। वात्तेककारस्तु ठञो नित्यं लुकं मन्यमानः पूर्वसूत्रवत् त्रैरूप्यमेवेच्छन् लुक्खग्रहणं प्रत्याचष्टे, `कुलिजाच्च' इति सिद्धे लुक्कग्रहणानर्थक्यम्, पूर्वस्मिन् त्रिकभावादिति ।।

सोऽस्यांशवस्नभृतयः ।। 5.1.56 ।।
इह च शतं यस्य वक्नो भवति स तेन क्रीतो भवति, तत्र तेन क्रीतमित्येव सिद्धम् नार्थो वस्नग्रहणेन ? नैतदस्ति; योग्यतामात्रेऽप्यस्येदं मूल्यमिति व्यवहारत् ।।

तदस्य परिमाणम् ।। 5.1.57 ।।
इह परिच्छदहेतुमात्रं परिमाणम्, न सर्वतो मानमेव; उत्तरसूत्रे संख्यायाः परिमाणेन विशेषणात्। खारशतिक इति। खारशब्दोऽकारान्तो वार्तिककारवचनात्साधुः, तेन हि `तदस्य परिमाणम्' इत्यत्र योगविभागः कर्तव्य इति दर्शयितुमुक्तम्-`अन्येभ्योऽपि दृश्यते खारशताद्यर्थम्' इति। वार्षशतिक इति। यज्ञादौ परिमाणिनि प्रत्ययः। षष्टि जीवितपरिमाणस्येति। संवत् सरेषु षष्ठिशब्दः,संवत्सरसंख्याया हि जीवितं प्रायेण परिच्छद्यते, जीवितपरिच्छेदद्वारेण तद्वतोऽपि षष्टिः संवत्सराः परिमाणमिति। तदस्मिन्परिमाणिनि प्रत्ययः। ननु यस्य षष्टिर्जीवितपरिमाणं षष्टिमसौ भृतो भवति तत्र तमधीष्टो भृतो भूतो भावीत्येव सिद्धम्। एवं च द्विषाष्टिक इत्यादौ नैवाध्यर्द्धपूर्वति लुक्प्रसङ्गः, तस्यानार्हीयत्वात्, ततश्च समर्थविभक्तेः प्रत्ययार्थस्य च पुनरुपादानेन विधानमपि न कर्तव्यम्, न च जीवितपरिमाणादन्यत्र पुनर्विधानेन लुगबाव इत्यते ? एवं मन्ये-तमधीष्ट इत्यत्र कालादिति वर्त्तते, न च षष्टयादयः कालशब्दाः। अथ काले संख्येये वर्तमानत्वात्तेऽपि कालशब्दाः ? रमणीयादिष्वतिप्रसङ्गः, रमणीयं कालं भूत इति। तस्माद्यः कालं न व्यभिचरति स एव कालशब्द इति। द्विषाष्टिक इति। `संख्यायाः संवत्सरसंख्यस्य च' इत्युत्तरपदवृद्धिः ।।

संख्याः संज्ञासङ्घसूत्राध्ययनेषु ।। 5.1.58 ।।
परिमाणोपाधिकादिति। नात्र रूढिपरिमाणं गृह्यते, किं तर्हि ? क्रियाशब्दः--परिमीयते येन तत्परिमाणम्। संख्यापि च परिमीयत इति नासम्भवि विषेषणम्, नन्वेवमप्यव्यभिचारादविशेषणम्, न ह्यपरिच्छेदिका संख्यास्ति, सत्यम्; इह तु प्रत्ययार्थस्य संघादेर्यदा परिच्छेदिका संख्या तदा प्रत्ययो यथा स्यात्--पञ्च गावः परिमाणमस्य पञ्चको गोसङ्ग इति; इह मा भूत्--पञ्च गावः संभूता अस्य ब्रह्मणसङ्घस्येति, न ह्यत्र सङ्घस्येयत्तागम्यते, तस्मात्प्रत्ययार्थस्य यदा परिच्छेदिका संख्या तदा यथा स्यादिति विसेषणमर्थवद्भवति।
तत्रेत्यादि। इहादशभ्यः संख्याः संख्येये वर्तन्त, ?????? सख्यानमात्रे। तत्र य एव शकुनयः पञ्चत्वसंख्यायुक्ताः पञ्चन्शब्दवाच्यास्त एव पञ्चकशब्दस्यापि, ततश्च परिमाणपरिमाणिभावाभावात्स्वार्थ एव प्रत्ययो वक्तव्यः। यदा तु वृत्तिविषये सम्भवत्येव परिमाणी प्रत्ययार्थः--पञ्चत्वसंख्या परिमाणमेषां पञ्चकाः शंकुनय इति। पञ्चकमध्ययनमिति। पूर्वं तु पञ्चकोऽधीते इति सम्पाठापेक्षया पुंल्लिङ्गनिर्द्देशः, `अधीते' इति च कृत इत्यर्थः।
यथा-ओदनपाकं पचत्योदनपाकं करोतीत्यर्थः।
स्तेमे डविधिरिति। सोमयागेषु छन्दोगैः क्रियमाणा पृष्टादिस्तुतिः स्तेमः। पञ्चदश मन्त्राः परिमाणमस्येति। साम्रा स्तुवीत, एकं साम तृचे कियते इति स्तुतिविधिः। तत्र त्रिकस्य पञ्चकृत्व आवृत्त्या पञ्चदश मन्त्रा भवन्ति, सप्तदशसोमे अन्त्यायाः सप्तकृत्व आवृत्तिः एकविशे तृचस्य। डित्करणमेकविशे तिलोपार्थम्, त्रयस्त्रिंशादौ टिलोपार्थं च। पञ्चदशः, सप्तदश इत्यत्र तु `नस्तद्धिते' इत्यनेनैव टिलोपः सिद्धः।
शन्शतोर्डिनिरिति। `स्तोमे' इति न सम्बध्यते। अत्रापि डित्करणं शदन्तस्य टिलोपार्थम्। पञ्चदशिन इति। पञ्चदशाहानि परिमाणमेषामिति डिनिः। एतेन

त्रिंशिनो व्याख्याताः।
विंशिनोऽङ्गिरस इति। `आङ्गिरसायास्य गौतम' इत्यादिप्रवरभेदेन भिन्नानि विंशतिरवान्तरगोत्राणि परिमाणमेषामित्यर्थः।
योगश्चायं पूर्वस्यैव प्रपञ्चः ।।

पंक्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ।। 5.1.59 ।।
पंक्त्यादयः शबाद निपात्यन्त इति। प्रकृतिनिर्देशस्त्वयं न भवति; पंक्त्यादिभ्यः प्रकृतेऽर्थेऽधिकृतः प्रत्ययो भवतीति पञ्चम्या अनुपदानात्, पूर्वेणैव च सिद्धत्वात्, उत्तरेण निपातनेन साहचयच्चि। प्रत्ययनिर्द्देशोऽपि न भवति--ङ्याप्प्रातिपदिकात्प्रकृतेऽर्थे पंक्तयादयः प्रत्यया भवन्तीति, लोके शास्त्रे च `शतच्च ठन्यतावशते' इत्यादौ केवलानां प्रयोगदर्शनाद्। यत्र समुदायः श्रूयते, अवयवा अनुमीयन्ते तन्निपातनम्, विपरीतो विधिः। पञ्चानामिति। अर्थगतस्य बहुत्वस्य शब्दे समारोपाद् बहुवचनम्, पञ्चशब्दस्योत्यर्थः। टिलोपस्तिच्च प्रत्यय इति। निपात्यय इत्यर्थः।
अवयवनिपातननान्तरीयकत्वात्समुदायनिपातनस्य। यद्वा--`निपातनात्सिद्धम्' इत्यस्य पुंल्लिङ्गविपरिणामेनान्वयः, कुत्वं तु चकारञकारयोर्न निपात्यम्, `चोः कुः' इत्येव सिद्धम्। पञ्च पदानीति। पदशब्दः पादपर्यायः। पंक्तिशछन्द इति। तत्पुनः पदपंक्तिः, यस्य पञ्चाक्षराः पञ्च पादा भवन्ति। द्वयोर्दशतोरिति। दशद्वयरूपसंख्येयमाचक्षाणस्य द्विशब्दस्येत्ययमत्रार्थो विवक्षितः। एवं त्रयाणाम् दशतामित्यादावपि द्रष्टव्यम्। शतिच्च प्रत्य इति। चित्करणमन्तोदात्तार्थम्। अपदत्वं चेति। तेन जश्तवचर्त्वे न भवतः। अत्र `तदस्य परिमाणमिति वर्त्तते' इत्युक्तम्, द्वौ दशतौ परिमाणमस्येत्यादिश्च विग्रहो दर्शितः। यदा तु ननुवर्त्तते तदा द्विशदादेर्दशब्दर्थाभिधायिनः स्वार्थे प्रत्ययो निपात्यः-- द्वौ दशतौ विंशतिः, त्रयोदशतस्त्रिंशद् इति; ततश्च स्वर्थिकानां प्रकृतितो लिङ्गवचनानुवृत्तेद्विशब्दादेरिव द्विवचनबहुवचनप्रसङ्गः। विंशत्यादि भिश्च दशतामभिधानमिति गवादिभिर्वैक्यधिकरण्यमेव स्याद्--गवां विंशतिरिति, न तु विंशतिर्गाव इति सामानाधिकरण्यम्, नापि द्विगुः---विंशतिगवमिति, तस्मादनुवर्त्तयम्।
अथास्येत्यनेन कः प्रतिनिर्दिश्यते ? परिमाणी। कः पुनरसौ ? भिन्नानि द्रव्याणि--द्वौ दशतौ परिमाणमेषां विशतिरिति। यद्येवम्, विंशत्यादिभिर्द्रव्याणामभिधानमिति बहुवचनप्रसङ्गाद्विशतिर्गाव इति न स्यात्, गवां विंशतिर्गोविंशतिरिति च न स्याद्, व्यतिरेकाभावात् ? अथास्मिन् पक्षे किञ्चिचदिष्टमपि सिद्धम्, आहोस्विद्दोषान्तमेवास्ति ? इत्याह--इह विशतिगवं त्रिंशत्पूलीति समानाधिकरणलक्षणो द्विगुः सिद्धः; तस्मान्न भिन्नानि द्रव्याणि परिमाणीनि, एतच्च सर्वेष्वेव विग्रहवाक्येष्वस्येत्येकवचनेन दर्शितम्। कस्तर्हि परिमाणी ? सङ्घः---द्वौ दशतौ परिमाणमस्य गोसङ्गस्य `विंशतित्रिंशद्भयां ड्तुन्' विशकः सङ्ग इति न स्यात्; सङ्गान्तरस्य परिमाणिनोऽसम्भवात्। अतोमयं परिमाणिभिन्ना द्रव्याणि तत्संघश्च, तत्र सङ्घपरिमाणिनि व्यधिकरणप्रयोगाः, द्रव्येषु तु परिमाणिषु समानाधिकरणप्रयोगाः, तत्रैव विंसतिर्गावः परिमाणमस्य विंशको गोसङ्ग इति भविष्यतीत्युच्येत् ? एवमपि विंशतिर्गाव इत्यत्र बहुवचनप्रसङ्गः, तथा सङ्घस्य परिमाणत्वे विंशतिर्गोसङ्ग इति प्राप्नोति, न चेष्यते, विंशक इत्येव हि तत्रेष्यते। एवं तर्हि द्वावत्र सङ्गौ स्तः--द्वव्याणामेकः, द्रव्यवर्गयोर्दशतोश्चापरः; तत्र निपातनसामर्थ्याद्दशत्संघे परिमाणिनि प्रत्ययः, सङ्श्च समुदायमात्रं न प्राणिनामेव किं हि निपातनादलभ्यम्, तत्र दशत्सङ्घस्य विंशतिशब्देनाभिधानाद् गोसंघे विवक्षिते विशतिः परिमाणमस्य विशको गोसङ्घ इति च भविष्यति, विशतिर्गोसङ्घ इति च न भविष्यति, गवां विंशतिर्गोविंशतिरिति च भविष्यति। ननु दशत्सङ्घस्य दशतौ गुणिनौ न गावः, तेन दशतोर्विशतिरिति प्रापनोति, गवां विशतिरिति तुन सिद्धयति ? उच्यते; द्रवल्याणां द्रव्यसङ्गस्य दशतां दशत्सङ्स्य च न पारमाथिको भेदोऽस्ति, केवलं बपुद्धया परिकल्प्यते, ततश्च गवां दशतोश्च तात्त्विकभेदाभावद्दशत्सङ्घमपि प्रतिगवामपि गुणित्वमुपपद्यते। व्यभिचारभावात्तु दशद्भ्यां विशतितर्न विशेष्यते गवादिभिरेव तु विशेष्यते, यथा--पटस्य शौक्ल्यमिति भवति, न शुक्लस्य शौक्लामिति व्यमिचाराभावात्, तद्वदत्रापि। ऐवं तावद्व्याधिकरणप्रयोगा उपपादिताः, विंशतिर्गाव इत्यादिकास्तु समानाधिक्रणप्रयोगा उपपादनीयाः, धर्मवचना एते विशत्यादयो गुणवचना इति शुक्लादिवद्भविष्यति। यथा हि-पटस्य शुक्लो गुण इति गुणमात्रे दृष्टः शुक्लशब्दो गुणगुणिनोरव्यतिरेकविवक्षायां मतुब्लोपाद्वा समानाधिकरणो बवति शुक्लः पट इति। एवं विशत्यादयोऽपि।
यद्येवम्, यथान्ये गुणवचना द्रव्यस्य लिङ्गसंख्ये अनुवर्तन्ते, यथा---शुक्लं वस्त्रम्, शुक्ला शाटी, शुक्लः कम्बलः, शुक्लौ, शुक्ल इति, एवं विंशत्यादयोप्यनुवत्तेरन् ? इह पुनर्विशतिर्गावः विंशतिर्बलीवर्द्दाः विशतिर्गोकुलानीति नित्यमेकवचनं स्त्रीलिङ्गं च भवति, शतशब्दात्तु नपुंसकत्वम्, विंशती विशतयः शते शतानीति तु प्रचयभेदविवक्षायामेकशेषः ? अत्रोच्यते--यस्य धमेस्य धमिणा सहाभेदः प्रतिपाद्यते, स चेत्तेषु प्रत्येकपरिसमाप्तः तदा तस्यापि धर्मिवद्भिन्नत्वाद् द्विवचनबहुवचने भवतः, यथा शुक्लौ, शुक्ला इति। शौक्ल्यं हि कम्बलेषु प्रत्येकपरिसमाप्तम्, कोऽर्थः ? एकैकस्मिन्नपि कम्बले शुक्लशब्दार्थः पुष्कलः, न मात्रयापि न्यून इत्यर्थः। विशतिर्गाव इत्यत्र तु विंशतिसंख्या न प्रत्येकपरिसमाप्ता, किं तर्हि ? बहुष्विति।
तद्रूपभेदाभावादेकवचनमेव भवति, यथा--गावो धनम्, इन्द्राग्नी देवता, वेदाः प्रमाणमिति। धिनोर्तेर्धनं प्रीतिहेतुः, समुदितानां च गवां प्रीतिहेतुत्वं विवक्षितम्, नैकैकस्या इति धनमेकं गोभिर्विशेष्यते, तत्र धनाकारे बेदाभावाद् बहुवचनाभावः. इन्द्राग्नी देवतेति दिवरैश्वर्यकर्मणोर्देवतासङ्घस्य च देवतात्वमेकं इविः प्रतीति द्विवननाभावः। देवते इति तूच्यमाने प्रत्यकमैश्वर्य प्रतीयेत, ततश्च व्रीहियवयोरिव विकल्पः स्यात्। वेदाः प्रमाणमिति चतुर्णा समुदितानां वेदानामेकं प्रमाणत्वं विवक्षितमिति तस्मिन्नाकारे भेदाभावाद् बहुवचनाभावः, प्रत्येकं तु प्रामाण्ये वेदाः प्रमाणानीति भवत्येव। यद्येवम्, त्रयश्चत्वारः पञ्च षट् सप्तेत्यत्राप्येकवचनप्रसङ्गः, न हि त्रित्वादिकमपि प्रत्येकपरिसमाप्तम् ? उच्यते; त्र्यादयो नित्यं संख्येयवचनाः, न तु कदाचिदपि संख्यानमात्रवचना इत्येकेन ध्रमेण व्यासज्यवृत्तिना सहानेकस्य धर्मिणो भेदप्रतिपादनाभावाद्धर्मिबेदाश्रयं बहुवचनमेव भवति। यद्यपि त्रित्वमित्यादौ संख्यानमात्रमपि निष्टष्टं

प्रतीयते, त्र्यादिभिस्तु न प्रतीयते। देवताशब्दस्तु यद्यपि निष्कृष्टदेवतात्वमाचष्टे, तथाप्यन्निर्देवतेत्येकेनापि स भिन्नदेवतात्वमाचष्टे, नानेकेनैव सर्वदा। त्र्यादयस्तु न क्वचिदप्येवमिति विशेषः। लिङ्गमपि लोकाश्रयत्वाद्यथादर्शितं व्यवतिष्ठते, न तद्धितान्तत्वेनाभिधेयवदिति सर्वमनाकुलम्।
एवं भाष्यकारमतेन व्याख्याय संप्रति वार्त्तिककारमतं दर्शयति--`विंशत्यादय इति। गुणशब्दा इति। रूढिरूपा इति भावः। यथाकथञ्अचिद्व्युत्पाद्या इति। स्वरवर्णानुपूर्वीज्ञानार्थम्, न त्ववयवार्थप्रदर्शनाय, तदाह--नात्रावयवार्थेऽभिनिवेष्टव्यमिति। अवयवार्थविषयोऽभिनिवेशो न कर्त्तव्य इत्यर्थः। स तु प्रतीतिपथं नारोहतीति परित्यज्यते।
या चैषामित्यादि। दर्शिता च गुणमात्रे गुणिनि च वृत्तिः, एतदपि सर्त्रं स्वाभाविकमेवेति दर्शितामुपपत्ति स्थिरां मन्यते।
सहस्रादयोऽप्येवञ्जातीयका इति। गुणमात्रे गुणिनि च वर्तन्ते, स्वलिङ्गसंख्यानुविधायिनश्चेत्यर्थः। तद्वदेव द्रष्टव्या इति। स्वरवर्णापूर्वीज्ञानार्थं विंशत्यादिवद्व्युत्पाद्या इत्यर्थः। तद्यथा-शतश्य दशतां सहभावः स्रच्च प्रत्ययः।। क्व पुनरेते व्युत्पाद्याः ? पृषोदरादिषु। उदाहरणामात्रम् प्रदर्शनमात्रमेतद्विंशत्यादीनामुपादानम्। इतिशब्दः समाप्तौ। अत्र वार्त्तिकम्--`अनारम्भो वा प्रातिपदिकविज्ञानाद्यथा सहस्रादिषु' इति ।।

पञ्चद्दशतौ वर्गे वा ।। 5.1.60 ।।
सङ्घग्रहणे प्रकृते वर्गग्रहणं सूत्राध्ययनयोरनुवृत्तिर्मा भूदिति, अप्राण्यर्थं च; सङ्घशब्दस्य प्राणिविषयत्वात् ।।

त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् ।। 5.1.62 ।।
न विषयसप्तमीति। ब्राह्मणविषयश्चेत्प्रयोगो भवतीति नैवमत्रार्थः, नैवमत्रार्थः, तथा हि सति मन्त्रे भाषायां च प्रयोगो न स्यात्, ब्राह्मणादन्यस्य च संज्ञायां शङ्क्येत, एवं च `ब्राह्मणसंज्ञायाम्' इति षष्ठीसमासेन निर्देष्टव्यम्, तथा तु न कृतमितेयेव सूत्रे च ये ओकारादन्तरं रेफमधीयते तेषां पञ्चम्यर्ये षष्ठीद्विवचनम्। ये तु न, तेषां समाहारद्वन्द्वे पञ्चम्येकवचनम् ।।

तदर्हति ।। 5.1.63 ।।
अर्हति लब्धु योग्यो भवतीत्यर्थः ।।

छेदादिभ्यो नित्यम् ।। 5.1.63 ।।
नित्यगद्रहणं प्रत्ययार्थविशेषणामिति। अथ यथा `नित्यं क्रीडाजीविकयो' इत्यत्र महाविभाषया प्राप्तस्य वाक्यस्य निवृत्त्यर्थं नित्यग्रहणम्, तथेहापि कस्मान्न भवति ? इष्टत्वात्, दृष्टत्वाच्च। इत्यते च दृश्यते च छेदमर्हतीति। न च वाक्यनिवृत्यर्थमेव नित्यग्रहणं कर्तव्यम्, `छेदादिभ्यः' इत्येवास्तु, पूर्वेण सिद्धे पुनरारम्भो वाक्यनिवृत्यर्थो भविष्यति। यथा तर्हि `त्रेर्मिन्नित्यम्' इत्यत्र स्वातन्त्र्यनिवृत्त्यर्थं नित्यग्रहणम्, तथेह कस्मान्न भवति ? इष्टत्वात्, दृष्टत्वाच्च। इष्यते च स्वातत्र्यम्, दृश्यते च छेदादिषु पठितस्य सम्प्रशनशब्दस्य स्वतन्त्रस्य प्रयोगः, विधिनिमन्त्रणादिसुत्रे यथा। तर्ह्येकगोपूर्वादित्यत्र प्रत्ययान्तर्य मतुपो निवृत्यर्थं नित्यग्रहणम्, तदेह कस्मान्न भवति? अप्राप्तत्वात्। न ह्यत्र कस्यचित्प्रत्ययान्तरस्य प्राप्तिः। यथा तर्हि `नित्यं कौटिल्ये गतौ' इत्यत्रार्थान्तरनिवृत्त्यर्थं नित्यग्रहणम्--गतिवचनाद्धातोः कौटिल्य एव, न क्रियासमभिहार इति, तथेह कस्मान्न भवति ? इष्टत्वाद्, इष्यते ह्यर्थान्तरेऽपि यथायोगं छेदादिभ्य अर्हीयः प्रत्ययः। तस्माद्यथोक्तमेव प्रयोजनं नित्यग्रहणस्य। छेदं नित्यमर्हतीति। ननु न कश्चित् पदार्थो नित्यं छेदमर्हति, योऽपि वेतसादिश्छिन्नश्छिन्नः प्ररोहति सोऽपि न सदैवच्छेदनार्हः; प्ररूढस्तु भवति। यस्तार्ह दस्युवंसादिर्नित्यं छेदनार्हः स प्रत्ययार्थः। अपर आह--आभीक्ष्णये नित्यशब्दः, यथा--नित्यप्रहसितादाविति।
विराग विरङ्गं चेति। विरागशब्दाः प्रत्ययमुत्पादयति, तत्सन्नियोगेन विरङ्गमादेशमापद्यते--विरागं नित्यमर्हति वैरङ्गिकः ।।

शीर्षच्छेदाद्यच्च ।। 5.1.65 ।।
प्रत्ययसन्नियोगेनेति। तथा च शिरःशब्देन विग्रहो दर्शितः। कथं तर्हि पूर्वमुक्तम्-शीर्षच्छेदशब्दाद् द्वितीयासमर्थादिति ? न प्रयोगार्हे वाक्ये द्वितीयासमर्थता, किं तर्हि ? यदुपमर्दनेन वृत्तिर्भवति तत्र प्रकियावक्ये प्रत्ययौ द्वौ--यच्च, ठक्च, एवं च प्रत्ययामभ्यां सन्नियोग इति द्विवचनान्तेन समासः ।।

दण्डादिभ्यो यः ।। 5.1.66 ।।
उपायविशेषः=दण्डः, हस्तालम्बश्च। इह `दण्डादिभ्यः' इत्येतावत्सूत्रम्, अनन्तरश्च यत्प्रत्ययो विधीयते'। तथा च वध्यशब्दवल्युत्पादनाय क्यब्विधावुक्तम्--`हनो वध च तद्धितो वा' इति, यदि चात्र यद्विधीयते तत एव तदुपपद्यते तद्धितो वेति। कथम् ? क्यप्याद्युदातत्वम्, यत्यपि तद्धिते `यतोऽनावः' इत्याद्युदात्तत्वमेव। यदि त्वत्र यो विधीयेत ततः स्वरे विशेषादनुपपन्नमेतत्स्यात्। उत्तरसूत्रे चास्य यस्यैवानुवृत्तिः स्यात्, न यतः। अथापि स्वरितत्वाद्यत एवानुवृत्तिरुच्यते ? एवमपि वृत्तिकारस्यैतद्वक्तुमापद्येत--`यदनुवर्त्तते नानन्तरो यः' इति। ये त्विभ-वध-मेधशब्दाना यदन्तानामाद्युदात्तानां छन्दसि प्रयोगाः--`इभ्यान्न राजा वनान्यत्ति, तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति, अपां मेध्यं यज्ञियम्' इत्याद्याः, ते दण्कडादिभ्यो यविधानेऽप्युपपद्यन्ते। कथम् ?

दण्कडादिभ्यो यः' दण्डादिभ्यश्छन्दस्युभयप्रसङ्गे परत्वाद्यद्भविष्यति। तस्मादेते प्रयोगाः `दण्डादिभ्यो यद्विधीयते' इत्यत्रार्थे प्रमाणत्वेन नोपन्यसनीयाः ।।

पात्राद्घँश्च ।। 5.1.68 ।।
ठक्ठञोरपवाद इति। तत्र ठकोऽपवादत्वमुपपादयति--पात्रं परिमाणमप्यस्तीति। भाजनविशेषस्तु प्रसिद्ध एव, तत्र ठकोऽपवादः, परिमाणवचने तु ठञ इत्यर्थः। पात्रिय इति। पात्रपरिमितं तण्डुलादिकं यः स्थाल्यादिरर्हति, सम्भवनधारणक्षमत्वात्, स एवमुच्यते। येन वा भुक्ते भोजनभाजनं संस्कारेण न शुद्ध्यति ।।

कडङ्करदक्षिणाच्छ च ।। 5.1.69 ।।
`कड मदे', कडतीति कडः, कडं करोतीत्यत एव निपातनात्खच्, कडङ्करं माषमुद्गादिकाष्ठमुच्यते। दक्षेरुत्साहकर्मणः करणे `दुदक्षिभ्यामिनन्' इतीनन्प्रत्ययः---दक्षिणा। चकाराद्यच्येति। घँस्त्वनन्तरोऽपि न समुच्चीयते, य एव; स्वरितत्वात्। कडङ्करीय इति। यो बलीवर्हो दुर्जरमपि कडङ्करं जरयितुं प्रभावति स तदर्हतदीत्यच्यते।
अल्पाच्चस्स्येत्यादि। यद्धा--यथासंख्येऽभिप्रेते यस्माद्यदिष्टः, तं दण्डादिषु पठंत् ।।

स्थालीबिलात् ।। 5.1.70 ।।
छयतावनार्त्तते इति। पूर्वसूत्रेऽपि न यच्चकारेणानुकृष्टः, तथा सति घन एव प्रसङ्गात्। किं तर्हि ? स्वरितत्वात्। अतो न सत्यानुवृत्तिर्दुलेभेति भावः। पाकयोग्या इत्यर्थ इति। त्रिफलीकृता इति यावत् ।।

यज्ञर्त्विग्भ्यां घखञौ ।। 5.1.71 ।।
यज्ञमर्हतीति। स पुनर्यस्य विदुषोऽर्थिनः शास्त्रेणामर्युदस्तस्य द्रव्यवतो यज्ञेऽधिकारः, स वेदितव्यः। देशस्यानैवंविधत्वाद्वचनम्।
यज्ञत्विग्भ्यां तत्कर्मार्हतीत्युपसंखयानमिति। यज्ञकर्मार्हतीति। यज्ञकर्मानुष्ठनयोग्य इत्यर्थः। ऋत्विक्कर्मार्हतीति। ऋत्विग्भवितुमर्हतीत्यर्थः ।।

पारायणतुरायणचान्द्रायणं वर्तयति ।। 5.1.72 ।
पारायणम्=आदित आरभ्यान्तादविच्छेदेन वेदाध्ययनम्, तुरायणम्=संवत्सरसाध्यो इविर्यज्ञविशेषः, चान्द्रायणम्=तपोविशेषः, वर्तनम्=निष्पादनम्। तत्र पारायणं गुरुणा शिष्येण च निर्वर्त्त्यते; अन्यतरासन्निधावध्ययनक्रियाया अनिष्पादनात्; शिष्य एव त्विष्यते। तथा तुरायणमुभौ वर्तयतः--ऋत्विग्यमानश्च; ऋत्विक् चरुपुरोडाशादि निर्वर्त्तयति, यजमानो देवतोद्देशेन द्रव्यं त्वजति; यजमान एव त्विष्यते। उभयत्र कस्मान्त भवति ? अनबिधानात् ।।

संशयमापन्नः ।। 5.1.73 ।।
सांशयिकः स्थाणुरिति। स्थाणुर्वा पुरुषो वेत्येवंरूपस्य संशयस्य विषय इत्यर्थः। अननैतद्दर्शयति-यद्यपि द्वे अपि कर्तृकर्मणी संशयमापन्ने, तथापि यद्विषयकः संशयस्तत्रैव प्रत्ययो भवति, न कर्तरि परुषे; अनभिधानाधिति ।।

योजनं गच्छति ।। 5.1.74 ।।
क्रोशशतयोजनशतयोरिति। गुणेन नेति प्रतिषेधः संख्याया न भवति; अत एव निर्देशात्, `शतस्हस्रान्ताच्च निष्कात्' इति वचनाच्च।
ततोऽभिगमनमिति। अत्र पञ्चम्यन्तात्प्रत्यः ।।

पन्थो ण नित्यम् ।। 5.1.76 ।।
नित्यग्रहणं प्रत्ययार्थविशेषणमिति। वाक्यनिवृत्त्यर्थं तु न भवति; पन्थादेशो हि प्रत्ययसन्नियोगेन विधीयमानो नैव वाक्ये सम्भवति; पथिन्श्ब्देन तु वाक्येऽनभिप्रेते पूर्वसूत्र एव नित्यग्रहणं कुर्यात्। यत्र पथिन्शब्दः श्रूयते, प्रत्ययान्तरनिवृत्त्यर्थमपि न भवति; पथः कनो विधानसामर्थ्यात्, प्रत्ययान्तरस्य प्राप्त्यभावात्। पन्थानं नित्यं गच्छतीति। नन्वयमर्थो न सम्भवति, विश्रमस्यावश्यम्भवित्वात्; सम्भवतु वा कथञ्चिदादित्यादौ, तथापि न तत्रैवेष्यते, उदाहृतं हि--पान्थो भिक्षां याचते इति ? तस्मादाभीक्षण्म्=नित्यम्, परित्यागाभावो वा ।।

उत्तरपथेनाहृतं च ।। 5.1.77 ।।
चकारः प्रत्ययार्थसमुच्चय इति। प्रत्ययार्थमात्रसमुच्चये, न यु समर्थविभक्तियुक्तस्य वाक्यार्थस्येत्यर्थः। `तस्य व्याख्यान इति च' इतिवद् वाक्यार्थपरामशिन इतिशब्दस्याभावदिति भावः। तेन किं सिद्धं भवति ? इत्याह--अत्रापीति। द्वितीयपक्षे चाक्रान्तेऽनाक्रान्ते च प्रकृत्यर्थे प्रत्ययः स्यात्, आक्रान्त एव तु भवति। वारिजङ्गलेत्यादि। वार्यादीनि पूर्वपदानि यस्मिन्प्रातिपदिके तत्मात्पथिन्शब्दान्तादित्यर्थः।

अजपथशंकुपथाभ्यां चेति। पूर्वस्मिन्नेववाक्येऽजशंकुशब्दौ पठितव्यौ, तथा तु न कृतमित्येव।
मधुमरिचयोरण् स्थलादिति। स्थलशब्दोत्तरो यः पथिन्-शब्दः, तदन्तान्मधुमरिचयोरभिधेययोरण् भवति। स्थलपथेनाहृतमिति। गच्छत्यर्थे तु प्रत्ययो न दर्शितः; मुख्यगमनासम्भवात्। स्थालपथं मधुकमिति। मधुमरिचयोरन्यतरनिर्णयायानुप्रयोगो न विरुद्धः ।।

कालात् ।। 5.1.78 ।।
स्वरूपग्रहणमिह न भवति, `तमधीष्टो भृतो भूतो भीषी' इत्यत्यन्तसंयोगे द्वितीयानिर्द्देसात् `मासाद्वयसि' इत्यादौ मासादीनां कालग्रहणेन विशेषणाच्च ।।

तेन निर्वृत्तम् ।। 5.1.79 ।।
तेनेति करणे तृतीया। निवृत्तम्=निष्पादितम्। अन्तर्भावितण्यर्थे वृत्तिः ।।

तमधीष्टो मृतो भूतो भावी ।। 5.1.80 ।।
भावीति तादृश एवानागत इति। स्वसत्तया व्याप्यमानकाल इत्यर्थः। ननु चेति। यद्यपि क्वचित्कदाचिन्मासमप्यध्येणं भरणं च क्रियते, तथापि यावन्तं कालं क्रियते, न तावतः प्रत्यय इष्यते, अपि तु फलभूतक्रियाव्याप्यकालादिष्यते। स चाध्येषणभरणाभ्यामव्याप्त इति द्वितीयानुपपत्तिरिति भावः। अध्येषणभरणे क्रियार्थे इति। अध्यापनादिक्रियार्थं हि तयोः करणम्। फलभूतया क्रिययेति अध्यापनादिकया।
ताभ्यामेव व्याप्त इत्युच्यत इति। यथा चौरैराहृतेनाग्निना दग्धे ग्रामे वक्तारो भवन्ति--चौरैर्दग्दो ग्राम इति ।।

मासाद्वयसि यत्खञौ ।। 5.1.81 ।।
वयस्यभिधेय इति। प्रत्ययार्थस्य तस्य विशेषणं वयः, तत्र विशिष्टाभिधाने विशेषणभूतं वयोऽप्यभिधेयमिति भावः। सामर्थ्यादिति। न हि मासमधीष्टो भृतो वेत्यक्ते काचित्कालकृता शरीरावस्था गम्यते, भाविन्यपि नाञ्जसा गम्यते। जातः कुमारो मासं भावीत्यत्रापि पूर्णे मासे याऽवस्था सैव वयः, ततश्च तत्रापि भूत एव मासो वयःप्रतीतेर्हेतुरित्येतत्सामर्थ्यम्। खञो ञित्करणं स्वरार्थम्, पुंवद्भावप्रतिषेधार्थं च--मासीनाभार्यः ।।

द्विगोर्यप् ।। 5.1.82 ।।
प्राग्वतेः संख्यापूर्वपदानां तदन्तविधेरभ्युपगमात्पूर्वेण यत्खञोः प्राप्तयोर्यब्विधीयते। यपः पित्त्वादनुदात्तत्वम्, तेन कालान्ते द्विगाविति पूर्वपदप्रकृतिस्वर एवावतिष्ठते ।।

षणमासाण्ण्यच्च ।। 5.1.83 ।।
औत्सर्गिकोऽपि ठञिष्यते इति। स कथमिष्यमाणोऽपि लभ्यइत्याह--स इति। यदि चकारष्ठञः समुच्चयार्थः। कथं तर्हि यब्भवति ? इत्याह--
स्वरितत्वाच्चेति। एतच्च व्याख्यानादेव लभ्यते ।।

अवयसि ठँश्च ।। 5.1.84 ।।
चकारोऽनन्तरस्य ण्यतःसमुच्चयार्थ इति। न तु पूर्ववत् ठञः समुच्चयार्थः। तथा च वार्तिकम्-- `अवयसि ठंश्चेत्यनन्तरस्यानुकर्षः' इति।।

समायाः खः ।। 5.1.85 ।।
सर्वत्रेति। पूर्वत्र, अत्र, परत्र च। तेन परिजय्य-लभ्य-कार्य-सुकरमिति यावत् ।।

रात्र्यहस्संवत्सराच्च ।। 5.1.87 ।।
द्वैयह्निक इति। `अङ्नष्टखोरेव' इति कनियमादसति टिलोपे `अल्लोपोऽनः' इत्यकारलोपः। नन्वत्र `राजाहःसखिभ्यष्टच्' इति परत्वाट्टचा भवितव्यम्, न च महाविभाषया टटो विकल्पः, बृहतीजात्यन्ताः समासान्ताश्चेति नित्येषु परिगणनात् ? एवं तर्हि समासान्तविधरेनित्यत्वादत्र न भविष्यति ।।

चित्तवति नित्यम् ।। 5.1.89 ।।
यदि चित्तवति नित्यं लुग्भवति, कथं `वर्षस्याभविष्यति' इत्यत्र वक्ष्यति-द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यति द्विवार्षिको मनुष्य इति, न हि नित्ये लुकि अधीष्टभृतयोरुत्पन्नस्य चित्तवति श्रवणमुपपद्यते ? एवं तर्हि भूत एवोत्पन्नस्य प्रत्ययस्य लुगिष्यते, न सर्वत्र। एतच्च नित्यग्रहणाल्लभ्यते। आरम्भसामर्थ्यादेव हि नित्यो लुक् सिद्धः, तत्र नित्यग्रहणं विशिष्टेऽर्थे नित्यं लुग् यथा स्यात्। स पुनर्विशिष्टोऽर्थो भूत एव; व्याख्यानात्। तेनाधीष्टादौ पूर्वेण विभाषयैव लुग्भविष्यति ।।

षष्टिकाः षष्टिरात्रेण पच्यन्ते ।। 5.1.90 ।।

लघुत्वात्प्रथमातिक्रमे कारणाभावाच्च एकवचनेनैव निर्देशाद्विवक्षितं तदिति मन्यमानं प्रत्याह--बहुवचनमतन्त्रमिति। तथा च वार्त्तिके--`षष्टिके संज्ञाग्रहणं कर्तव्यम्' इत्येकवचनं प्रयुक्तम्। प्रयोगबाहुल्यात्तु सूत्रे बहुवचनप्रयोगः, षष्टिरात्रेण पच्चन्त इत्यत्रार्थे निपात्यमानस्य षष्टिकशब्दस्य धान्यविशेष एव प्रयोगो यथा स्यात्, णुद्गादिषु मा भूदित्येवमर्थं संज्ञाग्रहणं कर्त्तव्यमिति वार्त्तिककारोणोक्तम्। तदेतन्निपातनादेव सिद्धमित्यभिप्रायेणाह--संज्ञैषेत्यादि ।।

वत्सरान्ताच्छश्छन्दसि ।। 5.1.91 ।।

इद्वत्सर-इदावत्सरशब्दौ पञ्चवर्षे युगे द्वयोर्घर्षयोः संज्ञे। एवं संवत्सर-परिवत्सरशब्दावपि ।।

तेन परिजय्यलभ्यकार्य्यसुकरम् ।। 5.1.93 ।।

परिजय्य इत्यस्य विवरणम्--शक्यते परिजेतुमिति। `क्षय्यजस्यौ शक्यार्थे' इत्ययादेशः ।।

तदस्य ब्रह्मचर्यम् ।। 5.1.94 ।।

मासोऽस्य ब्रह्मचर्यस्येति। यद्यप्यत्रात्यन्तसंयोगो गम्यते, तथापि द्वितीया न भवति; मासस्य प्रधानत्वात्, षष्ठीविषये च द्वितीया विधानात्।

उभयथा हि सूत्रप्रणयनादिति। उभयोरप्यर्थयोः सूत्रकारेणैव सूत्रस्य व्याख्यातत्वादित्यर्थः। महानाम्न्यादिभ्य इति। ब्रह्मचर्यस्य प्रत्ययार्थत्वात्सामर्थ्यात् षष्ठीसमर्थेभ्यः प्रत्ययः।

महानाम्न्यो नाम ऋच इति। महन्नाम यासां ता महानाम्न्यः, विदामघवन्नित्याद्याः, `नित्यं संज्ञाछन्दसोः' इति ङीप्। महानाम्नीश्चरतीति। चरणमनुष्टान्म्, तच्च क्रियाविषयमिति तत्सहचरितं व्रतं तच्छब्देनोच्यते। तत्र च स लिङ्गसंख्यापरित्यागेनैव महानाम्नीशब्दो व्रते वर्त्तत इति महानाम्नीश्वरतीति विग्रहः।

माहानामिक इति। `भस्याढे तद्धिते पुवद्भाव' इति ङीपि निवृत्ते टिलोपः।

अवान्तरदीक्षादिभ्यो डिनिरिति। डित्करणसष्टाचत्वारिंशतष्टिलोपार्थम्। अन्यत्र स्योति लोपेन सिद्धम्।

अश्टाचत्वारिंशक इति। वृत्तिविषये वर्षेषु, संख्योयेषु अष्टटत्वारिंशच्छब्दो वर्त्तते--प्रतिवेदं द्वादशवर्षाणि व्रतचरणाच्चतुर्षुं वेदेष्वष्टाचत्वारिंशतं वर्षाणि व्रतं चरति।

चातुर्मस्यानामिति। अभिदेयबहुत्वाद्बहुवचनम्।

किमिदं चातुर्मास्यानामिति ? तत्राह--चतुर्मासाण्णयो यज्ञे तत्र भव इति। चातुर्मास्यानीति। संवत्सरसाध्यो इविर्यज्ञविशेषस्तस्य चत्वार्यवान्तरपर्वाणि तदपेक्षं बहुवचनम्। चातुर्मासीति। `तत्र भवः' इत्येवाण्सिद्धः, तस्य `द्विगोर्लुगनपत्ये' इति लुकि प्राप्ते पुनरण् विधीयते। `कालाट्ठञ्' इत्यस्य त्वप्राप्तिः समुदायस्याकालवाचित्वात्तदन्तविध्यभावाच्च। अपर आह--यथाकथञअचित्कालवृत्तिब्योऽपि ठञ इष्टत्वाट्ठञ्येव प्राप्ते तस्य लुकीदमण्विधानमिति ।।

तस्य च दक्षिणायज्ञाख्येभ्यः ।। 5.1.95 ।।

यज्ञमाचक्षते यज्ञाख्याः सोपसार्गादपि मूलविभुजादित्वादस्यमादेव निपातनाद्वा कः ।

आख्याग्रहणमिति। आङ्पूर्वस्य `ख्या' इत्यस्य धातोर्ग्रहणमित्यर्थः। आख्याग्रहणामिति। ह्रस्वान्तपाठस्तु युक्तः। अकालवाचिनोऽपि यथा स्यादिति। स्वरूपग्रहणं तु बहुवचननिर्देशादिपि शक्यं निराकत्तुमिति भावः। नन्वेकाहादयः क्रतुशब्दः कालवाची न समुदायः, कथं ते एव गृह्येरन् ? अत आह--प्राग्वतेरिति। ननु याऽग्निष्टोमस्य दक्षिणा साग्निष्टोमे भवति, तत्र `बह्वचोऽन्तोदात्ताट्ठञ्', `क्रतुयज्ञेभ्यश्च' इति ठञ् सिद्धयति ? न सिद्धयति; `वायख्यातव्यनाम्नः' इति तत्र वर्त्तते, नामग्रहणाच्च व्याख्यातव्यतया लोके प्रसिद्धस्य ग्रन्थस्य ग्रहणम्। किञ्च--द्वयोर्वाजपेययोर्भवा द्वैवाजपेयिकी--अत्र न प्राप्नोति; इह तु `प्राग्वतेः संख्यापूर्वपदानाम्' इति तदन्तविधिश्चास्ति, लुक्च न प्राप्नोति; अप्रग्दीव्यतीयत्वात्, अनार्हीयत्वाच्च।

तत्र च दीयते कार्यं भववत् ।। 5.1.96 ।।

हैमनमिति। यद्यपि भववत्प्रत्यया भवन्तीत्युक्तम्, तथापि `सर्वत्राण्च तलोपश्च' इत्यण्प्रत्ययोऽतिदिष्टे तत्सान्नयोगशिष्टस्तलोपोऽपि भवति। वतिः सर्वसादृश्यार्थ इति। `कालेभ्यो भववत्' इत्यत्रैतद् व्याख्यातम्। अग्निष्टोमे दीयते आग्निष्टोमिकं भक्तमिति। यद्येवम्, अग्निष्टोमस्य या दक्षिणा साग्निष्टोमे दीयते तत्र `यज्ञाख्येभ्यो दीयते इत्यनेनैव सिद्धम्, तथा यन्मासे कार्यं तन्मासे भघं भवति, ततश्च कार्यग्रहणमनर्थकम्, तत्र भवेन कृतत्वात् ? अत्राहुः--``द्विगोर्लुगनपत्ये' इति लुक् प्राप्नोति। अथानेनापि प्रत्यये सति लुक्कस्मान्न भवति, यावता `वतिः सर्वसादृश्यार्थे' इत्युक्तम् ? सत्यम्; प्रत्ययमात्रस्यातिदेशो न लुक्'', इति। तदपरे न सहन्ते--वतिः सर्वसादृश्यार्थः, तत्र तथा भवे तदन्तविधिर्न भवति, एवमत्रापि न भवितव्यम्। एवं च कृत्वा `तत्र च दीयते' इत्यत्रापि तदन्तविधिर्न भवति। विभक्ते तु योगे भवत्येव, तत्र भववदित्यस्याभावात्-द्वयोर्वाजपेययोर्दीयते द्वैवाजपेयिकी। सूक्ष्मदृशामेष सन्थाः ।।

व्युष्टदिभ्योऽण् ।। 5.1.97 ।।

प्युष्टशब्दः कालवाची दिवसमुखे वर्त्तते, तत्साहचर्यान्नित्यशब्दस्यापि कालवाचिनो ग्रहणम्, नाकासादिवृत्तेः। तत्र चात्यन्तसंयोगे द्वितीया भवतीति सप्तम्यधिकरेऽपि द्वितीयान्तात्प्रत्ययः। नित्यं दीयते कार्यं वा नैत्यम्।
`अणप्रकरणेऽग्निपदादिभ्य उपसंख्यानम्' इत्येतत्प्रत्याचष्टे--न वक्तव्यमिति। न कर्त्तव्यमित्यर्थः। कथमित्याह--अत्रेव पठितव्यास्त इति। आदिशब्दः प्रकारवाच्याश्रयणीय इत्युक्तं भवति; अन्यथा तत्रैव पठयेरन्, उपसंख्यानं वा क्रियेत, को विशेषः ? अण्ग्रहणमनर्थकं भववदित्यनुवत्तिष्यते, तेनाणेव भविष्यति। न चैवं व्युष्टनित्यशब्दाभ्याम् `कालाट्ठञ्' इत्यस्य प्रसङ्गः, पूर्वेणैव ठञः सिद्धत्वात् ? सत्यम्; `आदिशब्दः प्रकारवाची' इत्युक्तम्, तत्र यदी वृद्धेष्वप्येतत्कदाचिप्रवर्तते, तदा छः स्यात्। पठितेषु तु नास्ति दोषः ।।

तेन यथाकथाचहस्ताभ्यां णयतौ ।। 5.1.98 ।।
तृतीयासमर्थाभ्यामिति। तृतीयार्थयुक्ताभ्यामित्यर्थः। तथा च यथाकथाचशब्दं प्रति वक्ष्यति--तृतीयार्थमात्रं च सम्भवतीति हस्तशब्दे तु तृतीयान्तत्वमेव सम्भवतीति प्रत्येकमर्थसम्बन्ध इति। ननु यथासंख्यं प्राप्नोति ? तत्राह--यथासंख्यमत्र नेष्यते इति। प्रत्ययौ तु प्रति यथासंख्यं भवत्येव, अत्र च व्याख्यानमेव शरणम्। तृतीयार्थमात्रं च सम्भवतीति। अर्थस्तावत्सम्भवति--यथाकथाच दत्तमित्युक्ते, अनदरेण दत्तमिति प्रतीतेस्तावन्मात्रमेव सम्भवति। मात्रशब्दस्य व्यवच्छेद्यं दर्शयति--न त्विति। यथाकथाचशब्दस्य वाक्यत्वात्। प्रत्ययस्तु वचनसामर्थ्याद्वाक्यादपि भवति ।।

सम्पादिनि ।। 5.1.99 ।।
सम्पादिनीत्यत्र सम्पदेरर्थमाह--गुणोत्कर्षः सम्पत्तिरिति। कर्णवेष्टकम्=कर्णाभरणम्। वस्त्रयुगेणेति। `कुमचि च' इति णत्वम् ।।

कर्मवेषाद्यत् ।। 5.1.100 ।।
कर्मृ=व्यायामः, वेषः=कृत्रिम आकारः ।।

तस्मै प्रभवति सन्तापादिभ्यः ।। 5.1.101 ।।
अलमर्थे चतुर्थीति। अलमर्थे `प्रभवति' इत्यस्मिन्नुपपदे शेषविषये चतुर्थात्यर्थः। सक्तुमांसौदनाद्विगृहीतादपिति। अपिशब्दात्सङ्घातादपि--साक्तुमांसितः; औदनिकः, आक्तुमांसौदनिकः ।।

कर्मण उकञ् ।। 5.1.103 ।।
कार्मुकं धनुरिति। अन्यत्र तु न भवति; अनभिधानात् ।।

समयस्तदस्य प्राप्तम् ।। 5.1.104 ।।
समर्थविभक्तिनिर्देश उत्तरार्थ इति। इह तु समय इति निर्देशादेव प्रथमासमर्थविभक्तिर्लभ्यते, उत्तरार्थत्वादेव च समयशब्दस्य पुंल्लिङ्गत्वेऽपि तदिति नपुंसकनिर्द्देशः, तदपेक्षया च प्राप्तशब्दस्यापि नपुंसकत्वम्, इह तु वाक्यभेदेन सम्बन्धः, यदाह--`यत्तप्रथमासमर्थं प्राप्तं चेतत्तद्भवतीति ।।

ऋतोरण् ।। 5.1.105 ।।
तपवस्ता प्राप्तोऽस्तेति। उपवत्सा=उपवासस्य कर्त्ता स प्राप्तोऽस्य औपवस्त्रम्=उपवासः, प्राशित्रम्=ब्रह्मभागः ।।

छन्दसि घस् ।। 5.1.106 ।।
ऋत्विय इति। `सिति च' इति पदत्वेन भत्वे निरस्ते `ओर्गुणः' न भवति ।।

कालाद्यत् ।। 5.1.107 ।।
काल्यस्ताप इति। प्रातःकाले काल्यशब्दस्य व्युत्पत्त्यन्तरं मृग्यम् ।।

प्रकृष्टे ठञ् ।। 5.1.108 ।।
प्रकर्षेणेति। प्रकृष्टशब्दे प्रकृत्यर्थस्य निष्कृप्य कथनमेतत्, एवं प्रकृष्टे =प्रकर्षे। वर्त्तमानादिति। प्रकर्षविशिष्टेऽर्थे वर्त्तमानादित्यर्थः। न त्वत्र `नपुंसके भावे क्तः' दर्शितः, कर्मणि क्तान्तोऽयं प्रकृष्यते, स प्रकृष्ट इति; अन्यथा प्रकृष्टो दीर्घः कालोऽस्येनि विग्रहो न घटेत। ठञ्ग्रहणं विस्पष्टार्थमिति। अन्यथानन्तरस्य यतोऽनुवृत्तिराशङ्क्येत ।।

प्रयोजनम् ।। 5.1.109 ।।
प्रयुज्यतेऽनेनेति प्रयोजनम्, करणे ल्युट्। किं पुनस्तत्फलम् ? यथाहुः--यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनमिति। इन्द्रमहः=इन्द्रोत्सवः ।।

विशाखाषाढादण्मन्थदण्योः ।। 5.1.110 ।।
विशाखा प्रयोजनमस्येति। विशाखाषाढशब्दौ रूढिरूपेण मन्थदण्डयोर्वर्तते, तयोर्यथाकञ्चिद्व्युत्पत्तिः क्रियते। मन्थः=विलोडनदण्डः। आषाढः=व्रतीनां दण्डः।
श्रद्धा प्रयोजनमस्येति। अत्र करणं प्रयोजनम् ।।
अनुप्रवचनादिभ्यश्छः ।। 5.1.111 ।।
विशिपूरीत्यादि। विश प्रवेशने', `पूरी अप्यायने', `पल्लृ गतौ' `रुह बीजजन्मनि'--एताः प्रकृतयो यस्यानस्य `युवोरनाकौ' इति विहितस्य तस्माद्विद्यमानपूर्वपदाच्छ उपसंख्येयः, केवलस्यानस्य सपूर्वपदत्वासम्भवत्सामर्थ्यात्तदन्तग्रहणम्। गृहप्रवेशनीयमिति। एवं चानुप्रवचनादिषु संवेशनानुप्रर्वशानान्वारोहणशब्दानां प्रपञ्चार्थः पाठः। स्वर्ग्यमिति। ठञि प्राप्ते यद्विधिः। पुण्याहवाचनादिभ्य इति। साहचर्यादभिधाने सिद्धे भेदविवक्षायां प्रत्ययश्रवणं मा भूदिति लुग्वचनम् ।।

ऐकागारिकट् चौरे ।। 5.1.113 ।।
एकागारं प्रयोजनमस्येति। एकशब्दोऽसहायवचनः, असहायं हि गृहं मुमूषिषतश्चोरस्य प्रयोजनम्। ससहाये तु गृहे मोषितुं न शक्तते। एकागारं प्रयोजनमस्य भिक्षोरिति। `एकागारं चरेद् भैक्ष्यं तत्पुराणमुनेर्व्रतम्' इति शास्त्रादेकामेव यो भिक्षां गृह्णाति न द्वितीयां स एवमुच्यते। नन्वेवमप्येकागाराच्चोरे ठञेव नियमार्थं वक्तव्यः, किं निपातनेन, टकारेण वा प्रयोजनम् ? अत आह--टकारः कार्यावधारणार्थ इति। अवधारणमेव दर्शयति--ङीबेव भवति, न ञित्स्वर इति। वृद्धइस्तु निपातनाद्भवत्येव। नन्वेवं ञित्स्वरनिवृत्तिरेव निपातनस्य। मा भूद्वा नियमः; भिक्षौ कस्मान्न भवति ? अनभिधानात्।
यथा तु भाष्यं तथा ञित्स्वर एवेष्यते। तत्र हि सूत्रमिदं प्रत्याख्यात्म्-`एकागारान्निपातनानर्थक्यं ठञ्प्रकरणात्' इति, प्रयोजनमित्यत्र ठञप्रकृतः, तेनैवैकागारिकशब्दः सिद्ध इत्यर्थः। इक्ट्प्रत्ययमिति। इदमपि प्रत्याख्यानेन विरुद्धम् ।।

आकालिककडाद्यन्तवचने ।। 5.1.114 ।।
आकालिककडिति निपात्ये इति। समुदायविषयमुक्तवा तत्रैव विभज्य निपातनं दर्शयति--समानकालशब्दस्येत्यादि। सर्वेषामेव वाक्यानां निपात्यत इति वक्ष्यमाणेनैव सम्बन्धः। आद्यन्तयोश्चैतद्विशेषणमिति। एतत्समानकालत्वमाद्यन्तयोर्विशेषणं निपात्यते `आद्यन्तवचने' इति सूत्रे श्रुतत्वादित्यर्थः। इकट् च प्रत्यय इति। क्वार्थे? अस्येत्यधिकारात्षष्ठ्यर्थे। तदाह--समानकालावाद्यन्तावस्येति। समानकालौ एककालावित्यर्थः। आदिः=जन्म, अन्तः=विनाशः, न चोत्पादविनाशयोरेककालत्वसम्भव इत्यव्यवहितकालत्वेमेककालत्वम्। निरन्तरे हि काले भेदाग्रहणात्स एव काल इति भवति प्रतिपत्तिः। तदाह--उत्पन्नानन्तरं विनाशीत्यर्थ इति ।
आकालाट्ठँश्चेति। वात्तिककारो मन्यते। न समानकालशब्दस्याकालशब्द आदेशो निपात्यः, नापीकट् प्रत्ययः, किं तर्हि ? आकालाट्ठंश्चेति सूत्रं कर्त्तव्यम्। चकारः प्रकृतस्यैव ठञः समुच्यायार्थः। किमिदमाकालादिति ? आवृतः कालोऽस्येत्याकालः। न च कालस्यावृत्तिः सम्भवतीत्ययमर्थो भवति- उत्पत्तिकालेन समानो निरन्तरो यस्य विनाशकाल इति। एवं ह्युत्पत्तिकाल एव विनाशोऽस्यावृत्त इति भवति प्रत्ययः। ततः स्वार्थे ठन्विधेय आद्यन्तवचने विषय इति। तत्र ठञ्पक्षे ङीबाद्युदात्तत्वं च भवति, प्रत्ययान्तरनिपातने तु नाद्युदात्तत्वं सिद्धयति, तदाह--`आकालनिपातनानर्थक्यं ठञ्प्रकरणा दिति। वृत्तिकारस्तु ठकारोच्चारणात्प्रत्ययान्तरस्यैव निपातनं मन्यमानो ञित्स्वरं नेच्छति, तन्मते निपातनापेक्षयां समुच्चयार्थश्चशब्दः, निपातनं च कर्त्तव्यम्। आकालशब्दाच्च ठनपि विधेय इति। आकालशब्दस्य चोक्त एवार्थः स्वार्थिकश्च ठन्। आद्यन्तविषया चावृत्तकालता।
अपर आह--आवृत्तः काल इति तत्पुरुषोऽयम्, ततोऽस्येत्यधिकारात् षष्ठ्यर्थे प्रत्यय इति। सर्वथा तिपातनस्य ठनश्चैक एवार्थः--समानकालावाद्यन्तावस्येति।
अन्ये वर्णयन्ति--येषां वर्षादीनां यस्मिन्नेव काले मध्यह्नादावुत्पत्तिः, तस्मिन्नेव द्वितीयदिवससम्भन्धिनि विनाशश्च तान्याकालिकानि, तस्मात्कालादनुवर्त्तन्त इति कृत्वा। तेषां ह्यद्यन्तयोरेक एव कालो भवति मध्याङ्नादिरिति ।।

तेन तुल्यं क्रिया चेद्वतिः ।। 5.1.115 ।।
यत्ततुल्यं क्रिया चेत्सा भवतीति। एतेन समानविभक्तिकत्वात्प्राधान्याच्च पर्त्ययार्थस्य विशेषणं क्रियाग्रहणमिति दर्शयति। निर्देशानुरोधे तु प्रथमनिर्दिष्टस्य प्रकृत्यर्थस्य विशेषणे भिन्नविभक्तिकत्वाद्वाक्यशेषेऽध्याहार्यः स्यात्--यत्तत् तृतीयासमर्थ क्रिया चेत्सा भवतीति। तुल्यमित्ये तच्च प्रथमान्तम्, न क्रियाविशेषणत्वेन यदाह--तुल्यमित्येतस्मिन्नर्थे इति। तस्य विशेषणं क्रियाग्रहणम्। सामान्योपक्रमत्वात्तु `हितं भक्षाः' इतिवत्तुल्यमिति नपुंसकनिर्द्देशः। ब्राह्णणेन तुल्यं वर्त्तत इति। ननु ब्राह्मणशब्देन जातिर्द्रव्यं वोच्येत, न ताभ्यां क्रियायास्तुल्यत्वम्; अत्यन्तभेदात्। यत्र तु किञ्चित्सामान्यम्, कश्चिच्च विशेषः, स एव विषयस्तुल्यतायाः। स्यादेतत्--ब्राह्मणसहचरितायामध्ययनीदिकायां क्रियायां ब्राह्मणशब्दस्य वृत्तिः- ब्राह्णणेन तुल्यं वर्तते, कोऽर्थः ? यथा

ब्राह्णणो वर्त्तते तथा वर्त्तत इत्यर्थः। वर्त्तनम् =अध्ययनादिक्रियानुष्टानम्, तेन युक्तमेव तुल्यत्वमिति। एवमपि मुख्ये सन्भवति गौणस्य ग्रहणं युक्तम्। कः पुनर्मुख्यः ? क्रियावाची। पचत्यादीनां तावत्क्रियावाचिनामप्रातिपदिकत्वादसत्त्वभूतार्थाभिधायित्वाच्च तृतीयासमर्थत्वं न सम्भवति। अव्ययकृतानां तु--कृत्वा, ह्रत्वा, कर्तुम्, हर्तुमित्येवमादीनां यद्यपि क्रियावाचित्वम्, यथा पञअचकृत्वः कृत्वेति कृत्वोऽर्थोत्पत्तिर्भिवति; तथाप्यसत्त्वभूतार्थाभिधायित्वात्ततीयान्तत्वाभावः घञादयश्च दात्वर्थस्य सिद्धतायां भवन्तः सत्त्वभूतार्थाभिधायिनो न क्रियावचनाः. अत एव हि तत्र कृत्वोऽर्थप्रत्ययाभावः। न हि भवति पञ्चकृत्वः पाक इति, भवति तु पञ्चपाका इति। यथा पञ्चघटा इति भवति, न तु भवति पञ्चकृत्वो घट इति। भोक्तुं पाक इत्यादौ धातुवाच्यक्रियोपेक्षस्तुमुन्प्रत्ययः। घृतपाकेन तुल्यस्तैलपाक इत्यादिरपि विषयो न भवति।

ननु पञ्चकृत्वः शयितव्यमिति कृत्वसुचो देवनाच्छयितव्यादयः क्रियावचनाः, ततः किम् ? राजशयितव्येन तुल्यं देवदत्तशयितव्यमित्यादिरवकाशः स्यत्, तता स्खथातव्येन तुल्यं गमनं मन्दत्वात्, तथा नर्तितव्येन तुल्यं गमनं वहुविकारत्वादिति, तता भोकग्तुं पाक इत्यादौ यथा प्रकृतिवाच्यक्रियापेक्षस्तुमुन् भवति, तथा धृतपाकेन तुल्यस्तैलपाक इत्यदौ वतिरपि स्यादिति सोऽप्यवकाशः; तदेवं प्रत्ययार्थविशेषणेऽपि क्रियाग्रहणे सामर्थ्यात्प्रकृत्यर्थोऽपि क्रियैव भवति, न ह्यक्रियया क्रिया तुल्या भवतीति क्रियावाचिभ्य एव वतिना भवितव्यं प्रकृत्यर्थविशेषणे सुतरामिति कथं क्लेशेन क्रियायां वर्तितेभ्यस्तेभ्यो ब्राह्मणादिभ्यः प्रत्ययः ? उच्यते; येनोपमीयते, यश्योपमीयते, यश्च तयोः साधारणो धर्मः-- एत्त्रयमप्यपेक्ष्योपमानोपमेयभावः प्रवर्त्तते। तत्र यदा क्रियोपमानत्वेन विवक्ष्यते, तदा सावश्यापेक्ष्यसाधारणधर्माधारत्वात्क्रियारूपातां हित्वा सत्त्वरूपतां प्रपद्यते, ततश्च सामर्थ्याद् भूतपूर्वगत्याश्रयणम्--यस्यार्थस्य क्रियारूपतापूर्वमभूत् सम्प्रति क्रियारूपातिक्रमेण सत्त्वभावापन्नोऽपि तृतीयान्तवाच्यः परिगृह्यते। तदेवं सम्प्रति मुख्यक्रियावाच्यसम्भवाद् भूतपूर्वक्रियारूपार्थवाचिनः शयितव्यादयोऽपि गौणा एव। गौणं च क्रियावाचित्वं ब्राह णादीनामपि सम्भवतीति तेभ्योऽपि भवति प्रत्ययः। तेषां तु न कस्याञ्चिदपि दशायां मुख्यक्रियावाचित्वमित्येतावाँस्तु विशेषः। यदि तर्हि क्रिययोस्तुल्यत्वले प्रत्ययः ब्राह्मणाध्ययनेन तुल्यमध्ययनं करोति ब्राह्मणवदधीत इत्यन्यः साधारणो धर्मोऽपेक्षणीयः स्यात्। तस्माद् द्रव्ययोरेव तुल्यत्वे प्रत्ययः, क्रिया तु साधारणो धर्म इति युक्तम्। न युक्तम्; एवं हि यथा ब्राह्मणेन तुल्यः क्षत्त्रियोऽध्ययनेनेति, द्रव्यस्य लिङ्गसंख्यायोगित्वात्। स्वरादिषु पाठाद्भविष्यति ? इहपि तर्हि प्राप्नोति-उपसर्गोच्छन्दसि धात्वर्थे य उद्वतो निवतो यासि। किञ्च पाठाद्भवतु संज्ञा, लिङ्गसंख्याकारकशक्तियोगस्तु केन वार्यते--स्वः पश्येत्यादिवत् ! लौकिके च प्रयोगे क्रिययोरेव सादृश्यं प्रतीयते, न तद्वतोर्देरव्ययोः। यत्पुनरुक्तम्--साधारणो धर्मोऽपेक्षणीयः स्यादिति ? नैष दोषः; चन्द्र इव मुखमस्या इत्यादौ यथा शब्दानुपात्ता अपि कान्त्यादयः प्रतीयन्ते, तथात्रापि सौष्ठवादयः प्रत्येष्यन्ते। तस्मात्सुष्ठूक्तम्--यत्ततुल्यं क्रिया चेत्सा भवतीति। गुणतुल्य इति। गुणैस्तुल्य इति ? `पूर्वसदृश' इति तृतीयासमासः। पुत्रेण तुल्यः स्यूल इति। पुत्रस्य यादृशं स्थौल्यं पितुरपि तादृशमित्यर्थः ।।

तत्र तस्येव ।। 5.1.116 ।।

किमर्थमिदमुच्यते न पूर्वेणैव सिद्धम्, न सिद्धयति, तृतीयासमर्थात्तत्र प्रत्ययः, इह तु सप्तमीषष्ठीसमर्थात् ? एवं तर्हि तुल्यार्थैरिति या तृतीया तयेवशब्दयोगे सर्वे विभक्तयर्था व्याप्ताः, तद्यथा--ब्राह्णण इवाधीते, ब्राह्मणेन तुल्यमधीते; ब्राह्मणमिव पश्यति, ब्राह्णेन तुल्यं पश्यति; ब्राह्मणएनेवाधीतम्, ब्राह्मणेन तुल्यमधीतम्; ब्राह्मणायेव ददाति, ब्राह्मणेन तुल्यं ददाति; ब्राह्मणादिवाधीते, ब्राह्मणेन तुल्यमधीते; ब्राह्मणस्येव क्षत्त्रियस्य स्वम्, ब्राह्मणेन तुल्यं क्षत्त्रियस्य स्वम्; ब्राह्ण इव क्षत्त्रिये वर्त्तते, ब्राह्मणेन तुल्यं क्षत्त्रिये वर्त्तत इति--ततश्च तृतीयान्तदेव पूर्वसूत्रेण प्रत्ययो भविष्यति। तथा च `पूर्ववत्सनः' इति पञ्चम्यन्ताद्वतिर्दृश्यते। एवमपि न सिद्धयति, किं कारणम् ? पूर्वत्र क्रियातुल्यत्वे प्रत्ययः, तच्चावश्यं क्रियाग्रहणं कर्त्तव्यम्, गवा तुल्यो गवय इत्यादौ मा भूदित्येवरमर्थः; ततश्च द्रव्यगुणयोस्तुल्यत्वे वतिर्न स्यादिति षष्ठीसप्तमयन्तादिवार्थेऽनेन विधीयते ।।

तदर्हम् ।। 5.1.117 ।।

तदिति द्वितीयासमर्थादिति। अर्हशब्दः पचाद्यजन्तस्तद्योगे कर्मणि षष्ठ्या भवितव्यम्, निपातनात्तु द्वितीया। अपर आह--विग्रहवाक्याभिप्रायमेतत्; यदा राजानमर्हतीत्येवं तिह्न्तेन विग्रह्यते तदा द्वितीया समर्थमिति। सूत्रे त्वर्हमिति कर्मोपपदादच्प्रत्ययः कृत इति। इह क्रियाग्रहणमनुवर्त्तते--यत्तदर्ह क्रिया चेत्सा भवतीति, राजानमर्हति वृत्तं राजवद्वर्त्तते, इह न भवति--राजानमर्हति छत्त्रम्, ब्राह्मणमर्हति दधीति। यद्येवम्, राज्ञा तुल्यं वर्तते इति विग्रहाश्रयणेन पूर्वेणैव वतिः सिद्धः ? इह तर्हि राजवद्वर्त्तते राजेति भेदाभावेन तन्निबन्धनस्य सादृश्यस्याभावादप्राप्तो वतिरनेन विधीयते। अत्रापि राजत्वेन ये प्रसिद्दा भरतादयस्त उपमानानीदानीन्तनानामिति सिद्धो वतिः। यदा तर्हि राजशब्दः सामान्यवचनः प्रसिद्धविशेषविषयो वा--राजवदयं वर्त्तते भरत इति, तदा सादृश्याभावादप्राप्तिः। विनीतवदुपस्यितं चिच्छेद कृतहस्तवदिति विनीतानामिदं योग्यमुपस्थानम् कृतहस्तानामिदं योग्यं छेदन मिति गम्यते, न तु सादृश्यम्। उक्तं च--

`युक्तमौपयिकं राज्ञ इत्यर्थस्य निदर्शनम्।
उपमानविवक्षायां तदर्हमिति पठ्यते ' ।। इति ।

यदा त्वेकमेव वस्तु अवस्थाभेदपरिकल्पितभेदमुपमानोपमेयत्वेन विवक्ष्यते, तदा नार्थोऽनेन। तथा चेवशब्दस्य प्रयोगो दृश्यते--राजेवायं राजा युध्यते, वैय्याकरण इव वैत्याकरणो ब्रूते, रामरावणयोर्युद्धं रामरावणयोरिवेति। उक्तम्----

`तदर्हमिति नारब्धं सूत्रं व्याकर्णान्तरे।

सम्भवत्युपमात्रापि भेदस्य परिकल्पनात्' ।। इति ।

उपसर्गाच्छन्दसि धात्वर्थे ।। 5.1.118 ।।
ससाधने धात्वर्थे इति। क्रियामात्र धात्वर्थः, स्तत्कथं ससाधन इति लभ्यते ? उच्यते; इहार्थग्रहणं न कर्त्तव्यम्, धातावित्येव सिद्धम्, कथं पुनर्धातौ नामोपसर्गो वर्तेत, शब्दे शब्दासम्भवात् ? अर्थे वृत्तिर्विज्ञास्यते। तथा--धातुसम्बन्धे' इत्यत्र तत् क्रियते बहुव्रीहिर्यथा विज्ञायेत--धातुर्धात्वर्थः क्रिया, अर्थः प्रयोजनं यस्य साधनस्य तस्मिन्वर्त्तमानादिति। `ससाधने धात्वर्थे' अत्यस्याप्ययमेवार्थः---धात्वर्थविशिष्टे साधन इति, न पुनः साधनविशिष्टे धात्वर्थ इति। उपसर्गाश्च पुनरेवमात्मकाः यदुत श्रुतायां क्रियायां तामेव विशिषन्ति, यथा--आगच्छतीति। यत्र तु न श्रूयते तत्र क्रियाविशिष्टं साधनमाहुः---निष्कौशाम्बिरिति, तत्र यत्र क्रिया न श्रूयते तत्र यथा स्यादित्येवमर्थं धात्वर्थ इत्युक्तम्। उद्गतानि निगतानीति। वनानां विशेष्यत्वान्नपुंसकत्वम्। उद्वतो निवत इति तु छान्दसं पुंस्त्वमिति मन्यते। यच्चास्माभिरुक्तम्-- `क्रिया गुणभूता साधनं प्रधानभूतं तत्रोपसर्गस्य वृत्तिः' इति तदप्यतेन दर्शइत्म्। साधनशब्देन शक्तिमद् द्रव्यमुच्यते,न शक्तिमात्रमिति लिङ्गसङ्ख्यायोगादन्वर्थाव्ययसंज्ञा न भवति ।।

तस्य भावस्त्वतलौ ।। `तस्येदम्' इत्यस्यापवादोऽयम्। भावशब्दोऽयम् `भवतेश्चेति वक्तव्यम्' इति णप्रत्ययान्तोऽस्त्येवाभिप्राये, यथा--अथं भावः' इति; अस्ति च पदार्थमात्रवचनः,--`विचित्रा हि भावशक्तयः' इति; अस्ति च श्रृङ्गारादिषु--स्तायीभावः सञ्चारीभाव इति; घञन्तस्तु भवत्यर्थे कर्तृवर्जिते च कारके वर्त्तते। भवतिश्चानेकार्थः, तद्यथा--`तत्र भवः' इति सत्तार्थः; `धान्यानां भवने' इत्युत्पत्त्यर्थः; `इत्थम्भूते' इति प्राप्त्यर्थः; `भूष्णुर्भूतिकामः' इति समृद्ध्यर्थः; `यस्य च भावेन भावलक्षणम्' इत्यादौ धात्वर्थमात्रवचनः; वृत्तिकारोपदर्शितश्चापरः, ततश्च `तस्य भावः' इत्यभिप्रायादिष्वत्पिरसङ्गः? इत्यत आहभवतोऽस्मादित्यादि। यस्माद् गोत्वादेर्हेतोर्गवादौ गौरित्येवमादिकमभिधानं प्रवर्त्तते, गौर्गौरित्येवमादिश्चाभिन्नाकारः प्रत्ययो भवति, सोऽर्थो गवादेः शब्दस्य प्रवृत्तिनिमित्तमिह भावशब्देनोच्यते।
तत्र भवतोऽस्मादित्यर्थप्रदर्शनमेतत्, न तु हेतौ केनचिद् घञ्विहः। तस्मात् `श्रिणीभुवोऽनुपसर्गे' इति करणे घञ् द्रष्टव्यः। अभिप्रायादीनां चानभिधानान्न ग्रहणम्। उक्तं च---`यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ' इति। गुएणशब्देन यावान्कश्चित्परापश्रयो भेदको जात्यादिरर्थः स सर्व इह गृह्यते। `यस्य भावात्' इत्येतावत्युच्यमाने पुत्रस्य भावात्पितृशब्दस्य निवेश इति पितत्वमिति पुत्रे प्रत्ययः स्यात्, पुत्रत्वमिति च पितरीति गुणग्रहणम्; भावाद् विद्यमानत्वात्। द्रव्यमिति विशेष्यभूतः सत्त्वभावापन्नोऽर्त उच्यते, तस्मिन् शब्दनिवेशः=शब्दस्य प्रवृत्तिः, सत्वतलोरभिधेय इत्यर्थः। तत्र ये रूपादयः शब्दा गुणमात्रवृत्तयस्तेभ्यो गुणसमवायिनि सामान्यविशेषे भावप्रत्ययो रूपत्वमिति। ये तु शुक्लादयो गुणगुणिवृत्तयो गुणगुणिनोरबेदोपचारात्, मतुब्लोपाद्वा, तेभ्यो गुणवृत्तिभ्यो गुणसमवायिनि सानान्ये भावप्रत्ययः; गुणिवृत्तिब्यस्तु गुणे। अणुमहद्दीर्घदयो नित्यं परिमाणिनि वर्त्तन्ते, तेभ्यः परिमाणो गुणे भावप्रत्ययः, षत्वं णत्वमिति भिन्नवर्णव्यक्तिसमवेते सामान्यविशेषे प्रत्ययः। गवादयो यदा जातिमात्रवाचिनस्तदा तेभ्यः शब्दस्वरूपे प्रत्ययः, तथा हयर्थे जातौ शब्दस्वरूपमध्यस्यते--यो गोशब्दः स शब्दार्थ इति। शब्दस्वरूपमेव तत्र प्रवृत्तिनिमित्तम्, नान्यत्। द्रव्यवाचिभ्यस्तु गवादिभ्यो जातौ प्रत्ययः, समासकृत्तद्धितास्तु यद्यपि केवलं सम्बन्धं नाभिदधति, तथापि सम्बन्धिनि वर्त्तमानाः सम्बन्धं प्रवृत्तिनिमित्तमपेक्षन्त इति तेभ्यः सम्बन्धे भावप्रत्ययः। तथा च राजपुरुषत्वमिति स्वस्वामिभावः सम्बन्धः प्रतीयते, पाचकत्वमिति क्रियाकारकसम्बन्धः, औपगवत्वमित्यादावपत्यापत्सिसम्बन्धः।
केचिदौपगवत्वमित्यपत्यप्रत्ययस्य जातिमभिधेयामिच्छन्ति; तन्मते, अर्थान्तरवृत्तिस्तद्धइत उदाहार्यः--`समासकृत्तिद्धितेषु सम्बन्धाभिधानमन्यत्र रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्यः' इति, रूढिशब्दा गौरखरसप्तपर्णलोहितशाल्यादयो जातिविशेषावच्छिन्नद्रव्यवाचिन इति तेभ्यो जातावेव भावप्रत्ययः। एवं कुम्भकारत्वम्, हस्तित्वमिति अभिन्नरूपाः। शुक्लादयो मतुब्लुकि विज्ञायमाने यद्यपि तद्धितान्ताः, तथापि तेभ्यो भावप्रत्ययो गुण एव भवति; न तु सम्बन्धे गुणगुणिनोर्जातितद्वतोरिव सोऽयमित्यभिसम्बन्धेन लोकनिरूढेन भेदसम्बन्धस्य न्यग्भावात्। `गुणवचनेभ्यो लुक्' इति लुग्विधानद्वारेणाबेदेनैव गुणिनामभिधानम्, न तु बेदाश्रया मत्वर्थीयोत्पत्तिरित्याख्यायते। अव्यभिचारि सम्भन्धात् सतो भावः सत्तेति जातावेव भावप्रत्ययः। न हि सद्वस्तु सत्तासम्बन्धं व्यभिचरतीति सत्तासम्बन्धानपेक्षणाद् न सम्बन्धे प्रत्ययः। राजपुरुषयोस्तु सम्बन्धस्य कादचित्कत्वात्तदपेक्षो राजपुरुषशब्दः स्वार्थमभिधत्ते इति ततः सम्भन्दे प्रत्ययो युक्तः। तस्मात्सत्सु पदार्थेषु नित्यसमवायिनि शब्दप्रवृत्तिहेतुः सत्तैव भावप्रत्ययवाच्या, न तु सत्सत्त्योः सम्बन्धः समवायाख्यः। धवखदिरत्वमिति जातिद्वन्द्वाज्जातिसमुदायः कुत्वमित्यादौ संज्ञास्वरूपे संज्ञिष्वध्यस्ते प्रत्ययः। अन्ये तु `संज्ञासंज्ञिसम्बन्धः' इत्याहुः। उक्तं च----
जातिगुणाज्जातिगुणे समासकृत्तद्विताच्च सम्बन्धे।
डित्थादेः स्वे रूपे धवखदिराज्जातिसङ्घाते ।। इति ।
इह तु नानात्वम्, सहत्वम्, यौगपद्यमित्यादौ वृत्तिविषये नानाशब्दोऽसहभूतेऽर्थे वर्तते, सहशब्दश्च सहभूते, युगपच्छशब्दोऽपि युगपद्भूते, ततोऽसहभावादौ भावप्रत्ययः। एवमन्यत्रापि यथासम्भवं द्रष्टव्यम्। इह न ब्राह्मणस्य भाव इति कयुगपद्भावेन नञर्थेन च सम्बन्धे विवक्षिते पूर्वं नञ्समासः, पश्चात्त्वतलौ, तेनाब्राह्मणत्वमब्राह्मणतेति सतिशिष्टत्वात्त्वप्रत्यये नञ्समासः, पश्चात्त्वतलौ तेनाब्राह्मणत्वं भवति, नाव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वम्। ननु परत्तावत्त्वतलौ प्राप्नुतः, न वा सापेक्षत्वाद्ब्राणार्थो यत्र नञर्थमपेक्षते। नञ्समांसोऽपि तर्हि न प्राप्नोति, ब्राह्मणस्य भावपेक्षत्वात् ? नैवम्; प्रधानमत्र ब्राह्मणपदम्, उत्तरपदार्थप्रधानो हि नञ्समासः। भवति च प्रधानस्य सापेक्षस्यापि समासः, यथा--राजपुरुषोऽभिरूप इति। `वा छन्दसि' छन्दसि विषये क्वचित्पूर्वं त्वतलौ

पश्चान्नञ्समासः--अयोनित्वाय, अशिथिलत्वाय। अत्र नञ्स्वर एव भवति, क्वचिद्विपर्ययः। त्वतल्व्यतिरिक्ते भावप्रत्ययो पूर्वं स एवेष्यते, पश्चान्नञ्समासः, तेनाप्रथिमेत्यादौ सति सिष्टत्वान्नञ्स्वर एव भवति। अशौक्ल्यमित्यादौ च नञः प्रकृतावनन्तर्भावाच्छुक्लशब्दादौ वृद्धिः पूर्व नञ्समासे `न नञ्पूर्वात्' इति प्रतिषेधात् ष्यञेच न स्यात्, सत्यपि वा ष्यञि नञो वद्धइः स्यात् ? ज्ञापकात्सिद्धम्, यदयं युवादिषु पुरुषासे, हृदयामे इति नञ्समासे विषयभूते भावप्रत्ययप्रतिषेधं शास्ति, तज्ज्ञापयति--त्वतलापवादप्रत्ययो नञर्थापेक्षादपि परत्वान्नञ्समासं बाधित्वा भवतीति ।।

आ च त्वात् ।। 5.1.120 ।।

प्रथिमेति। `तुरिष्ठेमेयस्सु' `टेः' इति टिलोपः, `रऋतो हलादेर्लघोः' इति ऋकारस्य रादेशः। पार्थवमिति। `इगन्ताच्च लघुपूर्वात्' इत्यण्। अपवादैरित्यादि। इमनिजादींस्त्वतलोरपवादान्वक्ष्यति, तैः सह समावेशो यथा स्यादित्येवमर्थमिदम्। ननु स्वरितत्वादेव त्वतलावनुवर्त्तिष्येते तेनापवादविषये भविष्यतः ? तन्न; इत उत्तरवाक्यानां प्रत्ययनिर्द्देशेन निराकांक्षत्वात्त्वतलोरपि पूर्वसूत्रे विधानादाकांक्षाया अभावान्नैतच्छक्यं विज्ञातुम्-अनुवर्त्तेते त्वतलाविति। कर्मणि च विधानाराथमिति। येभ्य एव कर्मणि ष्यञादिविधिस्तेभ्य एव त्वतलावपि कर्मणि भवतः, न तु ङ्याप्प्रातिपदिकमात्रात्। चकारो नञस्नञ्भ्यामपि समावेशार्थ इति। अन्यथा `स्त्रीपुंसाभ्याम्' इत्यस्य विधित्वपक्षे प्राग्भवनाद्येऽर्थास्तानपेक्ष्य तत्रैव प्रदेशे नञ्स्नञोर्विधानादत्र प्रकरणे सन्निधानाभावान्नेमनिजादिवत्समावेशसिद्धिः। परिभाषात्वेऽपि यथोद्देशपक्षे `स्त्रीपुंसाभ्याम्' इत्यत्रैव प्रकरणे नञ्स्नञोः सन्निधिः। न पुनरिमनिजादिमध्ये कार्यकालपक्षेऽपि प्राग्भवनाद्येऽर्थाः, तत्र नञ्स्नञ्भ्यामुपस्थातव्यम्। तत्र यदि तावद्भावे इत्यर्थविज्ञानमात्र एव नञ्स्नञोरुपस्थानम्--`तस्य भावस्त्वतलौ' `स्त्रीपुंसाभ्यां भावे नञ्स्नञौ' इति, तदस्मिन्प्रदेशे सन्निधानेऽपि `आ च त्वात्' इत्यस्मात्पूर्वौ भवतः। अथ तूत्सर्गापादविधानोपयोगविज्ञानानन्तरं नञ्स्नव्योरुपस्थानम्, तदा ब्रह्मणस्त्व इत्यस्मात्परौ नञस्नञौ भवतः। सर्वथा `आ च त्वात्' इत्यस्मिन्प्रदेशे नाभ्यन्तरौ। `गुणपचनब्राह्मणादिभ्यः कमणि च' इत्यत्र कर्मणि नञ्स्नञोरुपस्थानं नाशङ्नीयम्; प्रकृतिविसेषसम्बद्धस्य कर्मार्थस्योपादानात् प्रकृत्यन्तरेण तस्यासम्बन्धात्। अधिकारपक्षे तु प्रतिसूत्रमुपस्थानान्नञ्स्नञोरिमनिजादिष्वन्तर्भावाद् `आ च त्वात्' इत्येव नञ्स्नञ्भ्यामपि समावेशः सिध्यति। अथ तत्राप्यर्थस्यैवावधित्वादर्थेष्वेवोपस्थानम्, ततोऽधिकारपक्षेऽपि नाभ्यन्तरत्वमिति सर्वथा चकारेणैव नञ्स्नञ्भ्यां समावेशो वाच्यः ।।

न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवटचबुधकतरसलसेभ्यः ।। 5.1.121 ।।

`अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति त्वतलोरयं प्रतिषेध इति भ्रान्ति वारयति। इत उत्तरे ये प्रत्यया इति। एतच्च `आ च त्वात्' इति सम्बन्धाल्लभ्यते। चतुरादीनीति। चतुराद्यन्ताँस्तत्पुरुषान्नञ्पूर्वानित्यर्थः। ननु `पृथ्वादिभ्य इमनिज्वा' इत्यादिभिः परिणिणिताभ्यः प्रकृतिभ्य उत्तरो बावप्रत्ययो विधीयते। न च तत्र काचिन्नञ्पूर्वा प्रकृतिर्गृह्यते। तदन्तविधिश्च ग्रहणवता प्रातिपदिकेन प्रतिषिध्धः। यत्र तर्हि स्वरूपग्रहणं नास्ति पत्यन्ताद्यग्भवति, हायनान्तादण् भवति, `इगन्ताच्च लघुपूर्वात्', `योपदाद्गुरुपोत्तमाद्वुञ्' इति, तत्र नञ्पूर्वात्तत्पुरुषादस्त्येव प्रसङ्गस्तद्दर्शयति--वक्ष्यति पत्यन्त पुरोहितादिभ्यो यगिति। अपतित्वमपतितेति। तत्तु `आ च त्वात्' इत्यधिकार इत्युक्तम्, ततश्च पत्यन्तेत्यनेनैव त्वतलोरप्यधिकृतयोविधानम्। ततः किम् ? यक इव त्वतलोरप्यं प्रतिषेधः प्राप्नोति। अस्त्वेवमधिकृतयो स्त्वतलोः प्रतिषेधः, `तस्य भावः' इत्यनेन पुनस्त्वतलौ भविष्यतः; बाधकाभावात्। यदि पत्यन्तादिप्वेवास्योपयोगः, पत्यन्तेत्यस्यैव पुरस्तादिदं पठितव्यम्, तदेवोत्तरत्राप्यनुवर्त्तिष्यते। एवं तर्ह्त्र प्रदेशे प्रतिषेधाधिकारस्योपादानादिमनिजादीनामपि प्रतिषेदो विज्ञायते। ननु चोक्तम्--`तदन्तविध्यभावादप्रसङ्गः' इति ? एवं तर्ह्येतज्ज्ञापयति-अस्त्युत्तरत्र तदन्तविधिरित। किमेतस्य ज्ञापने प्रयोजनम् ? नञ्पूर्वाद्बहुव्रीहेरन्यपूर्वाच्च तत्पुरुषात्पृथ्वाद्यन्तादिमनिजादिः सिद्धो भवति--न विद्यन्ते पृथ्वो यस्य अपृथुः, परमपृथुः, तस्य भाव इति। नात्रोमनिजादिरिष्यते, अत एव वृत्तिकारेणापि नास्य पटवः सन्तीत्यपटुरित्यादि व्यावर्त्य दर्शितम्, तस्मादिहास्य करणे प्रयोजनं चिन्त्यम्। आचतुर्यमित्यादौ ब्राह्मणादित्वात्ष्यञ् ।।

पृथ्वादिभ्य इमनिज्वा ।। 5.1.122 ।।

वावचनमणीदिसमावेशार्थमिति। इह ये इगन्ता लघुपूर्वाः पृथुमृदुप्रभृतयस्तेष्वणः समावेशः। चण्डखण्कडादिषु गुणवचनेषु ष्यञः, बालवत्सादिषु वयोवचनलक्षणस्याञः। त्वतलोस्तु मसावेशः `आ च त्वात्' इत्येव सिद्धः ? इत्याह--त्वतलौ तु सर्वत्र भवत एवेति ।।

वर्णदृढादिभ्तयः ष्यञ् च ।। 5.1.123 ।।

वर्णविशेषवाचिभ्य इति। स्वरूपग्रहणं तु न भवति। यदि स्याद्, दृढादिष्वेव वर्णशब्दं पठेत्। वर्णशब्दश्च रूपस्य वाचको न ब्राह्मणादीनाम्; दृढादिभिर्गुणवचनैः साहचर्यात्। अत एव साहचर्याद्वर्णग्रहणात्पर्यायाणां ग्रहणं न भवति। कथम् ? दृढाययो हि गुणोपसर्जने द्रव्ये वर्त्तन्ते, अतस्तत्साहचर्याद्वर्णशब्दा अपि तादृशा एव गृह्यन्ते। एवञ्च वर्णदृढादीनां गुणवचनत्वादेव सिद्धे पुनर्वचनमनिजर्थम् ।

औचिती, याथाकामिति। ब्राह्मणआदेराकृतिगणत्वात्ष्यञ्, ङीष्, `हलस्तद्धितस्य' इति यलोपः।

वेर्यातलाभमतिमनःशारदानामिति। विसब्दादुत्तरे ये यातादयस्तदन्तानां समासानामनन्तरः ष्यञ् भवतीत्यर्थः। वियातत्वम्, वियातता, वियातिमा, वैयात्यम्। विलाभत्वम्, विलाभवता, विलाभिमा, वैलाभ्यम्। विमतित्वम्, विमतिता, विमतिमा, वैमष्यम्; इगन्तत्वादणपि भवति, वैमतम्,। विमनस्त्वम्, विमनस्ता,

विमनिमा, वैमनस्यम्। विशारदत्वम्, विशारदता, विशारदिमा, वैशारद्यम्, समो मतिमनसोरिति। सम उत्तरे ये मतिमनसी तयोः समासयोरनन्तरः ष्यञ्--संमतित्वम्, संमतिता, संमतिमा, साम्मत्यम्; पूर्ववदण्सांमतम्। संमनस्त्वम्, संमनस्ता, संमनिमा, सांमनस्यम् ।।

गुणवचनब्राह्मणादिभ्यः कर्मणि च ।। 5.1.124 ।।
कर्मशब्दः क्रियावचन इति। न साधनकर्मवचनः; क्रियाया हि साधनं सम्भवति। सत्त्वशब्दाश्च गुणवचनब्राह्मणादयः, अतस्तेषां नास्ति साधनकर्मणा सम्बन्धः। क्रिया त्वात्मलाभय तैर्यज्यते। कथं तर्हि कवेः कर्म काव्यम्, न हि तत्र क्रियाभिधीयते, किं कर्हि, तत्कृतो ग्रन्थः ? अत्राहुः--क्रियाकर्मण्येव प्रत्ययविधानम्, औपचारिकस्तु तत्कृते प्रयोग इति। अपर आह--सूत्रे यः कर्मशब्दो यश्च वृत्तौ क्रियाशब्दः, तदुभयमपि कर्मसाधनं कर्म, क्रियाकार्यमित्यर्थः, तेन कृतिव्याप्ये साधनकर्मण्येव प्रत्यय इति। ब्हाह्मणादिरकृतिगण इति अवृत्कृतत्वात्। एतदेवोपपादयति--आदिशब्दः प्रकारवचन इति।
किमर्थं तर्हि गुणवचनग्रहणम्, ब्राह्मणादीनां चानुक्रमणम् ? केषाञ्चित्प्रपञ्चार्थम्; केषाञ्चित्स्वार्थे प्रत्ययविधानार्थम्, केषाञ्चिद् वाधकबाधनार्थम्। तत्र ब्राह्णमशब्दात्प्राणभृज्जातिलक्षणेऽञि प्राप्ते, `माणववाडवाभ्यां गोत्रलक्षणे' वुञि। `अर्हतो नुम् च' इति नुमर्थःक पाठः; `अर्हः प्राशंसायाम्' इति शतृप्रत्ययः--आर्हन्त्यम्। चोरधूर्तयोर्मनोज्ञादित्वाद्वुञिप्राप्ते सोऽपि भवत्येव। आराध्यादीनां चतुर्णा जनपदवाचित्वादञि कृते, तस्य च `कम्बोजादिभ्यो लुग्ववचनम्' इति लुकि गोत्रवुञि प्राप्ते पाठः। एकभावादीनामन्यभावपर्यन्तानां स्वार्थे विधानार्थम्। तथा च वार्त्तिके प्रयोगः--`आन्यभाव्यं तु कालशब्दव्यवायात्' इति। अक्षेत्रज्ञानीश्वरशब्दयोः `न नञ्पूर्वात्' इति निषेधे प्राप्ते, कुशलादीनां युवादित्वादमि प्राप्ते, बालिशशब्दाद्वयोलक्षणोऽञि प्राप्ते, राजशब्दस्य पुरोहितादित्वाद्यकि प्राप्ते, गणपत्यधिपत्योः पत्यन्तलक्षणे यकि। शेषाणामलसादीनां पाठः प्रपञ्चार्थः।
सर्ववलेदादिभ्यः स्वार्थे इति। सर्वे वेदाः सर्ववेदाः, पूर्वकालोति समासः, सर्ववेदानधीत् इत्यण्, `सर्वसादेर्द्विगोश्च लः' इति लुक्, सर्ववेद एव सार्ववेद्यः। चतुर्वेदस्योभयपदवृद्धिश्चेति। चतुरो वेदानधीते इति तद्धितार्थे द्विगुः, अणो लुक्, चतुर्वेद एव चातुर्वैद्यः। क्वचित्तु चातुर्वैद्यस्येति पाठः, तत्र सिद्धय इति शेषः, चतस्रो विद्या अधीत इत्यादि षूर्ववद् विद्यालक्षणकल्पसूत्रान्तादिति ठक्, पूर्ववल्लुक्, चतुर्विध्य एव चातुर्वैद्यः ।।

स्तेनाद्यन्नलोपश्च ।। 5.1.125 ।।
`स्तेन चौर्ये', पचाद्यत्तु, स्तेनः। नशब्दस्येति। एतेन सङ्घातस्येदं ग्रहणमिति दर्शयति। वर्णग्रहणे तु नकारलोपे कृतेऽकारस्य यस्येति लोपः। तस्य पूर्वविधौ स्थानिवद्भावादयादेशः प्राप्नोति। ननु सह्घातग्रहणेऽपि `अल्लोऽन्त्यस्य' इत्यन्त्यस्य प्राप्नोति ? सिद्धोऽन्त्यलोपः `यस्येति च' इति; तत्रारम्भसामर्थ्यात्सर्वस्य भविष्यति, `नानर्थकेऽलोन्त्यविधिरनभ्यासविकारेषु' इति च परिभाषां पठन्ति। स्तेनादिति योगविभागं कुर्वन्तीति। भाग्येऽनुक्तमपि स्तैन्यशब्दस्य प्रयोगबाहुल्यादिदमुक्तम् ।।

कपिज्ञात्योर्ढक् ।। 5.1.126 ।।
इह कपिज्ञाती द्वौ, भावकर्मणी चार्थौ द्वावेवेति संख्यातानुदेशः प्राप्नोति, एवम् `पत्यन्तपुरोहितादिभ्यो यक्', `हायनान्तयुवादिभ्योऽण्' इत्यत्रेत्याशङ्कयाह--यथासंख्यं प्रकरणे नेष्यत इति। तदर्थस्य स्वरिततत्वस्याप्रतिज्ञानादिति भावः ।।

पत्यन्तपुरोहितादिभ्यो यक् ।। 5.1.127 ।।
राजास यिति। राजशब्दोऽसेऽसमासे यकमुत्पादयति--राज्ञो भावः कर्म वा राज्यम्। `असे' इति किम्? आधिराज्यम्, ब्राह्मणादित्वलात्यञ्। यद्यपि तत्र राजशब्दः पठ्यते, तथाप्ययमेवास इति प्रतिषेधो ज्ञापयति--`अस्त्यत्र राजशब्दे तदन्तविधिः' इति। एवं च ब्राह्मणादिपाठस्य समासे चरितार्थत्वादसमासे विशेषविहितो यगेव भवति।
अपर आह--`ब्राह्मणादेराकृतिगणत्वादेव तदन्तात् ष्यञि सिद्धे राजशब्दस्य तत्र पाठो यका सह समावेशार्थः' इति, तथा चावेष्ट्यधिकरणे शाबरबाष्ये उक्तम्--`तस्य कर्मणि ष्यञ्' इति ।।

प्राणमृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् ।। प्राणभृतः=प्राणिनः, प्राणिग्रहणमेव न कृतं वैचित्र्यार्थम्। प्राणभृद्ग्रहणात्तृणत्वं तृणतेत्यादौ न भवति, जातिग्रहणाद्देवदत्तत्वमित्यादौ न भवति। यत्त्विहेगन्तं लघुपूर्वं तस्मात्परत्वादण् भवति--तैत्तिरम्। उद्गात्रादिषु य ऋत्विग्वचनास्तेभ्यः `होत्राब्यश्छः' इति छे प्राप्देऽञ् चविधीयते। सुष्ठुदुष्ठुभ्यां गुणवचनलक्षणे ष्यञि, वधूशब्दादिगन्तलक्षणेऽणि, शेषेभ्यस्त्वतलोः प्राप्तयोः। सुभगं मन्त्रे इति। सुभगमित्येतच्छब्दरूपं मन्त्रविषये प्रयोगेऽञमुत्पादयति--`महते सौभगाय', सर्वविधीनां छन्दसि विकल्पितत्वात् `हृद्भगसिन्ध्वन्त' इत्युत्तरपदवृद्धिर्न भवति। अत एव मन्त्रे क्वचिदञ् न भवति--सौभाग्यमस्यै दत्वाय ।।

हायनान्तयुवादिभ्योऽण् ।। हायनान्तात्त्वतलोः प्राप्तयोरण्विधानम्। यौवनमिति। `अन्' इति प्रकृतिभावः, मनोज्ञादित्वद्वुञपि भवति। स्थविरशब्दस्य वयोलक्षणेऽञि प्राप्ते पाठः, होतृशब्दस्याप्युद्गात्रादित्वादञ्येव। पुरुषास इति। पुरुषशब्दोऽसमासेऽणमुत्पादयति, पौरुषम्, प्राणभृज्जातिवाचित्वादञ् प्राप्तः,

मनुष्यजातिवचनो ह्रसौ न पुंस्शब्दपर्यायः पुंल्लिङ्गवचनः; स्त्रियामपि दशनात्--तस्यामस्यां च पुरुषीश्च धेनुके दद्यरिति। अस इति किम्? राजपुरुषत्वम्। कमण्डलुशब्दस्येगन्तत्वादेवाणि सिद्धे त्वतल्निवृत्त्यर्थः पाठः। हृदयास इति। दृदयशब्दोऽसमासेऽणमुत्पादयति-हृदयस्य भावो हार्दम्, `हृदयस्य हृल्लोखयदण्लासेषु' इति हृद्भावः। असे इति किम् ? अहृदयत्वम्। ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधादेव सिद्धे समासप्रतिषेधश्चिन्त्यप्रयोजनः। कुशलादीनां क्षेत्रज्ञान्तानां ब्राह्मणादित्वात्ष्यञपि भवति।

श्रोत्रियस्य घलोपश्चेति। यदा `श्रोत्रियँश्छन्दोधीते' इत्यत्र छन्दसः श्रोतृभावो घश्च प्रत्यय इति पक्षः, तदा घलोपः; यदा तु `वाक्यर्थे पदवचनम्' इति पक्षः, तदा घशब्देन य इति रुपं लक्ष्यते। क्वचित्तु यलोपश्चेति पाठः; तत्र यलोपे सङ्गातग्रहणम्, वर्णग्रहणे त्वकारस्य यस्येतिलोपे सति इकारस्य यणादेशप्रसङ्गः, सङ्घातलोपे त्विकारस्य यस्येति लोपः---सर्वथा श्रोत्रियस्य भावः श्रौत्रमिति ।।

इगन्ताच्च लघुपूर्वात् ।। 5.1.131 ।।

लघुपूर्वग्रहणेन प्रातिपदिकसमुदायो विसेष्यते इति। यद्येवम्, पूर्वशब्दोऽवयववचनः, व्यवस्थावचनो वा, तत्राद्ये पक्षे यस्य सर्वपूर्वो वर्णो लघुस्तस्मादेवेष्वणुप्रभृतेः स्यात्, द्वितीये तु पाण्डुप्रभृतिभ्योऽपि स्यात्। यदा लघुः पूर्वो भवतीत्याशखङ्क्यावयववचन एव पूर्वशब्दः, सोऽप्यवध्यपेक्ष एव प्रवर्त्तते, तत्र कस्यचिदनिर्द्देशे सर्वपूर्वः प्रतीयते, इह तु सन्निधानादिक एवेति ? दर्शयति---लघुः पूर्वो यस्येत्यादि। तेनेति लघुपूर्वेणेगन्तेन। अस्मिन्व्याख्याने, अन्तग्रहणमतिरिच्यत इति लघुपूर्वेणेका प्रातिपदिकस्य विशेषणात्तदन्तविधेः सिद्धत्वात्।

कथं काव्यमिति। कावमिति भवितव्यमिति प्रश्नः ।।

योपधाद् गुरूपोत्तमाद् वुञ् ।। त्रिप्रमृतीनामित्यादि। एतच्च `अणिञोरनार्षयोः' इत्यत्र व्याख्यातम्। सहायाद्वेवेति वक्तव्यमिति। सूत्रेण नित्ये प्राप्ते विकल्पः ।।

द्वन्द्वमनोज्ञादिभ्यश्च ।। 5.1.132 ।।

यः पत्यन्तो द्वन्द्वस्तस्माद्यक् प्राप्तः, यस्तु हायनान्तस्तस्मादण्प्राप्तः, अन्यस्मात्त्वलौ, मनोज्ञादिष्वपि गुणवचनात् ष्यञ् प्राप्तः, चोरधूर्त्ताभ्यामपि ब्राह्मणादित्वात्ष्यञेव, युवशब्दाद्युवादित्वादण्, शेषेभ्यस्त्वतलौ। अमुष्यपुत्रेति। निपातनात्षष्ठ्या अलुक् ।।

गोत्रचरणाच्छ्लाधात्याकारतदवेतेषु ।। 5.1.133 ।।

गोत्रवाचिन इति। अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यते, अपत्यवाचिन इत्यर्थः। अपत्यप्रत्ययान्तादिति यावत्।

अपर आह--ग्रवराध्याये पठितानां गोत्राणामिह ग्रहणमिति। चरणवाचिनश्चेति। चरणशब्दः शाखाध्यायिषु पुरुषेषु रूढः, अनयोश्च गोत्रं च चरणैः सहेति जातित्वात् `प्राणभृज्जाति' इत्यञ्प्राप्तः। प्रत्येक भावकर्मणोरर्थयोरिति। `यथासंख्यं तु सर्वत्रैवात्र प्रकरणे नेष्यते' इति पूर्वमेवोक्तम्। स्लाघादिषु विषयभूतेष्विति। प्रत्ययार्थत्वं श्लाघादीनां न भवति, भावकर्मणोः प्रत्ययार्थयोरधिकृतत्वात् नापि प्रत्ययार्थविशेषणम्--ये ते भावकर्मणी श्लाघादयश्चेत्ते भवत इति; असम्भवता। शब्दस्य प्रवृत्तिनिमित्तं हि भावः, न च गोत्रचरणशब्दानां श्लाघादयः प्रवृत्तिनिमित्तम्, नापि गोत्रचरणशब्दानां श्लाघादिकर्मत्त्वेन प्रसिद्धिः। तस्मात् श्लाघादिषु भावकर्मणोः साध्यतया विषयभूतेष्वित्येवार्थः। तदवेतस्तत्प्राप्त इति। इणः प्राप्त्यर्थत्वात्। तज्ज्ञो वेति। अवपूर्वस्येणो ज्ञाने प्रसिद्धत्वात्। तच्छब्देन चेह गोत्रचरणयोर्भाकवर्मणी प्रतिनिर्दिश्यते। गार्गिकयेति। `आपत्यस्य च' इति यलोपः ।।

होत्राब्यश्छः ।। होत्राशब्द ऋत्विजां वाचक इति। जुहोतेश्त्रन्, स्वभावतश्चायमृत्विक्ष्वपि स्त्रीलिङ्गः। अच्छावाकीयम् ब्राह्मणाच्छंसीयमिति। वेदे स्त्रीलिङ्गतापि दृश्यते `सोऽस्याच्छावाकीयां कुर्यात्' इति ।।

ब्रह्मणस्त्वः ।। 5.1.136 ।।

ब्रह्मणस्त्वः ।। नेति वक्तव्ये इति। छप्रत्यये प्रतिषिद्धे `तस्य भावस्त्वतलौ' इत्येव प्रत्ययः सिद्धः, विभक्तेरनुच्चारणाल्लाघवं भवतीति भावः। यस्तु जातिशब्द इति `होत्राभ्यः' इत्यनुवृत्तेः फलं दर्शयति ।।

इति कश्रीहरत्तमिश्रविरचितायां पदमञ्जर्यां प्रञ्चमस्याध्यायस्य प्रथमः पादः ।

5.2

काशिकावृत्ती

अथ पञ्चमाध्याये द्वितीयः पादः

धान्यानां भवने क्षेत्रे खञ् ।। 5.2.1 ।।
धिनोतेः `कृत्यल्युटो बहुलम्' इति कर्तरि ण्यत्, अस्मादेव निपातनादन्त्यस्य लोपः, इकारस्य चात्वम्। धिनोतीति धान्यम्। `धान्यमसि धिनुहि देवान्' इति हि दृश्यते। धान्यानामिति भवनापेक्षया कर्त्तरि षष्ठी। भवनमित्यधिकरणे ल्युट्। क्षियष्ट्रन्, क्षेत्रम्। भवति जायतेऽस्मिन्निति भवनमिति। एतेनोत्पत्तिवचनोऽत्र भवतिर्गृह्यते, न सत्तावचन इति दर्शयति। एतच्च क्षेत्रग्रहणाल्लभ्यते। क्षेत्रशब्दो हि तृणानां धान्यानां चोत्पत्त्याधारमाचष्टे। न हि धान्यानां सत्तां प्रति भूमिः क्षेत्रव्यपदेशमासादयति। मुद्रानां भवनं कुसूलमिति। असति क्षेत्रग्रहणे सत्तावचनस्यापि भवतेर्ग्रहणं स्यादिसि भावः। किञ्च--भवनशब्दो गृदे रुढ इति मुद्गानां गृहमित्यत्रैव प्रसङ्ग इत्यपि शक्यते वक्तुम्।
यदि तर्हिह क्षेत्रग्रहणमवश्यं कर्त्तव्यम्, तदेवास्तु, किं भवनग्रहणेन ? धान्यानामिति शेषलक्षणषष्ठी, क्षेत्रं प्रत्ययार्थः। न चैवं क्षेत्रशब्दस्यापि शरीरभार्याद्यनेकार्थत्वादतिप्रसङ्ग; धान्यसम्बन्धादुत्पत्तिभूमिरेव प्रत्यष्यते। तदेतद्भवनग्रहणं चिन्त्यप्रयोजनम् ।।

व्रीहिशाल्योर्ढक् ।। 5.2.2 ।।
अत्रापि निर्द्देशादेव पष्ठी समर्थविभक्तिः, वृत्तिकारेण तु पूर्वानुसारेण गम्यमानत्वान्नोक्तम् ।।

यवयवकषष्टिकाद्यत् ।। 5.2.3 ।।
अत्र प्रत्ययार्थसामर्थ्यलभ्या षष्ठी समर्थविभक्तिः ।।

विभाषा तलमाषोमाभङ्गाणुभ्यः ।। 5.2.4 ।।
खञि प्राप्तो वचनं पक्षे सोऽपि भवतीति। युक्तं यदणुतिलमाषेभ्यः पक्षे कञपि भवतीति, तेषां धान्यत्वात्; उमाभङ्गयोस्त्वधान्यत्वादयुक्तम्, धान्यान्येव हि चमकानुवाकेषु पठ्यन्ते `व्रीहयस्य मे' इत्यादीनि, तान्येव धान्यानि, न चोमाभङ्गावत्र पठ्येते ? अत आह--उमाभङ्गयोरपि धान्यत्वमाश्रितमेवेति। न चमकानुवाको धान्यपरिगणनार्थः, तत्राधान्यानामप्यश्मादीनां पाठाद्, धान्यानामिपि केपाञ्चित् कोद्रवादीनामपाठात्। तस्मादन्यत एव थधान्यनिर्णयः, तत्र `शणसप्तदशानि धान्यानि' इति स्मृतिः, तत्र चोमाभङ्गे अपि पठिते। तस्माद्युक्तमेव यत्ताभ्यामपि पक्षे खञ् भवतीति ।।

सर्वचर्मणः कृतः शखञौ ।। 5.2.5 ।।
तृतीयासमर्थादिति। कृत इति प्रत्यर्थार्थे चर्मणः करणत्वात्सामर्थ्यलभ्या तृतीया समर्थविभक्तिः। सर्वशब्दस्य चर्मशब्देन समासं कृत्वायं निर्द्देशः। सर्वचर्मण इति समासश्च सामर्थ्ये सति भवति, ततश्चर्मशब्देनास्य सम्बन्ध इति कश्चिद्भाम्येत्तं प्तय्याह--सर्वशब्दश्चात्रेति। कथं तर्हि समासः? इत्याह--तत्रायमिति। अस्मादेव निपातनादिति भावः। किं पुनः कारणं सर्वशब्दः कृतेन सम्बध्यते न चर्मणा ? इत्याह--सर्वश्चर्मणेत्यादि। सर्वश्चर्मणा कृत इति योऽयं वाक्यार्थः, अस्मिंस्तद्धित्तवृत्तिरिष्यते, यदि चर्मणा सम्बध्येत, ततो यदि सर्वचर्मेति षष्ठीसमासः, ततः सर्वसम्बन्धइना चर्मणा कृत इत्यर्थः स्यात्। अथ कर्मधारयः, ततः सर्वेण चर्मणा कृत इति, न तु कृतस्य सर्वत्वमुभयथापि लभ्यते। तस्मात्कृतेनैव सम्बन्धो न्याय्य इति भावः ।।

यथामुखसम्मुखस्य दर्शनः खः ।। 5.2.6 ।।
दृश्यतेऽस्मिन्दर्शन इति। अधिकरणे। ल्युट्, कः पुनरसौ ? इत्याह--आदर्शादिरिति। आदिशब्देन जलादिकं गृह्यते। प्रतिबिम्बाश्रय इति। यो हि मुखादिप्रतिविम्बस्याश्रयस्तत्र मुखादिकं दृश्यते। मुखस्य सदृशं यथामुखं प्रतिविम्बम्, सादृश्यप्रतिषेधात्कथमत्र समासः? तत्राह--निपातनादिति। भट्टिकाव्ये तु पदार्थानतिवृत्तौ यथाशबप्द आश्रितः, तथा च मायामृगं प्रकृत्य भवति श्लोकः--`यथामुखीनः सीतायाः पुप्लुवे वहुलो भवन्' इति, यथामुखं दर्शन इत्यव्ययीभावस्यापि यथामुखशब्दस्योन्मत्तगङ्गादिवत् सत्त्वचनत्वात्कर्मशक्तियोगे सति दर्शनशब्दयोगे कृद्योगलक्षणा कर्मणि षष्ठी, तस्याः `नाव्ययीभावात्' इत्यम्भावः। अत एव पूर्वमुक्तम्--`यथामुखशब्दात्संमुखशब्दाच्च षष्ठीसमर्थात्' इति। समं मुखं संमुखमिति समशब्दः सर्वशब्दपर्यायः। निपातनादन्त्यलोपः, संमुखस्येति कर्मणि षष्ठी। प्रत्ययसन्नियोगेनान्त्यलोपनिपातनान्नेदं प्रयोगार्हम्, किं तर्हि ? प्रक्रियावाक्यम्। संशब्दस्तु न समशब्दस्यार्थे दृश्यते। सम्मुखीन इति। यत्रादर्शादौ सर्वं मुखं दृश्यते तदेवमुच्यते। कथं तहि `संयुगे संमुखीनं तमुद्यन्तं प्रसहेत कः' इति ? अभिमुखावस्तानात्साधर्म्याद्भविष्यति ।।

तत्सर्वादेः पथ्यङ्गकर्मपत्त्रपात्रं व्याप्नोति ।। 5.2.7 ।।
परिशिष्टं प्रकृतिविशेषणमिति। तत्र केवलानां पथ्यादीनां सर्वादित्वासम्भवात्प्रातिपदिकैरपि तैस्तदन्तविधिः, पञ्चम्यर्थे च प्रथमा द्वितीया वेत्याह---पत्यङ्गकर्मपत्त्रपात्रान्तादिति। सर्वपथीन इति। `पूर्वकाल' इत्यादिना समासः, `ऋक्पूरब्धूः' इत्यकारः समासान्तः, तस्य पथ्यन्तसमासग्रहणेन ग्रहणात्पथ्यन्तमेव प्रातिपदिकमिति खप्रत्ययः ।।

आप्रपदं प्राप्नोति ।। 5.2.8 ।।
प्रापदमिति पादस्याग्रमुच्यत इति। प्रारम्भः पदस्येति कृत्वा। तयोरव्ययीभाव इति। ???????????????????? इत्यनेन। द्वितीयासमर्थादिति। क्रियाविशेषणे `कर्मणि द्वितीया'। आप्रपदं यथा तथा सर्वशरीरं प्राप्नोतीत्यर्थः. शरीरेणासम्बद्धस्यापि पटस्य प्रमाणमाख्यायत इति। योग्यत्वात्, योग्यो ह्यसावाप्रपदं शरीरं प्राप्तुम्। व्याप्नोतीति प्रकृते प्राप्तनोतीति वचनमर्थभेदात्--सम्बन्धमात्रम्=प्राप्तिः, सम्बन्धः साकल्योपाधिकः=व्याप्तिः। `आप्रपदम्' इत्यत्र त्वभिविधौ व्याप्त्रिगम्यते, न गर्यादायाम् ।।

अनुपदसर्वान्नायानयं बद्धाभक्ष्यतिनेयेषु ।। 5.2.9 ।।
अनुरायाम इति। `यस्य चायामः' इति वा, `यथार्थे यदव्ययम्' इति वा ऽव्ययीभाव इत्यर्थः. पदप्रमाणेत्यर्थ इति। आयामे तावदयमेवार्थः, सादृश्येऽपि तुल्यपरिमाणतया सादृश्यमित्यमेवार्थो भवति। सर्वान्नीनो भिक्षुरिति। प्रकारकार्त्स्न्ये सर्वशब्दः, यान्यन्नानि लभ्यन्ते उष्णानि शीतानि सरसानि विरसानि तानि सर्वाणि भक्षयतीत्यर्थः। अयनमय इति गमनमात्रमयशब्देनोच्यते, तत्प्रतिषेधस्त्वनयशब्देनेत्याशङ्कामपनयति--अयः प्रदक्षिणमिति। प्रदक्षिणं गमनमित्यर्थः। एवम् अनयः प्रसव्यम्। वामपर्यायगमनम्। एतच्च रूढिवशाल्लभ्यते। रूढो ह्ययमयानयशब्दः शारणां प्रदक्षिणप्रसव्यगमने--श्रृणन्त्येभिर्द्ूतकाराः परस्परमिति शाराः, द्यूतसाधनविसेषाः, श्वान् इति येषां प्रसिद्धइः, `कृत्यल्युटो बहुलम्' इति करणे घञ्। तत्राभिमुखयोः क्रीडतोः कितवयोर्यदैवैकं प्रति प्रदक्षिणं गमनं तदेवेतरं प्रति प्रसव्यमित्ययश्चासावनयश्च अयानय इति कर्मधारयः ।

अथ वा--एकमेव प्रत्ययानयत्वम्, कथम्? वीथीभेदेन। चतस्रो वीथयः, तत्रात्मीयाः शाराः परपार्श्वे स्थिताः प्रथमायां वीथ्यामात्मनः प्रदक्षिणं दच्छन्ति, द्वितीयस्यां प्रकञ्म्, एवमुत्तरयोः; तत्र समाहारद्वन्द्वे लोकाश्रयत्वेन पुंल्लिङ्गता।
अपर आह--एकदेशद्वारेण गमनसमुदायस्यानयव्यपदेशः, कृताकृतदिवत्सामानाधिकरणसमास एवायमिति। प्रदक्षिणप्रसव्यगमनमात्रेऽपि नेष्यते, किन्तु विशेष इत्याह---प्रदक्षिणप्रसव्यगामिनामित्यदि। यस्मिन् गतिविशेषे सति गामिनामित्यादि। बहुवचनमयानयनिमित्तप्रदर्शनार्थम्। यदि शाराः प्रदक्षिणं प्रसव्यं च गच्छन्त्येवमयानयौ भवतः, नान्यथा। तत्रामीयाः शाराः प्रदक्षिणं गच्छन्ति, परकीयाः प्रसव्यम्। तेषामेवङ्गामिनां यानि स्तानानि तेषां यस्मिन् प्रदक्षिणप्रसव्यगमनात्मके गतिविशेषे सति परैर्विवक्षभूतैः शारैरसमावेशः=अनध्यसनमनाक्रमणं सोऽयानय इत्युच्यते, न तु प्रदक्षिणप्रसव्यगमनमात्रे स एवायम्। एवंरूपोऽथानयो यदा ससहायैः शारेः पदान्यदिष्ठीयन्ते यदा वेदितव्यः । ससहायानामेव हि शाराणां पदानि परैर्न शक्यन्तेऽध्यासितुम्। असहायानां तु भक्तयत् एव। फलकशिरसि स्थित इति। यत्र फलकेऽङ्केऽक्षैर्दीव्यन्ति तस्य शिरोभूतं यत्र स्थानं कितवानां प्रसिद्धं तत्र सिथितः शारः `अयानयीनः' इत्यच्यते; तत्रैवायानयीनशब्दस्य रूढत्वात्।
अपरे तु-नेयो नेतव्यः, न नीतस्ततः. तत्र `शिरसि स्तितः' इत्यर्थानुपपात्तेः `फलकशिरसि स्थाप्यते' इत्यर्थ इति ग्रन्थेन भवितव्यमित्याहुः। नीतो वा नेयः; तदुपलक्षणत्वात्। भाविन्यावस्थायोक्तः। अयानयसम्बद्धित्वेऽपि सर्वेषां विशेष्यादेव प्रत्ययोत्पत्तिरुक्तैव। सत्यपि द्वलितीयाधिकारे पुर्द्वितीयोच्चारणं दृष्टाद् द्वितीयान्ताद् यथा स्यादि त्येवमर्थम्। तेन विशिष्टार्थनेयवचनादयानयशब्दाद् द्विदीयान्ताद् प्रत्ययो भवति, न नेयवचनमात्रात्। स एव विशिष्टो यो नयऋः प्रदक्षिणप्रसव्यगामीत्यादिना ग्रन्थेन दर्शइतः।
अर्थायानय इति कोऽयं शब्दः, यदि ह्ययं समाहारे द्वन्द्वः, तस्य नपुंसकत्वादयानयमिति भवितव्यम् ? अथेतरेतरयोगे, द्व्यर्थत्वादयानयाविति भवितव्यम् ? नायं द्वन्द्वः, किं तर्हि ? मयूरव्यंसकादित्वात् तत्पुरुषः--अयसहितोऽनयोऽयानय इति। अथ बद्दाभक्षयतिनेयेष्विति कथं तिङन्तस्य द्वन्द्वः ? कः पुनराहायं द्वन्द्व इति? यदि न द्वन्द्वः, कथं नेयेष्विति बहुवचनम् ? सौत्रत्वान्निर्देशस्य। सुब्व्यत्ययेन वा च्छन्दस्येकवचनस्य स्थाने बहुवचनमुपपन्नम्। ननु च्छन्दसि सुब्वयत्यय उक्तः, नेद छन्दः ? नयश्च भवति तेनासावयानयं नेयः। `बद्धाभक्षयतिनेयेषु' इति निपातनात्तिडन्तस्य द्वन्द्वः असमासपक्षे तु बद्धेत्यत्र प्रथमैकवचनम्, नेयेष्विति सप्तमीबहुवचनमित्यसमञ्जसमापद्येत ।।

परोवरपरम्परपुत्रपौत्रमनुभवति ।। 5.2.10 ।।
परस्योत्ववचनमिति। परस्य शब्दरूपस्यादेरुत्वं निपात्यत इत्यर्थः, तत्र `आद्गुणः'। अथ वा--परशब्दस्य ओत्वं निपात्यतेऽन्त्यस्यालः, ततः `एङः पदान्तादति' इति पूर्वरूपैकादेशः, परस्यौत्वमिति प्राप्नोति `शकन्ध्वादिषु पररूपं अव्कव्यम्' इति पररूपेण निर्द्देशः। परपरतराणां चेति। चकारः पूर्वनिपातनापेक्ष्या समुच्चयार्थः। अर्तगतस्य बहुत्वस्य शब्दे समारोपाद् बहुवचनम्। तच्छब्दान्तरमेव द्रष्टव्यमिति। अव्युत्पन्नमेव प्रबपन्धस्य वाचकम्। अत एवस्त्रीलिङ्गमेकवचनं च। पारम्पर्यमित्यपि तस्मादेव स्वार्थे ष्यञि भवति कथं परोवर्यवदिति ? असाधुरेवायम्; खप्रत्ययसन्नियोगेन परोवरेति निपातनात् ।।

अवारपारात्यन्तानुकामं गामी ।। 5.2.11 ।।
गामीति। `गमेरिनिः', `आङि णिच्च' इति बहुलवचनात्केवलादपि णिनिर्भविष्यति। गम्यादय इति। यद्यप्याङ्पूर्वा गमिर्गम्यादिषु पठ्यते, तथापि बहुलवचनादेव णिनिरिव भविष्यत्कालत्मपि भविष्यतीति भावः। अकेर्नोर्भविष्यदाधमर्ण्ययोरिति षष्ठीप्रितिषेध इति। `गत्यर्थकर्मणि' इत्यत्र यदुक्तम्--

`द्वितीयाग्रहणमपवादविषये विदानार्थं तेन कृत्प्रत्ययप्रयोगे षष्ठी न भवति--ग्रामं गन्ता' इति, तन्नाश्रितमम्; प्रतिषेधे षष्ठीप्रसङ्गस्यैवाभावात्। अवारपारीण इति। द्वन्द्वात्प्रत्ययः। अवारपारे तीरे आहिताग्नयादिषु पक्षेपादुभयं भवति--अवारपारे, पारावारे इति । अत्न्तमिति । क्रियाविशेषणम्, एवम्अनुकाममिति। कामः=इच्छा, तस्य सदृशमनुकामम्=कामानुरूपम्, `यथार्थे यदव्ययम्' इति समासः ।।

समांसमां विजायते ।। 5.2.12 ।।

समांसमाभिति वीप्सेति। प्रष्टव्येति शेषः। अत्र निर्देशे वीप्सा द्रष्टव्या, तेन द्विचनमित्यर्थः। अथ वा--वीप्सावाची समुदायो वीप्सा, वीप्प्तावाचीत्यर्थः। सुबन्दमुदायः प्रकृतिरिति। प्रातिपदिकाधिकारेऽपि वचनसामर्थात्। गर्भ धारयतीत्यर्थ इति। दृश्यते च विजनिर्र्भधारणे, `स विजायमानो गर्भणाताम्यत्' इति।

पूर्वपदे सुपोऽलुग्वक्तव्य इति। अन्यथा तद्धिते उत्पन्ने यथोत्तरपदे लुग्भवति `सुपो दातुप्रातिपदिकयोः' इति, तथा पूर्वपदेऽपि स्यात्।

केचित्त्विवत्यादि। नन्वत्यन्तसंयोगे द्वितीयया भवितव्यम् ? तत्राह--गर्भविमोचने त्विति। तत्र वमोचनेन यकारमात्रलोपो न सर्वस्या विभक्तेरिति मात्रशब्दस्यार्थः. परिशिष्टस्येति। आम्शब्दस्यालुग्वक्तव्यः। ननु याटः सुब्भक्तत्वात्सुब्लुकैव लोपः सिद्धः तत्र यलोपवचनं नियमार्थं भविष्यति--यकारस्यैव लोपो न तु सर्वस्य प्रत्ययस्येति, तत्किमुच्यते `अलुग्वक्तव्यः' इति ? एवं मन्यते--यथैव निपातनात्पूर्वपदपरिशिष्टिस्य लोपो न भवति एवमुत्तरपदेऽपि न स्यादिति।

अनुत्पत्ताविति। वाक्ये पूर्वोत्तरपदयोरपि पक्षे यलोपो वक्तव्यः, तेन द्वैरूप्यं सिद्धं भवति ।।

अद्यश्वीनावष्टब्धे ।। 5.2.13 ।।

अवष्टब्ध, विजन--इत्येतयोर्यथाक्रमं विवरणम्--आसन्ने प्रसव इति। कथं पुनरवष्टब्धशब्दस्यासन्नमर्थः ? इत्याह--आविदूर्ये हीति। यद्यप्यालम्बनेऽपि षत्वं विधीयते; तथापि विजनस्यालम्बनत्वासम्भवादाविदूर्यमेवार्थः। किं पुनरत्र निपात्यते ? अद्य वा विश्वो वेति वार्थे समासः खप्रत्ययः, टिलोपस्त्वव्ययत्वादेव सिद्धः। अद्यश्वीना वडवेति। विजायत इत्यस्यानुकूलतया स्त्रीलिङ्गमुदाहृतम्, न पुनः सूत्रे स्त्रीलिङ्गनिर्द्देशः। अद्यश्वीनो गोसमूहः, अद्यश्वीनं गोमण्डलमित्यत्रापीष्टत्वात्। ????????? ह्रस्वान्तस्याविभिक्तिको निर्देशः।

केचित्त्विति। तेषां यथाभिधानं क्रियाध्याहारः। अवष्टब्धमात्रे इति। भवत्याद्यर्थेऽपीत्यर्थः। अद्यस्वीनं मरणमिति। अद्य वा श्वो वा भविष्यतीत्यत्रार्थे प्रत्ययः ।।

आगवीनः ।। 5.2.14 ।।

गोराङ्पूर्वादिति। गोशब्दान्तादाङ्पूर्वात्प्रातिपदिकादित्यर्थः। आ तस्य गोः प्रतिदानादिति। प्रतिदानम्=प्रत्यर्पणम्। एतेन वृत्तिविषये गोशब्दो गोप्रतिदाने वर्त्तत इति दर्शयति। करिणीति। कृञ आवश्यके णिनिः। आगवीन इति। `आङ् मर्यादाभिविध्योः' इत्यव्ययीभावे उपसर्जनह्रस्वत्वे च कृते खप्रत्ययः, `ओर्गुणः' ।।

अनुग्वलङ्गामी ।। 5.2.15 ।।

अलङ्गगामीति। `सुप्यजातौ' इति णिनिः। गोः पश्चादनुस्विति। पश्चादर्थेऽव्ययीभावः, उपसर्जनह्रस्वः। पर्याप्तमिति। क्रियाविशेषणमेव। अनुग्विति। ततश्च द्वितीयान्तात्प्रत्ययः। कृद्योगलक्षणा तु षष्ठी क्रियाविशेषणान्न भवति, तद्यथा--शोबनं पाचक इति ।।

अध्वनो यत्खौ ।। 5.2.16 ।।

द्वितीयासमर्थादिति। यदा तिङ्न्तेन विग्रहः--अध्वानं गच्छतीति, तदा द्वितीयासमर्थत्वम्। यदापि सूत्रोपात्तेन गामीत्यनेन विग्रहः, तदापि द्वितीयैव कृद्योगलक्षणा षष्ठी न भवति; `अकेनोः' इति प्रतिषेधात्। इह `अध्वनो यच्च' इति सिद्धम्, चकारात्खश्च? एवमुच्यमाने उत्तरसूत्रे चकारेणानन्तरो यदेवानुकृष्यते, न चानुकृष्टः खः। अतो यत्खयोर्द्वयोरप्यनुवृत्त्यर्थं यत्खावित्युक्तम् ।।

अभ्यामित्राच्छ च ।। 5.2.17 ।।

अब्यचामित्रामिति। `लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः, क्रियाविशेषणत्वात्कर्मणि द्वितीया ।।

गोष्ठात्सञ् भूतपूर्वे ।। 5.2.18 ।।

गावस्तिष्ठन्त्यस्मिन्निति गोष्ठ इति। छञर्थे कविधानम्, `स्थास्नायाव्यधिर्हान युध्यर्थम्' इत्यधिकरणे कः, `अम्बाम्बगोभूमि' इति षत्वम्। पूर्व भूतो भूतपूर्वः, `सुप्स,ुपा' इति समासः। गोष्ठशब्दस्यार्थद्वारकंच विशेषणत्वम्, न स्वरुपेण, न हि भूतपूर्वाद् गोष्ठशब्दात्प्रत्ययो विधातुं शक्यते। गोष्ठो वर्त्तत इति। सम्प्रति गवामवस्तानं दर्शयति ।।

अस्वयैकाहगमः ।। 5.2.19 ।।

एकाहेन गम्यत इत्येकाहगमः, `ग्रहवृदृनिश्चिगमश्च' इत्यपं बाधित्वा `परिमाणाख्यायां सर्वेभ्यः' इति, अस्ति कचात्र परिमाणाख्या, एकाहेन गम्यत इति परिच्छेदावगमाद्, अस्मादेव निपातनादपद्रष्टव्यः, `कर्कर्तृकरणे कृता बहुलम्' इति समासः। अश्वस्येति। कर्त्तरि षष्ठी। अश्वीनानि शतं पतित्वेति। यावन्ति योजनान्येकाहेनाश्वेन गम्यते, तावतां शतं गत्वेत्यर्थः ।।

शालीनकौपीने अधृष्टाकार्ययोः ।। 5.2.20 ।।
यथाकथञ्चिदिति। नात्रावयवार्थेऽभिनिवेष्टव्यमित्यर्थः। अभिनिवेशे तु यःक शालायामधृष्टो भार्याजितत्वादन्यत्र धृष्टः, यच्च कूपे अकार्यं मूत्रणादि, कथं तस्याभिधानं प्रागोति, कथं तर्हि विवक्षितार्थः ? इत्याह--शालाप्रवेशमर्हतीति। यदकार्यं तत्प्रच्छादनीयत्वात्कूपावतरणमर्हतीत्यर्थः। उत्तरपदालोपश्चेति। वृत्तिविषये शालाकूपशब्दौ तत्कर्मिकायां क्रियायां वर्तेतते इति गम्यमानत्वादप्रयोग एव लोपः। कौपीनं पापमिति। पापसाधनत्वात्तु पुरुषलिङ्गे कौपीनशब्दः, साधार्म्याद्वा; साधर्म्यं गोप्यत्वात्। तत्साहचर्याच्च तदाच्छादने वासःखण्डे। अपर आह---कार्यशब्दे करोतिः क्रियासामान्यवचनः, तेन लज्जाहेतुत्वेनाद्रष्टव्यत्वात्पुरुषलिङ्गं कौपीनम्, अस्पृश्यत्वाच्च तदाच्छादनमिति ।।

व्रातेन जीवति ।। 5.2.21 ।।
व्रातशबह्दो लोके सह्घमात्रवचनः, इह तु न तथेति दर्शयितुं भाष्यग्रन्थं पठति। नानजीतीया इति। अनेन चैकजातीयक्षत्त्रियादिसह्घनिराकरणम्। अनियतवृत्तय इति। नियतवृत्त्यायुधजीविसङ्गनिषेधः। उत्सेधजीविन इत्येतद्व्याचष्टे। उत्सेधः शरीरमिति। उच्छ्रायत्वात्। तदायास्येति। आयासेर्ण्यन्ताल्ल्यप्, तेन सकर्मकत्वम्। अण्यन्तपाठे त्वन्तर्भावितण्यर्थत्वात्सकर्मकत्वं द्रष्टयम्। शरीरायासेन बारवहनादिना जीवन्ति, न तु बुद्धिभावेनेत्यर्थः। व्राता इति। सङ्घवचनोऽयमिह सङ्घिषु प्रयुक्तः। एवंभूतानां यः सङ्घस्तद्व्रातमित्यर्थः। एवमपि तथाभूतेन सङ्घेन ये जीवन्ति तत्र प्राप्नोति,न चेष्यते ? तत्राह--तेषां कर्म व्रातमिति। इदमर्थे छे प्राप्तेऽस्मादेव निपातनादण्। यस्त्वन्य इत्यादि। अनभिधानमत्र हेतुः ।।

साप्तपदीनं सख्यम् ।। 5.2.22 ।।
साप्तपदीनमिति निपात्यत इति। किं पुनरत्र निपात्यते ? समर्थविभक्तिस्तृतीया। अवाप्यत इति प्रत्ययार्थः, सप्तभिः पदैरवाप्यत इति तद्वितार्थे द्विगुः समासः, सप्तपदशब्दात्खञ्। कथमिति। सख्युर्भावः कर्म वा सख्यम्, तत्र व्युत्पादितस्य न सखिशब्देन प्रश्नः, उपचारेणेत्युत्तरम्, गुणप्रधान इति। गुणो भावः, कर्म च भावः, प्रवृत्तिनिमित्तत्वाद्गुणः। यस्य हि गुणस्य भावादिति कर्माणि हि सख्यशब्दवाच्यत्वाद्गुण इत्युक्तम् ।।

हैयङ्गवीनं सञ्ज्ञयाम् ।। 5.2.23 ।।
ह्योगोदोहस्य विकार इति। दुह्यत इति दोहः=क्षीरम्, गोर्दोहो गोदोह इति षष्ठीसमासः, ह्यः शब्दस्य तेन `सुप्सुपा' इति समासः, ततो विकारेऽनुदात्तलक्षणस्याञोऽपवादः, खञ्। घृतस्यैषा संज्ञेति। घृतस्यापि न सर्वस्य, किं तर्हि ? तस्यैवाविकृतगन्धरूपस्य। ह्यःशब्देन कालप्रत्यासत्तिप्रतिपादनाद् नवनीतं हैयङ्गवीनमुत्यते, घृतशब्दोऽपि तत्रैव प्रयुक्तः ।।

तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ।। 5.2.24 ।।
पाकः=परिणामः, मूलः=उपक्रमः। `तस्येदम्' इत्यणादिषु प्राप्तेष्वयमारम्भः, जकारस्य प्रयोजनाभावादित्संज्ञाभावः ।।

पक्षात्तिः ।। 5.2.25 ।।
एकयोगशिष्टानामपि शब्दानां शब्दादिकारपक्षे यस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञायते, तस्यैवानुवृत्तिर्भवति। तथा च `दामहायनान्ताच्च' इत्यत्र सङ्घया हणमनुवर्त्तते, नाव्ययग्रहणम्। अर्थाधिकारपक्षे तु युगपदन्योऽन्यार्थाभिधायिनां द्वन्द्वविधानाद् द्वन्द्वार्थविच्छेदान्न स्यादेकदेशानुवृत्तिः। पक्षस्य मूलं पक्षतिः=प्रतिपदि, पक्षिणश्च पक्षमूले प्रयुज्यते ।।

तेन वित्तरचुञ्चुप्चणपौ ।। 5.2.26 ।।
वित्तः प्रतीत इति। `वित्तो बोगप्रत्यययोः' इति निपातनात्, चुञअचुप्चणपोश्चकारस्य यथेत्संज्ञा न भवति, तथा `चुटू' इत्यत्रैव वृत्तिकारेणोक्तम् ।।

विनञ्भ्यां नानाञौ नसह ।। 5.2.27 ।।
नसहेति प्रकृत्यर्थविसेषणमिति। यदि प्रत्ययार्थः स्यात्ततो द्वौ प्रतिषेधौ प्रकृतमेवार्थ गमयत इति सहार्थ एव गम्येत, न नसह, अपि तु सहैवेति। तस्मात्प्रकृत्यर्थ एव भवति। एतच्च व्याख्यानाल्लभ्यते। यद्येवम्,सहेत्येव प्रत्ययार्थोऽस्तु, विनञोः प्रतिषेधार्थत्वात्, विगर्दभारथक इत्यादौ विशब्दस्यापि प्रतिषेधे वृत्तिर्दृष्टैव ? सत्यम्; क्रियावाचिनो विशब्दात्सहार्थे प्रत्ययो विज्ञायेत--विगतौ सह विकृतौ सहेति, नाञो ञकारो वृद्ध्यार्थः, स्वरार्थश्च ।।

वेः शालच्छङ्कटच्चौ ।। 5.2.28 ।।

क्व पुनरेते शालजादयो भवन्ति ? इत्याह--ससाधनक्रियावचनादिति। क्रियाविशिष्टसाधनवचनादित्यर्थः। एतच्च `उपसर्गाच्छन्दसि धात्वर्थे' इत्यत्र प्रत्यपादि। उपसर्गादिति। अन्यत्रोपसर्गसंज्ञादर्शनाद्विषयान्तरेऽपि प्रादीनामभिधानम्। स्वार्थ इति। अनिर्दिष्टार्थत्वात्। विगते इति। विगमनक्रियाकर्त्तरि वेर्वृत्ति दर्शयति। तद्योगादिति। विशालावयवयोगात्, व्युत्पत्तिपक्षे नान्या गतिरिति भावः।

वस्तुगतिमाह--परमार्थतस्त्विति। विशालत्वम्=विस्तीर्णत्वं नाम गुणः, तस्माद्गुणवचना एते। वक्ष्मयाणप्रत्ययापेक्षया बहुवचनम्; ततश्च यद्गुणयोगाच्छङ्गे वृत्तिस्तद्गणयोगादेव गव्यपि वृत्तिः सिद्धेति भावः। तथा च-विशालो देश इत्यपि दृश्यते ।।

संप्रोदश्च कटच् ।। 5.2.29 ।।

कटच्प्रत्ययो भवतीति। पूर्ववत्ससाधनक्रियावचनेभ्यस्वार्थे। सङ्कटः=प्रज्ञातः, प्रकाश इत्यर्थः। उत्कटः=उद्भूतः। विकटः=विकृतः।

अलाबूतिलेत्यादि। भङ्गाभ्य इति पाठः, भह्गाशब्दष्टावन्तः। यथालाबूप्रभृतिभ्यो रजस्यभिधेये कटच्प्रत्ययो भवति, रजसो विकारत्वाद्विकारप्रत्ययानामपवादः। तत्रालाबूशब्दादोरञः, `मयड् वैतयोः' इति मयटश्चापवादः। तिलोमाशब्दाभ्यां घृतादित्वादन्तोदात्ताब्याम् `अनुदात्तादेश्च' इत्यञो मयटश्च। `उमोर्णयोर्वा' इति वुञ्श्च, `असंज्ञायां तिलयवाभ्याम्' इति मयटश्च। भङ्गायाः `तृणधान्यानां च द्वयषाम्' इत्याद्युदात्तत्वादणो मयदस्च। गोष्ठादय इति। प्रयोगसमवायिप्रत्ययरूपं निर्दिष्टम्। चकारस्तु स्वरार्थेऽनुबन्द्वव्यः। तथा हि--समासाश्रयेण भाष्ये एतत्प्रत्याख्यातम्, समासे चान्तोदात्तत्वं भवति। सर्वत्रादिशब्दः प्रकारे। गवां स्थानमिति। `तस्येदम्' इत्यत्रार्थे `सर्वत्र गोरजादिप्रत्ययप्रसङ्गे यत्' इति यति प्राप्ते गोष्ठच्प्रत्ययः; अप्रसृतावयवः समूहः=सङ्घातः, प्रसृतावयवस्तु=विस्तारः, उभावपि सामूहितानामपवादौ।

द्वित्व इति। प्रकृत्यर्थस्य द्वित्वे द्योत्य इत्यर्थः। उष्टगोयुगमिति। द्वयं युगमित्यादिवद् द्वयवयवसङ्घाभिधायित्वादेकवचनम्। एवं हस्ति???गवमित्यादावपि द्रष्टव्यम्।

स्नेह इति। स्निहयन्त्यनेनेति स्नेहः=द्रवरूप इङ्गुदादीनां विकारः। तत्र इङ्गुदशब्दः `लघावन्ते' इत्याद्युदात्तः, ततः `तस्य विकारः' इत्यण्प्रत्ययः प्राप्तः; तिलशब्दाद् `अनुदात्तादेश्च' इत्यञ् प्राप्त, सोऽपि त्विष्यते-तिलानां विकारस्तैलमिति, तत्तर्हीदं बहु वक्तवम् ? नेत्याह; उपमानात्सिद्धम्। कथम् ? गावस्तिष्ठन्त्यस्मिन्नति गोष्ठम्, तत्साधर्म्यादुष्ट्रादिस्थानमपि गोष्ठमित्युच्यते। तत्र विसेषप्रतिपत्त्यर्थमुष्टादिभिर्विशेष्टते--उष्ट्रगोष्ठम्, महिषगोष्ठम्; मुख्यार्थप्रतिपत्तये गोभिरपि गोगोष्ठमिति। यथा गोपतिशब्दे स्वामिमात्रपरतया प्रयुक्ते गोभिरपि विशेषणम्--`गवामसि गोपतिरेक इन्द्रः' `विज्ञा हित्वा गोपतिं शूर गोनाम्' इति, तथा नानाद्रव्याणां रज्जुवीरणादीनां सङ्घातः कटः, तत्साधर्म्यादन्योऽपि सङ्गातःक कटशब्देनोच्यते, स चाविप्रभृतिभिर्विशेषयिष्यते, एवं पटवद्विस्तीर्णोऽविसहगोऽविपट इति। तथा युगशब्देन द्वयमुच्यते--गवोर्युगं गोयुगम्, द्वयात्मत्वसामान्यादन्यदपि युगलं गोयुगमित्युच्यते, तत उष्ट्रादिभिर्विशेष्यते, मुख्यगोयुगप्रतिपत्तये गवापि। तथा षड् गावः समाहृताः पड्गवम्, `गोरतद्धितलुकि' इति टच्, पात्रादित्वान्नपुंसकत्वम्। तत्साधर्म्यादित्यादि पूर्ववत्। तथा तिलविकारो मुख्यं तैलं तत्सादृश्याद् द्रवरुपं विकारमात्रं तैलम्, तत इङ्गुदादिभिस्तिलैश्च विशेषणम्। एवं च कृत्वा तिलानां विकारस्तैलमित्यपि भवति, वाक्यप्रारम्भे चु तैलचा बाधितत्वादन स्यात्।

उपर आह--`यथा प्रकृष्टो वीणायां प्रवीण इति व्युत्पत्तिमात्रं क्रियते, कौशलमेव त्वस्य निमित्तम्, तथा च वीणायां प्रविण इत्यपि भवति; तथा तिलानां विकारस्तैलमिति व्युत्पत्तिमात्रम्, द्रवरूपो विकारस्त्वस्यार्थः। तथा चेङ्गुदादिभिर्विसेषणसिद्धिः'तत्तु न रोचयामहे; न हि तैलमित्युक्ते द्रवरूपं विकारमात्रं प्रतियन्ति। शाकटच्शाकिनौ तु वक्तव्यावेव ।।

अवात् कुटारच्च ।। 5.2.30 ।।

अवकुटारम्, अवकटमिति। अवाचीनम्, अप्रसिद्धमित्यर्थः ।।

नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः ।। 5.2.31 ।।

नमनं नतमिति। `नपुंसके भावे क्तः' नीचैस्त्वमित्यर्थः। नासिकायाः सम्बन्धइनीति। सम्बन्धश्च नमने कर्तृत्वेन, सूत्रे तु `नपुंसके भाव उपसंख्यानाम्' इति कर्त्तरि षष्ठी। यद्वा--शेषविज्ञानात्सिद्धमिति शेषलक्षणैव। अवटीटादिषु नासिकासाधने नमने वर्त्तमानादुपसर्गात्स्वार्थे प्रत्ययः। कथं तर्हि नासिका पुरुषश्च तथोच्यते ? इत्याह---तद्योगादिति। टीटञष्टकारस्येत्संज्ञभावः `चुटू' इत्यत्रैव व्यख्यातः ।।

इनच्पिटच्चिक चि च ।। 5.2.33 ।।

ककारः प्रत्यय इति। अकारो विवक्षितः; चकारः, एवकार इत्यादिवत् कारशब्दः, कप्रत्यय ित्यर्थः। तथा चोक्तमिति। सूत्रे निशब्दस्य द्वावादेशौ द्वौ च प्रत्ययौ विहितावित्यादेशप्रत्ययात्रविधानार्थमेतद् वार्त्तिककारोणोक्तम्। अस्य चक्षुषी इत्येतस्मिन्नर्थ इति। यद्यपि चक्षुषी प्रकृत्यर्थविशेषणम्, अस्येति षष्ठ्यर्थे प्रत्ययः, तथापि क्लिन्नत्वस्य चक्षुर्गतत्वं प्रत्ययस्यैव द्योत्यभिति मत्वैवमुक्तम्।

अस्येत्यनेनेति। वाक्यैकदेशं प्रत्याचष्टे, कस्मात्? नार्थः, इत्याह। चक्षुषोरेवभिधान इति। चक्षुषोर्वर्त्तमानात्क्लिन्नशब्दात्स्वार्थे प्रत्यय इत्यर्थः। कथं तर्हिपुरुषस्याभिधानम् ? इत्याह--तद्योगादित्यादि। अर्शआदिषु `स्वाङ्गाद्धीनात्' इति पठ्यते, तेन मत्वर्थेऽकारः ।।

उपाधिब्यां त्यकन्नासन्नारूढयोः ।। 5.2.34 ।।

नियतविषयमिति। पर्वतविषयम्। आस तेन वृक्षस्यासन्नम्, प्लक्षस्यारूढमित्यत्र न भवतीतति भावः। अथोपत्यका, अधित्यकेत्यत्र `प्रत्ययस्थात् कात् पूर्वस्य' इत्यनेनेत्त्वं करमान्न भवति ? इत्यत आह---प्रत्ययस्थात् कादिति। यद्यत्रेत्त्वं स्यात् संज्ञारूपं न सिध्येत्; नोपत्यिकाधित्यिकेत्येवंरूपा संज्ञा। तस्मात् संज्ञाधिकारादित्त्वं न भवति ।।

कर्मणि घटोऽठच् ।। 5.2.35 ।।

`कर्मणि' इत्यनेन कर्मणीति स्वलरूपग्रहणं दर्शयति। अथ पारिभाषिकस्य कर्मणो ग्रहणं करमान्न भवति ? असम्भवात्। असम्भवत्तु घटतेरकर्मकत्वात्। अठच्प्रत्येयेऽकारोच्चारणं ठस्येकादेशनिवृत्त्यर्थम् ।।

तदस्य सञ्जातं तारकादिभ्य इतच् ।। 5.2.36 ।।

तारकादिषु बुभुक्षा-पिपासाशब्दौ पठ्येते, तयोः किमर्थःक पाठः, यावता सन्नन्ताभ्यां निष्ठायामिटि च कृते बुभुक्षितः, पिपासितो पिपासित इति ? सत्यं कर्मणि सिद्धम्--बुभुक्षित ओदनः, पिपासितमुदकमिति; कर्त्तरि तु न प्राप्नोति--बुभुक्षितो देवदत्तः, पिपासितो देवदत इति। अनेन तु यस्य बुभुक्षापिपासे सञ्जाते तत्र प्रत्यय उत्पद्यते।

पुष्पादीनां तर्हि किमर्थः पाठः, `पुष्प विकसने', `मूत्र प्रस्त्रवमे,' `व्रण गात्रविचूर्णने'--- एब्योऽकर्मकत्वात्कर्तरि क्ते--पुष्पितः, मूत्रित इत्यादि सिद्धम् ? सत्यम् भूते सिद्धम्; वर्त्तमाने तु न सिद्धयति, अतो कवर्त्तमानार्थस्तेषां पाठ। कथं पुनरनेन वर्तमाने भवति, याताऽत्रापि `सञ्जात' इति भूते निष्ठा ? एवं तर्हि गणे पुष्पादीनां पाठसामर्थ्यात्सञ्जातमित्यत्र भूतकालो न विवक्ष्यते। गर्भादप्राणिनीति। गर्भशब्दादप्राणिन्यभिधेये इतञ्भवति--गर्भिताः शालयः, प्राणिनि तु गर्भिणी गौः ।।

प्रमाणे द्वयसज्दघ्नञ्मात्रचः ।। 5.2.37 ।।

यत्तत्प्रथमासमर्थं प्रमाणं चेत्तद्भवतीति। अनेन प्रकृत्यर्थविशेषणत्वं प्रमाणस्य दर्शयति। यदि तु प्रत्ययार्थविशेषणं स्यात्--यत्तदस्येति निर्द्दिष्ट प्रमाणंचेत्तद्भवतीति; तदा प्रमाणस्य प्रमेयापेक्षत्वात्प्रमेयं प्रकृत्यर्थः स्यात् यथा प्रकृत्यर्थविशेषणत्वे प्रमेयं प्रत्यथार्थः, ततश्चेह प्राप्नोति--उदकं प्रमेयमस्योरोरिति, एतच्चायुक्तम्; अनियतप्रमेयविषयत्वात्प्रमाणानामेकेन विशेषणस्यान्याय्यत्वात्, प्रमेयस्य तु नियतप्रमाणत्वप्रतिपादनायोरुमात्रादयः शब्दाः प्रयुज्यन्ते।

प्रथमश्च द्वितीयश्चेति। उर्ध्वावस्तितेन येन मीयते तदूर्ध्वमानम्, उर्वादि। तत्र केचिदाहुः--`आयाममामनमेव प्रमाणं सूत्रे गृह्यते, तिर्यङ्मानमेव चायाममानम्, ततश्चोर्ध्वमानेऽप्रप्तौ द्वयसज्जघ्नचौ प्रमाणादपकृष्येह विधीयेते' इति। अपर आह--`ऊर्ध्वावस्तितेनापि येनायामः परिच्छिद्यते तदप्यायाममानत्वात् प्रमाणमिति सूत्रे गृह्यते। वचनं तूर्ध्वमान एव यथा स्यातां तिर्यङ्माने मा भूतामिति नियमार्थम्' इति। अन्यस्त्वाह--`परिच्वेदकमात्रं प्रमाणमिहर गृह्यते' इति; तत्रापि नियमार्थमेतत्। मात्रं प्रमाणम्, ततो न्यायप्राप्तानुवादोऽयम्। प्रस्थामात्रमित्यपीति। अपि शब्दादूरुमात्रमित्यपि भवति।

प्रमाणे ल इति। लुक एषा पूर्वाचार्यसंज्ञा। प्रमाणमिति ये प्रसिद्धा इति। `प्रबाणशब्दा एते' इति ये प्रसिद्धाः---दिष्टिवितस्त्यादय इत्यर्थः शमः, दिष्टिः, वितस्तिरिति। अत्र मात्रयो लुग्; इतरयोरसम्भवात्। शमादीनामनूर्ध्वमानत्वाद्।

द्विगोर्नित्यमिति। द्विगोरप्रमाणत्वात्तदन्तविध्यबावाच्च पूर्वेणाप्राप्तो लुग्विधीयते। नित्यग्रहणं किमिति। नात्र विकल्पः प्रकृत इति प्रश्नः। संशये श्रीविणं वक्ष्यतीति। श्रवणं श्रावः, `कृयल्युटो वहुलम्', इति घञ्, सोऽस्यास्तीति श्रावी, `प्रमाणपरिमाणाभ्यां सङ्खयायाश्चापि संशये' इति वक्ष्यमाणस्य मात्रचः `प्रमाणे लः' इत्यनेन लुग्न भवति, परत्वाद्; अतोऽमौ श्रावी। अस्य द्विगावपि श्रवणे प्राप्ते लुग्विदीयत इत्यर्थः। द्वौ शमौ प्रमाणमस्य द्विशमः। कथं पुनरव संशये मात्रच उत्पत्तिः ? तदन्तविधइना। एतदेव लुग्वचनं ज्ञापकम्-अस्त्यत्र तदन्तविधिरिति। प्रकारणादिवशादस्य निश्चयसंसयविपयता प्रयोगस्यावसेया।

स्तोमे डड्वक्तव्य इति। अत्रायाममानस्यासम्भवात्परिच्छेदोपाधिकायाः सङ्ख्यायाः स्तोमेऽभिधेये डट्प्रत्ययः। डित्करणमेकविंश इत्यत्र ति शब्दस्य लोपार्थम्, त्रयस्त्रिंशादौ टिलोपार्थं च। पञ्चदसादौ `नस्तद्धिते' इत्येव सिद्धम्---पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशः स्तोमः, सप्तदशी रात्रिरिति। स्तोमसाहचर्याद्रात्र्यादौ स्त्रियां वृत्तिः, टित्त्वान्ङीप् `तदस्य परिमाणम्' `सङ्ख्यायाः संज्ञा' इत्यत्र तु स्तेमे डो विहितः, तत्र टाब् भवति यद्यस्ति प्रयोगः, अथ तु नस्ति ततोऽस्यैव स प्रपञ्चः।

शन्सतोर्हिनिर्वक्तव्य इति। एवं च छन्दसि च भाषायां च डिर्नेर्विधानात् `सङ्ख्यायाः संज्ञासङ्घ' इत्यत्र `शन्शतोर्डिनिश्छन्दसि' इति वचनं प्रपञ्चार्थमेव। विशिनोऽङ्गिरस इति। प्रवरभेदेन विंशतिर्भेदा उच्यन्ते, तत्र विंशतिशब्दात्सङ्खयानमात्रवाचिनः संख्येये प्रमेये डिनिः, `ति विंशतेर्डिति' इति लोपः, यस्येतिलोपश्च।

प्रमाणपरिमाणाभ्यामिति। रूढिशब्दावेतौ; भेदेनोपादानात्। शममात्रमिति। शमः प्रमाणमस्य स्यान्न वेत्यत्रार्थे मात्रच्। पञ्चमात्रा इति। पञ्च स्युर्न वेति

संशय्यमानार्थवाचिनः षष्ठ्यर्थे प्रत्ययः। पञ्चत्वसङ्ख्या प्रमाणमेषां स्याद्वा न वेति पञ्चमात्राः। तावदेविति। तत्परिमाणमस्य धान्यादिस्तावत्, ततः स्वार्थे ??????। उत्तरसूत्रे तु `भावः सिद्धश्च डावतोः' इत्यर्थान्तरे वक्ष्यते ।।

पुरुषहिस्तिभ्यामण् च ।। 5.2.38 ।।
हास्तिनमिति। `इनण्यनपत्ये' इति प्रकृतिभावः।
द्विगोर्नित्यं लुगिति। नायम् `प्रमाणे लो द्विगोर्नित्यम्' इत्यस्यानुवादः; पुरुषहस्तिनोः शमादिवत्प्रमाणतत्त्वेनाप्रसिद्धत्वात्। अत एव पुरुषद्वयसमित्यादौ `प्रमाणे लः' इति लुग्न भवति; अन्यथाणो विधानसामर्थ्याल्लुगभावेऽपि द्वयसजादीनां स्यादेव। तस्माद् पूर्वोऽत्र लुग्विधीयते। स च द्वयसजादीनां नाणः, ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधाद् द्विगोरणः प्राप्त्यभावात्। द्विपुरुषीति। `पूरुषात्प्रमाणेऽन्यतरस्याम्' इति ङीप् ।।

यत्तदेतेभ्यः परिमाणे वतुप् ।। 5.2.39 ।।
यावानिति। `आ सर्वनाम्नः' इत्यात्वम्। `उगिदचाम्' इति नुम्, `अत्वसन्तस्य' इति दीर्घः, हलङ्यादिसंयोगान्तलोपौ। प्रमाणपरिमाणयोरेकत्वं मत्वा यश्चोदयेत्--हलङ्यादिसंयोगान्तलोपौ। प्रमाणपरिमाणयोरेकत्वं मत्वा यश्चोदयेत्--परिमाणग्रहणमनर्थकम् प्रमाणाधिकारदिति ? तं प्रत्याह--प्रमाण इति वर्तमाने इत्यादि। स पुनरनयोर्भेदः `परिमाणं तु सर्वतः, आयामस्तु प्रमाणं स्यात्' इति पूर्वमेव व्याख्यातः। डावताविति। इहास्माभिर्वतुपं विधाय `आ सर्व नाम्नः' इत्यात्वं विहितम्। पूर्वाचार्यास्तु डावतुं विदधिरे, तदपेक्षोऽयं निर्देशः। विशिष्यत इति विसेषः, तस्य भावो वैशेष्यम्, अर्थवैसेष्यादर्थबेदात्परिमाणस्य प्रमाणात् पृथग्निर्देशः, उच्यते क्रियत इत्यर्थः। स्यादेतत्--`यद्यपि प्रमाणपरिमाणशब्दयोरर्थो भिद्यचते, तथापि प्रमाणग्रहणमेवानुवर्त्त्य तदुपाधिकेभ्य एव वतुब्विदेयः। तत्रायमप्यर्थः---इदमपि सिद्धं भवति---यावानध्वा, यावती रज्जुरिति, अत्र ह्यायाममानं गम्यते। ये तु परिमाणे प्रयोगाः---यावान् धान्यराशिरित्यादयः, तेऽप्युपमानाद्भविष्यन्ति। यथा सिद्धान्ते यावानध्वा यावती रज्जुः यावत्कृत्वो भुङ्क्त इत्यादयः' इति, तत्राह---मात्राद्यप्रतिघातायेति। यदि यथोक्तं क्रियेत ततो डावतुर्विशेषविहितत्वात्सामान्यविहितान्मात्रजादीन्बाधेन। परिमाणग्रहणे तु सति भिन्नोपाधिकत्वाद् बाध्यबाधकभावाभावः, तेन तन्मात्रं यन्मात्रमित्यादि प्रमाणे सिद्धं भवतीति। भावः सिद्धश्चेति। तत्परिमाणमस्य धान्यस्य दैर्घ्यं तादृगस्यापीत्यर्थः। तदेवं भिन्नविषयत्वे सति वत्वन्तान्मात्रादयः सिद्धयन्ति। एकविषयत्वे तु वतुपैव विशिष्टस्य प्रमेयस्योक्तत्वात्तदन्तान्मात्रादयो न स्युः,। यस्या हि तावत्प्रमाणं तस्य तत्प्रमाणमिति तावच्छब्दस्यैव तत्रापि प्रयोगः स्याद्; अन्यथा हि मात्रजादिप्रत्ययमालाप्रसङ्गः।

किमिदम्भ्यां वो घः ।। 5.2.40 ।।
कियान्, इयानिति। `इदं किमोरीश्की', यस्येतिलोपः। एतदेवेति। आदेशविधानान्यथानुपपत्त्या प्रत्ययोऽनुमीयते। योगविभागेन वेति। एवं प्रतिपादिते लाघवं भवति। `आदेः परस्य' इत्येव सिद्धे `वः' इति कवचनमादेशप्रतिपत्त्यर्थम्; इत्रथा हि घः प्रत्ययान्तरं विज्ञायेत ।।

किमः सङ्ख्यापरिमाणे इति च ।। 5.2.41 ।।
सङ्ख्यायाः परिमाणमिति। करणस्य कर्तृत्वविवक्षया कृद्योगलक्षणा कर्त्तरि षष्ठी। परिमितिः=परिमाणम्। सङ्ख्या परिच्छेद इति।। सह्ख्या यं परिच्छेदं परोति तत्रेत्यर्थः। तस्य च वकारस्य घकार इति। `वो घः' इत्यनुवृत्तेः। ननु का संख्या परिमाणमेषामित्यत्र किंशब्दः परिच्चेदिकायां सङ्खयायां वर्त्तते, न पुनः परिच्छेदे? तत्राह---पृच्छ्यमानत्वादिति। परिच्छेदकत्वविशिष्टा संख्या पृच्छयते--का संख्या परिच्छेदिकैषामिति, तत्र परिच्छेदस्यापि पृच्छयमानाकारान्तर्भावात्संक्यापरिच्छेदे वर्त्तमानादित्युक्तमित्यर्थः। अपर आह--``संख्यायाः' इति कर्मणि षष्ठी, संख्यापरिच्छेदार्थप्रश्ने वर्त्तमानः संख्यापरिच्छेदे वर्तत इत्युच्यते। संख्यायां परिच्छेत्तुमिष्टायां यः प्रश्नस्तत्र वर्तमानादित्यर्थः' इति। कति। `षहुष्विति वृत्तौ बहुवचनमेव भवति। उक्तं च--`अनिर्ज्ञातेर्ऽर्थे बहुवचनं प्रयोक्तव्यम्' इति। कथं तर्हि कियान्, कियन्ताविति ? नात्र संख्याप्रश्ने किशब्दः, किं तर्हि ? परिमाणमात्रप्रश्ने। संख्याप्रश्ने तु तत्रापि बहुवचनमेव भवति--कियन्तो ब्राह्मणा इति। यदीया च संख्या पृच्छयते तत्र प्रत्ययाः, तेन का संख्या हि तदा प्रत्ययेन भाव्यम्--कति गावोऽस्मिन्वर्ग इति। सङ्घसङ्घिनोरभेदविवक्षायां तु--कति गावोऽ??? वर्ग इति, न तु व्यवस्थितसंख्यासम्बन्धे वर्गे, वर्गसंख्याप्रश्ने तु कति वर्गा इति भवति। अथ वेत्यादि। अस्मिन्पक्षे संख्यापरिमाण इति कर्मधारयः, निपातनाच्च विशेषणस्य परनिपातः, करणसाधनश्च परिमाणशब्दः। एवमात्मिकेत्यस्य विवरणम्--परिच्छेदस्वभावेति। यत्रापरिच्छेदकत्वेन विवक्ष्यते इति। परिच्छेदकत्वेन न विवक्ष्यत इत्यर्थः। तथैव वा पाठः। क्व पुनरेवं न विवक्ष्यते ? इत्याह--क्षेपे हीति। केयमेषामिति। केयमीदृशानां दशत्वसंख्या येषांम् ।
अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्।
सहस्त्रशः समेतानां परिषत्त्वं न विद्यते ।। इति।
एवं संख्येयद्वारेण संख्यायां क्षेपः। प्रकृतः परिमाणशब्दो रूढिशब्दत्वात् संख्याया परिसम्बन्द्धुं नार्हतीति परिच्छइत्तिमात्रावचनः पुनरिहोपात्तः ।।

संख्याया अवयवे तयप् ।। 5.2.42 ।।

इहास्येत्यधिकारात्संख्याया अवयवे वर्त्तमानायाः स्वार्थे तावत्प्रत्ययो न भवति; अवयवस्वामिनि तु प्राप्नोति--पञ्च अवयवा अस्य देवदत्तस्येति। तत्राह--अवयवावयविनः सम्बन्धिन इति। अवयवशब्दस्य सम्बन्धिशब्दत्वाद्यं प्रत्यवयवत्वं तत्रैवावयविनि प्रत्यय इत्यर्थः। यथा द्वयसजादिषु प्रमाणे प्रकृत्यर्थे प्रमेयः प्रत्ययार्थः, तद्वत्। ????????? रेफस्य विसर्जनीये तस्य सत्वे `ह्रस्वात्तादौ तद्धिते' इति षत्वम्, `टिड्ढाणञ्' इति ङीप् ।।

द्वित्रिभ्यां तयस्यायज्वा ।। 5.2.43 ।।
ननु तयः प्रकृतः सोऽनुवर्त्तिष्यते, `द्वित्रिभ्याम्' इति पञ्चमी, `तस्मादित्युत्तरस्य' इति तस्य षष्ठ्यन्ततां सम्पादयिष्यति; तत्किं `तयस्य' इत्यनेन ? तत्राह--तयब्ग्रहणमित्यादि। असत्यामपेक्षायामनुवृत्तिः षष्ठीप्रकृतिश्च दुर्जानेति बावः। अथ प्रत्ययान्तरे को दोषः ? त्रयी गतिरिति तयब्निबन्धन ईकारो न स्यात्, `प्रथमचरमतय'क इति चैष विधिर्न स्याद्--द्वये, द्वया इति। क्वचित् तत्र को दोष इत्यादि वृत्तावेव वृत्तावेव पठ्यते। चकारः स्वरार्थ इति। तेन स्थानिवद्भावेनानुदात्तत्वं न भवति ।।

उभादुदात्तो नित्यम् ।। 5.2.44 ।।
उदात्तवचनसामर्थ्यादिति। अन्तोदात्तत्वस्य चित्स्वरेणैव सिद्धत्वात्। सर्वोदात्तत्वं तु न भवति, `अनुदात्तं पदमेकवर्जम्' इति वचनात्। नापि हे उभयेत्यत्रामन्त्रितानुदात्तत्वम्, उभयेत्यत्र चामन्त्रिताद्युदात्तत्वं बाधितुमुदात्तवचनम्; पुरस्तादपवादन्यायेन चित्स्वरस्यैव बाधनात्।
उभशब्दो यदि लौकिकी संज्ञेति। उभावित्युक्ते द्वाविति प्रतीतेः। अथ न संख्येति। कृत्वसुजादिसंख्याकार्यादर्शनात्; एकः, उभौ, त्रय इत्येवं लोके गणनाऽदर्शनाच्च। तस्य नित्यमयजादेश इति। अथ प्रत्ययान्तरमेवायः कस्मान्नाश्रितः, तत्रायमप्यर्थः--उदात्त इति न वक्तव्यं भवति, प्रत्ययस्वरेणैव सिद्धम्; यच्च सर्वनामसंज्ञायामुक्तमुभयशब्दस्य जसि सर्वादिपाठान्नित्या संज्ञा भवति, न `प्रथमचरमतय' इति विभाषा; व्यवस्थितविभाषाविज्ञाणत्पूर्वविप्रतिषेधाद्वेति, तदप्ययत्नसितद्धं भवति, कथम्, न ह्ययं तयप आदेशः ? सत्यम्; उभयीत्यत्र तु तयब्निबन्धन ईकारो न स्यात्। यदि तु ङीब्विधौ मात्रजित्ययचश्चकारेण प्रत्याहारग्रहणम्, ततः प्रत्ययान्तरत्वेऽप्ययचः सिद्ध ईकारः।
उदात्तग्रहणं नित्यग्रहणं च शक्यमकर्तुम्, ङीब्विधौ च तयपो ग्रहणम्।
अथ वा--दघ्नञ्मात्रचोरपि तत्र ग्रहणं शक्यमकर्तुम्, द्वयसजित्येवायचश्चकारेण प्रत्याहारोऽस्तु; तत्तु तथा नाश्रितमित्येव।
उभयो मणिरिति। उभौ पीतलोहितावययावस्येत्यवयवद्विनिबन्धनोऽवयविनो व्यपदेशः। उभये देवमनुष्या इति। वर्गद्वयापेक्षमतिरोहितभेदानां वर्गिणामिदमभिधानम् ।।

तदस्मिन्नधिकमिति दशान्ताड्डः ।। 5.2.45 ।।
अस्मिन्नधिकम्, यस्मादधिकमिति च निर्द्देशादधिकशब्दयोगे सप्तमीपञ्चम्यौ भवतः। अधिका खारी द्रोणेनेति कर्त्तरि तृतीयापि भवति। एकादश अधिका अस्मिन् शत इति। व्यपदेशिवद्बावोऽपि प्रातिपदिकेन प्रतिषिद्धः। प्रत्ययार्थेन चेत्यादि। प्रकृतिप्रत्ययार्थयोस्तुल्यजातीयत्वे प्रत्यय इत्यर्थः। न्यायसिद्धश्चायमर्थः। तथा हि--वाक्ये तावदेकादश अधिका अस्मिन् गोस्ते इति शतविशेषणत्वेनाप्युपात्ता गावः सन्निधानात्प्रकृत्यर्थमपि स्पृशान्ति। वृत्तावप्येकादशं गोशतमित्युक्ते प्रकृत्यर्थतया गावः सन्निहिता एव प्रतीयन्ते। यत्र तु विजातीयसंख्येयवाची शब्दः प्रयुज्यते, तत्र शब्दसन्निहितेन तेनान्यदर्थं सन्निहितं बाध्यते। न च वृत्तौ तादृशेन शब्देन प्रकृत्यर्थः शक्यो विशेषयितुम्; प्रत्ययार्थेनैकार्थीभूतत्वात्, यथा---वृद्धस्यौपगव इति ।।
शतसहस्रयोश्चेष्यत इति। इयमिष्टिरेव।
इतिकरणो विवक्षार्थस्ततः, इदं सर्व लभ्यत इति। यद्यपि पूर्वार्थो न्याया देव लभ्यते, तथापि `शतसहस्रयोश्चेष्यते' इत्ययमृथ इतिकरणादेव लभ्यते इति लाघवाय साधारणो हेतुरुपदिष्टः।
कथमित्यादि। शते सहस्रे चाभिधेये प्रत्ययो भवन्नत्र न प्राप्नोति, अत्र हि संख्यान्तरमधिकं शतसहस्रं नाम, न शतं सहस्रं वेति भावः। अत्रापि शतसहस्रयोरेवान्यतरस्य प्रत्ययार्थत्वं न संख्यान्तरस्येत्याह--शतानामिति। सहस्राणां वा शतमिति। अत्रापि पक्षे `संख्याया अल्पीयस्याः' इति द्वन्द्वे चाद्वन्द्वे च स्मरणाच्छतस्यैव पूर्वनिपातः। तत्र पूर्वस्मिन्विग्रहे शतानि संख्यायन्त इति तान्येव प्रकृत्यर्थः--एकादश शतान्यधिकान्यस्मिन्नेकादशं शतसहस्रमिति, उत्तरत्र तु सहस्राणां संख्येयत्वात्तान्येव प्रकृत्यर्थः--एकादशसहस्राण्यधिकान्यस्मिन्नेकादशं शतसहस्रमिति। प्रकरणादिवशाच्च शतानां वा संख्येयत्वावसायः ।
उक्तमेवार्थं श्लोकेन दर्शयति--अधिके समानजाताविति। प्रत्ययार्थसम्बन्धिन्या जात्या प्रकृत्यर्थस्य जातौ समानायां सत्यामधिकेऽर्थे वर्त्तमानात् प्रत्यय इत्यर्थः। यद्वा--`समानजातौ' इति बहुव्रीहिः। जात्यन्तलक्षमस्तु छो न भवति; भाष्यप्रयोगात्। प्रत्ययार्थेन समानजातीयेऽर्थे वर्त्तमानादित्यथः। इष्टमिति। प्रत्ययाख्यं कार्यम्। एकादशं शतसहस्रमित्यत्र निर्वाहार्थमाह--यस्य संख्येति। `शतानि सहस्राणि संख्यायन्ते', इत्युक्तम्, `अधिके समानजातौ' इति च, तेन यस्य संख्या यज्जातीयं संख्यायते। सामान्यपेक्षमेकवचनम्। तदाधिक्ये स कर्तव्यो मतो मम। एतच्चोदाहरण एव व्यक्तीकृतम्, नात्र किञ्चिदपूर्वमुक्तम् ।।
शदन्तविंशतेश्च ।। अन्तग्रहणमनर्थकम्, केवलस्य शतः प्रातिपदिकस्याभावात्; प्रत्ययग्रहणपरिभाषया तदन्तविधिर्भविष्यति, पङ्क्तयादिसूत्रे त्रिंशदादीनां शत्प्रत्ययान्तत्वेन निपातितत्वात्तत्राह--शद्ग्रहणेऽन्तग्रहणमिति। प्रत्ययग्रहणपरिभाषया तदन्तविधौ सति तदादिनियमः स्यात्, अस्मिस्त्वन्तग्रहणे सति यावतः

समुदायस्यान्ते शच्छब्दस्तावतो ग्रहणं भवति। संख्याग्रहणं चेति। `संक्याया अवयवे तयप्' इत्यतः संख्याग्रहणमनुवर्त्तनीयमित्यर्थः। तेन संख्यावाचिनः शदन्तात्प्रत्ययो भवतीत्यर्थः। एकत्रिशदादयश्च संख्यान्तरस्य वाचकाः, न तु समुदायस्य; तेन तेषामपि ग्रहणम्, गोत्रिशदादयश्च न संख्यावचना इति तेषामग्रहणम्।

विंशतेश्चेति। विंशतिशब्दानन्तरमन्तशब्दः पठितव्य इत्यर्थः; अन्यथा `ग्रहणवता' इति निषेधात्तदन्तान्न स्यात् ।।

संख्याया गुणस्य निमाने मयट् ।। तदस्य सज्जातमित्यत इति। तत्र तावत् `तदस्य' इति समुदायस्य स्वरितत्वं प्रतिज्ञातम्, अनुवृतं च बहुषु योगेषु। `तदस्मिन्नधिकम्' इत्यत्र तु पुनस्तच्छब्दोपादानान्त सम्बद्धयत इत्येतावत्। इह तु प्रतिबनधाभावात्स एव समुदायोऽनुवर्तत इत्यर्थः, तेन `तदस्मिन्' इत्यस्यैव तच्छब्दस्यानन्तर्यादनुवृत्तिर्युक्ता। `अस्मिन्' इत्यनेन विच्छइन्नत्वादस्येत्यनुवृत्तिश्चायुक्तेति न चोदनीयम्। निमानं मूल्यमिति। `मेङ् प्रणिदाने' इत्यस्मान्निपूर्वात्करणे ल्युट्, निमीयतेृक्रीयत इत्यर्थः। गुणस्येति। कर्मणि षष्ठी। सोऽपि सामर्थ्यादिति। गुणशब्दोऽपि सापेक्षं रूपमाचष्टे, तथा हि--द्विगुणम्, त्रिगुणमित्युक्ते किञ्चिदपेक्ष्येति गम्यते; तत्र निमेयस्य गुणत्वं सन्निहितं निमानमपेक्ष्येत्येतत्सामर्थ्यम्। यवानां द्वौ भागाविति। यद्यपि तुल्यमुभयत्रापि स्वत्यागः परकीयस्य ग्रहणम्, तथापि क्वचित्काचित्प्रसृततरा गतिः, तद्यथासमाने त्यागे धान्यं विक्रीणीत इत्युच्यते, न कश्चिदाह--कार्षापणी विक्रीणीत इति, तेन यवभागयोरेव निमानत्वम्, नोदश्विद्भागस्य। देशकालापेक्षो वा निमाननिमेयभावः। निमानस्य च निमेयापेक्षत्वान्निमेयं प्रत्यायार्थः, एकगुणस्यदश्वितो द्विगुणा यवा मूल्यमित्यर्थः। तद्यथा--प्रस्थस्योदश्वितो द्वौ प्रस्थौ यवाः, द्विमयमुदश्विद्यवानामिति। भागविशेषप्रतिपत्त्यथ प्रकृत्यर्थविशेषणस्य यवादेः प्रयोगः। द्विशब्दश्च वृत्तिविषये भागयोरेव संख्येययोर्वर्तत इति सम्बान्धिशब्दत्वेन नित्यसापेक्षत्वात्तद्धइतवृत्तिरविरुद्धा। कथं पुनः प्रत्ययान्तस्योदश्विच्छब्देन सामानाधिकरण्यम्, यावतोदश्विद्बागे प्रत्ययो विहितः, नोदश्विति ? तत्राह--भागेऽपि तु विधीयमान इति। अत्र चाभिधानस्वाभाव्यं हेतुः। अपर आह--यत्रोदश्वितो भागो द्विगुणैर्यवैः क्रीयते, तत्रार्थात्समुदायोऽपि द्विगुणैर्यवैः क्रीतो भवति बहुभिरेकेन वा, तदपेक्षं सामानाधिकारण्यमिति। गुणस्येति चैकत्वं विवक्षितमित्येतदर्थमेव हि `गुणनिमाने' इति लघुरपि निर्देशो न कृतः। द्वौ भागौ यवानां त्रयं उदश्वित इति। न तावद् `भूयसश्च वाचिकायाः' इत्युक्तमिति मत्वेदमुदाहृतम्, न त्वत्र द्विशब्दो भूयसो वाचकः। यद्वा उदाहरणदिगियं दर्शिता, त्रयो यवानां द्वावुदश्वित इति दर्शयितव्यम्, निमाननिमेयभावस्य विवर्ययो वा प्रष्टव्य। भूयसश्चेति। प्रत्ययार्थात्प्रकृत्यर्थस्य भूयसो या वाचिका संख्याततः प्रत्यय इत्यर्थः। इह न भवतीति। निमाननिमेययोः साम्यविषये न भवतीत्यर्थः; अन्यथा गुणस्येत्येकत्वविवक्षायामपि स्यादेव प्रसङ्गः। कुतस्तर्हि न भवति? अनभिधानात् ।

`बहोर्लोपो भू च वहोः' इति भूयःशब्दस्य व्युत्पादितत्वात्प्रकृत्यर्थस्य बहुतरत्वे सति प्रत्ययेन भाव्यम्, ततश्च द्विशब्दान्न स्यादित्याशङ्कयाह--भूयस इति चेति। गुणशब्द इत्यादि। न ह्ययं भागमात्रवचनः, किं तर्हि ? समानतामपि तस्य भागस्य ब्रूते ।

निमेये चापि दृश्यते इति। कथं तल्लभ्यते ? तन्त्रावृत्तेकशेषाणामन्यतमाश्रयणेन। द्वे अत्र वात्के; तत्रैकं व्याख्यात्म्, द्वितीये निमानमिति, कृत्यल्युटो `बहुलम्' इति कर्मणि ल्युट्।

गुणस्येति। करणस्य कर्तृत्वविवक्षायां कर्तरि षष्ठी, निमेयस्य निमानापेक्षत्वान्निमानं प्रत्ययार्थः, परिशिष्टं सर्वं पूर्ववत्। संख्याया इति किम् ? यवभागौ निमानमुदश्विद्भागस्य द्विवचनान्ताद्यवभागशब्दात्प्रत्ययो न भवति। व्रीहियवाविति। अत्रोदश्वित एव निमानं द्वौ न तद्भागस्य, तेन द्विमयमुश्विद् व्रीहियवाविति न भवति। द्विगुणं तैलं पच्यते क्षीरेणिति। क्षीरसम्बन्विनौ द्वौ गुणावस्मिस्तैल तत्तेनैव सुभगं सह क्षीरेण पच्यत इत्युच्यत इति ।।

तस्य पूरणे डट् ।। 5.2.48 ।।

तस्येत्येकत्वमविवक्षितम्। एकश्य पूरणासम्भवात्, तेन द्व्यादिब्यो द्विवचनबहुवचनान्तेभ्यः प्रत्ययः। पूर्यतेऽनेनेति पूरणमिति। करणे ल्युट्। पूर्यते इति। ण्यन्तात्कर्मणि यक्, न प्रकृत्यन्तरात्, कर्तरि श्यत्। यदि संख्यावाचिनः शब्दात्पूरणे प्रत्ययो भवति, इहापि प्राप्नोति-पञ्चानामन्यतो लब्धपञ्चसंख्यानामुष्ट्रिकाणां पूरणो घट इति ? तत्राह--येनेति। संख्येत्यस्य विवरणम्--संख्यानमिति। इह संख्यावाचिनः प्रत्ययो विधीयते, तत्र प्रत्यासत्त्या यस्य संख्यावाचिनो यत्प्रवृत्तिनिमित्तं संख्यानं पञ्चत्वादि, तस्य पूरण इति विज्ञायते; न तु विप्रकृष्टे पञ्चादिशब्दवाच्यानन्तर्भूतम्, यथा `अतिशायने तमविष्ठनौ' कुत्सित इत्यादाविति भावः। एकादशानां पूरण इति। तथा वैयाकरणपाश इत्यत्र प्रवृत्तिनिमित्तकुत्सायामपि याप्यो वैयाकरण इति विग्रहः, न तु याप्यं वैयाकरणत्वमितिः तथेहापि संख्यानपूरणे विवक्षिते संख्येयवाचिनापि विग्रहो न विरुध्यते। एकादश इति। पुनर्गणनायां क्रियमाणायां चरणबुद्धिस्थेन येनैकादशत्वसंख्या पूर्यते स इति वेदितव्यः। एवं च व्युत्क्रमेणाष्टाध्यायेषु गण्यमानेषु `समर्थः पदविधिः' इत्यध्यायो यदा चरमं गण्यते तदा निर्माणाद्वितीयस्यापि गणनाक्रमेणाष्टमत्वव्यपदेश े भवत्येव। ननु प्रकृत्यर्थव्यतिरिक्तेन प्रत्ययार्थेन भवितव्यम्, इह त्वेकादशस्वन्तर्भूत एकादशानीयन्तामित्युक्ते एकादशस्याप्यानयनात् ? सत्यम्, समुदायावचवयोस्तु भेदासमुदायः प्रकृत्यर्थोऽवयवः प्रत्ययार्थः, यथा-वृक्षस्यावयवो वार्क्षी शाखेति ।।

नान्तादसंख्यादेर्मट् ।। 5.2.49 ।।

डटो मडागमो भवतीति। कथं पुनरयमागमः शक्यो विज्ञातुम्, नात्रागमी निर्दिष्टः, यदपि प्रकृतं तदपि प्रथमान्तम्, षष्ठीनिर्दिष्टेन चेहार्थः ? अत आह--नान्तादिति। पञ्चमीग्रहणं तावदनुवर्तते, न च तस्य विधानार्थानुवृत्तिः, पूर्वमेव विहितत्वात्। न च विशेषविहितेन मटा बाधप्रसङ्गे विधानार्था डटोऽनुवृत्तिः, एवं हि प्रकृतस्य समुच्चयार्थश्चकारः क्रियेत, मट् चेति; यथान्यत्र। ततोऽनुवृत्तिसमामर्थ्यात्षठीप्रक्लृप्तावागमित्वमेव विज्ञायते। कः पुनर्मटः प्रत्ययत्वे

आगमत्वे वा विशेषः, यावता तदेव रूपं स एव स्वरः? सत्यम्; डटि मटि च नास्ति विशेषः, `विंशत्यादिभ्यस्तमडन्यतरस्याम्' इत्ययं तु तमड्यदि प्रत्ययः स्यादाद्युदात्तः स्याद्, आगमत्वेनागमानुदात्तत्वं भवति, न तु प्रत्ययस्वर इति विंशतितम इत्यस्यान्तोदात्तत्वं भवति।
एकादश इति। नायं संख्यासमुदायः, किं तर्हि ? संख्यान्तरमेव। अत एवात्र डड्भवति; अन्यथा सोऽपि न स्यात्। न हि संख्यासमुदायः संख्याग्रहणेन गृह्यते, यथा जनपदसमुदायो जनपदग्रहणेन-काशिकोशलीयाः। अथाप्ययं संख्यासमुदायः; तथापि संख्याग्रहणेन तत्समुदायो गृह्यत इति ज्ञापनार्थमेव `असंख्यादेः' इति वक्तव्यम्; तेन सर्वमेव संक्याकार्यमेकादशादीनामपि भवति ।।

षट्कतिकतिपयचतुरां थुक् ।। 5.2.51 ।।
तदिह सप्तम्या विपरिणम्यत इति। यदि पूर्ववत् षष्ठ्या विपरिणाम इष्टः स्यात्, पञ्चम्या निर्द्दिशेत्; षष्ठ्या निर्देशात्तु षषादीनामेवागमित्वं विज्ञायते। ततश्चानुवृत्तस्य डटोऽर्थात्सप्तम्या विपरिणाम इत्यर्थः। एवं च कृत्वा षष्ठाष्टमाभ्यां द्वितीयतृतीयतुर्थेति निर्द्देश उपपद्यते। कतिपयशब्दो न संख्येति। यद्यप्यसावतिप्रचयरहितं बहुत्वमाचष्टे, तथापि लोके संख्यात्वेन न प्रसिद्धिः, यथा--द्वित्राः पञ्चषा इति। साश्त्रेऽपि नैवास्य संख्यासंज्ञा विहिता, कथं तर्हि डट्प्रत्ययः ? इत्याह--तस्येति। किं पुनस्थुग्विधीयते, न पञ्चमीनिर्द्देशेन प्रकृतस्थडेव विधीयेत ? नैवं शक्यम्; इह षष्ठ इति जश्तवं प्राप्नोति, चतुर्थ इति रेफस्य विसर्जनीयस्तस्य च सत्वं प्राप्नोति; थटः परादित्वेन पूर्वस्य पदत्वात्। यदि पुनः पूर्वसूत्रे थुगेव विधीयेत ? नैवं शक्यम्; पञ्चथः, सप्तथः--नलोपो न स्यात्। इह लिङ्गविशिष्टपरिभाषाया कतिपशब्दादाबन्तादपि थुग्भवति, तत्र `भस्याढे तद्धिते' इति डटि विषयभूत एव पुंवद्भावः, कतिपयानां पूरणी कतिपयथीति भवति।
चतुरश्छयताविति। छयद्भयां डट् न बाध्यते; इटि परतस्थुग्विधानात्। आद्यक्षरलोपश्चेति। अच्सहितं व्यञ्जनमक्षरशब्देनोच्यते, अच्सहितस्यादेर्व्यञ्जनस्येत्यर्थः। व्यञ्जनसहिताज्वचने त्वक्षरशब्दे द्विर्वचनन्यायेन तकारस्यापि लोपः स्यात् ।।

बहुपूगगपसङ्घस्य तिथुक् ।। 5.2.52 ।।
अत्रापि षष्ठीनिर्द्देसाद् बह्वादीनामेवागमित्वम्। पूगसङ्घयोरित्यादिरेक एव ग्रन्थ। इह बह्वीनां पूरणीति पूर्ववड्डट् प्रत्ययः पुवद्भावश्च ।।

वतोरिथुक् ।। 5.2.53 ।।
अत्रापि पूर्ववद्वत्वन्तस्यैवागमित्वम्। इह तावतीनां पूरणी तावतिथीति लिङ्गविशिष्टपरिभाषया प्रत्ययः, पुंवद्भावश्च। कथं पुनरत्र लिङ्गविशिष्टपरिभाषा, यावता प्रातिपदिकस्वरूपग्रहणे सा भवतीत्युक्तम् ? यत्रापि प्रातिपदिकविशेषणं स्वरूपेणोपादीयते, तत्रापि सा भवति, यथा--`तृजकाभ्यां कर्त्तरि'--अपां स्रष्ट्रीति। इहापि वतोरिति विशेषणं स्वरुपेणोपादीयते, तेन भवत्येव लिङ्गविशिष्टस्य ग्रहणम्। उक्तं च--बहुकतिपयवस्तूनां लिङ्गविशिष्टादुत्पत्तिः; प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणादिति ।।

द्वेस्तीयः ।। 5.2.54 ।।
तीयप्रत्ययो भवतीति। डटो द्विशब्दस्य चादेशो न भवति; द्वितीयेति निर्द्देशात्। यद्येवम्, तस्मादेव निर्द्देशान्न सिद्धमस्य साधुत्वम् ? सिद्ध्यतु साधुत्वम्, पूरणआर्थस्तु कर्थ लभ्यते! किञ्च तदाश्रयणे प्रकृतिप्रत्ययविभागाभावात्प्रातिपदिकस्वरेणान्तोदात्तत्वं स्यात्, `अबाधकान्यपि निपातनानि भवन्ति' इति पक्षे डटः प्रसङ्गश्च ।।

त्रेः संप्रसारणं च ।। 5.2.55 ।।
अण इति तत्रानुवर्तत इति। `ढ्रलोपे पूर्वस्य दीर्घोऽणः' इत्यतः। एवमपि यदि परेण णकारेण प्रत्याहारः स्यात्पुनरपि स्यादेव दीर्गः, स तु न तथा? इत्याह--पूर्वेणोति। एतच्च `लण्' इत्यत्रैव प्रतिपादितम्।
`त्रेस्तृ च' इति नोक्तम्, प्रत्ययो मा विज्ञायीति ।।

विंशत्यादिभ्यस्तमडन्यतरस्याम् ।। विंशत्यादिभ्यः परस्येति। कथं पुनः `द्वेस्तीयः' इति तीयप्रत्ययेन सत्यं डट्प्रत्ययो विच्छिन्नः; पूरणार्थस्तु न विच्छिन्नः, सोऽनुवर्त्तते, तेन पूरणे यो विहितः स आगमी विज्ञायते। न च डटोऽन्यो विंशत्यादिभ्यः पूरणे विहितोऽस्ति।
कः पुनः पङ्क्त्यादिसूत्रनिर्द्दिष्टानां ग्रहणे सति दोषः ? तत्राह--तद्ग्रहणे हीति। स्यादेतत्--तदन्तविधिना एकविंशतिप्रभृतिभ्योऽपि भविष्यतीति ? तत्राह--ग्रहणवतेति। ननु यदयं `षष्ट्यादेश्चासंख्यादेः' इत्याह, तज्ज्ञापयति--भवति पूरणप्रकरणे तदन्तविधिरिति। तेनैकविंशतिप्रभृतिभ्योऽपि भविष्यति। अत्स्तवेतत्, केवलेभ्यस्तु न स्यात्, अतदन्तत्वात्। व्यपदेशिवद्भावेन भविष्यति, `व्यपदेशिवद्भावोऽप्रातिपदिकेन'। एवं चेत्यादि। लौकिकानां विंशत्यादीनां यदीदं ग्रहणम्, तदा `षष्ट्यादेश्च' इत्यत्रापि लौकिकानामेव षष्ट्यादीनां ग्रहणम्, ततश्चैकषष्टिप्रभृतिभ्यो नित्यस्य तमटः प्रसङ्गे `असंख्यादेः' इति पर्युदासो युज्यत एव, न कथञ्चिन्न युज्यते; अनिष्टलेशस्याभावात्। सूत्रसन्निविष्टानां तु ग्रहणे तदन्तविधइज्ञापनार्थं पर्युदासो युज्यते। केवलं न तु युज्यत

एव, केवलानामप्रसङ्गादिति तावद्वृत्तेरर्थः। यथा तु भाष्यं तथा सूत्रसंनिविष्टानां ग्रहणम्, ज्ञापनाच्च तदन्तविधिरिति स्थितम्। न च केवलानामप्रसङ्गस्तदन्तानामपि भवतीति ज्ञापनशरीरम्, न तु तदन्तानामेव भवतीति। यदि वा यत्र प्रातिपदिकस्य श्रुतिरस्ति--`ग्रहणवता प्रातिपदिकेन', व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति, तदुभयमपि न प्रवर्त्तते इति सामान्येन ज्ञापनम्। एवं च कृत्वेदमपि सिद्धं भवतिएकान्नविंशतेः पूरणः एकान्नविंशतितम इति। भवति ह्येतत्सूत्रसन्निविष्टविंशत्यन्तं संख्यादि संख्यावाचि च। लौकिकानां तु ग्रहणे नैतत्सिध्यति; विंशतेः प्राग्भावित्वादस्यास्संख्यायाः ।।

नित्यं शतादिमासार्धमाससंवत्सराच्च ।। 5.2.57 ।।
मासादय इत्यादिर्विज्ञायत इत्यन्त एको ग्रन्थः।
अथ शतादिग्रहणं किमर्थम्, यावता `षष्ट्यादेश्च' इति वक्ष्यमाणेनैवसिद्धम् ? तत्राह--षष्ट्यादेरित्यनेनैवेति। यदि तेन स्याद्, एकशतादिभ्यो न स्याद्; असंख्यादेरिति प्रतिषेधात् ।।

षष्ट्यादेश्चासंख्यादेः ।। 5.2.58 ।।
संक्यादेस्तु विक्लप एवभवतीति। न ह्ययं विकल्पस्यापि प्रतिषेधः। पर्युदासो ह्ययं संख्यादेः, न विधिर्न प्रतिषेधः, यदि केनचित् प्राप्नोति भवत्येव पूर्वेण च प्राप्नोति, प्रसज्यप्रतिषेधेऽप्यनन्तरा प्राप्तिः प्रतिषिध्यते, न व्यवहिता ।।

मतौ छः सूक्तसाम्नोः ।। 5.2.59 ।।
मताविति मत्वर्थ उच्यत इति। साहचर्याद् मुख्यस्य ग्रहणं न भवति। कथं हि मतुरभिधेयः स्याच्छब्दस्य शब्दः ? मत्वर्थग्रहणेनेत्यादि। समर्थविभक्तिः प्रथमा, प्रकृतेरर्थद्वारकं विशेषणम् अस्तित्वम्, प्रत्ययार्थः--अस्यास्मिन्निति च। तत्र यद्यपि प्रत्ययार्थो मतोरभिदेयम्, इतरदनभिधेयम्; तथापि साहचर्यमविशिष्टमिति सर्वमेतदाक्षिप्यते=सन्निधाप्यते, उपस्थाप्यत इत्यर्थः। अथ वा--प्रधानवशब्वित्वाद् गुणानां प्रधाने प्रत्ययार्थे उपस्थापिते समर्थविभक्त्यादिकमपि गुणभूतमुपस्थाप्यते एव, आचमनादिवत्, यथा--व्रहाह्ग्णा भोज्यन्तामित्युक्तेऽनुक्ता अप्याचमनादयोऽह्ग्गभूता आक्षिप्यन्ते।
इहास्यवाम इत्यस्मिन्नस्तीति षष्ठीप्रथमयोरुपलम्भादनेकपदसमुदायोऽयम्, ततश्चार्तवत्समुदायानां समासग्रहणं नियमार्थमिति प्रातिपदिकसंज्ञाया अभाबादेवंविधेभ्यः प्रत्ययो न प्राप्नोतीत्यत आह--अनुकरणशब्दाश्चेति। स्वरूपमात्रप्रधान इति। नात्र तदानीमुच्चरितमनुकरणस्वरूपं विवक्षइतम्, किं तर्हि ? अनुकार्यस्वरूपम्। मात्रशब्दो बाह्यर्थव्यवच्छेदार्थः, एतदुक्तं भवति--यथा गवादयः शब्दाः सास्नादिमदाकृतिमर्थं प्रत्यायन्तस्तेनार्थेन तद्वति मतुपमुत्पादयन्ति--गोमान्, वृक्षवानिति; तथानुकरणशब्दाः प्रथमासमर्थाः स्वेनानुकार्येण तद्वति छप्रत्ययमिति। तत्र `अनुकरणशब्दाः' इत्यनेन पदसमुदायत्वं निरस्यति। अनुकार्थो हि पदसमुदायः न त्वनुकरणम्। किं पुनरन्यदनुकार्यमनुकरणं च, ननु रूपभेदो नोपलभ्यते ? यद्यप्येवम्, तथाप्यर्थभेदाद् भेदः, अनुकार्यस्य बाह्योऽर्थः, अनुकरणस्य तु तदेवानुकार्यम्। अत एवास्यावामीयमित्यादौ विबक्त्यर्थाप्रतिपादनात्सुप्त्वाभावात्स्यशब्दादीनां लुग्न भवति। ये चाम्नायशब्दानां नियमाः- `श्मशाने नाध्येयम्', `चतुर्दश्यां नाध्येयम्', `शूद्रस्य वेदमुपश्रृण्वस्त्रपुजतुभ्यां श्रोत्रपूरणम्' इत्येवमादयः, तेऽप्यनुकरणेषु न भवन्ति। अस्यवामीयमिति हि सर्वत्र सर्वदा सर्वेपां च सकाशे प्रयुज्यते। तस्मादन्येऽनुकरणशब्दाः। अनुकार्यशब्दाश्च स्वरूपमात्रप्रदान इत्यनेन त्वर्थवत्त्वमाह। अनेकपदादपीति। अनेकं पदं यत्र समुदाये तस्मादपीत्यर्थः। परप्रसिद्ध्या चैवमुच्यते, यम्भवाननेकपदसमुदायं मन्यते तस्मादपीत्यर्थः। न त्वत्र वस्तुतोऽनेकपदत्वमस्ति---अस्यवामीयमिति, अस्यवामस्येति वेदे यत्पदद्वयं पठितं तदैकदेशस्यास्यवामशब्दस्य छप्रत्ययप्रकृतिरस्यवामशब्दः। प्रतिपादक इत्यर्थवत्त्वम्, पदसमुदायत्वाभावाच्च प्रातिपदिकत्वे सति प्रत्ययः। किं पुनरत्र छप्रत्ययप्रकृततेरनुकरणत्वे प्रमाणम् ? छप्रत्यय एव। न ह्यसावनुकरणत्वमन्तरेण सम्बवति। तस्मादितिशब्दवच्छप्रत्ययोऽप्युनुकरणत्वे प्रमाणम् ।।

अध्यायानुवाकयोर्लुक् ।। 5.2.60 ।।
केन पुनरिति। सूक्तसाम्नोरेव छो विहित इति प्रश्नः। इदमेविति। न ह्यसती लुग्विधानमुपपद्यते। विकल्पेन चेति। तत्कथं मतुप्प्रकरणे एवास्मिन्सूत्रे कर्तव्ये तदत्र छस्य लुग्विधानम् ? तस्मात्पाक्षिको लुगनुमीयते। अत्र केचिदाहुः--अनुवाकसाहचर्याद्वैदिकोऽध्यायो गृह्यत इति। अन्ये पुनः---पौरुषेयग्रन्थविशेषस्याप्यध्यायस्य ग्रहणमिच्छन्ति।च तथा च `दीर्घजीवितीयमध्यायं व्याख्यास्यामः' इत्यदिवैद्यकग्रन्थेषु दृश्यते ।।

तत्र कुशलः पथः ।। 5.2.63 ।।
पथि कुशल इति। `आयुक्तकुशलाभ्यां चासेवायाम्' इति सप्तमी, कौशलस्य क्रियाविषयत्वात्पथिन्शब्देन गमनादिका तद्विषया क्रिया लक्ष्यते। योगश्चायम् `कृतलब्धक्रीतकुशलाः' इत्यणोऽपवादः ।।

आकषादिभ्यः कन् ।। 5.2.64 ।।
कन् ।। आकषत्यस्मिन्सुवर्णादिकमित्याकषः, `पुंसि संज्ञायाम्' इति घः। `हलश्च' इति घञ् तु न भवति; प्रायग्रहणानुवृत्तेः, यथा निकष इति। ये तु

आकर्षादभ्य इति सरेफं पठन्ति, तेषामाकृष्यतेऽस्मिन्निति घञि रूपम्। त्सरुक इति। `त्सकर छद्मगतौ', `भृमृश्रृ' इत्यादिनौणादिक उप्रत्ययः। त्सरुः=खड्गग्रहणप्रदेशः। एतदर्खं प्रत्ययान्तरकरणमिवर्णान्तार्थं च। अकारान्तेष्वाकर्षादिषु प्रकृतेन वुनापि सिद्धम् ।।

धनहिरण्यात् कामे ।। 5.2.65 ।।
काम इच्छेति। कामयिता तु न गृह्यते; अनभिधानात् ।।

स्वाङ्गेभ्यः प्रसिते ।। 5.2.66 ।।
प्रसितः प्रसक्त इति। `षिञ् बन्धेने' कर्मणि क्तः, यो यत्र प्रसक्तः स तत्र प्रकर्षेण बद्ध इव भवतीत्युपमानादिदमभिधानम्। केशेषु प्रसित इति। `प्रसितोत्सुकाभ्यां तृतीय च' इति सप्तमी। केशादिरचनायामिति। केशादिस्थायां रचनायां केशादिशब्दस्य वृत्ति दर्शयति। एतश्च क्रियाविषयत्वात् प्रसक्लेलेभ्यते।
बहुवचनमित्यादि। स्वरूपविधिनिरासार्थं तु बहुवचनं न भवति, `अद्रवम्' इत्यादिना स्वाङ्गस्य परिभाषितत्वेन स्वरूपग्रहणासम्भवत् ।।

उदराट्ठगाद्यने ।। 5.2.67 ।।
आद्युनो विजिगीषुरिति। `विवोऽविजिकगीषायाम्' इति तत्र निष्ठानत्वविधानात्। उदरक इति। उदरपरिमार्जनादौ प्रसित उच्यते ।।

सस्येन परिजातः ।। 5.2.68 ।।
सस्यशब्दौ गुणवाचीति। न दान्यवाची; अनभिधानात्। केचित्तु `शंसिदुहिगुहिभ्यो वा' इति क्यवन्तं शस्यशब्दं पठन्ति। सस्येनेति कर्त्तरि कृतीया। परिगतो जातः परिजातः, `प्रादयो गताद्यर्थे प्रथमया' इति समासः। समन्तात्सन्बद्धः परिगतः, तत्र सस्यस्य कर्तृत्वम्, तदाह्र--यो गुणैः सम्बद्धो जात इति ।।

अंशं हीरी ।। 5.2.69 ।।
तत्र षष्ठीप्रतिषेधादिति। `अकेनोर्भविष्यदाधमर्ण्ययोः' इत्यनेन। ननु तत्र भविष्यदधिकारविहितस्याकस्य ग्रहणम् ? सत्यम्; इनस्त्वविशेषण ग्रहणम्, अस्मादेव द्वितीयानिर्द्देशात् ।।

तन्त्रादचिरापहृते ।। 5.2.70 ।।
तन्यन्ते तन्तवोऽस्मिन्नति तन्त्रम्=तन्तुवायशलाका, तन्त्रातेर्वा एरचि णिलोपः। अचिरापहृत इति। अचिरः कालोऽपहृतस्येति `कालाः परिमाणिना' इति समासः। पञ्चमीसमर्थादिति। अपहृतयोगे `अपादाने, पञ्चमी' ।।

ब्राह्मणकोष्णिके संज्ञायाम् ।। 5.2.71 ।।
कन्प्रत्ययान्तौ निपात्येते इति। किं पुनरत्र निपात्यते, ब्राह्णणशबप्दादायुधजीव्युपाधिकात्प्रथमान्तात्सप्तम्यर्थे कन्प्रत्ययः, अन्नशब्दादल्पत्वोपाधिकात्सप्तम्यर्थ एव कन्प्रत्ययः, अन्नशब्दस्योष्णस्योष्णयादेशः ? तदाहयत्रायुधजीविन इत्यादि ।।

शीतोष्णाभ्यां कारिणि ।। 5.2.72 ।।
शितं करोति स शीतकः, यश्चोष्णं करोति स उष्णकः। किं चातः? तुषारे आदित्ये च प्राप्नेति, शीतोणशब्दयोहि स्पर्शविसेषो मुख्योऽर्थेः, तं च तावश्यं कुरुत एवेति मुख्यार्थग्रहे दोषं दृष्ट्वा गौणार्थयोर्ग्रहणमिति दर्शयन्नाह--क्रियाविशेषणादिति। तत्र शीतोष्णशब्दयोरुपमानाद् वृत्तिः---शीतमिव शीतम्, मन्दकरणमित्यर्थः। शीतं हि मन्दतायुक्तम्; सति शीते कार्यकरणे पाटवाभावात्। एवमुष्णमिवोष्णम्=पटुकरम्, शीघ्रकरणमित्यरथः। एवं क्रियाविशेषणाभ्यां प्रत्ययः। द्वितीयासमर्थादिति। `कृद्योगलक्षणा तु षष्ठी क्रियाविशेषणान्त भवति' इति प्रागेवोक्तम्। मुख्यार्थवृत्तिभ्यां तु प्रत्ययो न भवति; अनभिधनात् ।।

अधिकम् ।। 5.2.73 ।।
अध्यारुढशब्दस्येति। यदि पुनरधिशब्दात्ससाधनक्रियावचनात् कन्निपात्यते, तदा कर्तृकर्मणोरन्यतरस्यैवाभिधानं प्राप्नोति। अध्यारूढशब्दस्तूभयार्थ इति तस्यैवेदमङ्गीकृतसाधनभेदं निपातनमुचितमिति भावः। अधिको द्रोणः खार्याम्, अधिकाक खारी द्रोणेनेति। यथैतत्प्रयोगद्वयमुपपद्यते तथा दर्शयतिकर्त्तरि कर्मणि चाध्यारूढशब्द इति। `गत्यर्थाकर्मक' इत्यादिना रुहेः कर्त्तरि कर्मणि च क्तो विहितः। निपातनसामर्थ्याच्च सकृदुपात्तोऽप्यङ्गीकृतसाधनभेदः संगृह्यते। तत्र यदा कर्तरि तदा तत्राबिहितत्वात्प्रथमैव भवति, न तृतीया; यदा तु कर्मणि तदा कर्तुरनभिहितत्वात्तृतीया, कर्मणस्त्वभिहितत्वात्प्रथमा। यदा च

कर्त्तरि क्तस्तदा कर्मणोऽनभिदानादध्यारूढयोगे यथा द्वितीया भवति--अध्यारूढो द्रोणः खारीमिति, ग्रामं गत इतिवत्, तथाधिकशब्देनापि योगे द्वितीयायां प्राप्तायाम् `यस्मादधिकम्' `तदस्मिन्नधिकम्' इति च निर्द्देसात् पञ्चमीसप्तम्यौ भवतः ।।

अनुकाभिकाभीकः कमिता ।। 5.2.74 ।।
सूत्रे समाहारद्वन्द्वे लिङ्गव्यत्ययः, अनुशब्दादभिशब्दाच्च ससाधनक्रियावचनात्स्वार्थे कन्निपात्यत इत्याह--अनुकामयतेऽनुक इति। `अभिकामयते' इत्येतद् गम्यमानत्वान्नोक्तम् ।।

पार्श्वेनान्विच्छति ।। 5.2.75 ।।
अनुजुरुपायः पार्श्वमिति। तिर्यगवस्तानात्पार्श्वं तावदनृजु, तद्वदन्योऽप्यनृजुरुपाय एवभुच्यत इत्यर्थः। य ऋजुनोपायेनान्वेष्टव्यानर्थाननृजुनाऽन्विच्छति स पार्श्वकः। कुत्सितो मार्ग=कुसृतिः, जालम्=आनायः, ताभ्यां चरतीति कौसृतिकौ जालिकः ।।

अथःशूलदण्डाजिनाभ्यांक ठक्ठञौ ।। 5.2.76 ।।
तृतीयासमर्थाभ्यामिति। निर्द्देशादेव तृतीया हीयम्, न पञ्चमी; पूर्वेण साहचर्यात्। तीक्ष्ण उपायोऽयःशूलमिति। यथायःशुलं तीक्षणं तथान्योऽपि तीक्षणं उपायोऽयःशूलमित्युपचारादुच्यत इत्यर्थः। दम्भोदण्डाजिनमिति। दम्भसाधनत्वात्। दम्भवन्तो हि प्रायेण दण्कडमजिनं च धारयन्ति। तेनेति। दम्भेन तु धारयतु मा वाऽदीधरदित्यर्थः, सर्वत्र मुख्यार्थाग्रहणेऽनभिधानमेव हेतुः ।।

तावतिर्थं ग्रहणमिति लुग्वा ।। 5.2.77 ।। यथा `तस्यापत्यम्' इत्यत्र तस्येति षष्ठ्यन्तानां सामान्यनिर्देशः, तथा तावतिथमिति पूरणप्रत्ययान्तानां सामान्यनिर्द्देशः। पूरणप्रत्ययस्य चेति। न तु कनः लुक्; वाग्रहणानर्थक्यप्रसङ्गात्, महाविभाषाधिकाराद्विकल्पेन कन उत्पत्तेः पञ्चमं ग्रहणम्, पञ्चमकं ग्रहणमिति रूपद्वयस्य सिद्धत्वात्। तथा च वार्तितकम्--`तावतिथं ग्रहणमिति लुग्वचनानर्थक्यं विभाषाप्रकरणात्' इति। अतो लुग्वाग्रहणं कुर्वतः सूत्रकारस्य पूरणप्रत्यस्य वा लुग्विधीयत इति पक्षो लक्ष्यते द्वितीयेन रूपेण ग्रन्थं गृह्णातीति। अत्र ग्रहणे द्वितीयस्य करणत्वं प्रदर्शयितुमिदं वाक्यम्। वस्तुतस्तु द्वितीयं ग्रहणं देवदत्तस्येति विग्रहीतव्यम्। द्विकं ग्रहणमिति। ग्रहीतर्यपि प्रत्ययो वक्ष्यते, तेन प्रकृत्युपाधिभूतस्य ग्रहणस्य नियमेनाप्रतीतेर्ग्रहणशब्दप्रयोगः। द्विकं रूपं देवदत्तस्येत्येव तु नोदाहृतम्, स्वच्छन्दतो हि वचसां प्रवृत्तिः। चतुष्क इति। सन्नियोगशिष्टपरिभाषया डटि निवृत्ते थुकोऽपि निवृत्तिः, रेफस्य विसर्जनीयः, `इदुदुपधस्य' इति षत्वम्।
तावतिथेनेति। स्वार्थे प्रत्ययो विधीयमानो ग्रहीतरि न प्राप्नोतीति वचनम्। नित्यं च लुकं वक्ष्यामीति। षट्क इति। रूपशब्दस्य वाक्ये प्रयुक्तस्यापि वृत्तौ गम्यमानत्वादप्रयोगः, पदत्वाज्जश्त्वचर्त्त्वे। इह यः षष्ठेन रूपेण गृह्णाति षङ्भिरसौ रूपैर्गृहृणाति, ततःकिं सङ्खयायाः, तेन गृह्णातीत्येव वक्तव्यम्, एवं हि लुग्वेति न वक्तव्यं भवति ? नैवं शक्यम्; एवं ह्युच्यमाने इहापि प्राप्नेति--एकेन रूपेण गृह्णातीति। पूरणप्रत्ययस्त्वेकशब्दान्नास्ति, तेन ग्रन्थविषयमेव ग्रहणं विज्ञायत इति। तेनेह न भवति--द्वितीयो हस्तो ग्रहणो दण्डस्योति ।।

स एषां ग्रामणीः ।। 5.2.78 ।।
इह त्वत्को मत्को वा विजय इत्यादावनेन कन्। त्वं ग्रामणीरस्य त्वत्कः, अहं ग्रामणीरस्य मत्कः। प्रायेण त्विदमर्थमात्रे प्रयुज्यते ।।

शृङ्कलमस्य बन्धनं करभे ।। 5.2.79 ।।
ननु न शृङ्खलमात्रेण करभो बद्धयते, किं तहि ? रज्ज्वा, कीलेन च, तस्माच्छृङ्कलमस्य बन्धनमिति न युक्तं वक्तुम्, एवं तु वक्तव्यम्---`शृङ्खलवदस्य सम्बनधनं करभे कुक्च मतोः इति ? तत्राह--यद्यपीति। अस्तु रज्ज्वादेरपि करणत्वम्, शृङ्खलस्यापि करणत्वमस्त्वेव; तदन्तरेण बन्धनस्यानिर्वृत्तेरित्यर्थः ।।

उत्क उन्मनाः ।। 5.2.80 ।।
उच्छब्दात्ससाधनक्रियावचनादिति। साधनम्=मनः, क्रिया=गमनम्, उद्गते मनसि वर्त्तमानादित्यर्थः। यद्वतीति। उद्‌गतं मनो यस्य तस्मिन्नित्यर्थः। उत्सुकः=उत्कण्ठितः ।।

कालप्रयोजनाद्रोगे ।। 5.2.81 ।।
अर्थलभ्येति। अर्थ=सामर्ध्यम्, तेन लभ्या। तत्र काले सप्तमी समर्थविभक्तिः, भवो हि तत्र प्रत्ययार्थः। प्रयोजने तृतीया, जनितो हि तत्र प्रत्ययार्थः। फले तु प्रयोजने प्रथमा। प्रयोजनं कारणं रोगस्य फलं चेति। उभयमपि प्रयोजयतीति प्रयोजनमुच्यते। यदि तर्हि कारणमपि प्रयोजनमुच्यते, कालग्रहणमनर्थकम्,

कथम् ? योऽसौ द्वितीयेऽह्नि भवो ज्वरस्तस्य द्वितीयमप्यहः कारणम्; अहरन्तरे तदनुत्पत्तेः? सत्यम्; सदपि कारणत्वं यदा न विवक्ष्यते `तत्र भवः' इत्येव तु विवक्ष्यते, तदापि यथा स्यादिव्येवमर्थं कालग्रहणम्। द्वितीयेऽह्नि भव इति। सामान्यशब्दस्यापि द्वितीयशब्दस्यार्थप्रकरणादिना वृत्तिविषये कालेऽपि वृत्तेः कालशब्दत्वम्। किं पुनः कारणं साक्षात्कालवाचिभ्यो मासादिभ्यः प्रत्ययो न भवति द्वितीयादिभ्यश्च भवति, तत्रापि सप्तमीसमर्थेभ्यो भवार्थ एव भवति कारणवाचिनस्तृतीयासमर्थात्, फलवाचिनस्तु प्रथमासमर्थात्, न ह्येतत्सर्व सूत्राक्षरैरुपात्तम् ? तत्राह--उत्तरसूत्रासंज्ञाग्रहणमिहानुकृष्यत इति। सिंहावलोकितन्यायेन, यथा सिंहा धावन्तः पृष्ठतोऽवलोकयन्ते। अपर आहउत्तरसूत्रे योगविभागः, `तदस्मिन्नन्नं प्राये', ततः `संज्ञायाम्', यदेतदनुक्रान्तं तत्संज्ञायां द्रष्टव्यमित्यर्थः। संज्ञाग्रहणमुभयोः शेषः, एतदेव चानुकर्षणं विवक्षितम् ।

तदस्मिन्नन्नं प्राये संज्ञायाम् ।। 5.2.82 ।।

अन्नम्=अब्यवहार्यम्, अद्यते स्मेति कृत्वा। गुकडामिश्रा अपूपा गुडापूपाः=कृसरस्तिलौदनः, तिलक्षोद इत्यन्ये। त्रइबिलोऽपूपस्त्रिपुटः। वटकेभ्य इनि रिति। कनि प्राप्ते वचनम्। ननु संज्ञाग्रहणात्कन्न भविष्यति, तस्मिंश्चासति मत्वर्थीय इनिर्भविष्यति ? न सिद्धयति; `सप्तम्यां च न तं स्मृतौ' इति वचनात् ।।

कुल्माषादञ् ।। 5.2.83 ।।

कुल्माषाः=मुद्गाः ।।

श्रोत्रियँश्छन्दोधीते ।। 5.2.84 ।।

वाक्यार्थ इति। वाक्यार्थग्रहणेन तदाश्रयश्छन्दोऽध्यायी पुरुष उपचारादुच्यते, कुतः ? मुख्यो हि वाक्यार्थः क्रियारूपः, सम्बन्धरूपो वा, स चासत्त्वभूतः। श्रोत्रियशब्दस्तु सत्त्वभूतार्थाभिधायी, तस्मिन्वाक्यार्थेऽविद्यमानप्रकृतिप्रत्ययविभागः श्रोत्रियशब्दो निपात्यत इत्यर्थः। अथ कथमस्मिनपक्षे स्वरसिद्धिः, यावता नकार इद्यस्य तत्र परतः स्वरो विधीयते, न चात्रैवं व्यपवर्गोऽस्ति ? मा भूद्वयपवर्गे, नित्करणसामर्थ्यात्तदभावेऽपि भविष्यति। यद्वा, नितीति कर्मधारयोऽयम्--नश्चासाविच्च नित्, तत्र परत इति।

कथमित्यादि। छन्दसः श्रोत्रभावो घन् च प्रत्ययः, छान्दस इति न सिद्ध्यति; घनाऽणो बाधितत्वात्, श्रोत्रभावेन च छन्दःशब्दस्य निवर्तितत्वादिति प्रश्नः। वाग्रहणमनुवर्तत इति। अपर आह--यश्छन्दोऽधीते तदर्थं चानुतिष्ठति तत्र श्रोत्रियशब्दः, अध्येतृमात्रे तु छान्दशब्द इत्यर्थभेदान्नास्ति बाध्यबाधकत्वमिति। `एकां शाखामधीत्य श्रोत्रियो भवति' इति धर्मसास्त्रम् ।।

श्राद्भमनेन भुक्तमिनिठनौ ।। 5.2.85 ।।

श्राद्धशब्दः कमनामधेयमिति। श्रद्धया निषाद्यस्य पित्र्यस्य कर्मणः श्राद्धशब्दः संज्ञा, श्रद्धास्मिन्नस्तीति `प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' इति णः। तत्साधने द्रव्य इति। मुख्यश्रद्धस्य भोजनासम्भवात्। समानकालग्रहणमितिष। भुजिना समाने काले प्रत्ययान्तस्य प्रयोगो यथा स्यात्, यद्यपि भुजिक्रिया कतिपयक्षणसाध्या, तथापि यावन्तं कालं तदाशिनस्तृप्तिशेषस्तल्लिङ्गं चानुवर्तते तावत्समानकालः, स च प्रायोवृत्त्याऽद्यतन एवेति तस्मिन्नेव प्रययान्तस्य प्रयोगः। यदा तु कस्यचिद्दुर्बलस्य द्वितीयेऽप्यह्नि भुक्तमपरिणतं तदा प्रयोगाभावः। तदिदमाह-अद्य भुक्ते श्वः श्राद्धिक इति कप्रयोगो मा भूदिति ।।

पूर्वादिनिः ।। 5.2.86 ।।

पूर्वं गतमनेनेत्यादि। क्रियाविसेषणाद् द्वितीयान्तात्प्रत्ययः ।।

सपूर्वाच्च ।। 5.2.87 ।।

विद्यमानं पूर्वमस्मिन्निति सपूर्वमिति। `तेन सहेति तुल्ययोगे' इत्युपाधिवचनस्य प्रायिकत्वाद्विद्यमानवचनस्यापि समासः। पूर्वशब्दोऽवयववचनः। न च शब्दान्तरं पूर्वशब्दस्यावयव उपपद्यते। पकारस्त्वव्यभिचारी, तेन प्रातिपदिकस्यैतद्विशेषणम्--सपूर्वं यत्प्रातिपदिकमिति। एवं च पूर्वशब्दोऽपि तस्यैव विशेषणम्, विशेषणेन च तदन्तविधिरित्याह--तस्य पूर्वशब्देन तदन्तविथधिरिति। सपूर्वादित्यादि। यद्यपि पूर्वशब्दान्तं प्रातिपदिकं सपूर्वमेव, तथापि असति सपूर्वग्रहणे तदन्तविधिर्न लभ्यत इति `सपूर्वात्' इत्युक्तम्। कृतकर्मणोः कृति' इत्यत्रायं प्रयोग उपपादितः।

योगद्वयेनेत्यादि। यदि `व्यपदेशिवद्भावोऽप्रातिपदिकेन' इत्येषा परिभाषा न स्यात् `पूर्वादिनिः सपूर्वात्' इत्येकमेव योगं कुर्यात्, व्यपदेशिवद्भावात्केवलादपि भविष्यति, किं योगद्वयकरणेन! अत्र चकारः कर्त्तव्यो न भवति। यदि च `ग्रहणवता प्रातिपदिकेन' इत्येषा परिभाषा न स्यात्, `पूर्वादिनिः' इत्येतावदेव ब्रूयात्, तदन्तविधिना सपूर्वादपि भविष्यतीति किं द्वितीयेन योगेन ! तदिह योगद्वयेन परिभाषाद्वयं ज्ञाप्यते ।।

छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ।। 5.2.89 ।।

अत्र पर्यवस्थातृशब्दात्स्वार्थे इनिप्रत्ययोऽवस्थातृशब्दस्य च पन्थि, परि--इत्येतावादेशौ निपात्येते। भाषायां तु परिपन्थिशब्दस्यासाधुः प्रयोगः ।।

अनुपद्यन्वेष्टा ।। 5.2.90 ।।
पदस्य पश्चादनुपदम्, पश्चादर्थेऽव्ययीभावः, अन्वेष्टरीनिप्रत्ययो निपात्यते। अनुपदी गवामिति। पदापेक्षया षष्ठी, गोपदस्य पश्चादन्वेषणं गवामेव, हिरण्यादावन्वेष्ये न भवति; पदाभावात्। यदि त्वन्वेष्टशब्दात्स्वार्थे इनिप्रत्ययः, एष्टृशब्दस्य च पदशब्द आदेसो निपात्येत; यदि वा--श्रोत्रियवदविद्यमानप्रकृतिप्रत्यमन्वेष्टरि निपात्येत, ततो गवामिति षष्ठी न प्राप्नोतिकृतपूर्वी कटम्, अनुको भार्यामभिको दासीमितिवत् द्वितीया प्राप्नोति; हिरण्यादौ चान्वेष्ये--अनुपदी हिरण्यमिति। तस्माद्यथोक्तमेव साधीयः ।।

साक्षाद् द्रष्टरि संज्ञायाम् ।। 5.2.91 ।।
साक्षाच्छब्दोऽव्ययमिति। तेन प्रकृतिवदनुकरणं भवतीति सूत्रे पञ्चम्या अलुक्, उदाहरणे च `अव्ययानां भमात्रे' इति टिलोप इति भावः। संज्ञाग्रहणादित्यादि। त्रिभिः साक्षाद् दृष्टं भवति--यश्च ददाति, यस्मै च दीयते, यश्च पार्श्वे स्थितः पश्यति, तत्र सर्वत्र प्रत्ययः प्राप्नोति। संज्ञाग्रहणाद्धनिकाधमर्णयोर्न भवतीत्यर्थः ।।

क्षेत्रियच् परक्षेत्रे चिकित्स्यः ।। 5.2.92 ।।
`क्षि निवासगत्योः' इत्यस्माद्यथायोगमधिकरणादौ ष्ट्रन्, क्षेत्रम्। परक्षेत्रं जन्मान्तरशरीरमिति। आत्मनो निवासस्थानत्वात्क्षेत्रम्, परं च तत्क्षेत्र चेति कर्मधारयः। तत्र चिकित्स्यः=प्रतिकार्योपनेय इत्यर्थः, न तु तत्र भिषजितव्य इति। यदाह--नामृतस्येति ।
अथ वेति। समुच्चय एवात्र विवक्षितः, न तु विकल्पः। वक्ष्यति--`सर्वचैतत्प्रमाणम्' इति। कृत्यः शक्यार्थे, पूर्वत्र तु कर्ममात्रे, उत्तरयोरर्हार्थे। सस्यार्थ इति। अनेन क्षेत्रस्य परकीयत्वमाह---परदाराः परक्षेत्रमिति। कर्मणि ष्ट्रन्, क्षेतव्याः=गन्तव्याः, उपगमनार्हा दाराः=क्षेत्रम्। तत्रेति। तस्मिन्विषये। निगृहीतव्य इति। दण्कडादिना ।।

इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा ।। 5.2.93 ।।
अन्तोदात्त इति। `क्षेत्रियच्' इत्येतत्साहचर्यात्। रूढिरेवेति। किमत्र प्रमाणम्? इत्याह तथा चेति। न हि यौगिकेषु व्युत्पत्तेरनियमो भवति। इन्द्र आत्मेति। कार्यकारणसङ्गातं प्रतीश्वरत्वात्। विज्ञियते च तमिन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेणेति। करणेनेति। हेतुगर्भविशेषणम्। यथा पुनरयं हेतुस्तथा दर्शयति--नाकर्तृकमिति। इतिकरणो हेतौ। न हि वाश्यादिकरणमनधिष्ठितं कर्त्रा प्रवर्तते। इन्द्रेण दृष्टमिति। दृष्टम्=ज्ञातम्, तथा च कार्यकारणसङ्घातं प्रस्तुत्य भवति वादः---`स एतमेव पुरुषं ब्रह्मततमपश्यत्', `इदमदर्शम्' इत्यादि। कथं पुनश्चक्षुरादिकमात्मना सृष्टम् ? इत्याह--तत्कृतेनेति। शुभं कर्म=विहितम्, प्रतिषिद्धम्=अशुभम्--तदुभयं मिलितं कारणानामुत्पादकम्; इष्टानिष्टानां रूपादीनां चक्षुरादिभिरुपलम्भात्। यथायथामिति। यो यस्य विषयः--चक्षुषो रूपम्, घ्राणस्य गन्ध इत्यादि, तद्ग्रहणायेत्यर्थः।
अन्यथापि कर्त्तव्येति। तद्यथा--इन्द्रेण दुर्जयमिति। प्रत्योकमभिसम्बध्यमान इति। हेतुगर्भविशेषणम्; यस्मात्प्रत्येकमभिसम्बध्यते तस्मादित्यर्थः ।।

तदस्यास्त्यस्मिन्निति मतुप् ।। 5.2.94 ।।
अस्यास्मिन्निति प्रत्ययार्थाविति। ननु च यद्यस्य भवति तस्मिन्नपि तद्वति, यच्च यस्मिन् भवति तस्यापि तद्भवति; यथा--वृक्षस्य शाखा, वृक्षे शाखेति; तत्रान्यतरनिर्द्देशेनैव सिद्धम्, किमर्थमुभावर्थौ निर्द्दिश्येते ? नैतयौरवश्यम्भावी समावेशः; तथा हि--षष्ठ्यर्थमात्रनिर्द्देशे यत्राधिकरणं तेनैव रूपेण विवक्ष्यते, न तज्जन्यः शेषसम्बन्धः, यथा--वृक्षा अस्मिन्पर्वते सन्तीति न तत्र प्रत्ययः स्यात्। न ह्यत्र क्रियाकारकपूर्वकः शेषसम्बन्धो दृश्यते; वृक्षैः पर्वतस्यानारम्भात् नावयवावयविभावः। आनन्तर्यादिसम्बन्धस्तु सम्भवति। न तु तत्र मत्वर्थीयो भवति; अनभिधानात्। तथा केवलसप्तम्यर्थनिर्द्देशे कारकान्तरपूर्वः सम्बन्धो न गृहीतः स्यात्; ततश्च पुत्रवान्, गोमानित्यादौ न स्याद्। उत्पादनप्रतिग्रहादिक्रियाविषयकर्तृत्वजन्यो ह्यत्र सम्बन्धः, नाधारपूर्वकः; देशान्तरगतेऽपि पुत्रादौ तद्वानिति व्यपदेश्यस्य भावात्। सामीपिकस्याप्यधिकरणस्यासम्भवः। स्यादेतत्--पुत्रस्य पित्रधीनत्वाद्गवां च स्वाम्यधीनत्वाद्गुरौ वसतीतिवदधिकरणं भविष्यति, करणसंज्ञायां हि तमब्ग्रहणेन कारकप्रकरणे प्रकर्षस्यानाश्रयणाद्गौणस्याप्याधारस्याधिकरणसंज्ञा भवत्येवेति ? भवत्वेवमधिकरणसंज्ञा, मत्वर्थायस्तु मुख्य एवाधिकरणे स्यात्--वृक्षवान् पर्वतः, गोमाञ्जनपद इत्यादौ; न गौणे--पुत्रवान् गोमान्देवदत्त इत्यादौ, न ह्यत्र गौणग्रहणस्य लिङ्गमस्ति। तस्मादुभयोरपि निर्द्देशः कर्तव्यः। अस्तीति प्रकृति विशेषणामिति। अर्थद्वारेणेति द्रष्टव्यम्।
ननु सम्भवे व्यभिचारे च विशेषणविसेष्यभावो भवति नीलोत्पलवत्, न च सत्तां पदार्थो व्यभिचरति, तामन्तरेण पदस्योच्चारयितुमप्यशक्यत्वात्; तथा हियावद्बुद्ध्या पदार्थो न विषयीकृतस्तावत्पदस्य प्रयोगाभावः, तेन बुद्धिसत्तासमाविष्टमर्थं शब्दो गोचरयति, तस्यैव बहिरसत्त्वासत्त्वप्रतिपादनाय वृक्षोऽस्ति, वृक्षो नास्तीति प्रयोगः। यदि बाह्यसत्तासमावलिष्टं वस्तु वाच्यं भवेत्, तदा विरोधपौनरुक्त्याभ्यां प्रयोगो न भवेदयम्। एवमेवात्यन्तासतोऽपि बहिः शशविषाणादीनर्थान्बुद्ध्या विषयीकृत्य तद्वचिशब्दप्रयोगः। तस्माद् बुद्ध्युपारूढोपचरिता सत्ता शब्दप्रयोगस्य निमित्तमिति न तां पदार्थो व्यभिचरति। तदुक्तम्---`न सत्तां पदार्थो व्यभिचरति' इति। कस्यचित्पदस्यार्थः सन्नेवंविधां सत्तां न व्यभिचरतीत्यर्थः ?
इदं तर्हि प्रयोजनम्--या सम्प्रतिसत्ता मुख्या वर्तमानलक्षणा बाह्या तस्यां यथा स्याद्, भूतभविष्यतोर्या सत्तातीतानागतवस्तुपरामार्शिन्या

बुद्व्योत्प्रेक्षितोपचरितरूपा तस्यां मा भूत्। तेन गावोऽस्यासन्, गावोऽलस्य भवितार इत्यत्रार्थे गोमानिति प्रयोगाभावः।
यद्येवम्, विद्यमान एव देवदत्ते तद्रवीनामतीतानागतत्वप्रतिपादनाय गोमानासीत् गोमान्भवितेति प्रयुज्यते, तत्र प्रकृत्यर्थस्य सम्प्रतिसत्ताया अभावात्प्रत्यायाप्रसङ्कः ? नैष दोषः; नात्र साक्षाद्गवां सत्ता कथ्यते, किं तर्हि ? गोमत एषा सत्ता कथ्यते। यदि पुनर्गवां सत्ता कथ्येत; यथेहास्तेः प्रयोगो न भवति--गावोऽस्य सन्ति गोमानिति प्रत्ययेनैव प्रकृत्यर्थोपाधेः प्रतीतत्वात्, तथेहापि न स्यात्--गोमानासीद्, गोमान्भवितेति। सत्यपि वा प्रयोगे यथेह बहुवचनं भवति--गोमानासीद्, गोमान्भवितेति। सत्यपि वा प्रयोगे यथेह बहुवचनं भवति--गावोऽस्यासन्, गावोऽस्य भवितार इति; एवमिहापि स्याद्गोमानासीद्, गोमान्भवितेति। तस्मान्नैषा गवां सत्ता कथ्यते, किं तर्हि ? गोमत्सत्तैषा कथ्यते। तत्र यद्यपि यो गोमान्स विद्यते, गोमत्तारूपं तु तस्यादीतमनागतं वेति भूतभविष्यत्प्रयोगः। यथा--ईश्वरोऽयमासीद्दरिद्रोऽयं भविष्यतीति। तत्रार्थात्प्रकृत्यर्थस्याप्यतीतानागतत्वप्रतीतिर्भवति, सा वाक्यार्थवशादुपजायमाना बहिरह्गेति नान्तरङ्गं शब्दसंस्कारं निवर्तयति, यथा--ग्रामं न गच्छतीति। तदेवं सम्प्रति सत्तायां यथा--ग्रामं न गच्छतीति। तदेवं सम्प्रति सत्तायां यथा स्याद्, भूतभविष्यत्सत्तायां मा भूदित्येवमर्थमस्तीत्युच्यत इति स्थितम्।
ननु च यत्रान्यत्क्रियापदं न श्रूयते तत्रास्तिर्भवतिपरः प्रथमपुरुषोऽप्रयुज्यमानोऽपि गम्यते, ततश्च गावोऽस्य गावोऽस्मिन्नित्युक्ते किमित्यपेक्षायां सन्तीति गंस्तते, नार्थोऽस्तिग्रहणेन ? न सार्वत्रिकमेतत्; यदा खलु गावोऽस्य नान्यस्य, गावोऽस्मिन्नान्यस्मिन्नित्येवं विवक्षा, न तदास्तित्वं प्रतीयते। तस्मादस्तीति वक्तव्यम्।
अथ क्रियमाणेऽप्यस्तिग्रहणे इह कस्मान्न भवति--गावोऽस्य सन्त्यनन्तरा इति ? सापेक्षत्वेनासामर्थ्यात्। इह कस्मान्न भवति-चित्रगुः, शबलगुरिति ? बहुव्रीहिणोक्तत्वात्। वाक्ये तु चित्रा गावोऽस्य सन्नीति प्रत्येकमसामर्थ्यान्न भवति, समुदायात्त्वप्रातिपदिकत्वात्। इह तु पञ्च गावोऽस्य सन्ति पञ्चगुः दशगुरिति `तद्धितार्थ' इति द्विगुश्च प्राप्नोति, बहुव्रीहिश्च; तत्रचित्रगुरित्यादौ सावकाशं बहुव्रीहिं संख्यावाचिषु द्विगुर्बाधेत, ततश्च तद्धितार्थे विषयभूते विहितेन द्विगुनाऽनुक्तस्तद्धितार्थ इति यथेह तद्धितो भवति-द्वैमातुरः, पाञ्चनापितिरिति, `द्विगोर्लुगनपत्ये'क इति लुगपि प्राग्दीव्यतीयस्य विधीयते, तेन मतुपो लुगलभ्यः। तस्मात् `तद्वितार्थ' इत्यत्र यदुक्तम् `सर्वत्र मत्वर्थे प्रतिषेधः' इति तदेवात्रक शरणम्।
भूमेत्यादि। अस्तिविवक्षायां ये मतुबादयो विधीयन्ते ते भूमादिषु विषयभूतेषु भवन्तीत्यर्थः।
बहूनां भावो भूमा, तत्र भूम्नि; गोमान्, यवमान्। बहुत्वं चाभिधानवशाद्विशिष्टमेवाश्रयणीयम्, यदाह--`यावतीभिः खल्वपि गोभिर्वाहदोहप्रसवाः कल्पन्ते तावतीषु सत्ता कथ्यते, कस्यचिच्चतसृभिरपि कल्पन्ते कस्यचिच्छतेनापि न कल्पन्ते' इति। एवं च यवमानिति त्रिप्रभृतिषु बहुत्वसद्भावेऽपि न भवति। इह यवमतीभिरद्भिर्यूपं प्रोक्षतीति जातिमात्रसम्बन्धो विवक्षित इति भूमाभावेऽपि भवति। भूमादिग्रहणं त्वभिधानस्वभावप्रदर्शनार्थम्। निन्दायां ककुदावर्त्तिनी कन्या, प्रशंसायां रूपवान्, नित्ययोगे क्षीरिणो वृक्षाः, अतिशायने उदरिणी कन्या। संसर्गे, संसर्गः=संयोगः; दण्डी संसक्तदण्ड उच्यते। गृहावस्थिते तु दण्डीति न भवति। क्वचिद् वृत्तौ ग्रन्थः अस्तिविवक्षायामस्तिमानिति। तत्र भूमादिष्वस्तिविवक्षायां च भवति मतुबादय इति समुच्चयो व्याख्येयः। अस्तिशब्दो विभक्तिप्रतिरूपको निपातः कर्तृविविशिष्टसत्तावाची, नैषोऽस्तेर्लट्। प्रत्ययान्तरमपि दृश्यते--अस्तित्वम्, अस्तितेति। अव्यभिचारादस्तिसामानाधिकरण्यं नास्तीत्यस्तिविवक्षायां प्रत्ययो विधीयते। एतच्च सूत्रे `अस्ति' इति तन्त्रेण लुप्तपञ्चमीकप्रकृतिनिर्द्देशाश्रयणाल्लभ्यते। अस्तिमानिति च वृत्तिविषये कर्तृविशेषे धनेऽस्तिशब्दो वर्त्तते। न हि कर्तृसामान्येन प्रत्ययार्थस्य विशेषणं सम्भवति, सर्वस्यैव हि सर्वदा यत्किञ्चिदस्ति।
गुणवचनेभ्य इति। अत्र शुक्लादय एवाभिन्नरूपा गुणे तद्वति च वर्तमाना गृह्यन्ते, न तु सर्वदा गुणमात्रवचना रूपादयः। तत्र यद्यप्यभेदोपचारादेव शुक्लः पट इत्यादिसिद्धिः, तथापि पटस्य शुक्ल इति भेदविवक्षाया अपि दर्शनात्पक्षे मतुप उत्पन्नस्य श्रवणप्रसङ्गाल्लुग्वक्तव्य इति ।।

रसादिभ्यश्च ।। 5.2.95 ।।
न पूर्वेणैवेति। नशब्दस्य काक्वा प्रयोगात्सिद्ध एवेत्यर्थः। नन्वर्थे वा नशब्दो द्रष्टव्यः। अन्ये इति। `अत इनिठनौ' इत्यादयः।
कथमिति। अन्यनिवृत्त्यर्थे पुनर्वचने रूपिणीत्यादि न सिद्ध्यतीति भावः। प्रायिकमिति। प्रयोगबाहुल्याबाहुल्येनास्यान्यनिवृत्तिः प्रयोजनमित्यर्थः। ततः किम्? इत्याह-क्वचिदिति। कथं पुनः प्रायिकत्वमित्याह--इतिकरण इति। तेन यत्र मतुबन्तादेव लोकस्य विवक्षा भवति, तत्रैवानेनान्यनिवृत्तिः क्रियते, न सर्वत्रेत्ययमर्थो भवति। एतच्च गुणादिति गणादिति गणपाठमनपेक्ष्योक्तम्, तदपेक्षां मत्वाऽऽह-
अथ वेति। अत्र गणे गुणादिति पठ्यते, तच्च रसादीनां सर्वेषां प्रत्येकं विशेषणम्, न स्वतन्त्रम्, नापि `एकाचः' इत्यनेन समानाधिकरणम्। तेन ये रसनेन्द्रियादिग्राह्यगुणा इति आदिशब्देन चक्षुरादिपरिग्रहः। तेषामेवायं पाठ इति। तेभ्य एवानेनान्यनिवृत्तिः क्रियते। रूपिणी, रूपिकः शोभायोग इति। ननु शोभापि पुणस्तथा भावः ? सत्यम्; गुणादिति विशेषणसामर्थ्यात्प्रसिद्धतराणां रसनादीन्द्रियग्राह्याणां गुणानां पाठः। भावयोग इति। भावाः=रतिहासादयो नाट्यधर्माः।
भाष्ये तु `उर्वशी वै रूपिण्यप्सरसां स्पर्शिको वायुः' इति दर्शनाद्यथाभिधानं प्रत्ययान्तरमपि भवति, तेन नियमस्यानिष्टत्वात्सूत्रमिदं प्रत्याख्यातम्।
एकाच इति। अत्र गुणादिति नापेक्ष्यते--स्ववान्, खवान् ।।
प्राणिस्थादातो लजन्यतरस्याम् ।। चूडाल इति। चूडा=शिखा, न त्वापीडाख्योऽलङ्कारः। एवं कर्णिकापि न कर्णिकापि न कर्णालङ्कारः, किं तर्हि ? तत्सदृशः प्राण्यङ्गविशेषः। प्राण्यङ्गादेव हीष्यते।
शिखावान्दीप इति। प्रत्युदाहरणदिगियं दर्शिता; शिखाशब्दस्य व्रीह्यादिपाठाल्लचोऽप्रसङ्गात्। चूडावान्वृक्ष इति प्रत्युदाहार्यम्।

प्राण्यङ्गादिति वक्तव्यमिति। एतच्चेतिकरणानुवृत्तेर्लभ्यते। चूडालोऽसीति। असीत्यस्य `तिङ्ङतिङः' इति निघातः, चूडालशब्दात्सुः, रुत्वम्, `अतो रोरप्लुतादप्लुते' इत्युकारः, स च हलां स्रंसनधर्मत्वादनुदात्तः, पूर्वेण `आद्गुणः', `एकादेश उदात्तेनोदात्तः', ततः `एङः पदान्तादति' इति पूर्वरूपत्वमेकादेशः, तस्य `स्वरितो वानुदात्तेऽपदादौ' इति स्वरितः प्राप्नोति, चित्करणसामर्थ्यान्न भवति। यद्येवम्, चूडालः--आमन्त्रिताद्युदात्तत्वे शेषनिघातो न स्यात्, हे चूडालआमन्त्रितनिधातो न स्यात्, चूडालत्वमित्यादौ च प्रत्ययस्वरे शेषनिघातः ? यदीष्यते, वक्तव्योऽत्र परिहारः; अथ नेष्यते, प्रयोजनमेवैतच्चित्स्वरस्य भवीष्यति ।।

सिध्मादिभ्यश्चः ।। 5.2.97 ।।
अन्यतरस्यांग्रहणेन भतुप्समुच्चीयत इति। अनेकार्थत्वान्निपातानाम्, अन्यतरस्यांग्रहणमिह समुच्चये वर्त्तत इत्यर्थः। तथा च वार्त्तिकम्--`लजन्यतरस्यामिति समुच्चयः' इति। न तु प्रत्ययो विकल्प्यत इति। यथान्यत्रान्यतरस्यांग्रहणं विकल्पार्थं न तथात्रेत्यर्थः। किमेवं सति सिद्धं भवति ? तत्राहतस्मादिति। विकल्पार्थेऽन्यतरस्यांग्रहणे लचा मुक्ते यथाप्राप्तमे स्यात्, ततश्चाकारान्तेभ्य इनिठनौ स्याताम्, समुच्चयार्थे प्रकृतो मतुबेव समुच्चीयत इति न दोषः। कथं पुनर्ज्ञायते-समुच्चयोऽत्रार्थः, न विकल्पोऽर्थ इति ? ज्ञापकात्। यदयं पिच्छादीन्, तुन्दादीश्च पृथक् पठति। कथं कृत्वा ज्ञापकम् ? इह `तुन्दादिभ्य इलच्च' इति चत्वारः प्रत्यया इष्यन्ते-इलच्, इनिठनौ, मतुबिति; तत्र यद्यन्यतरस्यांग्रहणं विकल्पार्थं स्यात्पिच्छादिभ्योऽपिप्रत्ययचतुष्टयं स्यात्। कथम् ? इलचो विकल्पितत्वादिनिठनौ, तयोरपि विकल्पितत्वान्मतुबिति; ततश्च तुन्दादिष्वेव पिच्छादयः पाठ्याः, पिच्छादिषु वा तुन्दादयः; पृथक्पाठाद्विज्ञायते- `अन्यतस्स्यांग्रहणेन मतुप्समुच्चीयते,न यथाप्राप्तमब्यनुज्ञायते' इति। एवं हि पिच्छादिभ्यः प्रत्ययद्वयम्--इलच्च, मतुप् च; तुन्दादिभ्यश्चत्वार इति पृथक् पाठोऽर्थवान्भवति। ननु च तुन्दादिभ्योऽनकारान्तेभ्योऽपीनिठनाविष्यते, पिच्छादिभ्यस्त्वकारान्तेभ्य एव; तत्र यदि तुन्दादिषु पिच्छादयः पठ्येरन्, तदा पिच्छादिभ्योऽप्यनकारान्तेभ्य इनिठनौ स्याताम् ? अथ पिच्छादिषु तुन्दादयः पठ्येरन्, तदा तुन्दादिभ्योऽप्याकारन्तेय्य इनिठौ न स्याताम् ? चत्तर्हि कानिचिदकारान्तानि पिच्छादिषु पठति, कानि चित्तुन्दादिषु, तद्यथोक्तस्यार्थस्य ज्ञापकं भविष्यति। तथा `केशाद्वोऽन्यतरस्याम्' इति न वक्तव्यम्; प्रकृतान्यतरस्यांग्रहणानुवत्त्या इन्ठन्मतुपां सिद्धत्वात्। तदिनिठनोःक प्राप्त्यर्थं क्रियमाणं पूर्वस्यान्यतरस्यांग्रहणस्य समुच्चयार्थत्वं ज्ञापयति। पार्ष्णिधमन्योर्दीर्धश्चेति। पार्ष्णीलः, धमनीलः। वातदन्तबलललाटानामूङ् चेति। वातादिभ्यो लज् भवति, तस्य च लच ऊडागमो भवति--वातूलः, दन्तूलः, बलूलः, ललाटूलः। जटाघटाकलाः क्षेप इति। एतै शब्दाः क्षेपे गम्यमाने लचमुत्पादयन्ति--जटाल इत्यादि। क्षेप इति किम् ? जटावांस्तापसः। क्षुद्रजन्तूपतापयोश्चेति। चुद्रजन्तुरानकुलात्, उपतापः=रोगः। विपादिकाल इति। `पादस्फोटो विपादिका'। सिध्म-गड्डुशब्दयोरनुपतापार्थः पाठः ।।

वत्सांसाभ्यां कामबले ।। 5.2.98 ।।
कामवति बलवति चेति। मत्वन्तनिर्द्देशेन कामबलशब्दयोरर्शआद्यच्प्रत्ययान्ततां दर्शयति।
ननु च वत्सांसशब्दौ वयोविशेषे प्राण्यङ्गविशेषे च रूढौ, न कामबलयो; तत्कथं ताभ्यां लजन्ताभ्यां कामवान् बलवांश्चोच्यते ? इत्यत आह--वृत्तिविषय इति। कुत एतद् ज्ञायते ? इत्याह-न ह्यत्रेति। वाक्ये योऽनयोः प्रासिद्धोऽर्थः स वृत्तौ नास्तीत्यर्थ। यस्त्वस्ति तं दर्शयतदि--वत्सल इति स्नेहवानुप्यत इति। स्नेहः=रागः, कामः।
सर्वत्रैवात्र प्रकरणे मतुप्समुच्चीयत इत्यत्रापि मतुपा भवितव्यमिति शङ्कामपनयति--न चेति। अनेनैव हेतुना वाक्यमपि न भवति। अत्र वत्सांसब्दौ द्वौ, अस्यास्मिन्निति च प्रत्ययर्थावपि द्वावेव तथापि यथासंख्यं न भवति, कथम् ? अजाद्यदन्तं लघ्वक्षरं पूर्वं निपततीत्यंसबलशब्दयोः पूर्वनिपाते प्राप्ते परनिपातलक्षणव्यभिचारचिह्नात्। एवं सर्वत्रैवात्र प्रकरणे द्रष्टव्यम् ।।

लोमादिपामादिपिच्छादिभ्यः शनेलचः ।। 5.2.100 ।।
अङ्ग कल्याण इति। `अङ्ग' इत्येतत् कल्याणविशिष्टेऽर्थे वर्त्तमानं प्रत्ययमुत्पादयति--कल्याणान्यङ्गान्यस्य अङ्गना, स्त्रिया एवाभिधानम्। कल्याण इति किम् ? अङ्गवती। शाकीपलालीदद्रवां ह्रस्वत्वं चेति। शाक्यादीनां नप्रत्ययो भवति ह्रस्वत्वं च-शाकिनम्, पलालिनम्। महच्छाकं शाकी, नानाजातीय एकसमाहारो वा। पलालक्षोदः=पलाली, भिन्नानि वा शलिकोद्रवादिपललानि। `दरिद्रातेर्यालोपश्च' इति दरिद्रातेरूकारः प्रत्ययो भवति, रिकाराकारयोश्च लोपः। दद्रूः=त्वग्रोगविशेषः, स यस्यास्ति स दद्रुणः। विष्वगिति। विष्वक्शब्दान्नप्रत्ययो भवति उत्तरपदलोपश्च, स चाकृतसन्देरकृतसन्धिकार्यस्य, अकृतयणादेशस्येत्यर्थः। विषु नाना अञ्चन्तीति विष्वञ्चि, तान्यस्य सन्तीति विषुणः= विषुषुवदाख्यः कालः, तस्य हि नानागतीनि दिनानि सन्ति, तदाश्रयत्वाद्दिवसान्तराणां न्यूनाधिकभावस्य। तथा मृत्युः, वयुः, अनवस्थितप्रकृतिर्मनुष्यादिश्च विषुणः, तत्र वृत्तिविषये गमनक्रियान्तर्भावाद्विष्वग्गमनमस्यास्कतीत्येवं वाक्यदेरभिदानमिच्छन्ति। यदि तु कृते यणादेशे उत्तरपदलोपः स्याद, वलि लोपे सति विष्ण इति प्राप्नोति। लक्ष्म्या अच्चेति। लक्ष्मीशब्दान्नप्रत्ययो भवति अक◌ारश्चान्तादेशः, लक्षअमीरस्यास्ति लक्ष्मणः। जटाघटाकलाः क्षेप इति। जटादयः क्षेपे गम्यमाने इलचमुत्पादयन्ति--जटिलः, घटिलः, कलिलः। क्षेपादन्यत्र जटावान् ।।

प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ।। 5.2.101 ।।

सूत्रे वृत्तिशब्दो वार्तिके दर्शनात्प्रक्षिप्तः---`वृत्तिर्विच्छेदप्रतिविदानात्' इति।
प्रज्ञाग्रहणं किमर्थम्? प्राज्ञ इत्येतद्रूपं यथा स्यात्। `प्रज्ञादिभ्यश्च' इत्यणि कुते सिद्धमेतत्, प्रज्ञ एव प्राज्ञः, यस्य हि प्रज्ञाऽस्ति स प्रजानाति ? सत्यम्; स्त्रियां त्वणि ङीब् भवति--प्राज्ञी, अस्मिस्तु णे टावेव भवति--प्राज्ञा। इह तु गुणभूतया क्रियया व्याकरणादिनां सम्बन्धे णाणोरुभयोरपि व्याकरणम्--प्राज्ञइति भवति, यथा--कृतपूर्वी कटमिति तद्धितप्रयोगे हि षष्ठी न भवतीत्युक्तम् ।।

तपस्सहस्राभ्यां विनीनी ।। 5.2.102 ।।
विनीन्योरिकारः--नकारस्येत्संज्ञा मा भूदिति। केचित्तु विनीनाविवीतीकाराकारौ पठन्ति, नकारान्तपाठे त्वित्संज्ञा प्राप्नोति। प्रत्ययार्थयोस्त्वित्यादि। यथा त्वनिष्यमाणमपि यथासंख्यं न भवति तथा पूर्वमेवोक्तम्। असन्तत्वादित्यादि। तपः शब्दाद् `अस्मायामेधा' इत्यादिना विनिप्रत्यये सिद्धे सहस्रशब्दादपि `अत इनिठनौ' इतीनिप्रत्यये सिद्धे, यत्पुनरिदं विधानं तद्वक्ष्यमाणेनाणा बाधा मा भूदित्येवमर्थम्। अणेति। हेतौ तृतीया। कर्तरि तु कृद्योगलक्षणा षष्ठी न प्राप्नोति, उभयप्राप्तौ कर्मण्येवेति नियमात् तृतीया भविष्यति, विनीन्योर्बाधा मा भूदिति कर्मणोऽपि गम्यमानत्वात्, यथा-` येनादर्शनमिच्छति' इति ? नैतदस्ति, अकाकारयोः प्रयोगे नियमस्य प्रतिषेधात्, तस्माद्धेतावेव तृतीया। घञन्तो वा बाधशब्दः पठनीयः। सहस्रशब्दादट्ठनपि बाध्यत इति। बाधा तु ठन इनणोः प्रतिपदविधानात् ।।

अण् च ।। 5.2.103 ।।
अण्प्रकरणे इत्यादि। प्रकरणम् प्रस्तावः, काण्डं वा। ज्योत्स्नातमिस्रेत्यादिसूत्रे पठितानां ग्रहणम्। ज्यौत्स्नः पक्ष इति। स पुनः पूर्वः पक्षः तत्र हि पञ्चदशस्वपि तिथिषु ज्योत्स्ना भवतीति कृत्स्नः पक्षो ज्योत्स्नया व्याप्यते। एतेन तामिस्रो व्याख्यातः, तमःसमूहस्तामिस्रम्, मत्वर्थीयो रः। तत्र ह्यवयवभूतानि तमांसि विद्यन्ते तधस्मिन्नस्ति स तामिस्रोऽपरः पक्षः। तमिस्रारात्रिर्यस्मिन्विद्यत इति वा तामिस्रः, नरकविशेषस्यैषा संज्ञा। कुण्कडलार्हः कौण्कडलः। तत्र यथाकथञ्चिन्मत्वर्थीय उपपाद्यः। यस्तु संसक्तकुण्कडलः स कुण्डली भवति। अयं च नियम इतिकरणानुवृत्तेर्ल भ्यते ।।

सिकताशर्कराभ्यां च ।। 5.2.104 ।।
शार्करं मध्विति। शर्करा माधुर्यम्, न तु गुडः, मधुनि तस्याभावात्।
अदेश इहोदाहरणमिति। देशे विसेषस्य वक्ष्यमाणत्वात् ।।

देशे लुबिलचौ च ।। 5.2.105 ।।
मतुप् चेति। अन्यतरस्याग्रहणेन मतुपः सर्वत्र समुच्चयात्। सिकता देश इति। लुपि युक्तवद्भावः।
देशे इति किमिति।। एतेन योगविभागोऽपि पर्यनुयुक्त एव भवति, तेन `सिकताशर्कराभ्यां लुबिलचौ च' इत्येव कस्मान्न कृतमित्यर्थः ।।

दन्त उन्नत उरच् ।। 5.2.106 ।।
दन्तशब्दादुन्नतोपाधिकादिति । सूत्रे तु पञ्चम्यर्थे प्रथमा, सप्तमी वा। दन्ता उन्नता अस्य दन्तुर इति। `हिमशिलाशर्करादन्तुराणि' इत्यादयो लक्षणाप्रयोगाः ।।

ऊषसुषिमुष्कमधो रः ।। 5.2.107 ।।
समाहारद्वन्द्वे सौत्रः पुल्लिङ्ग निर्देशः। सुषिमधुभ्यां मतुपि प्रापर्ते इतराभ्यामिनिठनोश्च रो विधीयते। ऊषाः=हरिणपांसवः, सुषिः=छिद्रम्, मुष्कौ=अण्कडौ। मधु=माधुर्याख्यो रसविशेषः, न माक्षिकं माध्वीकं वा; अनभिधानात्। एवं च मध्विदं मधुरमिति मधुन्यपि प्रयोगोपपत्तिः। इह च न भवति--मध्वस्मिन् घटो विद्यत इति।

रप्रकरण इति। प्रकरणम्=प्रस्तावः। कण्ठविवरं महदिति। गर्दभे व्युत्पत्तिं दर्शयति। तैक्षण्ये त्वव्युत्पन्नः खरशब्दः। मुखरः=वाचाल; तस्य हि सर्वस्मिन्वक्तव्ये मुखमस्ति; वक्तव्यावक्तव्यविवेकाभावात्। मुखम्=वागिन्द्रियम्। हस्तिहनुः कुञ्जशब्देनोच्यत इति। वृत्तिविषये। एतच्च सम्भवन्नवयवार्थः किमिति त्यज्यत इत्यभिप्रायेणोक्तम्। जातिशब्दस्तु कुञ्जरशब्दो हस्तिशब्दवत्।
नगरमिति। नगाः=वृक्षाः, पर्वताश्च। अयमपि जातिशब्द एव, तथा चनगरी, जातिलक्षणो ङीष् भवति। नगशब्दोऽयमश्मादिषु पठ्यते इति वुञ्छणादिशूत्रेणास्य सिद्धत्वात्, तस्माद्रो न वक्तव्यः। पाण्डुरमिति। पाण्डुः=शुक्लो वर्णः, तद्वत्पाण्डुरः। पाण्कडरशब्दस्त्वव्युत्पन्न एव गुणमात्रे गुणिनि च वर्तते ।।

द्युद्रुभ्यां मः ।। 5.2.108 ।।

द्युशब्दोऽप्युत्पन्नं प्रातिपदिकमुकारान्तम्। रूढिषु च मतुब्न विकल्प्यते इति। तदर्थस्य मतुपाभिधातुमशक्यत्वात् ।।

केशाद्वोऽन्यतरस्याम् ।। 5.2.109 ।।
मतुप्समुच्चयार्थं तदित्युक्तमिति। एतच्च `सिध्मादिभ्यश्च' इत्यत्रैव व्याख्यातम्।
वप्रकरण इति। प्रकरणम्=प्रस्तावः। मणिवः=नागविशेषः। हिरण्यवः=निधिविसेषः, कुञ्जरविशेष इत्यन्ये। विम्बावः, कुरराव इति। `अन्येषामपि दृश्थते' इति दीर्घः। राजीव इति। `कृदिकारादक्तिनः' इति ङीषन्तात्प्रत्ययः।
अर्णव इति। अर्णम्=उदकम्, `अर्त्तेरसुन्नुट् च'। छन्दसीवनिपौ चेति। चकाराद्वलश्च, अन्यतरस्यांग्रहणानुवृत्तेस्तु मतुप्, तदाह---
वश्च मतुप् चेति। रथीरिति। रथोऽस्यास्तीत्यर्थः। सुमङ्गलीरिति। सुष्ठुमङ्गलम्, `सुः पूजायाम्' इति प्रादिसमासः, ततोऽनेन मत्वर्थीय ईकारः, लाघवाद्बहुव्रीहिणा भवितव्यमिति न्यायश्छान्दसत्वादाश्रितः।
मघवानमिति। मघं धनं तदस्यास्तीति वनिप्। मतुपि तु मघवच्छब्दः, किमर्थं तर्हि `मघवा बहुलम्' इति ? तत्रैव वक्ष्यामः। उद्वा चेति।
उच्छब्दादुद्गताभिधायिना वप्रत्यये टाप्। उद्वतीति। मतुपः `झयः' इति वत्वम्, ङीप्।
मेधारथाभ्यामिति। इदमपि छन्दोविषयम् ।।

गाण्ड्यजात् संज्ञायाम् ।। 5.2.110 ।। गाण्डीवं धनुरिति। अर्जुनस्य। अजगवं धनुरिति। पिनाकमेतत्। उभयथा सूत्रं प्रणीतमिति। तन्त्रन्यायाश्रयेण। प्रयोगश्चोभयथापि भवति--`गाण्डीवी कनकशिलानिभं भुजाभ्याम्' `अधिरोहति गाण्डिवं महेषौ' इति च। संज्ञाग्रहणस्यैव प्रपञ्चः ।।

रजः कृष्यासुतिपरिषदो वलच् ।। 5.2.112 ।।
आसुतीवल इति। `षुञ् अभिषवे', क्तिन्, आसुतिः=अभिषवः। परिषदूल इति। परितः सीदन्तीति परिषत्, `सत्सूद्विष' इत्यादिना क्विप्, `सदिरप्रतेः' इति षत्वम्। पर्षच्छब्दमन्ये पठन्ति, `शदिभसोऽदिः' बाहुलकात्पृषेरपि भवति--`पर्षदेषा दशावरा' इति हि दृश्यते; `पार्षदकृतिरेषा तत्र भवताम्' `सर्ववेदपार्षदं हीदं शास्त्रम्' इति च भाष्ये। `पर्षद्वलामहाब्रह्मौरागतैः कठकाश्रमात्' इति च भट्टिकाव्ये। परिषच्छब्दस्तु प्रसिद्ध एव--`सहस्रशः समेतानां परिषत्त्वं न विद्यते' इति मनुः। अत्र च सूत्रे उभयोरपि उभयथा सूत्रप्रणयनात्।
भ्रातृवल इति । `वलः' इत्यत्राण्ग्रहणानुवत्तेर्दीर्घाभावः। पुत्रवलः, उत्साहवल इत्यत्र त्वसंज्ञयां दीर्घाभावः। संज्ञायां तु दीर्घत्वम्, `वलः' इत्यत्र हि `वनगिर्योः संज्ञायाम्' इत्यतः `सज्ञायाम्' इत्यनुवर्त्तते ।।

दन्तशिखात्संज्ञायाम् ।। 5.2.113 ।।
दन्तावलः=गजः, `दन्ती दन्तावलो हस्ती' इत्यमरसिंहः। शिखावलं नगरमिति। ननु देशे `शिखाया वलच्' इति चातुरर्थिकेनैव सिद्धम्, तच्चावश्यं कर्त्तव्यम्--निर्वृत्ताद्यर्थम् ? सत्यम्; इहापि सिखाग्रहणमदेशार्थमवश्यं कर्त्तव्यम्, इहापि यथा स्यात्--शिखावाला स्थूपेति। यद्येवंविधा संज्ञा भवति, तत्र देशे मत्वर्थे परत्वादनेनैव लज्युक्त इति मत्वा शिकावलं नगरमित्युदाहृतम् ।।

ज्योत्स्नातमिस्राश्रृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीसाः ।। 5.2.114 ।।
ज्योत्स्ना चन्द्रप्रभेति। तत्रावयवभूतं ज्योतिरस्तीति मत्वर्थोपपत्तिः। एतेन तमः समूहे तमिस्रशब्दो व्याख्यातः। निघण्टुषु तु तमः पर्यायस्तमिस्रशब्दः पठितः, तत्र समूहसमूहिनोरभेदोपचारः। स्त्रीत्वमतन्त्रमिति। व्याख्यानमत्र शरणम्। श्रृङ्गादिनच्प्रत्यय इति। यद्यपि सूत्रे चकारोऽनुच्यारितः, तथाप्यन्तोदात्तस्योच्चारणादेवं कल्प्यते। उर्जोऽसुगागम इति। उर्जस्वतीः, पयस्वतीः। ऊर्जस्वत्, पयस्वदित्यसुनन्तान्मतुप् दृश्यते, इह त्वनाश्रयणे हेतुर्मग्यः। सूत्रे ऊर्जस्विन्गोमिन्निति नान्तत्वाभिव्यक्तये नलोपो न कृतः ।।

अत इनिठनौ ।। 5.2.115 ।।
अकारान्तादिति। स्वरूपग्रहणं तु न भवति, अच्छब्दान्तात्कुर्वत्, पचदित्येवमादेरिति `रसादिभ्यः' पुनर्वचनात्। तद्ध्यनेन प्राप्तयोरिनिठनोर्बाधनार्थमित्युक्तम्। तपकरणं किमिति। व्रीहायादिषु मालादीनामाकारान्तानां पाठो नियमार्थो भविष्यतीति प्रश्नः। किमाकारान्तविषयो नियमः ? उत स्त्रीप्रत्ययान्तविषयः ? आहोस्विदाबन्तविषयः ? इति सन्देहसम्भवादघश्यं कर्त्तव्यं तपरकरणमित्युत्तरेऽभिप्रायः। एकाक्षरादिति। रसादिभ्यः पुनर्वचनमन्यनिवृत्त्यर्थमित्युक्तम्, तत्र च `एकाचः' इति पठीतम्, तेनैतत्सिद्धम्। कार्यीति। कार्यशब्दात्कृदन्तात् प्रत्ययः। तन्दुलीति। जातेः ।।

व्रीह्यादिभ्यश्च ।। 5.2.116 ।।
शिखादिभ्य इति। शिखादयोऽत्रैव वक्ष्यन्ते।
इकन्यवखदादिष्विति। विषयसप्तम्येषा। एतेऽप्यत्रैव पक्षयन्ते। इकन्निति। ठन्नित्यर्थः। पूर्वाचार्यप्रक्रियापेक्षस्त्विकन्निति निर्द्देशः श्लोकपूरणार्थः। परिशिष्टेभ्य

उभयमिति। एतच्च सर्वमितिकरणानुवृत्तेर्लभ्यते।
एवं तर्हीति। विपर्ययस्तु न भवति--तत्र स्वरूपग्रहणम्, इहार्थग्रहणामिति; असञ्जातविरोधित्वेनानैव स्वरूपग्रहणस्य युक्तत्वात् ।।
शीर्षान्नञ इति। नञः परो यः शीर्षशब्दस्तस्मादिनिठनौ भवतः---अशीर्षी, अशीर्षिकः। न विद्यते शिरो यस्य स एवमुच्यते। `अचि शीर्षे' इति शिरसः शीर्षभावः, वाक्येऽपि तस्यैव भीविनो निर्द्देशः ।।

तुन्ददिभ्य इलच्च ।। 5.2.117 ।।
स्वाङ्गाद्विवृद्धादिति। विवृद्ध्युपाधिकात्स्वाङ्गवाचिन इलजादयो भवन्ति, विवृद्धौ कर्णावस्य कणिलः, कर्णी, कणिकः, कर्णवान् ।।

एकगोपूर्वाट्टञ् नित्यम् ।। 5.2.118 ।।
एकशतमस्यास्तीति। एकं च तच्छतं चेति `पूर्वकाले' इत्यादिना कर्मधारयः। षष्ठीतत्पुरुषाद् बहुव्रीहेर्द्वन्द्वाच्च न भवति; अनभिधानात्; इतिकरणानुवृत्तेश्च। कथमिति। एकगोशब्दस्याप्यनकारान्तत्वात्प्रशनः। समासान्ते कृत इति। `गोरतद्धितलुकि' इति टचि। कथमिति। इवर्णान्त एव शककटिशब्दोऽस्तीति मन्यमानस्य प्रश्नः--अनभिधानादेव एकविंशत्यादिभ्यो न भविष्यति, किम् `अत' इत्यस्यानुवृत्त्या? तत्राह--अवशं चेति। एवमाद्यर्थमिति। एवमादि यत्सूत्रं तदर्शमित्यर्थः। ततः परे तु ये योगाः `वातातीसाराभ्याम्' इत्येवमादयः, तेषु `अतः' इत्यस्योपयोगो नास्तीति।
नित्यग्रहणमित्यादि। अन्यथान्यतरस्यांग्रहणेन सर्वत्रैवात्र प्रकरणे मतुप्समुच्चयादत्रापि प्रसङ्गः। एकेन वेति। यद्यवश्यं समर्थयितव्यमिति भावः। तत्र `सुप्सुपा' इति समासः। कथमेकदण्कडीति ? `एकदेशिनैकाधिकरणे' इति निर्देशो ज्ञापयति--इनिरपि क्वचिद्भवतीति ।।

शतसहस्रान्ताच्च निष्कात् ।। 5.2.119 ।।
निष्कादित्येतद् गुणभूताभ्यामपि शतसहस्राभ्यां सम्बध्यते, न तदन्तेनेत्याह---तौ चेदिति।
सुवर्णनिष्कशतमित्यादि। यत्र निष्कशब्दः पूर्वपदं न भवतीत्यर्थः।
अन्तग्रहणं किम् ? `निष्काच्छतसहस्राभ्याम्' इत्युच्यमाने सन्देहः स्यात्--किं पूर्वपदम् ?--इति ।।

रूपादाहतप्रशंसयोर्यप् ।। 5.2.120 ।।
रूप्यो दीनार इति। पुरुषाद्याकारचिह्नितौ सुवर्णपरिमाणविशेषौ व्यवहाराय कल्पितौ दीनारकार्षाणौ। निगातिकाताडनादिनेति। तीक्ष्णाग्रा आयसी शलाका=निगातिका, यया पुरुषाद्याककारं सुवर्णादौ सुवर्णकारा उद्भावयन्ति। `कृत्यल्युटो बहुलम्' इति करणे ण्वल्--निहान्यतेऽनया निघातिका, तया यत्ताडनम्, तदादिना। आदिशब्देन मुद्राप्रतिमुद्रणादि गृह्यते। क्वचिन्निघातिकाताडनेन पुरुषाद्याकार उद्भाव्यते, क्वचिन्मुद्रया प्रतिमुद्रयते दीनारादिषु, तदाहतमित्युच्यत इति। आहननेन निषपादितत्वात्।
प्रायेण केदारशब्दः पठ्यते, तस्यैवंविधेऽर्थे प्रसिद्धिर्मृग्या।
हिम्याः पर्वता इति। हिमवान् तत्पर्यन्तवर्त्तिनश्च भूम्नि यप्। गुप्याः=गुणवन्तः। इनिरपि दृश्यते--`गुण्यगुण्य इति न व्यजीगणत् ' ।।

आस्मायामेदास्रजो विनिः ।। 5.2.121 ।।
मतुप् सर्वत्र समुच्चीयत एवेति। पूर्वं नित्यग्रहणेन अन्यतरस्यांग्रहणं तत्रैव न सम्बध्यते, इह तु सम्बध्यत एवेत्येव शब्दस्यार्थः। तथा च `तसौ मत्वर्थे' इत्यत्र पयस्वान् यशस्वानिति भाष्ये उदाहृतम्। पयस्वीति। `तसौ मत्वर्थे' इति भत्वाज्जशत्वाभावः ।।

बहुलं छन्दसि ।। 5.2.122 ।।
अष्ट्रावीति। अशेष्ट्रनि अष्ट्रा, दंष्टापर्यायोऽयं मन्त्रेषु प्रयुज्यते--`अष्ट्रां पूषा शिथिरामुद्वरीवृजत्', `शुनमष्ट्रा व्यचरत्कपर्दी' इति, तत्रास्मादेव पाठाट्टाप। द्वयोभयहृदयानिति। अन्येषां स्वत एव दीर्घत्वात्।
हृदयाच्चालुरन्यतरस्यामिति। अन्यतरस्यांग्रहणेनेनिठनौ प्राप्येते, चकारस्य `चुटू' इतीत्संज्ञा। एवमुत्तरत्रापि। अन्ते तु चकारो नैवास्ति।
हिमाच्चेलुरिति। एकारादिः प्रत्ययः।
बलादूलजिति। सिध्मादिषु मत्वर्थे बलूलवालूलयोः प्रकारान्तरेण व्युत्पत्तिर्दर्शिता।
पर्वमरुद्भ्यां तन्निति। आद्युदात्तार्थो नकारः। मरुत्तो नाम राजा, यत्रेदं क्ष्रूयते--`मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे' इति। उपसर्गसंज्ञायां तु मरुच्छब्दस्योपसंक्यानाद् `अच उपसर्गात्तः' इति तत्वमनजन्तत्वेऽपि भवति। `मरुत एनं देयासुर्मरुत्तः' इति व्युत्पत्तिर्दर्शिता। तत्र `तृतीया कर्मणि' इति पूर्वपदप्रकतिस्वरः प्राप्नोति। मरुच्छब्दः `मृगोरुतिः' इति उतिप्रत्ययान्तत्वादन्तोदात्तः तत्र `उपसर्गाश्चभिवर्जम्' इत्याद्युदात्तत्वं द्रष्टव्यम् ।।

ऊर्णाया युस् ।। 5.2.123 ।।

ऊर्णायुरिति।क पदत्वाद्यस्येतिलोपो न भवति ।।

वाचो ग्मिनिः ।। 5.2.124 ।।
वाग्ग्मीति। चकारस्य कुत्वजश्त्वे, द्वयोर्गकारयोः श्रवणं भवति। अथ मिनिरेव कस्मान्नोच्यते, तत्रापि हि कुत्वजश्त्वयोर्वाग्ग्मीति सिद्ध्यत्येव; ननु चैवमेको गकारः स्यात्, न च `अनचि च' इति द्विर्वचनम्, `दीर्घादाचार्याणाम्' इति कप्रतिषेधात्। अथापि द्वयोरेकस्य वा श्रवणे विशेषो नास्तीत्युच्येत ? एवमपि `यरोऽनुनासिके' `प्रत्यये भाषायां नित्यवचनम्' इति नित्यमनुनासिकः प्राप्नोति, तथा--वाङ्भयम्, त्वङ्भयमिति ।।
आलजाटचौ बहुभाषिणि ।। 5.2.125 ।। यो हि सम्यगग्भाषत इति। बपह्वपीति भावः ।।

स्वामिन्नैश्वर्ये ।। 5.2.126 ।।
स्वशब्दादैश्वर्यवाचिन इति। अन्यत्रात्मात्मीयज्ञातिधानवचिनोऽपि स्वशब्दस्यैतद्वृत्तिविषये ऐश्वर्यवाचित्वं स्वभावतो भवति, तेन धनवान्निर्धनो वेशिता स्वामीत्युच्यते, न त्वयं धनवचनः। तथा च धनस्य स्वामीत्यपि भवति; अन्यथा मतुप आमिनचा बाधप्रसङ्गः। अन्यतरस्यांग्रहणेन मतुप्समुच्चयेऽपि धनस्य श्वामतिवद् धनस्य स्ववानित्यपि प्राप्नोति। तस्मादैस्वर्यवचनः स्वशब्दः, न धनादिवचन इति स्थितम्। धनयोगादैश्वर्यमित्यपि नास्ति; कवागादिविषयेऽपि दर्शनात्--वाचस्पतिः, वाचः स्वमीति; न च तत्र धनत्वप्रसिद्धिरस्ति ।।

अर्शआदिभ्योऽच् ।। 5.2.127 ।।
स्वाङ्गाद्धीनादिति। हीनम्=विकलम्। हीनस्वाङ्गवाचिनोऽञ्भवति। खञ्जः पादोऽस्यास्तीति खञ्जः। काणं चक्षुरस्यास्तीति काणः। कथं कुणिर्हस्तोऽस्यास्ति कुणिरिति ? अभेदोपचारात्। खञ्जादिष्वपि तर्हि तथैव भविष्यति ? इदं तर्हि प्रयोजनम्-भेदविवक्षायां मतुब्मा भूदिति। अथ कुणिशब्दान्मतुप् कस्मान्न भवति ? अनभिधानात्। शञ्जादिभ्योऽपि तर्ह्यनभिधानादेव मतुब्न भविष्यति ? अन्तोदात्तार्थं तु। ये आद्युदाता हीनस्वाङ्गवाचिनस्तेष्वन्तोदात्तत्वं यथा स्याद्, यदि सम्भवति। वर्णादिति। वर्णवाचिनः शुक्लशब्दादच्प्रत्ययो भवति-शुक्लोऽस्यास्तीति शुक्लः पटः। `गुणवचनेभ्यो मतुपो लुग्वक्तव्यः' इति सिद्धम् ? अन्तोदात्तार्थं तु। ये आद्युदात्ता वर्णवाचिनस्तेषु तद्वत्यन्तोदात्तत्वं यथा स्यात्। अपर आह--गुणिवचनेभ्योऽयं तद्वति प्रत्ययो विधीयते, तेन शुक्लाः प्रासादा अस्मिन्नगरे शुक्लं नगरमिति भवतीति ।।

द्वन्द्वोपतापगर्ह्यत्प्रणिस्थादिनिः ।। 5.2.128 ।।
तद्विषयेभ्य इति। तच्छब्देनोपतापो गर्ह्यं च प्रत्यवमृश्यते, न द्वन्द्वः; तस्यैव तद्विषयत्वासम्भवात्। प्राणिस्थार्थवाचिभ्य इति। इदं तु सर्वेषां ग्रहणम्। चित्रललाटिकावतीति। नियतद्रव्यविवक्षायां `जातिरप्राणिनाम्' इत्येकवद्भावाभावाट्टापः श्रवणम्। सिद्धे प्रत्यय इति। `अत इनिठनौ' इत्यनेन। ठनादिबाधनार्थमिति। आदिशब्देन मतुपो गुहणम् ।।

वातातिसाराभ्यां कुक् च ।। 5.2.129 ।।
वातातिसारयोरुपतापत्वादिति। अतिसारसाहचर्याद्वातस्यापि व्याधेरेव ग्रहणम्, न वायोरिति भावः। सिद्धे प्रत्यय इति। इनावेवेत्यर्थः। रोगे चायमिष्यते इति क्वचित्पठ्यते, तत्रोक्तो हेतुः ।।

वयसि पूरणात् ।। 5.2.130 ।।
मासः संवत्सरो वेति। प्रकरणादिवशात्पञ्चमादिशब्दस्य काले वृत्तिः, ततश्च `वयसि द्योत्ये' इति विशेषणं तत्रोपपन्नमिति भावः ।।

सुखादिभ्यश्च ।। 5.2.131 ।।
इनिः प्रत्ययो नियम्यते इति। पूर्वसूत्रे इनिरेव भवतीति नियमस्वरूपं दर्शितम्, इहापि तथैव नियमः। नन्वेवं यत एवकारस्ततोऽन्यत्रावधारणमिति सुखादय एव नियता भवन्ति, तत्किमुच्यते--`प्रत्ययो नियम्यते' इति? अन्यनिवृत्तिविशिष्टं व्यस्थापनगत्र नियम इत्यदोषः।
मतुब्बाधनार्थं वचनमिति। न तु ठन्बाधनार्थम्; `शिखादिभ्य इनिर्वाच्यः' इत्यनेनैव ठनो निवर्त्तितत्वादिति भावः ।।

धर्मशीलवर्णान्ताच्च ।। 5.2.132 ।।
ब्राह्मणवर्णिति। ब्राह्मणानां वर्णः=जातिः, तद्वान् ब्राह्मणवर्णी ब्राह्मण एव ।।

हस्ताज्जातौ ।। 5.2.133 ।।

इनिः प्रत्ययो नियम्यते इति। मत्वर्थसम्भवमात्रेणात्र प्रकरमे नियमवाचोयुक्तिः। परमार्थतस्तु विधिरयम्, कथम् ? गजशब्दवज्जातिशब्दोऽयम्, नात्र मत्वर्थगन्धोऽस्ति। तथा च विहस्तेऽपि गजे हस्तीति भवति; जातिसद्भावात्। हस्तसम्बन्धविवक्षायां च हस्तिन्यपि मतुब्भवति--हस्तवान्, हस्ती; हस्तवान्पुरुष इतिवत्। एवमुत्तरेष्वपि योगेषु द्रष्टव्यम्। हस्तग्रहणं चोपलक्षणार्थं मन्यते, तेन दन्ती, विषाणी, केसरीत्यादि सिद्धं भवति ।।

वर्णाद् ब्रह्मचारिणि ।। 5.2.134 ।।
ब्रह्मचारीति त्रैवर्णिकोऽभिमत इति। यद्यपि गुरुकुलवासिनि प्रथमाश्रमे ब्रह्मचारिशब्दः प्रसिद्धः, तथापीह लक्ष्यानुरोधात्त्रैवर्णिकमात्रमभिमतः, न त्वाश्रम इत्यर्थः, तस्य कादाचित्कं व्रह्मचर्ययोगं दर्शयति। स हीति। ब्रह्म चरतीति ब्रह्मचारी, ब्रह्म=वेदः। इह तु तदध्ययनार्थो नियमविशेषोऽभिमत इत्याह--नियममिति। तत्र ब्रह्मचारीति `व्रते' इति णिनिः। ब्रह्मचारिशब्दस्य मुख्यार्थपरित्यागेन त्रैवर्णिकमात्रपरत्वे कारणमाह--ब्राह्मणादयस्त्रयो वर्णा इति ।।

पुष्करादिभ्यो देशे ।। 5.2.135 ।।
अर्थीति। असन्निहितोऽर्थोऽस्येत्यर्थः। कालतश्चासन्निधिः, न देशतः। तत्र विरोधादस्तीति न सम्बद्ध्यते, ततश्चाप्राप्त एवेनिर्विधीयते, तक्रकौण्डिन्यन्यायेन च सत्तोपाधिकादिनेरभावः। अर्थवानिति। सन्निहितार्थ उच्यते। तदन्ताच्चेति। ग्रहणवता प्रातिपादिकेन तदन्तविधिप्रतिषेधादयमारम्भः। धान्यार्थीति। धान्यरुपोऽर्थोऽसन्निहितोऽस्तेत्यर्थः, कर्मधारयादिनिः। नन्वर्थयतेर्णिनिनैतत्सिद्धम्--धान्यमर्थयते धान्यार्थी ? एवमपि णिनीति पूर्वपदप्रकृतिस्वरः प्राप्नोति। एवं तर्हीदं स्यात्--अर्थनमर्थः=प्रार्थना, सा यस्यास्ति सोऽर्थी, धान्यस्यार्थो धान्यार्थः=धान्यप्रार्थना, सा यस्यास्ति सा धान्यार्थीति। एवं च कृत्वेदमपि सिद्धं भवति--अर्थिकः, प्रत्यर्थिक इति।
`अर्थाच्चासन्निहिते' इति तूच्यमाने इनेरेव विधानाट्ठन्न स्यात्। `एकाक्षरात्कृतो जातेः' इति प्रतिषेधोऽनित्यः, तेन कार्यी कार्यिक इतिवद् इनिठनौ भविष्यतः, मतुबनभिधानान्न भविष्यति। न च धनवाचिनोऽर्थशब्दात्सन्निहितादपीनिठनोः प्रसङ्गः; अनभिधानात्। एवम् `अर्थाच्चासन्निहितात्तदन्ताच्च' इति न वक्तव्यमिति स्थितम् ।।

बलादिभ्यो मतुबन्यतरस्याम् ।। 5.2.136 ।।
अन्यतरस्यांग्रहणेनेत्यादि। पूर्ववत्समुच्चये तस्य वृत्तेः? चकार एव तु न कृतः, किं कुर्मः! यदि तु विकल्पार्थेनानेन प्रत्ययो विल्प्येत, ततो मतुपा मुक्ते यथाप्राप्तमिनिठनौ द्वावपि स्याताम्। नन्वेवं सति सूत्रारम्भोऽनर्थकः स्यात्, विनाप्यनेन प्रत्ययत्रयस्य सिद्धत्वात्, तत इनिरेव भविष्यति। कुतो नु खल्वेतद्--इनिरेव भविष्यति न पुनष्ठनेव स्यादिति ? तस्मात्समुच्चयः ।।

संज्ञायां मन्माभ्याम् ।। 5.2.137 ।।
प्रथमिनि, दामिनीति। `अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च' इति तदन्तविधिः, `नस्तद्धिते' इति टिलोपः ।।

कंशंभ्यां बभयुस्तितुतयसः ।। 5.2.138 ।।
कंशमिति मकारान्ताविति। `कशब्दः सुखवार्वायुब्रह्ममस्तकवाचकः'क इत्यकारान्तः कशब्दो यद्यपि प्रसिद्धः, मकारान्तोऽपि क्वचिदस्तीति प्रदर्शनार्थम् `मकारान्तौ' इत्युक्तम्। उदकसुखयोर्वाचकाविति। न यथासंख्यम्, किं तर्हि ? यथासम्भवम्। कमित्युदकसुखयोर्वाचकम्, शमिति सुखस्य। `अल्पाच्तरम्' इति सुखस्य पूर्वनिपातः प्राप्तः न कृतः सूत्रकारेणैव; तत्र व्यभिचरितत्वात्। उदाहरणेष्वलनुस्वारपरसवर्णौ, तत्र यकारवकारयोः सानुनासिकौ यकारवकारौ ।।

अहंशुभयोर्युस् ।। 5.2.139 ।।
अहमिति शब्दान्तरमेवेति। ननु नात्र कश्चिच्छब्दः प्रकृतो यदपेक्षं शब्दान्तरत्वं स्यात् ? सत्यम्; `त्वाहौ सौ' इत्यस्मदादेशोऽहंशब्दः प्रसिद्धिवसाध् बुद्धिस्थो निर्द्दिष्टप्रायः, तदपेक्षं शब्दान्तरत्वम्। अहङ्ककारे वर्त्तते इति। अनेनार्थबेदमाह--`गर्वोऽभिमानोऽहङ्कारः'। अहंयुः, शुभंयुरिति। पूर्ववदनुस्वारपरसवर्णे। `ऊर्णाया युस्' इत्यत्र ये `छन्दसि' इति नानुवर्तयन्ति तेषामत्रैवोर्णाग्रहणं कर्त्तव्यम् ।।

इति क्षीहरदत्तमिश्रविरचितायां पदमञ्जर्या पञ्चमस्याध्यायस्य द्वितीयः पादः

5.3

काशिकावृत्ति
अथ पञ्चमाध्याये तृतीयः पादः

प्राग्दिशोविभक्तिः ।। 5.3.1 ।।
विभक्तिसंज्ञास्ते वेदितव्या इति। विभक्तिरिति शब्दः संज्ञा येषां ते तथोक्ताः। ननु विभक्तिशब्दः पूर्वमेव सुप्तिङां संज्ञात्वेन विनियुक्तः,क संज्ञा च प्रदेशेषु संज्ञिनं प्रत्याययति न स्वरूपम्, अतः सुप्तिङामेव संज्ञात्वं युक्तम्, न विभक्तिशब्दस्य ? सत्यम्; सुप्तिङस्तु संज्ञा भवन्तः प्रत्येकम्, समुदिता वा भवेयुः; न तावत्प्रत्येकम्, अनेकसंज्ञाकरणे प्रयोजनाभावात्; नापि समुदिताः, गौरवादनावृत्तेश्च। आवर्त्तिन्यो हि संज्ञा भवन्ति, न च समुदाय आवर्तते। अपर आह्-- ``यथा `किनौ लिट् च' इति लिड्वद्भावो विधीयते, तथात्रापि विभक्तिवद्भावो विधीयते'' इति। सुप्तिङां तु विधानमत्र नाशङ्कनीयम्; पूर्वमेवविहितत्वात्। त्यदादिविधय इति। त्यदादीनां यानि कार्याणि त्यदादित्वप्रयुक्तानि स्वरूपप्रयुक्तानि वा ते त्यदादिविधयः। उपलक्षणं चैतत्, दानीमो मकारस्य `न विभक्तौ तुस्माः' इतीत्संज्ञाप्रतिषेधोऽपि प्रयोजनम्। ततः, यत इति। `त्यदादीनामः' इत्यत्वम्। अत्र सकारस्यानन्त्यत्वादेवेत्संज्ञाभावः। कुत इति। `कुति होः' इति कुभावः। कदेति किमः कादेशः। क्वेत्यत्र `क्वाति' कइति क्वभावः इहेति। `इदमो हः,' `इदम इश्'। अत्र प्रत्ययस्वरेणैव स‌िद्धमुदात्तत्वम्। तस्मादित इत्येवलोदाहरणं विभक्तिस्वरस्य; अन्यथा `लिति' इति प्रत्ययात्पूर्वमुदात्तं स्यात्। ननु च `मध्येऽपवादाः' इति न्यायाद् `अनुदात्तौ सुप्पितौ' इत्यस्यैव विभक्तिस्वरोऽपवादः, न लित्स्वरस्य, लित्स्वर एव तु विभक्तिस्वर परत्वाद्बाधेत? नैष दोषः; नात्राकृते लित्स्वरे विभक्तिस्वरः प्राप्नोति, किं कारणण् ? `अन्तोदात्तात्' इति वर्त्तते, तत्र निमित्तमेव लित्स्वरो विभक्तिस्वरस्य। यद्यपि `ऊडिदम्' इत्यत्र `सावेकाचः' इत्यतस्तृतीयादिग्रहणमनुवर्त्तते, तथाप्या पञ्चमाध्यायपरिसमाप्तेर्यावान्प्रत्ययो विभक्तिसंज्ञकः सर्वोऽसौ तृतीयादिरिति तसिलादयोऽपि तृतीयादिग्रहणेन गृह्यन्त एव।
अतः परमित्यादि। एतत् `समर्थानां प्रथमाद्वा' इत्यत्रैव व्याख्यातम्। वावचनं त्वनुवर्त्तत एवेति। तस्य पृथकस्वरितत्वात्। अथ `सुपः, विभक्तिश्च' इत्यत्रैव `प्राग्दिशश्च' इत्युच्येत? नैवं शक्यम्; एवं ह्युच्यमाने न ज्ञायते--कुत आरभ्य प्राग्दिशीया ? इति। बहवश्च दिक्शब्दाः--दिगादिभ्यो यत्'क इत्येवमादयः, ततश्चावधिरपि न निश्चितः स्यात्। `किंसर्वनामबहुब्यः' इत्यादेश्च कार्यस्य विषयनियमार्थं पुनरिह `प्राग्दिशः' इति वाच्यमेव स्यात्। यदि पुनरिहैव `सुप्तिङौ च' इत्युच्येत? एवमपि `तिङस्त्रीणित्रीणि' इत्यत्र तिङ्ग्रहणम् सुप इति च तत्र वक्त्व्यं पुरुषवचनसंज्ञार्थम्, तत्र नास्ति विशेषः ।।

किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ।। अधिकारोऽयम्, परिभाषा वेति दर्शयति। प्रत्ययो वेदितव्य इति। द्वाभ्याम्, द्वयोरित्यत्र तसिल्त्रलौ न भवतः। प्रकृतिपरिसंख्यानम्=प्रकृतिपरिगणनम्। वैयाकरणपाश इति। अस्तात्यादयो ग्रहणवद्भ्यो विधीयन्त इति प्रकृतिपरिसंख्यानस्य तत्रासम्भवाद्व्यवहितोऽपि पाशप् प्रत्युदाहृतः। द्व्यादिपर्युदासादिति। यदि पुनरयं द्व्यादिभ्यः प्राक् किं पठ्येत, नैवं सक्यम्; एकशेषे हि दोषः स्यात्, त्यदादीनां यद्यत्परं तत्च्चिष्यतेत्वं च कश्च कौ, भवांश्च कश्च कौ।
बहुग्रहणे संख्याग्रहणमिति। कथमिह सर्वनामसंज्ञया संज्ञिनो निर्दिश्यन्ते ? तैः साहचर्याद् बहुशब्दस्यापि संज्ञिनो ग्रहणम्, यस्य `बहुगणवतुडतिसंक्या' इति संख्यासंज्ञा विहिता, न च तत्र वैपुल्यवाचिनो ग्रहणमिति अत्रापि तस्य ग्रहणाभावः ।।

इदम इश् ।। 5.3.3 ।।
शकारः सर्वादेशार्थ इति। अन्यथा विशेषविहितत्वात्त्यदाद्यत्वं बाधित्वा `अलोऽन्त्यस्य' इति मकारस्येत्वे हलिलोपे च-एतः, एहेत्यनिष्टं रूपं स्यात् ।।

एतेतौ रथोः ।। 5.3.4 ।।
इशोऽपवाद इति। भावे घञ्, इशो बाधनमेताभ्यां क्रियत इत्यर्थः। योगापेक्षं त्वेकवचनम्, अयं योग इसोऽपवाद इत्यर्थः। आदेशाभ्यां वा प्रत्येकमभिसम्बन्धादेकववनम्, यथा `भूशादिभ्यो भुव्यच्वेः' इति। इशोऽपवादाविति वा पठितव्यम्। रेफेऽकार उच्चारणार्थ इति। अकारवतो रेफस्य प्राग्दिशीयस्याभावात् ।।

एतदोऽशु ।। 5.3.5 ।।
शकारः सर्वादेशार्थ इति। अन्यथा `अलोऽन्त्यस्य' इत्यन्त्यस्य स्यात्। ननु चान्त्यस्य त्यदाद्यत्वेनैव सिद्धमत्वम्, कृते तर्हि तस्मिन्नकारस्याकारः प्राप्नोति, अकारस्य अकारवचने प्रयोजनाभावत्सर्वादेशो भविष्यति ? अस्त्यन्यदकारस्याप्यकारवचने प्रयोजनम्, किम् ? योऽन्यो विधिः प्राप्नोति स मा भूदिति। कः पुनरसौ ? `लिति' इति स्वरः। यथा--`मो राजि समः क्वौ' इति मकारस्य मकारवचनमनुस्वारबाधनार्थम्।
योगविभाग इति। अशो बाधनार्थः। थमुप्रत्ययः पुनरिति। अन्यथा य एवासावविसेषविहितस्थाकारादिः `प्रकारवचने थाल्' इति तत्रैव स्यात्। स तर्ह्युपसंख्येयः ? नेत्याह, इदमा थकरादिं विशेषयिष्यामः-- इदमो यस्थकारादिश्तत्रेति, स च थमुरेव। ततश्चास्मादेव ज्ञापकात्थमुर्बविष्यति, तेन च

थाल्बाध्यते।
भाष्ये तु `एतदोऽन्' इति नकारान्त आदेश इति स्थितम्। स चानेकाल्त्वात्सर्वादेशः, ततः स्थानिवद्भावात्प्रातिपदिकत्वे सति नलोपः---अतः, अत्र।।

सर्वस्य सोऽन्यतरस्यां दि ।। 5.3.6 ।।
`दि' इति दकारदियं सप्तमी, तत्र `यस्मिन् विधिः' इति तदादेर्ग्रहणं विज्ञायत इत्याह--दकारादौ प्रत्यये परत इति।
सर्वदा ब्राह्मणीति। किमर्थं स्त्रीलिङ्गोपन्यासः ? यो हि मन्यते--दीति दाशब्दादियं सप्तमी न तु दकारात्, तत्र क्त्वो ल्यप्, `हलः' `श्नः' इत्यादिवदातो लोप इति, तं प्रति दाशब्दः प्रत्युदाहृतः। एवमपि लाक्षणिकत्वादत्र दाशब्दस्य न भविष्यति ? एवं विजन्तमेतद् द्रष्टव्यम्, एवं च कृत्वा पुंल्लिङ्गमप्युदाहरणं भवत्येव ।।

पञ्चम्यास्तसिल् ।। 5.3.7 ।।
तसिल्प्रत्ययो भवतीति। यदि पुनः `पञ्चम्याः' `सप्तम्याः' इति षष्ठ्याश्रयेण पञ्चम्यादीनां तसिलादय आदेशा विज्ञायेरन्, सुब्लुक्स्वरगुणदीर्घत्वैत्वौत्वस्मायादिविधिप्रतिषेधः। सुब्लुक्--`अव्ययात्त्यप्', ततस्त्यः, तत्रत्यः, `सुपो धातुप्रातिपदिकयोः' इति तसित्रलोर्लुक् प्राप्नोति। स्वरः---तदा, यदा, `अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वं प्राप्नोति। गुणः--कुतः, `घेङिति' इति गुणः प्राप्नोति। दीर्घत्वम्--तर्हि, `अतो दीर्गो यञि', `सुपि च' इति दीर्घत्वं प्राप्नोति। एत्वम्---तर्हि, `अतो दीर्घो यञि',`सुपि च' इति दीर्घत्वं प्राप्नोति। एत्वम्--तेषु, तत्र, `बहुवचने झल्येत्' प्राप्नोति। औत्वम्-कस्मिन्, कुत्र, `औत्' `अच्च घेः' इत्यौत्वं प्राप्नोति। स्मायादितस्मात्, तस्मिन्, तत्र, `ङसिङ्योः स्मात्स्मिनौ' इति स्मात्स्मिनौ प्राप्नुतः। तस्मात् `पञ्चम्याः सप्तम्या इति पञ्चमी, तसिलादयश्च प्रत्ययाः' इति युक्तम्। अत एव `इतराभ्यः' इति पञ्चमीनिर्देशः; इतरथा `इतरासाम्' इति वक्तव्यं स्यात्। यदि तर्हि तसिलादयः प्रत्ययाः, नादेशाः, `तसेश्च' इति तस्यतेर्धातोरपि दोषः; `प्रतियोगे पञ्चम्यास्तसिः', `अपादाने चाहीयरुहोः' इत्यत्राप्यदेशत्वात्पञ्चम्यादेशस्य तसेस्तसिलादेशविदानात् ? प्रत्ययपक्षेऽपि न दोषः; तसेरितीकारो विवक्षितः, तेन धातोर्न भविष्यति ।।

तसेश्च ।। 5.3.8 ।।
तस्य तसेरिति। परत्वात्कृतस्य तसिलोऽवकाशः--कुतोऽवहीयते, कुतोऽवरोहतीति, तसेस्तु ग्रमत आगच्छतीत्यादिः; कुत आगच्छतीत्यादावुभयप्रसङ्गे परत्वात्तसकिर्भवति, तस्यानेन तसिलादेसः। तसेस्तसिल्वचनं स्वरार्थमिति। लित्करणस्योक्तं प्रयोजनम्। विभक्त्यर्थं चेति। विभक्तिसंज्ञार्थं चेत्यर्थः। अन्यथा परत्वात्तसौ कृते तस्याप्राग्दिशीयत्वाद्विभक्तिसंज्ञाया अभावात्त्यदाद्यत्वं न स्यादिति रूपमेव न सिद्ध्येत् ।।

पर्यभिभ्यां च ।। 5.3.9 ।।
सर्वोभयार्थे वर्तमानाभ्यामिति। अत्र चाभिधानस्वाभाव्यं हेतुः, तेनेह न भवति-परिषिञ्चति, अभियातीति; उपर्यर्थे परिः, आभिमुख्येऽभिः। इह त्वोदनं परिषिञ्चतीति सर्वतोभावेऽपि वावचनानुवृत्तेः पक्षे तसिलभावः। सर्वतः, उभयत इति। सप्तम्यन्ताभ्यामाद्यादित्वात्तसिः ।।

किमोऽत् ।। 5.3.12 ।।
तकारस्य `न विभक्तौ तुस्माः' इतीत्संज्ञाप्रतिषेधो न भवति; अनित्यत्वात्। अनित्यत्वं तु `इदमस्थमुः' इति थम उकारान्मकारस्येत्संज्ञापरिहाणार्थाज्ज्ञायते। दानीमस्तु मकारस्य भवत्येव प्रतिषेधः। अनित्यत्वं हि ज्ञाप्यते, न पुनस्तद्धितेष्वस्याभावः।
उत्तरसूत्रादिति। `किमोऽद्वा' इति सूत्रं पठितव्यम्। `ह च छन्दसि' इत्यत्र चकारेण त्रतलोः समुच्चयादिष्टसिद्धिरिति तेषां भावः। भागवृत्तिकारस्तु भाषायामेतन्नेच्छति ।।

इतराभ्योऽपि दृश्यन्ते ।। 5.3.14 ।।
पञ्चमीसप्तम्यपेक्षमितरत्वमिति। तयोरनन्तरनिर्दिष्टत्वात्। प्रायिकविध्यर्थमिति। प्रायिकोऽयं विधिर्यथा स्यादित्येवमर्थमित्यर्थः। तेन किं सिद्धं भवति ? इत्याह-तेनेति। स, भवान् ततो भवानित्यादि। अयं भवानिह भवानित्यादि हस्योदाहरणम्, को बवान्, क्व भवानित्यादि अतः। दीर्गायुःप्रमृतिष्विति। `नित्यं समासे' इति सत्वं न भवति; उत्तरपदस्थत्वात्। `इसुसोः सामर्थ्ये इति विकल्पोऽपि न भवति; व्यपेक्षायास्तत्राश्रयणात्।

सर्वैकान्यकिंयत्तदः काले दा ।। 5.3.15 ।।
सप्तम्या इति वर्तत इति। स्वरितत्वात्। न त्वितराभ्य इति। विपर्ययात् ।।

इदमो र्हिल् ।। 5.3.16 ।।

लकारः स्वरार्थ इति। यथा हीत इत्यत्र `ऊडिदम्' इत्यादिना स्वरो भवति, तथेह न भवति; लित्त्वस्याचरीतार्थत्वात्। तसिलस्तु लित्त्वलमिदमोऽन्यत्र चरितार्थम् ।।

अधुना ।। 5.3.17 ।।
इदमोऽशू भावो धुना च प्रत्यय इति। तत्र `ऊडिदम्' इत्यादिना विभक्तिस्वरः, स च `आदेः परस्य'क इत्यादेर्भवति। भाष्ये त्वधुनाप्रत्यय आश्रितः, तत्रेदम इशो यस्येतिलोपः, निपातनाच्च मध्योदात्तत्वम् ।।

तदो दा च ।। 5.3.19 ।।
दावचनमिति। अपर आह--`अदाप्रत्ययोऽयं न दाप्रत्ययः' इति, तत्राद्युदात्तत्वं पक्षे भवति ।।

तयोर्दार्हिलौ चच्छन्दसि ।। 5.3.20 ।।
तयोरिति प्रातिपदिकनिर्द्देशः, व्यत्ययेन पञ्चम्याः स्थाने षष्ठी ।।

सद्यः परुत्परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ।। 5.3.21 ।।
अहन्यभिधेय इति। सप्तम्यन्तस्याहन्शब्दस्यार्थ इत्यर्थः। तद्दर्शयति--समानेऽह्नि सद्य इति। एवं संवत्सरेऽभिधेय इत्यादिष्वपि द्रष्टव्यम् ।
उभयोरह्नोरुभयेद्युरिति पाठः। प्रायेण तु उभयस्मिन्नहनीति पठ्यते, तत्रोभे अहनी अवयवौ यस्य समुदायस्य तदहर्द्वयमुभयमहरित्युक्तम् ।।

प्रकारवचने थाल् ।। 5.3.23 ।।
सामान्यस्य भेदको विशेषः प्रकार इति। यथा ब्राह्मणसामान्यस्य माठरादयः। अनेनैतद्दर्शयति--यद्यपि सादृश्यमपि प्रकारः, यथा `प्रकारे गुणवचनस्य' इत्यत्र वक्ष्यति--`प्रकारो भेदः सादृश्यं च, तदिह सादृस्यं प्रकारो गृह्ये' इति; तथापि नेह सादृस्यं गृह्यते, अनभिधानादिति। तेन प्रकारेण तथेति। प्रथमान्तात्तु न भवति--स प्रकारस्तथेति; अनभिधानादेवेति भावः।
किंसर्वनामबहुभ्यो विशे,विहिंतेन थाला सामान्यविहितस्य जातीयरो बाधप्रसङ्ग इत्याशङ्क्याऽऽह--जातीयरोऽपीति। सत्यं जातीयरोऽपीदृशमेव लक्षणं `प्रकारवचने जीतीयर्' इति, कथं तर्ह्यबाध? अत आह--स त्विति। अर्थभेदाद् भेद इत्यर्थः। एवं च कृत्वा प्रकारमात्रे थालं विधाय तदन्तात्प्रकारवति जातीयरं प्रयुञ्जते--तथाजातीयः, यथाजातीय इति ।।

किमश्च ।। 5.3.25 ।।
योगविभागा उत्तरत्र किम एवानुवृत्तिर्यथा स्यादिदमो मा भूदिति।।

दिक्शब्देभ्यः ।। 5.3.27 ।।
सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ।। दिशां शब्दाः दिक्शब्दाः, षष्ठीसमासः। दिशां ये वाचकास्ते दिवशब्दा इति। दिशां ये वाचकत्वेन दृष्टाः, त इह दिक्शब्दा विवक्षिता इति, न तु दिशमभिदधाना एवेत्यर्थः। तेभ्य इति। यद्यपि पूर्वादिशब्दा दिशि वर्तमानाष्टाबन्ताः, देशकालयोस्तु प्रकृत्यन्ता इति रूपभेदः, तथापि टापः स्वार्थिकत्वाद्वाचकरूपे भेदाभावात् त एव दिक्शब्दा देशकालयोर्वर्त्तन्त इति वाचोयुक्तेर्नास्ति विरोधः। ये त्वर्थभेदं मन्यन्ते, तेषां सादृश्यनिबन्धनस्तेभ्य इति व्यपदेशः। कथं पुनर्द्दिक्शब्दा देशकालयोर्वर्त्तन्ते ? स्वभावाकत्। पूर्वादयो हि दिशामिव देशकालयोरपि स्वभावादेव वाचकाः। कथं तर्हि त्रिषु वर्त्तमाना दिशैकया व्यपदिश्यन्ते-दिस्शब्देभ्य इति? को दोषः; अन्वयेन ह्ययं व्यपदेशः, न तु दिशामेव ये शब्दाः-इत्यवधारणेन।
अथ देशकालयोरन्यतरेण कस्मान्न व्यपदिश्यन्ते ? शिंशपाचोद्यमेतत्। किं च, दिशां निर्द्देशे लाघवं भवति। दिक्शब्दस्योपलक्षणत्वात्पुनर्दिग्ग्रहणम्, अन्यथा देशकालवृत्तिभ्य एव स्यात्, न दिग्वृत्तिभ्यः। इह सप्तम्यादीनां विभक्तीनामर्थानां दिगादीनां च साम्यात्संख्यातातुदेशः स्यादिति ? तत्राह---यथासंख्यमत्र नेष्यत इति। अस्वरितत्वात्। पुरस्ताद्, अधस्तादिति। पूर्वाधरशब्दयोः `अस्ताति' इति पुर, अध्--इत्येतावादेशौ। ऐन्द्र्यां दिशि वसतीति। ऐन्द्रीशब्दोऽयम् इन्द्रसंबन्धिस्त्रीलिङ्गवस्तुमात्रमाह, दिक्शब्दसन्निधौ तु दिशि वर्त्तते इति न दिक्शब्दः। किञ्च, दिक्शब्देभ्य इत्येतस्मिन्नसति ये देशवाचिनः पञ्चालादयः, ये च कालवाचिनो मासादयः, तेभ्योऽपि प्रसङ्गः। अस्मिंस्तु सति दिक्शब्दा एव ये देशकालयोर्वर्तन्ते तेभ्य एव भवति। दिग्देशकालेष्विति किमिति।
`दिक्शब्देभ्यः' इतिशब्दग्रहणाद्दिशि दृष्टः शब्दो दिक्शब्द इति व्युत्पत्त्या देशकालवृत्तिभ्योऽपि सिद्धः प्रत्ययः, `दिक्शब्दाञ्चूत्तरपद' इति पञ्चमीवदिति मत्त्वा प्रश्नः। पूर्वस्मिन्गुराविति। पूर्वशब्दोऽत्र दिगादिसम्बन्दाद्गुरौ वर्त्तते, न दिगादिषु ।।

दक्षिणोत्तराभ्यामतसुच् ।। 5.3.28 ।।

किमर्थमतसुजुच्यते, न तसुजेवोच्येत्, तत्रायमप्यर्थः-- स्वरार्थश्चकारो न कर्त्तव्यो भवति, प्रत्ययस्वरेणैवक सिद्धम्, का रूपसिद्धिः ? दक्षिणोत्तरशब्दावकारानेतौ। यदा तर्हि दिशि वर्त्तमानौ दाबन्तौ भवतस्यदा यस्येतिलोपेन टापो निवृत्तिर्यथा स्यादित्येवमर्थोऽकारः, सिद्धाऽत्र टापो निवृत्तिः, कथम् ? `तसिलादिष्वाकृत्वसुचः' कइति पुंवद्भावात्। ननु च समानायामाकृतौ भाषितपुंस्कस्य तेन पुंवद्भावः, आकृत्यन्तरे चैतौ भाषितपुंस्कौ, कथम् ? दिशि वर्त्तमानाः पूर्वादयो निमित्तान्तरनिपेक्षाः, देशकालयोस्तु व्यवस्थापेक्षाः। कथं तर्हि दिशि वर्तमानानां सर्वनामसंज्ञा भवति, यावता व्यवस्थायामित्युच्यते ? अत्राहुः--यद्यपि दिशि षर्तमानानां व्यवस्था न प्रवृत्तिनिमित्तम्, वस्तुतस्तु व्यवस्था विद्यते इति भवत्येव संज्ञा। व्यवस्थायामिति हि विषयो निर्द्दिश्यते, न तु प्रवृत्तिनिमित्तम्। तथा चोत्तराः कुर्व इत्यत्र निरूढत्वाद्व्यवहारस्य प्रयोक्तृभिरनपेक्ष्यमाणाया अपि वस्तुतो व्यवस्थायाः सद्भावात्सर्वनामसंज्ञाप्रसङ्गेऽसंज्ञायामिति प्रतिषेधः कृत इति। तदेवमाकृतिभेदात्तसिलादिष्विति पुंवद्भावो न सिद्ध्यति। एवं तर्हि `सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति पुंवद्भावो भवि,यति, यथा दक्षिणोत्तरपूर्वाणामित्यत्र, तस्मान्नार्थोऽकारकरणेन ? इत्यत आह--अकारो विशेषणार्थ इति। `षष्ठी तसर्थप्रत्येन' इत्युच्यमाने ततो ग्रामादागत इति तसिलापि योगे षष्ठी स्यात् ? `अपपदविभक्तेः कारकविभक्तिर्बलीयसी'। इह तर्हि ततो ग्रामादन्य इत्यन्यादियोगे या पञ्चमी, तां बायत्वा षष्ठी स्यात् ? `निरनुबन्धकग्रहणे न सानुबन्धकस्य' इत्येवं तसिलादियोगे न भविष्यति। यस्तर्हि निरनुबन्धकः `प्रतियोगे पञ्चम्यास्तसिः' `तेनैकदिक्', `तसिश्च', तत्र मा भूत्अर्जुनतः प्रत्यभिमन्युः, सुदामतो विद्युदिति ।।

अञ्चेर्लुक् ।। 5.3.30 ।।
अञ्चत्यन्तेभ्य इति। केवलेभ्यः, लिङ्गविशिष्टेभ्यश्च। स्त्रीप्रत्ययोऽपि निवर्त्तत इति। एवं चाकारलोपः, `चौ' इति दीर्घत्वं च नास्तीति, प्रागित्यत्र सवर्णदीर्घत्वम्, प्रत्यगित्यत्र यणादेशः ।।

पश्चात् ।। 5.3.32 ।।
अपरस्य पश्चभाव इति। केवलस्य लिङ्गविशिष्टस्य च । दिक्पूर्वपदस्य चेति। दिग्वचनः पूर्व पदं यस्य तथोक्तः। दक्षिणपश्चादिति। दक्षिणस्या अपरस्याश्च दिशो यदन्तरालमिति `दिङ्नामान्यन्तराले' इति बहुव्रीहिः, दक्षिणापरा, तस्यां वसतीत्यातिप्रत्ययः, अपरस्य च पश्चभावः। अर्धोत्तरपदस्य चेति। अपरस्य चेत्येव। विनापी पूर्वपदेनेति। अपरस्य, अर्धोत्तरपदस्येति सम्बन्धः ।।

उत्तराधरदक्षिणादातिः ।। 5.3.34 ।।
आतिप्रत्ययो भवतीति। दक्षिणोत्तराभ्यामतसुजपि भवति, अधरशब्दादस्तातिरपि; `अस्ताति च' इत्यधरशब्दस्याधादेशविधानाल्लिङ्गात्। अत्र चोत्तरादीनां सप्तम्यादीनां च साम्ये सत्यपि पूर्ववद्यथासंख्याभावः। अस्तादिस्तूत्तरादीनां न सम्भवति, दक्षिणशब्दस्य काले वृत्त्यसम्भवात् ।।

एनबन्यतरस्यामदूरेऽपञ्चम्याः ।। 5.3.35 ।।
अदूरे चेत्यादि। यद्यप्यवधिरवधिमान् वा सूत्रे न श्रूयते, तथापि दिक्शब्दानामवध्यपेक्षा प्रवृत्तिर्भवति। अवधिश्चावधिमन्तमपेक्षते इति सामर्थ्यादेव विशेषो लभ्यते। तत्र देशकालयोरवध्यपेक्षायां न विवादः, दिशि तु विवदन्ते।
प्रागसेरिति। `असिपुरधवश्चैषाम्' इत्यस्मात्। दिवशब्दमात्रादिति। तेन पूर्वेण वसतीत्याद्यपी भवति। अञ्चत्यन्तात्तु न भवति; व्यवस्थइतविभाषाविज्ञानात्। अस्तु वा तदन्तादपि, `अञ्चेर्लुक्' इत्यनुवृत्तेर्लुग्भविष्यति।
पकारः स्वरार्थ इति। `एनपा द्वितीया' इति विशेषणार्थस्तु न भवति। अस्त्वेनेनेति, `अतसर्थप्रत्ययेन' इत्यनुवृत्तेः `द्वितीयाटौःस्वेनः' इत्यस्यात्र ग्रहणं न भविष्यति ।।

दक्षिणादाच् ।। 5.3.36 ।।
चकारो विशेषणार्थ इति। अन्यथा वाक्यस्मरणयोर्य आकारोऽननुबन्धकस्तेनापि योगे पञ्चमी स्यात्। अथाप्यञ्चूत्तरपदेनाहिना च साहचर्यादतसर्थस्याकारस्य ग्रहणं स्यात्, तथापि पश्चाशब्द आकारान्तो निपातित हति तेनापि योगे पञ्चमी स्यात्। छान्दसः पश्चाशब्दः, दृष्टानुविधिश्छन्दसि भवति? असन्देहार्थं तर्हि, `अञ्चूत्तरपदाहियुक्ते' इति ह्युच्यमाने आकारप्रश्लेषो व्याख्यातव्यः स्यात्। `अञ्चूत्तरपदाद्यायुक्ते' इति सूत्रं करिष्यते, तस्माक्षइणासीत्यत्र `स्वरितो वानुदात्तेऽपदादौ' इति विधिर्मा भूदिति चकारस्य प्रयोजनं वाच्यम् ।।

आहि च दूरे ।। 5.3.37 ।।
चकारादाच्चेति। अन्यथा दूरे विवक्षिते विशेषविहित आहिरेव स्यात् ।।

उत्तराच्च ।। 5.3.38 ।।

आजाही प्रय्ययौ भवत इति। यद्यप्याहिरनन्तरः, तथापि चकारेण व्यवहितस्यापि आचः समुच्चय इति भावः ।।

पूर्वाधरावराणामसि पुरधवश्चैषाम् ।। 5.3.39 ।।
आनन्तर्ययोगे षष्ठी। असीत्यविभक्तिको निर्द्देशः। एषामिति वचनं विस्पष्टार्थम्। सन्निधानाद्धि पूर्वादय एव स्तानिनः शक्या विज्ञातुम् ।।

अस्ताति च ।। 5.3.40 ।।
अस्तातीति सप्तम्यन्तम्। असिप्रत्ययेनेति। अधरशब्दादातिनापि ।।

विभाषाऽवरस्य ।। 5.3.41 ।।
अवित्ययमादेशो भवतीति। कथं पुनर्बहुष्वादेशेषु प्रसक्तेषु अयमेव भवतु? अस्यैवानुवृत्तेः। अथ वा--अवरस्य यदुक्तं तदसतातौ विभाषा भवतीति विज्ञास्यते ।।

संख्याया विधार्थे धा ।। 5.3.42 ।।
विधा प्रकार इति `गृह्यते' इति वक्ष्यमाणेन सम्बन्धः। यद्यप्योदनपिण्कडोऽपि विधाशब्देनोच्यते, तथापीह प्रकार एव गृह्यत इत्यर्थः। एतेन एका गोविधेत्यादौ न भवति। एतच्चार्थग्रहणाल्लभ्यते। इह हि विधायामिति वक्तव्ये यदर्थग्रहणं कृतं तस्यैतत्प्रयोजनम्----विधाशब्दो यत्रार्थे प्रसिद्धतरस्तस्य ग्रहणं यथा स्यात्। यथा च त्रिविधम्, बहुविधमित्यादौ प्रकारे प्रसिद्धो विधाशब्दः, न तथौदनपिण्कडे। सूत्रे च--विधाशब्दस्यार्थो विधार्थ इति षष्ठीसमासः। एवं वृत्तावपि। स च क्रियाविषय इति। एतच्चाभिधानस्वभावाल्लभ्यते। तदयमर्थ इत्याह--क्रियाप्रकारे इति। कथं तर्हि नवधा द्रव्यम्, बहुधा गुणाः, एकविशतिधा बाह्वृच्यम्, नवधाथर्वाणो वेद इति/ अत्रापि हि सर्वत्र क्रिया प्रतीयते--उपदिश्यते इति, भवतीति वा। द्विधा गच्छतीत्यादावे कस्या एव गमनक्रियाया अवान्तरप्रकारभेदः प्रतीयते। एकधा भुङ्क्ते इत्यत्र तु प्रकारैक्यप्रतिपादनेन तन्निवृत्तिः। एकः पाक इत्यादौ तु पाकव्यक्तेरेक्त्वं विवक्षितम्, न त्ववान्तरप्रकारभेदाभावेनैकप्रकारत्वमिति धाप्रत्ययाभावः। तद्विवक्ष्यां तु भवत्येव--एकधा पाक इति। पञ्च पाका इत्यादौ च भिन्ना एव पाका विवक्षिताः, न त्वेकस्य प्रकारवत्त्वम्। तद्विवक्षायां तु तत्रापि भवितव्यमेव--पञ्चधा पाका इति ।।

अधिकरणविचाले च ।। 5.3.43 ।।
अधिकरणं द्रव्यमित्यादि। जात्यादीनामाधारत्वात्। विचालनं विचालः=अन्यथाकरणम् णिजन्ताद् `एरच्'। तच्चेह संख्यासन्निधानात्संख्यान्तरापादनेनेत्याह--तस्य विचालः संख्यान्तरापादनमिति। एकं राशि पञ्चधा कुर्विति। पञ्च राशीन्कुर्वित्यर्थः। नात्र प्रकारभेदो गम्यते, नतरां क्रियाविषय इति सूत्रारम्भः। तत्र द्रव्यस्यापि स्वभावाद्धाप्रत्ययान्तेनासत्त्वरुपेण प्रतिपादनमित्यव्ययत्वम्, यथा--सुदामतो विद्युदिति तसन्तस्य ।।

एकाद्धो ध्यमुञन्यतरस्याम् ।। 5.3.44 ।।
`एकाद्' इति शब्दप्रधानत्वात्सर्वनामकार्याभावः एकधा राशि कुर्विति। अधिकरणविचाले उदाहरणं। ऐकध्यं भुङ्क्त इति। विधार्थे।
प्रकरणादेव लब्ध इति। कस्मिन् लब्धे? धाप्रत्ययस्य स्थानित्वे। इह हि पूर्वसूत्राद्धाग्रहणमनुवर्त्तते, स च पूर्वमेव विहित इति विधानासम्भवात् स्थानित्वमेव विज्ञास्यते।
विधार्थे विहितस्यापि यथा स्यादिति। स्थान्यादेशाभावोऽप्येतदर्थमेवाश्रितः; प्रत्ययान्तरेऽप्यस्मिन्दोषाभावात्। किं पुनः कारणं विधार्थे विहितस्य तस्य न स्याद्? अत आह--अनन्तरस्यैव हीति। `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति भावः ।।

द्वित्र्योश्च धमुञ् ।। 5.3.45 ।।
भतिद्वैधानीति। एकशेषेण बहुवचनम्। क्वचित् पथि द्वैधानीति पाठः। धमुञन्तस्यालिङ्गसंख्यत्वेऽपि तदन्तात्स्वार्थे विहितस्याप्यस्य स्वभावाल्लिङ्गसंख्यायोगः, तेनाव्ययत्वं न भवति ।।

एधाच्च ।। 5.3.46 ।।
योगविभागो यथासंख्यनिरासार्थः ।।

याप्ये पाशप् ।। 5.3.47 ।।
याप्यशब्दोऽकयमस्त्यपादानसाधनः--यापिता अस्माद् गुणा इति याप्यः=कुत्सितः, अस्ति कर्मसाधनः-यापयितव्यो याप्यो देशान्तरं प्रापयितव्यः, शरीराद्वाऽपनेतव्यः, अशक्यप्रतीकारो याप्यो व्याधिः। तत्रेहाभिधानशक्तिस्वभावादाद्यस्य ग्रहणमित्याह--याप्यः कुत्सित उच्यत इति।

तत्र कस्मान्न भवतीति। व्याकरणे प्रवीणस्यापि दुःशीलत्वेन कुत्सितत्वाद् भवितव्यमेवेति भावः। यस्य गुणस्येति। गुणो विशेषणम्, द्रव्यं विशेष्यम्। तस्य कुत्सायां प्रत्यय इति। एतच्चान्तरङ्गत्वाल्लभ्यते। प्रवृत्तिनिमित्तं हि प्रत्यासन्नम्; शब्दवाच्यत्वात्। धर्मान्तरं तु तत्र वस्तुतः सदपि न शब्देन स्पृश्यते। यत्र तु प्रवृत्तिनिमित्तस्य कुत्सितं न सम्भवति--असको देवदत्तक इत्यादौ, तत्र सहचरितगुणक्रियाकुत्साश्रयः प्रत्ययो भवत्येव। एवं च देवदत्तपाश इत्याद्यपि सत्यभिधाने भवति।

`कुत्सिते' इत्यत्रैवायं न विहितः; तिङन्तादपि प्रसङ्गात् ।।

पूरणाद्भागे तीयादन् ।। 5.3.48 ।।

पूरणार्थविहितत्वात्तीयप्रत्यय एव पूरणशब्देनोक्त इत्याह--पूरणप्रत्ययो यस्तीय इति। स्वरार्थं वचनमिति। भागे नित्स्वरेणाद्युदात्तत्वं यथा स्यात्, रूपे तु नास्ति विशेषः। पूरणग्रहणमुत्तरार्थमिति। नेहार्थम्, कुतः? इत्यत आह--न हीति। ननु चायमस्ति--`मुखपार्श्वतसोर्लोपः, भुखतीयः' इति ? तत्राह--मुखतीयादिरनर्थक इति। मुखतीयादौ यस्तीयशब्दः सोऽनर्थक इत्यर्थ ।।

प्रागेकादशभ्योऽच्छन्दसि ।। 5.3.49 ।।

प्रागीकादशभ्यः संख्याशब्देभ्य इति। एकादशशब्दात्प्राञ्चो ये संक्याशब्दास्तेभ्य इत्यर्थः, एकादशभ्यः प्राचीनेषु संख्येयेषु ये संख्याशब्दास्तेभ्य इती वा ।।

षष्ठाष्टमाभ्यां ञ च ।। 5.3.50 ।।

यथासंख्यमत्र न भवति, अन्यतरस्मादनः पूर्वेणैव सिद्धत्वात् ।।

मानपश्वङ्गयोः कन्लुकौ च ।। 5.3.51 ।।

मानं व्रीहिपरिमितं सुवर्णम्। अष्टमो भाग इति। कस्य पुनरत्र लुक् ? इत्याह--ञस्य लुक्, अनो वेति। अष्ठन्शब्दाद्भागो तयोरेव विहितत्वत्। लुग्वचनं किम्, यावता महाविभाषयैव पक्षे ञानोरभावः सिद्धः ? ज्ञापनार्थं तु, एतज्ज्ञापयति--पूर्वसूत्रे ञानौ नित्याविति ।।

एकादाकिनिच्छासहाये ।। 5.3.52 ।।

आकिनिचः कनो वेति। तयोरेवानेन सूत्रेण विधानात्। एकधेत्यादौ तु सूत्रान्तरविहितस्य लुग् न भवति; असन्निधानात्।

संख्याशब्दनिरासार्थमिति। अन्यथा प्रसिद्धत्वात्संख्याप्रकरणाच्च तस्यैव ग्रहणं स्वात्। अस्तु, को दोषः ? तत्राह---तदुपादाने हीति। द्विबह्वोरिति। द्वित्वे बहुत्वे चेत्यर्थः। न हि द्वयोर्बहुषु वा एकत्वसंख्यास्ति। असहायत्वं तु परस्परव्यतिरिक्तसहायाभावेन बहूनामपि भवति। इह अकिनिजेवायं वक्तव्यः, सवर्णदीर्घत्वेसिद्धमिष्टम्, यस्येतिलोपश्चाकारोच्चारणसामर्थ्यान्न भविष्यति ? न चावग्रहनिवृत्त्यर्थोऽकारः, नहि लक्षणेन पदकारा अनुवर्त्त्याः, पदकारैर्नाम लक्षणमनुवर्त्त्यम् ।।

भूतपूर्वे चरट् ।। 5.3.53 ।।

भूतपूर्वशब्द इत्यादि। केवलभूतशब्दः `पौतन्येऽपि वर्त्ततेभूतमियं ब्राह्मणीति, सत्येऽपि वर्त्तते--भूतवादीति, अत्र भूतशब्दो विद्यमानवचनित्यन्ये; पूर्वशब्दश्च दिग्देशयोरपि वर्त्तते, तस्मादन्यतरोपादाने विवक्षितोऽर्थो न गम्यत इत्युभयोरुपादानम्। आढ्यचर इति। यथात्र चकारस्येत्संज्ञा न भवति, तथा `चुटू' इत्यत्र प्रतिपादितम्।

`गोष्ठात्खञ्' इत्यत्रैव नोक्तम्, विशेषविहितेन खञा चरटो बाधा मा भूदिति। सन्निधौ हि बाध्यबाधकभावः, न कालभेदे ।।

षष्ठ्या रूप्य च ।। 5.3.54 ।।

शेषविषये विधानात्तदन्तव्यवच्छेदकत्वाद्विशेषणमप्रधानम्। यत्पुनः षष्ठ्याक्षिप्तं सम्बन्धिमात्रम्, तद्व्यवच्छेद्यत्वाद्विशेष्यं प्रधानम्। प्रदानेतरसन्निधौ च प्रधाने कार्यसम्प्रत्ययो भवतीति प्रत्ययस्तावचत्तत्रैव विज्ञायते, ततश्च भूतपूर्वग्रहणमपि तस्यैव विशे,णमित्याह-षष्ट्यन्तात्प्रत्ययविधान इति। हेतुगर्भ चेदमभिधानम्-यस्मात् षष्ठ्यन्तात्प्रत्ययविधानं तस्मादिति। सम्प्रतीति। यद्यपि पूर्वं ङ्याप्प्रातिपदिकेनैव सम्बद्धमासीदिदानीं त्वेवमित्यर्थः। तत्र विधान इति सप्तम्यन्तस्य सम्प्रतीत्यस्य च पौनरुक्त्यं मन्यमाना विधानशब्दमधिकरणसाधनं सूत्रपरं व्याचक्षते ।।

अतिशायते तमविष्ठनौ ।। 5.3.55 ।।

अतिशयनमतिशायनमिति। भावे ल्युट्। यद्यप्यनन्तरमेव वक्ष्यति--निपातनाद्दीर्घत्वमिति, तथापि `अबाधकान्यपि निपातनानि भवन्ति'

इत्यदीर्घेणाप्यर्थनमुपपद्यते। अन्ये तु--अतिशयोऽतिशायनमिति पठन्ति, अतिशायनं प्रकर्ष इत्येवान्ये। प्रकर्ष इति। यद्यपि केवलः शेतिः स्वप्ने वर्त्तते, तथाप्यतिपूर्वस्य प्रकर्षे वृत्तिः ।।

उपसर्गवशाद्धातुरर्थान्तरविलासकृत्।
विहाराहारसंहारप्रहारपरिहारवत् ।।
प्रकर्षश्चात्र नाधिक्यं किं तर्ह्यतिशयो मतः।
सकर्मको ह्ययं शुक्लमतिशेत हतीष्यते ।।
निपातनादिति। यदिदमस्मिन्सूत्रे दीर्घोच्चारणं तदेव निपातनम्। `सौत्रोनिर्द्देशः' इत्येष परिहारोऽत्र नोदितः; यस्मात्सूत्राद्बहिरपि प्रयोगोऽस्याभ्युपेयते। एतदर्थमेव च लघुरपि प्रकर्षशब्दो नोपात्तः। प्रकृत्यर्थविशेषणं चैतदिति। न प्रकृत्यर्थः, अतिशायने वर्त्तमानादिति। तथा हि सति अतिशयप्रकर्षादिभ्य एव स्यात्। नापि प्रत्ययार्थः, तथा हि सति आढ्यस्यातिशयनमाढ्यतममिति स्यात्। आढ्यस्येति कर्मणि कर्त्तरि वा षष्ठी, उभयथाप्याढ्यतमो देवदत्त इति सामानाधिकरण्यं न स्यात्। नापि प्रत्ययार्थविशेषणम्, अन्यस्य कस्यचित् प्रत्ययार्थस्यानिर्द्देशात्। नापि प्रकृतेरेव विशेषणम्, अतिशायनीवेशिष्टान्ङ्याप्प्रातिपदिकादिति। प्रत्ययद्योत्यमतिशायनं प्रकृत्यभिहितस्य प्रधानस्यैवार्थस्य विशेषणं युक्तम्, न त्वर्थाभिधानं प्रति व्यग्रस्य गुणभूतस्य शब्दस्य। यदा त्वसावगुणभूतः, तदा भवत्येव प्रकर्षयोगः--उच्चतरः शब्दः, नीचतरः शब्द इति। ननु शुक्लादिवदेतत्स्यात्, तद्यथा--शुक्लतरः पट इति गुणभूतस्यापि शौक्ल्यस्य प्रकर्षो द्रव्यप्रकर्षहेतुः, तथा शब्देऽप्यस्तु ? विषम उपन्यासः; शौक्ल्यस्य प्रकर्षो द्रव्यप्रकर्षहेतुः, तथा शब्देऽप्यस्तु ? विषम उपन्यासः; शौक्ल्यादयो हि द्रव्यसमवेताः, युक्तं यत्स्वयं प्रकृष्टा प्रकर्षयन्ति, शब्दस्तु न तथेति कथं तत्प्रकर्षेण द्रव्यं प्रकर्ष्यताम्! प्रातिपदिकादिति। प्रकृतेरिदमुपलक्षणम्। सुबन्तात्तु प्रत्ययः। उक्तं हि--`प्रियकुत्सनादिषु' ततः प्रवर्त्ततेऽसौ विभक्त्यन्तः' इति, `घकालतनेषु कालनाम्नः' इत्यलुग्विधानमप्येवमेवोपपद्यते। स्वार्थ इति। यद्येवम्, कुमारितमेत्यव्यतिरिक्तं वय इति कृत्वा `वयसि प्रथमे' इति ङीप् प्राप्नोति ? कुमारशब्दादुत्पन्नेन ङीपा वयोविशिष्टस्यार्थस्य स्त्रीत्वं द्योतितिमिति ङीब्न भविष्यति, तरबन्तात्तु स्त्रीत्वमात्राभिव्यक्तये टाब् भविष्यति। कुमारितम इति ह्युच्यमाने कुटीरः, शमीर इतिवल्लिङ्गान्तरं गम्येत। यद्वा--नात्र प्रज्ञ एव प्राज्ञः याव एव यावक इत्यादिवद्अत्यन्तस्वाथिकत्वं विवक्षितम्, किं तर्हि? ईषच्छुक्ले शुक्लतरे च गुणयोगस्य भावात् शुक्लशब्द एव प्रवर्त्तितुमर्हति, औपगवादौ तु नैवमित्येतावता स्वार्थिकत्ववाचोयुक्तिः। परमार्थतस्त्वस्मिन्प्रयोगे प्रकृष्टे शुक्लशब्दस्य प्रवृत्तिनिमित्तम्, तमबन्तस्य तु तद्गतः प्रकर्ष इति कुतोऽत्र ङीपः प्रसङ्गः! तदिदमुक्तम्--प्रकृत्यर्थविशेषणं च स्वर्थिकानां द्योत्यं भवतीति। अत्रापि यद्यपि तस्मिन्द्रव्ये बहवो गुणाःसन्ति, तथापि यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशः प्रत्यासत्तेस्तत्प्रकर्षाश्रयः प्रत्ययः। तद्यथा--शुक्लादिभ्यो गुणप्रकर्षे, पाचकादिभ्यः क्रियाप्रकर्षे, वाहदोहादयो धर्माः, तत्प्रकर्षे प्रत्ययः। तद्यथा--गौरयं यः शकटं वहति, गोतरोऽयं यः शकटं वहति सीरं च, गौरियं या समांसमां विजायते, गोतरेयं या समांसमां विजायते स्त्री वत्सा च, अश्वोऽयं श्चत्वारि योजनानि गच्छति, अश्वतरोऽयं योऽष्टौ गच्छतीति। एतेन संख्यापरिमाणप्रमाणोन्मानशब्दा व्याख्याताः। न हि स्वतदो भवति, द्वितरः प्रस्थतरः वितस्तितरः सुवपर्णतरमिति, सर्वथा धर्मद्वारको द्रव्यस्य प्रकर्षो न स्वतः, यथा--शुक्लगुणयोगात्पटस्य शुक्लव्यपदेशः, तथा प्रकर्षव्यपदेशोऽपि, तत्प्रकर्षादेवेत्यर्थः।
उक्तं च---
द्रव्यस्याव्यपदेश्यस्य य उपादीयते गुणः।
भेदको व्यपदेशाय तत्प्रकर्षोऽभिधीयते।। इति।
`अव्यपदेश्यस्य' इति धर्मयोगमन्तरेण स्वरूपेण व्यपदेष्टुमशक्यस्येत्यर्थः। तदेवमतिशायनशब्दो बावसाधनः, प्रकृत्यर्थविशेषणं च, स्वार्थिकश्च प्रत्यय इति स्थितम्। अत एव प्रकृतितो लिङ्गवचनानि भवन्ति। यदि तु कर्तृसाधनः स्यात्, तदा यदि प्रकृत्यर्थस्ततोऽतिशायनातिशायकातिशयितृप्रभृतिभ्य एव स्यात्, तत्रापि स्वार्थे न प्रवृत्तिनिमित्तप्रकर्षे; अथ प्रत्ययार्थः, ततः सामर्थ्यलभ्या समर्थविभक्तिः। सा च यदि तिङन्तेन विग्रहस्तादा द्वितीया---शुक्लमतिशेते शुक्लतर इति। अथ कृ-दन्तेनातिशायनशब्देन, तदा षष्ठी--शुक्लस्यातिशायनः शुक्लतर इति। तथा च कालीमतिशेते कालः कालितर इति प्राप्नोति, कालमतिशेते काली कालतरेति प्राप्नोति। इह च गर्गानतिशेते गार्ग्यः कर्गतर इति प्राप्नोति, तथा गार्ग्यमतिशेरते गर्गाः गार्ग्यतरा इति प्राप्नोति। अथ करणसाधनः तत्रापि प्रकृत्यर्थश्चेद्येन गुणेनातिशेते तद्वाचिनः शौक्ल्यादेरेव स्यात्, शौक्ल्येन हि शुक्लः शुक्लान्तरमतिशेते। प्रत्ययार्थे तु शुक्लादिशब्दादतिशायने गुणो प्रत्ययः प्राप्नोति, गुणिसामानाधिकरण्यं न स्यात्--शुक्लतरः पट इति। अथ व्यन्तात्कर्त्तरि ल्युड्--अतिशाययतीत्यतिशायन् इति, एवमपि स एव दोषो यः करणपक्षे। गुणा हि गुणिनं प्रयुञ्जते---अस्माभिः प्रकृष्टैस्त्वं सजातीयमतिशेषेवेति, ततश्च प्रकृत्यन्तात्करणे ल्युटि यो दोषः स एवात्रापि भवति। अथ शेतिरवस्तानार्थः--पक्वाशयो जलाशय इतिवत्, ततोऽयमर्थः स्यात्--गुणा गुणिनि शेरते, अवतिष्ठन्ते, तान्गुण्यतिशाययति=आत्मन्यतिशयेनावस्तापयतीति, ततश्च स एव दोषो यः प्रकृत्यन्तात्कर्त्तरि ल्युटि। अतिशायनशब्दश्च प्रकृत्यन्तो न साधितः स्यात्। तस्माद् वृत्तिकारोपदर्शित एवार्थो न्याप्यः ।।
पटिष्ठ इति। `तुरिष्ठेमेयस्सु' टेरिति टिलोपः। गरिष्ठ इति। `प्रियस्थिर' इत्यादीना गुरुशब्दस्य गरादेशः।
`प्रकर्षप्रत्ययान्तादपरेण प्रकर्षप्रत्ययेन न भवितव्यम्, एकेनैव प्रकर्षस्य द्योतितत्वात्' इति मन्यमानं प्रत्ययाह--यदा चेति।आतिशायिकान्तादिति। अतिशये भव आतिशायिकः, अध्यात्मादित्वाट्ठञ्, अनुशतिकादित्वादुभयपदवृद्धिः। श्रेष्ठतमार्यति। `प्रशस्यस्य श्रः' अत्र प्रकर्षरहितप्रतियोग्यपेक्षया यः प्रकर्षस्तत्रेष्टन्विहितः, तमप्प्रत्ययस्तु प्रकर्षवत्प्रतियोग्यपेक्षया यः प्रकर्ष इष्ठन्प्रत्ययेनद्योतितस्तस्मिन्नित्यपौनरुक्त्यम्। प्रत्ययद्वयस्य विधीयमानप्रत्ययभेदाच्च द्वे एते वाक्ये, तत्रैकेनेष्ठन्, अपरेण तदन्तात्तमप्। तेनैतन्न चोदनीयम्--यथा सनन्तान्न सन् भवति, तद्विदानवेलायां तदन्तस्य धातोरभावात्; तथा प्रकर्षप्रत्यान्तादपरेण प्रकर्षप्रत्ययेन न भवितव्यमिति ।।

भाष्ये तु प्रकर्षप्रत्ययान्तादपरः प्रकर्षप्रत्ययो नैव भवतीति स्थित्म्। तत्कयम्? न तावत्तरबन्तादपरस्य प्रसङ्गः--यत्र हि त्रयाणामेकः शुक्लः, द्वितीयः किञ्चित्प्रकृष्टः, तृतीयश्चात्यन्तम्, तत्र किल प्रसङ्गः शङ्क्यते; तत्र द्वितीयस्य सदप्युत्कृष्टत्वं तृतीयसन्निधावकिञ्चित्करम्, राजसन्निधाविवामात्यस्येति। द्वितीयात्तावत्तरब्न भवति। तृतीयादपि न भवति, तस्मिन्नेव प्रयोगे त्रयाणामपेक्षितत्वेन द्विवचनोपपदत्वाभावात्। एतेनेयसुन्व्याश्यातः। नापि तमबन्तादपरस्य प्रसङ्गः। यत्र हि चतुर्णा द्वौ शुक्लौ, तृतीयः किञ्चिचदुत्कृष्टः, चतुर्थश्चात्यन्तम्, तत्र किल प्रसङ्गः शङ्क्यते; तत्र तृतीयस्य सदप्युत्कृष्टत्वं चतुर्थसन्निधौ पूर्ववदकिञ्चित्करम्, चतुर्थात्तु तमबेव भवति। एतेनेष्ठन्व्याख्यातः।
कथं तर्हि श्रेष्ठतमाय कर्मणे इति? छान्दसत्वात्स्वार्थिकस्तमब् द्रष्टव्यः। युधिष्ठिरः श्रेष्ठतमः कुरुणाम् इति त्वन्याप्यमेव मन्यते ।।

तिङ्श्च ।। 5.3.56 ।।
पचतितमामिति। `किमेत्तिङव्यय' इत्यादिनाऽऽम्प्रत्ययः।
गुणवचने तस्य नियतत्वादिति। अत एव सूत्रार्थकथनवेलायामपि तमप् प्रत्ययो भवतीत्युक्तम्। न चानुवृत्तिसामर्थ्यान्नियमस्य बाधः, तमब्विधानेऽप्यनुवृत्तेरुपपन्नत्वात् ।।

द्विवचनविभज्यचोपपदे तरबीयसुनौ ।। 5.3.57 ।।
द्वयोरर्थयोर्वचनं द्विवचनमिति। करणे ल्युट्, कर्मणि षष्ठ्याः समासः। येन पदेन द्वावर्थावुच्येते तद् द्विवचनमित्यर्थः। एतेनान्वर्थस्य द्विवचनस्येदं ग्रहणम्, न पारिभाषिकस्येति दर्शयति। पारिभाषिकस्य हि ग्रहणे, अस्माकं च देवदत्तस्य च देवदत्तोऽभिरूपतर इत्यत्र न स्यात्। अन्वर्थग्रहणे तु भवति, तथा हि--अस्माकमित्यनेनैकोऽर्थ उच्यते, `अस्मदो द्वयोश्च' इत्येकस्मिन्नेवार्थे बहुवद्भावविधानाद्; देवदत्तस्य चेत्यनेनापि द्वितीयोऽर्थ उच्यते इति कभवत्येतदन्वथम्--द्विवचनमुपपदम्। विभक्तव्यः=पृथक्कर्त्तव्यः, स चातिशय्यमानः। तस्य ह्युपपदत्वम्, न अतिशयितुः; ततः प्रत्ययविधानात्। अपर आह--आद्यादेरतिशयितृविशेषणात्प्रत्ययो विधीयते, नातिशयितुर्माधुरादेरिति तस्याप्युपपदत्वमविरूद्धम्। पृथक्कारोऽपि तस्याप्यविशिष्ट इति। निपातनाद्यदिति। `ऋहलोर्ण्यत्' इति ण्यतोऽपवादः। तेन विभाग्यमिति नैव भवति। विभाज्यशब्दस्यतु स्मृतिषु प्रयुक्तस्य साधुत्वं चिन्त्यम्। द्व्यर्थे विभज्ये चोपपद इति। सूत्रे तु द्विवचनं च विभज्यं च द्विवचनविभज्यम्, तच्च तदुपपदं चेति कर्मधारयात्सप्तमी। अन्वर्थं चोपपदम्-उपोच्चारितं पदमुपपदमिति। तच्च विग्रहवाक्य एव प्रयुज्यते। वृत्तोतु गतार्थत्वान्नावश्यं प्रयुज्यते। एवं चोपपदग्रहणं स्पष्टार्थम्। इह द्वे उपपदे, द्वे च प्रकृती--`ङ्याप्प्रातिपदिकात्' `तिङ्श्च' इति, प्रत्ययावपि द्वावेव, ततश्च यथासंख्यप्रसङ्गः? इत्यत आह--यथासंख्यामिति। इष्टिरेवेयम्। अयमनयोरिति। अनयोरित्येतदत्र द्व्यर्थमुपपदम्। पटीयानिति। पूर्ववट्टिलोपः, अगित्त्वान्नुम्, `सान्तमहतः' इति दीर्घत्वम्, हल्ङ्यादिसंयोगान्तलोपौ।
माधुरा इत्यादि। किं पुनरत्र विभज्यम्? पाटलिपुत्रका हत्याह। तथा च तत्र `पञ्चमी विभक्ते' इति पञ्चमी भवति। यद्यप्यत्रापी माधुराणामेको राशिः, पाटलिपुत्रकाणां चापर इति राश्यपेक्षं द्व्यर्थत्वमस्ति; तथापि नासौ शब्देनोपादीयते, प्रत्युतावयवभेद एव। अत एव बहुवचनम्। इह च-माधुराः पाटलिपुत्रकेभ्यः सांकश्यकेब्यश्चाभिरूपतरा इति न राश्यपेक्षमपि द्व्यर्थत्वमस्ति। तस्माद्विभज्योपपदग्रहणं कृतम्।
इह दन्तोष्ठस्य दन्ताः स्निग्धतराः, पाणिपादस्य पाणी सुकुमारतरावित्यत्र तरब्न प्राप्नोति, किं कारणम् ? समाहारस्यैकत्वात्; न च गुणभूतवर्त्तिपदार्थाश्रयः प्रत्ययः, तेषां बहुत्वात्--द्वात्रिंशद्दन्ताः, द्वावोष्ठौ ? अत्राऽऽहुः--वृत्तावभेदैकत्वसंख्यामुपाददते वर्त्तिपदानि, ततश्च भेदपरित्यागादबेदैकत्वसंख्यायाश्चोपादानाद्--एवम्भूतदन्तोष्ठलक्षणार्थद्वयाश्रयः प्रत्यय इति। इतरेतरयोगद्वन्द्वे त्ववयवार्थबेदसद्भावाद् द्व्यर्थता नास्तीति तरब्न भवति। प्लक्षन्यग्रोधानां प्लक्षा दीर्घतमा इति विभज्योपपदाश्रयोऽपि न भवति, कथम्? प्रतियोग्यपेक्षत्वात्प्रकर्षस्य। सामर्थ्यलभ्ये विभागे विभज्योपपदग्रहणमवधारणार्थम्--विभागा एव यत्र शब्देन प्रतिपाद्यत इति। इह तु निर्धारणाश्रयनिर्द्देशो निर्धार्यमाणस्यापि साधारण इति न विभाग एव केवलः, किन्त्वविभागोऽपि। एतेन `पञ्चमी विभक्ते' इति पञ्चमी व्याख्याता। इह `परुद्भवान्पटुरासीत्, पटुतरश्चैषमः' इत्येकस्यापि धर्मिणो गुणभेदेन द्वित्वाध्यारोपात्प्रतियोग्यपेक्षः प्रकर्षः, तदाश्रयश्च प्रत्ययः। व्यपदिशति च--`अन्य एवासि संवृत्तः' `कच्चित्स एवासि धनञ्जयसत्वम्' इति ।।

अजादी गुणवचनादेव ।। 5.3.58 ।।
एवकारः किमर्थः ? नियमो यथा विज्ञायेत; अन्यथा प्रकर्थेऽजाद्योर्विधानादप्रकर्षे विधिः स्यात्। `अतिशायने' इत्यनुवर्त्तिष्यते, तत्रैव पुनर्वचनं नियमार्थं भविष्यति,नार्थ एवकारेण? तत्राह--एवकार इष्टतोऽडवधारणार्थ इति। असति ह्यस्मिन्विपरीतोऽपि नियमः सम्भाव्यते--अजादी एव गुणवचनादिति। तत्र को दोषः ? गुणवचनाद् व्यञ्जनादी न स्याताम्; तस्याजाद्योर्नियतत्वात्। यत एवकारस्ततोऽन्यत्रावधारणमिति। अजाद्योश्चानियतत्वादगुणवचनादपि तयोः प्रसङ्गः। इदमतिबहु क्रियते--अजादी गुणवचनादेवेति, एवं तु वक्तव्यम्--अतिशायने तमप्, गुणवचनादिष्ठन्, द्विवचनविभज्योपपद इयसुन्, गुणवचनादित्येव, ततस्तरप् च, गुमवटचनादिति निवृत्तम्? सापम्; `प्रशस्यस्य श्रः' इत्येवमाद्यर्थं तु `अजादी' इत्युक्तम्। एवं तर्हि `प्रशस्यस्य श्रोऽजाद्योः' इत्येवास्तु, एवमपि ह्येवकारो न वक्तव्यो भवति? त्वत्पक्षेऽपि `तरप् च' इति चकारः क्रियते, तत्तुल्यं भवति ।।

तुश्छन्दसि ।। 5.3.59 ।।
पूर्वेणेत्यादि। नियमबाधेन प्रकृत्यन्तरस्याभ्यनुज्ञानमात्रं क्रियते, न त्पपूर्वो विधिरित्यर्थः, तेनोपाधिसङ्करो न भवति। करिष्ठ इति। कर्तृशब्दात्तृन्नन्तादिष्ठन्। अत एव कर्मणि द्वितीया भवति। तृजन्तादेव वा भवतु, द्वितीया तु कृतपूर्वी कटमितिवद् द्रष्टव्या। दोहीयसीति। लिङ्गविशिष्टपरिभाषया दोग्ध्रीशब्दात्प्रत्ययः। भस्याऽढे तद्धिते पुंवद्भावेन ङीपो निवृत्ति। यद्वा, `सिद्धश्च प्रत्ययविधौ' इति वचनान्ङीपि निवृत्ते दोग्धृशब्दादेव प्रत्ययः, ततः `तुरिष्ठेमेयस्सु' इति तृचि निवृत्ते निमित्ताभावाद् घत्वजश्त्वयोरपि निवृत्तिः ।।

प्रशस्यस्य श्रः ।। 5.3. 60 ।।
अजाद्योः प्रत्यययोः परत इति। ननु चाजादी इति प्रथमान्तं प्रकृतम्। न सप्तम्यन्तम्, तत्कथमयमर्थो लभ्यते ? इत्यत आह--अजादी इति प्रकृतस्येत्यादि। प्रकृतस्य या विभक्तिः प्रथमा सा सप्तमीरूपेण विपरिणम्यते, ऊह्यत इत्यर्थः।
एवं तर्हीत्यादि। अथ यावेव सम्भवतः--तरप्तमपौ, तयोरेव परतोऽयमादेशः कस्मान्न भवति? नैवं भवितुमर्हति; `अजादी' इत्यनुवृत्तिसामर्थ्यात्। अथात्रैवाजाद्योर्विधिः कस्मान्न विज्ञायते--प्रशस्यशब्दादजादी भवतः, श्रश्चास्यादेश इति, तत्रायमप्यर्थः--विभक्तिविपरिणामो न कर्तव्यो भवति? नैवं शक्यम्; तरप्तमपौ हि स्याताम्, विशेषविहितावजादी बाधेयाताम्, उपाधीनां च सङ्करः स्याद्-इष्ठन्विषये ईयसुन्, तद्विषये चेष्ठन्निति। तद्विषय इति। स प्रशस्यशब्दो विषयो यस्य स तद्विषयः। सप्तम्यन्तपाठे तु स एव विषयस्तत्रेत्यर्थः। नियमो न प्रवर्तत इति। नयमाप्रवृत्तिज्ञापनद्वारेणाजादिभावो ज्ञाप्यते, न तु साक्षादित्यर्थः; अन्यथा पुनरनजाद्योर्बाध उपाधिसङ्करश्च स्यात्, उक्तेन प्रकारेण स्वशास्त्रेणैवाजाद्योर्विदानान्नैतद्दोषद्वयमपि भवति। कथं पुनर्थाश्रुतसम्बन्धसम्भवेऽपि विपरिणामः शक्य आश्रयितुम् ? श्रृणु; अजाद्योर्विधिरिष्टश्चेत्पञ्चम्या निरदेक्ष्यत्। किञ्च एवं सन्नियोगार्थश्चकारोऽप्यकरिष्यत। टिलोप-यस्येतिलोपाविति। `यस्येति' इत्यनेन लोपो यस्येतिलोपः, `कर्तृकरणे कृता बहुलम्' इति समासः, तत्रानुकरणत्वादस्यवामीयमित्यादिवद्विभक्तेरलोपः। `आद्गुणः' इति त्वनङ्गत्वान्न प्रतिषिध्यते ।।

ज्य च।। 5.3.61 ।।
योगविभागा उत्तरत्र ज्यादेश एव यथा स्यात्, आदेशो मा भूदिति। अयमनयोरिति। अतिशयेन प्रशस्य इति विपरिणामेनापेक्ष्यते, न पुनरुत्तरेणैकग्रन्थता। एवं सर्वत्र ।।

वृद्धस्य च ।। 5.3.62 ।।
स्वरूपग्रहणम्, न तु `वृद्धिर्यस्याचामादिः' इति पारिभाषिकस्येत्याह--वृद्धशब्दस्येति। अत्र च व्याख्यानमेव शरणम्। तयोश्चेत्यादि। यत्पूर्वमुक्तम्--`एवमुत्तरेष्वपि योगेषु विज्ञेयम्' इति, तदेवानेन स्मारितम्।
वचनात्पक्षे सोऽपि भवतीति। ननु च वर्षादेशस्येमनिजवकाशः स्यात्? न; वृद्धशब्दादिमनिचोऽभावात्। यद्येवम्, वर्षादेसोऽपीहैव वक्तव्यः--वृद्धस्य वर्षिश्चेति, एवं हि द्विर्वृद्धग्रहणं न कर्त्तव्यं भवति? सत्यम्; तथा तु न कृतमित्येव। अपर आह---इष्ठनीयसुनोरिमवेमनिचोऽपि सद्भावः कल्प्यते, तेन वर्षिमेत्यपि भवति। तस्य मते---वर्षादेशस्येमनिचि चरितार्थत्वादिष्ठन्नीयसुनोरनेन ज्यादेश एव प्राप्नोति। तस्माद् `युवाल्पयोः कनन्यतरस्याम्' इत्यत्रेदमनुवर्तते, तेन ज्यादेशेन मुक्ते पक्षे वर्षादेशः ।।

अन्तिकबाढयोर्नेदसाधौ ।। 5.3.63 ।।
निमित्तयोर्यथासंख्यमिह नेष्यत इति। `अजाद्योः' इति प्रकृतयोरिष्ठनीयसुनोर्ग्रहणात्तयोश्च क्रमेणोपदेशादजहत्क्रमयोरेव प्रतीतेर्यथासंख्याप्रसङ्गं मन्यते। कस्मात्पुनरिष्यमाणमपि न भवति ? विपरीतक्रमस्यापि सम्भवात्। तथा हि--कयोरजाद्योरित्यपेक्षायामानन्तर्यादीयसुंस्तावत्प्रतीयते, द्विवचनानुरोधात्विष्ठन्नपीत्येवमपि क्रमः सम्भवति। तदनयोः क्रमयोर्नान्यतरः क्रमो निर्द्धारयितुं शक्य इत्यनाश्रयणमेव तयोर्युक्तम् ।।

युवाल्पयोः कनन्यतरस्याम् ।। 5.3.64 ।।
युवेति न संज्ञायूनो ग्रहणम्, किं तर्हि? स्वरूपस्य; अल्पसाहचर्यात् व्याख्यानाच्च। अन्यतरस्यांग्रहणमल्पशब्दार्थम्। युवशब्दस्य तु `स्थूलदूरयुव' इति वचनात्सिद्धो विकल्पः। यविष्ठ इति। स्थूलदूरादिसूत्रेण यणादिपरं लुप्यते, पूर्वस्य च गुणः। कनीयानिति। प्रकरणादिवशाद्युवाल्पयोरन्यतरावसायः। `प्रकृत्यैकाच्' इति प्रकृतिभावाट्टिलोपः, `अल्लोपोऽनः' इत्यल्लोपश्च न भवति।

विन्मतोर्लुक् ।। 5.3.65 ।।
विन्मतोरित्युत्सृष्टानुबनधयोर्विनिमतुपोर्द्वन्द्वात्षष्ठीद्विवचनम्। अथ विन्ग्रहणं किमर्थम्, यावता येभ्यो विन् तेब्यो मतुबपि भवति, तस्यैव लुकि स्रजिष्ठ इत्यादि सिद्धम्, न च विन इष्ठचीयसुनोः श्रवणप्रसंगः, तदन्तात्तयोरभावात्? अस्मादेव हि लुग्वचनाद्विनन्तात्तयोर्भावो ज्ञाप्यते। यदा तर्हि विनन्तात् `तत्करोति

तदातष्टे' इति णिच् क्रियते, तदा विनः श्रवणं मा भूदित्येवमर्थं विनो लुग्वचनम्--स्रग्विणमाचष्टे स्रजयति ।।

प्रशंसायां रूपप् ।। 5.3.66 ।।
प्रकृत्यर्थविशेष्णं चैतदिति। प्रत्यार्थत्वे तु वैयाकरणस्य प्रशंसा वैयाकरणरूप इति प्राप्नोति, वैयाकरणरूपो देवदत्त इति सामानाधिकरण्यं न स्यात्, तस्मात्प्रकृत्यर्थविसेषमम्--प्रशंसाविशिष्टेभ्य इति। स पुनः प्रशस्तो न तु प्रशंसिता; अनभिधानात्। स्वार्थ इति। यद्येवम्, कुमारीरूपेत्यत्रानतिरिक्तं वय इति कृत्वा ङीप् प्राप्नोति? नैष दोषः; कुमारीशब्दादुत्पन्नेन ङीपा वयोविशिष्टार्थगतस्य स्त्रीत्वस्य द्योतितत्वाद्रूपबन्तस्य स्त्रीत्वमात्रमभिव्यङ्क्तुं टाबेव क्रियते, न च ङीपैव तदभिव्यक्तमिति टापोऽप्रसङ्गः। कुमारीरूप इत्युच्यमाने हि कुटीरादिवल्लिङ्गान्तरं प्रतीयेत। यतद्वा--प्रवृत्तिनिमित्तभेदान्ङीपोऽप्रसङ्गः, कुमारशब्दस्य वयो निमित्तम्, रूपबन्तस्य तु तद्गता प्रशंसा, तदाहस्वार्थिकाश्चेत्यादि। अत्रापि प्रवृत्तिनिमित्तस्य प्रशंसायामयं प्रत्ययः, तेन यो व्याकरणेऽनिपुणः प्रशस्तश्च वंशशीलादिना, तत्र वैयाकरणरूप इति न भवति। क्वचित्तु सहचरितधर्मप्रशंसायामपि भवति--गोरूपोऽयं यः सम्यग्वहतीति। अथ कथं वृषलादिशब्देभ्यः प्रत्ययः, ते हि तदा निन्दावचनाः, तदभिधेयानां काकादिवन्निकृषख्टतच्चात् ? अत आह--प्रकृत्यर्थस्येति। वैशिष्ट्यम्=परिपूर्णता, तस्मिन्सति प्रशंसा भवति। तथा च वृषलादिशब्दा अपि स्वार्थस्य पूर्णत्वे सति प्रसंसाविशिष्ट एवार्थे प्रवर्त्तन्त इति तेब्योऽपि सिद्धः प्रत्यय इति भावः। वृषलरुप इति। यद्यप्ययं जातिवचनः, जातेश्च न्यूनत्वम् पूर्णत्वं वा न भवति; तथापि सहचरितधर्माल्पत्वं बहुत्वापेक्षं न्यूनत्वं पूर्णत्वं च द्रष्टव्यम्। यद्वा--गुमसमुदाये शब्दप्रवृत्तेः शब्दार्थस्यैवैतदुभ्यं भवति। यः पलाण्डुनेति। सहयोगे तृतीया। कश्चिद् वृषलः पलाण्कडुं भक्षयति, कश्चित्सुरां पिबति, यस्तूभयं करोति तस्य परिपूर्णवृषलत्वम्। तथा चोरशब्दार्थस्यापि सुगुप्तवस्त्वपहरणेन परिपूर्णता भवति। अक्ष्णोरब्यञ्जनं हरेदिति। सम्भावने लिङ्, एवंविधमप्यस्य चौर्यसम्भवतीत्यर्तः। अक्ष्णोरप्यञ्जनं हरतु वा मा वा हार्षीत्, नन्वेवमपि यदा निन्दाप्रतिपादनाय वृषलरूप इत्यादि प्रयुज्यते तदा न सिद्ध्यति, निन्दैव हि तदा प्रकृत्यर्थस्य वैशिष्ट्याद्भवति, तस्मात्प्रशंसाग्रहणमपनीय वैशिष्ट्यग्रहणमेव कर्त्तव्यम्, यदाह--`सिद्धं तु प्रकृत्तयर्थस्य वैशिष्ट्यवचनात्' इति। वृत्तिकारस्तु मन्यते---चोररूपोऽयमित्यादौ प्रशंसैव शब्दार्थः, निन्दाप्रतीतिस्तु वाक्यनिबन्धनेति। दृश्यते च प्रशंसापराणामपि निन्दापरत्वम्, यथा--राक्षस इति, पौरुषातिशयप्रशंसावचने प्रशंसा गम्यते, निर्घृणत्वप्रतिपादने तु निन्दा।
पचतोरूपम्, पचन्तिरूपमिति। ???????द्विवचनबहुवचनप्रसङ्गः, स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्त इति कृत्वा? तत्राह--क्रियाप्रधानमाक्यातमिति। यद्यप्याख्यातस्य क्रियासाधनपुरुषसंख्याकालोपग्रहरूपोऽनेकोऽर्थः, तथापि तेषु तस्य क्रियैव प्रदानमर्थः। कथं ज्ञायते? यत् क्रियां पृष्टस्तदन्तेनाचष्टे--देवदत्तः किं करोति? पचतीति। ननु च द्रव्यमपि पृष्टस्तिङन्तेनाचष्टे, यथा--क एषु देवदत्तो यः पचतीति ? युक्तमत्र य इति हि पदान्तरेण द्रव्योपलक्षणाय गुणभावं क्रिया नीयते। अत एव केवलेनाख्यातेन प्रतिवचनाभावः, न हि भवति--को देवदत्तः, पचतीति। तस्मात् क्रियाप्रधानमाख्यातम्, तिङन्तो पात्तार्थापेक्षं च क्रियायाःक प्राधान्यमुच्यते। व्रीहिनवहन्तीत्यादौ तु द्रव्यसंस्कारार्थत्वादवघातादेर्व्रीह्यपेक्षमप्राधान्यमस्त्येव। अपर आह--अत्राप्यवघातादेरेव शाब्दं प्रधान्यम्; साध्यत्वात्। न तु व्रीह्यादेः; साधनत्वात्। आर्थं तु तस्य प्रधान्यमिति।
एका च क्रियेति। `निवृत्तभेदा सर्वत्र क्रियाक्यातेषु गम्यते'। कथं तर्हि द्विवचनबहुवचने भवतः--पचतः, पचन्तीति? नैते क्रियाबेदापेक्षे द्विवचनबहुवचने, किं कर्हि? साधनबेदापेक्षे। अत एव भवद्भिरास्यते हत्यादौ केवलक्रियावचने द्विवचनबहुवचनाभावः। न च कर्तृभेदः क्रियाभेदेन व्याप्तः; एकफलोद्देशेन प्रवृत्तामेकामेव पाकव्यक्तिं बहुष्वपि कुर्वत्सु-भवन्तः पचन्ति, भवद्भिः पच्यत इति दर्शनात्। तस्मादाख्यातवाच्या क्रियैकेति सिद्धम्। तेन रूपप्प्रत्ययान्ताद् द्विवचनबहुवचने न भवतः।
अथ यथा तिङ्न्ते साधनभेदाश्रये द्विचनबहुवचने भवतः, तथा रूपबन्तादपि कस्मान्न भवतः? उक्तोत्तरमेतत्--क्रियाप्रधानमाख्यातमिति। स्वार्थिकस्य हि प्रकृतितो लिङ्गवचनप्राप्तिः, तत्र च क्रिया प्रधानभूता, सा चैका, ततश्च प्रधानभूतप्रकृत्यर्थानुरोधेन भवद्वचनमेकवचनमेव भवति। पचतिरूपमित्यादावपि कर्तुः संख्याऽभिधीयते। सुपा तु क्रियाया एकत्वम्। अथ वातिङोक्तत्वाद्रूपप्प्रत्ययान्ताद् द्विवचनबहुवचने न भविष्यतः। एकवचनं तु भविष्यति; तस्यौत्सर्गिकत्वात्--`एकवचनमुत्सर्गः करिष्यते' इति। एतच्च तत्रतत्र व्याख्यातम्। यदि तर्हि क्रियाप्रधानमाख्यातम्, नपुंसकलिङ्गमपि रूपबन्तस्य न स्यात्, क्रियाया असतत्वभूतत्वेन लिङ्गाभावात्? अत आह--नपुंसकलिङ्गं त्विति। अथ तमबादेः रूपपश्च को विषयविभागः, यावताऽतिशायनमपि पूजानिन्दाविषयम्--पटुतमः, पापीयानिति; रूपप्प्रत्यययोऽप्युभयविषयः--पटुरूपः, चोररूप इति? उच्यते--अतिशायनं समानगुणप्रतियोग्यपेक्षम्, वैशिष्ट्यं तु तन्निरपेक्षमिति स्पष्ट एव विषयभेदः ।।

ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ।। 5.3.67 ।।
सम्पूर्णतेति। प्रवृत्तिनिमित्तस्य पौष्कल्यमित्यर्थः। पदार्थशबप्देन पर्यवसानभूमिर्विवक्षिता। प्रकृत्यर्थविशेषणं चैतदिति। न प्रत्ययार्थः। यदि तथा स्याद्, गुडस्येषदसमाप्तिर्द्राक्षाया गुडकल्पा द्रक्षाया इति स्यात्, गुडकल्पा द्राक्षेति द्रव्येण सामानाधिकरण्यं न स्यात्, एकवचनमेव च स्यात्, इष्यते चाभिधेयवल्लिङ्गवचने स्यातामिति। तस्मात्प्रकृत्यर्थविशेषणम्। स्वार्थ इति। न च कुमारिकल्पेत्यत्राप्यनतिरिक्तं वय इति ङीपः प्रसङ्गः; न हि कल्पबन्तस्य वयःप्रवृत्तिनिमित्तम्, किं तर्हि? तद्गतेषदसमाप्तिः। ईषदसमाप्तः पटुः पटुकल्पः, मृदुकल्प िति।
ननु च योऽर्थ एतावानेवेति परिज्ञातः, तस्य समाप्तिर्वा भवत्यसमाप्तिर्वा, न च पाटवादिगुण एतावानिति निर्ज्ञातः, यावत्तावदपि हि पाटवं भवत्येव, तत्

कथमस्येषदसमाप्तिः; एतेन जातिशब्दा व्याख्याताः, न हि तेऽक्तपरिमाणमर्थमाचक्षते ? इदं तु युक्तमुदाहर्तुम्--कृतकल्पम्, भुक्तकल्पमिति। धात्वर्थो हि फलावच्छिन्नो व्यापारनिचयोऽक्तपरिमाणः। नन्वत्रापि भूते क्तः, फलनिष्पत्तौ च धात्वर्थो भूतो भवति, भूतस्य च तस्य कुत ईषदसमाप्तिः? यदा तर्हि क्रियैकदेशापवर्गाश्रयो भूते क्तः, तदोदाहरणम्--कृतकल्पं वस्त्रमिति। तथा च कृतादय एकदेशकरणाश्रया प्रयोगा दृश्यन्ते। यदा भविष्यत्कालाया ईषदसमाप्तायाः क्रियाया आशस्यमानत्वात् `आशंसायां भूतवच्च' इति भविष्यति क्तप्रत्ययः, तदापि भवत्युदाहरणम्। एवम् `ञीतः क्तः', `मतिबुद्धिपूजार्थेभ्यश्च' इति वर्त्तमानविषयक्तान्तादपि युक्तः प्रत्ययः--पूजितकल्पम्, जातकल्पमिति। तथा तिङन्तमपि कालत्रविषयं भवत्युदाहरणम्--पचतिकल्पम्, पक्ष्यतिकल्पम्, अपाक्षीत्कल्पमिति। गुणवचनं त्वयुक्तम्। तदपि युक्तम्, ननु चोक्तं यावत्तावदपि पाटवं भवत्येव नास्येषदसमाप्तिरिति? नैतदस्ति; लोकत एव गुणस्यापीयत्ताया निर्ज्ञातत्वात्। लोके हि पटुरयमित्युच्यते, यो लघुनैवोपायेन साद्यार्थान्साधयति। यस्यु न तथा साधयति, किन्त्वीषदूनम्, सा पटुकल्पः। तद्विपर्ययेण मृदु-मृदुकल्पौ व्याख्यातौ। जातिवचने कथं गुडकल्पा द्रक्षा, तैलकल्पा प्रसन्नेति? उच्यते; गुडगतमाधुर्यश्रयेण द्राक्षायां गुडत्वारोपाद् गुडजात्यभावाच्च ईषदसमाप्तं गुडत्वं द्राक्षायाः। तथा गुडकल्पो गुड इत्यपि भवति। कथं पुनः स एवेषदसमाप्तः सम्भवति? गुणहानेः---यावन्माधुर्यं गुडस्य प्रसिद्धम्, न तावत्पुराणत्वादिदोषोपहतस्य। तेनासावीषदसमाप्तो गुड इत्युच्यते ।।

विभाषा सुपो बहुच्पुरस्तात्तु ।। 5.3.68 ।।

ईषदसमाप्तिविशिष्टेऽर्थे वर्त्तमानादिति। ल्यब्लोप एषा पञ्चमी। एवम्भूतं सुबन्तं प्रकृतित्वेनाश्रित्येत्यर्थः। सूत्रे तु `सुपः' इति `षष्ठ्यतसर्थप्रत्ययेन' इति षष्ठी। स च पुरस्तादेवेति। एतेनानेकार्थत्वान्निपातानाम् `तुशब्दोऽवधारणे वर्त्तते' इति दर्शयति। असति तु तुशब्दे प्रत्ययात् पूर्वत्वस्यापि विधेयतया प्राधान्याद्विभाषाग्रहणेन सम्बन्धः स्यादिति भावः।

भाष्यकारस्तु मन्यते--`उदश्वितोऽन्यतरस्याम्' इत्यादौ यथा परत्वं न विकल्पते, तत्कस्य हेतोः? प्रत्यय एव परत्वविशिष्टो विधीयते, तत्र विशेषणस्य गुमत्वाद्विकल्पेन न सम्बन्धः, गुणानां च परार्थत्वादिति न्यायात्; तद्वदिहापि विभाषाग्रहणेन बहुजेव सम्भन्त्स्यते, न पुरस्तादित्येतत्। तुशब्दस्य त्ववधारणार्थस्यान्यदेव प्रयोजनम्--पुरस्तादेव सर्वं भवतीति। तेन लिङ्गसंख्ये अपि प्राक्प्रत्ययोत्पत्तेःक प्रकृत्यवस्थायां ये दृष्टे ते एव भवतः। प्रयोगश्च प्राक् कृतेर्भवतीति। तेन बहुगुडो द्राक्षा, लघुर्बहुतृणं नर इति प्रकृतिवल्लिङ्गं भवति, नाभिधेयवत्। एवं च बहुगुडेति स्त्रीलिङ्गपाठः प्रमादजो द्रष्टव्यः; इतरथा भाष्यविरोधात्। ननु च स्वार्थिकत्वादेव प्रकृतितो लिङ्गवचने भविष्यतः, एवं तर्ह्येतज्ज्ञापयति--ईषदसमाप्तौ ये स्वार्थिकास्तेष्वभिधेयवदेव लिङ्गवचने भवत इति। तेन गुडकल्पा द्रक्षा,तैलकल्पा प्रसन्नेति सिद्धं भवति।

चित्करणमन्तोदात्तार्थमिति। तच्चान्तोदात्तत्वं सप्रकृतेः समुदायस्य भवति, न बहुचः; चितः सप्रकृतेर्बह्वकजर्थमिति वचनात्। यद्येवम्, बहुपटव इति सुबन्तस्य पुरस्तादुत्पत्तौ जस उदात्तत्वं प्राप्नोति? स्यादेवम्, यदि प्रागुत्पन्नो जसवतिष्ठेत; इह तु बहुच्युत्पन्ने समुदायस्येषदसमाप्तिलक्षणेनार्थवत्त्वात्प्रातिपदिकत्वे सति `सुपो धातुप्रातिपदिकयोः' इति लुकि पुनरपरो जसुत्पद्यते, तस्य च प्रकृत्यनेकदेशत्वान्नोदात्तत्वम्। ननु समासग्रहणस्य नियमार्थत्वात्प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा न प्राप्नोति? ज्ञापकात्सिद्धम्, यदयमप्रत्ययइति प्रतिषेधं शास्ति, तज्ज्ञापयति--भवति प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा, न तु समासग्रहणेन व्यावृत्तिरिति।

विभाषावचनादित्यादि। अन्यथा तिङन्तेषु सावकाशाः कल्पबादयः सुबन्ते विशेषविहितेन बहुचा देशभेदेऽपि समानार्थेन बाध्येरन्।

सुब्ग्रहणमित्यादि। अन्यथा `तिङश्च' इत्यधिकारात्कल्पबादिवद्बहुजपि तिङन्तस्यापि पुरस्तात्स्यात्। प्रातिपदिकनिवृत्त्यर्थं तु सुब्ग्रहणं न भवति; विशेषाबावात्। ननु चायमस्ति विशेषः--बहुसेचौः, बहुसेचः, सुबन्तादुत्पतौ सत्याम् `सात्पदाद्योः' इति षत्वनिषेधः सिद्ध्यति, प्रातिपदिकात्तूत्पत्तौ षत्वप्रसह्गः? नैष दोषः, सुबन्तादप्युत्पत्तावश्यमत्र कुत्वनिषेदार्थो यत्नः कर्त्तव्यः, स एव प्रातिपदिकादुत्पत्तौ ष्त्वनिषेदार्थः करिष्यते। स च `न लुमताङ्गस्य' इत्यत्रैव दर्शितः, इह तरप्तमपोरवकाशः प्रकर्षस्य वचनमीषदसमाप्तेरवचनम्--पटुतरः, पटुतमः, कल्पबादीनामवकाश ईषदसमाप्तेर्वचनं प्रकर्षस्यावचनम्--पटुकल्पः, मृदुकल्पः; उभयवचनादुभयप्रसङ्गे परत्वात्कल्पबादिषु कृतेषु प्रकर्षद्योतनाय पुनःप्रसङ्गविज्ञानात्तदन्तात्तरप्तमपौ भवतः---पटुकल्पतरः, मृदुकल्पतर इति। यदि यदन्ताद्भवन्तौ यत्प्रधानस्तदन्तस्तत्प्रकर्षे प्राप्नुतः, किंप्रधानश्च तदन्तः? ईषदसमाप्तिप्रधानः, प्रकृत्यर्थप्रकर्षे चेष्यते? नैष दोषः, नेषदसमाप्तेः प्रकर्षः सम्भवति, न हीषदर्थस्यासमाप्तेर्वा प्रकर्षे ईषदसमाप्तिर्भवति ।।

प्रकारवचने जातीयर् ।। 5.3.69 ।।

तस्य वचन इति। वचनम्=द्योतम्। सुबन्तादिति। अत्रापि तिङ्निवृत्त्यर्थम् `सुपः' इत्यनुवर्त्तते इति दर्शयति। प्रकारवति चायमिति। तेन विषयबेदाद्विशेषविहितेनापि थाला जातीयरो बाधा न भवति, थाल्न्ताच्च जातीयर् सिद्धो बवतीति भावः। स्वभावश्चात्र हेतुः ।।

प्रागिवात्कः ।। 5.3.70 ।।

तिङन्तादयं प्रत्ययो नेष्यत इति। तदर्थमत्र `सुपः' इत्येव सम्बन्धनीयमिति भावः।

अकजिष्यत इति। तदर्थं तत्र `सुपः' इत्येव सम्बन्धनीयमिति भावः।

कथं पुनरनुवर्तमानं शक्यमसम्भनधुम् ? तत्राह--तिङ्श्चेत्यनुवृत्तमिति। अत्र च व्याख्यानमेव शरणम्। इह `प्राक्कुट्याः' इति वक्तव्यम्, न हि `कुटीशमीशुण्डाब्यो रः' इत्यारब्यास्योपयोगः; प्रत्ययान्तरैरवष्टब्धत्वात्? उत्तरार्थं त्वियतोऽवधेर्ग्रहणम्, `वा बहूनाम्' इत्यत्र हि वावचनमकजर्थम्। एवमपि प्राक्कन इति वक्तव्यम् `अवक्षेपणे कन्' इत्ययमवधिः। कुतो नु खल्वेतद्? अयमेव कनवधिः, न पुनर्हस्वे, `संज्ञायां कन्' `कुत्सिते संज्ञायां कन्' इत्येतयोरन्यतरोऽवधिः स्यात् ।।

अव्ययसर्वनाम्नामकच् प्राक् टेः ।। कस्यापवाद इति। ननु च विरोधे सति बाध्यबाधकभावो भवति, काकचोश्च देशभेदान्नास्ति विरोधः, तत्कथं तस्यापवादः? नावश्यं देशकृत एव विरोधः, किं तर्हि? अर्थकृतोऽपि। काकचोश्च प्रयोजनमेकम्--अज्ञाताद्यर्थद्योतनं नाम, तस्मिन्नकचा कृते प्रयोजनाभावात्को न भविष्यति। सर्वके इति। अकचस्तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात् `जसः शी' भवति, के तु सति न स्यात्।

द्वयमपीहानुवर्त्तत इति। यद्येवम्, सर्वत्र सुबन्तस्य प्रातिपदिकस्य च प्राक् टेः प्रत्ययप्रसङ्गः? तत्राह--तत्रेति। क्वचित्प्रतिपदिकस्येति। ओकारसकारभकारादौ विभक्तौ। क्वचित्सुबन्तस्येति। उक्तादन्यत्र विभक्तौ। त्वयकीति। अकचो द्वितीयोऽकार उच्चारणार्थः। चित्करणं तु समुदायस्यान्तोदात्तार्थम्; `चितः सप्रकृतेर्बह्वकजर्थम्' इति वचनात्। इदमेव चित्करणं लिङ्गम्--सप्रकृतेश्चितोऽन्तोदात्तत्वम्, न चिन्मात्रस्येति। तूष्णीमः कामिति। यथासम्भवमज्ञातादिष्वर्थेषु। मकारो देशविध्यर्थः। अन्त्यादचः परः काम् भवति। अज्ञाताद्यर्थाविवक्षायां तूष्णीमित्येव भवति। शीले क इति। शीलम्=स्वभावः, नियमश्च। अज्ञाताद्यपवादः। शीलं तूष्णीं स्वभावाच्चा दद्वान् तूष्णीक इत्युच्यते, न तच्छीलमात्रम् ।।

कस्य च दः ।। 5.3.72 ।।

न सर्वनामग्रहणमिति। तदिङ्ग्रहणं चेति द्रष्टव्यम्; हेतोस्तुल्यत्वात्। अधोक्, अवक् इत्यादावसिद्धं कुत्वम्। शक्नोतिप्रभृतेर्यङ्लुकि लटि तिपीडभावे हल्ङ्यादिलोपे अशाशगित्यादौ छान्दसो यङो लुक्, छन्दसि च दृष्टानुविधानम्। धिगिति। ककारान्तत्वमव्ययस्य दर्शयति ।।

अज्ञाते ।। 5.3.73 ।।

अज्ञात इति सामान्येनोच्यते, न च सर्वथाऽविज्ञाते शब्दप्रयोगे एवल सम्बवति, न खल्वस्व इत्यजानन्नश्वशब्दं प्रयोक्तुमर्हति, तस्माद्विशेषस्य ग्रहणमित्याह--अज्ञातविशेषो ज्ञात इति। विशेषमेव दर्शयति--स्वेन रूपेणेति। विसेषरूपेणेति अस्य विवरणम्--कस्यायमश्व इत्यादि। इहाज्ञातः प्रकृष्टः पटुरित्यर्थद्वयविवक्षायां पश्चात्कः---पटुतमक इति भवति। इह च कुत्सितमर्द्धपिप्पल्या इति विवक्षायाम् पूर्वं समासः, पश्चात्कः---अर्द्धपिप्पलीकेति भवति। एतेन कल्पबादयो व्याख्याताः। आह च--`कविदेस्तमबादयः पूर्वविप्रतिषिद्धम् एकदेशिप्रधानश्च समासः' इति। इह तु छिन्नकतरमिति--`अनत्यन्तगतौ क्तात्' इति परत्वात्कनि कृते तरब् भवति। कदाचिद् द्वन्द्वः--प्लक्षन्यग्रोधकौ, प्लक्षकन्यग्रोधकौ इति वा ।।

कुत्सिते ।। 5.3.74 ।।

प्रकृत्यर्थविशेषणं चैतदिति। प्रकृत्यर्थस्यैतद्विशेषणम्, न तूपलक्षणमित्यर्थः। उपलक्षणत्वे हि यः कुत्सितस्तत्र वर्त्तमानादिति विज्ञायमाने इदं घृतकम्, इदं तैलकमित्यत्रेदंशब्दादपि प्राप्नोति। विशेषणत्वे त्वङ्गीकृतकुत्सात्प्रत्ययः, न त्वनुपातकुत्सात्; कुत्सिसमानाधिकरणात्। प्रत्ययार्थत्वे तु `प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थः प्रधानम्' इति प्रकृत्यर्थस्य विशेषणत्वं कुत्सितस्य विशेष्यत्वं प्राप्नोति, विपर्ययश्च लोके गम्यते। तस्मात्प्रकृत्यर्थविशेषणमिति सुष्ठूक्तम्। अश्वक इति। योऽश्व एव सन् तत्साध्यां क्रियां सुष्ठु न करोति स एवमुच्यते। स्वार्थिकेपु हि यत्र प्रवृत्तिनिमित्तस्य विशेषणासम्भवः, तत्राभिधेयसहचरितधर्मान्तराश्रयः प्रत्ययो भवतीत्युक्तम्। एवं च देवदत्तकः, डित्थक इत्यपि भवति यस्तत्साध्यामर्थं सम्यङ् नानुतिष्टति। सम्भवे त्विहापि शब्दोपात्तमर्माश्रयैव कुत्सा, तद्यथा--पटुकः पण्डितक इति स्वार्थे कुत्सा; `प्राप्य गाण्कडीवधन्वानं विद्धि कौरवकान् स्त्रियः' इति लिङ्गकुत्सा, कौरवकानिति किमेतेऽर्जुनसंनिधौ पुमांस इत्यर्थः; क्वचित्सङ्खयाकुत्सा, यथा--इदमेकमेव शनकमिति, शनभरणे यद्दुःखं तदेकस्यैव भरण इति शतत्वरूपेण कुत्सा। सर्वथाङ्गीकृतकुत्सात्प्रत्यय। अथेह कथं प्रत्ययः---कुत्सितक इति ? कथञ्च न स्यात् ? स्वशब्देनोपात्तत्वात् कुत्सायाः ? अनुकम्पादावर्थान्तरे भविष्यति। अथ वा--कुत्सितस्य यत्कुत्सनं तत्र प्रत्ययः। कुत्सितत्वं यदा कुत्स्यते--नास्य सम्यक्कुत्सितत्वमिति, तदेत्यर्थः। यथा--प्रकर्पस्य प्रकर्षे प्रकृष्टतम इति तमप्प्रत्ययो भवति तद्वदत्रापि। एतेनानुकम्पितशब्दादनुकम्पायां प्रत्ययो व्याख्यातः ।।

अनुकम्पायाम् ।। 5.3.76 ।।

कारुण्येनेति। करुणैव कारुण्यम्। अभ्युपपत्तिरिति। अनुग्रहः, उपकार इति यावत्। परस्योति कर्मणि षष्ठी। तस्यां गम्यमानायामिति। अनेनग्रयोक्तृधर्मोऽनुकम्पा आवाधवद्, न तु प्रशंसादिवत्प्रकृत्यर्थविशेषणमिति दर्शयति। अन्ये तु प्रकृत्यर्थविशेषणमेव मन्यन्ते, तथा चाजिनान्तस्येत्यादिषु विग्रह दर्शयिप्यन्ति--`अनुकम्पितो व्याघ्राजिनः, अनुकम्पितो बृहस्पतिदत्तः, अनुकम्पितः शेवलदत्तः' इति, न च प्रयोक्तृधर्मस्य विग्रहे दर्शनमस्ति। स्वपितकि, श्वसितकीति। अदादित्वाच्छपो लुक्, `रुदादिभ्यः सार्वधातुके' इतीट् ।।

नीतौ च तद्युक्तात् ।। 5.3.77 ।।

सामदानादिरिति। आदिशब्देन भेददण्डयोर्ग्रहणम्, यद्यनुकम्पायां तौ सम्भवतः। असम्भवेऽपि नीतिस्वरूपप्रदर्शनपरं द्रष्टव्यम्। एहकीति। आङ्पूर्वादिणो लोट्, सिपो हिः पूर्वेणेत्यादि। अनुकम्पायां हि विधीयमानः प्रत्ययः प्रत्यासत्तेरनुकम्प्यमानादेव युक्तो विधातुम्, तस्य हि अनुकम्पासम्बन्धः प्रत्तयासन्नस्तद्विषयत्वादनुकम्पायाः। तेन व्यवहितान्नीत्युपायाद्धानादेर्न स्याद्; अतद्विषयत्वादनुकम्पायाः. तेन व्यवहितान्नीत्युपायाद्धातादेर्न स्याद्; अतद्विषयत्वादनुकम्पायाः। धानाशब्दः स्त्रीलिङ्गः, ततः के विहते `केऽणः' इति ह्रस्वत्वे च स्वाथिकानां प्रकृतिवल्लिङ्गं भवतीति कप्रत्ययान्तादापि कृते `प्रत्ययस्थात्' इतीत्वेन भवितव्यम्। प्रायेण तु हन्त ते धानका पठ्यते, तत्र लिङ्गातिवृत्तिर्द्रष्टव्या ।।

बह्वचो मनुष्यनाम्नष्ठज्वा ।। 5.3.78 ।।
प्रकरणमपेक्ष्यते, न त्वनन्तरमित्याह--अनुकम्पायां नीतौ च तद्युक्तादिति वर्तत इति। मद्रबाहुक इति। नामग्रहणस्येदं प्रत्युदाहरणम्, यौगिकोऽयम्--मद्रौ बाहू यस्येति। मनुष्यग्रहणस्य तु स्तम्बेरमादिः प्रत्युदाहरणम्। अपर आह--मद्रबाहुरिति चतुष्पाज्जातिविशेषो मनुष्यग्रहणस्य प्रत्युदाहरणम्, नामग्रहणस्य त्वौपगवादिः प्रत्युदाहरणमिति।।

घनिलचौ च ।। 5.3.79 ।।
चकाराद्यथाप्राप्तं चेति। ननु च ठच् पूर्वण विहितः, वावचनात् कोऽपि, कात्र चकारेणाभ्यनुज्ञा ? इति चिन्त्यम्। योगविभागोऽपि चिन्त्यप्रयोजनः ।।

जातिनाम्नः कन् ।। 5.3.81 ।।
यो शब्दा जात्यन्तरे प्रसिद्धा मनुष्येषु नामत्वेन विनियुक्तास्त इहोदाहरणम्। जातिरेव नाम, जातिर्वा नाम=जातिनाम। व्याघ्रिय इति। अनेकार्थत्वान्निपातानामनुवृत्तस्य वाशब्दस्य समुच्चयार्थत्वाद् घनिलचौ भवतः। ये तु विकल्पार्थमेव वाशब्दं मन्यनते, ते कं प्रत्युदाहरन्ति--व्याध्रकाः, सिंहका इति। स्वरे विशेषः। घनिलचोस्तु शरभिल इत्याद्युदाहरणम् ।।

अजिनान्तस्योत्तरपदलोपश्च ।। 5.3.82 ।।
व्याघ्राजिनो नाम कश्चिदिति। व्याघ्रस्येवाजिनमस्येति कृत्वा। `अजिनलोपश्च' इत्युच्यमाने महदजिनं महाजिनम्, व्याघ्रस्येव महाजिनमस्य व्याघ्रमहाजिनः, सोऽनुकम्पित व्याघ्रक इत्यत्र महच्छब्दस्य लोपो न स्यात्; तस्मादुत्तरपदग्रहणम्। लोपश्चायं सर्वापहारी; उत्तरपदग्रहणात् ।।

ठाजादावूर्ध्वं द्वितीयादचः ।। 5.3.83 ।।
`ठाजादौ' इति समाहारद्वन्द्वे सौत्रः पुंल्लिङ्गनिर्द्देशः। आदिग्रहणं चिन्त्यप्रयोजनम्, `यस्मिन्विधिस्तदादौ' इत्येव सिद्धम्। अस्मिन्प्रकरण इति। प्रत्यासत्त्या तयोरेव बुद्धौ सन्निधानादिति भावः। ऊर्ध्वमिति प्रथमान्तस्याध्याहारेणान्वय इत्याह--ऊर्ध्वं यच्छशब्दरूपं तस्येति। द्वितीयादिति पञ्चम्या षष्ठी प्रकल्प्यते, प्रथमा तु निर्देशार्थैव। `सुपां सु' इति वा षष्ठीस्थाने प्रथमा भवतीति। ऊर्ध्वग्रहणमनर्थकम्, `तस्मादित्युत्तरस्य' इत्यूध्वस्यैव भविष्यति? तत्राह-ऊर्ध्वग्रहणं सर्वलोपार्थमिति। अन्यथा `आदेः परस्य' इति द्वितीयादचो यः परस्तस्यादेरेव लोपः स्याद्, ऊर्ध्वग्रहणणसामर्थ्यात्तु सर्वमेवोर्ध्वं लुप्यते। ठग्रहणमनर्थकम्, इकादेशे कृतेऽजादावित्येव सिद्धम्? अत आह--ठग्रहणमिति। अकृत एवैकादेशे ठावस्थायामेव लोपो यथा स्याद् इत्येवमर्थं तावट्ठग्रहणम्, किमेवं सिद्धं भवति? उको द्वितीयत्वे सति परस्यांशस्य लोपे कृते `इसुसुक्तान्तात्कः' इति कादेशः सिद्धो भवति, तत्रैतत्स्याद्-इकादेशे कृतेऽजादिलक्षण एव लोपोऽस्तु, इकादेशस्य स्थानिवद्भावाट्ठग्रहणेन ग्रहणादुकः परत्वेन कादेशो भविष्यति? तत्राऽऽह--आजादिलक्षणो हीति। ठजादिषु यदि वर्णमात्रं प्रत्ययः, अकारस्तूच्चारणार्थः, ततष्ठस्य क इत्यत्रापि वर्णस्यैव ठस्य स्थानित्वम्, ततश्चाल्विधित्वात्स्थानिवद्भावो नोपपद्यते, सङ्घातस्य तु प्रत्ययत्वे तत्रापि सङ्घातस्य ग्रहणम्। तत्र यद्यप्युपपद्यते स्थानिवद्बावः, तथापि सन्निपातपरिभाषया कादेशो न स्यादेव। अजादेः प्रत्ययस्य प्रकृत्या यदानन्तर्थं तत्कृतं ह्युकः प्रत्ययेनानन्तर्यं तत्कथं तस्याजादित्वं विहन्यात्! अत एव मथितं पण्यमस्य माथितिक इत्यत्र यस्येतिलोपे कृते सत्यपि तकारेण प्रत्ययस्यानन्तर्थे कादेशो न भवति। तस्माट्ठग्रहणं कर्त्तव्यम्। किञ्च---यदा चित्रभानुप्रभृतिभ्यष्ठज्विधीयते, तदेकादेशाबावादजादिलक्षणो लोपो न स्यादिति तदर्थमपि ठग्रहणम्।
चतुर्थादच्च इति। इदं संग्रहश्लोक नास्ति, क्वाचित्कं चैतत्।
अनजादौ विभाषा लोपो वक्तव्य इति। द्वितीयादच ऊर्ध्वस्येत्येव।
लोपः पूवपदस्य चेति श्लोकवातिकम्, तस्योपस्कारः--ठाजादावनजादौ च वक्तव्य इति। तत्र ठाजादौ पूर्वोत्तरयोरन्यतरस्य नित्यं लोपः, अनजादौ विकल्पः।
उवर्णाल्ल इति। लोपस्य `ल' इति पूर्वाचार्यसंज्ञा, तत्र `आदेः परस्य' इतीकारलोपः।
तदादेरिति। सन्ध्यक्षरात्परस्य लोपे प्राप्ते तत आरभ्य लोपार्थं वचनम्
एकाक्षरपूर्वपदानामिति। अक्षरशब्दोऽयमचि वर्त्तते, व्यञ्जनसहिते केवले वा। द्वितीयादच ऊर्ध्वस्य लोपे प्राप्ते तेन सह लोपार्थं वचनम्। वागाशारिति। वाचि आशीर्यस्य स वागाशीः। वाचिक इति। अत्र यदि द्वितीयादच ऊर्ध्वस्य लोपः स्यात्तदा `अकृतव्यूहाः पाणिनीयाः' इति परिभाषया कुत्वजश्त्वयोनिवृत्तौ

वाच्+आ+इक इति स्थिते आकारस्य यस्येतिलोपेन निवृत्तावपि तस्य स्थानिवद्भावादाकारान्तस्य भसंज्ञायां त्वन्तर्वर्त्तिनीं विभक्तिमाक्षित्य पदसंज्ञा, सा चकारान्तस्येति भिन्नावधिकत्वाद्भसंज्ञया पदसंज्ञा न बाध्यते, ततश्च कुत्वजश्त्वयोः कृतयोः-वागिक इति स्यात्। उत्तरपदलोपे तु तस्यानजादेशत्वात् स्थानिवत्त्वाभावात्तुल्यावधिकया भसंज्ञया पदसंज्ञायास्तद्धिताश्रयायास्तावदपवादत्वाद्बाधः। या त्वन्तर्वधिकया भसंज्ञया पदसंज्ञायास्तद्धिताश्रयाया स्तावदपवादत्वाद्बाधः। या त्वन्तर्वर्त्तिनीं विभक्तिमाश्रित्य सुबन्थं पदमिति पदसंज्ञा, तस्या अपि एकसंज्ञाधिकारात्परत्वाच्च बाध इति सिद्धमिष्टम् । कथमिति। अचाप्युत्तरपदलोपे कृते भसंज्ञया पदसंज्ञाया बाधितत्वाज्जश्त्वं न स्यादिति प्रश्नः। षष इति। सौत्र एवात्र लोप इष्यते, न त्वौपसख्यानिक इत्यर्थः ।

संग्रहश्लोकतृतीयपादे तथाशब्दानन्तरं वाशब्दः पाठ्यः, न त्वेवशब्दः,। स च पूर्वत्रापि यथेष्टं सम्बन्धनीयः, इष्टं च पूर्वमेव दर्शितम्। अत्र चोदयति--- संज्ञाशब्दस्यैकदेशे लुप्ते कथं संज्ञिनोऽवगमः, न हि देव इति वा दत्त इति वा संज्ञा कृता, किं तर्हि, देवदत्त इति ? अत्राहुः--एकदेसेन समुदायेऽनुमीयते, विषाणेनेव गौः, सोऽनुमितोऽर्थस्य वाचक इति। ननु चोच्चार्यमाणा एव शब्दोऽर्थ प्रत्याययति, न प्रतीयमानः? नेत्याह; स्मृत्यनुमिति श्रुतिः कि नार्थ प्रत्याययति! प्रत्याहारेषु वा मध्यवर्त्तिनो वर्णाः किं सवर्णान्न प्रत्यायन्ति! किञ्च---

अशक्तिजैरपभ्रंशैः साधवः स्मारिता यथा।

शब्दाः प्रत्याययन्त्यर्थं तथात्रापि भविष्यति ।।

समुदाये संज्ञात्वेन विनियुज्यमानेऽवयवानामपि संज्ञात्वममुनिष्पद्यते। किमर्थं तर्हि लोपो विधीयते? पदानामेव संज्ञैकदेशभूतानां साधुत्वं यथा स्याद्, वर्णानां मा भूदिति। उक्तं च---

तुल्यायामनुनिष्पत्तौ दे-य-सो इत्यसाधवः।

न ह्यन्वाख्यायके शास्त्रे दत्तादिवदनुस्मृतिः ।।

शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ।। 5.3.84 ।।

शेवलादीनामित्यादि। योऽयं शेवलादीनां तृतीयादच ऊर्ध्वस्य लोप उच्यते, सोऽकृतसन्धीनामेव वक्तव्यः। सन्धीयतेऽनेनेति संहिताकार्यमुच्यते ।।

ह्रस्वे ।। 5.3.86 ।।

यद्यपि वंशादिष्वल्पत्वह्रस्वत्वयोः समावेशो दृष्टः, तथापि घृतादिषु द्रवद्रव्येषु न कश्चिदाह--ह्रस्वं घृतम्, ह्रस्वं तैलमिति; तथा विस्तीर्णेष्वायामहीनेषु ह्रस्वः पट हत्युच्यते, न कश्चिदाह--अल्पः पट इति; तस्मादुभयनिर्देशः--`अल्पे', `ह्रस्वे' इति ।।

कुत्वा डुपच् ।। 5.3.87 ।।

कुतूरित्यावपनस्याख्येति। यद्यप्यावपनमात्रस्याख्या, तथापि डुपच्प्रत्ययान्तस्वभावादुक्तम्--चर्ममयं स्नेहबाजनमुच्यत इति ।।

वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ।। 5.3.91 ।।

`तनुत्वे' इति सामान्याभिधानात्कार्श्येऽपि प्रत्ययप्रसङ्गः, तत्राह--यस्य हि गुणस्येति। एतच्च प्रत्यासत्तेर्लभ्यते। प्रत्यासन्नं हि शब्दस्य प्रवृत्तिनिमित्तम्। प्रथमवया वत्स इति। प्रथमं वयो वत्सशब्दस्य प्रवृत्तिनिमित्तमित्यर्थः। तस्येति गुणभूतमपि वयोऽत्र परामृश्यते, तस्य प्रथमस्य वयस इत्यर्थः। द्वितीयवयःप्राप्तिरिति। द्वितीयं हि वयः प्राप्नुषतो वत्सस्य प्रथमं वयोऽल्पशेषं भवति। तरुण इति। द्वितीयवया इत्यर्थः। तस्य तनुत्वमित्यादि पूर्ववत्। अन्यपितृकतेति। गर्दभपितृकतेत्यर्थः। गर्दबेन त्वश्वायामुत्पादितोऽश्वतर उच्यते। अनड्वानिति। अनसो वोढेत्यर्थः, अनसि वहेः क्विप्, डश्चानसः ।।

कियत्तदोनिर्द्धारणे द्वयोरेकस्य डतरच् ।। 5.3.92 ।।

द्वयोरेकस्य निर्द्धारणे कडतरज्भवतीत्युच्यते, तत्रेहापि प्राप्नोति--कयोरन्यतरो देवदत्तः, ययोरन्यतरः, तयोरन्यतर इति; किमादीनां समुदायवचित्वेऽपि निर्द्धारणस्य गम्यमानत्वात्? अत आहनिर्द्धार्यमाणवाचिभ्य इति। एतच्चाभिधानस्वभावाल्लभ्येते। क्रियया गुणेन संज्ञया वेति। जात्या वेत्यापि द्रष्टव्यम्; कतरो भवतोः कट इत्यादेरपि सम्भवात्।

समुदायान्निर्द्धारणविभक्तिरिति। सा पुनः षष्ठी, न सप्तमी; वा बहूनामिति दर्शनात्। एकस्येतीति। निर्द्धार्यमाणनिर्देश इति। ननु च द्वयोरेकस्यैव निर्द्धारणं सम्भवति, नार्थ एतेन? नैतदस्ति; `एकस्य' इत्यनुच्यमाने द्वयोरिति कर्मणि षष्ठी विज्ञायेत, ततश्चास्मिन् ग्रामे कौ देवदत्तावित्यत्रापि प्राप्नोति। तस्मादेकग्रहणम् ।।

वा बाहूना जातिपरिप्रश्ने डतमच् ।। 5.3.93 ।।

जातिपरिप्रश्नविषयेभ्य इति। जातिपरिप्रश्नौ यथासम्भवं विषयौ येषां ते तथोक्ताः। सूत्रे पुनः समाहारद्वन्द्वः। सन्निधानाच्च परिप्रश्नोऽपि जातेरेव विज्ञायते, यथा--`गुणो यङ्लुकोः' इत्यत्र यङ् च यङ्लुक्चेति। एवं च कृत्वा जातिपरिप्रश्नग्रहणं किम एव विशेषणम्। `जातिग्रहणं तु सर्वैरपि सम्बध्यते' इति

वक्ष्यमाणमुपपद्यते। षष्ठीसमासे तु गुणभूतस्य जातिग्रहणस्य निष्कृष्य सम्बन्धोऽनुपपन्नः स्यात्।
परिप्रश्नग्रहणं क्षेपनिवृत्त्यर्थम्।
वावचनमकजर्थमिति। कथं तर्हि वाक्यस्य सिद्धिः? तत्राह--महाविभाषेत्यादि।
किमोऽस्मिन्विषय इति। द्वयोरेकस्य निर्द्धारण उक्तौ बहूनामेकस्य निर्द्धारणे न स्यादिति वचनम्। कथं पुनरिष्यमाणोऽपि लभ्यते? तत्राऽऽह--तत्रत्यादि। ननु कतरो भवतोः कठ इति द्वयोरेकस्य निर्द्धारणेऽपि जातिपरिप्रश्नस्य सम्भवान्नानेन वचनेन बहूनामेकस्य निर्द्धारणे डतरच् शक्यो ज्ञापयितुम्? एवं तर्हि--`समासविधौ कतरकतमौ जतिपरिप्रश्ने साधू भवतः' इत्यपि व्याख्येयमिति मन्यते। अजातिपरिप्रश्नेऽपि किमो डतमज् भवति--कतमो भवतोर्देवदत्त इति, कथम् ? कतरकतमावित्यत्र जातिपरिप्रश्नग्रहणात्। यदि हि कतमशब्दो जातिपरिप्रश्नादन्यत्र न स्यात्, ततस्तत्साहचर्यात्कतरशब्दोऽपि तदर्त एव ग्रहीष्यत इत्यनर्थकं तत्स्यात् ।।

एकाच्च प्राचाम् ।। 5.3.94 ।।
डतरज्डतमजित्येताविति। कथं पुनर्व्यवहितस्य डतरचोऽनुवृत्तिः? इत्याह--चकार इति। डतमचस्त्वनन्तरत्वदेवानुवृत्तिरिति भावः। `स्वस्मिन्निषये' इति यदुक्तं तदेव विवृणोति--द्वयोर्निर्धारण इति। एतच्च द्वयोरेकस्य डतरज, बहूनां डतमजित्यनुवृत्तेर्वाक्यभेदेन च सम्बन्धाल्लभ्यते ।।

अवक्षेपणे कन् ।। 5.3.95 ।।
अवक्षेपः=निन्दा। व्याकरणकेनेति। यद्यपि व्याकरणं स्वतो वक्षेपणं न भवति, प्रत्ययुत वेदाह्घत्वात्प्रशंसनम्; तथापि यस्य तदवलेपमावहति तस्यावक्षेपणं भवत्येव। याज्ञीक्यकेन नामेति। याज्ञिकानामाम्नायो याज्ञिक्यम्=कल्पसूत्रादि। परस्येत्यादिना कुत्सित इत्यस्यास्य च कनो विषयविभागं दर्शयति ।।

इवे प्रतिकृतौ ।। 5.3.96 ।।
इवार्थः सादृश्यमिति। कन् प्रत्ययस्तु स्वभावात्सदृशे भवति, न सादृश्यमात्रे; यथा-प्रकारेऽपि विहितो जातीयर्-प्रत्ययस्तद्वति भवति । ???????? शेषणं प्रतिकृतिग्रहणमिति। प्रतिकृतिविषयं यत्सादृस्यं तत्र प्रत्ययो यथा स्याती कोऽर्थः? प्रतिकृतिस्वरूपं यत्सदृशं यत्सदृशं तत्रेत्यर्थः। अश्व इवायमश्वप्रतिकृतिरिति! अश्वप्रतिकृतिरूपोऽस्वसदृशोऽयं पदार्थ इत्यर्थः। अश्वक इति।
केचिदाहुः--`अश्वशब्दोऽश्व एव वर्तते, कन्प्रत्ययस्तु प्रतिकृतिरूपे सदृश इति स्वार्थिकोऽयं न भवति' इति। अपर आह--`सादृश्यनिबन्धनादभेदोपचाराद् गौर्वाहीक इतिवद् अश्वशब्द एव प्रतिकृतौ वर्त्तते, प्रत्ययस्तु तस्यैवोपचारस्य द्योतकः' इति।
गौरिव गवय इति। गवयो गोन प्रतिकृतिः, तृणचर्मकाष्ठादिनिर्मितं हि प्रतिच्छन्दकम्=प्रतिकृतिः, न चैवं गवयः ।।

लुम्मुष्ये ।। 5.3.98 ।।
चञ्चा=तृणपुरुषः, तत्सदृशो मनुष्यश्चञ्चा। लुपि युक्तवद्भावः। `मनुष्यलुपि प्रतिषेधः' इत्येतत्तु विशेषणविषयम् ।।

जीविकार्थे चापण्ये ।। 5.3.99 ।।
वासुदेवः, शिव इत्यादि। याः प्रतिमाः प्रतिगृह्य गृहाद् गृहं भिक्षमाणा अटन्ति ता एवमुच्यन्ते, ता हि जीविकार्था भवन्ति।

देवपथादिभ्यश्च ।। 5.3.100 ।।
आदिशब्दः प्रकारे इति। तेन किं सिद्धं भवति? इत्याहआकृतिगणोऽयमिति।
अर्चासु=प्रतिमासु, पूजनार्थासु गृहेष्वायतनेषु वा याः पूज्यन्ते तासु, चित्रकर्मध्वजाभ्यां तद्गताः प्रतिकृतयो लक्ष्यन्ते ।।

समासाच्च तद्विषयात् ।। 5.3.106 ।।
तदित्यनेन प्रकृत इवार्थो निदिश्यते इति। छप्रत्ययस्तु प्रधानतया प्रकृतोऽपि न परामृश्यते, अनेनैव तस्य विधानात्, समासस्य तद्विषयत्वानुपपत्तेः।
अपरस्मिन्निवार्थ एवेति। एवकारः पौनर्वचनिकः। शस्त्रीश्यामादौ त्वेक इवार्थः समासेऽन्तर्भूत इति छो न भवति। अजाकृपाणीयमिति। अजाया गच्छन्त्याः कृपणेनाधः पतता यथा वधस्तत्सदृशमित्यर्थः। अन्धकवत्तिकीयमिति। वर्त्तिका=शकुनिविशेषः, तस्या अन्धहस्ते पतनं ग्रहणं च यादृच्छिकं तादृगित्यर्थः। अतर्कितोपपन्नमिति। अचिन्तितोपपन्नम् यादृच्छिकमित्यर्थः। चित्रीकरणम्=विस्मयकरणम्। कथमिति। सामान्येनायमर्थः कथमुच्यत इत्यर्थः।
समासश्चायमित्यादि। कि पुनः कारणं ज्ञापकात्समाससद्भावः प्रतिपाद्यते ? इत्यत आह--न ह्यस्तेति। स च एवंविषय एवेति। छप्रत्यविषय एवेत्यर्थः।
अनन्यत्र भावो विषयार्थः; तेन स्वातन्त्र्यमुपाध्यन्तरयोगोः, विग्रहश्च न भवति ।।

एकशालायाष्ठजन्यतरस्याम् ।। 5.3.109 ।।
अनेकार्थत्वन्निपातानामन्यतरस्यांग्रहणमिह समुच्चयार्थम्, न विकल्पार्थमित्याह--अन्यतरस्यांग्रहणेनेत्यादि ।।

कर्कलोहितादिकक् ।। 5.3.110 ।।
स्वयमलोहित इत्यादि। उपाश्रयः=उपादानभूतो लाक्षादिः ।।

प्रत्नपूर्वविश्वेमात्थाल् छन्दसि ।। 5.3.111 ।।
इम शब्द इदमा समानार्थः प्रकृत्यन्तरम् ।।

पूगाञ् ञ्योऽग्रामणीपूर्वलात् ।। 5.3.112 ।।
पूगवाचिन इति। स्वरूपग्रहणं तु न भवति; `अग्रामणीपूर्वात्' इति वचनात्। पूर्वशब्दो ह्यवयववचनः, न च पूगशब्दस्य ग्रामणीवचनो देवदत्तादिशब्दः पूर्वावयव उपपद्यते। लोहध्वजा इति। `ञ्यादयस्तद्राजाः' इति तद्राजसंज्ञा, `तद्राजस्य बहुषु' इति लुक्।
देवदत्तका इति। `स एषां ग्रामणीः' इति कन्, अत्र देवदत्तशब्दो ग्रामणीवचनः पूर्वोऽवयवः, समुदायः पूगवचनः ।।

व्रातच्फञोरस्त्रियाम् ।। 5.3.113 ।।
उत्सेधजीवित्वं व्रातस्य पूगाद्विशेषः। कौञ्जायनीति। `गोत्रे कुञ्जादिभ्यश्च्फञ्', `गोत्रं च चरणैः सह' इति जातित्वान्ङीष् ।।

आयुधजीविसङ्घाञ् ञ्यड् वाहीकेष्वब्राह्मणराजन्यात् ।। 5.3.114 ।।
यदा वाहीकशब्दः पुरुषेपु वर्त्तते, तदा `वाहीकेषु' इति निर्द्धारणे सप्तमी, यदा तु देशे तदाऽधिकरणे।
ब्राह्मणे तद्विशेषग्रहममिति। स्वरूपग्रहणं तु न भवति; ब्राह्मणशब्दवाच्यस्यायुधजीविसङ्घस्य वाहीकेष्वभावात्। राजन्ये तु स्वरूपग्रहणमिति। तद्वाच्यस्यैव भावात्। तेनास्त्रियामिति नानुवर्त्तत इति। तेन स्त्रियामपि--कौण्डीबृसी, क्षौद्रकी, मालवीति भवति। `हलस्तद्धितस्य' इति यलोपः ।।

दामन्यादित्रिगर्तषष्ठाच्छः ।। 5.3.114 ।।
`दामन्यादित्रिगर्तषष्ठात्' इति समाहारद्वन्द्वः, दामन्यादेरायुधजीविसङ्घात्त्रिगर्तषष्ठाच्चायुधजीविसङ्घादित्यन्वयः। त्रिगर्तषष्ठादित्यस्यार्थमाह--येषामिति। अन्तवर्गाः=अन्त्रगणाः। ते पुनः के? इत्याहतेषु चें स्भृतिरिति। त्रिगर्त्तषष्ठाः स्मर्यन्ते=ज्ञाप्यन्तेऽनयेति स्मृतिः।
सा पुनः-आहुस्त्रिगर्तषठानित्यादिः श्लोकः। अत्र जानकयस्त्रिगर्त्तवर्गाः, तेषु च त्रिगर्त्तषष्ठेतषु, प्रथमपञ्चमौ शिवाद्यणन्तौ, शेषास्तु इञन्ताः। केचित्तु-अतद्धितान्तमेव पञ्चमं ब्रह्मगुप्तशब्दं पठन्ति ।।

पर्श्वादियौधेयादिब्योऽणञौ ।। 5.3.115 ।।
पार्श्व इत्यादि। परशू, रक्षस्, असुर--इत्येते जनपदशब्दाः, तत्राकारान्ताद्बहुष्वपत्येषु `जनपदशब्दात्क्षत्त्रियादञ्' इत्यञ्, इतराभ्याम् `द्व्यञ्मगध' इत्यादिनाण्, तद्राजत्वाल्लुक्, पुनः सङ्घविवक्षायामनेनाण्। यौधेय इति। युधेतेऽसौ, युधेरिगुपधलक्षणः कः--युधा, तस्य अपत्यम् `द्व्यचः' इति ढक्, तदन्तात्सङ्घरूपविवक्षायामनेनाञ्--यौधेय इत्याद्युदात्तं भवति। तथा यौधेयस्याङ्को लक्षणं वा यौधेय इति--सङ्घाङ्कलक्षणेष्वञ्लक्षणोऽण् भवति। एतेन यौधेयादिषु ये ढगन्तास्ते सर्वे व्याख्याताः। यौधेयादीनामस्मिन्प्रदेशे न पाठः, पठिता हि ते चतुर्थे--`न प्राच्यभार्गादियौधेयादिभ्यः' इत्यत्र ।।

अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् ।। 5.3.116 ।।
अभिजयतीत्यभिजित्, वेत्तीति विदः, इगुपधलक्षणः कः, तान्बिभर्त्तीति विदभृत्, अन्ये मन्वन्ताः। अभिजिदादिभ्योऽणन्तेभ्य इति। सूत्रेऽभिजिदादय एवाणिति विशेषण समासः। अभिजिदादिप्रकृतयश्चाणन्ता अभिजिदादयः उच्यन्ते। गोत्रप्रत्ययस्येति। अपत्यप्रत्ययस्येत्यर्थः। आभिजितो मुहूर्त्त इति। `नक्षत्रेण युक्तः' इत्यण्, उत्तरस्य--`सास्य देवता' इति। इहाभिजित्यस्यायम् आभिजितक इति `गोत्रचरणाद्वुञ्' भवति, `आपत्यस्य' इति यलोपः।
गोत्रप्रत्ययान्तादध्ययमिष्यते। तेन स्वार्थिकत्वादयमपि यञ् गोत्रप्रत्यय एव भवति ।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां पञ्चमस्याध्यायस्य तृतीयः पादः ।।

5.4
ॐ नमोनारायनाय नमः

काशिकावृत्ति
अथ पञ्चमाध्याये चतुर्थः पादः

पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च ।। 5.4.1 ।।

आदिशब्दोऽयमवयववाची, न तु व्यवस्थावाची; `संख्यायाः' इति पञ्चमीनिर्देशेनैव सिद्धेः। न च संख्यावचनः शब्दः पादशतशब्दयोरवयव उपपद्यते; अनारम्भकत्वात्। तस्मात्संख्यादेरिति वचनादिह ग्रहमवतापि प्रातिपदिकेन तदन्तविधिर्विज्ञायत इत्याह--पादशतान्तस्येति। आनन्तर्यलक्षणा चेयं षष्ठी वुन्विधौ, लोपविधौ तु स्थानषष्ठी। तत्संनियोगेन चेति। चकारस्य संनियोगार्थकत्वात्।

अनैमित्तिकत्वार्थमिति। निमित्ते भवो नैमित्तिकः, अध्यात्मादिः। यस्योतिलोपः परनिमित्तक इति। ईति तद्धिते च परतो लोपविधानात्। पद्भावो न स्यादिति। पच्छब्दो हि तत्र स्थान्युपात्तः, स्थानिवत्त्वे च सति पादशब्दान्तमङ्गं भसंज्ञं भवति, न पाच्छब्दान्तमिति पादायेत्यादिवदत्रापि पद्भावो न स्यात्। अस्य त्वनैमितिकत्वादिति। न ह्यत्र वुन्निमित्तम्; सहविधानात्।

द्विपदिकामिति। तद्धितेन द्योतितत्वाद्वीप्सायां द्विर्वचनं न भवति। तद्धितार्थ इति समास इति। प्रकृत्युपाधिरपि वीप्सा वुना द्योत्यत इति तद्धितार्थो भवति। द्वौ पादौ ददातीति। उत्तरसूत्रेवक्ष्यति--`दानं व्यवसर्गः' इति, `अवीप्सार्थोऽयमारम्भः' इति च, तस्माद्भवितव्यमत्र वुना। क्रियान्तरं प्रत्युदाहर्त्तव्यम्-द्वौ पादौ लभत इत्यादि।

अपर आह--दडितो व्यवसृजतीति प्रयोग एवोत्तरोऽविधिरिति। यद्वापरस्वत्वापादनं दानम्=व्यवसर्गः, इह तु समर्पणमात्रे ददातिर्वर्त्तते; यथरजकस्य वस्त्रं ददातीति।

अन्यत्रापि दर्शनादिति। द्वौ द्वौ माषौ ददातीत्यादौ त्वनभिधानादतिप्रसङ्गभावः ।।

दण्डव्यवसर्गयोश्च ।। 5.4.2 ।।

दण्कडनं दण्ड इति। `दमु उपशमने' इत्यस्माद्भावे `ञमन्ताड्डः' दण्डतेर्वा चुरादिण्यन्तादेरच्। यद्यपि दण्कडशब्दः करणसाधनो यष्टावपि वर्त्तते, तथापि तस्य ग्रहणं न भवति; धात्वर्थेन व्यवसर्गेण साहचर्यात्। अत्राप्युदाहरणे `तद्धितार्थ' इति समासः स्त्रीलिङ्गस्तद्धितार्थः। उक्तं च-`स्वभावाच्च वुन्प्रत्ययः स्त्रियां वर्त्तते' इति। कथं तर्हि दाने वीप्सायां वुन्पूर्वसूत्र उदाहृतः, यावता नाप्राप्ते वीप्साया वुन्यारभ्यमाणोऽवीप्सावुनेतयोरर्थयोस्तस्य बाधकः प्राप्नोति, यथा `मतिबुद्धिपूजार्थेभ्यश्च' इति `वर्त्तमाने क्तः'---भूतक्तस्य, यथा च `अवृद्धादपि' इत्यपिशब्दः क्रियते? इहापि तर्हि चकारः क्रियते, तेनाधिकविधिरयमबाधकः। एवमपि परत्वादनेनैव दाने वीप्सायां वुन्युक्तः? सत्यम्; अविशेषात्तु पूर्वत्रोदाहृतः। यद्वा--दानस्य पदान्तरवाच्यत्वादेष वुन्बहिरङ्गः, वीप्सायास्तु तद्वितद्योत्यत्वात्पूर्वो वुन्नन्तरङ्गः ।।

स्थूलादिभ्यः प्रकारवचने कन् ।। 5.4.3 ।।

प्रकारवचने द्योत्य इति। प्रकारवचने कन् द्योत्य इत्यर्थः। यथौदनं पचतीत्यत्रैवार्थे ओदनपाकं पचतीति। यद्वा-प्रकारउच्यते स्थूलादिभिरिति द्योतनायेत्यर्थः। प्रकारवाचिभ्यः कन् भवति, तदेव प्रकारवचनत्वं द्योतयितुमिति यावत्। जातीयरोऽपवाद इति। तेनायमपि तद्वदेव प्रकारवति कभवति, न प्रकारमात्र इत्युक्तं भवति। प्रकारः=भेदः, सादृश्यं च, उभयत्रापि यथाभिधानं कन् भवति। वृत्तौ तु प्रकारो भेद इत्युपलक्षणम्।

चञ्चद्बृहतोरिति। एतावपि स्थूलादिषु पठितव्यावित्युक्तं भवति। चञ्चत्क इति। चञ्चतिश्चलनकर्मा चञ्चत्प्रकारश्चञ्चन्नेवं कश्चिद्विशेष उच्यते। तथा बृहद्विशेषो बृहत्कः। अपर आह--सादृश्येऽत्र कन्, अचञ्चन्नपि यश्चञ्चन्निव लक्ष्यते स बृहत्क इति। चञ्चा=बृणमयः पुरुषः, तत्सदृशश्चञ्चकः। `केऽणः' इति ह्रस्वः।

स्थूलाणुमाषेष्विति। स्थूल, अणु, णाप, इपु--इति चतस्रः प्रकृतयः कृष्णतिलेष्विति। कृष्णप्रकारास्तिलाः कृष्णकाः। यवकाः यवसदृशाः। पाद्यकालावदाताः सुरायामिति। पाद्यिका, कालिका, अवदातिका, सुराविशेषा एते। गोमूत्रकम्=गोमूत्रप्रकारं गोमूत्रवर्णमाच्छादनम्। यद्वा--विन्यासविशेषो गोमूत्रम्, तत्सदृशं तु गोमूत्रकम्। यत्र तु शुक्लकृष्णादिवर्णविन्यासः सुरावर्णोऽहिः सुरकः, पूर्ववद् ह्रस्वः। जीर्णप्रकाराः जीर्णकल्पाः शालयो जीर्णकाः।

जातीयरोऽनन्तरमेवायं कन् विधेयः, एवं हि पुनः `प्रकारवचने' इति न वक्तव्यं भवति। इह तु करणेऽज्ञातः स्थूलप्रकार इति प्रकारस्याज्ञातादीनां च युगपद्विवक्षायां परत्वादनेन कनि कृते पुनः प्रसङ्गविज्ञानादज्ञातादिद्योतनाय पुनः को भवति। तत्र तु करणे परत्वात्के कृते पुनः प्रसङ्गविज्ञानादज्ञातादिद्योतनाय पुन को भवति। तत्र तु करणे परत्वात्के कृते कन्न स्यात्; शब्दान्तरत्वात्। सत्यपि वा कनि स्थूलकक इत्याद्युदात्तं स्यात् ।।

अनत्यन्तगतौ क्तात् ।। 5.4.4 ।।

अशेषसम्बन्ध इति। क्तप्रकृतिवाच्यया क्रियया साधनस्य व्याप्तिरित्यर्थः। भिन्नकमिति। ईषद्भिन्नमित्यर्थः।
भिन्नमिति। यदशेषं भिदिक्रियाया व्याप्तं घटादि तदभिधीयते। इहानत्यन्तगतेः प्रकर्षस्य च युगपद्विवक्षायां पूर्वविप्रतिषेधेन पूर्वमातिशायिक इष्यते, तदन्तात्कन्वक्तव्यः, अक्तान्तत्वाद्धि न प्राप्नोति--भिन्नतरकं छिन्नतरकमिति। आह च--`अनत्यन्तगतौ क्तान्तात्तमबादयः पूर्वविप्रतिषिद्धं तदन्ताच्च स्वार्थे कन्वचनम्' इति। स्वार्थः पुनरनत्यन्तगतियुक्त एव, न शुद्धः। तथा हि सति अनत्यन्तगतिर्द्योतिता न स्यात् ।।

न सामिवचने ।। 5.4.5 ।।
साम्यर्थ उच्यतेऽनेन तत्सामिवचनम्। सामिवचने उपपदे इति। उपोच्चारितं पदमुपपदम्, तच्च समासावयवभूतं सत्केवलं गृह्यते। सामिकृतमिति। `सामि' इति समासः। अर्द्धकृतं नेमकृतमिति। विशेषणसमासः, बहुव्रीहिर्वा।
प्रकृत्यभिहितत्वादिति। का पुनरत्र प्रकृतिरभिप्रेता ? न तावत्समासः, अक्तान्तत्वात्, न हि सामिकृतादयः क्तान्ताः; प्रत्ययग्रहणे तदादिनियमात्। न च कृद्ग्रहणपरिभाषया क्तान्तत्वम्; साम्यादीनामगतित्वाद्, अकारकत्वाच्च। अथ यदत्र क्तान्तं सा प्रकृतिः? तदपि न; हि समासे एकार्थीभूतस्य पृथक् प्रकृतित्वभूपपद्यते। अथ वाक्यगतः कृतादिशब्दः प्रकृतिः? एवमपि प्रकृत्यभिहितत्वादित्यनुपपन्नम्। एवं तु वक्तव्यम्--उपपदेनाभिहितत्वादिति? अत्राहुः--वाक्यगतात्कृतादिशब्दात्, समासावयवाद्वा प्रसङ्ग शङ्क्यते। यत्तूक्तम्--प्रकृत्यभिहितत्वादित्यनुपन्नमुपपदेनाभिहितत्वादिति वक्तव्यमिति? सत्यम्; शब्दान्तरेणाभिहितत्वाद् द्योत्याभावात्कनः प्रसङ्गो नास्तीत्यर्थः। यदप्युक्तम्--समास एकार्थीबूतस्य पृथक्प्रकृतित्वासम्भव इति ? तदपि न; प्रकृत्यर्थस्य प्रत्ययार्थेनैकार्थीभावे सति प्रकृतित्वम्। न चार्थान्तरेणैकार्थीभूतस्य प्रत्ययार्थेनैकार्थीभावः सम्भवतीति किल प्रकृतित्वासम्भवः स्यात्। न चात्र प्रत्ययस्या द्योत् वाच्यं वाऽर्थान्तरमस्ति, येन सहैकार्थीभावः प्रार्थ्येत। तस्मादुपपन्नमेकार्थीभूतस्यापि प्रकृतित्वम्। अत एव वृत्तौ समास उदाहृतः।
केन पुनरिति। स्वार्थमात्रे कन्विधेः प्रत्यक्षेणादर्शनात्प्रश्नः। अनुमास्वत इत्युत्तरम्। यदेतदुत्यत इति। भाष्यकारैः उच्यत इति, प्रयुज्यत इत्यर्थः, भाष्यकारप्रयोग उपपन्नो भवतीति यावत्। साक्षिस्थानीयस्य भाष्यकारप्रयोगः, न पुनरन्यत्र स्वार्थे कन् न भवतीति ।।

बृहत्या आच्चादने ।। 5.4.6 ।।
बृहतिका=प्रावारः ।।

अषडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात्खः ।। 5.4.7 ।।
अविद्यमानानि षडक्षीणि यस्मिन्निति बहुव्रीहिरिति। अक्षिशब्दोऽत्र श्रोत्रेन्द्रिये वर्त्तते `बहुव्रीहौ सकथ्यक्षणोः' इति षच्। मन्त्रः=मन्त्रणम्, यद् द्वाब्यामेव क्रियत इति, त्रिभिस्तु क्रियमाणः षडक्षो भवति, चतुःप्रभृतिभिस्तु क्रियमाणस्य यद्यप्यष्टाक्षत्वादि सम्भवति, तथाप्यवर्जनीयरूपेण षडक्षत्वमपि भवति। तस्माद् द्वाभ्यामेव क्रियमाणोऽषडक्षीणो भवति। आशिता इति। अश्नोतेराङ्पूर्वादाशितः कर्तेति ज्ञापकात्कर्त्तरि क्तः। यद्वा--ण्यन्तात्कर्मणि। आशितङ्गवीनमरण्यमिति। प्रभूतयवसमित्यर्थः।
अधिशब्दः शौण्डादिषु पठ्यत इति। यत्र `अधिरीश्वरे' इत्यधेः कर्मप्रवचनीयत्वाद् `यस्य चेश्वरवचनम्' इति सप्तम्यन्ता राजादयोऽधिना समस्यन्ते। वाक्यमपि भवति। राजन्यधि, राजाधीनमिति। यथा--अधि ब्रह्मदत्ते पञ्चाला इति, अधिशब्दश्च वृत्तिविषये ईशितव्ये वर्त्तते। अपर आह--अधिकरणे एषा सप्तमी, वृत्तिविषये च ससाधनक्रियावचनोऽधिः, न तु वाक्य इत्यस्वपदेन विग्रहः, वृत्तिविषये च ससाधनक्रियावचनोऽधिः, न तु वाक्य इत्यस्वपदेन विग्रहः, राजन्यधिकृतं राजाधीनम्, राजायत्तमित्यर्थ इति। उत्तरसूत्रे विभाषाग्रहणादिति। द्वयोर्विभाषयोर्मध्ये नित्या विधय इति न्यायात् ।
तमबादय इति। `अतिशायने तमबिष्ठनौ' इत्यादयः। प्राक्कन इति। `अवक्षेपणे कन्' इत्यस्मात् शुक्ल इत्युक्ते सामान्यशब्दत्वात्प्रकर्षस्यानवगमात्तत्तदुपाधिद्योतनायावश्यं प्रयोज्यास्तमबादय इति नित्याः। अतिशयेन शुक्ल इत्यादिकं तु वाक्यं भवत्येव; पदान्तरद्योत्यत्वादतिशयस्य। ञ्जादय इति। `पूगाञ्ञ्योऽग्रामणीपूर्वात्' इत्यादयः। प्राग्वुन इति। पादशतादिशूत्रविहितात्, तस्य तु पुरा विग्रहो दर्शित एव। आमादय इति। `किमेत्तिङव्ययघादामु' इत्यादयः, `तत्प्रकृतवचने मयट्' इत्यतः प्रागित्यर्थः। बृहतीजात्यन्ता इति। बृहतीशब्देन `बृहत्या आच्छादने' इति विहितः कनुपलक्ष्यते। जात्यन्तशब्देनापि`जात्यन्ताच्छ बधुनि' इति विहितश्छः। बहुवचननिर्द्देशादेतत्सूत्रविहितस्य खस्यपाशबादीनां च ग्रहणम्। यो हि वैयाकरणपाशादितत्सूत्रविहितस्य खस्य पाशबादीनां च ग्रहणम्। यो हि वैयाकरणपाशादिशब्देभ्योऽर्थः प्रतीयते, नासौ जातुचित् वैयाकरणादिसामान्यशब्देभ्यः प्रतीयत इति तेऽपि तमबादिवन्नित्या एव। समासान्त श्चेति। `समासान्ताः' इत्यधिकृत्य विहिताः ।।

विभाषाञ्चेरदिक्स्त्रियाम् ।। 5.4.8 ।।
दिक् चासौ स्त्री चेति दिक्स्त्री, तत्र प्रतिषेधः न तु दिशि स्त्रियां च; स्त्रीलिङ्गैकवचननिर्देसात्। उदाहरणेषु `अचः' इत्यकारलोपे कृते `चौ' इति दीर्घः। उदीचीनमित्यत्र तूद `उद ईत्' इतीत्वम्।
दिग्ग्रहणं किमिति। अञ्जत्यन्तः स्त्रियां वतमानो दिश्येव वर्तत इति प्रश्नः। प्राचीना ब्राहामणीति। क्रियानिमित्तको देशकालनिमित्तको वा ब्राह्मण्यां स्त्रियां वर्त्तते, न दिशीति प्रतिषेधाभावः। स्त्रीग्रहणं किमिति। दिग्वृत्तिरञ्चत्यन्तः स्त्रीलिङ्ग एवेति मन्यते। प्राचीनं दिग्रणणीयमिति। प्राचीनशब्दाद्दिग्वाचिनः

प्रथमासमर्थाद् दिक्शब्देभ्य इत्युत्पन्नस्यास्तातेः `अञ्चेर्लुक्' इति लुक्, ङीपोऽपि `लुक् तद्धितलुकि' इति लुक्, ततः `तद्धितश्चासर्वविभक्तिः' इत्यव्ययत्वात्स्त्रीलिङ्गाभावः। खे तु कृते स्वभावादेव नपुंसकत्वम् ।।

जात्यन्ताच्छ बन्धुनि ।। 5.4.9 ।।

जात्यन्तात्प्रातिपदिकाद् बन्धुनि वर्त्तमानात्स्वार्थे छः प्रत्ययो यस्य बन्धुशब्दस्येति दर्शयति। एतच्च नपुंसकनिर्द्देशादवसीयते, आप्तपर्यायस्तु पुंल्लिङ्गः। येन ब्राह्मणत्वादिजातिर्व्यज्यत इति। व्यक्त्यधीना हि जातरभिव्यक्तिः, न हि स्वातन्त्र्येण जातुचिज्जातिरुपलभ्यते। एतदेवाभिप्रेत्य--बध्यतेऽस्मिन्निति बन्धिवत्युक्तम्। ब्राह्मणजातीय इति। भावप्रधानोऽत्र ब्राह्मणशब्दः, `द्व्योकयोः' इतिवत्, तेन बहुव्रीहिः। ब्राह्मणादिरेवोच्यते इति। ब्राह्मणत्वजात्याधारो द्रव्यात्मकः पिण्ड उच्यय इत्यर्थः।
ब्राह्मणजातिरिति। षष्ठीसमासः, कर्मधारयो वा ।।

स्थानान्ताद्विभाषा सस्थानेनेति चेत् ।। 5.4.10 ।।

सस्थानेन चेदिति। करणे एषा तृतीया, सस्थानेन सस्थानशब्दवाच्येनार्थेन तुल्यपर्यायेण स्थानान्तं यद्यर्थवद्भवति, एवं प्रत्ययो भति, नान्यतेत्यर्थ। सस्थान इति तुल्य उच्यत इति। स्तानत इति शेषः। स्थानम्=प्राप्तिः, सम्बन्धविशेषः, पदमिति यस्य प्रसिद्धइः। कथं पुनः सस्थानशब्देन तुल्य उच्यते? इत्याह--सामानं स्थानमस्येति। यस्य समानं स्थानं स सस्थान इत्युच्यते यश्चैवंविधः स यदपक्षया तस्य समानं स्थानं तेन तुल्यो भवति, तत्र शब्दभेदेऽपि ????तुवृत्तेन सस्थानशब्दस्य तुल्यो वाच्यो भवति। सभावः पुनरत्र `ज्योतिर्जनपद' इत्यादि सूत्रेण। पितृस्तानीय इति। पितुरिव स्थानमस्येति बहुव्रीहिः। गोस्थानमिति। तिष्ठत्यस्मिन्नति स्थानं देशः न तु तत्पुरुष इति। समानं च तत्स्थानं चेत्येवंरूपस्तत्पुरुषः। स्थानशब्दो नार्थमुपस्थापयति। यद्युपस्थापयेत्, तुल्यं च तत्स्थानं च तुल्यस्थानमित्यादेः कर्मधारयादपि प्रत्ययः स्यात्। अथ बहुव्रीहेस्तुल्यस्थानशब्दात्सस्थानशब्दाद्वाऽयं प्रत्ययः करमान्न भवति? कः पुनराहः-न भवतीति! नेष्यते इति करणादेव तु न भविष्यति। चेच्छब्दः सम्बन्धार्थ इति। चेच्छब्दे सति विभक्तिविपरिणानेनैध्याहरेण वा वाक्यपर्यसानेन च सम्बन्धो भवति। असति तु तस्मिन्पञ्चम्यन्तेन तृतीयान्तस्य सम्बन्धोऽनुपपन्नः स्यात् ।।

किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ।। 5.4.11 ।।

किम एकारान्तादित्यादि। अर्थप्रदर्शनपरमेतत्, सूत्रे तु षष्ठीसमासः, योगविभागाद्वा पञ्चमीसमासः। यद्यपीति। द्रव्यं विशेष्यं पर्यवसानभूतम्, तस्य स्वरूपेण प्रकर्षो नास्ति, प्रवृत्तिमित्तद्वारक एव तु तस्य प्रकर्षः, यथोक्तं भाष्ये--गुणस्यैव प्रकर्षो न द्रव्यस्येति। गुणः प्रवृत्तिनिमित्तम्। हरिरप्याह---
द्रव्यस्याव्यपदेश्यस्य न विना भेदहेतुना।
प्रकर्षो विद्यते नापि शब्दस्योपैति वाच्यताम् ।।
क्रियागुणस्य इति। प्रवृत्तिनिमित्तभूतस्य सहचरितस्य धर्ममात्रस्योपलक्षणं क्रियागुणग्रहणम्। द्रव्य उच्यत इति। द्रव्यनिष्ठोऽभिधीयत इत्यर्थः।
क्रियागुणयोरेवेति। यो द्रव्यनिष्ठयोरनुविधीयते स तयोरेव प्रकर्षः। किंतरामिति। इदं च किमिदं च किम्, इदमनयोरतिशयेन किम् इति तरप् प्रत्ययः। यत्र स्वरूपेण ज्ञातस्य वस्तुनो विशेषाकारा बहवो जिज्ञासितास्तत्र किंशब्दार्थः प्रश्नप्रकृष्ट इव भवति, तदाश्रयः प्रत्ययः। पूर्वाह्णेतरामिति। `घकालतनेषु' इति सप्तम्या अलुक्। तत्रासत्त्वभूतस्य विभक्त्यर्थस्य प्रकर्षः, न कालस्येति नायं द्रव्यप्रकर्षः ।
उच्चैस्तरामिति। आत्राप्युचचैःशब्दस्याधिकरणप्रधानत्वान्नायं द्रव्यप्रकर्षः। उत्‌चैस्तरः पर्वत इति। नात्राधिकरणप्रधान उच्चैःशब्दः, किं तर्हि? उच्चैस्त्वं नाम गुणस्तद्गतः प्रकर्षः पर्वतनिष्ठोऽभिधीयते, स्वभावाच्च तरबन्तस्यात्र सत्त्वभूतार्थाभिदायित्वम्, लिङ्गसंख्यायोगश्च।
उदित्करणं किम्? `आमि सर्वनाम्नः सुट्' इत्यत्रास्य सामान्यग्रहणं मा भूत्। यदि स्यात्? किन्तरामित्यत्र परत्वाद्यस्येतिलोपं बाधित्वा `ह्रस्वनद्यापः' इति नुट् प्रसज्येत, मकारस्य त्वित्संज्ञा प्रयोजनाभावादेव न भविष्यतीति ।।

अमु चच्छन्दसि ।। 5.4.12 ।।

प्रतरामिति। प्रशब्दार्थस्य प्रकर्षस्य प्रकर्षे तरप् प्रकृष्टतर इतिवत्। अत्रआप्युदित्करणम् `इच एकाचोऽम्प्रत्ययवच्च' इत्यत्रास्यापि ग्रहणं मा भूदिति। यदि स्यादत्रापि यद् दृष्टं कार्यं तदप्यतिदिश्येत, तत्र को दोषः? इह--स्त्रियम्मन्यः, यस्येतिलोपः प्राप्नोति ।।

अनुगादिनष्ठक् ।। 5.4.13 ।।

अनुगदतीत्यनुगादी, अस्मादेव निपातनाण्णिनिः, प्रकृतिस्वरूपप्रदर्शनपरं चैतत्। न त्वयं केवलः प्रयोगार्हः; ठको नित्यत्वात् ।

णचः स्त्रियामञ् ।। 5.4.14 ।।

व्यावक्रोशीति। व्यवपूर्वात्क्रुशेर्णच्, `कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' णजन्तेऽनुप्रवेशात्समुदायादञ्, तस्याङ्गत्वादादिवृद्धिः। `न य्वाभ्यां पदान्ताभ्याम्'

इत्येष विधिर्न भवति; `न कर्मव्यति हारे' इति निषेधात्।
तत इति। णचः, णजन्तादित्यर्थः। स्वार्तिकस्तत्रैव भविष्यतीति। `स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते' इति कृत्वा। अतिवर्त्तन्तेऽपीति। व्यभिचरन्त्यपीत्यर्थः। अपिशब्दादनुवर्त्तन्तेऽपि, अनुवृत्तिस्तु `कासूगोणीभ्यां ष्टरच्' इति षित्करणान्ङीषर्थादवसीयते। एकान्ततो निवृत्ते हि षकारोऽर्थको भवेत्, तेनेत्यादिना ज्ञापनस्य प्रयोजनं दर्शयति। प्रसन्ना=सुराविशेषः। देवतेति। देवशब्दात्पुंल्लिङ्गादेव तल् ।।

अणिनुणः ।। 5.4.15 ।।
संराविणमिति। `रु शब्दे,' `कूट दाहे' दीर्धोपधः, `मृजूष् शुद्धौ'--एतेब्यः संपूर्वेब्य इनुण्, पूर्ववत्सगतेरण्, `इनण्यनपत्ये' इति प्रकृति भावः, एकानुबन्धकपरिभाषया घिनुणोऽत्र ग्रहणाभावः ।।

विसारिणो मत्स्ये ।। 5.4.16 ।।
विसारीति। पूर्ववण्णिनिः। वैसारिण इति। पूर्ववत्प्रकृतिभावः ।।

संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ।। 5.4.17 ।।
अत्र `उपाय एवाभ्युपायः' इतिवद् आवृत्तिरेवाभ्यावृत्तिरित्याश्रीयमाणे आद्याऽऽवृत्तिर्न भवतीति षट्कृत्वः प्रवृत्तौ पञ्चकृत्व इति स्यात्, अभिग्रहणं चानर्थकम्, क्रियावृत्तिगणन इत्येव वाच्यं स्यात्, अतोऽत्र विवक्षितं वक्तव्यम्? तदाह--पौनः पुन्यमभ्यावृत्तिरिति। पुनः पुनर्भवितरि वर्त्तमानात् पुनःपुनःशब्दात्प्रवृत्तिनिमित्तस्य भवनस्य निष्कृष्याभिधानाय बावप्रत्यय। पौनःपुन्यम्=पुनः पुर्भवनमित्यर्थः, असकृत्प्रवृत्तिरिति यावत्। तत्र चाद्या प्रवृत्तिरन्तर्भवति, तद्यथा--पौनःपुन्यं भृसार्थो वा क्रियासमभिहार इत्यत्र योऽपि द्विः पचति तत्रापि पापच्यते इति भवति। उक्तमेवार्थं स्पष्टयतिएककर्तृकाणामिति। बहुवचनमतन्त्रम्। द्वयोरपि जननसंख्यानमावृत्तिर्भवत्येव जननसंख्यानम्=उत्पत्तिगणनम्। भिन्नकर्तृकासु भिन्नजातीयासु च क्रियासु निरन्तरमनुष्ठीयमानास्वपि क्रियाब्यावृत्तिप्रत्ययाभावादुभयमुपात्तम्। एवम्भूतानां क्रियाणां जन्मन उत्पत्तेर्यत्संख्यानं गणनं तत्क्रियाभ्यावृत्तिगणनम्। एतच्चाभ्यावृत्तिशब्दस्य तत्रैव प्रसिद्धेर्लभ्यते, अत एव अभिग्रहणं कृतम्। पञ्चकृत्वो भुङ्क्ते इति। एकैवात्र भुजिक्रिया निवृत्तभेदाख्यातेनाभिधीयते, आवृत्त्याजनियेन फलेनैकीकृतत्वात् तस्या उत्पत्तयः पञ्चसंख्यानेन गणयन्ते। आवृत्तिकृतं फलमिच्छन्भुजिक्रियायाः पञ्चोत्पत्त्यावृत्तीः करोतीत्यर्थः। अवान्तरफलापेक्षं पञ्चत्वम्, उत्पत्तिभेदश्च।
भूरिवारानिति। वारशब्दस्य क्रियोत्पत्त्याधारजालवाचित्वात् `कालाध्वनोः' इति द्वितीया. तथा च पुनःपुनःशब्दादुत्पत्त्याधारकालाभिधायित्वात् `कालाट्ठञ्' भवति--पौनःपुनिक इति। यदि कालशब्दः, वारशब्दः, भूरिशब्दोऽपि तत्समानाधिकरणः काल एव वर्त्तते, न क्रियाभ्यावृत्ताविति कथमत्र प्रसङ्गः? अत्राहुः--कालृवाचित्वेऽपि क्रियावृत्तेरपि गम्यमानत्वात्प्रसङ्ग इति। अपर आह---वारशब्दः क्रियागतामावृत्ति द्योतयन् क्रियाविसेषणत्वात्कर्म। नपुंसकत्वं तु न भवति, लोकाश्रयत्वाल्लिङ्गस्य; वारशब्दस्य नित्यपुंल्लिङ्गत्वात्--भूरिवारान् भुङ्क्ते। कोऽर्थः? आवृत्तानि बहूनिभोजनानि करोतीत्यर्थः। अत्र `बहुगणवतुडतिसंख्या' इत्यत्र बहुगणग्रहणं नियमार्थम्--अनियतप्रचयवाचिनां मध्ये एतयोरेवेति, तेन भूरिशब्दस्य लौकिकसंक्यावाचित्वेऽप्यत्र ग्रहणाभावः। अभ्यावृत्तिः क्रियाया एव सम्भवतीती। साध्यार्थविषयत्वात्तस्याः। न द्रव्यगुणयोरिति। तयोः सिद्धस्वभावतया शब्देनाभिधानात्। पुनः पुनर्दण्डी, पुनः पुनः स्थूल इत्यत्रापि गम्यमानाया भवतिक्रियाया एवाभ्यावृत्तिः, न तु द्रव्यगुणयोः। एकस्य सकृच्चेत्यत्रापीत्यादि। एकशब्देन ह्येकैव क्रियाव्यक्तिराख्यायते। न च तस्यामावृत्तेः सम्भवः; तत्रासति क्रियाग्रहणे `एको भुङ्क्ते' इत्यत्रापि स्यात्। तस्मादुत्तरार्थं क्रियाग्रहणम्। एवं च--क्रिया चाभ्यावृत्तिश्च क्रियाभ्यावृत्ती, तयोगर्णनं क्रियाभ्यावृत्तिगणनमिति द्वन्द्वगर्भः षष्ठीसमास इति केचित। अन्ये तु--इहार्थमपि सुखप्रतिपत्तये क्रियाग्रहणं मन्यमानाः षष्ठीतत्पुरुषगर्भ तत्पुरुषं वर्णयन्ति। तत्र गुणभूतस्यापि क्रियाग्रहणस्य निष्कृष्य सम्बन्धः तद्ग्रहणसामर्थ्याद्वेदितव्यः।
पञ्चपाका इति। अत्र कर्तृभेदेन वा भिन्नकालाः क्रिया एव गणयन्ते, नाभ्या वृत्तिः। सा हि भिन्नकालानामेककर्तृकाणामेककर्मकाणां च नैरन्तर्थे सति भवति। यद्यप्यत्र धात्वर्थस्य सिद्धताख्ये धर्मे घञो विधानम्, तथापि धातुनाऽत्रापि साध्यस्वभावा क्रियैवाभिधीयत इति तदाश्रयः प्रत्ययः स्यादेव। तता च---कारकस्य गतिः, कारकस्य व्रज्येत्यत्र `तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति ण्वुल् भवति।
अक्रियमाण इत्यादि। आ दशभ्यः संख्याः संख्येय एव वर्त्तन्ते, अतः परं संख्याने संख्येये च । तत्रासति गणनग्रहणे क्रियाभ्यावृत्तौ संख्येयायां वर्त्तमानेभ्यः संख्येयवचनेभ्य एव प्रत्ययः स्यात्, संख्याने तु वर्त्तमानेभ्यो न स्यात्, तदाह--इह न स्यादिति। शतं वाराणामिति। इयमप्यत्यन्तसंयोगे द्वितीया। किं कारणं न स्यात्? इत्यत आह--न ह्यत्रेति। कारणमाह--संख्यानमात्रवृत्तित्वादिति। गणनग्रहणात्त्विति। `क्रियाभ्यावृत्तिगणने' इति विषयनिर्देशः, तत्र ये संख्येयवचनाः, ये च संख्यानमात्रवचनाः---द्वयेऽपि ते गणनाविषया भवन्तीति सर्वत्र सिद्धिः। ननु शतं वाराणामित्यत्र यदा वाराणामिति प्रयुज्यते, तदा सापेक्षत्वात् प्रत्ययेन न भाव्यम्? यदा तर्ह्यर्थात्, प्रकरणाद्वाऽपेक्षयं निर्ज्ञातं भवति तदा भविष्यति यद्येवम्, संख्येयवचनादेव शतकृत्व इति भविष्यति, न हि `शतकृत्वो भुङ्क्ते' इत्यत्र वाराणामिति वारानिति वा प्रयोगार्हम्, तस्मात्प्रयोजनदिगियं दर्शिता। इदं तु प्रयोजनम्--यत्र साक्षादभ्यावृत्तिगणनं तत्र यथा स्याद्, अभ्यावृत्तिगणनसम्भवमात्रे मा भूत्--सप्तदश प्राजापत्यान् पशूनालभत इति। अस्ति ह्यत्रालभतिक्रियायाः प्रतिपशु वस्तुतोऽभ्यावृत्तिः, तस्या विषयभूतायाः साधनगणनवृत्तेरपि सप्तदशशब्दात् प्रत्ययः स्यात् ।।

द्वित्रिचतुर्भ्यः सुच् ।। 5.4.18 ।।
सकृदिति। `रात्सस्य' इति सुचो लोपः। सुचश्चकारः स्वरार्त इति। `चितः सप्रकृतेर्बह्वकजर्थम्' इति वचनाच्चतुरित्यस्यान्तोदात्तो भवति;
अन्यथा`चतेरुरन्' इत्युरन्प्रत्ययान्तत्वादाद्युदात्तः स्यात् ।।

एकस्य सकृच्च ।। 5.4.19 ।।
सकृदिति । `संयोगान्तस्य लोपः' इति सुचो लोपः। सुचश्चकारोऽत्राप्यन्तोदात्तार्थः, अन्यथा `इण्बीकापाशल्यतिमर्चिभ्यः कन्' इति कन्प्रत्ययान्त एकशब्द आद्युदात्त इति तस्य स्थाने भवन्सकृच्छब्द आन्तर्यत आद्युदात्तः स्यात्। एकः पाक इत्यत्रेत्यादि। अपर आह--`अभ्यावृत्तिग्रहणादेव सिद्धे पूर्वसूत्रे क्रियाग्रहणं क्रियाविशेषप्रतिपत्त्यर्थम्, तेन साध्यस्वभावैव क्रिया गृह्यते। पाकादिभिस्तु शब्दैः सिद्धस्वभावाऽभिधीयते, यादृशी च पूर्वसूत्रे क्रिया गृहीता तादृश्येवात्राप्यनुवर्त्तते' इति। तत्र च पाकादिशब्दप्रयोगे प्रत्ययाभाव इति घञन्ताद्यन्तप्रयोगेऽपि कृत्वोऽर्थप्रत्ययः क्वचित् लिङ्गाद् `द्विर्वचनेऽचि' इति साधनीयो मनीषिभिः ।।

विभाषा बहोर्द्धाऽविप्रकृष्टकाले ।। 5.4.20 ।।
अविप्रकृष्टकालग्रहणं क्रियाभ्यावृत्तिविशेषणमिति। यद्यप्येवम्, तथापि गणनग्रहणेनैवास्य शाब्दोऽन्वय इति नपुंसकलिङ्गमेव भवति, न स्त्रीलिङ्गम्। गणनस्याविप्रकृष्टकालत्वं गण्यमानानामभ्यावृत्तिनामविप्रकृष्टकालत्वे सतीत्यर्थप्राप्तं वृत्तिकारेण दर्शितम्। बहुधा दिवसस्य भुङ्क्ते इति। `कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' इति षष्ठी, अविप्रकृष्टकालत्वं चाभ्यावृत्तीनां तत्तत्क्रियावशेन व्यवतिष्ठते। बहुकृत्वो मासस्य भुङ्क्ते इति।
अत्राभ्यावृत्तेर्विप्रकृष्टकालताऽशक्तिदारिद्र्याद्यपेक्षया द्रष्टव्या ।।

तत्प्रकृतवचने मयट् ।। 5.4.21 ।।
प्राचुर्येण प्रस्तुतं प्रकृतमिति। यद्यपि प्रस्तुतमात्रवचनः प्रकृतशब्दः, तथापीह वचनग्रहणादयं विशेषो लभ्यते। वचनग्सरहणं हि यादृशस्य प्रकृतस्य लोके मयटा वचनं प्रत्यायनं तत्र यथा स्यादित्येवर्थम्। प्रथमासमर्थादिति। केन पुनः प्रथमान्तस्य सामर्थ्य प्रत्ययस्तावत्स्वार्थिकः? यद्यपि स्वार्थिकः, प्राचुर्यं तु तस्य द्योत्यम्। तच्च प्रकृत्यर्थगतमित्येतावदत्र सामर्थ्यम्।
अपरे पुनरित्यादि। अत्र प्रकृत्यार्थादर्थान्तर एव प्रत्ययः, तत्पुनरर्थान्तरं ल्युटा प्रतिपादितम्। सप्तम्यर्थ उच्यमानता प्रकृतता च प्रकृत्यर्थविशेषणम्,
तद्दर्शयति--अन्नं प्रकृतमस्मिन्निति।
उभयथा सूत्रप्रणयनादिति। प्रकारद्वयसाधारण्येन सूत्रस्य प्रणयनादित्यर्थः। अत्र प्रथमे व्याख्याने तदिति विस्पष्टार्थम्; `देवात्तल्' इत्येवमादिवत्समर्थविभक्तेः सिद्धत्वात् ।।

समूहवच्च बहुषु ।। 5.4.22 ।।
आपूपिकम्, मौदकिकमिति। `अचित्तहस्तिधेनोष्ठक्' ।।

अनन्तावसथेतिहभेषजाञ्ञ्यः ।। 5.4.23 ।।
आवसन्त्येतमित्यावसथः, `उपसर्गे वसेः' इत्यथप्रत्ययः। निपातसमुदायोऽयमिति। वचनाच्चाप्रातिपदिकादपि प्रत्ययः। उपदेशपारम्पर्ये वर्त्तते इति। तद्यथा--इति ह स्मोपाध्याः कथयन्तीति। भिषज्यतेः कण्ड्वादियगन्तात्क्विपि भिषक, भिषज इदमित्यण्--भेषजम्, अस्मादेव निपातनादेकारः ।।

देवतान्तात्तादर्थ्ये यत् ।। 5.4.24 ।।
चतुर्थीसमर्थादिति। तादर्थ्ये चतुर्थ्या उपसंख्यानादेतल्लभ्यते। पितृदेवत्यमिति। पर्मधारयात्प्रत्ययः। कथं पुनरत्र सामानाधिकरण्यम्? कथं च न स्यात् ? जातिभेदात्, अन्या हि पितृजातिरन्या च देवताजातिः, दर्शयति च--देवा मनुष्याः पितरस्तेऽन्यत आसन्निति, देव एव देवता--स्वार्थिकस्तल् ? एवं तर्हि तल्प्रत्ययस्य प्रकृतिर्देवशब्दः पचाद्यचि ऐश्वर्यार्थादिवेः साध्यः; न जातिवचनः; ततः सामानाधिकरण्यं स्याद्देवतापितृशब्दयोः। एवं च देवदेवत्यमित्येतदपि सिद्धयति। यागसम्प्रदानमन्त्रस्तुत्यं वा देवता, न जीतिविशेष इत्यर्थः ।।

पादार्घाभ्यां च ।। 5.4.25 ।।
गन्धोदकादिसमुदायोऽर्घः, तदर्थमुदकादि=अर्घ्यम्। छन्दस्य इति। यथा गायत्र्यादिवृत्तं छन्दःशब्दोऽभिधत्ते, तथाऽऽश्रावयेत्यादिकमपि सप्तदशाक्षरसमाहारम्, तत्र वर्त्तमानाच्छन्दःशब्दात्स्वार्थे प्रत्ययः, व्यत्ययेन पुंल्लिङ्गता।
द्वितीयाबहुवचनस्य लुगिति। छान्दसत्वात्। अत एव यदन्तात्प्रथमैकवचनं पुंल्लिङ्गं च भवति।

अमुष्यशब्दो नडादिः, अमुष्यपुत्रशब्दो मनोज्ञादिः; उभयत्र षष्ठ्या अलुगुपसंख्यायते। प्रत्ययप्रकरणे प्रासङ्गिकमेतत्, स चालुक् तयोरेव गणयोस्तथैव पाठात्सिद्धः।
समशब्दादावतुप्रत्यय इति। उकार उगित्कार्यार्थः--समावती यज्ञस्याशीरिति ङीब् भवति।
`अग्नीधः शरणे रण् भत्वं च'--आग्नीध्रम्, ततोऽञ्-आग्नीध्री। समानं धारणमस्य साधारणम्, अनेकं प्रत्यविशिष्टसम्बन्धम्। पृषोदरादित्वात्समानस्य सभावः, ततोऽञ् साधारणि। ङीबर्थं वचनम्। क्षेमशब्दाद्यो वक्तव्यः, यति हि सति `यतोऽनावः' इत्याद्युदात्तत्वं स्याद्, अन्तोदात्तत्वं चेष्यते ।।

यावादिभ्यः कन् ।। 5.4.29 ।।
ऋतावुष्णशीते इति। उष्णक ऋतुः, शीतक ऋतुः। ऋतोरन्यत्र तु---उष्णोऽग्निः, शीतमुदकम्। पशाविति। लूनकः पशुः, वियातकः पशुः। अन्यत्र--लूना दर्भाः, वियातो नीचः। अणु निपुण इति। अणुकः=सूक्ष्मदृक, निपुणः, अन्यत्राणुरेव। पुत्र कृत्रिमे। पुत्रको लोहादिनिर्मितः, अन्यत्र पुत्र एव। स्नात वेदसमाप्तौ। यस्याध्येतव्यो वेदः समाप्तः=पारं प्राप्तः, स वेदमधीत्य स्नास्यन्नित्यादिस्वगृह्योक्तप्रक्रारेण स्नानाय चोदितःक स्नातकः=समावृत्त उच्यते। अन्यत्र--नद्यां स्नातः। शून्य रिक्त इति। उदकादिना रिक्तो घटः शून्यकः। अन्यत्र--शून्यः प्रत्ययः, बाह्यार्थरहित इत्यर्थः। तथा शूने हितः शून्यः, गवादिषु `शुनः सम्प्रसारणं वा च दीर्घत्वं च' इति पठ्यते। दान कुत्सिते। कुत्सितं दानं दानकम्। तनु सूत्रे। तनुकं सूत्रम्=सूक्ष्मतन्तुः, अन्यत्र तनुः=शरीरम्। ईयसश्च।ईयसुन्नन्ताच्च स्वार्थे कन् भवति-श्रेयस्कम्। कुमारीक्रीडनकानि च। कुमारीणां यानि क्रीडनकानि=क्रीडासाधनानि तानि कनमुत्पादयन्ति---कण्डु(दु)कम् ।।

वर्णे चानित्ये ।। 5.4.31 ।।
सत्येवाश्रये यल्लौहित्यमपगच्छति तदनित्यम्। लोहितकः कोपेनेति। कोपे सति भवति कोपागगमे च सत्येवाश्रये निवर्त्तत इत्यनित्यमेतत् लौहित्यम्। लोहितो गौरिति। यावदाश्रयभावित्वादयं नित्यो वर्णः।
लोहितै रुधिरमिति। विषादिदूषितं रुधिरं कदाचित्कृष्णमपि भवतीति विसेषणम्। वर्णग्रहणं किम् ? अनित्यत्वं विशेषणं यथा विज्ञायेत्, अन्यथा लोहितशब्दो वर्णप्रवृत्तिनिमित्तमुपादाय यत्र द्रव्ये पर्यवस्यति, तत्रापि विशेषणं सम्भाव्येत। तत्र को दोषः? इह च स्यात्--लोहितो गौरिति। इह च न स्यात्--लोहितकाः पार्थिवाः परमाणवोऽग्निसंयोगेनेति। तथा वर्णनिरपेक्षो रुधिराख्ये द्रव्ये लोहितशब्दस्यस्यापि ग्रहणं स्यात्, अनित्यग्रहणमिदानीं किमर्थं स्यात्! ननु सर्वमेव रुधिरमनित्यं यत्सत्येवाश्रये कादाचित्कम्, यथा--स्त्रीणामार्त्तवम्, तस्य ग्रहणार्थं स्यात्, तस्माद्वर्णग्रहणम्।
लोहिताल्लिङ्गबाधनं वा इति। ङ्याप्सूत्र एतद्व्याख्यातम् ।।

रक्ते ।। 5.4.32 ।।
यत्र द्रव्यान्तरसम्पर्केण लौहित्यं तथाधीयते तथा यावदाश्रयमवतिष्ठते, तत्रानित्यत्वाभावात्पूर्वेण न प्राप्नोतीत्ययमारम्भः। नन्वेवमपि रञ्जनात् प्राक् सत्येव पदादावाश्रये लौहित्यस्यावस्थानाभावादस्त्येवानित्यता, न कारणावस्थायामेव रञ्जनात्? तदेतदेव वचनं ज्ञापकम्--पूर्वत्रायावद्द्रव्यभावित्वमनित्यत्वम्, न पुनराद्यन्तभाव इति। तादृशस्य त्वनित्यत्वस्य ग्रहणो तैजसानां परमाणूनां यल्लौहित्यं तद्व्यतिरिक्तस्य सर्वस्यैव लोहित्यस्य नित्यत्वादिदं वचनमनर्थलं स्यात् ।।

कालाच्च ।। 5.4.33 ।।
द्वयमप्यनुवर्त्तत इति। द्वयस्यापि स्वरितत्वात्, न त्वनन्तरं `रक्ते' इत्येतदेवेत्यपिशब्दार्थः। वैलक्ष्येणेति। विलक्षस्य भावो वैलक्ष्यम्=लज्जा। कालकः पट इति। नील्यादिना कालतामापादित इत्यर्थः ।।

विनयादिब्यष्ठक् ।। 5.4.34 ।।
उपायाद् ह्रस्वत्वं चेति। उपायशब्दष्ठकमुत्पादयति, ह्रस्वत्वं चापद्यते। स च ह्रस्व आकारस्यैव भवति; अन्यस्याचः स्वत एव ह्रस्वत्वात्। अकस्मादित्यत्र पठ्यते, तद्दकारान्तम्, तेन `हसुसुक्तान्तात्कः' इति कादेशो न भवति--आकस्मिकः, अव्ययत्वाट्टिलोपः ।।

वाचो व्याहृतार्थायाम् ।। 5.4.35 ।।
व्याहृत इति। उक्त इत्यर्थः। अन्येनेति। संदेष्ट्रा। तेन हि पूर्वमुक्तस्तस्यार्थः संदेशहरं प्रति। सन्देशवागिति। सन्देशरूपा वाक् सन्देशवाक्, सन्दिश्यते इति सन्देशः, तस्य वाक् संदेशवाक् यया संदिष्टोऽर्थोऽभिधीयते।
अपर आह--लेख्यादिनावधारितेऽर्थे प्रवर्त्तमाना वाक् व्याहृतार्थेति। `अतिवर्त्तन्ते च स्वार्थिकाः प्रकृतितो लिङ्गवचनानि' इति नपुंसकत्वम् ।।

तद्युक्तात्कर्मणोऽण् ।। 5.4.36 ।।

कर्मशब्दादिति। एतेन `कर्मणः' इति स्वरूपग्रहणम्, नेप्सिततमादेरिति दर्शयति। एतच्च व्याख्यानाल्लभ्यते। कार्मणमिति। `अन्' इति प्रकृतिभावः। तथैवेति। यथैव व्याहृतार्थया वाचा प्रतिपादितम्-एवमेतत्त्वया कर्त्तव्यमिति, तथैवेत्यर्थः।
अण्प्रकरण इति। प्रज्ञादिष्वपाठः---एतेषां भाषायामण्मा भूदिति। सान्नाय्येत्यादि। सान्नाय्यादयः शब्दाः प्रज्ञादिषु द्रष्टव्या इत्यर्थः। अन्तोदात्तार्थं चेह सान्नाप्यशब्दस्य ग्रहणम्, रूपं तु `पाय्यसान्नाय्य' इति निपातनादेव सिद्धम्। आनुजावर इति। अनुजादवर इत्यस्मादेव निपातनात्पञ्जमीसमासः, ततोऽण्। आनुषूक इति। सूतिः सूः, सम्पदादित्वात् क्विप्, अनुगता सूरेतमिति बहुव्रीहिः, कप्, `पूर्वपदात्' इति षत्वम्। चातुष्प्राश्यमिति। चतुर्भिः प्राश्यमिति `कर्तृकरणे कृता बहुलम्' इति समासः, ततोऽण्। आधाने व्रीह्योदनस्येदमभिधानम्। `इदुदुपधस्य' इति षत्वम्। राक्षोघ्नमिति। रक्षांसि हन्यन्तेऽनेनेति धञर्थे कः। वियातविकृतशब्दाभ्यामण्-वैयातः, वैकृतः। वरिवः=परिचर्या, तत्करोति वरिवस्कृत्, क्विप्, `अतः कृकमि' इति सत्वम्, वरिस्कृदेव वारिवस्कृतः=परिचारकः। अग्रमयनमस्य, अग्रे हायनमस्येतिक बहुव्रीहिभ्यामण्---आग्रायणं कर्म। नानिष्ट्वाग्रायणेनाहिताग्निर्नवस्याश्नीगदिति। आग्रहायणी, अणन्तान् ङीप्। सन्प्यतेऽनेनेति सन्तपनः, सन्तपन एव सान्तपनः=कृच्छ्रः ।।

ओषधेरजातौ ।। 5.4.37 ।।
औषधं पिबतीति। पथ्या-शुण्ठी-सैन्धवादीनां कल्के औषधशब्दो वर्त्तते, औषधयः क्षेत्ररूढा इति। फलपाकावसानेषु जातिविशेषेप्वत्रौषधिशब्दः ।।

प्रज्ञादिभ्यश्च ।। 5.4.38 ।।
प्रजानातीति प्रज्ञ इति। `इगुपधज्ञाप्रीकिरः कः' इति कः। अथ किमर्थमुभयं क्रियते, इह च प्रज्ञशब्दः पठ्यते, मत्वर्थे च प्रज्ञाशब्दाण्णो विधीयते, यः प्रजानाति तस्य प्रज्ञाऽस्ति, यस्य च प्रज्ञास्ति स प्रजानातीति, ततश्चान्यतरेणैव प्राज्ञ इति सिद्धम्?-- इत्याशङ्क्य स्त्रियां विशेष इति दर्शयति--स्त्रियामित्यादि।
विदन्, षोडन्निति विभक्त्यन्तयोः पाठ एकत्वविवक्षार्थः। वैचित्र्यार्थः इत्यन्ते। श्रोत्र शरीरे। यः श्रोत्रशब्दः शरीरे वर्त्तते, असौ अणमुत्पादयति--श्रौत्रम्। अन्यत्र श्रोत्रामिन्द्रियम्। जुह्वत्कृष्णमृग इति। कृष्णमृगे वर्त्तमानाज्जुह्वच्छब्दादण्प्रत्ययो भवति--जौह्वतः कृष्णमृगः। अन्यत्र जुह्वत्। अपर आह---कृष्णमृगे वर्त्तमानात्कृष्णशब्दादण्प्रत्ययो भवति--कार्ष्णो मृगः। अन्यत्र तु कृष्णः जुह्वच्छब्दात्त्वविशेषेणाण्भवतीति। सत्वन्त्विति। सच्छब्दो मत्वन्त आगतनुम्को गृह्यते, सत्वानेव सात्वतः ।।

मृदस्तिकन् ।। 5.4.39 ।।
`प्रत्ययस्थात्' इत्येव सिद्धे तिकन हकारोच्चारणम् यत्रापो लुक् क्रियते तदर्थम्---पञ्चभिर्मृत्तिकाभिः क्रीतः पटः पञ्चमृत्तिक पटः ।।

सस्नौ प्रशंसायाम् ।। 5.4.40 ।।
उत्तरसूत्रेऽन्यतरस्यांग्रहणादिति। मृच्छब्दस्य सामान्यशब्दत्वात्, मृदित्युक्ते प्रशंसाया अनवगमाच्च।
इह `प्रशंसायां रूपप्' इत्यस्यानन्तरम्--`वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि, मृदस्सस्नौ, तिकंश्च' इति वक्तव्यम्? तथा तु न कृतमित्येव ।।

बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ।। 5.4.42 ।।
कारकाभिधायिनः शब्दादिति। पञ्चकपक्षे प्रातिपदिकात्, त्रिकपक्षे सुबन्तात्। गहादिषु `मध्यमध्यमं चाण्चरणे' इत्यविशेषाभिधानेऽपि पृथिवीमध्यस्य मध्यमभाव इत्युक्तम्, इह तु न तथेत्याहअविशेषाभिधानाच्चेति। एवमादीति। आदिशब्देनापादानाधिकरणयोरुदाहरणपरिग्रहः---बहुभ्य आगच्छति बहुश आगच्छति; बहुषु निदधाति बहुशो निदधाति; एवमल्पेब्योऽल्पशः, अल्पेष्वल्पशः।
बहूनां स्वामीति। शेषे षष्ठीविधानान्न कारकाभिधायी बहुशब्दः।
पर्यायेब्योऽपीति। अपिशब्दाद्विशेषेभ्योऽपि। तत्र वृत्तौ पर्यायस्योदाहरणम्। विशेषस्य तु---त्रिशो ददातीति, वीप्साया अन्यत्र। वीप्सायां तूत्तरेण सिद्धम्। आब्युदयिकेष्विति। अब्युदयप्रयोजनेषु अग्न्याधेयादिषु अनिष्टेषु भयादिनिमित्तेषु दानेषु। प्रायिकं चैतन्मह्गलवचनम्, अन्यत्रापि हि दृश्यते।
`अपेतापोढनुक्तपतितापत्रस्तैरल्पशः' इति कारकत्वं समासक्रियां प्रति पञ्चभ्याः कर्मत्वात्तदभिधायित्वाच्चाल्पशब्दस्य द्रष्टव्यम्। उदीरितं च---`अल्पा पञ्चमी समस्यते' इति ।।

संख्यैकवचनाच्च वीप्सायाम् ।। 5.4.43 ।।
`नित्यवीप्सयोः' इति द्विर्वचने प्राप्ते तदपवादः सस्विधीयते। कथं तर्हि `एकैकशः पितृसंयुक्ताम्' इति शस्द्विर्वचनयोः सहप्रयोगः? छन्दोवदृषयः कुर्वन्ति। यद्यत्र पारिभाषिकस्यैकवचनस्य ग्रहणं स्यात्-सर्वेभ्यो ब्राह्मणेभ्यो घटंघटं ददातीत्यत्रापी स्यात्; घटशब्दस्यैकवचनान्तत्वादित्यालोच्यान्वर्थस्यैकवचनस्यात्र

ग्रहणमित्याह--एकोऽर्थ उच्यते येनेति। नन्वेवमपि स दोषस्तदवस्थ एव, एकवचनान्कतस्यैकार्थत्वात्? इत्यत आह-कार्षापणादयश्चेति। अनेन वृत्तिस्थैकार्थताऽऽश्रीयते, न वाक्यगतेति दर्शयति। वृत्तौ न घटादयो जातिशब्दा अनेकार्था भवन्ति, जातियोगस्यैकानेकसाधारणत्वात्; किन्त्वभेदैकत्वसंख्यामुपाददते; कार्षापणादयस्तु परिभाणवचना अक्तपरिमाणमर्थमाचक्षाणा इत्येकशेषबलात् अक्षाः, पादाः, माषा इतिवदेकजात्यन्वयरहितानेकार्थप्रतीतिः। वृत्तौ तु विभक्त्यैकशेषयोरभावात्स एव केवलोऽक्तपरिमाणोर्थोऽवतिष्ठते। अतः कार्षापणादय एवोदाहरणमिति जयादित्यो मन्यते।

वामनस्तु `जश्शसोः शिः' इत्यत्रोदाहरिष्यति--`जसा सहचरितस्य शसो ग्रहणादिह न भवति-कुण्डशो ददाति, वनशः प्रविशति' इति। स मन्यते- जातिशब्दोऽपि यदा अर्थप्रकरणादिना वृत्तावेकार्थीभवति, भवत्येव तदा ततोऽपि शसिति--द्वयोर्द्वयोः स्वामीति। कथं तर्हि--

अव्रतानामविद्यानां जातिमात्रोपजीविनाम्।

सहस्रशः समेतानां परिषत्त्वं ************ ।। इति ?

कथं च न स्याद्? वीप्साया अभावाद्, अकारकत्वाद्, अनेकवचनत्वाच्च, अयं ह्यत्रार्थः- एवम्भूतानां ब्राह्माणां सहस्रस्यापि परिषत्त्वं न विद्यत इति? नायमत्रार्थो यथा त्वमात्थ, कि तहि ? सहस्रं सहस्रं ये समेतास्तेपामप्येवम्भूतानां परिषत्त्वं नास्तीति, तत्र समवायक्रियायां कर्तृत्वाद्वीप्सायाश्चाभावाच्छस् भवति ।।

प्रतियोगे पञ्चब्यास्तसिः ।। 5.4.44 ।।

प्रतिना कर्मप्रवचनीयेनेत्यादि। `प्रतिः प्रतिनिधिप्रतिदानयोः' इति कर्मप्रवचनीयसंज्ञा, `प्रतिनिधिप्रतिदाने च यस्मात्' इति पञ्चमी । आद्यादिभ्य उपसंख्यानमिति। `तस्यादित उदात्तमर्धह्रस्वम्' इत्येतदत्र लिङ्गम्।

आपादाने चाहीयरुहोः ।। 5.4.45 ।।

सार्थाद्धीयत इति। `ओहाक्त्यागे', कर्मण्यात्मनेदम्, यक्, घुमास्थादिसूत्रेणेत्वम्। कथं पुनः कर्मसंज्ञा, यावता `कर्त्तुरीप्सिततमं कर्म'? न चात्र सार्थः कर्तृसंज्ञकः, किन्तु ध्रुवत्वेन विवक्षित्वादपादानसंज्ञकः। मा भूत्कर्तृसंज्ञा, जहाति तावत्सार्थो देवदत्तं यदि न जह्यादपाय एव न संवर्त्तेत। स्वातन्त्र्योपलक्षणं च कर्मसंज्ञायां कर्तृग्रहणम्, कर्तृसंज्ञा भवतु मा वा भूत्। एवं चापादनस्यापि सतः सार्थस्य हाने यत्स्वातन्त्र्यं वास्तवम्, तदाश्रया कर्मसंज्ञा भवति। यद्येवम्, माषेष्वश्वं बध्नातीत्यत्र कर्मणोऽप्यश्वस्य वस्तुतो यद्भक्षणे स्वातन्त्र्यं तदाश्रया माषाणं कर्मसंज्ञा प्राप्नोति, तस्मात्कर्मकर्त्तर्यत्र लकारः। कथमिह डजहातिरपगमनायां वर्त्तते? देवदत्तं सार्थो जहाति, अपगमयतीत्यर्थः। एषैव च सार्थस्यापगमना यत् क्षुदुपघातादिना देवदत्तस्यापगमने तत्समर्थाचरणम्, यदा तु क्षुधादिना स्वयमेवापगच्छति तदा कर्मकर्तृत्वम्, ततश्च हीयत इति। कोऽर्थ ? स्वयमेवापगच्छतीत्यर्थः। पुनः `कुतोहीयते'--इत्यपेक्षायां सार्थेन सम्बन्धः।

विकारनिर्देश इति। विकृतिर्विकारः, इह तु तद्वेतुत्वाद्यगभिप्रेतः। तत्र हि घूमास्थादिसूत्रेणेत्वविधानाद्धातुरूपं विक्रियते। यका निर्द्देशः-यस्य यकीत्वमस्ति, तस्य ग्रहणार्थमित्यर्थः। जिहीतेरिति। श्तिपो ङित्त्वाबावादीत्वानुपपत्तेर्जिहातेरिति पठीतव्यम्। तिङन्तानुकरणं वा जिहीतेरिति द्रष्टव्यम्। नैषा पञ्चमीति। यदन्तात्तसिः, नैषा पञ्चमीत्यर्थः। किं तर्हि तृतीयेति। हेतौ, करणे वा तृतीया, तदन्ताद् `हीयमानपापयोगाच्च' इति तसिरित्यर्थः। स्वरेण, वर्णेन वा विवक्षितादर्थाद्धीन इत्यर्थः सम्पद्यते ।।

अतिग्रहाव्यथनक्षेपेष्वकतरि तृतीयायाः ।। 5.4.46 ।।

अतिक्रम्य ग्रहोऽतिग्रह इति। अतिशब्दोऽत्रातिक्रमणे वर्त्तते इति दर्शयति। अतिशब्दो हि ससाधनेऽप्यतिक्रमणे दृष्टः, तद्यथा--`तस्माद्ब्राह्मणे राजन्यवानत्यन्यं ब्राह्मणम्' इति, `न वै देवा नमस्कारमति' इति च। तेन तस्यातिक्रमणमात्रे वृत्तिर्न सम्भवति। वृत्तेनातिगृह्यत इति। बहुष्वासीनेष्वन्यातिक्रमेणायमसाविति विज्ञायत इत्यर्थः, तत्र वृत्तं कारणम्। चारित्रेणेति। `चरेर्वृत्ते ह्रस्वश्च वा' इति णित्रन्प्रत्ययः-चरित्रम्, चारित्रम् ।।

हीयमानपापयोगाच्च ।। 5.4.47 ।।

उदाहरणेषु वृत्तस्य हीयमानेन पापेन च योगः, हेतौ

करणे वा तृतीया, कर्त्ता त्वत्र बन्धुजनादिः। क्षेपस्याविवक्षायामित्यादि। कस्मादेवमित्याह--क्षेपे हीति ।।

षष्ठ्या व्याश्रये ।। 5.4.48 ।।

नानापक्षसमाश्रयो व्याश्रय इति। तथा च `हेतुमति च' इत्यत्र भाष्ये प्रयोगः---व्याश्रिताश्च भवन्ति, केचित्कंसभक्ता, केचिद्वासुदेवभक्ता इति। देवा इत्यादि। अर्जुन इन्द्रपुत्रः, कर्णः सूर्यपुत्रः। षष्ठी चात्रेति । पक्षशब्दस्तु तसौ सति न प्रयुज्यतेः गतार्थत्वात्, नानापक्षसमाश्रयण एवास्य विधानात् ।।

रोगाच्चापनयने ।। 5.4.49 ।।
प्रवाहिकात इति। प्रवाहिफाशब्दात्प्रतीकारापेक्षया षष्ठी, तदन्तात्त्सिः, प्रतीकारशब्दस्य तु पूर्ववदप्रयोगः।।

अभूततद्बावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः ।। 5.4.50 ।।
वार्त्तिककारेण च्विविदावभूततद्भावग्रहणं कर्त्तव्यमित्युक्तम्, तदवश्यं कर्त्तव्यमिति मन्यमानः सूत्र एव प्रक्षिप्य वयाचष्टे--कारणस्येति। उपादानम्, निमित्तम्, असमवायीति--त्रीणि कारणानि, तत्रोपादानकारणस्येत्यर्थः। विकाररूपेणेति। कारणस्यैवोत्तरमवस्थान्तरम्=विकारः, तेन रूपेण तदात्मनाऽभूतस्याजातस्यापरिणतस्येत्यर्थः। तदात्मना विकारात्मना भावः=जन्म, परिणाम इत्यर्थः। अनेन कार्यकारणयोरभेदो दशितः। यथा रज्जुः शिक्यमिति न तत्त्वान्तरम्, अथ च न रज्जुमात्रे शिक्यप्रतीतिः। एवं हिरण्यमेव कुण्डलम्, मृदेव घटः, तन्तव एव पटः, दार्वेव यूपः। अथ च न दिहण्यादिमात्रे कुण्कडलादिप्रतीतिः, नो खलु कुण्डलं हिरण्यं न भवतीति कश्चित्प्रत्येति। यदि च कुण्डलं हिरण्यं न भवति, किं तर्हि? हिरण्यं पिण्डः ननु सोऽपि पिण्डः, एवं वृत्तमेवं दीर्घमिति न किञ्चन हिरण्यं स्यात्, तस्मदनुवृत्तं कारणम्, व्यावर्त्तमानस्त्ववस्थाभेदो विकार इति युक्तम्। कुतः पुनरयमभूततद्भावविशेषो लभ्यते, न पुनरभूत्वा भवनमात्रं भवन्त्यस्मिन्क्षेत्रे शालय इति ? तच्छब्दोपादानात्। येन रूपेण ग्रागभूतं कारणं तेन रूपेण तस्य भावोऽभूततद्भाव इति हि तस्यार्थः, अन्यथाऽभूतभाव इत्येव वाच्यम्। तदपि वा न वक्तव्यम्; सम्पद्यकर्तृत्वादेव सिद्धेः।
यद्वा-जन्मग्रहण एव कर्त्तव्ये `अभूततद्भावः' इति वचनाद्यथोक्तार्थलाभः, सर्वथा यत्र प्रकृतिरेव विकाररूपतामापद्यमाना विकारभेदेन विवक्ष्यते तत्रैव प्रत्ययः, तत्रेव हि दर्शितोऽभूततद्भावः सम्भवति। सम्पद्यतेः कर्तेति। शब्दात्मकस्य धातोः स्वरूपेण कर्त्रा सम्बन्धासम्भवादर्थद्वारकमिदमभिधानम्, सम्पद्यर्थस्य यः कर्त्ता स सम्पद्यकर्तेत्यर्थः। अर्थकथन चैतत्, विग्रहस्तु सम्पद्यश्चासौ कर्त्ता चेति, `पाघ्राध्माधेट्दृशः शः' अस्मादेव निपातनात्सम्पदोऽपि भवति। दिवादित्वात् श्यन्। क्वचित्तु सम्पद्यते कर्तेति। तिङन्तं पठ्यते, यः सम्पद्यते कर्त्ता स सम्पद्यकर्तेत्यर्थः। शुक्लीकरोतीति। प्रकृतौ विकारावस्थां प्राप्नुवत्यां वर्त्तमानाद्विकारशब्दात्स्वार्थे च्विप्रत्ययः, इकारः `वेरपृक्तस्य' इति सामान्यग्रहणार्थः। चकारस्तु तदविधातार्थः, प्रकृतेरन्तोदात्तार्थश्च। वकारस्य `वेरपुक्तस्य' इति लोपः, `अस्य च्वौ' इतीत्वम्, `ऊर्यादिच्विडाचश्च' इति निपातत्वेनाव्ययत्वात्सोर्लुक्।
नात्र प्रकृतिर्विवक्षितेति। प्रकृतिविवक्षायामेवाभूततद्भावः सम्भवतीत्युक्तम्।
अभूततद्भावसामर्थ्यक्षितेति। यो विकाररूपेणाभूतः सन् विकारात्मना भवति, स नियोगतस्तेन रूपेण सम्बद्यमानः सम्पद्यकर्त्ता भवतीत्येतत्सामर्थ्य यद्रूपान्तरेण सम्पद्यते न तदवश्यं कर्तृसंज्ञमेव भवतीत्यभिप्रायेणाह--कारकान्तरसम्पत्तौ मा भूदिति। अदेवगृहे देवगृहे सम्पद्यत इति। अदेवगृहे प्रागभूद्यो वृक्षादिः, स इदानीं तस्मिन्प्रदेशे देवालयीभूते देवागृहे सम्पद्यत इत्यर्थः। उदाहरणदिक्चेयं वृत्तिकारेण दर्शिता। कृभ्वस्तियोगाभावाद्विनैवात्र च्विः प्रसज्यते। तस्माददेव गृहे देवगृहे भवतीति प्रत्युदाहार्यम्। अत्र वृक्षादेः सम्पत्तिं प्रत्यधिकरणस्याप्यदेवगृहस्याभूततद्भावोऽस्त्येव; तस्य प्रागदेवगृहस्यापि सम्प्रति देवगृहत्वेन परिणामात्। एवं हि वृक्षादेस्तदाधारविशिष्टतयाऽभूततद्भावो यद्यपि वस्तुतः सम्पद्यकर्तृत्वमपि देवगृहस्यास्ति, तथापि न तद्विवक्षितम्, किं तहि? आधारभाव एवेति भवत्युदाहरणम्। ननु चैवं सति सुक्लीकरोतीत्यत्रापि न स्याद्, अत्रापि हि कारनान्तरस्य कर्मणः सम्पत्तिः, न कर्तुः? अस्यत्र विशेषः, कर्मवयापारोपसर्जनं कर्तृव्यापारं करोतिराह, कर्मव्यापारश्च सम्पत्तिः--शुक्लं करोतीति, कोऽर्थ? शुक्लं सम्पद्यमानं सम्पादयतीत्यर्थः। ततश्च सम्पद्यकर्तृत्वमस्मिन्प्रयोगे शब्देनैवोपात्तम्। इतरत्र तु वृक्षादेरेव सम्पद्यकर्तृत्वं शाब्दम्, देवगृहस्य त्वार्थम्। आधारभाव एव तु शाब्द इति न कश्जिद् दोषः। इह तर्हि कथं समापीभवति, अभ्याशीभवति, अन्तिकीभवतीति? कथं च न स्यात् ? न ह्यसमीपं समीपं भवतीत्यत्रार्थः, किं तर्हि? असमीपे स्थितं समीपे स्थितं भवतीति? तात्स्थ्यात्ताच्छब्द्यं भविष्यति ।।

अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च ।। 5.4.51 ।।
अत्र सर्वविशेषणसम्बन्धादित्यादि। यदि त्वभूततद्भावादीनां विशेषणानां मद्येऽन्यतमं न सम्बध्यते, ततश्च्वेरपि विध्यर्थमेतत्स्यात्। यतस्तु सर्वाणि विषेपणानि सम्बध्यनेते, ततो लोपमात्रमेवन न प्राप्नेतीति तदथ वचनम्, न च्वेर्विधानार्थम्। `च्विश्च प्रत्ययः' इति तु पूर्वेणैव विहितस्य च्वेरनुवादः कृतः, तत्सन्नियोगशिष्टत्वं लोपस्य दर्शयितुम्। यदि पुनविशेषविहितेन बाधा मा भूदिति च्विरप्यनेन विधीयेत, तत उन्मनीकरोतीत्यादावनेन प्रत्ययो न स्याद्; ग्रहणवचा प्रातिपदिकेन तदन्तविधिप्रतिषेधात्। ततश्चैतत्सन्नियोगशिष्टो लोपो न स्यात्, पूर्वेण तु केवल एव च्विः स्यात्। तस्मात्पूर्वेण विहिते च्वौ परतोऽरुःप्रभृतीनां लोपो भवतीत्येव सूत्रार्थः। पूर्वेणैव च केवलेभ्यस्तदन्ताच्च च्विर्भवति ।।

विभाषा साति कार्त्स्न्ये ।। 5.4.52 ।।
यदि प्रकृतिः कृत्स्ना विकारतामापद्यत इति। अभूततद्भावविषयं कार्त्स्न्यमाश्रीयत इति दर्शयति--विभाषाग्रहणं च्वेः प्रापकमिति। विकल्पार्थस्याप्यस्य प्रापयितव्यान्तराभावात्। ननु वाक्यं प्रापयितव्यं स्यात्? तत्राऽऽह-प्रत्ययविकल्पस्तिति। अपर आह--अनेकार्थत्वान्निपातानां समुच्चयोऽर्थः।
विभाषाग्रहणं च्वेः प्रापकमिति। विभाषाशब्दस्तु निपातो न भवति, `द्वयोर्विभाषयोर्मध्ये' इति विभक्तेर्दर्शनात्, किं तहि? `गुरोश्च हलः' इत्यकार प्रत्ययान्तः--विभाष्यते विकल्प्यते इति विभाषेति ।।

अभिविधौ सम्पदा च ।। 5.4.53 ।।
स तु कृभ्वस्तिभिरेव योगे भवतीति। विभाषाग्रहणस्य विकल्पार्थत्वात्स्वशास्त्रेणैव च्विर्भवतीति सम्पदायोगे तस्याप्रसङ्गात्। स्पष्टीकृतं चैतत्पूर्वग्रन्थे। विभाषाग्रहणानुवृत्तेश्च्विरप्यभ्यनुज्ञायत इति। समुच्चयार्थे तु तस्मिन्ननेनैव च्विर्भवन्सम्पदापि योगे स्याद्, अभ्यनुज्ञाय इति चानुपपन्नं स्यात्। अथेति। उभयत्र व्याप्तिसम्भवात्प्रश्नः। सर्वा प्रकृतिरिति। प्रकारकार्त्स्न्ये ऽत्र सर्वशब्दः, यथा---सर्वान्नीनो भिक्षुरिति। यथास्यां सेनायामित्यादि। अत्रापि प्रकारकार्त्स्न्य एव सर्वशब्दः, खङ्गप्रासादीनामशेषाणां सस्त्राणामेकदेशेनाप्यग्न्यात्मभावोऽत्र विवक्षितः, न त्वेकस्या अपि सस्त्रव्यक्तेः सर्वात्मना विकाररूपापत्तिः। एवं वर्षासु लवणमित्यत्रापि। कार्त्स्न्य त्वित्यादि। यत्रैकस्यापि द्रव्यस्य सर्वात्मना विकाररूपापत्तिः, न कश्चिदवयवः परिहाप्यते, तत्र कार्त्स्न्यं भवति। तस्मादर्थभेदादुभयमुक्तम्, न त्वेकत्रैवान्यतरत्र सम्पदो ग्रहणं कृतमिति ।।

तदधीनवचने ।। 5.4.54 ।।
स्वामिसामान्यमित्यादि। इह `अधिरीश्वरे' इति अधिशब्दस्य कर्मप्रवचनीयसंज्ञा तेन योगे `यस्मादधिकं यस्य चेश्वरवचनम्' इति ईश्वरवाचिनः सप्तमी, ईश्वरश्चेशितव्यापेक्षः। अधिशब्दश्चायं शौण्डादिषु पठ्यते इति सप्तमीसमासः, ततोऽध्युत्तरपदलक्षणः खः, तत्र कृते ब्रह्मदत्ताधीनाः पञ्चाला इति सामानाधिकरण्यदर्शनादधिशब्द ईशितव्यसामान्यभिधायी, पञ्जालादयस्तु तद्विशेषवचना इति गम्यते; ततश्च स्वामिसामान्यम्, ईशितव्यसामान्यं च तदधीतशब्देनोच्यते, तत्र स्वामिसामान्यं प्रकृत्यर्थः, सामान्यं च विशेषोपलक्षणार्थमिति विशेषवाचिभ्यः प्रत्ययो विज्ञायत इत्वाहस्वामिविशेषवाचिन इति ।।

देये त्रा च ।। 5.4.55 ।।
ब्राह्मणत्राकरोतीति। स्वरादिष्वयं त्रान्तः पठितव्यः, तेनाव्ययत्वात्सोर्लुक्। अपर आह--तत्रैव `चव्यर्थाश्च' इति पठ्यते, तत्र बहुवचननिर्द्देशादच्व्यर्थस्यापि त्राप्रत्यस्य साहचर्येण परिग्रहादव्ययत्वमिति।
राजसाद्भवति राष्ट्रमिति। पूर्वेण सातिरेव भवति ।।

देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ।। 5.4.56 ।।
सातीति निवृत्तमिति। पूर्वसूत्रे चानुकृष्टत्वात् `कृभ्वस्तियोगे' इति न सम्बध्यत इति तदर्थमत्र स्वरितत्वं कर्त्तव्यम्। स्वरिते सति नाधिकार इत्ययं च पक्ष आश्रयणीयः। मण्डूकप्लुत्याउत्तरत्र सम्बन्धः। `सम्पदा च' इत्येतत्तु सर्वथैवं निवृत्तत्वान्न सम्बध्यते ।।

अव्यक्तानुकरणाद् द्व्यजवरार्द्धादनितौ डाच् ।। 5.4.57 ।।
यत्र ध्वनावित्यादि। यद्यप्यनुकार्यमेव रूपमनुकरणे वर्णविशेषरूपेण प्रकाशते, तथापि `अव्यक्तानुकरणस्यात इतौ' इत्यनुकरणस्थस्याच्छब्दस्य पररूपं विधत्ते। ध्वनिमात्रसाम्येन तु तस्यानुकरण मुच्यते। अवरशब्दोऽपकर्षे इति। अपकर्षः=न्यूनता, प्रवृत्तिनिमित्तकथनं चैतत्, अपकृष्टं त्ववरशब्दस्यार्थः। यस्यापकर्षे क्रियमाणे इत्यादि। अत्रापकर्षः=विभागः, समप्रविभागेऽर्द्वशब्दः, अवरत्वं चाच्कृतमेव, द्व्यच्सन्निधानात्। यस्मिन्विभज्य निरूप्यमाणे सुष्ठु न्यूनमपि अल्पमपि अर्ध द्व्यच्छब्दवत्सम्पद्यते न ततो न्यूनम्, अधिकं तु सम्भवतु मा वा भूत्, तद् द्व्यजवरार्द्धमित्यर्थः. यस्येत्यादि। यदि त्वकृते द्विर्वचने यस्य द्व्यजवरार्द्धता ततो डाज् भवतीति विज्ञायते, तदा पटच्छब्दार्दर्न स्यादिति भावः।
नन्वेधं सति डाचि परभूते तदाश्रये द्विर्वचने द्व्यजवरार्द्धता भवति, तस्यां च सत्यं कडाचा भवितव्यमितीतरेतराश्रयत्वं प्राप्नोति ? तत्राह--डाचि बहुलमितीत्यादि। सत्यं परसप्तम्यां स्यादेष दोषः; विषयसप्तमी त्वेषा, ततो न दोष इत्यर्थः। उदाहरणे परभागस्य टचिलोपः, `नित्यमाम्रेडिते डाचि' इति पूर्वतकारस्य परदेश्च पकारस्य पररूपम्--एकं पकारः, द्वितीय उदाहरणे दकारः।
दृषत्करोतीति। व्यक्तानुकरणमेतत्, प्रकरणादिना चानुकरणत्वानुगतिः। खरटखरटाकरोतीति। खरटदित्यस्य द्विर्वचनादि पूरववत्। `द्व्यजर्द्धात्' इत्युच्यमानेऽत्र न स्यात्, न ह्यत्रार्द्धं द्व्यच्कम्, किं तर्हि? त्र्यच्कम्। अवरग्रहणे तु सति भवति; न्यूननिवृत्त्यर्थत्वादवरशब्दस्य। पटिति करोतीति। `अव्यक्तानुकरणस्यात इतौ' इति अच्छब्दस्य पररूपत्वम्। तद्यत्र स्याद्, डाजन्तस्य सतित्वं स्यादिति शब्दमनुच्चार्य करोतिरन्तरः स्यात्, इतिश्च, ततः परः एकाच्त्वादस्य प्रत्ययस्वेरेणैव सिद्धमुदात्तत्वम्, `लोहितादिडाज्भ्यः' इत्यत्रापि `डाभ्यः' इत्युच्यमानेऽपि न कश्चिहोषः।
इडायां डाशब्दोऽनर्थकः, `नाभा पृथिव्याः' इत्यादौ सुवादेशस्यापि डाशब्दस्याग्रहणम्; छन्दसि ततः क्यपोऽदर्शनात्, तस्मान्नार्थश्चकारेण ? तत्राह--चकार इत्यादि। पटपटा असीति स्थिते `तिङ्ङतिङः' इति निघातः, एकादेशः। अत्रासति चकारे `स्वरितो वानुदात्तेऽपदादौ' इति पक्षे स्वरितः स्यात्। चित्करणसामर्थ्यात्तु चिदचितोरेकादेशस्य पूर्व प्रत्यन्तवद्भावाच्चित्स्वरेणान्तोदात्त एव भवति।
स स्वार्थिको विज्ञेय इति। अर्थान्तरस्याभावात्। स्वार्थे तु यकारोऽस्मादेव निपातनाद्विज्ञेयः ।।

कृत्रो द्वितीयतृतीयशम्बबीजात् कृषौ ।। 5.4.58 ।।
कृषावभिधेयायामिति। कस्याभिधेयायाम्? द्विदीयादिशब्दानां डाजन्तानां कृञ्श्च। तद्दर्शयति--द्वितीयं कर्षणं विलेखनं करोतीत्यर्थ इति। प्रतिलोमं कर्षतीत्यर्थं

इति। शम्बशब्दस्यात्र प्रातिलोम्ये वृत्तिः, कृञ्श्च कर्षणे। सह बीजेनेति। बीजशब्दस्य बीजावापसहिते विलेखने वृत्तेरयमर्थो भवति ।।

सङ्ख्यायाश्च गुणान्तायाः ।। 5.4.59 ।।
सङ्ख्यावाचिनः शब्दस्येति। एतेन सङ्खय्या इत्यस्य वष्ट्यन्ततां दर्शयति। गुणान्तेति। व्यधिकरणपदो बहुव्रीहिः, अन्तशब्दश्च समीपवचन इत्याह--गुणशब्दोऽन्ते समीप इति। अन्तशब्दस्य सङ्ख्याया इत्येतदपेक्षमाणस्यापि सम्बन्धिशब्दस्य नित्यसापेक्षत्वात्समासः, निपातनाच्च सप्तन्यन्तस्यापि तस्य परनिपातः। यत्रेत्यनेन प्रकृतिर्निर्दिश्यते। सेत्यादिना प्रकृतिसङ्ख्या। गुणान्तेत्युच्यते। सङ्खयाशब्दस्यान्ते गुणश्बदो यस्याः सा तथोक्ता। अत्रापि गमकत्वात्समासः। तादृशादिति। सङ्ख्याशब्दसमीपवत्तिगुणशब्दादित्यर्थः। अन्तशब्दश्चायं नियतमेव परत्वविशिष्टं सामीप्यमाचष्टे, न सामीप्यमात्रम्। तेन गुणविशतिरित्यादौ पूर्वभूते गुणशब्देऽतिप्रसङ्गो नोद्भावनीयः। अनभिधानाद्वाऽत्र प्रत्ययाभावः। द्विगुणं विलेखनं करोति क्षेत्रस्येति। अत्र विलेखनशब्दस्य कृदन्तस्य प्रयोगात्कृद्योगदलक्षणा षष्टी क्षेत्राद्भवति। उत्पन्ने तु तद्धिते तदभावाद् द्वितीयैव भवति।
अथैवं कस्मान्न व्याख्यायते--सङ्ख्यायते-सङ्खयाया इति पञ्चमी, अन्तशब्दोऽवयववचनः, सङ्खयावाचिनः परो यो गुणशब्दस्तदन्तायाः प्रकृतेरिति ? उच्यते; एवं हि सति गुणान्ताया एव सङ्ख्याया इति विशेषणं स्यात्, न गुणशब्दस्य समासे गुणभूतस्य। एवं तर्हि मा बूदन्तग्रहणम्, सङ्घ्याया गुणादित्येवास्तु, व्यधिकरणे च पञ्चम्यौ-- सङ्ख्यायाः परो यो गुणशब्दस्तस्मादिति? एवमपि वाक्ये प्रसङ्गः--पञ्च गुणान्करोतीति, विपर्ययश्च सम्भाव्येत---गुणशब्दात्परा या सङ्ख्या तदन्तादिति। एवं तर्हि सङ्ख्यादेर्गुणादित्येवास्तु? सत्यम्; तथा तु न कृतमित्येव, प्रत्युत यथान्यासे द्विगुणभागं क्षेत्रं करोतीत्यत्रापि प्रसङ्गः ।।

समयाच्च यापनायाम् ।। 5.4.60 ।।
समयाकरोतीति। `अद्य मे पारवाश्यं श्वः परश्वो वास्य समयः' इत्येवं यो बहुषु दिवसेषु अतिवर्त्तते स एवमुत्यते। समयं करोतीति। समयः=नियमः, सङ्गमो वा--समयनं समय इति ।।

सपत्त्रनिष्पत्त्रादतिव्यथने ।। 5.4.61 ।।
पतत्यनेनेति पत्त्रम्=शराणां पुङ्खगतो बर्हः। सपत्त्रं शरमिति। सह पत्त्रेण वर्त्तत इति। सपत्त्रः, आपुङ्खान्मृगशरीरे शरं प्रवेशयतीत्यर्थः। निष्पत्त्राकरोतीति। निर्गतं पत्त्रमस्मान्निष्पत्त्रं मृगं करोतीति। यथास्य शरीरे पुङ्खप्रदेशोऽपि न लगति, तथा शरं शरीरान्निष्क्रामयतीत्यर्थः। सपत्त्रं वृक्षमिति। पत्त्राणि=पर्णानि। जलसेचनत इति। `कर्तृकरणे कृता बहुलम्' इति तृतीयासमासः। भूमिशोधक इति। `नित्यं क्रीडाजीविकयोः' इति जीविकायां षष्ठीसमासः ।।

निष्कुलान्निष्कोषणे ।। 5.4.62 ।।
निष्कुलाकरोतीति। निष्कोशितं कुलमन्तरवयवानामस्मादिति बहुव्रीहौ डाच् ।।

सुखप्रियादानुलोम्ये ।। 5.4.63 ।।
आराध्यचित्तानुवर्तनमिति। आराध्याः=स्वाम्यादयः, तेषामिष्टानिष्टकरणाकरणाभ्यां यच्चित्तस्यानुवर्त्तनम्= आराधनं तदानुलोम्यम्। प्रिय करोत्यौषधपानमिति। प्रीतिः=प्रियम्, घञर्थे कः।

दुःखात्प्रातिलोम्ये ।। 5.4.64 ।।
चित्तपीडनमिति। स्वाम्यादेर्यदनिष्टस्याचरणेन इष्टस्याकरणेन वा चित्तस्य पीडनं तत्प्रातिलोम्यम् ।।

शूलात्पाके ।। 5.4.65 ।।
शूलं करोति कदन्नमिति। शूलम्=उदरतोदः, कुत्सितमन्नं कदन्नम् ।।

सत्यादशपथे ।। 5.4.66 ।।
सत्सु साधु सत्यम्, प्राग्घितीये यति प्राप्तेऽस्मादेव निपातनाद्यः अन्तोदात्तो हि सत्यशब्दः--सत्येनोत्तभिता भूमिः, ऋतं च सत्यं चेति। शपेरथः शपथः, भाण्डम्=रत्नादिद्रव्यजातम्। तथ्यमिति। तथैव=तथ्यम्, `पादार्घाभ्यां च' इति चकारस्यानुक्तसमुच्चयार्थत्वात्स्वार्थे यत् ।।

मद्रात्परिवापणे ।। 5.4.67 ।।
परिवापणमिति। कर्मव्यापारमात्रवाचिनो वपेर्हेतुमण्णिचि ल्युट्, माङ्गल्यं मुण्डनं करोतीत्यर्थः, चोलदीक्षादौ। भद्राच्चेति वक्तव्यमिति। मद्रादित्यर्थग्रहणमिति

तु व्याख्याने मङ्गलादिभ्योऽपि स्यात्।

समासान्ताः ।। 5.4.68 ।।
अवयववचनोऽन्तशब्द इत्याह-अवयवा एकदेशा इति। समीपवचनस्तु न गृह्यते; प्रत्ययपरत्वेनैव सिद्धत्वात्। अवयववचनं चान्तशब्दमाश्रयता समासार्थादुत्तरपदादकृत एव समासे समासान्ता भवन्तीत्युक्तं भवति। एवं हि ते समासस्यैकादेशा भवन्ति, यदि प्रागेव तान्प्रत्ययान्कृत्वा तदन्तेन समासः क्रियते। तथा च `न कपि' इत्यत्र वक्ष्यति--`समासार्थे ह्युत्तरपदे कपि कृते पश्चात्समासेन भवितव्यमिति। ये पुनरत्र पक्षे दोषास्ते ङ्याप्सूत्रे एव प्रतिविहिताः।
अधिराजम्, उपराजमिति। विभक्त्यर्थे सामीप्ये चाव्ययीभावः, `अव्ययीभावे शरत्प्रभृतिभ्यः' `अनश्च' इति टच्। द्विपुरीति। समाहारद्वन्द्वः। `ऋक्पूरब्धूः' इत्यकारः। कोषश्च निषच्च कोषनिषदम्, स्रुक्च त्वक् च स्रुक्त्वचम्-द्वन्द्वाच्चुदषहान्तात्समाहारे' इति टच्। विगतो धुरः, प्रगतो धुर इति। प्रादिसमासः। तत्पुरुषे तुल्यार्तेत्येष स्वरो भवतीति। पूर्वपदप्रकृतिस्वरः, पूर्वपदं चात्र `निपाता आद्युदात्ताः', `उपसर्गाश्चाभिवर्जम्' इत्याद्युदात्तम्, उच्चैर्नीचैः- शब्दौ स्वरादिष्वन्तोदात्तौ पठितौ। अथ समासग्रहणं किमर्थम्, यावता `बहुव्रीहौ संख्येये,' `तत्पुरुषस्याङ्गुलेः', `अव्ययीभावे शरत्प्रभृतिभ्यः' ` द्वन्द्वाच्चुदषहान्तात्' इति प्रायेण समासविशेषग्रहणमस्ति? यत्रापि नास्ति तत्रापि सङ्गात एव गृह्यते, यथा `अच् प्रत्यन्ववपूर्वात्सामलोम्नः' इति। यत्र तर्ह्येतदुभयं नास्ति `ऋक्पूरब्धूः' इत्यादौ, समासग्रहममिति ।।

न पूजनात् ।। 5.4.69 ।।
यान् शब्दानुपादायेति। पूजनवचनात्समासान्तो न भवतीत्ययमर्थो न भवति; परिगणिताभ्य एव प्रकृतिभ्यः समासान्तविधानात्। तत्र च पूजनार्थस्य कस्याचिदभावात्, अभावे प्रतिषेधानुपपत्तेः। सुराजेत्यादौ प्रादिसमासः ।
पूजायां स्वलतिग्रहणमिति। पूजनग्रहणमपि कर्त्तव्यमेव, अवक्षेपणे अतिक्रमणे च वर्त्तमानयोः स्वत्योर्ग्रहणं मा भूदिति। प्राग्बहुव्रीहिग्रहणं चेति। `वहुव्रीहौ सक्थ्यक्षणोः' इत्यतः प्रागयमधिकार इति वक्तव्यमित्यर्थः।

किमः क्षेपे ।। 5.4.70 ।।
किराजेति। `किं क्षेपे' इति समासः। कस्य राजा किराज इति। प्रश्नेऽत्र किंशब्दः।
`क्षेपे' इति शक्यमाकर्त्तुम्, कस्मादत्र न भवति--लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति? कश्टिदाह--क्षेपग्रहणेनैज्ज्ञापयति--इयमिह परिभाषा नापतिष्ठत इति, तेन निन्दिता धूरस्य शकटस्य किंधूः शटकमिति बहुव्रीहावपि प्रतिषेधः सिद्धो भवतीति। तद्भाष्यविरोधादुपेक्ष्यम्। तस्माद्विस्पष्टार्थं क्षेपग्रहणम् ।।

बहुव्रीहौ संख्येये डजबहुगणात् ।। 5.4.73 ।।
`बहुव्रीहौ' इति सुब्व्यत्ययेन पञ्चम्यर्थे सप्तमी। तस्येदं ग्रहणमिति। तस्यैव संख्येये वृत्तेः। योऽपि वार्थे वर्त्तते-द्वित्राः, पञ्चषा इति, योऽपि ,सुजर्थे-द्विदशास्त्रिदशा इति; तावुभावपि संख्येय एव वर्त्तते; संख्येयस्यैव वार्थस्य सुजर्थस्य चाभिधानात्। उपदशा इत्यादौ टिलोपः। उपविंशा इत्यत्र `तिविंशतेर्डिति' इति तिलोपः द्वयोरकारयोः `अतो गुणे' पररूपत्वम्।
संख्येय इति शक्यमवक्तुम्। इह कस्मान्न भवति---चित्रगुरिति? नत्रिवयुक्तन्यायेन बहुगणप्रतिषेधात्तत्सदृशविज्ञाने सति संख्योत्तरपदो बहुव्रीहिर्ग्रहीष्यते। स्यादेतत्--वैपुल्यवचनोऽपि बहुशब्दोऽस्ति, न संख्यापदमेव, गणशब्दोऽपि सङ्घवचनोऽप्यस्ति, तस्मादशक्यं बहुगणसादृश्येन संख्योत्तरपदं ग्रहीतुमिति ? तन्न; परस्परसाहचर्यात्संख्यापदयोरेव पर्युदासात्। तस्मात् प्रसज्यप्रतिषेधेऽपि समाससम्भवात्सादृश्यस्य चानवस्थितत्वात् संख्येयग्रहणं कृतम्। उपबहवः, उपगणा इति। अनियतप्रचयवचनयोरपि बहुगणशब्दयोरर्थप्रकरणादिना यदा विशिष्टेष्वेव दशादिषु वृत्तिस्तदा तत्समीपगता नवादय उपबहव इत्यविरुद्धं बहुवचनम्। अत्रेति। उपगणा इत्यत्र स्वरे विशेष इति। डचि सत्यन्तोदात्तत्वं स्यात्, तस्मि, तस्मिस्त्वसति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमेव भवति। संख्यायास्तत्पुरुषस्येति। तत्पुरुषस्यावयवभूतं यत्संख्यावाच्युत्तरपदं तस्मादित्यर्थः। निस्त्रिशाद्यथमिति। आदिशब्दः प्रकारे, अव्ययादयः संख्यान्तास्तत्पुरुषा निस्त्रिंशप्रकाराः। गोविंशतिरित्यादौ न भवति। निस्त्रिशानिवर्षाणीति। त्रिंशल्लाक्षणायाः संख्याया निर्गतानि अधिकानिं एकत्रिंशदादीनीत्यर्थः। निर्गतस्त्रिशतोऽङ्गूलिभ्य इति। ततोऽपि दीर्घतर इत्यर्थः। रूढिशब्दस्येयं यथाकथञ्चिद्व्युत्पत्तिः।
डचश्चित्करणं स्वरार्थम्; अन्यथा समासार्थादुत्तरपदात्प्रत्यये कृते पश्चाद्बहुव्रीहौ सतिशिष्टः पूर्वपदप्रकृतिस्वरः स्यात्। इदमेव चित्करणं लिङ्गम्-समासार्थादुत्तरपदात्समासान्ते कृते पश्चात्समासः इति, अन्यथा प्रत्ययस्वर एव सतिशिष्टः स्वरः स्यात्। यस्तु मन्यते--`कृते समासे समासान्तग्रहणसामर्थ्याच्चागमवत्तद्ग्रहणेन गृह्यते' इति, तस्यापि ज्ञापकार्थं चित्करणम्; स्वरविधेः प्रागेव समासान्तो भवतीति। तेन महाधुर इत्यादौ बहुव्रीहिस्वरो भवति ।।

ऋक्पूरब्धूःपथामानक्षे ।। 5.4.74 ।।

सामार्थ्यादिति। धुर एवाक्षेण सम्बन्धोऽस्ति, नेतरेषामित्येतत्सामर्थ्यम्। एतद्विशेषणमिति। `अनक्षे' इत्यत्रोत्तरपदार्थ एतदा प्रत्यवमृश्यते, अत एवाह--अक्षसम्बन्धिनी या धूरिति। सूत्रे त्वक्षस्य धूरपेक्षयाऽधिकरणत्वादनक्ष इति सप्तमी। चक्रसम्बद्धः काष्ठविशेषो रथाद्यवयवः=अक्षः, तत्सम्बन्धिनी धूस्तस्यां न भवतीत्यर्थः। यदि त्वक्षे समासार्थे न भवतीति विज्ञायेत, इहैव प्रतिषेधः स्यात्-दृढा धूरस्य दृढधूरक्ष इति, इह तु न स्याद्--अक्षस्य धूरक्षधूरिति। अथाप्येवं विज्ञायेत--अक्षे पूर्वपदे न भवतीति, एवमपीहैव प्रतिषेधः स्याद्--अक्षधूरिति, इह तु न स्याद्दृढधूरक्ष इति। तस्माद्व्याप्तिन्याया दुक्त एवार्थो न्याय्यः। अर्द्धर्च इति। `अध नपुंसकम्' इति समासे `अर्द्धर्चाः पुंसि च' इति पुंल्लिङ्गत्वम्। बह्वच इति। बहुव्रीहिः। ललाटपुरम्, नान्दीपुरमिति। षष्ठीसमासौ। परवल्लिङ्गता तु न भवति, लोकाश्रयत्वाल्लिङ्गस्य। यद्यप्यकारान्तेन पुरशब्देन समासे कृते एतत्सिद्ध्यति, तथापि व्यञ्जनान्तेन समासे तस्य श्रवणं मा भूदिति पूर्वग्रहणम्, द्वीपं समीपमिति। द्विर्गता आपोऽस्मिन्निति बहुव्रीहिः, `द्व्यन्तरुपसर्गेभ्योऽप इत्' इतीत्वम्। राजधुरादयः षष्ठीसमासाः। महाधुर इति। बहुव्रीहिः, `स्त्रियाः पुंवत्' इति पुंवद्भावः, `आन्महतः' इत्यात्वम्।

अनृचो माणवक इत्यादि। ऋगन्तस्य बहुव्रीहेर्नञ्पूर्वस्य माणवक एवाभिधेये प्रत्यय इष्यते, तथा बहुपूर्वपदस्य चरणाख्यायामेवेत्यर्थः। अनृक्कं साम, बह्वृक्कं सूक्तमिति। `ञ्शेषाद्विभाषा' इति कप्, `चोःकुः' इति कुत्वम् ।।

अच् प्रत्यन्ववपूर्वात्सामलोम्नः ।। 5.4.75 ।।

प्रतिसाममित्यादौ प्रादिसमासः, बहुव्रीहिः, अव्ययीभावश्च यथासम्भवं वेदितव्याः।

कृष्णोदक्पाण्कडुर्वाया इति। कृष्णादिशब्दाः पूर्वे यस्यास्तस्या भूमेरच् प्रत्ययः स्मृतः। कृष्णा भूमिरस्मिन् कृष्णभूमो देशः, उदीची भूमिरस्मिन्नुदग्भूमो देशः। कः पुनस्सौ पृथिव्या दक्षिणसीमा? भूमिशब्दो वा तद्विशेषे सस्वसंपन्ने द्रष्टव्यः. यस्य दक्षिणतः खिलः संदेश उदम्भूम। गोदावर्याश्च नद्याश्चाच् प्रत्ययः। समृतः, ते नदि संख्या*** उत्तरे भवतः---पञ्चगोदावरम्, पञ्चनदम्। `नदीभिश्च' इति समाहारेऽव्ययीभावः।

पद्मनाभ इति। पद्माकारो नाभिरस्येति प्रथमान्तर्योर्वहुव्रीहिः। पद्मं नाभावस्येति विग्रहे गड्वादिपु दर्शनात्सप्तम्याः परनिपातः ऊर्णनाभ इति। `ङ्यापोः संज्ञाछन्दसोर्वहुलम्' इत्यूर्णशब्दस्य ह्रस्वः। तदेतदिति। कृष्णभूमादिकम्।

ओगविभागेनेति। अत एव प्राक् प्रत्ययनिर्द्देशः कृतः ।।

अक्ष्णोऽदर्शनात् ।। 5.4.76 ।।

`अदर्शनात्' इति वचनादक्षीवाक्षीत्यक्षिसदृशार्थवृत्तिरिहाक्षिशब्द उपात्तः। लवणाक्षम्, पुत्कराक्षमिति। लवणमक्षीव, पुत्करणक्षीवेति `उपमितं व्याघ्रादिभिः' इति समासः।

कथमित्यादि। ननु दर्शनादन्यत्र योऽक्षिशब्दस्तदन्तादित्युक्तम्, गवाक्षकबराक्षयोश्च समुदायो दर्शनवचनः, नाक्षिशब्द इति कात्रानुपपत्तिः? सत्यम्; अक्ष्यन्ताददर्शनादिति सूत्रार्थः कस्मान्न भवतीति मन्यमानस्यायं प्रश्नो द्रष्टव्यः। चक्षुःपर्याय इति। तस्य प्रसिद्धतरत्वादिति भावः ।।

अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्दोक्षोपशुनगोष्ठश्वाः ।। 5.4.77 ।।

समासव्यवस्थापीति। क्वचिद्बहुव्रीहेरेव, क्वचिद् द्वन्द्वादेवइत्येवंमादिको नियमः=व्यवस्था। अपिशब्दादन्यदपि टिलोपादिकं तन्निपातनादेव। स्त्रियाः पुमानिति। स्त्रियं प्रति पुमान् शूर इत्यर्थः।

अक्षिभ्रुवमिति। प्राण्यङ्गत्वादेकवद्भावः। दारगवमिति। `सर्वो द्वन्द्वे विभाषयैकवद्भवति'। सप्तम्यर्थे वृत्तयोरव्यययोः समासोऽपि निपातनादेवेति। चार्थेन योगाबावात्, न हि भवति-इह च, एवं चेति। अहर्दिवमिति। `रोऽसुपि' इति रेफः। कथमनयोर्द्वन्द्व इति। न कथञ्अचित्, विरुपाणामपि समानार्थानामेकशेषारम्भात्। वीप्सायामित्यादि। चार्थे विधीयमानो वीप्सायां न प्राप्नोति, एकशेषारम्भाच्च। तस्माद्वीप्सायां द्वन्द्वो निपात्यते, वीप्साद्योतनाच्चैकेन गतार्थत्वमपि नाशङ्कनीयम्, यथा द्विर्वचने--ग्रामोग्रामो रमणीय इति।

सरजसमिति। `अव्ययीभावे चाकाले' इति सहस्य सभावः। निःश्रेयसमिति। प्रादिसमासः. निःश्रेयस्क इति। निश्चितं श्रेयोऽनेनेति बहुव्रीहिः, शेपलक्षणः कप्, `सोऽपदादौ' इति सत्वम्।

ऋग्यजुरुन्मुग्घ इति। य ऋचो यजुंपि मन्यते।

त्रयो वा चत्वारो वा त्रिचतुराः। चतुर्णां समीप उपचतुराः, `बहुव्रीहौ सङ्ख्येते' िति प्राप्तस्य कडचोऽपवादोऽदज्विधीयते ।।

ब्रह्महस्तिभ्यां वर्चसः ।। 5.4.78 ।।

वर्चः=दीप्तिः। उदाहरणेषु षष्ठीसमासः ।।

अवसमन्धेभ्यस्तमसः ।। 5.4.79 ।।

अवगतं तमोऽवतमसम्, सन्ततं तमः सन्तमसम्, प्रादिसमासौ। अन्दं करोति अन्धयति, अन्धयतेः पचाद्यच्--अन्धम्, तच्च तत्तमस्च अन्धतमसम् ।।

श्वसो वसीयः श्रेयसः ।। 5.4.80 ।।
वसुशब्दात्प्रशस्तवचनादीयसुन्--वसीयः, `प्रशस्यस्य श्रः'--श्रेयः। स्वबावाच्चेत्यादि। यद्यपि श्वःशब्दोऽन्त्र कालविशेषे वर्तते, तथापीह समासे उत्तरपदार्थप्रशंसामाशीर्विषयामाचष्टे। कुतः ? स्वभावत्। अस्यैवेति। श्वः श्रेयसशब्दस्येत्यर्थः ।।

अन्ववतप्ताद्रहसः ।। 5.4.81 ।।
रहःशब्दोऽयमप्रकाशे वर्त्तते। अनुगतं रह इति। प्रादिसमासः, अनुगतं रहोऽस्मिन्निति बहुव्रीहिर्वा। एवमवहीनं रहः, अवहीनं रहोऽस्मिन्नति अवरहसम्। तप्तं च तद्रहश्च तप्तरहस****। अत्यन्तं रह इत्यर्थः ।।

प्रतेरुरसः सप्तमीस्थात् ।। 5.4.82 ।।
सप्तम्यर्थे वर्त्तत इति। न ह्यन्यदुरःशब्दस्य सप्तमीस्थत्वं नामेति भावः ।।

अनुगवमायामे ।। 5.4.83 ।।
आयामेऽभिधेय इति। प्रवृत्तिनमित्तमायामः, तद्वति तु पर्यवसानम्। मत्वर्थीयाकारान्तो वा आयामशब्दः, आयामवत्यभिधेय इत्यर्थः; अन्यथाऽनुगवं यानमिति सामानाधिकरण्यं न स्यात्। यस्य चायाम इति समास इति। ननु तत्र लक्षणेनेति वर्त्तते ? सत्यम्; इहापि बाह्यं यानं प्रति गवामस्त्येव लक्षणभावः। अनुगुशब्दात्प्रत्ययेऽभिधातव्ये निपातनाश्रयणं प्रसिद्ध्युपसंग्रहार्थम्, तेन यद्गवां बाह्यं तत्रैव भवति ।।

द्विस्तावा त्रिस्तावा वेदिः ।। 5.4.84 ।।
समासश्च निपात्यत इति। लक्ष्णाभावात्। यावती प्रकृततावित्यादिना निपातनस्य विषयं दर्शयति, यस्मिन्कर्मण्युपदिष्टा धर्माः कर्मान्तरेणोपजीव्यन्ते सा प्रकृतिर्ज्योतिष्टोमादिः, येनोपजीव्यते सा=विकृतिः। कस्याञ्चिद्विकृताविति। अश्वमेधादौ। द्विस्तावेति। तावतीशब्देन तत्सम्बन्धिन्या वृत्तिर्लक्ष्यते, सैव च द्विशब्दनं संख्यायत इति सुच् प्रत्ययः, परस्परसामर्थ्य च। द्विस्तावतीत्यसमासोऽयम्। सूत्रे लिङ्गमविवक्षितमअ। द्विस्तावोऽग्निरित्यपि दृश्यते। न चात्राग्निरमिधियते, न वेदिः? अग्निरपि वेदिरेव; उत्तरवेदिविकारत्वात्, `उत्तरवेद्यामग्निशचीयते' इति वचनात् ।।

उपसर्गादध्वनः ।। 5.4.85 ।।
अध्वशब्दस्याक्रियावचनत्वात्तं प्रत्युपसर्गसंज्ञाभावादुप सर्गग्रहणं प्राद्युपलक्षणम् ।।

तत्पुरुषस्याङ्गलेः संख्याव्ययादेः ।। 5.4.86 ।।
अङ्गुलिशब्दान्तस्येत्यादि। सर्वत्र समासान्तसम्बन्धे षष्ठी ।।

अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः ।। 5.4.87 ।।
अहर्ग्रहणं द्वन्द्वार्थमिति। न तु तत्पुरुषार्थम्; मुख्यार्थवृत्तयोस्तत्पुरुषासम्भवात्। न ह्यस्ति सम्भवः- रात्रिश्चेति, नाप्यहोरात्रिरित्यस्ति। यदि तु रात्रिशब्देन तद्गुणमहरुच्यते अहः शब्देन तद्गुणा रात्रिः, ततः सम्भवेदपिविशेषणसमासः। गौणार्थता तु भवति। न च मुख्ये सम्भवति गौणस्य ग्रहणं युक्तम्, तस्मादहर्ग्रहणं द्वन्द्वार्थम्। तथा च--`हेमन्तशिशिरावहोरात्रे च छन्दसि' इति द्वन्द्वे समासान्तो निर्द्दिष्टः। अहोरात्र इति। समाहारद्वन्द्वः, `रात्राह्नाहाः पंसि', अह्नो रुत्वे `रूपरात्रिरथन्तरेषु' इति नकारस्य रुत्वम्, तस्य `हशि च' इत्युत्वम्। द्विरात्र इति। समाहारे द्विगुः। नीरात्र इति। प्रादिसमासः, `ढ्रलोपे पूर्वस्य दीर्घोऽणः' ।।

अह्नेऽह्न एतेभ्यः ।। 5.4.88 ।।
तस्मिन्परभूत इति। समासान्तप्रकरणात्तत्र परतोऽयमादेशो विज्ञायते, न तदपवादः स च टजेव विहित इति सामर्थ्यादयमर्थो लभ्यते, व्याख्यानाच्चाह्नादेशः। स्वयं समासान्तो न विज्ञायते `ऊधसोऽनङ्' इत्यादिवत्। सामर्थ्याच्चेत्यादि। सामासान्तो नविज्ञायते `ऊधसोऽनह्' इत्यादिवत्। सामर्थ्याच्चेत्यादि। सामर्थ्यमेव दर्शयति। न हीति। एकशेषविधानाद् द्वन्द्वस्तावन्न सम्भवति, तेनैव तस्यासम्बन्धान्न षष्ठीसमासः, नापि विशेषणसमासः, न हि तदेव तस्य विशेषणं सम्भवति। एतेन बहुव्रीहिर्व्याख्यातः। द्व्यह्न इति। तद्धितार्थे समासः, `तत्र भवः' इत्यण्, तस्य `द्विगोर्लुगनपत्ये' इति लुक्। सर्वाह्न इति। `अह्नोऽदन्तात्' इति णत्वम्।

अह्नोऽह्नवचनानर्थक्यम्, अह्नष्टखोर्नियमवचनात्,`अह्न एतेभ्यः' इत्येतावदेव सूत्रं कर्त्तव्यम्, अजनुवर्त्तते, एतेभ्यः परो योऽहन्शब्दस्ततोऽज्भवति, टचोऽपवादः, तत्राचि कृतेऽह्नष्टखोरेवेति नियमाट्टिलोपाबावेऽल्लोपे सति द्वयह्न इत्यादि सिध्यति, `रात्राह्नाहाः पुंसि' इति वचनात् स्त्रियां प्रवृत्त्यभावाट्टजचोरविशेषः। `एतेभ्यः' इति वचनं संक्याव्ययार्थम्; इतरथा चानुकृष्टत्वान्न सम्बद्ध्येत ।।

न सङ्खयादेः समाहारे ।। 5.4.89 ।।
`सङ्खयादेः' इति न वक्तव्यम्; अन्यस्य समाहारे वृत्त्यसम्भवात् ।।

उत्तमैकाभ्यां च ।। 5.4.90 ।।
केचितत्वित्यादि। यथा `प्रथमयोः' इति प्रथमाद्वितीययोर्ग्रहणं द्विवचननिर्द्देशात्, तथैवात्राप्युत्तमग्रहणसामर्थ्यादुपोत्तमोत्तमयोर्द्वयोरपि ग्रहणमिति तेपामभिप्रायः। अत्र पक्षे उत्तमौ द्वावेकश्चापर इति बहुवचनप्रसङ्गात् सौत्रो द्विवचननिर्देशः। एकशब्दस्यापूर्वनिपातः `अल्पाच्तरम्' इत्यस्यानित्यत्वज्ञापनार्थः ।।

राजाहस्सखिभ्यश्टच् ।। 5.4.91 ।।
इह कस्मादिति। किं च स्याद्यद्यत्र टच् स्यात् ? `भस्याढे तद्धिते' इति पुंवद्भावेन ङीपि निवृत्ते टचि टिलापे सति टित्त्वान्ङीपि मद्रराजीति स्यात्, भद्रराज्ञीति चेप्यते। तस्मादत्र टचोऽनुत्पतिवक्तव्येति भावः। टचश्चित्करणमन्तोदात्तार्थम्; अन्यथा प्रययस्य समासेकदशत्वाद्विधुरः, प्रधुर इत्यादाविव प्रत्ययस्वरोऽव्ययपूर्वपदप्रकृतिस्वरेण बाध्येत ।।

गोरतद्धितलुकि ।। 5.4.92 ।।
पञ्चगवामिति। समाहारे द्विगुः, पञ्चगुरित्यत्र तद्धितार्थे। पञ्चगवरूप्यम्, पञ्चगवमयमिति। यथात्र `द्विगोर्लुगनपत्ये' इति रूप्यमयटोर्लुग्न भवति तथा तत्रैवोक्तम् ।।

अग्राख्यायामुरसः ।। 5.4.93 ।।
`अग्राख्यायाम्' इति पञ्चम्यर्थे सप्तमी, पञ्चम्यन्तेनोरः शब्देन सामानाधिकरण्यात्। सामानाधिकरण्यं तु `स चेदुरःशब्दः' इत्यादिना दर्शितम् ।।

अतेः शुनः ।। 5.4.94 ।।
जवन इत्यर्थ इत्यादि। विषयविशेषादियमर्थव्यवस्था श्वशब्दस्य ।।

उपमानादप्रणिषु ।। 5.4.97 ।।
अश्वा लोष्ट इति। अत्र ` नञस्तत्पुरुषात्' इति प्रतिषेधेन भाव्यम्, तस्मान्निः श्वा लोष्ट इति प्रत्युदाहर्त्तव्यम् ।।

खार्याः प्राचाम् ।। 5.4.101 ।।
द्विखारीति। टजभावपक्षे नपुंसकह्नस्वत्वम्।
अयं योगः शक्योऽवक्तुम् त्रिखारमिति? खारीशब्देन समानार्थः खारशब्दोऽस्ति यथा च `तदस्य परिमाणम्' , `संख्यायाः संज्ञा' इत्यत्र `अन्येभ्योऽपि दृश्यते खारशताद्यर्थम्' इति वार्तिकम् ।।

द्वित्रिभ्यामञ्जलेः ।। 5.4.102 ।।
द्वाभ्यामञ्जलिभ्यां क्रीतो द्वयञ्जलिरिति। अञ्जलिपरिमितो व्रीह्यादिरञ्जलिः; न पाणिद्वयम्, तस्य मुल्लत्वासम्भवात्। ततश्च परिमाणत्वात्प्राग्वतीयस्य ठकः `अध्यर्द्धपूर्व' इति लुक्। द्व्यञ्जलिप्रिय इति। व्यवस्थइतविभाषात्वादुत्तरपदद्विगोर्न भवतीत्याहुः ।।

अनसन्तान्नपुंसकाच्छसि ।। 5.4.103 ।।
सुत्रामाणमिति। सुष्ठु त्रायते इति `आतो मनिन्', उपपदसमासः। अनेहसमिति। `नञ्याहन एह च' इत्याङ्पूर्वाद्धन्तरेसिप्रत्ययः, धातूपसर्गयोश्चेहादेशः, नञ उपपदसमासः, द्वितीयैकवचनम्।
अन्तग्रहणं विस्पष्टार्थम् ।।

ब्रह्मणो जानपदाख्यायाम् ।। 5.4.104 ।।
अन्तरेणापि भावप्रत्ययं जानपदशब्दो भावप्रधानः, `द्व्येकयोः' इतिवदित्याह-समासेन चेद् ब्रह्मणो जानपदत्वमाख्यायते इति। यद्यप्येकं ब्रह्मग्रहणम्, तेन च समासो विशेषितः, तथापि प्रत्यासत्तेर्ब्रह्मण एव जानपदत्वं विशेषणं विज्ञायते, तस्मादेतत्प्रत्ययविधानमिति। तत एव हि प्रत्ययविदाने ब्रह्मणो जानपदत्वं शक्यमाख्यातुम्।
देवब्रह्मेति। षष्ठीसमासः, कर्मधारो वा ।।

द्वन्द्वाच्चुदषहान्तात्समाहारे ।। 5.4.106 ।।
तत्पुरुषान्मा भूदिति। तत्पुरुषादेव मा भूदित्यर्थः। `द्वन्द्वात्' इत्यनुच्यमाने हि तत्पुरुषाधिकारो न निवर्त्तेत ।।

अव्ययीभावे शरत्प्रभृतिभ्यः ।। 5.4.107 ।।
जराया जरस् चेति। जराशब्दादच् प्रत्ययो भवति, अव्ययीभावे जरसादेशश्च--उपजरसम्। प्रतिपरसमनुभ्योऽक्ष्णं इति। प्रादिभ्यः परो योऽक्षिशब्दस्ततष्टज्भवति, तत्र परशब्दस्याव्ययीभावसम्भवात्तत्पुरुषाथ ग्रहणम्। प्रत्यक्षमिति। `यथार्थे यदव्ययम्' इति वीप्सायामव्ययीभावः, परक्ष्मणः परोक्षम्, `परोक्षे लिट्' इति निर्द्देशात्पञ्चमीसमासः, उपसर्जनस्य च परनिपातः, अक्ष्यकारस्य चोत्वम्। अक्षियोग्यम्=समक्षम्, यथार्थे योग्यतायामव्ययीभावः। अन्वक्षमिति। पश्चादर्थेऽव्ययीभावः।।

नपुंसकादन्यतरस्याम् ।। 5.4.109 ।।
नपुंसकग्रहणमुत्तरपदविशेषणमिति। नाव्ययीभावविशेषणम्; अव्यभिचारात् ।।

नदीपौर्णमास्याग्रहायणीभ्यः ।। 5.4.110 ।।
`नदि' इति स्वरूपग्रहणम्, न संज्ञायाः; पौर्णमास्याग्रहायण्योः पृथग्ग्रहणात् ।।

झयः ।। 5.4.111।।
झय इति प्रतयाहारग्रहणमिति। झकारयकारयोस्तु ग्रहणं न भवति; तदन्तस्याव्ययीभावस्यासम्भवात्। योगविबागश्चिन्त्यप्रयोजनः ।।

गिरेश्च सेनकस्य ।। 5.4.112 ।।
अन्तर्गिरमिति। विभक्तयर्तेऽव्ययीभावः। विकल्पोऽनुवर्त्तत एवेति। अन्यथा केषाञ्अचिज्झयन्तानां शरत्प्रभृतिषु पाठोऽनर्थकः स्यात्; `झयः' इत्यनेनैव सिद्धत्वात्। एतेनैतन्न चोदनीयम्---`द्वयोर्विभाषयोर्मध्ये नित्या विधयः' इति पूर्वस्य विधेर्नित्यत्वार्थमिदं सेनकग्रहणं स्यादिति ।।

ब्रह्मव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।। 5.4.113 ।।
स्वाङ्गमद्रवादिलक्षणं पारिभाषिकं गृह्यते। दुःश्लिष्टविभक्तीनीति। दुर्=निन्दायाम्। निन्दितं यथा तथा श्लिष्टाः सम्बद्धाः विभक्यो येषु तानि तथोक्तानि, तथा हि--बहुव्रीहिशब्दात्पञ्चम्या भवितव्यम्, समासान्तसम्बनधे षष्ठ्या वा, यथा--`तत्पुरुषस्याह्गुलेः' इति; इह तु सप्तम्येकवचनं श्रुतम्। `सक्थ्यक्षणेः' इति षष्ठीद्विवचनम्, सप्तमीद्ववचनं वा। न चैवम्भूतेनानेन बहुव्रीहिः शक्यो विशेषयुतुम्; भिन्नविभक्तिवचनत्वात्। स्वाङ्गादिति पञ्चम्येकवचनम्, तच्च न सक्थ्यक्षणोः समानाधिकरणं विशेषणमवकल्पते, तत्चाभिप्रेतम्। तस्माद्विभक्तिव्यत्ययमाश्रित्य विभक्तयः सम्बन्धयितव्या इति `दुःश्लष्टविभक्तीनि' इत्युक्तम्। स्थूलाक्षिरिक्षुरिति। `अक्ष्णोऽदर्शनात्' इत्यचात्र भवितव्यम्। यदि तु नेष्यते, समासान्तविधिरनित्य इति वक्तव्यम्; तत एव तर्हि षजपि न भविष्यति। तस्मात्स्थूलाक्षा, सूक्ष्माक्षा वेणुयष्टिरिति अजेव टापि प्रत्युदाहर्त्तव्य इत्याहुः। दीर्घसक्थीति। दीघ सक्थ्यस्याः सा दीर्घसक्थी, अत्र षचि सतिक ङीषुदात्तो भवति, टचि तु सति ङीबनुदात्तः स्यात्। ननु टचश्चित्करणमन्तोदात्तार्थम्, ततश्च ङीबप्युदात्तनिवृत्तिस्वरेणोदात्त एव भविष्यति ? तत्राह--सक्यं चाक्रान्तादित्यादि। विभायेति। `विभाषोत्पुच्छ' इत्यतोऽनुवृत्तेः षचश्चित्करणमक्ष्यर्थम्। सक्थ्यपि यदाक्रान्तात्परं तदा नित्यमन्तोदात्तं भवति--चक्रसक्थः, वक्रसक्थ इति। गौरसक्थादौ तु नार्थश्चित्करणेन ।।

अङ्गुलेर्दारुणि ।। 5.4.114 ।।
अङ्गलिसदृशावयवमित्यादि। दारुणि समासार्थे मुख्याभिरङ्गुलीभिः सम्बन्धो नोपर्पद्यत इति भावः।
ननु च द्वे अङ्गुली प्रमाणमस्य दारुण इत्यत्र सम्भवति? तत्राह--यस्य त्वलित्यादि। इह च बहुव्रीहेरयं प्रत्ययो विधीयते, त्वदुक्ते चोदाहरणे तद्धितार्थे तत्पुरुषः कर्त्तव्यः, तत्र च `तत्पुरुषस्याङ्गुलेः' इत्यचा भवितव्यम्। तस्माद्बहुव्रीहौ दारुणि वाच्ये गौण एवाङ्गुलिशब्द इति सुष्ठूक्तमित्यर्थः ।।

द्वित्रिभ्यां ष मूध्नः ।। 5.4.115 ।।
अथ किमर्थ षः प्रत्ययान्तरं क्रियते, न प्रकृतः षजनुवर्त्तिष्यते? द्विमूर्द्धः, त्रिमूर्द्ध इत्यत्र `द्वित्रिभ्यां पाद्दन्मूर्द्धसु' इति पाक्षिकमन्तोदात्तत्वं यथा स्यात्। षचि तु सति चित्त्वान्नित्यमन्तोदात्तत्वं स्यात्। `द्वित्रिभ्यां पाद्दन्मूर्द्धशु बहुव्रीहौ' इत्यस्य तु समासान्तविधेरनित्यत्वात्तदभावे द्विमूर्द्धा, `त्रिमूर्द्धान सप्तरश्मिं गृणीषे' इति, सोऽवकाशः स्यात्। षे तु सति यदापि समासान्तः क्रियते, तदापि पक्षेऽन्तोदात्तत्वम्, पक्षे पूर्वपदप्रकृतिश्वरेणाद्यदात्तत्वमिति स्वरद्वयसिद्धिः। अनित्यत्वं च षविधानादेव विज्ञायते। नित्ये हि सति प्रकृते षच्यपि विहिते द्वित्रिभ्यामपि स्वरः प्राप्तमिभाषारूपेण चित्स्वरं वाधिष्यते; विषयान्तराभावात्। अनित्यत्वे तु समासानाताभावपक्षे सावकाशम् `द्वित्रिभ्याम्' इति स्वरं चित्स्वरो वाधेतेति प्रत्ययान्तरकरणमर्थवद्भवति। एवं च कृत्वा मूर्धस्विति नकारान्तनिर्दश उपपन्नो भवति; अन्यथा `सक्यं चाक्रान्तात्' इतिवदकारान्तमेव निद्दिशेत्। यदि नकारान्तो निर्द्दिश्यते,कथं समासान्ते कृते भवति? नैप दोपः; वक्ष्यति हि तत्र-- `यदापि समासान्तः क्रियते तदा बहुव्रीहेः कार्यित्वात्तदेकदेशत्वाच्च समासान्तस्यान्तोदात्तत्वं भवत्येव' इति ।

अप्पूरणीप्रमाण्योः ।। 5.4.116 ।।
पूरणप्रत्ययान्त इति। `तस्य पूरणे डट्' इत्येवमादयः पूरणार्थे ये प्रत्यया विहितास्तदन्ता इत्यर्थः। स्त्रीलिङ्गा इति। `पूरणी' इति ङीपा निर्द्देशात्। पूरणीग्रहणेन गृह्यन्ते इति। पूरणार्थसाहचर्यात्।
अपि प्रधानपूरणीग्रहणमिति। अपि विधीयमाने प्रधानं या पूरणी सा गृह्यत इति वक्तव्यमित्यर्थः। क्वच पुनः पूरण्याः प्रादान्यम्? इत्यत आह--यत्रेति। न केवलं वर्त्तिपदार्थ एवेति। समासावयवभूतं पदं वर्त्तिपदम्, तस्यार्थो वर्त्तिपदार्थः. प्रथमान्तं चैतत्, न सप्तम्यन्तम्। पूरणीत्येतदनुषज्यते, न पुनरनुप्रविशतीति। तत्रोदाहरणे उद्भूतावयवबेदस्य समुदायस्य कृतैकशेषेण रात्रिशब्देनाभिधानाद्रात्रिषु पञ्चम्या अन्तर्भावः। कल्याणपञ्चमीकः पक्ष इति। `नद्यृतश्च' इति अप्। अत्र वर्तिपदार्थ एव पूरणी, न त्वन्यपदार्थः; तिरोहितावयवलभेदस्य पक्षस्यान्यपदार्थत्वात्। यथा-वृक्षशब्दस्यावयव्यभिदेयः, न तु शाखादयोऽवयवाः; अनुमीयमानस्याशब्दार्थत्वादित्यप्राधान्यं पूरण्याः।
नेतुर्नक्षत्र इति। यो नेतृशब्दस्तदन्ताद्बहुव्रीहेरित्यर्थः। छन्दसि चेति। अनक्षत्रार्थमिदम्। पञ्चकमासिक इति। पञ्चभृतिरस्य मासस्य पञ्चको मासः, सोऽस्यांखवस्नभृतयः' इति संख्याया कन्, पञ्चको मासोऽस्येति बहुव्रीहौ कृतेटच्। अपः पित्कस्णं यत्र बहुव्रीहावन्तोदात्तत्वमारम्यते तद्बाधनार्थम्-- अपञ्चमाः, सुपञ्चमाः, `नञ्सुभ्याम्' इत्यन्तोदात्तत्वं न भवति ।।

अञ्नासिकायाः संज्ञायां नसं चास्थूलात् ।। 5.4.118 ।।
नसमिति। द्वितीयानिर्द्देशो वैचित्र्यार्थः। द्रणस इति। द्रुरिव नासिकास्य `पूर्वपदात्संज्ञायागः' इति णत्वम्। वध्रे भवा वाध्री, सा नासिकास्य वाध्रीणसः, `वृद्धिनिमित्तस्य च तद्धइतस्य' इति पुंवद्भावप्रतिषेधः। गौरिव नासिकाऽस्य गोनसः।
खुरखराभ्यां नस् वक्तव्य इति। केवलादेशवचनं प्रत्ययनिवृत्त्यर्थम्। खुरणाः, खरणा इति। `अत्वसन्तस्य च' इति दीर्घः।
शितिः कृष्णा नासिकास्य शितिनाः, अहेरिव नासिकाऽस्य अहिनाः। अर्चा=प्रतिमा, तस्या इव नासिकास्य अर्चनाः, `ङ्यापोः संज्ञाछन्दसोः' इति ह्रस्वत्वम् ।।

उपसर्गाच्च ।। 5.4.119 ।।
उपसर्गग्रहणं प्राद्युपलक्षणम्; नासिकां प्रति क्रियायोगाभावात्। वेर्ग्रो वक्तव्य िति। विशब्दात्परस्य ग्रशब्द आदेशो भवति; प्रत्ययस्त्वजेव ।।

सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ।। 5.4.120 ।।
टिलोपादिकमिति। सुप्रातः, सुख्व इत्यत्र टिलोपः। `अव्ययानां भमात्रे टिलोपः' इत्येतत्तु नाश्रितम्। आदिपदेन णणीपदाजपदयोः पद्भावः। शोभनं प्रातरयेति। प्रातः शब्दस्याधिकरणप्रधानत्वात्सामानाधिकरण्याभावात्, प्रातस्तनं कर्म प्रातःशब्देन लक्ष्यते, देवदत्तादिश्चान्यपदार्थ इत्याहुः। कथं च `वरदः करोतु सुप्रातमह्नामयं नायकः' इति? न ह्ययं बहुव्रीहिः, शोभनं प्रातस्तवार्कः करोत्विति ह्यत्रार्थ? उच्यते; शोभनं प्रातस्तनं कर्म यस्य सन्ध्यादेस्तत्ते करोत्विति क्लेशेनास्य निर्वाहः ।।

नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ।। 5.4.121 ।।
हलिग्रहणमनर्थकम्? कथमहलः, सुहल इति? अकारान्तो हलशब्दोऽस्ति? नन्वर्थभेदोऽस्ति-महद्धलं हलिरित्युच्यते, हलमात्रं तु हलम्? नायमर्थभेदः किञ्चित्करः, क्रियमाणेऽपि हलिग्रहणे हलशब्देनापि समासो न दण्कडवारितः, ततश्च प्रकरणादिवशेन विशेषोऽवगन्तव्यः; सति चैवमकारान्तेनापि समासे प्रकरणादिनैव महस्वमवगंस्यते? इह तर्हि---दुर्हल इत्यकारान्तेनापि समासे पूर्वपदप्रकृतिस्वरः प्राप्नोति, समासान्ते तु विहिते चित्स्वरो भवति। अहलः, सुहल इत्यत्र `नञ्सुभ्याम्' इत्यन्तोदात्तविधानान्नास्ति विशेषः। `शेषाद्विबाषा' इति च हलिशब्दात्कप् प्रत्ययः प्रसज्येत; तस्माद्धलिग्रहणम्। केचित्तु हलिशक्त्योरिति पठन्ति। अस्थिपर्यायः शक्तिशब्दः ।।

नित्यमसिच् प्रजामेधयोः ।। 5.4.122 ।। असेवायं न विहितः, सकास्येत्संज्ञा मा भूदिति।
एवं तर्हीत्यादि। भाष्ये एतन्नाश्रितम्। चित्करणम्--दुःप्रजाः, दुर्मेधा इत्यत्रान्तोदात्तार्थम्। अन्यत्र `नञ्सुभ्याम्' इत्येव सिद्धम् ।।

धर्मादनिच् केवलात् ।। 5.4.124 ।।
परमः स्वो धर्मोऽस्य परमस्वधर्म इति। `सर्वनामसंख्ययोरुपसंख्यानम्' इति स्वशब्दस्य पूर्वनिपातो न भवति; प्राप्तस्य चाबाधा व्याख्येयेति, आहिताग्न्यादेराकृतिगणत्वाद्वा ।।

जम्भा सुहरिततृणसोमेभ्यः ।। 5.4.125 ।।
दन्तवचनो वेति। `इममम्भसुतं पिब' इति दर्शनात् ।।

दक्षिणेर्मा लुब्धयोगे ।। 5.4.126 ।।
लुब्धो वयाध इति। कवयस्तु हिंसामात्रे प्रयुञ्जते--`बालीहेमाब्जमाली गुणनिधिरिषुणा निर्मितो दक्षिणेर्मा' इति यथा। व्रणितमिति। व्रणशब्दादितच्। `व्रम गात्रविचूर्णने' इत्यस्माद्वा चौरादिकणिजन्तात्क्तः ।।

इच् कर्मव्यतिहारे ।। 5.4.127 ।।
अयं बहुव्रीहिर्गृह्यत इति। अस्यैव कर्मव्यतिहारे वृत्तेः। उदारहरणेषु `अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घत्वम्। तिष्ठद्गुप्रभृतिष्वयमिच् पठ्यते इति। तेनाव्ययीभावसंज्ञकत्वादव्ययत्वे सति सुब्लुग्भवतीति भावः। यद्येवम्, अव्ययीभावसंज्ञया बहुव्रीहिसंज्ञाया बाधनात्समासस्वरेणैवान्तोदात्तत्वं सिद्धमिति नार्थश्चित्करणेन? विशेषणार्थं तु। असति हि तस्मिंस्तिष्ठद्गुप्रभृतिष्विकारमात्रं पठ्येत, ततश्च `अच इः' इत्यस्यापि ग्रहणं स्यात् ।।

द्विदण्ड्यादिभ्यश्च ।। 5.4.128 ।।
यदि `द्विदण्कड्यादयः साधवो भवन्ति'--इत्ययमर्थोऽभिप्रेतः, `द्विदण्ड्यादिभ्यः' इति सूत्रपदस्य कथं निर्वाहः? अत आह-द्विदण्ड्यादिभ्य इति। तादर्थ्य एषा चतुर्थीत्यादि। समुदायनिपातनाच्येति। समुदाया यत्र प्रसिद्धास्तत्रैव तेषामवरोधः=अवस्थापनं यथा स्यादित्येवमर्थं समुदायनिपातनमित्यर्थः। द्विदण्कडि प्रहरतीति। द्वौ दण्डावस्मिन्प्रहरणे इति विग्रहः। इह न भवतीति। किं न भवति? द्विदण्डीत्येतच्छब्दरूपं साधु न भवतीत्यर्थः।
बहुव्रीह्यधिकारेऽपीति। अत्रापि `समुदायनिपातनाच्च' इत्ययमेव हेतुः। ननु प्रातिपदिकेष्विच्प्रत्ययान्तपाठादेव सिद्धं द्विदण्ड्यादीनां साधुत्वम्, तत्किमनेन? तन्न; न हि पाठमात्रेणेजन्तत्वं शक्यमवगन्तुम्; ततश्चाव्ययीभावसंज्ञा न स्यात्। अनार्षश्च पाठः शङ्क्येत; क्वचिदप्यनुपयोगात् ।।

प्रसम्भ्यां जानुनोर्ज्ञः ।। 5.4.129 ।।
ज्ञुरित्ययमादेश इति। प्रत्ययस्त्वयं न भवति; षष्ठीद्विवचनेन निर्देशात्। इह हि जानुशब्दस्यैकत्वेऽपि अर्थगतं द्वित्वम्, उपपदनिबन्धनं वा द्वित्वमाश्रित्य जानुनोरिति निर्देश एतदर्थ- क्रियते--स्थानषष्ठीत्वमसन्दिग्धं कथं विज्ञायेतेति। छन्दसि तु स्वतन्त्रोऽपि ज्ञुशब्दो दृश्यते--`उपज्ञुबाधो नभसा', `सदेम वत्सज्ञुं पशुकामस्य' इति ।।

ऊधसोऽनङ् ।। 5.4.130 ।।
ङित्करणादन्त्यादेशत्वम्, अकारादित्वं च निश्चित्याऽऽहअनङादेशो भवतीति। कुण्डोध्नीति। `बहुव्रीहेरूधसो ङीष्', `अल्लोपोऽनः'।
अनङ्विधानमुत्तरार्थम्, इह तु नकारादेशेनापि सिद्धम् ।।

गन्धस्येदुत्पूतिसुसुरभिभ्यः ।। 5.4.135 ।।
इकारादेशो भवतीति। षष्ठीनिर्द्देशादादेशत्वावसायः। प्रकरणभेदाय चादेशत्वं व्यवस्थाप्यते, न त्वस्मिन्प्रत्ययेऽपि कश्चिद्दोषः।

गन्धशब्दोऽयमस्ति द्रव्यवचनः---वहति जलमियम्, पिनष्टि गन्धानियमिति, अस्ति च गुणवचनः---चन्दनस्य गन्ध इति, तत्र गुणवाचिनो ग्रहणार्थमाहगन्धस्येत्त्वं इति। रूपादिसमुदायः=द्रव्यम्, तस्य गन्धलक्षणो गुण एकान्त एकदेशो भवति, ऊपादिव्यतिरिक्तमवयवि द्रव्यमिति तु पक्षे एकान्त इवैकान्तः; तत्स्थस्योपलम्भात्।
सुगन्ध आपणिक इति। आपणे नियुक्त आपणिकः; प्राग्वहतीयष्ठक्। भवार्थे वा अध्यात्मादित्वाट्ठक्। अथ वायौ कथं सुगन्धिः, दुगन्धिरिति, न ह्ययं गन्धो वायोर्गुणः? मा भूत्तस्य गुणः, तेन तावदविभागापन्नो लक्ष्यते, एतावदेव च तदेकान्तत्वं विवक्षितम्, न तद्गुणत्वम्। एवं च कृत्वा कुङ्कुमाद्यनुलेपनमपि यदा

देवदत्तादेरविभागपन्नं भवति तदेत्त्वं भवत्येव--सुगन्धिर्देवदत्त इति, सर्वथा द्रव्यवचननिवृत्तिः ।।

अल्पाख्यायाम् ।। 5.4.136 ।।
सुपोऽल्पोऽस्मिन्सूपगन्धीति। अर्थप्रदर्शनमेतत्, विग्रहस्तु सूपस्य गन्धो लेशोऽस्मिन्निति; इन्यथा विशेषणत्वाद् गन्धशब्दस्य पूर्वनिपातः स्यात्। यद्वा--अस्मादेव निपातनाद् गन्धशब्दस्य परनिपातः ।।

पादस्य लोपोऽहस्त्यादिभ्यः ।। 5.4.138 ।।
लोपो भवति समासान्त इति। यदि त्वयं समासान्तो न स्याद्, `आदेः परस्य' इत्यादेः स्यात्, `शेषाद्विभाषा' इति कप् च प्रसज्येत्; समासान्तापेक्षस्य शेषस्याश्रयणात्। कथं पुनरभावरुपोऽन्तावयवो भवति? तत्राह--स्थानिद्वारेणेति ।।

कुम्भपदीषु च ।। 5.4.139 ।।
बहुवचननिर्द्देशात्प्रभृत्यर्थोऽवगम्यत इत्याह-- कुम्भपदीप्रमृतय इति। समुदाया एव निपात्यन्त इति। कथं तर्हि सूत्रे भूतविभक्तया सप्तम्या निर्द्देशः? इत्यत आह--तत्रेति। विषयग्रहणेन सूत्रे विषयसप्तमीति दर्शयति---यथा कुम्भपद्यादयः सिद्ध्यन्तीति। यत्तदोर्नित्यसम्बन्धात्पूर्वत्र तथा लोपो भवतीत्यर्थो ग्राह्यः। किमर्थं पुनः समुदाया एव निपात्यन्ते, न कुम्भादीनेव गणे पठित्वा तेभ्यः परस्य पादशब्दस्य लोपो विधीयेत ? तत्राह--समुदायपाठस्य चेति। विषयनियममेव दर्शयति--स्त्रियामेवेति। अत्र च स्त्रियामपि ङीप्प्रत्यय एव। `पादोऽन्तरस्याम्' इति यदा ङीब्विषयभूतस्तदैवेत्यर्थः। यच्चेत्यादि। उपमानपूर्वपदम्-कुम्भपदी, जालपदीत्यादि; संख्यापूर्वपदम्एकपदी, शतपदीति। अष्टापदीति पठ्यते, तत्र निपातनाद्दीर्घत्वम्, `अष्टनः संज्ञायाम्' इति वाऽऽकारः ।।

वयसि दन्तस्य दतृ ।। 5.4.141 ।।
द्वितन्निति। ऋकारस्योग्त्कार्यार्थत्वाद् `उगिदचाम्' इति नुम् ।।

त्रियां संज्ञायाम् ।। 5.4.143 ।।
अच्छन्दोऽर्थमिदम्। अयोगतीति। अय इव दन्ता अस्या अयोदती, उगित्त्वान्ङीप्। समदन्तीति। `नासिकोदरोष्ठ' इत्यादिना ङीष् ।।

विभाषा श्यावलारोकाभ्याम् ।। 5.4.144 ।।
अरोको निर्दीप्तिरिति। `रुच दीप्तौ',रोचनम्=रोकः, स न विद्यते यस्येति कृत्वा ।।

अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ।। 5.4.145 ।।
चकारोऽनुक्तसमुच्चयार्थः।
अहिदन्नित्यादि। भाष्ये एतन्नाश्रितम् ।।

ककुदस्यावस्थायां लोपः ।। 5.4.146 ।।
कालादिकृता इति। सादिशब्देनाहारपरिणामादेर्ग्रहणम् ।।

त्रिककुत् वर्तते ।। 5.4.147 ।।
पर्वतेऽन्यपदार्थे मुख्यस्य ककुदस्यासम्भवादाह--ककुदाकारं श्रृङ्गमित्यादि। न चेत्यादि। उच्यत इत्यस्यानुषङ्गः। संज्ञैषेत्यादि। एतच्च निपातनाल्लभ्यते। एवं च पर्वतग्रहणं विस्पष्टार्थम् ।।

अरःप्रभृतिभ्यः कप् ।। 5.4.151 ।।
व्यूढोरस्कः, प्रियसर्पिष्कः। इति। `सोऽपदादौ', `इणः षः', उपपूर्वान्नह्यतेः सम्पदादित्वात्कर्मणि क्विप्, उपनद्धा उपानत्, `नहिवृति' इति दीर्घः, अवमुक्ते उपानहौ येन सोऽवमुक्तोपानत्कः। `नहो धः' जश्त्वचर्त्त्वे ।।
विकल्प एव भवतीति। लक्ष्मीशब्दात् `नद्यृतश्च' इति नित्यः कब् न भवति; एकवचनान्तपाठस्य नियमार्थत्वात्। अर्थान्नञ इति। नञः परो योऽर्थशब्दस्तदन्ताद्बहुव्रीहेर्नित्यं कब्भवति। नास्यार्थोऽस्ति अनर्थमः ।।

इनः स्त्रियाम् ।। 5.4.152 ।।
`अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधं प्रयोजयन्ति' ।।

नद्यृतश्च ।। 5.4.153 ।।
नद्यन्ताद्बहुव्रीहेरिति। अत्रान्तशब्द उत्तरपदे वर्त्तते, नद्युत्तरपदाद्बहुव्रीहेरित्यर्थः। यद्वा--बहुव्रीह्यर्थमुत्तरपदं बहुव्रीहिः, तस्मान्नद्यन्तादित्यर्थः। किं सिद्धं भवति? बहुग्रामणीर्नगरी,बहुखलपूर्नगरीत्यत्र कब् निवर्त्तितो भवति ।।

शेषाद्विभाषा ।। 5.4.154 ।।
यस्माद्बहुव्रीहेरिति। कर्मणि ल्यब्लोपे एषा पञ्चमी, बहुव्रीहिमाश्रितयेत्यर्थः, तेन यत्राप्यादेशः समासान्तः--व्याघ्रपात्, सुगन्धिः, कुण्डोध्नीति; असावपि शेषो न भवति। प्रत्ययप्रायत्वाद्वा समासान्तस्य `यस्मात्' इत्युक्तम्।
इह शेषः कबपेक्षो वा स्याद्, अनन्तरो यो बहुव्रीह्यधिकारस्तदपेक्षो वा, समासान्तमाक्षत्रापेक्षो वा-इति त्रयः पक्षाः सम्भवन्ति। तत्राद्ये पक्षे-व्याघ्रपात्, सुगन्धिः, द्विदशाः, अनृचः, विधुर इत्यादौ नित्यकब्विषयवर्जं सर्वत्र प्रसज्येत। शेषग्रहणं चानर्थकम्, न हि नित्यकब्विषये विकल्पप्रसङ्गः;
नित्यकविधेरानर्थक्यप्रसङ्गात्। द्वितीयेऽपि द्विद्शा इत्यादौ स्यादेव प्रसङ्ग इति मन्यमानस्तृतीयं पक्षमाश्रयति--समासान्तो न विहित इति। बहुखट्वक इत्यादौ `आपोऽन्यतरस्याम्' इति ह्रस्वः, बहुखट्व इत्यादौ `गोस्त्रियोरुपसर्जनस्य' इति।
कथमित्यादि। यदि समासान्तापेक्षः शेष इति प्रश्नः। विशेषे स इष्यत इति। ततश्च विषयान्तरे सूक्ते सामनि च बहुव्रीहेः समासान्तापेक्षं शेषत्वमस्त्येवेति भावः। किमर्थं पुनः शेषग्रहणम्, यावता यत्र समासान्ता विहितास्तत्र त एव बाधका भविष्यन्ति, अनवकाशा विधयो बाधका भवन्ति, सावकाशाश्च ते, कोऽवकाशः ? विभाषा कप्, यदा न कप् सोऽवकाशः--कपोऽप्यन्याः प्रकृतयः; विशेषप्रकृतिभ्य उभयप्रसङ्गे परत्वात्कप् स्यात्। तस्माच्छेषग्रहणम् ।।

ईयसश्च ।। 5.4.156 ।।
सर्वा प्राप्तिः प्रतिषिद्ध्यत इति। न तु `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति शेषलक्षणस्यैव कपः प्रतिषेध इति सर्वशब्दस्यार्थः। एतच्च शेषादित्येतस्य निवृत्तत्वात्कब्मात्रस्यानुवृत्तेर्लभ्यते। बहुश्रेयसीति। लिङ्गविशिष्टग्रहणादत्र प्रतिषेधः। यथात्र सोर्हल्ङ्यादिलोपः, तथा तत्रैव वक्ष्यामः। ह्रस्वत्वमपि न भवतीति। `गोस्त्रियोरुपसर्जनस्य' इति प्राप्तम्। कस्मात्? इत्याह--ईयसो बहुव्रीहावित्यादि। पुंवद्वचनेनात्र न स्त्रीप्रत्ययस्य निवृत्तिर्विवक्षिता, किं तर्हि? ह्रस्वप्रकरणात्तदभावः। तथा च `गोस्त्रियोः' इत्यत्र वृत्तौ-`ईयसो बहुव्रीहौ प्रतिषेधो वक्तव्यः' इत्येवोक्तम् ।।

वन्दिते भ्रातुः ।। 5.4.157 ।।
वन्दितः स्तुत इति। यद्यपि `वदि अभिवादनस्तुत्योः' इत्यभिवादनेऽपि वदिः पठ्यते, तथापि व्याख्यानात्स्तुत्यर्थस्यैव ग्रहणमिति दर्शयति। तेन वन्दितभ्रातृक इत्यत्र कब्भवत्येव ।।

नाडीतन्त्र्योः स्वाङ्गे ।। 5.4.159 ।।
नाडीशब्दो जातिलक्षणङीषन्तः। तन्त्रीशब्दः `अवितृस्तृतन्त्रिभ्य ईः' इतीकारान्तः। बहरुनाडिरिति। उपसर्जनह्रस्वम्। बहुतन्त्रीरित्यत्र तु `कृत्स्त्रियाः प्रतिषेधः' इति वचनान्न भवति ।।

निष्प्रवाणिश्च ।। 5.4.160 ।।
प्रोयतेऽस्यामिति प्रवाणीति। वेञोऽधिकरणे ल्युट्, `कृत्यचः' इति णत्वम् ।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां पञ्चमास्याध्यायस्य चतुर्थ पादः
------------*****-------------

6.1

काशिकावृत्ती
अथ षष्ठाध्याये प्रथमः पादः

एकाचो द्वे प्रथमस्य ।। 6.1.1 ।।
इह यद्यपि स्वार्थत्वे सम्भवति पारार्थ्यमयुक्त्म्, विधेयकार्यिणोर्द्वयोर्निर्दे शात् सम्भवति च स्वार्थत्वम्, तथापि `लिटि धातोः' इत्यादौ विधेयानिर्द्देसेन वैयर्थ्यप्रसङ्गान्नायम् `अण्कुटिलिकायाः' इत्यादिवत्केवलो विधिः, नापि `शेषे' इत्यादिवल्लक्षणं चाधिकारश्च। तथा हि सति सर्वेषामेव शब्दानां प्रथमस्यैकाचोऽनेन द्विर्वचने सिद्धे `लिटि धातोः' इत्याहि व्यर्थ स्यात्। धातोर्लिञ्चेव, लिटि दातोरेव-इति नियमान्न वैयर्थ्यमिति चेत् ? न; विधिनियमसम्भवे विधेरेव ज्यायस्त्वात्। अस्च हि पारार्थ्येमिति चेत्? न; विधिनियमसम्भवे विधेरेव ज्यायस्तावात्। अस्य हि पारार्थ्योऽवम्भाविनि सति यथा तेषां विधित्वं तथास्य वर्णनं युक्तमतः परार्थ एवायम्। तत्रापि न परिभाषा-द्विर्वचनं विधीयमानं प्रथमस्यैकाचो वेदितव्यमिति; एवं हि सति `सर्वस्य द्वे' इत्यत्रैवास्य व्यापार इति तत्रैवैकाचः प्रथमस्येति वाच्यं स्यात्। `लिटि धातोः' इत्यादिकं च विधेयानिर्द्देशाद्व्यर्थ स्यात्। अतः पारिशेप्यात्स्वरितत्वाच्चाधिकार एवायमिति निश्चित्याह--एकाच इतदि चेति। अधिकारोऽयमिति वक्तव्ये पृथक् स्वरितत्वप्रदर्शनार्थमेवमुक्तम्। एतत्त्रितयमिति। तस्य प्रयोजनम्--यत्र यदपेक्षितं तत्र तस्य सम्बन्धः, यथा--`अजादेर्द्वितीयस्य' इत्यत्र `एकाचो द्वे' इति, `अभे अभ्यस्तम्' इत्यत्र `द्वे' इति, लिटि धातोरित्यादौ सर्व सम्बध्यते। इत उत्तरमित्यादि। अनन्तरोक्तस्यैव विवरणम्। प्राक् सम्प्रसारणविदानादिति। तत आरभ्य तु नास्य सम्बन्धः; विधेयान्तरनिर्देशात्स्वरिते कृते नाधिकार इति वा व्याख्यानात्।
सामान्येनोक्तमुदाहरणनिष्ठं दर्शयति--वक्ष्यतीति। अत्र यदि `धातोरेरेकाचः' इति सामानाधिकरण्येन सम्बन्धः स्यात्, पचिप्रभृतीनामेव स्यात्, न जागर्त्यादीनाम्। प्रथमग्रहणं चानर्थकं स्यात्, न ह्येकाचां धातूनां द्वितीयादिरेकाजस्ति। न च प्रथमस्य धातोरिति सम्बन्धः। तथा हि सति धातुपाठे प्रथमपठितस्य भवतेरेव स्यात्, ततश्च भवतिग्रहणमेव कर्तव्यं स्यात्। अथैकाचो धातोः प्रथमस्य वर्णस्येति सम्बन्धः ? तदयुक्तम्; सहनिर्द्दिष्टयोः सामानाधिकरण्यस्य स्वतः प्राप्तस्य त्यागायोगात्। अतो वैयधिकरण्येन सम्बन्ध इत्याह-दातोरवयवस्येति। द्वितीयस्य चेति। यद्यप्यत्र द्वितीयग्रहणं नास्ति, तथापि `लिटि धातोः' इत्यत्र त्वधिकृतमस्ति, तस्य चार्थः प्रदर्श्यते इति नासङ्गतं किञ्चित। जजागार-इत्यादीनि मुख्यगौणतया क्रमेणोदाहरणानि। एकाच इति यद्ययं तत्पुरुषः स्यात्तदा `धातोः' इत्यनेन सामानाधिकरण्यं चेत्? इयाय आरेत्यादावेव स्याद्, वैयधिकरण्ये तु पपाचेत्यादिषु भवदपि द्विर्वचनमज्मात्रस्यैव स्यात्, ततश्च `हलादिः शेषः', `शर्पूर्वाः खयः', `लिट्यब्यासस्योभ्येषाम्' इत्याद्यनुपपन्नं स्यात्। एकग्रहणं चानर्थकम, प्रथमस्याच इति विशेषणादेकस्य च धातोरनेकप्रथमाजसम्भवादच इत्येकत्वं वा विवक्षिष्यते, किमेकग्रहणेन ? तस्माद् बहुव्रीहिरयम्। तदाह--एकाच इति बहुव्रीहिनिर्देश इति। बहुव्रीहिणा विवक्षितस्यार्थस्य प्रतिपादनं बहुव्रीहेर्वा उच्चारणं बहुव्रीहिनिर्द्देषः। विग्रहप्रदर्शनं विस्पष्टप्रतिपत्त्यर्थम्। यदि बहुव्रीहिनिर्द्देशस्ततो बहुव्रीहेरन्यपदार्थप्रधानत्वाद्यथा `चित्रगुरानीयताम्' इत्युक्ते यस्य ता गावः स एवानयते न चित्रा गावः, तद्वदत्रोपलक्षितं तदुभयपार्श्ववत्ति व्यञ्जनद्वयमेव द्विरुच्येत, न तूपलक्षणभूतोऽजित्यत आह--तत्रेति। भवति वै बहुव्रीहावपि क्वचिद्वर्तिपदार्थस्यापि कार्ययोगः, तद्यथा--शुक्लवाससमानयेति मत्वर्थे बहुव्रीहिः, तत्र यथा दण्डी, विषाणीति संसर्गे मत्वर्थीय उत्पन्ने तस्य द्विष्ठत्वाद् गुणस्यापि कार्ययोगः; तद्वद् बहुव्रीहावपि यत्र संसर्गो वाच्यस्तत्राविरुद्धो गुमस्यापि कार्ययोगः। अभ्यन्तरश्चेति। अन्तर्भूत इत्यर्थः। आन्यन्तरमिति पाठे अभ्यन्तरम्=मध्यम्, तत्र भवमाभ्यन्तरम्। साच्कस्यैव द्विर्वचनं भवतीति। यथा तत्सन्निहितमवयवान्तरं द्विरुच्यते, तथोपलक्षणीभूतोऽप्यजित्यर्थः। अत्र च ज्ञापकम् `दीर्घोऽकितः' इत्यादि। चोदयति--एवं च पचित्यत्रेति। तेनैव तदवयवोच्छब्दः पशब्दश्चेति। चकारादकारश्च व्यपदेशिवद्भावादेकाजेव, यथैवाङ्गुल्या देवदत्तोऽङ्गुलिमांस्तथा हस्तोऽपि, तद्वदत्रापि। ततश्च सर्वेषामेव तेषां द्विर्वचनप्रसङ्ग इति शेषः। नन्वर्थवद्ग्रहणे नानर्थकस्येति समुदायस्यैव भविष्यति, नावयवानाम्, नन्वेवं जागत्र्यादीनां न स्यात्, किञ्च यत्र `शे' इत्यादौ विशिष्टं शब्दस्वरूपं गृह्यते तत्रैवेयं परिभाषा, अत्र तु `धातोरवयवस्यैकाचः' इति तटस्थेनोपलक्षणेन जागृ, पच्-इत्येवमादिकं गृह्यते, न तु स्वरूपेणेति नेह तस्याः प्रवृत्तिः? परिहरति--तत्रेति।
तेषु समुदायादिष्वेकाक्षु मध्येऽवयवैकाचः प्रथमा न द्विरुच्यन्ते, कुतः ? इत्याह--तथा हीत्यादि। अयमभिप्रायः---किमेकस्मिन्नेव प्रयोगे युगपच्च सर्वप्रयोगश्चोद्यते? पर्यायेण वा ? किं वा प्रयोगभेदेन कस्यचित् क्वचनेति ? न तावदाद्य कल्पः, प्रमित्यनुष्ठानयोर्द्वयोरप्यसम्भवात्। तथा हि--एकाच्त्वेन निरुपितं द्विर्वचनं प्रमातव्यम्, न चैकोऽवयवो युगपदनेकावयवत्वेन शक्योनिरूपयितुम्, तत्कथं युगपत्प्रमीयताम्, प्रमितं वा कथमनुष्ठीयताम्! न ह्येकस्मिन्नेकाचि द्विरुच्यमाने तदैवान्य एकाच्छक्यो द्विर्वक्तुम्; वाचः क्रमभावित्वात्। नापि द्वितीयः; `अनभ्यासस्य' इति प्रतिषेधादनवस्थापाताच्च। तस्मात्प्रयोगभेदेन सर्वप्रसङ्ग इत्येष एव पक्षः सम्भवति। तत्र `णिजिर् शौचपोषणयोः' इत्यस्य श्लौ यदा निशब्दस्य द्विर्वचनम्, तदा नेनेक्ति, नेनिक्त इत्यत्र न कश्चिद्दोषः। नेनिजति, अनेजिजुः, नेनिजदित्यत्र `अदभ्यस्तात्', `सिजब्यस्तविदिभ्यश्च', `नाभ्यस्ताच्छतुः' इत्यद्भावजुसभावनुम्प्रतिषेधा न स्युः; जकारेण व्यवधानात्, इकारस्येच्छब्दस्य च द्विर्वचने रुपमेव न सिध्यतीत्येष एव दोषः ? तस्य परिहारः--`शास्त्रहानिप्रसङ्गात्' इति। अवयवे हि द्विरुच्यमानेऽवयवान्तरविषयसमुदाविषयं च शास्त्रं हीयते। ननु शास्त्रेण प्रमितमेव यदि नानुष्ठीयेत स्याच्छास्त्रहानिः, अत्र तु पर्यायेण प्रतीयत इत्युक्तम्, तच्चानुष्ठितमेव कथं सास्त्रहानिः? अङ्ग तु भवानाचष्टाम्--पशब्दे द्विरुच्यमाने चकारः किमिति न द्विरुच्यते, तदा तद्द्विर्वचनस्याप्रतीतत्वादिति चेत्किमिति न प्रतीयते, तेन सहैकाच्त्वेनानिरूपितत्वादितिचेत्किमिति न निरूप्यते? मौनमत्रोत्तरम्, तस्माद्यस्मिन् प्रयोगे यच्च यावच्च प्रथमैकाच्त्वेन शक्यते निरूपयितुम्, तस्य सर्वस्य द्विर्वचनं प्रमातव्यमनुष्टातव्यं च; अन्यथा तु क्रियमाणं प्रतीत्यनुष्ठानयोरुभयोरपि शास्त्रहानिमावहति। तस्मात्समुदायस्य द्विर्वचनमिति। न चात्रापि पक्षेऽवयवविषये शास्त्रहानिः; अवयवात्मकत्वात्समुदायस्य न खल्ववयवानां द्विर्वचनमकृत्वा समुदायः शक्यो द्विर्वक्तुम्, तद्यथा-वृक्षः प्रचलन्सहावयवैः प्रचलति।

अथ कथं पपाचेति द्विर्वचनम्, यावता धातुरेवायं न धात्ववयवः, नापि प्रथमः, द्वितायादिषु हि सत्सु यस्मात्पूर्वो नास्ति स प्रथमः? कथन्तरां चेयायेत्यादौ यत्रैकोऽजस्येति व्यतिरिक्तोऽन्यपदार्थो नास्ति? तत्राह--पपाचेत्यत्रेति। एकाच्त्वमपीति। अपिशब्दात्प्रथमत्वमपि, उभयत्रापि धातुं प्रत्यवयवत्वम्। व्यपदेशिवद्भावादिति। मुख्य एकाज्व्यपदेशः, अवयवव्यपदेशश्च येषामस्ति ते व्यपदेशिनो जाग्रादिषु जागित्येवमादयः, तेषामिवैषामपि कार्य भवतीत्यर्थः। न चेदं वचनम्, लोकिकोऽयं न्यायः, लोके हि `शिलापुत्रकस्य शरीरम्' इति बहिर्वस्तुभेदेऽसत्यपि बेदव्यवहारोऽवस्थाबेदाश्रयो दृश्यते। शिलापुत्रकः क्रीयमाणविक्रीयमाणत्वाद्यवस्थायुक्तो यो दृष्टस्तस्येदं शरीरमिति परिदृश्यमानावस्थाभेदेन व्यपदिश्यते। पपाचेत्यत्रापि पचेरनन्तप्रयोगविषयस्य सम्प्रति प्रयुज्यमानं लिट्परं रूपमवयव इति शक्यं व्यपदेष्टुम्, प्रथमशब्दोऽपि प्रथमगर्बेण हतेत्यादावसतोऽपि द्वितीयादीन् बुद्ध्या परिकल्प्य मुख्यप्रथमसाधर्म्याद्यथा लोके एकस्मिन्नपि प्रथम इति प्रयुज्यते, तद्वदत्रापि। इयायेत्यत्रापि इतः, यन्ति, आयन्, आगात्, जिगमिषतीत्यनन्तप्रयोगस्थेनैकोऽयमिकार इत्यन्यपदार्थोऽपि कल्पितः. प्रसिद्ध्यप्रसिद्धिकृतश्च गौणमुख्यविवेकः। एवं विधस्तु व्यवहारो मुख्यादपि प्रसिद्ध इति न गौणत्वदोषः। एवं च कृत्वा--`व्यथो लिटि' `भवतेरः',`लिट्यभ्यास्सयोभयेषाम्', `दीर्घ इणः किति' इत्यादिकमुपपद्यते।

अत्र `द्वे' इत्यस्य संख्येयापेक्षायां शब्दानुशासनप्रस्तावाच्छब्दरूपे सख्येये `षष्ठी स्थानेयोगा' इति वचनादेकाचः प्रथमस्येति स्थानषष्ठ्यां सत्यामेकस्य स्थाने द्वे शब्दरुपे इत्यर्थो भवति, यथा--`अस्तेर्भूः' इत्यादौ, तदा `स्थाने द्विर्वचनम्' इत्ययं पक्षो भवति। यदा शब्दसम्बन्धिनी उच्चारणे संख्येये क्रियारूपस्य शब्दस्य च स्थान्यादेशसम्बन्धायोगादध्याहृतोच्चारणक्रियापेक्षयैकाच इति कर्मषष्ठी--एकाचो द्वे उच्चारणे भवतः, एकाचं द्विरुच्यारयेदित्यर्थः, तदा `द्विःप्रयोगो द्विर्वचनम्' इत्ययं पक्षो भवति। तत्राद्ये पक्षे `स्थानेऽन्तरतमः' इति वचनाच्छब्दतश्चान्तरतमयोर्द्वयोविधानाद् यद्यपि ये केचन प्राप्नुत इति दोषनवतारः। चिचीषतीत्यत्र तु `सन्यङोः' इति षष्ठ्याः स्थापयिष्यमाणत्वाच्चिस् इत्यस्य स्ताने चिस्चिस् इति शब्दान्तर आदेशे सति तत्स्थस्य सकारस्य सन्त्वे प्रमाणाभावात् `अज्झनगमां सनि' इति दीर्घत्वं न स्यात्; आदेशस्य स्थानिवद्भाव उच्यते नादेशावयवस्य स्यान्यवयववद्भाव इति स्थानिवद्भावेनापि सन्त्वं नास्ति। तस्य तु यत्र सन्मात्रस्य द्विर्वचने स्थानिवद्भावेन सन्त्वं सोऽवकाशः, यथा--इणः सन्, ईषिषतीति।

ननु शब्दान्तरप्राप्त्या द्विर्वचनमनित्यम्, अप्राप्त्या तु दीर्घत्वमित्युभयोः परत्वाद्दीर्घत्वे कृते द्विर्वक्ष्यते? इह तर्हि ह्वयतेः सनि ह्नास् इत्यस्य द्विर्वचनम्, समुदायस्य समुदाय आदेशस्तत्र आदोश एतन्नास्ति--इयं प्रकृतिरयं प्रत्यय इति, ततश्च `ह्वोऽभ्यस्तस्य' इति संप्रसारणं न स्यात्, जुहाव जुहुवतुरित्यादावेव तु स्याद्--यत्र ह्वामात्रस्य द्विर्वचनात्स्थानिवत्त्वम्? नैष दोषः; `ह्वोऽभ्यस्तस्य' इति व्यधिकरणे षष्ठ्यौ, ह्वयतेरभ्यस्तस्य भविष्यतः प्रागेव संप्रसारणं परपूर्वत्वम्, `हलः' इति `अज्झनगमाम्' इति वा दीर्घत्वम्, `ह्वास्' इत्यस्य द्विर्वचनम्। इह च पिपक्षति, उद्विवक्षतीत्यत्र `पूर्वत्रासिद्धमद्विर्वचने' इति तर्हि आटिटद्, आशिशद् इति णिलोपे कृतेऽपि `द्विर्वचनेऽचि' इति रूपस्थानिवद्बावाच्छब्दान्तरप्राप्त्यभावेन नित्यत्वात्पूर्वं द्विर्वचने सति समुदायस्य समुदाय आदेशस्तत्र सम्प्रभुग्धत्वात्प्रकृतिप्रत्ययत्वं नष्टम्, स णिज्न भवतीति णिलोपो न स्यात्, तस्य तु कारणेत्यादिरवकाशः। इह च जिघांसतीति समुदायस्य समुदाय आदेशे कृते हन्तेरभावाद् `अभ्यासाच्च' इति हन्तेरिति कुत्वं न स्यात्। तस्य तु जघनिथ, जघन्थ, अहं किल जघन, जघन्वानित्यादिरवकाशः, यत्रहन्तिमात्रस्य द्विर्वचनात्स्थानिवद्भावः। तदेवमाद्यपक्षस्य दुष्टत्वाद् द्वितीयं पक्षमाश्रित्याह-द्विःप्रयोगे द्विर्वचनमिति। चशब्दोऽवधारणे। कथं पुनः `षष्ठी स्थानेयोगा' इति परिभाषायां सत्यां द्विःप्रयोगपक्षः शक्य आश्रयितुम्? तत्राह--आवृत्तिसंख्या हीति। यद्यावृत्तेः संख्या विधीयते, एवं सति त्रिर्वचनं प्राप्नोति। न ह्याद्यमुच्चारणमावृत्तिः, अतस्तदेकम्, आवृत्ती च द्वे इति त्रिर्वचनप्रसङ्गः। तस्मादावृत्तिकृता संख्या। आवृत्तिसंख्या कस्य? उच्चारणस्य, आवृत्तमुच्चारणं विधीयत इत्यर्थः। तत्र च स्थान्यादेशभावो न सम्भवतीत्युक्तम्। अत्र पक्षे यथाटिटदित्यादौ दोषौ न भवति तथा दर्शयति--तेनेत्यादिना ।

नन्वत्रापि पक्षे नेमतुः, सेहे इत्यादौ नत्वसत्वयोः कृतयोर्धातोरादेशादित्वस्य द्विःप्रयोगेऽप्यनिवृत्तेरेत्वाभ्यासलोपौ न स्याताम्, पक्षान्तरे तु नादेशादिव्यपदेशः? अलाश्रयत्वेन स्थानिवत्त्वाभावात्समुदायादेशत्वेनादेशादित्वाभावाच्च न दोष)ः; `लिटि आदेशः' इति विशेषणआन्नत्वसत्वयोरनैमित्तिकत्वाद्। इह तर्हि वेभिदितेति वेभिद्यशब्दात्तृचि अल्लोपयलोपयोः कृतयोरुपदेषे य एकाजनुदात्तः स एवायमितीट्प्रतिषेधः स्यात्, पक्षान्तरे त्वेकाज्व्यमपदेशस्यालाश्रयत्वाद् बेभिद्येत्यस्य द्व्यचकत्वान्निषेधाभावः? द्विःप्रयोगेऽपि न दोषः; पूर्वस्मादपि विधौ अल्लोपस्य स्थानिवद्भावात्। इह तर्हि जरीगृहितेति ग्रहेर्वलिटि दीर्घत्वं स्यात्, न ह्यत्र स्थानिवत्त्वम्, दीर्घविधौ निषेधात्? नैष दोषः; `एकाच उपदेशे' इत्यत `एकाच' इत्यनुवर्त्तयिष्यते। यद्वा-- ग्रहेर्विहितं यदार्द्धधातुकं तस्य य इट् तस्य दीर्घ इति जरीगृह्यशब्दाद्विहितस्य न भविष्यति। इच च सिषेचति, यद्यपि सिचेर्लिङ्विहितः; तथापि द्विर्वचने कृते समुदायस्यैका पदसंज्ञा न तदवयवस्य, सेचशब्दस्य पदसंज्ञायां तदादिग्रहणानिवृत्तेरभ्यासस्य वर्जनायोगादिति `सात्पदाद्योः' इति षत्वनिषेधाभावः। इह तर्हि विभिद्वानित्यादौ शतकृत्वोऽप्युच्चारणे एकाच्त्वं न याति, किं पुनर्द्विरुच्चारण इति `वस्वेकाजाद्धसाम्' इतीट्प्रसङ्गः? तन्न; उच्चारणभेदाद्विरुद्धसंख्याप्रादुर्भावे पूर्वसंख्याकृतव्यपदेशनिवर्त्तनात्। अत एवाद्ग्रहंणं कृतं पपिवानित्यादाविडर्यम्। इह तर्हि विशुष्वापेति, तस्यैवार्थवतो द्विरुक्तिभावमात्रमित्यभ्यासस्यार्थवत्त्वात्सुपेः षत्वमित्यत्रानर्थको विसुषुपुरिति वक्ष्यमाणं विहन्येत? नैष दोषः; अन्वयव्यतिरेकाभ्यां शब्दस्याशेषार्थावसायः, न चात्राभ्यासोपजनने कश्चिदर्थ उपजायते, अपाये चापयाति। ननु स एव चेद् द्विरुच्यते, अर्थप्रत्ययेनाप्यावर्तितव्यम्, यथा--अहिरहिर्बुध्यस्वबुध्यस्वेति? किमत्रोपालभ्येमहि, न तावदर्थप्रत्यया आवर्तन्ते! तदेतदेवं दृश्यताम्-यथा स्वप्नः, सुप्तः, अस्वपदित्यादौ क्वचिदविकृतः, क्वचिद्विकृतः, क्विचिदडागमापेक्षोऽर्थं प्रतिपादयति, तथा सुष्वापेत्यादावावृत्त एव प्रतिपादयतीति ।।

अजादेर्द्वितीयस्य ।। 6.1.2 ।।

प्रथमद्विर्वचनापवादोऽयमिति। ननु विरोधे समानफलत्वे च बाध्यबाधकभावः, यथा--`अष्टश्रिर्यूपः कर्तव्यो वाजपेयस्य चतुरश्रिः' इत्यष्टाश्रित्वचतुरश्रित्वयोर्तथा नैवारश्चरुर्नखावपूतानामिति नखावपनेन वैतुष्यफलकेन तत्फलकोऽवघातो बाध्यते, नखैस्त्योलूखलमुसलम्; यत्र त्वेतदुभयं न भवति न तत्र बाधः, यथा--कृत्कृत्यप्रत्ययसंज्ञानाम्, यथा वा--तद्धिततद्राजप्रत्ययसंज्ञानाम्। इह तु न समानफलत्वम्; फलस्य कस्यचिदभावात्, अस्ति च सम्भवो यदुभयं स्यात्? स्यादेतत्--द्वयोरासीनयोर्मध्ये कस्मिंश्चिदुपविष्टे द्वितीयस्तृतीयो भवति, तथा प्रथमे द्विरुक्ते द्वितीयस्तृतीयो भवतीत्यस्त्येवाक्षत्राप्ससम्भाव इति, स्यादप्येवम्, यदि प्रथमद्विर्वचनमेव नियोगतः पूर्वं स्यात्, किञ्च नात्रौत्पत्तिकस्य द्वितीयस्य द्विर्वचनमुच्यते, किं तर्हि? द्वितीयमात्रस्य, ततः किम्? प्रथमे द्विरुक्ते यो द्वितीयस्तस्य भविष्यति।

नन्वेवमनारम्भसमं स्यात्, कथमटेः सन्, प्रथमस्य द्विर्वचनम्, अट्+अट् इति स्थिते हलादिःशेषश्च प्राप्नोति, द्वितीयद्विर्वचनं च, परत्वान्नित्यत्वाच्च हलादिःशेषः, ततो द्विर्वचनम्, अ+अट्+ अट् इति स्थिते हलादिशेषे त्रयाणामकाराणामतो गुणे पररुपत्वेऽटिषतीत्येतद्रूपं स्याद्, अकृतेऽपि द्विर्वचने एतदेव रूपम्, द्वयोरकारयोः पररूपमित्येतावद् नानारम्भसमम्, कथम्? प्रथमं द्विर्वचनम्, हलादिःशेषः, अ+अट् इति स्थिते `सन्यतः' इतीत्वं च प्राप्नोति द्विर्वचनं च, द्वयोर्नित्ययोः परत्वादित्वम्। नन्वित्वं सनमभ्यासं चापेक्षत इति बहिरङ्गम्, ततः किम्? अन्तरङ्गम् `अतो गुणो' इति पररूपत्वं प्राप्नोति, समानाश्रये च वार्णादाङ्गं बलीय? एवं तर्हि कृतेऽपि पररूपे तरयान्तवद्भावादित्वं प्राप्नोति, अकृते चेति नित्यत्वं परत्वं चेति द्वे तस्य प्राबल्यकारणे। पररूपस्य त्वन्तरङ्गत्वमेकमेवेतीत्वमेव तावद् भवति। सति तु तस्मिन् `अभ्यासस्यासवर्णे' इतीयङ् च प्राप्नोति द्विर्वचनं च, तत्र द्विर्वचनमियङि कृते यङित्यस्य प्राप्नोति; अकृते त्वङित्यस्येति शब्दान्तरप्राप्त्याऽनित्यम्, तेन परत्वान्नित्यत्वाच्चेयङि कृते यङ्शब्दस्य द्विर्वचने हलादिः शेषः, इत्वम्, इयियटिषति, ओणेः--उवुवोणिषतीति भवति। असति द्वितीये द्विर्वचने--इयटिषति, उवोणिषतीति भवतीति नानारम्भसाम्यम् ।

एवं तर्हि `अनभ्यासस्य' इति निषेधादेकस्मिन् द्विरुक्ते नापरो द्विर्वक्तुं शक्यत इत्यस्यैवासम्बवः। अथ वा--सामान्यविहितस्य विशेषविहितं सत्यपि सम्भवे बाधकं भवति, तद्यथा--दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्कडिन्यायेति। ओदनसेकाख्यस्य फलस्य समानत्वादत्र दधिबाध इति चेद्? इहापि तर्ह्यर्थाभिधानाख्यं फलमेकम्, अर्थाभिधानाय हि द्विरुच्चारणम्, तच्चैकेनैव साध्यते। अथ रूपविशेषाख्यं फलं भिन्नम्, अन्यद्धि रूपं प्रथमस्य द्विर्वचने, अन्यच्च द्वितीयस्य ? इतरत्रापि तृप्तिविशेषाख्यं फलं भिद्यते, अन्या हि दध्नस्तृप्तिरन्या हि तक्रस्य, अतो नाप्राप्ते तस्मिन्नारभ्यमाणत्वमेव बाधनिबन्धनम्, नासम्भवः, सामान्यशब्दा हि विशेषशब्दसन्निधौ तत्रैवोपसंह्रियन्ते, ततोऽन्यत्र वा, यथा--वसिष्ठो ब्राह्मणः, ब्राह्मणाः आयाता वसिष्ठोऽप्यायात इति।

ननु कौण्डिन्यस्यापि ब्राह्मणत्वाद् दधि प्राप्तम्, इह तु प्रथमस्योच्यमानं द्विर्वचनं द्वितीयस्य न प्राप्नोतीति कथं येन नाप्राप्तिः? न क्रमो द्वितीयस्य प्राप्तमिति; किन्तु धातुसामान्यविहितं प्रथमद्विर्वचनमजादेर्धातोः प्राप्तमिति; तत्र दधितक्राख्यं विधेयं भिद्यते, इह तु कार्यं भिद्यते, विधेयं द्विर्वचनमेकमित्येतावान् विशेषः। यद्वा-तत्रापि दानमेव विधेयं तस्य तु देयभेदाद् भेदः, इहापि कार्यिबेदाद्भेदः, तद्दमुक्तम्--प्रथमद्विर्वचनापवादोऽयं द्वितीयद्विर्वचनमिति। सर्वथा प्रथमद्विर्वचनं द्वितीयद्विर्वचनेन बाध्यते। यद्यंवम्, यथाभूतस्यैकाचः प्रथमद्विर्वचनं प्राप्तं तथाभूतस्यैवद्वितीयद्विर्वचनं बाधकं स्यात्, सव्यञ्जनस्यैतत्प्राप्तमिति तेन सहव्यञ्क्जनानामप्यनावृत्तिप्रसङ्गः? स्यादेवं यद्यजादिषु प्रथमस्यैकाचः किञ्चिद्विहितं प्रतिषिद्धं वा भवेत्, इह तु विशेषसन्निधौ सामान्यशब्दस्य ततोऽन्यत्र वृत्तेरजादिषु प्रथमद्विर्वचनरूपाप्रतीतत्वादप्राप्त्यनुमानमेव बाधः। व्यञ्जनानि च यदा यस्य कार्थं तदा तदङ्गानीति द्वितीयैकाच्यन्तर्भावात्तेन सह द्विर्वचनं केन वार्यते! अत्र च लिङ्गम् `न न्द्राः' इति प्रतिषेधः। अथेयाय, आरेत्यादौ केन द्विर्वचनम्? न तावदनेनाद्वितीयत्वात्, नापि पूर्वेणाजादिषु तस्याप्रवृत्तेः, यत्रैतदप्रवृत्तिः, यत्र तु द्वितीयाभावादेतन्न प्रवर्त्तते न तत्र तस्य प्रवृत्तिर्वार्यते ? तत्रापि वार्यते, अजादेरिति सामान्यनिर्द्देशात्। सामान्यनिर्द्देशे हि क्वचिदपि द्वितीयवत्यां व्यक्तौ सर्वत्र बाधेत, यथा हलादिःशेषे वक्ष्यते--`क्वचिदपि प्रवर्त्तमानो हलादिःशेषः सर्वत्र निवृत्तिं करोति' इति? नैष दोषः;

जात्योपलक्षिता व्यक्तिः प्राधान्येनेह गृह्यते।
द्वितीयवत्यामेवेदं व्यक्तौ तेन प्रवर्त्तते ।।
प्रवर्तते च यत्रेदं तत्र पूर्वं निवर्त्तते।
जातिर्हलादिशेषे तु प्राधान्येन समाश्रिता ।। इति।

गुणे चेति। नित्यत्वात्परत्वाच्च। स्थानिवद्भावः प्राप्नोतीति। ततश्च इस इत्यस्य द्विर्वचने हलादिःशेषे च दीर्घत्वे सति अरीषतीति प्रसङ्गः। न चात्र द्विर्वचनमनिमित्तमिडिति। यत्र परतो द्विर्वचनमुच्यते, तदेव तस्य निमित्तमिति भावः। कि तर्हि कार्यीति। `सन्यङोः' इति षष्ठ्याश्रयणात्। ततः किम्? इत्याह न चेति। तद्भावभावित्वे सत्यपि कायिणः सप्तमीनिर्द्देशाबावान्न निमित्तत्वं शास्त्रे स्थितमित्यर्थः। अवश्यं चैतदेवं विज्ञेयमित्याह--तथा हीति। गुणवृद्ध्योरिति। `क्ङिति च' इत्यत्र वृद्धेरपि प्रतिषेधाद् गुणवृद्ध्योरित्युक्तम्। शयितेत्यत्र न भवतीति। गुणस्य प्रतिषेधः। क्वचित्तु--शायक इत्यपि पठ्यते, तदयुक्तम्, अप्रकृतित्वादत्र वृद्धेः। यथा चोत्तरग्रन्थे गुणग्रहणमेव कृतम् ।

तेषां द्वितीयस्येति विस्पष्टार्थमिति। `तस्मादित्युक्तरस्य' इत्यनन्तरस्य द्विरीयस्यैव भविष्यति, न तृतीयादेः। यदा तु बहुव्रीहेः षष्ठी-अजादिर्यस्य धातोरिति, तदा सामर्थ्यादप्रथमार्थेऽप्यारम्भे तृतीयादेरपि प्रसङ्गः ।।

न न्द्राः संयोगादयः ।। 6.1.3 ।।
`उन्दी क्लेदने,' `अद्ड अभियोगे' दोपधः, ष्टुत्वम्, `अर्च पूजायाम्', `ईक्ष जर्शनाङ्कनयोः' अन प्राणने', `द्रा कुत्सायां गतौ', उब्जिर्विषये यद्वक्तव्यं तत्सर्वम् `हयवरट्' इत्यत्रैवोक्तम् ।
यकारपरस्येति। यकारः परो यस्माद्रकारात्तस्येत्यर्थः.
व्यञ्जनस्येति। तृतीयव्यञ्जनसहितस्यैकाच इत्यर्थः। तत्र षकारस्य द्विर्वचनंन भवति। अपरे पुनरिति। अस्मिन्पक्षे ईर्ष्यतेस्सनि कृते इति व्याख्येयम्, तत्सम्बन्धितस्तृतीयस्यैकाचोऽसम्भवात्। नामधातवः=सुब्धातवः।

पूर्वोऽभ्यासः ।। 6.1.4 ।।
अर्थादिति। सामर्थ्यात्पूर्वशब्दोऽयमवयववचनः, अवयवश्चावयविनो भवति, स चेह कश्चिन्न निर्दिष्टः, अतोऽवश्यम् `द्वे' इति अत्रानुवर्त्तनीयम्। न वानुवृत्तमपि प्रथमान्तमेवावस्थिमवयव्यपेक्षां पूरयितुमलमित्येतत्सामर्थ्यम्। अस्मिन्प्रकरण इति। अनेन `सर्वस्य द्वे' इत्यत्र प्रकरणे इयं संज्ञा न भवति, तेन तत्र हलादिशेषाद्यभावः। यद्येवम्, `द्युतिगमिजुहोत्यादीनां द्वे' इत्यत्र न प्राप्नोति? कर्त्तव्योऽत्र यत्नः। तयोः पूर्वोऽवयव इति। अवयववाचिभिर्दिक्शब्दैर्योगे पञ्चमी न भवति; `तस्य प्रमाम्रेडितम्' इति लिङ्गात्। पपाचेत्यादौ `हलादिः शेषः', `सन्यतः', `दीर्घोऽकितः', `कुहोश्चुः', `अभ्यासे चर्च', `सन्वल्लघुनि', `दीर्घो लघोः' इत्यादीनि यथायोगमब्यासकार्याणि ।।

उभे अभ्यस्तम् ।। 6.1.5 ।।
द्वे इति वर्त्तमान इत्यादि। द्विरुक्तसमुदायस्यैकाऽभ्यस्तसंज्ञा यथा स्याद्, द्वयोर्द्वे संज्ञे मा भूतामित्येवमर्थमुभेग्रहणम्, न तु संज्ञिनिर्देशार्थम्। द्वे इत्यस्यानुवृत्त्यैव संज्ञिनिर्देशस्य सिद्धत्वादित्यर्थः। ददतीत्यादौ `अदभ्यस्तात्' इत्यद्भावः, `श्नाभ्यस्तयोरातः' इत्याकारलोपः।
नेनिजतीत्यत्रेत्यादि। असत्युभे ग्रहणे `वृद्धिरादैच्' इत्यादौ प्रत्येकं वाक्यपरिसमाप्तिदर्शनादिहापि प्रत्येकं स्यात्, ततश्च नेनिजतीत्यत्र पृथगाद्युदात्तत्वं स्यात्। न च `अनुदात्तं पदमेकवर्जम्' इत्येकस्यानुदात्तत्वम्; वर्जनीयविशेषावगमहेतोः सतिशिष्टत्वादेरसम्भवात्। अथापि स्यात्, एवमपि पर्यायः स्यात्। ननु च `भीह्नीभृहुमद' इति ज्ञापकात्परस्य न भविष्यति? पूर्वस्यापि तर्हि न स्यात्, परेण व्यवधानात्। उच्यते च स्वरः, ततश्च स एव पर्यायप्रसङ्गः।
यदि तु संयोगसमासादिसंज्ञावदन्वर्थत्वप्रतिपच्यर्थं महासंज्ञाकरणम्, तेनान्वर्थताविज्ञाने समुदायस्यैव संज्ञेत्युच्यते, तदोभेग्रहणं शक्यमकर्तुम्। ननु यत्रोभे श्रूयेते तत्र यथा स्यात्, अन्यतराभावे मा भूद्-इत्येवमर्थमुभेग्रहणं कर्त्तव्यम्; अन्यथा ऋधेरापश्च `सनीवन्त' इति इडभावपक्षे परत्वात् प्रतिपदविहितत्वाच्च `आप्ज्ञप्यृधामीत्' इतीत्वे `न न्द्राः' इति प्रतिषेधाद्रेफवर्जं द्वितीयस्यैकाचो द्विर्वचने कृते`अत्र लोपोऽभ्यासस्य' इत्यतः प्रागन्तरङ्गत्वादभ्यस्तसंज्ञा स्यात्। सा च प्रत्येकम्, समुदायस्य वा? तत्र प्रत्येकपक्षेऽभ्यासलोपेऽपि परस्य न निवर्त्तेत। समुदायपक्षेऽपि पूर्वं संज्ञा समुदाये प्रवृत्ता; पश्चादेकदेशनिवृत्तावप्यवशिष्टेऽवतिष्ठेत। यथेयसुन ईकारे लुप्तेऽपि तद्वितसंज्ञा--भूयानित्यत्र। सत्यां च संज्ञायाम्--ईप्सन्ति, ऐप्सन्, ईर्त्सन्ति, ऐर्त्सन्, इत्यत्राद्भावजुसभावनुम्प्रतिपेधाः स्युः, अतः श्रूयमाणप्रतिपत्त्यर्थमुभेग्रहणं कर्त्तव्यम्? तन्न; प्रतीषिषतीत्यादिवत्सिद्धेः। तथा हि-`अजादेर्द्वितीयस्य' इति सनि द्विरुक्ते श्रूयमाणयोरुभ्योः सत्यामप्यभ्यस्तसंज्ञायामद्भावादयो न भवन्ति। यथा च पुत्रीयषिषन्तीत्यादौ `यथेष्टं नामधातूनाम्' इति सनि द्विरुक्ते, तद्वदत्रापि न भविष्यति। अत्र हि ईप्स+झि, ईर्त्स+झीति स्थितेऽद्बावात्प्राग्नित्यत्वाच्छप्, अद्भावो हि शपि कृते तेन व्यवधानान्न प्राप्नोतीत्यनित्यः ततः `झोऽन्तः' प्राप्नोति, पूर्वेण सहैकादेशश्च, परत्वादन्तादेशः। नित्य एकादेशः-कृतेऽप्यन्तादेशे प्राप्नोति, अकृतेपि। अन्तादेशस्त्वनित्यः, कृते एकादेशे तस्यान्तवद्भावादभ्यस्तग्रहणेन ग्रहणादद्भावेन बाध्यते। यस्य च निमित्तं लक्षणान्तरेण विहन्यते तदनित्यम्। अन्तरङ्गस्तर्ह्ये कादेशः; वर्णाश्रयत्वात्। अन्तादेशस्त्वाङ्गत्वाद्बहिरङ्गः, समानाश्रये च `वार्णादाङ्गं बलीयः'; अन्तादेशोऽप्यन्तरङ्गः, वक्ष्यति हि-आयन्नादिषूपदेशिवद्वचनमिति। तदेवमुभयोरप्यन्तरङ्गयोर्नित्ययोश्च परत्वादन्तादेशः, ततो झकाराभावादलाश्रयत्वेन स्थानिवद्भावाभावाच्चादादेशो न भवति।
अस्तु वा पूर्वमेकादेशः एवमपि `आत्मनेपदेष्वनतः' इत्यत्र `अनतः' इत्यस्य `अदभ्यस्तात्' इति पूर्वेणापि सम्बन्धात्पूर्वस्मादपि विधावेकादेशस्य स्थानिवत्त्वाद्वाऽद्भावो न भविष्यति। एवमैप्सन्नित्यत्रापि, ईप्स=झि इति स्थिते शप् च प्राप्नोति, जुस्भावश्च, नित्यत्वाच्छपि कृते तेन व्यवधानान्न जुस्भावः। न च पूर्वेण सहैकादेशे कृते तस्यान्तद्भावात्पुनर्जुस्प्रसङ्गः, पूर्वस्मादपि विधौ स्थानिवत्त्वात्। ईप्सन्नित्यत्रापि लटः शत्रादेशः, ईप्स+शतृ इति स्थिते सार्वधातुकमात्रापेक्षत्वादन्तरङ्गत्वाच्छपि कृते तत्र सनोऽकारेणातो गुणे पररूपे पश्चात्सर्वनामस्थाने चोत्पन्ने नुमः प्रसक्तस्य तस्यां दशायां शत्रभ्यस्तयोर्व्यपवर्गाभावादुभयवर्णाश्रयत्वेनान्तादिवद्भावाभावच्च निषेधाभावः। एवं प्रतीषिषन्तीत्यादावपि। चिकीर्षन्तीत्यादौ तु यत्र सनोऽकारो न द्विरुच्यते, तत्र तेनैव व्यवधानाददभावाद्यभावः ।।

जक्षित्यादयः षट् ।। 6.1.6 ।।
अत्र जक्षेः श्तिपि `रुदादिब्यः सार्वधातुके' इतीटि कृते जक्षितिरिति भवति, स आदिर्यषां ते जक्षित्यादय इति विज्ञायमाने वेव्यतेः सप्तमस्य न स्यात्, लाघवार्थमसन्देहार्थं च हकैव निर्द्देष्टव्यं स्यात्-जक्ष्यादय इति। तस्मान्नायमुक्तविग्रहिः, किं तर्हि? `जक्ष' इति पृथक् पदमित्याह-जक्ष इत्ययं धातुरित्यादयः

षडिति। इतिनानन्तरो जक्षिर्निर्दिश्यते। आदिशब्दः समीपवचनः, अतद्गुणसंविज्ञानो बहुव्रीहिः। सेयमिति। येयमुक्तप्रकारा, सेयमित्यर्थः।
एष स्वर इति। अन्यथा ङित्त्वाल्लसार्वधातुकानुदात्तत्वं धातुस्वरः, यणादेशे `उदात्तस्वरितयोः' इति स्वरितत्वं प्रसज्यते। शतरि व्यत्ययेन सम्पादित इति। ङित्त्वात्परस्मैपदासम्भवाद्व्यत्ययः।
षड्ग्रहणमनर्थकम्, सन्त्वागणान्ता जक्षित्यादयः। वेवीङोऽपि परे ये पठ्यन्ते तेषां कस्मान्न भवति? अत्रैवं गणपाठः, वेवीङोऽनन्तरम् `षस स्वप्ने, वश कान्तौ, चर्करीतं च, ह्नुङ् अपनयने' इति, केचिद्वेवीङोऽनन्तरम् `आङः शसु' इति पठन्ति, `षस्ति स्वप्ने' इति च। तत्राशासो न विशेषः; अभ्यस्तकार्याणि भूयिष्ठानि परस्मैपदिषु, आत्मनेपदी चायम्। अभ्यस्तस्वरेऽपि नास्ति विशेषः, कथम्? अनभ्यस्तेऽपि तस्मिन्ननुदात्तेतः परं लसार्वधातुकमनुदात्तं धातुस्वरश्च, चर्करीतमब्यस्तमेव, षसषस्ती छान्दसौ, वशिरपि, तस्यापि भाषायां न प्रयोगस्साधुः--बाष्यवार्त्तिककारौ चेत्प्रमाणम्। ह्नुङ्ोऽपि ङित्त्वात्परस्मैपदासम्भवः। स्वरस्तर्हि प्राप्नोति, `अङ्न्विङोः' इति प्रतिषेधवचनसामर्थ्यान्न भविष्यति, यदि स्यात्, तर्ह्यपह्नवत इत्यादावभ्यस्तस्वरे सति लसार्वधातुकस्य भवितव्यमेव निघातेनेति प्रतिषेधोऽनर्थकः स्यात्। तस्मात्प्रत्ययस्वरो यथा स्यतात्, लसार्वधातुकानुदात्तत्वं मा बूदित्यहन्विङोरिति प्रतिषेधोऽर्थवान् भवतीति प्रतिषेधसामर्थ्यात्प्रत्ययस्वरः एव भविष्यति, नाभ्यस्तरस्वरः। ननु चाभ्यस्तस्वरोऽजादौ विधीयते, ततः किम्? अजादौ तस्मिन्प्रव‍ृत्तेऽपि ह्नुते, षेह्नु, ह्नुवे- इत्यत्र तस्याप्रवृत्तौ यद्यह्न्विङोरिति प्रतिषेधो न क्रियते, ततो धातुस्वरेणाद्युदात्तं पदं स्यात्। अन्तोदात्तं यथा स्यादिति प्रतिषेधः क्रियेत। तदेवं सति प्रयोजने न प्रतिषेधसामर्थ्यादब्यस्तस्वरं बाधित्वा प्रत्ययस्वरः सिध्यति। एवं तर्हि `अभ्यस्तानामादिः' इत्यत्राप्यह्न्विङोरित्यनुवर्त्तिष्यते, तदेवं नार्थः षड्ग्रहणेन। तदुक्तम्--अपरिगणनं वा गणान्तत्वात् ।।

तुजादीनां दीर्घोऽभ्यासस्य ।। 6.1.7 ।।
अयं योगः शक्योऽवक्तुम्, कथम्? छान्दसमेतद्दीर्घत्वं छन्दसि च दीर्घत्वं न शक्यं परिगणयितुम्, अन्येषामपि दर्शनात् पूरुषः, नारक इति। अनेकाजङ्गत्वाच्च येषां चारभ्यचते तेषामेव तस्मिन्प्रयोगे न दृश्यते--मामहानः, ममहान इति वा ।।

लिटि धातोरनभ्यासस्य ।। 6.1.8 ।।
धातोरिति किमिति। लिटि परतोऽन्यो न सम्भवति; तस्य धातोरेव विधानादिति प्रश्नः। विश्रृण्विरे इति। `छन्दस्युभयथा' इति सार्वधातुकत्वात् `श्रुवः श्रृ च' इति श्नुप्रत्ययः, श्रृभावश्च। अत्र विकरणान्तस्य समुदायस्य लिट्परस्याधातुत्वात्तदीयस्य प्रथमस्यैकाचो द्विर्वचनाभावः। ईक्षाञ्चक्रे इत्यादौ त्वामन्तस्य लिटपरत्वं नास्ति; `आमः' इति लुका कुप्तत्वादिति द्विर्वचनाभावः। सिद्धः। अनभ्यासस्येति किमिति। न तावद् नुनाव, पपाचेत्यादौ तत्रैव लिटि पुनर्द्विर्वचनप्रसङ्गः; सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात्, अनवस्थापाताच्च। यस्तु प्रत्ययान्तरे सनादौ साभ्यासः, न तस्य लिटि सम्भवः; ततो हि `कास्प्रत्ययाद्' इत्यामा भवितव्यमिति प्रशनः। नोनावेति। `अमन्त्रे' इति प्रतिषेधादत्रामभावः। सम्मिमिक्षुरिति। सम्पूर्वान्मिहेः सनि `हो ढः',`षढोः कः सि' लिट्, झेरुस्, अतोलोपः। द्विवचनप्रकरण इति। प्रकरणग्रहणान्न केवलं सर्व द्विर्वचनं छन्दसि विकल्प्यते। एवं च `धातोः', `अनभ्यासस्य' इत्युभयमुत्तरार्थम्। एतस्मादेव विकल्पाद्विकरणान्तसाभ्यासयोर्न भविष्यति ।।

सन्यङोः ।। 6.1.9 ।।
षष्ठ्यन्तमेतदिति। तत्र प्रत्ययग्रहणपरिभाषाया तदन्तस्य द्विर्वचनम्, न तु सन्यङोरेव, यदाह--सनन्तस्य चेति। सप्तमीपक्षे तु सन्यङोः परतः पूर्वस्य धातोर्द्विर्वचनं भवतीत्ययमर्थः स्यात्, ततश्च सन्भक्तस्येटो द्विर्वचनं न स्यात्--अटिटिषति, अशिशिषतीत्यादौ; तथा प्रतीषिषतीत्यादौ सनो न स्यात्। एवमरार्यत इत्यादौ यङः, तथा सप्तम्यामिष्टायां पूर्वेणापरेण वा सहैकमेव योगं कुर्यात्।
जुगुप्सिषत इति। गुपे `गुप्तिज्किद्भयः सन्' तत्र सनि द्विर्वचनम्, पुनरिच्छासन्, तत्राकृतत्वात्पुनर्द्विर्वचनप्रसङ्गः। लोलूयिषते इति। अत्रापि यङिद्विर्वचनम्, न तु सनीति द्विर्वचनप्रसङ्गः।
भागवृत्तिकारस्तावाह--``पूर्वसूत्रे `धातोरनभ्यासस्य' इति द्वयमपि प्रत्याख्याय भाष्यकारेणोक्तम्---`तिष्ठतु तावत्सांन्यासिकं धातुग्रहणम्' इति, उत्तरार्थमिति भावः। अनभ्यासग्रहणस्य तु न किञ्चित्प्रयोजनमुक्तम्, ततश्चोत्तरार्थमपि तन्न भवतीति भाष्यकारस्याभिप्रायो लक्ष्यते। तेनात्र भवितव्यमेव द्विर्वचनेन'' इति ।।

श्लौ ।। 6.1.10 ।।
श्लौ परत इति। वर्णानामपि युगपदवस्थानाभावाद् बुद्धिपरिकल्पितं पोर्वापर्यम्, तच्चाभावरूपेण श्लुनाप्युपपद्यत् इति भावः। अनब्यासस्येति। अधीकारमात्रैणैतदुक्तम्, न तु श्लौ साभ्यासो भवति। एवं द्वितीयस्य चेत्यत्र द्रष्टव्यम् ।।

चङि ।। 6.1.11 ।।
एषां कार्याणां प्रवृत्तिक्रम इति। एतच्च `अचः परस्मिन्' इत्यत्रोपपादितम्, तत एवावधातव्यम्। न केवलं न्याप्यत्वादयं क्रम आश्रीयते, किन्तु

प्रयोजनमप्यनन्यथासिद्धमस्तीत्याह--यथा हीति। ह्रस्वस्य स्थानिवद्भावान्न प्रतिषिध्यत इति। `ह्रस्वस्य स्थानिवद्भावात्प्रतिषिध्यते' इति यत्तन्म भवति, स्थानिवद्भावाभावादित्यर्थः। कथं पुनरस्मिन् कार्यक्रमे सति सथानिवद्भावो न भवति? इत्यत आह--अनादिष्टाच इति। [करणे हेतौ?]। `अचः परस्मिन्' इत्यत्र योऽनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावो भवतीति सिद्धान्तः स्थापितः। न चास्मिन् क्रमे सत्यनादिष्टादचः पूर्वोऽभ्यासो भवति, किं तर्हि? आदिष्टादेव; ह्रस्वत्वे कृतेऽभ्यासोपजननात्। तेन तस्य विधौ कर्त्तव्ये ह्रस्वस्त स्थानिवद्भावो न भवतीति लघुत्वानिवृत्तेः सन्वद्भावो न व्याहन्येत। यदि तु द्विर्वचने कृते ह्रस्वः क्रियते, तर्ह्यनादिष्टादचः पूर्वोऽभ्यासः स्यात्, ततश्च तस्य स्थावनिवद्भावः स्यादेव विधौ, ततश्च दीर्घत्वाल्लघुसंज्ञाया अभावात्सन्वद्भावो न स्यात्। क्व तर्हि स्याद्? अशीशमदित्यादौ। अत्र हि णावेव णितां ह्रस्वो विधीयते। यदि तर्ह्ययं कार्यक्रमः, आटिटदित्यादौ द्वितीयस्यैकाचष्टिशब्दस्य द्विर्वचनं न प्राप्नोति ? अत्राह--आटिटदित्यादि।
`श्लुचङोः' इत्येकयोग एव कर्त्तव्ये योगविभागो वैचित्र्यार्थः ।।

दाश्वान्साह्वान्मीढवांश्च ।। 6.1.12 ।।
दाश्वादीनां प्राचुर्येण छन्दसि प्रयोगदर्शनाच्छान्दसमेतत्सूत्रमिति मन्यमानं प्रत्याह--अविशेषेणेति। विशेषानुपादानादिति भावः। परस्मैपदमिति। भौवादिकस्यात्मनेपदित्वात्, चौरादिकस्य तु `आ धृषाद्वा' इति णिजभावपक्षे दीर्घत्वमनिट्त्वं च निपात्यत इत्यन्ये। मीढ्वस्तोकायेति। `मतुवसोः' इति नुमो रुत्वम्।
किं पुनः सामर्थ्यम्? इत्याह--हलादिशेषे हीति। चराचर इति। दीर्घोच्चारणसामर्थ्याद् ह्रस्वो न भवति।
णिलुक्चेति। `णोरनिटि' इति णिलोपे सिद्धे पुनर्वचनं प्रत्.ययलक्षणेन पुनर्वृद्धिर्मा भूदिति। पाटूपट इति। पूर्ववद्धलादिशेषाभावो ह्रस्वत्वाभावश्च। दीर्घोच्चारणादेव `अब्यासस्यानचि' इति वचनाद्वा उभयत्रापि हलादिशेषाभावः. अभ्यासस्य यदुच्यते तदचि न भवतीत्यर्थः ।।

ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे ।। 6.1.13 ।।
`इग्यणः संप्रसारणम्' इत्यत्रोक्तम्--`वाक्यार्थः संज्ञी वर्णश्च' इति, तत्र विधौ वाक्यार्थ उपतिष्ठते इति तदाश्रयेणाऽऽह--यणः स्थान इग्भवतीत्यर्थ इति। तदन्तात् ष्यङिति। ष्यङ्विधावादेशपक्षस्य स्थित्वाल्ल्यब्लोप एषा पञ्चमी, तदन्तमाश्रित्येत्यर्थः। अतद्गुणसंविज्ञानेऽत्र बहुव्रीहिः, अण् प्रत्ययोऽन्तः समीपो यस्य कारीषगन्धेस्तस्मात्परः ष्यङित्यर्थः। प्रत्ययपक्ष एव वामनाचार्यस्य तत्राभिमतः। तथा च `ये च तद्धिते' इत्यत्र वक्ष्यति--`अणिञन्ताद्वा परः ष्यङ् प्रत्यय एषितव्यः' इति।
इभमर्हतीतीभ्या, `दण्डादिभ्यो यः' इह कारीषगन्ध्यामतिक्रान्तस्य पुत्रोऽतिकारीषगन्ध्यापुत्र इति प्रत्यग्रहणपरिभाषया समुदायस्याष्यङन्तत्वेऽपि योऽत्रष्यङ्न्तस्तस्य प्रसङ्गः। तथा पुत्रस्य कुलं पुत्रकुलम्, कारीषगन्ध्यापुत्रकुलमिति वर्णग्रहणे तदादिविधिविज्ञानादिह च तदभावात्तदादिविध्यभावेऽपि पुत्रपत्यानन्तर्याश्रयं संग्रसारणं प्राप्नोति। नात्र तर्हीदानीमिदं भवति--कारीषगन्धीपुत्रकुलमिति। भवति च यदैतद्वाक्यं भवति--कारीषगन्धायाः पुत्रः कारीषगन्धीपुत्रस्तस्य कुलं कारीषगन्धीपुत्रकुलमिति। न सिध्यतीति चोद्यार्थः। तथा-अतिकारीषगन्ध्यापुत्रकुलमित्यादावपि सर्वत्र पुत्रपत्योः ष्यङ्न्तस्य चानन्तर्यमाश्रित्य सम्प्रसारणप्रसङ्गः।
स्यादेतत्--यथा वृक्षे शाखेति वृक्षः शाखाया अवयवी प्रतीयते, तथेहापि, ष्यङ्न्तस्य पुत्रपत्योश्च तत्पुरुषः, तत्र प्रत्यासत्त्या यस्य तत्पुरुषस्य प्यङ्न्तोऽवयवस्तस्यैव पुत्रपती इति गम्यते, इह न तथेति? एवमप्यवयवावयवस्य समुदायावयवत्वादस्त्येव प्रसङ्गः? नैष दोषः; पुत्रपत्योरिति सप्ततीनिर्द्देशात् ष्यङन्तस्य पुत्रपत्योश्च पौर्वापर्यं प्रतीयते, पूर्वोक्तेन न्यायेन तत्पुरुषावयवत्वं च। तत्पुरुषश्च पौर्वापर्यावस्थितावयवद्वयात्मकः। तदिह तत्पुरुषावयवयोः पौर्वापर्योणावस्थितयोरिदं भवतीत्युक्ते ययोः स तत्पुरु,स्तावेताविति गम्यते, ष्यङ्न्तस्य पूर्वपदस्य पुत्रपत्योरुत्तरपदयोरित्यर्थः. समासे च यसामाच्च पूर्वं नास्ति तत्पूर्वपदम्, यस्माच्च परं नास्ति तदुत्तरपदम्,---यत् ष्यङ्न्तं न तत्पूर्वपदम्, यच्चोत्तरपदं न तत्पुत्रपत्यात्मकम्, यच्च पुत्रपत्यात्मकं न तदुत्तरपदमिति नास्ति प्रसङ्गः. इहापि तर्हि न प्राप्नोति--परमकारीषगन्धीपुत्र इति? तत्राह---प्यङ् इति स्त्रीप्रत्ययग्रहणमिति। `स्त्रियाम्' इति प्रकृत्य विहितत्वात्स्थानिवद्भावेन स्वयमेव वा प्रत्ययत्वाच्च स्त्रीप्रत्ययत्वम्। यदि स्त्रीप्रत्ययग्रहणम्, ततः किम्? इत्यत आह-तेनेति।
अप्रधानम्=उपसर्जनम्। एतदुक्तं भवति--यत्रार्थे स्त्रीप्रत्ययो विहितः स यावति तदन्ते प्राधान्येनोच्यते तावान्समुदायस्तदन्ततया ग्राह्यः। अप्रधाने च यतो विहितस्तदादिके च तदन्ते च न भवति। यदा तत्पुरुषाक्षिप्तमुत्तरपदं पुत्रपतिभ्यां विशेष्यते तदा तदन्ते प्रसङ्गः, इह तूत्तरपदेन पुत्रपती विशेष्येते इति भावः।
निर्दिश्यमानस्येति। एतच्च `षष्ठीस्थाने योगा' इत्यत्र व्याख्यातम्। `अनन्त्यविकारेऽन्त्यसदेशस्य' इति तु परिभाषा प्रयोजनाबावान्नाश्रिता।
सम्प्रसारणग्रहणमुत्तरार्थम्। इह त्वीशापि सिद्धम्, शकारः सर्वादेशार्थः। तत्रायमप्यर्थः--सम्प्रसारणस्येति योगविभागेन दीर्घत्वं न विधेयं भवति, तदेवोत्तरार्थत्वं दर्शयति--सम्प्रसारणमिति चेत्यादि।
पूर्वं यत्र ष्यङन्तं पदमुपरितनं पुत्रपत्यात्मकं स्याद्
दृष्ट्वा तत्र ष्यङ् तत्पुरुष इह यण स्थान इग्भावनीयः।
यत्रार्थे ष्यङ् स यावत्यपि सति न गुणोऽसाविहेष्टस्तदन्ते

यत्रेत्यर्थः प्रधानो न भवति स यतः ष्यङ् तदाद्येव तत्र ।।

बन्धुनि बहुव्रीहौ ।। 6.1.14 ।।
शब्दरुपापेक्षयेति। `बन्धु' इत्येतस्मिन् शब्दरुपमित्येवं शब्दरुपमपेक्ष्य नपुंसकनिर्देशः कृतः। किमर्थमेवं व्याख्यायते? इत्यत आह--
पुंल्लिङ्गाभिधेयस्त्वयमिति। योऽयमस्मिन्सूत्रे बन्धुशब्द उपात्तः स इत्यर्थः। कुत एतत्? नुपुंसकलिङ्गस्यापि विद्यमानत्वात्, बध्यतेऽस्मिन् जातिरिति बन्धु=द्रव्यम्, `जात्यन्ताच्छ बन्धुनि' इति। यद्येवम्, तस्यैव ग्रहणं प्राप्नोति? नैषदोषः; परिपुत्रसाहचर्याज्जातिवचन एव ग्रहीष्यते।

वचिस्वपियजादीनां किति ।। 6.1.15 ।।
आदिशब्दोऽयं यजिनैव सम्बध्यते, न वच्यादिभिः प्रत्येकम्; स्वपिग्रहणात्। अन्यथा `वच परिभाषणे', `विद ज्ञाने', `असभुवि', `मृजूष् शुद्धौ', `रूदिर् अश्रुविवचनेः', `ञिष्वप् शये'--इत्येवं गणपाठाद् वच्यादिग्रहणेनैव स्वपादीनामपि ग्रहणसिद्धेः पृथक् स्वपादिग्रहणँ न कुर्यात्। आगणान्ता इति। गणस्यान्तो गणान्तः, आगता गणआन्तमागणन्ताः। उक्त इति। `चोः कुः' इष्ट इति। व्रश्चादित्वात्षः। ऊढ इति। `हो ढः', `झषस्थोतर्धोधः',ष्टुत्वम्, `ढो ढे लोपः' `ढ्रलोपे पूर्वस्य दीर्घोऽणः'। उषित इति। `वसतिक्षुधोरिट्', `शासिवसिघसीनां च' इति षत्वम्। संवीतदौ `हलः' इति दीर्घः। शून इति। `ओदितश्च' इति निष्टानत्वम्।
धातोःक स्वरूपग्रहण इति। यत्र धातुः स्वरूपेणोपादीयते, न धातुशब्देन तत्र तत्प्रत्यये धातोरित्येवं यो विहितः प्रत्ययस्तत्रैव कार्यं विज्ञायते। एतच्च `भ्रौणहत्य' इति तत्त्वनिपातनेन ज्ञापयिष्यते। वाच्यति, वाचिकमिति। अत्र तु यद्यपि क्विबन्ता धातुत्वं न जहति, तथापि धातोरित्येवं प्रत्ययस्याविधानात्सम्प्रसारणाभावः ।।

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ।। 6.1.16 ।।
गृहीतः, यद्यपि प्रथमं ङिति प्रत्यये परतः सम्प्रसारणं चकारात्किति चेति क्रमो व्याक्यातः, तथाप्यनास्थया प्रथमं कित्युदाहृतम्। विजादेशो गृह्यत इति। पूर्वपरसाहचर्याद्यस्य वपेः परस्मैपदसंभवस्तस्य ग्रहणं न्याय्यम्, यस्तु `अय वच गतौ' इति वयिः, सोऽनुदात्तेदात्मनेपदी। यद्येवमिति। वेञादेशस्य ग्रहणमित्यर्थः। यजादिषु वेञ् पठ्यत इति। ततश्च पूर्वेणैव सम्प्रसारणं सिद्धिमिति भावः। नैवं शक्यमिति। विज्ञातुमिति शेषः। नानयोपपत्त्या वयिग्रहणमनर्थकं शक्यं विज्ञातुमित्यर्थः। एवं प्रतिषेधोऽपि प्राप्नोतीति। नात्राविशब्देन समुच्चय उच्यते, किं तर्हि? यथा स्थानिवद्भावाद्विधिः प्राप्यते, तथा प्रतिपेधोऽपि प्राप्नोति, तत्रापि स्तानिवद्भावस्य तुल्यत्वात् इति हेतोस्तुल्यत्वमपिशब्देन द्योत्यते, तेन प्रतिषेध एव भवेदित्यर्थः। उष्ट इति। तसन्तम्। व्यधिर्दिवादिः, व्यचिप्रभृतयस्तुदादयः। वृक्ण इति। `स्कोः संयोगाद्योः' इति सलोपः, पूर्ववन्निष्ठानत्वम्। वरीवृश्च्यत इत्यादौ `रीगृत्वतः' इति रीग्भावः ।।

लिट्यभ्यासस्योभयेषाम् ।। 6.1.17 ।।
विव्यथेति। `व्यचेः कुटादित्वमनसीति वक्तव्यम्' इत्यत्र पर्युदासवृत्त्यास्प्रत्ययसदृशस्य कृतो ग्रहणादिह ङित्वाभावाद्धातोः सम्प्रसारणाभावः। `वृश्चतिपृचचतिभृज्जतीनामविसेषः' इति वार्त्तिकम्, तद् वृश्चतिविषये भाष्यकारेण दूषितम्--`यदुच्यते वृश्चतेरविशेषः' इत्यादि। तत्र वात्तिककारस्याभिप्रायमाह--वृश्चतेरिति। असति सूत्रे यद्रूपं तदेव सतीत्यभिप्रयेण वात्तिककारेणैतदुक्तमित्यर्थः. भाष्यकारस्याभिप्रायमाह--योगारम्भे सतीति। रेफस्य सम्प्रसारणे सत्यसति वा नास्ति विशेष इति वार्त्तिककारेणोक्तमित्यध्यारोप्यभाष्यकारेणोक्तमित्यर्थ। अकिदर्तमिदमिति। किति कथम्? इत्यत आह--किति हीति।
अधिकारादेविति। नात्र सास्त्रीयोऽधिकारः, किं तर्हि? अपेक्षालक्षण, तेन पूर्वसूत्रे वच्यादेः सम्बन्धो नाशङ्कनीयः। योगविभागसामर्थ्याद्वा पूर्वसूत्रे तेषामसम्बन्धः।
हलादिःशेषमपि बाधित्वेति। अन्यथा परत्वाद्धलादिःशेषः स्यात्। सम्प्रसारणमेव यथा स्यादिति। पुनर्विधानमुभयेपांग्रहणाद्भवति तद्बाधकबाधनार्थमिति भावः ।।

श्वापेश्चङि ।। 6.1.18 ।।
स्वापेर्ण्यन्तस्य ग्रहणमिति। आप्रनोतेस्तु सुपूर्वस्य ग्रहणं न अण्यन्तस्य; चङोऽसम्भवात्। ण्यन्तस्यापि न भवति; `धातोः' इत्यधिकारात्। स्वाप्यत इति। कर्मणि लट्, णिलोपः।
स्वापित इति। `निष्ठायां सेटि' इति णिलापः
ननु च `ग्रहिज्या' इत्यादिसूत्रान्ङितीत्यनुवर्त्तिष्यते, न चान्यः स्वापेर्ङिदस्ति, यङ् तावदनेकाच्त्वन्नास्ति, अपित्सार्वधातुकं तु विकरणैर्व्यवहितम्, अङादयस्त्वविहिता एव? तत्राह--ङितीति केवलमित्यादि। ननु कितीत्येतच्चानुकृष्टं पूर्वसूत्र इति नेहानुवर्तिष्यते, किमर्थ दुर्ज्ञानं ङिद्ग्रहणम्? ङिद्ग्रहणमपि तर्हि पूर्वसूत्रे नानुवर्तते; लिटो ङितोऽसम्भवादिति तस्येहानुवृत्तिर्दुर्विज्ञाना ।।

स्वपिस्यमिव्येञां यङि ।। 6.1.19 ।।
स्वप्नगिति। `स्वपितृषोर्नजिङ्' ।।

चायः की ।। 6.1.21 ।।
कीति दीर्घोच्चारणमनर्थकम्, ह्रस्वादेशेऽपि `अकृत्सार्वधातुकयोः' इति दीर्घस्य सिद्धत्वात्? तत्राह--दीर्घाच्चारणमित्यादि। कथं पुनर्यङ्च्यमान आदेशो यङ्लुकि स्यात्? प्रत्ययलक्षणेन। `न लुमताङ्गस्य'? एवं तर्हि दीर्घोच्चारणसामर्थ्याल्लुक्यपि भविष्यति, पूर्वसूत्रविहितं तु प्रसारणं यङ्लुकि न भवत्येव। न च `सम्प्रसारणाश्रयं च कार्यं बलवत्' इति प्रागेव लुकः सम्प्रसारणम्; प्रत्याख्यातत्वादस्याः परिभाषायाः। तथा च पूर्वत्रोभयेषां ग्रहणं कृतम्, अनयताऽनयैव परिभाषया हलादिशेषात्प्रगेव सम्प्रसारणं भविष्यतीत्यनर्थकं तत्स्यात्। सास्वपीति, सास्वप्ति। सास्वप्तः, साश्वपीतः। वाव्येति, वाव्याति ।।

स्त्यः प्रपूर्वस्य ।। 6.1.23 ।।
द्वयोरप्येतयोरिति। द्वयोरपि स्यारुपस्य लाक्षणिकत्वात्। सम्प्रसारणे कृते इति। तस्यासिद्धत्वात्प्रागेव सम्प्रसारणम् ।
प्रस्त्य इत्येव सिद्ध इति। यथा `प्रस्त्योऽन्यतरस्याम्' इत्यत्र। न चैवमुच्यमाने प्रशब्दस्यापि यो रेफस्तस्यापि प्रसङ्गः; धातोरित्यधिकारात्। प्रसंस्तीत इति। `प्रस्त्योऽन्यतरस्याम्' इति मत्वमत्र न भवत्येव। तत्कथमिति। कथमयमर्थः शब्देनाभिहितो भवतीति प्रश्नः। षठ्यर्थे बहुव्रीहिरिति। पूर्वशब्दस्यावयववाचित्वात्, यथा--पूर्वं कायस्येति। व्यधिकरणे षष्ट्याविति। प्रपूर्वस्येति स्त्याशब्दापेक्षयावयवष्ठी, स्त्य इत्येषापि यणवयवापेक्ष्या षष्ठी। यथा पुनरयमर्थःक प्रकृतोपयोगी तथा दर्शयति--तत्रेति ।।

द्रवमूर्तिस्पर्शयोः स्यः ।। 6.1.24 ।।
द्रवकाठिन्य इति। द्रवावस्ताया उत्तरावस्थाविशेषः=काठिन्यम्। स्पर्शे चेति। रूपादिसहचरितो गुणः=स्पशः।
शीतो वायुरिति। कथं पुनः स्पर्समात्राभिधायिनःक शीतशब्दस्य तद्वद्द्रव्यवाचिना वायुशब्देन सामानाधिकरण्यम् ? तत्राह--गुणामात्र इत्यादि। शुक्लादिशब्दवदिति भावः ।।

विभाषाऽभ्यवपूर्वस्य ।। 6.1.25 ।।
सेयमुभयत्र विभाषेति। द्रवमूर्तिविषये पूर्वेण प्राप्तेऽन्यत्राप्राप्ते। अथ पूर्वग्रहणं किमर्थम्, न `विभाषाब्यवाभ्याम्' इत्येवोच्येत, तत्राहपूर्वग्रहणस्येत्यादि। क्रियमाणेऽपि पूर्वग्रहणे कस्मादेवात्र न भवति? इत्याह--न किलेति। किलशब्दसूचितामरुचि दर्शयति-योऽत्रेति। मा भून्महासमुदायोऽभ्यवपूर्वः, अवान्तरसमुदायस्त्वभ्यवपूर्वोऽप्यस्ति, तदाश्रयो विकल्पः प्राप्नोति। यत्नान्तरमास्थेयमिति। विभाषाग्रहणं व्यवस्थितविभाषार्थमाश्रयणीयमित्यर्थः। पूर्वग्रहणस्य चान्यत्प्रयोजनं वक्तव्यमिति। तत्पुनरभिसंशीनम्, अभिसंश्यानम्, अवसंशीनम्, अवसंश्यानमित्यत्रापि विकल्पप्रवृत्तिरेव। तच्च पूर्वग्रहणे क्रियमाणे यथा लभ्यते तथा `स्त्यः प्रपूर्वस्य' इत्यत्र व्याख्यातम् ।।

श्रृतं पाके ।। 6.1.27 ।।
श्रा पाक इत्यस्य धातोरिति। `श्रा पाके' इत्यदादौ पठ्यते, `श्रौ पाके' इति चुरादौ, घटादिष्वपि मित्त्वार्थः `श्रा पाके' इति पठ्यते, तत्रेह सर्वेषां ग्रहणम्। श्रायतेरपि कृतात्वस्यैतद्रपं भवति, निपातनसामर्थ्याच्च लक्षणप्रतिपदक्तपरिभाषा नाश्रीयते। ण्यन्तस्य चाण्यन्तस्य चेति। तथा चोक्तम्--`श्राश्रप्योः श्रृभावो निपात्यते' इति। अत एव प्रकृतं सम्प्रसारणमेव न विहतम्, श्रपेरपि श्रृतमित्येव यथा स्यादिति।
यदि विभाषेत्यतदत्रावर्त्तते, क्षीरहविषोरन्यत्र च विकल्पः प्राप्नोति सर्वत्र, तत्राह--व्यवस्थितविभाषा चेयमिति। यदा त्वित्यादि। प्रयोजकव्यापारः प्रेषणादिलक्षण प्रयोजकशब्देनोक्तः, तस्य च बाह्यत्वं बहिर्भूतणिज्व्याप्यत्वात्। तदापि नेष्यत इति। तथा चोक्तम्--श्रपेः श्रृतमन्यत्र हेतोरिति। श्रपितं क्षीरं देवदत्तेन। प्रयोजकव्यापारेणाप्यमानस्यापि प्रयोज्यस्य कर्मसंज्ञा न भवति, `गतिबुद्धिप्रत्यवसान' इति नियमात्। कथं पुनर्ण्यन्तस्य निपातनं लभ्यते, यावता पाक इत्युच्यते, ण्यन्तेन च पाचनाभिधीयते, न पाकः; अथ पाचनायामपि गुणभूतः पाकः प्रतीयते, तदाश्रयं निपातनं स्यचात्? यद्येवम्, द्वितीयेऽपि णिचि प्रसङ्गः। न हि तत्र पाको गुणभूतो न गम्यते।
अथं तत्र गुणभूतत्वादेव प्रधानभूते पाके चरितार्थं निपातनं न भविष्यती त्युच्येत ? प्रथमेऽपि न स्याद्, वक्तव्यो वा विशेषः। तमाह-श्रातिरयमित्यादि। अथमभिप्रायः--द्विविधः पाकः--विक्लित्तिलक्षणः, विक्लेदनालक्षणश्च;, उभयत्रापि पचेः प्रयोगदर्शनात्, पच्यते ओदनः स्वयमेव, पचत्योदनं देवदत्त इति। श्रातिश्चायं यद्यपि `पाके' ित्यविशेषेण पठ्यते, तथापि कर्मकर्तृविषयस्य पचेरर्थेवर्त्तते। स ण्यन्तोऽपि प्राकृतचं प्रकृतौ भवं णिज्रहितपचिवाच्यं पच्यर्थमाह। सोऽपि पाक एव, न पाचयतेरर्थः, यथा--सिद्ध्यत्योदनः, साधयत्योदनमिति। तत्र यदा श्रातेः क्त ****त्पद्यते, तदाऽकर्मकत्वात्कर्त्तरि भवति--श्रृतं क्षीरमिति, श्रपेस्तु कर्मणइ--श्रृतं क्षीरं देवदत्तेन। द्वितीये तु णिचि पाचयितृव्यापारः पाचनालक्षणः प्राधान्येनाभिधीयते, न तु पाक इति निपातनाभाव इति। `श्रपेः श्रृत्वमन्यत्र हेतोः' इति वार्त्तिके `श्राश्रप्योः श्रृभावो निपात्यते' इति

पूर्वमुक्तत्वादाद्यप्रकृतलक्षणप्रयोजकव्यापाराङ्गीकरणसामर्थ्यात्पाचयितृलक्षणप्रयोजकव्यापारनिषेधो विज्ञेयः ।।
पाकोऽयं पाक्यपक्त्योरद्विविध इह स विक्लित्तिविक्लेदनात्मा
श्रातिर्वक्त्येकमन्यं श्रपयतिरुभयत्रौभयोक्तेः श्रृभावः।
स्वे स्वे वाच्ये श्रपेस्तु प्रसजति सति वा पाचने न द्वितीये
नित्यं क्षीरे शृभावो हविषि च न तु पाक्येषु चार्थान्तरेषु ।।

प्यायः पी ।। 6.1.28 ।।
अन्धुः कूपः ।।

लिङ्यङोश्च ।। 6.1.29 ।।
विभाषेति निवृत्तमिति। उत्तरसूत्रे पुनर्विबाषाग्रहणात्। प्यायः पीत्येतच्चकारेणानुकृष्यते इति। असति चकारे प्रकरणिनः सम्प्रसारणस्यैवानुवृत्तिः स्याद्, यथोत्तरत्र। परत्वात्पीभावे कृते इति। ननु द्वयोः सावकाशयोः परत्वं भवति, अनवकाशश्च पीभावः, एवं तर्हि परत्वादुत्कृष्टत्वादनवकाशत्वादिति भावः। पुनः प्रसङ्गविज्ञानादिति। अत्रापि `विप्रतिषेधे परम्' इत्यत्र यदुक्तं न तद्विवक्षितम्, किं तर्हि? द्विर्वचनस्य पुनः प्रसङ्गोऽस्तीति कृत्वेत्यर्थः। यदि तर्ह्यनवकाशः पीभावो नाप्राप्ते द्विर्वचन आरभ्यमाणेन तेन द्विर्वचनस्य बाधः प्राप्नोति? नैष दोषः; परस्परसन्निधौ बाध्यबाधकबावः। इह तु सम्प्रसारणप्रकरणेन द्विर्वचनप्रकरणं विच्छिन्नम्। अत एव वक्ष्यते--`दिग्यादेशेन द्वित्वबाधनमितष्यते' इति।।

विभाषा श्वेः ।। 6.1.30 ।।
शुशावेति। परावपि वृद्ध्यायादेशौ बाधित्वा नित्यत्वात् सम्प्रसारणमन्तरङ्गत्वात्पूर्वत्वम्। शुशुवतुरिति। अत्रापि परत्वात्प्रापमियङं बाधित्वा नित्यत्वात्सम्प्रसारणम्। तत्र कृते परमपि `एरनेकाचः' इति यणं बाधित्वान्तरङ्गत्वात्पूर्वत्वम्, पश्चादुवङादेशः। अन्यत्रेति। पित्सु वचनेषु। तत्र सर्वत्र विकल्प इति। पित्सु तावद्विकल्प्यते; प्रतिषेधकाभावात्। कित्स्वपि परत्वादयं विकल्पः। यजादिलक्षणस्यावकाशः--शूनः, शूनवान्, अस्यावकाशः पिद्वचनानि; किति लिट्युभयप्रसंगे परत्वादयं विकल्पः। अब्यासस्यापि न भवतीति। किमिति न भवति? न तावत् परत्वादनेन कल्पेन बाधः, धातोरयं विकल्पः, नाभ्यासस्य। किञ्च--उभयेषांग्रहणस्य स एव विधिर्यथा स्यादिति। तस्माद्वचनमेवात्र शरणम्। यदाह--`स्वेर्लिट्यभ्यासलक्षणप्रतिषेधः' इति ।।

णौ च संश्चङोः ।। 6.1.31 ।।
`णौ' इतिक श्वयत्यपेक्षया परसप्तमी, `संश्चङोः' इति ण्यपेक्षया। तदाह--सन्परे चङ्परे च णौ परत इति। अन्तरङ्गमपीति। अन्तरङ्गत्वं तु णिज्मात्रापेक्षत्वात्। वृद्ध्यादिकमिति। आदिशब्देनायादेशो गृह्यते, यदा तु `संप्रसारणं संप्रसारणाश्रयं च कार्यं बलीयः' इति परिभाषा प्रयोजनाबावात्प्रत्याख्याता, तदा `णौ च संख्चङोर्विषयभूतयोः' इति। ओः पुयण्जीत्यादि। यथा चैतज्ज्ञापकं तथा `द्विर्वचनेऽचि' इत्यत्र प्रतिपादितम्। अत्र स्थानिवद्भावादित्यतः पूर्वम् `द्वितीयोऽपि' इतिशब्दः पाठ्यः। `तेन' इति वा पठितव्यम् ।।

ह्वः सम्प्रसारणम् ।। 6.1.32 ।।
संप्रसारणस्य बलीयस्त्वादिति। बलीयस्त्वं च पूर्ववत्।
एकयोगेनैव सिद्ध इति। उत्तरसूत्रे कस्यचिन्निमित्तस्य सप्तमीनिर्दिष्टस्याभ्यस्तं प्रत्यश्रवणाण्णावपि संश्चङ्परे ह्वेरभ्यस्तकारणस्य सिद्धमेव सम्प्रसारणमिति भावः। अनभ्यस्तनिमित्तप्रत्ययेनेति। अभ्यस्तस्य यन्निमित्तं न भवति तेन। व्यवधाने इति। यद्युत्तरसूत्रं प्रवर्तेत, तदा योगविबागोऽनर्थकः स्यादिति ज्ञापकत्वम् ।।

अभ्यस्तस्य च ।। 6.1.33 ।।
अत्र `ह्वः' इत्यनुवर्त्तमानस्य यद्यभ्यस्तर्येत्यनेन सामानाधिकरण्यं स्यात्, तदा कृते द्विर्वचनेऽभ्यस्तसंज्ञायामुपजातायां सम्प्रसारणेन भविथव्यम्, ततश्चाभ्यासस्य सम्प्रसारणं न स्यात्; `न सम्प्रसारणे सम्प्रसारणम्' इति निषेधात्। आकारहकाराभ्यां व्यवहितत्वादप्रतिषेध इति चेतु? न; समानाङ्गे सम्प्रसारणप्रतिषेधात्। समानाह्ग्गग्रहणं तत्र चोदयिष्यति, न; समानाङ्गे सम्प्रसारणप्रतिषेधात्। समानाङ्गग्रहणं तत्र चोदयिष्यति, एतच्च तत्रैव व्यक्तं व्याख्यास्यते। तमिमं सामानाधिकरण्ये दोषं पश्चन्नाह--तदभ्यस्तस्येत्यनेन व्यधिकरणमिति। एतदेव स्फोरयति--अब्यस्तस्य यो ह्वयतिरिति। तेन किं सिद्धं भवति? इत्याह--तेनेति ।।

अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्त्ताः ।। 6.1.36 ।।
अपर आहेति। कस्याञ्चिच्छाखायामपस्पृधेथामित्याद्युदात्तं पठ्यते, अन्यस्यां तु पदद्वयम्, उभयमप्यनेन निपातनेन संगृह्यते। तत्रैकपद्ये `तिङ्ङतिङः' इति

निघातः प्राप्तः, `यद्वृत्तान्नित्यम्' इति प्रतिषिद्धः। तत्राट्स्वरेणाद्युदात्तं पदं भवति। यदा तु द्वे पदे, तदा निघातप्रतिषेधे `तास्यनुदात्तेत्' इति लसार्वधातुकानुदात्तत्वे धातुस्वरेण स्पृधेथामिति पदमाद्युदात्तम्,`तिङि चोदात्तवति' इत्यपशब्दस्य निघातः।
बहुवचनस्याविवक्षितत्वादिति। सोमस्यैव बहुत्वे श्राभाव इति नियमानाश्रयणाच्च, अन्यथा बहुत्वातविवक्षायामपि सोमादन्यत्र श्राभावो न स्याद् विषयविभागवादितनाम् ।।

न सम्प्रसारणे सम्प्रसारणम् ।। 6.1.37 ।।
येषां सम्प्रसारणं विहितं तेषां यावन्तो यणस्तेषां सर्वेषां सम्प्रसारणे प्राप्ते प्रतिषेधोऽयमुच्यते। ननु चालोन्त्यपरिभाषयान्त्यस्यैव भविष्यति? नानया परिभाषया शक्यमिहोपस्थातुम्, वच्यादीनामन्त्यस्य यणोऽसम्भवात्। `अनन्त्यविकारेऽन्त्यसदेशस्य' इत्यनया परिभाषया तर्हि अन्त्यसदेशस्यैव भविष्यति, नेतरस्य? नैषास्ति परिभाषा; प्रयोजनाभावात्। एतच्चास्माभिः परिभाषाप्रकरणाख्ये ग्रन्थे उपपादितम्।
एवं तर्हि ज्ञापकात्सिद्धम्, यदयं प्यायः पीभावं शास्ति, तज्ज्ञापयति--न सर्वस्य यणः सम्प्रसारणं भवतीति। यदि स्यात्, प्यायः सम्प्रसारणमेव विदध्यात्। द्वयोर्यकारयोः सम्प्रसारणे पूर्वत्वे च `हलः' इति दीर्घत्वे च सिद्धं स्यात्पीनं मुखमिति। ननु च प्यायोऽन्त्य यणः। सम्भ्वाकत्तस्यैव स्यात्? स्यादेवं यदि `प्यायः' इति स्थानषष्ठी विज्ञायेत, अवयवषष्ठी चैषा विज्ञास्यते--प्यायो यो यण् तस्येति। एवमप्येतावदेवानेन ज्ञाप्यते-न ज्ञाप्यते--न सर्वस्य यणः सम्प्रसारणं भवतीति, तत्र कुत् एतत्-- परस्यैव भवति न पूर्वस्येति, न च विध्यतीत्यादिनिर्द्देशात्परस्यैवेति शक्यमवगन्तुम्? पर्यायेण प्रवृत्तावपि तदुपपत्तेः। तस्मादारभ्यमेवैतत्।
ननु पूर्वपरयोर्यणोरेकयोगलक्षणं सम्प्रसारणं तद्यदि परस्याभिनिर्वृत्तं पूर्वस्याप्यभिनिर्वृत्तमेव, न चाभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या विज्ञातुम्, यो हि भुक्तवन्तं ब्रूयाद् मा भुंक्था इति, किं तेन कृतं स्यात्! अथ पूर्वस्यानभिनिर्वृत्तं परस्याप्यनभिनिर्वृत्तमेव, तत्र निमित्त्त्वेनाश्रयणमनुपपन्नम्? इत्यत आह--एकयोगलक्षणमपीति। अपरः कल्पः-- अस्तु द्वयोरप्यभिनिर्वृत्तम्, कथं तर्हि प्रतिषिध्यते? न सम्प्रसारणं प्रतिषिध्यते, किं तर्हि? तदाश्रयं पूर्वत्वम्। तदेव त्वत्र सम्प्रसारणशब्देनोपचारादुच्यते, तस्मिन्प्रतिषिद्धे यणादेशेन सिद्धमिष्टम्। अस्तु वा द्वयोरप्यनभिनिर्वृत्तम्। कथं तर्हि निमित्तत्वम्? नैवात्र सम्प्रसारणनिमित्तम्, किं तर्हि? तद्भावी यो यण् स एव च सप्तम्यन्तेन सम्प्रसारणशब्देनोच्यत इति।
पुनः सम्प्रसारणग्रहणमिति। असति तस्मिन्, `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति पूर्वप्रकरणविहितस्यैव सम्प्रसारणस्य प्रतिषेधः स्यान्न विदेशस्थस्य। विभिनन्नो देशः=विदेशः।
सम्पब्रसारणग्रहणादेवेति। इह तु `व्यथो लिटि' विव्यथे इति हलादिःशेषापवादः सम्प्रसारणम्, प्रकरणादुत्सर्गदेशश्चापवादो भवतीति परस्यैव संप्रसारणात्सिद्धम्। अत एव पुनः संप्रसारणाद्विदेशस्थेपि संप्रसारणे प्रतिषेध इतीष्टव्यम्, अन्यथा तत्रेति वाच्यं स्यात्। व्यवधानमेतावदाश्रयिष्यत इति। तेनोपपूर्वाद्वसेः `भाषायां सदवसश्रुवः' इति लिटः क्वसौ विभक्तौ च परतो वसोस्सम्प्रसारणे उपेयुषेत्यादौ धातोः प्राप्तस्य यजादिलक्षणस्य संप्रसारणस्य प्रतिषेधो न भवति, प्रत्यक्षेण षकारेण व्यवदानादिति भावः। यदि तु व्यवधानमात्रे स्यात्, तदा समानाङ्गग्रहणं कर्त्तव्यम्। निमित्तनिमित्तिनौ यत्रैकस्मिन्नेवाङ्गे भवतः, तत्र प्रतिषेधो भवतीति वक्तव्यम्। उपेयुषीत्यत्र क्वसौ धातुरङ्गम्, क्वस्वन्तं च विभक्ताविति प्रतिषेधाभावः। अन्तरङ्गत्वाद्वाऽत्र पूर्वमेव धातोः सम्प्रसारणम्।
ऋचि त्रेरिति। कल्पसूत्रकारास्तु द्विशब्दस्यापि सम्प्रसारणं प्रयुञ्जते--`तृचाः प्रतिपदनुचराः', `द्वचाः प्रगाथाः' इति ।।

लिटि वयो यः ।। 6.1.38 ।।
लिङ्ग्रहणमुत्तरार्थमिति। नेहार्थं लिटः; अन्यत्र वयादेशस्यासम्भवात् ।।

वश्चास्यान्यतरस्यां किति ।। 6.1.39 ।।
अस्यग्रहणेन वयो यकारः प्रतिनिर्द्दिश्यते, अन्यथादेशाकारस्योच्चारणार्थत्वे प्रमाणाभावाद्वय एवायं सर्वादेशः सम्भाव्येत। अस्यग्रहणे तु सति यद्यष्यकारवानादेशः तथाप्यतो लोपेन सिद्धमिष्टम्।
वश्चास्यग्रहणं शक्यमकर्त्तुम्। कथम्? `अन्यतरस्यां किति वेञः' इति सूत्रं कर्तव्यम्, लिटीत्येव, किति लिटि परतो वेञः सम्प्रसारणं न भवत्यन्यतरस्याम्--ववतुः, ववुः; सम्प्रसारणपक्षे उपङादेशे सति द्विर्वचनम्, सवर्णदीर्घत्वम्--ऊचतुः, ऊचुः; `वेञो वयिः' --ऊयतुः ऊयुरिति। कथं ववौ, वविथ? `ल्यपि च' इति चकारेण लिडनुकृष्यते, तत्पिति नित्यनिषेधार्थं भविष्यति ।।

ल्यपि च ।। 6.1.40 ।।
पूर्वं वश्चास्यग्रहणे क्रियमाणे `ल्यपि व्यो ज्यश्च' इति एकयोग एव कर्त्तव्यः, एवं हि द्विश्चकारोऽपि न कर्त्तव्यो भवति ।।

आदेच उपदेशेऽसिति ।। 6.1.45 ।।

आदेच उपदेशेऽशिति ।। अत्र यदि `धातोः' इति नानुवर्त्तेत, ततो विसेष्याभावादेवल नास्ति तदन्तविधिरित्युपदेशे य एच् तस्यात्त्वमित्यर्थो भवति; ततश्च ढौकिता, त्रौकिता इत्यत्रापि प्राप्नोति। ननु चाशितीत्युच्यते, न चात्राशितं पश्यामः; न च ककार एवाशित्, किं कारणम्? नञिवयुक्तन्यायेन शित्सदृशस्य प्रत्ययस्यैव ग्रहणात् ? स्यादेवं यद्यशितीति पर्युदासः स्यात्, प्रसज्यप्रतिषेधस्त्वयमिति वक्ष्यते। तस्माद्धातोरित्यनुवर्त्तयमित्याह--धातोरिति वर्त्तत इति। तस्य चैचो विशेषणात्तदन्तविधिरित्याह--एजन्तो यो धातुरिति। उपदेश इति। अनिर्ज्ञातस्वरूपस्य स्वरूपज्ञापनार्थमाद्यमुच्चारणम्=उपदेशः।
चेता, स्तोतेति। आर्धधातुके गुणविधानं त्वात्त्वार्थमेव स्यात्; यं विधिं प्रत्युपदेश इति न्यायात्। कर्त्ता, हर्त्ता हत्यादौ च गुणविधिश्चरितार्थः। एवमपि लाक्षणिकत्वादेवात्र न भविष्यति? ज्ञापकाच्च; यदयं क्रीङ्जीनां णावात्त्वं शास्ति, तज्ज्ञापयति-न परनिमित्तस्यैच आत्त्वं भवतीति। नैतदस्ति ज्ञापकम्, नियमार्थमेतत् स्यात्--क्रीङ्जीनां णावेवेति। तत्तर्हि `मीनातिमिनोतिदीङां ल्यपि च' इत्यात्त्वं सास्ति? एवं तर्ह्युत्तरार्थमवश्यं कर्त्तव्यमुपदेशग्रहणम्, तदिहैव क्रियते मन्दधियामनुग्रहाय।
कथमिति। अशिदित्ययं बहुव्रीहिः, तत्र शिति प्रतिषेधे क्रियमाणे शिन्मात्रस्य प्राप्नोति, ततश्च जग्लाये इति भवितव्यमिति प्रश्नः। भावे लकारः, तत्पुरुषाश्रयेणोत्तरम्। कः पुनस्तत्पुरुषे सति गुणः? इत्यत आह--तत्रेति। तत्पुरुषे हि वर्णग्रहणमिदं भवति, वर्णग्रहणे च तदादौ कार्यं भवति। स्तनन्धय इत्यत्र तु `नासिकास्तनयोः' इति खशि कृते मद्यपातिनं शपमाश्रित्य प्रतिषेधः। प्रयोजनाभावादेवात्र न शपपा भितव्यमिति चेत्? नन्विदमेव प्रयोजनं यदुतात्त्वनिवृत्तिः। अशितीति। यद्ययं पर्युदासः स्यात्--शितोऽन्योऽशित्, तस्मिन्नशितीति, ततो ग्लायन्ति, मलायन्तीत्यत्र शबकारस्यान्त्याकारस्य चैकादेशे कृते तस्य परं प्रत्यादिवद्भावादस्ति शितोऽन्य इति कृत्वाऽऽत्त्वमत्र प्राप्नोति। प्रसज्यप्रतिषेधे तु न दोषः; एकादेशस्य पूर्वं प्रत्यन्तवद्भावात् सिद्ग्रहणेन ग्रहणात् शिति प्रतिषेध एव भवति। किं पुनः कारणमेकादेशविषय एव आत्त्वप्राप्तिश्चोद्यते, न पुनर्ग्लायतीत्यादावपि लकार एवाशिति परत आत्त्वं प्राप्नोतीति? नैवं शक्यं चोदयितुम्; एवं ह्यशितीति प्रतिषेधो निर्वषयः स्यात्, न च `पाघाध्माधेट्दृशः' ह्रति धेटः शप्रत्ययोऽनन्यपूर्वो विषयः। न ह्येकमुदाहरणं सित्प्रतिषेधं प्रयोजयति। यद्येतावत्। प्रयोजनं स्याद् `अशे' इत्येव ब्रूयात्। यद्वा--अन्तरङ्गत्वान्नित्यत्वाच्च पूर्वं चोद्यते? नैष दोषः; एकादेशस्य पूर्वविधौ स्थानिवद्भावेनादिशितोऽन्यस्य प्रत्ययस्याभवात्। इह तर्हि--सुग्लः, सुग्ला, सुग्लानमित्याकारान्तलक्षणाः काङ्यनो न स्युः? एषोऽप्यदोषः;
आत्त्वभाविन एजन्तादाकारान्तनिमित्तकः।
प्रत्ययो ज्ञाप्यते सर्वो ह्वावामश्चेत्यणा पुनः ।।
इह तर्हि ग्लै-ग्लानीयम्, पै--पानीयम्, अनीयरि कृते आत्त्वं च प्राप्नोति, आयादयश्च, परत्वादायादयः स्युः? सत्यम्; कृतेषु तेष्वलोन्त्यस्यात्वे सवर्णदीर्घत्वे ग्लानीयमित्यादि सिद्धम्। नन्वायादिषु कृतेषु नायमेजन्तः, न च स्थानिवद्बावोऽलाश्रयत्वात्? स्यादेतदेवं यदि सम्प्रति यदेजन्तं तस्यात्त्वं भवतीत्युच्येत, इह तूपदेशगतमेजन्तत्वं न सम्प्रतितनमिति नास्ति स्थानिवद्बावापेक्षा। नन्वेवमपि जग्लतुरित्यादौ यकारस्यात्वे कृते जग्ला+आ+अतुसिति स्थितेऽन्तरङ्गमप्याकारयोरेकादेशं बाधित्वा `आतो लोप इति च' इत्यातो लोपः स्यात्, न च पूर्वस्याकारस्य पुनर्लोपो लभ्यते, यकाराकारलोपस्य पूर्वविधौ स्थानिवद्भावात् `असिद्धवदत्राभात्' इत्यसिद्धत्वाच्च? नैष दोषः; समानाश्रये `वार्णादाङ्गं बलीयः' इह तु व्याश्रयत्वादन्तरङ्ग एकादेशे सति पश्चादाल्लोप इति सिद्धमिष्टम्। एवमपि `द्विर्वचनेऽचि' इत्यायादीनां स्थानिवत्ताव्त ग्लैशब्दस्यद्विर्वचनेऽभ्यासस्येवर्णान्तता प्राप्नोति, पक्षान्तरे त्वनैमित्तिकत्वादात्वस्य द्विर्वचननिमित्तेऽच्यविहितत्वान्न दोषः? पर्युदासपक्षेऽपि न दोषः, लिटि वयो यः' इति द्विलकारकोऽयं निर्देशः, तथानिर्द्देशस्य च तत्र प्रयोजनाभावादिहानुवृत्तं वाक्यभेदेन सम्बद्ध्यते--अशित्येव आत्वं भवति, लिटि तु लकारादौ लावस्थायामेवेति। ततश्चात्वस्य द्विर्वचननिमित्ताञ्निमित्तत्वाभावात्तस्य तावन्न स्थानिवद्भावः. आयादयस्तु लिट्यप्राप्ता एव। तदेवं पर्युदासपक्षस्य बहुप्रतिविधेय त्वात्प्रसज्यप्रतिषेधोऽयमित्याह--अशितीति प्रसज्यप्रतिषेधोऽयमिति। तेन किं सिद्धं भवति? इत्याह--तेनैतदित्यादि। एवमादि सिद्धं भवतीति। आदिशब्देन सुग्लेत्यत्र `आतश्चोपसर्गे' इत्यङो ग्रहणम्। अन्यानि बहुनी प्रयोजनानि प्रागेवास्माभिर्द्दर्शितानि ।
इह कस्मान्न भवति-गोभ्याम्, नौभ्यामिति? ज्ञापकात्। यदयम् `रायोहलि' इत्यात्त्वं शास्ति, तज्ज्ञापयति-न प्रातिपदिकस्यात्त्वं भवतीति। नैतदस्ति ज्ञापकम्, नियमार्थमेतत्स्यात्--रायो हल्येव; `औतोम्ससोः' इत्येत्तु गां पश्येत्यत्र, `गोतो णित्' णित्त्वाद्वृद्धिः प्राप्नोति, गाः पश्येत्यत्र त्वशितीति प्रतिषेधः प्राप्नोतीति कृतं भवेदित्यज्ञापकम् ? एवं तर्ह्युपदेश इत्युच्यते, न च गोनौशब्दयोरुपदेशोऽस्ति, यः `गोपयसोर्यन्', `नौवयोधर्म' इत्यादौ उच्चारणं नासावुपदेशः, किं तर्हि? उद्देशः, सिद्धवदुपानात्। मा भूद् गौनौशब्दयोरुपदेशः, एचस्तूपदेशोऽस्ति--`गमेर्डोः', `ग्लानुदिभ्यां डौः' इति, न च डोडावोर्विधानवैयर्थ्यम्, शसि चरितार्थत्वात्? एवं तर्हि `धातोरिति वर्त्तते'--इत्युक्तत्वान्न भविष्यति ।।

न व्यो लिटि ।। 6.1.46 ।।
कित्यात्वे सत्यसति वा विशेषाभावात्पित्युदाहरणमेतस्य वृत्तिकारेण दर्शितम्। थलि `इडत्यर्तिव्ययतीनाम्' इतीट ।।

क्रीङ्जीनां णौ ।। 6.1.47 ।।
यद्यपि करोतेः `ईङ् गतौ' इत्येतस्य यणादेशे ङिति रूपं सम्भवतति, तथापि `एचः' इत्यधिकारात्करोतेस्तावद् ग्रहणं न सम्भवति। तथा ईङोऽपि ग्रहणं न

भवति, ह्रस्वान्तेन परेण जयतिना साहचर्यात् ।।

सिध्यतेरपारलौकिके ।। 6.1.48 ।।
परलोकः प्रयोजनमस्य तत्पारलौकिकम् `प्रयोजनम्' इति ठक्, अनुशतिकादित्वादुभयपदवृद्धिः। ज्ञनविशेषे वर्त्तत इति। हेयोपादेयतत्त्वावबोधः=ज्ञानविशेषः। तापसः सिध्यतीति। हेयमुपादेयं च तत्त्वतो ज्ञातुकामः प्रवर्त्त त इत्यर्थः। तदाह--ज्ञानविशेषमासादयतीति। तपः प्रयुङ्क्ते इति। ज्ञानविशेषवन्तं करोतीत्यर्थः। परलोक इत्यस्य विवरणम्-जन्मान्तर इति। इह वा भवतु, स्वर्गादौ वा, शरीरान्तरोपलक्षणार्थं पारलौकिकग्रहणमिति। उपसंहरन्निति। हेतौ शतृप्रत्ययः। इह कस्मादिति। ब्राह्मणेभ्यो दास्यामीत्यनेनाभिप्रायेणानुष्ठितो धात्वर्थः परलोकप्रयोजनो भवतीति प्रश्नः। सिद्ध्यतेरर्थ इत्यादिना ऐहलौकिकत्वं धात्वर्थस्य दर्शयति। तस्यप्रयोजनमिति। तदुद्दिश्य प्रवृत्तत्वात्। पुनः सिद्धिरेवेति। पारलौकिकीति लिङ्गविपरिणामेन सम्बन्धनीयम्। सिद्धिः= सिद्धिरेवेति। पारलौकिकीति लिङ्गविपरिणामेन सम्बन्धनीयम्। सिद्धिः=निष्पत्तिः। यस्यां सिद्धौ धातुर्वर्त्तते सा च पारलौकिकी न भवति, तस्मादात्त्वं न पर्युदस्यते। साक्षादिति। यदि साक्षादव्यवधानेन पारलौकिको यः सिद्ध्यतेरर्थस्तत्र पर्युदासो न चरितार्थः स्यात्तदा पारम्पर्याश्रयणम्। इदं तु साक्षात्परलोकार्थे ज्ञानविशेषे चरितार्थम्, अतो नैवंविधे विषये प्रवर्त्तते इत्यर्थः ।।

मीनातिमिनोतिदीङां ल्यपि च ।। 6.1.49 ।।
उपदेश एवात्त्वविधानाल्ल्यपः परत्वासम्भवाल्ल्यपीति विषयसप्तमीत्याह--ल्यपि विषय इति। एकाच्च इति। यद्यपि प्रकृतिविशेषणं प्रागासीत्, तथापीहोपदेशाधिकारान्मीनात्यादीनां चोपदेश एजन्तत्वासम्भवात्सामर्थ्यादेव इत्येतदपि विषयविशेषणं विज्ञायत इत्याह--एचश्च विषय इति। यत्र प्रत्यये एज्भावी तस्मिन्बुद्धिस्थ इत्यर्थः। उपदेश एवेत्यस्य विवरणम्--प्राक् प्रत्ययोत्पत्तेरिति।
उपदेश एवात्त्वविधाने योऽर्थः सम्पद्यते तं दर्शयति--उपदेश एवात्त्वविधानादिति। इवर्णान्तलक्षणः प्रत्यय एरच्, आकारान्तलक्षणस्तु घञ्। यद्यपि घञाकारान्तादिति नोच्यते, तथाप्यत्रात्त्वे सति भवति, असति तु न भवतीत्येतावता घञ आकारान्तलक्षणत्वम्। उपदायो वर्त्तत इति। `घञि `आतो युक् चिण्कृतोः' इति युक्। ईषदुपदानमिति खलर्थे `आतो युच्'। मीनातिमिनोत्येस्तु खलचावेव भवत; `निमीमिलियां खलचोः प्रतिषेधः' इति वक्ष्यमाणत्वात्। अतो दी***वोदाहृतः ।।

विभाषा लीयतेः ।। 6.1.51 ।।
तयोरुबयोरपि यकाऽयं निर्द्देशः क्रियते इति। यदि तु दैवादिकस्यैव श्यना निर्द्देशः क्रियेत, `लीङः' इत्येव ब्रूयादिति भावः। शितपः शित्करणसामर्थ्याच्चाबावकर्मवाचित्वेऽपि यग् भवति, यथा--अकर्तृवाचित्वशबादयः--`भवतेरः' इत्यादौ। खलचोरिति। पचाद्यच एरचश्च सामान्येन ग्रहणम्। एवं चेति। व्यवस्थितविभाषाविज्ञानादेवेत्यर्थः। उल्लापयत इति। `लियः सम्माननशालीनीकरणयोश्च' इत्यात्मनेपदम् ।।

खिदेश्छन्दसि ।। 6.1.52 ।।
चखादेति। व्यत्ययेन परस्मैपदम्, आत्त्वस्यानैमित्तिकत्वाद् `द्विर्वचनेऽचि' इति स्थानिवत्त्वाभावदभ्यासस्येवर्णान्तता न भवति। अयं योगः शक्योऽवक्तम्। कथम्? खादेः--चखाद, खिदेः--चिखेदेति, अनेकार्थत्वाद्धातूनामर्थभेदोऽप्यकिञ्चित्करः ।।

अपगुरो णमुलि ।। 6.1.53 ।।।
यदि गिरतिर्गुरेरर्थे वर्तते, तदायं योगः शक्योऽवक्तम्। कथम् ? गिरेः--अपगारमपगारम्, गुरोः--अपगोरमपगोरम् ।।

प्रजने वियतेः ।। 6.1.54 ।।
यदि वातिरप्रजनेऽपि वर्तते, तदा योगोऽयं शक्योऽकर्तुम्। कथम्? वातेः--प्रवापयति, वीयतेः--प्रवाययतीति। वीयतेरित्ययमपि यका निर्द्दशः स्मर्यते, वेतेरादादिकत्वेन श्यनोऽसम्भवात्। प्रयोजनं हि यका निर्द्देशस्य चिन्त्यम्। जन्मन उपक्रम इति। जनेर्भवे घञ, प्रशब्द आदिकर्मणि। गर्भग्रहणमिति। गृहीतो हि गर्भो जायते, ततो गर्भग्रहणं जन्मन उपक्रमः।

बिभेतेर्हेतुभये ।। 6.1.55 ।।
हेतुभयमिति। `पञ्चमी भयेन' इति समासः, तदाह--हेतोर्भयमिति। किं पुनस्तत्? इत्याह-स यस्य भयस्येति। स चात्त्वपक्षे न भवतीति। एकदेशविकृतस्यानन्यट्वात्प्राप्नोति, कुतो न भवति? इत्याह--लीभियोरीकारप्रश्लेषनिर्द्देसादिति। `लीलोर्नुग्लुकौ' इति लियो नुग्विधीयते, यश्च `भियः षुक्'--तावुभावप्याकारान्तयोर्न भवतः, कुतः? ली+ई भी+ई इति ईकारप्रश्लेषेणेकारान्तयोर्विधानात्। लीभियोः प्रश्लेषनिर्द्देशादिति वार्त्तिके सह पाठादिह लियो ग्रहणम् ।।

नित्यं स्मयतेः ।। 6.1.57 ।।
धात्वर्थसामान्यादिति। सामान्यम्=सादृश्यम्, धात्वर्थयोः सामान्यं धात्वर्थसामान्यम्, द्वयोरपि धात्वोरर्थो चित्तविकारस्वभावौ, तेन भयशब्देन स्मयतेरर्थेऽभिधीयते, `क्रीङ्जीनां णौ' इत्यत्र स्मयतिर्नोक्तः, `हेतुभये' इत्युपाधिं वक्ष्यामीति ।।

सृजिदृशोर्झल्यमकिति ।। 6.1.58 ।।
धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यं विज्ञायत इति प्रत्यय इह सन्निधापितो झला विशेष्यत इति तदादिविधिर्विज्ञायत इत्याहझलादाविति। अकिति प्रत्यये परत इति। किति परतो न भवतीत्यर्थः। प्रसज्यप्रतिषेधो ह्ययमिष्यते, एतच्च गाङ्कुटादिसूत्र सम्यगुपपादितम्। लघूपधगुणापवा दोऽयमिति। अकितीति वृद्धिस्तु भवति, न बाध्यतेः येन नाप्राप्त्यभावात्। साप्यमि कृते भवति। तस्यैव व्याख्या। पूर्व तु बाध्यत इति। अमागमेन; नित्यत्वात्तस्य। रज्जुसृड्भ्याम्, देवदृग्भ्यामिति। उभयत्र व्रश्चादिसूत्रेण षत्वे जश्त्वमिति केचित्। अन्ये तु `क्विन्प्रत्ययस्य कुः' इति कुत्वमित्छन्ति। ननु न क्विन्नन्तावेतौ, किं तर्हि? क्विबन्तौ? नैष दोषः; यस्माद्धातोः क्वचित्क्विन् विहितः, तस्य प्रत्ययान्तरे कुत्वं भवति, `क्विनः कु' इति वक्तव्ये प्रत्ययग्रहणादिति वक्ष्यते। पदान्तस्येत्यधिकारात् स्रष्टा, द्रष्टेत्यत्र न भवति, कुत्वविधावेव तस्य निर्णयं वक्ष्यामः ।।

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ।। 6.1.59 ।।
उपदेश इति वर्त्तत इति। अनुदात्तस्य विशेषणार्थम्, तेन द्रप्तेत्यत्र तृनि विहिते यद्यपि नित्स्वरेण धातोरुदात्तत्वं भवति, तथापि उपदेशेऽनुदात्त इत्यम्भवति। वर्‌ढेत्यत्र तृचि कृते यद्यपि शेषनिघातेन धातुरनुदात्तो भवति, तथाप्युपदेशे नायमनुदात्त इत्यम्न भवति। किमर्थं पुनरनुदात्तस्येत्युच्यते, नानिट इत्येवोच्येत, एवं हि सति लघु सूत्रं भवति? तत्राहतृप प्रीणन इत्यादि। इडागमो रधादिभ्यश्चेत्यनेन विकल्पित इति। ततश्च पाक्षिकेणेटा सेट्त्वात्तयोर्न स्यात्। अथ पाक्षिकेणेडभावेन तयोरपि स्यात्, वर्ढा, वर्ढुमित्यत्रापि स्यादिति भावः। यदि तर्हि तयोः `रधादिभ्यश्च' इतीड्विकल्प्यते, अनुदात्तोपदेशः पुनस्तयोः किमर्थः? इत्याह--अनुदात्तोपदेशः पुनरमर्थ एवेति।

शीर्षंश्छन्दसि ।। 6.1.60 ।।
न पुनरयमादेशः शिरःशब्दस्येति। यद्यपि सूत्रे शिरस इति स्थानी नोपात्तः, तथापि समानार्थत्वादादेशेनाक्षिप्यते, यथा-शिवादिषु विश्रवणरवणशब्दाभ्यां विश्रवःशब्द इत्यादेशत्वशङ्का। सोऽपि हि छन्दसि प्रयुज्यत इति। आदेशक्षपक्षे तु तेन निवर्तितत्वाच्छिरःशब्दो न प्रयुज्येतेति भावः। ननु च `अन्यतरस्याम्' इत्यनुवृत्तेस्तस्यापि प्रयोगो भविष्यति, सत्यम्; उत्तरत्रापि विकल्पानुवृत्तिः शङ्क्येतेति प्रकृत्यन्तरपक्ष एवाश्रितः ।।

ये च तद्धिते ।। 6.1.61 ।।
छन्दसि पूर्वेणैव सिद्धमिति। भाषार्थमिदम्, यदि पूर्वसूत्रवदिहापि शीर्षन्निति प्रकृत्यन्तरं विज्ञायेत तदा। यदा शिरः शब्दाद्यचकारादिस्तद्धित उत्पद्यते तदा तस्य श्रवणं प्रसज्येतेति मत्वाऽऽह--आदेशोऽयमिष्यत इति। स कथमिति। स आदेशः कथं लभ्यते, न कथञ्चित्, स्थानिनोऽनुपादानात् पूर्वसूत्रवदिति प्रश्नः। तन्ननिमित्तमनुरूपां शब्दतश्चार्थतश्चान्तरतमां प्रकृतिं शिरशब्दमेवाक्षिपति। शिरस्यातीति। `सुप आत्मनः क्यन्'।
वा केसेष्विति। सूत्रेण न्त्ये प्राप्ते विकल्पितः। अत्र शिरस्यशब्दस्य केशैकविषयत्वात्तत्प्रयोगे केशशब्दो न प्रयोक्तव्यः, शीर्षण्यशब्दस्तु सामान्यवाचीति तत्प्रयोगे विशेषावगमाय केशशब्दः प्रयोक्तव्यः ।।

अचि शीर्षः ।। 6.1.62 ।।
शीर्षन्भावे ह्यन्निति प्रकृतिभावः स्यादिति। अतोऽकारान्तमादेशान्तरं विहितमिति भावः।
कर्त्तव्योऽत्र यत्न इति। तत्रायं यत्नः--शीर्षन्नादेशसन्नि पातकृतः ष्यङादेशस्तद्विघातस्य निमित्तं न भवतीति। अणिञन्ताद्वा पर इति। `अणिञोरनार्षयोः' इत्यादेशपक्षप्रहाणेन प्रत्ययपक्ष आश्रयणीयः, आदेशपक्ष एव वा स्थित्वा यत्नः कर्त्तव्य इति वाशब्दार्थः ।।

पदन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ।। 6.1.63 ।।
इहापि `शस्प्रभृतिषु' इति निमित्तोपादानादनुरूपाः प्रकृतयः आक्षिप्यन्ते, पदादयश्चादेश विज्ञायन्ते इत्याह--पाददन्ते त्यादि। अन्ते आसनशब्दः पठ्यते, आस्यशब्दस्तु पठितव्यः, आस्नो वृकस्य वर्त्तिकामभीके, ग्रीवायां बद्धो अपि कक्ष आसनि, आस्नो यत्सीसमुञ्चतं वृकस्येत्यादौ ह्यास्यार्थोऽवगम्यते। आसनीति। `विभाषा ङिश्योः' इत्यल्लोपाभावपक्षे रूपम्। अपरके पुनरविशेषणेच्छन्तीति। भाष्ये तु छान्दस्मेवैतदिति स्थितम्।
प्रकारार्थे प्रभृतिशब्द इति। व्यवस्थावाचिनि तु शसः पूर्वेषु वचनेषु न स्युः। दोषणीति। प्रथमाद्विवचने, दोःशब्दस्य दोषन्नादेशः, औङः शीभावः। मांसपचाया उखाया इति। `मांसस्य पचि युट्घञोः' इत्यन्तलोपो वक्ष्यते, तद्व्युत्पच्यन्तरम्। नस्यमिति। हितार्थे भवार्थे वा `शरीरावयवाद्यत्'। नस्त इति। `अपादाने

साहीयरुहोः' इति तसि। नः क्षुद्रः इति। `तृतीया तत्कृतार्थेन' इति समासः। `सप्तमी' इति योगविभागादित्यन्ये। बहुव्रीहौ विशेषणस्य क्षुद्रशब्दस्य राजदन्तादित्वात्परनिपात इत्यन्ये ।

यति वर्णनगरयोर्निति वक्तव्यमिति। तत्तर्हि वक्तव्यम्? न वक्तव्यम्; इह तावन्नासिक्यो वर्ण इति, परिमुकादिपाठाद् ञ्यः, नासिक्यं नगरमिति सङ्काशादिपाठाद् ण्यः, `राजन्यसाङ्काश्यकाम्पिल्पनासिक्यदार्वाघाटानामा दिर्वान्तो वा' इति प्रतिपदस्वरविधानात्स्वरेऽपि नास्ति विशेषः, प्रत्युत यत्प्रत्यये सत्यनासिक्यमित्यत्र `ययतोश्चातदर्थे' इत्युत्तरपदान्तोदात्तत्वं प्रसज्येत, अव्ययपूर्वपदकृतीस्वरश्चेष्यते ।।

धात्वादे षः सः ।। 6.1.64 ।।

सिञ्चतीति। `से मुचादीनाम्' इति नुम्।

षोडन्निति। षड् दन्ता यस्येति बहुव्रीहौ `वयसि दन्तस्य दतृ' `ष, उत्त्वं दतृदशधासु' इति षष उत्वमुत्तरपदादेष्टुत्वं च, `उगिदचाम्' इति नुम्, हल्ङ्यादिसयोगाचन्तलोगौ। क्वचित्तु षोड इति पठ्यते, तत्तु ,षोडन्तमाचष्ट इति णिचि कृते टिलोपे पचाद्यचि रूपम्। षटशब्दोऽवल्युत्पन्नं प्रातिपदिकम्। अनुकम्पितः षडङ्गुलिः षडिकः, `बह्वचो मनुष्यनाम्नष्ठज्वा', `ठाजादावूर्ध्वम्' इत्यङ्गलिशब्दस्य लोपः। लषतीति। षकारोपदेशस्तु प्रनिलषतीत्यादौ `शेषे विभाषाऽखकादावषान्त उपदेशे' इति नेर्णत्वप्रतिषेधार्थं स्यात्, लेषतुः लेषुरित्यत्र `आदेशप्रत्यययोः' इति षत्वार्थम्। क्वचित्तु कषतीत्यपि पठ्यते; तदयुक्तम्; षकारोपदेशसामर्थ्यादेवात्र न भविष्यति; प्रनिकषतीत्यत्रापि कखादावित्येव णत्वप्रतिषेधः सिद्धः; आदेशादित्वाभफ्यासलोपौ च न स्तः---चकषतुः, चकषुः। किमर्थं पुनः षादयो धातव उपदिष्टा;, न सादय एवोपदिश्येरन्, एवं ह्येतत्सूत्रं न कर्त्तव्यं भवति? तत्राह--आदोशप्रत्यययोरित्यादि। व्यवस्थानियमः--आदेशप्रत्यययोरिति सहादीनामेव षत्वं यथा स्यात्, सृपिसृजीप्रभृतीनां मा भूदित्येवमर्थं षादयः केचिदुपदिष्टाः; अन्यथा सहादीनां षत्वार्थं यत्नान्तरमास्थेयम्, तच्च गुरु भवतीति भावः। के पुनस्त इति। पाठे भ्रंशसम्भवात्प्रशनः। ये तथा पठ्यन्त इति। अप्रमादेन पठितव्यमित्यर्थः। अथ वा लक्षणं क्रियत इति। मन्दधियोऽनुग्रहीतुमिति भावः। अज्दन्त्यपराः सादय इति। अज्दन्त्यौ परौ येषां तेऽज्दन्त्यपराः, परशब्दोऽवयववाची। तच्चाज्दन्त्ययोः परत्वमवयवान्तरापेक्षं विज्ञायमानं सन्निधानात्सकारापेक्षं विज्ञायते। स्मिङ्स्विदिति। `ष्मिङीषद्धसने', `ञिष्विदा गात्रप्रक्षरणे',`ष्वन्ज सङ्गे', `विष्वप् शये'--एते स्वरूपेणैव पठ्यन्ते। वकारमकारयोरनज्दन्त्यत्वाद्वकारोऽपि केवलदन्तस्थानो न भवति। `स्वद आस्वादने' इति। स्वदिमपि केचित्पठन्ति। सृपिसृजीत्यादि। `सृप्रृ गतौ', `सृज विसर्गे',`स्तृञ् आच्छादने', `सत्यै ष्ट्यै शब्दसङ्घातयोः', `सेकतिर्गत्यर्थः', `सृ गतौ'---एतान्वर्जयित्वा येऽन्येऽज्दन्त्यपरास्ते षोपदेशाः।

सुब्दात्वित्यादि। सुब्धातुः क्यजाद्यन्तः, `ष्टिवु निरसने', `ष्वष्कतिर्गत्यर्थः' अनुदात्तेत्--एषां सत्वस्य प्रतिषेधो वक्तव्यः। तत्र सुब्दातूनां तावन्न वक्तव्यः, उपदेश इति वर्तते, न च सुब्धातवः क्वचिदुपदिश्यन्ते, एवं च कृत्वा धातुग्रहणं शक्यमकर्तुम्। उपदेशाभावादेव षोडादेर्न भविष्यति, तत् क्रियते धातोरित्यस्य निवृत्तिं सूचयितुम्। तेन `लोपो व्योर्वलि' इति अविशेषेण भवति, ष्ठीवतिष्वष्कती द्विषकारकौ, तत्र पूर्वस्यास्तु सत्वम्, परेण सन्निपातेन षत्वं भविष्यतीति। यद्येवम्, लिट् ष्वष्कते, षत्वस्यासिद्धत्वाद् `ङः सि धुट्' इति धुट् प्रसज्येत ? एवं तर्हि यकारादी ष्ठिवुष्वष्कती, यकारस्तु `लोपो व्योर्वलि' इति लुप्यते। ष्ठीवतीति। `ष्ठिवुक्लमुचमां शिति' इति दीर्घत्वम्। अथास्य द्वितीयो वर्णो यदि ठकारः, तेष्ठीयत इति न सिध्यति; अथ थाकरः, टेष्ठीयत इति न सिद्ध्यति; उभयं चेष्यते, तत्राह--ष्ठीवत इत्यस्येत्यादि। उभयथा ह्याचार्येण शिष्याः पाठिता इति भावः ।।

णो नः ।। 6.1.65 ।।

अणतीति। णोपदेशस्तु निरणतीत्यादौ `उपसरगादसमासेऽपि णोपदेशस्य' इति णत्वार्थं स्यात्। सुब्धातोरयमपि नेष्यत इति। पूर्ववदेव सर्वे नादय इति प्रयोगे। नृतीनन्दीत्यादि। `नृती गात्रविक्षेपे', `टुनदि समृद्धौ', `नर्द गर्द शब्दे', `नक्क नाशने', `नट अवस्यन्दने' चुरादिः, `नाथृ नाधृ याच्ञोपतापैश्वर्येषु' ।।

लोपो व्योर्वलि ।। 6.1.66 ।।

धातोरिति प्रकृतमित्यादि। एतद् `धात्वादेः षः सः' इत्यत्र व्याख्यातम्। दिदिवानिति। दिवेः क्वसौ रूपम्। `वस्वेकाजाद्घसाम्' इति नियमादिडभावः। अत्र वक्तव्यमस्ति तद् `वस्वेकाजाद्घसाम्' इत्यत्र वक्ष्यामः। `ऊयी तन्तुसन्ताने', `क्नूयी शब्दे'। आस्रेमाणमिति। `स्रिवु गतिशोषणयोः', औणादिको मनिन्, नञा समासः।

ननु च सतः कार्यिणः कार्येण भवितव्यमिति पूर्वं कार्यिनिर्द्देशो युक्तः, पश्चात्कार्यनिर्द्देशः--`व्योर्वलि लोपः' इति, लाघवं च भवत्यर्द्धमात्रया, तत्किमर्थं पूर्वं लोपग्रहणं कृतम्? इत्यत आह--पूर्वं लोपग्रहणमित्यादि। पूर्वं लोपग्रहणेनायमर्थः सूच्यते--विध्यन्तरात्पूर्वमेवायं लोपो भतीति, कण्कडूयतेर्यलोपश्च प्राप्नोति, वेरपृक्तलोपश्च, तत्रान्तरङ्गत्वात्पूर्वमपृक्तलोपेन भवितव्यम्।

कण्डूयतेः क्विबिति। `कण्ड्वादिभ्यो यक्' इत्यत्र भाष्यम्--`नैतेभ्यः क्विब् दृश्यते' इति, तस्मात्कण्डूमिच्छतीति क्यजन्तात्क्विब् दृष्टव्यः। द्विविधा हि कण्कड्वादयः--धातवः, प्रातिपदिकानि च। तत्र धातुभ्यो यग्विधानात्प्रातिपदिकेभ्यः क्यजादयो भवन्त्येव, तत्र क्यजन्तात्किवपि कृते--अतो लोपश्च

प्राप्नोति, वेरपृक्तलोपश्च, तत्रान्तरङ्गत्वात्पूर्वमपृक्तलोपेन भाव्यम्। अथाप्यार्द्धधातुक इति विषयसप्तम्याश्रयणात्पूर्वमतो लोपः, पश्चात्क्विप्? एवमपि क्विलोपश्च प्राप्नोति, वेरपृक्तलोपश्च, तत्रान्तरङ्गत्वात्पूर्वमपृक्तलोपः स्तात्, तस्मिश्च सति निमित्ताभावादलाश्रये प्रत्ययलक्षणाभावात्स्थानिवद्भावाभावाच्च वलि लोपो न स्यात् पूर्वलोपग्रहणाच्च भवति। अथात्र लोपस्य स्थानिवद्बावादुवङ् करमान्न भवति ? उच्यते; क्यजन्तात्क्विबित्युक्तम्, ततः किम् ? स्थानिवद्भावेनापि कण्कडूमात्रस्य धातुत्वाभावादुवह् न भवति। यणादेशस्तर्हि प्राप्नोति ? अस्तु यण्, तस्योठ् करिष्यते। न चोठयपि कर्त्तव्ये स्थानिवद्भावः, आदिष्टदचः पूर्वत्वाद्वकारस्य, अत एव कण्कड्वावित्यादावूङ्वङादिषु कर्त्तव्येषु नास्त्यल्लोपस्य स्थानिवद्भावः।
अथ व्रश्चकः, व्रश्चनमित्यादौ रेफे वलि परतो वकारस्य लोपः कस्मान्न भवति? तत्राह--व्रश्चादीनामित्यादि। ननु वृश्चति, वव्रश्चेत्यादौ सम्प्रसारणे कृते हलादिशेषे च वकारस्य श्रवणं यथा स्यादित्येतदुपदेशस्य प्रयोजनं स्यात्, न ह्यत्र लोपः प्रवर्तते, वल्परत्वाभावदित्यत आह--वृश्चति वव्रश्चेत्यादावपीत्यादि। बहिरङ्गत्वादिति। बहिरङ्गत्वं सम्प्रसारणस्य क्ङित्प्रत्ययोपेक्षत्वात्, हलादिशेषस्य त्वभ्यासापेक्षत्वात्, ततश्चाकृतयोरेव तयोर्वलोपः प्राप्त उपदेशसामर्थ्यादेव न भवति।
अत्र भाष्ये वलोपः प्रत्याख्यातः। आस्रेमाणम्, जीरदानुरित्यत्र छान्दसो वर्णलोपः, क्वसावपि छान्दस एव, दिविप्रबृतीनां यङ्लुगन्तानां तसादिषूठा भवतिव्यम्, तिप्सिपोरीडभावपक्षेषूठा भवितव्यम्। ये तत्र क्ङितीति नानुवर्त्तयन्ति-देदिविति देद्योति, देदिवीषि देद्योषि, मिपि त्वनुनासिकत्वादेव भवति, देदिवीमि देद्योमि; ये त्वनुवर्त्तयन्ति तेषामपि छान्दसो यङ्लुगिति ।।

वेरपृक्तस्य ।। 6.1.67 ।।
क्विबादयो गृह्यन्त इति। ततोऽन्यस्य वेरपृक्तस्याभावात्। घृतस्पृगिति। `क्विन्प्रत्ययस्य कुः' अपृक्तग्रहणाद्वकारमात्रस्येदं ग्रहणम्, इकार उच्चारणाथः ।।

हल्ङ्याब्भ्यो दीर्घत्सुतिरयपृक्तं हल् ।। 6.1.68 ।।
दीर्घग्रहणं सम्भवव्यभिचाराभ्यां ङ्भापोरेव विशेषणम्। ङ्याब्ग्रहणं च सोविशेषणम्। हलपृक्तग्रहणं च तिस्योः। सुतिसीति त्रीणि पदानि। तदिहेत्यादि। प्रकृतस्य लोपशब्दस्य शास्त्रीयस्य भावसाधनस्य सुतिसीति प्रथमान्तेन सम्बन्धाभवादिति भावः। अपर आह-इल्ङ्याब्भ्यः' इति पञ्चम्या सुतिसीत्यादिकायाः प्रथमायाः षष्ठ्यां प्रकल्पितायां शास्त्रीयेऽपि लापशब्दे न दोष इति। अभिनोऽत्रेति। भिदर्लङि सिलोपः, `दश्च' इति दकारस्य रूत्वम्, तस्य `अतो रोरप्लुतादप्लुते' इत्युत्वम्, श्नमोऽकारेण `आद्गुणः', `एङः पदान्तादति' इति पूर्वरूपम्।
निष्कौशाम्बिरिति। ननु च प्रत्ययग्रहणपरिभाषया तदादिग्रहणादेवात्र न भविष्यति, इहापि तर्हि न स्यात्--परमकुमारी, परमखट्वेकि? `स्त्रीप्रत्यये चानुपसर्जने न' इति तदादिनियमाबावाद्भविष्यति। निष्कौशाम्बिरित्यादौ उपसर्जनत्वाद्भवत्येव तदादिनियमः ? एवं तर्हि एतज्ज्ञापयति--अर्द्धपिप्पलीत्यादौ `एकविभक्ति च' इत्युपसर्जनत्वे सत्यपि लोपो भवति। नात्रोपसर्जनं पिप्लली; एकविभक्तावषष्ठ्यन्तमिति वचनात्। अत एव `गोस्त्रियोरुपर्जनस्य' इति ह्रस्वत्वं न भवति। मा भूच्छास्त्रीयमुपसर्जनम्, अप्रधानं तावद्भवत्येव--बह्व्यः श्रेयस्योऽस्य बहुश्रेयसीति? शास्त्रीयमप्युसर्जनत्वमस्ति, `ईयसश्च' इति कपः प्रतिषेधः, `ईयसो बहुव्रीहौ प्रतिषेधो वक्तव्यः' इति ह्रस्वाभावः। अपर आह--`निष्कौशाम्बिरित्यादौ समुदायस्य ङ्याबन्तत्वेऽपि यदत्र ङ्याबन्तं कौशाम्ब्यादि, ततः परस्य सोर्लोपः प्राप्नोति दीर्घग्रहणाद्व्यावर्त्तते' इति। ननु च विहितविशेषणं विज्ञायते--ङ्याबन्ताद्विहितस्येति? नैवं शक्यम्; या, सा, केत्यादौ न स्यात्, न ह्यत्र टाबन्तात्सुब्विहितः। मा भूदेवम्, हलन्ताद्विहित इत्येवं भविष्यिति। यद्येवम्, यः, सः, क इत्यत्रापि स्यात्, कर्त्ता हर्तेत्यादौ चन स्यात्, न ह्यत्र हलन्तात् त्सुर्विहित इति ? अतोऽन्यस्मादपि विहितस्य हल्ङ्याब्भ्योऽनन्तस्य लोप इत्यास्थेयम्। एवं च निष्कौशाम्ब्यादावपि लोपः प्राप्नो दीर्घग्रहणेन व्यावर्त्तनीयः। तिपा सहचरितस्येति। तिपा तिशब्देन साहचर्यात्सहापि तिङ एव ग्रहणमित्यर्थः।
अथ किमर्थमित्यादि। `ङ्यापोर्दीर्घात्सुः' इत्येव वक्तव्यमिति चोद्यार्थः। न लोपो न स्यादिति। ननु च `न ङिसम्बुद्ध्योः' इति कज्ञापकान्नलोपे कर्त्तव्ये संयोगान्तलोपरः सिद्ध एव भविष्यति? न; पचन्नित्यादावपि प्रसङ्गात्। नकारसंबुद्धयोरानन्तर्ते प्रतिषेधो विज्ञायमानस्तुल्यजातीये नकारविभक्तयोरानन्तर्य एव संयोगान्तलोपस्य सिद्धत्वं ज्ञापयति। पचन्नित्यादौ तु तकारेण व्यवहितत्वाद् ज्ञापकाभावाल्लोपाभावः?--इत्याशङ्क्य दोषान्तरमाह--उखास्रत्, पर्णध्वदिति। दत्वमिति। न स्यादित्यनुषङ्गः। उखास्रस्+सु इति स्थिते संयोगान्तलोपमपवादत्वाद्बाधित्वा `स्कोः संयोगाद्योः' इति प्रकृतिसकारस्य लोपे श्रूयमाणः सकारो न वस्वादिसम्बन्धीति `वसुस्रंसु' इति दत्वं न स्यात्। न च संयोगादिलोपं बाधित्वा पूर्वमेव प्रकृतिसकारस्य दत्वं लभ्यते; अपदान्तत्वात्। न हि सौ श्रूयमाणे पूर्वस्य पदसंज्ञाऽस्ति; `असर्वनामस्थाने' इति प्रतिषेधात्। अथापिसावपि पदत्वमिति पक्षाश्रयेण स्यात्पदत्वम्? एवमपि दत्वस्यासिद्धत्वात्पूर्वसंयोगादिलोप एव स्यात्। ननु च वस्वादीनां दत्वं सौ दीर्घत्वे सिद्धमिति वक्ष्यति तत्र, सौ दीर्घग्रहणं न करिष्यते वस्वादीनां दत्वमित्येव, ततश्च पूर्वमेव दत्वं भविष्यति? एवमपि राजा, तक्षेत्यादौ सावपि पदत्वे सति संयोगान्तलोपस्यासिद्धत्वात्पूर्वं नलोपे सति असंयोगान्तत्वात्सोर्लोपो न स्यात्। तस्मात्सुष्ठूक्तम्--दत्वं न स्यादिति। उत्वमिति। न स्यादित्यनुषङ्गः। स एव हेतुः-- संयोगान्तलोपस्यासिद्धत्वादिति। उत्वमिति। न स्यादित्युनुषङ्गः। स एव हेतुः-- संयोगान्तलोपस्यासिद्धत्वादिति। एतच्च `संयोगान्तलोपो रोरुत्वे सिद्धो वक्तव्यः'---इत्येतदनाश्रित्योक्तम्। तदाश्रयणे तु--हरिवो मेदिनीमित्यादिवत्सिद्धम्। रात्सस्येति नियमाल्लोप एव न स्यादिति। ननु `रात्सस्य' इति द्वितकारकनिर्देशात्तकारस्यापि प्रश्लेषाद्रेफादुत्तरस्य च तकारस्यापि लोपो विधास्यते? यद्येवम्, कीर्त्तयतेः क्विपि `कीः' इति स्यात्, यथान्यासे तु कीर्दिति भवति। तदेवं सिग्रहणमेकं न

कर्त्तव्यम्, अन्यत्सर्वं कर्त्तव्यमिति स्थितम्।
संयोगान्तस्य लोपे हीत्यादि। संग्रहश्लोकः। हिशब्दो हेतौ, नलोपादीत्यादिशब्देन दत्वोत्वयोर्ग्रहणम्। ये तु संयोगान्तलोपवादिनस्तेषां रेपादुत्तरस्य तकारस्य अबिभर्भवानित्यत्र नैव लोपः स्यात्, तस्माद्धल उत्तरेषां सुतिसीनां लोपो विधीयते ।।

एङ्ह्रस्वात्सम्बुद्धेः ।। 6.1.69 ।।
अत्र यदि हल्ग्रहणं नानुवर्तेत, तत एङ्ह्रस्वाभ्यां सम्बुद्धिरेव विशेषणीया--एङन्ताद् ह्रस्वान्ताच्च परस्याः सम्बुद्धेर्लोप इति, ततश्च हे कुण्डेत्यत्र न स्यात्। कथम्? कुण्ड+सु इति स्थिते लोपश्च प्राप्नोत्यम्भावश्च, तत्र लोपः शब्दान्तरप्राप्त्याऽनित्याः, स हि कृतेऽम्भावे `आदेः परस्य' इत्यमोऽकारस्य प्राप्नोति, अकृते तु सकारस्य अम्भावस्तु लोपे कृतेऽत्यन्ताप्राप्त्याऽनित्यः- इत्युभयोरनित्ययोः परत्वादम्भावे कृतेऽमि पूर्वस्य प्राप्नोति लोपश्च। तत्रामि पूर्वत्वे कृते व्यपवर्गाभावादुभयत् आश्रणणेऽन्तादिवद्भावाभावाच्च लोपो न प्राप्नोति, लोपे च कृतेऽमोऽभावादमिपूर्वत्वं न प्राप्नोतीत्युभयोरनित्ययोः परत्वादमि पूर्वत्वे कृते लोपो न स्यात्, तस्मादनुवर्त्यं हल्ग्रहणम्। तदाह-हलिति चेति। `वर्त्तते' इत्यपेक्षते। अपृक्तमिति नाधिक्रियत इति। यद्यधिक्रियेत, हे कुण्कडेत्यत्र न स्यात्; अपृक्तसंज्ञाया अभावात्। कथं पुनर्ज्ञायते--नायमधिक्रियत इति? तत्राऽऽह--तथा चेति। अनुवर्तमानेऽपि हल्ग्रहणे यद्येङ्ह्रस्वाभ्यां सम्बुद्धिर्विशेष्येत, तया हल् विशेष्येत--एङन्ताद् ह्रस्वान्ताच्च परा या सम्बुद्धिस्तस्या हल्लुप्यते इति, ततः हे कुण्डेत्यत्र न स्यात् पूर्वोक्तादेव हेतोः। अत एङ्ह्रस्वाभ्यां सम्बुद्ध्या च हलेव विशेषणीय इति मत्वाऽऽह--एङन्तात्प्रातिपदिकादित्यादि। सम्बुद्ध्याक्षिप्तप्रतिपदिकमेङ्ह्रस्वाभ्यां विशेष्यत इति तदन्तविधिलाभः। अत्र पक्षे कुण्डेत्यत्रामि पूर्वत्वस्य पूर्वं प्रत्यन्तवद्भावाद् ह्रस्वान्तात्परो हल्भवति। वस्तुतश्च सम्बुद्धेरिति लोपः सिद्धयति।
अच्छब्द इति। एतच्च तत्रैव व्याख्यास्यते। ह्रस्वाभावादिति। ननु चादडेवाकारो ह्रस्वः, ततः परो हल् भवति, सम्बुद्धेश्च सम्बन्धीति लोपः स्यादेव, सम्बुद्धौतु विशेष्यमाणायां प्रकृत्यकारस्य लोपे ह्रस्वात्प्रा सम्बुद्धिर्न भवतीति लोपाप्रसङ्गः? उच्यते; `सम्बुद्ध्याक्षिप्तं प्रातिपदिकमेङ्ह्रस्वाभ्यां विशेष्यते' इत्युक्तम्, तेन कुण्कडेत्यत्र न भविष्यति; एकादेशस्य पूर्वं प्रत्यन्तवद्भावात् प्रकृतिग्रहणेन ग्रहणात्। हे कतरदित्यत्र च न भविष्यति; टिलोपे कृते प्रकृतेरह्रस्वान्तत्वात्। सम्बुद्धिगुणबलीयस्त्वादिति। अन्यथा अग्नि+सु इति स्थिते सम्बुद्धिगुणश्च प्राप्नोति, ह्रस्वादिति लोपश्च; तत्र नित्यात्वात्परत्वाच्च सम्बुद्धिगुणे कृतेऽह्रस्वान्तत्वान्न भवेत्। ननु च विहितविशेषणं विज्ञास्यते--ह्रस्वान्ताद्विहिता या सम्बुद्धिरिति? एवमपि हे खट्वेत्यत्र न स्यात्। मा भूदनेन, आबन्तत्वात्पूर्वेण भविष्यति ? एवमपि हे खट्वेत्यत्र न स्यात्। मा भूदनेन, आबन्तत्वात्पूर्वेण भविष्यति? एवमपि हे नदि, हे यवागु, हे कुमारीत्यत्र न स्यात्, न चात्र ङ्यन्तत्वाल्लोपो लभ्यते, दीर्घग्रहणात्। एवं तर्ह्युभयं विज्ञास्यते--विहितविशेषणम्, परविशेषणं च; तेनाग्ने, कुमारीत्यादौ सर्वत्र भविष्यति? तत्र सकृच्छ्रुतस्य ह्रस्वग्रहणस्योभयविशेषणत्वमेव तावद् दुर्लभम्। अथापि लभ्यते? एवमपि हे कतरदित्यत्र यद्यपि टिलोपे कृते सम्बुद्धेर्ह्र स्वपरत्वाभावः, तथापि ह्रस्वान्ताद्विहिता सम्बुद्धिरिति स्यादेव लोपः। तस्मादेङ्ग्रहणं कर्तव्यम्।
वयं तु ब्रूमः--ये स्वभावत एङन्तास्तदर्थमप्येङ्ग्रहणं कर्त्तव्यमिति। तद्यथाहेशब्दमतिक्रान्तो ब्राह्मणोऽतिहेः, तस्य सम्बोधनं हे अतिहे; अनुकृतः पचतेशब्दो येन तस्य सम्बोधनं हेऽनुकृतपचते; विहित ईरेप्रत्ययो येन स विहितेरेः पाणिनिः, तस्य सम्बोधनम्--हे विहितेरे इत्यादि। अत्र संग्रहश्लोकः---
सम्बुद्धिर्ह्र स्वभेद्या यदि हि न च भवेन्नादिवन्नान्तवत्स्याद्,
दोषोऽसौ हल्निवृत्तावपि लुपि भवतोऽम् पूर्वरूपे परत्वात्।
ह्रस्वान्ताल्लुब्विधिः स्याद्धल इति कतरड्डित्त्वतो नो हलो लुप्,
ह्रस्वश्रुत्या न शक्यः परविहितविधिर्नातिहेऽतोऽप्यकार्येऽङ् ।।
लोपनं लुप्, लोप इत्यर्थः ।।

शेश्छन्दसि बहुलम् ।। 6.1.70 ।।
या क्षेत्रेति। शेर्लोपे कृते प्रत्ययलक्षणेन `नपुंसकस्य झलचः' इति नुम्, `सर्वनामस्थाने च' इति दीर्घः, नलोपः।
अयं योगः सक्योऽवक्तुम्, कथम्? डादेशेन सिद्धत्वात्। कथमग्नेत्रीति? त्रि+इ इति स्थिते प्रथमयोः पूर्वसवर्णदीर्घत्वेनैव सिद्धम्। न सिद्ध्यति, नुमा व्यवहितत्वात्? छन्दसि नपुंसकस्य पुंवद्भावो पक्तव्यः, मधोर्गृह्णातीत्येवमाद्यर्थं पुंवद्भावेनैव नुमो निवृत्तिः। एवमपि `जसि च' इति गुणः प्राप्नोति, वक्ष्यत्येतत्--`उसादिषु छन्दसि वावचनं प्राङ् णौ चङ्युपधायाः' इति। अपि च या क्षेत्रा, ता ता पिण्डानामिति त+इ इति स्थिते `सुपां सुलुक्' इतीकारस्याकारे कृते `प्रथमयोः पूर्वसवर्णः' इति दीर्घत्वेन सिद्धम् ।।

ह्रस्वस्य पिति कृति तुक् ।। 6.1.71 ।।
कृता धातुराक्षिप्यते, स च ह्रस्वेन विशेष्यते, तेन तदन्तविधिर्भवतीत्याह--ह्रस्वान्तस्य धातोरिति। अग्निचित्, सोमसुदिति। `अग्नौ चेः', `सोमे सुञः' इतिक क्विप्।
ग्रामणिकुलमिति व्यस्तं चेन्नपुंसकह्रस्वत्वम्, षष्ठीसमासे तु `इको ह्रस्वोऽङ्यो गालवस्य', `सोमे सुञः' इति क्विप्।
यदि पुनरयं तुट् परादिः क्रियते? चनैवं शक्यम्; इहाग्निचित्सोमसुत्, `वेरपृक्तस्य' इति वलोपो न प्राप्नोति। इह च परितनोतीति क्विप्, `क्वौ च

गमादीनाम्' इत्यनुनासिकलोपः, `नहिवृति' इत्यादिना दीर्घः--परीतत्, तुट आर्द्धधातुकभक्तत्वादिट्प्रसङ्गः। इह चावच्छ्याद् `वाऽन्यस्य संयोगादेः' इत्येत्वं प्रसज्येत। अथाभक्तः स्याद्, मधुच्छादयतीति `तिङ्ङतिङः' इति निघातो न प्राप्नोति; तकारेण व्यवधानात्। न च तकार एवातिङ्; अपदत्वात्। तस्मात्पूर्वान्त एव कर्त्तव्यः। यद्येवम्, नपुंसकह्रस्वत्वमुपसर्जनह्रस्वत्वं द्विगुस्वरश्च न सिद्ध्यति। नपुंसकह्रस्वत्वम्--आराशष्कुलिच्छत्रम्, धानाशष्कुलिच्छत्रम्। उपसर्जनह्रस्वत्वम्--निष्कौशाम्बिच्छत्रम्; द्विगुस्वरः--पञ्चारत्निच्छत्रम्, तुकि कृतेऽनन्त्यत्वादेते विधयो न प्राप्नुवन्ति ? न वा बहिरङ्गलक्षणत्वात्। बहिरङ्गस्तुक्--छकारसन्निपातापेक्षत्वात्, अन्तरङ्गा एते विधयः प्रागेव तत्सन्निधा नाद्भविष्यन्ति ।।

संहितायाम् ।। 6.1.72 ।।

`संहितायाम्' इति विषयसप्तमीयम्। कार्यिनिमित्तयोः संहितायां विषयभूतायां वक्ष्यमाणं कार्यं भवतीत्यर्थः। वक्ष्यति---`इको यणचि' इति, अन्तरं तु विधिमतिक्रामतोऽभिप्रायो मृग्यः। दधि अत्रेति। ननु च `इकोयणचि' इत्यधिकरणसप्तम्येषा, तच्चाधिकरणमौपश्लेषिकादन्यद्वर्णेषु न सम्भवति, तत्राच्युपश्लिष्टस्येको विधीयमानो यण्वर्णान्तरव्यवाये कालव्यवाये च न भविष्यतीति नार्थः संहिताधिकारेण? ज्ञापनार्थं तु, एतज्ज्ञापयति--`कालव्यवायो निर्दिष्टपरिभाषायां नाश्रीयते' इति। तेनोत्तरपदादिकारेऽपि विधीयमानं कार्यमलुगादि कालव्यवधानेऽपि भवत्येव--आखरेष्ठ इत्याखरे स्थः, अग्नाविष्णू इत्यग्ना विष्णू इत्यादि ।।

छे च ।। 6.1.73 ।।

छकारेकार उच्चारणार्थः, `विदिभिदिच्छिदेः', `शाच्छोरन्यतरस्याम्' इत्यादिर्निर्द्देशात्। अधिकारे द्वौ पक्षौ--अर्ताधिकारः, शब्दाधिकार इति। तत्राद्ये पक्षे पूर्वसूत्रे कृताक्षिप्तस्य धातेर्ह्रस्वेन विशेषणात्तदन्तं ह्रस्वशब्देन प्रत्यायितमिति इहापि तदन्तस्यैव ग्रहणं स्यात्। शब्दाधिकारे तु ह्रस्वशब्द एवात्रानुवर्त्तते, न पूर्वः प्रकृतोऽर्थः, न चेह किञ्चिद्विशेष्यमस्तीति तदन्तविध्यभावाद् ह्रस्व एवागमी भवति। तत्रेह द्वितीयः पक्ष आश्रित इत्याह--ह्रस्व एवात्रागमीति। किमेवं सति सिद्धं भवति? तत्राह--तेनेति। यदि तु ह्रस्वान्तस्य तुक् स्यात्, तुकोऽभ्यासग्रहणेन ग्रहणाद्धलादिशेषेण निवृत्तिः स्यात्। ह्रस्वमात्रे त्वागमिनि नायमभ्यासस्यावयवो हलिति न भवत्येष प्रसङ्गः। कथं पुनर्ह्रस्व अगमिनि गुगभ्यासग्रहणेन न गृह्यत इत्यत आह--नावयवावयव इति। इतिकरणो हेतौ। यद्यवयवावयवस्समुदायावयवो न भवति, एवं तर्हि शेरत इत्यत्र रूडागमः सार्वधातुकावयवस्यादादेशस्यावयव इति सोऽपि सार्वधातुकस्य समुदायस्यावयवो न स्यात्। तत्र को दोषः ? `शीङः सार्वधातुके गुणः' इति गुणो न स्यात्; रुटा व्यवधानात्। स ह्यवयवभक्तस्तमेव न व्यवदध्यात्, सार्वधातुकं तु व्यवदधात्येव। कुतश्चैष न्यायः--`अवयवावयवः समुदायावयवो न भवति' इति ? लोके तावद्देवदत्तावयवस्य हस्तस्यावयवोऽङ्गुलिर्देवदत्तस्याप्यवयवो भवत्येव--साङ्गुलिर्देवदत्त इति। तस्मादयमत्राभिप्रायः--`छ आह्भाङोश्च' इत्येक एव योगः कर्त्तव्यः, चकारादनन्तरस्य प्राक्कृतस्य च; एवं सिद्धे यद्योगविभागं चकारं च करोति, तस्यैत्प्रयोजनम्--प्रकृतस्य तदन्तस्य प्रहाणेन केवलं ह्रस्वमेवानुवर्त्तयिष्यामिति। यदि त्वागमस्तुक् समुदायस्यावयवः स्याद्, एष यत्नोऽनर्थकः स्यादिति ।।

आङ्माहोश्च ।। 6.1.74 ।।

आङ्भाङोर्ङिद्विशिष्टयोरुपादाने प्रयोजनमाहः--आङो ङित इति। अर्थविशेषसम्पादनार्थं ङिद्विशिष्टयोरुपादानमित्यर्थः। आच्छायाया इति। `आङ् मर्यादावचने' इति कर्मप्रवचनीयसंज्ञा, `पञ्चम्यपाङ्परिभिः' इति पञ्चमी। आच्छायमिति। `आङ् मर्यादाभिविध्योः' इत्यव्ययीभावः। माच्छिददिति। `इरितो वा' इत्यङ्।

आछाया, आच्छायेति। स्मरणे चात्राकारः, `वाक्यस्मरणयोरङित्'। प्रमेति। प्रमूर्वान्माङः `आतश्चोपसर्गे' इत्यङ्, अत्र धातोर्ङित्वेऽपि टाबन्तो न ङित्, `गामादाग्रहणेष्वविशेषः' इति लाक्षणीकस्याप्यस्य ग्रहणस्य प्रसङ्गः। अत्रोभयत्रापि `पदान्ताद्वा' इति विकल्प एव भवति ।।

दीर्घात् ।। 6.1.75 ।।

`अभयनिर्द्देशे पञ्चमीनिर्द्देशो बलीयान्', अचरितार्था च पञ्चमी, तेन दीर्घादिति पञ्चम्या छ इत्यस्याः सप्तम्याः षष्ठ्यां प्रकल्पितायां छकारस्यैव तुका भवितव्यमिति भ्रान्तिमपाकारोति--दीर्घात्परो य इत्यादि। अनेन पञ्चम्या अन्वयो दर्शितः, प्रक्रमाभेदाय तु छकारस्य निमित्तत्वम्, दीघस्य च कार्यित्वं दर्शयति। तस्मिन्पूर्वस्य तस्यैव दीर्घस्येति। अत्र च लिङ्गम्--`शाच्छा', `विभाषासेनासुराच्छाया' इत्यादि निर्द्देशः, अवध्यवधिमद्भावस्य विवक्षिततवादधिकरणभावस्य च विवक्षितत्वात् `तस्मिन्पूर्वस्य' इति सप्तमी कृता। ह्रीच्छतीति। `ह्रीच्छ लज्जायाम्'। म्लेच्छतीतिष। `म्लेच्छ अव्यक्ते शब्दे'। अपचाच्छायत इति। `छो छेदने', यङ्, `दीर्घोऽकितः'।।

पदान्ताद्वा ।। 6.1.76 ।।

प्रकृतेन दीर्घण पदविशेषणादेव तदन्तविधौ सिद्धेऽन्तग्रहणम्पदान्तविधिरयं तुग् यथा स्यात्, पदविधिर्मा भूदिति। तेन समर्थपरिभाषानुपस्थानात्--तिष्ठतु कुमारीच्छत्रं हर देवदत्तस्येत्यत्रापि विकल्पो भवति ।।

इको यणचि ।। 6.1.77 ।।

इको यणादेशो भवतीति। इकां यणां च साम्याद्यथासंख्यं भवति, आन्तर्यतो वा व्यवस्था। इक इति किम्? व्यञ्जनस्य मा भूत्--वाग्रत्र। कुत्वजश्तवयोरसिद्धत्वाच्छकारस्य यकारः प्राप्नोति। यत्र च कुत्वादेरप्रसङ्गोऽपदान्ते पचतीति, तत्रापि प्रसङ्गः? नैष दोषः; `दीर्घात्' इति वर्त्तते, तच्च तत्रैव पञ्चमीनिर्द्देशेऽपि स्थानिबूतमिहापि तथैवानुवर्तते। यदि दीर्घस्य यण् भवति, कथं दध्यत्र मध्वत्रेति, `ह्रस्वस्य' इत्येतदप्यनुवर्त्तते, तदेवं ह्रस्वदीर्घयोर्यण्विधानान्न व्यञ्जनस्य प्रसङ्ग ? प्लुतस्य च प्रकृतिभावेन भवितव्यम्, चयनम्, चायक इत्यादावेचामयादयोऽपवादाः, नाप्राप्ते तस्मिंस्तदारम्भात् ? देवेन्द्रः, खट्वौदनमित्यादौ गुणवृद्धी बाधिके भविष्यतः, यथा--सत्यपीग्ग्रहणे दधीन्द्रादौ सवर्ण दीर्घत्वम्, अतो नार्थ हग्ग्रहणेन ? इदं तर्हि प्रयोजनम्--इको यणेवाचि यथा स्याद्, यद्यदन्यत्प्राप्नोति तन्मा भूदिति। किञ्चान्यत् प्राप्नोति ? शाकल्म्। न च तस्याप्यत्यन्तबाधः; आरम्भसामर्थ्यात्। एवं सति सिन्नित्यसमासयोः शाकलप्रतिषेध इति यत्पूर्वाचार्यैः स्मर्यते तदनेनेग्ग्रहणेन सम्पाद्यते।

इकः प्लुतपूर्वस्येति। प्लुतः पूर्वो यस्मात्स तथोक्तः, प्लुतात्परस्येत्यर्थः। भो 3 इ इन्द्रेति। भो + इ + इन्द्र इति स्थिते भोशब्दस्य गीतिवशात् प्लुतः, इकारः स्वरादिपाठान्निपात प्रगृह्यसंज्ञकः, तस्य प्रकृतिभावे प्राप्ते यण्विधीयते, सवर्णदीर्घबाधनार्थमित्येतत्त्वाद्यप्राप्त्यभिप्रायेणोक्तम्। प्लुतपूर्वस्येति। प्लुतग्रहणमपि मात्रिकद्विमात्रिकव्यतिरिक्ताच्परिग्रहार्थम्, तेन चतुर्मात्रादावपि भवति, तथा च छन्दोगा गायन्ति, सामन्येव चायमिष्यते, भोयिन्द्रं गायतीत्येतदपि सामगस्यानुकरणम्। एवं तावद्भाष्ये स्थितम्, वृत्तावप्येवमेव द्रष्टव्यम् ।।

वान्तो यि प्रत्यये ।। 6.1.78 ।।

कस्य पुनरयं वान्तादेशः ? एच इति वर्त्तते। यद्येवमेदैतोरपि प्राप्नोति--चेयम्, जेयम्, रैयतीति? एवं तर्हि वान्तग्रहणं न करिष्यते, `एचोऽयवायावः' इत्येव। इहापे तर्ह्यादेशः प्राप्नोति--चेयम्, जेयमिति? `क्षय्यजय्यौ शक्यार्थे', `क्र्य्यस्तदर्थे' इत्येतन्नियमार्थं भविष्यति--एचौ यदि भवति क्षिज्योरेवेति। एवमपि रैयतीत्यत्रायादेशः प्राप्नोति? रैशब्दश्छान्दसः, `दृश्टानुविधिश्छन्दसि'। भाषायां तु रैशब्दप्रयोगो भाष्यविरोधादसाधुः। यद्वैवं नियम आश्रयिष्यते--अनौष्ठस्य यदि भवति क्षिज्योरेवेति; ततः `शक्यार्थे' इति द्वितीयो योगः, क्षिज्योरपि शक्यार्थ एवेति ? सिध्यति; सूत्रस्य तु को निर्वहः ? उच्यते; वान्तशब्दोऽयं सन्निहिते वान्ते वर्त्तते, न यत्र कुत्रचित्; सन्निहितश्चौदौत्स्थानिकः पूर्वत्र, यथासंख्यासम्बन्धात्। तत्र यथा यः कश्चन वान्तादेशो न भवति, तथान्यस्थानिको न भविष्यति; विशिष्टस्यैव सन्निधानात्। तदिदमुक्तम्--योऽयमेचः स्थाने इति। बाभ्रव्य इति। `मधुबभ्रवोर्ब्राह्मणकौशिकयोः' इति यञ्। मण्कडुशब्दो गर्गादि। शङ्कुपिचुशब्दाभ्याम् `तदर्थं विकृतेः प्रकृतौ' इत्यत्रार्थे `उगवादिभ्यो यत्' । नावा तार्यं नाव्यम्, नौवयोधर्म' इत्यादिना यत्।

अध्वपरिमाणे चेति। भाषार्थमिदम्। गव्यूतिः=क्रोशयुगम् ।।

धातौस्तन्निमित्तस्यैव।। धातोरिति किमिति। न तावदविशेषेण नियमप्रसङ्गः--

यि प्रत्यये यदि भवति तन्निमित्तस्यैवेति; एवं हि `वान्तो यि प्रत्यये तन्निमित्तस्य' इति विशिष्टविधिराश्रयणीयः, योगविभाग एवकारो नियम इति सर्वमेतदनर्थकमापद्येत। तस्मादसत्यपि धातुग्रहणे विशिष्टविषयो नियमो भविष्यतीति प्रश्नः। स तु विशिष्टो विषयः प्रातिपदकमपि सम्भाव्येतेत्युत्तरम्। वाभ्रव्य इत्यत्रैव स्यादिति। एचस्तन्निमित्तत्वात्। अत्र न स्यादिति। विपर्ययात्। उपोयत इति। वेञः कर्मणि लट, आत्मनेपदम्, यक्, यज्ञादित्वात्संप्रसारणम्, `अकृत्सार्वधातुकयोः' इति दीर्घः, `आद्गुणः', तस्य परं प्रत्यादिवद्भावाद्धातुग्रहणेन ग्रहणम्। ओयते इति। कर्मण्येव लङ्। लौयमानिरिति। `अत इञ्' आदिवृद्धिः। ननु चात्र गुणः पदद्वयापेक्षत्वाद्बहिरङ्गः, वृद्धिरपि बाह्यतद्धितापेक्षत्वाद्बहिरङ्गैव ? सत्यम्; औयतेत्यत्रैतदुभयं नास्ति, तदर्थमवश्यं योग आरब्धव्यः, आरब्धेनैव सिद्धत्वादुपोयते इत्यादिकं प्रत्युदाहृतम्।

एवकारकरणं किमिति। सिद्धे सत्यारम्भो नियमार्थत्वे हेतुः, न त्वेवकारकरणमपीति प्रश्नः। इष्टतोऽवधारणार्थ इत्युत्तरम् ।।

क्षय्यजय्यौ शक्यार्थे ।। 6.1.81 ।।

उदाहरणे शक्यार्थे कृत्यः, प्रत्युदाहरणे त्वावश्यके ।।

क्रय्यस्तदर्थे ।। 6.1.82 ।।

क्रय्य इत्यत्र प्रत्ययार्थश्च कर्म विद्यते, कर्मणि कृत्यविधानात् प्रकृत्यर्थश्च द्रव्यविनिमयः, तत्र प्रत्ययार्थः प्रधानम्, प्रकृत्यर्थस्तूपसर्जनम्, तत्र यदि प्राधान्यात्तदित्यनेन प्रत्ययार्थः परामृश्यमेव क्रय्यशब्दस्य तस्मिन्नर्थे वृत्तेर्नार्थस्तदर्थग्रहणेन। अथ सोऽर्थो यस्य तदर्थः शब्दस्तस्मिन्नभिधेय इत्यर्थः ? तदप्ययुक्तम्; शब्दस्य वृत्त्यसम्भवात्। अतो गुणीभूतोऽपि प्रकृत्यर्थे एव निर्दश्यत इति दर्शयति--तदर्थे क्रयार्थं यत्तस्मिन्नभिधेय इति। क्रयार्थं यः प्रसारित इति। क्रेतारः क्रीणीयुरिति बुद्ध्याऽऽणे यद्व्यवस्थापितमित्य्रथः। क्रेयमिति। मूल्येनोपादेयमित्यर्थः।

न चेहास्ति क्रय्यमिति। आपणे विक्रयाय प्रसारितं धान्यं नास्तीत्यर्थः। केचित्तु क्रय्यशब्दे क्रीणातिर्विक्रये वर्त्तत इत्याहुः। तेनापणे विक्रयाय प्रसारितं द्रव्यम् `क्रय्यम्' इत्युच्यते ।।

भय्यप्रवय्ये चच्छन्दसि ।। 6.1.83 ।।
वीत्येतस्येति। `वी गत्यादिषु', `अजेर्व्यघञपोः' इति वा।
हृदय्या इति। आकारस्यायादेशः ।।

एकः पूर्वपरयोः ।। वक्ष्यमाणप्रकरणे पौर्वापर्येणावस्थितौ निर्दिश्येते--आदचि, आदेचीत्यादि, तयोः पूर्वपरयोः स्थाने वक्षयमाणो गुणादिरेकादेशो भवतीति सूत्रार्थः ।
अथ पूर्वपरयोरिति किमर्थम्? स्थानिनिर्द्देशार्थम्, असति हि तस्मिन् `आद्गुणः' इत्यादौ स्थानिनिर्द्देशाभावात् कक्य गुणादिरादेशः स्यात्। नैतदस्ति प्रयोजनम्, ादित्यादिका पञ्चमी अचीत्यादिकायाः सप्तम्याः षष्ठीं प्रकल्पयिष्यति, सा च तस्यास्तेन तयोरेव पूर्वपरयोर्गुणो भविष्यतीति नार्थ एतेन ? तदाह--पूर्वपरग्रहणमित्यादि। द्वयोरादेशप्रतिपत्त्यर्थमिति। युगपदादेशप्रतिपत्त्यर्थमित्यर्थः.। असति तु तस्मिन्कस्य स्यात्? इत्यत नोभे सप्तमीपञ्चम्याविकि। नोभे प्रकल्पिके भवतः, युगपन्न प्रकल्पिके भवत इत्यर्थः। इतिकरणो हेतौ। तत्र `आद्गुणः' इत्यत्राचीत्येषा सप्तमी यणादिविधौ चरितार्था; आदित्येषा तु पञ्चमी न क्वचिच्चरितार्था, ततश्च सैव सप्तम्याः षष्ठीं प्रकल्पयिष्यति इत्यच एव स्थाने गुणः स्याद्। `वृद्धिरेचि' इत्यत्र तु गुणविधौ पञ्चमी कृतार्थेति तस्याः `एचि' इति सप्तम्यकृतार्था षष्ठीं प्रकल्पयेदित्यवर्णस्यैव वृद्धिः स्यात्। `उपसर्गादृति धातौ' इत्यादौ द्वयोरप्यकृतार्थत्वेऽपि पर्यायेण परस्परषष्ठीप्रकलृप्तिः स्यात्, न युगपत्कार्यित्वं निमित्तत्वं च; द्वयोर्युगपद्विरोधात्, ततश्च कार्यमपि पर्यायेण स्यात्। तस्मात्पूर्वपरयोरिति वक्तव्यम् ? न वक्तव्यम्; एकग्रहणसामर्थ्याद्। `अन्तादिवच्च' इति वचनाच्च पूर्वपरयोर्द्वयोरेवादेशो भवष्यति, नान्यतरस्य ? सत्यम्; सुखप्रतिपत्यर्थं तु पूर्वपरयोरित्युक्तम्; अन्यथा युगपत् षष्ठीप्रकल्पनद्वारेण विवक्षितप्रतिपत्तौ प्रतिपत्तिगौरवं स्यात् ।
अथ किमर्थमेकग्रहणम्, प्रथमनिर्दिष्टमतिक्रम्य चरमनिर्दिष्टस्य `पूर्वपरयोः' इत्यस्य प्राक् प्रयोजनमुक्तम्; पाठक्रमादर्थकमस्य बलीयस्त्वात्। कथम् ? सतः कार्यिणः कार्येण भवितव्यम्, कार्यस्य च गुणादेर्विशेषणमेकग्रंहणम्। ननु च `आद्गुणः' इत्यादावेकस्यैवादेशस्य सूत्रे उपादानम्, संख्याया विवक्षितत्वादुपात्तसंख्यात्यागे कारणाभावात्, ततश्चैक एव गुणादिरादेशो भविष्यति। स्यादेतत्--आदेशस्य विधेयतया प्राधान्यात् प्रधाने च ग्रहं सम्मार्ष्टीत्यादौ संख्याया अविवक्षितत्वादनेकादेशप्रसङ्ग इति ? तदसतः ग्रहं शेषितयोद्दिश्च सम्मार्गो हि विधीयते, शास्त्रान्तरे च विहितं शेषेत्वमुपगच्छति, शास्त्रान्तरो च विज्ञाता ग्रहाः संख्यान्तरान्विताः, तत्रैकत्वविवक्षायां वाक्यभेदः प्रसज्येतेति कृत्वा ग्रहैकत्वमविवक्षितमुच्यते। नैवं गुणादिरादेश इत्येकत्वं विवक्षितम्; `प्राजापत्या नव ग्रहाः' इति शास्त्रान्तरविहितनवग्रहोद्देशेन संस्कारः सम्मार्गो विधीयते, तत्र श्रुतमप्येकत्वं नोद्देश्यकोटौ निवेशयितुं शक्यते; तत्र संख्यान्तरान्विततया विहितत्वात्। ततश्च तद्विवक्षायां तदपि विधेयं स्यात्, ततश्च वाक्यभेदप्रसङ्गः। वचनव्यक्तिभेदाद्यो ग्रहस्तं सम्माष्टि, तं चैकमिति। इह तु विधेयतया गुणादेः प्राधान्येऽपि विशिष्टविधिसम्भवाद् न वाक्यबेदप्रसङ्गः, अविवक्षाकारणाभावाद्वियक्षितमेकत्वं लोकवत्, तद्यथा--लोकेऽनयोर्मृत्पिण्कडयोर्घटं कुर्विति, न चोच्यते एकमिति एकमेव चासौ करोति। न चार्थप्रकरणादिना तत्रैकस्य करणम्, तदभावेऽपि दर्शनात्तस्मान्नार्थ एकग्रहणेन? तत्राह--एकग्रहं पृथगादेशनिवृत्त्यर्थमिति। यथा पुनः पृथगादेशप्रसङ्गस्तथा दर्शयति--स्थानिभेदादिति। `पूर्वपरयोः' इति निर्द्देशात्स्थानिभेदः प्रतीयते, ततश्च तद्वशादादेशेऽपि श्रुतमप्येकत्वमविवक्षितं स्यादित्यनेकादेशप्रसङ्ग इत्यर्थः। अवश्यं चैतदेवमभ्युपगन्तव्यमिति दृष्टान्तेन दर्शयति। भिन्नादिषु नत्ववदिति। यथा `रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इति नत्वमेकत्वाविवक्षया प्रतिस्थानि भवति, तद्वदत्रापीत्यर्थः।
भाष्ये त्वेकग्रहणं प्रत्याख्यात्म्। न तावद् गुणभूतस्थान्यनुरोधेन प्रधानस्यादेशस्य भेदकल्पना युक्ता, प्रधानानुरोधी ही गुणो भवति,न पुनर्गुणानुरोधी प्रदानम्। यच्चोक्तम्--भिन्नादिषु नन्ववदिति, तत्र न खलु नत्वविधावेकत्वस्याविवक्षिततया द्वौ नकारौ भवतः, किं तर्हि? पूर्वस्य चेति चकाराद्वाक्यभेदोऽवगम्यते। तत्र पूर्वेण निष्ठातो नत्वम्, परेण धातुदकारस्य, इह च `उभौसाभ्यासस्य' इति प्राणिणिषतीत्युपसर्गादनन्तरस्य नकारस्य `अनितेः' इत्येव णअत्वे सिद्धे साभ्यासस्येतेयेतावतैव द्वयोर्नकारयोर्मत्वं सिद्धमिति स्थानिनिर्द्देशार्थमुभौग्रहणं न कर्त्तव्यम्--उभौ नकारौ णत्वमापद्यते इति। तस्मादादेशार्थमुभौग्रहणं विज्ञायते--साब्यासस्यानितेर्थौ नकारौ द्वौ तयोरुभौ णौ भवत इति। तेनात्रापि नैकत्वस्याविवक्षितत्वाद् द्वयोर्द्वौ भवतः, किन्तूभौग्रहणादिति न कश्चिद्दोषः।
इह श्रुतिस्मृतिविहितं कर्म किञ्चित्सकृदनुष्ठीयते, यथा--उपनयनम्, आधानम्, आचमनमिति; न ह्युपनीतः पुनरुपनीयते, नाप्यग्न्याहितः पुनरग्नीनाधत्ते, नाप्याचान्तः पुनराचामति। असति निमित्ते, किञ्चिदसकृद्यथा--ज्योतिष्टो मादयः. यथा--`पूर्ववया ब्राह्मणः प्रत्युत्थेयः' इति यो यो वृद्धवयास्तस्य तस्यागमनं प्रत्युत्थीयते। `ब्राह्मणो न हन्तव्यः', `सुरा न पेया' इति प्रतिव्यक्तिविषेधोऽनुष्ठीयते, न पुनरेकं ब्राह्मणमहत्वैकां च सुरामपीत्वान्यत्र कामचारः। व्याकरणं च स्मृतिः, तदिह `आद्गुणः' इत्यनया स्मृत्या `गुणः कर्त्तव्यः' इति चोदिते यदि सकृदनुष्ठानं खट्वेन्द्र इत्येकस्यां व्यक्तौ गुणे कृते कृतः शास्त्रार्थ इति कृत्वा मालेन्द्र इत्यादिषु न क्रियेत, तस्मात्प्रत्युत्थानादिवदावर्त्तते। किं पुनरत्र निभन्धनम्--किञ्चित्सकृत्क्रियते, किञ्चित्पुनः पुनरिति? उपनयनं तावन्माणवकस्य संस्कारः, सकृच्चासौ संस्कृतोऽध्ययनादिषु योग्यो भवति, आधानमप्यग्निसंस्कारार्थम्, सम्पन्नेष्वग्निषु प्रयोजनाबावात्पुनर्न क्रियते, आचमनमपि शौचार्थमित्य सति निमित्ते पुनर्न क्रियते। ज्योतिष्टोमादयस्तु नित्याश्चेत्प्रत्यवायपरिहाराय वसन्ते क्रियन्ते; अथ काम्याः `अमुष्मिन् लोक एनमप्सरसो जाया भूत्वोपशेरते इति ततस्तमभ्युदयम्', भूयोभूयः परीप्सुभिः पुनः पुनरनुष्ठीयन्ते। पूर्ववयोब्राह्मणप्रत्युत्थानाकरणे दोषः, करणे चाब्युदयो दर्शितः--
`ऊर्ध्व प्राणा ह्युत्कामन्ति यूनः स्थाविर आयति।

प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते'।। इति।

तच्च प्रत्यागमनमविशिष्टम्, अतो दोषनिर्हाणाथ पुनः पुनरनुष्ठीयन्ते। नैमित्तिकत्वाद्वा प्रतिनिमित्तमावृत्तिः। तथा ब्राह्मणवधे च सुरापाने च दो, उक्तः। स ब्राह्मणमात्रे सुरामात्रे च भवति, ततो दोषवन्तो मा भूमेति सर्वत्रैवानुष्ठीयते। इह शब्दस्य ज्ञाने प्रयोगे चाभ्युदयो दर्शितः--`एकः शब्द सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति' इति। प्रत्यवायश्च याज्ञे कर्मण्यपशब्दुप्रयोगे दर्शितः--`तेऽसुरा हेलयः' इति, `आहिताग्निरपशब्दं प्रयुज्य' इति च। अत एव तदपि गुणादिक पुनःपुनरनुष्ठीयते। तदेवं नित्यत्वं नैमित्तिकत्वं काम्यत्वं भूयोबूयोऽनुष्ठाननिबन्धनम्। एतच्च सर्वशास्त्रसाधारणमपि वात्तिककारेण प्रोक्तं भाष्यकारेणोपपादितमित्यस्माभिरप्यत्रैव प्रत्यपादि ।।

अन्तादिवच्च ।। 6.1.85 ।।

अन्तादिशब्दयोरवयवविशेषवाचित्वादवयविशेषापेक्षायां पवपरयोरित्यनुवृत्तेस्तस्य च वक्ष्यमाणगुणाद्यादेशविशेषणत्वादेकादेस इति लभ्यते, तदिदमुक्तम्--एकः पूर्वपरयोरिति वर्त्तत इत्यादि। कः पुनरत्रातिदेशार्थः, किं यावेकादेशस्य स्थानिनौ पूर्वपरौ तयोरन्तादिवद्भवति? किं वा--अकृत एकादेशे तमेवैकादेशमपेक्ष्य यौ पूर्वपरौ समुदायौ तयोरन्तादिवद्भवतीति ? यदि वा--एकादेशस्य स्थानिनौ पूर्वपरौ वर्णै, तयोः समुदाययोरन्तादी, यतोरेकादेशोऽप्यन्तादिवद्भवतीति ? तत्राद्यपक्षस्तावन्न सम्भवति, एकादेशेन पूपरयोस्तत्स्थानिनोर्निवर्त्तितत्वात्! कथमसतोः पूर्व परयोरन्तादिवत्स्यात्! द्वितीये पक्षे वृक्षावित्यत्र वृक्ष+औ इति स्थिते सुबसुपोरेकादेशः सुबपेक्षस्य कस्यचित्परस्याभावात्परादिवन्न स्यात् ?

अतः तृतीयः पक्ष ाश्रीयते। नन्वयमपि पक्षो न सम्भवत्येव। तथा हि--ब्रह्मबन्धूरित्यत्र ब्रह्मबन्धु+ऊ इति स्थिते पूर्वो वर्ण उकारो यस्यान्तो ब्रह्मबन्धुशब्दस्य स एकादेशे नास्त्येव, उकारस्य निवर्त्तितत्वात्; यश्चास्ति धकारान्तो न तस्यान्त एकादेशस्य स्थानी उकारः, अनारम्भकत्वात्? एवं तर्हि यद्व्यपदेशयुक्तस्य स्थानिनौ पूर्वपरावन्तादी तद्व्यपदेशयुक्तस्यैकादेशोऽप्यन्तादिवदित्यर्थः। एददुक्तं भवति--एकादेशात्प्राक् पूर्वपरयोः पृथगवस्थितयोस्ताभ्यां सह यो व्यपदेशः पूर्वपरसमुदायविषयो दृष्टः--प्रातिपदिकमिति वा, सुबन्तमिति वा, स व्यपदेश एकादेशे कृतेऽपि भवतीति। तदिदमुक्तम्--यथा तस्यान्त आदिर्वा तदन्तर्भूत इत्यादि। तस्येत्यनेन एकादेशात्प्रागवस्थितः पूर्वः परश्च समुदायो निर्दिश्यते, अन्तादिशब्दाभायां च एकादेशस्य स्थानिनौ पूर्वपरौ। तद्ग्रहणीन गृह्यत इत्यनेनापि `एतदुक्तं भवति' इत्यारम्भायन्तरं च एकादेशस्य स्थानिनौ पूर्वपरौ। तद्ग्रहणेन गृह्यत इत्यनेनापि `एतदुक्तं भवति' इत्यारभ्यानन्तरं यदुक्तमस्माभिस्तद्दर्शितम्। एषोऽतिदेशार्थ इति। अतिदिश्यत इत्यतिदेशः, अतिदेशश्चासावर्थश्चेत्यतिदेसार्थः कर्मधारयोऽयमर्थोऽत्रातिदिश्यत इत्यर्थः।

वर्णाश्रयविदावित्यादि। वर्णस्वरूपमाश्रित्य यद्विधीयते न तदन्तादिवद्भावेनातिदिश्यत इत्यर्थः। तत्कथम्? नात्र ताद्रूप्यनिबन्धनं कार्यमतिदिश्यते, योऽयमान्त आदिर्वा प्रागेकादेशादवस्थितः पूर्वः परश्च तद्वदयमेकादेशो भवति। तत्प्रयुक्तं कार्यं लभत इति। एवं च तद्वच्चेत्येव वक्तव्य स्तात्, तच्छब्देन पूर्वापरौ परामृश्यते। एवं हि सिद्धेऽन्तादिवदिति वचनादन्तादित्वप्रयुक्तं कार्यमेकादेशस्य भवतु, पूर्वपरस्वरूपप्रयुक्तं तु कार्यं केन भवेत् ! लिङ्गं चात्र भवति तुक्यसिद्धवचनम्; अन्यथा अधीत्येत्यादावेकादेशस्यादिवद्भावादेव तुकः सिद्धत्वादनर्थकं तत्स्यात्। खट्वाभिरिति। तपरकरणं तु यत्रैकादेशो नास्ति तदर्थं स्यात्--शुभंयाभिरिति। जुहावेति। `अभ्यस्तस्य च' इति ह्वयतेः सम्प्रसारणे कृते जुहु+आ इति यत्पूर्वरूपत्वमाकारस्य तन्नादिवद्भावति, योऽयमादिराकारस्तद्वन्न भवति, तेन `आत औ णलः' इति न भवति। अस्यै अश्व इति। स्याटो विभक्त्येकारस्य योऽयं `वृद्धिरेचि' इति वृद्धिरेकादेशः स परस्यादिवन्न भवति, तेन `एङः पदान्तादति' इति न भवति। यत्र च युगपदुभयमाश्रीयते--अन्तश्चादिश्च, तत्राप्यन्तादिवद्भावो न भवति, यथा `एतेलिङि' इति ह्रस्वत्वमुपसर्गात्परस्येणो विधीयमानम्-अभीयात्परीयादित्यादौ न भवति। यदि ह्ययमेकादेशः पूर्वं प्रत्यन्तवद् बुद्ध्या गृह्येत, स तदानीमेव कथं परं प्रत्यादिवत्स्यात्! एवं परं प्रत्यादिवत्त्वे तदानीमेव पूर्वं प्रत्यन्तवद्बावोऽप्यनुपपन्नः; एकस्योभयापेक्षया युगपत्पारतन्त्र्यस्य विरोधात् ।

पूर्वापरेति। यो येन निवर्त्यते स तस्य स्तानी, यथा--भुवोऽस्तिः। समुदायश्चात्र निवर्त्यते, ततश्च तत्प्रयुक्तमेव कार्थं स्थानिवद्बावात्स्याद् यदि किञ्चिदस्ति, न तु प्रत्येकं पूर्वपरयुकृत्म्। स्यादेतद्--अवययोरपि निवर्त्यमानत्वात्तयोरपि स्थानित्वम्? इत्यत आह--तत्रेति। इतिकरणद्वयमपि हेतौ। तत्र समुदाये स्थानिन्यवयवयोर्यत्स्थानित्वं तदानुमानिकमवयवनिवृत्तिमन्तरेणावयविनो निवर्त्तयितुमशक्यत्वादवयवयोर्निवृत्तिः, न त्वादिष्टत्वादित्यर्थः। ततश्च तदाश्रयं कार्यं स्थानिवद्भावान्न प्राप्नोति; साक्षाच्छ्रुतस्यैव च स्थानिनस्तत्राश्रयणात्। इष्यते च तदर्थमन्तादिवद्भावो विधीयते। ननु विपरीतमिदम्--अवयवयोरानुमानिकं स्थानित्वमिति ? `पूर्वपरयोः' इति द्विर्वचननिर्द्देशात् तयोरेव स्थानित्वं श्रुतं न समुदायस्य शब्दोऽस्ति, द्वयोस्तु निवर्तमानयोरर्थात्समुदायो निवर्तत इत्येतावत्। तथा च पूर्वसूत्रे `स्थानिबेदादिभन्नादिषु नत्ववत्' इत्युक्तम्। तच्चान्यत्रापि उक्तम्--यो ह्युभयस्थाने भवति लभते सोऽन्यतरव्यपदेशम्, तेन खट्वर्श्य इत्यत्र पररत्वं भवत्यृकारस्यापि स्थानिवद्भावः, कथम? `स्थानिवदादेशः' इत्यत्र स्थानिशब्दस्य सम्बन्धिशब्दत्वादेवादेशपरिग्रहे सिद्धे आदेशग्रहणमानुमानिकस्याप्यादेशस्य स्थानिवद्भावार्थम्, ततश्च स्थान्यप्यानुमानिक आश्रितः, यथा `एरुः' पचत्वित्यत्र । अत्र हि इकारेणेकारान्तः स्तान्यनुमीयते, उकारेणाप्युकारान्त आदेशः, तस्य स्थानिवद्भावात् `तिङ्न्तं पदम्' इति पदसंज्ञा भवति। एवमप्यत्रावयवयोरानुमानिके स्थानित्वे सिद्धः स्थानिवद्भावः ? एवं तर्ह्यनल्विधौ स्थानिवद्बाव उक्तः अल्विध्यर्थमिदम्, यथा--क्षीरपेण, सुरापेणोत्तरपदविभक्त्योरेकादेशस्यान्तवद्भावात् `एकाजुत्तरपदे णः' इति णत्वमल्विधिरपि भवति। ननु च `अनल्विधौ' इति प्रतिषेधः स्थान्यलाश्रयेष्वेव कार्येषु, असय त्वेकादेशस्योत्तरपदं प्रत्यवयवत्वमेव स्थानिवत्त्वेन प्रार्थनीयम्; अच्त्वं तु स्वत एव सिद्दम्, ततश्च यथा--अरुदितामित्यत्र स्वाश्रयं वलादित्वं

स्थानिवद्बावकृतं च सार्वदातुकत्वमाश्रित्य `रुदादिभ्यः सार्वधातुके'इतीङ् भवति, तद्वदिहापि स्थानिवद्भावकृतमुत्तरपदावलयवत्वं स्वाश्रयं चाच्त्वमाश्रित्य णत्वं भवति। तत्तु स्थान्यल्खरूपनिबन्धनम्, तत्रेष्यत एव, यथा खट्वाभिरित्यादावैस्भावादि। तस्मात् चिन्त्यभस्य प्रयोजनम् ।।

षत्वतुकोरसिद्धः ।। 6.1.86 ।।

षत्वे तुकि चेति। षत्वशास्त्रे, तुक्शास्त्रे चेत्यर्थः। एकादेश इति। एकादेशशास्त्रम् `आद्गुणः' इत्यादीत्यर्थः। असिद्धो भवतीति। सिद्धः=निष्पन्नः, ततोऽन्योऽसिद्धः। तत्र शास्त्रस्वरूपं तावन्निष्पन्नमिति परत्र परशब्दप्रयोगादिवार्थोऽवगम्यते, तत्कार्यकरणाच्च सादृश्यम्, तदाह--सिद्धकार्याणि न करोतीत्यर्थ इति। षत्वतुक्शास्त्रसन्निधावेकादेशशास्त्रं स्वकार्यमेकादेशाख्यं कार्यं न करोति=न प्रवर्त्तयति, न प्रतिपादयतीत्यर्थः। सूत्रस्य प्रयोजनमाह्ह--
असिद्धवचनमिति। आदेशे कृते यत्कार्यं तद्धेतुकं प्राप्नोति तदादेशलक्षणम्, आदेसो लक्षणं निमित्तमस्येति कृत्वा; तस्य प्रतिषेधार्थमसिद्धवचनम्।
उत्सर्गः=स्थानी, सामान्योत्सृष्टत्वात् स लक्षणं यस्य तदुत्सर्गलक्षणम्, तस्य भावः प्रवृत्तिर्यथा स्यादित्येवमर्थं चासिद्धवचनम्। कोऽसिचदिति।
`लिपिसिचिह्वश्च' इति च्लेरङ्, कशब्दात्सोरुत्वम्, `अतो रोरप्लुतादप्लुते' इत्युत्वम्, गुणः। एङः पदान्तादतीति। परम्प्रत्यादिवद्भावादिति। आदिवद्भावे हि ओसिचदित्येतदन्तं पदम्, ततः सकारः पदादिर्न भवतीति `सात्पदाद्योः' इति निषेधाभावादेकादेशमोकारमिणमाश्रित्य षत्वं प्राप्नोति, तदसिद्धत्वान्न भवति। असिद्धत्वे हि षत्वशास्त्रं प्रत्येकादेशशास्त्रस्याप्रतिपादकत्वात् को असिचदित्येवमवस्थितं पदरूपं भवति, तत्राकारेण व्यवधानात्षत्वाभावः।
कोऽस्येति। इदमः षष्ट्येकवचनम्, त्यदाद्यत्वम्, `टाङसिङ्सामिनात्स्याः' इति स्यादेशः, हलि लोपः, शेषं पूर्ववत्। एवमादेशलक्षणप्रतिषेधस्योदाहरणानि दर्शितानि।
इतरस्य दर्शयति--अधीत्य, प्रेत्येति। एकादेशस्यासिद्धत्वादित्यादि। असिद्धत्वे हितुक्शास्त्रसन्निधावधि + इ + इयेत्येव स्थितं पदरूपं भवति, ततश्च ह्रस्वाश्रयस्तुक् प्रवर्त्तते। यदि तु मुख्यस्यैकादेशस्यैव कार्यस्यासिद्धत्वमुच्यते, तदा षत्वे नास्ति दोषः, कथम्? ओकारस्तावत्स्वकार्यं षत्वं न करोति, यौ तु ततः पूर्वौ ककारयकारौ तदाश्रयमपि षत्वं न भवति, तेनैवौकारेण व्यवधानात्। तुकि नेष्टसिद्धिः। कथम् ? एकादेशेन ह्रस्वस्य निवतितत्वात्, न चैकादेशः स्वकार्यं न करोति। अनेन स्थानिनः प्रत्यावृत्तिः शक्या, तस्मात्तिः शक्या, तस्मात्तुकि शास्त्रासिद्धत्वामेवाश्रयणीयम्। आह च--स्थानिवद्वचनानर्थक्यं च शास्त्रासिद्धत्वादिति।

सम्प्रसारणङीट्स्विति। सम्प्रसारणे ङौ इटि च य एकादेशस्तस्यासिद्धत्वप्रतिषेधो वक्तव्यः। शकहूष्विति। शकान् ह्वयतीति यज्ञादित्वात्सम्प्रसारणं पूर्वत्वम्, क्विप्, `हलः' इति दीर्घः। परिवीष्विति। व्येञः परिपूर्वात् क्विबादि पूर्ववत्। असिद्धत्वात्षत्वं न प्राप्नोतीति। पूर्वरूपस्यासिद्धत्वे हि शकहु+आ इत्येवमवस्थितं पदरूपं भवति। वृक्षेच्छत्रमिति, अपचेच्छत्रमिति। पचेर्लङ्, उत्तमैकवचनमिट् शप्। आद्गुणस्यासिद्धत्वादिति। असिद्धत्वे हि तस्य वृक्ष इ च्छत्रम्, अपच इ च्छत्रमित्येवमवस्थितं पदरूपं भवति। अत्र सम्प्रसारणे तावत्प्रतिषेधो न वक्त्व्यः, एकादेशोऽसिद्ध इत्युच्यते, न चात्रैकादेशं पश्यामः; दीर्घेण निवर्त्तितत्वात्। न चदीर्घस्य स्थानिवद्भावादेकादेशग्रहणेन ग्रहणम्; अल्विधित्वात्। ङिटोस्तु प्रतिषेधो वक्तव्य एव।
अथ वा--लाघवार्थं पदस्येति वक्तव्यम्। अन्तादिग्रहणं च पूर्वसूत्रादनुवर्त्तनीयम्, तेन पदान्तस्य पदादेश्च य एकादेशः सोऽसिद्ध इत्येषोऽर्थो भवति। यद्येवम्, सुपिप्पला ओषधीस्कृधीत्यत्रौषधिशब्दाद् द्वितोयाबहुवचनम्, `औषधेश्चविभक्तावप्रथमायाम्' इति दीर्घः, ततः प्रथमयोः पूर्वसवर्णदीर्घः, रुत्वविसर्जनीयौ।
अत्रेदानीम् `कःकरत्करतिकृति' इति विसर्जनायस्य सत्वमिष्यते, तन्न प्राप्नोति;`पदान्तपदाद्योः' िति वचनात्। एकादेशस्यासिद्धत्वाभावाद् इण उत्तरो विसर्जनीय इति `इणः षः' इति षत्वं प्राप्नोति, अविशेषेणासिद्धत्वे ओषधी + अस् कृधीत्येवमवस्थानादिण उत्तरत्वाभावात्षत्वाप्रसङ्गात्सत्वं सिध्यति ? ज्ञापकात्सिद्धम्; यदयं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति, तज्ज्ञापयति--नैकादेशात्परस्य विसर्जनीयस्य षत्वं भवतीति। यदि स्याद्, भ्रातृशब्दान्ङसि `ऋत उद्' इत्युत्त्वे एकादेशे रपरे च कृते `रात्सस्य' इति सकारलोपे कृते षष्ठीसमासे `ऋतो विद्यायोनिसम्बन्धेभ्यः' इत्यलुकि रेफस्य विसर्जनीये `ऋत उद्' इत्युकारस्यैकादेशस्य सिद्धत्वात् `इदुदुपधस्य च' इत्येव षत्वे सिद्धे कस्कादिषु तन्न पठेत्, पठति च, ततो ज्ञायते--नैकादेशात्परस्य षत्वमिति।
शकहूष्वित्यत्रापि तर्हि न प्राप्नोति ? नैष दोषः; तुल्यजातीयस्य ज्ञापकं भवति। कश्च तुल्यजातीयः ? यः कुप्वोरनन्तरः. इह चट वेञः क्विपि सम्प्रसारणे पूर्वत्वे च `ह्रस्वस्य पिति कृति' इति तुकि प्राप्ते पूर्वत्वस्य सूत्रेणासिद्धत्वे प्राप्ते `पदान्तपदाद्योः' इति वचनादसिद्धत्वाभावादुदिति तुग्भवत्येव। न हि उ+आ इत्येकादेशात्प्रागवस्तायामाकारः पदान्तः। नाप्यकारः पदादिः; विभक्तेरभावात्। न चैकादेशात्प्रागेव कृदन्तत्वाद्विभक्तयुत्पत्तिः;
एकादेशस्यान्तरङ्गत्वात्। अथापि प्रागेव विभक्त्युत्पत्तिः; एवमपि उ+आसु इति स्थिते उकारः पदादिः सकारः पदान्तः, सुबन्तं हि पदम्, न तु ततः पूर्वम्।
अथापि भ्याम्प्रभृतौ उ+आभ्यमिति स्थिते `स्वादिषु'इति पदसंज्ञायां पदान्तपदाद्योरेकादेशः ? तथापि न दोसः; `पूर्वपरयोः' इति वर्त्तते, अन्तादिग्रहणञ्च; तत्र यथासंक्यसम्बन्धात्पूर्वपदस्य योऽन्तः परस्य चादिस्तयोरेकादेशोऽसिद्ध इत्यर्थः सम्पद्यते। आकारश्चात्र पदादिर्न भवति, नाप्युकारः पदान्त इत्यसिद्धत्वात्तुग् भवत्येव।
किमर्थं पुनः षत्वतुकोरेकादेशस्यासितद्धत्वादुच्यते, यावता द्विपदाश्रयत्वाद् बहिरङ्गस्यैकादेशस्यैकपदाश्रयत्वेनान्तरङ्गयोः षत्वतुकोः `असिद्धं बहिरङ्गमन्तरङ्गे' इत्येवासिद्धत्वं सिद्धम्? ज्ञापनार्थं तु, एतज्ज्ञापयति--`यत्र बहिरङ्गस्यान्तरङ्गस्य वाऽचोरानन्तय निमित्तत्वेनाश्रितं तत्र बहिरङ्गपरिभाषा न प्रवर्त्तते' इति। तेनाक्षद्यूरित्यत्र बहिरङ्गस्याप्यूठोऽसिद्ध्तवाभावाद्यणादेशः सिद्धो भवति। अयमेवार्थः परिभाषारूपेण पठ्यते

`नाजानन्तर्यं बहिष्ट्वप्रक्लृप्तिः' इति ।।

आद्गुणः ।। 6.1.87 ।।
गुणग्रहणं किम्, यावताऽचीति वर्त्तते, `एकः पूर्वपरयो' इति च, तत्रान्तर्यतः कण्ठतालव्ययोरकारेकारयोः स्थाने तादृश एवैकारो भविष्यति, कण्ठ्यौष्ठ्ययोश्चाकारोकारयोः स्थाने तादृश एवौकारो भविष्यति, कण्ठ्यौष्ठ्ययोश्चाकारोकारयोः स्थाने तादृश एवौकारो भविष्यति; चैकारौकारयोरपि प्रसङ्गः, वृद्दिरेचीति नियमात् ? तदिदानीं नियमार्थम्, ऐचोरनेनैव सिद्धत्वात्, एच्येव वृद्धिभर्वति। उभयथा नियमश्च व्याख्यास्यते, वृद्धिरेवैचीति। इर तर्हि खट्वर्श्यः मालार्श्य इति प्रमाणतोऽन्तरतमो मूर्द्धन्त ऋकारः प्राप्नाति ? माण एव रपरो भवतीति स्थानत् उभरोरन्तरतमः. आकारस्तर्हि प्राप्नोति ? `इपसर्गादृति धातौ' इत्येतन्न्यमार्थं भविष्यति---ऋति धातावेवाकारो नान्यत्रेति। प्रुतस्तर्हि प्राप्नोति ----खट्वेन्द्रः, `प्लुतश्च विषये स्मृतः', प्लुतविदाने हि सति यस्मिन्विषे ब्लुतो विहितस्तस्मिन्नप्यनैनैव भाव्यम् ? अस्मिन्कर्त्तव्ये आष्टमिकस्य प्लुतस्यासिद्धत्वात्, ततश्च पक्षेऽनुवाददोषपसङ्गत् प्लुगो न भवतीति। इह तर्हि शट्वा ईषा खट्वेषा,शट्वा ऊढा खट्वेढा, आन्तर्यतश्चतुर्मात्र आदेशः प्राप्नोति, गुणग्रहणे तु क्रियमाणे गुणसंज्ञायान्परकरणं सर्वार्थमिति त्रिमात्रचतुर्मात्राणामगुणत्वादप्रसङ्गः। तस्माद् गुणग्रहणम्। श्लेकौ चात्र भवत----
आदेशश्चेद् गुणः केन स्थानेऽन्तरतमो हि साः।
ऐदौतौ नैचि तावुक्तावृकारो नोभयन्तरः ।।
आकारो नर्त्तिधातौ स प्लतश्च विषये स्मृत।
आन्तर्यात्त्रिचतुर्मात्रो गुणश्च तपरः समृतः ।।
इह वृक्षशब्दान्ङिः, वृक्ष + इ + इन्द्रमिति स्थिते अकारेकायोर्गुणश्च प्राप्नोतीकारयोः सवर्णदीर्घश्च, तत्र शब्दपरविप्रतिषेधाद्दीर्घप्रसङ्गः, तथा तच्छपब्दान् `जश्शसोः शिः', न इ इन्द्रम्, पचेरुत्तमैकवचनमिट् शप् पच इ चन्द्रम् ? नैष दोषः एकपदातरङ्गो गुणे भविष्यते प्रगेव पदान्तरसन्निदानात् ।

लृकारस्य स्तानत इतइ। यथा चैतल्लभ्यते तथा। `लण्' इत्यत्र व्याख्यातम् ।।

एत्येधत्यूठ्सु ।। 6.1.89 ।।
न पुनरेधतेरव्यभिचारादिति। बाहुल्याभिप्रायेणैतदुक्तम्। अस्ति ह्यस्यापि व्यभिचारः--चङ्युपधाह्रस्वत्वे भवान् मा प्रेदिधदित्यत्रेत्याहुः। प्रष्ठौह इति। प्रष्ठं वहतीति `धन्दसि सहः', `वहश्च' इति ण्विः, `वाह ऊठ्' इत्यूठ, सम्प्रसारणम्, पूर्वत्वम्, ततो वृद्धिः। एत्येधत्योरेहि पररूपापवाद इति। वृद्धिर्विधीयत इत्यनुषङ्गः।
यथैव तर्हि `एङि पररूपम्' बाधते, एवमाङि पररूपमपि बाधेतः नाप्राप्ते पररूपेऽस्या वृद्धेरारम्भात्? इत्यत आह-ओमाङोश्चैतच्चिवति। कुतः? इत्याहयेनेति। स तस्य बाधको भवतीति। तस्यैव बाधको भवतीति यावत्, तद्बाधस्यावश्यम्भावित्वात्, तावता च बाधकस्य चरितार्थत्वात्। न चाप्राप्ते एङि पररूपे इयं वृद्धिरारभ्यते, आङि पररूपे तु आ इतः=एतः, प्रेतः, परेत इत्यत्र प्राप्ते; उपैति, प्रैतीत्यत्र त्वप्राप्ते तस्मान्न बाधते। परिहारान्तरमाह--पुरस्तादिति। अनन्तरे बाध्ये ज्ञाते तद्बाधया वचनस्य चरितार्थत्वादुत्तरेण सह स्पर्द्धायां परत्वात्तदेव भवतीति भावः।
अक्षौहिणीति। अक्षैरूहतेऽवश्यमिति आवश्यके णिनिः, साधनम् `कृता' इति समासः।
स्वैरमिति। `ईर गतौ', ईरणमीरः, भावे घञ्, स्वेनाभिप्रायेण ईरणं स्वैरम्, `कर्तृकरणे कृता बहुलम्' इति समासः, क्रियाविशेषणात्वाल्लोकाश्रयत्वाद्वा लिङ्गस्य नपुंसकत्वम्। स्वेनाभिप्रायेणेरते गच्छतीति स्वैरी, `सुप्यजातौ' इति णिनिः. ईरिग्रहणमनर्थकम्, स्वेनाभिप्रायेणेरते गच्छतीति स्वैरी, `सुप्यजातौ' इति णिनिः। ईरिग्रहणमनर्थकम्, `पदास्वैरिबाह्य' इति निपातनात्सिद्धम्, पदास्वैरशब्दादिना मत्वर्थीयेन सिद्धम्, णिनिस्त्वनभिधानान्न भविष्यति।
प्रादित्यादि। ऊढ, ऊढि, एष्य--इत्येतान्युत्तरपदानि। इष्यतेरिच्छतेरिष्णातेर्वा यदा ण्यत् तदा--प्रैष्यः, यदा घञ् तदा-प्रैषः, एङि पररूपापवादो वृद्धिः। ईष्यशब्दे तु प्रेष्य इति भवति। तथा आ+ऊढा ओढा प्रोढेति `ओमाङोश्च' इति पररूपं भवति। पूर्वोपात्तस्य ऋणस्यापनयनाय यदृणमन्यदुपात्तं तद् ऋणार्णम्। दशार्णशब्दो नदीविशेषस्य, देशविशेषस्य च संज्ञा ।।

आटश्च ।। 6.1.90 ।।
`ईक्ष दर्शने', `उभ उम्भ पूरणे', `उब्ज आर्जवे',`ऋधु वृद्धौ'-- इत्येतेषामुदाहरणानि। चकारोऽधिकविधानार्थ इति। अस्यैव विवरणम्-- उस्योमाङोश्चेति। पररूपबाधनार्थं इति। उसि, ओमि, आङि च यत्पररूपं प्राप्नोति तद्बाधनार्थ इत्यर्थः; अन्यथा परत्वात्तदेव पररूपं स्यात्। औस्रीयदिति। अनर्थकेऽप्युसि पररूपविधानादत्र प्रसङ्गः ।।

उपसर्गादृति धातौ ।। 6.1.91 ।।
उपार्च्छतीति। `ऋच्छ गन्तीन्द्रियप्रलयमूर्तिभावेषु'।

प्रच्छको देश इति। अत्र यत्क्रियायुक्ताः प्रादयः इति गमिं प्रति प्रशब्दस्योपसर्गत्वं नर्च्छतिं प्रतीति भवति प्रत्युदाहरणम्।
वा सुप्यापिशलेरिति हि विकल्पः स्यादिति। तेनोत्तरार्थन्तपरकरणमिति भावः।
धातुग्रहणमनर्थकम्, यत्र चोपसर्गत्वं न सम्भवति, तत्रोपसर्गग्रहणेन प्रादयोऽपिलक्ष्यन्ते, यथा-नासिकाया नस्बावविधौ; इह तु मुख्यमेवोपसर्गत्वं सम्भवति तत्किं धातुग्रहणेन ? इत्यत आह-उपसर्गग्रहणादेवेति। शाकल्यस्येदं शाकलम्, तस्य निवृत्त्यर्थं पुनर्द्धातुग्रहणम्। सति तु दातुग्रहणे योगविभागेन पुनर्वृद्धिर्विधीयत इति शाकलं बाध्यते। असति तु तस्मिन् शाकल्यमतेन परत्वात् प्रकृतिभावः स्यादेव ।।

वा सुप्यापिशलेः ।। 6.1.92 ।।
सुबन्तस्य धातोरसम्भवात्सुबित्येत्येतद्धातोरवयवद्वारकं विशेषणमित्याह--सुबन्तावयवे धाताविति। आचार्यग्रहणेनैव पूजाविकल्पयोरपि सिद्धयोः पुनर्वाग्रहणमाचार्यग्रहणस्य प्राधान्येन पूजार्थतां ख्यापयितुं कृतम् ।।

औतोऽम्ससोः ।। 6.1.93 ।।
गां पश्येति। ननु चात्र `गोतो णित्' इति णित्त्वे सति परत्वा द्वद्धौ कृतायामोकाराभावादात्वेन न भाव्यम्, आत्वविधानं तु द्योशब्दार्थं स्यात्, न हि तत्र णित्त्वमस्ति, `गोतः' इति वचनादित्यत आह-द्योशब्दोऽपीत्यादि। सत्यं यदि णित्त्वं न स्यात्, अस्ति तु तत्रापि णित्त्वम्, `गोतः' इत्यस्यौकारान्तोपलक्षणत्वात्, वर्णनिर्द्देशेषु तपरत्वप्रसिद्धेः। ततः किम्? इत्याह--तेनेति।
शसा साहचर्यादिति। सुप एव हि शशोऽत्र सम्भवः, नान्यस्य;`अचि' इत्यधिकारात्।
अचितवमसुनवमिति। चिनोतेः, सुनोतेश्च लङ्, `तस्थस्थमिपाण्' इत्यमि कृते विकरणस्य गुणावादेशौ ।।

एङि पररूपम् ।। 6.1.94 ।।
`इल प्रेरणे' चुरादिः, `ओखृ शाखृ' इति भूवादौ पठ्येते।
केचिद्वा सुप्यापिशलेरित्यनुवर्त्तयन्तीति। यद्येवम्, तेन सहास्यैकवाक्यतायाम् असुब्धातुषु नास्य प्रवृत्तिः स्याद्? इत्यत आह--तच्चेति। अत्र व्याख्यानमेव शरणम्।
शकन्ध्वादिष्विति। शकन्ध्वादयः प्रयोगतोऽनुसर्तव्याः, तेषु पररूपं वक्तव्यम्। `कुलटाया वा', `कतन्तेभ्यः' इत्यादिनिर्द्देशोऽस्मिन्नर्थे लिङ्गम्। अन्धुः=कूपः, बहूनि कुलान्यटति नैकस्मिन्कुलेऽवस्थितेति कुलटा। पचादिष्वयं पठितव्यः, अन्यथा `कर्मण्यण्' स्यात्।
एवे चानियोग इति। नियोगः=अवश्यम्भावः, नियमः=अवधारणम्, ततोऽन्यत्रार्थे पररूपं सम्भवति। उदाहरणेऽनवक्लृप्तावेवशब्दः, यथा--क्वेव भोक्ष्यस इति। अवधारणे तु वृद्धिरेव भवति---`अमैवाव्ययेन', `धातोस्तन्निमित्तस्यैव', इहैव सन्तत्वाय, ममैव हव्यान्यग्न इत्यादि।
ओतुः=विडालः। `तुन्वोर्वि निपात उपसंख्यानम्', वीति सप्तमीनिर्द्देशात्तदादिविधिः, वकारादौ निपाते परतः तुनु-इत्येतयोः पररूपं भवति--तु वै त्वै, अनुभूततमं चैकम्। नुवै न्वै। एक एवायं निपातः, अर्थाभेदात्, यदाह--`न वा, निपातैकत्वात्' इति। अत एव नैतद् वृत्तिकारेण पठितम् ।
सूत्रे पररूपग्रग्रहणभुत्तरार्थम्, इह त्वेङीत्येव सिद्धम्--एङि परत एकादेशो भवतीति। रूपग्रहणं चिन्त्यप्रयोजनम्, तथा च `अमि पूर्वः' इत्यत्र रूपग्रहणं न कृतम् ।

ओमाङोश्च ।। 6.1.95 ।।
अद्योढेति। आङ्नाङोरेकादेश आङ्ग्रहणेन गृह्यत इति भवत्युदाहरणम्। अत्र च `धातूपसर्गयोः कार्यमन्तरङ्गम्' इति पूर्वमाद्गुणए कृते पश्चादद्यशब्देन सम्बन्धे वृद्धिः प्राप्नोति, एवमाङो रूपमवितष्टम्। अद्य गआगत इत्यादौ तत्र सवर्मदीर्घत्वेन सिद्धं रूपम्।
अकः सवर्णे दीर्घत्वं बाध्यत इति। ननु च मध्येऽपवादन्यायेन वृद्धेरेव बाधो युक्तः न दीर्घत्वस्य? नैष दोष; चकारोऽत्र क्रियते, स पुनर्विदानार्थो भविष्यति ।।

उस्यपदान्तात्।। 6.1.96 ।।
भिन्द्युरिति। भिदेर्लिङ्, यासुट्, झेर्जुस्, श्नसोरल्लोपः, `लिङः सलोपोऽनन्त्यस्य' इति सलोपः, भिन्द्या+उस्--अनेन पररूपम्। अदुरिति। दाञो लुङ्, `गातिस्था' इत्यादिना सिचो लुक्, `आतः' इति झेर्जुस्, अदा+उस्--अनेन पररूपम् ।
कोस्रेति। ननु चानर्थकत्वादेवास्योसो ग्रहणं न भविष्यति ? एवं तर्ह्येतज्ज्ञापयति--अनर्थस्याप्युसो ग्रहणमिति, तेन भिद्युरित्यादावप्युसि पररूपं भवति। अत्र हि यासुडादिः समुदायोऽर्थवान्, न तु तदवयव उस्। कोषितेति। वसेः क्तः, `वसतिक्षुदोरिट्', यजादित्वात्सम्प्रसारणम्, `शासिवसिघसीनां च' इति षत्वम्, तस्यासिद्धत्वादुसि न पररूपं भवति। अस्य तु लाक्षणिकत्वादेवाग्रहणं सिद्धम्। अबिभयुरिति। भियो लङ्, शपः श्लुः, `सिजभ्यस्त' इत्यादिना झेर्जुस्, `जुसि च' इति गुणः ।।

अतो गुणे ।। 6.1.97 ।।
अकः सवर्णे दीर्घस्यापवाद इति। ननु च मध्येऽपवादन्यायेन वृद्धेरेवायमपवादो युक्तः, न दीर्घस्य? गुणग्रहणाद्दीर्घस्यापि बाधको भविष्यति, अन्यथा--`अतोऽपदान्तात्' इत्येव वक्तव्यम्। एङीत्येव, ततो जुसि च, अपदान्तादित्येव। एवं सिद्धं गुणग्रहणाद् गुणमात्रेऽयं विधइः प्रवर्तमानो दीर्घमपि बाधिष्यते। अत इति किमिति अदिति वर्त्तत एवेति प्रश्नः। तपरकरणे तात्पर्यमित्युत्तरम् ।।

अव्यक्तानुकरणस्यात् इतौ ।। 6.1.98 ।।
अव्यक्तमपरिस्फुटवर्णमिति। अपरिस्फुटा=अनभिव्यक्ता अकारादयो वर्णा यस्मिन्तत्तथोक्तम्। यद्येवम्, तदनुकरणेनापि तथाविधेनैव भाव्यम्, सदृशं ह्यनुकारणं भवति, ततश्चानुकार्य इव तत्रापि नैवाच्छब्दोऽवधार्यते, अनवधारिते चाशक्यं पररूपं कर्त्तुम् ? तत्राह-तदनुकरणं भवत्यतिप्रसङ्गात्? इत्यत आह--केनचित्सादृश्येनेति। तत्पुनः सादृस्यं ध्वनेस्तुल्यतया, तेन ह्यव्यक्तमनुकार्यमनुकरोति पुरुषः, अनुकरणं कर्तृ अव्यक्तं कर्मानुकरोति, करणस्य कर्तृत्वाविवक्षयां कर्तृप्रत्ययः, अनुकरणशब्दस्तु करणसाधन एव। पररूपमेकादेशो भवतीति। अच्छब्दसयापि सर्वस्य नालोन्त्यस्य; `नानर्थकेऽलोन्त्यविधिः' इति वचनाज्ज्ञापकाच्च। यदयम् `आम्रेडितस्यान्त्यस्य तु वा ' इति अन्त्यग्रहणं करोति, तज्ज्ञापयति --`नात्रालोन्त्यपरिभाषा प्रवर्त्तते' इति। किञ्च--पूर्वापरसमुदाय एकादेशस्य स्थानीत्युक्तम्, ततश्च तदेकदेशे पूर्वस्मिन् खल्वेतत्परिभाषाप्रवृत्तिः कीदृशीति चिन्त्यम्। पटदितीति। प्रक्रियावाक्यमेतत्, न प्रयोगार्हम्; पररूपस्य नित्यत्वात्। पाटितीति कथं पुनः पररूपे कृते तदनुकार्यस्य प्रतिपादकं भवति, कुतश्च तस्यानुकरणत्वम्? नैष दोषः; यथा गवित्ययमाहेति कृतावादेशमपि गोशब्दस्यानुकरणं भवति शास्त्रावासनया, तद्वदत्राऽपि भविष्यति।
दकारान्तानुकरणमेतदिति तकारान्तानुकरणे तु रूपमेवैतन्न स्यात्; अपदत्वेन जश्त्वाभावाद्, यथा--पटिति करोतीति ।।

नाम्रेडितस्यान्त्यास्य तु वा ।। 6.1.99 ।।
अव्यक्तानुकरस्याम्रेडितस्येति। व्यधिकरणे षष्ठ्यौ, अव्यक्तानुकरणस्य यदवयवभूतमाम्रेडितम्, तस्येत्यर्थः। नित्यवीप्सयोरिति द्विर्वचनमिति। वीप्सायोगस्तु ययाकथञ्चिद् द्रष्टव्यः।
अपर आह--`नित्यवीप्सयोः' इत्युपलक्षणमेतत्, `डाचि बहुलं द्वे भवतः' इत्यत्र बहुलवचनादन्यस्यापि द्विर्वचनमिति।
यदि त्विति। द्विरूक्तस्य समुदायानुकरणस्य वार्थभेदो भवंति।

नित्यमाम्रेडिते डाचि ।। 6.1.100 ।।
वार्त्तिकमेवेदम्। वृत्तिकृता सूत्ररूपेण पठितम्। डाचि विवक्षित इति। `आशंसायां भूतवच्च' इति भविष्यति क्तः, विधित्सित इत्यर्थः। अन्यथा कडाजेव न स्यात्; द्व्यजवरार्धत्वाभावात्। तथा च डाज्विधावुक्तम्--`यस्य च द्विर्वचने द्व्यजवरार्द्धता ततः प्रत्ययः' इति, अष्टमे च वक्ष्यतिडाचीति विषयसप्तमीति। डाचि विधित्सित एव द्विर्वचनं क्रियत इत्यत्र प्रयोजनान्तरमाह--तच्चेति। ह्यर्थे चः, तद्धि द्विर्वचनं टिलोपात्पूर्वमिष्यते। एवं च पूर्वं सिद्ध्यति, यदि डाचिविधित्सित एव द्विर्वचनं भवति, नान्यथा। यदि हि परभूते द्विर्वचनं स्यात्, ततोऽन्तरङ्गत्वात्पूर्वं टिलोपे कृते टकारान्तस्य द्विर्वचने पटपटेति न सिद्ध्येत्।
यद्वा--डाचि विहिते उत्पन्ने इत्यर्थः। ननु चोक्तम्--डाजेव न स्यादिति? नैष दोषः; `द्व्यजवरार्द्धात्' इति भाविव्यपदेशोऽयम्। यस्य द्व्यजवरार्द्धता भविष्यति द्विर्वचने कृते तस्मादित्यर्थः. यदि डाचि विहितं द्विर्वचनं परत्वाट्टिलोपप्रसङ्ग इत्युक्तम् ? तत्राह--तच्चेत्यादि। `डाचि बहुलम्' इति बहुलग्रहणाद् द्विर्वचने कृते टिलोप इत्यर्थः ।।

अकः सवर्णे दीर्घः ।। 6.1.101 ।।
अग्नय इति। `घेर्ङिति' इति गुणे कृते दीर्घत्वप्रसङ्गः। दध्यत्रेति। असति सवर्णग्रहणे यणादेशस्य दीर्घस्य च विषयविभागो न ज्ञायेत, ततश्च पर्यायः स्यात्।
कुमारी शेत इति। ननु च तुल्यास्यप्रयत्नत्वेऽपि सावर्ण्यमत्र नास्ति, `नाज्झलौ' इति प्रतिषेधात्? इत्यत आह--नाज्झलावित्यत्रेति। `आणुदित्सवर्णस्य चाप्रत्ययः' इति ग्रहणकवाक्यम्, तच्च `नाज्झलौ' इत्यस्य प्रवृत्तिसमये नाभिनिर्वृत्तम्, तस्य हि सवर्णसंज्ञाङ्गम्, तेन यावत्सा न प्रवर्त्तते तावदनभिनिर्वृत्तम्। सवर्णसंज्ञाऽपि स्वापवादे `नाज्झलौ' इत्यस्मिन्नप्रवृत्ते न प्रवर्त्तते, ततश्च पूर्वं `नाज्झलौ' इत्यस्य प्रवृत्तिः, पश्चात्सवणसंज्ञायाः प्रवृत्तिः, पश्चाद् ग्रहणकवाक्यस्येति एष क्रमः। तेन `नाज्झलौ' इत्यत्रागृहीतसवर्णानामचां ग्रहणमिति इकारशकारयोः सावर्ण्यमपतिषिद्धम्, तस्मादचीत्यनुवर्त्त्यमिति।
ऋति ॠ व वचनमिति। मध्ये रेफभक्ती द्वे, आदितोऽज्भक्तेरर्द्धमात्रा, एवमन्ततः।
एवम् लृतीत्यत्रापि मध्ये द्वे लकारभक्ती, अभितः पूर्ववत्। एवं द्विमात्रयौरप्येतयोरीषत्स्पृष्टत्वाद्विवृत्ताभ्यामृकारलृकाराभ्यामसावर्ण्यादग्रहणाद्दीर्घसंज्ञाया अभावाद्वचनम्। अर्द्धतृतीयमात्रत्वात्तत्कालत्वाभावादित्यन्ये। एतच्च सवर्णसंज्ञाया प्रपञ्चितम्। दीर्घपक्षे त्विति। ऋकारलृकारयोः समुदायः स्थानी, न च तस्यान्तरतमो दीर्घः सम्भवति, अतोऽवयवस्य योऽन्तरतमः स एव भवति। तत्रापि लृवर्णस्य दीर्घासम्भवादृकारस्य योऽन्तरतमः स एव भवति। तत्रापि

लृवर्णस्य दीर्घासम्भवादृकारस्य योऽन्तरतमः स ऋकार एव भवति ।।

प्रथमयोः पूर्वसवर्णः ।। 6.1.102 ।।
प्रथमाशब्दो विभक्तिविशेषे रूढ इति। सुपामाद्यत्रिके `सपूर्वायाः प्रथमायाः',`सप्तमीपञ्चमीप्रथमाभ्यः' इत्यादौ तस्यैव ग्रहणात्। ननु च स्त्रीलिङ्गः प्रथमाशब्दस्तत्र रूढः, न चास्य स्त्रीलिङ्गत्वे प्रमाणमस्ति, प्रत्युत प्रथमशब्दस्तिङां त्रिकद्वयेऽस्मिन्नेव शास्त्रे संज्ञात्वेन विनियुक्तं इति तस्यैव ग्रहणं युक्तम्; ततश्च पचति, पचतः, पचन्ति, पचते, पचेते, पचन्ते, चकार, चक्रतुः, चक्रुः; चक्रे, चक्राते, चक्रिरे--इत्यादौ यथाप्राप्तविध्यन्तरबाधेनायं विधिर्युक्तः। किञ्चैव सति मुख्येऽपि प्रथमशब्दे `प्रथमयोः' इति द्विवचनमुपपद्यते, आत्मनेपदपरस्मैपदभेदेन प्रथमस्य भेदात्? उच्यते; एवं सति द्विवचननिर्देशोऽनर्थकः; `लुटः प्रथमस्य' इत्यादिवत्सिद्धत्वात्। यद्वा--`वा सुप्यापिशलेः' इत्यतः सुपीत्यनुवर्त्तयिष्यते, तेन सुप एव प्रथमस्य ग्रहणम्, लिङ्गाच्च, किं लिङ्गम्? `दीर्घाज्जसि च' `तस्माच्छसो नः पुंसि' इति। अत एवल लिङ्गात्सुपामप्यादितः प्रथमयोर्द्वयोर्ग्रहणं भवति, अचीत्यधिकाराच्च, न हि सुरजादिः। सुरपि कुण्डं तिष्ठतीत्यदावजादिः ? नात्रायं विधिः प्राप्नोति, कारणम् ? अमि पूर्वत्वेन बाध्यते। तस्मात् स्त्रीलिङ्गस्य ग्रहणमिति स्थितम्। तत्साहचर्याद् द्वितीयापि प्रथमेत्युक्तेति। द्विवचनं चात्र प्रमाणम्। ननु सकृच्छ्रुतः शब्दो मुख्यवृत्तिरेव वा भवति, जघन्यवृत्तिरेव वा, न पुनरुभयवृत्ति ? प्रथणाद्वितीयासमुदाये जघन्यवृत्तिरेवायम्, स च समुदाय उद्भूतावयवभेद इति द्विवचनोपपत्तिः, यथा--छत्त्रिणो गच्छन्तीति।
वृक्षाः, प्लक्षा इति। नन्वत्रापि `अतो गुणे' इति पररूपेण भवितव्यम्, नाप्राप्ते विध्यन्तरे तस्यारम्भात्। स्यादेतत्--प्रथमयोरित्येतदपि दीर्घत्वं नाप्राप्ते विध्यन्तरे आरभ्यमाणम् अग्नी इत्यादौ यथा बाधते, तथा पररूपमपि बाधिष्यते इति? तत्र, स्वरसन्धिषु गुणयावुत्सर्गौ, वृद्धिः सवर्णदीर्घत्वं पूर्वसवर्णादेशश्च तयोरपवादा इति द्वितीयकक्षाप्राप्ताः, पररूपं तु तृतीयकक्षाप्राप्तमिति तदेव प्राप्नोति। एवं तर्हि योगविभागः करिष्यते--प्रथमयोरिति, अकः सवर्ण इत्येव, तेन वृक्षा इत्यादौ पररूपं बाधित्वा प्रथमयोरकः सवर्णो दीर्घत्वं भविष्यति; यथैव तर्हि योगविभागः पररूपं बाधते, तथा वृक्षमित्यादावमि पूर्वमपि बाधेत, तस्य त्वग्निमित्यादिरवकाशः? नैष दोषः; `अमि पूर्वः' इत्यत्रामीति योगविभागेन प्राप्तं दीर्घत्वमपि न भवतीत्यर्थः. एवमपि `तस्माच्छसो नः पुंसि' इत्यत्र तच्छब्देनानन्तरो दीर्घः परमृश्यते, एतान् गाश्चरतो बलीवर्द्दान्पस्य इत्यत्र `औतोम्शसोः' इत्येकादेशान्मा भूदिति, ततः किम् ? योगविबागे क्रियमाणे अग्नीन्, वायुनित्यादावेव नत्वं स्यात्, न तु वृक्षानित्यादौ यत्र प्रथमयोरिति योगविभागाद् दीर्घो विधीयते ? अयमप्यदोषः; तस्मादित्यनेनाक्स्थानिको दीर्घः परामृश्यते, नानन्तरः, नापि दीर्घमात्रम्, एतच्चाक इत्यनुवृत्तेर्लभ्यते। मा भूद्वा योगविभागः---प्रथमयोरिति। ननु चोक्तम्--वृक्षा इत्यादौ पररूपप्रसङ्ग इति? नैष दोषः; आचार्यप्रवृत्तिर्ज्ञापयति--न जस्सासोः पररूपं भवतीति, यदयं `नादिचि' इतीज्ग्रहणं करोति; अन्यथा अवर्णान्तस्य नास्त्येव दीर्घप्रसङ्ग इतिक किमिज्ग्रहणेन? केवलोत्तरार्थे हि तस्मिंस्तत्रैव कर्त्तव्यं स्यात्। यद्वा--`दीर्घाच्छसि' इत्येव ब्रूयात्, किमर्थमिदम्? नीयमार्थम्---दीर्घाच्छस्येवेति। तेन जस्शसोर्न भविष्यति।
वृत्तिकारस्तु यथोक्ते परिहारे प्रतिपत्तिगौरवप्रसङ्गान्न्यायतः परिहारमाहअतो गुण इति यदकारे पररूपमित्यादि। न्यायं दर्शति--पुरस्तुदिति। इतिकरणो हेतौ ।।
अग्नी इत्यत्रेति। असति हि पूर्वग्रहणे पूर्वसमुदायस्य स्थानिनोऽन्तरतमस्य दीर्घस्याभावादवयवान्तरतमो भवन् पूर्वस्यैवेति नियमकारणाभावात्परसवर्णोऽपि स्यात्, ततस्तन्निवृत्त्यर्थम्। पूर्वग्रहणं तु विप्रतिषेधनिराकरणार्थम्; अन्यथा अग्नी इत्यत्र विप्रतिषिद्धमापद्यते। कथम्? `दीर्घः' इति वर्तते, यदि पूर्वो न दीर्घः, यदि दीर्घो न पूर्वः। ननु दीर्घग्रहणानुवृत्तिसामर्थ्यात् पूर्वशब्देन पूर्वाकृतिर्ग्रहीप्यते ? कथं पुनः सामर्थ्यम्, यावता यत्र पूर्वव्यक्तिर्दीर्घभूता--कुमारीः पश्य, भस्त्राः पश्येत्यादौ तत्रैव यथा स्यात्, अग्नी इत्यादौ मा भूदित्येवमर्था दीर्घानुवृत्तिः स्यात्? यद्येतावत्प्रयोजनं स्याद्-`दीर्घाच्छसि पूर्वोऽमि च' इति ब्रूयात्; यतस्तु वलु प्रथमयोरित्यारभ्यते ततो ज्ञायते--न केवलं कुमारीः पश्येत्यादौ दीर्घस्यैव प्रथमयोरित्यनेन दीर्घो विधित्सितः, किं तर्हि? अग्नी इत्यादावपीति, तच्चाकृतिविवक्षायामुपपद्यते ? सत्यम्; तदेव सवर्णग्रहणेनापि विस्पष्टीक्रियते--त्रिमात्रे स्तानिनि त्रिमात्रादेशनिवृत्त्यर्थमिति। आन्तरतस्यात् त्रिमात्र एव प्राप्नोति। यत्र प्लुताप्लुतप्रसङ्गः स एव `प्लुतश्च विषये स्मृतः' इत्यस्य विषयः, इह तु प्लुतस्यैव प्रसङ्ग इति नायमस्य विषयः ।।

तस्माच्छसो नः पुंसि ।। 6.1.103 ।।
तस्मादित्यनेनान्तरः पूर्वसवर्णदीर्घो निर्द्दिश्यत इत्याह-तस्मात्पूर्वसवर्णदीर्घादिति। उत्तरस्य शशोऽवयवस्येति। उत्तरस्येत्येतच्छसवयवस्य विशेषणम्, तस्मादुत्तरो यः शसोऽवयवस्तस्येति, न तु शशः; असम्भवात्। न हि पूर्वसवर्णदीर्घात् परः क्वचिच्छस् सम्भवति। अन्तादिवद्भावोऽपि न भवति; उभयत आश्रयणात्। अत एवानुपात्तमप्यवयवस्येति लभ्यते। `बहुषु बहुवचनम्' इत्यत्र `त्रिकं प्रातिपदिकार्थः' इत्युक्तम्, तेन `पुसि' इत्येतत्प्रकृतिविशेषणम्--पुंशब्दात् परस्य शसोऽवयवस्येति। यद्येवम्, वृक्षानित्यादिकं पदं नकारान्तमुदाहरणमुपपद्यते। षणुकषण्ढकशब्दाविह लोकप्रसिद्ध्या नपुंसके वर्त्तमानावपि पुंस्तावनुगतमेवार्थमाहतुः, यथा कुमार्यादिषु वर्त्तमानोऽर्थशब्दः, सामान्यविशेषा एव स्त्रीत्वादयो न पुनस्तनादयः। स्त्रीसूत्रे चैतदुपपादितम्। स्थूरकानित्यादि तूदाहरणद्वयमयुक्तम्, कथम्? स्थूरकाया अपत्यानि, अररकाया अपत्यानि `गर्गादिभ्यो यञ्', बहुषु लुक्, स्त्रीप्रत्ययस्यापि `लुक् तद्धितलुकि' इति लुक्, स्थूरक, अररक-इत्येतौ स्त्रीशब्दौ, ताभ्यां परोऽत्र शस् भवति; न तु पुंशब्दाब्यामित्यत आह--सर्व एत इति। न केवलं वृक्षादयः, अपि त्वेतावपीति सर्वशब्दस्यार्थः, लुप्तेऽपि प्रत्यये प्रकृतिरेव तदर्थे वर्त्तते, प्रत्ययार्थश्चात्रायमन्यरूपः। पुंस्त्वविशिष्ट इति। स्त्रीवाचकत्वेन प्रसिद्धावप्येतावस्मिन् प्रयोगे

पुंशब्दाविति भावः।
यद्येवम्, चञ्चेव चञ्चाः पुमांस इति `इवे प्रतिकृतौ' इति कनः `लुम्मनुष्ये' इति लुपि कृते प्रकृतिरेव चञ्चाशब्दः पुंस्त्वविशिष्टं प्रत्यार्थमस्मिन् प्रयोग आहेति नत्वप्रसङ्गः? इत्यत आह-इह त्वित्यादि। प्रत्ययार्थोऽपि नैवात्र पुंस्त्वविशिष्टः, किं तर्हि? अतिदेशात् स्त्रीत्वविशिष्ट इत्यर्थः।
तस्मादिति किमिति। प्रकृतस्य दीर्घग्रहणस्य पञ्चम्या विपरिणामात्सिद्धमिति प्रश्नः। एतान् गाः पश्येति। `औतोऽम्शसोः' इत्यात्वमेकादेशः, `एकः पूर्वपरयोः' इति महाप्रकरणम्, ततश्च तद्विषयमेव नत्वं स्यादिति मन्यते। नन्वेवं `षत्वतुकोरसिद्धः' िति च तत्रैव कर्त्तव्यम्--शशो नः पुंसीति, इह तु प्रकरणादनन्तरमेवोपजीविष्यते? तदेव तर्हि तस्माद्ग्रहणेन विस्पष्ट्यते ।।

नादिचि ।। 6.1.104 ।।
खट्वे इति। `औङ आपः' इति औङः शीभावः। कुण्कडे इति। अत्रापि `नपंसकाच्च' इति ।।

दीर्घाज्जसि च ।। 6.1.105 ।।
आदिति नानुवर्तते, चकारेणेचोऽनुकर्षणसामर्थायत्; अन्यथा पूर्वेणैव दीर्गादप्यवर्णादिचि सिद्धः प्रतिषेध इति किं तदनुवृत्त्यर्थेन चकारेण! दीर्घग्रहणं किम्, यावता ऋवर्णस्य `ऋतो ङिसर्वनामस्थानयोः' इति गुणविधानान्नातिप्रसङ्गः ? एवमिदुतोरकपि, `जति च' इति गुणो विधीयते। इह तहि वृक्षाः, अग्नी, वायू; इति ह्रस्वादपि प्रतिषेधः स्यात्? नैष दोषः; `नादिचि' इत्येतन्नियमार्थं भविष्यति, अगृह्यमाणविशेषत्वाच्चोभ्यथानियमः---आदिच्येव, आदेवेचीति। तत्राद्येन नियमेन वृक्षा इत्यादि सिद्धम्; द्वितीयेनाग्नी, वायू इत्यादि। यथैव तर्ह्यग्नी, वायू हत्यादौ निषेधौ न भवति; एवं कुमार्थौ, वध्वावित्यादावपि न स्यात्, तस्माद् दीर्घादिति वक्तव्यम्। जस्ग्रहणं शस्निवृत्त्यर्थम्, अन्यथा कुमारीः पश्य, वधूः पश्येत्यादौ शस्यापि प्रतिषेधः स्यात्। ज्ञापकान्न भविष्यति, यदयम्, `तस्माच्छसो नः पुंसि' इति पुंग्रहणं करोति, तज्ज्ञापयति--न शसि प्रतिषेधो भवतीति; तद्धि नपुंसके सवर्णदीर्घत्वासम्भवात् स्त्रीनिवृत्त्यर्थं कृतम्, यदि च स्त्रियामप्ययं कुमारीः पश्येत्यादौ शस्यपि प्रतिषेधः सयात्तदा पूर्वसवर्णदीर्घ त्वाभावादेव तत्वं न भविष्यति, किं पुंग्रहणेन? नैतदस्ति ज्ञापकम्; ह्रस्वान्तं यत् स्त्रीलिङ्गं तदर्थमेतत् स्यात्--कृतीः पश्य, धेनूः पश्येति। तस्मात् `जासि च' इत्येतदपि वक्तव्यमेव।

वा छन्दसि ।। 6.1.106 ।।
मारुतीरिति। मरुतो देवता आसामिति `सास्य देवता' इत्यण्, ङीप्, जसि पूर्वसवर्णदीर्घत्वम्। वाराहीति। वराहस्य विकार इति `अवयवे च प्राण्योषधिवृक्षेभ्यः' इति `प्राणिरजतादिभ्योऽञ्', ङीप्, द्विवंचने पूर्वसवर्णदीर्घः। उपानहौ विशेष्ये ।।

अमि पूर्वः ।। 6.1.107 ।।
`दूर्घात्' इति नानुरुक्तते, आरम्भसामर्थ्यात्।
पूर्वग्रहणमित्यादि। यः पूर्वः श्रुतः, स एव यथा स्यात्, कः पुनरन्यः प्राप्नोति ? तत्राह--पूर्वसवर्णो दीर्घो मा भूदिति। क्वचित्तु समासः पठ्यते, स कर्मधारयो द्रष्टव्य। एतदुक्तं भवति--असतीह पूर्वह्रहणे प्रकृतं पूर्वग्रहणमनुवर्त्यम्, तस्मिंश्चानुवर्त्तमाने तत्सम्बद्धं सवर्णग्रहणमप्यनुवर्त्यम्, ततश्च पूर्वस्य यः सवर्णः स एवान्तरतमः प्रसज्येत, तत्र को दोषः ? न तावद्वृक्षमित्यातदौ द्विमात्रस्य स्थानित्वेन द्विमात्रप्रसह्गः, वचनसामर्थ्यात् `प्रथयोः पूर्वसवर्णः' इत्येव दीर्घस्य सिद्धत्वात् ? अत आह--कुमारीमित्यत्रेति।
वा छन्दसीत्येवेति। एतच्च वाक्यभेदेन सम्बद्ध्यते, अन्यथा भाषायां न स्यात्। शम्यं चेति। विकल्पविदानसामर्थ्यात्पूर्वत्वाभावे पूर्वसवर्णदीर्घोऽपि न भवति, तयोरत्र विशेषाभावादिति यणादेश एव भवति ।।

सम्प्रसारणाच्च ।। 6.1.108 ।।
सम्प्रसारणविधानसामर्थ्यादिति। कथं पुनः सामर्थ्यम्, यावता संहितायां यण् विधीयते, असंहितायां संप्रसारणं चरितार्थम् ? नैत दस्ति; `संहितैकपदे नित्या' इति वचनात्।
वा छन्दसीत्येवेति। पूर्ववद्वाक्यभेदेन सम्बन्धः। यज्यमान इति। नन्विदानी मेवोक्तम्--विगृहीतस्य श्रवणं प्राप्नोति, तत्कथमत्र यणादेशः ? अत आह-पूर्वत्वविधाने हीति। सत्यम्, अनारब्धे पूर्वत्वे विगृहीतश्रवणं प्राप्नोति, सम्प्रसारणविधानं व्यर्थं मा भूदिति, पूर्वत्वविधाने हि सति तत्प्रतिपत्तिविषये अर्थवत्सम्प्रसारणमिति पूर्वत्वाभावपक्षे यणादेशे भवत्येव, `सम्प्रसारणपूर्वत्वे समानाङ्गग्रहणम्', यस्मिन्नङ्गे संप्रसारणमवस्थितं तदन्तर्भूतो योऽच् तेनैव सह यथा स्यात्, इह मा भूत्--शकह्वौ, शकह्वर्थमिति, शकान् ह्वयतीति क्विपि यज्ञादित्वात्सम्प्रसारणम्, योऽन्त्यो धातोराकारः तस्मिन्नेवाङ्गेऽन्तर्भवति तस्य तावत् पूर्वत्वम्, विभक्त्योकारोऽर्थशब्दाकारश्च न तस्मिन्नङ्गेऽन्तर्भवत इति तयोः पूर्वत्वं न भवति। अत्र परिहारः--यणः स्थाने य इक् स संप्रसारणम्, एकादेशस्तु न यण्स्तानिकः, वर्णाश्रयत्वाच्चान्तादिवद्भावोऽपि नास्ति, एवं पूर्वत्वमेव तावन्न सम्प्रसारणम्, किं पुनः, तत्स्थानिक ऊकार िति पूर्वैकादेशाभावः। सम्प्रसारणदीर्घत्वे तु वचनसामर्थ्यादेकादेशस्य पूर्वं प्रत्यन्तवद्भावात् सम्प्रसारणव्यपदेशः। वृत्तिकारस्तु सम्प्रसारणत्वमभ्युपेत्य

परिहारान्तरमाह--अन्तरङ्गे चेति ।
देशतो विप्रकर्षोऽत्र बाह्यत्वेनोपवर्णितः।
कालतो विप्रकर्षस्तु पश्चादुपनिपाततः ।।
धातावनन्तर्भावकृतं बाह्यत्वम्, पश्चादुपनिपातस्तु स्पष्ट एव ।।

ङसिङसोश्च ।। 6.1.120 ।।
एङ उत्तरयोरिति। एङ उत्तरौ यौ ङसिङसौ, तयोर्यः सम्बन्धयकारः, तस्मिन् परत इत्यर्थः। अग्नेरागच्छति, अग्नेः स्वमिति। यद्यपि द्वावेङौ, ङसिङसावपि द्वावेव; तथापि यतासङ्ख्यं न भवति, न ह्यत्र ङसिङसोः काय विधीयते, किं तर्हि? तत्सम्बन्धिन्यति; स चैक एव। अथापि सम्बन्धिभेदेन तस्य भेदः स्यात् ? एवमपि न दोषः; `ईदग्नेः सोमवरुणयोः', `धातोः' इत्यादिनिर्देशात् ।।

ऋत उत् ।। 6.1.121 ।।
द्वयोः षष्टीनिर्द्दिष्टयोरित्यादि। न्यायप्राप्तिप्रदर्शनमेतत्, न पुनापरत्वेऽक्रियमाणे किञ्चिदनिष्टम् `ऋतः' इति तपरकरणं दीर्घनिवृत्त्यर्थम्, `उन्न्योर्ग्रहः' `प्रेस्त्रोऽयज्ञे' इत्यादौ न भवति। `उच्' इत्यपि तपरकरणं दीर्घनिवृत्त्यर्थमेव, आन्तर्यतो हि द्विमात्रस्य द्विमात्र एव प्राप्नोति। ननु `भाव्यमानोऽण्सवर्णान्न गृह्णाति' इति ? एवं तर्ह्येज्ज्ञापयति-`भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति' इति, तेनामूभ्यामित्यत्र `अदसोसेर्दादु दो मः' इति दीर्घस्य दीर्घ ऊकारो भवति। इह गम्लृप्रभृतिभ्यो ङसिङसोः कृतयोः ऋकरलुकारयोः सवर्णसंज्ञाविदानादस्मिन्नुत्वे लपरत्वे च कृते संयोगान्तलोपे गमुलिति रूपं भवति ।।

ख्यत्यात् परस्य ।। 6.1.122 ।।
खिशब्दशीशब्दयोरित्यादि। यणादेशे कृते तुल्यरूपत्वाद् द्वयोरपि ग्रहणम्। एतदर्थमेवागन्तुकेनाकारेण यणादेशं कृत्वा विकृतनिर्द्देशः कृतः; अन्यथा खित्योरिति ह्रस्वयोर्गहणे दीर्घयोर्न स्यात्, दीर्घयोर्गहणे ह्रस्वयोर्नस्यात्। विकृतनिर्द्देशे तु द्वयोरपि भवति। अकारान्तयोस्तु मुख्यापत्यादिवर्त्तिनोर्ग्रहणं न भवति, `सख्युर्यः' `पत्युर्नो' `आपत्यस्य च' इत्यादिर्निर्द्देशात्।
सखीयतेः क्विप् सखीरिति। ननु चाल्लोपस्य स्थानिवद्भावद्याणा भाव्यम्, तत्र कृते यलोपे स्थानिवत्त्वनिषेधादादिष्टदचः पूर्वत्वाच्च पुनः स्थानिवत्त्वाभावात् `लोपो व्योर्वलि' इति यलोपे सश्युरित्यादि न सिद्ध्यति ? नैतदस्ति; `क्वौ लुप्तं न स्यानिवत्' इति स्थानिवत्त्वनिषेधात्।
विकृतनिर्द्देशश्य प्रयोजनान्तरमप्याह--विकृतनिर्देशादिति। अतिसखेरिति। अतिक्रान्तः सखा येनेति बहुव्रीहिः। यद्वा--शोभनः सखा अतिसखा, `न पूजनात्' इति समासान्तनिषेधः। अथ स एव यणादेशोऽत्र कस्मान्न भवति, `घेङिति' इति गुणेन बाधितत्वादिति चेत्? न; `शेषो घ्यसखि' इति घिसंज्ञाप्रतिषेधादित्यत आह--सखिशब्दस्य केवलस्यैव हीति। एतच्च तत्रैव प्रतिपादितम् ।।

अतो रोरप्लुतादप्लुते ।। 6.1.123 ।।
उकारानुबन्धकस्येति। यदि रुशब्दसमुदायः स्थानी स्याद्, अगुर्वर्थम्, तर्वर्थमित्यादावपि प्रसज्येत। `ससजुषो रुः' इत्यत्र चोकारस्यानुनासिकत्वप्रतिज्ञयाऽनुबन्धकरणमनर्थकं स्यात्, तद्ध्यत्रैव सूत्रे विशेषणार्थं क्रियते। रुत्वमपीति। अपिशब्दः पुनः शब्दस्यार्थे। यदि पुना रुत्वमसिद्धं स्यात, स्थानित्वेनाश्रयणमनुपपन्नं स्यात्; उकारानुबन्धकस्य कस्यचिद्रोरभावात्।
तस्यापीति। निमित्तबूतस्यापीत्यर्थः। सुस्त्रोता3 अत्र न्वसीति। `दूराद्धूते च, इति प्लुतः, नुशब्दः प्रश्ने। अश्विन् आत्रेति। अश्वशब्दान्मत्वर्थीय इनिः, सम्बुद्ध्यन्तं चैतत्, `गुरोरनृतः' इति प्लुतः, हे अश्विन् अत्रैव प्रदेशे पयस्तिष्ठत्वित्यर्थः। प्रायेण तु तकारान्तं पठ्यते, तत्राश्विच्छन्दस्य व्युत्पत्तिर्मृग्या। ननु तपरकरणादेव प्लुतात्परस्य प्लुते वा परतो न भविष्यति, यथा दीर्घे ? तत्राह--प्लुतस्यासिद्धत्वादिति। ननु च सिद्धः प्लुतः स्वरसन्धिषु यदयं `प्लुतप्रगृह्या अचि' इति प्रकृतिभावं शास्ति, यस्य हि विकारः प्राप्नोति तस्य प्रकृतिभावो विधातव्यः, न च प्लुतस्यासिद्धत्वे प्लुतस्य सतो विकारप्राप्तिरित्यनर्थकं तत् स्यात्? अस्तु स्वरसन्धिषु प्लतः सिद्धः, रोरुत्वं तु स्वरसन्धिर्न भवति।
यदि तु संहिताधिकारे यद्विधीयते तन्मात्रविषयं ज्ञापकमाश्रीयते शक्यमकर्त्तम्--`अप्लुतादप्लुते' इति ।।

इशि च ।। 6.1.124 ।।
अप्लुतादित्येव--सुस्त्रोता3 देहीति। चकारोऽतीत्यस्यानुकर्षणार्थः, तेनोत्तरत्र तस्यैवानुवृत्तिर्भवति, न हशीत्यस्य, नहि तदनुकर्षणस्यान्यत्प्रयोजनमस्ति ।।

प्रकृत्यान्तःपादमव्यपरे ।। 6.1.125 ।।
अतीत्येवेति। न तु हशीति। अत्र हेतुः पूर्वमेवोक्तः। एङ इति यत् पञ्चम्यन्तमित्यादि। `एङः' इति तावद् व्यवहितमप्यनुवर्त्तते, न त्वनन्तरमपि रोरित, अत्र च व्याख्यानमेव शरणम्; तेनाव्यपरे हशि परतो रु प्रकृत्या भवतीत्यर्थो न भवति। तदर्थादिति। नहि पञ्चम्यन्तस्य `प्रकृत्या' इत्यनेन सम्बन्धः सम्भवति।

प्रकृतिरित्यादि। उभत्रापि प्रकृतिशब्दो दृष्टः--दुस्त्यजा प्रकृतिः, दध्नः क्षीरं प्रकृतिरिति। अन्तरित्यव्ययमित्यादि। तेन मध्यवाचिनान्तः--शब्देनोपजनिते व्यतिरेके पादशब्दात्षष्ठी, तदन्तेन सहाव्ययीभावः। ऋक्पादस्यैव ग्रहणमिष्यत इति। इष्टिरेवैषा ।

अन्ये तु `वा छन्दसि' इत्यतो मण्डूकप्लुत्या `छन्दसि' इत्यनुवर्त्तयन्ति। एवमवयवार्थं दर्शयित्वा समुदायार्थं दर्शयति--अवकारयकारपर इत्यादिना। स्वभावेनावतिष्ठत इति। यदा प्रकृतिशब्दः स्वभावे वर्त्तते तदायमर्थः--स्वभावपरित्यागेन न संहिताकार्यमापद्यत इत्यर्थः। यदा तु कारणे वर्त्तते तदायमर्थः--एङ्कारणात्मना भवतीति। कारणं परपूर्वत्वादेः कार्यस्यैङ्, तस्यात्मा= स्वरूपम्, तेनैव भवति। प्राक संहिताकार्यादेङो यद्रूपं तेनैवावतिष्ठत इत्यर्थः। अनन्तरोक्तमेवार्थद्वयं विस्पष्टीकरोति--

इति। एवं हि स्वभावेन भवति, यदि स्वभावादन्यथालक्षणां

प्राप्नोति; तथा एवङ्कारणात्मना भवति, यदि विकाररूपं नापद्यते, यदि कार्यात्मना न विपरिणमतीत्यर्थः। तौ चेदिति। निमित्तम्=अकारः, कार्यम्=एङ्। उदाहरणेषु `एङः पदान्तादति' इति पूर्वत्वस्यायवादेश्च यथायोगमभावः ।

एतेऽर्चयन्तीति। अत्रैतत्पदान्ते वर्त्तते, अर्चयन्तीत्यकारश्च परस्य पादस्यादौ।

केचिदिति। यदि `नान्तः पादम्' इति पठन्ति, एवं सति पूर्वत्वस्यैवानन्तरस्य प्रतिषेधः प्राप्नोति, नायवोर्व्यवहितयोः ? इत्यत आह-संहितायामिति। `संहितायाम्' इत्येतावदेवात्रापेक्ष्यतचे, न तु पूर्वरूपत्वम्; तेनैङः संहिताधिकारे यदुक्तं तन्न भवतीत्यर्थः। तेनैतदपि न चोदनीयम्--अनारब्धेऽस्मिन् प्रतिषेधेऽयवोः प्राप्तिर्नास्ति, पूर्वत्वेन बाधितत्वात्, अनेन तु प्रतिषेधेन पूर्वत्वे बाधिते तयोरुद्भवः स्यात्, तस्यां दशायामस्य व्यापारो नास्ति, आत्माश्रयदोषप्रसह्गादिति। कथमेतच्योद्यं परिहृतम् ? यदि पूर्वत्वस्यैवायं प्रतिषेधः स्यात्ततस्तदेवापेक्ष्य प्रतिषेधयेत्, यतस्तु खलु संहितायामित्यपेक्ष्य सामान्येन प्रतिषेधति तस्यैतत्प्रयोजनम्--स्वप्रवृत्त्युत्तरकालमुद्भवतोरयवोरपि प्रतिषेधो यथा स्यादिति। अत्र च `पदान्ताद्' इत्यनुवर्त्यम्, अन्यथा अग्नेरहं सुहुवस्य प्रणीतौ, वायोरिव सूनृतानामुदर्क्के इत्यादौ `ङसिङ्सोश्च' इति यत्पूर्वरूपम्, तस्यापि प्रकृतिभावप्रतिषेधौ प्राप्नुतः ।।

अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च ।। 6.1.116 ।।

अव्यादीनामनुकरणत्वात्समासो विभक्तिश्च। अव्यादिति। अवेराशिषि लिङ्। अवद्यादिति। पञ्चम्येकवचनान्तम्। अवक्रमुरिति। अवपूर्वस्य क्रमेर्लिट्युसि `दिर्वचनप्रकरणे छन्दसि वा वक्तव्यम्' इति द्विर्वचनाभावे रूपम्। केचित्तु सूत्रे अवचक्रमुरिति कृतद्विर्वचनं वठन्ति, तेषामुदाहरणं मृग्यम्; बह्वृचस्तावद्--अवक्रमुरित्यधीयते। अव्रतेति। वृङ्वृञोः `मन्त्रे घस' इत्यादिना च्लेर्लुक्, `आत्मनेपदेष्वनतः' इति अदादेशः। अयमिति। इदम्-शब्दात् सुः, `इदोऽय् पुंसि'। अवतेर्लोट्, अवन्तु, तस्मादेवासुनन्तात् क्यच्, `क्याच्छन्दसि' इत्युप्रत्ययः-- अवस्युः। तेनोवन्तु पितरो हवेष्विति बह्वृचाः पूर्वरूपमेवाधीयते। अधिब्रुवन्तुं तेऽवन्त्वस्मानिति ।।

आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे।। 6.1.118 ।।

आपो इत्यादीनि पृथक् पदानि अनुकरणानि, विभक्तिस्त्वनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वान्न भवति। `सुपां सुलुक्' इति वा विभक्तेर्लुग् भवति, अम्बिकेपूर्व इत्येतदप्यनुकरणमेव। तत्र प्रथमं जसन्तम्, द्वितीयं स्वन्तम्, तृतीयं शसन्तम्, चतुर्थं ङयन्तम्, इतरे सम्बुद्ध्यन्ते। अम्बिकेशब्दात्पूर्वाविति। अस्मादेव निपातनात्पञ्चमीसमासः। अस्मादेव निपातनादिति। अम्बेत्येतद्विषयमेतत्। इतरयोस्तु `अम्बार्थं द्व्यक्षरम्' इति वक्ष्यमाणत्वान्नैव ह्रस्वप्रसङ्गः ।।

अङ्ग इत्यादौ च ।। 6.1.119 ।।

अङ्गशब्दे य एङिति। `स प्रकृत्या भवति' इति वक्ष्यमाणेन सम्बन्धः. तदातौ चाकारे यः पूर्व इति। `एङ्' इत्यपेक्ष्यते, पूर्ववच्च सम्बन्धः। तच्छब्देनातिक्रान्तप्रत्यवमर्शिनेतिशब्दस्यार्थमाचष्टे, तस्याङ्गशब्दस्यादिस्तदादिः। चकार किमर्थः, असति चकारेऽङ्गशब्दस्यैवैङ् तदादावति परतः प्रकृत्या भवतीत्यर्थः स्यात्, ततश्चाङ्गेऽङ्गे इत्यत्रैव स्यात्। सति तु तस्मिन्नङ्गशब्दस्य एवैङ् यत्र क्वचिदति परतः प्रकृत्या भवति, तदादौ चाति परतो यः कश्चिदेङ् प्रकृत्या भवतीत्ययमर्थो भवति। तेन अङ्गे अदीध्यत्, प्राणो अङ्गे-- इत्युभयत्रापि भवति ।।

अनुदात्ते च कुधपरे ।। 6.1.120 ।।

कवर्गधकारपरे इति। कवर्गधकारौ परौ यस्मात्स तथोक्तः। धकारेऽकार उच्चारणार्थः। अग्निशब्दः `अङ्गेनिर्नलोश्च' इति निप्रत्ययान्तोऽन्तोऽदात्तः अध्वरशब्दः प्रातिपदिकस्वरेयणान्तोदात्तः।

आद्युदात्तो निपात्यत इति। `ऋज्रेन्द्राग्र' इत्यादावुणादिसूत्रे अग्रशब्दः प्रातिपदिकस्वरेणान्तोदात्तः ।।

सर्वत्र विभाषा गोः ।। 6.1.122 ।।

सर्वत्र च्छन्दसि भाषायां चेति। यद्यपि `छन्दसि' इति न प्रकृतम्, तथापि `अन्तः पादं यजुषि' इति वचनात् अवक्रमुः, अव्रतावस्युरिति छान्दसानुकरणाच्च छान्दसानि पूर्वसूत्राणीति भावः। सर्वत्रग्रहणं तु यजुषि, अन्यत्र चेत्यप्युपपन्तम्। पदान्तादित्येव--गोरागतं गोः स्वम् ।।

अवङ् स्फोटायनस्य ।। 6.1.123 ।।

स्फोटोऽयनं परायणं यस्य स स्फोटायनः=स्पोटप्रतिपादनपरो वैयाकरणाचार्यः। ये त्वौकारं पठन्ति, ते नडादिष्वश्वादिषु वा पाठं मन्यन्ते। अतीति निवृत्तमिति। अन्यथा गवौदनादौ न स्यात्। न चैवं सत्यतिप्रसङ्गः ? इत्याह---अचीत्येतत्त्विति। सर्वत्र चात्र व्याख्यानमेव शरणम्। यद्यचीत्यनुवर्त्तते कथम् `इको यणिचि' इत्यत्रौक्तम्--``अचीति चाधिकारः `सम्प्रसारणाच्च' इति यावत्'' इति ? निरन्तरानुवृत्त्यभिप्रायं तदित्यदोषः। गवाग्रम्, गवाजिनमिति। बहुव्रीहिः, तत्पुरुषो वा। गवोष्ट्रमिति। द्वन्द्वः, गोरग्वचनम् गोरग्वक्तव्यः, तत्रापि अवादेशेन सिद्ध्यत्येव। न च `एङः पदान्तात्' इति पूर्वत्वप्रसङ्गः; अगागमस्य तद्ग्रहणेन ग्रहणादोकारस्यापदान्तत्वात्। किं प्रयोजनम्? लाघवं तावद्भवति, स्वरे च न दोषः।

कथमागमा अनुदात्ताः ? तत्र गवाग्रादौ बहुव्रीहौ पूर्वपदप्रकृतिस्वरेणागमानुदात्तत्वं सम्भवति, अवङादेशे त्वान्तर्यतोऽन्तोदात्तस्यान्तोदात्तोऽवङादेशः स्यात्। ननु चास्यैकाचः सतो व्यपदेशिवद्भावेनान्तोदात्तत्वमेष्टव्यम्, तत एवाद्युदात्तत्वमपि भविष्यति, ततः किमाद्युदात्तस्याद्युदात्त आदेशो भविष्यति ? सत्यमेवमेतत्; न त्विदं लक्षणमस्ति--प्रातिपदिकस्यादिरुदात्तो भवतीति, इदं पुनरस्ति--प्रातिपदिकस्यान्त उदात्तो भवतीति। योऽसौ लक्षणेनान्तोदात्तः, तत्रान्तर्यतोऽन्तोदात्त आदेशः प्राप्नोति। ननु गमेर्डो विधीयते? ततः किम्, प्रत्ययाद्युदात्तत्वे कृते आन्तर्यत आद्युदात्त आदेशो भविष्यति। कथं पुनरयमाद्युदात्तः, यावता एकाच् व्यपदेशिवद्बावेन? यद्येवम्, तत एवान्तोदात्तोऽपि, तत्रान्तर्यतोऽन्तोदात्तस्यान्तोदात्तोऽवङादेशः प्रसज्यते ? सत्यम्; नन्विङं लक्षणमस्ति--प्रत्ययस्यान्तोदात्तो भवतीति, इदं पुनरस्ति--प्रत्ययस्यादिरुदात्तो भवतीति। योऽसौ लक्षणेनाद्युदात्तस्तत्रान्तर्यत आद्युदात्त आदेशो भविष्यति। स्यादेवं यदि `आद्यन्तवदेकस्मिन्' इति शास्त्रातिदेशः स्यात्। यदा त्वनेन कार्यमात्रमुदात्तत्वम्, अन्तत्वे असत्येवादित्वे चातिदिश्यते तदौकारस्यैवादित्वव्यपदेशाभावात् कुतस्तदादेशस्याद्युदात्तत्वम्! ततश्च पर्यायेण त्वनियतदेशमाद्युदात्तत्वं स्यादिति पक्षे दोषप्रसङ्गः । तत्र सूत्रकारेण तावल्लाघवमनादृत्यावङ्गादेशः कृतः। तत्र यथा स्वरे दोषो न भवति, तथा दर्शयति--आद्युदात्तोऽवङादेशो निपात्यत इति। एकश्रुत्या सूत्रपाठे यदत्र यत्नेनाद्युदात्तोच्चारणं तदन्तोदात्तत्वबाधनार्थं विज्ञायते, अन्यत्र समासान्तोदात्तत्वेन वाध्यत इति। एतच्च भाष्ये `उपदेशिवद्भावो वक्तव्यः' इति वचनेन लभ्यते, अन्यथा परत्वात् पूर्वं समासान्तोदात्तत्वे कृते अवङि अवङ्स्वर एव सतिशिष्टत्वात् स्यात्। उपदेशिवद्भावे तु पूर्वमवङि कृते पश्चात् समास इति सतिशिष्टत्वात् समासस्वर एव भवति। पदान्तादित्येव--गवो, गवोः, गवाम्, गवि ।।

इन्द्रे च ।। 6.1.124 ।।

अत्र यदि `अचि' इति विसेषणम्, इन्द्रशब्दो विशेष्यम्, तदाऽजादौ इन्द्रशब्द इत्यर्थः स्यात्। ततश्च गवेन्द्रयज्ञ इत्यादौ न स्यात्, अनुत्तरपदत्वात्। यद्यप्यत्रोत्तरपदग्रहणं नास्ति, तथाप्यर्थात्समास एतद्विधानम्, न ह्यन्यत्र गोरनन्तर इन्द्रशब्दः सम्भवति। समासे च विधानमर्थादुत्तरपद एव स्यात्--ष्यङः सम्प्रसारणवत्, तस्मादज्विशेष्यम्, इन्द्रशब्दो विशेषणम्, अचि परतः कस्मिन्निन्द्रे यः स्थितस्तस्मिन्निति, तदिदमुक्तम्--इन्द्रशब्दस्थेऽचीति ।।

प्लुतप्रगृह्या अचि नित्यम् ।। 6.1.125 ।।

ननु यस्य विकारः प्राप्तस्तस्य प्रकृतिभावो विधेयः, न च प्लुतस्य विकारः प्राप्तः, स्वरसन्धिषु तस्यासिद्धत्वात्? इत्यत आश्रयात्प्लुतः सिद्धः इति। यदिदं प्लुतस्य प्रकृतिभावं प्रति कायित्वेनाश्रयणम्, आह--अस्मादेव ज्ञापकात् `स्वरसन्धिषु प्लुतः सिद्धः' इति कल्प्यत इत्यर्थः।

आदेशनिमित्तस्याचः परिग्रहार्थमिति। यस्मिन्नादेशो विधीयते स एव प्रकृतिभावस्यापि निमित्तत्वेन परिगृहीतो यथा स्यादित्येवमर्थमित्यर्थः। जानु उ अस्येति। उञ् निपातः, तस्य पूर्वेण सहैकादेशस्य यन्निमित्तं न सप्रगृह्यादुत्तरः, यश्च ततः परो न स एकादेशस्य निमित्तमिति प्रकृतिभावाभावादेकादेशो भवत्येव। असति पुनरज्ग्रहणे `प्रगृह्योऽचि परतः प्रकृत्या भवति' इत्युच्यमाने पूर्वेणसह यो विकारः प्राप्तस्तस्यापि प्रकृतिभावः स्यात्। पुनरज्ग्रहणे तु न भवति, तत्रैकादेशे कृते तस्यादिवद्भावात्प्रगृह्यग्रहणेन ग्रहणात्। `इको यणचि' इति यणादेशः प्रकृतिवद्भावान्न भवति, `मय उञो वो वा' इति पक्षे वकारः। नित्यग्रहणमनुवर्त्तत इति। पूर्वसूत्रे नित्यग्रहणमेतदर्खमेव कृतम्, तत्र त्वारन्भसामर्थ्यादेव नित्यो विधिः सिद्धः। नित्यमेव प्रकृतिभावो यथा स्यादिति। अयमेव प्रकृतिभावो नित्यं यथा स्यात्, शास्त्रान्तरेण कार्यान्तरसहितो मा भूदित्यर्थः ।।

आङोऽनुनासिकश्छन्दसि ।। 6.1.126 ।।

तेनेह न भवतीति। अनर्थकस्यैवाकारस्य भवति, अभ्र आँ अप इत्यादौ सप्तम्यैव तदर्शस्योक्तत्वात्तदर्यवृत्तिराङ्नर्थकः; अनुर्थान्तरवाचित्वात्। आतरदित्यत्र तु क्रियाविशेषणत्वादर्थवान्।

कथं पुनरनर्थकस्य ङित्त्वम्, यावता---

`ईषदर्थे क्रियायोगे मर्यादाऽभिविधौ च यः।

एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्' ।। इत्युक्तम् ?

सत्यम्; `वाक्यस्मरणयोरङित्' इत्यत्रैव तात्पर्यम्, अन्यत्र सर्वत्र आङ् ङिद्वेदितव्यः--एवं तावद्भाष्ये स्थितम् ।।

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ।। 6.1.127 ।।
किमर्थश्चकारः, प्रकृत्येत्येतदनुकृष्यतेऽनेन ? ननु च ह्रस्वविधानसामर्थ्यादेव स्वरसन्धिर्न भविष्यति ? भवेद्दीर्घाणां ह्रस्ववचनसामर्थ्यादेव स्वरसन्धिर्न स्यादिति ह्रस्वानां तु प्राप्नोति। न हि ह्रस्वानां ह्रस्वो भवति; प्रयोजनाभावात्। अस्ति प्रयोजनम्--स्वरसन्धिर्मा भूदिति? इदं तर्हि प्रयोजनम्---प्रकृतिभावमात्रं क्वचिद्यथा स्यादिति, तेनेषा अक्षादिषु च्छन्दसि प्रकृतिभावमात्रं सिद्धं भवति।
शाकल्यग्रहणं पूजार्थमिति। अथ विकल्पार्थं कस्मान्न भवति? इत्याह--आरम्भसामर्थ्यादिवेति। सवर्णेऽचि दीर्घविधानाद्यणादेशस्यासवर्ण एवाज्विषयः, अस्यापि विधेः स एव विषयः, ततश्च विषयैक्यादेव विकल्पे सिद्धे न तदर्थक माचार्यग्रहणम् ।
सिन्नित्यसमासयोरिति। नित्याधिकारविहितोऽस्वपदविग्रहश्च समासो नित्यसमासः, एकापि सप्तमी विषयभेदाद्भिद्यते, सिति परतो नित्यसमासे च विषय इति, शाक्ल्यस्यायां विधिः शाकलः, `कण्वादिभ्यो गोत्रे' इत्यण्। ऋत्विय इति। ऋतुरस्य प्राप्त इति `ऋतोरण्', `छन्दसि घस्'। व्याकरणमिति। `कुगतिप्रादय' इति समासः, तत्र `नित्यम्' इत्यनुवर्त्तते। कुमार्यथमिति। कुमार्यै इदं कुमार्यर्थम्, अस्वपदविग्रहोऽयं नित्यसमासः ।।

ऋत्यकः ।। 6.1.128 ।।
सवर्णर्थमनिगर्थं च वचनमिति। होतृ ऋश्यः, खट्व ऋश्य इत्यादौ; इन्यत्र पूर्वेणैव सिद्धत्वात् ।।

अप्लुतवदुपस्थिते ।। 6.1.129 ।।
ऋषिः=वेदः तत्र भव आर्षः, ततोऽन्योनार्षः, समुदायाद्वाक्यादवच्छिद्य पृथककृत्य स्वरूपेऽवस्थाप्यते। कैः? पदकारैः. पदस्येयत्तापरिज्ञानाय अप्लुतेन तुल्यं वर्त्तत इत्यप्लुतवत्। तत्र येन साधर्म्येणाप्लुतवत्त्वम्, तद्दर्शयति--अप्लुतकार्यमिति। तत्रापि प्लुतशब्देन विहितस्य कार्यस्य प्रतिषेध इति दर्शयति--प्रकृतिभावं करोतीति। अन्यथा स्वरसन्धेरपि प्रतिषेधः स्यात्, तस्यापि प्लुकार्यत्वात्। उदाहरणेषु प्लुतकार्यपब्रतिषेधादेकादेशो भवत् प्लुतमेवोपमृद्य भवति; स्वरसन्धिप्रकरणे प्लुतस्य सिद्वत्वात्।
तत्र को दोष इति। एकादेशेन निवर्त्त्यमानत्वात् प्लुतस्य श्रवणेन न भवितव्यमिति प्लुत एव निषिध्यताम्, किमर्थमतिदेशाश्रयणमिति प्रशनः। अग्नी3 इतीति। यत्र प्लुताश्रयोऽपि प्रकृतिभावः प्राप्नोति, प्रगृह्याश्रयोऽपि; तत्र प्लुताश्रयस्य प्रतिषेधेऽपि प्रगृह्याश्रयस्य प्रकृतिभावस्य प्रतिषेधाभावात् प्लुतस्य श्रवणं सिद्ध्यति, प्लतप्रतिषेधे तु क्रियमाणेऽत्रापि श्रवणं न स्यात् ।।

ई3 चाक्रवर्मणस्य।। 6.1.130 ।।
सूत्रे ई चेति त्रिमात्रिकस्य निर्द्देशः। अचि परत इति। उपस्थितग्रहणं चास्वरितत्वान्निवृत्तम्। अस्तु ही3 इत्यब्रूतामिति। `विभाषा पृष्टप्रतिवचने हेः' इति प्लतः, अस्तेर्लोटि तिप्, `एरुः'।
तदुपस्थिते निवृत्त्यर्थमिति। तत्र पूर्वेणाप्लुतवद्भावस्य नित्यप्राप्तत्वात्, अनुपस्थिते प्राप्त्यर्थमिति, तत्र केनचिदप्राप्तत्वात्।
ईकारादन्यत्रापीति। तथा च भाष्यम्--`ईकारग्रहणेन नार्थः' इत्यादि ।।

दिव उत् ।। 6.1.131 ।।
पदग्रहणमनुवर्त्तत इति। अन्तग्रहणेनोपसमस्तमपि केवलं पदग्रहणमेवानुवर्त्तते, ततश्चार्थात् षष्ठ्यन्तं जायते, दिवशब्देन विशेषणात्तदन्तविधिः, `ग्रहणवता प्रातिपदिकेन' इति तु प्रत्ययविधिविषयम्। व्यपदेशिवद्भावात् केवलस्यापि भवितव्यम्, `व्यपदेशिवद्भावोऽप्रातिपदिकेन' इत्येतदपि प्रत्ययविधिविषयमेव। सानुबन्धकत्वादिति। दीव्यतेर्धातोरुकारोऽनुबन्धः, प्रातिपदिकस्य तु न कश्चिदनुबन्धः. दिवः पदस्येति। तदन्तस्य पदस्येत्यर्थः. द्युकाम इति। दिवं कामयते इति `शीलिकामिभिक्षाचरिभ्यो णः' विमलद्यु इति। विमला द्यौरऽस्मिन्निति बहुव्रीहिः। अक्षद्युभ्यामिति। अक्षशब्द उपपदे दीव्यतेः क्विप्, तत्र `च्छ्वोः शूडनासिते च' इत्यूठ्।
अथ तपरकरणं किमर्थम्, यद्यपि `ऋत उत्' इति तपरकरणेन ज्ञापितम्--`भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति' इति, तथाप्यान्तर्थतोऽर्द्धमात्राकालस्य व्यञ्जनस्य मात्रिक एव भविष्यति? इत्यत आह--तपरकरणमिति। यद्यप्यनेन दीर्घो न प्राप्नेति, प्राप्नोति, लक्षणान्तरेण तु प्राप्तोतीत्याह--द्युभ्याम्, द्युभिरिति। उत्वस्यावकाशो यत्रायजादिपरः--विमलद्यु, ऊठोऽवकाशः--द्यूत्वा, द्यूतम्; यत्र तूभयोः प्रसङ्गस्तत्र परत्वादूठ प्राप्नोति, तपरकरणादुत्वमेव भवति। यदि प्राप्तस्योठो निवृत्त्यर्थं तपरकरणमित्युच्यते एवं तर्हि `चछ्वोः शूडनुनासिते च' इत्यत्र `कथं द्युभ्याम्, द्युभिः' इति परेण चोदिते यद्वक्ष्यति--`ऊठि कृते दिव उदिति तपरकरणानामात्राकालो भविष्यति', तद्विरुद्ध्यते, तस्य ह्यूठि कृते तस्यैवोठो मात्राकालो भविष्यतीत्ययमर्थः ? नैषः दोषः; `ऊठि कृते' इत्येतस्य पूर्वेण चोद्यग्रन्थेन सम्बन्धः--`कथं द्युभ्यां द्युभिरिति, ऊठि कृते' इति; `दिव उत् इति तपरकरणात् मात्राकालो भविष्यति' इत्येतावान् परिहारग्रन्थः. तपरकरणस्य तूण्निवृत्तिरेव प्रयोजनम्। तस्मादुत्त्वमेवात्र कर्त्तव्यम्, न पुनरुडित्यर्थः ।।

एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ।। 6.1.132 ।।

एतेन `एतत्तदोः' इति सुशब्दापेक्षया सम्बन्धलक्षणा षष्ठीत्याचष्टे। यद्येवम्, सु इत्येतस्य सापेक्षत्वाल्लोपशब्देन समासो न प्राप्नोति ? नैवायं समासः, सु इति पृथक्पदम् `सुपां सुलुक्' इति लुप्तष्ठीकम्। कश्च तयोः सुशब्द इति। यदि यस्ताभ्यां विहितः सुः स तयोः सम्बन्धी भवति, तदा परमस ददाति, परमैष ददातीत्यादो न स्यादिति मन्यमानः पृच्छति। इतरो विदिताभिप्रायः परिहति-यस्तदर्थेन सम्बद्ध इति। अर्थद्वारकश्च सम्बनधः, यस्तदर्थगतमेकत्वमाचष्ट इत्यर्थः। परमस ददातीत्यादावपि उत्तरपदार्थप्रधानत्वात्तदर्थगतमेवैकत्वमाचष्ट इति सिद्धो लोपः। प्रथमैकवचनस्यात्र सुशब्दस्य ग्रहणम्, न सप्तमीबहुवचनस्य। `स्यश्छन्दसि' `सोऽचि लोपे चेत्पादपूर्णम्' इत्यत्र ह्यस्यैव सम्भवः। द्वयोः सामान्येन ग्रहणं तर्हि कस्मान्न भवति? एवं तर्हि `निरनुबन्धकग्रहणे न सानुबनधकस्य' इति प्रथमैकवचनस्यैव ग्रहणम्, तस्य ह्युकार उच्चारणार्थः, नानुबन्धः। एष इति। `तदोः स सावनन्त्ययोः' इति सकारः, त्यदाद्यत्वम्, षत्वम्। एषक इति। `अव्यसर्वनाम्नामकच् प्राक् टेः' इत्यकच् ।

ननु रूपभेदात्साकच्कावेतत्तदावेव न भवतः, तत्किम् `अकोः' इति प्रतिषेधेन ? तत्राह--तन्मध्यपतिति इति। अस्याश्च परिभाषाया अस्तित्वे अयमेव प्रतिषेधो लिङ्गम् ।

उत्तरपदार्थप्रधानत्वादिति। एतच्च नञ्सूत्र एव व्याख्यातम्। `हल्ङ्याब्भ्यः' इत्यस्यानन्तरमिदं न कृतम्--संहितायां यथा स्यात्, असंहितायां मा भूदिति ।।

स्यश्छन्दसि बहुलम् ।। 6.1.133 ।।

स्य इति यदित्यस्य प्रथमान्तस्यानुकरणम् `सुपां सुलुक्' इति लुप्तषष्ठीकम्। अनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वादनुत्पत्तिरेव वा षष्ठ्याः। उदाहरणे सत्वादि पूर्ववत् ।।

सोऽचि लोपे चेत्पादपूरणम् ।। 6.1.134 ।।

स इति निर्देशः पूर्ववत्।

केचिदिति। स्वयं तु छन्दोऽधिकारादृक्पादस्यैव ग्रहणं मन्यते ।।

सुट् कात् पूर्वः ।। 6.1.135 ।।

संस्कर्त्तति। संम्पुंकानां सो वक्तव्यः' इति वचनात् `समस्सुटि' इति द्विसकारकत्वाद्वा निर्देशस्य समो मकारसक्य सकारः, `अत्रानुनासिकः पूर्वस्य तु वा' इति पूर्वस्यानुनासिकः। इह `सम्पर्युपेभ्यः करोतौ भूषणे', `किरतौ लवने' इत्यादौ ककारादावागमिनि टित्त्वादेव सुट् कात्पूर्वो लभ्यते। `ह्रस्वाच्चन्द्रोत्तरपदे' इत्यादौ कात्पूर्वत्वसम्भवादनुपयोग एवेत्यनर्थकं कात्पूर्वग्रहण्। स्यादेतत्--संचस्कारेत्यादावभ्यासे सञ्जाते साभ्यासस्य करोतित्वाच्चात्पूर्वः सुट स्यात्, मा भूच्चात्पूर्वः, कात्पव एव यथा स्यादित्येवमर्थं कात्पूर्वग्रहणमिति ? तन्न; अत्र हि लिटि द्विर्वचनं च प्राप्नोति, सुट् च; तत्र द्विर्वचनमकृते सुटि कृशब्दस्य प्राप्नोति, कृते तु स्कृशब्दस्य। सुडपि कृते द्विर्वचने चकृशब्दस्य प्राप्नोति, अकृते तु कृशब्दस्येत्युभयोरनित्ययोः परत्वात् सुटि कृते तस्य धातुग्रहणेन ग्रहणात् सहैव तेन द्विर्वचने `सर्पूर्वाः खयः' इति खयः शेषे संचस्कारेति सिद्धम्। न च साभ्यासस्याकृतः सुकडिति पुनः सुट्प्रसङ्गः; अस्मिन्नेव प्रयोगे लक्षणस्य प्रवृत्तत्वात् ।

ननु `पूर्वं धातुः साधनेन युज्यते' इति दर्शने पूर्वं साधनवाचिनि लकारे तदाश्रये च द्विर्वचने एकपदाश्रयत्वादन्तरङ्गे कृते पदद्वयाश्रयत्वाद्बहिरङ्गः सुट् पश्चाद्भावन् चात्पूर्वः स्यात्, समस्कारोदित्यादौ चान्तरङ्गत्वात् परत्वाच्चाटि कृते तेन व्यवधानान्नैव सुट् स्यात्, विकरणान्ताङ्गभक्तो ह्यडागमस्तमेव न व्यवदध्यात्, करोतिं तु व्यवदधात्येव; इह च समस्कृत, संस्कृथा इति यत्र करोतिरेवाऱङ्गं तत्राटः कृग्रहणेन ग्रहणादट एव पूर्वः सुट् स्यात्, अतोऽडभ्यासयोरपि कृतयोः कात् पूर्वः सुड्यथा स्यादिति कर्त्तव्यं कात्पूर्वग्रहणम्? न कर्त्तव्यम्; `अडभ्यासव्यवायेऽपि' ित्येतस्मादेव निर्देशादेतत्सिद्धम्। न च तत्र करिष्यामीति कात्पूर्वग्रहणम्, कृतेऽप्यस्मिन्नसिद्धेः। तथा हि-क्रियमाणमप्येतत्कालावधारणार्थं वा स्यात्--करोतेस्तस्यामवस्थायां सुड् भवति यस्यामवस्थायां भवन् कात्पूर्वो भवतीति। करोत्यवधारणारथं वा--तस्य करोतेः सुड् भवति यस्य भवन् कात्पूर्वो भवतीति। तत्र पूर्वस्मिन्पक्षे यद्यप्यन्तरङ्गे अप्यडद्विर्वचने बाधित्वा कात्पूर्वग्रहणसामर्थ्यात् पूर्वं सुड् भवति, पश्चात्तयोः कृतयोरिष्टं सिद्ध्यति। द्वितीये तु प्रत्युताभ्यासवतोर्निर्वृत्त्यर्थमेव कात्पूर्वग्रहणं स्यात्, न हि तद्वतोर्भवन् कात्पूर्वः कृतः स्यात्। स्यादेतत्--न करोत्यवधारणार्थं कात्पूर्वग्रहणम्, किं तहि ? अपकृष्य विधिः, करोतेः सर्वत्र सुड भवति, स तु प्रदेशान्तरे प्राप्तः कात्पूर्वः कर्त्तव्य इति ? एवमपि समस्कृत, समस्कृथा इति सिद्ध्यति, अटऋः प्राक्प्राप्नुवन् कात्पूर्वो नीयत इति, समास्करोदित्यादौ त्वसिद्धिरेव, कथम् ? प्रदेसान्तरे प्राप्तस्य विधिरपकृष्य भवति,न चात्र सुट् प्राप्तोऽचा व्यवदानादिति कथमपकृष्य विधिर्भवेत्। कथं च संचस्कारेत्यादावपि द्धिःप्रयोगे द्विर्वचने उच्चारणभेदाच्छब्दभेद इति द्वौ करोती, तत्र यः समोऽनन्तरो न तस्य ककारः, यस्य च ककारो नासौ समोऽनन्तरः--इति अप्राप्तत्वान् न कात्पूर्वं विधीयेत ? स्थाने द्विर्वचने च स्थानिवद्भावादेक एव करोतिः, स चाव्यवहित इति कातु पूर्वः प्राप्तः कात् पूर्वः कृत इति न कश्चिद्दोषः। तदेवं धातुः पूर्वं साधनेन युज्यते, ततश्च क्रियमाणेऽपि कात्पूर्वग्रहणे नैवेष्टं सिध्यतीति `अड्भ्यासव्यवायेऽपि' इत्येतदेव कर्त्तव्यम्। कात्पूर्वग्रहणं तु शक्यमकर्त्तुमति वार्त्तिककारस्य पक्षः।

यदि तु `सम्पर्युपैः करोतौ' इति तृतीयानिर्दशेन समादिभिरुपसृष्टस्य सुड्विधीयते, तदा व्यवहितस्याप्युपसृष्टत्वात्कात्पूर्वग्रहणेनाप्ययमर्थः शक्यते

सम्पादयितम्। कथम्? समस्करोदित्यादौ तावदन्तरेणापि कात्पूर्वग्रहणमटो न भविष्यति; तस्य करोतिं प्रत्यनवयवत्वात्। करोतेस्तु भविष्यति; व्यवहितस्याप्युपसृष्टत्वात्। समस्कृतेत्यादौ त्वटः पूर्व प्रापर्तः कात्पूर्वं चेष्यते। संचस्कारेत्यादौ च स्थाने द्विर्वचने कात्पूर्वं चेष्यते। संचस्कारेत्यादौ च स्थाने द्विर्वचने कात्पूर्वं प्राप्तः कात्पूर्वं करिष्यते। द्विःप्रयोगे तु द्वयोरपि करोत्योः प्राप्तः पूर्वस्मादेव करिष्यते, न हि तस्य कृतः कात्पूर्वः कृतः स्यादिति सिद्धमिष्टम्म।

भाष्यकारस्तु मेने--उभयं न कर्त्तव्यम्। पूर्वं धातुरुपसर्गेण युज्यते, ततश्चानु त्पन्न एव प्रत्यये संकृ इति स्थिते सुटि कृते लकारः, ततस्तन्निबन्धनावडभ्यासौ ससुट्कस्यैव भविष्यतः। ननु च लब्धस्वरूपा क्रिया विसेषणमाकाङ्क्षति, तल्लाभश्च साधनान्तर इति पूर्वं धातुः साधनेन युज्यते, लब्ध्वस्वरुपेति, कोऽरथ ? किं प्रतिपन्नस्वरूपा, उत निष्पन्नस्वरूपा? निष्पत्तिस्तावद्विशेषणसम्बन्धेनोपयुज्यते, प्रतिपत्तिस्तु विशेषणसम्बन्धात्प्रागपि क्रियायाः सम्भवति। विशिष्टा च क्रिया साधनेन युज्यते, तता हि--तिष्ठतीति गतिनिवृत्तेः साधनसम्बन्धः प्रतीयते, प्रतिष्ठत इति गतेः, गच्छतीति गमनस्य, आगच्छतीत्यागमनस्य, करोतीति व्यापारमात्रस्य, संस्करोतीति भूषणस्य। विशिष्टा च क्रियोपसर्गसम्बन्धे सत्येव प्रतीयत इति द्योतकत्वेन वाचकत्वेन वा पूर्वमुपसर्गसम्बन्धोऽपेक्षणीयः। अवश्यं चैतदेवं विज्ञेयम्; अन्यथा भवतेरकर्मत्वाद्भावे लकार उत्पन्ने पश्चादनुशब्देन सम्बन्दे अनुभूयते कम्बलो देवदत्तेनेति कथं कर्मणि लकारःस्यात्? अतः `पूर्वं धातुरूपसर्गेण युज्यते' इत्येतदेव सम्प्रतिपन्नम्। एवं च पूर्वोक्तन्यासेन सिद्धमिष्टमिति नार्थः कात्पूर्वग्रहणेन, नापि `अडभ्यासव्यवायेऽपि' इत्यनेन। यदि पूर्वं धातुरुपसर्गेण युज्यते; अध्येता, प्रत्येता, प्रत्यायक इत्यादौ पूर्वं धातूपसर्गयोरेकादेशे तस्य धातुं प्रत्यादिवत्त्वात्तत एव प्रत्ययोत्पत्तावनिष्टं प्राप्नोति ? नैष दोषः, `नेन्द्रस्य परस्य' इत्यत्र ज्ञापितमेतत्--पूर्वोत्तरपदयोस्तावत्कार्यं भवति, पश्चात् स्वरसन्धिरति। प्रत्यय इति वा निर्देशोऽस्यार्थस्य ज्ञापकः।

वृत्तिकारस्तु--उभयं वक्तव्यमिति मन्यमानः कात्पूर्वग्रहणस्य तावत्प्रयोजनमाह--कात्पूर्वग्रहणमित्यादि। किं पुनरभक्तत्वे प्रयोजनम् ? अत आह--तथा हीति। संस्कृषीष्टेति। आशिषि लिङ्, आत्मनेपदम्, `उश्च' इति कित्त्वम्, सुट्,तयोः कात्पूर्वः सुट्, तस्य करोतिभक्तत्वात् करोतिग्रहणेण ग्रहणात् कृञः संयोगादिता ज्ञायेतेति `ऋतश्च संयोगादेः' इतीट् प्रसज्येत। संस्क्रियत इति। कर्मणि लट् `रिङ् शयग्लिङ्क्षु'। अत्रापि भक्तत्वे सुटः कृञः संयोगादित्वात् `गुणोऽर्तिसंयोगाद्योः' इति गुणः स्यात्, अतस्यौ मा भूतामिति अभक्तः सुडेषितव्य इति भावः। निघातोऽपि तर्हि न प्राप्नोति? समः पदस्य सुटा व्यवहितत्वात्, सुटश्चापदत्वात्।

गुणः कथमिति। सुटोऽभक्तत्वेनाङ्गस्य संयोगादित्वाभावात्प्रशनः। `तन्मध्यपतितस्तद्ग्रहणेन गृह्यते'इति स्थानेद्विर्वचनपक्षे द्विःप्रयोगे च समुदायस्यैवाङ्गसंज्ञेत्युकृत्, ततश्च तदङ्गमध्यपतितः तदङ्गग्रहणेन गृह्यते।

नन्वेवमपि असंयोगादित्वं तदवस्थम् ? अत आह--संयोगोपधग्रहणं चेति। अन्त्यादचः पूर्वस्य वर्णस्योपधासंज्ञाविधानात् `तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इत्येतदुक्तं भवति, यदि न सम्भक्तः सुट् टित्करणं किमर्थम् ? इत्यत आह---टित्करणममिति। `सुटस्तुस्वञ्जाम्' इत्युच्यमाने सुरेत्यादौ यः सुशब्दौ यश्चोपसर्गस्तस्यापि ग्रहणं स्यात्, ततश्च सुरां परिचष्टे परिसुरयतीत्यादावपि प्राप्नोति ।।

अड्भ्यासव्यवायेऽपि ।। 6.1.136 ।।

व्यवायः=व्यवधानम्, अपिशब्दादव्यवधानेऽपि, असति तु तस्मिन् व्यवाय एव स्यात्। संचस्करिथेति। `ऋतो भारद्वाजस्य' इत्येतदप्यसुट एवेष्यत इति वचनादिडागमः। पूर्वं धातुरित्यादि। यद्यपि `पूर्वं धातुः साधनेन युज्यते' इत्यत्रापि दर्शने सुतरामेतदनारम्भणीयम्, तथापि स्वदर्शनत्वादुपपन्नत्वाच्चेदमेव दर्शनमुपन्यस्तम्। अपर आह--`किमर्थं पुनरिदमुच्यते' इत्यस्यानन्तरं यावतेति पठितव्यम्, ततश्च पश्चादडभ्यासावित्येवमन्तश्चोद्यग्रन्थः' इति। परिहरति--अभक्तुश्चेति। चस्त्वर्थे। तत्रेति। अभक्ते। एतस्मिस्तु सतीत्यादि। ननु चास्मादेव वचनात्कृतयोरभ्यासयोस्तद्व्यवायेऽपि सुट् कात्पूर्वः क्रियताम्, यस्तु संकृ इत्यस्यामवस्थायां सुट् प्राप्नोति स केन वार्येत? उच्यते; नाप्राप्ते तस्मिन्नस्यारम्भात्तस्यानेन बाधः। अपरे तु-एतच्चोद्यभयाद्भाष्यकारमतमेव ज्यायो मन्यन्ते। यकत्पुनरुक्तमाद्गुणप्रसंग इति? नैष दोषः; `ऋतश्च संयोगादेः' इत्यत्र तावदुपदेश इति वर्त्तते, क्व प्रकृतम्? `एकाच उपदेशेऽनुदात्तात्' इति, ततः किम्? `अपदेशे संयोगादेः' इति सुटि कृते न भविष्यति। `गुणोऽर्तिसंयोगाद्योः' इत्यत्रापि नित्यमित्यनुवर्त्तते, क्व प्रकृतम् ? `नित्यं छन्दसि'इति, ततः किम् ? नित्यं यः संयोगादिस्तस्य गुणः ? सुटि कृते न भविष्यति ।।

सम्पर्युपेभ्यः करोतौ भूषणे ।। 6.1.137 ।।

सम्पूर्वस्य क्वचिदभूषणेऽपीष्यत इति। एतच्च `संस्कृतंक भक्षाः' इति निर्देसाल्लभ्यते ।।

समवाये च ।। 6.1.138 ।।

उदाहरणेषु भावे निष्ठा। एवं समुदितमित्यत्रापि ।।

उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु ।। 6.1.139 ।।

सत इत्यादि। लब्धसत्ताकस्यार्थस्य पूर्वं ये गुणा आधीयन्ते। येन तद्गुणान्तराधान तत्पुनः किमर्थम् ? इत्याह--आधिक्यायेति। आधिक्यम्=वृद्धिः। वृद्धस्य

वा तादवस्थयायेति। तस्य वृद्धियुक्तावस्थायाः प्रच्युतिपरिहारायेत्यर्थः। समीहा=चेष्टा। अगम्यमानार्थस्येति। अर्थप्रकरणादिना। वाक्यस्येति। वाक्यैकदेशस्येत्यर्थः। एधो दकस्येति। जातिद्वन्द्वः, `कृञः प्रतियत्ने' इति षष्ठी, `प्रतियत्नप्रकथनोपयोगेषु कृञः' इत्यात्मनेपदम्। उपस्कृतं भुङ्क्ते इति। क्रियाविशेषणम्, विकृतं भुङ्क्त इत्यर्थः। उपस्कृतं जल्पतीति। साध्याहारं यथा तथा जल्पतीत्यर्थः।
अथैवं कस्मान्न कृतम्--`सम्प्रतिभ्यां करोतौ भूषणसमवाययोः, उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च' इति ? सूत्रकारं पृच्छ ।।

किरतौ लवने ।। 6.1.140 ।।
किरतौ लवनविषय इति। अर्थद्वारकं किरतेर्लवनविषयत्वम्, लवनविषये विक्षेपे यः किरतिर्वर्त्तते तत्रेत्यर्थः। तदाह--विक्षिप्य लुनन्तीत्यर्थ इति। साक्षात्तु विषये किरतेर्लवनमेवार्थः स्यात्।
णमुलत्र वक्तव्य इति। आभीक्ष्ण्यादेर्णमुलर्थस्याभावात् ।।
हिसायां प्रतेश्च ।। हिसायां विषय इति। न त्वभिधेयायाम्। विक्षेप एव त्वभिधेयः, तदेव दर्शयति--तथेति। उदाहरणे नपुंसके भावे क्तः, हंशब्द कोपे। परिनिविभ्य एव सुटः षत्वम्, न प्रतेः ।।

अपाच्चतुष्पाच्छकुनिष्वालेखने ।। 6.1.142 ।।
तस्मिन्विषय इति। न त्वभिधेये। विक्षेप एव त्वभिधेयः, तदारह---आलिख्य विक्षिपतीत्यर्थ इति।
हर्षजीविकेत्यादि। हर्षः=प्रमोदः, जीविका=प्राणपरित्राणोपायः, कुलायः=आश्रयः।
किं पुनरुदाहरण एवात्मनेपदं भवति, न प्रत्युदाहरणे? अत आहहर्षजीविकेत्यादि ।।

कुस्तुम्बुरूणि जातिः ।। 6.1.143 ।।
सूत्रे नपुंसकलिङ्गेन बहुवचनेन च निर्द्देशात् फलजातावेव सुटा भवितव्यम्, न त्वोषधिजातौ ? इत्याशङ्क्याह--सूत्रनिर्देश इति। नपुंसकलिङ्गग्रहणं बहुवचनस्याप्युपलक्षणम् ।।

अपरस्पराः क्रियासातत्ये ।। 6.1.143 ।।
अपरस्परा इति। अपरे च परे चेति द्वन्द्वः, निपा तनादल्पाच्तरस्य परनिपातः। सार्था गच्छन्तीति। सार्थभूता गच्छन्तीत्यर्थः। सततमविच्छेदेनेति। न कदाचिदस्मिन् महापथे गमनं विच्छिद्यत इत्यर्थः। अयं चार्थः सुटा द्योत्यते। किमिदमिति। `अस्मादेव निपातनान् मलोपः' इत्युच्यमाने सततमिति न सिद्धयति, सूत्रे `प्यञन्तोच्चारणादिति प्रश्नः। कथमिति मलोपस्य लक्षणं न दृश्यते। अथ `सातत्ये' इत्येतदेव निपातनं सामान्येन ततशब्दे परतः समो मकारस्य लोपो भवतीत्यस्यार्थस्य ज्ञापकं कल्प्यते, सन्ततमिति न सिद्ध्येत्, बाधकत्वान्निपातनानामिति मन्यमानस्य प्रश्नः।
समस्तते विकल्पेनेति। अयमभिप्रायः---सातत्यशब्दं पूर्वाचार्यलक्षणसिद्धमुच्चारयता पूर्वाचार्यलक्षणमाश्रितम्, अतस्तेन समो मकारस्य लोपो विधीयत इति एवञ्च कृत्वावश्यंप्रभृतीनामपि कृत्यादिषु मकारलोपः सिद्धो भवति, तदेव पूर्वाचार्यलक्षणं पठन्ति--लुम्पेदित्यादि। अन्त्यमिति शेषः। कृत्यप्रत्ययान्ते परतोऽवश्यंशब्दस्यान्त्यं लुम्पेत्, लोपमस्य कुर्यादित्यर्थः। `शे मुचादीनाम्' इति नुम्। अवश्यकार्यमित्युदाहरणम्। तुमिति वृत्तभङ्गभयात्षष्ठी न कृता। तुम्प्रत्ययान्तस्यान्त्यं लुम्पेत्, काममनसोः शब्दयोः परतः--कर्त्तु कामोऽस्य कर्त्तुकामः, कर्तुं मनोऽस्य कर्त्तुमनाः, तुमप्यत्रोपसंख्यायते, अक्रियोपपदत्वादित्याहुः। संशब्दस्यान्त्यं लुम्पेत्, वा=विकल्पेन, हिततयोः शब्दयोः परतः--सहितम्, संहितम्, सततम्, संततम्। नगिसमासः। मांसशब्दस्याप्यन्त्यं लुम्पेत्, क्व? पचि, पचतिधातौ। किंविशिष्टे ? युड्घञोः, युटि घञि च परतो यः पचिस्तस्मिन्नित्यर्थः, मास्पचनम्, मास्पाकः, कर्मणि षष्ठ्याः समासः। संहितायां समासे चैष मलोप इत्याहुः।
अथ सन्ततशब्दात् प्यञ् भवति वा न वा सान्तत्यमिति, तेत्याहुः ।।
गोष्पदं सेवितासेवितप्रमाणेषु ।। गावः पद्यन्तेऽस्मिन्निति। `पुंसि संज्ञायाम्' इत्यधिकरणे घः, कर्त्तरि षष्ठ्या समासः। अगोष्पदान्यरण्यानीति। ननु च सूत्रे गोष्पदशब्द उपात्तः, तत् किमिदम्? इत्यत आह--असेवित इत्यादि। क्रियते चेदमसेवितग्रहणम्, न च तत्र गोष्पदशब्दः सम्भवति, तस्मादसेविते गोष्पदशब्दार्थनिपातनं विज्ञायते। नार्थ एतेनेति। असेवितग्रहणेन। कथं तेन विना सिद्धिः ? तत्राह--गोष्पदप्रतिषेधादिति। सत्यमिति। गोष्पदप्रतिषेधादिति यदुक्तम्, तत् सत्यं मन्यते, न तु नार्थ एतेनेति। तद् यदि सत्यम्, किमर्थं तर्ह्यसेवितग्रहणम् ? इत्याह--यत्र त्विति। नञ्समासो हि तत्पुरुषः स्वभावादुत्तरपदार्थसदृशमर्थमाचष्टे-अब्राह्मणवत्, ततश्च न गोष्पदमगोष्पदमिति नञ्समासे कृते यत्र सेवितस्य सेवनस्य प्रसङ्गोऽस्ति, तत्रैवागोष्पदमिति स्यात्, स एव गोष्पद स्य देशस्य सदृशः; यत्र त्वत्यन्तासम्भव एव सेवितस्य तत्र न स्यात्। असेवित ग्रहणसामर्थ्यात्तु बहुव्रीहिराश्रीयते, स चात्यन्ताभावेऽपि भवति। तेन येषु गवामत्यन्तासम्भवः, तान्यरण्यान्यासेवितशब्देनोच्यन्ते। ततश्च तत्राप्यगोष्पदमिति भवति। अत्यन्तासम्भवं स्पष्टयति--यानि हि महान्त्यरण्यानीति। तत्र केचिदाहुः--यत्र गवामत्यन्तासम्भवः, तत्रैवागोष्पदशब्दः प्रयोक्तव्यः, न त्वसम्भव इति। अन्ये त्वविशेषेणेच्छन्ति। न चैवमसेवितग्रहणस्य वैयर्थ्यम्, असति ह्यस्मिन्नत्यन्तासम्भवे न स्यात्। गोष्पदपूरमिति। `वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्' इति णमुल्। ननु च

गोष्पदमिति षष्ठीसमासोऽयम्, तस्य गोः सम्बन्धि पदमर्थः, न तु प्रमाणम्? तत्राह--नात्र गोष्पदं स्वार्थप्रतिपादनार्थमुपादीयत इति। तथा च गोष्पदपूरं वृष्टे देव इति। असत्यपि गोष्पदपूरणे प्रयुज्यते, यथा--चेलक्नोपं वृष्टो देव इत्यसत्यपि चेलक्रोपे ।।

आस्पदं प्रतिष्ठायाम् ।। 6.1.146 ।।
आत्मयापनायेति। प्राणधारणम्=आत्मयापनम्, तदर्थ यत्स्थानम्, सा प्रतिष्ठा। आस्पदमिति। आङ्पूर्वात्पदेः पूर्ववदधिकरणे घः, लोकाश्रयत्वादस्मादेव निपातनाद्वा नपुंसकलिङ्गता, आपदमित्यव्ययीभावसमासः ।।

आश्चर्यमनित्ये ।। 6.1.147 ।।
यद्याश्चर्यमनित्ये निपात्यते, घटादावतिप्रसङ्गः ? इत्यत आह--अनित्यतयेत्यादि। लोके यदनुचितमदृष्टपूर्वमुपलभ्यते, तदनित्यातया व्याप्तं कादाचित्कत्वम्, अतोऽनित्यता विषयभूता भवति। तथा विषयभूतया अद्भूतत्वं पिस्मयहेतुत्वमुपलक्ष्यते। उदाहरणे `अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि' इत्यनवक्लृप्तावसम्भावनायां लिङ्। रुग्णस्य मन्दकर्णस्य चाविशिष्टे कालादौ भोजनमध्ययनं चादृष्टपूर्वं दृश्यमानमद्भूतं भवतीति। आश्चर्यमिति। `चरेराङि चागुरौ' इति यन्। आचर्यमनुष्ठेयमित्यर्थः ।।

वर्चस्केऽवस्करः ।। 6.1.148 ।।
कुत्सितं वर्चो वर्चस्कम्, `कुत्सिते' इति कन्, `सोऽपदादौ' इति सत्वम्। कना निर्द्देशो दीप्तौ मा भूदिति, दीप्तावपि हि वर्चःशब्दो वर्त्तते। अन्नमलमिति। भाण्डेषु यल्लग्नं काष्ठादिनाऽपकृष्य काकादिभ्यो विकीर्यते तदन्नमलम्। अवकीर्यत इति। भूमाववक्षिप्यत इत्यर्थः। तत्सम्बन्धाद् देशोपीति। यत्र भाण्डानि परिमृज्यन्ते देशे स देशः। तथा च याज्ञवल्कयः--- `सम्मार्जितावस्करया व्यये चामुक्तहस्तया' इति। अपर आह--पुरीषं वर्चस्कं तद्देशश्चेति। अवकर इति। ब्रह्मचारिणः स्त्रियां रेतः सेक=अवकरः, यतोऽवकीर्णो भवति ।।

अपस्करो रथाङ्गम् ।। 6.1.149 ।।
अत्र सूत्रे तृतीय उपसर्गः, पूर्वत्र षष्ठः ।।

विष्किरः शकुनिर्विकिरो वा ।। 6.1.150 ।।
विष्किरो वेत्यादि। शकुनावभिधेये विष्किर इति वा सुण्निपात्यत इत्येतावतैव सुड्विकल्पः सिद्ध इत्यर्थः। विकिरग्रहणमित्यादि। असति तस्मिन् कप्रत्ययान्तस्य विकिरशब्दस्य शकुनौ विकल्पार्थमेवेदं वचनं स्यादिति विकिरशब्दस्यान्यत्र प्रयोगो न निवर्त्तितः स्यादिति। पुनर्विकिरग्रहणे तु सति भवति। यथा तु भाष्यं तथा `विष्किरः शकुनौ वा' इत्येतावत् सूत्रम् ।।

ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ।। 6.1.151 ।।
सुडागमो भवतीति। पूर्वं कात्पूर्वग्रहणादभक्तः सुडित्युक्तम्, इह तु कात्पूर्वत्वं न सम्भवति, आगमलिङ्गं च टित्त्वमस्तीत्यागम एव सुडुक्त इति भावः। स च भवन् `उभयनिर्देशे पञ्चमीनिर्द्देशो बलीयान्' इति चन्द्रशब्दस्यैव भवति, सूर्याचन्द्रमसाविति। द्वन्द्वः, `देवताद्वन्द्वे च' इत्यानङ्। उत्तरपदमित्यादि। स्वनिकायप्रसिद्धिरेवेषा ।।

प्रतिष्कशश्च कशेः ।। 6.1.152 ।।
अत्र यद्यपीत्यादि। कशेरिति। यद्धातोरुपादानं तस्य नान्यत्प्रयोजनमिति भावः।।

प्रस्कण्वहरिश्चन्द्रावृषी ।। 6.1.153 ।।
हरिश्चन्द्रो राजर्षिः। प्रकण्वो देश इति। कण्वम्=पापम्, तत्प्रगतं यस्मात्स एवमुच्यते। इहिः चन्द्रो यस्य मुग्धस्य स हरिचन्द्रः।

मस्करमस्करिणौ वेणुपरिव्राजकयोः ।। 6.1.154 ।।
परिव्राजके त्विनिरपीति। मत्वर्थाभावादिनिरप्राप्तः, अतः सोऽपि निपात्यते, न हि परिव्राजको मकरेण तद्वान्, मस्करेण तु वेणुना तद्वान् भवति; दण्डधारणात्, ततः किम् ? मस्करशब्दादिनिना सिद्धम्। एवमपि संयोगे मत्वर्थीयविधानान्मस्करसंयुक्त एव मस्करीत्युच्येत, मा भूदेवं परिव्राजकमात्रवचनो यथा स्यादितीनिर्निपात्यते, व्युत्पत्तेरदर्शनाद्वा नात्र स्पष्टं निपात्यम्, तद्दर्शयति--केचिदिति। माकरणशील इति। प्रतिषेधशीलस इत्यर्थः। कर्मापवादित्वादिति। कर्मशब्देनेह काम्यमर्माणि विवक्षितानि, न नित्यनैमित्तिकानि, तानि हि ममुक्षोरपि कर्त्तव्यानि। यथाऽऽहुः--
मोक्षार्थी न प्रवर्त्तेत ततः काम्यनिपिद्धयोः।

नित्यनैमित्तिके कुर्यात् प्रत्यवायनिवृत्तये ।। इति ।
तानि कर्माण्यपवदितुं प्रतिषेद्धुं शीलमस्य स कर्मापवादी। परमहंसास्तु कर्ममात्रमपवदन्ति। मा कुरुतेति। न कर्त्तव्यानीत्यर्थः। कर्मणि लुङ् ।।

कास्तीराजस्तुन्दे नगरे ।। 6.1.155 ।।
केचिन्नगरे इति प्रथमाद्विवचनान्तभाहुः। वृत्तौ तु सप्तम्यन्तं व्याख्यात्म्। कातीरमिति। `ईषदर्थे च' इति काभावः ।।

कारस्करो वृक्ष ।। 6.1.156 ।।
पारस्करप्रभृतिष्वेवेति। नेदं सूत्रमधीयत इत्यर्थः ।।

पारस्करप्रभृतीनि च संज्ञायाम् ।। 6.1.157 ।।
रूढिशब्दा एते यथाकथञ्चिद्व्युत्पाद्याः। पाहङ्करोतीति पारस्करः, `कृञो हेतु' इत्यादिना टः। रथं यातीति रथष्या। `आतोऽनुपसर्गे कः'। षत्वागप्यत्र निपात्यते। अन्ये तु सकारमेव पठन्ति। किं करोतीति करोतेर्डुः, किमोऽन्त्यलोपः, सुट्, किष्कुः। किमपि धत्ते किष्किन्धा । पूर्ववत्कः, किमो द्विर्वचनं पूर्वस्य मलोपः, सुट, उभयत्राप्यत्र षत्वमपि निपात्यते। तत्करोतीति तस्करः। अत्र हि तच्छब्देन चोरकर्म प्रसिद्धं निन्द्यं परामृश्यते।
प्रात्तुम्पताविति। `तुप तुम्प हिंसार्थौ' इत्येतस्मिन्धातौ परतः प्रशब्दात्परः सुड् भवति धात्वर्थस्य चेद् गौः कर्त्ता भवति, प्रस्तुम्पतीति यत्ने तिबन्ते सुट्। स्वशब्देन धातुग्रहणात्तदादावपि भवति प्रस्तुम्पतो गावौ, प्रस्तुम्पन्ति गाव इति।
चित्तिचित्तयोरिति। `चिती संज्ञाने', क्तिन्, `नपुंसके भावे क्तः'।
प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपो निश्चयसंयोगात्प्रायश्चित्तमिति स्मृतम् ।।

अनुदात्तं पदमेकवर्जम् ।। 6.1.158 ।।
एकवर्जमिति। एकं वर्जयित्वेत्यर्थः। `द्वितीयायां च' इति णमुल्। तत्र हि परीप्सायामिति प्रायिकम्। अत्र यदि पदमिति जातावेकवचनं स्यात्तदैकवर्जनमित्येकशब्देनापि प्रत्यासत्त्या पदमेवोच्येत, ततश्चायमर्थो भवति--वाक्ये पदान्यनुदात्तानि भवन्ति एकं पदं वर्जयित्वेति। अनुदात्तशब्दश्चेदानीं लौकिकः, लोके ह्यचामनुदात्तादिगुणायोगे हलपि तदनुरक्तत्वात्तद्धर्मा गृह्यत इति अज्झल्समुदायरूपं पदमेवानुदात्तमिति सामानाधिकरण्येन व्यपदिशति। अत्र पक्षे किमेकं वर्जनीयमिति नियमकारणाभावात् सर्वेषामेव पदानां पर्यायेण वर्जनात्स्वरनियमो न स्यात्। तस्मात्पदमिति व्यक्तिनिर्द्देशः, विवक्षितं चैकत्वम्। अनुदात्तशब्दश्च `नीचैरनुदात्तः' इत्यविशेषे पारिभाषिक इति तस्यैवग्रहणं युक्तम्। एकशब्देनापि सन्निधानादजेवोच्यते। कथं तर्ह्यज्झल्समुदायरूपस्य पदस्याज्मात्रवाचिनानुदात्तशब्देन सामानाधिकरण्यम् ? अवयवावयविनोरभेदोपचारात् अर्सआद्यच्प्रत्यायान्तत्वाद्वाऽनुदात्ताच्कं पदमेवानुदात्तम्। यद्येवम्, अनुदात्तशब्देनापि पदमेव प्राधान्येनोच्यते अज्गुणाभावेनेति पुनरप्येकशब्दस्य संख्येयापेक्षायां प्रधानभूतपदमेव संख्येयं प्राप्नोति ? उच्यते; पदमित्येकत्वं विवक्षितमित्युक्तम्, तत्रैकं पदमनुदात्ताच्कं भवत्येकं पदं वर्जयित्वेति नायमर्थः सम्भवतीति सामर्थ्याद् गुणभूतोऽप्यजेवैकशब्देनोच्यते ।
यद्वा, पदशब्दोऽपि लक्षणया तत्स्थेष्वक्षु वर्त्तते, तत्राचां पदश्थत्वाव्यभिचारादेकत्वविवक्षार्थमेव पदग्रहणम्। सर्वथा त्वयमर्थो विवक्षितः---एकस्मिन्पदे वर्त्तमाना अचोऽनुदात्ता भवन्ति एकमचं वर्जयित्वेति। एवं स्थिते यदीदं स्वतन्त्रं लक्षणं स्यात्तदा नियमो वा स्याद्--एकमचं वर्जयित्वा, परिशिष्टमनुदात्तमेव भवतीति विधिर्वा।
तत्राद्ये पक्षे येषामचां लक्षणआन्तरेणोदात्तः स्वरितो वा विधीयते, तत्रानियमप्रसङ्गाभावात्तद्व्यतिरिक्तविषयमेवेदं भवति। अस्ति हि तत्रानियमप्रसङ्गः; अस्वरस्याच उच्चारणासम्भवात्। एकवर्जमिति। यस्य यस्योदात्तस्वरितविधानं स स वर्ज्य इत्यर्थो भवति। ततश्चत्वार इत्यादावागमादीनां पृथक् स्वरप्रसङ्गः, आमलकीज इत्यत्र ङीषः प्रत्ययाद्युदात्तत्वम्, `गतिकारकोपपदात्कृत्' इति जशब्दस्योदात्तत्वम्, `दीर्घकाशतुषभ्राष्ट्रवटं जे'इति पूर्वपदाद्युदात्तत्वम्, `अन्त्यात्पूर्वं बह्वचः' इति लकाराकारस्योदात्तत्वमिति युगपदुदात्तचतुष्टयप्रसङ्गः। ननु च नाप्राप्ते कृत्स्वर आरभ्यमाणेन `दीर्घकाश' इत्याद्युदात्तत्वेनापोदितत्वादेव कृत्स्वरो न भविष्यति, तथाऽऽद्युदात्तत्वं कुटीज इत्यादौ सावकाशम्, उपसरज इत्यादौ सावकाशेन `अन्त्यात्पूर्वं बह्वचः' इत्यनेन परत्वाद्बाधिष्यत इति कथमुदातुष्टयप्रसङ्गः ? उच्यते; विरोधे समानफलत्वे बाध्यबाधकभावः, विप्रतिषेधोऽपि विरोध एव, तच्चोभयं स्वरेषु नास्तीति कृत्कृत्यप्रत्ययसंज्ञानामिव समावेशप्रसङ्गः। सत्यपबि विप्रतिषेधे ङीष उदात्तत्वे कृते पश्चात् `अन्त्यात्पूर्वं बह्वचः' इत्येतस्मिन्प्रवृत्ते.ापि पूर्वकृतस्य ङीष उदात्तस्यानिवृत्तेरनिष्टमेव। यदि च यस्य यस्योदात्तस्वरितविधानम्, तं तं वर्जयित्वा परिशिष्टमनुदात्तमेवेत्यर्थः स्यात्, तदा पदमेकवर्जमिति द्वयमपि व्यर्थं स्यात्। सामान्येनाचोऽनुदात्ता इत्येवास्तु, प्रत्ययाद्युदात्तत्वादिविषये तैर्बाधितत्वादेवानुदात्तत्वं न भविष्यति। तस्मात्पदमेकवर्जमिति वचनान्नायं स्वतन्त्रो नियमः।
अथ विधिः ? तदा येषामचां लक्षणान्तरेणोदात्तः स्वरितो वा न विधीयते, तष्वप्यनुदात्तस्य पक्षे प्राप्तत्वाद्विधिरनुपपन्न इति लक्षणान्तरेण येषामुदात्तः स्वरितो वा विहितः, त एकस्मिन्पदे वर्तमाना अनुदात्ता भवन्त्येकमचं वर्जयित्वेत्यर्थः स्यात्। क एक वर्ज्य इति न ज्ञायेत! अथापि परनित्यादिभिर्व्यवस्था ? एवमपि

सतिशिष्टेनापि व्यवस्था न स्यात्। कथमौपगवत्वमित्यत्र द्वे प्रत्ययाद्युदात्तत्वे ? तत्रैकस्यानुदात्तत्वं विदीयमानं कस्य भवतु ? उदात्तस्वरितव्यतिरिक्तानां चाचामनियमप्रसङ्ग एवावतिष्ठेत। तदेवं स्वतन्त्रेऽस्मिन् विधौ नियमे वा नेष्टं सिद्ध्यति।

अथाधिकारः स्यात्तदा `ककर्षात्वतो घञोऽन्तः' इत्यत्रास्योपस्थाने सत्ययमर्थो भवति--कर्षशबप्दस्याकारवतोऽन्त उदात्तो भवति, तमेकं वर्जयित्वा तस्मिन्पदे वर्त्तमानाः परिशिष्टा अचोऽनुदात्ता भवन्तीति। एवमन्यत्रापि--यत्र यत्रोपस्थानं तत्र तत्र विधीयमानस्य स्वरस्योपलक्षणार्थम्। तेन `तवै चान्तश्च युगपत्', `उभे वनस्पत्यादिषु युगपत्' इत्यादौ द्वयोरपि वर्जनं भवति। इन्द्राबृहस्पती इत्यत्र बृहस्पतिशब्दो वनस्पत्यादित्वाद् द्वयुदात्ते इन्द्रशब्देन द्वन्द्वे `देवताद्वन्द्वे च' इति द्वयोरपि प्रकृतिस्वरत्वमिति त्रयणां वर्जनं भवतीत्येवं षाष्ठिके स्वरे न कीश्चिद्दोषः।

`आद्युदात्तश्च', `समानोदरे शयित ओ चोदात्तः' `अस्थिदधिसक्थ्यक्षणामनङुदात्तः' इत्यादिषु प्रदेशान्तरवर्त्तिषु स्वविधिष्वस्यानुपस्थानात्तेषु परिशिष्टस्यानुदात्तत्वं न स्यात्, एकवर्जमिति च व्यर्थं स्यात्। कथमनुदात्तं पदमित्येवाधिकारोऽस्तु, न चेवं तत्तत्सूत्रविहितस्यापि स्वरस्यानुदात्तप्रसङ्गः, तद्विधानसामर्थ्यात्। तदेवं पक्षान्तरसम्भवात्परिभाषेयमिति निश्चित्याह--परिभाषेयमिति। लिङ्गवती चेयम्, स्वरविधिश्च लिङ्गमित्याह--स्वरविधिविषयेति। यत्रान्य इति। अनुदात्तापेक्षमन्यत्वम्। उदात्तः स्वरितो वेति। अनुदात्तस्यानुदात्तवर्जनं व्यर्थमिति तद्विरोधाद् उदात्तः स्वरितो वा परिसंख्येयः, तद्विधावेवास्योपस्थानमिति भावः। उपरियतमित्यनेन स्वरविधिभिरस्यैकवाक्याता दर्शता। कः पुनरिति। वर्ज्यविशेषस्य सूत्रेऽनिर्देशात्प्रशनः। यस्य स्वरो विधीयत इति। यत्रेदमुपतिष्ठते तत्र यः स्वरो विधीयते स उच्यते। असाविति। यदि ह्यसावपि न वर्ज्येत तस्य तत्स्वरविदानमनर्थकं स्यात्। धातुस्वरं शनास्वरो बाधत इति। सतिशिष्टेन व्यवस्थाया वक्षयमाणत्वात्। श्नास्वरं तस्स्वरं इति। बाधत इत्यनुषङ्गः। अत्रापि हेतुर्वक्ष्यते, विकरणस्वरस्तु सतिशिष्टोऽपि' इत्यत्र तस्स्वरमाम्स्वर इति। पूर्ववदनुषङ्ग। सतिशिष्टत्वं हेतुः।

आगमस्येत्यादि। उपलक्षणमेतत्। अनेन हि तत्तल्लक्षणाभिनिर्वृत्तानां बहूनामुदात्तस्वरितानां समावेशनिवृत्तिः प्रयोजनमस्येत्युच्यते। न चैतावदेव प्रयोजनम्, येषामपि केनापि स्वरित उदात्तो वा न विधीयते, यथाऽनेकाक्षु प्रत्ययेषु धातुषु वाऽऽधन्तव्यतिरिक्तानामचां तेषामप्यनुदात्तनियमस्यैतदधीनत्वात्। चत्वार इति। `चतेरुरन्' इति चतुर्शब्द आद्युदात्तः। अनड्वाह इति। `अनसि वहेः क्विवब् उश्चानसः' इति क्विप्, यजादित्वात् सम्प्रसारणम्, अनः--शब्दोऽसन्प्रत्ययान्त आद्युदात्तः, `गतिकारकोपपदात्कृत्' इत्युत्तरपदप्रकृतिस्वरेण धातोरन्त उदात्तः। अस्थनीति। `असिसञ्जिभ्यां क्थिन्' इत्याद्युदात्तोऽस्थिशब्दः, दधिशब्दः `नब्विषयस्यानिसन्तस्य' इत्याद्युदात्तः। नबिति नपुंसकाख्या। यस्यासौ स्वरो विधीयते स वर्ज्यते इत्युक्तम्। सर्वेषां चागमादीनां स्वरो विधीयत इत्यविशेषण वर्जनप्रसङ्ग इत्यत आह--परनित्यान्तरङ्गापवादैरिति। स तस्मिन्योगे सर्वेषामेव तेषां स्वकस्वरवर्ज्यमन्यमनुदात्तं चिकीर्षता परस्परविरोध उपजायते, परत्वादिभिर्युक्तैव व्यवस्ता। सतिशिष्टेन चेति। व्यवस्थेत्यपेक्षते। एतदेव विवृणोति--यो हीति।

सामान्येनोक्तमुदाहरणनिष्ठं करोति--तथा हीति। एतच्च सतिशिष्टस्य बाधकत्वं न्यायतस्सिद्धम्। कथमुदात्तस्वरितविदिभिरेकवाक्यतापन्नयाऽनया शेषनिघातः क्रियत इत्युक्तम्, ततः किम्? उत्सर्गस्यापवादस्य वा या चरमा प्रवृत्तिस्तस्यामिदमुपतिष्ठते, एवञ्च तस्यैव लक्षणस्य यचा चरमा प्रवृत्तिस्तत्रास्या उपस्थाने पूर्वा प्रवृत्तिर्बाध्यते, तद्यथौपगवत्वमिति। अत्र हि `आद्यदात्तश्च' इत्यस्य प्रतिप्रत्ययमावृत्तौ त्वप्रत्यये यदा प्रवर्त्तते तदाऽनया निघातः क्रियते। यदि सतिशिष्टस्वरो बाधकः, विकरणस्वरोऽपि लसार्वधातुकस्वरस्य बाधकः प्राप्नोति ? तत्राह--विकरणस्वरस्तिविति। एवं मन्यते--यदयं तासेः परस्य लसार्वधातुकस्यानुदात्तत्वं शास्ति तज्ज्ञापकमुक्तस्वार्थस्य; अन्यथा यद्यपि लावस्थायां तासिविधीयते, तथापि लकारमावापेक्षत्वादन्तरङ्गेषु च लादेशेषु कृतेषु पश्चात्तासिरिति तत्स्वरस्य सतिशिष्टत्वाच्छेषनिघातेनैव सिद्धेरनर्थकं तत्स्यादिति।

विभक्तिस्वरादिति। सतिशिष्टत्वाद्विभक्तिस्वरे प्राप्ते वचनम्। नञ्स्वरेणेति। `तत्पुरुषे तुल्यार्थ' इति प्रकृतिभावविहितेन।

विभक्तिनिमित्तस्वरादिति। विभक्तिर्निमित्तं यस्य तस्य यः स्वरस्तस्मादित्यर्थः। वाक्ये हीत्यादि। देवदत्तशब्द आर्मोन्त्रतस्वरेणाद्युदात्तः, गाभित्याद्युदात्तः, गमेर्डोः प्रत्ययस्वरः, `ओतोऽम्शसोः' इत्यात्वमेकादेशः, `एकादेश उदात्तेनोदात्तः', `निपाता आद्युदात्ताः' `उपसर्गाश्चाभिवर्जम्' इत्याद्युदात्तत्वे वर्जितत्वादभेः फिषित्यनेनान्तोदात्तत्वम्। फिषिति प्रातिपदिकस्य पूर्वाचार्याणां संज्ञा। आङ् उपसर्गस्वरेणाद्युदात्तः। अजेर्लोट्, `तिङ्ङतिङः' इति निधातः, खुक्लशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। टापा विभक्तया च `एकादेश उदात्तेनोदात्तः'। तदेवं पदग्रहणाद्वाक्ये पृथगेव स्वरो भवति।

ननु च यदि वाक्येऽपि शेषनिघातः स्यात्, ततश्च सतिशिष्टस्वरत्वादिनां व्यवस्थापकानां तत्रासम्भवात्क एको वर्जनीय इति न ज्ञायेत? सत्यम्; विशेषाग्रहणात्पर्यायेण वर्जनं भविष्यति। यदि तर्हि पदग्रहणं क्रियते, एवं सति यावत् पदसंज्ञा न भवति, तावच्छेषनिघातेन न भवितव्यम्, ततश्च कुवल्या विकारः कौवलमित्यत्रानुदात्तादेश्चेत्यञ्न प्राप्नोति, यतः कुवलशब्दोऽयं ग्रामादित्वेनाद्युदात्तः, गौरादित्वान्ङीषि विहितेऽपि पदव्यपदेशाभावादाद्युदात्तत्वं न परित्यजति ? इत्यत आह--परिमाणार्थं चेति। पदमत्र गौणमभिप्रेतम्, यस्य पदसंज्ञा भविष्यति न मुख्यम्; पदाधिकारे पुनः पदग्रहणात्। किं चोदात्तस्वरितविधिभिरेकीभूय शेषनिघातः क्रियत इत्युक्तम्, तस्यां च दशायां युष्मदस्मदोर्ङसि, ङयि चेत्यादावेव पदत्वं निष्पन्नं भवति, न पुनः `धातोः' इत्यादिषु धात्वाद्युपदेशानन्तरं प्रवर्त्तमानेषु। अतश्च तैरेकीभूतस्य पदशब्दस्य तदैकदेशेऽपि भविष्यति वृत्तिः। यद्येवम्, यत्र यत्रास्योपस्थानं तत्र तत्र सव पदम्, ततोऽपि चान्यत्र न्यूनं न कार्यित्वेन संनिहितमिति तत्रैवाक्षु परिशिष्टमनुदात्तं भविष्यति, नार्थो वाक्यनिवृत्त्यर्थेन पदग्रहणेन? उच्यते; असति पदग्हणे दातोरन्त उदात्तो भवति परिशिष्टमनुदात्तमित्युक्ते धातोरेव यत्परिशिष्टं तदनुदात्तमिति गम्येत; एवम् `आद्युदात्तश्च' इत्यादौ, ततश्च धातुप्रत्यययोः पृथक्स्वरः स्यादेव। अत एकपदे भविष्यतां सर्वेषामेवानुदात्तत्वं यथा स्यादित्येवमर्थं पदग्रहणम्।

काशिकावृत्तिः--4 (continution from 10th july 2002)

पदमञ्जरी

पदाधिकारस्य निवृत्ति करोतीति। गौणार्थमेतत्पदग्रहणं मुख्यपदाधिकारस्य निवृत्तिं कारयति। तेन किं सिद्धं भवति? तत्राह-तेनेति। ज्ञापकमप्यस्मिन्नर्थे दर्शयति--गर्भिणीशब्दश्चेति। गर्भोऽस्या अस्तीति मत्वर्थीय इनिः, ङीप्। गर्भशब्दो ग्रामादिः। तत्र यदीनिप्रत्ययस्योदात्तविधिसमकालमेवानुदात्तत्वं भवति, ततो गर्भिणीशब्दस्यानुदात्तादित्वाद् `अनुदात्तादेः' इत्याञि प्राप्ते तद्बाधनार्थं युज्यते तस्य भिक्षादिषु पाठः। अथ पदसंज्ञाया उत्तरकालं शिष्टस्यानुदात्तत्वं भवेत्, ततो गर्भिणीशब्द आद्युदात्तः स्यात्, ततश्चाञो बाधनार्थं भिक्षादिषु न पठितव्यः स्यात्।
कुवलगर्भशब्दावाद्युदात्ताविति। तत्र चोक्त एव प्रकारः, ततः कुवलशब्दादञ्सिद्धये आश्रयणीयम्। गर्भिणीशब्दश्च ज्ञापकमुपपद्यत इति भावः। अत्रेदं चोद्यते-उदात्तस्वरितविधिभिरेकीभूतमप्येतन्नियमार्थं चेद् विहितस्वररहितष्वेवस्यात्, विध्यर्थं चेद् विहितस्वरेष्वेव स्याद्--इति प्रागुक्तो दोशस्तदवस्थ एव? उच्यते; उक्तं पदग्रहणमेकस्मिन्पदेऽन्तर्भूतानां सर्वेषामनुदात्तत्वमिति, अतो यथैतदुपपद्यते तथा विधिरूपेण, नियमरूपेण, उभयरूपेण वा प्रवृत्तिर्भविष्यति।

कर्षात्वतो घञोऽन्त उदातः ।। 6.1.159 ।।
आदस्यास्तीत्यात्वान्, `तसौ मत्वर्थे' इति भसंज्ञा, कर्षश्चात्वांश्चेति समाहारद्वन्द्वः। विकृतनिर्देश इति। विकरणान्तस्येदमनुकरणम्, न तु घञन्तनिर्देश इति भावः। अथ किमर्थो मतुब्निर्देशः, यावता न क्वचिदप्याकारात्परो घञस्तीति सामर्थ्यात्तद्वतो ग्रहणं भविष्यति? उच्यते; घञाक्षिप्तो धातुरात इत्यनेन विशेष्येत, तत्र तदन्तविधौ ज्ञायमाने आनन्तर्यस्यासम्भवाद्विधानं विशेष्येत--आकारान्ताद्यो विहित इति, ततश्च दाय इत्यादावेव स्यात्, पाक इत्यादौ तु न स्यात्; मतुब्निर्द्देशात्तु सर्वत्र भवतीति। लाक्षणिकस्याप्यात्वतो ग्रहणमिष्यते; वृषादिषु कामपामपदानां पाठात्।
`अलोऽन्त्यस्य' इत्येव सिद्धेऽन्तग्रहणमुत्तरार्थम् ।।

उञ्छादीनां च ।। 6.1.160 ।।
`उछि उञ्छे', `म्लेच्छ अव्यक्ते शब्दे'। `जजि युद्धे', अत्र कुत्वाभावो निपातनात्, `जल्प व्यक्तायां वाचि' `व्यध ताडने', `व्यधजपोरनुपसर्गे' इत्यप्। वध इति। `हनश्च वधः' इत्यप्। कालविशेष इति। कतद्वापरादौ। `घृ गृ निगरणे', `ऋदोरप्'।
विषमित्यनेन दूष्यशब्दस्य विशेष वृत्तिं दर्शयति।
`विद ज्ञाने', `ओविजी भयचलनयोः', `वेष्ट वेष्टने', `बन्ध बन्धने', `ष्टुञ् स्तुतौ', `यु मिश्रणे', `द्रु गतौ'।
उपसमस्तार्थमेतदिति। केवलानां धातूनां क्विबन्तानां धातुस्वरेणैव सिद्धत्वात्। परिष्टुदिति। सम्पदादित्वात्क्विप्, तेन प्रादिसमासः, `पूर्वपदात्' इति षत्वम्। अव्ययपूर्वपदप्रकृतिस्वरे प्राप्तेऽन्तोदात्तत्वम्। सोपपदात्तु क्विपि कृत्स्वरेणैव चसिद्धम्।
अन्यत्र मध्योदात्त इति। स हि `वृतु वर्त्तने' इत्यस्मादिनिप्रत्ययेन व्युत्पाद्यते। `दृ विदारणे'।
साम्बतापौ भावगर्हायामिति। साम्बो भिक्षते, अम्बया सह भिक्षणं गर्हितम्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरस्यापवादः। तापो दस्यूनाम्। धार्मिकेषु दस्युकर्तृकस्तापो गर्हितः। `कर्षात्वतः' इत्येव सिद्धे भावगर्हाया अन्यात्राऽऽद्युदात्तार्थं वचनम्।
उत्तमशश्वत्तमाविति। तमबन्तावेतौ। द्रव्यप्रकर्षविवक्षायामामभावः, पित्त्वादनुदात्ते प्राप्ते पाठः। सर्वत्रेति। भावगर्हायाम्, अन्यत्र च। छन्दसि, भाषायां चेत्यन्ये। `भक्ष अदने' चुरादिः, `मन्थ विलोडने', `भुज कौटिल्ये', `दिह उपचये'। एरजण्यन्तानामिति। ये तु अनार्षमेतदचनमित्याहुः, तेषां भक्षशब्दस्य पाठे प्रयोजनं मृग्यम् ।।

अनुदात्तस्य च यत्रीदात्तलोपः ।। 6.1.161 ।।
कुमारशब्दोऽन्तोदात्त इति। फिषित्यनेन। अन्यत्रापि प्रातिपदिकस्यान्तोदात्तत्वमनेनैव द्रष्टव्यम्। पथिन्शब्दोऽन्तोदात्त इति। `पतेस्थ च' इतीन्प्रत्ययान्तत्वात्। कुमुदादयोऽन्तोदात्ता इति। कुमुदशब्दो मूलविभुजादित्वात्कप्रत्ययान्तः, नडशब्दोऽव्युत्पन्नः, `वि गत्यादिषु' अस्मादसच्, तुडागमश्च।
वेतसश्चित्स्वरेणान्तोदात्तः।
प्रासङ्ग्य इति। प्रासज्यत इति प्रासङ्गः, कर्मणि घञन्तः, `तद्वहति' इति `प्राग्धिताद्यत्' इति यत्। नैतदस्तीति। उदात्तो लुप्यत इति। यत्तस्य प्रतिषेधः। कथं नैतदस्ति ? इत्याह--स्वरिते हीति। `प्रागेव पदसंज्ञायाः स्वरविधिसमकालमेव शेषनिघातो भविष्यति' इत्युक्तं पुरस्तात्। तत् कुत उदात्तलोप इति। न कुतशिचिदित्यर्थः। तदेतदित्यादि। यस्मादेवमनुदात्तग्रहणस्य व्यावर्त्य न सम्भवति, तस्मादेतदनुदात्तग्रहणमादेरनुदात्तार्थम् ।
अथासत्यनुदात्तग्रहणे कस्य स्यात्? इत्यत आह--अन्त इति। मा हि धुक्षातामिति। दुहेर्माङि लुङात्मनेपदम्, आतामाथामौ, च्लेः क्सः। `अदुपदेशात्' इति लसार्वधातुकानुदात्तत्वम्, क्सः प्रत्ययस्वरेणान्तोदात्तः, `क्सस्याचि' इत्यकारलोपः। माङः प्रयोगोऽडागमनिवृत्त्यर्थः, अटि हि सति पदमाद्युदात्तं भवति, हिशब्दप्रयोगः `हि च' इति निघातप्रतिषेधार्थः। अत्रासत्यनुदात्तग्रहणे आतामाथामोर्द्वितीयस्याच उदात्तः स्यात्, अन्ताधिकारात्; सति त्वस्मिन्नादेर्भवति। इदं

दु वक्तव्यम्, `यत्रोदात्तलोपः' इत्युच्यमाने कथमन्त्यस्य प्रसङ्गः, न हि तदुदात्तलोपस्य निमित्तमिति ? उच्यते; आदेरपि तर्हि न प्राप्नोति, तस्यानुदात्तलोपं प्रत्यनिमित्तत्वात्, `क्सस्याचि' इत्यजादौ प्रत्यये विधानात्। तस्माद्यत्र प्रत्यय उदात्तलोपस्तत्सम्बन्धिनोऽनुदात्तस्योदात्तो भवतीति सूत्रार्थेऽन्ताधिकारादन्त्यस्य प्रसङ्ग। यदि तु निमित्तत्वानादरेण यत्रानुदात्ते परतः उदात्तलोपः, तस्योदात्तो भवतीति सूत्रार्थः, तदा नान्त्यस्य प्रसङ्गः।
भृगव इति। `अत्रिभृगुकुत्स' इत्यादिना बहुषु लुक्। तत्र बहुष्वित्यर्थग्रहणम्, न बहुवचनस्य। वैदीति। विदाद्यञन्तात् `शाङ्गर्रवाद्यञो ङीन्' ।।

चितः ।। 6.1.163 ।।
भङ्गुरमिति। `चजोः कु घिण्यतोः' इति कुत्वम्। कुण्डिना इति। कुण्कडशब्दान्मत्वर्थीय इनिः, स्त्रियां ङीप्, कुण्डिनीशब्दो मध्योदात्तः, कुण्डिन्या अपत्यानि बहूनि, गर्गादियञो बहुषु लुक्, परिशिष्टस्य कुण्डिनजादेशः।
चिति प्रत्यये इति। ननु च नात्र चितीति प्रत्ययग्रहणं कुण्कडिनजादेरपि ग्रहणात् ? तस्मादयमत्रार्थः---यत्र चित्प्रत्ययस्तत्र समुदायस्येष्यत इति। कथं पुनरेतल्लभयते? चित इत्यवयवादेषा षष्ठी, न कार्यिणः, चितोऽवयवस्य सम्बन्धी यः समुदायः स कार्या। अथ वा--चिदस्यास्तीति चितः, अर्शआदेराकृतिगणत्वादच् प्रत्ययः, षष्ठ्यर्थे प्रथमा, तेन चिद्वतः समुदायस्येत्यर्थः। अत्र च लिङ्गम्-अकः चित्करणम्, अन्यथा तस्यैकाच्त्वादनर्थकं तत्स्यात्। कुण्कडिनजादेर्व्यपदेशिवद्भावेन चिद्वत्त्वम् ।।

तद्धितस्य ।। 6.1.164 ।।
कौञ्जायना इति। कुञ्जस्यापत्यानि बहुनि, `गोत्रे कुञ्जादिभ्यश्च्फञ्', `व्रातच्फञोरस्त्रियाम्' इति ञ्यः, `ञ्कयादयस्तद्राजाः', `तद्राजस्यबहुष्' लुक्। किमर्थमिति। पूर्वेण सिद्धमिति प्रश्नः। परमपीति। चकारः `व्रातच्फञोरस्त्रियाम्' इत्यत्र विशेषणेन चरितार्थः। ञकारोऽपि वृद्ध्यर्थः, तत्रासत्यस्मिन्परत्वाद् ञित्स्वरः ।।

तिसृभ्यो जसः ।। 6.1.166 ।।
अर्थगतं बहुत्वं शब्दे आरोप्य बहुवचननिर्द्देशः। तिस्न इति। अन्तोदात्तस्य त्रिशब्दस्य स्थाने तिसृशब्द आदेशः स्थानिवपद्भावादन्तोदात्तः। `अनुदात्तौ सुप्पितौ' इति जसनुदात्तः, तत्राऽचि परतः `अचि र ऋतः'। `जसः' इति किमर्थम् ? तिसृका, स्वार्थे क प्रत्ययः, `तिसृभावे संज्ञायां कनि' इति तिस्रादेशः ? नित्स्रोऽत्र बाधको भविष्यति। नाप्राप्ते स्वरान्तरे तिसृस्वर आरभ्यते, स यथैव `सुप्पितावनुदात्तौ' इत्येतं बाधते एवं नित्स्वरमपि बाधेत ? नैष दोषः; येन नाप्राप्ते इत्येतस्य बाधनं भविष्यति, न वाप्राप्ते `अनुदात्तौ सुप्पितौ' इत्येतस्मिन् तिसृस्वर आरभ्यते, तिसृकेत्यत्रापि हि टापा सहैकादेशस्य स्थानिवद्भात्पित्स्वरः प्राप्नोति। अथ वा `मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते' इति तिसृस्वरः `अनुदात्तौ सुप्पितौ' इत्येतमेव बाधिष्यते, न नित्स्वरम्; बहुवचनविषयत्वाद् द्विवचनैकवचने न स्तः। शसि तु भवितव्यम् `उदात्तयणो हल्पूर्वात्' इति। अन्याः सर्वा हलादयो विभक्तयस्तत्र `षट्त्रिचतुर्भ्यो हलादिः' `झल्युपोत्तमम्' इत्यनेन स्वरेण भवितव्यम्, तत्रान्तरेणापि जस्ग्रहणं जस एव भविष्यति ? अत आह-जस्ग्रहणमुपसमस्तार्थमिति। समासेऽपि तिसृशब्दात्परो जस् भविष्यति।
अतितिस्राविति। अत्र `अतेरकृत्पदे' इत्यत्र `अतेर्धातुलोप इति वक्तव्यम्' इति वचनात्प्राप्तमन्तोदात्तत्वं बाधित्वा विभक्तेरुदात्तत्वं स्यात्। जस्ग्रहणात्तु `उदात्तस्वरितयोर्यणः' इति स्वरितो भवति। अतितिस्र इत्यत्र त्वनेन जस उदात्तत्वं भवत्येव ।।

चतुरः शसि ।। 6.1.167 ।।
अनुकरणत्वेनार्थपरत्वाभावादेकवचनम्। इह चतस्रः पश्यइत्यत्र चतस्रादेशे कृते स्थानिवद्भावादयं स्वरः प्राप्नोति? तत्राह--चतस्रादेश इति। स्थानिवद्भावादेवाद्युदात्तत्वे सिद्धे पुनराद्युदात्तत्वनिपातनमस्य स्वरस्य बाधनार्थमिति। भावः। यथैव तर्हि निपातनस्वरः शस्स्वरंक बाधते, एवम् `षट्त्रिचतुर्भ्यो हलादिः' इत्येतमपि विभक्तिस्वरं बाधेत--चतसृणामिति? ज्ञापकात्सिद्धम्, यदयम् `षट्त्रिचतुर्भ्यो हलादिः' इति हलादिग्रहणं करोति, तज्ज्ञापयति--`न निपातनस्वरो विभक्तिस्वरं बाधते' इति। तद्धि तत्र न कर्तव्यम्, कथम् ? सर्वेषामपि बहुवचनविषयत्वाद् द्विवचनैकवचने न सम्भवतः। न चोपसमस्ते सम्भवः; विहितविसेषणाश्रयणात्। तत्र षड्भ्यस्तावत् जश्शसोर्लुका भवितव्यम्। अन्याः सर्वा हलादयो विभक्त्यः। स्त्रीशब्देऽपि जसि न भवितयम्; असर्वनामस्थानमित्यधिकारात्, शसि भवितव्यम् `एकादेश उदात्तेनोदात्तः' इति, अन्या हलादयः। तिसृशब्देऽपि जसि `तिसृभ्यो जसः' इति भवितव्यम्, शस्यपि `उदात्तयणो हलपूर्वात्' इति, अन्या हलादयः। चतुर्-शब्देऽपि जस्यसर्वनामस्थान इति निषेधः, शसि `चतुरः शशि' इत्ययमेव भवति, अन्यास्तु हलादयः। तदेतद्धलादिग्रहणं चतस्रः पश्येत्यत्र मा भूदित्येतदर्थमेव कृतम्। यदि च निपातनस्वरेण विभक्तिस्वरो बाध्येत हलादिग्रहणमनर्थकं स्यात्। चतस्रः पश्येत्यत्र निपातनस्वरेणैव बाधितत्वाद् विभक्तिस्वरस्याप्रसङ्गात् किं तन्निवृत्त्यर्थेन हलादिग्रहणेन! तत्क्रियमाणम्--विभक्तिस्वरस्य बलीयस्त्वं ज्ञापयतीति चतसृणामित्यत्र विभक्तिस्वरः सिद्धः। यणादेशस्य चेति। `अचि र ऋतः' इति रादेशस्यास्मात्स्वरात्पूर्वं परत्वात्कृतस्य। एतदुक्तं भवति--परत्वादादेशे कृते ऋकारस्य तावन्न भवति, तशब्दाकारस्यापि न भवति; रादेशस्य स्थानिवद्भावादिति। न च स्वरविधौ स्थानिवत्त्वनिषेधः, `स्वरदीर्घयलोपेषु लोपजादेश एव न स्थानिवत्' इति वचनात् ।।

सावेकाचस्तृतीयादिर्विभक्तिः ।। 6.1.168 ।।

सावीति सप्तमीबहुवचनस्य सुशब्दस्य गुहणमिति। न प्रथमैकवचनस्य; व्याख्यानात्। प्रयोजनं तूत्तरत्र वक्ष्यति। पातेति। पातेर्लटः शत्रादेशः। राज्ञेति। `सौ' इत्येत्स्मिन्नसत्येकाचः परा तृतीयादिविभक्तिरुदात्ता भवतीत्यर्थो भवति, भवति चायमल्लोपे कृते एकाच्। ननु च विहितविशेषणं विज्ञास्यते-एकाचो या विहिता तृतीयादिरिति ? न; प्रमाणाभावात्। सप्तमीबहुवचनस्य ग्रहणादिति। प्रथमैकवचने तु `त्वाहौ सौ' इति त्वादेशे कृते युष्मच्छब्द एकाच् भवति, शेषे लोपे कृतेऽकारान्तत्वात् `सावर्ण' इति प्रतिषेधो भविष्यति। तदिह प्रथमैकवचनाग्रहणे को हेतुरिति चिन्त्यम् ।।

अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ।। 6.1.169 ।।

नित्यशब्दः स्वर्यते इति। स्वरितत्वमस्य क्रियत इत्यर्थः। तत्र स्वरितो गुणः क्रियारूपेण निर्दिष्टः, स्वरितत्वे सति किं भवति? इत्याह--तेनेति। `स्वरितेनाधिकारः' इत्यत्रायमप्यर्थो व्याख्यातः--स्वरितेन लिङ्गेन यदत्राधिकारः स प्रत्येतव्य इति, ततो नित्याधिकारविहितः समासोऽत्र प्रतिषिध्यते। अवाचेति। नञ्समासः। तत्पुरुषोऽयमिति। न बहुव्रीहिः। तेन `नञ्सुभ्याम्' इत्यन्तोदात्तत्वं न भवति, अव्ययपूर्वपदप्रकृतिस्वर एव भवतीति भावः। प्रायेण तु सुवाचा, सुत्वचा इति पाठः। तत्र प्रत्युदाहरणादिगियं दर्शितेति व्याख्येयम्, न पुनरत्र प्रसङ्गः; प्रादिसमासस्य नित्यसमासत्वात्।
अथोत्तरपदग्रहणं किमर्थम्, यावता `अनित्यसमासे' इत्याधारसप्तमी विज्ञास्यते---अनित्यसमासस्थान्तोदत्तादेकाचः परा तृतीयादिर्विभक्तिरिति, चच्चोत्तरपदमेव? तत्राह--उत्तरपदग्रहणमिति। अयं भावः--सत्सप्तमी विज्ञायेत, ततश्व समासस्याश्रयत्वात्तस्यैवेकात्त्वमन्तोदात्त्वं च विशेषणं स्यादिति।
अग्निचिता, सोमसुतेति। `अग्नौ चेः', `सोमे सुञः' इति क्विप्।
`नित्यशब्दः स्वर्थते' इति यदुक्तम्, तस्य प्रयोजनमाह--यस्त्विति ।।

अञ्चेश्छन्दस्यासर्वनामस्थानम् ।। 6.1.170 ।।

दधीच इति। दध्यञ्चतीति `ऋत्विक्' इत्यादिना क्विन्, अनुनासिकलोपः, `अचः' इत्यकारलोपः, `चौ' इति दीर्घत्वम्।
शसोऽपि परिग्रहर्थमिति। शसादिग्रहणं तु न कृतम्, नपुंसके शसि मा भूत्, सुटि च यथा स्यादिति ।।

ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः ।। 6.1.171 ।।

प्रष्ठौह इति। `छन्दसि सहः', `वहश्च' इति ण्विः। वाह ऊठि `एत्येधत्यूठसु' इति वृद्धिः।
ऊठ्युपधाग्रहणमिति। उपधाभूत ऊठ् गृह्यते, न त्वन्त्य इत्यर्थः। पञ्चमीनिर्द्देशादन्त्यस्यैव ग्रहणे प्राप्ते वचनम्।
अन्तोदात्तादित्यधिकारादन्वादेशे न भवतीति। अत एव हेतोः `सावेकाचः' इत्यनेनापि न भवति। यदि स्यात्, इहान्तोदात्ताधिकारो व्यर्थः स्यात्। ननु च यदीमे नानुशसो अभ्यवर्षादिति शसोऽन्वादेशेन मा भूदिति प्रयोजनम्, `एकाचः' इत्यधिकारादेव सिद्धम्, तथा च तदस्मै तथ्य तदस्य प्रियं प्रेणा तदेषामित्यादि सर्वानुदात्तं पदमधीयते।
पदादयो निश्पर्यन्ता गृह्यन्त इति। `पदन्नोमास्' इति सूत्रे निर्दिष्टाः, तत्र एकाच इत्यनुवृत्तेनिशः परे न गृह्यन्ते। यदा त्वल्लोपे कृते एकाचो भवन्ति, तदोदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं सिद्धम्। येऽप्याद्युदात्तानां स्थाने विधीयन्ते आदेशास्ते तत्रैवान्तोदात्ता निपात्यन्ते। वृत्तावप्येतदेवोक्तं द्रष्टव्यम्। आसनीति। आस्यशब्दस्यासनादेशः। यत्रैकाचस्तेषां शसर्थं ग्रहणम् ।।

अष्टनो दीर्घात् ।। 6.1.172 ।।

घृतादिपाठादन्तोदात्त इति। तेनोत्तरार्थमनुवर्तमानस्य `अन्तोदात्तात्' इत्यस्य नेहापि विरोध इति भावः। अष्टस्विति।
ननु चात्र दीर्घग्रहणमनर्थकम्, यावता `अष्टन आ विभक्तौ इत्यनेन भवितव्यम्, तद्विधौ विकल्पस्याभावात् ? इत्यत आह--इदमेवेति। नित्ये ह्यात्वे व्यावर्त्याभावादिह दीर्घग्रहणमनर्थकं स्यात्। कृतात्वस्य च षट्संज्ञामिति। इदमेव दीर्घग्रहममष्टनो ज्ञापयतीति सम्बन्धः। कथमेतत् ? इत्यत आह--अन्यथा हीति। आत्वाभावपक्षेऽयं स्वरो मा बूदित्येतदर्थं हि दीर्घग्रहणम्। यदि च कृतात्वस्याष्टनः षट्संज्ञा न स्यात्, तदाऽऽत्वपक्षे सावकाशमिममष्टनः स्वरमनात्वपक्षे षट्संज्ञायां सत्याम् `झल्युपोत्तमम्' इति षट्स्वरः परत्वाद्बाधिष्यते--इत्यनर्थकं दीर्घग्रहणं स्यात्। यदा तु कृतात्वस्याष्टनः षट्संज्ञा भवति, तदा नाप्राप्ते षट्स्वरे आरभ्यमाणोऽष्टनः स्वरोऽनात्वपक्षेऽपि स्यादिति तन्निवृत्तये क्रियमाणमर्थवद्भवति। कथं पुनरेकेन यत्नेनोभयं शक्यं ज्ञ्ञपयितुम् ? को दोषः ! अन्यथानुपपत्त्या ह्यनेकोऽप्यर्थो ज्ञाप्यते, तेनैतदुभयमन्तरेणानुपपद्यमानमुभयमपि ज्ञापयति।

शतुरनुमो नद्यजादी ।। 6.1.173 ।।

तुदती, नुदतीति। तुदादित्वाच्छः, `आच्छीनद्योर्नुम्' विकल्पितः। तत्र नुमभावपक्षे उदाहरणम्, नुम्पक्षे प्रत्युदाहरणम्।
तुदन्तीति। `श्नाभ्यस्तयोरात' इत्याकारलोपः। अत्र प्रत्ययस्वरेण शत्रन्तमन्तोदात्तम्। तत्रेत्यादिना प्रत्युदाहरणस्य द्व्यङ्गविकलतां परिहरति--तत्र

पूर्वत्रासिद्धमिति नेष्यति इति। अत्र च ज्ञापकमयमेवानुम इति प्रतिषेधः, न हि किञ्चिदेकादेशस्वरमन्तरेण शत्रन्तं सनुम्कमन्तोदात्तमिस्ति।
बुहन्महतोरुपसंख्यानमिति। शतृवद्भावादेव सिद्धे नियमार्थमिदम्--पृष्टदादीनां मा भूदिति। `गौरादिषु बृहन्महतोः पाठोऽनर्थकः' इति स्त्रीप्रकरण एवोक्तम् ।।

उदात्तयणो कहल्पूर्वात् ।। `उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति प्राप्ते वचनम्। वहुतितवा ब्राह्मण्येति। स्त्रीलिङ्गोपादानं नाभावनिवत्त्यर्थम्। `तनोतेर्डउः सन्वच्च' इति, `चालनी तितउः पुमान्', ततो बहुव्रीहिः, `बहोर्नञ्वदुत्तरपदभूम्नि' इत्युत्तरपदान्तोदात्तः, तत्र `उदात्तस्वरितयोः' इति विभक्तेः स्वरितत्वम् ।
नकारग्रहणं च कर्त्तव्यमिति। उदात्तस्थाने यो नकारस्ततोऽपि परस्या नद्या उदात्तत्वं वक्तव्यमित्यर्थः। तदर्थं केचिद् `उदात्तहलो हल्पूर्वात्' इति पठनीयमिति मन्यन्ते। वाक्पत्नीति। तत्पुरुषः। `पत्यावैश्वर्य्ये' इति पूर्वपदप्रकृतिस्वरस्य `न भूवाक्चिद्दिधिषु' इति प्रतिषेधात्समासान्तोदात्तत्वे `विभाषा सपूर्वस्य' इति नकारः ।।

नोङ्धात्वोः ।। 6.1.175 ।।
ऊङो धातोश्च य उदात्तयण् हल्पूर्व इति। अनेन पूर्वस्याः प्राप्तेरयं प्रतिषेध इति दर्शयति। तस्मात्परा तृतीयादिर्विभक्तिरिति। यद्यपि पूर्वसूत्रे `नद्यजादी' इत्यनुवर्त्तते न `तृतीयादिः' इति, तथाप्यत्र बाहुल्येन तृतीयादेरेव सम्भवादिधमुक्तम्। तथा हि--ऊङ्धातुयणः परा नदी तावन्न सम्भवति, नाप्यूङ्यणः शस् सम्भवति, धातुयणस्तु सम्भवति ।।

ह्रस्वनुड्भ्याम्मतुप् ।। 6.1.176 ।।
अक्षण्वतेति। `छन्दस्यपि दृश्यते' इत्यनङ्, `अनो नुट्' इति नुडागमः, पूर्वस्य नकारस्य लोपः। शीर्षत्वतेति। `शीर्षञ्छन्दसि' इति निपातितः। वसुशब्द्र आद्युदात्त इति। वसेरुप्रत्ययः, `धान्ये नित्' इत्यधिकारे। अथेहकस्मान्न भवति--मरुतोऽस्य सन्ति मरुत्वानिति ? मरुच्छब्दो हि `मृग्रोरुतिः' इति उतिप्रत्ययान्तत्वात्प्रत्ययस्वरेणान्तोदात्तः। न च तकारेण व्यवधानम्, स्वरविधौ व्यञ्जनस्याविद्यमानत्वात् ? इत्यत आह--अत्रेति। कथं पुनर्ज्ञायते नाक्षी यते इति ? नुड्ग्रहणात्। तद्ध्यक्षण्वतेत्यादौ यथा स्यादित्येवमर्थम्, अन्यथा नकारस्य लुप्तस्यापि स्वरविधावसिद्धेर्नकारेण व्यवधानान्न स्यादिति। यदि चात्र व्यञ्जनमविद्यमानवत्स्यात्, ततोऽसिद्धलोपस्यापि तस्यावविद्यमानत्वादेव स्वरः सिद्ध इति नुड्ग्रहणमनर्थकं स्यात् ? नैतद्युक्तमुच्यते; यदि हि नकारलोपस्यासिद्धत्वेऽपि नकारोऽविद्यमानवत्स्यात्, स्वरविधौ नकारलोपस्यासिद्धवद्वचनमनर्थकं स्यात्। तस्मान्नलोपविषयेऽविद्यमानवद्भावो न प्रवर्त्तत इति कर्त्तव्यमेव नुड्ग्रहणम्। एवं तर्हीष्टिरेवेयम्--`अत्र स्वरेऽविद्यमानवत्परिभाषा न प्रवर्त्तते' इति।
रेशब्दाच्चेति पाठः। आरेवानिति। रयि अस्यास्तीति मतुपि `रयेर्मतौ बहुलम्' इति सम्प्रसारणम्, पूर्वत्वम्, आद्ग्रणः, ततो ह्रस्वाभावाद्वचनम्।
त्रिवतीरिति। `छन्दसीरः' इति वत्वम्, `वा छन्दसि' इति पूर्वसवर्णदीर्घः ।।

नामन्यतरस्याम् ।। 6.1.177 ।।
मतुबिति चेति। चच्चार्थात्सप्तम्यन्तं सम्पद्यते।
अन्यथा हि साम्प्रतिक एव स्यादिति। साम्प्रतिकाभावे हि भूतपूर्वगतिर्भवति, न तु तस्मिन्सत्यपि; ततस्तिसृणाम्, चतसृणामित्यत्र `न तिसृचतसृ' इति दीर्घप्रतिषेधात्साम्प्रतिक एव ह्रस्वो विद्यते इति तत्रेव स्यात्; अग्नीनाम्, वायूनामित्यादौ परत्वान्नित्यत्वाच्च दीर्घत्वे कृते ह्रस्वाभावान्न स्यात्, तस्मान्मतुपा ह्लस्वो विशेष्यते। यद्येवम्, `मतौ बह्वचोऽनजिरादीनाम्', `शरादीनां च' इति येषां मतौ दीर्घत्वमुच्यते तेषां न स्यात् ? नैष दोषः; संज्ञायामिति वर्त्तते, ततश्चातुरर्थिक एव मतौ दीर्घत्वम्, न तु `तदस्यास्यास्मिन्' इत्यत्र; तत्र मतौ ह्रस्वान्तत्वादभविष्यति। ेवमपि तिसृणाम्, चतसृणामित्यत्र न स्यात्, तिसृचतसृभावस्यैव तत्राभावात् ? इष्टमेवैतत्संगृहीतम्। अत्र हि `षष्टत्रिचतुर्भ्यो हलादिः' इति नित्यमेव विभक्तेरुदात्तत्वमिष्यते। धेन्वाम्, शकट्यामिति। `धेट इच्च' इति नुप्रत्ययान्तो धेनुशब्दोऽन्तोदात्तः, `शकटिशकट्योरक्षरमक्षरं पर्यायेण' इति शकटीशब्दोऽपि पक्षेऽन्तोदात्तः। त्रपुशब्दो वसुशब्दश्चाद्युदात्तः ।।

षट्त्रिचतुर्भ्यो हलादिः ।। 6.1.179 ।।
अन्तोदात्तादिति निवृत्तमिति। यद्येतदनुवर्त्तेत पञ्चानाम्, नवानाम्, चतुर्मामित्यत्र न स्यात्; `न्रः संख्याया' इत्याद्युदात्तत्वात्, क्व तर्हि स्यात् ? सप्तानाम्, अष्टानाम्। सप्ताष्टशब्दौ घृतादित्वादन्तोदात्तौ। `न्रः' इति रेफनकारान्ताया इत्यर्थः।
चतस्रः पश्येति। यथैतदिह हलादिग्रहणस्य व्यावर्त्त्यं तथा `चतुरः शसि' इत्यत्रावोचाम ।।

झल्युपोत्तमम् ।। 6.1.180 ।।

झलादौ विभक्तौ परतः षट्त्रिचतुर्णां त्रिप्रभृत्यक्षराभावात् झलादिविभक्तयन्तस्य पदस्य ग्रहणम्, यदाह--विभक्त्यन्ते पदे उपोत्तममुदात्तम्भवतीति ।।

न गोस्वन्सावववर्णराडङ्क्रुड्कृद्भ्यः ।। `सौ' इति यदि सप्तमीबहुचनस्य ग्रहणं स्यात्, तेभ्यः, केभ्य इत्यत्र न स्यात्, तत्किंशब्दयोः सप्तमीबहुवचने परतस्त्यदाद्यत्वे कृते `बहुवचने झल्येत्' इत्येत्वविधानात्; ताभिर्याभिरित्यादावेव स्यात्, तासुयास्वित्यत्रावर्णान्तत्वात्। तस्मात्प्रथमैकवचनस्य ग्रहणामित्याह--सौ प्रथमैकवचन इति। अनन्तरस्य प्रतिषेध्यस्यासम्भवात्सर्वस्यैव षाष्ठिकस्वरस्य प्रतिषेधो विज्ञायते इत्याह-इत्येभ्यो यदुक्तं तन्न भवतीति। एवं च वृक्षवानित्यादौ `ह्रस्वनुड्भ्यां मतुप्' इत्यपि प्रतिषेधो भवति, उदात्तनिवृत्तिस्वरस्य प्रतिषेधो नेष्यते। सुगुनेति । बहुव्रीहौ `गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वः, `नञ्सुभ्याम्' इत्यन्तोदात्तत्वम् ।
शुनेति। ननु च नलोपे कृते सावर्णान्तमेतत् ? न ; स्वरविधौ नलोपस्यासिद्धत्वात्। न चायं स्वरविधिः, स्वरप्रतिषेधोऽयम् ? एवं तर्हि शुनः प्रतिषेधं कुर्वन्नेतज्ज्ञापयति--अस्मिन्प्रतिषेदे नलोपोऽसिद्धो भवतीति। तेन नृशब्दात्सप्तम्येकवचने नरीत्यत्र `सावेकाचः' इति विभक्तेरुदात्तत्वं भवति, पितृमानित्यादौ `ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वं भवति, अन्यथा `साववर्ण' इति प्रतिषेधः स्यात्।
प्राचेति। पूर्ववन्नलोपदीर्घादि। क्रुञ्चेति। `कुञ्च क्रुञ्च कौटिल्याल्पीभावयोः', `ऋत्विक्' इत्यादिना क्विन्, तत्रैव सूत्रे क्रुञ्चेति निपातनान्नलोपाभावः। कृतिर्वेति। `कृती छेदने' ।।

दिवो झल् ।। 6.1.183 ।।
झलादिरिति। कथं पुनरसति सप्तमीनिर्देशे तदादिविधिर्भवति; केवलझलात्मिकाया विभक्तेरभावात्, अस्तु तर्हि तदन्तविधिः, का पुनर्झलन्ता विभक्ति, शसादिः सकारान्ता ? एवं तर्हि `षट्त्रिचतुर्भ्या हलादिः' इत्यत आदिग्रहणमनुवर्तते, दिवः परा विभक्तिर्नोदात्ता भवति, कीदृशी ? यस्या झलादिरिति।
अयं योगः शक्योऽवक्तुम्। कथम् ? एवं वक्ष्यामि---`अष्टनो दीर्घात्, दिवोझलादिः, शतरनुमो नदी च' इति, `ऊडिदम्' इत्यादौ च दिवो ग्रहणं न करिष्यमि ? एवमपि `नृ चान्यतरस्याम्' इत्युत्तरसूत्रे तत्र झल्ग्रहणं कर्तव्यम्, `नदि च' इति चकारश्च क्रियत इति नास्ति लाघवे विशेषः ।।

तित्स्वरितम् ।। 6.1.185 ।।
इह कस्मान्न भवति `ऋत इद्धातोः' आस्तीर्णम्, विस्तीर्णम्, तत्कालग्रहणार्थतया चरितार्थत्वादिति चेत् ? न; अनेकप्रयोजनदर्शनादनुबन्धानाम्। तद्यथा आक्षिक इत्यादौ ठकि सति स्वरो वृद्धिश्च भवति। एवं नर्हि नायमिकारस्तपरः, किं तर्हि? दपरः। यद्येवम्, ऋकारस्य स्थाने आन्तर्य्यतो दीर्घः प्राप्नोति ? `भाव्यमानोऽण् सवर्णान्न गृह्याति' । इच्चेवम्, `अदसोऽसेर्दादु दो मः' इमूभ्याम् दीर्घस्य स्थाने दीर्घो न स्यात् ? नैष दोषः ज्ञापितमेतत् `दिव उत्' `ऋत उत्' इति तपरकरणेन--भाव्यमानोऽप्युकारः सवर्णान् गृह्णातीति। तयोरेव तर्ह्युकारयोः स्वरितत्वप्रसङ्गः ? तावपि तहि न तपरौ, किं तर्हि ? दपरौ। कथं तर्हिं ज्ञापकम्? `तपरस्तत्कालस्य' इत्यत्र दकारोऽपि चर्त्वभूतोनिर्दिश्यते, `अणुदित्सवर्णस्य चाप्रत्ययस्तपरस्तत्कालस्य' इति, यदि दकारोऽपि निर्दिश्यते `ऋदोरप्' इत्यत्रापि दद्ग्रहणादिहैव, स्याद्यवः, स्तवः; लवः, पव इत्यत्र न स्यात्; `तादपि परस्तपरः' इति तादपि परस्य तपरत्वात्। एवं तर्हि ऋदोरप्' इत्यत्र धकारो जश्त्वभूत उच्चारणार्थो निर्दिश्यते, तत्र जश्त्वस्यासिद्धत्वान्नायमृकारो दपरः। ये तु `प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्' इति परिभाषां पठन्ति, तेषाम् `ऋत इद्धातोः' इत्यादौ सत्यपि तित्त्वेनास्य स्वरस्य प्रसङ्गः। `तपरस्तत्कालस्य' इत्यत्र दकारोऽपि न प्रश्लेष्टव्यः।
तस्यास्तु परिभाषाया भाष्यवार्त्तिकयोहिर।
अदर्शनादयं यत्नो महानस्माभिरादृतः ।।
तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ।। तास्यादीनां समाहारद्वन्द्वः। अदुपदेशादिति। उपदिश्यत इत्युपदेशः, तस्याकारेण विशेषणात्तदन्तविधिः, अच्चासावुपदेशश्चादुपदेशः, उपदिश्यमानदशायां यदवर्णान्तं तस्मारित्यर्थः। अकारोपदेशादिति। अकारान्तादुपदेशादित्यर्थः। कर्त्तेत्यादि। लुङात्मनेपदे प्रथमपुरुषस्य डारौरसः, तासिः। एकवचने टिलोपः, इतरत्र `रि च' इति सलोपः।
आस्ते इत्यादावदादित्वाच्छपो लुक्।
तुदत इत्यादीनि तसन्तानि। कथं पुनः शबुपदेशेऽदन्तो भविष्यति, यावता पकारान्तोऽयं तत्र? इत्यत आह---अनुबन्धस्यानेकान्तत्वादकारान्तोपदेश एवेति। `उदीचामाङः'इति कृतात्वनिर्द्देशाज्ज्ञापकादनुमीयते---कार्येष्वनुबन्धाः श्रूयमाणा अपि न प्रतिबन्धका इति। पचमानो यजमान इति। लटः शानच्। नन्वत्र मुका व्यवधानम् ? अत आह--यद्यत्रेति। स्यादिति। सम्भावने लिङ्। अङ्गस्य योऽकारस्तस्य मुगित्याश्रयणादस्य पक्षस्य सम्भवः। तदा लसार्वधातुकमदुपदेशादनन्तरमिति। प्रवर्त्तते निघातः। `आतो ङितः' इतीयादेशस्तु न भवति; कअत इत्यत्र तपरकरणात्। अनन्तरयोगे पञ्चमी मृग्या, परमिति वाऽध्याहारः। अथाकारान्तस्याङ्गस्येति। अकारेणाङ्गस्य विशेषणादिति भावः। लसार्वधातुकस्येति। `सिद्धम्' इति वक्ष्यमाणेन सबन्धः, निघात इति चानुषङ्गः, तथा च लसार्वधातुकस्य निघातः सिद्ध इत्यर्थः। असिद्ध इति। प्रकृतत्वान्मुगिति गम्यते। बहिरङ्गत्वादिति। बहिरङ्गत्वं तु मुको बह्वपेक्षत्वात्। स हि अकारान्तविशिष्टमङ्गमाश्रयति आनञ्च प्रत्ययविशेषम्। अयं तु स्वरोऽदुपदेशणात्रं लसार्वधातुकमात्रं चापेक्षत इत्यन्तरङ्गः। चित्स्वरोऽपीत्यादि। चित्स्वरस्यावकाशः--चलनः, `चलनशब्दार्थादकर्मकाद्युच्' अस्यावकाशः--आस्ते, शेते इति; पवमान इत्यादौ परत्वादयं

निघातश्चित्स्वरं बाधते। ननु चैकस्य द्विकार्ययोगे विप्रतिषेधः, न चात्रैको द्विकार्ययुक्तः, कथम्? आदेरनुदात्तत्वमन्त्यस्य चित्स्वर नात्रादेरनुदात्तत्वम्, किं तर्हि ? सङ्घातः कार्यी। अत्र ज्ञापकमुत्तरत्र वक्ष्यामः। ततश्चानस्य सर्वानुदात्तत्वेन भवितव्यम्, न त्वादेरित्यस्त्येव विरोध इति परत्वलादयं बाधते इति युक्तमेव। चिनुतः, चिन्वन्तीति। ननु च `सार्वधातुकमपित्' इति श्नुरपि ङिदेव तत्कथमिदं प्रत्युदाहरणम् ? अत आह--ङिदयं श्नुः पूर्वस्य कार्यं प्रतीति। तत्र हि ङिति यत्कार्यं तदतिदिश्यते, यदाह--सिद्धं तु पूर्वस्य कार्यातिदेशादिति। नायं स्थितः सिद्धान्तः, `आतो ङितः' इत्यत्र वक्ष्यति--```सार्व्धातुकमपित्' इत्यत्र ङित इव ङिद्वदित्यङ्गीक्रियते'' इत्यादि। अत्र तु पक्षे परिहारः--उपदेशग्रहणमुभाभ्यामपि सम्भध्यते--ङिदुपदेशात्, अदुपदेशादिति। पचावः, पचाम इति। असत्युपदेशग्रहणे परत्वान्नित्यत्वाच्च दीर्घे कृते तपरकरणान्न स्यात्। ननु च तपरकरणं न करिष्यते ? यदितु न क्रियते--यातः, वात इत्यत्रापि प्राप्नोति। हतः, हथ इति। अत्र `अनुदात्तोपदेश' इत्यादिनानुनासिकलोपे कृते सत्यकारात्परं लसार्वधातुकं भवति, तथाप्युपदेशग्रहणान्न भवति। न हि हन्तिरदन्त उपदिश्यते। अथ योऽत्रादन्तो हशब्दस्तदाश्रयमनुदात्तत्वं कस्मान्न भवति? तावतोऽनुपदेशात्, समुदायपरो हि हन्त्युपदेशः। कतीह पचमाना इति। `पूङ्यजोः शाननु', तत्र च `लटः' इति निवृत्तत्वान्न लादेशोऽयम्। शिश्य इति। `एरनेकाचः' इति यणादेशः, `लिट् च' इत्यार्द्धधातुकमेतत्। यदधीत इति। यच्छब्दप्रयोगः `निपातैर्यद्यदि' इति निघातप्रतिषेधार्थः।

आदिः सिचोऽन्यतरस्याम् ।। 6.1.187 ।।
मा हि कार्ष्टामिति। हेः, माङ्श्च प्रयोगे पूर्वमेव प्रयोजनमुक्तम्। अपरो मध्योदात्त इति। ननु न वलादिरिह प्रत्ययः, इडागमः, आगमाश्चानुदात्ता भवन्ति, तस्मादिहाप्यन्तोदात्तत्वेन भवितव्यम् ? अत आह--सिचश्चित्करणादिति।
अनिटः पित इति। अनिटः सिचः परः पित्पक्षे उदात्तो भवति, पक्षे त्वनुदात्तः, तेन मा हि कार्षमिति तिङन्तं पक्षे आद्युदात्तम्, पक्षे त्वन्तोदात्तम्; अन्यथा धातुस्वरेण नित्यमाद्युदात्तं स्यात्। मध्योदात्त एवेति। सिचः स्वरेण, एवकारेण न त्वन्तोदात्त इति दर्शयति ।।

स्वपादिहिंसामच्यनिटि ।। 6.1.188 ।।
स्वपादिरा वृत्कारणादिति। आ गणान्तादित्यर्थः। तत्र `ञिष्वप् शये', `श्वस प्राणने', `अन च' इत्येतेब्यः परे जक्षित्यादयोऽभ्यस्तसंज्ञकाः, तेषु परत्वातद् `अभ्यस्तानामादिः' इति स्वरो भवति, ये तु ततः परे `षस् स्वप्ने' , वश कान्तौ', `ह्नूङ् अपनयने', चर्करीतमिति; तत्र चर्करीतीतमभ्यस्तम्। अन्ये तु `षसिवसी छान्दसौ', छन्दसि च दृष्टानुविधानम्। ह्नुङोऽप्ययं स्वरो न भवति `अहन्विङोः' इत्यनुवृत्तेः। पारीशेष्यादादितस्त्रिवेवायं स्वरः। हिसन्तीति। `हिसि हिंसायाम्' रुधादिः, `श्नान्नलोपः', `श्नसोरल्लोपः'।

अभ्यस्तानामादिः ।। 6.1.189 ।।
आदिरिति वर्त्तमान इति। `आदिः सिचोऽन्यचरस्याम्' इत्यतः। पुनरादिग्रहणं नित्यार्थमिति। अन्यथा आदिग्रहणसम्बद्धमन्यतरस्यांग्रहणमनुवर्तेत ।

अनुदात्ते च ।। 6.1.190 ।।
अनजाद्यर्थेमिदम्। जिहीते, मिमीत इति। `ई हल्यघोः', ङित्त्वाल्लसार्वधातुकानुदात्तत्वम्। `अविद्यमानोदात्ते' इति वदता `अनुदात्त इति बहुव्रीहिनिर्देशोऽयम्' इत्युक्तम्। तत्र प्रयोजनमाह--अनुदात्त इति। बहुव्रीहिनिर्देश इत्यादि। न विद्यते उदात्तो यस्मिन्नित्यनुदात्तः। मा हि स्म् दधादिति। शास्त्रीयेऽनुदात्ते गृह्यमाणे नित्यत्वादन्तरङ्गत्वाद्वा इकारलोपे कृतेऽचोऽनुदात्तस्य परस्याभावादाद्युदात्तत्वं न स्यात्, बहुव्रीहौ विज्ञाते तु भवति। दधात्यत्रेति। अत्र यणादेशस्य बहिरङ्गत्वेनासिद्धत्वादपि स्वरः सिद्धः ।।

सर्वस्य सुपि ।। 6.1.191 ।।
सर्वशब्द उणादिषु अन्तोदात्तो निपातितः, सर्वस्य विकारः सार्व इत्यनुदात्तादिलक्षणोऽञ् यथा स्यादिति।
प्रत्ययलक्षणेनापीत्यादि। `न लुमताङ्गस्य' इत्यत्रैतदुपपादितम्। सर्वस्वरोऽनकच्कस्येति।

भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ।। आद्युदात्तस्यापवादोऽयम्। जागरामिति सौत्रौ निर्देशः। अत्र मदिर्दिवादिः, दरिद्राजाग्रावदादी, अन्ये जुहोत्यादयः। पञ्चमे लकार इति। लस्येत्वत्र दर्शितक्रमे पञ्चमकलकारो लेट्। लेट्शब्दस्तु वृत्तिकारदेशे जुगुप्सितः, यथाऽत्र द्रविहदेशे नीवीशब्दः। दधनदिति। `इतश्च लोपः परस्मैपदेषु', `लेटोऽडाटौ' इत्यट्। दरिद्रतीति। अत्र परत्वादाकारलोपे कृते इकारस्योदात्तत्वप्रसङ्गः।
अथ प्रत्ययग्रहणं किमर्थम्, यावता भ्यादिभ्यः परः पित्प्रत्यय एव सम्भवति, ननु चायमस्ति--`आडुत्तमस्य पिच्च', बिभयाति, अत्रापि लोडुत्तमस्यैव पित्त्वं विधीयते, न त्वाट् इति, आटसहितो लोडुत्तमः पिद्भवति स च प्रत्यय एव। अत एव लोडादेशात्पितः पूर्वमाड् भवति, प्रत्ययात्तु पूर्वो न भवति, आटसहितस्याप्रत्ययत्वादिति तन्निवृत्त्यर्थं प्रत्ययग्रहणमिति न वाच्यम्, कथण्? यथैव प्रत्ययत्वमाट्सहितस्य , तथा पित्त्तवमपि तस्यैव। इहं तर्हि प्रयोजनम्-

- प्रत्ययात्पूर्वस्याच उदात्तत्वं यथा स्यात्सङ्घातस्य मा भूदिति, एतदेव ज्ञापकम्--स्वरविधौ सङ्घातः कार्यीति, तेन `तास्यनुदात्तेत्' इति निघातः `पचमानः' इत्यादौ चित्स्वरं परत्वाद्बाधत इति यदुक्तं तदुपपन्नं भवति। अथ पूर्वग्रहणं किमर्थम्, प्रत्यये पितीति वक्तव्यम्, तत्र `तस्मिन्निति निर्दिष्टे पूर्वस्य' इति पूर्वस्यैव भविष्यति ? इदं तर्हि प्रयेजनम्--पिति पूर्वं कार्यभाग्यथा स्यात्, पिदन्तं मा भूदिति। कथं पुनः सप्तमीनिर्द्देशे तदन्तस्य प्रसङ्ग? एतदेव ज्ञायति--स्वरविधौ सप्तम्यस्तदन्तसप्तम्य इति । किं सिद्धं भवति ? उपोत्तमं
रिति, रित्प्रत्यययान्ते उपोत्तममुदात्तं भवति, न तु रिति परतः पूर्वस्य; `चङ्यन्यतरस्याम्' चङन्तस्य। यद्येवम्, `चतुरः शसि' इति शसन्तस्य प्राप्नोति, शस्ग्रहणसामर्थ्यान्न भविष्यति। यदि हि `चतुरः शसि' इत्यनेन शस उदात्तत्वमिष्टं स्यात्, ततः `ऊडिदम्' इत्यस्यानन्तरम् `चतुरश्च' इति ब्रूयात् तत्रासर्वनामस्थानग्रहणानुवृत्त्या `षट्त्रिचतुर्भ्यो हलादिः' इति हलादेरुदात्तत्वविधानाच्च शस एव भविष्यति ।।

लिति ।। 6.1.193 ।।
प्परत्ययात्पूर्वमिति वर्त्तते, तेन लिदन्ते स्वरप्रसङ्गो न चोदनीयः ।।

आदिर्णमुल्यन्यतरस्याम् ।। 6.1.194 ।।
लोलूयंलोलूयमिति। एकाक्षु धातुषु लित्स्वरस्य, अस्य च विशेषाभावादनेकाजुदाहृतः। आम्रेडितानुदात्तत्वे कृत इति। `अनुदात्तं च' इत्यनेन ।।

अचः कर्तृयकि ।। 6.1.195 ।।
कर्तृवाचिनि सार्वधातुके विहितो यक् कर्तृयक्। उपदेश इति वर्त्तत इति। `अदुपदेशात्' इतियत्र यदुपदेशग्रहणं तदुपसमस्तमपि स्वरितत्वप्रतिज्ञानादिह सम्बद्ध्यते, तच्चार्थात्सप्तम्यन्तं सम्पद्यत इति मत्वोक्तम्, न तु सप्तम्यन्तमुपदेशग्रहणं प्रकृतमस्ति। यदि तूपदेशग्रहणं नानुवर्त्तत, कार्यत इत्यादौ रपरत्वे सति न स्यात्, तस्मादुपदेश इत्यनुवर्त्त्यम्।
यद्येवम्, जायते स्वयमेवेत्यादौ न स्यात्, `ये विभाषा' इत्यात्वे सत्युत्तरकालमजन्ता जनादयः, न तूपदेशे ? इत्यत आह--जनादीनामिति। `ये विभाषा' इत्यत्र `अनुदात्तोपदेशे' इत्यत उपदेशग्रहणमनुवर्तते, सा च विषयसप्तमीति उपदेशएव जनादीनामात्वं भवति। जायते स्वयमेवेति। अन्तर्भावितण्यर्थो जनिः कर्मकर्तृविषयः। दृश्यते चान्तर्भावितण्यर्थस्य प्रयोगः, यथा--एकं द्वादशधा जज्ञे इति ।।

थलि च सेटीडन्तो वा ।। 6.1.196 ।।
`अन्यतरस्याम्' इति वर्त्तमाने वाग्रहणं कार्यिविकल्पार्थम्। अन्यतरस्यांग्रहणेन कार्यं विकल्प्यते, वाग्रहणेन कार्यिणः। तेनेडादयः पर्ययेण कार्यं प्रतिपद्यन्ते। ननु च `अन्तश्च तवै युगपत्' इत्यादौ युगपद्ग्रहणादेवान्यत्र पर्यायः सिद्धः ? सत्यम्; अदेरपि प्राप्ते वाग्रहणम्; अन्यथा श्रुतयोहिडन्तयोरेव कार्यित्वं विकल्पेत्, वाग्रहणे तु सति यद्येवं विकल्पोऽर्थः, अथापि समुच्चयः, सर्वथादेरपि भवति ।
सेटीति किमिति। इड्ग्रहणादेव थल् सेट् ग्रहीष्यत इति प्रश्नः। ययाथेति। अयमभिप्रायः--इड्ग्रहणं यदेडागमः क्रियते तदा तस्योदात्तार्थं स्यात्, ततश्च यथा लुलविथेत्यादौ चतुर्णां पर्यायेणोदात्तवलिधाने ययिथेप्यादौ चतुर्थाभावेऽपि पर्यायेणोदात्तत्यं भवति, एवमिडभावेऽपि स्यादिति ।।

ञ्नित्यादिर्नित्यम् ।। 6.1.197 ।।
प्रत्ययस्वरापवाद इति। बाहुल्यादेवमुक्तम्। `श्रोत्रियंश्छन्दोऽधीते' इत्, अत्र हि वाक्यार्थे पदवचनमित्यत्र पक्षे न प्रत्ययश्वरप्रसङ्गः ।
प्रत्ययलक्षणमत्र नेष्यत इति। ननु च `न लुमताङ्गस्य' इति प्रतिषेधादेव प्रत्ययलक्षणं न करिष्यते, किमुच्यते--प्रत्ययलक्षणमत्र नेष्यत इति ? एवमन्यतो ज्ञापितमेतत्--`स्वरविधौ सप्तम्यस्तदन्तसप्तम्यः' इति। ततश्च यथा पूर्वसूत्रे थलन्तं कार्यि; तथात्रापि ञ्निदन्तं न तु ततः
पूर्वमङ्गमित्यनङ्गकार्यत्वात्प्रतिषेधो न सिद्ध्यतीति। यञि कनि चेति। चकाराद्बिदाद्यञि च ।।

आमन्त्रितस्य च ।। 6.1.198 ।।
अत्र `कारकादत्तश्रुत्योरेवाशिषि' इति प्राप्तिः प्रतिषिद्ध्यते, शेषनिधातेन बाध्य ित्यर्थः। प्रत्ययलक्षणमत्रेष्यत इति। षष्ठीनिर्देशेन तत्कार्यस्य स्पष्टत्वात्। सर्पिरिति। सृपेरिसि सर्पिः सब्दोऽन्त्योदात्तः, `स्वमोर्नपुंसकात्' इति सोर्लुक्। सप्तशब्दौ घृतादित्वादन्तोदात्तः, `षड्भ्यो लुक्' इति जसो लुक् ।।

पथिमथोः सर्वनामस्थाने ।। 6.1.199 ।।
पथिमथिशब्दावित्यादि। `गमेरिनिः', `पुषः कित्', `मन्थः', `पतेस्थ च' इतीनिप्रत्ययः, मन्थः कित्त्वादुपधालोपः--पन्थाः, मन्था इति। `पथिमथ्यृभुक्षामात्' इत्यादिकार्यम् ।
पथः पश्येति। भस्य टेर्लोपः। प्रत्ययलक्षणमत्रापि नेष्यते। अतिप्रसङ्गस्तु पूर्ववत् ।।

अन्तश्च तवै युगपत् ।। 6.1.200 ।।
कर्त्तवै इति। `कृत्यार्थे तवलैकेन्केन्यत्वनः' इति तवैप्रत्ययः। किं पुनः कारणं पर्यायनिवृत्तये यत्नः क्रियते ? इत्याह--एकवर्जमिति हीत्यादि ।।

क्षयो निवासे ।। 6.1.201 ।।
`क्षि निघासगत्योः'--इत्यास्माद् अधिकरणे घः। क्षयो दस्यूनामिति। क्षयेरच्, कर्त्तरि षष्ठी ।।

वृषादीनां च ।। 6.1.203 ।।
`वृषु सेचने', `जनी प्रादुर्भावे', `ज्वर रोगे', `हि गतौ', `कै गै रै शब्दे'। एते सर्वेऽच्प्रत्ययान्ता इति। पचादित्वात्। बाहुल्याच्चेदमुक्तम्। वृषः--इत्यत्रेगुपधलक्षणः कः। `णीञ् प्रापणे', `तायृ सन्तानपालनयोः'। केचित्तय इति पठन्ति, `अय पय तय गतौ', क्वचिच्चयशब्दः पठ्यते, स चिनोतेर्द्रष्टव्यः। `इण् गतौ', अंस समाधाने', `विद ज्ञाने', `षूद निरासे', `दु दाहे',। `वद व्यक्तायां वाचि', `अत सातत्यगमने'। केचिदेतौ न पठन्ति। `गुहूसंवरणे', `शम उपशमे', `अण रण शब्दे'।
सम्मतौ भावकर्मणोरिति। शमरणाविति वर्त्तते, सम्मतावर्थे शमरणौ भावकर्मणोर्यथाक्रममाद्युदात्तौ भवतः। `मात्रि गुप्तभाषणे'। शान्तिरिति। शमेः क्तिचि `कमु कान्तौ', `यमु उपरमे', केचिद्यमशब्दं न पठन्ति।
`ॠ शब्दे गतौ', `घृञ् धारणे', `कृ विक्षेपे', भिदादिपु निपातनाद्वृद्धिः। `वह प्रापणे', `कृपू सामर्थ्ये', `पद गतौ' ।।

संज्ञायामुपमानम् ।। 6.1.204 ।।
यद्येवमिति। यद्यत्र कनो लुबित्यर्थः। एतदेवेत्यादि। ज्ञापकाभावे तु सप्तमीनिर्देशेऽपि प्रत्ययलक्षणप्रतिषेधो न स्यात्, `स्वरविधौ सप्तम्यस्तदन्तसप्तम्यः' इति ज्ञापनेन तदन्तस्य कार्यित्वात्। क्वचिदिति। वचनात्क्वचिद्भवत्येव, यथा--`सर्वस्य सुपि' इत्यत्र ।।

निष्ठा च द्व्यजनात् ।। 6.1.205 ।।
इहाद्यात्तः अद्यात्त इत्येकादेशस्य बहिरङ्गत्वादसिद्धत्वाद् `अनात्' इतिक प्रतिषेधाभावः। भीष्मशब्दः `भियः षुक्व' इति मन्प्रत्ययान्तः।
चिन्तित इति। `चिति स्मृत्याम्' चुरादिः ।।

आशितः कर्त्ता ।। 6.1.207 ।।
अशेरिति। `अश भोजने' इत्यस्मात्। आङ्पूर्वादविवक्षिते कर्मणीति। उक्तं हि--`प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया' इति। कर्तरि क्त इति। `गत्यर्थाकर्मक' इत्यादिना। भाष्ये तु `कर्त्तरि क्तो निपात्यते' इति स्थितम्। यदि तर्ह्याङ्पूर्वकस्याशेराशित इति रूपम्, अवग्रहः प्राप्नोति, तस्मात् `उपधादीर्घत्वमपि निपात्यते' इति वार्त्तिककारः. वृत्तिकारस्तु--`संहितापाठ एव नित्यः, पदपाठस्तु पौरुपेयः, ततश्च न लक्षणेन पदकारा अनुवर्त्त्याः पदकारैर्नाम लक्षणमनुवर्त्त्यम्' इति मन्यते। अपर आह---अशेर्ण्यन्तस्य प्रयोज्यकर्त्तरि `गतिबुद्धिप्रत्यवसानार्थ' इति कर्मसंज्ञके निष्ठायामाशित इति रूपम्, स एवात्र भूतपूर्वगत्या कर्त्ता विवक्षित इति ।।

रिक्ते विभाषा ।। 6.1.208 ।।
रिक्त इति। `रिचिर्विरेचने'। संज्ञायामित्यादि। `निष्ठा च द्व्यजनात्' इत्यस्यावकाशः--दत्तः, गुप्तः, अस्यावकाशोऽसंज्ञायाम्--रिक्तो घट इति; संज्ञायामुभयप्रसंगे पूर्वविप्रतिपेधः ।।

जुष्टार्पिते चच्छन्दसि ।। 6.1.209 ।।
जुष्ट इति। `जुषी प्रीतिसेवनयोः', `श्वीदिते निष्ठायाम्' इतीट्प्रतिषेधः। अपित इति। `अतिर्ह्री' अर्त्तेर्णिच्, अर्त्यादिना पुक् ।।

नित्यं मन्त्रे ।। 6.1.210 ।।
आरम्भसामर्थ्यादेव सिद्धे नित्यग्रहणमुत्तरार्थम् ।।

युष्मदस्मदोर्ङसि ।। 6.1.211 ।।
`युष्यसिब्यां मदिक्', युषिः सौत्रो धातुः। तव, ममेति। `युष्मदस्मद्भ्यां ङसोऽस्', `तवममौ ङसि' इति मपर्यन्तस्य तवममादेशः, शेषे लोपः, `अतो गुणे' इति

पररूपत्वम्, `एकादेश उदात्तेनोदात्तः' इति विभक्तेरुदात्तत्वे प्राप्ते इदमुच्यते ।।

ङयि च।। 6.1.212 ।।

तुभ्यम्, मह्यमिति। `ङे प्रथमयोरम्', `तुभ्यमह्यौ ङयि'।

अथ किमर्थो योगविभागः, न `युष्मदस्मदोर्ङेङसोः' इत्येवोच्येत, एवं हि चकारो न कर्त्तव्यो भवति ? अत आह--पृथग्योगकरणमिति। आशङ्काग्रहणेनास्वरितत्वादेव यथासंख्यं न भविष्यतीति शक्यं वक्तुमिति दर्शयति। अत्रापि पूर्ववद्विभक्तिस्वरः प्राप्तः ।।

यतोऽनावः ।। 6.1.213 ।।

अत्र `अनावः' इति प्रतिषेधो ज्ञापयति--स्वरविधौ व्यञ्जनमविद्यमानवदिति; अन्यथा य आदिर्नकारो नासौ स्वरयोग्यः, यश्च स्वरोग्य अकारो नासावादिरिति प्रतिषेधोऽनर्थकः स्यात् ।।

ईडवन्दवृशंसदुहां ण्यतः ।। 6.1.214 ।।

`ईह स्तुतौ', `वदि अभिवादनस्तुत्योः', `वृङ्सम्भक्तौ', `शंसु स्तुतौ', `दुह प्रपूरणे'। कथं वार्य इत्यत्र ण्यत्, यावता `एतिस्तुशासु' इत्यादिना विशेषविहितेन क्यपा भाव्यम् ? अत आह--वार्य इत्यादि। अथ वृङोऽपि क्यबेव कस्मान्न भवति ? अत आह--क्यब्विधौ हीत्यादि। एतच्च तत्रैव प्रतिपादितम् ।।

विभाषा वेण्विनधानयोः ।। 6.1.215 ।।

णुप्रत्ययान्त इति। `तिष्ठतेर्णुः' इति तत्रानुवर्तते। उदात्तनिवृत्तिस्वरेणेति। `श्नसोरल्लोपः' इति श्नसोऽकारस्योदात्तस्य लोपात्।

वेणुरित्यादि। `संज्ञायामुपमानम्' इत्यस्यावकाशः--चञ्चा वर्ध्रिका, विभाषाया अवकाशः--अनुपमानभूतो वेणुः शुष्क उपवने; वेणुरिति संज्ञायामुपमाने पूर्वविप्रतिषेधः।

त्यागरागहासकुहश्वठक्रथानाम् ।। 6.1.216 ।।

`कुह विस्मापने', `श्वठ क्रथ भाषणो' चौरादिकावदन्तौ। निधाकतस्यैवायमपवादो युक्तः ? नैतदेवम्; यद्ययं निघातस्यापवादः स्यात्, तत्रैवायं ब्रूयात्--`अनुदात्तं पदमेकवर्जम्, न हि स्वार्थम् ।।

चङ्यन्यतरस्याम् ।। 6.1.218 ।।

उदाहरणे एकवचनातिक्रमणे हेतुर्मृग्यः। मा हि दघदिति। `विभाषा धेट्श्योः' इतिक च्लेश्चङादेशः।

मतोः पूर्वमात्संज्ञायां स्त्रियाम् ।। 6.1.219 ।।

मतोः पूर्वं आकार इति। अर्थव्याख्यानमेतत्। सूत्रे तु शब्दरूपापेक्षय नपुंसकनिर्देशः। केचित्तु सूत्रे पूर्वशब्दं पुंल्लिङ्गमेव पठन्ति। उदाहरणे चातुरथिकः `नद्यां मतुप्', `मतौ बह्वचोऽनचिरादीनां च' इति दीर्घत्वम्। मतोरिति किम् ? गवादिनीति। मतोरित्यस्मिन्नसति पूर्वग्रहणमपि न क्रियेतेति संज्ञाशब्दसम्बन्धिन आकारमात्रस्य प्रसङ्गः। पूर्वग्रहणं मतोरनन्तरस्य पूर्वस्य यथा स्यात्, इह मा भूत्--सानुमतीति ।।

अन्तोऽवत्याः ।। 6.1.220 ।।

इहासन्देहार्थम् `वत्या अन्तः' इत्यवचनादकारप्रश्लेषो निश्चितः।

तत्र प्रयोजनं पृच्छति--अवत्या इति किमुच्यत इति। अथावत्या इत्युच्यगानेऽपि राजवतीत्यत्र कस्मान्न भवति, भवति ह्येतदपि नलोपे कृतेऽवतीशब्दान्तम् ? अत आह--स्वरविधावित्यादि। ननु चोदाहरणेऽपि मतोर्वत्वस्यासिद्धत्वादवतीशब्दान्तत्वं नास्ति ? इत्याह्र--वत्वं पुनरिति। पुनःशब्दो नलोपाद्विशेषं द्योतयति ।।

ईवत्याः ।। 6.1.221 ।।

अहीवतीत्यादौ पूर्वं दीर्घः, `संज्ञायाम्' इति वत्वम्। योगविभागश्चिन्त्यप्रयोजनः ।।

चौ ।। 6.1.222 ।।

उदात्तनिवृत्तिस्वरापवादोऽयमिति। कृदुत्तरपदप्रकृतिस्वरेणोदात्तस्याञ्चत्यकारस्य विभक्तिनिमित्तकः `अचः' इति लोपः।

चावतद्धित इति वक्तव्यमिति। चौ यः स्वरः स तद्धिते परतो न भवतीत्यर्थः; इन्यथा योऽनुदात्तः प्रत्ययः--दधीचः पश्येत्यादौ, तत्र यथोदात्तनिवृत्तिस्वरं

बाधते, तथा दाधीच इत्यादौ प्रत्ययस्वरमपि सतिशिष्ट स्वरो वादेत, तस्मादतद्धित इति वक्तव्यम्, अस्मिंश्च सति उदात्तनिवृत्तिस्वरस्यायमपवादो भवति ।।

समासस्य ।। 6.1.223 ।।
राजदृषदिति। ननु च योऽत्र समासस्यान्तो दकारो नासौ स्वरभाक्, यश्च ततः पूर्वोऽकारो नासौ समासस्यान्तः ? अत आह--स्वरविधाविति। न स्वरस्यैव विधिः, किं तर्हि ? योऽपि `अनुदात्तादेरञ्' इत्यादिः, सोऽपि स्वरविधिः; स्वराश्रयत्वात्। तेन सोऽपि विधिर्व्यञ्जनादौ व्यञ्जनान्ते च भवति। अत्र च ज्ञापकम्--`नोत्तरपदेऽनुदात्तादौ' इत्युक्तवा पृथिव्याः प्रतिषेधः।

नानास्वरापवाद इति यद्यपि `अनुदात्तं पदमेकवर्जम्' इत्यस्ति, तथापि वर्जने विशेषाश्रयणात्पर्यायेण नानास्वरप्रसङ्गः। तत्र राजशब्दः `कनिन्युवृषितक्षि' इत्यादिना कनिन्प्रत्यान्तत्वादाद्युदात्तः; `पुरः कुषन्'----पुरुषः; ब्रह्मणोऽपत्यं ब्राह्मणाः--अणन्तः; `कलतृपश्च'; `वृषादिभ्यश्चित्';`कमेर्बुक् च'---कम्बलः; `कन्याराजन्यशिप्यामनुप्याणामन्तः' इति कन्याशब्दोऽनतस्वरितः; `स्वनहसोर्वा' इत्यप्, धातुस्वरः; पटत्पटद्धन्यत इति पटहः, पृषोदरादिरन्तोदात्तः; `स्वनहसोर्वा' इत्यप्, धातुस्वरः; पटत्पटद्धन्यत इति पटहः, पृषोदरादिरन्तोदात्तः; `शाशपिभ्यां दनौ', पचादिषु नदडिति पठ्यते, टित्त्वान्ङीप्-नदी; उदात्तनिवृत्तिस्वरः; पोषशब्दो घञन्तः; `श्रदृभसोऽदिः' `दृणातेः षुग् ह्रस्वश्च' दृषत्, प्रत्ययस्वरः; समिध्यते ययेति समित्, सम्पदादित्वात्क्विप्, कृदुत्तरपदप्रकृतिस्वरः--एते नानास्वराः, तेषामपवादः ।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां षष्ठस्याध्यायस्य प्रथमः पादः
-----***-----

6.2

अथ षष्ठाध्याये द्वितीयः पादः
पदमञ्जरी
बहुव्रीहौ प्रकृत्या पूर्वपदम् ।। 6 - 2 - 1 ।।
इह यस्य विकारः प्राप्तस्तस्य प्रकृतिभावो विधेयः। न च कृत्स्नस्य पूर्वपदस्य शेषनिघातलक्षणो विकारः प्राप्तः किन्तु तत्स्थयोरुदात्तस्वरितयोरेव, तस्मात्त्योरेव पूर्वपदशब्दो वर्तते,तदाह - पूर्वपदग्रहणमित्यादि। समासान्तोदात्तत्वे हीत्यादिना विकारप्राप्तिं दर्शयति। समासान्तोदात्तत्वापवादोऽयमिति। नाप्राप्ते तस्मिन्नारम्भात् । ननु च यत्र सामान्यविधिप्रप्तिमनपेक्ष्य विशेषविधिप्रवृत्तिस्तत्रापबादत्वम्, यथा -- कर्मण्यण् आतोऽनुपसर्गे कः इति इह तु सत्यां विकारप्राप्तौ प्रकुतिभावो विधेयः, विकारप्राप्तिश्च समासस्येत्यस्मिन् प्रववृत्त इति कथं तत्प्रवृत्त्यपेक्षस्तदपवादः, अतः समासस्येत्यस्मिन्प्रवृत्ते प्राप्तस्य शोषनिधातस्यैवायमपवादो युक्तः नैतदेधम, यद्ययं निघातापवादः स्यात्, तत्रैवायं ब्रूयाद् - अनुदात्तम्पदमेकवर्जम बहुव्रीहौ पूर्यपदम् इति । नन्वेवनुत्यमाने समपाद इत्यादौ स्वाभाविकस्यापि पूर्वपदानुदात्तस्य प्रतिषेधप्रसङ्गः, किं कारणम् अनन्तरस्य विधिर्वा भवति प्रतिपेधो वा इति तस्मात्समासस्येतेयस्यानन्तरमारभ्यमाणस्तस्यैवायमपवादः। ननु चेक्तम् -- कथं तत्प्रवृकत्त्यपेक्षस्तदपवादः इति उच्यते निदानेच्छेदेन निदानिन उच्छेदः शक्यते कर्तुम्, समासान्तोदात्तत्वं च शेषनिधातलक्षणस्य पूर्वपदविकारस्य निदानम्, अतस्तदभावद्वयोरेण निदानभूतस्य समासान्तोदात्तस्यैवास्मिन् विषयेऽप्रवृत्तिराख्यायते । नन्वेवं नानापदस्वरप्राप्तौ समाससान्तोदात्तस्यारम्भात्तदप्रवृत्तौ द्वयोरपि पूर्वेत्तरपदयोः प्रकृत्स्वरप्रसङ्गः, तथा हि सति न बहुव्रीहेः इति समासान्तोदात्तत्वमेव प्तिपेवेत्, अस्तु वा समासान्तोदात्तत्वम्, अस्तु वा सोषविधातः, पश्चात्तु प्रकृत्वेत्यनेन स्वरविशेशमुपलक्ष्य स स्वरः पूर्वपदस्य विधीयते, शेषविधातात्प्राक् पूर्वपदास्य प्रकृत्या यः स्वरस्तत्स्वरकं पूर्वपदं बहुव्रीहौ भवतीतिः यदि वा प्रकृत्या इत्यनेनस्वरविशेषे उपलक्षिते सत्ययमर्थो भवति बहुव्रीहौ पूर्वपदस्य स्वभाविको यः स्वर आद्युदात्तत्वादिकः स भवतीति, एवं च यथा पूर्वपदस्यादिरुदात्तो भवतीत्युक्तेन समासस्येत्येतत्प्रवृत्त्यपेक्षा, तादृगोतदिति युज्यते तदपवादता।
कृष्णो मृग इति। यस्याजिनं कृष्णाजिनमित्युच्यते।
ब्रह्मचारिन्शब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्त इति। तथा चाधीयते---
ब्रह्मचारी चरति विषयद्विषाम्। कस्य ब्रह्मचार्यसीत्यादौ णिनिः, पूर्वपदाद्युत दात्तत्वं तु न भवति, प्रवृद्धादिषु पाठादाकृतिगणो हि स इष्यते । वृत्तौ तु कृदुत्तरपदप्रकृतिस्वरेणेत्युपलक्षणम् । अपर आह-छन्दसि परादिश्च परान्तश्च इत्यन्तेदात्तत्वम्। वृत्तेस्त्वयमर्थः -- ब्रह्मेव चरति ब्रह्मचारीत्युपमानमत्र पूर्वपदम्, ततः किम् उपमानं शब्दार्थप्रकृतावेव इति नियमात्कृदुत्तरपदप्रकृतिस्वर एव भवतीति । स्नातकशब्दः कन्प्रत्ययान्त इति। यावादिषु स्नात

वेदसमाप्तौ इति पठ्यते ।

मनोर्जातावञ्यतौ षुक्च, मनुष्यः । यदि तर्ह्ययं प्रकृतिभावः समासान्तोदात्तत्वं बाधते, सर्वानुदात्तेऽपि पूर्वपदे बाधेत, तत्रापि ह्यस्य प्रवृत्तिर्न केनचिद्वार्यते, विशेषविधिश्च प्रवर्तमानः सत्यपि सम्भवे, सामान्यविधेर्बाधको भवति, तक्रदानमिव दधिदानस्य इत्यत आह -- उदात्तग्रहणमित्यादि । न्यायतेऽप्ययमर्थः सिद्धः, कथं यस्य विकारः प्राप्तस्तस्य प्रकृतिभावो विधेयः, विकारप्राप्तिश्चोदात्तस्वरितयोरेव, अत एव पूर्वमुक्तमुदात्ते स्वरिते वा वर्तते इति।

समभाग इति । समशब्दः सुञो डमप् इति व्युत्पादितः सर्वानुदात्ततः । नन्वत्रासत्यपि समासान्तोदात्तत्वे भागशब्दस्य कर्षात्वतः इति अन्तोदात्तात्वत् समाभागशब्दोऽन्तोदात्त एव भविष्यति। तस्मादुदाहराणदिगियं दर्शिता, समपाद इत्युदाहर्तव्यम्, पादशब्दो वृषादित्वादाद्युदात्तः।

किमर्थं पुनरिदमुच्यते पूर्वपदप्रकृतिस्वरो यथा स्यात्, समासान्तोदात्तत्वं मा भूदिति,नञ्सुभ्याम् इत्येतन्नियमार्थं भविष्यति - यदि बहुव्रीहौवन्तोदात्तत्वं भवति नञ्सुभयामेवेति। न चैवं नानापदस्वरप्राप्तौ समासान्तोदात्तत्वविधानान्नियमेन तस्मिन्व्यावित्तितेऽपि पूर्वोत्तरापदयोर्द्वयोरपि पर्यायोण प्रकृतिस्वरप्रसङ्गः, शितेर्नित्याबह्वच् इत्यस्य नियमार्थत्वात् यदि बहुव्रीहावुत्तरपदं प्रकृत्या भवति शितेरेव परमिति उच्यते नञ्सुभयाम् इत्येष तावन्नियमे नेपपद्यते अनुदरः, सूदर इत्यादौ उदाराश्वेषु क्षेपे इति पूर्वपदान्तोदात्तस्य प्राप्तस्य बाधनाद्विधिसम्भवात्। शितेर्नित्याबह्वच् इत्येतदपि -- शितेर्नित्याबह्वजेवेत्यनेन नियमेत शीतिललाटादिषेवेवोत्तरपदाप्रकृतिस्वरं निवर्तयेत्, न चित्रगुप्रभृतिष्वित्यारभ्यमेवैतत् ।

बहुव्रीहिग्रहणं तु शक्यमकर्तुम् तत्पुरुषे कस्मान्न भवति तत्पुरुषे तुल्यार्थ इत्यादिनियमार्थं भविष्यति - तत्पुरुषे तुत्यार्थाद्येवेति, गन्तव्यपण्यमेव वाणिजे,गतादिष्वेवोत्तरवदेषु द्विगावित्यादि। द्वन्द्वे कस्मान्न भवति राजन्यबहुवचने इत्येतन्नियमार्थं भविष्यति - द्वन्द्वे भवति राजन्यबहुवचनद्वन्द्व एवेति। अव्ययीभावे कास्मान्न भवति परिप्रत्युपापावर्ज्यमान इत्यादि नियमार्थं भविष्यति -- परिप्रत्थुपापा एवाव्ययीभाव इति । विपरीतस्तु नियमः सर्वत्र न भविष्यति नानिष्टार्था शास्त्रप्रवृत्तिरिति। एवमप्यसति बहुवीहिग्रहणे समासान्तोदात्तस्य पूर्वपदप्रकृतिस्वरस्य चैकविशयत्वाद्विरोधाच्च तुल्यश्वतः, पञ्चारत्निरित्यादौ पर्यायः प्राप्नोति तत्पुरुषादिषु तुल्यार्थादीन्येव पूर्वपदानि प्रकृतिस्वराणि भवन्ति नान्यानि इत्येव हि नियमः कृतः, न तुल्यार्थादिपूर्वपदेषु तत्पुरुपादिषु पूवपदाप्रकृतिस्वलत्वमेव इति । अथाम्यगृह्यमाणविशेषत्वादुभयनियमः तत्पुरुपादिषु तुल्यार्थादीन्येव, तेषु पूर्वपदप्रकृतिस्वरत्वमेवेति तथा च बह्वन्यतरस्याम् इति वर्तमाने दिष्टिवितस्त्योश्च इति विकल्पो विधीयते, पञ्चदिष्टिः, पञ्चवितस्तिरित्यादौ इगन्ते द्विगौ इति नित्यपूर्वपदप्रकृतिस्वरो मा भूदिति तथापि चित्रगुरित्यादौ बहुव्रीहौ पर्यायप्रसङ्गः, ज्ञापकात्सिद्धम्, यदयम् द्वित्रिभ्यां पाद्दन्मूर्द्धसु इति द्विपादित्यादावान्तोदात्तविकल्पं शास्ति, तज्ज्ञापयति - न बहुव्रीहावन्तोदात्तत्वं पर्यायोण भवति इति एवमप्युदात्तविषयमेव ज्ञापकं स्यात् -- बहुव्रीहावन्तोदात्तत्वं पर्यायेण भवति इति । किञ्च स्यात् उदात्तस्वरितयोस्तु पूर्वोत्तरपदस्थयोः पर्यायप्रसङ्गः । न च स्वरिते य उदात्तस्तदाश्रयं ज्ञापकं युज्यते, अचो ह्युदात्तसंज्ञा, न च वर्णैकदेशो गृह्मते । अथ वर्णत्वावर्णत्वकृतं भेदमुत्सृन्योदात्तश्रुतिपरं ज्ञापकं वण्यैत, तदा बहुव्रीहिग्रहणं शक्यमकर्तुम् ।।

तत्पुरुषे तुल्यार्थतुतीयसप्तम्युपमानाव्ययद्वितीयाकृत्या ।। 6 - 2 - 2 ।।

सदृक्शब्दोऽपीत्यादि। कृदुत्तरपदप्रकृतीस्वरेणेत्येतदपेक्षते।

कुमुदशब्दोऽपीत्यादि । तत्र यदा कप्रत्ययान्तस्तदा थाथादिस्वरेणान्तोदात्तः, तथा च अनुदात्तस्य च यत्रोदात्तलोपः इत्यत्र कुमुद्वानित्युदाहृतम्, उक्तं च -- कुमुदातयोऽन्तोदात्ता इति। यदा त्वव्युत्पन्नं तदा नब्विषयस्यनिसन्तस्य इत्याद्युदात्त इत्युक्तम् । अपर आह - जलजे नपुंसकविषयः कुमुदशब्दः, यस्तु वानरविशेषे कुमुदशब्दः स पुंल्लिङ्गः, तत्रेह जलजवाच्युदाहृतः, अनुदात्तस्य च इत्यत्र तु वानरवचन इति ।

दूर्वाकाण्डशरकाण्डशब्दावित्यादि। आद्यप्राप्तिप्रदर्शनमेतत्, षट् च कण्डादीनि इत्युत्तरपदाद्युदात्तत्वेन तत्र भाव्यम्।

नञ्कुनिपातानामिति। निपातत्वादेव सिद्धे नञ्ग्रहणम् अकरणिरित्यादौ परस्यापि कृत्स्वरस्य बाधनार्थम् । तथा चाव्यथीत्यत्रापि कृता सह निर्दिष्टो यत्र नञ्, तत्रापि नञ एव स्वरो भवति, तथा विभक्तिस्स्वरान्नञ्स्वरो बलीयान् भवति । कुग्रहणं तु चादिषु पाठाभावात्, पठितव्यस्त्वसौ, अन्यथाऽव्ययसंक्षा न स्यात स्वरादिष्वपि पाठाभावात् । स्नात्वाकालक इति । मयूरव्यंसकादिरयम् । यद्येवम्,स तत्रैवान्तोदात्तः पठिष्यते एवमपि परिगणनं कर्तव्यम्,सामिकृतम्,स्वयन्धौतमित्यादौ प्रकृतिरवरो मा भूदिति। इह कस्मान्न भवति-परमं कारकं परमकारकम्,परमेण कारकेण परमकारकेण,परमे कारके परमकारके इति न हि विशेषणसमासः प्रथमान्तानामेवेति नियमेऽस्ति । तेन द्वितीयाद्यन्तं पूर्वपदमित् चोद्यम् । परिहारस्तु लक्षणप्रतिपदोक्तपरिभाषया तृतीयादीनां प्रतिपदं यः समासस्तत्रायं स्वरः। अयं तु विभक्तिविशैषमनुपादाय विशेषणसमास इति ।।

वर्णे वर्णोष्वनेते।। 6 - 2 - 3 ।।

अनेते तइति प्रतिषेधाद्बहुवचननिर्देशाच्चोत्तरपदे स्वरूग्रहणं न भवति, तत्साहचर्यात्पूर्वपदेऽपि। कृष्णाशब्दो नक्प्रत्ययान्तोऽन्तोदात्त इति । फिषि तु कृष्णस्यामृगाख्या चेत् ति छन्दस्यन्तोदात्तत्वम्, अन्यत्राद्युदात्तत्वं व्यवस्थितम्।।

गांधलवणायोः प्रमाणे।। 6 - 2 - 4 ।।

शम्बगाधमिति।गाधृ प्रतिष्ठायाम्,गाध्यत तइति गाधः अर्द्धर्चादिः, इयत्तायाः परिच्छित्तः - इयत्तापरिच्छेदः । क्रियाशब्दोऽत्र प्रमाणशब्दो गृह्यते, न त्वायोममाने रूढ इत्यर्थः ।।

दायाद्यं दायादे।। 6 - 2 - 5 ।।

दातव्यो दायः - भागः, अंश इत्यर्थः । दायमादत्ते दायादः, मूलविभुजादित्वात्कः, दायादास्य भावो दायाद्यम् । किं पुनस्तत् दायास्यादानं तत्सम्बन्धो वा। इह तु लक्ष्यमाणोऽऽदीयमाने एव दायद्यशब्दो वर्तते ।

अथेत्यादि । वक्ष्यमाणोऽभिप्रायः । तमेवाविष्करोति - यद्येवमिति । शेषलक्षणैवेति। सामान्यलक्षणैवात्र षष्ठी, न प्रतिपदमित्येवशब्दस्यर्थः । यदि शेषलक्षणैवात्र षष्ठी, किमर्थं पुनस्तत्र विधानम् इत्याह - तास्यास्त्विति । सप्तमी तावद्विधेया, अप्राप्तत्वात् । तत्र यदि सैव विधीयेत, ततोऽसौ विशेषविहितत्वात् षष्ठ्या बाधिका विज्ञायेत, मैवं विज्ञायीति पुनः सैव शेषलक्षणा षष्ठ्यभ्यनुज्ञायते, न त्वपूर्वा विधीयत इत्यर्थः ।।

प्रितिबन्धि चिरकृच्छ्रयोः ।। 6 - 2 - 6 ।।

कार्यसिद्ध प्रतिबध्नातीति प्रतिबन्धि, आवश्यके णिनिः । विशेषणसमास इति । ननु च सामानाधिकरण्ये सति स भवति, न चेह तदस्ति गमनशब्दस्य गतिवाचित्वात् चिरशब्दस्य च कालवाचित्वात् नैष दोषः चिरकालभाविनि गमनेऽत्र चिरशब्दो वर्त्तते । मयूरव्यंसकादिर्वैष इति । गमनमत्र विशेष्यम्, तद्विशेषणे तु चिरकृच्छ्रे, अतो विशेष्यस्य पूर्वनिपातार्थं मयूरव्यासकादित्वमेष्टव्यमिति भावः । पूर्वपदस्य प्रतिबन्धिवाचित्वमुपपन्नयति । गमनं हीत्यदि । कराणनैकल्याद्धि चिरकारभावि गमनं कृच्छ्रयोगि च, कृच्छ्रम् - दुःखम्, तद्योगि च कार्यसिद्धेः प्रतिबन्धि जायते ।।

पदेऽपदेशे ।। 6 - 2 - 7 ।।

अच्चारः - पुलीषक्रिया ।।

निवाते वातत्राणे।। 6 - 2 - 8 ।।

ङ्यक्प्रत्ययान्तोऽन्तोदात्त इत्यपरे इति । कवतेर्ङ्यक् इति सूत्रमधीयते । डकारस्येत्संज्ञा न भवति गुणप्रतिषेधार्थात्ककारानुबन्धात् ।।

शारदेऽनार्तवे ।। 6 - 2 - 9 ।।

उदाहरणे रज्जूद्धृते रज्जुशब्दो दृषत्पिष्टेषु दृषच्छब्दः, ततः कर्मधारयऽस्वपदविग्रहः। सृजेरसुम् च इत्यत्र स्कन्देः सलोपश्च इत्यतः सलोप इति वर्तते, तेन सृजेरन्त्यादचः परोऽयमसुम्, सलोपे यणादेशेऽसुमः सकारस्य जश्त्वे च रज्जुरिति भवति ।।

अध्वर्युकषाययोर्जातौ।। 6 - 2 - 10 ।।

नियतविषया इति। वरणविशेषनियता इत्यर्थः।।

सदृशप्रतिरुपयोः सादृश्ये ।। 6 - 2 - 11 ।।

सदृशाग्रहणमनर्थकम् तुतीयासमासवचनात्। सदृशशब्देन तुतीयासमास उच्यते - पूर्वसदृशसमोनार्थ इति, तत्र तुतीयापूर्व पदं प्रकृतिस्वरं भवतीत्येव सिद्धमत आह - षष्ठीसमासार्थं चेति। तुल्यार्थयोगे षष्ठ्यपि विधीयते, तत्र यदा तस्याः षष्ठ्याः समासः क्रियते, तदापि यथा स्यादित्येवमर्थ सदृशग्रहणम्। ननु चानभिधानात्षष्ठीसमासो न भविष्यति त्रैशब्द्यं हि नः साध्यम् -- मातुः सदृशः,मात्रा सदृशः मातृसदृश इति एतच्च विनापि षष्ठीसमासेन सिद्ध्यत्येव अत आह -- इहेत्यादि। अलुकि सति रूपविशेषस्य विद्यमानत्वादवश्यकर्तव्यः षष्ठीसमासः, तदर्थं चेह सदृशग्रहणं कर्तव्यम् । यद्येवम्, तृतीयासमासे सदृशग्रहणम्, यथा -- विद्या सदृशो विद्यासदृश इति। न ह्यत्र षष्ठ्यर्थोऽस्ति,किन्तु तृतीयार्थः, विद्यया हेतुना सदृश इत्यर्थः, अन्यो देवदत्तादिरत्र प्रतियोगी । अपर आह -- तृतीयासमासोऽप्यलुकि प्रयजयति -- मनसः संज्ञायां मनसासदृश इति। अत्रेत्यादि। दशि दशनस्पर्शनयोः दंशेष्टो न आ च इति टप्रत्ययः नकारस्य चाकारः टित्त्वान्ङीप्, यस्योतिलोपः, अनुदात्तस्य च यत्रोदात्तलोपः इति उदात्तत्वम् । वृषलशब्दाज्जातिलक्षणो ङीष् ।।

द्विगौ प्रमाणे।। 6 - 2 - 12 ।।

कर्दमादीनाञ्च इत्यत्र मकरकुक्तकुटपारेवतेत्यादेः सूत्रादादिग्रहणमनुवर्तते। अथ द्वितीयं प्रागीपात् इत्यते द्वितीयग्रहणम् । परमसप्तसममिति।समाहारे द्विगुः पात्त्रादित्वान्नपुंसकत्वम्,मूलोदाहरणे तु तद्धितार्थे द्विगुरुत्तरपदम्।।

गन्तव्यपण्यं वाणिजे।। 6 - 2 - 13 ।।

वणिगेव वाणिजः प्रज्ञादित्वादण्। सप्तमीसमासा एत एति । सप्तमी इति योगविभागात् । गोवाणिजादयस्तु षष्ठीसमासाः।।

मात्रो पज्ञोपकमच्छाये नपुंसके।। 6 - 2 - 14 ।।

फिपिति आदिमेन योगेन शान्तनवीयं न चतुष्कं सूत्रमुपलक्षणयति । तत्र समुद्रशब्दः गागरार्थत्वादन्तोदात्तः ।।

सुखप्रिययोर्हिते ।। 6 - 2 - 15 ।।

समानाधिकरणसमासा एते इति । गमनादीनां विशेष णत्वात्पूर्वनिपातं मन्यते । अथ तु सुखप्रिययोर्विशेषणत्वं तदा मयूरव्यांसकादित्वमेष्टव्यम । आयत्यामिति । परिणामे, आगामिकाले, भाविकाल इति यावत् ।।

प्रीतौ च ।। 6 - 2 - 16 ।।

इह तु सुखपिरययोः तइत्येतावत्सूत्रं कृत्वा हिते च इति वक्तव्यम्, तत्राद्ये सूत्रे सुखप्रिययोः प्रीत्यव्यभिचारादेव प्रीतौ गम्यमानायां भविष्यति तत्राह - सुखप्रिययोरित्यादि । ब्राह्मणशब्दोऽणन्तः । छात्त्रशब्दः छत्त्रा दिभ्यो णः इति णप्रत्ययान्तः । कन्याशब्दः स्वरितान्त इति । तिल्यशिक्यमर्त्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः इति फिषि पाठात् ।।

पत्यावैश्वर्ये।। 6 - 2 - 18 ।।

धान्यमन्तः स्वरितमिति । आनन्तरपठितेन फिट्सूत्रेण।। गवादीनां तु पूर्वमेव स्वरकथनम् ।।

न भूवाक्चिद्दिधिषु।। 6 - 2 - 19 ।।

भूवादीनां समाहारद्वन्द्वे नपुंसकहस्वत्वम्, अत्र पूर्वपदप्रकृतिस्वरप्रतिषेधाद् वृत्तिकारेण पूर्वपदानां स्वरो व्याख्यातः । तत्रादितस्त्रयः क्विबन्ताः । अन्दूदृभ्भूजम्बूकफेलूकर्कन्धूदिधिषूः इति कूप्रत्ययान्तो दिधिषूशब्दो निपातितिः ।।

वा भुवननम्।। 6 - 2 - 20 ।।

भुवनशब्दो भाषायां बहुलवचनात्साधुः ।।

आशङ्काबाधनेदीयस्सु समाभावने ।। 6 - 2 - 21 ।।

शकि शङ्कायाम् बाधृ विलोडने, आङ्पूर्वाभ्यां कर्मणि घञ् । अतिशयेनान्तिको नेदीयः, अन्तिकबाढयोर्नेदसाधौ । अस्तित्वाध्यवसायः - अस्तित्वनिश्चयः। गमनाशङ्कादयो विशेषणसमासाः, मयूरव्यंसकादयो वा ।।

पूर्वे भूतपूर्वे।। 6 - 2 - 22 ।।

आढ्यो भूतपूर्व इति। यः पूर्वमाढ्य आसीत्स एवमुच्यते। अत्रेत्यादि। परमश्चासौ पूर्वश्चेति। सोऽयं वाक्यार्थः पूज्यमानतालक्षणः, तस्मिन्निह प्रत्युदहरणे समास इत्यर्थः। न त्विति । परमो भूतपूर्व इति। योऽयं वाक्यार्थः पूर्व परम आसीदित्यवंरूपः, न तस्मिन् तत्र समास इति यावत्, किं कारणम् इत्याह-तथा चेति । ह्यर्थे ।।

सविधसनीडसमार्यादसवेशसदेशेषु सामीप्ये।। 6 - 2 - 23 ।।

उदाहरणेषु षष्टीसमासः, मद्रादीनां पूर्वमेव स्वर उक्तः।।

विस्पष्टादीनि गुणवचनेषु।। 6 - 2 - 24 ।।

विस्पष्ट इति । स्पश बाधनस्पर्शनयोः इत्यस्य निष्टायाम् वा दान्त इत्यादिना स्पष्ठशब्दो निपातितः विशब्देन गतिसमासः। चित्र चित्रीकरणे चुरादिः, तस्मादेरचे, विशेषेण चित्रं विचित्रम्, प्रादिसमासः । चिती संज्ञाने विगतं चितमस्य विचित्तः, आञ्जू व्यक्त्यादिषु तस्य विपूर्वस्य निष्टाया गतिस्वरः, तत्रेकारस्य यो यण् स उदात्तयण् भवति ।

सम्पन्नशब्दस्याथादिस्वरेणेति । गतिस्वरस्तु न भवति, किं कारणम्, कर्मणि इति तत्रानुवर्तते, अयं तु कर्तरि क्तः। पटुपण्डितशब्दौ प्रत्ययस्वरेणेति। अन्तोदात्त इत्यपेक्षेते। यदेकवचनान्तं प्रकृतम्, तस्य वचनविपरिणामं कृत्वाऽन्तोदात्ताविति सम्बन्धः कर्तव्यः। पाटयतेः फरिपाटिनमिजनीनां गुक्पटिनाकिधश्च इत्युप्रत्ययः, पटिश्चादेशः, इकार उच्चारणार्थः पटुः । पडि गतौ निष्ठा, पण्डितः। कुशान् लातीति कुशलः, ला आदाने चपलशब्दश्चित्स्वरेणेति । अन्तोदात् इत्यपेक्षेते । चचिदिति वर्तत इति । वृषादिभ्यशिचत् इत्यतः। निपुणाशब्द इत्यादि। पूर्ववत्सम्बन्धः। पुण कर्मणि शुभे।।

श्रज्यावमकन्यापवत्सु भावे कर्मधारये।। 6 - 2 - 25 ।।

उदाहरणेषु मयुरव्यंसकादित्वाद्विशेष्यस्य पूर्वनिपातः। इष्ठेयसुनोः प्रशास्यस्य श्रः ज्य च युवाल्पयोः कनन्यतरस्याम्। पापिष्ठ इति । विन्मतोर्लुक्।

कुमारश्च।। 6 - 2 - 26 ।।

कुमारश्रमणेति। लिङ्गविशिष्टपरिभाषया कुमारीशब्दस्य समासे पुंवद्भावः। कुमार क्रीडायाम् इत्यस्मात्पचाद्यच्, कुमारः । केचित्पुनरित्यादि चकारे ह्यत्र, क्रियते, अस्यैव, विधः समुञ्चयार्थः।।

आदिः प्रत्येनसि।। 6 - 2 - 27 ।।

प्रतिगत एनसेति। अवादयः कुष्टाद्यर्थे तृतीयया इति तत्पुरुषः । द्वितीये तु विग्रहे बहुव्रीहिः । कथं पुननन्तरेणोदात्तग्रहमुदात्तस्वरो लभ्यते इत्याह -- उदात्त इत्येतदिति । सामर्थ्यमेव दर्शयति । पूर्वपदेति । प्रकृत्येति हि वर्त्तते, तत्रैवमभिसम्बन्धः -- पूर्वत्र कुमारशब्दे प्रकृतिभावेन यः स्वरः सथापितः सोऽत्रादेर्भवतीति।।

इगन्तकालकपालमगालशरावेषु द्विगौ।। 6 - 2 - 19 ।।

कृताणप्रत्ययलोपा इति। कुतोऽण्प्रत्ययलोपो यषां ते तथोक्ताः । द्विगाविति किं परमशराव इति । षष्ठीसमासोऽयम् । बहुव्रीरौ तु पूर्वपदप्रकुतिस्वरेण भाव्यमेव । इगन्तप्रकुतिस्वरत्वे यण्गुणयो रुपसंख्यानम् -- पञ्चारत्न्यो दशारत्न्यः,यण्गुणयोः कृतयोरिगन्ते द्विगावित्येष स्वरो न प्राप्नोति इत्यत आह यण्गुणयोरित्यादि। प्राक्सुबुत्पत्ते। स्वरो भवन्नन्तरङ्गः, यण्गुणौ तु सुबपेक्षत्वाद्वहिरङ्गौ । स्थानिवद्भावाद्वेति । न चात्र स्वरविधौ न स्थानिवत्त्वम्, अलोपाजादेशत्वात् । पञ्चारत्न्य इति । छान्दसोऽयं प्रयोगः। तत्र जसि च इति गुणे न भवति जसादिषु छन्दसि वा वचनम् इति वचनात्।।

बह्वन्यतरस्याम्।। 6 - 2 - 30 ।।

बहुशब्दोऽन्तोदात्त इति। कुर्भ्रुश्च इति वर्तमाने लन्घिबंह्योर्न लोपश्च इति कुप्रत्यये व्युत्पादितत्वात् ।।

सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्।। 6 - 2 - 32 ।।

ण्यप्रत्ययान्ताविति। वुञ्छणादिषु सङ्काशादिभ्यो ण्यः। अवतेः कक्प्रत्ययः, ज्वरत्वर इत्यादिनोठ्, ऊकः । कुम्भकलशशब्दाभ्यां जातिलक्षणो ङीष्, भ्राष्ट्रशब्दो भ्रस्जेष्ट्रनि वृद्धौ च व्युत्पादितः । चक्रशब्दः कुञः को द्वे च।

सप्तमीस्वर इत्यादि। तत्पुरुषे तुल्यार्थ इत्यादिना सप्तम्यन्स्य यः प्रकृतिभावः परत्वात्थाथादिस्वरेण बाधित इति। यत्र तु कृत्स्वरेण बाधित थइति पाठः, तत्र कृदान्तस्य यः स्वरः थाथादिलक्षणस्तेनेत्यर्थः ।।

परिप्रत्युपापा वर्ज्यमानाहोरात्रावयधेषु।। 6 - 2 - 33 ।।

परित्रिगर्त्तमिति । त्रिगर्त्तन्वर्जयित्वेत्यर्थः। अपपरी वर्जने इति कर्मप्रवचनीयसंज्ञा, पञ्चम्यगाङ्परिभिः इति पञ्चमी । अपपरिबहिरञ्चवः पञ्चम्या इत्यव्ययीभावः। सौवीरादयोऽपि जनपदविशेषाः। प्रतिपूर्वाह्णमिति । लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः। उपपूर्वाह्णमिति । अव्ययं विभक्ति इत्यादिना सामीप्ये। किं पुनः
कारणमपपरर्योरेव वर्ज्यमानमुदाहृतम्, नेतरयोः तत्राह - तत्रेति । अथाहोरात्रावयवा अपि इतरयोरपपर्थोः कस्मान्नोदाह्रियन्ते अत आह -- अहोरात्रावयवा अपीति । परिवनमित्यत्रेति । परिप्रत्युपापा इत्यस्यावकाशः - परित्रिगर्तमिति, वनं समासे इत्यस्यावकाशः -- प्रवणमिति परिवनमित्यत्र वनं समासे इत्येतद्भवति विप्रतिषेधेन । अपवादत्वं चात्र हेतुः, न विप्रतिषेधः । समासस्य इत्येव सिद्धे वनस्य पुनर्वचने एतत्प्रयोजनम् -- येऽन्ये तदपवादास्तद्बाधनार्थम् । सर्वयैवाव्ययस्वरं बहुव्रीहिस्वरं च बाधते, एवमिदमपि बाधिष्यते।।

राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु।। 6 - 2 - 34 ।।

श्वाफल्कचैत्रकरोधका इति । प्रमादपाठोऽयम् । अत्र त्रिपदे हि द्वन्द्वे यत्यक्वमपेक्षेय पूर्वपदं तस्यैव भवति, ततश्च चैत्रकशब्दस्य स्वरवचनमनुपपन्नं, तस्मात् श्वाफल्कचैत्रकाश्चैत्रकरीधको इति पाठः । एकस्तु चैत्रकशब्दो लेखकैः पुनरुक्तिशङ्कया त्यक्तः । शिनिशब्द आद्युदात्त इति । शिङो निन् ह्रस्वश्च बहुलवचनात् । तदपत्येष्विति । यद्यपि शिनिशब्द इति प्रकृतम्, तथापि शब्दस्यापत्यास्यासम्भवाच्छिनेः क्षत्त्रियस्यैव यान्यपत्यानि तेष्वित्यर्थः। अभेदेन - अभेदोपचारेण ।

ननु च राज्ञोऽपत्ये जातिग्रहणम् इति वचनाद् राजन्यशब्दः क्षत्त्रियजतिवचनः, ततश्च द्वैप्यभैमायना
इत्युक्तं प्रत्युदाहरण् नोपपद्यते, तेषामपि क्षत्त्रियत्वाद् अत आह -- राजन्यग्रहणमित्यादि । अन्धकवृष्णीनां क्षत्त्रियत्वाव्यभिचाराद्
राजन्यग्रहणमुक्तविशेषपरिग्रहार्थमिति भावः ।।

सङ्ख्या।। 6 - 2 - 35 ।।

एकादशोति । सङ्ख्याया अल्पीयस्याः इत्येकशब्दस्य पूर्वनिपातः, प्रागेकादशभ्यो छन्दसि इति निपातनाद्दीर्घः । द्वादशेति। द्व्यष्टनः सङ्ख्यायाम् इत्यात्वम् ।।

आचार्योपसर्जनश्चान्तेवासी।। 6 - 2 - 36 ।।

आचार्य उपसर्जनं यस्य स आचार्योपसर्जनः, अन्ते वसतीत्युन्तेवासी, शयवासवासिष्वकालाद् इत्यलुक्। गौणश्चायं निर्देशः। द्वन्दवस्य यान्यवयवपदानि तान्याचार्योपसर्जनवचनत्वादन्तेवासिवाचित्वाञ्च तथोच्यन्ते। तदवयवद्वन्द्वोऽप्यवयवधर्मेण तथोच्यते। पाणिनिशब्दादिञ् न भवतीति पूर्वमेवोक्तम् । रौढिशब्दादपि न भवति, न द्व्यचः प्राच्यभारतेषु इति निषेधात्।

आचार्योपसर्जनग्रहणं द्वन्द्वविशेषणमिति । न पूर्ववदविशेषणम् । प्रथमा तु सप्तम्यर्थे द्रष्टव्या । किमर्थं पुनर्द्वन्द्वविशेषणं विज्ञायते इत्याह -- सकलो द्वन्द्व इति। इह मा भूदिति। पूर्वपदविशेषणेत्वत्रापि स्यात् ।।

कार्त्तकीजपादयश्च।। 6 - 2 - 37 ।।

प्रकृतिस्परपूर्वपदा इति । प्रकृतिशब्दः स्पाभाविक् वर्त्त ते, प्रकृति -- स्वाभाविकः स्वरो येषां तानि प्रकृतिस्वराणि, एवंविधानि पूर्वपदानि येष्विति बहुव्रीहिः। कृतस्यापत्यम्, कुजस्यापत्यमिति । आणन्तानेताविति । ऋषिवाचित्वादाभ्यामण् । उत्तरपदस्य व्युत्पत्तिप्रदर्शनं प्रासङ्गिकम्, पूर्वपदस्यैव तु स्वरसिद्धये प्रदर्शनीयम् । माण्डूकेशब्दः ढक्च मण्डूकात् इति ढगन्तः।

अवन्त्यश्मका इति। अवन्तिशब्दोऽन्तोदात्तः, तस्मात् वृद्धेत्कोसलाजादाङ् तस्य तद्राजत्वाद्बहुषु लुक्, अवन्तीनां निवासो जनपदः, जातुरर्थिकस्याणा जनपदे लुक्। अश्मकशब्दात् साल्वावयव इत्यादिना इञ्, लुगादि पूर्ववत्।

श्यापर्णीति । शार्ङरवाद्यञो ङीन् ।

कपिरन्तोदात्त इति । प्रातिपदिकस्वरेण, कमु कान्तौ क्तिच्, पृषोदरादित्वादत उत्वम् ।

कुन्तिशब्दोऽन्तोदात्तः, अवन्तिवत्कुन्तयः। शोभनं राष्ट्रमस्य सुराष्ट्रः, तस्यापत्यानि बहूनि जनपदशब्दात्क्षत्त्रियादञ् लुगादि पूर्ववत् । चिति स्मृत्याम्, क्तिच्, कुन्तिवच्चिन्तयः ।

तडि ताडने, तण्डः, तस्मादेवावपुर्वाद्वतण्डः, वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः इत्यकारलोपः। मदी हर्षे, विपूर्वात् क्तः, न ध्याख्या इत्यादिना नत्वाभावः, न विमत्तोऽविमत्तः।

शलङ्कु शलङ्कं चेति । नडादिष्वेतत्पठ्यते । बभ्रोरपत्यं बाभ्रतवः, अण् । दानच्चयुतो दानच्युतः तदपत्यमपि दानच्युत एव। कटशब्दः पचाद्यजन्तः, लोकेऽक्षि यस्य स लोकक्षः, तस्यापत्यं लौकाक्षिः, तस्य
छात्त्रा लौकाक्षाः । स्त्रीकुमारमिति । समाहरद्वन्द्वः ।

मुद हर्षे, इगुपधलक्षणः कः, मुदः, पिप्पतमत्तीति पिप्पलादः, कर्मण्यण् । वदेः सः, वत्सः, जीर्यतेरतृन्, जरन् , तयोः समाहारद्वन्द्वः ।

षिद्भिदादिभ्योऽङ्, जरा । भुजिमृङ्भ्यां युक्त्युकौ मृत्युः ।।

महान् व्रीह्यपराह्वगृष्टीष्वासजाबालभारभारतहेलिहिलरौरवप्रवृद्धेषु।। 6 - 2 - 38 ।।

महच्छब्दोऽन्तोदात्त इति । वर्तमाने पृषद्बृहन्महनत् इत्यत्र तथा निपातनात् । तस्येत्यादि । एतञ्च लक्षणप्रतिपदोक्तपरिभाषया लभ्यते ।

यद्येवम्, प्रवृद्धग्रहणमनर्थकम्, कर्मधारयेऽनिष्ठा इति वक्ष्यमाणेनैव सिद्धत्वात्, कृद्ग्रहणे गरिकारकपूर्वस्यापि ग्रहणम् इति प्रवृद्धशब्दस्यापि क्तान्तत्वाद् अत आह - कर्मधारयेऽनिष्ठेत्ययमपीति ।
तत्रापि लक्षणप्रतिपदोक्तपरिभाषया क्तान्तेन प्रतिपदोक्तो यः कर्मधारयस्तस्य ग्रहणमित्यर्थः ।।
क्षुल्लकश्च वैश्वदेवे।। 6 - 2 - 39 ।।
क्षुधं लातीति क्षुल्लः। आतोऽनुपसर्ग कः, तोर्लि इति परसवर्णः ।।
उष्ट्रः सादिवाम्योः।। 6 - 2 - 40 ।।
उष्ट्रशब्दः ष्ट्रन्प्रत्ययान्त इति। उष दाहे इत्येतस्मात् ष्ट्रन् इति वर्तमाने उषिखनिभ्यां कित् इत्येवं व्युत्पादितत्वात् ।।
गौः सादसादिसारथिषु।। 6 - 2 - 41 ।।
गोसादा इति । सदेर्घञ्, ततः, षष्ठीसमासः । गां सादयतीति वेति । सदेर्ण्यन्तात्कर्मण्यण्, तस्मादेव णिनिः - गोसादी । अत्र सादसादिनोः कृत्स्वरस्यापवादः, सारथौ तु समासस्वरस्य।।
कुरुगारिहपतरिक्तगुर्वसूतजरत्यश्लीलदृढरुपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च।। 6 - 2 - 42 ।।
अत्र कुरुगार्हपतेत्येवमादयः पण्यकम्बलपर्यन्ताः सप्त समासाः । तत्रादितो द्वाविविभक्तिकौ, इतरे प्रथमैकवचनान्ताः। सा च प्रथमा सुब्व्यत्ययेन षष्ठ्याः स्थाने द्रष्टव्या । दासीभाराणामिति । बहुवचननिर्देशादाद्यर्थो व्याख्यायते।
कुर्भ्रुश्च, कृग्रो रुच्च -- कुरुः, वृजी वर्जने निदित्यधिकारे इगुपधात्किः -- वृजिः, फिषि तु इगन्तानाञ्च द्व्यषाम् इति पत्रेऽन्तोदात्तः। तस्यार्थः- नजपदशब्दानामिति वर्तते,अन्तः पूर्वो वा इति च,जनपद वाचिनामिगन्तानां द्व्यचामादिरुदात्तो भवति अन्तो वा - काशयः ,चेदयः। एतेन कुरुशब्दो व्याख्यातः।
रिक्तपूर्वादयः कर्मधारयाः। श्रीर्यस्यास्तीति श्रीशब्दो लावण्यवचनः । कपिलकादित्वाल्लत्वमिति । कृपो रो लः इत्यत्रैतद्वक्ष्यते । श्रीर्यस्यास्ति तच्छ्रीलशब्देनोच्यत इति । एतदेवोपपादयति -- अशलीलदृढरूपेति हीति । संस्थानमात्रेण शोभनेति। कुब्जत्वादीनामभावात्, दृढत्वाच्च संस्थानस्य । मात्रशब्दव्यार्व्यं दर्शयति - निःश्रीकेति । असेयैवार्यं विस्पष्टीकरोति - लावण्यरहितोति ।
तितिलिनोऽपत्यमिति। तिलशब्दान्मत्वर्थीय इनिः, पृषोदरादित्वात्तिशब्दस्य द्विर्वचनम्। तत्र यदापत्येऽर्थेऽण् तदा नस्तद्धिते इति टिलोपः यदा तु छात्त्रे तदा नान्तस्य टिलोपे इत्यादिनोपसङ्ख्यानेन टिलोपः । ये तु तत्र तैतिलिशब्दं पठन्ति, तेऽत्रापि तैतिलिनोऽपत्यमिति विगृह्णन्ति, पृषोदरादित्वेनेव च रूपसिद्धिः । पण्यशब्दः अवद्यपण्य इत् यदन्तः यतोऽनावः इत्याद्युदात्तः।
पण्यकम्बलः संज्ञायामिति । नियतप्रमाणस्य वियतमूल्यस्य कम्बलस्यैषा संज्ञा । समासन्तोदात्तत्वमेवेति । ननु च पण्यशब्दस्य कृत्यप्रत्ययान्तत्वात् तत्पुरुषे तुल्यार्थ इति पूर्वपदप्रकृतिस्वरेण भाव्यम् अत आह प्रतिपदोक्ते हीति । कृत्यतुल्याख्या अजात्या इति यः कृत्यसमासः प्रतिपदोक्तः, तत्रैव स स्वरः । अयं तु विशेष्यण इति सामान्यलक्षणविहितः,कम्बलशब्दस्य जातिशब्दत्वात्। कृत्यतुल्याख्या अजात्या इत्येतद्धि गुणक्रियावाचिनामनियते पूर्वनिपातप्रसङ्गे कृत्यान्तस्य पूर्वनिपातार्थम्, न तु जातिप्रतिषेधार्थम् । आनात्येति तु वचनं न्ययसिद्धार्थानुवाद एवेति स्थितिः। चन्द्रे माङो डिच्च इति मिथुनेऽसिः, पूर्ववच्च सर्वमित्यसिप्रत्ययः प्रकृतः। चन्द्रशब्द उपपदे माङ्माने इत्यस्मादसिप्रत्ययो भवति डिच्च, डित्त्वाट्टिलोपः, चन्द्रमिव मीयते चन्द्रमाः। चन्द्रमिति रजतम्, अमृतं च। चन्द्र इति वा मीयते चन्द्रमाः। चन्द्रशब्दस्तु स्फायितञ्चि इत्यादिना रक्प्रत्ययान्तः।
यस्य तत्पुरुषस्वेत्यादिना दासीभारादेराकृतिगणत्वं दर्शयति।।
चतुर्थी तदर्थे ।। 6 - 2 - 43 ।।
तस्मै इदं तदर्थम् , तच्छब्देन चतुर्थ्यन्तार्थ उच्यते, यदाह -- तदभिधेयार्थं यदिति। तस्य चतुर्थ्यन्तस्य यदभिधेयं तदर्थमित्यर्थः । रमन्तऽस्मिन्स्थिता इति रथः, हनिकृषिनीरमिकशिभ्यः क्यन्, अनुदात्तोपदेश इत्यनुनासिकलोपः,वल्लीशब्दो गौरादिङीषन्तः ।
तदर्थ इति किम्,कुबेरबलिरिति । अत्र तादर्थ्यस्य भावाद् गोसुखमिति प्रत्यदाहार्यं मन्यन्ते । प्रकृतिविकारभावे स्वरोऽयमिष्यत इति । समासप्रकरण एवैतत्सम्यगुपपादितम्, आत्रापि ज्ञापकं वक्ष्यति।।
अर्थे।। 6 - 2 - 44 ।।
तदर्थविशेषा एव दारुहिरण्यादयो भवन्तीति। दारुहिरण्यादयो विशेषा एव तदर्था भवन्तीत्यर्थः । तादर्थ्यं हि तच्छेषभावः, सच विशेषाणमेव भवति, न सामान्यस्यति मन्यते ।
केचित्पुनरित्यादि । त एवं मन्यन्ते नेयं राजाज्ञा - विशेषा एव तदर्था इति, तेन सामान्यवाचिन्यप्यर्थशब्दे पूर्वेणैव सिद्धम् इति । अश्पघास इति । ननु च तदर्थेन प्रकृतिविकारभावे समासः इत्यक्तम् अश्वघासादयः षष्ठीसमासाः इति च एवं मन्यते -यदात्र प्रकृतिविकारभावे स्वे इति स्थितम् ,तदाश्वघासादौ चतुर्थोसमासेऽपि दोष इति। श्वश्रुश्वशुरमिति। विभाषा सेना इत्यादिना नपुंसकत्वम्।।
क्ते च ।। 6 - 2 - 45 ।।
गोभ्यो रक्षितं दीयत इति सम्प्रदाने चतुर्थीति। अथ तादर्थ्ये चतुर्थ्या को दोषः चतुर्थो तदर्थे इत्येव स्वरस्यसिद्धत्वात् । नैतदस्योदाहरणमुपपद्यते कथम् प्रकृतिविकारभावे स्वरः इत्युक्तम्, न चात्र प्रकृतिविकारभवः सत्यम् समासविधौ तु रक्षितग्रहणस्येदं प्रयोजनं दर्शितम् ।।

कर्मधायेरऽनिष्टा ।। 6 - 2 - 46 ।।

श्रिञ् सेवायाम्, औणादिके निन्प्रत्यये श्रेणिः, मुदि ग्रो गग्गौ,बहुलवचनात्पूङोऽपि गक् पूगः। कृताकृतमिति । क्तेन नञ्विशिष्टेनानञ् इति समासः । अनिहष्टेत्यनुच्यमानेऽत्रैव स्यात्, अयं हि क्तसंशब्द नेन विहितत्वाच्छ्रेण्यादिसमासादपि प्रतिपदोक्तः ।।

अहीने द्वितीया।। 6 - 2 - 47 ।।

हीनम् - त्यक्तम्। अहीनयाचिनि समास इति । पूर्वपदद्वारेण तसमासस्याहिनवाचित्वम्।

द्वितीयानुपसर्ग इति वक्तव्यमिति । अहीनग्रहणमपनीय अनुपसर्गग्रहणं कर्तव्यम्, व्यापकत्वादित्यर्थः। इह मा भूदिति। इहापि मा भूदित्यर्थः। अनुपसर्गग्रहणे चेह क्रियमाणे प्रवृद्धादिषु खट्वारूढशब्दो न पाठ्यः, आरूढशब्दस्य सोपसर्गत्वात्। एतत्स्वराभावे थाथादिस्वरेणैवान्तोदात्तस्य सिद्धत्वात्।।

तृतीया कर्मणि ।। 6 - 2 - 48 ।।

अयमपि थाथादिस्वरपवादः। अहिरन्तोदात्त इति । आङ्पूर्वाद्धनो डिप्रत्ययः, आङश्च ह्रस्वः। आहन्ति परान्, आहन्यते परैरिति वा अहिः। केचिदिति। ते तत्रोदात्तग्रहणमनुवर्तयन्ति, तथात च -अहन्नहिम्, अहिरिव भोगैरिति आद्युदात्तमधीयते ।।

गतिरनन्तरः।। 6 - 2 - 49 ।।

अनन्तरः इति पुंल्लिङ्गनिर्देशाद् गतिशब्दः क्तिजन्तः, निपातनाच्चानुनासिकलोपः। प्रकृतः, प्रहृत इति । अत्र समासान्तोदात्तत्वम्, अव्ययपूर्वपदप्रकृतिस्वरत्वम्, कृत्सवरः, थाथादिस्वरः, इत्येतेषु प्राप्तेषु पूर्वपदप्रकृतिभावे विधीयते।

व्यवहितस्य गतेरयं स्वरी न भवतीति। ननु च निर्दिष्टग्रहणमानन्तर्यार्थम्, प्रत्ययग्रहणपरिभाषया च ह्रतशब्दस्क्तान्तः, तत्कथं क्तान्ते परतो विधीयमानो व्यवहितस्य प्रसज्यते कृद्ग्रणपरिभाषाया

क्तान्तेऽनुप्रवेशादुच्छब्दस्य प्रसङ्ग इति चेत्, यद्येवम्, क्रियमाणेऽप्यनन्तरग्रहणे स्यात्, उद्धृतशब्दः क्तान्तस्तस्यानन्तर एव गतिरिति एव गतिरिति नैष दोषः, अनन्तरग्रहणसामर्ध्याद्धान्तोरनन्तरो गतिराश्रयिष्यते । नन्वेवमप्यत्र परत्वाद् गतिर्गतौ इति निघातो भविष्यति, सति च तस्मिन् उदात्तस्वरिताधिकारादेव पूर्वपदप्रकृतिस्वरस्याप्रसंग इति व्यवहितनिवृत्त्यर्थमनन्तरग्रहणं न कर्तव्यम् अनन्तरप्राप्त्यर्थं तु । तत्र च यत्रैक एव गतिस्तत्र नार्थाऽनेन । यत्र त्वनेको गतिस्तत्रासौ न प्राप्नोति, तानन्तर इत्यनेनानेकगतिसमवधानेऽनन्तरस्य प्राप्नोति, तदनन्तर इत्यनेनानेकगतिसमवधानेऽनन्तरस्य प्राप्यते अन्यथाऽभ्युद्धृतमित्यत्रोद्धृतशब्दस्य कृद्ग्रहणपरिभाषया क्तान्तत्वे सति समासान्तोदात्तत्वे तदपवादे च कृत्स्वरे तदवपादस्थाथादिस्वरः प्राप्नोति। ननु च यथा प्रथमे समासे गतिस्वरेण बाधितस्य थाथादिस्वरस्य पुनर्द्वितीये समासे प्राप्तिः, तथा तदपवादो गतिस्वरोऽप्यनेन पुनर्भविष्यति नैतदेवम् अपूर्वपदत्वात् । कुगतिप्रादयः इत्यत्र निष्कान्तोदौ पदकार्यप्रवृत्तये सुबित्यनुवर्तनीयम्, तत्रैकत्वस्य विवक्षितत्वात्सुबन्तसमुदायस्य चासुबन्तत्वान्न दूयोर्युगपत्समासो लभ्यत इति क्रमेणासौ विधेयः । गतिकारकोपपदानाम् इत्यनेनाप्युत्तरपदस्य

प्राक् सुबुत्पत्तेः समास उच्यते, न पूर्वपदस्यापि निष्क्रान्तचर्मकारादौ पदकार्यस्यासिद्धिप्रसङ्गात् । अत उच्छब्दस्य पूर्वं समासः, पश्चादुद्धृतशब्देनाभिशब्दस्य, ततश्चाभिशब्द एव पूर्वपदं नोच्छब्द इति

पूर्वपदं नोच्छब्द इति पूर्वपदस्य गतेः प्रकृतिस्वरो विधियमानोऽपूर्वपदो न स्याद् । अतः कक्षान्तरप्र्तमपि थाथादिस्वरं बाधित्वऽपूर्वपदस्याप्यनन्तरस्य वाक्यभेदेन प्रकृतिभावो यथा स्यादित्येवमर्थमनन्तरग्रहणम्। तदाह -- अनन्तरे पुनरिष्यत इति ।

यद्येवम्, कारकबूर्वेऽतिप्रसङ्गः, दूरादागतो प्राप्तो देवदत्तेनेत्यत्राप्यागतशब्देन स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन इति समासे कृते तस्यामवस्थायां थाथादिस्वर इष्यते, तमपि बाधित्वाऽपूर्वपदस्याप्युद एव स्वरः प्राप्नेति नैष दोषः थाथादिसूत्रे गतिग्रहणं निवतिष्यते ततः किम् प्रकृतमित्यादौ कृत्स्वरस्यैव प्राप्तत्वात्तस्यैव गतिस्वरापवादः,न तु थाथादिस्वरस्य प्रसङ्गः, तत्र स एव भविष्यति। अभ्युद्धृतमित्यादौ तु यत्र कक्षान्तरेऽपि कृत्स्पर एव प्राप्तस्तत्रापि स एव भविष्यतीति ततश्चापूर्वपदार्थमनन्तरग्हणमपि न कर्तव्यं भवति। कथम् उद्धृतशब्दे गतिस्वरे प्रवृत्ते पश्चादभिशब्दस्य समासे कृते गतिर्गतौ इति इति निघाते चोदात्तस्वरिताधिकाराद् गतिरित्यस्य पूर्वपदप्रकृतिभावस्याप्रवृत्तौ समासस्वरापवादः कृत्स्वरो भवन् कृद्ग्रहणपरिभाश्योद्धृतशब्दस्य कृदन्तत्वात्तत्स्वर उच्छब्दोदात्तत्वमेव भविष्यति। यदि थाथादिशूत्रेण गतिग्रहणं निवर्त्तिष्यते

प्रभेद इत्यत्र कृत्स्वरेण घञो ञित्त्वाद्धातोरुदात्तत्वं स्याद,अन्तोदात्तत्वं चेष्यते। एवं तर्ह्यनुवर्तते गतिग्रहणम्,क्तेन तु न सम्बद्ध्यते,तत्कथं थाथादिसूत्रात् क्तग्रहणमपनीय पृथक्कर्तव्यम् तत्र च गतिग्रहणं निवर्त्तिष्यते ।

एवमपि विशुष्क इत्यादौ यत्र कर्तरि क्तान्तमुत्तरपदम् शुष्कधृष्टौ इत्याकारकपूर्वस्य त्वित्यादि।

कारकपूर्वस्य तु सति शिष्टत्वात थाथादिस्वर एव भवति दूरदागत इति। दिना चाद्युदात्तम् तत्र कृत्स्वरे सत्युत्तरपदमाद्युदात्तं स्यादन्तोदात्तं चेष्यते।अतः कृद्ग्रहणेनापि गतिग्रहणमवश्यं सम्बन्धनीयम्,ततश्च पूर्वोक्तदोषप्रसङ्गः,तत्राह-कारकपूर्वस्य त्विति। अयमभिप्रायः-अनन्तरशब्दोऽयमननन्तरमपेक्ष्य प्रवर्तते,तत्र च अनन्तरो गतिः इत्युक्ते अननन्तरोऽपि गतिरेव प्रतीयते सन्निधानात्। ततश्चापूर्वपदार्थमप्यन्न्तरग्रहणं गतिद्वयसमवधान एवानन्तरस्य प्रकृतिस्वरत्वं प्रापयतीति दूरादागत इत्यादौ न दोष इति।

अथ वा - कारकाद्दत्तश्रुतयोरेवाशिषि इत्यत्र कारकादिति विभज्यते, तत्र च क्तप्रहणमनुवर्तते, अन्तोदात्तः इति गतिः इति च, कारकात्परं क्तान्तमुत्तरपदमन्तोदात्तंभवतीत्यर्थः। तत्र दूराद् गत इत्यादौ थाथादिसूत्रेणै वान्तोदात्तत्वस्य सिद्धत्वाद् दूरादागत इत्यादौ गतिरनन्तरः इत्यनन्तरग्रहणेनैवापूर्वपदार्थेन प्राप्तास्य गतिस्वरस्यापवादः कारकादित्ययं योगो ज्ञायते। यद्येवम्, अनन्तरग्रहणं न कर्तव्यम्,कथम् असत्यनन्तरग्रहणे

दूरादागतः,आभ्युद्धृत तइत्वादौ सर्वत्र द्वितीये समासे कृते सतिशिष्टस्थाथादिस्वर एव प्राप्तः, ततश्च कारकादित्ययं योगो नियमार्थो भवति। तत्र च गतिग्रहणमनुवर्तयितव्यम्, ततश्चात्रायमर्थः - कारकादेव परं सगतिकं क्तान्तभुत्तरपदमन्तोदात्तमिति। ततश्चाभ्युद्धृत इत्यादौ नियमेन थाथादिखरे व्यावर्तिते कृत्स्वरो भवन् कृट्ग्रहणपरिभाषयोद्धृतादेः कृदन्तत्वात्तस्यैव यः स्वर आद्युदात्तत्वं स एव भविष्यति। ननु च विपरीतोऽपि नियमः सम्भाव्येत - कारकात्परं सगतिकमेवेति,ततश्च पूर्वह्णशुष्क इत्यत्र थाथादिस्वरे कृत्स्वरेण शुष्कधृष्टौ इत्याद्युदात्तत्वं श्रूयेत नैष दोषः,आचार्येप्रवृत्तिर्ज्ञापयति - न विपरीतो नियम इति, यदयम् दत्तश्रुतयोरेवाशिषि इत्याह। न हि विपरीते नियमे कारकात्परयोर्दत्तक्षुतयोरन्यस्य वा क्तान्तस्योत्तरपदस्यान्तोदात्तत्वं प्रसक्तम्। अतो नार्थोऽपूर्वपदार्थनानन्तरग्रहणेन । एवं तर्हि व्यवहितनिवृत्त्यर्थमेवानन्तरग्रहणम्, ननु चोक्तम्-परत्वाद् गतिर्गतौ इति निध्ते कृते उदात्तस्वरिताधिकारादेव प्रकृतिभावस्याप्रसङ्गः इति यत्र तर्हि गतिर्गतौ इति निघातो नास्ति तत्र प्रसङ्गः। क्व चासौ नास्ति

पादादौ। वक्ष्यति हि आ पादपरिसमाप्तेरपादादावित्यधिकारः इति, तथा च चउपप्रेतकुशिताश्चेतध्वमिति पादादावुपशब्दं गतिपरमपि उदात्तमधीयते,तथाभ्युद्धृतमिति यदाभिशब्दः पादादौ वर्तते तदा निघाताभावादनेन व्यवहितस्यापि गतेः प्रकृतिभावः स्यात् नैतदस्ति यावता प्रत्ययग्रहणपरिभाषया ह्रतशब्दः क्तान्तः,नोद्धृतशब्दः। एवं तर्ह्येतद् ज्ञापयति-कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति।

ननु कृद्ग्रहणे गतिपूर्वस्य ग्रहण् ज्ञापितम्,कारकपूर्वस्य तु कथम् उच्यते पूर्वचार्यैस्तावदेषा परिभाषा व्युत्पादिता,इहाप्यनन्तरग्रहणेनैकदेशद्वारेण कृत्स्न एव परिभाषार्थो ज्ञाप्यते। यदित कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवति, कथं समुद्धृत इति प्रत्युदाहरणम्, यावता उद्धृतशब्दः क्तान्तः, तस्य चानन्तर एव सम् इत्यत आह - अनन्तरग्रहणासामर्थ्यादिति । इह व्यवहितनिवृत्तिफलेनानन्तरग्रहणेन परिभाषाया ज्ञापनादन्तत्रैतत्फललाभ इति भावः ।

प्रकृतः कटमिति । आदिकर्मणि क्तः कर्तरि च इति कर्तरि प्रत्ययः।।

तादौ च निति कृत्यतौ ।। 6 - 2 - 50 ।।

प्रजल्पाक इति। जलपभिक्ष इति षाकन्। इह गतेः स्वरो विधीयते,क्रियायोगे च गतिसंज्ञा, धातुश्च क्रियावाची, धातोश्च द्वये प्रत्ययाः - कृतस्तिङश्च, तत्र तिङन्ते पूर्वपदस्यासम्भवात्कृदन्तादेव भविष्यति, नार्थः कृद्ग्रहणेन इदं तर्हि प्रयोजनम् -यथा तादिग्रहणं कृद्विशेषणं विज्ञायते तकारादौ निति कृतीति अन्यथा नितीत्यनेन प्रत्ययग्रहणपरिभाषया तदन्तस्योपस्थानात्तस्यैवोत्तरपदस्य तकारादित्वं विशेषणं स्यात्। ततश्चेहैव स्यात् - प्रतरिता, प्रतरितमिति इह न स्यात् - प्रकर्त्तुम्। नैतदस्ति प्रयोजनम् ,क्रियमाणेऽपि कृद्ग्रहणे अनिष्टं शक्यं विज्ञातुम्तकारादावुत्तरपदे निति कृतीति, अक्रियमाणेऽपि चेष्टम् निद्यस्तकारादिस्तदन्तउत्तरपदेति ततश्च यथा उतश्च प्रत्ययात् इत्यत्रासंयोगपूर्वग्रहणेनोकारो विशेष्यते न प्रत्ययः, तथेहापि नित एव विशेषणं तादिग्रहणं भविष्यतीति अत्राह कृद्ग्रहणामुपदेशे ताद्यर्थमिति। अयमभिप्रायः - कृद्ग्रहणेन कृत्संज्ञाप्रवृत्तिकाले यस्तादिस्तत्रेति । किमेवं सति सिद्धं भवति तत्राह - इहापीति । असति कृद्ग्रहणे, तादिग्रहणेन स्वरप्रवृत्तिसमये यस्तादिस्तत्रेति विज्ञायेत, ततश्च प्रलपितेत्यादौ इडागमे कृते न स्यात् सम्प्रत्यतादित्वात् , कृद्ग्रहणात्तु भवति

आदिग्रहणं तु शक्यमकर्तुम् ,यस्मिन्विधिस्तदादावल्ग्रहणे।। तवै चान्तश्च युगपत्।। अन्त उदात्तो भवतीति। कथं पूनरन्तरेणोदात्तग्रहणमुदात्तो भवतीत्ययमर्थो लभ्यते एवं मन्यते प्रकृत्येति वर्तते, तत्रैवमभिसम्बन्धः क्रियते-तवैप्रत्ययान्तस्य यः स्वरः प्रकृत्याशर्यः प्राप्तः सोऽन्तस्य भवतीति, स चोदात्त एवति। युगपदिति पर्यायनिवृत्त्यर्थम्।।

अनिगान्तोऽञ्चतौ वप्रत्यये।। 6 - 2 - 52 ।।

वप्रत्यय इति। वकारः प्रत्ययो यस्य स तथोक्तः। प्राङिति। ऋत्विक् इत्यादिना क्विन्। स च वकारमात्र एव ककारादीनाम नुबन्धत्वात्। उगिदचाम् इति नुम् हल्ङ्यादिसंयोगान्तलोपौ। क्विन्प्रत्ययस्य कुः इति कुत्वम् - चकारस्य ङकार। पराङिति। पारशब्द आद्युदात्तः, तेनात्र स्वरितो वाऽनुदात्तेऽपदादौ इत्येष विधिर्न भवति। प्रत्यङिति। ननु चात्रान्तरङ्गत्वाद्यणादेशे कृते,अनिगन्तत्वात्प्रकृतिभावेन भवितव्यम्, अनिगन्तः इत्यस्य तु प्रतीच इत्यादिरवकाशः तत्र अचः इत्यकारलोपाद्यणादेशाभावः। न च यणादेशस्य स्थानिवद्भावोऽस्ति अपूर्वविधित्वात्, पूर्वपदस्य प्रकृतिस्वरविधानात् यत्तर्हि न्यधीचेत्यधेः प्रकृतिभावं शास्ति,

तज्ज्ञापयति-यण्विषयऽयं स्वरो न भवतीति। यदि स्याद्,अध्यङित्यत्राप्यऽनेनैव सिद्धं स्यात्। नैतदस्ति ज्ञापकम्,अधीच इत्यादौ यत्र यण् नास्ति तदर्थमेतत्स्यात् यत्तर्हि नेः प्रकृतिस्वरं शस्ति,निशब्दस्यैकाच्त्वाद्,नीच इत्यादावुत्तरस्य प्रकृतिस्वरस्य च विशेषो नास्ति। एतदपि न ज्ञापकम्, वचनसामर्थ्यादकृत एवान्तरङ्गे यणादेशे निशब्दस्य स्वरार्थमेतत्स्यात्,यणआदेशे कृते स्वरभाजोऽभावात् प्रत्यङादिषु तु यणादेश एवान्तरङ्गत्वात्प्राप्नोति,तस्माद्यण्विषये प्रतिपेधो वक्तव्यः न वक्तव्यः स्थानिवद्भावात्सिद्धम्। ननु चोक्तम् पूर्वपदस्य प्रकृतिस्वरो न यणः पूर्वस्य इति नैतदस्ति उक्तमेतत् पूर्वपदशब्दः पूर्वपदस्योद उदात्ते स्वरिते वा वर्तते इति।

चोरिति। चौ इति यत्पूर्वपदन्तोदात्तत्वं विधी.यत् तच्चुशब्देन लक्ष्यते। चोः-चुस्वरादित्यर्थः। एष स्वरो भवतीति । विप्रतिषेधेनेति भावः। चुस्वरस्यावकाशः दधीचः दधीचात,यत्र गतिर्नास्ति अनिगन्तस्वरस्यावकाशः -पराङ्, पराञ्चौ,पराञ्चः, पारच इत्यादावुभयप्रसङ्गे परत्वादिनिगन्तस्वर एव भवति। नायं युक्तो विप्रतिषेधः, चुस्वरःसतिशिष्टः कथम् चौ इत्युच्यते, यत्रास्यैतद्रूपम्, भसंज्ञावनिमित्ते प्रत्यये,अल्लोपे च कृते सम्भवति एवं तर्हि नायं विप्रतिषेध उपन्यस्तः किं तर्हि इष्टिरेषा चोरनिगन्तोञ्चतावप्रत्यय इत्येष स्वर इष्यते इति।।

नयधी च।। 6 - 2 - 53 ।।

अधीच इति। अत्रापि कृत्स्वरादयमेव इष्यत इति दर्शयति।।

ईषदन्यतरस्याम् ।। 6 - 2 - 54 ।।
ईषद्भेद इत्यादौ तु कृत्स्वंर एव भवतीति । परत्वात् । अपर तआह - ईषदकृता तइति प्रतिपदेक्तस्य समास्य ग्रहणादुपदसमासस्याप्रवृत्तिरिति ।।
हिरण्यपरिमाणं घने ।। 6 - 2 - 55 ।।
हिरण्यपरिमाणवाचीति । परमाणविशिष्टहिरण्यवाचीत्यर्थः । तत्र सुवर्णशब्दः परिमाणे, उपपदादौ तत्परिच्छिन्ने हिरण्य च वर्तते, यथा - प्रश्थादिशब्दो दार्वादिनिर्मिते परिमाणे तत्परिमिते च व्रीह्यादौ वर्तते । पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश पलं सुवर्णाश्त्वारः , द्वयोः सुवर्णयोः समाहारो द्विसुवर्ण पात्त्रादि । द्विसुर्णपरिमाणमिति । अत्र सुवर्णशब्द उपले वर्तते । काञ्चनधनमिति । परिमाणग्रहणमकृत्वा हिरण्यमित्युच्यमाने इहापि स्यात्, काञ्चनशब्दस्य हिरण्यवाचित्वात् । परिमाणवाची त्वेष न भवति ।।
कतरकतमी कर्मधारये ।। 6 - 2 - 57 ।।
इह त्वित्यादि । कतरकतमौ जातिपरिप्रश्ने इति प्रतिपदसमासः तस्येह ग्रहणम्, स कर्मधारय एव । तस्मान्नेडार्यं कर्मधारयग्रहणमिति भावः ।
राजा च ।। 6 - 2 - 59 ।।
राजाब्राह्मण इति । राजशब्दो ब्राह्मणे ताद्धूर्म्यादूर्तत इति सामानाधिकरण्यात्कर्मधारयः, राजशब्दः कनिन्प्रत्ययान्तत्वादद्युदात्तः ।
पृथग्योगकरणमुत्तरार्थमिति । उत्तरो विधी राजशब्दस्यैव यथा स्यात्, आर्यशब्दस्य म भूत् । यथासङ्ख्याभावोऽपि पृथग्योगकरणस्य प्रयोजनम्, तत्तु नोक्तमित्येतावत् ।।
षष्ठी प्रत्येनसि ।। 6 - 2 - 60 ।।
राज्ञः प्रत्येना इति । षष्ठ्या आकोशे इत्युलुक् ।।
क्ते नित्यार्थे ।। 6 - 2 - 61 ।।
नित्यशब्द आभीक्ष्ण्ये कौटस्थ्ये च वर्तते , इह त्वाभीक्ष्ण्ये। कृत एतत् क्त इत्युच्यते, क्तश्च इत्युच्यते, क्तश्च धातोर्विधीयते, धातुश्च क्रियावचनः, क्रियायाः क्षणिकत्वात्कौटस्थ्यं नोपपद्यते, तस्मादाभीक्ष्ण्य नित्यशब्दः । द्वतीयासमासोऽयमिति । द्वितीय पुनरत्यन्तसंयोगे अथ वा - कर्णणि, कालभावाध्वगतव्याः कर्मसंज्ञा ह्यकर्मणाम् इति तततम् इति भावे क्त इत्यादि । यदा तु कर्मणि क्तः तदा गतिरनन्तरः इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तो भवति । समासस्वरस्य द्वीतियापुर्वपदप्रकृतिस्वरो बाधकः, तस्य थाथादिस्वरः, तस्यापवादः ।।
ग्रामः शिल्पिनि ।। 6 - 2 - 62 ।। ग्रम इति स्वरुपग्रहणम् ।।
राजा च प्रशंसायाम् ।। 6 - 2 - 63 ।।
षष्ठीसमासे चेति । प्रशंसेत्यनुषङ्गः । राजयोग्यतया तस्येति । स हि कर्मणि प्रवीणत्वाद्राजानं प्रति योग्यो भवति । राजार्ह इति चोक्ते प्रशंसा गम्यते ।।
आदिरुदात्तः ।। 6 - 2 - 64 ।।
पूरपदगमित्यस्येहार्थात्षष्ठ्या विपरिणामः । सर्वत्र वात्र प्रकरणे पूर्वपदविषये षष्ठ्यर्थे प्रथमा ।।
सप्तमीहारिणी घर्म्येऽहरणे ।। 6 स- 2 - 64 ।।
हारीत्यावश्यके णिनिः । घर्म्ये इत्यर्थग्रहणम् । हरणप्रतिषेधात्तस्ताहचर्याद्धारीत्यर्थग्हणम् । आचारनियतमिति । आचारेण नियनमाचारनियतम्, आचारवशादवश्यकर्तव्यमित्यर्थः । कथं पुनस्ताद्धर्म्यम् तत्राह - घर्मो ह्यनुवृत्त आचार इति । जनपदे ग्रामे चरणे कुरु वाऽनुवृत्तः परम्परायात इत्यर्थः । तस्मादनपेतं धर्म्यम्, धर्मपथ्यर्थ इत्यादिना यत् । तेन वा प्राप्यमिति । नौवयोधर्म इत्यादिना यत् । याज्ञिकाश्वादौ षष्ठीसमासः ।
चिदित्यादिना शाणादेर्देयस्याचारनियततां दर्शयति । याज्ञिकादीनामश्वादीति । दातव्यमित्यनुपङ्गः ।
क्वचिदयमाचारा व्यपस्थित इति च । वर्द्धितको नाम - मूले स्थूलोऽग्रे सूक्ष्म ओदनपिण्डः, स कर्मकराय दीयते, अन्यथा कर्म न कुर्यादिति, न त्वयं धर्मः । बीजावाबः - वीजनिषेकः, गर्भाधानम् । वाडवहरणमिति । क्वचिदयमाचारो व्यवस्थितः - वाडवाय बीचनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं योग्यमश्नादि दात्व्यमिति । हरणशब्दः कर्मसाधनः । अत्रास्मिन्स्वरे निवृत्ते कृत्स्वरे प्राप्ते अनो भावकर्मवचनः इत्युत्तरपदान्तोदात्तत्वं भवति । ननु च परत्वादेवायं स्वरो भवतिष्यति, तत्किं हरणप्रतिषेधेन तत्राह - परोऽपीत्यादि । अत्र पूर्वपदानां स्वरो नाऽऽख्यातः अप्रयोजनत्वात् ।।
युक्ते च ।। 6 - 2 - 66 ।।
वल्लवादयः शब्दा गवादीनां पालकवचनाः । मथणिं ददातीति मणिन्दः पृषोदरादिः । गाः सञ्चष्टे, समि ख्यः इति कः गौसंख्यः, उपपदसमासः । नन्वत्र परत्वात्थाथादिस्वरः प्राप्नोति, अस्य तु गौबल्लवादिरवकाशः सत्यम्, पूर्वविप्रतिषेधास्त्वत्र पठितव्यः, चित्स्वराद्धारिस्वरः - पितृगवः, मातृगावः, कृत्स्वराञ्च वाडवहार्यम् । युक्तस्वरश्च कृत्स्वरादित्येव, कृतो यः स्वरस्थाथादिसृत्रेण तस्माद्युक्तस्वरो भवति पूर्वविप्रतिषेधेनेत्यर्थः । युक्तः समाहि इति । युज समाधौ इत्यसेयैतद्रूपमित्यर्थः ।।
विभाषाऽध्यक्षे ।। 6 - 2 - 67 ।।
अध्यक्षशब्दोऽपि समासे युक्तवाच्येवेति सूत्रे पूर्वेण नित्ये प्राप्ते विकल्पः ।।
पापं च शिल्पिनि ।। 6 - 2 - 67 ।।

पापमिति स्वरुपग्रहणम्, शिल्पिनीति चार्थग्रहणम् व्याख्यानात् ।।

गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे ।। 6 - 2 - 69 ।।

गोत्रान्तेवासिनोरर्थग्रहणम्, इतरयोः स्वरुपगरहणम्। अपत्याधकारादन्यत्र लीकिकं गोत्रमित्यनेन लौकिकमपत्यमात्रं गोत्रं गृह्यते । जङ्घादानगहं ददानीति । जङ्घादानं करवाणीत्यर्थः , ओदनपाकं पचतीतिवत् । अत्र शाद्वादा वात्स्यानाभव पादप्रक्षालनं क्रियते, तत्रावात्स्यः सन्वात्स्योऽहणिति ब्रूतं, तल्लाभाय जङ्घावात्स्य इति क्षिप्यते । वत्सश्बदो सौश्रुतः । भार्याप्रधानतयेति । शाकपार्थिवादित्वादुत्तरपदलोपी समास कइति दर्शयति । वशाब्राह्मकृतेय इति वशा - वन्ध्या भार्या, सौश्रु तवत्समासः । दक्षेण प्रोक्तं दाक्षम्, तदधीते दाक्षः, दाक्षेश्छात्त्रो वा दाक्षः । चारशब्दो नडादिः, चारायणेन प्रोक्तमधीते तस्य वा शिष्यश्चारायणीयः । एवं पाणिनीयः । कुमार्यादिलाभकामा इति । तत्प्रोक्ते ग्रन्थे श्रद्वायामसत्यामपि ये कुमार्यादिलाभकामास्तत्र प्रवर्तन्ते त एवं क्षिप्यन्ते । पूर्ववत्समासः । माणवब्राह्मणयोरपत्यवाचित्वेन प्रसिद्ध्यभावात्पृथग्ग्रहणम् । अपर आकह - तस्येदम् इत्यणन्तयोर्ग्रहण्, निपातनाञ्च माणवे णत्वमिति ।

भयब्राह्मण इति । यो ब्राह्मण एव सन् राजदण्डादिभयेन ब्राह्मणाचारं करोति, न श्रद्धया, स एवं
क्षिप्यते । कर्तृकरणे कृता बहुलम् कइति बहुलवचनादकृतापि समासः । दासीश्रोत्रियो दासीब्राह्मणवत् ।।

अङ्गानि मैरेये ।। 6 - 2 - 70 ।।

अङ्गम् - आरम्भकम्, बहुवचनं स्वरुपविधिनिरासार्थम् । सुराव्यतिरिक्तं मद्यम् - दैरेयम् । तदङ्गवाचिनीति । दैरेयशब्द इति प्रकृतम्, कइह तु तच्छब्देन तदर्थः परामृश्यते । पौषासव इति । आसवः - मद्यविशेषः, यत् पौष्पैण मधुना द्रव्यान्तरेण चारभ्यते तस्य पौषमङ्गं भवति । पुष्पासव कइति तु युक्तः पाठः ।।

भक्ताख्यास्तदर्थेषु ।। 6 - 2 - 71 ।।

बहुवचननिर्देशादेव स्वरुपविधिनिरासे सिद्धे आख्याग्रहणं भक्तविशेषवाचिनां भक्षादीनां गर्हणार्थम् अन्यथा पर्यायाणामन्नादीनामेव ग्रहणं स्यात् ।
भिक्षाकंण्दयः षष्ठीसमासाः येषां प्रकृतिविकारभावे चतुर्थीसमास इति पक्षः । अन्येषां चतुर्थीसमासाः ।।

गोविडालसिहसैन्धवेषूपमाने ।। 6 - 2 - 72 ।।

गौविडालसिहसैन्धवेषूपमाने ।। उपमानशब्दस्य सह गवादिभिः प्रत्येकं सम्बन्धादेकवचनम् । उपमानार्थोऽपीति । यो यत्रोदाहरणे उपमानार्थः समाभवति स तत्र योजयितव्यः । यथाप्रसिद्धं चेति । यस्योदाहरणस्य च यथा लोके प्रसिद्धिः स तथा योजयितव्यः । तत्र दिङ्मात्रं दर्शयति - गवाकृत्येत्यादि । आकृतिः - संस्थानम् , संनिवेशितम् - व्यवस्थापितम् । ेवमन्यत्रापि यत्किञ्चित् सादृश्यं योजनियम् ।।

अके जीविकार्थे ।। 6 - 2 - 73 ।।

जीविकावाजिनीति । प्रवृत्तिनिमित्तकथनमेतत्, जीविकारुपप्रवृत्तिनिमित्त इत्यर्थः । पर्यवसानभूमिस्तु तध्वान्, तदाह - दन्तलेखनादिभिर्यषामिति । रमणीयकतेति । अत्रापि नित्यं क्रीडाजीविकयोः इति समासः, क्रीडायामेव हि तृजन्तं सम्भवति, न पुनर्जीविकायामिति तत्रार्थः ।।

प्राचां क्रीडायाम् ।। 6 - 2 - 74 ।।

प्राचां क्रीडायामिति श्रुतयोरेवान्वयसम्भवान्मतेनेत्यध्याहारो न युक्त इति चमत्वाऽऽह - प्राग्देश्वतिनां या
क्रीडेति ।।

अणि नियुक्ते ।। 6 - 2 - 75 ।।

नियुक्त इति युजिर्योगे इत्यस्यैतद्रूपमित्याह - नियुक्तीऽधिकृत इति । स च कस्मिश्चत्कर्तव्ये तत्परो न भवतीति । कार्यान्तरेऽपि नियोगसम्भावात् ।।

शिल्पिनि चाकृञः ।। 6 - 2 - 66 ।।

युक्ते च इत्येव सिद्धे कृञः प्रतिषेधार्थ वचनतम् । तन्तुवाय इति ह्वावामश्च इत्यण्, अतो युक् । अयस्कार इति अतः कृकगम इत्यादिना विसर्जनीयस्य सत्वम् ।।

गौतन्तियवं पाले ।। 6 - 2 - 78 ।।तनु विस्तारे , क्तिच्, तन्तिः - वत्सानां बन्धनरज्जुः ।।

उपमानं शब्दार्थप्रकृतावेव ।। 6 - 2 - 80 ।।

उष्ट्रक्रोशीत्यादौ कर्तर्युपमाने इति णिनिः । उपमानगर्हणमित्यादि । अन्यथा योगाविभागेन नियमाश्रयणसामर्थ्याद्विशिष्टविषयो नियम इत्येतावद् गम्यत, न त्विष्टो विषयविभाग इति भावः ।

शब्दार्थप्रकृताविति किमिति । सूत्रारम्भः किमर्थ इत्यर्थः । वृकवञ्चीति । कृत्सवर एव भवति । प्रकृतिरेवेत्यादि । असति प्रकृतिगरहणे शब्दार्थात्परो यो णिनिस्तदन्त उत्तरपदे इति विज्ञायेत्, ततश्च यत्रापि धातूपसर्गसमुदायात् शब्दार्थात्परो णिनिः, तत्रापि स्यात् कृदुग्रहणे गतिकारकपूर्वस्यापि ग्रहणाण्णिन्यन्तमेवोत्तरपदमिति कृत्वा । प्रकृतिग्रहणे तु न भवति ।

योऽत्र धातुर्नासौ शब्दार्थः, यश्च शब्दार्थो धातूपसर्गसमुदायो न ततो णिनिर्विहित इति, सिद्धे विधिरारभ्यमाणोन्तरेथणाप्येवकारं नियमाय भवति, नार्थ एवकारेण तत्राह - एवकारकरणमित्यादि । असति हि तस्मिन्विपरीतो नियमः स्यात् - शब्दार्थप्रकृतौ यदि भवति उपमान एवेति । एवं च प्रकृतिर्नियम्येत, नोपमानम् । तस्मादुपमानावधारणार्थमेवकारः क्रियते । किम पुनः कारणमुपमानावधारणमाश्रीयते अत आह - शब्दार्थप्रकृताविति । तुशब्दो हेतौ, उपमाननियमे हि शब्दार्थप्रकृतेरनियतत्वात्तत्राप्यविशेषेण सर्वस्याद्युदात्तत्वं

लभ्यते, नान्यथा । किञ्च - प्रिकृत्यवधारणेऽस्यानियतत्वाद् वृकवञ्चीत्यादावाद्युदात्तत्वप्रसङ्गः ।।
युक्तारोह्यादयश्च ।। 6 - 2 - 81 ।।
पूर्वोत्तरपदनियमार्थमिति । यत्र युक्तादीन्येव पूर्वपदानि, कआरोहायादीन्यव चोत्तरपदानि -- तत्रैव यथा स्यादित्यर्थः । आगतमत्स्यादिषु च बहुव्रीहिः, कर्मधारयो वा ।
एकशितिपादिति । संख्यासुपूर्वस्य इति पादशब्दाकारस्य लोपः, संख्यासुपूर्वस्य समासस्य योऽन्ते पादशब्दरतस्य लोपो भवतीति तत्रार्थः । ननु चेह इण्भकापाशल्यतिमर्ञ्चिभ्यः कन् इति कन्नन्त एकशब्द आद्युदात्तः, ततश्च बहुव्रीहौ प्रकृत्य इत्येव सिद्धमाद्युदात्तत्वम् तत्राह - एकः शिति पादोऽस्येति त्रिपदौ बहुव्रीहिरिति । ततः किमित्याह - तत्रेति । यद्युत्तरपदे परत एकशितिशब्दस्तत्पुरुषः, ततो।पि किम् इत्याह - तस्येति । तस्य तत्पुरुषसंज्ञकस्यैकशितिशब्दस्य समासान्तोदात्तत्वं प्राप्तम् । ननु समासस्वरापवादो बहुव्रीहिस्वः तत्राहनिमित्तिस्वरबलीयस्त्वादिति । समासस्वरस्येति शेषः । निमित्तमुत्तरपदं द्विगोस्त्रिपदो बहुव्रीहिस्तस्य यः स्वरः , तस्मात्समासस्वरस्य बलीयस्त्वादित्यर्थः । बलीयस्त्वंतु सतिशिष्टत्वात् । सतिशिष्टत्वं तु बहुव्रीहौ सति पश्चात्तत्पुरुषे कृते प्राप्नोतीति ।
एवमपीत्यादि । स्पष्टार्थम् । निमित्तिस्वर बलीयस्त्वस्यापीत्यादि । तथा च समर्थसूत्रे वार्त्तिकम् - एकशितिपात्स्वरवचनं तु ज्ञापकं निमित्तिस्वरबलीयस्त्वस्य इति । उभयमन्तरेणाप्यनुपपद्यमानमेकशितिपाद्ग्रहणमुभयमपि कज्ञापयति ।।
दीर्घकाशतुषभ्राष्ट्रवटं जे ।। 6 - 2 - 82 ।।
कुटीज इति । सप्तम्यां जनेर्डः ।।
अन्त्यात्पूर्वं बह्वचः ।। 6 - 2 - 83 ।।
आमलकीज इति । दीर्घान्तेऽपि बह्वचि परत्वादयमेव स्वरो भवति ।।
ग्रमेऽनिवसन्तः ।। 6 - 2 - 84 ।।
निपूर्वाद्वसेरौणादिकोऽधिकरणे झच् , निवसग्त्यस्मिन्निति निवसन्तः । देवग्राम इति । प्राचीनपरिक्षिप्तदेशेऽयं ग्रामशब्दः । यद्येवम्, निवसन्तवाची भवति तत्राह - देवस्वामिक कइति । ततश्चायं न देवापेक्षया ग्रामो निवसन्त इति भावः । दाक्ष्यादयो निवसन्ति यस्मिन्नित्यादि । अन्ये निवसन्तु, तत्र मा वा यसन्, ते तावदवात्सुरित्येतावता तेपामिति व्यपदिश्यत इत्यर्थः ।।
घोषादिषु च ।। 6 - 2 - 85 ।।

यान्यत्रेति । घोषकुटादीनि । अपरे पुनरिति । थेषां घोषकुटादिष्वपि शब्देषु तावद्भवति, न निवासनामधेयेषु ।।
छात्त्र्यादयः शालायाम् ।। 6 - 2 - 86 ।।
यदा शालान्त थइत्यादि । विभाषा सेनासुरा इत्यादिना शालान्तस्य तत्पुरुषस्य विभाषा नपुंसकत्वमुक्तम् । तत्रास्यावकाशो यो नपुंसकलिङगो न भवति - छात्त्रिशाला, गोशरितिः तत्पुरुषे शालायाम् इत्यस्यावकाशो यश्छात्त्र्यादिपूर्वपदो न भवति - वाराह्मणशालम्, क्षत्त्रियशालमिति, यश्छात्त्र्यादिपूर्वपदो नपुंसकलिङ्गश्च, तत्रैकदेशबिकृतस्यानन्यत्वादयमपि प्राप्नोति, तत्पुरुषे शालायाम् इत्ययं च तत्र पूर्वविप्रतिषेधादयमेव भवति ।।
प्रस्थेऽवृद्धमकर्क्यादीनमा ।। 6 - 2 - 87 ।।
मालीदीनां च इति वचनादवृद्धमिति पदच्छेदः । कर्क्यादिप्रतिषेधस्तु नामधेयार्थः स्यात् - वुा नामधेयस्य वृद्धसंज्ञा वक्तव्या इति ।।
अर्मे चावर्णं द्वय्च्त्र्यच् ।। 6 - 2 - 90 ।।
वृहदर्ममिति । स्वरविधौ व्यञ्जनमविद्यमानवत् इत्येतदत्र नाश्रीयते अनित्यत्वात् । नहार्ममिति । आत्वे कृतेऽवर्णान्तत्वादस्ति प्राप्तिः । नवाममिति । नवशब्दः प्रत्यग्रवचनोऽकारान्तः ।।
न भूताधिकसञ्जीवमद्राश्मकज्जलम् ।।ल 6 - 2 - 91 ।।
मद्राश्मग्रहणं सङ्घातविगृहीतार्थमिति । मद्रशब्दस्य केवलस्य मद्राश्मशब्दस्य च सङ्घातस्य प्रतिषेधार्थमित्यर्थः ।
मद्राश्मार्ममिति । अनोऽश्मायः सरसां जातिसंज्ञयोः इति समासान्ते सत्यवर्णान्मेतद्भवति, तदेवम् - मद्रार्मम्, मद्राश्मार्ममिति देव एवोदाहरणे । प्रायेण तु अश्मार्ममिति तृतीयमप्युदाहरणं पठ्यते, तदयुक्तम्, अश्मशब्दस्य नकारान्तत्वात् । न च लोपे कृतेऽवर्णान्तत्वम्, स्वरविधौ नलोपस्थासिद्धत्वात् । तथा च वक्ष्यति - पञ्चार्मम्, दशार्ममित्यत्र अर्मे चावर्णं द्व्यच्त्र्यच् इत्यं स्वरो न भवतीति । ।
अपर आह मद्राश्मग्रहणं सङ्घातविगृहीतार्थम् इत्यस्य भाष्येऽदर्शनादनार्षो वृत्तौ पाठ इति ।
दिवोदासावेति । दिवश्च दासे इति षष्ठ्या अलुक् ।।
अन्तः ।। 6 - 2 - 92 ।।
अत्रापि प्रकरणे पूर्वपदविशषया प्रथमा षष्ठ्यर्थे द्रष्टव्या ।।
सर्व गुणकार्त्स्न्ये ।। 6 - 2 - 93 ।।
यत्र गुणान्तरस्याभावस्तत्र गुणकार्त्स्न्यं भवति । सर्वश्वेत इति । पूर्वकालैक इत्यादिना कर्मधारयः । अत्र शुक्लेन गुणेन सर्वावयवानां वायप्तिर्गम्यते ।

आश्रयव्याप्त्या परमत्वमिति । यद्यप्यौज्ज्वल्यादिनापि परमत्वं सम्भवति, अत्र त्वेवंविधं परमत्वं विवक्षितमित्यर्थः । सर्वसौवर्ण इति । विकारविषयमत्र कार्त्स्न्यम् । कार्त्स्न्ये इति किमिति । गुणवाचिन्युत्तरपदे न स्रवशब्दस्य कार्त्सस्न्यं व्यभिचरतीति प्रश्नः । सर्वेषां श्वेततरः सर्वश्वेत इति । गुणिकार्त्स्न्ये सर्वशब्दः, न गुणकार्त्स्न्ये । सर्वषामिति च गुणसम्बन्धे षष्ठी, पटस्य शौक्ल्यमितिवद् । गुणवाचिन एव च प्रत्ययः, सर्वेषां पटानां द्रव्यान्तराधारो यः श्वेतगुणस्तदपेक्षया सातिशयः श्वेतो गुण इत्यर्थः ।

गुणात्तरेणेति । गुणाद्युस्तरप्रत्ययस्तदन्तेनेत्यर्थः । वचनमेवेदम्, तेन पूरणगुण कइति प्रतिषेधं बाधित्वा समासश्च भवति, तरब्लोपश्च ।।

संज्ञायां गिरिनिकाययोः ।। 6 - 2 - 94 ।।

अञ्जनागिरिरिति । वनगिर्योः संज्ञायाम् इति दिर्घत्वम् ।।

कुमार्या वयसि ।। 6 - 2 - 95 ।।

वृद्धकुमारीति । विशेषणसमासः । जरत्कुमारीति । जरतीशब्दस्य पूर्वकालैक इत्येनेन, अत्रोभयत्र पुंवत्कर्मधारय इत्यादिना पुंपद्भावः ।

ननु च कुमारीशब्दः प्रथमे वयसि वर्तते, तथा च वयसि प्रथमे इति ङीबत्र विहितः, तस्य कथं चरमवयोवाचिभ्यां वृद्धाचरतीशब्दाभ्यां सामानाधिकरण्यम् अत आह - कुमारीशब्द इत्यादि । कुमार्यां हि द्वयं दृष्टम् - प्रथमं वयः , पुंसा सहासम्प्रयोगश्च तत्र प्रथमार्थप्रहाणेन द्वितीयमर्थमसम्प्रयोगमात्रमुपाददानस्य सम्भवति सामानधिकरण्यमित्यर्थः । तच्चेति । वृद्धादिशब्दान्तराभिधेयमित्यर्थः । कुमारत्वमेवेति । यदेतत्कुमारीशब्दस्य प्रवृत्तिनिमित्तं न तद्वयो गृह्यत इत्यर्थः । एतच्च वयोग्रखहणसामर्थ्याल्लभ्यते अन्यथा कुमारीशब्दप्रयोगो नियमतः प्रथमवयो गम्यते इत्यनर्थकं तत्स्यात् ।

परमकुमारीत्यत्र कुमारत्वमेव प्रतीयते, न वयोऽन्तरमिति भवति प्रत्युदाहरणम् ।।

उदकेऽकेवले ।। 6 - 2 - 96 ।।

असन्देहार्थम् केवल उदके इत्यवचनाद् अकेवले इति पदच्छेदः । मश्रम् - द्रव्यान्तरसंयुक्तम् ।।

द्वीगौ क्रतौ ।। 6 - 2 - 97 ।।

गर्गत्रिरात्रादयः षष्ठीसमासाः । तिसृणां रात्रीणां समाहारस्त्रिरात्रः, अहः सर्व इत्यादिनाच समासान्तः । अतिरात्र इति । रात्रिमतिक्रान्त इति प्रादिसमासः ।।

सभायां नपुंसके ।। 6 - 2 - 98 ।।

गोपालसभादौ अशाला च इति नपुंसकत्वम् ।

रमणीयसभमिति । अत्राभिधेयवशान्नपुंसकत्वम्, न प्रतिपदोक्तम् ।।

अरिष्टगौडपूर्वे च ।। 6 - 2 - 100 ।।

पूर्वग्रहणं किमिति । अरिष्टगौडयोरिति वक्तव्यम् इति प्रश्नः । इहापि यथा स्यादिति । पूर्वग्रहणे हि सति वहुव्रीहिर्लभ्यते - अरिष्टगौहौ पूर्वौ यस्मिन्समास इति । तेनारिष्टाश्रितपुरम्, गौडभृत्यपुरमित्यत्रापि पूर्वपदमान्तोदात्तं भवति । असति तु पूर्वग्रहणे श्रितः भृत्यशब्दाभ्यां व्यवहितत्वादपूर्वपदत्वादरिष्टगौडयोस्तावन्न स्यात् समुदाययोश्च सूत्रेऽनुपात्तत्वात् ।।

न हास्तिनफलकमार्देयाः ।। 6 - 2 - 101 ।।

मार्देय इति । ढेलोपोऽकद्र्वाः इत्युकारलोपः ।।

दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु ।। 6 - 2 - 103 ।। चानराटे स्वरुपग्रहणम्, इतरेषु अर्थग्रहणम्। पूर्वेषुकामशमीति । दिक्संख्ये संज्ञायाम् इति समासः । पूर्वपञ्चाला इति । समुदाये हि वृत्तोः शब्दा अवयवेष्वपि वर्तन्ते तइति पञ्चालैकदेशे पञ्चालशब्दः, ततः पूर्वापरप्रथम इत्यादिना कर्मधारयः । शब्दग्रहणमित्यादि । दिशि दृष्टः शब्दो दिक्शब्द इत्युत्तरपदेलोपो समासः तेन कालवाचिनोऽपि ग्रहणात् पूर्वयायतमित्यादावपि भवति ।।

आचार्योपसर्जनश्चान्तेवासिनि ।। 6 - 2 - 104 ।।

आचार्योपसर्जनग्रहणमन्तेवासिनो विशेषणम्, सप्तम्यर्थे प्रथमा । आचार्योपसर्जनान्तेवासिवाचिनीति । आचार्य उपसर्जनं यस्य स आचार्योपसर्जनः स चासावन्तेवासी च आचार्योपसर्जनान्तेवामी, तद्वाचिनि। पूर्वपाणिनीया इति । पूर्ववत्समासः, पाणिनेश्छात्त्राः पाणिनीयाः , अत्रान्तेवासिनः प्रधानम्, आचार्यस्तूपसर्जनम्

। काशकृत्स्निशब्दात् अतश्च इत्यण् । पूर्वपाणिनीयं शास्त्रमिति । पाणिनीयं शास्त्रं पूर्वम, चिरन्तनमित्यर्थः ।

उत्तरपदवृद्धौ सर्वं च ।। 6 - 2 - 105 ।।

वृद्धौ इत्येतावतैव तद्वदुत्तरपदपरिग्रहे सिद्धे उत्तरपदग्रहणात्तदधिकारो लक्ष्यते ।।

बहुव्रीहौ विश्वं संज्ञायाम् ।। विशेः क्वनि विश्वशब्द आद्युदात्तः । विश्वामित्त्र इत्यादि । अस्यावकाशः - विश्वदेवः , विश्वयशाः , संज्ञायां मित्त्राजिनयोः इत्यस्यावकाशः - कुलमित्त्रः, कुलाजिनः, विश्वामित्त्रः, विश्वाजिन इत्यत्रोभयप्रसङ्े संज्ञायां मित्त्राजिनयोः इत्येतद्भवति विप्रतिषेधेन ।।

उदराश्वेषुषु ।। 6 - 2 - 107 ।।

अयमपि पूर्वपदप्रकृतिस्वरस्यापवादः । वृकशब्दः प्रणिनां च कुपूर्वाणाम् इत्याद्युदात्तः, वृकास्येवोदरं यस्य वृकीदरः । दाम ुदरे यस्य दामोदरः, दामशब्दो

मनिन्प्रत्ययान्तः । हरतेः सर्वधातुभ्य इन् इतीन्, हरिदश्वो यस्य हर्यश्वः । यौवनशब्दोऽव्युत्पन्नं प्रतिपदिकम्, लघावन्तेद्वयोश्च वह्वषो गुरुः इत्याद्युदात्तः । यूनो भावो यौवनमिति युवाद्यणन्तत्वे प्रत्ययस्वरेणान्तोदात्तत्वात् पूर्पपदप्रकृतिस्वरेणैव सिद्धम् । सुवर्णपुङ्खेशुरिति । शोभनो वर्णो येषां ते सुवर्णाः, नञ्सुभ्याम् इत्यन्तोदात्तत्वम्, सुवर्णाः, पुङ्खायोषां ते सुवर्णपुङ्खाः, पूर्वपदप्रकृतिस्वरेण मध्योदात्तत्वम्, पननरिषुशब्देन बहुव्रीहिः । महेषुरिति । महच्छब्दोऽन्तोदात्त इति महान्व्रीह्यपराह्ण इत्यत्रोक्तम् । तस्मात्तत्पूर्वपदप्रकृतिस्वरेणैव सिद्धे सति तस्यान्यार्थ आरम्भः अपवादत्वादनेनैवान्तोदात्तत्वं युक्तमित्यस्योपन्यासः ।।

क्षेपे ।। 6 - 2 - 108 ।।

कुण्डशब्दः नब्विषयस्यानिसन्तस्य इत्याद्युदात्तः । घटशब्दः पचाद्यजन्तः । महेषुवदस्योपन्यासः । कटुशब्दात्संज्ञायां कन् । स्पन्दितशब्दो निष्ठान्तः । निहन्यतेऽनेनेति निघातः ततोऽन्योऽनिघातः , अतोऽव्ययपूर्वपदप्रकृतिस्वरत्वम्, चरिचलिपतिवदिनां वा द्वित्वमच्याक्चाभ्यासस्य - चलाचलः ।

अनुदर इत्यादि । अस्यावकाशः - कुण्डोदर इत्यादि, नञ्सुभ्याम् इत्यस्यावकः शः - अयशः, सुयशः, एवं स्थिते विप्रतिषेधः ।।

नदी बन्धुनि ।। 6 - 2 0 109 ।।

बन्धुनि इति शब्दरुपापेक्षया नपुंसकनिर्देशः, गर्गवत्स शब्दाभ्यां गर्गादियञन्तभ्याम् यञश्च इति ङीप् , गार्गीवात्सीशब्दौ ञित्स्वरेणाद्युदात्तौ । ब्रह्मशब्दो बृहेर्मनिन्प्रत्यये निपातितः ।।

निष्ठोपसर्गपूर्वमन्यतरस्याम् ।। 6 - 2 - 110 ।।

प्रक्षालितपाद इति । क्षल शौचकर्मणि चुरादिः, धावु गातिशुद्ध्योः, च्छ्वोः, शूठ् इत्युठ्, एत्येधत्युठसु इति वृद्धिः, प्रक्षालितप्रधौतशब्दौ गतिस्वरेणाद्युदात्तौ । मुखं स्वाङ्गमित्येतद्भवतीति । विकल्पितमुत्तरपदान्तोदात्तत्वम्, तेन स्वाङ्गवाचिनि मुखशब्दे स्वरत्रयं भवति - अनेन पूर्वपदान्तोदात्तत्वम्, मुखं स्वाङ्गम् इत्येतत्, उभाभ्यां मुक्ते पूर्वपदप्रकृतिभावेन गतिरनन्तरः इत्याद्युदात्तत्वं च । न चेदिति । स्वाङ्वा चीति सम्बध्यते, यदि मुखशब्दः स्वाङ्गवाची न भवतीत्येर्थः ।

प्रसेचकशब्दः कुदुत्तरपदप्रकृतिस्वरेण मध्योदात्तः, शुष्कशब्दः शुष्कधुष्टौ इत्याद्युदात्तः ।।

उत्तरपदादिः ।। 6 - 2 - 111 ।।

उत्तरपदग्रहथखणमसमस्तं लुप्तषष्ठीकम् । अत्रापि प्रकरण उत्तरपदनिर्देशे षष्ठ्यर्थे प्रथमा ।।

कर्णो वर्तणलक्षणात् ।। 6 - 2 - 112 ।।

दात्राकर्णः शङकूकर्ण इति । दात्रं कर्णे यस्य, शङ्कुः कर्णे यस्यति विग्रहः, सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनम् इति पनिपातः । कर्णे लक्षणस्याविष्टेत्यादिना दीर्घत्वम् । लक्ष्यते येन तल्लक्षणम्, ततश्च स्थूलकर्ण इत्यत्रापि प्राप्नोति, स्थौल्योनापि हि लक्षणीयत्वादत आह - पशूनां विभागज्ञापनार्थमित्यादि । एतच्च सामान्योक्तावपि वर्णग्रहणाल्लभ्यते अन्यथा वर्णेनापि लक्ष्यमाणत्वांत्तदमर्थकं स्यात् । श्विता वर्णे पचाद्यच् , कूट दाहे, इगुपधलक्षणः कः, शुभ शुम्भ शोभार्थे, अनुदात्तेतश्च हलादेः, इति युच् - शोभनः । प्रत्युदाहरणे सर्वत्र पूर्वपदप्रकृतिस्वर एव भवति । अण्ठकरणादीनां समाहारद्वन्द्वे नपुंसकह्रस्वत्वम् ।।

कण्ठपृष्ठग्रीवाजङ्घं च ।। 6 - 2 - 114 ।।

सुग्रीव इति । अत्र परत्वात् नञ्सुभ्याम् इत्यन्तोदात्तत्वेनभाव्यम्, अस्य तु दशग्रीवादिरवकाशः यदि तु नेष्यते, चकारस्यैव विधेः समुञ्चयार्थ इति व्याख्यातव्यम् । नाडीजङ्घ इति । नाड्याकारे जङ्घे यस्य नाडीजङ्घः ।।

नजो जरमरमित्त्रमृताः ।। 6 - 2 -116 ।।

जरणं जरः, ऋदोरप् । मरणं मरः, अरु देव निपातनादप् । ऋिमिदा स्नेहने - अस्मात् क्त्रः, मित्त्रम् ।।

सोर्मनसी अलोमोषसी ।। 6 - 2 - 117 ।।

मँश्च मनसी । सुप्रथिमेति । पृथोर्भावः, पृथ्वादिब्य इमनिच्, र ऋतो हलादेर्लघोः इति रादेशः । पीयत इति पचः पिबतेरिञ्च इत्यसुन् । अशोर्देवने युट् च इत्यसुन् , युडागमः , यशः । स्त्रुरिभ्यां तुट् स्रोतः । सुस्रत्, सुध्वद् इति । स्रंसुध्वंसुभ्यां क्विप्, वसुस्रंसु इत्यादिना दत्वम्, तस्यासिद्धत्वादत्रासन्तत्वम् । राज - तक्षशब्दौ कनिन्युवृशषि इत्यादिना कनिप्रत्ययान्तौ । लुनातेर्मनिन - लोम, उष दाहे, मिथुनेऽसिः इति वर्तमाने उषः कित् ।

अनिनस्मन्ग्रहणानीति । अन्, इन्, अस्, मन् - इत्येतानि गृह्यन्ते येषु सूत्रेषु तानि तथोक्तानि, तत्र तदन्तविधिं प्रयोजयन्तीति वचनादनर्थकानामप्यनिन्प्रभृतीनां ग्रहणं भवतीत्युक्तं भवति । तेन सुप्रथिमा, सुस्रत्, सुध्वदित्यादिकमप्यदाहरणमुपपद्यत इति भावः ।

कपि परत्वादिति । सोर्मनसी इत्यस्वावकाशः - सुकमा, सुशर्मा, कपि पूर्वम् इत्यस्यावकाशः - अयवकः, सुयवक इति एकस्थले विप्रतिषेधः ।।

आद्युदात्तं द्व्यच् छन्दसि ।। 6 - 2 - 119 ।।

कुर्भ्रश्च इति वर्तमाने अर्जिदृशिकम्यमिपशिबाधामृजिपसितुग्धुग्दीर्घहकाराश्च । बाधते येन परानिनिति बाहुः ।।

वीरवीर्य्यौ च ।। 6 - 2 - 120 ।।

वीर विक्रान्तौ चुरादिः, ततः पचाद्यचि - वीरः, अचो यत् - वीर्यम्, वीरेषु वा साधुरिति पारग्घितीयौ यत् । तत्रेत्यादि । कथं पुनरेतज्ज्ञापकम् इत्याह - तत्र हि सतीति । फिषितु बिल्वभक्ष्यवीर्याणि छन्दसि इति छन्दस्यन्तस्वरितत्वं भाषायां वाद्युदात्तत्वं शब्दस्य स्थितम् ।।

कूलतीरतूलमूलशालाक्षसममव्ययीभावे ।। 6 - 2 - 121 ।।

सुषममित्यादौ सुविनिर्दुर्भ्यः सुपिसूतिसमाः इति षत्वम्, तस्यासिद्धत्वात्समशब्द एवायम् । तिष्ठद्गुप्रभृतिष्वेते पठ्यन्त इति । तेनाव्ययीभावसंज्ञा । पर्यादिभ्य इत्यादि । परिप्रत्युपापा इत्यस्यावकाशो यत्र कूलादयौ न सन्ति - परित्रिगर्तमिति, कूलादीनामाद्युदात्तस्यावकाशो यत्र पर्यादयो न भवन्ति - अवकूलम्, तअतिकूलमिति पर्यादिभ्यः परेषु कूलादिषु विप्रतिषेधः ।।

कंसमन्थशूर्पपाय्यकाण्डं द्विगौ ।। 6 - 2 - 122 ।।

द्विकंस इति । द्वाभ्यां कंसाभ्यां क्रीत इति तद्धितार्थे समासः , कंसाट्टिठन् इति टिठन्, तस्य अध्यर्धपूर्व इति लुक् । द्विमन्थ इति । आर्हादगौपुच्छ इत्यादिना ठक्, शेषं पूर्ववत् । द्विशूर्पमिति । शूर्पादञन्यतरस्याम् । द्विपाय्यमिति । पाय्यसान्नाय्य इत्यादिना परिमाणे निपातितः । प्राग्वतेष्ठञ् । द्विकाण्डमिति । देव काण्डे प्रमाणमस्य प्रमाणे द्वयसच् इत्यादिना मात्रजादयः, तेषाम् प्रमाणे लो द्विगोर्नित्यम् इति लुक् ।।

तत्पुरुषे शालायां नपुंसके ।। 6 - 2 - 123 ।।

दृढशालमिति । बहुव्रीहिरयम् । तत्र पूर्वपदप्रकृतिस्वर एव भवति, पूर्वपदं च निष्ठान्तत्वादन्तोदात्तम् । ननु चात्र लक्षणप्रतिपदोक्तपरिभाषयैव भविष्यति सत्यम्, उत्तरार्थं तत्पुरुषग्रहणमवश्यं कर्तव्यं तदिहैव क्रियते, परिभाषाया अनाश्रयणाय ।।

कन्था च ।। 6 - 2 - 124 ।।

शोभवनः शमो यस्य तस्यापत्यं सौशमिः । आङ्पूर्वात् ह्वयतेः आतश्चोपसर्गे इति कः चप सान्तवने औणादिकः पः बहुलवचनादिडभावः - चप्पः ।।

आदिश्चिहणादीनाम् ।।थ 6 - 2 - 125 ।।

चिनोतेः क्विप्, चित्, हन्तेः पचाद्यच्, हनः, चिहणम् - निपातनात्तलोपो णत्वं च । मल मल्ल धारणे, तआभ्यां रप्रत्ययः, निपात्नाल्लस्य डत्वम् - मडरः, मद्दुरः । विगततुलस्येदं वैतुलम् । पटदिति कायति - पटत्कः । कै गै रै शब्दे । आतोऽनुपसर्गे कः । बिडमादेत्ते बिडालः । ला आदाने सोपसर्गादप्यस्मादेव निपातनात्कः, तस्यापत्यं बैडालिः, तस्येव कर्णावस्य बैडालिकर्णः । अपहे तु इकारान्तं पठन्ति - बैडालिकणिरिति । कुक्कु रटतीति, कुक्कुटः, निपातनाद्रशब्दस्य लोपः, चिनोतेः क्विप् , चित्, कणतेरच्, कणः, चिता कणः, चिक्कणः, निपातनात्तकारस्.य ककारः । तकारमेवान्ये पठन्ति । चिहणादयश्चैते गौत्रनामधेयाति स्मर्यन्ते ।

आदिरिति वर्तमान इति । पूर्वं ह्यादिग्रहणमुत्तरपदाभिसम्बद्धमिह पूर्वपदानां चिहणादीनामाद्युदात्तत्वमिष्यते, अतस्तदर्थं पुनरादिग्रहणं कृतम् ।।

चेलखेटकटुककाण्डं गर्हायाम् ।। 6 - 2 - 126 ।।

पुत्रचेलमिति । चेलवत्तुच्छमित्यर्थः । खेट इति तृणनाम, तद्वद् दुर्बला उपानत्खेटम्। कटुकम् - अस्वादु, तथा दध्यपि गतस्वादुकत्वात् कटुकम्। काण्डमिति शरनाम, तद् यथा सत्त्वपीडाकरम्, एवं भूतमपि ।।

चीरमुपमानम् ।। 6 - 2 - 127 ।।

वस्त्रचीरमिति । वस्त्रं चीरमिवेति पूर्ववद्व्याघ्रादिसमासः ।।

कूलसूदस्थलकर्षाः संज्ञायाम् ।। 6 - 2 - 129 ।।

भजीसूदमिति । भाजीशब्दो जानपदादि सूत्रेण ङीषन्तः ।।

अकर्मधारये राज्यम् ।। 6 - 2 - 130 ।।

चेलराज्यादिस्वरादिति । आदिशब्देन वर्ग्यादिस्वरपरिग्रहः, चेलरजायादिस्वरस्यावकाशः - भार्याचेलम्, ब्राह्मणराज्यम्, तत्पुरुषे तुल्यार्थ इत्यादिना विहितस्याव्ययस्वरस्यावकाशः - निष्कौशाम्बिः, कुचेलम्, कुराज्यमित्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधः।।

पुत्रः पुम्भ्यः ।। 6 - 2 - 132 ।।

कुनटस्यापत्यं कौनटिः । दामकमाहिषकशब्दौ संज्ञायां कन् इति कन्नन्तौ ।।

नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः ।। 6 - 2 - 133 ।।

संयुक्ताः स्त्रीसम्बन्धिनः श्यालादय इति । योगरुढिरेषा तेषाम्, यथा सम्बन्धिशब्दः । ज्ञातयो मातापितृसम्बन्धेन बान्धवा इति । पितसम्बन्धिष्वेव तु ज्ञातिशब्दो लोके प्रसिद्धः । आख्याग्रहणमाचार्यादिभिः प्रतेयकमभिसम्बध्यत । भ्रातुष्पुत्र इति । कस्कादिषु पाठात् षत्वम् ।।

चूर्णादीन्यप्राणिषष्ठ्याः ।। 6 - 2 - 134 ।।

चूरी दाहे अस्मात् क्तः चूर्णम्। वा गतिगन्धनयोः, पा रक्षणे - आभ्यां करिशब्द उपपदे आतोऽनुपसर्गे कः, करिवम्, करिपम्। महेरिनण्, बहुलवचनात् शकेरपि भवति - शाकिनम्, शकादिभ्योऽटच्, शकटम्, तद्वहतीति शकटादण् - शाकटम् । द्राक् क्षरति द्राक्षा, पृषोदरादिः । तुस शब्दे ततो बहुलवचनात् क्तः उपधादीर्घत्वं च । कुं दुनोति, कुत्सितं वा दुनोतीति क्विप्, अस्मादेव निपातनात्तुगभावः, पूर्वपदस्य च मुम् कुन्दुं मिमीते कुन्दुमः । दलेः कपन्, दलपः । चमेरसच् चमसः ततो जातिलक्षणो ङीष् - चमसी । कनी दीप्तिकान्तिगतिषु - अस्मात् पचाद्यच्, अस्मादेव निपातनाद् द्वर्वचनम् - चक्कनः । च्कन इत्यन्ये पठन्ति, तत्रापि निपातनादेव रुपसिद्धिः । चोलस्यापत्यम् द्व्यचः इत्यण् - चौलः । एते चूर्णादयः ।

पूर्वाचार्योपचारेणेति । उपचारः प्रयोगः ।।

कुण्डं वनम् ।। 6 - 2 - 136 ।।

कुण्डशब्ददीऽत्रेत्यादि । जनविशेषाभिधायी कुण्डशब्दस्तस्य नान्तरेण सादृश्यम्, ततोऽन्यत्र वने वृत्तिः सम्भवतीति भावः । अन्ये तु वनेऽपि मुख्य एव कुण्डशब्द इत्याहुः । तत्र वनशब्देन विशेषणेन भाजन विशेषवाजी निवर्त्यते, समुदायवाची चात्र वनशब्दः, न तूदकवाची, आह हि - कुण्डाद्युदात्तत्वे तत्समुदायग्रहणमिति, तच्छब्देन पूर्वदार्थः परामृश्यते । उपर आह - वनसमुदाये इति वक्तव्यम्, न तु वने इति
, तेन शरवणसमुदायः शरकुण्डशब्देनोच्यत इति ।।

प्रकृत्या भगालम् ।। 6 - 2 - 137 ।।

भगालमित्यर्थग्रणमित्याह - भगालवाचीति । अत्र च व्याख्यानमेव शरणम् । भगालादयचो दध्योदात्ता इति । लघावन्ते द्वयोश्च बह्वषो गुरुः इति वचनात् ।।

शितेर्नित्याबह्वज्बहुव्रीहावभसत् ।। 6 - 2 - 138 ।।

अंसौष्ठशब्दावित्यादि । अम् रोगे, अमेः सन् , असः, उष दाहेः उषिकुषिगात्तिभ्यस्थन्, ओष्ठः । दर्शनीयशब्दोऽनीयर् - प्रत्ययान्तो मध्योदात्तः । शितिशब्दः वर्णानां तणतिनितान्तानाम् इत्याद्युदात्तः ।।

गतिकारकोपपदात् कृत् ।। 6 - 2 - 139 ।।

प्रकारक इत्यादौ कुगतिप्रादयः इति समासः । इध्मप्रव्रश्चानादौ कर्मणि षष्ठ्याः समासः, करणे ल्युट्, इध्मं प्रवृश्च्यते येन सोऽत्र इध्मप्रवश्चनः, शद्लृ शातने, णिच्, शदेरगतौ तः । पलशानि शात्यन्ते येन स दण्डः पराशशतनः । श्मश्रु कल्प्यते येन स क्षुरादिः श्मश्रुकल्पनः । कृपू सामर्थ्ये ण्यन्तः , केवलो वा । ईषत्कर इति । एतदुपपदग्रहणस्य साक्षादुदाहरणम्। सुदुरोस्तु गतित्वादपि सिद्धम्, स्तम्बेरमादौ च कारकत्वात् । उच्चैः कृत्य उच्चैः कारमित्यादिकमप्युपदगरहृणस्यैवोदाहरणम्।

देवदत्तस्येति शेषलक्षणा षष्ठीति । न कर्मलक्षणा, तथा हि सति कारकमेव देवदेत्तः स्यात्, तृजकाभ्यां कर्तेरि च इति समासप्रतिषेधप्रसङ्श्च ।

अथ कृद्ग्रहणं किमर्थम् निर्गतः कौशाम्ब्याः निष्कौशाम्बिरित्यत्र मा भूत् । नैतदस्ति प्रयोजनम्,
यत्क्रियायुक्ताः पारदयस्तं प्रति गत्युपसर्गसंज्ञा भवन्ति, न च कैशाम्बीशब्दं प्रति क्रियायोगः, कारकमपि क्रियाया एव सम्भवति, उपपदमपि धात्वधिकारे सप्तमीनिर्दिष्टं प्रत्ययनिमित्तमुच्चते तदेवं गत्यादिभिस्त्रिभिरपि क्रियावाच्युत्तरपदमाक्षिप्यते, धातुश्च क्रियावाची, धातोश्च द्वये प्रत्ययाः - कृतः तिङश्च, तत्र तिङ्न्ते समासाभावात्कृदन्तमेव सम्भवतीति अनुव्यचलदित्यत्र तु न गतित्वनिबन्धनः समासः किं तर्हि सुबिति योगविभागनिबन्धनः
धातुप्रत्ययसमुदायपरिग्रहार्थं तु, अन्यथा यत्क्रियायुक्तास्तं प्रतीति वचनाद्धातुमेव प्रति गतित्वाद्धातावेवोत्तरपदे स्वरः स्यात् - प्रणीः, उन्नीरिति इह न स्यात् - प्रणयकः ,उन्नायक इति ।

एतदपि नास्ति प्रयोजनम् यत्क्रियायुक्ताः इति नैवं विज्ञायते - यस्य क्रिया यत्क्रिया यत्क्रियायुक्तास्तं प्रतीति, एवं विज्ञायमाने त्वन्वयव्यतिरेकाभ्यां धातोरेव क्रिया वाच्येति तमेव प्रति गत्युपसर्गसंज्ञाप्रसङ्गः, कथं तर्हि विज्ञायते । या क्रिया यत्क्रिया तं क्रियालक्षणमर्थं प्रतिगत्युपसर्गसंज्ञे भवतः, केवलायाश्च क्रियाया वाचकमुत्तरपदं नास्तीति क्रियाविशिष्टसाधनवाचिनि प्रणीः, प्रकारक इत्यादौ क्रियायां सिद्धताभिधायिनि, प्रभवनमित्यादौ च सर्वत्र भविष्यतीति नार्थ एतेन कृद्ग्रहणेन अत आह - कृद्ग्रहणं विस्पष्टार्थमिति । य एवं प्रतिपत्तुमसमर्थस्तं प्रति विस्पष्टार्थं क्रियत इत्यर्थः ।

यदि तर्हि विस्पष्टार्थमपि तावत्कृद्ग्रहणं क्रियते, आमन्ते तर्हि न प्राप्नोति - प्रपचतितराम्, प्रपचतितमामिति, ततश्च समासस्वरं बाधित्वाऽव्ययस्वर एव स्यात् इत्यत आह - प्रपचतितरामित्यादि । अत्र हि प्रशब्दस्य तरबन्तेन समासः, नामन्तेन । कथम् अन्तरङ्गत्वाद्धातुः पूर्वमुपसर्गेण युज्यते, प्रपचित्यस्यामवस्थायां सुबभावात् समासो न कृत इत्येतावत्, ततस्तिङ्, तस्यामप्यवस्थायां सुबभावः, ततस्तरप्, तद्धितान्तत्वात्सुप् , तेन समासः, ततश्चाम्प्रत्ययः, तत आम्श्वरः सतिशिष्टः । कथं पुनस्तरवन्तेन समासः कथं च न स्यात् गतिकारकोपपदानां कृद्भिः सह समासवचनम् इति वचनात् नात्र कृद्भरेव समास इति नियम्यते, कि तर्हि यदि गत्यादीनां समासो भवति तेनतेन लक्षणेन, तदा कृद्भिः प्रक् सुबुत्पत्त्ेरिति ननु चेवमपि तरबन्तेन समासो न लभ्यते, कि कारणम् असुबन्तत्वात् प्रतिपदिकाधिकाराद्धि तत एव किमेत्तिङव्ययधात् इत्याम् भवति, न सुबन्तात् , न च
गतिकारकोपपदानामित्येतदस्ति, अकृदन्तत्वात् अत्राहुः - घकालतनेषु इति ज्ञापकात्सुबन्तादेव सर्वे तद्धिताः, ङ्याप्प्रातिपदिकग्रहणं तु
वृद्धाद्यर्थमेवाधिक्रियते, ततश्चामुत्पत्तये यः सुप् तदन्तेन समास इति । अपर आह - कुगतिप्रादयः इत्यत्रातिङिति वक्ष्यमाणस्य
प्रतिकर्षादुत्तरपदमसुबन्तमेव समस्तयते, ततश्च तरबन्तेन समासो लभ्यत इति ।

इत्येक इति । अस्य कृद्ग्रहणं विस्पष्टार्थम्, न चामन्ते दोषप्रसङ्ग इत्येवं केचिद्व्याचक्षते ।

प्रपचिदेश्याद्यर्थं त्वित्यादि । तुशब्दः पक्षं व्यावर्तयति । आदिशब्देन प्रपचतिकल्पम् , प्रपचतिदेशीयम्, प्रपचतिरुपमित्येतेषां ग्रहणम्। प्रपचतिदेश्यादावर्थः प्रयोजनं यस्य तत्तथोक्तम् । एतदुक्तं भवति - न विस्पष्टार्थं कृद्गरहृथणम्, अपि तु प्रपचिति देश्यादौ यत्र सतिशिष्टस्वरान्तरं नास्ति, तत्रायं स्वरो मा भूद्, अव्ययपूर्वपदप्रकृतिस्वर एव यथा स्यादित्येवं सप्रयोजनं दृश्यते इति । इदं तु वक्तव्यम् - प्रपचतितरामित्यादौ तरबन्तेन समासे पश्चादाम् भवन् प्रत्ययग्रहणपरिभाषया पचितितरशब्दस्यैव घान्तत्वात् तत एव स्यात् । तत्र को दोषः सोपसर्गस्य सङ्घातस्यैकपद्याभावाद् आम्प्रपचतितरां देवदेत्तेत्यादौ आम एकान्तरमामन्त्रितमनन्तिके इत्येष विधिर्न स्यात्, शेषनिघातश्च प्रशब्दस्य न स्यात् भिन्नपदत्वात् । तस्मात् प्रशब्दस्यामन्तेन समासोऽङ्गी

कर्तव्यः, न तरबन्तेन । तत्र समासत्वात् समुदायस्य प्रातिपदिकत्वे विभक्तावैकपद्यं भवति । स्वरे तु देषप्रसङ्गात् कृद्ग्रहणमपि त्यक्तव्यमिति भाष्ये स्थितम्, प्रपचतिदेशीयादौ का गतिरिति न विद्मः ।।

उमे वनस्पत्यादिषु युगपत् ।। 6 - 2 - 140 ।।

वनशब्दः नब्विषयस्वानिसन्तस्य इत्याद्युदात्तः पातेर्डतिः पतिः ।

तनुशब्दोऽन्तोदात्त इति । केचितु तस्याप्याद्युदात्तत्वमत्र निपातयन्ति, तथा च तनूनपादुच्यते गर्भ आसुरः इत्याद्युदात्तमधीयते ।

नरा अस्मिन्नित्यादि । शंसेः अकर्तरि च कारके संज्ञायाम् इत्यधिकरणे वा घञ् । अबन्त इति । कृत्यल्युटो बहुलम् इति कर्तरि ॠदोरप् ।

शुनः शेप इति । बहुव्रीहिः । शुनः पुच्छशेपलाङ्गूलेषु इत्येनेन षष्ठ्या अलुक् । उभावाद्युदात्താविति । श्वन्शब्दः प्रातिपदिकस्वरेण शेपशब्दः स्वाङ्गशिटामदन्तानाम् तइत्यनेन । शिट् इति सर्वादीनां संज्ञा, स्वाङ्गवाचिनां शिटामदन्तानां चांदिरुदात्तो भवतीत्यर्थः । शडि रुजायाम् पचाद्यच् शण्डः, प्रामादित्वादाद्युदात्तः ।

मर्चयतेः इम्भीकापाशल्यतिमर्चिभ्यः कन् इति कन्, तितुत्र तइत्यादिना इट् प्रतिषेधः, कुत्वम् - मर्कशब्द तआद्युदात्तः ।

तुष्णाब्द इति । तृषेर्निष्ठायामस्मादेव निपातनादिडभावः , निष्ठा च द्व्यजनात् इत्याद्युदात्तत्वम् ।

लबि अवस्रन्सने पचाद्यच्, अस्मादेव निपात्नाल्लकारस्य बकारः, बिश्वानि वयांस्यस्य विश्ववयाः, मृङः अन्येभ्योऽपि दृश्यते इति विच् - मरिति ।

भुजिमृङ्भ्यां युक्त्युकौ - मृत्युः ।।

देवताद्वन्द्वे च ।। 6 - 2 - 141 ।।

उदाहरणेषु देवताद्वन्द्वे च इति पूर्वपदस्यानङ् । अत्र त्रय उदात्ता इति । त्रयाणां पपदानामादयः ।।

नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु ।। 6 - 2 - 142 ।।

अग्निशब्दः अङ्गेर्निर्नलोपश्च इति निप्रत्ययान्तः । कृवापाचिमिस्वदिसाध्यशूभ्य उण् , युक्, वायुः ।

उत्तरपदग्रहकणमित्यादि । अन्यथाऽस्मिन्प्रकरणे द्वन्द्वेः सप्तम्या निर्दिष्टः, नोत्तरपदम् तत्र अनुदात्तादौ इति सप्तम्यन्तं द्वन्द्वस्यैव विशेषणं स्यात्, ततश्चन्द्रसूर्यावित्यादौ प्रितषेधः स्यचात् । उत्तरपदग्रहणे तु सति तस्यैव श्रुतस्य अनुदात्तादौ ित्येतद्विशेषणं भवति ।

अनुदात्तादावित्यादि । तअन्यथा विधिप्रतिषेधयोः समानविषयत्वाद्विकल्पः प्रसज्येत । प्रथेः षिवन् सम्प्रसारणं च । शुक्रशब्दोऽयम् ॠज्रेन्द्राग्र इत्यादिना निपातितोऽन्तोदात्तः ।।

अन्तः ।। 6 - 2 - 143 ।।

तत्र समासस्योत्तरपदस्वेति । क्वचित् समासस्यान्त उदात्तो भवति, क्वचिदुत्तरपदस्येत्यर्थः । विषयविभागमुत्तरत्र दर्शयिष्यति ।।

थाथाधञ्क्ताजबित्रकाणाम् ।। 6 - 2 - 144 ।।

आद्युदात्तमुत्तरपदं स्यादिति । यदिदं नोच्येतेति भावः । दूरादागत तइति । तअत्र कर्मणि क्तः , ग्रामादिरभिधेयः, कृता आङो गतिसमासे गतिरनन्तरः इति प्रकृतिभावे चागत इत्याद्युदात्तम्, तेन स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन इति समासः पञ्चम्याः स्तोकादिभ्यः इत्यलुक्, तत्र कारकात्परमागतमित्येतत् कृदुत्तरपदप्रकृतिस्वरेणाद्युद्त्तं स्यात् । विशुष्क इति । शुषेरकर्मकत्वात् कर्तारि क्तः, शुष्कधृष्टौ इत्याद्युदात्तत्वम्, ततो गतिसमासः । आतपशुष्क इति । नायम् सिद्धसुष्क इति सप्तमीसमासः, सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात् तइति पूर्वपदप्रकृतिस्वरप्रसङ्गात् । तस्मात् कर्तृकरणे कृता बहुरम् इति समासः ।

प्रक्षयः, प्रजय इति । एरच् । ननु च कृदुत्तरपदप्रकृतिस्वरेणैवात्रान्तोदात्तोत्वं सिद्धम् अत आह - क्षयो निवास इत्यादि ।

प्रलवः प्रसव इत्यादि । ॠदोरप् ।

प्रलवित्रमिति । अर्त्तिलूधूसूखनसहचर इत्र) ।

गोवृष इति । वृषु मृषु सेवने । सुस्तुतमिति । सुः पूजायाम्, अतिरतिक्रमणे च इति कर्मप्रवचनीयसंज्ञा, स्वती पूजायाम् इति प्रादिसमासः ।।

सूपमानात् क्तः ।। 6 - 2 - 145 ।।

वृकावलुप्तमित्यादि । लूञ् छेदने , च्युङ् प्रुङ् प्लुङ् गतौ, नर्द गर्द शब्दे - सर्वत्र कर्तृकरकणे कृता बहुलम् इति समासः । कवृकैसरिवालुप्तमित्यादिविग्रहः । उपमानादपीत्यादि । अत्रेतिशब्दस्यानन्तरं प्रप्त इत्यस्यानुषङ्गः ।।

संज्ञायामनाचितादीनाम् ।। 6 - 2 - 146 ।।

सम्भूतादयः शब्दा रामायणादीनां संज्ञाः, रामायणशब्दो नपुंसकलिङ्गः, प्रायेण तु पुंल्लिङ्गः पठ्यते। उपहूत ििति । ह्वञो निष्ठायां यजादित्वात् सग्प्रसारणम्। परिजग्ध इति । अदो जग्धिरादेशः । प्राप्त्यर्थादभवतेरिति । चुरादौ आधृषाद्वा इत्यधिकारे भू प्राप्तवात्मनेपदी इति पठ्यते ।

किं पुनः कारणं प्रयत्नेन कर्मणि क्त तउपपाद्यते अत आह - गातिरनन्तर इत्यत्र हीति । तद्वाधनार्थञ्चेदमिति । प्रकृतोदाहरणाभिप्रयमेतद् , न सूत्राभिप्रायम् । घनुष्खातेति । नित्यं समासेऽनुत्तरपदस्थस्य इति षत्वम् ।

चिञ् चयने ष्ठा गतिनिवृत्तौ, ण्यन्तः केवलश्च, ग्रह उपादाने , वच परिभाषणे, पद गतौ शिलष आलिङ्गने , डुधाञ् धारणपोषाणयोः - सर्वत्र कर्णमि क्तः, एते आचितादयः ।

संहिताऽगवीति गाणसूत्रम्, तद् व्याचष्टे - याद गोरन्यस्वेति ।।

प्रवृद्धादीनां च ।। 6 - 2 - 147 ।।
वृधु वृद्धौ यु मिश्रणे डुधाञ् धारणे रुह बीजजन्मनि शसु हिंसायाम् । खट्वारुढ इति । खट्वा क्षेपे इति समासः । नैतदिह पठितव्यमिति अहीने द्वितीया तइत्यत्रावोचाम । कविभिः शस्तः, तृतीय कर्मणि तइत्यस्यापवादः ।
प्रायोवृत्तिप्रदर्शनार्थ इति । प्रायो बाहुल्येन या वृत्तिर्यानादिष्वर्थेषु तस्याः प्रदर्शनार्थ इत्यर्थः ।
पुनरुत्स्यूतमिति । सीव्यतेः च्छ्वोः शूडनुनासिके इति ऊठ्, पनश्चनसोश्छन्दसि िति गतिसंज्ञायां समासः ।।
कारकादत्तश्रुतयोरेवाशिषि ।। 6 - 2 - 148 ।।
संज्ञायामनाचितादीनाम् इति वहितमन्तो दात्तत्वमनेन नियम्यते, देवा एनं देयासुः इत्येवं प्रार्थितैर्देवैर्दत्तो देवदत्तः, आशिषि लिङ्लोटौ इति वर्तमाने क्तिच् क्तौ च संज्ञायाम् इति क्तः , दो दद्धोः ।
सम्सूतो रामायण इति । कारकात् इत्युनच्यमाने गतिकारकोपपदात् इति त्रितयाधिकाराद्यथैव कारकान्नियमो भवति, तथा गतेरपि स्यात् ।
एवकारकरणं किमिति । सिद्धे विधिरारभ्यमाणोऽन्तरेणाप्येवकारं नियमार्थो भविष्यतीति प्रश्नः । कारकावधारणमित्यादि । असति ह्येवकारं विपरीतो।पि नियमः स्यात् - कारकादेव दत्तश्रुतयोरिति । एवं चाकारकाद् दत्तश्रुतयोर्न स्यात्, इष्यते, च , तथा कारकस्यानियतत्वाद् देवपालित इत्यादावन्तोदात्तप्रसङ्गः । अतः कारकावधारणं यथा स्याद्दत्तश्रुतावधारणं मा भूदित्येवमर्थं करणमित्यर्थः । अयमपि नियम इष्यत इति । एतच्च तन्त्रेण सूत्रद्वयोच्चारणादेकसूत्रेऽपि आशिष्येवेति भिन्नकमत्वादेवकारस्य लभ्यते ।।
इत्यम्भूतेन कृतमिति च ।। 6 - 2 - 149 ।।
सप्तप्रलपितमित्यादि । कथं पनरेतान्युदाहरणानि, यावता कृतामित्युच्यते, न च प्रलपितादीनि कृतानि, अभूतप्रादुर्भाव एव हि करोतिर्वर्तते, ततश्च सुप्रकृतं सुप्रभाषितं सुप्रोत्पादितमित्यादिकमेवोदाहर्तव्यम् अत आह - कृतमिति क्रियासामान्ये करोतिर्वर्तत इति । ततश्च यथा क्रियावचनो धातुः क्रियायां क्रियार्थायाम् इत्यादौ विशेषाणामपि ग्रहणं भवति, तद्वदत्रापि । अभूतप्रादुर्भावः - निष्पादनम् ।।
अनो भावकर्मवचनः ।। 6 - 2 - 150 ।।
पयः पानादीनाममुपपदसमासः । राजभोजनादौ षष्ठ्या समासः ।
सर्वषु प्रत्युदाहरणेष्वित्यादि । एतेन गातिकारकोपपदात् इत्यस्यायमपवाद इति दर्शयति ।।
मन्क्तिन्व्याख्यानशयनासनस्थाRनयाजकादिक्रीताः ।।B 6 - 2 - 151 ।।
रथवर्त्मेति । वृत्तेरधिकरणे मनिन्, कर्तरि षष्ठ्या समासः । पाणिनिकृतिरिति । कर्मणि क्तिन्, पूर्ववत्समासः । व्याख्यानशब्दः करणसाधनः, शयनासनस्थानशब्दा अधिकरणसाधनाः। प्रकृतिः, प्रह्वतिरिति । तादौ च निति कृत्यतौ इति पूर्वपदप्रकृतिस्वर एवात्र भवति ।।
सप्तम्याः पुण्यम् ।। 6 - 2 - 152 ।।
उणादीनां त्विति । अतः कृकमिकंस इत्यत्र कमिग्रहणैनैव सिद्धे कंसग्रहणादुणादिषु पाक्षिकव्युत्पत्तिकार्यमिति भावः । पूञो यत्, णुक् ह्रस्वश्च, पुण्यम् । ह्रस्वविधानादगुणत्वम् । यतोऽनावः इत्याद्युदात्तवम् ।।
ऊनार्थकलहं तृतीयायाः ।। 6 - 2 - 153 ।।
उदाहरणेषु पूर्वसदृश इति तृतीयासमासः ।
अत्र केचिदित्यादि । नन्वेवमूनशब्दस्यापि स्वरुपग्रहणं प्रसज्येत, ततश्च तदर्थानामान्येषां ग्रहणं न स्यात् अत आह - ऊनशब्देनैव त्विति । अर्थनिर्देशार्थत्वं तु व्याख्यानादवसेयम् ।।
मिश्रं चानुपसर्गमसन्धौ ।। 6 - 2 - 154 ।।
कथं पुनर्मिश्रशब्दस्य विधीयमानः सम्मिश्रशब्दस्य प्राप्वोति, कथं वा मिश्रशब्देन समान उच्यमानः सोपसर्गेण लभ्यते अत आह - इहेत्यादि ।
प्रत्युदाहरणे सन्धिं दर्शयति - बाह्मकणैरिति । एतदेव स्पष्ययति - एकार्थ्यमापच इति ।
कथं पुनः सन्धिशब्दस्यायमर्थः इत्याह - सन्धिरिति । पणबन्धः - परिभाषणम् - यदि मे भवानेषं कुर्यादहमपि ते इदं करिष्यामीत्येवंरुपः ।
केचित्पुनरिति । गृह्यमाणो विशेषो व्यावृत्तिर्थस्यां प्रत्यासत्तो सा तथोक्ता । ततः किम् इत्याह - तत्रेति । यद्यपि राज्ञोऽपि ब्राह्मणैस्सह प्रत्यासत्तिरस्ति, तथापि सत्यामपि तस्यां परस्परमूर्तिविभागस्वरुपभेदो गृह्यत इति प्रत्युदाहरणोपपत्तिरित्यर्थः ।
उदाहरणेषु नैवमित्याह - उदाहरणेष्विति ।।
नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः ।। 6 - 2 - 155 ।।
सम्पादि - शोभनम् । कार्णवेष्टकिकमिति । सम्पादिनि इति प्राग्वतेष्ठ्य् । छैदिक इति । छैदादिभ्यो नित्यम् इति आर्हादगोपुच्छ इत्यादिना ठक् । वत्सीय इति । प्राक् क्रीताच्छः । सान्तापिक इति । तस्मै प्रभवति सन्तापादिभ्यः इति पाग्वतेष्ठ्ञ् ।
नञ तिति किमिति । प्रतिषेधे प्रायेण नञ एव प्रवृत्तिदर्शनात्प्रश्नः । विगार्दभरथिक तइति । अव्ययपूर्वपदप्रकृतिस्वर एवात्र भवति । गर्दभरथिकादन्य इत्यादि । उदाहरणादस्य विशेषंम प्रदशेयितुम् गुणप्रतिषेधे इति सूत्रावयवं व्याचष्टे - गुण इति । तद्धितार्थः सम्पाद्यादिः, तस्य यत्प्रवृत्तिनिमित्तं सम्पादित्वादि । आदिशब्देन तदर्हत्वादेर्ग्रहणम्, स गुण इत्युच्यते । उक्तं हि - संसर्गभेदकं यद्यत् सव्यापारं प्रतीयते । गुणत्वं परतन्त्रत्वात्तस्य शास्त्र उदाहृतम् ।। इति ।

कथं तस्य गुणस्य प्रतिषेध उच्यते इत्याह - कर्णवेष्टकाभ्यां न सम्पादीति । ववेढेति । अर्हर्थे तृच्, ढत्वधात्वष्टुत्वधलोपषु सहिवहोरोदवर्णस्य इत्योत्वम् ।।

ययतोश्चातदर्थे ।। 6 - 2 - 156 ।।

पाशतृणशब्दाभ्यां समूहे पाशादिभ्यो यः दन्तकर्णशब्दाभ्यां भवार्थे दिगादिभ्यो यत्, शरीरावयवाच्च इति यत् ।

पाद्यमिति । पादार्घाभ्यां च इति यत् । अदेयमिति । अर्हार्थे अचो यत् ईद्याति इतीत्वम्, गुणः । निरनुबन्धकैकानुबन्धयीरिति । एते च परिभाषे - वामदेवाद् ड्यड्ड्यौ इत्यत्र ज्ञापिते ।।

अच्कावशक्तौ ।। 6 - 2 - 157 ।।

अविक्षिप इति । वक्ष्यमाणैः कृत्योकेष्णुज्भिः साहचर्यादच्कयोः कृतोरिदं ग्रहणम्, तेन कृद्ग्रहणपरिभाषया विक्षिपशब्दस्य कान्तत्वम् ।

दीक्षितपरिव्राजकौ शास्त्रनिषेधान्न पचतः, न त्वशक्तत्वात्, तेन तत्र व्रतं गम्यते, न त्वशक्तिः ।।

आक्रोशे च ।। 6 - 2 - 158 ।।

अपचोऽयं जाल्म ईति । लोभोऽत्र विवक्षितः, न त्वशाक्तिः ।।

संज्ञायाम् ।। 6 - 2 - 159 ।।

अदेवदत्त इति । यो देवदत्तः सन् तत्कार्यं न करोति, स एवमाक्रुश्यते ।।

कृत्योकेष्णुच्चार्वादयश्च ।। 6 - 2 - 160 ।।

द्व्यनुबन्धकस्यापि ग्रहणमिति । भवतीति वक्ष्यमाणेन सम्बन्धः । अत्रैव हेतुः - इकारादेर्विधानसामर्थ्यादिति । भवतेरुदात्तत्वात्ततः परस्य खिष्णुच इटैवेकारादित्वे सिद्धे इकारादेर्विधानमिह सामान्यग्रहणार्थमे वेति भावः । अचारुरित्यादि ।

चरेर्ञुण् चारुः । साधेरुण् साधुः । युधा चरति यौधिकः । एजेः खश् अङ्गमेजयः, ततोऽन्योऽनङ्गमेजयः । वदेरान्यः । न कस्मादकस्मात् । वृतु वर्तते, वृधु वृद्धौ, ञित्वरा सम्भ्रमे, रुच दीप्तौ धृङ् अवस्थाने - एते शानजान्ताः गृह्यते । संज्ञायां कन् - गृहपतिकः । गृहपतिरित्यन्ये पठन्ति ।।

बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ।। 6 - 2 - 162 ।।

प्रथमेति स्वरुपग्रहणम् । पूरणशब्दस्य स्वरितत्ात्तदधिकारविहितानां प्रत्ययानां ग्रहणम् ।

अनेन प्रथम इति । अत्र तृतीयापूर्वपदप्रकृतिस्वर एव भवति ।

यत्प्रथमा इति । यः प्रथम एषामिति बहुव्रीहिः । अत्रापि पूर्वपगदप्रकृतिस्वर एव भवति ।

इदम्प्रधाना इत्यर्थं इति ।

अनेन प्रधानवचनः प्रथमशब्दो न त्वेकसंख्यावचन इति दर्शयन् गणनाभावमाह - उत्तरपदस्वेत्यादि । सर्वत्रेह समासस्येति प्रकृतम्, उत्तरपदादिः इत्यतः प्रभति उत्तरपदस्य इति च, तत्र चोत्तरपदं कायित्वेनाश्रीयते । तेन यदा कबुत्पद्यते तदा कपि परतो यत्पूर्वं प्रथमेति तदन्तोदात्तं भवति, न तु कबन्तम् । कप्रत्ययो हि समासस्यैवान्तः, नोत्तरपदस्य । यदा च समासार्थादुत्तरपदादकृत एव समासे समासान्त इति पक्षः, तदापि प्रथमपूरणयोः इति विशेष्टरुपग्रहणात्, कपश्च तत्रान्तर्भावादुपात्तयोरेव स्वरः । ननु यदत्रोत्तपरपदं कबन्तं न तदुपात्तम्, यच्चोपात्तं न तदुत्तरपदम्, कपा सहोत्तरपदत्वादिति नात्र कपः स्वरप्रसङ्गः, नापि ततः पूर्वपदस्य सेवरेण भवितव्यम् । तस्मादिस्मिन् पक्षे उत्तरपदग्रहणमुपान्तस्योपलक्षणम्। प्रायोण हि तदुत्तरपदम्, उत्तरपदस्य कार्थित्वात् । कोऽर्थः प्रायोणोत्तरपदभूतयोः प्रथमपूरणयोः कार्तित्वादित्यर्थः ।।

विभाषा छन्दसि ।। 6 - 2 - 164 ।।

द्विस्तना - इत्यन्तोदात्तम् । चतुस्तना - इत्याद्युदात्तम् ।।

संज्ञायां मित्त्राजिनयोः ।। 6 - 2 - 165 ।।

विश्वामित्त्र इति । मित्त्रे चर्षौ इति दीर्घः, परत्वादनेनान्तोदात्तत्वं प्राप्तं प्रतिषिध्यते, ततः बहुव्रीहौ विश्वं संज्ञायाम् इति पूर्वपदान्तोदात्तं भवति ।।

व्यवायिनोऽन्तरम् ।। 6 - 2 - 166 ।।

उदाहरणे व्यवधानवाचिनोऽन्तराशब्दात् तत्करोति इति णिचि पचाद्यच् । प्रत्युदाहरणे त्वन्यवाच्यन्तरशब्दः ।।

मुखं स्वाङ्गमः ।। 6 - 2 - 167 ।।

दीर्घमुखा शालेति । मुखशब्देनात्र द्वारप्रदेशः शालाया उच्यते । ननु च स्वमङ्गं, ततश्च भवितव्यमेवात्रापि अत आह स्वाङ्गमद्रवादिलक्षणं गृह्यत इति ।।

नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ।। 6 - 2 - 167 ।।

उच्चैर्नीचैः शब्दै स्वरादिष्वन्तोदात्तौ । प्राक्शब्दः अनिगन्तोऽञ्चतौ इत्याद्युदात्तः । प्रत्यङित्यत्र कृदुत्तरपदप्रकृतिस्वरः । गोमहतोरुक्तः स्वरः । स्थूलशब्दः ऋज्रेन्द्र इत्यादौ निपातितः, अन्तोदात्तः । मुषेः क्तिच् - मुष्टिः । कुश्च, प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च इति पृथुः । वदेः सः वत्सः ।

गोमुष्टिवत्सपूर्वस्यत्यादि । अस्य प्रतिषेधस्यावकाशो यत्र गवाध्युपमानं न भवति - गौर्मुखमित यस्य, मुष्टिर्मुखमिव यस्य, वत्सो मुखमिव यस्येति, सर्वत्र गवाद्युपमेयम्, नोपमानम् विकल्पस्योत्तरस्यावकाशो यत्र गवादिपूर्वपदं न भवति - सिंहमुखः व्याघ्रमुखः, गावादावुपमाने उभयप्रसंगेऽयमेव भवति प्रतिषेधः पूर्वविप्रतिषेधेन ।।

निष्ठोपमानादन्यतरस्याम् ।। 6 - 2 - 169 ।।

हिंसेः पचाद्यच्, पृ्षोदरादित्वादाद्यन्तविपर्ययः - सिंहः । व्याजिघ्रतीति व्याघ्रः । आतश्चोपसर्गे इति कः । पाध्राध्माधेट्दृशः इति शो न भवति, जिघ्रतेः संज्ञायां प्रतिषेधः इति वचनात् ।।

जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतिमितप्रतिमन्नाः ।। 6 - 2- 170 ।।

ननूदाहरणेषु प्रत्युदारहणेषु च नि,ठेति निष्ठान्तं पूर्वं प्रयोक्तव्यं स्यात् इत्यत आह - एतष्विति । प्रत्युदारहणे,ित्यादि । तत्र पुत्रशब्दोऽन्तोदात्तः । वसेष्ट्रन् - वस्त्रम् , दस्यैव ल्युट् - वसनम् । कुण्डशब्दः नब्विषयस्यानिसन्तस्य इत्याद्यदात्तः ।।

वा जाते ।। 6 - 2 - 171 ।।

दन्तस्तनशब्दौ स्वाङ्गशिटामदन्तानाम् इत्याद्युदात्तौ । मासशब्दः प्रामादीनां च इत्याद्युदात्तः । संवत्सरशब्दः बंहिष्ठवत्सरतिशत्थान्तानाम् इत्यन्तोदात्तः । अस्यार्थः - बंहिष्टवत्सरतिशत्थ ित्येवमन्तानामन्त उदात्तो भवति - बंहिष्ठः, संवत्सरः, सप्ततिः, अशीतिः, त्रिंशत्, चत्वारिंशत्, गूथम्, पूथम् ।

सुखदुःखशब्दौ खान्तस्याशमादेः इत्यान्तोदात्तौ । अस्यार्थः - खान्तस्य शब्दस्याशकारमकारादेरन्त उदात्तो भवति, नखः, तउखा । अशमादेरिति किम् शिखा, मुखम् । तृपेः स्फायितञ्चि इत्यादिना रक्प्रत्ययः । कृतेश्छ्र च - कृच्छ्रम् । असेर्बहुलवचनाद्रक्, अस्रम् । अम्बिकादयश्च इति अम्बकशब्द इकन्प्रत्ययान्तो निपातितः । प्रतिगता आपोऽत्र प्रतीपम् । कृवापाजिभ्य उण् - कारुः । कृपेः क्युन् - कृपणः । सहेः क्ते सोढः । दश सुखादयः ।।

नञ्सुभ्याम् ।। 6 - 2 - 172 ।।

समासस्यैतदित्यादि । यद्यपि समास उत्तरपदं चेति प्रकृतम्, तथाप्यत्र समासस्येव कार्यित्वामिष्यते । एतच्च कपि पूर्वम् इति वचनादवसीयते । यदि ह्यनेनोत्तरपदस्यान्तोदात्तत्वं स्यात्, ततोऽकृमारीक इत्यादावनेनैव समद्धत्वात् अपि पूर्वम् इति न वाच्यं स्यात् । समासान्ताश्च समासवयवा भवन्तीति । समासान्ता इत्यत्रान्तग्रहणमेतदर्थम् - समासान्ताः समासग्रहणेन यथा गृह्येरन्निति, तेनानृच इत्यादौ कृते समासान्ते तस्यैव समासान्तस्योदात्तत्वं भवति । वहवृच इति । बहोर्नञ्वद् इत्यतिदेशादिदमत्रोदाहृतम् । एतच्च समासान्ताः समासस्यैवावयवाः, नोत्तरपदस्य इत्याश्रित्योक्तम् । न कपि इत्यत्र तु पूर्वं समासान्तेषु पश्चात्तदन्तेन समासः इति वक्ष्यति ।।

कपि पूर्वम् ।। 6 - 2 - 173 ।।

पूर्वेण कप एवादात्तत्वे प्राप्ते ततः पूर्वस्योदात्तचं धीयते ह्रस्वन्तेऽन्त्यात्पूर्वम् कइति वचनादिह दीर्घान्ता एवोदाहृताः । नद्यृतश्च इति कप् ।।

ह्रस्वान्तेऽन्त्यात्पूर्वम् ।। 6 - 2 - 174 ।।

ह्रस्वान्ते इत्यस्य बहुव्रीहेरन्यपदार्थ उत्तरपदं समासो वेत्याह - ह्रस्वोऽन्तो यस्यत्यादि ।

अत्र च कपि परतः इति पृथग्वचनात्तद्रहितमुत्तरपदं समासश्च गृह्यते, पूर्वग्रहणमनर्थकम्, कपि पूर्वमित्यनुवृत्तेः इत्यत आह - पूर्वमिति वर्तमाने इत्यादि । द्वितीये पूर्वग्रहणे सति प्रवृत्तिभेदो भवति, तत्रैकया प्रवृत्त्या ह्रस्वान्तऽन्त्यात्पूर्वस्योदात्तत्वं विधीयते, अपरया तु नियम्यते - ह्रस्वान्तेऽन्स्यादेव पूर्वमुदात्तं भवति, न तु कपि पूर्वमिति। तेन किं सिद्धं भवति तत्राह - तेनेति । नास्त्यस्य ज्ञ इत्यज्ञकः, शोभनो ज्ञोऽस्येति सुज्ञकः । तत्र यद्येष नियमो न स्यात्, ततोऽन्त्यात्पूर्व उदात्तभावी नास्तीति कपि पूर्वम् इत्ययमेव स्वरः स्यात् । अस्मिस्तु नियमे सति न भवति, नञ्सुभ्याम् इति कबन्तस्यैव भवति । यथा च कबन्तस्य भवति तथा तत्रैव प्रितपादितम् । व्यक्तिपक्षाश्रयणे चैतत्पूर्वग्रहणं कृतम् । जातिपक्षाश्रयणे तु यथा हलादिः शेषः इत्यत्र क्वचिदपि वर्तमानो हलादिरनादेः सर्वत्र निवृत्तिं करोति, (तथैव) ह्रस्वान्तेऽन्त्यात्पूर्वम् इत्यत्रापि ह्रस्वजातेराश्रयणात्सर्वत्र ह्रस्वान्ते तक्रकौण्डिन्यन्यायेन कपि पूर्वम् इत्यस्याप्रवृत्तिः सिध्यति ।।

बहोर्नञ्वदुत्तरपदभूम्नि ।। 6 - 2 - 175 ।।

नञ इव नञ्वत्, अस्मादेव निपातानात्पञ्चमीसमर्थाद्वतिः । यद्वा - सम्बन्धसमामान्ये षष्ठी, तया सर्वे विभक्त्यर्था संगृह्यन्त इति पञ्चम्यर्थेऽपि तत्र तस्येव इति वतिः षष्ठ्यन्तादेव । बहूनां भावो भूमा, बहोर्लोपो भू

च बहोः, उत्तरपदशब्देन तदर्थो गृह्यते, स्वरुपणोत्तरपदस्य बहुत्वासम्भवात् । तदाह - उत्तरपदार्थबहुत्व इति । किमर्थं पुनरतिदेश आश्रीयते, न नञ्सुबहुभ्य उत्तरपदभूम्नि इत्युच्येत, एवमपि ह्युच्यमाने उत्तरपदभूम्नि इत्येतत्सम्भवव्यभिचाराभ्यां बहोरेव विशेषणं भवतिष्यति, योऽपि न गुणादयोऽवयवाः इति प्रतिषेधः, तत्राप्युत्तरपदभूम्नीत्यनुवृत्तेर्बहोरेव भवतिष्यति, न नञ्सुभ्याम् - अगुणः सगुणः इति इदं तर्हि प्रयोजनम् - प्रकरणान्तरेऽपि यो नञाश्रयः स्वरस्तस्याप्यतिदेशो यथा स्यादिति । तद्दर्शयति - नञी जरमरमित्त्रमृता इत्युक्तमित्यादि ।।

न गुणादयोऽवयवाः ।। 6 - 2 - 173 ।।

गुण संख्याने चुरादेरदन्तादेरच् । अशेः सरः . अक्षरः । छन्दो मीयते येन छन्दोमानम् । वचेः सुपूर्वात् क्तः - सूक्तम् । अधीयतेऽस्मादिति अध्यायः , इङश्च इति घञ् । एते गुणादयः ।।

उपसर्गात् स्वाङ्गं ध्रुवमषर्शु ।। 6 - 3 - 177 ।।

स्वाङ्गं प्रति क्रियायोगाभावाद् कउपसर्गग्रहणं प्रद्युपलक्षमम् । सततं यस्येत्यादिना षृष्ठस्य ध्रुवत्वं दर्शयति । तीर्थपृष्ठगूढयूथ इति पृष्ठशब्दो निपातितः । उद्वाहुः क्रोशतीति । अत्र क्रोशनसमय एवोद्वाहुत्वं न सर्वदेत्यध्रुवत्वम् । स्पृशेः श्वण्शुनौ पृ च स्वृशेर्धातोः श्वण्, न् - इत्येतौ प्रत्यौ भवतः, धातोश्च पृ इत्यादेशः । बहुलवचनाच्छकारस्योत्संज्ञा न भवति, यथाक्रमं वृद्धिगुणौ - पार्श्वम्, पर्शुः ।।

परेरमितोभावि मण्डलम् ।। बहुव्रीहिरयमित्यादि । यदा बहुव्रीहिस्तदा परितः कूलमस्येति विग्रहः । प्रादिसमासे तु परिगतं कूलमिति । यदा पुनरव्ययीभावस्तदा परिकूलादिति । अव्ययीभावपक्षेऽपि हीत्यादि । अव्ययीभावेऽप्ययमेव स्वर एषितव्यः न समासस्वरेण सिद्धिरित्यर्त्थः । अमितो भावोऽस्यास्तीत्यमितोभावीति । लौकिके योगे लाघवस्यासार्वत्रिकत्वाद्बहुव्रीहिरेव नाश्रित इत्याह - अमितोभावीति । सुप्यजातौ इति णिनिरिति । यच्चैवंस्वभावमिति । अभितोभवनस्वभावम् ।।

प्रादस्वाङ्गं संज्ञायाम् ।। 6 - 2 - 183 ।।

प्रकोष्ठादिषु प्रादिसमासः बहुव्रीहिर्वा ।।

निरुदकादीनि च ।। 6 - 2 - 184 ।।

एषामित्यादि । यदा प्रदिसमासस्तदा - निर्गतमुदकं निर्गतं वोदकादिति विग्रहः, बहुव्रीहौ -- निर्गतमुदकमस्मादिति । अथाव्ययीभावार्थमप्येषां ग्रहणं कस्मान्न भवति अथ आह -- अव्ययीभावे त्विति । निष्कालिक इति । कालशब्दज्जानपदादिसूत्रेण ङीष्, ततः स्वार्थे कन्, केऽणः इति ह्रस्वः, कालिका, ततः प्रादिसमासः ।

निष्षेष इति । पिषेर्घञ् । कुत्सितस्तरीय इति । दुः कुत्सायां वर्तत इति दर्शयति । अपरे निस्तरीक इति । पठन्तीत्यनुषङ्गः, निष्पूर्वोऽजिनशब्दः । स एवोदुपपूर्वः ।

परेरित्यादि । परेरुत्तरे हस्तादयोऽन्तोदात्ता भवन्ति । परिहस्त इत्यादि । (हरैरिव केशा यस्य हरिकेशः , कपेरिव कपिकेशः)।।

अभेर्मुखम् ।।6 - 2 - 185 ।।

उपसर्गात्स्वाङ्ग ध्रुवमिति सिद्ध इति । मुखं स्वाङ्गम् इति न सिद्ध्यति नाव्ययदिक्शब्द इति प्रतिषेधात् ।।

अपाञ्च ।। 6 - 2 - 186 ।।

अव्ययीभावोऽप्यत्र प्रयोजयतीति । कुतः इत्याह - तत्रापि हीति । यस्मात्तत्रापि परिप्रत्युपापा इति पूर्वपदप्रकृतिस्वरत्वमुक्तम्, तस्मात्सोऽपि प्रयोजयतीत्यर्थः ।

योगाविभाघ उत्तरार्थ इति । उत्तरत्र उपात् इत्यस्यैवानुवृत्तिर्यथा स्यात्, अभेर्मा भूत् ।।

स्फिगपूतवीणाञ्चोऽध्वकुक्षिसीरनाम नाम च ।। 6 - 2 - 187 ।।

नामग्रहणं सीरशब्देनेव सम्बध्यते, न स्फिगादिभिःस्फिगपूतकुक्षीणां पृथग्ग्रहणात् ।

उपसर्गादध्वन इति यदा समासान्त इत्यादि । अत्र कारणमाह -- तस्मिन् हि सतीति । ननु च

चउपसर्गादध्वनः इत्यत्र तु न विकल्पः श्रुतः, नापि प्रकृतः, तत्किमुच्यते - यदा समासान्तो नास्तीति अत आह -- अनित्यस्चेति । यदि नित्यः समासान्तः स्यदध्वग्रहणमिह न कर्तव्यं स्याद्, अच्प्रत्ययस्य चित्त्वादेवान्तोदात्तत्वस्य सिद्धत्वात् कृतं तु, ज्ञापयति -- समासान्तविधिरनित्य इति ।

स्फिगपूतकुक्षीणामित्यादि । यदा ह्येतानि स्वाङ्गवाचीनि ध्रुवाणि च भवन्ति, बहुव्रीहिश्च समासः, तदा उपसर्घात्स्वाङ्गम् इत्येव सिद्धम् ।।

अधेरुपरिस्थम् ।। 6 - 2 - 188 ।।

उपरि तिष्ठतीत्युपरिस्थम्, सुपि स्थः इति कः ।

दन्तस्योपरीत्यादिनोपरिस्थत्वं दर्शयति ।

अधिकरणमिति । अत्र कृदुत्तरपदप्रकृतिस्वरेण ककाराकार उदात्तः ।।

अनोरप्रधानकनीयसी ।। 6 - 2 - 189 ।।

उदारहणे उत्तरपदार्थस्याप्राधान्यं दर्शयति । पूर्वपदार्थप्रधानः प्रादिसमासोऽयमिति । प्रधानार्थे च कनीयोग्रहणमिति । अन्यत्रा प्रधानग्रहणेनैव सिद्धत्वात् । अनुगतो ज्यष्ठ इति । विग्रहविशेषेण प्रधानवाचित्वं ज्येष्टशब्दस्य दर्शयति ।।

पुरुषश्चान्वादिष्ठः ।। 6 - 2 - 190 ।।

अन्वादिष्टः - अप्रधानशिष्टः, यथा भिक्षामठ गां चानयेति गोरानयनम् । कथितानुकथितो वेति । कस्मिंश्चित्प्राक्कथिते योऽन्यः पश्चात्कथ्यते स कथितानुकथितः । अनुगतः - पश्चाद्गतः ।।

अतेरकृत्पदे ।। 6 - 2 - 191 ।।

अकृच्च पदच्च अकृत्पदे ।। आतकारक इति । शोभनः कारकः, स्वती पूजायाम् इति प्रादिसमासः ।

अतेर्धातुलोप इति वक्तव्यमिति । अत्यङ्कुश चइत्यादौ वृत्तिवषयेऽतिशब्दो।तिक्रन्तार्थवृत्तिरिति क्रमेरप्रयोग एव धातुलोपः । अतिगार्ग्य इति । यथान्यासे त्वत्रापि प्राप्नोति गार्ग्यशब्दस्याकृदन्तत्वात् । अतिकारक इति । यथान्यासे त्वत्र न स्यात्, कारकशब्दस्य कृदन्तत्वात् । तस्मादव्याप्त्यतिव्याप्तिपरिहारार्थमकृत्पदे इत्यपनीय अतेर्धातुलोपः इति वक्तव्यम् ।

नेरनिधाने ।। 6 - 2 - 192 ।।

निधानमप्रकाशतेति । न निधानमनिधानम् । निर्गतं मूलमस्य निर्गतं वा मूलन्निमूलम् ।

निधानार्थं ब्रवीतीति । अप्रकाशतां ब्रवीतीत्यर्थः । कथं पुनर्निशब्दस्यायमर्थः इत्याह - प्रादयो हीति ।।

प्रतेरंश्वादयस्तत्पुरुषे ।। 6 - 2 - 193 ।।

अंशुशब्दः कुश्च इति वर्तमाने मृगय्वादयश्च इति निपातितः । राजतेः कनिन् राजन् । उष दाहे, ष्ट्रन् --उष्ट्रः । खिट्, ण्वुल् -खेटकः । अजिरशिशिर इति किरच् - अजिरम् । द्रातेराङ्पूर्वाद् आतश्चोपसर्गे इत्यङ्, अस्मादेव निपातनादाङो रगागमझः - आर्द्रा । श्रृणोतेर्ल्युट् - श्रवणम् । कृतिभिदिलतिभ्यः कित्, तिकन् प्रकृतः - कृत्तिका । ऋघेः पचाद्यच् - अर्धः । पुर अग्रगमने इगुपधात्कः पुरम् । एते अंश्वादयः ।।

उकपाद् द्व्यजजिनमरगौरायः ।। 6 - 2 - 194 ।।

गुरी उद्यमने, पचाद्यजन्तात्प्रज्ञाद्यण्, गौरम्। तिष्येण युक्तः कालस्तैषः । लेट् लोट् इति । कण्ड्वादिपठिताब्यां पचाद्यच्, लेटलोटौ । दिहेर्जिह्वा उणादिः । कृषेर्वर्णे इति नक्, टाप् - कृष्णा । कन्याशब्दः अध्न्यादयश्च इति निपातितः । गुघ घनत्वे इगुपधात्कः गुधः । क्लृपिपदिभ्यां घञ् - कल्पः, पादः ।।

सोरवक्षेपणे ।। 6 - 2 - 195 ।।

उदारहणे तु स्वती पूजायाम् इति कर्मप्वचनीयस्य समासः । तेन सुप्रत्यवसिते थाथादिस्वरेण सिद्धिर्नाशङ्क्या । यदि सुशब्दोऽत्र पूजायामेव वर्तते, कथं तर्हि क्षेपो गम्यते इत्याह - वाक्यार्थस्त्विति । कथम् इत्याह - आसूयया तथाभिधानादिति । यः खल्वनर्थं उपस्थिते सुखायाम् आस्ते तं प्रकृत्यैवमुक्ते क्षेपो गम्यते ।।

विभाषोत्पुच्छे।। 6 - 2 - 196 ।।

सेयमुभयत्र विभाषेति । आद्यप्रवृत्तावव्ययपूर्वपदप्रकृतिस्वरेण बाधितत्वात् समासस्यान्तोदात्तत्वमप्राप्तम्, द्वितीयायां तु थाथादिस्वरेण नित्यं प्राप्तमिति कृत्वा ।।

द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ ।। द्वित्रिभ्याम् इति दिग्योगलक्षणा पञ्चमी, पाद्दन्मूर्द्धसु इति सत्सप्तमी, बहुव्रीहिः कार्यीति, तदेतदाह - द्वित्रि इत्येताभ्यामिति । द्विपादिति । संख्या सुपूर्वस्य इत्यकारलोपः समासान्तः । दन्निति । वयसि दन्तस्य दतृ।

मूर्द्धन्नित्यादि । न ह्यकृत्समासान्तस्य सम्भवः अत आह - एतदेवेति ।

यदि तर्ह्यकृतसमासान्तस्योपादनम्, एवं सति यदि समासान्तः क्रियते, तदा न प्रापनोति तस्य शब्दान्तरत्वादित्यत आह - यदपीति । इह हि बहुव्रीहिः कार्यित्वेनोपात्तः, न मूर्द्धशब्दः । तदेकदेशत्वाच्चेति । तस्य बहुव्रीहेरेकदेशोऽवयवः समासान्तस्तद्भावस्तत्त्वम्, तस्मादित्यर्थः । तदेकदेशित्वादिति पाठे स व ब्रीहिरेकदेशी अवयवी यस्य स तदेकदेशी, तस्य भावस्तत्त्वम्, तस्मादिति स एवार्थः । तदेवं बहुव्रीहेः कार्यित्वात्त्देकदेशत्वाच्च समासान्तस्य यदापि समासान्तः क्रियते, तदाप्ययं विधिर्भवत्येव ।

अपर आह - यदाप्युत्तरपदस्य कार्यित्वं तदापि परत्वादन्तोदात्तत्वे कृते पश्चात्समासान्तः, तत्र टिलोपे सति उदात्तनिवृत्तिस्वरेणैव षप्रत्ययस्य सिद्धमुदात्तत्वमिति । कल्याणमूर्द्धेति । पूर्वपदप्रकृतिस्वर एवात्र भवति । कल्याणशब्दः लघावन्ते इति मध्योदात्तः ।।

सक्थं चाक्रान्तात् ।। 6 - 2 - 198 ।।

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् इति समासान्ते कृते यः सक्थशब्दः सोऽत्र गृह्यते । क्रशब्दोऽन्तो यस्य स क्रान्तः, ततोऽन्योऽक्रान्त इति । गौरसक्थ इति । गौरशब्दः प्रज्ञाद्यणन्तत्वादन्तोदात्तः । श्लिषेरञ्चोपपधायाः इति श्लक्ष्णशब्दोऽन्तोदात्तः ।

षचश्चित्त्वादिति । एतेन चित्स्वरस्यायमपवादः, प्राप्तविभाषेयमिति दर्शयति ।।

परादिश्छन्दसि बहुलम् ।। 6 - 2 - 199 ।।

परादिरिति । परशब्देनात्र सक्थशब्द एव गृह्यत इति । तस्यैव पूर्वसूत्रे सन्निहितत्वात् । यद्येवम्, परग्रहणमनर्थकम्, प्कृतो हि सक्थशब्दोऽनुवर्तिष्यते नैतदस्तिः बहुव्रीहेरपि प्रकृतिस्यानुवृत्तिः स्यात्, तस्याद्युदात्तत्वं शङ्क्येत, विभाषाग्रहणे प्रकृते बहुलग्रहणस्य प्रयोजनमन्यदपि यथा स्यादिति । ऋजुवाहुरिति । बहुव्रीहिः । वाक्यतिश्चित्पतिरिति । षष्ठीसमासौ । अत्र भाषाविषये पत्यावैश्वर्ये इत्यस्य न भूवाक्चिद्दिधिषु इति प्रतिषेधे समासान्तोदात्तत्वं भवति ।

बहुलग्रहकणसिद्धमर्थं श्लोकेन दर्शयति - परादिश्च परान्तश्चेति । पूर्वपर शब्दाभ्यां पूर्वोत्तरपदयोर्ग्रहणम्। यत एवं परादिप्रभृतिरुदात्तश्छन्दसि दृश्यते, ततो हेतोर्बहुलं स्वरव्यत्यय उक्तः । स्वरव्यत्ययार्थं बहुलग्रहणं कृतमित्यर्थः ।।

इति श्रीहरदत्तमश्रविरचितायां पदमञ्जर्यां षष्ठाध्यायस्य द्वितीयः पादः।

6.3

अथ षष्ठाध्याये तृतीयः पादः
पदमञ्जरी

अलगुत्तरपदे ।। 6 - 3 - 1 ।।

अलुगिति चेत्यादि । प्रत्येकं स्वरितत्वप्रतिज्ञानं दशेयति, अस्य पोरयोजनम् - एकस्य निवृत्तावपरस्य निवृत्तिर्मा भूदिति । स्तोकान्मुक्त इति । करणे च

स्तोकाल्पकृच्छ्र इत्यादिना पञ्चमी, स्तोकान्तिक इत्यादिना समासः । उत्तरपद इति किमिति । लुक् तावत्समास एव प्राप्तः प्रतिषिध्यते इति सामर्थ्यादुत्तरपद तइत्येतल्लभ्यते । नलोपो नञः इत्यादौ च न समासे इत्ययो हि समासग्रहणानुवृत्तेरुत्तरपदलाभात् नतरामित्यादौ नञो नलोपाद्यभावः सिद्ध इति पश्नः । निस्तोक इति । अत्रोत्तरपदभूतेभ्योऽपि स्तोकादिभ्यः परस्याः पञ्चम्या अलुक्प्रसङ्गः ।

ननु च लक्षणप्रतिपदोक्तपरिभाषया स्तोकादिभ्यः प्रतिपदं या पञ्चमी विहिता, यश्च तेषां प्रतिपदोक्तः समासस्तस्या एव तत्रैव वा लुग्भविष्यति, तत्किमेतन्निवृत्त्यर्थेनोत्तरपदग्रहणेन इत्यत आह - अन्यार्थमित्यादि । आनङृतो द्वन्द्वे उत्तरपदे परतो यथा स्यात्, उत्तरपदस्य मा भूद् - होतापोतारौ, तअन्यथा परमपि सर्वनामस्थानापेक्षत्वेन बहिरङ्गम ऋतो ङि गुणं बाधित्वा द्वन्द्वक्रियानन्तरप्राप्त आनङ् स्यात्, होतापोतृभ्यामित्यादौ च स्यादेव । तथा इको ह्रस्वोऽङ्यो गालवस्य इति उत्तरपदे यथा स्याद् , ग्रामणीरित्यादावुत्तरस्य पदस्य मा भूदित्येवमाद्यर्थमुत्तरपदाधिकारोऽवश्यं कर्तव्यः स इहैव क्रियेत, समासानुवृत्तिः - लक्षकणप्रतिपदोक्तपरिभाषा नाक्षयितव्या भवतीति । आ कुत तइमावधिकारौ इत्यपेक्षायामाह - अलुगधिकार इत्यादि । ऋकारान्तस्य ह्युत्तरपदेऽनन्तरे पितृपुत्र इत्यादौ आनङा भवितव्यम् । यदि चात्रालुक् स्याद्विभक्त्या व्यवधानं स्यात् । यद्वा - साक्षान्निर्दिष्टमानङादिकार्यं प्रकरणप्प्तस्यालुको निवर्तकमिति अलुगधिकारः प्रगानङः तथाङ्गस्य विधीयमानं कार्यं यत्राङ्गमित्येतद्भवति तत्रैव भवति । कस्मिंश्चैतद्भवति प्रत्यये, न तूत्तरपद तथइति सामर्थ्याद् उत्तरपदाधिकारः प्रागङ्गाधिकारात् ।।

पञ्चम्याः स्तोकादिभ्यः ।। 6 - 2 - 2 ।।

स्तोकादीनां प्रतिपदिकगणेऽपाठात्सूत्रपठितानां ग्रहणमित्याह - स्तोकान्तिकदूरार्थकृच्छाणि स्तोकादीनीति । करणे च स्तोकाल्पकृच्छ्र इत्यादीनि तुस्तोकादीनि न गृह्यन्त अव्याप्तः । स्तोकान्तिक इत्यत्रत्यानि भूयिष्ठानि अर्थग्रहणात् । अलुग्भवतीति । लुग्न भवतीत्यर्थः । सुपो लुकि प्राप्त इति । सुपो धातुप्रातिपदिकयोः इत्यनेन । प्रतिषेधः क्रियत इति । अलुगिति प्रसज्यप्रतिषेध इति दर्शयति, उत्तरपदाधिकारोपजीवनाय तु नाव्ययीभावात् इत्यस्यानन्तरमिदं प्रकरणं नारब्धम्, एकवच्च, सर्वस्यालुक्प्रकरणस्य शेषभूतोऽयमर्थातिदेशः, यस्या विभक्तेरलुग्विधीयते, तदर्थो द्व्यात्मको बह्वात्मकर्श्चैकवद्भवतीति वक्तव्यम् । तेन स्तोकाभ्यां मुक्तः, स्तोकेभयो मुक्त इत्यपि विग्रहे स्तोकाभ्यां मुक्तः स्तोकेभ्यो मुक्त इत्यत्राप्यैकपद्यमैकस्वर्यं स्यात् नैष दोषः, स्तोकादिभ्यः प्रतिपदं या पञ्चमी - करणे च स्तोकाल्प इति, तस्य अलुक्, सा चासत्त्ववचनेभ्यो द्विबह्वोर्न सम्भवतीति स्तोकाभ्याम्, स्तोकेभ्य इत्यपादान एषां पञ्चमीत्येव न भविष्यति । एवमपि दूराभ्यामागतः, दुरेभ्य आगत इत्यत्र प्रसङ्गः अत्र हि दूरान्तिकार्थेभ्यो द्वितीया च इति प्रतिपदमेव पञ्चमी । तथाऽन्तिकाभ्यां कृतम्, अन्तिकेभ्यः कृतमित्यादावप्यलुक्प्रसङ्गः तस्मादेकवच्चेति वक्तव्यम् । ननु वृत्तावुपसर्जनपदानि एकादिसङ्ख्यां विहायाभेदैकत्वासङ्ख्यां प्रतिपद्यन्ते, का पुनरियमभेदैकत्वसङ्ख्या विशेषाणामविभागेनावस्थानम्, यथा - मधुन्योषधिरसानाम्, न हि तत्रास्या ओषधेरयंरसोऽस्या अयमिति विभागो दृश्यते, अथ च त एव विशेषा अनुभूयन्ते न पुना रससामान्यम्, तद्वदत्रापि राजपुरुष तइति राजार्थो नैकत्वादिविशेषाः । उक्तं च -

यथौषधिरसाः सर्वे मधुन्याहितशक्तयः ।
अविभागेन वर्तन्ते तां सङ्ख्यां तादृशीं विदुः ।। इति ।

यद्वा - अनुपात्तसङ्ख्याविशेषमेकत्वादिष्वनुगतं सामान्यमभेदैकत्वसङ्ख्या, यथा सन्तमसे रुपमात्रं गृह्यते न पुनः शुक्ल इति वा, कृष्ण इति वा, तद्वदत्रापीति सङ्ख्यावान् राजार्थः, न चाव्ययार्थवन्निःसङ्ख्य इत्येतावत्प्रतीयते । उक्तं च

भेदानां वा परित्यागात्सङ्ख्यात्मा स तथाविधः ।
व्यापारज्जातिभागस्य भेदापोहेन वर्तते ।।
अन्तर्हितविशेषेण यथा रुपेण रुपनान् ।
प्रख्यायते न शुक्लादिभेदो रुपस्य गम्यते ।। इति ।

तदेवमभेदैकत्वसङ्ख्योपादानाद् द्विवचनबह्वचनान्तानां सर्वा वृत्तिर्न भवति, किं पुनः समास एव, ततश्च समासाभावादलुग्न भविष्यतीति किमेकवद्भवेन उच्यते किं पुनः कारणम् - वृत्तावभेदैकत्वसङ्ख्या प्रतीयते सङ्ख्याविशेषप्रतिपादकाभावात् । विभक्तिर्हि तस्य प्रतिपादिका, सा च वृत्तौ निवृत्ता, निवृत्तायां च तस्याम् त्रिकत्र्ञ प्रातिपदिकार्यः इति पक्षे सङ्ख्यासामान्यस्यापि तावत्प्रदिपादकाभावः । यदि परं गुड इत्युक्ते माघुर्यादिवदव्यभिचारात्सङ्ख्या प्रतीयते, अव्यभिचारश्च चसामान्यस्यानियतस्य वा विशेषस्येति, सैवाभेदैकत्वसङ्ख्या । पञ्चकपत्रेऽपि सङ्ख्याविशेषप्रतिपत्तौ द्योतकत्वेनापि तावद् विभक्तयोऽपेक्ष्यन्त इति तदभावात्सामान्योऽनियते वा विशेषः प्रतीयत इति सैवाभेदैकत्वसङ्ख्या । यत्र ह्यर्थप्रकरणादिकं विशेषावगतौ प्रमाणं भवत्येव तत्र वृत्तिथः । तद्यथा, अर्याद् मुद्गौः क्रीतं मौद्गिकम्, न ह्येकेन मुद्गेन क्रयः सम्भवति, कारकमध्य इति च, न ह्येकस्य मध्यं सम्भवति प्रकरणात् - भवद्गिरामवसरप्रदानाय इति आदेशात् - तावकीनो मामकीन इति शैषिकः । मासजात इत्यादौ तु प्रातिपदिकार्थस्यैवाक्तपरिमाणत्वात् । द्विपुत्र इत्यादौ सङ्ख्याशब्दसन्निधानात् । तदेवं यत्र विषेषे प्रमाणाभावस्तत्राभेदैकत्वसङ्ख्या ।

यद्येवम्, अत्रालुकि सति विभक्तिरेव प्रमाणमिति द्विवचनबहुवचनान्तानां समास स्यादेव यदा त्वर्थप्रकरणादिना विशेषावगतौ द्विवचनबहुवचनान्तानां वृत्तिर्भवति तदा का शङ्घा विभक्तावेव सत्याम् । यदि चाभेदैकत्वसङ्ख्योपजनाद् द्विचनबहुवचनयोरलुगभावः, एकवचनस्यापि न स्यात्, तस्यापि हि सुद्धमेकत्वं वाच्यम्, माभेदैकत्वसङ्ख्या । अथ विभाक्त्यभावे सङ्ख्यासामान्यस्य प्रतीतस्य विषेषपयेवसानापेक्षायां यो हि बहून् कल्पयति कल्पयत्यसावेकमिति न्यायेन वृत्तावपि शुद्धमेकत्वं प्रतीयत इत्युच्येत, अभैदैकत्वसङ्ख्येत्यनुपपन्नं स्यात्। तस्मादेकवचनान्तम्य, द्विवचनान्तस्य,

बहुवचनान्तस्य वा यथेष्टं वृत्तिः, वृत्तौ
चाभेदैकत्वसङ्ख्या, अर्थप्रकरणादिना विशेषावगतिरिति वाच्यम्। एवं च पूर्वोक्तेन न्यानेन द्विवचनबहुचनयोरलुक्प्रसङ्गादतिदेश आश्रयितव्यः ।
यद्येवम्, गोपुचरः अप्सुयोनिः, अप्सव्य इति ये नित्यबहुवचनान्ताः तेषा मप्यलुकि एकत्वातिदेशादेकवचनप्रसङ्गः एवं तर्ह्यनभिधानमत्र हेतुः । तदाह द्विवचनबहुवचनान्तानां त्वनभिधानादिति । वाक्यमपि तर्हि न प्राप्नोति । न च वाच्यम् - समासे नास्त्यभिधानम्, वाक्ये पुनरस्तीति । नु हि समाससंज्ञाऽर्थाभिधाने उपयुज्यते, यत्पुनरुपयुज्यते - प्रातिपदिकम्, विभक्तिश्च, तत्सर्वमविकलमिति किमत्रानभिधानं करिष्यति । तत्राह - तेनात्रेत्यादि । स्वरस्याप्यर्थाभिधान उपयोगात्, पृथक्स्वरयुक्तस्य वाक्यस्य प्रतिपादकत्वमैकस्वर्ययुक्तस्य समासस्याप्रतिपादकत्वं च युक्तमित्यर्थः ।
ब्राह्मणाच्छंसिन इत्यादि । किं पुनरत्रोपसङ्ख्यायते द्वितीयार्थे पञ्चमी, ब्राह्मणानि शंसति ब्राह्मणच्छंसी, अलुक् तु तत्पुरुषे कृति बहुलम् इत्येव सिद्धः । ननु शास्त्राण्यसौ शंसति, न ब्राह्मणानि नैष दोषः ब्राह्मणविहितेषु शास्त्रेषु ब्राह्मतणशब्दो द्रष्टव्यः । अपर आर - युक्त एवात्र पञ्चम्यर्थः, आहरणपूर्वके शंसने शंसतिर्वर्तते, ब्राह्मणादाहृत्य सूक्तानि शंसतीति ब्राह्मणाच्छंसी । एवमापि होतृप्रभृतिष्वपि ब्राह्मणाच्छंसीति प्राप्नोति तत्राह - ऋत्विग्विशेषस्य रुढिरियमिति । तस्या इति । ब्राह्मणाच्छंसीत्यस्या रुढेरित्यर्थः । सतेति । ब्राह्मणाच्छंसीत्यत्र पक्षे पञ्चम्यर्थो न सम्भवति, पक्षान्तरे तु सम्भवति ।।
ओजःसहोम्भस्तमसस्तृतीयायाः ।। 6 - 3 - 3 ।।
ओजःसहोग्भस्तमसस्तृतीयायाः ।। उदाहरणेषु कर्तृकरणे कृता बहुलम् इति समासः । इह कस्मान्न भवति - सततनैशतमोवृतामिति उच्यते उत्तरपदेन पूर्वपदमाक्षिप्यते, तेनोपात्तमोजःप्रभृति विशेष्यते पूर्वपदभूतेभ्य
ओजः प्रभृतिभ्य इति । न चात्र तमः शब्दः पूर्वपदम्, किं तर्हि सततनैशतमः शब्दः । यत्र तदन्ताविधिरिष्यते तत्रोपात्तेनाक्षिप्तं पूर्वपदं विशेष्यते, तेन तस्य तदन्तस्य च भवति - इष्टकचितम्, पक्वेष्टकचितमिति । क्वचित्तु - यदेवोपात्तं तस्यौवोत्तरपदेऽनन्तरे तत्कार्यं भवति, न तूपात्तस्य तदन्तस्य वा पूर्वपदत्वमपेक्ष्यते, यथा - आनङ् ऋतो द्वन्द्वे होतृपोतृनेष्टोद्गातारः इति, अत्र नेष्टृशब्दश्च न पूर्वपदम्, नापि तदन्तं पूर्पदम्, किं तर्हि होतृशब्दः न तस्योत्तरपदमनन्तरम् ।
अञ्चसा - आर्जवेन । यस्य पुमानग्रजः स पुंसा हेतुनाऽनुज इति कृत्वा, जनुषान्धः - जात्यन्धः, जनु - जन्म ।
आत्मनश्च पूरणे ।। 6 - 3 - 6 ।।
वार्तिकमेवेदं सूत्ररुपेण पठितम् । पूरणशब्दस्य स्वरितत्वात्तदधिकारविहितानां प्रत्ययानामत्र ग्रहणं न स्वरुपस्य ग्रहणमित्याह - पूरणप्रत्ययान्त इति । यद्यप्युत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्न भवतीति दृदयस्य दृल्लेख इत्यत्र ज्ञापयिष्यते, तथाप्यात्मन्शब्दात् पूर्णप्रत्ययस्यासम्भवात्सामर्थ्यादत्र तदन्तविधिः । आत्माना वा कृत इति । वृत्तौ कृतार्थस्यान्तर्भावात् कर्तरि करणे वा तृतीया, तृतीया तत्कृतार्थेन इति समासः, यथा - कुङ्कमलोहितादावित्यर्थः ।
आत्मा चतुर्थो यस्येति । एकस्यापि वस्तुनो बुद्धिपरिकल्पितविभेदस्य वत्तिपदार्थत्वम्, तअन्यपदार्थत्वं चाविरुद्धम् ।।
वैयाकरणारुयायां चतुर्थ्याः ।। 6 - 3 - 7 ।।
वैयाकरणानामित्यादि । यदि तु व्याकरणे भवा वैयाकरणी, अणृगयनादिभ्यः इत्यण्, वैयाकरणी चासावाख्या चेति वैयाकारणाख्येत्येषं व्याख्यायेत आत्मनेभाषः , परस्मैभाष इत्यत्र न स्यात् अनयोरष्टाध्याय्यामपठितत्वात् । तस्माद्ययोपदशितमेव व्याख्यातम् । यद्येवम्, कुबेरबलिरित्यादौ लोकिकसञ्ज्ञाशब्दे प्रसङ्गः, वैयाकरणानामपि तेन व्यवहारात् अत आह - ययोत । विशेषणसामर्थ्यादवधारणमाश्रीयत इति भावः । यदा तु धातुसूत्रगणोणादिवाक्यात्मकं पञ्चस्थानं व्याकरणम्, तदा वैयाकरणी चासावाख्या चेत्यास्मन् व्याख्यानेऽपि न दोषः । आत्मनेपदमिति । अन्वर्थत्मस्य समासविधौ दर्शितम् ।
परस्य च ।। 6 - 3 - 8 ।।
किमथेमिदमुच्यते अलुग् यथा स्यात् - परस्मैपदम्, परस्मैभाषः । सिद्धोऽत्रालुक् पूर्वेणेव न सिध्यति आत्मनः इति तत्र वर्तते । निवर्तिष्यते यदि निवर्तेत, तेभ्यो हितास्तद्धिता इत्यत्रापि प्राप्नोति । तस्मात् अत्मनः थइति तत्रानुवर्तते, तस्मश्चानुवर्तमाने परस्य चेति वक्तव्यम् ।।
हलदन्तात्सप्तम्याः सञ्ज्ञायाम् ।। 6 - 3 - 9 ।।
उदाहरणेषु संज्ञायाम् इति समासः । गविष्ठिर इत्यादि । अन्यथा अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते इत्यवादेशस्याकरणादहलदन्तत्वान्न स्यात्, यथा - भूम्यां पाशो भूमिपाश इत्यत्रेति भावः ।
हृद्द्युभ्यामिति । असंज्ञार्थमिदम् । हृदिस्पृक्, दिविस्पृगिति । द्वितीयार्थे चैषा सप्तमी । तथा हि भाष्यम् - अन्यार्थे चैषा सप्तमी द्रष्टव्या, हृदयं स्पृशतीति हृदिस्पृक्, दिवं स्पृशतीति दिविस्पृक् इति । आख्याग्रहणस्योपसमस्तत्वादिह संज्ञाग्रहणम् । तत्रैव त्वसमास्तमाख्याग्रहणं कर्तव्यम् ।।
कारनाम्नि च प्राचां हलादौ ।। 6 - 3 - 10 ।।
वणिम्भिः पशुपालैः कर्षकैश्च कल्पितो राजग्राह्यो भागः - करः, कर कएव कारः, प्रज्ञादित्वादण् ।
नियमविकल्पा इति नियमविशेषा इत्यर्थः । तानेव दर्शयति - कारनाम्न्ये नेत्यादि । प्राचां देशे हलादौ यदि भवति कारनाम्न्येव इति प्रथमो नियमः, अप्राग्देशावर्तिनि तु त्वचिसारादावकारनाम्न्यपि भवत्येव । तथा कारनाम्नि हलादौ यदि भवति प्रचामेव इति द्वितीयः । प्राचां कारनाम्नि च यदि भवति

हलादावेव इति तृतीयः । अवीनां समूहोऽविकटम्, सङ्घाते कटच् । कथं पुरेकस्मिन्वाक्ये नियमत्रयं लभ्यते कः पुनराह - एकमिदं वाक्यमिति आगृह्यमाणविशेषत्वेन प्रत्येकमेवकारध्याहारात् त्रीण्येव वाक्यानि । संज्ञाग्रहणेन प्रकृतेऽपि नामग्रहणं क्रियते नियमार्थत्वं विस्पष्टयितुम् अन्यथाऽसंज्ञायां विध्यर्थताऽपि समाभाव्येत । कथं पुरसंज्ञायां सप्तमीसमासः एतदेव ज्ञापकं स्यात् - प्रचां कारे हलादिनोत्तरपदेनासंज्ञायां सप्तमीसमासः एतदेव ज्ञापकं स्यत् - प्रचां क्रे हलादिनोत्तरपदेनासंज्ञानामपि भवति समास इति । यस्मिन्विधिः इत्येव सिद्धे आदिग्रहणं विस्पष्टार्थम् ।।

अमूर्द्धमस्तकात् स्वाङ्गादकामे ।। 6 - 3 - 12 ।।

उदाहरणेषु प्रत्युदारहणेषु च व्यधिकरणपदो बहुव्रीहिः । अक्षशौण्ड इति । सप्तमी शौण्डैः इति तत्पुरुषः ।।

बन्धे च विभाषा ।। 6 - 3 - 13 ।।

स्वाङ्गात् इतदि निवृत्तम्, सामान्यनायं विधिः । बन्धे इति धातुरेवात्र सहकारेणाऽनुकृतः । नेन्त्सिद्धबध्नादिषु च इति धातावेव प्रतिषेध उक्तः, ततश्च बहुव्रीहिरेवास्य विकल्पस्य विषयः । तत्रापि हस्तबन्धादौ स्वाङ्े प्रप्तविभाषा, चक्रबन्धादावस्वाङ्गे त्वप्रप्तविभाषेत्युभयत्रविभाषा समापद्यते त्तपुरुषे तु नैवास्य प्रवृत्तिः इतीमां शङ्कामपनयति बन्ध इति घञन्तो गृह्यत इति । ततश्च तत्पुरुषेऽपि घञन्तस्य वृत्तिर्विरुद्धा, प्रतिषेधस्य बन्धनादौ चरितार्थत्वादिति भावः । उभयत्र विभाषेयमिति । कथमित्याह - स्वाङ्गाद् बहुव्रीहाविति । तत्पुरुषे त्विति । यद्यपि बहुव्रीहावेवास्वाङ्गादप्राप्त इति शक्यं वक्तुम्, तथाप्यस्य तत्पुर्षे प्रवृत्ति दर्शीयितुं तत्पुरुषे चास्य प्रवृत्तिः पूर्वविप्रतिषेधेन अन्यथा बहुव्रीहिरस्यावकाशः, बध्नातिप्रतिषेधस्य च बन्धनादिरषकाशः घञन्ते तु तत्पुरुषे उभयप्रसङेगे परत्वात्प्रतिषेध एव स्यात् ।।

तत्पुरुषे कृति बहुलम् ।। 6 - 3 - 14 ।।

अत्रापि कृदन्तस्य ग्रहण्, न कृन्मात्रस्य, तत्र परतः सप्तम्या असम्भवत् इह कस्मान्न भवति - परमे कारके परमकारक इति उच्यते - अन्तरङ्गा कृत्प्रतिपाद्यक्रियानिमित्ता सप्तमी, इह तु क्रियान्तरनिमित्तापरमे कारके निधेहीति, तेन बहिरङ्गत्वान्नास्या ग्रहणम् ।

कुरुचर इति । हलदन्तात् इत्यधिकारमनाश्रित्यैतदुदादृतम् । विभाषाग्रहणे प्रकृते बहुलग्रहणं क्वचित् प्रकृत्यादीनामुपसंग्रहार्थम् । तेन कर्णेजपादावलुगेव, मद्रचरादौ लुगेव, ब्राह्मणाच्छंस्यादौ असप्तम्या अप्यलुक् । एवं च सर्वमेवालुक्प्रकरणमस्यैव प्रपञ्चः ।।

प्रावृट्शरत्कालदिवां जे ।। 6 - 3 - 15 ।।

प्रावृट्शरदोः पृथग्ग्रहणात्कालेति स्वरुपग्रहणम् ।।

घकालतनेषु कालनाम्नः ।। 6 - 3 - 17 ।।

घ इति तरप्तमपोर्ग्रहणम्। काल इति स्वरुपग्रहण्, तन इति ट्युट्युलोरादेशस्य सतुट्कस्य ग्रहणम् ।

पूर्वाह्णेतनमिति । सप्तम्यर्थप्रकर्षे प्रत्यः, तस्याद्रव्यप्रकर्षत्वादलुक्पक्षे, किमेत्तिङव्ययघात् इत्यामुप्रत्ययः । लुक्पक्षे तु निमित्ताभावादद्रव्यप्रकर्षेऽप्यामभावः । तरबन्तात् सप्तमी । क्वचित्तु - अलुक्पक्षेऽपि सप्तमी समुदायात्पठ्यते, तत्र प्रकृत्यर्थविवक्षया अद्रव्यप्रकर्षे इति प्रतिषेधो व्याख्येयः । पूर्वह्णे इति । विभाषा पूर्वह्णापराह्णाभ्याम् इति ट्युट्युलौ, अनादेशास्तुट् च ।

कथं पुनर्घतनप्रत्ययमात्रेऽलुक् उदाहृतः, यावता प्रत्ययग्रहकणवरिभाषया तदन्त उत्तरपदेऽलुगुदारर्तव्यः अत आह - उत्तरपदाधिकार इति । कुत इत्याह । लेखग्रहणादिति । यदयम् हृदयस्य हृल्लेखयदणलासेषु इत्यण्ग्रहणे क्रियमाणे लेखग्रहणं करोति, तज्ज्ञापयति - नोत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्भवतीति । यदि स्यात्, लेखगर्हणं न कुर्यात् अणन्त इत्येव सिद्धत्वात् । ननु च घञर्थं लेखगर्हणं स्यात्, न वै घञन्त इष्यते । कालेति न स्वरुपग्रहणमिति । नामग्रहणात् । क्वचिन्नञ् न पठ्यते, तत्र घकाले स्वरुपग्रहणमित्यर्थः ।।

शयवासवासिष्वकालात् ।। 6 - 3 - 18 ।।

अत्राकाल इत्यर्थगर्हण, व्याख्यानात् । तदाहअकालवाचिन इति । खशय इति । अधिकरणे शेतेः इत्यच् । वास इति । घञ् । ग्रामेवासीति । सुप्यजातौ णिनिः ।

अपो योनीत्यादि । शब्दप्रधानत्वादप इत्येकवचनम्, योनिः - उत्पत्तिः अप्सुयोनिर्यस्य सोऽम्सुयोनिः । अप्सव्य इति । ओर्गुणः, वान्तो यि प्रत्यये । अप्सुमन्ताविति । सप्तम्यन्तान्तुपोऽसम्भवादप्स्विति शब्दो ययोरस्ति तावप्सुमन्तौ कारीर्यामाज्यभागौ, तयोर्हि अप्स्वग्ने सधिष्टवः, अप्सु मे सोमो अब्रवीत्, इत्यनुवाक्ययोरप्सुशब्दोऽस्ति । यद्येवम्, अनुकरणत्वादस्यवामीयादिवल्लुगन भविष्यतीति किं मतुब्ग्रहणेन अन्य तु मतिशब्दं पठन्ति, उदारहन्ति - अत्र सोमो वाप्सुमतिरिति तत्तु भाष्ये न दृष्टम् ।।

नेन्त्सिद्धबध्नातिषु च ।। तत्पुरुषे कृति बहुलम् इति प्राप्तं प्रतिषिध्यते, सप्तम्यांः परस्याः परस्य केवलस्येनोऽसम्भवादुत्तरपदाधिकारेऽपि प्रत्ययग्रहणे तदन्तविधिरित्याह - इन्नन्त उत्तरपद इति । स्थण्डिलवर्तीति । व्रते इति णिनिः । उपपदसमासः । साङ्काशयसिद्ध इति । सिद्धशुष्कपक्वबन्धैश्च इति समासः । चारबद्ध थइति । बद्धशब्दो निष्ठान्तः । योगविभागात् समास इति । बद्धशब्देन ।

तदिति । बन्ध इत्येव शब्दरुपम् । अथ धञन्तः कस्मान्न भवति तत्राह धञन्ते हीति । अथ वा - पचाद्यजन्ते च बन्धे च विभाषा इत्ययं विकल्पः कस्मान्न भवति इत्यत आह - धञन्ते हीति ।।

स्थे च भाषायाम् ।। 6 - 3 - 20 ।।

आखरेष्ठ इति । स्थः क च इति कः ।।
षष्ठ्या आक्रोशे ।। 6 - 3 - 21 ।।
पश्यतोहर इति । षष्ठी चानादरे इति षष्ठी, पश्यन्तमनादृत्य हरतीत्यर्थः ।
शुनः शेप इति । आकारन्तोऽप्यस्ति शेपशब्दः न केवलं सकारान्तः । शुन इव शेपमस्येति बहुव्रीहिः । एवं पुच्छलाङ्गूलाभ्यामपि बहुव्रीहिः । ऋषिविशेषाणामेताः संज्ञाः ।।
ऋतो विद्यायोनिसम्बन्धेभ्यः ।। 6 - 3 - 23 ।।
विद्या च योनिश्च विद्यायोनी, अभ्यर्हितत्वाद्विद्यायाः पूर्वनिपातः, तत्कृतः सम्बन्धो येषां ते विद्यायोनिसम्बन्धाः, कृतशब्दो गम्यमानत्वान्न प्रयुज्यते । पितुःपुत्र इति । प्रख्यातात्पितुरुत्पन्न इत्यर्थः ।
विद्यायोनिसम्बन्धेभ्यः पूर्वोत्तरपदग्रहणमिति । सूत्रे पञ्चमीनिर्देशात्पूर्वपदानामेव विद्यायोनिसम्बन्धवावित्वं लभ्यते, नोत्तरपदानाम् अथ सप्तमीनिर्देशः क्रियते । उत्तरपदानामेव लभ्यते, न पूर्वपदानाम् । तस्मादुभयेषामपि तद्वाचित्वेऽयं विधिरिति वक्तव्यमित्यर्थः । अन्यवृत्तिपरत्वाच्चास्य तेषां परस्परव्यतिकरेऽपि भवति - होतुः पुत्रः, पितुरन्तेवासीति ।।
आनङ् ऋतो द्वन्द्वे ।। 6 - 3 - 25 ।।
अत्र यद्यृकारस्य द्वन्द्वे आनङ् भवतीत्यवं विज्ञायेत, पितृपितामहादप्याङ् स्यात् ऋतः ित्येतच्चानर्थकं प्रकृतत्वात्, तस्माद् द्वन्द्वविशेपणमृत इति । जातौ चेदमेकवचनमिति मन्यमान आह - ऋकारान्तानामित्यादि। इह कार्यार्थः श्रवणार्थो वा वर्णानामुपदेशः, नकारश्चायं न क्वचित् श्रूयते सर्वत्र नलोपः प्रातिपदिकान्तस्य इति नलोपेन भवितव्यम्, कार्यमपि चास्य न किञ्चिदुपदिश्यते, तस्मान्नार्थ एतेन इत्यत आह - नकारोञ्चारणमित्यादि । असति नकारे उः स्थानेऽणेव शिष्यते इति उरण् रपरः इति रपरत्वं स्यात्, तस्मिश्च न्यमणेव शिष्यते, किं तर्हि थअण् चान्यच्चेति, नास्ति रपरत्वप्रसङ्गः । तस्माद्रपरत्वनिवृत्त्यर्थं नकारोच्चारणम् । ङकारः ङिच्च इत्यन्त्यादेशार्थः । यत्र च निर्दिश्यमानं कार्यिणो विशेषणम्, तत्र निर्दिश्यमानस्यादेशा भवन्तीत्येतद्भवति, नात्र ऋतः इति कार्यिणो विशेषणम्, किं तर्हि द्वन्द्वस्य विशेषणम् । पुत्र इत्यत्रानुवर्तत इति । पुत्रेऽन्यतरस्याम् इत्यतः । यद्यत्र पुत्र थइति वर्तते, विभाषा स्वसृपत्योः इत्यत्रानुवर्तेत, ततश्च भ्रातुष्पुत्र इत्यादावनाक्रोशेऽपि विकल्पप्रसङ्गः एवं तर्हि व्याख्यानादत्रैव सम्बध्यते, अत एव ह्यत्रेत्युक्तम् । एवमपि पुत्र उत्तरपदे पूर्वपदमात्रस्यानङ् प्रप्नोति, कार्यिणोऽनिर्देशात्, ऋतः इति श्रुतस्य द्वन्द्वविशेषमत्वादत तआह - ऋत इति चेति । अनुवर्तते इत्युषङ्गः । ऽतोविद्यायोनि इत्यतः ऽतः इत्यनुवर्तते, तत्कार्यिणं विशेषयिष्यतीत्यर्थः । यद्यपि तत् पञ्चम्यन्तम्, तथापि तदिह व्याख्यानात्षष्ठ्यन्तं विपरिणम्यते ।।
देवताद्वन्द्वे च ।। 6 - 3 - 26 ।।
अनृकारन्तार्थमविद्यायोनिसम्बन्धार्थं वचनम्। द्वन्द्व इति वर्तमान इत्यादि । प्रकृतं द्वन्द्वग्रहणं समासविशेषप्रतिपत्त्यर्थम्, इदं प्रसिद्धं साहचर्यं यस्य युगलस्य तत्परिग्रहर्थम् । कथं पुनर्न परिग्रहः तइत्यत आह अत्यन्तसहचारत इत्यादि । द्वन्द्वं रहस्यमर्यादा इत्यत्राभिव्यक्तिग्रहणेनात्यन्तसहचरितयुगले द्वन्द्व इति निपात्यते, तस्यात्र ग्रहणं देवतापदेन, समस्तं चेदम्प्रकृतस्य द्वन्द्वस्यार्थद्वारकं विशेषणम् - अत्यन्तसहचरितयुगलाभिधायिनि द्वन्द्व इति यावत् । साहचर्यमेव विशिनष्टि - तत्रेति । सहवापः - सहनिर्वापः । अग्नीषोमाभ्यां जुष्टं निर्वपामि इत्यादि । उभयत्रेति । पूर्वपत्वेनोत्तरपदत्वेनेत्यर्थः ।।
इद् वृद्धौ ।। 6 - 3 - 28 ।।
अत्र वृद्धिमदुत्तरपदं वृद्धिशब्देनोच्यते, वृद्ध्यात्मकस्योत्तरपदत्यासम्भवात् । अग्नीवरुणौ देवते अस्य, अग्नामरुतौ देवते अस्योति विग्रहः, पूर्वत्रेत्वम्, उत्तरत्रानङ् । द्व्यधिष्ठानं देवतात्वमिति । देवतेत्येकवचनम् । आनङमीत्वं च बाधितुमिति । वरुणे हीत्वस्य प्रसङ्गः, अन्यत्रानङः । यद्यपि प्राग् वृद्धेविग्रहवाक्य एवानङीत्वयोः प्रसङ्गः, तथाप्यपवादविषयत्वात्प्रक्रियावाक्ये न क्रियेते, लौकिके तु वाक्ये भवत एव ।
इद्वृद्धौ विष्णोः प्रितिषेधः - आग्नावैष्णवमेकादशकपालं निर्वपेत् ।।
दिवसश्च पृथिव्याम् ।। 6 - 3 - 30 ।।
दिवसः इति प्रथमान्तम् । अकारोच्चारणं किमर्थम्, यावता प्रयोजनाभावात्सकारस्येत्संज्ञा न भविष्यति तत्राह - अकारीञ्चारणमिति । असति तस्मिन् पृथिवीशब्दे परतः सकारस्य रुत्वम्, विसर्जनीयः, कुप्वोः - क - पौ च इत्येते विकाराः प्राप्नुवन्ति, अकारे सति सकारस्योच्चारणं भवति, तेन प्रयोगेऽस्याविकृतस्यैव ग्रहणं भवति ।
कथमित्यादि । द्वन्द्वे इत्यनुवृत्तेर्वाक्ये नैव प्राप्नोतीति प्रश्नः । कर्तव्यीऽत्र यत्न इति । छान्दसोऽयं प्रयोगः, दृष्टानुविधश्छन्दसि इत्येषोऽत्र यत्नः ।
उषासोषसः ।। 6 - 3 - 31 ।।
उषासानक्तेति । छान्दसोऽयं प्रयोगः । उषाश्च नक्तं चेति द्वन्द्वः, प्रथमाद्विवचनस्य डादेशः । अत्र पदकाले पदकाले पदकाराः - उषसानक्तेति ह्रस्वमधीयते ।।
स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ।। 6 - 3 - 34 ।।
अत्र त्रयः पक्षाः सम्भवन्ति - स्त्रिया इति स्त्रीप्रत्ययग्रहणम्, अर्थग्रहणम् शब्दग्रहणं चेति । तत्र यदि स्त्रीग्रहणं स्वर्यते, स्वरितेनादिकारावगतिर्भवतीति

स्त्र्यधिकारविहिताष्टाबादयो गृह्यन्त, यथा - गोस्त्रियोरुपसर्जनस्य इत्यत्र तदा चायमर्थो भवति - भाषितपुंस्कात्परे टाबादिस्त्रीप्रत्यया यथा पुंसि न भवन्ति तथा उत्तरपदे न भवन्तीति । नन्वश्रुतक्रियापदेसु वाक्येषु भवतीत्यध्याहारोऽन्यत्र दृष्टः उच्यते वतिनिर्देशेषूपमाने सत्ता, असत्ता वा या प्रसिद्धा सोपमेयेऽतिदेश्या यथा - उशीनरवन्मद्रेषु यवाः सन्ति, न सन्तीति ततः पुंसि स्त्रीप्रत्ययस्याभावात्स्त्रियामप्यभावोऽतिदिश्यत इति न भविष्यतित्येव वाक्यशेषः परिकल्पनीयः, तदा त्वनूङित्यनेन सामानाधिकरण्यात् स्त्रियाः इति प्रथमार्थे षष्ठी, पुंवदिति सप्तमीसमर्थाद्वतिः । तत्र च प्रगेव समासाद्विग्रह्वाक्य एव स्त्रीप्रत्ययस्य कृतत्वान्न तस्योत्तरपदे परतः न क्रोडादिबह्वचः इतिवत् प्रगभावः शक्यः प्रतिपादयितुमिति लुक् तद्धितलुकि इत्यादिवत्कृतस्य निवृत्तिरेव प्रतिपाद्या । विग्रहवाक्य एव कृताः स्त्रीप्रत्यया उत्तरपदे परतो निवर्तन्ते, लुप्यन्त इत्यर्थः ।

यदा तु पुंवत् स्त्रीत्वयुक्तं द्रव्यं स्त्रीशब्देनोच्यते, तदार्थग्रहणं भवति, स्त्रियाः स्त्र्यर्थस्य पुंस इति पुमर्थस्येवल कार्यं भवतीत्यर्थः । तदा च षष्ठीसमार्थाद्वतिः । यदा तु स्त्र्यर्थवाची शब्दः स्त्रीशब्देनोच्यते तदा शब्दग्रहणम्, स्त्रियाः - स्त्रीलिङ्गस्य शब्दस्य पुंवद् रुपं भवतीति रुपतिदेशः, वृत्तिविषये पुंशब्दसम्बन्धिनः कार्यस्यातिदेष्टव्यस्याभावात् । तत्र च प्रत्यासत्तेः पुंभावभाजः स्त्रीशब्दस्य प्रयोगान्तरे पुमांसमाचक्षाणस्य यद्रूपं तदेवातिदिश्यते, न यस्य कस्यचित् ।

अनूङ् इति षष्ठ्यर्थे प्रथमा, तत्रार्थग्रहणे स्त्रीशब्दे मुख्यः । अर्थस्य तूत्तरपदेन पौर्वापर्यमनूङः, तत्त्वं च स्वतोऽनुपन्नमिति शब्दद्वारकमाश्रयणीयम् । इत्रयोस्तु पक्षयोः स्त्रीशब्दो गौणः । पौर्वापर्यादिकं तु समञ्जसमिति न प्रमाणतः पक्षविशेषपरिग्रहः सम्भवतीति निर्दोषतः पक्षः परिग्रह्यः ।

तत्राद्ये पक्षे एतभार्य इत्येतशब्दाद् वर्णादनुदात्तात् इति ङीपि तकारस्य च नकारे एकदेशाविकृतस्यानन्यत्वादेतशब्दाद्भाषितपुंस्कात्पर ईकार इति तन्निवृत्तावप्यर्थस्य स्त्रीत्वमनिवृत्तमिति नकारः श्रूयेत । न च सन्नियोगशिष्टत्वादीकारनिवृत्तौ नकारस्य निवत्तिः, उत्तरपदनिमित्तायाः स्त्रीप्रत्ययनिवृत्तेर्नकारनिवृत्त्याख्ये पूर्वविधौ स्थानिकद्भावे सत्यन्यतराभावस्यासिद्धेः । न च नकारस्यापि अदिकारविहितत्वादिकारवत्पुंवद्भावेनैव निवृत्तिः तस्य भाषितपुंस्कात्परत्वाभावात्, अप्रत्ययत्वेनोङ्सादृश्याभावाच्च । तथा पठ्वी भार्यास्य पटुवी भार्यास्य पटुभार्य इति निवृत्तस्यापि स्त्रीप्रत्ययस्य स्थानिवद्भावाद्यणादेशः स्यात् ।

अथ तूत्तरपदे परतोऽनूङ् स्त्रीप्रत्ययो भाषितपुंस्कान्न भवतीति न क्रोडादिबह्णचः इतिवत् प्रागभाव एवात्र विधेयः तत्सामर्थ्याच्च विग्रहवाक्य तएव प्राप्तोऽन्तारङ्गोऽपि स्त्रीप्रत्ययो न क्रियते इत्युच्येत तदैतद्दोषाभावेऽपि लुगलुगस्त्रीविषयद्विस्त्रीप्रत्ययेषु दोषः । लुक् - वतण्डस्यापत्यं स्त्री वतण्डाच्च लुक् स्त्रियाम्, शाङ्गर्रवादिपाठान्ङीन्, वतण्डी चासौवृन्दारिका च वातण्ड्यवृन्दारिकेति पुंवत् कर्मधारय ितिि इकारस्य निवृत्तावपि अर्थगतस्य स्त्रीत्वस्यानिवृत्तत्वात् लुक् स्त्रियमा इति यञो लुक्प्राप्नोति । स्यादेतत् - स्त्री - ई स्त्रीति ईकारप्रश्लेषेण स्त्रियां य ईकारस्तत्र परतो लोपः, अत्र तु पुंवद्भावेनेकारस्यानुत्पन्नत्वाल्लुङ् न भविष्यतीति तन्न, इत्रेतराश्रयप्रसङ्गात् । कथम् शाङ्गर्रवादिषु वतण्डशब्दः कृतयञ्लुक् पठ्यते, ततश्चाकृते लुकि ईकारो नास्ति, अकृते चेकारे लुकोऽप्रसङ्गः । अलुक् - गर्गस्यापत्यं स्त्रियः, गर्गादिभ्यो यञ् यञश्च इति ङीप् , गार्ग्यश्च ता वृन्दारिकाश्त गर्गवृन्दारिका इति ङीपि निवृत्तेऽपि स्त्रीत्वस्यानिवृत्तत्वाद् यञञोश्च स्त्रियामिति लुग्न प्राप्नोति, वाक्यवदलुगेव स्यात् । अस्त्रीविषयः - कुञ्जस्यापत्यं स्त्री गोत्रे कुञ्जादिभ्यश्चफञ्, गोत्रं च चरणैः सह ितिि जातित्वान् ङीष्, कौञ्जायनी चासौ वृन्दारिका च कौञ्जायनवृन्दारिकाः ङीषि निवृत्तेऽपि स्त्रीत्वस्यानिवृत्तेः व्रातच्फञोरस्त्रियाम् इत्यस्त्रीविषयो न स्यात् । द्विस्त्रीप्रत्ययः - गर्गस्यापत्यं स्त्री गर्गादिभ्यो यञ्, प्राचां ष्फ तद्धितः, षिल्लक्षणो ङीष्, गार्ग्यायणी चासौ वृन्दारिका च गार्ग्यवृन्दारिकेत्यादौ यत्र द्वौ स्त्रीप्रत्ययौ तत्र यो भाषितपुंस्कात्परः ष्फो नासावुत्तरपदे, ङीषा व्यावधानात्। यश्चोत्तरपदे ङीष् नासौ भाषितपुंस्कात्परः, ष्फेण व्यवधानात्, तस्य च स्त्रियामेव विहितत्वात् इति पुंवद्भाव एव न स्यात् । तथा इडविडोऽपत्यं स्त्री जनपदशब्दात्क्षत्त्रियादञ् दरदोऽपत्यं स्त्री द्व्यञ्मगध इत्यण्, तयोः अतश्च इति लुक् - इडव़िडदरत्, स चासौ वृन्दारिका च ऐडव़िवृन्दारिका - अत्र पुंवद्भावो न स्यात् अधिकारविहितस्य कस्यचित्प्रत्यस्याभावात् ।

द्वितीये तु पक्षेऽर्थस्य पुमर्थत्वेऽतिदिष्टे तद्वाची शब्दः प्रवर्तत इति नैते दोषाः, किन्तु खित्यनव्ययस्य इति ह्रस्वत्वस्यास्य पुंवद्भावस्य विप्रतिषेधो नोपपद्यते भन्नविषयत्वात् । अचो ह्रस्वत्वमर्थस्य पुंवद्भावः, ततः कालिम्मन्येत्यत्र विप्रतिषेधे परम् इतिह्रस्वत्वमिष्टम्, तन्न प्रप्नोति । शब्दपक्षे तु द्वयोरप्येकविषयत्वाद्विप्रतिषेधोऽस्ति, पुंवद्भावस्यावकाशः, यत्र खिदन्तं नास्ति - दर्घनीयभार्यः, ह्रस्वत्वस्यावकारशो यत्र पुंवद्भावो नास्ति - कालिम्मन्यः पुमानिति कालिम्मन्या स्त्रीत्यत्रोभयप्रसङ्गे परत्वाद् ह्रस्वत्वं भवति । न च कृतेऽपि ह्रस्वत्वे पुनः प्रसङ्गविज्ञानात्पुंवद्भावप्रसङ्गः, सकृद्गतिन्यायस्याश्रयणात् । न चार्थपक्षेऽप्यसत्यप्येकविषयत्वेऽसम्भवाद्विप्रतिषेधः, असम्भवादित्यस्यैवासिद्धेः । यद्यपि हि पुंवद्भावे सति स्त्रीप्रत्ययस्य निवृत्तौ दीर्घान्तत्वाभावाद् ह्रस्वस्याप्रवृत्तिः, तथापि ह्रस्वे प्रवृत्तेऽप्यर्थस्यानिवृत्तत्वात्पुंवद्भावः प्राप्नोत्येव ।

तदेवमाद्ययोर्दुष्टत्वात्तृतीयं पक्ष्माश्रित्याह - भाषितः पुमान्येनेत्यादि । भाषितः पुमान्येन शब्देनेति शब्देऽन्यपदार्थे बहुव्रीहिराश्रीयते, ततः स्त्रियां पुंसि च वर्तमानस्य यस्य प्रवृत्तिनिमित्तं भिद्यते, तस्यापि प्राप्नोति - द्रोणीभार्यः, पात्रीभार्य इति । द्रोणशब्दः परिमाणे पुंल्लिङ्गः, पात्रशब्दोऽर्द्धर्चादित्वात्परिमाणे पुंल्लिङ्गः, भाजनविशेषे तु स्त्रीलिङ्गः, सर्वत्राप्यत्र प्रवृत्तिनिमित्तभेदेऽपि य एव प्रयोगान्तरे पुमांसमाख्यत्, स एव सम्प्रति स्त्रियां वर्तत इति स्यादेव पुंवद्भाव इति मत्वा विशिनष्टि - समानायामाकृताविति । भाष्यग्रहन्थोऽयम्, अतो व्याचष्टे - एकस्मिन्प्रवृत्तिनिमित्त इति । स भाषितपुंस्कः शब्दः, अयं तावदर्थो विवक्षित इत्यर्थः । यथा पुनरयमर्थः सूत्राक्षरैरेव लभ्यते, तथा पृच्छति - तदेतदेवमित्यादि । तदेतदर्थरुपम् एवम्प्रकारं कथं भवतीत्यर्थः । प्रवृत्तिनिमित्तलक्षणेऽन्यपदार्थे सप्तम्यर्थे बहुव्रीहिरित्युत्तरम् । एतदुक्तं भवति - यस्मिन्पिरवृत्तिनिमित्ते पुमान् भाषितः पुमासमाचक्षाणस्य यत्प्रवृत्तिनिमित्तं तेन युक्तं स्त्र्यर्थमाच्क्षाणो भाषितपुंस्क इति ।

नन्वेवमपि द्रोणीभार्य इत्यादौ दोषः स्यदेव, कथम् यस्यां गवादन्यां द्रोणीशब्दो वर्तते, सोऽपि यदा अर्थ इत्युच्यते तदा भाषितपुंस्केन प्रवृत्तिनिमित्तेन

युज्यते, तत्र चार्थं शब्दप्रवृत्तिनिमित्तमप्यर्थ्यमानत्वाद् गवादन्यां सन्निहितमिति तत्र वर्तमानो द्रोतथणीशब्दः स्वयं तत्प्रवृत्तिनिमित्तमनभिदधानोऽपि वस्तुतस्तद्युक्तमर्थमाह नैतदस्ति, एवं हि भाषितपुंस्कग्रहणमनर्थकं स्यात् सर्वत्र सुलभत्वात् । अतो यः शब्दो भाषितपुंसकेन प्रवृत्तिनिमित्तेन युक्तं स्वार्थं तेनैव रुपेणाह, न रुपान्तरेण, स भाषितपुंस्को गृह्यते । द्रोणीशब्दस्तु द्रोणीत्वजातियुक्तेन रुपेण गवादन्यां वर्तते, नार्थ्यमानतया ।
एवमपि द्यौर्भार्या यस्य द्युभार्य इत्यत्र दिव्यशब्दस्य स्त्रीलिङ्स्य स्वर्ग इति पुंल्लिङ्गः प्राप्नोति, येनैव रुपेण स्वर्गशब्देनोच्यते, तेनैव रुपेण दिव्शब्देनापीति कृत्वा एवं तर्हि प्रत्यासत्तेर्यस्य पुंवद्भावो विधीयते, तेनैव यत्र पुमान् भाषित इति विज्ञायते, आत्मनः प्रयोगान्तरे पुमांसमाचक्षाणस्य यत्प्रवृत्तिनिमित्तं तद्युक्तं स्त्र्यर्थम्, सम्प्रत्याचक्षाणस्य स्त्रीशब्दस्य पुम्भाषणदशायां यद्रू पं तदेवाद्यापि भावतीत्यर्थः । आतिदेशिकभेदाच्च पुंवदिति वतिनिर्देशः ।
अनूङिति पर्युदासे सति नञिवयुक्तन्यायेन ऊङ्सदृशस्य टाबादेर्ग्रहणादैडविडवृन्दारिकेत्यादौ स्त्रीप्रत्ययाभावान्न स्यादिति प्रसज्यप्रतिषेधं दर्शयति - ऊङोऽभावोऽनूङिति । भाषितपुंस्कादनूङिति । यद्ययमसमासः स्यात् - अनूङिति, तदा प्रथमा स्यात्, लुप्तषष्ठीकं वा । षष्ठीपक्षेऽयमर्थो भवति - भाषितपुंस्कात्परस्य स्त्रीशब्दस्येव रुपं भवति, ऊङन्तस्य तु नेति । ततश्च पुंवद्भावभाजः स्त्रीशब्दस्य भाषितपुंस्कत्वं विशेषणं न स्यात्, तत्र को दोषः इह च प्रसज्येत - अङ्गारका नाम शकुनयः तेषां कालिकाः स्त्रियः तत एताः कालिकावृन्दारिका इति । एतच्छब्दाद्भाषितपुंस्कात्परः कालिकाशब्द इति तस्य स्त्रीविषयस्याप्यङ्गारकशब्दता स्यात्। शक्यन्ते हि ताः साहचर्यादङ्गारकशब्देनाभिधातुम् । तथा अश्वस्य वडवा, पुरुषस्य योषित्, हंसस्य वरटा, कच्छपस्य डुलीत्यादावपि प्रसङ्गः । दर्शनीयभार्य इत्यादौ च न स्यात्, न ह्यत्र दर्शनीयशब्दो भाषितपुंस्कात्परः । प्रथमायां तु भाषितपुंस्कादित्यनेन सामानाधिकरण्यात्स्त्रिया इति पञ्चमी षष्ठ्यां कस्यचिदर्थस्यासम्भवात् । ततश्च भाषितपुंस्कात् स्त्रीलिङ्गात्पर ऊङोऽन्यः प्रत्ययः पुंवदित्यर्थो भवति, तत्र स एव दोषो यः प्रथमपक्षे । तदेवं समासे देषप्रसङ्गाद्व्यधिकारणपदो बहुव्रीहिराश्रयणीय इत्याह - भाषितपुस्कादनूङित्यादि । आलुक्च निपातनात्पञ्चम्या इति । अलौकिकत्वादस्य निपातनादित्यपरिहारः । लुगपि तर्हि न प्राप्नोति अलौकिकत्वादेवेति यत्किञ्चदेतत् । अनूङ् इइति षष्ठ्यरथे प्रथमा, तदायमर्थेऽवस्थितः - भाषितपुस्कात्स्वस्मादूङोऽभावो यस्मिन् । कोऽर्थः यस्मिन् स्त्रीशब्दे भाषिपुंस्कात्पर उङ्न कृत इत्यर्थ तइति । अपर आह - भाषितपुंस्कादिति षष्ठ्यर्थे पञ्चमी, सर्वमन्यत्पूर्ववत् । भाषितपुंस्कस्य स्त्रीशब्दस्य पुंशब्दस्येव रुपं भवति,
ऊङन्तस्य तु नेति ।
नन्वेवमाश्रीयमाणे यत्र भाषितपुस्कस्यैवानन्तरमुत्तरपदं तत्रैव स्यात् दर्शनीयबा्य इत्यादौ, अत्र हि भाषितपुंस्कस्य दर्शनीयशब्दस्य टापश्चैकादेशः पूर्वं प्रत्यन्तवद्भावाद्भाषितपुंस्कग्रहणेन गृह्यते, गार्गी चासौ वृन्दारिका च गार्ग्यवृन्दारिकेत्यादौ न स्यात्, योऽत्र भाषितपुंस्को गार्ग्यशब्दो न तस्यानन्तरमुत्तरपदम् ङीपा व्यवधानात् । यस्य चानन्तरं गार्गीशब्दस्य नासौ भाषितपुंस्कः स्यादेतदेवम्, प्रयोगान्तरे भाषितपुंस्कस्य सम्प्रति स्त्रियां वर्तमानस्य पुंवद्भाव उच्येत । स्त्रियां वर्तमानस्य तदैव भाषितपुंस्कस्य पुंवद्भावं ब्रूमः, सम्भवति च स्त्रीयां वर्तमानस्य तदैव भाषितपुंस्कत्वं भाषितपुंस्केन प्रवृत्तिनिमित्तेन युक्तां स्त्रियमाहेति कृत्वा । एवं च स्त्रीशब्दस्यैवान्तर उत्तरपदे पुंवद्भाव इति सर्वत्र सिध्यति ।
ग्रामणि दृष्टिरस्येति । अत्र ग्रामणिशब्दोऽपरित्यक्तस्वलिङ्ग तएव दृष्टिशब्देन समानाधिकरणो भवति
। अत्र यदि पुंवद्भावः स्यान्नपुंसकह्रस्वत्वं निवर्ततः
कथमित्यादि । अनवयवभूतगर्भसम्बन्धः स्त्रियां गर्भिणीशब्दस्य प्रवृत्तिनिमित्तम्, पुंसि त्ववयवभूतगर्भसम्बन्धः । प्रसूत - प्रजातशब्दयोरपि स्त्रियां गर्भमोचननिमित्तम, पुंसितुगर्भाधानम् । कर्तव्योऽत्र यत्न इति । अन्तर्वर्तिवस्तुसम्बन्धमात्रं गर्भिणीशब्दस्य प्रवृत्तिनिमित्तमवयवत्वानवयवत्वेन तन्त्रम् । एवं प्रसूतप्रजातशब्दयोरपि आधानविमोचनत्यागेनापत्यसम्बन्धमात्रं निमित्तमाश्रीयत इत्ययमत्र यत्नः ।
ब्रह्मबन्धूभार्य इति । ऊङो निवृत्तिर्न भवति । न कोपधायाः इत्यत्रैवोङ्ग्रहणे कर्तव्ये पृथक्प्रतिषेधादस्य वैलत्रण्यं ज्ञयते । तेन ब्रह्मबन्धूवृन्दरिकेति पुंवत्कर्मधारय इति निषेधविपये विधीयमानोऽपि पुंवद्भावो न भवति । एष चार्थोऽनूङित्यस्य तत्रानुवृत्तेर्लभ्यते । अपूरणीप्रियादिष्वित्ययं तु प्रतिषेधस्तत्रैव कर्तव्यः, न ह्यस्य पुंवत्कर्मधारय इत्यत्रानुवृत्तिरिष्यते महानवमी, महाद्वादशी, अक्षयतृतीया, कृष्णचतुर्दसीत्यादौ पूरण्यामपि कर्मधारये पुंवद्भावस्येष्टत्वात् ।
प्रधानपूरणीग्रहणं कर्तव्यमिति । प्रधानं या पूरणी तस्यामेव प्रतिषेधो भवतीति वक्तव्यमित्यर्थः । एवच्च प्रधाने कार्यसम्प्रत्ययाल्लभ्यते । कल्याणपञ्चमीकः पक्ष इति । अत्र तिरोहितावयवभेदः पक्षोऽन्यपदार्थ इति तत्र पूरण्या अननुप्रवेशान्नास्ति प्राधान्यम्, कल्याणपञ्चमा रात्रय इत्यादावुद्भूतावयवभेदा रात्रमोऽन्यपदार्थः, तत्र यथा रात्रयः समासाभिधेया, एवं पञ्चम्यपीति पूरण्याः प्राधान्यम् ।
अथ दृढभक्तिः, शोभनभक्तिरित्यत्र कथं पुंवद्भावः, यावता प्रियादिषु भक्तिशब्दः पठ्यते अत आह - दृढभक्तिरित्येवमादिष्विति । स्त्रीवाचित्वं पूर्वपदस्याविवक्षितम्, अतो दृढभक्तिरित्येवमादिसिद्धिरित्येवं चोद्यसमाधानं कर्तव्यमित्यर्थः । दृढशब्दोऽत्र दार्ढ्यनिवृत्तिपरः, तत्र दार्ढ्यनिवृत्तिपरायां चोदनायां स्त्रीलिङ्गोपादानमकिञ्चित्करमिति भावः । न चैवं सूत्रस्यानादरणीयत्वम्, लिङ्गविशेषविवक्षायां दर्शनीयभार्य इत्याद्यनिष्टप्रसङ्गात् । अथेह कथं भवितव्यम् - पट्वीमृद्व्यौ भार्ये अस्येति, पट्वीमृदुभार्य इति भवितव्यम् यस्योत्तरपदमनन्तरं तस्य पुंवद्भावो नेतरस्येति ।।
तसिलादिष्वाकृत्वसुचः ।। 6 - 3 - 35 ।।
अनुत्तरपदार्थमासम्भः । ततस्तत्रेति । प्राग्दिशो विभक्तिः इति विभक्तित्वात्त्यदाद्यत्वम्, टाप्, अनेन पुंवद्भावः ।
इह केचित्तसिलादिषु पठ्यन्ते, येषु पुंवद्भावो नेष्यते, केचिच्चान्यत्र पठ्यन्ते, येषु पुंवद्भाव इष्यते, तस्मादाह - परिगणनमिति । त्रतसोरुदाह्रतम् । तरप्तमपो दर्शनीयतरा, दर्शनीयतमा । चरट्जातीयरोः पटुचरी, पटुजीतीया । कल्पदेशीयरोः - दर्शनीयकल्पा, दर्शनीयदेशीया । देश्यप्रत्ययस्य नास्ति पाठः । रुपप्पाशपोः दर्शनीयरुपा, पटुपाशा । थम्थालोः - इदमस्थमुः, किमश्च इति विहितस्थमुः, प्रकारवचने थाल् अनया प्रकृत्या इत्थम्, कया प्रकृत्या

कथम्, तया तथा । दार्हिलोः - तस्यां वेलायां तदा, तर्हि । तिल्थ्यनोः - वृकज्येष्टाभ्यां तिल्तातिलौ चच्छन्दसि, वृकी प्रशस्ता वृकतिः । तातिलो नासिति पाठः । अजाविभ्यां थ्यन् अजायै हिता अजथ्या । अत्र घरुपकल्पेषु ङ्यन्तस्य परत्वात् ह्रस्वः - पटिवतमा, पटिवकल्पा, पटिवरुपा ।
शसि बहूल्पार्थस्येति । बह्वल्पार्थात् इत्ययमपि शस् तसिलादिषु द्रष्टव्य इत्यर्थः ।
ङास्तिकमिति । यद्यत्र पुंवद्भावो न स्यत्, तदा हस्तिनीशब्दस्य यस्तेतिलोपे कृते तस्य स्थानिवत्त्वाद् असिद्धवदत्राभात् इत्यसिद्धत्वाच्च नस्तद्धिते इति टिलोपो न स्यादिति पुंबद्भावो विधीयते । ठक्छसोश्च इत्येनेन पुंपद्भावो न लभ्यते छसा सहचरितस्य ठको ग्रहणात् । श्यैनेयः, रोहिणेय इति । श्येतरोहिताभ्याम् वर्णादनुदात्तात् इति । ङीब्नकारौ । अत्र पुंवद्भावे सति - श्यैतेयः, रौहितेय इति स्यात् ।
कथमित्यादि । यदि ढे पुंवद्भावः प्रतिषिध्यते, ततोऽग्नेः स्त्री वृषाकप्यग्निकुसितकुसिदानामुदात्तः इति अग्निशब्दान् ङीपि कृते ऐकारे आयादेशे च अग्नायी, स देवतास्य अग्नेर्ढक् इति, सर्वत्राग्निकलिभ्यां ढक् इति ढकि पुंवद्भावनिपेधादाग्नायेय इति प्राप्नोति, तत्कथमाग्नेय इति कर्तव्योऽत्र यत्न इति । केचिदाहुः - अढे इत्यपनीयानपत्य इति वक्तव्यम् । इदमपि सिद्धं भवति - कुण्डिन्या अपत्यमिति गर्गादिभ्यो यञ्, तत्र पुंवद्भावाभावाद्यस्येति लोपे तस्य स्थानिवद्भावात् नस्तद्धिते इत्यसति टिलोपे कौण्डिन्य इति भवति,
पुंवद्भावे तु सति कौण्ड्य इति प्राप्नोति । तथा सपत्न्या अपत्यं शिवादित्वादण, तत्र पुंवद्भावाभावात् सापत्न इति भवति, पुंवद्भावे तु सति नित्यं सपत्न्यादिषु इति विहितयोर्ङीब्नकारयोनिवृत्तयोः सापत इति स्यात् । तदेवम्, अनपत्ये इति वचनाद् ढेऽप्यनपत्ये पुंवद्भवति स आग्नेय इति । अपत्ये तु न भवति - श्यैनेयः, रौहिणेय इति । यद्यनपत्य इत्युच्यते, गर्गस्यापत्यं स्त्री गार्ग्यायणी, तस्या अपत्यम् गोत्रस्त्रियाः कुत्सने ण च इति णप्रत्यये कृते पुंवद्भावो न प्राप्नोति, ततश्च गार्ग्यायणो जाल्म इति स्यात्, गार्ग्यो जाल्म इति चेष्यते, तस्मादनपत्य इति न शक्यं वक्तुम्। कथं कौण्डिन्यः आगस्त्यकौण्डिन्ययोः इति निपातनात् सिद्धम् । कथं सापत्नः शत्रुपर्यायः सपत्नशब्दोऽस्तिः व्यन्सपत्ने इति लिङ्गात् । स शार्ङ्गरवादिषु पठितव्यः, ततः शिवाद्यण, तस्मात् स्त्रीभ्योढक् इत्यत्रैव पुंवद्भावप्रतिषेध इति व्याख्यानमेवात्र शरणम् ।
ठक्छसोरिति । छसः सित्त्वात् सिति च इति पदसंज्ञाविधानाद्भत्वाभावाद् वचनम्, ठग्रहणं किमर्थम्, इकादेशे कृते भस्याढे इत्येव सिद्धे ठावस्थायामेव यथा स्यात् किमेवं सति भवति इसुसुक्तान्तात्कः इति कादेशाः सिद्धो भवति अन्यथा यदीकादेशे कृते पुंवद्भावः स्यात्, ततो यथा माथितिक इत्यत्रेकादेशे कृते कादेशो न भवति, एवं भावत्क इत्यत्रापि न स्यात् ।।
क्यङ्मानिनोश्च ।। 6 - 3 - 36 ।।
अयमस्याः, इयमस्या इति वैयधिकरण्यप्रदर्शनार्थमिदमुक्तम् । पूर्वणेव सिद्धमिति । एकस्या एव कर्मत्वात्कर्तृत्वाच्च सामानाधिकरण्यस्याभावात् ।।
न कोपधाया ।। 6 - 3 - 37 ।।
मद्रेषु भवा मद्रिका, वृजिका, मद्रवृज्योः कन् । वैलेपिकमिति । अण्महिष्यादिभ्यः, अत्र भास्याढे तद्धिते
इति ह्यौपसंख्यानिकी प्राप्तिः प्रतिषिद्ध्यते । पूर्वेषु तु सौत्री । तद्धितवुयग्रहणमिति । तद्धितस्य यः ककारः वोश्च यः ककारः तस्येति वक्तव्यमित्यर्थः । पाकभार्य इति । पाकशब्दः प्रथमवयोवाची, ततो ङीबपवादोऽजादित्वाट्टाप् ।।
संज्ञापूरण्योश्च ।। 6 - 3 - 38 ।।
संज्ञाशब्दा ये दानादिक्रियानिभित्ताः पुंसि च स्त्रियां च लोके प्रयुज्यन्ते तदर्थः संज्ञाप्रतिषेधः । ये त्वेकद्रव्यनिमित्ता देशनिमित्ता वा
संज्ञाशब्दास्तत्राभाषितपुंस्कत्वादेवाप्रसङ्गः । दत्तायते, गुप्तायते इति । अत्र यद्यपि सत्यसति वा प्रतिषेधे विषेषाभावः, तथापि वस्तुतः प्रतिषेधस्यच विषय इत्येतावताऽस्योपन्यासः ।।
वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ।। 6 - 3 - 39 ।।
वृद्धेनिमित्तं णकारः । इह निमित्तग्रहणं न कर्तव्यम्, वृद्धेस्तद्धितस्य इत्येव वक्तव्यम् - वृद्धेर्यस्तद्धितः, कश्च वृद्धेस्तद्धितः यस्तस्या निमित्तमेवं सिद्धे निमित्तग्रहणाद्व्यधिकरणपदो बहुव्रीहिः । अपर आह - षष्ठीसमासादर्शआद्यच्प्रत्यय इति । यद्वा - निमित्तग्रहणाद्बहुवचनान्तस्य समासः वृद्धीनां तिसृणामपि निमित्तं वृद्धिनिमित्तमिति । वतुस्त्वाकारस्यैव निमित्तम् । इह तु सर्वस्मै हिता सार्वा सा भार्या यस्य स सार्वभार्य इति यद्यपि सर्वपुरुषाभ्याम् इति णप्रत्यये आकार एव वृद्धिर्भवति, तथापि नासौ स्वरुपेण वृद्धेर्निमित्तम्, किं तर्हि णित्त्वेन । तच्च तिसृणामपि निमित्तम् ।
मध्ये भवा मध्यमा, तमध्यान्मः । काण्डं लुगातीति काण्डलावी, कर्मण्यण् टिट्ढाणञ् इति ङीप् , यत्तदेतेभ्यः परिमाणे वतुप् आ सर्वनाम्नः अगितश्चं ङप्, तावती । तत्पुरषाश्रयणेऽस्यापि प्रतिषेघः स्यात्, बहुव्रीहौ तु णकारदेरभावान् न भवति । काषायीति । तेन रक्तं रागात् इत्यण् । लौहीति । प्राणिरजतादिभ्योऽञ् । खदिरशब्दः पलाशादिः ईषा - रथावयवविशेषः ।।
स्वाङ्गञ्चेतोऽमानिनि ।। 6 - 3 - 40 ।।
स्वाङ्गाच्चेतोऽमानिनि ।। अमानिनीति वार्तिके दर्शनात्सूत्रे प्रक्षिप्तम् । स्वाङ्गाच्चोपसर्जनात् इति ङीष्, दीर्घकेशी ।
सहनञ्विद्यमानपूर्वाच्च इति प्रतिषेधादकेशा ।।
जातेश्च ।। 6 - 3 - 41 ।।
कठबहूवृचयोः गौत्रं च चरणौः सह इति जातित्वान् ङीष् ।
अयमित्यादि । व्याख्यानमत्र शरणम् ।।

पुंवत् कर्मधारयजातीयदेशीयेषु ।। 6 - 3 - 42 ।।

ननु कर्मधारये स्त्रियाः पुंवत् इत्यादिना सिद्धः पुंवद्भावः जातीयदेशीययोरपि तसिलादिष्विति, किमर्थोऽयमारम्भः इत्यत आह - प्रतिषिद्धार्थोऽयमिति । प्रतिषिद्धोऽपि पुंवद्भावो यथा स्यादित्येवमर्थमित्यर्थः । प्रतिषेधार्थोऽयमिति पाठे प्रतिषेधाविषयः प्रतिषेधशब्देनोक्तः । निवृत्तिवचनो वार्थशब्दः ।

कुक्कुट्यादीनामित्यादि । अस्त्र्यर्थेमसमानाधिकरणार्थं वचनम् । न वेत्यादि । उपसंख्यानं प्रत्याचष्टे । न वा वक्तव्यम्, किं कारणम् स्त्रीपूर्वपदस्याविवक्षितत्वात् । नात्र स्त्रीत्वावसायः आरभ्यमाणेऽपि पुंवद्भावे समाश्रयणीयः, अनारम्भेऽपि तथा भविष्यति । यदि तर्हि स्त्रीलिङ्गेन समासो न भविष्यति । यद्यपि तावदत्रैतच्छक्यते वक्तुम्, इह तु कथं मृग्या क्षीरं मृगक्षीरमिति, नहि पुंसः क्षीरेण सम्बन्धोऽस्ति अत्रापि जात्यन्तरनिवृत्तिपरत्वाच्चोदनायाः स्त्रीत्वमाकिञ्चित्करत्वादविवक्षितम् । यत्र तु लिङ्ग, विशेष उपकारकस्तत्रासौ विवक्षित एव यथा - अडामूत्रेण पर्युक्षितं दातव्यमिति । पूर्वपदार्थोऽत्र जातिरिति । कुक्कुटाण्डाजौ पूर्वपदार्थो जातिः स च समामान्येन स्त्रीत्वादिविशेषरहितेन रुपेण विवक्षित इत्यर्थः ।

खिद्घादिष्विति । तत्र खिति विप्रतिषेधः स्त्रियाः पुंवत् इत्यत्रैवोदाहृतः । घादिषु नद्या ह्रस्वो भवतीत्यस्यावकाशः - नर्तकितरा, नर्तकितमा, नर्तकिरुपा, नर्तकिकल्पा, यत्र पुंवद्भावः प्रतिषिध्यते न कोपधायाः इति - तसिलादिष्विति । पुंद्भावस्यावकाशः यद् ङ्यन्तं न भवति - दर्शनीयतरेत्यादि । पट्वितरेत्यादावुभयप्रसङ्गे विप्रतिषेधः । केऽणो ह्रस्वो भवतीत्यावकाशः - नर्तकिका, पुंवद्भावस्यावकारः - दरदोऽपत्यं स्त्री, द्व्यञ्मगध इत्यण्, तस्य अतश्च लुक्, ततः प्रागिवात्कः, तसिलादिष्विति पुंवद्भावाद्दारदशब्दः, प्रत्ययस्थात् इतीत्वं दारिदिका । ननु च परिगणितास्तसिलादयः न च कप्रत्ययस्तेषु समस्ति एवं तर्हि विप्रतिषेधादेव कप्रत्ययोऽपि तत्राभ्युपगम्यत इति अनुमीयते, पट्विका मृट्विकेत्यादावुभयप्रसङ्गे परत्वाद् ह्रस्वः, सर्वत्र चात्र सकृदित्याश्रयणाद् पुंवद्भावाभावः ।

अनूङिति यदुक्तं तस्य प्रयोजनं दर्शयति - इहेत्यादि । तद्राजप्रत्ययस्येति । ये द्व्यचस्तेषु द्व्यञ्मगध इत्यण्, शेषेषु जनपदशब्दात् इत्यञ् , पृथ तइति थकारान्तः ।।

घरुपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः ।। 6 - 3 - 43 ।।

चेलादीनां वृत्ति विषये कुत्सनवचनत्वात्तैः कुसितानि कुत्सनैः इति समासः । ङ्य इत्यत्र ईयाश्छन्दसि बहुलम् इत्यादिवदागमः प्राप्तः, सौत्रत्वान्न कृतः ।।

दत्तातरेति । ननु च स्वाङ्गाच्चेतः इत्यतः ईतः इत्यनुवर्तिष्यते । एवमपि प्रामणीतरः - अत्रापि प्राप्नोति स्त्रियामिति वर्तते । एवमपि प्रमणीतरा - अत्रापि प्राप्नोति स्त्रियाम इति वर्तते, स्त्रीया ईतः स्त्रीवाचिन ईकार स्येत्यर्थः, ग्रामणीशब्दे त्वनर्थक ईकारः । शेषप्रवलृप्त्यर्थं तर्हि ङीब्ग्रहणम्, क्रियमाणे हि ङीब्ग्रहणे ङ्योऽनेकाचः इति श्रुतत्वात्तदपेक्षः शेषो लभ्यते - अङीब् या नदी ङ्यन्तं च यदेकाजिति । अन्तरणापि ङीब्ग्रहणं प्रवलृप्तः शेषः, कथम् ईत इति वर्तते, अनीच्च या नदी ईदन्तं च यदेकाजिति । तदेतन्ङीग्रहणं तिष्ठतु तावत् ।।

नद्याः शेषस्यान्यतस्याम् ।। 6 - 3 - 44 ।।

भाषितपुंस्कादनूङ् इति निवृत्तम् । कश्च शेष इति । यदि च यत्र पूर्वसूत्रेण ह्रस्वो न विवत्रितः स शेषः, ततो यदभाषितपुंस्कम्, यच्च भिन्नायामाकृतौ भाषितपुस्कमनेकाज ङ्यन्तं तस्यापि ह्रस्वत्वं प्रसज्यते - आमलकीतरा, द्रीणीतरेति । अत्रापि पूर्वेण विहितत्वादिति प्रश्नः । पूर्वसूत्रे यत्साक्षात् श्रुतं तदपेक्षः शेष इत्युत्तरम् ।

शेषग्रहणं शक्यमकर्तुम्। कथम् नद्या अन्यतरस्यां ह्रस्व इत्युत्सर्गः, तस्यानेकाच ईतो नित्यह्रस्वत्वमपवादः, तस्मिन्नित्ये प्राप्ते उगितश्च इति विभाषाऽऽरभ्यते । यद्येवम्, नद्या अन्यतरस्याम् इत्यत्र भाषितपुंस्कादित्यनुवर्त्यते, द्रोणीतरा - तअत्रापि प्राप्नोती, तस्मात्कर्तव्यं शेषग्रहणम् । तस्मिश्च क्रियमाणे
श्रुतापेक्षं शेषत्वं यथा विज्ञायेतेति पूर्वसूत्रे ङीग्रहणमपि कर्त्तव्यम् ।

लक्ष्मीत्रेति । अवितृस्ततन्त्रिभ्य ईः लक्षेर्मुट् च इतीकारप्रत्ययान्तो लक्ष्मीशब्द इति कृन्नद्यन्तो भवति । स तर्हि प्रतिषेधो वक्तव्यः न वक्तव्यः कथम् स्त्रिया इत्युनुवर्तते, तेन नदीं विशेषयिष्यामः स्त्रिया नद्या इति न च कुन्नदी स्त्रीवाचिनी । नदीसंज्ञाऽपि तर्हि न प्राप्नोति उक्तोऽत्र परिहारो नदीसंज्ञाप्रकरणे ।।

उगितश्च ।। 6 - 3 - 45 ।।

पुंवद्भावोऽप्यत्र पत्रे वक्तव्य इति । भाष्ये नैतद् दृष्टम् । प्रकर्षयोगात्प्रागित्यादिना वक्तव्यं प्रत्याचष्टे । विवक्षा हि शब्दव्युत्पत्तेः प्रधानं कारणम्। न चेह प्रकणयोगात्प्राक्स्त्रीत्वविवक्षायां स्त्रीप्रत्यय इति मन्यते ।।

आन्महतः समानाधिकरणजातीययोः ।। 6 - 3 - 46 ।।

महतः पुत्रो महत्पुत्र इति । ननु चात्र आन्महतः इत्येतावानेव योगः कर्तव्यः, ततः जातीये च इति द्वितीयः, तत्र पूर्वस्मिन् योगे उत्तरपदेन समासः सन्निधाप्यते, स च लक्षणप्रतिपदोक्तपरिभाषाया सन्महत् इत्यादिना तयो विहितः स एव ग्रहीष्यते, स च समानापरिभाषया सन्महत् इत्यादिना यो विहितः स एव ग्रहीष्यते, स च समानाधिकरण एवेति अनर्थकं समानाधिकरणग्रहणग्रहणम्, तदेतदाशङ्कते तावत् - लक्षणोक्तत्वादिति । निराकरोति - बहुव्रीहावपीति । तदर्थमिति । बहुव्रीहावपि यथा स्यादित्यवमर्थमित्यर्थः । लक्षणप्रतिपदेक्तपरिभाषाया निवृत्त्यर्थमिति वा ।

इह आमहान् महान्सम्पन्नो महद्भूतश्चन्द्रमा इति महच्छब्दो भूतशब्दश्चैकस्मिन्नर्थे चन्दर्मसि वर्तेते इति सामानाधिकरण्यादात्त्वं प्राप्नोति । स्यादेतत् - अभूततद्भावे च्विर्विधीयते, अभूततद्भावश्च कः कारणस्य विकारत्मनाऽभूतस्य तदात्मना भावः, तत्र प्रकृतिः कर्त्री, न विकृतिः, तथा च - सङ्घीभवन्ति ब्राह्मणाः, पटीभवन्ति तन्तवः, अत्वं त्वं सम्पद्यते त्वद्भवतीति प्रकृत्याश्रयेण बहुवचनप्रथमपुरुषौ दृश्येते, न विकृत्वाश्रयेणैकवचनमध्यमपुरुषौ, ततश्च भूत

इति क्तप्रत्ययो भवन् क्रियायाः कर्तर्यमहत्युत्पन्नः, न तु विकारे महति ततः किम् आमहतो भूतेन सामानाधिकरण्यम्, न तु महतः न ह्यवस्थावत एकत्वेऽप्यवस्थयोः सामानाधिकरण्यं सम्भवति, नहि भवति बालश्चासौ स्थविरश्चेति, भवति तु बालश्चासौ देवदत्तश्चेति, अतो वैयधिकरण्यादात्त्वाभाव इति । यद्येवम्, अमहती महती सम्पन्ना ब्राह्मणी महद्भूता ब्राह्मणीति पुंवद्भावोऽपि न स्याद्वैयधिकरण्यादेव यथा प्रकृतेः कर्तृत्वं दृष्टं तथा विकृतेरपि दृश्यते । तथा च पस्पशायां भाष्यम् - सुवर्णपिण्डः खदिराङ्गारवर्णे कुण्डले भवति इति । तथा क्लृपि सम्पद्यमाने चतुर्थी वक्तव्या इति सम्पद्यकर्तरि विधीयमाना चतुर्थी विकाराद्भवति - मूत्राय कल्पते यवागूरिति, न प्रकृतेः । तथा असङ्घो ब्राह्मणसङ्घो भवति, अपटस्तन्तवः पटो भवतीति विकाराश्रयं वचनं दृश्यते तत्र यदि विकृतेः कर्तृत्वमाश्रित्य सामानाधिकरण्याश्रयः पुंवद्भावो विधीयेत, आत्त्वमपि स्यात् । अथ प्रकृतेः कर्तृत्वाद्वैयधिकरण्यादात्त्वं न स्यात्, पुंवद्भावोऽपि न स्यात् उच्यते, दर्शितं तावदिदं यथा च्विविषये द्वयोरपि प्रकृतिविकृत्योः कर्तृत्वमिति । युक्तं चैतत्, यदि विकृतेः कर्तृत्वमाश्रित्य प्रत्ययः । यदा चैकोऽर्थः प्रकृतिविकारात्मक आश्रीयते, तदा परिणामव्यवहारः । उक्तं च - जहद्धर्मान्तरं पूर्वमुपादत्ते यदा परम् । तत्त्वादप्रच्युतो धमी परिणाम सः उच्यते ।। इति । यदा त्वन्यतरव्यवस्था न विवक्ष्यते, तदा च्वरभावः - तन्तवो भवन्ति, पटो भवतीति, तज्ञ योऽयं पूर्वकं धर्मं जहदुत्तरं चोपाददत्सम्मृछितोऽर्थः सञ्जायमानः सम्पद्यकर्तेति चोच्यते, तदभेदाच्च पूर्वोत्तरावस्थयोरपि कर्तृत्वम्, अत एतदपि निरस्तम्। असत्या उत्तरावस्थाया उत्पत्तौ शशविषाणमप्युत्पद्येत, सत्याश्च पूर्ववस्थाया उत्पत्तौ सर्व एव पटादयः सर्वदोत्पद्यमाना एव भवेयुरिति । कथं निरस्तम् किं सदुत्पद्यतं, किञ्चासत् पूर्वोत्तरयोरवस्थयोरनुवर्तमानं वस्तु तस्मान्न भिन्नेन नाप्यभिन्नेन केनचिद्रूपेणोत्पद्यते, यथा - मृद्वस्तु धटरुपेण । यद्येवम्, पूर्ववस्थया किमपराद्धम्, यत्सैव नोत्पद्यते न किञ्चिदपराद्धम्, असती तु सा कथं कर्त्रो स्यात् । विनष्टायां हि तस्यामुत्तरवस्थोत्पद्यते, यथा घटः पिण्डावस्थायाम् । अतो दृद्वग्त्वेव तेव तेव पिण्डादिरुपेण परिणमत इति युक्तम् । एवमामूलप्रकृतितः । सा तु प्रकृत्यन्तरनिरपेक्षैव तेन तेन पृथिव्यादिरुपेण परिणमत इति । तदेवं स्थितमेतत् सम्मूर्च्छितोऽर्थात्मा सम्पद्यकर्ता, तदभेदाच्च पूर्वोत्तरावस्थयोरपि कर्तृत्वमिति । उक्तं च - पूर्वावस्थामभिजहत्संस्पृशन् धर्ममुत्तरम् । सम्मूर्छित इवार्थात्मा जायमानोऽभिधीयते ।। इति ।

तदेवं सति च्व्यर्थे वाक्ये क्वचित्प्रकृतेरेव कर्तृत्वम्, च्व्यन्तस्य गतित्वाद्, गतीनां च क्रियाविशेषणत्वादन्यद्धि भनम्, अन्यद्धि सङ्घीभवनम् तत्र केवले भवने सङ्घः कर्ता, सङ्घीभवने तु ब्राह्मणः । यथा - व्याकरणस्य सूत्रं करोतीति सत्रं तद्विशेषणम्, व्याकरणं सत्रयतीत्यत्र विशिष्टकरोतेर्व्याकरणं कर्म तद्वदत्रापि । तत्र मद्दद्भतश्चन्द्रमा इति च्व्यन्तोऽयं महच्छब्दौ भूतशब्दस्य प्रवृत्तिनिमित्ते भवने पर्यवस्यति । भूतशब्दस्तु महत्त्वेनासंस्पृष्टश्चन्द्रमाः स्वरुपे वर्तत इति वैयधिकरण्यादात्त्वाभावः । महद्भूता ब्राह्मणीत्यत्र तु मृगक्षीरादिवत्स्त्रीपूर्वपदस्याविवक्षितत्वात्सिद्धम् । यत्र तु स्त्रीत्वं विवक्षितम्, न भवत्येव तत्र पुंवद्भावः -- अगौमती गोमती सम्पन्न गोमतीभूता ब्राह्मणीति ।

वृत्तिकाग्स्तु विकृतेः कर्तृत्वाश्रयेण सामानाधिकरण्य सत्यपि परिहारमाह गीणत्वान्महपर्थस्येति । गोणमुख्ययोहि मुख्ये सम्प्रत्ययो भवति, तद्यथा - गौरनुबन्ध्याऽजोऽग्नीपोमीय इति न वाहीकोऽनुबध्यते, स्वशास्त्रेऽपि स्वरुपम् इत्यत्र रुपग्रहणेन ज्ञापितरुपवदर्थोऽपि तन्त्रमिति मुख्यार्थस्य महच्छभ्दस्चात्र ग्रहणाद् गौणर्थस्यात्त्वाभावः । च्व्यन्तेषु हि एकस्य वस्तुनः प्रकृतिविकारात्मकतया द्व्यात्मकत्वं गम्यते । पटीभवन्तीति ह्युक्ते प्रागपटः सम्प्रति पटात्मना परिणमत इति प्रतीयते । पटो भवतीत्युक्ते नैवं प्रतीयते, किन्तु पटो रक्तादिरुपेण भवतीत्यपि गम्यते । तत्र केवलविकारावस्थावाचकस्य पठशब्दस्य प्रागवस्थायामनुगतावस्थायां च वृत्तिर्न लक्षणामन्तरेणोपपद्यते ।

अपर आह महत्त्वेन परिणामोन्मुखेऽमहति महच्छब्दस्य वृत्तिः । अत्र च प्रमाणम् - पटो भवतीति वाक्ये रक्तादिरुपेण भवतीत्यपि गम्यते, पटीभवतीत्यत्रापटः पटो भवतीत्येव गम्यते । एवमर्थे प्रवृत्तिरुपचारमन्तरेण नोपपद्यते इति गौणार्थत्वादात्त्वाभाव थइति मन्तव्यम् । यदि तर्हि पुंवद्भावस्तु विशेषमनुपादाय विधीयमानो गौणार्थस्यापि भवति, शब्दविशेषोपादाने हि गौणमुख्यन्यायः एवं तु गोमतीभूतत्यत्र तु पुंवद्भावनिवृत्तये यतितव्यम् । यदि तहि शास्तत्रेषु मुख्यार्थस्य ग्रहथण, कथं तर्हि वाहीक् वृद्ध्यात्वे भवतः - गौर्वाहीकः, गां वाहीकमिति उच्यते पदस्य पदान्तरसम्बन्धे सति गौणार्थत्वाभिव्यक्तिः विभक्त्यन्तं च पदान्तरेण सम्बध्यते, ततश्च पदस्य पदान्तरसम्बन्धे सति यत्कार्थं प्राप्तं सत्रैवसौ न्यायः , न प्रतिपदिककार्येष्वति मुख्य एव स्वार्थे सास्नादिमति वृद्ध्यात्वे अनुभूय गोशब्दो वाहीके वर्तिष्यते । इह तु महच्छब्दस्योत्तरपदे परतो विधीयमानमात्त्वं तस्यामवस्थायां मुख्यार्थस्यैव भवितुमर्हति । अनेनैव न्यायेन च तस्य गौशब्दस्य गौऽभवदित्यत्र ओत् इति प्रगृह्यसंज्ञा न भवति, अग्निसोमौ माणवकारवित्यत्र अग्नेः स्तुत्स्तोमसोमाः इति षत्वं न भवति, ईदग्नेः थइतीत्त्वं च ।

महदात्त्व इत्यादि । समुच्चये चशब्दः, नान्वाचये । तेव यत्रैव पुंवद्भावस्तत्रैवात्त्वम् । अष्टाकपालमिति । अष्टसु कपालेषु संस्कृतमिति तद्धितार्थे समासः, संस्कृतं भक्षाः इत्यण्, तस्य द्विगोः इति लुक् । अष्टकपालमिति । समाहारे द्विगुः । पात्रादित्वात् स्त्रीत्वाभावः ।

अष्टागवेनेति । अष्टौ गावो युक्ता अस्मिन्निति त्रिपदो बहुव्रीहिः, पूर्वयोर्द्वयोरुत्तरपदे द्विगौ गोरतद्धितलुकि इति टच्समासान्तः । तत्र दीर्घत्वेन युक्तार्थसम्प्रत्ययाद्युक्तशब्दस्य निवृत्तिः । समाहारद्विगोर्वा साहचर्यादभेदौपचाराद्युक्तार्थे वृत्तिः ।

कषकरणं विस्पष्टार्थमिति । न भिन्नकालानां निवृत्त्यर्थम्, अनण्त्वात्, नापि गुणभिन्नानां तत्कालानां ग्रहणम् अभदकत्वाद् गुणानाम् । आनङ्प्रकरण एवास्मिन्वक्तव्येऽत्र आत् इति वचनं योगविभागार्थम् । तेनाष्टाकपालदावातत्वसिद्धिः । एवं चैकादशेऽन्यत्राप्यात्त्वं भवति, तथा च प्रागेकादशभ्योऽच्छन्दसि इति प्रयोगः ।।

द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ।। 6 - 3 - 47 ।।

अत्र संख्यातानुदेशो न भवति । यदि स्याद्, अष्टनोऽशीतौ प्रतिषेधः स्यात्, तथा च तस्य वैयर्थ्यम् । प्रतिषिद्धेऽप्यात्त्वे सवर्णदीर्घत्वेन भवितव्यम् । द्वादश,

द्वाविशतिरित्यादौ समाहारे द्वन्द्वः । स नपुंसक्म् इत्येत्त्ु न भवति लोकाश्रयत्वाल्लिङ्गस्य ।
द्वित्रा इति । द्वौ वा त्रयो वेति वार्थे संख्ययाव्ययासन्न इति समासः, बहुव्रीहौ संख्येये डच् । द्विर्दश द्विदशाः । सुजर्थे समासः ।।
त्रेस्त्रयः ।। 6 - 3 - 48 ।।
सन्धिवेलादिषु त्रयोदशशब्दस्य पाठात्सकारन्तोऽयमादेशः ।।
विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ।। 6 - 3 - 49 ।।
सर्वेषाग्रहणमित्यादि । असति हि तस्मिन् अनन्तरस्य त्रेस्त्रयः इत्यस्यैव विकल्पः स्यात् ।।
हृदस्य हृल्लेखयदण्लासेषु ।। 6 - 3 - 50 ।।
अणन्तस्य ग्रहणमिष्यत इति । व्याख्यानात् । अत्र व्यावर्त्यं दर्शयति - घञि त्विति । यदा चाणन्तस्य ग्रहणं न धञन्तस्य, तदा लेखग्रहणस्य ज्ञापकत्वमुपद्यते ।।
वा शोकष्यञ्रोगेषु ।। 6 - 3 - 51 ।।
हृदयशब्देनेत्यादि । यदुक्ततं तन्नानुमन्यन्ते, अत एव विकल्पविधानात्, पद्दन्नोमास्हृत् इत्यत्र हृददेशविधानाच्च ।।
पादस्य पदज्यातिगोपहतेषु ।। 6 - 3 - 52 ।।
आकारान्तोऽयमादेशोऽविभक्तिकः । अज्यतिभ्यामिति । अज गतिक्षेपथणयोः, अत सातत्यगमने । पदग इति । डप्रकरणेऽन्यत्रापि दृश्यते इति डः । अपदेश एवेति । समसनक्रियानन्तरमेव प्रागेव समासस्य प्राप्तस्वरादित्यर्थः । अन्तोदात्तो निपात्यत इति । अन्यथाऽऽन्तर्यत आद्युदात्तः स्यात् । तेनेत्यादिना अन्तोदात्तनिपातनस्य प्रयोजनमाह । पदाजिरित्यादिनोपदेशग्रहणस्य । यदि वृत्स्वरे कृते सत्युत्तरकाले पदशब्दोऽन्तोदात्त आदेशः स्यात्, तदा सतिशिष्टत्वात्तेन कृत्स्वरो बाध्येत । उपदेश एव त्वान्तोदात्तादेशे कृत्वस्वर एव सतिशिष्टो भवति । न चान्तोदात्तनिपात्नस्य वैयर्थ्यम, पदोपहत इत्यत्र श्रूसमाणत्वादिति पिण्डार्थः ।।
पद्यत्यतदर्थे ।। 6 - 3 - 53 ।।
इके चरताविति । चरत्यर्थे इक् प्रत्ययः कृत्प्रत्ययस्तत्रेत्यर्थः । एतद्वार्त्तिकादर्शनात्पर्पादिषु पादः पच्च इति पठितम् ।
शरीरावयवस्येति । व्याख्यानमत्र शरणम् । अपर आह - पूर्वज्ञ तावच्छरीरावयवस्य ग्रहणम्, तस्यैवाज्यादिषु करणत्वसम्भवता् इहापि स एवानुवर्तते । ऋचः शे इत्यत्र ऋग्विषये शरिरावयवस्यासम्भवाच्छतुर्थभागवचनस्य ग्रहणमिति । तेनेत्यादि । पणपादमाषशतात् इत्यत्र हि परिमाणवचनैः पणादिभिः साहचर्यात्परिमाणस्य ग्रहणम्, न शरीरावयवस्य । द्विपाद्यमिति । तेन क्रीतम् इत्यत्रार्थे यत्प्रत्ययः । इदमप्यत्र शक्यं वक्तुम् - पादेन यद्विशेष्यते, पादस्य यो यत्, कश्च पादस्य यत् यस्ततो
विहितः, द्विपाद्यमित्यत्र तु पादशब्दान्ताद् द्विगोर्यद्विहित इति ।।
हिमकाषिहतिषु च ।। 6 - 3 - 54 ।।
पादस्य हिमं शीतं पद्धिमम् । पादौ कषन्तीति पत्काषिणः - पादचारिणः । सुप्यजातौ इति णिनिः । पादाभ्यां हन्यत इति पद्धतिः ।।
ऋचः शे ।। 6 - 3 - 55 ।।
शे इति शस्प्रत्ययस्येदमेकदेशानुकरणम्, अन्यस्य शशब्दस्या सम्भवात् । ननु च सम्भवत्ययम्, पादे शेते अधिकरणे शेतेः इत्यच् पादश इति । नास्त्यस्य सम्भवः, न हि ऋक्पादे कश्चिच्छेते । यच्च लोमादिभ्यः
शः, तस्याप्यसम्भव तएव लोमादिषु पादशब्दस्याभावात् ।।
वा घोषमिश्रशब्देषु ।। 6 - 3 - 56 ।।
पन्निष्क इति । निष्कशब्दः सुवर्णजातिवचनः, पादशब्दः परिमाणवचनः, कर्मधारयः समासः ।।
उदकस्योदः संज्ञायाम् ।। 6 - 3 - 57 ।।
उदमेघ इति । षष्ठीसमासः, सादृश्यात्पुरुषस्य संज्ञा, पितुरप्रसिद्धत्वात्पुत्रेण व्यपदेशः। उदकं वहतीति
कर्मण्यण् - उदवाहः ।
क्षीरोद इति बहुव्रीहिः । अत्र केचिदाहुः - उदकशब्देन समानार्थ उदशब्दोऽस्ति, तथा च संज्ञायामपि प्रयुज्यते - अप्रसन्नोद इति । इदं वचनं संज्ञायामुदकशब्दस्य प्रयोगनिवृत्त्यर्थमिति । एवं तु वक्ष्यमाणो विकल्पोऽनर्थकः स्यात् ।।
पेषंवासवाहनधिषु च ।। 6 - 3 - 58 ।।
असंज्ञार्यमिदम् । उदधिरिति । कर्मण्यधिकरणे च च इति किप्रत्ययः । घटादिरत्रोदधिः, समुद्रे पूर्वेणैव सिद्धेः ।।
एकहलादौ पूरयितव्येऽन्यतरस्याम् ।। 6 - 3 - 59 ।।
एकोऽसहाय इति । यद्ययमेकशब्दः संख्यावचनः स्यात्, तर्ह्येकेत्यनर्थकं स्यात्, न हि द्वौ च बहवौ वा आदिभूताः क्वचित्सम्भवन्ति, तस्मादसहायवचन एकशब्दः । नन्वेवमप्यस्य व्यावर्त्त्य न सम्भवति, कथम् एकैकवर्णवशवर्तित्वाद्वाचः, यदि ह्यनेकस्य वर्णस्य युगपदुच्चारणं स्यात्त्दा स्थालीशब्दोऽनेकहलादिः, यदि वा क्रमेणोच्चारिता अपि वर्णा अवतिष्ठेरन्, तदापि युगापद्वर्णयोरुपलम्भादादित्वं स्यात्, यत्स्तु नोञ्चारणे युगपदुलब्धौ वा

वर्णानां यौगपद्यम्, तस्मादेकस्यैवादित्वमिति न किञ्चिदेकग्रहणेन शक्यं व्यवच्छेत्तुम् एवं तर्ह्येकग्रहणसामर्थ्याद्विशिष्टमसहायत्वामाश्रीयते । किं पुनस्तत् आनन्तर्यम् । तदेतदाह - तुल्यजातीयेनानन्तरेणेति । हल्त्वेन तुल्यजातीयत्वेन तुल्यास्थानादिभिर्भिन्नजातीय् व्यवहिते च सद्दायत्वाप्रसिद्धरेवमुक्तम् ।।

मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च ।। 6 - 3 - 60 ।।

द्रवद्रव्यसंयुक्ताः सक्तवः - मन्थः । उदकेन मन्थ इति । तृतीयेति योगविभागात्समासः । अथ प्रथ्यत इति क्रियाशब्दः, तदा कर्तृकरणे कृता बहुलम् इत् समासः, सक्त्वौदनाभ्याम् अन्नेन व्यञ्चनम् इति, बिन्दुवज्रवीवधैः षष्ठीति भारहारगाहैः कर्मण्यणन्तैः उपपदमतिङ् इति समासः, उदकस्य वज्रं क्रूरम्, यदपां क्रूरमिति दर्शनात् । अन्येऽपि यथासम्भवं समासा भवन्त्येव उदकं वज्रमिव भिन्दानो दृदयमसाहिनोदवज्रः ।।

इको ह्रस्वोऽङ्यो गालवस्य ।। 6 - 3 - 61 ।।

ग्रामणिपुत्र इति । सत्सूद्विष इत्यादिना क्विप्, अग्रग्रमाभ्यान्नयतेः इति णत्वम् । गार्गीपुत्र इति । गार्ग्यशब्दाद् यञश्च इति ङीप् यस्येति च, हलस्तद्धितस्य ।

कारीषगन्धीपुत्र इति । ष्यङः संप्रसारणम् संप्रसारथणस्यः इति दीर्घः । काण्डीभूतमिति । ऊर्यादिच्विडाश्च इति निपातसंज्ञायामव्ययत्वम् । स्त्रीवेषधारी नर्तकः पुस्षः भ्रुकुंसः ।

इहालाबुकर्कन्धुजम्बुफलमिति फलशब्द उत्तरपदे जम्ब्वा ह्रस्वत्वम्, द्वन्द्वे जम्ब्वामुत्तरपदे कर्कन्ध्वा ह्रस्वत्वम्, अलाब्वास्तु न प्राप्नोति, कर्कन्ध्व अनुत्तरपदत्वात् एवं तर्ह्येवं विग्रहः करिष्यते - अलाबूश्च कर्कन्धूश्च अलाबुकर्कन्धवौ, ते च जम्बूश्च अलाबुकर्कन्धुजम्ब्वः, तासां फलमलाबुकर्कन्धुजम्बुफलमिति, एवमपि जम्ब्वाः पूर्वनिपातः प्राप्नोति । एवं कर्कन्धुजम्ब्वोरपि द्वन्द्वे द्रष्टव्यम् । जम्बुशब्दो जम्बुशब्दो राजदन्तादिषु द्रष्टव्यः ।।

एक तद्धिते च ।। 6 - 3 - 62 ।।

एक इत्यविभक्तिको निर्देशः, समानाधिकरणे हि स्त्रियाः पुंवद्भावेनैव सिद्धत्वात् । व्यधिकरणार्थमिदम् । एकत्वमिति । असहायादिवचनोऽयमेकशब्दः । संख्यावचनस्य तु त्वतलोर्गुणवचनस्य इति पुंवद्भावेनैव सिद्धम् । किं पुनः कारणं स्त्रीलिङ्ग एवोदाह्रियते, न पुनर्यथाश्रुतः पुंल्लिङ्गो नपुंसकलिङ्गो वेति तत्राह - लिङ्गविशिष्टस्यति । स्त्रीलिङ्गस्यैव ह्रस्वविधानमर्थवद् भवति, नेतरस्य, तस्य स्वत एव ह्रस्वान्तत्वात् । ननु चारस्तु स्वत एवान्तो ह्रस्वः, यस्तवसावादिरेकारः, तदर्थमितरस्यापि ग्रहणमर्थवत् अत आह - अचेति । स्यादेतदेवम्, यदि गृह्यमाणेनैकशब्देन अचश्च इत्युपस्थापितोऽज्विशेष्येत - एकशब्दस्य योऽच् यत्र कुत्र स्थित इति, इह तूपस्थापितेनाचा गृह्यमाण एकशब्दो विशेष्यते एकस्य ह्रस्वो भवति । किंविशिष्टस्य अचः अजन्तस्येति । तत्र अलोन्त्यस्य इत्यन्त्यस्य ह्रस्वेन भाव्यम्, तच्च टाबन्तस्यैवार्थवत्, नेतरस्य । इतिकरणो
हेतौ ।।

ङ्यापोः संज्ञाछन्दसोर्बहुलम् ।। 6 - 3 - 63 ।।

बहुलग्रहणात्कवचिटुत्तरपदेऽपि भवति - अनुगायन्ति नयो गभिणय इति । एवं कृत्वा फाल्गुनीपौर्णमासीति प्रत्युदादाहरणोपपत्तिः, कर्मधारये पुंवद्भावः प्राप्नोति ।

ऊर्णम्रदा इति । ऊर्णावन् म्रदीयसीति यावत्, छान्दस ईयसीशब्दस्याराः । तैतिरीयास्तु दीर्घमधीयते - ऊर्णाम्रदसं चास्तृणामीति ।।

इष्टकेषीकामालानां चिततूलभारिषु ।। 6 - 3 - 65 ।।

इष्टकचितमिति । कर्तृकरणे कृता बहुलम् इति समासः । इषीकतूलमिति । षष्ठीसमासः । मालाम्बिभर्तीते मालभारिणी, सुप्यजातौ इति णिनिः । प्रायेण तु हरतिमधीयते, प्रयोगस्तु बिभर्तेः, गाल्लिका मालभारिण्य इति ।

इष्टकादिभिस्तदन्तस्यापि ग्रहणं भवतीति । यथा तु भवति, तथा अलुक्प्रकरण एवोक्तम् ।।

खित्यनव्ययस्य ।। 6 - 3 - 66 ।।

इकह ह्रस्वश्रुत्या अचः इत्युपस्थाप्यते । तत्र यदि पूर्वपदेनाज्विशेष्येत पूर्वपदस्याचो ह्रस्वो भवति यत्र स्थितस्येति, ततो वाङ्मन्य इत्यादावपि प्राप्नोति, तस्मादचा पूर्वपदं विशेष्यते - अजन्तस्य पूर्वपदस्येति । तत्र कालिम्मन्येत्यादावपि मुमि कृतेऽजन्तत्वाभावाद् ह्रस्वाभाव इत्यत तआह - मुमा ह्रस्वो न बाध्यत इति । कुतः इत्यत आह - अन्यथा हीति । उच्यते चेदम् - अजन्तस्य ह्रस्व इति, यदि पूर्वं मुम् स्याद्वचनमिदमनर्थकं स्यात् । तस्मान्मुमा ह्रस्वो न बाध्यते । कथं पुनर्मुमा ह्रस्वबाधः शाङ्कितः, यावता स्तनन्धयादौ चरितार्थस्य मुमः कालिम्मन्यत्यादौ ह्रस्वेनैव बाधः शङ्कनीयः तस्मादयमस्यार्थः - यथा पूर्वं मुमा ह्रस्वो न बाध्यते, तथा सूत्रस्यार्थो वर्णनीयः - अजन्तस्य ह्रस्वो विधेयः, न तु पूर्वपदसम्बन्धिनोऽचो ह्रस्व इति । तस्मिन्पक्षे मुमि कृतेऽपि ह्रस्वप्रवृत्तिसम्भवादनवकाशत्वाभावात् मुमि कृते पश्चाद्ध्रस्वः स्यात्, पूर्वं तु मुमा बाध्येतेति । यत्पुनरुक्कम् - मुम एव ह्रस्वेन बाधः शङ्कनीय इति अत्र परिहारमुत्तरसूत्रे वक्ष्यति ।

कथं पुनरत्र खिदन्तस्य ग्रहणम्, यावता ज्ञापितमेतदुत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्न भवति तत्राह - अन्वययस्येत्येतदेवेति । धातोरेव खितो विधानान्नाव्ययात्परः खित्प्रत्ययः सम्भवति । तस्मादव्ययप्रतिषेधादत्र तदान्तग्रहणमित्यर्थः ।।

अरुर्द्विषदजन्तस्य मुम् ।। 6 - 3 - 67 ।।

अरुन्तुद इति । विध्वरुषोस्तुदः इति खश्, तुदादित्वाच्छः, सकारात्पूर्वं मुमि कृते सकारस्य संयोगान्तलोपः । द्विषन्तप इति । द्विषत्परयोस्तापे इति खच्,

खचि ह्रस्वः, मुमादि पूर्ववत् । विद्वन्मन्य इति । वसुस्रंसुध्वंसु इति दत्वम्, यरोऽनुनासिकेऽनुनासिको वा ।

अन्तग्रहणमनर्थकम्, वर्णग्रहणे सर्वत्र तदन्तविधेर्भावादित्यत आह अन्तग्रहणमित्यादि । समीपवचनोऽन्तशब्दः, अच्चासावन्तश्चेति अजन्तः, निपातनाद्विशेषणस्य परनिपातः । कः पुनरसौ पूर्वसूत्रे विहितो ह्रस्वः, तेन पूर्वपदस्य तदन्तविधिः एतदुक्तं भवति - योऽयमस्य सूत्रस्य समीपभूतो यः पूर्वसूत्रे विहितो ह्रस्वस्तदन्तस्य मुम् इति, यतो ह्रस्वे कृते मुम् भवतीति । एतेनैदपि निरस्तम् - मुम एव ह्रस्वेन बाधप्रसङ्ग इति । कथं तन्निमित्तकत्वान्मुमः ह्रस्वनिमित्तको ह्येष मुम् भवति । यद्येवम्, स्तन्धयादौ यत्र ह्रस्वो न क्रियते तत्र मुम् न प्राप्नोति किं पुनः कारणमत्र ह्रस्वो न क्रियते प्रयोजनाभावात् । अस्ति प्रयोजनम्, किम् मुम् यथा स्यादिति । इदानीमेव ह्युक्तम् - ह्रस्वनिमित्तको मुमिति ।।

इच इकाचोऽम्प्रत्ययवच्च ।। 6 - 3 - 68 ।।

अमागमो भवतीति । कथमस्यागमत्वम् मित्त्वात् । यद्येवम्, मकार इत्संज्ञकः प्रयोगे श्रवणं न प्राप्नोति - श्रियम्मन्यः, भ्रुवम्मन्य इति नैवास्य मकारस्य श्रवणम्, किं तर्हि मुमः । ननु च नाप्राप्ते मुम्यारभ्यमाणोऽयमागमस्तं बाधेत न बाधेत उक्तं तत्र -अन्तग्रहणं कृताजन्तकार्यप्रतिपत्त्यर्थमिति, तेनास्मिन्नपि प्रकृते भविष्यति । वयन्तु ब्रूमः - नेवायमित्संज्ञको मकारः, अम्प्रत्ययवद्भावेन न विभक्तौ तुस्माः इति प्रतिषधात् । यद्यवम्, आदेशः प्राप्नोति अम्प्रत्ययवद्भावात्परो भविष्यति । आगमव्यपदेशास्तु यौगिकः समीप आगच्छतीति, यथा न य्वाभ्यां पदान्ताभ्याम् इत्यत्रैचः । द्वितीयोऽपि वा मकारः संयोगान्तलोपेन लुप्तनिर्दिष्टो द्रष्टव्यः ।

यद्यत्र प्रत्ययवच्चेत्येतावदुच्येत गाम्मन्य इत्यत्र औतोऽम्शसोः इत्याकारो न स्यात्, शसा सहचरितस्यामस्तत्र ग्रहणात् । इह च स्त्रीम्मन्य इति अमि पूर्वः इति पूर्वरुपं न स्यात् प्रथमयोः इति तत्रानुवृत्तेः । इह च नरम्मन्य इति ऋतो ङिसर्वनामस्थानयोः इति गुणो न स्यात् सामान्यतिदेशे विशेषानतिदेशात् । यत्र हि सामान्यशब्देनातिदेशस्तत्र विषेषाणामशब्दार्थत्वात्सामान्यनिबन्धनमेव कार्यं प्राप्यते यथा - ब्राह्मणवदस्मिन् क्षत्त्रिये वर्तितव्यमिति ब्राह्मणमात्रप्रयुक्तं कार्यमतिदिश्यते, न माठरादिर्विशेषप्रयुक्तम्, तद्वदत्रापि प्रत्ययमात्रप्रयुक्तयोरियङुवङोरेवातिदेशः स्यत्, न त्वाकारदेरिति मत्वाऽऽह - अम् प्रत्ययवच्चेचि । एतदेव विवृणोति - द्वितीयैकवचनवच्चेति । ननु चात्रैकमम्ग्रहणं यदि तेनागमो निर्दिष्टः प्रत्ययो न विशेषितः स्यात् अथ प्रत्ययो विशेष्यते, आगमो न निर्दिष्टः स्यात् इत्यत आह - अमिति हीत्यादि । नन्वत्रापि पक्षे अम्प्रत्ययप्रयुक्तयोरात्वपूर्वत्वयोरेवातिदेशः स्यात्, न गुणस्य सर्वनामस्थानमात्रनिमित्तस्य, नतरामियङुवङोः प्रत्ययमात्रनिमित्तयोः स्यादेतदेवम्, यद्यमित्येतदाहत्य विहितं तस्यैवातिदेशः स्यात् । वयं तु - आमि यद् दृष्टं सामान्यनिबन्धनं विशेषनबन्धनं वा तत्सर्वमतिदिशामः ।

त्वङ्मन्य इति । अत्र त्वचंमन्य इति प्राप्नोति, येषामेको मकारः प्रत्ययवद्भावात्त् परोऽयमिति पक्षः । येषामपि द्वितीयस्तेषामचः परोऽम् प्राप्नोति, येषां त्वित्संज्ञको मकारस्तेषामक्षापि को दोष इति चिन्त्यम् । नन्वज्ग्रहणानुवृत्तेरेवात्र न भविष्यति, उपसमस्तस्य पृथगनुवृत्तिर्दुर्ज्ञानेति मन्यते । लेखाभ्रुमन्य इति । पूर्ववद् ह्रस्वत्वं मुमागमश्च ।

अथहेत्यादि । भाष्ये अथेह कथमित्यारभ्यश्रिमन्यमितिभवितव्यमिति स्थितम्, स्थापितमित्यर्थः । तेन भिन्नकर्तृकत्वं नाशङ्कनीयम् । ननु च स्त्रीलिङ्गः श्रीशब्दस्तत्कथं श्रिमन्यमिति रुपमित्याशङ्क्योपपादयति - तच्चेदमिति । अर्थान्तरे हि वर्तमानाः शब्दाः केचित्स्वलिङ्गत्यागेन वर्तन्ते, यथा - यष्ट्यादयः शब्दाः पुंयोगात्स्त्रियां वर्तमानाः यष्टी, प्रचरी, गणिकेति । केचित्तु स्वलिङ्गोपादानेन यष्टीः पुरुषान् प्रवेशयेति । तत्रेह प्रथमा विधा भाष्यकारस्याभिप्रेता, तेन स्वमोर्नपुंसकात् इत्यमोलुकि कृते श्रिमन्यमिति भवति । यद्येवम्, सुपो धातुप्रातिपदिकयोः इत्यस्यापि लुकोऽतिदेशः प्राप्नोति, तस्याप्यमि दृष्टत्वात्, अथाम्विधानसामर्थ्यदस्य लुको नातिदेशः, खमोर्नपुंसकात् तित्यस्यापि न स्यात् उच्यते, येन नाप्राप्ते इति वा, मध्येऽपवादाः इति वा सुपो धातुप्रतिपदिकयोः इत्यस्यैव लुको विधानसामर्थ्याद्बाधः न स्वमोर्नपुंसकात् इत्यस्य । एवमप्येकपदाश्रयत्वाल्लुगन्तरङ्गो विपर्ययादागमो बहिरङ्ग तइत्यन्तरङ्गे लुकि कर्तव्ये बहिरङ्गोऽमागमो नास्त्येव, तत्कुतो लुक् नात्र बहिरङ्गपरिभाषा शख्याऽऽश्रयितुम् । अनुस्वारोऽपि हि न स्याद् - अरुन्तुदः, द्विषन्तप इति । तस्मादत्र लुकि सति श्रिमन्यमिति भवति, येषां त्वमो मकार इत्संज्ञकः प्रयोगे तु मुमः श्रवणम्, तेषामकारमात्रस्य लुकि सति मुमः शेवणप्रसङ्गः ।।

वाचंयमपुरन्दरौ च ।। 6 - 3 - 69 ।।

वाचंयम इति । वाचि यमो व्रते इति खच् । पुरंदर इति । पूःसर्वयोर्दारिसहोः इति खचि ह्रस्वः । उभयस्यापि पूर्वपदस्यामन्तत्वं निपात्यते ।।

कारे सत्यागदस्य ।। 6 - 3 - 70 ।।

सत्यङ्कारः - समयकरणम् । अशपथऽपि परत्वाद् डाचं बाधित्वा कारे मुमेव भवति, तआगदङ्कारः - विषप्रतिपक्षद्रव्यविषेषकरणम् ।

मक्षङ्कारः - यागविशेषे द्रव्यभक्षण्स्य करणम् । भक्षङ्करेतीति वा भक्षङ्कारः, कर्मण्यण् ।

धेनुम्भव्येति । भविष्यन्ती धेनुरुच्यते, भव्यगेय इति यत्कर्त्तरि ।

लोकमपृणेति । पृणोतिः पूरणकर्मा, मूलविभुजादित्वात्कः ।

अनभ्याशामित्य इति । एतिस्तुशासु इत्यादिना क्यप् - एतव्यम्, थइत्यम् । अनभ्याशम् - दूरम्, तअनभ्याशामित्यः , दूरतः परिहर्तव्य उच्यते ।

भ्राष्ट्रमिन्धः, अग्निमिन्ध इति । कर्मण्यण्, घञन्तेन वा षष्ठीसमासः ।

तिमिङ्गिल इति । मत्स्यविशेषः । तिमिङ्गिलतीति पूर्ववत्कः, इत्वम् । अचि विभाषा इति लत्वम् । तिमिङ्गिलगिलः । अयमपि मत्स्यविशेष एव ।

गिलगिले चेति । यदा गिलं गिलतीति गिलगिलः तिमिङ्गिलगिल इति व्युत्पत्तिस्तदेदमुपसंख्यानम् । यदा हि तिमिङ्गिलं गिलतीति तिमिङ्गिलगिल इति व्युत्पाद्यते, तदा नार्थ एतेन । उष्णङ्करणम्, भद्रङ्करणमिति । षष्ठीसमासौ ।
पुत्रड्वेति । दकारो ङीबर्थः ।
केचित्त्वित्यादि । तेषां पक्ष उपसंख्यानमिदं नारब्धव्यम् ।
अन्यत्रापि हीत्यादिना शाङ्गर्रवादिपाठमेव द्रढयति । अन्ये तु शाङ्गर्रवादिपाठं नेच्छन्ति ।।
श्येनतिलस्य पाते ञे ।। 6 - 3 - 71 ।।
श्येनपातोऽस्यां क्रियायामिति । यद्यपि घञः सास्यां क्रियेति ञः इत्यतः क्रियाग्रहणं प्रकृत्यर्थविशेषणम्, न प्रत्ययार्थः, श्येनपातोऽस्यां तिथौ श्येनपाता तिथिरिति तत्रोदाहृतत्वात् , तथाप्यस्यामिति स्त्रीलिङ्गमात्रस्य प्रत्ययार्थत्वात्क्रियाया अपि प्रत्ययार्थत्वामविरुद्धम् । श्यैनम्पातेति । पतनं पातः श्येनस्य पातः, कर्तरि षष्ठ्या समासः, ततः घञः सास्याम् इति ञः ।।
रात्रेः कृति विभाषा ।। 6 - 3 - 72 ।।
कृदन्त उत्तरपद इति । यद्यप्याचारक्विबन्तस्य रात्रिशब्दस्यानन्तरस्तृजादिः कृत्सम्भवति, तथापि तस्य गौणार्थत्वादग्रहणमिति सामर्थ्यादुत्तरपदाधिकारेऽप्यत्र तदन्तविधिर्भवति । रात्रिष्चर इति । रात्रौ चरतीति चरेष्टः । राश्रिमट इति । अटतीत्यटः, पचाद्यच्, साधनं कृतेति समासः । अप्राप्तविमाषेयमिति ।
ननु चोभयत्रविभाषेयं युक्ता, रात्रिम्मन्येत्यादौ खिदन्ते प्राप्ते, अन्यत्राप्राप्ते इत्यत आह - खिति हि नित्यं मुम् भवतीति । पूर्वविप्रतिषेधेनेति भावः ।।
नलोपो नञः ।। 6 - 3 - 73 ।।
नञः सानुबन्धवस्य ग्रहणम्, पामादिभ्यो नः - पामनपुत्र इत्यादौ मा भूत् । अथ क्रियमाणेऽपि सानुबन्धकग्रहणे स्त्रैणपुत्र इत्यत्र कस्मान्न भवति प्रत्यञित्त्वस्य वृद्धिस्वरयोश्चरितार्थत्वात्, निपातञित्त्वस्य चाचरितार्थत्वात्, पूर्वपदेन वा नञ् विशेष्यत इति अपूर्वपदत्वान्न भविष्यति । एवं च कृत्वाऽनुबन्धोच्चारममपि न कर्त्तव्यम्, अपूर्वपदत्वादेव पामनपुत्रे न भविष्यति ।
अवक्षेपे तिङीति । अवक्षेपः - निन्दा । नञोऽशिति वा नञोऽनिति वा सिद्धे लोपवचनं साकच्कार्थमित्याहुः ।।
तस्मान्नुडचि ।। 6 - 3 0 74 ।।
नञ तएव हि स्यादिति । तस्मिन्निति निर्द्दिष्टे पूर्वस्य इति वचनात् । नञश्च नुटि सत्यनिष्टं रुपं स्यात्, नलोपविधानमनजाद्यर्थं स्यात् तस्माद्ग्रहणे तु सति पञ्चमीनिर्देशस्य बलीयस्त्वादुत्तरस्यैव भवति । ननु यदि तत्रैव स्यान्नाचीति नलोपमेव प्रतिषेधेत् । तद्वचनं तूत्त्रपदस्यैव भविष्यति । तस्मादेवं कक्तव्यम् - नाप्राप्ते नलोपे आरभ्यमाणो नुट् तस्य बाधकः स्यात्, तस्माद्ग्रहणे तु सति निमित्तमेव नुटो नलोपो भवति ।
अय नुगिति पूर्वान्त एवायं कस्मान्न कृतः, एवं हि नञ एव स्यादित्यवमपि दोषो न भविष्यति, तत्रायमप्यर्थः - तदोः सः सौ इत्यत्र तदोः इत्यपनीय तोः इति वर्गग्रहणमेव कर्त्तव्यम् परादौ ह्यनेष करोतीत्यत्र नुटो नकारस्यापि प्रसङ्गादशक्यं वर्गग्रहणम् तत्राह - पूर्वान्ते हीति । ङमुट् प्राप्नोतीति । नलोपः प्रतिपदिकान्तस्य इति नलोपो विधानसामर्थ्यान्न भवतीति भावः । अत्रापि पक्षे इदं कर्तव्यम् - नाप्राप्ते नलोपे आरभ्यमाणो नुक् तस्य बाधकः स्यादिति ।।
नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनकनाकेषु प्रकृत्या ।। 6 - 3 - 75 ।।
नभ्राडिति । भ्राजभास इत्यादिना क्विप्, व्रश्चादिषत्वम्, जश्त्वम् - डकारः, तस्य वावसाने इति पक्षे
चर्त्वम् - टकारः । पादिति शात्रन्तमिति । तनूनपादुच्यते, अपान्नपादित्यादावनपुंसकेऽपि दर्शनाद् उभे वनस्पत्यादिषु इत्यत्र पातेः क्विपि निपातनात्तुगित्यभिधानाच्चापाठोऽयम् ।पादिति क्विबन्तमिति पाठः । शत्रन्तमित्यस्य वानन्तर नरैर्न मन्तव्यमित्यध्याहार्यम् । औणादिकः किप्रत्यय इति । इगुपधात्किः इत्यनेन । कम् - सुखम्, अकम् - दुःखम्, तद्यत्र नास्ति स नाकः स्वर्गः ।
दुःखेन यन्न सम्भन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम् ।।
इति हि पठन्ति । अत्र नपुंसकादित्रये निपात्यमस्तीति ते तथैव ग्राह्याः । इतरेषु तूत्तरपदामात्राणि गृहित्वा नञ् प्रकृत्येत्येव बाच्यम् । एवं सिद्धे सति समुदायपाठः प्रसिद्ध्युपसंग्रहार्थः । तेन नासत्यावित्याश्विनोरेव भवति, तअन्यत्रानसत्या इत्येव । एवमन्यत्रापि यथासम्भवं दृष्टव्यम् ।
एकादिश्चैकस्य चादुक् ।। 6 - 3 - 76 ।।
एकादिरिति बहुव्रीहिः । आदिशब्दो व्यवस्था वचनः । एकान्नविशतिरिति । पूर्वं नञो विशत्यादिभिः समासं कृत्वा पश्चात् तृतीयासमासः कर्तव्यः ।
किमर्थं पुनः पूर्वान्तोऽयमादुक् क्रियते, न परदिरादुट् क्रियेत, एवमेकस्येत्यागमिनिर्देशार्थं न कर्तव्यं भवति, प्रकृतस्य नञ एवागमित्वात् इत्यत आह - पूर्वान्तश्चायमिति । यरोऽनुनासिकेऽनुनासिको वा इत्यत्र न पदान्ताट्टोरनाम् इत्यतः पदन्तग्रहणमनुवर्तते, अविध्नः, बध्नातीत्येवमादिषु मा भूदिति । परादौ सति दकारः पदान्तो न स्यादिति अनुनासिको न स्यात् । अथानुट् क्रियेत, एवमपि पत्रे दकारश्रवतणं न स्यात् तदिदमुक्तम् - अनुनासिको विकल्पेन यथा स्यादिति । किमर्थं पुरादुक् क्रियते, अदुगेव नोचज्येत, सवर्णदीर्घत्वे तावत् सिद्धम्, अतो गुणे इति पररुपत्वं चाकारोच्चारणसामर्थ्यादेव न भविष्यति, यदि स्याद् दुकमेव विदध्यात् । सवर्णदीर्घत्वं तु यं विधिं प्रत्युपदेशोऽनर्थकः इति न्यायाद्भविष्यति । वृत्तिकारेण तु प्रतिपत्तिलाघवार्थमादुगयं व्याख्यातः ।।

नगोऽप्राणिष्वन्यतरस्याम् ।। गमेर्डप्रत्यय इति । डप्रकरणे अन्यत्रापि दृश्यते इति ।।
सहस्य सः संज्ञायाम् ।। 6 - 3 - 78 ।।
सहयुध्वेति । युध्यतेः क्वनिप् राजनि युधि कृञः सहे च इति सादेशः ।
उदात्तो निपात्यत इति । अन्यथा तु किं स्यात् इत्यत आह - उदात्तानुदात्तावतोहीति । सहशब्दे निपाता आद्युदात्ताः इति सशब्द उदात्तः, शेषनिधाते हशब्दोऽनुदात्तः, तेनासावुदात्तानुदात्तवान् तस्य स्थाने भवत् सशब्द आन्तर्यतः स्वरितः स्यात्, तन्मा भूदेष देष इति उदात्तो निपात्यते । यद्येवम्, अव्ययीभावेऽपि तस्यैवोदात्तत्वं श्रूयेत तत्राह - स चेति । अयमभिप्रायः - समासे कृते समासस्वरश्च प्राप्नोति, अयं चादेशः, तत्र परत्वादस्मिन्नादेशे उदात्तेऽभिनिर्वृत्ते पुनः प्रसङ्गविज्ञानात् समासस्वरः, स च सतिशिष्ट इति तस्यैव श्रवणम् । उदात्तनिपातनस्य तु यत्र पूर्वपदप्रकृतिस्वरत्वं बहुव्रीहितत्पुरुषयोस्तत्रैव श्रवणमिति । सेष्टि, सपशुबन्धमिति । अन्तवचनेऽव्ययीभावः ।।
ग्रन्थान्ताधिके च ।। 6 - 3 - 79 ।।
सकलमिति । कला - कालविशेषः, तत्सहचरितो ग्रन्थोऽपि कला । एवं समुहूर्तमित्यत्रापि । ससंग्रहमिति । एतत्तु प्रमादाल्लिखितम्, अत्र हि अव्ययीभावे चाकाले इति वक्ष्यमाणेनैव सिद्धः सभावः । कालवाचिन्युत्तरपद इति । कालादयः शब्दा यद्यपि तत्सहचरितग्रन्थपराः, तथाप्यधीत इति पदान्तरप्रयोजनसमधिगम्यत्वाद् ग्रन्थपरत्वं बहिरङ्गमिति कालश्रयः प्रतिषेध एव स्यादिति मन्यते ।
सद्रोणेति । तेन सहेति तुल्ययोगे इति बहुव्रीहिरयम् । तेन वोपसर्जनस्य इति विकल्पे प्राप्ते नित्यार्थं वचनम् ।।
द्वितीये चानुपाख्ये ।। 6 - 3 - 80 ।।
अप्रधानो यः सः द्वितीय इति । तत्रैव लोके द्वितीयशब्दस्य प्रयोगात्, स्वामिभृत्ययोहि स्वामिनं प्रति भृत्यो द्वितीय इत्युच्यते, न विपर्ययेण । उपाख्यायते इत्यस्य विवरणम् - प्रत्यक्षेणीपलभ्यत इति । घञर्थे
कविधानम् इति कः कर्मणि । साग्निरिति । पूर्ववद्बहुव्रीहिः, इदमपि नित्यार्थं वचनम् । अग्न्यादयः ित्यादिना अनुपाख्यत्वं दर्शयति, कपोतश्चेदगारमुपहन्यात्ततश्च कपोतेनाग्निरनुमीयते । विद्युद्वात्यययोश्च रक्षः पिशाचं वर्तत इति वार्त्ता ।।
अव्ययीभावे चाकाले ।। 6 - 3 - 81 ।।
अकालवाचिनीति । स्वरुपग्रहणं न भवति , ग्रन्थान्ताधिके च इत्यत्र ग्रन्थग्रहणात्, तद्धि समुहूर्तमित्यादौ यथा स्यादित्येवमर्थम् । यदि यात्र स्वरुपग्रहणं भवति, तदा मुहूर्त्तादौ निषेधाभावादनेनैव सिद्धत्वादनर्थकं तत्स्यात् । सचक्रमिति । यौगपद्येऽव्ययीभावः । सपुरमिति । ऋक्पूरब्धूः इत्यकारः समासान्तः । सहपूर्वाह्वमिति । साकल्येऽव्ययीभावः ।।
वोपसर्जनस्य ।। 6 - 3 - 82 ।।
उपसर्जनस्येत्यस्य सहशब्दे विशेष्ये सहयुध्वा, सहकृत्तवेत्यत्रापि स्यात्, अनर्थकञ्च विशेषणं स्यात्, सहशब्दस्य चासत्त्ववाचित्वाद् द्वन्द्वो न सम्भवति, समासान्तरे च सह उपसर्जनमेव तस्मादुत्तरपदेन सन्निधापितस्य समासस्यैवेदं विशेषणं विज्ञायते । तत्राप्यवयवद्वारा । समासस्योपर्जनसंज्ञायां अभावात् सर्वत्र च समासे कश्चिदवयव उपसर्जनमेव । उच्यते चेदमुपसर्जनस्येति, ततश्च सर्वावयवद्वारा विज्ञायते, तदिदमुक्तम् - उपसर्जनसर्वक्यव इति । तदवयवस्येति । उपसर्जनस्य इत्यवयवयोगो षष्ठीति दर्शयति । सहकृत्वप्रिय इति । वा प्रियस्य इति पूर्वनिपात्विकल्पः । इह बहुव्रीहौ यदुत्तरपदमिति । उत्तरपदाधिकारात्, सर्वोपसर्जनस्य बहुव्रीहेराश्रयणाच्च तत्सम्बन्धिन्येवोत्तरपदे उत्तरपदाधिकारात्, सर्वोपसर्जनस्य बहुव्रीहेराश्रयणाच्च तत्सम्बन्धिन्येवोत्तरपदे सहशब्दस्यानन्तरे सभावेन भाव्यमिति भावः । तत्परः सहशब्दो न भवतीति । पूर्वत्र तावन्न भवति, कृत्वशब्देन व्यवधानात्, उत्तरत्रापि सहकृत्वेत्येतदुत्तरपदम्, न कृत्वशब्दः ।।
प्रकृत्याशिष्यगोवत्सहलेषु ।। 6 - 3 - 83 ।।
प्रकृत्याशिषि इत्येतावत्सूत्रम्, परिशिष्टं भाष्यवार्त्तिकदर्शनात् सूत्ररुपेण पठितम् । न इति वक्तव्ये प्रकृतिवचनं वैचित्र्यार्थम् ।।
समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु ।। 6 - 3 - 84 ।।
समानस्येति योगविभाग इति । अपर आह - सहशब्दः सदृशवचनोऽस्ति, यथा - सदृशः सख्या ससखीति, तस्यायमस्वपदिविग्रहो बहुव्रीहिः - समानो धर्मोऽस्य, समानः पक्षोऽस्य, समाना जातिरस्य वोपसर्जनस्य इति सभावः । समानशब्दस्य तु समानजातीय इत्यादि भवति । योगविभागे तु तस्य नित्यत्वान्नैतत्सिध्यति । अत । व भाष्यवार्त्तिकयोर्योगविभागस्य नोपन्यास इति ।।
ज्योतिर्जनपदरात्रिनाभिनामगोत्ररुपस्थानवर्णवयोवचनबन्धुषु ।। 6 - 3 - 85 ।।
सज्यातिरिति । समानं ज्योतिरस्येति बहुव्रीहिः, यस्मिञ्ज्योतिष आदित्ये नक्षत्रे वा उपनिपतितमानस्यास्तमयादनुवर्तमानमाशौचं सज्योतिरित्युच्यते, सरुपाणामेकशेषः, स्थानान्ताद्विभाषा, सस्थानेन इति निर्धेशाद्बहुव्रीहावप्ययं सभावो भवति, न तु पूर्वोपरप्रथमचरमजघन्यसमान इति प्रतिपदोक्त एव तत्पुरुषे ।।
चरणे ब्रह्मचारिणि ।। 6 - 3 - 86 ।।
चरणशब्दः कठकलापादं शाखाविशेषे मुख्यः, तदध्यायिषु पुरुषेषु गौणः, तदिह मुख्यो गृह्यते - समानो
ब्रह्मचारी सब्रह्मचारीति, तच्चरति तदनुतिष्ठतीत्यर्थः । ब्रह्मचारीति । व्रते इति णिनिः । एवं ब्रह्मचारिशब्दं निरुप्य सब्रह्मचारीशब्दं निर्वक्तुकामः

समानशब्दस्यार्थमाह - पमानस्तस्यैव ब्रह्मणः सणानत्वादिति । तस्यैवेति । पूर्वमुक्तस्य । इतिकरणो हेतौ, यस्माद् ब्रह्मचारिणां समानत्वं तद्विवक्षितं तस्मादयं वक्ष्यमाणस्सब्रह्मचारिशब्दस्यार्थो भवति । तमेव दर्शयतदि - समाने ब्रह्मणीति । समाने साधारण इत्यर्थः । एकस्मिन्काले एकेन ब्रह्मणा एकशाखाध्ययनार्थं ययोर्व्रतमादिष्टं तावन्योऽन्यं सब्रह्मचारिणावित्यर्थः । एतच्च चरणग्रहणाल्लभ्यते, तद्धिचरणे समाने यथा स्यादाकारादौ मा भूदित्येवमर्थं कृतम् । एवं चरणे गम्यमाने इत्यस्यापि चरणे समानत्वेन गम्यमान इत्ययमर्थो द्रष्टव्यः ।।

तीर्थे ये ।। 6 - 3 - 87 ।।

विभाषोदरे ।। यप्रत्ययान्त इति । पूर्वसूत्रे ये इति यकारादेः प्रत्ययस्य ग्रहणं यप्रत्ययोऽन्ते समीपे यस्य स तथोक्तः । तत्र यदा सभावः, तदा सोदराद्यः, यदा तु न तदा समानोदरे शयितः इति यत् ।।

दृग्दृशवतुषु ।। 6 - 3 - 89 ।।

वतुग्रहणमुत्तरार्थमिति । समानशब्देऽसम्भवात् ।

दृक्षे चेति । छान्दसमेतदिति केचित् । माष्ये सदृक्षम् ित्यनुदाहृतत्वात्तस्मिन्पक्षे क्सप्रत्ययोऽपि छन्दस्येव ।।

इदं किमोरिश्की ।। 6 - 3 - 90 ।।

इयान्कियानिति । घस्येयादेशे कृते यस्येति च इतीकारलोपः । किमिदम्भ्यां वो घ इति वतुबीति । नासतो वतुपो वकारस्य घकारः शक्यो विधातुमिति वतुपोऽप्यनेनैव विधानमिति भावः ।।

आ सर्वनाम्नः ।। 6 - 3 - 91 ।।

अकारोच्चारणमतो गुणो पररुपत्वं मा भूत् । अकारविधानं त्वन्तस्य निवृत्त्यर्थं स्यात्, लोपविधौ तु गौरवं भवति ।।

विष्वग्देवयोश्च देरद्र्यञ्चतौ वप्रत्यये ।। 6 - 3 - 92 ।।

व प्रत्ययो यस्मात्स वप्रत्ययः । विष्वद्र्यङिति । अञ्चतेः क्विनि लोपे उगिदचाम् इति नुम्, संयोगान्तलोपः, क्विन्प्रत्ययस्य कुः इति कुत्वम् - नकारस्य ङकारः । अद्रिसध्र्योरिति । वार्तिकस्य साधारणत्वादिह सध्रशब्देपादानम्, अश्वमञ्चतीति अश्वाची, अञ्चतेश्चोप संख्यानम् इति ङीप् अचः इत्यकारलोपः, चौ इति दीर्घत्वम् । विष्वग्युनक्तीति विष्वग्युक, सत्मद्विष इत्यादिना क्विप् । विष्वगञ्चनमिति । ल्युट् ।

कथं पुरत्र प्रसङ्गः, यावता उत्तरपदे इत्युच्यते, न चात्राञ्चतिरुत्तरपदम्, किं तर्हि ल्युडन्तम्, न च तदादिविधिरस्ति, अल्ग्रहण एव तदादिविधिः इत्यत आह वप्रत्ययग्रहणमिति । यदि धातुग्रहणे तदादिविधिर्न स्याद्वप्रत्ययग्रहणमकर्तव्यं स्यात्, कृतं तु तदादिविधिं ज्ञापयति । अत्र प्रयोजनमाह तेनेति । अपस्कृतमिति । असति तु ज्ञापने अयस्कृदित्यादौ यत्र करोतिमात्रमुत्तरपदं तत्रैव स्यात् ।

विश्वाची च धृताची चेति । वेदपाठोऽयं प्रदशितः, न तु पृताजीत्युदाहरणम् प्राप्यभावात् । उपसंख्याने स्त्रियाम् इत्येतेन नार्यः, पुंस्यपि हि क्वचिदद्र्यादेशो न दृश्यते । तस्माद्विष्वञ्चौ प्राथणापानाविति । कद्रीचीति । किंशब्दस्य टेरद्र्यादेशः, पूर्ववन्ङीब्लोपदीर्घत्वादि ।।

तिरसः तिर्यलोपे ।। 6 - 3 - 95 ।।

यदाऽस्य लोपो न भवीति । अकारस्य लोपे सतीत्ययं त्वर्थो न भवति व्याख्यानात् ।।

सध मादस्थयोश्छन्दसि ।। 6 - 3 - 96 ।।

सधमादो द्युम्नि इति केचिदाहुः । अस्मिन्मन्त्रेद्युम्निरित्यादिकमपां विशेषणम्, सधमाद इत्यपि तत्समानाधिकरणं शसन्तम्, मादयतेः क्विबन्तस्य रुपम्। मादः छन्दसि सधादेशो दृश्यते बहुलम् - आ त्वा वृहन्तो हरयो युजानाः, अर्वागिन्द्रसघमादो वहन्तु इत्यादावपीति । अपर आह - मदनं मादः, मदोऽनुपसर्गे इत्यपि प्राप्ते छान्दसो घञ्, तेन सह वर्तत इति सधमाद इति । रेवतीस्थः सधमादः इत्यादौ तु सधमादौ यज्ञः, सह माद्यन्ति देवा अस्मिन्निति कृत्वा ।।

द्व्यन्तरुपसर्गेभ्योऽप ईत् ।। 6 - 3 - 97 ।।

उदाहरणेषु द्विर्गता आपोऽस्मिन्नित्यादिविग्रहः, ऋक्पूब्धूः इत्यकारः समासान्तः ।

समापं नामेति । ईत्वे प्रतिषिद्वे अन्येषामपि दृश्यते इत्यकारस्य दीर्घः । अपर आह - समशब्दस्यात्र प्रयोगः, समा आपोऽस्मिन्निति समाप इति ।

अप्शब्दं प्रतीत्यादि । इह यत्क्रिंयायुक्ताः प्रादयस्तं तेषामुपसर्गत्वम्, अप्शब्दश्च न क्रियावचनः, तस्माद्यस्य प्रादेरन्यत्रोपसर्गत्वं तदुपलक्षणार्थमुपसर्गग्रहणं विज्ञायते ।।

ऊदनोर्देशे ।। 6 - 3 - 98 ।।

अवग्रहार्थमिति । यत्र समासावयवानां रुपाणि प्रदर्श्यन्ते पदकारैः सः - अवग्रहः ।।

अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थस्थितोत्सुकोतिकारकरागच्छेषु ।। 6 - 3 - 99 ।।

उदारहणेषु विशेषणसमासः । गहादिष्वन्यशब्दो द्रष्टव्य इति । तेपामवृत्कृतत्वात् ।

दुगागमोऽविशेषेणेत्यादि । छप्रत्यये परतोऽविशेषेण सामान्येन दुक्कर्तव्यः, कीदृशे छे सकारके, कारकशब्दसहिते कारकशब्दे चेत्यर्थः । कारकच्छयोरिति पाठे पूर्वनिपातलक्षणस्यानित्यात्वात्तस्य परनिपात्ः । अन्येष्वाशीरादिषु सप्तसु षष्टीतृतीययोर्नेष्टस्तेष्वेव प्रतिपेध इत्यर्थः ।

कथमेतल्लभ्यते इत्याह - अस्य चेति । अषष्ठीतृतीयास्थस्य इत्येव सिद्धे द्विर्नञ उपादानं प्रतिषेधास्यानित्यत्वज्ञापनार्थम्, व्याख्यानप्रकारश्चायम् । शक्यं

हि वक्तुं द्विर्नञ उपादानं दाढ्यार्थमिति ।
कोः कत्तत्पुरुषेऽचि ।। 6 - 3 - 101 ।।
उदारहणेषु कुगतिप्रादयः इति समासः । कूष्ट्र इति । एतदेव तत्पुरुषग्रहणं ज्ञापकम् अस्मिनप्रकरणेऽप्रतिपदोक्तोऽपि समासो गृह्यत इति, तेन ज्योतिर्जनपद इति सभावो बहुव्रीहावपि भवति ।
त्रावुपसंख्यानमिति । कत्र्यादिभ्यः इति वचनात्सिद्धम् ।।
का पथ्यक्षयोः ।। 6 - 3 - 104 ।।
अनीषदर्थ आरम्भः । कुत्सितः पन्थाः कापथः । पूर्ववत्समासान्तः । काक्ष इति । अक्षशब्देन तत्पुरुषः, अक्षिशब्देन बहुव्रीहिर्वा, बहुव्रीहौ सक्थ्यक्ष्णोः इति षच् ।।
ईषदर्थे ।। 6 - 3 - 105 ।।
कामधुरमिति । कुगति इति समासः । कुः पापार्थः इत्येतत्तु प्रायिकम् । काम्लमिति । ननु चात्र कोः कत्तत्पुरुषेऽचि इति कद्भावः प्राप्नोति, अस्य त्वनजादिरवकाशः तत्राह - अजादावपीति ।।
विभाषा पुरुषे ।। 6 - 3 - 106 ।।
अप्राप्तविभाषेयमिति । ईषदर्थे इत्यस्य निवृत्तत्वात् ।
नन्वेवं सत्युभयत्रविभाषेयं युक्ता, ईषदर्थे प्राप्तत्वात्, अन्यत्र चाप्राप्तत्वाद् अत आह - ईषदर्थे त्विति । ईषदर्थे च इत्यस्यावकाशः - कामधुरमिति, विभाषा पुरुषे इत्यस्यावकाशः - कुत्सितः पुरुषः कापुरुषः ईषत्पुरुष इत्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधः ।।
कवञ्चोष्णो ।। 6 - 3 - 107 ।।
छन्दस्यन्यत्रापि दृश्यते - न कवादिभ्यो न हि ते पृणन्तीति, कवाशब्दोऽपि दृश्यते केवलः - कवातिर्यदि वोपतिष्ठेतेति, ईषत्तिर्थङित्यर्थः ।।
पृषोदरादीनि यथोपदिष्टम् ।। 6 - 3 - 109 ।।
निरुक्तादिशास्त्रसिद्धानामसमासपदानाम् उणादयो बहुलम् इति सद्धिरुक्ता, अनेन तु समासपदानां जीमूतवलाहकादीनां सिद्धिरुच्यते । प्रकारवचनोऽयमादिशब्द इति दर्शयति पृषोदरप्रकाराणीति । व्यवस्थार्थे तावदिशब्दे यथोपदिष्टमित्यनर्थकमिति भावः । प्रकारमाह - येष्विति । यथोयदिष्टमिति । वीप्सायामयमव्ययीभाव इत्याह - यानियानीति । दिशिरुच्चारणक्रियः, उच्चार्य हि वर्णानाह - उपदिष्टा इमे वर्णाः इति, कैः पुनरुपदिष्टानि शिष्टेः । शिष्टाः पुनरकामात्मानो यथार्थवेदिनो यथाविहितभाषिणश्च किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारगाः, यानधिकृत्येदमुच्यते ।
आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ।।
अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्पण चक्षुषा ।
ये भावान्वचनं तेषां नानुमानेन बाध्यते ।। इति ।
यदि तर्हि शिष्टाः शब्देषु प्रमाणम्, किमष्टाध्याथ्या क्रियते शिष्टपरिज्ञानार्थाष्टाध्यायी । कथम् अष्टाध्यायीमधीयानोऽन्यं पश्यत्यनधीयानम्, ये चानुविहितास्तान् प्रयुञ्जानम् । स पश्यति - नूनमस्य
दैवानुग्रहः स्वभावो वा यदसौ नाष्टाध्यायीमधीते, अथ चात्र तु विहिताः शब्दास्तान्प्रयुङ्क्ते, नूनमन्यानपि अयं जानाति । सैषा शिष्टपरिज्ञानार्थाष्टाध्यायी ।
जीवनस्य जलस्य मूतो भाचनं जीमूतः, यथा कुसूलो धान्यानाम्, खम् - बिलम् । पिशितम् - मांसम् । बृसी - तृणमयमासनम् । एवमन्येऽपीत्यादि । कप्यश्वमहीशब्देपूपपदेषु सुपि स्थः, सकारस्य तकारः, महीशब्दस्य ह्रस्वः ।
दक्षिणतारमिति । विशेषणसमासः । वाग्वाद इति । कर्मण्यण् । षोडन्निति । वयसि दन्तस्य दतृ, उगित्त्वान्नुम् ।
घासु नेति । उत्वस्यायं विकल्पः । उत्वपक्षे तु ष्टुत्वं नित्यमेव भवति, अत्रोत्तरपदशब्देन धाप्रत्ययोऽभिधीयते । पद्यते गम्यतेऽनेनार्थ इति पदम्, उत्तरं च तत्पदं च उत्तरपदम् । षड्धेति । न पदान्ताट्टोरनाम् इति ष्टुत्वप्रतिषेधः । नानाधिकरणवाचिन इति । अर्थगतं बहुत्वं शब्दे समारोप्य धास्विति बहुवचननिर्देशः, तेन अधिकरणविचाले च इति वहितस्य धाप्रत्ययस्येदं ग्रहणम् । षड्धेति । आतोऽनुपसर्गे कः स्त्रियां टाप्प्रत्ययः । लाक्षणिकत्वादस्याग्रहणमिति चेत् एवमपि क्वबन्ते प्रसङ्गः ।
नाश्यत इति । णश अदर्शने ण्यन्तः । दभ्यत इति । दम्भु दम्भे ।
स्वो रोहावेति । लोडुत्तमद्विवचने ।
वर्णागम इत्यादि । कौ जीर्यत इति वृञ्जर इत्यत्र नकारस्य वर्णस्यागमः । हिनस्तीति सिंह इत्याद्यन्तयोर्वर्णयोविपर्ययो व्यत्यासः । षोड इत्यत्र षकारस्योकाररुपापत्तिः वर्णाविकारः । पृषोदर इत्यादौ तकारादेर्वर्णस्य विनाशः । यस्य धातोर्थोऽर्थः प्रसिद्धः, तस्मादर्थान्तरेण योगस्तदर्थातिशयेन योग इति । एतत्पञ्चविधं निरुक्तम् - निर्वचनप्रकारः, शब्दानां तदन्तेन सूत्रेणोच्यत इति श्लोकार्थः ।।
संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ङौ ।। 6 - 3 - 110 ।।
द्व्यह्न इति । तद्धितार्थ इति समासः, कालाट्ठञ्, तस्य द्विगोर्लुगनपत्ये इति लुक्, राजाहः सखिभ्यष्टच्, अह्रोऽह्न एतेभ्यः इत्यह्नादेशः । द्व्यह्नीति । विभाषा ङिश्योः इत्यल्लोपविकल्पः । व्यह्न इति ।प्रादिसमासः, शेषं पूर्ववत् । सायाह्न इति । एकदेशिसमासः ।

ननु चायं पूर्वापरादिसूत्रे न पठ्यते, तत्कथमस्यैकदेशिसमासः तत्राह - एकदेशिसमास इत्यादि । अह्रोऽह्न एतेभ्यः इत्यत्र तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः इति पक्रान्ताः संख्यादयः परामृश्यन्त । यदि च पूर्वादय एवैकदेशिना समास्येरन्न । ततश्च तत्र पूर्वस्याह्नशब्दस्येह ग्रहणमनुपपन्नं स्यात् । तस्मात्सायशब्दस्य समासस्तावदनुमीयते । तत्र सिध्ययति, तद्दर्शयति - तेनेति । स्यतेरन्तकर्मणः सायशब्दो घञन्तोऽहरवसानवचनः । पूर्वाह्ण इति । समासादि पूर्ववत्, अह्रोऽदन्तात् इति णत्वम् ।

द्रलोपे पूर्वस् दीर्घोऽणः ।। 6 - 3 - 111 ।।

रेफे अकार उच्चारणार्थः । यद्ययं षष्ठीतत्पुरुषः स्यात्, तदाणः पूर्वत्वं नोपपद्यते, लोपस्याभावरुपत्वात् । अथापि बुद्धिपरिकल्पितं पौर्वापर्यमाश्रीयते एवमपि करणीयमित्यादावप्यनीयरो रेफस्य लोपे परतः पूर्वस्य दीर्घप्रसङ्ग इति तत्पुरुषे एवं दोषं दृष्ट्वा कण्ठेकालवद्व्यधिकरणपदो बहुव्रीहिरित्याह - ढकाररेफयोर्लोपो यस्मिन्निति । अत्र लिङ्गम् - भव्यगेयप्रवचनीय इति निर्देशः । लीढमिति । लिह आस्वादने, निष्ठा, ढत्वधत्वष्टुत्वढलोपेषु रुपम्, मिह सेचने, गुह संवरणे, मुह नैचित्त्ये । पूर्वग्रहणमनर्थकम्, तस्मिन्निति निर्दिष्टे पूर्वस्य इति सिद्धेः इत्यत आह - पूर्वग्रहणमित्यादि । सति पूर्वग्रहणे यद्यपि ढलोपे वचनप्रामाण्यादनुत्तरपदेऽपि स्यात्, रलोपे त्वनुत्तरपदे न स्यात् नीरक्तमित्यादाबुत्तरपदस्यापि सम्भाव्त । आतृढमिति । तृहूहिंसायाम् यस्य विभाषा इतीट्प्रतिषेधः । क्वचिदादृढमिति पाठः, तदसत् ,सेट्त्वादस्य धातोः दृढः स्थूलबलयोः इति हलोपो निपात्यते । आवृढमिति वृहू उद्यमने ।।

सहिवहोरोदवर्णस्य ।। 6 - 3 - 112 ।।

ऊढ इति । अत्रासत्यावर्णग्रहणे वह् - त इति स्थिते न तावदोत्वं ढलोपनिमित्त्व्ात् । अत्र पूर्वत्रासिद्धम् इति ढत्वादीनामसिद्धत्वात्पूर्वं यजादित्वात्सम्प्रसारणम्, तस्मिन्कृते पूर्वत्वे वोकारस्योत्वं प्राप्नोति ।

भाष्ये त्वावर्णग्रहणं प्रत्याख्यातम् । अन्तरङ्गाणि ढत्वादीनि, वर्णाश्रयत्वात् बहिरङ्गं सम्प्रसारण, प्रत्ययविशेषत्वात्तस्याप्यसिद्धत्वात् पूर्वत्रासिद्धम् इत्यस्यानुपस्थानम् । यद्वा - ढलोपस्यौत्वदीर्घविधौ निमित्तत्वेनाश्रयणादत्र विषये ढत्वादीनामसिद्धत्वं नास्ति, ततः प्रागेव सम्प्रसारणात्परत्वात् ढत्वादिषु कृतेषु वढ इति स्थिते सम्प्रसारणं च प्राप्नोति, ओत्त्वं च परत्वादोत्त्वम्, ततः सम्प्रसारणम् । पूर्वत्वं च न पुनरोत्त्वम्, तस्मन्नेव प्रयोगे कृतत्वात्तदभावे निमित्तसद्भावाद् दीर्घत्वं प्रवर्तिष्यत इति ।

वर्णग्रहणं किमिति । ओदस्येति वक्तव्यमिति प्रश्नः । कृतायामपीत्यादि । उत्पूर्वाद्वहेर्लुङि तामादिषु सिचि वृद्धौ सलोपढत्वादीनि । तत्रेदानीमसति वर्णग्रहणे मात्रिकस्योच्यमानो दीर्घस्य न स्यात । नन्ववर्णः सवर्णान् गृह्णातीत्याकारस्यापि ग्रहणं भवति तत्राह - तादपि परस्तपर इति । इदमेव वर्णग्रहणं लिङ्गं तपरस्तत्कालस्य इत्यत्र पञ्चमीसमासोऽप्याश्रीयत इति । तेनैतन्न चोदनीयम् - सहिवहोरस्यैत् इत्येवं कस्मान्न कृतमिति ।।

साढ्यै साढ्वा साढेति निगमे ।। 6 - 3 - 113 ।।

साढेति तृचि रुपमिति । अपपाठोऽयम्, आपाढोऽग्निर्बुहद्वयाः, आपाढमुग्रं सहमानम्, आषाढं युत्सु पृतनासु, आषाढाय सहमानाय इत्यादौ निष्ठायामात्वादर्शनात् । तस्मान्निष्ठायां रुपमिति पाठः । सूत्रवृत्तौ च साढेति ह्रस्वान्तं छेत्तव्यम् । यदि तृजन्तेऽपि क्वचिदात्वं दृश्यते, तदान्यतरत्सूत्रे इतिकरणस्य प्रकारार्थत्वात्साध्यम् ।।

संहितायाम् ।। 6 - 3 - 114 ।।

अनन्तरैर्योगैरत्तरपदे कार्यं विधीयते, उत्तरपदं च समासे भवति । तत्र नित्यमेव संहितया भवितव्यम् संहितैकपदे नित्येति वचनात् । अवग्रहेऽपि क्वचित्कार्यं दृश्यते, क्वचिन्न, इकः काशे अनूकाशमित्यनु - कशमिति, अष्टनः संज्ञायाम्, अष्टाबन्धुरमित्यष्टा - बन्धुरमिति । अतो न तेष्ववश्यमस्योपयोग इति । यत्रानुत्तरपदे कार्यं विधीयते तदुदाहरति - वक्ष्यति द्व्यचोऽतस्तिङ इति । अत्र हि तिङन्तस्य समासासम्भवादुत्तरपद इति न सम्बध्यते । वद्मा हि त्वेति । विदेर्लट्, मस्, विदो लटो वा ।।

कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य ।। 6 - 3 - 115 ।।

तदिह लक्षणं गृह्यत इति । तत्रैव लक्षणशब्दस्य प्रसिद्धत्वात् विष्टादिपर्युदासाच्च । दात्रादिशब्द उपमानात्तदाकारे चिह्ने वर्तते ।।

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।। 6 - 3 - 116 ।।

उपनह्यते इत्युपानत्, सम्पदादित्वात्कर्मणि क्वप्, नहो धः । परीणदिति । उपसर्गादसमासेऽपि णत्वम् । नीवृदीति । नीवृदादौ कर्तरि क्विप्, व्यधेर्ग्रहिज्यादिसम्प्रसारणम् । ऋतीषाहमिति । पूर्वपदात् इति षत्वम् । परीतदिति । अनुदात्तेति लोपस्य क्ङिज्झल्निमित्तकत्वात् क्वौ च तदभावाद् गमादीनामितीत्यनुनासिकलोपे तुक् ।।

वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम् ।। 6 - 3 - 117 ।।

कोटरावणमिति । वनं पुरगा इति णत्वम् ।।

वले ।। 6 - 3 - 118 ।।

वलच्प्रत्ययो गृह्यत इति । वक्ष्यमाणेन मतुपा साहर्यात् । तेन वल संवरणे इत्यतः पचाद्यचि यत्प्रातिपदिकं तत्र दीर्घो न भवति ।

अण इत्येव - भर्तुवलः ।।

मतौ वह्वचोऽनजिरादीनाम् ।। 6 - 3 - 119 ।।

संज्ञायामिति मतोर्वत्वमिति । यद्यप्युदाहृतेषु मादुपधायाः इति वत्वं सिद्धम्, तथापि संज्ञायामत्रापि परत्वादनेनैव वत्वं युक्तम् । प्रत्युदाहरणे च

व्रीहिमतीत्यत्रापि नानेन वत्वमित्येतदुपन्यस्तम् । अजिरादिष्वबह्वचां पाठ उषसमस्तार्थः ।।
इको वहेऽपीलोः ।। 6 - 3 - 121 ।।
ऋषीवहादयः षष्ठीसमासः । वहशब्दः पचाद्यजन्तः ।।
उपसर्गस्य घञ्यनुष्ये बहुलम् ।। उपसर्गाद् घञोऽविधानादुत्तरपदाधिकारेऽप्यत्र तदन्तविधिर्विज्ञायत इत्याह - घञन्त उत्तरपदे इति । वीमार्ग इति । मृजेर्वृद्धिः ।
कृत्रिमम् - करणेन निर्वृत्तम् । पुरुषव्यापाराभिनिर्वृत्तमित्यर्थः ।
निषीदत्यस्मिन्पापमिति निषादः, हलश्च इति घञ् ।।
इकः काशे ।। 6 - 3 - 123 ।।
पचाद्यच्प्रत्ययान्तोऽयं काशशब्द इति । नघञन्तः, तत्र पूर्वेणैव सिद्धम् । यथा निगमे - प्राकाशावध्वर्यवे ददातीति । इको वहेऽपीलोः इत्यत्र पूर्वपदमात्रस्येष्यते, इह तूपसर्गस्य तेन द्विरिक इत्युक्तम् ।।
दस्ति ।। 6 - 3 - 124 ।।
दा इत्येतस्यादि । अत्र तकारादिशब्दः कर्मधारयः । तस्मिन्परत इति । यस्मिन्विधिस्तदादौ इति वचनात्तदादावुत्तरपदे परत इत्यर्थः । दा इत्येतस्य सम्बन्धी यस्तकारस्तदादावुत्तरपदे दीर्घ इत्येषोऽर्थो विवक्षितः । नीत्तमिति । ननु चात्र तकार आदिर्न भवति, यस्तावद् अच उपसर्गात्तः इति तकारः स अलोऽन्त्यस्य इत्यन्तस्य क्रियते, योऽपि दकारस्य खरि च इति तकारः, सोऽप्यस्मिन्दीर्घे कर्तव्येऽसिद्धः अत आह - अच उपसर्गात्त इत्यादि । उच्यते चेदं तकारादावुत्तरपद तइति । यदि चर्त्वमसिद्धं स्याद्, दीर्घविधिरनर्थकः स्यात्, अत आश्रयात्सिद्धं चर्त्वम् । तेन तकार आदिरुत्तरपदस्य सम्भवतीत्यर्थः । यद्यपीति । अनेनैतद्दर्शयति - द्वितकारपक्षस्याश्रयणे न किञ्चिद्वक्तव्यमिति । सुदत्तमिति ।।
अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तं चेति चेष्यते ।।
इत्यनयेष्ट्याऽत्र ददादेशः ।।
छन्दसि च ।। 126 ।।
अष्टाकपालमिति । आन्महतः इत्यत्राष्टनः कपाले हविषीति अष्टागवं शकटमिति च व्युत्पादितम्, इदं तु व्युत्पत्तिविकल्पप्रदर्शनार्थमात्वं वा, दीर्घो वेति ।।
विश्वस्य वसुराटोः ।। 6 - 3 - 128 ।।
विश्वाराढिति । विश्वस्मित्राजत इति सत्सूद्विष इत्यादिना क्विप् । यत्रास्यैतदिति । पदसंज्ञाविषयं इत्यर्थः ।।
ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् ।। 6 - 3 - 133 ।।
मन्त्रे इति प्रकृति ऋग्ग्रहणं मन्त्रविशेषप्रतिपत्त्यर्थम् । घ इति स्वरुपग्रहणम्, न तरप्तमपोः, छन्दसि घशब्दस्यैव दीर्घदर्शनात् । उत वा घा स्यालादिति । भार्याया भ्राता स्यालः ततः पञ्चमी । तङिति थादेशस्य ङित्त्वपक्षे ग्रहणमिति । लोण्मध्यमपुरुषबहुवचनस्य थस्य लोटो लङ्वत् इत्यतिदेशेन यस्तादेशस्तस्य यदा ङित्त्वं तदा ग्रहणमित्यर्थः ।
श्रृणोत ग्रावाण इति । तप्तनप्तनथनाश्च इति तबादेशः । अत्र पित्त्वान्ङित्त्वं नास्ति । तङिति प्रत्याहारग्रहणमिति तु वृत्तौ न क्वापि पाठो दृश्यते । यच्च तत्रोक्तम् - लोण्मध्यमपुरुषबहुवचनादारभ्य आ महिङो ङकारत्प्रत्याहारः इति, तदाप्ययुक्तम् असन्निविष्टेन प्रत्याहारायोगात् । उरुष्या ण इति । रुष्यतिः कण्ड्वादियगन्तो रक्षतिकर्मा लोट्, सेर्हिः, अतो हेः इति लुक्, न इत्यस्य नश्च धातुस्थोरुषुभ्यः इति णत्वम् ।।
इकः सुञि ।। 6 - 3 - 134 ।।
सुञिति निपातस्य ग्रहणम्, तस्य च ञकारोऽत्रैव विशेषणार्थः । ऊषुण इति । उकारस्य दीर्घः ।।
द्व्यचोऽतस्तिङः ।। 6 - 3 - 135 ।।
भवतेति । लोण्मध्यमपुरुषबहुवचनम् । वक्षि, यक्षीति । बहेर्यजेश्च लेड्, सिप् । सिब्बहुलं लेटि इत्ययं तु विधिर्न भवति, बहुवचनात् । बहुलं छन्दसि इति शपो लुक्, वहेर्ढत्वम्, यजेः षत्वम्, षढोः कः सि द्वयोरपि । देवानावह यज च इत्यग्निं प्रति भरद्वाजस्य वचनम् ।।
निषातस्य च ।। 6 - 3 - 136 ।।
एवशब्दश्चादिषु पाठान्निपातः, अच्छ गत्यर्थवदेषु इत्यच्छशब्दः ।।
अन्येषामपि दृश्यते ।। 6 - 3 - 137 ।।
मन्त्रे इति निवृत्तम्। केशाकेशीति । तत्र तेनेदम् इत्यादिना बहुव्रीहिः, इच् कर्मव्यतिहारे । जलाषाडिति । छन्दसि सहः इति ण्विः, सहेः साडः सः इति षत्वम् । पूरुष इति । पुरुषशब्दस्याद्यचो दीर्घः ।
सुनोदन्तेत्यादि । तत्र श्वादंष्ट् इति बहुव्रीहिः । अन्यत्र तत्पुरुषः, बहुव्रीहिर्वा । दंष्ट्रेति ह्रस्वान्तस्य ग्रहणाद्दीर्घन्ते नायं दीर्घो भवतीत्याहुः । अन्ये तु दीर्घान्तमेव पठन्तोऽविशेषेणेच्छन्ति ।।
चौ ।। 6 - 3 - 137 ।।

अञ्चतिर्गृह्यत इति । चवर्गस्य तु ग्रहणं न भवति व्याख्यानात् । दधीच इति । ननु चान्तरङ्गत्वाद्यणादेशेनैव प्राग्भवितव्यम्, अकारलोपो भस्य विधीयते, भसंज्ञा च यकारादावजादौ च सम्भवतीति बहिरङ्गः, दीर्घत्वं तु लोपमपेक्षत इति बहिरङ्गम् अत आह - अन्तरङ्गोऽपीति । एवं मन्यते - इह दीर्घश्रुत्या अचश्च इत्युपतिष्ठते, तत्राचा पूर्वपदं विशेष्यते - अजन्तस्य पूर्वपदस्येति । यदि च यणआदेशः स्यान्न क्वाप्यजन्तपूर्वपदं स्यात् । प्राच इत्यादावपि पूर्वमेव सवर्णदीर्घत्वप्रसङ्गः, तस्मादन्तरङ्गोऽपि विधिर्बाध्यत इति । अत्र च लिङ्गं प्रतीच इति निर्देशः ।।

सम्प्रसारणस्य ।। 6 - 3 - 139 ।।

अकृत एवेत्यादि । कारीषगन्धिपुत्र इति स्थिते ह्रस्वत्वं च प्राप्नोति, अनेन दीर्घत्वं च तस्यावकाशः - ग्रामणि कुलम्, ह्रस्वाभावपक्षे दीर्घस्यावकाशः, पक्षान्तरे उभयप्रसङ्गः । यद्यपि ह्रस्वाभावपक्षे सावकाशं दीर्घत्वम्, तथापि तेन परत्वाद् ह्रस्वो बाध्यते ।

अथेदानीं दीर्घे कृते पुनः प्रसङ्गः कस्मान्न भवति तत्राह - पुनः प्रसङ्गविज्ञानं चेति ।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां षष्ठस्याध्यायस्य तृतीयः पादः।

6.4

अथ षष्ठाध्याये चतुर्थः पादः

अङ्गस्य ।। 6 - 4 - 1 ।।

अधिकारोऽयमिति । स्वरितत्वात् । इह केचिन्मन्यन्ते - प्रागभ्यासविकारेभ्योऽयमङ्गाधिकारः । एवं हि गुणो यङ्लुकोः इत्यत्र लुग्ग्रहणं न कर्त्तव्यं भवति, कथम् प्रत्ययलक्षणेनैव सिद्धम् । यदि त्वभ्यासविकारेऽप्ययमधिकारः स्यात्, ततोऽङ्गाधिकारविहितमिति न लुमताङ्गस्य इति प्रतिषेधः स्यादिति । वृत्तिकारस्तु मन्यते - यदि प्रागभ्यासविकारेभ्योऽङ्गाधिकारः, वव्रश्चेति वृश्चतेर्लिटि लिट्यभ्यासस्योभयेषाम् इति रेफस्य सम्प्रसारणे उरदत्वे हलादिशेषे च कृते वकारस्यापि सम्प्रसारणं प्राप्नोति, तस्य न सम्प्रसारणे सम्प्रसारणम् इति प्रतिषेध इष्यते, स न प्राप्नोति उरदत्वस्यासम्प्रसारणत्वात् । न च तस्य स्थानिवत्त्वम्, अपरनिमित्तत्वात् । आ सप्तमाध्यायपरिसमाप्तेः पुनरङ्गाधिकारे सत्युरदत्वं परिनिमित्तकं भवति, अङ्गेन स्वनिमित्तस्य प्रत्ययस्याक्षेपात् । यदप्युक्तम् - लुग्ग्रहणं न कर्त्तव्यं भवतीति, तदपि न न हि तत्राङ्गाधिकारविहितस्यैव प्रतिषेधः, कस्य तर्हि लुमता लुप्ते प्रत्यये वस्तुतो यदङ्गं तस्य पारप्तं यत्कार्यमाङ्गमनाङ्ग वा तस्य सर्वस्य प्रतिषेधः । तस्मादासप्तमाध्यायपरिसमाप्तेरयमङ्गाधिकारो युक्त इति । हूत इत्यादौ यजादित्वात्सम्प्रसारणम् । जीन इति । ग्रहिज्या इति सूत्रेण सम्प्रसारणम्, ल्वादिभ्यः िति निष्ठानत्वम् ।

निरुतम्, तुरुतमिति । घेञ् तन्तुसन्ताने, यजादिः, अत्राङ्गेऽनन्तर्भूतयोर्निर्दुरोरवयवौ यौ हलौ तदाश्रयं दीर्घत्वं न भवति । क्रिमिणामिति । क्रिमिपामन्शब्दाभ्यां मत्वर्थे पामादिभ्यो नः, पामनो नलोपः, स्त्रियां टाप्, द्वितीयैकवचनम् । अत्र नामिति समुदायस्याप्रत्ययत्वान्न तदपेक्षं पूर्वस्याङ्गत्वमिति नप्रत्ययापेक्षयाऽङ्गत्वेऽपि दीर्घत्वं न भवति, पामनामित्यत्र नलोपे कृतेऽजन्तत्वाद् दीर्घप्रसङ्गः । न च नलोपस्यासिद्धत्वम्, असुब्विधित्वात् । न ह्यस्यां दशायां दीर्घत्वं सुब्विधिर्भवति । अस्तु वाऽसिद्धत्वम्, नोपधायाः इति दीर्घत्वप्रसङ्गः ।

भिस्मा - ओदनः भिस्सदा- दिधि । ननु क्रिमिणामित्यत्र प्रत्ययस्यार्थवत्त्वेऽपि समुदायोऽनर्थकः, परस्परासम्बन्धात्, एवं भिस्साभिस्सदयोर्भिस्शब्दः, ततश्च अर्थवद्ग्रहणे नानर्थकस्य इत्येव न भविष्यति तत्राह - अङ्गा धिकार इत्यादि । सन्सम्प्रसारणदीर्घत्वैत्वतातङियङवङनुट्ह्रस्वत्वत्वे चाङ्गस्येत्यधिकारे प्रयोजनम् । सनि दीर्घः प्रयोजनम् - दधि सनोतीति दधिसेत्यत्र मा भूत् । सम्प्रसारणदीर्घत्वम् - निरुतम्, दुरुतमित्यत्र मा भूत् । एत्वम एर्लिङि वान्यस्य संयोगादेः निर्यायात्, निर्वायादित्यत्र मा भूत् । तातङ - निपात्स्य तोर्मा भूत्, जीव तु त्वम् । इवङुवदृ - शयर्थम्, वर्थम् इत्यत्र मा भूत् । नुट् - ह्रस्वनद्यापो नुट्, कुमारी आमित्याहेत्यत्र मा भूत् । ह्रस्वत्वम् - केऽणः, कुमारी कस्मै स्पृहयति, कुमार्याः कं सुखं कुमारीकमित्यत्र मा भूत् । तत्वम् - अपो फिः अब्भार इत्यत्र मा भूदित्येवमर्थं कर्तव्योऽङ्गाधिकारः । सोऽन्यार्थः कृतो नामीत्यत्रापि दीर्घत्वं व्यवस्थापयति - अभिमते विषये नियमयति ।

अर्थवद्ग्रहणपरिभाषयेति । उपलक्षणमेतत् । अनने मुक्, प्राण इत्यत्र मा भूत्। अकृत्सार्वधातुकयोदीर्घः दधि यातमित्यत्र मा भूत् - इत्येवमर्थं लक्षणप्रतिपदोक्तपरिभाषा, नञिवयुक्तन्यायश्च नाश्रयितव्यो भवति ।

षष्ठी स्थानेयोगा इति वचनादङ्गस्येति स्थानषष्ठीयम्, ततश्च अतो भिस ऐस् इत्यत्रात इति पञ्चम्यन्तमङ्गस्येत्यस्य षष्ठ्यन्तस्य सामानाधिकरण्येन विशेषणं नोपपद्यते इत्यकारमात्रस्य ग्रहणात् ब्राह्मणभिस्सेत्यादावपि प्रसङ्गः । अवयवषष्ठ्यादीनां चाप्रसिद्धिः, ततश्च ऊदुपधायां गोहः अङ्गस्य इति स्थानषष्ठ्या अन्त्येऽल्युपसंहाराद् गोहश्चान्त्यस्य स्यात्, उपधायाश्च इति वचनादुपधामात्रस्य च । एवं शास इदङ्हलोः इत्यादावपीत्याशङ्कायामाह - अङ्गस्येति सम्बन्धसामान्ये षष्ठीति । अयमभिप्रायः - अधिकारोऽयम्, स च परर्थः, षष्ठीस्थाने योगा इत्यपि परिभाषा परार्था, न च परार्थयोः परस्परं सम्बन्धोऽस्ति, यश्रोक्तम् - गुणानां च परार्थत्वादसम्बन्धः समात्वात्स्यात् इति, ततश्चाङ्गस्येति षष्ठी स्वभावप्रयुक्तं सम्बन्धसामान्यमेवार्थमभिधत्त इति । यथायोगमिति । यस्मिन्योगे यस्य सम्बन्धविशेषस्याभिव्यञ्जकमस्ति तस्मिन्योगे तत्रैव विशेषे पर्यवस्यतीत्यर्थः ।

तद्यथा हन्तेर्जः ित्यादौ स्थानषष्ठी, ऊदुपधाया गोहः इत्यवयवषष्ठी, युवोरनाकौ इत्यादौ निमित्तनिमित्तिसम्बन्ध षष्ठी, लोकवत्, तद्यथा - लोके देवदत्तस्येत्यभेदेन प्रकृत्ता षष्ठी- पुत्रः पाणिः कम्बल इति प्रतिसम्बन्धवशात्तत्रतत्र विशेषे पर्यवस्यति ।

अथ वेत्यादि । पूर्व विवक्षितोऽपि षष्ठ्यर्थः सामान्यरुप इत्युक्तम्, इदानी तु प्रयोगासाधुत्वायैव षष्ठ्युच्चार्यते, न त्वर्थविवक्षयेत्युच्यते । अवश्यं च यया कयाचन विभक्तया निर्द्देष्टव्यम् । षष्ठ्यनुरोधस्तु बाहुल्येन तदर्थस्योपयोक्ष्यमाणत्वात् । यथायोगं विभक्तिषु विपरिणम्यत इति । लोकवदेव । तद्यया - उच्चानि देवदत्तस्य गृहाणि, आढ्यो वैधवेयो देवदत्तः, आमन्त्रयस्वैनं देवदत्तम्, किमनेन कृत्यं देवदत्तेनेति, तेन अतो भिस ऐस् इत्यत्र पञ्चम्या विपरिणामे सति अकारान्तदङ्गदित्ययमर्थे भवति । आदिशब्देन युष्मदस्मद्भ्यां ङसोऽश् इत्येवमादिर्गृह्यते । अपिशब्देनैतद्दर्शयति - न केवलं षष्ठ्यर्थ एव सस विशेषः सिध्यति, अपि तु पञ्चम्यर्थेऽपिति । पूर्वत्र तु पक्षे अतो भिस ऐस् इत्यत्र निमित्तनिमित्तिसम्बन्धे षष्ठी - अङ्गस्य निमित्तं यो भिस् । कश्चाङ्गस्य निमित्तम् यस्मिन्नङ्गमित्येतद्भवति । कस्मिंश्चैतद्भवति प्रत्यये ।।

हलः ।। 6 - 4 - 2 ।।

हल इति किमिति । केनेदानीमुदाहरणेषु दीर्घसिद्धः एषं मन्यते - यथा शेषे इति लक्षणं चाधिकारश्च, तथाङ्गस्येत्येतदपि, ततश्चाभिमते विषये दीर्घो भविष्यतीति । अतिप्रसङ्ग इति तूत्तरम् । विद्धः, विचित इति । व्यधताडने, व्यच व्याजीकरणे, ग्रहिज्या इत्यादिना सम्प्रसारणम् ।

अण इत्येवेति । ढ्रलोपे पूर्वस्य दीर्घोऽणः इत्यतः । न च तस्य इकः काशे इतिग्ग्रहणेन विच्छेदः । तत्र हि विरोधाभावादिग्ग्रहणेनाणेव विशेष्यते - इकोऽण इति । अथेदानीम् चौ इत्यारभ्याण इत्येवानुवर्तिष्यते, नेक इति । तृतियेति वा निपातनादिति । मा नामाण इत्येतदनुवृतत्, द्वितीयतृतीयचतुर्थेति योऽयं निर्द्देशस्तस्मादेव निपातनादनणो दीर्घत्वं न भविष्यतीत्यर्थः ।

नन्वेकमङ्गग्रहणं प्रकृतं तद्धलो यदि ।
विशेषणं स्यात्कार्यित्वमङ्गस्येह न लभ्यते ।।
ततश्च विद्धमित्यादावपि दीर्घः प्रसज्यते ।
अथ निर्दिश्यते कार्थी नाहलः स्याद्विशेषणम् ।।
ततो निरुतमित्यादावपि दीर्घत्वमापतेत् ।
सकृच्छ्रुतस्य चैकस्य युज्यते नोभयार्थता ।।
अत आह - अङ्गग्रहणमित्यादि ।
आवर्त्तमानं वस्वेकमप्यनेकस्य शेषताम् ।
भजते भाजनं यद्वन्नृणामसहभोजने ।।

नामि ।। 6 - 4 - 3 ।।

नामित्येतस्य शास्त्रे क्वचिदप्यविहितत्वात्तत्परिज्ञानार्थमाह - नामिति षष्ठीबहुवचनमित्यादि । नामीति दीर्घपाठस्तु न समाचीनः । आगतनुट्कमिति । गत्यर्थत्वाद्गमेः कमणि कर्तरि वा क्तः । आगतो नुड्येन आगतो वा नुड्यं तदा गतनुट्कम् । अग्नीनामित्यादि । अकारन्तस्य तु सुपि च इति दीर्घः सिद्धः ।

कर्तणामिति । नन्वण इति वर्त्तते तत्राह - अण इत्येतदिति । न तिसृचतसृ इति प्रतिषेधादिति भावः ।

उत्तरार्थमिति । नोपधायाः इति दीर्घत्वं सनुट्के आमि यथा स्यात् - पञ्चानाम्, सप्तानाम्, षट्चतुभ्यश्च इति नुट् चर्मणामित्यादावनुट्के मा भूत् । कृते च नुटि दीर्घत्वप्रतिपत्त्यर्थमिति । आगतनुट्कस्य ग्रहणमित्यनुषङ्गः । अन्यथा हीत्यादि । यद्यागतनुट्कस्य ग्रहणं न क्रियते, ततः अग्नि - आम् इति स्थिते दीर्घत्वं च प्राप्नोति, नुट् च परो नुट्, नित्यं दीर्घत्वम्, कृतेऽपि नुटिप्राप्रोत्यकृतेऽपि, ततो दीर्घे कृतेऽह्रस्वत्वान्नुडेव न स्यात्, योऽयं सिद्धान्ते निमित्तत्वेनोपादानादयत्नेन सिद्धो नुट्, स एव न स्यादित्येवशब्दस्यार्थः । ननु चाह चायं ह्रस्वान्तान्नुडिति , न च नित्यत्वाद्दीर्घे कृते क्वचिदपि ह्रस्वान्तमस्ति, तत एवं विज्ञास्यामः - भूतपूर्व यद् ह्रस्वान्तमिति, ननु चेदं सम्प्रति ह्रस्वान्तमस्ति, न तिसृचतसृ तिसृणाम्, चतसृणाम् नैतदस्ति इह तावच्चतसृणामिति षट्चतुर्भ्यश्च इति नुट् सिद्धः तिसृणामित्यत्रापि ह्रस्वनद्यापो नुट् इत्यत्र त्रेस्त्रयः इत्यतस्त्रेरित्यनुवृत्तेरेव नुट् सिद्धः । यदा तर्हि नृ च इति दीर्घत्व प्रतिषधस्तदास्त्यवकाशः न चैकमुदारहणं योगारम्भं प्रयोजयति, यद्येतावत्प्रयोजनं स्यात् नृनद्यापो नुट् इत्येव ब्रूयात्, ह्रस्वग्रहणात्तु भूतपूर्वगतिर्विज्ञायते । यद्येवम्, अस्थ्नाम्, दध्नाम्, अस्थिदधिसक्थ्यक्ष्णाम् ित्यनङि कृतेऽपि भूतपूर्वमेतद् ह्रस्वान्तमिति नुट् प्राप्नोति, ततश्च नोपधायाः इति दीर्घत्वे नलोपे च अस्थानामिति प्राप्नोति । यद्वा - यदा नुड्विधौ भूतपूर्वगतिस्तदा नुण्नित्यो भवति, अनङ् त्वनित्य इति पूर्वं नुटि कृतिऽस्थीनामिति प्राप्नोति, द्विपदामित्यादौ पादस्य लोपे कृते नुट्प्रसङ्गः । एवम् पद्दन्नोमास् इत्यत्र ये ह्रस्वान्तस्यादेशास्तेष्वपि प्रसङ्गो योज्यः, तस्मान्न शक्यं भूतपूर्वगतिविज्ञानम् । यच्चोक्तम् - त्रेरित्यनुवृत्तेरेव तिसृणामित्यत्र नुट् सिद्ध इति तदप्यप्रमाणम्, न हि द्वयोरन्यतरस्य वाऽपेक्षायामसत्यां चकारे चासत्यनुवृत्तिः स्वध्यवसाना । तस्माद् - अन्यथा हि नुडेव न स्यादिति स्थितमेतत् ।

उक्त एवार्थे संग्रहश्लोकं पठिति । नामिदीर्घ इति । यदि नुटमकृत्वा आमीत्येव सूत्रं क्रियेतेत्यर्थः । वचनादिति । वचनसामर्थ्याद् भूतपूर्वगतिविज्ञायत इति भावः । यत्र तन्नास्तीति । तिसृणामित्यत्र यत्र दीर्घत्वं नास्ति स वचनस्यावकाश इत्यर्थः । नोपधायाश्चेति । चशब्दः समुच्चये ।।

न तिसृचतसृ ।। 6 - 4 - 4 ।।

सूत्रे षष्ठीद्विवचनस्य लुका निर्द्देशः । तिसृणाम्, चतसृणामिति । कथं पुनरत्र दीर्घप्रसङ्गः, यावताऽजन्तस्य दीर्घो नामीति, न चात्राजन्तता सम्भवति, कथम् तिसृ - आम् इति स्थिते नुट् प्राप्नोति, अचि र ऋतः इति रादेशाश्च, परत्वाद्रादेशः तत्राह - इदमेवेति ।।

छन्दस्युभयथा ।। 6 - 3 - 5 ।।

तिसृ चतसृ इत्येतयोरिति । अविशेषेण तु विकल्पो दृश्यते अयं पितृणामग्निः, धाता धातृणामिति तैत्तिरीके ह्रस्वः, वह्वृचे दीर्घः ।।
नृ च ।। 6 - 4 - 6 ।।
केचिदत्रेति । छन्दस्युभयथा इत्यतः । येत्वनुवर्त्तयन्ति ते पूर्वसूत्रे तिसृचतसृग्रहणमनुवर्त्तयन्ति ।।
नोपधायाः ।। 6 - 3 - 7 ।।
अनजन्तार्थ आरम्भः, न इति षष्ठ्येकवचनान्तम् । सौत्रत्वान्निर्द्देशः, अकारश्चोच्चारणार्थ इति । पञ्चानामित्यादौ सुब्विधौ नलोपस्यासिद्धत्वान्नान्तत्वम् । उपधाग्रहणमाद्यचो मा भूत् । नैतदस्ति प्रयोजनम् - दीर्घश्रुत्योपस्थापितमचं नाम्परतया विशेषयिष्यामः , उत्तरत्र च सर्वनामस्थानपरतया, तत्र येन नाव्यवधानमित्येकेन वर्णेन व्यवधाने भविष्यति उत्तरार्थ तु इन्हन्पूर्षार्यम्णां शौ इत्यत्र दीर्घविधेरुपधानियमात् इति वक्ष्यति, तदार्थमुपधाग्रहणम् ।।
सर्वनामस्थाने चासम्बुद्धौ ।। 6 - 4 - 8 ।।
राजनीति । विभाषा ङिश्योः इत्यल्लोपाभावपक्षे दीर्घत्पप्रसङ्गः । एवं चर्मणामित्यादावपि प्रसङ्गः ।।
वा षपूर्वस्य निगमे ।। 6 - 4 - 9 ।।
अत्र दीर्घश्रुत्योपस्थापितस्याचो विशेषेणमुपधाग्रहणम् । षपूर्वस्य इत्येतदपि तस्यैव विषेषणम्, तेन पुंल्लिङ्गस्याविरोध िति मन्यमान आह - षपूर्वस्याच इति । ऋभुक्षणमिति । ऋभुक्षिशब्द उणआदिषु निपातितः , इत्योऽत्सर्वनामस्याने इत्यकारः ।।
सान्तमहतस्संयोगस्य ।। 6 - 4 - 10 ।।
सकारेऽकार उच्चारणार्थः, सोऽन्तो यस्य स सान्तः । सान्तेति पृथक्पदं लुप्तषष्ठीकं संयोगस्य विशेषणम्, तद्विशिष्टसंयोगो नकारस्य विशेषणम्, महच्छब्दोऽपि तस्यैव विषेषण, सर्वनामस्थाने इत्यनेनानुवृत्तेन सान्तः संयोगो महच्छब्दश्च विशेष्यते, तेन हंसः, हंसावित्यत्र दीर्घाभावः । महतश्चेति । यो नकार इत्यपेक्ष्यते । तस्येति नकारस्य, कः पुनर्नकारस्योपधायाश्च सम्बन्धः, यावता यस्मिन्समुदाये योऽन्त्यादलः पूर्वः स तं प्रत्युपधा सत्यम् इह तु गत्यभावात् सामीप्यलक्षणः सम्बन्धः,
नकारसमीपवर्त्तिन्यास्तमेव नकारान्तं समुदायं प्रत्युपधाया इत्यर्थः । कल्पसूत्रेषु च प्रौढोऽयं व्यवहारः तद्यथा - विसर्जनीयोऽनत्यक्षरोपधो रिषित इति । श्रेयानिति । प्रशस्यस्य श्रः , उगिदचाम् इति नुम् । श्रेयांसीति । जश्शसोः शिः, नपुंकस्य झलचः इति नुम् । महानिति । बृहन्महच्छतृवच्च इति वचनाद् उगिदचाम् इति नुम् ।।
अप्तृन्तृच्स्वसृनप्तृनेष्ट्ृत्वष्ट्ृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् ।। 6 - 4 - 11 ।।
आप इति । अप्शब्दस्य नित्यं बहुवचनान्तत्वाद् द्विवचनैकवचनयोरसम्भवः । बह्वाम्पीति । बहुव्रीहिः । अङ्गाधिकारे तस्य च तदुत्तरपदस्य च इति तदन्तविधिरभ्युपगतः । किं पुनरत्रेष्टव्यम्, न तावद् ऋक्पूरब्धूः इति प्राप्तस्य समासान्तस्याभावः इत्याह - तत्रेति । यत्पुनरेष्टव्यं तद्दर्शयति - नित्यमपीति । कृताकृतप्रसङ्गित्वान्नित्यो नुम् ।
जनापवादानिति । न लोकाव्यय इत्यादिना तृन्योगे षष्ठीप्रतिषेधात् कर्मणि द्वितीयैव भवति । एतच्च तृन्नन्तत्वाभिव्यक्तये प्रयुक्तम् , एतेन कटस्येतिव्याख्यातम् । तुरिष्ठेमेयस्सु, तुश्छन्दसि इतिवत् सामान्यनिर्द्देशे कर्त्तव्ये, तृन्तृचोर्नेदेनोपादाने प्रयोजनं चिन्त्यम् ।
अव्युत्पत्तिपक्षे इति । नावश्यं व्युत्पत्तिकार्यं भवतीत्येतद् अतः कृकमिकंस इत्यत्र कंसग्रहणाल्लभ्यते, ज्ञापकादिति भावः । व्युत्पत्तिपक्ष इति । नमेस्तृचि मकारस्य पकारः - नप्ता, नयतेस्तृनि षुक् गुणश्च - नेष्टा, त्विषेरच्चोपधायाः - त्वाष्टा क्षदेस्तृन्यनिट्त्वम् - क्षत्ता होता, पोता - तृनेव प्रपूर्वाच्छासेस्तृच्, अनिट्त्वं च - प्रशास्ता । एवम्भूतानामिति । एवम्भूतानामिति । अस्यैव विवरणम् - संज्ञाशब्दानामिति ।।
इन्हन्पूषार्यम्णां शौ ।। 6 - 4 - 12 ।।
अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति इति इन्ग्रहणेन तदन्तं गृह्यते । इतरेभ्योऽपि केवलेभ्यः शिर्न सम्भवति, कथम् इन्निति हन्तेः क्विबन्तस्य ग्रहणम्, ब्रहणम्, ब्रह्मद्युपदाच्च हन्तेः क्विब्विहितः, इतरौ च पुंल्लिङ्गौ, तस्मात्सवैरेव तदन्तविधिर्विज्ञायते, इत्याह - इन्हन्पूषन्नर्यमन्नित्येवमन्तानामिति । बहुदण्डीनीति ।
बैषम्यपरिहारार्थमाद्ययोर्बहुपूर्वयोः ।
उपन्यासो बहुत्वं च पूषादौ कालभेदतः ।। इति ।
इह दण्डीनि ब्राह्मणकुलानि, ब्रह्महाणि ब्राह्मणकुलानि - इत्यन्तरेणापि बहुशब्दमाद्ययोरिन्हन्नित्येतयोरुदाहरणत्वेनोपन्यासः सम्भावतीति चोद्यम्, वैषम्यपरिहारार्थं तु बहुपूर्वयोरुपन्यास इत्युत्तरम् । वृत्रहा इन्द्रः, स एकः , एवं पूषार्यमणौ, तेषां कथं बहुत्वं विषेषणमिति चोद्यम्, मन्वन्तरादिकालभदेनेन्द्रादयो भिद्यन्ते इत्युत्तरम् । यद्वा - बहुषु यज्ञेष्वाहूता इन्द्रादयो यैर्ब्राह्मणकुलैस्तानि तथोच्यन्ते ।
ननु च सर्वनामस्थाने चासम्बुद्धौ इति दीर्घत्वं सिद्धम्, तत्किमर्थोऽयमारम्भः इत्याह - सिद्धे सत्यारम्भ इति । इन्नादीनामुपधायाः शावेवेति । विपरीतस्तु नियमो न भवति - इन्नादीनामेव शाविति सर्वनामानि तायेकवचनद्विवचनबहुवचनान्येकशः इति निर्देशात् । वृत्रहणाविति । नन्वत्रास्तु सर्वनामस्थाने चासम्बुद्धौ थइति प्राप्तो दीर्घः कस्मान्न भवति, न ह्यसौ तस्य नियमः अप्रकृतत्वादसंशब्दितत्वाच्च सत्यम् नियमविधानसामर्थ्यात्तु तस्याप्यनेन निवृत्तिः ।
अस्त्वेवं सर्वनामस्थाने, विभक्त्यन्तरे तु सर्वत्रानुनासिकललक्षणो दीर्घः प्राप्नोति अत आह - दीर्घविधिरिति । य इह शास्त्रे इन्नादीनां दीर्घविधिस्तं विनियम्य - तस्य नियमं कृत्वा, क्व सुटि सर्वनामस्थाने । उपलक्षणमेतत् । तेन शसादेशोऽपि शिर्गृह्यते । इतिशब्दो हेतौ, स च भिन्नक्रमः श्लोकन्ते

द्रष्टव्यः ।

ततः किं कुर्यात् शौ नियमं पुनर्विदध्यात् । एवकारो भिन्नक्रमो नेत्यस्यानन्तरं द्रष्टव्यः । एकस्मन्योगे नियमद्वयस्य कर्तुमशक्यात्वाद्योगविभागः कर्त्तव्य इत्यर्थादुक्तं भवति । इन्हन्पूषार्यम्णाम् इत्येको योगः, सर्वनामस्थाने इति च वर्तते, इन्नादीनां च सर्वनामस्थान एव दीर्घो भवतीत्यर्थः । अत्र हन्व्यतिरिक्तानां ग्रहणमुत्तरार्थम् । ततः शौ इति द्वितीयो योगः, सर्वनामस्थानेऽपि शावेव न सर्वत्र । ततः सौ च इति सूत्रं

विध्यर्थम् । एवं च योगद्वयं क्रियमाणे च सति यदिष्टं सम्पद्यते तद्दर्शयति - भ्रूणहनीति तथास्य न दुष्येदिति । तथेति योगाद्वये सतीत्यर्थः । अस्येति आचार्यस्य । भ्रूणहनीति सप्तम्येकवचने विभाषा ङिश्योः इत्यल्लोपाभावक्षेऽनुनासिकलक्षणो दीर्घो न भवतीत्यर्थः । सप्तम्येकवचनमुपलक्षणम् सर्वत्र दीर्घप्रसङ्गस्योक्तत्वात् ।

एवं योगविभागेन चोद्यं परिहृत्यैकस्मिन्योगे परिहर्त्तुमाह - शास्मीति । शास्मि - उपदिशामि तं प्रकारम्, येनैकयोगेऽपि दोषाभावः । अत्रापि सुडिति सर्वनामस्थानं लक्ष्यते सर्वनामस्थानग्रहणं निवर्त्त्य अनाश्रितसर्वनामस्थानत्वविशेषे प्रत्ययत्वमात्राश्रयेण । शौ नियमं कुरु वा । एवं वा कुरु, पूर्वोक्तं वा प्रकारमित्यर्थः । एवं च विशेषमनपेक्ष्य शौ नियमः क्रियमाणः प्रत्ययत्वेन तुल्यजातीये सर्वत्र प्रत्ययान्तरे निवृत्तिं करोति ।

यद्येवम्, वृत्रहेवाचरति वृत्रहायते इति क्यङि अकृत्सार्वधातुकयोः इत्यपि दीर्घो न स्यात् अत आह - दीर्घविधेरिति । निर्द्धारणे एषा षष्ठी, जातावेकवचनम् । उपधाशब्देन उपधालक्षणं दीर्घत्वमुच्यते । दीर्घविधानमध्ये उपधालक्षणस्य दीर्घस्य नियमादित्यर्थः । एतच्चोपधाग्रहणानुवृत्तेर्लक्ष्यते । हन्तेर्यो हन्तियः, तस्मिन्यो दीर्घविधिस्तत्र न दोष इत्यर्थः । क्वचित्तु - हन्तेति निपातोऽभिमुखीकरणार्थः पठ्यते । अत्रापि यिग्रहणमुपलक्षणम्, दण्डीभूतइत्यत्र च्वौ च इत्यपि दीर्घो भवत्येव ।

इदानीमसत्यपि योगविभागे सर्वनामस्थानापेक्षायां सत्यामपि न दोष इत्याह - सुट्यपीति । अपिशब्दः अप्रकृतिप्रतिषेधे इत्यनेन सम्बन्धनीयः । वाशब्दः पक्षान्तरं द्योतयति । अत्रापि सुडिति सर्वनामस्थानोपलक्षणम्, तदयमर्थः - अथ वा - सुटि सर्वनामस्थाने प्रकृते प्रकरणादपेक्ष्यमाणे । एतेन लौकिकमधिकारमभ्युपगच्छति, शास्त्रीयस्तु नैवाभ्युपगम्यते । अनवकाश इति । हेतुगर्भमिदं विशेषणम् । यतोऽनवकाशः शौ नियमोऽतोऽप्रकृतस्याप्यनुनासिकदीर्घस्य प्रतिषेधे व्यावृत्तौ कर्त्तव्यायामपि प्रवर्त्तते ।

कथमनवकाशत्वम् अत आह - यस्य हीति । द्विविधं सर्वनामस्थानम् - शिः सुट् च, तत्र शिर्नपुंसकस्य सम्बन्धी, तत एतस्य विधानात्, सुट् तु स्त्रीपुंसयोः सुडनंपुसकस्य इति वचनात् । ततश्च यस्य नपुंसकस्य सम्बन्धिनि शौ नियमः क्रियते सुटि सर्वनामस्थानसंज्ञके नैतन्नपुंसके सम्भवति अनपुंसकस्येति वचनात् । हिशब्दो हेतौ, यस्मादेवं तेन कारणेन तत्र सर्वनामस्थाने सुटि नियन्तव्यं व्यावर्त्त्य दीर्घत्वं सम्भवतीति सामर्थ्यादविशेषेण नियम आश्रीयते । एतदुक्तं भवति - यदि प्रकारणाप्राप्तं सर्वनामस्थानत्वं शेराश्रीयते, तदा नपुंसकसम्बन्धित्वमप्याश्रयणीयम् । उभयथाश्रयणे वायमर्थो भवति - इन्नादीनां नपुंसकानां शावेव सर्वनाम स्थाने दीर्घत्वमिति । एवंविधस्य नियमस्य किं तुल्यजातीयं व्यावत्तेनीयम् नपुंसकानामेवैषां सर्वनामस्थानान्तरं न च तदस्तीति नियमविधानसामर्थ्यात्प्रकरणप्राप्तं सर्वनामस्थानत्वं सामर्थ्यप्राप्तं च नपुंसकत्वमुभयमप्यविशेषात्परित्यज्य प्रत्ययमात्रे स्त्रीपुंससम्बन्धिनि दीर्घत्वं व्यावर्त्यत इति ।

विनियम्यम् - साधु नियम्यम् ।

हन्तेरनुनासिकस्येत्यादिना प्रथमश्लोकं व्याचष्टे ।

सर्वनामस्थान इत्यादिना द्वितीयस्य पूर्वार्द्धम् यस्त्वित्यादिना पश्चार्द्धम् ।

अथ वेत्यादिना तृतीयश्लोकम् । अनुवर्त्तमानेऽपीति । लौकक्यत्रानुवृत्तिर्विवक्षिता, न शास्त्रीया स्वरितत्वनिबन्धना । तथा हि सति सामर्थ्यप्राप्तस्य नपुंकत्वस्यैव परित्यागः स्यात्, न वचननप्राप्तस्य सर्वनास्थानत्वस्य । सामर्थ्यप्राप्तस्य नंपुकत्वस्येव परित्यागः स्यात्, न वचनप्राप्तस्य सर्वनास्थानत्वस्य । समार्थ्यादित्युक्तम्, तदेव दर्शयति - शिशब्दो हीति । अविशेषेणोति । नंपुसकत्वं सर्वनामस्थानत्वं च विशेषमनाश्रित्येत्यर्थः । पूर्व नपुंसकत्वाप्रसञ्जनेन केवलसर्वनामस्थानत्वाश्रयेण नियमो दोषप्रसङ्गात्तथा नाश्रीयत इत्याद्ययोः श्लोकयोरुक्तम् ।

वृत्तिकारस्तु सर्वनामस्थानत्वपरित्यागेन केवलनपुंसकत्वाश्रयणमपि दोषप्रसङ्गादेव सर्वथा न कार्यमित्याह - तत्र त्विति । तुशब्दोऽपिशब्दोऽपिशब्दस्यार्थे भिन्नक्रमश्चैतत् इत्यस्यानन्तरं द्रष्टव्यः । तत्रैतस्मिन्नियमे क्रियमाणे नपुंसकस्येत्येतदपि विशेषणं नाश्रीयत इत्यर्थः । किमेवं सति सिद्धं भवति तद्दर्शयति - तेनेति । तदाश्रयणे ह्ययमर्थः स्यात् - इन्नादीनां नपुंसकानां शावेव दीर्घत्वमिति, ततश्च भ्रूणहनि ब्राह्मणकुले इत्यादावेव दीर्घत्वं न स्यात्, न लिङ्गान्तरे । तस्मान्नपुंसकत्वमपि विशेषणं नाश्रयणीयमिति भावः ।

कथं पुनरप्रकृतस्यासंशब्दितस्य नपुंसकत्वस्याश्रयणप्रसङ्गः इत्यह सर्वनामस्थानविधाने त्विति । सर्वनामस्थानमिति तटस्थमुपलक्षणम्, यदिदं सर्वनामस्थानं शिशब्दस्तस्य यद्विधानं जश्शयोरित्येतत्, तत्रेत्यर्थः । सर्वनामस्थानसंज्ञाविधाने त्विति पाठे योऽयं सर्वनामस्थानसंज्ञः पाठः, न तत्र समीचीनमर्थः पश्यामः । तथा हि - शि सर्वनामस्थानम् इत्येतत्संज्ञाविधानम्, तत्र नपुंसकग्रहणमस्ति । अथ शिशब्दस्य नपुंसकत्वाव्यभिचारादार्थान्नपुंसकस्याश्रयणम् तदत्रैव सूत्रे शक्यते वक्तुम्, किमुच्यते - संज्ञाविज्ञाने त्विति । अथावश्यमयमेव पाठो योज्यस्तदाङः प्रश्लेषः स च धात्वर्थानुवादी, सर्वनामस्थानसंज्ञस्याविधानं सर्वनामस्थानसंज्ञाविधानम्, तत्रेति, स एवार्थो यं पूर्वमवोचाम। तुशब्दो हेतौ, अपि स्यादिति सम्भावनायाम् । यस्मान्नपुंसकादेव शेर्विधानं तस्मात्तत्र शिशब्दे क्रियमाणस्य नियमस्य नपुंसकविषयता सम्भाव्यते इत्यर्थः ।।

अत्वसन्तस्य चाधातोः ।। अत्रेत्यदि । ननु च परत्वान्नित्यत्वाच्च नुमेव पूर्व प्राप्नोति तत्राह - यदि हीति । इह दीर्घश्रुत्याचः स्थानित्वम्, तच्च न स्वरुपेण, किं तर्हि उपधायाः इत्यनुवृत्तेरुपधात्वनिबन्धनम्, अत एवाजन्तस्य दीर्घाभावः । तस्मात्सथानिन्येवात्र निमित्तशब्दः प्रयुक्तः ।

पिण्डग्रश्चर्मव इति । ग्रसु ग्लसु अदने, वस आच्छादने क्विप् । ननु चानर्थकत्वादेवात्र न भविष्यति, मूलोदाहरणेषु त्वसुन्प्रत्ययस्यार्थवत्त्वात्सिद्धम् अत आह - अनर्थकोऽपीति । अत्रैव हेतुमाह - अनिनस्मिन्ग्रहणानीति । अयमेव धातुप्रतिषेधो ज्ञापयति - अस्तीयं परिभाषेति । नैतदस्ति ज्ञापकम्, अस्यर्थमेतत्स्यात् - शत्रूनस्यात्, शत्रूनस्यतीति शत्रूव इति, तस्माद्वचनमेवेदम् । अतुग्रहणे त्वर्थवतोऽतुशब्दस्याभावादेवानर्थकस्य ग्रहणम् ।

अन्तग्रहणमनर्थकम्, केवलयोरत्वसोरभावादेव सिद्धम् अत आह अन्तग्रहणमित्यादि । अपदेशः - लक्षणवाक्यानि गणपाठश्च, प्रयुज्यत इति प्रयोगः, उपदेशे प्रयोग उपदेशप्रयोगः । उपदेशे यत्प्रयुज्यते शब्दंरुपं तदेकदेशस्याप्यत्वसन्तस्य परिग्रहार्थमित्यर्थः । असति पुनरन्तग्रहणे कस्य ग्रहणं न स्यात् इत्यत आह - इतरथा हीति । मतुब्ग्रहणमुपलत्रणम् । कुमुदनडवेतसेभ्यो डमतुप् इत्यस्यापि ग्रहणं न स्यात् । किं कारणमित्यत आह - उपदेश इति । रुपनिर्ग्रहः - रुपनिश्चयः । स यद्यपि लौकिते प्रयेगे भवति, अनुबन्धयुक्तं तु रुपमुपदेश एव निश्चीयत इत्युपदेश इत्युक्तम् । नायमत्वन्त इति । यद्यपि तावतोऽवधेरतुरन्तः, तथापि न तत्पर उपदेशः, यत्परश्चोपदेशो न सोऽत्वन्तः, पकारान्तत्वात् । ततश्च तस्य ग्रहणं न स्यात्, अन्तग्रहणसामर्थ्यात्तु तावतोऽप्यवधेरत्वन्तस्य ग्रहणम् ।।

अनुनासिकस्य क्विझलोः क्ङिति ।। 6 - 4 - 15 ।।

अङ्गाक्षिप्तस्य झला विशेषणात्तदादिविधिः । कितीत्येतत्सम्भवव्यभिचाराभ्यां झलादेरेव विशेषणम् । प्रतानित्यादि । तमु काङ्क्षायाम्, शमु उपशमे, दमु ग्लानौ - एतेभ्यः क्विप, मो नो धातोः इति नत्वम् । यङलुगन्तात्तसिति । स्य सार्वधातुकमपित् इति ङित्त्वम् । वस्तुकथनं चैतत्, न त्वनेन निष्ठाशङ्का वार्यते ङिति खल्वपि इत्युपक्रमात् । किञ्च निष्ठायामिटा भवितव्यम्, न चोदित्त्वाद् यस्य विभाषा इति प्रतिषेधः, एकाच इति तत्रानुवृत्तेः ।।

अज्झनगमां सनि ।। 6 -4 - 16 ।।

अत्र यद्यपधाया इत्यनुवर्त्तेत, अजन्तेषु व्यञ्जनस्य दीर्घप्रसङ्गः । तस्मान्निवृत्तम् । यद्येवम्, हनिगम्योरलोऽन्त्यस्य दीर्घप्रसङ्गः तन्न, अचश्च इत्युपस्थानात् । न चैवमभ्यासस्य प्रसङ्गः, हन् स इति स्थिते परत्वाद्दीर्घत्वे कृते पुनः प्रसङ्गविज्ञानात् द्विर्वचनम् । अस्तु वाऽभ्यासस्यापि दीर्घः, ह्रस्वः इति भविष्यति । जिघांसतीति । अभ्यासाच्च इति कुत्वम् । अधिजिगांसत इति । इङश्च इति गमिरादेशः ।

इह बहवो गमयः - गम्लृ सृ्प्लृ गतौ इति धातुः, णौ गमिरबोधने, सनि चेतीणादेशः, इण्वदिक इति वक्तव्यम् इतीक आदेशः, इङश्च इतीङादेशश्चेति तत्राविशेषात्सर्वत्र प्रसङ्गे सत्याह - गमेरिङादेशस्येति वक्तव्यमिति । इण इक इङश्चैक एवादेशः स इहोपलक्ष्यते, अतो धातुमेकं वर्जयित्वा त्रयाणामादेशस्य
ग्रहणम्, तथा च वक्ष्यति - अजादेशस्य गमेरिति । एवं चेणिकोरादेशस्यापि गमेर्भावकर्मणोरात्मनेपद इडभावे झलादौ सनि अज्झन इति दीर्घो भवत्येव सञ्जिगांस्यते इति । सञ्जिगंसत इति । गमेः समो गम्यृच्छि इत्यात्मनेपदं विहितम्, तत्र च अकर्मकात् इति वर्तते, तेन सनन्तादपि पूर्ववत्सनः इत्यात्मनेपदमकर्मकादेव भवति, ततश्च मातरमित्यपपाठः, । मात्रेति तृतीयान्तं पठितव्यम् । सञ्चिगांसदिति । सम्पूर्वाद् गमेः सन्, सकर्मकत्वात् परस्मैपदम्, छान्दसत्वादिडभावः, बहुलं छन्दस्यमाङ्योगेऽपि इत्यडभावः । प्रायेण तु वृत्तौ साट्कं कठ्यते ।

इहेत्यादिना गमेरिङादेशस्येति वक्तव्यम् इत्येतत्प्रत्याचष्टे । कथं पुनः सनि दीर्घः इत्येतावति सूत्रे क्रियमाणऽजन्तस्यैव दीर्घत्वं लभ्यते अत आह - तत्राचेत्यादि । सनि दीर्घः इति सूत्रे क्रियमाणएऽङ्गस्येति वर्त्तते, दीर्घश्रुत्या वा अचश्च इत्युपतिष्ठते, तत्र विशेषणविषेष्यभावं प्रति कामचारादुत्तरत्र हनिगम्योदीर्घविधानाद् गृह्यमाणमङ्गमचा विशेष्यते, तेन त्वचाङ्गम, विशेषणेन तदन्तविधिर्भवतीति सिद्धमजन्तस्य दीर्घत्वम्, यथा अकृत्सार्वधातुकयोः इत्यत्र । तस्मादिहाज्ग्रहणं न कर्त्तव्यम् । किमर्थ तर्हि क्रियते इत्याह - तत्क्रियत इति । प्रवृत्तिभेदेन - व्यापारभेदेन । तमेव दर्शयति - अजन्तस्येति । एवं च अज्ग्रहणं सामर्थ्यादावर्तते इत्युक्तं भवति ।।

तनोतेर्विभाषा ।। 6 - 4 - 17।।

उपसंख्यानेनेति । तनिपतिदरिद्राणामुपसंख्यानम् इत्यनेन ।

क्रमश्च क्त्वि ।। 6 - 4 - 18 ।।

अनुनासिकस्य क्विझलोः क्ङिति इति नित्यस्य दीर्घस्यापवादोऽयं विकल्पः । उपधाया इति । यद्यप्युपधाग्रहणं पूर्वमेव निवृत्तम्, तथापि अचश्च इत्युपस्थानाद्, अन्यस्य चाचोऽसम्भावदेवमुक्तम् ।

क्रमित्वेति । उदितो वा इति पक्षे इट् । बहिरङ्गोऽपि ल्यबादेश इति । एतच्च अदो अग्धिर्ल्यप्ति किति इत्यत्र ल्यब्ग्रहणेन ज्ञापितम् ।।

च्छ्रवोः शूडनुनासिके च ।। 6 - 4 - 19 ।।

यद्यत्र केवलस्य छस्य ग्रहणं स्यात्, तदा पृच्छेरुप देशानन्तरं तुकि कृते क्तप्रत्यये परतश्छकारमात्रस्य शादेशे षत्वे तुकः ष्टुत्वे षृट्ष्ट इत्यनिष्टं रुपं स्यात् । न च निमित्ताभावे नैमित्तिकस्याप्यभावः इति तुको निवृत्तिः, न हीदं वचनं नापि न्यायः, न हि कृतस्य निवृत्तौ कश्चिन्न्यायः । कथं तर्हि स्थातेत्यत्र सत्वे कृते ष्टुत्वस्य निवृत्तिः, नात्र कृतमेव ष्टुत्वं निवर्त्तते, किं तहि तस्यासिद्धत्वात्पूर्वमेव सत्वम्, तत्र ष्टुतवस्य प्राप्त्यभावः तदेवं वितुक्कस्य ग्रहणे दोषं दृष्ट्वाऽऽह - छ इत्येतस्य सतुक्कस्येति । कथं पुनर्ज्ञायते - छेत्यस्य सतुक्कस्य ग्रहणमिति यजयाच इति नङो ङित्करणात् । तद्धि विश्न इत्यत्र गुणो मा भूदिति, सतुक्कस्यैव शादेशे लघूपधत्वाद् गुणप्रसङ्गः । वितुक्कस्य तु शादेशे तकार उपधा, नेकारः, संयोगे गुरु इति गुरुसंज्ञश्च । पृच्छेस्तु क्ङिति सम्प्रसारणार्थ नङो ङित्त्वं न भवति प्रश्ने चासन्नकाले इति निपातनात् । तस्मात्सतुक्कस्य ग्रहणम् । एवं च कृत्वा षृष्टप्रतिवचने इति निर्द्देशोपपत्तिः । ननु सतुक्कस्य ग्रहणेऽपि अलोऽन्त्यस्य इति छमात्रस्य प्रसङ्गः न ह्यनर्थकेऽलोन्त्यविधिरस्ति । अथ सतुक्केन च्छेनाङ्गस्य

विशेषणात्तदन्तस्याङ्गस्यालोऽन्त्यस्य प्रसङ्गः तदापि निर्द्दिश्यमानस्यादेशा भवन्ति इति सह तुका भविष्यति ।
अन्तरङ्गत्वादिति । उपदेशान्तरं प्रसङ्गादन्तरङ्गत्वम्, शस्तु बहिरङ्गः, कथम् उत्पन्ने प्रत्ययेऽङ्गसंज्ञा, अङ्गस्य च शादेशः । न च वार्णादाङ्गं बलीयः, भिन्नकालत्वात् ।
औणादिके नप्रत्यय इति । साक्षात्सिवेरविहितोऽपि बाहुलकान्नप्रत्ययः । पुगन्तलघूपधगुणात्पूर्वमूठ् क्रियते इति । अन्तरङ्गत्वादिति वक्ष्यमाणो हेतुरिहाव्यपक्रष्टव्यः, गुणो हि बह्वहेक्षो बहिर्भूतप्रत्ययापेक्षश्च, ऊठ् तु विपर्ययादन्तरङ्गः, तेन स एव पूर्व क्रियते । तत्र कृतेऽन्तरङ्गत्वाद्यणादेश इति । अन्तर्भूताजपेक्षत्वाद्यणोऽन्तरङ्गत्वम्, गुणस्तु पूर्ववदेव बहिरङ्गः । नानाश्रयत्वाच्चेति । यत्रैकमेव निमित्तीकृत्याङ्गवर्णयोर्युगपत्प्राप्तिस्तत्र वार्णादाङ्गं बलीयः, तथा अचो ञ्णिति इति वृद्धेरवकाशः - गौरिति, यणोऽवकाशः - दध्यत्रेति चकारेत्यत्र कृ - अ इति स्थिते उभयप्रसङ्गे परामपि वृद्धिं बाधित्वान्तरङ्गत्वाद्यणि
प्राप्ते वार्णादाङ्गं बलीयः इति वृद्धिर्भवति ।
शब्दप्राडिति । व्रश्चादिषत्वम्, जश्त्वजत्वे । गोविडिति । विच्छ गतौ, गां विच्छायतीति विगृह्य आयादय आर्धधातुके वा इत्यायप्रत्ययाभावपक्षे क्विप् । अक्षद्यूः, हिरण्यष्ठ्यूरिति । दिविष्ठिविभ्यां क्विप्, सुब्धातुष्ठिबुष्वष्कतीतनां प्रतिषेधः इति सत्वाभावः । ननु चान्तरङ्गे यणि बहिरङ्गस्योठोऽसिद्धत्वाद्यणादेशेन नात्र भवितव्यम् अत आह - असिद्धं बहिरङ्गमन्तरङ्ग इति । नाजान्तर्य इति । अस्यायमर्थः - यत्रान्तरङ्गे बहिरङ्गे वाऽचोरानन्तर्यमाश्रीयते तत्र बहिरङ्गपरिभाषा न प्रवर्त्तत इति । एतच्च षत्वतुकोरसिद्धः इत्यत्र ज्ञापितम् । द्युम्यामिति । ऊठोऽवकाशः द्यूतः, द्यूतवान्, उत्वस्यावकाशः - अहर्विमलद्युः द्युभ्यामित्यादावुभयप्रसङ्गः । तस्मात् क्ङितीत्यत्रानुवर्त्तयितव्यमिति भावः ।
केचिदित्यादि ।तेषां मते हि दिविप्रभृतीनां यङ्लुगन्तानां तिप्सिपोरीडभावपक्षे ऊठि सति देदिवीति देद्योति, देदिवीषि, देद्योषीति । पूर्वत्र तु पक्षे वलिलोपे- देदेति, देदेवीति ।
कथं द्युभ्यां द्युभिरिति ऊठि कृत इति । क्ङितीत्यास्याननुवृत्तत्वात् अत्रापि परत्वादूठा भाव्यम्, ऊठि च कृते द्यूभ्यां द्यूभिरिति भवितव्यमिति प्रश्नः । दिव उदिति तपरकरणादित्यादि । अत्र हि तपरकरणं न कर्त्तव्यम्, यतोऽर्द्धमात्राकालस्य व्यञ्जनस्य मात्राकालो ह्रस्व एव सिद्धः, तत्क्रियते लक्षणान्तरेणापि दीर्घो मा भूदिति । तेन परमप्यूठं बाधित्वा दिव उत् इत्यनेन मात्राकालो भविष्यतीत्यर्थः ।
अथ वा - ऊठि कृते इत्यस्य परेण परिहरग्रन्थेन सम्बन्धः । तत्रायमर्थः - क्रियतां सामान्येन क्ङिति चान्यत्र च ऊठ्, कृते तु तस्मिन्नेकदेशविकृतस्यानन्यत्वात्तस्यैवोठः स्थाने तपरत्वान्मात्राकालो भविष्यति । तेषामित्यादि । क्ङिद्ग्रहणे हि निवृत्ते सति तृजादावपि शास्यानेन विधानाद् व्रश्चादिसूत्रे छग्रहणं न कर्त्तव्यम्, शकारस्य षत्वविधानेनैव सर्वस्य सिद्धत्वात् । ये तु क्ङिद्ग्रहणमनुवर्तयन्ति, तेषां तृजादौ शत्वस्याभावाच्छस्येव षत्वं विधातव्यम् । तत्रापि सतुक्कस्य ग्रहणम् ।
ऊडयं यदि दित्स्याद् आद्यन्तौ टकितौ इत्यादिः प्रसज्येत, अस्तु वकारस्य, वलि लोपे सति अक्षद्यूरित्यादि सिद्धम् । न च नाप्राप्ते वलिलोपे आरभ्यमाण ऊङ्वलोपस्य बाधकः स्यादिति शङ्कनीयम्, भिन्नजानीयत्वात् - ऊडागमः, लोप आदेशः, न च भिन्नजातीयं बाधकं भवति । न हि दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्यायेति दध्नः कम्बलो बाधको भवति सत्यम्, उत्तरसूत्रे त्वागमिभेदाद् द्वावूठौ स्याताम् - एको वकारात्पूर्वः, अपर उपधायाः, तस्मादूठष्ट्त्वमवश्याङ्गीकर्त्तव्यमिति मन्यमानस्तदङ्गीकरणे प्रयोजनमाह - ऊठष्ठित्करणमिति । एवं ब्रुवता एत्येधत्यूठसु इति ठकारस्य चर्त्त्चेन निर्द्देश इत्युक्तं भवति । यत्र ठकारो न क्रियते ततो वृद्धिविधावपि नोपादीयेत, ततश्च प्र - ऊहते पोहत इत्यत्रापि स्यात् । वाह ऊडित्ययमपि ठिदेवेति । अन्यथा तस्य वृद्धिविधौ ग्रहणं न स्यात्, अत्रापि ठकारस्याश्रवणं जश्चत्वचर्त्वाभ्याम् ।।
ज्वरत्वरस्रिव्यविमवामुपधायाश्च ।। 6 - 4 - 20 ।।
ज्वर रोगे, ञित्वरा सम्भ्रमे, स्त्रिवु गतिशोषणयोः, अव रक्षणे, मव बन्धने । ज्वरत्वरेत्यादि । वस्तुकथनम् ।।
राल्लोपः ।। 6 - 4 - 21 ।।
मुर्छेति । मुर्छा मोहसमुच्छ्राययोः । हुर्छेति । हुर्छा कौटिल्ये । ननु च पूर्वत्र सतुक्कस्य छकारस्य ग्रहणं वितुक्कश्चायम्, तत्कथमत्र लोपः इत्याह - राल्लोप इत्यादि । ननु यदि नाम रेफात्परः सतुक्कशछकारो न सम्भवति, किमेतावताऽप्रकृतस्यासंस्थितस्य केवलस्य छस्य ग्रहणं भवति तस्मादेवं व्याख्येयम् - पूर्वत्र द्विच्छकारो निर्द्देशः, तत्रैकः सतुक्कः, अपरस्तु केवलो गृहीतः, त त्र च राल्लोप सतुक्कस्य छस्यासम्भाव्तकेवलो गृह्यत इति । यदि द्विच्छकारकः पूर्वत्र निर्द्देशः, च्छ्वोरिति निर्द्देशो नोपपद्यते, कथम् समाहारद्वन्द्वे एकवचनप्रसङ्गः नैष दोषः पूर्वं द्वयोरछकारयोः समाहारद्वन्द्वं कृत्वा पश्चाद्वकारेणेतरेतरयोग द्वन्द्वः करिष्यते । एवमपि द्वन्द्वाच्चुदषहान्तात्समहारे इति समासान्तः प्राप्नोति तर्हि छकारवकारयोः समाहारद्वन्द्वं कृत्वा तेन सह सतुक्कस्य छस्येतरेतरयोगे द्वन्द्वो भविष्यति । यदि पूर्वत्र वितुक्को गृह्यते, वाञ्छतेः क्विपि शत्वं प्राप्नोति इष्टमेवैतत्संगृहीतम् - वांशौ, वांश इत्येव भवितव्यम् ।।
असिद्धवदत्रा भात् ।। 6 - 4 - 22 ।।
आ भादितिनिर्द्दशः आ कडारात् इत्यनेन व्याख्यातः । सिद्धशब्दो निष्पन्नवचनः, न सिद्धोऽसिद्धः - यः पुनः सिद्धोऽपि सिद्धकार्य न करोति, स तेन तुल्यं वर्त्तत इति असिद्धवत् । किं पुनस्तत् प्राधान्यात्कार्य मिति प्राप्तम्, शास्त्रं हि कार्यार्थत्वादप्रधानम् । कार्यस्य चासिद्धत्वे आदेशलक्षणप्रतिषेध एव सिध्द्येत् - आगहि, जहीति न तूत्सगलक्षणस्य भावः - एधि, शाधीति । कार्यस्यासिद्धत्वे ह्ययमर्थः - आ भाच्छास्त्रीयं कार्य प्रवृत्तमपि प्रवृत्तकार्यं न क्रोतीति, अतः

प्रवृत्तकार्यनिबन्धनस्यैव कार्यस्य प्रतिषेधः स्यात् । न च एधि, शाधीत्यत्र एत्वशाभावनिबन्धनं किञ्चित्कार्य प्राप्तं यस्य प्रतिषेधो विज्ञायेत । आभीयं तु शास्त्रं स्वकार्य कुर्यादेव । अत एत्वशाभावशास्त्राभ्यां स्वकार्ययोरेत्वशाभावयोः प्रवर्त्तितयोः स्थानिनोरभावात्तन्निबन्धनं धित्वं न स्यादेव । शास्त्रासिद्धत्वे त्वयमर्थः - आभीयं शास्त्रं निष्पन्नमपि स्वकार्य न करोतीति । अत एत्वशाभावशास्त्राभ्यां स्वकार्ययोरेत्वशाभावयोरप्रवृत्तत्वादनिवर्त्तितत्वाच्चैत्वधिभावशास्त्रस्य स्थानिबुद्धिरेव वर्त्तते इति तन्निबन्धनं कार्यसिध्यति । अतो व्यापकत्वाच्छास्त्रस्यैवासिद्धत्वम्, आ भादिति शास्त्रस्यैव विषयत्वेन निर्द्देशाच्च ।

यद्ययं स्वतन्त्रविधिः स्यात्, तदा भाद्ग्रहणं विषयनिर्द्देशार्य वा स्यात् - आ भाच्छास्त्रे।थत्र कर्त्तव्येऽसिद्धवदिति, असिद्धवद्भवतो वा निर्द्देशार्थम्, अत्रग्रहणं तु विषयार्थम् - आ भाद्यच्छास्त्रं तदसिद्धवद्भवति अत्रैवाभीये शास्त्रे कर्त्तव्य इति तत्राद्ये पक्षे असिद्धवद्भवतो निर्द्देशाभावाद्यत्किञ्चनाष्टाध्याय्यां कार्य तत्सर्वमाभीये कर्तव्ये असिद्धवत्, ततश्च चधिन्विकृण्व्योर च इत्यस्यासिद्धत्वद्धिनुते, कृणुत िेत्येतो लोपो न स्यत । अत्रग्रहणं चानर्थकं स्यात्, अपरिपूर्णत्वादध्याहारेणैवा भाद्यत्तत्र कर्त्तव्य इत्यर्थलाभात् । द्वितीये तु पक्षे समानाश्रयत्वं विशेषो न लभ्येत, ततश्च प्रशमय्येति मितो ह्रस्वस्यासिद्धत्वाल्लघुपूर्वो मकारो न भवतीति ल्यपि लघुपूर्ात् इत्ययादेशो न स्यात् प्रबेभिदय्येति, भिदर्यङन्ताद् णचि यस्य हलः इति यलोपस्यासिद्धत्वाल्लघुपूर्वादुत्तरो णज्न भवति, यकारेण व्यवधानादित्ययादेशो न स्यात् प्रस्तन्य्येति, अदन्तात्स्तनशब्द इत्यस्माद् णिच्यल्लोपस्यासिद्धत्वाल्लघोरेव परो णिच्, न तु लघुपूर्वादित्ययादेशाप्रप्तिः, पशुं सनोतीति जनसनखन इति विट्, विड्वनोः इत्यात्वम्, सनोतेरेनः इति शत्वम् - पशुषाः, ततः शसि पशुषो नवाजानित्यादावात्वस्यसिद्धत्वात् आतो धातोः इत्यालोपो न स्यात् चाखायितेति, खनेर्यङि द्विर्वचनात्परत्वात् ये विभाषा इत्यात्वे द्विर्वचने तृचि आत्वस्यासिद्धत्वात् यस्य हलः इति यलोपः स्यात् पपुष इत्यादौ च दोषो वक्ष्यते ।

अधिकारे आ भाद्ग्रहणं चानर्थकं स्यात्, थअधिकारादेव तदर्थलाभात् । तथा हि - शनान्नलोपः इत्यत्रास्मिन्नुपस्थिते सति श्नादुत्तरस्य नकारस्य लोपो भवति स चासिद्धवद्भवतीत्ययमर्थो भवति । एवम् अनुदात्तोपदेश इत्यादावपि, तत्किमसिद्धवद्भवतो निर्द्देशार्थेनाभाद्ग्रहणेन । न चासिद्धवद्भवत इत्यत्तावधारणार्थमाभाद्ग्रहणम्, अधिकारे ह्यस्मिन्नवध्यनिर्द्देशाद् युवोरनाकौ इत्यादीनामपि असिद्धत्वं स्यादिति वाच्यम्, ङ्याप्रतिपदिकात् इतिवदन्तरेणाप्यवधिनिर्द्देशमधिकारपरिमाणावगतेः । नन्वसत्याभाद्ग्रहणेऽधिकारेऽस्मिन् सति यत्रैतदधिकृतं तदेव सूत्रं तद्धिहितं वा कार्यमत्रग्रहणेन परमृश्येत, अन्यस्य सन्निहितस्याभावात्, ततश्च श्नान्नलोपः इत्यस्यायमर्थः स्यात् - श्नादुत्तरस्य नकारस्य लोपो भवति, स चासिद्धवद्भवत्यत्रैव श्नान्नलोपे कर्त्तव्य इति । एवं सर्वत्र । ततश्च चिणो लुक् इत्यत्रैवेष्टं सिध्येत् - अकारितरामिति , गतः, गतवानित्यादावन्यस्मिन्नाभीयेऽन्यस्याभीयस्यासिद्धत्वानापादनादतो लोपादि स्यादेव । आ भाद्ग्रहणं तु कृत्वा विधावाश्रीयमाणे तस्यैव सन्निहितस्यात्रग्रहणेन परामर्शादाभीयमाभीयेऽसिद्धवत्स्वस्मिन्नन्यस्मिन्बेत्ययमर्थो लभ्यते उच्यते, अधिकारेऽप्यस्मिन्सति अनुदात्तोपदेश इत्यादौ तत्रैव कर्त्तव्ये तस्यैवासिद्धवचने न किञ्चित्प्रयोजनमस्तीति तत्कार्यविशेषरुपपरित्यागेन इदमसिद्धवद्भवति । अत्र कर्त्तव्ये इत्येवं सामान्यरुपेण परामर्शादन्यस्मिन्नप्यन्यस्यासिद्धत्वं भविष्यति, तदेवमा भाद्ग्रणमतिरिच्यमानं विषयार्थ विज्ञायते । अधिकाराच्चासिद्धवद्भवतोऽवगतिः ।

अत्रग्रहणं तु समानाश्रयत्वप्रतिपत्त्यर्थम्, यद्युभे अप्याभीये एकमेव निमित्तमाश्रित्य प्राप्नुतः, एवमन्योऽन्यस्मिन्नसिद्धवद्भवति, किमत्रग्रहणमतिरिच्यते इत्यतः समानाश्रयत्वप्रतिपत्तिः नेत्याह अक्षरार्थ

एवायम् तथा हि - अनुदात्तोपदेश इत्यत्रास्मिन्नुपस्थिते सत्ययमर्थो भवति - अनुदात्तोपदेशानां लोपो भवति झलादौ क्ङिति परतः, स चासिद्धवद्भवति । कुत्र कर्त्तव्ये अत्र यदा भात्तत्रेति । कोऽर्थः क्ङित्यनुनासिकलोपो भवतीत्युक्तम्, अत्रैव क्ङितिनिमित्ते सति यदाभीयं प्राप्नोति तत्र कर्त्तव्य इति । एवं सर्वत्र । एवं च विस्पष्टमक्षरैरेव समानाश्रयत्वं प्रतिपादितं भवति ।

यद्ययमधिकारस्ततो यत्रास्योपस्थानं तत एवारभ्य यदा भात्तत्रैव तस्यासिद्धत्वं स्यात्, न तु स्वस्मात्पुर्वेष्वितरेषु, यद्देशस्थेन हि वक्ता आङुच्चार्यते तत तएवारभ्य मर्यादाभिविधिप्रतिपत्तिः यथा - आ पाटलिपुत्राद्वृष्टो देव तइति, एवं च ध्वसोरेद्वौ इत्यस्यायमर्थो भवति - अस्तेहौ एकारः, स चेत आरभ्य यदा भात्तत्रासिद्धवदिति, ततश्च पूर्वत्र धित्वे नासिद्धवत्स्यात् स्वतन्त्रे तु विधौ अत्रैव प्रदेशे आङर्थ प्रतिपदायन् अत एवारभ्य यदा भात्तदसिद्धवद्भवत्यत्रैव कर्त्तव्य इति श्नान्नलोपः इत्यारभ्य ऋत्व्यवास्त्त्व्य इत्येवमान्तानां सर्वेषामेवान्योऽन्यस्मिन्नसिद्धत्वमापादयति उच्यते द्वौ पक्षौ - शब्दाधिकारश्चार्थाधिकारश्च, ततश्च शब्दाधिकारे स्यादेष दोषः, अर्थाधिकारे त्वस्मिन्नेव प्रदेशो आङर्थ प्रतिपादयन् पूर्ववत्प्रतिपादयति, स च प्रतिपादितार्थादुत्तरत्रोपतिष्ठते, उपस्थितश्च तत्रतत्रोपस्थितेनात्रग्रहणेन विशेष्यत इति सर्वमिष्टं सिद्धम् । तदनेन सूक्षेणायमर्थः सम्पादितः श्नान्नलोपः इत्यारभ्यापादपरिसमाप्तेर्यानि सूत्राणि तान्यन्योऽन्यस्मिन्नसिद्धवद्भवन्ति, तानि चेत्तुल्यनिमित्तानीति । तदेतत्सर्व वृत्तौ यथास्थानं योज्यम् । तदाश्रयमेव भवतीत्यत्रासिद्धवदिति वक्ष्यमाणमपक्रष्टव्यम् । विभिन्नाश्रयम् - व्याश्रयम्, विभिन्ननिमित्तमित्यर्थः ।

असिद्धवचनमित्यादि । उत्सृज्यते आदेशेन निवर्त्यत इत्युत्सर्गः - स्थानी, स लक्षणं निमित्तं यस्य तदुत्सर्गलक्षणम्, तस्य भावः - प्रवृत्तिर्यथा स्यात् । एतच्च शास्त्रासिद्धत्वाश्रयणाल्लभ्यत इत्युक्तम् । आगहीति । बहुलं छन्दसि इति शपो लुक् अनुदातोपदेश इत्यादिनानुनासिकलोपः । जहीति । हन्तर्जः । अभाजीति । भञ्जेश्च चिणि इत्यनुनासिकलोपः । राग इति । रञ्चेश्च घञि च भावकरणयोः इत्यनुनासिकलोपः ।

अत्रग्रहणं किमिति । यद्यपि समानाश्रयत्वप्रतिपत्त्यर्थमिति पूर्वमेवात्रग्रहणस्य प्रयोजनमुक्तम्, तथापि समानाश्रयत्वप्रतिपत्तेः किं फलमिति प्रश्नावसरोऽस्त्येव । पपुष इति । पा पाने, आतो लोप इटि च । चिच्युष इति । चिञ् चयन, एरनेकाचः इति यणादेशः । लुलुविष इति । लूञ् छेदने । कथं पुनरत्र व्याश्रयत्वम् इत्याह - आलोपादीनि हीति । नन्वेवमपि नैवात्रालोपादीनि सिध्यन्ति, अन्तरङ्गाणि हि तानि, तदन्तर्भूतसम्प्रसारणापेक्षत्वात् बहिरङ्गं सम्प्रसारणम्, बहिर्भूतविभक्त्यपेक्षत्वात्, ततः किम् असिद्धं बहिरङ्गमन्तरङ्गे तत्राह - असिद्धं बहिरङ्गमन्तरङ्गे इत्यादि । एतदिति वचनापेक्षं

नपुंसकत्वम् । क्रिमिति न प्रवर्त्तते अत आह - एषा हीति । आ भाच्छास्त्रीयेति । वाह ऊठ इत्यत्र ज्ञापितत्वात् । ततः किम् इत्याह - तस्यामिति । अन्तरङ्गबहिरङ्गयोर्युगपत्सन्निधानं नास्तीति परिभाषया सह यौगपद्यमेष्टव्यम् । परिभाषासन्निधावन्तरङ्गबहिरङ्गयोरवस्थानाभावादित्यर्थः । वसुसम्प्रसारणं चैकं परिभाषाया आल्लोपादीनां चाश्रय इति समानाश्रयत्वमप्यस्ति । एतच्च नाजानन्तर्ये इत्यनाश्रित्योक्तम् । आल्लोपादयो हि अचोरानन्तर्यमाश्रित्य प्राप्नोवन्ति ।

वुग्युटाविति । तत्र युटा तावत्सिद्धत्वं न वक्तव्यम्, युड्विधानसामर्थ्यात् यण् न भविष्यति । तत्र यकारद्वयश्रवणार्थ युड्विधानम् यणो मयो द्वे भवतः इति द्विर्वचनविधानात् । हलो यमां यमि लोपः िति पक्षे लोपविधानाच्च पक्षे यकारद्वयश्रवणस्य सिद्धत्वात् । वुकोऽपि सिद्धत्वं न वक्तव्यम्, कथम् नाप्राप्ते उवङ्यारभ्यमाणो वुक् तस्यापवादो भविष्यति । ननु च बाधकप्रवृत्तिवेलायां यद्विरुध्यते तद्बाधकेन निवर्त्तितं न प्रवर्त्तते, उवङ्निरवकाशे वुकि प्रवर्त्तमानेऽसिद्धत्वात्स्वमात्मानमदर्शयन्नशक्यो बाधितुमिति वुकि कृते तस्यासिद्धत्वात्स्यादेव एवं तर्हि वुग्न करिष्यते, भुवो लुङ्लिटोरुटुपधायाः इति सूत्रमस्तु, तत्र च ओः सुपि इत्यतः ओरित्यनुवत्तिष्यते, तेन भुवाऽङ्गस्योपधाया उकारस्य ऊद्भवतीत्याश्रयणे उवङि कृत ऊकारो भविष्यति । यद्येवम्, बभूव, बभूविथेति गुणवृद्ध्योरवावोश्च कृतयोरुवर्ण उपधां न भवतीत्यूत्वं न स्यात् तत्रापि इन्धिभवतिभ्यां च िति पितोऽपि लिटः कित्त्वाद् गुणवृद्ध्योरभावे उवङि ऊद्भविष्यति । यद्येवम्,

इन्धिश्छन्दोविषयत्वाद्भुषो वुको नित्यत्वादिति न्यायात्तन्न कर्त्तव्यं भवति अवश्यं च वुको नित्यत्वमाश्रित्य बभूवेति शाधयितव्यम् अन्यथा अचो ञ्णिति इत्यत्रेक इत्युनपस्थानादनिग्लक्षणा वृद्धिः स्यादेव एवं तर्हि नार्थो वुका, नापि कित्त्वेन, ओः सुपि इत्यत्रावर्णमपि प्रिश्लष्यते, अकारोकारयोराद्गुणे कृते ङसिङसोश्च इति पूर्वैकादेशेन निर्देशात् । तेन बभूवथेति गुणवृद्ध्योरवाधोश्च कृतयोरवर्णस्याप्युपधाया ऊद्भविष्यति, बभूवतुरित्यादावुवङि कृति उवर्णस्यापि । यद्येवम्, ओः सुपि इत्यवर्णस्यापि निर्देशात्कीलालपः पश्येत्यादावपि यण् स्यात् परत्वाद् आतो धातोः इति लोपो बाधको भविष्यति, लोपस्यावकाशः संयोगपूर्वाकारन्तो धातुः, अकारप्रश्लेषस्योत्तरत्रावकाशः - बभूव, बभूविथ, कीललपः पश्येत्यत्रोभयप्रसङ्गे परत्वादाकारलोपः, विप्रतिषेधे ह्यसिद्धत्वं नास्तीति ज्ञापयिष्यते । एवमपि कीलालपौ सर्वनामस्थाने भसंज्ञाया अभावादाकारलोपाप्रसङ्गाद्यण् स्यात् एवं तर्हि ओः सुपि इत्यत्र अचि श्नुधातु इत्यतः य्वोः इत्यनुवर्त्तिष्यते, ततश्चकारोकाक,मुजानिर्देशेऽपि य्वोः इत्यनेन विशेषणसामर्थ्यादुकारस्यैव यण् भविष्यति, न त्ववर्णस्येति सामर्थ्यादवर्णग्रहणमुत्तरार्थमेव सम्पद्यते । तदेवं सत्यप्यस्मिन्योगे वुग्युटोः सिद्धत्वं न वक्तव्यमिति भाष्ये स्थितम् ।

ये त्वाहुः - भुवो वुग्लुङलिटोः इत्यत्र ओः इत्यनुवर्तनीयम्, उवर्णान्तस्य भुवो वुग्यथा स्यात् - बोभाव, बोभविथेति यङ्लुकि पिति लिटि इन्धिभवतिभ्यां च इत्यत्र श्तिपा निदेशादेसति कित्त्वे गुणवृद्ध्योः कृतयोरनुवर्णान्तस्य मा भूदित्येवमर्थम् । एवं च बभूव, बभूविथत्यत्रापि गुणवृद्ध्योः कृतयोः वुकोऽप्रसङ्गादनित्यात्वात् इन्धिभवतिभ्यां च इति कित्त्वमारमभणीयम् । तत्र च ङिदित्यधिकारात्कित्त्वङित्त्वयोरुभयोरपि विधानद् बभूवेत्यनिग्लक्षणापि वृद्धिर्न भवति । एष तएव च कित्त्वे श्तिपा निर्देशं वुकि च तदभावं कुर्वतः सूत्रकारस्याभिप्राय इति तेषां वुकः सिद्धत्वं वक्तव्यमेव । न च वत्करणं स्वाश्रयमपि यथा स्यादिति वुकः सिद्धत्वं लभ्यते, सत्यसति वा वतावतिदेशेष्वातिदेशिकाविरुद्धस्याश्रयकार्याविवर्त्तनांत्सिद्धत्वासिद्धत्वयोस्तु विरोधात्कथं वतिना सिद्धत्वप्रापथणम् कथं वा विषयविभागो लभ्येत स्थानिवदित्यादौ तु वतिमन्तरेण संज्ञा स्यादिति वत्करणमतिदेशार्थ सत् स्वाश्रयप्रतिपत्त्यर्थं वर्ण्यते एवं तर्हि श्नसोरल्लोपः इति तपरकरणाल्लिङ्गात् क्वचित्सिद्धत्वमनुमीयते, तद्धि आस्तामित्यादावाटो मा भूदिति । यदि चेदमसिद्धत्वं नित्यं स्यात्, आटोऽसिद्धत्वादेव लोपो न भविष्यतीति किं तपरकरणेन वत्करणं तु प्रतिपत्तिलाघवार्थमेव । तथा च षत्वतुकोरसिद्धः, गोतो णिद् इत्यादो वतिमन्तरेणापि परत्र परशब्दप्रयोगादेवातिदेश आश्रितः, तत्रापि चाविरुद्धं स्वाश्रयं भवत्येव ।

अत्राङ् मर्यादायां यदि स्याद्, भाधिकारीयस्यासिद्धत्वं न स्यात् । न चाभाद्ग्रहणं विषयार्थम्, असिद्धवद्भवतस्तु परिज्ञानमधिकारादेवेत्युक्तम् । अतो मर्यादार्थेऽप्याङि भाधिकारेऽप्यस्योपस्थानं न विहन्यते । तस्मादेवं वक्तव्यम् - भाधिकारीये कर्त्तव्ये भाधिकारीयस्य पूर्वस्यैव प्रकारणस्याप्यसिद्धत्वं नोक्तं स्यादिति सत्यम् अयमेव दोषः - तत्र सूर्येणैकदिगिति अणि कृते यस्येतिलोपः, ङीप्, पुनरणो यस्येतिलोपः, तअत्रेदानीम् सूर्यतिष्य इति यलोप इष्यते - सौरी बलाकेति, स न प्राप्नोति भाधिकारीये यलोपे यस्येति लोपस्यासिद्धत्वाभावाद्यकारस्यानुपधात्वात् । स्थानिवद्भावश्च यलोपविधिं प्रति निषिद्धः तमिमं मर्यादापत्रे दोषं दृष्ट्वाऽऽह - आ भादित्ययमभिविधावाङिति । भाधिकारेऽप्यसिद्धवद्भवतीति । भाधिकारेऽपि तदवस्थितम्, तत्रापि कर्त्तव्ये तत्र त्यमन्यच्चासिद्धवद्भवतीत्यर्थः । एवं व्याख्याता वृत्तिः ।

कानि पुनरस्य योगस्य प्रयोजनानि इह पादोऽस्यास्तीति अत इनिठनौ, पादिकः, तउदकं वहतीत्यण् संज्ञायामुदभावः, उदवाहस्यापत्यम् अत इञ् औदवाहिः, सारणशब्दाभ्यां ल्युहन्ताभ्यामत इञ्, सारणिः, वारणिः, शातनपातनशब्दाभ्यां टित्त्वान्ङीप्, शातनी, पातनी स्रंसेर्ध्वंसेर्ण्यन्ताद्यकि स्रंस्यते, ध्वंस्यते, अत्र यस्येतिलोपे णिलोपे च कृते पद्भावः, ऊठ, नस्तद्धिते अल्लोपोऽनः, अनिदिताम् इत्येते विधयः प्राप्नवन्ति, लोपस्यासिध्दत्वान्न भविन्ति तन्न, अचः परस्मिन् इति स्थानिवद्भावेनाप्येतानि सिद्धानि । शा हौ इत्यत्र शास् हौ इति पदच्छेदः, शासः शासित्ययमादेशो भवति, किमर्थमिदम् इत्वबाधनार्थम् ततः हुझल्भ्यः इति धित्वम्, धि च इति सलोपः शाधीति सिद्धम्, धि सकारे सिचो लोप इति नाश्रीयते, चकाधीत्येव भवितव्यमिति निर्णेष्यते । ध्वसोरेद्धावभ्यासलोपश्च इत्यत्रापि श्नसोरल्लोपः इत्यतो विषयार्थमल्लोप इत्यनुवृत्तेरल्लोपविषयत्वं भवदकारस्यैव भविष्यति, ततः पूर्ववद् ह्रस्वसलोपयोरेधीति सिद्धम् । इह च कुरु इति क- उहि इति स्थिते हिलुक्च प्राप्नोति गुणश्च, परत्वाद् गुणए कृते अत उत्सार्वधातुके इत्युत्वं च प्राप्नोति हिलुक्च, नित्यत्वाद्धिलुकि कृतेऽपि सार्वधातुकग्रहणसामर्थ्यादभूतपूर्वेऽपि तस्मिन्नुत्वं सिद्धिम् । लुङ्लङ्लृङ्क्ष्वडुदात्तः इत्यत्रोपदेश इत्यनुवृत्तेः द्विलकारकनिर्द्देशाश्रयणाद्वा लुङादिषु लावस्थायामेवाडाटो भवत इति अकारि, ऐक्षीत्यत्र चिणो लुक् इति नित्ये लुकि कृतेऽडाटौ सिद्धो । एवं

चासन्नित्यत्रापि प्रागेव श्नसोरल्लोपादाटि कृते तपरकरणाल्लोपाभावः । एवं चायन्नित्यत्रापि इणो यण् इति यणादेशात्प्रगाटि सति सिद्धमिष्टम् । यद्येवम्, ऐज्यत, औप्यतेति लङो लावस्थायां यजिवप्योरनजादित्वादटि सति आटश्च इति वृद्धिर्न स्यात् अत्र परिहारम् आडजीदीनाम् इत्यत्र वक्ष्यामः । अतो हेः इत्यत्र च उतश्च प्रत्ययात् इत्यतः प्रत्ययग्रहणआपकर्षणाज्जहीत्यत्र हन्तेर्जभावे लुग्न भविष्यति । अतो लोपः इत्यत्र च अनुदात्तोपदेश इत्यत उपदेशग्रहणानुवृत्तेः उपदेशे यदकारान्तं तस्य लोपः इति गतः, गतवानित्यत्रानुनासिकलोपे कृते सम्प्रत्यकारान्तत्वेऽपि तदभावः ।

इहापि तर्हि न स्यात् - धिन्विकृण्व्योर च, धिनुतः नोपदेशग्रहणेनाङ्गमभिसम्बध्यते - यदङ्गमुपदेशकालेऽकारान्तमिति , अपि तु आर्द्धधातुकमभिसम्बध्यते - आर्द्धधातुकोपदेशे यदकारान्तमिति । एतदुक्तं भवति - यदार्द्धधातुकमुत्पन्नं न मुहूर्त्तमात्रप्यनकारान्तात्परं तत्र तदन्तस्य लोप इति धिनुत इत्यत्र चोप्रत्ययसन्नियोगेनाकारविधानादुप्रत्यय उत्पन्नो न कदाचिदपि अनतः पर इति ।

इह च मधमस्यास्तीति छन्दसीवनिपौ च इति वनिबन्ताच्छस्, श्वयुवमधोनाम् इति सम्प्रसारणम्, मघ - उन् - अस् इति स्थिते सम्प्रसारणमाक्षित्य यस्येति लोपः प्रप्तस्तस्यासिद्धत्वान्न भवति नात्रासिद्धत्वं लभ्यते, व्याश्रयत्वात् - शसि सम्प्रसारणम्, सम्प्रसारणे यस्येति लोपः । तस्मान्मधवच्छब्दो व्युत्पन्नं प्रातिपदिकम्, ततश्च तद्धिताभावादेव लोपाभावः ।

इह च कंस्विद् गर्भ प्रथमं दध्र आपि इति । दधातेर्लिटि धा - इरे इति स्थिते नित्यत्वात् इरयोरे इत् छान्दसोः रेभावः, लिट्, छन्दसि सार्वधातुकमपीति शुप्, शापः श्लुः , द्विर्वजनम्, ईहल्यधोः इति प्रतिषेधातु श्नाभ्यस्तोरातः इति सिद्धो लोपः, घुव्यतिरिक्तेषु माप्रभृतिषु छान्दसत्वाद्यथादर्शनं भविष्यति ।

इह तर्हि कुर्वः, कुर्मः, कुर्यादिति, कृउ - वस् , कृउ - मस्, कृउ - यात् इति स्थिते नित्यं करोतेः ये च इति लोपश्च प्राप्नोति करोतेर्गुणश्च, तत्रोभयोर्नित्ययोः परत्वाद् गुणे कृते अत तउत्सार्वधातुके इत्युत्त्वं बाधित्वा नित्यत्वादुकारलोपे कृते सार्वधातुकपर उप्रत्यये विधीयमानभुत्वं न स्यात् , न च सार्वधातुक एव परतः शक्यमुत्वं विधातुम्, तथा हि सति कुरुत इत्यादौ विकरणव्यवायेऽपि न स्यात्, क्व तर्हि स्यात् यत्र विकरणस्य लोपः कुर्यात्, कुर्म इत्यादौ यद्यप्यत्रापि स्थानिवद्भावाद्व्यवधानं तथापि वचनादीदृशं व्यवधानमाश्रीयते, तस्माद्भावतीदं प्रयोजनम् न प्रयोजनम् सत्यप्युकारलोपे तस्य स्थानिवद्भावात्प्रत्ययलक्षणेन वा अत उत् इत्यत्र म्वोर्य इत्यनुवृत्तेर्वा उत्वं भविष्यति ।

इह तर्हि करिष्यते इति चिण्वदिटोऽसिद्धत्वाण्णिलोपपो भवति, अन्यथा अनिटीति प्रतिषेधः स्यात् तत्र चिण्वदिट् चेति चकारः समुच्चये - इट् च यच्चान्यत्प्राप्नोति, किं चान्यत्प्रप्नोति णिलोपः, अवश्यं चकारेणैव णिलोपः समुच्चेतव्यः, अन्यथा चिण्वदिटोऽसिद्धत्वेऽपि वलादिलक्षणेनेटा सेड्बुद्धिरेव णिलोपशास्त्रस्यास्मिन्विषये वर्त्तत इति लोपो नैव स्यात्, चिणो लुग् इत्यत्र च अनुदात्तोपदेश इत्यतः क्ङिद्ग्रहणमनुवर्त्य तस्य चिणः इति पञ्चम्या षष्ठ्यां प्रकल्पितायां चिण उत्तरस्य क्ङितो लुग्विधीयते, तेनाकारितरामित्यादौ तरपो न भविष्यति ।

इह तर्हि शुन इति श्वयुवमघोनाम इति सम्प्रसारणे सु - अन् अस् सम्प्रसारणपूर्वत्वं बाधित्वा अल्लोपोऽनः इत्यकारलोपे सति विभक्तेरनुदात्तनिवृत्तिस्वरः प्राप्नोति, कृतेऽस्मिन्योगे सम्प्रसारणस्यासिद्धत्वात् न संयोगाद्वमन्तात् इति प्रतिषेधादल्लोपेऽसति सम्प्रसारणपूर्वत्वे सति एकादेश उदात्तेनोदात्तः इत्याद्युदात्तं पदं भवति । नात्राल्लोपे सत्युदात्तनिवृत्तिस्वरस्य प्रसङ्गः, न गोश्वन्सावर्ण इति प्रतिषेधात् । नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः , कस्य तर्हि तृतीयादिस्वरस्य । स च श्वभ्याम्, श्वभिरिति हलादौ
विभक्तावुदात्तलोपाभावे चरितार्थः एवं तर्हि न लक्षणप्रतिषेधं शिष्मः, किं तर्हि येन केनचित्प्रप्तसय तृतीयादिस्वरस्य । यत्र तर्हि तृतीयादिर्नास्ति - शुनः पश्येति, तत्रोदात्तनिवृत्तिस्वरः प्राप्नोति एवं तर्हि तृतीयादिग्रहणमपि निवर्त्तिष्यते, अविशेषेण विभक्तिस्वरमात्रस्य प्रतिषेधः । थज्ञापकाद्वा सिद्धम्, यदयं श्वन्शब्दं गौरादिषु पठति, तज्ज्ञापयति - नोदात्तनिवृत्तस्वरः शुन्यवतरतीति ।

एवमपि विद्यते विशेषः, अल्लोपेन वा निवृत्तौ सत्यां पूर्वत्वेन वा अल्लोपे सति, बहवः श्वानो यस्यामिति बहुव्रीहेरुपधालोपित्वाद् अन उपधालोपिनः इति ङीपा भाव्यम् - बहुशुनीति, तदभावे तु बहुश्वेति भवति । गौरादिङीषोऽप्यनुपसर्जनाधिकारादत्राप्रसङ्गः । किञ्च - ज्ञापकात्सामान्येन वा निषेधादुदत्तनिवृत्तिस्वराभावेऽपि कथमाद्युदात्तं पदं भवति, न ह्यल्लोपे सत्येकादेशास्वरोऽस्ति, ततश्च सर्वानुदात्तं पदं स्यात्, तदेतद्भवति प्रयोजनम् न प्रयोजनम्, अन्तरङ्गत्वात्पूर्वत्वं भवति । न च वार्णादाङ्गस्य बलीयस्त्वम् व्याश्रयत्वात् विभक्तिरल्लोपस्य निमित्तम्, पूर्वत्वस्य तु श्वन्शब्दाकारः ।

इह तहि भूयानिति भूबावस्यासिद्धत्वादोर्गुणो न भवेदिति । दीर्घोच्चारणसामर्थ्यान्न भविष्यति । अस्ति दीर्घोच्चारणे प्रयोजनम्, किम् भूम्नेत, निपातनादप्येतसिद्धम् उत्तरपदाभूम्नीति । इदं च सूर्येणैकदिक् सौरी बलाकेति द्वयोरकारयोर्यस्येति लोपेऽपि वचनसामर्थ्याद् भूतपूर्वगत्योपधाश्रयणाल्लोपो भविष्यति ।

तदेवं न सन्ति प्रयोजनानि, प्रतिपत्तिगौरवपरिहारार्थ सूत्रमारब्धम् ।।

शनान्नलोपः ।। 6 - 4 - 23 ।।

पृथक्पदं लुप्तषष्ठीकम्, तेनोत्तरत्रोपधाग्रहणेन नकारो विशेष्यते । श्नमयमुत्सृष्टमकारो गृह्यत इति । अन्यस्य श्नस्यासम्भावत् । अनक्तीति । अञ्जू व्यक्तिम्रक्षणक्रान्तिगतिषु, भञ्जो आमर्द्दने, हिसि हिंसायाम् ।

शकारवतो ग्रहणं किम् इह मा भूत्, नन्दिता - नन्दकः । एवं वक्ष्यामि नान्नलोपऽनिदिताम् तइति, ततः हल उपधायाः क्ङिति इति अनिदिताम् इत्येव, इहापि न स्यात् - हिनस्तीति । पामादिभ्यो नः - अस्य च ग्रहणं स्यात् एवं तर्हि क्ङितीति वर्तते, सत्सप्तमी चैषा - क्ङिति सतीति, तेन हिनस्तीत्यत्र तिपः पित्तवादङित्वेऽपि श्नममेव ङितमाश्रित्य लोपो भविष्यति । इहापि तर्हि प्राप्नोति - नन्दमान इति, चानशो ङित्त्वात् एवं तर्हि नशब्दमेव क्ङित्त्वेन

विषेषयिष्यामः - क्ङितो नश्बदादिति, तस्मात् नान्नलोपः इति वक्तव्यमिति पृच्छति - शकारवतो ग्रहणं किमिति । यज्ञानामति । यजयाच इत्यादिना नङ्, श्चनत्वम्, तस्यासिद्धत्वान्नशब्द एवायम् । ननु यद्यपि नामि दीर्घादयं लोपः परः, सुपि च इत्येतर्द्दर्घत्वमस्मात्परम्, तत्र कृते नादिति व्यपदेशाभावादेव लोपो न भविष्यति अत आह - सुपि चेत्यादि । स्थानिवद्भावादिति । पूर्वस्यादपि विधौ स्थानिवद्भावात् ।

अथ गृह्यमाणेऽपि शकारवतो ग्रहणे विश्नानाम्, प्रश्नानामित्यत्र कस्मान्न भवति, ननु सम्प्रति श्नरुपत्वादत्रैव प्राप्नोति अत आह - विश्नानामिति ।

अत्र संग्रहलोकः -

नान्नस्यायं विधेयो ननु लुबनिदितां नन्दिता चापि सिध्येद्
हिंसेर्न प्राप्तिरेवं क्ङिति सति तु तथा नन्दमानो न सिध्येत् ।
क्ङिन्नाच्चेच्चाथ यत्नाद्बहुवचनाबिधौ दुष्यति स्थानिवत्त्वाद्
विश्नानां लक्षणोक्तप्रतिपदवचनात्सिद्ध एवेत्यदोषः ।।

लोपनं लुप्, लोप इत्यर्थः । राल्लोपः इति प्रकृते लोपग्रहणं विस्पष्टार्थम् ।।

अनिदितां हर उपधायाः क्ङिति ।। 6 - 4 - 24 ।।

इकार इत्संज्ञको येषा ते इदितः ततोऽन्येऽनिदितः, तेषां विषेषणम् - हलः इति । व्यत्ययेन त्वेकवचनम् । सनीस्रंस्यत इति । नीग्वञ्चु इत्यादिनाऽभ्यासस्य नीगागमः । नानन्द्यत इति । टुणदि समृद्धौ, यङ्, दीर्घोऽकितः । नह्यत इति । कित्परत्वेन नकारो विशेष्यते । येन नाव्यावधानमित्येकेन व्यावधानमाश्रीयते - इत्येतत्तु दुर्ज्ञानमिति भावः ।

लङ्गिकम्प्योरिति । इदित्त्वाद्वचनम् । कृच्छ्रप्राप्तिरत्रोपतापः न रोगः, शरीरविकार इत्येव सिद्धत्वात् । शरीरविकारोऽत्र व्याधिरुच्यते, नस्वाभाविकः स्थौल्यादिः । विलगितः, विकपित इति । गत्यर्थाकर्मक इत्यादिना कर्त्तरि क्तः ।

मित्त्वादुपधाह्रस्वत्वमिति । एतदेव मित्त्ववचनं ज्ञापकम् - रञ्जेरक्ङित्यप्युपधालोपो भवतीति ।

रजकरजनरजः सूपसंख्यानमिति । कित्त्वात्सिद्धम् । कित एते औणादिकाः प्रत्ययाः, क्वुन् शिल्पिसंज्ञयोः - रजकः । पुंयोगान्ङीषु - रजकी । अपुंयोगे तु नैव ङीषा भवितव्यम् । रञ्जेः क्युन् - रजनः । स च बाहुलकाट्टित्, रजनी । श्रृरञ्जिभ्यां किच्च इत्यसुन्, शिरः रजः ।।

दंशसञ्जस्वञ्जां शपि ।। 6 - 4 - 25 ।।

परिष्वजत इति । ष्वञ्ज परिष्वङ्गे, अनुदात्तेत्, उपसर्गात्सुनोति इत्यादिना षत्वम् ।।

रञ्जेश्च ।। 6 - 4 - 26 ।।

पृथग्योगकरणमुत्तरार्थमिति । उत्तरत्र रञ्जेरेवानुवृत्तिर्यथा स्यात्, दंशिप्रभूतीनां मा भूत् ।।

घञि च भावकरणयोः ।। 6 - 4 - 27 ।।

राग इति । हरश्च इति करणाधिकरणयोर्घञ्, चजोः कु धिण्ण्यतोः इति कुत्वम् ।।

स्यदो जवे ।। 6 - 4 - 28 ।।

जवः - वेगः ।

गोस्यद इति । गोर्गतिविषयो वेग इत्यर्थः । तैलस्यन्द इति । तैलस्य स्रवणमित्यर्थः ।।

अवोदैधोद्मप्रश्रथहिमश्रथाः ।। 6 - 4 - 29 ।।

उन्दी त्केदने, इन्धी दीप्तौ, श्रन्थ मोचनहर्षयोः ।।

नाञ्चे पूजायाम् ।। 6 - 4 - 30 ।।

उदाहरणे मतिबुद्धिपूजार्थ इत्यादिना वर्त्तमाने क्तः, क्तस्य च वर्त्तमाने इति कर्त्तरि षष्ठी । अथ नाञ्चेरिटि इत्येव कस्मान्नोक्तम् नैवं शक्यं वक्तुम् इह हि न स्यात् - समञ्चते गुरुः, गुरुं समञ्च्यागत इति । इड्विधौ वृत्तिकारो वक्ष्यति - निष्ठायाम् अस्य विभाषा इति प्रतिषेधे प्राप्ते क्त्वायाम्, तथा उदितो वा इति विकल्पे प्राप्ते पूजायां नित्यमिड्विधीयते इति । तेन गुरुमङ्क्त्वेति पूजायामसाधुरेव ।।

क्त्वि स्कन्दिस्यन्दोः ।। 6 - 4 - 31 ।।

न क्त्वा सेडिति कित्त्वप्रतिषेधादेवेति । तेन सेटः त्तवाप्रत्ययस्योदाहरणं न प्रदर्शितमिति भावः ।।

जान्तनशां विभाषा ।। 6 - 4 - 32 ।।

मक्त्वा, मङ्क्त्वा, नष्ट्वा, नंष्ट्वा । मस्जिनशोर्झलि इति तुम् । अन्तग्रहणं विस्पष्टार्थम् वर्णग्रहणादेव तदन्तविधिलाभात् ।।

शास इदङ्हलोः ।। 6 - 4 - 34 ।।

अङ्गाक्षिप्तस्य प्रत्ययस्य हला विशेषणात्तदादिविधिरित्याह - हलादौ च क्ङितीति ।

क्वौ च शास इति । नित्यात्वात्क्विपो लोपे हलादेरभावाद्वचनम् । प्रत्ययलक्षणेन तु सिद्धम्, यत्र कार्ये वर्णरुपमेव निमित्तत्वे नाश्रीयते तद्वर्णाश्रयत्वात् प्रत्ययलक्षणेन न भवति, यथा - रायः कुलं रैकुलमित्यायादेशः । यत्तु वर्णविशिष्टप्रत्ययनिमित्तं तद्भवत्येव, यथा - अतृणेडिति, हलादौ पिति सार्वधातुके

विधीयमानस्तृणह इमागमः, इदमपीत्वं हलादौ क्ङिति प्रत्यये विधीयमानं लोपेऽपि भवति । आर्यशीरिति । सकारस्य रुत्वे र्वोरुपधायाः इति दीर्घः ।
अथाऽऽशास्ते, आशास्यामान इत्यत्र कस्मान्न भवति इत्याह - यस्माच्छासेरिति । अङ्विधौ तावत्परस्मैपदिभ्यामर्तिसर्तिभ्यां साहचर्यात्परस्मैपदिनः शासेर्ग्रहणम्, इहाप्यङ्संसर्गाद्विशिष्टस्य शासेर्ग्रहणं संसर्गस्य विशेषावगतिहेतुत्वात् । यथा - सवत्सा धेनुरानीयतां सकलभा सकिशोरेति गवादिर्धेनुः प्रतीयते । ननु च नात्राङ् केवलो निमित्तम्, अपि तु हलादिरपि, स चात्मनेपदिनोऽपि सम्भवति, तत्कुतः संसर्गाद्विशिष्टस्य प्रतीतिः नैष दोषः साधारणासाधारणसम्बन्धिसन्निपाते यस्यासाधारणः सम्बन्धी सन्निहितस्तस्यैव ग्रहणं भवति, यथा वृद्धानां किशोरीणां च मध्ये धेनवो बध्यन्ते इत्युक्ते बडवा धनवो बध्यन्ते ।
तस्मादङ्हलोर्द्वयोरप्युपादाने यस्माच्छासेरङ् विहितस्तस्यैव ग्रहणम् । शासिवसिघसीतनां च इति षत्वविधौ शासिमात्रस्य ग्रहणं द्रष्टव्यम् आशिषिलिङ्लोटौ इत्यादिनिर्देशात् ।।

शा हौ ।। 6 - 4 - 35 ।।

उपधाया इति निवृत्तमिति । तद्धि उपधाग्रहणं क्ङितीत्यनेन सम्बद्धम्, तइह च क्ङिद्ग्रहणं निवृत्तम् इति वक्ष्यति, तेन तत्सम्बद्धमुपधाग्रहणं च निवृत्तम् । स्थानेयोगा षष्ठी भवतीति । एतच्च शब्दाधिकारपक्षस्याश्रयणाल्लभ्यते, अर्थाधिकारे त्विहाप्यवयवसम्बन्धान्न सर्वस्य स्यात् ।
क्ङितीत्यपि निवृत्तमिति । उत्तरत्र पुनः क्ङिद्ग्रहणात् । तेनेति । अन्यथा सार्वधातुकमपित् इति वचनात्पित्त्वपक्षे ङित्तवाभावाच्छाभावो न स्यात् । मा भूत्पित्त्वपक्षे, दृश्यमानस्तु प्रयोगोऽपित्त्वपक्षेऽप्युपपद्यते अत आह - शाधीत्याद्युदात्तमपीति । यदि तु पिति शाभावो न स्यात्, तदा शाधीत्येतत्सतिशिष्टेन प्रत्यस्वरेणान्तोदात्त एव स्यात् । आद्युदात्तमपि दृश्यते, तस्मात्पित्त्यपि शाभाव एव द्रष्टव्यः ।
इह आ हौ वक्तव्यम्, उपधाया इत्येव, आकारस्याकारवचनमित्त्ववाधानार्थम्, ततः हुढल्भ्यो हेर्धिः ित धित्वम्, धि च इति सकारलोपः । येषां तु धि सकारे सिचो लोपः इति पक्षः, तेषां शाभाव एव विधेय अन्यथा उपधायाः ित्यस्य निवृत्तावपि सकारस्याकारे तस्यासिद्धत्वाद्यद्यपि धित्वं लभ्यते, उपधायास्तु पूर्वेणेत्वमाशङ्क्येत, अविरोधात् ।।

हन्तेर्जः ।। 6 - 4 - 36 ।।

श्तिपा निर्देशो यङलुग्निवृत्त्यर्थः ।
अनुदात्तेपदेशावनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति ।। उपदिश्यन्ते इत्युपदेशाः, अनुदात्ताश्च ते उपदेशाश्च अनुदात्तोपदेशाः । उपदिश्यमानावस्थायामनुदात्ता इत्यर्थः । अनुनासिकेति पृथक्पदं लुप्तषष्ठीकमनुदात्तोपदेशानां विशेषणम्, तेन तदन्तविधिः ।
यमिरमीत्यादि । यमिर्यमन्तेषु इति श्लोको वक्ष्यते । वनतेरिति । वन षण सम्भक्तौ ।
सनोतेरात्वं वक्ष्यतीति । जनसनखनां सञ्झलोः इत्यनेन । अतत, अतथा इति । तनादिभ्यस्तथासोः इति सिचो लुक् ।
इह च यथा स्यादिति । अन्यथा क्तिनि नित्स्वरेण सम्प्रत्युदात्तत्वान्न स्यात् । इह च मा भूदिति । अन्यथा प्रत्ययस्वरे कृते शेषनिधाते सम्प्रत्यनुदात्तत्वाच्छान्त इत्यादावपि स्यात् ।।

गमः क्वौ ।। 6 - 4 - 40 ।।

अध्वगत इति । अध्वनो गन्तार इत्यर्थः । अनुनासिकलोपे कृते ह्रस्वस्य तुक् ।
संयदिति । सम्पूर्वाद्यमेः क्विप् । परीतदिति । तनोतेः क्विप्, नहिवृतिवृषि इत्यादिना पूर्वपदस्य दीर्घः।
ऊचेति । चकारादनुनासिकलोपश्च । अग्रेगूरिति । अनुनासिकलोपे कृते अकारस्य ऊकारः । क्वचिद् ऊङिति ङकारः पठ्यते, न त्सय प्रयोजनमस्ति । ओः सुपि इति यणादेशो धातुत्वाद्भवति - अग्रेग्वौ, अग्रेग्व। अग्रेभ्रूरिति । एवं, च कृत्वा अचिं श्नुधातु इत्यत्र भ्रूग्रहणं न कर्त्तव्यं धातुत्वादेव सिद्धम् ।।

विड्वनोरनुनासिकस्यात् ।। 6 - 4 - 41 ।।

अग्रेगा इत्यादि । यद्यप्यकारविधानेऽपि सवर्णदीर्घेण सिद्ध्यति, अतो गुणे इति पररुपत्वे हि अतोलोपमेव विदध्यात् । ये त्वकारोपधा न भवन्ति, तदर्थ दीर्घोच्चारमम् - घुण घूर्ण भ्रमणे, अन्यभ्योऽपि दृश्यन्ते इति वनिप्, ध्वावा, धूरावा । क्षिणु - क्षावा, ऋणु - रावा, ओणृ - अवावा ।।

जनसनखनां सञ्झलोः ।। 6 - 4 - 42 ।।

झल्शब्देनात्र झलादिर्गृह्यते अङ्गेनाक्षिप्तस्य प्रत्ययस्य झला विशेषणात् । क्ङिद्ग्रहणं तस्य विशेषणम् । प्रकृतं तु झल्ग्रहणं सनो विशेषणम् ।
तदिहेति । वाक्योपन्यासे । विप्रतिषेधादिति । सनोतेस्तनोत्यादिपाठस्यावकाशोऽन्यत्तनादि कार्यम् - तनादिकृञ्भ्य उः, तनादिभ्यस्तथासोः इति, इह त्वात्त्वविधौ सन्ग्रहणस्यावकाशः सन्, शिषासति, स्यतः, सातवानित्यत्रोभयप्रसङ्गे परत्वादात्वं भवति ।
ननु चासिद्धकाण्डे वक्ष्यति - पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति, यत्र किलैकस्याप्यांसद्धत्वे विप्रषेधाभावस्तत्र का कथा द्वयोरप्यसिद्धत्वे इत्यत आह - घुमास्थागापाजहातीत्यादि । विप्रतिषेधो भवतीति । विप्रतिषेधेन व्यवस्थायां क्रियमाणायामासद्धत्वं न भवतीत्यथेः । कथं कृत्वा ज्ञापकम् हर्गर्हणस्यैतत्प्रयोजनम् - हलादौ यथा स्यात्, इह मा भूत् - गौदः, कम्बलद इति । यदि चात्र विप्रतिषेषो न स्याद्धल्ग्रहणमनर्थकं स्यात् । अस्त्वत्रेत्वम्, तस्यासिद्धत्वादियङादेशो असत्याल्लोपे तत्सिद्धं स्यात्, सति विप्रतिषेधे आल्लोप स्यावकाशः - पाणित्रम्, अङ्गुलित्रमिति, ईत्वस्य - दीयते, मीयते गोद इत्यादावसति हल्ग्रहणे परत्वादीत्वं स्यादिति हल्ग्रहणमर्थवद्भवति नैतदस्ति ज्ञापकम् व्यवस्थार्थमेतत्स्यात् । असति हि तस्मिन्नीत्वस्यासिद्धत्वादालोपः, तस्यासिद्धत्वादीत्वमिति चक्रकमव्यवस्था प्राप्नोति नास्ति चक्रकप्रसङ्गः,न ह्यव्ययस्थाकारिणा शास्त्रेण भवितव्यम्, शास्त्रतो नाम व्यवस्था । तत्र

पूर्वमीत्वम्, तस्यासिद्धत्वादाल्लोपः, लोपेनावस्थानं भविष्यति । एवमपि कुत एतत् - ईत्वास्यासिद्धत्वादाल्लापः, लोपेनावास्थानमिति, न पुनर्विपर्ययः स्यात् -पूर्वमाल्लोपः, तस्यासिद्धत्वादीत्वमीत्वेन व्यवस्थानमिति एवं तर्हि यदि व्यवस्थार्थमेतत्स्यात्, नैवायं हल्ग्रहणं कुर्वीत, अविशेषेणायमीत्वं कृत्वा तस्याजादौ लोपमवादं विदधीत, कथम् इदमस्ति आतो लोप इटि च, ततो धुमास्थानगापाजहातिसां लोपो भवति - इटि चाजादौ च क्ङितीति, किमर्थ पुनरिदमीत्त्वम् वक्ष्यति - तस्य बाधनार्थं तत्, ईद्भवति ध्वाधीनाम्, ततः एलिङि, वान्यस्य संयोगादेः, न ल्यपि, मयतेरिदन्यतरस्याम्, ततः यति च, यति च ईद्भवति आतः इत्येव सोऽयमेवं लघीयसा न्यासेन सिद्धे सति यति यद्धल्ग्रहणं करोति तद् गरियांसं यत्नमारभते, तज्ज्ञापयत्याचार्यः - भवतीह विप्रतिषेध इति ।

इह झल्ग्रहणं शक्यमकर्त्तुम् । कथम् योगविभागः कर्त्तव्यः - जनसनखनामनुनासिकस्याकारादेशो भवि, झलि क्ङिति ततः सनि च, जनसनखनामाकारादेशो भवति झलीत्येव ।।

ये विभाषा ।। 6 - 4 - 43 ।।

जायत इति । यक् । नित्यं जादेशो भवतीति । तस्यानवकाशत्वात् । तेन श्यनि जायते इत्येव भवति, न तु कदाचित् जन्यत इति ।।

सनः क्तिचि लोपश्चास्चान्यतरस्याम् ।। 6 - 4 - 45 ।।

अस्यग्रहणमनन्तरस्य क्तिचो मा भूद्, व्यवहितस्यापि धातोरेव यथा स्यात् । क्रियमाणे हि तस्मिन्कायित्वेन प्राधान्यव्द्यवहितस्यापि धातोरेव परामर्शो भवति ।

अन्यतरस्यांग्रहणमनर्थकम्, विभाषा इति प्रकृतत्वाद् अत आह - अन्यतरस्यांग्रहणमिति । ननु नैतद्विस्पष्टनीयं प्रकृतमनुवर्त्तत िति तदाह ये संबद्धं हीति ।।

आर्धधातुके ।। 6 - 4 - 46 ।।

चिकीर्षितेति । सनन्तातृच् भवतीति सर्वत्रातो लोपे कृते अतो दीर्घो यञि इत्यस्य कोऽवकाशः, वचनात्पचाव ित्यादौ लोपं बाधित्वा दीर्घोऽस्तु । तत्र चरितार्थम् अदुपदेशाल्लसर्वधातुकानुदात्तत्वम् इति तदपि न ज्ञापकं सार्वधातुकेऽतो लोपाभावस्य यत्तर्ह्यदिप्रभृतिभ्यः शपो लुकं शास्ति तज्ज्ञापयति - न शपोऽतो लोप इति तत्राह - अदिप्रमृतिभ्यः शप इति । ये तर्हि न गुणवृद्धिभाजोऽदिप्रभृतयस्तेषामदादिषु पाठोनर्थकः सत्यम् वृक्षत्वम्, वृक्षतेत्यादावतो लोपे आर्दधधातुकाधिकारस्य प्रयोजनम् - बेभिद्यते इत्यत्र शपि सार्वधातुके न भवति । यङो यकारोपशस्तु हलन्तेषु चरितार्थः ।

कारवतीति । णिज्विधानं प्रत्ययलक्षणार्थमियङ्थ च स्यात् ।

यान्तीति । ननु श्नाभ्यस्तयोरात्ः इत्येन्नियमार्थ भविष्यत् - सार्वधातुके श्नाभ्यस्तयोरेवेति नैतदस्ति विपरीतोऽपि नोयमः स्यात् - श्नाभ्यस्तयोः सार्वधातुक एवेति, तदा च ययतुरित्यादौ न स्यात् । श्नाग्रहणं तूत्तरार्थ स्यात् ।

अदातामिति । लुङ्, गातिस्थाघु इत्यादिना सिचो लुक् ।

चिण्वद्भावे सति वृद्धिः स्यादिति । नन्वतो लोपो वृद्धेः पूर्वविप्रतिषेधे, तद्यथा - चिकीर्षक इति, अदिहनिमावाप्रभृतिभ्यः शपो लुग्विधानेन सार्वधातुकेऽतोलोपाभावस्य ज्ञापितत्वात्स्वाश्रयोऽतो लापो मा भूच्चिण्वद्भावात्तु चिणि तस्य दर्शनात्स्यादेव । वृत्तिकारेण तु प्राप्तिमात्रमाश्रित्य वृद्धिः स्यात् - इत्युक्तम् । दोषोपलक्षणं वृद्धग्रहणम्, लोपेऽपि रुपासिद्धरेव ।

ततो युक् प्रसज्येतेति । आद्गुणः, इति तु वार्णत्वान्न लभ्यते, इट्प्रसङ्गस्तु विशेषाभावान्नोक्तः ।

प्रयोजनसंग्रहश्र्लोको गतार्थः । भ्रस्जो रोपधयोरमन्यतरस्याम्, दीङो युडचि क्ङिति इत्यत्र तु नास्य प्रयोजनम्, कथम् भृज्जतेः सार्वधातुके तुदादित्वाच्छः, तत्र ग्रहिज्यादिसूत्रेण सम्प्रसारणम् । दीङोऽपि दिवादित्वान् श्यना भाव्यमित्युक्तान्येव प्रयोजनानि ।

असिद्धत्वनिवृत्त्यर्थं द्वितीयाध्यायगोचरोः ।
आदेशा नेह विहिता वुगाल्लोपौ प्रयोजनम् ।।
अन्यथा - अस्त्यादेशस्य भवतेरसिद्धत्वान्न वुग्भवेत् ।
न चाचख्यतुरित्यादावाल्लोपः ख्याञसिद्धितः ।।

भ्रास्जो रोपधयो रमन्यतरस्याम् ।। 6 - 4 - 47 ।।

रमित्ययं रोपधयोर्यदि स्थाने भवति मित्त्वमस्यानर्थकं स्यात्, अथाचोऽन्त्यात्पर आगमो रोपधयोः श्रवणं प्राप्नोति तत्राऽऽह - रोपधयोः प्रसङ्गे रम् प्रयुज्यते, रोपधे न प्रयुज्येते इत्यर्थः । प्रयुज्यमानश्च रम् मित्त्वादन्त्यादचः परः प्रयुज्यते । यस्य तु देशान्तरे विधानं नास्ति स स्थानिदेश एव भवति, तत्प्रसङ्गे हि तस्य विधानम्, विशिष्टदेशश्च स्थानिनः प्रसङ्गः । इह तु मित्त्वेनायं न्यायो बाध्यते स्थानषष्ठीनिर्देशसामर्थ्यात्तु सनः क्तिचि इत्यतो लोपग्रहणमनुवर्त्त्य रोपधयोर्लोपं रमागमं चान्यतरस्यां विदधति । भ्रज्जनमिति । ल्युटि सकारस्य जश्त्वम् - दकारः, तस्य चुत्वम् - जकारः ।

पूर्वविप्रतिषेधेनेति । रमोऽवकाशः - भ्रष्टा, भ्रष्टुम्, सम्प्रसारणस्यावकाशः - भृज्जति, सार्वधातुकत्वादत्र रमोऽप्रसङ्गः, भृष्टः भृष्टवानित्यत्र पूर्वविप्रतिषेधः । अथैवं कस्मान्नोक्तम् - भ्रस्जो रस ऋदन्यतरस्याम् इति भ्रस्जेः सम्बन्धी रमिति योऽयं सङ्घातस्तस्य ऋ इत्ययमादेशो भवतीत्यर्थः । तस्याक्ङिति गुणे कृते भर्जनमित्यादि रुपं भवति, ऋकाराभावपक्षे तु भ्रज्जनमिति क्ङिति ऋकारपक्षे भृष्टमिति, तदभावपक्षे तु, ग्रहिज्यादिसूत्रेण सम्प्रसारणे सति तदेव रुपं भवतीति पूर्वविप्रतिषेधो न वक्तव्यो भवति उपदेशग्रहणमपि नानुवर्त्यम् न ह्यत्र पक्षे रीकः प्रसङ्गेऽस्ति अत्रापि पत्रे पूर्वविप्रतिषेधो वक्तव्यः क्व सिचि वृद्धौ

अभार्क्षीदिति अन्यथा ऋकारविकल्पं बाधित्वा परत्वाद्धलन्तलक्षणा वृद्धिर्नित्यं प्राप्नोति । रम्भावे तु क्रियमाणे परत्वाद्वृद्धौ कृतायामपि पुनऋ प्रसङ्गविज्ञानमिति सिद्धम् - अभार्क्षीदिति । न चान्तरङ्गत्वात्पर्वमृकारः, न सिच्यन्तरङ्गमस्तीति वक्ष्यमाणत्वात् । एवं तर्हि नित्यत्वाद्ृभावः, स हि कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि एकदेशविकृतस्यानन्यत्वात् शब्दान्तरप्राप्तिरपि नास्ति, वृद्धिस्तु कृते ऋभावे ऋकारस्याकृते त्वकारस्येति शब्दान्तरप्राप्तेरनित्या, तस्मादृकार एव विधेयः तथा तु न कृतमित्येव । भ्रस्जेर्भृज्जिरित्युच्यमाने यङ्लुकि दोषः, साभ्यासे भृज्जिभावः प्राप्नोति, इष्यते तु तत्रापि रोपधयोरेव निवृत्ती, रम्भावश्च ।

बरीभृज्यत इति । यङि सम्प्रसारण रीगृत्वत इति वक्तव्यम् इति रीक्, तस्य तन्मध्यपतितस्य तद्ग्रहणात्प्रसङ्गः ।।

अतो लोपः ।। 6 - 4 - 48 ।।

धिनुतः, कृणुत इति । इवि दिवि धिवि प्रीणनार्थाः, कृवि हींसाकरणयोः, लट्, तस्य तस्, धिन्विकृण्व्योर च इति उप्रत्ययः, अकारोऽन्तादेशश्च, तस्य चोप्रत्ययेऽतो लोपः । एकवचने त्वान्तरेणातो लोपमुप्रत्ययस्य गुणे कृते अतो गुणे इति पररुपेणापि सिद्धिः ।

चेता, स्तोतेति । तपरकरणस्य पृथग्व्यावर्त्यस्य दर्शयिष्यमाणत्वात्तद्रहितस्याकाररमात्रस्येदं प्रत्युदाहरणम्, एवं च गुणवृद्ध्योर्दीर्घेषु चरितार्थत्वाद् ह्रस्वेषु लोपप्रसङ्गः । ननु च परत्वाद् गुणो भविष्यति, तस्मात्कुटादिषु गु पुरीषोत्सर्गे, ध्रुव गतिस्थैर्ययोः इत्यत्र लोपप्रसङ्ग उदाहार्यः । याता, वाता तइति । असति तकारेऽत्रापि लोपप्रसङ्गः आतो लोप इटि च इत्येतन्नियमार्थं भविष्यति - आत इट्येवाजादौ च क्ङिति, नान्यत्रेति नैतदस्ति विपरीतोऽपि नियमः स्यात् - आत एवेटि, नान्यस्येति । था च चिकीर्षितेत्यत्र न स्यात् ।

वृद्धदीर्घाभ्यामिति । अचो ञ्णिति इति वद्धेरेवकाशः नौरितिस अतो लोपस्यावकाशः चिकीर्षितेति, चिकीर्षकः - इत्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधः । वृद्धौ तु युकि - चिकीर्षायक िति स्यात् । अकृत्सार्वधातुकयोः इत्यस्य दीर्घस्यावकाशः चीयते, अतो लोपस्यावकाशः स एवः चिकीर्ष्यते - इत्यत्रोभयप्रसङ्गे पूर्वपिप्रतिषेधः ।।

यस्य हलः ।। 6 - 4 - 49 ।।

यस्येति यद्यागन्तुकोऽकारः, ततो वर्णग्रहणम्, अन्यथा तु सङ्घातग्रहणमिति पक्षद्वयसम्भवादाह - यस्येति सङ्घातग्रहणमिति । श्रुतस्याकारस्याविवक्षायां कारणाभावादिति भावः अतो लोप इत्यनेनैव सिद्धत्वादिति । अस्तु तर्हि नियमः यस्य हल एव नान्यतः, लोलूयितका, पोपूयिता, कैमर्थ्याद्धि नियमो भवति निधेयं नास्तीति कृत्वा इह चास्ति विधेयम्, किम् अन्त्यस्य लोपः प्राप्तः सर्वस्य विधेयः । तत्रापूर्वो विधिरस्तु, नियमो वेति अपूर्वो विधिरेव भविष्यति ।

एवमपि क्यस्य विभाषायां दोषः - समिधमिच्छति समिध्यति, समिध्यतेस्तृच, इट् , समिधिता, यदा लोपस्तदा सर्वस्य लोपः, यदा त्वलोपपक्षस्तदा सर्वस्यालोपः प्राप्नोति, सङ्घतग्रहणे हि यस्य हलः इत्यनेन येननाप्राप्तिन्यायेन अतो लोपो बाध्यः, यलोपोऽपि क्यस्य विभाषा इति विकल्पेन बाध्यः, ततश्च पक्षे सङ्घातस्यैव श्रवणं स्यात्, यलोपवदाल्लोपस्यापि विकल्पेन बाधनात् इत्यत आह - हल इति वेत्यादि । एवं च क्यस्य विभाषा इति यकारस्यैव विकल्पेन लोपः, अकारस्य तु अतो लोपः इत्यनेन नित्यमिति सिद्धिमष्टम्, अवश्यं चातो लोप एवात्रैष्टव्यः, अन्यथा पापचक इत्यादौ अत उपधायाः इति वृद्धिः स्यात्, स्थानिवद्भावान्न भवति । तस्मात्सङ्ङ्घातस्य ग्रहणम्, अवयवशस्तु लोप इति, तदेव युक्तम् ।

मव्यितेति । मव्यतिः संयोगान्तोऽस्ति, ज्वरत्वारादिसूत्रे तु वकारान्त उदादृतः ।।

क्यस्य विभाषा ।। 6 - 4 - 50 ।।

क्यस्य इति क्यच्क्यङोः सामान्येन ग्रहणम्, क्यषस्तु हलन्तादसम्भवः । समिधमिवात्मानमाचरतीति । अपपाठोऽयम्, एवं हि क्यङो वाक्यं न प्रदर्शितं स्यात्, क्यचश्च द्वितीयं वाक्यामनर्थकं स्यात् । विधिभेदान्नानर्थकमिति चेत् यद्येवम्, अधिकरणाच्चेति वक्तव्यम् इत्यस्यापि प्रदर्शनीयं स्यात् । तस्मात्समिदिवाचरतीति पाठः । अत्र केचित्कण्ड्वादियकोऽपि ग्रहणमिच्छन्ति, क्यस्य इति कतो यकारस्य ग्रहणे तात्पर्यम्, तआदित्वं ककारस्याविवक्षितं वदन्ति, नेति वयम् आदित्वाविक्षायं प्रमाणाभावात् ।।

णेरनिटि ।। 6 - 4 - 51 ।।

इयङादिभिरेव सर्वस्य विषयस्यावष्टब्धत्वादनवकाशो णिलोपस्तेषां बाधक इत्याह - इयङ्यणित्यादि ।

ननु पाचयतेः पाक्तिः, याजयतेर्याष्टिरित्युदारहिष्यति, ण्यासश्रन्थो युच् इति युचि प्राप्ते क्तिन्नजादिभ्यः इति क्तिन्प्रत्ययः क्तिज्वा पुनरयं द्रष्टव्यः, तत्कथमनवकाशः उच्यते, यद्येतावत् प्रयोजनं स्यात्, अनिटीति न वक्तव्यंस्यत्, अतोऽनिटीति वचनादीर्घधातुकमात्रविषयतास्यावसीयते, ततश्च युक्तमियङादीन्प्रत्यपवादत्वम् । वार्तिककारेण तु पूर्वविप्रतिषेधः पठितः - ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन इति । अततक्षदिति । अत्र चङो ङित्त्वाद् गुणस्याप्रसङ्गः, संयोगपूर्वत्वाद् एरनेकाचः इति यणोऽप्यप्रसङ्गः । इयङ

एवायं विषयः, संयोगपूर्वत्वाद् एरनेकाचः इति यणोऽप्यप्रसङ्गः । इयङ एवायं विषयः, अत्रेयङि सति पुनः प्रसङ्गविज्ञानात् भवन्नपि लोपोऽन्त्यस्य स्यात् । । आशिशदिति । एरनेकाचः इति यणोऽत्र प्रसङ्गः । अत्र सत्यपि यणि असिद्धत्वात्पुनःप्रसङ्गविज्ञानेन वा णिलोपे सति सिद्धमिष्टम् । एवं गुणवृद्धिदीर्घविषयेऽपि द्रष्टव्यम् । च न गुणवृद्ध्योरयादेशप्रसङ्गः, वार्णादाङ्गं बलीयः इति णिलोपः । ज्ञीप्सतीति । आप्ज्ञप्यृधामीत् अज्झनगमां सनि इति दीर्घप्रसङ्गः ।

अनिटीति शक्यमकर्त्तुम् । कथं कारयिता निष्ठायां सेटि इत्येतन्नियमार्थं भविष्यति - सेटि यदि भवति निष्ठायामेवेति । विपरीतस्तु नियमो न भवति -

निष्ठायां सेट्येवेति अनिटो निष्ठाया असम्भवात् । असम्भावश्चोत्तरसूत्रे वक्ष्यते । अथ वा - अयामन्ताल्वाय्येत्न्विष्णुषु इत्यत्र णेरिति योगविभागः क्रियते, सेट्यार्द्धधातुके णेरयादेशो भवति लोपस्यापवादः ।।

निष्ठायां सेटि ।। 6 - 4 - 52 ।।

सेटीति किमिति । अनिटि पूर्वेण सिद्धत्वात्सेडर्थमेवेदं सूत्रं भविष्यतीति प्रश्नः । सामर्थ्यात्पूर्वसूत्रप्राप्तेरेव व्यावृत्तिरित्युत्तरम् ।

संज्ञापित इति । वा दान्तशान्तपूर्ण इत्यत्र ज्ञपेर्निपातनमाश्रीयते - ज्ञप्तः, ज्ञपित इति । अथ पुनरिति । प्रतिपत्तृविप्रतिपत्त्या सन्दिग्धाभिधानम् ।

कालावधारणार्थमिति । सेड्ग्रहणे क्रियमाणे यदा निष्ठा सेड्भवति तदा लोपो भवति न प्रागिति कालाबधारणं लभ्यते । किं पुनः स्याद्यद्येवमर्थं सेड्ग्रहणं न क्रियेत तत्राह - अकृते हीति । णिलोपे सतीति । नित्यत्वात् । स हि कृतेऽपीटि प्राप्नोत्यकृतेऽपि, इट्पुनरनित्यः, णिलोपे सत्येकाच इति प्रतिषेधात् ।यस्य च निमित्तं लक्षणान्तरेण विहन्यते न तदनित्यम्, न हि बालिसुग्रीवयोर्युध्यमानयोर्भगवता रामेण बालिनि हते सुग्रीवापेक्षया बालिनो दौर्बल्यं मन्यन्ते शूरमानिनः सत्यम् कार्यगतभावाभावविवक्षायां तु तत्राश्रीयते । इट्प्रतिषेधः प्रसज्येतेति । एकदेशविकृतस्यानन्यत्वात् । एतच्च पूर्वस्मादपि विधौ स्थानिवद्भावमनाश्रित्योक्तम्।

भाष्ये तु सूत्रमिदं प्रत्याख्यातम् । सप्तमे णेरध्ययने वृत्तम् इत्ययं योगस्त्रेधा विभक्तव्यः, क्रमविपर्ययश्चाश्रयणीयः - णेः इत्येको योगः, तत्र निष्ठायां नेडिति वर्तते - ण्यन्तादुत्तरस्य निष्ठाया इण्न भवति ततः वृत्तम् - वुत्तमिति निपात्यते, णिलोपः । किमर्थमिदम् नियमार्थम् - अत्रैव निष्ठायां णेर्लोपो भवति, नान्यत्रेति । क्व मा भूत् कारितम्, हारितम्, कैमर्थक्यान्नियमो भवति, विधेयं नास्तीति कृत्वा । इह चास्ति विधेयम्, किम् गुणाभावः । एवं तर्हि तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणादेकस्य नियमार्थत्वमपरस्य गुणनिषेधार्थत्वं भवति, ततोऽध्ययने, वर्तेरध्ययन एव णिलोप इति ।।

शमिता यज्ञे ।। 6 - 4 - 54 ।।

तृचि सम्बुद्ध्यन्तमेतादिति । उदाहृताभिप्रायमेतत् । सूत्रे तु शुद्धप्रथमैकवचनान्तम् । सर्वासु च विभक्तिषु निपातनम् प्रथमैकवचनस्थाविवक्षितत्वात् । तथा च सूत्रार्थकथनसमये इडादौ तृचि सामान्येनोक्तम् । प्रयोगोऽपि तथाविध एव - शामितारो यदत्र सुकृतमिति, शमितृभ्यश्चैवैनन्तन्निगृहीतृब्यश्चेति च । शामित्रमिति तद्धितेऽपि भवति । सूत्रे च सम्बुद्ध्यन्तं विवक्षितं चेच्छमितर्यज्ञ इति प्राप्नोति ।।

उयामन्ताल्वाय्येत्न्विष्णुषु ।। 6 - 4 - 55 ।।

गण्डयन्त इति । गडि सेचने घटादिः, मडि भूषायाम् - आभ्यामौणादिको झच्, झोऽन्तः । स्पृहयालुरिति । स्पृहिगृहि इत्यादिना आलुच् । स्पृहयाय्य इति । भृदक्षिस्पृहिभ्य आय्यः । स्तनयित्नुरिति । औणादिक इत्नुच् । पारयिष्णव इति । णेश्छन्दसि इति इष्णुच् ।।

नेति वक्तव्ये इति । णिलोपे हि प्रतिषिद्धे गुणे सत्ययादेशः सिद्धः, मात्रालाघवं च भवति । उत्तरार्थमिति । ल्यपि लघुपूर्वस्य इति षष्ठ्यन्तमध्यापिताः, अन्ये पञ्चम्यन्तम् तत्राद्यपक्षे प्रशमय्येत्यादौ व्यञ्जनान्ते न स्यात्, न ह्यत्र णिर्लघुपूर्वः, किं तर्हि व्यञ्जनपूर्वः । न चाव्यवहिते । क्व तर्हि स्यात् प्रगणय्य, प्रस्तनय्येत्यादौ यद्यप्यत्राल्लोपे कृते णिर्लघुपूर्वो न भवति, व्याश्रयत्वादल्लोपस्यासिद्धिरपि नास्ति, तथापि भूतपूर्वलघुपूर्वतामाश्रित्यात्रैव स्यात् । तथा प्रचिकीर्ष्येत्यादावपि प्रसङ्गः, सम्प्रति गुरुपूर्वत्वेऽपि भूतपूर्वगत्या । तस्माद् द्वितीयं पक्षमाश्रित्य व्याचष्टे - लघुपूर्वाद्वर्णादिति ।

नन्वत्रापि पक्षे प्रशमय्येत्यादौ ह्रस्वादीनामसिद्धत्वादयादेशाप्रसङ्गः, क्व तर्हि स्यात् मृदमाचष्ट इति णिचि प्रकृत्यैकाच् इति प्रकृतिभावाट्टिलोपाभावे प्रमृदय्य गत इत्यादौ स्यादत आह - ह्रस्वयलोपाल्लोपानामिति ।।

विभाषाऽऽपः ।। 6 - 4 - 57 ।।

आप्लृ लम्भने चुरादिः, आप्लृ व्याप्तौ स्वादिः - द्वयोरपि ग्रहणम् । इह इङ् अध्ययने, णिच्, क्रीङ्जीनां णौ इत्यात्वम्, अत्तिह्री इत्यादिना पुक, अध्याप्य गत इत्यत्रापि प्राप्नोति, आप्रुपस्य भावात्, तस्मात् सानुबन्धको निर्देश्यः ।

आपुलिति पठितव्यम्, आप्लृशब्दान्ङसः, ऋकारलृकारयोः सवर्णत्वात् अत उत् इत्युत्वम् उरण्रपरः

इत्यत्र रप्रत्याहारग्रहणाल्लपरत्वम्, सकारस्य संयोगान्तलोपः, तत्तहि तथा पठितव्यम् नेत्याह -ङादेशस्येति ।।

निष्ठायामण्यदर्थे ।। 6 - 4 - 60 ।।

ण्यतः कृत्यस्यार्थो भावकर्मणी इति । यद्यपि भव्यगेयादावाप्लाव्यापात्यशब्दयोः कर्त्तापि पक्षे ण्यदन्तयोर्वाच्यः, तथापि क्षियः सन्निधानात्तदीयो ण्यदर्थ एव पर्युदस्यते ।

प्रक्षीणमिदं देवदत्तस्येति । अधिकरणवाचिनश्च इति कर्त्तरि षष्ठी । अधिकरण इति । क्तः प्रत्यय इत्यनुषङ्गः । एवमक्षितमिति भावे इत्यत्रापि ।।

वाऽऽक्रोशदैन्ययोः ।। 6 - 4 - 61 ।।

क्षितायुरिति । पूर्ववत्कर्त्तरि क्तः । क्षीणक इति । अनुकम्पायाम् इति कन् । प्राप्तविभाषेयम् । अण्यदर्थ इत्येव - क्षितं सर्वमस्य, क्षितमस्य तपस्विनः ।।

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ।। 6 - 4 - 62 ।।

चिणीव चिण्वत्, तत्र तस्येव इति सप्तमीसमर्थाद्वतिः, स्यसिच्सीयुट्तासिषु इति प्रतियोगिनि सप्तमीनिर्द्देशात्, यथा - मथुरावत्पाटलिपुत्रे प्रासाद इति । भावकर्मविषयेष्विति । अनेन भावकर्मणोः िति वषयसप्तमीति दर्शयति । भावकर्मणोर्ये स्यादयो वर्त्तन्ते तेष्वति तु विज्ञायमाने सीयुडेको विशेषितः स्यात्, स्यादयो न विशेषिताः स्युः भावकर्मणोर्लादेशवाच्यत्वात्सीयुटश्च विशेषितः स्यात्, स्यादयो न विशेषिताझ स्युः भावकर्मणोर्लादेशवाच्यत्वात्सीयुटश्च तद्भक्तत्वात् । अथ यदाबावकर्माभिधायी प्रत्ययो भावकर्मशब्दाभ्यामभिधीयते, तदायमर्थः स्यात् - भावकर्मवाचिनि प्रत्यये परतो ये स्यादय इति । तदा

स्यादयो विशेषिताः, सीयुडविशेषितः, न हि तद्भक्तस्य तेन सह पौर्वापर्यं सम्भवति । तस्मात्सर्वानुग्रहाय विषयसप्तम्येव युक्ता । यदा चिण्वत्तदेचडागमो भवतीति । चकारस्य सन्नियोगार्थत्वात् । कस्येति । षष्ठीनिद्दिष्टस्यागमो भवति, स्यादयश्च सप्तमीनिर्द्दिष्टाः, अज्झनग्रहदृशाम् इति षष्ठीनिर्द्दिष्टम्, अङ्गस्य इति च वर्तते, अतोऽजन्तादीनामङ्गानामेवागामित्वं युक्तमिति विपर्ययं मन्यमानस्य प्रश्नः । स्यसिच्सीयुट्तासीनामेवति । कथम् इत्याह ते हि प्रकृता इति । सन्निहिता इत्यर्थः । नन्वङ्गमपि प्रकृतं योग्यविभक्तिकं च तत्राह - अङ्गस्य त्विति । लक्ष्यविरोधादिति । यद्वा - सप्तमे योगविबागः क्रियते, आर्धधातुकस्येट्, परिभाषेयम्, यो यावान्कश्चिदिडागमः स सर्व आर्धधातुकस्यैव द्रष्टव्यः, तेनायमपीडागमः स्यादीनामेव भवति, नाङ्गस्य ।
कानि पुनरिति । चिणि यदेवाहत्य विहितं तदेवातिदिश्यते, आहोस्वित् चिणि दृष्टमात्रमिति प्रश्नः । तत्र द्वितीयः पक्ष आश्रीयत इति श्लोकेन दर्शयति - चिण्वद्वृद्धिरिति । यथा चिणि वृद्धिः तथा स्यादिष्वपीष्यते - घानिष्यते । एतदेकं प्रयोजनम्, एवमुत्तरत्रापि । प्रत्येकं सम्बन्धेन यथायोगमतिदेशो योज्यः। दायिष्यत िति, आतो युक् चिण् कृतोः इति युक्, एतच्चिण्याहत्य विहितम् । यच्च हो हन्तेर्ञ्णिन्नेषु िति कुत्वमघानीत्यत्र दृष्टम्, तदपि दीर्घविकल्पविधानं तदपि प्रयोजनम् । एतदपि चिण्याहत्य विहितम् - शमिष्यते,शामिष्यत इति शमेर्णिचि मितां ह्रस्वं लृटि स्ये चिण्वद्भावेन दीर्घविकल्पः, तणेरनिटि इति णिलोपः ।
नन्वनिटीत्युच्यते, सेट् चायम् अत आह - इट् चासिद्ध इति । आ भाच्छास्त्रीये णिलोपे कर्त्तव्ये आ भाच्छास्त्रीयश्चिण्वदिडसिद्धः, तेनानिडादित्वात्सिद्धो णिलोप इत्यर्थः । मे इति । सूत्रकारायमाण्सय् वचनम् । ननु चास्य चिण्वदिटोऽवकाशः येऽनिटः, येषु ऋद्धनोः स्ये इत्यादि प्रतिपदविधानं नास्ति आर्द्धधातुकस्येत्यस्यावकाशः सेह् योऽस्य विषयो न बवति यस्तु सेडस्य च सूत्रस्य विषयः, तत्र परत्वात् आर्धधातुकस्येड्वलादेः इत्ययमेव प्राप्नोति, तत्कथमसिद्धत्वम् अत आह - नित्यश्चायमिति । अयं चिण्वदिण्णित्यः, कृतेऽपि वलादिलक्षण इट् प्राप्नोति, अकृतेऽपि, न ह्ययं वलादित्वमबेक्षते । अस्मिंस्तु कृते वलादिलक्षण इण्न प्राप्नोति, तस्माद् वल्निमित्त इडनित्यः । विधातः - निमित्ताभावादप्रवृत्तिः, सोऽस्यास्तीति वधाती । तदेवं नित्यत्वात्सेड्भ्योऽप्यनेनैवैड् भवति, अयं चासिद्धइति न भवति णिलोपाभावदोषः । अवश्यं चानेनैव सेड्भ्योऽपीडेष्टव्यः अन्यथा एतदिट्सन्नियुक्तश्चिण्वद्भावोऽपि न स्यात् । न च शब्दान्तरप्राप्तेरस्याप्यनित्यत्वम् आकृतिपक्षे शब्दान्तरत्वाभावात् ।
प्रकृतस्येटो दीर्घत्वमिति । वलादिलक्षणस्य प्रकृतत्वात् ।
गुणे कृत इति । परत्वान्नित्यत्वाच्च । उपदेशग्रहणाद् भवतीति । यद्यपि करोतिरुत्तरकालमनजन्तः, उपदेशे त्वजन्त एव ।
यदि चिणि दृष्टमात्रस्यातिदेशः, हनिणिङादेशा अपि प्राप्नुवन्ति, तेषामपि तत्र दृष्टत्वात् अत आह - अङ्गाध्कारविहितमिति । अङ्गस्येति प्रकृत्य यद्धिहितं चिणि दृष्टं तदेवातिदिश्यते, सन्निहतत्वात् । न च हनिणिङामादेशा एवंविधा इति तेषामनतिदेशः । अत्र वात्तिकम् - वधाभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेन इति । वधभावस्यावकाशः - वध्यात्, वध्यास्ताम्, वध्यासुः, चिण्वद्भावे हन्ग्रहणस्यावकाशः - धानिष्यते, अधानिष्यत, अधानिषाताम्, अघानिषत, घानिषीष्टेत्यत्रोभयप्रसङ्गे चिण्वद्भावो भवति विप्रतिषेधेन । अथेदानीं चिण्वद्भावे पुनः प्रसङ्गविज्ञानाद् वधादेशः कस्मान्न भवति सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितं तद्बाधितमेवेति । ननु द्वितीयाध्याये, तत्र आर्धधातुके इति वष्यसप्तमी, ततः किमन्तरङ्गो वधभावः नैतदस्ति लिङीति विशेषनिर्द्देशात्परसाप्तमी । यत्र तु विशेषनिर्देशाभावः - अस्तेर्भूः इत्यादौ, तत्रैव विषयसप्तमी भव्यादिसिद्धये ।।

दीङो युडचि क्ङिति ।। 6 - 4 - 63 ।।

दीङ इति पञ्चमीनिर्देशादिति । षष्ठ्यां त्वास्यां दीङ एवादितो युट् स्यात्, पञ्चम्यां तूभयनिर्देशे पञ्चमीनिर्देशो बलीयानिति अचीति सप्यम्याः षष्ठ्यां प्रकल्पितायामजादेर्युड् भवति । सप्तमीनिर्देशस्तूत्तरार्थः, तदादिविध्यर्थश्च । विधानसामर्थ्याच्चेति । यदि युटोऽसिद्धत्वेन यणादेशः स्यात्, युड्विधानमनर्थकं स्यात् उपदिय्य इति रुपे विशेषाभावात् । न च यकारद्वयश्रवणाद्विशेषः, हलो यमां यमि लोपः, थइति पक्षे यलोपविधानात् । न च पक्षे श्रुतिभदः, यणो मये द्वे इति द्विर्वचनविधानादेव सिद्धत्वात् । श्रुतिभेदोऽपि व्यञ्जनात्परस्यैकस्यानेकस्य वा यकारस्य कीदृश इति चिन्त्यम् ।
उपदानमिति । मीनातिमिनोतिदीङां ल्यपि च ित्यात्वम्, दीङः इत्यनुबन्धनिर्द्देशो यङ्लुकि मा भूदिति ।।

आतो लोप इटि च ।। 6 - 4 - 64 ।।

इह अचि क्ङिति, आर्द्धधातुके इति त्रयाणं प्रकृत्वाद्विशेषणविशेष्यभावे च कामचारात्तेषामन्यतमेनानुभूतान्यतरविशेषणेन, अनुभूतोभयविशेषणेन, अननुभूतविशेषणेन वा इटः समुच्चयसम्भावद् द्वादश पक्षाः सम्भवन्ति । तत्र यदि तावद्विशेषणसम्बन्धात् प्रगेवाचा इटः समुच्चयः, अङ्गाक्षिप्तश्च प्रत्ययो वा विशेष्यते, इट्यजादौ च प्रत्यये इति विज्ञायते, तदेड्ग्रहणमनजाद्यर्थं भवति अजादेरिटोऽजादिना प्रत्ययेन समुच्चयासम्भवात् । तदा च ङिदार्धधातुकेअजादेरेव विशेषणे व्यवतिष्ठेते, नेटः हलादेरिटः क्ङित्त्वासम्भावत्, आर्धधातुकत्वाद्, व्यभिचाराच्च । ततश्च दासीयेत्यादौ लोपप्रसङ्गः । अथ किद्विशिब्टेनाचा समुच्चयः - क्ङित्यजादौ भवतीटि चेति, ततोप्रसङ्गः । अथ किद्विशिष्टेनाचा समुच्चयः - क्ङित्यजादौ भवतीटि चेति, ततोऽक्ङिर्थिमनजाद्यर्थं चेड्ग्रहणं भवति - पपिथ, दासीयेति, अथार्द्धधातुकविशिष्टेनाचा समुच्चयः, ततोऽक्ङिदर्थमनजाद्यर्थमनार्धातुकार्थं चेडग्रहणम् - पपिथ, दासीय, व्यत्यरे - इतीण्मात्रे लोपप्रसङ्गः, तदेवमचा समुच्चये चत्वारः पक्षाः । एवमार्धधातुकेन एवं क्ङितेति द्वादश पक्षाः । तयोरप्युफयविशिष्टयोस्त एव दोषाः, यांस्त्ववोचाम ।
अथविशेषितेनार्धधातुकेन समुच्चयस्तदा नार्धधातुकार्थमिडग्रहणमिति व्यत्यरे इत्यत्रैव प्रसङ्गः अथ क्ङिद्विशिष्टेनार्धधातुकेन समुच्चयस्तदाऽक्ङिदर्थमनार्धधातुकार्थमिड्ग्रहणम् - पपिथ, व्यत्यरे अथाज्विशिष्टेनाधधातुकेन समुच्चयः, अनजाद्यर्थमनार्धधातुकार्थं चेड्ग्रहणम् - दासीय,

व्यत्यरे अथाज्विशिष्टेन क्ङिता समुच्चयः, ततोऽनजाद्यर्थमाक्ङिदर्थं चेड्ग्रहणम् - दासीय, पपिथ । अथार्धधातुकविशिष्टेन क्ङिता समुच्चयः, तदानार्धधातुकार्थमक्ङिदर्थं चेड्ग्रहणम् - व्यत्यरे, पपिथ । तदेवमेकादशपक्षा दुष्टाः । द्वादशः पक्षः शिष्यते - अविशिष्टेन क्ङिता समुच्चय इति, अत्र च पक्षे अच्यार्धधातुके इति विशेषणद्वयमविशेषाद् द्वावपि क्ङिदिटावुपनिपततीति अक्ङिदर्थमेवड्ग्रहणं भवति । तेन पपिथेत्यादावाल्लोपो भवति दासीय, व्यत्यरे -

इत्यनजादावनार्धधातुके च न भवति । स एष निर्दोषः पक्ष, तमिममाश्रयति - इट्यजादावार्धधातुक इति । क्ङिति चेति । अजादावार्धधातुके इत्यनुषङ्गः । दासीयेति । आशिषि लिङ्, उत्तमैकवचनमिट, इटोऽन् । अत्र सीयुट इड्भक्तत्वादिटोऽजादित्वाभावः ।।

ईद्याति ।। 6 - 4 - 65 ।।

दीर्घविधानमुत्तरार्थम् - अध्यगीष्ट । इह तु गुणेन भवितव्यमिति ह्रस्व एव विधेयः ।।

धुमास्थागापाजहातिसां हलि ।। 6 - 4 - 66।।

माग्रहणेन मेङ् प्रणिदाने, माङ् माने, मा माने इति सर्वेषां ग्रहणम् । एवं गा इत्यत्रापि गाङ्गतौ, गैशब्दे, गा स्तुतौ छन्दसि, इणो गा लुङि, इण्वदिक इति कत्तव्यम्, गाङ् लिटि इति सर्वेषां गारुपाणां ग्रहणम् गामादाग्रहणेष्वविशेषः इति वचनात् ।

जहतेरिति । ओहाक् त्यागे । जिहातेरिति । ओहाङ् गतौ इत्यस्य । भृञामित् इत्यभ्यासस्येत्वे सति जहातीति निर्देशो नोपपद्यते ।

कामं हागित्यपि निर्देशेन भवति जिहातेः प्रसङ्गः, तथा तु न कृतामित्येव ।

एतदेवत्यादि । यथा चैतज्ज्ञापकं तथा जनसनखनाम् इत्यत्रोक्तम् । ईत्वे वकारप्रतिषेधः, वकारस्य निमित्तभावेन प्रतिषेधो वकारप्रतिषेधः । वकारादावीत्यं न भवतीत्यर्थः । आतो मनिन्क्वनिब्वनिपश्च - घृतं पिबन्ति घृतपावानः, वसां पिबन्ति वसापावानः । क्वनिपीत्वं न भवति । धीवरी, पीवरीत्वत्र त्वौणादिकमीत्वं धायाप्योर्वा सम्प्रसारणम् तथा च स्थः क च इत्यत्र क्विपि ईत्वाभाव उदाहृतः ।।

वान्यस्य संयोगादेः ।। 6 - 4 - 68 ।।

स्थेयादिति । अन्यस्य ग्रहणेऽक्रियमाणे पूर्वयोगोऽन्येषु सावकाशः, अयमपि ग्लायादित्यादिषु स्थेयादित्यत्रोभयप्रसङ्गे परत्वादयमेव विधिः स्यादित्यन्यस्य ग्रहणम् ।।

न ल्यापि ।। 6 - 4 - 69 ।।

यदुक्तमिति । ईत्वम्, न त्वनन्तरमेत्वम्, प्राप्त्यभावात् ।।

मयतेरिदन्यतरस्याम् ।। अपमित्येति । उदीचां माङो व्यतीहारे इति त्तवाप्रत्ययः, इत्त्वे कृते तुक् ।।

आङजादीनाम् ।। 6 - 4 - 72 ।।

ऐज्यतेत्यादौ यजिवपिवहीनां हलादित्वादाणन प्राप्नोति, सम्प्रसारणे कृतेऽजादित्वाद्भविष्यति, परत्वाल्लादेशेभ्यः प्रागटा भवितव्यम्, ततो लादेशैः, ततो यका, ततः सम्प्रसारणेन, अत आह - इहेति । लादेशास्यान्तरङ्गत्वं लकारमात्रापेक्षित्वात् । अडागमस्तु लकारविशेषमङ्गं चापेक्षते इति बहिरङ्गः, कृताकृतप्रसङ्गत्वाद्विकरणस्य नित्यत्वम् । नन्वडागमोऽपि कृतेऽपि विकरणे प्राप्नोत्यकृतेऽपीति नित्य एव, ततश्च परत्वादडागम एव प्राप्नोति, तत्राह - शब्दान्तरप्राप्तोरिति । शब्दान्तरप्राप्तिमेव दर्शयति - कृते हीति । अङ्गस्याडागमः कृते विकरणोऽपि शब्दान्तरप्रप्तेरनित्यः तथा हि स कृतेऽडागमे तदादेर्धातोर्भवति, तथअकृते तु धातुमात्रात् अत आह - शब्दान्तरस्येति । षष्ठीनिर्द्देष्टस्य यद्विधीयते आगम आदेशो वा तत्रैषा परिभाषा, न पञ्चमीनिर्देश इत्यर्थः ।

नित्यत्वादेवेति । एवकारः पौनर्वचनिकः, नित्यत्वादडागमं बाधते इति पूर्वमुक्तम्, तत्रापि स एव हेतुरिति । अडागमस्तु सम्प्रसारणे कृते न प्राप्नोति, आटा बाधितत्वात् । यस्य निमित्तं लक्षणान्तरेण विहन्यते इति तु न सार्वत्रिकमिति भावः ।

अयं योगः शक्योऽकर्तुम्, अजादीनामपि पूर्वसूत्रेण अडेवास्तु । कथम् आटश्च इति वृद्धिः अटश्च इति वक्ष्यामि । इहापि तर्हि प्राप्नोति - अकार्षीत् अचीति वर्त्तते । एवमपि स्वपेर्लङ्, सिप्, अड् गार्ग्यगालवयोः इति सिपोऽट, रुत्वम्, हशि च इत्युत्वम् - अस्वपो हसतीत्यत्र वृद्धप्रसङ्गः अजादौ धातौ वृद्धिं वक्ष्यामि । तर्हि धाताविति वक्तव्यम् न वक्तव्यम् यदेतद् उपसर्गादृति धातौ इति, तत्पूर्वत्रापकृष्यते, अटश्च इत्यत्र चकारस्तस्यैव विधेः समुच्चयार्थः - अटो विध्यन्तरं बाधित्वा वृद्धिरेव यथा स्यात् । तेनाटिटदित्यादौ परमप्यतो गुणे पररुपं बाधित्वा वृद्धिरेव भवति । यथा सिद्धान्तेऽपि, औसीयत् औङ्करीयत् उस्यपदान्तात्, ओमाङोश्च

इति पररुपं न भवति । उत्तरार्थं तर्ह्याड्वचनम् छन्दस्यपि दृश्यते - सुरुचो वेन आवः अट एवात्र छान्दसं दीर्घत्वं भविष्यति - पूरुषो नारक इति । यथा आसन्नित्यत्रापि लावस्थायामेवाटि कृते अ - अस् - ल् इति स्थिते अटश्च इति वृद्धिश्च प्राप्नोति, लादेशाश्च, तत्रान्तरङ्गत्वाल्लादेशः । वृद्धर्ह्यटमचं च निमित्तमपेक्षते, कृते लादेशे वृद्धिश्च प्राप्नोति, श्नसोरल्लोपः च, तत्रान्तरङ्गत्वाद्वृद्धिः । नानाश्रयत्वाच्च वार्णादाङ्गं बलीयः इति नास्ति कृतायां वृद्धौ तपरकरणादाकारस्य लोपाभावः । इह च आयन्निति इणो लङि अटि अ - इ - अन्, अटश्च इति वृद्धिः प्राप्नोति, इणो यण् इति यणादेशश्च, तत्रान्तरङ्गत्वाद्वृद्धः, नानाश्रयत्वाच्चवार्णादाङ्गं बलीयः, इति नास्ति, इणो यण् एः इति योगविभागादिवर्णान्तस्येणो यण्विधानादेकारस्य तदभावादायादेशे सिद्धिमिष्टम् । अत्र श्लौकौ -

अजादीनामटा सिद्धं वृद्ध्यर्थमिति चेदटः ।
अस्वपो हलतीत्यत्र धातौ वृद्धिमटः स्मरेत् ।।
पररुपं गुणेनाट ओमाङोरुसि तत्समम् ।
छन्दोऽर्थं बहुलं दीर्घ इणस्त्योरन्तरङ्गतः ।। इति

न माङ्योगे ।। 6 - 4 - 74 ।।

यद्ययमनन्तरस्याट एव प्रतिषेधः स्यात्, तत्संयुक्तमेव प्रतिषेधं कुर्यात् - आडजादीनाममाङ्योगे इति, असंयुच्य तु प्रतिषेधात्सर्वस्य प्राकरणिकस्य प्रतिषेधा विज्ञायत इत्याह - लुङ्लङ्लृङ्क्षु यदुक्तं तन्न भवतीति । तत्र लुङ उदाहरणं न प्रदर्शितम् माङ्योगे तदासम्भवत् । ङिद्विशिष्टस्योपादानम् - असम्दादेशो यो माशब्दः त्वोमौ द्वितीयायः इति तद्योगे प्रतिषेधो मा भूत् - सुखिनं मा अकार्षीदिति । अथ कथम् - मा बालिपथमन्वगाः ।।
स्वच्छन्दमनुवर्त्तन्ते न शास्त्रमृषयः किल ।।

बहुलं छन्दस्यमाङ्योगेऽपि ।। 6 - 4 - 75 ।।

मा वः क्षेत्र इति । वः युष्माकं क्षेत्रे भार्यायां परबीजानि परेषां वीर्याणि मा वाप्सुः, उप्तानि मा भूवन् । वपेः कर्मणि लुङ्, व्यत्ययेन परस्मैपदम्, झेर्जुस्, सिच्, वदव्रज इति वृद्धिः । क्वचित्तु माङ्योगेऽपि भवति इति प्रकम्य अवाप्सुरिति पठ्यते, तथाध्ययनं तु न क्वचिद्दृष्टम् अभित्था इति । भिदेस्थास्, झलो झलि इति सिचो लोपः । आवरिति । पूर्वसूत्रे वृत्तावेव व्युत्पादितम् ।।

हरयो रे ।। 6 - 4 - 76 ।।

दघ्र इति । ननु चात्र परत्वाद्रेभावे कृते अनजादित्वादाल्लोपो न प्राप्नोति अत आह - घञो रेभावस्यासिद्धत्वादिति ।
नन्वेवमपि रेभावे कृते तस्यैवेडागमः प्राप्नोति, न च रेभावस्य वैयर्थ्यम् कृसृभृप्रभृतिष्वनिट्सु चरितार्थत्वात् इत्यत आह - अत्रेति । कथं पुनर्लाक्षणिकस्य तस्य थइरेशब्दस्य रेभावो भवति कथं वा स्वप्रवृत्तिमपेक्ष्य तस्मिन्निडागमे कृते पुनः स्वयं प्रवर्त्तमानस्यात्माश्रयदोषो न भवति तत्राह - तदर्थे चेति । द्विवचननिर्देशाद् दोषद्वयं न भवतीत्यर्थः ।।

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ।। 6 - 4 - 77 ।।

इश्च उश्च यु, तयोर्य्वोः । ह्रस्वयोरिदं ग्रहणम्, दीर्घयोरपि तु कार्यं भवति सवर्णग्रहणात् । य्वोरिति वर्णग्रहणात्ताभ्यां शन्वादीनां तदन्तविधिः । तत्र निर्द्दिश्यमानस्यादेशा भवन्ति इत्येवान्तस्य सिद्धेर्ङकारो विस्पष्टार्थः । आप्नुवन्तीत्यादि । यत्संयोगपूर्वमेकाच् तदिहोदाहरणम्, अन्यत्र हुश्नुवोः सार्वधातुके, एरनेकाचः इति यणा भाव्यम् । लुलुवतुरित्यादिकं तु भवत्येव ओः सुपिः इति वचनात् ।
इयङ्भ्यामिति । गुणवृद्ध्योरवकाशः - चेता, गौः, इयङुवङोरवकाशः - चिक्षियतुः लुलुवतुः, चयनम्, चायकः लवनम्, लावक इत्यत्रोभयप्रसंगे विप्रतिषेधः ।
तनुवमिति । अधातुत्वादप्राप्त उवङ् विधीयते । तन्वमिति । वा छन्दसि इत्यमि पूर्वत्वाभावे यण् । विष्वमिति । विषुव इति - सत्सूद्विष इति क्विप् । अत्र नित्यम् ओः सुपि इत्यनेन यण् प्राप्तः । स्वर्गादिषु
यजुर्वेदे - इयङुवङौ, बह्वृचे - यण् ।।

अभ्यासस्यासवर्णे ।। 6 - 4 - 78 ।।

पूर्वमङ्गस्याजादौ प्रत्यये विधानादिदमारभ्यते । इयेषेति । अत्र गुणस्य स्थानिवद्भावविषये यद्वक्तव्यं तद् द्विर्वचनेऽचि इत्यत्रोक्तम् ।।

स्त्रियाः ।। 6 - 4 - 79 ।।

स्त्री इत्येतस्येति । स्त्रीप्रत्ययान्तानां स्त्र्यर्थवृर्त्तर्वा शब्दस्य ग्रहणं न भवति आण्नद्या, कुमार्या वयसि इत्यादिनिर्देशात् । उत्तरार्थमिति । उत्तरत्र स्त्रियाः एवानुवृत्तिर्यर्था स्यात्, श्नुधातुभ्रुवां मा भूत् ।।

इणो यण् ।। 6 - 4 - 81 ।।

अत्र सूत्रार्थकथनानन्तरं क्वचित्पठ्यते - अन्तरङ्गत्वात् इको यणचि इति सिद्धे समानाश्रये वार्णादाङ्गं बलीयः इति ज्ञापनार्थ वचनम् इति, तदयुक्तम् इयङादेशापवादोऽयम् इति वक्ष्यति, तत्कथमियङ्विषये यण्प्रवर्त्तते । इयङादेशापवादोऽयमिति । इयङ्गादेशस्यैवापवाद इत्यर्थः । कुतः इत्याह मध्येऽपवादा इति । एवं सति यदिष्टं सिद्धम्, तद्दर्शयति - गुथणवृद्धिभ्यमिति । यदि तु नाप्राप्ते विध्यन्तरे आरम्भात्सर्वमेव विध्यन्तरं यण्बाधेत, गुणवृद्धिवषयेऽपि स्यत् । अथ इणो न इत्येव कस्मान्नोक्तम् इयङादेशे हि
प्रतिषिद्धे इको यणचि इत्येव यणभविष्यति अहो सूक्ष्मदर्शी देवानांपियः, यदिदमपि न दृष्टम् - ईयिव, ईयिम, कर्मणि ईयिरे, अत्रेयङि प्रतिषिद्धे सर्वर्णदीर्घः स्यात् । तस्माद्यणेव विधेयः ।।

एरनेकाचोऽसंयोगपूर्वस्य ।। 6 - 4 - 82 ।।

तेन संयोगो विशेष्यते इति । यद्यप्यन्यपदार्थं प्रति गुणभूतः संयोगः, तथापि स एव विशेष्यते धातोः इत्यनुवृत्तस्य प्रयोजनान्तराभावात् । अस्तीदं प्रयोजनम् - इवर्णं विशेषयिष्यामीति नैतदस्ति यद्यधातोरिवर्णोऽसंयोगपूर्वः, भवितव्यमेव तस्य यणा इको यणचि इति, तद्यथा - कुमार्थौ, कुमार्य इति । ननु ग्रहमणीवदधातोः पूर्वसवर्णं बाधित्वा यण् मा भूदिति धातुनैवेवर्णो विशेषणीयः नेत्याहः इयङ्बाधनार्थो यण् । न च धातोरियङः प्रसङ्गोऽस्ति, तत्कथमधातुनिवृत्त्यर्थो धात्वनुवृत्तिरुपद्यते, तस्मात्सुष्ठूक्तम् - गुणभूत एव संयोगो विशेष्यत इति ।

अङ्गविशेषणं मा भूदिति । अन्यथाधिकारेण सन्निहितस्य तस्यैव विशेषणं स्यादसंयोगपूर्वग्रहणम्, ततश्च यवक्रियौ, यषक्रियः - इत्यत्रापि प्रसध्येत, न ह्यत्राङ्गस्य संयोगः पूर्वोऽवयव इति । ननु च य्वोरिति प्रकृतम् , तत्र एरित्यनुच्यमाने ओरपि यण् स्यात् - लुलुवतुरित्यादौ, ततश्च तन्निवृत्त्यर्थमपि स्यात् इत्यत आह
लुलुवलुर्ल्लवुरित्येतत्त्विति । इह एरित्यनुच्यमानेनैवौ रपिसिद्धत्वाद् ओः सुपि इत्येतन्नियमार्थं भवति - ओः सुप्येवेति । वपरीतस्तु नियमो न भवतिओरेव सुपीति न भूसुधीयोः इति यण्प्रतिषेधात् । ततश्चास्तमादेव नियमाल्लुलुवुरित्यादौ सिद्धत्वादेरित्येतदोर्मिवृत्त्यर्थं नोपपद्यते इति पूर्वोक्तमेव प्रयोजनम् । यदि त्वसंयोगपूर्वयोरिति द्विवचननिर्देशेन य्वोरेवैतद्विशेषणमुच्येत, तर्ह्योरिति शक्यमकर्तुम् । इहापि न स्यादिति । यदि धातुना संयोगो न स्यादिति । यदि धातुना संयोगो न विशेष्येतेति भावः । क्वचिद् इहापि यथा स्यादिति पाठः, तत्र प्रकृतत्वाद्यणादेश इत्यर्थः ।गतिकारकाभ्यामित्यादि । इष्टिरेवैषा । परमनियाविति । भावे कर्त्तरि वा क्विप् ।।
ओः सुपि ।। 6 - 4 - 83 ।।
सकृल्ल्वाविति । क्रियाविशेषणत्वात् सकृदित्यस्य कारकत्वम् ।
कटप्रुवाविति । क्विब्वचि इत्यादिना क्विप्, दीर्घश्च ।।
वर्षाभ्वश्च ।। 6 - 4 - 84 ।।
न भूसुधियोः इति प्रतिषेधे प्राप्ते वचनम् ।
पुनर्भ्वश्चेत्यादि । एवं च पुनर्वर्षारिषु भुवः इति सूत्रन्यासः ।
न भूसुधियोः ।। 6 - 4 - 85 ।।
भूशब्देन तदन्तस्य ग्रहणम् केवलस्य यण्प्राप्त्यभावात् ।
न चोवङः प्रतिषेधः, विच्छिन्नत्वात्, वर्षाभ्वश्च इत्यारम्भाच्च । सुधियाविति । ध्यायतेः क्विप, दृशग्रहणात्सम्प्रसारणम् ।।
हुश्नुवोः सार्वधातुक् ।। 6 - 4 - 87 ।।
अनेकाचः, असंयोगपूर्वस्य, ओरिति चानुवर्त्तते । यद्यपि हुश्नुवोरुवर्णान्तत्वमब्यभिचारि, तथाप्यसंयोगपूर्वग्रहणमोविशेषणं यथा स्यात्, हुश्नुवोर्मा भूदित्येवमर्थमनुवर्त्यमोरित्येतत् । हुश्नुवोर्विशेषणे हि तक्ष्णुवन्तीत्यादावेव प्रतिषेधादाप्नुवन्तीत्यादौ न स्यात्, तत्र श्नुप्रत्ययान्तस्यसंयोगापूर्वस्योति व्यधिकरणे षष्ठ्यौ । स्नुप्रत्ययान्तस्याङ्गस्यावयोवोऽसंयोगपूर्वो य उकारस्तस्वत्यर्थः । अनेकाचः इति त्वङ्गेन समानाधिकरणेमेव, सार्वधातुकग्रहणं जुहोत्यर्थम्, न शन्वर्थम् अव्यभिचारात् । जुह्वतीति । अदभ्यस्तात् । जुह्वदिति । नाभ्यस्ताच्छतुः इति नुम्प्रतिषेधः ।
योयुवति, रोरुवतीति । यु रु - इत्येताभ्यां यङ्लुगन्ताभ्यां लटि पूर्वत् झेरद्भावः ।
इदमेवेत्यादि । एतच्च यङोऽचि च चित्यत्र छन्दोऽनुवृत्तिमाश्रित्योक्तम् । अयादित्यस्तु तत्र छन्दोऽनवृत्तिं नाशिश्रियत् । कथं पुनरेतज्ज्ञापकम् इत्याह - छन्दसि हीति । छन्दसि यङ्लुगन्तनिवृत्तथ हुश्नुगर्हणं न भवति ततः परस्य तिङ आर्धधातुकत्वात् । यणादेशस्याप्रसङ्गादित्यर्थः । तथा चात्र वार्त्तिकम् - यङ्लुगर्थमिति चेदार्घघातुकत्वात्सिद्धम् इति । स्यादेतत् - यङ्लुगन्तादन्यव्द्यावर्त्य भविष्यति, अतो न ज्ञापकं हुश्नुगर्हणमिति अत आह - न चेति । असंयोगपूर्वमिति । असंयोगपूर्वोवर्णान्तमित्यर्थः । अत्र ओस्त्यिनुवृत्तेः - मिमते इत्यादौ न भविष्यति, अनेकाचः इत्यनुवृत्तेर्थुवन्तीत्यादौ । अयुवन्, थअरुवन्नित्यत्राप्यटोऽसिद्धत्वादेकाच्त्वमेव । असंयोगपूर्वस्येत्यनुवृत्तेः प्रोर्णुवन्तील्यत्र न भविष्यति । तन्वन्तीत्यादौ च भवितिव्यमेव यणा । तस्माद्यङ्लुगन्तादन्यद् व्यावर्त्त्यं न सम्भवति । आह च - हुश्नुग्रहणमनर्थकमन्यस्याभावादिति ।।
भुवो वुग्लुङ्लिटोः ।। 6 - 4 - 88 ।।
अभूवन्निति । गातिस्था इत्यादिना सिचो लुक् । अभूवमिति । मिपोऽमभावः । लुङ्लिटोरिति किम् भवति, भविष्यति - शप्स्ययोर्न भवति । यदी क्ङितीत्यनुवर्तिष्यते, अभूवमित्यत्रापि तर्हि न स्यात् एवं तर्ह्यारित्यनुवर्तिष्यते, गुणे कृते अनुवर्णान्तत्वान्न भविष्यति, अभूवमित्यत्र भूसुवोस्तिङि इति गुथणप्रतिषेधादुवर्णान्तत्वम् । नात्र शक्यमोरित्यनुवर्तयितुम् । एतच्च इन्धीभवतिभ्यां च इत्यत्र विश्तरेणोक्तम् ।।
ऊदुधाया गोहः ।। 6 - 4 - 89 ।।
उदाहरणेषु णिच्, ण्वुल्, तणनिः आभीक्ष्ण्ये णमुल्, घञ् - इत्येते प्रत्ययाः । सर्वत्र गुणे कृते ओकारस्य ऊकारः ।
उपधाया इति किमिति । ओः इत्युनुवृत्तेरेवोकारस्य भविष्यति, स चोपधैवेति प्रश्नः । ननु च ओरित्युच्यते, न चास्योपधोकारः सम्भवति ओरित्यनुवृत्तिसामर्थ्याद् गोहः थइति विषयोपलक्षणं भविष्यति, न तु
कृतगुणप्रतिपत्त्यर्थम् । तअन्तयस्य मा भूदिति । नोपलक्षणत्वे प्रमाणमस्ति, ततश्चासम्भावदोरित्यस्य निवृत्तरार्थमप्यवश्यमुपधागर्हणं कर्त्तव्यमिति भावः ।
विकृतग्रहणं विषयनियमार्थमिति । गुह थइत्युच्यमाने धातुनिर्देशोऽयं भवति, ततश्च क्ङिद्विषयेऽपि तत्स्वरुपप्रयुक्तमूत्वं स्यात् । तस्मादूत्वस्य विशिष्टो विषयो निर्दिष्टो यथा स्यादिति विकृतसाय कृतगुणस्य ग्रहणं कृतम् । वेषयार्थतां स्पष्टयति - यत्रेति । गुणविषये यथा स्यादित्यर्थः । अयादेशप्रतिवेधार्थ च केचिदिच्छन्तीत्यादि । पूर्वविषयावधारणे तातपर्यमित्युक्तम्, तच्चाक्ङितीत्युच्यमाने सिद्ध्यति । लाघवार्थ तु गह इत्युक्तम् , तच्च कालावधारणार्थमप्यर्थाद्भवति, गुणोत्तरकालमूत्वमिति । इदानीं तूभायत्रापि तात्पर्यमित्युक्तं भवति । गुणविषये भवति - तत्रापि कृते गुणे इति । यदि हि प्रगेवांगुणादूत्वं स्यात्, तदा ल्यपि लघुपूर्वात् इत्यादेशे तस्यासिद्ध्त्वाल्लघुपूर्वो हकार इत्ययादेशः स्यात । यदा तु गुणो कृते तस्य स्थाने ऊत्वम्, तदा

तस्यासिद्धत्वेऽप्योकारस्य गुरुत्वादयादेशाभावः सिद्ध्यतीति । तदेतद् दूषयति - व्याश्रयत्वादिति
। कथं व्याश्रयत्वमित्याह - णावूत्वमिति ।

दोषो णौ ।। 6 - 4 - 90 ।।

किरमर्थं दुषेर्विकृत्स्य ग्रहणं क्रियते, न दुषः इत्येवोच्येत विषयार्थमिति चेत् न णाविति विषयस्य साक्षान्निर्द्देशात् । प्रदूष्य गत इत्यादावयादेशप्रतिषेदार्थमिति चेत् न दत्तोत्तरत्वात् । उक्तोत्तरमेतेत - व्याश्रयत्वादसिद्धत्वं नास्तीति । तस्माद् दुषः इत्येव वक्तव्यम्, अत आह - विकृतग्रहणमिति । क्रमः - प्रस्तावः, प्रकरणमित्यर्थः ।।

वा चित्तविरागे ।। 6 - 4 - 91 ।।

चित्तविरागः - चित्तस्याप्रीतता । प्राप्तविभाषेयम् ।

णावित्येव - चित्तस्य दोषः ।।

मितां ह्रस्वः ।। 6 - 4 - 92 ।।

रजयतीति । रञ्जोर्णौ मृगरमण उपसङ्ख्यानम् इत्युपधालोपः ।।

चिण्णमुलोर्दीर्धोऽन्यतरस्याम् ।। 6 - 4 - 93 ।।

न ह्रस्वविकल्प एव विधीयेतेति । एवमपि ह्रस्वपक्षे अशमीति सिध्यति, पक्षान्तरे अशामीति यथाप्राप्तं दीर्घ एवाषस्थास्यत इति भावः । शमयन्तं प्रयुंक्ते इति । यद्यपि चिण्विषये कर्म प्रदर्शनीयं भूतकालश्च, तथापि णिजुत्पत्तये हेतुव्यापारमात्रप्रदर्शनमत्र विवक्षितम्, न कर्त्ता नापि वर्तमानः काल तइति न दोषः ।

णिलोपस्य स्थानिवद्भावादिति । स्थानिवद्भावे हि सति यश्चिण्णमुल्परो णिः न तस्मिन्मिदङ्गम्, पूर्वेण णिचा व्यावधानात् यर्स्मिश्च मिदङ्गं न स चिण्णमुल्परः, परेण णिचा व्यावधानात् ततश्च ह्रस्वविकल्पो न स्यात्, पूर्वेथण नित्यमेव तु ह्रस्वः स्यात् । ननु दीर्घविकल्पेऽपि यावता स्थानिवद्भावः, कथमिवैतत् सिद्ध्यति तत्राह - दीर्घविधौ त्विति । न पदान्तद्विर्वचन इत्यादिना स्थानिवद्भावप्रतिषेधाद्दीर्घविकल्पस्यायं विषय एवेत्यर्थः । तथेत्यादि । अत्र दीर्घविधौ त्वजादेशो न स्थानिवद्भावतीत्यनुषङ्गः । शमेर्यङ्, द्विर्वचनम्, नुक्, णिच्यतो लोपः यस्य हल, तशंशमि इति स्थिते - यदा ततश्चिण्णमुलौ भवतः, तदा दीर्घविकल्पः सिध्यति अजादेशस्य स्थानिवत्त्वाभावादित्यर्थः ।

एतदेव स्पष्टयति - योऽसाविति । यश्च यङ्कार इति । णौ लुप्यत थइत्युनषङ्गः । एवं तावद्दीर्घविधौ त्वजादेशो न स्थानिव्ध्बवतीत्येत्तस्पष्टीकृतम् । णिलोपस्य स्थानिवद्भावाद् ह्रस्वविक्लपो न स्यात् िति यदुक्तम्, तत्समार्थयते - ह्रस्वविकल्पे त्विति । णेर्णिः णिणिः, सोऽन्तो यस्य स णिण्यन्तः । एतेन यङ्ण्यन्ते इति व्याख्यातम् ।

असिद्धिरेवेति । कस्य प्रकृतत्वाद्दीर्घस्य, एवकारेण तुशब्देन चैतद्दर्शयति । णिचमाश्रित्य वृद्धिविधानादस्ति दीर्घस्य शङ्का, णिलोपस्य तु स्थानिवद्भावादयं विकल्पो न स्यादित्येव दोषः । यङ्ण्यन्ते तु भवतु नामायं विकल्पः, तथापि पक्षे दीर्घस्य श्रवणं न सिध्यति तणिचमपेक्ष्य वृद्धौ कर्त्तव्यायामतो लोपस्य स्थानिवद्भावाद्, दीर्घस्यानुन्मेषादिति ।

स्यादेत्त - दीर्घविकल्पे विधीयमाने यदि नाम स्थानिवद्भावो नास्ति, तथापि नैवात्र दीर्घः सिध्यति, असिद्धवदत्राभात् इति णियङोर्लोपस्यासिद्धत्वादिति अत थआह - व्याश्रयत्वादिति । व्याश्रयत्वमेव दर्शयति - णौ हीत्यादि । किञ्च - हेड वेष्टने घटादिः, तस्य ह्रस्वाभावपक्षे अहेडीति स्यात्, दीर्घे तु ह्रस्वस्य कृते - अहीडीति भवति । तस्मादतोऽपि हेतोर्दीर्घ एव विकल्पनीयः ।।

ह्लादो निष्ठायाम् ।। 6 - 4 - 95 ।।

ह्लादी सुखे च, ईदित्वान्निष्ठायामनिट् । क्वचित्पठ्यतेह्लाद इति योगविभागः क्रियते, क्तिन्यपि यथा स्यात् प्रल्हत्तिरिति । माष्ये तु नैतद्दृष्टम् ।।

छादेर्घेऽद्व्युपसर्गस्य ।। 6 - 4 - 96 ।।

उरश्छद इति । छद आवरणे, चुरादिणिच्, पुंसि संज्ञायाम् िति करणे घः, कर्मणि षष्ठ्या समासः । ननु चात्र घे परतो ण्यन्तमङ्गं तस्योपधादकारः, न च सं ह्रस्वभाविनी । न च शख्यं वक्तुम् - णिलोपे कृते
आकारो ह्रस्वभाविन्युपधेति णिलोपस्य असिद्धवदत्रा भात् तइत्यसिद्धत्वाद् अचः परस्मिन् इति स्थानिवद्भावाच्च । अत आह - णिलोपस्य चेति । अपर आह - णाविति वर्त्तते, धे परतो यो णिस्तत्र यदङ्गं तस्योपधाया ह्रस्वः । छादेः इति चेका निर्द्देशः, न णिचा इति ।

ननु यत्र त्रिप्रभृतयः सन्ति, द्वावपि तत्र स्तः, ततश्च अद्व्युपसर्गस्य इत्येव सिद्धम्, किं सूत्रशिक्षया अत आह - उत्तरा हीति । एतदेव लोकव्यवहारेथण द्रढयति - न हीति ।

इस्मन्त्रन्विवषु च ।। आर्चिशुचिहुसृपिच्छदिछर्दिभ्य इसिः इतीसिप्रत्ययः । मनिन् सर्वधातुभ्यः । ष्ट्रन् सर्वधातुभ्यः । योगविभागाद् द्विप्रभृत्युपसर्गादपि भवति - समुपच्छदिः ।।

गमहनजनखनधसां लोपः क्ङित्यनङि ।। 6 - 4 - 98 ।।

जध्नतिरिति । अभ्यासाच्च इति कुत्वम् । जज्ञतुरिति । जन जनने परस्मैपदी जौरोत्यादिकः, नकारस्य चुत्वम् । जज्ञ इति । जनी प्रदुर्भावे अनुदात्तेत् दैवादिकः । जक्षतुरिति । लिट्यन्यतरस्याम् इत्यदेर्घस्लादेशः, घकारस्य चर्त्वम्, शासिवसिघसीतनां च इति षत्वम् । अक्षन्निति । लुङ्सनोर्घस्लृ मन्त्रे घस

इति च्लेलुक् ।

अचीत्येवेति । अचि श्नुधातु इत्यतः । तस्य तु दोषो णौ इत्यत आरभ्योपयोगो न प्रदर्शितः, क्वचिद्व्यभिचाराभावात्, क्वचिदसंभावात् । इह तूपयोगः तथा चोत्तरसूत्रे हलि च इति वक्ष्यति ।।

तनिपत्योश्छन्दसि ।। 6 - 4 - 99 ।।

वितत्निर इति । लोपविधानसामर्थ्यादसिद्धत्वेऽपि तस्य अत एकहल्मध्ये इत्येत्वाभ्यासलोपौ न भवतः । पप्तिमेति । लिट्, मस्, इट् ।।

घसिभसोर्हलि च ।। 6 - 4 - 100 ।।

सूत्रे चकारस्य पाठोऽनार्षः । तथा च वार्त्तिकम् - हल्ग्रहणमपरिभाष्यम्, अन्यत्रापि दर्शनात् इति ।

तथा न क्रियत ििति । यदि क्रियेत, अनच्कत्वाद् द्विर्वचनं न स्यादिति भावः । पूर्वत्र अचीत्यधिकारादिह हलीत्युक्तम्, तदुपादानाद् - अचि न स्यादिति चकारेण समुच्चयः ।

यदि पूर्ववैवाचीत्यनुवर्त्तते, नैह इत्युच्येत, ततः हलि च इति शक्यमकर्त्तुम्, उत्तरार्थ तु तत्क्रतम् ।।

हुझल्भ्यो हेर्धिः ।। 6 - 4 - 101 ।।

हलादेरिति । हुझल्भ्यः इति पञ्चम्या हलीति सप्तम्याः षष्ठी प्रकल्प्यते इति भावः । यद्येवम्, यस्मिन्विधिः ित्यस्याभावात्तदादिविधिर्न स्यात् हलीत्यनुवृत्तिसामर्थ्याद्धलन्तत्वाभावाच्च भविष्यति । भिन्धीति । श्नसोरलोपः । प्रीणीहीति । ई हल्यघोः । लोटो लङ्वत् । जुहुतामिति । तसस्ताम् । रुदिहीति । शब्दान्तरप्रात्या द्वयोरप्यनित्ययोः परत्वादिटि कृते पुनर्द्वित्वप्रसङ्गः ।

इहेत्यादि । धित्वस्यावकारशोऽनाशिषि - जुहुधीति, तातङोऽवकाशो हुझल्भ्योऽन्यः - जीवतात्त्वमिति, आशिषि हुझल्भ्यस्तूभयप्रसङ्गे परत्वात्तातङ् । अथ कृतेऽपि तस्मिन् स्थानिवद्भावाद्धित्वं कस्मान्न भवति तत्राह - तत्र कुते इति । भिन्धकि, छिन्धकीत्यत्रापि तर्हि परत्वेन धित्वे कृते अकज्न स्यात् इत्यत आह - भिन्धीकिति । अपर आह - स्थान्यादेशयोर्द्वयोरपीकार उच्चारणार्थः, तहकारस्य धकार आदेशः, हलीत्यपि नानुवर्त्त्यमम्, न क्वाप्यनिष्टप्रसङ्गः इति ।।

श्रुश्रृणुपृकृवृभ्यश्छन्दसि ।। 6 - 4 - 102 ।।

उरुकृदुरुणस्कृधीति । नश्च धातुस्थोरुषुभ्यः इति णत्वम्, कः करत् इति विसर्जनीयस्य सत्वम् ।

अन्यषामपि दृश्यत इति । दीर्घत्वमिति । न केवलं श्रृणुधी गिर इत्यत्र, श्रुधी हवम्, अपावृधीत्यत्राप्यनेनैव दीर्घत्वम् । अतोऽन्यत्रेति । श्रृणुधीत्यतोऽन्यषु सर्वोदाहरणेषु ।।

अङितश्च ।। 6 - 4 - 103 ।।

मलोपाभावस्त्विति । अनुदात्तोपदेश तइत्यादिना यो मलोपस्तस्याभावः । अङित्वादेवेति । नासौ यत्नसाध्य इत्येवश्बदार्थः । यमेः शपो लुगिति । वहुलं छन्दसि इत्येव । एवमुत्तरत्रापि ।।

चिणो लुक् ।। 6 - 4 - 104 ।।

चिण इति पञ्चमी, न षष्ठी विधानसामर्थ्यात् । प्रत्ययस्येति । प्रत्ययस्य लुक्शलुलुपः, इति वचनादङ्गाधिकाराच्चैतल्लभ्यते । तेनाकारितरामिति तश्बदस्य तरप आमश्च यः सङ्घातस्तस्य युगपल्लुग्न भवति प्रत्येकं प्रत्ययत्वेऽपि सङ्घातोऽप्रत्ययो ह्ययम् ।

ननु चेदमस्मिन्नसिद्धमिति भेदनिबन्धनो विषयविषयिभावः, तत्कथं चिणो लुक्चिणो लुक्येवासिद्धो भवति अत तआह - चिणो लुगित्येतदिति । अथ वा - क्ङिति इति वर्तते, चिणः इति पञ्चमी तस्य षष्ठी प्रकल्पयिष्यति, तेन क्ङितः प्रत्यस्य लुग्विधीयमानस्तरपो न भविष्यति ।।

अतो हेः ।। 6 - 4 - 105 ।।

गच्छेति । इषुगमियमां छः । धावेति । धावु गातिशुध्योः, पाध्नादिसूत्रेण सर्त्तेर्धावादेशः ।

लुनीहीति । प्वादीनां ह्रस्वः ई हल्यघोः । ननु चात्रानवर्णान्तत्वादेष न भविष्यति, ईत्वमेव हि परत्वाद्भवति तत्राह - इत्वस्येति । नन्वेवमप्युत्तरसूत्रे उतः, प्रत्ययात् इति यदुपात्तमुपाधिद्वयं तस्मादेवात्र प्रत्युदाहरणद्वयेऽपि न भविष्यति । यदि च लुनीहीत्यत्र परत्वादीत्वं भवति, ततोऽसिद्धत्वं नास्ति, विप्रतिषेधविषये तदभावस्योक्तत्वात् । तस्मादत इत्यस्य इहि, अधीहीति प्रत्युदाहरणम्, तपरकरणस्य - याहि, वाहिति ।।

उतश्च प्रत्ययादसंयोगपूर्वात् ।। 6 - 4 - 106 ।।

उतः, प्रत्ययात् - इत्यनयोर्विशेषणविशेष्यभावे कामचारः । तत्र
उकारस्य विशेष्यत्वात् तेन नास्ति तदन्तता ।
न सम्भवति चोकारः प्रत्ययान्तो यदा पुनः ।।
विशेष्यते उकारेण प्रत्ययस्तत्तदन्तता ।
आश्रीयते प्रत्ययस्य तत्पक्षद्वयसम्भवः ।।

तत्राद्ये पक्षे तनु, कुरु - इत्यादावेव स्यात् सुनु, चिनु - इत्यादौ तु न स्यात् । तथा उकारस्य प्रत्ययस्चासंयोगपूर्वत्वादसंयोगपूर्वग्रहणमस्मिन्पक्षे अङ्गविशेषणं विज्ञायेत, ततश्च क्षिणु इत्यादौ न स्यात्, क्षिणु हिंसायाम् तानादिकः, अत्र धातोर्गुणो न भवतीत्याहुः । तस्मादुकारो विशेषणम्, तेन तदन्तविधिः । यद्येवम्, तनु, कुरु - अत्र न प्राप्नोति, इकार एवात्र प्रत्ययो न तदन्तः अत्रापि तदन्तः कथम् व्यपदेशिवद्भावात् । एवं स्थिते -

यद्यसंयोगपूर्वत्वमुकारान्तविशेषणम् ।
आप्नुहीत्यत्र हेर्लुक्स्यात्प्रतिषेधस्तु तकृष्णुहि ।
तस्मादिविशेषाणमिदमुकारस्यैव गृह्यताम् ।।
ननु च येन विधिस्तदन्तस्य इति उकारस्तदन्तस्य संज्ञा, ततः किम्
संज्ञिप्रत्यायनपरा संज्ञा तस्या विशेषणम् ।
अयुक्तमिति चेदत्र समाधिरभिधीयते ।
विशेषणं तदन्तस्य संज्ञा, सत्यम्, तथापि तु ।
विशेषणत्वस्फुरथणात् प्रागेवोतो विशेषणम् ।
प्रत्ययस्येति, नैवेह किञ्चिदस्ति तिरोहितम् ।।

तदिदमुक्तम् - योऽयमुकारोऽसंयोगपूर्वस्तदन्तातप्रत्ययादिति । युहि, रुहीति । ननु जुहोतेः परस्य हेर्धित्वविधानादेव धातोः परस्य न भविष्यति सत्यम् विशिष्टविषयमेतज्ज्ञापकं स्यादिति प्रत्ययग्रहणम् । छन्दसि वेति च वक्तव्यमिति । एवं च कृत्वोत्तरसूत्रेऽन्यतरस्यांग्रहणं न कर्त्तव्यं भवति ।।

लोपश्चास्यान्यतरस्यां म्वोः ।। 6 - 4 - 107 ।।

अस्येत्यनेनोकारान्तः प्रत्ययः प्रत्यवमृश्यते । अस्येत्यनुच्यमाने म्वोः इति षष्ठ्याश्रयणे न म्वोरेव लोपो विज्ञायेत । एवं च उतश्च प्रत्ययादसंयोगपूर्वात् इति पञ्चमी न बाधिता भवति । लुगिति वर्त्तमाने इत्यादि । यदि हि प्रकृत एव लुक् क्रियेत, सर्वस्यैव प्रत्ययस्य स्यात् । लुगादयः सर्वादेशः िति संज्ञाविधाववोचाम् ।

सर्वस्य लोपे कृते सुन्वः, सुनुव इति न सिध्येत् । तस्मादन्त्यस्य लोपार्थं लोपग्रहणम् । किञ्च - कुर्वः , कुर्म इत्यत्र लुकि सति गुणो न स्यात् न लुमताङ्गस्य इति प्रतिषेधात् । लोपे तु सति भवति ।।

नित्यं करोतेः ।। 6 - 4 - 108 ।।

करोतेरुप्रत्ययान्तस्येति । उतश्च प्रत्ययाद् इत्यनुवृत्तेर्लभ्यते । उकारलोपस्येत्यादिना सोपपत्तिकां दीर्घप्रप्तिमनूद्य प्रतिषेधं दर्शयति ।
आरम्भसामर्थ्यादेव सिद्धे नित्यग्रहणं विस्पष्टार्थम् ।।

अत उत्सार्वधातुके ।। 6 - 4 - 110 ।।

करोतेरुप्रत्ययान्तस्येति । उतश्च प्रत्ययात् इत्यनुवृत्तेर्लभ्यते ।

सार्वधातुक इति किमिति । सत्यपि सार्वधातुकग्रहखणे स्यतास्यान्तस्य प्रसङ्गकरिष्यावः, कर्त्ताराविति स्यातासिभ्यां व्यवधानान्न भविष्यति । कुरुते - ित्यत्रापि तर्ह्युप्रत्ययेन व्यवधानान्न स्यात् । स्मात्सार्वधातुके परतः करोतेरङ्गस्येत्यर्थसम्भावात्सार्वधातुके परतो यदङ्गं तदवयवस्य करोतेरित्याश्रयणीयम् । एवं च स्यतास्यन्तस्यापि प्रसङ्ग इति । उतश्च प्रत्ययात् इत्यवश्यमनुवर्त्त्यम्, उप्रत्ययान्तात्करोतेः परं क्ङित्सार्वधातुकमेवेति प्रशनः । भूतपूर्वेऽपीति । करु - हि इति स्थिते उत्वं च प्राप्नोति, हिलुक्च, नित्यत्वाद्धिलुकि कृते क्ङितः परस्याभावादुत्वं न स्यात् । प्रत्यात् । प्रत्ययलक्षणं च न लुमताङ्गस्य इति प्रतिषिद्धम् । तस्माद् भूतपूर्वेऽपि सार्वधातुके यथा स्यादिति सार्वधातुकग्रहणम् । आसिद्धो हिलुक्, तस्यासिद्धत्वादुत्वं भविष्यति । तस्माद्विस्पष्यार्थं सार्वधातुकग्रहणम् । यथा पुरस्योत्तरत्राप्युपयोगाभावः, तथा तत्र तत्र वक्ष्यते ।

इह यद्यपि भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति, तथाप्यान्तर्यतो मात्रिकस्यातो मात्रिक तउकार एव भविष्यति, नार्थस्तकारेण तत्राह - तपरकरथखणमिति । थअसति हि तस्मिन्नुप्रत्ययमाश्रित्योकारस्य लघूपधलक्षणो गुणः स्यात्, स मा भूदिति तपरकरणम् । तस्य हि प्रयोजनम् - लक्षणान्तरेणापि दीर्घो मा भूत् ।।

श्नसोरंल्लोप ।। 6 - 4 - 111 ।।

तपरकरणं किम् आटो मा भूत् - आस्ताम्, आसन्, असिद्ध आट् । एवं तर्ह्याभीभीयस्यासिद्धत्वमनित्यमिति ज्ञापनार्थं तपरकरणम् । अथात्र सार्वधातुकाधिकारस्योपयोगः नेत्याह । श्नः सार्वधातुक एव, अस्तेरप्यार्द्धधातुके भूभावेन भाव्यम् । नन्वनुप्रयोगे भूभावो नास्ति - ईहामासुः सत्यम् तत्र द्विर्वचने हलादिशेषे च कृते येननाप्राप्तिन्यायेन अतो गुणे इति पररुपं बाधित्वा अत आदेः इति दीर्घत्वे कृते परस्याकारस्य सण्पि लोपे सिद्धमिष्टम् ।।

श्नाभ्यस्तयोरातः ।। 6 - 4 - 112 ।।

लुनत इति । लट्, आत्मनेपदेष्वनतः इति झस्यादादेशः । लुनतामिति । लोटि आमेतः । अलुनतेति । लङ् । मिमते इत्यादौ भृञामित् इतीत्वम् ।
यान्ति, वान्तीति । असति हि श्नाभ्यस्तग्रहणे अतो गुणे इत्यत्र तपरकरण्सय यानमित्यादावक्ङिति चारितार्थत्वादिह लोप एव स्यादिति भावः ।
अलुनादिति । अत्तरसूत्रे क्ङितीत्यस्य सम्बन्धः स्थित एवेति नायमीत्वस्य विषयः । इकहाकारणाभ्यस्तविषेषणादाकारान्तस्य लोपो जाग्रतीत्यत्र न भवति । तत्र निर्दिश्यमानस्यादेशाः इति वा अलोऽन्त्यस्य ििति वा आकारस्यैव लोप इत्यादि मत्वा व्याख्यातम् - श्न इत्येतस्याभ्यस्तानां चाकारस्यैति । आकारान्तानाम् इति तु व्याख्येयम् । अत्रापि आ सार्वधातुक एव सम्भवति । एवमभ्यस्तमप्याकारान्तम् । ववतुरित्यादौ भवत्येव लोपः ।।

ई हल्यधोः ।। 6 - 4 - 113 ।।

लुनन्तीति । असति हल्ग्रहणे ईत्वलोपयोः पर्यायः स्यात् एकविषयत्वात् । घुसंज्ञकेष्वेव वा लोपः स्यात् । अत्रापि पूर्ववत् सार्वधातुकमेव सम्भवति ।।

इद्दरिद्रस्य ।। 6 - 4 - 114 ।।

इदमपि सार्वधातुक एव अन्यत्र लोपविधानात् । सिद्धस्त्वति । यथा प्रत्ययविधौ प्रत्ययविधानकाल थएव सिद्धो भवति, तथा लोपः कर्त्तव्यः, आर्धधातुके तइति वष्यसप्तम्याश्रयणीयेति भावः ।

आकारान्तलक्षण इति । आर्धधातुके इति परसप्तम्यां तस्योत्पत्तिं प्रतीक्ष्य लोपः कर्त्तव्यः, ततश्च स्यावृद्य ित्याकारान्तलक्षणो णप्रत्ययः स्यात्, तत्र कृतेऽनेन लोपश्च प्राप्नोति युक्च, तत्र लोपस्य शब्दान्तरप्राप्त्याऽनित्यत्वम् , युकस्तु लोपे कृतेऽप्राप्तिः, ततश्च उभयोरप्यनित्ययोः परत्वाद्युक् स्यात् । अथापि
लोपः स्यात्, एवमपि अदरिद्र तइत्यत्र अच्कावशक्तौ इत्येव स्वरो न स्यात् । ईषद्दरिद्रमित्यत्र च आचो युच् इति युच् स्यात् ।

दरिद्रायक् इति । ण्वुलि, युक् । दरिद्राण इति । ल्युट् । दिदरिद्रासतीति । तनिपतिदरिद्राणामुपसंख्यानम् इति व्यवस्थितविभाषा, तेन लोपपक्षे इट् । अन्यत्रेडभावः ।

अद्यतन्यामिति । लुङ एषा पूर्वाचार्यसंज्ञा । अदरिद्रासीदिति । यमरमनमातां सक्च इति । एकाचः इति तत्रानुवर्त्तत इत्येकीयं मतम् । चिणि - अदरितिद्रि, तअदरिद्रायि । णलि - ददरिद्रौ । छान्दस ह्रस्वत्वमिति । अन्यथा आतो धातोः इति लोपे दरिद्र इति निर्द्देशः स्यात ।।

भियोऽन्यतरस्यम् ।। 6 - 4 - 115 ।।

हलादौ क्ङिति सार्वधातुक इति । नैतेषामत्रोपयोगः, तथा च प्रत्युदाहरणं न प्रदर्शितम् । थथा हि - उजादावप्यस्तु बिभ्यतीति, एरनेकाचः इति ह्रस्वस्यापि यण् भविष्यति । न चेत्वविधेर्वैयर्थ्यम् हलादौचरितार्थत्वात् । तथा विभेतीति अक्ङित्यपि भवतु गुणो भविष्यति । इत्वविधिश्च क्ङिति चचरितार्थः । तथा थअभ्यस्तस्य इत्यनुवृत्तेर्भीत इत्यादावार्धधातुके न भविष्यति । क्वसावपि तर्हि प्राप्नोति छान्दसः क्वसुः, दृष्टानुविधिश्छन्दसि ।।

जहातेश्च ।। 6 - 4 - 116 ।।

अत्रापि न सार्वधातुके ित्यस्योपयोगः, अत एवास्य प्रत्युदाहरणं न प्रदर्शितम् । अभ्यस्तस्य इत्यनुवृत्तेरार्धधातुके न भविष्यति, लिडजादिः ।।

आ च हौ ।। 6 - 4 - 117 ।।

सार्वधातुकमेव हि ।।

लोपो यि ।। 6 - 4 - 118 ।।

देहि, धेहीति । दाञ्धाञो रुपे । दोदाण्धेटां तु विकरणेन हिर्व्यवहितः । देङात्मनेपदी । शिदयमिति । न सूत्रे श्रूयमाणशकारो विभक्तिसकारस्य श्चुत्वेनागतः, किं तर्हि औत्पत्तिको लोपशब्दसम्बन्धी । विभक्तेषु हल्ङ्यादिलोप इति भावः । संज्ञाशब्दे च कृतोऽनुबन्धः संज्ञिनः कार्यं सम्पादयति, यथा - ङमुटष्टत्वम् । एचच्च नानर्थकेऽलोन्त्यविधिः इत्यनाश्रित्योक्तम् ।।

अत एकहलमध्येऽनादेशादेर्लिटि ।। 6 - 4 - 120 ।।

एकशब्दोऽसहायवचनः न सङ्ख्यावचनः मध्याभावात् । द्विवचनान्तस्य च समासः, द्वयोरेव मध्यसम्भाव्त, अत्र लिटीति यदि
विधीयमानयोरेत्वाभ्यासलोपयोर्निमित्तनिर्द्देशः स्यात्, आदेशो न विशेषितः स्यात्, ततश्च नेमतुः, नेमुः, सेहे, सेहाते, सेहिरे - अत्रापि प्रतिषेधः स्यात्, न त्वसत्वयोः कृतयोरङ्गस्यादेशादित्वात् । तस्माद् गुणभूतस्याप्यादेशस्यायं निमित्तनिर्द्देश इति दर्शयति - लिटि परत इति । लिटि परत्रावस्थिते य आदेशो विधीयते स आदिर्यस्याङ्गस्य नास्तीत्यर्थः ।

ररक्षतुरिति । अयुक्तमिदमादेशादित्वात् । क्वचित्तु ततक्षुरिति पठ्यते, तदप्ययुक्तम् संयोगान्तत्वेन लिटः कित्त्वाभावात् । तस्मात्तत्सरतुः, तत्सरुरिति प्रत्युदाहरणम् । त्सर छद्मगतौ । चकणतुरिति । कणतिः शब्दार्थधातुवर्गे भूवादौ पठ्यते । जगणतुरिति । गण संख्याने, चुरादित्वात्तत्र णिच् प्राप्नोति । यदिनेष्यते, अनित्यण्यन्ताश्नुरादयः । एतच्च धुषिरविशब्दने इत्यत्र वक्ष्यते । यद्यपि कृहौश्चुः इति चुत्वं लिट्याहत्य न विहितम्, तखअभायसनिमित्ते तु प्रत्यये विधानाल्लिण्निमित्तमपि भवति, सर्वथा लिट्युत्पन्ने पश्चाद्भवति ।

अनैमित्तिके नत्वसत्वे इति । ततश्च प्रागेव लिडुत्पत्तेस्ताभ्यां भवितव्यम्, तेन तदाद्यङ्गं लिटि य आदेशस्तदादि न भवति, यदि लिटा आदेशो विशेष्यते, एत्वमलिट्यपि प्राप्नोति - पक्वः, पक्ववानिति नैष दोषः, चकारः सभूच्चये, नान्वाचये तेन यत्राभ्यासलोपस्तत्रैवैत्वम् । इह तर्हि स्यात् - पिपठिषति क्ङितीति
वर्त्तते । एवमपि पापठ्यते - अत्रापि प्राप्नोति नैष दोषः, इह ह्यभ्यासकार्येषु ह्रस्वहलादिशेषावुत्सर्गौ, तयोरन्यऽपवादास्तत्रैह दीर्घोऽकितः इति दीर्घत्वं च प्राप्नोति अनेन लोपश्च, तत्र दीर्घस्यावकाशः - बाभाष्यते, अस्य विधेरवकाशः - पेचतुः, पेछु, पापच्यते - इत्यत्रोभयप्रसङ्गे अपवादविप्रतिषेधाद्दीर्घत्वेनायमभ्यासलोपो बाध्यते तत्सन्नियोगशिष्टत्वादेत्तवमपि न भविष्यति । अभ्यासविकारेषु उभयसमावेशो यत्र सर्वेषां प्रवृत्तिस्तत्र । इह तु यद्यपि दीर्घत्वे कृतेऽपि एत्वाभ्यासलोपयोः प्रसङ्गः, तयोश्च कृतयोन दीर्घस्य प्रसङ्ग इति न सर्वेषां प्रवृत्तिः ।

ननु च बभणतुः, बभणुरित्यादावभ्वासजश्त्वचर्त्वयोरसिद्धत्वादनादेशादित्वात् एत्वाभ्यासलोपाभ्यां भाव्यम्, विपिरतिषेधस्य तु जहसतुर्जहसुरित्यादौ यत्र कुहोश्चुः इति चुत्वं क्रियते सोऽवकाशः स्यात् अत आह - इहेति । अत्रैव थज्ञापकमाह - तथा चेति । रुपामेदे त्विति । यत्रादेशस्य स्थानिना सह रुपमैदो नास्ति तत्रेत्यर्थः । शसिदद्योरिति । अभ्यासे चर्च, इति सर्वत्र जश्चरोः प्राप्तयोरन्तरतमपिरभाषाव्यापारलब्धमिदं वक्ष्यते - प्रकृतिचरां प्रकृतिचरः, प्रकृतिजशां प्रकृतिजश इति । तेन शसेः शकारस्य शकारो ददेर्दकारस्य दकार इति, तावप्यादेशादी भवतः । यदि चाभिन्नरुपोऽप्यादेश कइहाश्रीयेत, तत आदेशादित्वादेव प्रतिषेधे सिद्धे न शसददवादिगुथणानाम् इति शसिदद्योः प्रतिषेधोऽनर्थकः स्यात्, कृतस्तु ज्ञापयति - रुपाभेदे य थआदेशः स इह

नाश्रीयते इति । यदि पुनराश्रीयेत किं स्यात् इत्यत आह - अन्यथेति । प्रकृतिर्जश् प्रकृतिश्चर्छर्च्चादिर्येषां तेषां न स्यात्, वचनं तु रेणुरित्यादौ चरितार्थम् । अहं पपचेति । उत्तमे णलि णित्त्वाभावपक्षे रुपम् । णत्त्वपक्षे तु परत्वाद्वृद्धौ कृतायां तपरकरणादकाराभावादेवा प्रसङ्गः ।
देभतुरिति । श्रन्थिग्रन्थि इत्यादिना लिटः कित्त्वे सति नलोपः ।
नशिमन्योरलिट्येत्त्वमिति । अलिटीति पादपूणार्थोऽनुवादः, श्लोकोह्योवं भाष्ये पठितः ।।
नशिमन्योरलिट्येत्वं छन्दस्यमिपचोरपि ।
अनेशन्मेनकेत्येतद्व्येमानं लिङि पेचिरन् ।। इति ।
अनेशन्निति । झोऽन्तादेशः । थअनेशन्नस्योषवः । अनेशमिति तु प्रायेण पाठः, तत्र मिपोऽम्भावः । क्षिपकादिष्विति । क्षिपकादिषु हि इत्वप्रतिषेधो वक्ष्यते, एतच्च न यासयोः इत्यत्र आशिषि चोपसङ्ख्यानम् इत्यनाश्रित्योक्तम्, छन्दसीतिवचनात् मेनकेति भाषायां न प्राप्नोति । यदीष्यते, पृषोदरादिषु द्रष्टव्यः । लुग्न क्रियत इति । छान्दसत्वात्, बहुलं छन्दसि इति वा शपो लुप्तत्वात् । पेचिरन्निति । पचेरन्निति प्राप्ते ।
क्वचित्पठ्यते - यजिवप्येश्च, आयोजे आवेवे, यजेर्वपेश्च लङि इति छन्दस्यपि दृश्यते इत्यनजादेरप्याडिति । अपर आह - लिटि तस्य एशादेशः, सम्प्रसारणपूर्वत्वे वा छन्दसि इत्यनुवृत्तेर्यणादेशः, एत्वाभ्यासलोपौ, उदात्तवता तिङेत्याङः समास इति । तथा चावगृह्णन्ति - यच्छञ्चयोश्च मनुरायजे पिता, आयेज इत्यायेजे इति ।।
थलि च सेटि ।। 6 - 4 - 121 ।।
पेचिथेति । क्रादिनियमात्प्राप्तस्येटः उपदेशेऽत्वतः इति प्रतिषेधे प्राप्ते ऋतो भारद्वाजस्य इति नियमात्पक्षे इट् । पपक्थेति । अन्येषां मतेन प्रतिषेधः ।
थल्ग्रहणमनर्थकम्, पेचिवेत्यादावन्यत्र सेटि कित्त्वात्पूर्वेण भवितव्यमेव अत आह - यल्ग्रहणं विस्पष्टार्थमिति । किमत्र विस्पष्टनीयम् तद्दर्शयति - अक्ङिदर्थमित्यादि । आरम्भसामर्थ्यादेवायं निश्चयः स्यात्
- यत्र पूर्वेण न सिद्ध्यति तदर्थमिति, बहवश्च विशेषाः प्रकृताः - अत एकहलमध्ये थइत्यादयः, तत्रासति थल्ग्रहणे सन्देहः स्यात् - किमनकारार्थं वचनम् - ददिविव, ररादिव इति अथानेकहल्मध्यार्थम् - तत्सरिवेति अथादेशार्थम् - बभणिवेति उतालिडर्थम् - पठित इति उताक्ङिदर्थमिति तत्र अत इत्यादेयो विशेषा अनुवर्त्तन्ते, क्ङितीत्येतत्तु निवर्तते - इति व्याख्यानमन्तरेण दुर्ज्ञानम् । तस्माद्विस्पष्टार्थं थल्ग्रहणं कृतम् ।।
तृफलभजत्रपश्च ।। 6 - 4 - 122 ।।
फल निष्पत्तौ, ञिफला विशरणे - द्वयोरपि ग्रहणम् । गुणाथमिति । न शसददवादिगुणानाम् इति प्रतिषेधं बाधितुमित्यर्थः । श्रेथतुरिति । पूर्वषत्कित्त्वनलोपौ ।।
राधो हिंसायाम् ।। 6 - 4 - 123 ।।
अनेकार्थत्वाद्धातूनां राधो हिंसायां वृत्तिः ।
ननु च नात्रापूर्वमवर्णग्रहणमस्ति, प्रकृतश्च मात्रिकस्तपरकरणात्, तत्कथमवर्णस्थान एत्वं भवतीत्युक्तम् अत आह - अत इत्येतदिति । अतः इति तावत्स्वरितत्वादुपतिष्ठते, तत्तपरत्वकृतस्य कालविशेषस्य मात्रात्मकस्यासम्भवात् तमपास्यावर्णमात्रं प्रतिपादयति । अथ वेति । पूर्वत्र त्वत इति विरोध्युपादानादात् इत्यस्यानभिसम्बन्धः । एकहल्मध्ये चेति । अत्र एकहल्मध्ये इत्येव, अतः, आत इति च द्वयमपि नानुवृत्तम् । एकहल्मध्य इत्यनुवृत्तेर्यत्तच्छब्दाध्याहारेण स्थानी लभ्यत इत्यर्थः ।।
फणां च सप्तानाम् ।। 6 - 4 - 125 ।।
बहुवचनिर्देशादाद्यर्थो गम्यत इत्याह - फणादीनामिति । फण गतौ, राजृ दीप्तौ, टुभ्राश्रृ टुभ्राजृ टुभलाश्रृ दीप्तौ, स्यमुस्वनध्वन शब्दे, अन्त्यवर्जं फणादयः सप्त । अत्र राजप्रभृतीनामप्येत्वमवर्णस्य भवति । उक्तोऽत्र न्यायः राधो हिंसायाम् इत्यत्र ।।
न शसददवादिगुणानाम् ।। 6 - 126 ।।
अत्र वस्तुतो यो गुणसंज्ञकोऽकारस्तत्रैव यदि प्रितषेधस्तर्हि विधिप्रतिषेधयोरेकविषयत्वाद्विकल्पः स्यात्, ततश्च वा जभ्रमुत्रः, साम् इति यद्वाग्रहणं तदेवादितः पाठ्यं स्यात्, तस्माद् गुणग्रहणेन तच्छब्दरुषितस्य तद्भावि तस्य ग्रहणमित्याह - गुण इत्येवममिनिर्वृत्तस्य चेति । तस्य सम्बन्धी योऽकार इत्यर्थः । सम्बन्धित्वमपि तस्य तत्स्थानिकत्वात्तदवयवत्वाच्च यथायोगं वेदितव्यम् । शशसतुरिति । शसु हिंसायाम्, दद दाने, अनुदात्तेत्, टुवम् उद्गिरणे । विशशरतुरिति । शृ हिंसायाम्, ऋच्छत्यृताम् इति गुणः ।
यदुक्तम् - गुण इत्येवमभिनिर्वृत्तस्य इति, तदुदाहरणं दर्शयति - गुणशब्दाभिनिर्वृत्तस्येति । उरण् रपरः इत्यत्र सिद्धं तु प्रसङ्गे रपरत्वात् इति वचनाद्गुणो भवन्नेव रेफशिरस्कोऽभिनिर्वर्त्तते, एवमभिनिर्वृत्तस्यार्शब्दस्यावयवोऽकारः । लुलविथेत्यत्र तु अभिनिर्वृत्तस्योकारस्य स्थानेऽवादेशास्तदवयवोऽकारः । क्वचित्पठ्यते - गुणशब्देनात्र शसादीनां ग्रहणसामर्थ्यात्तद्भावितस्य ग्रहणमिति । अकारमात्रस्य हि ग्रहणे शशिदद्योर्वकारादीनां च ग्रहणमनर्थकं स्यादिति किल तस्यार्थः ।।
अर्वणस्त्रसावनञः ।। 6 - 4 - 127 ।।
ऋकार उगित्कार्यार्थः तेन सर्वनामस्थाने नुम् भवति । स च नञ उत्तरो न भवतीति । चेदित्यनुषङ्गः । अर्वतीति उगित्त्वान्नान्तत्वाद्वा ङीप् । आर्वतमिति । तद्धितेऽपि भवति, असाविति प्रसज्यप्रतिषेधो न पर्युदासः, तेन नञिवयुक्तन्यायाभावाद्विभक्तेरेव ग्रहणं न भवति, तथा च सुश्चेत्परो न भवतीति

प्रथमैकवचनस्य चात्र ग्रहणम्, न सप्तमीबहुवचनस्य, व्याख्यानात् ।।

मघवा बहुलम् ।। 7 6 - 4 - 128 ।।

मघवेति । षष्ठ्यर्थे प्रथमा । मघोन इति । श्वयुवमघोनाम् इति सम्प्रसारणं पूर्वत्वम् आद्गुणः । ननु च मघमस्यास्तीति मघवान्, मघमिति धननाम्, छन्दसीवनिपौ वक्तव्यौ इति वनिप्, सम्प्रसारणे कृते पूर्वस्य भसंज्ञायां यस्येतिलोपप्रसङ्गः । व्याश्रयत्वादसिद्धत्वमपि नाशङ्कनीयम् शसि सम्प्रसारणे यस्येतिलोपः । य एवं तर्ह्यन्यदेवेदमव्युत्पन्नं भविष्यति, तथा चैतस्य भाषायां प्रयोग उपपद्यते । यथा तु भाष्यम्, तथा न केवलमस्यैव अर्वणोऽपि भाषायामसाधुः प्रयोगः । आह हि -

अर्वणस्तृ मघोनश्च न शिष्यंछान्दसं हि तत् ।

मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनात् ।।

ऋधातोर्वनिपि गुणे च कृते अर्वन्निति रुपम् । तस्माद्विचि मतुपि अर्वन्तावित्यादि सिद्धं भवति, वनिप्यर्वणामित्यादि, मघशब्दादपि प्रत्ययद्वये सिद्धं भवति, नार्थः सूत्रद्वयेनेत्यर्थः । मघोन इत्यादौ तु
यस्येतिलोपाभावश्छान्दसत्वादेव । माघवनमिति । अन् इति प्रकृतिभावः ।।

पादः पत् ।। 6 - 4 - 130 ।।

पादिति पादशब्दो लुप्ताकारो गृह्यत इति । पादयतेः क्विबन्तस्याप्यत्र ग्रहणमिति येन विधिस्तदन्तस्य इत्यत्र भाष्यकारेणोक्तम् । तस्मादपिशब्दाध्याहारेणायं ग्रन्थो योज्यः । लुप्ताकारः पादशब्दोऽपि गृह्यते, पादयतिः क्विबन्तोऽपि । अङ्गाधिकारे तस्य च तदुत्तरपदस्य च िति वक्तव्यात्तदन्तस्याङ्गस्येत्यत्रापि तस्य चाङ्गस्येति द्रष्टव्यम् । तदन्ते तु वक्तव्यमस्तीति तसेयैव प्राधान्येनोपन्यासः, तद्दर्शयति - स चेति । यद्यपि पाच्छब्देन तदन्तः समुदायः प्रत्याय्यते, तथापि विशेषणत्वेन यो निर्द्दिश्यते तत्रापि यतः षष्ठी श्रूयते तस्यैवादेशः, न प्रतीयमानस्य समुदायस्येत्यर्थः । द्विपद इति । द्वौ पादावस्येति बहुव्रीहिः, संख्यासुपूर्वस्य इत्यन्तलोपः । द्विपदिकामिति । पादशतस्य संख्यादेः इति वुन्, लोपश्च । व्याघ्रपाच्छब्दो गर्गादिः ।।

वसोः सम्प्रसारणम् ।। 6 - 4 - 131 ।।

पेचुष इति । पक्षेः क्वसुः, एत्वाभ्यासलापौ ।

कथं पुनर्व्द्यनुबन्धकस्य क्वसोर्ग्रहणम् इत्याह - वसुग्रहण इति । एतच्च शात्रादेशास्य वसोरुकारानुबन्धकरणाल्लभ्यते, तस्य ह्येतदेव प्रयोजनम् - इह सामान्यग्रहणं यथा स्यादिति उगित्कार्यस्य स्थानिवद्भावेनैव सिद्धत्वात् ।।

वाह ऊठ् ।। 6 - 4 - 132 ।।

वाह थइति वहेर्ण्विप्रत्ययान्तस्य ग्रहणम्, ण्विश्च सोपपदाद्विहित इति सामर्थ्यादत्र तदन्तविधिरत्याह - वाह इत्येवमन्तस्येति । सम्प्रसारणं भवतीति । सम्प्रसारतणग्रहणानुवृत्तिं दर्शयति । तेन वकारस्य स्थाने भवति, अन्यथान्त्यस्य स्यात् । उदाहरणेषु छन्दसि सहः वहश्च इति ण्विः ।

अथेत्यादि । वाह इत्येतावता प्रकृतं सम्प्रसारणमेव विधेयमिति प्रश्नः । का रुपसिद्धिः इत्याह - सम्प्रसारणे कृत इति । । गुणे चेति । कृत इत्यनुषङ्गः । ण्विप्रत्ययमपेक्ष्य प्रत्ययलक्षणेन गुणः । नन्वेवं शालीन्वहतीत्यादावनकारान्त उपपदे साल्यूह इति न सिध्यति तत्राह - अनकारान्ते चेति । चकारादकारान्त उपसर्गेऽपीति द्रष्टव्यम् । तेन प्रौह इत्यादावेङि पररुप्रसङ्ग इति न चोदनीयम् । ज्ञापानर्थमिति । कथमेतज्ज्ञापकम् ित्याह - तस्यां हि सत्यामिति । वहिरङ्गस्य वहिरड्गत्वं वहिर्भूताजादिप्रत्ययापेक्षत्वात्, अन्तर्भूताण्व्यपेक्षत्वाद् गुणोऽन्तरङ्गः ।।

श्वयुवमधोनामतद्धिते ।। 6 - 4 - 133 ।।

शौवमिति । नस्तद्धिते इति टिलोपः । यौवनमिति । यूनो भाव इति हायनान्तयुवादिभ्योऽण्, अन् इति प्रकृतिभावः । मघवा देवतास्य माघवनः ।

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणाद् युवतिशब्दस्यापि सम्प्रसारणप्रसङ्गः, तथा मघवत इत्यादौ मघवा बहुलम् इति त्रादेशो कृते थएकदेशविकृतस्यानन्यत्वात्प्रसङ्गः इत्याह - श्वादीनामित्यादि । कथमेतल्लभ्यते इत्याह - एतदथमिति । अन इत्युभयोः शेष इति । न त्वनन्तरस्यैव, योगविभागसामर्थ्यात् । न चैषमपि मघवतेत्यादावेकदेशविकृतस्यानन्यत्वात्प्रसङ्गः, सामान्यातिदेशे विशेषानतिदेशात् ।।

अल्लोपोऽनः ।। 6 - 4 - 134 ।।

अदिति पृथक् पदं लुप्तविभक्तिकम्, तेन आतो धातोः इत्यादौ केवलस्य लोपशब्दस्व सम्बन्धः । राजकीयमिति । गर्त्तोत्तरपदाच्छः इत्यधिकारे राज्ञः कच इति छः, ककारश्चान्तादेशः । अत्रैकदेशविकृतस्यानन्यत्वात्प्रसङ्गः ।।

षपूर्वहन्धृतराज्ञामपि ।। 6 - 4 - 135 ।।

किमिदं नियमार्थम्, आहोस्विद्विध्यर्थम् कथं चेदं नियमार्थम्, कथं वा विध्यर्थम् यद्यन्निति प्रकृतिभावोऽनन्तरस्यैव टिलोपस्य, तदाल्लोपस्य प्रकृतिभावेनानिवर्त्तितत्वात्पूर्वेणैव सिद्धे नियमार्थम्, अथाविशेषेणाल्लोपटिलोपयोर्द्वयोरपि प्रकृतिभावस्ततो विध्यर्थम् । तत्रापि नियमपक्षे यदि तावदेवं नियमः - षपूर्वदीनामेवाणीति भवेत्, इह न स्यात् - सामनः वैमनः, ताक्षण्य इत्यत्र तु प्रसङ्गः । अथाप्युभयनियमः
स्यात्, षपूर्वदीनामेवाणि, षपूर्वदीनामण्येवेति एवमपि सामनः वैमनः, ताक्षण्य इति सिद्धम् सामसु साधुः सामन्योऽत्र प्राप्नोति । तस्मादुभयोः प्रकृतिभाव

इत्याश्रित्य विद्यर्थमिदमित्याह - तस्याकारस्य लोपो भवतीति । ताक्ष्ण इति । इदमर्थेऽण्, अपत्ये तु कारिलक्षणो ण्यो भवति । उभावपि न भवत इति ।
टिलोपमात्रव्यावृत्तिर्निषेधेनापि सिध्यति ।
तत्प्रकृत्येति वचनान्निवृत्तिरुभयोरपि ।।
विभाषा ङिश्योः ।। 6 - 4 - 136 ।।
जसः शी, औङ आपः, नपुंसकाच्च इति योऽयं शीशब्दस्तस्येह ग्रहणम्, न जश्शसोः शिः इत्यस्य ह्रस्वान्तस्य तत्र संज्ञाया अभावात् ।।
न संयोगाद्वमन्तात् ।। 6 - 4 - 137 ।।
स्याद्वकारमकाराभ्यां संयोगस्य विशेषणात् तदन्तविधिरत्रेति विस्पष्टार्थमन्तग्रहकण् ।।
अचः ।। 6 - 4 - 138 ।।
अच इत्ययमञ्चतिर्लुप्तनकारो गृह्यत इति । प्रत्याहारग्रहणं तु न भवति, यदि स्याद्, अजन्तस्याङ्गस्य लोपो भवतीत्यर्थः स्यात्, ततश्च आतोधातोः इत्येतदनर्थकं स्यात् । यच्च द्युप्रागपागुदक्प्रतीचो यत् इति निर्दिशति, यच्च चौ इत्याह, ततो ज्ञायते - अञ्चतेरेवात्र ग्रहणमिति । एतेन पचाद्यचोऽप्यग्रहणम् ।।
आतो धातोः ।। 6 - 4 - 140 ।।
एवमादि सिद्धं भवतीति ।सूत्राद्बहिरस्मदादिप्रयोगेऽपीति भावः। सूत्रे तु सौत्रो निर्द्देश इत्येव सिद्धम् ।।
मन्त्रेष्वाङ्यादेरात्मनः ।। 6 - 4 - 141।।
आङिति पूर्वाचार्यप्रक्रियया तृतीयैकवचनस्य ग्रहणम् ।
आङोऽन्यत्रापि दृश्येत इति । तस्मादाङीति न वक्तव्यमित्यर्थः । आतः इत्यनुवृत्तेरादेरित्यपि शक्यमकर्त्तुम् । त्मन्येति । सप्तम्येकवचनस्य याशब्द आदेशः ।।
ति विंशतेर्डिति ।। 6 - 4 - 142 ।।
तिग्रहणं किम् अन्त्यस्य मा भूत् । सिद्धोऽन्त्यस्य लोप उत्तरसूत्रेण सिद्धे सत्यारम्भो नियमार्थः स्यात् - डित्येव यथा स्यादन्यत्र यस्येतिलोपो मा भूदिति । अथापि विधिनियमसम्भवे विधेरेव ज्यायस्त्वम् एवमप्यारम्भसामर्थ्यात् अलोऽन्त्यस्य इत्येतस्मिन् बाधिते समुदायस्यैव षष्ठीनिर्द्दिष्टस्य लोपप्रसङ्गः, न त्वसंशब्दितस्य तिशब्दस्य लोपः सिध्यति । तिग्रहणे तु सति तत्सामर्थ्याद् अलोऽन्त्यस्य इत्यस्यानुपस्थानात्सर्वस्य तिशब्दस्य भवति । विंशम्, विंशकमित्यादौ तिलोपे कृते अतो गुणे पररुपत्वम् । यस्येतिलोपस्तु न भवति तिलोपस्यासिद्धत्वात् ।।
टेः ।। 6 - 4 - 143 ।।
डित्यभस्यापीति । श्रवंणार्थस्तु डकारो न भवति, ड्मतुपि तावद् देशे तन्नाम्नि इति वर्त्तते, न च डकारवता प्रत्ययेन तन्नामा गम्यते देशः । डेऽपि प्रावृट्शरत्कालदिवां जे िति निर्द्दिष्टत्वान्न (वणार्थो डकारः । मन्दुरज इति । ङ्यापोः संज्ञाछन्दसोर्बहुलम् इति ह्रस्वः ।।
नस्तद्धिते ।। 6 - 4 - 144 ।।
तेषामिति । अन् इति प्रकृतिभावः प्राप्त इत्यनुषङ्गः । पीठेन सर्पतीति पीठसर्पी । कलापिशब्दात्प्रोक्तार्थे कलापिनोऽण्, छन्दोब्राह्मणानि च तद्विषयाणि, तदधीते इत्यण्, प्रोक्ताल्लुक्, कालापाः । एवं कौर्थुमाः । किं पुनः कारणमुषचार आश्रीयते, न पुनर्मुख्यार्थवृत्तिभ्याम् तेन प्रोक्तम् इत्याद्यर्थेऽण् क्रियते इत्यत आह - शैषिकेष्विति । केचित्तितलिशब्दं पठन्ति - लिलानां तलं तिलम्, पृषोदरादिः, तदस्यास्तीति तितली । एवं लाङ्गला इति । उपचारादि सर्वमतिदिशति । उत्तरेषु त्रिष्विदमर्थेऽण् ।
एवमाश्मा इत्यत्रापि । चार्म इत्यत्र विकारे । चार्मण इत्यत्रेदमर्थे विकारेऽपि कोशादन्यत्र ।
शौव इति । तस्येदमित्यण्, अत्र परत्वाद्वृद्धिप्राप्तौ द्वारादित्वात्तत्प्रतिषेधे ऐजागमे च कृते टिलोपः ।
शौवनोऽन्य इति । विकारावयवयोस्तु प्राणित्वादञिति प्रकृतिभावाभावात् शौव इत्येव भवति ।
के पुनरिति । प्रातिपदिकगणे पाठाभावात्प्रश्नः । आदिशब्दस्य प्रकारवचनत्वादाकृतिगणोऽयमित्युत्तरम् । सायम्प्रातिकमिति । यथाकथञ्चित्कालवृत्तेरपि भवति इत्युक्तत्वात्कालसमुदायेऽपि ठञ् एव भवति, येषां च विरोधः शाश्वतिकः इति निर्द्देशात् इसुसुक्तान्तात्कः इति कादेशाभावः । शाश्वतमिति । भाष्यकारवचनादण् प्रत्ययः ।।
अह्नष्टखोरेव ।। 6 - 4 - 145 ।।
द्व्यह इति । न सङ्ख्यादेः समाहारे इति अह्नादेशस्य प्रतिषेधः । द्व्यहीन इति । तद्धितार्थे द्विगुः, समायाः खः, द्विगोर्वा, रात्र्यहःसंवत्सराच्च इति खः ।
आह्निकमिति । आर्हीयष्ठक् ।
एवकारकरणं विस्पष्टार्थमिति । विपरीतनियमनिरासार्थं तु न भवतीत्याह - अह्न एवेति । विपरीते हि नियमे अन्यस्य खे टिलोपप्रसङ्गाद् आत्माध्वानौ खे इति प्रकृतिभावविधानमनर्थकं स्यादिति भावः ।।
ओर्गुणः ।। 6 - 4 - 146 ।।
बाभ्रव्यादौ गोत्रे यञ् । शङ्कव्यादौ प्राक्क्रीतीयः उगवादिभ्यो यत् । औपगवादावपत्येऽण् ।
संज्ञापूर्वको विधिरित्यादि । भाष्येऽनुक्तमपि प्रयोगो बाहुल्यादुक्तम् । तद्धितइत्येव - वोतो गुणवचनात्, पट्वी ।।

ढे लोपोऽकद्रवाः ।। 6 - 4 - 147 ।।

मद्रबाहुशब्दाद् बाह्वन्तात्संज्ञायाम् इत्युङ्, कद्रुशब्दादपि कद्रुकमण्डल्वोश्छन्दसि संज्ञायाम् इत्यूङ्, ताभ्यामपत्ये स्त्रीभ्यो ढक्, अन्यत्र चतुष्पाद्भ्यो ढञ्, कमण्डलुपद आदधीतेति बह्वृग्ब्राह्मणम् । श्रृगालः - जम्बुः, शिवा - जम्बूः । जम्बुरेव जम्बजम्बुकः ।।

यस्येति च ।। 6 - 4 - 148 ।।

इश्च अश्च यम्, समाहारद्वन्द्वे ध्यन्तादजाद्यदन्तं विप्रतिषेधेन इति अश्बदस्य पूर्वनिपातः सौत्रत्वान्न भवित । यशब्दस्य तु ग्रहणं न भवति, लिङ्गात, यदयं गर्गशब्दस्य यञि कुमारशब्दस्य तु ङीपि लोपं निर्द्दिशति - ओतो गार्ग्यस्य, कुमार्या वयसि इति । अत एव निर्द्देशादेकारे तावद्ह्रस्वस्य ग्रहणम्, तत्साहचर्यादिकारेऽपि । कार्यं तु दीर्घस्यापि भवति सवर्णग्रहणात् । दाक्षीति । इतो मनुष्यजातेः इति ङीष, सखिशब्दादपि सख्यशिश्वीति भाषायाम् इति । सर्वत्र सवर्णदीर्घत्वेन रुपं सिध्यति, किं लोपेन तत्राह - सवर्णदीर्घत्वे हीति । अतिसखेरिति । अतिक्रान्तः सखीमिति तत्पुरुषे लिङ्गविशिष्टपरिभाषया राजाहःसखिभ्यष्टच् इति टज्न भवति, तस्यानित्यत्वात् । तत उपसर्जजह्रस्वत्वम् । एकादेशतस्येति । ङीषा सह कृतस्य । असखीति प्रतिषेधः स्यादिति । कथं पुनः सखिशब्दस्योच्यमानोऽतिसखिशब्दस्य प्रतिषेधः स्यात् तदन्तविधिनाः ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति । एवं मन्यते - कार्यकालं संज्ञापरिभाषम् इति पक्षे घेङिति इत्यत्र घिसंज्ञाया उपस्थानाद् अङ्गाधिकारे तस्य च तदुत्तरपदस्य च इत्यस्ति तदन्तविधिरिति । यद्वा - शेषस्येकारोकारमात्रस्य घिसंज्ञा, न तदन्तस्य, ततः किम् असखीत्यपि सखिशब्देकारस्य प्रतिषेधः, न सखिशब्दस्य । एकादेशे च सखिशब्देकार एवायमिति तदन्तेऽपि प्रतिषेधः स्यादेव ।लोपे तु सति यद्यप्युपसर्जनह्रस्वत्वे कृते रुपमविशिष्टम्, तथापि तस्य लाक्षणिकत्वान्न भवति प्रतिषेधः । दौलेयादौ इतश्चानिञः इति ढक् । बलाका - सुमित्राशब्दौ बाह्वादी । सौर्य इति । तेनैकदिक् इत्यण्, एतचच सूर्यागस्त्ययोश्छे च ङ्यां च इत्यनपेक्षयोदाहृतम् ।

इयङुवङ्भ्यामिति । इयङुवङोरवकाशः - श्रियौ, भ्रवौ, लोपस्यावकाशः - दौलेयः कामण्डलेयः ।

सूर्यतिष्यागस्तयमत्स्यानां य उपधायाः ।। 6 - 4 - 149 ।।

यद्यत्र भत्वेन सूर्यादयो विशेष्यन्ते - सूर्यादीनां भसंज्ञानामिति, ततः सूर्यस्य स्त्री सूरी, आगस्त्यस्य अगस्तीत्यादौ यत्र सूर्याद्येव भसंज्ञकं तत्रैव स्यात्, सौरी बलाकेत्यत्र तु न स्यात्, न ह्यत्र सूर्यशब्द ईति भसंज्ञकः, किं तर्हि अणन्तम् । तस्मादनाश्रितरुपस्य भमात्रस्य लोपेन सम्बन्धः । सूर्यादिभिर्यकारो विशेष्यते इति दर्शयन्नाह - सूर्यतिष्यागस्त्यमत्स्येत्यतेषामिति । भसंज्ञकस्य यो यकार उपधा तस्य लोपो भवति, स चेत्सूर्यादीनां सम्बन्धीत्यर्थः । सौरीति । अत्र ईति परतो भसंज्ञकमङ्गमणन्तं तस्य यकार उपधा यथा भवति तथा दर्शयति - अणि यो यस्येति लोप इति । व्याश्रयत्वादिति । अणि यस्येति लोपः, ईति यलोप इति व्याश्रयत्वम् । ईकारे तु य इति । लोप इत्यपेक्षते । भस्याणन्तस्येति । भसंज्ञकस्याणन्तस्य यकार उपधा भवतीत्यर्थः । स्थानिवद्भावस्तु द्वयोरपि यस्येतिलोपयोर्यलोपविधिं प्रति प्रतिषिद्धः ।

मत्स्यचरीति । मत्सी भूतपूर्वेति चरन्, तसिलादिष्विति पुंवद्भावः , टित्त्वान्ङीप्, भवत्यत्र मत्स्यचरशब्द ईति भसंज्ञकः, मत्स्यसम्बन्धी च यकारः न त्वसौ भसंज्ञकस्योपधेति लोपाभावः ।

यग्रहणमुत्तरार्थमिति । इह तु सूर्यादिसम्बन्धी भसंज्ञकस्योपधायकार एव न वर्णान्तरमिति नार्थस्तेन ।

सौरीय इति । सौर्यशब्दाद्वृद्धच्छः । एवम् - आगस्तीयः । आगस्त्य इति । उपत्ये ऋष्यण् ।

तिष्यपुष्ययोरिति । तिष्यस्य सत्रेणैव प्राप्ते नक्षत्राणि नियमः, पुष्यस्याप्राप्ते विधिः । सूत्रे त्वर्थग्रहणे सिध्यत्यस्यापि प्रसङ्गः ।

अन्तिकस्येत्यादि । छन्दस्येतदिष्यते । ककारादेः शब्दस्येति । ककारस्याकारस्य चेत्यर्थः । आद्युदात्तञ्चेति । प्रत्ययस्वरस्यापवादः । अन्तित इति ।अपादाने चाहीयरुहोः इति तसिः । कादेश्चेति । कशब्दस्येत्यर्थः । अन्तिषदिति । मत्मृद्विप इत्यादिना क्विप् । बह्वचास्तु व्यस्तमधीयते ।

ये चेति । दृश्यत इत्यपेक्षते । अन्तिय इति । भवे छन्दसि इति यत् । कादिलोपस्यासिद्वत्वाद्यस्येनि लोपाभावः ।।

हलस्तद्धितस्य ।। 6 - 4 - 150 ।।

तद्धित इति निवृत्तमिति । उत्तरसूत्रे पुनस्तद्धितग्रहणात्, तेनायमीत्येय विधिः ।।

आपत्यस्य च तद्धितेऽनाति ।। 6 - 4 - 151 ।।

गार्गकमिति । गोत्रोक्षोष्ट्र इत्यादिना वुञ, सङ्कशादिभ्यो ण्यः इति वुञ्छणादिसूत्रेण चातुरर्थिकः, ततः धन्वयोपधाद्वुञ् इति जातादावर्थे ।

तद्धितग्रहणमित्यादि । सोमो देवतास्येति सोमाट्ट्यण् टित्त्वान्ङीप्, तत्र परतोऽनापत्ययकारस्याप्यस्य हलस्तद्धितस्य इति लोपो यथा स्यादित्येवमर्थमिह तद्धितग्रहणं कृतम् अन्यथा हि प्रकृतं तद्धितग्रहणिहानुवर्त्तनीयम्, तस्मिंश्चानुवर्त्तमाने तत्सम्बद्धमीतीत्यपि सम्बध्येत, तच्चोभयमिह सम्बध्यमानं पूर्वसूत्रेऽपि सम्बध्येत, ततश्च पूर्वेणैव सिद्धे सत्युभयत्र तद्धित ईति चेति नियमोऽयं विज्ञायेत - आपत्यस्यैवानाकारादौ तद्धिते ईति चेति । ततो यथा तद्धितेऽनापत्यस्य न भवति - साङ्कश्यक इत्यादौ, तथा ईत्यपि न स्यात् - सौमी इष्टिरिति । तद्धितग्रहणे तु सति तेन पूर्वयोगे तद्धितग्रहणस्य निवृत्तिराख्यातेत्यापत्यानापत्ययोर्द्वयोरपि पूर्वेण ईति लोपो विधीयत इति सौमी इष्टिरित्यत्रापि यलोपः सिध्यतीत्यतस्तद्धितग्रहणम् । ननु च यद्युभयस्यायं नियमः स्याद्, योगविभागोऽनर्थकः स्याद्, हल आपत्यस्य तद्धितस्यानाति इत्येकमेव योगंकुर्यात्, ततो योगविभागादन्यतरस्यैवानुवृत्तिः, तत्रापि अनाति कइति वचनात्तस्यैव एवमपि दोषः, अनापत्यस्य तद्धितेऽपि प्राप्नोति, कथम् आपत्यस्य यदि भवति थअनाकारादावेवेति नियमसम्भावत्, साङ्काश्यकादौ लोपः स्यादेव । अनाकाराविति नियमः सम्भवति । अथ न सम्भवति तदा न कश्चिद्दोषः आपत्यस्यैव तद्धिते, तत्राप्यनाकारादेवेति नियमद्वयाश्रयणात् ।।

क्यच्व्योश्च ।। 6 - 4 - 152 ।।

गर्गीयतीति । क्यचि च इतीत्वम् । गार्गीयत इति । अकृत्सार्वधातुकयोर्दीर्घः , क्यषस्तवापत्यादसम्भवः । गार्गीभूत इ । अस्य च्वौ इतीत्वम् ।।
बिल्वकादिभ्यश्छस्य लुक् ।। 6 - 4 - 153 ।।
बिल्वकादीनामस्मिन्प्रदेशे प्रातिपदिकगणे पाठाभावात्तत्परिज्ञानार्थमाह - नडादिष्विति । नडादिषु बिल्वादयस्तावत्पठ्यन्ते, तत्र कुकि कृते यद्रूपं ककारान्तं तदिहानुकृतम् । बिल्वक् आदिर्येषामिति विगृह्य समासः । जश्त्वे तु क्रियमाणे रुपविनाशप्रसङ्गान्न कृतमित्यर्थः । तेन बिल्वक आदिर्येषामिति अज्ञातादिषु यः
कस्तदन्तानां ग्रहणं नाशङ्कनीयम् पाठाभावात् ।छग्रहणं किमिति । कृतकुगागमेभ्यः परस्तादन्यो न सम्भवतीति प्रश्नः कथं पुनः कुको निवृत्तिप्रसङ्गः इत्याह - अन्यथा हीति । इदमेव छग्रहणं ज्ञापकम् - अस्त्येषा परिभाषेति । यकारमात्रस्येति । उपधाया इत्यनुवृत्तेस्तस्यैव स्याद् । अथापि तन्निवृत्तम्, एवमपि, आदेः परस्य इति परस्य प्रसङ्गादनिष्टमेव ।।
तुरिष्ठेमेयस्सु ।। 6 - 4 - 154 ।।
दोहीयसीत्यत्र घत्वादीनामसिद्धत्वात्पूर्वं तृशब्दस्य लोपे कृते पश्चान्निमित्ताभावात्तेपामभावः । लोपो भवति इत्युक्त, तत्रन्त्यस्य प्राप्नात्यत आह - सर्वस्येति । कारणमाह - अन्त्यस्य हीति ।
नन्वेवमनन्तरो लुगेव विधेयः, एवं सुखमेव सर्वस्य निवृत्तिर्लभ्यते अत आह - लुगित्येतत्त्विति । कः पुनस्तदनुवृत्तौ दोषः स्याद् अत आह - तथा हीति । न च पूर्वमेव गुणो भवति अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते इति वचनात् ।
इमनिज्ग्रहणमुत्तरार्थमिति । नेहार्थम्, तृशब्दात्तस्यासम्भावात् । न चेदमेव कल्पकं भवितुमर्हति, उत्तरार्थतयाप्युपपत्तेः । नन्वेवम् अजादी गुणवचनादेव इति नियमादिष्ठेयसुनोरपि न सम्भवः अत आह - इतरौ त्विति ।।
टेः ।। 6 - 4 - 155 ।।
णाविष्ठंवदिति । सप्तमीसप्तमर्थाद्वतिः, णाविति प्रतियोगिनि सप्तमीनिर्द्देशात् तेनेष्ठनि यत्कार्यं तदतिदिश्यते, न त्विष्ठनो यत्कार्यं तदपि । तेन बहूनाचष्टे बहयतित्यत्र इष्ठस्य यिट् च इति णेर्यिण् भवति, तदभावे तत्सन्नियोगशिष्टो भूभावोऽपि न भवति । केचित्तु भूभावमुदाहरन्ति - भावयतीति । एतयतीति । टिलोबातिदेशेनैव सन्नियोगशिष्टत्वान्नकारनिवृत्तावपि सिद्धायां पुंवद्वचनं सन्नियोगशिष्टपरिभाषाया अनित्यत्वज्ञापनार्थम्, तेन श्यैवेयः, ऐनेय इत्यादि सिद्धं भवति ।
अपर आह - इडविडमाचष्टे ऐडविडयति, दरदमाचष्टे दारदयतीत्येवमादौ पुंशब्दातिदेशार्थं पुंवद्वचनमिति । ननु चेडविडादीनामिष्ठनि पुंवद्भावो न दृष्टः, इष्ठन एव तत्रासम्भावात् । नेष्ठनि दृष्टस्यातिदेशः, किं तर्हि सम्भावितस्य अन्यथा अतिराजयतीत्यादौ टिलोपो न स्यात् ।
प्रातिपदिकग्रहणं प्रकृतिमात्रोपलक्षणम् । तेन द्रोणीमाचष्ठे इत्यादावपि टिलोपो भवति । नात्र पुंवद्भावोऽस्ति अभाषितपुंस्कात्वात् ।
लिङ्गविशिष्टपरिभाषया वा ङीबन्तस्य ग्रहणम् । उक्तं हि प्राक् - यथाकथञ्चित्प्रातिपदिकग्रहणे लिङ्गविशिष्टं गृह्यते इति । स्थवयतीत्यादौ अत उपधायाः इति वृद्धिर्न भवति अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य इति वचनात् । अस्यार्थः - अङ्गधिकारविहिते कस्मिंश्चत्कार्थे वृत्ते पुनः कार्यान्तरस्य वृत्तौ प्राप्तायामविधिस्तस्य कार्यस्य, तच्चेदङ्गं निष्ठितं भवति - प्रयोगार्हं भवति । यत्र त्वनिष्ठितमङ्गं तत्र भवत्येव वृत्तिः - प्रापयति, स्थापयतीति । कर्तारमाचष्ट इत्यादौ तृशब्दस्य तुरिष्ठेमेयः सु इति लोपो भवति न वेति । चिन्तयम् ।।
स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः ।। 6 - 4 - 156 ।।
यद्यपि प्रकृतो लोपशब्दो भवासाधनः, तथापीह कर्मसाधनोऽपि ज्ञायते, यणादि परं लोप इति सामानाधिकरण्येन निर्द्देशात् । तदाह - यणादिपरं लुप्यत इति । पूर्वग्रहणं विस्पष्टार्थमिति । इको गुणवृद्धी इति वचनाल्लुप्तावशिष्टस्य य इक् तस्य गुणो भविष्यतीति भावः । अत एव वचनादजादी प्रत्ययौ भवत इति । इमनिच तु पृथ्वादिष्वपठितेभ्यो न भवति, अनभिधानात् ।।
प्रयस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बेहिगर्वर्षित्रब्द्रधिवृन्दाः ।। 6 - 4 - 157 ।।
प्रियस्थिरोरुबहुलदीर्घाः पृथ्वादिषु पठ्यन्ते, तेनैतेष्विमनिजनुवृत्तेश्चरितार्थत्वादित्तरेष्विमनिचः कल्पकमेतद्वचनं न भवति, तदाह - तेनान्यषामिति ।।
बहोर्लोपो भू च बहोः ।। 6 - 4 - 158 ।।
भूयानिति । आदेः परस्य इत्यादेर्लोपः । अन्यथा हीति । यदि पुनः बहोः इति नोच्येत, ततो यथा लोपः प्रत्ययानां भवति, तथा भूभावोऽपि तेषामेव स्यात् । पर्यायेण तत्र लोप आदेर्भूभावः सर्वस्य शक्यते
वक्तुम् पृथग्निर्द्देशात्प्रत्ययानां न भविष्यति, अन्यथा भूलोपौ बहोः इति ब्रूयात् । एवं च कृत्वा उत्तरपदभूम्नि इति निर्द्देश उपपद्यत इति ।।
इष्ठस्य यिट् च ।। 6 - 4 - 159 ।।
लोपापवादो यिडागम इति । नाप्राप्ते तस्मिन्नारम्भात् । तस्मिन्निति । लोपापावदभूते । यदि तु लोपोऽप्यनुकृष्य विधीयते तदा इकारो नोच्चारणार्थः ।।
ज्यादादीयसः ।। 6 - 4 - 160 ।।
लोपस्येति । यदि लोपो यिटा न व्यवहितः स्यात्तेनैव ज्यायानिति सिध्यतीति कृत्वा आदिति न वक्तव्यं स्यादिति भावः । कथं पुरर्लोपे सिद्धिः इत्याह - लोपे हीति । अकृद्यकार इति । अत्र क्ङितीति नानुवर्त्तत इति भावः । उरुयेत्यादौ छान्दसत्वाद्दीर्घाभावः ।।
र ऋतो हलादेर्लघोः ।। 6 - 4 - 161 ।।

परिगणनं कर्त्तव्यमिति । एवं च हलादेर्लघोः इति न वक्तव्यम् । मातयतीति । उणादीनामव्युत्पन्नत्वात् तुरिष्ठेमेयःसु इति तृशब्दस्य लोपो न भवति, अत्र परत्वाट्टिलोपं बाधित्वा रभावः प्राप्नोति ।।

प्रकृत्यंकाच् ।। 6 - 4 - 163 ।।

इष्ठेमेयस्सु परत इति । यदि त्विष्ठादीनामिहानुवृत्तिर्न स्यात्, तदा श्रिये हितम् प्राक् क्रीताच्छः श्रीयम्, ज्ञा देवतास्य ज्ञः स्थालीपाक इत्यत्र यस्येतिलोपो न स्यात्, ततश्च श्रीयमित्यत्रेयङादेशः स्यात्, तस्मादनुवर्त्या इष्ठादयः । स्रजिष्ठ इति । थअथ प्रादयः किमित्युपेक्षिताः - प्रेष्ठः, प्रेयान्, स्थेष्ठः, स्थेयानिति असिद्धत्वात्प्रादीनां टिलोपो यस्येतिलोपश्च न भविष्यति । इह तर्हि श्रेष्ठः, श्रेयानिति अकारोच्चारणसामर्थ्याल्लोपो न भविष्यति । तस्माद्विन्मतोर्लुक्येवास्योदाहरणस्य सम्भवः । यद्येवम्, नाप्रप्ते टिलोपे आरभ्यमाणे विन्मतोर्लुक् लोपं बाधिष्यते सत्यम् विन्नन्तस्य मत्वन्तस्य च टिलोपः प्राप्तस्तं बाधते । यस्तु तयोलुकि कृते अवशिष्टस्य टिलोपः प्राप्नोति, तस्य कथं बाधकः स्यात् । न हि तस्मिन्नप्राप्ते विन्मतोर्लुगारभ्यते । अवश्यं चैतदेवं विज्ञेयम् - अविशिष्टस्य यष्टिलोपस्तं न बाधत इति अन्यथा यत्रावशिष्टमनेकाच् तत्रापि टिलोपो न स्यात्, ततश्च वसिष्ठः, वसीयानिति प्रत्युदाहरणं नोपपद्यते । एवं चातिशयेन ब्रह्मवान् ब्रह्मष्ठः, अवशिष्टस्य नस्तद्धिते इति टिलोपो भवति । बह्वच्ब्राह्मणं च - तस्माद्भाह्मणं ब्रह्मिष्ठं कुर्वीत इति, तथातिशयेन पयस्वी पयिष्ठ इति भवति, न तु पयसिष्ठ इति ।

अपर आह -

इष्ठेमेयस्स्वनेकाचोऽप्यवशिष्टस्य नेष्यते ।

टिलोपो भाष्यकारेण प्रवृत्ते विन्मतोर्लुकि ।। इति ।

प्रकृत्येत्यादि । राज्ञोऽपत्यं राजन्यः, राजश्वशुराद्यत्, मनोरपत्यं मनुष्यः, मनोर्जातावञ्यतो पुक्च, ताभ्यां समूहे गोक्षोक्षोष्ट्र इत्यादिना वुञ् । आपत्यस्य चेत्यादि । एतच्चानयोरपत्यवाचित्वमङ्गीकृत्योक्तम् । यदा तु जातिमात्रमुभयत्र शब्दार्थः, अपत्यार्थस्तु नास्त्येवेति पक्षः तदानापत्यत्वादेव लोपस्या प्रसङ्गान्नार्थः प्रकृतिभावेन ।।

इनण्यनपत्ये ।। 6 - 4 - 164 ।।

सांकूटिनमिति । कूट दाहे, दीर्घोपधः, अभिविधौ भावे इनुण्, अमिनुणः ।।

गाथिविदथिकेशिगणिपणिनश्च ।। 6 - 4 - 165 ।।

मत्वर्थीयेन्नन्ता एते । गाथाशब्दो व्रीह्यादिः । विदथः - यज्ञः ।।

संयोगादिश्च ।। 6 - 4 - 166 ।।

अयमपत्यार्थ आरम्भः ।।

अन् ।। 6 - 4 - 167 ।।

अनपत्ये इति निवृत्तम् । सामनः, वैमन इति । तस्येदम् इत्यण्, सुयजोर्ङ्वनिप्, ह्रस्वस्य तुक् - सुत्वा, तस्यापत्यं सौत्वनः ।।

ब्राह्मोऽजातौ ।। 6 - 4 - 171 ।।

योगविभागोऽत्र क्रियते इति । यदि न क्रियते, तदापत्य इत्यनुवर्त्तते वा, न वा तत्रानुवृत्तावनन्तरसूत्रेण प्रकृतिभावप्रतिषेधात् नस्तद्धिते इत्येव टिलोपस्य सिद्धत्वान्नियमार्थमेतद्भवति - अजातावेवापत्ये इति, तत्रापत्ये सिद्धमिष्टम् - ब्राह्मो नारदः, ब्राह्मणजातिरिति । अनपत्ये तु जातावजातौ च न क्वचिट्टिलोपः स्याद् - ब्राह्मी ओषधिः, ब्राह्मं हविरिति । अननुवृत्तौ तु विधिनियमसम्भवे विधिरेव ज्यायानिति अनपत्ये अन् इति प्रकृतिभावे प्राप्ते अजातौ टिलोपार्थं विध्यर्थमेतद्भवति , तत्र ब्राह्मं हविरित्यादि सिद्धम्, ब्राह्मी ओषधिरिति न सिध्यति अजाताविति प्रतिषेधात्, ब्राह्मणी ओषधिरिति प्राप्नोति । अपत्ये च जातौ ब्राह्मण इति न सिध्यति, पूर्वसूत्रेण प्रकृतिभावे प्रतिषिद्धे टिलोपप्रसङ्गादिति भावः । विभक्तस्यार्थमाह - ब्राह्म इत्येतदिति । सामर्थ्यादिति । अपत्ये पूर्वेणैव टिलोपस्य सिद्धत्वाद्भाह्म इत्येतावता नियमस्य कर्त्तुमशक्यत्वाच्च, तत्रापत्येऽपि ब्राह्मो नारद ििति परत्वादनेनैव टिलोपः । अपत्ये वेति । अन्यथा अनपत्ये वापत्ये च जातौ प्रतिषेधः स्यात्, प्रसज्यप्रतिषेश्चायमित्याह - अपत्ये जाताविति ।।

कार्मस्ताच्छील्यो ।। 6 - 4 - 172 ।।

यद्येवमिति । यदि तु णप्रत्ययोऽयमित्यर्थः । नस्तद्धित इति टिलपोः सिद्ध ििति । अणि हि प्रकृतभावः । ज्ञापनार्थमिति । एवं च छत्त्रा दिभ्योऽण् इति लाघवाय कर्त्तव्यम् णवचने प्रयोजनाभावात् । ताच्छीलिक इति । लुल्यजीतीयविषवत्वाज्ज्ञापनस्यैतल्लभ्यते, तेन तदस्यां प्रहरणम्, प्रज्ञाश्रद्धार्चा इत्यादिके णे ङीब्न भवति ।।

दाण्डिनायनहास्तिनायनार्थर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ।। 6 - 4 - 174 ।।

उपचारादिति । मुख्यस्याध्ययनासम्भव उपचारे हेतुः ।

भ्रौणहत्येति तु निपातनानर्थक्यम् , हनस्तोऽचिण्णलोः इति तकारस्य सिद्धत्वात् । न च नस्तद्धिते इति टिलोपप्रसङ्गः, उभयोरनित्ययोः परत्वात्तस्यैव भावादत आह - हनस्तोऽचिण्णलोरिति । धातुस्वरुपग्रहणे तत्प्रत्यये धातोरित्येवं विहितो यस्तत्रैव कार्यं विज्ञायते, न च ष्यञेवं विहितः, किं तर्हि प्रातिपदिकादित्येवम्, तेनात्र तो निपात्यते । कथं निपातनात् । एवं तर्हि कुत्वानिवृत्त्यर्थं निपातनम् मैवम् तथाहि - न क्वादेः इत्यत्र प्रकरणे भ्रूणघ्नः ष्यञि इत्यवक्ष्यत्, अतस्तत्त्वार्थमपि निपातनं सत् ज्ञापकमेव ।

ऐक्ष्वाकशब्दोऽयमाद्युदात्तोऽन्तोदात्तश्चष्यते, तत्रान्यतरस्य पाठे इतरस्योकारलोपो न सिद्ध्यति, तत्राह - स्वरसर्वनाम्नोति । उदात्तादीनामविभागेनावस्थानम् - एकश्रुतिः, सर्वनामवत्सर्वनाम । यथैव हि तस्यापत्यम् इत्यादौ उपगुप्रभृतीन्विशेषान्सर्वनाम प्रतिपादयति, तथैकश्रुतिरप्युदात्तादीन्स्वरविशेषानिति एकश्रुतेः सर्वनामत्वम् ।

इयादेशापवाद इति । केकयादिसूत्रेण प्राप्त इयादेशः ।

इह मित्रयुशब्दस्य चतुर्ग्रहणं क्रियते - गृष्ट्यादिषु प्रत्ययसिद्ध्यर्थम्, यस्कादिषु लुगर्थम्, केकयादिसूत्रे इत्यादेशार्थम्, इदं चतुर्थं युलोपार्थम् तत्र द्विर्ग्रहणमकर्त्तु शक्यमित्यभिप्रायेणाह - अथ किमर्थमिति । लुगर्थः पाठो न कर्त्तव्य इति । यञञोरित्येव सिद्धत्वात् । परिहरति - नैतदस्तीति । अण्प्राप्नोतीति । यदी तु सङ्घाङ्कलक्षणेषु इत्यस्यानन्तरं न मैत्रेयादित्युच्येत, तदा त्रीणि ग्रहणानि, नार्थो निपातनेन । यलोप इति । युशब्दस्य लोप इत्यर्थः ।।

ऋत्व्यवास्त्यवास्त्व्यमाध्वीहिरण्ययानि छन्दसि ।। 6 - 4 - 175 ।।

मलोपो निपात्यत इति । तस्यासिद्धत्वाद्यस्येतिलोपाभावः । एवमपि अकृत्सार्वधातुकयोर्दीर्घः इति दीर्धः प्राप्नोति, अङ्गवृत्तेः पुनर्वृत्तौ इति वचनान्न भविष्यति । क्वचित्तु मकारलोप इति पठन्ति । तत्र यस्येति लोपे कृते प्रत्ययाकारस्य श्रवणम् ।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यो षष्ठास्याध्यायस्य चतुर्थः पादः

7.1

ॐ

अथ सप्तमाध्याये प्रथमः पादः

युवोरनाकौ ।। 7 - 1 - 1 ।।

शास्त्रस्य लाघवार्थं युवू प्रत्ययौ उपदिष्टौ, तयोरनेनानाकावादेशौ विधीयेते तत्रतत्र ह्यनाकयोरेवोपदेशे शास्त्रस्य गौरवं स्यात् । इह कस्मान्न भवति - यु मिक्षणे, युतः युतवान् उदितोर्युवोरिदं ग्रहणम् । कथम् ल्यडादिषूकारोऽनुनासिक इत्संज्ञकः । एवमपि द्यूत्वा, द्यूतः, द्यूतवान - अत्र प्राप्नोति, ऊठस्त्वनुदिदवकाशः अथार्थवतो युवुशब्दस्य ग्रहणम्, अनर्थकश्चनायम्, तेन धात्वन्तस्य न भवति । भुज्युः, मृत्युः, कंयुः शंयुः ऊर्णायुरित्यादावुकारस्यानित्संज्ञकत्वादादेशाभावः । यदि तर्हि ल्युडादिषूकार इत्संज्ञकः - नन्दनः, कारकः, उगिदचाम् इति नुम् प्राप्नोति उगितो झलन्तस्य नुम्, न चौतौ झलन्तौ । तत्तर्हि झल्ग्रहणं कर्त्तव्यम् नेत्याह, यदेतत् नपुंसकस्य झलचः इति झल्ग्रहणं तत्पुरस्तादपक्रक्ष्यते, उगिदचां सर्वनामस्थानेऽधातोर्झलः युजेरसमासे, ततः - नपुंसकस्य झलढ, इत्येव, ततः, अचः, नपुंसकस्य इत्येव, तच्चावश्यं झल्ग्रहणमपक्रष्टव्यम्, अन्यथोगितो लिङ्गविशिष्टस्यापि नुम् प्रसज्येत - गोमती भवती । इह तर्हि नन्दना, कारिका - उगितश्च इति ङीप् प्राप्नोति ज्ञापकात्सिद्धम्, यदयं क्वचिद्युवू षिट्टितौ करोति - शिल्पिनि ष्वुन्, ट्युट्युलौ तुट् च इति, तज्ज्ञापयति - न युवोरीकारो भवतीति । नैतदस्ति ज्ञापकम् षित्करणं ङीषर्थम्, टित्करणमनुपसर्जनार्थम्, टितो ह्यनुपसर्जनात् ङीप् भवति, उगितः पुनरविशेषेण । तथा शातनपातनशब्दौ ल्युडन्तौ गौरादिषु पठितौ, तत्र शातनितरा, पातनितरा, नद्याः शेषस्यान्यतरस्याम् उगितश्च इत्युगिल्लक्षणो ह्रस्वविकल्पः प्राप्नोति । ननु चोगित इत्येवमुगितसंज्ञाशब्दनेन या नदी विहिता तस्यास्तत्र ग्रहणम् नेत्याह, इह हि दोषः स्यात् - भोगवतितरा, गौरिमतितरा, शार्ङ्गरवादिङीनन्तावैतौ, तत्र ह्रस्वविकल्पो न स्यात्, इष्यते चात्रापि ह्रस्वविकल्पो भाष्यकारेण । तस्मान्नैवं शक्यम् - उदितोर्युवोर्ग्रुहणम् इति । न चेदेवं युतः, युत्वा, भुज्युः, शंयुरित्यत्रापि प्राप्नोति तत्राह - अनुनासिकयणोरिति । सन्ति हि यणः सानुनासिकाः, निरनुनासिकाश्च, तत्र येषामादेश इष्यते तेषु यकारवकारावनुनासिकौ पठितव्यौ, तेन क्वाप्यनिष्टप्रसङ्गः । प्रत्ययोरिति । वस्तुकथनमेतत्, न त्वप्रत्ययनिवृत्त्यर्थम्, तथाविधास्यानुनासिकस्य यणोऽसम्भवात् ।।

मुत्युरिति । भुजिमृङ्भ्यं युक्त्युकौ इति सूत्रे सहनिर्दिष्टत्वादिदमुदाहृतम्, शक्यते ह्यत्र वक्तुम् - अङ्गस्य यौ युवू, कौ चाङ्गस्य युवू, ययोरङ्गमित्येतद्भवति, कयोश्चैतद्भवति प्रत्ययोः न चैष प्रत्यय इति । आनर्थक्याच्च ट्युटयुलोस्त्वनादेशे कृते पश्चात्तुडित्यर्थवत्त्वं प्रत्ययत्वं च । किमुच्यतेऽनुनासिकत्वं न प्रतिज्ञायत इति , न पुनर्न पठ्यते इत्यत आह - प्रतिज्ञानुनासिक्या इति । प्रतिज्ञयानुनासिक्यं येषां ते तथोक्ताः । सर्वत्र पाठाभावात्सतोऽपि वा पाठस्य सङ्कीर्णत्वात्प्रतिज्ञासमधिगम्यमेवानुनासिकत्वमित्यर्थः ।

युवोरिति समाहरद्वन्द्वेश्चेत् स नपुंसकम् इति नपुंसकत्वे सति औत्वगुणवृद्धितृज्वद्भावेभ्यो नुम् पूर्वविप्रतिषिद्धम् इति वचनात् घेर्ङिति इति गुणं बाधित्वा इकोऽचि विभक्तौ इति नुमि सति युवुन इति भवितव्यम् इतरेतरयोगद्वन्द्वे तु द्विर्वचने यणादेशे च सति द्वयोर्वकारयोः श्रवणप्रसङ्गः । स्थानिवद्भावाद्वलि लोपोऽपि नास्ति, तत्कथमयं निर्द्देशः इत्याह - युवोरिति । नपुंसकलिङ्गता चेति । न भवतीति वक्ष्यमाणेन सम्बन्धः । मध्ये हेतुः । लिङ्गमशिष्यमिति ।

छान्दसो वर्णलोप इति । अकृत एव यणादेश उकारस्य लोपः, कृते वा तस्मिन्नन्यतरस्य वकारस्य अपर आह - कर्मधारयोऽयम्, अवयवधर्मेण समुदायस्य व्यपदेशः । युश्चासौ समुदायो युवुलक्षणो वुश्चासाविति तत्र समुदाययस्य क्वचिदभावादवयवयोरेवानाकादेशाविति ।

आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम् ।। 7 - 2 - 2 ।।

फकारादिष्वकार उच्चारणार्थः । व्यञ्जनमात्रं स्थानि अन्ते फढखछघाम् इत्यनच्कनिर्देशात् । एवं च निरनुवन्धकपरिभाषा न प्रवर्त्तते । आढ्यकुलीन इति । अपूर्वपदात् इति वचनात् कुलात्खः इत्यनेन सपूर्वपदादपि खो भवति ।

फक्क नीचैर्गतौ ढोकृ तौकृ गत्यर्थौ । इह प्रत्ययाद्युदात्तत्वं संज्ञासन्नियोगेन विधानादन्तरङ्गम् ।

एते त्वायन्नादयोऽङ्गाधिकारे विधानाद्वहिरङ्गाः, ततश्च यत्र स्वरार्थोऽनुबन्धो नास्ति - शिलाया ढः ,

वृद्धच्छः इत्यादौ तत्राद्युदात्तत्वे कृते पश्चाद्भवन्त एते आदेशा अस्वरकस्याच उच्चारणसम्भवादनियतस्वराः स्युः इत्याङ्क्याह - आयन्नादय इत्यादि । अयमभिप्रायः - प्रत्ययादीनां फकारादीनामङ्गसम्बन्धाव्यभिचारात्प्रयोजनाभावादिह अङ्गस्य इति न सम्बध्यते, तेन एतेऽप्यन्तरङ्गा, तत्र परत्वादेतेषु कृतेषु पश्चादाद्युदात्तत्वमिति । अत्रैय ज्ञापकमाह - तथा चेति । यदि प्रत्ययस्वरे कृते आयन्नादय आदेशाः स्युः, ततो घशब्दाकारस्योदात्तत्वे कृते घकारस्य हलः स्रंसनधर्मिणः स्रंसनधमिण्यनुदात्त आदेशे कृतेऽन्तोदात्तत्वं सिद्धमिति चित्करणमनर्थकं स्यादिति भावः । इयङिति । वावचनं ज्ञापकमिति । यदि धातुप्रत्ययानामप्येते आदेशाः स्युः ऋतेश्छङ् इत्येष ब्रूयात् । न च छङि सति वलादिलक्षणे इटि कृते अनादित्वादियादेशो न स्यादिति वाच्यम्, इदानीमेव ह्युक्तम् - अन्तरङ्गा आदेशा इति ।

अपर आह - यदि धातुप्रत्ययेष्वेतज्ज्ञापकं प्रातिपदिकप्रत्ययेष्वपि शख्यं वक्तुं यदयमीयसुनं शास्ति, तज्ज्ञापयत्याचार्यः न प्रातिपदिकप्रत्ययानामिमे आदेशा इति । यदि स्युस्तर्हि छसुनमेव विदध्यात् । एतावन्तश्च प्रत्ययाः - धातुप्रत्ययाः, प्रतिपदिकप्रत्ययाश्चेति, उच्यन्ते चादेशाः ते वचनात्सर्वत्रैव स्युरिति ।

इत्संज्ञया भवितव्यमिति । न च वचनसामर्थ्यादित्संज्ञाया बाधनमित्याहतिद्धितेषु हीति । प्रतिविधानं कर्त्तव्यमिति । प्रतिविधानं तु प्राचामवृद्धात्फिन् बहुलम् इति फिनो नित्करणादित्संज्ञाया अभाव इति । न च फेश्छ च इत्यत्र फिनः, फिञश्च सामान्यग्रहणार्थं नित्करणम् , वृद्धादित्यधिकाराद्धि फिञ एव तत्र ग्रहणम्, न फिनः ।।

झोऽन्तः ।। 7 - 1 - 3 ।।

आदिग्रहणं निवृत्तमिति । तदनुवृत्तौ हि शयान्तै इत्यत्र शीङो लेटि लेटोऽडाटौ इति लावस्थायामेव प्राप्ते आटि सति झकारस्यानादित्वान्न स्यात् । कथं पुनः समासनिर्दिष्टानामेकदेशोऽनवर्त्तते नैष दोषः, अनाश्रितार्थकं शब्दमात्रं स्वरितत्ववशादनुवर्त्तते - इति पक्षे यस्यैव स्वरितत्वं प्रतिज्ञातं तस्यैवानुवृत्तिः । अर्थाधिकारपक्षे तु समासार्थस्यैकत्वात्तस्यैवानुवृत्तिः स्याद्वा, न वा । यद्वा - प्रत्ययग्रहणं पूर्वसूत्रे पृथक् पदं लुप्तविभक्तिकम्, तेन तस्यैवानुवृत्तिर्भविष्यति । आदेशे त्वकार उच्चारणार्थः तेन पचन्तीत्यादौ श्रवणं न भवति ।।

अदभ्यस्तात् ।। 7 - 1 - 4 ।।

ददतीत्यादि । जक्षतीत्यादौ यत्रोपदेशानन्तरमभ्यस्तसंज्ञा, तत्राप्यवश्यं विकरणाभावः प्रतीक्ष्यः, अन्यथा नित्यत्वाच्छपि कृते तेन व्यवधानान्न स्यात्, ततश्च ददतीत्यादावपि शपः श्लावभ्यस्तसंज्ञायामदादेशो भवति ।

जुसादेशेन तु बाध्यत इति । तस्यानवकाशत्वात् । अत्राप्यादेशे कृते प्रत्ययाद्युदात्तत्वं भवतीति । उत्तरत्रेति भावः । इह तु अभ्यस्तानामादिः इति स्वरो भवति ।।

आत्मनेपदेष्वनतः ।। 7 - 1 - 5 ।।

अनभ्यस्तार्थमिदं वचनम् । चिन्वतामिति । लोट्, टेरेत्वम् आमेतः । च्यवन्त इति ।

ननु चात्रापि प्रागेव शपः परत्वाददादेशप्रसङ्गः, अनतः इत्यस्य तु बेभिधन्ते - इत्यादिरवकशः इत्यत आह - नित्यत्वादिति । झकारविशेषणं किमिति । श्रुतानामात्मनेपदानामधिकृतस्य प्रत्ययस्य वा विशेषणे को दोष तइति प्रश्नः । शयान्तै इति । अत्राङ्गस्यानन्तरमात्मनेपदमाटस्तद्भक्तस्य तद्ग्रहणेन ग्रहतथणात्, झकारस्त्वाटा व्यवहितः । अन्तादेशस्त्वङ्गविशेषानुपादानादत्रापि भवति ।।

शीङो रुट् ।। 7 - 1 - 6 ।।

झादेशस्यात् इति । ननु च नेहाद्ग्रहणमस्ति, यदपि प्रकृतं तदपि प्रथमानिर्दिष्टम्, षष्ठीनिर्दिष्टेन चेहार्थः, शीङ इत्येषा पञ्चमी अदिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति, तस्मादित्युत्तरस्य इति । शेरत इति । सार्वधातुकावयवस्य झस्यादादेशस्तदागमो रुट् तद्ग्रहणेन गृह्यते । अवयवस्य समुदायं प्रत्यवयवत्वं लोकेऽपि दृश्यते, यथा - देवदत्तस्याङ्गुलिरिति । सार्वधातुकस्याप्यवयवो रुडिति शीङः सार्वधातुके गुणः इति गुणो भवति ।

किं पुनः कारणं रुडागमो झदेशस्यातो विधीयते, नझकारस्यैव वधीयते, एवं हि न षष्ठी प्रकल्प्या

भवति अत आह - रुडयमिति । यदि तु ककारासञ्जनेन पूर्वान्तः क्रियेत, शेरत इत्यत्र गुणो न स्याद् अनिगन्तत्वात् । तस्मात् परादिरेव वक्तव्यः । स यदिच झकारस्यैव स्यात्, ततो यथा शयान्तै इत्यत्राटा व्यवहितत्वाज्झस्यादादेशो न भवति, तथा शेरते इत्यत्रापि न स्यात् रुटा व्यवहितत्वात् ।

ननु च युक्तमाटा व्यवधानम्, स हि सार्वधातुकभक्तस्तदेव न व्यवदध्यात्, झकारं तु व्यवदधात्येव, रुट् पुनर्झकारभक्तः स कथं तस्य व्यबधायकः उच्यते गृह्यता तावत्तद्ग्रहथणेन , तथापि निर्दिश्यमानस्यादेशा भवन्ति इति यदत्र निर्दिश्यते झ इति विशिष्टं रुपं न तदनन्तरम्, यश्चानन्तरो रेफझकारसमुदायो न स निर्दिश्यत इति न स्यादेवादेशः । अपर आह - आदेशो न स्यादिति, कोऽर्थः झस्य न स्यादिति, कस्य तर्हि स्यात् आदेः परस्य

इति रुट एव स्यात् । न च रुटेः वैयर्थ्यं स्यात्, झकारस्य श्रवणार्थत्वात् इति, तच्चिन्त्यम् अनेकाल्त्वात्सर्वादेशः प्राप्नोति । सर्वादेशे रुटो वैयर्थ्यमिति चेत् किं कुर्मः मा भूदादेशः । शीङः इत्यनुबन्धोच्चारणं यङ्लुग्निवृत्त्यर्थम् - व्यतिशेश्यते । गुणोऽपि न भवति तत्राप्यनुबन्धनिर्द्दशात् ।।
वेत्तेर्विभाषा ।। 7 - 1 - 7 ।।
संविद्रत इति । समो गम्यृच्छि इत्यादिनात्मनेपदम् । वित्त इत्यादि । विद विचारणे, रुधादिरनुदात्तेत् । सत्तालाभार्थयोस्तु विकरणव्यवधानादेवाग्रहणम् । अत्र च बहुवचनं प्रत्युदाहरणम्, इतरयोरुपन्यासो विचारणार्थस्येदं बहुवचने रुपमिति प्रदर्शनार्थम् । विदन्ते इति रुपस्य लाभार्थे तौदादिके स्वरितेत्त्वादात्मनेपदे एकवचने शे मुचादीनाम् इति नुम्यपि कृते सम्भवात् । किञ्च - वेत्तेरिति श्तिपा निर्द्देशादेव यङ्लुकि न भवति - व्यतिवेविदते इति ।।
बहुलं छन्दसि ।। 7 - 1 - 8 ।।
बहुलवचनादन्यत्रापि भवतीति । एतदर्थमेव विभाषाग्रहणे प्रकृतेऽपि बहुलग्रहणं कृतम् ।
अदृश्रमिति । इरितो वा इति वाङ् ।।
अतो भिस ऐसं ।। 7 - 1 - 9 ।।
अतिजरसैरिति । अत्रैव चैकारस्य श्रवणार्थमैसादेशः कृतः । वृक्षैरित्यादावेसादेशेऽपि वृद्ध्या रुपं सिद्धम् । अतो गुणे इति पररुपं तु न भवति यदि स्यात, इसमेव विदध्यात् ।
परत्वादिति । एत्वस्यावकाशः - वृक्षेषु, ऐसोऽवकाशः कृत एत्वे, प्रागेत्वादुभयप्रसङ्गे परत्वादेत्वप्रसङ्ग इति चेन्मन्यसे, अत एस क्व भविष्यति एत्वे कृते मुख्यमकारान्त न भवतीति प्रश्नः कृत एत्वे भौतपूर्व्यादिति । भूतपूर्वस्य भावो भौतपूर्व्यम्, साम्प्रतिकाभावाद्भूतपूर्वगतिराश्रीयत इति भावः । एस् तु नित्यस्तथा सतीति । एवं हि सत्यैस्भावो नित्यः, कृताकृतप्रसङ्गित्वात् । एत्वं त्वैसि कृते न प्राप्नोति अझलादित्वात् । न च तत्र भूतपूर्वगतिः मुख्यस्यैव सम्भावात् । एतच्चोद्यपरिहारमुत्सर्गापवादभावमनाश्रित्य कृतं द्रष्टव्यम्, तदाश्रयणे हि नाप्राप्त एत्व आरम्भादैसपवाद इत्ययुक्तो विप्रतिषेधः स्यात् ।।
नेदमदसोरकोः ।। 7 - 1 - 11 ।।
इदमदसोः इति भिसपेक्षया सम्बन्धलक्षणा षष्ठी । एभिरिति । त्यदाद्यत्वम्, हलि लोपः इतीद्भागस्य लोपः । अमीभिरिति । ऐसि प्रतिषिद्धे बहुवचने झल्येत् इत्येत्वम् एत ईद्बहुवचने इतीत्वमत्वे ।
अकोरित्येतदनर्थकम्, कथम् विशिष्टरुपाश्रयोऽयं प्रतिषेधः - इदमदसोः इति, तत्राकचि कृते रुपभेदादेव न भविष्यति तत्राह - अकोरित्येतदेवेति । ज्ञापनस्य परयोजनम् - सर्वके इत्यादौ सर्वनामकार्यप्रवृत्तिः ।
इमौ द्वौ प्रतिषेधावुच्येते, द्वावपि शक्यावक्तुम् । कथम् एवं हि वक्ष्यामि - इदमदसोः कात् इति, तन्नियमार्थं भविष्यति - इदमसोरेव कादिति । ततश्च सर्वकैरित्यादौ न स्यात्, एभिरित्यादौ च स्यादेव - तन्मध्यपरिभाषा च न ज्ञापिता स्यात् । क्वचित्तु वृत्तावेव पठ्यते - इदमदसोः कादिति नोक्तम्, विपरीतोऽपि नियमः स्यात् - इदमदसोरेव कादितीति ।।
टाङसिङसामिनात्स्याः ।। 7 - 1 - 12 ।।
अतिजरसिनेत्यादि । समासे ह्रस्वत्वे कृते इनादेशः, ततः सन्निपात्परिभाषाया अनित्यत्वाज्जरसादेशः ।
एवमतिजरसादित्यत्राप्यादादेशे कृते जरसादेशः । ननु च टाङस्योरेवाजादित्वात्प्रागिनादादेशाभ्यां जरसादेशः प्राप्नोति, स हि नित्यः परश्च, तत्र कृतेऽनदन्तत्वादेवेनादादेशयोरभावे अतिजरसा, अतिजरस इति भवितव्यम् । नैष दोषः, एवं हि इनादेशस्य, अदादेशस्य च विधानमनर्थकम्, नादेशोऽदेशश्च विधेयः स्यात्, का रुपसिद्धः
इह तावद् वृक्षेणेति एत्वे योगविभागः करिष्यते - बहुवचने झल्येत्, ओसि च, ततः आङि च - आङि च परतोऽत एत्वम्- वृक्षेण । नैवं शक्यम्, थइह ह्यनेनेति हलि लोपः इति इद्रपलोपे सति एनेति प्राप्नोति हलि लोपः इत्यपनीय झलि लोपः इति सूत्रे करिष्येत, तत्र नकारस्याझल्त्वाल्लोपाभावः । न स शक्यो झलि लोपो वक्तुम्, इह हि न स्यात्, - अयाविष्ट, अजनयत, अयेति इदमश्चतुर्थ्यकवचनस्य सुपां सुलुक इत्यादिना यादेशः, सुपि च इति दीर्घाभावः छान्दसः, तत्रास्याझलादित्वादिद्रूपलोपो न स्यात् । तस्माद्धलि लोप एव कर्त्तव्यः, ततश्चानेनेति न सिध्यति एवं तर्हि अनाप्यकः इति द्विनकारकोऽयं निर्द्देशः, तत्रादेशसम्बन्धी पदान्तत्वाल्लुप्तः नश्च आप् च नाप्, तत्र परत इदोऽनादेश इति सूत्रार्थाश्रयणादिद्रूपलोपापवोदो नशब्दे परतो नादेश एव भविष्यति । यद्यवम्, आदेशेन लोपस्यासिद्धत्वाद्राजेत्यादाविव सूत्रे दीर्घप्रसङ्गः - अनाप्यकः इति नैष दोषः, सुपां सुलुक् इति लुकि कृते न लुमताङ्गस्य इति प्रतिषेधः । वृक्षादित्यत्रापि सवर्णत्वेनैव सिद्धम्, अकारोच्चारणसामर्थ्यादतो गुणे पररुपं न भविष्यति । तदेवमिनादेशस्यादादेशस्य च विधानसमर्थ्यात्पूर्वमिनादादेशौ, पश्चाज्जरसादेश इत्यषामभिप्रायः ।
यथा त्वित्यादि । भाष्ये हि पूर्वोक्तप्रक्रियाश्रयणेन नाधेशोऽदादेशश्च व्यवस्थापितः । यदि चैतद्रूपद्वयमिष्टं स्यात्, तयोरादेशयोः प्रत्याख्यानमनुपपन्नं स्यात् । तत्र सन्निपातपरिभाषया जरसादेशाभावादतिजरेण, अतिजरादिति भाष्यकारस्याभिप्रेतिमिति केचित् । प्रागेव जरसादेशे - अतिजरसा, अतिजरस इत्यभिप्रेतमित्यन्ये ।।
ङेर्यः ।। 7 - 1 - 13 ।।
ङे इति चतुर्थ्यकवचनस्य ग्रहणमिति । तस्य हि ङे इति रुपं प्रतिपदोक्तं सप्तम्येकवचनस्य घेर्ङिति इति गुणे लाक्षणिकम् । यद्यपि ङेः इति

विभक्त्यन्तमुपात्तम्, तच्चोभयोरपि लाक्षणिकम्, थथापि प्रत्ययात्पूर्वस्य भागस्य लाक्षणिकत्वप्रतिपदोक्तत्वापेक्षेया परिभाषाप्रवृत्तिः । यद्येवम्, ङेराम्नद्याम्नीभ्यः इत्यत्राप्येवमेव प्रसङ्गः तस्माव्द्याख्यानमेवात्र शरणम् । लिङ्गं च - तस्मै प्रभवति, तदस्मै दीयते, तस्मै हितम्, तदस्यैं प्रहरणमिति क्रीडायां णः इत्यादि । वृक्षायेति । सुपि च इति दीर्घः ।

कथं पुनरकारसन्निपातकृतो यशबद्स्तद्विधातनिमित्तं भवति अत आह - सन्निपातलक्षण इति । अनित्यत्वं तस्याः कष्टाय क्रमणे इति निर्द्देशादवसीयते ।।

सर्वनाम्नः स्मै ।। 7 - 1 - 14 ।।

भवत इति । द्विर्यन्तास्त्यदादयः इति वचनादन्यत्र त्यदाद्यत्वाभावादनकारन्तत्वम् । अन्वादेशेऽशदेशे कृत इति । अनन्वादेशे त्वत्रास्मै चेद्रूपलोपः, न चाकृते इद्रूपलोपे एकादेशः प्राप्नोतीति । न चाद्गुणप्रसङ्गः, नित्येनेद्रूपलोपेन बाधितत्वात् । एकादेशः प्राप्नोतीति । नित्यत्वात् । वाक्यसंस्कारपक्षे चैतच्चोद्यम् । तद्ध्यर्थप्रतिपादनाय लोके प्रयुज्यते, तदेव च शास्त्रे विभज्यान्वाख्यायते । अन्तरङ्गत्वादिति । एकपदा(यत्वादन्तरङ्गत्वम्, पदद्वयाश्रयत्वादेकादेशो बहिरङ्गः ।।

पूर्वादिभ्यो नवभ्यो वा ।। 7 - 1 - 16 ।।

द्वये पूर्वादयः - सूत्रपठिताः, गणपाठपठिताश्च, सर्वनाम्नः इति चेहानुवर्त्तते तत्रासति नवग्रहणे ङसिङ्योर्येन सर्वनामसंज्ञा स गणपाठ एव गृह्यत इति नवग्रहणम् ।

इह जसिङसिङीनां शीस्मात्स्मिनः पूर्वादिभ्यो नवभ्यो वा, औङ आपः, शी नपुंसकाच्च इति सूत्रन्यासः कर्त्तव्यः, एवं जसि विभाषार्थानि त्रीथणि सूत्राणि न कर्त्तव्यानि भवन्ति तथा तु न कृतमित्येव ।।

जसः शी ।। 7 - 1 - 17 ।।

दीर्घोच्चारणमुत्तरार्थमिति । खथइह त्वत इत्यधिकाराद् गुणेन भवितव्यमिति, ह्रस्वेऽपि सिद्धम् । न च सर्वे छत्त्रिण इत्यत्र षत्वतुकोरसिद्धः इत्येकादेशस्यासिद्धत्वाद् ह्रस्वाश्रयस्य नित्यस्य तुकः प्रसङ्गः, तत्र हि पदान्तपदाद्योर्य एकादेशस्तस्यैवासिद्धत्वम् ।।

औङ आपः ।। 7 - 1 - 18 ।।

औङः इति निर्द्देशं क्रियमाणमनुवादपूर्वमाक्षिपति ।

औकारोऽयमिति । कोऽयं प्रकारः, कृत्सितोऽयं सूत्रप्रणयनप्रकारः, सिद्धस्य ह्यनुवाद उपपद्यते, यथा - ङेर्यः इति, अयं तु न क्वापि सिद्ध इति परिहरति - कामान्यार्थ इति । औतः इत्युच्यमाने प्रथमाद्विवचनस्यैव स्यान्िरनुबन्धकत्वात्, न सानुबन्धकस्यौटः । यद्यपि टकारः प्रत्याहारार्थत्वात्समुदायानुबन्धः, तथापि प्रत्ययानुबन्धत्वमपि तस्याविरुद्धम् । व्द्यर्थां अपि हेतवो भवन्ति, तद्यथा - आम्राश्च सित्ताः पितरश्च प्रीणिताः इति, औट इत्युच्यमाने प्रथमाद्विवचनस्य न स्यात् । तस्माद् द्वयोरपि सामान्यग्रहणार्थो ङकारानुबन्धनिर्द्देशः । नन्वसतोऽवुवादोऽनुपपन्न इत्याक्षेपः, तत्र प्रयोजनाभिधानमसङ्गतम् नैष दोषः, ओदौटोरौङिति वधिवाक्यमस्मादेवानुवादादनुमास्यते, तस्यैव प्रयोजनाभिधानम् । पुनश्चोदयति - तस्य चेति । तस्य ङकारानुबन्धस्यासञ्जनेऽस्मिन्नेवं विज्ञायमाने ङित्कायं याडापः इत्येतत्ते एवंवादिनस्तव, श्यां शीशब्दे परतः, प्रसक्तम् । प्रसजतु नाम तत्राह - स दोष इति । दोष इत्यनेन सामानाधिकरण्यात्स इति पुंल्लिङ्गनिर्द्देशः । परिहरति - ङित्त्व इति । वर्णमात्रनिर्द्देशः इति ववक्षितम्, वृत्तभङ्गभयात्त्वस्थाने माक्षशब्दः प्रयुक्तः । याडापः इत्यत्र ङितीति यदनुवृत्तं न स बहुव्रीहिः ङ इद्यस्येति किं तर्हि कर्मधारयः - ङश्चासविच्चेति, ततः किम् इत्यत आह वर्णे यत्स्यादिति । यस्मिन्विधिस्तदादावल्ग्रहणे ।

अयं तावन्ङित्त्वमभ्युपेत्य परिहार उक्तः, ङित्वमेव तु नास्तीत्याह - वर्णश्चायमिति । चशब्दो वार्थे पठितः । वर्णो वायमित्येव वा पाठः । औङिति वर्णो वायमुपात्तो न प्रत्ययः । ङकारस्तु मुखसुखार्थः, यथा - ऋदोरप् इत्यत्र दकारः । अङ्गाक्षिप्तस्य प्रत्ययस्य तेन विशेषणादौकारान्तस्य प्रत्ययस्येत्यर्थः । वर्णरुपतया चौकारग्रहणे सति द्वयोरप्यौकारयोर्ग्रहणं भवति प्रत्ययविषयत्वादननुबन्धकपरिभाषायाः । ङित्वेऽप्यदोष इति । ङित्त्वे सति यो दोषः सोऽपि न भवति, ङित्त्वस्यैवाभावादित्यर्थः, पूर्वेण वा परिहारेणास्यान्वयः ।

परिहारान्तरमाह - निर्देशोऽयमिति । पूर्वाचार्याणां हि सूत्रे द्वे अप्येते द्विवचने औङिति पठ्येते, तदाश्रयेणायं निर्देशः, तेन द्वयोरपि ग्रहणं भवति । न च ङित्कार्यप्रसङ्गः, न हि पूर्वाचार्यानुबन्धैरिह कार्याणि क्नियन्ते ।।

जश्शसोः शिः ।। 7 - 1 - 20 ।।

कुण्डश इति । जातिशब्दोऽप्ययं यदार्थप्रकरणादिना जात्याधारभूतायामेकस्यां व्यक्तौ वर्त्तते, तदा वृत्तिविषय एकवचनो भवतीति संख्यैकवचनात् इति शस् भवति । अर्थप्रकरणाद्यभावे तु तत्र प्रत्युदाहृतम् - घटंघटं ददातीति ।।

अष्टाभ्य औश् ।। 7 - 1 - 21 ।।

कृताकारोऽष्टन्शब्दो गृह्यत इति । कृताकारस्यानुकरणमष्टाशब्दः, न तु विभक्तौ लक्षणवशादात्वं कृतमित्यर्थः ।

कृताकारस्य ग्रहणं किमिति । आत्ववतोऽनुकरणं किमित्याश्रितमित्यर्थः । यदाऽऽत्वं भवति तदैव यथा स्यादित्युत्तरम् ।

अष्टेति । कथं पुनरत्रात्वाभावः, यावता न हि तद्विधौ विकल्पः सन्निहितः इत्यत आह - एतदेवेति । इह अष्टनः इति वक्तव्यम् - यथा अष्टन आ विभक्तौ इत्यत्र, एवं सिद्धे अष्टाभ्यः इति निर्द्देशात्कृतात्वास्यानुकरथणमिति तावन्निश्चितम् तसेय चैतत्प्रयोजनम् - यदात्वं भवति तदैव यथा स्यादिति । यदि च नित्यननु च अष्टनो दीर्घात् इति दीर्घग्रहणेनायमार्थो ज्ञापितः, तद्वा ज्ञापकमिदं वा, को नवत्र विशेषः इहेयत्तावद्वक्तव्यम् - षड्भ्यो लुक् इत्यस्यायमपवाद

इति । अस्यैवेत्यवधारणं द्रष्टव्यम् । कारणमाह - नाप्राप्ते चेति । स हि समास एव प्राप्नोति, न तु वाक्ये । अष्टपुत्र इति । अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते इति वचनाद्वाक्यावस्थायामेव प्राप्तोऽप्यौश् न क्रियते, औश एव वा स्थानिवद्भा बाल्लुक् । तदन्तग्रहणमत्रेष्यत इति । अङ्गाधिकारे तस्य च तदुत्तरपदस्य च इति वचनात् । यद्येवम्, यत्राष्टशब्दार्थ उपसर्जनं तत्रापि प्राप्नोति अत आह - प्रिया,टान इत्यत्रेति । यथा पुनरत्रात्वं न भवति, तथा तद्विधावेव
वक्ष्यते ।।

षड्भ्यो लुक् ।। 7 - 1 - 22 ।।

षट्प्रधानादिति । षट्संज्ञकानामर्थः प्रधानं यत्र तस्मादित्यर्थः । प्रियषष इति । अन्यपदार्थप्रधानोऽयं बहुव्रीहिः, सर्वनामसंख्ययोरुपसंख्यानम् इति षषः पूर्वनिपाते प्राप्ते वा प्रियस्य इति प्रियशब्दस्य पूर्वनिपातः ।।

स्वमोर्नपुंसकात् ।। 7 - 1 - 23 ।।

सु इति प्रथमैकवचनस्य ग्रहणम्, न सप्तमीबहुवचनस्य अमा एकवचनेन साहचर्यात् । तद्भाह्मणकुलमित्यत्र परत्वात्त्यदाद्यत्वे कृते लुग्न प्राप्नोति अतोऽम् इत्यम्भावेन बाधितत्वात्, तस्मात्त्यदादिभ्यश्चेति वक्तव्यम् अत आह - तद् ब्राह्मणकुलमित्यत्रेति । नित्यत्वाद्वेति । लुका त्यादाद्यत्वं बाध्यत इत्यनुषङ्गः । कथं पुनर्लुको नित्यत्वम्, यावता त्यदाद्यत्वे कृते अतोऽमित्यपवादविधानात सोऽप्यनित्य एव अत आह - लुको हीति । यदि ह्यतोऽमित्येतन्न स्यादकारान्तमप्यङ्गं लुको निमित्तं स्यादेव, ततः किम् इत्यत आह - यस्य चेति । त्यदाद्यत्वं तु लुकि कृते नैव प्राप्नोति न लुमताङ्गस्य इति निषेधात् । यद्येवम्, तदपि लक्षणान्तरेणैव बाध्यते नासावत्वस्य प्रतिषेधः, कस्य तर्हि प्रत्ययलक्षणस्य, प्राप्तिर्हि प्रत्ययलक्षणेन ।।

अतोऽम् ।। 7 - 1 - 24 ।।

अत्रामिति पदच्छेदः, न तु मिति तथा हि सति लाघवाय मत तइत्येव ब्रूयात् । किमर्थं पुनरम्बिधीयते न मकार एवोच्येत, द्वितीयैकवचनेऽपि आदेः परस्य इत्यकारस्य मकार कृतेऽन्यस्य मकारस्य संयोगान्तलोपेनैव सिद्धमिष्टम् दीर्घप्रसङ्गस्तु सुपि च इति दीर्घः प्राप्नोति । न च दीर्घविधौ सन्निपातपरिभाषा प्रवर्त्तते वृत्रायेत्यादावपि प्रसङ्गात् । तस्मादमेव विधेयः ।

अपर आह - अम्विधानसामर्थ्यादतिजरसमित्यत्र जरसादेशो भवतीति, तच्चिन्त्यम् सन्निपातपरिभाषया जरसादेशस्याप्रसङ्गात् । अम्विधानं तु दीर्घबाधनेन चरितार्थमिति ।।

अद्ड्डरादिभ्यः पञ्चभ्यः ।।7 - 1 - 25 ।।

अद्ड्डादेशो भवतीति । वविक्षितादेशरुपप्रतिपादनाय ष्टुत्वं न कृतम् । कथं पुनर्ज्ञायते - डिदयमादेश
इति यदि हि डिन्नस्यात् डतरादिभ्यः पञ्चभ्योऽत् इत्येव ब्रूयात् । किं पुनः कारणं सावेव दीर्घनिवृत्तिः प्रयोजनमुच्यते, न त्वमि इत्याह - इह त्विति । एवं तर्हीति । पूर्वसूत्रविहितमममनुवर्त्य डतरादिभ्य इति पञ्चम्याः षष्ठी प्रकल्प्य तस्यैवामो दकारो विधास्यत इति चोद्यार्थः । हे कतरदित्यत्र सम्बुद्धिलोपो मा भूदिति । अयं च दोष पूर्वस्मिन्नपि पक्षे समानः ।

ननु च सम्बुद्धिलोपे हल्ङ्याब्भ्यः इत्यतोऽपृक्तग्रहणमनुवर्तयिष्यते, इह च आदेः परस्य इत्यमोऽकारस्य दकारे कृते मकारस्य संयोगान्तलोपः, तस्यासिद्धत्वान्नायमपृक्तः, एवमदादेशो नापृक्तः, यद्यपृत्तग्रहणमनुवर्तते, हे काण्डेत्यामोऽपि न स्यादिति दोषः । तदिदमुक्तम् -- अथ निवृत्तमपृक्तग्रहणम्, ततो निवृत्ते डतरादिषु दोषः - हे कतरदित्यादौ लोपः स्यादिति । अतो डित्त्वादद्ड्डादेशविधानात्तस्य च डित्त्वान्न सम्बुद्धिलोपः, नापि पूर्वसवर्णदीर्घत्वमित्यर्थः । यदि पुनः पूर्वसूत्रबिहितमममनुवर्त्य तस्यैवादादेशो विधीयते शक्यं डित्त्वमकर्त्तुम् ।।

नेतराच्छन्दसि ।। 7 - 1 - 26 ।।

अतोऽमित्यस्यानन्तरमेवेति । अमादेश एवाद्ड्डादेशस्यापवादो भविष्यति, ततश्च न इति वक्तव्यं न भवतीति भावः ।।

युष्मदस्मद्भ्यां ङसोऽश् ।। 7 - 1 - 27 ।।

शित्करणं सर्वादेशार्थमिति । अन्यथा आदेः परस्य इत्यादेः स्यात् । ननु चाकारस्याकारवचने प्रयोजनाभावादाद्यनुसंहारे बाधिते अलोन्त्यस्य इति मकारस्याकारे सति अतो गुणे इति पररुपेणैव सिद्धम् अत आह - अन्यथा हीति । आदेश इति व्यपदेश आदेशव्यपदेशः, यस्यादेशस्य प्रयोजनं नास्तीति मन्यसे तसयैव स्यादित्येवशब्दार्थः । किं पुनरादेशव्यपदेशेन प्रयोजनं यत आदेरेव स्यात् तत्राह -ततश्चेति । ह्यर्थे चः
पठितः । ततो ह्यादेशव्यपदेशाद् योऽचि इति यत्वं न स्यात्, यत्वाभावः प्रयोजनमादेशव्यपदेशस्य स्यादित्यर्थः । योऽचि ित्यत्र युष्मदस्मदोरनादेशे इति वर्त्तते । ननु चानादेशो या विभक्तिरित्येवं तत्र विज्ञास्यते, न हि तदादिविधिरस्ति यत अनादेशादाविति विज्ञायेत ततश्च सत्यष्यादेशादित्वे विभक्तेरनादेशत्वात्स्यादेव यत्वमिति व्यर्थमेवाकारस्याकारविधानम् एवं मन्यते - सर्वे सर्वपदादेशाः इति न्यायेनादिविकारद्वारेण विभाक्तेरेवादेशो विधीयत इति विभक्तिरेवादेश इति । सर्वे सर्वपदादेशाः इत्यत्र न पदशब्देन सुप्तिङन्तमुच्यते, किं तर्हि पद्यते गम्यतेऽनेनार्थ इति पदम्, ततश्च पचत्वित्यत्र यथा तिशब्दस्य तुशब्दो भवति, तद्वदत्रापि ङसोऽशेव विधीयत इति भवत्येवादेशात्वं विभक्तेः ।।

ङे प्रथमयोरम् ।। 7 - 1 - 29 ।।

ङे इत्याविभक्तिकोऽयं निर्देश इति । प्रथमयोरिति प्रथमाद्वितीययोर्ग्रहणम् इति वक्ष्यति, तदत्र समासे सति बहुवचनप्रसङ्ग इति भावः । प्राधानयलक्षणस्य प्रथमार्थस्येहासम्भावत्सन्निवेशविशेषापेक्षया प्रथमस्य ग्रहणमिति तावन्निश्चितम् । तिङ्प्रथमयोस्तु युस्मादस्मद्भ्यामसम्भव एव, तत्र प्रत्यययोर्ग्रहणम्,

विभक्त्योर्वेति संशयः । यदि स्त्रीलिङ्गनिर्द्देशस्ततो विभक्त्योर्ग्रहणम्, पुंल्लिङ्गनिर्देशे तु प्रत्यययोः । तत्र निर्वयमाह - प्रथमयोश्च विभाक्त्योरिति । एतदेव स्पष्टयति - प्रथमाद्वितीयोरिति । कथं कुनः प्रथमाशब्देन द्वितीयोच्यते, साहचर्यात । ननु सकृत्प्रयुक्तः शब्दो मुख्यवृत्तिर्वा भवतु, जघन्यवृत्तिर्वा, न पनरुभयवृत्तिः सत्यम् प्रथमाद्वितीयासमुदाये जघन्यवृत्तिरेवायमुद्भतावयवभेदश्च समुदाय इति द्विवचनम् । कथं पुनर्ज्ञायते - विभक्त्योर्ग्रहणमिति द्वितीयायां च इत्यात्वविधानात् । तद्ध्यदेशार्थमुच्यते, अनादेशे युष्मदस्मदोरनादेशे इत्येव सिद्धत्वात् । यदि चात्र विभक्त्योर्ग्रहणं स्यात्, एवमस्यादेशार्थतोपपद्यते । ननु च योऽचि इति यत्वबाधनार्थं तत्स्यात् यद्येताबत्प्रयोजनं स्यात्, यत्वमेवायं विशिष्य ब्रूयात् - योऽच्यापीति । आबिति प्रत्याहारः अनाप्यकः इति वत् । यतस्तु द्वितीयायामात्वं शास्ति, ततो ज्ञायते - विभक्त्योरिह ग्रहणमिति ।।

शसो न ।। 7 - 1 - 29 ।।

नेत्यविभक्तिको निर्द्देशः, तथा च पूर्वसूत्रेण प्राप्तस्यायममः प्रतिषेध इति माष्ये शङ्कितम् - कः पुनः प्रतिषेधे सति दोषः, यावताऽमि प्रतिषिद्धे योऽचि इति यत्वे च द्वितीयायां इत्यात्वे कृते प्रथमयोः पूर्वस्यर्णदीर्घत्वे कृते तस्माच्छसो नः पुंसि इति नत्वे च युष्मानिति सिद्ध्यत्येव सत्यं पुंसि सिद्ध्यति स्त्रीनपुंसकयोस्तु न सिद्ध्यति, तदिदं दर्शितम् - युष्मान् अस्मान् ब्राह्मणीरित्यादि ।

अलिङ्गे वा युष्मास्मदी इति । लिङ्गानुशासने तथा पाठात् । उदाहरणे तु आदेः परस्य इत्यकारस्य नकारे सकारस्य संयोगान्तलोपः ।।

भ्यसो भ्यम् ।। 7 - 1 - 30 ।।

एत्वं प्राप्नोतीति । सुपि च इति दीर्घस्याप्युपलक्षणमेतत् । अङ्गवृत्त इत्यादि । अस्यार्थः पूर्वमेव व्याख्यातः ।

केचित्पुनरित्यादि । येषां शेषेलोपोऽन्त्यस्य लोपः तेषाम् अतो गुणे पररुपत्वमेकादेशः, स्वरश्च । एत्वनिवृत्त्वार्थमिति । अत्रापि दीर्घस्याप्युपलक्षणम्, एत्वनिवृत्त्या चाकारोच्चारणस्यार्थवत्त्वात्सवर्णदीर्घत्वं तेषां न

भवति । येषां त्विति । अन्त्यलोपपक्षे मतभेदः - भयमादेशः, अभ्यमादेश इति । टिलोपपक्षे त्वषश्यमभ्यमादेशः, अन्यथा रुपासिद्धे । नन्वेवं स्वरे दोषः, कथम् अनुदात्तस्य च यत्रोदात्तलोपः इत्यत्र कर्षात्वतो घञोन्त उदात्तः इत्यन्तोदात्तग्रहणमनुवर्त्तते, ततश्च भ्यमोऽन्तोदात्तत्वं प्राप्नोति अत्यत आह - उदात्त्निवृत्तिस्वरश्चेति । न तत्रान्तग्रहणमनुवर्त्तते, उच्चारणक्रमे प्रत्यासत्या चादेरेवोदात्तत्वं भवतीत्यर्थः ।।

साम आकम् ।। 7 - 1 - 33 ।।

सामिति षष्ठीबहुवचनमागतसुट्कं गृह्यत इति । अङ्गसंज्ञानिमित्तस्यान्यस्यासम्भवात् ।

अथ किमर्थमागतसुट्को गृह्यत इति । यद्यपि षष्ठीबहुवचनमागतसुट्कं गृह्यत इति प्रकृतम्, इह तु प्रत्त्योपेक्षया पुंल्लिङ्गनिर्द्देशः । नपुंसकलिङ्गमेव वा पठितव्यम् । अथेति न प्रयोजनप्रधानः प्रश्नः, किं तर्हि युष्मदस्मद्भ्यां परस्यैवंविधस्यासम्भवप्रधानः । अत एवाह - न ह्यादेशविधानकाले सुड्विद्यत इति । सुड्विधौ

आज्जसेरसुक् इत्यत आदित्यनुवर्त्तते, अकारान्तत्वं च युष्मदस्मदोः शेषे लोपः इत्यन्त्यस्य लोपे भवति, कश्च शेषः आदेशः । अनादेशे यत्वात्वयोर्विधानात् । आदेशत्वं चाकमादेशे सति । न च त्यदाद्यत्वेनाकारान्तत्वम् त्यदाद्यत्वं प्रति द्विपर्यन्तास्त्यदादयः इति स्मरणात् । तस्मादादेशविधानकाले सुण्नविद्यते । उत्तरवादी तु - आदेशविधानकालेऽसत एव सुट उपादानम्, अथापि तस्योपादाने प्रयोजनमस्तीत्याह - तस्यैव त्विति । यद्यसुट्को गृह्यते, ततः पूर्वोक्तेन न्यायेन पश्चाद्भवतः सुटः केन निवृत्तिः स्यात् स्थानिन्यन्तर्भूतत्वादिति । तेन सहस्थानित्वेनोपादानसामर्थ्यादिति भावः । एतच्च पाक्षिकं प्रयोजनम् । कतरस्मिन्पक्षे यदा शेषेलोपोऽन्त्यलोपस्तदा, यदा तु टिलोपस्तदा पश्चादपि सुटः प्रसङ्गाभावान्नैतत्प्रयोजनम् ।

दीर्घोच्चारतणमित्यादि । अन्यथातो गुणे पररुपत्वं स्यात् । नन्वकारोच्चारणसामर्थ्यान्न भविष्यति, अन्यथाऽकमेव विदध्यात् अत आह - अकमि त्विति ।

आत औ णलः ।। 7 - 1 - 34 ।।

पपावित्यादौ पा - अ इति स्थिते युगपत् त्रीणि कार्यणि प्राप्नुवन्ति द्विर्वचनम्, सवर्णदीर्घत्वमेकादेशः, औत्वमिति, तत्र येन क्रमेणैतानि कर्तव्यानि, तद्दर्शयति - अत्रेति । लित्स्वरं तु नोपन्यस्याति, सर्वथान्तोदात्तत्वसिद्धेः । उक्तक्रमे हेतुमाह - एकादेशादिति । यदि पूर्वमेकादेशः स्याव्द्यपवर्गाभावादौत्वं न स्यादित्यनवकाशं तत् । परत्वादेकादेश इति । अत्र वृद्धिरेकादेशः, तस्य स्थानिवद्भावाद् द्विर्वचनम्, स्थानिवद्भावस्तु द्विर्वचनेऽचि इति । तत्र ह्यचीति न स्थानिवद्भावस्य निमित्तनिर्द्देशः किं तर्हि अजादेशस्य - द्विर्वचननिमित्तेऽचि योऽजादेश इति । तेन सम्प्रत्यच्परत्वाभावेऽपि स्थानिवद्भावो भवत्येव । ओकारौकारयोर्लाघवे विशेषाभावात्प्रयोगसमवाय्यौकार एव विहितः । अपर आह - आङ्प्रश्लिष्टाकार ओकारः, तस्योच्चारणे प्रयत्नलाघवं भवति विश्लिष्टाकार औकारस्तस्योच्चारणे प्रयत्नगौरवं भवति, तद्विधानं दरिद्रात्यर्थम्ददरिद्रौ, अत्र दरिद्रातेरार्द्धधातुके लोपो वक्तव्यः इत्याकारलोपेऽप्यौकारस्य श्रवणम् भवति । यद्यपि सिद्धश्च प्रत्ययविधौ इति वचनाल्लिटि विवक्षित एवाकार लोपे सत्यौत्वस्याप्रसङ्गः, यद्यपि च सास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थम् इत्यामि सति णल एवासम्भवः, तथाप्यौत्वविधानसामर्थ्याद् द्वयमप्येतन्न भवति ।।

तुह्योस्तातङाशिष्यन्यतरस्याम् ।। 7 - 1 - 35 ।।

जीवतात्त्वमिति । अत्र स्थानिवद्भावेन तातङो हिग्रहणेन ग्रहणाद् अतो हेः इति लुक् प्राप्नोति नैष दोषः हुझल्भ्यो हेर्धिः, इत्यनुवर्त्तमाने पुनः अतो हेः इति हिग्रहणम् - हिरेव यो हिस्तस्य यथा स्यात्, स्थानिवद्भावेन यो हिस्तस्य माभूदित्येवमर्थम् ।

ङित्करणमित्यादि । यद्यपि सर्वादेशतायाः प्राग्गुणवृद्धिप्रतिषेधार्थत्वमनिश्चतम्, तथापि सर्वादेशत्वेऽपि ङित्त्वस्य प्रयोजनं तातङि सम्भवति, अनङादिषु तु नैव सर्वादेशत्वे प्रयोजनं सम्भवतीति तेष्वनन्यार्थङित्त्वेषु ङिच्च इत्येतत् सहसा प्रवर्त्तते, तातङि तु प्रयोजनान्तरसम्भावनया कियानपि विलम्बो भवति ।

तेनास्मिन्विषये उत्सर्गापवादयोस्तुल्यकाला प्रवृत्तिरित्यपवादमपि ङिच्च इत्येतद्बाधित्वा अनेकाल्शित्सर्वस्य इत्येतदेव परत्वात्प्रवर्त्तत इति भावः । एतच्च ङिच्च इत्यत्र सम्यगुपपादितम् । तत्र ब्रूतादित्यादौ गुणप्रतिषेधः, मृष्टादित्यत्र वृद्धिप्रतिषेधः । ङित्त्वाच्चास्येति । ननु च ङित्कार्यं भवतु, स्थानिवद्भावप्राप्तपित्त्वात्पित्कार्यमपि, को विरोधः अत आह - ङिच्च पिन्न भवतीति । वचनमिदम् सार्वधातुकमपित् इत्यत्र योगविभागेन कल्पितम् । ब्रुव ईडिति । उपलक्षणमेतत्, तृण्ढाद्भवान् इत्यत्र तृणह इम् न भवतीति ।

तातङि ङित्त्वमित्यादि श्लोकद्वयं क्वचित्पठ्यते । तातङि व्यवस्थितं ङित्त्वं संकमकृत्स्यात्, संक्रमो नाम - गुणवृद्धिप्रतिषेधः, अर्हार्थे लिङ्, गुणवृद्धिप्रतिषेधकृद्भवितुमर्हति । अन्त्यविधिश्चेत्, अन्त्यविधिहेतुत्वादन्त्यविधिर्ङित्त्वम् । करणसाधनो वा विधिशब्दः अन्त्यस्य यथा स्यादित्येवमर्थं चेत् ङित्त्वमित्यर्थः । निराकरोति - तच्च तथा न । चशब्दोऽवधारणे प्रतिषेधेन सम्बध्यते, तत् ङित्त्वं तथा सति नैव कर्त्तव्यम् । एरुः इत्यस्यानन्तरम् तुह्योस्तादाशिषि इति वक्तव्यम्, एरुरित्येव, एवं सिद्धे ङित्करणं गुणवृद्धिप्रतिषेधार्थमिति निश्चीयते । न च सर्वादेशतामन्तरेण तत् तत्प्रतिषेधार्थत्वं ङित्त्वस्योपपद्यत इति
सर्वादेशस्तातङ् भवति । ननु चान्त्यविधिश्चास्तु अवयवे कृतं लिङ्गम् इति न्यायेन गुणवृद्धिप्रतिषेधार्थश्चास्तु ङित्करणसामर्थ्यादित्याशङ्क्य परिहारान्तरमाह - हेरधिकार इति । अतो हेः इत्यत्र लोपविधौ हुझल्भ्यो हेर्धिः इत्यतो हेरित्यधिकारे सत्येव तयोऽयं हेरित्यधिकारस्तं ज्ञापकमाह सूत्रकारः, तस्य ह्येततप्रयोजनम् -स हिरेव यो हिस्तस्य यथा स्तात्, स्थानिवद्भावेन यो हिस्तस्य मा भूदिति । तच्च सर्वादेशत्वे सत्युपपद्यते ।

ननु च हिरेव यो हिस्तस्य यथा स्याद्विकृतो यो हिस्तस्य मा भूदित्यन्त्या देशत्वेऽपि तातङो हेरित्यधिकार उपपद्यत इत्यादशङ्क्य साक्षात्परिहारमाह - तातङो ङित्त्वसामर्थ्यादिति । ङित्त्वसामर्थ्यात्किलायमान्त्यविधिः स्यात्, तच्च सामर्थ्यं नास्ति, सर्वादेशत्वेऽपि प्रयोजनसम्भवात् । ततश्च पूर्वोक्तया रीत्या विप्रतिषेधात्सर्वादेश एव तातङ् भवति । अनङ् सौ तित्यादावनङादीनां नैवं ङित्त्वसामर्थ्याभावः, तेन तेऽन्त्यविकारदा जाताः ।।

विदेः शतुर्वसुः ।। 7 - 1 - 36 ।।

विद ज्ञान इति । सत्ताविचारणार्थयोरात्मनेपदित्वेन शतुरसम्भवः, लाभार्थस्य तूभयपदित्वेन शतुः सम्भवेऽपि तुदादित्वाद्विकरणेन व्यवधानमिति ज्ञानार्थस्यैव लुग्विकरणस्य परस्मैपदिनो ग्रहणमिति भावः ।

क्वसोरपि सामान्यग्रहणार्थमिति । अन्यथा वसः सम्प्रसारणम् इत्युच्यमाने निरनुबन्धकत्वादस्यैव ग्रहणं स्यात् । ननु च क्रियमाणेऽप्युकारानुबन्धे एकानुबन्धकत्वादस्यैव ग्रहणं स्यात् तत्राह - एकानुबन्धकग्रहण इति ।

समासेऽनव्पूर्वे क्त्वो ल्यप् ।। 7 - 1 - 37 ।।

पूर्वशब्दोऽवयवचनः,, अनञ्पूर्वोऽवयवो यत्र समासे सोऽनञ्पूर्वः । प्रकृत्येति । समानकर्तृकयोः पूर्वकाले इति क्त्वा, कुगातिप्रादयः इति समासः, ल्यपि सति ह्रस्वस्य तुक् । पार्श्वतःकृत्येति । आद्यादित्वात्सप्तम्यन्तात्तसिः, स्वाङ्गे तस्प्रत्यये कृभ्वोः इति क्त्वा, तृतीयाप्रभृतीन्यन्यतरस्याम् क्त्वा च इति समासः । नानाकृत्य, द्विधाकृत्येति । नाधार्थप्रत्ययेच्व्यर्थे इति क्त्वा, पूर्ववत्समासः ।

अकृत्वा, अहृत्वेति । हृत्वेत्येतत्प्रत्यदारणम्, अत्र कृत्वाशब्दो नञ्सदृशः पूर्वोऽस्ति, समुदायस्तु समासो न भवति । परमकृत्वेति । सन्महन् इत्यादिना समासः, तुमर्थाधिकाराद्भावे क्त्वा प्रत्ययः । पारम्यमपि क्रियाया एव विशेषणमिति समानाधिकरण्यम् ।

कथं पुनरिदं प्रत्युदारहणम्, यावता भवत्येवायमनञ्पूर्वः समासः इत्यत आह- जनञिति हीति अनञ् इति पुर्युदासोऽयम्, तत्र नञिवयुक्तन्यायेन नञ्सदृशमव्ययं परिगृह्यते, तेन नञ् अनव्ययं च परमशब्दािकमनञ् न भवति, तअमेदादनव्ययत्वाच्च । स्नात्वाकलक इत्यादिष्विति । आदिशब्देन पीत्वास्थिरक इत्येवमादेर्ग्रहथणम्, यत्रोत्तरपदे क्रिया नोपादीयते तत्राध्याहृतक्रियापक्षेः क्त्वाप्रत्ययः । सापेक्षत्वेऽपि निपातनात्समासः ।
निपातनाल्ल्यबादेशो न भवतीति । न प्राकरणिकः समास एव तत्र निपात्यते, किं तर्हि यस्य लक्षणं नास्ति तत्सर्वमिति भावः ।

निर्धारणे सप्तमीति । जातावेकवचनम्, वचनव्यत्यो वा । समास एव निर्धार्यत िति । निर्धारणस्य तुल्यजातीयापेक्षत्वात् । कथं पुनः समासः क्त्वान्तो भवति, यावता प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहण, न च समासात् क्त्वा विहितः अथ कृद्ग्रहणए गतिकारकपूर्वस्यापि ग्रहणात्समासस्य क्त्वान्त्ता एवमपि प्रकृत्य, पार्श्वतःकृत्येत्यादावेव स्यात्, उच्चैकृत्येत्येवमादौ तु न स्यात्, अगतित्वादकारकत्वाच्च इत्याशङ्क्याह - स चेति । तत्र निर्दिश्यमानस्यादेशा भवन्ति िति क्त्वामात्रस्यैव ल्यब्भवति । ननु प्रत्ययविषये पूर्वेण परिभाषाद्वयेन तदन्तविधिव्यवस्था, न तु येन विधिस्तदन्तस्य इत्यनेन तत्राह - तथा चेति । कथं पुनरेतज्ज्ञापकम् इत्याह - गतिकारकपूर्वस्य त्विति । कथं नास्ति प्रसङ्गः इत्याह - नञ्न गतिरिति । अदो जग्धिर्ल्यप्ति किति इत्यत्र यदुक्तम् - जग्धौ सिद्धमन्तरङ्गत्वात् इत्यादि, तत्स्मारयति - प्रधाय, प्रस्थायत्येवमादिष्विति ।

के पुनरन्तरङ्गा विधयः हित्वदत्वात्वेत्वदीर्घत्वशूडिटः । हित्वम् दधातेर्हिः, हित्वा, प्रधाय। दत्वम् - दो दद्धोः, दत्वा, प्रदाय । आत्वम् - जन सनखनां सन्झलोः खात्वा, प्रखाय, प्रखन्य। इत्वम् -
द्यतिस्यतिमास्थामित्ति किति, स्थित्वा, प्रस्थाय । ईत्वम् - घुमास्थागापाजहातिसां हलि पीत्वा, प्रपाय। दीर्घत्वम् - अनुनासिकस्य क्विझलोः क्ङिति, शान्त्वा, प्रशम्य । शू - च्छ्वोः शूडनुनासिके च पृष्ट्वा, आपृच्छ्य । उठ् - द्यूत्वा । इट् - उदितो वा, देवित्वा, प्रदीव्य, अत्रेटि सति न क्त्वा सेट् इति कित्त्वप्रतिषेधाद् गुणः स्यात् ।

पूर्वग्रहणं किमर्थम्, अनञ् इत्येवोच्यमाने बहुव्रीहिः स्यात् - अविद्यमानो नञ् यस्मिन्नसावनञिति, तथा च स्त्रैणीकृत्येत्यत्रापि प्रतिषेधः स्यात् । पूर्वग्रहणे तु

सति, तस्य नियतदेशावयववचनत्वान्नायं दोषः । लित्करणं प्रचिकीर्ष्येत्यत्र प्रत्ययात्पूर्वस्य स्वरार्थम् । प्रकृत्येत्यादौ तु धातुस्वरेणेव सिद्धम् । पित्करणं तुगर्थम् ।।

क्त्वापि छन्दसि ।। 7 - 1 - 38 ।।

अपिशब्दाल्ल्यबपीति । स च समासेऽसमासे च भवति, अप्राप्तिविषये ल्यपः प्रापणार्थत्वादपिशब्दस्य, अन्यथा वा छन्दसि इत्येव वाच्यं स्यात्, तथा च छन्दोविधानमुनवदधानाः कल्पसूत्रकारा अपि प्रयुञ्जते - आज्येनाक्षिणी अज्येत्यादि ।।

सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ।। 7 - 1 - 39 ।।

सुशब्द आदेश उच्यमाने अन्ये सुपो न प्राप्नुवन्ति, तस्मात् सुग्रहणमपनीय सुङ्ग्रहणं कर्त्तव्यमित्याह - सुपां सुप इति । तिङां तिङ इति । एतच्च व्यात्ययो बहुलम् इति सिद्धम् । सुपां सुप इत्ययमपि तस्यैव प्रपञ्चः । तक्ष्ण्वन्तीति प्राप्त तु युक्तः पाठः ।

आद्रे चर्मन्निति । ननु च पूर्वसवर्णेनाप्येतत्सिद्धम्, कथम् चर्मन् - इ इति स्थिते इकारस्य पूर्वसवर्णो नकारः, तत्र परतः स्वादिषु इति पदसंज्ञायां सत्यां पूर्वस्य नकारस्य लोपः, तत्रायमप्यर्थः - न ङिसम्बुद्ध्योः इत्यत्र ङिग्रहणं न कर्त्तव्यं भवति, अप्रातिपदिकत्वादेव विभक्तिनकारस्य लोपाप्रसङ्गात्, पूर्वस्य तु नकारस्येष्ट एव लोपः नैतदस्ति अत्र हि पूर्वसवर्णो भवन्नान्तर्यतो निरनुनासिकस्य निरनुनासिको दकार एव स्यात् । अस्तु, संयोगान्तलोपो भविष्यति नात्र संयोगान्तलोपः प्राप्नोति, स्वादिषु इति पदसंज्ञायां सत्यां पूर्वनकारस्य लोपे सति असंयोगान्तत्वात् । नलोपो हि संयोगान्तलोपे सिद्धः । एवं तर्हि न ङिसम्बुद्ध्योः इत्यत्र ङिग्रहणं करिष्यते, तत्र नलोपाभावे संयोगान्तलोपः तदेवमस्यान्यथासिद्धत्वादुदाहरणान्तरमाह - हविर्द्धाने यत्सुन्वन्तीति । यत् - इ इति स्थिते अत्र यदि पूर्वसवर्णो दकारः स्यात्त्यदाद्यत्वे सति स्थानिवद्भावात्स्मिन्भावः प्राप्नोति । तस्मादत्र लुगेव कर्त्तव्यः । अनेकाल्षु च भ्यामादिषु अन्त्यस्य पूर्वसवर्णे पूर्वभाग्य श्रवणाप्रसङ्गः, तस्मात्तत्रापि लुगेव कर्त्तव्यः ।

धीतीत्यादि । धीति -मति - सुष्टुतिशब्देभ्यस्तृतीयेकवचनस्य पूर्वसवर्ण इकारः, कवर्णदीर्घत्वम् ।

न तादू ब्राह्मणादिति । तच्छब्दाद् ब्राह्मणशब्दाच्च शस्, तस्यादादेशः, न विभक्तौ तुस्माः इति इत्संज्ञाप्रतिषेधः । या देव विप्नतात् त्वा महान्तम् इति बह्वचाः । यूयं वयमिति प्राप्त इति । प्रमादपाठोऽयम्, तथा हि - न युष्मे बाजबन्धवः इत्यत्र मन्त्रे ऋक्षाश्वमेधनाम्नो राज्ञोर्दानं स्तूयते, व्यत्ययेन द्वयोर्बहुवचनम्, बाजमित्यन्ननाम, अन्नप्रदानेन सर्वेषां बन्धवस्तेषां सम्बोधनं हे बाजबन्धवः । युष्मे युषमासु अधीत्यस्यानेन सम्बन्धः, सच सप्तम्यर्थातनुवादी । निनित्सुश्च निन्दनशीलोऽपि मर्त्यौ युष्मासु अवद्यं न धारयति नावधारयति, अवद्याभावादित्यर्थः । अस्मे इन्द्राबृहस्पती थइत्यत्रापि रयिं धत्तमिति क्रिया, दधातिश्च दानार्थः । तस्माद्युष्मासु अस्मःयमिति युक्तः पाठः । यूयादेश इत्याद्यपि न पठितव्यम् ।

अनुष्टमेति प्राप्त इति । अध्रिगुप्रैषे तु ता अनुष्ट्योव्यावयतादिति अनुपूर्वात्तिष्ठतेः आतश्चोपसर्गे इत्यङ्, अनुष्ठानमनुष्ठा, तयाऽनुष्ठ्या ।

प्रबाहवेति । धेरङ्िति इति गुणः । ननु ङित्त्वे विद्याद्वर्णनिर्द्देशमात्रं वर्णे यत्स्यात्तच्च विद्यात्तदादौ इत्युक्तम् सत्यम् ङित्करणसामर्थ्यात्तु गुणः । प्रबहुनेति प्राप्त इति । बाहुनेति तु युक्तः पाठः प्रशब्दस्याख्यातेन सम्बन्धनात् । अयाचोऽकारः सुपि च इति दीर्घनिवृत्त्यर्थः ।।

अमो मश् ।। 7 - 1 - 40 ।।

अमिति मिबादेशो गृह्यत इति । द्वितीयैकवचनस्य ग्रहणं न भवति छन्दसि दृष्टानुवधानाद्वक्ष्यमाणेषु बाहुल्येन तिङा निर्द्देशात् । वधीमिति । हन्तेर्लुङ्, लुङि च इति वधादेशः, च्लेः सिच्, इट्, मिपोऽम्भावः, तस्य मश् - अकार उच्चारणार्थः, अस्तिसिचोऽपृक्ते इतीट्, इट ईटि इति सिचो लोपः, सवर्णदीर्घत्वम् ।

शित्करणं सर्वादेशार्थमिति । अन्यथा हि अलोऽन्त्यस्य इति मकारत्य मकारवचने प्रयोजनाभावात्सर्वादेशो भविष्यति, अत आह - मकारस्यापीति । यथा मो राजि समः कौ इत्यत्रेति भावः । पञ्चमीनिर्द्देशाभावात्तु आदेः परस्य इत्येतन्न भवति । अथोच्यते - द्विमकारकोऽयं निर्द्देशः करिष्यते, तत्रैकस्य संयोगान्तलोपेऽपि वधीमित्यादि सिद्धमिति एवमपि लाघवे नास्ति विशेषः । किञ्चसंयोगान्तलोपस्यासिद्धत्वादपृक्तलक्षण ईट् एव स्यात् । एवं तर्हि यकारादिः करिष्यते, किम् यकारो न श्रूयते, बलि लुप्तनिर्द्दिष्टो यकारः नात्र किञ्चित् प्रम, णमस्ति, तस्माच्छित्करणम् ।।

लोपस्त आत्मनेपदेषु ।। 7 - 1 - 41 ।।

अदुह्रेति । दुरेर्लङ् आत्मनेपदेष्वनतः इति झस्यादादेशः, बहुलं छन्दसि िति रुट्, तकारस्य लोपे द्वयोरकारयोः अतो गुणे पररुपत्वम् । शये इति । शेते इत्यत्र तलोपे कृते अयादेशः । दुहामिति । लोट्, टेरेत्वम्, आमेतः, तलोपः ।

अपीत्यधिकारादिति । एवं च आत्मनेपदेषु इति वचनं तस्यैव प्रपञ्चः ।।

तस्य तात् ।। 7 - 1 - 44 ।।

लोण्मध्यमपुरुषबहुवचनस्येति । प्रथमपुरुषैकवचनस्य तु ग्रहणं न भवति, छन्दसि दृष्टानुविधानात् । पूर्वोत्तराभ्यां बहुवचनाभ्यां वा साहचर्यात् । कृणुतादिति । कृवि हिंसाकरणयोः, धिन्वकृण्व्योर च इत्युप्रत्ययः, वकारस्य चाकरः, अतो लोपः ।।

तप्तनप्तनथनाश्च ।। 7 - 1 - 45 ।।

शृणोतेति । श्रुवः श्रृ च इति श्नुप्रत्ययः श्रृभावश्च, पित्त्वे सति ङित्त्वाभावाद् गुणः । दधातनेति । अत्रापि पित्त्वाभावात् श्नाभ्यस्तयोः इत्याकारलोपाभावः । जुजुष्टनेति । व्यत्ययेन परस्मैपदम्, तुदादित्वाच्छः, तस्य बहुलं छन्सि इति श्नुः ,द्विर्वजनम् । जुषेरनुदात्तेत्वात् जुषध्वमिति प्राप्त इति तु युक्तः पाठः । यदिच्छतेति प्राप्त इति । बह्वचास्तु - कोवस्तो मरुतो यतिष्टन इत्यस्यामृचि यतिष्ठनेति पठन्ति । यतिस्थनेति पदकाले, तत्रास्ते रुपम् ।।

इदन्तो मसि ।। 7 - 1 - 46 ।।

मसीत्यविभक्तिको निर्देशः । इकार उच्चारणार्थः । अन्तशब्दोऽवयववचनः - इत् अन्तो यस्य स इदन्तः । तपरकरणमसन्देहार्थम्, यन्तः इत्युच्यमाने सन्देहः स्यात् - किं यकारन्त ईदन्तः इदन्तो वेति तत्र यदि सकारोपमर्द्देन इकारान्तमभिप्रेतं स्यात्, मस इत इत्येव वाच्यं स्यात् । तस्मादवस्थित थएव सकार इकाह उपसृज्यते । अन्तग्रहणाच्च तद्ग्रहणेन गृह्यते, ततश्च टित्त्वादेरागमलिङ्गस्याभावेऽपि अर्थादागमोऽयं सम्पद्यते । तदिदमुक्तम् - मसः सकारान्तस्येत्यादि । एवं च मस इक् इति वक्तव्यम् प्रत्याहारसन्देहप्रसङ्गात्तथा नोक्तम् ।।

क्त्वा यक् ।। 7 - 1 - 47 ।।

दत्त्वायेति । दो दद्घोः । सौभाग्यमस्यै दत्त्वाय, दत्त्वायास्मभ्यं द्रविणेह भद्रः - इत्यादिमन्त्रगतमुदाहरणम् । दत्त्वाय सविता धियमिति क्वचित्, पठ्यते, तत्र तैत्तिरीयकास्तत्वायेति पठन्ति ।

क्त्वापि छन्दसीत्यादि । एवं हि पुनः क्त्वाग्रहणं न कर्त्तव्यं भवति ।।

आज्जसेरसुक् ।। 7 - 1 - 50 ।।

जसेः िति पूर्वाचार्यानुरोधेन निर्द्देशः । ब्राह्मणास इति । असुकि कृते जसः सकारस्य श्रवणम्, असुकः सकारस्य विसर्जनीयः ।

येपूर्वास इत्यादि । चोद्यम् - उपरास इति । अपरशब्दस्यादेरुकारश्छान्दसः । यदि पुनरयं पूर्वान्तः क्रियते - अस्य जस्यसुक् इति, नैवं शक्यम्, अतो गुणे पररुपत्वं हि स्यात् । अकारोच्चारणं तु - उत्तरसूत्रे

दध्यस्यतीत्यादौ श्रवणार्थ स्यात् । सकृद्गतावित्यादि परिहारः । यद्यप्येत्सर्वनामसंज्ञाया पूर्वादिषु जसि विकल्पनादेव सिद्धम्, उभयासो जातवेदःस्याम इत्यत्र तु शीभावप्रसङ्गः, अत्र हि प्रथमचरम इति वकल्पं बाधित्वा सर्वादिषु पाठान्नित्या संज्ञा भवति, सा ह्यन्तरङ्गा ।।

अश्वक्षीरवृषलवणानामत्मप्रीतौ क्यचि ।। 7 - 1 - 51 ।।

अश्वस्यतीति । असुकोऽकारः पूर्वत्र ब्राह्मणास इत्यादौ चरितार्थ इति अतो गुणे इति पररुपत्वं भवति, नः क्ये इति नियमादपदान्तोकारः ।

मैथुनेच्छायामिति । अश्वविषयेच्छा यदा मैथुनार्था, तदेवासुग्भवति । मैथुनेच्छापरत्वाच्च प्रयोगस्याश्ववृषोपादानमतन्त्रमिति मनुष्यादिविषयेऽपि प्रयुज्यते इति - रामो वृषस्वन्तीमिति । तृष्णातिरेक इति । अभ्यवजिहीर्षा - अतिरेकः, क्षीरलवणविषय इच्छातिरेको यदाभ्यवहारार्थो न तु होमाद्यर्थेस्तदेत्यर्थः ।

सर्वप्रातिपदिकेभ्य इति । तादर्थ्ये एषा चतुर्थी सर्वप्रातिपदिकार्थम्, सर्वेषां प्रतिपदिकानामित्यर्थः ।

आमि सर्वनाम्नः सुट् ।। 7 - 1 - 52 ।।

इमे बहव आमः - ङस् - ओस् - आम्, ङेराम्नद्याम्नीभ्यः, किमेत्तिङव्ययधादाम्वद्रव्यप्रकर्षे, कास्प्रत्ययादाममन्त्रे लिटि तेषु कस्येदमामो ग्रहणम् इत्याह - आमिति षष्ठीबहुवचनं गृह्यत इति । तस्य हि परत्वादिति ।

सुटो नुटश्च षष्ठीबहुवचनमवकाशः, आट्प्रभृतीनां चतुर्थ्येकवचनादि, ङेराम उभयप्रसङ्गे परत्वादाडादयो भवन्ति, तेषु कृतेषु सकृद्गतिन्यायाश्रयणात् सुट्नुटौ न भवतः । यश्च घादामुरिति । किमेत्तिङव्ययघादामु इत्येव । चस्त्वर्थे, तुरेव वा पठितव्यः । आम् च लिटीति । लिटि परतो य आम् कास्प्रत्ययात् इति विहित इत्यर्थः । न तौ सर्वनाम्नः परौ स्त इति । तेनात्र तावत्तयोरग्रहणम्, यस्य चात्र ग्रहणं तस्यैवोत्तरत्राप्यधिकार इति नुड्विधावपि तयोरग्रहणमिति भावः । आचारक्विबन्तानां सर्वादीनां सर्वार्थत्वाभावात्सर्वनामसंज्ञाभावात्सर्वनाम्नो लिट्यामोऽसम्भवः । यस्तु मन्यते - इह सामान्यग्रहणे सति यथासम्भवं प्रकरणे कार्यप्रतिपत्तिः, ततश्च तयोरपि नुट्प्रसङ्ग इति, तं प्रति परिहारान्तरमाह - सानुबन्धकाविति वेति । सामान्यग्रहणे तु सति पचतितरामित्यत्र यस्येतिलोपं बाधित्वा परत्वान्नुट् स्यात् । कारयाम्, चिकीषीमित्यत्र तु नित्यत्वाद् अयामन्त इत्ययादेशे, अतो लोपे च कृते ह्रस्वाभावान्नास्ति नुटः प्रसङ्गः ।

उत्तरार्थमिति । त्रेस्त्रयः इत्यामि परतो यथा स्तात । इह त्विति । पञ्चमीनिर्देशस्तु आत् इत्.यनुवृत्तेन सामानाधिकरण्यादवसीयते, एवं च कृत्वा हलि सर्वेषाम् इति निर्देशोपपत्तिः ।।

त्रस्त्रयः ।। 7 - 1 - 53।।

त्रेरिति षष्ठी, न पञ्चमी, णिजां त्रयाणाम् इति निर्देशात् ।।

ह्रस्वनद्यापो नुट् ।। 7 - 1 - 54 ।।

ह्रस्वनद्याप इति पञ्चमी, नामि इति लिङ्गेन अन्यथाऽङ्गनिमित्तस्य नामो न ह्यस्ति सम्भवः ।।

षट्चतुर्भ्यश्च ।। 7 - 1 - 55 ।।

नुटि कृते नोपधायाः इति दीर्घः । नलोपः प्रातिपदिकान्तस्य । षण्णमिति । झलां जशोऽन्ते - इति षकारस्य डकारः, यरोऽनुनासिके इति डकारस्य णकारः, ष्टुत्वम् ।

अथ ष्णान्ताः षट् इति रेफस्च प्रक्षेपणेन रेफान्ताया कअपि संक्याया षटसंज्ञा कस्मान्न विहिता, एवं ह्यत्र चतुर्ग्रहथणं न कर्त्तव्यं भवति, तथा षट्त्रिचर्भ्यो हलादिः ित्यत्रापि इत्यत आह - रेफान्ताया इति । बहुवचननिर्देशादिति । शब्दप्राधान्ये हीतरेतरयोगे द्विवचनेन भाव्यम्, समाहारद्वन्द्वे त्वेकवचनेन भाव्यम्, अर्थप्राधान्ये तु षट्संज्ञका एव प्रत्येकं बह्वर्थाश्चतुःशब्दश्चेत्युपपद्यते बहुवचनम् । अत्रामः परत्वं शब्दद्वारकम् । परमषण्णामिति । अत्रापि बडर्थप्राधान्यात्तत एव पर आम् भवति । बहुव्रीहौ त्वन्यपदार्थस्य प्राधन्यान्न षडर्थापेक्षं परत्वमिति न भवति ।

प्रियपञ्च्जामिति । अल्लोपे कृते चुत्वम् - ञकारः ।।

श्रीग्रामण्योश्छन्दसि ।। 7 - 1 - 56 ।।

नित्यार्थ वचनमिति । अन्यथा भाषायामिव विकल्पः स्यात्, छन्दसि नुडेव चेद् दृश्यते, तस्य च लक्षणमस्ति, कोऽयं विकल्पप्रसङ्ग इति चिन्त्यमेतत् ।

सूताश्च ते ग्रामण्यश्चेति । नेदं कर्मधारयस्य वाक्यम्, किं तर्हि बहुवचनान्तयोर्यदेतरेतरयोगे द्वन्द्वस्तदा नुड्विधेः प्रयोजनम् । यदैकवचनान्तयोः समाहारद्वन्द्वं कृत्वा एकशेषः क्रियते तदा ह्रस्वान्तत्वादेव नुट् सिद्ध इति न प्रयोजनमिति दर्शयति । एवं च तेशब्दो न पठितव्यः ।

अत्रापि नुडेव चेद् दृश्यते तस्य च निर्वाहोऽस्ति, इतरेतरेतरयोगद्वन्द्वो न करिष्यते, तदेवमिदं सूत्रं भाष्ये प्रत्याख्यातम् ।।

गोः पादान्ते ।। 7 - 1 - 57 ।।

छन्दसि इत्यधिकारदृक्पादस्यै ग्रहणम्, श्लोकपादस्येत्याह - ऋक्पादान्त इति ।।

इदितो नुम् धातोः ।। 7 - 1 - 58 ।।

कुडि दाहे, हुडि सङ्घाते ।

अङ्गाधिकारान् नुमयं प्रत्यये परतो भवेत् ।

कुण्डेत्यादौ ततश्च क्तिन्स्यान्नाकारो गुरोर्हलः

इत्याशङ्क्याह - अयमिति । अत्र प्रमाणमाह - तथा हीति । कथं पुनरेतज्ज्ञापकम्, यावता इक्श्तिपौ धातुनिर्द्देशे वक्यतव्यौ इति इक्प्रत्यये कृतेऽङ्गसंज्ञायां सत्यां नुमा भवितव्यमिति लक्षणवशादेव नुमनुषक्तयोर्ग्रहणं कर्त्तव्यम् एवं मन्यते - नायमिका निर्देशः, किं तर्हि आगन्तुकेनेकारेण, तत्राप्राप्तो नुमिति ।

नात्र किञ्चित्प्रमाणमस्तीत्याशङ्क्याह - धातुग्रहणं चेति । धातुत्वमेवापेक्षितं न त्वङ्गत्वमित्येवमर्थं धातुग्रहणम्, नान्यत्किञ्चित्प्रयोजनमस्तीति भावः । ननु च भेत्ता, अभैत्सीदित्यत्राधात्वोस्तासिचसिचोरिदितोर्नुम्निवृत्त्यर्थं धातुग्रहणं स्यात् अत आह - तासिसिचोरिति । ननु चामंस्तेत्यादौ आत्मनेपदं ङितमपेक्ष्य सिजन्तस्य अनिदिताम् इति लोप मा भूदित्येतत्सिचीदित्कार्यं स्यात् इत्यत आह - अमंस्तेत्यादाविति । यथा हनः सिच् इति कित्त्वविधानमस्य लिङ्गं तथा तत्रैव प्रतिपादितम् ।

तासेस्तर्हीदित्करणं मन्तेत्यादौ आत्मनेपदैकवचनस्य डादेशे कृते टिलोपे च मनत् - आ इति स्थिते नकारस्योपधालोपे मा भूदित्येवमर्थं स्यादत आहमन्तेत्यत्रेति । नकारलोपो न भवतीत्यनुषङ्गः ।

जयादित्यस्तु - आभीयमसिद्धत्वमनित्यमाश्रित्य तासेरिदितकरणमनुनासिकलोपप्रतिषेधार्थमित्यवोचत् । तन्मते धातुग्रहणं तासिनिवृत्त्यर्थं कर्तव्यमिति उपदेशे नुम्भवति इत्यत्र यत्नान्तरमास्थेयम् ।

इह भिदिर्प्रभृतिषु इकारस्य उपदेशेऽजनुनासिक कइत् इतीत्संज्ञा, रेफस्यापि हलन्तयम् इति, ततश्चेदित्त्वान्नुम् प्राप्नोति तत्राह - इरितामिति । इरितामिर उपसङ्ख्यानम् इत्यौपसङ्ख्यानिकी समुदायस्येत्संज्ञा, न प्रत्येकं सौत्री, ततश्चानिदित्त्वान्नुम् न भवतीत्यर्थः ।

नन्वेवमपि स्वरितेत्त्वनिबन्धनमात्मनेपदं न प्राप्नोति भिदिर्प्रभृतिषु, तस्मात्प्रत्येकपक्षे परिहारो वाच्यः - िति मत्वा प्रत्येकपक्षे परिहारमाह - अवयवशोऽपीति । अपर आह - इदित इति नायं बहुव्रीहिः, किं तर्हि कर्मधारः ततश्च वर्णग्रहणमिदं भवति । तत्र तदन्तविधिनेत्संज्ञकेकारान्तस्य धातोर्नुमिति । अथेदितो धातोवो ननमनुषक्ता एव कस्मान्न पठिताः, एवं हीदं न कर्त्तव्यं भवति नुम्ग्रहणं तावदुत्तरार्थं कर्त्तव्यम्, इदितां च भूयस्त्वातप्रत्येकं नक्रोच्चारणादिदमेव सूत्रं लघीयः ।।

शे मुचादीनाम् ।। 7 - 1 - 59 ।।

मुचादयः मुच्लृ मोक्षणे इत्यारभ्य तुदादिष्वा गणान्ताद्वेदितव्याः ।

के पुनस्तृफादय इति । व्यवस्थावाचिन्यादिशब्दे निरनुषङ्गाणामपि ग्रहणप्रसङ्गादिति प्रश्नः । प्रकारवाची आदिशब्दः, प्रकारश्च सादृश्चम्, तच्च नकारानुषक्ततयेत्युत्तरम् । यदि सानुषाङ्गणां पुनर्नुम् विधीयते, एषं सति परस्य नकारस्यानुस्वारपरसवर्णयोः कृतयोर्नकारमकारयोः श्रवणप्रसङ्गः इत्यत आह - तेषामिति । अथास्य नुमोऽपि लोपः कस्मान्न भवति तत्राह - चेति । विधानसामर्थ्यादिति । अयं च मुचादिष्वेव लोपाभावस्य हेतुः । तृम्फादिषु तु परनकारलोपस्य चिणो लुग्न्यायेनासिद्धत्वादेव पूर्वनकारस्य लोपाभावः सिद्धः । अथ मुचादिष्वेव तृम्फादयः कस्मान्न पठिताः इत्यत आह - ये त्विति । अयमभिप्रायः - सानुषाङ्गाणां निरनुषङ्गाणां च तन्त्रेणार्थनिर्देशः । तत्र यदि सर्वे मुचादिषु पठ्येरन्, निरनुषङ्गाणामपि नुम्प्रसङ्गः । सानुषाङ्गाणां निष्कृष्य पाठे द्विरर्थनिर्द्देशेन गौरवप्रसङ्ग इति ।।

मस्जिनशोर्झलि ।। 7 - 1 - 60 ।।

टुमस्जो शुद्धौ तृच्, एकाचः, इतीट्प्रतिषेधः, अन्त्याज्जकारात्पूर्वो नुम्, स्कोः संयोगाद्योरन्ते च इति सलोपः, कुत्वम्, अनुस्वारपरसवर्णौ । नंष्टेति । रधादिभ्यश्च इतीडभावपक्षे नुम् । मज्जनमिति । जकारे परतः सकारस्य श्चुत्वे च प्राप्ते जश्त्वस्यासिद्धत्वात् श्चुत्वम्, शकारस्य जश्त्वम् - जकारः ।

मस्जेरित्यादि । यद्यन्त्यादचः परः स्यात्तदा नसजानां समुदायस्यैका संयोगसंज्ञेति सकारस्यासंयोगादित्वाल्लोपो न स्यात् । अथापि सजयोः पृथक्संयोगसंज्ञामाश्रित्य लोपः स्याद् एवमपि तस्य लोपस्यासिद्धत्वान्नकार उपधा न भवतीति तस्य लोपो न स्यात् । तस्मादन्त्याज्जकारात्पूर्वः सजयोर्मध्ये नुमेषितव्यः ।।

रधिजभोरचि ।। 7 - 1 - 61 ।।

रध हिंसासंराध्योः जभ जृभी गात्रविनामे, इहास्य नुमोऽवकाशः - रन्धनम्, ररन्धतुरित्यादि, अत उपधायाः वृद्धेरवकाशः - पाचकः, पाठकः, रन्धकइत्यादावुभयप्रसङ्गे परत्वाद्वृद्धिः प्राप्नोति तत्राह - परापि सतीति । वृद्धिस्तु नुमि कृते न प्राप्नोति, अकारस्यानुपधात्वादित्यनित्या । रद्धेति । रधादिभ्यश्च इति पक्षे इडभावः झषस्तथोर्धोऽधः इति तकारस्य धत्वम् ।

इह जभेरचि रधेलिटि च नेटि - इति सूत्रन्यासः कर्त्तव्यः तथा तु न कृतमित्येव ।।

नेट्यलिटि रधेः ।। 7 - 1 - 62 ।।

नुमि कृते इत्यादि । ननु चेटि सत्यजादित्वान्नुमा भवितव्यम्, प्रागेव चेटः कित्त्वं प्राप्नोति न च अलिटि इत्यस्य वैयर्थ्यम्, थल्यर्थवत्त्वान् एवं हि धातोरित्यनुवृत्तेरुपदेश एव नुम् भवति । अचीत्येषा तु विषयसप्तमी ।

अथेति । येषां छान्दसः क्वसुस्तेषामेष विचारो नास्ति, छन्दसि दृष्टानुविधानात् । एत्वाभ्यासलोपयोः कृतयोरिति । वस्वेकाजाद्घसाम् इत्यत्र कृतद्विर्वचनानामेकाचां ग्रहणादेव मुक्तम् । तत्र नुमागम इति । अचीति वचनात् । तस्येत्यादि । यद्यपि ररन्धिवेत्यादिवत् क्वसावप्यातिदेशिकं कित्त्वं नास्ति, तथाप्यौपदेशिकं कित्त्वमाश्रित्य नलोपो भवतीत्यर्थः ।

अथेत्यादि । एवं सति नेट्यलिटि इति द्वावपि प्रतिषेधौ न वक्तव्यौ भवत िति भावः । विपरीतमावधारणं सम्भाव्येतेति । एवकारे तु क्रियमाणे न लाघ्रवे विशेषः ।।

रभेरशब्लिटोः ।। 7 - 1 - 63 ।।

रभ राभस्ये, अनुदात्तेत् ।।

लभेश्च ।। 7 - 1 - 64 ।।

डुलभष् प्राप्तौ, अनुदात्तेन । लम्भो वर्त्तत इति । उपसर्गादेव खल्घञोः इति नियमस्य वक्ष्यमाणत्वादपपाठोऽयम् । खनो घ च इति चकाराद् भगः पदम् इतिवत् घप्रत्यय इत्येके । योगविभाग उत्तरार्थ इति । उत्तरोविधिर्लभेरेव यथा स्याद्रभेर्मा भूत् । किञ्च - शिब्लिटोर्यथासंख्यनिरासार्थश्च ।।

आङो यि ।। 7 - 1 - 65 ।।

अत्र धातोः इत्यनुवृत्तेरुपदेशावस्थायामेव नुमा भवितव्यम्, तस्माद् यि इति विषयसप्तमीत्याह - यकारादौ प्रत्यये विषय इति । प्रागित्यादिना विषयसप्तम्याश्रयणस्य फलं दर्शयति । तत्रेत्यादि । रुपे तु नास्ति विशेषः, ण्यत्प्रत्ययेऽपि वृद्ध्या नैव भवितव्यम् , नित्ये नुमि सति विहितनिमित्तत्वात् । यति पुनरुत्तरपदाद्युदात्तत्वं स्यादिति । यतोऽनावः इत्युत्तरपदाद्युदात्तत्वात् । आलभ्य इति । यक् । अनुषङ्गलोपः क्रियत इति । एतेन यक्ल्यपौ व्याख्यातौ । तेन यि इति सामान्योक्तावपि ण्यदेवोदाहृत इति भावः ।।

उपात्प्रशंसायाम् ।। 7 - 1 - 66 ।।

अत्र प्राप्तिरेव धात्वर्थः । प्रशंशा तु गम्यमानतया विशेषणम् । अतो यस्य प्राप्तिर्यतो वा प्राप्तिः प्रशंसाहेतुर्भवति तत्रोदाहरणम् । विपर्यये तु प्रत्युदाहरणम् ।।

उपसर्गात् खल्घञोः ।। 7 - 1 - 67 ।।

सिद्धे सतीति । लभेश्च इत्यनेन । उपसर्गादेवेति । विपरीतस्तु वियमो न भवति - उपसर्गात्खल्घञोरेवेति गृधिवञ्च्योः हलम्भने इति निर्द्देशात् ।।

न सुदुर्भ्या केवलाभ्याम् ।। 7 - 1 - 68 ।।

केवलशब्दः शब्दोपात्तादन्यस्य सजातीयस्याभावमाचष्टे । यथा हि -

केवलाभ्यामिहैताभ्यां प्रवेष्टव्यमितीरिते ।

अन्यस्य पुरुषस्यैव प्रवेशः प्रतिषिध्यते ।।

न शुकादेः, तथेहापि परस्परयुताधिमौ ।

एकाकिनौ विजातीयसहितौ चापि केवलौ ।।

सुदुर्लभम्, सुलभम्, दुर्लभम्, अतिसुलभमित्युदाहरणानि । सुलाभः, दुर्लाभ इति । भावे घञ् । कर्मणि तु खल् भवति । यद्वा - सुः क्षेपे, यथा - सुषिक्तं नामेति । दिर्निन्दायाम्, यथा - दुर्ब्राह्मण इति । तेन कृच्छ्राकृच्छ्रार्थत्वाभावात्खलभावः ।

तृतीयां मत्वेति । तृतीयापक्षे त्विदं प्रत्युदाहरणमित्यर्थः । अथ पञ्चमीपक्षे कस्मान्न प्रत्युदाहरणम् कइत्याह - पञ्चम्यां हीति । न च तदापि प्रसुलम्भमिति प्रत्युदाहरणम् उक्तं हि भाष्ये - नैषोऽस्ति प्रयोगः इति ।

अतिसुलभमित्यत्रेति । उपसर्गात् इत्यनुवृत्तेरुपसर्गयोः सुदुरोरिह ग्रहणमिति भावः । अतिरतिक्रमणे च इत्यतः कर्णप्रवचनीयसंज्ञा, तया चोपसर्गसंज्ञा बाध्यते, एकसंज्ञाधिकारात् । पञ्चमीनिर्देशपक्षेऽपीति । एवं च सर्वथा केवलग्रहणस्य कर्त्तव्यत्वात्क्रमव्यतिक्रमे कार्णाभावात्पूर्वतृतीयाश्रयणेन प्रत्युदाहरणं दर्शितम् ।।

विभाषा चिण्णमुलोः ।। 7 - 1 - 69 ।।

तेनानुपसृष्टास्य विकल्प इति । तथा च वार्त्तिकम् चिण्णमुलोरनुपसर्गस्य इति ।।

उगिदचां सर्वनामस्थानेऽधातोः ।। 7 - 1 - 70 ।।

धातुवर्जितानामिति । नेदमधातोरित्यस्याथप्रदर्शनम् , तस्यान्यपरत्वात् । तस्माद् अञ्चतिग्रहणं नियमार्थम् इति यद्वक्ष्यते, तत्सिद्ध एवायमर्थः प्रदर्शितः ।

अधातोः इत्यस्य त्वर्थप्रदर्शने उगितामङ्गानामञ्चतेश्चाधातोश्चोहगितो नुम् भवतीति प्रदर्शनीयम् । अञ्चतेश्चेति । अजिति प्रत्यहारग्रहणं तु न भवति नपुंसकस्य झलचः इति पुनरज्ग्रहणात् । तत्र हि प्रत्याहारस्यैव ग्रहणम्, नाञ्चतेः, झलन्तत्वात् । भावनिति । अत्वसन्तस्य च इति दीर्घः । अत्रावयवे कृतं लिङ्गं समुदास्यापि विशेषकं भवतीत्यङ्गस्योगित्त्वम् । प्राङिति । ऋत्विक् इत्यादिना क्विन, सुः, हल्ङ्यादिसंयोगान्तलोपौ, क्विन्प्रत्ययस्य कुः इति कुत्वम् - नकारस्य ङकारः ।

अञ्चतिग्रहणं नियमार्थमिति । न हि अधातोः इति प्रतिषेधादप्राप्ते विध्यर्थमेतद्भवति । एवं ह्यधातोरिति न वक्तव्यम् नियमादेव सिद्धेः । उखास्रदिति । वसुस्रंसु इत्यादिना दत्वम् ।

अधातोरिति किमिति । अञ्चतिग्रहणान्नियमादेव धातोर्न भविष्यतीति प्रश्नः । अधातुभूतपूर्वस्यापीति । यस्य कदाचिदधातुत्वं दृष्टं तस्य सम्प्रति धातुत्वे सत्यपि यथा स्यादित्यर्थः । गोमत्यतेरिति । सुप आत्मनः क्यच्, अवद्यमानः प्रत्ययः - अप्रत्ययः, स पुनः क्विप् । अतो लोपः, क्यस्य विभाषा इति यलोपः, नुम् - गोमान् । कथं पुनरत्र दीर्घत्वम्, यावता अत्वासन्तस्य चाधातोः इत्युच्यते नैष दोषः, अधातोः इति विभज्यते, तत्सामर्थ्यादसन्तस्यैष प्रतिषेधः, नात्वन्तस्य । अत एव तत्र वृत्तौ असन्तस्यैव प्रत्युदाहरणमुपन्यस्तम् ।।

युजेरसमासे ।। 7 - 1 - 71 ।।

युङ्, युञ्जौ, युञ्ज इति । पूर्ववत्क्विबादि । अश्वयुगिति । सत्सूद्विष इत्यादिना क्विप् । एतदेवासमासवचनं ज्ञापकम् - अङ्गाधिकारे तस्य च तदुत्तरपदस्य च ग्रहणं भवति इति ।

युजेरितीकारनिर्देशादिति । नावमिका धातुनिर्देशः, किं तर्हि धातुपाठगतस्येकारस्यानुकरणमिति भावः । युजमिति । सम्पदादित्वाद्भावे क्विप् ।।

नपुंसकस्य झलचः ।। 7 - 1 - 72 ।।

त्रपूणीति । यद्यप्यत्र इकोऽचि विभक्तौ इत्येव नुम्सिद्धः, तथापि अचः, इति प्रत्याहारग्रहणस्यानन्यार्थत्वादनेनैव नुम् भवति । कः पुनरत्र विशेषः - तेन वा नुमि सति, अनेन वा न तु कश्चिद्विशेषः, भ्यायस्तु प्रदर्शितः । यद्येवम्, मा कारि प्रत्याहारग्रहणम्, अकार एव गृह्यताम् - झलत इति कः पुनरेवं लाघवे विशेषः । किञ्चाक्ष प्रत्याहारग्रहणात् उगिदजाम् इत्यत्र अञ्चतेर्ग्रहणम्, न प्रत्याहारस्य इत्युक्तम्, तदपि विघटितं स्यात् ।

बहुपुरीति । बहवः पुरो येषामिति बहुव्रीहौ ऋक्पूर्ब्धूः पथामानक्षे इत्यकारः समासान्तः प्राप्तः, समासान्तविधेरनित्यत्वान्न भवति । विमलाद्यौर्येषु तानि विमलदिवि दिनानि । इह झल्लक्षणस्य नुमोऽवकाशो यदुगिदनुपंसकम् - सर्पींषि, धनूषि, तउगिल्लक्षणस्वावकाशो यदनुगिन्नपुंसकम् - गोमान् , यवमान्, उगितो झलन्तस्य नपुंकस्योभयप्रसङ्गे परत्वादनेनैव नुम् भवति । अस्तु, कृते पुनः प्रसङ्गविज्ञानादुगिल्लक्षणोऽपि नुम् प्राप्नोति, कथं पुनरेकमन्त्यमचमपेक्ष्यानेकस्य परत्वं सम्भवति मा नाम सम्भूतप्रयोगे, विधानकाले तु सम्भवति, यथा पचतीति लटः शपश्च तत्र तुदन्ती, नुदन्तीत्यत्र परस्थ नकारस्यानुस्वारपरसवर्णयोः कृतयोर्द्वयोर्नकारयोः श्रवणं प्रति विशेषोऽस्ति ।

इह तर्हि - कृषन्ति, रुपन्तीत्यत्र परस्य नुमोऽनुस्वारपरसवर्णयोः कृतयोः पूर्वस्याझल्परत्वादनुस्वारपसवर्णौ न स्त इति अट्कुप्वाङ्नुम्व्यवायेऽपि इति णत्वं प्राप्नोति, यदा पुनरेको नुम् तदा तस्यानुस्वारश्च प्राप्नोति णत्वं च, तत्र णत्वस्यासिद्धत्वादनुस्वारे कृते परसवर्णः, तस्यासिध्दत्वाण्णत्वाभावः सिद्धः, तस्मादुगिल्लक्षणस्य प्रतिषेधो वक्तव्यः इत्याशङ्क्याह - उगितो झलन्तस्येति । सकृद्गतिन्यायोऽत्राश्रीयत इत्येवकारेण दर्शयतिः अनेनैवेति ।

अन्त्यात्पूर्व इति । रेफजकारयोर्मध्य इत्यर्थः ।।

इकोऽचि विभक्तौ ।। 7 - 1 - 73 ।।

इक इति किमिति । पूर्वत्र यदज्ग्रहणं तदिहैव कर्त्तव्यम् - नपुंसकस्य झलः, अचोऽचीति तेन तु हलन्तस्य न भविष्यति, सन्ध्यक्षरन्तं तु नपुंसकं नास्त्येवेति प्रश्नः । अत एवादन्तं प्रत्युदाहरति, न हलन्तम् ।

अचीति किमिति । त्रपुभ्यामित्यादौ हलादौ सत्यपि नुमि स्वादिषु इति पदसंज्ञायां सत्याम् नलोपः प्रातिपदिकान्तस्य इति लोपेनैव सिद्धमिष्टमिति प्रश्नः । इतरोऽपि विदिताभिप्राय आह - उत्तरार्थमिति । अस्थिदधिसक्थ्यक्ष्णामनङ् अचि यथा स्यात्, हलादौ अस्थिभ्यामित्यादौ मा भूत् । पुनश्चोदयतियद्येवमिति । परिहरति - इह त्विति । हे त्रपो इति । अत्र प्रागेव गुणान्नुमः प्रसङ्गः , गुणे कृतेऽनिगन्तत्वादप्रसङ्गः । स्यादेतत् - अस्त्वत्र नुम्, स्वमोर्नपुंसकात् इति सोर्लुकि सुबन्तं पदमिति पदसंज्ञायां नलोपो भविष्यतीति तत्राहन ङिसम्बुद्ध्योरिति । ननु चेत्यादि । एवकारो भिन्नक्रमः प्रतिषेधेन सम्बद्ध्यमान औपचारिकमपि विभक्तेरस्तित्वं प्रतिषेधति । द्विविधं विभक्तेरस्तित्वम् - मुख्यम्, औपचारिकं च । तत्र मुख्यं श्रूयमाणायाः, इतरल्लुप्तायाः प्रत्ययलक्षणेन । तदिह लुप्तत्वान्मुख्यं तावन्नास्ति, प्रत्ययलक्षणप्रतिषेधेनौपचारिकमपि नास्त्येव, तत्र विभक्तौ इत्युच्यमानो नुम् कः प्रसङ्गे यत्सर्वथैवासत्यां विभक्तौ स्यात् नैष प्राप्नोति, नार्थोऽज्ग्रहणेन । एतदेवेत्यादि । अन्यथा ह्यज्ग्रहणं न कुर्यात्, कृतं तु, ज्ञापयति - अत्रोगन्ते नपुंसके सम्बुद्धिविषये प्रत्ययलक्षणप्रतिषेधो न भवतीति । तथा चेत्यादिना ज्ञापकस्य प्रयोजनं दर्शयति । सम्बुद्धौ च इति वर्त्तमाने ह्रस्वस्य गुणः इति वहितो गुणः सम्बुद्धिगुणः ।

लौम्बुरवमिति । विकारे ओरञ् ।

इकोऽचीत्यादि । इकः अचीत्युच्यते व्यञ्जनादौ मा भूत् - त्रपुभ्याम्, त्रपुभिः । अस्तु लोपः, अस्त्वत्र नुम् नलोपः प्रातिपदिकान्तस्य इति नलोपो भविष्यति स्वरः कथम् - पञ्चत्रपुभ्याम्, पञ्चत्रपुभिः इगन्ते उत्तरपदे द्विगौ पूर्वपदं प्रकृत्या भवतीत्येष स्वरो न प्राप्नोति नुमि सत्यनिगन्तत्वात् । नलोपेऽपि कृते स्वरविधौ
तस्यासिद्धत्वादनिगन्तत्वादनिगन्तत्वमेव ।

स्वरो वै श्रूयमाणेऽपि लुप्ते किन्न भविष्यतीति । वैशब्दः क्षमायाम् । श्रूयमाणेऽपि वै नकारे स्वरो भवति - पञ्चत्रपुणे, पञ्चत्रपुणः । स लुप्ते किं न

भविष्यति, यत्र शास्त्रवशेन सम्भवो न प्रत्यक्षेण, तत्र किं न भविष्यति भविष्यत्येव । किं पुनः कारणं श्रूयमाणेऽपि नुमि स्वरो भवति सङ्घातभक्तोऽसौ नोत्सहते तदुत्तरपदेगन्ततां विहन्तुम् । यदि चान्तरङ्गः स्वराः, प्रागेव विभक्त्युत्पत्तेर्भविष्यति । अत्र तर्हि - अतिराभ्याम्, अतिराभिरिति - अतिरिभ्यामिति स्थिते नुमि कृते तेन व्यवधानाद् रायो हलि इत्याकारो न प्राप्नोति, नलोपेऽपि कृते सुब्विधौ तस्यासिद्धत्वाव्द्यवधानमेव, सङ्घातभक्तो नुम् तमेव न व्यावदध्यात्, रैशब्दं तु व्यवदधात्येव । अथापि अत्र अङ्गाधिकारे तस्य च तदुत्तरपदस्य च इति रैशब्दान्तस्याङ्गत्वविधानान्नास्ति नुमाङ्गस्य व्यवधानम् अथापि निर्दिश्यमानस्यादेशा भवन्ति इति रैशब्दस्य व्यवधानमेव । अथाप्यङ्गस्यात्वम्, एवमपि नुम एवात्वं प्राप्नोति, तत्र पूर्वस्य यणि सति अतिर्याभ्यामिति स्यात् । तथा प्रियतिसृभ्यां ब्राह्मणकुलाभ्यामित्यत्र प्रियत्रिभ्यामिति स्थिते तिसृभावो न स्यात् नुमा व्यवधानात् । नलोपेऽपि कृत इत्यादि पूर्ववत् ।

नैष दोषः, रायात्वं तिसृभावश्च व्याव्धानान्नुमा अपि भवतः । व्यवधानादिति कर्मणि ल्यब्लोपे पञ्चमी, नुमा व्यवधानं प्राप्यापि भवत इत्यर्थः । विभक्तिविधानदशायां यदानन्तर्थं तत्तत्राश्रीयते, न त्वादेशविधानदशायामिति भावः । नुमा अपीत्यत्र संहिताया अविवक्षितत्वात्सवर्णदीर्घत्वं न कृतम् । अन्ये मध्ये हि शब्दं पठन्ति । अपिशब्देनैतत्सूचयति - प्रकारान्तरेणाप्यात्वतिसृभावौ सिद्ध्यत इति । तत्कथम् कअतिरिभ्यामिति स्थिते नुभात्वयोरुभयोरप्यनित्ययोः परत्वादात्वमेवं तिसृभावः, तत्र सकृद्गतिन्यायाश्रयणेन नुमभावः, सत्यापि वा नुमि न कश्चिद्दोषः एवं तर्हि नुम्नुटोर्विप्रतिषेधार्थमज्ग्रहणं कृतम् । ह्रस्वनद्यापो नुट् इत्यसायावकाशः - अग्नीनां वायूनाम्, नुमोऽवकाशः - त्रपुणे, जतुने, त्रपूणाम्, जतूनामित्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधेन नुडिष्यते । नामि इति दीर्घो यथा स्याद् इति । स च विप्रतिषेधोऽज्ग्रहणे सत्युपपद्यते द्वयोरप्यनित्यत्वेन तुल्यबलत्वात् । असति हि त्वज्ग्रहणे कृताकृतप्रसङ्गित्वान्नित्यत्वान्नुमेव स्यात् ।

एतदपि प्रयोजनं दूषयति -नुङ् वाच्य इति । क्रियमाणेऽप्यज्ग्रहणे नुट् तत्र वाच्यः - वचनेनैव साध्यः, अन्यथा परत्वान्नुमेव स्यात् । ततश्चाज्ग्रहणं कर्त्तव्यम्, पूर्वविप्रतिषेधश्च वक्तव्यः - इति यत्नद्वयमाश्रयणीयम् । तत्राज्ग्रहणमकृत्वा एक एव नुडर्थो यत्नः कर्त्तव्य इत्यर्थः ।

इदं तर्हि प्रयोजनम् - तेनैव यत्नेन नुटि तत्रैवानजादौ नुम् मा भूत् अस्तु, लोपो भविष्यति, नलोपस्यासिद्धत्वादनजन्तत्वात् नामि इति दीर्घत्वं न स्यात् । मा भूदेवम्, नोपधायाः इत्येवं भविष्यति इह तर्हि शुचीनाम् , इन्हन्पूषार्यम्णां शौ, सौ च इति नियमाद्दीर्घत्वं न स्यात्, प्रतिपदोक्तस्येनस्तत्र ग्रहणम्, लाक्षणिकश्चायम् । एवं प्रत्याख्यातेऽज्ग्रहणे प्रयोजनमाह - उत्तरार्थं त्विति । तुशब्दः तर्ह्यर्थे । यद्युत्तरत्रास्य प्रयोजनं तर्हि तत्रैव कर्त्तव्यमा अत आह - इह किञ्चिदिति । तुशब्दस्य यण् न कृतः इकोऽसवर्णे शाकल्यस्य इति प्रकृतिभावविधानात् । त्रपो इति । अत्र तु सम्बुद्धौ शाकल्यस्येतावनार्षे इति प्रगृह्यत्वादवादेशाभावः ।

केचिदत्र हे त्रपो, हे त्रपु - इति द्वैरुप्यमिच्छन्ति, प्रत्ययलक्षणप्रतिषेधस्यानित्यत्वं ज्ञाप्यते, न त्वस्मिन्विषये सर्वथैवाभाव इति वदन्ति । तथा च भाष्ये हे त्रपु, हे त्रपो इति द्वयमप्युदाहृतम् । अन्ये तु हे त्रप्विति प्राप्ते हि त्रपो इति भवतीति भाष्यं व्याचक्षणाा नित्यमेव गुणमिच्छन्ति । तथा च वृत्तौ गुण एवोदाहृतः ।.

तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य ।। 7 - 1 - 74 ।।

नपुंसकस्य इति यत्षष्ठ्यन्तं प्रकृतं तदिह भाषितपुंस्कम् इत्यनेन सम्बन्धात्प्रथमान्तं सम्पद्यते । पुंवदिति । पुंशब्देन तुल्यमित्यर्थः । केन पुनः प्रकारेण पुंशब्देन तुल्यं वर्त्तते इत्यपेक्षायामाह - यथेति । नुम्ह्रस्वयोरभावः पुंशब्देन दृष्टः, तद्द्वारेण यत्सादृश्यं तदिहातिदिश्यते, अन्यस्य कस्यचित्तृतीयादिशु पुंशब्देन सादृश्यस्यासम्भावत् । तेनार्थान्नुम्ह्रस्वयोः प्रतिषेधोऽयं सम्पद्यते । नन्वेवमपि प्रकृतत्वान्नुम एवाभावातिदेशो युक्तः , न ह्रस्वस्य, ततश्च ह्रस्वस्यावस्थितत्वात्तदाश्रयाणां गुणनाभावनुडौत्त्वात्त्वनां प्रतिषेधो वक्तव्यः । गुणः - घेर्ङिति, ग्रामण्ये कुलानाम् औत्वम् - औत्, अच्च घेः, ग्रामण्यां ब्राह्मणकुले नैष दोषः, अतिदेशसामर्थ्याद्
ह्रस्वाभावोऽप्यतिदिश्यते, अन्यथा प्रतिषेधमेव गालवस्य विदध्यात् । ग्रामणीर्ब्राह्मण इति । भाषितपुंस्कप्रदर्शनमेत् । ग्रामणि ब्राह्मणकुलमिति । नपुंसकह्रस्वत्वं भवति, अतस्तदभावोऽतिदिश्यत इत्यनेन दर्शितम् । परिशिष्टमुदाहरणं शुचि ब्राह्मणकुलमिति प्रक्रमाभेदाय दर्शितम् । प्रत्युदाहरणेषु यथायोगं नित्यमेव मुम्ह्रस्वौ भवतः ।

पीलु फलमिति । विकारे ओरञः फले लुक् । समानायामाकृताविति । अस्यैव विवरणम् - तुल्ये प्रवृत्तिनिमित्त इति । यद्योगाद् द्रव्ये शब्दनिवेशः, तत्प्रवृत्तिनिमित्तं ग्रामनयनादि । अस्त्वेवम्, प्रकृते किमायातम् तत्राह - इह त्विति । पुंसशब्ददस्य या प्रवृत्तिस्तत्र वृक्षाकृतिः वृक्षावान्तरजातिर्निमित्तमित्यर्थः । फलाकृतिनैपुंसक इति । प्रवृत्तिनिमित्तशब्दस्येत्यनुषङ्गः । फलाकृतिः - फलावान्तरजातिः । तत्र यद्यपि पीलोः फलमिति व्युत्पत्तौ वृक्षावान्तरजातिरप्यङगीकृता, तथापि न सा फले प्रवृत्तिनिमित्तम्, किं तर्हि फलावान्तरजातिरेवेति भिद्यते निमित्तम् । तदेतदेवमित्यादि स्त्रियाः पुंवत् इत्यत्रैतव्द्याख्यातम्, तत एवावधार्यम् ।

कीलालपेनेति । ह्रस्वस्य निवृत्तौ आतोः धातोः इति लोपः स्यात् ।.

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ।। 7 - 1 - 75 ।।

अनङो द्वितीयोऽकार उच्चारणार्थः, ङकारोऽन्तादेशार्थः, अस्थ्यादयः नब्विषयस्यानिसन्तस्य इत्याद्युदात्तः, शेषमनुदात्तम् । तत्रान्तर्यतोऽनुदात्त आदेशे प्राप्ते उदात्तवचनमस्थ्नेत्यादौ अल्लोपोऽनः इत्यकारलोपे अनुदात्तस्य च यत्रोदात्तलोपः इति विभक्तेरुदात्तत्वार्थम् । विभाषा ङिश्योः इत्यल्लोपाभावपक्षे त्वकारस्य उदात्तस्य श्रवणं भवति - अस्थनीति, यथा छन्दस्यपि दृश्यते इत्यत्र - इन्द्रो दधीचो अस्थमिरिति ।

एतैरस्थ्यादिभिरित्यादि । अत्र अङ्गाधिकारे तस्य च तदुत्तरपदस्य च इति तदन्तस्य तावद् ग्रहणं भवति । तथा नुपंसकस्य इत्यनुवृत्तं श्रुतत्वादस्थ्यादीनां

विशेषणम्, न प्रकृतस्याङ्गस्य, तेनानपुंसकस्यापि तस्य ग्रहणम् । किमर्थं पुनरस्थ्यादयो नपुंसकत्वेन विशेष्यन्ते यदृच्छाशब्दानां पुंल्लिङ्गानां मा भूत् - दधिर्नाम कश्चित्, तेन दधिनेति । नैतदस्ति प्रयोजनम् -

अभिव्यक्तपदार्था ये स्वतन्त्रा लोपविश्रुताः ।
शास्त्रार्थस्तेषु कर्त्तव्यः शब्देषु न तदुक्तिषु ।।

एवं तर्हि, नपुंसकस्य इत्यनुवृत्तस्यान्वयप्रदर्शनमात्रं कृतम् - एतैरस्थ्यादिभिर्नपुंसकैरिति ।।

छन्दस्यपि दृश्यते ।। 7 - 1 - 76 ।।

छन्दसि इत्येव सिद्धे अपि दृश्यते इत्येतत्सर्वोपाधिव्यभिचारार्थम् अन्यथारम्भसामर्थ्यात्कस्यचिदेव व्यभिचारः शङ्क्येत । तदिदमुक्तम् - यत्र विहितस्ततोऽन्यत्रापि दृश्यत इति । अस्थन्वन्तमिति । अनङि कृते अनोनुट् इति मतुपो नुट्, अनङो नकारस्य लोपः ।।

ई च द्विवचने ।। 7 - 1 - 77 ।।

अक्षी इति । अक्षि - औ इति स्थिते औङः शीभावः, पूर्वस्य इकारः, तत्र प्रथमयोः पूर्वसवर्णः इति दीर्घस्य दीर्घाज्जसि च इति नित्ये प्रतिषेधे प्राप्ते वा छन्दसि इति पक्षे पूर्वसवर्णदीर्घत्वम् । अकः सवर्णेदीर्घः इति वा दीर्घत्वम् । ननु चासत्यप्यस्मिन्वचने पूर्वसवर्णदीर्घत्वेनैव सिद्धम् नात्र पूर्वसवर्णदीर्घत्वम् प्राप्नोति, परत्वान्नुमा बाध्यते । एवं तर्हि छन्दसि नपुंसकस्य पुंवद्भावो वक्तव्यः - मधोस्तृप्ता इवासते - इत्येवमाद्यर्थम्, तेन पुंवद्भावेन नुमि शीभावे चासति पूर्वसवर्णदीर्घत्वनापि सिद्धम् - अक्षी इति सत्यम् स्वरस्तु न सिध्यति, अक्षिशब्दस्य नब्विषयस्यानिसन्तस्य इत्याद्युदात्तत्वात् । न च पुंवद्भावेन स्वरस्याप्यभावातिदेश इष्यते । तस्मात्स्वरार्थमात्रापीकार एव विधेयः ।।

नाभ्यस्ताच्छतुः ।। 7 - 1 - 78 ।।

ददिति । श्नाभ्यस्तयोरातः इत्यकारलोपः । जक्षदित्यादौ जक्षित्यादयः षट् इत्यभ्यस्तसंज्ञा । कथं पुनश्चतुर्भिर्योगैर्व्यवहितस्य नुमः प्रतिषेधः शक्यो विज्ञातुम् इत्याह - शतुरन्तरो न विहित इति । अनन्तर ईकारः शत्रन्तस्य न विहितः, एवं तदनन्तर इति यावद्विहितान्वेषणे नुमि पर्यवसानम् ।।

आच्छीनद्योर्नुम् ।। 7 - 1 - 80 ।।

अवर्णान्तादङ्गादुत्तरस्य शतुरिति । सूत्राक्षरैस्तावदयमेवार्थः प्रतीयते इत्येवं व्याख्यातम्, न पुनरयं व्यवस्थितः सूत्रार्थः, दूषणस्य वक्ष्यमाणत्वात् । तस्मान्नाप्रदर्शितविषयं दूषणं शक्यं वक्तुमिति विषयप्रदर्शनपरमिदं द्रष्टव्यम् । याती कुले इति । नपुंसकाच्च इत्यौङः शीभावः । याती ब्राह्मणीति । उगितश्च इति ङीप् । करिष्यतीति । लृट्, लृटः सद्वा, ऋद्धनोः स्ये इतीट् ।

अत्रेत्यादि चोद्यम् । अन्तरङ्गत्वं पुनरेकादेशस्य शतृमात्रापेक्षत्वात् । नुमस्तु बहिङ्गत्वम् शीनद्युत्पत्त्यपेक्षत्वात् । व्यपवर्गः - भेदः - इदमवर्णान्तमङ्गम्, अयं शतृप्रत्यय इत्येवंरुपः । स एकादेशे कृते नास्ति, क्षीरोदकवत् । तद्यथा - क्षीरोदके संयुक्ते न ज्ञायेते - इदं क्षीरमिदमुदकम्, अमुष्मिन्नवकाशे क्षीरममुष्मिन्नवकाशे उदकमिति ।

अवर्णान्तादङ्गादुत्तरस्य शतुरिति न युज्यते वक्तुमिति । यथा पूर्वमवोचस्तथा न युज्यत इत्यर्थः । तथा हि सर्वत्रैवावर्णस्य निवृत्त्या भवितव्यम्, क्वचिल्लुका - अदती, ध्नतीति, क्वचिच्छ्लुना - जुह्वतीति, तुदतीत्यादावेकादेशेन, लुनतीत्यादौ श्नाभ्यस्तयोरातः इत्याकारलोपेन । स्यादेतते - एकादेशविषेयेऽन्तादिवद्भावेन व्यापवर्गो भविष्यतीति तत्राह - उभयत आश्रय इति । यत्र च पूर्व परं चोभयं युगपदाश्रीयते न तत्रान्तादिवद्भावोऽस्तीति, यथा उपसर्गाद्ध्रस्वः ऊहते, प्रोहते एतेर्लिङि अभीयादिति । इहाप्यवर्णान्तमङ्गं शता चेत्युभयं युगपदाश्रीयते, इति नास्त्यन्तादिवद्भावः । एतर्ह्युच्यते चेदमवर्णान्तादङ्गादुत्तरस्य शतुरिति, न च सम्प्रत्येवंविधः शता क्वचित्सम्भवति, तत्र भूतपूर्वगतिराश्रयिष्यते - पूर्वं यः शता क्वचित्सम्भवति, तत्र भूतपूर्वगतिराश्रयिष्यते - पूर्वं यः शता अवर्णान्तादङ्गादुत्तर आसीदिति तत्राहभूतपूर्वगत्याश्रयणे वेति । समाधिः - समाधानम्, परिहारः । अवर्णान्ताच्छब्दादिति । अङ्गादिति द्रष्टव्यम्, अन्यथा ददतीत्यादावपि प्रसङ्गात् । भवति ह्यत्रापि शत्रवयवादकारत्परस्तकारः । कथं पुनरवर्णान्तस्याङ्गत्वम् एकादेशस्यान्तवद्भावात् । न हीदानीं परम्प्रत्यादिषत्वं विवक्षितम् तकारस्य स्वयमेव सत्रवयवत्वात् । एवं तेन तकारेण पुनरङ्गस्य तदन्तविधिः, अङ्गस्य इत्येतदत्रावर्त्यते ।

अपरे पुनरिति । अत्रापि पक्षे युगपदुभयं नाश्रीयते, किन्तु क्रमेणेत्यस्त्यन्तादिवद्भावः । ननु च तुदन्तीत्यादावन्तादिवद्भावादवर्णान्तमङ्गं भवतुः तथापि न ततः परे शीनद्यौ, तकारेण व्यवधानात् इत्यत आह - तत्रेति । प्रकृतो नुम् प्रतिषेधेन सम्बद्ध इति तदनुवतत्ताविहापि प्रतिषेध एव विकल्पेन, शीनद्योर्वा नुम् न भवति अवर्णान्तादिति, केन पुनः प्रसङ्ग इदमेव ज्ञापकं स्यात् - अस्ति शीनद्योर्नुमिति, ततश्च कुर्वतीत्यादावनवर्णान्तन्नित्यं नुमः प्रसङ्गः, मैवं विज्ञायीति नुमग्रहणम् ।।

शप्श्यनोर्नित्यम् ।। 7 - 1 -81 ।।

इत्येतयोः शतुरिति । एतयोः सम्बनधी यः शता तस्येत्यर्थः, म्बन्धश्च निमित्तनिमित्तिभावः । क्वचित्तु सम्बन्धिन इति पठ्यते । नित्यग्रहणमिति । ननु चारम्भसामर्थ्यादेव नित्यं भविष्यति तत्राह - इहेति ।।

सावनडुहः ।। 7 - 1 - 82 ।।

इह चतुरनडुहोरामुदात्तः इत्यामागमः सर्वनामस्थानमात्रे विधीयमानः सोरन्यत्र सावकाशो निरवकाशेन नुमा बाध्येत, तथा सम्बुद्धेरन्यत्र सौ सावकाशो नुम् सम्बुद्धौ विशेषविहितेन अम् सम्बुद्धौ इत्यनेन बाध्येत इत्याशङ्क्याह - अत्र केचिदित्यादि । कथं पुनरादित्यास्यानुवृत्तौ सत्यामप्याममोः कृतयोर्नुम भवति, न

पुनर्थ एवानडुहि नित्यः सन्निहितोऽकारस्तत एव परः स्यात् उच्यते एवं सति मिदचोऽन्त्यात्परः इति परिभाषा बाध्यते, तत्राबाधेनोपपत्तौ सत्यां बाधो न न्याय्यः । तत्र यथा परिभाषा न बाध्यते आदित्यनुवृत्तिश्च सार्थिका भवति, तथा वक्तव्यम् । यदि चाममोरकृतयोर्नुम् स्यात्, नेदमुभयमनुगृहीतं स्यादिति कृतयोरेव तयोर्नुम् भवि,यति । आमामौ च न बाध्येते इति । न केवलममेव न बाध्यते, अपि त्वाममावुभावपि न बाध्येते इत्यर्थः । अमत्र दृष्टान्तत्वेनोपात्तः । यथाऽम् न बाध्यते तथा आमिति भावः । न पुनरमो नुमा बाधशङ्का, अमो विशेषविहितत्वात् । आमम्भ्यां च नुमितित । न बाध्यते इति वचनविपरिणामेनानुषङ्गः । अत्रापि यथा आमा न बाध्यते तथाऽमापीत्यर्थः । न पुनरामा नुमो वाधशङ्का तस्य सामान्यत्वात् । अपरे त्वित्यादि । इच्छन्ति
इति वचनादिष्टिरेवेयमिति केचित् । अन्ये त्वाहुः - भवतु वा सामान्यविशेषयोः सन्निधौ बाध्यबाधकभावः, इह त्वनेकेन योगेन व्यवधानम्, असति हि सम्भवे बाधनं भवति, तथइह च अस्ति सम्भवो यदुभयं स्यादित्याममोर्नुमश्च समावेश इति । यथेति । अक्ष नाप्राप्ते द्विवर्चने दीर्घ आरभ्यते । अथ च सम्भावात्प्रकरणभेदाच्च समावेशः । बह्वनड्वांहि ब्राह्मकुलानीति परत्वादामि कृते पुनः प्रसङ्गविज्ञानात् नपुंसकस्य झलचः इति नुम् भवति ।।

दृक्स्ववस्स्वतवसां छन्दसि ।। 7 - 1 - 83 ।।

ईदृङित्यादौ त्यदादिषु दृशोऽनालोचने कञ्च इति क्विनि नुमि च कृते पूर्ववत्कुत्वम् ।।

दिव औत् ।। 7 - 1 - 84 ।।

धातोः प्रतिषेधो वक्तव्यः - अक्षद्यूरिति, एकदेशविकृतस्यानन्यत्वादूठि कृते दिवशब्द एवायमिति प्रसङ्ग इति अधात्वधिकारात्सिद्धम्, अधातोः इत्यनुवर्त्तते, क्व प्रकृतम् उग्िदचां सर्वनामस्थानेऽधातोः इति ।यदि तदनुवर्तेत, नपुंसकस्य झलचः इत्यत्रापि सम्बध्येत, ततश्च काष्टतङ्क्षि ब्राह्मणकुलानीत्यत्र न स्यात् । तस्मादशक्यं तदनुवर्त्तयितुम् ततश्च धातोः प्रतिषेधो वक्तव्य एव इत्याशङ्क्याह - दिविति प्रातिपदिकमित्यादि ।।

पथिमथ्यृभुक्षामात् ।। 7 - 1 - 85 ।।

पन्था इति । इतोऽत्सर्वनामस्थाने इतीकारस्याकारः, सवर्णदीर्घत्वम्, थो न्थः । अनुनासिकस्य नकारस्यान्तर्यतोऽनुनासिक आकारः कस्मान्न भवति इत्याशङ्क्याह - स्थानिन्यनुनासिकेऽपीति । अक्ष कारणमाह - भाव्यमानेनेति । केचिद्भाव्यमानोऽण् सवर्णान्न गृह्यति इति पठन्ति, तेषाम्प्यण्ग्रहणं ग्राहकोपलक्षणार्थम्, तेनाकारोऽपि भाव्यमानो ग्राहको न भवति । तपरस्तत्कालस्य इत्यनेन तु ग्रहणशङ्का, उक्तं हि तत्र - अनणि विध्यर्थमेतदिति । स्यादेतत् - मा भूत्सवर्णाग्रहणम्, अनुनासिकस्यैव तु सूत्रे उच्चारणात्स एव स्यात् इत्यत आह - शूद्धो ह्ययमिति । अकारविधाने अतो गुणे परुपं स्यात् । अकारविधानं तु नकारनिवृत्त्यर्थ स्यात् लोपविधौ गौरवप्रसङ्गात् । तस्मादाकर एव विहितः ।।

इतोऽत्सर्वनामस्थाने ।। 7 - 1 - 86 ।।

अद्ग्रचनं किमर्थम्, ह्रस्वस्य श्रवण् यथा स्यात् नैतदस्ति सै तावदकः सवर्णदीर्घत्वं भवति, अन्यत्रापि नोपषायाः, सर्वनामस्थाने इति दीर्घेण भाव्यम्, तस्मात्प्रकृत आकार एव विधेयः अत आह - आदिति वर्त्तमान इति । यत्रायं विहितोऽकारः षपूर्वो भवति तत्रास्य प्रयोजनमित्यर्थः । तदेव दर्शयति - ऋभुक्षणमित्यत्रेति । अकारविधौ त्वेकमेव रुपं स्याद् । दीर्घविकल्पस्तु तक्षणाम्, तक्षाणामित्याद्यर्थ स्यात् । स्थानिन्यादेशे च तपरकरणं मुखसुखार्थम् ।।

थो न्थः ।। 7 - 1 - 87 ।।

पथिमथोरिति । त्रयाणां प्रकृतत्वेऽप्येतयोरेव थकारसम्भवात् सम्बन्धः । आदेशेऽकार उच्चारणार्थः । स्यादेतत् - थेरन्थः इति सूत्रमस्तु, अकारोऽपि विवक्षितोऽस्तु ,थिशब्दस्यान्थ आदेशः एवं च कृत्वा इतोऽत् इति न वक्तव्यम् इति तदपि वक्तव्यम् ऋभुक्षिन्शब्दार्थम् ।।

भस्य टेर्लोपः ।। 7 - 1 - 88 ।।

पथ्यादीति । प्रत्येकमभिसम्बन्धाद् भस्य इत्येकवचनम् । विरोधादिति ।। सर्वनामस्थाने भसंज्ञाया अभावो विरोधः । इह न सम्बद्ध्यत इति । उत्तरार्थं त्वनुवर्त्तत एवेति भावः ।।

पुंसोऽसुङ् ।। 7 - 1 - 89 ।।

असुङो ङकारोऽन्तादेशार्थः । उकार उच्चारणार्थः । पुमानिति । पुंस्शब्दस्योगित्त्वान्नुम्, स हि पुञो डुमसुन् इति व्युत्पाद्यते । डकारष्टिलोपार्थः उकार उगित्कार्यर्थः - बहुपुंसीति ङीब् उगिल्लक्षणो भवति । नकारः स्वरार्थः । मकारेऽकार उच्चारणार्थः ।

इहेत्यादि । चोद्यम् । प्रागेव च प्रत्ययोत्पत्तेरिति । प्रत्ययः, सर्वनामस्थानम् । समासान्तोदात्तत्वमिति । पुंस्शब्दोकारस्य । अनिष्टः स्वर इति । स्त्रंसनधर्मणः सकारस्य हलः स्थाने तद्धर्माऽनुदात्त आदेशः स्यादित्यर्थः
। ननु चोकारस्यकृतमपि समासान्तोदात्तत्वमसुङि कृतेऽनन्त्यत्वान्निवर्त्तिष्यते, असुङश्चान्त्यत्वात्प्रवर्त्तिष्यते नैतदस्ति, थअन्तरङे स्वरे कर्त्तव्ये बहिरङ्गस्यासुङोऽसिद्धत्वात्, प्रवृत्तस्य निवर्त्तनायोगाच्च । तदर्थमित्यादि । परिहारः । अर्थशब्दो निवृत्तवचनः, तस्यानिष्टस्वरस्य निवृत्त्यर्थमित्यर्थः । उपदेशिवद्वचनमिति । उपदेशोऽस्यास्तीत्युपदेशी, सकारः, स यथोपदेशावस्थायां सन्निहितस्तयाऽसुङपीत्यर्थः । सर्वनामस्थाने कइति विषयसप्तम्याश्रयणीयेत्युक्तं भवतीति, तत्र समासानन्तरमेव परत्वादसुङि कृते पश्चादुदात्तत्वं भवदसुङ एवाकारस्य भवतीति सिद्धमिष्टम् । यद्यवम्, पुमानित्यादावसमासेऽपि उपदेशावस्थायामसुङि कृते प्रतिपदिकस्वरो भवन्नसुङ एव स्यात् इत्यत आह - पुमानित्ययं पुनरिति । पुंस्शब्दे प्रत्ययो निदित्युक्तम्, तत्सामर्थ्यादाद्युदात्तत्वम् ।।

गोता णित् ।। 7 - 1 - 90 ।।

गाङ्कुटादिसूत्रे यावन्तः पक्षाः, इहापि तावन्त एव, त थएव गुणा दोषश्च, तद्वदेव चातिदेशपक्ष आश्रीयते, यदाह - णिद्भवतीति । परत्र परशब्दः प्रयुक्तोऽन्तरेणापि वतिं वत्यर्थं गमयति, यथा - सिंहो माणवक िति । णिदित्यनेन सामानाधिकरण्यात् सर्वनामस्थाने इति सप्तम्यन्तं प्रथमया विपरिणम्यते, तत्र सर्वनामस्थानस्य णित्यार्य विधेयं न सम्भवतीति णिति यत्कार्यं तत्सर्वनामस्थाने पूर्वस्यातिदिश्यते । तदाह - णित्कार्याणि तत्र भवन्तीत्यर्थ इति ।

चित्रगुरिति । बहुव्रीहौ गोस्त्रियोरुपसर्जनस्य इति ह्रस्वत्वम् । अत्रासति तपरकरणेऽङ्गाधिकारे तदन्तविधेरभ्युपगमात् सर्वे सर्वपदादेशाः इति न्यायेन स्थानिवद्भावेन गोशब्दान्तत्वात् णिद्वद्भावः प्राप्नोति । तपरकरणे तु तत्कालार्थे सति न भवति भिन्नकालत्वात्, तपरस्तत्कालस्य इत्यत्राणित्यस्य निवृत्तत्वाद नणोऽपि तत्कालनियमो भवतीति मन्यते ।

कथमिति । ह्रस्वस्य गुणः जसि च इति गुणे कृते सत्यपि तकारे स्थानिवत्त्वात् तत्कालत्वाण्णित्त्वं प्राप्नोत्येवेति प्रश्नः । न च स्थानिवद्भावविषये लक्षणप्रतिपदोक्तपरिभाषा तस्य वैयर्थ्यप्रसङ्गात् । अङ्गवृत्ते इत्यादि परिहारः । णित्त्वं न भवतीति । णित्कार्यं न भवतीत्यर्थः ।

भवतु सम्बुद्धावेष परिहारः, जसि त्ववादेशामन्तरेणानिष्ठीतत्वादङ्गस्य नायं परिहारः इत्याशङ्क्याह - अथ वेति । यच्चेत्यादिनार्थद्वारकं विशेषसम्बन्धमाह । आनन्तर्यलक्षणे तु सम्बन्धे चित्रगुशब्दादपि प्रसङ्गे यदि, तर्ह्यर्थद्वारकसम्बन्धाश्रयणादेव चित्रगुशब्देऽप्रसङ्गः, किमर्थं तपरकरणम् इत्याह - तपरकरणं तु निर्देशार्थमेवेति । स्पष्टनिर्देशार्थमेवेत्यर्थः । इतरथा गोः इत्युच्यमाने गुशब्दस्यापि निर्देशः सम्भाव्येत ।

केचिदित्यादि । एवं पाठे प्रयोजनमाह - द्योशब्दादपीति । ये तर्ह्येवं न पठन्ति तेषां कथं द्योशब्दे णिद्वद्भावः इत्यत आह - गोत िित्येतदेवेति । कथं पुनरेदोकारान्तोपलक्षणं द्रष्टं शक्यम् इत्यत आह - वर्णनिर्द्देश एव तपरत्वं दृष्टम्, तस्मात्तपरकरणादिह ओकारान्तोपलक्षणं विज्ञायते ।।

णलुत्तमो वा ।। 7 - 1 - 91 ।।

णित्कार्यं वा तत्र भवतीत्यर्थं इति । एतेन पक्षे णित्कर्यस्याभावाद्वा णिद्वतीत्युच्यते, न तु पक्षे णकारस्येत्संज्ञाप्रतिषेधादिति दर्शयति । एतच्च पूर्वत्र कार्यातिदेशाल्लभ्यते । चकारेति । णित्त्वपक्षे वृद्धिः, अन्यदा तदभावः ।।

सख्युरसम्बुद्धौ ।। 7 - 1 - 92 ।।

अत्रापि णिदित्यनेन सामानाधिकरण्यात् सर्वनामस्थाने इति प्रथमान्तम् । तत्रोत्तरार्थम् असम्बुद्धौ िति सप्तम्यन्तस्योपात्तस्य यथेहान्वयः, तथा दर्शयति - असम्बुद्धौ यः सखिशब्द इति ।

अनङ् सौ ।। 7 - 1 - 93 ।।

सर्वनामस्थानप्रकरणात्सम्बुद्धिपर्युदासाच्च सौ इति प्रथमैकवचनस्य ग्रहणम्, न सप्तमीबहुवचनस्य, आकारविधाने सोर्हल्ङ्यादिलोपो न स्यात् एवं तर्हि सोर्ङादेशो विधीयताम्, तएवं सिद्धे यदनङं शास्ति तज्ज्ञापयति - अनङ एव क्वचिच्छ्रवणमस्तीति । तेन यद्वक्ष्यति - सम्बुद्धावपि पक्षेऽनाङिष्यते इति, तदुपपन्नं भवति ।।

ऋदुशनस्पुरुदंसोऽनेहसां च ।। 7 - 1 - 94 ।।

सम्बुद्धावपि पक्षेऽनङिष्यते तइति यदुक्तं तदाप्तगमेन द्रढयति - तथा चोक्तमिति । सम्बोधने - सम्बुद्धौ, त्रयाणां रुपाणां समाहारस्त्रिरुपम्, पात्रादिः ।

कानि पुनस्तानि रुपाणि इत्यत आह - सान्तमित्यादि । सान्तमनङोऽभावपक्षे, नान्तं नलोपाभावपक्षे, तअदन्तं नलोपपक्षे, मध्यन्दिनस्यापत्यं माध्यन्दिनिः - आचार्यः, वष्टि इच्छति । भाषायामस्य साधुत्वं चिन्त्यमिति जक्षित्यादयः षट् इत्यत्रावोचाम । तथा व्याघ्रपदां व्याघ्रपादपत्यानां मध्ये वरिष्ठो वैयाघ्रपद्यआचार्यः नपुंसके नपुंसकसम्बन्धिनि, इगन्ते हे त्रपो इत्यादौ, गुणं षष्टीति श्लोकस्यार्थः ।।

तृज्वत्क्रोष्टः ।। 7 - 1 - 95 ।।

क्रोष्टुशब्दस्तुन्प्रत्ययान्त इति । क्रुश आह्वाने, सितनिगमिमसिसच्यविधाञ्कुशिभ्यस्तुन् । संज्ञाशब्द इति । तुन्प्रत्ययस्य संज्ञार्थे विधानात् । जम्बुकस्य चेयं संज्ञा । वस्तुस्वरुपकथनमेतत् । अत्रानन्तरं तस्येति पठितव्यम् क्रोष्टुरिति सूत्रे षष्ठीनिर्देशात् । तृज्वद्बवतीति । तृच इव तृज्वत् । तत्र तस्येव इति षष्ठीसमर्थाद्वतिः । तदेत्सर्वमुत्तरग्रन्थे स्पष्टीकृतम् । तृजन्तस्य यद्रूपं तदस्य भवतीति । प्रत्ययग्रहणपरिभाषया तृजन्तस्येति लभ्यते ।

अतिदेशोऽनेकप्रकारः - निमित्त व्यापदेश - तादात्म्य - शास्त्र - कार्य - स्वरुपविषयः । तत्रेहादितस्त्रयाणामसम्भावादनतिदेशः, शास्त्रकार्यातिदेशयोश्चायं विशेषः । शास्त्रातिदेशे तेनतेन शास्त्रेण कार्याणि भवन्ति, कार्यातिदेशे त्वतिदेशवाक्येनैवेति तत्र विप्रतिषेधे फलविशेषः । तद्यथा - कर्मवत्कर्मणा इत्यत्र शास्त्रातिदेशे कर्मकर्तरि भावकर्मणोः इत्येतद्बाधित्वा स्वाश्रयं कर्तुत्वमाश्रित्य शेषात्कर्त्तरि परस्मैपदप्रसङ्गः, कार्यातिदेशे त्वात्मनेपदमेव परत्वाद्भवतीति । इह तु नैवं विशेषः सम्भवतीति तयोरभेदमाश्रित्य विचारः प्रवर्त्तितो महाभाष्ये - किं पुनरयं शास्त्रातिदेशः आहोस्विद्रूपातिदेश इति तत्र शास्त्रस्य शास्त्रं प्रत्यासन्नमिति शास्त्रातिदेशः आहोस्विद्रूपातिदेश इति तत्र शास्त्रस्य शास्त्रं प्रत्यासन्नमिति शास्त्रातिदेशः प्राप्नोति, प्राधान्यात्त्ु रुपातिदेशप्रसङ्गस्तदर्थत्वादतिदेशान्तरणाम् । तत्राद्ये पक्षे आहत्य तृचि यच्छास्त्रं तद्वातिदिश्यते अनाहत्य वा यदि तृच्छब्दवच्छास्त्रमतिदिश्यते तत आहत्येति पक्षः, तअथ तृच्छब्दे ऋकार एव विवक्षितः, चकारः स्वरार्थः, तकारस्त्वप्रसिद्धाशङ्कानिवृत्त्यर्थः ऋज्वत् इत्युच्यमाने अप्रसिद्धाश्रयोऽतिदेशः शङ्क्यत, ऋक्प्) इत्यक्शब्दनिबन्धनस्य वा समासान्तस्यातिदेशः शङ्क्येत, तस्मात्तजन्ते यदृकारप्रयुक्तं शास्त्रं कार्यं वा तदतिदेशेनाहत्येति पक्षः । तत्राहत्येति पक्षे अप्तृन्तृच् इति दीर्घत्वमेकमतिदिष्टं स्यादनङ्गुणरपरत्वान्यनतिदिष्टानि - अनङ् ऋदुशनस्पुरुदं सोऽनेहसां च, ऋतो ङिसर्वनामस्थानयोः, उरण् रपरः इति, नह्येतानि तृच्संशब्दनेन विधीयन्ते । ननु च दीर्घत्वेऽतिदिष्टेऽनङादीन्यप्यतिदिष्टान्येव भवन्ति, कथम् दीर्घविधौ उपधायाः इति वर्त्तते, अचश्च इति चोपतिष्ठते, ततश्च तृजन्तस्येव तुन्नन्तस्यापि दीर्घो भवतीत्युक्ते - थउपधाया अचो दीर्घो भवतीत्युक्तं भवति, न चाकृतेष्वनङादिषु

तुन्नन्तस्योपधा दीर्घभाविनी सम्भवति । जसि गुणावादेशयोः सम्भवतीति चेत् न ह्येकमुदाहरणं योगारम्भं प्रयोजयति, यद्येतावत्प्रयोजनं स्यात्, अंप्तृन् इत्यत्रैव क्रोष्टुग्रहणं कुर्यात् । नन्वेवम् स्त्रियां च, विभाषा तृतीयादिष्वचि इत्येवमर्थं पुनः तृजावतक्रोष्टुः इति वक्तव्यं स्यादिति गौरवं स्यात् स्यादेतत् अचि र ऋतः इत्यस्यानन्तरम् क्रोष्टुः स्त्रियाम् विभाषा तृतीयादिष्वचि इति रादेशार्थं वक्ष्यामीति नास्ति गौरवमिति । एवमपि क्रोष्टुः, क्रोष्टरि, पञ्चक्रोष्टुभी रथैरिति न सिद्ध्यति, नापि उदात्तयणो हल्पूर्वात् इति स्वरः, तुन्नन्तस्याद्युदात्तत्वात्तदेवं जसि दीर्घातिदेशेऽपि नातिदेशाश्रणं व्यर्थमिति न तत्सामर्थ्यादनङादीनामाक्षेपतः सिद्धिः - इत्याहत्यपक्षो दुष्ट एव ।

अथानाहत्यपक्षः, अनङादीन्यतिदिष्टानि दीर्घत्वमनतिदिष्टम्, न हि तदृत इत्येवं विधीयते । अथ तृजीतिसमुदाय एव विवक्षितः, न त्वृकारः, न चाहत्यपक्ष आश्रीयते, किं तर्हि तृचि यद् दृष्टं यत्किञ्चन निबन्धनं तस्य सर्वस्यातिदेशः एवमप्यङ्गप्रकरणादङ्गाधिकार एव विहितं यत् शास्त्रं कार्यं तदेवातिदिश्यत, न विप्रकृष्टमनाङ्गम् । यथाचि रवद्भावेन वृद्ध्यादीन्येव भवन्ति, न हनिणिङादेशः, ततश्च रपरत्वमनतिदिष्टं स्यात् । रपरत्वमप्याङ्गम्, कार्यकालं संज्ञापरिभाषम्, ऋतो ङि सर्वनामस्थानयोः गुणो भवति, उपस्थितमिदं

भवति - उरण् रपरः इति । स्त्रियां च इत्यत्र तर्हि क्रोष्ट्रीत्यत्रानाङ्गयोरीकारयणोरतिदेशो न स्यात् वचनाद्भविष्यति, न तृजन्तस्य स्त्रियामाङ्गं किञ्चिदस्ति । स्त्रियामप्याङ्गं किञ्चिदस्ति - पञ्चभिः कर्तृभिः क्रीतो रथः पञ्चकर्त्ता रथः, हे पञ्चकर्त्त, पञ्चकर्तरीति स्त्रीलिङ्गे कर्तृशब्दे ङिसम्बुद्ध्योर्दृष्टस्य गुणस्यातिदेशः स्त्रियां च इत्यत्र सम्भवति न हि सम्बुद्धौ तृज्वत्क्रोष्टुः इत्यनेन सिद्धिः, असम्बुद्धौ इत्यधिकारात् । ङौ विभाषा तृतीयादिषविचि इति विकल्पः स्यात् । स्यादेतत् - स्त्रियां च इत्यत्र न किञचिन्निमित्तमुपादीयते, ततश्च प्रागेव विभक्त्युत्पत्तेः स्त्रियां वर्त्तत इत्येवं तृजन्ते दृष्टस्यातिदेशः, न च तदाङ्गं सम्भवतीति अनाङ्गस्याप्यतिदेश इति एवमपि पञ्चभिः क्रोष्ट्रभिः क्रीतै रेथैः पञ्चक्रोष्टृभी रथैरित्यत्र न कथञ्चन तृजनतरुपप्रादुर्भावः सम्भवति । तथा विभाषा तृतीयादिष्वचि इत्यत्रापि क्रोष्टरीति आङ्गस्य गुणस्यातिदेशसम्भवात् क्रोष्ट्रा, क्रोष्टुरिति यण्शास्त्रमुत्त्वशास्त्रं चानाङ्गं नातिदिश्यते, नापि स्वरः । ननु तन्नापि तृतीयादिग्रहण सामर्थ्यादनाङ्गमप्यतिदिश्येत, अन्यथा विभाषा ङौ इत्येव ब्रूयात् नैतदस्ति अभावातिदेशार्थं तृतीयादिग्रहणं स्यात्, वतिनिर्द्देशेष्वभावातिदेशस्यापि दृष्टत्वात्, यथा - मरुभूमिवदस्मिन्ग्रामे जलमिति । शास्त्रेऽपि तृतीयादिषु भाषितपुंसक्म् - इत्यत्र नुम्ह्रस्वयोरभावोऽतिदिश्यते । यदा हि प्रत्यासत्तेराङ्गमेवातिदेश्यमिति स्थितम्, तदा न सर्वासु तृतीयादिषु भावातिदेशः सम्भवतीति यस्य शास्त्रस्य भावस्तृजन्ते दृष्टः, तुन्नन्तेऽपि तस्य भावोऽतिदिश्यते । यस्य त्वभावः, तृजन्तेऽपि तस्याभावोऽतिदेश्यः स्यात् । तदेवं शास्त्रातिदेशास्य बहुच्छिद्रत्वाद्रूपातिदेश एवायमाश्रयणीयः । तदाह रुपातिदेशोऽयमिति ।

यद्यवम्, यस्य कस्यचितृजन्तस्य रुपमतिदिश्यते - पक्ता, वक्तेति तत्राह - प्रत्यासत्तेरिति । अथैतस्मिन् रुपातिदेशे प्रयोगसमवायि यद्रूपम् - क्रोष्टा, क्रोष्टारौ, पञ्चक्रोष्टृभी रथैः, क्रोष्ट्रा, क्रोष्टुः, क्रोष्टरीत्येवम् - सावाकारन्तं द्विवचनादावारन्तम्, स्त्रियां क्वचिद्रेफान्तं क्वचिदकारान्तम्, तृतीयादौ रेफान्तम्, ङसिङसोरुकारान्तम्, ङावरन्तमिति तदतिदिश्यते आहोस्विच्छास्त्रीयं यद्रूपम् ण्वुल्तृचौ, तृज्वत्क्रोष्टुः इत्युपदेशवाक्येऽतिदेशवाक्ये च श्रुतं तदतिदिश्यते तत्राद्ये पक्षे उदात्तयणो हल्पूर्वात् इति स्वरो न सिद्ध्यति, न हि क्रोष्ट्रेत्यादावृकारावस्था कदाचिद्दृष्टा, यतोऽयमुदात्तयणः स्यात् । तस्माद् द्वितीयः पक्ष आश्रणीयः । तदाह - तच्च क्रोष्टृ इत्येतदिति । नन्वत्रापि पक्षे उपदेशवाक्ये, अतिदेशवाक्ये च तृशब्दस्योदात्तस्योच्चारणाभावादुच्चारितस्य वा गुणानामभेदकत्वेनाकिञ्चित्करत्वात् स्वरस्यातिदेशो न स्यात् सत्यम् चकारग्रहणसामर्थ्यात्तस्याप्यतिदेशो भविष्यति । तदाह - अन्तोदात्तमपि । यद्वा - मा भूत्स्वरस्यातिदेशः, तृजन्तरुपेऽतिदिष्टे तृजबुध्या यथा दीर्घादीनि स्वेनस्वेन शास्त्रेण भवन्ति, स्वरोऽप्येवमेव भविष्यति । वतिनिर्द्देशाच्चायमतिदेश आश्रितः ।

यदि वतिनिर्देशमकृत्वा स्थान्यादेशभावं एवाश्रीयते, न किञ्चिदनिष्टम् तथा तु न कृतमित्येव ।।

स्त्रियां च ।। 7 - 1 - 96 ।।

क्रोष्टुशब्दस्तृज्वद्भवतीत्येतत्त्वर्थकथनम् । षष्ठ्यन्तं तु युक्तं पठितुम् । अन्ये त्वेतद्ग्रहन्थपर्यालोपचनया पूर्वसूत्रेऽपि क्रोष्टः इति प्रथमान्तं मन्यन्ते । अनुक्रियमाणरुपविनाशप्रसङ्गात्तु तृज्वद्भावो न कृतः । वतिरपि तृतीयासमर्थादेव । तृजन्तेन तुल्यं वर्त्तत इति तद्रूपभाक्त्वेन तुल्यत्वमिति रुपातिदेशत्वम् । एवं च पूर्वसूक्षेऽप्याद्यग्रहन्थे तस्येति न पठितव्यम् । तृजन्तस्य यद्रूपं तदस्य भवतीति । एतच्चार्थकथनम् । अत्र विभक्तौ इत्यनुवर्त्तते चेत् क्रोष्ट्री भक्तिरस्येति बहुव्रीहौ भक्तिशब्दस्य प्रियादिशु पाठात्पुंवद्भावाभावे क्रोष्ट्री भक्तिरिति न सिद्ध्यति समासार्थाया विभक्तेर्लुमता लुप्तत्वात् । अथ वाक्यावस्थायामेव तृज्वद्भावो भविष्यति अन्तरङ्गनपि विधीन्बहिहङ्गो लुग्बाधते । तस्मान्नात्र विभक्तिर्निमित्तत्वेन शक्या आश्रयितुम्, किं तर्हि निमित्तम् इत्याह - केचिदित्यादि । कथं पुनर्गौरादिषु पाठे ङीष्प्रत्ययो निमित्तं भवति स्त्रियाम् इति नैवं विज्ञायते स्त्रियामर्थ इति । कथं तर्हि स्त्रिया - ई - स्त्री, स्त्रियामिति, स्त्रीत्वस्य द्योतको य ईकारस्तत्रेत्यर्थः । अर्थगतं च स्त्रीत्वमीकारे आरोप्य स्त्रियामिति नदीसंज्ञानिमित्तावामाटौ क्रियेते । एवं वदतामनिष्टमाह - तेषामिति । पञ्चक्रोष्टृभिरिति । तद्धितार्थे समासः, आर्हीयस्य ठकः अध्यर्द्धपूर्व इति लुक्, लुक्तद्धितलुकि इति स्त्रीप्रत्ययस्यापि लुक् । तत्र न लुमताङ्गस्य इति

प्रतिषेधादीकारनिमित्तस्तृज्वद्भावो न सिद्ध्यति । अन्तरङ्गातणं च विधीनां लुका बाधनोत् न पूर्वमेव तृज्वद्भावो लभ्यते । तत्र सर्वनामस्थाने पूर्वेणैव सिद्धस्तृज्वद्भाव इति तृतीयादावसिद्धिरुक्ता, सर्वनामस्थानेऽपि सम्बुद्धौ पूर्वेणासिद्धिरेव - हे पञ्चक्रोष्टरिति । तथा शसि पञ्चक्रोष्टृन्, तथा तृतीयादिष्वजादिप्वप्युत्तरसूत्रेण विकल्पः प्राप्नोति - पञचक्रोष्ट्रा, पञ्चक्रोष्ट्रे । नन्वारब्धेऽप्यस्मिन्, परत्वाद्विकल्प एव प्राप्नोति थअन्तरङ्गत्वादयमेव नित्यो विधर्भवति । तत्र प्रतिविधेयमिति । वचनमेवात्र शरणम् ।

ये तर्हि गौरादिषु न पठन्ति तेषां किं निमित्तम् न किञ्चिदित्याह - य त्वित्यादि । स्त्रियां च वर्त्तमान इति । सूत्राक्षरामनुरोधेन चशब्दः पठितः । ननु च यद्यपि न शब्देन किञ्चिन्निमित्तमाश्रीयते, अङ्गस्य इति त्वाश्रीयते, अङ्गे चाश्रिते प्रत्ययोऽप्याश्रित एव, यथोक्तम्, अङ्गस्य इत्यत्र वव्रश्चेत्यस्य सिद्धये सत्यम् कार्यकालं संज्ञापरिभाषम् तदुक्तम् । तत्र हि पक्षे उरत् इत्यत्राङ्गसंज्ञासूत्रमुपतिष्ठते, ततश्च प्रत्ययः ित्यस्याङ्गसंज्ञायामुरदत्वं च प्रति निमित्तभावः , सन्निधेरविशिष्टत्वात् । इह तु यथोद्देशपक्ष आश्रीयते, तदतश्च वस्तुतोऽङ्गस्य स्त्रियां वर्तमानस्य क्रोष्टुशब्दस्य तृज्वद्भावो विधीयते, न तु परनिमित्तमाश्रीयते । अङ्गसंज्ञा च प्रत्ययलक्षणेन भविष्यति । अङ्गस्य इति वचनाल्लब्धाङ्गसंज्ञस्य यत्कार्यं प्रत्ययलक्षणं तदेव प्रतिषिद्ध्यति, न चाङ्गसंज्ञा अङ्गस्य कार्यम् । अन्तोदात्त एव क्रोष्ट्रीशब्दो भवतीति । गौरादिषु पाठे ङीष्प्रत्ययस्वरेणान्तोदात्तः । अत्रापि पक्षे उदात्तयणो हल्पूर्वात् तथइत्यन्तोदात्त थएवेति एवशब्दार्थः । केचित्तु - ङीपोऽपि उदात्तयणः इत्येवोदात्तत्वम् अन्यथा ङीषि परतस्तृज्वद्भावे चित्स्वरस्य सतिशिष्टत्वेन ङीषोऽनुदात्तत्वप्रसङ्ग इत्याहुः ।।

विभाषा तृतीयादिष्वचि ।। 7 - 1 - 97 ।।

अप्राप्तविभाषेयम् । स्त्रियाम् इति नानुवर्त्तते, पञ्चक्रोष्ट्रेत्यादावन्तरङ्गत्वात्पूर्वेण नित्यस्तृज्वद्भाव इत्यवोचाम, तेनोभयत्र विभाषापि न भवति । पूर्वविप्रतिषेधेनेति । तृज्वद्भावस्यावकाशः क्रोष्ट्रे, पुंसे नुम्नुटोरवकाशः - त्रपुणे, जतुने, अग्नीनाम्, वायूनाम, प्रियक्रोष्टुन इत्यादावुभयप्रसङ्गे पूर्वविप्रतिषेधः । अथ किमर्थ तृज्वद्भावो विधीयते, यावता क्रुशेरेव तृचि क्रोष्ट्रेत्यादि सिद्ध्यति तुन्नन्तस्यासम्बुद्धौ सर्वनामस्थाने स्त्रियां च प्रयोगो मा भूत्, तृजन्तस्यैव यथा स्यात् । विभाषा तृतीयादिष्वचि इत्येतत्तर्हि किमर्थम्, तृजन्तस्यैव क्रोष्ट्रेत्यादि सिद्धम्, तुन्नन्तस्य क्रोष्टुनेत्यादि यथैव तर्ह्यजादावुभयं भवति तथा हलादावपि स्यात्, एवं शस्यपि तुन्नन्तस्यैव च तत्र प्रयोग इष्यते, तेनैतदपि नियमार्थम् - तृतीयादावेवोभयम्, तत्राप्यजादावेवेति ।

यस्तु मन्यते -- अभिधानस्वभावादेव तुंस्तृचोर्व्यवस्थितविषयः प्रयोग इति, तं प्रति सूत्रत्रयमपि शक्यमकर्तुम् ।।

चतुरनडुहोरामुदात्तः ।। 7 - 1 - 98 ।।

अत्र सर्वनामस्थाने इति स्वर्यते, न तृतीयादिष्विति । आगमानुदात्तत्यवबाधनार्थमुदात्तवचनम् । तदान्तविधिरत्रेष्यत थइति ।

अङ्घाधिकारे तस्य च तदुत्तरपदस्य च इति वचनात् । प्रयचत्वा इति । बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानमिति चतुरशब्दस्य पूर्वनिपाते प्राप्ते वा प्रियस्य इति प्रियशब्दस्य पूर्वनिपातः ।।

अम्सम्बुद्धौ ।। 7 - 1 - 99 ।।

चतुःशब्दस्य केवलस्य सम्बुद्ध्यभावादुपसमस्तस्योदाहरणम् । अनडुहस्तु प्रक्रमाभेदाय, तदन्तविधिरत्रेष्यते इति प्रदर्शनाय च तदन्तस्योदाहरणम् ।।

ॠत इद्धातोः ।। 7 -1 - 100 ।।

किरतीति । कॄ विक्षेपे , गॄ निगरणे तुदादी । आस्तीर्णम्, विशीर्णमिति । स्तॄञ् आच्छादने, शॄ हिंसायाम्, हलि च इति दीर्घः, रदाभ्याम् इति निष्ठानत्वम् ।

मातॄणामिति । दीर्घत्वे कृतेऽपि लाक्षणिकत्वादेवात्र न भविष्यतीति अत आह - लाक्षणिकस्यापीति । किं प्रयोजनम् इत्याह - चिकीर्षतीत्यादि । अतस्तदर्थ धातुग्रहणमिति भावः । क्वचित्तु वृत्तावेवैतत्पठ्यते
।।

उपधायाश्च ।। 7 - 1 - 101 ।।

पूर्वेण ॠकारान्तस्य धातोरित्त्वमुक्तम्, उपधायामपि यथा स्यादित्ययमारम्भः । ननु पूर्वयोगे धातुना ॠकारं विशेषयिष्यामः - धातोर्य ॠकारो यत्र स्थित इति, इहापि तर्हि प्राप्नोति - ॠकारमिच्छति ॠकारीयतीति एवमपि कृतस्य इतीयता सिद्धम्, ॠतः इत्यनुवृत्तेरन्त्यस्य न भविष्यति तथा तु न कृतमित्येव । कीर्त्तयतीति । कत संशब्दने चुरादिः ।।

उदोष्ठ्यपूर्वस्य ।। 7 - 1 - 102 ।।

पूर्त्ती इति । पॄ पालनपूरणयोः न ध्याख्यापृमुर्च्छिमदाम् इति निष्ठानत्वप्रतिषेधः । मुमूर्षतीति । मृङ् प्राणत्यागे । सुस्मूर्षतीति । स्मृ चिन्तायाम् । सुस्वूर्षतीति पाठे स्वृ शब्दोपतापयोः, सनीवन्तर्ध इत्यादिनेडभावपक्षे रुपम् । पुर्व एव तु युक्तः पाठः, पृथगुदाहरणस्य वक्ष्यमाणत्वात् ।

दन्त्योष्ठ्यपूर्वोऽपीत्यादि । ओष्ठ्यत्वमात्रं विवक्षितं नेतरव्यावृतिरिति भावः । ओष्ठ्योऽत्रेत्यादि । यथा हलः इत्यत्राङ्गेन हल् विशेष्यते, तेन सम्प्रसारणम्, तेन च पुनरङ्गम तथेहाप्यङ्गस्यावयव ओष्ठ्यः पूर्वो यस्मात्तदन्तस्याङ्गस्येति ।

इत्त्वोत्त्वाभ्यामित्यादि । इत्त्वोत्त्वयोर्दर्शितान्युदाहरणान्यवकाशः, गुणवृद्ध्योरवकाशः - चयनं चायकः, उभयप्रसङ्गे विप्रतिषेधः । आस्तरणमिति । नात्र गुणस्य नित्यत्वम् लक्षणभेदात् । पूर्वं हीगन्तलक्षणो गुणः प्राप्नोति, इत्त्वोत्त्वयोः कृतयोर्लघूपधलक्षणः ।।

बहुलं छन्दसि ।। 7 - 1 - 103 ।।

ततुरिर्जगुरिरिति । तृगृभ्याम् आदृगमहनः इति किन्प्रत्ययः, उत्त्वम्, तस्य द्विर्वचनेऽचि इति स्थानिवद्भावात्तृगृ - इत्येतस्य द्विर्वचनम् । पप्रितममिति । पॄ इत्येतस्मात्पूर्ववत्किन्, इत्त्वोत्त्वयोरभावे यण्, तस्य स्थानिवद्भावाद् द्विर्वचनम्, अतिशायने तमप् ।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जयौ सप्तमाध्यायस्य प्रथमः पादः

7.2

अथ सप्तमाध्याये द्वितीयः पादः

सिचि वृद्धिः परस्मैपदेषु ।। 7 -2 - 1 ।।

अत्र सिचि, परस्मैपदेष्विति द्वे अपि परसप्तम्यौ, तत्र सिचोऽह्गापेक्षं परत्वम्, परस्मैपदानां सिजपेक्षम् । इको गुणवृद्धी इति वचनादिक इत्युपतिष्ठते, तत्रेकाङ्गस्य विशेषणात्त्दन्तविधिर्भवतीत्याह - इगन्तस्याङ्गस्येति । उदाहरणेषु अस्तिसिचोऽपृक्ते इतीट्, सेटः सिचः इट ईटि इति लोपः । ननु चान्तर्भूतसिज्मात्रापेक्षत्वाद् गुणोऽन्तरङ्गः, बहिर्भूतं परस्मैपदं सिचं चापेक्षत इति वृद्धिर्बहिरङ्गा, ततश्च पूर्व गुणे कृते इगन्तस्याङ्गस्येति नोपपद्यते इत्यत आह - अन्तरङ्गमपीति ।

यथैवत तर्हि गुणं बाधते तथोवङमपि बाधेत, तत्राह - न्यनुवीन्यधुवीदित्यत्रेति । णू स्तुतौ, धूञ् विधूनने कुटादी । यत्र हि वृद्धिः प्रवर्त्तते तत्रान्तरङ्गं बाधेत, इह तु प्रतिषेधादप्रवृत्ता सती नोत्सहते वाधितम् । ननु च यथा गुणो बाध्यते, तएवं प्रतिषेधोऽपि बाधनीयः येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति, गुणे च नाप्राप्ते वृद्धिरारभ्यते, प्रतिषेधे च प्राप्ते चाप्राप्ते चेति । अथैवं कस्मान्न कल्प्यते - अन्तरङ्गत्वाद्गुणे कृते वचनादनिकोऽपि वृद्धिर्भवति, यथा - अचैषीदित्यादावेकारस्य, अहौषीदित्यादावोकारस्येति तत्रायमर्थः - ह्म्यन्तक्षण इत्यत्र णिश्विग्रहणं न कर्त्तव्यं भवति, कथम् औनयीत्, अश्वयीदित्यादौ तअन्तरङ्गत्वाद् गुणायादेशयोः कृतयोर्यान्तानां ह्म्यन्त इत्येव प्रतिषेधः सिद्धः नैवं शक्यं कल्पयितुम् , थएवं हि कल्प्यमाने अभैत्सीदित्यादौ व्यञ्जनस्यापि वृद्धिप्रसङ्गः । वदव्रजहलन्तस्याचः इत्येषा व्यञ्जनवृद्धिं बाधिष्यते नाप्राप्तायां तस्यामारम्भात् । यत्र तर्हि सा प्रतिषिध्यते - अनन्दीत्, अदेवीदित्यादौ, तत्र व्यञ्जनस्य सिचि वृद्धिः प्राप्नोति - नैष दोषः नेटि इत्यनेन हलन्तस्य या च यावती च वृद्धिः प्राप्नोति - वदव्रजः इति वा, सिचि वृद्धिः इति वा, सा सर्वा प्रतिषिध्यते । इह तर्हि आगवीदिति गोशब्दस्याचारक्विबन्तस्य सिचि वृद्धिः प्राप्नोति आत्राप्यन्तरङ्गत्वादवादेशो कृते हलन्तलक्षणाया वृद्धेः नेटि ि ति प्रतिषेधः । अतो हलादेर्लघोः ि ति वकल्पस्तु सत्यपि सिचि वृद्धेरिग्लक्षणत्वे भवति । इह तर्हि न्यनुवीत्, न्यधुर्वीदिति - क्ङिति च इति प्रतिषेधो न प्राप्नोति, अनिग्लक्षणत्वात् मा भूत्प्रतिषेधः अन्तरङ्गत्वादुवङादेशो भविष्यति । इह च अकार्षीदिति - गुणे रपरत्वे च कृते हलन्तलक्षणा वृद्धिः यत्रापि सा प्रतिषिध्यते - अतारीत्, अस्तारीदिति, तत्रापि अतो ल्रान्तस्य इति वृद्धिः सिद्धा । इह तर्ह्यलावीत्, अयावीदन्तरङ्गत्वाद् गुणावादेशयोः कृतयोर्हलन्तलक्षणायाः नेटि इति प्रतिषेधे अतो हलादर्लघोः इति वकल्पः प्राप्नोति अतो ल्रान्तस्य इत्यत्र वकारोऽपि प्रश्लिष्यते । किं वकारो न श्रूयते लुप्तनिर्द्दिष्टो वकारः । इहापि तर्हि प्राप्नोति - मा भवानवीद्, अमवीदिति णिश्विग्रहणमिह पक्षे न कर्त्तव्यमित्युक्तम्, तयोः स्थाने अविमवी प्रक्षेप्स्यामि । यत्तर्हि लाघवमस्मिन्पक्षे प्रदर्शितम् -- णिश्विग्रहणं न कर्त्तव्यं भवतीति, तदेवं सति हीयते किं चागवीदित्यत्रापि अतो हलादेर्लघोः इति विकल्पं बाधित्वा वकारप्रश्लेषान्नित्या वृद्धिः प्राप्नोति तथा चिप्रभृतिभ्यो यङ्लुगन्तेभ्यो लुङि अचेचायीदित्यादौ गुणायादेशयोः कृतयोर्यान्तानां नेति प्रतिषेधः प्राप्नोति, तथा चिरिणोति - चिरिणोत्योः अचिरायीत, अजिरायीद् । तस्मादन्तरह्गमपि गुणमेषा वृद्धिर्वचनाद्बाधत इत्येतदेव साम्प्रतम् । न पुनरन्तरङ्गस्य प्रवृत्तिमभ्युपेत्य वचनादनिकोऽपि भवतीति । किं पुनः कारणमियमेव कल्पना भवति णिश्विग्रहणात् अन्यथा णिश्विग्रहणं न कर्त्तव्यं भवतीत्यनन्तरमेवोक्तम् ।।

अतो ल्रान्तस्य ।। 7 - 2 - 2 ।।

अन्तशब्दोऽयमस्त्यवयववचनः - वस्त्रान्तः, वसनान्त इति , अस्ति समीपवचनः - उदकान्तं गत इति तत्राद्ये पक्षे ल्रान्तस्य इति बहुव्रीहिः, अङ्गमन्यपदार्थः, अन्यस्यार्थस्यासम्भवात् । तत्र वर्णग्रहणे सर्वत्र बहुव्रीहिः अङ्गमन्यपदार्थः अन्यस्यार्थस्यासम्भवात् । तत्र वर्णग्रहणे सर्वत्र तदन्तविधिरित्येव सिद्धत्वादन्तग्रहणमतिरिच्यते । तस्मात्समीपवचनोऽन्तशब्दः । तत्रापि यदि षष्ठीसमासः स्यात - रेफलकारयोः समीपभूतस्यातो वृद्धिर्भवतीति, ततो लषिरणिप्रभृतिष्वेव स्यात् । यदि परसमीपवचनोऽन्तशब्दः, अथ तु समीपमात्रवचनसतदा इष्टविष्ये तावत्सिध्यति, अनिष्टेऽपि तु विषये प्राप्नोति, तथा अखल्लीदित्यत्रापि प्रसङ्गः । तस्मात्कर्मधायः, निपातनाच्च विशेषणस्य परनिपातः । समीपभूतौ रेफलकारौ ल्रान्तशब्देन विवक्षितौ । कस्य समीपभूतावित्यपेक्षायाम् अत इत्यनेन सम्बन्धः । एवं विशेषिताभ्यां रेफलकाराभ्यामङ्गस्य विशेषणात्तदन्तविधिः । अतः समीपभूतौ यौ रेफलकारौ तदन्तस्याङ्गस्येति । यद्येवम्, एकत्वाद् अतः इत्यस्य तस्य च रेफलकारयोः विशेषणे एवं उपक्षीणत्वान्न वृद्धिभाङ् निर्द्दिष्टः स्यात् विशेषणत्वेनाि तावदकारस्य श्रुतत्वात्तस्यैव वृद्धिर्भवतीत्यदोषः, तदिदमुक्तम् - रेफलकारौ यावतः समीपभूतावित्यादि ।

वयं तु ब्रूमः - समीपभूतरेफलकारान्तस्याङ्गस्यातः स्थाने वृद्धिर्भवतीत्येवा क्षरव्यापारः । तत्र कस्य समीपभूतावित्यपेक्षायां सन्निधानादतः समीपभूताविति गम्यते इति । अपर आह - रश्च लश्च ल्रम्, आगन्तुकोऽकारः, षष्ठ्या लुका निर्द्देशः, अत्र ल्रेणाङ्गस्य विशेषणात्तदन्तविधौ ल्रान्तस्याङ्गस्य योऽकारस्तत्र वृद्धिर्भवति । कीदृशस्यातः समीपभूतस्य । सन्निधानाच्च ल्रं प्रति समीपभूतस्येति । अन्यशब्दश्च समीपमात्रवचनो न तु परमसीपवचनः इति ।

उदाहरणेषु , क्षर सञ्चलने, त्सर छद्म गतौ, ज्वल दीप्तौ, ह्वल चलने ।

न्यखोरीत्, न्यमीलीदिति । खुर छेदने, मील निमेषणे । मा भवानित्यादि । अट गतौ, अश भोजने माङः प्रयोग अ़डागमनिवृत्त्यर्थः ।

अवम्रीत्, अखल्लीदिति । वभ्रिर्गत्यर्थः, खल्लिराशु गमने । अथान्तग्रहणं किमर्थम्, न ल्रः इत्यवोच्येत इहापि तर्हि प्रप्नोति - अवभ्रीत्, अखल्लीदिति अकारमेव सिच्परत्वेन विशेषयिष्यामः ल्रान्तस्याङ्गस्य योऽकारस्तस्य सिच्यनन्तरे वृद्धिर्भवतीति । न च रेफलकारन्तस्याङ्गस्य योऽकारस्तस्य सिजव्यवहितः सम्भवतीति सामर्थ्यात् येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादित्येकेन वर्णेन व्यवधानमाश्रयिष्यते । अथ वा अतो हलादेर्लघोः इत्यस्यानन्तर मिदं कर्त्तव्यम्, तत्रायमप्यर्थः अत इत्यपि न वक्तव्यं भवति, तत्र लघोः, ि त्यनुवृत्तेरखल्लीदित्यादौ न भविष्यति । एवमपि

चतुश्शब्दादाचारिक्विपि लुङि सिचि चकारस्यापि प्राप्नोति तत्रापि सिचाऽऽनन्तर्यं विशेषयिष्यामः, तत्र यथा अचकासीदित्यत्र अतो हलादेर्लघोः इति चकाराकारस्य वृद्धिर्न भवति, तत्कस्य हेतोः सिचा आनन्तर्थं विशेष्यत इति । एवं चतुश्शब्देऽपि न भविष्यति । एवं च कृत्वा लघोः इत्यपि न वक्तव्यं भवति तथा तु न कृतमित्येव ।।

वदव्रजहलन्तस्याचः ।। 7 - 2 - 3 ।।

विकल्पबाधनार्थमिति । अतो हलादेर्लघोः इति विकल्पो वक्ष्यते । नेटि इति प्रतिषेधे प्राप्त इति तु नोक्तम् विकल्पस्यैव वस्तुतः प्राप्तत्वात् । अत्रेत्यादि । वदव्रज्योः इत्येको योगः, अचः इति द्वितीयः तत्राङ्गेनाज्विशेष्यत इति - अङ्गस्य योऽच् यत्र तत्र स्थितस्तस्येति , तेन हलन्तस्य सिद्धा वृद्धिरिति भावः । किं पुनः कारणमङ्गेनाज्विशेष्यते, न पुनरचाऽङ्गस्येति असम्भवात् । अचिकीर्षीदित्यादौ अदन्तस्य तावत् नेटि इति प्रतिषेधः आकारन्तं तु सिचि न सम्भवति, यमरमनमातां सक्च इति सग्मविधानात् । सम्भवे वा नास्ति विशेषः सत्यां वा वृद्धावसत्यां वा । इगन्तस्य तु सिचि वृद्धिः इत्येव सिद्धा वृद्धिः । एजन्तमप्यात्वविधानान्नैव सम्भवति । अगवीदित्यत्र तु नेटि इति प्रतिषेधः । तदेवमङ्गेनाज्विशेष्यत इति सहृदयमभिधानम् । एवं प्रत्याख्याते हल्ग्रहणे, प्रयोजनमाह - तदेतदिति । किं पुनः कारणमन्तरेण हल्ग्रहणं हल्समुदायस्य परिग्रहो न सिद्ध्यति अत तथआह - अन्यथा हीति । एतच्च यदा वृद्धिभागाजेव सिच्परत्वेन विशेष्यते, तदा वेदितव्यम् । अङ्गे तु विशेष्य माणे सर्वत्र सिध्यति । न चैवमचकासीदित्यादिष्वनेकाक्षु पूर्वस्याप्यचो वृद्धिप्रसङ्गः, नेटि इति प्रतिषेधात् । न चानेकाजनिडस्ति । न चापाक्षीदित्यादावटः प्रसङ्ग्ः, किं कारणम् लुङि यदङ्गं सिजन्तं तद्भक्तोऽडागमस्तद्ग्रहणेनैव गृह्यते न तु सिचि यदङ्गं तद्ग्रहणेन । यत्रापि सिचो लुक् क्रियते - अदातु, अधात् इति, तत्र सिच्परत्वाभावाद् वृद्धेरप्रसङ्गः ।

उदवोढामिति । वहेर्लुङ्, तसस्ताम्, सिच्, वह - स्तामिति स्थिते - वृद्धिश्च प्राप्नोति ढत्वादीनि च, आदिपदेन झलो झलि इति सिचो लोपः, झषस्तथोर्घोऽधः इति धत्वं ष्टुत्वं ढलोप इत्येतेषां ग्रहणम् । तत्र ढत्वादीनामसिद्धत्वात्पूर्वं वृद्धिः क्रियते, पश्चात् ढलोपनिमित्तमोत्तवम् । अथ तस्य पुनर्वृद्धिः कस्मान्न भवति तत्राह - तत्र कृत इति । कृतत्वादिति । यद्यप्येकारस्य न कृता वृद्धिः तथापि प्रयोगेऽस्मिन् कृतेति भावः ।

यत्र त्विति । न ह्योकारत्वनिबन्धनो वृद्धेरभावः, किन्तु कृतत्वनिबन्धन इति भावः । सोढा अभिभूता अमित्रा येन स सोढामित्रः ।।

नेटि ।। 7 - 2 - 4 ।।

उदाहरणेषु - दिवु क्रीडादौ , सिवु तन्तुसन्ताने, कुष निष्कर्षे, मुष स्तेये इति धातवः ।

ननुचेत्यादि चोद्यम् । नैतदेवमित्यादि परिहारः । उभयमप्येतत् सिचिवृद्धिसूत्रे व्याख्यातम् ।।

ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ।। 7 - 2 - 5 ।।

उदाहरणेषु ग्रह उपादेने, स्यमु स्वनध्वन शब्दे, टुवम उद्गिरणे, व्ययवित्तसमुत्सर्गे, क्षणु हिंसायाम्, श्वस प्रणने, जगृ निद्राक्षये, ऊन परिहाणे इल प्रेरणे चुरादी, टुओश्वि गतिवृद्ध्योः, रगे लगे सगे सर्वरणे, कखे खगे कगे हसने इति धातवः । ऊनयत्येलयत्योर्नोनयतिध्वनयतीति चङः प्रतिषेधः ।

यदि च पूर्व गुणः स्यादित्यादि । एतदपि सिचिवृद्धिसूत्र एव व्याख्यातम् । अथ जागृग्रहणं किमर्थमिति । येन पृष्टं स एव यथैतन्न कर्त्तव्यं तथा दर्शयति - जाग्रोऽविचिण्णल्ङित्स्विति । कृते गुणे इत्यादि । अङ्गवृत्ते पुनर्वृत्तावविधिः इत्येतत् नाश्रितम्, निष्ठितत्वस्य दुर्ज्ञानत्वात् । अथ त्विति । अन्यथा वृद्धिविषये गुणविधानमनर्थकं स्यादिति भावः । तथा चेति । चिण्णलोः प्रतिषेधेन उत्तरकालभाविवृद्धिमात्रं न भवतीति सामान्येन ज्ञाप्यते, न तूपधालक्षणवृद्धिर्न भवतीत्येवं विशेषेणेति भावः । जागृग्रहणे सति चायं सूत्राणां प्राप्तिक्रमः, जागृ - इस् - ईत् इति स्थिते पूर्व यण् प्राप्तः, तमपवादत्वात् सार्वधातुकार्धधातुकयोः इति गुणो बाधते, तमपि सिचि वृद्धिः, तामपि जागर्तिगुणः, तत्र कृते हलन्तलत्रणा वृद्धिः, तस्याः नेटि इति प्रतिषेधः, ततः अतो हलादेर्लघोः इति वकल्पः, ततः अतो ल्रान्तस्य इति नित्या वृद्धिः, ततोऽयं प्रतिषेध थइति । आह च

गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् ।

पुनर्वृद्धिर्निषेदोऽतो यण्पूर्वाः प्राप्तयो नव ।।

अतो हलादेर्लघोः ।। 7 - 2 - 7 ।।

न्युकुटीत्, न्युपुटीदिति । कुट कौटिल्ये, पुट संश्लेषणे । नन्वत्र कुटादित्वान्ङित्त्वे सति क्हिति च प्रतिषेधादेव वृद्धिर्न भविष्यति, किमत्र अतः इत्यनेन तत्राह - अत इत्येतस्मिन्नसतीति । अतक्षीत्, अरक्षीदिति । तक्षू, त्वक्षू, तनूकरणे, रक्ष पालने, सिच्परत्वेनाङ्गस्य विशेषणादत्र प्रसङ्गः ।

अथेह कस्मान्न भवतीति । यदि सिच्परत्वेनाङ्ग विशेष्यते, ततोऽत्रापि प्रसङ्ग इति प्रश्नः । सिच्परत्वेनाको विशेष्यते इत्याश्रित्योत्तरम् । येन नाव्यवधानमिति वचनप्रामण्यादिति । अपिपठिषीदित्यादावनन्ततरस्याकारस्यातो लोपेन भवितव्यम् । ननु चोभयोरप्यनित्ययोः परत्वाद्वृद्धिः प्राप्नोति अस्तु वृद्धिः, आतो लोप इटि च इत्याकारलोपो भविष्यति न भविष्यति परत्वात्सगिटौ स्याताम् एवं तर्हि ण्यल्लोपावियङुवङ्यण्गुणवृद्धिदीर्घभ्यः पूर्वविप्रतिषिद्धौ इत्यतो लोपो भविथ्यति, यथा - चिकीर्षक इत्यत्र । युकतं तत्र अचो ञ्णिति इति वृद्धिरन्यत्र चरितार्था, इयं तु सिच्यन्तरस्यातौ विधीयमाना निरवकाशा एषं तर्हि हलन्तस्य इत्यनुवृत्तेरनन्तरोऽकारो न सम्भवतीत्येत्सामर्थ्यम् ।

अथ त्विति । व्यवधानेन भवितव्यमिति स्थिते हला व्यवधानमिति कल्पनायां लघुग्रहणं कर्त्तव्यम्, एकेन वर्णेनेति तु कल्पनायां न कर्तव्यमित्यर्थः ।।

नेड्वशि कृति ।। 7 - 1 - 8 ।।

वशि कृतीति सप्तमीनिर्द्देशस्तदादिविध्यर्थः तस्य च वयं पुरस्तात्करणस्य प्रयोजनं क्रादिसूत्रे वक्ष्यामः। ईशितेत्यदेरुपन्यासः प्रकृत्याश्रयः प्रतिषेधो न सिध्यति इति प्रदर्शनार्थः । ईश्वर इति । स्थेशभास इत्यादिना वरच् । दीप्रमिति । नमिकम्पि इत्यादिना रः । भस्मेति । अन्येभ्योऽपि दृश्यन्ते इति मनिन् । औणदिके त्वव्युत्पत्तिपक्षाश्रयणेनापि सिद्धम् । याच्ञेति । यजयाच इत्यादिना नङ् ।

सम्भवोदाहरणप्रदर्शनमिति । एतावन्त्युदाहरणानि सम्भवन्तीति प्रदर्शनार्थमित्यर्थः । रुदिव, रुदिम इति । असति कृद्ग्रहणे रुदादिभ्यः सार्वधातुके इत्यस्यापचि इटोऽत्र प्रतिषेधः स्यात्, तस्य त्वाशादिरवकाशः रोदितीति । क्वचिद् रुरुदिव, रुरुदिमेति लिटि पठ्यते, तदयुक्तम्, क्रादिनियमादेवेटः सिद्धत्वात् ।।

तितुत्रतथसिसुसरकसेषु च ।। 7 - 2 - 9 ।।

क्तिन्क्तिचोः सामान्येन ग्रहणमिति । रोदितीत्यस्य तिप एकानबचन्धकस्याप्यग्रहणम् कृति इत्यनुवृत्तेः ।

दीप्तिरिति । क्तिन्नाबादिभ्यश्चः इति क्तिन् ।

औणादिकस्यैवेति । एतच्च भूयोभिरौणादिकैः साहचर्याल्लभ्यते ।

ततुत्रेष्विति । अस्मिन् सूत्र इत्यर्थः । अग्रहादीनामिति । ग्रहदिव्यतिरिक्तानां धातूनां सम्बन्धिषु तितुत्रादिषु प्रतिषेध इत्यर्थः । आदिशब्दः प्रकार इत्याह - ग्रहप्रकारा इति । कः पुनः प्रकारः इत्यह - येषामिति । निकृचितिरिति । कुञ्चेः पूर्ववत् क्तिन्, उपधालोपः, कुच शब्दकरणे इत्यतस्माद्वा क्तिन् ।।

एकाच उपदेशेऽनुदात्तात् ।। 7 - 1 - 10 ।।

अनुदात्तादिति बहुव्रीहिः न विद्यते उदात्तो यस्मिन् सोऽयमनुदात्तः । पारिभाषिके त्वनुदात्तेऽज्मात्राणामिणादीनामेव ग्रहणं स्यात्, नाज्झल्समुदायरुपाणं पचिप्रभृतीनाम । ततश्च तेषामनुदात्तोपदेशोऽनर्थकः स्यात् । अथ वा - अनुदात्तच्कत्वात्समुदाय एवानुदात्त तइत्युच्यते, यथा अनुदात्तं पदम् िति । उपदेशः - प्रकृतिपाठः । अनुदात्तश्चेति । उपदेशे इत्यपेक्षते । उभयविशेषणं चैतदिष्यते । अन्यतरविशेषणं तु यदि विज्ञायेत - उपदेश एकाचः सम्प्रत्यनुदात्तादिति, तथइहापि च प्रसज्येत - लविष्यति, पविष्यतीति, भवति ह्येतत् प्रत्ययस्योदात्तत्वे शेषनिघातेन सम्प्रत्यनुदात्तम् थइह च न स्यात् - कर्त्ता, कर्त्तुम्, नित्स्वरेण सम्प्रत्युदात्तत्वात् प्रकृतिपाठे चैषामनुदात्तोपदेशोऽनर्थकः स्यात् । अथ विज्ञायेत - उपदेशेृनुदात्तादेकाचः श्रूयमाणादिति क्रादिसूत्रे नियमो नोपपद्येत चकृव, चकृमेत्यादौ श्रूयमाणरुपस्यानेकाच्त्वाद्विधिरेव स्यात्, तत्र को दोषः बिभिदिव, बिभिदिम अत्रेडागमो न स्यात् । ननु च सम्प्रत्यनेकाच्त्वादत्र प्रतिषेधास्याप्रसङ्गादेवेड् भविष्यति इह तर्हि पेचिव, पेचिम्, एत्वाभ्यासलोपयोः कृतयोरेकाचः श्रूयमाणादिट्प्रतिषेधः प्राप्नोति । परत्वादिटि कृते एतवाभ्यासलोपौ भविष्यतः नित्यावेत्वाभ्यासलोपौ कृतेऽपीटि प्रप्नतोऽकृतेऽपि इट् पुनरनित्यः - कृतयोस्तयोरेकाछः श्रूयमाणादिति प्रतिषेधात् । एवं तर्हि थलि च सेटि इत्यत्र सेट्ग्रहणं कालवाधारणार्थं भविष्यति, कथम् तत्र थल्ग्रहणं न कर्त्तव्यम्, सेटीत्येतावता सिद्धम्, अत एकहल्मध्ये इत्यादि सर्वमनुवर्त्तते, किद्ग्रहणमेकं निवृत्तम्, न च थलोऽन्यः सेट् किल्लिट् सम्भवति । सोऽयमेषं सिद्धे यत्थल्ग्रहणं करोति तस्यैतत्प्रयोजनम् - किता सह समुच्चयार्थम्, थलि च किति च सेटि एत्वााभ्यासलोपौ भवत इति । तत्र किति पूर्वेणैव सिद्धे कालावधारणार्थमिदं वचनमिति कृते थएत्वाभ्यासलोपौ यथा स्याताम्, अकृते मा भूतामिति, यथा - निष्ठायां सेटि इत्यत्र । एवमपि विधित्सति, चिच्छित्सतीत्यत्र नित्यत्वाद् द्विर्वचने कृते एकाचः श्रूयमाणादिति प्रतिषेधो न स्यात् तस्मादुभयविशेषणमुपदेशग्रहणम्, तअत एवेदं मध्ये पठितम् । यद्युभयविशेषणम्, बेभिदिता, चेच्छिदिता - अत्रापि प्राप्नोति अल्लोपस्य पूर्स्मादपि विधौ स्थानिवद्भावान्न भविष्यति । यङ्लुगन्त तर्हि प्राप्नोति - बेभेदिता, चेच्छिदिता यत्रैकाज्ग्रहणं किञ्चित्पञ्चैतानि न यङ्लुकि इति वचनान्न भविष्यति । के पुनरिति । पाठे सङ्करसम्भवात्प्रश्नः । असङ्करेण पठितव्याः इत्युत्तरम् । प्रविभक्ता इति । स्वरान्तहलन्तककारादिवर्णभेदेनेत्यर्थः । श्लेकेष्वनिडग्रहणमनुदात्तोपलक्षणम् । षष्ठीसप्तम्यश्च धातुविषयनिर्धारणे द्रष्टव्याः । श्विडीडिति । समाहारद्वन्द्वे द्वितीयान्तम् ।

गणस्थमिति । श्लोकपूरणार्थम् । स्वभावकथनमेतत् । मत् मत्तः निबोधत, अवगच्छत ।

द्व्येत्यादिश्लोकयोर्द्धयोर्विवरणम् । इति स्वरान्ता इति । अस्य पुनः पाठो निगदव्याख्यानतां दर्शयतुं द्रष्टव्यः । अन्ये तु पूर्व न पठन्ति ।

यमिर्यमन्तेष्विति । श्यनि पठ्यत इति । दिवादौ पठ्यत तित्यर्थः । प्रतिषेधवाचिनामिति । इट्प्रतिषेधं कुर्वतामाचार्याणां मतेनेत्यर्थः । दिहिर्दुहिरिति । यद्विषयः संशयः पुरुषाणां नास्ति ते मुक्तसंशयाः । तन्त्रान्तरम् - व्याकरणान्तरम्, आपिशलादि । सहेर्विकल्प इति । तीषसह इत्यादिना । सविकल्पाविति । विकल्पस्तद्विषयः संशय इत्यर्थः । स्वरुपेणैव ससंशयाविति । तौ स्तो न इत्यपि संशयस्तत्रेत्यर्थः ।

दिशि दृशिमिति । पुरणम् - चिरन्तनं व्याकरणं येऽधीयते ते पुरणगाः । पाठेषु, धात्वादिषु । ऋदुपधानामित्यादिना तेष्वनुदात्तोपदेशस्य प्रयोजनान्तरं समुच्चिनोति । एवं च श्लोकेष्वनिट
इत्यस्यानुदात्तोपलक्षणत्वं निश्चितम् ।

रुधिः सराधिरिति । न्याय्यविकरणयोरिति । न्याय्यः - उत्सर्गः, शब्विकरणयोरित्यर्थः ।क्वचित्तु तथैव पाठः केचिद्भौवादिकं सिधिमुदितं पठन्ति - षिधु गत्याम् इति, तेन तस्य क्त्वायां विकर्ल्पितेट्कत्वान्निष्ठायाम् यस्य विभाषा इति प्रतिषेधेन भवितव्यम् । तथा दैवादिकस्य भौवादिकस्य च बुधेरर्थे रुपे वा विशेषो नास्ति, ततश्चैक एवायं बुधिः, विकरणद्वयार्थं तु द्वयोर्गणयोः पाठः, तस्य चार्धधातुकलक्षण इडप्युक्तः, प्रतिषेधोऽपीत्येकविषयत्वाद्विभाषितेट्कत्वम्, ततश्च तस्यापि निष्ठायां प्रतिषेधेन भवितव्यमिति मन्यमानं प्रत्याह - निष्ठायामपीति । सिधेरुदित्त्वं तावदनन्यार्थम् । न च यथाकथञ्चिदिटो भावाभावौ निष्ठायां निषेधस्य निमित्तम्, किं तर्हि विकल्पवाचिना विभाषादिशब्देन विकल्पितेट्त्वमिति भावः ।

तपि तिपिमिति । तिपिक्षपी इति पाठः । नीचेन स्वरेणानुदात्तेन पठितान्प्रतीहि निबोधतेति । प्रस्तावात्प्रतीतेति पाठः, प्रतीहीति पाठे उत्तरानुरोधः - विद्ध्यनिट्स्वरानिति ।

तेप्तेति । तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणे । छोप्तेति । छुप स्पर्शने । पचि वचिमिति । सृजिमृजीति । समाहारद्वन्द्वः । अनिट्त्वस्य हेतुः स्वरो येषां तेऽनिटट्स्वराः ।

ततोऽस्य विकल्पेन भवितव्यमिति । तेनानिट्स्वरार्थोऽनुदात्तपाठो न भवति । अमागमोऽपीति । तेन तदर्थोऽप्युदात्तपाठो न भवति ।

तत्कस्मादिहानिट्कारिकासु पठ्यते इत्यत आह - केचिदित्यादि । युक्तं चैतदित्याहनिजादिषु हीति । णिजां त्रयाणां गुणः श्लौ इत्यत्र पठिता निजादयः । अत्रैव व्याकरणान्तरानुमतिं दर्शयति - तथा चेति ।

अवधीदिति । किं पुनरयमुपदेशेऽनुदात्तः ओमित्याह । क्व पुनरस्योपदेशः हनो वध लिङि इति । किमेकाज्ग्रहणं न निवर्त्तयिष्यामीत्यनुदात्त उपदिश्यते, न ह्यस्यान्यदनुदात्तत्वे प्रयोजनम् न ब्रूमः - अस्मिन्नुषदेशेऽयमनुदात्त इति, हन्तिरनुदात्तस्तस्य स्थाने भवन्स्थानिवद्भावेनानुदात्तः । क्रियमाणेऽपि तर्ह्येकाज्ग्रहणे यावता स्थानिवद्भावः कस्मादस्य परतिषेधादिति चेत् हन्तैवमनुदात्तव्यपदेशेऽपि स्थान्यलाश्रयत्वात्कथमिवास्य सायत् स्यादेतत् । नात्र स्थानिवद्भावेन प्रसङ्गः, किं तर्हि उपदेशग्रहणेन, यथा - कर्त्ता, कर्तुमित्यादौ रुपभेदे स्वरभेमे च भवति । तत्कस्य हेतोः यः स उपदेशेऽनुदात्तः स एवेमामवस्थामापन्न इति कृत्वा, न तु स्थानिवद्भावात् एवमिहापि य उपदेशेऽनुदात्तो हन्तिः स एवायमिति उपदेशग्रहणात्प्रसङ्ग इति । क्रियमाणेऽपि तर्ह्येकाज्ग्रहणे कथमिवास्य व्यावृत्तिः, यावता उपदेशग्रहणस्योभाभ्यां सम्बन्धः - य उपदेशे एकाच् स एवायमिति स्यादेव प्रसङ्गः तस्माद्वधेराद्युदात्तनिपातनं कर्त्तव्यम्, तत्सामर्थ्याद्धन्त्युपदेशविषयानुदात्तत्त्वश्रयोऽपि प्रतिषेधो न भवति । न ह्येतदाद्युदात्तत्वं प्रयोगसमवायि, प्रत्ययस्वरेण बाधितत्वादित्येवमत्र हारो बाच्यः । एकाज्ग्रहणमुत्तरार्थम् ।।

शर्युकः किति ।। 7 - 2 - 11 ।।

योषां प्रकृत्याश्च प्रतिषेधो नास्ति तदर्थमिदम् । श्रितः, श्रितवान्, युतः, युतवान् इति । सनीवन्तर्ध इति विकल्पितेट्त्वाद् यस्य विभाषा इति प्रतिषेधः सिद्धः ।

केचिदित्यादि । यथा ग्लाजिस्थश्च क्स्नुः इत्यत्रोक्तम् - क्स्नोर्गित्त्वान्न स्थ ईकारः इत्यादि । यदि गकारः प्रश्लिष्यते श्रयुकः किति इति निर्द्देशो नोपपद्यते, गकारे परतः हशि च इत्युत्वं प्राप्नोति चर्त्वे च कृते कुप्वोः क पौ च इत्येष विधिर्भवति, चर्त्वस्यासिद्धत्वादुत्वमेव प्राप्नोति तत्राह सौत्रत्वादिति । अत्रापि ग्रन्थे वर्णयन्ति इत्यस्य सम्बन्धः । तदेतद्दूषयति - ग्लाजिस्थश्च ग्स्नुरित्यत्रेति । आकारप्रश्लेषे सति तिष्ठतेराकारन्तादित्यर्थो भवति, तिष्ठतिश्चाकारान्त एव, तत्र विशेषणमुत्तरकालभावीकारनिवृत्त्यर्थ विज्ञायते, ततश्च -

कथं प्रकृतिनिर्द्देशे पञ्चम्यां परतः श्रुतः ।
आकारोऽयं विधेयः स्यादिति चोद्यमपाकृतम् ।।

स्थास्नोः । स्थास्नुशब्दस्य । न किञ्चिदेतदिति । एतद् गकारप्रश्लेषवर्णनमशेभनमित्यर्थः । गस्नुप्रत्ययस्य गित्त्वे हि गप्रश्लोषो युज्यते, कित्त्वेऽपि तिष्ठतेरीत्वमुक्ताद्धेतोर्निवर्त्तते ।

तीर्ण इत्यत्रापि यथा स्यादिति । इह तु तीर्त्वा, पूर्त्वेति आनुपूर्व्यात्सिद्धम्, कथम् तत्वा, पत्वा इति स्थिते यावदिट्प्रतिषेधो न प्रर्वतते तावदित्वोत्वे प्राप्नोति, किं कारणम् क्ङिति इत्युच्यते, न चाकृते इट्प्रतिषधे क्त्वा किद्भवति, न क्त्वा सेट् इति प्रतिषेधात् । किञ्च भो इत्वोत्वे किति विधीयेते न किति विधीयेते, किति तु विज्ञायेते । कथम् इत्वोत्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन । तस्मातप्रगेव सन्निहितं कित्त्वमाश्रित्येट्तिषेधे प्रवृत्ते इत्वोत्वे भवतः । कृतयोस्तहि तयोः प्रतिषेधनिमित्तस्योगन्तत्वस्यापगमात्पुनरिट्प्रसङ्गः, तस्मिंश्च सति न क्त्वा सेट् इति कित्त्वप्रतिषेधाद् गुणे सति तेरित्वा, पोरित्वेति प्राप्नोति नैतदस्ति प्रसङ्गावस्थायामेव प्रतिषेधेन बाधितस्य भ्रष्टावसरस्य पुनः प्रवृत्त्ययोगात् । इह च तितीर्षति, मुमूर्षतीति नाकृत इटः प्रतिषेधे सनः कित्त्वमझलादित्वात्, असति च कित्त्वे गुणस्यायं विषय इति इत्वोत्वयोरप्रसङ्ग इति आनुपूर्व्यात्सिद्धमित्येव । यदि वा तृ - स इति स्थिते, अनवकाशत्वादिट् सनि वेति ऋकारान्तनिमित्त इड्विकल्पः प्रवर्त्तते, तत्रेडभावपक्षे कित्त्वाद् गुणे निषिद्धे इत्वोत्वयोः कृतयोरपि विकल्पेन बाधितस्येड्लक्षणस्य भ्रष्टावसरत्वेन पुनः प्रवृत्तययोगात्सिद्धमिष्टम् । तस्मात्तीर्ण इत्यत्र चोपदेशाधिकारस्योपयोगः । कस्मात्पुनरसत्युपदेशाधिकारेऽत्र न स्यात् इत्यत आह - इत्वे हि कृत इति । किं पुनः कारणमित्वमेव तावद्भवति नित्यत्वात् । मा भूदित्यादि चोदकः । कस्य पुनरित्यादीतरः । ऋत इत्यादि चोदकः । यद्येवमित्यादीतरः । स्थानिवद्भावादिति चोदकः । अनिल्विधावित्यादीतरः । अल्विधित्वं पुनरुगिति प्रत्याहारग्रहणात् । ननु चेत्वोत्वयोः कृतयोः समप्रत्यृकाराभावेऽप्येकदेशविकृतस्यानन्यत्वात्स एव धातुर्यस्य सनि विभाषा विहितेतीट्प्रतिषेधो भविष्यति नैतदस्ति आदितश्च इति योगविभागेन ज्ञापयिष्यते - यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति, ततश्च ऋकारान्तत्वमुपाधिरड्विकल्पे, स चेत्वे कृते नास्तीति कथं प्रतिषेधः स्यात् तस्मादित्यादि । यस्मादेवमसत्युपदेशग्रहणे तीर्ण इत्यत्र प्रतिषेधो न सेत्स्यति, तस्मात् उपदेशे इत्यनुवर्तनीयम् । तथा च सतीति । उपदेशे इत्यनुवर्त्तमाने सतीत्यर्थः । अत्रापि प्राप्नोतीति । जगर्तेरुपदेशावस्थायामुगान्तत्वात् । तदर्थमिति । जगरित इत्यादिसिद्ध्यर्थम् । जगरित इत्यादाविट्प्रतिषेधनिवृत्त्यर्थमिति वा । तथा च वार्त्तिकम् - एकाजग्रहणं जगर्त्यर्थम् इति पूर्वसूत्रेऽनुपयोगादिहार्थमेकज्ग्रहणमित्यर्थः ।

भष्यकारस्त्वाह - यस्य क्वचिदिड्विकल्पो दृष्टः स धातुराश्रीयते - यस्य विभाषा इति, न तु तद्गतं विकल्पकारणमकारादि । भवति चेत्वोत्वयोः कृत योरयमपि स एव धातुरिति तीर्ण इत्यादौ सिद्धः प्रतिषेधः इति । यद्येवम्, विभाषा गमहनविदविशाम् इति विशिना साहचर्यात्तौदादिकस्य विदेः क्वसाविटि विकल्पिते दैवादिकस्यापि विदेर्निष्ठायां प्रतिषेधः प्राप्नोति - विदितः, विदितवानिति न, धातुभदात् । कथं धातुभेदः अर्थभेदाद्, अनुबन्धभेदाद्, विकरणभेदाच्च । तदेवं नार्थ उपदेशाधिकारेण, नापि एकाज्गरहणानुवृत्त्या । किमर्थं तर्हि पूर्वसुत्रे एकज्ग्रहणम् यङ्लुगन्तनिवृत्त्यर्थम् । ननु च

क्रियमाणेऽप्येकाज्कहणे यङ्लुगन्तस्य प्रतिषेधः प्राप्नोति, उपदेशग्रहणस्योभयविशेषणत्वात्, यथा बिभित्सतीति, तत्रैतत्स्यात् - क्रियमाणे एकाजग्रहणे यत्रैकाजग्रहणं किञ्चित् इति वचनाद् यङ्लुगन्तस्य न भवतीति तच्च वार्त्तम् अक्रियमाणेऽपि चैकाज्गरहणे वचनान्तराश्रयणेन यङलुगन्तेऽपि परिहारः । तदेव वचनमेवं पठ्यताम् - त्रोपदेशाग्रहणमिति । अनुदात्तोपदेशलक्षणोऽनुनासिकलोपोऽपि तर्हि यङ्लुगन्तानां तसादिषु न स्यात्, तथा इबन्तानां दिविप्रभृतीनां यङ्लुगन्तानामपि सनीङ्विकल्पः प्राप्नोति । क्रियमाणे पुनरेकाज्ग्रहणे न भवति, तएकाचः इति तत्रानुवृत्तेः । यदि नेष्यते, एवं वक्ष्यामि - उपदेशेऽनुदात्तान्न यङ्लुक किति । अधिकारोऽयम्, यत्रैकाज्ग्रहणेन यङ्लुगन्तस्य वायवृत्तिरिष्यते, तत्रोपतिष्ठते । एवमपि वावृतु वरणे इति दिवादावनेकाजुदिदनुदात्तेत्पठ्यते । तथा च भट्टिकाव्ये प्रयोगः - ततो वावृत्त्यमानाऽसौ रामशालां न्यविक्षत इति । तस्योदितो विकल्पितेटो निष्ठायाम् यस्य विभा,ा इति प्रतिषेधः प्राप्नोति । एकाज्ग्रहणे तु क्रियमाणे न भवति एकाचः इति तत्रानुवृत्तेः । तथा च निष्ठायां सेटि (6.4.52 । इत्यत्रापि वृत्तिकारेणोक्तम् - अथ पुनरेकाच इति तत्रानुवर्त्तते इत्यादि ।

अन्ये पुनर्भाष्यकारेणैकाज्ग्रहणस्य प्रत्याख्यातत्वान्नैतदिष्यत इत्याहुः । तथा च वृत्तिकारेणापि पाक्षिकत्वेनैवोक्तम् - अथ पुनरेकाच िित तत्रानुवर्त्तते इति । कृतमतितविस्तिरेण ।।

सनि ग्रहगुहोश्च ।। 7 - 2 - 12 ।।

चकार उगनुकर्षणार्थः । न च इको झल् इति सनः कित्वात् उगन्तानां पूर्वेणैव सिद्धिः किं कारणम् झलादौ सनः कित्त्वम्, न चान्तरेणेटट्प्रतिषेधं सन् झलादिर्भवति, तेन येषु प्रकृत्याश्रयः प्रतिषेधो नास्ति, तेष्वनेनैवेटि प्रतिषिद्धे झलचादित्वे सनः कित्तवमित्येष क्रमः । जिधृक्षतीति । रुदविद इत्यादिना सनः कित्त्वम्, ग्रहिज्यादिसूत्रेण तम्प्रसारणम्, हो ढः, षढो कस्सि, एकोचो बशो भष् । जुघुक्षतीति । गुहू संवरणे, स्वरितेत्, हलन्ताच्च इति सनः कित्त्वम् । अथ चकारेणोगिदिव श्रयतिरपि कस्मान्नानुकृष्यते अत आह - श्रिस्वृयूर्ण्वित्यादि ।।

कृसृमृवृस्तुद्रुस्रुश्रुवो लिटि ।। 7 - 2 - 13 ।।

क्रादय एव लिट्यनिट इति । लिट्येव क्रादयोऽनिटः इत्येष तु विपरीतोऽत्र नियमो न भवति क्रादीनामनुदात्तोपदेशसामर्थ्यात् । कृतलब्धक्रीतकुशलाः, तमधीष्टो भृतो भूतः, परिवृतो रथः स्तुतस्तोमयोः इत्यादिनिर्देशाच्च ।

केन पुनरेषामिट्प्रतिषेधः सिद्धः, यतो नियमार्थोऽयमारम्भः इत्यत आह - अनुदात्तोपदेशानामित्यादि । वृङ्वृञ्भ्यामन्येऽनुदात्तोपदेशास्तेषां प्रकृत्याश्रयः एकाच उपदेशे इतीट्प्रतिषेधः सिद्धः । वृङ्वृञोस्तु प्रत्ययाश्रयः श्र्युकः किति ित्येषः । तस्मादुभयस्यापि - प्रकृत्याश्रस्य, प्रत्ययाश्रयस्य च । कथं पुनरयं प्रत्ययाश्रयचस्य नियमः, यावता वृग्रहणं वृञस्थलि विध्यर्थं सम्भवति, न हि तत्र प्रकृत्याश्रयः प्रतिषेधः, वृञ उदात्तत्वात्, नापि प्त्ययाश्रयः थलः कित्त्वाभावात्, असति प्रत्ययाश्रयस्य नितयमे लुलुविथेत्यादाविण्न स्यात् इत्यत आह - वृञो हीति । व्यवस्था - नियमः । इह तुष्टोथेत्यादौ ऋतो भारद्वाजस्य इत्येतस्मान्नियमादिट् प्राप्नोति, ययिथेत्यादिवत् । यथा हि ययिथ, पपिथेत्यादौ आधेधातुकस्य इतीट् प्रप्तः एकाचः इति निषिद्धः, पुनः क्रादिनियमात् प्राप्तः अचस्तास्वत्थलि इति प्रतिषिद्धः, ततः ऋतो भारद्वाजस्य थलि प्रतिषेधो नान्येभ्यः इति नियमात्पक्षे इड् भवति, तथात्रापि स्यात् । कथं खलु क्रादिनियमस्य बाधकम् अचस्तास्वत् इति प्रतिषेधं बाधमानो भारद्वाजनियमः क्रादिप्रतिषेधं न बाधते कृसुभृवृ इत्येतेषु पुर्वायं दोषस्तेषामृकारान्तत्वेन भारद्वाजपक्षेऽपीटः प्रतिषेधात् । एवं तर्हि स्तुद्रुस्रुश्रुवां ग्रहणं विध्यर्थं भविष्यति, तअसति हि विधेये नियमो भवति, इह चास्ति विधेयम्, किम् थलि भारद्वाजनियमादिटः प्राप्तस्य प्रतिषेधः, इतरेषां तु क्रादीनां ग्रहणं नियमार्थ भविष्यतीति । बिभिदिव, लुलुविवेत्यादावपि न दोषः । कथं पुनस्तुष्टुमः अत्र हि क्रादिनियमादिट् प्राप्नोति नैष दोषः स्तुद्रुस्रुश्रुवां ग्रहणमुभयोरपि प्रतिषेधार्थम् । यश्च क्रादिनियमादिट् प्राप्तः यश्च भारद्वाजनियमात्, तयोरुभयोरपीत्यर्थः ।

यद्येवम्, येन नाप्राप्तिन्यायेन क्रादिनियममेव स्तुद्रुस्रुश्रुवां प्रतिषेधो बाधेत, न तु विकल्पेन प्राप्तं भारद्वाजनियमम्, ततश्चासौ स्यादेव इत्याशङ्क्याह -- पूर्वकत्वातप्रतिषेधस्य पूर्व विधिप्रकरणं पठितव्यम्, आर्धधातुकस्य इत्यारभ्य ईडडजनोर्ध्वे च इत्येवमन्तम्, पश्चात्प्रतिषेधप्रकरणम्, तद्यथाऽन्यत्रापि - कर्त्तरि कर्मव्यतिहारे , न गतिहिंसार्थेभ्यः इति । तत्रायमर्थो द्विरिड्ग्रहणं न कर्त्तव्यं भवति, प्रकृतमनुवर्त्तते । नन्वेवम्, रुदादिभ्यः सार्वधातुके इति सार्वधातुकग्रहणम्, लिङः सलोपोऽनन्तयस्य इत्यत्र विच्छिद्येत एवं तर्हि न वृद्भ्यश्चतुर्भ्यः इत्यत्रैव पठितव्यम्, एवं हि विध्युत्तरकारश्च प्रतिषेधः कृतो भवति, द्विश्चेड्ग्रहणं न कर्त्तव्यं भवति, सार्वधातुकग्रहणं च सलोपे न विच्छिद्यते, अपि च द्विःप्रतिषेधो न कर्त्तव्यो भवति, सोऽयमेवं सिद्धे यत्पुरस्तातप्रतिषेधकाण्डं करोति, तस्यैततप्रयोजनम् - थअनाश्रितविधानविशेषमिण्मात्रमनारभ्याधीतेन प्रतिषेधेन यथा बाध्येतेति । यदि तु भारद्वाजनियमात्परमिदं काण्डं क्रियेत, ततो मध्येऽपवादन्यायेव मारद्वाजनियमः अचस्तास्वत् इति प्रतिषेधेमेव, बाधेत, न तु क्रादिनिषेधमिति पुरस्तातप्रतिषेधकरणे न कश्चिद्दोषः ।

अपर आह - यत्र तत्र वा प्रतिषेधकरणमस्तु, सर्वथा तु भारद्वाजनियमः अचस्तास्वत् इति योगद्वयेन थलि यः प्रतिषेधः प्राप्तस्तस्यैव नियामकः, अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा इति, ततश्च स्तुद्रुस्रुश्रुवामपि भारद्वाजनियमेव थअचस्तास्वत् इति प्रतिषेध एव निवर्त्तते, न तु क्रादिप्रतिषेधः इति । तन्मते पुरस्तात्प्रतिषेधकरणस्य प्रयोजनमुत्तरत्र दर्शयिष्यामः ।

कृञोऽसुट इति वक्तव्यमिति । कृतेऽपि करोतिर्भवत्येवेति प्रतिषेधप्रसङ्गः ।.

श्वीदितो निष्ठायाम् ।। 7 - 2 - 14 ।।

श्विग्रहणं किमर्थम्, न सम्प्रसारणे कृते परस्य पूर्वत्वे चोगन्तत्वे सति श्र्युकः किति इत्येव सिद्धम् न सिध्यति, श्वि - त इति स्थिते परत्वादिट् प्राप्नोति ।

अथापि पूर्वं सम्प्रसारणम् एवमपि शर्युकः किति इत्यत्र उपदेशे इत्यनुवृतेतरस्य चोपदेशे इदन्तत्वान्न सिध्यति ।
डीङ इत्यादि । डीङयं स्वादीनां मध्ये पठ्यते, ते च ओदितः, स्वादय ओदितः इति वचनात्, कथमेतज्ज्ञापकम् इत्यत आह - स हीति । निष्ठातः निष्ठातकारस्य । अनन्तरस्य विधीयत इति । इटि सत्यानन्तर्थं विहन्येत ।
एवञ्च सति श्वयतेरप्यत्र ग्रहणं शक्यमकर्त्तुम्, तथा ओलस्जीप्रभृतीनामपि उक्तेनैव न्यायेनेडभावस्य सिद्धत्वात् ।।
यस्य विभाषा ।। 7 - 2 - 15 ।।
यस्य विभाषा इत्यनुवादवाक्यम् । अत्र च इड्विहितः िति वाक्यशेषः । यत्तदोर्नित्यसम्बन्धात्तस्य निष्ठायामिण्न भवतीति प्रतिषेधवाक्यं सम्पद्यते । निपात्नादिडागम इति । अपर आह - अनित्योऽयं प्रतिषेधः, कृती छेदने इत्यस्य इदित्करणसामर्थ्यात् । यदि ह्ययं विधिर्नित्यः स्यात् सेऽसिचि इत्यनेन विभाषितेट्त्वादनेनैव प्रतिषेधस्य सिद्धत्वादीदित्करणमनर्थकं स्यादिति ।।
आदितश्च ।। 7 - 2 - 16 ।।
आश्वस्तः, वान्त इति । भाष्यवार्तिकयोरनुक्तमपि प्रयोगबाहुल्यादुक्तम् । योगविभागकरणं किमिति । योगविभाग एव तावद्दोषः । अपि च एकयोगत्वे चकारो न कर्त्तव्यो भवतीति प्रश्नः । एवं चोत्तरग्रन्थे चकारो न पठितव्यः । पठ्यमानस्तु अनुक्तसमुच्चयार्थे व्याख्येयः । कथं पुनरेक्रयोगत्वे भावादिकर्मभ्यामन्यत्र प्रतिषेधः सिद्धः तत्राह - अन्यत्रेति । यदुणधेरिति ।उपाधिरभिधेयादिर्भेदकः । यद्युपाधीनां भेदकत्वं न स्यात्, योगविभागोऽनर्थकः स्यात् । भेदकत्वे तु तेषां भावादिकर्णणोर्विकल्पविधानात्कर्तृकर्मणोः प्रतिषेधो न स्यादिति तदर्थो योगविभागः कर्त्तव्यः । किमेतस्य ज्ञापने प्रयोजनम् इत्यत आह - तेनेति । लाभार्थस्य विभाषेति । अत्र हेतुर्वक्ष्यते । यदि तर्ह्युपाधिर्भेदकः, ततः उदितो वा इति क्त्वाप्रत्यये भाववाचिनि विकल्प इति निष्ठायामपि भाव एव प्रतिषेधः स्यात्, नार्थान्तरे । शब्देनाश्रीयमाणो ह्युपाधिर्भेदकः । न च उदितो वा इत्यत्र भाववाचित्वं शब्देनाश्रितम् । तथा च तेन निर्वृत्तम्, निर्वृत्तेऽक्षद्यूतादिभ्यः इत्यादेरुपपत्तिः ।।
विभाषा भावादिकर्मणोः ।। 7 - 2 - 17 ।।
मेदितमनेनेति । निष्ठा शीङ् इति कित्त्वप्रतिषेधाद् गुणः । प्रमिन्न िति । आदिकर्मणि क्तः कर्त्तरि च इति कर्त्तरि क्तः ।
सौनागा िति । सुनागस्याचार्यस्य शिश्याः - सौनागाः । शकितो घटः कर्तुमिति । यद्यपि शकिः केवलोऽकर्मकः, तथापि तुमुनन्तवाच्यक्रियाविशेषणत्वेन सकर्मको भवति । तथा च कर्मणि लादयो दृश्यन्त - अयं योगः शक्योऽवक्तुम्, अयमर्थः शक्यते वक्तुमिति ।।
क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धिफाण्बाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ।। 7 - 2 - 18।।
मन्थाभिधानं चेदिति । समुदायेन चेन्मन्थोऽभिधीयत इत्यर्थः । एतेन समुदायानामभिधेयभावेन मन्थादय
इहोपात्ता इति दर्शयति । यदि तु धात्वर्थोपाधित्वेनाश्रीयेरन् - मनथादिसाधने धात्वर्थे क्षुब्धादयो निपात्यन्त िति, तदा क्षुभितं मन्थेनेत्यादावपि स्यात् । द्रवद्रव्यसम्पृक्ताः सक्तवः- मन्थः । दधिमन्थान्मधुमन्थांश्चेति हि दृश्यते । अन्ये तु मथ्यतेऽनेनेति मन्थनदण्डः खञ्जकः - मन्थ इत्याहुः । मन्थादिषु क्षुब्धादिशब्दानां चलानादिक्रियायोगो यथासम्भवं द्रष्टव्यः । उपमानादिति । उपमानम् - सादृश्यम्, तचच् यथासम्भवं द्रष्टव्यम् ।
स्वान्तशब्देन विषयष्वविक्षिप्तमनाकुलं मन उच्यते । स्वनितं शब्दायितमित्यर्थः । मनसेति । कर्त्तरि करणे वा तृतीया । एवं ध्वनितं तमसेत्यत्रापि ।
लग्निमिति । रगे लगे ष्टगे संवरणे, अत्र निष्ठानत्वमपि निपात्यते ।
ग्लिष्टमिति । म्लेच्छ अव्यक्ते शब्दे । म्लेच्छितमिति । अपभाषितमित्यर्थ । अत्रार्थस्याविस्पष्टतया शब्दस्याविस्पष्टत्वम् अपशब्दानामपि स्वरुपेणाभिव्यक्तत्वात् । उदाहरणेषु वर्णानभिव्यक्तिः - विस्पष्टत्वम् । फाण्डमित्यादि । कः पुनरत्रानायासो विवक्षितः इत्यत आह - यदश्रृतमित्यादि । यस्य व्याधेर्यदौषधं जातं तस्य पञ्चधा कल्पान - रसः, कल्कः, श्रृतः, शीतः, फाण्ट इति । रसः - स्वरसः । कल्कः - पिष्टम् । श्रृतम् - क्वाथः । शीतो नाम - क्षुण्णमौषधजातमुदके प्रक्षिप्य रात्रावधिवासितमुदकं प्रातः पीयते । तदेवोष्णोदके प्रक्षिप्य सद्योऽभिषुत्य पूत्वा यत्पीयते सः फाण्टः । यथाह वाग्भटः - सद्योऽभिषुत्य पूतस्तु फाण्टः इति । पञ्चाप्येते कषायाः । तत्राश्रृतमिति क्वाथस्य व्यावृत्तिः, अपिष्टमिति कल्कस्य, उदकसम्पर्केणेति स्वरस्य, ईषदुष्णमिति शीतस्य, मात्रशब्दः स्वभावानुवादः । विभक्तरसम् प्राघवस्थाया भिन्नरसम् । यदेवम्भूतं कषायं तत्फाण्टमित्यर्थः । कषायशब्द उभयलिङ्गः । कथं पुनरेतदनायासशब्देनोच्यते लक्षणया । यदाह - अनायासेनेति ।।
घृषिशसी वैयात्ये ।। 7 - 2 - 19 ।।
ञिधृषा प्रागल्भ्ये, शसु हिंसायाम्, षष्ठ्यर्थे प्रथमा । विरुपं यातम् - ग्मनम्, चेष्टतं यस्य स वियातः - अविनीतः ।
शसेरपीत्यादौ ग्रन्थे इट्प्रतिषेधः सिद्ध इत्यनुषङ्गः । अथ धृषेः विभाषा भावादिकर्मणोः इति विकल्पे प्राप्ते नित्यार्थं ग्रहणं कस्मान्न भवति तत्राह - भावादिकर्मणोरपीति । एवं चास्य आदित्वे प्रयोजनं चिन्त्यम् । धर्षितः - अभिभूतः पूर्ववदकित्वम् । विशसितः - विकृतः ।।
दृढः स्थूलबलयोः ।। 7 - 2 - 20 ।।
स्थूलः - मांसलः, दुर्बलोऽपि । अस्थूलोऽपि बलवान् - बलः । बलवति चेति । सूत्रे अर्शआद्यच्प्रत्ययान्तं बलशब्दं दर्शयति । दृंहेरिति । दृहि वृद्धौ इत्येतावान्पाठः - इति वार्तिककारस्य पक्षः, दृह दृहि वृद्धौ - इति भाष्यकारस्य ।
अथ किमर्थ हकारस्य लोपो निपात्यते, न ढत्वमेव निपात्यताम्, परस्य धत्वं ष्टुत्वम्, ढो ढे लोपः दृढ इति सिद्धम् इत्यत आह - हकारलोपनिपातनमिति । रेफो न स्यादिति । रादिफः इत्यत्र वर्णादिति नाफेक्ष्यते, तेन रशब्दो न स्यादित्यर्थः । ढलोपस्यासिद्धत्वे संयोगे गुरु इति गुरुसंज्ञयोपजातया लघुसंज्ञाया

बाधितत्वात्तन्निबन्धनकार्याप्रसङ्ग इत्यर्थः । इह चेति । गुरुसंज्ञानिबन्धनकार्यप्रसङ्गश्चेत्यर्थः । दृंहितमिति । दृंहेः प्रत्युदाहरणम् । दृहितमिति दृहेः । अत्र च दीर्घादिरुपेण वृद्धमुच्यते ।।

प्रभौ परिवृढः ।। 7 - 2 - 21 ।।

पूर्वेण समानमिति । इडभावादेर्निपात्यस्य तुल्यत्वात् । वृहेरिति । वृहि वृद्धौ इति वार्त्तिककारस्य पक्षः । बृहि वृद्धौ इति भाष्यकारस्य । वृहिश्च यदि प्रकृत्यन्तरमस्तीति । ततस्तस्यापि निपातनमित्यर्थः । तदेव प्रयोजनमिति । असिद्धत्वाभावः ।

अथं कथं परिवृढय्येत्यत्र ल्यबादेशः, यावता परिवृढमाचष्टे इति विग्रहे तत एव णिच् कर्त्तव्यः, समुदायस्य च धातुत्वात् क्त्वाप्रत्ययोऽपि तत थएव कर्त्तव्यः, ततश्च परेरपि क्त्वान्तेऽन्तर्भावान्नायं समासः, इह च परिव्रढयतीति परिशब्दस्य तिङन्तेऽन्तर्भवात् तिङ्ङतिङः इति निधातो न स्यात् इत्यत आह - परिवृढमाचष्ट इति विगृह्येति । णिजुत्पद्यत इति । ण्यन्तं पठितव्यम् । अण्यन्तपाठे तु विगृह्येति क्त्वाप्रत्ययो न स्यात्, असमानकर्तृकत्वात् । स्ग्रामयतेरेव सोपसर्गादिति । तयदत्र वक्तव्यं तद् भृशादिभ्यो भुव्यच्वेः इत्यत्रैवोक्तम् । निघातो भवतीति । अड्द्विर्वचनयोरप्युपलक्षणमेतत् - पर्यव्रढयत्, परिविव्रढयिषति । परिवृंहितमिति । वृंहेः प्रत्युदाहरणम् । परिवृहितमिति । वृहेः ।।

कृच्छ्रगहनयोः कषः ।। 7 - 2 - 22 ।।

कषतिर्हिंसार्थः । कष्टोऽग्निरिति । चीयमानोऽग्निरत्राग्निशब्देन विवक्षितः, स कष्टो भवति, चयनप्रकारस्य दुर्ज्ञानत्वात् । व्याकरमस्य कष्टत्वमिडागमादिव्यवस्थाया दुर्ज्ञानत्वात् । सान्नं कष्टत्वं वर्षभदस्य स्वरस्य स्तोमादीनां च दुर्ज्ञानत्वात् । कारणमपीति । लक्षणया, कृच्छ्रमिति व्युत्पत्त्या वा ।।

धुषिरविशब्दने ।। 7 - 2 - 23 ।।

घुष्टा - अविशब्दिता । अवधुषितम् - विशब्दितम्, आविष्कृताभिप्रायमित्यर्थः । चौरादिकस्य चायं प्रयोगः स एव ह्यस्मिन्नर्थे वर्तते । द्वावपीति । घुषिरिति सूत्रोपात्तं रुपं द्वयोरपि साधारणमित्यर्थः । कथं सामान्येन ग्रहणम्, यावता विशब्दने णिचा भवितव्यम्, केवलश्चेह घुषिरुपात्तः अत तआह - विशब्दनप्रतिषेधश्चेति । विशब्दनार्थस्यानित्य इति । अन्ये तु अनित्यण्यन्ताश्चनरादयः इति सामान्येन ज्ञापकमाहुः । अपर आह -

चिति स्मृत्यामितीदित्त्वमत्र ज्ञापकमस्य हि ।
फलं चिन्तित तित्यादौ न लोपो मा स्म भूदिति ।।
नित्ये च णिचि सत्यत्र नलोपस्याप्रसङ्गतः ।
चिन्त स्मृत्यामित्येव च पठितव्यं भवेदिति ।।

अयमपीति । यद्यपि अवधुषितं वाक्यमाह - इत्येतदपि प्रयोजनम्, तथापि जुघुषुरित्यपि प्रयोग उपपन्न इत्यर्थः ।।

अभोश्चाविदूर्थे ।। 7 - 2 - 25 ।।

विशेषेण दूरं विदूरं ततोऽन्यदिति । तत्पुनर्यदासन्नमविप्रकृष्टं वा भवति तद्वेदितव्यम् । तस्य भाव आविदूर्यमिति । ब्राह्मणादेराकृतिगणत्वात् ष्यञ् । ननु च न नञ्पूर्वात्तत्पुरुषात् इति प्रतिषेधः प्राप्नोति तत्राह - एतस्मादेवेति । न नञ्पूर्वात् इत्यमयधिकारः, तेन ततः सूत्रादुत्तरस्य भाषप्रत्ययस्य प्रतिषेधस्तत्र क्रियत इति उत्तरस्येत्युक्तम् ।।

णेरध्ययने वृत्तम् ।। 7 - 2 - 26 ।।

अधीयत् इत्यध्ययनमिति कृत्यल्युटो बहुलम् इति कर्मणि ल्युट् । निषठाविशेषणं चैतत् - अध्ययनाभिधायिन्यां निष्ठायामिति । णिलुक्वेति । प्रत्ययलक्षणेन गुणो मा भूदिति णेर्लुग्निपातनम्, लोपनिपातने तु गुणः स्यात् । वृत्तो गुणो देवदेत्तेनेति । गुणः - पाठः, पदक्रमसंहितारुपोऽध्ययनविशेषः, स वृत्तः - सम्पादित इत्यर्थः ।

वृतिरयमित्यादिना सूत्रस्यानारम्भमाशङ्कते । अकर्मक इति वृत्तं गुणसुय, वृत्तं पारायाणस्यते भावे क्तस्य प्रयोगार्थमिदमुक्तम् । अकर्मकत्वे हि भावे निष्ठा भवति तयोरेव इत्यत्र भावे चाकर्मकेभ्यः इत्यनुवृत्तेः । योऽपि नपुंसके भावे क्तः, सोऽपि सकर्मकेभ्यो न भवति तयोरेव इत्यत्र क्तमात्रस्य ग्रहणात् । अन्यथा सक्रमकाद्भावे क्ते विधीयमाने कर्मणि द्वितीया प्रज्येत - ग्रामं गतम्, ओदनं भुक्तमिति । यदि तर्ह्यकर्मकः, कथं वृत्तो गुण इति कर्मणि निष्ठा इत्याशङ्क्याह - स ण्यर्थे वर्तमाने इति । यदि वा - अयं वृतिरकर्मकः स ण्यर्थे वर्तमानः इत्येक एव ग्रन्थः, अकर्मका अपि धातवोऽन्तर्भावितण्यर्थाः प्रयोज्येन कर्मणा सकर्मका भवन्ति, यथा - राजयुध्वेति, दृश्यते च वृत्तेरन्तर्भावितण्यर्थस्य प्रयोग इत्याह - तेन निर्वृत्तिमिति हीति । न चात्रोपसर्गवशात्सकर्मकत्वम्, ण्यर्थगतेः वृत्तेणिचि योऽर्थः । निवर्त्यते यैर्नियमाभिषेकः इत्यादौ तदवगतेरित्यर्थः। तत्तस्मात् । वृत्तेरेवेति । प्रकृत्यन्तादेवेत्यर्थः । वृत्तो गुण इति । उदितो वा इति क्त्वायां विकल्पितेट्कत्वाद् यस्य विभाषा इतीट्प्रतिषेधः सिद्धः । तदेवं निपातनमनर्थकमित्येव मतं चोद्यम् । परिहरति - तत्क्रियत इति । इष्टस्यान्यथासिद्धावप्यनिष्टनिवृत्त्यर्थं निपातनसित्यर्थः । अपरे त्विति । तेषां मते नानेनार्थः सूत्रेण ।।

वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ।। 7 - 2 - 27 ।।

दान्तः, शान्त इति । दमिशमी उपशमनार्थे । णलुगिट्प्रतिषेधयोः अनुनासिकस्य क्विझलोः इति दीर्घः । निपात्यमानस्य च णिलुकोऽपरनिमित्तकत्वाद्दीर्घविधिं प्रति निषेधाच्च स्थानिवद्भावो नास्ति । पूर्ण इति । पूरी आप्यायने दिवादिः, चुरादिश्च । दस्त इति । तसु उपक्षये दमु च । अत्र ह्रस्वत्वमपि निपात्यते । स्पष्टः छन्न इति । स्पशबाधनस्पर्शनयोः, छद अपवारणे । अत्रापि ह्रस्वत्वमपि निपात्यते । ज्ञप्त इति । ज्ञप मिच्च, चुरादिः । इट्प्रतिषेधो णिलुक्च निपात्यत इति । चकारात्क्वचिदुपधाह्रस्वत्वं च । क्वचित्पठ्यते - ज्ञपेभंरज्ञपिसनामिति विकल्पिविधानाद्यस्य

विभाषेतीट्प्रतिषेधे प्राप्ते विकल्पार्थे निपातनमिति । एकाज्ग्रहणम् यस्य विभाषा इत्यत्र नानुवर्त्तत इति भावः ।
अत्रादितश्चतुर्णां ग्रहणं शक्यमकर्त्तुम् । कथम् अन्तर्भवितण्यर्थानां प्रकृत्यन्तानां दान्त इत्यादीनि रुपाणि, अन्यत्र ण्यन्तानां दमित इत्यादीनि ।।
रुष्यमत्वरसंघुषास्वनाम् ।। 7 - 2 - 28 ।।
अभ्यान्त इति । अम गत्यादिषु, पुर्ववद्दीर्घः । तूर्ण इति । ञित्वरा सम्भ्रमे, ज्वरत्वर तइत्यादिनोठ् । आदितश्चेतीट्प्रतिषेधे प्राप्त इति । आदित्वे तु प्रयोजनं मृग्यम् । आत्मनेपदार्थं तावत्कश्चिदनुबन्ध थआसञ्जनीयः । कश्चिदाह - आदित्वं यङ्लुगर्थमिति, न हि तत्रायं विकल्पः, एकाचः इत्यनुवृत्तेः । आदित्करणसामर्थ्याच्चानुबन्धनोऽपि आदितश्च इतीट्पिरतिषेधो यङ्लुकि भवति । सम्पूर्वस् धुषेरिति । घुषिरविशब्दने इत्यस्यासम्पूर्वोऽवकाशः - घुष्टा रज्जुः, अस्य विकल्पस्यावकाशः सम्पूर्वत्वे सति विशब्दने - संघुष्टं वाक्यमाह, संपूर्वस्याविशब्दने विप्रतिषेधः । आङ्पूर्वस्येत्यादि । क्षुब्धस्वान्त इति निपातनस्यावकाशोऽनाङ्पूर्वत्वे सति मनोऽभिधाने - स्वान्तं मन इति , अस्य विकल्पस्यावकाशः, - आङ्पूर्वत्वे सत्यमनोऽभिधाने आङ्पूर्वत्वे मनोऽभिधाने च सति विप्रतिषेधः ।।
हृषेर्लोमसु ।। 7 - 2 - 29 ।।
हृष्टानि - उत्स्फुटानि, मूर्द्धजाः - केशाः । अङ्गान्तरजानि लोमानि इति निघण्टुप्रसिद्धिः । कल्पसूत्रकारणामपि तदनुगुणाः प्रयोगाः - केशश्मश्रुलोमनखं वापयन्ति इति, तइह तु केशानामपि ग्रहणम् इत्याह - मूर्द्धजान्यङ्गजानि चेति । अत्र विशेष्यं मृघ्यम् । सामान्येन गृह्यन्त इति । क्व यथा इत्यात्राह - यथेति । ननु क्रियावचनस्य धातोः कथं द्रव्यात्मकेषु लोमसु वृत्तिः इत्यत आह - तद्विषये चेति । प्रतिहताः कठिनद्रव्याखादनेन, शीतपीड्या वा हता इत्यर्थः ।।
अपचितश्च ।। 7 - 2 - 30 ।।
अपचितोऽनेन गुरुरिति । चायृ पूजानिशामनोयोः । निशामने चायं प्रयोगः । पूजायां तु मतिबुद्धिपूजार्थेभ्यश्च इति वर्तमाने क्ते सति क्तस्य च वर्त्तमाने इति षष्ठ्या भवितव्यम् । क्तिनि नित्यमिति । क्तिन्नाबादिभ्यः इति क्तिन् । अन्यथा गुरोश्च हलः इत्याकारः स्यात् ।।
ह्रु ह्वरेश्छन्दसि ।। 7 - 2 - 31 ।।
ह्वरेरिति । ह्वृ कौटिल्ये । आगन्तुकेकारे गुणेन निर्द्देशः ।।
अपरिह्वृताश्च ।। 7 - 2 - 32 ।।
आदेशस्याभाव इति । पूर्वसूत्रेण प्राप्तस्य । वहूवचननिर्द्देशश्छन्दसि तस्यैव प्रयोगदर्शनात् ।।
सोमे ह्वरितिः ।। 7 - 2 - 33 ।।
इडागमो गुणश्चेति । चकारादादेशाभावश्च ।।
ग्रसितस्कमितस्तभितोत्तभितचत्तविकस्ता विशस्तृशस्तृशास्तृतरुतृतरुतृवरुतृवरुतृवरुत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति चः ।।
ग्रसु अदने, स्कम्भु स्तुम्भु रोधनार्थौ, सौत्रौ, चते याचने, कस गतौ, शसु हिंसायाम्, शंसु स्तुतौ, शासु अनुशिष्टौ, तृ प्लवनतरणयोः, वृङ् वरणे, ज्वल दीप्तौ, क्षर सञ्चलने, क्षमूष् सहने, दुवम उद्गिरणे, अमगत्यादिषु । उत्ताभितेति । उदः स्थास्तम्भोः पूर्वस्य इति पूर्वसर्वणः, सकारस्य तकारः । अन्योपसर्गपूर्वः स्तभितशब्दो न भवतीति । यदि स्यात्, उत्तभितग्रहणमनर्थकं स्यात् । निपातनबहुत्वापेक्षमिति । तेन छान्दसः प्रयोगः एकवचनान्तोऽप्युदाहृत इति भावः ।
इतिकरणः प्रदर्शनार्थ इति । तस्य प्रकारार्थत्वात् ।।
आर्धधातुकस्येड्वलादेः ।। 7 - 2 - 35 ।।
आस्ते, वस्त इति । ननु च रुदादिभ्यः सार्वधातुके इत्येतन्नियमार्थं भविष्यति - रुदादिभ्य एव सार्वधातुक इति तत्राह - रुदादिभ्यः सार्वधातुक इत्येतस्तमिन्निति । नियमे त्वेतस्मिन् विज्ञायमाने विपरीतोऽपि नियमः सम्भाव्यते - रुदादिभयः सार्वधातुके एवेति । तत्र च वक्तव्यं रुदविदेति क्त्वासनोः कित्त्वविधानान्न भविष्यति । तअनिटः सनो झलादेर्हलन्ताच्च इत्येव सिद्धत्वात् । क्त्वोऽप्यनिट औपदेशिककित्त्वसद्भावादिति, ततश्च प्रतिपत्तिगौरवं स्यात् । ननु चासत्यार्धधातुकग्रहतणे अङग्स्य इत्यधिकारत्तस्यैवेट् प्राप्नोति, यथा लुङ्लङ्लृङ्क्ष्वडुदात्तः इति ज्ञापकात्सिद्धम्, यदयम् एकाच उपदेशेषनुदात्तात् इति प्रत्ययस्यट्प्रतिषेधं शास्ति, यच्च निष्ठायां सेटि न क्त्वा सेट् इत्याह, तज्ज्ञापयति - प्रत्ययस्यैवायमिडिति । न च वृक्षत्वमित्यादौ प्रतिपदिकप्रत्ययस्य प्रसङगः, ॠत तइद्धतोः इत्यधिकारात् । एवमपि जुगुप्सते, लभ्याम्, लूभिरित्यादौ प्रसङ्गः इदितो नुम् धातोः इत्यतो द्वितीयमपि धातुग्रहणमनुवर्तिष्यते, तत्रैकं स्वरुपपदार्थकम्, ततश्च धातोः इत्येवं धातुसंश्बदनेन विहितस्य धातोः परस्येड्विधानान्न क्वाप्यनिष्टं रूपम् । तदेवं बहुप्रतिविधेयत्वात् प्रतिपत्तिगौरवपरिहारार्थम् आर्धधातुकस्य इत्युक्तम् ।
प्रतिषेधनिवृत्त्यर्थमिति । केन पुनः प्राप्तस्य प्रतिषेधः शङ्क्यते इदमेव वचनं कल्पकं स्यात् - अस्त्यार्द्धधातुकमात्रस्येट्, यतो वलादेः प्रतिषिध्यत इति । तनेङ्वशि कृति थइत्यादिकस्तु प्रतिषेधो नियमार्थः स्यात् ।।
स्नुक्रमोरनात्मनेपदनिमित्ते ।। 7 - 2 - 36 ।।
स्नुक्रमोरुदात्तत्वादिटि सिद्धे नियमार्थं वचनम् - अनात्मनेपदनिमित्त एव यथा स्यादन्यत्र मा भूदिति । अथ प्रस्नुतः, प्रस्नुतवान्, प्रसुस्नूषति, क्रान्तः, क्रान्तवान् - इत्यत्र श्र्युकः किति, सनि ग्रहगुहोश्च, यस्य विभाषा इति प्रतिषेधे प्राप्ते विध्यर्थमेतत्कस्मान्न भवति पुरस्तात्प्रतिषेधकाण्डकरणात् । तस्य हि प्रयोजनम् - अनाश्रितविधानविशेषस्येण्मात्रस्य प्रतिषेधो यथा स्यादिति । यद्यनात्मनेपदनिमित्त इति प्रसज्यप्रतिषेधः स्नुक्रमोरात्मनेपदनिमित्तत्वे सतीण्न

भवतीति, एवं च प्रतिषेधप्रकरण एवैतत्पठितव्यम्, तत्रायमभ्यर्थः - नञुपादानं न कर्त्तव्यं भवति तथा तु न कृतमित्येव ।

अत्र यद्यात्मनेपदशब्देन नञः समासं कृत्वा पश्चान्निमित्तशब्देन षष्ठीसमासः क्रियेत - आत्मनेपदादन्यदनात्मनेपदम्, परस्मैपदमिति यावत्, तस्य निमित्तम्, ततश्च यत्र स्नुक्रमौ परस्मैपदनिमित्ते - चक्रमिथ, चक्रमिव, चक्रमिम, प्रास्नावीत्, प्रसुस्नुविवेत्यादौ - तत्रैवेड्भवतीत्यर्थः स्यात्, ततश्च कृति न स्यात् - प्रस्नविता, प्रस्त्रवितुम्, प्रस्नवितव्यम्, प्रक्रमिता, प्रक्रमितुम्, प्रक्रमितव्यमिति, तथा चिक्रमिषतीत्यत्रापि न स्यात्, न हि सनन्तादुत्पद्यमानस्य परस्मैपदस्य क्रमिर्निमित्तम्, परस्मैपदग्रहणमेव च कर्त्तव्यं स्यात्, तस्मादात्मनेपदशब्दस्य निमित्तशब्देन समासं कृत्वा पश्चान्नञा समासः कर्त्तव्यः । प्रसज्यप्रतिषेधे त्वनुन्मेष एवास्य पक्षस्य स्यात् । तत्र यद्यनात्मनेपदनिमित्त इति सप्तम्येकवचनं स्यात्, ततोऽयमर्थः स्यात् - आत्मनेपदस्य यन्निमित्तं ङकारादि तस्मिन्सति न भवतीति, ततश्च प्रस्नवित्रीयत इत्यत्रापि प्रतिषेधः स्यात्, विद्यते ह्यत्रात्मनेपदस्य निमित्तम् क्यङो ङकार इति । प्रथमाद्विवचनान्तं स्नुक्रमोर्विशेषणमिति दर्शयति - न चेत् स्नुक्रमौ आत्मनेपदस्य निमित्तमिति । वेदाः प्रमाणम् इतिवदेकवचनम् । सूत्रे तु प्रत्येकं निमित्तत्वस्य विवक्षिततत्वात् द्विवचनम् । निमित्तशब्दोऽयमस्ति योग्यतामात्रे - कुसूलस्थेष्वपि बीजेषु वक्तारो भवन्ति - अङ्कुरनिमित्तान्यतानीति अस्ति च कुर्वद्रूपे । तत्राद्ये पक्षे कृत्यापि प्रतिषेधः स्यात् - प्रस्नविता, प्रस्नवितुम्, प्रस्नवितव्यम्, प्रक्रमिता, प्रक्रिमितुम्, प्रक्रमितव्यमिति । अस्ति ह्यत्र यथायोगं भावकर्मकर्तृविषयत्वादात्मनेपदं प्रति योग्यत्वम्, तदिह किं विवक्षितम् इति पृच्छति - क्व च तावात्मनेपदस्य निमित्तमिति । इतरोऽपि कुर्वद्रूपपक्षाश्रयणेन परिहरति - यत्रेत्यादि । अत्रैवं व्याख्येयम् - यत्रात्मनेपदं तदाश्रयं भवति तत्रैवात्मनेपदस्य
निमित्तम् । किं पुनस्तद्यत्र तदाश्रयमात्मनेपदं भवति इत्यत आह - भावकर्मेत्यादि । अत्र हि विषये स्नुक्रम्योः श्रूयमाणमात्मनेपदं भवतीति, कुर्वद्रूप एव निमित्तशब्दो मुख्यः, योग्यतामात्रे त्वौपचारिक इति भावः । ननु च भावकर्मादिषु त एवार्था आत्मनेपदस्य निमित्तम्, स्नुक्रमी, क्व तर्हि प्रतिषेधः स्याद् यत्र हि क्रिमिरेव निमित्तम्, अनुपसर्गाद्वा - क्रंस्यते नैष दोषः, भावकर्मकर्त्तारः क्रमेश्च वृत्त्यादयः । सर्वमेवैतद्धातोरेव विषयतया विशेषणम्, धातुरेव तु साक्षादात्मनेपदस्य मिमित्तम् - भावादिविषयाद्धातोरात्मनेपदं भवतीति । तेनेत्यादि । यत
एवं कुर्वद्रूपमेवात्र निमित्तम्, तेनायं सत्यात्मनेपदे प्रतिषेध इत्यर्थः ।

किमुच्यते प्रतिषेध इति, यावता पर्युदासाश्रयेणोकपक्रमे व्याख्यातम् तत्राह - प्रतिषेधफलं चेदं सूत्रमिति । सत्यं पर्युदासेऽपि नियमार्थत्वान्नियमस्य चेतरव्यावृत्तिफलकत्वादेवमुक्तमित्यर्थः ।

प्रस्नोषीष्टेति । आशिषि लिङ्, भावकर्मणोः इत्यात्मनेपदम् । प्रकंसीष्टेति । अत्र तु प्रोपाभ्यां समर्थाभ्याम् इति कर्त्तरि । सर्वत्रेत्यादिना सूत्रार्थमुदाहरणे दर्शयति । ननु सनन्ताद्विधीयमानस्यात्मनेपदस्य स एव धातुर्निमित्तं न स्नुक्रमी तत्राह - सनन्तादपीति । पूर्ववदिति वचनात्प्रकृतिगतमेव सनन्तेऽपि निमित्तमिति भावः । यदा तर्हि सनन्ताद्भावकर्मणोरात्मनेपदं तदा प्रतिषेधो न प्राप्नोति, न हि तदा प्रकृतिगतं निमित्तमपेक्षितम्, किं तर्हि सनन्तमेव स्वतन्त्रं निमित्तम्, पुत्रीयत ित्यादिवत् एवं तर्हि सनन्ताद्भावकर्मणोरपि पूर्ववत्सनः इत्यात्मनेपदं भविष्यति एतयोरर्थयोः सन्प्रकृतावात्मनेपदस्य दृष्टत्वात् । तत्र यद्यपि सनन्तमपि स्वयमेव निमित्तमुपपद्यते, तथापि भावकर्मणोः इत्यस्यावकाशः - भूयते, पच्यते पूर्ववत्सनः इत्यस्यावकासः - शिशयिषते सनन्ताद्भावकर्मणोरुभयप्रसंगे परत्वात् पूर्ववत्सनः इत्यनेन भविष्यति । यदि परं विशेषो नास्तीत्युच्यते तदपि न अत्रैव विशेषस्य सम्भवात् । एवमपि न सिध्यति, पूर्ववत्सनः इत्यत्र कर्त्तरि कर्मव्यतिहारे इत्यतः कर्तरीत्यनुवृत्तेः । तत्र हि प्रकरणे सर्वत्रैव कर्तरिति सम्बध्यते । अथापि न सम्बध्यते, एवमपि यदा सनन्ताद् णिचि कृते णिचश्च इति, भावकर्मणोः इति वा आत्मनेपदम्, तदा प्रतिषेधो न सिध्यति - चिक्रंस्यते, चिक्रंस्यत इति । किं च - भोस्तदानीमपि प्रतिषेध इष्यते बाढमिष्यते । यदाह वार्त्तिककारः - सिद्धं तु स्नोरात्मनेपदेन समानपदस्थस्योट्प्रतिषेधात्, क्रमेश्च इति । तदेवमात्मनेपदेन समानपदस्थत्वे प्रतिषेधं कुर्वतो वार्त्तिककारस्यैवंविधे विषये प्रतिषेध इष्टो लक्ष्यते । यथा पुनर्वृत्तिकारेण व्याकख्यातं तथा न प्राप्नोति कर्त्तव्योऽत्र यत्नः ।

यदि सत्यात्मनेपदे प्रतिषेधः मा कारि निमित्तग्रहणम् अनात्मनेपदे इत्येवास्तु, सतिसप्तमी विज्ञास्यते - आत्मनेपदे सति न भवतीति, यद्येतल्लभ्यते कृतं स्यात्, तत्तु न लभ्यम्, शास्त्रे याः सप्तम्यस्ताः सर्वा परसप्तम्य इति नियमात् परसपतम्यां तु यदि स्नुक्रमोर्विशेषणं स्नुक्रमोरात्मनेपदेऽनन्तर इति, सिद्धं प्रस्नोषीष्ट, प्रक्रसीष्ट, प्रस्नोष्यते, प्रक्रंस्यते - अत्र न प्राप्नोति, स्येन व्यवहितत्वात् । आर्धार्धधातुकस्य विशेषणम् - स्नुक्रमिभ्यां परस्यार्धधातुकस्यात्मनेपदेऽनन्तर इति सिद्धं प्रस्नोष्यते, प्रक्रंस्यते, प्रस्नोषीष्ट, प्रक्रंसीष्ट - अत्र न प्राप्नोति, सीयुट आत्मनेपदभक्तत्वात् । उभयथापि प्रचिक्रंसिष्यते - अत्र न प्राप्नोति, न ह्यत्र क्रमेस्तत्परस्य सार्वधातुकस्यात्मनेपदमनन्तरम् । तस्मान्निमित्तग्रहणं कर्त्तव्यम् । तदाहनिमित्तग्रहणमित्यादि । तदात्मनेपदं परं यस्मात्स ततप्रः, प्रचिक्रसिष्यते इत्यादौ स्यप्रत्ययः, स परो यस्मात्स तत्परः, सन्प्रत्ययः । इह त्वित्यादि । प्रगेव व्याक्यातम् । प्रस्नवित्रीयत इति । रीङ् ऋतः । वात्तिककारमतेऽप्यत्र प्रतिषेधो न भवति, कथम् समानपदस्थस्य इति वचनात् इडागमेन पदावस्थापेक्षणीया । तत्र तृचि विभक्तावुत्पन्नायां लब्धेऽपि पदत्वे आत्मनेपदस्यासन्निधानादिट् प्रवर्त्तते । प्रतिक्रंसिष्यत इत्यत्र तु पदावस्थायामात्मनेपदसन्निधानात् प्रतिषेधप्रवृत्तिः। आत्मनेपदविषयादिति । तद्येग्यादित्यर्थः । सत्यात्मनेपदे प्रतिषेध इत्युक्तत्वादिदमारभ्यते । अनुपसर्गात्क्रमेः क्रन्ता, क्रमिता - इत्युभयमपि भवति अनुपसर्गाद्वा इति वकल्पेनात्मनेपदनिमित्तत्वादित्येके । अन्ये त्वात्मनेपदविषयादिति अनन्यभावे विषयशब्दं वर्णयन्तः क्रिमितेत्येव भवितव्यमित्याहुः ।

स्नौतेः सनि किति चेति । उपलक्षणमेतत् । क्रमेश्च निष्ठायाम् यस्य विभाषा इति द्रष्टव्यम् । प्रतिषधो भवतीति । अत्र हेतुः प्रागेवोक्तः ।।

ग्रहोऽलिटि दीर्घः ।। 7 - 2 - 37 ।।

ग्रह उत्तरस्येट इति । कथं पुनरिटो दीर्घत्वं लभ्यते, इडिति यत्प्रकृतं तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः एवं तर्हि षष्ठ्यन्तप्रपरं करिष्यामि ।

एवमपि दोषः, प्रकृतमिटमनपेक्ष्येट इत्युच्यमानेऽविशेषाच्चिण्वदिटोऽपि दीर्घप्रसङ्गः अस्तु तर्हि प्रशमान्तमेव । तत्र दीर्घ इट् भवतीति सामानाधिकरण्येनान्वये सामर्थ्यादीडागमे विधिः सम्पद्यते । इट् दीर्घ इति चेद्विप्रतिषिद्धम्, यदिट् न दीर्घञ्,
अथ दीर्घो नेट्, इट् दीर्घश्चेति विप्रतिषिद्धम् स्यादेतत् - दीर्घ इडद्भवतीत्युक्ते सामर्थ्याद्व्यक्तिपरत्यागेर इकारजातिराश्रीयते, दीर्घग्रहणाच्च तव्द्यक्तिसमवेता सा विधीयत इति । एवमपि दोषः, विवरीषते इत्यत्र सनीटि प्रप्ते वृतो वा इत्यनेन पक्षे दीर्घ इटि च प्रसक्ते सनि ग्रहगुहोश्च इत्युभयस्मिन्नपि प्रतिषिद्धे इट् सनि वेति पक्षे इड्विधीयते । तत्र पुनरिटो विधानाभावात्पक्षे दीर्घ ईकारो न श्रूयेतेति नैष दोषः इट् सनि वा इत्यत्र दीर्घ इट् इति, वृतः इति चानुवर्तिष्यते । यत्तर्हि विदेशस्थमिटं प्रतिषिध्य पुर्विधानं तत्र न सिध्यति - जृव्रश्चोः क्त्वि, जरित्वा, जरीत्वा, अत्रोदात्तत्वादिट् प्राप्तः वृतो वा इत्यनेन च दीर्घ इट्, ततो द्वयोरपि श्र्युकः किति चइति प्रतिषेधे पुनरिड्विधीयते, न च तत्र दीर्घग्रहणस्यानुवृत्तिसम्भवः । ननु च श्र्युकः किति इत्यत्र नेड्वशि इत्यधिकाराव्द्यक्तिपक्षाश्रयणाच्च इट एकमात्रस्य निषेधः, न दीर्घस्येटः, ततः किम् वृतो वा इत्यनेन विहितो दीर्घ इट् तथेव स्थितः, जृव्रश्चोः क्त्वि इत्यनेन चेट् प्रतिप्रसूयते इति जरित्वा, चरीत्वेति दव्यमपि सिद्धं भवति स्यादेवं यद्यागमान्तरमीड्वीधीयते, इह तु इड् दीर्घः, इति वचनादिटकार्यमस्यापि भवत्येव । अन्यथा अग्रहीदित्यत्र ह्म्यन्तक्षण इति वृद्धप्रतिषेधः इट ईटि इति सिज्लोपश्च अग्रहीढ्वम्, अग्रहीध्वम्, विभाषेटः इति मूर्द्धन्यविकल्पः, जरीत्वेति न क्त्वा सेट् इति कित्त्वप्रतिषेधः इत्येते विधयो न सिध्येयुः । तस्मादिट्कार्यमस्यापीटो भवतीत्यङ्गीकर्त्तव्यम्, ततश्च विदेशस्थं प्रतिषिध्य पुनर्विधाने स्थित एव दोषः स्यात्, तस्माद्दीर्घ इडशक्यो विधातुम् । एवं तर्हि आर्धधातुकस्य इति वर्त्तते, ग्रह उत्तरस्यार्द्धधातुकस्य दीर्घो भवति । इहापि तर्हि प्राप्नोति - ग्रहणीयम् वलादेः इति वर्तते । इहापि तर्हि न प्राप्नोति - ग्रीता, ग्रहीतुमिति भूतपूर्वगतिर्विज्ञास्यते । इहापि तर्हि प्राप्नोति - ग्राहक इति अस्तु तर्हि इडित्येव । ननु चोक्तं षष्ठीनिर्द्देष्टेन चेहार्थ इति ग्रहः इति पञ्चमी इडिति प्रथमायाः षष्ठी प्रकल्पयिष्यति - तस्मादित्युत्तरस्य इति ।
प्रकृतस्येति । आर्धधातुकस्येड् इत्यनन्तरं विहितस्य । चिण्वदिटो न भवतीति । जरित्वेत्यत्र तु आर्धधातुकस्येड् इत्ययमेवेट् प्रतिषिद्धः प्रतिप्रसूयते इति भवत्येव दीर्घः । इह जरीगृहितेति यङन्तातृच्यल्लोपयलोपयोः कृतयोर्द्विष्प्रयोगो द्विर्वचनमिति स एवायं ग्रहिरिति दीर्घः प्राप्नोति पूर्वस्मादपि विधौ यः स्थानिवद्भावः सोऽपि दीर्घविधौ प्रतिषिद्धः । तस्माद्विहितविशेषणमिहाश्रयणीयम् - ग्रहेर्यद्विहितमार्धधातुकं तस्य य इट् तस्य दीर्घ इति ।

वृतो वा ।। 7 - 2 - 38 ।।

अत्र यदि वृ वरणे इत्येतस्य तसिला निर्द्देशः स्यात् व्रः इत्येव निर्दिश्येत, यथा ग्रो यङि इति । अथ तस्य ऋकारान्तानां च ग्रहणम् एवमपि तस्य पृथग्ग्रहणमनर्थकम्, ऋकारान्तत्वात् । अथ तस्य ऋकारान्तानां
च तथा च सति ऋतश्च संयोगादेः इत्यत्र ऋतः इति न वक्तव्यम् अस्यैवानुवृत्तेः । अथ वृङ्वृञोः ऋकारान्तानां च तथापि वृग्रहणमनर्थकमृकारान्तत्वात् । तस्माद्वृत्तिकारोपदर्शितानामेव ग्रहणम् ।
वृत इति किमिति । उः इति वक्तव्यमिति मन्यते ।।

न लिङि ।। 7 - 2 - 39 ।।

विस्तरिषीष्टेति । कर्मण्यात्मनेपदम् ।।

सिचि च परस्मैपदेषु ।। 7 - 2 - 40 ।।

अतारिष्टामिति । तृ प्लवनतरणयोः । अस्तारिष्टमिति । स्तञ् आच्छादने, ञिदुभयपदी ।।

इट् सनि वा ।। 7 - 2 - 41 ।।

अत्रातिस्तीर्षतीति परस्मैदपाठो न युक्तः ।।

लिङ्सिचोरात्मनेपदेषु ।। 7 - 2 - 42 ।।

आत्मनेपदे परे इति । सिच एवैतद्विशेषणम्, न लिङः, असम्भवात् । न चैवं तस्य परस्मैपदेऽपि प्रसङ्गः वलादेः इत्यधिकारात् । प्रावृषीष्टेत्यादौ उश्च इति कित्त्वम् ।।

ऋतश्च संयोगादेर्गुणः ।। 7 - 2 - 43 ।।

उदारहणेषु भावकर्मणोः आत्मनेपदम् ।
संस्कृषीष्टेति । समः सुटि इत्यत्र सम्पुंकानां सो वक्तव्यः ि‌ति वचनात् सत्वम् ।।

स्वरतिसूतिसूयतिधूञूदितो वा ।। 7 - 2- 44 ।।

अत्र स्वरतेरनुदात्तत्वादप्राप्ते, तइतरेषां तु प्राप्ते विभाषा ।
वेति वत्तमान इति । इट् सनि वा इत्यतः । लिङ्सिचोर्निवृत्त्यर्थमिति । अन्यथा वाग्रहतणसम्बद्धयोस्तयोरप्यनुवृत्तिः स्यात् । पूप्रेरण इत्यस्य निवृत्त्यर्थ इति । अन्यथा निरनुबन्धकत्वात्तस्यैव ग्रहककणं स्यात् । एवं तर्हि सूङिति वक्तव्यम् एवमपि लुग्विकरणालुग्विकरकणयोरलुग्विकरणस्यैव ग्रहकणम् इति सूयतेरेव ग्रहणं स्यात्, न सूतेः । तस्याः परिभाषाया अस्तित्वेऽयमेव विकरणनिर्द्देशो ज्ञापकः । धूविधूनन इत्यस्य निवृत्त्यर्थ इति । अन्यथा पूर्ववत्तस्यैव ग्रहणं स्यात् । धुवितेति । कुटादित्वान्ङित्त्वम् ।
स्वरतेरिति । अस्य विकल्पस्यावकाशः - स्वर्त्ता, स्वरिता, ऋद्धनोः स्ये इत्यस्यावकाशः - करिष्यति, स्वरतेः स्ये उभयप्रसङ्गे विप्रतिषेधः । किति तु प्रत्यय श्र्युक इति । ननु चायं विकल्पो यथा एकाज्लक्षणं प्रतिषेधं बाधते तृजादौ, तथा किल्लक्षणमपि प्रतिषेधं बाधेत न बाधेत, कथम् येन नाप्राप्ते तस्य बाधनं भवति । तस्मादपबादता तावदेकाज्लक्षणमेव प्रतिषेधं प्रत्यस्य भवति, कित्युभयप्रसङ्गे पुरस्तात्प्रतिषेधकाण्डकरणात्प्रतिषेध एव भवति । लिङ्गाच्च, यदयम्

स्वृयूर्णुभरज्ञपिसनाम् इति विकल्पं शास्ति, अन्यथा अनेनैव सत्यपि विकल्पस्य सिद्धत्वात्पुनस्तं न विदध्यात् । वृत्तौ तु विप्रतिषेधशब्देनापि पुरस्तात्प्रतिषेधकाण्डकरणमेव विवक्षितम्, समानफलत्वात् ।।

रधादिभ्यश्च ।। 7 - 2 - 45 ।।

रधिर्नशिस्तृपिदृपी द्रुहिर्मुहि ष्णुहिष्णिही ।

रधादयोऽमी पठिता दिवादिष्वष्ट कृष्टिभिः ।।

नेष्टेति । मस्जिनशोर्झल इति नुम् । तृपिदृप्योः - अनुदात्तस्य चर्दुपधस्य इति पक्षे अमागमः । द्रोढेत्यादौ वा द्रुहमुहष्णुरष्णिहाम् इति धत्वढत्वे ।

क्रादिनियमादिति । ननु च प्रतिषेधस्यासौ नियमः, न च रधादौ कस्यचित्प्रत्ययाश्रयः प्रकृत्याश्रयो वा प्रतिषेधः प्राप्नोति, ययोरपि प्राप्नोति तृपिदृप्योः, तयोरपि प्रतिषेधे लिट्यनेन व्यावर्तितेऽप्ययं विकल्पः स्यादेव, विकल्पस्यानियतत्वात् एवं मन्यते -- यावान्कश्चिदिडभावः प्रतिषेधनिबन्धनो विकल्पनिबन्धनो वा, तस्य सर्वस्य क्रादिसूत्रेण नियमः इति । एवं चोत्तरग्रन्थे प्रतिषेधनियमस्येति अभावनियमस्थेत्येवार्थो द्रष्टव्यः । अपर इति । ननु चास्तु प्रतिषेधस्य प्राबल्यम्, किमायातम् नियमस्य प्रतिषेधविषयत्वान्नियमस्यापि प्राबल्यमित्यदोषः । नित्यमिटा भवितव्यमिति । प्रतिषेधाधिकारेण क्रादीनामेव लिटि इण्न भवति तइति नियमे विज्ञायमाने धात्वन्तरेषु यावान् कश्चित्प्रतिषेधः स सर्वो मा भूत्, विकल्पस्तु कस्मान्न स्यादिति ।।

निरः कुषः ।। 7 - 2 - 46 ।।

निष्कोष्टोति । इदुदुपधस्य चाप्रत्ययस्य इति षत्वम् । निस इति वक्तव्य इति । प्रदिषु हि निसिति पठ्यते, तथा च निसस्तपतौ तिति निर्देश इति भावः । किमेतस्य ज्ञापने प्रयोजनम् इत्यत आह - तस्येति । ननु नच नित्य एव रुत्वे कृते लत्वं भविष्यति तत्राह - निसो हीति ।।

इण्निषठायाम् ।। 7 - 2 - 47 ।।

इडिति वर्त्तमाने पुनरिड्ग्रहणं किमर्थम् इत्यत आह -- इड्ग्रहण नित्यार्थमिति । नन्वारम्भसामर्थ्यादेव नित्यमिड् भविष्यति, विकल्पस्य पूर्वोणेव सिद्धत्वात् इत्यत आह - आरम्भो हीति । यदि तर्हि नित्यार्थमिडग्रहणं क्रियते, उत्तरत्रापि नित्य एव विधिः स्यात् इत्यत तआह -- आत्रैवेति ।।

तीषसहलुभरुषरिषः ।। 7 - 2 - 49 ।।

इषु इच्छायामित्यास्येति । तौदादिकस्य । प्रेषितेति । एङि पररुपम् । उदितं पठन्तीति । धातुपाठे इच्छार्थमुदितं पठित्वा थइहाप्युकारोपादानेन तस्यैव ग्रहककणं वर्णयन्तीत्यर्थः । इदमेव चोदित्त्वस्य प्रयोजनम् क्त्वायामिड्विकल्पस्यानेनैव सूत्रेण सिद्धत्वात् । ये तूदितं न पठन्ति, ते सहिना साहचर्यादिच्छार्थस्य ग्रहणमाहुः । उभयोरप्यकारमात्रं विकरकण इति । यथा तु वार्तिकं तथा क्रैयादिकस्याप्यत्र ग्रहणमिष्यते, यदाह -- इषेस्तकारे श्यन्प्रत्ययात् प्रतिषेधः इति, तन्मते त्रोयऽपि निरनुबन्धकाः ।।

सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ।। 7 - 2 - 49 ।।

भ्रस्जेरेकाच इति । श्रयतेरुगन्तानां च सनि ग्रहगुहोश्च इति प्रतिषेधः प्राप्तः इतरेषां तु नित्यमिट् प्राप्तः, तक्षेदमारभ्यते अर्दिधिषतीति । लघूपधलक्षणे गुणे अजादेर्द्वितीयस्य इति धिस् इत्यस्य द्विर्वजनम्, रेफस्य तु न न्द्राः इति प्रतिषेधः । ईर्त्सतीति । आप्ज्ञप्यृधामीत् तइति ऋकारस्य रपर ईकारः, धकारेण सशब्दस्य द्विर्वचनम्, अत्र लोपोऽभ्यासस्य ।

बिभ्रज्जिषतीति । भ्रस्चो रोपधयो रमन्यतरस्याम् । विभ्रक्षतीति । व्रश्चादिना षत्वम्, षढोः कः सि ।

धिप्सतीति । दम्भ इच्च इतीत्वमित्वं च, हलन्ताच्च इति कित्त्वे नलोपः, पूर्ववदभ्यासलोपः ।

यियविषतीति । ओः पुयण्ज्यपरे इत्यभ्यासस्येत्वम् ।

भृञ् इत्येतस्येति । दीर्घान्तोऽयम् । थथा च भरः इत्यब् भवति ।

सिसनिषतीति । स्तौतिण्योरेव इति नियमादत्र षत्वाभावः । सिषासतीति । षत्वभूते सनि नियमादत्र षत्वम् ।

केचिदत्रेति । ये त्वेतन्न पठन्ति ते उपसंख्यानमारभन्त । तितांसतीति । तनोतेर्विभाषां इति पक्षे दीर्घत्वम् । पित्सतीति । सनि मीमाधु इत्यादिना अच इस्, स्कोः संयोगाद्योः इति सलोपः पूर्ववदभ्यासलोपः । दिदरिद्रा सतीत्येके दिदरिद्रषतीति चेति । इट् पक्षे दरिद्रातेराकारलोपः ।।

क्लिशः क्त्वानिष्ठयोः ।। 7 - 2 - 50 ।।

क्लिशित्वेति । मृडमृद इत्यादिना कित्त्वम् ।

विकल्पः सिद्ध एवेति । उदत्त्वात्स्वरत्यादिसूत्रेण । किमर्थं तर्हि क्त्वाग्रहणम् इत्यत आह - क्लिश उपताप तइत्यस्येति ।।

वसतिक्षुधोरिट् ।। 7 - 2 - 52 ।।

उषित्वेति । पूर्ववत्कित्त्वम्, यजादित्वात्सम्प्रसारणम्, शासिवसि इत्यादिना षत्वम् । वस्तेस्त्विति । वस आच्छादने इत्यस्य यङ्लुग्निवृत्त्यर्थोऽपि शपा निर्द्देशो न भवति, तत्रापि क्त्वानिष्ठयोः सामान्यलक्षणेन इड् भवत्येव - वावसितः , वावसितवान्, वावसित्वा । गणाश्रयत्वात्सम्प्रसारकणाभावः ।।

अञ्चेः पूजायाम् ।। 7 - 2 - 53।।

अञ्चिता अस्येति । मतिबुद्धि इत्यादिना वर्त्तमाने क्तः, नाञ्चेः पूजायाम् इत्युपधालोपप्रतिषेधः, क्तस्य च वर्त्तमाने इति कर्त्तरि षष्ठी ।।

लुभो विमोहने ।। 7 - 2 - 54 ।।

लुभित्वा, लोभित्वेति । रलो व्युपधात् इत्यादिना कित्त्वविकल्पः ।।

सोऽसिचि कृतचृतच्छृदतृदनृतः ।। 7 - 2 - 57 ।।

से इत्यकार उच्चारणार्थः, तअसिचीति प्रतिषेधात् । तेन स्येऽप्ययं विकल्पो भवति । कृती छेदने मुचादिः, कृती छेदने रुधादिः - द्वयोरपि ग्रहणम् । इदित्त्वस्य प्रयोजनमुक्तम् । चृती हिंसाग्रन्थनयोः ऊच्छृदिर्दीप्तिदेवनयोः, तऊतृदिर् हिंसानादरयोः, नृती गात्रविक्षेपे । ईदित्त्वं पूर्ववत् ।।

गमेरिट् परस्मैपदेषु ।। 7 - 2 - 58 ।।

संगंस्यत इति । समो गम्यृच्छि इत्यात्मनेपदम् । गमेरिडादेशस्येति । तेन सञ्जिगंसते इत्यत्र न भवतीति भावः ।

आत्मनेपदेन समानपदस्थस्येति । इह तु जिगमिषितेवाचरति जिगमिषित्रीयत इति बहिरङ्गत्वादात्मनेपदस्य प्रतिषेधाभावः । एतच्च प्रस्नवित्रीयत् , इत्यत्र वार्त्तिककारमेत व्याख्यात्म् । अन्यत्र सर्वत्रैवेष्यत इति । कथं पुनरिष्यमाणोऽपि लभ्यते योगविभागात् । गमः सकारादाविड् भवतीत्येको योगः, ततः परस्मैपदेषु इति द्वितीयो नियमार्थः । लुल्यजातीयचापेक्षत्वान्नियमस्यात्मनेपदविषय इण्निवर्त्तत इति केचिदाहुः । अन्ये मन्यन्ते -- परस्मैपदेष्विति सप्तमीनिर्देशादानन्तर्याश्रयणादयमर्थो भवति - गमेरुत्तरस्य सकारादेरार्धधातुकस्य तिङ्क्ष्वनन्तरेषु यदिड्भवति परस्मैपदेष्वेवेति, ततश्च सङ्गंस्यते इत्यत्रैव व्यावृत्तिः

स्यात्, न सङ्गंसीष्टेत्यत्र । नापि संजिगांत ित्यादौ, शपा व्यावधानात् । एकादेशे नास्ति व्यावधानम् एकादेशः पूर्वविधौ स्थानिवद्भवति तइति स्थानिवद्भावाव्द्यवधानमेव । संजिगंसिष्यत इत्यादौ च नैव स्यात्, तस्मादिष्टिरेवेयम् । अत तेव इष्यत इत्युक्तम् । पदशेषो नाम ग्रन्थविशेषः । तन्तेनेत्यादि । अनन्तरोक्तस्य दूषणम् न पुनरयं पक्षः स्यापितः, वार्त्तिकविरोधात् । यदाह - सिद्धं गमेरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् इति ।।

न वृद्भ्यश्चतुर्भ्यः ।। 7 - 2 - 59 ।।

बहुवचननिर्द्देशाच्चतुर्ग्रहणाच्चाद्यर्थो गम्यते ।

वृत्तिर्वृधिः शृधिः स्यन्दिश्चत्वारोऽमी वृतादयः ।

शृधु शब्दकुत्सायाम् । अन्ये प्रसिद्धाः । उदाहरथणेषु वृद्भ्यः स्यसनोः इति तपरस्मैपदम् ।

चतुर्भ्य इति न वक्तव्यमिति । किं कारणम् इत्यत तथआह - वृद्ग्रहतणं हीति । यदि द्युतादिपरिसमाप्त्यर्थं तत्किमायातं वृतादिपरिसमाप्तेः इत्यत आह -- तदेवतेति । तअगुह्ययमाणविशेषत्वादिति भावः । अवन्तरङ्गमपीति । अन्तरङ्गत्वं विकल्पस्यार्धधातुकमात्रापेक्षत्वात् । अयं तु प्रतिषेधो बहिरङ्गः, सकारादिविशेषापेक्षत्वात्, बहिर्भूतपरस्मैपदापेक्षत्वाच्च । ननु चान्येष्वपि वृतादिषु आर्धधातुकलक्षणोऽपीडन्तरङ्ग एव, अथ तस्य वचनसामर्थ्यातप्रतिषेधः, तर्हि विकल्पस्यापि भविष्यति नैतदस्ति येन नाप्राप्ते तस्य बाधनं भवति, नाप्राप्तिश्चार्धधातुकस्येडित्यस्य, न तूदिल्लक्षणस्य । यदि परम्, परत्वादुदिल्लक्षणमपीटं प्रतिषेधो बाधेत ततदपि न अन्तरङ्गबहिरङ्गयोर्विप्रतिषेधानुपपत्तेः । कथं तर्हि सत्यपि चतुर्ग्रहणे तस्य प्रतिषेधः इत्यत आह - चतुर्ग्रहणे हीति । सति च तस्मिन् चतुर्थ्या प्रतिषेधेन भाव्यमिति प्रतीतिः, इतरथा संख्याश्बदाभावादेकस्य प्रतिषेधाभावेऽपि न कश्चिद्भावधः ।

परस्मैपदेष्वित्येवेति । यद्येवम्, यत्र वृतादिभ्यः परस्यार्धधातुकस्य परस्मैपदमनन्तरं तत्रैव स्यात् - वर्त्स्यतीत्यादौ, विवृत्सतीत्यादौ न स्यात्, शपा व्यवधानात् । तएकादेशेऽपि कृते स्थानिवद्भावाव्द्यवधानमेव, विवृत्सिष्यति, विवृत्सयतीत्यादौ प्रतियक्षमेव व्यवधानम्, कृति परस्मैपदलुकि च परस्मैपरगन्धोऽपि नास्तीति न स्यादेव तत्राह - अत्रापीति । इष्टिरेवेयम् । विवृत्सित्रीयत इत्यादौ चोक्त एव परिहारः ।।

तासि च क्लृपः ।। 7 - 2 - 60 ।।

उदाहरणेषु लुटि च क्लृपः इति परस्मैपदम् । क्लृपेरपीत्यादि । अन्यथा कल्प्स्यतीत्यादावेव स्यात्, न तु चिक्लृप्सिता, चिक्लृप्स त्वमित्यादाविति भावः ।

इह तु न वृद्भ्यः पञ्चभ्यस्तासि च इति वक्तव्यम्, क्लृपिग्रहणं तु शक्यमकर्त्तुम् । न च वृतादिभ्योऽपि तासौ प्रसङ्गः, परस्मैपदाभावात्, आत्मनेपदेन समानपदस्थत्वाच्च ।।

अचस्तास्वत्थल्यनिटो नित्यम् ।। 7 - 2 - 61।।

यस्थलि क्रादिनियमादिट् प्राप्तः स निषिध्यते ।

पञ्चसूत्र्येत आरभ्य तास्वदित्येष डेर्वतिः ।।

उपदेशग्रहोऽप्यत्र वक्ष्यमाणोऽपकृष्यते ।

गुणे नित्ये कृतेऽप्येष ऋदन्ते प्राप्नुयात्कथम् ।।

क्व नित्यमनिट् इत्यपेक्षायां तासेः सन्निधानात्तत्रैवेति विज्ञायते, यद्वापूर्वसूत्रात् तासि इति वर्त्तते । यातेति । तासावनिट्प्रदर्शनार्थमुपन्यस्तम् ।

लूत्वेति । तास्वत् इत्यनुच्यमाने यत्र क्वापि नित्यानिटस्थलि प्रतिषेधः स्यात् । लुनातिश्चायम् श्र्युकः किति इति प्रतिषेधात्किति नित्यानिट्कः । ययिव, ययिमेति । आतो लोप इटि च । अनिड्ग्रहणं नित्यमित्यनेन विशेषणार्थमिति । असत्यनिड्ग्रहणे नित्यमित्यनेन प्रतिषेध तएव विश्ष्येत - नित्यमण्न भवतीति । यद्यप्यत्र विकल्पे न प्रकृतः, तथापीदमेव नित्यग्रहणं पूर्वस्व विधेरनित्यत्वं ज्ञापयेत् । सेड्निवृत्त्यर्थ त्वनिड्ग्रहणं न भवति, कथम् तास्वदित्युच्यते, यथा तासौ न भवति एवं थल्यपीति । न च यस्तासौ सेट् तस्य

थलि प्रतिषेधो भवन् तास्वत्कृतो भवति । विधोता, विधवितेति । स्वरत्यादिसूत्रेण तासाविड्विकल्पितः ।

क्रमेरपि चक्रमिथेति भाव्यम्, न हि तासौ नित्यानिट् क्रमिः, आत्मनेपदे इडभावात्परस्मैपदे सेटत्वात् । तासौ विभाषेटस्थलि नित्यमिडागमो भवतीति ।

यावान्कश्चिदिडभावः प्रतिषेधनिबन्धनो विकल्पनिबन्धनो वा स सर्वः क्रादिसूत्रेण नियम्यते इत्यस्मिन्पक्षे इति भावः । यद् तु प्रतिषेधाधिकारेण क्रादीनामेवेण्न भवति इतिनियमात्प्रतिषेध एव सर्वो निवर्तते, स्वरत्यादि लक्षणस्तु विकल्पो भवत्येव इति पक्षः, तदा विदुधोथ, विदुधविथेत्युभयं भवति । यद्येवम्, नित्यमनिट इति न वक्तव्यम् अस्तुः यस्तासौ विकल्पितेट् तस्याप्ययं प्रतिषेधः ऋतो भारद्वाजस्य इति नियमाद्विकल्प एवावस्थास्यते नैवं शक्यम्, स्वरतौ हि दौषः स्यात् । भारद्वाजपक्षेऽपि तस्य प्रतिषेधात् सस्वर्थेत्येव स्यात् । यदा तु विकल्पितेटस्थलि प्रतिषेधोऽयं न भवति, तदा सस्वर्थ, सस्वरिथेत्युभयं भवति ।

तास्वदिति वतिनिर्देश इति । तास्वदित्यस्य निर्देश इत्यर्थः । तास्वदित्यनुच्यमाने प्रकृतस्य तासीत्यस्यानुवृत्तावप्येतावदेव लभ्येत - तासौ नित्यमनिटस्थलीण् न भवतीति, ततश्च यस्तासावसन, असत्त्वादेव नित्यानिट्, तस्यापि प्रसज्येत ।

तास्वदित्युच्यमाने तु वतेः सादृश्योगोचरात् ।
यथाभूतस्य तासौ नेट् तथाभूतस्य थल्यपि ।।
इटा न भाव्यमित्येष दोषो नैव प्रसज्यते ।
इटस्तास्यसतो धातोर्निषेधे विहिते थलि ।
अभावः सदृशो न स्यात् थलि तास्यसतो भवेत् ।।

अधसिथेति । स्थानिवद्भावात् इडत्त्यर्तिव्ययतीनाम् इत्येवैष सिद्ध इत्याहुः । थउत्तरसूत्रेऽपीति । एतेनोत्तरार्थं तास्वदित्युच्यत तइति दर्शयति । अदादेशो हीति । ननु चास्य स्थानी तासावस्ति, अस्ति चानिडिति तदादेशस्यापि स्थानिवद्भावात् सत्त्वानिट्त्वे स्याताम् नैतदस्ति, स्थानिवद्भावः शास्त्रीयेषु प्रवर्त्तते, न च तासौ सत्त्वं नाम शास्त्रीयं कार्यम् ।।

उपदेशेऽत्वतः ।। 7 - 2 - 62 ।।

अनजन्तार्थ आरम्भः । इयष्टेति । लिट्यभ्यासस्योभयेषाम् इति अभ्यासस्य सम्प्रसारणम्, व्रश्चादिष्त्वम्। चक्रर्षिथेति । कृष विलेखने । भवत्ययं गुणे कृते सम्प्रत्यकारवान्, न तूपदेशे । जिग्रहिथेति । सनि ग्रहगुहोश्च इतीट्प्रतिषेधाद्भावत्ययं सनि नित्यानिट्, न तासौ ।

आनञ्चिथेति । अत आदेः तस्मान्नुड्द्विहलः, स्वरत्यादिसूत्रेण तासौ विकल्पितेडयम् ।।

ऋतो भारद्वाजस्य ।। 7 - 2 - 63 ।।

सस्मर्थेति । स्मृ चिन्तायाम् । दध्वर्थेति । ध्वृ हूर्छने ।

सिद्धे सतीत्यादि । अदन्तानां वृङ्वृञावुदात्तौ । तत्रापि वृङ्स्थल् न सम्भवति, आत्मनेपदित्वात् । वञस्तु ववर्थेति निपातनाद्भाषायामिटां भाव्यम् । तस्मात्तयोरिट्प्रतिषेधार्थं तावदेतन्नोपपद्यते । अन्येऽदन्तास्तासौ नित्यानिटः इति अचस्तास्वत् इत्यनेनैव सिद्धः प्रतिषेधः । ननु च परत्वाद् गुणे कृते रपरत्वे चानजन्तत्वान्न सिद्ध्यति, पूर्वसूत्रेणाप्यसिद्धिरेव, न ह्यकारान्ता उपदेशेऽत्वन्तः, तस्मान्नियमानुपपत्तिः अस्तु तर्हि दध्वर्थेत्यादौ विध्यर्थमेव । यद्येवम्, स्थायापचिप्रभृतिषु पूर्वयोगाभ्यां नित्यं थलि प्रतिषेधप्रसङ्गः, जहर्थेत्यादौ भारद्वाजस्येति वचनाद्विकल्पेप्रसङ्गः एवं अचस्तास्वत् इत्यत्रैव भारद्वाजग्रहणं करिष्यते, तदेवानन्तरयोगेऽप्यनुवर्तिष्यते, इह तु निवर्तिष्यते सत्यम्, अयं तु भारद्वाजः स्वस्मान्मतात्प्रच्यावितो भवति । तस्य मतम् - ऋकारान्तदन्यत्र ययिथ, पेचिथेतीड्भवति, अकारान्ते नेति । त्वदुक्ते तु न्यासे मतविपर्ययः कृतो भवति । एवं तर्ह्युपदेशग्रहणस्य अचस्तास्वत् इत्यत्रापकर्षादुपदेशेऽजन्तत्वात्सिद्धः प्रतिषेध इति मन्यते । ऋत एव भारद्वाजस्येति । विपरीतस्तु नियमो न भवति - ऋतो भारद्वाजस्यैवेति । यदि स्यान्नियमाश्रयणनर्थकं स्यात्, पूर्वोक्तेन प्रकारेण विध्यर्थत्वमेवाश्रयणीयं स्यात् । पूर्वयोर्योगयोरिति । ऋकारान्तेषु अनन्तरस्य विधिर्वा भवति इति न्यायस्य तावदसम्भवः । यस्य तर्हि प्रसङ्गः अचस्तास्वत् इति, तस्यैव नियमो युक्तः, तत्कथं पूर्वयोर्योगयोर्द्वयोरपि विकल्पः एवं मन्यते - द्वयोरनन्तरमस्यारम्भात्तासौ नित्यमनिटां मध्ये ऋत एव भारद्वाजस्य
नान्येषाम् - इत्येवं सामान्याकारेण नियम आश्रयणीय इति । तथा हि सतीति । असति तपरकरणे ॠकारान्तनामप्यत्र ग्रहणं स्यात्, तेषां च तासौ सिद्धत्वाद् अतस्तास्वत् इत्यस्याप्रसङ्गे विध्यर्थमेवेदं स्यात्, न ह्रस्वग्रहणेन नियमार्थम्, विधिनियमसम्भवे विधेरेव ज्यायस्त्वादित्यर्थः ।।

विभाषा सृजिदृशोः ।। 7 - 2 - 65 ।।

सस्नष्ठ, दद्रष्टेति । सृजिदृशोर्झल्यमकिति, पूर्ववत् षत्वम् ।।

इडत्त्यर्त्तिव्ययतीनाम् ।। 7 - 2 - 66 ।।

अत्र इड्ग्रहणं विस्पष्टार्थमिति । अथ विकल्पे प्राप्ते नित्यार्थ कस्मान्न भवति तत्राह - विकल्पविधाने हीति । एवमपि प्रतिषेधः प्रकृतः, तन्निवृत्त्यर्थमिड्ग्रहणं स्यात् इत आह - प्रतिषेधविधाने इति ।

वस्वेकाजोद्घसाम् ।। 7 - 2 - 67 ।।

वसु इत्यविभक्तिको निर्द्देशः । वसोरित्यर्थः । कृतद्विर्वचनानामिति ।

कथं पुनरविशेषोक्तावेष विशेषो लभ्यते एकाज्ग्रहणसामर्थ्यात् । न हि कश्चिचदकृते द्विर्वचनेनैकाजस्ति यन्निवृत्त्यर्थमेकाज्ग्रहणं स्यात् । चिरिजिरिचिकाशिभ्यः कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थम् इत्यामा भवितव्यमिति वसोरसम्भवः । ऊर्णोतेस्तु णुवद्भावादेकाज्ग्रहणोनानिवृ्त्तिः । ननु च जागर्त्तिरस्ति उषविदजागृभ्योऽन्यतरस्याम् इत्यामो विकल्पितत्वात् वेदेऽपि - जागृवांसो अनुग्मन्निति द्विर्वचनप्रकरकणे छन्दसि वेति वक्तव्यम् इति द्विर्वचनाभावः, नैकमुदाहरणमेकाज्गरहणं प्रयोजयति । यद्येतावत्प्रयोजनं स्यात् जागर्तेर्न इत्येव ब्रूयात्, लधीयसी हि साक्षात्प्रतिषेधप्रतिपत्तिः । यदि वा

न्यायसिद्धोऽयमर्थः । तथा हि द्विर्वचनस्यावकाशः - पंपाच, इटोऽवकाशः यत्र कृते द्विर्वचन एकाच् -- पेचिवान्, आदिवान् बिभिद्वानित्यादौ तूभयप्रसङ्गे नित्यत्वाद् द्विर्वचनम् ।

कादिनियमात्प्राप्त इति । नेड्वशि कृति इति प्रत्ययाश्रयस्य प्रतिषेधस्य सर्वत्र भावात्कादिनियमानेव सर्वत्र वसोरिटः प्राप्तिः ।

आद्ग्रहणमनेकाजर्थमिति । ननु द्विर्वचने आकारलोपे सति तेषामप्येकाच्त्वादेव सिद्धम् अत आह - द्विर्वचने हीति । इण्निमित्त आकारलोपो नासति तस्मिन्भवति, ततश्चानेकाच्त्वमित्यर्थः ।

अथाप्याम्न क्रियत इति । आत औ णलः इत्योकारे विधातव्ये औकारविधानेन ज्ञापितमेतत् -- दरिद्रातेरनित्य आमिति । तेनायमभ्युपगमः ददरिद्रवानिति, नेड्वशि कृति इति प्रतिषेध एव तत्र भवति ।

अथ घसिग्रहणं किमर्थम्, यावता द्विर्वचने कृते घसिभसोर्हलि च इत्युपधालोपे सत्येकाच्त्वादेव सिद्धम् अत आह - घसेरपीति । परत्वादिति । नित्यत्वाच्चेत्यापि द्रष्टव्यम् तस्य हल्यपि विधानात् । अनष्कत्वादिति । स्थानिवद्भावोषऽपि नास्ति, हल्निमित्तत्वादुपधालोपस्य । क्रियमाणे तु घसिग्रहणे नायं दोष इत्याह - क्रियमाणे त्विति ।।

भविभाषा गमहनविदविशाम् ।। 7 - 2 - 68 ।।

जध्निवान्, जघन्वानिति । हो हन्तोर्ञ्णिन्नेषु । अभ्यासाच्च इति कुत्वम् ।

विशिना तौदादिकेनेति । यद्यप्यादादिकेन हन्तिना साहचर्यमस्ति, तथापि शब्दपरविप्रतिषेधाद्विशिसाहचर्यमेव व्यवस्थापकमिति भावः । ज्ञानार्थस्य त्विति । सत्ताविचारणार्थयोस्त्वात्मनेपदित्वात् क्वसावसम्भव एवेति भावः । विविद्वानिति । वूर्वविदिट्प्रतिषेधः ।.

सनिससनिवांसम् ।। 7 - 2 - 69 ।।

क्वसोश्छान्दसत्वात्, आनुपूर्व्याश्च विवक्षितत्वाच्छन्दस्येवैतन्निपातनम् ।।

ऋद्भनोः स्ये ।। 7 - 2 - 70 ।।

स्वरत्यादिसूत्रे यदुक्तम् - स्वरतेरेतस्माद्विकल्पादित्यादि, तदेव स्मारयति - स्वरतेर्वेट्त्वादिति । वाविकल्पित इड्यस्य स वेट्, तस्य भावो वेट्त्वम्, स पुनर्विकल्पितेट्सम्बन्धः ।।

यमरमनमातां सक्त ।। 7 - 2 - 73 ।।

व्यरंसीदिति । व्याङ्परिभ्यो रमः इति परस्मैपदम् ।

युक्तमत्र द्विवचनबहुवचनयोरुदाहरणम्, तत्र हि संगिटोः सतोरस्ति विशेषः, एकवचने त्क्युक्तम्, विशेषाभावात् तत्राह - यमादीनामिति । ह्म्यन्तक्षण इत्यत्रापीटीति वर्त्तते, अपासीदित्येतत्तु प्रक्रमाभेदायोदाहृतम्, नत्वत्र विशेषोऽस्ति । ननु चात्रापि स्वरे विशेषोऽस्ति - मा हि मासीदिति, इट्यसत्याद्युदात्तं पदं स्यात्, सति तु तस्य सिज्भक्तत्वाच्चित्स्वरेणोदात्तत्वे एकादेश उदात्तेनोदात्तः इत्यन्तोदात्तं पदं भवति, तत्र आदिः सिचोऽन्यतरस्याम् ित पक्षे आद्युदात्तत्वम्, पक्षेऽन्तोदात्तत्वम् नैषोऽस्ति विशेषः, अनिटः सिचः पक्षे उपसंख्यानम् इति वचनान्म हि कार्षमित्यत्र यथा पक्षे आद्युदात्तत्वं पक्षे चान्तोदात्तत्वं च भवति, एवमत्रापि भविष्यति । आयंस्तेति । समुदाङ्भ्यो यमोऽग्रन्थे इत्यात्मनेपदम् । अनंस्तेत्यत्र कर्मकर्त्तरि न दुहस्तनुनमां यक्चिणौ इति चिणः प्रतिषेधः ।।

स्मिपूङ्रञ्ज्वशां सनि ।। 7 - 2 - 74 ।।

ऋ इति धातोर्ग्रहणम्, न ऋकारान्तनाम् उत्तरत्र किरादीनामिड्विधानात् । पिपविषय इति । ओः पुयण्ज्यपरे इत्यभ्यासस्येत्वम् । अञ्जिजिषतीति । अजादेर्द्वितीयस्य इति जिशब्दस्य द्विर्वचनम्, नकारस्तु न द्विरुच्यते, न न्द्राः इति प्रतिषेधात् ।।

किरश्च पञ्चभ्यः ।। 7 - 2 - 75 ।।

किरः इति व्यत्येनैकवचनम् । पञ्चभ्यः इति बहुवचनादाद्यर्थावगतिः । कृगृदृङ्धृङ्पृच्छतयः तुदादिषु किरादयः । पिपृच्छिवतीति । रुदविद इत्यादिना सनः कित्त्वम् । ग्रहिज्यादिसूत्रेण सम्प्रसारणम् ।

किरतिगिरत्येरिति । शेषाणां त्वनुदात्तत्वात्प्रतिषेधः । दीर्घत्वं नेच्छन्तीति । इष्टिरेवेयम् ।।

रुदादिभ् सार्वधातुके ।। 7 - 2 - 76 ।।

रुदिस्वप्श्वसनिजक्षिरदादिषु रुदादयः । उभयनिर्देशे पञ्चमीनिर्द्देशो बलीयान् इति रुदादिभ्यः इति पञ्चम्या सार्वधातुके इति सप्तम्याः षष्ठी प्रकल्प्यते । सप्तमीनिर्देशस्तूत्तरत्रोपयोगं यास्यति । प्राणितीति । अनितेः इति णत्वम् ।

स्वप्तेति । अन्येभ्यस्तु परस्यार्धधातुकस्यैटा भवितव्यम् ।।

ईशः से ।। 7 - 2 - 77 ।।

ईश ऐश्वर्ये आदादिकः । से इत्यविभक्तिको निर्द्देशः । इशिष्वेति । सवाभ्यां वामौ । एकदेशविकृतस्यानन्यत्वात् सेशब्द एवायम् ।।

ईडजनोर्ध्वे च ।। 7 - 2 - 78 ।।

ईड स्तुतौ अदादिः । छान्दसत्वाच्छ्यनो लुगिति । भाषायां तु जायसे - इत्यत्र नित्यत्वात् श्यनि कृते तेन व्यवधानादिडभावः ।

जन जनने इत्यस्यापीति । नन्वसौ परस्मैपदी तत्राह - तस्य कमव्यतिहार इति । यदि तर्हि तस्याप्यात्मनेपदं सम्भवति, तस्यैव ग्रहणं प्राप्नोति, निरनुवन्धकत्वात् ईडिना साहचर्यादात्मनेपदिनोऽपि ग्रहणं भविष्यति ।

तदर्थे केचिदिति । ये त्वेवं न पठन्ति, ते चकारेण कृत्स्नमेव पूर्वसूत्रमनुवर्त्तयन्ति । सकारादेरिति । स्
इति सप्तम्या लुका निर्द्देशात्तदादिविधिः ।
यदि तर्हि ईशेरपि ध्वे शब्दे इडागतो भवति, योगाविभागो न कर्त्तव्यः, इडीशजनां सेध्वयोः इति वक्तव्यम्, एवं हि पृथग्विभक्तिर्नोच्चारयितव्या भवति,
चकारश्च न कर्त्तव्यः अत आह - ईशीड्जनां सेध्वयोरिति । लङि ध्वमित्यस्य न भवतीति । लोट्यपि तर्हि ध्वमित्यस्य न प्राप्नोति तत्राह - लोटि पुनरिति ।।
लिङः सलोपोऽनन्त्यस्य ।। 7 - 2 - 79 ।।
सार्वधातुके यो लिङिति । नैषा परसप्तमी, सार्वधातुकपरस्य लिङोऽसम्भवात् । तस्मान्निर्धारणे सप्तमी । जातावेकवचनम्, सार्वधातुकेषु मध्ये यो लिङ्
सार्वधातुकसंज्ञकस्तस्येत्यर्थः । कुर्यादिति । अत उत्सार्वधातुके इत्युत्त्वम्, ये च ित्युकारस्य लोपः । अत्र यासुट्सुटोः सकारस्य लोपः । कुर्युरिति ।
झेर्जुम्, .यासुट्सकारलोपः, उस्यपदान्तात् इति पररूपत्वम् । कुर्वीतेति । सीयुट्सुटोः सलोपः । कुर्वीन्निति । झस्य
रन्, अत्र सीयुट एव लोपः ।।
अतो येयः ।। 7 - 2 - 80 ।।
सार्वधातुके इति प्रकृतमर्थात् षष्ठ्यन्तं सम्पद्यते, तदाह -- अकारान्तादङ्गादुत्तरस्य सार्वधातुकस्येति । अवयवसम्बन्धे चैषा षष्ठी, सार्वधातुकस्यावयवस्य
याशब्दस्येत्यर्थः । इय् इत्ययमिति । सूत्रे त्वाकार उच्चारणार्थः । पचेदिति । इयादेशे कृते शवकारेण सहाद्गुणः, वलादिषु वलि लोपः ।
यकारस्य च श्रवणम् - पचेयुः, पचेयमित्यादौ । पचेयुरित्यत्रेत्यादि । पररूपस्यावकाशः चिनुयुः, सुनुयुः, इयादेशस्य तु पचेदित्यादि,
पचेयुरित्यत्रोभयप्रसङ्गे परत्वादियादेशः । यदि पूर्वमेव पररूपं स्यात्, याशब्दाभावादियादेशो न स्यात् । एवमतो लोपस्यापि बाधकः स्यादिति । एतच्च मध्येऽपवादाः इति न्यायमनाश्रित्योक्तम् । तदाश्रयणे त्वतो लोपस्यैव बाधकः स्यात् । दीर्घस्तु परत्वात्स्यादेव । स्वादेतदेवमित्यादि । दीर्घविधौ
तुरुस्तुशम्यम्ः सार्वधातुके इति प्रकृतम्, मूसुवोस्तिङि इति च ।
योय इत्यविभक्तिको निर्देश इति । येयः इत्यस्मिन्समुदाये या इत्युविभक्तिको निर्देश इत्यर्थः । य इति वेति । याशब्दात्षष्ठी, आतो धातोः इत्याकारलोपः ।
केचित्तु -- अतो यास् इति सकारान्तानुकरणं पठन्ति ।।
आतो ङितः ।। 7 - 2 - 81 ।।
आकारमात्रस्य ङितोऽसम्भवाद् आतः ङितः इति व्यधिकरणे षष्ठ्यौ । ङितोऽवयवस्यात् इत्यर्थः । उदाहरणेषु स्वरितत्वादात्मनेपदम् । ननु
गाङ्कुटादिसूत्रे परत्र परशब्दप्रयोगादध्यादह्रियमाणो वतिः सप्तमीसमर्थादध्याहर्तव्यः - हितीव ङिद्वदिति, अन्यथा चुकुटिषंतीत्यत्र सनो
ङित्वादात्मनेपदप्रसङ्गादित्युक्तम् । सार्वधातुकमपित् इत्यत्रापि तदेवानुवर्त्तते, ततश्च पूर्वस्य कार्य प्रत्येव सार्वधातुकस्य ङित्त्वम्, न स्वकार्य
प्रतीत्ययुक्तान्युदाहरणानि लङ्लृङोस्तु युक्तमुदाहर्तुम् - अपचेताम्, अकरिष्येतामिति अस्ति ह्यत्रापि स्थानिवद्भावेन ङित्त्वम् अत आह -
सार्वधातुकमपिदित्यत्रेत्यादि ।
ममाते, मिमाथे इति । असति तपरकरणे श्नाभ्यस्तयोरातः इति लोपात्परत्वादयमेव विधिः स्यात् ।।
आने मुक् ।। 7 - 2 - 82 ।।
अत्र आने इति सप्तम्यचरितार्था पूर्वत्र कृतार्थायाः अतः इति पञ्चम्याः षष्ठी प्रकल्पयति तस्मिन्निति निर्दिष्टे पूर्वस्य इति , तत्र विशेषणविशेष्यभावे
कामचारादङ्गेनाद्विशेष्यते, न त्वाताऽङ्गमित्यभिप्रायेणाह - अकारमात्रभक्तोऽयमिति । अङ्गस्यावयवो योऽकारस्तस्य मुगित्यर्थः । किमेषं सति भवति
इत्याह - अदुपदेशाग्रहणेनेति । उपदेशे अत् अदुपदेशः, यदि त्वकारान्ताङ्गभक्तः स्यात्, ततस्तदेशाह्गं न व्यावदध्यात्, तदवयवं त्वकारं व्यवदधात्येवेति
स्वरो न स्यात् । न च स्वरविधौ व्यञ्जनमविद्यमानवत, किं कारणम् हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवदिति परिभाषाया भाष्यकारेण शिक्षितत्वात् ।
अन्यथाऽग्निचिद्वानित्यादौ ह्रस्वनुड्भ्यां मतुप् इति स्वरप्रसङ्गात् । यदि पुनरयमभक्तो मकारो विकरणवन्मध्ये क्रियते, अभक्ते मुकि स्वरो न स्यादित्येव ।
यदि पुनरयं परादिझ क्रियेत - आनस्य मुडिति, परादित्वे दीर्घत्वप्रसङ्गः - पचमान इति अतो दीर्घो यञि इति दीर्घत्वं प्राप्नोति पाक्षिक एष दोषः ।
कतरस्मिन्पक्षे यदि सार्वधातुक इत्येव तत् । अथ ङीत्येव तत्तदा न दोषः । तदयं भक्तस्तत्रापि पूर्वान्तः, तत्राप्यकारस्य मुगिति स्थितम् । यद्येवमिति ।
यद्यकारमात्रभक्तत्वात्तद्ग्रहणेन गृह्यत इत्यर्थः । अध्यर्द्धमात्र इति । अर्धमधिकं यस्याः सा अध्यर्धा, अध्यर्धा मात्रा यस्यासावध्यर्धमात्रः ।
लसावंधातुकानुदात्तत्वमपि तर्हि न प्राप्नोतीति । यद्विधावपि तपरनिर्द्देशात् । तत्राह - उपदेशग्रहणमिह क्रियत इति । तथा चेति । यदा द्विमात्रत्वेऽपि
भवति, तदा का शङ्काऽध्यर्धमात्रत्वे
इति भावः ।।
ईदासः ।। 7 - 2 - 83 ।।
आसः इति पञ्चम्यचरितार्था पूर्वत्र कृतार्थायाः आने इति सप्तम्याः षष्ठीं प्रकल्पयति ।।
अष्टन आ विभक्तौ ।। 7 - 2 - 84 ।।
सौत्रत्वान्निर्द्देशस्य अल्लोपो न कृतः ।

व्यक्तिनिर्देशोऽयमिति । यथाश्रुतनिरनुनासिकाकारव्यक्तिर्निर्द्दिश्यत इत्यर्थः । जातिनिर्देशस्तु दुष्ट इत्याह -- आकृतिनिर्देशो त्विति । आकृतिर्जातिः, न संस्थानम् । जातिनिर्द्देशे हि शुद्धाया जातेरादेष्टुशमक्यत्वात्तदाधारभूतानां व्यक्तीनां विधानम् । तत्र यद्यपि दीर्घोच्चारणसामर्थ्यान्न ह्रस्वप्लुतव्यक्तीनां प्रसङ्गः, दीर्घव्यक्तयस्तु सर्वाः प्रसक्ताः, तत्रान्तर्यतोऽनुनासिकव्यक्तिरेव स्यात्, तस्याः पूर्वेण सह सवर्मदीर्घोऽप्यनुनासिक एव स्यात् । विकल्पेन चायमित्यादि । यथा च दीर्घग्रहणं कृतात्वनिर्द्देशश्चास्मिन्नर्थे लिङ्गं तथा तत्रैव व्याख्यातम् । तदन्तविधिश्चात्रेष्यत इति । अङ्गाधिकारे तस्य तदुत्तरपदस्य च इति वचनात् । एकवचननिर्देशात्स्वरूपस्य ग्रहणं नार्थस्य तेनोपसर्जनेऽप्यष्टनि भवति, तत्रापि विकल्पितत्वात्प्रियाष्टा, प्रियाष्टानौ, प्रियाष्टान इत्यपि भवति । तत्रापि भसंज्ञाविषये आत्वपत्रे आतो धातोः इत्यकारलोपमिच्छन्ति - प्रियाष्टः पश्येत्यादि, आत्वाभावपक्षे त्वल्लोपे ष्टुत्वम् - प्रियाष्ट्न इत्यादि भवति ।।

रायो हलि ।। 7 - 2 - 85 ।।

मृजेर्वृद्धिरित्यतः प्राग्विभक्त्यधिकार इति । पूर्वसूत्रान्ते ग्रन्थोऽयं पठितव्यः ।

युष्मदस्मदोरनादेशो ।। 7 - 2 - 86 ।।

युष्मदस्मदिति । पञ्चम्यां अत् इति भ्यसोऽद्भावः ।

हलीत्यधिकारादप्यत्र न स्यादिति । न चादेशो हलादिरस्ति, भ्यसोभ्यम् ित्ययं तु अभ्यमादेशः । उत्तरत्रेति । योऽचि इति यत्वमादेशे मा भूत् त्वमहमित्यादौ शेषे लोपः इति शेषव्यवस्थार्थं च । तदिहैव क्रियत इति । लघवे विशेषाभावात् ।।

द्वितीयायां च ।। 7 - 2- 87 ।।

उदाहरणेषु ङे प्रथमयोरम् इति विभक्तेरम्भावः ।।

प्रथमायाश्च द्विवचने भाषायाम् ।। 7 - 2 - 88 ।।

युवयोरिति । ननु च योऽचि इति यत्वमत्र बाधकं भविष्यति प्रथमाद्विवचनेऽपि तर्हि शेषेलोपो बाधकः स्यात् । अथ तस्य वचनाद्बाधः यत्वस्यापि बाधः स्यात् । पुरस्तादपवादन्यायेन वा यत्वस्यैव बाधः स्यात् ।।

योऽचि ।। 7 - 2 - 89 ।।

शक्ययमकर्तुमचीत्येतदिति । कथम् अनादिष्टायां विभक्तौ विधीयमानं यत्वमुत्सर्गः, तत्रैव हलादावात्वमपवादः । त्वत्, मदिति । एकवचनस्य च इति ङसेरदादेशः ।।

शेषे लोपः ।। 7 - 2 - 90 ।।

उपयुक्तादन्यः शेषः । तस्यैव संग्रहश्लोकः -- पञ्चम्याश्चेत्यादि । पञ्चम्यादीनां सम्बन्धीनि यान्यद्विवचनानि -- अयं तावच्छेषः, तत्र शेषे लोपो विधीयत इति । अद्विवचनानि इत्येतद्भाषापेक्षं द्रष्टव्यम् । छन्दसि तु - युवं वस्त्राणीति द्विवचनमपि शेष एव ।

शेषग्रहणं विस्पष्टार्थमिति । कथम् विभक्तिमात्रे लोपः, तस्यानादिष्टायां विभाक्तौ यत्ववमपवादः । अस्यापि हलादावात्वमपवाद इत्यसङ्करेणात्त्व - य - लोपः सिध्यन्ति । अनादेशग्रहणं तु क्रियमाणेऽज्ग्रहणे यत्वलोपयोर्विषयविभागार्थं कर्त्तव्यमेव । सन्निपातलक्षण इति । विभक्तिसन्निपातकृतं युष्मदस्मदोरकारान्तत्वम् । तद्यदि टोपो निमित्तं स्यात्, तत्सन्निपातं विहन्यात् । एतेच्च त्यदादिशब्दवत्स्त्रीलीङ्गत्वमभ्युपेत्योक्तम्, इदानीं च लिङ्गमेव नास्तिं इत्याह - जलिङ्गे वेति ।

केचित्त्विति । । टाब्निवृत्त्यर्थमेव त एवमिच्छन्ति । कथमिति । यत्राकारो यकारश्च न विहितः स शेषः, तत्र विधीयमानो लोपः अलोऽन्त्यसाय इत्यन्तस्यैव युक्त इति प्रश्नः । अन्तरोक्तं शेषग्रहणस्य षैयर्थ्यं हृदि कृत्वाऽऽह -- वक्ष्यमाणेति । आदेशा वक्ष्यमाणा यस्य स वक्ष्यमाणादेशः । कः पुनरसौ इत्याह - ते चेति ।

मपर्यन्ताद्योऽन्यः स शेष इति । स च टिरेव । तत्रायं लोप इति स्थानिनोऽधिकरणत्वविवक्षया सप्तमी । किमर्थं पुंनर्लोप इत्युच्यते, न त्यादद्यत्वेनैष सिद्धम् न सिध्यति, द्विपर्यन्तास्त्यदादयः इति वचनात् । यदा चोपसर्जने युष्मदस्मदी, तदा त्यदाद्यत्वं न सिध्यति । टिलोपपक्षे तु सुतरामारम्भणीयम् ।।

णपर्यन्तस्य ।। 7 - 2 - 91 ।।

मपर्यन्तस्य इत्यवयवस्य स्थानित्वेन निर्देशाद्युष्मदस्मदोरित्यवयवषष्ठी विज्ञायते - मः पर्यन्तोऽवधिर्यस्य स मपर्यन्तः । यद्यपि द्वयोर्द्वौ मपर्यन्तौ, तथाप्यभेदक्विक्षयैकवचनम् ।

मपर्यन्तस्यैति किमिति । समुदाययोरप्यादेशे आदेशानामप्यदन्तत्वाद्दोषाबाव इति प्रश्नः । साकच्कस्य मा भूदिति । तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात्प्रसङ्गः । सर्वस्य मा भूदिति । साकच्कस्य मा भूदिति तु नोक्तम्, यस्मादकज्विधावुक्तम् - त्वया, मया, त्वयि, मयि इत्यत्र सुबन्तस्य प्राक्टेरकच् इति । अनिष्टं रूपं स्यादिति । त्व्या, म्येत्यनिष्टं रूपम् ।

अथ परिग्रहणं किमर्थम्, मान्तस्येत्येवोच्येत, युष्मदस्मदोर्यो मान्तो भागास्तस्येत्यर्थः तत्राह -- मान्तस्येत्येव सिद्धेऽस्मिन्निति । अस्मिन् साकच्कस्या देशाभावे, युवकाम्, अवकामिति रूपे वा । अवधिद्योतनार्थमिति । पर्यन्तशब्देनावधिं द्योतयामीत्यर्थः । अन्यथा मान्तस्येत्युच्यमाने युष्मदष्मदोः समानाधिकारणं विशेषणं सम्भाव्येत, प्रत्येकसम्बन्धाच्चैकवचनम्, ततश्च यत्र मान्ते युष्मदस्मदी तत्रैवादेशाः स्युः । अथापि वैयधिकरण्यमाक्षीयते, तथापि चत्र मान्ते तत्र भेदाभावादादेशा न स्युः । व्यपदेशिवद्भावोऽपि प्रातिपदिकेन प्रतिषिद्धः । पर्यन्तशब्देन त्ववधिद्योतने तदुपादानसामर्थ्याद्युष्मद्स्मदवयवेऽपि युष्मदस्मच्छब्दौ वर्तेते इति सर्वत्रादेशसिद्धिः । वैयधिकरण्येन वा सम्बन्धे परिग्रहणसामर्थ्याद् व्यपदेशिवद्भावोऽप्रतिपदिकेन इति प्रतिषेधाप्रवृत्तौ

मान्तयोरप्यादेशासिद्धिः ।

अपर आह - सति शेषे पर्यन्तशब्दः, तेन सामानाधिकरण्यासम्भावद्वैयधिकरण्येनैवान्वयः । यदा तु मान्ते युष्मदस्मदी तदा नैवादेशा भवन्ति, तदिदमुक्तम् मान्ते मा भूद्यदा तदेति । यदा युष्मदस्मदी मान्ते तदैव मा भूत्, तदापि वा मा भूदित्यर्थः । क्व पुनर्मान्ते युष्मदस्मदी इत्याह - ण्यन्तयोरिति । युष्मानाचष्टे युष्मयति, अस्मानाचष्टे अस्मयति णिचीष्ठवद्भावे टिलोपः, प्रत्ययोत्तरपदेयोश्च इत्यत्रैकवचनाधिकारात्त्वमादेशाभावः । क्विपि णिलोपः । ननु च विभक्तावादेशैर्थाव्यम्, अत्र च णिलोपस्य स्थानिवद्भावाव्द्यवधानम् अत आह - स्थानिवत्त्वं चेति । णेः क्वौ लुप्तत्वान्न तल्लोपस्यात्र स्थानिवत् इत्येवमिति भाष्वकारः ।

तत्र यो मन्यते - मान्तयोरप्यादेशा भवन्तीति , तन्मतेनोदाहरणानि । कृदन्तत्वाद्विभक्तयः, एकदेशविकृतस्यानन्यत्वाद्युष्मदस्मदाश्रयविभक्त्यादेशाः प्रकृत्यादेशाश्च त्वादयः तत्र त्वाहौ सौ इत्यादिविषये ते भवन्ति । अन्यत्रादेशविभक्तौ लोपः, अजादौ यत्वम्, हलादावात्त्वम् -- त्वम्, युषाम्, युयम्, युषाम्, युषाम्, युषान्, युष्या, युषाभायम्, युषाभिः, तुभ्यं युषाभ्यां युषभ्यम्, युषत्, युषाभ्याम्, युषत्, तव, युष्योः, युषाकम् युष्यि, युष्यो, युषासु । एवमस्मदोऽपि द्रष्टव्यम् । मपर्यन्तापेक्षया तु शेष आश्रीयमाणे, मात्परस्याभावाल्लोपाभावात् युष्मभायम्, युष्मदित्यादि भवति ।

यदा तु त्वामोचष्टे, मामाचष्ट इति विगृह्य क्विप् क्रियते, तदा प्रत्ययोत्तरपदयोश्च इति त्वमयोः कृतयोः प्रकृत्यैकाच् िति प्रकृतिभावादसति टिलोपे अत उपधायाः इति वृद्धिः । यदि निष्ठितमङ्गं ततो वददध्यभावः । त्वद्स् त्वाद्स्, मद्स् चमादस् इति स्थिते मपर्यन्ताभावात् त्वाहौ सौ इत्यादेरप्रवृत्तौ वृद्धिपक्षे त्वामिति भवति । पक्षान्तरे तु त्वमिति । द्विवचने तु त्वाम्, जसि त्वम् । द्वितीयादिषु तु त्वाम्, त्वाम्, त्वान्, त्वया, त्वाभ्याम्, त्वाभिः, त्वम्, त्वाभ्याम्, त्वभ्यम्, त्वत्, त्वाभ्याम्, त्वत्, त्व, त्वयोः, त्वाकम्, त्वयि, त्वयोः त्वासु । एवमस्मदोऽपि ।

यदा तु द्विवचनान्ताण्णिच् क्रियते, तदापि युष्मयत्यस्मयतीति णिचि भवति, विभक्त्यभावाद्युवावयोरभावः । एकार्थत्वाभावात् प्रत्ययोत्तरपदयोश्च इत्यस्याप्यभावः । विभक्तौ तु युवावादेशौ । त्वहौ सो इत्यादिविषये तु त एव भवन्ति । ये तु मान्तयोरादेशौ नेच्छन्ति तेषां सौ, शेषेलोपपक्षे -- युषम्, असमिति भवति । पक्षान्तरे तु युष्मम्, अस्ममिति । एवमन्यत्रापि द्रष्टव्यम् । गहनोऽयं प्रकियातर्क इत्युपरम्यते ।।

युवावौ द्विवचने ।। 7 - 2 - 82 ।।

द्विवचन इत्यर्थग्रहणमिति । वक्तीति वचनम्, कृत्यल्युटो बहुलम्, इति कर्त्तरि ल्युट्, द्वयोरर्थयोर्वचने

द्विवचने । प्रथमाद्विवचनान्तं चैतत्, तदाह - द्विवचने युषमदस्मदी इति । के पुनस्ते इत्याह - द्व्यर्थाभिधानविषये इति । एतच्च वचनग्रहणाल्लभ्यते । कथम् द्वित्व इति वक्तव्यम्, विभक्तावित्येव, द्वित्ये या विभक्तिस्तस्यामित्यर्थः ।

अर्थग्रहणे सति यदिष्टं सम्पद्यते, तद् दर्शयति - यदेति । पारिभाषिकस्य द्विवचनस्य ग्रहणे तस्यास्मिन्विषयेऽभावद्युवावादेशौ न स्यातामित्यव्याप्तिः स्यादिति भावः । आदेशान्तरेण न बाध्येते इति । बाधस्तु परत्वादित्यत्रैव वक्ष्यते । अतिक्रान्तं युवामिति सौ जसि चादेशान्तरेण बाधः । द्विवचनस्य तु पारिभाषिकस्य ग्रहणेऽपि सिद्धिरिति प्रथमाया अतिक्रमः । उत्तरत्रापि तु पारिभाषिकस्य ग्रहणेऽपि सिद्धिरिति प्रथमाया अतिक्रमः । उत्तरत्रापि द्विवचनस्यातिक्रमेऽयमेव हेतुः । तत्र चानादेशे विभक्तौ हलादौ द्वितीयायां च आत्वम्, अजादौ यत्वम्, शेषे लोपः, ङेप्रथमयोरम्, इत्यादयो विभक्त्यादेशाश्च यतायय़ं द्रष्टव्याः ।

परत्वादिति । त्वाहादीनामवकाशः यदा बह्वर्थे युष्मदस्मदी - अतिक्रान्तो युष्मानतित्वम्, अत्यहम्, युवावयोरकाशः - युवाम्, आवाम् व्द्यर्थत्वे सति, सावुभयप्रसङ्गे विप्रतिषेधः ।

यदा त्वित्यादि । पारिभाषिकस्य ग्रहणे तत्रापि प्रसङ्ग इत्यतिव्याप्तिः स्यादिति भावः । अतिक्रान्तौ त्वाम् , अतित्वामिति । प्रथमायाश्च द्विवचने भाषायाम् इत्यात्वम् । यदात्र पारिभाषिकस्य ग्रहणमिति मत्वेदमुदाहृतम् । अथापि तत्राप्यर्थग्रहणम्, तथापि बह्वर्थेऽतिप्रसङ्ग इत्याह - अतिक्रान्तौ युष्मानिति । पूर्ववदात्वम् । एवं ज्ञेयमिति । अतियुष्माम्, अतियुष्माभ्याम्, अतियुष्मयोः । एवमस्मदः ।।

यूयवयौ जसि ।। 7 - 2 - 93 ।।

परमयूयमिति । अत्र पारम्ययोगो यथासम्भवं द्रष्टव्यः । तदन्तविधिरत्र भवतीति । अङ्गाधिकारे तस्य च तदुत्तरपदस्य च इति वचनात् । यदापि तदन्तस्य, तदापि न सर्वस्य, युष्मदस्मदोर्मपर्यन्तस्येत्यधिकारात् ।।

त्वाहौ सौ ।। 7 - 2 - 94 ।।

त्वमिति । यद्यप्यत्र त्वमावेकवचने इति त्वादेशः सिद्धः तथाप्यहादेशस्तावद्विधेयः तत्र च अहः सौ ित्युच्यमाने युष्मदोऽपि प्रसङ्गः, अस्मदोऽहः सौ इत्युच्यमाने गौरवं स्यात्, तस्मादत्रापि त्वादेश एव विधेययः । किञ्च - अतिक्रान्तो युवां युष्मान्वाऽतित्वमित्यत्र त्वादेशस्य शङ्कापि नास्ति ।।

त्वमावेकवचने ।। 7 - 2 - 97 ।।

एकवचन इत्यर्थनिर्देश इत्यादि । एतच्च द्विवचन इत्यर्थनिर्द्देशः इत्येतदनुसारेण योज्यम् ।

अर्थग्रहणे यदिष्टं सम्पद्यते तद्दर्शयति - तदेति । पारिभा, इकस्य त्वेकवचनस्य ग्रहणेऽत्र न स्यादित्यव्याप्तिः । अतिक्रान्तौ त्वामिति । तदापि त्वमौ भवत इत्यस्योदाहरणम् । अतित्वामिति । पूर्ववदात्वम् । एवमन्यदुदाहर्त्तव्यमिति । एतद् अतित्वम्, अत्यहमित्यनेनापि सम्बध्यते । अतियूयम्, अतितुभ्यम्, अतितव । एवमस्मदः । अतित्वामतिमामित्यनेन तु सम्बन्धः स्पष्ट एव । अतित्वां पश्य अतित्वान्, अतित्वाभ्याम्, अतित्वाभिः, अतित्वभायम् । अतित्वम् । अतित्वयोः अतित्वाकम् । अतित्वयि, अतित्वयोः, अतित्वासु । एवमस्मदः ।

अत्रानन्तरं यदा युष्मदस्मदी द्वित्वबहुत्वयोर्वर्त्तते समासार्थेस्यैकत्वं तदा त्वमौ न भवतः अतिक्रान्तं युवामतियुवाम्, अत्यावाम् । अतिक्रान्तं युष्मान् अतियुष्मान्, अत्यस्मान् । एवं नेयमिति पठितव्यम् पूर्वानुसारेण गम्यमानत्वान्न पठितम् ।।

प्रत्ययोत्तरपदयोश्च ।। 7 - 2 - 98 ।।

एकवचने वर्त्तमानयोरिति । एकार्थाभिधानविषययोरित्यर्थः । वस्तुकथनं चैतम्, न तु शब्दार्थकथनम् । एकवचने इत्यस्य प्रथमाद्विवचनान्तत्वात् । त्वदीय इति । त्यदादीनि च इति च वृद्धसंज्ञा, वृद्धाच्छः । त्वत्तर इति । पारम्यवत्प्रर्षयोगः ।

वभक्तावित्यधिकारादिति । ननु च पूर्वसूत्रे विभक्तौ इति न सम्भान्त्यते कथम् आवृद्धेरनुवर्त्तमानं न सम्बध्येत एवमपि योगविभागो न कर्त्तव्यः, त्वमावेकवचने प्रत्ययोत्तरपदयोः इत्येकयोग एव कर्त्तव्यः, एवं हि चकारो न कर्तव्यो भवति नैवं शक्यम्, एवं ह्युच्यमाने यथासङ्ख्यं प्राप्नोति - युष्मदः प्रत्यये, अस्मद उत्तरपद

इति । अथ क्रियमाणेऽपि योगविभागे, यावता निमित्तयोः साम्यं कस्मादेव यथासङ्ख्यं न स्यात् । नै, दोषः चकारोऽत्र क्रियते, स द्वयोरपि द्वे निमित्ते समुच्चेष्यति ।

ननु चेति । चोदकः । प्रकृतिप्रत्यययोः पूर्वात्तरपदयोश्च मध्ये या वर्तते सामन्तर्वर्त्तिनी विभक्तिः । परिहरति - नैषं शक्यमिति । लब्धुमिति शेषः । किं कारणम् इत्याह - तस्या लुका भवितव्यमिति । लुक्तु सुपो धातुप्रातिपदिकयोः इत्यनेन । अन्तरङ्गावित्यादि । चोदकः । विभक्तिमात्रापेक्षत्वादन्तरङ्गत्वम्, लुक्तु पश्चादुत्पन्नः प्रत्ययमुत्तरपदं धापेक्ष्य धातुत्वप्रतिपदिकत्वयोरुपजातयोः प्राप्नुवन् बहिरङ्गः । यद्यप्ययं नित्यः, तथापि नित्यान्तरङ्गयोरन्तरङ्गमेव बलीयः । यथोक्तम् - परिनित्यान्तरङ्गप्रतिपदविधयो विरोधिनः सन्निपाते तेषां मिथः प्रसङ्गे परबलीयस्त्वमिति । एतदेवेत्यादि । परिहारः । किमेतस्य ज्ञापने प्रयोजनम् इत्याहतेनेति । प्रथमेनादिब्देन गोमत्यतीत्यादेर्ग्रहणम्, द्वितीयेन दीर्घहल्ङ्यादिलोपयोः, हल्ङ्यादिलोपे हि प्रत्ययलक्षणेन नुमादि स्यादेव । लुकि तु न लुमताङ्गस्य इति प्रत्ययलक्षणप्रतिषेधान्न भवति । ज्ञापनस्य प्रयोजनान्तरमाह - एवं चेति ।

पुनश्चोदयति - अथेति । असति हि प्रयोजने ज्ञापकं भवति, अस्ति चात्र प्रयोजनम्, किम् एषामेव त्वाहादीनामादेशान्तराणां बाधनम् । सत्येतस्मिन् प्रयोजने न ज्ञापनमुपपद्यत इति । परिहरति - लक्ष्यस्थित्यपक्षयेति । गोमत्प्रिय इत्यादिकं लक्ष्यं लोके साधुभावे स्थितम्,

तदादेशान्तरबाधनार्थेऽस्मिन्विज्ञायमाने न संगृहीतं स्यात्, तच्चापेक्ष्यं प्रयोगमूलत्वाव्द्याकरणस्य । तस्मात्तदपेक्षया नैतदादेशान्तराणां बाधनार्थं युक्तं विज्ञातुमिति ।

अपर आह - यद्येतदादेशान्तराणां बाधनार्तं स्यात् मपर्यन्तस्य इत्यनुवृत्तिरपार्थिका स्यात् । कथम् उत्सर्गसमानदेशत्वादपवादानां श्यनादिषु तथा दृष्टत्वादिति । नायं नियमः - उत्सर्गसमानदेशा अपवादाः इति श्नमादिषु व्यभिचारात् । न हि श्नम्बहुजकचः शबादिभिः समानदेशाः । तस्माद्यद्यवश्यमुपपर्तिर्वक्तव्या, एवं वक्तव्यम् - इह त्वाहादयोऽप्यनुवर्त्तनेत, मपर्यन्तस्येति च तत्र त्वाहाद्यनुवृत्त्यैव तद्बाधे सिद्धे मपर्यन्तानुवृत्तिरप्राप्तप्रापणार्था सती ज्ञापकमुक्तस्यार्थस्येति ।

वयं तु ब्रूमः - मपर्यन्तस्य इत्येवानुवर्त्य तस्यादेशौ विधेयौ । यदि चान्तरङ्गा आदेशाः स्युः , प्रत्ययोत्तरपदयोर्मपर्यन्तस्य न क्वापि सम्भव इति तस्यादेशविधानमनुपपन्नं स्यादिति ज्ञापकमुक्तस्यार्थस्येति ।।

त्रिचतुरोः स्त्रियां तिसृचतसृ ।। 99 ।।

त्रिचतुरोरेव विशेषणमिति । श्रुतत्वात् । नाङ्गस्येति । विपर्ययात् । तेन किं सिद्धं भवति इत्याह - तेनेति । प्रियतिसेति । अनङ्सौ, ऋदुशनस्पुरुदंसोऽनेहसाञ्च इत्यनङ् । प्रियतिस्नाविति । ऋतो ङिसर्वनामस्थानोयोः इति गुणं परमपि बाधित्वोत्तरसूत्रेण रादेशः । प्रियतिसृ इति । इकोऽचि विभक्तौ इत्यज्ग्रहणेन ज्ञापितम् - लुमता लुप्तेऽपि क्वचित्प्रत्ययलक्षणं भवतीति । तेन स्वमोर्नपुंसकात् इति नित्ये लुकि कृतेति तिसृभावः । प्रियतिसृणी इति । रादेशात्पूर्वविप्रतिषेधेन नुमिति क्वचित्पठ्यते । नद्यृतश्चेति कब्न भवतीति । समास्यमानदशायामृकारान्तस्य तत्र ग्रहणमिति भावः । कबभावे हेतुः - विभक्त्याश्रयत्वादित्यादि । एवं तावत् स्त्रियाम् इत्यनेन त्रिचतुरोर्विशेषणादव्याप्तिपरिहारो दर्शितः ।

अतिव्याप्तिरपि परिहृतेत्याह - यदा चेति । तिसृकेति । स्वार्थे कन्प्रत्ययः अल्पत्वे, कुत्सितत्वे, संज्ञायां वा । तत्र विभक्तेर्लुकि कृते तत्र विधीयमानस्तिसृबावो न स्यादिति वचनम् । तत्र स्वार्थिकप्रत्ययान्तत्वाद्बहुवचनान्तस्तिसृकाशब्दः संज्ञेत्येके । ग्रामस्य कस्यचिदेषा संज्ञा रूढिरिति नास्ति बहुवचनप्रसङ्ग इत्यन्ये ।

चतसरीति । यथा प्रियतिस्नावित्यत्र सवनामस्थानलत्रणं गुणं बाधित्वा रादेशो भवति, तथा ङावपि प्राप्नोति तथा चोत्तरसूत्रे प्रियतिस्नीति ङावपि रादेशमुदाहरिष्यति, पूर्वविप्रतिषेधं च वक्ष्यति । अत्राहुः - अस्मादेव निर्देशादर्थप्रधानयोरेवादेशः । इह तु स्वरूपप्रधानत्वात्त्दभावे गुण इति । चतस्न ितिति । अत्र स्थानिवद्भावात् चतुरः शसि इत्यन्तोदात्तत्वे सति उदात्तयणो हल्पूर्वात् इति शस उदात्तत्वप्रसङ्गः, स निपातनस्वरेण बाध्यते । यथैव तर्हि निपातनस्वरः शसिस्वरं बाधते, तथा षट्त्रिचतुर्भ्यो हलादिः इत्येतं

विभक्तिस्वरमपि बाधेत तत्राह - चतसृणामित्यत्र त्विति । तत्र कारणमाह - हलादिग्रहणसामर्थ्यादिति । तत्र हलादिग्रहणस्य चतस्नः पश्येत्येतदेव व्यावर्त्त्यम्, नान्यत्किञ्चित् । एतच्च तत्रैवोपपादितम् । यदि च निपातनस्वरो विभक्तिस्वरस्यापि बाधकः स्यात्, तदान्तरेणापि हल्ग्रहणं विभक्तेः स्वरो न भविष्यति, किं हलादिग्रहणेन तत्क्रियमाणं ज्ञापयति -- निपातनस्वरं विभक्तिस्वरो बाधते इति । अन्ये त्वाहुः हलादि - ग्रहणादेव चतस्नः पश्येत्यत्र चतुरः शसि इत्यस्याप्रवृत्तिरवसीयते । यदि स्यात्, ततः उदात्तयणओ हल्पूर्वात् इति स्यादेव विभक्तेरुदात्तत्वमिति तव्द्यावृत्तये हलादिग्रहणमनर्थकं स्यात् ।

तस्मादाद्युदात्तनिपातनमेव न कर्तव्यमिति । तत्राद्युदात्तस्य चतुश्शब्दस्यानन्तर्यत आद्युदात्त एव चतस्नदेशे सति चतसृणामित्यत्र षट्त्रिचतुर्भ्यो हलादिः इति विभक्तेरुदात्तत्वं भवति ।।

अचि र ऋतः ।। 7 - 2 - 100 ।।

पूर्वसवर्णोत्त्वेत्यादि । तिस्नः पश्येत्यत्र प्रथमयोः पूर्वसवर्णः इत्यस्यापवादः । प्रियतिस्नः स्वमित्यत्र ऋत उत् इत्युत्त्वस्य । प्रियतिस्नि, प्रियतिस्नौ, प्रियतिस्नस्तिष्ठन्तीत्यत्र ऋतो ङिसर्वनामस्थानयोः इति गुणस्य । ननु यत्र विध्यन्तरस्याप्राप्तिः - प्रियतिस्ना, प्रियतिस्ने, प्रियतिस्नोरिति, तत्र इकोयणचि इत्येव सिद्धमिति विध्यन्तरस्य विषये इदमारभ्यते तत्र मध्येऽपवादाः पूर्वान्विधीन् बाधन्ते इति उत्त्वपूर्वसवर्णौ बाधत इति युक्तम्, गुणविषये तु परत्वात् स एव स्यात् इत्यत आह - परमपि हीति ।

ऋत इति किमिति । तिसृचतस्नोरनुवृत्तोः अलोऽन्त्यस्य इत्येव सिद्धमिति प्रश्नः । तिसृचतस्नोः प्रतिपत्त्यर्थमिति । तिसृचतस्नोरादेशयोरजादावपि विभक्तौ प्रतिपत्तिर्यथा स्यादित्यर्थः । अन्यथा हीति । ऋतः इत्यनुच्यमाने षष्ठीनिर्दिष्टत्वात् त्रिचतुरोरेवायमादेशः स्यात्, स च नाप्राप्तयोस्तिसृचतस्नोर्विधीयत इति तयारपवादः स्यादित्यर्थः ।।

जराया जरसन्यतरस्याम् ।। 7 - 2 - 101 ।।

अतिजरांसीति । अतिजर - इ इति स्थिते यदि पूर्व नुमागमः स्यात्, सोऽङ्गभक्तोऽङ्गमेव न व्यावदध्यात् । तदवयवं तु जराशब्दं व्यवदधात्येवेति सत्यपि तदन्तविधौ निर्दिश्यमानस्यादेशा भवन्ति इति जरशब्दन्तस्याङ्गस्यावयोवो यो जराशब्दः तस्य विभक्त्यानन्तर्थे विधीयमानो जरसादेशो न प्राप्नोति । अथापि स्यात्, तथापि सकारात्परस्य नुमः श्रवणं स्यात् . तस्मात्परत्वात्पूर्वं जरसादेश एष्टव्यः । तत्र कृते झलन्तलक्षणो नुम । अतिजरसं प्रश्येत्यत्र अतिजर - अम् इति स्थिते एकदेशविकृतस्यानन्यत्वाज्जरशब्दस्य जरसादेशो कृते स्वमोर्नपुंसकात् इति लुक् प्राप्नोति । न च तदानीमम्भावस्य प्रसङ्गः अनदन्तत्वात् । ननु चातिजरशब्दस्यादन्तत्वात्तस्यामवस्थायामम्भावेन बाधितस्य लुकः पुनः प्रसङ्गो न युक्तः, भ्रष्टावसरत्वात् नैतदस्ति, नात्राम्भावः प्रवृत्तः परत्वान्नित्यत्वाच्च जरसादेशेन बाध्यते, तत्र कृते लुक्प्रसङ्गः । एवं तर्हि सन्निपातपरिभाषया लुग्न भविष्यति । अजादिसन्निपातेन जरसादेशो निष्पन्नो नोत्सहते तस्य लुको निमित्ततां प्रतिपत्तुम् । यद्येवम्, अतिजरसं ब्राह्मणकुलं तिष्ठति अतिजरसैरिति न सिद्ध्यति, कथम् सोर्भिसश्चाकारान्तसन्निपातेनाजादिरादेशः कृतोऽकारान्तत्वाविधातिनो जरसादेशस्य निमित्तं न स्यात् । इष्टमेवैतत्सङ्गहीतम् । अतिजरमतिजरैरिति भवितव्यम्, एष गोनर्दीयस्य पक्षः, तदिदमुच्यते - इहेत्यादि । इहेति वाक्योपान्यासे । अतिजरसं ब्राह्मणकुलमित्यादि भवितव्यमित्यन्तं गोनर्दीयस्य मतम् । न पुनर्लुवशास्त्रं प्रवर्त्तत इति यदुक्तम्, यच्चोक्तम् - अतिजरं ब्राह्मणकुलमित्यादि, तत्रोभयत्रापि हेतुः - सन्निपातलक्षण इति । न पुनर्लुक्शास्त्रम् इत्यत्र पुनः शब्दस्यायमर्थः - पूर्वं या लुक्प्राप्तिः, साम्भावेन बाधिता या तु जरसादेशे कृते नुनः प्राप्तिः, सापि सन्निपातपरिभाषया न भवतीति ।

अन्ये त्वित्यादि । एतच्च टाङ्सिङसामिनात्स्याः, अतो भिस ऐस् इत्यत्र व्याख्यातम् ।।

त्यदादीनाम् ।। 7 - 2 - 102 ।।

द्विपर्यन्ता इत्यादि । इष्टिरेवेयम् । यत्तूच्यते - शेषेलोपवचनं ज्ञापकमिति, तदयुक्तम्, उपसर्जनार्थत्वाददतियूयमतिवयमिति । यदा तु शेषे लोपष्टिलोपस्तदा तु सुतरामज्ञापकम् ।

पाठादेव पर्युदस्ता इति । तथा च सर्वादिसूत्रे वार्त्तिकम् संज्ञोपसर्जनानां प्रतिषेधः पाठात्पर्युदासः इति । तेन पाठोपजीवनेन प्रवर्तमानमिदमपि संज्ञोपसर्जनीभूतानां न भवति । त्यदादीति । त्यादादीनामर्थः प्रधानं यत्र समासे तत्रेत्यर्थः । न हि ते पाठात्पर्युदस्ताः ।।

किमः कः ।। 7 - 2 - 103 ।।

तेनाकार एव किमो न विधीयत इति । कथं पुनरकारविधाने कः इत्यादिरूपसिद्धिः, यावतान्त्यस्य प्राप्नोति, न चान्त्यस्य पूर्षेण सिद्धः, द्विपर्यन्तास्त्यदादयः इत्युक्तत्वात् अपरे पुनरेतच्चोद्यभयादेवं पठन्ति - तेनाकार एव इमो न विधीयत इति । अयमर्थः - इमः इत्येतावत्सूत्रमस्तु, त्यदादीनामः इत्येव त्यदादीनां सम्बन्धिन इमोऽकारो भवति तत्र नानर्थकेऽलेन्त्यविधिः इति सर्वस्यैवेमोऽकारो भवति । तेषामेवं पठतामुत्तरत्र किमो ग्रहणं कर्त्तव्यम् न कर्त्तव्यम् उति होः इति वक्ष्यामि इमः इत्येव्र, ततो वाति इमः इत्येव, इमो वकारादेशो भवति । तस्मात्साकच्कार्थमेव कादेशो विहितः ।।

कु तिहोः ।। 7 - 2 - 104 ।।

तिशब्दस्य विभक्तिसंज्ञकस्याभावात्तकारे इकार उच्चारणार्थः । कुहेति । वा ह च छन्दसि इति हप्रत्ययः ।।

क्वाति ।। 7 - 2 - 105 ।।

क्वेति । किमोऽत् इत्यत्प्रत्ययः ।।

अथदेशान्तरकरणं किमर्थम्, न प्रकृतः कुशब्द एव विधीयते, एवं च कृत्वा योगाविभागोऽपि न कर्तव्यः कुतिहात्सु इत्येवास्तु का रूपसिद्धिः यणादेशे कृते क्वेति सिद्धम्, ओर्गुणस्तु अङ्गवृत्ते पुनर्वृत्तौ इति वचनान्न भविष्यति, यणदेशस्त्वनाङ्गत्वाद्भवत्येव तत्राह - आदेशान्तरकरणमोर्गुणनिवृत्त्यर्थमिति । निष्ठिततत्त्वं दुर्ज्ञानमिति भावः । एवं तर्हि किमोऽत् इत्येतत् किमोड्वत् इति वक्तव्यम्, टिलोपो कृते क्वेति सिद्धम् अत आह - किमोड्वदिति चेति । कथं पुनः प्रत्ययान्तरे रूपसिद्धिः, यावता ककारस्य जशत्वं प्राप्नोति टिलोपो हि डित्प्रत्यभविष्यति । कथमसिद्धत्वम् असिद्धं बहिरङ्गमन्तरङ्गे । टिलोपो हि डित्प्रत्ययापेक्षत्वाद्बहिरङ्गः जश्त्वं तु तदनपेक्षत्वादन्तरङ्गम् । साकच्कार्थमिति । साकच्के हि प्रत्ययान्तरे विहिते कक्वेति स्यत् । यथान्यासे तु तत्रापि क्वेत्येव भवति ।।

तदोः सः सावनन्त्ययोः ।। 7 - 2 - 106 ।।
 सौ, इति प्रथमैकवचनस्य ग्रहणम्, न सप्तमीबहुवचनस्य, स्यश्छन्दसि, सोऽचि लोपे चेत् इत्यादिनिर्देशात् । नाप्युभयोः तथाहि सति सि इत्येव ब्रूयात्, सकारादौ विभक्ताविति ।
 अनन्त्ययोरिति किमिति । विशेषणविशेष्यभावे कामचारात्त्यदादिषु तकारान्तस्यासम्भावच्च त्यदादिभिस्तदोर्विशेषणादनन्त्ययोस्तावस्तावस्तिद्धम्, अन्त्यस्य तु त्यदाद्यत्वं भविष्यतीति प्रश्नः । अत्वस्य सोरन्यक्ष सावकाशत्वात्सौ परत्वादिदमेव स्यादित्युत्तरम् । तत्र केवले सौ पुंल्लिङ्गे विशेषाभावात् सम्बुद्धौ, स्त्रियां च प्रत्युदाहृतम् । किमर्थं पुनः तदोः इत्युच्यते, तवर्गग्रहणमेव क्रियेत - तोः सः सावनन्त्यस्य इति नकारस्यापि तर्हि प्राप्नोति तस्मान्नुडचि - अनेषः, तअनयम्, अनसाविति । नुयं परादिस्तद्ग्रहणेन गृह्यते ।।
अदस औ सुलोपश्च ।। 7 - 2 - 107 ।।
 असुक इति । अदकस् सु इति स्थिते औत्वप्रतिषेधात्त्यदाद्यत्वं दकारस्य सत्वं सकारादुत्तरस्य चाकचोऽकारस्य उत्वम् ।
 उत्तरपदभूतानामित्यादि । समासाद्या विभक्तिरुत्पद्यते, तदपेक्षत्वादादेशो बहिङ्गः, ततश्चान्तरङ्गत्वादेकादेशे कृते तस्यादिवद्भावादादेशेषु क्रियमाणेषु परमयम्, परमहमित्याद्यनिष्टप्रसङ्गः । तस्मादकृतसन्धिकार्याणामेवामी आदेशा वक्तव्याः । एतच्च नेन्द्रस्य परस्य इत्यत्र ज्ञापयिष्यते ।
 अदसः सोर्भवेदित्यादि । अदस औ इत्येतावदेव सूत्रमस्तु, सौ इत्येव अदसः इति पञ्चमी, तया पूर्वसूत्रे कृतार्थायाः सप्तम्याः षष्ठ्यां प्रकल्पितायाम् अदस उत्तरस्य सोरौकारो भवतीत्यर्थः, तत्र त्यदाद्यत्वे कृते असाविति सिद्धे किं सुलोपो विधीयते । ह्रस्वाल्लुप्येत सम्बुद्धिः । यदि सोरौकारो विधीयते, तदा हि असावित्यत्र त्यदाद्यत्वे ह्रस्वात्परस्याः सम्बुद्धेरौकारस्य लोपः स्यात्, न हलः नैष दोषः, हलः सलोपे विधीयते
। यद्येवम्, तत्र हल्ग्रहणं कर्त्तव्यम् नेत्याह - प्रकृतं हि तत् । हल्ङ्याब्भ्यो दीर्घात् इत्यत्र । ननु चेदं प्रथमानिर्दिष्टम्, षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य इति । पूर्वसूत्रवद्वा प्रथमाया तएव यथाकथञ्चिन्निर्वाहो भविष्यति । आप एत्वं भवेत्तस्मिन् । इह तर्हि स्त्रियां सम्बुद्धौ असा - औ आङि चापः सम्बुद्धौ च थइत्येवं प्राप्नोति, प्रकृते रेव त्वौत्वे टापोऽभावादेत्वाभावः, न, झलीत्युवर्त्तनात् नैष दोषः, बहुवचने झल्येत् इत्यतो झलीति तत्रानुवर्त्तते - झलादौ सम्बुद्धाविति, औत्वे कृते अझलादित्वान्न भविष्यति । प्रत्ययस्थाच्च कादित्वमिति । इह तर्हि स्त्रियामकचि असका - औ इति स्थिते प्रत्ययस्थात्कात्पूर्वस्य इतीत्वं प्राप्नोति, प्रकृतेरेव त्वौकारे टापोऽभावादित्वाभावः । शीभावश्च प्रसज्यते । इह च स्त्रियाम् असा - औ इति स्थिते औह आपः इति शीभावः प्राप्नोति, औत्वविधानं तु पुंसि चरितार्थम् पाक्षिक एष दोषः, यदा औङ आपः इति पूर्वाचार्यनिर्देशस्तदा नास्ति, इतरयोरस्तु पक्षयोरस्ति ।।
यः सौ ।। 7 - 2 - 110 ।।
 स्त्रियामयं यकार इति । नपुंसके तु स्वममोर्नपुंसकात् इति लुमता लुप्तत्वात् सोरभावः ।।
हलि लोपः ।। 7 - 2 - 113 ।।
 अन्ग्रहणमनुवर्त्तत इति । यद्यपि तत्प्रथमान्तम्, तथापि हलीति सप्तम्या तस्य षष्ठी प्रकल्प्यते ।।
मृजेर्वृद्धिः ।। 7 - 2 - 114 ।।
 धातोश्च कार्यमुच्यमानमिति । वस्तुतो धातोर्यत्कार्यमुच्यते, तदिह धातोरुच्यमानमिति विवक्षितम् । स धातुः स्वरूपेणैव गृह्यतां मा वा, ग्राहितेन अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् इत्ययमप्यमागमो धातुप्रत्यय एव भवति, न प्रमृज्भ्यामित्यादौ । तत्प्रत्यय इति । धातोरित्येवं विहिते । कंसपरिमृड्भ्यामिति । अत्र तदन्तविधिना प्रसङ्गः ।।
अचो ञ्णिति ।। 7 - 2 - 115 ।।
 तण्डुलनिश्चाय इत्यादौ परिमाणाख्ययां सर्वेभ्यः इति घञ् ।
 गौः, गावौ, गाव इति । अत्र गौरित्येतत्साक्षादुदाहरणम्, इतरत्रावादेशे कृते अत उपधायाः इत्येव सिद्धम् । सखायौ, सखाय इति । अत्रापि सखायावित्येतदुदाहरणम्, जसि तु जसि च इति गुणे अयादेशे च कृते पूर्ववत्सिद्धम् । च्यौत्नमिति बलनाम, छान्दसम् -- तमिच्च्यौत्नैरार्यन्ति । किमर्थ पुनरिदमुच्यते, यावता जेतृयोतृशब्दाभायां प्रज्ञाद्यणि जैत्रम्, यौत्रमिति सिद्धम् । च्यौत्नमिति उणादयोऽव्युत्पन्नानि प्रातिपदिकानि । तण्ुलनिश्चायः श्चावकः, लावक इत्यादौ गोतो णित् इत्येतट् गोत औत् इति वक्तव्यम् - गोत औकारादेशो भवति सर्वनामस्थाने परतः । कथं सखायौ, सखायः सख्युरसम्बुद्धौ इत्येतत् सख्युरैत् तइति वक्ष्यामि, अत्रोच्यते ञ्णिति इति तावदुत्तरार्थं वक्तव्यम् । किञ्च - प्रियमाचष्टे प्राप्ययतीत्यादौ प्राद्यादेशेषु वृद्धिने स्यात् । अथ ते दीर्घान्ता विधीयेरन् तदतिगुरु स्यादिति यथान्यासमेवास्तु ।।
तद्धितेष्वचामादेः ।। 7 - 2 - 117 ।।
 अजामादेरचो वृद्धिरिति । ननु च इक्परिभाषोपस्थानादिक एव स्थानित्वेन भवितव्यम्, यद्यपि तुल्यजातीयस्य निर्धारणं भवति, यथा - गवां कृष्णा सम्पन्नक्षीरतमेत्युक्ते गौरेव प्रतीयते, तथात्राप्यचामादिरजेव तथापि साक्षाद् अचः इति निर्देशाभावादिक्परिभाषोपतिष्ठेतैव - इगात्मकस्याच इति, तस्मात्सथानिनिर्देशार्थमच इति वक्तव्यम् तन्न वक्तव्यम् प्रकृतमनुवर्त्तते -- अचो ञ्णिति इति, तत्र निर्दिष्टस्थानिकत्वादिक्परिभाषाया अव्यापारः ।
 अथ त्वाष्ट्रः, जागत इत्यत्र त्वष्ट्रजगच्छब्दाभ्याम् तस्येदम् इत्यणि कृते यथाक्रमम् अचो ञ्णिति, अत उपधायाः इति वृद्धिः कस्मान्न भवति तत्राह - त्वाष्ट्रः जागत ित्यत्रेति । अन्त्योपधालक्षणां वृद्धि बाधत इति । परत्वादिति भावः । अन्त्योपधालक्षणाया वृद्धेरवकाशः - गौः, याचकः, अस्या अवकाशः सुश्रुत्

सौश्रुतः, त्वाष्ट्रः, जगत इत्यत्रोभयप्रसङ्गे परत्वादादिवृद्धिर्भवति । सकृद्गतिन्यायश्चाश्रीयते, न पुनः प्रसङ्गविज्ञानम् । एवं च कृत्वा पुष्करसच्छब्दस्यानुशतिकादिषु पाठोऽर्थवान्न भवति । यदि त्वादिवृद्धिविषयेऽन्त्योपधावृद्धिः स्यात्, तदोपधालक्षणयैव वृद्ध्या पौष्करसादेः सिद्धत्वादनुशतिकादिषु तन्न पठेत्, ठगर्थं तत्र पाठः स्यात् -
पौष्करसादिकः । न ह्यत्रोपधालक्षणा वृद्धिः प्राप्नोति, अञ्णित्वात् नैतदस्ति, न ह्यस्माच्चरत्यर्थे ठगुत्पद्यते, अनभिधानात् । यद्वाप्रतिपदविहिते बाह्वादिलक्षण इञ्योवोभयपदवृद्धिः, नान्यत्रेति ठगर्थः पाठो न भवति । यत्र त्वादिवृद्धिः प्रतिषिष्यते, तत्रान्त्योपधालक्षणा वृद्धिः । कस्मान्न भवति -- व्यमोर्भवो वैयसवम्, इगन्ताच्च लघुपूर्वात् इत्यण्, व्यापदि भषं वैयापदमिति तत्राप्यैचौ परत्वात् बाधकाविति सिद्धम् ।।
किति च ।। 7 - 2 - 117 ।।
नाडायनः, चारायण इति । नडादिभ्यः फक् । आक्षिकः, शालाकिक इति । दीव्यत्यर्थे ठक् ।।
इति श्रीहरदत्तमश्रविराचतायां पदमञ्जरयौ सप्तमस्याध्यायस्य द्वितीयश्चरणः

7.3

काशिकावृत्तिः---6
अथ सप्तमाध्याये तृतीयः पादः
देविकाशिंशपादित्यवाड्दीर्घसत्त्रश्रेयसामात् ।। 7.3.1 ।।
अत्र विशेषणविशेष्यभावे कामचाराद् देविकादिभिरङ्गं विशेष्यते, तेन वा तानि, तत्रापि सामानाधिकरण्येन, वैयधिकरण्यन वा---इति चत्वारः पक्षाः । तत्र देविकादिभिः सामानाधिकरण्येनाङ्गस्य विशेषणात् तदन्तविधिसम्भवाद्देविकाद्यन्तस्याचामादेराकारो भवतीत्यर्थः स्यात् । तत्र केवलानां न स्यात्, न हि तदेव तदन्तं भवति । व्यपदेशिवद्भावोऽपि प्रातिपदिकेन निषिद्धः । यदि तु प्रत्ययविधिविषयः स प्रतिषेधः । तदा केवलानां भवतु, तदादौ तु न स्यात्--- देविकाकूले भवा दाविकाकूलाः शालय इति । तदन्ते चातिप्रसङ्गः---सुदेविकादौ भवं सौदेविकमिति; अत्र सोरुकारस्याकारः स्यात् । अथ वैयधिकरण्येन विशेषणम्---देविकादीनां यदङ्गमिति, किञ्चि---देविकादीनामङ्गं यत्र च तेऽवयवभूताः, ततश्च केवलान्न स्यात्, न हि स एव तस्यावयवो भवति । व्यपदेशिवद्भावोऽपि प्रातिपदिकेन प्रतिषिद्धः । यदि तु प्रत्ययविषयः स प्रतिषेधः, तदा केवलानां भवतु, तदन्ते त्वतिप्रसङ्गः पूर्ववत् । केवलं तदादावप्रसङ्ग एवास्मिन्पक्षे परिहृतः । अथाङ्गं समानाधिकरणं विशेषणम्---अङ्गं ये देविकादय इति, तदा तदन्तेऽतिप्रसङ्गः परिहृतः, तदादौ त्वप्रसङ्गः स्यादेव । तदेव तर्हि व्यधिकरणं विशेषणम्---अङ्गस्य ये अवयवभूता देविकादयस्तेषामचामादेराकार इति ? तदा केवले तदादौ च न दोषः, किन्तु परपदभूतानामपि तेषामाकारप्रसङ्गः । तत्र प्राग्ग्रामे पूर्वशांशप इत्यादाविष्ट एवाकारः, सुदेविकादावग्रामे त्वनिष्टप्रसङ्गः । तदेवमेते चत्वारोऽपि पक्षा दुष्टाः ।
अथापरः पक्षः---अङ्गेन देवकादिभिश्चाचामादिविशेष्यते---अङ्गस्याचामादेराकारो भवति स चेद्देविकादीनां सम्बन्धी भवतीति । अत्र पक्षे केवलेषु तदातौ चाङ्गे नास्ति दोषः, नापि सौदेविकमित्यत्र पूर्वपदस्योत्तरपदस्य वा प्रसङ्गः; किन्तु प्राग्ग्रामे पूर्वशांशपः---इत्यादावुत्तरपदभूतानां देविकादीनामाकारो न स्यात् ? नैष दोषः; `प्राचां ग्रामनगराणाम्' इत्यत्रैतदनुवर्तिष्यते, तत्र च वाक्यबेदेन सम्बन्धः---प्राचां ग्रामनगराणामुत्तरपदस्याचामादेरचो वृद्धिर्भवति, देविकादीनामुत्तरपदानामचामादेराकार इति । अयमपि वृत्तिकारस्य पक्षो न भवति; यद्ययं पक्षोऽभविष्यत्, उत्तरपदवृद्धावप्येतदनुवर्त्तिष्यत इत्येवावक्ष्यत् । कस्तर्हि वृत्तिकारस्य पक्षोऽयमभिधीयते ?
परिभाषेयमान्तर्यपरिभाषाऽपवादिनी ।।
देविकादेरचामादेर्यत्र वृद्धिः प्रसज्यते ।
तत्रोपतिष्ठते, तेन सर्वमिष्टं प्रसिध्यति ।। इति ।
अनारभ्यमाणे एतस्मिन्, देविकादीनामादेरचो वृद्धिर्भवन्ती स्थानेऽन्तरतमवचनादैकारः प्राप्नोति, तदपवादेनाकारः प्राप्यते, तत्राङ्गं भवतु देविकादयः पूर्वपदमुत्तरपदं वा; सर्वथा यत्र देविकादीनामचामादेरचो वृद्धिप्रसङ्गः, तत्राकारो भवतीति परिभाष्यते । ननु च `अङ्गस्य' इति वर्त्तते ? सत्यम्; नैवमस्याभिसम्बन्धः---अङ्गस्याचामादेराकारो भवति स चेद्देविकादीनां सम्बन्धीति, किं तर्हि ? देविकादीनामचामादेराकारो भवति स चेदङ्गस्य सम्बन्धीति । अथैवमभिसम्बन्धे किं व्यावर्त्यम् ? न किञ्चित्, अनुवृत्तस्य तु सम्बन्धो वक्तव्य इत्येतावत् । साप्याकार एव भवतीति । उक्तोऽत्र हेतुः ।
वहीनरस्येति । वहोऽस्यास्तीति वही, वही चासौ नरश्चेति वहीनरः, `अन्येषामपि दृश्यते' इति दीर्घत्वम् । वैहीनरिरिति । अत्राकारवृद्धिः प्राप्ता इकारेण बाध्यते । तस्य त्वैकारवृद्धिर्भवत्येव, न हि तस्यां नाप्राप्तायामिकारो विधीयते, एवं च कृत्वा सूत्रेऽप्यकार एव विधेयः, तस्याकारवृद्धौ सिद्धमिष्टम् ? तथा तु न कृतमित्येव । केचित्त्विति । विहीनो नरो विहीनरः, पृषोदरादित्वान्नशब्दस्य लोपः ।।
केकयमित्रयुप्रलयानां यादेरियः ।। 7.3.2 ।।
लौकिकं हि तत्र गोत्रं गृह्यत इति । मित्रयु शब्दोऽभेधोपचारात्तदपत्यसन्ताने यदा वर्त्तते न परं प्रकृतावेव, तदेदमुच्यते । यदा तु गृष्ट्यादिभ्यष्ठञो

यस्कादित्वाद् बहुषु लुक् क्रियते, तदा पारिभाषिकेऽपि गोत्रे न दोषः । अत्र यद्यपि वृद्धिप्रसङ्गेऽयमादेश उच्यते, तथापि वृद्धिर्न बाध्यते; विषयभेदात्---अचामादेर्वृद्धिः, यादेरियादेशः, अङ्गं तूभयोविशेषणम्, न कार्यि ।।

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ।। 7.3.3 ।।

अत्रार्थद्वयविधानाद्वाक्यभेदः, तस्यैव द्योतकस्तुशब्दः, `पूर्वौ' इत्यनेन सम्बन्धादैचाविति प्राप्ते एकवचनं सौत्रम् । वृत्तौ तु क्रियाविशेषणत्वादेकवचनम् । ताभ्यां तु पूर्वमिति । ऐजागमो भवतीति । टित्त्वाद्यागमलिङ्गाभावेऽपि पूर्वशब्देन देशविशेषे भवन्नागम इत्युच्यते---आगच्छतीत्यागम इति । वैयसनमिति । `गतिकारकोपपदानां प्राक्सुबुत्पत्तेः समासः' इत्युत्तरपदविषयमित्यवीचाम । तेन वैयसनादिषु य्वोः पदान्तत्वम् । स्वश्वशब्दः शिवदिः । याष्टीक इति । `शक्तियष्ट्योरीकक्' । ननु चात्राचामादेः स्थाने यौ य्वौ ताभ्यामित्याश्रयणआदेव न भविष्यति ? तत्राह---यत इम इति । `इण् गतौ' लटः शत्रादेशः, शपो लुक्, `इणो यण्' । इहासत्यपि प्रतिषेधे वैयसनमित्यादौ व्यसन + अ इति स्थिते वृद्धिश्च प्राप्नोति, ऐजागमश्च; तत्र वृद्धिरनित्या, शब्दान्तरप्राप्तेः । सा ह्येचि कृते तस्यैव प्राप्नोति; तन्मध्यपतितस्य तद्ग्रहणेन प्रहणात् । ऐजागमस्तु नित्य इति स एव तावद्भवति । तत्र कृते यद्यपि पुनः---प्रसङ्गविज्ञानाद् वृद्धिः, तथाप्यान्तर्यत ऐकारस्यैकारः, औकारस्यौकार इति न कश्चिद्दोषः, किं प्रतिषेधेन !

नन्वसति तस्मिन्, वैयाकरणी भार्या अस्य वैयाकरणभार्य इति `वृद्धिनिमित्तस्य' इति पुंवद्भावप्रतिषेधः स्यात्, सति तु प्रतिषेधे न भवति; कथं न भवति, यावता वृद्धेर्निमित्तं ञणका यस्मिंस्तद्धित इति बहुव्रीहिः, विद्यते चात्र णकारः ? सत्यं विद्यते, निमित्तं तु न भवति; `कुर्वद्रूपे हि निमित्तशब्दो मुख्यः' इत्युक्तम् । ननु च मा भूत् `तद्धितेष्वचामादेः' इत्यस्या वृद्धेर्निमित्तम्, य एव त्वसौ णित्तद्धिताश्चय ऐज्विधीयते तस्यैव वृद्धिसंज्ञकस्य निमित्तं णकार इति स्यादेव पुंवद्भावप्रतिषेधः ? उच्यते; न हि वस्तुतो या वृद्धिस्तस्या यन्निमित्तं ञकारादिस्तद्वति प्रतिषेधः, किं तर्हि ? बृद्धिरित्येवं या विधीयते तन्निमित्ते । अतः पुंवद्भावप्रतिषेधनिवृत्त्यर्थं वृद्धेः प्रतिषेधो वक्तव्य एव ? न वक्तव्यः; एकस्मिन्नङ्गे विशेषविहितावैचौ सामान्यविहिताया वृद्धेर्बाधकौ भविष्यतः, सत्यपि सम्भवे बाधनं भवतीति न्यायात्; ततश्च पूर्ववत्पुंवद्भावप्रतिषेधो न भविष्यतीति `य्वाभ्यां पूर्वमैच्' इत्येवास्तु, नार्थः प्रतिषेधेन ? इत्यत आह---प्रतिषेधवचनमिति । प्रतिषेधवचने सति याभ्यां य्वाभ्यां परस्य वृद्धिः प्राप्ता प्रतिषिध्यते, ताभ्यामेव पूर्वावैचौ भवत इत्यर्थो भवति, असति हि तस्मिन् यौ कौचन य्वौ गृह्येयाताम् । तस्मादैचोर्विशिष्टो विषयः प्रल्कृप्तो यथा स्यादित्येवमर्थं प्रतिषेधवचनं क्रियत इत्यर्थः । दाध्यश्विः, माध्वश्विरिति। दधिप्रियोऽश्वो यस्य स दध्यश्वः । एवं मध्वश्वः, ताभ्याम् `अत इञ्' ।

ननु च `अछामादेः' इत्यनेन य्वौ विशेषयिष्यामः---अचामादेरचः स्थाने यौ य्वाविति ? एवमपि द्वे अशीति अधीष्टः, `तद्धितार्थ' इति समासः, तमधीष्ट इति `प्राग्वतेष्ठक्', द्व्याशीतिकः---अत्र प्राप्नोति । सति तु प्रतिषेधे `तद्धितेष्वचामादेः' इत्यनुवृत्तेर्याभ्यां परस्य `तद्धितेष्वचामादेः' इति वृद्धिः प्राप्ता प्रतिषिध्यते, ताभ्यामिति विज्ञायते; अत्र तु `संख्यायाः संवत्सरसंख्यस्य च' इत्येवमुत्तरपदवृद्धिर्विधीयत इति तस्य निषेधाभावादैजागमाभावः सिद्धः । स्यादेतत्---अचामादेरित्यनुवृत्तं स्वरूपपरं सद् वृद्धेर्विशेषणम्, अचामादेरित्येवं या वृद्धिस्तस्याः प्रसङ्गे तदपवादो य्वाभ्यां पूर्वमैचो भवत इत्यर्थः, इह तु नैवं वृद्धेः प्रसङ्ग इत्यैचौ न भविष्यत इति ? एवमपि य्वावविशेषितौ स्याताम्, ततश्च दाध्यश्वादौ प्रसङ्गः । न च सकृच्छ्रुतमचामादेरित्येतदेवोभयं विशेषयितुमर्हति, येनाचामादेः स्थाने य्वौ ताभ्यां पूर्वावैचो भवतः, सति तस्मिन्नचामादेरित्येवं वृद्धेः प्रसङ्ग इत्याश्रयणान्न क्वापि दोषः स्यात् । न च तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणे प्रमाणमस्ति, तस्मात्सुष्ठूक्तम्---प्रतिषेधवचनमैचोर्विषयप्रल्कृप्त्यर्थमिति ।

उत्तरपदवृद्धेरपीति । एतच्च तत्रालस्याधिकाराल्लभ्यते । यत्र त्विति । एतदप्युत्तरपदेन य्वोर्विशेषणाल्लभ्यते---उत्तरपदस्य यौ य्वौ ताभ्यां परस्य वृद्धिर्न भवति, ताभ्यां च पूर्वमैजागम इति । इह---इश्च अजश्च यजौ, उश्च अजश्च वजौ, तयोरिदं ऐयजम्, औवजमिति ऐचोरभक्तत्वादतन्मध्यपतितत्वाच्च अङ्गग्रहणेनाग्रहणादैयजीयम्, औवजीयमित्यादौ शेषनिघातो न स्यात्, शेषविवक्षायां च वृद्धाच्छो न स्यात्, प्रातिपदिकस्यावृद्धत्वात् ? उच्यते; यद्येवंविधमभिधानमस्ति, ततः पूवशब्द आवर्तयितव्यः, तत्रैकोऽवयववचनः, अपरो व्यवस्थावचनः---य्वाभ्यां पूर्वावैचौ भवतस्तौ चाङ्गस्यावयवाविति।

अत्र संग्रहश्लोकौ----

नाप्राप्ताया हि वृद्धेः प्रतिपदविधिरैज्बाधको नञ् किमर्थो
याभ्यां य्वाभ्यां परस्यैच् प्रसजति तत एवैष पूर्वो यथा स्यात् ।
मा दाध्यश्वादिके भूदिति ननु विहितौ यावचां स्थान आदे-
र्य्वौ ताभ्यामैजिहैवं न भवति इति चेद् द्वे अशीति अधीष्टे ।।
स्यादैज् द्व्याशीतिकेऽङ्गाद्यच इति विहितस्यैवमैच्चेत्प्रसङ्गाद्
य्वौ न स्यातां विशिष्टौ श्रुतमपि च सकृन्नोभयं भेत्तुमर्हम् ।
स्यादेतस्योत्तरत्राप्यधिकृतिरिह च य्वोः पदस्योत्तरस्यै-
वं पूर्वत्रैयलिन्दे भवति, न च भवेद् द्वे अशीती अधीष्टे ।।

द्वारादीनां च ।। 7.3.4 ।।

दौवारिक इति । `तत्र नियुक्तः' इति ठक् । द्वारपालस्येदं दौवारपालमिति । `संज्ञापूर्वको विधिरनित्यः' इति वृद्धलक्षणश्छो न भवति, `कलापिनोऽण्' इत्यत्राण्ग्रहणस्याधिकविधानार्थत्वाद्वा । कथं पुनर्द्वारशब्दस्य पाठे द्वारपालशब्दस्य विधिरयं भवति ? तत्राह---तदादिविधिश्चात्र भवतीति । अत्र च कारणं

देविकादिसूत्र एवोक्तम् । ज्ञापकं चात्र वक्ष्यति । सौवरोऽध्याय इति । स पुनः शन्तनुप्रणीतः, फिषित्यादिकः । `सौवर्यः सप्तम्यस्तदन्तसप्तम्यः' इति भाष्ये ।

शोभनोऽध्यायः स्वाध्याय इति । आङत्र मध्ये प्रक्षेप्तव्यः, `अन्येषामपि दृश्यते' इति वा उत्तरपदादेदीर्घत्वम् । एवमपीत्यादि ।

यद्यत्र स्वशब्दः पठ्यते, किमायातं स्वाध्यायशब्दस्य ? तत्राह---तदादावपि हीति । स्वार्थिक-स्वाभाविकादयस्तु भाष्यप्रयोगात्साधवः । स्फैयकृत इति ऋषित्वादण् । शौवादंष्ट्रो मणिरिति । `शुनो दन्तदंष्ट्रा' इति दीर्घत्वम्, पूर्ववदण् ।।

न्यग्रोधस्य च केवलस्य ।। 7.3.5 ।।

नैयग्रोध इति । नीचैर्गतौ प्ररोहैर्वर्धत इत्यर्थः ।

अव्युत्पत्तिपक्षे तु विध्यर्थमिति । अपदान्तत्वाद्यकारस्य । अथास्मिन्नपि पक्षे केवलग्रहणं किमर्थम्, यावता न्यग्रोधस्येत्युज्यते, तत्र कः प्रसङ्गो यत्तदादौ स्यात् ? ज्ञापनार्थं तु । एतज्ज्ञापयति---असमिन्प्रकरणे यान्युपात्तानि तानि तदादिवृद्धिभाजोऽचो विशेषणानीति ।।

न कर्मव्यतिहारे ।। 7.3.6 ।।

कर्मव्यतिहारे यदुक्तमिति । यदस्मिन्प्रकरणे उक्तं तत्कर्मव्यतिहारे न भवतीत्यर्थः ।।

स्वागतादीनां च ।। 7.3.7 ।।

व्यावक्रोशीत्यादौ व्यवपूर्वो धातुः कर्मव्यतिहारे दृष्ट इति व्यवहारशब्दोऽपि कर्मव्यतिहारे वर्त्तते, ततश्च पूर्वेणैवात्र सिद्धेरत्रास्य पाठोऽनर्थक इत्याशङ्क्याह---व्यवहारशब्दोऽयमिति । द्वारादिषु स्वशब्दस्य पाटादत्र प्रसङ्ग इति । `तदादेरपि तत्र ग्रहणं भवति' इत्युक्तमेव ।।

श्वादेरिञि ।। 7.3.8 ।।

तत्र चेत्यादि । यदि तत्र तदादिविधिर्न स्यात् एतद्वचनमनर्थकम्, कथम् ? केवलश्वन्शब्दो द्वारादिषु पठ्यते, तत्र कः प्रसङ्गो यत्तदादेः स्यात् ! तदादिविधिर्भवतीति । अस्मिन्प्रकरणे यदुक्तं तद्वृद्धिभाजोऽचो विशेषणमित्यस्मिन्नर्थे ज्ञापकमित्यर्थः । इकारादिग्रहणं चेत्यादि । श्वादेरितीति वक्तव्यमित्यर्थः । तत्र वर्णग्रहणे सप्तमीनिर्देशात्तदादिविधिः । श्वागणिक इति । `श्वगणाट्ठञ्' इति ठञ् । तदन्तस्येति । इञन्तस्य । श्वाभस्त्रमिति । `इञश्च' इत्यण् । तन्निमित्तो वृद्धिप्रतिषेधः, ऐजागमश्च भिन्नकक्षत्वादशक्य इञाश्रयेण प्रतिषेधेन निवारयितुमिति वचनारम्भः ।।

उत्तरपदस्य ।। 7.3.10 ।।

उत्तरत्र `अचामादेः' इत्यनुवृत्तेरुत्तरपदस्याचामादेर्वृद्धिर्वेदितव्या ।

ननु च`अवयवादृतोः' इत्यादौ `अवयवाद्' इत्यादिका पञ्चमी, तत्रान्तरेणाप्युत्तरपदग्रहणमुत्तरपदस्यैव भविष्यति ? अत आह---यत्रेति । आदिपदेन `हृद्भगसिन्ध्वन्ते पूर्वपदस्य च', अनुशतिकादीनां च', `देवताद्वन्द्वे च'---इत्येतेषां ग्रहणम् । एषु योगेषु पञ्चमीनिर्देशाभावादसत्यस्मिन्नधिकारेऽङ्गस्याचामादेरचो वृद्धिः स्यात्, नोत्तरपदस्य । वचनं तु नियमार्थं स्यात्---ज एव प्रोष्ठपदानाम्, नान्यत्र । प्रोष्ठपदानामेव वा जे इति । वचनसामर्थ्याद्वा पूर्वपदस्यैवानाद्यचो वृद्धिविधानार्थं स्यात् । तस्मादेतदर्थमेवायमधिकारः कर्त्तव्यः ।

किमिदानीं पञ्चमीनिर्देशेष्वस्यानुयोग एव ? नेत्याह---पञ्चमीनिर्देशेष्वपीति । वृद्धेश्च व्यपदेशार्थमिति । उत्तरपदाधिकारे विहिता या वृद्धिरिति व्यपदेशो यथा स्यादित्येवमर्थमित्यर्थः । क्व पुनरेवंविधेन व्यपदेशेन प्रयोजनम् ? इत्यत आह---उत्तरपदवृद्धौ सर्वं चेत्यत्रेति । सर्वभासः, सर्वकार इत्यादौ मा भूदित्येवमर्थं तत्रैवमाश्रितम् ।।

अवयवादृतोः ।। 7.3.11 ।।

ऋतोर्वृद्धिमद्विधावित्यादि । ऋतोः=ऋतुवाचिनः शब्दाद्वृद्धिमद्विधौ=वृद्धिनिमित्ते प्रत्यये विधीयमाने तदन्तविधिः, ऋतुशब्दान्तादपि प्रत्ययो भवतीत्यर्थः । किं सर्वत्र ? नेत्यत आह---अवयवादिति । अवयववचनात् परो यदा ऋतुवचनस्तदेत्यर्थः । ये तु---अवयवानामिति षष्ठीबहुवचनान्तं पठन्ति, तेषां न समीचीनोऽर्थः । तथा च `सुसर्वार्धदिक्शब्देभ्यः' इति पञ्चम्या निरदेशि । पूर्वासु वर्षासु भव इति । `तद्धितार्थ' इति समासः । अन्ये तु---अदिक्शब्दत्वाद्विशेषसमासं मन्यन्ते । अथात्रापि तदन्तविधिना वर्षाभ्यष्ठगेव कस्मान्न भवति ? अत आह---अवयवपूर्वस्यैव हीति ।।

सुसर्वार्धाज्जनपदस्य ।। 7.3.12 ।।

जनपदवाचिन इति । स्वरूपग्रहणं तु न भवति; उत्तरसूत्रे मद्रप्रतिषेधात् । सुसर्वार्धेत्यादि । जनपदवाचिनः शब्दस्यानन्तरे प्रत्यये विधीयमाने तदन्तस्यापि ग्रहणं भवति, यदि सुप्रभृतिभ्यः परः सम्भवतीत्यर्थः ।।

दिशोऽमद्राणाम् ।। 7.3.13 ।।

पूर्वपाञ्चालक इति । तद्धितार्थे समासः । पौर्वपञ्चालक इति । अवयववाच्यत्र पूर्वशब्दः, एकदेशिसमासाद् वुञ्प्रत्ययः । अदिक्शब्दत्वाद् आदिवृद्धिरेव भवति । यद्येवम्, वुञापि न भवितव्यमदिक्शब्दत्वादेव ? अस्त्यत्र विशेषः, सुसर्वार्द्धादिक्शब्देभ्य इति तदन्तविधौ शब्दग्रहणं क्रियते---दिशि दृष्टः शब्दो दिक्शब्द इत्येवं यथा विज्ञायेत, वृद्धिविधौ तु दिश इत्येतावदुच्यते । अन्ते त्वणन्तमेव प्रत्युदाहरणं पठन्ति ।।

प्राचां ग्रामनगराणाम् ।। 7.3.14 ।।

`प्राचाम्' इति नाचार्यनिर्द्देशः; जनपदादिभिर्देशैः साहचर्यात् ।

पूर्वैषुकामशम इति । पूर्वा चासाविषुकामशमी चेति `दिक्संख्ये संज्ञायाम्' इति समासः, ततो भवार्थे `दिक्पूर्वपदादसंज्ञायां ञः' इति ञप्रत्ययः ।
पूर्वपाटलिपुत्रक इति । पूर्ववत्समासः, `रोपधेतोः प्रचाम्' इति वुञ् । यद्यप्येकमेव पाटलिपुत्रम्, तथापि पाटलिपुत्रस्यैकदेशे पाटलिपुत्रशब्दस्य वृत्तेः पूर्वत्वविशेषणं युक्तमेव ।
जना यत्र सन्ति स ग्रामः, ततश्च नगरमपि ग्रामः । ये हि ग्रामे विधयो नेष्यन्ते साधीयस्ते नगरेऽपि न क्रियन्ते । तद्यथा---`अभक्ष्यो ग्रामकुक्कुटः' इति सुतरां नागरोऽपि न भक्ष्यते । `ग्रामे नाध्येयम्' इति साधीयो नगरेऽपि नाधीयते । शास्त्रेऽपि--`उदीच्यग्रमाच्च बह्वचोऽन्तोदात्तात्', `वाहीकग्रामेभ्यश्च', `दिक्शब्दाः ग्रामजनपदाख्यानचानराटेषु'---नगरमपि गृह्यते, तस्मादिहापि नार्थो नगरग्रहणेन ? इत्यत आह---ग्रामत्वादेवेति । सम्बन्धभेदप्रतिपत्त्यर्थमिति । अङ्गस्येति प्रकृतम्, उत्तरपदस्येति च, तत्र ग्रामाणामित्येतदङ्गस्येत्यनेन सम्बध्यते---ग्रामवाचिनामङ्गानामिति । नगराणामित्येतदुत्तरपदस्येत्यनेन---नगरवाचिनामुत्तरपदानामिति । न चायं सम्बन्धभेदः सकृदुपात्ते ग्रामशब्दे सम्भवति, तस्मान्नगरग्रहणं क्रियते । तत्र दिक्पूर्वपदो हीत्यादिना सम्बन्धभेद आश्रयणीय इत्यत्र हेतुर्दर्शितः । तत्रैत्यादिना तु स एव सम्बन्धभेदः । इह पूर्वैषुकामशम इति समसनक्रियानन्तरं पूर्वोत्तरपदयोर्गुणः प्राप्नुवन्नन्तरङ्गः, उत्तरपदवृद्धिस्तु पश्चादुपनततद्धितापेक्षत्वाद्बहिरङ्गा, तत्र गुणे कृते पूर्वोत्तरयोर्व्यपवर्गाभावाद्वृद्धिर्न प्राप्नोति; अन्तादिवद्भावोऽप्युभयत आश्रयणे प्रतिषिद्धः । अत्र हि दग्वाचि पूर्वपदमुत्तरपदं च युगपदाश्रीयते, तत्राह---पूर्वैषुकामशम इत्येवमादिष्विति । यथा `नेन्द्रस्य परस्य' इति ज्ञापकम्, तथा तत्रैव वक्ष्यामः ।।
संख्यायाः संवत्सरसंख्यस्य च ।। 7.3.15 ।।
संवत्सरश्च संख्या च संवत्सरसंख्यम्, समाहारद्वन्द्वः । द्विसांवत्सरिक इति । `प्राग्वतेष्ठञ्', तस्य `अध्यर्धपूर्व' इति लुग्न भवति, अनार्हीयत्वात् ।
द्विषाष्टिक इति । ननु `तमधीष्टो भृतः' इत्यत्र कालादिति वर्त्तते, तत्कथं द्विषष्ट्यादिशब्देभ्यः प्रत्ययः ? इत्यत आह---द्विषष्ट्यादिशब्द इति । कालवृत्तिः शब्दस्तत्र गृह्यते, न मासादय एवेति भावः ।
ननु च `परमाणान्तस्यासंज्ञाशाणयोः' इत्यत्र परिच्छेदहेतुत्वमात्रं गृह्यते, न त्वारोहतः परिणाइतश्च येन मीयते तदेव प्रस्थादि; अन्यथा शाणप्रतिषेधोऽनर्थकः स्यात्; कालश्चापि परिच्छेदहेतुर्भवत्येव, ततश्च संबत्सरग्रहणमनर्थकम्, परिमाणान्तस्येत्येव सिद्धत्वात् ? इत्यत आह---संवत्सरग्रहणमिति । द्वैसमिक इति । अधीष्टादिषु `समायाः खः', `द्विगोर्वा' इति पक्षे ठञ् ।
न केवलं वृद्धिविषयमेव ज्ञापकम्, किं तर्हि ? सार्वत्रिकमित्याह---द्विवर्षा माणविकेति । द्वे वर्षे भूता इति पूर्ववट्टञ्, तस्य `वर्षाल्लुक्', `चित्तवति नित्यम्' इति लुक् । पर्युदासो न भवतीति । प्रतिषेधस्य । तेन प्रतिषेध एव भवति ।
अथ संख्याग्रहणं किमर्थम्, यावता संख्ययापि परिच्छिद्यते, तत्र `परिमाणान्तस्य' इत्येव सिद्धम् ? केचिदाहुः---संख्याग्रहणमपि ज्ञापकार्थमेव, परिमाणग्रहणेन संख्यापि न गृह्यत इति । तथा च `अपरिमाणबिस्ताचित' इत्यत्र वृत्तावुक्तम्---`कालः संख्या च परिमाणं न भवति । द्विवर्षा, त्रिवर्षा, द्विशता, त्रिशता' इति । अपर आह---साक्षाच्छिष्टेन निमित्तभावेनानुमितं कार्यित्वं मा बाधीति परिमाणात्पृथगिह संख्याग्रहणं कृतमिति ।।
वर्षस्याभविष्यति ।। 7.3.16 ।।
यस्येत्यादि । यस्य यियक्षोर्यागवर्षादारभ्य त्रीणि वर्षाणि धान्यं भावि=तावन्तं कालं जीवनाय पर्याप्तम्, स सोमयागेऽधिकारी, न न्यून इत्यर्थः । गम्यते हीति । वाक्यार्थस्तत्र भविष्यत्ता, न पदार्थ इत्यर्थः । द्विवार्षिको मनुष्य इति । `वर्षाल्लुक्', `चित्तवति नित्यम्' इति नित्यं लुग्न भवति; भूतार्थ एव हि स इष्यते, अन्यत्र चित्तवत्यपि विकल्प एव ।।
परिमाणान्तस्यासंज्ञाशाणयोः ।। 7.3.17 ।।
द्विकौडविक इति कुडेरवप्रत्यये कुडवः= प्रस्थचतुर्थभाग इत्युणादिषु व्युत्पत्तिः । कुडवमित्येतदव्युत्पन्नं शब्दान्तरं द्रष्टव्यम् । ततः `प्राग्वतेष्टञ्', अनार्हीयत्वाल्लुगभावः । द्वाभ्यां सुवर्णआभ्यामिति । शाणप्रतिषेधात्परिच्छित्तिसाधनमिह परिमाणम्, तेनोन्मानस्यापि भवति---लोहिनी=गुञ्जा, ताभिः पञ्चभिः परिमितमाकारविशेषयुक्तं हिरण्यं पाञ्चलोहितिकम् । कलापः=कश्चिन्मानविशेषः ।
योगविभागादिति । पूर्वासु वृत्तिषु `तदस्य परिमाणं संख्यायाः संज्ञा' इत्येकयोगेन पठितत्वाद्, भाष्ये तत्र योगविभागस्योक्तत्वादेवमुक्तम् ।
तद्धितान्तश्चायमिति । यथा तु `अध्यर्धपूर्वद्विगोः' इत्यत्र वार्त्तिकं तथा तद्धितलुकि सति संज्ञेति तत्रैवावोचाम । द्वैशाण इति । यद्यत्रोत्तरपदवृद्धिः स्यात्, पूर्वपदस्य न स्यात् । कुलिजम्=धान्यमानम् । अन्तग्रहणं चिन्त्यप्रयोजनम् ।।
जे प्रोष्ठपदानाम् ।। 7.3.18 ।।
ज इति जातार्थो निर्दिश्यत इति । उपसरज इत्यादौ दृष्टस्य पदैकदेशस्य प्रयोगः, भीमसेनो भीम इतिवत् ।
बहुवचननिर्देशादिति । यद्यपि ज्योतिषां बहुत्वाद्बहुवचनान्तप्रोष्ठपदाशब्दः, तथापि तस्यैव शब्दरूपापेक्षायामेकवचनं न्याय्यं मन्यते ।।
हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ।। 7.3.19 ।।
सुहृद इति । `सुहृद्दुर्हृदौ मित्त्रामित्रयोः' इति निपातितः सुहृच्छब्दः । यदा तु सुहृदयस्येदमिति पाठः, तदा `हृदयस्य हृल्लेख' इत्यादिना हृद्भावः । सौहार्द्यमिति । `वा शोकष्यञ्रोगेषु' इति हृद्भावः । सिन्धवो जनपदः, नदीवचनस्यापि ग्रहणम्, तथा समुद्रवचनस्यापि ।।
अनुशतिकादीनां च ।। 7.3.20 ।।

आनुशातिकमिति । शतेन क्रीतं शतिकम्, `शताच्च ठन्यतावशते, इति ठन्, अनुगतः शतिकेन अनुशतिकः, ततः `तस्येदम्' इत्यण । आनुहौडिकं इति । `चरति' इति ठक् । आनुसांवरणमिति । `तत्र च दीयते कार्यं भववत्' इत्यण् । आनुसांवत्सरिकमिति । `बह्वचोऽन्तोदात्ताट्ठञ्' ।
कुरुकत-शब्दो गर्गादिः ।
सार्वलौकिकमिति । `लोकसर्वलोकाभ्यां ठञ्' । सार्वभौम इति । `सर्वभूमिपृथिवीभ्यामणञौ' । प्रयोगाधिदेवाधिभूतेत्यध्यात्मादयः । कुलटाया वेतीनङिति । अपपाठोऽयम्, तत्र हि स्वरूपग्रहणम्, । कल्याण्यादिषु परस्त्रीशब्दः पठ्यते, तस्मात् कल्याण्यादीनामिनङिति पाठः । चातुर्वैद्यमिति ।
चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्, ताः पुनश्चरस्रो विद्याः=चत्वारो वेदाः ।।
देवताद्वन्द्वे च ।। 7.3.21 ।।
अग्निवरुणौ देवता अस्य आग्निवारुणम्, अग्निमरुतौ देवता अस्य आग्निमारुतम् । `इद्वृद्धौ' इत्यग्निशब्दस्य इत्त्वम् ।
यो देवताद्वन्द्व इत्यादि । यः सूक्तं भजते स्तुत्यतया स सूक्तसम्बन्धी, हविर्यस्मै निरूप्यते स हविः सम्बन्धी । अर्थद्वारकं चेदं द्वन्द्वस्य विशेषणम् ।
स्कान्दविशाख इति । `सास्य देवता' इत्यण् । ब्राह्मप्रजापत्यमिति । `पत्युत्तरपदाण्ण्यः' । ननु `सास्य देवता' इत्यत्र न जातिवचनो देवताशब्दः, किं तर्हि ? यस्यै हविर्निरूप्यते, या वा मन्त्रस्तुत्या सास्य देवता गृह्यते; न चैवम्भूतोऽत्र द्वन्द्वार्थः, एवम्भूतत्वे वा यथा तद्धिता भवन्ति तथायमपि विधिः प्राप्नोति ? अत्राहुः---तद्धितः क्वचिदन्यत्रापि भवति---ज्ञा देवतास्य ज्ञः, स्थालीपाक इति हि भाव्ये दृष्टमिति ।।
नेन्द्रस्य परस्य ।। 7.3.22 ।।
आग्नेन्द्रम्, सौमेन्द्रमिति । `अजाद्यदन्तम्' इतीन्द्रशब्दस्य पूर्वनिपातो न भवति; प्रायिकत्वात्तस्य ।
इन्द्रशब्द इत्यादि । इन्द्रश्च मरुच्चेत्यादौ व्यञ्जनान्तेन सह द्वन्द्वे इन्द्रशब्दस्य पूर्वनिपातेन भाव्यम् । यथा---ऐन्द्रामारुतीं भेदकामालभेतेति ।
वायुविन्द्रावित्यादिकस्तु द्वन्द्वः सूक्तहविः सम्बन्धी न भवतीति भावः ।।
दीर्घाच्च वरुणस्य ।। 7.3.23 ।।
अत्र हीत्यादि । उदाहरणेषु `देवताद्वन्द्वे च' इत्यानङिकृते दीर्घात्परो वरुणशब्दः ।।
प्राचां नगरान्ते ।। 7.3.24 ।।
प्राचां देश इति । आचार्यग्रहणं तु न भवति; उत्तरसूत्रे `विभाषितम्' इति वचनात् ।।
जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् ।। 7.3.25 ।।
जङ्गलम्=वनप्रायो देशः, कुरुषु जङ्गलं कुरुजङ्गलम् । धेनुः=नवप्रसूता, विश्वेषां धेनुर्विश्वधेनुः । सुवर्णविकारः=वलजम्, सौवर्णवलजम् । `उत्तरम्' इत्युत्तरपदं लक्ष्यते, तस्य नित्यसन्निहितत्वात् स्वरूपेण विभाषितत्वानुपपत्तेर्विभाषितवृद्धिकत्वाद् विभाषितमिति गौणो वादः ।।
अर्द्धात्परिमाणस्य पूवस्य तु वा ।। 7.3.26 ।।
अर्द्धद्रौणिकमिति । प्राग्वतेष्ठञ् ।
वावचनमनर्थकम्, विभाषितमित्यनुवृत्तेः, तत्रैवं वक्तव्यम्---पूर्वं त्विति ? तथा तु न कृतमित्येव ।।
नातः परस्य ।। 7.3.27 ।।
आर्धप्रस्थिकम्, आर्धकंसिकमिति । पूर्ववट्ठञ् । कंसाट्टिठँस्तु न भवति; तदन्तविधेरभावात् । प्राग्वतेः संख्यापूर्वपदानां तदन्तविधिः, न वार्धशब्दः संख्यावाची ।
किं च स्यादिति । आकारो वृद्धिरेव, तत्र सत्यसति वा वृद्धिप्रतिषेधे नास्ति विशेष इति मन्यते । किं पुनः कारणं पुंवद्भावप्रतिषेधो न स्यात् ? इत्यत आह---यत्र हीति । तदुक्तम्---`कुर्वद्रूपे निमित्तशब्दो मुख्यः' इति ।
परस्येति किम् ? पूर्वस्य मा भूत्, अत इति विशेषणोपादानसाममर्थ्यात्पूर्वस्य न भविष्यति, न हि पूर्वस्याधशब्दस्याकारादन्यो वृद्धिभागस्ति । किञ्च---यदि पूर्वस्य प्रतिषेधः स्यात्, `पूर्वस्य तु वा' इत्येतदनर्थकं स्यात् । इदं तर्हि प्रयोजनम्---तदन्तविधिर्मा भूदिति, अन्यथाऽकारान्तस्योत्तरपदस्यैवं विज्ञायेत । तत्र को दोषः ? इहप्रतिषेधः स्यात्---अर्धद्रौणिकम्, अर्धकौडविकमिति । पूर्वस्तु विधिः---अर्धमुष्टिना क्रीतोऽर्धमौष्टिक इत्यादौ चरितार्थः ।
तस्मात्तदन्तविधिनिरासार्थम् `परस्य' इत्युक्तम् ।।
प्रवाहणस्य ढे ।। 7.3.28 ।।
प्रवाहणशब्दस्य ढे परत उत्तरपदस्येति व्यधिकरणे षष्ठ्यौ । प्रवाहणशब्दस्य अवयवभूतं यदुत्तरपदं तस्येत्यर्थः । ननु वृद्धिमदेवात्र स्वत एवोत्तरपदम्, कस्मै प्रयोजनायास्य पुनर्वृद्धिर्विधीयते ? उच्यते; यदा पूर्वपदे वृद्धिर्न भवति तदा यद्युत्तरपदेऽपि वृद्धिर्न स्यात्, `वृद्धिनिमित्तस्य' इति पुंवद्भावप्रतिषेधो न स्यात्---प्रवाहणेयीभार्य इति । मा भूदेवम्, `जातेश्च' इत्येवं भविष्यति, `गोत्रं च चरणैः सह' इति जातित्वम् ? एवं तर्ह्येतज्ज्ञापयति---अनित्योऽयं प्रतिषेध इति । तेन हस्तिनीनां समूहो हास्तिकमित्यत्र भस्याढे' इति वा, `ठक्छसोश्च' इति वा प्राप्तस्यौपसंख्यानिकस्य पुंवद्भावस्य प्रतिषेधो न भवति ।
प्रवाहयतीति प्रवाहणः, ण्यन्ताद् वहेर्नन्द्यादेर्ल्युः, `णेर्विभाषा' इति णत्वम् ।
तत्प्रत्ययस्य च ।। 7.3.29 ।।

प्रवाहणेयिरिति । यून्यपत्ये `अत इञ्' । प्रवाहणेयकमिति । `गोत्रचरणाद् वुञ्' ।
किमर्थमिदमुच्यते ? ढे परतः पूर्वेण विकल्प उक्तः, ठान्तस्येञादौ नित्यवृद्धिर्मा भूदिति । वैतदस्ति प्रयोजनम्, इञादिनिमित्ताया अपि वृद्धेर्ढाश्रय एव विकल्पो बाधको भविष्यति, `ढे' इति हि परसप्तमी, न निमित्तसप्तमी, तेना न्यनिमित्ताया अपि वृद्धेर्ढे परतः प्रतिषेधो लभ्यत एव ? अत आह---ब्राह्यतद्धितनिमित्तेति । अयमभिपायः---ढे उत्पन्ने तदाश्रयां वृद्धिं बाधित्वा विकल्पस्तावत्प्रवृत्तः, पश्चादिञादिरुत्पन्नः, तन्निमित्ता च वृद्धिः प्राप्ता, न त्विदानीं डनिमित्तो विकल्पः, पूर्वमेव प्रवृतत्वात्, आवृत्त्ययोगादिति ।।
नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ।। 7.3.30 ।।
अप्राप्तैव विधीयत इति । अप्राप्तिमेवोपपादयति---न नञ्पूर्वादिति । उत्तरो भावप्रत्यय इति । त्वतल्भ्यामुत्तरः ष्यञादिः, ततश्चोत्तरो भावप्रत्ययः प्रागेव नञ्समासात् शुच्यादिभ्य एव विधेयः, पश्चान्नञ्समासः; तत्र नञोऽङ्गेऽनन्तर्भावादप्राप्ता वृद्धिर्विधीयत इति ।
तदपरे इत्यादि । असति विषयेऽङ्गाधिकार उपमृद्यः, अस्ति च विषयः; कः पुनरसौ ? भाववचनादन्योऽपत्यादिषु विहितः प्रत्ययः । अथापि भाववचने श्रद्धा, सोऽपि शक्यत एव दर्शयितुमित्याह---बहुव्रीहेश्चेति ।
`उत्तरो भावप्रत्ययः प्रतिषिध्यते' इत्येतदप्यत्र न सार्वत्रिकमित्याह---अक्षेत्रज्ञेति । तदेवमङ्गाधिकारो न बाधनीय इति स्थितम् । एवं च `तदुपस्पर्शादशौचम्' इत्यादिप्रयोगोपपत्तिः । `दशाहं शावमाशौचम्' इत्यादौ त्विदमर्थोऽण् द्रष्टव्यः ।।
यथातथयथापुरयोः पर्यायेण ।। 7.3.31 ।।
ब्राह्मणादिषु नञ्समासावेतौ द्रष्टव्याविति । तेन `न नञ्पूर्वात्' इति ष्यञः प्रतिषेधो न भवतीति भावः । यथाऽसादृश्य इत्यव्ययीभावसमास इति । पदार्थानतिवृत्तौ । तथाभावमनतिक्रान्तं यथातथम्=सत्यमुच्यते, यद्वस्तु पुरा यथाभूतं तदद्यापि तथाभावमनतिक्रान्तं यथापुरमुच्यते । किं पुनरव्ययीभावत्वे प्रमाणम् ? इत्यत आह---तथा हीति । भाष्ये त्विति । न हि ह्रस्वत्वमकृत्वा । विग्रहप्रदर्शनमव्ययीभावस्योपपद्यते ।
अयं योगः शक्योऽवक्तुम् । कथम् ? यदा पूर्वपदस्य वृद्धिः, नञ्समासाद्भावप्रत्ययः । यदा तूत्तरपदस्य वृद्धिस्तदा ष्यञन्तेन नञ्समासः । स्वरेऽपि नास्ति विशेषः;अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वात् । प्रत्ययान्तरं चाभ्यां न भवति; अनभिधानात् ।।
हनस्तोऽचिण्णलोः ।। 7.3.32 ।।
तद्धितेष्विति निवृत्तमिति । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात् । तत्सम्बद्धं कितीत्यपीति । निवृत्तमित्यपेक्ष्यते । ञ्णिद्ग्रहणं तु प्रत्ययमात्रेण सम्बद्धम्, अतः `तद्धितेषु' इत्यस्मिन्निवृत्तेऽपि तदनुवर्त्तत एव । उदाहरणएषु `हो हन्तेर्ञ्णिन्नेषु' इति कुत्वम् ।।
आतो युक् चिण्कृतोः ।। 7.3.33 ।।
चिण्ग्रहणमकृदर्थम् । ददौ, दधाविति । ननु च `आत औ णलः' इत्यौत्वमत्र बाधकं भविष्यति, अनवकाशा हि विधयो बाधका भवन्ति, सावकाशं चौत्वम्, कोऽवकाशः ? यदा उत्तमे णलि णित्वाभावः ? एवं तर्हि `अचिणअणलोः' इत्यनुवर्तिष्यते, चिणि तु वचनाद्भविष्यति, तत्राह---चौडिर्बालाकिरिति । बाह्वादित्वादिञ् । अत्र दाक्ष्यादौ चरितार्थं यस्येतिलोपं बाधित्वा परत्वाद्युक् स्यात् । अचामादेरित्यनुवृत्तेर्न भविष्यति ? अत आह---ज्ञा देवता अस्येति । आदिवद्भावात्र प्रसङ्गः । किञ्च---`अचामादेः' इत्यनुवृत्तौ दरिद्रायक इत्यत्र न स्यात् ।।
नोदात्तोपदेशस्य मान्तस्यानाचमेः ।। 7.3.34 ।।
उपदेशे उदात्त उदात्तोपदेशः । अस्मादेव निपातनात्साधुः । किञ्चोक्तमिति । सन्निहितस्य कस्यचिदप्रसङ्गात्प्रश्नः । अत उपधाया इति वृद्धिरिति । चिण्कृदुपजीवनार्थं तु न तदनन्तरमिदमारब्धम् ।
निपातनादनुगन्तव्यमिति । येषां तु `अपाणिनीयो धातुपाठेऽर्थनिर्द्देशः' इति पक्षः, तेषामत्र `संज्ञापूर्वको विधिरनित्यः' इति वृद्ध्यभावः । शमी, तमीति । `शमित्यष्टाभ्यो घिनुण्', अत्र प्रत्ययस्वरे कृते सम्प्रति धातुरनुदात्तः । यामकः, रामक इति । लित्स्वरे कृते भवत्ययं सम्प्रत्युदात्तः ।
`अनाचमेः' इत्यल्पमिदमुच्यते ? इत्याह---अनाचमिकमिवमीनामिति वक्तव्यमिति । `टुवम उद्गिरणे', `कमु कान्तौ', `चमु अदने', तत्र सूत्रे आङ्पूर्वस्य पर्युदासः, वाक्ये तु केवलस्य । वृत्तौ तु वाक्योदाहरणमप्याङ्पूर्वस्यैव दर्शितम्, नात्राप्तैर्निरणायि । काम इति । कमेः `आयादय आर्धधातुके वा' इति णिङभाव पक्षे घञ्, वृद्धिः । णिचि वृद्धौ सत्यमिति । न हि तत्रायं प्रतिषेधः; णिचोऽकृत्त्वात् । ननु च सत्यामपि वृद्धौ `जनीजृष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वे सति `मितां ह्रस्वः' इति ह्रस्वेन भाव्यम् ? अत आह---तत्र हीति । नान्ये मितोऽहेताविवीति । अहेतौ चुरादिणिच्यनुक्रान्तेभ्योऽन्येऽमन्तादयो मितो न भवन्तीत्यर्थः । अन्याय्यमेव मन्यन्त इति । `विश्रान्तिभूमिः' इति पठितव्यमित्यर्थः । तेन `विश्रामं लभता मिदं च शिथिलज्याबन्धमस्मद्धनुः' इति व्याख्यातम् ।।
जनिवध्योश्च ।। 7.3.35 ।।
वधिः प्रकृत्यन्तरमिति । `वध हिंसायाम्' इति भूवादौ पाठात् । भक्षकश्चेदिति । योऽपि मांसं क्रीत्वा भक्षयति, तस्यापि हिंसानुषङ्गोऽस्तीत्येतदनेन प्रतिपाद्यते । यथाह मनुः (मo स्मृo 5.51)---
अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ।
संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः ।। इति ।

हनादेशस्येति । अवधि भवता दस्युरित्यत्र । जजान गर्भमिति । व्यत्ययेन परस्मैपदम्, अन्तर्भावितण्यर्थत्वात् सकर्मकत्वम् ।।
अर्तिह्रीव्लीरीक्नुयीक्ष्माय्यातां पुङ् णौ ।। 7.3.36 ।।
`व्लीङ् वरणे', `क्नूयी शब्दे', `क्ष्मायी विधूनने' । उदाहरणेषु पुगन्तलक्षणो गुणः । द्वयोरपि ग्रहणमिति । विशेषानुपादानात् ।
री इत्यपीति । यद्यपि प्रस्रवणार्थः सानुबन्धकः तथापि तस्यापि ग्रहणमाचार्यैः स्मर्यत इति भावः ।
पूर्वान्तकरणं न यादृच्छिकम्, किं तर्हि ? विवक्षितमित्याह---पुकः पूर्वान्तकरणमिति । अदीदपदिति । यदि पुनर्णेः पुट् स्यात्, तस्य णिग्रहणेन ग्रहणाण्णौ परतो यदङ्गं न तस्याकार उपधेति ह्रस्वो न स्यात् । दोषोपलक्षणं चैतत्, दाप्यते इत्यादौ `णेरनिटि' इति णेर्लोपेनापहृतत्वात्पकारस्य श्रवणं न स्यात् ?
नैष दोषः; न हि लोपः सर्वापहारी, `अलोऽन्त्यस्य' इत्यन्त्यस्य लोपः । इह तर्हि क्नोपयतीतीडागमः प्राप्नोति ।
लाभोऽपि कश्चिन्नैवात्र परादौ सति दृश्यते ।
पुगन्तस्य गुणो वाच्यो वृद्धिः स्यादन्यथा यतः ।।
यत्किलेदमुच्यते---पुटि सति गुणविधौ पुगन्तग्रहणं न कर्त्तव्यम्, `सार्वधातुकार्धधातुकयोः' इत्येव सिद्धत्वादिति, तदप्याशावादमात्रम्; यतः परादावप्यवश्यं पुटि गुणो विधेयः, अन्यथा `अचो ञ्णिति' इति वृद्धिप्रसङ्गात् ।।
शाच्छासाह्वाव्यावेपां युक् ।। 7.3.37 ।।
पाग्रहणे इत्यादि । इष्टिरेवेयम्; लाक्षणिकत्वात् पारूपस्य ।
लुगागमस्त्विति । यद्यपि पालयतीति रूपम् `पाल रक्षणे' इत्यस्यैव चुरादिणिजन्तस्य पुनर्हेतुमण्णिचि सिद्धम्, तथापि पातेः पुकि पापयति, युकि तु पाययति इति मा भूदिति लुग्वचनम् ।
धूञ्प्रीञोरिति । `धूञ् कम्पने', `प्रीञ् तर्पणे', ञान्तस्यानुकरणम्; तेन न दैवादिकस्य नुग्भवति ।
एतेऽपीति । एते युगादयः, वक्ष्यमाणाश्च जुगादयः । कृतात्वानां ग्रहणमिति । आकारान्तानां युकं विधाय तदनन्तरमाकारान्तेषु गृह्यमाणेषु युकः प्राप्तिराख्याता भवतीति भावः । एवमादीति । आदिशब्देन---क्रापयति, निजापयति, विलापयते, मुण्डो विस्मापयते, प्रियमाचष्टे प्रापयतीत्यादेर्ग्रहणम् ।।
वो विधूनने जुक् ।। 7.3.38 ।।
`विधूनने' इत्ययमेव निर्देशो लिङ्गम्---धूञो णौ नुग्भवतीति । वा इत्येतस्येति । `वा गतिगन्धनयोः' इत्यस्य । `वज व्रज गतौ' इत्यस्य णिचि रूपे वाजयतीति सिद्धे, वातेः पुग्निवृत्त्यर्थं जुको विधानम् ।।
लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने ।। 7.3.39 ।।
स्नेहः= घृतादिः, तस्य विपातनम्=विगच्छतः काठिन्यं त्यजतः प्रयोजनकव्यापारः । स्नेहविपातनं काठिन्यमुपगतस्याग्नौ निष्टपनादिना द्रवत्वापादानमित्यर्थः ।
न तु कृतात्वस्येति । एकदेशविकृतस्यानन्यत्वात् प्रसङ्गः । जटाभिरालापयत इति । `लियः सम्माननशालीनीकरणयोश्च' इत्यात्मनेपदम् ।
ली इति लीलीङोर्ग्रहणमिति । क्रैयादिकदैवादिकयोः । निरनुबन्धकपरि भाषा तु नेष्यते । कृतात्वस्य च लीयतेरिति । ग्रहणमित्यपेक्ष्यते ।।
भियो हेतुभये षुक् ।। 7.3.40 ।।
हेतुः पारिभाषिकः, भीः=भयम्, हेतोर्भयं हेतुभयम्, तत्र वर्तमानस्य । भीषयत इति । `भीस्म्योर्हेतुभये' इत्यात्मनेपदम् । भापयत इति । `बिभेतेर्हेतुभये' इत्यात्वम् ।।
रुहः पोऽन्यतरस्याम् ।। 7.3.43 ।।
अयं योगः शक्योऽवक्तुम् । कथम् ? `रुप विमोहने' इति दिवादौ पठ्यते, स ण्यन्तोऽत्र जन्मनि वतिष्यते; अनेकार्थत्वाद्धातूनाम्, तस्य रोपयतीति । रूहेस्त्वारोहयतीति ।
प्रत्ययस्थात्कात्पूर्वस्यात् इदाप्यसुपः ।। 7.3.44 ।।
अत्र यदि कादित्यत्राकारो विवक्षितः स्यात्, एतिकाश्चरन्तीत्यत्रेत्वं न स्यात् । एतदोऽकचि जसि त्यदाद्यत्वे टापि च रूपम् । अकचो ह्यन्त्योऽकार उच्चारणार्थो न श्रवणार्थः; भिन्धिकि, रुन्धकि इत्यादेरसिद्धिप्रसङ्गात्, ततश्च कशब्दस्याभावादेतिका इत्यत्र न स्यादेव । `न यासयोः' इति च प्रतिषेधः सङ्घातग्रहणेऽनर्थकः स्यात् । तस्मादुच्चारणार्थोऽकारः, वर्णमात्रमेव विवक्षितमित्याह---प्रत्ययस्थात्ककारादिति । स चेदिति । स चेदाप्सुपः परस्तान्न भवति तदेत्वमित्यर्थः । प्रत्ययग्रहणपरिभाषया सुबन्थादिति द्रष्टव्यम् । जटिलिका, मुण्डिकेति । टाबन्ताभ्यामज्ञातादिषु `प्रागिवात्कः', `केऽणः' इति ह्रस्वत्वम्, ततष्टाप्, तत इत्वम् । यद्यप्ययमकारो लाक्षणिकः, तथापि `उदीचामातः स्थाने' इति लिङ्गात्तस्यापि भवति ।
ककारमात्रं हाति । उक्तमिदम्---`कादिति वर्णमात्रं विवक्षितम्' इति, न ककारमात्रं कश्चिप्रत्ययोऽस्ति, तस्मात् कात्प्रत्ययादित्युच्यमानेऽपि प्रत्ययावयवे प्रत्ययशब्दो वर्त्तिष्यते इति किं स्थग्रहणेनेत्यर्थः ।
पटुका, मृदुकेति । पटुमृदुशब्दाभ्यां स्त्र्यर्थवृत्तिभ्यां के कृते टाप् । असति पूर्वग्रहणे `तस्मादित्युत्तरस्य' इति कात्परस्यैवाकारस्य `वार्णादाङ्गं बलीयः' इत्येकादेशं बाधित्वा इत्त्वं स्यात् । यद्यपि जटिलिका, मुण्डिकेत्यादावयं प्रसङ्गः शक्यो दर्शयितुम्; तथापि विस्पष्टार्थमुदाहरणान्तरमुपन्यस्तम् । राका, धाकेति । `कृदाधारार्चिकलिभ्यः कः' ।

अथापीत्यनेन किं विशिष्यति इति । ककारः, प्रत्ययो वेति सन्देहात्प्रश्नः । ककार इति । प्रत्यये तु विशिष्यमाणे रथकट्यादिष्वतिप्रसङ्ग इति भावः । यद्यपि प्रत्ययोऽपि श्रुतः, तथापि तस्योपसर्जनत्वात् ककार एव विशिष्यते । कारिकेत्यत्रापि न स्यादिति । अतिप्रसङ्गस्तिष्ठतु तावत्, इष्टमपि न सिद्ध्यतीत्यपिशब्दस्यार्थः । `आपि परतो यः ककारः'---इत्येवं विज्ञायमाने कारिकेत्यपि न स्यात्; एकादेशस्य यो द्वितीयोऽकारस्तेन व्यवधानात् । वचनाद्व्यवधानमीदृशमिति । आश्रीयत इति वक्ष्यमाणेन सम्बन्धः । ईदृशमित्येतद्व्याचष्टे---स्थानिकद्भावकृतमिति । एकेन वर्णेनेत्युपलक्षणम् । स्थानिवद्भावकृतमित्येतावति तात्पर्यम्; अन्यथा एतिकेत्यत्र द्वाभ्यामकाराभ्यां व्यवधानादित्त्वं न स्यात् । एक एतदः सम्बन्धी, द्वितीयः `त्यदादीनामः' इत्यकारः; तत्राकारयोर्यः पररूपमेकादेशः, यश्च टापा सह दीर्घः---द्वयोरपि तयोः स्थानिवद्भावः । अन्ये त्वाहुः---अत्रापि टापा सह य एकादेशस्तस्यैव स्थानिवद्भावः, न त्वकारयोः कृतस्य पररूपस्य; सकृत्पवृत्त्या लक्षणस्य चरितार्थत्वात् । तेनात्राप्येकेनैव व्यवधानमिति । वचनाद्व्यवधानेऽपि भविष्यतीति वक्तव्ये, ईदृशं व्यवधानमिति यदुक्तम्, तस्य व्यावर्त्यं दर्शयति---रथकट्यादिष्विति । रथानां समूहो रथकट्या, `इनित्रकट्यचश्च' । आदिशब्देन गर्गकाम्यादेग्रहणम् । गर्गमिच्छत्यात्मन इति काम्यजन्तादप्रत्ययः, ततष्टाप् । एतदुक्तं भवति---आपीति सप्तम्या यदानन्तर्यमुपात्तं तन्नात्यन्ताय त्यज्यते, किन्तु यावत्सम्भवमाश्रीयत इति ।

सुवन्तादयं परिव्राजकशब्दादिति । प्रत्ययलक्षणेन सुबन्तत्वम् । पर्यदासे हीति । सुपोऽन्यो।ऽसुप्, ततश्चेदाप्पर इत्याश्रीयमाण इत्यर्थः । समुदायादसुबन्तादिति । अवयवात्परिव्राजकशब्दात्सुबुत्पन्नः, न समुदायादिति तस्यासुबन्तत्वम् । एवमपि नाश्रीयते इति । बहुव्रीहिरपि नाश्रीयत इत्यर्थः । किं कारणम् ? इत्यत आह---तथा हीति । बहुचर्मिकेति । बहूनि चर्माण्यस्यामिति बहुव्रीहिः, `शेषाद्विभाषा' इति कप् । तत्पुरुषे त्वस्मिन्, नात्र सुबन्तात्परष्टाव् भवति; कपा व्यवहितत्वात् ।

मामिकेति । ममेयमित्यण्, `तवकममकावेकवचने' इति ममकादेशः । दाक्षिणआत्यिकेति । `दक्षिणादाच्', दक्षिणा, ततो भवादौ `दक्षिणापश्चात्पुरसस्त्यक्'। इहत्यिकेति । `अव्ययात्त्यप्' ।।

न यासयोः ।। 7.3.45 ।।

पूर्वेण नित्यमित्त्वे प्राप्ते निषेधोऽयमुच्यते, प्राप्तिपूर्वकत्वात् प्रतिषेधस्य । यदा यत्तदोरकज्भवति तदा प्रतिषेधः । यका, सकेति । यत्तदोरकच्, सौ त्यदाद्यत्वे टाप् । या सेति प्रथमैकवचनान्तयोरुपादानाद्विभक्त्यन्तरे प्रतिषेधो न स्यादित्यत आह---यासेति निर्देशो न तन्त्रमिति । यत्तदोरुपलक्षणमिति । यद्येवम्, यत्तदोरित्येव वक्तव्यम् ? सत्यम्; तथा तु न कृतं किं कुर्मः ! यकांयकामधीमह इति । ऋचं गाथां च । तकांतकाम्पचामह इति । ओषधिं शाकिनीं वा, द्वावेतौ प्रयोगौ ।

उपत्यकेति । `उपाधिभ्यां त्यकन्नासन्नारूढयोः' । अत्र कश्चिदाह---`स्त्रीविषयोऽयं त्यकन्प्रत्ययान्तः; ततश्च प्रक्रियालाघवाय त्यिकन्निति वक्तव्ये त्यकन्नित्यकारोच्चारणसामर्थ्यादित्त्वाभावः' इति तदयुक्तम्; पञ्चभिरुपत्यकाभिः क्रीतः पञ्चोपत्यक इत्यादावार्हीयस्य ठकः `अध्यर्धपूर्व' इति लुकि कृते `लुक् तद्धितलुकि' इति टापो लुकि निमित्ताभावादित्त्वं न स्यादिति तद्धितलुगर्थमेतत्स्यात्, बहिरङ्गो लुक्, `अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते' । ननु च `सुपो धातुप्रातिपदिकयोः' इत्येतद्विषयमेतत् ? नेत्याह; यश्च यावाँश्च तुग्ग्रामः, सर्वोऽप्यन्तरङ्गान्विधीन्बाधते, यथा---`सनीस्रंस' इत्यादौ नलोपो न भवति । पञ्चखट्व इत्यादौ टापा सहैकादेशो न भवति; यदि स्यात्, आदिवद्भावादाव्ग्रहणेन ग्रहणाल्लुकि सति अकारोऽत्र न श्रूयेत ।

पावका इति । पुनन्ति पावयन्तीवि वा पावकाः । अलोमका इति । बहुव्रीहेः कप् ।

जीवकेति । `आशिषि च' इति वुन् ।

देवकेति । देवदत्तशब्दात् `अनुकम्पायां कन्', `अनजादौ च विभाषा लोपो वक्तव्यः' इति दत्तशब्दस्य लोपः ।

क्षिपकेति । क्षिपेरिगुपधात्कः । `ध्रु गतिस्थैर्ययोः', पचाद्यचि कुटादित्वाद् गुणाभावे उवङ्, उभाभ्यामज्ञातादिषु `प्रागिवात्कः'।

तरतेर्ण्वुल्---तारका । वर्णयति महत्त्वादिकं गुणमिति वणका=प्रावारविशेषः, तन्तूनां विकारस्तान्तवम् `ओरञ्' । वणिकेति । भागुरी व्याख्या, टीकाविशेषः । वृतेर्ण्यन्तात् ण्वुल्---वर्त्तिका ।

अष्टकेति । अश्नन्ति ब्राह्मणा ओदनमस्यामित्यष्टका, `इष्यशिभ्यां तकन्' इति तकन् । पितरश्च ता देवताश्च पितृदेवताः, तदर्थं कर्म पितृदैवत्यम् `देवतान्तात्तादर्थ्ये यत्' इति यत् । अष्टिकेति । अष्टौ परिमाणमस्याः, `संख्याया अतिशदन्तायाः कन्' ।

सूतकेति । `न सामिवचने' इति प्रतिषेधेन ज्ञापितः स्वार्थे कन् । पुत्रिकेति । शाङ्र्गरवादित्वान्ङीनि कृते स्वाथिकः कन्, `केऽणः' इति ह्रस्व इकारः, तस्य पक्षेऽत्वं विधीयते । वृन्दारिकेति । `श्रृङ्गवृन्दाभ्यामारकन् वक्तव्यः' इत्यारकन् ।।

उदीचामातः स्थाने यकपूर्वायाः ।। 7.3.46 ।।

यकौ पूर्वौ यस्याः सा यकपूर्वा, कोऽन्यपदार्थः ? आकारः । अर्थगतं स्त्रीत्वं शब्दे समारोप्य स्त्रीलिङ्गनिर्देशः, पूर्वशब्दो व्यवस्थावचनः । इभ्यिकेति । इभर्हतीति `दण्डादिभ्यो यः'---इभ्या, ततः पूर्वत्कः, ह्रस्वत्वं च । चटक--मूषकशब्दाभ्यामजादित्वाट्टाप् । साङ्काश्यिकेति । सङ्काशैः निर्वृत्तं साङ्काश्यम्, `सङ्काशादिभ्यो ण्यः', ततो भवार्थे `धन्वयोपधाद्वुञ्' इति वुञ् ।

स्थानग्रहणमनर्थकम्, `षष्ठी स्थानेयोगा' इति सिद्धत्वादिति ? अत आह---स्थानग्रहणमित्यादि । परिभाषाया विधिशेषत्वादनुवादे उपस्थानं न स्यादिति भावः । अनुवादत्वमेव स्पष्टयति---आत इत्यनेन हीति । अतो योऽकारस्तस्येत्त्वं भवतीति वचनव्यक्तौ नाकारस्य विधिस्पर्शः कश्चिदस्तीत्यर्थः ।

स्त्रीप्रत्ययस्य प्रतिपत्त्यर्थमिति । यः `स्त्रियाम्' इत्यधिकृत्य विहितष्टाबादिः स स्त्रीप्रत्ययः, तस्य प्रतिपत्तिर्यथा स्यादित्येवमर्थमित्यर्थः । असति हि स्त्रीलिङ्गेयः कश्चनाकारो गृह्येत ।

शुभं याति, भद्रं यातीति । क्विप् । शुभम्, भद्रमिति मकारान्तौ निपातितौ, पूर्वत्कः, ह्रस्वत्वं च ।

प्रतिषेध इति । तेन विधिरेव भवति । सुनयिका, सुशयिकेति । नीशीभ्याम् `एरच्', सुशब्देन बहुव्रीहिः, टाबादि पूर्ववत् । सुपाकिका, सुशोकिकेति । पचिशुचिभ्यां घञ्, `चजोः कु घिण्ण्यतोः' इति कुत्वम् । शेषं पूर्ववत् ।।

भस्त्रैषाचजाज्ञाद्वास्वा नञ्पूर्वाणामपि ।। 7.3.47 ।।

`स्वा' इति षष्ठ्याः स्थाने प्रथमा । एषेति कृतषत्वनिर्देशस्तन्त्रम् । तथा च---एतिकाश्चरन्तीति जसि नित्यमित्त्वमुदाहृतम् ।।

अत्रातः स्थान इत्येतत् स्वशब्दस्य विशेषणण् ।
सम्भवव्यभिचारौ हि तत्र स्तः काकचोः सतोः ।।
द्व्येतदोः सम्भवो नास्ति, नान्यत्र व्यभिचारिता ।
सर्वनाम्नः स्वशब्दस्य तेन नायं विधिर्भवेत् ।।

द्वके इति । द्वकिशब्दाद् द्विवचने त्यदाद्यत्वे टापि औङः शीभावः । तस्यां सत्यामिति । समासार्थात्तु या विभक्तिस्तस्यां त्यदाद्यत्वं न भवति; `अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते' इति वचनात् । सोऽन्तवर्त्तिन्या विभक्त्या सुबन्तात्पर इति । प्रत्ययलक्षणेन सुबन्तत्वम् ।

स्वशब्दोऽपि तर्ह्यनयैव युक्त्या नञ्पूर्वो न प्रयोजयेदित्यत आह---स्वशब्दस्त्विति । स्वशब्दो हि `स्वमज्ञातिधनाख्यायाम्' इति वचनाज्ज्ञातिधनयोरसर्वनामसंज्ञकः, तेन तस्मात्कप्रत्ययेनैव भवितव्यम्, नाकचा । तत्र यदा नञ्समासे कप्रत्ययः क्रियते तदन्ताच्च टाप्, तदासौ सुपः परो न भवति; केन व्यवहितत्वात् । तेनासर्वनामसंज्ञकः स्वशब्दो नञ्पूर्वोऽपि भवत्येव प्रयोजकः ।

अभस्त्रका, अभस्त्रिकेति । `अल्पे' इति `प्रागिवात्कः' । असति तु भस्त्राग्रहणे यथा न सिध्यति तथा दर्शयति---अत्रेति । बहुव्रीहिः पुंस्यपि वर्त्तते---अभस्त्रः पुरुष इति । विहितग्रहणेनैतद्दर्शयति---यद्यप्यभाषितपुंस्काद्भस्त्राशब्दात्परो भवति, तथापि तस्माद्विहितो न भवति । विहितविशेषणं चोत्तरत्रापि भाषितपुंस्कग्रहणम्, अन्यथा न विद्यते खट्वा यस्याः साऽखट्वा, ततोऽखट्विका---इत्यादावपि प्रसङ्गादिति ।

अपिग्रहणेन केवलानामेव भस्त्रादीनां समुच्चयः, नान्यपूर्वाणामिति शङ्कमानं प्रत्याह---नञ्पूर्वाणामपीत्यपिशब्दादिति । इष्यते इति । अनेन नेयं स्वतः प्राप्तिरिति दर्शयति । यदि तर्हि सर्वत्रेष्येत, नञ्पूर्वाणामपीति न वक्तव्यम् `अङ्गाधिकारे तस्य च तदुत्तरपदस्य च' इत्येव सर्वत्र भविष्यत्यत आह---तत्रेति ।।

अभाषितपुंस्काच्च ।। 7.3.48 ।।

अभाषितपुंस्कादिति विहितविशेषणमित्याह---अभाषितपुंस्काद्विहितस्येति । खट्वाशब्दः स्त्रियामेव नियत इत्यभाषितपुंस्कः, बहुव्रीहेरभिधेयलिङ्गत्वादभाषितपुंस्कत्वाभावादनेन विकल्पेन न भवितव्यमिति मन्यमानं प्रत्याह---बहुव्रीहाविति । कथं भवतीत्यत आह---तत्रापीति । इतिकरणो हेतौ ।

यदा त्विति । कबभावपक्ष एतत् । अखट्वा इति स्थिते उपसर्जनह्रस्वत्वम्, टाप्, पुनः `केऽणः' इति ह्रस्वः । स च समासाद्भाषितपुंसकादुत्पन्नस्य टाप इति न भवत्ययं विकल्पः । `अभाषितपुंस्कात्परस्यातः' इति विज्ञायमाने स्यादेवात्र विकल्पः । अतिखट्विकेति । अत्रापि समासाद्भाषितपुंस्काट्टाबुत्पन्नः ।।

आदाचार्याणाम् ।। 7.3.49 ।।

इत्त्वापवादोऽयं योगः । `केऽणः' इति ह्रस्वापवादश्च । आचार्याणामिति । उदीचामित्युक्तम्, ततोऽन्येषामाचार्याणामित्यर्थः । अपर आह---आचार्यस्य पाणिनेर्य आचार्यः स इहाचार्यः, गुरुत्वात्तु बहुवचनमिति । सर्वथा अभाषितपुंस्केषु त्रैरूप्यम्---अखट्वका, अखट्विका, अखट्वाकेति ।।

ठस्येकः ।। 7.3.50 ।।

अत्र द्वौ पक्षौ---ठेति व्यञ्जनमात्रं स्थानित्वेन निर्दिश्यते, अकारस्तूच्चारणार्थः, एवं ढगादिष्वपीत्येकः पक्षः; सङ्घातः प्रत्ययः, स्थान्यप्यत्र स एवेति द्वितीयः । तत्राद्ये पक्षे पठिता, पठितुमित्यादौ धात्वन्तस्यापि प्रसङ्गः; द्वितीये तु अठचि कर्मठ इत्यत्रापि प्राप्नोति । तत्र द्वयोरपि पक्षयोर्यथा दोषो न भवति तथा दर्शयन्नाह---अङ्गस्य निमित्तं यष्ठ इति । सम्बन्धस्तत्र नावयवावयविभावलक्षणः, पठितेत्यादावपि प्रसङ्गात्; किं तर्हि ? निमित्तनिमित्तिभावलक्षणः । अङ्गस्य सम्बन्धीत्युक्ते तद्रूपसम्बन्ध्येव प्रतीयते; प्रत्ययश्च तद्रूपसम्बन्धी, तदायत्तत्वादङ्गव्यपदेशस्य । तदेवमङ्गव्यपदेशनिमित्तस्य प्रत्ययस्य ग्रहणादुभयोरपि पक्षयोर्दोषाभावः । किञ्च---सङ्घातपक्षे अर्थवतष्ठशब्दस्य ग्रहणान्न भवति कर्मठः---इत्यत्र प्रसङ्गः । वर्णग्रहणे त्वर्थवत्परिभाषा न प्रवर्तते । तत्र सङ्गातपक्षे दोषान्तरमाशङ्क्य परिहरति--तत्रेति । पुनरपि तस्मिन्नेव पक्षे चोदयति---मथितं पण्यमस्येति । वर्णग्रहणमे तु `अनल्विधौ' इति स्थानिवत्त्वनिषेधादिकस्य कादेशाप्रसङ्गः । कादेशः । प्राप्नोतीति । ननु तान्तादङ्गादित्युच्यते, न चात्र तान्तमङ्गम्, ततः प्रत्ययस्याविधानात् ? नैतदस्ति; एकदेशविकृतस्यानन्यत्वादङ्गं भवति, तान्तं च; ततश्च यथा---अनुकम्पितो भानुदत्त इति ठचि द्वितीयादच ऊर्ध्वस्य लोपे कादेशो भवति---भानुक इति, तथात्रापि प्रसङ्गः ? परिहरति---सन्निपातेति । अजादिसन्निपातेन तान्तत्वमुपजायते, ततश्च तद्विघातस्य निमित्तं नोपपद्यते ।

परिहारान्तरमाह---यस्येतिलोपस्येति । स्थानिवद्भावस्तु `अचः परिस्मिन्पूर्वविधौ' इत्यनेन । ननु पूर्वस्य विधावित्युच्यते, परस्यायम् ? तत्राह---

पूर्वस्मादपिहीति । पञ्चमीसमासोऽपि तत्राश्रीयत इत्यर्थः । अन्ये त्वाहुः---वर्णग्रहणादेव तदन्तविधौ सिद्धे, अन्तग्रहणं प्रत्ययोपदेशकाले तान्तप्रतिपत्त्यर्थमिति ।।

इसुसुक्तान्तात्कः ।। 7.3.51 ।।

सार्पिष्क इति । `तदस्य पण्यम्' इति ठक्, `इणः षः' इति विसर्जनीयस्य षत्वम् । धानुष्क इति । प्रहरणमिति ठक् । याजुष्क इति । दीव्यत्यर्थे ठक् । नैषादकर्षुकः, शाबरजम्बुक इति । भवादावर्थे `ओर्देशे ठञ्', कादेशे कृते `केऽणः' इति ह्रस्वत्वम् । मातृकम्, पैतृकमिति । तत आगतः, `ऋतष्ठञ्' । औदश्वित्क इति । `संस्कृत भक्षाः', `दध्नष्ठक्', `उदश्वितोऽन्यतरस्याम्' इति सप्तम्यन्तात्ठक् । शाकृत्कः, याकृत्कः, याकृत्क इति । `संसृष्टे' इति ठञ् । आशिषेति । `आङः शासु इच्छायाम्' इत्यस्मादाशासनमाशीरिति सम्पदादित्वाद् भावे क्विप्, `आशासः क्वावुपसंख्यानम्' इतीत्वम् । उषेति । वसेः क्विप्, यजादित्वात्सम्प्रसारणे लाक्षणिकं रूपमिति । सर्पिरादौ तु `अर्चिशुचिहूसृपिच्छादिभ्य इसिः', `जनेरुसिः', `अर्तिवपियजित्रापिधनिभ्यो नित्' इति प्रतिपदोक्तमिसुसो रूपम् ।

दोष उपसंख्यानमिति । वर्णैकदेशानां वर्णग्रहणेनाग्रहणादोकारे य उकारः, तस्य उकारग्रहणेनाग्रहणादुपसंख्यानम् ।।

चजोः कु घिण्ण्यतोः ।। 7.3.52 ।।

पाक इत्यादौ भावे घञ् । पाक्यमित्यादौ कर्मणि `ऋहलोर्ण्यत्' । यथासंख्यमत्र न भवति---घिति चकारस्य, ण्यति जकारस्येति; `भुजन्युब्जौ पाण्युपतापयोः', `प्रयाजानुयाजौ यज्ञाङ्गे', `वचोऽशब्दसंज्ञायाम्' इत्यादेर्लिङ्गात् ।

क्वचितु पठ्यते---यथासंख्यमत्र नेष्यते, तेन रक्तं रागादिति लिङ्गादिति ।।

न्यङ्क्वादीनां च ।। 7.3.53 ।।

न्यङ्कु इत्येवमादीनां चेति । `सिद्धये' इति शेषः, कृतकुत्वानामेव गणे पाठात् । किमर्थं तर्हि सूत्रम्, यावता यथैव कुत्वादन्यदपि घत्वगुणदीर्घत्वादिकं निपातनाद्भवति, तथा कुत्वमपि भविष्यति ? सत्यम्; असति तस्मिन्, अनुवादे गणस्य क्वचिदप्यनुपयोगात्प्रमादपाठः शङ्क्येत । पचाद्यचीति । घञि कुत्वस्यासिद्धत्वात् ।

संज्ञायां मेघ इत्यादि । मेघः=परोयघरः, निदाघः=घर्मः, अवदाघोऽपि स एव । अर्घः=विक्रीयमाणस्य धान्यादेरियत्ता, मूल्यमित्यन्ये । वीरुदिति । निपातनादुपसर्गस्य दीर्घत्वम् ।।

हो हन्तेर्ञ्णिन्नेषु ।। 7.3.54 ।।

ञश्च णश्च ञ्णौ, तावितौ ययोस्तौ ञ्णितौ, तौ च नश्च ञ्णिन्नाः, तेषु ञ्णिन्नेषु । नकारेऽकार उच्चारणार्थः, तेन वृत्रघ्नि, वृत्रघ्नोरित्यादावपि भवति । घ्नन्तीत्यादौ `गमहन' इत्युपधालोपः ।

किमिदं ञ्णिन्नग्रहणं हन्तिविशेषणम्---ञ्णिन्नपरस्य हन्तेर्यो हकार इति ? आहोस्विद्धकारविशेषणम्---ञ्णिन्नपरस्य हकारस्य स चेद्धन्तेरिति ? तत्राद्ये पक्षे ह्यत्रासिद्धिः---घ्नन्ति, घ्नन्तु; न हि स्वावयव एव स्वस्मात्परो भवति । द्वितीये तु न क्वचित् स्यात्, न हि ञ्णिन्नकारपरता हकारस्य क्वापि सम्भवति---घातयतीत्यादौ तावदकारेण तकारेण च व्यवधानम्, घ्नन्तीत्यादावुपधा लोपस्य स्थानिवद्भावाद् व्यवधानमेव । अथ वचनाद्व्यवधानेऽपि भविष्यति ? इहापि तर्हि प्राप्नोति---हतमिच्छति हतीयति, हतीयतेर्ण्वुल्, हतायक इति, नकारेऽपि हन्ता, हननमित्यादावपि प्रसङ्गः । नकारग्रहणमिदानीं किमर्थं स्यात् ? यत्र नकारः श्रूयते तत्र यथा स्यात्, इह मा भूत्---हतः, हथ इति तदेवं द्वयोरपि पक्षयोर्दोषं दृष्ट्वा पक्षान्तरं दर्शयति---ञ्णित्प्रत्यय इत्यादि । यद्यपि द्वन्द्वनिर्द्दिष्टानामेकयोगक्षेमता न्याय्या, तथापि सम्भवव्यभिचारौ हि विशेषणविशेष्यभावस्याङ्गमित्ययमेव प्रकार आश्रीयते । ननु च `स्थानिवद्भावादानन्तर्यं नकारस्य न सम्भवति' इत्युक्तम् ? अत आह---तच्चेति । सन्निपातकृतमिति । श्रुतिकृतमित्यर्थः ।

अथ वा---पुनरस्तु द्वितीयः पक्षः, तत्रापि दोषः सुप्रतिविधानः ? इत्याहयदापीति । धात्ववयवेन नकारेण व्यवधानमव्यभिचारीति तदेवाश्रीयते, न शब्दान्तरेणेति ञ्णित्ययं परिहारः । नकारे तूक्त एव ।।

अभ्यासाच्च ।। 7.3.55 ।।

अहं जघनेति । णित्त्वाभावे उदाहरणम् । णित्त्वपक्षे पूर्वेणैव सिद्धम् । एवं जघनिथ, जघन्थ, जघन्वानित्युदाहरणम् ।

अभ्यासनिमित्ते प्रत्यय इत्यादि । अङ्गाधिकारेणाभ्यासेन च प्रत्ययस्याक्षेपादयमर्थो लभ्यते । जिहननीयिषतीति । अत्र यस्मिन्हनिरङ्गं ल्युटि न तस्याभ्यासनिमित्तत्वम्, यश्चाभ्यासस्य निमित्तं सन् न तस्मिन् हन्तिरङ्गम् ।।

हरचङि ।। 7.3.56 ।।

प्राजीहयदिति । ण्यन्ताल्लुङ्, चङ्, णिलोपः, उपधाह्रस्वत्वम्, `चङि' इति द्विर्वचनम्, `कुहोश्चुः' इति कुत्वम्, `दीर्घो लघोः' इति दीर्घः ।

`अचङि' इत्येतत्प्रत्याचष्टे---अचङीति शक्यमकर्त्तुमिति । कथम् ? इत्यत आह---चङ्यभ्यासेति । यथा पूर्वसूत्रे जिहननीयिषतीत्यत्र न भवति, एवं प्राजीहयदित्यत्रापि न भविष्यति, किमचङीत्यनेनेत्यर्थः । तत्क्रियत इत्यादिपरिहारः । किमेतस्य ज्ञापने प्रयोजनम् ? इत्यत आह---तेनेति ।।

सन्लिटोर्जेः ।। 7.3.57 ।।

`ज्या वयोहानौ'---इत्यस्य किति ग्रहिज्यादिसूत्रेण सम्प्रसारणे कृते पूर्वत्वे च जिरूपस्य भावाद् `हलः' इति दीर्घत्वं बाधित्वा कुत्वं प्राप्नोति, कृतेऽपि वा

दीर्घत्वे एकदेशविकृतस्यानन्यत्वात्कुत्वप्रसङ्गः, यथा---जिगीषतीत्यत्र, इत्यत आह---जिनातेरित्यादि । `एरनेकाचः' इति यण देशः ।।
न क्वादेः ।। 7.3.59 ।।
कूज इत्यादि । `कूज अव्यक्ते शब्दे', `खर्ज व्यथने', `गर्जशब्दे' । अत्र बार्त्तिकम्---`क्वाद्यजिव्रजियाचिरुचीनामप्रतिषेधो निष्ठायामनिटः कुत्ववचनात्' इति । अस्यार्थः---`चजोः कु घिण्ण्यतोर्निष्ठायामनिड्' इति सूत्रं कर्त्तव्यम्, तेनैव क्वाद्यजादीनां कुत्वनिवृत्तेः सिद्धत्वान्नार्थः प्रतिषेधवचनेनेति । नन्वेवं प्रुचुग्लुचुकुजुखुजूनां निष्ठायाममिटत्वात्कुत्वं प्राप्नोति, तथा अजिसजितर्जीनां निष्ठायां सेट्त्वात् कुत्वाप्रसङ्गः, यथा तु सूत्रं तथा विपर्ययः ? उच्यते; `यथोत्तरं मुनीनां प्रामाण्यम्' इति वात्तिकानुसारेण कुत्वस्य भावाभावौ व्यवस्थाप्यौ । नन्वसत्यजेः प्रतिषेधे निवीत इति निष्ठायामनिट्त्वात् समाज इति कुत्वप्रसङ्गः ? नेतदस्ति; व्यादेशो निष्ठायामनिट्, न त्वजिः, स तु वलाद्यार्धधातुके विकल्पेनेष्यते इति वीभावाभावपक्षे अजित इति सेडेव । कथं शोकः, समुद्ग इति, यावता शुच्युब्जी निष्ठायां सेटौ ? एवं तर्हि `शुच्युब्ज्योर्घञि' इति वक्ष्यामि, तच्च यथान्यासेऽपि वक्तव्यम्--घञ्येव यथा स्याद् ण्यति मा भूदिति---अशोच्यानन्वशोच्यस्त्वमिति । तदेव वार्त्तिककारपक्षे विध्यर्थ भविष्यति ।।
अजिव्रज्योश्च ।। 7.3.60 ।।
समाजः, उदाज इति । पशुभ्योऽन्यत्र `हलश्च' इति घञ्, पशुषु तु `समुदोरजः पशुषु' इत्यब्भवति ।।
भुजन्युब्जौ पाण्युपतापयोः ।। 7.3.61 ।।
पाणिशब्देन तद्वान्बाहुर्लक्ष्यते, न तु मणिबन्धस्याधः पञ्चशाखाप्रदेश उच्यते । लोकेऽपि बाहुपर्यायो भुजशब्दः । भुज्यते इति । `भुज पालनाभ्यवहारयोः' । न्युब्जिता इति । अधोमुखाः, निश्चेष्टाः । वस्तु कथनं चैतत्, विग्रहस्तु न्युब्जन्त्यस्मिन्निति दर्शयितव्यः ।
न्युब्जोपतापग्रहणं शक्यमकर्त्तुम् । कथम् ? यस्मिन्व्याधौ न्युब्जिताः शेरते स तान् न्युब्जयति, तत्र ण्यन्तात्पचाद्यचि न्युब्ज इति सिद्धम्; न चात्र घञचोः स्वरे विशेषः, थाथादिसूत्रेण घञ्यप्यन्तोदात्तत्वविधानात् । भुजशब्दस्तु घञ्याद्युदात्तो भवति, इगुपधलक्षणे तु केऽन्तोदात्तः ।
प्रयाजानुयाजौ यज्ञाङ्गे ।। 7.3.62 ।।
पञ्चानुयाजा इति । दर्शपूर्णमासयोस्त्रयोऽनुयाजाः, चातुर्मास्येषु नव, पशुष्वेकादश, पञ्चत्वं न क्वापि दृष्टम्, तस्मात् त्रयोऽनुयाजा इति पाठः । प्रदर्शनार्थमिति । एतच्च यज्ञग्रहणाल्लभ्यते, उपात्तयोर्हि यज्ञाङ्गविषयत्वं निपातनादेव सिद्धम्, उपांशुयागस्य ऋतुयाजानां च यज्ञसमुदायं प्रत्यवयवत्वाद् यज्ञाङ्गत्वम् । प्रधानयागा ह्येते; इतरेषां तु फलवत्सन्निधावफलं तदङ्गमित्यङ्गत्वम् ।।
वञ्चेर्गतौ ।। 7.3.63 ।।
वञ्च्यं वञ्चन्तीति । गन्तव्यं गच्छन्तीत्यर्थः । वङ्कमिति । गुणशब्दोऽयम्भावे घञ्, अभेदोपचाराद् गुणिनि वृत्तिः ।।
ओक उचः के ।। 7.3.64 ।।
`उच समवाये' । न्योकः शकुन्त इति । न्युचति समवैति नीडादाविति कृत्वा । न्योको गृहमिति । न्युचन्ति समवयन्ति वसन्ति तस्मिन् इति कृत्वा । असुनि प्रत्यय इति । अयमेव लोके साधीयः प्रयुज्यते ।।
ण्य आवश्यके ।। 7.3.65 ।।
उदाहरणेषु `आवश्यकाधमर्ण्ययोर्णिनिः', `कृत्याश्च' इति ण्यत्, मयूरव्यंसकादित्वात् समासः, `लुम्पेदवश्यमः कृत्ये' इति मलोपः ।।
यजयाचरुचप्रवचर्चश्च ।। 7.3.66 ।।
अर्क्ष्यमिति । `ऋच स्तुतौ' । प्रवाच्यो नामेति । प्रकर्षेणोच्यत इति प्रवाच्यः=पाठविशेषोपलक्षितो ग्रन्थविशेषः । अपरे पुनरिति । ते मन्यन्ते---प्रपूर्वो वचिरशब्दसंज्ञायामेव वर्त्तते, तत्र विधेयासम्भवान्नियम इति ।
एतच्चेति । अविवाक्यमित्येतावच्छब्दरूपम् । कः पुनरसौ विशेषः ? इत्यत आह---दशरात्रस्येति । द्वादशाहेऽभितो द्विरात्रो मध्ये दशरात्रः, तस्य दशममहः=अविवाक्यम् । अन्यत्रेति । तथा च नास्मिन्नहनि केनचित् कस्यचिद्विवाच्यम्, अविवाक्यमित्येतदाचक्षते । संशये बहिर्वेदिस्वाध्यायप्रयोगोऽन्तर्वेदीत्येके इत्यहर्विशेषे कुत्वम्, अन्यत्र तदभावः प्रयुक्त आश्वलायनेन । एवमन्योपसर्गपूर्वस्यापि प्रतिषेध एवेष्यते, न नियमः । एवञ्च कृत्वा प्रवचिग्रहणं शक्यमकर्त्तुम्; अहर्विशेष पृषोदरादित्वात्कुत्वम्, अन्यत्र प्रतिषेध इति सिद्धमिष्टम्; अन्यथा नियमे हि बहु प्रतिविधेयं स्यात् ।।
प्रयोज्यनियोज्यौ शक्यार्थे ।। 7.3.68 ।।
इह `प्रयुजनियुजः शक्यार्थे' इति वक्तव्यम्, `ण्ये' इत्येव, एवं सिद्धे निपातनाश्रयणं रूढ्यर्थम्---गुणभूत् एवैतयोः प्रयोगो यथा स्यात्---प्रयोन्यो भृत्यः, नियोज्यो दास इति । स्वामिनि प्रयोज्यनियोज्यशब्दौ न भवतः ।।
भोज्यं भक्ष्ये ।। 7.3.69 ।।
भोज्या यावगूरिति । ननु भक्षिरयं खरविशदेऽभ्यवहार्ये वर्तत इति `संस्कृतं भक्षाः' इत्यत्रोक्तम्, तत्कथं द्रवद्रव्ये भवति ? इत्यत आह---इहेति । एवं मन्यते---नात्र भक्षिः खरविशद एव वर्त्तते; अब्भक्षः, वायुभक्ष इत्यत्रापि दर्शनादिति शब्दान्तरसन्निधिबलादेतदेवं भवति । `स्वभावतस्तु भक्षिः खरविशद एव वर्त्तते' इति वार्त्तिककारस्य पक्षः, यदाह---`भोज्यमभ्यवहार्य इति वक्तव्यम्' इति ।।
घोर्लोपो लेटि वा ।। 7.3.70 ।।

दधदिति । दधातेर्लेट्, तिप् `इतश्च लोपः परस्मैपदेषु' इतीकारलोपः । दाशुषे यजमानाय सत्नानि, दद्यादित्यर्थः । अन्ये त्वाहुः---दधदिति शत्रन्तमेतत्, ददिति दाञो रूपम् ।

वावचनं प्रत्याचिख्यासुराह---आडागमे सतीति । अस्त्वत्र लोपः; आटः श्रवणं भविष्यतीत्यर्थः ।

किमर्थं तर्हि वावचनम् ? इत्यत आह--तत्रेति । किमत्र विस्पष्टनीयम् ? अत आह---एषा हीति । अन्ये त्वाहुः--ज्ञापकार्थं वाग्रहणम्, एतज्ज्ञापयति---अनित्यमागमशासनमिति । अनित्यत्वे त्वाट्यसति ददादिति न स्यादिति तत्सिद्धये वाग्रहणं कर्त्तव्यमिति ।।

ओतः श्यनि ।। 7.3.71 ।।

श्यतीत्यादि। `शो तनूकरणे', `छो छेदने', `दो अवखण्डने', `षो अन्तकर्मणि' ।

इहि `ओतः शिति' इति वक्तव्यम्, न च ओकारान्तानां श्यनोऽन्यः शित् सम्भवति, अर्धमात्रया च लाघवं भवति; तत्रायमप्यर्थः---`ष्ठिवुल्कमुचमां शिति' इति शिद्ग्रहणं न कर्त्तव्यं भवति, इदमेवानुवर्तिष्यते । ननु श्यन्ग्रहणमुत्तरार्थं कर्त्तव्यम्---`शमामष्टानाम्' इति ? तत्राप्यस्तु शितीत्येव; यदि शितीत्युच्यते, भ्रमे `वा भ्राश' इति पक्षे शब् भ्रमति---अत्रापि प्राप्नोति ? शमादिभिः शितं विशेषयिष्यामः---शमादिभ्यो यो विहितः शिदिति, श्यन्नेव च सर्वेभ्यः शमादिभ्यो विहितः, एवमपि शिद्विशेषणत्वेन शमादीनामुपयोगात्कार्यनिर्द्देशाभावात् नश्यतीत्यादावपि प्रसङ्गः ? नैष दोषः; `अष्टानाम्' इत्यनेन संख्येयाः कार्यिणो निर्दिश्यन्ते, ते च सन्निधानात् शमादय एव विज्ञास्यन्ते ।।

क्सस्याचि ।। 7.3.72 ।।

अधुक्षातामिति । दुहेः स्वरितेत्त्वेनात्मनेपदम्, आताम्, अत्रासति लोपे `आतो ङितः' इति इयादेशः प्राप्नोति । अधुक्षीति । इटि लोपः ।

ककारवतः सशब्दस्य ग्रहणादिह न भवति---वत्सौ; `तृणादिभ्यः सः', तृणसौ, तृणसः ।।

लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ।। 7.3.73 ।।

एतेषामङ्गानां क्सस्येति । एतेषां सम्बन्धी यो निमित्तत्वेन क्सः, तस्येत्यर्थः ।

सर्वादेशार्थमिति । लुक्सर्वापहारीति संज्ञाविधावुक्तम् । वह्यर्थमिति । उत्तमपुरुषद्विवचनार्थमित्यर्थः । अथान्यार्थं कस्मान्न भवति ? तत्राह---अन्यत्रेति । अलोऽन्त्यस्येति । `आदेः परस्य' इत्येतत्तु न भवति; पञ्चमीनिर्द्देशाभावात् । झलो झलीति लोपेनेति । `धि सकारे सिचो लोपः' इति नाश्रीयते । च्ल्यादेशोपलक्षणं वा तत्र सिज्ग्रहममिति भावः । अकारस्येति । अकारलोपस्येत्यर्थः । तथैव वा पाठः ।

ननु च क्रियमाणेऽपि लुग्ग्रहणे वहौ लुका न भवितव्यमेव, अदन्तत्वात्, दन्त्यौष्ठ्यो ह्यसौ ? अत आह---दन्त्योष्ठ्योऽपीत्यादि । दन्तान्वयोऽत्र विवक्षितः, नेतरव्यावृत्तिरिति भावः । एवं न्यायसिद्धेऽप्यर्थे वचनसामर्थ्यमपि दर्शयति---यदि चेति । ताविति । तवर्गादावित्यर्थः । वहेरन्यानि हि दन्त्यादीनि सर्वाण्यात्मनेपदानि तवर्गादीनि ।।

शमामष्टानां दीर्घः श्यनि ।। 7.3.74 ।।

शमुस्तमुः श्रमुदम् भ्रमुक्षमुमदल्कमः ।
शमादयोऽमी पठिता दिवादिष्वष्ट कृष्टिभिः ।।

ष्ठिवक्लम्याचमां शिति ।। 7.3.75 ।।

क्लामतीति । `वा भ्राश' इत्यादिना शप् ।

क्लमिग्रहणं शबर्थमिति । श्यनि पूर्वेणैव सिद्धत्वात् । शमादिषु पाठश्चिन्त्यप्रयोजनः; श्यन्यप्यनेनैव सिद्धत्वात् ।

तत्र सप्तग्रहणमेवास्तु, चमेराङ्पूर्वस्य ग्रहणं तन्त्रम्, न तूपेयिवानित्यादिवदविवक्षितम् ? इत्याह---चमेराङिति । `दीर्घत्वमाङि चमः' इति वार्त्तिकस्याप्ययमेवार्थः ।।

क्रमः परस्मैपदेषु ।। 7.3.76 ।।

इहेत्यादि । चोद्यम् । हेर्लुकि कृत इति । `अतो हेः' इत्यनेन । नैष दोष इत्यादि परिहारः । `न लुमताङ्गस्य' इत्यत्र हि प्रत्यसात्तेरयमर्थो व्यवस्थापितः,---लुमता लुप्ते प्रत्यये यदङ्गं तन्निबन्धनं कार्यं न भवतीति । ततः किम् ? इत्यत्राह---न चेति ।।

इषुगमियमां छः ।। 7.3.77 ।।

इच्छतीति । तुदादित्वाच्छः । इष्यतीति । `इष गतौ'। इष्णातीति । `इष आभीक्ष्ण्ये'। ये पुनरुदितमिषि नाधीयत इति । धातुपाठे । इह च सूत्रे अचीत्यनुवर्त्तयन्तीति । `क्सस्याचि' इत्यतः । नन्वचीत्यनुवृत्तावपि `हलः श्नः शानज्झौ' इति शानजादेशे इषाणेत्यत्र छत्वं स्यादेव, अजादित्वात् ? इत्यत आह---तत्रेति । स्यादेतदेवं यद्यचीत्येन शिद्विशेष्येत---शितिच्छो भवति, किंविशिष्टे ? अचि---अजादाविति; इह तु शिता अज्विशेष्यते---अचि छो भवति, किं विशिष्टे ? शितीति, तेन तदादिविधिर्न भवति । कि कारणम् ? इत्यत आहयस्मिन्विधिरिति । न केवलं तदन्तविधौ विशेषणत्वापेक्षा, अपि तर्हि तदादिविधावपीत्यपिशब्दस्यार्थः । इषाणेत्यत्रापीति । न केवलमिष्यतीत्यत्रैव---इत्यपिशब्दस्यार्थः । न ह्ययमजेवेति । अज्मात्रस्यात्र शित्त्वं नास्तीत्यर्थः । इतिकरणो हेतौ ।।

प्राघ्रध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ।। 7.3.78 ।।

`पा पाने' । `पा रक्षणे' इत्यस्य तु ग्रहणं न भवति; लुग्विकरणत्वात् शितश्चासम्भवात् । `घ्रा गन्धोपादाने', `ध्मा शब्दाग्निसंयोगयोः', `ष्ठा गतिनिवृत्तौ',

`म्ना अभ्यासे', `दाण् दाने', `दृशिर प्रेक्षणे', `ऋगतिप्रापणयोः', `सृगतौ', भौवादिकौ । `ऋ सृ गतौ' इति जौहोत्यादिकयोस्तु ग्रहणं न भवति; शितोऽसम्भवात् । नन्वेशः सम्भव इति चेत् ? उक्तमत्र---`वर्णे यत्स्यात्तच्च विद्यात्तदादौ' इति । शितीति हि कर्मधारयः---शश्चासाविच्चेति । `शद्लृ शातने' भूवादिः, `शद्लृ विशरणे' तुदादिः, `षद्लृविशरणगत्यवसादनेषु' ।

आद्युदात्तो निपात्यत इति । यदि न निपात्येत, ततः `धातोः' इत्यन्तोदात्तत्वे सति शपा सहैकादेशे कृते `एकादेश उदात्तेनोदात्तः' इति पिबतीति पदं मध्योदात्तमापद्येत, आद्युदात्तं चेष्यते ।

वेगितायामिति । सञ्जातवेगयायामित्यर्थः । यद्वा---वेगिनो भावो वेगिता, तस्यां च सत्यां गतौ वर्त्तमानस्येत्यर्थः ।।

ज्ञाजनोर्जा ।। 7.3.79 ।।

दैवादिकस्य ग्रहणमिति । न जौहोत्यादिकस्य, शितोऽसम्भवात् । दीर्घोच्चरणस्य प्रयोजनमुत्तरसूत्रे वक्ष्यते ।।

प्वादीनां ह्रस्वः ।। 7.3.80 ।।

प्वादयः क्र्यादौ पठ्यन्त इति । ये तु भूवादौ पठ्यन्ते---`पूञ् पवने' इत्यादयः, तेषां ग्रहणं न भवति, कतिपये हि तत्र ह्रस्वभाविनः, तेषामपि शपि गुणेन भवितव्यम् . किञ्च---क्रैयादिकस्य जानातेर्ह्रस्वनिवृत्त्यर्थं पूर्वसूत्रे दीर्घोच्चारणम्, तदपि क्रैयादिकानां ग्रहणे प्रमाणम् ।

वृत्करणमित्यादि । न ह्युभयार्थत्वे वृत्करणस्य कश्चिद्भार इति भावः । अपरे त्विति । ल्वादीनामनन्तरत्वादिति भावः । तथा `द पूरणे', `द भये'---इत्येतयोरपि वृत्करणात् परस्तात्पठितयोरपि ह्रस्वो भवति---यः पृणाति स ह देवेषु गच्छति, पृणीयादिन्नाधमानाय, पृणन्तं च पपुरिं श्रस्यव, आदृणातीति । पूर्वस्मिन्पक्षे ह्रस्वान्तावेतौ पठन्ति ।

चोदयति---येषामिति । आगता गणान्तमागणान्ताः, परिहरति--ज्ञाजनीर्जा इति । यदि जानातीत्यत्र ह्रस्वत्वं स्यात्, ह्रस्वान्तमेवादेशं विदध्यात् । ननु चान्यार्थं दीर्घान्तादेशविधानं स्यात्, न ह्यन्यथा---जायते इति सिद्ध्यति ? अत आह--ज इत्यपीति । ह्रस्वान्तादेशविधानेऽपि `अतो दीर्घो यञि' इति दीर्घत्वे---जायते इति सिद्धम्, तत्र हि `तुरुस्तुशम्यमः सार्वधातुके' इत्यतः सार्वधातुकग्रहणमनुवर्त्तते, न पुनः `तङि' इति । अत एव `आने मुक्' पूर्वान्तः कृतो न परादिः; दीर्घप्रसङ्गात् । ये तर्हि वृत्करणमुभयव्यावृत्त्यर्थं वर्णयन्ति, तेषां दीर्घोच्चारणं किमर्थम् ? जानातीत्यत्र दीर्घो यथा स्यात् । `अतो दीर्घो यञि' इत्येव दीर्घो भविष्यति / न सिध्यति; `अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' न जादेशमात्रेण निष्ठितमङ्गं भवति । तत्रेदं दीर्घोच्चारणमेव लिङ्गम्--आगणान्ताः ष्वादय इति ।।

मिदेर्गुणः ।। 7.3.82 ।।

मेद्यतीति । श्यन् । मिद्यत इति । भावे यक् ।।

जुसि च ।। 7.3.83 ।।

उदाहरणेषु लङि शपः श्लुः, द्विर्वचनम्, अभ्यासकार्यम्, `सिजभ्यस्तविधिभ्यश्च' इति झेर्जुस् ।

अथेत्यादि । जुस्भक्तस्य यासुटस्तद्ग्रहणेन ग्रहणात्प्रसङ्गः । सार्वधातुकाश्रयङित्त्वनिमित्त इति । सार्वधातुकमाश्रयो यस्य तत्सार्वधातुकाश्रंय तन् ङित्वं निमित्तं यस्य प्रतिषेधस्य स तथोक्तः । एतेन यासुडाश्रयङित्त्वनिमित्तमिति व्याख्यातम् । तत्र हि प्राप्ते चाप्राप्ते चेति । चिनुयुरित्यादौ प्राप्ते, अजुहवुरित्यादावप्राप्ते । क्सस्याचीत्यनुवर्त्तते इति । परिहारान्तरम्, जकारोच्चारणं तु चक्रुः---इत्यादौ लिटि मा भूत् ।।

सार्वधातुकार्धधातुकयोः ।। 7.3.84 ।।

सार्वधातुकार्धधातुकयोरिति किमिति । एवं मन्यतेप्रत्यय इति वक्तव्यम्, एवमपि हीष्टे विषये सिद्ध्यतीति । सङिति प्रत्याहारः; सनः सशब्दादाहरभ्या महिङो ङकारात् । अग्नित्वमिति । प्रत्यय इत्युच्यमाने, अत्रापि प्राप्नोति । अग्निकाम्यतीति । सङीत्युच्यमाने अत्रापि प्राप्नोति ।।

जाग्रोऽविचिण्णल्ङित्सु ।। 7.3.85 ।।

अविचिण्णल्ङित्सु परत इति । विचिण्णल्ङिद्भ्योऽन्ये ये प्रत्ययास्तेषु परत इत्यर्थः । जागारयतीत्यादीनि वृद्धिविषये उदाहरणानि । जागरितः, जागरितवानिति प्रतिषेधविषये ।

किं पुनः कारणं वृद्धिप्रतिषेधविषयाण्येवोदाहरणानि उपन्यस्तानि ? तत्राह---वृद्धिविषये, प्रतिषेधविषये चेति । अन्यत्र पूर्वेणैव गुणस्य सिद्धत्वादेतद्विषय एवायं गुणः, तत्राप्युभयविषयः, कथम् ? चिण्णलोः प्रतिषेधात् वृद्धिविषये तावद्भवति, ङित्प्रतिषेधात् प्रतिषेधविषयेऽपीति । तस्मिन्कृत इति । `अङ्गवृत्ते पुनर्वृत्तौ' इत्येतदनाश्रित्योच्यते । सा न भवतीति । किं कारणम् ? इत्याह---यदि हीति । यद्यपि जागरितः, जगरितवानित्यत्र गुणविधिश्चरितार्थः, तथापि वृद्धिविषयेऽप्येतद्विधानमित्युक्तम्, तत्रास्यानर्थक्यमुच्यते । किञ्चेत्याह---चिण्णलोश्चेति । यदि गुणे कृते `अत उपधाया' इति वृद्धिः स्याच्चिण्णलोर्गुणप्रतिषेधोऽनर्थकः स्यात् । अस्तु तत्रापि गुणः; वृद्धौ सत्यामजागारि, जजागारेति सिद्धम् ।

जागृत इति । लट्, तस्, अदादित्वाच्छपो लुक्, `सार्वधातुकमपित्' इति ङित्त्वम् ।

अत्र वीति केचिदिति । `अविचिण्णल्ङित्सु' इत्यत्र यो वकारात्पर इकारस्तमुच्चारणार्थं वर्णयन्ति, तत्र `यस्मिन्विधिः' इति वकारादौ प्रतिषेधः । किमर्थं पुनरस्त एवं वर्णयन्ति ? इत्यत आह---क्वसावपीति । जजागृवानिति । `नेड्वशि कृति' इति इट्प्रतिषेधः । तत्र क्रादिनियमादिट् प्राप्तः `वस्वेकाजाद्घसाम्' इति नियमान्न भवति । ये तु क्विपो लोपाद्वर्णाश्रये प्रत्ययलक्षणप्रतिषेधाच्च पर्युदासं नेच्छन्ति, तेषां जागरिति गुणो भवत्येव । अन्ये

त्वाहुः---यथा अतृणेडिति प्रत्ययलक्षणेनेभागमी भवति, वर्णस्य प्रत्ययविशेषणत्वात्; एवं क्विपोऽपि पर्युदासः, ततस्तु जागृदिति भवति ।

चोदयति---कथमजागरुरिति । एवं मन्यते--प्रसज्यप्रतिषेधोऽयं विचिण्णल्ङित्सु न भवतीति, ततश्च `जुसि च' इत्यस्यापि गुणस्य प्रतिषेधः स्यात्, तथोत्तमे णलि णित्त्वाभावपक्षे गुण इष्यते--`सार्वधातुकार्धधातुकयोः' इति, तस्यापि प्रतिषेधः प्राप्नोतीति । परिहरति---नाप्रतिषेधादिति । नायं दोषः, कुतः ? अप्रतिषेधात् । नायं प्रसज्यप्रतिषेधः, कस्तर्ह्ययम् ? इत्याह---अविचिण्णल्ङित्स्विति पर्यदासोऽयमिति । पर्युदासे हि विचिण्णल्ङित्सु न विधिर्न प्रतिषेधः, ततोऽन्यत्र विधानम्, तेन जुसि णलि च लक्षणान्तरेण प्राप्तो गुणो भवत्येव ।

प्रसज्यप्रतिषेधेऽप्याह---अथ वेति । `अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति भावः । केचिद्दर्विरित्यत्र गुणदर्शनादौणादिकं विच्प्रत्ययं वर्णयन्ति, तेषां जागृविरित्यत्र गुणः प्राप्नोति । न च वेः प्रतिषेधवैयर्थ्यम्; क्विपि क्वसौ च चरितार्थत्वात् । तस्माज्जागर्तेः किद्वक्तव्यः ।।

पुगन्तलघूपघस्य च ।। 7.3.86 ।।

भेत्ता, छेत्तेति । कथं पुनरत्र गुणः, यावता धात्वन्तप्रत्ययाद्योर्हलोरानन्तर्ये `संयोगे गुरु' इति गुरुसंज्ञया लघुसंज्ञाया बाधनान्न प्राप्नोति, भेदनमित्यादौ सावकाशो गुणः ? अत आह---प्रत्ययादेरिति । क्नुसनोः कित्करणेनेति । `त्रसिगृधिधृषिक्षिपेः क्नुः' इति क्नोः किक्करणस्यैतत्प्रयोजनम्---गृध्नुरित्यादौ गुणो मा भूदिति । यदि चैवंविधे विषये गुरूपधत्वाद् गुणो न स्यात्, क्नोः कित्करणमनर्थकं स्यात् । तथा `हलन्ताच्च' इति सनः कित्त्वविधानस्यैतत्प्रत्योजनम्---पित्सतीत्यादौ गुणो मा भूदिति, तदपि ज्ञापकमुक्तार्थस्य । इदं तु ज्ञापकं नोपपद्यते; सिसृक्षति, दिदृक्षते इत्यत्र `सृजिदृशोः' इत्यमागमो मा भूदित्येवमर्थमेतत्स्यात्, तथा धिप्सतीत्यत्र नलोपार्थं तत्स्यात् । तस्मात् क्नोरेव कित्करणं ज्ञापकम् । भिनत्ति, छिनत्तीत्यत्र श्नमोऽकारेण लघूपधमङ्गम्, तत्र धातोरिकारस्य गुणः प्राप्नोति, अत आह---उपधात्रेति । न ह्यत्र या काचिदुपधा गृह्यते, किं तर्हि ? `इको गुणवृद्धी' इत्यस्योपस्थानात् स्थानित्वेन सन्निहित इगेव ।

अपरे त्विति । वर्णयन्तीति सम्बन्धः । पुकि अन्त इति । अन्तशब्दः समीपवचनः । यद्यपि `पुगन्त' इत्यत्र बहुव्रीहावपि न दोषः, तथाप्यैकरूप्येण विशेषणार्थमयमपि तत्पुरुष एव व्याख्यातः । लघ्वी उपधेति । कर्मधारयः । अत्र पक्षे शाब्द एवोपधाया इका सम्बन्धः---लघ्व्या उपधाया इक इति । पुगन्तलघूपघमिति । समाहारद्वन्द्वः ।

क्वचिद् `उपधात्र' इत्यादेर्ग्रन्थस्य पुरस्तात् संयोगे गुरुसंज्ञायामिति श्लोकत्रयं पठ्यते । धात्वन्तप्रत्ययाद्योर्हलोरानन्तर्ये सति गुरुसंज्ञायां सत्यां गुणो भेत्तुर्भेशब्दस्य न सिध्यति । परिहरति--विध्यपेक्षमिति । इदं विधानमिति शेषः । लघूपधाद्ये विहिते सार्वधातुकार्धधातुके, तयोरङ्गस्य गुण इत्यर्थः । ननु पञ्चम्यभावात् कथं विधानमुपपद्यते ? उच्यते; षष्ठीपक्षेऽपि विशेष्यत इति चेत्को दोषः---लघूपधस्य ये सार्वधातुकार्धधातुके । के च ते ? ये तस्माद्विहिते इत्युपपद्यते । लघोश्चासावसौ चेति पाठे लघूपधाच्चासौ तृज्विहित इत्यर्थः । उपधाशब्दस्तु वृत्तभङ्गभयान्न प्रयुक्तः । कथं कुण्डिरिति । अङ्गाधिकारे नुमो विधानादकृत एव नुमि प्रत्ययो लघूपधाद्विहितः, तत्र परतो निमित्ते स्थिते कुण्डितेत्यादौ गुणः प्राप्नोति, यदि विधानं विशेष्यत इत्यर्थः । परिहरति---धातोर्नुम इति । हेतौ पञ्चमी, यस्मात्तत्र धातोर्नुमङ्गस्य तस्मादित्यर्थः । उक्तं हि तत्र---`धातुग्रहणस्य प्रयोजनम्---धातूपदेशावस्थायामेव नुम् यथा स्यात्' इति, ततश्च प्रागेव नुम्, पश्चात्प्रत्ययः; न चासौ लघूपधाद्विहितो भवति । कथं रञ्जेरिति । यदि षष्ठीनिर्द्देशेऽपि विधानं विशेष्यते, तदान्यत्रापि प्रसङ्गः, ततश्च `अत उपधायाः' इत्यकारोपधाद्विहिते प्रत्यये विधीयमाना वृद्धी रञ्जेर्न स्यात्; प्राक् प्रत्ययोत्पत्तेर्नकारोपधत्वात्--राग इति, `घञि च भावकरणयोः' इति नकारलोपः । यद्यप्यु पधाया अकारस्य वृद्धिरुच्यते, न च ततः प्रत्ययस्य विधानं सम्भवति, तथाप्यकारोपधाद्यद्विधानं तदेवोपधाया विधानं मन्यते । स्यन्दिश्रन्थ्योरिति । यदयम् `स्यदो जवे', `अवोदैधोद्मप्रश्रथहिहश्रथाः' इति स्यन्दिश्रन्थ्योर्वृद्ध्यभावं निपातयति, तज्ज्ञापयति----भवत्येवञ्जातीयकानां वृद्धिरिति । तत्र हि नलोपार्थम्, वृद्ध्यभावार्थं च निपातनमाश्रयणीयम् । यदि च वृद्धिविषये विधानं विशेष्येत, ततो वृद्धिप्रसङ्गाभावान्निपातनाश्रयणमनर्थकं स्यात् । नलोपस्य सिद्धये विधिरेवाश्रयणीयः, अनेकप्रयोजनसिद्धये हि निपातनाश्रयणम् । अनल्लोपेति । अनन्तस्य योऽल्लोपः सोऽनल्लोपः; शौ दीर्घत्वम्, शिदीर्घत्वम्---तयोर्द्वन्द्वः, अनल्लोपशिदीर्घत्वे विध्यपेक्षे न सिद्ध्यतः । यदि च षष्ठीनिर्द्देशेऽपि विधानं विशेष्येत, अल्लोपो राज्ञ इत्यादावेव स्यात्; अस्थ्ना, अस्थ्ने, दध्ना, दध्ने---इत्यादौ न स्यात् । शौ दीर्घत्वं च सामानि इत्यादावेव स्यात्, कुण्डानीत्यादौ तु न स्यात् । तस्मात्षष्ठीनिर्दशेषु विहितविशेषणग्रहणे दोषप्रसङ्गाद् गुणो भेत्तुर्न सिद्ध्यतीति । एवं तर्हि ज्ञापकात्सिद्धम्, यदयम् `नाभ्यस्तस्याचि' इत्यज्ग्रहणं करोति, तज्ज्ञापयति---भवत्येवञ्जातीयके विषये गुण इति । तस्य हि प्रयोजनम्---नेनक्तीत्यादौ हलादौ गुणप्रतिषेधो मा भूदिति । यदि च हलादावलघूपधत्वाद् गुणो न स्यात्, तदा गुणस्य प्राप्त्यभावात्किं तन्निवारणार्थेनाज्ग्रहणेन ! नैतदस्ति ज्ञापकम्; अभ्यस्तस्य यदाहाचि लङर्थं तत्कृतं भवेत् । अभ्यस्तस्याजादौ प्रतिषेधमाहेति यत् तल्लङर्थं कृतं भवेत्, यत्र हलादिर्लुप्यते---अनेनेगिति, तस्मान्न ज्ञापकम् । एवं तर्हि---क्नुसनोर्यत्कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे । व्याख्यातमेतत् ।।

नाभ्यस्तस्याचि पिति सार्वधातुके ।। 7.3.87 ।।

नेनिजानीत्यादि । लोट्, `मेर्निः', `आडुत्तमस्य पिच्च' शपः श्लुः, द्विर्वचनम्, `णिजां त्रयाणां गुणः श्लौ' । अनेनिजमित्यादि । लङ्, मिपोऽम्भावः । वेदानीति । `विद ज्ञाने', लोडादि यथायोगं पूर्ववत्, शपो लुक् । नेनेक्तीति । लट्, तिप्, कुत्वम् । पिद्ग्रहणमुत्तरार्थमिति । `तृणह इम्' पिति यथा स्यात्, इह तु पितोऽन्यत्रापि `सार्वधातुकमपिति' इति ङित्त्वाद्भवितव्यमेव प्रतिषेधेन । निनेजेति । णल्, स च `लिट् च' इत्यार्द्धधातुकसंज्ञः ।

जुजोषदिति । `जुषी प्रीतिसेवनयोः', लेट्, व्यत्ययेन परस्मैपदम्, तिप्, `इतश्च लोपः परस्मैपदेषु', `लेटोऽडाटौ' इत्यट्, व्यत्ययेन शपः श्लुः, द्विर्वचनम् ।

यद्यत्र गुणप्रतिषेध इष्यते, पस्पशाते इत्यादौ उपधाह्रस्वत्वमिष्यते, तन्न प्राप्नोति । तस्मादभ्यस्तानामुपधाया ह्रस्वत्वमेव विधेयम्, न गुणप्रतिषेधः । कथं नेनिजानीत्यादि, गुणे कृते उपधाह्रस्वत्वम्, `एच इग्घ्रस्वादेश', सिद्धमिष्टम् ? अत आह---पस्पशाते इत्यादि । स्पशिर्वार्त्तिककारवचनादपठितोऽपि धातुः, तस्माल्लेट्, व्यत्ययेनात्मनेपदम्, टेरेत्वे `लेटोऽडाटौ' इत्याट्, शपः `बहुलं छन्दसि' इति श्लुः, द्विर्वचनम् । अथ वा---यङ्लुकि छान्दसमभ्यासस्य ह्रस्वत्वम् । चाकशीतिति । `काशृ दीप्तौ', यङ्लुक्, लट्, तिप्, `यङो वा' इतीडागमः । वावशीतिरिति । `वाशृ दीप्तौ', यङ्लुक्, लट्, शत्रादेशः, ङीप्, शस् । छान्दसं ह्रस्वत्वमिति । यदि तु गुणनिषेधं प्रत्याख्यायोपधाह्रस्वत्वमुच्येत, तदा नर्नृतीतीत्यादौ ऋदुपधे रपरे गुणे कृते ह्रस्वभाविन्युपधा नास्तीति रूपं न सिद्ध्येत् । तस्माच्छान्दसमेव ह्रस्वत्वमेष्टव्यमिति भावः । प्रकृत्यन्तराणामेवेति । `स्पश बाधनस्पर्शनयोः' `कश गतिशासनयोः', `वश कान्तौ' ।।

भूसुवोस्तिङि ।। 7.3.88 ।।

अभूदिति । लुङ्, `गातिस्था' इत्यादिना सिचो लुक् । सुवै, सुवावहै, सुवामहै इति । `षूङ् प्राणिगर्भविमोचने', लोट्, चेरेत्वम्, `एत ऐ', `आडुत्तमस्य पिच्च', शपो लुक्, उवङादेशः ।

सुवतिसूयत्योस्त्विति । `षू प्रेरणे' तुदादिः, `षूङ् प्राणिप्रसवे, दिवादिः । भवतीति । शपि गुणः ।

व्यतिभविषीष्टेति । आशिषि लिङ्, `लिङाशिषि' इत्यार्धधातुकसंज्ञा, `कर्तरि कर्मव्यतिहारे' इत्यात्मनेपदम् ।

अथेति । प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणात्प्रसङ्गः । ज्ञापकादिति । सूतेस्तु निपातनाभावाद् गुणनिषेधो भवत्येव---सोषुवीतीति ।।

उतो वृद्धिर्लुकि हलि ।। 7.3.89 ।।

यवानीति । लोडुत्तमैकवचनम् ।

अपि स्तुयादिति । अपिः सम्भावने कर्मप्रवचनीय इति `उपसर्गात्सुनोति' इत्यादिना षत्वं न भवति । ङिच्च पिन्न भवतीति । यासुडादेः सार्वधातुकस्य साक्षाच्छिष्टं ङित्त्वमनवकाशम्, तिबादीनां तु पित्त्वं लकारान्तरेषु सावकाशम्, तेन `ङिच्च पिन्न भवति' इति `पिच्च ङिन्न भवति' इति वचनद्वयसद्भावेऽपि `ङिच्च पिन्न भवति' इत्येतदेवात्र प्रवर्त्तत इति भावः । `क्ङिति च' इति प्रतिषेधस्त्वत्र न लभ्यते, किं कारणम् ? इक इत्येवमिक्संशब्दनेन या वृद्धिस्तस्याः स प्रतिषेधः, इह तु `उत्तः' इति निर्दिष्टस्थानिकत्वादिक्परिभाषा नोपतिष्ठते ।।

गुणोऽपृक्ते ।। 7.3.91 ।।

ननु च `हलि' इति वर्त्तते, `पिति' इति च, अङ्गेन च प्रत्यय उपस्थाप्यते; तत्र हलात्मके प्रत्यये पिति विधायमानो गुणोऽपृक्त एव भविष्यति, नार्थोऽपृक्तग्रहणेन ? इत्यत आह---हलीति वर्त्तमान इति । अपृक्तग्रहणं ह्येवमर्थं क्रियते--हलादौ मा भूदिति, यदि चेयं परिभाषा न स्यात्, अपृक्तग्रहणं न कुर्यात्, कृतं तु, ज्ञापयति--भवत्येषा परिभाषेति । इदं त्वत्र वक्तव्यम्---तदन्तविधिनिवृत्यर्थमपृक्तग्रहणं कस्मान्न भवतीति, तदन्तविधौ हि लङि मिपोऽम्भावेऽपि प्रसङ्गः स्यात् । ननु भवत्येव तत्र गुणः, कथं भवति ? यदा पूर्वत्र वृद्धिविधावपि तदन्तविधिरेव भवति । तदेतदपृक्तग्रहणं कथं तदादिविधेर्ज्ञापकमिति चिन्त्यम् । `नापृक्ते' इत्युच्यमानेऽनन्तराया विभाषिताया वृद्धेः प्रतिषेधः स्यात्, नित्या तु वृद्धइः स्यादेव । तस्माद् गुणग्रहणम् ।।

तृणह इम् ।। 7.3.92 ।।

तृणेढीति । इमि कृते श्नमोऽकारेण सह `आद्गुणः', `हो ढः', `झषस्तथोर्धोऽधः', ष्टुत्वम्, ढलोपः । तृणेक्षीति । `षढोः कः सि' । अतृणेडिति । लङ्, तिप्सिपोरन्यतरः, हल्ङ्यादिलोपः, ढत्वजश्चचर्त्वानि ।

ननुं च `हलादौ' इत्युच्यते, न चात्र हलादिं पश्यामः ? प्रत्ययलक्षणेन । वर्णाश्रये नास्ति प्रत्ययलक्षणम् ? अत आह--वर्णाश्रयेऽप्यत्रेति । यत्र केवलो वर्ण एव निमित्तं यस्य स वर्णाश्रयः, यथा---गवे हितं गोहितमित्यवादेशः । इह तु पिति सार्वधातुक इति प्रत्यय एव निमित्तम्, हल् तस्य विशेषणम्, तेनासौ प्रत्ययनिमित्तत्वाद्भवत्येवेत्यर्थः । तृणहानीति । लोट्, `मेनिः' । तृणअढ इति । तस् ढत्वादि पूर्ववत्, `श्नसोरल्लोपः', अनुस्वारपरसवर्णौ ।

अथ किमर्थं तृहिरागतश्नम्को गृह्यते ? रौधादिकस्य `तृह हिंसायाम्' इत्यस्य ग्रहणं यथा स्यात्, `तृहि हिंसायाम्' इत्यस्य तौदादिकस्य ग्रहणं मा भूत् । नास्य पिद्धलादिसार्वधातुक मनन्तरं सम्भवति; विकरणेन व्यवधानात् । ननु चास्यापि यङ्लुगन्तस्य सम्भवति, एवं तर्हि सानुबन्धकत्वात् तस्य ग्रहणं न भविष्यति ? अत आह---तृणह इतीत्यादि । यद्यागतश्नम्को न गृह्येत, ततो नाप्राप्ते श्नम्यारभ्यमाण इम् तस्य बाधकः स्यात् । अथापि न बाधकः, एवमपि श्नमि कृते इमितीष्टव्यवस्था न स्यात् । विपर्ययोऽपि स्यात्---पूर्वमिमागमः, पश्चात् श्नमिति । सश्नम्कनिर्द्देशे तु न श्नमो निवृत्तिर्भवति, इष्टा च व्यवस्था सिध्यति---पूर्वं श्नम्, पश्चादिमिति । अतस्तदर्थमागतश्नन्को गृह्यते । किञ्च---रौधादिकस्यापि यङ्लुगन्तस्य ग्रहणं भवति सश्नम्कनिर्द्देशादेव ।।

ब्रुव ईट् ।। 7.3.93 ।।

`ब्रुवः' इति पञ्चमी, न षष्ठी; व्याख्यानात् । तयाऽचरितार्थया पूर्वत्र कृतार्थायाः सार्वधातुक इति सप्तम्याः षष्ठी प्रकल्प्यते । तदाह---ब्रुव इत्येतस्मादुत्तरस्येति । इह ब्रूताद्भवानिति तातङ औपदेशिकेन ङित्त्वेन स्थानिवद्भावकृतं पित्त्वं बाध्यते---`ङिच्च पिन्न भवति' इति, तेनेड् न भवति ।।

यङो वा ।। 7.3.94 ।।

लालपीतीत्यादि । लपिवदिरौतिभ्यो यङ्लुक्, द्विर्वचनम् । रौतेरभ्यासस्य गुणः । इतरयोर्दीर्घत्वम् । ववर्तीति । वृते रूपम्, `रुग्रिकौ च लुकि' इत्यभ्यासस्य रुक् । किं पुनः कारणं यङ्लुगन्तमेवोदाहृतम्, न पुनर्यङन्तम् ? तत्राह---हलादेरिति । यङन्ते हि शपा भवितव्यम्, स च हलादिर्न भवति ।।

तुरुस्तुशम्यमः सार्वधातुके ।। 7.3.95 ।।

तु इति सौत्रोऽयं धातुरिति । स च वृद्धौ वर्त्तते, गत्यर्थ इत्यन्ये, हिंसार्थ इत्यपरे । उत्तवीतिति । `बहुलं छन्दसि' इति शपो लुक् । शमीध्वमिति । शमेरन्तर्भावितण्यर्थात्प्रैषे लोट्, व्यत्ययेनात्मनेपदम्, शप्, तस्य `बहुलं छन्दसि' इति लुक् ।

आपिशला इति । आपिशलेः शिष्याः । सावधातुकास्विति । टाबन्तम् । तत्र संज्ञात्वेन विनियुक्तं सार्वधातुकग्रहणमनर्थकम्, `नाभ्यस्तस्य' इत्यादेः सूत्रादनुवृत्तेः ? अत आह---सार्वधातुके इति वर्तमान इति । तद्धि सार्वधातुकग्रहणं पितीत्यनेन सम्बद्धम्, अतस्तदनुवृत्तौ तदप्यनुवर्तेत, तन्मानुवृतदित्येवमर्थं पुनः सार्वधातुकग्रहणमिति । `हलि' इतियेतत्त्वनुवर्त्तत एव; न हि तत्सार्वधातुकग्रहणेन सम्बद्धम् ।।

अस्तिसिचोऽपृक्ते ।। 7.3.96 ।।

`अपृक्ते' इति षष्ठ्यर्थे सप्तमी, तेनापृक्तस्यैवायमागमः । आसीदिति । `अस् भुवि', शपो लुक्, तिप ईट् । अलावीदिति । लुङ्, `इट ईटि इति सिचो लोपः ।

आहिभुवोरीट्प्रतिषेध इत्यादि । स्थानिवत्सूत्र एतद्वार्त्तिकम् । आहिभुवोः स्थानिवद्भावस्य प्रतिषेधो वक्तव्यः, ईट्प्रतिषेधः प्रयोजनमित्यर्थः । आत्थेति । `ब्रुवः पञ्चानाम्' इत्यादिना सिपस्थल्, ब्रुव आहादेशः, `आहस्थः' इति हकारस्य थत्वम्, तस्य `खरि च' इति चर्त्वम्---तकारः । अभूदिति । लुङ्, `अस्तेर्भूः' `गातिस्था' इत्यादिना सिचो लुक् । अत्र स्थानिवद्भावप्रतिषेधादस्त्याश्रयस्तावदीण्न भवति । सिजाश्रयोऽपि न भवति, स्थानिवद्भावप्रतिषेधसामर्थ्यात् । अस्त्वेवमस्त्यादेशे भुवि, शुद्धे तु भवतौ सिजाश्रय ईट् प्राप्नोति, तस्मादीडेवात्र प्रतिषेध्यः । आहिविषये परिहारान्तरं ज्ञापकात्सिद्धम्, यदयं झलादिप्रकरणे `आहस्थः' इति थत्वं शस्ति । ननु च भूतपूर्वगत्यर्थमेतस्यात्---झलादिर्यो भूतपूर्वस्तत्रेति ? नैतदस्ति; एवं तर्हि पञ्चानामपि तिबादीनां भूतपूर्वझलादित्वमिति सर्वत्र थत्वप्रसङ्गः, ततश्चाथमेव विदध्यात् ।।

बहुल छन्दसि ।। 7.3.97 ।।

आ इति । अस्तेर्लङ्, तिप्, शपो लुप्, रुत्वविसर्जनीयौ अक्षाः, अत्सा इति । `क्षर सञ्चलने', `त्सर छद्मगतौ', लुङ्, तिपो हल्ङ्यादिलोपः, `रात्सस्य' इति सिचो लोपः, दातुरेफस्य विसर्जनीयः । छान्दसत्वादिति । `बहुलं छन्दस्यमाङ्योगेऽपि' इत्यनेन न केवलममाङ्योगेऽडाटोरभावः क्रियते, किं तर्हि ? माङ्योगे तत्सद्भावोऽपीति भावः । इडभावश्च सिच इति । छान्दसत्वादित्यपेक्षते ।।

रुदश्च पञ्चभ्यः ।। 7.3.98 ।।

रुदिः स्वपिः श्वसिरनिर्जक्षिः पञ्च रुदादयः ।

रुदः इति बहुवचनस्थान एकवचनम् । `पञ्चभ्यः' इति निर्द्देशादाद्यर्थावगतिः ।।

अड् गार्ग्यगालवयोः ।। 7.3.99 ।।

गाग्यगालवयोर्ग्रहणं पूजार्थमिति । न विकल्पार्थम्; विधानसामर्थ्यादेवाडीटोर्विकल्पस्य सिद्धत्वात् । अनेकाचार्यग्रहणमप्यत एव ।।

अदः सर्वेषाम् ।। 7.3.100 ।।

सर्वेषांग्रहणं नित्यार्थम्, अन्यथा गार्ग्यगालवग्रहणमिह विकल्पार्थ सम्भाव्येत ।।

अतो दीर्घो यञि ।। 7.3.101 ।।

केचिदत्र तिङित्यनुवर्त्तयन्तीति । `भूसुवोस्तिङि' इत्यतः । भववानिति । भवतेः क्वसुः, तस्य `छन्दस्युभयथा' इति सार्वधातुकत्वाच्छप्, `लिटि धातो' इत्यत्र धातुग्रहणाच्छबन्तस्य द्विर्वचनाभावः । ये तु `सार्वधातुके' इत्येवानुवर्त्तयन्ति, तेषां छान्दसत्वाद्दीर्घाभावः । अथ प्रकृतोऽडागम एव कस्मान्न विधीयते---`अतो यञि' इति, अकारान्तादङ्गादुत्तरस्य यञादेस्तिङोऽडागमो भवति, पच अवस्, सवर्णदीर्गत्वे पचाव इति सिद्धण्, विधानसामर्थ्याच्च `अतो गुणे' इति पररूपत्वं न भविष्यति ? नैवं शक्यम्; इह ह्यधुक्षावहि, अधुक्षामहीति `क्सस्याचि' इति लोपः प्रसज्येत । इह चातिजराभ्यामिति जरस्भावः । एवमपि दीर्घग्रहणमनर्थकम्, आदित्याकार एव विधेयः ? इह तर्हि प्रयोजनम्---अपाक्षी रोदनं देव दत्तः । ननु पचामि भोरित्यत्रापि `अनन्त्यस्यापि प्रश्नाख्यानयोः' इति प्लुतः प्राप्नोति ? स मा भूद्दीर्घ एव यथा स्यादिति दीर्घग्रहणम् ।

अत इति तपरकरणमुत्तरार्थम्, `बहुवचने झल्येत्' इत्येत्वं खट्वाभिरित्यत्र मा भूत् ।।

सुपि च ।। 7.3.102 ।।

वृक्षायेति । सन्निपातपरिभाषाया अनित्यत्वादत्र दीर्घत्वम् । अनित्यत्वं च `कष्टाय' इति निर्देशादवसितम् ।।

बहुवचने झल्येत् ।। 7.3.103 ।।

वृक्षाणामिति । `झलि' इत्यनुच्यमानेऽग्नीनामित्यादौ सावकाशम् `नामि' इति दीर्घत्वं बाधित्वेदमेत्वमकारान्तेषु स्यादिति भावः ।।

आङि चापः ।। 7.3.105 ।।

खट्वया, खट्वयोरित्यादीनि टाब्डाप्चापां क्रमेणोदाहरणानि । कीलालपेति । कीलालं पिबति `आतो मनिन्क्वनिब्वनिपश्च' इति विच्, तृतीयैकवचने `आतो धातोः' इत्यालोपः, असति तु पिद्विशिष्टस्य ग्रहणे कीलालपः पश्येत्यादौ चरितार्थं लोपं बाधित्वा परत्वादाङोसोरिदमेवैत्वं स्यात् ।

ङ्याब्ग्रहणेऽदीर्घग्रहणादिति । यत्र ङ्यापौ गृह्येते तत्र दीर्घयोर्ग्रहणम्, न ह्रस्वयोः । स्थानिवद्भावे तु प्रसङ्गः, तत्र स्थानिवत्प्रतिषेधसूत्रप्रस्तावे वार्त्तिकम्--

-`ङ्याब्ग्रहणेऽदीर्घः' इति, ङ्यापोर्ग्रहणेऽदीर्घ आदेशो न स्थानिवदिति । तत्रार्थादिदमुक्तं भवति---ङ्यापोर्ग्रहणे दीर्घयोर्ग्रहणमिति, तदिदं वृत्तिकारेण दर्शितम् ।।

अम्बार्थनद्योर्ह्रस्वः ।। 7.3.107 ।।

अम्बार्थाः= मात्रार्थाः ।

डलकवतीनामिति । अर्थगतेन स्त्रीत्वेनाम्बार्थाः शब्दा निर्दिष्टाः, श्रुत्यपेक्षो वा स्त्रीलिङ्गनिर्देशः---`डलकवतीनां श्रुतीनामित्यर्थः' इति । असंयुक्ताश्च डलका गृह्यन्ते; तेनाक्क, अल्लेति ह्रस्वो भवत्येव ।

देवते भक्तिरिति । ह्रस्वत्वे कृते, `ङ्याब्ग्रहणेऽदीर्घः' इति स्थानिवत्त्वनिषेधाद्याडागमो ङेरामपि न भवतः ।

मातृणामिति । पूर्वपदभेदन बहवो मातृशब्दा इति बहुवचनम् । पुत्रार्थमिति । पुत्रमभिधातुं यो मातृशब्द उपादीयत इत्यर्थः । बहुव्रीहौ च वर्त्तिपदैरन्यपदार्थोऽभिधीयत इति तत्रैवयमादेशः । कीदृशाय पुत्रायेति । समासे गुणीभूतस्यापि पुत्रस्थ बुद्ध्या प्रविभज्य निर्द्देशः, यथा---`अथ शब्दानुशासनम्, केषां शब्दानाम्' इति । मात्रा व्यपदेशमर्हतीति । यः पुत्रः श्लाघ्यगुणत्वात्कुलसम्भूतया मात्रा व्यपदेशमर्हतीत्यर्थः । यत्र तु पितुरसंविज्ञानेन मात्रा व्यपदेशस्तत्र न भवति, एतच्चार्हत इति प्रशंसायां लटः शत्रादेशविधानाल्लभते । समासान्तापवाद इति । नाप्राप्ते तस्मिन्नस्यारम्भात् ।।

ह्रस्वस्य गुणः ।। 7.3.108 ।।

ह्रस्वविधानसामर्थ्यादिति । ननु ह्रस्वविधानं तस्य गुणविधानार्थमेव स्यात्, अन्यथा ह्रस्वत्वाभावाद् गुणो न स्यादत आह---यदीति । ह्रस्वं विधाय गुणे विधीयमाने प्रक्रियागौरवं भवतीति लाघवार्थं साक्षादेव गुणं विदध्यादित्यर्थः । ननु `नदीह्रस्वयोर्गुणः' इत्युच्यमाने `जसि च' इत्यत्र नद्या अप्यनुवृत्तिः स्यात्, एकसमासनिर्दिष्टत्वात् ? नैष दोषः; एकसमासनिर्दिष्टयोरप्येकदेशोऽनुवर्त्तते, तद्यथा---`संख्याव्ययादेर्ङीप्', `दामहायनान्ताच्च' इत्यत्र संख्याग्रहणमनुवर्त्तते, नाव्ययग्रहणम् ।।

जसि च ।। 7.3.109 ।।

जसादिष्विति । आदिशब्दः प्रकारे, तेन पूर्वयोगनिर्दिष्टानामपि ग्रहणम् । दर्वीति । `कृदिकारादक्तिनः' इति ङीष्विकल्पमनपेक्ष्यैतदुक्तम्, तत एव तु सिद्धं रूपद्वयम् । शतक्रत्व इति । `जसि च' इति गुणाभावपक्षे `प्रथमयोः' इति पूर्वसवर्णदीर्घोऽपि `वा छन्दसि' इति वचनान्न भवतीति यणादेशः प्रवर्त्तते । किकिदीव्येति । `आङो नास्त्रियाम्' इति नाभावो न भवति । किकिदीविशब्दः `कृविधृष्वि' इत्युणादिषु निपातितः ।।

ऋतो ङिसर्वनामस्थानयोः ।। 7.3.110 ।।

तपरकरणं मुखसुखार्थमिति । ङिसर्वनामस्थानयोर्दीर्घान्तस्यासम्भवात् । धात्वनुकरणमपि न सम्भवति, `ऋत इद्धातोः' इतीत्वविधानात् । कर्त णीत्यत्यादावपि नुमः पूर्वान्तत्वादसम्भवः ।।

घेर्ङिति ।। 7.3.111 ।।

ध्यन्तस्याङ्गस्येति । `वर्णमात्रस्य घिसंज्ञा' इत्याश्रित्येदमुक्तम् । `तदन्तस्य संज्ञा' इत्यत्र तु पक्षे घ्येकदेशे वर्णे घिशब्दो द्रष्टव्यः । एतेन नद्यन्तादिति व्याख्यातम् ।

सुपीत्येवेति । `सुपि च' इत्यतः । पट्वीति । `वातो गुणवचनात्' इति । कुरुत इति । यस्य नदीसंज्ञा नास्ति स सर्वोऽपि घिसंज्ञः, न लिङ्गवदेवेति । कुरुशब्दस्य घिसंज्ञा, तस्य तसि ङिति गुणो न भवति । एतच्च ङिच्छब्दे बहुव्रीहिमाश्रित्योच्यते । यदि तु ङश्चासाविच्चेति कर्मारयस्तदा नैवात्र प्रसङ्गः, `सार्वधातुकमपित्' इत्यनेन हि बहुव्रीहौ ङितो यत्कार्यं तदतिदिश्यते, न चैतावता तसेर्ङकार आदिर्भवति ।।

आण्नद्याः ।। 7.3.112 ।।

`नद्याः' इति पञ्चम्यकृतार्था ङितीति सप्तम्याः षष्ठीं प्रकल्पयति, तेन ङित एवायमागमो विज्ञायत इत्याह---नद्यन्तादङ्गादुत्तरस्येति । कुमार्या इति । `आटश्च' इति वृद्धिः । अथ दीर्घोच्चारणं किमर्थम्, अडेवोच्येत, `वृद्धिरेचि' इति वृद्ध्या सवर्णदीर्घत्वेन च कुमार्यै, कुमार्या इति सिद्धम् ? न सिद्ध्यति; `अतो गुणे' पररूपत्वं प्राप्नोति । अड्वचनसामर्थ्यान्न भविष्यति ? अस्त्यड्वचने प्रयोजनम्, किम् ? श्रियै, श्रिया इत्यत्र `सावेकाचः' इत्याद्युदात्तत्वं मा भूत्, आगमानुदात्तत्वं यथा स्यादिति । आगमानुदात्तत्वं हि प्रत्ययस्वरमिव विभक्तिस्वरमपि बाधते, विशेषतोऽत्राड्वचनसार्थ्यात् ।।

याडापः ।। 7.3.113 ।।

दीर्घोच्चारणं किमर्थम्, न यडेवोच्येत, वृद्धौ कृतायां सवर्णदीर्घत्वे च खट्वायै, खट्वाया इति सिद्धम् ? न सिध्यति; `अतो गुणे' पररूपत्वं प्राप्नोति, अकारोच्चारणसामर्थ्यान्न भविष्यति । अस्त्यन्यदकारोच्चारणस्य प्रयोजनम्---ज्ञाये, ज्ञाया इत्यत्र `सावेकाचः' इत्याद्युदात्तत्वं मा भूत्, आगमानुदात्तत्वं यथा स्यादिति । किञ्च---उच्चारणार्थोऽप्यकारः सम्भाव्येत, इह खट्वामतिक्रान्त इति प्रादिसमासे ह्रस्वत्वे च तस्य स्थानिवद्भावात्ततः परस्य चतुर्थ्येकवचनस्य `ङेर्यः' इति यादेशं बाधित्वानेन याट् प्राप्नोति, तत्र कृते दीर्घत्वे चातिखट्वायै देवदत्तायेति प्रसङ्गः, तत्राह---आतखट्वायेत्यत्रेति । अकृते दीर्घत्व इति । यादेशात् प्रागवस्थायामिदमुक्तम् । कृते तर्हि यादेशे दीर्घत्वे च ङिच्चासौ भूतपूर्व इति याट् प्राप्नोति ? अत आह---कृते च लाक्षणिकत्वादिति ।।

सर्वनाम्नः स्याड्ढ्रस्वश्च ।। 7.3.114 ।।

दीर्घोच्चारणं सर्वस्या इत्यत्र वृद्धिर्यथा स्याद्, `अतो गुणे' पररूपत्वं मा भूत् । अकारोच्चारणं तु अस्या इत्यत्र `ऊडिदम्पदादि' इति विभक्तेराद्युदात्तत्वं मा भूत्, आगमानुदात्तत्वं यथा स्यादेवमर्थ स्यात् । किञ्च उच्चारणार्थोऽप्यकारः सम्भाव्येत ।।

विभाषा द्वितीयातृतीयाभ्याम् ।। 7.3.115 ।।

अप्राप्तविभाषेयम्; असर्वनामत्वात् । ननु च `तीयस्य वा ङित्सूपसंख्यानम्' इत्यनेनैव सिद्धत्वान्नार्थ एतेन, तच्चावश्यं वक्तव्यं लिङ्गान्तरेऽपि स्मायादयो विकल्पेन यथा स्युरिति ? नैतद्युक्तमुच्यते; यद्धि सूत्रेणासिद्धं तदुपसंख्यानेन साधनीयम्, न पुनरुपसंख्यानाश्रयणेन सूत्रस्य प्रत्याख्यानं युज्यते । यदि पुनरत्र ह्रस्वयोर्ग्रहणं कृत्वा स्याड्ग्रहणं च निवर्त्य `सर्वनाम्नः' इत्येवा नुवर्त्यातिदेश आश्रीयते---सर्वनाम्नो यदुक्तं तद्विभाषा भवति द्वितीयातृतीययोरिति, तदोपसंख्यानं शक्यमकर्त्तुम् ।।

ङेराम्नद्याम्नीभ्यः ।। 7.3.116 ।।

`ङेः' इति सप्तम्येकवचनग्रहणम्; इच्छायाम्, स्त्रियामित्यादिनिर्देशात् । ग्रामण्यामिति । `सत्सूद्विष' इत्यादिना क्विप्, `अग्रग्रामाभ्याम्' इति णत्वम्, `एरनेकाचः' इति यण् ।।

इदुद्भ्याम् ।। 7.3.117 ।।

नदीग्रहणमिहानुवर्त्तते । यद्येवम्, अपार्थकमिदम्, पूर्वेणैव सिद्धत्वात्, ततश्च `इदुद्भ्यामौत्' इत्येकयोग एव कर्त्तव्यः ? नैवं शक्यम्; औकारो हि स्यात्, नदीलक्षणस्यामोऽवकाशः---कुमार्यामिति, औत्वस्यावकाशः---पत्यौ, सख्याविति; कृत्यामित्यत्र यदा नदीसंज्ञा तदा परत्वादौत्त्वं प्राप्नोति ।।

औत् ।। 7.3.118 ।।

यन्न नदीसंज्ञमित्यादि । नदीसंज्ञके पूर्वेणाम् विहितः, घिसंज्ञेऽप्युत्तरेणात्वसंयुक्तमौत्वं वक्ष्यति, तस्मादाभ्यामन्यदेवोदाहरणम् । तत्र पूर्वत्र `घ्यन्तान्नद्यन्तात्' इत्युक्तम्, इह त्विकारोकारान्तमित्युक्त्म्, संज्ञाविधौ च पक्षद्वयं दर्शितम्---वर्णमात्रस्य संज्ञा, तदन्तस्य वेति; तेन नास्ति विरोधः ।।

अच्च घेः ।। 7.3.119 ।।

कृतौ, धेनाविति । अथात्रात्वे कृते `अजाद्यतष्टाप्' इति टाप्कस्मान्न भवति, अस्तु को दोषः ? `ङेराम्नद्याम्नीभ्यः', `याडापः' इत्येतौ विधी प्राप्नुतः, औत्वविधानं तु पुंसि चरितार्थम् ? अत आह---तपरकरणं स्त्रियामापो निवृत्त्यर्थमिति । इह हि स्थानिनो मात्रिकत्वाद्भाव्यमानत्वाच्चाणो दीघस्य प्रसङ्गो नास्ति, यस्य निवृत्त्यर्थं तपरकरणं स्यात् । तस्माच्छास्त्रन्तरेणापि दीर्घो मा भूदित्येवमर्थं तपरकरणं क्रियते, एतच्च सन्निपातपरिभाषामनाश्रित्योक्तम् । ङिसन्निपातकृतं ह्यत्वं तद्विघातकस्य टापो निमित्तं न भवति ।

औदच्च घेरिति येषामित्यादि । इह केचित् `औदच्च घेः' इत्येकयोगमेवाधीयते, तत्र यदि समुच्चये चशब्दः स्यात्, यत्रात्वं तत्रैवौत्वं स्यात्---धेनाविति; घेश्चात्वमित्यघौ सख्यौ, पत्यावित्यत्रौत्वमपि न स्यात्, अस्य दोषस्य निवृत्तये प्रधानशिष्टमौत्वमन्वाचयशिष्टमत्वमिति वर्णयन्ति । तत्र यथा `कर्त्तुः क्यङ् सलोपश्च' इत्यत्र सलोपस्यान्वाचयशिष्टस्याभावेऽपि श्येनायत इत्यादौ क्यङ् भवति, तथा अत्रापि सख्यौ, पत्यावित्यत्वाभावेऽपि औत्वं भवतीत्यर्थः ।।

आङो नाऽस्त्रियाम् ।। 7.3.120 ।।

`आङः' इति स्थान्यन्तरस्योपादानाद् घेरिति षष्ठी पञ्चम्या विपरिणम्यत इत्याह---घेरुत्तरस्येति । अथ किमर्थमस्त्रियामित्युच्यते, `आङो ना पुंसि' इत्येवोच्येत, एवं हि मात्रया लाघवं भवति, इष्टं च सिध्यति ? एवमुच्यमाने त्रपुणा, जतुनेत्यत्र नपुंसके न प्राप्नोति । मा भून्नाभावः, `इकोचि विभक्तौ, इति नुमि कृते सिद्धमिष्टम् ? अत आह--पुंसीति नोक्तमित्यादि । अमुना ब्राह्मणकुलेनेति । `पुंसि' इत्युच्यमाने नाभावो न स्यात् । नुमपीग्लक्षणो नास्ति; मुत्वस्यासिद्धत्वात् । `अस्त्रियाम्' इत्युच्यमाने नपुंसकेऽपि नाभावो भवति । नाभावे कर्त्तव्ये मुत्वस्यासिद्धत्वं नास्ति । `न मुने' इति प्रतिषेधादिति `नपुंसके' इत्युच्यमानेऽपि न सिध्यति । तस्मादस्त्रियामित्येव वक्तव्यमिति ।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां सप्तमस्याध्यायस्य तृतीयः पादः समाप्तः

7.4

काशिकावृत्तिः---6

अथ सप्तमाध्याये चतुर्थः पादः

णौ चङ्युपधाया ह्रस्वः ।। 7.4.1 ।।

`णौ' इत्यङ्गापेक्षया परसप्तमी, `चङि' इति ण्यपेक्षया । उदाहरणेषु कृह्वलूपूभ्यो णिच्, लुङ्, चङ, णिलोपः, ह्रस्वत्वम्, द्विर्वचनम् । तत्र णौ कृतं स्थानिवद्भवतीति कृ इत्यादि धातुरूपं द्विरुच्यते, कृ ह्व इत्येतयोरुरदत्वम्, `सन्वल्लघुनि' इति सन्वद्भावादित्वम् । इतरयोरपि `ओः पुयण्ज्यपरे' इतीत्वम् । सर्वत्र `दीर्घो लघोः' इति दीर्घः । अत्रेति । अनन्तरोदाहृतेषु । परत्वादिति । चङीति द्विर्वचनस्याशिश्रयदित्यादिरवकाशः, ह्रस्वस्य तु कृतद्विर्वचनमवकाशः; अकृते तु द्विर्वचने विप्रतिषेधः । तत्र कृते द्विर्वचनमिति । ततश्च सन्वद्भावे कर्त्तव्ये ह्रस्वत्वं न स्थानिवद्भवति; अभ्यासस्यादिष्टादचः पूर्वत्वादिति भावः । चोदयति---इह त्विति । माङ्प्रयोग आड् मा भूदिति । नित्यत्वादिति । द्विर्वचनं हि कृतेऽपि ह्रस्वत्वे प्राप्नोति,

अकृतेऽपि, ततश्च तदेव स्यात्तत्र को दोषः ? इत्यत आह---तथा सतीति । परिहरति---नैष दोष इति । ओणेरिति । `ओणृ अपनयने' इत्यस्य ऋदित्करणं एतत्प्रयोजनम्---ऋदितो नेति प्रतिषेधो यथा स्यात् । यदि चात्र द्विर्वचनं स्यात्, ऋदित्करणमनर्थकं स्याद्, द्विर्वचने कृते पररूपेण व्यवहितत्वादेव ह्रस्वत्वं न भविष्यति, पश्यति त्वाचार्यः---द्विर्वचनाद् ह्रस्वत्वं बलीय इति, तत ओणिमृदितं करोति । णाविति किमिति । ह्रस्वश्रुत्या अच्परिभाषोपस्थानादच उपधाया ह्रस्वेन भाव्यम् । न चाण्यन्तानां चङि उपधा ह्रस्वभाविनी सम्भवति, न हि श्रिद्रुस्नुधेट्श्वीनामजुपधा । कमिगुप्योस्तु ह्रस्व एवोपधा, ततश्च चङि यः प्रत्ययस्तस्मिन्नुपधाया ह्रस्वो भवति स च णिरेव, तत्र णावन्तरङ्गत्वाद् वृद्ध्यादिषु कृतेषु उपधाया ह्रस्व इति सिद्धमिष्टमिति प्रश्नः । इतरः---यथाश्रुतसम्बन्धसम्भवे चङि यः प्रत्यय इत्यध्याहारो न युक्त इति वचनादन्तरङ्गमपि वृद्ध्यादिकं बाधेतेति मत्वाऽऽह---चङ्युपधाया इति । ह्रस्वः स्यादिति । ननु च ऊकारस्य ह्रस्वः, तस्मिंश्च कृते बाधितत्वान्मा भूद् वृद्धिः, गुणस्तु केनचिदबाधितत्वाद्भविष्यति, ततोऽवादेशे सिद्धमलीलवदिति ? नैतदस्ति; गुणस्य वृद्ध्या बाधितत्वाद् वृद्धेश्च ह्रस्वेनेति भ्रष्टावसरस्य गुणस्य कुतः पुनः प्रवृत्तिरित्युवङ् प्रसज्येत । अस्तु वा तत्र गुणः, दोषान्तरमाह---अदीदपदित्यत्रेति । यदा तु चङ्परनिर्ह्नासे स्थानिवत्त्वनिषेधः, तदा वृद्ध्यावादेशयोः कृतयोः पुकि च णिलोपस्य स्थानिवद्भावाभावाच्चङि यदङ्गं तस्यैवोपधा ह्रस्वभाविनी सम्भवतीति णाविति न वक्तव्यम् । सूत्रकारेण स्थानिवत्त्वनिषेधो न कृत इति `णौ' इत्युक्तम् ।
चङीति किमिति । मितां ह्रस्वविधानादनेन णौ सर्वत्र ह्रस्वो न भविष्यति, प्रयोगदर्शनाच्चेष्टतो व्यवस्थाश्रयिष्यते इति प्रश्नः । इतरः---नान्तरेण वचनमिष्टानिष्टविभागः सुज्ञान इति मत्वाऽऽह--कारयति, हारयतीति । किञ्च---मितां ह्रस्ववचनम् `असिद्धवदत्राभात्' इत्येतदर्थं स्यात् । उपधाया इति किमिति । ह्रस्वश्रुत्या `अचः' इत्युपतिष्ठते, तत्र विशेषणविशेष्यभावे कामचारादङ्गेनाज्विशिष्यते, अङ्गस्य यत्र तत्र स्थितस्याचो ह्रस्वो भवति, तेनोपधायास्तावत्सिद्धं ह्रस्वत्वमिति प्रश्नः । इतरोऽप्यतिप्रसङ्गमुदाहरति--अचकाङ्क्षदिति । ननु `णौ' इत्यनेनाचं विशेषयिष्यामः---णौ परतोऽङ्गस्य योऽजिति, तत्र सामर्थ्यादकवर्णव्यवधानमवश्यम्भावित्वादाश्रयिष्यते ? इत्याह---तदेतदिति । उत्तरार्थमिति । `लोपः पिबतेरीच्चाभ्यासस्य'---उपधाया यथा स्यादन्तस्य मा भूदित्येवमर्थमवश्यमुपधाग्रहणं कर्त्तव्यम् । यद्युत्तरार्थमुपधाग्रहणम्, तत्रैवं कर्त्तव्यम् । यद्येवम्, तत्रैव क्रियताम् ? अत आहतदिहापीति । आल्लोपः पिबतेरिति । एवमुच्यमानेऽन्तरङ्गमपि युकमनवकाशत्वादाल्लोपो बाधते, उपधाग्रहणे त्वन्तरङ्गत्वाद्युकि कृते आकारस्य उपधाया लोप इति न कश्चिद् दोषः । तस्मादुत्तरार्थमुपधाग्रहणम् । अपर आह---इहार्थमप्युपधाग्रहणम्, अन्यथा णावनन्तरस्य ह्रस्वो विधीयमानोऽन्तरङ्गमपि वृद्ध्यादिक वाधित्वा लू+इ अत् इति स्थिते उकारस्यादेशः प्राप्नोति, नैष दोषः; यदयम् `नाग्लोपिशास्वृदिताम्' इति प्रतिषेधे शास्ति, तज्ज्ञापयति---नान्त्यस्येव ह्रस्वत्वमिति ।
णौ णिच्युपसंख्यानमिति । णौ परतो यो णिस्तस्मिन्नित्यर्थः । णेणिचीति पाठे ण्यन्तात्परे णिचि विहित इत्यर्थः । वादितवन्तं प्रयोजितवानिति । लुङो भूतकालत्वात्प्रयोजितवानिति भूतकालेन विग्रहः । वादितवन्तमित्यत्र तु कथम्, यद्यसौ वादितवान् कथं प्रयुक्तिः, कुर्वतो हि प्रयुक्तिः करिष्यतो वा, न तु कृतवतः ? न ब्रूमः---प्रयुक्तिकालापेक्षयात्र भूतकालत्वमिति, कि तहि ? यथाशब्दप्रयोगकालपेक्षया । प्रयोजितवानित्यत्र भूतकालत्वं तदपेक्षयैव प्रयोज्यव्यापारस्यापीति । अवीवददिति । वदेर्ण्यन्ताण्णिचि लुङादि । किं पुनः कारणं न सिध्यति ? अत आह---योऽसाविति । स्थानिवद्भावे हि सति यश्चङ्परो णिर्न तत्रोपधा ह्रस्वभाविनी, यत्रोपधा ह्रस्वभाविनी न स चङ्परः; द्वितीयेन णिचा व्यवहितत्वात् । तेन चेति । णिलोपेन । अग्लोपित्वादिति । ननु च ण्यन्ताण्णिचि विहिते णिलोपश्च प्राप्नोति, `अचो ञ्णिति' इति वृद्धिश्च, तत्र लोपः शब्दान्तरे प्राप्तेरनित्यः, वृद्धेस्तु लोपे कृतेऽत्यन्ताप्राप्तिरित्युभयोरनित्ययोः परत्वाद् वृद्धौ कृतायामैकारस्य लोपः, तन्नाग्लोप्यङ्ग भवति ? एवं तहि यदग्लोपिनां नेति प्रतिषेधं शास्ति, तज्ज्ञापयति---वृद्धेर्लोपो बलीयानिति; अन्यथा सर्वत्राको वृद्धौ कृतायामैकारौकारयोर्लोपः, न त्वकः । नैतदस्ति ज्ञापकम्; यत्र वृद्धावपि कृतायामगेव लुप्यते तदर्थमेतत्स्यात्---राजनमतिक्रान्तवान्नत्यरराजत्, यत्तहि प्रत्याहारग्रहणं करोति; अन्यथाल्लोपिनां नेत्येव ब्रूयात् ? एतदपि नास्ति ज्ञापकम्; स्वामिनमाख्यदसस्वामत्, गोमुचमाख्यदजुगोमत्, प्रावृषमाख्यदपप्रावत्, यादृशमाख्यदययादत्--इत्येवमाद्यर्थमेतत्स्यात् । अत्राहुः---णिजत्र नास्ति; अनभिधानात् ! एतच्च भाष्यकारेण ज्ञापकत्वसमर्थनादवसितमिति । यत्र तर्ह्यभिधानमङ्गीकृतं तद्रथमेतत्स्यात् `विन्मतोर्लुक्'---भास्वन्तमाख्यत् अबभासत् ? नैतत्प्रत्याहारग्रहणस्य प्रयोजनम्, अकार एव ह्यत्र मतुपो लुप्यते । यत्र तर्हि विनो लुक्---स्रग्विणमाख्यदसस्रजत् ? अत्रापि नोपधा ह्रस्वभाविनी । तस्मात्प्रत्याहारग्रहणं ज्ञापकमिति स्थितमेतत् । एवमपि हरिकल्योरत्वनिपातनं सन्वद्भावप्रतिषेधार्थमिति यदुक्तं तेनैद्विरुध्यते । तथा हि---असत्यप्यत्वनिपातने वृद्धिं बाधित्वा इकारस्य लोपे सति नैव सन्वद्भावस्य प्रसङ्गः । तस्मादग्लोपित्वादिति नायं स्वपक्षः, परमतेन त्वेतदुक्तं द्रष्टव्यम् ।।
भाष्यस्याप्येवमेवात्र निर्वाहो दृश्यतां बुधैः ।
विपर्यये तूच्यमाने युक्तिः काचिन्न दृश्यते ।।
एवं च पटुमाख्यत् बलिमाख्यत् अपीपटत्, अबीबलदिति भवति । यथा त्वत्र भाष्यं तथा अपपटत्, अबबलदिति भवतीत्यलमियता ।
उपसंख्यानं प्रत्याचष्टे---ण्याकृतिनिर्देशात्सिद्धमिति । आकृतिरत्र जातिर्निर्दिश्यते---चङ्परा या ण्याकृतिर्जातिस्तत्रेति । ततश्च सत्यपि स्थानिवत्त्वे ण्याकृतेरेवत्वाद्यश्चङ्परो णिः स एव पूर्वः, यश्च पूर्वः स एव चङ्पर इति सिद्धं ह्रस्वत्वम् । यदप्युक्तम्---`अग्लोपित्वात्' इति, तदपि न; आकृतिनिर्द्देशे हि ह्रस्वस्य न ण्याकृतिनिमित्तत्वेनाश्रीयते । तत्र गोबलीवर्दन्यायेन तस्या ण्याकृतेरन्यस्याको लोपः प्रतिषेधविषयत्वेनाऽऽश्रीयते इति सर्वमवदात् ।।
नाग्लोपिशास्वृदिताम् ।। 7.4.2 ।।
यत्र णौ परतोऽग्लोपस्तदिहाग्लोपि गृह्यते ।

दीव्यतिप्रभृतेर्नायं निषेधः शास्वृदिद्ग्रहात् ।।
शक्यः शासिग्रहोऽकर्तुमृदिदेष पठिष्यते ।
ऋशासू अनुशिष्टावित्येवमेके प्रचक्षते ।।
वदन्त्यन्ये तु सूत्रेऽस्मिन् शासिं निरनुबन्धकम् ।
पठन्तः प्रतिषेधोऽस्य यङ्लुक्यपि भवेदिति ।।
तत्र स्थानिवद्भावादपि सिद्धमिति । स्थानिवद्भावे हि सति ह्रस्वभाविन्युपधा न सम्भवति । हलचोरादेशे तु न सिद्ध्यतीति । यथा `सुधातुरकङ् च' इति समुदायस्यादेशत्वेऽवयवस्यानादेशत्वादणो रपरत्वं न भवति---सौधातकिरिति, तथा समुदाये स्थानिन्यवयवस्यास्थानित्वादजादेशत्वाभावान्नास्ति स्थानिवद्भावः । इह त्वग्लोपिग्रहणसामर्थ्यात् समुदायलोपोऽप्यग्लोप आश्रीयते ।।
भ्राजभासभाषदीपजीवमीलपीजामन्यतरस्याम् ।। 7.4.3 ।।
`भ्राज दीप्तौ', `भासृ दीप्तौ', `भाष व्यक्तायां वाचि' भौवादिकाः; `दीपि दीप्तौ', दैवादिकः, सर्वेऽनुदात्तेतः; `जीव प्राणधारणे' भौवादिकः; `मील निमेषणे', `पीड अवबाधने'---चुरादी ।
भ्राजभासोरित्यादि । अवश्यमनयोरनुदात्तोऽनुबन्ध आसङ्क्तव्यः, ऋकारानुरोधस्त्वपाणिनीय इत्युच्यते । ऋकारानुबन्धे प्राप्ते विभाषा, वर्णान्तरे त्वप्राप्ते विभाषेति । ऋकारानुरोधे फलविशेषाभावादपाणिनीयत्वम् ।
काण्यादीनामिति । काणिवाणिराणिहेठिलोपिप्रभृतयः काण्यादयः । आदिशब्दः । प्रकारे ।।
लोपः पिबतेरीच्चाभ्यासस्य ।। 7.4.4 ।।
अपीप्यदिति । ननु च परत्वान्नित्यत्वादुपधालोपे कृते, अनच्कत्वाद् द्विर्वचनं न प्राप्नोति ? अत आह---उपधालोपे कृत इति । उपधाया एव पर्यायेणेत्त्वं मा भूदिति अभ्यासस्य ग्रहणम् । आकारलोपेनाङ्गस्याग्लोपित्वाल्लघुनश्च परस्यासम्भवात् `सन्वल्लघुनि' इतीत्त्वदीर्घत्वयोरभावादीत्त्वविधिः । तिपा निर्देशो यङ्लुग्निवृत्यर्थः ।।
तिष्ठतेरित् ।। 7.4.5 ।।
अतिष्ठिपदिति । णौ कृतस्येत्वस्य स्थानिवद्भावात् स्थाशब्दस्य द्विर्वचनम्, सन्वद्भावादभ्यासस्येत्त्वम् । तिपा निर्देशः पूर्ववत् ।।
उर्ऋत् ।। 7.4.7 ।।
उपधाया ऋवर्णस्येति । अथ अर्त्तेर्धातोर्ग्रहणं कस्मान्न भवति, मा भवानर्पिपद् इति यथा स्यादिति ? तपरकरणात् । तद्धि दीर्घेऽपि स्थानिनि ह्रस्व एव यथा स्यादिति । हरराराामपवाद इति । `कृत संशब्दने'---इत्यस्य `ऋत इद्धातोः' इतीत्वं प्राप्नोति, `वृतु वर्त्तने' इत्यादीनां गुणः, `मृजेर्वृद्धिः'---ते च रपराः सन्त हरारारो भवन्ति । अचिकीर्त्तदिति । णौ कृतमपीत्त्वं न स्थानिवद् भवति । यत्र द्विरुक्ते परभागस्याद्योऽजवर्णस्तत्र स्थानिवत्त्वम् । तथा च `ओः पुयण्ज्यपरे' इति ज्ञापकमप्येतादृशमेव । ननु चान्तरङ्गा इरराराः, णिज्मात्रापेक्षत्वात्; ऋकारस्तु बहिरङ्गः, स हि पश्चाद्भाविनं चङमपेक्षते, तत्कथं तेनैते बाध्यन्ते ? अत आह---वचनसामर्थ्यादिति । यद्यन्तरङ्गत्वादिरराराः स्युः, व्यर्थमेवेदं वचनं स्यात् ।
तपरकरणमित्यादि । असति तस्मिन्यत्र स्थानी दीर्घस्तत्रान्तरतम्याद्दीर्घ एव स्यात् । ननु भाव्यमानोऽण् सवर्णान्न गृह्णाति, तत्कथं दीर्घस्य प्रसङ्गः ? अत आह---न चायमिति । असति तपरकरणे इति भावः । कथमभाव्यमानः ? अत आह---आदेशान्तरेति । अयमभिप्रायः---प्राप्तप्रतिषेधस्य प्रतिप्रसवे सम्भवति नापूर्वविधानं युक्तमिति तावन्न्यायः, ततश्चासति तपरकरणे आदेशान्तराणामिरारां निवृत्त्यर्थं यथावस्थितमृवर्णस्वरूपमेवाभ्यनुज्ञायेत । सम्भावने लिङ्, सम्भवति च सवर्णग्रहणे सति स्वरूपाभ्यनुज्ञानम् । तत्र स्वरूपमेवाभ्यनुज्ञायतामिति सवर्णग्रहणं स्यात्, तपरकरणे तु सति स्वरूपाभ्यनुज्ञानं न सम्भवति, अतो भाव्यमानत्वसम्पत्तये तपरकरणमिति । प्रायेण तु अभ्यनुज्ञायते इति उडन्तं पठ्यते, न तत्र समीचीनोऽर्थः; क्रियमाणानुवादे हि लड् भवति । अन्ये तु व्याचक्षते---आदेशान्तरनिवृत्त्यर्थ स्वरूपमेवाभ्यनुज्ञायत इत्येवमापद्येतेति ।।
दयतेर्दिगि लिटि ।। 7.4.9 ।।
अवदिग्य इति । `देङ् रक्षणे', ङित्त्वादात्मनेपदम्, `एरनेकाचः' इति यण् ।
न तु दयेत्यस्येति । `दय दानगतिरक्षणेषु' इत्यस्य । तस्य लिट्याम्विहित इति । `दयायासश्च' इत्यनेन ।
दिग्यादेशेन द्विर्वचनस्य बाधनमिष्यत इति । नाप्राप्ते तस्मिन्नस्यारम्भात् । ननु दयतेः प्राप्तं द्विर्वचनं बाध्यताम्, दिग्यादेशस्य तु स्थानिवद्भावेन द्विर्वचनं प्राप्नोति, तत्कथं बाध्यते, न हि तस्मिन्नाप्राप्ते तस्यारम्भः ? उच्यते; बाध्यबाधकभावे हि द्वेतम्---लक्ष्यं वा लक्षणेन बाध्यते, लक्षणं वा तेनेति । तत्राद्ये पक्षे स्यादेतच्चोद्यम्, द्विर्वचनशास्त्रस्याबाधितत्वात्; द्वितीये तु द्विर्वचनशास्त्रमेवास्मिन् विषये दिग्यादेशशास्त्रेण बाधितमिति कृतेऽपि दिग्यादेशे नास्ति द्विर्वचनस्य प्रसङ्गः । यद्येवम्, `अस्तर्भूः'---बभूव, अत्र द्विर्वचनं न स्यात्, अनवकाशा हि विधयो बाधका भवन्ति, सावकाशश्चायम्, कोऽवकाशः ? भविता, भवितुम्; यस्तर्हि लिट्येव विधीयते--`चक्षिङः ख्याञ्', `वा लिटि' इति, तत्र द्विर्वचनं न प्राप्नोति---आचख्यौ ? नैष दोषः; आर्धधातुके लिटीति विषयसप्तमी, ततश्च द्विर्वचननिमित्तस्य लिट उत्पत्तेः प्रागेव ख्याञादेशः, पश्चाल्लिटि परतो द्विर्वचनम् । इह तु परसप्तम्याश्रयणान्नाप्राप्ते द्विर्वचने दिगिरारभ्यमाणस्तद् बाधते । एवमन्यत्रापि, यत्र बाधो नेष्यते तत्र लक्ष्य बाधो वक्तव्यः, विषयसप्तमी वाश्रयणीया ।।
ऋतश्च संयोगादेर्गुणः ।। 7.4.10 ।।

सस्वरतुरित्यादि । `स्वृ शब्दोपतापयोः', `ध्वृ हूर्च्छने', `स्मृ चिन्तायाम्' । अत्र परत्वाद् गुणे कृते पश्चाद् द्विर्वचनमिति गुणविधानसमये संयोगादित्वमङ्गस्य । यद्वा---द्विर्वचने हलादिशेषे कृते साम्प्रतिकासम्भावाद् भूतपूर्वसंयोगादित्वमाश्रित्य गुणः ।।

प्रतिषेधविषय इति । थलि, उत्तमे णलि णित्त्वाभावपक्षे च सामान्यलक्षणो नैव गुणः सिद्धः---सस्वर्थ, अहं किल सस्वर । वृद्धिविषये तर्हि परत्वादयमेव गुणः प्राप्नोति ? तत्राह---वृद्धिविषये त्वित्यादि । गुणस्यावकाशः---सस्वरतुः, णिति वृद्धेरवकाशः---कारकः, हारकः; सस्वारेत्यादौ वृद्धिविषये पूर्वविप्रतिषेधः । ननु च परत्वाद् गुणेऽपि कृते तस्मिन् `अत उपधायाः' इति सिद्धम् ? सत्यम्; परिहारान्तरं त्विदं द्रष्टव्यम्---तपरकरणं निर्देशार्थम् । दीर्घस्य तु आतस्तरुरित्यादावुत्तरसूत्रेण गुणो भवत्येव । न च तस्या अपि प्राप्तेः संयोगादिषु तपरकरणसामर्थ्याद्व्यावृत्तिः; निर्देशार्थतया तस्योपपत्तेः । संयोगादेरित्यादि । अङ्गस्यासंयोगादित्वाद्वचनम् । उपधाग्रहणं देशविशेषोपलक्षणम्, अल्मात्रस्योपधासंज्ञाविधानात् संयोगस्योपधात्वासम्भवात्, संयोगावयवे वा संयोगशब्दो वर्त्तते, उपधात्वं तु मुख्यम् । सञ्चस्करतुरिति । `सम्पर्युपेभ्यः करोतौ भूषणे', `अडभ्यासव्यवायेऽपि' इति सुट् । यदि संयोगोपधग्रहणं क्रियते, नार्थः संयोगादिग्रहणेन; इहापि सस्वरतुः, सस्वरुरिति `संयोगोपधस्य' इत्येव सिद्धम् ? भवेत्सिद्धम्---सस्वरतुः, सस्वरुरिति; इदं तु न सिद्ध्यति--सञ्चस्करतुः, सञ्चस्करुरिति, किं कारणम् ? बहिरङ्गलक्षणत्वात्---बहिरङ्गः सुट्, अन्तरङ्गो गुणः । कथं सुटो बहिरङ्गत्वम् ? अत आह---अत्र हीति । अत्र दर्शने साधनाभिधायी लिट् तावद्भवति, ततश्च तावत्येव निमित्तमस्तीति गुणः प्राप्नोति, सुट् तु पश्चादुपनतमुपसर्गमपेक्षत इति बहिरङ्गः, तेनासौ गुणे कर्त्तव्येऽसिद्ध इति असंयोगोपधत्वाद् गुणो न स्यात् । सस्वरतुरित्यादौ च सावकाशं वचनम् । संयोगादिग्रहणे तु क्रियमाणे संयोगोपधग्रहणस्यानन्यार्थत्वादसिद्धत्वं बाध्यत इति गुणसिद्धइः । अवश्यं च सुटो बहिरङ्गत्वमेषितव्यमित्याहएवं च कृत्वेति । `सुट्कात्पूर्वः' इत्यत्रोक्तम्---कात्पूर्वग्रहणं सुटोऽभक्तत्वज्ञापनार्थमिति, इह तु भाष्यकारपक्षावलम्बनेन भक्तत्वेऽपि परिहार उक्त इति न विरोधः ।।

ऋच्छत्यृताम् ।। 7.4.11 ।।

`ऋच्छ गत्यादिषु' । अर्त्तेरप्यत्र प्रश्लेषः, यदाह--ऋ इत्येतस्येति । एतच्च बहुवचननिद्देशादवसीयते । ऋवर्णस्य ग्रहणं तु न भवति; ऋकारान्तानां पऋतग्ग्रहणात् । किमर्थ पुनरत्तिः प्रश्लिष्यते ? आरतुः, आरुरिति यथा स्यात् । अन्यथा ऋ अतुस्, ऋ उस् इति स्थिते द्विर्वचनम्, उरदत्वं च बाधित्वा वार्णत्वात्सवर्णदीर्घत्वम्; तत्र यद्यभ्यासग्रहणेन ग्रहणम्, उरदत्वं हलादिशेषः, `अत आदेः' इति दीर्घत्वम्, `आतो लोप इटि च',---अतुरुरिति वचनमेव श्रूयेत । अथ धातुग्रहणेन ग्रहणम् ? तत ऋकारान्तत्वाद् गुणे कृते अरतुः, अरुरिति रूपं स्यात् । तथा क्वसौ गुणे कृते अरित्यस्य द्विर्वचनम्, हलादिशेषः, `अत आदेः', सवर्णदीर्घत्वम्, `वस्वेकाजाद्घसाम्' इतीट्---आरिवानिति भवति ।

ऋच्छतेरलघूपधत्वाद् गुण इति । अन्तरङ्गत्वात् `छे च' इति तुकि कृते `संयोगे गुरु' इति ऋकारो गुरुर्भवति, न च लघुः, नाप्युपधा । ॠतां त्विति । सूत्रवदत्राप्यर्त्तिप्रश्लेषः । वृद्धिविषये त्विति । अस्तु वा परत्वाद् गुणः, `अत उपधायाः' इति सिद्धमिति परिहारान्तरम् ।।

शृदॄप्रां ह्रस्वो वा ।। 7.4.12 ।।

`शॄ हिंसायाम्', `दॄ विदारणे', `पॄ पालनपूरणयोः' । विशशरतुरित्यादि । `न शशददवादिगुणानाम्' इत्येत्त्वाभ्यासलोपयोः प्रतिषेधः । अथ किमर्थं ह्रस्वो विकल्प्यते, न प्रकृत एव गुणो विकल्प्येत, गुणाभावपक्षे यणादेशेन विशश्रतुरित्यादिरूपसिद्धिः ? इत्यत आह---ह्रस्ववचनमित्त्वनिवृत्त्यर्थमिति । अन्यथा `वार्णादाङ्ग बलीयः' इति वर्णाश्रयमन्तरङ्गमपि यणं बाधित्वा इत्त्वं स्यात् ।

केचिदित्यादि । कथं पुनरस्य प्रत्याख्याने विशश्रतुरित्यादिरूपसिद्धिः ? इत्यत आह---श्रा पाक इत्यादि । ननु चार्थभेदः ? न इत्याह---अनेकार्था इति । तथा सत्तीत्यादिना प्रत्याख्यानं प्रत्याचष्टे । तत्र श्रृणातेः क्वसौ---विशशर्वानिति, श्रातेस्तु---विशश्रिवानिति । तस्माद् ह्रस्व एव विकल्पनीय इत्यर्थः ।।

केऽणः ।। 7.4.13 ।।

ज्ञकेति । `भस्त्रैषाजाज्ञा' इतीत्त्वप्रतिषेधः ।

गोकेति । `अणिति पूर्वेण णकारेण प्रत्याहारः' इति `लण्' इत्यत्र प्रतिपादितम् । राका, धाकेति, `कृदाधाराचिकलिभ्यः कः' । कनोऽपीति । सानुबन्धकस्योपलक्षणमेतत्, `ओर्देशे ठञ्', नैषादकर्षुकः ।।

न कपि ।। 7.4.14 ।।

बहुकुमारीक इत्यादौ `नद्यृतश्च' इति कप् ।

अथात्रास्मिन्प्रतिषिद्धे उपसर्जनह्रस्वत्वं कस्मान्न भवति ? अत एव प्रतिषेधात् । नायमस्य ह्रस्वस्य प्रतिषेधः, किं तर्हि ? अनन्तरस्य `केऽणः' इत्यस्य । कुत एतत् ? `अनन्तरस्य विधिर्वा भवति प्रतिषेधो षा' इति । एवं तर्ह्याह---अयं कपि ह्रस्वो न भवतीति । यदि चोपसर्जनहस्वत्वं स्यात्, वचनमिदमनर्थकं स्यात् । अतो वचनसामर्थ्याद्यच्च यावच्च ह्रस्वत्वं तस्य प्रतिषेधो भविष्यति । अस्ति वचनस्यावकाशो यत्रोपसर्जनह्रस्वत्वं न प्राप्नोति, अस्त्रीप्रत्यये---बहुयवागूकः, बहुलक्ष्मीक इति, स्त्रीप्रत्यये उपसर्जनह्रस्वत्वं स्यादेव । तत्राह---गोस्त्रियोरुपसर्जनस्येत्ययमपीति । कुतः ? इत्यत आह---समासार्थ हीति । `समासान्ताः' इत्यत्रान्तशब्दोऽवयववचनः । कथं च कप्समासावयवो भवति ? यदि तेन सह समासो भवति । कथं च तेन समासो भवति ? यद्यकृत एव समासे तदर्थादुत्तरपदात् कब्भवति, पश्चात्तदन्तेन समासः ।

ननु च कपः पूर्वं सुबन्तम्, तत्कथं कबन्तेन समासः ? वचनात्समासान्तेष्वसुबन्तेन समासः । अपर आह---`उत्तरपदे या विभक्तिस्तस्याश्च या प्रकृतिस्तयोर्मध्ये विकरणवत्समासान्तः, तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात्सुबन्तेन समासः' इति; एवं वदतो दोषः; बहुचर्मिकेत्यादौ `प्रत्ययस्थात्' इतीत्त्वं

न स्यात् । किं कारणम् ? कात्परः सुप्, ततः परष्टाप्, यथा---बहुपरिव्राजका मथुरेति । यदि कपि कृते पश्चात्तदन्तेन समासः, किमायातम् ? इत्यत आह---स्त्रीप्रत्ययान्तं समासप्रातिपदिकं न भवतीति । `गोस्त्रियोः' इत्यत्र प्रातिपदिकस्येति वर्त्तते, स्त्रीप्रत्ययान्तस्य च प्रातिपदिकत्वं समासे सति, न चोक्ते प्रकारे कपः पूर्वभागस्य समासत्वं प्रातिपदिकत्वं वा समस्ति, तस्मान्नोपसर्जनह्रस्वत्वमिति ।।

ऋदृशोऽङि गुणः ।। 7.4.16 ।।

`ऋ' इति वर्णग्रहणम्; व्याख्यानात् । अकरदित्यादौ `कृमृदृरुहिभ्यश्छन्दसि' इति च्लेरङ् । असरदिति । `सर्तिशास्त्यर्त्तिभ्यश्च' इत्यङ् । अदर्शदिति । `इरितो वा' इत्यङ् । गुणग्रहणं किम्, नाकार एवोच्येत---`ऋदृशोङ्यः' इति ? नैव शक्यम्; दृशेरन्त्यस्यत्वं स्यात्, गुणग्रहणात्त्विको भवति । यदि त्वण् इत्यनुवर्त्तते, शक्यं गुणग्रहणमकर्त्तुम् । तथा तु न कृतमित्येव ।।

अस्यतेस्थुक् ।। 7.4.17 ।।

आस्थदिति । `अस्यतिवक्तिख्यातिभ्योऽङ्' ।।

श्वयतेरः ।। 7.4.18 ।।

अश्वदिति । `जृस्तम्भु' इत्यादिनाङ् ।।

पतः पुम् ।। 7.4.19 ।।

अपप्तदिति । लृदित्वादङ् ।।

शीङः सार्वधातुके गुणः ।। 7.4.21 ।।

अनुबन्धनिर्देशो यङ्लुकि मा भूदिति---शेशीतः, शेश्यतीति । `शीङ एः' इत्युच्यमाने सानुबन्धकात् षष्ठ्युच्चारिता, अनुबन्धश्च निवृत्तिधर्मा, तस्य लोपेन निवृत्तौ प्राप्तायामयमन्यः प्रकारो विज्ञायेत, नास्य लोपे निवर्त्तकः, किं तर्हि ? एकार इति । गुणग्रहणं त्विकं निवर्त्तयति । ङकारस्तु स्वनेनैव हेतुना निवर्त्तते । तस्माद् गुणग्रहणम् ।।

अयङ्यि क्ङिति ।। 7.4.22 ।।

शय्यत इति । यक् । शाशय्यत इति । यङ्, परत्वान्नित्यत्वाच्चायङादेशे कृते द्विर्वचनम् । प्रशय्येति । ल्यप् ।।

उपसर्गाद्ध्रस्व ऊहतेः ।। 7.4.23 ।।

ङितोऽसम्भवादुदाहारणं न प्रदर्शितम् । यङस्तावदजादित्वादसम्भवः । यासुटोऽपि शपा व्यवधानात् । आशिषि तु किदेव यासुट् । एवं चोहतेर्दीर्घप्रयोगनिवृत्त्यर्थं वचनम् । समुह्यत इत्यादिकं तु रूपं वहेरेव सम्प्रसारणे कृते सिद्धम् । अनेकार्थत्वाद्धातूनामर्थभेदोऽप्यकिञ्चित्करः । आ ऊह्यत इति । नेदं लौकिकं वाक्यं प्रयोगार्हम्, न हि तत्र धातूपसर्गयोरसंहितास्ति; `संहितैकपदे नित्या नित्या धातूपसर्गयोः' इति स्मरणात् । तस्मादलौकिकेन प्रक्रियावाक्येनाङः प्रश्लेपः प्रदर्श्यत इति ह्रस्वत्वं न कृतम्; लौकिकप्रयोगसम्पादनपरत्वाच्छास्त्रस्य । अन्ये त्वत्रापि ह्रस्वत्वं पठन्ति । ओह्यत इति । अत्रैकादेशे कृते व्यपवर्गाभावाद् ह्रस्वाभावः, `उपसर्गादूहतेः' इत्युभयत आश्रयणादन्तादिवद्भावोऽपि नास्ति । समोह्यत इति । अत्रैकादेशस्यादिवद्भावात्समः परस्य ह्रस्वत्वप्रसङ्गः । `अणः' इत्यनुवृत्तेस्तु न भवति, पूर्वणैव णकारेण प्रत्याहारः एवं च रूपाश्रयोऽयं विधिरिति ताद्रूप्यानतिदेशाद् ह्रस्वाभावः ।।

एतेर्लिङि ।। 7.4.24 ।।

आशिषि लिङीत्यादिना सूत्रस्य विषयं दर्शयति । सार्वधातुके हि लिङि दीर्घत्वमिणो न सम्भवति । ननु च सवर्णदीर्घत्वे सति सम्भवति---अभीयात्, प्रतीयात्, परीयादिति, नात्र ह्रस्वत्वेन भवितव्यम्; किं कारणम् ? `उपसर्गादेतेः' इत्युभयत आश्रयणादन्तादिवद्भावाभावात् । आ+ईयादित्यादि । आ+ऊह्यत इत्यादिना व्याख्यातम् ।।

अकृत्सार्वधातुकयोर्दीर्घः ।। 7.4.25 ।।

अकृद्यकार इति । यकारमात्रस्य प्रत्ययस्यासम्भवादकृति असार्वधातुके च यकारादावित्यर्थः । भृशायत इति । `भृशादिभ्यो भुव्यच्वेः' इति क्यङ् । सुखायत इति । `सुखादिभ्यः कर्तृवेदनायाम्' । चीयत इति । यक् । चेचीयत इति । यङ् । तोष्टूयत इति । `शर्पूर्वाः खयः' । चीयादिति । आशिषि लिङ् ।

निश्चित्य, प्रस्तुत्येति । ल्यबयं कृत्संज्ञकः । ननु चाजन्तस्य दीर्घो विधीयते, इह च तुकि कृतेऽनजन्तत्वाद्दीर्घो न भविष्यति ? इत्यत आह---परत्वादिति । तुकोऽवकाशः---गनिचित्, सोमसुत्; दीर्घस्यावकाशः---चीयते, स्तूयते; निश्चित्य, प्रस्तुत्येत्यत्र परत्वात्तुग् दीर्घत्वेन बाध्यते । प्रायेण तु प्रकृत्य, प्रह्नत्येति पाठः, तत्रोत्तरसूत्रेण रीङः प्रसङ्गाद् दीर्घत्वेन तुको बाधः स्यादित्ययुक्तं स्यात् . आद्यप्राप्त्यभिप्रायेण वा व्याख्येयम् । चिनुयादिति । विध्यादिलिङि । उरुया, धृष्णुयेति । `सुपां सुलिक्' इत्यादिना यादेशः ।।

रीङ् ऋतः ।। 7.4.27 ।।

पियमिति । `पितुर्यच्च' इति यत्प्रत्ययः, रीङादेशे कृते स्येतिलोपः ।

कथं पुनः `क्ङिति' इत्यनुवर्त्तमानेऽत्र रीङादेशो भवति ? अत आह---क्ङितीत्येतदिह निवृत्तमिति ।

चेकीर्यत इति । `कृ विक्षेपे' यङ्, `ऋत इद्धातोः', `हलि च' इति दीर्घः । जेगिल्यत इति । अत्र `ग्रो यङि' इति लत्वे कृते रेफाभावाद् दीर्घाभावः । अथ रीङिति किमर्थम्, न रिङेवोच्येत, `अकृत्सार्वधातुकयोः', `च्वौ च' इति दीर्घो भविष्यति, तत्रायमप्यर्थः---उत्तरत्र रिङ्ग्रहणं न कर्त्तव्यं भवति; तथा यग्लिङोरपि ग्रहणं न कर्त्तव्यं भवति, `शे च' इत्येव वक्तव्यं चकारादकृत्सार्वधातुकयकारे च ? यद्येवम्, यथा मात्रीयतीत्यादौ दीर्घो भवति, तथा यग्लिङोरपि स्यात्---क्रियते, क्रियादिति । अथ तत्र नाप्राप्ते दीर्घे रिङि विधीयमानो दीर्घत्वं बाधत इति उच्येत; तर्हि क्यजादिष्वपि बाधेत । अथ मतम्---ऋवर्णदीर्घत्वं तावद्बाध्यताम्, रिङस्तु कथं बाध्यते, न हि तत्र नाप्राप्ते दीर्घे स आरभ्यत इति ? यग्लिङोरपि तर्हि न बाधेत । तस्मात्क्यजादिषु दीर्घस्य, यग्लिङोस्तु ह्रस्वस्य श्रवणं यथा स्यादिति पृथगादेशद्वयं वक्तव्यम् ।।

रिङ् शयग्लिङ्क्षु ।। 7.4.28 ।।

यिग्रहणमकृत्सार्वधातुकग्रहणं चानुवर्त्तमानं सम्भवव्यभिचाराभ्यां लिङ् एव विशेषणम्, न शयकोः । आद्रियते, आध्रियत इति । `दृङ्' आदरे', `धृङ् अवस्थाने', तुदादित्वाच्छः, रिङि कृते इयङादेशः । रिङ्विचनं दीर्घनिवृत्त्यर्थमिति । रिङि कृते `अकृत्सार्वधातुकयोः' इति दीर्घत्वं प्राप्नोति, तस्यापि निवृत्तयर्थमिति भावः ।।

गुणोऽर्तिसंयोगाद्योः ।। 7.4.29 ।।

`ऋ गतिप्रापणयोः' भूवादिः, `ऋ सृ गतौ' जौहोत्यादिकः---द्वयोरप्ययं छान्दसत्वाल्लुका निर्देशः; ऋच्छतीति निर्देशे इयर्त्तर्न स्यात्, इयर्त्तीति निर्द्देशे ऋच्छतेर्न स्यात् । ऋग्रहणमेव तु न कृतम्, वैचित्र्यार्थम् । न चैवमुच्यमाने वर्णग्रहणशङ्का ? `ऋतः' इत्यनुवृत्तेः । श इत्येतदिहासम्भवान्निवृत्तमिति । न ह्यर्त्तिः, संयोगादिर्वा धातुस्तुदादिषु पठ्यते ।

संस्क्रियते, संस्क्रियादित्यत्र सुटि कृते संयोगाद्यङ्गमिति गुणप्रसङ्गः ? इत्यत आह--इहेति । बहिरङ्गत्वं सुटो द्विपदाश्रयत्वात्, इदं तु `पूर्वं धातुः साधनेन युज्यते' इत्याश्रित्योक्तम् । पक्षान्तरेऽप्याह---अभक्तत्वाद्वेति । इयृयादिति । विध्यादिलिङ्, शपः श्लुः, द्विर्वचनम्, `अर्तिपिपर्त्योश्च' इत्यभ्यासस्येत्त्वम्, `अभ्यासस्यासवर्णे' इतीयङ् । अकार एव वक्तव्ये गुणग्रहणं चिन्त्यप्रयोजनम् ।।

यङि च ।। 7.4.30 ।।

घ्नीभाव इति । प्रक्रियालाघवाय घकारोच्चारणम्, ह्नीभावविधौ `अभ्यासाच्च' इति कुत्वे गौरवप्रसङ्गात् । जेघ्नीयत इति । दिग्यादेशेनेव घ्नीभावेन द्विर्वचनं न बाध्यते, विषयभेदात्---यङन्तस्य द्विर्वचनम्, प्रकृतिमात्रस्य घ्नीभावः । जङ्घन्यते इति । गत्यर्थोऽयम् ।

ई घ्राध्मोः ।। 7.4.31 ।।

इकारविधावपि `अकृत्सार्वदातुकयोर्दीर्घः'।

अस्च च्वौ ।। 7.4.32 ।।

`च्वौ च' इति दीर्घे सिद्धे ईकारविधानं प्रक्रियालाघवार्थम् ।

क्यचि च ।। 7.4.33 ।।

पृथग्योगकरणमुत्तरार्थमिति । `न छन्दस्यपुत्रस्य' इत्यादि क्यच्येव यथा स्यात्, च्वौ मा भूदिति ।

अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु ।। 7.4.34 ।।

एतेष्वर्थेष्विति । गम्यमानेषु । यस्तदानीमेव बुभुक्षमाणोऽशनमिच्छति तदत्रोदाहरणम् । यस्तु तदानीं सुहित एवोत्तरार्थमशनमिच्छति, तदत्र प्रत्युदाहरणम् । उदकीयतीति । स्नानाद्यर्थमुदकमिच्छतीत्यर्थः । धनायतीति । अभिलाषातिरेकः=गर्धः, सत्येव धने भूयोऽपि धनमिच्छतीत्यर्थः । धनीयतीति । दरिद्रः सन धनमिच्छति ।

नच्छन्दस्यपुत्रस्य ।। 7.4.35 ।।

इहानन्तर्थादीत्त्वस्यैव प्रतिषेधः प्राप्नोति, ततश्चापवादेऽपनीते उत्सर्गः `अकृत्सावेधातुकयोः' इति दीर्घः प्राप्नोतीत्याशङ्क्याह---क्यचि यदुक्तं तन्न भवतीति । किं पुनस्तत् ? इत्यत आह---दीर्घत्वमीत्वं चेति । एवं मन्यते---यदयम् `अश्वाघस्यात्' इत्यात्वं शास्ति, तज्ज्ञापयति---दीर्घस्याप्ययं प्रतिषेध इति; अन्यथा दीर्घेणैव सिद्धत्वादात्ववचनमनर्थकं स्यादिति । मित्रयुरित्यादौ `क्याच्छन्दसि' इत्युप्रत्ययः । पुत्रमिच्छन्तः पुत्रीयन्तः । जनमिच्छन्तो जनीयन्तः, लटः शत्रादेशः, `उगिदचाम्' इति नुम् । अपरे त्वाहुः---जनीमिच्छन्तो जनीयन्तः, जनीति वधूरुच्यत इति । तत्रादिग्रहणस्य प्रयोजनान्तरं मृग्यम् ।।

दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति ।। 7.4.36 ।।

दुष्टीयितेति प्राप्ते इति । भाषायां प्राप्ति रुच्यते, तत्र उप्रत्ययाभावात् तत्समानार्थस्तृच् प्रयुक्तः । प्रायेण तु लडन्तं पठ्यते, तत्र प्रकृतिमात्रे तात्पर्यम् ।।

अश्वाघस्यात् ।। 7.4.37 ।।

एतदेवेत्यादि । पूर्वमेवैतद्व्याख्यातम् ।।

देवसुम्नयोर्यजुषि काठके ।। 7.4.38 ।।

वेदवचनोऽत्र यजुः शब्दः, न मन्त्रवचनः । कठानामिदं काठकम्, `गोत्रचरणआद्वुञ्' । काठके यजुषि कठशाखायामित्यर्थः ।। एवं च कृत्वा ऋगात्मके यजुषि मन्त्रे कठशाखायामात्वं भवति, तथा ऋग्वेदेऽपि भवति स चेन्मन्त्रः काठके दृष्टः । देवान् जिगाति सुम्नयुरिति । बह्वृचानामप्यस्ति कठशाखा, ततो

भवति प्रत्युदाहरणम् । अनन्ता वै वेदाः ।।

द्यतिस्यतिमास्थामित्ति किति ।। `दो अवखण्डने', `षो अन्तकर्मणि' । `मा माने', `माङ् माने', `मेङ् प्रणिदाने'---त्रयाणामपि ग्रहणम्, गामादाग्रहणेष्वविशेषात् ।

अवदायेति । ल्यप् । अवदातेति । तृच् । `द्यतिस्यति' इति श्तिपा निर्द्देशो धातुविशेषणार्थः ।।

शाच्छोरन्यतरस्याम् ।। 7.4.41 ।।

`शो तनूकरणे', छो छेदने' ।

श्यतेरिति । व्रत इति विषयो निर्द्दिश्यते, नोत्तरं पदम्; तेन संशितो ब्राह्मण इत्यत्रापि नित्यमित्त्वं भवति । संशित इति । व्रतविषये यत्नवानुच्यते । संशितव्रत इति । बहुव्रीहिः । सम्यक्सम्पादितव्रत इत्यर्थः । व्रतादन्यत्रापीत्त्वं भवति, व्रते तु नित्यमिति, संशितशब्दस्य सामान्यशब्दत्वादविरुद्धो व्रतशब्दस्य प्रयोगः ।

व्यवस्थितविभाषाविज्ञानात्सिद्धमिति । क्वचिन्नित्यं प्रवृत्तिः, क्वचिद्विकल्पेन, क्वचिन्नैव प्रवृत्तिः---इत्येवं विविधमवस्थिता विभाषा व्यवस्थितविभाषा । व्यवस्थितविभाषाणां दिङ्मात्रं श्लोकेन दर्शयति---देवत्रात इति । `क्तिच्क्तौ च संज्ञायाम्' इति क्तः । `नुदविदोन्दत्रा' इति नत्वं संज्ञायां न भवति । देवग्रहणस्योपलक्षणत्वाद् भवत्रात इत्यादावपि संज्ञायां नत्वाभावः । क्रियाशब्दे तु त्रातम्, त्राणमित्युभयं भवति । गल इति । `अचि विभाषा' इति लत्वम्, प्राण्यङ्गे नित्यं भवति, गिरत्यन्नमिति गलः, विषेतु नैव भवति, गीर्यते शपथार्थिभिरिति गरः; क्रियाशब्दे तूभयं भवति---गरः, गल इति । ग्राह इति । `विभाषा ग्रहः' इति आदित्यादिषु पचाद्यजेव भवति । ग्रहण इति क्रियाशब्दे तु पूर्ववत् । इतियोग इति । हन्तीति पलायते, वर्षतीति धावतीत्यादौ इतिप्रयोगे `लक्षणहेत्वोः क्रियायाः' इति शतृशानचौ न भवतः । मिथ इति । एकस्मिन्विषये न विकल्प्यन्ते, किन्तु विषयभेदेन । एतच्चाकृतिपक्ष उपपद्यते, तत्र हि सर्वं लक्ष्यजातं युगपदभिसमीक्ष्य द्वयमुपदिश्यते---भावोऽभावश्च, तत्र तयोर्विषयभेदेन प्रवृत्तावपि समुदाये द्वयं प्रवृत्तं भवति । असङ्कीर्णत्वं तु प्रयोगवशात् प्रत्येतव्यम् । गवाक्ष इति । वातायने `अवङ् स्फोटायनस्य' इति नित्यमवङ् भवति, प्राण्यङ्गे गोऽक्षमित्यत्र न भवति; अन्यत्र विकल्पः--मवाग्रम्, गोऽग्रमिति ।

दधातेर्हिः ।। 7.4.42 ।।

यद्यपि हिनोतेर्हित इत्यादि सिद्धम्, दधातेस्तु धीत इत्यादिनिवृत्तये सूत्रारम्भः । श्तिपा निर्देशो धेटो मा भूदिति । `ध' इत्युच्यमाने धेटोऽप्यनुकरणं सम्भाव्येत, यथा---`दाधा घ्वदाप्' इत्यत्र । यङ्लुकि त्विटि सति दाधित इति भवति ।।

जहातेश्च क्त्वि ।। 7.4.43 ।।

इदमपि वचनं जहानेहत्विनि मा भृदिति । श्तिपा निर्द्देशस्य तु प्रयोजनं वृत्तावेव दर्शितम् । यङ्लुकि जाहित्वेति भवति ।।

विभाषा छन्दसि ।। 7.4.44 ।।

पूर्वसूत्रारम्भादयमारम्भः, अन्यथा हिनोतिजहात्यो रूपद्वयं सिद्धम् । हात्वेति । छान्दसत्वादीत्त्वाभावः ।।

सुधितवसुधितनेमधितधिष्वधिषीय च ।। 7.4.45 ।।

इडागमो वेति । यदा इडागमः, तदा `आतो लोप इटि च' इत्याकारलोपः । वसुधितमिति । कर्मधारयः । क्तिन्यपि दृश्यते---उत त्वेतं वसुधितिं निरेके । नेमधितमिति । अयमपि कर्मधारयः ।

धत्स्वेति । `श्नाभ्यस्तयोरातः' इत्याकारलोपः, `दधस्तथोश्च' इति भष्भावः ।।

दो दद् घोः ।। 7.4.46 ।।

धीत इति । घुमास्थादिसूत्रेणेत्त्वम् । घेट एतद्रूपमिति । दधातेस्तु `दधातेर्हिः' इति हिरादेशो भवति । दातमिति । `दाप् लवने' । लूनमित्यर्थः । अवदातमिति । `दैप् शोधने' । अयमादेशस्थान्त इष्यत इति । कुतः ? इत्याह---एवं ह्युक्तमिति । यद्यपि दकारः श्रूयते, तथापि संहितायां तकारादीनामपि जश्त्वे कृते एतस्य रूपस्य सम्भवाच्चतुर्णां पक्षाणां सम्भवः । यद्ययमादेशस्तकारान्तः स्यात्, सुदत्तमित्यत्र `दस्ति' इति दीर्घत्वं स्यात्; `दा' इत्यतस्य यस्तस्तस्मिन्निति हि तत्रार्थः । अथ दकारान्तः, `रदाभ्याम्' इति नत्वं प्रसज्येत । अथ धकारान्तः, `झषस्तथोर्धोऽधः' इति धत्वमापद्येत । थान्तेऽदोष इति । नञोऽत्र प्रश्लेषः, `तस्मात्थान्तः' इति निगमनात् ।

यदि त्विति । `दस्ति' इत्यत्र द्वौ पक्षौ---`दा- इत्येतस्य यस्तकारान्त आदेशः, तकारादिर्वेति । तत्र द्वितीयपक्षे नायं दोषः । दान्तधान्तयोरपीति । तकारादिप्रत्ययसन्निपातेन भवन् दद्भावो न तद्विघातस्य निमित्तं भवति ।

अवदत्तमित्यादि । आदिकर्मणीति इत्येतत्प्रदत्तमित्येतस्य विशेषणम्, नेतरेषाम्; असम्भवात् । इति चेष्यत इति । चकारद्यथाप्राप्तं च, तेन अवत्तम्, वित्तम्, प्रत्तमित्याद्यपि भवति ।

अनुपसर्गा वा एत इति । कथमनुपसर्गत्वम् ? इत्यत आह---क्रियान्तरविषया इति । अवगतं दत्तमिति गमिनाऽवादिनां योगः, ततश्च `यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा भवन्ति' इति ददातिं प्रत्यनुपसर्गत्वम् ।।

अच उपसर्गात्तः ।। 7.4.47 ।।

त इत्ययमिति । तकारेऽकार उच्चारणार्थः । प्रत्तमिति । तत्राकारस्य तकारे दकारस्य चर्त्त्वम् । नीत्तमिति । `दस्ति' इति दीर्घत्वम् ।

आदेरलः प्राप्नोतीति । `आदेः परस्य' इति वचनात् । अच इत्येतदावर्त्तत इति । यद्वा---अस्येति वर्त्तते, क्व प्रकृतम् ? `अस्यच्वौ' इति, `दोदद्घोः' इत्ययमपि दद्भावोऽवर्णस्य प्राप्नोति, ततश्च दत्तमिति संयोगादि श्रूयते, एवं तर्ह्येवं वक्ष्यामि---`दोऽद्घोः' इति, दो य आकारस्तस्याद्भवतीति । द्वितकारकोवेति । `अलोऽन्त्यस्य' इत्येतस्य द्वावपवादौ---`आदेः परस्य', `अनेकाल्शित्सर्वस्य' इति, तयोर्विप्रतिषेधे परः प्रवर्त्तते । `अपो भि' इत्यत्रापि तर्हि सर्वादेशप्रसङ्गः ? अत आह---अपो भीत्यत्रेति । अत्र द्वयोस्तकारयोरन्त्यस्य संयोगान्तलोपः, पूर्वस्य जश्त्वम् । अत्र केचिदाहुः---अवश्यमत्राच इत्यनुवर्त्यम्, अन्यथा लूञ् `ऋदोरप्', लवाभ्यामित्यत्रापि स्यादिति, तन्न; लुप्ते पकारे नाप्शब्द इति नात्र भविष्यति ।।
भूतपूर्वगतिर्युक्ता न साम्प्रतिकसम्भवः ।
न प्रत्ययाप्रत्यययोरित्यस्याप्यत्र सम्भवः ।।
द्वयोरतुल्यकक्षत्वात्प्रत्ययेऽपो न हि श्रुतः ।
अपो भि ।। 7.4.48 ।।
स्ववद्भिरिति । अवतेरसुन्, शोभनमवो येषां ते स्ववसः । `तु' इति सौत्रो धातुः, स्वन्तवो येषां ते स्वतवसः । माद्भिरिति । `पद्दन्नोमास्' इति मासशब्दस्य मासादेशः । उषद्भिरिति । `मिथुनेऽसिः', `वसेः किञ्च' इत्यसिप्रत्ययः ।।
सः स्यार्धधातुके ।। 7.4.49 ।।
वत्स्यतीत्यादि । `वस निवासे', लट् । जिघत्सतीति । `लुङ्सनोर्घस्लृ' । आस्से, वस्से इति । `आस उपवेशने', `वशे आच्छादने'---अदादी अनुदात्तेतौ । `अतङि' इत्युच्यमाने व्यतिवत्सीष्टेत्यत्रापि न स्यात् ।।
तासस्त्योर्लोपः ।। 7.4.50 ।।
व्यतिसे इति । `कर्त्तरि कर्मव्यतिहारे' इत्यात्मनेपदम्, शपो लुक्, `श्नसोरल्लोपः' इत्यकारलोपः । प्रत्ययमात्रमेतत्पदमिति । तेन `सात्पदाद्योः' इति षत्वप्रतिषेध इति भावः ।।
रि च ।। 7.4.51 ।।
अस्तेरुदाहरणं न प्रदर्शितम्, रेफादेरसम्भवात् ।।
ह एति ।। 7.4.52 ।।
एशि हकारो न भवति---एधामासे इति, किं कारणम् ? तासेर्य एकारः सम्भवति तत्रेवास्तेरपि । कश्च तासेः सम्भवति ? उत्तमैकवचनम् । अपर आह---उतमैकवचनम्, सार्वधातुकं चेति; तेन सुप्तोऽहं त्वां प्रेक्षामासे, उत्तमेऽप्यार्धदातुके न भवतीति ।।
यीवर्णयोर्दीधीवेव्योः ।। 7.4.53 ।।
यकारे इकार उच्चारणार्थः । लोपो भवतीति । हकारस्त्वनन्तरोऽप्यस्वरितत्वान्नानुवर्त्तते । आदीध्येति । ल्यप् । आदीध्यक इति । यक् । आदीधितेति । तृच्, इट् ।
आदीध्यनमिति । ल्युट्, `दीधीवेवीटाम्' इति गुणप्रतिषेधः । इहादीधयतेर्वुल्---आदीध्यक इति । श्रूयमाण एव णौ ण्वुल् । उत्पत्तेः प्रागेव प्राप्तोऽपि लोपो न भवति; वर्णग्रहणात् । किं वर्णग्रहणमतिरिच्यत इत्यतो न भवति ? नेत्याह । अक्षरार्थ एवायम्, कथम् ? `वर्ण वर्मने' चुरादिः, वर्ण्यते उपलभ्यत इति वर्णः, वर्णश्चासाविश्चेति विशेषणसमासे विशेषणस्य निपातनात् परनिपातः ।।
सनि मीमाघुरभलभशकपतपदामच इस् ।। 7.4.54 ।।
सीत्येतदिहानुवृत्तं सनो विशेषणम् । मीनातिमिनोत्योरिति । `मीञ् हिंसायाम्', `डुमिञ् प्रक्षेपणे' । उभयोरपि ग्रहणमिति । मिनोतेरपि `अज्झनगमां सनि' इति दीर्घे कृते `मी' इति रूपसम्भवात् । नन्वसौ लाक्षणिकः ? सत्यम्; इष्टिरेवेयम्, यदाह---इष्यत इति । `मा माने', `माङ् माने', `मेङ् प्रणिदाने'---त्रयाणामपि ग्रहणम् । मीनातिमिनोत्योः सनः कित्त्वे सति अनेज्विषयत्वात् मारूपासम्भवात्पृथग्ग्रहणम् । घु इति । घुसंज्ञका दाधा गृह्यन्ते ।`रभ राभस्ये', `डुलभष् प्राप्तौ', शक्लृ शक्तौ', `पल्लृ गतौ' । मित्सतीति । `स स्यार्धधातुके' इति सकारस्य तकारः, `अत्र लोपोऽभ्यासस्य' । आत्मनेदिषु `पूर्ववत्सनः' । आरिप्सते इत्यादौ `स्कोः संयोगाद्योः' इति सलोपः ।।
आप्ज्ञप्यृधामीत् ।। 7.4.55 ।।
`आप्लृ व्याप्तौ', `ज्ञा अवबोधने', णिचि पुक, `मारणतोषणनिशामनेषु ज्ञा' `मिच्च' इति मित्संज्ञायाम् `मितां ह्रस्वः' । `ऋधु वृद्धौ' । ईर्त्सतीति । रपर ईकारः, धकारस्य चर्त्वम् ।
ज्ञपेरित्यादि । इह `अचः' इत्यनुवर्त्तते, तेन च ज्ञपौ विशिष्यमाणे अजन्तस्य ज्ञपेरित्त्वं, विधीयमानम् `अलोऽन्त्यस्य' इत्यन्त्यस्य स्यात्, अजन्तस्येति च विशेषणं व्यर्थम्; व्यभिचाराभावात्; तेन ज्ञपिनाज्विशेष्यते---ज्ञपेरचो यत्र तत्रस्थस्येति, यथा---आबृधिभ्याम् । एवं चैकप्रकारो विशेषणविशेष्यभावो भवति, तत्रानन्त्येऽचि सावकाशमीत्त्वमन्त्येऽचि पूर्वविप्रतिषेधेन णिलोपो बाधते, तदिदमुक्तम्---णेर्लोप इति । इतरस्य त्विति । अपर आह---अस्तु णेरपीत्वम्, तस्य स्थानिवद्भावाण्णिलोपो भविष्यति, ईत्त्ववचनं त्वनन्त्ये श्रवणार्थमिति ।
अर्दिधिषतीति । सनि इटि लघूपधगुणे रपरे कृते `न न्द्राः' इति प्रतिषेधाद् रेफवर्जितद्वितीयस्यैकाचो द्विर्वचनम् ।।

दम्भ इच्च ।। 7.4.56 ।।
धिप्सति, धीप्सतीति । `हलन्ताच्च' इति सनः कित्त्वादुपधालोपः, भकारस्य चर्त्वम् । इत्त्वं शक्यमविधातुम्; एवं वक्ष्यामि---`सनिमीमादीनामच इस् दम्भ ईच्च', चकारादिस्भावश्च, ततः `आप्ज्ञप्यृधामित्' इत्येव ।।
मुचोऽकर्मकस्य गुणो वा ।। 7.4.57 ।।
मुमुक्षत इति । `भूषाकर्मकिरादिसनां चान्यत्रात्मनेपदात्' इति कर्मकर्त्तरि यगभावः । अतिदेशेन स्वश्रयस्यानिवृत्तेः कर्तरि शब्भवति; यथा---नमते दण्डः स्वयमेवेति ।
कर्मविशेषस्याविवक्षितत्वाद्वेति । उक्तं हि---
`प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ।' इति ।।
अत्र लोपोऽभ्यासस्य ।। 7.4.58 ।।
अत्रशब्दस्यार्थं दर्शयति---यदेतदिति ।
अथात्रग्रहणं किमर्थम् ? अत्र `सनिमीमा' इत्यादौ प्रकरणे यथा स्याद्; ददौ, ददातीत्यत्र मा भूदिति । नैतदस्ति प्रयोजनम्, एवं वक्ष्यामि---`सनि मीमाघुरभलभशकपतपदामच इसभ्यासलोपश्च'---इति, उत्तरत्रापि `अभ्यसलोपश्च' इत्येव ? तत्राह---सनि मीमाध्वित्यादि । विषयावधारणम्=विषयर्नियमः । कः पुनरसौ ? इत्यत आह---अत्रैवेत्यादि । अवधारणस्य व्यवच्छेद्यं दर्शयति---सन्वद्भावविषये न भवतीति । अमीमपदिति । मिञो णिचि `मीनातिमिनोति' इत्यात्त्वम्, पुक, लुङ्, चङि द्विर्वचनम्, सन्वद्भावादित्त्वम्, `दीर्घो लघोः' ।
कथं पुनः सनीत्युच्यमानस्याभ्यासलोपस्यात्र प्रसङ्गः ? इत्यत आह---सन्वल्लघुनीति । यथैव हि सन्वद्भावेनेत्त्वं भवति, तथाभ्यासलोपोऽपि स्यात्, `अलोऽन्त्यस्य' लोपेन भवितव्यमित्याशङ्कायामाह---सर्वस्येति । कथं पुनः सर्वस्य लभ्यते ? अत आह---तदर्थमेवेति । `इतराभ्योऽपि दृश्यन्ते' इति षष्ठ्यन्तात्त्रल् । योऽयमभ्यासः प्रसिद्धोऽस्य लोपः, न तदन्तस्येत्यर्थः । विषयावधारणं त्वन्यथापि सिद्धम् । सन्वल्लघुनीति न कार्यमतिदिश्यते, किं तर्हि ? रूपम् । लोपश्चासावभावरूपो न रूपमिति नातिदिश्यते । नानर्थकेऽलोन्त्यविधिरित्यपरे सर्वस्य कुर्वन्तीति । `अनभ्यासविकारेषु' इति तु प्रतिषेधो न भवति; लोपस्याविकारत्वात् । तथा च पस्पशायाम्---`लोपागमवर्णविकारज्ञः' इति पृथग्ग्रहणम्, `द्वौ चापरौ वर्णविकारनाशौ' इति च पृषोदरादिसूत्रे । अन्वयव्यतिरेकाभ्यामर्थवत्तावधार्यते, न चाभ्यासस्योपजनने कश्चिदर्थः प्रतीयत इत्यभ्यासस्यानर्थक्यम् ।।
ह्रस्वः ।। 7.4.59 ।।
हलादिशेषो न भवतीति । न चागमविधानसामर्थ्याद्धलादिशेषाभावः, अन्यथाऽऽदेशमेवाकारं विदध्यादिति वाच्यम् । सत्यपि वा हलादिशेषे विगृहीतश्रवणार्थत्वादाकारस्य---चलाचलमिति ।।
कर्मधारये हि विशेषणत्वादादिशब्दस्य पूर्वनिपातः प्राप्नोति । षष्ठीसमासे हलन्तरापेक्षं हल आदित्वम्, नाभ्यासापेक्षमिति अजादिष्वपि प्रसङ्गः । `अक्षु व्याप्तौ' लिट्, आनक्ष, अत्र ककारस्य शेषः प्राप्नोति । आटतुरित्यादावप्यादिवद्भावात्प्रसङ्गः । कर्मधारयासमासयोस्तु अभ्यासापेक्षमादित्वमिति नायं दोषः । अनादिर्लुप्यते इति । हलित्यपेक्ष्यते, एतेनासमासपक्षो दर्शितः । समासे ह्युपसमस्तस्यापेक्षायोगादनादिर्हलिति पुनर्हल्ग्रहणं कर्तव्यम् ।
ननु शेषोऽवस्थानं तत्त्वादेः प्राप्तमेव, तत्किमेतेन ? अत आह---आदिशेषनिमित्तोऽयमिति । सत्यम्, `सिद्धे सत्यारम्भो नियमार्थः', आदिरेव शिष्यते न त्वनादिरिति, ततश्चादिशेषनिमित्तोऽयमनादेर्लोपो विधीयत इति नास्यानर्थक्यमित्यर्थः । यद्यादिशेषो निमित्तमनादिलोपस्य, पपाचेत्यादौ यत्रादेर्हलोऽवस्थानं तत्रैवान्यस्य निवृत्तिः स्यात्, आटतुरित्यादौ तु न स्यादित्यत आह---तत्रेति । जातिपक्षे अभ्यासजातावेवादेरवस्थानमपेक्षितम्, न प्रतिव्यक्तीति दोषाभावः । अपरे त्विति । पूर्वत्र पक्षेऽवस्थानमेव शब्दार्थः, नियमाश्रयणआत्त्वितरव्यावृत्तिः; अत्र तु पक्षे निवृत्तिरपि गुणभूतशेषशब्देनैवोच्यते । ततः किम् ? इत्यत आह---तदवस्थानमित्यादि । उक्तितः=शब्दव्यापारतः । अविधेयत्वात्त्विति । आर्थमप्राधान्यं दर्शयति । निवृत्तिस्तु विपरीतेत्याह--निवृत्तेरेव त्विति । लोकेऽपि `चङ्क्रम्यमाणोऽधीष्वात्र जपँश्चमङ्क्रणं कुरु' इत्येवमर्थाभेदेऽपि शब्दोद्भेदः प्रतीयते । ततः किम् ? इत्यत आह---तत्रेति । साविधेयत्वात्प्रदानभूता सती निवृत्तिः । किमित्यादेरनिवृत्तिमपेक्षिष्यते । किम्भूताम् ? अविधेया सतीम् । अविधेयत्वादप्रधानभूतां सतीमित्यर्थः । न प्रधानं गुणनुवर्ति, तस्मादपेक्षाकरणं नास्तीत्यर्थः ।
भाष्ये परिहारान्तरम्---`हल्' इत्येको योगः, `अत्र लोपः' इति वर्त्तते; स च कर्मसाधनः, यथा `हल्ङ्याब्भ्यो दीर्घात्' इत्यत्र, अभ्यासस्य हल् लुप्यते, तत आदिः शेषः; यद्वा---`ह्रस्वोहलादिः शेषः' इति संहितापाठ एव, तत्राहलिति पदच्छेदः---अभ्यासोऽहल् भवति, अविद्यमानहल्को भवति, तत आदिः शेष इति ।।
शर्पूर्वाः खयः ।। 7.4.61 ।।
पूर्वेण शरां शेषे प्राप्ते खयां शेषो विधीयते, नत्रैकाभ्यासविषयेणानादिशेषेणादिशेषो बाध्यते; सत्यपि सम्भवे बाधनं भवतीति न्यायात् । किञ्चासम्भवोऽप्यत्र शक्यते वक्तुम्, कथम् ? शेषशब्दोऽयं निवृत्तिमदवस्थानमाह, न चोबयोरवस्थाने निवृत्त्या विशिष्टमवस्थान सम्भवति । चुश्च्योतिषतीति । `श्च्युतिर् क्षरणो' । पिस्पन्दिषत इति । `स्पदि किञ्चिच्चलने', अनुदात्तेत् । सस्नाविति । `ष्णा शौचे' ।
खर्पूर्वा इति । सूत्रे शर्ग्रहणमपनीय खर्ग्रहणं कर्त्तव्यमित्यर्थः । उचिच्छिषतीति । `उच्छी विवासे'। अन्तरङ्गत्वादिति । उपदेशानन्तरमेव

प्राप्तत्वादन्तरङ्गत्वात्तुकि कृते द्विवर्चनमिति । तच्च `पूर्वत्रासिद्धम्' इति चुत्वस्यासिद्धत्वात् सतुक्क एव भवति, तत्र कृते यद्यत्र हलादिशेषः स्यात्, अभ्यासे तकारः श्रूयेत । एतच्च `पूर्वत्रासिद्धीयमद्विर्वचने' इत्येतदनाश्रित्योक्तम् । तदाश्रयणे तु चुत्वे कृते तस्य सिद्धत्वात् च्छिस्शब्दस्य द्विर्वचने चकारशेषेणैव रूपं सिध्यति; न चेदमस्ति---`निमित्ताभावे नैमित्तकस्याप्यभावः' इति, येन चुत्वं निवर्त्तते ।।

कुहोश्चुः ।। 7.4.62 ।।

चखानेति । खकारस्य छकारः, तस्य `अभ्यासे चर्च्च' इति चकारः । जघासेति । घकारस्य झकारः, तस्य जश्तवम्---जकारः । जिहीर्षतीति । `इको झल्' इति सनः कित्त्वम्, हकारस्यापि झकारः, तस्य जश्त्वम् ।।

न कवतेर्यङि ।। 7.4.63 ।।

कवतेरित्यादि । `कूङ् शब्दे' इति तुदादिः, `कु शब्दे' इत्यदादिः, `कुङ् खुङ्' इति भूवादिः शब्दार्थ एव । तत्रासति विकरणनिर्देशे `कोः' इत्यच्यमाने त्रयाणमपि ग्रहणं स्याद् । अथ तौदादिको दीर्घान्तः ? एवमपि द्वयोर्ग्रहणं स्यात् । न च निरनुबन्धकत्वादादादिकस्यैव ग्रहणम्; लुग्विकरणत्वात् । तस्माद्भौवादिकस्यैव यथा स्यादिति विकरणनिर्द्देशः ।।

दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्यतोदविद्युतत्तरित्रतः सरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च ।। 7.4.65 ।।

धारयतेरिति । `घृङ् अवस्थाने' ण्यन्तः । धृङो वेति । स एव प्रकृत्यन्तरम् । श्लौ यङ्लुकिचेति । `श्लौ' इत्येतद्धारयतेः, धृङो वेत्युभाभ्यां सम्बध्यते । `यङलुकि च' इत्येतत्तु `धृङो वा' इत्यनेनैव । तदयमर्थः---दाधर्तीति धारयतेः श्लौ णिलुगभ्यासदीर्घत्वं च निपात्यते, धृङो वा श्लावभ्यासदीर्घत्वम् । अत्र परस्मैपदमपि निपात्यम्, तस्यैव वा यङ्लुकि अभ्यासदीर्घत्वं निपात्यत इति । दर्धर्तीत्यत्र तु यङलुक् । पक्षे दाधर्तीति । निपातनेन प्राप्तस्य दीर्घत्वस्याभावो निपात्यते, `रुग्रिकौ च लुकि' इत्येव रुक् सिद्धः । श्लुपक्षे तु रुगपि निपात्यः । दर्धर्षीत्यत्र यङलुक्, पक्षे न किञ्चिन्निपात्यम् । बोभूत्विति । यङलुगन्ताल्लोट् । बोभवीतीति । लट्, `यहो वा' इति पक्षे ईट् ।

प्रत्ययलक्षणेनेति । यद्यपि `अनुदात्तङितः' इति ङित्त्वनिमित्तमात्मनेपदं न प्रत्यनिमित्तम्; तथापि लोलूयते इत्यादौ यङन्तादात्मनेपदम्, तत्प्रत्ययस्य ङित्वादिति प्रत्ययलक्षणं भवत्येव । एवं चादादिषु `चर्करीतं परस्मैपदम्' इति परस्मैपदग्रहणमनुवादः । कर्त्तर्येव चेदमात्मनेपदं नियम्यते इति भावकर्मणोर्यङ्लुगन्तादात्मनेपदं भवत्येव ।

करिक्रदिति । अत्र चुत्वाभाव एव निपात्यः, रिगागमस्तु `रुग्रिकौ च' इत्येव सिद्धः । तथा चास्येति । असंय मन्त्रपदस्य ब्राह्मणे विवरणम् । भरिभ्रदिति । अत्रापि जश्त्वाभाव एव निपात्यः । जसि रूपमिति । `नाभ्यस्ताच्छतुः' इति नुमः प्रतिषेधः ।।

उरत् ।। 7.4.66 ।।

ववृते इत्यादौ हलादिशेषे कृते ऋकारान्ततायामुपजातायामद्भावः, रपरत्वे पुनः `हलादिः शेषः' ।

नर्नर्तीत्यादौ रुगादिषु कृतेषु ऋकारान्तत्वाभावादत्वं न स्यादित्याशङ्क्याह---नर्नर्तीत्यादाविति । यथा चाभ्यासविकारेषु बाधका न बाधन्ते, तथा `दीर्घोऽकितः' इत्यत्रैव वक्ष्यते ।।

द्युतिस्वाप्योः सम्प्रसारणम् ।। 7.4.67 ।।

विदिद्युते इति । `द्युत दीप्तौ' अनुदात्तेत् । व्यदिद्युतदिति । ण्यन्ताल्लुङ्, चङि द्विर्वचनम् । विदिद्योतिषते, विदिद्युतिषत इति । `रलो व्यपधात्' इति सनः कित्त्वविकल्पः ।

स्वापिर्ण्यन्तो गृह्यत इति । स्वपेर्यो णिज्विहितस्तदन्तस्य ग्रहणम्, तेन स्वापं करोतीति णिचि कृते यः स्वापिस्तस्य ग्रहणं न भवति । एतच्च `स्वापि' इत्युक्ते सहसा प्रथमं तस्यैव प्रतीतेर्लभ्यते । अण्यन्तस्यैव योऽभ्यासस्तस्यानेनैव सम्प्रसारणं सिद्धम् । तथा हि---लिटि तावत्किति `वचस्वपियजादीनां किति' इति कृतसम्प्रसारणमेव द्रिरुच्यते, अकित्यपि `लिट्यभ्यासस्योभयेषाम्' इत्यस्ति सम्प्रसारणम्, सन्निपि `रुदविदमुषग्रहिस्वपि' इति किदेव, यङ्यपि `स्वपिस्यमिव्येञां यङि' इति कृतसम्प्रसारणमेव द्विरुच्यते । अथापि यङलुक्यभ्यासस्य सम्प्रसारणं न केनचित्प्राप्तम्, तथापि `स्वापे' इति निर्द्देशादेव ण्यन्तस्य ग्रहणम् । तस्येत्यादि । अभ्यासेनात्र स्वनिमित्तं प्रत्ययः सन्निधापितः, तेन स्वापिरङ्गं विशेष्यते---अभ्यासनिमित्ते प्रत्यये यदङ्गं स्वापिस्तस्येति । सिस्वापकी यिषतीत्यत्र चाभ्यासनिमित्तं यः प्रत्ययः सन् न तस्मिन्स्वापिरङ्गम्, यस्मिंश्च स्वापिरङ्गं ण्वुलि न तदभ्यासस्य निमित्तम् । द्युतेस्तु---व्यदिद्युतदिति, अत्राभ्यासस्य निमित्तं यश्चङ् स यद्यपि णिचा व्यवहितः, तथापि सम्प्रसारणमिष्यते ।

द्वन्द्वनिर्द्दिष्टयोरेतद्वैषम्यं लभ्यते कथम् ?

तस्माद्वक्तव्यमेवैतदिति मन्यामेह वयम् ।।

द्योतकीयतेः सनि अभ्यासस्य प्रसारणं भवति, न वेति चिन्त्यम् ।

व्यथो लिटि ।। 7.4.68 ।।

विव्यथे इति । `व्यथ भयचलनयोः', अनुदात्तेत् । अत्र यकारे हलादिशेषेण निवृत्ते वकारस्य प्रसारणप्रसङ्ग इत्याशङ्क्याह---यकारस्येति । इह `लिट्यभ्यासस्योभयेषाम्' इत्यस्यनन्तरम् `व्यथः' इति वक्तव्यम्, ततः `द्युतिस्वाप्योः ? तथा तु न कृतमित्येव ।।

दीर्घ इणः किति ।। 7.4.69 ।।

यणादेशे कृत इति । परत्वात् । स्थानिवद्भावादिति । `द्विर्वचनेऽचि' इति रूपस्थानिद्भावः । इयाय, इययिथेति । णलि थलि च वृद्धिगुणयोः कृतयोः स्थानिवद्भावाद् द्विर्वचनम्, `अभ्यासस्यासवर्णे' इतीयङ् ।।

अत आदेः ।। 7.4.70 ।।

`आदेः' इति वचनादत्र तदन्तविधिर्न भवति, लिटीत्यनुवर्त्तते, किद्ग्रहणं तु निवृत्तम् । `अतो गुणे' पररूपत्वे प्राप्ते दीर्घत्वमिदमारभ्यते । तपरकरणं किम् ? दीर्घस्य मा भूत्---`आछि आयामे', आच्छ, आञ्छतुः, आञ्छुः । किं च स्यात्, यद्यत्र दीर्घः स्यात् ? `तस्मान्नुड् द्वहलः' इति नुट् प्रसज्येत । यद्यप्यत्रापि ह्रस्वत्वे कृते अद्भवति, तथापि तपरकरणसामर्थ्याद् `अदेव योऽत्' इति विज्ञानात् स्वाभाविकस्य मात्रिकस्य परिग्रहः ।।

तस्मान्नुड् द्विहलः ।। 7.4.71 ।।

आनङ्गेति । `अगि रगि लघि गत्यर्थाः' । आनञ्जेति । `आञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' । द्विहल्ग्रहणमनेकहलुपलक्षण, तेनानर्छेत्यत्र गुणे रपरे कृते त्रिहलोऽपि भवति ।

`ऐऔच्' इत्यत्र `वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्यं न भवति इत्युक्त्वा `नुड्विधिलादेशविनामेषु ऋकारे प्रतिविधातव्यम्' इत्युक्तम्, तत्रावसरे प्राप्ते नुड्विधौ प्रतिविधत्ते---ऋकारैकदेस इत्यादि ।

अत्र द्विहल्ग्रहणं न कर्त्तव्यम्, `तस्मान्नुट्' इत्येवास्तु; एवमुच्यमाने आटतुः, आटुरित्यत्रापि प्राप्नोति ? `अश्नोतेश्च' इत्येतन्नियमार्थं भविष्यति---अद्विहलो यदि भवति अश्नोतेरेवेति; अश्नातिनिवृत्त्यर्थं नाश्न इत्येवं वाच्यं स्यात्, तदेवमन्तरेणापि द्विहल्ग्रहणं सिद्धे यद् द्विहल्ग्रहणं करोति तस्यैतदेव प्रयोजनम्---द्विहल्छायानुकारिणोऽपि यथा स्यादिति ।।

भवतेरः ।। 7.4.73 ।।

`उरत्' इत्यस्यानन्तरमिदं नोक्तं लिटीत्युपजीवनाय । यदि पुनस्तदत्रैवोच्येत ? नैवं शक्यम्; लिट्येव हि स्यात् । श्तिपा निर्द्देशो यङ्लुग्निवृत्त्यर्थः ।।

ससूवेति निगमे ।। 7.4.74 ।।

दाधर्त्यादिष्वेवैतत्पठितव्यम् ।।

णिजां त्रयाणां गुणः श्लौ ।। 7.4.75 ।।

निजिरि, विजिर, विष्लृ व्याप्तौ जुहोत्यादिष्वमी त्रयः ।

त्रयाणां ग्रहणमुत्तरार्थमिति । `भृञामित्' इतीत्त्वं त्रयाणामेव यता स्यात् । अथेहार्थमपि कस्मान्न भवति ? तत्राह---एषां हीति । यदि तर्ह्युत्तरार्थं त्रिग्रहणं कर्त्तव्यम्, तदेवास्तु, वृत्करणं तु निजामन्ते शक्यमकर्तुम् ? सत्यम्; तदपि कृतमित्येव ।

गुणग्रहणमिक्परिभाषोपस्थानार्थम्, तेन हलादिशेषे कृते गुणो भवति; अन्यथा तदपवादो हल एव एकारः स्यात् । अथ `अभ्यासविकारेष्वपवादो नोत्सर्गान् बाधते' इत्याश्रीयेत ? तदा विस्पष्टार्थं गुणग्रहणम् ।।

भृञामित् ।। 7.4.76 ।।

अमी अपि जुहोत्यादौ भृञ्, माङ्, ओहाङ्---भृञादयः । मिमीत इति । `ई हल्यघोः' ।।

अर्तिपिपर्त्योश्च ।। 7.4.77 ।।

इयर्तीति । `ऋ सृ गतौ', `पृ पालनपूरणयोः' अभ्यासस्यासवर्णे, इतीयङ् । अच्छन्दोऽर्थमिदम्; छन्दस्युत्तरसूत्रेणैव सिद्धत्वात् ।।

सन्यतः ।। 7.4.79 ।।

यियक्षतीति । यजेर्ब्रश्चादिना षत्वम्, `पढोः कः सि' ।

तपरकरणं किम् ? पापच्यतेः सन्, पापचिषते इत्यत्र मा भूत् । किं पुनः कारणमत्र ह्रस्वो न भवति ? दीर्घविधानसामर्थ्यात् । यदि तु `सनि योऽभ्यासः' इत्येवं विज्ञायते, ततो लाघवे विशेषाभावात्तपरकरणम् ।।

ओः पुयण्ज्यपरे ।। 7.4.80 ।।

पुयणजकाराणां समाहारद्वन्द्वे सप्तम्येकवचनम् । पुयण्जि `द्वन्द्वाच्चुदषहान्तात्समाहारे' इति समासान्तस्त्वनित्यत्वान्न भवति, अः परो यस्मात्पुयण्जस्तदपरम्, अवर्णपरमित्यर्थः । पिपविषत इति । `पूङ् पवने', `स्मिपूङ्रञ्ज्वशां सनि' इतीद्गुणावादेशौ, तयोः `द्विर्वचनेऽचि' इति स्थानिवद्भावात् `पू' इति द्विरुच्यते । पिपावयिषतीति । तत एव ण्यन्तात्सन् । विभावयिषतीति । भवतेर्ण्यन्तात्सन् । यियविषतीति । `यु मिश्रणे', `सनीवन्तर्धे' इतीट् । यियावयिषतीति । तस्मादेव ण्यन्तात्सन् । रिरावयिषति, लिलावयिषतीति । रौतिलुनातिभ्यां ण्यन्ताभ्यामेव सन् । जिजावयिषतीति । `जु' इति सौत्रो धातुः `जुचङ्क्रम्य' इत्यादौ निर्दिष्टः ।

कथं पुनर्ण्यन्तेषु सन्युवर्णान्ताभ्यासस्य, यावता णौ वृद्ध्यावादेशयोः कृतयोराकारान्तस्य द्विर्वचनेन भवितव्यम्, न हि णौ कृतस्य केनचित्स्थानिवद्भावो विहितः, णेरद्विर्वचननिमित्तत्वात् ? इत्यत आह---एतदेवेति । न हि णौ कृतस्य स्थानिवद्भावमन्तरेण पुयण्जोऽवर्णपराः सम्भवन्ति । पिपचिषति, यियविषते इति सम्भवनीति चेत् ? किमेतावता ! वर्गग्रहणं प्रत्याहारग्रहणं जग्रहणं चार्थवद्भवति । तस्मादेतदेव वचनमुक्तस्यार्थस्य मृवकमिति । यच्चात्र

वक्तव्यं तद् `द्विर्वचनेऽचि' इत्यत्रोक्तम्, तत एवावधार्यम् ।
पापचिषत इति । `सनि योऽभ्यासः' इत्येतदनाश्रित्येदं प्रत्युदाहरणम् । तदाश्रये तु प्रत्युदाहरणान्तरं मृग्यं यदि सम्भवति । अवतुतावयिषतीति । `तु' इति सौत्रो धातुः `तुरुस्तुशम्यमः' इत्यत्र निर्दिष्टः । जुहावयिषतीति । जुहोतेर्ण्यन्तात्सन् ।।
स्रवतिश्रृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ।। 7.4.81 ।।
`श्रु श्रवणे', अन्ये गत्यर्थाः । उदाहरणेषु ण्यन्तेभ्यः सन् ।
कथं पुनर्यणि परत उच्यमानमित्त्वं सकारादीनां वर्णेन व्यवधाने भवति ? तत्राह--वचनसामर्थ्यादिति । पूर्वसूत्रे इत्यादिना अप्राप्तविभाषेयमिति दर्सयति ।।
गुणो यङ्लुकोः ।। 7.4.82 ।।
लुक्शब्देनात्र यङ्लुगेव गृह्यते; सन्निधानात् । किञ्च---अभ्यासस्यायं गुणो विधीयते, न च लुगन्तरेऽभ्यासः सम्भवति । चोक्रुशीतिति । क्रुशेर्यङ्लुगन्तात्तिप्, `यङो वा' इतीट्, `नाभ्यस्तस्याचि पिति' इति लघूपधगुणप्रतिषेधः ।।
दीर्घोऽकितः ।। 7.4.83 ।।
अपवादत्वादिति । नाप्राप्ते दीर्घे नुक आरम्भावदपवादत्वम् । अनजन्तत्वादेवेति । दीर्घश्रुत्या `अचश्च' इत्युपस्थानादभ्यासविशेषणादजन्तस्याभ्यासस्य दीर्घो विधीयत इति भावः । अभ्यासविकारेष्वित्यादि । अपवादग्रहणं बाधकमात्रोपलक्षणम्, उत्सर्गग्रहणमपि बाध्यमात्रोपलक्षणम् । तत्र ह्रस्वत्वस्यावकाशः---ययावित्यत्र, दीर्घत्वस्यावकाशः---पापच्यत इत्यादि; डोढौक्यत इत्यादावुभयप्रसङ्गे परत्वाद्दीर्घत्वस्यः प्रसङ्गः, नापवादत्वात् । तथा सन्वद्भावस्यावकाशः---अचिक्षणदिति, दीर्घत्वस्यावक्राशः---अदीदिपदिति; अचीकरदित्यादावुभयप्रसङ्गे परत्वाद्दीर्घत्वप्रसङ्गः । मीमांसते इत्यत्राप्यनैमित्तिकत्वेनान्तरङ्गत्वाद्दीर्घत्वप्रसङ्गः, इत्त्वं तु सनि परतोऽङ्गाधिकारेऽभ्यासस्याकारान्तस्य विधानाद्बहिरङ्गम् । अजीगणदित्यत्र त्वेकस्मिन् येननाप्राप्तिन्यायेन हलादिशेषस्येत्त्वमपवादत्वाद् बाधकं प्राप्नोति । इह तु अपचच्छतुः, अपचच्छुः, चच्छदतुः, चच्छदुः, चिच्छादयिषति, चिच्छर्दयिषति, चेच्छिद्यते---इति परत्वात् ह्रस्वत्वात्त्वेत्त्वगुणेषु कृतेषु पश्चात्तुक्, क्रियते; तेनैतन्न नोदनीयम्---तुकि कृते ेत विधयो न प्राप्नुवन्तीति । `ओहाक् त्यागे' इत्यस्य धातोर्निषेधो न भवति, धातुर्ह्ययं कित्, न त्वभ्यासः । ककारस्तु `हश्च व्रीहिकालयोः' इत्यत्र हाङ्हाकीः सामान्येन ग्रहणार्थः ।।
नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् ।। 7.4.84 ।।
वञ्चुकसिपतिपदयो गत्यर्थाः । `स्कन्दिः शोषणार्थः', इतरे अवस्रंसनार्थाः । वनीवच्यते इत्यादौ `अनिदिताम्' इत्युपधालोपः । वनीवञ्चीतीत्यादौ न भवति यङो लुमता लुप्तत्वादीकारोच्चारणसामर्थ्यान्नीकि कृते गुणह्रस्वौ न भवतः ।।
नुगतोऽनुनासिकान्तस्य ।। 7.4.85 ।।
नुगित्येतदित्यादि । केन सम्बन्धेनोपलक्षणम् ? अत आह---स्थानिना हीति । उपलक्षणत्वे किं सिद्धम् ? अत आह---तेनेति । अझल्परत्वेऽपीति । तन्तन्यत इत्यादौ झल्परत्वे तु `नश्चापदान्तस्य झलि' इत्यनुस्वारः सिद्ध एव ।
`अनुस्वारस्य ययि परसवर्णः' इति नित्यं परसवर्णः प्राप्नोति, इष्यते च पक्षे अनुस्वारस्य श्रवणम् ? अत आह---पदान्तवच्चेति । तत्कथं लभ्यते ? इहान्तग्रहणं न कर्त्तव्यं तदन्तविधिना सिद्धम् ? तत्क्रियते---पदान्तस्यानुस्वारस्य यो धर्मः सोऽस्य यथा स्यादिति । एवं च---अनुनासिकान्तस्येति पृथक् पदे, अनुनासिकेति लुप्तषष्ठीकम् ।
तेतिम्यत इति । `तिम आर्द्रीभावे' ।
तपरकरणं किमिति । सर्वत्र ह्लक्वस्यैव भावान्नास्य किञ्चिद्व्यावर्त्यमिति प्रश्नः । भूतपूर्वस्यापीति । अन्यथा तपरकरणमनर्थकं स्यादिति भावः । बाभम्यत इति । `भाम क्रोधे ।।
जपजभदहदशभन्जपशां च ।। 7.4.86 ।।
`जप जल्प व्यक्तायां वाचि', `जभ जृभी गात्रविनामे', `दह भस्मीकरणे', `दन्श दशने', `भन्जो आमर्दने', `पश' इति सौत्रो धातुः । जञ्जप्यत इत्यादिचतुर्षु `लुपसद' इत्यादिना यङ्, इतरत्र सामान्यलक्षणेन ।।
चरफलोश्च ।। 7.4.87 ।।
चरतिर्भक्षणार्थः । `ञिफला विशरणे', फल निष्पत्तौ'---द्वयोरपि ग्रहणमिष्यते । चञ्चूर्यत इति । `लुपसद' इत्यादिना यङ् । उत्तरसूत्रेणा कारस्योत्त्वे `हलि च' इति दीर्घत्वम् । योगविभाग उत्तरार्थः ।।
उत्परस्यातः ।। 7.4.88 ।।
अभ्यासस्य मा भूदिति । अन्यथा प्रकरणात्तस्येव प्रसङ्गः ।
अन्त्यस्य मा भूदिति । `आदेः परस्य' इत्यस्य त्वप्रसङ्गः; पञ्चमीनिर्द्देशाभावात् ।
तपरकरणं किमिति । यद्यपि भाव्यमानोऽप्युकारः । सवर्णान्गृह्णाति, तथा प्यान्तर्यतो मात्रिकस्य मात्रिक एव सिद्ध इति प्रश्नः । लघूपधगुणनिवृत्त्यर्थमिति । अनेन लक्षणेन दीर्घस्य प्राप्त्यभावाल्लक्षणान्तरप्राप्तेऽपि विकारस्तपरकरणसामर्थ्याद्वार्यत इति भावः । यथैव तर्हि गुणो निवर्त्तते, तथा `हलि च' इति दीर्घत्वमपि निवर्त्तेत ? अत आह---दीर्घत्वे हीति ।।

ति च ।। 7.4.89 ।।
वचनसामर्थ्यादिति । यङ्लुकि पूर्वेणैव सिद्धत्वात् ।।
रीगृधुपधस्यच ।। 7.4.90 ।।
ऋत्वत इति । येङि परतो य ऋकारवान् तस्यैव ग्रहणम्, न तूपदेशे ऋत्वतः । तेन परीपृच्छ्यत इत्यादौ सम्प्रसारणे कृतेऽपि भवति ।।
रुग्रिकौ च लुकि ।। 7.4.91 ।।
मर्मृज्यत इति । लुकि विधीयमानो रुग्यङि न प्राप्नोतीति वचनम् ।।
ऋतश्च ।। 7.4.92 ।।
किरतिमिति । ऋकारान्तोपलक्षणमेतत् । `चर्करीतम्' इति यङलुकः पूर्वाचार्यसंज्ञा । पचतीति । लट उपलक्षणम्, तेन चाकर्तीत्यादीनि रूपाणि, किरतेर्यो नयेदित्यर्थः । यद्वा---अत्र यङ्लुकि किरतिं पचतीति यो नयेत्=पचतिना तुल्यरूपाणि यो नयेत्, पचतिवद् रुगादिकमकृत्वा नयेदित्यर्थः । प्राप्तिज्ञमिति । रुगादीनां विषयविभागेन या प्राप्तिस्तां जानातीति प्राप्तिज्ञः । प्रारब्ध इति । संग्रहणं संग्रहः, साधुशब्दसंग्रहस्तेन प्रारब्ध इति योग्यतातिशयोद्भावनेनायं स्तूयते ।
तत्र प्रापतिज्ञमित्यत्र प्राप्तिं व्याचष्टे---तत्रेयं प्राप्तिरिति । तपरकरणसामर्थ्यादिति । अभ्यासविशेषणे तु भूतपूर्वदीर्घनिवृत्त्यर्थं तपरकरणमिति व्याख्येयम् । न हि मुख्यनिवर्त्त्यसम्भवे गौणकल्पना न्याय्येति अङ्गविशेषणमृत इत्याश्रित मित्यर्थः ।।
सन्वल्लघुनि चङ्परेऽनग्लोपे ।। 7.4.93 ।।
`लघुनि चङ्परे' इति व्यधिकरणे सप्तम्यौ, न सामानाधिकरणे; चङ्परस्य लघुनोऽसम्भवात् । चङ्परे णौ परत इति । कृथं पुनर्णाविति लभ्यते ? चङ्परस्यान्यस्यासम्भवात् । ननु चाचकमतेत्यत्र मकारः । सम्भवति, अदुद्रुवद्, असुस्रवदित्यत्र वकारः ? एवं तर्हि `चङ्परे' इत्यङ्गस्य विशेषणम्---चङ्परे यदङ्गं तस्य योऽभ्यासस्तस्य सन्वत्कार्यं भवति । लघुनि धात्वक्षर इति । चङ्परे णौ यदङ्गं तस्य सम्बन्धि यल्लघ्वित्यर्थः । सामर्थ्याण्ण्यन्तस्य ग्रहणमिते । णेः समीपभूतस्याङ्गस्य ग्रहणमित्यर्थः । ण्यन्तस्यावयवभूतं यदङ्गं तस्य ग्रहणमिति वा । अनग्लोप इति । नास्मिन्नग्लोपो विद्यत इति अनग्लोपः । एतच्च `चङ्परे' इत्यनेन समानाधिकरणम् । तेनायमर्थः---चङ्परे णावको लोपेऽसतीति । अततक्षदित्यत्र संयोगपरत्वाद् गुरुसंज्ञया लघुसंज्ञाया बाधः, अजजागरदित्यत्र आकारः । परः ।
अत्र केचिदित्यादि । ननु च गकारो जाशब्देन व्यवहितः ? अत आह---सर्वत्रैवेति । अचीकरदित्यादावपि ककारादिना व्यवधानाल्लघोरानन्तर्यं नास्ति, ततश्च वचनप्रामाण्याद्व्यवधान एव सन्वद्भावेन भवितव्यमिति तेषामभिप्राय इत्यर्थः । दूषयति---तदसदिति ।।
यदि तहि वर्णसङ्घातेन व्यवधानं नाश्रीयते व्यञ्जनसङ्घातेनापि व्यवधाने न सिध्यतीति मन्यमानः पृच्छति---कथमिति । एवञ्जातीयकानामिति । संयोगव्यवहितानामित्यर्थः ।
अचकमतेति । `कमेरुपसंख्यानम्' इति च्लेश्चङादेशः । अचकथदिति । `कथ वाक्यप्रबन्धे' चुरादावदन्तः, `अतो लोपः' । अत्राल्लोपस्य स्थानिवद्भावे सति व्यवधानान्न भविष्यति, अतः प्रत्युदाहरणान्तरोपन्यासः । अददृषदिति । `तदाचष्टे' इति णिच इष्ठवद्भावेन टिलोपः । अत्राज्झलोर्लोपः, नाच एव केवलस्येति नास्ति स्थानिवद्भावः । एतदर्थं च `अनग्लोपे' इत्येतत्क्रियमाणमचकथदित्यत्र सन्वद्भ्वावं निवर्त्तयतीति तस्योपन्यासः ।
यदि चङ्परे णौ यदङ्गं तस्य यल्लघु तत्र परतोऽभ्यासस्य सन्वद्भावो विधीयते, वादितवन्तं प्रयोजितवानवीवददित्यत्रापि तर्हि न प्राप्नोति, किं कारणम् ? यश्चङ्परो णिर्न तत्र लघुः; पूर्वेण णिचा व्यवहितत्वात् । लोपे कृते नास्ति व्यवधानम् । अजादेशः पूर्वविधौ स्थानिवद् भवतीति स्थानिवद्भावाद्व्यवधानमेव । यद्यपि दीर्घविधिं प्रति स्थानिवद्भावो निपिद्धः, सन्वद्भावे तु प्राप्नोति । यस्मिंश्च णौ लघुर्नासौ चङ्परः; द्वितीयेन णिचा व्यवहितत्वात् । भवतु वा स्थानिवत्त्वनिषेधः, अग्लोपित्वान्न प्राप्नोति । वृद्धौ कृतायां णेलेपिः, तन्नाग्लोप्यङ्गं भवति । अग्लोपि वास्तु, प्रागेव वृद्धेर्णिलोपे कृते ? तत्रापि परिहारमाह---योऽसौ णौ णेर्लोप इत्यादि । ततोऽन्योऽग्लोप इति अन्याकारोऽन्य उक्तः । जात्याश्रयणे हि गोबलीवर्दन्यायेन णिजातेर्निमित्तत्वेन परिगृहीताया अन्यस्याको लोपः प्रतिषेधविषयः परिगृह्यते, न तु तस्या णिजातेः; ततश्चास्य लोपस्याग्लोपत्वेनानाश्रयणआत्तेनाग्लोप्यङ्गं न भवतीति भवत्येवात्र सन्वद्भावः । मीमादीनामत्र ग्रहणादिति । तत्र ह्यच इति `अभ्यासलोपश्च' इत्येव सिद्धेऽत्रग्रहणं विषयावधारणार्थम् । अत्र मुख्ये सन्येव भवति, न सन्वद्भावविषय इति ।
किञ्चेत्यादि । अनेनेदमाह---न केवलं मुख्यसन्परिग्रहमात्रमत्र कारणम्, किं तर्हि ? हस्भावद्यपि विषयत्वेन निर्दिश्यते । इह च धातोः सन्वद्भावादिस्भावादि न भवति, ततश्चाभ्यासलोपोऽपि न भवतीति । यद्वा---सकारादौ सन्यभ्यासलोपो विहितः, न सन्मात्रे, ततश्च सामान्यातिदेशे विशेषानतिदेशात् लोपाभावः ।।
दीर्घो लघोः ।। 7.4.94 ।।
अबिभ्रजदिति । `भ्राजभास' इत्यादिना पक्षे उपधाह्रस्वनिपेधः ।।
उत्स्मृदृत्वारप्रथम्रदस्तृस्पशाम् ।। 7.4.95 ।।
तपरकरणसार्थ्यादिति । स्थानिनो ह्रस्वत्वाद् भाव्यमानत्वेन सवर्णग्रहणाच्च नानेन दीर्घस्य प्रसङ्गः, अतो लक्षणान्तरेण प्राप्तं दीर्घत्वं तपरकरणेन व्यावर्त्यते ।।

ई च गणः ।। 7.4.97 ।।
`गण संख्याने' चुरादावदन्तः, तस्यातो लोपेनानग्लोप इति प्रतिषेधाद्द्वचनम् । कृतयोर्हलादिशेपदीर्घत्वयोरीत्वमत्वं च विधीयते ।
`लोपः पिबतेः' इत्येतदत्रैव पठितव्यम्---पिबतेरालोपश्चेति, चकारात् ई चाभ्यासस्य ? सत्यम्; विभाषेत्यस्यानुवृत्तिः शङ्क्येत ।।
इति श्रीहरदत्तमिश्रविरचितायां पदमञ्चर्या सप्तमस्याध्यायस्य तुरीयश्चरणः

8.1

काशिकावृत्तिः --- 6
सर्वस्य द्वे ।। 8.1.1 ।।
`नित्यवीप्सयोः' इत्येवमादीनां विधेयकार्यिणोरनिर्देशेन साकाङ्क्षत्वात्स्वरितत्वाच्चाधिकारोऽयम्, तदाह---सवस्येति द्वे इति चेति । `सर्वस्य' इत्युक्ते यत्प्रतीयते, `द्वे' इत् चेत्युक्ते यत्प्रतीयते, एतदर्थस्वरूपमित्यर्थः । यद्यपि `स्वं रूपम्' इति वचनादुभयोरपि स्वरूपग्रहणं युक्तम्, तथापि `नाम्रेडितस्यान्त्यस्य तु वा', `नित्यमाम्रेडिते डाचि' इति द्विरुक्तेऽच्छब्दस्य सत्तामङ्गीकृत्य कार्यविधानात्तदभावः । न हि द्वयोरन्यतरस्य वा स्वरूपग्रहणे द्विरुक्तेऽच्छब्दस्य सम्भवः, तथा `तस्य परमाम्रेडितम्' इति पूर्वपराभावादनुपपन्नं स्यात् । तस्मादर्थग्रहणम् । सर्वशब्दश्चायं द्रव्यप्रकारावयवकार्त्स्न्यवृत्तिः, द्रव्यकार्त्स्न्ये यथा---सर्वस्वं ददातीति, यच्च यावच्च स्वं तत्सर्वं ददातीति गम्यते । प्रकारकार्त्स्न्ये यथा---सर्वान्नीनो भिक्षुरिति, सर्वप्रकारकमन्नं भक्षयतीति गम्यते । अवयवकार्त्स्न्ये यथा---सर्वः पटो दग्ध इतिः, सर्वावयवः पटो दग्ध इति गम्यते । इह तु पर्यादीनां विशिष्टार्थानां शब्दानामुपादानाद् द्रव्यप्रकारकार्त्स्न्ययोरसम्भवः । यत्रापि किञ्चिन्नोपादीयते `नित्यवीप्सयोः' इति, तत्रापि विशेषानुपाद ानादेव सर्वस्य शब्दस्य सिद्धम् । तस्मादवयवकार्त्स्न्यवृत्तिर्गृह्यते । परेः सर्वस्य द्वे भवतः, न कश्चिदवयो द्विर्वचनेन वर्ज्यत इत्यर्थः ।
अत्र `आ दशभ्यः संख्याः संख्येये वर्तन्ते' इति `द्वे' इत्यस्य संख्येयापेक्षायां शब्दानुशासनप्रस्तावाच्छब्दरूपे संख्येये `षष्ठी स्थानेयोगा' इति वचनात्सर्वस्येति स्थानषष्ठी, सर्वस्य पर्यादेः स्थाने द्वे शब्दरूपे भवत इत्यर्थः, यथा---`अस्तेर्भूः' इति, तदा `स्थाने द्विर्वचनम्' इत्ययं पक्षो भवति । शब्दसम्बन्धिनि तूच्चारणे संख्येये स्थान्यादेशभावो न सम्भवति, निवृत्तिधर्मा हि स्थानी शब्दश्चेन्निवृत्त कस्योच्चारणं स्यात् । अतोऽध्याहृतोच्चारणशब्दापेक्षया `कर्तृकर्मणोः कृति' इति सर्वस्येति कर्मणि षष्ठी, सर्वस्य पर्यादेर्द्वे उच्चारणे भवतः, सर्वः पर्यादिद्विरुच्चारणीय इत्यर्थः, तदा `द्विः प्रयोगो द्विर्वचनम्' इत्येष पक्षो भवति ।
तत्र प्रथमं पक्षंम दर्शयति---सर्वस्य स्थाने द्वे भवत इति । के द्वे इति । विशेषानुपादानाद्ये केचन द्वे प्राप्नुत इति प्रश्नः ।
इतरोऽप्यन्तरतमपरिभाषामाश्रित्याह---शब्दतश्चेति । बिभीतकादिवाचिनामक्षादिशब्दानां शब्दत एवान्तर्यम्, तरुपादपादीनामर्यत एव, द्वयोस्तु पचतिशब्दयोरुभयथान्तर्यम्; तत्र ते एव यथा स्यातामित्युभयग्रहणम् । ते एवोभयथान्तरतमे दर्शयति---एकस्येति ।
ननु चारिमन्पक्ष राजाराजा, वाक्वाक्, लिट्लिट्, गोधुग्गोधुक्, शब्दप्राट्शब्दप्राट्, उपानदुपानत्, गौर्गौरित्यत्र नलोप-कुत्वा-ढत्व-घत्व-षत्व-धत्व-दीर्घत्वा(वृद्धी) नामसिद्धत्वादकृतेष्वेतेषु द्विर्वचने कृते पदस्य स्थाने समुदायस्यादिष्टत्वात्तस्यैव स्थानिवद्भावेन पदत्वं नावयवयोरिति पूर्वत्र भागे नलोपादीनि न स्युः, उत्तरत्र तु समुदायपदत्वेनापि सिद्ध्यति ? ननु च नलोपादीन्यतरङ्गाणि पदत्वमात्रा पेक्षत्वाद्, द्विर्वचनं तु बहिरङ्गं वीप्साद्यर्थापेक्षत्वात्, ततश्च तेषु कृतेषु द्विर्वचनं भविष्यति ? एवमपि कृतानामपि तेषां द्विर्वचने कर्तव्येऽसिद्धत्वान्नका रादियुक्तस्य द्विर्वचनमिति पुनः पूर्वपदे निमित्तभावान्न स्युरेव, यथा औजढदित्यत्र कृतानावपि ढत्वादीनामसिद्धत्वात् हत इत्येतस्य द्विर्वचनेऽभ्यासे हकारस्यैव श्रवणं भवति ? नैष दोषः; वक्ष्यत्येतत् `पूर्वत्रासिद्धीयमद्विर्वचने' इति, ततश्च परत्वादन्तरङ्गत्वाद्वा नलोपादिषु कृतेषु तद्युक्तस्यैव द्विर्वचनं भविष्यति ।
यानि तर्हि पदकार्याणि नाकृते द्विर्वचने प्राप्नुवन्ति, तानि न स्युः; तद्यथा किङ्किमिति---`वा पदान्तस्य' इति परसवर्णविकल्पः, अपचन्नपचन्निति ङमुट्, अग्नाअग्नाविति वलोपः, छायाच्छायेति तुग्विकल्पः, वृक्षत्वक्षानिति `पदन्तस्य' इति णत्वप्रतिषेधः, अजेऽजे इति, `एङः पदान्तादति' इति पूर्वरूपत्वम् । किं चात्र `स्वरितो वानुदात्ते पदादौ' इत्येष विधिर्न स्यात्, उत्तरभागस्यापदत्वात्; तथाऽपदत्वात्तदाश्रयाणि कार्याणि प्राप्नुवन्ति, तद्यथा---अङ्गनाङ्गनेत्यतो गुणे पररूपत्वं स्यात्, पयः पय इति `सोऽपदादौ' इति सत्वप्रसङ्ग इत्येषा दिक् । अतो द्वयोरपि पृथक्पदत्वमेषितव्यम्; तदुच्यते---यदि प्रत्यस्तमितावयवभेद एक एवादशः स्याद्, `द्वे' इति द्विर्वचनमनुपपन्नं स्यात्; ततः `द्वे' इति वचनादेकस्य पदस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वेन विधीयेते, तत्र स्थानिवद्भावेन समुदायस्यापि पदत्वं स्वतः, एवं चावयवयोरपीति समुदायस्यावयवयोश्च पदकार्याणि भविष्यन्ति । एवमपि विसंविसम्, मुसलंमुसलमिति `आदेशप्रत्यययोः' इति षत्वप्रसङ्गः ? नैष दोषः; नैवं विज्ञायते---आदेशस्य सकार इति, कथं तर्हि ? आदेशो यः सकार इति । अत्र च समुदायस्य समुदाय आदेशः, न सकारमात्रस्य सकारमात्रमिति न भविष्यति । इह तहि नृभिर्नृभिरिति समुदायस्य पदत्वाद्रेफनकारयोः समानपदस्थत्वाद्रषाभ्यामिति णत्वप्रसङ्गः ? एषोऽप्यदोषः; तत्र समानग्रहणं न कर्त्तव्यम्, `पदे' इत्येवास्तु, तत्रापदस्थयोर्निमित्तनिमित्तिनोरसम्भवादेकत्वविवक्षार्थमेव पदग्रहणमिति समानपदस्थत्वं सिध्यति, ततश्च समानग्रहणाद यत्र समानपदस्थत्वमेव, तत्र णत्वम् । इह तु स्थानिवद्भावादेकपदत्वम् । वस्तुतस्तु पदद्वयात्मक आदेश इति पृथक्पदस्थमिति णत्वाभावः । तदेवं निर्दोषः `स्थाने द्विर्वचन' पक्षः ।
इदानीं द्वितीयं पक्षं दर्शयति---यदा त्विति । द्विरावर्त्तत इति । उच्चार्यमाणस्य शब्दस्य यो व्यापार उच्चारणं नाम सेहावृत्तिविवक्षिता । द्विरुच्चरतीत्यर्थः ।

द्वे आवृत्ती भवत इति । द्वे उच्चारणक्रिये भवत इत्यर्थः । न पुनर्मुख्ये एवावृत्ती द्वे भवतः, तथा सति त्रिर्वचनप्रसङ्गात् । नन्वस्मिन्पक्षे आं पचसिपचसि देवदत्त3---इत्यत्रावृत्तिभेदनिबन्धनया द्वित्वसंख्यया स्वाश्रयस्यैकत्वस्य निवर्त्तनादेकान्तरताया अभावाद् `आम एकान्तरम्' इति निघातप्रतिषेधो न स्याद्यथा किरिणेत्यादावावृत्तिभेदनिबन्धनेनापि द्व्यच्त्वेन स्वाश्रयस्यैकाच्त्वस्य निवर्तानात् `सावेकाचः' इति विभत्तयाद्युदात्तत्वं न भवति, तद्वत् । स्थाने द्विर्वचने तु समुदायस्यापि स्थानिवद्भावेन पदत्वात्सिध्यति, तथा पौनः पुन्यमिति पुनः पुनर्भवितरि वर्तमानात्पुनःपुनशब्दाद्भावे ष्यञि यते; पुनः पुनर्भवः पौनः पुनिक इति च कालाट्ठञ्', तत्र द्विः प्रयोगे पदस्य विज्ञायमाने समुदायस्व वीप्सालक्षणेनार्थेन सत्यप्यर्थवत्त्वेऽर्थवत्समुदायानां समासग्रहणं नियमार्थमित्यप्रातिपदिकत्वात्तद्वितो न रयातः सुबन्तादुत्पत्तिपक्षेऽपि समुदायस्यासुबन्तत्वान्न स्यादेव, पक्षान्तरे तु स्थानिवद्भावादुभयमप्यस्तीति सिध्यति । यद्यप्यस्य स्थानी सुबन्तः, तथापि सुब्लुकि कृते `न ङिसम्बुद्ध्योः' इति निषेधाज्ज्ञापकात् प्रत्ययलक्षणेन `अप्रत्ययः' इति निषेधाभावात्प्रातिपदिकत्वमव्यावृत्तमिति ? अत्रैवं भाष्ये परिहार उक्तः---पचसिपचसीत्यर्थरूपयोः समानत्वात्स एव पच्शब्दः, स एव च तिङ्, ततश्च यः पूर्वस्माद्विदितः स परस्मादपि यश्च परस्मात्स पूर्वस्मादपि, तदादिग्रहणं च पदसंज्ञायामनुवर्त्तते, तत्र समुदायस्यावयवयोश्च तुल्येऽपि तिङन्तत्वे समुदायस्यैव पदसंज्ञा भविष्यति द्विर्वचनवत्, तद्यथा---पपाचेत्यत्र समुदायस्यावयवानां च तुल्येऽप्येकाच्त्वे समुदायस्यैव । द्विर्वचनं भवति, नावयवानाम्; तत्कस्य हेतोः ? शास्त्रहानेः, अवयवद्विर्वचने ह्यवयवान्तरे विषये समुदायविषये च शास्त्रं हीनं स्यात्, तद्वत्पदसंज्ञापि समुदायस्यैव भविष्यतीत्येकान्तरता युज्यते । पौनः पुन्यमित्यादौ तद्धितोऽप्युक्तेन न्यायेन समुदायस्य सुबन्तत्वात् प्रातिपदिकत्वाच्च सिद्ध्यतीति ।

अत्रैवं चोदयन्ति---प्रागेव द्विर्वचनात् पचसीत्यस्यामवस्थायां प्रवृत्ता पदसंज्ञा किमिति पुनः कृतेऽपि द्विर्वचने प्रवर्त्तते, प्रवर्त्तमाना वा किमिति समुदायस्यैव प्रवर्त्तते, न तु प्रत्येकमवयवयोः, न ह्येवंविधो द्विर्वचनन्यायस्य विषय इति संयोगसंज्ञायामुक्तम्; निर्ग्लेयादित्यादौ त्रिष्वपि द्वयोः संयोगसंज्ञाभ्युपगमात् । किञ्च यत्र समुदायस्यैव पदत्वम्---अपचन्नपचन्नित्यादौ, तत्रावयवेषु पदकार्याभावप्रसङ्ग इति ।

अपर आह---उच्चारणक्रियैवात्र परं भिद्यते, तद्भेदात्त्वौपचारिकः पदभेदः; तत्त्वतस्त्वेकमेव पदमित्येकान्तरता युज्यते, पौनः पुन्यमित्यौ च वीप्सालक्षणेनार्थेन समुदायस्याप्यर्थवत्त्वात् प्रातिपदिकत्वम् । न च समासग्रहणान्निवृत्तिः; अतुल्यजातीयत्वात् । येपां हि भिन्नार्थानां सतां परस्परसम्बन्धमात्रमधिकं तत्समुदायस्यैव तुल्यजातीयस्य तेन निवृत्तिः । न चात्रैतदुभ्यमस्ति । न हि द्वयोः पुनः शब्दयोरर्थो भिद्यते, नापि तत्समुदाये तत्सम्बन्धोऽधिकः किं तर्हि ? वीप्सारूपोऽन्य एवेति । यद्येवम्, किरिणेत्यादौ `सावेकाचस्तृतीयादिः' इति विभक्तिस्वरः स्यात् ? तत्रापि ह्युच्चारणक्रियैव भिद्यते, तत्त्वतस्त्वेक एवेकारः । किञ्च----नित्यानां विभूनां वर्णानां तदात्मकानां च पदानां स्वरूपेण व्यवधानमव्यवधानं च न सम्भवतीत्युपलब्धिगतमेव तदाश्रयितव्यम् । तत्र च यथा पदभेदेऽप्युपलब्धिभेदः, तथा तदभेदेऽपीति कथमेकान्तरता ! यदि च पौनः---पुन्यमित्यादावुक्तेन न्यायेन समुदायस्यापि प्रातिपदिकत्वम्, हन्तैवं ग्रामोग्रामो रमणीय इत्यादावप्येवमेव प्रातिपदिकत्वे सति सुब्लुक् स्यात्, तस्मात्स्थाने द्विर्वचनमेवात्र रोचयामहे । अत एव `स्थाने द्विर्वचनम्' पूर्वं वृत्तिकारेण दर्शितम्, पश्चात्सम्भवमात्रेण `द्विः प्रयोगोऽपि' दर्शितः ।

इह सर्वस्येति वचनमलोऽन्त्यनिवृत्त्यर्थं वा स्यात्, षष्ठ्यर्थप्रसिद्धयर्थं च । तत्र स्थाने द्विर्वचनपक्षे तावच्छब्दतोऽर्थतश्चान्तरतमाभ्यां द्वाभ्यामादेशाभ्यां भाव्यम् । ये चैवं प्रकारास्ते नियोगतोऽनेकाल्स्वभावाः---इत्यन्तरेणापि सर्वग्रहणम् `अनेकाल्शित्सर्वस्य' इति सर्वस्य भविष्यति । षष्ठ्यर्थोऽपि `परेर्वर्जने' इत्यादौ यत्र षष्ठ्युच्चार्यते तत्र तावत् सिद्धः; यत्रापि षष्ठी नास्ति---`नित्यवीप्सयोः' इति, तत्रापि सामर्थ्याल्लभ्यते---नित्यवीप्सयोयः शब्दस्तस्य द्वे भवत इति । द्विः प्रयोगपक्षे त्वलोन्त्यविधिप्रसङ्ग एव नास्ति; स्थानषष्ठ्यभावात् । षष्ठ्यर्थोऽपि लभ्यत एवः, उच्चारणस्य शब्दधर्मत्वाद् । अतो नाथः सर्वग्रहणेनेत्यभिप्रायेणाह---सर्वस्येति किमिति । विस्पष्टाथमिति । य एवं प्रतिपत्तुमसमर्थः, तं प्रति सुखप्रतिपत्तये सर्वस्येत्युच्यत इत्यर्थः । अथेत्यादि । एवं मन्यते---समासतद्धितवाक्यनिवृत्त्यर्थमवश्यम् `पदस्य' इति वक्तव्यम् । समासनिवृत्त्यर्थ तावत्---सप्तपर्णोऽष्टापदम्, अत्र सप्तसंख्यानि पर्णानि वीप्स्यन्ते, न तु तद्वान्वृक्ष इति वीप्सायामेकत्वस्यानन्तर्भावात्प्रागेव विभक्तेद्विवचनप्रसङ्गः, पदाधिकारात्तु न भवति; तद्धितः---द्विपदिकां ददाति, अत्र द्वित्वसंख्यायुक्तः पदार्थो वीप्स्यत इति स्त्रीत्वैकत्वलक्षणयोर्लिङ्गसंख्ययोरनन्तर्भावात्प्राक् तद्धितोत्पत्तेः समासे कृते प्राप्तं द्विर्वचनं पदत्वाभावान्न भवति; वाक्यम्---ग्रामेग्रामे पानीयम्, अत्र वाक्यस्यापदत्वाद् द्विर्वचनं न भवति ग्रामे पानीयमिति । किञ्चोत्तरत्र पदस्येति न वक्तव्यं भवति; `पदस्य पदात्' इत्यस्यैवानुवृत्तेरिति । नैवं शक्यमिति । अस्याप्ययमभिप्रायः---`पदस्य' इत्युच्यमानेऽपि सप्तपर्णाभ्यामित्यादौ स्वादिषु पूर्वस्य पदत्वाद् द्विर्वचनप्रसङ्गः; तस्मादेवमत्र परिहारो वाच्यः---यद्वीप्सायुक्तम्, न अदः प्रयुज्यते; किं पुनस्तत् ? पर्वणिपर्वणि सप्तपर्णान्यस्येति, यच्च प्रयुज्यते न तद्वीप्सायुक्तम्---सप्तपर्णान्यस्येति पर्णशब्द इति । तद्धिते तु तद्धितेनैवोक्तत्वाद् द्विर्वचनाभावः, स हि `वीप्सायाम्' इत्युच्यते । वाक्यस्यापि द्विर्वचनं न भवति; पदद्विर्वचनेनोक्तत्वाद्वीप्सायाः । तस्मात् समासादिनिवृत्त्यर्थं तावत्पदाधिकारो न कर्तव्य इति ।

प्रत्युत क्रियमाणे पदाधिकारेऽव्याप्तिलक्षणो दोष इत्याह---इह हि न स्यादिति । प्रपचतीति । धातूपसर्गसमुदायः क्रियाविशेषवाची । अडादिव्यवस्थार्थं तु धातूपसर्गयोः पृथक् कल्पनम्, ततश्च क्रियाधर्मो नित्यता समुदायस्येति तस्यैव द्विर्वचनम् । इहेत्यादि । द्रुहेस्तृचि विहिते `वा द्रुहमुह' इति घत्वढत्वे प्राप्नुतः, द्विर्वचनं च; तत्र घत्वढत्वयोरसिद्धत्वात्पूर्वं द्विर्वचनं प्राप्नोति । अस्तु, को दोषः ? तत्राह---तत्रेति । पश्चाद्विकल्पे प्रवर्त्तमाने यदा परत्र ढत्वं तदा पूर्वत्रापि ढत्वमेवेति नियमाभावात् घत्वमपि कदाचित् स्यात् । एवं घत्वेऽपि द्रष्टव्यम्---परत्र घत्वं पूर्वत्र ढत्वमिति । एतच्चैकस्या आकृतेश्चरितः प्रयोगो न द्वितीयस्यास्तृतीयस्याश्च भवतीति न्यायमनाश्रित्योक्तं द्रष्टव्यम् । अयं च न्यायः `कृञ्चानुप्रयुज्यते लिटि' इत्यत्रैव व्याख्यातः ।

पूर्वत्रासिद्धीयमिति । `पूर्वत्रासिद्धम्' इत्यस्मिन्नधिकारे भवं नलोपादिकार्यं पूर्वत्रासिद्धीयम्, तद् द्विर्वचनादन्यत्रासिद्धं भवति । अथ वा---पूर्वस्यां

सपादसप्ताध्याय्यमसिद्धं नलोपादि पूर्वत्रासिद्धम्, तत्र भवमसिद्धत्वं पूर्वत्रासिद्धीयम्; तद् द्विर्वचने कर्त्तव्ये न भवति, ततश्च घत्वे ढत्वे वा प्रवृत्ते तद्युक्तस्यैव द्विर्वचनमिति नास्ति दोषः ।

सर्वस्येत्येतदेवेत्यादि । पूर्वं `पूर्वत्रासिद्धीयमद्विर्वचने' इति वचनाश्रयेण द्रोढाद्रोढेति साधितम्, इदानीम् `सर्वस्य' इत्यनेन साधितमित्येकस्मिन्साध्ये द्वयोर्हेत्वोर्विकल्पः । कथं पुनः `सर्वस्य' इत्यनेन कृतसर्वकार्यप्रतिपत्तिः ? अर्शआद्यच्प्रत्ययान्तोऽयं सर्वशब्दः---सर्वं कार्यं यस्मिन्नस्ति तदिदं सर्वम्, तस्य द्वे भवतः । सर्वेषु कार्येषु कृतेषु द्विर्वचनमित्यर्थः ।।

तस्य परमाम्रेडितम् ।। 8.1.2 ।।

`तस्य' इत्यवयवयोगे षष्ठी, परशब्दोऽवयवचनः । `दिक्शब्दाञ्चूत्तरपद' इत्यत्र यद्यपि `दिशि दृष्टः शब्दो दिक्शब्दः'---इत्याश्रयणात्सम्प्रत्यदिक्शिब्दत्वेऽपि पञ्चमी विहिता, तथाप्यस्मादेव निर्देशादवयववाचिभिर्योगे षष्ठी भवति । एवं च पूर्वं कायस्येत्यादि सिद्धं भवति । उदाहरणे---`आम्रडितं भर्त्सने' इति प्लुतः । तस्य ग्रहणं विषयावधारणार्थम्--तस्यैतस्यानन्तरस्य द्विरुक्तस्येति, तेन पाष्ठिके द्विर्वचने इयं संज्ञा न भवति । ननु आम्रेडितशब्दो निघण्टुषु प्रसिद्धः---`आर्म्रडितं द्विस्त्रिरुक्तम्' इति ? सत्यमर्थे प्रसिद्धः; इह तु शब्दे परिभाष्यते
महासंज्ञाकरणं पूर्वाचार्यानुरोधेन ।।

अनुदात्तं च ।। 8.1.3 ।।

परमित्यनेन सामानाधिकरण्यात्तस्य चाज्झल्समुदायरूपत्वादन्यर्थोऽत्रानुदात्तशब्दः---अविद्यमानमुदात्तमनुदात्तमिति । स्वरितेऽप्युदात्तस्य भावात्तस्यापि निवृत्तिः । एवमपि न ज्ञायते---केन स्वरेणाम्रेडितं प्रयोक्तव्यमिति ? उच्यते; उदात्तस्वरितौ तावन्निषिद्धौ, न चास्वरकस्याच उच्चारणं सम्भवति, तत्र पारिशेष्यादनुदात्तत्वमेव भविष्यति । यद्वा---अनुदात्ताच्कमनुदात्तम्, आम्रेडितस्था अचोऽनुदात्ता भवन्तीत्यर्थः । भुङ्क्तभुङ्क्त इति । `भुजोऽनवने' इत्यात्मनेपदम्, तस्य `तास्यनुदात्तेत्' इत्यनुदात्तत्वम्, श्नमः प्रत्ययस्वरः, तस्य `श्नसोरल्लोपः' इत्यल्लोपे उदात्तनिवृत्तिस्वरेण भुङ्क्तेशब्दोऽन्तोद्रुत्तिः, द्विर्वचनेन परस्यानुदात्तत्वम् । पशुशब्दः कुप्रत्ययान्तोऽन्तोदात्तः ।।

नित्यवीप्सयोः ।। 8.1.4 ।।

नित्ये चार्थे वीप्सायां च यद्वर्त्तते इति । अनेन सप्तमीयमर्थनिर्देशार्थेति दर्शयति । प्रयोकृधर्मभूता वीप्सा, न च सा ग्रामादिशब्दैरभिधीयते । पचतिपचतीत्यत्रापि वस्तुतो यन्नित्यं न तत्तिङन्तेनाभिधीयते । नित्यत्वं तु द्विर्वचनद्योत्यम् । तस्मादयमत्रार्थः---नित्यत्वे द्योत्यत्वेन विषयभूते, वीप्सायां व द्योत्यत्वेन विषयभूतायामिति । एषैव च तत्र वृत्तिः, शब्दस्य यद्वत्ता तद्विषयता । यदि पुनरेषा षष्ठी स्यात्सवृूपविधिः प्रसज्येत, ततश्च `नित्यं क्रीडाजीविकयोः', `पादशतस्य संख्यादेर्वीप्सायाम्' इत्यादिनिर्देशो नोपपद्यते । यदि तु `नित्यार्थविषयः शब्दो नित्यः' इत्युच्येत, वीप्सार्थविषयश्च वीप्सेति; तदा षष्ठ्यामप्यदोषः ? गौणत्वप्रसङ्गात्तदनाश्रितम् । नित्यशब्दोऽयं सर्वकालावस्थायिनो य आत्माकाशादयः, येषामुत्पत्तिविनाशौ प्रयोक्तृभिर्नोपलभ्येते, तेष्वपि प्रयुज्यमानो दृश्यते---नित्य आत्मा, नित्य आकाशः, नित्या द्यौरिति; आभीक्ष्ण्येऽपि---नित्यं प्रहसितः, नित्यं प्रजल्पित इति । तत्राविशेषादुभयोरपि ग्रहणादाकाशादिशब्दानामपि द्विर्वचनप्रसङ्ग इति मन्यमानः पृच्छति--केषु नित्यतेति ।

अथ वा---नित्यशब्दस्य कूटस्थलक्षण एव मुख्योऽर्थः, शब्दान्तरसन्निध्यनपेक्षणात् । आभीक्ष्ण्यं तु क्रियापदप्रयोगसमधिगम्यं गौणोऽर्थः; अविच्छेदोपलब्धिसामान्यमाश्रित्य तत्र प्रयोगात् । ततश्च `गौणमुख्ययोर्मुख्ये सम्प्रत्ययः' इति कूटस्थवाचिनामेव द्विर्वचनप्रसङ्ग इति मन्यमान आह---केषु नित्यतेति । इतरोऽपि विदिताभिप्राय आह---तिङ्क्ष्विति । अविशेषमेव मन्यमानः पृच्छति---कुत इति । आभीक्ष्ण्यमिहेति । अयमभिप्रायः---कूटस्थवचनग्रहणे तिङन्तानि न संगृहीतानिस्युः, आभीक्ष्ण्यलक्षणे तु नित्यत्वे गृह्यमाणे तल्लक्षणं द्विर्वचनं तिङन्तानाम्, वीप्सालक्षणं तु सुबन्तानामित्युभयानुग्रहो भवति । गौणोऽपि चार्थो लक्ष्यदर्शनवशादिहाश्रीयते---यथा `शीतोष्णाभ्यां कारिणि', पार्श्वेनान्विच्छतीत्यादौ । उभ्यविधेऽपि नित्यत्वे गृह्यमाणे तद्वाचिनां सुबन्तानां स्वार्थ एव द्विर्वचनं स्यात्, न चैवं लोके प्रयोगोऽस्ति---आत्मात्मेति । एवं ह्युक्ते वीप्सा प्रतीयते, न तु स्वार्थः । तस्मादाभीक्ष्ण्यस्यैव ग्रहणमिति भवत्याभीक्ष्ण्यमिह नित्यता । सा च तिङ्क्ष्वव्ययकृत्सु चेति । एतत्कुतसत्यम् ? इत्याह--आभीक्ष्ण्यं च क्रियाधर्म इति । पौनः पुन्यम्=आभीक्ष्ण्यम् । तच्च साध्यरूपायाः क्रियाया एव सम्भवति, तज्जातीयस्य तु पुनः करणं घटादिष्वपि रूम्भवति; तथापि क्रियाविषयैव पुनः क्रियत इति प्रतीतिः । तद्वचनाश्च पुनः पुनः, आभीक्ष्ण्यम्, नित्यमित्यादयः शब्दाः, यथा युगपत्पृथगित्यादयः शब्दाः क्रियाविषयाः, तद्वत् । क्रिया च तङिक्ष्वव्यवकृत्सु चाभिधीयते, पाचकादिषु तु साधनं प्रधानम् । पाकादिष्वपि तु सिद्धता प्रधानम्, न क्रिया ।

कीदृशी पुनः सा क्रिया यस्या आभीक्ष्ण्यं धर्मः ? इत्याह---यां क्रियामिति । तन्नित्यमिति । नित्यशब्दस्य नपुंसकलिङ्गत्वात्तद्वृत्ति तच्छब्दस्यापि नपुंसकत्वम्, यथा---अणौ यत्कर्म णौ चेत्स कर्तेत्यत्र पुंस्त्वम् । लुनीहिलुनीहीति । क्रियासमभिहारे लोट् । यद्यपि तिङन्तस्य दर्शितमुदाहरणं तथाप्यस्त्यत्र वक्तव्यमिति पुनरुपन्यासः, तद्दर्शयति---कत्वाणमुलोर्लोटश्चेति । `समानकर्तृकयोः' इत्यादिनार्थान्तरेऽपि क्त्वाणमुलौ विहितौ, लोडपि विध्यादावर्थान्तरे विहित इति सामान्यशब्दत्वात् द्विर्वचनापेक्षा एव पौनः पुन्यं प्रकाशयन्ति । यङ् तु तन्निरपेक्ष इति । स हि क्रियासमभिहारं न व्यभिचरति, तत्किं तस्य तद्द्योतने द्विर्वचनापेक्षया ! ननु यङन्तस्यापि कदाचिद् द्विर्वचनमिष्यते, तत्कथम् ? इत्याह---यदा त्विति । द्विविधो हि क्रियायाः समभिहारः---पौनः पुन्यम्, भृशार्थश्च । तत्र यदा द्विर्वचनं भवति, तदा भृशार्थे यङ्, तस्यैव पौनः पुन्यं द्योतयितुं द्विर्वचनम्, तस्य यङाऽद्योतितत्वादित्यर्थः । वृत्तौ च सामान्यशब्दस्यापि क्रिया समभिहारशब्दस्य भृशार्थलक्षणे क्रियासमभिहारे वृत्तिविज्ञेया । पापच्यत इति । सकला अवयवक्रियाः स्वयमेव सम्पादयन् पुनः

पुनः पचतीत्यर्थः । लोडपि भवति---पापच्यस्व पापच्यस्वेत्येवायं पापच्यत इति । अथ नित्यतायां द्विर्वचनमुच्यमानं धातुमात्रस्य कस्मान्न भवति, स हि क्रियावचनः ? उच्यते; परिगृहीतसाधना क्रिया व्यवहारोपयोगिनी भवति, तदभिधानाच्च धातुमात्रस्य द्विर्वचनाभावः । पदाधिकारो वाश्रयणीयः । अनेनैवाभिप्रायेण पूर्वमुक्तम्---`अथ पदस्येत्येव कस्मान्नोच्यते' इति, अस्मिन्पक्षे सगतिकस्य द्विर्वचनं वक्तव्यमेव । एतेनैतदपि निरस्तम्---भृशार्थे सावकाशो यङ् पौनः पुन्ये परेण द्विर्वचनेन बाध्यत इति । कथमिदं निरस्तम् ? पदस्य द्विर्वचनं धातोर्यङ्, तत्रान्तरङ्गस्य न युक्तो बाध इत् व्याख्यातम् ।

नित्यं वीप्सां व्याख्यास्यन् विषयं तावत्पृच्छति---अथेति । सुप्सु वीप्सेति । सुपामेव तदभिव्यक्तौ समर्थत्वात् । एवं विषयमुक्त्वा स्वरूपं पृच्छति---का पुनरिति । यदि सामान्येन व्याप्तुमिच्छा वीप्सा, तदा चिकीर्षतीत्यादौ द्विर्वचनप्रसङ्गः; करोत्यादिक्रियाभिः कटादीनां या व्याप्तुमिच्छा तद्विचित्वात् । इतरो `योगरूढिर्वीप्साशब्दः' इत्यभिप्रायेणाह---व्याप्तिविशेषविषयेति । प्रयोक्तुरिच्छेति । अनेन नाभिधेया वीप्सा गृह्यते---वीप्सावाचिनो द्वे भवत इति, किं तर्हि ? प्रयोक्तृधर्मः, आबाधवत् । गतगत इत्युक्ते प्रियस्य चिरगमनादिना पीडितो वाक्यं प्रयुङ्क्त इति प्रतीयते, तेन चिकीर्षतीत्यादौ द्विर्वचनं भवतीति दर्शयति । व्याप्तिविशेषविषयेत्युक्तम्, स तु विशेषो नाद्याप्यभिहितद इति पुनः पृच्छति---का पुनरसाविति । नानावाचिनामित्यादि ।

पूर्ववृत्तिषु पठितं वीप्सालक्षणम्, तद् व्याचष्टे---नानाभूतार्थवाचिनामिति । तत्र नानावाचिनामिति वचनाज्जातिवाचिनां द्विर्वचनं न भवति---ब्राह्मणो न हन्तव्यः, सम्पन्नो व्रीहिरिति । नहि जातिशब्दा नानाभूतार्थवाचिनः; जातेरेकत्वात् । युगपद्ग्रहणात्क्रमविवक्षायां द्विर्वचनाभावः, यथा---अस्मिन्वनेऽयं वृक्षः शोभनोऽयं वृक्षः शोभन इति क्रमेण शोभनत्वप्रतिपादने बहूनामपि शब्दानां प्रयोगो भवति, तथैकशेषोऽपि न भवति---अस्मिन्वने वृक्षाः शोभना इति; नानावाचित्वाभावात् । पृथगर्थपर्यवसायित्वं हि नानावाचित्वम्, न चैकशेषे तदस्ति । अत एव तत्र न प्रत्येकं विधेयसम्बन्धो नियमेन प्रतीयते । न `हि ब्राह्मणेभ्यः शतं देयम्' इत्युक्ते नियमेन प्रत्येकं शतं देयं भवति । ब्राह्मणाय ब्राह्मणाय शतं देयमित्युक्ते प्रत्येकं शतं दीयते, तत्करय हेतोः ? पृथगर्थपर्यवसायितया पृथग्देयस्य सम्बन्धात् । यदा च पृथगर्थपर्थवसायिता, तदा यावन्तोऽर्था अभिधित्सिताः, तावन्तः शब्दाः पृथगेकैकपर्यवसायिनः प्रसक्ताः, तेषामनेन निवृत्तिः क्रियते---वीप्सायां द्वे एव प्रयोक्तव्ये, न तु बहु प्रयोक्तव्यमिति । कथं तहि निवृत्तानामर्थः प्रतीयते, यावता प्रत्येकपर्यवसायित्वे द्वयोरेव प्रतीतिः स्यात् ? उच्यते---

एकशेषे यथान्येषामर्थः शिष्टेन गम्यते ।
तद्वदत्र विशेषेऽपि शिष्टाभ्यामितरार्थधीः ।।

यथैव हि वृक्षौ वृक्षा इत्येकशेषविषये शिष्यमाणमेव निवृत्तानामप्यर्थमाह, तथेहापि शिष्यमाणे द्वे एव विवक्षितानर्थानबिधास्यतः । न च बहुवचनप्रसङ्गः; परिगृहीतैकत्वानां बहूनामभिधानात्; अन्यथा प्रतेयकसम्बन्धस्याप्रतीतेः द्विर्वचनादुत्तरकालं सत्यामपि बहुत्वावगतावप्रातिपदिकत्वाद्बहुवचनाभावः, यथा---पश्य मृगो धावतीति सत्यपि दर्शनक्रियापेक्षे कर्मत्वे द्वितीयाभावः । एकैकमित्यत्र तु सत्यपि बहुव्रीहिवद्भावेन प्रातिपदिकत्वं परिगृहीतैकत्वस्यैकारथस्य वीप्सायोगादन्तरङ्गत्वादेकवचनं भवति, न बहुवचनम् ; बहुत्वप्रतीतेर्बहिरङ्गत्वात् । अस्यैवार्यस्य `एकैकस्य प्राचाम्' इति निर्देशो लिङ्गमित्यलमियता । तदयमत्रार्थः---नानाभूतार्थवाचिनां यान्यधिकरणानि वाच्यानि तेषां सहविवक्षितानां पृथक् संख्यायुक्तानां प्रत्येकं क्रियया गुणेन वा व्याप्तुमिच्छा वीप्सेति । क्रियागुणग्रहणं द्रव्यस्याप्युपलक्षणम् । ग्रामेग्रामे पानीयमिति । द्रव्यव्याप्तेरुदाहरणम् । पुरुषः पुरुषो निधनमुपैतीति । निधनम्=मरणम् । जातस्य हि ध्रुवो मृत्युरित्यर्थः । अपर आह---साम्नां भक्तिविशेषः=निधनम्, सर्व एव ऋत्विजो निधनमुपयन्तीत्यर्थ इति ।

यत्तिङन्तमित्यादि । अत्र विप्रतिषेधो हेतुः, द्विर्वचनस्यावकाशो यत्र नित्यता विवक्षिता, न प्रकर्षः---पचतिपचतीति, प्रकर्षप्रत्ययस्यावकाशो यत्र प्रकर्ष एव विवक्ष्यते, न नित्यिता---पचतितरामिति; उभयविवक्षायामुभयप्रसंगे परत्वाद् द्विर्वचनम्, ततः पुनः प्रसङ्गविज्ञानात्प्रकर्षप्रत्ययः । यद्वा---प्रतियोग्यपेक्षः प्रकर्षो बहिरङ्गः, पौनःपुन्यमन्तरङ्गमिति पूर्वं द्विर्वचनम् ।

इह त्वित्यादि । इष्टिरेवेयम् । यद्वा---प्रकर्षयुक्ता एवाढ्यादय आनयनक्रियायामुपयुज्यन्त इति लघुप्रकर्षा एव वीप्स्यन्ते । किञ्च---कृतद्विर्वचनात्तरपि सत्याढ्यातरमिति भवितव्यम्, तथा च प्रकर्षार्थो गम्येत, न वीप्सेति पूर्वं प्रकर्षयोगः ।।

परेर्वर्जने ।। 8.1.5 ।।

परिपरि त्रिगर्तेभ्य इति । `अपपरी वर्जने' इति कर्मप्रवचनीय संज्ञा, `पञ्चम्यपाङ्परिभिः' इति पञ्चमी । परिषिञ्चतीति । परिः सर्वतो भावे, `उपसार्गात्सुनोति' इत्यादिना षत्वम् ।

परेर्वर्जन इत्यादि । `परेर्वर्जने' इत्यत्रा `असम से' इति वक्तव्यम्, `वा' इति च वक्तव्यम्, तेनासमास एव भवति, तत्रापि विसप्लेन ।

अन्यत्र तु नैव भवति, तदाह---समासे त्विति । तेनौवोक्तत्वादिति । ननु वाक्ये तावद्वर्जनं परेरेव द्योत्यम्, समासेऽपि परिः सन्निहितः, तत्किं समासस्य वर्जने शक्तिः कल्प्यते ? तत्राहुः---`जहत्स्वार्था वृत्तिः' इति पक्षे समास एव वर्ज्यमानोपसर्जने वर्जने वर्त्तते, अवयवौ त्वनर्थकाविति । यदा तु `अजहत्स्वार्था वृत्तिः' इति पक्षः, तदा वाक्ये केवले वर्जने परिर्वर्तत इति तत्रैव द्विर्वचनं भवति । समासे तु वर्ज्यमानार्थास्कन्दानान्न द्व्यर्थः परिः केवले वर्जने वर्त्तत इति द्विर्वचनाभावः ।।

प्रसमुपोदः पादपूरणे ।। 8.1.6 ।।

प्रादीनां समाहारद्वन्द्वः, `द्वन्द्वाच्चुदषहान्तात्समाहारे' इति समासान्तस्तु न भवति; समासान्तविधेरनित्यात्वात् । उदित्यं जातवेदसमिति क्वचिदुदाहृतम्, तदयुक्तम्; न ह्यत्र द्वितीय उच्छब्दः, किं तर्हि ? उशब्दः ।

उपर्यध्यधसः सामीप्ये ।। 8.1.7 ।।
उपर्यादीनां योऽर्थस्तस्य सामीप्यद्योतनाय द्विर्वचनम् । सामीप्यम्=प्रत्यासत्तिः, तच्च देशकृतं कालकृतं वा । उपर्युपरिदुः खमिति । कालकृतस्योदाहरणम् । दुः खस्य सामीप्येनोपरिष्टादित्यर्थः । `उभसर्वतसोः' इत्युपसंख्यानेन द्वितीया । उपर्युपरि ग्रामिति । ग्रामस्य सामीप्येनोपरिष्टाद्देश इत्यर्थः । अध्यधि ग्राममिति । अधिरुपरिभावे, यथा---`समिधं स्रुचं चाध्यधि गार्हपत्यं ह्रत्वा' इति । अधोऽधो ग्राममिति । ग्रामस्य सामीप्येनाधस्ताद् देश इत्यर्थः । यथा `नवानधोऽधो बृहतः पयोधरान्' इति ।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति ।
अधोऽधो दर्शने कस्य महिमा नोपजायते ।।
इति तु वीप्सायां द्विर्वचनम् ।
उपरि चन्द्रमा इति । अत्र भूगतमपेक्ष्योपरिभावस्य सामीप्यं नास्ति । उपरि शिरस इत्यादि । न हि वस्तुसत्तैव शब्दत्युत्पत्तेः प्रधानं कारणम्, किं तर्हि ? विवक्षा, सा चेह नास्ति । शिरस उपरिष्टाद् घटं धारयति नाधस्तादिति ह्यत्र विवक्षितम् । सामीप्यं तु वस्तुतः सम्भवति ।।
वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु ।। 8.1.8 ।।
एकार्थः पदसमूहो वाक्यमिति । यथाह भगवाञ्चैमिनिः---अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्' इति । क्वचित्तु `एकतिङ्पदसमूहो वाक्यम्' इति पठ्यते, एका तिङ्विभक्तिर्यत्र स एकतिङ् । क्वचित्तु न किञ्चिदपि वाक्यलक्षणं पठ्यते । असूयासम्मतिकोपकुत्सनभर्त्सनेषु यदि तद्वाक्यं भवतीति । यद्यपि वाक्यादेरिति समासे गुणीभूतं वाक्यम्, तथाप्यसूयादीनां तेनैव सम्बन्धः---असूयादिषु यद्वाक्यं तदादेरिति, न तु प्रधानेन वाक्यादिनाऽऽमन्त्रितेन । प्रयोक्तृधर्मा ह्यसूयादयो नाभिधेयधर्माः, ते च वाक्येनैव द्योत्यन्ते, नामन्त्रितेन । उदाहरणेषु सम्मतावनुकम्पायां कन्, इतरत्र कुत्सिते कः । रिक्तम्= शून्यम्, क्षुद्रमित्यर्थः । शक्तियष्टिशब्दाभ्यां तद्वत्योः स्त्रियोर्वर्तमानाभ्यां कुत्सिते कः । एवं हि कुत्सनम्, सम्बोधनं च समीचीनं भवति । भर्त्सने त्वित्यादि । यद्यपि `भत्सेने पर्यायेण' इति वचनात्पूर्वस्यापि तत्र विधीयमानं भर्त्सनकुत्सनयोरपि सिद्ध्यति; कारणत्वेन तत्रापि कोपासूययोर्भावात्, तेतश्च नार्थः कुत्सनभत्सेनग्रहणेन ? नैतदस्ति;
गुरवो हि हितैषित्वादकुप्यन्तोऽपि भर्त्सनम् ।
कुर्वते भर्त्स्यमानास्तु कुपितान्प्रतियन्ति तान् ।।
विनाप्यसूयया कुत्सां कुर्वन्तीति पृथक्तयोः ।
निर्देशः सूत्रकारेण विहितः सूक्ष्मदर्शिना ।।
सामृतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः ।
लालनाश्रयिणो दोषास्ताडनाश्रयिणो गुणाः ।।
अभिप्राये दुष्टे लालनेऽपि दोषा भवन्ति, विपर्यये तु ताडनेऽपि गुणा इत्यर्थः ।।
एवं बहुव्रीहिवत् ।। 8.1.9 ।।
अत्र यदि केवलो बहुव्रीहिवद्भावोऽनिर्दिष्टविषयोऽनेन विधीयते, ततश्चेहापि प्राप्नोति---एक इति, ततश्च सुब्लुक्, स्यात् । अस्तु, बहुव्रीहिवद्भावादपरः सुः प्रभविष्यति ? नैव चात्र सुब्लुक् प्राप्नोति, एक इत्यस्य प्रत्ययान्तत्वेनाप्रातिपदिकत्वात् । `कृत्तिद्धितसमासाश्च' इत्यत्र च समासग्रहणं नियमार्थम्, न विध्यर्थमिति तेनापि नास्ति प्रातिपदिकत्वम् । इह तर्ह्येकेति पुंवद्भावः प्राप्नोति ? स्यादेवतन्---`द्वे' इत्यधिकाराद् द्विर्वचनसन्नियोगेन विधीयमानो बहुव्रीहिवद्भावस्तदभावादिह न भवतीति । अथ तदपि द्विर्वचनं तेन विधीयमानमत्र कस्मान्न भवति ? तस्माद्वक्तव्योऽस्य विषयः । अत आह---एकमित्येतच्छब्दरूपं द्विरुक्तमिति । सत्यम्; `द्वे' इत्यनुवर्त्तते, न च तेन द्विर्वचनं विधीयते, किं तर्हि ? अन्येन विहितनूद्य तत्र बहुव्रीहिवद्भावो विधीयते । क्व चान्येन द्विर्वचनं विहितम् ? वीप्सायाम् । यदि पुनर्वीप्साग्रहणमनुवर्त्य तत्र बहुव्रीहिवद्भावो विधीयेत ? नैवं शक्यम्; बहुव्रीहिवद्भावेन द्विर्वचनं बाध्यते । अथ यदि वीप्सायां द्वे इत्येवमुभयमनुवर्त्य द्विर्वचनं बहुव्रीहिवद्भावः---इत्युभयमनेन विधीयते, न दोषो भवति । वृत्तिकारस्तु किमनया वीप्साग्रहणानुवृत्त्येति `द्वे' इत्येवान्ववीवृतत् ।
सुब्लोपपुंवद्भावाविति । यद्यप्येतौ बहुव्रीहाविति नोच्येते, तथापि तत्र दृष्टावित्येतयोरतिदेशः । क्वचित्तु वृत्तावेवायमर्थः पठ्यते । एकैकमिति । एकमित्यस्य द्विर्वचने द्वयोरपि सुपोर्लुकि सति पुनर्बहुव्रीहिवद्भावादेव सुप् । एकैकयेति । टाबन्तात्तृतीया, तदन्तस्य द्विर्वचनम्, सुब्लुकि पुंवद्भावेन पूर्वभागे टापो निवृत्तिः । कः पुनरत्र टापो निवृत्तौ सत्यामसत्यां वा विशेषः । ? अवग्रहेऽस्ति विशेषः---ऐकैकयेत्येक---एकयेति भवति । उत्तरत्र च गतगतेत्यादौ पुंवद्भावस्य प्रयोजनम् ।
ननु यदि यच्च यावच्च बहुव्रीहौ दृष्टं कार्य तस्य सर्वस्यातिदेशः; सर्वनामसंज्ञाप्रतिषेधः, स्वरः, समासान्त इत्येते विधयः प्राप्नुवन्ति ? अत आह---सर्वनामसंज्ञाप्रतिषेधस्वरसमासान्ता इति । न बहुव्रीहाविति प्रतिषेधो न भवतीति । तत्र हि `विभाषा दिक्समासे बहुव्रीहौ' इत्यतः `बहुव्रीहौ' इत्यनुवर्त्तमाने पुनर्वहुव्रीहिग्रहणम्---बहुव्रीहिरेव यो बहुव्रीहिस्तत्र यथा स्याद्, बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूदिति । तेन संज्ञाप्रतिषेधस्तावत्समासाधिकारे बहुव्रीहौ विज्ञायते । नन, सुसु इति । `आबाधे च' इति द्विर्वचनम् । नन करोति, सुसु जागर्तीत्यादिवाक्यैकदेश उदाहृतः । नञ्सुभ्यामित्यन्तोदात्तत्वं न भवतीति । तत्र हि `वनं समासे' इत्यतः सिंहावलोकितन्यायेन `समासे' इति सम्बध्यते, `बहुव्रीहाविदमेतत्तद्भ्यः' इत्यतः `बहुव्रीहौ' इति च । तत्र बहुव्रीहेः

समासत्वाव्यभिचारे पुनः समास इति विशेषणं समासाधिकारविहितबहुव्रीहिपरिग्रहार्थण् । अथात्र `नञ्सुभ्याम्' इत्यन्तोदात्तत्वे सति कः स्वरो भवति ? अत्र हि चत्वारः स्वराः प्राप्नुवन्ति---समासान्तोदात्तत्वं च । तत्र `नञ्सुभ्याम्' इत्ययं स्वरो न भवतीत्युक्तम् । आम्रेडितानुदात्तत्वमपि न भवति, किं कारणम् ? कार्यातिदेशे तावदिदमेव कार्याणां विधायकमिति परत्वादाम्रेडितानुदात्तत्वं बहुव्रीहिस्वरेण बाध्यते । शास्त्रातिदेशेऽपि विरुद्धस्य स्वाश्रयस्यातिदेशेन निवर्त्तनान्नैवाम्रेडितानुदात्तत्वं भवति, `बहुव्रीहौ प्रकृत्या' इत्यत्र च न समासग्रहणमनुवर्त्तते, तेन बहुव्रीहिवद्भावात्पूर्वपदप्रकृतिस्वरो भवन् समासान्तोदात्तत्वं बाधते । ऋगृगिति । `आबाधे च' इति द्विर्वचनम् । ऋक्पूरिति समासान्तो न भवतीति । तत्र हि `समासाच्च तद्विषयात्' इत्यतः `समासात्' इत्यनुवर्त्तमाने पुनः समासग्रहणं समासाधिकारे विहितो यः समासस्तत्परिग्रहार्थम् । तेनातिदेशिके समासे समासान्तो न भवतीति । एवमेते संज्ञाप्रतिषेधादयः समासाधिकारविहिते बहुव्रीहौ विज्ञायन्ते ।

वार्त्तिककारस्तु सर्वमेवैतद्वाचनिकं मन्यते, यदाह---`सर्वनामस्वरसमासान्तेषु दोषः' इति । अथ ननेत्यत्र बहुव्रीहिवद्भावान्नलोपः कस्मान्न भवति ? उच्यते; `उत्तरपदे' इति वर्तते, नञ इति च कार्यिणो निर्देशः, तत्र साक्षाच्छिष्टेन कार्यित्वेन नञो निमित्तभावो बाध्यते, यथा---मद्रह्रदो भद्रह्रद इत्यत्र रेफस्य `अचो रहाभ्यां द्वे' इति द्विर्वचनप्रसङ्गे उक्तम्---`नेमौ रहौ कार्यिणौ, किं तहि ? निमित्तमिमौ द्विर्वचनस्य' इति । अयं तु परिहारः पूर्वत्रापि यथासम्भवं द्रष्टव्यः ।।

आबाधे च ।। 8.1.10 ।।

आबाधनमाबाध इति । भावे घञ् । प्रयोक्तृधर्मो नाभिधेयधर्मइति । अभिधेयधर्मत्वे हि बाधितपीडितादिशब्दानामेव द्विर्वचनं स्यात्, न गतादिशब्दानाम्, प्रयोक्तृधर्मत्वे हि तेषामपि भवतीति व्याप्तिर्भवति । तत्र वर्त्तमानस्येति । द्विर्वचने सत्याबाधस्य गम्यमानत्वाद् गतादिशब्दानां तत्र वृत्तिः, न तु तदभिधानात् । प्रियस्य चिरगमनादिनेति । प्रयोक्तृधर्मत्वमाबाधस्य दर्शयति । आदिशब्देन नाशादेर्ग्रहणम् ।।

कर्मधारयवदुत्तरेषु ।। 8.1.11 ।।

कोपधाया अपि कर्मधारयवद्भावात् पुंवद्भावो भवतीति । तेन बहुव्रीहिवद्भावे प्रकृते कर्मधारयवद्भावो विधीयते इति भावः । समासान्तोदात्तत्वमनेन विधीयत इति । कार्यातिदेशपक्षे इदमुक्तम् । शास्त्रातिदेशे तु यद्यप्याम्रेडितानुदात्तत्वमेव परम्, तथापि न तद्भवति; विरुद्धस्य स्वाश्रयस्याति देशेन निवर्त्तनात् ।।

प्रकारे गुणवचनस्य ।। 8.1.12 ।।

प्रकारो भेदः सादृश्यं चेति । उभ्यत्रापि प्रकारशब्दस्य दृष्टत्वात् । भेदे तावत्---बहुभिः प्रकारैर्भुङ्क्ते, बहुभिर्भेदैः, विशेषैरिति गम्यते; सादृश्ये---ब्राह्मणप्रकारोऽयं माणवकः, ब्राह्मणसदृश इति गम्यते । तदिहेति । तदिति वाक्योपन्यासे । अव्ययं वा सप्तम्यर्थवृत्ति, तत्रेत्यर्तः । सादृश्यं प्रकारो गृह्यत इति । द्विरुक्तात् तस्यैव प्रतीतेः । अत्र चाभिदानस्वाभाव्यं हेतुः । प्रकारे वर्तमानस्येति । द्विर्वचनप्रवृत्तिद्वारेण तद्द्योतनात्तत्र वृत्तिः । अपरिपूर्णगुण इत्यर्थ इति । कथमेतत् ? इत्याह---परिपूर्णगुणेनेति । यस्य पूर्णं पाटवम्, यः पटुकार्याणि करोति, तेन यदा न्यूनपाटवमुपमीयते, तदा पुटुपटुरिति प्रयोगो भवति, तेनार्थादपरिपूर्णगुण इत्यर्थो भवति ।

जातीयरोऽनेन द्विर्वचनेन बाधनं नेष्यत इति । तद्विधौ द्विविधस्यापि प्रकारस्य ग्रहणं मन्यते । जयादित्यस्तु तत्राह---`सामान्यस्य भेदको विशेषः प्रकारः' इति । इष्टिश्चेयम्, अन्यथा ब्राह्मणजातीय इत्यादावगुणवचने, पटुजातीय इत्यादौ गुणवचनेऽपि सादृश्यादन्यत्र भेदे चरितार्थस्य जातीयरो गुणवचनेषु सादृश्ये बाधः स्यात् ।

पटुर्देवदत्त इति । परिपूर्णगुण एवात्र पटुशब्दो वर्त्तते, नतत्सादृश्यान्न्यूनगुणे ।

अग्निर्माणवक इति । अग्निशब्दो वह्नौ वृत्तः सोऽयमतिसादृश्यनिमित्तादभेदोपचारान्माणवके वर्त्तत इति द्रव्ये पूर्ववृत्तः सम्प्रत्यपि द्रव्यवचन इति गुणवचनो न भवति । एवं गौर्वाहीक इत्यत्र गोशब्दः सास्नादिमति वर्तित्वा वाहीके वर्तमानः । नन्वग्निशब्दोऽग्निगततैक्ष्ण्यं माणवके प्रतिपादयितुं प्रयुज्यत इति गुणवचन एव, तथा गोशब्दोऽपि सास्नादिमद्गतजाड्यप्रतिपादनाय वाहीके प्रयुज्यत इति गुणवचन एव ? इत्यत आह---यद्यप्यत्राग्निशब्द इति । अग्निशब्दो माणवके प्रयुज्यमानो यादृशमग्नेस्तैक्ष्ण्यं परश्वादिभ्यो व्यावृत्तं तदेव प्रतिपादयति, न तैक्ष्ण्यमात्रमिति, गोशब्दोऽपि यादृशं गवां जाड्यं मनुष्येभ्यो व्यावृत्तं तदेव प्रतिपादयति, आश्रयविशेषसम्बन्धाद्धि तैक्ष्ण्यजाड्यादिकं भिद्यते, तदेतदाह---मुख्यार्थसम्बन्धादवधृतभेदं तैक्ष्णजाड्यादिकमिति । शब्दान्तरसन्निधीमन्तरेण शब्दश्रवणमात्राद् योऽर्थः प्रतीयते स मुख्यः । विपरीतो गौण । अवधृतभेदम्---निश्चितभेदम् । आदिशब्देन पैङ्गल्यभारवहनादेर्ग्रहणम् । अर्थान्तरे, गौणे माणवके वाहीके च । सर्वदा गुणवचनो न भवतीति न द्विरुच्यत इति । `प्रकारे वर्त्तमानस्य' इत्येव गुणवचनत्वे सिद्धे पुनर्गुणवचनग्रहणात् सर्वदा गुणवचनस्येत्याश्रीयते । न चायं सर्वदा गुमवचनः; प्राक् प्रकाराद् द्रव्यवचनत्वात् ।

अत्र केचित्---`गुणमुक्तवान् गुणवचनः' इति गुणोपसर्जनद्रव्यवचनस्य द्विर्वचनमिच्छन्ति । अन्ये तु गुणवचनस्य गुणिवचनस्य च अविशेषेणेच्छन्ति---शुक्लशुक्लं रूपम्, शुक्लशुक्लः पट इति । `नवंनवं प्रीतिरहो करोति' इत्यत्र वीप्सायां द्विर्वचनम्, अनेन तु द्विर्वचने सुब्लोपप्रसङ्गः, यथा---नवनवावनवायुभिरादेधे' इति । मूलेमूले इति । एकस्य वस्तुनो वेणुदलादेरेकमेव मुख्यमग्रं मूलं च, इतरेषां तु भागानामापेक्षिको मूलाग्रव्यपदेशः । स्थौल्यसौक्ष्म्ये अपि नैकरूपे, किं तर्हि ? यथामूलमुपचीयते स्थौल्म्, यथाग्रं च सौक्ष्म्यमिति वीप्साया अत्रासम्भवः । इह `मूलेमूले पथि विटपिनाम्' इति वीप्सायामेव द्विर्वचनम् ।

स्वार्थ इति । अर्थान्तराभावप्रदर्शनार्थमिदमुक्तम् । अस्मार्त्कार्षाणादिति । अनेकमाषसमुदायः=कार्षापणम् । तत्र न सर्वे माषा दानक्रियया व्याप्यन्ते, किं तर्हि ? द्वावेवेति वीप्साया अभावः । ननु यथा द्वावेव माषौ निर्ज्ञातौ दानक्रियया व्याप्येते, तदा माषंमाषं देहि---इति वीप्सायां द्विर्वचनं भवति;

एवमनेकमाषसमुदायादपि कार्षापणाद् द्वयोरेवास्ति दानक्रियाव्याप्तिः ? मैवम्, तत्र हि सन्निहितस्यार्थस्य न कस्यचिद् वर्जनमस्ति; इह तु वर्जनमस्ति, यतो माषंमाषमसौ दत्वा शेषं पृच्छति---किमनेन क्रियतामिति । तदिदमुक्तम्---अत्र हीति । माषं देहि द्वौ माषौ देहि त्रीन्माषानिति । अनेन यथेच्छं देहीति विवक्षया अवधारणाभावं दर्शयति । चापल इति प्रयोक्तृधर्मोऽयम्, तस्मिन् द्योत्ये सुबन्तस्य तिङन्तस्य च सर्वस्य वाक्यगतस्य पदस्य द्विर्वचनं नावश्यमिति नेदं शास्त्रीयं द्विर्वचनम्, किं तर्हि ? परप्रत्यायनायानेकस्य स्वतन्त्रपदस्य प्रयोग इत्यर्थः । एवं च कृत्वा आम्रेडितानुदात्तत्वाभावाद्यथाप्राप्तः स्वरो भवति । क्रियासमभिहार इति । लोडन्तस्यैवेदं द्विर्वचनम्, न यङन्तस्य; लोटः समुच्चयेऽपि विधानात् क्रियासमभिहाराभिव्यक्तौ केवलस्य सामर्थ्याभावात् । यङ् तु क्रियासमभिहारविषय एवेति तद्द्योतने स्वयं सामर्थ्यान्नापेक्षते द्विर्वचनम् ।

आभीक्ष्ण्य इति । पूर्वेण वाक्येन क्रियासमभिहारसंशब्देनेन यो विहितस्तदन्तस्यैव द्विर्वचनमिति शङ्कमानं प्रत्यस्य वाक्यस्योपन्यासः । नित्य इत्येव सिद्धमिति तत्रोक्तमिति । `नित्यवीप्सयोः' इत्यत्र हि `क्त्वाणमुलोर्लोटश्च द्विर्वचनसापेक्षाणामेव पौनः पुन्यप्रकाशने शक्तिः' इत्युक्तम् । अन्ये त्वाहुः---`पुनः पुनः क्रियाया उत्पादनमाभीक्ष्ण्यम् । तथा हि---भुक्त्वाभुक्त्वा व्रजतीत्युक्ते सत्यपि क्रियाया विच्छेदे पुनः पुनर्भुङ्क्ते पुनः पुनर्व्रजतीति क्रियावृत्तिः प्रतीयते, नित्यता तु क्रियाया अविच्छेदः, यता जीवतिजीवतीत्युक्ते जीवत्येवायमिति प्रतीयते, न त्वसौ जीवित्वा म्रियते मृत्वा च जीवतीति, जीवनमेव त्वविच्छिन्नं प्रतीयते । तस्मादाभीक्ष्ण्यं नित्यमिति भिन्नावेतावर्थौ' इति ।

अपर आह---भुक्त्वा व्रजतीत्यादौ क्त्वाणमुलन्तस्य तिङन्तस्य च द्विर्वचने प्राप्ते आभीक्ष्ण्यसंशब्दनेन यो विहितस्तदन्तस्य यथा स्यात्, तिङन्तस्य मा भूदिति नियमार्थमिदमिति ।

डाचीति । विषयसप्तमीयम्, तेनानुत्पन्न एव डाच्यकृतटिलोपस्य पटदित्यादेर्द्विर्वचनम्, ततः `अव्यक्तानुकारणात्' इति डाचि टिलोपः, `नित्यमाम्रेडिते `डाचि इति पररूपत्वम् । अपर आह---इदमेवाच्छब्दस्य पररूपविधानं लिङ्गम्---`डाचि' इति परसप्तम्यामपि टिलोपात्पूर्वं द्विर्वचनं भवतीत्यस्यार्थस्येति, तदसत; पतदित्यादौ टिलोपादुत्तरकालमप्यच्छब्दस्य सम्भवात् । द्वितीया करोतीति । `कृञो द्वितीया' इत्यादिना डाच् । तत्तर्हि डाचि द्विर्वचनं वक्तव्यम् ? न वक्तव्यम्; आचार्यप्रवृत्तिर्ज्ञापयति---`डाच्यव्यक्तानुकरणस्य द्विर्चनं भवतीति, यदयम् `नित्यमाम्रेडिते डाचि' इति पररूपत्वं शास्ति ।

पूर्वप्रथमयोरिति । पूर्व, प्रथम---इत्येतयोर्द्विर्वचनं भवति, क्व ? अर्थातिशयविवक्षायाम् । अनयोर्योऽर्थस्तस्यातिशये विवक्षिते । आतिशायिकोऽपि दृश्यत इति । द्विर्वचनेन बाधे प्राप्ते वचनम् । अतिशयशब्दोऽनुशतिकादिषु द्रष्टव्यः । केचित्तु अर्थबेदादातिशायिकस्याबाध्यत्वमाहुः । तथा हि---`पूर्वतरं भुङ्क्ते' इत्युक्ते किमात्मसाध्यक्रियान्तरापेक्षं भोजनस्य पूर्वत्वम् ? अथ भोक्त्रान्तरसाध्यभोजनक्रियापेक्षम् ? इति सन्देहो भवति । एवं पूर्वतरं पुष्प्यतीत्युक्तेऽयमर्थो गम्यते । न तावदेष किसलयितो यावदेष पुष्प्यतीति । पूर्वंपूर्वं । पुष्प्यतीत्यस्मात्त्वन्येभ्यः पुष्पितृभ्योऽतिशयेन पूर्व पुष्प्यतीत्यर्थः प्रतीयते ।

डतरडतमयोरिति । डतरडतमान्तस्य द्वे भवतः, समेनाढ्यत्वादिना धर्मेण सम्प्रधारणायां विषये । स्त्रीनिगदे भाव इति । भावः=भूतिः, सम्पत्=आढ्यता, निगद्यत इति निगदः, `नौ गद' इत्यादिना कर्मण्यप् । स्त्रीशब्देन स्त्रीलिङ्गः शब्दोऽबिधीयते, स्त्रिया निगदः, कर्त्तरि षष्ठ्याः समासः । स्त्रीलिङ्गशब्दाभिधेयायां भूतौ वर्त्तमानस्येत्यर्थः । कतराकतरा अनयोराढ्यतेति । किं साधनसम्पत्कृता ? उत भाग्यकृता ? इति प्रश्नार्थः ।

कर्मव्यतिहार इति । क्रियाव्यतिहारे इत्यर्थः । तत्र द्विर्वचनं नित्यम्, समासवद्भावस्तु बहुलम् । तत्रान्योऽन्यशब्दे समासवद्भावाभावात्सुब्लुक्, समासान्तोदात्तत्वं च न भवति, आम्रेडितानुदात्तत्वं भवति । इतरेतरशब्दे तु नित्यः समासवद्भाव इति सुब्लुक्समासस्वरौ भवतः । अन्योऽन्यमिति . द्वितीयैकवचनान्तस्य द्विर्वचनम् । अन्योऽन्यस्येति । षष्ठ्येकवचनान्तस्य । अन्योऽन्यसम्बन्धिनः पुत्रादीनित्यर्थः । स्त्रीनपुंसकयोरिति । उत्तरपदस्थाया विभक्तेराम्भावः; अन्यथाऽनेकालत्वात्स सर्वस्योत्तरपदस्य स्यात् । तत्र `सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति पूर्वोत्तरपदयोर्द्वयोरपि पुंवद्भावे कृते पक्षे आम्विधिः । अन्याशब्दस्य तु द्विर्वचने समासवद्भावाभावाद्बहुलवचनात्स्त्रियां टापो निवृत्तिः । नपुंसके च `अद्ड्डुतरादिभ्यः' इत्यस्य निवृत्तिः । वार्त्तिकेषु `कर्मधारयवत्' इति न सम्बध्यत इति सुब्लुगादि न भवति ।।

अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् ।। 8.1.13 ।।

प्रियप्रियेणेति तृतीयैकवचनान्तस्य द्विर्वचने कर्मधारयवद्भावात् सुब्लुकि पुनस्तदेव वचनम् । अत्यन्तदयितमपि वस्त्वनायासेन ददातीत्यर्थः ।।

यथास्वे यथायथम् ।। 8.1.14 ।।

`यथास्वे' इति `यथाऽसादृश्ये' इति वीप्सायमव्ययीभावः । स्वशब्द आत्मवचनः, आत्मीयवचनो वेति दर्शयति । यो य आत्मेति । ज्ञातिधनवचनस्य तु ग्रहणं न भवति; द्विर्वचनस्य तत्रासमर्थत्वात् ।।

द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ।। 8.1.15 ।।

पूपवदस्येति । द्वि औ द्वि स्थिते कर्मधारयवद्भावात्सुब्लुकि कृते पूर्वपदावयवभूतस्येकारस्याम्भावः, उत्तरपदावयवस्य चात्वं निपात्यते, चकारान्नपुंसकत्वम्, क्वचिदेकवद्भावश्च निपात्यते, समासान्तोदात्तत्वं तु कर्मधारयवद्भावाद् भवति । तत्र रहस्यं द्वन्द्वशब्दवाच्यमिति । द्वाभ्यां निर्वृत्ते रहस्ये योगरूढिरेपेत्यर्थः । द्वन्द्वं मन्त्रयन्त इति । द्वौ द्वौ भूत्वा मन्त्रयन्त इत्यर्थः । एवं हि तद्रहस्यं भवति । आचतुरमिति । आङभिविधौ । चतुर्णां पूरणे चतुः शब्दो द्रष्टव्यः, आचतुर्थादित्यर्थः । द्वन्द्वं मिथुनीयन्तीति । मिथुनशब्देन मैथुं तत्कर्म लक्ष्यते, तदिच्छतीति क्यच्, प्रायेण मिथुनायन्त इति क्यङन्तं पठ्यते, तत्रोपमानार्थो मृग्यः । माता पुत्रेणेत्यादिना मर्यादावचने व्यनक्ति । तत्पुत्रेणापीति । एतावदेव पशूनामायुः । द्वन्द्वं व्युत्क्रान्ता इति । द्वौ पक्षौ भूत्वा पृथगवस्थिता इत्यर्थः । स्वार्थे द्विर्वचनमेकवद्भावश्चेति । द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति = सादयति, न्यञ्चि=न्यग्भूतानि, अवाग्बिलानि । द्वन्द्वं स्फ्यश्च कपालानि चेति द्वेद्वे इत्यर्थः । अत्र वीप्सायां द्विर्वचनम्, अम्भावादि, एकवद्भावश्च । द्वावभिव्यक्तौ साहचर्येणेत्यर्थ इति । अत्र स्वार्थे द्विर्वचनमेकवद्भावादिकं सर्वं निपात्यते ।

द्वन्द्वं युद्धमिति । अत्रापि वीप्सायां द्विर्वचनम् । द्वन्द्वानि सहन्त इति । शीतमुष्णं चेत्येकं द्वन्द्वम्, सुखदुः खे चापरम्, क्षुत्तृष्णे चापरम् । अत्रापि स्वार्थे द्विर्वचनमेकवद्भावादि, तत्रैकशेषवशाद्बहुत्वम् । चार्थे द्वन्द्व इति । द्वे चार्थनिर्द्दिष्टे पदे समस्ते द्वन्द्वः । अत्रापि स्वार्थे द्विर्वचनादि, पुंस्त्वं च ।।

पदस्य ।। 8.1.16 ।।

प्रागपदान्ताधिकारादिति । `अपदान्तस्य मूर्द्धन्यः' इत्यत्र तु प्रकरणे विरोध्युपादानान्नादिक्रियते । पचन्तौ, यजन्ताविति । संयोगान्तस्थेऽपि लोपो न भवति । एवं राजानावित्यत्र नलोपो न भवति, प्रशामावित्यादौ `मो नो धातोः' इति नत्वं न भवति । अनन्तरेषु योगष्वामन्त्रितादेः सुबन्तस्य तिङन्तस्य च पदस्यैव कार्यविधानात्तेषामुल्लङ्घनम् । न च समर्थपरिभाषोपस्थानंम तेषु प्रयोजनम्, अनन्तरेणाप्येतं वस्तुतः पदकार्यत्वादेव सिद्धेः । किञ्च---`समानवाक्ये निघातयुष्मपदस्मादादेशाः' इति वक्ष्यते । कुत्वादीनि त्ववयवस्य भत्वेऽपि समुदायस्य पदत्वाश्रयेणेष्यन्त एव---वक्तरि, दोग्धरीति । तस्मान्न भसंज्ञकव्यावृत्तिरपि प्रयोजनम् ।

`षष्ठी स्थानेयोगा' इति वचनात् `पदस्य' इति स्थानषष्ठी, ततश्च `उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इत्यस्यायमर्थो भवति---उदात्तस्वरितयोर्योयण् ततः परो योऽनुदात्तस्तदन्तस्य पदस्य स्वरितत्वमलोऽन्त्यस्य भवतीति । ततश्चात्रैव स्यात्---कुमार्याविति; कुमार्य इत्यत्र न स्यात्, सकारो ह्यत्र पदस्यान्तः, हल्स्वरप्राप्तौ च व्यञ्जनमविद्यमानवद्भवति । एवम् `एकादेश उदात्तेनोदात्तः' इत्यत्रापि अयमर्थो भवति---उदात्तानुदात्तयोर्य एकदेशस्तदन्तस्य पदस्यालोन्त्यस्यादेशो भवतीति । तदश्चेहैव स्यात्---वृक्षाविति; वृक्षानित्यत्र न स्यात्, नकारो ह्यत्र पदस्यान्त्यः ? ---इत्याशङ्क्याह---

वक्ष्यमाणवाक्यापेक्षयेति । अमयभिप्रायः---अधिकारोऽयं परार्थः, परिभाषापि परार्था, ततश्च `गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यात्' इति न्यायेन नात्र स्थानेयोगपरिभाषोपतिष्ठते । यत्र त्वस्या अधिकारो वक्ष्यमाणेषु वाक्येषु तेत्वेवोपस्थानम्, तत्र विशेषणविशेष्यभावे कामचाराद्यणेकादेशस्वरयोः `पदस्य' इत्यनुवृत्तं कार्यिविशेषणार्थम्, न तु कार्यप्रतिपत्त्यर्थम् । तेन पदावयवयोरनुदात्तैकादेशयोः स्वरविधानादनन्त्ययोरपि भवति । संयोगान्तलोपादौ तु संयोगादिना पदस्य विशेषणात् स्थानषष्ठी, तस्माद्वक्ष्यमाणानि वाक्यान्यपेक्ष्य पर्यालोच्य पदस्येति षष्ठ्या अर्थो व्यवस्थाप्यः, न त्वेतत्सूत्रपर्यालोचनयेति । व्यवस्थामेव दर्शयति---क्वचिदिति । यद्येषा स्थानषष्ठ्येव स्यात् `नलोपः प्रातिपदिकान्तस्य' इत्यत्रान्तग्रहणमनर्थकं स्यात् । तद्धि पदान्तस्य यथा स्यात्, पदावयवस्य मा भूदित्येवमर्थम् । स्थानषष्ठ्यां तु `अलोन्त्यस्य' इत्यस्य सिद्धत्वादन्तग्रहणमनर्थकं स्यात् । तस्मादन्तग्रहणात् क्वचिद्विशेषणषष्ठ्यपि विज्ञायते ।।

पदात् ।। 8.1.17 ।।

प्राक् कुत्सने च सुप्यगोत्रादावित्येतस्मादिति । यदि त्वत्र पदादित्येतदनुवर्त्तेत, यत्पचति पूतीत्यत्रैव तिङन्तस्य निघातः स्यात्, न तु पचति पूतीत्यत्र ।।

अनुदात्तं सर्वमपादादौ ।। 8.1.18 ।।

यत्ते नियतमित्यादि । अत्र मृत्यो इत्यस्य पादादौ निघाताभावः, यदङ्गदाशुषे त्वमित्येकः पादः, अग्ने इत्यपरः, अग्ने भद्रं करिष्यतीत्यादीनि चोदाहरणानि ।

रुद्रो विश्वेश्वर इत्यादि । अत्र युष्माकम्, असमाकमित्यनयोरादेशाभावः ।

ऋक्पादः श्लोकपादश्च गृह्यते इति । विशेषानुपादानात् । अथ सर्वग्रहणं किमर्थम्, यावता `अननुदात्त पदमेकवर्जम्' इति वचनादेकस्मिन्पदे एक एवोदात्तः स्वरितो वा सम्भवति । ये तु द्व्युदात्ताः---`उभे वनस्पत्यादिषु युगपत्' इति, न येषामत्र प्रकरणे क्वचिदनुदात्तत्वं विधीयते । यदा तु तेषामामन्त्रितत्वम्, तदा द्व्युदात्तत्वमेव । इदं तर्हि प्रयोजनम्---अनादेरप्युदात्तस्यानुदीत्तत्वं यथा स्यात्, अन्यथा पदीदित्यधिकाराद् `आदेः परस्य' इत्यादेरेव स्यात्, ततश्च `तिङ्ङतिङः' इति इहैव स्यात्---देवदत्तः पचतीति, अत्र हि शप्तिपावनुदात्तौ, धातोः स्वरः; इह तु न स्यात्---देवदत्तः करोतीति, विकरणस्वरेण मध्योदात्तमेतत् पदम् । सर्वग्रहणे तु सति पदस्य सर्वोऽवयवोऽनुदात्तो भवतीत्यर्थः संपद्यते, लुटि प्रतिषेधात्सिद्धम्, यदयं `न लुट्' इति प्रतिषेधं शास्ति, तज्ज्ञापयति---`नात्रादेः परस्येत्येतद्व्याप्रियते' इति । न हि लुडन्तं किञ्चिदाद्युदात्तमस्ति । एवमपि ज्ञापकेनापवादे आदिविधावपनीते अलोऽन्त्यस्यैव स्वाद्---उभो कुरुत इत्यादौ ? अत्र असार्वधातुकस्य प्रत्यस्वरेणान्तोदात्तत्वं विकरणस्य तु निघातः, न तु विकरणस्वरः सतिशिष्टोऽपि सार्वधातुकस्वरं बाधते, तासेः लसार्वधातुकानुदात्तत्वविधानेन ज्ञापनात् । एवं तहि लृटि प्रतिषेधात्सिद्धम्, यदयं `गत्यर्थलोटा लृण्न चेत्' इति लृडन्तस्य प्रतिषेधं शास्ति, तज्ज्ञापयति---नात्र `अलोऽन्त्यस्य' इत्येतद्व्याप्रियत इति, न हि लृडन्तं किञ्चिदन्तोदात्तमस्ति, अदुपदेशात्परं लसार्वधातुकं निहन्यते ? नैतदस्ति; ज्ञापकमिडर्थमेतत् स्यात् भोक्ष्य इति । एतद्धेकादेशस्वरेणान्तोदात्तम् ।

एवं तर्ह्युक्तमेतत्---पदस्येति क्वचिद्विशेषणषष्ठ्यपि भवति न स्थानषष्ठ्येवेति, ततः किम् ? अनुदात्तविधौ विशेषणषष्ठ्याश्रयिष्यते, तत्सामानाधिकरण्यात्तिङिति षष्ठ्यर्थे प्रथमा, तिङन्तस्य पदस्यावयवोऽजनुदात्तो भवतीत्यर्थः, तत्र स्थानषष्ठ्यभावाद् `अलोऽन्त्यस्य' इति न प्रवर्त्तते, तस्मान्नार्थः सर्वग्रहणेन ? इत्यत आह---सर्वग्रहणमित्यादि । असति सर्वग्रहणे यत्र विधेयान्तरं नास्त्यामन्त्रितस्येत्यादौ, तत्रैवानुदात्तत्वं विधीयेत । तत्र ह्येतद्विधानार्थमामन्त्रिताद्यनूद्यते, विधेयान्तरसद्भावे तु न तस्यानुदात्तत्वं विधीयेत; वाक्यभेदप्रसङ्गात् । तथा हिसिद्धस्य वस्तुनो धर्मान्तरं शक्यते विधातुं नासिद्धस्य, न ह्यसति कुड्ये चित्रकर्म; ततश्च वांनावादय एकेन वाक्येन विधेयाः, अपरेण च तेषामनुदात्तत्वमिति वाक्यभेदः । विशिष्टविधानेऽप्यनेकार्थविधानाद्विधिगौरवलक्षणो वाक्यभेदः स्यादेव । सम्भवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते । सति तु सर्वग्रहणे तन्सामर्थ्याद्वाक्यभेदः सह्यते ? इत्याह---तेनेति ।

प्रयोजनान्तरमाह---युष्मदस्मदादेशाश्च सवस्य सुबन्तस्य यथा स्युरिति । अन्यथा केवलयोर्युष्मदस्मदोरेव स्युः, षष्ठ्येकवचने ङसोऽसि `ङसिङसोश्च' इति पूर्वैकादेशे यद्यपि दोषाभावः; तथापि वचनान्तरे दोषप्रसङ्गः । सर्वग्रहणेन तु सति युष्मदस्मद्भ्यां तदवयवकं पदं लक्ष्यत इति सर्वस्य पदस्य वांनावादयो भवन्तीति । ननु न पदस्येति वर्तते, विभक्त्यन्तं च पदम्, तत्रान्तरेणापि सर्वग्रहणं विभक्त्यन्तस्य भविष्यति ? इत्यत आह---यत्रापीति । भवेदेवं यत्र विभक्त्यन्तं पदम्, यत्र तु विभक्तौ पदं तत्र युष्मदस्मदोरेव प्रसङ्ग इत्यर्थः । ग्रामोवां दीयत इति । चतुर्थीद्विवचने, `स्वादिषु' इति पूर्वं पदं भवति ।।

आमन्त्रितस्य च ।। 8.1.19 ।।

सर्वमनुदात्तं भवतीति । आमन्त्रितसम्बन्धिनः सर्वेऽचोऽनुदात्ता भवन्तीत्यर्थः । एतच्चानुवृत्तस्य सर्वशब्दस्यान्वयमात्रं प्रदर्शितम्, न त्वत्रास्योपयोगः कश्चित् । समानवाक्य इत्यादि । अर्थैकत्वादिकं लौकिकं वाक्यलक्षणम्, इह तु पारिभाषिकं वाक्यम् । आख्यातं साव्ययकारकविशेषणं वाक्यमिति, आख्यातमित्येकत्वं विवक्षितम्, निमित्तनिमित्तिनोः समान एकस्मिन्वाक्य आधारभूते सति निघातादयो भवन्तीति वक्तव्यम्, किमर्थमित्याह---इहेति । `भवतीह विष्णुमित्रः, देवदत्तागच्छ' इति वाक्यद्वयमेतत्; तिङन्तद्वययोगात् । तत्र देवदत्तेत्यस्यामन्त्रितस्य निघातो न भवति । ननु च पदविधिरयम्, ततश्चासामर्थ्यादेवात्र न भविष्यति, अस्त्यत्र सामर्थ्यं विष्णुमित्रमन्विष्यान्यत्र गच्छन्तं देवदत्तं प्रतीदमुच्यते, ततश्च विष्णुमित्रस्येह भवनं देवदत्तागमनस्य निमित्तत्वेनोच्यत इतियस्ति व्यपेक्षा । क्वचिदेतदुदाहरणं न पठ्यते । अयं दण्ड इति । अस्तीति गम्यमानत्वादेतावदेकं वाक्यम् । अत्राप्यनेनेति सर्वनाम्ना परमृष्टस्य दण्डस्य करणत्वादस्ति सामर्थ्यमिति तिङन्तस्य निघातप्रसङ्गः । ओदनं पचेति । त्वत्कर्तृकत्वेन त्वत्स्वामिको मत्स्वामिकश्चौदनो भविष्यतीत्येवं पाकस्य युष्म दस्मदर्थस्य च व्यपेक्षाऽस्तीत्यादेशप्रसङ्गः, एवमतिप्रसङ्गपरिहारः प्रयोजनमित्युक्तम् । इदानीमव्याप्रिपरिहारोऽपि प्रयोजनमित्याह---इह चेति । किं पुनः कारणमेषूदाहरणेषु निघातादयो न स्युरित्यत आह---आमन्त्रितान्तमित्यादि । इह स्थिता मातेत्यन्वयः, न त्विह देवदत्तेति; नद्याः कूलमित्यन्वयः, न नद्यास्तिष्ठतीति; शालीनामोदनमित्यन्वयः, न शालीनां ते इति, ततश्चासामर्थ्यान्न स्युरित्यर्थः ।।

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नवौ ।। 8.1.20 ।।

द्विवचनान्तयोरेवेति । तेन वचनान्तरेणोदाहृतमिति भावः ।

स्थग्रहणमनर्थकम्, षष्ठ्यादिष्वादेशविधानादेव तात्स्थ्यंसिद्धेः ? इत्यत आह---स्थग्रहणमिति । श्रूयमाणविभक्तिकयोरेवादेशा यथा स्युः, लुप्तविभक्तिकयोर्मा भूवन्नित्यर्थः । श्रूयमाणायां हि विभक्तौ तत्स्थत्वं भवति, न पुनर्लुप्तायाम् । पत्ययलक्षणेनापि कार्यं शास्त्रं वाऽतिदिश्यते, न तात्स्थ्यम् । यदि वा तिष्ठतिरवमविहानावपि दृष्टः, यथा---समये तिष्ठ सुग्रीवेति, समयं मा विहासीरित्यर्थः । तेनायमर्थः---षष्ठीचतुर्थीद्वितीया अजहतोर्युष्मदस्मदोरादेशा भवन्तीति । इति युष्मत्पुत्र इति । इतिशब्दात्पदात्परयोः षष्ठ्यन्तयोर्युष्मदस्मदोः प्रत्ययलक्षणेन वान्नावौ न भवतः ।।

न चवाहाहैवयुक्ते ।। 8.1.24 ।।

चः समुच्चये, वा विकल्पे, ह अहेत्यद्भुते, ह खेदे च, एवोऽवधारणे । एभिर्युक्त इति । एभिर्योगे सतीत्यर्थः । यद्वा---एभिर्युक्ते युष्मदस्मदारर्थ इत्यर्थः । युक्तग्रहणमनर्थकम्, तृतीयानिर्द्देशत एव सिद्धम्, यथा `तुल्यार्थैरतुलोपमाभ्याम्' इत्यत्र ? इत्यत आह---युक्तग्रहणमिति । यदा युष्मदस्मदर्थगतान्समुच्चयादींश्चादयो द्योतयन्ति, तदा तैस्तयोः साक्षाद्योगः; तत्रैवायं प्रतिषेधो यथा स्यात्, युक्तयुक्ते मा भूदित्येवमर्थ युक्तग्रहणमित्यर्थः । एतदेव युक्तग्रहणं लिङ्गम्---अत्र प्रकरणे युक्तयुक्तस्यापि ग्रहणमिति, तेनोत्तरः प्रतिषेधो युक्तयुक्तेषु भवति ।।

पश्यार्थैश्चानालोचने ।। 8.1.25 ।।

दर्शनम् = पश्यः । अस्मादेव निपातनाद् भावे शप्रत्ययः, पाघ्रादिसूत्रेण पश्यादेशः, पश्योऽर्थो तेषां ते पश्यार्थाः, तदाह---पश्यार्था दर्शनार्था इति । यदि तु `पाघ्राध्माधेट्दृशः शः' इति कर्त्तरि शप्रत्ययः स्यात्, ततो द्रष्ट्रर्थैरित्यर्थः स्यात्, तथा चालोचनपर्युदासोऽनर्थकः स्यात्, न ह्यालोचनार्था द्रष्ट्रर्था भवन्ति । दर्शनं ज्ञानमिति । यद्यपि दृशिश्चक्षुर्विज्ञाने प्रसिद्धः, तथापि तस्य पर्युदासात् ज्ञानमात्रे दृशिरिह वर्तत इत्यर्थः । ग्रामः = जनसमुदायः । समीक्ष्य मनसा निरूप्येत्यर्थः ।।

सपूर्वायाः प्रथमाया विभाषा ।। 8.1.26 ।।

विद्यमानपूर्वादिति । `तेन सहेति तुल्ययोगे' इत्यत्र `तुल्ययोगे' इत्यपाधेः प्रायिकत्वाद्विद्यमानवचनस्यापि सहशब्दस्य समासः, `वोपसर्जनस्य' इति सभावः । युष्मदस्मदोर्विभाषाऽनन्वादेश इति । येयं युष्मदस्मदोर्विभाषा साऽनन्वादेशे भवति, अन्वादेशे तु नित्यमादेशविधिरित्यर्थः ।

अपर आहेति । पूर्वस्यैव वाक्यस्य व्याख्यानान्तरम् । पूर्वं विभाषाऽनुवादेन `विषयो नियम्यते' इत्युक्तम्, इदानीं तु `विशिष्टे विषये विकल्प एव विधीयते' इत्युच्यते । न केवलं सूत्रोक्तविषये ये प्राप्तास्त एव विकल्प्यन्ते, अपि तु सर्वे सर्वविषया इत्यर्थः ।

न तर्हीति । वक्तव्येनैव सिद्धत्वादिति भावः । अन्वादेशार्थमिति । ननु पूर्वम् `अन्वादेशे सूत्रं न व्याप्रियते, इत्युक्तम्, इदानीं तु `तत्राव व्याप्रियते' इत्युच्यते, तत्कोऽत्र निर्णयः ? इत्याह---तदयमिति । तदिति तत्रेत्यर्थे । वाक्योपन्यासे वा । पूर्वा व्याख्यया बाध्यत इत्यर्थः ।।

तिङो गोत्रादीनि कुत्सनाऽऽभीक्ष्ण्ययोः ।। 8.1.27 ।।

पचति गोत्रमिति । पचिर्व्यक्तीभावे, यथा---लोकपक्तिरिति, भोजनाद्यर्थं गोत्रं ख्यापयतीत्यर्थः, एवं हि कुत्सा भवति । पचतिपचति गोत्रमिति । विवाहादिविषये पुनः पुनर्गोत्रं ख्यापयतीत्यर्थः । तत्र कुत्साया अभावादाभीक्ष्ण्यग्रहणम् । `नित्यवीप्सयोः' इति द्विर्वचनम् । ब्रुवशब्दः कुत्सितवचनः, अत एवास्याभीक्ष्ण्ये पृथगुदाहरणं प्रदर्शितम् । पचति प्रवचनमित्यादावात्मप्रशंसया कुत्सा । प्रवचनम्=अध्यापनम् ।

`वा नाम' इति गणसूत्रं व्याचष्टे---नामेत्येतदिति । पचति पापमिति । पापमिति क्रियाविशेषणम् । खनति गोत्रं समेत्य कूपमिति । गोत्रं कुलं समुदितं भूत्वा कूपं खनतीत्यर्थः ।
किमिदं कुत्सनाऽऽभीक्ष्ण्यग्रहणं गोत्रादीनां पाठविशेषणम्---एतयोरर्थयोर्गोत्रादीनि भवन्ति, तानि च तिङः पराण्यनुदात्तानि भवन्तीति ? आहोस्विदनुदात्तविशेषणम्---तिङः पराणि गोत्रादीनि अनुदात्तानि भवन्त्येतयोरर्थयोरिति ? अस्मिन्विवादे निर्णयमाह---कुत्सनाभीक्ष्ण्यग्रहणं चेति । पठ्यत इति पाठः, सन्निवेशविशेषः । तस्य विशेषणं वेदितव्यम् । अयं चार्थो योगविभागाल्लभ्यते, `तिङो गोत्रादीनि' इत्येको योगोऽनुदात्तविधानार्थः, `कुत्सनाभीक्ष्ण्ययोः' इति द्वितीयो योगः, गोत्रादीनीत्येव, परिभाषेयम् । इह शास्त्रे गोत्रादीनि कुत्सनाभीक्ष्ण्यविषयाण्येव ग्राह्याणीति, तेन किं सिद्धंभवति ? इत्यत आह---तेनेति । अन्यत्रापीति । `चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः', `कुत्सने च गोत्रादौ' इत्यत्र ।।
तिङ्ङतिङः ।। 8.1.28 ।।
भवति पचतीति । पचतीत्येतद्भवति, पाकक्रिया भवतीत्यर्थः । तत्र साध्यसाधनभावेन द्वयोः क्रिययोरन्वयादस्ति सामर्थ्यम् । यथोक्तम्---पच्यादिक्रिया भवतिक्रियायाः कर्त्र्यो भवन्तीति । तत्र पाकस्य स्वसाधनानि प्रति साध्यस्यापि भवनं प्रति सिद्धत्वम् । यथाह भर्तृहरिः---
`तत्र यं प्रति साध्यत्वमसिद्धं तं प्रति क्रिया ।
सिद्धा तु यस्मिन्साध्यत्वं न तमेव पुनः प्रति' ।। इति ।
अस्त्येतत् ? किम् ! तर्हि अतिङ्ग्रहणमनर्थकम्; समानवाक्याधिकारात्, `समानवाक्ये' इति वर्त्तते, न चैकस्मिन्वाक्ये तिङन्तद्वयमस्ति, तदुक्तं पुरस्तात् । सूत्रकारेण तु समानवाक्याधिकारो न कृत इत्यतिङ्ग्रहणमकारि ।।
न लुट् ।। 8.1.29 ।।
श्वः कर्त्तेत्यादि । अथात्र निघाते प्रतिषिद्धेकः स्वरः श्रूयते ? इत्याह---तासेः परस्येति ।।
नीपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ।। 8.1.30 ।।
यद्यदार्थे च हेतौ च विचारे यदिचेच्चणः ।
हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ।।
कच्चित्प्रश्ने नेन्निषेधे प्रशंसायां कुवित्स्मृतम् ।
यत्राधारे निपातत्वं यदादीनां विशेषणम् ।।
समासे गुणभूतानामपि गत्यन्तरं न हि ।
नैव वाऽथं समासः सुबव्ययत्वेन लुप्यते ।।
तत्र बह्वृचाः---`नेच्चेद्' इति निपातसमाहारमधीयते---नेदेवमायुनजन्त्र देवाः । अन्यश्चेन्नाभिगच्छतीति चेदर्थे वर्त्तत इति । य एव समुच्चयादिषु दृष्टश्चशब्दः स एव चेदर्थे वर्त्तते, तदर्थवर्त्तिनस्तु चिह्नं णकारः । तथा च चादयोऽनुदात्ता इत्ययं चेदर्थोऽप्यनुदातः, इन्द्रश्च मृडयाति नः; नतः पश्चादघं नशत्, इन्द्रश्चेदस्मान्मृडयेत्, सुखयेदित्यर्थः । त्वं च सोम नो वशो जीवातुं न मरामहे---हे सोम त्वं चेदस्मान् जीवातुं जीवितुं वशः उश्याः कामयेथा इत्यर्थः ।
समुच्चयादिषु यश्चशब्द इति । एष्वर्थेषु न भवतीत्यर्थः । उदाहरणेषु करोतिशब्दो विकरणस्वरेण मध्योदात्तः । भुङ्क्त इति । उदात्तनिवृत्तिस्वरेणान्तोदात्तः । अधीत इति । `अहन्विङोः' इति लसार्वधातुकानुदात्तत्वप्रतिषेधादन्तोदात्तः । इणः शतरि रूपमिति । `इणो यण्' इति यणादेशः । ननु प्रतिपदोक्तत्वाद्यद्यादिभिः साहचर्याच्च निपातस्यैव ग्रहणं भविष्यति ? एवं तर्ह्येतज्ज्ञापयति---अत्र प्रकरणे नेदमुभयं व्यवस्थापकमिति । तेन `यावद्यथाभ्याम्' इत्यत्र `यत्तदेतेतेभ्यः परिमाणे वतुप्' इति व्युत्पादितस्य लाक्षणिकस्यानिपातस्यापि यावच्छब्दस्य ग्रहणं भवति---तावदुषो राधो अस्मभ्यम्, रास्व यावत्स्तोतृभ्यो अरदो गृणाना इति; यावतोऽश्वान् प्रतिगृह्णीयादिति च ।
यत्र क्व चेति । अत्र यत्रेत्यस्य उत्तरमित्यनेन साक्षात्सम्बन्धः । दधस इति । `तध धारणे' अनुदात्तेत् । इह---
हन्ताऽहं पृथिवीमिमां निदधानीह वेह वा ।
हन्तो नु किमास से प्रथमं नो रथं कृधि ।। इति छान्दसत्वान्निघातः ।।
नह प्रत्यारम्भे ।। 8.1.31 ।।
नहेति निपातसमाहारः प्रतिषेधे वर्त्तते । प्रत्यारम्भः=पुनरारम्भः । तस्य विषयमाह---चोदितस्येति । भुङ्क्ष्व, अधीष्वेत्येवं चोदितस्य कर्तष्यतयोपन्यस्तस्य भोजनादेरवधीरणेऽवज्ञाते सति तस्यावधीरयितुरुपालिप्सया=उपालब्धुमिच्छया तस्यैव भोजनादेः प्रतिषेधेन सम्बन्धः प्रत्यारम्भः, पुनरुपन्यासः क्रियते इति यावत् ।।
अङ्गाप्रातिलोम्य ।। 8.1.33 ।।
प्रातिलोम्यम्=प्रतिकूलकारित्वम्, ततोऽन्यदभिमतकारित्वमप्रातिलोम्यम् । एवं चानुलोम्य इति वक्तव्यम् । अङ्गशब्द उदाहरणेऽनुज्ञायाम् । प्रत्युदाहरणे त्वमर्षे ।।
हि च ।। 8.1.34 ।।
हिशब्दोऽवधारणे हेतौ वा, स च प्रत्युदाहरणे त्वमर्षे ।।

छन्दस्यनेकमपि साकाङ्क्षम् ।। 8.1.35 ।।
अत्र हेतुहेतुमद्भावस्य द्योतको हिरित्यनेकमपि तिङन्तं हियुक्तं भवति । तत्र पूर्वेण सर्वस्य निघातप्रतिषेधे प्राप्ते क्वचिदनेकस्य क्वचिदेकस्य यथा स्यादिति वनचम् । तदाह---कदाचिदिति । तत्र छन्दसि दृष्टानुविधानाद्यथाप्रयोगं व्यवस्था । अनृतं हीति । पाप्मा = मद उच्यते । यस्मादसौ मत्तोऽनृतं वदति तस्मादनृतवदनदोषेण युज्यत इत्यर्थः ।
उदजयदित्याद्युदात्तमिति । अत्राजयदित्याद्युदात्तमित्यर्थः । अजनिष्ट गर्भमिति अन्तर्भावितण्यर्थत्वाज्जनेरत्र सकर्मकत्वम् ।।
यावद्यथाभ्याम् ।। 8.1.36 ।।
यावत्साकल्ये, अध्यवसाये वा, यथा योग्यतादिषु । `यावद्यथाभ्याम्' इति तृतीयेति दर्शयितुं परभूतयोरपि प्रयोग उदाहृतः । तेनैतदपि न चोदनीयम्---`यद्वृत्तान्नित्यम्' इत्येव यथाशब्दे यावच्छब्दे च वतुबन्तौ सिद्धः प्रतिषेध इति ।।
पूजायां नानान्तरम् ।। 8.1.37 ।।
द्वौ प्रतिषेधौ प्रकृतमर्थं गमयत इत्याह---कि तर्ह्यनुदात्तमिति । यावद्देवदत्त इति । ननु चोत्तरत्र नियमो विज्ञास्यते---व्यवाये यदि भवति उपसर्गेणैवेति ? एवं तर्ह्युत्तरत्रास्य प्रयोजनम्---उपसर्गव्यपेतस्य यावद्यथाशब्दयोश्च मध्ये शब्दान्तरं मा भूत् । अथ तु `व्यवाये यदि भवति उपसर्गेणैव' इत्यस्मादेव नियमात्तत्राप्रसङ्गः ? ततोऽनन्तरग्रहणं शक्यमकर्त्तुम् ।।
उपसर्गव्यपेतं च ।। 8.1.38 ।।
व्यवायः = व्यवधानम् । अनन्तरमित्येवेति । तच्चानन्तर्यं सोपसर्गस्य, न तिङन्तमात्रस्य ।।
तुपश्यपश्यताहैः पूजायाम् ।। 8.1.39 ।।
तुप्रभृतीनि पूजाविषयाणि । माणवकस्तु भुङ्क्त इति । आश्चर्ये तुशब्द इति भोजनस्य पूजा गम्यते, एवमन्यत्रापि---पश्य मृगो धावतीति । तत्त्वकथनमेतत् ।
ननु `पूजायां नानन्तरम्' इत्यतः पूजायामित्यनुवर्त्तत एवं, तत्किं पूजायामित्यनेन ? तत्राह---पूजायामिति वर्तमान इति । तद्धीति । ततश्च तदनुवृत्ताविहापि `न लुट्' इत्यादिके विषये प्रतिषेधस्य प्रिषेधः स्यात्, मा भूदेवम्; निघातस्यैव प्रतिषेधो यथा स्यादित्येवमर्थं पूजाग्रहणमित्यर्थः । किञ्च---अनन्तरमित्येवं तदभूत्, इह त्वविशेषेणेष्यते ।।
अहो च ।। 8.1.40 ।।
पृथग्योगकरणमुत्तरार्थमिति । उत्तरो योगोऽहोयोग एव यथा स्यात्, तुप्रभृतिभिर्योगे मा भूत् ।।
शेषे विभाषा ।। 8.1.41 ।।
अशूयावचनमेतदिति । अनाश्वर्यभूतमेव वस्त्वसूयन्नाश्चर्यवत्प्रतिपादयतीत्यर्थः ।
शेषवचनं किम्, यावता योगविभागसामर्थ्यादेव पूर्वप्रकृतेषु किञ्चिन्नानुवर्त्तत इति ज्ञातम्, तत्र चानुकृष्टत्वात् `पूजायाम्' इत्येतन्निवर्तिष्यते ? अत आह---पूजायामित्यस्येति ।।
पुरा च परीप्सायाम् ।। 8.1.42 ।।
पुराशब्दोऽत्र भविष्यदासत्ति द्योतयतीति । भविष्यतो विद्योतनादेरध्ययनान्तरायभूतस्याचिरकालभावित्वं द्योतयति, तेनात्र त्वरा गम्यते इति भावः । विद्योतनादावध्ययनं धर्मशास्त्रे प्रतिषिद्धम्, अतस्तदुपन्यासेन त्वरितमधीष्वेति गम्यते इत्यर्थः । उदाहरणे `यावत्पुरानिपातयोः' इति भविष्यदर्थे लट्, प्रत्युदाहरणे `लट् स्मे' इति । अत्र भूतकालविप्रकर्षमिति । भूतस्याध्ययनस्य चिरकालप्रवृत्तत्वं द्योतयति । तेन नात्र त्वरा गम्यत इति भावः ।।
नन्वित्यनुज्ञैषणायाम् ।। 8.1.43 ।।
किंचित्कर्तु स्वयमेवोद्युक्तस्यैवं क्रियतामित्येवं रूपोऽभ्युपगमः = अनुज्ञा । सूत्रार्थमुदाहरणेन दर्शयति---करणं प्रतीति । उपलक्षणमेतत्, करणगमने प्रतीत्यर्थः । उदाहरणे `वर्त्तमाने लट्' । प्रत्युदाहरणे तु भूते `ननौ पृष्टप्रतिवचने' इत्येनेन ।`अङ्गाप्रतिलोम्ये' इत्यादिवत् सिद्धे इतिकरण एकनिपातोऽयमिति दर्शनार्थः; अन्यथा द्वयोरपि निपातयोर्ग्रहणं सम्भाव्येत ।।
किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषइद्धम् ।। 8.1.44 ।।
अप्रतिषिद्धमिति । अप्रतिषिद्धार्थमित्यर्थः ।
पूर्वं किंयुक्तमिति । तत्समीपे किमः श्रूयमाणत्वात् । उत्तरं तु न किंयुक्तमिति । विपर्ययात् ।
अपरे इत्यादि । न समीपे श्रूयमाणत्वं किंशब्देन सम्बन्धे हेतुः, किन्तु संशयविषयत्वम् । तच्च द्वितीयस्याप्यस्ति, अतस्तस्यापि तेन योग इत्युभयत्र प्रतिषेध इत्यर्थः । ये त्वाहुः---पूर्वं किंयुक्तमिति, ते मन्यन्ते---अस्तु द्वयोः संशयविषयत्वम्, किंशब्देन तु समीपे श्रुतक्रियाविषय एव प्रश्नो द्योत्यते, क्रियान्तरविषयस्तु प्रश्न आहोस्विदित्यनेन, क्रियाप्रश्न इति चोच्यते, तस्मात्तस्यैव निघातप्रतिषेध इति ।।
लोपे विभाषा ।। 8.1.45 ।।
प्रकृतत्वात्किम एव लोपो विज्ञायत इत्याह---किमो लोप इति ।
क्व चास्येति । शास्त्रे क्वचिदपि किमो लोपस्याविहितत्वात् प्रश्नः । न शास्त्रीयस्यैवादर्शनस्य लोपसंज्ञा, किं तर्हि ? अदर्शनमात्रस्येत्युत्तरम् । यत्रेति । न

च प्रयुज्यत इति । अर्थप्रकरणादिना गम्यमानत्वात् । उदाहरणे आहोस्विच्छब्दः पक्षान्तरप्रश्ने, स च नान्तरेण पूर्वप्रश्नमित्यर्थात् पूर्वत्र किमर्थो गम्यते, तदाह---विनैव किमेति ।

प्राप्तविभाषेयमिति । कथं पुनः प्राप्तिः, यावता किंशब्देन योगेन पूर्वो योगः ? तत्राह---किमर्थेनेति । पूर्ववत्प्रत्युदाहरणानीति । तान्येव किंशब्दरहितानीत्यर्थः ।।

एहिमन्ये प्रहासे लृट् ।। 8.1.46 ।।

एहिमन्य इत्यनेनेति । समुदायाभिप्रायमेकवचनम्, अन्यथा आख्याते द्वे आङ् चापर इति बहुवचनप्रसङ्गः । उदाहरणे `प्रहासे च मन्योपपदे' इत्यादिना पुरुषव्यत्ययः ।

सुष्ठु च मन्यसे इति । भूतमर्थं दर्शयन् प्रहासाभावमाह, अत एव पुरुषव्यत्ययोऽपि न कृतः ।

गत्यर्थलोटा लृडित्येव सिद्ध इति । आङ्पूर्वादिणो लोट्, सिपो हिः । अन्यत्र मा भूदिति । क्वान्यत्र मा भूत् ? वृत्तिकारेण यत्प्रत्युदाहृतम्--एहि मन्यस इत्यादि तत्र ।

कथं पुनरेहिमन्ये इत्यनेन योगनियमः क्रियमाण एहि मन्यस इत्यनेन योगनिवृत्तिं करोति ? इत्याह---उत्तमोपादानमतन्त्रमिति । अतन्त्रत्वे कारणमाह---प्रहास एव हीति । तन्त्रत्वे नियमस्य व्यावर्त्यं न सम्भवेदित्यर्थः । भाष्ये तु प्रत्युदाहरणेऽप्युत्तम एव प्रयुक्तः, तत्रायमर्थः---एहि रथेन त्वं यास्यसीत्येवमहं मन्य इति ।।

जात्वपूर्वम् ।। 8.1.47 ।।

जात्वित्येतदपूर्वमिति । अथ तिङन्तविशेषणमपूर्वत्वं कस्मान्न भवति, युक्तं चैतत्, विशषणेन सम्बन्धुं योग्ये सति निमित्तिनि निमित्तस्याप्रधानस्य न हि युक्तं विशेषणम् ? उच्यते; यदयम् `आहो उताहो चानन्तरम्' इत्यत्रानन्तरग्रहणं करोति, ततो ज्ञायते---निमित्तस्येदं विशेषणमिति; अन्यथा तत्रापि `अपूर्वम्' इत्यनुवृत्तेरेव केवलतिङन्तस्यानन्तय लभ्यत इति किं तेन ! ननु च शेषप्रक्लृप्त्यर्थं तत्स्यात्---`शेषे विभाषा', कश्च शेषः ? सान्तरः शेष इति ? अन्तरेणाप्यनन्तरग्रहणं प्रक्लृप्तः शेषः । कथम् ? अपूर्वमिति प्रकृतम्, सपूर्वः शेष इति ।।

किवृत्तं च चिदुत्तरम् ।। 8.1.48 ।।

वृत्तिमित्यधिकरणे क्तः, किमो वृत्तं किंवृत्तमिति, `अधिकरणवाचिनश्च' इति कर्त्तरि षष्ठी, `अधिकरणवाचिना च' इति समासप्रतिषेधे प्राप्तेऽस्मादेव निपातनात्समासः । यदि यत्र किंशब्दो वर्तते तत्सर्वं गृह्येत---किमीयः, कैमायनिः, किंतरामित्यादेर्ग्रहणप्रसङ्ग इति मत्वा परिसञ्चष्टे---किंवृत्तग्रहणेनेति । चिदुत्तरमित्येतत्किंवृत्तस्य विशेषणम्, न तिङन्तस्य; पूर्वोक्तात् सामान्यापेक्षया ज्ञापकात् ।।

आहो उताहो चानन्तरम् ।। 8.1.49 ।।

अपूविमित्येवेति । अत एवोताहोग्रहणम्, उतशब्दपूर्वत्वादाहोशब्दस्य ।।

शेष विभाषा ।। 8.1.50 ।।

कश्च शेष इति । बहूनां प्रकृतत्वात्प्रश्नः । यदन्यदन्तरादिति । प्रतिषेधस्य निमित्तभूतमाहो--उताहीग्रहणं तावदवश्यमनुवर्त्यम्, उताहोग्रहणाच्चापूर्वमित्यप्यनुवर्तते; तत्र पारिशेष्यादनन्तरापेक्ष एव शेष इति भावः ।।

गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् ।। 8.1.51 ।।

गमिना समानार्था गत्यर्था इति । अर्थप्रदर्शनमेतत्, गतिरर्थो येषामिति तु विग्रहः, गत्यर्थलोटा युक्तमिति योगः, पुनरर्थद्वारको निमित्तनिमित्तिभावः, लोडन्तवाच्यं हि निमित्तं लृडन्तवाच्यस्य । न चेत्कारकं सर्वमन्यद्भवतीति । सर्वं चेत्कारकमन्यत्, तदा निघातप्रतिषेधो न भवतीति भावः । अत्र---

लोडन्ते च लृडन्ते च यावत्किञ्चन कारकम् ।
कृह्येत यदा तत्सर्वं वाच्यावाच्यविवेकतः ।।

तदेहापि तर्हि प्राप्नोति---

`वह ब्राह्मण शालींस्त्वं पितैतांस्तव भोक्ष्यते' इति ?

यत्र हि सर्वं भिद्यते, तत्रैव न भवितव्यम्, यथा वृत्तावुपन्यस्तयोः प्रत्युदाहरणयोः ।
न चात्र भिद्यते सर्वमभेदाच्छालिकर्मणः ।

अथायमर्थः स्यात्---सर्वस्मिन्कारकेऽनन्यस्मिन्नघातप्रतिषेधः, न तु क्वचिदपि भिन्न इति तदेहापि न स्यात्---आगच्छ देवदत्त ग्राममोदनं भोक्ष्यस इति, भिद्यते ह्यत्र कर्म, तस्माद्व्याख्येयमेतत् ? तत्राह---यत्रैवेति । एवकारेण वाच्यव्यतिरिक्तस्य निरासः, न तु सर्वस्यानन्यत्वं विवक्षितम्, तत्स्पष्टीकृतम् । कर्तृकर्मणी एवेति । एतच्च प्रत्यासत्तेर्लभ्यते, प्रत्यासन्नं हि तत्तस्य, यत्तेनैवाभिधीयते । उदाहरणेषु प्रथमतृतीययोः सर्वमनन्यत् । द्रक्ष्यसीत्यस्य तु निघातप्रसङ्गश्चिन्त्यः; नानावाक्यत्वात्, द्वितीयचतुर्थयोर्वाच्यमात्रं वहेर्गुणभूतगमनाभिप्रायं गत्यर्थत्वम्, प्रापणार्थस्त्वयम् । तथा च---

`नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च' ।

इति भेदेन गणनं कृतम् । ननु च शक्तिः कारकम्, सा च प्रतिक्रियं भिद्यते, तत्कथमिहाभिन्नं कारकम् ? शक्तिशक्तिमतोर्भेदस्याविवक्षितत्वाददोषः । आगच्छेरिति । लिङयं न लेट् । पश्यतीति । लडयं न लृट्, प्रत्युदाहरणयोः सर्वमन्यत् । कारकशब्देनापि सूत्रे कारकव्यक्तिरेवाश्रीयते, तेन

कर्तृकर्मत्वाभेदेऽपि व्यक्तिभेदात् कारकभेदः---त्वं चाहं च द्रक्ष्याव इति । अक्रियमाणे सर्वग्रहणे यत्र वाच्यं न भिद्यते तत्रैव भवितव्यम्, इह च भिद्यते वाच्यम्---एकत्रैकम्, अपरत्र द्वयमिति निघातप्रतिषेधो न स्यात् । क्रियमाणे तु सर्वग्रहणे यथा सिध्यति, तथा दर्शयति---लृडन्तवाच्ये हीति ।।

लोट् च ।। 8.1.52 ।।

शाधीति । शार्सेर्लोट्, सिप्, सिपो हिः, `शा हौ' इति शादेशः, तस्यासिद्धत्वात् झल्लक्षणं धित्वम् । प्रशाधीति प्रायेण पाठः, स न युक्तः; सोपसर्गत्वेनोत्तरसूत्रविषयत्वात् ।

पृथग्योगकरणमुत्तरार्थमिति । उत्तरो विकल्पो लोट एव यथा स्यात्, लृटो मा भूदिति ।।

हन्त च ।। 8.1.54 ।।

हन्त प्रभुञ्जावहै इति । भुजेर्लोट्, `भुजोऽनवने' इत्यात्मनेपदम्, वहिः, टेरेत्वम्, `आडुत्तमस्य पिच्च', `एत ऐ', अनुदात्तेत्वाल्लसार्वधातुकमनुदात्तत्वम्, विकरणस्वरः ।

आम एकान्तरमामन्त्रितमनन्तिके ।। 8.1.55 ।।

अन्तरयतीत्यन्तरम् = व्यवधायकम् । एकमन्तरं यस्य तदेकान्तरम्, उदाहरणे निघाते प्रतिषिद्धे षाष्ठिकमाद्युदात्तत्वम्, `दूराद्धूते च' इति प्लुतः; भवच्छब्दस्य `विभाषा भवद्भगवदघवताम्' इति रुत्वम्, अवशब्दस्य च ओकारः, `भोभगो' इत्यादिना यत्वम्, तस्य `हलि सर्वेषाम्' इति लोपः ।

ननु च `आमन्त्रितं पूर्वमविद्यमानवत्' इति भोः शब्दस्याविद्यमानत्वादेकान्तरता नोपपद्यते ? अत आह---भो इत्येतदिति ।

तदुभयमप्यनेन क्रियत इति । कथं पुनरप्रकृताया असंशब्दितायाश्चैकश्रुतेः प्रतिषेधः शक्यो विज्ञातुम् ? उच्यते; नञत्र विपक्षवचनः, अधर्मानृतादिवत्, अन्तिकविरुद्धमनन्तिकम्, दूरमित्यर्थः, तत्र चैकश्रुतिरुच्यते, ततश्च पचसि देवदत्तेत्यादावन्तिके सावकाशमामन्त्रितनिघातं बाधित्वा एकश्रुतिः प्राप्नोति, सा तावत्प्रतिषिद्ध्यते, ततोऽपवादे प्रतिषिद्ध उत्सर्गभूतो निघातः प्राप्नोति, सोऽपि प्रतिषिध्यते, एकश्रुतिमात्रप्रतिषेधे हि तत्रैवायं ब्रूयात्---नाम एकान्तरमिति । एवं हि `आमन्त्रितमनन्तिके' इति च न वक्तव्यं भवति, सोऽयमेवं सिद्धे यन्निघातप्रकरणे इदं ब्रवीति तेन विजानीमः---निघातोऽपि प्रतिषिध्यत इति । केवलस्य निघातस्येकश्रुत्या बाधितस्य प्रतिषेधोऽनर्थक इति सामर्थ्यादुभयोः प्रतिषेधः ।

ननु चैकश्रुतिरपि देवदत्ता3 आगच्छेत्यादौ सावकाशा कथमां भो देवदत्त इत्यादौ निघातस्य बाधिका, प्रत्युत परत्वादेकश्रुतेर्निघात एव बाधक इति तस्यैवात्र प्रसङ्ग इति प्रतिषेधोऽपि तस्यैव न्याय्यः, तस्य च प्रतिषेधे एकश्रुतिः स्यादेव ? अत्राहुः---पदद्वयमात्रनिबन्धनत्वादन्तरङ्गो निघातः पूर्वं प्रवर्त्तते, ततो दूरात्सम्बोधनमधिकं निमित्तमपेक्षमाणैकश्रुतिरिति सैवानन्तरं प्राप्नोति, तां तावद्बाधते पूर्वोक्तेन न्यायेन निघातमपीति सुष्ठूक्तम्---तदुभयमनेन क्रियत इति । यथैव तर्हि एकश्रुतिर्बाध्यते, तथैव प्लुतोदात्तोऽपि बाध्येत ? अत आह---प्लुतोदात्तः पुनरिति । अपरेषामिति । ते मन्यन्ते---सादृश्येऽत्र नञ्, न विपेक्षे; अन्यथा दूर इत्येव ब्रूयादिति प्राप्तिरेव नास्ति, अदूरत्वात् । कथं तर्हि प्लुत उदाह्रियते ? अत आह---प्लुतोऽपीति ।।

यद्धितुपरं छन्दसि ।। 8.1.56 ।।

जाये स्वो रोहावैहीति । रुहेर्लोट्, वस्, शप्, `आडुत्तमस्य पिच्च', `लोटो लङ्वत्' इति लङ्वद्भावात् `नित्यं ङितः' इति सलोपः, आह्पूर्वादिणो लोट्, सिपो हिः, एहीत्यनेन परभूतेन युक्तस्य रोहावेत्यस्य `लोट् च ' इति प्राप्तो निघातप्रतिषेधो नियमेन निवर्त्यते, तेन स्वशब्दाश्रयो निघातो भवति । ननु `परमपि छन्दसि' इति वचनात् स्वः शब्दस्य पूर्वाङ्गवद्भावज्जायेस्वरित्यामन्त्रितम्, ततश्च `आमन्त्रित पूर्वमविद्यमानवत्' इत्यविद्यमानत्वान्निघातो न प्राप्नोति, प्रतिषिध्यतेऽत्राङ्गवद्भावः---अव्ययानां प्रतिषेध इति ? नैवम्; अत्राङ्गवद्भावः प्राप्नोति, उक्तं हि तत्र---`षष्ठ्यामन्त्रितकारकवचनम्' `तन्निमित्तग्रहणं च' इति । न हि स्वः शब्दः षष्ठ्यन्त आमन्त्रितकारकं तन्निमित्तं वा स्वरे वाङ्गवद्भावो नाविद्यमानवत्त्वम् । स्वः शब्दस्य `रो रि' इति लोपो न भवति, उत्वं च भवति; छान्दसत्वात् । अथेदानीं रोहावेत्यनेन युक्तस्य एहीत्यस्य `लोट् च' इति निघातप्रतिषेधः कस्मान्न भवति, न रुहिर्गत्यर्थः, `गत्यर्थाकर्मक' इत्यत्र पृथग्ग्रहणात् ? यदि न गत्यर्थः, आरोहन्ति हस्तिनं मनुष्याः आरोहयति हस्ती मनुष्यान्, `गतिबुद्धिप्रत्यवसानार्थ' इति कर्मसंज्ञा न प्राप्नोति । तस्मादुपरिगमनरूपव्यापारो रुहेरर्थः । `गत्यर्थाकर्मक' इत्यत्र च रुहिग्रहणं प्रपञ्चार्थम् । एहीत्यस्य तु निघातप्रतिषेधो न भवति; `विभाषित सोपसर्गमनुत्तमम्' इति वचनात् ।।

चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ।। 8.1.57 ।।

इहापीति । न केवलं तिङो गोत्रादीनीत्यत्रैवेत्यपिशब्दार्थः । तत्र हेतुस्तत्रैव प्रतिपादितः । शुक्लीकरोति चनेति । अगतेरिति प्रतिषेधाभावादत्र निघातप्रतिषेधो भवत्येव । यत्काष्ठमिति । शुक्लीशब्दस्य निघातो न भवति ।।

चादिषु च ।। 8.1.58 ।।

त इह गृह्यन्त इति । प्रत्यासत्तेः । `चादयोऽसत्वे' इत्यत्र येषां ग्रहणं ते विप्रकृष्टः । `समुच्चयो विकल्पश्चानेकस्य धर्मः' इत्युत्तरसूत्रे वक्ष्यति, अतः खादति चेत्यस्योपन्यासः । न त्वस्य निघातप्रसङ्गः; नानावाक्यत्वात् । खादति हेत्यादेस्तु प्रक्रमाभेदायोपन्यासः ।

परंतु निहन्यत एवेति । प्रशब्दात्समानवाक्यगतात् पदात्परत्वात् ।।

चवायोगे प्रथमा ।। 8.1.59 ।।

अगतेरिति । पूवसूत्र इत्यादि । अत एव पूर्वसूत्रे प्रत्युदाहरणावसर उक्तम्---प्रथमस्यात्र तिङन्तस्य चवायोगे प्रथमेति निघातः प्रतिषिध्यत एवेति । प्रथमेति स्त्रीलिङ्गस्य निर्वाहमाह---प्रथमा तिङ्विभक्तिरिति ।

प्रथमाग्रहणव्यावर्त्यस्य द्वितीयादेः सम्भवमाह---चवायोगो हीति ।।

हेति क्षियायाम् ।। 8.1.60 ।।

आचारभेदः = आचारोल्लङ्घनम् । उदाहरणे---उपाध्याये पदातौ गच्छति शिष्यस्य रथेन गमनं प्रतिषिद्धम्---इत्याचारभेदः ।।

अहेति विनियोगे च ।। 8.1.61 ।।

नानाप्रयोजन इति । अनेक प्रयोजनो नियोगः = प्रेषणम् । प्लुतश्चेति । स पुनः क्षियायां क्षियाहेतुकः, विनियोगे प्रैषहेतुकः ।।

चाहलोप एवेत्यवधारणम् ।। 8.1.62 ।।

उदाहरणे चलोपं दर्शयति---ग्रामं चेति । एवमहलोपेऽपि द्रष्टव्यम् । तत्र प्रथमे ग्राम कर्मकस्यारण्यकर्मकस्य च देवदत्त एव कर्तेति समानकर्तृकत्वम्, द्वितीये तु विपर्ययान्नानाकर्तृकता द्रष्टव्या । अनवक्लृप्तिः = असम्भवनम् । यो हि देवदत्तस्य भोजनं क्वचिदपि न सम्भावयति, स एवं प्रयुङ्क्ते---क्वेव भोक्ष्यस इति । `एवे चानियोगे' इति पररूपत्वम् । क्वचित्तु वृत्तावेवैतत् पठ्यते ।।

चादिलापे विभाषा ।। 8.1.63 ।।

पूर्वो योग एवशब्दप्रयोगे नित्यार्थः ।।

वैवावेति च छन्दसि ।। 8.1.64 ।।

वै स्फुटार्थे, क्षमायां च । वाव प्रसिद्धौ, स्फुटार्थे च ।

एकान्याभ्यां समर्थाभ्याम् ।। 8.1.65 ।।

समौ तुल्यावर्थौ ययोस्तौ समर्थौ, शकन्ध्वादिषु दर्शनात्पररूपत्वम् । निपातनाद्वाऽन्तलोपः । परस्परं समानार्थता न; तिङन्तेन असम्भवात् । तिङन्तेन सङ्गताभ्यामित्ययं त्वर्थो न भवति, `चवायोगे प्रथमा' इत्यतो योगग्रहणानुवृत्तेरेवास्यार्थस्य सिद्धत्वात् । जिन्वतीति । जिविः प्रीणानार्थः, इदित्त्वान्नुम्, लट्तिप्शपः । चाकशीतीति । काशिना समानार्थः कशिः प्रकृत्यन्तरमस्तीत्युक्तम्, तस्यैतद्यङ्लुकि रूपम् ।

एकशब्दस्य व्यवस्थार्थं चेति । अतस्तस्यैव प्रत्युदाहरणं दर्शितम्, नान्यशब्दस्येति भावः । व्यभिचारित्वात्तस्येति । एकशब्दो ह्यन्याथ व्यभिचरतीति । नानार्थो ह्ययमिति हि `एको गोत्रे' इत्यत्र दसितम् । तत्रासति समर्थग्रहणेऽन्यशब्देन भिन्नार्थस्यापि ग्रहणप्रसङ्गः । न च साहचर्यमत्र प्रकरणे व्यवस्थापकमिति `निपातैर्यद्यदिहन्त' इत्यत्रावोचाम ।।

यद्वृत्तान्नित्यम् ।। 8.1.66 ।।

`किंवृत्तं च चिदुत्तरम्' इत्यत्र किंवृत्तशब्दस्य दर्शिता व्युत्पत्तिरिहानुगन्तव्या । एतन्नाश्रीयत इति । तदाश्रयणे हि यद्र्यङ्, यदीयम्, यादायनिरित्यादिभ्यः परस्य न स्यात् । जुहुम इति । प्रत्ययस्वरेणान्तोदात्तमेतत्, `अभ्यस्तानामादिः', `भीह्रीभृहुमद' इति चोभयत्रापि अचीति वर्त्तते । यद्र्यङिति । यदञ्चति, क्विन्, `विष्वग्देवयोश्च' इति टेरद्र्यादेशः ।

कथं पुनः पञ्चमीनिर्द्देशे सति यत्कामास्ते, यद्र्यङ् वायुरित्यादौ व्यवधाने भवति ? अत आह---पञ्चमीनिर्देशेऽप्यत्रेति । एतच्चोत्तरसूत्रे ज्ञापयिष्यते । याथाकाम्ये वेति । याथाकाम्यम् = यथेच्छप्रवृत्तिः, देशकालानपेक्षा, तत्र गम्यमाने वा निघातप्रतिषेधः, यत्र क्वचन यजते ।।

पूजानात् पूजितमनुदात्तं काष्ठादिभ्यः ।। 8.1.67 ।।

`काष्ठादिभ्यः' इति वार्तिके दृष्टं सूत्रावयवत्वेन पठितत्वात्तदनुरोधेन पूजनादित्येकवचनं बहुवचनस्थान इति व्याचष्टे---पूजनेभ्यः काष्ठादिभ्य इति । उत्तरपदमिति । उत्तरसूत्रे तिङ्ग्रहणादस्य च सूत्रस्य समासविषयत्वात्सुबन्तमिति द्रष्टव्यम् । काष्ठादयश्चैतेऽद्भुतपर्यायाः पूजनवचना भवन्ति, तत्र येषां वृत्तिविषय एवाद्भुतपर्यायत्वममातापुत्रादीनां तेष्वन्यपदेन विग्रहः । काष्ठाध्यापक इति क्रियाविशेषणम् । काष्ठशब्दो द्वितीयान्तः समस्यते । कृद्योगलक्षणा तु षष्ठी क्रियाविशेषणेपु न भवति, धात्वर्थं प्रति यत्कर्म तत्रैव षष्ठीः, कर्तृपदेन साहचर्यात् । यो हि धात्वर्थं प्रति कर्त्ता तत्र षष्ठी, तत्साहचर्यात् कर्मापि तादृशमेव गृह्यते । विशेषणं तु धात्वर्थेन समानाधिकरणत्वान्न तं प्रति कर्म । सर्वथा क्रियाविशेषणान्न षष्ठी भवति, अत एव मलोप इति वक्ष्यते । षष्ठ्यां सत्यां मकाराभावादनुपपन्नमेततस्यात् । कथं पुनः कर्तृप्रधाने कृदन्ते गुणभूतायाः क्रियाया विशेषणेन सम्बन्धः, साधनसम्बन्धवदुपपद्यते; तद्यथा---ग्रामं गत इत्यादौ गुणभूताया अपि क्रियायाः साधनेन योगः, तथा विशेषणेनापि नानुपपन्नः । काष्ठाभिरूपक इति । आभिरूप्यं काष्ठेन विशेष्यत इति नपुंसकप्रथमान्तस्य समासः । एवं सर्वत्र प्रवृत्तिनिमित्तमात्रेण काष्ठादीनामन्वयाद् द्रव्यवाचिभिः सामानाधिकरण्याभावात् मयूरव्यंसकादित्वमाश्रितम् । समासे चेत्यादि । चकारोऽवधारणे, यदि समासे एवैतदिष्यते, कथं वार्तिककारेणोक्तम्---पूजितस्यानुदात्तत्वे काष्ठादिग्रहणं मलोपश्चेति; न हि समासे तेषामन्त्यो मकारः सम्भवति, विभक्तेर्लुप्तत्वात् ? इत्यत आह---मलोपश्चेत्यनेनापीति । कथं पुरथं विषयोऽनेनाख्यायते ? अत आह---यत्रेति । समासे हि विभक्तेरभावान्मकारो न श्रूयते अयमेव लोप इति । किं पुनः कारणमेवं काशकुशावलम्बनेन वात्तिकं व्याख्यायते ? अत आह---असमासे हीति । अन्ये त्वाहुः---यदि समास एवैतदभिमतमभविष्यत् `समासे' इत्येवावक्ष्यत्; मलोपवचनात्तु वाक्यविषयमेवैतत् । दारुणमध्यापक इत्यादिकं तु रूपं यदीष्यते विकल्पेन मलोपो वक्तव्य इति ।

पूजनादित्येव पूजितपरिग्रहे सिद्ध इति । पूजनस्य पूजतापेक्षत्वादिति भावः । अनन्तरपूजितप्रतिपत्त्यर्थमिति । `पूजनात्पूजितम्' इति सूत्रे सामान्यगतमानन्तर्यं विशेषाणां विज्ञायत इति भावः । कथं पुनः पञ्चमीनिर्देशे व्यवहितस्य प्रसङ्गः ? इत्याह---एतदेवेति । ज्ञापनस्य प्रयोजनमाह---तथा

चेति ।

अनुदात्त इति वर्तमान इत्यादि । प्रकृतं ह्यनुदात्तग्रहणम् `न लुट्' इत्यादिना प्रतिषेधेन सम्बद्धम्, अतस्तदनुवृत्तौ प्रतिषेधोऽप्यनुवर्तेत । तत्र यद्यप्यस्य योगस्य समासविषयत्वात्तादृशो विषयो न सम्भवति, यत्रामन्त्रितादौ निघातः प्रतिषिध्यते; तथापि `कुत्सने च सुपि' इत्यादौ उत्तरत्र प्रतिषेध एव स्यात् । तस्मात्तन्निवृत्त्यर्थं पुनरनुदात्तग्रहणम् ।।

सगतिरपि तिङ् ।। 8.1.68 ।।

यत्काष्ठं पचतीति । येऽपि `मलोपश्च' इत्यनेन वाक्येन मलोपमाहुः तेऽपि तिङन्ते परतो नैव लोपमिच्छन्ति । सगतिग्रहणाद्गतिरपि निहन्यत इति । कथम् ? तुल्ययोगेऽत्र सहशब्दः, यत्र तुल्ययोगे सहशब्दस्तत्र द्वयोरपि कार्ययोगो भवति, तद्यथा---सपुत्रो भोज्यतामित्युक्ते पुत्रोऽपि भोज्यते अपिग्रहणं यत्र गतिर्न प्रयुज्यते तत्र केवलस्यापि तिङन्तस्य यथा स्यात्, गतिप्रयोगे तु द्वयोः सहैव भवति, तिङ्ग्रहणात्पूर्वो योगः सुबन्तविषय एव विज्ञायते ।।

कुत्सने च सुप्यगोत्रादौ ।। 8.1.69 ।।

पचति क्लिश्नातीति । कथमत्र समानवाक्यत्वं सामर्थ्यं चेति चिन्त्यम् ।

कर्तुः कुत्सने मा भूत्, पचति पूतीति । कर्तृत्वमत्र कुत्स्यते---अस्येदमयुक्तमिति । क्रिया तु शोभनैव, तत्र कर्तृत्वस्य विशेषणं पूतित्वं न कर्त्रा समानाधिकरणमिति दारुणमभिरूपकमित्यादिवन्नपुंसकत्वम् । एवं द्विबह्वोरप्येकवचनमेव भवति---पचतः पूति, पचन्ति पूतीति । प्रायेण पूतिरिति पुंल्लिङ्गं पठ्यते । ननु क्रियाप्रधानेऽस्मिन्नाख्याते साधनं कथं विशेषणेन सम्बन्धमप्रधानं पठ्येत ? उच्यते;

एकार्थीभावमापन्नं वृत्तौ यदुपसर्जनम् ।
विशेषणेन सम्बन्धस्तस्य नैवोपपद्यते ।।

न हि भवति---ऋद्धस्य राजपुरुष इति । यस्य तु नैकार्थीभावस्तदप्रधानमपि विशेषणेन संयुज्यते, यथा---ऋद्धस्य राज्ञः पुरुष इति । एवं साधनं क्रियां प्रति गुणभूतमप्येकार्थीभावाद्विशेषणेन युज्यते, तथा साधनप्रधानेषु कृदन्तेषु क्रिया गुणभूताऽपि विशेषणेन युज्यते---दारुणमध्यायक इति । यथैव तर्हि साधनस्य विशेषणेन योगः, एवं क्रियान्तरेणापि प्राप्नोति---पचति पठति, पचति दृश्यति, पाचकः पठति, पाचकः पश्यतीतिवत् ? किं कुर्मः, न तावदेवं दृश्यते ! तदेतदेवं प्रतिपत्तव्यम्---

भार्या स्त्र्यन्तरसम्बन्धं पत्युर्न सहते यथा ।
स्नानादिकं तु संस्कारं स्वार्थमेवानुमन्यते ।।

तथा क्रियापि---

विशेषणेन सम्बन्धं कर्त्तुः स्वस्यानुमन्यते ।
स्वानुरक्तं तु कर्त्तारं न क्रियान्तरगामिनम् ।। इति ।

पूतिश्चेति । तिबन्तः पूतिशब्द आद्युदात्तः । वसेस्तिबिति । तिब् बाहुलकात्पूञोऽपि भवति, बाहुलकादेव गुणाभावः । तस्य निघातनिमित्तस्यान्तोदात्तत्वं यथा स्यादिति चित्त्वमुपसङ्ख्यायते । विभाषितमिति । बह्वथ तिङन्तं विभाषा निहन्यते, यदा निहन्यते तदा पूतिरन्तोदात्तः ।

क्रियाकुत्सने इत्यादि यदुक्तम्, तत्र प्रमाणत्वेन भाष्यपठितामार्यां पठति---सुपि कुत्सन इति । मलोप इष्टोऽतिङि चोक्तार्थमिति । भाष्ये तावदयमर्थः । मलोपश्चेति वार्त्तिककारेणोक्ते मलोपस्तिङि नेष्टः---दारुणं पचतीति । इत्येवं मलोपश्चेति वाक्यमुक्तार्थमाचार्यैरिति । वृत्तौ तु श्लोकान्तर्गतत्वादयं पादः पठितो न त्वत्रास्योपयोगः कश्चित्; `समासे चैतदनुदात्तत्वमिष्यते' इत्युक्तत्वात् ।।

गतिर्गतौ ।। 8.1.70 ।।

अभ्युद्धरतीति । सर्वोपसर्गसाधारणी हरणक्रिया प्रतीयते, तामुद्विशिनष्टि उद्धरतीति । उदैवोर्ध्वता विशिष्टाऽवगम्यत तामभिर्विशिनष्टि अभ्यद्धरतीति । तत्र---

अन्योऽन्यापेक्षया नास्ति गतित्वं यद्यपि द्वयोः ।
क्रियां प्रति गतित्वात्तु निहतोऽभिर्गतिर्गतौ ।।

समुदानयतीति । अत्र समुदोर्द्वयोरपि निघातः । अभिसम्पर्याहरतीति । अत्र त्रयाणाम् ।।

गताविति किमिति । क्रियां प्रति गतिर्भवति, क्रिया च धातुवाच्या । धातुश्च द्विविधः---सगतिः, अगतिश्च । प्रत्यया अपि धातोर्द्वये भवन्ति---कृतः, तिङश्च । तत्र कृदन्ते सगतावगतौ च कृत्स्वरथाथादिस्वरेषु कृतेषु शेषनिघातेन गतिर्निहन्यत एव । तिङन्तेऽपि केवले उदात्तवति तावदुत्तरसूत्रेण भवत्येव निघातः, अनुदात्तेत्तु नियमाश्रयणान्न भविष्यति, तिङन्ते यदि भवति उदात्तवत्येव भवति, ततश्च सगतिरेव तिङवशिष्यते इति प्रश्नः । आमन्द्रैरिति । ननु च क्रियायोगे गतिभवति, न चात्राङः क्रियायोगोऽस्ति, मन्द्रशब्दस्याक्रियावाचित्वात् ? अत आह---याहीत्येतत्प्रतीति । `ते प्राग्धातोः' इति प्रयोगनियमः, न संज्ञानियमः, ततश्च व्यवहितप्रयोगेऽपि गतित्वमस्त्येवेति भावः । ननु यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा भवन्ति, ततश्च याहीत्येतत्प्रति गतित्वेन मन्द्रं प्रत्यगतित्वादप्रसङ्गः, इहापि तर्हि न प्राप्नोति---अभ्युद्धरतीति, उदं प्रत्यगतित्वात् ? मा भूदुदं प्रति गतिः, समुदायं तु प्रति गतिर्भवति, उदा विशिष्टा हि क्रिया अभिना विशेष्यते । आ मन्द्रैरित्यत्रापि मन्द्रादिकरणकमिन्द्रकर्तृकं यानमाङा विशेष्यत इति समुदायं क्रियाविशेषवाचिनं प्रत्याङो गतित्वान्निघातः प्राप्नोति ? न प्राप्नोति ; पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन, आयाने हि मन्द्रादेः साधनत्वं मन्द्रैर्हरिभिरायाहीति, न तु याने; ततश्च न समुदायं

प्रत्याङो गतित्वमिति नास्त्येवात्र प्रसङ्गः । तत्राह---तस्येति । न हि परनिमित्तानुपादाने `यत्क्रियायुक्ताः प्रादयस्तं प्रति' इति गम्यते, ततश्च वस्तुतो गतित्वाश्रयो निघातः स्यादिति मन्यते ।

यदि पुनः `पदस्य' इत्यधिकारात्समर्थपरिभाषोपस्थानाद्येन गतेः सामर्थ्यं तं प्रति गतेरिति विज्ञायते, तदा शक्यं गतावित्यवक्तुम्, यदाह---`गतेरनुदात्तत्वे गतिग्रहणानर्थक्यम्, तिङ्यवधारणाच्छन्दोऽर्थमिति चेन्नागतित्वात्' इति ।।

तिङि चोदात्तवति ।। 8.1.71 ।।

उदाहरणे `नीपातैर्यद्यदि' इति निघातप्रतिषेधात्तिङन्तमुदात्तवत् । तिङ्ग्रहणं किमर्थम् ? तिङन्ते यथा स्यात्, मन्द्रशब्दे मा भूत्---आ मन्द्रैरिन्द्र हरिभिर्याहि । मन्द्रशब्दो रक्प्रत्ययान्तोऽन्तोदात्तः ।

ननु च `यत्क्रियायुक्ताः' इति वचनाद्गतिशब्दः पित्रादिशब्दवत् सम्बन्धिशब्दत्वात् स्वसम्बन्धिनमाक्षिपतीति क्रियावाचिन्येवोदात्तवपि भविष्यति कृदन्ते चातिप्रसङ्गाभावः पूर्वसूत्रे एवोक्तः, तस्मान्नार्थस्तिङ्ग्रहणेन ? इत्याशङ्क्याह---तिङ्ग्रहणमिति । परिमाणम्=इयत्ता । परिमाणार्थत्वमेव स्पष्टयति---अन्यथा हीति । अक्रियमाणे तिङ्ग्रहणे धातुरेव क्रियावाचित्वाद् गतिसंज्ञानिमित्तमिति तत्रैवोदात्तवति निघातः स्यात्, न तु प्रत्यये । तिङ्ग्रहणात्तु प्रकृतिभागं प्रति गतेः प्रत्ययोदात्तत्वेनाप्युदात्तवति तिङन्तमात्रे भवति । धातुमेव प्रति गतिसंज्ञेति । यस्य क्रिया यत्क्रियेति षष्ठीसमासः, अन्वयव्यतिरेकाभ्यां यस्य वाच्या क्रिया तं प्रतीत्यर्थः । धातोरेव चासौ वाच्येति तमेव प्रति गतित्वम् ।

आमन्ते तर्हि न प्राप्नोतीति । ननु चाक्रियमाणेऽपि तिङ्ग्रहणे नैवामन्ते प्राप्नोति, यदा हि तिङन्तेऽपि प्रत्ययोदात्तत्वेनोदात्तवति न स्यादिति स्थितम्, तदा का वार्ता आमन्ते ! तत्किमुच्यते---आमन्ते तर्हीति ? एवं तर्ह्ययमत्रार्थः---यदि तिङ्ग्रहणाद्यत्नात्प्रकरोतीत्यादौ भवति, तर्हि तस्यामन्तेऽभावान्न प्राप्नोति; तस्माद्या क्रिया यत्क्रिया---इति कर्मधारय आश्रयणीयः । एवं हि क्रियालक्षणमर्थं प्रति गतित्वम्, तत्रार्थे कार्यस्यासम्भवात्तद्वाचिनि कार्यं विज्ञायमानं क्रियाप्रधाने सर्वत्र सिध्यतीति । अनन्तरोक्तं चोद्यं पक्षविशेषे व्यवस्थापयितुमाह---अत्र केचिदिति । अत्र पक्षे गतिकारकोपपदानामित्यस्यायमर्थः---गत्यादीनामविशेषेण समासो भवति, कृद्भिस्तु प्राक् सुबुत्पत्तेरिति । अव्ययपूवपदप्रकृतिस्वरत्वे इति । `गतिकारकोपपदात्' इत्यत्र प्रपचतिदेश्याद्यर्थं कृद्ग्रहणं स्थितम्, न प्रत्याख्यातमिति पूर्वपदप्रकृतिस्वरस्यैवात्र प्रसङ्ग इति मन्यते । अक्रियमाणेऽपि तिङ्ग्रहहण इति । यथा वा क्रियमाणे तिङ्ग्रहणे उदात्तत्वे सति निघातः सिध्यति, तथाऽनन्तरमेवोक्तम् ।

अथ तरबन्तस्येति । यथायं पक्षः सम्भवति, यश्चात्र पक्षे दोषः---तत्सर्वम् `गतिकारकोपपात्कृत्' इत्यत्रैवोक्तम् ।

येषां त्वित्यादि । कुगत्यादीनां कृदन्तैनैव, तत्रापि प्राक् सुबुत्पत्तेरित्यर्थः । तदर्थं यत्नः कर्त्तव्य इति । तत्रायं यत्नः---तिङग्रहणं न करिष्यते; या क्रिया, यत्क्रियेति वाऽऽश्रयिष्यत इति ।

आमन्त्रितं पूर्वमविद्यमानवत् ।। 8.1.72 ।।

किमदमविद्यमानवत् ? इत्याह---तस्मिन्सतीत्यादि । तत्र तस्मिन्सति यत्कार्यं तन्न भवतीत्यत्रोदाहरणमाह---आमन्त्रिततिङनिघातेति । असति च यत्कार्यं तद्भवतीत्यत्रोदाहरणमाह---पूजायामित्यादि । आमन्त्रिताद्युदात्तत्वे कर्त्तव्ये इति । असति पूर्वग्रहणे `आमन्त्रितमविद्यमानवत्' त्युच्यमाने स्वस्याद्युदात्तत्वेऽपि षाष्ठिके कर्तव्येऽविद्यमानवत् स्यात्, क इदानीं तस्यावकाशः ? यत्राविद्यमानवद्भावः प्रतिषिध्यते, विकल्प्यते वा; तथा `अपादादौ' वित्यधिकारात्पादादिरप्यवकाशः---उषो नो अधषु हवा व्युच्छनन्, नस्भावो ह्यत्राविद्यमानवद्भावादेव भवति; इन्द्र त्वा वृषभं वयम्, त्वादेशो भवति । एवं तु इन्द्र पिब तुल्यं सुतो मदाय, इन्द्र पिब वृषभूतस्य वृष्णः, अग्ने याहि शस्त्रिभिः, वायो याहि शिवादिव---इत्यादौ तिङ्निघातः प्राप्नोति ? कर्त्तव्योऽत्र यत्नः, उक्तं हि पुरस्तात्---`आपादपरिसमाप्तेरपादादावित्यधिकारः' इति ।

यदि `आमन्त्रितं पूर्वमविद्यमानवत्' देवदत्त पचसीत्यत्र पचसीत्येतदपेक्षवा देवदत्तशब्दस्य पूर्वत्वमस्तीत्यविद्यमानवत्त्वे सति आमन्त्रिताद्युदात्तत्वं न स्यादित्यत आह---पूर्वत्वं चेति । पूर्वशब्दस्य सम्बन्धिशब्दत्वाद्यं प्रति पूर्वत्वं तत्कार्यं प्रत्येवाविद्यमानवत्त्वम्, न स्वकार्यं प्रति; तेन नायं दोष इत्यर्थः ।

कार्यशब्देनैतद्दर्शयति---अविद्यमानवत् कार्यमत्रातिदिश्यते । तत्र पूर्वशब्दस्य सम्बन्धिशब्दत्वेन परस्य कार्ये कर्त्तव्य इत्येतावदाश्रीयते, न तु परं प्रत्यविद्यमानवत्; पूर्वं तु प्रति विद्यमानवदित्यर्थ इति स्यात् । इमं मे गङ्गे यमुने सरस्वतीत्यत्र गङ्गेशब्दस्य यमुनेशब्दं प्रत्येवाविद्यमानवत्त्वं न मेशब्दं प्रतीति व्यवधानाद् यमुनेशब्दस्य निघातं प्रति मेशब्दो निमित्तं न स्यात् । यथोपदर्शिते त्वर्थे, परस्य कार्ये कर्त्तव्ये इत्येतावत्तत्कार्यं स्वनिमित्तमन्यनिमित्तं वेति विशेषाभावाद् मेशब्दापेक्षेऽपि निघाते गङ्गेशब्दस्याविद्यमानवत्त्वं सिध्यति । तदेतत् स्वनिमित्तेऽन्यनिमित्ते चेत्यत्र सूचितम् ।

तदेवमुक्तं दर्शयति---इहेत्यादि । गङ्गेशब्दोऽविद्यमानवत्त्वात्स्वयं निमित्तं न भवतीत्वेतावत्, न तु मेशब्दस्य निमित्तभावं प्रतिबध्नातीत्यर्थः । परं प्रत्यविद्यमानवद्भवतीत्याश्रीयमाणे हि तथा स्यात् ।

ननु वत्करणमन्तरेणापि `गोतो णित्' इत्यादावतिदेशो दृश्यते, तत्किमत्र वत्करणेन ? नन्वसति वत्करणे `पूर्वमामन्त्रितमविद्यमानम्' इत्युच्यमाने पूर्वस्यामन्त्रतस्य निवृत्तिः स्यात् ? नैष दोषः; अर्थप्रत्ययनाय शब्दप्रयोगादनिवृत्तेऽर्थे शब्दनिवृत्त्यभावात् । अथापि परप्रयोगो भवतु, पूर्वप्रयोगो मा भूदित्यर्थः कल्पेत ? तथापि राजदन्तादिषु परमामन्त्रितं वेति वक्तव्यं स्यात् । परमेवामन्त्रितं भवति, न पूर्वमित्यर्थः । तदेवमन्तरेणापि वतिमतिदेशः सिद्धः ? इदं तर्हि प्रयोजनम्---स्वाश्रयमपि यथा स्यात्---आं बो देवदत्त `आम एकान्तरमामन्त्रितमनन्तिके' इत्येकान्तरता यथा स्यात् । एकवचनान्तं ह्युत्तरसूत्रस्य विषयः, बहुवचनान्ते तु `विभाषितं विशेषवचने बहुवचनम्' इति पक्षे निघातप्रसङ्गः । यद्यप्यतिदेशिककार्याविरुद्धं स्वाश्रयमतिदेशेप्यवसत्यपि वत्करणे भवति, इह तु वत्करणाद्यत्नाद्विरुद्धमपि क्वचित्प्राप्यते । अविद्यमानवत्त्वविरोधिनी ह्येकान्तरता । व्याख्यानाच्चातिप्रसङ्गो नोद्भावनीयः ।।

नामन्त्रिते समानाधिकरणे सामान्यवचनम् ।। 8.1.73 ।।

द्वौ नञौ प्रकृतमर्थं सूचयत इत्याह---कि तर्हि विद्यमानवदेवेति । माणवक जटिलकाध्यापकेति । अत्र जटिलशब्दो माणवकशब्दापेक्षया विशेषवचनः, अध्यापकशब्दापेक्षया तु सामान्यवचन इति द्वयोरप्यविद्यमानवत्त्वं न भवति । पूर्वस्येत्यादिना प्रतिषेधस्य फलं दर्शयति । देवदत्तयज्ञदत्तेति । `सामान्यवचनं विशेषवचनापेक्षम्' इति वक्ष्यत्युत्तरसूत्रे, ततश्च यथा यज्ञदत्तशब्दः समानाधिकरणो न भवति, एवं पूर्वामन्त्रितार्थगतविशेषाकारवचनोऽपि न भवतीति देवदत्तशब्दोऽपि सामान्यवचनो न भवति, तस्माद् द्व्यङ्गविकलत्वाच्चिन्त्यमेत् । एवं ह्युक्तमिति । तैत्तिरीयके ब्राह्मणे सहस्रतमीं प्रकृत्य इडे रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुते---एतानि ते अघ्निये नामानीति । वृत्तौ त्वन्यथा पाठः शाखान्तरे द्रष्टव्यः ।।

विभाषितं विशेषवचने ।। 8.1.74 ।।

बहुवचनमिति वार्त्तिके दर्शनात् प्रक्षिप्तम् । शरणत्वेन प्राप्तिः शरणम्, तत्र साधवः शरण्याः । शरणशब्दो हि शरण्येऽपि दृश्यते---शरणं भवन्तमतिकास्त्रणकमिति । शर्मण्या इति पाठे शर्मणि साधवः शर्मण्याः ।

सामान्ववचनाधिकारादेवेति । सामान्यस्य विशेषापेक्षत्वाद्यं प्रति सामान्यमित्येतद्भवति, तस्मिन्विशेषवचन एव भविष्यति ।।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यामष्टमस्याध्यायस्य प्रथमः पादः

8.2

काशिकावृत्तिः---6

अथ अष्टमाध्याये द्वितीयः पादः

पूर्वत्रासिद्धम् ।। 8.2.1 ।।

पूर्वत्रासिद्धमित्ययमधिकार इति । यदि तु स्वतन्त्रो विधिः स्यात्, ततो वक्ष्यमाणस्य त्रिपादीलक्षणसमुदायस्य पूर्वत्र सपादसप्ताध्यायीलक्षणे समुदायेऽसिद्धत्वमुक्तं स्यात्, न तु त्रिपाद्यां पूर्वत्र परस्यासिद्धत्वमापादितं स्यात्; ततश्च गुडलिण्मान्, गोधुङ्मानित्यादौ ढत्वघत्वादेरसिद्धत्वाभावात् `झयः' इति मतुपो वत्वप्रसङ्गः । तस्मान्न विधिः । अथ परिभाषा स्यात्, सर्वत्रैवाष्टाध्याय्यां पूर्व प्रति परस्यासिद्धत्वात् तेन, तैः, तस्य---इत्यादाविनादिषु कर्त्तव्येषु त्यदाद्यत्वस्यासिद्धत्वादकारान्तनिमित्ता इनादयो न स्युः । तस्माद्---अधिकारः । एवं सति यदनेन सम्पादितं भवति तद्दर्शयति---तत्रेति । तत्राधिकारे सतीत्यर्थः । अधिकारे हि त्रिपादीगतानामप्यविशेषेण सपादसप्ताध्यायीगतान्प्रत्यसिद्धत्वं त्रिपाद्यं च पूर्वत्र परस्यासिद्धत्वं सिद्ध्यति । विधौ तु नैतावत्सम्पादयितुं शक्यम्; त्रिपाद्यां पूर्वत्र परस्यासिद्धत्वानापादनात् । परिभाषायां च नैतावति पर्यवस्यति; सर्वत्रैव प्रसङ्गात् । तस्मादधिकारत्वादेतावत्सन्पद्यते । एतावदेव च सम्पद्यत इत्यर्थः । न चैवमत्र भ्रमितव्यम्---येयं सपादसप्ताध्यायी अनुक्रान्तेत्यनेन विधिरूपेण प्रवृत्तिर्दर्शिता, इत उत्तरमित्या दिना त्वधिकाररूपेण, ततश्च शेष इतिवल्लक्षणं चाधिकारश्चेति ? निष्प्रयोजनत्वाद्, अधिकारोऽयमित्युक्तत्वाच्च । किं हि नामाधिकार एवास्मिन्न सिध्यति, यदर्थो विधिराश्रीयते ! सप्तानामध्यायानां सामाहारः सप्ताध्यायी, सपादाचासौ सप्ताध्यायी चेति कर्मधारयः, सपादेति टाबन्तपाठे त्वसमासः । उत्तरउत्तरो योग इति पाठः;वीप्सायां द्विर्वचने सुब्लुकोऽसम्भवात् । अत्राध्यायग्रहणेन योगग्रहणेन च शास्त्रासिद्धत्वमाश्रीयत इति दर्सयति । एतच्च पूर्वत्रेति वचनाल्लभ्यते । शास्त्रस्य हि मुख्यं पूर्वत्वम्; सन्निवेशविशेषयोगित्वात् । कार्यस्य तु शास्त्रद्वारकमौपचारिकम्, न हि मुख्ये सम्भवति गौणस्य ग्रहणं युक्तम् । कथं पुनरुच्चरितं शास्त्रमसिद्धमित्युच्यते, न हि वचनशतेनापि सिद्धमपि असिद्धं भवति ? अत आह---सिद्धकायं न करोतीत्यर्थ इति । वचनादतिदेश आश्रीयत इत्यर्थः । शास्त्रास्यासिद्धत्वमाश्रीयते, न कार्यस्येति दर्शितम् ।

तत्र प्रयोजनमाह---तदेतदिति । यदिदं शास्त्रविषयमसिद्धवचनं तदेतदित्यर्थः । आदेशो लक्षणं निमित्तं यस्य कार्यस्य तस्य प्रतिषेधार्थमुत्सृज्यते आदेशेन निवर्तत इति उत्सर्गः=स्थानी, स लक्षणं निमित्तं यस्य तस्य भावः प्रवृत्तिर्यथा स्यादित्येवमर्थं चासिद्धवचनम् । कार्यासिद्धत्वे तूत्सर्गलक्षणस्य भावो न न सिध्यति । तत्रादेशलक्षणप्रतिषेधस्योदाहरणमाह---अस्मा उद्धरेत्यादि । आयावोः कृतयोः `लोपः शकल्यस्य' इति लोपः । व्यलोपस्यासिद्धत्वादिति । शास्त्रद्वारकं व्यलोपस्यासिद्धत्वम् । यदा हि पूर्वशास्त्रसन्निधौ परशास्त्रमसिद्धम्, तदा तत्प्रतिपादितं कार्यं सुतरामसिद्धं भवति ।

उत्सर्गलक्षणभावस्योदाहरणमाह--अमुष्मै इति । अत्रासत्यसिद्दत्वे परत्वाद् `अदसोऽसेर्दादु दो मः' इत्युत्वे सत्यत इति स्मायादयो न स्युः । असिद्धत्वे तु पूर्वं स्मादयः, पश्चादुत्वमिति सिद्धमिष्टम् । उत्वस्येति । उत्वशास्त्रस्येत्यर्थः ।

शुष्किकेत्यादिश्लोकः । अत्र निदर्शनमिति प्रत्येकमभिसम्बध्यते । निदर्शनमुदाहरणदिगित्यर्थः । मतोर्वत्वे कर्त्तव्ये `झलां जशोऽन्ते' इति जश्त्वेऽसिद्धे सति गुडलिण्मानिति दर्शनम् ।

न कोपधाया इति पुंवद्भावप्रतिषेधो न भवतीति । कोपधप्रतिषेधे तद्धितवुग्रहणमित्येतनाश्रित्येदं प्रयोजनमुक्तम् । क्षामिमानिति । `क्षायो मः' इति निष्ठातकारस्य मत्वम्, ततः `अत इञ्' इति इञन्ताद् `अत इनिठनौ' इतीन्, तदन्ताद्वा मतुप् ।

वहेरित्यादि । `वह प्रापणे', निष्ठा, सम्प्रसारणम्, `हो ढः', `झषस्तथोर्धोऽधः', ष्टुत्वम्, `ढो ढे लोपः', `ढ्रलोपे पूर्वस्य दीर्घोऽणः', ऊढ इति स्थिते णिचि टिलोपः, लुङ्, च्लेश्चङ् । हतइत्येतद् द्विरुच्यते इति । `अजादेर्द्वितीयस्य' इति वचनात्, ततः `हलादिः शेषः', `कुहोश्चुः', इति चुत्वम्---हकारस्य झकारः, तस्य `अभ्यासे चर्च' इति जश्त्वं जाकरः । अथात्र `सन्वल्लघुनि' इतीत्वं कस्मान्न भवति ? तत्राह--अनग्लोप इति वचनादिति । कथं

पुनरौजिढदिति भवति ? इत्यत आह---अनग्लोप इति वचनादिति । कथं पुनरौजिढदिति भवति ? इत्यत आह---औजिढदित्येतत्त्विति । पूर्वत्रासिद्धीयमद्विर्वचने' इत्येतत्त्विह प्रवर्त्तते; अनिस्यत्वात् । अनित्यत्वं च `उभौ साभ्यासस्य' इति वचनाद्विज्ञायते, अन्यथा `अनितेः' इति णत्वे कृते तस्य सिद्धत्वात् सह णकारेण द्विर्वचने सति सिद्धं स्यात्---प्राणिणिवतीति ।

गुडलिण्मानिति । गुडं लेढीति क्विप्, तदन्तान्मतुप्, ढत्वजश्त्वयोः कृतयोः `यरोऽनुनासिकत्वे तद्धिते भाषायां नित्यवचनम्' इति णकारः ।

षष्ठीनिर्देशा इति । `संयोगान्तस्य लोपः' इत्यादयः, पञ्चमीनिर्देशाः `ह्रस्वादङ्गात्' इत्यादयः, सप्तमीनिर्देशाः `झलो झलि' इत्यादयलस्तेषाम् । असिद्धत्वं न भवतीति । यदि स्यात् `संयोगान्तस्य लोपः' इत्यत्र `षष्ठी स्थानेयोगा इत्येतस्याभावात्तच्छेषस्य `अलो।ऽन्त्यस्य' इत्यस्याप्रवृत्तेः सर्वस्य पदस्य लोपप्रसङ्गः; `ह्रस्वादङ्गात्' इत्यत्राप्यनियमेन दिक्शब्दाध्याहारात्पूर्वस्य परस्य च लोपप्रसङ्गः; `झलो झलि' इत्यत्राप्यौपश्लेषिकेऽधिकरणे सप्तमी विज्ञायेतेति पूर्वपरयोरविशेषेण प्रसङ्गः, सत्सप्तमीविज्ञाने तु व्यवहितस्यापि प्रसङ्गः । कथं पुनः पूर्वासु परिभाषासु कर्तव्यासु तेषामसिद्धत्वं न भवति ? अत आह---कार्यकालं हीति । संज्ञापरिभाषमिति समाहारद्वन्द्वः । अयमभिप्रायः---

संज्ञाः परार्था अत्यन्तं परिभाषाश्च तद्विधाः ।
न स्वातन्त्र्येण तास्तस्मात् कार्यावगतिहेतवः ।।
अनेकस्य प्रधानस्य शेषभूता भवन्त्विति ।
एताः केवलमाचार्यः पृथन्देशा उपादिशत् ।।
विधिवाक्यैस्तु संहत्य यत्र तत्र स्थितैरपि ।
बोधयन्त्यः स्वकार्याणि नैकपूर्वाः परा इमाः ।। इति ।

यदि कार्यकालं संज्ञापरिभाषम्, `विप्रतिषेधे परम्' इत्येषापि परिभाषात्रोपतिष्ठेत, ततश्च विस्फोर्यम्, अवगोर्यमित्यत्र गुणं बाधित्वा परत्वात् `हलि च' इति दीर्घत्वं स्यात् ? इत्यत आह--विप्रतिषेधे परमित्येषा त्विति । एषा तु न प्रवर्त्तत इति सम्बन्धः । मध्ये हेतुर्येनेति । विप्रतिषेधो हि तस्या निमित्तम् । कश्च विप्रतिषेधः ? द्वयोस्तुल्यबलयोरेकस्मिन्विषये त्वं चाहं चेति प्रवृत्तिप्रसङ्गः । न चायमत्र सन्भवति, तस्मान्निमित्ताभावान्न प्रवर्त्तत इत्यथः । यद्येवम्, अपवादोऽपि परः पूर्वमुत्सग न बाधेत ? अत आह---अपवादस्येति । यद्यपवादस्यासिद्धत्वादुत्सर्ग एव स्यात्, अपवादविधानं व्यर्थं स्यात् ।।

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ।। 8.2.2 ।।

अत्र सूत्रे, उत्तरसूत्रे च कार्योपादानात् कार्ये कार्यस्यासिद्धत्वमुच्यते । `कृति' इत्येतत्तु सम्भवव्यभिचाराभ्यां तुग्विधिनैव सम्बध्यते । विधिशब्दो भावसाधनः, कर्मसाधनश्च; तत्र भावसाधनानां त्रयाणां कर्मसाधनस्य चैकस्यैकशेषः; भिन्नार्थानामपि सरूपाणामेकसेषवचनात् । विधिश्च विधिश्च विधिश्च विधयः, ततो बहुवचनान्तेन विधिशब्देन सुबादीनां द्वन्द्वस्य षष्ठीसमासः । सर्वत्र च शेषलक्षणा षष्ठी । तत्र सुब्विधौ शेष एव शेषः, इतरेषु तु कर्म शेषत्वेन विवक्षितम् । तदिदमुक्तम्---विधिशब्दोऽयमित्यादि । सम्बन्धसामान्यषष्ठ्यन्तेनेति । सम्बन्धसामान्यमुच्यते षष्ठ्या, तदन्तेनेत्यर्थः । सामान्यशब्देन स्थानेयोगव्यवच्छेदः । कथं पुनः `षष्ठी स्थानेयोगा' इति परिभाषायां सत्यां सामान्यवचनता लभ्यते ? उच्यते; नात्र सुपः स्थाने किञ्चिद्विधीयते, किं तर्हि ? अनुवादोऽयम्---सुपो यो विधिस्तत्रेति । अनुवादे च परिभाषा न प्रवर्त्तते; `उदीचामातः स्थाने' इति स्थानेग्रहणाल्लिङ्गात् । सम्बन्धसामान्यवचनषष्ठ्यन्तेनेति यदुक्तम्, तत्र प्रयोजनमाह---सुपां स्थान इत्यादि । सर्वोऽसौ सुब्विधिरिति । सर्वस्य सुप्सम्बन्धित्वात्सुबर्थमेव चेदं विधिग्रहणं कृतम् । स्वरादिषु तु नार्थः; तेन यथा `न मु ने' इत्यत्र नाभावे कर्त्तव्ये इत्यर्थो भवति, तथा स्वरादिषु कर्त्तव्येष्वित्यर्थो भविष्यति । द्वन्द्वात्परस्य तु प्रत्येकं सम्बन्धो दुर्निवार इति भावसाधनत्वमङ्गीकृतम् । `सुब्विधिस्वरसंज्ञातुक्षु' इत्युच्यमाने तु न किञ्चिद्यत्नसाध्यम् ।

राजवतीति । मतुबन्ताद् `उगितश्च' इति ङीप्, राजशब्दः कनिन्प्रत्ययान्तत्वादाद्युदात्तः । पञ्चार्ममिति । `दिक्संख्ये संज्ञायाम्' इति समासः, तत्र नलोपे कृते पूर्वपदमवर्णान्तं जातमिति स्वरः प्राप्तोऽसिद्धत्वान्न भवति, समासोदात्तत्वमेव भवति ।

पञ्चदण्डीति । समाहारद्विगुः । नलोपस्यासिद्धत्वात् ष्णान्ता षडिति षट्संज्ञा भवतीति । एतच्च यत्तत्रोक्तम्---`अस्तग्रहणमौपदेशिकप्रतिपत्त्यर्थम्' इति, तदनाश्रित्योक्तं द्रष्टव्यम् । न षट्स्वस्त्रादिभ्य इति टापः प्रतिषेधो भवतीति । अत्र हि नान्तत्वादाप्प्राप्तः, सोऽपि निषिध्यते; `स्त्रियां यदुक्तं तन्न भवति' इति सामान्येन निषेधविधानात् । तदेतत्प्रयोजनं कथं भवतीति । पाक्षिकत्वं प्रयोजनस्य दर्शयितुं प्रश्नः । केषाञ्चिद्दर्शनम्---अनारभ्य कार्यविशेषमादौ तावत्संज्ञा क्रियते, ततो यस्यां दशायां यत्कार्यं प्राप्तं तत्क्रियते लोकवत्, तद्यथा---लोके दशम्यामुत्थितायां पुत्रस्य नाम दधातीति सकृत्कृतया संज्ञया सर्वाणि कार्याणि क्रियन्ते, न तु प्रतिकार्यं नाम कुर्वन्ति, तद्वदिति । अयं च `यथोद्देशं संज्ञापरिभाषम्' इति पक्षः । कार्यकालपक्षे तु तेनतेन विधिवाक्येनेकवाक्यतापन्नेन संज्ञासूत्रेण संज्ञा प्रणीयत इति प्रतिकार्यं संज्ञाप्रवृत्तिः । तत्राद्ये दर्शने जश्शसोर्लुगर्था या संज्ञा तयैव टाप्प्रतिषेधस्यापि सिद्धत्वान्नेदं प्रयोजनम्, द्वितीये तु पक्षे भवति प्रयोजनमित्याह---यदि प्रतिकार्यमिति । कथं तदा प्रयोजनम् ? इत्याह---या हीति । जश्शसोर्लुगर्थेति । उपलक्षणमेतत्, ङीप्प्रतिषेधार्थेत्यपि द्रष्टव्यम् । स्त्रीप्रत्ययस्येति । टाप इत्यर्थः । अथ प्रथमे पक्षे न कर्त्तव्यं संज्ञाग्रहणम्, इह हि---दण्डिगुप्तौ, गुप्तदण्डिनाविति नलोपे कृते दण्डिशब्दस्य घिसंज्ञा प्राप्नोति, ततश्च तस्यैव पूर्वनिपातः स्यात्; नलोपस्यासिद्धत्वाद्धि संज्ञाया अभावादनियमः पूर्वनिपातस्य भवति ।

अत्र के चदित्यादि । सुपः सन्निपातेन नलोपः, स यदि तुकं प्रवर्त्तयेत् तत्सन्निपातं विहन्यात् । कथं पुनः सन्निपातस्य विघातः, यावता पूर्वान्तस्तुक् स तुग्ग्रहणेन गृह्यते ? सत्यम्; ह्रस्वमात्रभक्तस्तुगित्याश्रित्येदमुक्तम् । बहिरङ्गलक्षणत्वेन वेति । बहिर्भूतविभक्त्यपेक्षो नलोपोऽन्तर्भूतक्विबपेक्षे तुक्यसिद्धो

भवतीत्यर्थः ।

परिभाषाद्वय्साप्यनित्यत्वं ज्ञापयितुमिति । तत्र सन्निपातपरिभाषाया अनित्यत्वाद् वृक्षायेत्यादौ `सुपि च' इति दीर्घत्वं भवति ।

बहिरङ्गपरिभाषायास्त्वनित्यत्वाद् एषा, द्वे इत्यत्र विभक्त्याश्रयं त्यदाद्यत्वं बहिरङ्गमपि प्रातिपदिकाश्रये टापि न सिद्धं भवति ।

वृत्रहच्छत्रमिति । नात्र सन्निपातलक्षणो नलोपः, नापि नलोपस्य बहिरङ्गत्वम्; तुकोऽपि छकारापेक्षत्वात् । राजीयतीति । `क्यचि च' इतीत्वम् । राजायत इति । `अकृत्सार्वधातुकयोः' इति दीर्घः । राजाश्व इति । `अकः सवर्ण दीर्घः' ।।

न मु ने ।। 8.2.3 ।।

`मु' इत्यविभक्तिको निर्देशः । घिलक्षणो नाभावो न स्यादिति । यद्येतन्नारभ्येतेति शेषः । अनेन सूत्रारम्भस्य प्रयोजनमुक्तम् । कृते तु नाभावे इत्यादि । यद्यत्र दीर्घत्वं स्यात् भाव्यमानोऽप्युकारः सवर्णान् गृह्णातीति, यथा---अमूभ्यामित्यादौ दीर्घस्य स्थानिनो दीर्घोकारो भवति, तथात्राप्याकारस्य दीर्घोकारः स्यात्, ततश्च ह्रस्वसन्निपातकृतो नाभावस्तं विहन्यादिति भावः । अत्र चोदयन्ति---मुभावस्य सिद्धत्वात्किल दीर्घप्रसङ्गश्चोद्यते, तत् किं मुभावमपश्यद् दीर्घशास्त्रं घिलक्षणं नाभावमपि न पश्यति, वृक्षादिशब्दस्थानीयं ह्येतद्दीर्घशास्त्रं प्रति, ततश्च यञादेरभावात्कथमत्र दीर्घप्रसङ्ग इति ? अत्राहुः---प्रयोगे तावन्नाभावः श्रूयते, शास्त्रमपि तस्य सिद्धकाण्डे पठितम्, केवलं तन्निदानभूतं मुभावमेव दीर्घशास्त्रं न पश्यतिं, तन्मा द्राक्षीत्, नाभावं तावत्पश्यति, ततश्च दीर्घत्वं प्रवर्त्तयेदिति ।

अथ वेति । यथा कश्चित्कुशलमतिः किञ्जातीयो धावति, किंवर्णो धावति---इत्येकेनानेकेन वा पृष्टस्तन्त्रेण प्रतिवक्ति---श्वेतो धावतीति; तथात्रापि योगद्वयमेतत्; तत्रैकं ने कर्त्तव्ये मुत्वस्यासिद्धत्वं निषेधति, अपरं ने परतो यत्प्राप्तं तत्र । तदिदमुक्तम्---उभयार्थमिति । तन्त्रणेति । साधारणं भवेत्तन्त्रम्, यथा---तुल्यकक्षयोर्भुञ्जानयोः प्रदीपः, इह तु साधारणप्रयत्नस्तन्त्रम् ।

इदानीमेकस्मिन्नेव योगे यथोभयं साध्यते, तथा दर्शयति---अथ वेति । अर्थात्संगृहीतमिति । वृद्धकुमारीवाक्यवत्, तद्यथा---वृद्धकुमारीन्द्रेणोक्ता वरं वृणीष्वेति सा वरमवृणोत्---पुत्रा मे बहुक्षीरघृतमन्नं कांस्यपात्र्यां भुञ्जीरन्निति, पतिरेव तावदस्या न भवति कुतः पुत्राः, कुतो गावः, कुतो धान्यम् ! अनेनैव खल्वेकवाक्येन पतिः पुत्राः गावो धान्यमिति सर्वं वृतं भवति; तद्वदत्रापि ने परतो यत्कार्यं तत्र कर्त्तव्ये मुभावस्यासिद्धत्वस्य प्रतिषेधं ब्रुवता नाभावेऽपि कर्त्तव्येऽर्थान्मुत्वस्यासिद्धत्वं प्रतिषिद्धं भवति ।

एकादेशस्वरोऽन्तरङ्ग इति । एकादेशस्वरे चत्वारि दर्शनानि---उदात्तानुदात्तयोरेकादेश आन्तर्यतः स्वरितोऽभिनिर्वृत्तस्य स्थाने' एकादेश उदात्तेनोदात्तः' इत्यनेनोदात्तगुणादेशः क्रियत इत्येकं दर्शनम् । तथैवाभिनिवृत्त एकादेशस्वरे स्वरितगुणमात्रस्योदात्तमात्रं विधीयत इति द्वितीयं दर्शनम् । तृतीयं तु दर्शनम् `एकादेश उदात्तेनोदात्तः' इति परिभाषा एकादेशविधिषूपतिष्ठते; तत्रायमर्थो भवति---आद्गुणो भवति, उदात्तानुदात्तयोस्त्वाद्गुण उदात्त इति; एवं सत्येकादेशो विधीयमान एवोदात्तो भवति । चतुर्थदर्शनमुदात्तानुदात्तयोरेकादेशः स्वरितगुणः प्राप्त उदात्तो भवतीति । तत्र येननाप्राप्तिन्यायेन स्वरितत्वापवाद उदात्तविधिः सम्पद्यते, तत्र परिभाषापक्षे सिद्धमुदात्तत्वमयादिषु । इतरेषु तु पक्षेषु असिद्धत्वे प्राप्ते सिद्धत्वमुच्यते, आन्तर्यतोऽयादेश उदात्तो यथा स्यादिति, अन्यथा स्वरितः स्यात् ।

कुमार्या इदमिति । कुमारशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, तस्माद् `वयसि प्रथमे' इति ङीप्, `यस्येति च' इति लोपः, `अनुदात्तस्य च यत्रोदात्तलोपः' इति ङीप उदात्तत्वं चतुर्थ्येकवचनम्, कुमारी + ए इति स्थिते' आण्नद्याः' इत्याट्, यणादेशः, `उदात्तयणो हल्पूर्वात्' इत्याट उदात्तत्वम्, `आटश्च' इति वृद्धिरेकादेशः, स आन्तर्यतः स्वरितः प्रसक्तः `एकादेश उदात्तेनोदात्तः' इत्यनेनोदात्तः क्रियते, तत्सिद्धत्वं वक्तव्यम्--अयादेश उदात्तो यथा स्यात् ।

यदीत्यादि । पूर्वमुदात्तत्वं क्रियते पश्चादेकाधेशः । यथानन्तरं दर्शितं तदा भवतीदं प्रयोजनमित्यर्थः । अथ त्वित्यादि । कुमार्या ए इति स्थिते `आटश्च' इति वृद्धिश्च प्राप्नोति, `उदात्तयणो हल्पूर्वात्' इति आटः स्वरश्च, द्वावप्यनित्यौ; स्वरः शब्दान्तरप्राप्तेरनित्यः, स हि प्रागाकारस्य प्राप्नोति कृतायां वृद्धावैकारस्य, वृद्धिरपि प्रागनुदात्तयोः परत्वात्स्वरे, आटस्तु स्वरे कृते उदात्तानुदात्तयोः स्वरभिन्नस्य प्राप्नुवन्विधिरनित्यो भवति, उभयोरनित्ययोः परत्वात्स्वरे प्राप्ते वर्णाश्रयत्वेनान्तरङ्गत्वाद्वृद्धिः, स्वरस्तु विभक्तेरुच्यमानः पदाश्रयो बहिरङ्गः ।

गाङ्गेऽनूप इति । गङ्गाया इदमित्यण्, प्रत्ययस्वरेणोन्तोदात्तः, ततो ङिः, सुप्त्वादनुदात्तः, तयोरेकादेश उदात्तः । आपोऽनुगतमनूपमिति प्रादिसमासः, अव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते `अनोरप्रधानकनीयसी' इत्युत्तरपदान्तोदात्तत्वं शेषनिघातः । तस्य सिद्धत्वादित्यादि । एकादेशस्वरस्य सिद्धत्वे `एङः पदान्तादति' इत्ययमेकादेश उदात्तेन सह भवति । ततश्च `स्वरितो वानुदात्ते पदादौ' इति पक्षे स्वरितः पक्षे उदात्तो भवति । यदि त्वसिद्धत्वं स्यात्, तदासावेकार उदात्तानुदात्तस्थानिकत्वादान्तर्यतः स्वरितः स्यात् । तथा च सति तस्य `एङः पदान्तादति' इत्ययमेकादेश उदात्तेन न भवति, किं तर्हि ? `स्वरितेन' इति पक्षे स्वरितो न स्यात् । अपि तु स्वरितानुदात्तयोः स्थाने भवन्नान्तर्यतो नित्यमेव स्वरितः स्यात् । स उदात्तेनेत्यत इति पाठः, स एकादेश उदात्तेन सहेत्यतो हेतोरित्यर्थः ।

शतृस्वर इति । तुदिवदिनदिभ्यो लट्, तस्य शत्राश्रयो नद्यजाद्योः स्वरः शतृस्वरः, `शतुरनुमो नद्यजादी' इत्यत्र `अन्तोदात्तादुत्तरपदात्' इत्यन्तोदात्तादुत्तरपदादीत्यनुवर्तते । तुदती, नुदतीति । तुदिनुदिभ्यां लट, शत्रादेशः, `तुदादिभ्यः शः', प्रत्ययस्वरेणोदात्तः । अनुम इति प्रतिषेधो ज्ञापक इति । तेन नैतदर्थं सिद्धत्वं वक्तव्यमिति भावः । कथमेतत् ज्ञापकम् ? इत्याह---नदीति । अनुम इति प्रतिषेध स्येतत्प्रयोजनम्---नुदन्तीत्यत्र `आच्छीनद्योर्नुम्' इति यदा नुम् भवति, तदा मा भूदिति । असिद्धे चैकादाशस्वरेऽन्तोदातत्वाभावादेव शतृ न भविष्यति, किमनुम इति प्रतिषेधेन ! प्रतिषेधात्तु

सिद्धत्वमनुमीयते । ननु यत्र लसार्वधातुकानुदात्तत्वस्य निमित्तं नास्ति, तदर्थः प्रतिषेधः स्यात्; यान्ती, वान्तीत्यत्र हि धातुप्रत्ययोरुदात्तयोरान्तर्यत एकादेश उदात्तः, स च शतृस्वरे सिद्धः ? अत्रापि प्रत्ययस्वरे सति तदनन्तरमेव धातोः शेषनिघातो भवति, ततश्चात्रापि नान्तरेणैकादेशस्वरमन्तोदात्तत्वं भवति । एकानुदात्तत्वमिति । एवं वर्जयित्वा परिशिष्टस्य यदनुदात्तत्वं तदेकानुदात्तत्त्वम् । भाष्ये त्वेकाननुदात्तमिति पाठः, तत्रापि `अनुदात्तं पदमेकवर्जम्' इत्ययमेव स्वरो विवक्षितः, तत्र हि `एकमेवानुदात्तमन्यत्सर्वमुदात्तम्' इत्युच्यते । तथा च तत्रोक्तम्---`सिद्धं त्वेकाननुदात्तत्वात्' इति । तुदन्तीति । शविकरण उदात्तः, लसार्वधातुकमनुदात्तम्, तयोरेकादेशः । अनेनेति । एकादेशस्वरेण सिद्धेन । वर्ज्यमानतेति । `अनुदात्तं पदमेकवर्जम्' इत्यस्यार्थो लक्ष्यते । यदि त्वसिद्धत्वं स्यात्, ततोऽसत्यां वर्ज्यमानतायां द्वयोरुदात्तयोः श्रवणं स्यात् । ननु चोदात्तस्यासिद्धत्वेऽपियोऽसावुदात्तानुदात्तयोरेकादेश आन्तर्यतः स्वरितोऽभिनिर्वृत्तस्तदाश्रया वर्ज्यमानता भविष्यति ? सत्यम्; सिद्ध्यति यदा स्वरितस्योदात्तो भवतीति पक्षः, यदा तु स्वरितापवाद उदात्तो विधीयते तदा तस्यासिद्धत्वात् स्थानिनश्च स्वरान्तराभावात्केन वर्ज्यमानता स्यात् ! तस्मात्सिद्धत्वमुच्यते । न च कार्यकालपक्षाश्रयेण परिभाषान्तरवद्वज्यमानपरिभाषाया अपि त्रिपाद्यां प्रवृत्तिः शक्याभ्युपगन्तुम्; अतिप्रसङ्गात् । `उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य', `उदात्तादनुदात्तस्य स्वरितः' इत्यत्रापि शेषनिघातप्रसङ्गात् । यथा तु यान्तीत्यत्र प्रागेवैकादेशाच्छेषनिघातो भवति, तथात्रापीत्यप्रयोजनमित्याहुः ।

ब्राह्मणास्तुदन्तीति । अत्रापि स्वरितत्वापवाद उदात्तत्वमिति दर्शने सिद्धत्वमुच्यते, अन्यथोदात्तस्यानुदात्तत्वाभावादुदात्तः प्रयोगे श्रूयेत ।

बहरिरङ्गस्यासिद्धत्वमेव भवतीति । `असिद्ध बहिरङ्गमन्तरङ्गे' इत्यनेन । पचतीति । इतिशब्दो निपातत्वादाद्युदात्तः । अत्र बाह्यपदापेक्षत्वादादेकादेशस्य बहिरङ्गत्वात्तत्स्वरोऽपि बहिरङ्गः, तस्यासिद्धत्वात्तेन वर्ज्यमानता न भवति । प्रपचतीति । अत्रापि `तिङि चोदात्तवति' इति गतिनिघातो न भवति । उभयत्रापि पूर्वं प्रत्यन्तवद्भावात्प्रसङ्गः ।

हरिव इति । यदा `छन्दसीवनिपौ' इति वनिप्प्रत्ययः क्रियते `वन उपसंख्यानम्' इति, तस्य च रुत्वम्, तदा नार्थः सिद्धवचनेन ।

अलावीदिति । लुङ्, च्लेः सिच्, इट्, `अस्तिसिचोऽपृक्ते' इतीट्, सिचि वृद्धिः ननु च `इट ईटि' इत्यत्र इट इति षष्ठी विज्ञास्यते, न पञ्चमी, सस्येत्यनुवर्तते, तत्रेडादेः सस्य लोपो विधीयमान इटो भविष्यतीति सिद्धमलावीदिति ? सत्यं रूपं सिद्धम्; स्वरे तु दोषः स्यात्---यदि लोपेनेकारो निवर्त्येत, अनुदात्तस्य ईटः श्रवणं प्रसज्येत, उदात्तनिवृत्तिस्वरे लोपस्यासिद्धत्वाद् । यदा तु सकारमात्रस्य लोपे सवर्णदीर्घत्वं तदा सिचश्चित्करणादिडुदात्त इत्येकादेशस्वरो भवति ।

वृक्ण इति । `ओदितश्च' इति निष्ठानत्वम् । षत्वस्वरप्रत्ययेड्विधिष्वित्यस्य व्यावर्त्यं दर्शयति---कुत्वं तु प्रतीति । क्षीबशब्द एवोदाह्रियत इति । कथं पुनरेकमेव त्रिषु विधिषूदाहरणम् ? इत्यत आह---तत्र हीति । तत्र क्वचित्पक्षे किञ्चित् प्रयोजनं प्रत्युदाहरणमित्याह---यदेति । संज्ञायामिति वचनम्, तत्र संज्ञायामुपमानम्' इत्यतः `संज्ञायाम्' इत्यनुवृत्तेः । एष स्वर इति । आद्युदात्तत्वम् । क्षीबिक इति । `नौद्व्यचः ष्ठन्' ।

प्लुतसहितो विकारः प्लुतविकारः । अग्ना3इ, पटा3उ इति । अग्निपटुशब्दयोः सम्बुद्धिगुणे कृते `एचोऽप्रगृह्यस्य' इत्यादिना पूर्वस्यार्धस्याकारः प्लुतः, उत्तरस्य त्विदुतौ । नित्यस्तुग्न प्राप्नोतीति । `पदान्ताद्वा' इति दीर्घलक्षणो विकल्पः स्यात् । छ इति किम् ? अन्यत्र प्लुतविकारस्यासिद्धत्वमेव यथा स्यात्---खलपु ब्राह्मणकुलम्, तत्र सम्बुद्धाविह किञ्चित्रपो इति न्यायेन गुणे खलपा + उ इति स्थिते `ह्रस्वस्य पिति कृति' इति तुग् न भवति । द्विविधं चात्रासिद्धत्वम्---बहिरङ्गलक्षणम्, पूर्वत्रासिद्धमिति च ।

किमर्थ पुनरिति । सकारस्य क्वचिदपि श्रवणाभावात्प्रश्नः ।

उचिच्छितीति । `उछी विवासे', तुक्, सन्, इट्, `अजादेर्द्वितीयस्य' इति छिस्शब्दस्य द्विर्वचनम्, `शर्पूर्वाः खयः' इति खयः शेषः, छस्य `अभ्यासे चर्च' इति चकारः ।

संय्यन्तेत्यादौ `मोऽनुस्वारः', `अनुस्वारस्य ययि परसवर्णः' ।

पदाधिकारश्चेदिति । यदि लत्वादिविधिपु पदस्येत्यपेक्ष्यते, तदा लत्वादीनां द्विर्वचनस्य च समकक्षत्वम्, अनपेक्षायां तु बहिरङ्गं द्विर्वचनमन्तरङ्गेषु लत्वादिष्वसिद्धमिति `पूर्वत्रासिद्धम्' इत्येतन्न प्रवर्त्तते इति लत्वादिषु कृतेषु द्विर्वचनमिति सिद्धमिष्टम् । गलोगल इति । `अचि विभाषा' इति लत्वम् । दोग्धेति । `वा द्रुह' इति वा घत्वम्, तदभावे `हो ढः' । नुन्न इति । `नुदविद' इति वा निष्ठानत्वम् । अभिन इति । भिदेर्लङ्, सिपि श्नमि हल्ङ्यादिलोपः, `सिपि धातो रुर्वा', `दश्च' इति वा रुत्वम्, आडागमः । मातुः ष्वसेति । `मातुः पितुर्भ्यामनन्तरस्याम्' इति वा षत्वम् । माषवापाणीति । `प्रातिपदिकान्त' इति वा णत्वम् । वाङ्नयनमिति । `यरोऽनुनासिकेऽनुनासिको वा' इति वा गकारस्य ङकारः । वाक्शयनमिति । `शश्छोऽटि' इति वा छत्वम् । लत्वादीनामित्यादिनाऽसिद्धत्वे लत्वादीनां यो दोषस्तं दर्शयति---अनिष्टोऽपि विकल्पः स्यादिति । पूर्वोत्तरयोः पदयोरेकत्र प्रवृत्तिः, अपरत्राप्रवृत्तिरित्येषोऽनिष्टो विकल्पः । एतत्सर्वमित्यादि । योगविभागार्थमेव च प्रतिषेधाश्रयणम्, अन्यथा लाघवार्थममुनेति निपातनमाश्रयणीयं स्यात्, ततः `मु ने' इति द्वितीयो योगः । किमर्थमिदम् ? पूर्वयोगस्यासर्वविषयत्वख्यापनार्थम्, तेनातिप्रसङ्गो नोद्भावनीयः ।।

उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ।। 8.2.4 ।।

`उदात्तस्वरितयोः' इत्यनुवादेऽपि स्थानषष्ठ्येषा; व्याख्यानात् । तेन उदात्तस्वरितयोः समीपवर्त्ती यो यण् ततः परस्यानुदात्तस्य स्वरितत्वं न भवति । सकृल्ल्व्याशा, खलप्व्याशा इति । ततः परस्य सप्तम्येकवचनस्य स्वरितत्वमिति । केन ? इत्यत आह---उदात्तयण् इत्यनेनेति । योऽयमस्मिन्सूत्रे पूर्वो भागः, तेनेत्यर्थः । `उदात्तयणो हल्पूर्वात्' इत्युदात्तत्वं तु न भवति, `नोङ्दात्वोः' इति प्रतिषेधात्, आशाशब्दः `आशाया अदिगाख्या चेत्' इति

अन्तोदात्तत्वादनुदात्तादिः । तत्कथमयं स्वरितयण् भवतीति । न कथञ्चित्, न ह्ययं स्वरितमपनीय तत्स्थाने भवति । न हि पूर्वं शास्त्रं स्थानिबुध्या आदेशे प्रवर्त्तते, किं तर्हि ? स्थानिन्येव । यथोक्तम्---`हत इत्येतद् द्विरुच्यते' इति, न पुनस्तद्बुध्या ढशब्दो द्विरुच्यत इति । आश्रयादिति । आहायम्---स्वरितयण इति, न चास्ति सिद्धः स्वरितः, तत्राश्रयात् सिद्धत्वं भविष्यति ।

एवमुच्यमानेऽतिप्रसङ्गमुद्भावयति---यद्येवमिति । दध्याशेति । दविशब्दः `नब्बिषयस्यानिसन्तस्य' इत्याद्युदात्तः, सेषनिघातः, `उदात्तादनुदात्तस्य स्वरितः' इति तस्य स्वरितत्वम्, तस्याश्रयात्सिद्धत्वे सति तत्स्थानिकादपि यणः परस्यानुदात्तस्य स्वरितत्वप्रसङ्ग इत्यर्थः । तस्मादित्यादि । यत एवमाश्रयात्सिद्धत्वे दोषः, तस्मादयमेव यण्स्वरो यता सिद्धो भवति तथा वक्तव्यम् । तत्कथम् ? योगविभागः करिष्यते--`उदात्तयणः', ुदात्तयणः परस्यानुदात्तस्य स्वरितो भवति; ततः `स्वरितयणः;, स्वरितयणश्च परस्यानुदात्तस्य स्वरितो भवति, उदात्तयण इत्येव । तेन उदात्तयण इत्येवं योऽभिनिर्वृत्तः स्वरितः, तद्यणः परस्यानुदात्तस्य स्वरितत्वं भवतीत्यर्थः । तेनास्यैव स्वरितस्याश्रयात्सिद्धत्वं भविष्यति ।

यद्येवमित्यादिना योऽतिप्रसङ्ग उद्भावितः, तं केषाञ्चिन्मतेन परिहरति---केचित्त्विति । उदात्तात्स्वरितयणो पीति । उदात्तात्परो यः स्वरितः `उदात्तादनुदात्तस्य' इति विहितः तस्य यो यण् तस्मादपि परस्येत्यर्थः । तैत्तिरीयक इति । तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः, तेषामाम्नायस्तैत्तिरीयकम्, चरणलक्षणो वुञ् । शाखान्तर इति । वृत्तिकारदेशे या शाखा तदपेक्षं शाखान्तरत्वम् । एकशतं ह्यध्वर्युशाखाः, विशेषवचनो वान्तरशब्दः । यास्ते विश्वा इति । `यद्वृत्तान्नित्यम्' इति सन्तीत्यस्य निघातप्रतिषेधः, अग्नेशब्दस्यामन्त्रितनिघातः । ब्राह्मण इति । तत्रैव तैत्तिरीयके दधिशब्द उक्तस्वरः, आशयतीत्यस्य तिङ्निघातः । ननु चोभयत्राप्यत्र यणादेशे कृते `उदात्तादनुदात्तस्य स्वरितः' इत्येव स्वरितः, तथा च यत्र स प्रतिषिध्यते `नोदात्तस्वरितोदयम्' इति, तत्र स्वरितो न दृश्यते च---स्वस्मभ्यमाभर प्रत्यग्निरुपसामग्रमख्यादिति, अयं तु स्वरित उदात्तस्वरितपरस्यापि भवति---दहाशसो रक्षसः पाह्यस्मानिति । तथा च भाष्येऽप्युदात्तपर एवानुदात्तेति प्रसङ्ग उद्भावितः---दध्याशेति । तस्मात् पूर्वोक्तस्यातिप्रसङ्गस्य नायं व्यभिचार इति चिन्त्यमेतत् ।

निराकरिष्यमाणत्वाद्वास्य नात्र सुष्ठु निर्बन्धनीयं दर्शयति---यथा त्विति । अत्र वार्त्तिकम्---`यण्स्वरो यणादेशे सिद्धो वक्तव्यः', `स्वरितयणः स्वरितार्थः आश्रयात्सिद्धत्वमिति चेदुदात्तात् स्वरिते दोषः' इति । यदि च `उदात्तादनुदात्तस्य स्वरितः' इति यः स्वरितः तस्य यो यण् ततः परस्यानुदात्तस्य स्वरितत्वमिष्टं स्याद्, दोषत्वेन वचनमनुपपन्नं स्यात् । भाष्ये तु यथायमर्थः स्थितः, तथा दर्सयति---तथा चेति । अत्र भाष्यम्---`अथ वा स्वरितग्रहणं न करिष्यते; यदि न क्रियते, केनेदानीं स्वरितयणः परस्यानुदात्तस्य स्वरितत्वं भवति ? उदात्तयण इत्येव, स्वरितयणा व्यवहितत्वान्न प्राप्नोति, `स्वरविधौ व्यञ्जनमविद्यमानवत्' इति नास्ति व्यवधानम्" इति । यदि चोदात्तात् स्वरितयणः परस्यानुदात्तस्य स्वरितत्वमिष्टं स्यात् प्रत्याख्यानं न युज्येत । यदि प्रत्याख्यानम्, किमर्थं तर्हि स्वरितयण्ग्रहणं क्रियते ? इत्याह---तत्क्रियत इति । स्थानिवद्भावाद्व्यवधानमस्तीति । यण्स्थानिकेनेकारेण । व्यञ्जनस्य ह्यविद्यमानवद्भावः, नाचः । ननु च `न पदान्तद्विर्वचन' इति स्वरविधौ प्रतिषिद्धः स्थानिवद्भावः ? तत्राह---स्वरदीर्घेति । बैद्याशेति । बिदस्यापत्यं स्त्री `अनृष्यानन्तर्ये बिदादिभ्योऽञ्', `शार्ङ्गरवाद्यञो ङीन्', नित्स्वरेणाद्युदात्तो बैदीशब्दः ।।

एकादेश उदात्तेनोदत्तः ।। 8.2.5 ।।

`अनुदात्तस्य' इति वर्त्तते । अग्न्यादिशब्दाः प्रातिपदिकस्वरेणान्तोदात्ताः, विभक्तिरनुदात्ता ।

पचन्तीति । अत्र शबकारस्य यत्स्वरितत्वम् `उदात्तादनुदात्तस्य स्वरितः' इति, तस्यासिद्धत्वाद् द्वयोरनुदात्तयोरेकादेशः ।।

स्वरितो वानुदात्ते पदादौ ।। 8.2.6 ।।

प्रादित्वात्समासे सतीति । `प्रादिप्रसङ्गे कर्मप्रवचनीयानां प्रतिषेधः' इत्यस्य तु तत्रैव `स्वती पूजायाम्' इति प्रतिषेधः कृतः । गतिसमासस्त्वनाश्रितः; `गतिर्गतौ' इति निगातप्रसङ्गात् । वसुकशब्दः पूर्ववदन्तोदात्तः ।

स्वरितग्रहणं विस्पष्टार्थमिति । कथम् ? इत्याह---उदात्ते हीति । आन्तर्यत एव स्वरितो भविष्यतीति । यद्येवम्, तस्य सिद्धत्वाच्छेषनिघातः स्यात्---गाङ्गेऽनूप इति ? एकादेशस्य परं प्रत्यादिवद्भावादनूपशब्दोऽनुदात्तः प्राप्नोति, स्वरितग्रहणे तु सति अस्यासिद्धत्वाद्यथोक्तदोषाभावः । अथ क्रियमाणेऽपि स्वरितग्रहणे यः सिद्धः स्वरितः तेन वर्ज्यमानता कस्मान्न भवति---कन्यानूप इति ? कन्याशब्दः `कन्याराजन्यमनुष्याणामन्तः' इत्यन्तस्वरितः, ततः स्वरितानुदात्तयोरेकादेश आन्तर्यतः स्वरितः, तस्य सिद्धत्वात्तेन वर्ज्यमानता प्राप्नोति ? ततश्चात्र यः परिहारः स एव गाङ्गेऽनूप इत्यत्र भविष्यति । कः पुनरसौ ? पदद्वयाश्रयत्वेन एकादेशस्य बहिरङ्गत्वात्स्वरोऽपि तदीयो बहिरङ्गः, शेषनिघातस्तु एकपदाश्रयत्वात् स्वरोऽपि तदीयोऽन्तरङ्गः; ततः किम् ? `असिद्धं बहिरङ्गमन्तरङ्ग' ।।

नलोपः प्रातिपदिकान्तस्य ।। 8.2.7 ।।

विशेष्यमन्तस्येत्यस्य नेत्येतदविभक्तिकम् ।
तथैव प्रातिपदिकेत्येतत् पदविशेषणम् ।।

प्रातिपदिकस्य, पदस्य---इति समानाधिकरणे षष्ठ्यौ । अहन्निति । हन्तेर्लङ्तिपो हल्ङ्यादिलोपः ।

अन्तग्रहणं किमिति । `नलोपः प्रातिपदिकस्य' इत्येवास्तु, `पदस्य' इति वर्तते, तत्र नकारेण पदे विशेष्यमाणे तदन्तविधिना नकारान्तस्य पदस्य लोपो विधीयमानः `अलोऽन्त्यस्य' इत्यन्त्यस्यैव भविष्यतीति प्रश्नः । राजानाविति । असत्यन्तग्रहणे प्रातिपदिकस्य पदस्य योऽवयवो नकारः, तस्य यत्र तत्र

स्थितस्य लोपो भवतीत्यर्थः स्यात्, ततश्चेहापि स्यादिति भावः । एवं च नराभ्यामित्यादावपि प्रसङ्गो दर्शयितव्यः । ननु च क्रियमाणमप्यन्तग्रहणं प्रातिपदिकग्रहणेन समस्तम्, ततश्च प्रातिपदिकान्तस्य पदावयवस्य नकारस्येत्येषोऽर्थो भवति, न पुनः पदान्तस्येति; ततश्चाहन्, नराभ्यामित्यादौ मा भूत्; राजानावित्यादौ तु स्यादेव ? अत आह---प्रातिपदिकग्रहणमिति ।
अहरिति । `स्वमोर्नपुंसकात्' इति स्वमोर्लुक्, `न लुमताङ्गस्य' इति प्रत्ययलक्षणप्रतिषेधात्सुप्परत्वाभावात् `रोऽसुपि' इति रुत्वम् । अहोभ्यामिति । `अहान्' इति रुत्वम् ।
ननु चात्र रत्वरुत्वयोः कृतयोर्नकाराभावादेव नलोपो न भविष्यत्यत आह---रुत्वरेफयीरसिद्धत्वादिति । नन्वनवकाशत्वाद्रत्वरुत्वे एव भविष्यतः, उक्तं ह्यपवादस्य परस्यापि वचनप्रामाण्याद सिद्धत्वं न भवतीति ? अत आह---सावकाशं वै तदुभयमिति । सम्बुद्धौ हि `न ङिसंबुद्ध्योः' इति नलोपः प्रतिषिद्ध्यते । हे अहरिति । `वा नपुंसकानाम्' इति पक्षे नलोपप्रतिषेधः, अत्र रत्वं सावकाशम् । हे दीर्घाहो निदाघेति । पुंल्लिङ्गेऽन्यपदार्थे बहुव्रीहिः, सम्बुद्धेर्हल्ङ्यादिलोपः । निदाघशब्दस्य परस्य प्रयोगो विशेषणार्थः, `हशि च' इत्युत्वम् । अथ अहः, अहोभ्यामित्यादौ नलोपेकृतेऽप्येकदेशविकृतस्यानन्यत्वात्स एवाहः शब्द इत्यवसिष्टस्य योऽन्त्याकारः सोऽवकाशा इति कस्मान्नोक्तम् ? एवं मन्यते---अहन्निति नकारापरित्यागेन निर्देशान्नकारान्तस्यैव स्थानित्वम्, अन्यथा हस्येत्येव ब्रूयादिति । अहन्निति प्रथमैकवचनान्तमिति । आदेशमात्रे विधित्सिते अह्न इति नकारान्तस्यैव षष्ठ्या प्रथमैकवचनान्तमिति । आदेशमात्रे विधित्सिते अह्न इति नकारान्तस्यैव षष्ठ्या निर्देशं कुर्यात्; प्रथमान्तस्य निर्देशे प्रयोजनम्---एतस्य रूपस्यान्वाख्यानमेवेति भावः ।।
न ङिसम्बुद्ध्योः ।। 8.2.8 ।।
आर्द्रे चर्मन्निति । `सुपां सुलुक्' इत्यादिना ङेर्लुक् ।
ननु च ङिसम्बुद्ध्योर्द्वयोरपि लुप्तयोः पूर्वस्य प्रातिपदिकसञ्ज्ञा नास्ति, प्रत्ययलक्षणेनाप्रत्यय इति निषेधात्; ङौ तु पदसंज्ञापि नास्ति, प्रत्ययलक्षणेनैव प्रवृत्तया भसंज्ञया बाधित्वातः तत्कुतोऽत्र नलोपप्रसङ्गः ? अत आह---एतस्मादेवेति । ननु च हे सुराजन्नित्याद्यर्थमेतत्स्याद्, अत्र हि `कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञा, न च तस्या अपि `अप्रत्ययः' इति निषेधः, सूत्रान्तर्गतत्वात् ? एवं तर्ह्यत्रापि `अप्रत्ययः' इत्यनुवर्त्तते, अन्यथा सुराजेत्यादौ विध्यर्थत्वसम्भवात् समासग्रहणं नियमार्थं न स्यात् । तस्मादुपपन्नमेवास्य ज्ञापकत्वम् । एतच्च प्रतिकार्यं संज्ञाप्रवृत्तिरिति पक्षाश्रयेणोच्यते, तत्र हि विभक्त्यर्थमुत्पन्नया प्रातिपदिकसंज्ञया नलोपो न प्राप्नोति । भसंज्ञा च न भवतीति । अत्रापि `एतस्मादेव प्रतिषेधवचनात्प्रत्ययलक्षणेन ज्ञाप्यते'---इति च सम्बध्यते । ज्ञापनस्य प्रयोजनमाह---तथा चेति । नलोपश्च भवतीति । प्रातिपदिकत्वात् । अल्लोपश्च न भवतीति । भसंज्ञाया अभावात् । अपर आह---``नायमर्थो ज्ञापकसाध्यः भसंज्ञा न भवतीति । कथम् ? `यचि' इत्युच्यते, न चात्र यजादिं पश्यामः; प्रत्यलक्षणेन ? `न लुमताङ्गस्य' इति प्रतिषेधः, तत्र हि लुमता लुप्ते प्रत्यये यदङ्गं तस्य यत्कार्यमाङ्गमनाङ्गं वा तत्सर्वं प्रतिषिध्यते" इति ।
चर्मतिल इति । वैयधिकरण्येऽपि गमकत्वाद्बहुव्रीहिः । ननु चात्यल्पमिदमुच्यते, ङाविति सम्बुद्धावप्युत्तरपदे प्रतिषेधो वक्तव्यः; अन्यथा हे राजन् वृन्दारकेति विगृह्य `वृन्दारकनागकुञ्जरैः पूज्यमानम्' इति सम्बुद्ध्यन्तयोः समासे सति लोपो न स्यात् । तथा च वार्त्तिकम्---ङिसम्बुद्ध्योरनुत्तरपद इति । अत आह---हे राजवृन्दारकेत्यत्र त्विति । तत्र न पूर्वपदार्थसम्भोधनमिति । न हि पृथगवयवार्थयोरभिमुखीकरणे परस्परमेकार्थीभावः सम्भवति । किञ्च `सम्बुद्धौ' इत्युच्यते, न चात्र सम्बुद्धिं पश्यामः । प्रत्ययलक्षणेन ? `न लुमताङ्गस्य' इति प्रतिषेधः । वचनं तु हे राजन्नित्यादौ यत्र लोपशब्देन सम्बुद्धिर्लुप्यते तत्र चरितार्थम् । ङौ तु नायं परिहारः सम्भवति; सर्वत्र लुमता लुप्तत्वात् ।
वा नपुंसकानामिति । अप्राप्तिविभाषेयम्; सम्बुद्धेर्लुमता लुप्तत्वात् ।
मादुपधायाश्च मतोर्वोऽयवादिभ्यः ।। 8.2.9 ।।
अत्र चकाराद्वाक्यभेदः, मश्च अश्चेति समाहारद्वन्द्वः । तस्मान्मात्परस्य मतोर्वो भवति । `उपधायाश्च', मादित्येव, उपधायाश्च मात्परस्य मतोर्वो भवति, पूर्वेणानन्तर्ये विहितं व्यवधानेऽपि यथा स्यादित्ययमारम्भः । एवं व्याख्यातव्ये मतोरिह कार्यित्वेनेत्यादि यदुक्तम्, तत्राभिप्रायो मृग्यः । कश्चिदाह---`मकारान्तान्मकारोपधावर्णान्तादवर्णोपधाच्चेति वैयाकरणगोष्ठीषु पठ्यते, तस्येदमुपपादनम्' इति; तत्रापि मकारोपधादकारोपधादिति बहुव्रीह्यर्थस्य नोपपादनं दृश्यते । व इत्ययमादेशो भवतीति । अत्रेतिशब्दः पठितव्यः, तदयमर्थो भवतीत्युपक्रमात्, यवादिविप्रतिषेधे प्रकारे आदिशब्दः । पयस्वानिति । `तसौ मत्वर्थे' इति भत्वाद्रुत्वाभावः, ।
इह नरोऽस्यास्तीति नृमान्, तस्येदं नार्मतमिति वृद्धौ कृतायामवर्णोपधादिति वत्वं प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः ? इत्यत आह---इहेति । बहिर्भूततद्धितापेक्षत्वाद्बहिरङ्गा वृद्धिरन्तर्भूतमतुबपेक्षे वत्वे असिद्धा भवतीत्यर्थः ।।
झयः ।। 8.2.10 ।।
अग्निचित्वानिति । पूर्ववद्भत्वाज्जश्त्वाभावः ।।
संज्ञायाम् ।। 8.2.11 ।।
अहीवतीत्यादौ चातुरर्थिको नद्यां मतुप् ।।
आसन्दीवदष्टीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ।। 8.2.12 ।।

आसन्दीवदहिस्थलमिति । देशविशेषः, यत्रेदमुच्यते---
आसन्दीवति धान्यादं रुक्मिणं हरितस्रजम् ।
अश्वं बबन्ध सारङ्गं देवेभ्यो जनमेजयः ।। इति ।
तथा चोक्तमिति । प्रयोगशास्त्रेषु । राजासन्दी = सोमराजस्यासनम् । यदि तस्यैव संज्ञायामिति वत्वेन सिद्धम्, आसन्दीवदित्येतत्किमर्थं तर्हि निपातनम् ? इत्यत आह---प्रपञ्चार्थं त्विह पठ्यत इति । अत्रेतिशब्दः पठितव्यः, अपरे त्वाहुरित्युपक्रमात् । शरीरैकदेशस्येति । स पुनर्जान्वोः सन्धिः । चक्रीवन्ति सदो हविर्धानानीति । सारस्वते सत्रे जङ्गमानि सदोहविर्धानानि, न त्वेकत्रावस्थितानि, तानि तत्र तत्र कर्षणाय चक्रयुक्तानि भवन्ति । कक्षीवानिति । `हलः' इति दीर्घत्वम् । रुमन्निति प्रकृत्यन्तरमस्तीति । `रुमा च लवणाकरः' । णत्वार्थं चेति । `पदान्तस्य' इति प्रतिषेधप्रसङ्गात् । मतोर्वा नुडर्थमिति । अत्र पक्षे पूर्वस्य नकारस्य लोपः, णत्वमपि `रषाभ्याम्' इत्येव सिद्धम् ।।
उदन्वानुदधौ च ।। 8.2.13 ।।
उदन्वान्नाम ऋषिरिति । यस्य च कामवर्षो पर्जन्यः---यस्मिन्नुदकं धीयत इति, स पुनस्तटाकादिः । `कर्मण्यधिकरणे च' इति किप्रत्ययः, `पेषंवासवाहनधिषु च' इति उदकस्योद्भावः ।
उदकसत्तासम्बन्धसामान्यमिति । तच्च देवदत्तादिष्वपि सम्भवति । असंज्ञार्थं वोदधिग्रहणम् ।।
राजन्वान् सौराज्ये ।। 8.2.14 ।।
शोभनो राजा तस्य भावः सौराज्यम्, ब्राह्मणादित्वात्ष्यञ्, टिलोपः । तत्पुनः शोभनेन राज्ञा देशस्य सम्बन्धः । समासकृत्तद्धितेषु सम्बन्धाभिधानम्; भावप्रत्ययेनेति वचनात् । एतच्च राजन्वानित्यस्य प्रवृत्तिनिमित्तम्, देश एव त्वभिधेयः, यदाह---सौराज्ये गम्यमान इति । राजन्वानिति । प्रशंसायां मतुप्, नलोपाभावो निपात्यते । सूत्रे पुंल्लिङ्गस्याविवक्षितत्वं दर्शयति---राजन्वती पृथिवीति ।।
अनो नुट् ।। 8.2.16 ।।
अक्षण्वन्त इति । अक्षिशब्दस्य मतुपि `छन्दस्यपि दृश्यते' इति अनङादेशः, नुटोऽसिद्धत्वात् पूर्वं नलोपे भूतपूर्वगत्या नुट्, तस्य णत्वम् । शीर्षण्वतीति । `शीर्षश्छन्दसि' शिरसः शीर्षन्नादेशः । प्रकृत्यन्तरं वा शिरस्शब्देन समानार्थः । शीर्षन्निति छन्दसि निपात्यते । नुडयं परादिः क्रियते, तस्य मतुब्ग्रहणेन ग्रहणात् `मादुपधायाः' इति वत्वं प्राप्नोति । मकारस्य तु न प्राप्नोति; नुटा व्यवधानात् । यदि पुनरयं नुक् पूर्वान्तः क्रियेत ? नैवं शक्यम्; अक्षण्वता, शीर्षण्वता---णत्वं न स्यात् । इह च सुपथिन्तरः---उत्तरसूत्रेण नुकि कृते पदान्तत्वात् `नश्छव्यप्रशान्' इति रुत्वं प्राप्नोति, तस्मात्परादिरेव कर्त्तव्यः, तत्र चोक्तो दोषः । अत आह---नुटोऽसिद्धत्वादिति । नन्वेवमप्यवग्रहे दोषः प्राप्नोति---अक्षण्वन्त इति अक्षण्वन्ते इति णान्तमवगृह्णाति, तन्न प्राप्नोति ? न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यम् ।।
नाद् घस्य ।। 8.2.17 ।।
भूरिदावत्तर इति । `आतो मनिन्' इत्यादिना वनिप् ।
रथीतर इति । रथशब्दान्मत्वर्थीय इनिः, तदन्तात्तरप्, नकारलोपे कृते दकारस्य ईकारः । यदि तु नकारलोपापवादो नकारस्य स्थाने विधीयेत, तदा तस्यासिद्धत्वादेकादेशो न स्यात् ।।
कृपो रो लः ।। 8.2.18 ।।
कृपो धातोरिति पाठः । भाष्ये---`कृपो रो लः' इति पठितत्वात् । `नुड्विधिलादेशविनामेष्वृकारे प्रतिविधातव्यम्' इत्युक्तम्, तत्रावसरे प्राप्ते लादेशे प्रतिविधत्ते---इति सामान्यमिति । वर्णत्वावर्णत्वकृतभेदतिरस्कारेण वर्णात्मिकायामवर्णात्मिकायां च रेफव्यक्तौ यत्सामान्यं वर्त्तते यतो द्वयोरपि तयो र इत्यभिन्नाभिधानप्रत्ययौ भवतः, तदुपादीयते; न तु वर्णात्मिकैव रेफव्यक्तिरित्यर्थः । ततः किम् ? इत्यत आह---तेनेति । इत्यपि सामान्यं चेति । उपादीयत इत्यपेक्षते । अत्रापि तेन यश्च केवलो लकारः, यश्च लृकारस्थः, तयोर्द्वयोरपि ग्रहणमिति पठितव्यम्, पूर्वानुसारेण तु गम्यमानत्वान्न पठितम् । यदि द्वयोरपि ग्रहणम्, ततोऽपि किम् ? इत्याह---ततोऽयमिति । केवलस्य=शुद्धस्य । लकार आदेश इति । अत्रापि केवल इति द्रष्टव्यम् । ऋकारस्यापि लृकार इति । आन्तरतम्यात् । ननु सत्यपि द्वयोरपि ग्रहणे ऋकारस्थस्य रेफस्य लृकारस्थो लकार आदेशो भवतु, कथं तु कृत्स्नस्य कृत्स्नो वर्ण आदेशो लभ्यते ? इत्याशङ्क्योक्तम्---एकदेशद्वारेणेति । एकदेशविकारस्थो रेफः, तस्य विकार एकदेशविकारः । यद्वा---अत्र एकदेश लृकारस्थो लकारः, स एव विकार एकदेशविकारः, तद्द्वारेण । तत एतदुक्तं भवति---अज्भक्तिसम्पुटितयो रेफलकारयोर्निष्कृष्य कर्तुमशक्यत्वात्समुदायस्य समुदाय आदेश इति । यदि निष्कर्षोऽशक्यक्रियः, मा भूत्तयोरुपादानम्, न पुनरेतावता सूत्रेऽनुपात्तयोः समुदाययोः स्थान्यादेशभावो विद्यते ? इत्यत आह--तथा चेति । एवमादय इति । आदिशब्देन `तासि च क्लृपः', `ऋदुपधाच्चाक्लृपि चृतेः' `अनवक्लृप्त्यवमर्षयोः' इत्यादेर्ग्रहणम् । कल्प्तेति । ऊदित्त्वात्पक्षे इडभावः । अत्र लत्वस्यासिद्धत्वात् पूर्वं परस्मैपदे `तासि च क्लपः' इतीडभावः, अन्यत्र तु गुणे कृते रेफस्य लकारः । चिक्लृप्सतीति । `हलन्ताच्च' इति सनः कित्त्वम् । क्रपेरिति । `क्रप कृपायाम्' । भवतु सम्प्रसारणे कृते रूपम्, तथापि रूपसामान्याद् ग्रहणप्रसङ्गः ? अत आह---तस्य हीति । क्रपेरेव द्रष्टव्या इति । `रञ्जे क्युन्', बहुलवचनात्क्रपेरपि भवति `कृकृपिभ्यां कीटन्' इत्यत्रापि क्रपिरेव पठितव्यः । `खर्जिपिञ्जादिभ्य ऊरोलचौ' क्रपेरपि भवतु, सर्वत्र बहुलवचनात् सम्प्रसारणम् ।

कर्पूरादय इति । आदिशब्देन कृपाणस्य ग्रहणम् । `युधिबुधिदृशेः किच्च' इति बाहुलकात् कृपेरपि आनच् । यद्यवश्यं बाहुलकमाश्रयणीयम्, कृपेरपि न दोषः ? इत्याह---उणादय इति ।

बालेति । `बल वल्ल संवरणे', बल्यत इति बालः । मूलमिति । `मूल प्रतिष्ठायाम्' इत्यस्मादिगुपधलक्षणः कः । `लङ्घिवंह्योर्नलोपश्च' इति कुप्रत्ययान्तो लघुशब्दः । अलमित्यव्ययम् । `अङ्गेः कुलिः' अङ्गुलः । `अमेर्गुरी रश्च लो वा' इति नाश्रितम् ।

कपिलकादिषुचारस्य लः । रोमाणीति । रौतेर्मनिन्, `रोमन् नामन् सीमन् स्तोमन् होमन् सोमन् लोमन् व्योमन् विधर्मन् पाप्मन् धामन्' इत्यत्र `लोमन् समान्' इति निपातनं नाश्रितम् । पांसुरमिति । पांसुरस्मिन्नस्तीति `नगपांसुपाण्डुभ्यश्च' इति रः । `कृञो मनिन्' कर्म । शुक्रः, शुक्ल इति । `ऋज्राग्र' इति निपातनं नाश्रितम् । अथ `क्लृपू सामर्थ्ये, इत्येव कस्मान्न पठितम्, एवं हि लत्वं न विधेयं भवति ? नैतदस्ति; अचीक्लृपदिति हि न सिध्येत् । `ऋकारलृकारयोः सवर्णविधिः' इति लृकारस्य `उरत्' इति अकारे कृते अचीकृपदिति स्यात्, लत्वविधौ तस्यासिद्धत्वात्पूर्वमृकारः, ततो लत्वमिति सिद्धमिष्टम् । तथा चलीक्लृप्यते इति रीको पि लत्वसिद्धिर्भवति ।।

उपर्गस्यायतौ ।। 8.2.19 ।।

अयतौ पर इति । अत्र द्वौ पक्षौ---अयतिग्रहणं रेफविशेषणम्---अयतिपरस्य रेफस्य, स चेदुपसर्गस्येति; उपसर्गविशेषणं वा---अयतिपरस्योपसर्गस्य यो रेफ इति । तत्राद्ये पक्षे एवमन्वयः---अयतौ परतो यो रेफ उपसर्गसम्बन्धी तस्येति; द्वितीये तु---अयतौ परतो य उपसर्गस्तस्य यो रेफस्तस्येति । प्लायत इति । अयतिरनुदात्तेत् । कथं तहि `उदयति विततोर्ध्वरश्मिरज्जौ' इति परस्मैपदम् ? किमनेन वन्यगजशौचेन ! यदि वा---पचाद्यजन्तादुदयशब्दादाचारे क्विपि लट् । केचित्तु `इट कटी गतौ' इत्यत्र इकारमपि धातुं पठन्ति । यथा त्वत्र दर्शिते पक्षद्वयेऽपि दोषो न भवति, तथा क्रमेण दर्शयति--अत्रेति ।

स्थानवद्भावादिति । `पूर्वत्रासिद्धे न स्थानिवत्' इत्येतत्त्विह न भवति; `तस्य दोषः संयोगादिलोपलत्वणत्वेषु' इत्यपवादस्मरणात् । यद्ययतिग्रहणं रेफस्य विशेषणमिति । कार्यित्वेन प्रधानत्वात् । एकेन वर्णेनेति । एकग्रहणं प्रत्यय इत्यत्र सङ्घातेन व्यवाये न भवतीति प्रदर्शनार्थम् । तथा चेति । एवं च कृत्वेत्यर्थः । पल्ययत इत्यत्रापीति । यत्र श्रूयमाणेनैकेनैव वर्णेन लौकिकं व्यवधानम्, तत्रापि प्रवर्तते । न केवलं प्लायत इत्यादौ यत्र स्थानिभावद्वारेण शास्त्रीयं तत्रैवेत्यपिशब्दस्यार्थः । अमुमेव विशेषं दर्शयितुमस्य पृथगुपन्यासः ।

ननु च `निर कुषः', `सुदुरोरधिकरणे' इति निर्देशाद्रेकान्तावप्युसर्गौ स्तः, तौ वचनस्यावकाशौ इति कथं व्यवधाने भवति ? उच्यते; यद्येतावत्प्रयोजनं स्यात्, `दुरोरयतौ' इत्येव ब्रूयात्, उपसर्गग्रहणात्तु व्यवायेऽपि भविष्यति, एतच्चैकवर्णव्यवधानेनाप्युपपन्नमिति न प्रत्ययत इत्यत्र प्रसङ्गः । उपसर्गविशेषणेत्विति । श्रुतत्वादिति भावः । सिद्धमेवैतत्सवामति । `येन नाव्यवधानमित्यादि न कश्चित् यत्नोऽस्मिन्पक्षे' इत्येवशब्दस्यार्थः । प्रतेरपि तु प्राप्नोतीति । पूर्वस्मिन्पक्षे सङ्घातेन व्यवायान्न प्राप्नोति, अत्र तु प्राप्नोतीत्यमुं विशेषं तुशब्दो द्योतयति । प्रथमपक्षदर्शनाभिनिविष्टास्त्विति । प्रथमपक्षस्य या दर्शना=परेभ्यः प्रतिपादना, तत्राभिनिविष्टाः = तत्परायणा इत्यर्थः । अपरे त्वित्यादि । आप्तपर्यायः प्रत्ययितशब्द इतच्प्रत्ययान्तः, सञ्जातप्रत्ययाः प्रत्ययिता इति । निस्दुस् इत्येतयोस्त्विति । सकारान्तविषयो ग्रन्थः, रेफान्तयोस्तु भवितव्यमेव लत्वेन ।।

ग्रो यङि ।। 8.2.20 ।।

उदाहरणे `ऋत इद्धातोः' इतीत्वम्, रपरत्वम्, `हलि च' इति दीर्घस्यासिद्धत्वात्पूर्वमनेन लत्वम्, ततोऽपहृतनिमित्तत्वाद्दीर्घाभावः ।

गिरतेः, गृणातेश्चेति । निगरणार्थस्य, शब्दार्थस्य च । सामान्येनेति । विशेषानुपादानात् । अपरे तु गिरतेरेव ग्रहणमिच्छन्तीत्यनुषङ्गः । कः पुनरत्र हेतुः ? इत्यत आह---गृणातेस्त्विति । तु ह्यर्थे । निगीर्यत इति । यक् ।।

अचि विभाषा ।। 8.2.21 ।।

धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्प्रत्ययः सन्निधापितः, तस्याचा विशेषणात्तदादिविधिर्विज्ञायते, यदाह---अजादौ प्रत्यये इति । निगिरतीति । तुदादित्वाच्छः, तस्य ङित्त्वादसति गुणे इत्वम् । णिलोपस्य स्थानिवद्भावादिति । पदस्य लत्वविधानादन्तरङ्गत्वाभावात् `पूर्वत्रासिद्धम्' इति च लत्वस्यासिद्धत्वापूर्वं णिलोप एव भवतीति भावः । प्रत्ययलक्षणमप्यत्र शक्यं वक्तुम् । न च वर्णाश्रयत्वम्; `अजादौ प्रत्यये' इत्युक्तत्वात् ।

कथं पुनः स्थानिवद्भावः, यावता `पूर्वत्रासिद्धे न स्थानिवत्' इति पठ्यते ? अत आह---पूर्वत्रासिद्ध इति । कः पुनरस्यापवादः ? इत्यत आह---तस्य दोष इति । अन्तरङ्गत्वाद्वेति । `पदस्य' इत्यधिकारात् कालतोऽन्तरङ्गत्वाभावेऽप्यन्तर्भूताजाद्यपेक्षत्वाल्लत्वमन्तरङ्गम्, बहिर्भूतयगपेक्षत्वात्तु णिलोपो बहिरङ्ग इति भावः । गिरौ, गिर इति । विस्पष्टार्थम् ।।

परेश्च घाङ्कयोः ।। 8.2.22 ।।

परि घ इति । `परौ घः' इत्यप्, हन्तेष्टिलोपः, घत्वं च । पर्यङ्क इति । `अकि लक्षणे' पचाद्यच्, `हलश्च' इति घञ्, चाद् घश्च ।

घ इति स्वरूपग्रहणमत्रेष्यत इति । इष्टिरेवेयम् । परियोगः, पर्यनुयोगः ।।

संयोगान्तस्य लोपः ।। 8.2.23 ।।

इह श्रेयान्, भूयानिति संयोगान्तलोपो न प्राप्नोति, परत्वाद्रुत्वेन बाध्यमानत्वात् ? इत्याशङ्क्याह---इहेति ।

यथैव तर्हि रुत्वमसिद्धत्वात्संयोगान्तलोपं न बाधते, तथा जश्त्वमपि न बाधेत; ततश्च पयः, यश इति जश्त्वमेव स्याद् ? अत आह---जश्त्वे त्विति । संयोगान्तलोपे हि प्राप्तेऽप्राप्ते च रुत्वमारभ्यते---श्रेयानित्यादौ प्राप्ते, पय इत्यादौ त्वप्राप्ते । जश्त्वे तु सर्वत्र प्राप्ते एव । तस्माद्येननाप्राप्तिन्यायेन

जश्त्वमेव बाध्यते, न संयोगान्तलोपः ।

दध्यत्रेत्यादि । यणादेशो हि द्विपदाश्रयत्वाद्बहिरङ्गः, संयोगान्तस्य लोपस्तु एकपदाश्रयत्वादन्तरङ्गः ।

अन्तग्रहणं शक्यमकर्तुम् । `पदस्य' इति वर्त्तते, संयोगेन हि पदे विशेष्यमाणे तदन्तविधिना `संयोगान्तस्य' इति लभ्यत एव ।।

रात्सस्य ।। 8.2.24 ।।

संयोगान्तस्य पदस्येत्यादि । संयोगान्तस्य पदस्य योऽवयवो रेफः, तस्मादुत्तरस्य सकारस्य लोपो भवति, तदेव पदं प्रत्यलोऽन्त्यस्येत्यर्थः । अक्षाः, अत्सा इति । `क्षर सञ्चलने', `त्सर छद्मगतौ' । रात्सस्यैवेति । रादेव सस्य नान्यतः, श्रेयानित्यादौ---एवं तु नियमो न भवति; उरः प्रभृतिषु पुमानिति कृतसंयोगान्तलोपस्य पाठात् । ऊर्गिति । `ऊर्ज बालप्राणनयोः', `भ्राजभास' इत्यादिना क्विप् । अत्र नियमाज्जकारस्य लोपाभावे `चोः कुः' इति कुत्वम्---गकारः, `वावसाने' इति चर्त्वम् । न्यमार्डिति । `मृजू शुद्धौ' अदादिः, तिपो हल्ङ्यादिलोपः, `मृजेर्वृद्धिः', व्रश्चादिना षत्वम्, जश्त्वचर्त्वे ।

धि च ।। 8.2.25 ।।

`इतः प्रभृति सिचः सकारस्य लोपः' इति वक्ष्यति, ततश्च सिचा प्रत्यय आक्षिप्यते, तस्य धकारेण विशेषणात्तदादिविधिर्विज्ञायते, इत्याह---धकारादौ प्रत्यय इति । भाष्यकारमते तु धकारे पर इति द्रष्टव्यम् । अलविढ्वमिति । लुङ्, च्लेः सिच्, इट्, सिचो लोपः, `विभाषेटः' इति पक्षे मूर्धन्यः । धकारो न श्रूयेतेति । ष्टुत्वे कृते अलविढ्वमित्येव स्यात् । विभाषाग्रहणं तु तत्र षीध्वमर्थम्, लिङर्थं च स्यात् ।

इतः प्रभृतीत्यादि । `उदः स्थास्तम्भोः पूर्वस्य' इति पूर्वसवर्णविधानमत्र ज्ञापकमाहुः । अन्यथा उत्+स्था इति स्थिते तकारात्परस्य सकारस्य `झलो झलि' इति लोपे सति उत्थानमित्यादेः सिद्धत्वादनर्थकं तत् स्यात् । सामान्यापेक्षं च ज्ञापकम्---अस्मिन् प्रकरणे यो लोपः स सिच इति । चकाद्धीति । हे शिरः पलितं सच्चकाद्धि, शोभस्वेत्यर्थः । `चकासृ दीप्तौ' अदादिः, लोट्, सिपो हिः, हेर्द्धिः, `झलां जश् झशि' इति सकारस्य दकारः । पयो धावतीति । `हशि च' इति रोरुत्वम् । यदि सिचो लोप इष्यते, सग्धिः, बब्धाम्---`झलो झलि' इति लोपो न स्यात् ? अत आह---सग्धिर्बब्धामिति । अदेः क्तिनि `बहुलं छन्दसि' इति घस्लादेशः, `घसिभसोर्हलि च' इत्युपधालोपः, `बहुलं छन्दसि' इति सलोपः, `झषस्तथोर्धोऽधः' जश्त्वेन घकारस्य गकारः, समाना ग्धिः सग्धिरिति `पूर्वापरप्रथम' इत्यादिना कर्मधारयः, `समानस्य छन्दसि' इति सभावः । बब्धामिति । `भस भर्त्सनदीप्त्योः' जुहोत्यादिः, लोट्, तसस्ताम्, श्लौ द्विर्वचनम्, पूर्ववदुपधालोपः, सकारस्य च लोपः, तकारस्व धकारः, पकारस्य जश्त्वम्---बकारः । पयो धावतीत्येवमादावपीति । अन्यथा रुत्वस्य सिद्धत्वात् पूर्वं सलोपः स्यात् ।

भाष्यकारस्त्वाहेति । पूर्वं तु श्लोकवार्त्तिककारस्य मतं दर्शितम् । यत्नान्तरमास्थेयमिति । एकपदाश्रयत्वादन्तरङ्गं रुत्वम्, पदद्वयाश्रयत्वाद्बहिरङ्गः सलोपः; तत्र सलोपस्यासिद्धत्वात् पूर्वत्रेति निर्दिष्टस्य विसर्गस्याभावादसिद्धत्वाभावादुत्वमेव तावत्प्रवर्तते, अल्विधित्वाच्च स्थानिवत्वाभावादोर्लोपाभाव इति ।

धि सकार इति । स्थानिनोऽपि विषयत्वविवक्षया सकार इति सप्तमीनिर्देशः । आशाध्वमिति । `आङः शासु इच्छायाम्' अदादिरनुदात्तेत् । जश्त्वमिति । `झलां जश् झशि' इत्यनेन । सर्वमेवमिति । यदि सकारस्य जश्त्वेनाशाध्वमिति सिद्धम्, ततः सर्वमेव लक्ष्यजातं जश्त्वेनैव सिद्धं स्यात्, ततश्च सूत्रमेवेदं न कर्त्तव्यमिति । श्रुतिश्चापि न भिद्यत इति । व्यञ्जनपरस्यैकस्यानेकस्य वा हलः श्रवणे न धार्यत इत्यर्थः । लुङश्चापीति । अयं चापरो जश्त्वे सति गुणः, `इणः षीध्वम्' इत्यत्र लुङो ग्रहणं न कर्त्तव्यं भवति; अव्योढ्वम्, अलोढ्वमित्यादौ षत्वजश्त्वष्टुत्वैरेव रूपस्य सिद्धत्वात् ।

ह्रस्वादङ्गादिति सिचो लोपेऽकृढ्वं कथं भवेत् ।

दोषान्तराभिधानात्तु नैतत्सुष्ठु निरूपितम् ।।

तद्दर्शयति---सेटि दुष्यतीति । एतच्च यद्यत्र सकारस्य लोपो न स्यादित्युपक्रमे एवोक्तम् । तस्माद्धि चेति कर्त्तव्यम्, मूर्धन्ये च लुङो ग्रहः । धिसकारे सिचो लोप इति त्वेतदवस्थितम् । तत्र दोषान्तरं दर्सयति---घसिभसोरिति । सग्धिर्बब्धामित्येतयोरसिद्धिप्रसङ्गात्, न सिचो लोपः शक्यो विज्ञातुमित्यर्थः । परिहरति---छान्दसो वर्णलोपो वेति । वाशब्दः पक्षं व्यावर्त्तयति, सिच एवायं लोपः, घसिभस्योस्तु छान्दसो वर्णलोप इति । क्व यथा ? इत्याह---यथेति । इष्कर्त्तारमध्वरस्येत्यस्यैकदेशानुकरणादिष्कर्तारमध्वरशब्दात्सप्तमी । तत्र बह्वचाः---इष्कर्त्तारमिति पठन्ति, तैत्तिरीयास्तु निष्कर्त्तारमिति ।।

झलो झलि ।। 8.2.26 ।।

भिदिच्छिदी स्वरितेतौ, मन्यतिहनुदात्तेत् ।

अयमपि सिच एव लोप इति । यदि वा `पदस्य' इति वर्त्तते, तत्र प्रत्यासत्तेः `झलो झलि' सस्येति निर्दिष्टानां त्रयाणामप्येकसम्बन्धत्वे विधिरयमिति सोमसुत् स्तोतेत्यादौ न भविष्यति । समासेऽपि न भवति---सोमसुत्स्थितिरिति । किं कारणम् ? सकारथकाराभ्यां यत्पदमारब्धं तत्प्रति तकारस्यावयवत्वाभावात् ।।

ह्रस्वादङ्गात् ।। 8.2.27 ।।

अच्योष्टेति । सलोपस्यासिद्धत्वात्पूर्वं गुणः, ततो विहितनिमित्तत्वाल्लोपाभावः । अयमपीति । अत्र `उदः स्थास्तम्भोः' इति पूर्वोक्तं ज्ञापकमेव शरणम् । द्विष्टमामिति । `ह्रस्वात्तादौ तद्धिते' इति षत्वम् ।।

इट ईटि ।। 8.2.28 ।।

अत्र सिच एव सम्भवः ।।
स्कोः संयोगाद्योरन्ते च ।। 8.2.29 ।।
गुणभूतोऽपि संयोगो झलन्ताभ्यां विशेष्यते ।
संयोगाद्योः पदस्यान्ते स्कोर्यस्मान्नास्ति सम्भवः ।।
इति मत्वाऽऽह---पदस्यान्त इति । झलि च परत इति । पदस्य यः संयोग इत्यपेक्षते । लग्न इति । `ओलस्जी व्रीडे', निष्ठा, ईदित्त्वादिट्प्रतिषेधः । अत्र तकारे झलि परतः सजयोर्यस्संयोगः तदादिः सकारः, `ओदितश्च' इति निष्ठानत्वम्, तस्यासिद्धत्वात् कुत्वम् । साधुलगिति । साधु लज्जत इति क्विप् । मग्न इति । `मस्जिनशोर्झलि' इति नुम्, स च जकारात्पूर्वः, `मस्जेरन्त्यात्पूर्वं नुममिच्छन्ति' इति वचनात् । तेन `अनिदिताम्' इति नलोपः, सलोपादि पूर्ववत् । तष्ट इति । `तक्षू तनूकरणे', ऊदित्तावद्विकल्पितेट्, `यस्य विभाषा' इतीट्प्रतिषेधः ।
झलि सङीति वक्तव्यमिति । सङीत्ययं प्रकरणशेषः । किं प्रयोजनम् ?
गिरोऽभोधिर्द्विष्टरां च दृषत्स्थः काष्टशक्स्थिरः ।
क्रुञ्चा धुर्येति मा स्मैषु सत्वादीनि भवन्त्विति ।।
गिर इति---अत्र `अचि विभाषा' इति लत्वं मा भूत् । अभोधिरिति---`धि च' इति सलोपो न भवति । द्विष्टरामिति---`ह्रस्वादङ्गात्' इति न भवति । दृषत्स्थः---`झलो झलि' इति न भवति । काष्ठशक्स्थिरः---`स्कोः संयोगाद्योः' इति न भवति । क्रुञ्चा---`चोः कुः' इति कुत्वं न भवति । धुरं वहतीति धुर्येति---`हलि च' इति दीर्घत्वं न भवति । तथा च वार्त्तिकम्---`सङि लत्वलोपसंयोगादिलोपकुत्वदीर्घत्वानि' इति । सङीति प्रकृत्य लत्वादीनि वक्तव्यानीत्यर्थः । तदेवं वार्त्तिककारमतेऽपि चकाधीत्येव भवितव्यम्; सङीति वचनात् । सनः प्रमृतीति । धातुप्रत्ययानां ग्रहणमित्यर्थः । अत्र संयोगादिलोपं प्रयोजनं प्रत्याचष्टे---तदिति । तदिति वाक्योपन्यासे । शकेरिति । ककारान्तोपलक्षणमेतत्, तेन `कक लौल्ये', `कुक वृक आदाने' इत्यादेरपि क्विबन्तस्य प्रयोगो नास्त्येव । आहुरिति । भाष्यकारादयः । तत्र भाष्यं तावत् पठति---काष्ठशगेवेति । वाक्यर्थमित्यत्र स्थानिवद्भावोऽपि शक्यो वक्तुम् `तस्य दोषः संयोगादिलोप' इत्युक्तत्वात् ।।
चोः कुः ।। 8.2.30 ।।
नकारोपधो वेति । पूर्वमौत्पत्तिकं ञकारोपधत्वमाश्रित्येक्तम्, इदानीं तु नकारस्यानुस्वारपरसवर्णाभ्यामागतो ञकार इत्युच्यते । नकारलोपे हीति । तथा सन्निपातपरिभाषायाः प्रयोजनेषु पठितम्---उदुपधत्वस्य निकुचित इति । कुचितशब्दे कित्त्वसन्निपातकृतमुदुपधत्त्वम् `उदुपधाद्भावादिकर्मणोरन्यतरस्याम्' कित्त्वस्य निमित्तं न भवतीत्यर्थः । नन्वस्तु नोपधः, तथाप्यनुस्वारपरसवर्णयोः कृतयोः नकारस्य कुत्वप्रसङ्गः ? अत आह---तत्रेति । चुत्वस्य त्वत्र प्रसङ्गो नास्ति; अनुस्वारं प्रति तस्यासिद्धत्वात् ।।
हो ढः ।। 8.2.31 ।।
सोढेति । `तीषसह' इतीड् विकल्पः । तुराषाडिति । `छन्दसि सहः' इति ण्विः, `अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घत्वम्; `सहेः साडः सः' इति षत्वम् । प्रष्ठवाडिति । `वहश्च' इति ण्विः ।।
दादेर्धातोर्घः ।। 8.2.32 ।।
किं तर्हि तद्विशेषणमिति । यद्यपि समानाधिकरणं न भवतीत्यस्यैतत्प्रतिपक्षभूतं न भवति, समानाधिकरणस्यापि विशेषणत्वोपपत्तेः, तथापि सामानाधिकरण्यपक्षे `धातोः' इत्येतद्विशेष्यम्; अत्र तु पक्षे विशेषणमित्यस्यैव प्रतिपक्षता । अवयवषष्ठ्यन्तमिति । अवयवसम्बन्धे या षष्ठी तदन्तमित्यर्थः । अत्र स्पष्टमेव प्रतिपक्षत्वम्---धातोरवयवो यो दादिः शब्द इति । एवं चोपक्रमेऽपि दकारादेःस धातोः---इति व्यधिकरणे षष्ठ्यौ । किं कृतं भवतीति । किमिष्टं सिद्धं भवतीत्यर्थः । अधोगित्यत्रापीति । सामानाधिकरण्ये त्वडागमेन दादित्वस्य विहितत्वान्न स्यात् । कथमिति । धातुरेवायं न धातोरवयव इति प्रश्नः । अथ वेति । अस्मिन्पक्षे उपक्रमेऽपि `दादेर्धातोः' इति यथाश्रुतमेव । धातूपदेश इति । एतच्च धातुग्रहणाल्लभ्यते ।
न ह्यधातोर्दकारादेर्हकारान्तस्य सम्भवः ।
देवानडुद्भ्यामित्यादौ यस्माड्ढत्वं प्रवर्त्तते ।।
तदेतदसमीचीनमवधानच्युतं वचः ।
यस्माद्दामलिडित्यादेरधातोरपि सम्भवः ।।
तस्माद्धातुग्रहणमावर्तनीयम् । तत्रैकमतिरिच्यमानमुपदेशकालं लक्षयति । तथा चेति । पूर्वत्र तु पक्षे व्यपदेशिवद्भावेन दामलिडित्यत्रापि प्रसङ्गः ।।
वा द्रुहमुहष्णुहष्णिहाम् ।। 8.2.33 ।।
द्रुहादय एते दिवादिष्वनेनैव क्रमेण प्रपठ्यन्ते, रधादित्वाद्विकल्पितेटः । तत्र `वा द्रुहादीनाम्' इति वक्तव्ये प्रतिपदपाठो यङ्लुक्यपि यथा स्यात्---दोध्रुक्, दोध्रुट्; अन्यथा `निर्द्दिष्टं यद्गणेन च' इति न स्यात् ।।
नहो धः ।। 8.2.34 ।।
परीणदिति । सम्पदादित्वात्क्विप्, `नहिवृति' इति दीर्गत्वम्, `उपसर्गादसमासेऽपि' इति णत्वम् । प्रक्रियालाघवार्थं दकार एव विधातव्ये धकारविधानम् `झषस्तथोर्धोऽधः' इति धत्वं यथा स्यात्, नद्धमित्यत्र रदाभ्यां निष्ठानत्वं च मा भूदिति ।
आहस्थः ।। 8.2.35 ।।

अथ प्रकृतो धकार एव कस्मान्न विधीयते, तस्यापि हि चर्त्वेन आत्थेति सिद्धम्, थकारस्यापि चर्त्वेन भवितव्यम्, एवं च कृत्वा `आहनहोर्धः' इत्येक एव योगः कर्त्तव्यः ? अत आह--आदेशान्तरकरणमिति । एवमपि तकार एव कर्त्तव्यः ।
हृग्रहोरिति । हकारस्येति वचनं हरत्यर्थम् । निग्राभमिति । `उदि ग्रहः' इत्यत्र `छन्दसि निपूर्वादपीष्यते स्रुगुद्यमननिपातनयोः' इति वचनाद्वा घञ् ।।
व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ।। 8.2.36 ।।
अत्र शकारान्तस्य जश्त्वे प्राप्ते, इतरेषां तु कुत्वे तदपवादः षत्वं विधीयते । मूलवृट्, धानामृडिति । ग्रहिज्यादिना सम्प्रसारणम्, `स्कोः संयोगाद्योः' इति सलोपः, षकारस्य जश्त्वम्---डकारः, `वावसाने' इति पक्षे टकारः ।
झलादिराभ्यामित्यादि । पर्यवपद्यते=व्यवधीयते । राष्टिः, भ्राष्टिरिति । `गुरोश्च हलः' इत्यकारे प्राप्ते `क्तिन्नाबादिभ्यः' इति क्तिन्प्रत्ययः, `तितुत्रतथ' इत्यादिनेट्प्रतिषेधः ।
शब्दप्राडिति । `क्विब्वचि' इत्यादिना क्विप्, दीर्घत्वम्, सम्प्रसारणाभावश्च । छग्रहणमनर्थकम्; `च्छ्वोः शूड्' इत्यादिना छस्य शत्वे कृते शान्तानामित्येव षत्वं सिद्धम् ? अत आह---च्छ्वोः शूडित्यादि ।।
एकाचो बशो भष् झषन्तस्य स्ध्वोः ।। 8.2.37 ।।
`धातोः' इति यदिहानुवर्त्तते तद्व्यधिकरणमवयवषष्ठ्यन्तम् `एकाचः' इत्यस्य विशेषणम् । `झषन्तस्य' इत्येतदपि तस्यैव समानाधिकरणं विशेषणम् । एवंविशिष्टं तु `एकाचः' इत्येतदवयवषष्ठ्यन्तिविशेषणम् । तदाह---धातोरवयव इत्यादि । झलि सकार इति । एतेनानुवर्त्तमानस्य झलो विशेषणं सकार इति दर्शयति । किमथ पुनरिह झलीत्यनुवर्त्तते ? `अन्त' इत्यस्यानुवृत्तिर्यथा स्याद्, अन्यथा झलीत्यस्य निवृत्तौ तत्सम्बद्धमन्त इत्यपि निवर्त्तेत । ननु
चत्वारो भष आदेशाः स्थानिनस्तु बशस्त्रयः ।
डकारस्य तु न क्वापि सम्भवोऽस्ति कथञ्चन ।।
ततश्च वैषम्यात्संख्यातानुदेशो न प्राप्नोति ? तत्राह---चत्वारो बशः स्थानिन इत्यादि ।
शास्त्रप्रतीतिवेलायां संख्यासाम्यस्य सम्भवात् ।।
प्रवर्त्तते यथासंख्यमनुष्ठाने त्वसम्भवः ।।
इत्यर्थः । क्वचित्तु नायं ग्रन्थः पठ्यते । भोत्स्यन्त इति । बुधिरनुदात्तेत्, लृटि स्यः, तत्र व्यपदेशवद्भावेन धातुं प्रत्येकाचोऽवयवत्वम् । अभुघ्वमिति । `धि च' इति सिचो लोपः । गुहिदुही स्वरितेतौ ।
अजर्घा इति । गृधेर्यङ्लुकि द्विर्वचने धातुं प्रत्येकाचोऽवयवत्वम्, `रुग्रिकौ च लुकि' इति रुक्, जर्गृध् इति स्थिते लङादि ।
गर्दभयतेरिति । गर्दभमाचष्ट इति णिच् । अश्रावी प्रत्ययोऽप्रत्ययः क्विदिः ।
असत्येकाज्ग्रहणे इत्यादि । यद्येकाज्ग्रहणं न क्रियेत, ततोऽन्यस्येहाश्रुतत्वाद् बशेव धातोरित्यनेन विशेष्येत । बशो झषन्तत्वस्यासम्भवाज्झषन्तस्येत्यनेनापि धातुरेव विशेष्येत, ततश्चायमर्थः स्यात्---झषन्तस्य धातोर्योऽवयवो वश् तस्य भषिति, ततो दामलिडित्यत्रापि प्रसङ्गः । `एकाचः' इत्यस्मिंस्तु सति वृत्तिकारोपदर्शित एवार्थो भवतीति च तत्र प्रसङ्गः । अत्र हि यो झषन्त एकाच् लिडिति न तस्यावयवो ब्रश् दकारः, यस्य चावयवो दामित्यस्य न स झषन्तः । क्रोत्स्यतीति । अत्र ककारस्य घकारो न भवति ।।
दधस्तथोश्च ।। 8.2.38 ।।
दधातिर्निर्दिश्यत इति । `दध धारणे' इत्यस्य ग्रहणं न भवति; शपा तयोर्व्यवायात् ।
ननु यङ्लुकि व्यवायो नास्ति, ततश्च तस्यैव ग्रहणप्रसङ्गः, एवं च वर्चनसामर्थ्यादिति वक्ष्यमाणं नाश्रयितव्यं भवति ? तस्माद्व्याख्यानमेवात्र शरणम् ।
वचनसामर्थ्यादिति । न हि दधातिराकारलोपेन विना झषन्तो भवति । एतच्च `पूर्वत्रासिद्धे न स्थानिवत्' इत्यनाश्रित्योक्तम् । अभ्यासजश्त्वस्य चासिद्दत्वमिति । वचनसामर्थ्यान्न भवतीत्यपेक्षते । न ह्यभ्यासस्य जश्त्वेन विना दधातेर्बश् क्वचित् सम्भवति ।
तथोरिति किमिति । `झलि' इति वर्त्तते, `झषन्तस्य' इति च; न च तकारथकाराभ्यामन्यो दधो झलस्ति, स्ध्वोस्तावदिष्टमेव । तस्मात्तथोरिति न वक्तव्यम् । एवं च कृत्वा चकारोऽपि न कर्त्तव्यः, सर्वत्र झलीत्येव सिद्धमिति प्रश्नः । आनन्तर्यादिति । ननु च स्ध्वोः पूर्वेणेव सिद्धम् ? न सिध्यति; आल्लोपस्यस्थानिवद्भावे सति अझषन्तत्वात् । ननु च पूर्वत्रासिद्धे नास्ति स्थानिवद्भावः ? एवमप्यभ्यासजश्त्वस्यासिद्धत्वान्न सिध्यति ।
यदि तु `अभ्यासजश्त्वचर्त्वमेत्वतुकोः सिद्धं वक्तव्यम्' इत्यत्र एत्वतुकोरित्यपनीयाविशेषेण सिद्धत्वमुच्येत, फलिभजिग्रहणं वा सामान्येन ज्ञापकमाश्रीयेत, न त्वेत्वविषयमेव; ततः `तथोश्च' इति शक्यमकर्त्तुम् । कथम् ? स्ध्वोः पूर्वेणैव सिद्धम्, इदं तु व्यतिरिक्ते झलि यथा स्यादित्येवमर्थं भविष्यति ।।
झलां जशोऽन्ते ।। 8.2.39 ।।
पदस्यान्ते वर्त्तमानानामिति । पदावसाने वर्त्तमानानाम् । अन्तशब्दोऽवसानवचनः, न त्ववयववचनः । श्वलिडिति । अत्र हकारस्य जश्त्वे प्राप्ते तस्यासिद्धत्वात् पूर्वं ढत्वम्, ढकारस्य जश्त्वम्---डकारः ।
झषस्तथोर्धोऽधः ।। 8.2.40 ।।
दधातिं वर्जयित्वेति । अनेनाध इति धातुप्रतिषेधं दर्शयति । यदि धकारप्रतिषेधः स्यात्---धकारात्परयोर्नेति, ततः `गतिबुद्धि' इत्यादयो निर्देशा नोपपद्येरन् । अलब्धष अलब्धा इति । लुङि त-थासौ । एवमलीढ, अलीढा इति । धत्तः, धत्थ इति । धत्वे प्रतिषिद्धे धकारस्य चर्त्वम् ।

`अधः' इति शक्यमवक्तुम् । इह कस्मान्न---धत्तः, धत्थ इति ? जश्त्वे योगविभागः करिष्यते, `दधस्तथोश्च', `झलां जशः'---झलां जशो भवन्ति दधस्तथोः, ततः `अन्ते'---अन्ते च झलां जशो भवन्ति, तत्र `पूर्वत्रासिद्धम्' इति भष्भावे जश्त्वस्यासिद्धत्वाज्झषन्तत्वम् । धत्वे परस्मिन् सिद्धं जश्त्वमित्यझषन्तत्वाद्धत्वाभाव इति सिद्धमिष्टम् ।।

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ।। 8.2.42 ।।

`निष्ठातः' इति समासनिर्देशः । तत्र प्रधानभूततकारः `रदाभ्याम्' इत्यनेन विशेष्यते, न गुणभूता निष्ठेत्याह--रेफदकाराभ्यामुत्तरस्येति । तेन चरितम्, मुदितमित्यत्र निष्ठाया अव्यवधानेऽपि तस्येटा व्यवहितत्वान्नत्वं न भवति । अवगूर्णमिति । `गुरी उद्यमने', `श्वीदितो निष्ठायाम्' इतीट्प्रतिषेधः, पूर्वेषु `र्युकः किति' इति । भिन्नः, भिन्नवानिति । आदेशे `न' इत्यकार उच्चारणार्थः, तेन दकारस्य स्थाने शुद्धो नकारो भवति । कृतः कृतवानिति । ननु यथा `कृपो रो लः' इत्यृकारस्यापि रेफस्य लकारो भवति, तथेहापि ऋकारस्य रेफमाश्रित्य नत्वं प्राप्नोति ? अत आह---र इत्यत्रेति । युक्तं तत्र सामान्योपादानात्, इह तु न सामान्यमुपादीयते, किं तर्हि ? व्यञ्जनम् । किमात्मकम् ? अर्द्धमात्रात्मकम्, ऋकारस्तु मात्राचतुर्भागात्मकः । अस्तु वा सामान्यनिर्देशः, तथापि न दोष इत्याह---सामान्यनिर्देशे चेति । ऋकारे ह्यभितोऽज्भक्तिः, मध्ये रेफभक्तिः, ततश्च परयाऽज्यभक्त्या व्यवधानान्नास्ति नत्वप्रसङ्गः ।

चरितम्, मुदितमिति । `त' इत्यनुच्यमाने इटो निष्ठाभक्तत्वात्तस्य नत्वप्रसङ्गः । परस्य मा भूदिति । परस्यैव मा भूदित्यर्थः । असति पूर्वग्रहणे पाठक्रमे निष्ठा प्रत्यासन्नेति तद्दकारस्येव नत्वेन भाव्यम् । तेनैतदपि न चोदनीयम्---बहिरङ्गत्वाल्लाक्षणिकत्वाच्च न भविष्यतीति । किञ्च---पदस्येत्यधिकारात् पदावस्थायां नत्वविधानाद्बहिरङ्गत्वमपि नास्ति । केवलस्य वर्णस्यानुपदेशात् प्रतिपदोक्तत्वमपि नास्ति । अथापि प्रत्यासत्तिर्नापेक्ष्यते, तथापि पञ्चमीनिर्देशात् परस्यैव प्रसङ्गः । कार्तिरित्यत्र बहिर्भूततद्धितापेक्षत्वाद्बहिरङ्गा वृद्धिः । वृद्धेश्च यन्निमित्तं तदेव रेफस्यापि; `उरण् रपरः' इत्यस्य वृद्धिविधिनैकवाक्यत्वात् ।।

संयोगादेरातो धातोर्यण्वतः ।। 8.2.43 ।।

प्रद्राण इति । `कृत्यचः' इति णत्वम् ।

निर्यात इति । योऽत्र दातुर्नासौ संयोगादिः, यश्च संयोगादिर्नासौ धातुः । न चात्र संयोगादित्वस्य बहिरङ्गत्वम् । कथम् ? पूर्वं धातुरुपसर्गेण युज्यते, ततश्च निष्ठोत्पत्तेः प्रागेव संयोगः सन्निहितः । प्रद्राण इत्यादावप्येतावदेव ।।

ल्वादिभ्यः ।। 8.2.44 ।।

जीन इति । `ज्या वयोहानौ', ग्रहिज्यादिना सम्प्रसारणम् । निष्टावदिति । नत्वसन्निधौ वचनात्तदेवातिदिश्यते, तेन पूनिरित्यत्र `क्लिशः क्त्वानिष्ठयोः', `पूङश्च' इतीड्विकल्पो न भवति ।

दुग्वोरिति । `दु गतौ' इत्यस्यैव दोर्ग्रहणम्, न तु `टुदु उपतापे' इत्यस्य; सानुबन्धकत्वात् । तथा माघे प्रयुक्तम्---`मृदुतया दुतया' इति । `गु पुरीषोत्सर्गे'।

पूना इति । अनेकार्थत्वाद्धातूनां पूञ् विनाशार्थः ।

सिनो ग्रास इति । `षिञ् बन्धने', बध्यमानः=पिण्डीक्रियमाणो ग्रासो यदा दध्यदिव्यञ्जनवशेन तत्रानुकूल्यं प्रतिपद्यते, तदा कर्मणः कर्तृत्वविवक्षायामयं प्रयोगः । सिता पाशेनेति । शुद्धे कर्मणि क्तः, समुदायप्रत्युदाहरणमेतत् । इदानीमवयवप्रत्युदाहरणं दर्शयति---ग्रासोऽपीति ।

ओदितश्च ।। 8.2.45 ।।

आपीन इति । `प्यायः पी' इति पीभावः । स्वादयः `षूङ् माणिप्रसवे' इत्यादयः `ब्रीङ् वृणोत्यर्थे' इत्येवमन्ता दिवादौ पठ्यन्ते ।।

क्षियो दीर्घात् ।। 8.2.46 ।।

`क्षि क्षये', `क्षि निवासगत्योः'---द्वयोरपि ग्रहणम् । क्षीणा इति । अकर्मकत्वात् कर्त्तरि क्तः, `निष्ठायामण्यदर्थे' इति दीर्घः । क्षीणस्तपस्वीति । अत्रापि `वाऽऽक्रोशदैन्ययोः' इति ।

`दीर्घात्' इति शक्यमवक्तुम्, `क्षियः' इति निर्देशादेव दीर्घस्य ग्रहणं विज्ञायते, ह्रस्वस्य हि ग्रहणे इयङादेशात्परत्वात् `घिर्ङिति' इति गुणे कृते क्षेरिति निर्देष्टव्यं स्यादित्यत आह---ह्रस्वान्तस्यापीति । यथाभूतस्य दीर्घत्वं विधेयं तथाभूतमेवानुकर्तुं युक्तम् । ह्रस्वान्तस्य च दीर्घत्वं विधेयमिति तस्यैव दीर्घविधावनुकरणम् । तत्रापि चेयङादेशो दृष्टः, तस्मादियङादेशो न दीर्घग्रहणे प्रमाणमित्यर्थः ।

यदि तर्हि ह्रस्वान्तस्यापि धात्वनुकरणस्येयङादेशो भवति `विपराभ्यां जेः' इत्यादावपि प्रसङ्गः ? इत्यत आह---विपराभ्यां जेरित्येवमादौ त्विति । अविवक्षित्वेति पाठः । तत्र हि धातावनुकार्येऽवस्थितं धातुत्वं क्रियावाचित्वलक्षणमविवक्षितत्वात्तस्य विवक्षामकृत्वा रूपसामान्यस्य---विजितम्, कूजितमित्यादिसाधारणस्य रूपस्यानुकरणम्, ततश्च विशेषनिबन्धनस्य कार्यस्य सामान्येऽभावात्प्रकृतावदृष्टत्वादनुकरणेऽप्यभाव इत्यर्थः । यदा तु विशेषोऽनुक्रियते, तदा तन्निबन्धनं कार्यमनुकरणे प्रवर्त्तते, यथात्रेयङादेशः । यद्येवम्, विभक्त्युत्पत्तिर्न प्राप्नोति, `अधातुः' इति प्रतिषेधेन प्रातिपदिकसंज्ञाया अभावात् ? नैष दोः; अधातुरिति पर्युदासोऽयम्, न प्रसज्यप्रतिषेधः । ततः किम् ? आतिदेशिकस्य कस्यचित् कार्यस्याभावात् धातोरन्यत्वात्स्वाश्रया प्रातिपदिकसंज्ञा प्रवर्त्तते । इयङादेशस्त्वातिदेशिको धातोर्विधीयमानत्वाद्भवति ।।

श्योऽस्पर्शे ।। 8.2.47 ।।

शीनमिति । `श्यैङ् गतौ', `द्रवमूर्त्तिस्पर्शयोः श्यः' इति सम्प्रसारणम् ।

गुणभूतोऽपि स्पर्श इति । एतच्च व्याख्यानाल्लभ्यते, स्पर्शशब्दोऽयमस्ति गुणवचनः, `स्पृश संस्पर्शने', भावे कर्मणि वा घञ्---स्पर्शस्त्वगिन्द्रियग्राह्यो गुणः; अस्ति रोगवचनः, `स्पृश उपतापे', घञ्---स्पर्शः; तदिह विशेषानुपादानाद् द्वयोरपि ग्रहणम् ।

ततश्च रोगेऽपि प्रतिषेधात्प्रशीन इति न सिध्येत् ? अत आह--गुणे चेति । गुण एवेत्यर्थः । एवं मन्यते---यदयम् `द्रवमूर्तिस्पर्शयोः श्यः' इति स्पर्शे संप्रसारणं विधायपुनः `प्रतेश्च' इत्याह, तज्ज्ञापयति---श्यायतेर्ग्रहणे स्पर्शशब्दो रोगं न प्रत्याययतीति । यदि प्रत्याययेत् पुनर्न विदध्यात्, प्रतिपूर्वो रोग एव श्यायतिर्वर्तते ।।

अञ्चोऽनपादाने ।। 8.2.48 ।।

न चेदपादानं तत्र भवतीति । तत्राञ्चत्यर्थे विषयेऽपादानं चेन्न भवतीत्यर्थः । समकाविति । सङ्गतावित्यर्थः । `यस्य विभाषा' इतीट्प्रतिषेधः, `अनिदिताम्' इत्युपधालोपः ।

उदक्तमिति । उद्धृतमित्यर्थः । व्यक्तमित्येतदिति । `अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' इत्यस्येदं रूपम्, नाञ्चतेः; तेन नत्वमिदं न भवतीति भावः ।।

दिवोऽविजिगीषायाम् ।। 8.2.49 ।।

आद्यून इति । `च्छ्वोः शूङ्' । आद्यूनः=औदरिकः । परिद्यूनः=क्षीणः ।

द्यूतं वर्तते इति । नन्वत्राक्षादिपतनलक्षणा क्रीडा प्रतीयते, न विजिगीषा ? अत आह---विजिगीषया हीति ।।

निर्वाणोऽवाते ।। 8.2.50 ।।

वाताधिकरण इति । वातकर्तृक इत्यर्थः । यदि `वातश्चेदभिधेयो न भवति' इत्यर्थः स्यात्, तदा निर्वातो वात इत्यत्रैव प्रतिषेधः स्याद्यत्र कर्त्तरि क्तः; यत्र तु भावे तत्र न स्यात्---निर्वातं वातेनेति ।

निर्वाणोऽग्निरिति । उपशान्त इत्यर्थः । निर्वाणो भिक्षुरिति । उपरत इत्यर्थः । वातस्तु करणमिति । यथासम्भवं करणत्वे हेतौ वा तृतीया द्रष्टव्या । यथा तु वार्त्तिकं तथा भावे प्रतिषेधो न भवति, निर्वाणं वातेनेत्येव भवति ।।

प्रस्त्योऽन्यतरस्याम् ।। 8.2.54 ।।

प्रस्तीम इति । `स्त्यः प्रपूर्वस्य' इति सम्प्रसारणम् ।।

अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः ।। 8.2.55 ।।

फुल्ल इति । `आदितश्च' इतीट्प्रतिषेधः, `उत्परस्यातः', `ति च' इत्युत्वम् ।

क्तवत्वन्तस्याप्येतल्लत्वमिष्यत इति । निष्ठायास्तशब्दान्तं यद्रूपं तस्य फुल्लः---इत्येतन्निपात्यत इति भावः । क्षीबादिषु तु नैतदिष्यते ।

इडभाव इति । अन्यथा तलोपस्यासिद्धत्वाद्वलादित्वादिट् प्रसज्येत । कृते वा इटि इच्छब्दलोप इति । निपात्यत इत्यपेक्षते । लाघेरुदोऽन्य इति । उदस्तु प्रतिषेधो न भवति; निर्देशसामर्त्यात् । कृशि प्रत्यनुपसर्ग एवेति । `यत्क्रियायुक्ताः प्रादयस्तं प्रति' इति वचनात् । क्रियान्तरयोगमेव दर्शयति---परिगतः कृश इति । कार्श्येन परिगत इत्यर्थः । यद्यपि फुल्लादयः पचाद्यचि इगुपधलक्षणे के च सिध्यन्ति, तथापि `निष्ठा च द्व्यजनात्' इत्यादिकार्यसिद्धये, क्षीबिताद्यनिष्टशब्द निवृत्तये च निपातनम्; फुल्लशब्दे तु फुल्लावनित्येतदर्थं च ।।

नुदविदोन्दत्राघाह्रीभ्योऽन्यतरस्याम् ।। 8.2.56 ।।

अत्रानन्तरस्य निपातनस्य विधातुमशक्यत्वाद्व्यवहितं विधेयमिति स्थिते `शुषः कः' इत्यादिभिरादेशान्तरैर्व्यवहितमपि नत्वमेव विधीयते । कथम् ? उत्तरसूत्रे तावत्तदेव प्रतिषिध्यते; प्राप्तिपूर्वकत्वात्प्रतिषेधस्य । तस्मात्तदेव बुद्धौ विपरिवर्त्तमानमत्रापि विकल्प्यते । समुन्न इति । `उन्दी क्लेदने', ईदित्त्वादिट्प्रतिषेधः, `अनिदिताम्' इत्युपधालोपः ।

उभयत्र विभाषेयमित्याह---ह्री इत्येतस्येति ।

विद विचारण इत्यस्येति । रौधादिकस्य; उन्दिना रौधादिकेन साहचर्यात् । यद्यपि तौदादिकेन नुदिनापि साहचर्यम्, तथापि परसाहचर्यमेव व्यवस्थापकम्; `विप्रतिषेधे परम्' इत्यस्यैवमादावप्युपयोगात् ।

विचारणार्थस्य ग्रहणमित्येतदाप्तागमेन द्रढयति---एवं ह्युक्तमिति । वित्तेर्धातोर्निष्ठान्तशब्दरूपं विदित इतीष्यते, तस्य सेट्त्वात्; इह च `रदाभ्यां निष्ठातः' इत्यनुवृत्तेः विद्यतेः सत्तार्थस्य विदेर्विन्न इतीष्यते; तस्यानिट्त्वात्, इह च तस्याग्रहणात् । विन्तेरिति । तिङन्तानुकरणात् षष्ठी । भोगवित्त इति । एकार्थीभावाभावेऽपि भाष्यकरनिपातनात्सप्तमीसमासः । भोगग्रहणमुपलक्षणम् । भोग प्रत्यययोरर्थयोः विन्दतेस्तौदादिकस्य विदेर्वित्त इतीष्यते, अन्यत्र विन्न इति नत्वमेव भवति, न त्वयं विकल्प इत्यर्थः । उक्तोऽत्र हेतुः ।।

न ध्याख्यापमूर्च्छिमदाम् ।। 8.2.57 ।।

मूर्त्त इति । `आदितश्च' इतीट्प्रतिषेधः, `राल्लोपः' इति छस्य लोपः । मत्त इति । ईदित्त्वादिट्प्रतिषेधः ।।

वित्तो भोगप्रत्यययोः ।। 8.2.58 ।।

लाभार्थादिति । ज्ञानार्थादिटा भाव्यम् । सत्ताविचारणार्थयोरपि न भोगप्रत्यययोर्वृत्तिः सम्भवतीति भावः । कथं पुनर्भोगे निपात्यमानो वित्तशब्दो धने भवति ? इत्यत आह---धनं हीति । कर्मसाधनः सूत्रे भोगशब्द इत्यर्थः । एतेन `प्रत्ययः' इति व्याख्यातम् ।
विन्न इति । `विभाषा गमहनविदविशाम्' इति तौदादिकस्य क्वसौ विकल्पितेटत्वाद् `यस्य विभाषा' इति निष्ठायामिट्प्रतिषेधः ।।
भित्तं शकलम् ।। 8.2.59 ।।
शकलपर्यायोऽयमिति । यथा शकलशब्दो जातिशब्दः, न क्रियाशब्दः, तथा भित्तशब्दोऽपीत्यर्थः ।
नन्वयं भिदेर्धातोः व्युत्पाद्यमानः क्रियाशब्दः, स कथं जातिशब्दस्य पर्यायो भवति ? अत आह---अत्रेति । सन्ति हि ते शब्दा येषु व्युत्पत्तिमात्रोपयोगिनी क्रिया, जातिरेव तु समुदायशक्त्या शब्दार्थः, यथा---तैलं पिबतीति तैलपायिकेति । किमर्थं पुनरेवमाश्रीयते ? इत्याह---भिदिक्रियाविवक्षायां हीति ।
साम्यप्रतिपादनार्थं शकलग्रहणम् । यता विदाहरणविवक्षायां भिन्नं शकलमिति भवति, तथा भिन्नं भित्तमित्येव प्रयोग इत्यर्थः । क्रियाशब्दत्वे तु भिन्नशब्देनैव क्रियाया उपात्तत्वाद्भिन्नमित्यस्यैव प्रयोगो न स्यात् । अन्ये त्वाहुः---यथा विदारणक्रियया शकलं निवर्तते, तदा तामङ्गीकरोत्येव भिन्नशब्दः, यत् शकलस्य सतो विदारणं तदा तत्प्रतिपादनाय भिन्नं भित्तमिति प्रयोग इति ।।
ऋणमाधमर्ण्ये ।। 8.2.60 ।।
ऋ इत्येतस्मादिति । `ञ सृ गतौ', `ऋ गतिप्रापणयोः' इति वा ।
एतस्मादेवेति । शौण्डादिव्यतिरेकेण सप्तमीसमास एव मृग्यः, प्रागेव सप्तम्यन्तोत्तरपद इति भावः । कालान्तरेत्यादि । ऋणग्रहणकालापेक्षया कालान्तरत्वम्, तत्र देयं कालान्तरदेयम्, तत्र यो विनिमयः=विपरिवर्त्तनं तदुपलक्षणार्थमाधमर्ण्यग्रहणम्, न तु स्वार्थप्रतिपादनार्थम् । किं पुनः कारणमेवं व्याख्यायते ? इत्याह---उत्तमर्ण इत्यपि हीति । एतच्च `धारेरुत्तमर्णः' इति निर्देशादवसितम् ।।
नसत्तनिषात्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि ।। 8.2.61 ।।
नसत्तेत्यादीनामनुकरणपदानां द्वन्द्वः । निषत्तमिति । `सदिरप्रतेः' इति षत्वम् ।
अनुन्नमिति भाषायामिति । `नुदविदोन्दत्रा' इति विकल्पो न भवति; एतन्निपातानारम्भसामर्थ्यादित्याहुः ।
प्रतूर्तमिति । यदा त्वरतेः, तदा `ज्वरत्वर' इत्यादिना ऊठ् । उदा तु `तुर्वीहिंसायाम्' इत्यस्य, तदा `राल्लोपः'। उत्वमिति । रपरत्वम् `उरण् रपरः' इत्यव सिद्धम्; परभाषाणामसिद्धप्रकरणेऽपि प्रवृत्तेः ।।
क्विन्प्रत्ययस्य कुः ।। 8.2.62 ।।
क्विनः कुरिति वक्तव्ये इति । न हि क्विन्प्रत्ययत्वं व्यभिचरतीति भावः । न चैवमुच्यमाने `वेरपृक्तस्य' इति लोपं बाधित्वा क्विन एव वकारस्य कुत्वं घकारः प्राप्नोतीति शङ्कनीयम्; तथा क्विन इति प्रत्यग्रहणपरिभाषया तदन्तस्य ग्रहणे सति क्विनो वकारस्य लोपे कर्त्तव्ये सति कुत्वस्यासिद्धत्वात् `राल्लोप' एव भवति, तस्मिंश्च सति पश्चाद्भवत्कुत्वं परिशिष्टस्य धातोरेव भविष्यति । स्यादेतत्---क्विबादिषु सावकाशं लोपं विशेषविहितं कुत्वमपवादो वचनप्रामाण्यादिति न्यायेन बाधेतेति ? तन्न; एवं हि वर्गग्रहणमनर्थकंस्यात् । अनेकस्य स्थानिनोऽनेकादेशप्रतिपत्तये हि वर्गग्रहणम्, वकारस्यैव तु स्थानित्वे घकार एव निर्दिश्येत, `वर्गाणां तृतीयचतुर्थाः' इति शिक्षायां वकारघकारयोर्गुणसाम्यप्रतिपादनात् । तस्मात् `क्विनः कुः' इत्येव वक्तव्यम् ।
बहुव्रीहिविज्ञानार्थमिति । बहुव्रीहिविज्ञानार्थमिति । बहुव्रीहिश्चोपलक्षणेऽपि भवति, यथा---चित्रगुरानीयतामिति गवामभावेऽपि चित्रगवीभिरुपलक्षितस्यानयनं भवति, तथेहाप्यसत्यपि क्विपि क्विनोपलक्षितस्य धातोः कार्यं भवतीति । अस्राग्, अद्रागिति । सृजिदृशिभ्याम् `माङि लुङ्', तिप्, च्लेः सिच्, हल्ङ्यादिलोपः, `वदव्रज' इति वृद्धिः । अत्र व्रश्चादिषत्वे प्राप्ते कुत्वम्---जस्य गः, शस्य खः, तस्यापि जश्त्वम्, `वावसाने' इति चर्त्वम्---ककारः ।
`पूर्वत्रासिद्धम्' इत्यसिद्धत्वं षत्वे कुत्वस्य नास्ति; प्रत्ययग्रहणसामर्थ्यात् षत्वापवादत्वात् कुत्वस्य ।
क्विबन्तस्यापीति । द्रष्टेत्यादौ तु न भवति; अपदान्तत्वात् । एवं च सतीत्यादि । तद्वदेव । दृग्भ्यामिति कुत्वमुदाहृतम् ।
प्रतिविधातव्यमिति । प्रतिविधानं कर्तव्यमिति । प्रतिविधानं वचनमेव ।।
नशेर्वा ।। 8.2.63 ।।
जीवनाशहेतुत्वादाहुतिः=जीवनगित्युच्यते, सम्पदादित्वाद्भावे क्विप् ।।
मो नो धातोः ।। 8.2.64 ।।
नलोपो न भवतीति ।। नत्वं तु लोपार्थमेव स्यादिति मन्यते ।।
ससजुषो रुः ।। 8.2.66 ।।
सजूरिति । पूर्ववद्भावे क्विप्, रुत्वे कृते `र्वोरुपधायाः' इति दीर्घत्वम्, बहुव्रीहौ सहस्य सभावः । सप्रीतिरित्यर्थः ।।
अवयाः श्वेतवाः पुरोडाश्च ।। 8.2.67 ।।
ण्विनि कृत इति । प्राप्त इत्यर्थः । श्वेतवहादीनां यत्र पदत्वं भात्रि तत्र ण्विनोऽपवादो डस् वक्तव्य इति हि तत्रार्थः, न पुनर्ण्विनन्तानां पदत्वे सति डस् वक्तव्य इति ।
ननु श्वेतवोभ्यामित्यादिसिद्ध्यर्थमवश्यं डस् वक्तव्यः, स चेदुच्यते नार्थोऽनेन, सान्तत्वात्पूर्वोणैव रुः सिद्धः, दीर्घत्वम् `अत्वसन्तस्य' इत्येव सिद्धम् ? तत्राह-

--सम्बुद्धौ दीर्घार्थमिति ।।

अहन् ।। 8.2.68 ।।

अहोभ्यामिति । `हशि च' इत्युत्वम् । नलोपमकृत्वेत्यादि । नलोपविधावेतद्व्याख्यातम् ।

लाक्षमिकत्वादिति । अडागमेन अहन्निति रूपलाभात् ।

ह्रस्वविधाविति । समासे च लुमता लोपाद् रादेशे प्राप्ते रुत्वमुत्वार्थमुच्यते । अहोरूपमिति । षष्ठीसमासः । गतमहो रूपं पश्येत्यसमासः । अहोरात्र इति । `अहस्सर्वैकदेश' इत्यादिनाच् समासान्तः, इकारलोपे कृतेऽप्येकदेशविकृतस्यानन्यत्वादुत्वम् । रात्रग्रहणं तु न कृतम्; गतमहो रात्रिरागतेत्यसमासेऽपि रुत्वार्थम् ।।

रोऽसुपि ।। 8.2.69 ।।

पूर्वस्यायमपवादः । `र' इत्यकार उच्चारणार्थः । अदर्ददातीति । अत्यन्तसंयोगे द्वितीया । अह्नो रुविधाविति । यथा चैतत्सूत्रेणैव सिद्धम्, तथा `न लुमताङ्गस्य' इत्यत्रोक्तम् । दीर्घाहो निदाघ इति । `असुपि' इति प्रसज्यप्रतिषेधः । पर्युदासे तु सुप्सदृशो हल्परोऽस्तीति स्यादेवात्र रेफः । प्रसज्यप्रतिषेधे तु प्रत्ययलक्षणेन प्रतिषेधे सति रुरेव भवति, ततश्च तन्निबन्धने यत्वोत्वे भवतः ।।

अम्नरूधरवरित्युभयथा छन्दसि ।। 8.2.70 ।।

नित्यं रुत्वे प्राप्ते पक्षे रोऽपि यथा स्यादित्ययमारम्भः । अम्नस्शब्द ईषदर्थे, अम्नरस्तमित इति यथा । अवः=रक्षणम् ।

प्रचेता राजन्निति । सकारस्य रेफः, तस्य `रो रि' इति लोपः, `ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घः ।

अहरादीनामित्यादि । उभयत्राप्यादिशब्दः प्रकारे । इदमपि छन्दसि भाषायां च ।।

भुवश्च महाव्याहृतेः ।। 8.2.71 ।।

तिस्रो महाव्याहृतयः---पृथिव्यन्तरिक्षस्वर्गाणां वाचिकाः, इह तु मध्यमाया ग्रहणम् । भुवो विश्वेषु सवनेष्विति । तिङन्तमेतत् । भवतेः `छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लङ्, सिप्, शपि गुणाभावश्छन्दसः, `बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः । लाक्षणिकत्वादेवास्याग्रहणे सिद्धे महाव्याहृतिग्रहणम्---अस्याः परिभाषाया अनित्यत्वज्ञापनार्थम् । तेन क्रापयतीत्यादौ पुक् सिद्धो भवति ।।

वसुस्रंसुध्वंस्वनडुहां दः ।। 8.2.72 ।।

स इति वर्तत इति । अननुवृत्तौ तु तस्य विद्वानित्यादौ नकारस्य दत्वं प्राप्नोति । न तु स्रंसुध्वंसू इति । विशेष्येते इति विपरिणामेनान्वयः । असम्भवाच्चानडुच्छब्द इति । न विशेष्यत इत्यन्वयः ।

इहेदं वसोर्दत्वं नाप्राप्ते विध्यन्तरे आरभ्यमाणं यथा विद्वद्भ्यामित्यादौ रुत्वं बाधते, तथा विद्वानित्यादौ संयोगान्तलोपमपि बाधेत ? इत्यत आह---रुत्वे नाप्राप्त इति ।

अथानड्वानित्यत्र नुमो दकारः कस्मान्न भवति ? अत आह---नुमस्त्विति । दत्वं यदि नकारस्य स्यात् नुमोऽनर्थको विधिः, हकारस्यापि दत्वेन ह्यनड्वादिति सिध्यति । यथैव तर्हि नुमो विधानसामर्थ्याद्दत्वं न भवति, तथानड्वान् अत्रेत्यादौ `दीर्घादटि समानपादे' इति रुत्वमपि न प्राप्नोति ? `यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, यस्य तु विधेर्निमित्तमेव नासौ बाध्यते' दत्वं च प्रतिनुमो विधिरनर्थकः, रुविधेः पुनर्निमित्तमेव ।।

सिपि धातो रुर्वा ।। 8.2.74 ।।

धातुग्रहणमुत्तरार्थमिति । इह तु सिपि परतो दातोरन्यस्यासम्भवः । रुग्रहणं चेति । उत्तरार्थमित्यनुषङ्गः, इह तु दत्वे विकल्पिते सान्तत्वादे पक्षे रुः सिध्यति ।।

दश्च ।। 8.2.75 ।।

अभिनदिति । तन्मध्यपतितस्य श्नमस्तद्भक्तस्य वाटस्तद्ग्रहणेन ग्रहणादत्र पदस्य धातुत्वम् ।।

र्वोरुपधाया दीर्घ इकः ।। 8.2.76 ।।

धातोः, पदस्य---इत्युभयं समानाधिकरणं रेफवकाराभ्यां विशेष्यते, विशेषणेन च तदन्तविधिर्भवतीत्याह---रेफवकारान्तस्येति ।

वग्रहणमुत्तरार्थमिति । इह तु वकारान्तस्य पदस्य धातोरसम्भवः । अभ्यासेकारस्य मा भूदिति । यदि स्यात्, तस्यासिद्धत्वाद् `ह्रस्वः' इति ह्रस्वो न स्यात् ।।

उपधायां च ।। 8.2.78 ।।

`र्वोरुपधायाः' इत्यादि सर्वमनुवर्त्तते । इदमुपधाग्रहणं र्वोर्विशेषणम् । षष्ठीद्विचनस्य तु स्थाने सप्तम्येकवचनम् । प्रकृतमुपधाग्रहणमिको विशेषणम्, तच्च र्वपेक्षया पूर्वत्वं प्रतिपादयति, तेन वृत्तिकारोपदर्शितः सूत्रार्थो भवति । हूर्छितेत्यादि । `हुर्छा कौटिल्ये', `मुर्छा मोहसमुछ्राययोः', अचो रहाभ्याम्' इति द्विर्वचनस्यासिद्धत्वाद्रेफस्योपधात्वे सति पूर्ववद्दीर्घत्वम् । `चिरिजिरी हिंसार्थौ' ।

इह रिर्यतुः, विव्यतुरिति `रि गतौ', `वी गत्यादिषु', लिट्, अतुस्, द्विर्वचने `एरनेकाचः' इति यणादेशः । अत्राभ्यासेकारस्य दीर्घप्रसङ्गः, ततश्च तस्यासिद्धत्वाद् ह्रस्वो न स्यात्, तत्राह---रियेतुरित्यादि । यणादेशस्य स्थानिवद्भावादिति । न च दीर्घविधौ स्थानिवद्भावप्रतिषेधः; अलोपाजादेशत्वात् । एवमपि `पूर्वत्रासिद्धे न स्थानिवत्' इत्याशङ्क्य परिहारान्तरमाह---असिद्धत्वात्त्वेति । अङ्गाधिकारे विधानात् प्रत्ययाश्रयत्वाद्यणो बहिरङ्गत्वम्, दीर्घस्य तु

तदनपेक्षत्वादन्तरङ्गत्वम् ।
इह चतुर्यितेः क्यजन्तात्तृच्, इट्, अतो लोपे कृते `क्यस्य विभाषा' इति यदाऽयं लोपो न भवति, तदा धातोरुपधाभूतो रेफो हल्परश्चेति दीर्घप्रसङ्गः ? इत्याशङ्कायामाह---चतुर्यितेत्यत्रापीति । अत्राप्यन्तरङ्गत्वबहिरङ्गत्वे पूर्ववत् । इह प्रतिपूर्वाद्दिवेः `कनिन्युवृषितक्षि' इति कनिन्प्रत्ययान्तात्तृतीयैकवचने `अल्लोपोऽनः' इत्यकारस्य लोपे प्रतिदीव्नेति दीर्घत्वमिष्यते, तन्न प्राप्नोति; वकारस्य धातुं प्रत्यनुपधात्वादित्यत आह---प्रतिदीव्नेत्यत्रेति । कथं पुनः `हलि च' इति दीर्घत्वम्, यावताल्लोपस्य स्थानिवद्भावे सति हल्परो वकारो न भवति ? इत्यत आह---दीर्घविधाविति । ननु मा भूत्स्थानिवद्भावः, विभक्त्याश्रयत्वेनाल्लोपो बहिरङ्गः, तस्यासिद्धत्वाद्धल्परो न भवति ? इत्यत आह---असिद्धं बहिरङ्गमन्तरङ्ग इत्येतत्त्विति । अनाश्रयणं त्वस्याः परिभाषाया अनित्यत्वात् ।अनित्यत्वं च `नलोपः सुपस्वर' इतियत्र तुग्विधिग्रहणेन ज्ञापितम् । इह जीर्यतेः क्रिन् रश्च वः---जिव्रिः, कृगृभ्यां किप्रत्ययः---किरिः, गिरिः, ताभ्यामोस्, यणादेशः---किर्योः, गिर्यो रत्र `हलि च' इति दीर्घत्वं प्राप्नोति ? तत्राह---उणादयोऽप्युत्पन्नानीति । उणादिषु नावश्यं व्युत्पत्तिकार्यं भवतीत्यर्थः । एतच्च `अतः कृकमिकंस' इत्यत्र कमिग्रहणेनैव सिद्धे कंसग्रहणेन ज्ञापितम्---क्वचिद् व्युत्पत्तिकार्यं भवत्येव, यथा---प्रतिदीव्नेति । किर्योरित्यत्र यणो बहिरङ्गत्वमनाश्रित्ययं परिहार उक्तः ।।
न भकुर्छुराम् ।। 8.2.79 ।।
छुर्यादिति । `छुर छेदने', आशिषि लिङ् ।
प्रतिदीव्नेति । योऽत्र वकारान्तो नासौ भसञ्ज्ञकः, यश्च भसंज्ञो नासौ वकारान्तः, किं तर्हि ? नकारान्तः ।।
अदसोऽसेर्दादु दो मः ।। 8.2.80 ।।
`असेः' इति सकारे इकार उच्चारणार्थः । अमूभ्यामिति । अत्र त्यदाद्यत्वे कृते `सुपि च' इति दीर्घत्वम्, तत आन्तरतम्यादाकारस्य ऊकारः । ननु च सूत्रे ह्रस्वो निर्द्दिष्टः, भाव्यमानत्वाच्च सवर्णग्रहणमपि नास्ति, तत्कथमूकारो लभ्यते ? अत आह---भाव्यमानेनापीति । एतच्च `दिव उत्' इति तपरकरणेन ज्ञापितम् । केचिदत्राप्युकारं दपरं पठन्ति---`उद्दोमः' इति, तेषामयमौत्पत्तिको दकारो मुखसुखार्थः, न पुनरस्तकारस्य जश्त्वम्, तथा हि सति सवर्णग्रहणं न स्यात् । अदपरपाठस्तु भद्रः । अदस्यतीति । ननु च `पदस्य' पति वर्त्तते, न चेदं पदम्; `नः क्ये' इति नियमात् ? एवं तर्ह्येतदेव ज्ञापयति--पदस्याप्यदस एतन्मुत्वं भवतीति---अमुम्, अमुयेति, अन्यथा यत्र स्वादौ पदं तत्रैव स्याद्---अमुष्यै, अमूभ्यामिति ।
अनोस्र इति । ओकारसकाररेफा न विद्यन्ते यस्य तस्येत्यर्थः । अदः कुलमिति । विसर्जनीयस्यासिद्धत्वाद्रेफान्तमेतत् ।
तदर्थमिति । ओकाररेफयोरपि प्रतिषेधार्थम् । अः सेर्यस्येति । कोऽर्थः ? इत्यत्राह---यत्रेति । तेन किं सिद्धं भवति ? इत्याह---तेनेति ।
कथमद्र्यादेश इति । असमिन्विषये वक्तव्यमस्तीति प्रश्नः, तदाह---अदसोऽद्रेरिति । श्लोकस्य पूर्वार्धं व्याचष्टे---यैरति । तृतीयं पादं व्याचष्टे---ये त्विति । चतुर्थं पादं व्याचष्टे--येषां त्विति । अमुमुयङिति । अदोऽञ्चतीति `ऋत्विग्' इत्यादिना क्विन्, `विष्वग्देवयोश्च' इत्यदसष्टेरद्र्यादेशः अदद्र्यजिति स्थिते अदः--शब्दस्याद्र्यादेशसम्बन्धिनो दकाररेफयोश्च मुत्वम्, सौ `उगिदचाम्' इति नुम्, हल्ङ्यादिसंयोगान्तलोपौ, `क्विन्प्रत्ययस्य कुः' इति कुत्वम्---नकारस्य ङकारः ।
अमुया, अमुयोरिति । अत्र यकारस्योत्वप्रसङ्गः ।।
एत ईद्बहुवचने ।। 8.2.81 ।।
अर्थनिर्दशोऽयमिति । व्याप्तेर्न्यायात् । किं पुनः कारणमेवं व्याख्यायते ? इत्यत आह---पारिभाषिके इति । तदा हि `तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषोपस्थानाद्बहुवचने परत एकारस्येत्त्वेन भवितव्यम्, न चात्र बहुवचनं परम् ।।
वाक्यस्य टेः प्लुत उदात्तः ।। 8.2.82 ।।
अधिकारोऽधिकारान्तरनिवर्त्तक इति वाक्याधिकारेण पदाधिकारस्य निवृत्तिः प्राप्नोति, ततश्च भवन्तौ---इत्यादावपदान्तस्यापि नकारस्य `नश्छव्यप्रशान्' इति रुत्वं प्रसज्येत ? इत्याशङ्क्याह---पदाधिकारोऽनुवर्तत एवेति । न हि वाक्यग्रहणेन पदाधिकारः शक्यो निवर्त्तयितुम्; यो हि वाक्यस्य टिः, स सन्नियोगतः पदस्यापि भवत्येव ।
अथ वाक्यग्रहणं किमर्थम्, यावता वाक्यस्थस्यैव पदस्य प्रयोगः, न केवलस्य ? तत्राह---वाक्यग्रहणमिति । `पदस्य टेः' इत्युच्यमाने वाक्ये यावन्ति पदानि तेषां सर्वषां टेः प्लुतः प्राप्नोति, इष्यते च वाक्यपदयोर्यष्टिस्तस्यैव यथा स्यादिति ।
टिग्रहणमित्यादि । असति टिग्रहणे प्लुतश्रुत्याऽच्परिभाषोपस्थानादचा तदन्तविधौ सति अजन्तस्यैव वाक्यस्यालोऽन्त्यस्य प्लुतः स्यात्; यथा नपुंसकह्रस्वत्वम्---ग्रामणि कुलमित्यादौ भवति, न पुनः सुवागित्यादौ; तद्वत् । टिग्रहणे तु सति तदुपादानसामर्थ्याट्टिना अज्विशेष्यते, न त्वचा टिरिति हलन्तस्यापि प्लुतः सिध्यति ।।
प्रत्यभिवादेऽशूद्रे ।। 8.2.83 ।।
प्रत्यभावादो नामेत्यादि । गुरुरित्युपलक्षणम् । त्रिवर्षपूर्वः श्रोत्रियोऽभिवादमर्हति, अभिवाद्यमानः=आशिषं वाच्यमानो गुरुराशिषं प्रयुङ्क्त इति यत् स प्रत्यभइवादः, न प्रत्युक्तिमात्रम्; तत्रैव लोके प्रसिद्धत्वात् । तद्यथा---`अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः' इति । तत्रेति । आशीर्वादविषये । कीदृशे ? अशूद्रविषये । अशूद्रो विषयो यस्य स तथोक्तः, अभिवादने सति प्रत्यभिवाद इति । तं तावदुदाहरति---अभिवादय इति । नमस्कारपूर्वमाशिषं

वाचयामीत्यर्थः । एवमभिवादितो गुरुः प्रत्यभिवदति---आयुष्मानिति । आयुष्मत्त्वस्य विधेयत्वात्सम्बोधनविभक्त्यभावः । एधीति । अस्तेर्लोटि सिपो हिः । भवेत्यर्थः ।

`आयुष्मान्भव सौम्येति विप्रो वाच्योऽभिवादने' इति मानवे भवेत्यर्थग्रहणम्, तेन पर्यायैरपि प्रत्यभावादो भवति । ननु च तत्र `अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः' इत्युक्तम्, सकस्मादिह न विधीयते ? उच्यते; यदर्थाभिधान उपयुज्यते तदेव व्याकरणे वक्तव्यम्; अकारस्तु केवलमदृष्टार्थः प्रयुज्यते, न त्वस्य कश्चिदर्थोऽस्ति ।

अन्ये तु मानवमन्यथा व्याचक्षते---अस्याभिवादयितुर्नाम्नोऽन्ते=अवसाने योऽकारः स प्लुतो वाच्यः, अकार इत्युपलक्षणम्, पूर्वाक्षरश्च प्लुतो वाच्यः, हलन्तविषयमेतत्, अक्षर इत्यचमाह, हलन्तेष्वन्त्यात्पूर्वोऽच प्लुतो वाच्य इति, उभाभ्यामिति ताभ्यां टेः प्लुत इत्युक्तं भवति ।

वयं तु ब्रूमः---पृथगेवाकारः प्रयोक्तव्य इति, कुतः ? अक्षरार्थस्त्वयम् । किञ्च भरतशास्त्रे प्रसङ्गेन प्रत्यभिवादप्रकारे वर्ण्यमाने पृथगकारप्रयोगो दर्शितः । तस्मादयमत्र प्रत्यभिवादनप्रयोगः---आयुष्मान् भव सौम्य देवदत्त 3 अ, अग्निचि3त् अ इति । एजन्तेषु तु `एचोऽप्रगृह्यस्य' इत्यस्मिन्विधौ सत्यकारे परतः, `तयोर्य्वावचि संहितायाम्' इति यणपि भवति पिनाकपाण3य, हर3य, शम्भ3व, विष्ण3व---इति । प्रत्यभिवादे शर्मवर्मशब्दयोः प्रयोगं नेच्छन्ति । `शर्मान्तं ब्राह्मणस्य स्याद्वर्मान्तं क्षत्रियस्य तु'---इत्यनेन नाम्न्यनन्तर्भूतयोरेव तयोः प्रयोग उक्तः, न तु नाम्न्यन्तर्भावः ।

तुषजक इति । कुत्सिते कः, `शूद्रस्य तु जुगुप्सितम्' इति वचनात् एवंविधं शूद्रनाम।

स्त्रियामपीति । अस्त्रीशूद्रयोरिति वक्तव्यमित्यर्थः । केचिदाहुः---न स्त्र्यभिवादयते, पादोपसंग्रहणाद्येव तु करोतीति; अन्ये त्वाहु---अभिवादयते, न तु स्वं नाम गोत्रं वा गृह्णातीति; द्वयोरपि पक्षयोः स्त्रीप्रतिषेधो न विधेयः । ये तु स्त्रीणामपि नामगोत्राभ्यामभिवाद---प्रत्यभिवादाविच्छन्ति तन्मतेनायं प्रतिषेधः ।

असूयतीत्यसूयकः=अविनीतः । तस्मिंस्त्वित्यादिनाऽसूयके प्रतिषेधं प्रत्याचष्टे । यावदसावसूयकत्वेन ज्ञातो न भवति तावत्प्लुतं करोत्येव, यदा त्वसूयकोऽयं मामुपहसितुकाम इति जानाति, तदा नैवाऽऽशीर्वादरूपं प्रत्यभिवादं प्रयुङ्क्ते, प्रत्युत शापमेव ददातीति भाष्ये दर्शितमित्याह---तथा ह्युक्तमिति । गुरुणा स्थालिशब्दं संज्ञां मत्वा प्लुते प्रयुक्ते, असूयक आह---नैषा मम संज्ञेति, किन्तु दण्डिन्यायो मया विवक्षितः---स्थालमस्यास्तीति स्थालीति; तदपि तत्त्वं मन्वानो गुरुः पुनरपि प्लुतरहितं प्रत्यभिवादनं कृतवान्---आयुष्मानेधि स्थालिन्निति । पुनरसूयक आह---न दण्डिन्यायो मया विवक्षितः संज्ञैवैषा ममेति; ततोऽसूयकत्वं निर्ज्ञाय कुपितः सन् गुरुराह---असूयकस्त्वमित्यादि । भिद्यस्वेति । कर्मकर्त्तरि यक् । स्थालिन्निति पाठः, न तु स्थालीवदिति ।

अभिवादवाक्ये यत् सङ्कीर्तितमिति । येन वाक्येनाभिवाद्यते तदभिवादनवाक्यम् । नाम = संज्ञा । गोत्रम् = अपत्यप्रत्ययान्तः शब्दः । वाक्यस्य टेः प्लुतविधानादेवमुक्तम् । तत्र प्लुतिरिष्यत इति । इष्टिरेवेयमिति केचित् । अन्ये त्वाहुः---अभिवादनं तावन्नामगोत्राभ्यामिति । समाचारप्राप्तम् । प्लुतोऽप्ययं प्रधाने कार्यसम्प्रत्ययात्तस्यैव वाक्यान्ते वर्त्तमानस्य भवति, पदस्य च प्राधान्यमर्थद्वारकम् । प्रधानमर्थोऽभिवादयिता, तदनुग्रहार्थत्वात्प्रत्यभिवादस्य । कुशलित्वादिकं तु तस्यैव संस्कारकम् । एवम्---एधीत्याख्यातवाच्या साध्यरूपतया प्रधानभूतापि क्रिया संस्कारकत्वेन विवक्षितत्वादप्रधानमेव । तस्मात् प्रधानभूत्सायभिवादयितुर्यदुपस्थापकं पदं तस्य प्लुतः । तच्च नामगोत्रं चेति ।

भोराजन्यविशां वेति । भो इति स्वरूपग्रहणम्, इतरयोस्तु तन्नाम्ना ग्रहणम् । तत्र भोः शब्दस्यासंज्ञागोत्रशब्दत्वादप्राप्ते विभाषा, इतरत्र प्राप्ते; संज्ञाशब्दत्वात् ।।

दूराद्धूते च ।। 8.2.84 ।।

दूरादिति `दूरान्तिकार्थेभ्यो द्वितीया च' इति पञ्चमी, हूतम्=ह्वानम्, भावे निष्ठा । दूरादित्युच्यते, दूरं चानवस्थितम्, तदेव हि कञ्चित्प्रत्यतिदूरं कञ्चित्प्रत्यन्तिकं भवति । एवं हि कश्चित्कञ्चिदाह--य एष पार्श्वतः करकस्तमानयेति; स आह---उत्थाय गृहाण, दूरे न शक्नोमि गन्तुमिति; अपर आह---दूरं मथुरायाः पाटलिपुत्रमिति, स आह---न दूरमन्तिकमिति, तदेवं दूरस्यानवस्थितत्वान्न ज्ञायते---कस्यामवस्थायां प्लुत्या भवितव्यमिति ? अत आह---दूरमित्यादि । ह्वानम् = हूतम्, तदपेक्षया यद्दूरं तदिहाश्रीयते; दूराद्धूतमित्यन्वयात् । इतिकारणो हेतौ, न तु देशमपेक्ष्य देशान्तरं दूरं भवति । किमिदं हूतापेक्षं दूरम् ? इत्यत आह---यत्रेति । यत्र हूते, प्राकृतात्स्वभावसिद्धत् । एवंविधे हूते देशद्वारकहूतापेक्षमपि दूरत्वमस्तीति भावः ।

हूतग्रहणं चेति । येन पर आगमने नियुज्यते तद्धूतम्, तच्च नान्तरेण सम्बोधनं सम्बवति, सम्बोधितो हि पुरुष आगमने पानादौ वा नियुज्यते, अतो नान्तरीयकत्वाद्धूतेन सम्बोधनमात्रं लक्ष्यते । उपलक्षणे प्रयोजनमाह---तेनेति ।

इहायं प्लुतो दूरात्सम्बोधने विधीयते, एकश्रुतिरपि तत्रैव---`एकश्रुति दूरात्सम्बुद्धौ' इति, एकस्मिंश्च विषये प्राप्तानां बाधविकल्पसमुच्चयानामन्यतमेन भवितव्यम्, तदिह को भवति ? इत्याह---अस्याश्चेति । बाधस्तावद्विषयभेदे सति भवति, यथा काणोः; तत्र हि कस्य विशेषो विषयः, अणस्तु धातुसामान्यम्; इह तु नैवं विषयभेदोऽस्ति । विकल्पोऽपि सहप्राप्तयोर्भवति, यथा तव्यदादीनाम् । इह चैकश्रुतौ कर्तव्यायां प्लुतस्यासिद्धत्वात्सहप्रप्तिर्नास्ति, तस्मात्पारिशेष्यात्समावेश एव भवति । एकस्मिन्वाक्ये द्वयोरपि युगपत्प्रवृत्तिरित्येतावता चात्र समावेशवाचोयुक्तिः, तत्त्वतस्तु वाक्यस्य टेः प्लुत उदाहृतः, परिशिष्टस्यैकश्रुत्यमिति बाध एव ।।

हैहेप्रयोगे हैहयोः ।। 8.2.85 ।।

पूर्वेण हूयमानार्थस्य वाक्यान्तस्य पदस्य टेः प्लुतविधानादतदर्थयोर्हैहयोर्न प्राप्नोतीति वचनम् । हैहयोरेवेति । एवकारः पौनर्वचनिकः---हैहयोः प्रयोगे तयोरेव हैहयोरिति । अन्ये तु---हैहयोरेव भवति, न न हूयमानार्थस्य वाक्यस्य टेरिति वर्णयन्ति । तदेतत्कथं लभ्यते ? अपकृष्य विधानात् । हूयमानार्थस्य

प्लुते प्राप्ते अतदर्थयोरेव तयोर्विधीयमानः प्लुतस्तं बाधते;सत्यपि सम्भवे बाधनं भवतीति न्यायात् । न चास्यासिद्धत्वाम्; अपवादो वचनप्रामाण्यादित्युक्तत्वात् । है3 इति । `प्लुतावैच इदुतौ' इति वचनादिकारभागः प्लुतः । हे3 इति । `एचोऽप्रगृह्यस्य' इत्यनेन प्लुतविकारो न भवति; दूराद्धूतत्वात् । हैहयोरिति किमर्थम् ? हैहयोः प्लुतो यथा स्यात्, अन्यथाऽऽरम्भसामर्थ्यादनन्त्यस्य हूयमानवाचिन एव स्यात्---देवदत्त है इत्यादौ । एवं तर्हि हैहयोरित्येवास्तु, किं `हैहेप्रयोगे' इत्यनेन, न ह्यप्रयुज्यमानयोः प्लुतविधिः सम्भवति ? उच्यते; `प्रयोगे' इति तावद्वक्तव्यम्, प्रयोगमात्र यथा स्यात् । किं सिद्धं भवति ? अनर्थकयोरपि ग्रहणं सिद्धं भवति । क्व च तावनर्थकौ ? यत्र सम्बोधनवचनं प्राक् प्रयुज्यते, तत्र तेनैवाभिमुख्यस्य द्योतितत्वान्न हैहयोर्द्योत्यमस्तीत्यानर्थक्यम् । यत्र तु हैहयोः प्राक् प्रयोगः, तत्रानयोराभिमुख्यं द्योत्यमित्यर्थवत्त्वम् । एवमपि प्रयोगे हैहयोरित्येवास्तु, हैहयोः प्लुतो भवति प्रयोगे, कस्य ? हैहयोरेवेति श्रुतत्वात्, तस्मात्पुनर्हैहेग्रहणस्य प्रयोजनं वक्तव्यम् ? तदाह---पुनरिति ।
यदि तु प्रयोगग्रहणादेवानर्थकयोरिवानन्त्ययोरपि भविष्यतीत्युच्यते; शक्यं पुनर्हैहेग्रहणमकर्तुम् ।।
गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ।। 8.2.86 ।।
अनन्त्यस्यापि टेरिति । अनेनापिशब्देन प्रकृतष्टिः समुच्चीयत इति दर्शयति । यदि तु गुरोः सन्निधानात् स एवान्त्यः समुच्चीयेत--- गुरोरनन्त्यस्यान्त्यस्यापीति, ततो तेन यत्रान्त्यो गुरुस्तत्रैव पर्यायः स्यात् । लघौ त्वन्त्ये पूर्वेण तस्य स्याद्, अनेन चानन्त्यस्य गुरोरिति द्वयोः प्लुतयोर्युगपच्छ्रवणं प्राप्नोति । `अनुदात्तं पदमेकवर्जम्' इति वचनान्नास्ति यौगपद्यसम्भवः । असिद्धः प्लुतः, तस्यासिद्धत्वान्नियमो न न प्राप्नोति ? नैतदस्ति; `कार्यकालं संज्ञापरिभाषम्', यत्र कार्य तत्रोपतिष्ठते---वाक्यस्यटेः प्लुत उदात्तः, गुरोरनृतः प्लुत उदात्तः; उपस्थितमिदं भवति---`अनुदात्तं पदमेकवर्जम्' इति, तस्मान्नास्ति यौगपद्यसम्भवः । यस्तह्येनुदात्तः प्लुतः, तस्यास्य च समावेशः प्राप्नोति अभिपूजते दूराद्धते प्लुतो भवन्ननुदात्तं प्रश्नान्ताभिपूजितयोरिति टेरनुदात्तो भवति---शोभनः खल्वसि देवदत्त इति, तत्र तेन गुरोरुदात्तः प्लुतः स्यात्, तस्माट्टिरेव समुच्चेतव्यः । तत्र ह्येकैकस्येति वचनात् यथाऽनन्त्यस्य पर्योयोऽयं भवति, तथाऽन्त्यस्य टेरपीति नास्ति यौगपद्यप्रसङ्गः ।
एकैकग्रहणं पर्यायार्थमिति । अन्यथाऽनन्तरोक्तेन प्रकारेणोदात्तानुदात्तयोः प्लुतयोः समावेशः स्यात् ।
क्वचित्पठ्यते---प्रत्यभिवाद इत्येवमादिना यः प्लुतो विहितस्तस्यैवायं स्थानिविशेष उच्यत इति । तस्यार्थः---नेदं स्वतन्त्रं प्लुतविधानम्, किं तर्हि ? प्रत्यभिवादे दूराद्धूते च यः प्लुतो विहितः स गुरोरनन्त्यस्यापि भवति, अन्त्यस्यापि टेः पर्यायेणेति । तेन प्रत्यभिवाद्यमानार्थस्य हूयमानार्थस्य च शब्दस्येदं प्लुतविधानम्, न यत्र तत्र स्थितस्य गुरोरिति द्रष्टव्यम् ।
प्राचांग्रहणं विकल्पार्थमिति । तेन पक्षे न कस्यचिदपि प्लुतो भवति । तदनेनेत्यादि । तदिति वाक्योपन्यासे । `अग्नीत्प्रेषणे परस्य च' इत्यत्र भाष्यकारेण यदेतदुच्यते---`सर्व एव प्लुतः' इत्यादि, तदुपपन्नं भवतीत्यर्थः । ननु यत्र प्राचांग्रहणमस्ति स प्लुतो विकल्पताम्, सर्वस्य तु कथं विकल्पः ? एवं तर्हि प्राचांग्रहणं सर्वत्रैव प्लुतविधौ सम्बन्धनीयम्, शास्त्रत्यगः साहसम् ! तेन शास्त्रमत्यजताप्यभियुक्तस्मरणात्सर्व एव प्लुतो विभाषा विधेय इत्यर्थः ।।
ओमभ्यादाने ।। 8.2.87 ।।
प्लुतश्रुत्याऽच्परिभाषोपस्थानादच एव प्लुतः, मकारस्त्वर्द्धमात्र इति समुदायोऽर्धचतुर्थमात्रः सम्पद्यते ।।
ये यज्ञकर्मणि ।। 8.2.88 ।।
ये यजामह इत्यत्रैवायं प्लुत इष्यते इति । पित्र्यायां ये स्वधेत्यत्रापि भवति; एतत्स्थानापन्नत्वात्तस्य ।।
प्रणवष्टेः ।। 8.2.89 ।।
क एष प्रणवो नामेति । इह शास्त्रेऽपरिभाषितत्वात्प्रश्नः । पादस्येति । शास्त्रान्तरप्रसिद्ध आश्रीयते, देवतावत्, अक्षरमच्, अन्त्यमचं गृहीत्वेत्यर्थः । तदाद्यक्षरशेषस्येति । अक्षरं च शेषश्च हल् अक्षरशेषम्, तदन्त्यमक्षरमादिर्यस्य तत्तदादि, तदादि च तदक्षरशेषं त तदाद्यक्षरशेषं तस्य टेरिति । त्रिमात्रमिति । केचिन्मकारेण सह त्रिमात्रमिच्छन्ति, अन्ये भागमेव । तत्र ओंकारविधिः सामिधेन्यादिषु प्रसिद्धः--स्वरादिमृगन्तमोकारं त्रिमात्रं मकारान्तं कृत्वोत्तरस्य अर्धे अवस्येदिति; ओंकाराविधिस्तु निनर्दे स्वरादिरन्त ओङ्कारश्चतुर्न्निनर्द इति । आथर्वणिकास्तु सर्वत्र चानयोविकल्पमिच्छन्ति, तेषामेव चेदं सूत्रं पठितम् । जिन्वतो3मिति । `जिविः प्रीणानार्थः', लट्, तिप् ।
टेरिति वर्त्तमान इत्यादि । असति टिग्रहणे `अलोऽन्त्यस्य' इति वचनाट्टेर्योऽन्त्याल् तस्योकारः स्यात् । व्यभिचाराभावाद्धि प्रणवः प्लुतत्वेन विशेष्यते । संज्ञया विधाने चाच्परिभाषा प्रवर्त्तते, न वस्तुतस्त्रिमात्रविधाने । तस्माद्धल एव प्राप्नोति । अथाच्परिभाषोपस्थानार्थमेव प्लुतत्वेन प्रणवो विशेष्येत ? तथापि टेर्योऽच् तस्यैव स्यात्, न तु सर्वस्य टेः । ओंकारस्त्वझल्समुदायत्वात् प्लुतो न भवतीति सर्वस्य टेः सिध्यति; `वाक्यस्य टेः' इत्यधिकारात् ? सत्यम्; टिस्था निकस्यैव त्वोङ्कारस्य प्रणवसंज्ञत्वात् कथमन्त्यस्याचो वा प्रसङ्ग इति चिन्त्यम् ।।
याज्यान्तः ।। 8.2.90 ।।
याज्याकाण्ड इति । याज्यानुवाक्याकाण्डमिति समाख्याने प्रकरणे । तेषामिति । मन्त्राणाम् । तासामिति पाठे तासां याज्यानामन्तः । प्लवत इति । त्रिमात्रतया वर्धत इत्यर्थः । अग्नये3 इति । चतुर्थ्येकवचनान्तस्याग्नयेशब्दस्य `एचोऽप्रगृह्यस्य' इति प्लुतविकारः । इहेदमन्तग्रहणं टेरित्यस्य निवर्त्तकं वा स्याद्, विशेषणं वा; पूर्वस्मिन् कल्पे प्लुतश्रुत्याच्परिभाषोपस्थानादचान्ते विशेषेतेऽजन्ताया एव याज्यायाः प्लुतः स्यात् । पक्षान्तरे त्वन्तग्रहणमनर्थकम्; टेरन्तत्वाव्यभिचारादित्यभिप्रायेणाह---अन्तग्रहणं किमिति । इतरोऽपि विदिताभिप्राय आह---याज्या नामेति ।।

ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ।। 8.2.91 ।।

पित्र्यायामनुस्वधेति सम्प्रेष्येत्यत्रापि अनुस्व3धेति प्लुतो भवति; ब्रूहिस्थानापन्नत्वात्स्वधाशब्दस्य । तथा अस्तु स्वधेति प्रत्याश्रवणमित्यत्रापि भवति; अस्तु स्वधेति श्रौषट्स्थानापन्नत्वात् । तथा च वषडित्येके समामनन्ति, वौषडित्येके, वाषडित्येके, वौक्षडित्येके, वाक्षडित्यके, वक्षाडित्येके इति षड्विधस्यापि वषट्कारस्य प्लुतो भवति; वषटकारोपलक्षणत्वाद्वौषट्शब्दस्य ।

आवह देवान् यजमानायेत्येवमादिष्विति । आदिशब्देन--आवह जातवेदः, सुयजा यजेत्यादेर्ग्रहणम् ।।

अग्नीत्प्रेषणे परस्य च ।। 8.2.92 ।।

अत्रैवायं प्लुत इष्यत इति । ओस्वधेत्याश्रवणमित्यत्र तु तत्स्थानापन्नात्वाद्भवति । आ3स्वधेति । तथा चाश्वलायनः--`नित्याः प्लुतयः' इति । उद्धर3 उद्धरेति । चापले द्विर्वचनम् ।।

विभाषा पृष्टप्रतिवचने हेः ।। 8.2.93 ।।

प्रतिवचनशब्दोऽयं विरुद्धेऽपि शब्दे वर्त्तते, प्रतिशब्दस्य विरोधे प्रसिद्धेः---प्रतिमल्लः, प्रतिकुञ्जर इति; वचनं वचनं प्रतीति प्रतिवचनमिति वीप्सायामव्ययीभावेऽप्यस्ति; समाधानेऽप्यस्ति---अनेनाभिहितस्य मया प्रतिवचनं विहितमिति; पृष्टप्रतिवचनेऽपि वर्तते; तत्रासति पृष्टग्रहणे विवक्षितं प्रतिवचनं न गम्येत । उदाहणे हिशब्दोऽवधारणे ।।

निगृह्यानुयोगे च ।। 8.2.94 ।।

निगृह्येति । ल्यबन्तमेतत् । स्वमतादिति । स्वपक्षात् । प्रच्यावनम्=अपनयः । तस्यैवेति । यस्मादसौ प्रच्यावितस्तस्यैव स्वपक्षस्याविष्करणम्=शब्देन प्रकाशनम्--एवं किल त्व निरुपपत्तिकमात्थेति । सूत्रार्थमुदाहरणे दर्शयन्नेवोदाहरति---अनित्यः शब्द इति केनचित्प्रतिज्ञातमिति । तमेवं वादिनमुपालिप्सुरुपालब्धुकामो निगृह्य स्वमतात्प्रच्याव्य साभ्यसूयं सामर्षमनुयुङ्क्ते आविष्कृतस्वमतकरोति । क्वचित्त्वयं ग्रन्थो न पठ्यते, अन्ते तु पठ्यते । अद्यामावास्या इत्येवंवादी प्रच्याव्य स्वमतादेवमनुयुज्यत इति ।।

आम्रेडितं भर्त्सने ।। 8.2.95 ।।

उदाहरणेषु `वाक्यादेरामन्त्रितस्य' इत्यादिना द्विर्वचनम् । `वाक्यस्य टेः' इत्यधिकारेऽप्यत्रानन्त्यस्य भवति; वाक्यादेरेव पदस्य भर्त्सने द्विर्वचनविधानात् । तदर्थमिति । पर्यायेण पूर्वोत्तरयोर्भागयोः प्लुतो यथा स्यादित्येवमर्थम् । द्विरुक्तोपलक्षणार्थमिति । द्विरुक्तसमुदाये भागद्वयोपलक्षणार्थमित्यर्थः । एतच्चाम्रेडितमात्रस्य भर्त्सने वृत्त्यसम्भवाल्लभ्यते, पर्यायस्य तु `एकैकस्य' इत्यनुवृत्तेर्लाभः ।।

अङ्गयुक्तं तिङाकाङ्क्षम् ।। 8.2.96 ।।

आकाङ्क्षतीत्याकाङ्क्षम्, पचाद्यच् । इदानीं ज्ञास्यसि जाल्मेत्येष द्वयोरप्युदाहरणयोः शेषः । कूजनफलं व्याहारफलं वास्मिन्नेव क्षणे ज्ञास्यसीत्यर्थः । अङ्गशब्दोऽमर्षे, प्रत्युदाहरणे त्वनुनये ।

अङ्ग देवदत्तेत्येतावदेकं वाक्यम् । एतच्च वाक्यं मिथ्या वदसीत्येतदपेक्षते ।।

विचार्यमाणानाम् ।। 8.2.97 ।।

कोटिद्वयस्य विज्ञानं विचार इति कथ्यते ।
विचार्यमाणस्तज्ज्ञानविषयीभूत उच्यते ।।

इह तु विचार्यमाणार्थविषयत्वाद्वाक्यानि विचार्यमाणानि । गृह3इ इति । गृहेशब्दस्य पूर्ववत् प्लुतविकारः । अनुप्रहरेदिति । अनुप्रहारः = शायनम्, व्यत्ययेन कर्मणि कर्तृप्रत्ययः, शाययेतेत्यर्थः । अथ वानुप्रहरेदित्यत्र यूपं यजमान इत्यस्याध्याहारः, किं यूपं यजमानः शाययेदिति विचारार्थः ।।

पूर्वं तु भाषायाम् ।। 8.2.98 ।।

पूर्वं तु भाषायाम्।। पूर्वेणैव सिद्धे नियमार्थमेतत्, तुशब्दस्त्विष्टतोऽवधारणार्थः, यर्थेवं विज्ञायेत---पूर्वमेव भाषायामिति, मैवं विज्ञायि--पूर्वं भाषायामेवेति। पूर्वत्वं च प्रयोगापेक्षम्। उदाहरणे नुशब्दो वितर्के। लोष्टः=मृत्पिण्डः।।

प्रतिश्रवणे च।। 8.2.99 ।।

प्रतिश्रवणे च।। प्रतिश्रवणमभ्युपगम इति। अङ्गीकारः। प्रतिज्ञानमिति। प्राथितस्य देयत्वेन संवादः। अत्रोभयत्रापि गतिसमासः, अर्थध्वयेऽपि प्रतिपूर्वः श्रृणोतिः प्रसिद्धः। श्रवणाभिमुख्यं चेति। अत्र `लक्षणेनाभिप्रती आभिमुख्ये'इत्यव्ययीभावः। उदाहरणानि तु व्युत्क्रमेण दत्तानि। किमात्थ6 इति। किं ब्रूषे---इत्येतत्पृच्छति। अत्र च श्रवणाभिमुख्यं गम्यते। हन्त ते ददामि 6इति। अत्रि प्रार्थितस्य संवादो गम्यते। देवदत्त भोरित्यामन्त्रितम्। स यदर्थमामन्त्रितस्तच्छ्वणार्थं किमात्थ इति। गां मे देहि भोः, नित्यः शब्दो भनितुमर्हति, तस्मिन् तृतीये तूदाहरणे स्वाभ्युपगमो गम्यते।।

अनुदात्तं प्रश्नान्ताभिपूजितयोः।। 8.2.100 ।।

अनुदात्तं प्रश्नान्ताभिपूजितयोः।। प्रश्नवाक्ये यच्चरमं प्रयुज्यते स प्रश्नान्तः। क्वचित्पठ्यते---नानेन प्लुतो विधीयते, किन्तु दूराद्धूतादिषु विहितस्य `अनन्त्यस्यापि प्रश्नाख्यानयोः' इति स्वरितप्लुतस्यानुदात्तत्वं गुणमात्रं विधीयत इति। तत्रैषा वचनव्यक्तिः---प्रश्नान्ते अभिपूजिते च यः प्लुतः सोऽनुदात्तो भवतीति। तत्राभिपूजिते `दूराद्धूते च' इति प्लुत इति। इतरत्र तु `अनन्त्यस्यापि प्रश्नाख्यानयोः' इति। अगमः पूर्वान् ग्रामानित्येषां स्वरितः प्लुतः। अग्निभूते, पटो----इत्यन्यतरेण वाक्यपरिसमाप्तिर्भवति। तत्र यदा येन वाक्यपरिसमाप्तिस्तदा तस्यानेनानुदात्तः प्लुतः, स च पूर्वभागस्य; उत्तरभागस्य

तूदात्ताविदुतौ भवतः।।

चिदिति चोपमार्थे प्रयुज्यमाने।। 8.2.101 ।।

चिदिति चोपमार्थे प्रयुज्यमाने।। इतिकरणः किमर्थः? अक्रियमाणे तस्मिन् उपमानार्थे कस्मिंश्चिच्छब्दे प्रयुज्यमाने चिच्छब्दः प्लुत इति विज्ञायेत। इतिकरणे तु सति `प्रयुज्यमाने' इत्येतच्चिच्छब्दस्य विशेषणम्, प्लुतस्तु `वाक्यस्य टेः' इत्यधिकारात्तस्यैव भवति।

कथञ्चिदिति। अत्र कष्टे चिच्छब्दः। अग्निर्माणवको भायादिति। अग्निरिव माणवको दीप्येतेत्यर्थः। अत्रोपमार्थस्य गम्यमानत्वादस्ति चिच्छिब्दस्य प्रतीतिः, प्रयोगस्तु नास्ति। यद्यप्यन्येपामप्युपमानार्थानामिवादीनामस्ति प्रतीतिः, तथापि चिच्छब्दस्यापि तावदस्तीति स्यादेव प्लुतः। चकारोऽस्य प्लुतस्य समुच्चयार्थः। समुच्चयश्च भेदाधिष्ठान इति प्लुतान्तरमेवेदमाख्यातं भवति; अन्यथा पूर्वसूत्रवत् पूर्वेप्वेव प्लुतनिमित्तेष्वनुदात्तत्वगुणमात्रं विधीयत इति विज्ञायेत। एतदेव च ज्ञापकम्---पूर्वसूत्रे गुणमात्रं विधीयत इति।

उपरिस्विदासीदिति च।। 8.2.102 ।।

उपरिस्विदासीदिति च।। अत्रापि `विचार्यमाणानाम्' इति विहितस्य प्लुतस्य गुणमात्रं विधीयते।।

स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु।। 8.2.103 ।।

स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु।। वावचनं कर्त्तव्यमिति। `सर्व एव प्लुतः' इति वचनमन्यदीयमिति वार्त्तिककारेण तावदिदं पठितं वृत्तिकारोऽपि तदेवापठत्।।

क्षियाशीः प्रैषेषु तिङाकाक्षम्।। 8.2.104 ।।

क्षियाशीः प्रैषेषु तिङाकाक्षम्।। क्षिया = आचारभेदः, आचारोल्लङ्घनम्। इष्टाशंसनम्=आशीः। शब्देन व्यापारणम्=प्रैषः। क्वचिद् वृत्तावप्ययं ग्रन्थः पठ्यते। दीर्घं ते आयुरस्तु, अग्नीन्विहरेति। क्षियायां तु न प्रत्युदाहृतम्; नित्यसाकाङ्क्षत्वात्। न हि `स्वयं ह रथेन याति' इत्येतावत्युक्ते आचारभेदो गम्यते, किं तर्हि?`उपाध्यायां पदातिं गमयति'इत्युक्ते।

इह `उपरिस्विदासीदिति च' इत्यस्यानन्तरम् `अङ्गयुक्तं तिङाकाङ्क्षम्' इति वक्तव्यम्, ततः `क्षियाशीः प्रैषेषु स्वरितः' इति, ततः `आम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु' इति, एवं हि तिङाकाङ्क्षग्रहणं द्विर्न कर्त्तव्यं भवति? तथा तु न कृतमित्येव।।

अनन्त्यस्यापि प्रश्नाख्यानयोः।। 8.2.105 ।।

अनन्त्यस्यापि प्रश्नाख्यानयोः।। सर्वेषामेव पदानामिति। नन्वन्त्यस्यानुदात्तम्, `प्रश्नान्ताभिपूजितयोः' इत्यनुदात्तप्लुतेन भवितव्यम्, तत्कथमेष स्वरितः प्लुतो भवति? अत आह---अनन्त्यस्येति। यद्यप्यत्र विकल्पो न श्रुतः, तथाप्यतेनापिशब्देनान्त्यस्याप्ययं स्वरितः प्लुतो भवति, ततश्चानुदात्तप्लुतः पाक्षिकः सम्पद्यते इति भावः। ननु चापिशब्द आख्यानेऽन्त्यसमुच्चयेन चरितार्थः, ततः किम्? प्रश्नेऽन्त्यस्यानुदात्तस्य नित्यं प्लुतः प्राप्नोति, तत्र विकल्पाभावान्नैष दोषः। प्रश्नेऽप्यपिशब्दस्य तात्पर्यं गम्यते; सहनिर्दिष्टत्वात्, ततश्च प्रश्नान्ते स्वरितानुदात्तयोः प्लुतयोर्विकल्पो भविष्यति।।

प्लुतावैच इदुतौ।। 8.2.106 ।।

प्लुतावैच इदुतौ।। लक्षणान्तरेणैवैचोः प्लुतप्रसङ्गे तदवयवयोरिदुतोः प्लुतार्थं वचनम्। वचनसामर्थ्याद्वर्णैकदेशयोरपीदुद्ग्रहणेन ग्रहणम्। ऐचः प्लुतप्रसङ्गे इति। केचिदाहुः---`सूत्रे प्लुताविति प्लुतिशब्दात्सप्तमी, ऐचः प्लुतौ प्राप्तायामिति तदनेन दशितम्' इति, तदयुक्तम्; प्लुतौ' इति हि क्रियानिमित्तोऽयं व्यपदेशः---इति प्रथमाद्विवचनान्तत्वेन व्याख्यास्यमानत्वात्। तस्मात् प्रकरणप्राप्तये तदुक्तम्। उदाहरणे दूराद्धूते `गुरोरनृतः' इत्येव प्लुतः। यदि ऐकारौकारयोरवयवयोरिदुतोः प्लुतः क्रियते, समुदायस्य चतुर्मात्रताऽर्धचतुर्थमात्रता वा प्राप्नोति, कथम्? इमावैचौ समाहारवर्णौ; मात्राऽवर्णस्य, मात्रेवर्णोवर्णयोः। अपरे त्वाहुः---अर्धमात्राऽवर्णस्य, अध्यर्धमात्रेवर्णोवर्णयोरिति। तत्र पूर्वस्मिन्कल्पे इदुतोरनेन प्लुते कृते तयोस्तिस्रो मात्राः, अवर्णस्य चैका मात्रेति समुदायश्चतुर्मात्रः प्राप्नोति, पक्षान्तरे त्वर्द्धचतुर्थमात्रः प्राप्नोत्यत आह---अत्रेति।

ननु च त्रिमात्रस्याचः प्लुतसंज्ञा कृता, तत्कथं द्विमात्राविदुतावनेन शक्येते कर्तुम्? अत आह---प्लुताविति हीति। अनेन प्लुताविति कर्त्तरि निष्ठा, न संज्ञाशब्द इति दर्शयति। वृद्धिं गच्छत इत्यर्थ इति। अनेकार्थत्वाद्धातूनां प्लवतिर्वधनेऽपि वर्त्तते। नन्वेवमपि न ज्ञायते---कियती सा वृद्धिरिति? अत आह----तावती चेति। एवं मन्यते---प्रकृतमपि प्लुतग्रहणमत्र सम्बध्यते, ततश्चायमर्थो भवति---ऐचोऽवयवाविदुतौ तथा वर्धेते यथा ऐचौ प्लुतौ सम्पद्यते इति। तस्मादनभिमताया वृद्धेरप्रसङ्ग इति।

अर्धतुतीयमात्राविति। अर्धरूपा तृतीयमात्रा ययोस्तौ तथोक्तौ। इष्यते चतुर्मात्रः प्लुत इति। चतुर्मात्रतया वृद्धिरिष्यत इत्यर्थः। अस्मिन्पक्षे चतुर्मात्रस्याच्त्वमपि भवति। तेन प्रत्यङङैतिकायन इति ङमुङ् भवति; ग्लौ त्रातेति `अनचि च' इति तकारद्विर्वचनं भवति।।

एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ।। 8.2.107।।

एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ।। विषयपरिगणनं कर्तव्यमिति। एतद्विवृणोदि---प्रश्नान्तेति। यथाविषयमिति। प्रश्नान्तेऽनुदात्तः स्वरितो वा, शेषे तूदात्तः। इदुतौ पुनरुदात्तावेवेति। अनुवृत्तस्य उदात्तग्रहणस्याभिसम्बन्धात्।

विष्णुभूते इति। कथं पुनरिदं परिगणनस्योदाहरणम्, यावता सूत्रे तु `अदूराद्धूते'इत्युच्यते?अत आह----परिगणनं चेति। अन्यार्थेऽवश्यकर्त्तव्ये परिगणने तेनैव सिद्धत्वाद् `अदूराद्धूते' इति न वक्तव्यम्, ततश्चेदमपि परिगणनस्य प्रत्युदाहरणमुपपद्यत इति। गौरिति। `असर्वनामस्थाने' इति प्रतिषेधात् सौ परतः

पूर्व पदं न भवति। अथ यदा सावपि पदं भवतीति पक्षः, तदा कस्मान्न भवति? उक्तमेतद् `वाक्यपदयोरन्त्यस्य' इति, विसर्जनीयशब्दश्चात्र वाक्यान्तः। नन्वेवं पदान्तग्रहणमित्यत्र पदशब्देन वाक्यमुच्यतेऽन्वर्थग्रहणात्---पद्यते प्रतीयतेऽनेन हेतुनार्थ इति? एतच्च `याज्यान्तः' इत्यतोऽन्तग्रहणानुवृत्त्या लभ्यते।
अग्निभूता6इति। अग्निभूतिशब्दस्य सम्बुद्धौ रूपम्।
आमन्त्रिति इति। अप्राप्त एव प्लुते वचनम्।।
तयोर्य्वावचि संहितायाम्।। 8.2.108 ।।
तयोर्य्वावचि संहितायाम्।। किमर्थमिदमुच्यते, न `इको यणचि'इत्येव सिद्धम्? अत आह----इदुतोरसिद्धत्वादिति। ननु सिद्धः प्लुतस्स्वरसन्धिषु कथं ज्ञायते? `प्लुतप्रगृह्या अचि' इति प्लुतस्य प्रकृतिभावविधानात्। यस्य हि विकारः प्राप्तः तस्य प्रकृतिभावो विधेयः; प्लुतस्य चासिद्धत्वे न तस्य स्वरसन्ध्याख्यो विकारः प्राप्नोति। अस्तु प्लुतः सिद्धः, किमायातमिदुतोः? उच्यते, प्लुतप्रकरणे यत्काय तत्स्वरसन्धिषु सिद्धमिति सामान्येन ज्ञापकमाश्रयिष्यते, ततश्चेदुतोरपि सिद्धत्वादत्सिद्ध एव यणादेशः, अत आह---अथापि कथञ्चिदिति। सामान्यपेक्षं ज्ञापकमित्यस्यार्थस्य दुर्ज्ञातत्वात् कथञ्चिदित्याहः यदीदं नोच्येत, अग्ना7इ इन्द्रम, पटा6उ उदकमित्यत्र षाष्ठिकं यणादेशं वाधित्वा सवर्णदीर्घत्वं स्यात, अग्ना6याशेत्यादौ च `इकोऽसवर्णे शाकल्यस्य' इति प्रकृतिभावः स्यात्, अतस्तद्बाधनार्थमिदं वक्तव्यमेव। ननु च तन्निवृत्तये यत्नान्तरमस्ति, किं पुनस्तत्? `इको यणचि' इत्यत्रोक्तम्---`इकः प्लुतपूर्वस्य यणादेशो वक्तव्यम्', य इक् प्लुतपूर्वः न च प्लुतविकारः, भो6यिन्द्रं गायतीति भोः शब्दस्य छान्दसः प्लुतः, ततः परस्येकारस्य निपातत्वात्प्रकृतिभावे प्राप्ते तं बाधित्वा यणादेशः, तदेवं तस्यावश्यकर्त्तव्यत्वात्तेनैव यण् सिद्धः? अत आह----अथापीति। यण्स्वरनिवृत्त्यर्थमिति। यणाश्रयः स्वरो यण्स्वरः, एतदेव विवृणोति---यणादेशस्येति।
उक्तमेवार्थं श्लोकाभ्यां संगृह्णाति----किन्त्विति। इको यणादेशेन किं न सिद्धं रूपम्, यतोऽयमाचार्यः इदुतोर्य्वौ विदधाति, तौ चेदुतौ स्वरसन्धिषु सिद्धौ। ममेति सूत्रकारेणैकीभूतस्य वचनम्। एवं चोदिते परिहरति---शाकलदीर्घविधौ तु निवर्त्याविति। शाकल्यस्येदं शाकलम्, `कण्वादिभ्यो गोत्रे'इत्यण्। पुनश्चोदयति---इक् च परेति। वार्त्तिककारोऽपि इकः प्लुतपूर्वस्य यणं विदधाति, स च प्रकृतिभावस्येव शाकलदीर्घविध्योरप्यपवादः, ततश्च तेनैव यणा एतयोरपीदुतोः शावलदीर्घौ न भविष्यतः, नार्थ एतेन? परिहरति---यण्स्वरेति। यण्स्वरबाधनमेव हेतुः सूत्रारम्भस्येति।।
इति श्रीहरदत्तमिश्रविचितायां पदमञ्जर्यामष्टमाध्यायस्य द्वितीयश्चरणः
-------*********--------

8.3

काशिकावृत्तिः --- 6
अथ अष्टमाध्याये तृतीयः पादः
मतुवसो रु सम्बुद्धौ छन्दसि ।। 8.3.1 ।।
`युवोरनाकौ' इतिवन्मतुवसोरिति निर्देशोऽनुबन्धपरित्यागेन वा सकारान्तस्य वसोर्ग्रहणम्, निपातनाच्चाल्पाच्तरस्य परनिपातः । रु---इत्यविभक्तिको निर्देशः । मरुत्व इति । `झयः' इति वत्वम्' तसौ मत्वर्थे' इति भसंज्ञा । हरिवो मेदिनमिति । `छन्दसीरः' इति वत्वम्, `संयोगान्तलोपो रो रुत्वे सिद्धो वक्तव्यः' इति वचनात् `हशि च' इत्युत्वम् ।
वन इति । क्वनिब्वनिपोः सामान्येन ग्रहणम् । अनुबन्धानिर्देशादत्र तदनुबन्धकपरिभाषाया अनुपस्थानात् क्वनिपोऽपि ग्रहणम् । प्रातरित्व इति । प्रातरेतीति `अन्येभ्योऽपि दृश्यन्ते' इति क्वनिपि ह्रस्वस्य तुक् । अवशब्दस्य चेति । सर्वस्येति द्रष्टव्यम्; अनर्थकेऽलोन्त्यपरिभाषाया अभावात् । उपसंख्यानं प्रत्याचष्टे---निपातविज्ञानाद्वेति । एतदेव विवृणोति---अथ वेति । अवश्यं चैतन्निपातत्वमेव विज्ञेयमित्याह---असम्बुद्धावपि हीति ।
स्त्रियामिति । भो ब्राह्मणीति । विभक्तिनिमित्तेषु कार्येषु लिङ्गविशिष्टपरिभाषा नोपतिष्ठत इत्युक्तम्---`न वा विभक्तौ लिङ्गविशिष्टाग्रहणात्' इति, तेन भवतीशब्दस्य रुत्वौत्वे न स्याताम् । अथापि स्याताम् ? एवमीकारस्य रुत्वे अवशब्दस्य चौकारो रूपं न सिध्यति । तस्मादसम्बुद्धौ स्त्रियां च दर्शनान्निपाता एवेति विज्ञेयम् । निपातत्वं च विभक्तिस्वरप्रतिरूपकत्वेनेति । नन्वसत्यस्मिन्नुपसंख्याने भोइत्यादिकः शब्दो विभक्त्यन्तो नास्ति, यत्प्रतिरूपका एते स्युः ? तस्मात्सौत्रा एते निपाताः, `भोभगोअघोः' इत्यत्र सूत्रे निर्दिष्टाः, चादिषु वा पठितव्याः । तदेवं प्रत्याख्यातमुपसंख्यानम् ।
अन्ये त्वाहुः---`इतराभ्योऽपि दृश्यन्ते' इति भवदादियोगे विधीयमानास्तसिलादयः, ततः `भो' इत्यादावपि यथा स्युरिति वार्त्तिकारम्भ इति ।
अन्ये तु---भवदादेरपरिगणितत्वाद् निपाता भोइत्यादयो भविष्यन्तीति मन्यन्ते ।।
अत्रानुनासिकः पूर्वस्य तु वा ।। 8.3.2 ।।
पूर्वत्वमिदमापेक्षिकम्, रुत्वं च सन्निहितम् । न च तदपेक्षं पूर्वत्वं सम्भवति; रोरनुनासिकस्य च सहविधानात् । तस्माद्यस्य रुर्विधीयते तदपेक्षमेव पूर्वत्वं विज्ञायत इत्याह---यस्य स्थान इति ।
अथात्रग्रहणं किमर्थम् ? अत्र रुप्रकरणे यथा स्यात् । अधिकारादप्येतत् सिद्धम्, अधिकारे हि सति रुत्वानुनासिकयोः सह विधानान्नान्यत्र प्रसङ्गः ? अथ

आह---अत्रग्रहणमिति । अवधारणमत्र द्रष्टव्यम्---रुणैव सहेति । नन्वधिकारादप्येतत्सिद्धमित्युक्तम् ? अत आह---अधिकारेति । असत्यत्रग्रहणे अनुनासिकाधिकारस्य परिमाणं न ज्ञायेत---एतावत्सु योगेष्वस्य व्यापार इति, ततश्च रुप्रकरणात्परत्राप्यस्याधिकारः सम्भाव्येतेत्यर्थः । तुशब्दः परस्मात्कार्यिणः पूर्वस्य विशेषद्योतनार्थः---परस्य नित्यं रुत्वम्, पूर्वस्य तु वानुनासिक इति ।

वावचनमनर्थकम्, ज्ञापकात्सिद्धम्, यदयमुत्तरत्र सूत्रे यस्यानुनासिको न विहितस्तस्माद्रोः पूर्वस्मात्परमनुस्वारं शास्ति; ततो ज्ञायते---विकल्पेनायं भवतीति । न हि नित्येऽस्मिन्विधौ स रोः पूर्वः सम्भवति, यस्यानुनासिको विहित ।।

आतोऽटि नित्यम् ।। 8.3.3 ।।

केचिदिति । तैत्तिरीयाः । अनुस्वारमधीयत इति । शुद्धा दाकारात्परम् । नित्यग्रहणमनर्थकम्, अरम्भसामर्थ्यादेव नित्यो विधिः सिद्धः ? अस्त्यारम्भे प्रयोजनम् नियमो यथा स्यात्---आत एवाटि, अन्येषां तु नेति । कैमर्थ्यान्नियमो भवति विधेयं नास्तीति कृत्वा, इह चास्ति विधेयम्, किम् ? नित्योऽनुनासिकः ।।

अनुनासिकात् परोऽनुस्वारः ।। 8.3.4 ।।

अन्यशब्दोऽत्राध्याहर्त्तव्य इति । असत्यध्याहारे परशब्दस्य श्रुतत्वात्तदपेक्षयेवं `अनुनासिकात्' इत्येषा पञ्चमी स्यात्---परशब्दस्य दिग्वृत्तिः, अन्यार्थवृत्तिर्वा, पूर्ववृत्तिर्वा । पूर्वस्मिन्कल्पेरोः पूर्वस्मादनुनासिकादेवपरोऽनुस्वारो विज्ञायेत, न च तस्मात्पर इष्यते । इतरस्मिंस्त्वमनुनासिकादन्योऽनुस्वारो भवतीत्यर्थो भवति, तत्र चानर्थकं परग्रहणम्, न ह्यनुस्वारोऽनुनासिकापेक्षयाऽन्यत्वं व्यभिचरति । तस्मादन्यशब्दोऽध्याहार्यः । स च परशब्दापेक्षया पञ्चम्यन्तोऽध्याहार्यः । पूर्वस्येत्येतदप्यत्रानुवृत्तं पर इत्यनेन योगात्पञ्चम्यन्तं विपरिणम्यते । एवं स्थिते योऽर्थः सम्पद्यते तं दर्शयति--अनुनासिकादन्य इति । कः पुनरसौ ? इत्याह---यस्यानुनासिको न कृत इति । अनुस्वार आगमो भवतीति । टित्त्वाद्यागमलिङ्गाभावेऽपि परशभ्देनानुस्वारस्य देशविशेषसम्पादनादागमत्वम्, यथा---`न य्वाभ्यां पूर्वावैच्' इति ।।

समः सुटि ।। 8.3.5 ।।

`मोऽनुस्वारः' इत्यनुस्वारे प्राप्ते वचनम् । संस्कर्त्तेति । `सम्पर्युपेभ्यः करोतौ भूषणे' इति सुट्, समो मकारस्य रुत्वम्, तस्य विसर्जनीयः, तस्य `वा शरि' इति विकल्पे यथा नित्यं सकारो भवति तथा दर्शितम् ।

कथं पुनरस्मिन्सूत्रे सकारो निर्दिश्यते ? इत्याह---समः स्सुटीति द्विसकारको निर्देश इति । स च सुटः सकारे सन्देहाभावात्तद्व्यतिरेकेण द्विसकारकत्वम् । वस्तुतस्तु त्रयः सकाराः---एको विभक्तिसम्बन्धी, द्वितीय आदेशः, तृतीयस्तु रुसम्बन्धी । यदि तर्हि सकारे आदेशो विधीयते, अनुनासिको न प्राप्नोति; यस्मादत्रग्रहणं रुणा सह सन्नियोगप्रतिपत्त्यर्थमित्युक्तम् ? नैष दोषः; अत्र रुप्रकरणे यद्विधीयते तदुपलक्षणार्थं तत्र रुग्रहणम् । एतेन पूर्वसूत्रे रोः पूर्व इति व्याख्यातम् । तदत्र सत्वे कृते यदा पूर्वस्यानुनासिकः, तदा सत्वस्यासिद्धत्वाद्रुत्वाभावात् `अनचि च' इति द्विर्वचने `झरो झरि' इति पाक्षिके लोपे द्विसकारकः, त्रिसकारको वा प्रयोगः । यदा त्वनुस्वारः, तदाऽयोगवाहानां अट्प्रत्याहार उपदेशचोदनात्तस्य च हल्त्वात् `झरो झरि' इति वा लोपे द्विसकारकः, एकसकारको वा प्रयोगः । यदा त्वनुस्वारस्य हल्त्ववदच्त्वमपीष्यते, तदा ततः परस्य द्विर्वचनपक्षे सकारत्रयमपि भवति । तदेवं पञ्च रूपाणि भवन्ति---अनुनासिकपक्षे द्वौ सकारौ, त्रयो वा, अनुस्वारपक्षे द्वावेकस्त्रयो वा । पञ्चस्वपि पक्षेषु `शरः खयः' इति वा ककारस्य द्विर्वचने कृते दश रूपाणि भवन्ति । समो वा लोपमेके । एके आचार्याः समो विकल्पेन लोपमिच्छन्ति, अत्राप्यनुनासिकानुस्वारौ भवतः । तस्यापि रुप्रकरणे विधानात्तत्रानुनासिकपक्षे सकारस्य `अनचिच' इति द्विर्वचने पाक्षिके च लोपे एकसकारकत्वमपि कदाचिद्भवति । तत्रापि ककारस्य पक्षे द्विर्वचनमिति द्वादश रूपाणि भवन्ति ।।

पुमः खय्यम्परे ।। 8.3.6 ।।

पुंसः सकारादवशिष्टो यो भागस्तस्यायं निर्देशः, सकारस्य संयोगान्तलोपे कृते तस्यैव कायित्वात् । अमिति प्रत्याहारस्य ग्रहणम्, न द्वितीयैकवचनस्य; खया प्रत्याहारेण साहचर्यात् । पुंश्चलीति । पचादौ चलडिति पाठान्ङीप्, पुंश्चलीति षष्ठीसमासः । पुंस्कामेति । पुमांसं कामयत इति `शीलिकामिभिक्षाचरिभ्यो णः' इति णः । तस्मादत्र सकार एवादेशो वक्तव्य इति । `कुप्वोः ःकःपौ च' इत्यत्रैतद्वक्तव्यम् ।

द्विसकारकनिर्देशपक्षे त्विति । यदा पूर्वसूत्रे `द्विसकारको निर्देशः' इति पक्षः, तदेत्यर्थः । स इत्यनुवर्तते इति ।

ननु च रुरपि प्रकृतः, सोऽपि प्राप्नीतीत्यत आह---रुत्वं त्विति । असम्बन्धे कारणमाह---सम्बन्धानुवृत्तिस्तस्यति । इतिकरणो हेतौ, यस्मादसौ स्वसम्बन्धिना यः सम्बन्धस्तमनुवर्त्तते तं न जहाति तस्मादित्यर्थः । यद्वा---सम्बध्यत इति सम्बन्धः । यस्मादिह स्वसम्बद्धमेव तदनुवर्तते तस्मादित्यर्थः । रुत्वं खल्विहानुवर्त्तमानमपि `मतुवसो रु सम्बुद्धौ' इति स्वेन सम्बन्धिना सम्बद्धमेवानुवर्त्तते, तस्य प्रयोजनम्---सम्बन्ध्यन्तरेण रोः सम्बन्धो मा मूदिति । पुंदासादयः षष्ठीसमासाः । पुंगव इति । `गोरतद्धितलुकि' इति टच्समासान्तः । परग्रहणे क्रियमाणे खयि परतो योऽम् तत्रेत्यपि विज्ञायेत, ततश्च पुमक्षः पुमाचारः---इत्यत्रैव स्यात्; तस्मात्परग्रहणम् ।।

नश्छव्यप्रशान् ।। 8.3.7 ।।

प्रशान्वर्जितस्येति । सूत्रे तु `अप्रशान' इति षष्ठ्यर्थे प्रथमा । टीकतिर्गत्यर्थोऽनुदात्तेत् । त्सरुः = खड्गग्रहणप्रदेशः, तत्र कुशलः त्सरुकः, आकर्षादिभ्यः कन् ।।

दीर्घादटि समानपादे ।। 8.3.9 ।।

एकपर्यायः समानशब्दः =समानपाद इत्युच्यते, तत्रेदं न सिध्यति---यजामहे यज्ञियान्हन्त देवान् इलामहयिति ? छान्दसत्वाद् भविष्यति ।

नृन्पे ।। 8.3.10 ।।

नृनिति षष्ठ्यर्थे प्रथमा । एवमुत्तरत्रापि `पे' इत्यकार उच्चारणार्थः, पकारमात्रं निमित्तम् ।।

स्वतवान्पायौ ।। 8.3.11 ।।

`तु वृद्धौ' सौत्रो धातुः, ततोऽसुन्---स्वं तवो यस्याऽसौ स्वतवान्, `दृक्स्ववः स्वतसां छन्दसि' इति नुम् ।।

कानाम्रेडिते ।। 8.3.12 ।।

`कान्कान्' इति वक्तव्ये आम्रेडितग्रहणं यत्र द्विर्वचनं तत्रैव यथा स्यात्, इह मा भूत्---कान्कान् पश्यतीति, एकोऽत्र किं शब्दः प्रश्ने, द्वितीयः क्षेपे । समः सुटीत्यतो वा सकारोऽनुवर्तत इति । यद्येवम्, पूर्वेष्वपि योगेषु स एव प्राप्नोति ? इत्यत आह---पूर्वेषु योगेष्विति ।

ढो ढे लोपः ।। 8.3.13 ।।

आकार उच्चारणार्थः, ढकारमात्रं निमित्तम्; तेन लेढा, लेढीत्यादावपि भवति । लीढमित्यादौ `हो ढः', `झषस्तथोर्धोऽधः', `झषस्तथोर्धोऽधऋ', ष्टुत्वम्, ततोऽनेन ढलोपः । ननु चासिद्धं ष्टुत्वं तत्कथमत्र लोपः ? तत्राह---ष्टुत्वस्येति । उच्यते चेदम्---ढे परतो ढस्य लोपो भवतीति, तत्र ष्टुत्वस्यासिद्धत्वे निर्विषयमेतत्स्यात् ।

ननु च यत्रौत्पतिको ढकारः---श्वलिड्ढौकत इत्यादौ, तत्र सावकाशः स्यादत आह---श्वलिड्ढौकत इत्यत्रेति । जश्त्वे कृत इति ।

एकपदाश्रयत्वादन्तरङ्गत्वात् `पूर्वत्रासिद्धम्' इति लोपस्यासिद्धत्वाद्वा पूर्वं जश्त्वम् । ननु च निर्विषयत्वाद् ढलोपो जश्त्वं बाधेत ? नेत्याह---न चेति । कुतः ? इत्याह---तस्य हीति ।

कथं पुनर्लीढादिरवकाशः, यावता यथा श्वलिड्ढौकते इत्यत्र जश्त्वे कृते कार्यिणोऽभावः, तथा लीढादावपि ष्टुत्वस्यासिद्धत्वान्निमित्तस्याभावः; अथ तत्र वचनसामर्थ्यात् ष्टुत्वस्यासिद्धत्वं बाध्यते, तदेतरत्रापि जश्त्वं बाधनीयम्, वक्तव्यो वा विशेषः ? अत आह---तत्र हीति । अयमभिप्रायः---लोपेन तावदसिद्धत्वमवश्यं बाध्यम्, तत्र लीढमित्यादावेकमेव `पूर्वत्रासिद्धम्' इत्यसिद्धत्वम्, अतस्तदेव बाध्यते; श्वलिड्ढौकत इत्यत्र तु ढलोपस्य जश्त्वापेक्षया बहिरङ्गत्वात् परत्वाच्च द्विविधमसिद्धत्वमिति न तद्बाध्यते । ततो जश्त्वे कृते न श्रुतिकृतमानन्तर्यम्, नापि शास्त्रकृतम्; जश्त्वस्यासिद्धत्वाभावादिति ढलोपस्यायमविषय इति ।।

रो रि ।। 8.3.14 ।।

किमिदं सानुबन्धकस्य रोर्ग्रहणम् ? आहोस्विद्रेफस्य ? कुतः संशयः ? तुल्यात्र संहिता---रोः रि, रः रीति । किं चातः ? यदि सानुबन्धकस्य ग्रहणम्, सिद्धमिन्दूरथः अग्नीरथः; इदं तु न सिध्यति---नीरक्तम्, दूरक्तमिति । अथ रेफस्य ग्रहणम्, सिद्धं नीरक्तं दूरक्तमिति; इदं तु न सिध्यतिअग्नीरथः, इन्दूरथ इति, `निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति ? नैष दोषः, वर्णग्रहणेषु नैषा परिभाषा प्रवर्त्तते ।

पदस्येत्यत्र विशेषणे षष्ठीति । एतच्च `पदस्य' `पदात्' इत्यत्रैव व्याख्यातम् । तेन किं सिद्धं भवति ? इत्याह---तेनेति । स्थानषष्ठ्यां तु रेफेण पदस्य विशेषणाद्रेफान्तस्य पदस्य लोपेन भवितव्यम् । अजर्घा इति । `एकाचो बशो भष्' इत्यत्रैतद् व्युत्पादितम् । अपास्पा इति । `स्पर्द्ध सङ्घर्षे', यङ्लुकि `दीर्घोऽकितः' इति दीर्घः, लङि सिपि शपो लुक्, सिपो हल्ङ्यादिलोपः; जश्त्वम्, `दश्च' इति रुत्वम् ।।

खरवसानयोर्विसर्जनीयः ।। 8.3.15 ।।

यद्यत्रापि पदस्येति विशेषणषष्ठी स्यात्, तदा चकर्ष, कर्कश इत्यादावपदान्तस्यापि रेफस्य विसर्जनीयः स्यात् । स्थानषष्ठ्यां तु रेफेण पदे विशेषिते रेफान्तस्य पदस्यालोन्त्यस्य विसर्जनीयविधानान्न कश्चिद्दोष इति मन्यमान आह---रेफान्तस्य पदस्येति । खरि परतोऽवसाने चेति । `परतः' इत्येतत्खरैव सम्बध्यते, नावसानेन; असम्भवात् । येन वर्णेन विरम्यते स एवावसानं स्यात् । विरतिः=वर्णस्यानुच्चारणम् । तत्र पदान्तस्य रेफस्य येन वर्णन विरम्यते स तावत्परो न सम्भवति । इतरत्पुनरवसानमभावरूपम्, न चाभावेन पौर्वापर्यं सम्भवति । तस्मात् `खरवसानयोः' इत्येकापि सप्तमी विषयभेदाद्भिद्यतेखरि परसप्तमी, अवसाने विषयसप्तमीति ।

अपर आह---वर्णेष्वप्युच्चरितप्रध्वंसिषु बुद्धिविरचितं पौर्वापर्यमस्ति, तत्त्वभावेनापि सम्भवति; तस्मादुभयत्रापि परसप्तमीति । उदाहरणेषु खरि विसर्जनीयस्य सत्वम्, चवर्गे श्चुत्वम्, टवर्गे ष्टुत्वम् ।

नार्पत्य इति । पत्युत्तरपदाण्ण्यः । वृद्धेर्बहिरङ्गलक्षणत्वादिति । बहिर्भूततद्धितापेक्षत्वाद् वृद्धेर्बहिरङ्गत्वम् । तदाश्रयस्य रेफस्येति । तदाश्रयत्वं तु तया सह विधानात् । `उरण् रपरः' इत्येतद्धि गुणवृद्धिविधिभिरेकतामापाद्य रपरत्वं विधत्ते, तेन वृद्धेर्यन्निमित्तं तदेव रेफस्यापि, ततस्तस्यापि बहिरङ्गत्वम् । विसर्जनीयस्तु खर्मात्रमाश्रित्य भवन्नन्तरङ्गः । ननु बहिरङ्गपरिभाषा `वाह ऊठ्' इत्यत्र ज्ञापितत्वात्तद्देशा, ततः किम् ? तस्यां कर्त्तव्यायां विसर्जनीयः `पूर्वत्रासिद्धम्' इत्यसिद्धः, सा कथमन्तरङ्गमपश्यन्ती बहिरङ्गस्यासिद्धत्वमापादयति ? नैष दोषः; `कार्यकालं संज्ञापरिभाषम्', ततश्च परिभाषान्तरवद् बहिरङ्गपरिभाषाया अप्यत्र प्रकरणे प्रवृत्तिरविरुद्धा ।।

रोः सुपि ।। 8.3.16 ।।

पयः स्विति । यत्र सकारद्वयं पठ्यते तत्र `वा शिर' इति विसर्जनीयस्य वा सकारः । सर्पिः ष्विति । यत्र विसर्जनीयः पठ्यते तत्र

`नुम्विसर्जनीयशर्व्यवायेऽपि' इति प्रत्ययसकारस्य षत्वम् । षकारद्वयपाठे तु पूर्ववद्विसर्जनीयस्य सत्त्वम्, परस्य पूर्ववदेव षत्वम्, पूर्वस्य ष्टुत्वम् ।
सप्तमीबहुवचनं गृह्यत इति । न प्रत्याहारः; `खरि' इत्यनुवृत्तेः, न हि सप्तमीबहुवचनादन्यः सुप् खरादिरस्ति । तेन पयोभ्यामित्यादौ विध्यर्थं न भवति, किं तर्हि ? नियमार्थम्, यदाहसिद्धे सत्यारम्भो नियमार्थ इति । रोरेव सुपीति । विपरीतस्तु नियमो न भवति---रोः सुप्येवेति; `हलोऽनन्तराः संयोगः' इत्यादिनिर्देशात् ।।

भोभगोअघोअपूर्वस्य योऽशि ।। 8.3.17 ।।

अश्ग्रहणमनर्थकमन्यत्राभावात्, अशोऽन्यः खर्भवति, तत्र च `पूर्वत्रासिद्धम्' इति यत्वस्यासिद्धत्वाद्विसर्जनीयेन भाव्यम्, कृते विसर्जनीये स्थानिवद्भावाद् रुग्रहणे ग्रहणात् स्यात्प्रसङ्ग इति चेत् ? न; अल्स्थानिकत्वात् । अत्र हि रोर्यो रेफस्य विसर्जनीयस्य स्थानी, न पुना रुरेव । किञ्च---यत्वस्याप्यस्य रोर्यो रेफः स एव स्थानी, न पुना रुरेव । तस्मादल्विधित्वादपि नास्ति स्थानिवद्भावः । संहिताधिकाराच्चावसाने यत्वं न भविष्यति, तस्मादश्ग्रहणमनर्थकम् ? इत्यत आह---अश्ग्रहणमुत्तरार्थमिति । एतदेव व्यनक्ति---हलि सर्वेषामिति । वृक्षवयतेरप्रत्यय इति । स पुनर्विच, न क्विप् । क्विपि हि एकदेशविकृतस्यानन्यत्वाद्वयति ग्रहणेन ग्रहणाद्वकारस्य सम्प्रसारणं स्यात् । `लोपो व्योर्वलि' इति वलोपः । स्थानिवत्त्वं च णेरत्र क्वौ लुप्तत्वान्न विद्यते । विचि तु णिलोपस्य स्थानिवद्भावाद्वलोपो नास्ति । सम्प्रसारणस्य त्वप्रसङ्ग एव । `हलि सर्वेषाम्' इत्यनेन तु लोपे कर्तव्ये `पूर्वत्रासिद्धे न स्थानिवत्' इति स्थानिवत्त्वनिषेधाद् वलोपः स्यादिति विशेष्यते । अथ ककारे परतः `लोपो व्योः' इति वलोपः कस्मान्न भवति, णिलोपस्य स्थानिवद्भावो नास्ति, पदान्तविधौ प्रतिषेधात्, वकारस्य पदान्तत्वात् ? नैष दोषः; भावसाधनस्त्वत्र विधिशब्दः, ततश्च पदान्ते विधीयमाने स्थानिवत्त्वनिषेधः । न च लोपः पदान्तः; तस्याभावरूपत्वात् ।
अथेति । यदि `हलि सर्वेषाम्' इत्यत्राश्ग्रहणस्य प्रयोजनम्, तत्रैवं वक्तव्यम्---`हशि' इति, तत्किं हल्ग्रहणं कृत्वाऽश्ग्रहणेन तद्विशेष्यत इति प्रश्नार्थः । एवकारो भिन्नक्रमः, तत्र हश्ग्रहणमेव कस्मान्न कृतमिति । उत्तरार्थमिति । यदि तत्र हश्ग्रहणँ क्रियते, `मोऽनुस्वारः' इत्यत्र पुनर्हल्ग्रहणं कर्तव्यम् । हल्मात्रे यथा स्यादिति । सर्वथोभाभ्यां ग्रहणाभ्यां न मुच्यामहे इति भावः । तथाप्यत्राश्ग्रहणानुरोधे प्रयोजनं वक्तव्यम् ? तदाह---व्योर्लघुप्रयत्नतर इति ।।

व्योर्लघुप्रयत्नतरः शाकटायनस्य ।। 8.3.18 ।।

अतिशयेन लघुप्रयत्नः=लघुप्रयत्नतरः । वर्णोच्चारणहेतुरात्मधर्मः = प्रयत्नः । उदाहरणेष्वान्तर्यतो वकारस्य वकारः, यकारस्य यकारः । किं पुनरिदं लघुप्रयत्नतरत्वम् ? इत्याह---लघुप्रयत्नतरत्वमिति । स्थानम्=ताल्वादि, जिह्वाया अग्रोपाग्रमध्यमूलानि=करणानि, प्रयत्नस्य लघुत्वे तानि शिथिलानि=लघूनि भवन्ति ।।

लोपः शाकल्यस्य ।। 8.3.19 ।।

अवर्णपूर्वयोरिति । ओकारपूर्वस्य तूत्तरसूत्रेण तूत्तरसूत्रेण नित्यं लोपो विधास्यते ।
शाकल्यग्रहणं विकल्पार्थमिति । ननु लोपोऽप्युच्यते, लघुप्रयत्नतरोऽपि, तावुभौवचनाद्भविष्यतः; तत्किं विकल्पार्थेन शाकल्यग्रहणेन ? अत आह---तेनेति ।।

ओतो गार्ग्यस्य ।। 8.3.20 ।।

आकारादुत्तरस्य यकारस्येति । वकारस्त्वस्मिन्विषये न सम्भवति । नित्यार्थोऽयमारम्भ इति । विकल्पस्य पूर्वणैव सिद्धत्वात् ।
किमर्थं तहि गार्ग्यग्रहणम् ? इत्याह---गाग्यग्रहणं पूजार्थमिति । व्योरिह प्रकरणे लघुप्रयत्नतरोऽपि विहितः, लोपोऽपि, तत्कस्यायं नित्यो लोपो बाधकः, आनन्तर्याल्लपिविकल्पस्य ? इत्याह---योऽयमिति ।
केचित्त्विति । यदस्मिन्प्रकरणे व्योः कार्यं तत्समुदायोऽपेक्ष्यते, न त्वनन्तरो लोपविकल्प इति तेषामभिप्रायः ।।

उञि च पदे ।। 8.3.21 ।।

भूतपूर्वेण ञकारेणेति । भूलोदाहरणेऽपि भूतपूर्वेणैव ञकारेणोञिति प्रतिपत्तिः; अनुबन्धस्य प्रयोगेऽसमवायात् । उत्तरार्थमिति । `ङमो ह्रस्वादछि ङमुण्नित्यम्' इत्येष विधिरजादौ पदे यथा स्यात्, इद मा भूत्---दण्डिनेति । नैतदस्ति प्रयोजनम्; `पदस्य' इति वर्त्तते । इह तर्हि परमदण्डिना, अत्र हि सुबन्तस्य समास इति पदत्वमस्ति ? नास्ति; उक्तं हि `उत्तरपदत्वे चापदादिविधौ' इति । तदेतत्पदग्रहणं तिष्ठतु तावत् । अयमपि नित्यार्थो योगः ।।

हलि सर्वेषाम् ।। 8.3.22 ।।

यकारस्य पदान्तस्येति । वकारस्तु भोभगोअघोपूर्वो न सम्भवति । अवर्णपूर्वस्तु सम्भवति--वृक्षव् करोतीति । तस्य तु लोपो न भवति, अशि हलीति विशेषणादित्युक्तम् । तस्माद्यकारस्येत्युक्तम् । ननु वृक्षव् हसतीत्यादौ सम्भवति ? न सम्भवति; अनभिधानात्, नह्येवंविधमभिधानमस्ति । तथा च `लण्' इत्यत्र भाष्यकार आह---`न पदान्ता हलोऽणः सन्ति' इति । एवं च वृक्षव् करोतीत्ययमपि प्रयोगश्चिन्त्यः ।।

मो।ञनुस्वारः ।। 8.3.23 ।।

अत्र पदस्येति स्थानषष्ठी, मकारेण पदस्य विशेषणान्नकारान्तस्य पदस्यालोन्त्यस्यानुस्वारो विज्ञायते । तदाह---मकारस्य पदान्तस्यति ।।

नश्चापदान्तस्य झलि ।। 8.3.24 ।।

आक्रंस्यत इति । क्रमेर्लृट्, `आङ उद्गमने' इत्यात्मनेपदम् ।।

मो राजि समः क्वौ ।। 8.3.25 ।।

सम्राडिति । `सत्सूद्विष' इत्यादिना क्विप्, व्रश्चादिना षत्वम् । साम्राज्यमिति । क्विबन्ताद् ब्राह्मणआदित्वात् ष्यञ् । अधिकसद्भावेऽपि क्विबन्तो राजतिस्तावदस्तीत्यत्रापि भवति, क्विबन्तावस्थायामेव वा प्रागेव ष्यञ उत्पत्तेर्मत्वम् ।

संयदिति । `गमः क्वौ' इत्यत्र गमादीनामिति वचनाल्लोपः, ह्रस्वस्य तुक् । किराडिति । `किं क्षेपे' इति समासः ।।

हे मपरे वा ।। 8.3.26 ।।

ह्मलयतीति । `ह्मल चलने', णिच्, `ज्वलह्वलह्मलनमामनुपसर्गाद्वा' इति पक्षे मित्संज्ञा, `मितां ह्रस्वः' इति ह्रस्वत्वम् ।

यवलपर इति । यवलाः परे यस्माद्वकारत्स तथोक्तः, यवलाश्चैते भवन्त आन्तरतम्यादनुनासिका भवन्ति, वावचनात्पक्षेऽनुस्वारोऽपि भवति ।

परग्रहणं शक्यमकर्त्तुम्; सप्तम्यैव तदर्थलाभात्---मकारे परतो यो हकारस्तत्रेति । विपर्ययस्तु न भवति; असम्भवात् । न हि मकारात्परो हकारः क्वचित् सम्भवति ।।

ङ्णोः कुक्टुक् शरि ।। 8.3.28 ।।

उदाहरणेषु `खयो द्वितीयाः शरि पौष्करसादेः' इति पक्षे ककारस्य खकारः, टकारस्य ठकारः ।

पूर्वान्तकरणमित्यादि । किं पुनः कारणंपदादौ छत्वं न सिध्यतीत्यत आह---शश्छोऽटीति । विरप्शिन्निति । महन्नामैतत्, विपूर्वाद्रपेरौणादिकः कर्मणि शिनिप्रत्ययः । यदि वा विरपणं विरप्, सोऽस्यास्तीति विरप्शः = शब्दितः, सङ्कीर्तत इत्यर्थः ।

षत्वप्रतिषेधार्थमिति । परादौ तु सकारः पदादिर्न स्यात् ।

ष्टुत्वप्रतिषेधार्थमिति । परादौ तु टकारः पदान्तो न स्यात् ।।

ङः सि धुट् ।। 8.3.29 ।।

`उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति `ङः' इति पञ्चम्या सीति सप्तम्याः षष्ठी प्रकल्प्यत इति मत्वाऽऽह---डकारान्तादिति । सप्तमीनिर्देशस्तु लाघवार्थः । उदाहरणेषु धुटि कृते चर्त्वम्--तकारः, तस्य पूर्ववत्पक्षे थकारः ।

अथ किमर्थं धुट् परादिः क्रियते---न धुगेव पूर्वान्तः क्रियेत, एवं हि `शितुक्' इत्यत्र तुग्ग्रहणं न कर्त्तव्यं भवति, एष धुक् तत्रानुवर्त्तिष्यते ? अत आह---परादिकरणमिति । प्रक्रियालाघवार्थं तुडिति वक्तव्ये धुड्ग्रहणमुत्तरार्थम्---`नश्च' इति धुड्यथास्यात्, तुण्मा भऊत् । किञ्च स्यात्, भवान्त्साय इत्यत्र `नश्छव्यप्रशान्' इति रुत्वं प्रसज्येत ? नैतदस्ति; अम्पर इति तत्रानुवर्त्तते । किञ्च---तुटोऽसिद्धत्वादपि रोरप्रसङ्गः । तस्मात्तुडेव वक्तव्यः ।।

नश्च ।। 8.3.30 ।।

अत्रापि परादित्वात् कुर्वन् सीदतीत्यादौ `पदान्तस्य' इति णत्वप्रतिषेधो भवति ।

धुटश्चर्त्वस्यासिद्धत्वादिति । धुटो यच्चर्त्वं तस्यासिद्धत्वादित्यर्थः । यद्यपि धुडप्यसिद्धः, तथापि न तदुच्यते; सिद्धेऽपि तस्मिन्विना चर्त्वेन रुत्वस्याप्राप्तेः । नन्वस्तु चर्त्वमसिद्धम्, तथापि नैव रुः प्राप्नोति, अनम्परत्वात् ? सत्यम्; यस्त्वसौ धुट उकारः, तेन भूतपूर्वेणाम्परत्वमंभ्युपेत्यैतदुक्तम् । अन्ये तु ग्रन्थमिमं न पठन्ति ।।

शि तुक् ।। 8.3.31 ।।

`शि' इत्येषा सप्तम्यकृतार्था पूर्वसूत्रे कृतार्थायाः पञ्चम्याः षष्ठीं प्रकल्पयति, तदाह---नकारस्येति ।

अथ किमर्थमपूर्वः पूर्वान्तस्तुक् क्रियते, न प्रकृतः परादिर्धुडेव विधीयेत, तत्रापि चर्त्वेन सिध्यत्येव ? अत आह---पूर्वान्तकरणमिति । पूर्वान्तस्यापूर्वस्यतुकः करणमित्यर्थः । नकारस्यापदान्तत्वादिति । तुका पदान्तताया विहतत्वात् । परादौ तु `पदान्तस्य' इति प्रतिषेधाददोषः । तत्रेत्यादि । तत्र तुको यच्चुत्वं तदाश्रयात्सिद्धं भवति ।।

ङमो ह्रस्वादचि ङमुण् नित्यम् ।। 8.3.32 ।।

ङमः, ङमुट्---इत्युभयत्रापि प्रत्याहारग्रहणम् । उडिति प्रत्येकं ङकारादिभिः सम्बध्यते । संज्ञायां हि कृतमागमलिङ्गं संज्ञिनां भवति । ह्रस्वादित्येतन्ङमो विशेषणम्, सोऽपि ङम् पदस्य विशेषणम्, विशेषणेन च तदन्तविधिर्भवति । पदस्येति प्रकृतं यद्यपि षष्ठ्यन्तम्, तथापि `हमः' इत्यनेन सम्बन्धात् पञ्चम्यन्तं विपरिणम्यते । `उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति `ङमः' इति पञ्चम्या `अचि' इति सप्तम्याः षष्ठी प्रकल्प्यते । सप्तमीनिर्देशस्तु लाघवार्थः, उत्तरार्थश्च । तदेतत्सर्वं मनसि कृत्वाह---ह्रस्वात्पर इति । संख्यातानुदेशश्च देवतितव्यः; आगमानामम्, आगमिनां च समत्वात् ।

परमदण्डिनेत्यादौ सुबन्तयोः समासः, तत्र समासार्थायां विभक्तौ लुप्तायामपि प्रत्ययलक्षणेन दण्डिन्नित्यस्य पदत्वमस्तीति ङमुट् प्राप्नोतीत्याशङ्क्याह---इहेति । समासे य उत्तरो भागस्तस्य पदत्वे कर्त्तव्ये प्रत्ययलक्षणं न भवति, अपदादिविधौ=पदादिविधिं वर्जयित्वा । `सात्पदाद्योः' इत्यत्र पदादिविधौ प्रत्ययलक्षणं भवत्येवेत्यर्थः । एतद्वार्त्तिककारमतेनोक्तम् ।

सूत्रकारमतेनाप्याह---अथ वेति ।।

मय उञो वो वा ।। 8.3.33 ।।

`इको यणचि' इत्यनेनैव सिद्धत्वान्नार्थोऽनेन ?---इत्याशङ्क्याह---प्रगृह्यत्वादिति । प्रगृह्यत्वं च `निपात एकाजनाङ्' इति । एवमपि `इको यणचि'

इत्यस्यानन्तरम् `मय उञो वा' इति वक्तव्यम्, एवं हि वग्रहण न कर्त्तव्यं भवति ? तत्राह---तस्यासिद्धत्वादिति । यदा त्वितिपर उञ् भवति मयश्च परः, तदा `उञः' इति प्रकगृह्यसंज्ञाया विकल्पः, ऊँआदेशश्च; तत्र यदा प्रगृह्यसंज्ञा न भवति तदानेन वत्वं च प्राप्नोति यणादेशश्च, तत्रास्य वत्वस्यासिद्धत्वाद्यणादेशे सत्यनुस्वारोऽपि भवति---किंविति । प्रगृह्यसंज्ञआपक्षे त्वनेन वा वत्वम्---किव्विति, किमु इति । ऊँआदेशस्यापि स्थानिवद्भावादनेन पक्षे वकारो भवति, स चान्तरतमत्वादनुनासिकः, तच्चतुर्थं रूपम् । ऊँआदेशस्यैव वत्वाभावपक्षे श्रवणम्, तत्पञ्चमं रूपम् ।।
विसर्जनीयस्य सः ।। 8.3.34 ।।
इह खरवसानयोर्द्वयोरपि रेफस्य विसर्जनीय उक्तः, तत्रेह निमित्तविशेषानुपादानात्खरि वावसानेऽपि सत्वं प्राप्नोति--वृक्षः, प्लक्ष इति ? सहितायामिति वर्तते, न चावसाने संहितास्ति; परस्याभावात् । मा भूत्परः, पूर्वेण या संहिता तदाश्रयं सत्वं प्राप्नोति, `इको यणचि' इत्यादौ तु कार्यिनिमित्तयोर्द्वयोरप्युपात्तत्वात्तयोरेव परस्परं संहिताश्रीयत इति दधि+अत्रेति पूर्वपराभ्यामिगचोः संहितायां सत्यामपि कार्यं न भवति; परस्परमसंहितत्वात् । स्यादेतत् । सामान्यविहिता संहितासंज्ञा, विशेषविहितावसानसंज्ञा; कार्ययोरेकवर्णविषयत्वात्कार्यार्थत्वाच्च संज्ञानां संज्ञयोरप्येकविषयत्वाद्बाध्यभादकभावः । यद्वा---`सन्निकर्षः संहिता' इतीयता सिद्धे परग्रहणमतिशयप्रतिपत्त्यर्थम्---प्रकृष्टो यः सन्निकर्षः । कश्च प्रकृष्टः ? यः पूर्वपराभ्यामुभाभ्यामपि । तदभावादवसानस्य संहितासंज्ञाया अभावः । यद्येवम्, अणो।ञप्रगृहस्यानुनासिके दोषः, तत्र हि `वावसाने' इति वर्त्तते; संहिताधिकारश्चोत्तरार्थोऽवश्यमनुवर्त्यः---`तोलि' इति परसवर्णोऽसंहितायां मा भूत्---अग्निचित् लुनातीति, ततश्च संहितावसानोभयाश्रयोऽनुनासिको दधि इत्यादौ न स्यादिति संहितािवसानसंज्ञयोः समावेश एषितव्यः, ततश्चावसानेऽपि सत्वप्रसङ्गः ? अत आह---खरीत्यनुवर्त्तत इति । तदनुवृत्तिश्च मण्डूकप्लुतिन्यायेन, सम्बन्धानुवृत्त्या वा वेदितव्या; अन्यथा हि पूर्वत्रापि खरि कार्य विज्ञायेत ।
किं पुनरत्र प्रमाणं खरीत्यनुवर्त्तते इति ? उत्तरत्र शर्पर इति वचनम्, स हि बहुव्रीहिः, तस्यान्यपदार्थापेक्षाया यो विसर्जनीयात्परः सम्भवति स एवान्यपदार्थः, स च खरेवः, अवसानस्य शर्परत्वासम्भवात् । यद्वा---यदि खरवसानयोर्द्वयोरपि सत्वं स्यात् विसर्जनीयविधानमनर्थकं स्यात्; `खरवसानयोस्सः' इत्येव वाच्यं स्यात् । एवं हि `विसर्जनीयस्य' इति न वक्तव्यं भवति । अवश्यम् `शर्परे विसर्जनीयः' इत्यस्य स्थानिनिर्देशार्थं विसर्जनीयस्येति वक्तव्यम् ? न वक्तव्यम्; पुरस्तादपकर्षेणाप्येतत्सिद्धम्, एवं वक्ष्यामि---`रो रि खरवसानयोः सः, रोः सुपि शर्परे विसर्जनीयः' इति, शर्पर इत्यत्र `र' इति वर्त्तते, न तु `रोः' इति, तेन सुगीः त्सरुकः, पुरुषः त्सरुकः इत्यादौ सर्वत्र भवति । अथ `भोभघोअघो' इत्यादिसूत्रं कुत्र करिष्यसि ? `शर्परे विसर्जनीयः' इत्यस्यानन्तरम् । यद्येवम्, स्वरत्र, स्वर्नयतीत्यादावपि यत्वप्रसङ्ग इति पुना रुग्रहणं कर्तव्यम् ? एवं तर्हि `रोः सुपि' इत्यस्यानन्तरम् `भोभगो' इत्यादि रुस्थानिकादेशविधानार्थं पठित्वा `शर्परे विसर्जनीयः' इत्यादिकं पठिष्यते । एवमपि पुनारग्रहणं कर्त्तव्यम्; रुणा विच्छिन्नत्वात् ? एवमपि यथान्यासे सति त्रीणि ग्रहणानि---द्वे विसर्जनीयग्रहणे, तृतीयं सग्रहणम्; अन्यथान्यासे तु द्वे सग्रहणे रुग्रहणं च । तदेवं लघीयसा न्यासेन सिद्धे विसर्जनीयविधानसामर्थ्यान्न सर्वत्र सत्वं भविष्यति ।
एवमपि कुत एतत्---खरि भवति, न पुनरवखान इति ? ज्ञापकात्, यदयं शर्परे खरि विसर्जनीयं विधत्ते, तज्ज्ञापवति---खरि तावदस्ति सत्वमिति । विपर्यये हि पुरषः त्सरुक इत्यादौ सत्वाभावादस्त्येव विसर्जनीय इति तद्विधानमनर्थकं स्यात् । नैतदस्ति ज्ञापकम्; अस्त्येतस्य ववने प्रयोजनम्, किम् ? वासः क्षौमम्, अद्भिः प्सातमित्यादौ जिह्वामूलयोपध्मानीवौ मा भूतामिति ? नैतदस्ति; यद्येतावत्प्रयोजनं स्यात् `कुत्वोः ़कःपौ वा शरि' इत्येव ब्रूयात् । तदेवं विधानसामर्थ्यात्खर्येवायं विधिः । अनेन चैवाभिप्रायेण `खरीत्यनुवर्त्तते' इत्युक्तम् ।।
शपरे विसर्जनीयः ।। 8.3.35 ।।
शर्परो यस्मादिति बहुव्रीहिः, परग्रहणेऽक्रियमाणे शरएव केवलस्य निमित्तता विज्ञायेत, न खरीत्यनुवृत्तेः, `वा शरि' इत्यभिधानाच्च । विपर्ययस्तर्हि विज्ञायेत---खर्परे शरीति, नित्यः स्फोटः, पुरुषः स्थातेति । तस्मात्परग्रहणम् ।
अथ किमर्थण्, `विसर्जनीयः' इत्युच्यते, न `न' इत्येवोच्येत, सत्वे हि प्रतिषिद्धे विसर्जनीयः स्वेनैव रूपेणावस्थास्यते ? अथ आह---विसर्जनीयस्येति । सत्यम्; पुरुषः त्सरुक इत्यादौ सत्वनिषेधेनापि सिद्धम्, यत्र तु कुपू शर्परौ---वासः क्षौमम्, अद्धिः प्सातमिति, तस्य विसर्जनीयस्य यो विकारो जिह्वामूलीयादिः स एव स्यात् । विसर्जनीयग्रहणे तु सति विसर्जनीय एव भवति । जिह्वामूलीयोपध्मानीयावपि न भवत इति । केवलं सकार एवेत्यपि शब्दार्थः ।।
वा शरि ।। 8.3.36 ।।
वृक्षा स्थातार इति । लोपाभावपक्षे विसर्जनीयः, सत्वं वा ।।
कुप्वोः ़कःपौ च ।। 8.3.37 ।।
विसर्जनीयश्चेति । अनेन चकारो विसर्जनीयानुकर्षणार्थ इति दर्शयति । अथ वाग्रहणमेवानुवर्त्य जिह्वामूलीयोपध्मानीयौ कस्मान्न विल्प्येते, एवं हि चकारो न कर्त्तव्यो भवति ? नैवं शक्यम्; एवं ह्याभ्यामुक्ते `विसर्जनीयस्य सः' इति सत्वमेव स्यात् । तस्माच्चकारेणैवानुकृष्य विसर्जनीयो विधातव्यः, वाग्रहणं च नानुवर्त्यम् । तदनुवृत्तौ हि त्रिभिरपि मुख्ये पक्षे सत्वं प्रसज्येत ।
सूत्रे ककारपकारसहितयोर्जिह्वामूलीयोपध्मानीययोरुच्चारणात्तथाभूतावेव विसर्जनीयस्यादेशाविति शङ्कमानं प्रत्याह---कपावुच्चारणार्थाविति । ताभ्यां विना तयोरुच्चारयितुमशक्यत्वादिति भावः । कीदृशौ तर्ह्यादेशौ ? इत्याह---जिह्वामूलीयेति । इह विसर्जनीयस्य स्थाने आदेशत्रयं विधीयते, ततश्च शर्परयोरेव

कुप्वोः प्राप्नोति---वासः क्षौमम्, अद्भिः प्सातमिति, अत्र हि `शर्परे विसर्जनीयः' इति विसर्जनीयोऽस्ति, न च तस्य वैयर्थ्यम्; यत्र कुपुभ्यामन्यः शर्परः खरस्तिपुरुषः त्सरुक इत्यादौ, तत्र सावकाशत्वात् । अशर्परयोस्तु कुप्वोर्न स्यात्, न हि तस्य विसर्जनीयोऽस्ति, `विसर्जनीयस्य सः' इति सत्वेन निर्वर्तितत्वात् । किं पुनः कारणं सत्वमेव तावद्भवति ? तत्र कर्त्तव्ये तस्य विधेरसिद्धत्वात् । तस्मादत्र सकारः स्थानी निर्देष्टव्यः---यः `विसर्जनीयस्य सः' इति सः, तस्य स्थाने कुप्वोरादेशत्रयं भवतीति ।

एवं हि शर्परयोः कुप्वोः सकारापवादो विसर्जनीयो विधीयेत इति सकाराभावादादेशाप्रसङ्गः, केवलयोस्त्वादेशप्रसङ्गः, तस्मात्सस्येति वक्तव्यम्, यदाह वार्तिककारः---`सकारस्य कुप्वोर्विसर्जनीय---जिह्वामूलीयोपध्मानीयाः, विसर्जनीयादेशे हि शर्परयोरेवादेशप्रसङ्गः' इति ? अत्र परिहारामाह---विसर्जनीयस्य स इत्येतस्मिन्निति । अयमभिप्रायः---`विसर्जनीयस्य सः' इति सकारस्य स्थानी विसर्जनीय उपात्तः, स च द्विविधः सम्भवति---शर्परलक्षणः, खरवसानलक्षणश्च । तत्र शर्परलक्षणस्यासिद्धत्वादितरः सकारस्य स्थानी, स एव चेहानुवर्तते; ततश्च नाप्राप्ते सत्वे इदमारभ्यते; सर्वस्य विषयस्य तेन व्याप्तत्वात् । `शर्परे विसर्जनीयः' इत्येतत्तु शर्परयोः कुप्वोः प्राप्तम्, केवलयोस्त्वप्राप्तमिति न तं प्रत्यस्य बाधकलक्षणयोग इति । स्यादेतत्, मा भूदपवादत्वम्, परत्वात्तु शर्परयोरपि कुप्वोरयमेव विधिः प्राप्नोति ? तत्राह---पूर्वत्रासिद्धे इति ।

परिहारान्तरमाह---केचित्त्विति । `कुप्वोः' इत्येको योगः, अत्र `शर्परे विसर्जनीयः' इति वर्तते, शर्परयोः कुप्वोः विसर्जनीय एव भवति, न ःकःपाविति । किञ्च---पूर्वसूत्रे `नेति वक्तव्ये विसर्जनीयविधानं तद्विकारनिवृत्त्यर्थम्' इत्युक्तम् । तेन शपरयोः कुप्वोरस्य विधेरप्रसङ्ग एव ।।

सोऽपवादादौ ।। 8.3.38 ।।

`अपदादौ' इति कुप्वोरेतद्विशेषणम्, व्यत्ययेन त्वेकवचनम् । पूर्वस्यायमपवादः । पाशकल्पककाम्येष्विति । सम्भवप्रदर्शनमेतत्, न परिगणनम्; अन्यस्यासम्भवात् । प्रातः कल्पमिति । अधिकरणशक्तिप्रधानस्यापि प्रातः---शब्दस्य वृत्तिविषये शक्तिमद्वाचित्वादीषदसमाप्त्या योगः, यथा---दोषाभूतमहः, दिवाभूता रात्रिरित्यत्राभूततद्भावयोगः ।

रोः काम्ये नियमार्थमिति । एतदेव विवृणोति---रोरेवेति । गीः काम्यतीति । उत्तरसूत्रेण षत्वं न भवति । यदि पुनस्तत्रैवेदमुच्यते ? नैवं शक्यम् ; षत्वमात्रप्रतिषेधेऽप्यनेन सत्वं प्राप्नोति । उपघ्मानीयस्य चेति । अस्यैव विवरणम्---कवर्गेपरत इति । उब्जिरयमित्यादि । यथा पुनरयं दकारोपध एषितव्यः, तथा `हयरट्' इत्यत्रोक्तम् ।।

इणः षः ।। 8.3.39 ।।

पूर्वेण सत्वे प्राप्ते तदपवादः षत्वं विधीयते । अत्र केचिदाहुः---``योऽयम् `सोऽपदादौ' इति सकारः, स एवोत्तरत्र सर्वत्र कुप्वोः प्रकरणे विधीयते, अनेन तु तस्यैव सकारस्येण उत्तरस्य षत्वं विधीयते, न विसर्जनीयस्य, `अपदादौ' इति चात्र न सम्बध्यते" इति । स तर्हि सकारः स्थानी निर्देष्टव्यः ? नेत्याह; प्रकृतोऽनुवर्त्तते---`सोऽपदादौ' इति, तस्य `इणः' इति पञ्चम्या षष्ठी प्रकल्प्यते ।

एवमपि वक्ष्यमाणैर्योगैर्विहितस्य सकारस्य षत्वं न प्रापनोति, अस्मिन्कर्त्तव्ये तेषामसिद्वात्वात् ? नैष दोषः; अचार्यप्रवृत्तिर्ज्ञापयति---न योगे योगोऽसिद्धः, किं तर्हि ? प्रकरणे प्रकरणमसिद्धमिति; यदयम् `उपसर्गादसमासेऽपि' इत्यत्र `असमासेऽपि' ग्रहणं करोति । कथं कृत्वा ज्ञापकम् ? अन्तरेणाप्यसमासेपिग्रहणं विशेषानुपादानात्समासासमासयोर्णत्वं भविष्यति, न च समासे `पूर्वपदात्संज्ञायामगः' इति नियमाण्णत्वस्य निवृत्तिः, नियमे कर्त्तव्ये `उपसर्गात्' इत्यस्य णत्वस्यासिद्धत्वात् । पश्यति त्वाचार्यः---प्रकरणे प्रकरणमसिद्धमिति, ततः `असमासेपि' ग्रहणं करोति, तदा हि सह नियमेन सर्वमेव णत्वप्रकरणमेकमिति नियमे कर्तव्ये उपसर्गादिति णत्वस्य सिद्धत्वान्नियमेन व्यावृत्तिः स्यादिति कर्त्तव्यं समासेऽपिग्रहणम् । तदेवं सकारस्य षत्वं विधीयते, न विसर्जनीयस्य; उत्तरत्र च सत्वमेवानुवर्त्तते, न षत्वमिति ।

अयमपि पक्षो निर्दोष एव, किन्तु षष्ठीप्रकल्पनं ज्ञापकाश्रयणं चेति प्रतिपत्तिगौरवप्रसङ्गाद् वृत्तिकारेण नाश्रितः । कस्तर्हि तस्य पक्षः ? उत्तरत्र द्वयमप्यनुवर्त्तते---सकारः, षकारश्चेति । यद्येवम्, सर्वत्र द्वयमपि प्राप्नोति---अथ सकारो वानुवर्तते `इदुदुपधस्य च' इत्यादौ यत्रेणः परो विसर्जनीयस्तत्रापि सकार एव प्राप्नोति; अथ षकार एवानुवर्त्तते `नमस्पुरसोर्गत्योः' इत्यादौ यत्रानिणः परो निसर्जनीयस्तत्रापि षकार एव प्राप्नोति ? नैष दोषः; `इणः षः' इति समुदायस्य स्वरितत्वं प्रतिज्ञायते । यदाह---इणः ष इति वर्त्तत इति । ततः षत्वं तावदनिण्विषये न भविष्यति । एवमपि षत्वविषये सत्वमपि प्राप्नोति ? न; षकारेण तस्य बाधनात्, चकाराकरणाच्च । यदि परमनुवृत्तिसामर्थ्यात्तत्प्रसङ्गः ? तदपि न; उत्तरार्थमप्यनुवृत्तिसम्भवात् । तदिदमुक्तम्---य इणः परे विसर्जनीयस्तस्य षकार आदेशो भवत्यन्यस्य तु सकार इति । किमर्थं पुनरिदमारभ्यते, यावता सत्वमेवात्र प्रकरणे विधीयताम्, तस्य त्वादेशसकारत्वात् `इण्कोः' इति षत्वं भविष्यति ? सिध्यति; `अपदान्तस्य' इति तत्र वर्त्तते, पदान्तार्थोऽयमारभः ।।

नसस्पुरसोर्गत्योः ।। 8.3.40 ।।

अतः प्रभृति `अपदादौ' इति निवृत्तम् । नमः शब्दस्य तु `पुरोऽव्ययम्' इति ।

पुरः पश्येति । `पॄ पालनपूरणयोः', `भ्राजभास' इत्यादिना क्विप्, तदन्ताच्छस् । अस्य तदन्ततां दर्शयितुम्--पूः पुरावित्यनयोरुपन्यासः ।।

इदुदुपधस्य चाप्रत्ययस्य ।। 8.3.41 ।।

इदुतावुपधे यस्य स इदुदुपधः समुदायः, तस्य यो विसर्जनीय इति वैयधिकरण्येन सम्बन्धः । अप्रत्ययस्येत्येतदपि व्यधिकरणमेव ।

निर्दुर्बहिराविश्चतुष्प्रादुरिति । अन्येषां सम्भवतां प्रतिषेधस्य वक्ष्यमाणत्वान्नेदं परिगणनम्, किं तर्हि ? सम्भवप्रदर्शनम् । चतुष्कपालमिति । तद्धितार्थे द्विगुः,

`संस्कृतं भक्षाः' इत्यणः `द्विगोर्लुगनपत्ये' इति लुक् । चतुष्कण्टकमिति । बहुव्रीहिः ।
मातुः करोतीत्यादि । चोद्यम्---अत्र हि मातृ+अस् इति स्थिते `ऋत उत्' इत्युकारो भवन् `यो ह्युभयोः स्थाने' इति न्यायेन रपरो भवति, ततश्च `रात्सस्य' इति प्रत्ययसकारस्य लोपे कृते रेफस्य विसर्जनीयो भवति । परिहरति---करकादिष्विति । एकादेशनिमित्तादिति । कर्मधारयः, एकादेशरूपनिमित्तादित्यर्थः, एकादेशशास्त्रं वा निमित्तं यस्योकारस्य तस्मादित्यर्थः ।
पुम्मुहुसोरिति । अव्युत्पन्नावेताविति प्रतिषेध उच्यते । तत्र पुंसः प्रतिषेधेन नार्थः । षत्वं कस्मान्न भवति ? विसर्जनीयाभावात्, उक्तं हि `सम्पुंकानां सत्वम्' इति, तत्र सत्वस्यासिद्धत्वाभावाद्विसर्जनीयाभावः । तच्चावश्यं सत्वं वक्तव्यम्, रुविधौ विसर्जनीयस्य षत्यपतिषेधेऽपि `कुप्वोः ःकःपौ च' इत्येव विधिः प्राप्नोति---मुहुः कामो यस्याः सा मुहुः कामा, तत्र `कुप्वोः ःकःपौ च इत्येष एव विधिर्भवति । क्वचित्तु मुहुस्कामेति सत्वं पठ्यते सोऽपपाठः, न ह्यत्र सत्वसम्भवः; सूत्रवार्त्तिकयोरनिबद्धत्वात् । नैष्कुल्यमिति । ब्राह्मणआदित्वात् ष्यञ् । नि3ष्कुलं दु3ष्कुलमिति । `गुरोरनृतः' इत्यादिना प्लुतः । बहिरङ्गलक्षणयोरिति । बहिर्भूततद्धितापेक्षत्वाद्वद्विर्बहिरङ्गा, प्लुतोऽपि दूराद्धूतादिकमर्थं वाक्यं चापेक्षत इति बहिरङ्गः ।।
तिरसोऽन्यतरस्याम् ।। 8.3.42 ।।
`तिरोऽन्तर्धौ' इति तिरः शब्दस्य गतिसंज्ञा ।
तिरः कृत्वेति । अत्रान्तर्धेरविवक्षितत्वादगतित्वम् ।।
द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ।। 8.3.43 ।।
उभयत्रविभाषेयम्, `चतुर्' इत्यस्याप्रत्ययविसर्जनीयत्वाद् `इदुदुपधस्य च' इति प्राप्ते, इतरयोरप्राप्ते । `इसुसोः सामर्थ्ये' इत्यनेन त्वत्र सिद्धिर्न शङ्कनीया; इसः प्रत्ययस्य तत्र ग्रहणात् ।
कृत्वोर्थ इति किमिति । सुजन्ताः कृत्वोऽर्थं न व्यभिचरन्तीति प्रश्नः । चतुः---शब्दस्य सुजन्तत्वे प्रमाणं नास्तीत्युत्तरम् । यदि तु साहचर्यं व्यस्थापकम्, तदा तदर्थमपि कृत्वोऽर्थग्रहणं न कर्त्तव्यम्, क्रियते च ? तज्ज्ञापकार्थम्, एतज्ज्ञापयति---न सर्वत्र साहचर्यं व्यवस्थापकमिति । किं सिद्धं भवति ? `दीधीवेवीटाम्' इत्यत्र धातुसाहचर्येणाप्यागमस्येटो ग्रहणं भवति ।
द्विस्त्रिश्चतुरिति किम् ? पञ्चकृत्वः करोतीत्यत्र सत्वं मा भूत् । नैतदस्ति प्रयोजनमित्याह--इदुदुपधस्येत्यस्यानुवृत्तौ सत्यामित्यादि । कृत्वोऽर्थो विषयो यस्यतत्तथोक्तम् । कृत्वोर्थे यत्पदं वर्तते तस्य यो विसर्जनीयः---इत्येवं विशेष्यमाणं इत्यर्थः । यदि तु कृत्वोऽर्थग्रहणेन विसर्जनीयो विशेष्येत, तदा चतुरो न स्यात् । एतच्च श्लोकेषु व्यक्तीकरिष्यति ।
एवं श्लोकवार्त्तिककारमतेन द्विस्त्रिश्चतुर्ग्रहणं प्रत्याख्यातम् । तानेव श्लोकानुदाहरति---कृत्वसुजर्थे इति । कस्माद्धेतोः कृत्वसुजर्थे षत्वं व्रवीति, कृत्वोऽर्थग्रहणस्य किं प्रयोजनमित्यर्थः । अत्र च वक्ष्यमाणोऽभिप्रायः । प्रयोजनमाह---चतुष्कपाल इति । चोदयिता स्वाभिप्रायं प्रकाशयति---ननु सिद्धमिति । नन्वित्यभ्युपगमे । भवत्वनेन चतुष्कपालेऽपि विभाषा, तथापि नित्यं षत्वं सिद्धम् । कथम् ? अनेन मुक्ते `इदुदुपधस्य च' इति षत्वं भविष्यति । परिहरति---सिद्धे ह्ययमिति । सिद्धे प्राप्त इत्यर्थः । कथं प्राप्तिः ? इत्याह---लुप्ते इति । चतुरस् इति स्थिते `रात्सस्य' इति सुचो लोपः, रेफस्य विसर्जनीयः । सोऽयमप्रत्ययविसर्जनीयो भवति, यदि सुचो रुत्वं पूर्वस्य `रोरि' इति लोपः, रोर्विसर्जनीयो भवति, किन्तु `ढ्रलोपे' इति दीर्घः प्राप्नोति, रुत्वस्यासिद्धत्वात्, पूर्वमेव च लोपेन भवितव्यम्, एवं च कृत्वोऽर्थग्रहणं कर्तव्यमित्युक्तम् ।
इदानीं तदाश्रयणेन द्विस्त्रश्चतुर्ग्रहणं प्रत्याचष्टे---एवं सतीति । किं कार्यमिति । न किञ्चिदित्यर्थः । कथम् ? इत्याह---अन्यो हीति ।
इतरोऽसति द्विरादिग्रहणे दोषं दर्शयति---अक्रियमाण इति । विसर्जनीयो विशेष्येतेति । तस्य कार्यित्वेन प्राधान्यादिति भावः । सम्भावने लिङ् । विशेष्यतां विसर्जनीयः, को दोषः ? इत्यत आह---चतुर इति । तथेति । अनन्तरोक्ते विशेषणप्रकारे चतुरो न सिध्यतीति । कस्मात् ? इत्याह---रेफस्येति ।
क्रियमाणे तु द्विरादिग्रहणे नायं दोषः, इत्याह---तस्मिस्त्विति । इतरयोर्विशेषाभावाच्चतुरो विशेषणं युक्तमित्युक्तम् । प्रत्याख्यानवाद्याह---प्रकृतं पदमिति । यदुक्तम्---`कार्यित्वेन प्रधानभूतो विसर्जनीयः' इति, तन्न; सोऽपि प्रकृतस्य पदस्य षत्वमिति, स त्वर्थाद् `अलोऽन्त्यस्य' इति विसर्जनीयस्य भवतीत्येतावत् पदमेव तु कार्यि, तदिदमुक्तम्---तदन्तमिति । तस्यापीति । अपिशब्दोऽवधारणे, तस्यैवेत्यर्थः ।
एवं श्लोकवार्त्तिककारेण प्रत्यख्याते द्विरादिग्रहणे वृत्तिकारः स्थापयितुमाहएवमिति । पूर्वेणेति । `इदुदुपधस्य च' इत्यनेन । नित्यं षत्वं स्यादिति । अस्य तु द्विस्त्रिः शब्दाववकाशौ । न च परत्वादयमेव विधिः सिद्ध्यतीत्याह---पूर्वत्रासिद्ध इति ।
श्लोकवार्त्तिककारस्य त्वयमभिप्रायः---प्रकरणे प्रकरणमसिद्धम्, न योगे योगः, तेनास्यासिद्धत्वं भवतीति । अथ वा---`इदुदुपधस्य कृत्वोऽर्थवृत्तेर्नाप्राप्ते नित्ये षत्वस्यारम्भादपवादत्वमित्यपवादत्वादेव, वचनप्रामाण्यादितिवा सिद्धत्वमिति ।
अथ `सुचः' इत्येव कस्मान्नोक्तम्, किमनेन महता प्रबन्धेन ? एवमुच्यमाने सुचि विसर्जनीयो विशेष्येत---सुचो यो विसर्जनीय इति, ततश्च चतुरो न स्यात् । एवं तर्हि सुजन्तस्येति वक्तव्यम्---सुजन्तस्य यो विसर्जनीय इति ? एवमपि `पदस्य' इत्यनुवृत्तेर्यत्र सुजन्तं पदं तत्रैव स्यात्---द्विष्करोतीति, इह तु न स्यात्---परमद्विष्करोतीति । यत्पदं तन्न सुजन्तम्, तस्मात्सुचोऽविहितत्वात् । यच्च सुजन्तं द्विरिति न तत्पदम्;`उत्तरपदत्वे चापदादिविधौ' इति पदसंज्ञायाः प्रतिषेधात् ।
इसुसोः सामर्थ्ये ।। 8.3.44 ।।

तिष्ठत्वित्यादि । अत्रसपरिरित्यस्य तिष्ठत्वित्यनेन सम्बन्धः, `पिब' इत्यस्य तूदकमित्यनेनेति परस्परलसम्बन्धाभावादसामर्थ्यम् । सामर्थ्यमिह व्यपेक्षेति । अवधारणमत्र द्रष्टव्यम्--व्यपेक्षैवेति । प्रयोजनमुत्तरत्र वक्ष्यते । न पुनरेकार्थीभाव इति । अत्राप्यवधारणं द्रष्टव्यम्---एकार्थीभाव एव गृह्यत इति यत्तन्न व्यपेक्षैवेत्यर्थः । ननु च सामर्थ्यशब्दः सामान्यशब्दः, न च सामान्यशब्दः प्रकरणादिकमन्तरेण विशेषेऽवतिष्ठते, तत्कथं व्यपेक्षैव सामर्थ्यं गृह्यते, न पुनरेकार्थीभाव इत्युच्यते, उभयं तु कस्मान्न गृह्यते ? अत आह---उभयं वेति । नेत्येव; उभयमपि गृह्यत इति यत्तदपि नैवेत्यर्थः । अयं भावः---पदविधित्वादेव समर्थपरिभाषोपस्थानात् सामर्थ्ये लब्धे पुनः सामर्थ्यग्रहणादिष्टस्य व्यपेक्षालक्षणस्यैव सामर्थ्यस्य परिग्रहः; नेतरस्य, नाप्युभयोरिति ।।

नित्यं समासेऽनुत्तरपदस्थस्य ।। 8.3.45 ।।

परसमर्पिष्कुण्डिकेति । ननु च `अर्चिशुचिहुसृपिच्छादिच्छादिभ्य इसिः', `जनेरुसिः', `अतिपयजितनिधनिवपिभ्यो नित्' इत्येवं सर्पिः, यजुरित्यादय इसुसन्ता व्युत्पाद्यन्ते, ततश्च प्रत्ययग्रहणपरिभाषया सर्पिरादीनामेवेसुसन्तत्वम्, न परमसर्पिरादीनाम्, तत्कथमत्र प्रसङ्गः; अवश्यं चोणादीनामपि व्युत्पत्तिपक्ष एवाश्रयणीयः; अव्युत्पत्तिपक्षे ह्याश्रीयमाणे सर्पिषा, यजुषेत्यादौ षत्वं न सिद्ध्यति, अप्रत्ययसकारत्वात्; तस्मादनर्थकमनुत्तरपदग्रहणम् ? अत आह---एतदेवेत्यादि । ज्ञापनस्य प्रयोजनमाह--तेनेति । अथ पूर्वसूत्रेण समासेऽपि विकल्पः कस्मान्न भवति ? इत्यत आह--व्यपेक्षा चेति । केचित्तु ```नित्यं समासे' इत्येको योगः, `अनुतरपदस्थस्य' इति द्वितीय इति योगविभागेन समासे सर्वा षत्वप्राप्तिरुत्तरपदस्थस्य प्रतिषिध्यते" इति वदन्तः पूर्वत्र द्विविधेऽपि सामर्थ्ये समाश्रिते न दोष इत्याहुः ।।

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ।। 8.3.46 ।।

कृ, कमीति धातुग्रहणम् । इतरेषां स्वरूपग्रहणम् । अयस्कार इति । `कर्मण्यण्' । अयस्काम इति । `शीलिकामि' इत्यादिना णप्रत्ययः, अयस्कंसादयः षष्ठीसमासाः । कंसग्रहणमनर्थकम्, कमिग्रहणेनैव सिद्धत्वात्, कंसशब्दो हि `वृतृवदिहनिकमिभ्यः सः' इति कमेरेव व्युत्पाद्यते ? ज्ञापनार्थं तु, एतत् ज्ञापयति---उणादिषु नावश्यं व्युत्पत्तिकार्यं भवतीति । अयस्कुम्भीति । कुम्भशब्दाज्जातिलक्षणो ङीष् । अयस्पात्रीति । पात्रशब्दः ष्ट्रन्प्रत्ययान्तः, षित्त्वान्ङीष् । अयस्कुशेति । नात्रायोविकारो विवक्षितः, तेन `जानपद' इति सूत्रेण ङीष् न भवति । अयस्कर्णीति । अय इव कर्णौ यस्याः सा अयस्कर्णी, `नासिकोदर' इत्यादिना ङीष् । शुनस्कर्ण इत्ययं त्विति । सूत्रे त्वीकारान्तस्य कर्णीशब्दस्य निर्देशादत्राप्रसङ्गः ।

भाः करणमिति । षष्ठीसमासः । भास्कर इत्ययं त्विति । `दिवाविभा' इत्यादिना टप्रत्ययः । जयादित्यस्तु तस्मिन्सूत्रेऽवोचद्---`भास्करान्तेति प्रत्ययसन्नियोगेन सत्वं निपात्यते' इति । श्वः कारः, पुनः काम इति । धञन्तेन मयूरव्यंसकादित्वात् समासः ।।

अधः शिरसी पदे ।। 8.3.47 ।।

इत्येतयोरिति । सूत्रे तु षष्ठीस्थाने प्रथमा । पद इति स्वरूपस्य ग्रहणम् न सुप्तिङन्तस्य; तस्य समासाधिकारादेव सिद्धत्वात् । तदाहपदशब्दे परत इति ।

मयूरव्यंसकादित्वात्सामास इति । अधस्पदमित्यत्र तु षष्ठीसमासः ।।

कस्कादिषु च ।। 8.3.48 ।।

`कुप्वोः ःकःपौ च' इत्यस्यापवादः । यथायोगमिति । इणः परस्य षत्वम्, अन्यस्य सत्वमित्येष यथायोगार्थः । कस्क इति । स्वन्तस्य किमो वीप्सायां द्विर्वचनम् । कौतस्कुत इति । कुतः शब्दस्य पूर्ववद् द्विर्वचनम्, तस्मात् `तत आगतः' इत्यण्, `अव्ययानां भमात्रे टिलोपः' । भ्रातुष्पुत्र इति । `ऋतो विद्यायोनिसम्बन्धेभ्यः' इत्यलुक् । शुनस्कर्ण इति । `षष्ठ्या आक्रोशे' इत्यलुक् । पारायणेन दीव्यन्ति व्यवहरन्तीति पारायणिकाः । पारायणं द्विविधम्---धातुपारायणम्, नामपारायणमिति ।

भाष्ये वृत्तावित्यादिनाऽनन्तरोक्तमर्थं निराकरोति । अविहितलक्षण इत्यादिनाऽऽकृतिगणोऽयमिति दर्शयति । विसर्जनीयस्थानिकयोः सकारषकारयोः उपचार इति संज्ञा ।।

छन्दसि वाऽप्राम्रेडितयोः ।। 8.3.49 ।।

अयस्पात्रमिति । असमासोऽयम् । समासे हि`अतः कृकमि' इत्यादिना नित्यं सत्वं प्राप्नोति; अस्य विकल्पस्यासिद्धत्वात्, असमासे चास्य विकल्पस्य चरितार्थत्वात् । यदि वा `प्रकरणे प्रकरणमसिद्धम्' इति पक्षे समासेऽप्युदाहरणम्, किन्त्वनेन मुक्ते तेन नित्यं प्राप्नोति, तस्मादसमास एवायम् । समासे तु यदि विकल्पो दृश्यते, स छान्दसत्वेनोपपाद्यः । विश्वतस्पात्रमिति । अत्राव्ययत्वाद् `अतः कृकमि' इत्यस्याप्रसङ्गः । उरुणस्कार इति । अस्मदो नसादेशः, `नश्च धातुस्थोरुषुभ्यः' इति णत्वम् । कारशब्दो घञन्तः, अत्रासमासत्वादप्रसङ्गः ।

अग्निः प्रविद्वानिति । अत्र षत्वप्रसङ्गः, उभ्यक्रमे तु सकार आदेश इत्युपलक्षणम् । परुषः परुष इति । वीप्सायां द्विर्वचनम् । अङ्गमङ्गं परुष्परु, चतुष्पषा विशस्ते---इत्यादयस्तु कस्कादिषु द्रष्टव्याः । हरिकेशः पुरस्तादित्यादेरत्रोपयोगं न पश्यामः । कथमत्रैव सूत्रे वाग्रहणात् सत्वषत्वयोर्भावाभावौ प्रतिपादितौ ? किमत्र ? `सर्वे विधयश्छन्दसि विकल्प्यन्ते' इत्यनेन ।।

कः करत्करतिकृधिकृतेतेष्वनदितेः ।। 8.3.50 ।।

करिति । कृञो लुङ्, `मन्त्रे घस' इत्यादिना च्लेर्लुक्, तिपो हलङ्यादिलोपः, `बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः । करदिति । कृञ एव लुङ्, `कृमृदृहिभ्यश्छन्दसि' इति च्लेरङ् । करतीति । लट्, व्यत्ययेन शप् । कृधीति । कृञो लोट्, सेर्हिः, `बहुलं छन्दसि' इति शपो लुक्,

`श्रुश्रृणुपृकृवृभ्यश्छन्दसि' इति हेर्धिरादेशः । कृतमिति । कृञ एव क्तः । सकार आदेश इति । षत्वस्याप्युपलक्षणमेतत् । विश्वतस्करिति । अव्यत्वादसमासत्वाच्च `अतः कृकमि' इत्यस्याप्रसङ्गः । इतरेषु त्वसमासत्वादप्रसङ्गः । शन्न करत्, यथा नः श्रेयसः करदित्यादौ छान्दसत्वात्सत्वाभावः । तथा कृधीत्यत्र सकार-घकार-कशब्देषु परतस्तैत्तिरीयके सत्वं न भवति---तन्म आमनसः कृधि स्वाहा, उरुक्षयाय नः कृधि घृतमन्यासै, शं च नः कृधि क्रत्वे ।।

पञ्चम्याः परावध्यर्थे ।। 8.3.51 ।।

अध्यर्थ इति । परेरिदं विशेषणम् । हिमवतस्परि, हिमवत उपरीत्यर्थः । व्यत्ययेन षष्ठ्याः स्थाने पञ्चम्याः प्रयोगः ।
पर्योज उद्भतमिति । अत्र परिः सर्वतोभावे वर्त्तते ।।

पातौ च बहुलम् ।। 8.3.52 ।।

क्वचित् पठ्यते---पाताविति धातुनिर्देश इति । अन्ये तूदाहरणपर्यालोचनया लोडन्तानुकरणं मन्यते ।।

षष्ठ्याः पतिपुत्रपृष्ठपरापदपयस्पोषेषु । वाचस्पतिरिति । `तत्पुरुषे कृति बहुलम्' इत्यलुक् ।।

अपदान्तस्य मूर्धन्यः ।। 8.3.55 ।।

मूर्धन्यग्रहणमनर्थकम्, `ष' इत्येव सिद्धम् ? अत आह---ष इत्येव सिद्धे इति । `ष' इत्युच्यमाने `इणः षीध्वम्' इत्यत्रापि षत्वं प्रसज्येत, ढत्वं चेष्यते । अथात्रैव मूर्धन्यग्रहणं क्रियते, उत्तरेषु योगेषु पुनः षग्रहणं कर्त्तव्यम् । मूर्धन्यग्रहणे तु क्रेयमाणे न दोषो भवति ।।

सहेः साडः सः ।। 8.3.56 ।।

साड्रूपस्येति । साडिति रूपं प्राप्तस्येत्यर्थः । जलाषाडिति । `भजो ण्विः', `छन्दसि सहः', उपधावृद्धिः, ढत्वम्, जश्त्वचर्त्वे, `अन्येषामपि दृश्यते' इत्युपपदस्य दीर्घः, सकारस्यान्तरतमो मूर्धन्यः षकारः ।

सहेरिति किमिति । अन्यत्र साडशब्दस्यासम्भवं मन्यमानस्य प्रश्नः । सह डेनेति । अडः = वृश्चिरकलाङ्गलम्, तस्यापत्यं साडिरिति । साड इत्यत्र तु साड्शब्दस्यानर्थकत्वादप्रसङ्गं मत्वा तद्धितान्तः प्रत्युदाहृतः, तत्र हि यस्येतिलोपे कृते साडशब्दोऽर्थवान् भवति । न च यस्येतिलोपस्य स्थानिवत्त्वम्; `पूर्वत्रासिद्धे न स्थानिवत' इति वचनात् । एवमपि `षत्वतुकोरसिद्धः' इत्यकादेशस्यासिद्धत्वात् साड्शब्दस्याभावः । तस्मात्सह डेन वर्त्तत इति सड इति पाठः । यस्य नाम्नि डशब्दो वर्त्तते स सडः, यथा---मृड इति, तस्यापत्यं साडिः । नन्वत्रापि बहिर्भूततद्धितापेक्षत्वाद्बहिरङ्गा वृद्धिः, क्व तर्हि स्यात् ? जलाषाडिति । नन्वत्रापि बहिर्भूत-णव्यपेक्षया बहिरङ्गैव वृद्धिः ? अथ तत्र वचनाद्भवति, इहापि प्राप्नोति---तुरासाहमिति ? तुरासाहं पुरोधायेत्यादौ तु ण्विरेव दुर्लभः, प्रागेव षत्वम् ।

आकारस्य मा भूदिति । `अन्त्यस्य मा भूत्' इति तु नोक्तम्; डकारस्य डकारवचने प्रयोजनाभावात् । अथाप्यनन्तरतममूर्धन्यार्थं वचनं स्याद् ? एवमप्यपदान्तस्येत्यन्त्यस्य न भविष्यति । नन्वेवमपि `अलोऽन्त्यस्य' इत्यस्मिन्बाधिते सर्वादेशो मूर्धन्यः प्राप्नोति, तत्किमुच्यते---आकारस्य मा भूदिति ? उच्यते; `अनन्त्यविकारेऽन्त्यसदेशस्य' इत्याकरस्य मूर्धन्यः प्राप्नोति ।।

इण्कोः ।। 8.3.57 ।।

`इण्' इति परेण णकारेण प्रत्याहरः, `कु' इति कवर्गस्य ग्रहणम्, तयोः समाहारद्वन्द्वे एकवचनम् । नुमागमस्तु सत्यपि नपुंसकत्वे न कृतः, `अनित्यमागमशास्त्रम्' इति कृत्वा । वाक्ष्विति । `चोः कुः' इति कुत्वे कृते कवर्गात्परः सकारः । वर्गग्रहणम् `शासिवसिघसीनां च' इत्यत्र घकारस्यापि ग्रहणार्थम्---जक्षतुरिति; अन्यथा चर्त्वस्यासिद्धत्वान्न स्यात् । अथ वचनसामर्थ्यात् चर्त्वस्य सिद्धत्वमाश्रीयेत; चिन्त्यं वर्गग्रहणस्य प्रयोजनम् । दास्यतीति । ननु च `नाज्झलौ' इत्यत्रागृहीतसवर्णानामचां ग्रहणम्---इत्यसकृदुक्तम्, ततश्च यथा कुमारी शेते---इत्यत्रेकारशकारयोः सावर्ण्यमप्रतिषिद्धम्, ततश्च यथा कुमारी शेते---इत्यत्रेकारशकारयोः सावर्ण्यमप्रतिषिद्धम्, तथा आकारहकारयोरपि, ततः किम् ? हकारेणेणाकारस्य ग्रहणात् षत्वप्रसङ्गः ? नैष दोषः; हकारो विवृतः, आकारो विवृततरः । एवं हि पठन्ति---विवृतकरणाः स्वराः, तेभ्य एओ विवृततरौ, ताभ्यामैऔ, ताभ्यामप्याकारः संवृतोकार इति । एवं च कृत्वा---`इष्टकासु', `वयस्यासु'---इत्यादयो निर्देशा उपपद्यन्ते । असाविति । `अदस औ सुलोपश्च', `तदोः सः सौ' इत्यादेशसकारोऽयम्, न त्विण्कोः परः ।।

नुम्विसर्जनीयशर्व्यवायेऽपि ।। 8.3.58 ।।

`इण्कोः' इति पञ्चमीनिर्देशात् व्यवाये षत्वं न प्राप्नोतीत्ययमारम्भः । नुम्ग्रहणमनुस्वारोपलक्षणम्; नुमा व्यवायासम्भवात्, `नश्चापदान्तस्य झलि' इत्यनुस्वारस्य विधानात् । अनुस्वारग्रहणमेव तु न कृतम्, नुम्स्थानिकेनैवानुस्वारेण व्यवधाने यथा स्यात्, इह मा भूत्---पुंस्विति; पुम्स्शब्दात्सुपि `सयोगान्तस्य लोपः', मकारस्यानुस्वारः । सर्पींषीति । `नपुंसकस्य झलयः' इति नुम्, `सान्तमहतः संयोगस्य' इति दीर्घः । सर्पिः स्विति । `वा शरि' इति पक्षे विसर्जनीयः । सर्पिष्ष्विति । पक्षे सत्वम्, तेनैव व्यवाये षत्वम्, सकारस्य ष्टुत्वम् ।
सकारग्रहणे कर्त्तव्ये शरिति प्रत्याहारग्रहणं चिन्त्यप्रयोजनम् ।

इह यथा वृषलैर्न प्रवेष्टव्यमिति वृषलनिवृत्तिपरायां चोदनायां प्रत्येकं संहतानां च प्रवेशो न भवति, तथा नुमादीनां षत्वाप्रतिबन्धहेतुत्वपरायां चोदनायां प्रत्येकं समुदायेन च व्यवाये षत्वं प्राप्नोतीति तत्र सर्वव्यवायस्य क्वचिदसम्भवात्, क्वचित्प्रत्येकम्, क्वचिद् द्वाभ्यां व्यवाये षत्वप्रसङ्गः ? इत्यत आह---

नुमादिभिः प्रत्येकं व्यवाय इति । एवं मन्यते---व्यवायशब्दः प्रत्येकमभिसम्बध्यतेनुम्व्यवाये, विसर्जनीयव्यवाये, शर्व्यवाय इति । यथादर्शितमुपक्रमे, तत्र `इण्कोः' इति पञ्चमीनिर्देशेनानन्तर्ये षत्वप्रतिपादनादनेन च वाक्यत्रयेणैकैकव्यवाये षत्वाभ्यनुज्ञानात् `येन नाव्यवधानम्' इति न्यायेन अधिकव्यवाये षत्वाभाव इति । निंस्स इति । `णिसि चुम्बने', अदादिरनुदात्तेत् । निस्स्वेति । लोट्, `सवाभ्यां वामौ' ।।

आदेशप्रत्यययोः ।। 8.3.58 ।।

किमवयवयोगैषा षष्ठी---आदेशस्य यः सकारः, प्रत्ययस्य च यः सकार इति ? आहोस्वित्समानाधिकरणे---आदेशो यः सकारः, प्रत्ययो यः सकार इति ? तत्राद्ये पक्षे `सः' इत्यस्यानुवृत्तस्येह वचनविपरिणामो न कर्त्तव्यो भवति, कार्येण त्वादेशप्रत्यययोः साक्षात् श्रुतयोरसम्बन्धः; सकारविशेषणत्वात् । द्वितीये त्वादेशप्रत्यययोः सकारयोरिति द्विवचनं विपरिणम्यम् । कार्येण तु साक्षाच्छ्रुतयोः सम्बन्ध इति वचनदोषसाम्यान्न युक्तितः पक्षविशेषनिर्णयः । तत्रावयवषष्ठी चेद् द्विर्वचने दोषः---विसंबिसम्, मुसलंमुसलम् । तत्रावयवषष्ठी चेद् द्विर्वचने दोषः---विसंबिसम्, मुसलंमुसलम् । आष्टमिके हि द्विर्वचने स्थाने द्विर्वचनपक्षोऽपि स्थापितः, ततश्च `नित्यवीप्सयोः' इत्येकस्य विसमित्येतस्य स्थाने बिसंबिसमित्येतस्मिन्नादेशे कृते तस्यावयव सकारः इति षत्वप्रसङ्गः । अथ द्वितीयः पक्षः ? करिष्यति, हरिष्यतीत्यत्र न प्रापनोति; समुदायो ह्यत्र प्रत्ययः, न सकारमात्रम् । क्व तर्हि स्यात् ? यत्र सकारमात्रं प्रत्ययः---इन्द्रो मा वक्षत्, स देवान्यक्षत् ; वचियजिभ्यां लेट्, तिप्, `इतश्च लोपः' इत्यादिनेकारलोपः, `लेटोऽडाटौ' इत्यट्, `सिब्बहुलं लेटि' इति सिप्, वचेः कुत्वम्, यजेः षत्वकत्वे । अथापरौ द्वौ पक्षौ---आदेशस्य यः सकारः, प्रत्ययो यः सकार इति; विपर्ययो वा---आदेशो यः सकारः, प्रत्ययस्य यः सकार इति ? तत्राद्ये पक्षे तावेव दोषौ यौ पूर्वयोः पक्षयोः बिसबिसमित्यादौ प्रसङ्गः, करिष्यतीत्यादौ चाप्रसङ्ग इति । तस्मादन्त्यः पक्ष आश्रीयते, तदाह---आदेशप्रत्यययोरिति षष्ठी भेदेन सम्बध्यत इत्यादि ।

अत्र च ज्ञापकं यदयमुत्तरसूत्रे घसिग्रहणं करोति, तज्ज्ञापयति---आदेशे समानाधिकरणा षष्ठी, न व्यधिकरणेति; अन्यथा घसेरादेशत्वादेव तस्य सकारस्यानेनैव षत्वसिद्धेरनर्थकं तत्स्यात् । यच्च `सात्पदाद्योः' इति सातिप्रतिषेधं शास्ति, तज्ज्ञापयति---प्रत्ययेऽवयवषष्ठी, न समानाधिकरणेति; अन्यथा सातिसकारस्याप्रत्ययत्वात् षत्वस्य प्राप्त्यभावादनर्थकं तत्स्यात् । ननु चादेशस्येति षत्वापेक्षया स्थानषष्ठी, प्रत्ययस्येति सकारापेक्षयावयवषष्ठीति सहविवक्षाभावाद् द्वन्द्वनुपपत्तिः ? नैष दोषः; पूर्वोक्तात् ज्ञापकद्वयात् सहविवक्षाया अभावेऽपि द्वन्द्वो भविष्यति ।

यदि प्रत्ययावयवस्य षत्वमुच्यते, इन्द्रो मा वक्षत्, स देवान्यक्षदित्यत्र षत्वं न प्राप्नोति, प्रत्यय एवात्र सकारो न तु प्रत्ययस्यावयवः ? अत आह---इन्द्रो मा वक्षदित्यादि । इह `अशेः सरन्'---अक्षरमित्यत्र षत्वं भवति, तस्यैव तु `कृधूमादिभ्यः कित्' इति विहितस्य षत्वं न भवति, कृसरम्, धूसरम् । तथा `वृतृवदि' इत्यादिना विहितस्य कक्षमित्यत्र भवति, वर्समित्यत्र न भवति; बहुलवचनात् प्रत्ययसंज्ञाया अभावात् ।।

शासिवसिघसीसां च ।। 8.3.60 ।।

अन्विशिषदिति । `सर्तिशास्ति' इत्यादिना च्लेरङ्, `शास इदङ्हलोः' इतीत्वम् । उषित इति । यजादित्वात् सम्प्रसारणम्, `वसतिक्षुधोरिट्' । जक्षतुः, जक्षुरिति । `लिट्यन्यतरस्याम्' इत्यदेर्घस्लादेशः, `गमहन' इत्युपधालोपः । अक्षन्निति । अदेर्लुङ् `लुङ्सनोर्घसॢ', `मन्त्रे घस' `इत्यादिना च्लेर्लुक् । तत्र युक्तं शासिवस्योरनादेशार्थं वचनमिति, घसेस्त्वयुक्तमादेशत्वात् ? इत्यत आह---घसिर्यद्यप्यादेश इति । आदेश इति । आदेशो यः सकारस्तत्र स्थितमिति भावः । यस्त्वनादेशो घसिस्तस्येह ग्रहणं न भवति; विरलप्रयोगत्वात् ।।

स्तौतिण्योरेव षण्यभ्यासात् ।। 8.3.61 ।।

षत्वभूत् इति । षत्वं प्राप्ते, कृतषत्व इत्यर्थः । आदेशसकारस्येति । प्रत्ययसकारस्त्वसम्भवान्न सम्बध्यते । सुष्वापयिषतीति । `द्युतिस्वाप्योः' इत्यभ्यासस्य सम्प्रसारणम् । सिसिक्षतीति । `सिचि क्षरणे' । सुसूषत इति । `षूङ् प्राणिप्रसवे' । परस्मैपदपाठे तु `षू प्रेरणे'---इत्यस्य रूपम् ।

यदि सिद्धे सत्यारम्भो नियमार्थः, एवकारस्तहि किमर्थः ? तत्राह---एवकारकरणमिति । अथ विपरीतेऽवधारणे को दोषः ? इत्यत आह---स्तौतिण्योः षण्येवेति । इह च स्यादेवेति । षण्येवेत्यनेन ह्यवधारणेन प्रत्ययान्तरे स्तौतिण्योः षत्वं व्यवच्छिन्नम्, न तु धात्वन्तरस्य षणि, ततश्चाभिहितदोषद्वयप्रसङ्गः ।

सिषेचेति । षणीत्यनुच्यमाने प्रत्ययमात्रे नियमः स्याद्---अभ्यासात्परस्य यदि षत्वं भवति स्तौतिण्योरेवेति, ततश्च सिषेचेत्यादौ न स्यात् ।

को विनतेऽनुरोध इति । विनतमिति पत्वणत्वयोः प्रातिशाख्येषु प्रसिद्धिः---एकवर्णमनोकारं विनते सुस्मेति, नः पर इति यथा । अनुरुध्यते आनुकूल्येन प्राप्यत इत्यनुरोधः=प्रयोजनम् । कृतषत्वस्य निर्देशे किं प्रयोजनमित्यर्थः । सुषुप्सतीति । `रुदविद' इत्यादिना सनः कित्त्वम्, `वचिस्वपि' इत्यादिना सम्प्रसारणम् । सनीत्युच्यमाने सन्मात्रे नियमः स्यात्, ततश्च यथा---षत्वभूते सनिधात्वन्तरस्य षत्वं न भवति, एवमिहाषत्वभूतेऽपि न स्यात् ।

कः सानुबन्धेऽनुरोध इति । नकारानुबन्धवतो ग्रहणे किं प्रयोजनमित्यर्थः । णत्वस्य तु प्रयोजनं न पृच्छति; तस्य लक्षणप्राप्तत्वात् । सुषुपिष इन्द्रमिति । स्वपेर्लिट्, छान्दसत्वाद् `व्यत्ययो बहुलम्' इति थास्, `थासः सेः', `असंयोगाल्लिट् कित्' इति लिटः कित्त्वात् पूर्ववत्सम्प्रसारणम्, द्विर्वचनम्, क्रादिनियमादिट्, इन्द्रशब्दे परतो यादेशः, `लोपः शाकल्यस्य' इति यलोपः । अत्र नियमाभावादभ्यासात् परस्य षत्वं भवत्येव, `ष' इत्युच्यमाने तु यावान् कश्चित् षशब्दस्तत्र सर्वत्र नियमः स्यात्, तस्मात्सानुबन्धकग्रहणम् ।

अभ्यासादिति किमिति । अभ्यासाद् या प्राप्तिस्तस्या नियमो यथा स्यादुपसर्गाद् या प्राप्तिस्तस्या नियमो मा भूत्; अभिषिषिक्षतीत्येतत्तावदप्रयोजनम्, कथम् ? असिद्धमुपसर्गात्पत्वम्, तस्यासिद्धत्वान्नियमो न भविष्यति । स्यादेतत्---यथा `अत एकहल्मध्ये' इत्यत्र लिटा आदेशो विशेष्यते, तथेह सनाभ्यासः, सनि

योऽभ्यासस्तस्मात् स्तौतिण्योरेवेति, तेन यङि योऽभ्यासस्तस्मात्षणि धात्वन्तरस्यापि षत्वं भवति, स्वपेर्यङ्, स्वपिस्यमिव्येञां यङि' इति सम्प्रसारणम्, सोषुप्यतेः सन्, इट्, `अतो लोपः', `यस्य हलः', सोषुपिषते---तदेतद्भवति प्रयोजनमिति ? तन्न; अन्तरङ्गमत्र षत्वम्, बहिरङ्गो नियमः; तस्मादनर्थकमभ्यासग्रहणमिति प्रश्नः । परिहरति---प्रतिषिषतीति । इणो बोधनार्थत्वाद् गम्यादेशाभावोऽजादेरिति सशब्दस्य द्विर्वचनम्, `सन्यतः' इतीत्वम् । तत्राभ्यासाश्रये प्रत्ययस्य षत्वे कृतेऽस्य नियमस्याभावाद् धात्वाश्रयं षत्वमभ्यासस्य प्रवर्त्तते । ननु षणीति परसप्तमी, ततश्च षणि परे स्तौतिण्योरेवेति षत्वनियमः क्रियमाणस्तुल्यजातीयस्य षण्वस्य सिसिक्षतीत्यादेः षत्वं निवर्तयति । प्रतीषिषतीत्यत्र तु सनि एव द्विर्वचनमिति षण्परत्वाभावादयं नियमो न प्रवतिष्यते । `सन्यतः' इतीत्वमपि तर्हि न प्रापनोति, समुदायस्य सन्रूपत्वात्तस्य च सन्परत्वाभावात् । तस्मात्सन्प्रदेशेषु सत्सप्तमी विज्ञेया, ततश्च यथेत्त्वं प्रवर्त्तते तथा षत्वनियमोऽपि स्यादित्यभ्यासग्रहणम् ।।

स स्विदिस्वदिसहीनां च ।। 8.3.62 ।।

`स' इत्यविभक्तिको निर्देशः । ण्यन्तानामिति । षत्वप्राप्तौ सत्वमुच्यते, षत्वप्राप्तिश्च ण्यन्तानामिति सामर्थ्यलभ्यमेतत्, किमर्थं पुनः सकारस्य सकार उच्यते ? अत आह---सकारस्येति ।

नेति प्रतिषेध एव वक्तव्ये सकारवचनं लाघवे विशेषाभावात् ।।

प्राक्सितादड्व्यवायेऽपि ।। 8.3.63 ।।

`इण्कोः' इति पञ्चमीनिर्देशाद्व्यवाये न प्राप्नोतीति वचनम् । अडित्यागमस्य ग्रहणम्, न प्रत्याहारस्य । एतच्च `हयवरट्' इत्यत्रोपपादितम् । प्राक् सितसंशब्दनादिति । `परिनिविभ्यः सेवसित' इत्यतः । अपिग्रहणं किम् ? अव्यवधानेऽपि यथा स्यात्, अन्यथा विशेषवचनाद्व्यवाय एव स्यात् । अभ्यषुणोदिति । `षुञ् अभिषवे', लङ्, `स्वादिभ्यः श्नुः', अडागमः, पागेव यणादेशात् षत्वम्; कृते वा यणि यकारमेवेणमाश्रित्य षत्वम् ।।

स्थादिष्वभ्यासेन चाभ्यासस्य ।। 8.3.64 ।।

द्वे एते वाक्ये---स्थादिष्वभ्यासेन व्यवाये त्वं भवति; अभ्यासस्य च षत्वं भवति तेष्वेव स्थादिष्विति । तत्राद्यं विध्यर्थम्, द्वितीयं नियमार्थम् । अषोपदेशार्थमिति । षोपदेशे तु परितिष्ठासतीत्यादौ सामान्यलक्षणेनैव सिद्धम् । अभिषिषेणयिषतीति । सेनयाऽभियातुमिच्छतीति विगृह्य `सत्यापपाश' इत्यादिना णिच्, टिलोपः, ततः सन्, द्विर्वचनम्, ह्रस्वः, एच `इग्घ्रस्वादेशे' अव्युत्पन्नः सेनाशब्दः । यद्वा सहेनेन वत्तत इति सेना, `सहस्य सः संज्ञायाम्' इति सादेशः । यदा तु सिनोतेर्नप्रत्यये सेनेति व्युत्पाद्यते, तदास्त्येवा भिः षोषदेशत्वमेति । अभितष्ठाविति । आदेशसकारस्याप्यस्य षत्वं न सिद्ध्यति; इणअकोरभावात् । अभिषिषिक्षतीति । यद्यप्ययमादेशसकार इणश्च परः, तथाप्यभ्यासमपेक्ष षत्वं न सिद्ध्यति; स्तौतिण्योरेव षणीति नियमात् । अतः षणि यत्प्रतिषिद्धं षत्वं नियमेन व्यावर्तितं तदप्युपसर्गमाश्रित्य भवति ।

अथाभ्यासस्येति किमर्थम्, यावताभ्यासेनेत्यत्र क्रियापेक्षायां प्रकरणाद्व्यवाय इति सम्बध्यते, तच्चापिशब्दसन्निहितमेव प्रकृतमिति अव्यवायेऽपि षत्वं भविष्यति पूर्वसूत्रवत्, नार्थः `अभ्यासस्य' इत्यनेन ? अत आह---अभ्यासस्येति वचनं नियमार्थमिति । नियमस्य स्वरूपं दर्शयति---स्थादिष्वेवेति । विपरीतस्तु नियमो न भवति---स्थादिष्वभ्यासस्यैवेति । यदि स्यात्, अभ्यासेन व्यवाये षत्वविधानमनुपपन्नं स्यात् । अभिसुसूषतीति । `षू प्रेरणे', सन्, `सनि ग्रहगुहोश्च' इतीड्निषेधः । अत्र धातुसकारस्य स्तौतिण्योरेवेति नियमादषत्वम् । अभ्याससकारस्य त्वस्मान्नियमात् षत्वाभावः ।।

उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयस्धसिचसन्जस्वन्जाम् ।। 8.3.65 ।।

`षुञ्, अभिषवे' स्वादिः, `षु प्रेरणे' तुदादिः, `षो अन्तकर्मणि' द्विवादिः, `ओतः श्यनि' इति लोपः, `ष्टुञ् स्तुतौ' अदादिः, `उतो वृद्धिर्लुकि हलि', ष्टुभस्तम्भे', अनुदात्तेत् । एतेषां श्तिपा निर्देशो यङ्लुग्निवृत्त्यर्थः---`अभिसोषवातीत्यादि । `ष्ठा गतिनिवृत्तौ' । सेनयतिर्ण्यन्त । शपा निर्देशेन नार्थः; यङोऽसम्भवात् । `षिध गत्याम्', षिधू शास्त्रे माङ्गल्ये च' भौवादिकौ; तत्र `सेधतेर्गतौ' इति प्रतिषेधादन्यत्र षत्वम् । शपा निर्देशो यङ्लुग्निवृत्त्यर्थः, दैवादिकनिवृत्त्यर्थश्च `षिधू संराद्धौ' इति । `षिच क्षरणे' तुदादिर्मुचादिः, `षन्ज सङ्गे', `ष्वन्जपरिष्वङ्गे', अनुदात्तेत्, `दशंसञ्जस्वञ्जां शपि' इति नलोपः, सिवादीनां यङ्लुक्यपि भवति, अभिषेषिचीतीत्यादि । एतेषामड्व्यवाये, अभ्यासव्यवाये च यथासम्भवं षत्वम् । `इण्कोः' इति वर्त्तते, तत्र कवर्गस्यासम्भवादिण इति सम्बध्यते, तत्र यदीणा उपसर्गो विशेष्येत---इणन्तादुपसर्गादिति, इह न स्यात्---निष्षुणोति, दुष्षुणोतीति । तस्मादुपसर्गेणेण्विशेषणीयः---उपसर्गस्येण इति । ननूपसर्गादिति पञ्चमी, तत्कथमिण्विशेष्यते ? न ब्रूमो वैयधिकरण्येन विशेष्यत इति, किं तर्हि ? तात्स्थात्ताच्छब्द्यम्---उपसर्गादिणः, उपसर्गस्थादिण इति । तत्र शर्व्यवायस्याश्रितत्वान्निसोऽपि परस्य षत्वं भवति, तदिदमुक्तम्---उपसर्गस्थान्निमित्तादिति । दधि सिञ्चतीति । `सात्पदाद्योः' इति प्रतिषेध एवात्र भवति, तदपवादो ह्यम् ।

निः सेचक इति । निरयमुपसर्ग एव, तत्कथमिदं प्रत्युदाहरणम् ? अत आह---तायं सिचेरुपसर्ग इति । यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञे भवतः । अभिसावकीयतीति । सावकशब्दात् ण्वुलन्तात्क्यच्, तस्याभिना योगः । सुनोतिना योगे तु भवत्येव, अभिषावकमिच्छति अभिषावकीयतीति । ण्यन्तेऽपि तर्हि णिजर्थेन प्रैषादिनोपसर्गस्य योगो न प्रकृत्यर्थेनेति षत्वाप्रसङ्गः ? अत आह---अभिषावयतीत्यत्रेति । अभिषवविषया प्रयुक्तिः, न तु प्रयुक्तेरभिना योग इत्यर्थः । यदा तु प्रयुक्तेरभिना योगः, तदा नैव षत्वं भवति; किन्तु प्रकृत्यर्थेनासंसृष्टस्य प्रयुक्तिमात्रस्याभिना योगः कीदृश इति चिन्त्यम् ।

सदिरप्रतेः ।। 8.3.66 ।।

`सदिः' इति षष्ठ्यर्थे प्रथमा । निषसादेति । सदिस्वञ्ज्योः परस्य लिटीति प्रतिषेधादभ्यासात् परस्य न भवति ।।

स्तन्भेः ।। 8.3.67 ।।

स्तन्भिः सौत्रो धातुः । अभिष्टभ्नातीति । `स्तुन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च' इति श्नाप्रत्ययः, `अनिदिताम्' इति नलोपः ।

अप्रतेरित्येतदिह नानुवर्त्तत इति । यद्यनुवर्त्तेत, पूर्वसूत्र एव स्तम्भिग्रहणं कुर्यात्किं योगविभागेन ? अस्ति प्रयोजनम्, किम् ? `अवाच्चालम्बनाविदूर्ययोः' इति वक्ष्यति, तत्स्तम्भेर्यथा स्यात्, सदेर्मा भूत् ? नैतदस्ति; एकस्मिन्नपि योगे यस्यालम्बनाविदूर्ये स्तः, स एवानुवर्तिष्यते, स्तम्भेरेव च ते सम्भवतः ।।

अवाच्चालम्बनाविदूर्ययोः ।। 8.3.68 ।।

आलम्बनम्=आश्रयणम् । विदूरम्=विप्रकृष्टम्, तदन्यदविदूरम्, तस्य भाव आविदूर्यम्, अत ेव निपातनात् नञ्पूर्वादपि तत्पुरुषाद्भावप्रत्ययः । अवष्टभ्येति । यष्ट्यादिकमवलम्ब्येत्यर्थः । अवष्टब्धेति । आसन्नेत्यर्थः । अवस्तब्ध इति । अभ्यादित इत्यर्थः ।।

वेश्च स्वनो भोजने ।। 8.3.69 ।।

उदाहरणेषु स्वार्थपरित्यागेन भोजनमात्रे स्वनिर्वर्तत इति शङ्कामपनयति---अभ्यवहारक्रियाविशेष इति । तमेव विशेषं दर्शयति---यत्रेति । विष्वणतीति । सशब्दं भुङ्क्त इत्यर्थः ।।

परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ।। 8.3.70 ।।

सेवतिर्भूवादिष्वनुदात्तेत् । सित इति । `षिञ् बन्धने' क्तान्तः । सय इति । स एवैरजन्तः, `षिवु तन्तुसन्ताने' दिवादिः, `षह मर्षणे' अनुदात्तेत् ।

सुडिति । `सुट् कात्पूर्वः' इत्यस्य ग्रहणम् । स्तुस्वञ्जी उक्तार्थौ, तयोः `उपसर्गात्सुनोति' इत्यादिनैव सिद्धे पर्यादिपूर्वयोरुत्तरसूत्रेणाड्व्यवाये विकल्पार्थं वचनम् ।।

सिवादीनां वाऽड्व्यवायेऽपि ।। 8.3.71 ।।

सिवादयः प्रत्यासत्तेः पूर्वसूत्रे सन्निविष्टा गृह्यन्ते । अभ्यत्रविभाषेयम्, स्तुस्वञ्ज्योः `प्राक् सिताद्' इति प्राप्ते, इतरेषामप्राप्ते ।।

अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ।। 8.3.72 ।।

`स्यन्दू प्रस्रवणे' अनुदात्तेत् ।

अनुस्यन्देते मत्स्योदके इति । मत्स्यश्चोदक च मत्स्योदके । `जातिरप्राणिनाम्' इत्यनेन यत्र सर्वाण्यवयवपदान्यप्राणिवाचीति, तत्रैकवद्भावः; इह तु मत्स्यशब्दस्य प्राणिवाचित्वादेकवद्भावाभावः । अत्राप्राणिष्विति प्रसज्यप्रतिषेधः, तेन प्राण्यप्राणिसमुदायेऽपि प्राण्यस्तीति प्रतिषेधो भवति । अन्ये तु पर्युदासं मन्यमाना भवितव्यमेवात्र षत्वेनेत्याहुः ।

इह पर्यादिग्रहणं शक्यमकर्तुम्, एवं वक्ष्यामि---`अन्वभिभ्यां च' इति, चकारात् परिनिविभ्यश्चेति ।।

परेश्च ।। 8.3.74 ।।

पृथग्योगकरणसामर्थ्यादिति । अन्यथा `विपरिभ्यां स्कन्देरनिष्ठायाम्' इत्येव ब्रूयात् ।।

वेः स्कभ्नातेर्नित्यम् ।। 8.3.77 ।।

स्कम्भिः सौत्रो धातुः ।।

इणः षीध्वंलुङ्लिटां धोऽङ्गात् ।। 8.3.78 ।। इणन्तादङ्गादुत्तरेषामित्यादिना इणन्तमङ्गं षीध्वमादीनां विषेणम्, तेऽपि धकारस्येति दर्शयति । धकारस्य त्विणन्तमङ्गं विशेषणं न भवति---इणन्तादङ्गादुत्तरस्य धस्य स चेत् षीत्वमादीनामिति । तथा हि सति योषिढ्वमित्यादौ वचनसामर्थ्यात्षीशब्देन व्यवाय आश्रयणीयः स्यात् । अच्योढ्वमिति । `धि च' इति सलोपः ।

इण्ग्रहणं कवर्गनिवृत्त्यर्थमिति । प्रकृतं हीण्ग्रहणं कवर्गेण सम्बद्धमिति तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात् । पक्षीध्वमिति । `चो कुः' इति कुत्वे कृते ढत्वप्रसङ्गः । यक्षीध्वमिति । व्रश्चादिना षत्वे कृते `षढोः कः सि' इति कत्वम् ।

स्तुध्वे इति । टेरेत्वम् । अस्तुध्वमिति । लङ् । परिवेविषीध्वमिति । `विष्लृ व्याप्तौ' जुहोत्यादिः स्वरितेत्, `णिजां त्रयाणां गुणः श्लौ' इत्यभ्यासस्य गुणः, `लिङः सलोपोऽनन्त्यस्य' इति सीयुटः सकारलोपः । अत्र धातुषकारस्य, ईध्वशब्दस्य च यः समुदायस्तदात्मकः षीध्वंशब्दोऽस्ति, न त्वसावङ्गादुत्तरः । षकारान्तं ह्यत्राङ्गम्, न तु वेवीत्येतावत् ।

चोदयति---अर्थवद्ग्रहणादपीति । परिहरति---एतत्त्विति । एतदर्थवतो ग्रहणमत्र नाश्रितम् । किं कारणम् ? न किञ्चित्, नाश्रितमित्येव ।।

विभाषेटः ।। 8.3.79 ।।

अत्रेण्ग्रहणमिटो विशेषणम्, सोऽपि षीध्वमादीनाम्, तेऽपि धकारस्येति दर्शयन्नाह---इणः परस्मादिट इत्यादि । तत्र षीध्वमो लिटश्च श्रुतिकृतमानन्तर्यम्, शास्त्रकृतं तु न सम्भवति, इटस्तद्भक्तत्वात्तद्ग्रहणेन ग्रहणात् । अत एवानयोः प्राप्तविभाषेयम् ।

तथैव लुङ्यप्यलविढ्वमादौ धि चेति लुप्ते सति सिच्सकारे ।

इणन्तमङ्गं ध्वमि जातमातः पूर्वस्य नित्यस्य विधेः प्रसङ्गः ।।

एवं च धातावनिणन्त इष्टमैधिढ्वमित्यादिषु नित्यढत्वम् ।

यदि त्विणन्ताद्विहितस्य ढत्वं तथा न ते ढत्वमधिढ्वमि स्यात् ।।

तथा---लिहिदोग्धिनहां ढत्वघत्वधत्वेषु सत्स्वपि ।

इणन्ताद्विहितः षीध्वमिति ढत्वं प्रसज्यते ।।
तथेणो लुङि गादेशे विहिते ध्वमि कर्मणि ।
अगाध्वं यूयमेतेनेत्यत्र ढत्वं प्रसज्यते ।।
एवं `ब्रूवो वचिः' वक्षीध्वमिति ।
इष्यते सर्वमेवैतदिति चेन्नाप्तवागिह ।
तस्मात्पाप्तविभाषैव सर्वत्रेयमिति स्थितम् ।।

तथा च तैत्तिरीयके `तान् रुद्रा अब्रुवन्प्रयूयमजनिढ्वम्' इति ढत्वं प्रयुक्तम् । लविषीढ्वम्, लविषीध्वमिति । अन्ये त्विटो विभाषाया वक्ष्यमाणत्वाद् गोबलीवर्दन्यायेन तद्व्यतिरिक्तमिणन्तमङ्गमिह गृह्यत इति वदन्त एधिध्वमित्यादौ ढत्वं नेच्छन्ति, तेषामप्यधिढ्वमित्यत्र भवत्येव, नत्सीध्वमित्यादौ च न भवति ।

आसिषीध्वमिति । `आस उपवेशने' । कथं भवितव्यमिति । किमत्रानेन विकल्पेन भवितव्यम्, उत नेति प्रश्नार्थः । उपदिदीयध्व इति । `दीङ् क्षये', लिट्, ध्वमि क्रादिनियमादिट्, दीङो युडचि क्ङिति' इति युट् । युटा व्यवहितमिति । समुदायभक्ते हि युट् तमेव न व्यवदध्यात्, इटं तु व्यवदधात्येव । न भवितव्यं ढत्वेनेति । अनेन विकल्पेनेति भावः । पूर्वेण तु नित्यं प्राप्नोत्येव । अपरेषामिति । अस्मिन्पक्षे विकल्प एव भवति ।।

समासेऽङ्गलेः सङ्गः ।। 8.3.80 ।।

सङ्ग इति षष्ठ्याः स्थाने प्रथमा । एवमुत्तरेष्वपि योगेषु । सञ्जनं सङ्गः, भावे घञ्, अङ्गलीषु सङ्गो यस्याः साऽङ्गुलिषङ्गा ।
अङ्गलेः सङ्ग इति । अत्र `शर्व्यवाये' इत्यधिकारात्प्रसङ्गः । अन्ये तु `अङ्गुले सङ्गः' इति सम्बुध्यन्तमुदाहरन्ति ।।

भीरोः स्थानम् ।। 8.3.81 ।।

भीरो स्थानमिति । पूर्ववत्सम्बुद्ध्यन्तम्, षष्ठ्यन्तं वा ।
`समासेऽङ्गलिभीरुभ्यां सङ्गस्थाने' इत्युच्यमाने भ्यामित्यधिकं प्राप्नोति, तस्माद्योगविभागः ।।

अग्नेः स्तुत्स्तोमसोमाः ।। 8.3.82 ।।

अग्निष्टुदिति । सम्पदादित्वादधिकरणे क्विप्, यत्राग्निः स्तूयते सोऽग्निष्टुत्=क्रतुविशेषः, तत्रेदं भवति---अपि वा सर्वेषु देवताशब्देष्वग्निमेवाभिसन्नमेदिति ।
अग्निष्टोम इति । सोमयागस्य सप्तं संस्थाः; तत्राद्या संस्थोच्यते ।
अग्नेर्दीर्घादिति । देवताद्वन्द्वे षत्वमित्यर्थः; तत्रैव दीर्घस्य विधानात् ।
अग्निसोमौ माणवकाविति । अत्र माणवके संज्ञात्वेन विनियुक्तावग्निसोमषत्वाभावः । अग्निसोमौ तिष्ठत इति । आश्वलायनस्तु तत्रापि दीर्घषत्वे प्रायुङ्क्त---अग्नीषोमौ प्रणेष्यामीति ।।

ज्योतिरायुषः स्तोमः ।। 8.3.83 ।।

ज्योतिष्टोम इति । अत्र `शर्व्यवाये' इत्यधिकारात् षत्वम् । एवमायुष्टोमेऽपि ।।

मातुः पितुर्भ्यामन्यतरस्याम् ।। 8.3.85 ।।

एकदेशविकृतस्यानन्यत्वाद्, `विसर्जनीयशर्व्यवाये' इत्यधिकाराच्च पूर्वेण नित्ये प्राप्ते विकल्पः । मातुः ष्वसेति । `विभाषा स्वसृपत्योः' इति षष्ठ्या अलुक् ।
रेफान्तयोरिदं ग्रहणमिति । तच्चोत्तरपदे स्पष्टं पूर्वपदमपि तत्साहचर्याद्रेफान्तमेव । यद्येवम्, रेफस्य विसर्जनीये कृते तस्य `वा शरि' इति पक्षे सत्वे कृतेऽरेफान्तत्वान्न प्राप्नोति ? अत आह---एकदेशविकृतस्यानन्यत्वादिति । यदि तु सकारान्तयोर्ग्रहणं क्रियेत, विसर्जनीयान्तयोर्न स्यात् ।
विसर्जनीयान्तयोस्तु ग्रहणे भ्यामि परतो निर्देशो दुर्घटः स्यात् ।।

अभिनिसस्तनः शब्दसंज्ञायाम् ।। 8.3.86 ।।

अभिनिस् इत्येतस्मादिति । एतेन समुदायो निमित्तं न प्रत्येकमिति दर्शयति । अभिनिष्टानो विसर्जनीय इति । तथा चापस्तम्बः---`द्व्यक्षरं चतुरक्षरं वा नाम पूर्वमाख्यातोत्तरं दीर्घाभिनिष्ठान्तं घोषवदाद्यन्तरन्तरस्थम्' इति । द्व्यक्षरं चतुरक्षरं वा नाम कर्त्तव्यम्, कीदृशम् ? नामपूर्वम्, नाम प्रातिपदिकमक्रियावाचि तत्पूर्वपदम्, आख्यातोत्तरं क्रियावाच्युत्तरपदं दीर्घात्परो योऽभिनिष्टानो विसर्जनीयस्तदन्तं दीर्घान्तं विसर्जनीयान्तं चेत्यन्ये ।
गोषवान्वर्ण आदिर्यस्य तद्घोषवदादि, अन्तरन्तस्थं यरलवानामन्यतमं मध्ये यस्य तत्तथोक्तमेवंभूतं नाम कर्त्तव्यम् । द्रविणोदा वरिवोदा इत्याद्युदाहरणम् ।।

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ।। 8.3.87 ।।

य् च अच्च यचौ, तौ परौ यस्मात्स यच्परः । यचोरिति सप्तमीनिर्देशेनैव सिद्धे परग्रहणं चिन्त्यप्रयोजनम् । अभिषन्तीति । अदादित्वाच्छपो लुक्, `श्नसोरल्लोपः' ।
अनुसृतमिति । कथं पुनरत्र प्रसङ्गः, यावता सकारस्य प्रकृतत्वात्तमेव प्रत्युपसर्गत्वमाश्रयिष्यते; न चात्र सकारं प्रत्युपसर्गत्वमस्ति, तावन्मात्रस्याक्रियावचनत्वात्, तत्किमस्तिग्रहणेन; न च प्रादुः शब्दार्थमस्तिग्रहणं कृतम्, तस्य कृभ्वस्तिविषयत्वेन नियतत्वात्, तदेतदाशङ्कते तावत् ।
तथापीति । अनुसुशब्दः शुभ्रादिः, चतुष्पाद्वचन इत्यन्ये, ततो ठक्ठञोरन्यतरः, `ढे लोपोऽकद्र्वा' इत्युकारलोपे सकारमात्रस्य क्रियावाचित्वात् षत्वप्रसङ्गः ।।

सुविनिर्दुर्भ्यः सुपिसूतिसमाः ।। 8.3.88 ।।

सुपीत्यागन्तुक इकारः, न पुनरिका निर्देशः । तत्र `वचिस्वपि' इति लक्षणप्राप्तेन सम्प्रसारणेन धातोरेवायं निर्देशः स्यात्, ततश्च यत्रास्यैतद्रूपं तत्र षत्वमित्ययमर्थो न लभ्यते । तस्मादागन्तुकेनेकारेण प्रयोगस्थस्य कृतसम्प्रसारणस्य रूपस्येदमनुकरणम् । तदाह---सुपीति स्वपिः कृतसम्प्रसारणो गृह्यते इति । एतच्च `सुपि' इति निर्देशादेव लभ्यते, अन्यथा `वचिस्वपि' इतिवन्निर्दिशेत् ।

सूतीति स्वरूपग्रहणमिति । सूतेः क्तिन्नन्तस्य ग्रहणमित्यर्थः । समेत्यपि स्वरूपग्रहणमेव, न `षम ष्टम वैक्लव्ये' इति धातोर्ग्रहणम्; इक्श्तिपोरन्यतरस्याभावात् ।

अथ किमथ स्वपेः सुपि भूतस्य षत्वमुच्यते ? सुपेः षत्वं स्वपेर्मा भूत्, सुपेः षत्वमुच्यते, स्वपेर्मा भूदिति---विस्वप्नः, विस्वप्नमिति । विसुष्वापेति । अथ क्रियमाणेऽपि विकृतग्रहणे विसुष्वापेति केन न हेतुना केन विसुष्वापेत्यत्राभ्यासस्य षत्वं न भवति, `लिट्यभ्यासस्योभयेषाम्' इति सम्प्रसारणे कृते सुपिरूपस्य भावात् प्रागेव हलादिशेषात्, कृते वा तस्मिन्नेकदेशविकृतस्यानन्यत्वादस्ति प्रसङ्गः । हलादिशेषान्न सुपिः । द्विर्वचने कृते परत्वाद्धलादिः शेषेण यकारे निवृत्ते वकारस्य सम्प्रसारणम्, ततश्च सुपिरूपस्य कदाचिदप्यभावात् षत्वाभावः । इष्टं पूर्वं प्रसारणम् । उक्तं तत्रोभयेषां ग्रहणस्य प्रयोजनम्---परमपि हलादिशेषं बाधित्वा उभयेषां सम्प्रसारणमेव यथा स्यादिति, तेन सम्प्रसारणमेव पूर्वमिष्टम्, विशेषतश्चात्रेष्टम्, अन्यथा षकारवद्वकारोऽपि निवर्त्तेत । न ह्यत्र हेतुरस्ति---षकारो निवर्त्तते वकारोऽवतिष्ठत इति । एवं तर्हि स्थादिष्वेवाभ्यासस्येत्येतस्मादेव नियमादत्र षत्वं न भविष्यति ? स्थादीनां नियमो नात्र । किं कारणम् ? प्राक्सितादुत्तरः सुपि । `प्राक्सितात्' इति तत्र वर्त्तते, तेन प्राक्सिता ये धातवस्तेषां मध्ये स्थादिष्वेवाभ्यासस्य षत्वमिति नियमेन सुनोतिसुवतिस्यतिस्तोभतय एव निवर्त्यन्ते, सुपिस्त्वयं ततोऽवधेरुत्तरः । एवं तहि `अर्थवद्ग्रहणे नानर्थकस्य' इत्येषमेतस्य न भविष्यति, स्थाने हि द्विर्वचनेन समुदायोऽर्थवान्, अवयवौ त्वनर्थकौ, द्विष्प्रयोगेऽर्थप्रत्यायनस्यानावर्त्तनाद् द्वाभ्यामर्थः प्रत्याय्यत इत्येकस्यानर्थक्यमेव ? तदेतदाह---अनर्थके विषुषुपुः । यद्यनर्थकस्य ग्रहणं न भवति, विषुषुपुरिति न सिद्ध्यति ? नैषः दोषः; षुषिभूतो द्विरुच्यते । अयमभिप्रायः---पूर्वं धातुरुपसर्गेण युज्यते, तत्र द्विर्वचनात् परत्वात्सम्प्रसारणम्, परत्वादेव षत्वम्, कृतषत्वस्यैव तस्य द्विर्वचनमिति ।

ननु षत्वस्यासिद्धत्वात्पूर्वं द्विर्वचनमेव प्राप्नोति ? अत आह---पूर्वत्रासिद्धीयमद्विर्वचन इति ।।

निनदीभ्यां स्नातेः कौशले ।। 8.3.89 ।।

निष्णातः कटकरणे इति । तत्र कुशल इत्यर्थः । नदीष्ण इति । नदीस्नाने कुशल इत्यर्थः । कवयस्तु कुशलमात्रे प्रयुञ्जते । नदीस्नात इति । `सप्तमी' इति योगविभागात् समासः ।।

सूत्रं प्रतिष्णातम् ।। 8.3.90 ।।

`सूत्रं प्रतेः' इति वक्तव्ये निपातनाश्रयणं प्रत्ययान्तरे मा भूत् ।।

कापिष्ठलो गोत्रे ।। 8.3.91 ।।

गोत्रमिह प्रवराध्यायपठितं गृह्यते, तत्र च स्वसन्तानस्य व्यपदेशहेतुराद्यः पुरुषो गोत्रमित्युच्यते । पारिभाषिकग्रहणे तु कापिष्ठलिरित्यत्रैव स्याद्यत्र गोत्राभिधायी प्रत्ययः । यदि तु गोत्रं न षत्वस्य विषयेण निर्दिष्टम्, किं तर्हि ? दर्शनस्य गोत्रे यो दृष्टः कपिष्ठलशब्दः स साधुर्भवति, क्व ? यत्र तत्रेत्याश्रीयते, पारिभाषिकेऽपि गोत्रे न दोषः ।।

प्रष्ठोऽग्रगामिनि ।। 8.3.92 ।।

प्रस्थे हिमवत इति । `घञर्थे कविधानम्' इत्यधिकारणे कः ।।

वृक्षासनयोर्विष्टरः ।। 8.3.93 ।।

विस्तीर्यत इति विष्टरः, `प्रथमे वावशब्दे' इति घञि प्राप्ते । अस्मादेव निपातनादप् । रुढिशब्दत्वाद्वा पचाद्यचि व्युत्पाद्यः । उलपेन कृता टीका औलपी, सा वाक्यस्य विस्तरः, अशब्द इति प्रतिषेधादप् ।।

छन्दोनाम्नि च ।। 8.3.94 ।।

विष्टार इति निपात्यत इति । ननु च विष्टर इति प्रकृतम्, तत्कथं विष्टार इति निपात्यते ? अत आह---विपूर्वादिति ।

यदि त्विह छन्दोनाम्नि विष्टार इत्यात्वं क्रियेत, घञ्विधौ `छन्दोनाम्नि च' इति शक्यमकर्त्तुम्, इह वा `विष्टार' इत्युच्येत, तत्र वा `छन्दोनाम्नि' इति, को न्वत्र विशेषः, अपर आह---घञ्विवौ वाविति नानुवर्त्तते; तेन प्रस्तारपङ्क्तिः, संस्तारपङ्क्तिरित्यपि भवतीति ।।

गवियुधिभ्यां स्थिरः ।। 8.3.95 ।।

गविष्ठिरः, युधिष्ठिर इति । `संज्ञायाम्' इति सप्तमीसमासः । गोशब्दादहलन्तादपीति । यद्यप्यवादेशे कृते सम्प्रति हलन्तो भवति, तथापि उत्पत्तिवेलायामहलन्तत्वान्निपातनमाश्रितम् ।।

विकुशमिपरिभ्यः स्थलम् ।। 8.3.96 ।।

वि, कु, परि---इत्येतेषाम् `कुगतिप्रादयः' इति समासः, शमीशशब्दस्य तु षष्ठीसमासः, `ङ्यापोः संज्ञाछन्दसोर्बहुलम्' इति ह्रस्वत्वम् । सूत्रे ह्रस्वोच्चारणे ह्रस्वपक्ष एव षत्वं यथा स्यात् । तेन प्रयोगे बहुलवचनाद्यदा ह्रस्वत्वं न भवति, तदा षत्वमपि न भवति ।।

अम्बाम्बगोभूमिसव्यापद्वित्रिकुसेकुशङ्ववङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः ।। 8.3.97 ।।

स्थशब्दसकारस्येति । एतेन `स्थ' इति सूत्रे स्वरूपग्रहणं प्रथमान्तमिति दर्शयति । यदि तु `आतो धातोः' इति तिष्ठतेराकारलोपं कृत्वा षष्ठ्या निर्देशः स्यात्, तदा गोस्थानम्, भूमिस्थानमित्यादावपि षत्वं स्यादिति भावः । अम्बे तिष्ठत्यम्बष्ठः, `सुपि स्थः' इति कप्रत्ययः, `ङ्यापोः' इति ह्रस्वत्वम् । आम्बष्ठ इति । संज्ञेयं जनपदविशेषस्य । गोष्ठ इति । `घञर्थे कविधानम्' इत्यधिकरणे कप्रत्ययः । भूमिष्ठादौ `सुपि स्थः' । सव्येष्ठ इति । `हलदन्तात्सप्तम्याः' इत्यलुक् ।

यदि `स्थः' इति स्वरूपग्रहणम्, स्थास्थिन्स्थृणां न प्राप्नोतीतिदमाह---स्थास्थिन्निति । स्थाशब्दः क्विबन्तः । सव्येष्ठा इति । `ईत्वे वकारप्रतिषेधः' इति वचनात् प्रत्ययलक्षणेनेत्वं न भवति । `गमेरिनिः' इति वर्त्तमाने `परमे स्थः किच्च' इति किदिनिप्रत्ययः, परमेष्ठीशब्द इप्रत्ययान्तः बाहुलकादाकारलोपः । सव्ये तिष्ठति सव्येष्ठा सारथिः ।।

सुषामादिषु च ।। 8.3.98 ।।

क्वचित् `सात्पदाद्योः' इति प्रतिषेधे प्राप्ते क्वचिच्चादित एवाप्राप्ते षत्वे सुषामादिषु मूर्धन्यो विधीयते । दुष्षामेति । `विसर्जनीयशर्व्यवायेऽपि' इत्यधिकारादत्र षत्वम् । सुशब्दस्येत्यादि । अत्रैवमभिसम्बन्धः---सुदुस्शब्दयोस्तु क्रियाविशेषविषयत्वादनुपसर्गत्वे सति---निषेधः, दुः षेध इति पाठोऽयमिति । तत्र सुशब्दस्य `सुः पूजायाम्' इति कर्मप्रवचनीयसंज्ञा, सा चोपसर्गसंज्ञाया बाधिका; आकडाराधिकारात् । निर्दुरोरप्युपसर्गत्वाभावः, क्रियान्तरविषयत्वात् । गमिक्रियाविषयौ हि तौ---निर्गतः सेधो निः षेधः, दुर्गतः सेधो दुष्षेध इति । तेन `उपसर्गात्सुनोति' इत्यादिना नैतेषु षत्वप्राप्तिः । एवं तावत् `षिधू हिंसासंराद्ध्योः' इत्यस्य घञि सेध इति रूपमित्याश्रित्योक्तम् । यदा तु `षिध गत्याम्' इत्यस्य घञन्तस्य रूपम् ? तदाप्याह---सेघतेर्गताविति प्रतिषेधबाधनार्थं चेति । सुषन्धिरित्यादौ `उपसर्गे घोः किः', समः षत्वम् । उणादिष्वेताविति । `पृभिदिव्यधिधृषिभ्य' कुः' इति वर्तमाने `अपदुः सुपु स्थः' इति कुप्रत्ययः ।

गौरिषक्थ इति । `बहुव्रीहौ सक्थ्यक्ष्णोः' इति षच् । प्रतिष्णकेति । प्रतिपूर्वात्स्नातेः `आतश्चोपसर्गे' इत्यङ्, तदन्ताट्टाप्, ततोऽज्ञातादिषु कः `केऽणः' इति ह्रस्वत्वम्, `प्रत्ययस्थात्' इतीत्वम् । नौषेचनमिति । सिचेर्ल्युट् । दुन्दुभिषेवणमिति । सेवतेः, सीव्यतेर्वा ल्युट् ।

एतसंज्ञायामगादिति गणसूत्रम् । तद्व्याचष्टे---एकारपरस्येति । हरयः सेना अस्य हरिषेणः । परितः सेनास्य परिषेणः । पृथ्वी सेना यस्येति । `स्त्रियाः पुंवत्' इति पूर्वपदस्य पुंवद्भावः ।

नक्षत्राद्वेति । पूर्वेण नित्ये प्राप्ते विकल्पः । चकारोऽनुक्तसमुच्चयार्थः, आकृतिगणतामस्य सूचयति, तदाह---अविहितलक्षण इति ।।

ह्रस्वात्तादौ तद्धिते ।। 8.3.99 ।।

`अपदान्तस्य' इत्यधिकारादप्राप्तं षत्वं विधीयते, तरबादय एव तावत्तद्धिताः सम्भवन्तीत्याह---तरप्तमबिति । सर्पिष्टरमिति । सर्पिर्जातेः प्रकर्षाभावेऽपि सहचारिणो गुणस्य गन्धादेः प्रकर्षे प्रत्ययः । चतुष्टय इति । `जसः शी' । सर्पिष्ट इति । प्रतिप्रयोगे पञ्चम्यास्तसिः । आविष्ट्य इति । अव्ययात्त्यप्' इत्यत्राविः शब्दात् `छन्दसि' इति वचनात्त्यप् ।

सर्पिः सादिति । `विभाषा सातिः कार्त्स्न्ये' । ननु च `सात्पदाद्योः' इति प्रतिषेधादेवात्र षत्वं न भविष्यति ? इत्यत आह---प्रत्ययसकारस्येति ।

भिन्द्युस्तराम्, छन्द्युस्तरामिति । भिदिछिदिभ्यां लिङ्, झेर्जुसि यासुट्, `तिङश्च' इति तरप्, `किमेत्तिङव्ययघात्' इति आमुप्रत्ययः ।

आदिग्रहणं शक्यमकर्तुम्, `ति' इत्येव `यस्मिन्विधिस्तदादावल्ग्रहणे', पुंसः प्रतिषेधः, पुंस्त्वम्, पुंस्ता ।।

निसस्तपतावनासेवने ।। 8.3.100 ।।

निस्तप्तं रक्षः, निस्तप्ता अरातय इत्यत्रेति । एवमपि कस्याञ्चिच्छाखायां पाठमुपलभ्य परिहार उच्यते । तैत्तिरीयकास्तु षत्वमेव पठन्ति ।।

युष्मत्तत्ततक्षुः ष्वन्तः पादम् ।। 8.3.101 ।।

ततक्षुः ष्विति सकारान्तानुकरणात्परस्य सुष्सकारस्य `नुम्विसर्जनीयशर्व्यवायेऽपि' इति षत्वम् । तकारादिष्विति । एतद्युष्मद एव विशेषणम्; इतरयोरव्यभिचारात् । त्वं त्वा इत्यादि । एतेषामेव सम्भव इत्यर्थः ।

अग्निस्तत्पुनराहेति । अग्निरित्ययं पूर्वस्य पादस्यान्तः---यन्म आत्मनो मिन्दाभूदग्निरिति; तेनायं पादान्ते सकारः, न पादमध्ये ।।

स्तुतस्तोमयोश्छन्दसि ।। 8.3.103 ।।

पूर्वपदादित्येव सिद्ध इति । पूर्वपदमिति सामान्येन तत्राश्रीयते, न तु समासावयव एवेति वाक्येऽपि तेनैव सिद्धं षत्वमिति भावः । ततश्च स्तुतस्तोमग्रहणं प्रपञ्चार्थम् । छन्दोग्रहणं तूत्तरार्थं कर्त्तव्यमेव ।।

पूर्वपदात् ।। 8.3.104 ।।

असमासेऽपीति । एतच्च सवनादिषु `सवनेसवने' इत्यादीनां पाठादेवावसीयते ।।

सुञः ।। 8.3.105 ।।

अभीषुण इति । `इकः सुञि' इति दीर्घत्वम्, `नश्च धातुस्थोरुषुभ्यः' इति णत्वम् । क्वचित्तु वृत्तावेवैतत्पठ्यते ।।

सनोतेरनः ।। 8.3.106 ।।

गोषा इति । `जनसनखनक्रमगमो विट्', `विड्वनोरनुनासिकस्यात्' । क्वचित्त्विदमपि वृत्तावेवास्ति ।

गोसनिमिति । `छन्दसि वनसनरक्षिमथाम्' इतीन्प्रत्यः । सिसानयिषतीति । यद्यप्यण्यन्तः सूत्र उपात्तः, तथाप्यण्यन्तस्य प्रतिषेधवचने प्रयोजनं नास्तीति कृत्वा ण्यर्थो विज्ञास्यते । इह तु सिसनीयतीति स्तौतिण्योरेव षणीत्येतस्मान्नियमादप्रसङ्गः षत्वस्य । सिसनीरिति । क्विप्यतो लोपः, ततः सुः, हल्ङ्यादिलोपः, सनः सकारस्य षत्वं प्राप्नोति रुत्वं च, तत्र षत्वस्यासिद्धत्वाद्रुत्वम्, `र्वोरुपधाया दीर्घः' इति दीर्घत्वम् । अत्र सन् षत्वभूतो न भवतीति स्तौतिण्योरेवेत्यस्य नियमस्यायमविषय इति षत्वं प्रसक्तम्, अस्मान्नियमान्न भवति । एतस्मिंश्च प्रयोजने सति सामर्थ्याभावाद् ण्यन्तस्य नियमाभावात् सिषाणयिवतीति षत्वं भवत्येव ।।

सहेः पृतनर्ताभ्यां च ।। 8.3.107 ।।

योगविभागमिति । तत्र द्वितीयो योगः पूर्वयोगस्यासर्वविषयत्वज्ञापनार्थः । संहितायामेवेति । उभयत्रापि संहिताधिकारादयं विशेषो लभ्यते, `नहिवृतिवृष' इत्यादिना दीर्घत्वम् ।

न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ।। 8.3.108 ।।

विस्रंसिकाया इति । `रोगाख्यायाम्' इति ण्वुल् । विस्रब्धमिति । `सृम्भु विश्वासे' क्तः, `यस्य विभाषा' इतीट्प्रतिषेधः, `अनिदिताम्' इति नलोपः । विसृप इति । `सृपितृदोः कसुन्' ।

सवनेसवन इत्यादौ वीप्सायां द्विर्वचनम् । किंस इत्यत्र `अयोगवाहानामट्सुणत्वं शर्षु जश्भावषत्वे' इति वचनाच्छर्व्यवाये इति षत्वप्रसङ्गः । यथा तु शषूपदेशो न कर्तव्यस्तथा `हयवरट्' इत्यत्रोक्तम् ।

अश्वसनिग्रहणमनर्थकमनिणन्तत्वात् ? अत आह---अश्वसनिग्रहणमिति । ज्ञापनस्य प्रयोजनमाह---जलाषाहमिति ।।

सात्पदाद्योः ।। 8.3.109 ।।

आदिग्रहणं शक्यमकर्तुम्, पदादिति पञ्चमीनिर्द्देशः कर्त्तव्यः---पदात्परस्य सकारस्य नेति । इहापि तर्हि न प्राप्नोति--अग्निषु, वायुषु, त्वक्षु ? सातिप्रतिषेधो ज्ञापयति---स्वादौ यत्पदं न तस्मात्प्रतिषेध इति । तत्रायमप्यर्थः---दधिसिक्, मधुसिगित्यादौ प्रतिषेधः सिद्धो भवति, न ह्ययं सकारः पदादिः । गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति वचनात् पदात्परस्तु भवति, तत्रापि पूर्वपदस्य सुबन्तत्वात् । बहुचस्तु प्रतिषेधः । बहुवस्तु परस्य प्रतिषेधो वक्तव्यः---बहुसेक्ता, न ह्यत्र पदात्परः सकारः ।।

सिचो यङि ।। 8.3.110 ।।

परिसेसिच्यत इति । अत्राभ्याससकारस्य `उपसर्गात्सुनोति' इत्यादिना प्राप्तिः, धातुसकारस्य त्वादेशसकारत्वात् `स्थादिष्वभ्यासेन च' इत्येतस्माच्च । ननु चोपसर्गात्प्रतिषेधविषये षत्वमारभ्यते, तद्यथैव पदादिप्रतिषेधं बाधते, एवं `सिचो यङि' इत्येतमपि बाधेत ? अत आह---उपसर्गाद्या प्राप्तिरिति । येन नाप्राप्ते तस्य बाधनं भवति, नाप्राप्ते च पदादिलक्षणे प्रतिषेधे उपसर्गात् षत्वमारभ्यते, `सिचो यङि' इत्येतस्मिंस्तु प्राप्ते चाप्राप्ते च । अथ वा---`पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते न परान्' इति । अनेनैतदपि निरस्तम्---`स्थादिष्वभ्यासेन च' इत्यनेन यथाभिषिषिक्षतीत्यत्र स्तौतिण्योरेवेति नियमं बाधित्वा षत्वं भवति, तथैनमपि प्रतिषेधं बाधित्वा धातुसकारस्य प्रसङ्ग इति ।।

सेधतेर्गतौ ।। 8.3.111 ।।

`उपसर्गात्' इति प्राप्तिः प्रतिषिध्यते ।।

प्रतिस्तब्धनिस्तब्धौ च ।। 8.3.112 ।।

`स्तन्भेः' इति प्राप्तिः प्रति षिध्यते ।।

सोढः ।। 8.3.113 ।।

सोड्भूतो गृह्यते इति । निष्ठान्तस्य प्रथमया निर्देशशङ्कामपाकरोति । परिसोञेति । `परिनिविभ्यः' इति प्राप्ते प्रतिषेधः ।।

स्तम्भुसिवुसहां चङि ।। 8.3.114 ।।

अत्राद्यस्य `स्तम्भेः' इति प्राप्तिः, इतरयोस्तु `परिनिविभ्यः सेवसित' इति । अभ्यतस्तम्भदिति । `प्राक्सितादड्व्यवायेऽपि' इति `स्थादिष्वभ्यासेन च' इति प्राप्तिः । पर्यसीषिवदिति । अत्रापि `सिवादीनां वाड्व्यवायेऽपि' इति प्राप्तिः ।।

उपसर्गादिति वक्तव्यमिति । किमर्थम् ? इत्याह---उपसर्गाद्या प्राप्तिरिति ।।

सुनोतेः स्यसनोः ।। 8.3.115 ।।

अत्रेत्यादि । इतिकरणो हेतौ, यस्मात् स्तौतिण्योरेवेति नियमादभ्यासादप्राप्तिः, स्थादिष्वेवाभ्यासस्येति नियमादुपसर्गादप्यप्राप्तिः, तस्मादभिसुसूरित्युदाहरन्ति । अथ वा कथं षत्वप्रसङ्गः ? अत आह---अत्र हीति । यथा चात्र सन्ष--------------------इत्यत्रोक्तम् । अभ्यासात्प्राप्तिमिति । अभ्यासग्रहणमुपसर्गात्प्राप्तेरसम्भवादभ्यासेन व्यवहितान्न धातुसकारस्य प्रसङ्गः, नाप्यभ्याससकारस्य, स्थादिनियमेन व्यावतितत्वात् । एवं चात्राभिग्रहणमतन्त्रम्, सुसूरित्येवोदाहर्तव्यम् ।।

सदिस्वन्ज्योः परस्य लिटि ।। 8.3.116 ।।

लिटि द्विर्वचने कृते द्वौ सकारौ भवतः, तत्र सदेः `स्थादिष्वभ्यासेन च' इति वचनात् `सदिरप्रतेः' इति षत्वप्रसङ्गः, स्वञ्चेरपि `उपसर्गात्सुनोति' इत्यादिना । परिषस्वज इति । कथं पुनरत्र नलोपः, यावता संयोगान्तत्वान्नात्र लिटः कित्त्वमस्ति ? अत आह---स्वञ्जेरिति । एतच्च `इन्धिभवतिभ्यां च' इत्यत्र व्याख्यातम्, स्वञ्जिग्रहणञ्च वार्तिके दर्शनात्सूत्रे प्रक्षिप्तम्, यथाह---`सदो लिटि प्रतिषेधे स्वञ्चेरुपसंख्यानम्' इति ।।

निव्यभिभ्योऽड्व्यवाये वा छन्दसि ।। 8.3.117 ।।

प्रकरणे प्राप्तस्य सत्वमात्रस्य प्रतिषेधः । न्यष्टौदिति । `उतो वृद्धिर्लुकि हलि' इति वृद्धिः, अभ्यस्थाद्विषोः पृतना अरातीरित्यप्युदाहरणम् ।।

इति श्रीहरदत्तमिश्रविरिचितायां पदमञ्जर्यामष्टमस्याध्यायस्य तृतीयः पादः

8.4

काशिकावृत्तिः----6

अथ अष्टमाध्याये चतुर्थः पादः

रषाभ्यां नो णः समानपदे ।। 8.4.1 ।।

निमित्तयोरादेशे चकार उच्चारणार्थः । समानं च तत्पदं समानपदम् । निमित्तनिमित्तिनोश्चायमाधारनिर्द्देशः । तदाह---समानपदस्थो चेदिति । एकपर्यायः समानशब्दः । निमित्ते रषौ, निमित्ती नकारः । यद्यप्यसौ प्रागेव सिद्धस्वरूपः, तथापि तत्स्थाने भवतो णकारस्य यन्निमित्तम्, तस्यापि तेन सम्बन्धोऽस्त्येव । णकार एव वा निमित्ती, तस्य तु विधानोत्तरकालं समानपदस्थत्वम् ।

षग्रहणमुत्तरार्थमिति । अडादिव्यवाये णत्वं वक्ष्यति, तदस्मादपि यथा स्यात् । अथेहार्थमपि कस्मान्न भवति ? अत आह---ष्टुत्वेनैव सिद्धमेतदिति । ऋवर्णाच्चेति वक्तव्यमिति । रषाभ्यां णत्वमुच्यमानमृकारान्न प्राप्नोति वचनम् । न च शक्यं वक्तुम्---ऋवर्णस्थाद्रेफाद् भविष्यतीति । वर्णो ह्यत्र रेफः सूत्र उपात्तः, षकारेण साहचर्यात् । न च वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते । तिसृणामिति । `न तिसृचतसृ' इति प्रतिषेधात् `नामि' इति दीर्घत्वाभावः । तत्तर्हि वक्तव्यम् ? नेत्याह---रश्रुतिसामान्यनिर्देशात्सिद्धमिति । र इति श्रुतिः=श्रोत्रेणोपलब्धिर्ययोस्ते रश्रुती=वर्णात्मिका चावर्णात्मिका च व्यक्तिः, तयोर्यत्सामान्यं तन्निदिश्यते; न तु वर्णात्मिकैव व्यक्तिरित्यर्थः । नन्वेवमपि ऋकारे त्रयो भागा अभितोऽज्भक्तिर्मध्ये रेफभक्तिर्मात्रा चतुर्भागात्मिका, ततश्च परयाज्भक्त्या व्यवधानान्न प्राप्नोति ? `अड्व्यवाये' इत्येवं भविष्यति । न पराज्भक्तिरट्सन्निविष्टा, सा ह्यर्द्धमात्रा चतुर्भागात्मिका ऋकारभक्तिः । न च तस्याः सवर्णग्रहणेन नाप्यड्ग्रहणेन ग्रहणम्; असवर्णत्वात्, न हि तस्याः स्थानं प्रयत्नो वा पृथगस्ति । तस्मात्सामान्यनिर्दशेऽपि नै णत्वं सिध्यति, अत आह---वर्णभक्त्याचेति । वर्णस्य समुदायस्यावयवभूता या पराज्भक्तिस्तयेत्यर्थः । ननु च नृनमनग्रहणं वृद्ध्यर्थं स्यात्---नृनमनस्यापत्यं नार्नमनिरिति ? नैतदस्ति; बहिरङ्गा वृद्धिः, अन्तरङ्गं णत्वम्, `असिद्धं बहिरङ्गमन्तरङ्गे' ।

अथ वेति । व्यक्तिनिर्द्देशेऽपि दोष इत्यर्थः । अपरः प्रकारः---अभितोऽज्भक्ती चतुर्भागात्मिके, मध्ये शुद्धो रेफोऽर्धमात्रात्मकः, तेन व्यक्तिनिर्दशेऽप्यदोष इत्यर्थः । ननु च परयाज्भक्त्या व्यवधानम् ? एवं तर्हि उत्तरसूत्रे योगविभागः करिष्यते---`व्यवायेऽपि' इति, व्यवायेऽपि णेत्वं भवति; ततः `अट्कुप्वाङ्नुम्भिः' इति । इदमिदानीं किमर्थम् ? नियमार्थम्---वर्णात्मकैर्व्यवाये यदि भवति अडादिभिरेवेति । `अपदान्तस्य मूर्धन्यः' इत्यधिकारादत्र णग्रहणं शक्यमकर्तुम् । उत्तरत्र च `पदान्तस्य' इति प्रतिषेधः ।।

अट्कुप्वाङ्नुम्व्यवायेऽपि ।। 8.4.2 ।।

`रषाभ्याम्' इति पञ्चमीनिर्द्देशाद्व्यवाये न प्राप्नोतीत्ययमारम्भः । पर्याणद्धमिति । `णह बन्धने', पर्याङ्पूर्वः निष्ठा, `नहो धः' ।

ननु च `अड्व्यवाये' इत्येवात्र णत्वं सिद्धं तत्किमर्थमाङ्ग्रहणम् ? इत्यत आह---अड्व्यवाय इत्येव सिद्धमिति । क्वचित्तु आङ्ग्रहणं पदव्यवायेऽपीत्यस्य बाधनार्थमित्येतावत् पठ्यते । बृंहणमिति । `बृहि वृद्धौ', `इदितो नुम्', `नश्चापदान्तस्य झलि' इत्यनुस्वारः ।

यद्येवम्, अनुस्वारेणात्र व्यवायो न नुमा ? अत आह---नुम्ग्रहणमनुस्वारोपलक्षणार्थमिति । झल्परस्य नुमोऽनुस्वारविधानात्स्थानिना नुमानुस्वार उपलक्ष्यते । एवमपि योऽनुस्वारो नुम्स्थानिको न भवति तद्व्यवाये न प्राप्नोति `तृंह स्तृंह हिंसार्थौ', तृंहणमिति ? अत आह---तेनेति । नात्र नुम्स्थानिकोऽनुस्वार उपलक्ष्यते, किं तर्हि ? अनुस्वारमात्रं तेनात्रापि भवतीत्यर्थः । यत्र तर्हि नुम एव श्रवणं नानुस्वारस्य तत्र णत्वं भवति वा, न वा ? अत आह---सत्यपि चेति । यथा `नक्षत्रं दृष्ट्वा वाचं विसृजेत्' इति कालविशेषोपलक्षणपरायां चोदनायां सत्यपि दिवा नक्षत्रदर्शने वाग् न विसृज्यते, उपलक्षितस्य कालस्याभावात्; असत्यपि नक्षत्रदर्शने रात्रौ विसृज्यते, तस्य कालस्य भावात्; तथेहापि द्रष्टव्यम् । प्रेन्वनमिति । `इविः प्रीणनार्थः', `इदितो नुम्', अत्र `इजादेः सनुमः' इति णत्वप्रसङ्गः ।

इह समुदाये वाक्यपरिसमाप्तिर्दृष्टा, यथा---गर्गाः शतं दण्ड्यन्तामिति, अर्थिनश्च राजानो हिरण्येन भवन्ति, न च प्रत्येकं दण्डयन्ति; प्रत्येकमपि दृष्टा, यथा---वृद्धिगुणसंज्ञे प्रत्येकं भवतः । तत्रेह यदि पूर्वः कल्प आश्रीयते, न क्वचित् स्यात्, न हि समस्तैरडादिभिर्व्यवायः क्वचिदपि सम्भवति । द्वितीये तु अर्हेणेत्यादौ न स्यात्; अटा कवर्गेण च व्यवायात् । अत आह---व्यवायोप लक्षणार्थत्वादिति । इह ये यदुपलक्षणायोपादीयन्ते तेषामेकेन द्वाभ्यां बहुभिरप्युपलक्षितः स गृह्यते, तद्यथा---`गर्गैः सह न भोक्तव्यम्' इत्युक्ते प्रत्येकं च सह न भुज्यते, समुदितैरपि, तथेहापि शक्नुवन्त्यडादयः समस्ता

व्यस्ताश्च व्यवायमुपलक्षयितुमिति सर्वत्र भवति । अडादिव्यवाये णत्वेऽन्यव्यवाये प्रतिषेधः---आदर्शेन, स्पर्शेन । यद्यप्यत्रान्येनापि व्यवायः, यस्त्वटा व्यवायस्तदाश्रयं णत्वं प्राप्नोति, यत्र त्वनिर्दिष्टैरेव व्यवायस्तत्रैव न स्यात्---कृत्स्नम्, मृघ्नोतीति ? नैष दोषः; `रषाभ्याम्' इत्यत्र `तस्मात्' इति परिभाषोपस्थानाद्व्यवाये णत्वासङ्गात् सूत्रमिदमारभ्यमाणमडादिव्यवाय एव णत्वमनुजानाति, नान्यव्यवाये; तस्य निर्दिष्टग्रहणेन निवर्तितत्वात्, यदि च निदिष्टव्यतिरिक्तैरपि व्यवाये णत्वं स्यात्, नुम्ग्रहणमनर्थकं स्यात्; केवलेन नुमा व्यवायासम्भवात् ।।

पूर्वपदात्संज्ञायामगः ।। 8.4.3 ।।

`रषाभ्याम्' इति वर्तते, न च तयोः पूर्वपदत्वं सम्भवतीति सामर्थ्यात्पूर्वपदस्थान्निमित्तादुत्तरस्येत्येषोऽर्थो विज्ञायत इत्याह---पूर्वपदस्थादिति । रेफषकारान्तापूर्वपदादित्ययं त्वर्थो न भवति; व्याख्यानात् । द्रणस इति । द्रुरिव नासिका यस्येति बहुव्रीहिः, `अञ्नासिकायाः' इत्यत्रप्रत्ययो नशादेशश्च । वार्ध्रीणस इति । वध्रर्था विकारो वार्ध्री रज्जुः, वार्ध्रीव नासिका यस्य स वार्ध्रीणसः=मृगविशेषः । तत्र पूर्वपदस्योपमाननिष्ठत्वाद्व्यधिकरणत्वात् पुंवद्भावाभावः, नस्शब्दः प्रियादिषु वा द्रष्टव्यः । शूर्पणखेति । `नखमुखात्संज्ञायाम्' इति प्रतिषेधः । यदा तु योगो विवक्ष्यते, न संज्ञा---शूर्पाकाराणि नखानि यस्या इति; तदा ङीष् भवति, णत्वं तु न भवति---शूर्पनखी । एवं च णत्वङीषौ न समवेतः---`ततः शूर्पनखीवाक्यात्' इति ।

`अगः' इति शक्यमवक्तुम् । कस्मान्न भवति---ऋचामयनमृगयनमिति ? निपातनादेतत्सिद्धम्---`अणृगयनादिभ्यः' इति । यथान्यत्रोक्तम्--सर्वनाम संज्ञायां निपातनाण्णत्वाभाव इति ।

पूर्वपदात्संज्ञायामेवेति । विपरीतस्तु नियमो न भवति---पूर्वपदादेव संज्ञायामिति, शिवादिषु सुषेणशब्दस्य पाठात् । सिद्धे सत्यारम्भो नियमाय भवति, कथमत्र सिद्धिः ? इत्याह---समानपदेऽपि हीति । यद्यपि पूर्वपदस्थं निमित्तमुत्तरपदस्थो निमित्तीति भिन्नपदस्थत्वमप्यस्ति, तथापि समासे कृते ततो वा विभक्तिरुत्पद्यते, तया समुदायस्य पदसंज्ञायां सत्यां तस्मिन्समानेऽपि पदे भावादस्त्येव पूर्वेण प्राप्तिः, समानपदत्वं हि तत्राश्रितम्, न भिन्नपदत्वं प्रतिषिद्धम् । तस्मादुपपन्नं नियमार्थत्वम् । यद्येवम्, यथोत्तरपदस्थस्य नकारस्य णत्वं नियमेन व्यावर्त्त्यते---चर्मनासिक इति; तथा तद्धितपूर्वपदस्थस्यापि व्यावर्त्त्येत---खरपस्यापत्यम् `नडादिभ्यः फक्'---खारपायणः, मातृभोगाय हितः `भोगोत्तरपदात्खः'---मातृभोगीणः, करणं प्रियमस्य करणप्रियः ? इत्याह---स चेति । सम्बन्धिशब्दो नियतमेव प्रतियोगिनमुपस्थापयति, तद्यथा---मातरि वर्तितव्यं पितरि शुश्रूषितव्यमिति, न चोच्यते---स्वस्यां मातरि स्वस्मिन्पितरीति, अथ च सम्बन्धादेतद् गम्यते---यस्य या माता तस्यामिति, यो यस्य पिता तस्मिन्निति । पूर्वपदम्, उत्तरपदमिति च सम्बन्धिशब्दावेतौ---पूर्वपदमपेक्ष्योत्तरपदं भवति, उत्तरपदं चापेक्ष्य पूर्वपदम् । तत्र सम्बन्धादेतदवगन्तव्यम्---यत्प्रति पूर्वपदमित्येतद्भवति तत्स्थस्य नियम इति । किञ्च प्रत्येतद्भवति ? उत्तरपदम् । अयं तर्हि दोषः---`अगः' इति नियमस्यैव प्रतिषेधः प्राप्नोति, तेनैकवाक्यत्वात्, न णत्वस्य, ततश्च संज्ञायाञ्च गान्तरे णत्वं प्राप्नोति ? अत आह---अग इति । `अगः' इति योऽयं प्रतिषेधः स णत्वस्य, न नियमस्य । अत्र हेतुः--योगविभागेनेति । `पूर्वपदात्संज्ञायाम्' इत्येको योगः, `अगः' इति द्वितीयः; अनेन च या च यावती च णत्वप्राप्तिः सा सर्वा प्रतिषिध्यते, योगविभागसामर्थ्यात् ।

अपरे त्वित्यादि । कथ पुनः समानमेवेत्यवधारणं लभ्यते ? अत आह---समानग्रहणादिति । `पदे' इत्येव वक्तव्यम्, तत्रापदस्थयोर्निर्मित्तिनिमित्तनोर सम्भवात् पदग्रहणमेकत्वविवक्षार्थं विज्ञायते । एवं सिद्धे यत्समानग्रहणं क्रियते, तस्यैतत्प्रयोजनं यथैवं विज्ञायेत---समानमेव यत्पदमिति । तेषामेवं ब्रुवतां विध्यर्थमेतद्विज्ञायत इत्याह---तेषामिति । विध्यर्थत्वमेवोपपादयति---समासे हीति । अथास्मिन्पक्षे खारपायण इत्यत्र कथं णत्वम्, यावता खरपशब्दे खरशब्दस्यापि पदत्वमस्ति, तत्स्थत्वाद्रेफस्य समानपदस्थत्वमेव न भवति ? नैष दोषः; यत्र द्वावपि निमित्तनिमित्तिनौ समानपदस्थत्वं व्यभिचरतः, तत्र णत्वाभावः; इह रेफस्य व्यभिचारेऽपि नकारस्य समानपदस्थत्वाव्यभिचाराण्णत्वं प्रवर्त्तते ।।

वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः ।। 8.4.4 ।।

`वनम्' इति षष्ठ्याः स्थाने प्रथमा । उदाहरणे `वनगिर्योः संज्ञायाम्' इति पूर्वपदस्य दीर्घत्वम् । अग्रेवणमिति । षष्ठीसमासे राजदन्तादित्वाद्वनशब्दस्य परनिपातः, `हलदन्तात्' इति सप्तम्या अलुक्, अथ न संज्ञा ततो राजदन्तादिषु निपादनादलुक् ।

सिद्धे सतीत्यादि । पुरगादिष्वेतदुच्यते, अग्रेशब्दे त्वसंज्ञायां विध्यर्थमित्याहुः । एतेभ्य एव वननकारस्येति । `एतेभ्यो वननकारस्यैव' इत्ययं तु नियमो न भवति; दीर्घोच्चारणात् । तद्धि दीर्घान्तेष्वयं नियगो भवेदिति । न च वनादन्यत्रोत्तरपदे दीर्घान्तत्वमेषां सम्भवति, यत्रास्य णत्वं दीर्घान्तेषु व्यावर्त्त्येत ।।

प्रनिरन्तः शरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि ।। 8.4.5 ।।

अत्रादितस्त्रिषु संज्ञायामसज्ञायामप्राप्तं णत्वं विधीयते, कथम् ? संज्ञायां तावत् `पूर्वपदात्संज्ञायाम्' इत्येतद्यद्यपि नियमार्थम्, अथापि विध्यर्थम्---उभयथापि अवश्यम् `वनं पुरगा' इत्यादिसूत्रं नियमार्थम्---पुरगादिष्वेव वननकारस्येति, ततश्च प्रादिष्वप्राप्तिः । असंज्ञायामपि नियमे तावदप्राप्तिः; संज्ञायामेवेति नियमात् । विधावपि संज्ञायां विधानादन्यत्राप्राप्तिरेव । शरादिषु त्वोषधिवनस्पतिवाचिषु संज्ञायामसंज्ञायां चोत्तरसूत्रेण प्राप्तस्य विकल्पस्यापवादः । `असंज्ञायामपि' इत्यनुच्यमाने `संज्ञायाम्' इत्यधिकारात्तत्रैव स्यात् । निवर्तिष्यते संज्ञायामिति ? यदि निवर्तते, संज्ञायां न प्राप्नोति; पुरगादिभ्य एव वननकारस्येति नियमात् । अयं तु विधिरसंज्ञायां सावकाशः, संज्ञायामपि परत्वादयमेव विधिर्भविष्यति, `पूर्वत्रासिद्धे नास्ति विप्रतिषेधः', तस्मादसंज्ञायामपीति वक्तव्यम् । प्रवणम्, निर्वणमिति । प्रादिसमासौ । अन्तर्वणमिति । विभक्त्यर्थेऽव्ययीभावः, शरवणादयः षष्ठीससासाः ।।

विभाषौषधिवनस्पतिभ्यः ।। 8.4.6 ।।

`असंज्ञायामपि' इत्यनुवर्त्तते, तेन संज्ञाऽसंज्ञायोर्द्वयोरयं विकल्पः । अन्ये तु वृत्तावनुक्तत्वात्तस्याधिकारं नेच्छन्ति, तेषां संज्ञाविषये पुरगादिभ्य इति नियमत्वेन

भवितव्यम् । यदि त्विष्यते यत्नान्तरमास्थेयम् ।
इह ये पुष्प्यन्ति फलन्ति च ते वानस्पत्याः; ये फलन्त्येव न पुष्प्यन्ति ते वनस्पतयः; उभयेऽपि ते वृक्षा इत्यभिधानविदः । ततश्च वनस्पतिशब्दोपादानेन णत्वं विकल्प्यमानं शिरीषवणमित्यत्रैव स्यात्, शिरीषादयो हि पुष्प्यन्ति फलन्ति च, तस्माद्वृक्षग्रहणं कर्त्तव्यम्, तदिदमाशङ्कते तावत्---
फली नवस्पतिरित्यादि । फलमेव यस्य न पुष्पं स वनस्पतिः=उदुम्बरादि, पुष्पोपगा वेतसादयः, फलोपगा उदुम्बरादयः, उभयोपगा आम्रादयश्च वृक्षाः । अन्तात्यन्तादिसूत्रे `डोऽन्यत्रापि दृश्यते' इति वचनाड्डुः । फलपाकेन विनाशो यासा ता ओषध्यः---शाल्यादयः, लताप्रतानवत्यो मालत्यादयः, गुल्माः=ह्रस्वस्कन्धास्तरवः, बहुकाण्डपत्राः वीरुध इति---यद्यपि वृक्षवनस्पत्योर्भेदः स्मर्यत इति शङ्कां परहरति---इहाभेदेन ग्रहणं द्रष्टव्यमिति । अत्र च `लुपि युक्तवद्व्यक्तिवचने' इत्यत्र भाष्यकारवचनं लिङ्गम् । उक्तं हि तत्र---"व्यक्तिवचन इति किम्, शिरीषाणामदूरभवो ग्रामः शिरीषाः, तस्य वनं शिरीषवनमिति---वनस्पतित्वं नातिदिश्यते । यद्यतिदिश्येत, `विभाषौषधिवनस्पतिभ्यः' इति णत्वं प्रसज्येत" इति । यदि चोक्तो भेद इहाश्रितः स्यात्, शिरीषणामवनस्पतित्वाद्वनस्पतित्वणत्वयोः प्रसञ्जनं नोपपद्येत ।।
अह्नोऽदन्तात् ।। 8.4.7 ।।
पूर्वाह्ण इति । अह्नः पूर्वो भाग इति `पूर्वापर' इत्यादिसूत्रेण समासः, `राजाहः सखिभ्यष्टच्', `अह्नोऽह्न एतेभ्यः' इत्य अह्नादेशः । निरह्न इति । निर्गतोऽह्न इति प्रादिसमासः, शेषं पूर्ववत् । दीर्घाह्नी शरादति । बहुव्रीहिरयम्, तेन टज्न भवति; टज्विधौ तत्पुरुषाधिकारात् । `अन उपधालोपिनोऽन्यतरस्याम्' इति ङीप्, `अल्लोपोऽनः' । अकारान्तस्य ग्रहणादत्र णत्वं न भवति । यदि तु नकारस्यायं षष्ठ्या निर्देशः स्यात्, अत्रापि णत्वं स्यात् । अकारान्तस्य तु ग्रहणं प्रकरणाद्विज्ञायते । सर्वत्र प्रकरणे स्थानी प्रथमया निदिश्यते---वनम्, वाहनम्, यानमिति । यद्वा---युवादिषु पाठादस्य णत्वाभावः । अवश्यकर्तव्यश्च युवादिषु पाठः; प्रातिपदिकान्तेति विकल्पेन णत्वं मा भूदिति । अन्तग्रहणं ज्ञापकम्---अत्र प्रकरणे न यत्नमन्तरेण वर्णेनापि तदन्तविधिर्भवतीति । तेन `रषाभ्याम्' इत्यत्र तदन्तविधिने भवति ।।
वाहनमाहितात् ।। 8.4.8 ।।
उह्यतेऽनेनेति वाहनम्=शकटादि, करणे ल्युट्, अस्मादेव निपातनादुपधावृद्धिः । आहितमारोपितमुच्यते । यदा बाह्यं नारोपितं केवलं सन्निहितं तदान न प्राप्नोति, तदापीष्यते । यदाह---आहितोपस्थितयोरिति वक्तव्यमिति । न वा भूतकालस्याविवक्षितत्वात्, स्वामिभावनिवृत्तिपरायां चोदनायामाहितमिति भूतकालो न विवक्ष्यते, तेनाहितादाधायिष्यमाणाच्च भविष्यति । केवलं स्वस्वामिभावविवक्षायामेव न भवति, यथा प्रत्युदाहरणे उक्तम्---दाक्षिस्वामिकमित्यर्थ इति । दाक्ष्यादयोऽपि यदा वाह्यत्वेन विवक्ष्यन्ते न स्वामित्वेन, तदा णत्वं भवत्येव ।।
पानं देशे ।। 8.4.9 ।।
क्षीरं पानं येषामिति । कर्त्तरि षष्ठी । उशीनरादयः शब्दा देशद्वारेण पुरुषेषु वर्तन्त इति देशाभिधायिनो भवन्ति ।
दाक्षईणां पानमिति । अत्रापि कर्मसाधन एव पानशब्दः ।।
वा भावकरणयोः ।। 8.4.10 ।।
गिरिनद्यादीनामिति । संज्ञायां प्राप्ते, असंज्ञायामप्राप्ते---इत्युभयत्रविभाषेयमित्याहुः ।।
प्रातिपदिकान्तनुम्विभक्तिषु च ।। 8.4.11 ।।
माषवापिणाविति । `बहुलमाभीक्ष्ण्ये' इति णिनिः । माषवापाणीति । माषान्वपन्तीति `कर्मण्यण्', `जश्शसोः शि', `नपुंसकस्य झलचः' इति नुम् । इह कस्मान्न भवति---गर्गाणां भगिनी गर्गभगिनीति । भगिन्नित्यस्य प्रातिपदिकस्यान्तो नकार इत्यस्ति प्राप्तिः ? इत्यत आह---पूर्वपदाधिकारादिति । एतच्च `पूर्वपदात्संज्ञायाम्' इत्यत्रैव व्याख्यातम् । किमिदानीं नैव भवति---गर्गभगिणीति, भवति विवक्षान्तरे शास्त्रान्तरेण नित्यम्, न त्वनेन ? इत्याह---यदा त्विति । मातृभोगीणवदिति । एतदपि तत्रैव व्याख्यातम् ।
यद्युत्तरपदं प्रातिपदिकं गृह्यते माषवापिणीत्यत्र णत्वं न प्राप्नोति, यदुत्तरपदं वापिनीति न तस्यान्तो नकारः, यस्य चान्तो नकारो वापिन्निति न तदुत्तरपदम् ? अत आह---माषवापिणीत्यादि । `उपपदमतिङ्' इत्यत्रैतद्व्याख्यातम् । `उत्तरपदभूतं प्रातिपदिकं गृह्यते' इत्यत्र ज्ञापकमाह---तथा चेति । कथमेतज्ज्ञापकम् ? इत्याह---स हीति । अङ्गस्य नुम्विधीयते, ततश्च तद्भक्तो नुम् तद्ग्रहणेनैव गृह्यते, नोत्तरपदग्रहणेन । यदि च यत्किञ्चन प्रातिपदिकं गृह्येत नोत्तरपदमेव, ततो नुम्ग्रहणमकर्त्तव्यमेव स्यात्; `समासप्रातिपदिकान्त' इत्येव सिद्धत्वात् ।
आर्ययूनेति । विशेषणमासः । `श्वयुवमघोनामतद्धिते' इति सम्प्रसारणम् । प्रपक्वानीति । गतिसमासः । अत्र `कुमति च' इति नित्यं णत्वं प्राप्नोति । दीर्घाह्नी शरदिति । अयमपि युवादिषु द्रष्टव्य इत्युक्तम् ।।
एकाजुत्तरपदे णः ।। 8.4.12 ।।
विकल्पाधिकारनिवृत्तेविस्पष्टीकरणार्थमिति । अन्यथा यद्यप्यत्रारम्भसामर्थ्यान्नित्यो विधिः शक्यो विज्ञातुम्, उत्तरत्र त्वनुवृत्तिः सम्भाव्येत ।।
कुमति च ।। 8.4.13 ।।
अनेकाजुत्तरपदार्थोऽयमारम्भः । वस्त्रयुगिणाविति । युगशब्दादिनि कृते पश्चादिन्नन्तेन समासः कर्तव्यः । एवं तर्हि उत्तरपदस्य प्रातिपदिकस्यान्तो नकारो भवति; अन्यथा मातृभोगीणवल्लक्षणान्तरेणैव णत्वं सिद्धं स्यात्, `कौ' इत्युच्यमानेऽपि कवर्गमात्रस्योत्तरपदस्यासम्भवान्मतुबर्थो लभ्यते, नार्थो मतुपा ? सत्यम्; `कौ' इत्युच्यमाने तदादिविधिविज्ञायेत---कवर्गादावुत्तरपद इति ।।

उपसर्गादसमासेऽपि णोपदेशस्य ।। 8.4.14 ।।

ण उपदेशे यस्य स णोपदेशः । प्रनायको देश इति । अत्र गतिक्रियायोगमात्रमेव प्रति प्रस्योपसर्गत्वम्, न नमतिं प्रति ।

असमासेऽपीति किमिति । विशेषानुपादानादेव समासासमासयोर्द्वयोरपि भविष्यतिति प्रश्नः । पूर्वपदाधिकारादिति । सर्वत्रैवात्र प्रकरणे `पूर्वपदात्' इति वर्तते, समासे एव पूर्वपदं भवति, तेन समास एव स्यात् । तदधिकारनिवृत्तिद्योतनार्थमिति । नानेन विस्पष्टार्थमसमासेऽपिग्रहणमिच्युते । तथा हि---यद्यप्यस्वरितत्वात् `पूर्वपदात्' इति निवर्त्तते, तथाप्यसमासेऽपिग्रहणं कर्त्तव्यम्, अन्यथाऽसंज्ञायां समासे न स्यात्; पूर्वपदात्संज्ञायामेवेति नियमादस्य च विधेरसमासे चरितार्थत्वात् । तस्मात्पूर्वपदाधिकारनिवृत्तिद्योतनमुखेन समासासमासयोर्द्वयोरपि यथा स्यादित्यसमासेऽपिग्रहणमित्ययमर्थो द्रष्टव्यः । नन्वसिद्धमुपसर्गणत्वम्, तस्यासिद्धत्वान्नियमो न भविष्यति, तेन `पूर्वपदात्' इत्यस्मिन्निवृत्ते न कर्त्तव्यमसमासेऽपिग्रहणम् ? एवं तर्ह्येतज्ज्ञापयति---न योगे योगोऽसिद्धः, अपि तु प्रकरणे प्रकरणमसिद्धमिति । यदा तु `पूर्वपदात्संज्ञायाम्' इति सूत्रं नियमार्थमिति पक्षः, तदैतदुच्यते । यदा तु विध्यर्थ तदा नैतदुपपद्यते ।।

हिनुमीना ।। 8.4.15 ।।

`हि गतौ' स्वादिः, `मीञ् हिंसायाम्' क्रियादिः, दीर्घान्तः ।

हिनुमीनाग्रहणए विकृतस्योपसंख्यानम्, इहापि यथा स्यात्---प्रहिणोति, प्रमिणीतः ? सिद्धं वा स्थानिवत्त्वात्; ईत्वगुणयोः स्थानिवद्भावे सति उपात्तमेव रूपमिति णत्वं भविष्यति । ननु `पूर्वत्रासिद्धे न स्थानिवत्' ? दोष एवायमस्याः परिभाषायाः `तस्य दोषः संयोगादिलोपलत्वणत्वेषु' इति ।

आनि लोट् ।। 8.4.16 ।।

प्रवपाणीति । वपेर्लोट्, `मेर्निः' । `आड्डत्तमस्य पिच्च', प्रयाणीति याते रूपम् । प्रवपानीति । प्रकृष्टा वपा येषु तानि प्रवपानि । आनिलोड्ग्रहणमनर्थकम्; अर्थवद्ग्रहणात्, अर्थवत आनिशब्दस्य ग्रहणम्, न चैषोऽर्थवान् । अनुपसर्गाद्वा, यत् क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञे भवतः, न चैतमानिशब्द प्रति क्रियायोगः, तदन्तं तु प्रति भवति । कथं नैवं विज्ञायते---यस्य क्रिया यत्क्रिया, यत्क्रियायुक्ता इति ? कथं तर्हि या क्रिया यत्क्रिया यत्क्रियायुक्ता इति, प्रयोगविषया च क्रिया न क्वचिदसंसृष्टास्तीति समुदायस्याश्रीयत इति आनिशब्दान्तं समुदायं प्रति क्रियायोगः । तत्रायं च सूत्रार्थः---उपसर्गात् परस्यावयवो य आनिशब्दस्तन्नकारस्य णत्वमिति । तदेवं प्रत्याख्यातं लोड्ग्रहणम् ।।

नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ।। 8.4.17 ।।

`गामादाग्रहणेष्वविशेषः' इति वचनात् `मीनातिमिनोतिदीङाम्' इत्यात्वे कृते यन्मारूपम्, यच्च `मा माने' इति, तेषामपि ग्रहणप्रसङ्गः ? इत्या शङ्क्याह---माङ्मेङोर्ग्रहणमिष्यत इति । इष्टिरेवेयम् । प्रणिष्यतीति । `ओतः श्यनि', `उपसर्गात्सुनोति' इत्यादिना षत्वम् । हन्तिप्रभृतयः प्सातिपर्यन्ता अदादयः, `मा माने च' । प्रणिशाम्यतीति । `शमामष्टानां दीर्घः श्यनि' ।

स्यत्यादिषु तिपा निर्देशो यङ्लुग्निवृत्त्यर्थः ।

अड्व्यवायेऽपीति । अन्यथाङ्गस्याड्उच्यते, विकरणान्तं चाङ्गम्, सोऽसौ सङ्घातभक्तोऽशक्यो गदादिग्रहणेन ग्रहीतुमिति न स्यात् । आङा चेति वक्तव्यम्---प्रण्यागददिति । तत्तर्हि वक्तव्यम् ? न वक्तव्यम्, `अटकुप्वाङ्नुम्व्यवाये' इति वर्त्तते, तेन नेर्गदादीनां चाड्व्यवाये च भविष्यति । प्रन्युपगदतीत्यादौ तु `पदव्यवायेऽपि' इति प्रतिषेधादप्रेसङ्गः ।।

शेषे विभाषाऽकखादावषान्त उपदेशे ।। 8.4.18 ।।

`अकखादावषान्ते' इति चोपसर्गसन्निधापितस्य धातोर्विशेषणमित्याह---अकखादिरषान्त उपदेशे यो धातुरिति ।

आदिग्रहणं शक्यमकर्तुम्, `अकखे इति वक्तव्यम्, `यस्मिन्विधिस्तदादावल्ग्रहणे' । अन्तग्रहणं तु कर्त्तव्यम्, असति हि तस्मिन्न ज्ञायते---केन तदादिविधिः, केन वा तदन्तविधिरिति ।

शेषग्रहणं किम् ? गदादिषु मा भूत् । यदि तेष्वपि स्यात्, पूर्वयोगो निर्विषयः स्यात्;तस्माच्छेष इति शक्यमवक्तुम् ।

प्रनिपेक्ष्यतीति । `षढो कः सि' इति कत्वे कृते सम्प्रत्यषान्तो भवति । प्रनिचकारेति । `कुहोश्चुः' इत्यभ्यासस्य चुत्वे कृते सम्प्रत्ययं न ककारादिर्भवति । प्रणिवेष्टेति । `व्रश्च' इत्यादिषत्वे कृते सम्प्रति षान्तो भवति, उपदेशे त्वषान्तत्वाण्णत्वं भवति ।।

अनितेः ।। 8.4.19 ।।

प्राणितीति । `श्वस प्राणने', `अन च', रुदादिभ्यस्सार्वधातुके' इतीट् ।।

अन्तः ।। 8.4.20 ।।

अनितेरन्तस्येति । अनितेः सम्बन्धिनः पदान्तस्य नकारस्येत्यर्थः । हे प्राणिति । क्विबन्तात्सम्बुद्धिः, `न ङिसम्बुद्ध्योः' इति नलोपप्रतिषेधः । अन्यत्र तु पदान्तस्य नकारस्य लोपेन भवितव्यमिति सम्बुद्ध्यन्तमुदाहृतम् । अन्तश्च पदापेक्षो गृह्यत इति । नानित्यपेक्षः; व्यभिचाराभावात् ।

केचित्त्वित्यादि । `अनितेरन्तः' इत्येकमेव योगं पठन्ति, समीपवचनं चान्तशब्दमाश्रयन्तीत्यर्थः । किमर्थम् ? इत्याह---निमित्तसमीपस्येति । ननु च नास्त्येव स विषयो यत्र निमित्तस्य समीपभूतोऽनितेर्नकारः, प्राणितीत्यादावेकादेशे कृते आकारेण व्यवायः, निरणितीत्यत्राकारेण, तत्कथं निमित्तसमीपस्थस्येत्युच्यते ? अत आह---एकवर्णव्यवहितस्येति । सामर्थ्यादेकवर्णन व्यवधानमाश्रतमित्यर्थः । न च प्राणितीत्यत्रैकादेशस्य पूर्वस्माद्विधौ स्थानिवद्भावाद् वर्णद्वयव्यवायः

शङ्कनीयः; पूर्वत्रासिद्धे स्थानिवत्त्वनिषेधात् । ननु चोक्तम्---`तस्य दोषः संयोगादिलोपलत्वणत्वेषु' इति ? एवं तर्ह्यनित्यः पूर्वस्माद्विधौ स्थानिवद्भावः; `निष्ठायां सेटि' इति सेड्ग्रहणात्, एतच्च स्थानिवत्प्रकरण एव व्याख्यातम् । तैरित्यादि । एकं ह्यन्तग्रहणम्, तच्च सामीप्यार्थं पर्यनितीत्यत्र णत्वव्यावृत्त्या चरितार्थम्, ततश्च हे प्राणित्यत्र पदान्तस्येति प्रतिषेधः प्राप्नोति; तस्मात्तैर्द्वितीयमप्यन्तग्रहणमावृत्त्या तन्त्रेण वाऽऽश्रयितव्यम् ।
ननु च येऽपि योगविभागं कुर्वन्ति, अवयववचनं चान्तशब्दमाश्रयन्ति, तेरपि पूर्वसूत्रे सामीप्यवाच्यन्तशब्दः पठितव्य एव; अन्यथा पर्यनितीत्यत्रापि स्यात् ? अत आह---येषां त्विति । ते नैकवर्णव्यहितस्यापि णत्वमिच्छन्त्येव, तस्मान्नार्थस्तेषां पूर्वसूत्रेऽन्तग्रहणेनेत्यर्थः ।।
उभौ साभ्यासस्य ।। 8.4.21 ।।
प्राणिणिषतीति । सनि `अजादेर्द्वितीयस्य' इति निशब्दस्य द्विवर्चनम् । प्राणिणदिति । ण्यन्ताल्लुङ्, च्लेश्चङ्, णिलोपः, `द्विर्वचनेऽचि' इति स्थानिवद्भावान्निशब्दस्य द्विर्वचनम् ।
पूर्वत्रासिद्धीयमित्यादि । `पूर्वत्रासिद्धीयमद्विर्वचने' इत्यस्मिन्नसति प्रानिसतीतिस्थिते द्विर्वचनं च प्राप्नोति, णत्वं च, तत्र णत्वस्यासिद्धत्वात्पूर्व द्विर्वचने कृतेऽभ्यासणकारेण व्यवायाद्धातुनकारस्य णत्वं न स्यात् । अस्मिंस्तु सति परत्वाण्णत्वे कृते कृतणत्वस्यैव द्विर्वचने अन्तरेणाप्येतद्वचनं प्राणिणिषतीत्यादि सिद्धं भवति । यद्येवम्, किमर्थमिदमारभ्यते ? इत्याह---एतत्त्विति । शक्यार्थे कृत्याः, इतिकरणो हेतौ । तुशब्दोऽवधारणे । यस्मादेतदपवादवचनमेतदर्थं नैव शक्यमाश्रयितुम्, तस्मादेतदारभ्यते । अयमभिप्रायः---अस्य वचनस्यानित्यत्वज्ञापनार्थमिदमारभ्यत इति । तेन---`औजढदित्यत्र ढत्वादीनामसिद्धत्वात् हत् इत्येतद् द्विरुच्यते'---इत्युपपन्नं भवति ।
अथ `उभौ' इति किमर्थम्, यावताभ्यासनकारस्य पूर्वेणैव णत्वं सिध्यति, आरम्भसामर्थ्याद्धातुनकारस्य व्यवायेऽप्यनेन भविष्यति ? सत्यम्; व्यवहितस्य सिध्यति, अनन्तरस्य तु तक्रकौडिन्यन्यायान्न स्यादिति `उभौ' इत्युच्यते ।।
हन्तेरत्पूर्वस्य ।। 8.4.22 ।।
हन्तेरित्यवयवषष्ठी, अत्पूर्वो यस्मादिति बहुव्रीहिः, नकारोऽन्यपदार्थः । यद्यपि नकारविशेषणानि प्रथमया निद्दिश्यन्ते---अन्तः, उभाविति, तथापीह षष्ठ्या निर्द्देशः कृतः । इदं हि न्याय्यं व्यतिक्रमोऽल्पः । प्रहण्यत इति । भावे, कर्मणि वा लट् । प्रघ्नन्तीति । `गमहन' इत्युपधालोपः, `हो हन्तेः' इति कुत्वम् । अत्र `कुव्यवाये' इति प्रसङ्गः । प्राघानीति । `चिण् भावकर्मणोः' इति चिण् ।
श्तिपा निर्देशो धातुनिर्देशार्थ एव, न यङ्लुग्निवृत्त्यर्थः---प्रजङ्घनीति । अत्र हि चुत्वे कृते जकारेण व्यवायादेव न भविष्यति ।।
वमोर्वा ।। 8.4.23 ।।
पूर्वेण नित्ये प्राप्ते विकल्पः ।।
अन्तरदेशे ।। 8.4.24 ।।
`अन्तः शब्दस्याङ्किविधिणत्वेषूपसंख्यानम्' इत्युपसर्गसंज्ञाया भावाद् `हन्तेरत्पूर्वस्य' इति सिद्धे देशप्रतिषेधार्थं वचनम् । अन्तर्हननो देश इति । अधिकरणे ल्युट् ।।
अयनं च ।। 8.4.25 ।।
अन्तरयणमिति । अयेः, इणो वा ल्युटि रूपम् । `कृत्यचः' इति सिद्धे इदमपि देशप्रतिषेधार्थं वचनम् ।।
छन्दस्यृदवग्रहात् ।। 8.4.26 ।।
अवगृह्यते=विच्छिद्य पठ्यते इत्यवग्रहः, ऋच्चासाववग्रहश्च ऋदवग्रहः । ऋकाराद्, अवग्रहात्, पूर्वपदात्---इति तिस्रोऽपि समानाधिकरणाः पञ्चम्यः । तत्र ऋकारमात्रस्य पूर्वपदस्यासम्भवादृकारेण तदन्तविधिः---अवग्रहणभूतो य ऋकारस्तदन्तादिति । संहिताधिकाराच्च संहिताकाल एतेषां णत्वम्; पदकाले चावग्रहः क्रियते, तेनावग्रहयोगयत्वादृकारोऽवग्रह इत्युक्तः, न तु तद्दशापन्नः । तथा चावग्रहं दर्शयता णत्वं न प्रयुक्तम् । अनवगृह्यमाणादिति । अनवग्रहयोग्यादित्यर्थः । अपदादिति । पदे ह्यवग्रहः क्रियते, पदमत्र विच्छिद्यत इति दर्शनाय ।।
नश्च धातुस्थोरुषुभ्यः ।। 8.4.27 ।।
धातौ तिष्ठतीति धातुस्थो रेफः, षकारश्च । ऊरु इति स्वरूपग्रहणम्, षु इति कृतषत्वस्य सुञो ग्रहणम्, न सप्तमीबहुवचनस्य; तेन इन्द्रो धता गृहेषु न इत्यत्र न भवति । नसिति नासिकादेशस्यास्मदादेशस्य च सामान्येन ग्रहणम्, ततोऽत्रास्मदादेश एव कार्यी; तस्यैव धातुस्थादिभ्यः परस्य सम्भवात्, उत्तरसूत्रे तूभयोः कार्यित्वम् । रक्षा ण इति । रक्षेति लोण्मध्यमपुरुषैकवचनान्तम्, `द्व्यचोऽतस्तिङः' इति दीर्घः । शिक्षा ण इति । शिक्षतिर्दानकर्मा छन्दसि । उरुणस्कृधीति । कृञो लोट्, सेर्हिः `श्रुशृणुपृकृवृभ्यश्छन्दसि' इति हेर्धिरादेशः, `कः करत्' इत्यादिना विसर्जनीयस्य रुत्वम् । अभीषु ण इति । `इकः सुञि' इति दीर्घः । एवमूषु ण इत्यत्रापि ।।
उपसर्गाद्बहुलम् ।। 8.4.28 ।।
न सम्प्रति क्रियायोगाभावात् प्राद्युपलक्षणमुपसर्गग्रहणम् । प्रण इत्यस्मदो नसादेशः, प्रणस इति बहुव्रीहिः, `उपसर्गाच्च' इत्यच् समासान्तः, नासिकायाश्च नस्भावः ।
उपसर्गादनोत्पर इति पाठान्तरम्, उपसर्गात्परस्य नसो नकारस्य णत्वं भवति, ओतः परस्य ओकारे वा न भवतीत्यर्थः ।

उभयथाप्यतिव्याप्त्यव्याप्तिसम्भवाद्व्याख्यात एव पाठो वृत्तिकारेणाश्रितः ।।

कृत्यचः ।। 8.4.29 ।।

कृत्स्थो यो नकार अच उत्तर इत्यनेनाच इति नकारस्येदं विशेषणम्, न कृत इति दर्शयति । यदि हि कृत एतद्विशेषणं स्यात्, प्रापणमित्यादौ न स्यात्, `न भाभूपूकमिगमिष्यायिवेपाम्' इत्यत्र च कम्यादीनां प्रतिषेधोऽनर्थकः स्यात् । अनमानेत्यादि । सम्भवोदाहरणदर्शनपरम्, न परिगणनम्; अन्यस्यासम्भवात् । अन इति । योरनादेशः । मान इत्यागतमुक्, शानजादिः । तव्यदादिसूत्रविहितोऽनीयः, `आक्रोशे नञ्यनिः'। `सुप्यजातौ णिनिः', आवश्यके णिनिः । निष्ठादेशः `रदाभ्याम्' इति विहितः । प्रहीण इति । `घुमास्था' इत्यादिना ईत्वम् ।

प्रमग्नः, प्रभुग्न इति । `ओदितश्च' इति निष्ठानत्वम् । निर्विण्णस्येति । अचः परः कृत्स्थो नकारो न भवतीति वचनम् । तत्र परस्य नस्य णत्वम्, पूर्वस्य ष्टुत्वम् ।।

णेर्विभाषा ।। 8.4.30 ।।

ण्यन्ताद्यो विहित इति । एतेन णेरित्यस्य विहितविशेषणत्वं दर्शयति, प्रयोजनं वृत्तावेव वक्ष्यते । अपरः प्रकारः---`अड्व्यवाये' इति वर्तते, तेन ण्यन्तस्य कृतश्चाड्व्यवायेऽपि णत्वस्याभ्यनुज्ञानात् ण्यन्तात्परः कृदित्येवमाश्रीयमाणेऽपि प्रयाप्यमाणित्यादौ यकारव्यवायेऽपि णत्वसिद्धिरिति ।।

हलश्चेजुपधात् ।। 8.4.31 ।।

प्रकोपणमिति । `कुप क्रोधने' । प्रेहणम्, प्रोहणमिति । `ईह चेष्टायाम्', `ऊह वितर्के'। अत्र `कृत्यचः' इति णत्वं नित्यमेव भवति ।

कथं पुनरसत्यादिग्रहणे हलादिरिति लभ्यते ? अत आह---इजुपधस्येति । इजुपधस्य हलन्तत्वाव्यभिचारात् सामर्थ्यादादिविशेषणं हल्ग्रहणमित्यर्थः ।।

इजापेः सनुमः ।। 8.4.32 ।।

हल इति वर्तत इति । प्रयोजनमुत्तरत्र वक्ष्यति । ननु तत्रादिविशेषणं हल्ग्रहणम्, अन्तविशेषणेन चेहार्थः । अत आह---तेनेति ।

इजादेर्हलादित्वासम्भवात्सामर्थ्यम् । प्रङ्खणमिति । `इखि गत्यर्थः', इदित्त्वान्नुम् ।

ननु चात्रानुस्वारे कृते नायं सनुम्को भवति, काममत्र स्थानिवद्भावात् सिद्ध्यति---प्रम्भणमिति, अत्र त्वादित एव नुम् भवतीत्यत्र न सिद्ध्यति, औत्पत्तिको हि तत्र नकारः; प्रेन्वनमित्यत्र च प्राप्नोति, यत्र नुमेवाविकृतः श्रूयते; तस्मादिहापि नुमग्रहणमनुस्वारोपलक्षणार्थं व्याख्येयम् । नक्षत्रदर्शनन्या येनेष्टविषये सर्वत्र भविष्यति, अनिष्टे च न भविष्यति, एवं च कृत्वा नियमार्थतोपपद्यते; अन्यथा प्रेन्वनमित्यत्र विध्यर्थता सम्भाव्येत । न च `अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्येतेन सिद्धिः, तत्रापि नुमग्रहणस्यानुस्वारोपलक्षणत्वात् । ननु `कृत्यचः' इत्यनेनैव सिद्धे नार्थोऽनेन ? अत आह---सिद्धे सतीति । प्रमङ्गनमिति । मगिरपि गत्यर्थ एव । प्रमङ्कनमिति पाठे मण्डनार्थः ।

ननु च कैमर्थ्यान्नियमो भवति, विधेयं नास्तीति कृत्वा, इह चास्ति विधेयम्, किम् ? ण्यन्ताद्विभाषा प्राप्ता, तत्र नित्यं णत्वं विधेयम् ? अत आह---हलइत्यधिकारादिति । ननु चणिलोपे कृते ण्यन्तोऽपि हलन्तो भवति, ततः किम् ? सत्यपि हलधिकारे विध्यर्थता सम्भवति ? नैतदस्ति; विहितविशेषणस्याश्रयणात् । एतदेव ह्यभिप्रेत्य वृत्तिकारेणोक्तम्---`हलन्ताद्धातोर्यो विहितः' इति ।।

वा निंसनिक्षनिन्दाम् ।। 8.4.33 ।।

`णिसि चुम्बने' `णिक्ष रोपणे', णिदि कुत्सायाम्' णोपदेशत्वादेतेषां नित्ये णत्वे प्राप्ते विकल्पः ।।

न भाभूपूकमिगमिप्यायीवेपाम् ।। 8.4.34 ।।

पूग्रहणेन पूञोग्रहणमेष्टव्यमिति । इष्टिरेवेयम् । ण्यन्तानां चेति । ण्यन्तस्याधात्वन्तरत्वान्न प्राप्नोतीति वचनम्, किञ्च ण्यन्तेष्वस्य प्रवृत्तौ पक्षेऽनुवाददोषप्रसङ्गः; `णेविभाषा' इत्येव पक्षे निवृत्तेः सिद्धत्वात् ।।

षात् पदान्तात् ।। 8.4.35 ।।

निष्पानम्, दुष्पानमिति । `इदुदुपधस्य च' इति विसर्जनीयस्य षत्वम्, अत्र `कृत्यचः' इति प्रसङ्गः । सर्पिष्पानमिति । कर्मणि षष्ठ्याः समासः । यजुष्पानमिति । `कर्तृकरणे कृता बहुलम्' इति समासः । उभयत्रापि `नित्यं समासेऽनुत्तरपदस्थस्य' इति षत्वम्, अत्र `पानं देशे' `वा भावकरणयोः' इति प्राप्तिः ।

पदे अन्त इति । `सप्तमी' इति योगविभागात्समासः । सुसर्पिष्केणेति । शोभनं सर्पिरस्येति बहुव्रीहिः, कप्, `इणः षः' इति षत्वम् । नायं पदे परतः पूर्वमवस्थितस्यान्तो भवति । पदस्य त्वन्तो भवति; `स्वादिषु' इति पदसंज्ञाया विधानात्, ततश्च षष्ठीसमासेऽत्रापि प्राप्नोति । कथं पुनर्ज्ञायते---सप्तमीसमासोऽयमिति ? अन्तग्रहणात्; अन्यथा वर्णग्रहणे सर्वत्र तदन्तविधिरित्येव षकारन्तात् पदादिति लभ्यते ।।

नशेः षान्तस्य ।। 8.4.36 ।।

प्रनष्ट इति । `मश्जिनशोर्झलि' इत्यागतस्य नुमः `अनिदिताम्' इति नलोपः, व्रश्चादिषत्वम् । * नशेरशः * । अशकारान्तस्य नशेरिति वक्तव्यम्, न तु षान्तस्येति, इहापि यथा स्यात्---प्रनङ्क्ष्यतीति, `षढोः कः सि' इति कत्वं भवति । तत्तर्हि तथा वक्तव्यम् ? नेत्याह---अन्तग्रहणमिति । षकारेण नशेर्विशेषणात् `षन्तस्य' इति सिद्धे पुनरन्तग्रहणसामर्थ्याद्यः सम्प्रति षान्तो यश्च भूतपूर्वः, तस्य भवति प्रतिषेधः ।।

पदान्तस्य ।। 8.4.37 ।।

हे करिन्नित्याद्यप्युदाहरणम् ।।

पदव्यवायेऽपि ।। 8.4.38 ।।

माषकुम्भवापेनेति । अत्र केचिदाहुः---यदा माषाणां कुम्भो माषकुम्भः, तस्य वाप इति पक्रिया, तदा `उत्तरपदत्वे चापदादिविधौ' इति प्रत्ययलक्षणप्रतिषेधात् पदत्वाभावान्निषेधाप्रवृत्तेर्भवितव्यमेव णत्वेन, तस्मात् कुम्भस्य वापः कुम्भवापः, माषाणां कुम्भवापो माषकुम्भवाप इति प्रक्रियाश्रयेणोदाहरणमिति । अत्र `कुमति च' इति प्राप्तिः । प्रावनद्धमिति । `उपसर्गादसमासेऽपि' इत्यवशब्दव्यवायेऽपि `अड्व्यवाये' इति प्राप्तिः । प्रगान्नयाम इति । छन्दस्ययं व्यवहितः प्रयोगः । गामिति द्वितीयान्तेन पदेन व्यवायः ।

पदव्यवायेऽतद्धित इति । योऽयं पदव्यवाये प्रतिषेधः, स तद्धिते यत्पदं तत्र न भवतीति वक्तव्यमित्यर्थः । आद्रगोमयेणेति । `गोश्च पुरुषे' इति मयट्, तत्र परतो गोशब्दः `स्वादिषु' इति पदम् ।।

क्षुभ्नादिषु च ।। 8.4.39 ।।

क्षुभ्ना---इति स्वरूपग्रहणम्, न धातुग्रहणम्, तेन क्षोभणमित्यादौ णत्वं भवत्येव । क्षुभ्नीतः, क्षुभ्नन्तीति । अत्र त्वाल्लोपयोः स्थानिवद्भावादेकदेश विकृतस्यानन्यत्वाद्वा णत्वं न भवति । नृन्नमयतीति नृनमः । हरिनन्दीति ताच्छीलिको णिनिः । हरिनन्दनः, गिरिनगरमिति षष्ठीसमासौ । नरीनृत्यत इति । `रीगृदुपधस्य च' । तृप्नोतीति । छन्दसि व्यत्ययेन श्नुः । परिनर्त्तनम्, परिगहनमिति । प्रादिसमासौ । परिनन्दनमिति । गतिसमासः । शरनिवेशादयो दर्भानूपान्ताः षष्ठीसमासाः । आचार्यभोगीनः, आचार्यानीति । अत्रैवास्यप्रतिषेधः; आचार्येण, आचार्याणमित्यादौ तु भवत्येव । क्षुभ्नादिराकृतिगण इति । चकारोऽनुक्तसमुच्चयार्थ एवमेवार्थं सूचयति ।।

स्तोः श्चुना श्चुः ।। 8.4.40 ।।

अत्र सन्निपात इत्यध्याहार्यम् । वृक्षश्शेते इति । `वा शरि' इति पक्षे विसर्जनीयस्य सकारः । मज्जतीति । `झलां जश् झशि' इति सकारस्य दकारे कृते तस्य चुत्वम्---जकारः । असिद्धत्वं तु जश्त्वस्य न भवति; `न मु ने' इत्यत्र नेति योगविभागात् । तथा च भृज्जतीनां ङितीति निर्देश उपपद्यते । इह सकारतवर्गौ कार्यिणौ द्वौ, निमित्ते अपि द्वे एव---शकारचवर्गौ, ततश्च साम्यात्संख्यातानुदेशः प्राप्नोति ? इत्याशङ्क्याह---शादिति प्रतिषेध इति । श्चुनेति तृतीयानिर्देशः पूर्वभूतेनापि योगे यथा स्यात्---यज्ञः, याच्ञेति । सप्तमीनिर्देशे तु `तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परभूतेनैव योगे स्यात् ।।

ष्टुना ष्टुः ।। 8.4.41 ।।

अट्टतीत्यादि । `अत्ट अतिक्रमणहिंसयोः', `अद्ड अभियोगे', तकारदकारोपधयोरेतयोर्गणपाठः क्विबन्तयोः संयोगान्तलोपे कृते तकारदकारयोः श्रवणार्थः, `न न्द्राः संयोगादयः' इति प्रतिषेधोऽप्यड्डतेर्भवति । इहापि तृतीयानिर्देशः पूर्वभूतेनापि योगे ष्टुत्वं यथा स्यात्, यथा---द्रोढेति । अत्रापि `तोः षि' इति प्रतिषेधान्निमित्तिनिमित्तयोः संख्यातानुदेशो न भवति ।

न पदान्ताट्टोरनाम् ।। 8.4.42 ।।

`अनाम्' इति षष्ठीबहुवचनस्यागतनुट्कस्य प्रतिषेधः । श्वलिट्साय इति । धुडभावपक्षे सकारस्य ष्टुत्वं प्राप्नोति । धुट्पक्षे तु चर्त्वस्यासिद्धत्वात्तस्यैव धकारस्येति ।

ईट्टे इति । `ईड् स्तुतौ', अदादिरनुदात्तेत् ।

षडधिका नवतिः षण्णवतिः । षण्णां नगराणां समाहारः षण्णगरी ।।

तोः षि ।। 8.4.43 ।।

`षि' इति सप्तमीर्निर्देशात् पूर्वभूतेनापि सन्निपाते भवत्येवलोष्टा, पेष्टेति ।।

शआत् ।। 8.4.44 ।।

प्रश्नः, विश्न इति । `यजयाच' इत्यादिना नङ्, `च्छ्वोः शूडनुनासिके च' इति छकारस्य शकारः । `सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति तैत्तिरीयके नायं प्रतिषेधो भवति---अयोऽश्ञाति । तत्रापि काठके भवत्येव---ब्रह्मचारिणे प्रश्नान् प्रोच्य प्रजिघाय । स्वाध्यायब्राह्मणे च भवतीति सकलं भद्रमश्नुते ।।

यरोऽनुनासिकेऽनुनासिको वा ।। 8.4.45 ।।

`पदान्तात्' इत्यनुवृत्तं षष्ठ्यन्तं विपरिणम्यते । वाङ्मयमिति । `नित्यं वृद्धशरादिभ्यः' इति मयट् ।।

अचो रहाभ्यां द्वे ।। 8.4.46 ।।

अर्चयतेर्घञ्, कुत्वम्, अर्क्कः । मर्चिः सौत्रो धातुः, तस्मात् `इण्भीकापाशल्यतिमर्चिभ्यः कन्', `चोः कुः' इति कुत्वम्---मर्क्कः । अत्राकारादनन्तरो रेफः, तस्मादपि ककारः । एवमुत्तरेष्वपि द्रष्टव्यम् ।।

अनचि च ।। 8.4.47 ।।

अनच्परस्येति । अचोऽन्योऽनच्, स परो यस्मात्सोऽनच्परः । अनेन पर्युदासो दशितः, किं प्रयोजनम् ? न किञ्चित्, प्रत्युत दोष एव, अवसाने न सिध्यति---वाक्क, अच्सदृशस्य वर्णान्तरस्याभावात्, प्रतिपत्तिगौरवप्रसङ्गात्पर्युदास आश्रितः । पक्षान्तरे हि विशेषप्रतिषेधात् सामान्येन विधिरनुमेयः स्यादिति गौरवम् ।

उल्क्का, वल्म्मीक इति । लकारो यण्, ककारमकारौ यमौ ।
स्त्थालीति सकारः शर, थकारः खय् । वत्स्सादिषु तकारककारपकाराः खयः, सकारषकारौ शरौ ।
अवसाने इति । पर्युदासाश्रयणादिदमारब्धम् । प्रसज्यप्रतिषेधे तु परस्य निमित्तस्यानाश्रयणाद् `वा' इत्यधिकारात्सिद्धम् ।।
नादिन्याक्रोशे पुत्त्रस्य ।। 8.4.48 ।।
पुत्रादिनीति । ताच्छील्ये णिनिः ।
तत्परे चेति । स आदिनीशब्दो यस्मात्परस्तत्रापि परतः पुत्त्रशब्दस्य द्विर्वचनं न भवति---पुत्राश्च पौत्राश्च पुत्रपौत्राः, तानत्तुं शीलमस्याः पुत्रपौत्रादिनी ।
अन्ये तु `तत्परे पुत्रशब्दे' इति व्याचक्षाणाः पुत्रपुत्रादिनीत्युदाहरन्ति, तत्र पुत्रस्य पुत्रमत्तीति विग्रहः ।
वा हतजग्धपर इति । हतजग्धं च तत्परं चेति विशेषणसमासः, राजदन्तादित्वात् परशब्दस्य परनिपातः । पुत्रहतीति । पुत्रो हतोऽनयेति बहुव्रीहिः, `अस्वाङ्गपूर्वपदाद्वा' इति ङीष् ।
खयो द्वितीया इति । `खयः' इति षष्ठी । द्वितीया इति । वर्गेषु खकारादयः ।।
शरोऽचि ।। 8.4.49 ।।
आदर्श इति । दृशेरधिकरणे घञ् । दर्श इति । अत्राप्यधिकरणे घञ् । विपरीतलक्षणा चेयम्---न दृश्यतेऽस्मिंश्चन्द्रमा इति दर्श इति ।।
त्रिप्रभृतिषु शाकटायनस्य ।। 8.4.50 ।।
इन्द्र इत्यादौ नकारदकारयोर्द्विर्वचनाभावः । भ्राष्ट्रमिति । `दीर्घादाचार्याणाम्' इत्यस्यासिद्धत्वात् । त्रिप्रभृतिष्वयमेव प्रतिषेधो भवतीति मन्यते ।।
सर्वत्र शाकल्यस्य ।। 8.4.51 ।।
अत्रिप्रभृत्यर्थोऽयमारम्भः ।।
दीर्घादाचार्याणाम् ।। 8.4.52 ।।
दात्रमित्यादौ `अनचि च' इति प्राप्तिः ।।
झलां जश् झशि ।। 8.4.53 ।।
उदाहरणेषु भ-घ-धानां ब-ग-दाः ।।
अभ्यासे चर्च ।। 8.4.54 ।।
चिखनिषतीति । खनेः सन्, द्विर्वचनम्, `कुहोश्चुः' इति चुत्वम्---छकारः, तस्य चर्त्वम्---चकारः । टिठकारयिषतीति । ठकारमाचष्ट इति णिच्, टिलोपः, सन्, ठकारस्य टकारः । तिष्ठासतीति । `शर्पूर्वाः खयः' इति थकारस्य शेषः, तस्य चर्त्वं तकारः ।
प्रकृतिश्चां प्रकृतिचर इति । जश्त्वबाधनार्थं पर्जन्यवल्लक्षणप्रवृत्त्या प्रकृतिरूपाश्चरः स्थानिनाऽभिन्नरूपा भवन्तीत्यर्थः । एतच्चान्तरतमपरिभाषया लभ्यते ।
प्रकृतिजशां प्रकृतिजश इति । व्याख्यातम् । डिड्य इति । डीङो लिटि द्विर्वचने `एरनेकाचः' इति यण् ।।
खरि च ।। 8.4.55 ।।
युयुत्सत इति । युधेः सन्, धकारस्य तकारः । आरिप्सते, आलिप्सत इति । रभिलभ्योः `सनि मीमाघु' इत्यादिना अच इस्, `स्कोः संयोगाद्योः' इति सलोपः, भकारस्य पकारः ।।
वावसाने ।। 8.4.56 ।।
`झलां जशोऽन्ते' इति नित्ये जश्त्वे प्राप्ते चर्त्वं विधीयते, वावचनात् पक्षे सोऽपि भवति ।।
अणोऽप्रगृह्यस्यानुनासिकः ।। 8.4.57 ।।
`अणः' इति पूर्वेण णकारेण प्रत्याहरः । अग्नी, वायू इति । `ईदूदेत्' इति प्रगृह्यसंज्ञा ।।
अनुस्वारस्य ययि परसवर्णः ।। 8.4.58 ।।
शङ्कितेत्यादि । `शकि सङ्कायाम्', `उछि उञ्छे', `कुडि दाहे', `टुनदि समृद्धौ', `कपि चलने', इदत्त्वान्नुम्, `नश्चापदान्तस्य झलि' इत्यनुस्वारः, तस्य ककारादिषु परतो यथासंख्यं परसवर्णा वर्गपञ्चमाङकारादयः ।
कुर्वन्ति, कृषन्तीत्यत्र झेरन्तादेशे नकारस्य णत्वं प्राप्नोति, तत्कस्मान्न भवति ? इत्याह---इहेति । णत्वमनुस्वारात्पूर्वं न भवति, यस्माण्णत्वस्यासिद्धत्वात् पूर्वमनुस्वार एव क्रियते, पश्चादपि न भवति, अनुस्वारस्थानिकस्यास्य परसवर्णस्य णत्वे कर्त्तव्ये असिद्धत्वात् । परसवर्णेनेति । परसवर्णार्थेन शास्त्रेणेत्यर्थः । एवमित्यादि । अनुस्वारीभूतो णत्वमतिक्रामतीति भाष्ये यदुक्तं तदेवमुक्तप्रकारेणेत्यर्थः ।।
वा पदान्तस्य ।। 8.4.59 ।।
तङ्क्थमित्यादि । ककारादिषु परतो ङकारादयः क्रमेण भवन्ति ।।
तोर्लि ।। 8.4.60 ।।
अत्र तकारस्य शुद्धो लकारः, नकारस्यानुनासिकः ।।

उदः स्थास्तम्भोः पूर्वस्य ।। 8.4.61 ।।
परसवर्ण इति समस्तमपि सवर्णग्रहणमिह निष्कृष्य सम्बद्ध्यते । उत्थातेति । सकारस्य पूर्वसवर्णस्तकारः । अन्ये तु बाह्यप्रयत्नसाम्यात् थकारमिच्छन्ति । तत्र तखाराद्वयस्य श्रवणम् । न च पूर्वस्य चर्त्त्वम्; तत्र कर्त्तव्येऽस्य पूर्वसवर्णस्यासिद्वत्वात् ।
रोगे चेति वक्तव्यमिति । इदमविशेषेण छन्दसि, भाषायां च ।।
झयो होऽन्यतरस्याम् ।। 8.4.62 ।।
उदाहरणेषु हकारस्य महाप्राणस्य सोष्मणो घोषवतस्तादृश एवं घकारादयश्चतुर्था भवन्ति ।।
शश्छोऽटि ।। 8.4.63 ।।
शश्छोऽमीतीति । अटीत्यपनीयामीति वक्तव्यमित्यर्थः । तच्छ्लोकेन, तच्छ्मश्रुणेति अत्र लकारमकारपरस्यापि शकारस्य भवति ।।
हलो यमां याम लोपः ।। 8.4.64 ।।
द्वौ यकाराविति । एकः `संज्ञायां समज' इत्यादिना विहितस्य क्यपः सम्बन्धी, द्वितीयः `अयङ्यि क्ङिति' इत्ययङादेशस्य । क्रमजस्तृतीय इति । क्रमः=आनुपूर्वी, ततो जातः क्रमजः, स च पुनः `अनचि च' इति द्विर्वचनेन सम्पादितः । तकारात्पर एको यकार इति । `दित्यदित्यादित्य' इत्यादिना विहितस्य ण्यस्य सम्बन्धी । द्वौ यकाराविति । एकोऽदितिशब्दात्परस्य ण्यस्य सम्बन्धी, द्वितीय आदित्यशब्दात् ।
अन्नमिति । भवत्यं नकारो यम्, यम्परश्च, न तु हलः परः । अर्ध्यमिति । `पादार्घाभ्यां च' इति तादर्थ्ये यत्, भवत्ययं घकारोरेफाद्धलः परोयम्परश्च, न तु यम् । शाङ्र्गमिति । श्रृङ्गस्य विकार इत्यण्, ऋकारस्य रपरा वृद्धिः, अत्र ङकारो यम् भवति हलख्च परः, न तु यम्परः । ननु च बहिरङ्गा वृद्धिः, ततः किम् ? हलः परो न भवति ? लोपोऽपि बहिरङ्गः; अनेकनिमित्तापेक्षत्वात् ।
झरो झरि सवर्णे ।। 8.4.65 ।।
त्रयस्तकारा इति । `अच उपसर्गात्तः' इत्याकारस्य तकारः, तकारस्यापि चर्त्वं तकारः; एकः प्रत्ययसम्बन्धी, `अनचि च' इति द्विर्वचने क्रमजश्चतुर्थः । चत्वारस्तकारा इति । पूर्वोक्तास्त्रयः, चतुर्थो रुच्छब्दसम्बन्धी, पञ्चमो द्विर्वचनेन सम्पादितः । मरुच्छब्दस्योपसंख्यानसामर्थ्यादिति । एतच्च `मरुच्छब्दस्योपसंख्यानम्' इत्यत्रैव प्रतिपादितम् ।
शार्ङ्गिन्निति । भवत्ययं ङकारो हलः परः झरि सवर्णे परतः, न त्वयं झरिति न लुप्यते । प्रिययञ्च्ञेति । प्रियाः पञ्चास्येति बहुव्रीहिः, `वा प्रियस्य' इति प्रियशब्दपूर्वनिपातस्तृतीयैकवचनम्, अल्लोपः, नकारस्य श्चुत्वम्---ञकारः । भवत्ययं चकारो हलः परः स्वयं च झर् सवर्णे च परतः, न तु ञकारो झरिति न लुप्यते । ननु चाल्लोपस्य स्थानिवत्त्वादनन्तरो न भवति सवर्णः, तत्किमेतन्निवृत्त्यर्थेन `झरि' इत्यनेन ? इत्यत आह---अल्लोपस्येति ।
तर्प्तेति । `तृप प्रीणने', पकारस्य तकारः स्थानेभेदात्सवर्णो न भवति । ननु च निमित्तानां कायिणां च संख्यासामान्यादिह संख्यातानुदेशे सति नैव तप्तेत्यत्र लोपः प्राप्नोति, तत्किमेतन्निवृत्त्यर्थेन सवर्णग्रहणेन ? अत आह---सवर्णग्रहणसामर्थ्यादिति । न हि यथासंख्येऽसवर्णे झरस्ति, यद्व्यावृत्त्यर्थं सवर्णग्रहणं स्यात् । शिण्ढि, पिण्ढीति । `शिष्लृ विशेषणे', `पिष्लृ सञ्चूर्णने'---रुधादी, लोट्, सेर्हिः, `श्नसोरल्लोपः', हेर्धिः, `झलां जश् झशि' इति षकारस्य डकारः, `नश्चापदान्तस्य झलि' इत्यनुस्वारः, तस्य परसवर्णो णकारः, धकारस्य ष्टुत्वम्---ढकारः, अनेन डकारस्य ढकारे लोपः ।।
उदात्तादनुदात्तस्य स्वरितः ।। 8.4.66 ।।
गार्ग्यः, वात्स्य इति । `गर्गादिभ्यो यञ्', ञित्त्वादाद्युदात्तत्वम्, शेषनिघातः, तस्य स्वरितः । पचति, पठतीति । शप्तिपावनुदात्तौ, धातुस्वरः, शबकारस्य स्वरितत्वम् ।
`तित्स्वरितम्' इत्यस्यानन्तरमिदं वक्तव्यम्, एवं हि स्वरितग्रहणं न कर्त्तव्यं भवति ? अत आह---अस्येति । यदि तत्र क्रियेत, `अनुदात्तं पदमेकवर्जम्' इत्येतत्प्रवर्तेत । इह तु करणे न प्रवर्त्ततेः स्वरितस्यासिद्धत्वात् । तेन द्वयोरप्युदात्तस्वरितयोः श्रवणं भवति ।।
नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ।। 8.4.67 ।।
उदात्तस्वरितावुदयौ यस्मादिति बहुव्रीहिः । उदयशब्दः प्रत्येकमभिसम्बध्यते, यदाह---उदात्तोदयस्येति । उदयशब्दः परशब्देन समानार्थः प्रातिशाख्येषु प्रसिद्धः । तत्रशब्दो लित्स्वरेणाद्युदात्तः, क्वशब्दः `किमोऽत्' इत्यत्प्रत्ययान्तस्तित्स्वरितः ।
उदात्तस्वरितपरस्येति वक्तव्य इति । एतदप्युपलक्षणम्, उदात्तस्वरितयोरित्येव वक्तव्यमिति, इत एव परशब्दार्थलाभात् । मङ्गलार्थमिति । उदयशब्दोच्चारणमेव मङ्गलम् । णङ्गलादीनि हि शास्त्राणि प्रथन्ते, मङ्गलमध्यानि मङ्गलान्तामि च वीरपुरुषाणि च भवन्ति आयुष्मत्पुरुषाणि च । इह चादौ वृद्धिशब्दः, मध्ये शिवशब्दः---`शिवशमरिष्टस्य करे' इति, अन्ते चायमुदयशब्दः ।।
अ अ ।। 8.4.68 ।।
एकोऽत्र विवृतः, परः संवृतः, द्वावप्यविभक्तिकौ, यो विवृतस्स स्थानी, यः संवृतः स आदेशः ।
किमर्थमकारस्याकारो विधीयते ? इत्याह---इहेति । कार्यार्थमिति । तत्पुनः कार्यमकारस्य दीर्घप्लुताभ्यां सवर्णसंज्ञा, अन्यथा प्रयत्नभेदान्न स्यात्, ततश्च ह्रस्वोऽकारो गृह्यमाणो दीर्घप्लुतौ न गृह्णीयात् । तत्र चदोषः---`अकः सवर्णे दीर्घः', इहैव स्याद्---ऐन्द्राग्नमिति, इह न स्यात्---दण्डाढकमिति ।
तस्मादेवमादिकार्यार्थमकार इह शास्त्रे विवृतः प्रतिज्ञायते, तत्र यदीयं प्रत्यापत्तिर्न क्रियेत, तदा तस्य तथाभूतस्यैव प्रयोगः स्यात्, स मा भूदिति

प्रत्यापत्तिरिह क्रियते ।
इह स्थान्यकारो विवृतोऽण्त्वात् सवर्णानां ग्राहक इति दीर्घप्लुतयोरपि स्थाने संवृतोऽकारः प्राप्नोति, आदेशस्त्वकारः संवृतोऽण् न भवतीति सवर्णानां ग्राहको न प्राप्नोति, भाव्यमानत्वात्; ततश्च यद्गुणः संवृत उच्चारितः, तद्गुण एवाष्टादशभेदभिन्नस्यापि अवर्णस्य प्राप्नोति ? इत्याशङ्क्याह---
दीर्घप्लुतयोश्चेति । इष्टिरेवेयम् । यद्वा---तपरनिर्देशात्सिद्धम्, `अद' इति सूत्रं कर्तव्यम्, तत्र तः परो यस्मादिति पूर्वोऽकारस्तपरः, तात्परस्तपर इति द्वितीयः, ततश्च स्थान्यकारो दीर्घप्लुतौ न ग्रहीष्यति, आदेशस्त्वनणपि गुणान्तरयुक्ताँस्तत्कालान् ग्रहीष्यति । एकशेषनिर्देशो वायं द्रष्टव्यः । अत्र षड् मात्रिका अकाराः स्थानिनो निर्दिश्यन्ते, आदेशा अपि षडेव, तत उभयत्रैकशेषः, तत्र षण्णां स्थानिनां निर्देशसामर्थ्यात् स्थानिभिर्दीर्घप्लुतौ भिन्नकालौ न गृह्येते । ततः षण्णां स्थानिनां स्थाने षडादेशाः संवृता यथासंख्यं भवन्तीति सर्वेष्टसिद्धिरिति शम् ।।
इति श्रीभट्टहरदत्तमिश्रविरचितायां पदमञ्जर्यामष्टमस्याध्यायस्य चतुर्थः पादः

Sutrapatha

०००१ १,१,००१ वृद्धिरादैच्

०००२ १,१,००२ अदेङ् गुणः

०००३ १,१,००३ इको गुणवृद्धी

०००४ १,१,००४ न धातुलोप आर्धधातुके

०००५ १,१,००५ क्क्ङिति च

०००६ १,१,००६ दीधीवेवीटाम्

०००७ १,१,००७ हलोनन्तराः संयोगः

०००८ १,१,००८ मुखनासिकावचनोनुनासिकः

०००९ १,१,००९ तुल्यास्यप्रयत्नम् सवर्णम्

००१० १,१,०१० नाज्झलौ

००११ १,१,०११ ईदूदेद्द्विवचनम् प्रगृह्यम्

००१२ १,१,०१२ अदसो मात्

००१३ १,१,०१३ शे

००१४ १,१,०१४ निपात एकाजनाङ्

००१५ १,१,०१५ ओत्

००१६ १,१,०१६ संबुद्धौ शाकल्यस्येतावनार्षे

००१७ १,१,०१७ उञः

००१८ १,१,०१८ ऊँ

००१९ १,१,०१९ ईदूतौ च सप्तम्यर्थे

००२० १,१,०२० दाधाघ्वदाप्

००२१ १,१,०२१ आद्यन्तवदेकस्मिन्

००२२ १,१,०२२ तरप्तमतौ घः

००२३ १,१,०२३ बहुगणवतुडति संख्या

००२४ १,१,०२४ ष्णान्ता षट्

००२५ १,१,०२५ डति च

००२६ १,१,०२६ क्तक्तवतू निष्ठा

००२७ १,१,०२७ सर्वादीनि सर्वनामानि

००२८ १,१,०२८ विभाषा दिक्समासे बहुव्रीहौ

००२९ १,१,०२९ न बहुव्रीहौ

००३० १,१,०३० तृतीया समासे

००३१ १,१,०३१ द्वन्द्वे च

००३२ १,१,०३२ विभाषा जसि

००३३ १,१,०३३ प्रथमचरमतयाल्पार्धकतिपयनेमाश्च

००३४ १,१,०३४ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्

००३५ १,१,०३५ स्वमज्ञाति धनाख्यायाम्

००३६ १,१,०३६ अन्तरम् बहिर्योगोपसंव्यानयोः

००३७ १,१,०३७ स्वरादिनिपातमव्ययम्

००३८ १,१,०३८ तद्धितश्चासर्वविभक्तिः

००३९ १,१,०३९ कृन्मेजन्तः

००४० १,१,०४० क्त्वातोसुन्कसुनः

००४१ १,१,०४१ अव्ययीभावश्च

००४२ १,१,०४२ शि सर्वनामस्थानम्

००४३ १,१,०४३ सुडनपुंसकस्य

००४४ १,१,०४४ न वेति विभाषा

००४५ १,१,०४५ इग्यणस्सम्प्रसारणम्

००४६ १,१,०४६ आद्यन्तौ टकितौ

००४७ १,१,०४७ मिदचोन्त्यात्परः

००४८ १,१,०४८ एच इग्घ्रस्वादेशे

००४९ १,१,०४९ षष्ठी स्थानेयोगा

००५० १,१,०५० स्थानेन्तरतमः

००५१ १,१,०५१ उरण्रपरः

००५२ १,१,०५२ अलोन्त्यस्य

००५३ १,१,०५३ ङिच्च

००५४ १,१,०५४ आदेः परस्य

००५५ १,१,०५५ अनेकाल्शित्सर्वस्य

००५६ १,१,०५६ स्थानिवदादेशोनल्विधौ

००५७ १,१,०५७ अचः परस्मिन् पूर्वविधौ

००५८ १,१,०५८ न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु

००५९ १,१,०५९ द्विर्वचनेचि

००६० १,१,०६० अदर्शनम् लोपः

००६१ १,१,०६१ प्रत्ययस्य लुक्श्लुलुपः

००६२ १,१,०६२ प्रत्ययलोपे प्रत्ययलक्षणम्

००६३ १,१,०६३ न लुमताङ्गस्य

००६४ १,१,०६४ अचोन्त्यादि टि

००६५ १,१,०६५ अलोन्त्यात्पूर्व उपधा

००६६ १,१,०६६ तस्मिन्निति निर्दिष्टे पूर्वस्य

००६७ १,१,०६७ तस्मादित्युत्तरस्य

००६८ १,१,०६८ स्वम् रूपम् शब्दस्याशब्दसंज्ञा

००६९ १,१,०६९ अणुदित्सवर्णस्य चाप्रत्ययः

००७० १,१,०७० तपरस्तत्कालस्य

००७१ १,१,०७१ आदिरन्त्येन सहेता

००७२ १,१,०७२ येन विधिस्तदन्तस्य

००७३ १,१,०७३ वृद्धिर्यस्याचामादिस्तद्वृद्धम्

००७४ १,१,०७४ त्यदादीनि च

००७५ १,१,०७५ एङ् प्राचाम् देशे

००७६ १,२,००१ गाङ्कुटादिभ्योञ्णिन्ङित्

००७७ १,२,००२ विज इट्

००७८ १,२,००३ विभाषोर्णोः

००७९ १,२,००४ सार्वधातुकमपित्

००८० १,२,००५ असंयोगाल्लिट्कित्

००८१ १,२,००६ इन्धिभवतिभ्याम् च

००८२ १,२,००७ मृडमृदगुधकुषक्लिशवदवसः क्त्वा

००८३ १,२,००८ रुदविदमुषग्रहिस्वपिप्रच्छः संश्च

००८४ १,२,००९ इको झल्

००८५ १,२,०१० हलन्ताच्च

००८६ १,२,०११ लिङ्सिचावात्मनेपदेषु

००८७ १,२,०१२ उश्च

००८८ १,२,०१३ वा गमः

००८९ १,२,०१४ हनस्सिच्

००९० १,२,०१५ यमो गन्धने

००९१ १,२,०१६ विभाषोपयमने

००९२ १,२,०१७ स्थाघ्वोरिच्च

००९३ १,२,०१८ न क्त्वा सेट्

००९४ १,२,०१९ निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः

००९५ १,२,०२० मृषस्तितिक्षायाम्

००९६ १,२,०२१ उदुपधाद्भावादिकर्मणोरन्यतरस्याम्

००९७ १,२,०२२ पूङः क्त्वा च

००९८ १,२,०२३ नोपधात्थफान्ताद्वा

००९९ १,२,०२४ वञ्चिलुञ्च्यृतश्च

०१०० १,२,०२५ तृषिमृषिकृशेः काश्यपस्य

०१०१ १,२,०२६ रलो व्युपधाद्धलादेस्संश्च

०१०२ १,२,०२७ ऊकालोज्झ्रस्वदीर्घप्लुतः

०१०३ १,२,०२८ अचश्च

०१०४ १,२,०२९ उच्चैरुदात्तः

०१०५ १,२,०३० नीचैरनुदात्तः

०१०६ १,२,०३१ समाहारः स्वरितः

०१०७ १,२,०३२ तस्यादित उदात्तमर्धह्रस्वम्

०१०८ १,२,०३३ एकश्रुति दूरात्संबुद्धौ

०१०९ १,२,०३४ यज्ञकर्मण्यजप-न्यूङ्ख-सामसु

०११० १,२,०३५ उच्चैस्तरां वा वषट्कारः

०१११ १,२,०३६ विभाषा छन्दसि

०११२ १,२,०३७ न सुब्रह्मण्यायाम् स्वरितस्य तूदात्तः

०११३ १,२,०३८ देवब्रह्मणोरनुदात्तः

०११४ १,२,०३९ स्वरितात्संहितायामनुदात्तानाम्

०११५ १,२,०४० उदात्तस्वरितपरस्य सन्नतरः

०११६ १,२,०४१ अपृक्त एकाल्प्रत्ययः

०११७ १,२,०४२ तत्पुरुषः समानाधिकरणः कर्मधारयः

०११८ १,२,०४३ प्रथमा निर्दिष्टं समास उपसर्जनम्

०११९ १,२,०४४ एकविभक्ति चापूर्वनिपाते

०१२० १,२,०४५ अर्थवदधातुरप्रत्ययः प्रातिपदिकम्

०१२१ १,२,०४६ कृत्तद्धित समासाश्च

०१२२ १,२,०४७ ह्रस्वो नपुंसके प्रातिपदिकस्य

०१२३ १,२,०४८ गोस्त्रियोरुपसर्जनस्य

०१२४ १,२,०४९ लुक्तद्धितलुकि

०१२५ १,२,०५० इद्गोण्याः

०१२६ १,२,०५१ लुपि युक्तवद्व्यक्ति वचने

०१२७ १,२,०५२ विशेषणानां चाजातेः

०१२८ १,२,०५३ तदशिष्यं संज्ञा प्रमाणत्वात्

०१२९ १,२,०५४ लुब्योगाप्रख्यानात्

०१३० १,२,०५५ योगप्रमाणे च तदभावेऽदर्शनम् स्यात्

०१३१ १,२,०५६ प्रधानप्रत्ययार्थवचनं अर्थस्यान्यप्रमाणत्वात्

०१३२ १,२,०५७ कालोपसर्जने च तुल्यम्

०१३३ १,२,०५८ जात्याख्यायाम् एकस्मिन् बहुवचनमन्यतरस्याम्

०१३४ १,२,०५९ अस्मदो द्वयोश्च

०१३५ १,२,०६० फल्गुनी प्रोष्ठपदानां च नक्षत्रे

०१३६ १,२,०६१ छन्दसि पुनर्वस्वोरेकवचनम्

०१३७ १,२,०६२ विशाखयोश्च

०१३८ १,२,०६३ तिष्य पुनर्वस्वोर्नक्षत्र द्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्

०१३९ १,२,०६४ सरूपाणामेकशेष एकविभक्तौ

०१४० १,२,०६५ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः

०१४१ १,२,०६६ स्त्री पुंवच्च

०१४२ १,२,०६७ पुमान् स्त्रिया

०१४३ १,२,०६८ भ्रातृपुत्रौ स्वसृदुहितृभ्याम्

०१४४ १,२,०६९ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्

०१४५ १,२,०७० पिता मात्रा

०१४६ १,२,०७१ श्वशुरः श्वश्र्वा

०१४७ १,२,०७२ त्यदादीनि सर्वैर्नित्यम्

०१४८ १,२,०७३ ग्राम्यपशु संघेष्वतरुणेषु स्त्री

०१४९ १,३,००१ भूवादयो धातवः

०१५० १,३,००२ उपदेशेऽजनुनासिक इत्

०१५१ १,३,००३ हलन्त्यम्

०१५२ १,३,००४ न विभक्तौ तुस्माः

०१५३ १,३,००५ आदिर्ञिटुडवः

०१५४ १,३,००६ षः प्रत्ययस्य

०१५५ १,३,००७ चुटू

०१५६ १,३,००८ लशक्वतद्धिते

०१५७ १,३,००९ तस्य लोपः

०१५८ १,३,०१० यथासंख्यमनुदेशः समानाम्

०१५९ १,३,०११ स्वरितेनाधिकारः

०१६० १,३,०१२ अनुदात्तङित आत्मनेपदम्

०१६१ १,३,०१३ भावकर्मणोः

०१६२ १,३,०१४ कर्तरि कर्मव्यतिहारे

०१६३ १,३,०१५ न गतिहिंसार्थेभ्यः

०१६४ १,३,०१६ इतरेतरान्योन्योपपदाच्च

०१६५ १,३,०१७ नेर्विशः

०१६६ १,३,०१८ परिव्यवेभ्यः क्रियः

०१६७ १,३,०१९ विपराभ्यां जेः

०१६८ १,३,०२० आङोदोऽनास्य विहरणे

०१६९ १,३,०२१ क्रीडोऽनुसंपरिभ्यश्च

०१७० १,३,०२२ समवप्रविभ्यः स्थः

०१७१ १,३,०२३ प्रकाशन स्थेयाख्ययोश्च

०१७२ १,३,०२४ उदोऽनूर्ध्व कर्मणि

०१७३ १,३,०२५ उपान्मन्त्रकरणे

०१७४ १,३,०२६ अकर्मकाच्च

०१७५ १,३,०२७ उद्विभ्याम् तपः

०१७६ १,३,०२८ आङो यमहनः

०१७७ १,३,०२९ समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः

०१७८ १,३,०३० निसमुपविभ्यो ह्वः

०१७९ १,३,०३१ स्पर्धायामाङः

०१८० १,३,०३२ गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः

०१८१ १,३,०३३ अधेः प्रसहने

०१८२ १,३,०३४ वेः शब्दकर्मणः

०१८३ १,३,०३५ अकर्मकाच्च

०१८४ १,३,०३६ संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः

०१८५ १,३,०३७ कर्तृस्थे चाशरीरे कर्मणि

०१८६ १,३,०३८ वृत्तिसर्गतायनेषु क्रमः

०१८७ १,३,०३९ उपपराभ्याम्

०१८८ १,३,०४० आङ उद्गमने

०१८९ १,३,०४१ वेः पादविहरणे

०१९० १,३,०४२ प्रोपाभ्याम् समर्थाभ्याम्

०१९१ १,३,०४३ अनुपसर्गाद्वा

०१९२ १,३,०४४ अपह्नवे ज्ञः

०१९३ १,३,०४५ अकर्मकाच्च

०१९४ १,३,०४६ संप्रतिभ्यामनाध्याने

०१९५ १,३,०४७ भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः

०१९६ १,३,०४८ व्यक्तवाचाम् समुच्चारणे

०१९७ १,३,०४९ अनोरकर्मकात्

०१९८ १,३,०५० विभाषा विप्रलापे

०१९९ १,३,०५१ अवाद्ग्रः

०२०० १,३,०५२ समः प्रतिज्ञाने

०२०१ १,३,०५३ उदश्चरः सकर्मकात्

०२०२ १,३,०५४ समस्तृतीयायुक्तात्

०२०३ १,३,०५५ दाणश्च साचेच्चतुर्थ्यर्थे

०२०४ १,३,०५६ उपाद्यमः स्वकरणे

०२०५ १,३,०५७ ज्ञाश्रुस्मृदृशाम् सनः

०२०६ १,३,०५८ नानोर्ज्ञः

०२०७ १,३,०५९ प्रत्याङ्भ्याम् श्रुवः

०२०८ १,३,०६० शदेः शितः

०२०९ १,३,०६१ म्रियतेर्लुङ्लिङोश्च

०२१० १,३,०६२ पूर्ववत् सनः

०२११ १,३,०६३ आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य

०२१२ १,३,०६४ प्रोपाभ्याम् युजेरयज्ञपात्रेषु

०२१३ १,३,०६५ समः क्ष्णुवः

०२१४ १,३,०६६ भुजोऽनवने

०२१५ १,३,०६७ णेरणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने

०२१६ १,३,०६८ भीस्म्योर्हेतुभये

०२१७ १,३,०६९ गृधिवञ्च्योः प्रलम्भने

०२१८ १,३,०७० लियः संमानन शालिनीकरणयोश्च

०२१९ १,३,०७१ मिथ्योपपदात्कृञोऽभ्यासे

०२२० १,३,०७२ स्वरितञितः कर्त्रभिप्राये क्रियाफले

०२२१ १,३,०७३ अपाद्वदः

०२२२ १,३,०७४ णिचश्च

०२२३ १,३,०७५ समुदाङ्भ्यः यमोऽग्रन्थे

०२२४ १,३,०७६ अनुपसर्गाज्ज्ञः

०२२५ १,३,०७७ विभाषोपपदेन प्रतीयमाने

०२२६ १,३,०७८ शेषात्कर्तरि परस्मैपदम्

०२२७ १,३,०७९ अनुपराभ्याम् कृञः

०२२८ १,३,०८० अभिप्रत्यतिभ्यः क्षिपः

०२२९ १,३,०८१ प्राद्वहः

०२३० १,३,०८२ परेर्मृषः

०२३१ १,३,०८३ व्याङ्परिभ्यो रमः

०२३२ १,३,०८४ उपाच्च

०२३३ १,३,०८५ विभाषाऽकर्मकात्

०२३४ १,३,०८६ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः

०२३५ १,३,०८७ निगरण चलनार्थेभ्यः

०२३६ १,३,०८८ अणावकर्मकाच्चित्तवत्कर्तृकात्

०२३७ १,३,०८९ न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः

०२३८ १,३,०९० वा क्यषः

०२३९ १,३,०९१ द्युद्भ्यो लुङि

०२४० १,३,०९२ वृद्भ्यः स्यसनोः

०२४१ १,३,०९३ लुटि च किपः

०२४२ १,४,००१ आकडारादेका संज्ञा

०२४३ १,४,००२ विप्रतिषेधे परं कार्यम्

०२४४ १,४,००३ यू स्त्र्याख्यौ नदी

०२४५ १,४,००४ नेयङुवङ्स्थानावस्त्री

०२४६ १,४,००५ वाऽमि

०२४७ १,४,००६ ङिति ह्रस्वश्च

०२४८ १,४,००७ शेषो घ्यसखि

०२४९ १,४,००८ पतिः समास एव

०२५० १,४,००९ षष्ठीयुक्तश्छन्दसि वा

०२५१ १,४,०१० ह्रस्वं लघु

०२५२ १,४,०११ संयोगे गुरु

०२५३ १,४,०१२ दीर्घं च

०२५४ १,४,०१३ यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्

०२५५ १,४,०१४ सुप्तिङन्तम् पदम्

०२५६ १,४,०१५ नः क्ये

०२५७ १,४,०१६ सिति च

०२५८ १,४,०१७ स्वादिष्वसर्वनामस्थाने

०२५९ १,४,०१८ यचि भम्

०२६० १,४,०१९ तसौ मत्वर्थे

०२६१ १,४,०२० अयस्मयादीनि छन्दसि

०२६२ १,४,०२१ बहुषु बहुवचनम्

०२६३ १,४,०२२ द्व्येकयोर्द्विवचनैकवचने

०२६४ १,४,०२३ कारके

०२६५ १,४,०२४ ध्रुवमपायेऽपादानम्

०२६६ १,४,०२५ भीत्रार्थानाम् भयहेतुः

०२६७ १,४,०२६ पराजेरसोढः

०२६८ १,४,०२७ वारणार्थानाम् ईप्सितः

०२६९ १,४,०२८ अन्तर्धौ येनादर्शनमिच्छति

०२७० १,४,०२९ आख्यातोपयोगे

०२७१ १,४,०३० जनिकर्तुः प्रकृतिः

०२७२ १,४,०३१ भुवः प्रभवः

०२७३ १,४,०३२ कर्मणा यमभिप्रैति स संप्रदानम्

०२७४ १,४,०३३ रुच्यर्थानाम् प्रीयमाणः

०२७५ १,४,०३४ श्लाघह्नुङ्स्थाशपाम् ज्ञीप्स्यमानः

०२७६ १,४,०३५ धारेरुत्तमर्णः

०२७७ १,४,०३६ स्पृहेरीप्सितः

०२७८ १,४,०३७ क्रुधद्रुहेर्ष्याऽसूयार्थानाम् यं प्रति कोपः

०२७९ १,४,०३८ क्रुधद्रुहोरुपसृष्टयोः कर्म

०२८० १,४,०३९ राधीक्ष्योर्यस्य विप्रश्नः

०२८१ १,४,०४० प्रत्याङ्भ्याम् श्रुवः पूर्वस्य कर्ता

०२८२ १,४,०४१ अनुप्रतिगृणश्च

०२८३ १,४,०४२ साधकतमम् करणम्

०२८४ १,४,०४३ दिवः कर्म च

०२८५ १,४,०४४ परिक्रयणे संप्रदानमन्यतरस्याम्

०२८६ १,४,०४५ आधारोऽधिकरणम्

०२८७ १,४,०४६ अधिशीङ्स्थासाम् कर्म

०२८८ १,४,०४७ अभिनिविशश्च

०२८९ १,४,०४८ उपान्वध्याङ्वसः

०२९० १,४,०४९ कर्तुः ईप्सिततमम् कर्म

०२९१ १,४,०५० तथायुक्तं चानीप्सितम्

०२९२ १,४,०५१ अकथितम् च

०२९३ १,४,०५२ गतिबुद्धिप्रत्यवसानार्थ शब्दकर्माकर्मकाणामणि कर्ता स णौ

०२९४ १,४,०५३ हक्रोरन्यतरस्याम्

०२९५ १,४,०५४ स्वतन्त्रः कर्ता

०२९६ १,४,०५५ तत्प्रयोजको हेतुश्च

०२९७ १,४,०५६ प्राग्रीश्वरान्निपाताः

०२९८ १,४,०५७ चादयोऽसत्त्वे

०२९९ १,४,०५८ प्रादयः

०३०० १,४,०५९ उपसर्गाः क्रियायोगे

०३०१ १,४,०६० गतिश्च

०३०२ १,४,०६१ ऊर्यादि च्वि डाचश्च

०३०३ १,४,०६२ अनुकरणञ्चानितिपरम्

०३०४ १,४,०६३ आदरानादरयोः सदसती

०३०५ १,४,०६४ भूषणेऽलम्

०३०६ १,४,०६५ अन्तरपरिग्रहे

०३०७ १,४,०६६ कणेमनसी श्रद्धाप्रतीघाते

०३०८ १,४,०६७ पुरोऽव्ययम्

०३०९ १,४,०६८ अस्तं च

०३१० १,४,०६९ अच्छ गत्यर्थवदेषु

०३११ १,४,०७० अदोऽनुपदेशे

०३१२ १,४,०७१ तिरोऽन्तर्धौ

०३१३ १,४,०७२ विभाषा कृञि

०३१४ १,४,०७३ उपाजेऽन्वाजे

०३१५ १,४,०७४ साक्षात्प्रभृतीनि च

०३१६ १,४,०७५ अनत्याधान उरसिमनसी

०३१७ १,४,०७६ मध्ये पदे निवचने च

०३१८ १,४,०७७ नित्यम् हस्ते पाणावुपयमने

०३१९ १,४,०७८ प्राध्वम् बन्धने

०३२० १,४,०७९ जीविकोपनिषदावौपम्ये

०३२१ १,४,०८० ते प्राग्धातोः

०३२२ १,४,०८१ छन्दसि परेऽपि

०३२३ १,४,०८२ व्यवहिताश्च

०३२४ १,४,०८३ कर्मप्रवचनीयाः

०३२५ १,४,०८४ अनुर्लक्षणे

०३२६ १,४,०८५ तृतीयार्थे

०३२७ १,४,०८६ हीने

०३२८ १,४,०८७ उपोऽधिके च

०३२९ १,४,०८८ अपपरी वर्जने

०३३० १,४,०८९ आङ् मर्यादावचने

०३३१ १,४,०९० लक्षणेत्थम्भूताख्यान भाग वीप्सासु प्रतिपर्यनवः

०३३२ १,४,०९१ अभिरभागे

०३३३ १,४,०९२ प्रतिः प्रतिनिधि प्रतिदानयोः

०३३४ १,४,०९३ अधिपरी अनर्थकौ

०३३५ १,४,०९४ सुः पूजायाम्

०३३६ १,४,०९५ अतिरतिक्रमणे च

०३३७ १,४,०९६ अपिः पदार्थ संभावनान्ववसर्ग गर्हा समुच्चयेषु

०३३८ १,४,०९७ अधिरीश्वरे

०३३९ १,४,०९८ विभाषा कृञि

०३४० १,४,०९९ लः परस्मैपदम्

०३४१ १,४,१०० तङानावात्मनेपदम्

०३४२ १,४,१०१ तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः

०३४३ १,४,१०२ तान्येकवचनद्विवचनबहुवचनान्येकशः

०३४४ १,४,१०३ सुपः

०३४५ १,४,१०४ विभक्तिश्च

०३४६ १,४,१०५ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः

०३४७ १,४,१०६ प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च

०३४८ १,४,१०७ अस्मद्युत्तमः

०३४९ १,४,१०८ शेषे प्रथमः

०३५० १,४,१०९ परः सन्निकर्षः संहिता

०३५१ १,४,११० विरामोऽवसानम्

०३५२ २,१,००१ समर्थः पदविधिः

०३५३ २,१,००२ सुबामन्त्रिते पराङ्गवत्स्वरे

०३५४ २,१,००३ प्राक्कडारात्समासः

०३५५ २,१,००४ सह सुपा

०३५६ २,१,००५ अव्ययीभावः

०३५७ २,१,००६ अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु

०३५८ २,१,००७ यथाऽसादृश्ये

०३५९ २,१,००८ यावदवधारणे

०३६० २,१,००९ सुप् प्रतिना मात्रार्थे

०३६१ २,१,०१० अक्षशलाकासंख्याः परिणा

०३६२ २,१,०११ विभाषा

०३६३ २,१,०१२ अपपरिबहिरनवः पञ्चम्या

०३६४ २,१,०१३ आङ् मर्यादाभिविध्योः

०३६५ २,१,०१४ लक्षणेनाभिप्रती आभिमुख्ये

०३६६ २,१,०१५ अनुर्यत्समया

०३६७ २,१,०१६ यस्य चायामः

०३६८ २,१,०१७ तिष्ठद्गुप्रभृतीनि च

०३६९ २,१,०१८ पारे मध्ये षष्ठ्या वा

०३७० २,१,०१९ संख्या वंश्येन

०३७१ २,१,०२० नदीभिश्च

०३७२ २,१,०२१ अन्यपदार्थे च संज्ञायाम्

०३७३ २,१,०२२ तत्पुरुषः

०३७४ २,१,०२३ द्विगुश्च

०३७५ २,१,०२४ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः

०३७६ २,१,०२५ स्वयं क्तेन

०३७७ २,२,०२६ खट्वा क्षेपे

०३७८ २,१,०२७ सामि

०३७९ २,१,०२८ कालाः

०३८० २,१,०२९ अत्यन्तसंयोगे च

०३८१ २,१,०३० तृतीया तत्कृतार्थेन गुणवचनेन

०३८२ २,१,०३१ पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः

०३८३ २,१,०३२ कर्तृ-करणे कृता बहुलम्

०३८४ २,१,०३३ कृत्यैरधिकार्थवचने

०३८५ २,१,०३४ अन्नेन व्यञ्जनम्

०३८६ २,१,०३५ भक्ष्येण मिश्रीकरणम्

०३८७ २,१,०३६ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः

०३८८ २,१,०३७ पञ्चमी भयेन

०३८९ २,१,०३८ अपेतापोढमुक्तपतितापत्रस्तैरल्पशः

०३९० २,१,०३९ स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन

०३९१ २,१,०४० सप्तमी शौण्डैः

०३९२ २,१,०४१ सिद्धशुष्कपक्वबन्धैश्च

०३९३ २,१,०४२ ध्वाङ्क्षेण क्षेपे

०३९४ २,१,०४३ कृत्यैर्ऋणे

०३९५ २,१,०४४ संज्ञायाम्

०३९६ २,१,०४५ क्तेनाहोरात्रावयवाः

०३९७ २,१,०४६ तत्र

०३९८ २,१,०४७ क्षेपे

०३९९ २,१,०४८ पात्रेसमितादयश्च

०४०० २,१,०४९ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन

०४०१ २,१,०५० दिक्संख्ये संज्ञायाम्

०४०२ २,१,०५१ तद्धितार्थोत्तरपदसमाहारे च

०४०३ २,१,०५२ संख्यापूर्वो द्विगुः

०४०४ २,१,०५३ कुत्सितानि कुत्सनैः

०४०५ २,१,०५४ पापाणके कुत्सितैः

०४०६ २,१,०५५ उपमानानि सामान्यवचनैः

०४०७ २,१,०५६ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे

०४०८ २,१,०५७ विशेषणं विशेष्येण बहुलम्

०४०९ २,१,०५८ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च

०४१० २,१,०५९ श्रेण्यादयः कृतादिभिः

०४११ २,१,०६० क्तेन नञ्विशिष्टेनानञ्

०४१२ २,१,०६१ सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः

०४१३ २,१,०६२ वृन्दारकनागकुञ्जरैः पूज्यमानम्

०४१४ २,१,०६३ कतरकतमौ जातिपरिप्रश्ने

०४१५ २,१,०६४ किं क्षेपे

०४१६ २,१,०६५ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः

०४१७ २,१,०६६ प्रशंसावचनैश्च

०४१८ २,१,०६७ युवा खलतिपलितवलिनजरतीभिः

०४१९ २,१,०६८ कृत्यतुल्याख्या अजात्या

०४२० २,१,०६९ वर्णो वर्णेन

०४२१ २,१,०७० कुमारः श्रमणादिभिः

०४२२ २,१,०७१ चतुष्पादो गर्भिण्या

०४२३ २,१,०७२ मयूरव्यंसकादयश्च

०४२४ २,२,००१ पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे

०४२५ २,२,००२ अर्धं नपुंसकम्

०४२६ २,२,००३ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्

०४२७ २,२,००४ प्राप्तापन्ने च द्वितीयया

०४२८ २,२,००५ कालाः परिमाणिना

०४२९ २,२,००६ नञ्

०४३० २,२,००७ ईषदकृता

०४३१ २,२,००८ षष्ठी

०४३२ २,२,००९ याजकादिभिश्च

०४३३ २,२,०१० न निर्धारणे

०४३४ २,२,०११ पूरणगुणसुहितार्थसदव्ययतव्य समानाधिकरणेन

०४३५ २,२,०१२ क्तेन च पूजायाम्

०४३६ २,२,०१३ अधिकरणवाचिना च

०४३७ २,२,०१४ कर्मणि च

०४३८ २,२,०१५ तृजकाभ्यां कर्तरि

०४३९ २,२,०१६ कर्तरि च

०४४० २,२,०१७ नित्यं क्रीडाजीविकयोः

०४४१ २,२,०१८ कुगतिप्रादयः

०४४२ २,२,०१९ उपपदमतिङ्

०४४३ २,२,०२० अमैवाव्ययेन

०४४४ २,२,०२१ तृतीयाप्रभृतीन्यन्यतरस्याम्

०४४५ २,२,०२२ क्त्वा च

०४४६ २,२,०२३ शेषो बहुव्रीहिः

०४४७ २,२,०२४ अनेकमन्यपदार्थे

०४४८ २,२,०२५ संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये

०४४९ २,२,०२६ दिङ्नामान्यन्तराले

०४५० २,२,०२७ तत्र तेनेदमिति सरूपे

०४५१ २,२,०२८ तेन सहेति तुल्ययोगे

०४५२ २,२,०२९ चार्थे द्वन्द्वः

०४५३ २,२,०३० उपसर्जनं पूर्वम्

०४५४ २,२,०३१ राजदन्तादिषु परम्

०४५५ २,२,०३२ द्वन्द्वे घि

०४५६ २,२,०३३ अजाद्यदन्तम्

०४५७ २,२,०३४ अल्पाच्तरम्

०४५८ २,२,०३५ सप्तमीविशेषणे बहुव्रीहौ

०४५९ २,२,०३६ निष्ठा

०४६० २,२,०३७ वाहिताग्न्यादिषु

०४६१ २,२,०३८ कडाराः कर्मधारये

०४६२ २,३,००१ अनभिहिते

०४६३ २,३,००२ कर्मणि द्वितीया

०४६४ २,३,००३ तृतीया च होश्छन्दसि

०४६५ २,३,००४ अन्तरान्तरेण युक्ते

०४६६ २,३,००५ कालाध्वनोरत्यन्तसंयोगे

०४६७ २,३,००६ अपवर्गे तृतीया

०४६८ २,३,००७ सप्तमीपञ्चम्यौ कारकमध्ये

०४६९ २,३,००८ कर्मप्रवचनीययुक्ते द्वितीया

०४७० २,३,००९ यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी

०४७१ २,३,०१० पञ्चम्यपाङ्परिभिः

०४७२ २,३,०११ प्रतिनिधि-प्रतिदाने च यस्मात्

०४७३ २,३,०१२ गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि

०४७४ २,३,०१३ चतुर्थी संप्रदाने

०४७५ २,३,०१४ क्रियार्थोपपदस्य च कर्मणि स्थानिनः

०४७६ २,३,०१५ तुमर्थाच्च भाववचनात्

०४७७ २,३,०१६ नमः स्वस्ति स्वाहास्वधालंवषड्योगाच्च

०४७८ २,३,०१७ मन्यकर्मण्यनादरे विभाषाऽप्राणिषु

०४७९ २,३,०१८ कर्तृकरणयोस्तृतीया

०४८० २,३,०१९ सहयुक्तेऽप्रधाने

०४८१ २,३,०२० येनाङ्गविकारः

०४८२ २,३,०२१ इत्थंभूतलक्षणे

०४८३ २,३,०२२ संज्ञोऽन्यतरस्यां कर्मणि

०४८४ २,३,०२३ हेतौ

०४८५ २,३,०२४ अकर्तर्यृणे पञ्चमी

०४८६ २,३,०२५ विभाषा गुणेऽस्त्रियाम्

०४८७ २,३,०२६ षष्ठी हेतुप्रयोगे

०४८८ २,३,०२७ सर्वनाम्नस्तृतीया च

०४८९ २,३,०२८ अपादाने पञ्चमी

०४९० २,३,०२९ अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहि-युक्ते

०४९१ २,३,०३० षष्ठ्यतसर्थप्रत्ययेन

०४९२ २,३,०३१ एनपा द्वितीया

०४९३ २,३,०३२ पृथग्विनानानाभिस्तृतीयान्यतरस्याम्

०४९४ २,३,०३३ करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य

०४९५ २,३,०३४ दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्

०४९६ २,३,०३५ दूरान्तिकार्थेभ्यो द्वितीया च

०४९७ २,३,०३६ सप्तम्यधिकरणे च

०४९८ २,३,०३७ यस्य च भावेन भावलक्षणम्

०४९९ २,३,०३८ षष्ठी चानादरे

०५०० २,३,०३९ स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च

०५०१ २,३,०४० आयुक्तकुशलाभ्यां चासेवायाम्

०५०२ २,३,०४१ यतश्च निर्धारणम्

०५०३ २,३,०४२ पञ्चमी विभक्ते

०५०४ २,३,०४३ साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः

०५०५ २,३,०४४ प्रसितोत्सुकाभ्यां तृतीया च

०५०६ २,३,०४५ नक्षत्रे च लुपि

०५०७ २,३,०४६ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा

०५०८ २,३,०४७ सम्बोधने च

०५०९ २,३,०४८ सामन्त्रितम्

०५१० २,३,०४९ एकवचनं संबुद्धिः

०५११ २,३,०५० षष्ठी शेषे

०५१२ २,३,०५१ ज्ञोऽविदर्थस्य करणे

०५१३ २,३,०५२ अधीगर्थदयेशां कर्मणि

०५१४ २,३,०५३ कृञः प्रतियत्ने

०५१५ २,३,०५४ रुजार्थानां भाववचनानामज्वरेः

०५१६ २,३,०५५ आशिषि नाथः

०५१७ २,३,०५६ जासिनिप्रहणनाटक्राथपिषां हिंसायाम्

०५१८ २,३,०५७ व्यवहृपणोः समर्थयोः

०५१९ २,३,०५८ दिवस्तदर्थस्य

०५२० २,३,०५९ विभाषोपसर्गे

०५२१ २,३,०६० द्वितीया ब्राह्मणे

०५२२ २,३,०६१ प्रेष्यब्रुवोर्हविषोदेवतासंप्रदाने

०५२३ २,३,०६२ चतुर्थ्यर्थे बहुलं छन्दसि

०५२४ २,३,०६३ यजेश्च करणे

०५२५ २,३,०६४ कृत्वोऽर्थप्रयोगे कालेऽधिकरणे

०५२६ २,३,०६५ कर्तृकर्मणोः कृति

०५२७ २,३,०६६ उभयप्राप्तौ कर्मणि

०५२८ २,३,०६७ क्तस्य च वर्तमाने

०५२९ २,३,०६८ अधिकरणवाचिनश्च

०५३० २,३,०६९ न लोकाव्ययनिष्ठाखलर्थतृनाम्

०५३१ २,३,०७० अकेनोर्भविष्यदाधमर्ण्ययोः

०५३२ २,३,०७१ कृत्यानां कर्तरि वा

०५३३ २,३,०७२ तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्

०५३४ २,३,०७३ चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः

०५३५ २,४,००१ द्विगुरेकवचनम्

०५३६ २,४,००२ द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्

०५३७ २,४,००३ अनुवादे चरणानाम्

०५३८ २,४,००४ अध्वर्युक्रतुरनपुंसकम्

०५३९ २,४,००५ अध्ययनतोऽविप्रकृष्टाख्यानाम्

०५४० २,४,००६ जातिरप्राणिनाम्

०५४१ २,४,००७ विशिष्टलिङ्गो नदीदेशोऽग्रामाः

०५४२ २,४,००८ क्षुद्रजन्तवः

०५४३ २,४,००९ येषां च विरोधः शाश्वतिकः

०५४४ २,४,०१० शूद्राणामनिरवसितानाम्

०५४५ २,४,०११ गवाश्वप्रभृतीनि च

०५४६ २,४,०१२ विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्

०५४७ २,४,०१३ विप्रतिषिद्धं चानधिकरणवाचि

०५४८ २,४,०१४ न दधिपयआदीनि

०५४९ २,४,०१५ अधिकरणैतावत्त्वे च

०५५० २,४,०१६ विभाषा समीपे

०५५१ २,४,०१७ स नपुंसकम्

०५५२ २,४,०१८ अव्ययीभावश्च

०५५३ २,४,०१९ तत्पुरुषोऽनञ् कर्मधारयः

०५५४ २,४,०२० संज्ञायां कन्थोशीनरेषु

०५५५ २,४,०२१ उपज्ञोपक्रमं तदाद्याचिख्यासायाम्

०५५६ २,४,०२२ छाया बाहुल्ये

०५५७ २,४,०२३ सभा राजाऽमनुष्यपूर्वा

०५५८ २,४,०२४ अशाला च

०५५९ २,४,०२५ विभाषा सेनासुराच्छायाशालानिशानाम्

०५६० २,४,०२६ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः

०५६१ २,४,०२७ पूर्ववदश्ववडवौ

०५६२ २,४,०२८ हेमन्तशिशिरावहोरात्रे च च्छन्दसि

०५६३ २,४,०२९ रात्राह्नाहाः पुंसि

०५६४ २,४,०३० अपथं नपुंसकम्

०५६५ २,४,०३१ अर्धर्चाः पुंसि च

०५६६ २,४,०३२ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ

०५६७ २,४,०३३ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ

०५६८ २,४,०३४ द्वितीयाटौस्स्वेनः

०५६९ २,४,०३५ आर्धधातुके

०५७० २,४,०३६ अदोजग्धिर्ल्यप्ति किति

०५७१ २,४,०३७ लुङ्सनोर्घसि

०५७२ २,४,०३८ घञपोश्च

०५७३ २,४,०३९ बहुलं छन्दसि

०५७४ २,४,०४० लिट्यन्यतरस्याम्

०५७५ २,४,०४१ वेञो वयिः

०५७६ २,४,०४२ हनो वध लिङि

०५७७ २,४,०४३ लुङि च

०५७८ २,४,०४४ आत्मनेपदेष्वन्यतरस्याम्

०५७९ २,४,०४५ इणो गा लुङि

०५८० २,४,०४६ णौ गमिरबोधने

०५८१ २,४,०४७ सनि च

०५८२ २,४,०४८ इङश्च

०५८३ २,४,०४९ गाङ् लिटि

०५८४ २,४,०५० विभाषा लुङ्लृङोः

०५८५ २,४,०५१ णौ च संश्चङोः

०५८६ २,४,०५२ अस्तेर्भूः

०५८७ २,४,०५३ ब्रुवो वचिः

०५८८ २,४,०५४ चक्षिङः ख्याञ्

०५८९ २,४,०५५ वा लिटि

०५९० २,४,०५६ अजेर्व्यघञपोः

०५९१ २,४,०५७ वा यौ

०५९२ २,४,०५८ ण्यक्षत्रियार्षञितो यूनि लुगणिञोः

०५९३ २,४,०५९ पैलादिभ्यश्च

०५९४ २,४,०६० इञः प्राचाम्

०५९५ २,४,०६१ न तौल्वलिभ्यः

०५९६ २,४,०६२ तद्राजस्य बहुषु तेनैवास्त्रियाम्

०५९७ २,४,०६३ यस्कादिभ्यो गोत्रे

०५९८ २,४,०६४ यञञोश्च

०५९९ २,४,०६५ अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च

०६०० २,४,०६६ बह्वच इञः प्राच्यभरतेषु

०६०१ २,४,०६७ न गोपवनादिभ्यः

०६०२ २,४,०६८ तिककितवादिभ्यो द्वन्द्वे

०६०३ २,४,०६९ उपकादिभ्योऽन्यतरस्यामद्वन्द्वे

०६०४ २,४,०७० आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्

०६०५ २,४,०७१ सुपो धातुप्रातिपदिकयोः

०६०६ २,४,०७२ अदिप्रभृतिभ्यः शपः

०६०७ २,४,०७३ बहुलं छन्दसि

०६०८ २,४,०७४ यङोऽचि च

०६०९ २,४,०७५ जुहोत्यादिभ्यः श्लुः

०६१० २,४,०७६ बहुलं छन्दसि

०६११ २,४,०७७ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु

०६१२ २,४,०७८ विभाषा घ्राधेट्शाच्छासः

०६१३ २,४,०७९ तनादिभ्यस्तथासोः

०६१४ २,४,०८० मन्त्रे घसह्वरणशवृहदहाद्वृच्कृगमिजनिभ्यो लेः

०६१५ २,४,०८१ आमः

०६१६ २,४,०८२ अव्ययादाप्सुपः

०६१७ २,४,०८३ नाव्ययीभावादतोऽम्त्वपञ्चम्याः

०६१८ २,४,०८४ तृतीयासप्तम्योर्बहुलम्

०६१९ २,४,०८५ लुटः प्रथमस्य डारौरसः

०६२० ३,१,००१ प्रत्ययः

०६२१ ३,१,००२ परश्च

०६२२ ३,१,००३ आद्युदात्तश्च

०६२३ ३,१,००४ अनुदात्तौ सुप्पितौ

०६२४ ३,१,००५ गुप्तिज्किद्भ्यः सन्

०६२५ ३,१,००६ मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य

०६२६ ३,१,००७ धातोः कर्मणः समानकर्तृकादिच्छायाम् वा

०६२७ ३,१,००८ सुप आत्मनः क्यच्

०६२८ ३,१,००९ काम्यच्च

०६२९ ३,१,०१० उपमानादाचारे

०६३० ३,१,०११ कर्तुः क्यङ् सलोपश्च

०६३१ ३,१,०१२ भृशादिभ्यो भुव्यच्व्वेर्लोपश्च हलः

०६३२ ३,१,०१३ लोहितादि डाज्भ्यः क्यष्

०६३३ ३,१,०१४ कष्टाय क्रमणे

०६३४ ३,१,०१५ कर्मणो रोमन्थतपोभ्यां वर्तिचरोः

०६३५ ३,१,०१६ बाष्पोष्मभ्यामुद्वमने

०६३६ ३,१,०१७ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे

०६३७ ३,१,०१८ सुखादिभ्यः कर्तृवेदनायाम्

०६३८ ३,१,०१९ नमोवरिवश्चित्रङः क्यच्

०६३९ ३,१,०२० पुच्छभाण्डचीवराण्णिङ्

०६४० ३,१,०२१ मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्

०६४१ ३,१,०२२ धातोरेकाचो हलादेः क्रियासमभिहारे यङ्

०६४२ ३,१,०२३ नित्यं कौटिल्ये गतौ

०६४३ ३,१,०२४ लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायाम्

०६४४ ३,१,०२५ सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्

०६४५ ३,१,०२६ हेतुमति च

०६४६ ३,१,०२७ कण्ड्वादिभ्यो यक्

०६४७ ३,१,०२८ गुपूधूपविच्छपणिपनिभ्य आयः

०६४८ ३,१,०२९ ऋतेरीयङ्

०६४९ ३,१,०३० कमेर्णिङ्

०६५० ३,१,०३१ आयादय आर्धधातुके वा

०६५१ ३,१,०३२ सनाद्यन्ता धातवः

०६५२ ३,१,०३३ स्यतासी लृलुटोः

०६५३ ३,१,०३४ सिब्बहुलं लेटि

०६५४ ३,१,०३५ कास्प्रत्ययादाममन्त्रे लिटि

०६५५ ३,१,०३६ इजादेश्च गुरुमतोऽनृच्छः

०६५६ ३,१,०३७ दयायासश्च

०६५७ ३,१,०३८ उषविदजागृभ्योऽन्यतरस्याम्

०६५८ ३,१,०३९ भीह्रीभृहुवाम् श्लुवच्च

०६५९ ३,१,०४० कृञ्चानुप्रयुज्यते लिटि

०६६० ३,१,०४१ विदांकुर्वन्त्वित्यन्यतरस्याम्

०६६१ ३,१,०४२ अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति छन्दसि

०६६२ ३,१,०४३ च्लि लुङि

०६६३ ३,१,०४४ च्लेः सिच्

०६६४ ३,१,०४५ शल इगुपधादनिटः क्सः

०६६५ ३,१,०४६ श्लिष आलिङ्गने

०६६६ ३,१,०४७ न दृशः

०६६७ ३,१,०४८ णिश्रिद्रुस्रुभ्यः कर्तरि चङ्

०६६८ ३,१,०४९ विभाषा धेट्श्व्योः

०६६९ ३,१,०५० गुपेश्छन्दसि

०६७० ३,१,०५१ नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः

०६७१ ३,१,०५२ अस्यतिवक्तिख्यातिभ्योऽङ्

०६७२ ३,१,०५३ लिपिसिचिह्वश्च

०६७३ ३,१,०५४ आत्मनेपदेष्वन्यतरस्याम्

०६७४ ३,१,०५५ पुषादिद्युताद्यॢदितः परस्मैपदेषु

०६७५ ३,१,०५६ सर्तिशास्त्यर्तिभ्यश्च

०६७६ ३,१,०५७ इरितो वा

०६७७ ३,१,०५८ जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च

०६७८ ३,१,०५९ कृमृदृरुहिभ्यश्छन्दसि

०६७९ ३,१,०६० चिण्ते पदः

०६८० ३,१,०६१ दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्

०६८१ ३,१,०६२ अचः कर्मकर्तरि

०६८२ ३,१,०६३ दुहश्च

०६८३ ३,१,०६४ न रुधः

०६८४ ३,१,०६५ तपोऽनुतापे च

०६८५ ३,१,०६६ चिण्भावकर्मणोः

०६८६ ३,१,०६७ सार्वधातुके यक्

०६८७ ३,१,०६८ कर्तरि शप्

०६८८ ३,१,०६९ दिवादिभ्यः श्यन्

०६८९ ३,१,०७० वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः

०६९० ३,१,०७१ यसोऽनुपसर्गात्

०६९१ ३,१,०७२ संयसश्च

०६९२ ३,१,०७३ स्वादिभ्यः श्नुः

०६९३ ३,१,०७४ श्रुवः शृ च

०६९४ ३,१,०७५ अक्षोऽन्यतरस्याम्

०६९५ ३,१,०७६ तनूकरणे तक्षः

०६९६ ३,१,०७७ तुदादिभ्यः शः

०६९७ ३,१,०७८ रुधादिभ्यः श्नम्

०६९८ ३,१,०७९ तनादिकृञ्भ्य उः

०६९९ ३,१,०८० धिन्विकृण्व्यो र च

०७०० ३,१,०८१ क्र्यादिभ्यः श्ना

०७०१ ३,१,०८२ स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च

०७०२ ३,१,०८३ हलः श्नः शानज्झौ

०७०३ ३,१,०८४ छन्दसि शायजपि

०७०४ ३,१,०८५ व्यत्ययो बहुलम्

०७०५ ३,१,०८६ लिङ्याशिष्यङ्

०७०६ ३,१,०८७ कर्मवत्कर्मणा तुल्यक्रियः

०७०७ ३,१,०८८ तपस्तपःकर्मकस्यैव

०७०८ ३,१,०८९ न दुहस्नुनमां यक्चिणौ

०७०९ ३,१,०९० कुषिरञ्जोः प्राचां श्यन् परस्मैपदं च

०७१० ३,१,०९१ धातोः

०७११ ३,१,०९२ तत्रोपपदं सप्तमीस्थम्

०७१२ ३,१,०९३ कृदतिङ्

०७१३ ३,१,०९४ वाऽसरूपोऽस्त्रियाम्

०७१४ ३,१,०९५ कृत्याः प्राङ्ण्वुलः

०७१५ ३,१,०९६ तव्यत्तव्यानीयरः

०७१६ ३,१,०९७ अचो यत्

०७१७ ३,१,०९८ पोरदुपधात्

०७१८ ३,१,०९९ शकिसहोश्च

०७१९ ३,१,१०० गदमदचरयमश्चानुपसर्गे

०७२० ३,१,१०१ अवद्यपण्यवर्यागर्ह्यपणितव्यानिरोधेषु

०७२१ ३,१,१०२ वह्यं करणम्

०७२२ ३,१,१०३ अर्यः स्वामिवैश्ययोः

०७२३ ३,१,१०४ उपसर्या काल्या प्रजने

०७२४ ३,१,१०५ अजर्यं संगतम्

०७२५ ३,१,१०६ वदः सुपि क्यप्च

०७२६ ३,१,१०७ भुवो भावे

०७२७ ३,१,१०८ हनस्त च

०७२८ ३,१,१०९ एतिस्तुशास्वृदृजुषः क्यप्

०७२९ ३,१,११० ऋदुपधाच्चाकिपिचृतेः

०७३० ३,१,१११ ई च खनः

०७३१ ३,१,११२ भृञोऽसंज्ञायाम्

०७३२ ३,१,११३ मृजेर्विभाषा

०७३३ ३,१,११४ राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः

०७३४ ३,१,११५ भिद्योद्ध्यौ नदे

०७३५ ३,१,११६ पुष्यसिध्यौ नक्षत्रे

०७३६ ३,१,११७ विपूयविनीयजित्या मुञ्जकल्कहलिषु

०७३७ ३,१,११८ प्रत्यपिभ्यां ग्रहेश्छन्दसि

०७३८ ३,१,११९ पदास्वैरिबाह्यापक्ष्येषु च

०७३९ ३,१,१२० विभाषा कृवृषोः

०७४० ३,१,१२१ युग्यं च पत्रे

०७४१ ३,१,१२२ अमावस्यदन्यतरस्याम्

०७४२ ३,१,१२३ छन्दसि
निष्टर्क्यहेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि

०७४३ ३,१,१२४ ऋहलोर्ण्यत्

०७४४ ३,१,१२५ ओरावश्यके

०७४५ ३,१,१२६ आसुयुवपिरपिलपित्रपिचमश्च

०७४६ ३,१,१२७ आनाय्योऽनित्ये

०७४७ ३,१,१२८ प्रणाय्योऽसंमतौ

०७४८ ३,१,१२९ पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु

०७४९ ३,१,१३० क्रतौ कुण्डपाय्यसंचाय्यौ

०७५० ३,१,१३१ अग्नौ परिचाय्योपचाय्यसमूह्याः

०७५१ ३,१,१३२ चित्याग्निचित्ये च

०७५२ ३,१,१३३ ण्वुल्तृचौ

०७५३ ३,१,१३४ नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः

०७५४ ३,१,१३५ इगुपधज्ञाप्रीकिरः कः

०७५५ ३,१,१३६ आतश्चोपसर्गे

०७५६ ३,१,१३७ पाघ्राध्माधेड्दृशः शः

०७५७ ३,१,१३८ अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च

०७५८ ३,१,१३९ ददातिदधात्योर्विभाषा

०७५९ ३,१,१४० ज्वलितिकसन्तेभ्यो णः

०७६० ३,१,१४१ श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च

०७६१ ३,१,१४२ दुन्योरनुपसर्गे

०७६२ ३,१,१४३ विभाषा ग्रहः

०७६३ ३,१,१४४ गेहे कः

०७६४ ३,१,१४५ शिल्पिनि ष्वुन्

०७६५ ३,१,१४६ गः स्थकन्

०७६६ ३,१,१४७ ण्युट् च

०७६७ ३,१,१४८ हश्च व्रीहिकालयोः

०७६८ ३,१,१४९ प्रुसृल्वः समभिहारे वुन्

०७६९ ३,१,१५० आशिषि च

०७७० ३,२,००१ कर्मण्यण्

०७७१ ३,२,००२ ह्वावामश्च

०७७२ ३,२,००३ आतोऽनुपसर्गे कः

०७७३ ३,२,००४ सुपि स्थः

०७७४ ३,२,००५ तुन्दशोकयोः परिमृजापनुदोः

०७७५ ३,२,००६ प्रे दाज्ञः

०७७६ ३,२,००७ समि ख्यः

०७७७ ३,२,००८ गापोष्टक्

०७७८ ३,२,००९ हरतेरनुद्यमनेऽच्

०७७९ ३,२,०१० वयसि च

०७८० ३,२,०११ आङि ताच्छील्ये

०७८१ ३,२,०१२ अर्हः

०७८२ ३,२,०१३ स्तम्बकर्णयोरमिजपोः

०७८३ ३,२,०१४ शमि धातोः संज्ञायाम्

०७८४ ३,२,०१५ अधिकरणे शेतेः

०७८५ ३,२,०१६ चरेष्टः

०७८६ ३,२,०१७ भिक्षासेनादायेषु च

०७८७ ३,२,०१८ पुरोऽग्रतोऽग्रेषु सर्तेः

०७८८ ३,२,०१९ पूर्वे कर्तरि

०७८९ ३,२,०२० कृञो हेतुताच्छील्यानुलोम्येषु

०७९० ३,२,०२१
दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्ध
नुररुःषु

०७९१ ३,२,०२२ कर्मणि भृतौ

०७९२ ३,२,०२३ न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु

०७९३ ३,२,०२४ स्तम्बशकृतोरिन्

०७९४ ३,२,०२५ हरतेर्दृतिनाथयोः पशौ

०७९५ ३,२,०२६ फलेग्रहिरात्मम्भरिश्च

०७९६ ३,२,०२७ छन्दसि वनसनरक्षिमथाम्

०७९७ ३,२,०२८ एजेः खश्

०७९८ ३,२,०२९ नासिकास्तनयोर्ध्माधेटोः

०७९९ ३,२,०३० नाडीमुष्ट्योश्च

०८०० ३,२,०३१ उदिकूलेरुजिवहोः

०८०१ ३,२,०३२ वहाभ्रे लिहः

०८०२ ३,२,०३३ परिमाणे पचः

०८०३ ३,२,०३४ मितनखे च

०८०४ ३,२,०३५ विध्वरुषोस्तुदः

०८०५ ३,२,०३६ असूर्यललाटयोर्दृशितपोः

०८०६ ३,२,०३७ उग्रम्पश्येरम्मदपाणिन्धमाश्च

०८०७ ३,२,०३८ प्रियवशेवदः खच्

०८०८ ३,२,०३९ द्विषत्परयोस्तापेः

०८०९ ३,२,०४० वाचि यमो व्रते

०८१० ३,२,०४१ पूःसर्वयोर्दारिसहोः

०८११ ३,२,०४२ सर्वकूलाभ्रकरीषेषु कषः

०८१२ ३,२,०४३ मेघर्तिभयेषु कृञः

०८१३ ३,२,०४४ क्षेमप्रियमद्रेऽण्च

०८१४ ३,२,०४५ आशिते भुवः करण-भावयोः

०८१५ ३,२,०४६ संज्ञायां भृतॄवृजिधारिसहितपिदमः

०८१६ ३,२,०४७ गमश्च

०८१७ ३,२,०४८ अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः

०८१८ ३,२,०४९ आशिषि हनः

०८१९ ३,२,०५० अपे क्लेशतमसोः

०८२० ३,२,०५१ कुमारशीर्षयोर्णिनिः

०८२१ ३,२,०५२ लक्षणे जाया-पत्योष्टक्

०८२२ ३,२,०५३ अमनुष्यकर्तृके च

०८२३ ३,२,०५४ शक्तौ हस्ति-कपाटयोः

०८२४ ३,२,०५५ पाणिघताडघौ शिल्पिनि

०८२५ ३,२,०५६ आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्

०८२६ ३,२,०५७ कर्तरि भुवः खिष्णुच्-खुकञौ

०८२७ ३,२,०५८ स्पृशोऽनुदके क्विन्

०८२८ ३,२,०५९ ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च

०८२९ ३,२,०६० त्यदादिषु दृशोऽनालोचने कञ्च

०८३० ३,२,०६१ सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्

०८३१ ३,२,०६२ भजो ण्विः

०८३२ ३,२,०६३ छन्दसि सहः

०८३३ ३,२,०६४ वहश्च

०८३४ ३,२,०६५ कव्यपुरीषपुरीष्येषु ञ्युट्

०८३५ ३,२,०६६ हव्येऽनन्तःपादम्

०८३६ ३,२,०६७ जनसनखनक्रमगमो विट्

०८३७ ३,२,०६८ अदोऽनन्ने

०८३८ ३,२,०६९ क्रव्ये च

०८३९ ३,२,०७० दुहः कब्घश्च

०८४० ३,२,०७१ मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्

०८४१ ३,२,०७२ अवे यजः

०८४२ ३,२,०७३ विजुपे छन्दसि

०८४३ ३,२,०७४ आतो मनिन्क्वनिब्वनिपश्च

०८४४ ३,२,०७५ अन्येभ्योऽपि दृश्यन्ते

०८४५ ३,२,०७६ क्विप्च

०८४६ ३,२,०७७ स्थः क च

०८४७ ३,२,०७८ सुप्यजातौ णिनिस्ताच्छील्ये

०८४८ ३,२,०७९ कर्तर्युपमाने

०८४९ ३,२,०८० व्रते

०८५० ३,२,०८१ बहुलमाभीक्ष्ण्ये

०८५१ ३,२,०८२ मनः

०८५२ ३,२,०८३ आत्ममाने खश्च

०८५३ ३,२,०८४ भूते

०८५४ ३,२,०८५ करणे यजः

०८५५ ३,२,०८६ कर्मणि हनः

०८५६ ३,२,०८७ ब्रह्मभ्रूणवृत्रेषु क्विप्

०८५७ ३,२,०८८ बहुलं छन्दसि

०८५८ ३,२,०८९ सुकर्मपापमन्त्रपुण्येषु कृञः

०८५९ ३,२,०९० सोमे सुञः

०८६० ३,२,०९१ अग्नौ चेः

०८६१ ३,२,०९२ कर्मण्यग्न्याख्यायाम्

०८६२ ३,२,०९३ कर्मणीनिविक्रियः

०८६३ ३,२,०९४ दृशेः क्वनिप्

०८६४ ३,३,०९५ राजनि युधिकृञः

०८६५ ३,२,०९६ सहे च

०८६६ ३,२,०९७ सप्तम्यां जनेर्डः

०८६७ ३,२,०९८ पञ्चम्यामजातौ

०८६८ ३,२,०९९ उपसर्गे च संज्ञायाम्

०८६९ ३,२,१०० अनौ कर्मणि

०८७० ३,२,१०१ अन्येष्वपि दृश्यते

०८७१ ३,२,१०२ निष्ठा

०८७२ ३,२,१०३ सुयजोङ्वनिप्

०८७३ ३,२,१०४ जीर्यतेरतृन्

०८७४ ३,२,१०५ छन्दसि लिट्

०८७५ ३,२,१०६ लिटः कानज्वा

०८७६ ३,२,१०७ क्वसुश्च

०८७७ ३,२,१०८ भाषायां सदवसश्रुवः

०८७८ ३,२,१०९ उपेयिवाननाश्वाननूचानश्च

०८७९ ३,२,११० लुङ्

०८८० ३,२,१११ अनद्यतने लङ्

०८८१ ३,२,११२ अभिज्ञावचने लृट्

०८८२ ३,२,११३ न यदि

०८८३ ३,२,११४ विभाषा साकाङ्क्षे

०८८४ ३,२,११५ परोक्षे लिट्

०८८५ ३,२,११६ हशश्वतोर्लङ्च

०८८६ ३,२,११७ प्रश्ने चासन्नकाले

०८८७ ३,२,११८ लट् स्मे

०८८८ ३,२,११९ अपरोक्षे च

०८८९ ३,२,१२० ननौ पृष्टप्रतिवचने

०८९० ३,२,१२१ नन्वोर्विभाषा

०८९१ ३,२,१२२ पुरि लुङ् चास्मे

०८९२ ३,२,१२३ वर्तमाने लट्

०८९३ ३,२,१२४ लटः शतृशानचावप्रथमासमानाधिकरणे

०८९४ ३,२,१२५ संबोधने च

०८९५ ३,२,१२६ लक्षणहेत्वोः क्रियायाः

०८९६ ३,२,१२७ तौ सत्

०८९७ ३,२,१२८ पूङ्यजोः शानन्

०८९८ ३,२,१२९ ताच्छील्यवयोवचनशक्तिषु चानश्

०८९९ ३,२,१३० इङ्धार्योः शत्रकृच्छ्रिणि

०९०० ३,२,१३१ द्विषोऽमित्रे

०९०१ ३,२,१३२ सुञो यज्ञसंयोगे

०९०२ ३,२,१३३ अर्हः प्रशंसायाम्

०९०३ ३,२,१३४ आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु

०९०४ ३,२,१३५ तृन्

०९०५ ३,२,१३६ अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्

०९०६ ३,२,१३७ णेश्छन्दसि

०९०७ ३,२,१३८ भुवश्च

०९०८ ३,२,१३९ ग्लाजिस्थश्च ग्स्नुः

०९०९ ३,२,१४० त्रसिगृधिधृषिक्षिपेः क्नुः

०९१० ३,२,१४१ शमित्यष्टाभ्यो घिनुण्

०९११ ३,२,१४२
संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च

०९१२ ३,२,१४३ वौ कषलसकत्थस्रम्भः

०९१३ ३,२,१४४ अपे च लषः

०९१४ ३,२,१४५ प्रे लपसृद्रुमथवदवसः

०९१५ ३,२,१४६ निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूञो वुञ्

०९१६ ३,२,१४७ देविक्रुशोश्चोपसर्गे

०९१७ ३,२,१४८ चलनशब्दार्थादकर्मकाद्युच्

०९१८ ३,२,१४९ अनुदात्तेतश्च हलादेः

०९१९ ३,२,१५० जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः

०९२० ३,२,१५१ क्रुधमण्डार्थेभ्यश्च

०९२१ ३,२,१५२ न यः

०९२२ ३,२,१५३ सूददीपदीक्षश्च

०९२३ ३,२,१५४ लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्

०९२४ ३,२,१५५ जल्पभिक्षकुट्टलुण्टवृङः षाकन्

०९२५ ३,२,१५६ प्रजोरिनिः

०९२६ ३,२,१५७ जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च

०९२७ ३,२,१५८ स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्

०९२८ ३,२,१५९ दाधेट्सिशदसदो रुः

०९२९ ३,२ १६० सृघस्यदः क्मरच्

०९३० ३,२,१६१ भञ्जभासमिदो घुरच्

०९३१ ३,२,१६२ विदिभिदिच्छिदेः कुरच्

०९३२ ३,२,१६३ इण्नश्जिसर्तिभ्यः क्वरप्

०९३३ ३,२,१६४ गत्वरश्च

०९३४ ३,२,१६५ जागरूकः

०९३५ ३,२,१६६ यजजपदशां यङः

०९३६ ३,२,१६७ नमिकम्पिस्म्यजसकमहिंसदीपो रः

०९३७ ३,२,१६८ सनाशंसभिक्ष उः

०९३८ ३,२,१६९ विन्दुरिच्छुः

०९३९ ३,२,१७० क्याच्छन्दसि

०९४० ३,२,१७१ आदृगमहनजनः तितिनौ लिट्च

०९४१ ३,२,१७२ स्वपितृषोर्नजिङ्

०९४२ ३,२,१७३ शृवन्द्योरारुः

०९४३ ३,२,१७४ भियः क्रुक्लुकनौ

०९४४ ३,२,१७५ स्थेशभासपिसकसो वरच्

०९४५ ३,२,१७६ यश्च यङः

०९४६ ३,२,१७७ भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्

०९४७ ३,२,१७८ अन्येभ्योऽपि दृश्यते

०९४८ ३,२,१७९ भुवः संज्ञान्तरयोः

०९४९ ३,२,१८० विप्रसंभ्यो ड्वसंज्ञायाम्

०९५० ३,२,१८१ धः कर्मणि ष्ट्रन्

०९५१ ३,२,१८२ दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे

०९५२ ३,२,१८३ हलसूकरयोः पुवः

०९५३ ३,२,१८४ अर्तिलूधूसूखनसहचर इत्रः

०९५४ ३,२,१८५ पुवः संज्ञायाम्

०९५५ ३,२,१८६ कर्तरि चर्षिदेवतयोः

०९५६ ३,२,१८७ ञीतः क्तः

०९५७ ३,२,१८८ मतिबुद्धिपूजार्थेभ्यश्च

०९५८ ३,३,००१ उणादयो बहुलम्

०९५९ ३,३,००२ भूतेऽपि दृश्यन्ते

०९६० ३,३,००३ भविष्यति गम्यादयः

०९६१ ३,३,००४ यावत्पुरानिपातयोर्लट्

०९६२ ३,३,००५ विभाषा कदाकर्ह्योः

०९६३ ३,३,००६ किंवृत्ते लिप्सायाम्

०९६४ ३,३,००७ लिप्स्यमानसिद्धौ च

०९६५ ३,३,००८ लोडर्थलक्षणे च

०९६६ ३,३,००९ लिङ्चोर्ध्वमौहूर्तिके

०९६७ ३,३,०१० तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्

०९६८ ३,३,०११ भाववचनाश्च

०९६९ ३,३,०१२ अण्कर्मणि च

०९७० ३,३,०१३ लृट् शेषे च

०९७१ ३,३,०१३ लृटः सद्वा

०९७२ ३,३,०१५ अनद्यतने लुट्

०९७३ ३,३,०१६ पदरुजविशस्पृशो घञ्

०९७४ ३,३,०१७ सृ स्थिरे

०९७५ ३,३,०१८ भावे

०९७६ ३,३,०१९ अकर्तरि च कारके संज्ञायाम्

०९७७ ३,३,०२० परिमाणाख्यायां सर्वेभ्यः

०९७८ ३,३,०२१ इङश्च

०९७९ ३,३,०२२ उपसर्गे रुवः

०९८० ३,३,०२३ समि युद्रुदुवः

०९८१ ३,३,०२४ श्रिणीभुवोऽनुपसर्गे

०९८२ ३,३,०२५ वौ क्षुश्रुवः

०९८३ ३,३,०२६ अवोदोर्नियः

०९८४ ३,३,०२७ प्रे द्रुस्तुस्रुवः

०९८५ ३,३,०२८ निरभ्योः पूल्वोः

०९८६ ३,३,०२९ उन्न्योर्ग्रः

०९८७ ३,३,०३० कॄ धान्ये

०९८८ ३,३,०३१ यज्ञे समि स्तुवः

०९८९ ३,३,०३२ प्रे स्त्रोऽयज्ञे

०९९० ३,३,०३३ प्रथने वावशब्दे

०९९१ ३,३,०३४ छन्दोनाम्नि च

०९९२ ३,३,०३५ उदि ग्रहः

०९९३ ३,३,०३६ समि मुष्टौ

०९९४ ३,३,०३७ परिन्योर्नीणोर्द्यूताभ्रेषयोः

०९९५ ३,३,०३८ परावनुपात्यय इणः

०९९६ ३,३,०३९ व्युपयोः शेतेः पर्याये

०९९७ ३,३,०४० हस्तादाने चेरस्तेये

०९९८ ३,३,०४१ निवासचितिशरीरोपसमाधानेष्वादेश्च कः

०९९९ ३,३,०४२ सङ्घे चानौत्तराधर्ये

१००० ३,३,०४३ कर्मव्यतिहारे णच्स्त्रियाम्

१००१ ३,३,०४४ अभिविधौ भाव इनुण्

१००२ ३,३,०४५ आक्रोशेऽवन्योर्ग्रहः

१००३ ३,३,०४६ प्रे लिप्सायाम्

१००४ ३,३,०४७ परौ यज्ञे

१००५ ३,३,०४८ नौ वृ धान्ये

१००६ ३,३,०४९ उदि श्रयतियौतिपूद्रुवः

१००७ ३,३,०५० विभाषाऽऽङिरुप्लुवोः

१००८ ३,३,०५१ अवे ग्रहो वर्षप्रतिबन्धे

१००९ ३,३,०५२ प्रे वणिजाम्

१०१० ३,३,०५३ रश्मौ च

१०११ ३,३,०५४ वृणोतेराच्छादने

१०१२ ३,३,०५५ परौ भुवोऽवज्ञाने

१०१३ ३,३,०५६ एरच्

१०१४ ३,३,०५७ ॠदोरप्

१०१५ ३,३,०५८ ग्रहवृदृनिश्चिगमश्च

१०१६ ३,३,०५९ उपसर्गेऽदः

१०१७ ३,३,०६० नौ ण च

१०१८ ३,३,०६१ व्यधजपोरनुपसर्गे

१०१९ ३,३,०६२ स्वनहसोर्वा

१०२० ३,३,०६३ यमः समुपनिविषु च

१०२१ ३,३,०६४ नौ गदनदपठस्वनः

१०२२ ३,३,०६५ क्वणो वीणायां च

१०२३ ३,३,०६६ नित्यं पणः परिमाणे

१०२४ ३,३,०६७ मदोऽनुपसर्गे

१०२५ ३,३,०६८ प्रमद-संमदौ हर्षे

१०२६ ३,३,०६९ समुदोरजः पशुषु

१०२७ ३,३,०७० अक्षेषु ग्लहः

१०२८ ३,३,०७१ प्रजने सर्तेः

१०२९ ३,३,०७२ ह्वः सम्प्रसारणं च न्यभ्युपविषु

१०३० ३,३,०७३ आङि युद्धे

१०३१ ३,३,०७४ निपानमाहावः

१०३२ ३,३,०७५ भावेऽनुपसर्गस्य

१०३३ ३,३,०७६ हनश्च वधः

१०३४ ३,३,०७७ मूर्तौ घनः

१०३५ ३,३,०७८ अन्तर्घनो देशे

१०३६ ३,३,०७९ अगारैकदेशे प्रघणः प्रघाणश्च

१०३७ ३,३,०८० उद्घनोऽत्याधानम्

१०३८ ३,३,०८१ अपघनोऽङ्गम्

१०३९ ३,३,०८२ करणेऽयोविद्रुषु

१०४० ३,३,०८३ स्तम्बे क च

१०४१ ३,३,०८४ परौ घः

१०४२ ३,३,०८५ उपघ्न आश्रये

१०४३ ३,३,०८६ सङ्घोद्घौ गणप्रशंसयोः

१०४४ ३,३,०८७ निघो निमितम्

१०४५ ३,३,०८८ ड्वितः क्त्रिः

१०४६ ३,३,०८९ ट्वितोऽथुच्

१०४७ ३,३,०९० यजयाचयतविच्छप्रच्छरक्षो नङ्

१०४८ ३,३,०९१ स्वपो नन्

१०४९ ३,३,०९२ उपसर्गे घोः किः

१०५० ३,३,०९३ कर्मण्यधिकरणे च

१०५१ ३,३,०९४ स्त्रियां क्तिन्

१०५२ ३,३,०९५ स्थागापापचो भावे

१०५३ ३,३,०९६ मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः

१०५४ ३,३,०९७ ऊतियूतिजूतिसातिहेतिकीर्तयश्च

१०५५ ३,३,०९८ व्रजयजोर्भावे क्यप्

१०५६ ३,३,०९९ संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः

१०५७ ३,३,१०० कृञः श च

१०५८ ३,३,१०१ इच्छा

१०५९ ३,३,१०२ अ प्रत्ययात्

१०६० ३,३,१०३ गुरोश्च हलः

१०६१ ३,३,१०४ षिद्भिदादिभ्योऽङ्

१०६२ ३,३,१०५ चिन्तिपूजिकथिकुम्बिचर्चश्च

१०६३ ३,३,१०६ आतश्चोपसर्गे

१०६४ ३,३,१०७ ण्यासश्रन्थो युच्

१०६५ ३,३,१०८ रोगाख्यायां ण्वुल् बहुलम्

१०६६ ३,३,१०९ संज्ञायाम्

१०६७ ३,३,११० विभाषाख्यानपरिप्रश्नयोरिञ्च

१०६८ ३,३,१११ पर्यायार्हर्णोत्पत्तिषु ण्वुच्

१०६९ ३,३,११२ आक्रोशे नञ्यनिः

१०७० ३,३,११३ कृत्यल्युटो बहुलम्

१०७१ ३,३,११४ नपुंसके भावे क्तः

१०७२ ३,३,११५ ल्युट् च

१०७३ ३,३,११६ कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम्

१०७४ ३,३,११७ करणाधिकरणयोश्च

१०७५ ३,३,११८ पुंसि संज्ञायां घः प्रायेण

१०७६ ३,३,११९ गोचरसंचरवहव्रजव्यजापणनिगमाश्च

१०७७ ३,३,१२० अवे तॄस्त्रोर्घञ्

१०७८ ३,३,१२१ हलश्च

१०७९ ३,३,१२२ अध्यायन्यायोद्यावसंहाराधारावायाश्च

१०८० ३,३,१२३ उदङ्कोऽनुदके

१०८१ ३,३,१२४ जालमानायः

१०८२ ३,३,१२५ खनो घ च

१०८३ ३,३,१२६ ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्

१०८४ ३,३,१२७ कर्तृकर्मणोश्च भूकृञोः

१०८५ ३,३,१२८ आतो युच्

१०८६ ३,३,१२९ छन्दसि गत्यर्थेभ्यः

१०८७ ३,३,१३० अन्येभ्योऽपि दृश्यते

१०८८ ३,३,१३१ वर्तमानसामीप्ये वर्तमानवद्वा

१०८९ ३,३,१३२ आशंसायां भूतवच्च

१०९० ३,३,१३३ क्षिप्रवचने लृट्

१०९१ ३,३,१३४ आशंसावचने लिङ्

१०९२ ३,३,१३५ नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः

१०९३ ३,३,१३६ भविष्यति मर्यादावचनेऽवरस्मिन्

१०९४ ३,३,१३७ कालविभागे चानहोरात्राणाम्

१०९५ ३,३,१३८ परस्मिन् विभाषा

१०९६ ३,३,१३९ लिङ्निमित्ते लृङ् क्रियातिपत्तौ

१०९७ ३,३,१४० भूते च

१०९८ ३,३,१४१ वोताप्योः

१०९९ ३,३,१४२ गर्हायां लडपिजात्वोः

११०० ३,३,१४३ विभाषा कथमि लिङ् च

११०१ ३,३,१४४ किंवृत्ते लिङ्लृटौ

११०२ ३,३,१४५ अनवकिप्त्यमर्षयोरकिंवृत्तेऽपि

११०३ ३,३,१४६ किंकिलास्त्यर्थेषु लृट्

११०४ ३,३,१४७ जातुयदोर्लिङ्

११०५ ३,३,१४८ यच्च यत्रयोः

११०६ ३,३,१४९ गर्हायां च

११०७ ३,३,१५० चित्रीकरणे च

११०८ ३,३,१५१ शेषे लृडयदौ

११०९ ३,३,१५२ उताप्योः समर्थयोर्लिङ्

१११० ३,३,१५३ कामप्रवेदनेऽकच्चिति

११११ ३,३,१५४ संभावनेऽलमितिचेत्सिद्धाप्रयोगे

१११२ ३,३,१५५ विभाषा धातौ संभावनवचनेऽयदि

१११३ ३,३,१५६ हेतुहेतुमतोर्लिङ्

१११४ ३,३,१५७ इच्छार्थेषु लिङ्लोटौ

१११५ ३,३,१५८ समानकर्तृकेषु तुमुन्

१११६ ३,३,१५९ लिङ् च

१११७ ३,३,१६० इच्छार्थेभ्यो विभाषा वर्तमाने

१११८ ३,३,१६१ विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्

१११९ ३,३,१६२ लोट् च

११२० ३,३,१६३ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च

११२१ ३,३,१६४ लिङ् चोर्ध्वमौहूर्तिके

११२२ ३,३,१६५ स्मे लोट्

११२३ ३,३,१६६ अधीष्टे च

११२४ ३,३,१६७ कालसमयवेलासु तुमुन्

११२५ ३,३,१६८ लिङ् यदि

११२६ ३,३,१६९ अर्हे कृत्यतृचश्च

११२७ ३,३,१७० आवश्यकाधमर्ण्ययोर्णिनिः

११२८ ३,३,१७१ कृत्याश्च

११२९ ३,३,१७२ शकि लिङ् च

११३० ३,३,१७३ आशिषि लिङ्लोटौ

११३१ ३,३,१७४ क्तिच् क्तौ च संज्ञायाम्

११३२ ३,३,१७५ माङि लुङ्

११३३ ३,३,१७६ स्मोत्तरे लङ् च

११३४ ३,४,००१ धातुसम्बन्धे प्रत्ययाः

११३५ ३,४,००२ क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः

११३६ ३,४,००३ समुच्चयेऽन्यतरस्याम्

११३७ ३,४,००४ यथाविध्यनुप्रयोगः पूर्वस्मिन्

११३८ ३,४,००५ समुच्चये सामान्यवचनस्य

११३९ ३,४,००६ छन्दसि लुङ्लङ्लिटः

११४० ३,४,००७ लिङर्थे लेट्

११४१ ३,४,००८ उपसंवादाशङ्कयोश्च

११४२ ३,४,००९ तुमर्थे सेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः

११४३ ३,४,०१० प्रयै रोहिष्यै अव्यथिष्यै

११४४ ३,४,०११ दृशे विख्ये च

११४५ ३,४,०१२ शकि णमुल्कमुलौ

११४६ ३,४,०१३ ईश्वरे तोसुन्कसुनौ

११४७ ३,४,०१४ कृत्यार्थे तवैकेन्केन्यत्वनः

११४८ ३,४,०१५ अवचक्षे च

११४९ ३,४,०१६ भावलक्षणे स्थेण्कृञ्वधिचरिहुतमिजनिभ्यस्तोसुन्

११५० ३,४,०१७ सृपितृदोः कसुन्

११५१ ३,४,०१८ अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा

११५२ ३,४,०१९ उदीचां माङो व्यतीहारे

११५३ ३,४,०२० परावरयोगे च

११५४ ३,४,०२१ समानकर्तृकयोः पूर्वकाले

११५५ ३,४,०२२ आभीक्ष्ण्ये णमुल् च

११५६ ३,४,०२३ न यद्यनाकाङ्क्षे

११५७ ३,४,०२४ विभाषाऽग्रेप्रथमपूर्वेषु

११५८ ३,४,०२५ कर्मण्याक्रोशे कृञः खमुञ्

११५९ ३,४,०२६ स्वादुमि णमुल्

११६० ३,४,०२७ अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्

११६१ ३,४,०२८ यथातथयोरसूयाप्रतिवचने

११६२ ३,४,०२९ कर्मणि दृशिविदोः साकल्ये

११६३ ३,४,०३० यावति विन्दजीवोः

११६४ ३,४,०३१ चर्मोदरयोः पूरेः

११६५ ३,४,०३२ वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्

११६६ ३,४,०३३ चेले क्नोपेः

११६७ ३,४,०३४ निमूलसमूलयोः कषः

११६८ ३,४,०३५ शुष्कचूर्णरूक्षेषु पिषः

११६९ ३,४,०३६ समूलाकृतजीवेषु हन्कृञ्ग्रहः

११७० ३,४,०३७ करणे हनः

११७१ ३,४,०३८ स्नेहने पिषः

११७२ ३,४,०३९ हस्ते वर्तिग्रहोः

११७३ ३,४,०४० स्वे पुषः

११७४ ३,४,०४१ अधिकरणे बन्धः

११७५ ३,४,०४२ संज्ञायाम्

११७६ ३,४,०४३ कर्त्रोर्जीवपुरुषयोर्नशिवहोः

११७७ ३,४,०४४ ऊर्ध्वे शुषिपूरोः

११७८ ३,४,०४५ उपमाने कर्मणि च

११७९ ३,४,०४६ कषादिषु यथाविध्यनुप्रयोगः

११८० ३,४,०४७ उपदंशस्तृतीयायाम्

११८१ ३,४,०४८ हिंसार्थानां च समानकर्तृकाणाम्

११८२ ३,४,०४९ सप्तम्यां चोपपीडरुधकर्षः

११८३ ३,४,०५० समासत्तौ

११८४ ३,४,०५१ प्रमाणे च

११८५ ३,४,०५२ अपादाने परीप्सायाम्

११८६ ३,४,०५३ द्वितीयायां च

११८७ ३,४,०५४ स्वाङ्गेऽध्रुवे

११८८ ३,४,०५५ परिक्लिश्यमाने च

११८९ ३,४,०५६ विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः

११९० ३,४,०५७ अस्यतितृषोः क्रियान्तरे कालेषु

११९१ ३,४,०५८ नाम्न्यादिशिग्रहोः

११९२ ३,४,०५९ अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ

११९३ ३,४,०६० तिर्यच्यपवर्गे

११९४ ३,४,०६१ स्वाङ्गे तस्प्रत्यये कृभ्वोः

११९५ ३,४,०६२ नाधार्थप्रत्यये च्व्यर्थे

११९६ ३,४,०६३ तूष्णीमि भुवः

११९७ ३,४,०६४ अन्वच्यानुलोम्ये

११९८ ३,४,०६५ शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्

११९९ ३,४,०६६ पर्याप्तिवचनेष्वलमर्थेषु

१२०० ३,४,०६७ कर्तरि कृत्

१२०१ ३,४,०६८ भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा

१२०२ ३,४,०६९ लः कर्मणि च भावे चाकर्मकेभ्यः

१२०३ ३,४,०७० तयोरेव कृत्यक्तखलर्थाः

१२०४ ३,४,०७१ आदिकर्मणि क्तः कर्तरि च

१२०५ ३,४,०७२ गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च

१२०६ ३,४,०७३ दाशगोघ्नौ संप्रदाने

१२०७ ३,४,०७४ भीमादयोऽपादाने

१२०८ ३,४,०७५ ताभ्यामन्यत्रोणादयः

१२०९ ३,४,०७६ क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः

१२१० ३,४,०७७ लस्य

१२११ ३,४,०७८ तिप्तस्झिसिप्थस्थविब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्

१२१२ ३,४,०७९ टित आत्मनेपदानाम् टेरे

१२१३ ३,४,०८० थासः से

१२१४ ३,४,०८१ लिटस्तझयोरेशिरेच्

१२१५ ३,४,०८२ परस्मैपदानां णलतुसुस्थलथुसणल्वमाः

१२१६ ३,४,०८३ विदो लटो वा

१२१७ ३,४,०८४ ब्रुवः पञ्चानामादित आहो ब्रुवः

१२१८ ३,४,०८५ लोटो लङ्वत्

१२१९ ३,४,०८६ एरुः

१२२० ३,४,०८७ सेर्ह्यपिच्च

१२२१ ३,४,०८८ वा छन्दसि

१२२२ ३,४,०८९ मेर्निः

१२२३ ३,४,०९० आमेतः

१२२४ ३,४,०९१ सवाभ्याम् वामौ

१२२५ ३,४,०९२ आडुत्तमस्य पिच्च

१२२६ ३,४,०९३ एत ऐ

१२२७ ३,४,०९४ लेटोऽडाटौ

१२२८ ३,४,०९५ आत ऐ

१२२९ ३,४,०९६ वैतोऽन्यत्र

१२३० ३,४,०९७ इतश्च लोपः परस्मैपदेषु

१२३१ ३,४,०९८ स उत्तमस्य

१२३२ ३,४,०९९ नित्यम् ङितः

१२३३ ३,४,१०० इतश्च

१२३४ ३,४,१०१ तस्थस्थमिपाम् तान्तन्तामः

१२३५ ३,४,१०२ लिङः सीयुट्

१२३६ ३,४,१०३ यासुट् परस्मैपदेषूदात्तो ङिच्च

१२३७ ३,४,१०४ किदाशिषि

१२३८ ३,४,१०५ झस्य रन्

१२३९ ३,४,१०६ इटोऽत्

१२४० ३,४,१०७ सुट् तिथोः

१२४१ ३,४,१०८ झेर्जुस्

१२४२ ३,४,१०९ सिजभ्यस्तविदिभ्यश्च

१२४३ ३,४,११० आतः

१२४४ ३,४,१११ लङः शाकटायनस्यैव

१२४५ ३,४,११२ द्विषश्च

१२४६ ३,४,११३ तिङ् शित् सार्वधातुकम्

१२४७ ३,४,११४ आर्धधातुकम् शेषः

१२४८ ३,४,११५ लिट् च

१२४९ ३,४,११६ लिङाशिषि

१२५० ३,४,११७ छन्दस्युभयथा

१२५१ ४,१,००१ ङ्याप्प्रातिपदिकात्

१२५२ ४,१,००२ स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्

१२५३ ४,१,००३ स्त्रियाम्

१२५४ ४,१,००४ अजाद्यतष्टाप्

१२५५ ४,१,००५ ऋन्नेभ्यो ङीप्

१२५६ ४,१,००६ उगितश्च

१२५७ ४,१,००७ वनो र च

१२५८ ४,१,००८ पादोऽन्यतरस्याम्

१२५९ ४,१,००९ टाबृचि

१२६० ४,१,०१० न षट्स्वस्रादिभ्यः

१२६१ ४,१,०११ मनः

१२६२ ४,१,०१२ अनो बहुव्रीहेः

१२६३ ४,१,०१३ डाबुभाभ्यामन्यतरस्याम्

१२६४ ४,१,०१४ अनुपसर्जनात्

१२६५ ४,१,०१५ टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः

१२६६ ४,१,०१६ यञश्च

१२६७ ४,१,०१७ प्राचां ष्फ तद्धितः

१२६८ ४,१,०१८ सर्वत्र लोहितादिकतन्तेभ्यः

१२६९ ४,१,०१९ कौरव्यमाण्डूकाभ्यां च

१२७० ४,१,०२० वयसि प्रथमे

१२७१ ४,१,०२१ द्विगोः

१२७२ ४,१,०२२ अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि

१२७३ ४,१,०२३ काण्डान्तात्क्षेत्रे

१२७४ ४,१,०२४ पुरुषात्प्रमाणेऽन्यतरस्याम्

१२७५ ४,१,०२५ बहुव्रीहेरूधसो ङीष्

१२७६ ४,१,०२६ संख्याव्ययादेर्ङीप्

१२७७ ४,१,०२७ दामहायनान्ताच्च

१२७८ ४,१,०२८ अन उपधालोपिनोऽन्यतरस्याम्

१२७९ ४,१,०२९ नित्यं संज्ञाछन्दसोः

१२८० ४,१,०३० केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च

१२८१ ४,१,०३१ रात्रेश्चाजसौ

१२८२ ४,१,०३२ अन्तर्वत्पतिवतोर्नुक्

१२८३ ४,१,०३३ पत्युर्नो यज्ञसंयोगे

१२८४ ४,१,०३४ विभाषा सपूर्वस्य

१२८५ ४,१,०३५ नित्यं सपत्न्यादिषु

१२८६ ४,१,०३६ पूतक्रतोरै च

१२८७ ४,१,०३७ वृषाकप्यग्निकुसितकुसीदानामुदात्तः

१२८८ ४,१,०३८ मनोरौ वा

१२८९ ४,१,०३९ वर्णादनुदात्तात्तोपधात्तो नः

१२९० ४,१,०४० अन्यतो ङीष्

१२९१ ४,१,०४१ षिद्गौरादिभ्यश्च

१२९२ ४,१,०४२
जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनाय
ोविकारमैथुनेच्छाकेशवेशेषु (वर्णना ?)

१२९३ ४,१,०४३ शोणात्प्राचाम्

१२९४ ४,१,०४४ वोतो गुणवचनात्

१२९५ ४,१,०४५ बह्वादिभ्यश्च

१२९६ ४,१,०४६ नित्यं छन्दसि

१२९७ ४,१,०४७ भुवश्च

१२९८ ४,१,०४८ पुंयोगादाख्यायाम्

१२९९ ४,१,०४९ इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्

१३०० ४,१,०५० क्रीतात्करणपूर्वात्

१३०१ ४,१,०५१ क्तादल्पाख्यायाम्

१३०२ ४,१,०५२ बहुव्रीहेश्चान्तोदात्तात्

१३०३ ४,१,०५३ अस्वाङ्गपूर्वपदाद्वा

१३०४ ४,१,०५४ स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्

१३०५ ४,१,०५५ नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च

१३०६ ४,१,०५६ न क्रोडादि-बह्वचः

१३०७ ४,१,०५७ सहनञ्विद्यमानपूर्वाच्च

१३०८ ४,१,०५८ नखमुखात्संज्ञायाम्

१३०९ ४,१,०५९ दीर्घजिह्वी च छन्दसि

१३१० ४,१,०६० दिक्पूर्वपदान्ङीप्

१३११ ४,१,०६१ वाहः

१३१२ ४,१,०६२ सख्यशिश्वीति भाषायाम्

१३१३ ४,१,०६३ जातेरस्त्रीविषयादयोपधात्

१३१४ ४,१,०६४ पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च

१३१५ ४,१,०६५ इतो मनुष्यजातेः

१३१६ ४,१,०६६ ऊङुतः

१३१७ ४,१,०६७ बाह्वन्तात्संज्ञायाम्

१३१८ ४,१,०६८ पङ्गोश्च

१३१९ ४,१,०६९ ऊरूत्तरपदादौपम्ये

१३२० ४,१,०७० संहितशफलक्षणवामादेश्च

१३२१ ४,१,०७१ कद्रुकमण्डल्वोश्छन्दसि

१३२२ ४,१,०७२ संज्ञायाम्

१३२३ ४,१,०७३ शाङ्गरवाद्यञो ङीन्

१३२४ ४,१,०७४ यङश्चाप्

१३२५ ४,१,०७५ आवट्याच्च

१३२६ ४,१,०७६ तद्धिताः

१३२७ ४,१,०७७ यूनस्तिः

१३२८ ४,१,०७८ अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे

१३२९ ४,१,०७९ गोत्रावयवात्

१३३० ४,१,०८० क्रौड्यादिभ्यश्च

१३३१ ४,१,०८१ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम्

१३३२ ४,१,०८२ समर्थानाम् प्रथमाद्वा

१३३३ ४,१,०८३ प्राग्दीव्यतोऽण्

१३३४ ४,१,०८४ अश्वपत्यादिभ्यश्च

१३३५ ४,१,०८५ दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः

१३३६ ४,१,०८६ उत्सादिभ्योऽञ्

१३३७ ४,१,०८७ स्त्रीपुंसाभ्याम् नञ्स्नञौ भवनात्

१३३८ ४,१,०८८ द्विगोर्लुगनपत्ये

१३३९ ४,१,०८९ गोत्रेऽलुगचि

१३४० ४,१,०९० यूनि लुक्

१३४१ ४,१,०९१ फक्फिञोरन्यतरस्याम्

१३४२ ४,१,०९२ तस्यापत्यम्

१३४३ ४,१,०९३ एको गोत्रे

१३४४ ४,१,०९४ गोत्राद्यून्यस्त्रियाम्

१३४५ ४,१,०९५ अत इञ्

१३४६ ४,१,०९६ बाह्वादिभ्यश्च

१३४७ ४,१,०९७ सुधातुरकङ् च

१३४८ ४,१,०९८ गोत्रे कुञ्जादिभ्यश्च्फञ्

१३४९ ४,१,०९९ नडादिभ्यः फक्

१३५० ४,१,१०० हरितादिभ्योऽञः

१३५१ ४,१,१०१ यञिञोश्च

१३५२ ४,१,१०२ शरद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु

१३५३ ४,१,१०३ द्रोणपर्वतजीवन्तादन्यतरस्याम्

१३५४ ४,१,१०४ अनृष्यानन्तर्ये बिदादिभ्योऽञ्

१३५५ ४,१,१०५ गर्गादिभ्यो यञ्

१३५६ ४,१,१०६ मधुबभ्र्वोर्ब्राह्मणकौशिकयोः

१३५७ ४,१,१०७ कपिबोधादाङ्गिरसे

१३५८ ४,१,१०८ वतण्डाच्च

१३५९ ४,१,१०९ लुक् स्त्रियाम्

१३६० ४,१,११० अश्वादिभ्यः फञ्

१३६१ ४,१,१११ भर्गात् त्रैगर्ते

१३६२ ४,१,११२ शिवादिभ्योऽण्

१३६३ ४,१,११३ अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः

१३६४ ४,१,११४ ऋष्यन्धकवृष्णिकुरुभ्यश्च

१३६५ ४,१,११५ मातुरुत्संख्यासंभद्रपूर्वायाः

१३६६ ४,१,११६ कन्यायाः कनीन च

१३६७ ४,१,११७ विकर्णशुङ्गछगलाद्वत्सभरद्वाजात्रिषु

१३६८ ४,१,११८ पीलाया वा

१३६९ ४,१,११९ ढक्च मण्डूकात्

१३७० ४,१,१२० स्त्रीभ्यो ढक्

१३७१ ४,१,१२१ द्व्यचः

१३७२ ४,१,१२२ इतश्चानिञः

१३७३ ४,१,१२३ शुभ्रादिभ्यश्च

१३७४ ४,१,१२४ विकर्णकुषीतकात् काश्यपे

१३७५ ४,१,१२५ भ्रुवो वुक् च

१३७६ ४,१,१२६ कल्याण्यादीनामिनङ् च

१३७७ ४,१,१२७ कुलटाया वा

१३७८ ४,१,१२८ चटकाया ऐरक्

१३७९ ४,१,१२९ गोधाया ढ्रक्

१३८० ४,१,१३० आरगुदीचाम्

१३८१ ४,१,१३१ क्षुद्राभ्यो वा

१३८२ ४,१,१३२ पितृष्वसुश्छण्

१३८३ ४,१,१३३ ढकि लोपः

१३८४ ४,१,१३४ मातृष्वसुश्च

१३८५ ४,१,१३५ चतुष्पाद्भ्यो ढञ्

१३८६ ४,१,१३६ गृष्ट्यादिभ्यश्च

१३८७ ४,१,१३७ राजश्वशुराद्यत्

१३८८ ४,१,१३८ क्षत्राद्घः

१३८९ ४,१,१३९ कुलात्खः

१३९० ४,१,१४० अपूर्वपदादन्यतरस्यां यड्ढकञौ

१३९१ ४,१,१४१ महाकुलादञ्खञौ

१३९२ ४,१,१४२ दुष्कुलाड्ढक्

१३९३ ४,१,१४३ स्वसुश्छः

१३९४ ४,१,१४४ भ्रातुर्व्यच्च

१३९५ ४,१,१४५ व्यन्त्सपत्ने

१३९६ ४,१,१४६ रेवत्यादिभ्यष्ठक्

१३९७ ४,१,१४७ गोत्रस्त्रियाः कुत्सने ण च

१३९८ ४,१,१४८ वृद्धाट्ठक्सौवीरेषु बहुलम्

१३९९ ४,१,१४९ फेश्छ च

१४०० ४,१,१५० फाण्टाहृतिमिमताभ्यां णफिञौ

१४०१ ४,१,१५१ कुर्वादिभ्यो ण्यः

१४०२ ४,१,१५२ सेनान्तलक्षणकारिभ्यश्च

१४०३ ४,१,१५३ उदीचामिञ्

१४०४ ४,१,१५४ तिकादिभ्यः फिञ्

१४०५ ४,१,१५५ कौसल्यकार्मार्याभ्यां च

१४०६ ४,१,१५६ अणो द्व्यचः

१४०७ ४,१,१५७ उदीचां वृद्धादगोत्रात्

१४०८ ४,१,१५८ वाकिनादीनां कुक्च

१४०९ ४,१,१५९ पुत्रान्तादन्यतरस्याम्

१४१० ४,१,१६० प्राचामवृद्धात्फिन्बहुलम्

१४११ ४,१,१६१ मनोर्जातावञ्यतौषुक्च

१४१२ ४,१,१६२ अपत्यं पौत्रप्रभृति गोत्रम्

१४१३ ४,१,१६३ जीवति तु वंश्ये युवा

१४१४ ४,१,१६४ भ्रातरि च ज्यायसि

१४१५ ४,१,१६५ वाऽन्यस्मिन् सपिण्डे स्थविरतरे जीवति

१४१६ ४,१,१६६ वृद्धस्य च पूजायाम्

१४१७ ४,१,१६७ यूनश्च कुत्सायाम्

१४१८ ४,१,१६८ जनपदशब्दात्क्षत्रियादञ्

१४१९ ४,१,१६९ साल्वेयगान्धारिभ्यां च

१४२० ४,१,१७० द्व्यञ्मगधकलिङ्गसूरमसादण्

१४२१ ४,१,१७१ वृद्धेत्कोसलाजादाञ्ञ्यङ्

१४२२ ४,१,१७२ कुरुनादिभ्यो ण्यः

१४२३ ४,१,१७३ साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्

१४२४ ४,१,१७४ ते तद्राजाः

१४२५ ४,१,१७५ कम्बोजाल्लुक्

१४२६ ४,१,१७६ स्त्रियामवन्तिकुन्तिकुरुभ्यश्च

१४२७ ४,१,१७७ अतश्च

१४२८ ४,१,१७८ न प्राच्यभर्गादियौधेयादिभ्यः

१४२९ ४,२,००१ तेन रक्तं रागात्

१४३० ४,२,००२ लाक्षारोचनाशकलकर्दमाट्ठक्

१४३१ ४,२,००३ नक्षत्रेण युक्तः कालः

१४३२ ४,२,००४ लुबविशेषे

१४३३ ४,२,००५ संज्ञायां श्रवणाश्वत्थाभ्याम्

१४३४ ४,२,००६ द्वन्द्वाच्छः

१४३५ ४,२,००७ दृष्टं साम

१४३६ ४,२,००८ कलेर्ढक्

१४३७ ४,२,००९ वामदेवाड्ड्यड्ड्यौ

१४३८ ४,२,०१० परिवृतो रथः

१४३९ ४,२,०११ पाण्डुकम्बलादिनिः

१४४० ४,२,०१२ द्वैपवैयाघ्रादञ्

१४४१ ४,२,०१३ कौमारापूर्ववचने

१४४२ ४,२,०१४ तत्रोद्धृतममत्रेभ्यः

१४४३ ४,२,०१५ स्थण्डिलाच्छयितरि व्रते

१४४४ ४,२,०१६ संस्कृतं भक्षाः

१४४५ ४,२,०१७ शूलोखाद्यत्

१४४६ ४,२,०१८ दध्नष्ठक्

१४४७ ४,२,०१९ उदश्वितोऽन्यतरस्याम्

१४४८ ४,२,०२० क्षीराड्ढञ्

१४४९ ४,२,०२१ साऽस्मिन्पौर्णमासीति

१४५० ४,२,०२२ आग्रहायण्यश्वत्थाट्ठक्

१४५१ ४,२,०२३ विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः

१४५२ ४,२,०२४ साऽस्य देवता

१४५३ ४,२,०२५ कस्येत्

१४५४ ४,२,०२६ शुक्राद्घन्

१४५५ ४,२,०२७ अपोनप्त्रपांनप्तृभ्यां घः

१४५६ ४,२,०२८ छ च

१४५७ ४,२,०२९ महेन्द्राद्घाणौ च

१४५८ ४,२,०३० सोमाट्ट्यण्

१४५९ ४,२,०३१ वाय्वृतुपित्रुषसो यत्

१४६० ४,२,०३२ द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च

१४६१ ४,२,०३३ अग्नेर्ढक्

१४६२ ४,२,०३४ कालेभ्यो भववत्

१४६३ ४,२,०३५ महाराजप्रोष्ठपदाट्ठञ्

१४६४ ४,२,०३६ पितृव्यमातुलपितामहमातामहाः

१४६५ ४,२,०३७ तस्य समूहः

१४६६ ४,२,०३८ भिक्षादिभ्योऽण्

१४६७ ४,२,०३९ गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्

१४६८ ४,२,०४० केदाराद्यञ्च

१४६९ ४,२,०४१ ठञ्कवचिनश्च

१४७० ४,२,०४२ ब्राह्मणमाणववाडवाद्यत्

१४७१ ४,२,०४३ ग्रामजनबन्धुसहायेभ्यस्तल्

१४७२ ४,२,०४४ अनुदात्तादेरञ्

१४७३ ४,२,०४५ खण्डिकादिभ्यश्च

१४७४ ४,२,०४६ चरणेभ्यो धर्मवत्

१४७५ ४,२,०४७ अचित्तहस्तिधेनोष्ठक्

१४७६ ४,२,०४८ केशाश्वाभ्यां यञ्छावन्यतरस्याम्

१४७७ ४,२,०४९ पाशादिभ्यो यः

१४७८ ४,२,०५० खलगोरथात्

१४७९ ४,२,०५१ इनित्रकट्यचश्च

१४८० ४,२,०५२ विषयो देशे

१४८१ ४,२,०५३ राजन्यादिभ्यो वुञ्

१४८२ ४,२,०५४ भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ

१४८३ ४,२,०५५ सोऽस्यादिरिति छन्दसः प्रगाथेषु

१४८४ ४,२,०५६ संग्रामे प्रयोजनयोद्धृभ्यः

१४८५ ४,२,०५७ तदस्यां प्रहरणमिति क्रीडायां णः

१४८६ ४,२,०५८ घञः साऽस्यां क्रियेति ञः

१४८७ ४,२,०५९ तदधीते तद्वेद

१४८८ ४,२,०६० क्रतूक्थादि सूत्रान्ताट्ठक्

१४८९ ४,२,०६१ क्रमादिभ्यो वुन्

१४९० ४,२,०६२ अनुब्राह्मणादिनिः

१४९१ ४,२,०६३ वसन्तादिभ्यष्ठक्

१४९२ ४,२,०६४ प्रोक्ताल्लुक्

१४९३ ४,२,०६५ सूत्राच्च कोपधात्

१४९४ ५,२,०६६ छन्दोब्राह्मणानि च तद्विषयाणि

१४९५ ४,२,०६७ तदस्मिन्नस्तीति देशे तन्नाम्नि

१४९६ ४,२,०६८ तेन निर्वृत्तम्

१४९७ ४,२,०६९ तस्य निवासः

१४९८ ४,२,०७० अदूरभवश्च

१४९९ ४,२,०७१ ओरञ्

१५०० ४,२,०७२ मतोश्च बह्वजङ्गात्

१५०१ ४,२,०७३ बह्वचः कूपेषु

१५०२ ४,२,०७४ उदक्च विपाशः

१५०३ ४,२,०७५ संकलादिभ्यश्च

१५०४ ४,२,०७६ स्त्रीषु सौवीरसाल्वप्राक्षु

१५०५ ४,२,०७७ सुवास्त्वादिभ्योऽण्

१५०६ ४,२,०७८ रोणी

१५०७ ४,२,०७९ कोपधाच्च

१५०८ ४,२,०८०
वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिफिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबल पक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः

१५०९ ४,२,०८१ जनपदे लुप्

१५१० ४,२,०८२ वरणादिभ्यश्च

१५११ ४,२,०८३ शर्कराया वा

१५१२ ४,२,०८४ ठक्छौ च

१५१३ ४,२,०८५ नद्यां मतुप्

१५१४ ४,२,०८६ मध्वादिभ्यश्च

१५१५ ४,२,०८७ कुमुदनडवेतसेभ्यो ड्मतुप्

१५१६ ४,२,०८८ नडशादाड्ड्वलच्

१५१७ ४,२,०८९ शिखाया वलच्

१५१८ ४,२,०९० उत्करादिभ्यश्छः

१५१९ ४,२,०९१ नडादीनां कुक्च

१५२० ४,२,०९२ शेषे

१५२१ ४,२,०९३ राष्ट्रावारपाराद् घखौ

१५२२ ४,२,०९४ ग्रामाद्यखञौ

१५२३ ४,२,०९५ कत्त्र्यादिभ्यो ढकञ्

१५२४ ४,२,०९६ कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु

१५२५ ४,२,०९७ नद्यादिभ्यो ढक्

१५२६ ४,२,०९८ दक्षिणापश्चात्पुरसस्त्यक्

१५२७ ४,२,०९९ कापिश्याः ष्फक्

१५२८ ४,२,१०० रङ्कोरमनुष्येऽण्च

१५२९ ४,२,१०१ द्युप्रागपागुदक्प्रतीचो यत्

१५३० ४,२,१०२ कन्थायाष्ठक्

१५३१ ४,२,१०३ वर्णौ वुक्

१५३२ ४,२,१०४ अव्ययात् त्यप्

१५३३ ४,२,१०५ ऐषमोह्यःश्वसोऽन्यतरस्याम्

१५३४ ४,२,१०६ तीररूपोत्तरपदादञ्ञौ

१५३५ ४,२,१०७ दिक्पूर्वपदादसंज्ञायां ञः

१५३६ ४,२,१०८ मद्रेभ्योऽञ्

१५३७ ४,२,१०९ उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्

१५३८ ४,२,११० प्रस्थोत्तरपदपलद्यादिकोपधादण्

१५३९ ४,२,१११ कण्वादिभ्यो गोत्रे

१५४० ४,२,११२ इञश्च

१५४१ ४,२,११३ न द्व्यचः प्राच्यभरतेषु

१५४२ ४,२,११४ वृद्धाच्छः

१५४३ ४,२,११५ भवतष्ठक्छसौ

१५४४ ४,२,११६ काश्यादिभ्यष्ठञ्ञिठौ

१५४५ ४,२,११७ वाहीकग्रामेभ्यश्च

१५४६ ४,२,११८ विभाषोशीनरेषु

१५४७ ४,२,११९ ओर्देशे ठञ्

१५४८ ४,२,१२० वृद्धात्प्राचाम्

१५४९ ४,२,१२१ धन्वयोपधाद्वुञ्

१५५० ४,२,१२२ प्रस्थपुरवहान्ताच्च

१५५१ ४,२,१२३ रोपधेतोः प्राचाम्

१५५२ ४,२,१२४ जनपदतदवध्योश्च

१५५३ ४,२,१२५ अवृद्धादपि बहुवचनविषयात्

१५५४ ४,२,१२६ कच्छाग्निवक्त्रवर्त्तोत्तरपदात्

१५५५ ४,२,१२७ धूमादिभ्यश्च

१५५६ ४,२,१२८ नगरात्कुत्सनप्रावीण्ययोः

१५५७ ४,२,१२९ अरण्यान्मनुष्ये

१५५८ ४,२,१३० विभाषा कुरुयुगन्धराभ्याम्

१५५९ ४,२,१३१ मद्रवृज्योः कन्

१५६० ४,२,१३२ कोपधादण्

१५६१ ४,२,१३३ कच्छादिभ्यश्च

१५६२ ४,२,१३४ मनुष्यतत्स्थयोर्वुञ्

१५६३ ४,२,१३५ अपदातौ साल्वात्

१५६४ ४,२,१३६ गोयवाग्वोश्च

१५६५ ४,२,१३७ गर्तोत्तरपदाच्छः

१५६६ ४,२,१३८ गहादिभ्यश्च

१५६७ ४,२,१३९ प्राचां कटादेः

१५६८ ४,२,१४० राज्ञः क च

१५६९ ४,२,१४१ वृद्धादकेकान्तखोपधात्

१५७० ४,२,१४२ कन्थापलदनगरग्रामह्रदोत्तरपदात्

१५७१ ४,२,१४३ पर्वताच्च

१५७२ ४,२,१४४ विभाषाऽमनुष्ये

१५७३ ४,२,१४५ कृकणपर्णाद्भारद्वाजे

१५७४ ४,३,००१ युष्मदस्मदोरन्यतरस्यां खञ्च

१५७५ ४,३,००२ तस्मिन्नणि च युष्माकास्माकौ

१५७६ ४,३,००३ तवकममकावेकवचने

१५७७ ४,३,००४ अर्धाद्यत्

१५७८ ४,३,००५ परावराधमोत्तमपूर्वाच्च

१५७९ ४,३,००६ दिक्पूर्वपदाट्ठञ्च

१५८० ४,३,००७ ग्रामजनपदैकदेशादञ्ठञौ

१५८१ ४,३,००८ मध्यान्मः

१५८२ ४,३,००९ अ सांप्रतिके

१५८३ ४,३,०१० द्वीपादनुसमुद्रं यञ्

१५८४ ४,३,०११ कालाट्ठञ्

१५८५ ४,३,०१२ श्राद्धे शरदः

१५८६ ४,३,०१३ विभाषा रोगातपयोः

१५८७ ४,३,०१४ निशाप्रदोषाभ्यां च

१५८८ ४,३,०१५ श्वसस्तुट्च

१५८९ ४,३,०१६ सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्

१५९० ४,३,०१७ प्रावृष एण्यः

१५९१ ४,३,०१८ वर्षाभ्यष्ठक्

१५९२ ४,३,०१९ छन्दसि ठञ्

१५९३ ४,३,०२० वसन्ताच्च

१५९४ ४,३,०२१ हेमन्ताच्च

१५९५ ४,३,०२२ सर्वत्राण्च तलोपश्च

१५९६ ४,३,०२३ सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट्च

१५९७ ४,३,०२४ विभाषा पूर्वाह्णापराह्णाभ्याम्

१५९८ ४,३,०२५ तत्र जातः

१५९९ ४,३,०२६ प्रावृषष्ठप्

१६०० ४,३,०२७ संज्ञायां शरदो वुञ्

१६०१ ४,३,०२८ पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन्

१६०२ ४,३,०२९ पथः पन्थ च

१६०३ ४,३,०३० अमावास्याया वा

१६०४ ४,३,०३१ अ च

१६०५ ४,३,०३२ सिन्ध्वपकराभ्यां कन्

१६०६ ४,३,०३३ अणञौ च

१६०७ ४,३,०३४ श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुगस्तविशाखाऽषाढाबहुलाल्लुक्

१६०८ ४,३,०३५ स्थानान्तगोशालखरशालाच्च

१६०९ ४,३,०३६ वत्सशालाभिजिदश्वयुक्छतभिषजो वा

१६१० ४,३,०३७ नक्षत्रेभ्यो बहुलम्

१६११ ४,३,०३८ कृतलब्धक्रीतकुशलाः

१६१२ ४,३,०३९ प्रायभवः

१६१३ ४,३,०४० उपजानूपकर्णोपनीवेष्ठक्

१६१४ ४,३,०४१ संभूते

१६१५ ४,३,०४२ कोशाड्ढञ्

१६१६ ४,३,०४३ कालात्साधुपुष्प्यत्पच्यमानेषु

१६१७ ४,३,०४४ उप्ते च

१६१८ ४,३,०४५ आश्वयुज्या वुञ्

१६१९ ४,३,०४६ ग्रीष्मवसन्तादन्यतरस्याम्

१६२० ४,३,०४७ देयमृणे

१६२१ ४,३,०४८ कलाप्यश्वत्थयवबुसाद्वुन्

१६२२ ४,३,०४९ ग्रीष्मावरसमाद्वुञ्

१६२३ ४,३,०५० संवत्सराग्रहायणीभ्यां ठञ्च

१६२४ ४,३,०५१ व्याहरति मृगः

१६२५ ४,३,०५२ तदस्य सोढम्

१६२६ ४,३,०५३ तत्र भवः

१६२७ ४,३,०५४ दिगादिभ्यो यत्

१६२८ ४,३,०५५ शरीरावयवाच्च

१६२९ ४,३,०५६ दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्

१६३० ४,३,०५७ ग्रीवाभ्योऽण्च

१६३१ ४,३,०५८ गंभीराञ्ञ्यः

१६३२ ४,३,०५९ अव्ययीभावाच्च

१६३३ ४,३,०६० अन्तःपूर्वपदाट्ठञ्

१६३४ ४,३,०६१ ग्रामात्पर्यनुपूर्वात्

१६३५ ४,३,०६२ जिह्वामूलाङ्गुलेश्छः

१६३६ ४,३,०६३ वर्गान्ताच्च

१६३७ ४,३,०६४ अशब्दे यत्खावन्यतरस्याम्

१६३८ ४,३,०६५ कर्णललाटात्कनलंकारे

१६३९ ४,३,०६६ तस्य व्याख्यान इति च व्याख्यातनाम्नः

१६४० ४,३,०६७ बह्वचोऽन्तोदात्ताट्ठञ्

१६४१ ४,३,०६८ क्रतुयज्ञेभ्यश्च

१६४२ ४,३,०६९ अध्यायेष्वेवर्षेः

१६४३ ४,३,०७० पौरोडाशपुरोडाशात्ष्ठन्

१६४४ ४,३,०७१ छन्दसो यदणौ

१६४५ ४,३,०७२ द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्

१६४६ ४,३,०७३ अणृगयनादिभ्यः

१६४७ ४,३,०७४ तत आगतः

१६४८ ४,३,०७५ ठगायस्थानेभ्यः

१६४९ ४,३,०७६ शुण्डिकादिभ्योऽण्

१६५० ४,३,०७७ विद्यायोनिसंबन्धेभ्यो वुञ्

१६५१ ४,३,०७८ ऋतष्ठञ्

१६५२ ४,३,०७९ पितुर्यच्च

१६५३ ४,३,०८० गोत्रादङ्कवत्

१६५४ ४,३,०८१ हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः

१६५५ ४,३,०८२ मयट्च

१६५६ ४,३,०८३ प्रभवति

१६५७ ४,३,०८४ विदूराञ्ञ्यः

१६५८ ४,३,०८५ तद्गच्छति पथिदूतयोः

१६५९ ४,३,०८६ अभिनिष्क्रामति द्वारम्

१६६० ४,३,०८७ अधिकृत्य कृते ग्रन्थे

१६६१ ४,३,०८८ शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः

१६६२ ४,३,०८९ सोऽस्य निवासः

१६६३ ४,३,०९० अभिजनश्च

१६६४ ४,३,०९१ आयुधजीविभ्यश्छः पर्वते

१६६५ ४,३,०९२ शण्डिकादिभ्यो ञ्यः

१६६६ ४,३,०९३ सिन्धुतक्षशिलादिभ्योऽणञौ

१६६७ ४,३,०९४ तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः

१६६८ ४,३,०९५ भक्तिः

१६६९ ४,३,०९६ अचित्तादेशकालाट्ठक्

१६७० ४,३,०९७ महाराजाट्ठञ्

१६७१ ४,३,०९८ वासुदेवार्जुनाभ्यां वुन्

१६७२ ४,३,०९९ गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्

१६७३ ४,३,१०० जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने

१६७४ ४,३,१०१ तेन प्रोक्तम्

१६७५ ४,३,१०२ तित्तिरिवरतन्तुखण्डिकोखाच्छण्

१६७६ ४,३,१०३ काश्यपकौशिकाभ्यामृषिभ्यां णिनिः

१६७७ ४,३,१०४ कलापिवैशम्पायनान्तेवासिभ्यश्च

१६७८ ४,३,१०५ पुराणप्रोक्तेषु ब्राह्मणकल्पेषु

१६७९ ४,३,१०६ शौनकादिभ्यश्छन्दसि

१६८० ४,३,१०७ कठचरकाल्लुक्

१६८१ ४,३,१०८ कलापिनोऽण्

१६८२ ४,३,१०९ छगलिनो ढिनुक्

१६८३ ४,३,११० पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः

१६८४ ४,३,१११ कर्मन्दकृशाश्वादिनिः

१६८५ ४,३,११२ तेनैकदिक्

१६८६ ४,३,११३ तसिश्च

१६८७ ४,३,११४ उरसो यच्च

१६८८ ४,३,११५ उपज्ञाते

१६८९ ४,३,११६ कृते ग्रन्थे

१६९० ४,३,११७ संज्ञायाम्

१६९१ ४,३,११८ कुलालादिभ्यो वुञ्

१६९२ ४,३,११९ क्षुद्राभ्रमरवटरपादपादञ्

१६९३ ४,३,१२० तस्येदम्

१६९४ ४,३,१२१ रथाद्यत्

१६९५ ४,३,१२२ पत्रपूर्वादञ्

१६९६ ४,३,१२३ पत्राध्वर्युपरिषदश्च

१६९७ ४,३,१२४ हलसीराट्ठक्

१६९८ ४,३,१२५ द्वन्द्वाद्वुन्वैरमैथुनिकयोः

१६९९ ४,३,१२६ गोत्रचरणाद्वुञ्

१७०० ४,३,१२७ सङ्घाङ्कलक्षणेष्वञ्यञिञामण्

१७०१ ४,३,१२८ शाकलाद्वा

१७०२ ४,३,१२९ छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः

१७०३ ४,३,१३० न दण्डमाणवान्तेवासिषु

१७०४ ४,३,१३१ रैवतिकादिभ्यश्छः

१७०५ ४,३,१३२ कौपिञ्जलहास्तिपदादण्

१७०६ ४,३,१३३ आथर्वणिकस्येकलोपश्च

१७०७ ४,३,१३४ तस्य विकारः

१७०८ ४,३,१३५ अवयवे च प्राण्योषधिवृक्षेभ्यः

१७०९ ४,३,१३६ बिल्वादिभ्योऽण्

१७१० ४,३,१३७ कोपधाच्च

१७११ ४,३,१३८ त्रपुजतुनोः षुक्

१७१२ ४,३,१३९ ओरञ्

१७१३ ४,३,१४० अनुदात्तादेश्च

१७१४ ४,३,१४१ पलाशादिभ्यो वा

१७१५ ४,३,१४२ शम्याः ष्ट्लञ्

१७१६ ४,३,१४३ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः

१७१७ ४,३,१४४ नित्यं वृद्धशरादिभ्यः

१७१८ ४,३,१४५ गोश्च पुरीषे

१७१९ ४,३,१४६ पिष्टाच्च

१७२० ४,३,१४७ संज्ञायां कन्

१७२१ ४,३,१४८ व्रीहेः पुरोडाशे

१७२२ ४,३,१४९ असंज्ञायां तिलयवाभ्याम्

१७२३ ४,३,१५० द्व्यचश्छन्दसि

१७२४ ४,३,१५१ नोत्वद्वर्ध्रबिल्वात्

१७२५ ४,३,१५२ तालादिभ्योऽण्

१७२६ ४,३,१५३ जातरूपेभ्यः परिमाणे

१७२७ ४,३,१५४ प्राणिरजतादिभ्योऽञ्

१७२८ ४,३,१५५ ञितश्च तत्प्रत्ययात्

१७२९ ४,३,१५६ क्रीतवत्परिमाणात्

१७३० ४,३,१५७ उष्ट्राद्वुञ्

१७३१ ४,३,१५८ उमोर्णयोर्वा

१७३२ ४,३,१५९ एण्या ढञ्

१७३३ ४,३,१६० गोपयसोर्यत्

१७३४ ४,३,१६१ द्रोश्च

१७३५ ४,३,१६२ माने वयः

१७३६ ४,३,१६३ फले लुक्

१७३७ ४,३,१६४ प्लक्षादिभ्योऽण्

१७३८ ४,३,१६५ जम्ब्वा वा

१७३९ ४,३,१६६ लुप् च

१७४० ४,३,१६७ हरीतक्यादिभ्यश्च

१७४१ ४,३,१६८ कंसीयपरशव्ययोर्यञञौ लुक्च

१७४२ ४,४,००१ प्राग्वहतेष्ठक्

१७४३ ४,४,००२ तेन दीव्यतिखनतिजयतिजितम्

१७४४ ४,४,००३ संस्कृतम्

१७४५ ४,४,००४ कुलत्थकोपधादण्

१७४६ ४,४,००५ तरति

१७४७ ४,४,००६ गोपुच्छाट्ठञ्

१७४८ ४,४,००७ नौद्व्यचष्ठन्

१७४९ ४,४,००८ चरति

१७५० ४,४,००९ आकर्षात्ष्ठल्

१७५१ ४,४,०१० पर्पादिभ्यः ष्ठन्

१७५२ ४,४,०११ श्वगणाट्ठञ्च

१७५३ ४,४,०१२ वेतनादिभ्यो जीवति

१७५४ ४,४,०१३ वस्नक्रयविक्रयाट्ठन्

१७५५ ४,४,०१४ आयुधाच्छ च

१७५६ ४,४,०१५ हरत्युत्सङ्गादिभ्यः

१७५७ ४,४,०१६ भस्त्रादिभ्यः ष्ठन्

१७५८ ४,४,०१७ विभाषा विवधात्

१७५९ ४,४,०१८ अण्कुटिलिकायाः

१७६० ४,४,०१९ निर्वृत्तेऽक्षद्यूतादिभ्यः

१७६१ ४,४,०२० क्त्रेर्मम्नित्यम्

१७६२ ४,४,०२१ अपमित्ययाचिताभ्यां कक्कनौ

१७६३ ४,४,०२२ संसृष्टे

१७६४ ४,४,०२३ चूर्णादिनिः

१७६५ ४,४,०२४ लवणाल्लुक्

१७६६ ४,४,०२५ मुद्गादण्

१७६७ ४,४,०२६ व्यञ्जनैरुपसिक्ते

१७६८ ४,४,०२७ ओजःसहोऽम्भसा वर्तते

१७६९ ४,४,०२८ तत्प्रत्यनुपूर्वमीपलोमकूलम्

१७७० ४,४,०२९ परिमुखं च

१७७१ ४,४,०३० प्रयच्छति गर्ह्यम्

१७७२ ४,४,०३१ कुसीददशैकादशात्ष्ठन्ष्ठचौ

१७७३ ४,४,०३२ उञ्छति

१७७४ ४,४,०३३ रक्षति

१७७५ ४,४,०३४ शब्ददर्दुरं करोति

१७७६ ४,४,०३५ पक्षिमत्स्यमृगान् हन्ति

१७७७ ४,४,०३६ परिपन्थं च तिष्ठति

१७७८ ४,४,०३७ माथोत्तरपदपदव्यनुपदं धावति

१७७९ ४,४,०३८ आक्रन्दाट्ठञ्च

१७८० ४,४,०३९ पदोत्तरपदं गृह्णाति

१७८१ ४,४,०४० प्रतिकण्ठार्थललामं च

१७८२ ४,४,०४१ धर्मं चरति

१७८३ ४,४,०४२ प्रतिपथमेति ठंश्च

१७८४ ४,४,०४३ समवायान् समवैति

१७८५ ४,४,०४४ परिषदो ण्यः

१७८६ ४,४,०४५ सेनाया वा

१७८७ ४,४,०४६ संज्ञायां ललाटकुक्कुट्यौ पश्यति

१७८८ ४,४,०४७ तस्य धर्म्यम्

१७८९ ४,४,०४८ अण्महिष्यादिभ्यः

१७९० ४,४,०४९ ऋतोऽञ्

१७९१ ४,४,०५० अवक्रयः

१७९२ ४,४,०५१ तदस्य पण्यम्

१७९३ ४,४,०५२ लवणाट्ठञ्

१७९४ ४,४,०५३ किसरादिभ्यः ष्ठन्

१७९५ ४,४,०५४ शलालुनोऽन्यतरस्याम्

१७९६ ४,४,०५५ शिल्पम्

१७९७ ४,४,०५६ मड्डुकझर्झरादणन्यतरस्याम्

१७९८ ४,४,०५७ प्रहरणम्

१७९९ ४,४,०५८ परश्वधाट्ठञ् च

१८०० ४,४,०५९ शक्तियष्ट्योरीकक्

१८०१ ४,४,०६० अस्ति नास्ति दिष्टं मतिः

१८०२ ४,४,०६१ शीलम्

१८०३ ४,४,०६२ छत्त्रादिभ्यो णः

१८०४ ४,४,०६३ कर्माध्ययने वृत्तम्

१८०५ ४,४,०६४ बह्वच्पूर्वपदाट्ठञ्

१८०६ ४,४,०६५ हितं भक्षाः

१८०७ ४,४,०६६ तदस्मै दीयते नियुक्तम्

१८०८ ४,४,०६७ श्राणामांसौदनाट्टिठन्

१८०९ ४,४,०६८ भक्तादणन्यतरस्याम्

१८१० ४,४,०६९ तत्र नियुक्तः

१८११ ४,४,०७० अगारान्ताट्ठन्

१८१२ ४,४,०७१ अध्यायिन्यदेशकालात्

१८१३ ४,४,०७२ कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति

१८१४ ४,४,०७३ निकटे वसति

१८१५ ४,४,०७४ आवसथात् ष्ठल्

१८१६ ४,४,०७५ प्राग्घिताद्यत्

१८१७ ४,४,०७६ तद्वहति रथयुगप्रासङ्गम्

१८१८ ४,४,०७७ धुरो यड्ढकौ

१८१९ ४,४,०७८ खः सर्वधुरात्

१८२० ४,४,०७९ एकधुराल्लुक्च

१८२१ ४,४,०८० शकटादण्

१८२२ ४,४,०८१ हलसीराट्ठक्

१८२३ ४,४,०८२ संज्ञायां जन्याः

१८२४ ४,४,०८३ विध्यत्यधनुषा

१८२५ ४,४,०८४ धनगणं लब्धा

१८२६ ४,४,०८५ अन्नाण्णः

१८२७ ४,४,०८६ वशं गतः

१८२८ ४,४,०८७ पदमस्मिन् दृश्यम्

१८२९ ४,४,०८८ मूलमस्याबर्हि

१८३० ४,४,०८९ संज्ञायां धेनुष्या

१८३१ ४,४,०९० गृहपतिना संयुक्ते ञ्यः

१८३२ ४,४,०९१ नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु

१८३३ ४,४,०९२ धर्मपथ्यर्थन्यायादनपेते

१८३४ ४,४,०९३ छन्दसो निर्मिते

१८३५ ४,४,०९४ उरसोऽण् च

१८३६ ४,४,०९५ हृदयस्य प्रियः

१८३७ ४,४,०९६ बन्धने चर्षौ

१८३८ ४,४,०९७ मतजनहलात्करणजल्पकर्षेषु

१८३९ ४,४,०९८ तत्र साधुः

१८४० ४,४,०९९ प्रतिजनादिभ्यः खञ्

१८४१ ४,४,१०० भक्ताण्णः

१८४२ ४,४,१०१ परिषदो ण्यः

१८४३ ४,४,१०२ कथादिभ्यष्ठक्

१८४४ ४,४,१०३ गुडादिभ्यष्ठञ्

१८४५ ४,४,१०४ पथ्यतिथिवसतिस्वपतेर्ढञ्

१८४६ ४,४,१०५ सभाया यः

१८४७ ४,४,१०६ ढश्छन्दसि

१८४८ ४,४,१०७ समानतीर्थे वासी

१८४९ ४,४,१०८ समानोदरे शयित ओ चोदात्तः

१८५० ४,४,१०९ सोदराद्यः

१८५१ ४,४,११० भवे छन्दसि

१८५२ ४,४,१११ पाथोनदीभ्यां ड्यण्

१८५३ ४,४,११२ वेशन्तहिमवद्भ्यामण्

१८५४ ४,४,११३ स्रोतसो विभाषा ड्यड्ड्यौ

१८५५ ४,४,११४ सगर्भसयूथसनुताद्यन्

१८५६ ४,४,११५ तुग्राद्घन्

१८५७ ४,४,११६ अग्राद्यत्

१८५८ ४,४,११७ घच्छौ च

१८५९ ४,४,११८ समुद्राभ्राद्घः

१८६० ४,४,११९ बर्हिषि दत्तम्

१८६१ ४,४,१२० दूतस्य भागकर्मणि

१८६२ ४,४,१२१ रक्षोयातूनां हननी

१८६३ ४,४,१२२ रेवतीजगतीहविष्याभ्यः प्रशस्ये

१८६४ ४,४,१२३ असुरस्य स्वम्

१८६५ ४,४,१२४ मायायामण्

१८६६ ४,४,१२५ तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक्च मतोः

१८६७ ४,४,१२६ अश्विमानण्

१८६८ ४,४,१२७ वयस्यासु मूर्ध्नो मतुप्

१८६९ ४,४,१२८ मत्वर्थे मासतन्वोः

१८७० ४,४,१२९ मधोर्ञ च

१८७१ ४,४,१३० ओजसोऽहनि यत्खौ

१८७२ ४,४,१३१ वेशोयशआदेर्भगाद्यल्

१८७३ ४,४,१३२ ख च

१८७४ ४,४,१३३ पूर्वैःकृतमिनियौ च

१८७५ ४,४,१३४ अद्भिः संस्कृतम्

१८७६ ४,४,१३५ सहस्रेण सम्मितौ घः

१८७७ ४,४,१३६ मतौ च

१८७८ ४,४,१३७ सोममर्हति यः

१८७९ ४,४,१३८ मये च

१८८० ४,४,१३९ मधोः

१८८१ ४,४,१४० वसोः समूहे च

१८८२ ४,४,१४१ नक्षत्राद्घः

१८८३ ४,४,१४२ सर्वदेवात्तातिल्

१८८४ ४,४,१४३ शिवशमरिष्टस्य करे

१८८५ ४,४,१४४ भावे च

१८८६ ५,१,००१ प्राक्क्रीताच्छः

१८८७ ५,१,००२ उगवादिभ्यो यत्

१८८८ ५,१,००३ कम्बलाच्च संज्ञायाम्

१८८९ ५,१,००४ विभाषा हविरपूपादिभ्यः

१८९० ५,१,००५ तस्मै हितम्

१८९१ ५,१,००६ शरीरावयवाद्यत्

१८९२ ५,१,००७ खलयवमाषतिलवृषब्रह्मणश्च

१८९३ ५,१,००८ अजाविभ्यां थ्यन्

१८९४ ५,१,००९ आत्मन्विश्वजनभोगोत्तरपदात्खः

१८९५ ५,१,०१० सर्वपुरुषाभ्यां णढञौ

१८९६ ५,१,०११ माणवचरकाभ्यां खञ्

१८९७ ५,१,०१२ तदर्थं विकृतेः प्रकृतौ

१८९८ ५,१,०१३ छदिरुपधिबलेर्ढञ्

१८९९ ५,१,०१४ ऋषभोपानहोर्ञ्यः

१९०० ५,१,०१५ चर्मणोऽञ्

१९०१ ५,१,०१६ तदस्य तदस्मिन् स्यादिति

१९०२ ५,१,०१७ परिखाया ढञ्

१९०३ ५,१,०१८ प्राग्वतेष्ठञ्

१९०४ ५,१,०१९ आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्

१९०५ ५,१,०२० असमासे निष्कादिभ्यः

१९०६ ५,१,०२१ शताच्च ठन्यतावशते

१९०७ ५,१,०२२ संख्याया अतिशदन्तायाः कन्

१९०८ ५,१,०२३ वतोरिड्वा

१९०९ ५,१,०२४ विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्

१९१० ५,१,०२५ कंसाट्टिठन्

१९११ ५,१,०२६ शूर्पादञन्यतरस्याम्

१९१२ ५,१,०२७ शतमानविंशतिकसहस्रवसनादण्

१९१३ ५,१,०२८ अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्

१९१४ ५,१,०२९ विभाषा कार्षापणसहस्राभ्याम्

१९१५ ५,१,०३० द्वित्रिपूर्वान्निष्कात्

१९१६ ५,१,०३१ बिस्ताच्च

१९१७ ५,१,०३२ विंशतिकात्खः

१९१८ ५,१,०३३ खार्या ईकन्

१९१९ ५,१,०३४ पणपादमाषशताद्यत्

१९२० ५,१,०३५ शाणाद्वा

१९२१ ५,१,०३६ द्वित्रिपूर्वादण्च

१९२२ ५,१,०३७ तेन क्रीतम्

१९२३ ५,१,०३८ तस्य निमित्तं संयोगोत्पातौ

१९२४ ५,१,०३९ गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्

१९२५ ५,१,०४० पुत्राच्छ च

१९२६ ५,१,०४१ सर्वभूमिपृथिवीभ्यामणञौ

१९२७ ५,१,०४२ तस्येश्वरः

१९२८ ५,१,०४३ तत्र विदित इति च

१९२९ ५,१,०४४ लोकसर्वलोकाट्ठञ्

१९३० ५,१,०४५ तस्य वापः

१९३१ ५,१,०४६ पात्रात् ष्ठन्

१९३२ ५,१,०४७ तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते

१९३३ ५,१,०४८ पूरणार्धाट्ठन्

१९३४ ५,१,०४९ भागाद्यच्च

१९३५ ५,१,०५० तद्धरति वहत्यावहति भाराद्वंशादिभ्यः

१९३६ ५,१,०५१ वस्नद्रव्याभ्यां ठन्कनौ

१९३७ ५,१,०५२ संभवत्यवहरति पचति

१९३८ ५,१,०५३ आढकाचितपात्रात्खोऽन्यतरस्याम्

१९३९ ५,१,०५४ द्विगोः ष्ठंश्च

१९४० ५,१,०५५ कुलिजाल्लुक्खौ च

१९४१ ५,१,०५६ सोऽस्यांशवस्नभृतयः

१९४२ ५,१,०५७ तदस्य परिमाणम्

१९४३ ५,१,०५८ संख्यायाः संज्ञासंघसूत्राध्ययनेषु

१९४४ ५,१,०५९ पंक्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्

१९४५ ५,१,०६० पञ्चद्दशतौ वर्गे वा

१९४६ ५,१,०६१ सप्तनोऽञ्छन्दसि

१९४७ ५,१,०६२ त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्

१९४८ ५,१,०६३ तदर्हति

१९४९ ५,१,०६४ छेदादिभ्यो नित्यम्

१९५० ५,१,०६५ शीर्षच्छेदाद्यच्च

१९५१ ५,१,०६६ दण्डादिभ्यो यः

१९५२ ५,१,०६७ छन्दसि च

१९५३ ५,१,०६८ पात्राद्घंश्च

१९५४ ५,१,०६९ कडङ्करदक्षिणाच्छ च

१९५५ ५,१,०७० स्थालीबिलात्

१९५६ ५,१,०७१ यज्ञर्त्विग्भ्यां घखञौ

१९५७ ५,१,०७२ पारायणतुरायणचान्द्रायणं वर्तयति

१९५८ ५,१,०७३ संशयमापन्नः

१९५९ ५,१,०७४ योजनं गच्छति

१९६० ५,१,०७५ पथः ष्कन्

१९६१ ५,१,०७६ पन्थो ण नित्यम्

१९६२ ५,१,०७७ उत्तरपथेनाहृतं च

१९६३ ५,१,०७८ कालात्

१९६४ ५,१,०७९ तेन निर्वृत्तम्

१९६५ ५,१,०८० तमधीष्टो भृतो भूतो भावी

१९६६ ५,१,०८१ मासाद्वयसि यत्खौ

१९६७ ५,१,०८२ द्विगोर्यप्

१९६८ ५,१,०८३ षण्मासाण्ण्यच्च

१९६९ ५,१,०८४ अवयसि ठंश्च

१९७० ५,१,०८५ समायाः खः

१९७१ ५,१,०८६ द्विगोर्वा

१९७२ ५,१,०८७ रात्र्यहःसंवत्सराच्च

१९७३ ५,१,०८८ वर्षाल्लुक्च

१९७४ ५,१,०८९ चित्तवति नित्यम्

१९७५ ५,१,०९० षष्टिकाः षष्टिरात्रेण पच्यन्ते

१९७६ ५,१,०९१ वत्सरान्ताच्छश्छन्दसि

१९७७ ५,१,०९२ संपरिपूर्वात्ख च

१९७८ ५,१,०९३ तेन परिजय्यलभ्यकार्यसुकरम्

१९७९ ५,१,०९४ तदस्य ब्रह्मचर्यम्

१९८० ५,१,०९५ तस्य च दक्षिणा यज्ञाख्येभ्यः

१९८१ ५,१,०९६ तत्र च दीयते कार्यं भववत्

१९८२ ५,१,०९७ व्युष्टादिभ्योऽण्

१९८३ ५,१,०९८ तेन यथाकथा च हस्ताभ्यां णयतौ

१९८४ ५,१,०९९ संपादिनि

१९८५ ५,१,१०० कर्मवेषाद्यत्

१९८६ ५,१,१०१ तस्मै प्रभवति संतापादिभ्यः

१९८७ ५,१,१०२ योगाद्यच्च

१९८८ ५,१,१०३ कर्मण उकञ्

१९८९ ५,१,१०४ समयस्तदस्य प्राप्तम्

१९९० ५,१,१०५ ऋतोरण्

१९९१ ५,१,१०६ छन्दसि घस्

१९९२ ५,१,१०७ कालाद्यत्

१९९३ ५,१,१०८ प्रकृष्टे ठञ्

१९९४ ५,१,१०९ प्रयोजनम्

१९९५ ५,१,११० विशाखाषाढादण्मन्थदण्डयोः

१९९६ ५,१,१११ अनुप्रवचनादिभ्यश्छः

१९९७ ५,१,११२ समापनात्सपूर्वपदात्

१९९८ ५,१,११३ ऐकागारिकट् चौरे

१९९९ ५,१,११४ आकालिकडाद्यन्तवचने

२००० ५,१,११५ तेन तुल्यं क्रिया चेद्वतिः

२००१ ५,१,११६ तत्र तस्येव

२००२ ५,१,११७ तदर्हम्

२००३ ५,१,११८ उपसर्गाच्छन्दसि धात्वर्थे

२००४ ५,१,११९ तस्य भावस्त्वतलौ

२००५ ५,१,१२० आ च त्वात्

२००६ ५,१,१२१ न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटयुधकतरसलसेभ्यः

२००७ ५,१,१२२ पृथ्वादिभ्य इमनिज्वा

२००८ ५,१,१२३ वर्ण दृढादिभ्यः ष्यञ्च

२००९ ५,१,१२४ गुणवचनब्राह्मणआदिभ्यः कर्मणि च

२०१० ५,१,१२५ स्तेनाद्यन्नलोपश्च

२०११ ५,१,१२६ सख्युर्यः

२०१२ ५,१,१२७ कपिज्ञात्योर्ढक्

२०१३ ५,१,१२८ पत्यन्तपुरोहितादिभ्यो यत्

२०१४ ५,१,१२९ प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्

२०१५ ५,१,१३० हायनान्तयुवादिभ्योऽण्

२०१६ ५,१,१३१ इगन्ताच्च लघुपूर्वात्

२०१७ ५,१,१३२ योपधाद्गुरूपोत्तमाद्वुञ्

२०१८ ५,१,१३३ द्वन्द्वमनोज्ञादिभ्यश्च

२०१९ ५,१,१३४ गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु

२०२० ५,१,१३५ होत्राभ्यश्छः

२०२१ ५,१,१३६ ब्रह्मणस्त्वः

२०२२ ५,२,००१ धान्यानां भवने क्षेत्रे खञ्

२०२३ ५,२,००२ व्रीहिशाल्योर्ढक्

२०२४ ५,२,००३ यवयवकषष्टिकाद्यत्

२०२५ ५,२,००४ विभाषा तिलमाषोमाभङ्गाणुभ्यः

२०२६ ५,२,००५ सर्वचर्मणः कृतः खखञौ

२०२७ ५,२,००६ यथामुखसंमुखस्य दर्शनः खः

२०२८ ५,२,००७ तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति

२०२९ ५,२,००८ आप्रपदं प्राप्नोति

२०३० ५,२,००९ अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु

२०३१ ५,२,०१० परोवरपरम्परपुत्रपौत्रमनुभवति

२०३२ ५,२,०११ अवारपारात्यन्तानुकामं गामी

२०३३ ५,२,०१२ समांसमां विजायते

२०३४ ५,२,०१३ अद्यश्वीनाऽवष्टब्धे

२०३५ ५,२,०१४ आगवीनः

२०३६ ५,२,०१५ अनुग्वलंगामी

२०३७ ५,२,०१६ अध्वनो यत्खौ

२०३८ ५,२,०१७ अभ्यमित्राच्छ च

२०३९ ५,२,०१८ गोष्ठात्खञ् भूतपूर्वे

२०४० ५,२,०१९ अश्वस्यैकाहगमः

२०४१ ५,२,०२० शालीनकौपीने अधृष्टाकार्ययोः

२०४२ ५,२,०२१ व्रातेन जीवति

२०४३ ५,२,०२२ साप्तपदीनं सख्यम्

२०४४ ५,२,०२३ हैयङ्गवीनं संज्ञायाम्

२०४५ ५,२,०२४ तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ

२०४६ ५,२,०२५ पक्षात्तिः

२०४७ ५,२,०२६ तेन वित्तश्चुञ्चुप्चणपौ

२०४८ ५,२,०२७ विनञ्भ्यां नानाञौ न सह

२०४९ ५,२,०२८ वेः शालच्छङ्कटचौ

२०५० ५,२,०२९ संप्रोदश्च कटच्

२०५१ ५,२,०३० अवात्कुटारच्च

२०५२ ५,२,०३१ नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः

२०५३ ५,२,०३२ नेर्बिडज्बिरीसचौ

२०५४ ५,२,०३३ इनच्पिटच्चिकचि च

२०५५ ५,२,०३४ उपाधिभ्यां त्यकन्नासन्नारूढयोः

२०५६ ५,२,०३५ कर्मणि घटोऽठच्

२०५७ ५,२,०३६ तदस्य संजातं तारकादिभ्य इतच्

२०५८ ५,२,०३७ प्रमाणे द्वयसज्दघ्नञ्मात्रचः

२०५९ ५,२,०३८ पुरुष हस्तिभ्यामण्च

२०६० ५,२,०३९ यत्तदेतेभ्यः परिमाणे वतुप्

२०६१ ५,२,०४० किमिदम्भ्यां वो घः

२०६२ ५,२,०४१ किमः संख्यापरिमाणे डति च

२०६३ ५,२,०४२ संख्याया अवयवे तयप्

२०६४ ५,२,०४३ द्वित्रिभ्यां तयस्यायज्वा

२०६५ ५,२,०४४ उभादुदात्तो नित्यम्

२०६६ ५,२,०४५ तदस्मिन्नधिकमिति दशान्ताड्डः

२०६७ ५,२,०४६ शदन्त विंशतेश्च

२०६८ ५,२,०४७ संख्याया गुणस्य निमाने मयट्

२०६९ ५,२,०४८ तस्य पूरणे डट्

२०७० ५,२,०४९ नान्तादसंख्यादेर्मट्

२०७१ ५,२,०५० थट् च च्छन्दसि

२०७२ ५,२,०५१ षट्कतिकतिपयचतुरां थुक्

२०७३ ५,२,०५२ बहुपूगगणसंघस्य तिथुक्

२०७४ ५,२,०५३ वतोरिथुक्

२०७५ ५,२,०५४ द्वेस्तीयः

२०७६ ५,२,०५५ त्रेः सम्प्रसारणं च

२०७७ ५,२,०५६ विंशत्यादिभ्यस्तमडन्यतरस्याम्

२०७८ ५,२,०५७ नित्यं शतादिमासार्धमाससंवत्सराच्च

२०७९ ५,२,०५८ षष्ट्यादेश्चासंख्यादेः

२०८० ५,२,०५९ मतौ छः सूक्तसाम्नोः

२०८१ ५,२,०६० अध्यायानुवाकयोर्लुक्

२०८२ ५,२,०६१ विमुक्तादिभ्योऽण्

२०८३ ५,२,०६२ गोषदादिभ्यो वुन्

२०८४ ५,२,०६३ तत्र कुशलः पथः

२०८५ ५,२,०६४ आकर्षादिभ्यः कन्

२०८६ ५,२,०६५ धनहिरण्यात्कामे

२०८७ ५,२,०६६ स्वाङ्गेभ्यः प्रसिते

२०८८ ५,२,०६७ उदराट्ठगाद्यूने

२०८९ ५,२,०६८ सस्येन परिजातः

२०९० ५,२,०६९ अंशं हारी

२०९१ ५,२,०७० तन्त्रादचिरापहृते

२०९२ ५,२,०७१ ब्राह्मणकोष्णिके संज्ञायाम्

२०९३ ५,२,०७२ शीतोष्णाभ्यां कारिणि

२०९४ ५,२,०७३ अधिकम्

२०९५ ५,२,०७४ अनुकाभिकाभीकः कमिता

२०९६ ५,२,०७५ पार्श्वेनान्विच्छति

२०९७ ५,२,०७६ अयःशूलदण्डाजिनाभ्यां ठक्ठञौ

२०९८ ५,२,०७७ तावतिथं ग्रहणमिति लुग्वा

२०९९ ५,२,०७८ स एषां ग्रामणीः

२१०० ५,२,०७९ शृङ्खलमस्य बन्धनं करभे

२१०१ ५,२,०८० उत्क उन्मनाः

२१०२ ५,२,०८१ कालप्रयोजनाद्रोगे

२१०३ ५,२,०८२ तदस्मिन्नन्नं प्राये संज्ञायाम्

२१०४ ५,२,०८३ कुल्माषादञ्

२१०५ ५,२,०८४ श्रोत्रियंश्छन्दोऽधीते

२१०६ ५,२,०८५ श्राद्धमनेन भुक्तमिनिठनौ

२१०७ ५,२,०८६ पूर्वादिनिः

२१०८ ५,२,०८७ सपूर्वाच्च

२१०९ ५,२,०८८ इष्टादिभ्यश्च

२११० ५,२,०८९ छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि

२१११ ५,२,०९० अनुपद्यन्वेष्टा

२११२ ५,२,०९१ साक्षाद्द्रष्टरि संज्ञायाम्

२११३ ५,२,०९२ क्षेत्रियच् परक्षेत्रे चिकित्स्यः

२११४ ५,२,०९३ इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा

२११५ ५,२,०९४ तदस्यास्त्यस्मिन्निति मतुप्

२११६ ५,२,०९५ रसादिभ्यश्च

२११७ ५,२,०९६ प्राणिस्थादातो लजन्यतरस्याम्

२११८ ५,२,०९७ सिध्मादिभ्यश्च

२११९ ५,२,०९८ वत्सांसाभ्यां कामबले

२१२० ५,२,०९९ फेनादिलच्च

२१२१ ५,२,१०० लोमादि पामादि पिच्छादिभ्यः शनेलचः

२१२२ ५,२,१०१ प्रज्ञाश्रद्धार्चाभ्यो णः

२१२३ ५,२,१०२ तपःसहस्राभ्यां विनीनी

२१२४ ५,२,१०३ अण्च

२१२५ ५,२,१०४ सिकताशर्कराभ्यां च

२१२६ ५,२,१०५ देशे लुबिलचौ च

२१२७ ५,२,१०६ दन्त उन्नत उरच्

२१२८ ५,२,१०७ ऊषसुषिमुष्कमधोरः

२१२९ ५,२,१०८ द्युद्रुभ्यां मः

२१३० ५,२,१०९ केशाद्वोऽन्यतरस्याम्

२१३१ ५,२,११० गाण्ड्यजगात्संज्ञायाम्

२१३२ ५,२,१११ काण्डाण्डादीरन्नीरचौ

२१३३ ५,२,११२ रजः कृष्यासुतिपरिषदो वलच्

२१३४ ५,२,११३ दन्तशिखात्संज्ञायाम्

२१३५ ५,२,११४ ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः

२१३६ ५,२,११५ अत इनिठनौ

२१३७ ५,२,११६ व्रीह्यादिभ्यश्च

२१३८ ५,२,११७ तुन्दादिभ्य इलच्च

२१३९ ५,२,११८ एकगोपूर्वाट्ठञ् नित्यम्

२१४० ५,२,११९ शतसहस्रान्ताच्च निष्कात्

२१४१ ५,२,१२० रूपादाहतप्रशंसयोर्यप्

२१४२ ५,२,१२१ अस्मायामेधास्रजो विनिः

२१४३ ५,२,१२२ बहुलम् छन्दसि

२१४४ ५,२,१२३ ऊर्णाया युस्

२१४५ ५,२,१२४ वाचो ग्मिनिः

२१४६ ५,२,१२५ आलजाटचौ बहुभाषिणि

२१४७ ५,२,१२६ स्वामिन्नैश्वर्ये

२१४८ ५,२,१२७ अर्श आदिभ्योऽच्

२१४९ ५,२,१२८ द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः

२१५० ५,२,१२९ वातातीसाराभ्यां कुक्च

२१५१ ५,२,१३० वयसि पूरणात्

२१५२ ५,२,१३१ सुखादिभ्यश्च

२१५३ ५,२,१३२ धर्मशीलवर्णान्ताच्च

२१५४ ५,२,१३३ हस्ताज्जातौ

२१५५ ५,२,१३४ वर्णाद्ब्रह्मचारिणि

२१५६ ५,२,१३५ पुष्करादिभ्यो देशे

२१५७ ५,२,१३६ बलादिभ्यो मतुबन्यतरस्याम्

२१५८ ५,२,१३७ संज्ञायां मन्माभ्याम्

२१५९ ५,२,१३८ कंशम्भ्यां बभयुस्तितुतयसः

२१६० ५,२,१३९ तुन्दिबलिबटेर्भः

२१६१ ५,२,१४० अहंशुभमोर्युस्

२१६२ ५,३,००१ प्राग्दिशो विभक्तिः

२१६३ ५,३,००२ किंसर्वनामबहुभ्योऽद्व्यादिभ्यः

२१६४ ५,३,००३ इदम इश्

२१६५ ५,२,००४ एतेतौ रथोः

२१६६ ५,२,००५ एतदोऽन्

२१६७ ५,३,००६ सर्वस्य सोऽन्यतरस्यां दि

२१६८ ५,३,००७ पञ्चम्यास्तसिल्

२१६९ ५,३,००८ तसेश्च

२१७० ५,३,००९ पर्यभिभ्यां च

२१७१ ५,३,०१० सप्तम्यास्त्रल्

२१७२ ५,३,०११ इदमो हः

२१७३ ५,३,०१२ किमोऽत्

२१७४ ५,३,०१३ वा ह च छन्दसि

२१७५ ५,३,०१४ इतराभ्योऽपि दृश्यन्ते

२१७६ ५,३,०१५ सर्वैकान्यकिंयत्तदः काले दा

२१७७ ५,३,०१६ इदमो र्हिल्

२१७८ ५,३,०१७ अधुना

२१७९ ५,३,०१८ दानीं च

२१८० ५,३,०१९ तदो दा च

२१८१ ५,३,०२० तयोर्दार्हिलौ च छन्दसि

२१८२ ५,३,०२१ अनद्यतने र्हिलन्यतरस्याम्

२१८३ ५,३,०२२ सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः

२१८४ ५,३,०२३ प्रकारवचने थाल्

२१८५ ५,३,०२४ इदस्थमुः

२१८६ ५,३,०२५ किमश्च

२१८७ ५,३,०२६ था हेतौ च छन्दसि

२१८८ ५,३,०२७ दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः

२१८९ ५,३,०२८ दक्षिणोत्तराभ्यामतसुच्

२१९० ५,३,०२९ विभाषा परावराभ्याम्

२१९१ ५,३,०३० अञ्चेर्लुक्

२१९२ ५,३,०३१ उपर्युपरिष्टात्

२१९३ ५,३,०३२ पश्चात्

२१९४ ५,३,०३३ पश्च पश्चा च छन्दसि

२१९५ ५,३,०३४ उत्तराधरदक्षिणादातिः

२१९६ ५,३,०३५ एनबन्यतरस्यामदूरेऽपञ्चम्याः

२१९७ ५,३,०३६ दक्षिणादाच्

२१९८ ५,३,०३७ आहि च दूरे

२१९९ ५,३,०३८ उत्तराच्च

२२०० ५,३,०३९ पूर्वाधरावराणामसिपुरधवश्चैषाम्

२२०१ ५,३,०४० अस्ताति च

२२०२ ५,३,०४१ विभाषाऽवरस्य

२२०३ ५,३,०४२ संख्याया विधार्थे धा

२२०४ ५,३,०४३ अधिकरणविचाले च

२२०५ ५,३,०४४ एकाद्धो ध्यमुञन्यतरस्याम्

२२०६ ५,३,०४५ द्वित्र्योश्च धमुञ्

२२०७ ५,३,०४६ एधाच्च

२२०८ ५,३,०४७ याप्ये पाशप्

२२०९ ५,३,०४८ पूरणाद्भागे तीयादन्

२२१० ५,३,०४९ प्रागेकादशभ्योऽच्छन्दसि

२२११ ५,३,०५० षष्ठाष्टमाभ्यां ञ च

२२१२ ५,३,०५१ मानपश्वङ्गयोः कन्लुकौ च

२२१३ ५,३,०५२ एकादाकिनिच्चासहाये

२२१४ ५,३,०५३ भूतपूर्वे चरट्

२२१५ ५,३,०५४ षष्ठ्या रूप्य च

२२१६ ५,३,०५५ अतिशायने तमबिष्ठनौ

२२१७ ५,३,०५६ तिङश्च

२२१८ ५,३,०५७ द्विवचनविभज्योपपदे तरबीयसुनौ

२२१९ ५,३,०५८ अजादी गुणवचनादेव

२२२० ५,३,०५९ तुश्छन्दसि

२२२१ ५,३,०६० प्रशस्यस्य श्रः

२२२२ ५,३,०६१ ज्य च

२२२३ ५,३,०६२ वृद्धस्य च

२२२४ ५,३,०६३ अन्तिकबाढयोर्नेदसाधौ

२२२५ ५,३ ०६४ युवाल्पयोः कनन्यतरस्याम्

२२२६ ५,३,०६५ विन्मतोर्लुक्

२२२७ ५,३,०६६ प्रशंसायां रूपप्

२२२८ ५,३,०६७ ईषदसमाप्तौ कल्पब्देश्यदेशीयरः

२२२९ ५,३,०६८ विभाषा सुपो बहुच्पुरस्तात्तु

२२३० ५,३,०६९ प्रकारवचने जातीयर्

२२३१ ५,३,०७० प्रागिवात्कः

२२३२ ५,३,०७१ अव्ययसर्वनाम्नामकच्प्राक्टेः

२२३३ ५,३,०७२ कस्य च दः

२२३४ ५,३,०७३ अज्ञाते

२२३५ ५,३,०७४ कुत्सिते

२२३६ ५,३,०७५ संज्ञायां कन्

२२३७ ५,३,०७६ अनुकम्पायाम्

२२३८ ५,३,०७७ नीतौ च तद्युक्तात्

२२३९ ५,३,०७८ बह्वचो मनुष्यनाम्नष्ठज्वा

२२४० ५,३,०७९ घनिलचौ च

२२४१ ५,३,०८० प्राचामुपादेरडज्वुचौ च

२२४२ ५,३,०८१ जातिनाम्नः कन्

२२४३ ५,३,०८२ अजिनान्तस्योत्तरपदलोपश्च

२२४४ ५,३,०८३ ठाजादावूर्ध्वं द्वितीयादचः

२२४५ ५,३,०८४ शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्

२२४६ ५,३,०८५ अल्पे

२२४७ ५,३,०८६ ह्रस्वे

२२४८ ५,३,०८७ संज्ञायां कन्

२२४९ ५,३,०८८ कुटीशमीशुण्डाभ्यो रः

२२५० ५,३,०८९ कुत्वा डुपच्

२२५१ ५,३,०९० कासूगोणीभ्यां ष्टरच्

२२५२ ५,३,०९१ वत्सोक्षाश्वर्षभेभ्यश्चतनुत्वे

२२५३ ५,३,०९२ किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्

२२५४ ५,३,०९३ वा बहूनां जातिपरिप्रश्ने डतमच्

२२५५ ५,३,०९४ एकाच्च प्राचाम्

२२५६ ५,३,०९५ अवक्षेपणे कन्

२२५७ ५,३,०९६ इवे प्रतिकृतौ

२२५८ ५,३,०९७ संज्ञायां च

२२५९ ५,३,०९८ लुम्मनुष्ये

२२६० ५,३,०९९ जीविकार्थे चापण्ये

२२६१ ५,३,१०० देवपथादिभ्यश्च

२२६२ ५,३,१०१ बस्तेर्ढञ्

२२६३ ५,३,१०२ शिलाया ढः

२२६४ ५,३,१०३ शाखादिभ्यो यत्

२२६५ ५,३,१०४ द्रव्यं च भव्ये

२२६६ ५,३,१०५ कुशाग्राच्छः

२२६७ ५,३,१०६ समासाच्च तद्विषयात्

२२६८ ५,३,१०७ शर्करादिभ्योऽण्

२२६९ ५,३,१०८ अङ्गुल्यादिभ्यष्ठक्

२२७० ५,३,१०९ एकशालायाष्ठजन्यतरस्याम्

२२७१ ५,३,११० कर्कलोहितादीकक्

२२७२ ५,३,१११ प्रत्नपूर्वविश्वेमात्थाल्छन्दसि

२२७३ ५,३,११२ पूगाञ्ञ्योऽग्रामणीपूर्वात्

२२७४ ५,३,११३ व्रातच्फञोरस्त्रियाम्

२२७५ ५,३,११४ आयुधजीविसङ्घाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात्

२२७६ ५,३,११५ वृकाट्टेण्यण्

२२७७ ५,३,११६ दामन्यादित्रिगर्तषष्ठाच्छः

२२७८ ५,३,११७ पर्श्वादियौधेयादिभ्योऽणञौ

२२७९ ५,३,११८ अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ्

२२८० ५,३,११९ ञ्यादयस्तद्राजाः

२२८१ ५,४,००१ पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च

२२८२ ५,४,००२ दण्डव्यवसर्गयोश्च

२२८३ ५,४,००३ स्थूलादिभ्यः प्रकारवचने कन्

२२८४ ५,४,००४ अनत्यन्तगतौ क्तात्

२२८५ ५,४,००५ न सामिवचने

२२८६ ५,४,००६ बृहत्या आच्छादने

२२८७ ५,४,००७ अषडक्षाशितङ्ग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः

२२८८ ५,४,००८ विभाषाऽञ्चेरदिक्स्त्रियाम्

२२८९ ५,४,००९ जात्यन्ताच्छ बन्धुनि

२२९० ५,४,०१० स्थानान्ताद्विभाषा सस्थानेनेति चेत्

२२९१ ५,४,०११ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे

२२९२ ५,४,०१२ अमु च च्छन्दसि

२२९३ ५,४,०१३ अनुगादिनष्ठक्

२२९४ ५,४,०१४ णचः स्त्रियामञ्

२२९५ ५,४,०१५ अणिनुणः

२२९६ ५,४,०१६ विसारिणो मत्स्ये

२२९७ ५,४,०१७ संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्

२२९८ ५,४,०१८ द्वित्रिचतुर्भ्यः सुच्

२२९९ ५,४,०१९ एकस्य सकृच्च

२३०० ५,४,०२० विभाषा बहोर्धाऽविप्रकृष्टकाले

२३०१ ५,४,०२१ तत्प्रकृतवचने मयट्

२३०२ ५,४,०२२ समूहवच्च बहुषु

२३०३ ५,४,०२३ अनन्तावसथेतिहभेषजाञ्ञ्यः

२३०४ ५,४,०२४ देवतान्तात्तादर्थ्ये यत्

२३०५ ५,४,०२५ पादार्घाभ्यां च

२३०६ ५,४,०२६ अतिथेर्ञ्यः

२३०७ ५,४,०२७ देवात्तल्

२३०८ ५,४,०२८ अवेः कः

२३०९ ५,४,०२९ यावादिभ्यः कन्

२३१० ५,४,०३० लोहितान्मणौ

२३११ ५,४,०३१ वर्णे चानित्ये

२३१२ ५,४,०३२ रक्ते

२३१३ ५,४,०३३ कालाच्च

२३१४ ५,४,०३४ विनयादिभ्यष्ठक्

२३१५ ५,४,०३५ वाचो व्याहृतार्थायाम्

२३१६ ५,४,०३६ तद्युक्तात्कर्मणोऽण्

२३१७ ५,४,०३७ ओषधेरजातौ

२३१८ ५,४,०३८ प्रज्ञादिभ्यश्च

२३१९ ५,४,०३९ मृदस्तिकन्

२३२० ५,४,०४० सस्नौ प्रशंसायाम्

२३२१ ५,४,०४१ वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि

२३२२ ५,४,०४२ बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्

२३२३ ५,४,०४३ संख्यैकवचनाच्च वीप्सायाम्

२३२४ ५,४,०४४ प्रतियोगे पञ्चम्यास्तसिः

२३२५ ५,४,०४५ अपादाने चाहीयरुहोः

२३२६ ५,४,०४६ अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः

२३२७ ५,४,०४७ हीयमानपापयोगाच्च

२३२८ ५,४,०४८ षष्ठ्या व्याश्रये

२३२९ ५,४,०४९ रोगाच्चापनयने

२३३० ५,४,०५० कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः

२३३१ ५,४,०५१ अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च

२३३२ ५,४,०५२ विभाषा साति कार्त्स्न्ये

२३३३ ५,४,०५३ अभिविधौ संपदा च

२३३४ ५,४,०५४ तदधीनवचने

२३३५ ५,४,०५५ देये त्रा च

२३३६ ५,४,०५६ देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्

२३३७ ५,४,०५७ अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच्

२३३८ ५,४,०५८ कृञो द्वितीयतृतीयशम्बबीजात्कृषौ

२३३९ ५,४,०५९ संख्यायाश्च गुणान्तायाः

२३४० ५,४,०६० समयाच्च यापनायाम्

२३४१ ५,४,०६१ सपत्रनिष्पत्रादतिव्यथने

२३४२ ५,४,०६२ निष्कुलान्निष्कोषणे

२३४३ ५,४,०६३ सुखप्रियादानुलोम्ये

२३४४ ५,४,०६४ दुःखात्प्रातिलोम्ये

२३४५ ५,४,०६५ शूलात्पाके

२३४६ ५,४,०६६ सत्यादशपथे

२३४७ ५,४,०६७ मद्रात्परिवापने

२३४८ ५,४,०६८ समासान्ताः

२३४९ ५,४,०६९ न पूजनात्

२३५० ५,४,०७० किमः क्षेपे

२३५१ ५,४,०७१ नञस्तत्पुरुषात्

२३५२ ५,४,०७२ पथो विभाषा

२३५३ ५,४,०७३ बहुव्रीहौ संख्येये डजबहुगणात्

२३५४ ५,४,०७४ ऋक्पूरब्धूः पथामानक्षे

२३५५ ५,४,०७५ अच्प्रत्यन्ववपूर्वात् सामलोम्नः

२३५६ ५,४,०७६ अक्ष्णो दर्शनात्

२३५७ ५,४,०७७
अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिव सरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः

२३५८ ५,४,०७८ ब्रह्महस्तिभ्यां वर्चसः

२३५९ ५,४,०७९ अवसमन्धेभ्यस्तमसः

२३६० ५,४,०८० श्वसो वसीयः श्रेयसः

२३६१ ५,४,०८१ अन्ववतप्ताद्रहसः

२३६२ ५,४,०८२ प्रतेरुरसः सप्तमीस्थात्

२३६३ ५,४,०८३ अनुगवमायामे

२३६४ ५,४,०८४ द्विस्तावा त्रिस्तावा वेदिः

२३६५ ५,४,०८५ उपसर्गादध्वनः

२३६६ ५,४,०८६ तत्पुरुषस्याङ्गुलेः संख्याऽव्ययादेः

२३६७ ५,४,०८७ अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः

२३६८ ५,४,०८८ अह्नोऽह्न एतेभ्यः

२३६९ ५,४,०८९ न संख्यादेः समाहारे

२३७० ५,४,०९० उत्तमैकाभ्यां च

२३७१ ५,४ ०९१ राजाहःसखिभ्यष्टच्

२३७२ ५,४,०९२ गोरतद्धितलुकि

२३७३ ५,४,०९३ अग्राख्यायामुरसः

२३७४ ५,४,०९४ अनोऽश्मायःसरसां जातिसंज्ञयोः

२३७५ ५,४,०९५ ग्रामकौटाभ्यां च तक्ष्णः

२३७६ ५,४,०९६ अतेः शुनः

२३७७ ५,४,०९७ उपमानादप्राणिषु

२३७८ ५,४,०९८ उत्तरमृगपूर्वाच्च सक्थ्नः

२३७९ ५,४,०९९ नावो द्विगोः

२३८० ५,४,१०० अर्धाच्च

२३८१ ५,४,१०१ खार्याः प्राचाम्

२३८२ ५,४,१०२ द्वित्रिभ्यामञ्जलेः

२३८३ ५,४,१०३ अनसन्तान्नपुंसकाच्छन्दसि

२३८४ ५,४,१०४ ब्रह्मणो जानपदाख्यायाम्

२३८५ ५,४,१०५ कुमहद्भ्यामन्यतरस्याम्

२३८६ ५,४,१०६ द्वन्द्वाच्चुदषहान्तात्समाहारे

२३८७ ५,४,१०७ अव्ययीभावे शरत्प्रभृतिभ्यः

२३८८ ५,४,१०८ अनश्च

२३८९ ५,४,१०९ नपुंसकादन्यतरस्याम्

२३९० ५,४,११० नदीपौर्णमास्याग्रहायणीभ्यः

२३९१ ५,४,१११ झयः

२३९२ ५,४,११२ गिरेश्च सेनकस्य

२३९३ ५,४,११३ बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्

२३९४ ५,४,११४ अङ्गुलेर्दारुणि

२३९५ ५,४,११५ द्वित्रिभ्यां ष मूर्ध्नः

२३९६ ५,४,११६ अप्पूरणीप्रमाण्योः

२३९७ ५,४,११७ अन्तर्बहिर्भ्यां च लोम्नः

२३९८ ५,४,११८ अञ्नासिकायाः संज्ञायां नसं चास्थूलात्

२३९९ ५,४,११९ उपसर्गाच्च

२४०० ५,४,१२० सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः

२४०१ ५,४,१२१ नञ्दुःसुभ्यो हलि सक्थ्योरन्यतरस्याम्

२४०२ ५,४,१२२ नित्यमसिच्प्रजामेधयोः

२४०३ ५,४,१२३ बहुप्रजाश्छन्दसि

२४०४ ५,४,१२४ धर्मादनिच्केवलात्

२४०५ ५,४,१२५ जम्भा सुहरिततृणसोमेभ्यः

२४०६ ५,४,१२६ दक्षिणेर्मा लुब्धयोगे

२४०७ ५,४,१२७ इच्कर्मव्यतीहारे

२४०८ ५,४,१२८ द्विदण्ड्यादिभ्यश्च

२४०९ ५,४,१२९ प्रसंभ्यां जानुनोर्ज्ञुः

२४१० ५,४,१३० ऊर्ध्वाद्विभाषा

२४११ ५,४,१३१ ऊधसोऽनङ्

२४१२ ५,४,१३२ धनुषश्च

२४१३ ५,४,१३३ वा संज्ञायाम्

२४१४ ५,४,१३४ जायाया निङ्

२४१५ ५,४,१३५ गन्धस्येदुत्पूतिसुसुरभिभ्यः

२४१६ ५,४,१३६ अल्पाख्यायाम्

२४१७ ५,४,१३७ उपमानाच्च

२४१८ ५,४,१३८ पादस्य लोपोऽहस्त्यादिभ्यः

२४१९ ५,४,१३९ कुम्भपदीषु च

२४२० ५,४,१४० संख्यासुपूर्वस्य

२४२१ ५,४,१४१ वयसि दन्तस्य दतृ

२४२२ ५,४,१४२ छन्दसि च

२४२३ ५,४,१४३ स्त्रियां संज्ञायाम्

२४२४ ५,४,१४४ विभाषा श्यावारोकाभ्याम्

२४२५ ५,४,१४५ अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च

२४२६ ५,४,१४६ ककुदस्यावस्थायां लोपः

२४२७ ५,४,१४७ त्रिककुत्पर्वते

२४२८ ५,४,१४८ उद्विभ्यां काकुदस्य

२४२९ ५,४,१४९ पूर्णाद्विभाषा

२४३० ५,४,१५० सुहृद्दुर्हृदौ मित्रामित्रयोः

२४३१ ५,४,१५१ उरः प्रभृतिभ्यः कप्

२४३२ ५,४,१५२ इनः स्त्रियाम्

२४३३ ५,४,१५३ नद्यृतश्च

२४३४ ५,४,१५४ शेषाद्विभाषा

२४३५ ५,४,१५५ न संज्ञायाम्

२४३६ ५,४,१५६ ईयसश्च

२४३७ ५,४,१५७ वन्दिते भ्रातुः

२४३८ ५,४,१५८ ऋतश्छन्दसि

२४३९ ५,४,१५९ नाडीतन्त्र्योः स्वाङ्गे

२४४० ५,४,१६० निष्प्रवाणिश्च

२४४१ ६,१,००१ एकाचो द्वे प्रथमस्य

२४४२ ६,१,००२ अजादेः द्वितीयस्य

२४४३ ६,१,००३ नन्द्राः संयोगादयः

२४४४ ६,१,००४ पूर्वोऽभ्यासः

२४४५ ६,१,००५ उभे अभ्यस्तम्

२४४६ ६,१,००६ जक्षित्यादयः षट्

२४४७ ६,१,००७ तुजादीनां दीर्घोऽभ्यासस्य

२४४८ ६,१,००८ लिटि धातोः अनभ्यासस्य

२४४९ ६,१,००९ सन्यङोः

२४५० ६,१,०१० श्लौ

२४५१ ६,१,०११ चङि

२४५२ ६,१,०१२ दाश्वान्साह्वान्मीढ्वांश्च

२४५३ ६,१,०१३ ष्यङः सम्प्रसारणम् पुत्रपत्योस्तत्पुरुषे

२४५४ ६,१,०१४ बन्धुनि बहुव्रीहौ

२४५५ ६,१,०१५ वचिस्वपियजादीनाम् किति

२४५६ ६,१,०१६ ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनाम् ङिति च

२४५७ ६,१,०१७ लिट्यभ्यासस्योभयेषाम्

२४५८ ६,१,०१८ स्वापेश्चङि

२४५९ ६,१,०१९ स्वपिस्यमिव्येञां यङि

२४६० ६,१,०२० न वशः

२४६१ ६,१,०२१ चायः की

२४६२ ६,१,०२२ स्फायः स्फी निष्ठायाम्

२४६३ ६,१,०२३ स्त्यः प्रपूर्वस्य

२४६४ ६,१,०२४ द्रवमूर्तिस्पर्शयोः श्यः

२४६५ ६,१,०२५ प्रतेश्च

२४६६ ६,१,०२६ विभाषाऽभ्यवपूर्वस्य

२४६७ ६,१,०२७ शृतं पाके

२४६८ ६,१,०२८ प्यायः पी

२४६९ ६,१,०२९ लिड्यङोश्च

२४७० ६,१,०३० विभाषा श्वेः

२४७१ ६,१,०३१ णौ च संश्चङोः

२४७२ ६,१,०३२ ह्वः सम्प्रसारणम्

२४७३ ६,१,०३३ अभ्यस्तस्य च

२४७४ ६,१,०३४ बहुलं छन्दसि

२४७५ ६,१,०३५ चायः की

२४७६ ६,१,०३६ अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताःश्रितमाशीराशीर्ताः

२४७७ ६,१,०३७ न सम्प्रसारणे सम्प्रसारणम्

२४७८ ६,१,०३८ लिटि वयो यः

२४७९ ६,१,०३९ वश्चास्यान्यतरस्यां किति

२४८० ६,१,०४० वेञः

२४८१ ६,१,०४१ ल्यपि च

२४८२ ६,१,०४२ ज्यश्च

२४८३ ६,१,०४३ व्यश्च

२४८४ ६,१,०४४ विभाषा परेः

२४८५ ६,१,४५ आदेच उपदेशेऽशिति

२४८६ ६,१,०४६ न व्यो लिटि

२४८७ ६,१,०४७ स्फुरतिस्फुलत्योर्घञि

२४८८ ६,१,०४८ क्रीङ्जीनां णौ

२४८९ ६,१,०४९ सिध्यतेरपारलौकिके

२४९० ६,१,०५० मीनातिमिनोतिदीङां ल्यपि च

२४९१ ६,१,०५१ विभाषा लीयतेः

२४९२ ६,१,०५२ खिदेश्छन्दसि

२४९३ ६,१,०५३ अपगुरो णमुलि

२४९४ ६,१,०५४ चिस्फुरोर्णौ

२४९५ ६,१,०५५ प्रजने वीयतेः

२४९६ ६,१,०५६ बिभेतेर्हेतुभये

२४९७ ६,१,०५७ नित्यं स्मयतेः

२४९८ ६,१,०५८ सृजिदृशोर्झल्यमकिति

२४९९ ६,१,०५९ अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्

२५०० ६,१,०६० शीर्षञ्छन्दसि

२५०१ ६,१,०६१ ये च तद्धिते

२५०२ ६,१,०६२ अचि शीर्षः

२५०३ ६,१,०६३ पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु

२५०४ ६,१,०६४ धात्वादेः षः सः

२५०५ ६,१,०६५ णो नः

२५०६ ६,१,०६६ लोपो व्योर्वलि

२५०७ ६,१,०६७ वेरपृक्तस्य

२५०८ ६,१,०६८ हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्

२५०९ ६,१,०६९ एङ्ह्रस्वात्संबुद्धेः

२५१० ६,१,०७० शेश्छन्दसि बहुलम्

२५११ ६,१,०७१ ह्रस्वस्य पिति कृति तुक्

२५१२ ६,१,०७२ संहितायाम्

२५१३ ६,१,०७३ छे च

२५१४ ६,१,०७४ आङ्माङोश्च

२५१५ ६,१,०७५ दीर्घात्

२५१६ ६,१,०७६ पदान्ताद्वा

२५१७ ६,१,०७७ इको यणचि

२५१८ ६,१,०७८ एचोऽयवायावः

२५१९ ६,१,०७९ वान्तो यि प्रत्यये

२५२० ६,१,०८० धातोस्तन्निमित्तस्यैव

२५२१ ६,१,०८१ क्षय्यजय्यौ शक्यार्थे

२५२२ ६,१,०८२ क्रय्यस्तदर्थे

२५२३ ६,१,०८३ भय्यप्रवय्ये च छन्दसि

२५२४ ६,१,०८४ एकः पूर्वपरयोः

२५२५ ६,१,०८५ अन्तादिवच्च

२५२६ ६,१,०८६ षत्वतुकोरसिद्धः

२५२७ ६,१,०८७ आद्गुणः

२५२८ ६,१,०८८ वृद्धिरेचि

२५२९ ६,१,०८९ एत्येधत्यूठ्सु

२५३० ६,१,०९० आटश्च

२५३१ ६,१,०९१ उपसर्गादृति धातौ

२५३२ ६,१,०९२ वा सुप्यापिशलेः

२५३३ ६,१,०९३ औतोऽम्शसोः

२५३४ ६,१,०९४ एङि पररूपम्

२५३५ ६,१,०९५ ओमाङोश्च

२५३६ ६,१,०९६ उस्यपदान्तात्

२५३७ ६,१,०९७ अतो गुणे

२५३८ ६,१,०९८ अव्यक्तानुकरणस्यात इतौ

२५३९ ६,१,०९९ नाम्रेडितस्यान्त्यस्य तु वा

२५४० ६,१,१०० नित्यमाम्रेडिते डाचि

२५४१ ६,१,१०१ अकः सवर्णे दीर्घः

२५४२ ६,१,१०२ प्रथमयोः पूर्वसवर्णः

२५४३ ६,१,१०३ तस्माच्छसोनः पुंसि

२५४४ ६,१,१०४ नादिचि

२५४५ ६,१,१०५ दीर्घाज्जसि च

२५४६ ६,१,१०६ वा छन्दसि

२५४७ ६,१,१०७ अमि पूर्वः

२५४८ ६,१,१०८ सम्प्रसारणाच्च

२५४९ ६,१,१०९ एङः पदान्तादति

२५५० ६,१,११० ङसिङसोश्च

२५५१ ६,१,१११ ऋत उत्

२५५२ ६,१,११२ ख्यत्यात्परस्य

२५५३ ६,१,११३ अतोरोरप्लुतादप्लुते

२५५४ ६,१,११४ हशि च

२५५५ ६,१,११५ प्रकृत्यान्तःपादमव्यपरे

२५५६ ६,१,११६ अव्यादवद्यादवक्रमुरव्रतायमवन्त्वस्युषु च

२५५७ ६,१,११७ यजुष्युरः

२५५८ ६,१,११८ आपोजुषाणोवृष्णोवर्षिष्ठेऽम्बेऽम्बालेऽम्बिके पूर्वे

२५५९ ६,१,११९ अङ्ग इत्यादौ च

२५६० ६,१,१२० अनुदात्ते च कुधपरे

२५६१ ६,१,१२१ अवपथासि च

२५६२ ६,१,१२२ सर्वत्र विभाषा गोः

२५६३ ६,१,१२३ अवङ् स्फोटायनस्य

२५६४ ६,१,१२४ इन्द्रे च

२५६५ ६,१,१२५ प्लुतप्रगृह्या अचि नित्यम्

२५६६ ६,१,१२६ आङोऽनुनासिकश्छन्दसि

२५६७ ६,१,१२७ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च

२५६८ ६,१,१२८ ऋत्यकः

२५६९ ६,१,१२९ अप्लुतवदुपस्थिते

२५७० ६,१,१३० ई(३) चाक्रवर्मणस्य

२५७१ ६,१,१३१ दिव उत्

२५७२ ६,१,१३२ एतत्तदोः सुलोपोऽकोरनञ्समासे हलि

२५७३ ६,१,१३३ स्यश्छन्दसि बहुलम्

२५७४ ६,१,१३४ सोऽचि लोपे चेत्पादपूरणम्

२५७५ ६,१,१३५ सुट् कात्पूर्वः

२५७६ ६,१,१३६ अडभ्यास व्यवायेऽपि

२५७७ ६,१,१३७ संपर्युपेभ्यः करोतौ भूषणे

२५७८ ६,१,१३८ समवाये च

२५७९ ६,१,१३९ उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु

२५८० ६,१,१४० किरतौ लवने

२५८१ ६,१,१४१ हिंसायाम् प्रतेश्च

२५८२ ६,१,१४२ अपाच्चतुष्पाच्छकुनिष्वालेखने

२५८३ ६,१,१४३ कुस्तुम्बुरूणि जातिः

२५८४ ६,१,१४४ अपरस्पराः क्रियासातत्ये

२५८५ ६,१,१४५ गोष्पदं सेवितासेवितप्रमाणेषु

२५८६ ६,१,१४६ आस्पदं प्रतिष्ठायाम्

२५८७ ६,१,१४७ आश्चर्यमनित्ये

२५८८ ६,१,१४८ वर्चस्केऽवस्करः

२५८९ ६,१,१४९ अपस्करो रथाङ्गम्

२५९० ६,१,१५० विष्किरश्शकुनिर्वा

२५९१ ६,१,१५१ ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे

२५९२ ६,१,१५२ प्रतिष्कशश्च कशेः

२५९३ ६,१,१५३ प्रस्कण्व हरिश्चन्द्रावृषी

२५९४ ६,१,१५४ मस्करमस्करिणौ वेणुपरिव्राजकयोः

२५९५ ६,१,१५५ कास्तीराजस्तुन्दे नगरे

२५९६ ६,१,१५६ कारस्करो वृक्षः

२५९७ ६,१,१५७ पारस्करप्रभृतीनि च संज्ञायाम्

२५९८ ६,१,१५८ अनुदात्तं पदमेकवर्जम्

२५९९ ६,१,१५९ कर्षात्वतो घञोऽन्त उदात्तः

२६०० ६,१,१६० उञ्छादीनां च

२६०१ ६,१,१६१ अनुदात्तस्य च यत्रोदात्तलोपः

२६०२ ६,१,१६२ धातोः

२६०३ ६,१,१६३ चितः

२६०४ ६,१,१६४ तद्धितस्य

२६०५ ६,१,१६५ कितः

२६०६ ६,१,१६६ तिसृभ्यो जसः

२६०७ ६,१,१६७ चतुरः शसि

२६०८ ६,१,१६८ सावेकाचस्तृतीयादिर्विभक्तिः

२६०९ ६,१,१६९ अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे

२६१० ६,१,१७० अञ्चेश्छन्दस्यसर्वनामस्थानम्

२६११ ६,१,१७१ ऊडिदंपदाद्यप्पुम्रैद्युभ्यः

२६१२ ६,१,१७२ अष्टनो दीर्घात्

२६१३ ६,१,१७३ शतुरनुमो नद्यजादी

२६१४ ६,१,१७४ उदात्तयणो हल्पूर्वात्

२६१५ ६,१,१७५ नोङ्धात्वोः

२६१६ ६,१,१७६ ह्रस्वनुड्भ्यां मतुप्

२६१७ ६,१,१७७ नामन्यतरस्याम्

२६१८ ६,१,१७८ ङ्यश्छन्दसि बहुलम्

२६१९ ६,१,१७९ षट्त्रिचतुर्भ्यो हलादिः

२६२० ६,१,१८० झल्युपोत्तमम्

२६२१ ६,१,१८१ विभाषा भाषायाम्

२६२२ ६,१,१८२ न गोश्वन्साववर्णराजङ्क्रुङ्कृद्भ्यः

२६२३ ६,१,१८३ दिवो झल्

२६२४ ६,१,१८४ नृ चान्यतरस्याम्

२६२५ ६,१,१८५ तित्स्वरितम्

२६२६ ६,१,१८६ तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः

२६२७ ६,१,१८७ आदिः सिचोऽन्यतरस्याम्

२६२८ ६,१,१८८ स्वपादिर्हिंसामच्यनिटि

२६२९ ६,१,१८९ अभ्यस्तानामादिः

२६३० ६,१,१९० अनुदात्ते च

२६३१ ६,१,१९१ सर्वस्य सुपि

२६३२ ६,१,१९२ भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति

२६३३ ६,१,१९३ लिति

२६३४ ६,१,१९४ आदिर्णमुल्यन्यतरस्याम्

२६३५ ६,१,१९५ अचः कर्तृयकि

२६३६ ६,१,१९६ थलि च सेटीडन्तो वा

२६३७ ६,१,१९७ ञ्नित्यादिर्नित्यम्

२६३८ ६,१,१९८ आमन्त्रितस्य च

२६३९ ६,१,१९९ पथिमथोः सर्वनामस्थाने

२६४० ६,१,२०० अन्तश्च तवै युगपत्

२६४१ ६,१,२०१ क्षयो निवासे

२६४२ ६,१,२०२ जयः करणम्

२६४३ ६,१,२०३ वृषादीनां च

२६४४ ६,१,२०४ संज्ञायामुपमानम्

२६४५ ६,१,२०५ निष्ठा च द्व्यजनात्

२६४६ ६,१,२०६ शुष्कधृष्टौ

२६४७ ६,१,२०७ आशितः कर्ता

२६४८ ६,१,२०८ रिक्ते विभाषा

२६४९ ६,१,२०९ जुष्टार्पिते च छन्दसि

२६५० ६,१,२१० नित्यं मन्त्रे

२६५१ ६,१,२११ युष्मदस्मदोर्ङसि

२६५२ ६,१,२१२ ङयि च

२६५३ ६,१,२१३ यतोऽनावः

२६५४ ६,१,२१४ ईडवन्दवृशंसदुहां ण्यतः

२६५५ ६,१,२१५ विभाषा वेण्विन्धानयोः

२६५६ ६,१,२१६ त्यागरागहासकुहश्वठक्रथानाम्

२६५७ ६,१,२१७ उपोत्तमं रिति

२६५८ ६,१,२१८ चङ्यन्यतरस्याम्

२६५९ ६,१,२१९ मतोः पूर्वमात् संज्ञायां स्त्रियाम्

२६६० ६,१,२२० अन्तोऽवत्याः

२६६१ ६,१,२२१ ईवत्याः

२६६२ ६,१,२२२ चौ

२६६३ ६,१,२२३ समासस्य

२६६४ ६,२,००१ बहुव्रीहौ प्रकृत्या पूर्वपदम्

२६६५ ६,२,००२ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः

२६६६ ६,२,००३ वर्णो वर्णेष्वनेते

२६६७ ६,२,००४ गाधलवणयोः प्रमाणे

२६६८ ६,२,००५ दायाद्यं दायादे

२६६९ ६,२,००६ प्रतिबन्धिचिरकृच्छ्रयोः

२६७० ६,२,००७ पदेऽपदेशे

२६७१ ६,२,००८ निवाते वातत्राणे

२६७२ ६,२,००९ शारदेऽनार्तवे

२६७३ ६,२,०१० अध्वर्युकषाययोर्जातौ

२६७४ ६,२,०११ सदृशप्रतिरूपयोः सादृश्ये

२६७५ ६,२,०१२ द्विगौ प्रमाणे

२६७६ ६,२,०१३ गन्तव्यपण्यं वाणिजे

२६७७ ६,२,०१४ मात्रोपज्ञोपक्रमच्छाये नपुंसके

२६७८ ६,२,०१५ सुखप्रिययोर्हिते

२६७९ ६,२,०१६ प्रीतौ च

२६८० ६,२,०१७ स्वं स्वामिनि

२६८१ ६,२,०१८ पत्यावैश्वर्ये

२६८२ ६,२,०१९ न भूवाच्किद्विधिषु

२६८३ ६,२,०२० वा भुवनम्

२६८४ ६,२,०२१ आशङ्काबाधनेदीयस्सु संभावने

२६८५ ६,२,०२२ पूर्वे भूतपूर्वे

२६८६ ६,२,०२३ सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये

२६८७ ६,२,०२४ विस्पष्टादीनि गुणवचनेषु

२६८८ ६,२,०२५ श्रज्यावमकन्पापवत्सु भावे कर्मधारये

२६८९ ६,२,०२६ कुमारश्च

२६९० ६,२,०२७ आदिः प्रत्येनसि

२६९१ ६,२,०२८ पूगेष्वन्यतरस्याम्

२६९२ ६,२,०२९ इगन्तकालकपालभगालशरावेषु द्विगौ

२६९३ ६,२,०३० बह्वन्यतरस्याम्

२६९४ ६,२,०३१ दिष्टिवितस्त्योश्च

२६९५ ६,२,०३२ सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्

२६९६ ६,२,०३३ परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु

२६९७ ६,२,०३४ राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु

२६९८ ६,२,०३५ संख्या

२६९९ ६,२,०३६ आचार्योपसर्जनश्चान्तेवासी

२७०० ६,२,०३७ कार्तकौजपादयश्च

२७०१ ६,२,०३८ महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु

२७०२ ६,२,०३९ क्षुल्लकश्च वैश्वदेवे

२७०३ ६,२,०४० उष्ट्रः सादिवाम्योः

२७०४ ६,२,०४१ गौः सादसादिसारथिषु

२७०५ ६,२,०४२ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूपण्यकम्बलो दासीभाराणां च

२७०६ ६,२,०४३ चतुर्थी तदर्थे

२७०७ ६,२,०४४ अर्थे

२७०८ ६,२,०४५ क्ते च

२७०९ ६,२,०४६ कर्मधारयेऽनिष्ठा

२७१० ६,२,०४७ अहीने द्वितीया

२७११ ६,२,०४८ तृतीया कर्मणि

२७१२ ६,२,०४९ गतिरनन्तरः

२७१३ ६,२,०५० तादौ च निति कृत्यतौ

२७१४ ६,२,०५१ तवै चान्तश्च युगपत्

२७१५ ६,२,०५२ अनिगन्तोऽञ्चतौ वप्रत्यये

२७१६ ६,२,०५३ न्यधी च

२७१७ ६,२,०५४ ईषदन्यतरस्याम्

२७१८ ६,२,०५५ हिरण्यपरिमाणं धने

२७१९ ६,२,०५६ प्रथमोऽचिरोपसंपत्तौ

२७२० ६,२,०५७ कतरकतमौ कर्मधारये

२७२१ ६,२,०५८ आर्यो ब्राह्मणकुमारयोः

२७२२ ६,२,०५९ राजा च

२७२३ ६,२,०६० षष्ठी प्रत्येनसि

२७२४ ६,२,०६१ क्ते नित्यार्थे

२७२५ ६,२,०६२ ग्रामः शिल्पिनि

२७२६ ६,२,०६३ राजा च प्रशंसायाम्

२७२७ ६,२,०६४ आदिरुदात्तः

२७२८ ६,२,०६५ सप्तमीहारिणौ धर्म्येऽहरणे

२७२९ ६,२,०६६ युक्ते च

२७३० ६,२,०६७ विभाषाऽध्यक्षे

२७३१ ६,२,०६८ पापं च शिल्पिनि

२७३२ ६,२,०६९ गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे

२७३३ ६,२,०७० अङ्गानि मैरेये

२७३४ ६,२,०७१ भक्ताख्यास्तदर्थेषु

२७३५ ६,२,०७२ गोबिडालसिंहसैन्धवेषूपमाने

२७३६ ६,२,०७३ अके जीविकार्थे

२७३७ ६,२,०७४ प्राचां क्रीडायाम्

२७३८ ६,२,०७५ अणि नियुक्ते

२७३९ ६,२,०७६ शिल्पिनि चाकृञः

२७४० ६,२,०७७ संज्ञायां च

२७४१ ६,२,०७८ गो तन्तियवं पाले

२७४२ ६,२,०७९ णिनि

२७४३ ६,२,०८० उपमानं शब्दार्थप्रकृतावेव

२७४४ ६,२,०८१ युक्तारोह्यादयश्च

२७४५ ६,२,०८२ दीर्घकाशतुषभ्राष्ट्रवटं जे

२७४६ ६,२,०८३ अन्त्यात्पूर्वं बह्वचः

२७४७ ६,२,०८४ ग्रामेऽनिवसन्तः

२७४८ ६,२,०८५ घोषादिषु च

२७४९ ६,२,०८६ छात्र्यादयः शालायाम्

२७५० ६,३,०८७ प्रस्थे वृद्धमकर्क्यादीनाम्

२७५१ ६,३,०८८ मालादीनां च

२७५२ ६,२,०८९ अमहन्नवं नगरेऽनुदीचाम्

२७५३ ६,२,०९० अर्मे चावर्णं द्व्यच्त्र्यच्

२७५४ ६,२,०९१ न भूताधिकसंजीवमद्राश्मकज्जलम्

२७५५ ६,२,०९२ अन्तः

२७५६ ६,२,०९३ सर्वं गुणकार्त्स्न्ये

२७५७ ६,२,०९४ संज्ञायां गिरिनिकाययोः

२७५८ ६,२,०९५ कुमार्यां वयसि

२७५९ ६,२,०९६ उदकेऽकेवले

२७६० ६,२,०९७ द्विगौ क्रतौ

२७६१ ६,२,०९८ सभायां नपुंसके

२७६२ ६,२,०९९ पुरे प्राचाम्

२७६३ ६,२,१०० अरिष्टगौडपूर्वे च

२७६४ ६,२,१०१ न हास्तिनकफलकमार्देयाः

२७६५ ६,२,१०२ कुसूल-कूप-कुम्भ-शालं बिले

२७६६ ६,२,१०३ दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु

२७६७ ६,२,१०४ आचार्योपसर्जनश्चान्तेवासिनि

२७६८ ६,२,१०५ उत्तरपदवृद्धौ सर्वं च

२७६९ ६,२,१०६ बहुव्रीहौ विश्वं संज्ञायाम्

२७७० ६,२,१०७ उदराश्वेषुषु

२७७१ ६,२,१०८ क्षेपे

२७७२ ६,२,१०९ नदी बन्धुनि

२७७३ ६,२,११० निष्ठोपसर्गपूर्वमन्यतरस्याम्

२७७४ ६,२,१११ उत्तरपदादिः

२७७५ ६,२,११२ कर्णो वर्णलक्षणात्

२७७६ ६,२,११३ संज्ञौपम्ययोश्च

२७७७ ६,२,११४ कण्ठपृष्ठग्रीवाजङ्घं च

२७७८ ६,२,११५ शृङ्गमवस्थायां च

२७७९ ६,२,११६ नञो जरमरमित्रमृताः

२७८० ६,२,११७ सोर्मनसी अलोमोषसी

२७८१ ६,२,११८ क्रत्वादयः

२७८२ ६,२,११९ आद्युदात्तं द्व्यच्छन्दसि

२७८३ ६,२,१२० वीरवीर्यौ च

२७८४ ६,२,१२१ कूलतीरतूलमूलशालाक्षसममव्ययीभावे

२७८५ ६,२,१२२ कंसमन्थशूर्पपाय्यकाण्डं द्विगौ

२७८६ ६,२,१२३ तत्पुरुषे शालायां नपुंसके

२७८७ ६,२,१२४ कन्था च

२७८८ ६,२,१२५ आदिश्चिहणादीनाम्

२७८९ ६,२,१२६ चेलखेटकटुककाण्डं गर्हायाम्

२७९० ६,२,१२७ चीरमुपमानम्

२७९१ ६,२,१२८ पललसूपशाकं मिश्रे

२७९२ ६,२,१२९ कूलसूदस्थलकर्षाः संज्ञायाम्

२७९३ ६,२,१३० अकर्मधारये राज्यम्

२७९४ ६,२,१३१ वर्ग्यादयश्च

२७९५ ६,२,१३२ पुत्रः पुम्भ्यः

२७९६ ६,२,१३३ नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः

२७९७ ६,२,१३४ चूर्णादीन्यप्राणिषष्ठ्याः

२७९८ ६,२,१३५ षट्च काण्डादीनि

२७९९ ६,२,१३६ कुण्डं वनम्

२८०० ६,२,१३७ प्रकृत्या भगालम्

२८०१ ६,२,१३८ शितेर्नित्याबह्वज्बहुव्रीहावभसत्

२८०२ ६,२,१३९ गतिकारकोपपदात्कृत्

२८०३ ६,२,१४० उभे वनस्पत्यादिषु युगपत्

२८०४ ६,२,१४१ देवताद्वन्द्वे च

२८०५ ६,२,१४२ नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु

२८०६ ६,२,१४३ अन्तः

२८०७ ६,२,१४४ थाथघञ्क्ताजबित्रकाणाम्

२८०८ ६,२,१४५ सूपमानात्क्तः

२८०९ ६,२,१४६ संज्ञायामनाचितादीनाम्

२८१० ६,२,१४७ प्रवृद्धादीनां च

२८११ ६,२,१४८ कारकाद्दत्तश्रुतयोरेवाशिषि

२८१२ ६,२,१४९ इत्थंभूतेन कृतमिति च

२८१३ ६,२,१५० अनो भावकर्मवचनः

२८१४ ६,२,१५१ मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादि क्रीताः

२८१५ ६,२,१५२ सप्तम्याः पुण्यम्

२८१६ ६,२,१५३ ऊनार्थकलहं तृतीयायाः

२८१७ ६,२,१५४ मिश्रं चानुपसर्गमसन्धौ

२८१८ ६,२,१५५ नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः

२८१९ ६,२,१५६ ययतोश्चातदर्थे

२८२० ६,२,१५७ अच्कावशक्तौ

२८२१ ६,२,१५८ आक्रोशे च

२८२२ ६,२,१५९ संज्ञायाम्

२८२३ ६,२,१६० कृत्योकेष्णुच्चार्वादयश्च

२८२४ ६,२,१६१ विभाषा तृन्नन्नतीक्ष्णशुचिषु

२८२५ ६,२,१६२ बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने

२८२६ ६,२,१६३ संख्यायाः स्तनः

२८२७ ६,२,१६४ विभाषा छन्दसि

२८२८ ६,२,१६५ संज्ञायां मित्राजिनयोः

२८२९ ६,२,१६६ व्यवायिनोऽन्तरम्

२८३० ६,२,१६७ मुखं स्वाङ्गम्

२८३१ ६,२,१६८ नाव्ययदिक्छब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः

२८३२ ६,२,१६९ निष्ठोपमानादन्यतरस्याम्

२८३३ ६,२,१७० जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः

२८३४ ६,२,१७१ वा जाते

२८३५ ६,२,१७२ नञ्सुभ्याम्

२८३६ ६,२,१७३ कपि पूर्वम्

२८३७ ६,२,१७४ ह्रस्वान्तेऽन्त्यात्पूर्वम्

२८३८ ६,२,१७५ बहोर्नञ्वदुत्तरपदभूम्नि

२८३९ ६,२,१७६ न गुणादयोऽवयवाः

२८४० ६,२,१७७ उपसर्गात्स्वाङ्गं ध्रुवमपर्शु

२८४१ ६,२,१७८ वनं समासे

२८४२ ६,२,१७९ अन्तः

२८४३ ६,२,१८० अन्तश्च

२८४४ ६,२,१८१ न निविभ्याम्

२८४५ ६,२,१८२ परेरभितोभाविमण्डलम्

२८४६ ६,२,१८३ प्रादस्वाङ्गं संज्ञायाम्

२८४७ ६,२,१८४ निरुदकादीनि च

२८४८ ६,२,१८५ अभेर्मुखम्

२८४९ ६,२,१८६ अपाच्च

२८५० ६,२,१८७ स्फिगपूगवीणाञ्जोऽध्वकुक्षिसीरनामनाम च

२८५१ ६,२,१८८ अधेरुपरिस्थम्

२८५२ ६,२,१८९ अनोरप्रधानकनीयसी

२८५३ ६,२,१९० पुरुषश्चान्वादिष्टः

२८५४ ६,२,१९१ अतेरकृत्पदे

२८५५ ६,२,१९२ नेरनिधाने

२८५६ ६,२,१९३ प्रतेरंश्वादयस्तत्पुरुषे

२८५७ ६,२,१९४ उपाद्द्व्यजजिनमगौरादयः

२८५८ ६,२,१९५ सोरवक्षेपणे

२८५९ ६,२,१९६ विभाषोत्पुच्छे

२८६० ६,२,१९७ द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ

२८६१ ६,२,१९८ सक्थं चाक्रान्तात्

२८६२ ६,२,१९९ परादिश्छन्दसि बहुलम्

२८६३ ६,३,००१ अलुगुत्तरपदे

२८६४ ६,३,००२ पञ्चम्याः स्तोकादिभ्यः

२८६५ ६,३,००३ ओजःसहोऽम्भस्तमसस्तृतीयायाः

२८६६ ६,३,००४ मनसः संज्ञायाम्

२८६७ ६,३,००५ आज्ञायिनि च

२८६८ ६,३,००६ आत्मनश्च

२८६९ ६,३,००७ वैयाकरणाख्यायां चतुर्थ्याः

२८७० ६,३,००८ परस्य च

२८७१ ६,३,००९ हलदन्तात् सप्तम्याः संज्ञायाम्

२८७२ ६,३,०१० कारनाम्नि च प्राचां हलादौ

२८७३ ६,३,०११ मध्याद्गुरौ

२८७४ ६,३,०१२ अमूर्धमस्तकात्स्वाङ्गादकामे

२८७५ ६,३,०१३ बन्धे च विभाषा

२८७६ ६,३,०१४ तत्पुरुषे कृति बहुलम्

२८७७ ६,३,०१५ प्रावृट्शरत्कालदिवां जे

२८७८ ६,३,०१६ विभाषा वर्षक्षरशरवरात्

२८७९ ६,३,०१७ घकालतनेषु कालनाम्नः

२८८० ६,३,०१८ शयवासवासिष्वकालात्

२८८१ ६,३,०१९ नेन्सिद्धबध्नातिषु च

२८८२ ६,३,०२० स्थे च भाषायाम्

२८८३ ६,३,०२१ षष्ठ्या आक्रोशे

२८८४ ६,३,०२२ पुत्रेऽन्यतरस्याम्

२८८५ ६,३,०२३ ऋतो विद्यायोनिसंबन्धेभ्यः

२८८६ ६,३,०२४ विभाषा स्वसृपत्योः

२८८७ ६,३,०२५ आनङ् ऋतो द्वन्द्वे

२८८८ ६,३,०२६ देवताद्वन्द्वे च

२८८९ ६,३,०२७ ईदग्नेः सोमवरुणयोः

२८९० ६,३,०२८ इद्वृद्धौ

२८९१ ६,३,०२९ दिवो द्यावा

२८९२ ६,३,०३० दिवसश्च पृथिव्याम्

२८९३ ६,३,०३१ उषासोषसः

२८९४ ६,३,०३२ मातरपितरावुदीचाम्

२८९५ ६,३,०३३ पितरामातरा च च्छन्दसि

२८९६ ६,३,०३४ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु

२८९७ ६,३,०३५ तसिलादिष्वाकृत्वसुचः

२८९८ ६,३,०३६ क्यङ्मानिनोश्च

२८९९ ६,३,०३७ न कोपधायाः

२९०० ६,३,०३८ संज्ञापूरण्योश्च

२९०१ ६,३,०३९ वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे

२९०२ ६,३,०४० स्वाङ्गाच्चेतोऽमानिनि

२९०३ ६,३,०४१ जातेश्च

२९०४ ६,३,०४२ पुंवत्कर्मधारयजातीयदेशीयेषु

२९०५ ६,३,०४३ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः

२९०६ ६,३,०४४ नद्याः शेषस्यान्यतरस्याम्

२९०७ ६,३,०४५ उगितश्च

२९०८ ६,३,०४६ आन्महतः समानाधिकरणजातीययोः

२९०९ ६,३,०४७ द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः

२९१० ६,३,०४८ त्रेस्त्रयः

२९११ ६,३,०४९ विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्

२९१२ ६,३,०५० हृदयस्य हृल्लेखयदण्लासेषु

२९१३ ६,३,०५१ वा शोकष्यञ्रोगेषु

२९१४ ६,३,०५२ पादस्य पदाज्यातिगोपहतेषु

२९१५ ६,३,०५३ पद्यत्यतदर्थे

२९१६ ६,३,०५४ हिमकाषिहतिषु च

२९१७ ६,३,०५५ ऋचः शे

२९१८ ६,३,०५६ वा घोषमिश्रशब्देषु

२९१९ ६,३,०५७ उदकस्योदः संज्ञायाम्

२९२० ६,३,०५८ पेषंवासवाहनधिषु च

२९२१ ६,३,०५९ एकहलादौ पूरयितव्येऽन्यतरस्याम्

२९२२ ६,३,०६० मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च

२९२३ ६,३,०६१ इको ह्रस्वोऽङ्यो गालवस्य

२९२४ ६,३,०६२ एकतद्धिते च

२९२५ ६,३,०६३ ङ्यापोः संज्ञाछन्दसोर्बहुलम्

२९२६ ६,३,०६४ त्वे च

२९२७ ६,३,०६५ इष्टकेषीकामालानां चिततूलभारिषु

२९२८ ६,३,०६६ खित्यनव्ययस्य

२९२९ ६,३,०६७ अरुर्द्विषदजन्तस्य मुम्

२९३० ६,३,०६८ इच एकाचोऽम्प्रत्ययवच्च

२९३१ ६,३,०६९ वाचंयमपुरंदरौ

२९३२ ६,३,०७० कारे सत्यागदस्य

२९३३ ६,३,०७१ श्येनतिलस्य पाते ञे

२९३४ ६,३,०७२ रात्रेः कृति विभाषा

२९३५ ६,३,०७३ नलोपो नञः

२९३६ ६,३,०७४ तस्मान्नुडचि

२९३७ ६,३,०७५ नभ्राण्णपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या

२९३८ ६,३,०७६ एकादिश्चैकस्य चादुक्

२९३९ ६,३,०७७ नगोऽप्राणिष्वन्यतरस्याम्

२९४० ६,३,०७८ सहस्य सः संज्ञायाम्

२९४१ ६,३,०७९ ग्रन्थान्ताधिके च

२९४२ ६,३,०८० द्वितीये चानुपाख्ये

२९४३ ६,३,०८१ अव्ययीभावे चाकाले

२९४४ ६,३,०८२ वोपसर्जनस्य

२९४५ ६,३,०८३ प्रकृत्याशिष्यगोवत्सहलेषु

२९४६ ६,३,०८४ समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु

२९४७ ६,३,०८५ ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु

२९४८ ६,३,०८६ चरणे ब्रह्मचारिणि

२९४९ ६,३,०८७ तीर्थे ये

२९५० ६,३,०८८ विभाषोदरे

२९५१ ६,३,०८९ दृग्दृशवतुषु

२९५२ ६,३,०९० इदंकिमोरीश्की

२९५३ ६,३,०९१ आ सर्वनाम्नः

२९५४ ६,३,०९२ विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये

२९५५ ६,३,०९३ समः समि

२९५६ ६,३,०९४ तिरसस्तिर्यलोपे

२९५७ ६,३,०९५ सहस्य सध्रिः

२९५८ ६,३,०९६ सध मादस्थयोश्छन्दसि

२९५९ ६,३,०९७ द्व्यन्तरुपसर्गेभ्योऽप ईत्

२९६० ६,३,०९८ ऊदनोर्देशे

२९६१ ६,३,०९९ अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु

२९६२ ६,३,१०० अर्थे विभाषा

२९६३ ६,३,१०१ कोः कत्तत्पुरुषेऽचि

२९६४ ६,३,१०२ रथवदयोश्च

२९६५ ६,३,१०३ तृणे च जातौ

२९६६ ६,३,१०४ का पथ्यक्षयोः

२९६७ ६,३,१०५ ईषदर्थे

२९६८ ६,३,१०६ विभाषा पुरुषे

२९६९ ६,३,१०७ कवं चोष्णे

२९७० ६,३,१०८ पथि च च्छन्दसि

२९७१ ६,३,१०९ पृषोदरादीनि यथोपदिष्टम्

२९७२ ६,३,११० संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ

२९७३ ६,३,१११ ढ्रलोपे पूर्वस्य दीर्घोऽणः

२९७४ ६,३,११२ सहिवहोरोदवर्णस्य

२९७५ ६,३,११३ साढ्यै साढ्वा साढेति निगमे

२९७६ ६,३,११४ संहितायाम्

२९७७ ६,३,११५ कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नछिन्नछिद्रस्रुवस्वस्तिकस्य

२९७८ ६,३,११६ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ

२९७९ ६,३,११७ वनगिर्योस्संज्ञायाम् कोटरकिंशुलु*कादीनाम् *ल

२९८० ६,३,११८ वले

२९८१ ६,३,११९ मतौ बह्वचोऽनजिरादीनाम्

२९८२ ६,३,१२० शरादीनाञ्च

२९८३ ६,३,१२१ इको वहेऽपीलोः

२९८४ ६,३,१२२ उपसर्गस्य घञ्यमनुष्ये बहुलम्

२९८५ ६,३,१२३ इकः काशे

२९८६ ६,३,१२४ दस्ति

२९८७ ६,३,१२५ अष्टनः संज्ञायाम्

२९८८ ६,३,१२६ छन्दसि च

२९८९ ६,३,१२७ चितेः कपि

२९९० ६,३,१२८ विश्वस्य वसुराटोः

२९९१ ६,३,१२९ नरे संज्ञायाम्

२९९२ ६,३,१३० मित्रे चर्षौ

२९९३ ६,३,१३१ मन्त्रे सोमाश्वेन्द्रिय विश्वदेव्यस्य मतौ

२९९४ ६,३,१३२ ओषधेश्च विभक्तावप्रथमायाम्

२९९५ ६,३,१३३ ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्

२९९६ ६,३,१३४ इकः सुञि

२९९७ ६,३,१३५ द्व्यचोऽतस्तिङः

२९९८ ६,३,१३६ निपातस्य च

२९९९ ६,३,१३७ अन्येषामपि दृश्यते

३००० ६,३,१३८ चौ

३००१ ६,३,१३९ सम्प्रसारणस्य

३००२ ६,४,००१ अङ्गस्य

३००३ ६,४,००२ हलः

३००४ ६,४,००३ नामि

३००५ ६,४,००४ न तिसृचतसृ

३००६ ६,४,००५ छन्दस्युभयथा

३००७ ६,४,००६ नृ च

३००८ ६,४,००७ नोपधायाः

३००९ ६,४,००८ सर्वनामस्थाने चासंबुद्धौ

३०१० ६,४,००९ वा षपूर्वस्य निगमे

३०११ ६,४,०१० सान्तमहतः संयोगस्य

३०१२ ६,४,०११ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्

३०१३ ६,४,०१२ इन्हन्पूषार्यम्णां शौ

३०१४ ६,४,०१३ सौ च

३०१५ ६,४,०१४ अत्वसन्तस्य चाधातोः

३०१६ ६,४,०१५ अनुनासिकस्य क्विझलोः क्ङिति

३०१७ ६,४,०१६ अज्झनगमां सनि

३०१८ ६,४,०१७ तनोतेर्विभाषा

३०१९ ६,४,०१८ क्रमश्च क्त्वि

३०२० ६,४,०१९ च्छ्वोः शूडनुनासिके च

३०२१ ६,४,०२० ज्वरत्वरस्रिव्यविमवामुपधायाश्च

३०२२ ६,४,०२१ राल्लोपः

३०२३ ६,४,०२२ असिद्धवदत्राभात्

३०२४ ६,४,०२३ श्नान्न लोपः

३०२५ ६,४,०२४ अनिदितां हल उपधायाः क्ङिति

३०२६ ६,४,०२५ दंशसञ्जस्वञ्जां शपि

३०२७ ६,४,०२६ रञ्जेश्च

३०२८ ६,४,०२७ घञि च भावकरणयोः

३०२९ ६,४,०२८ स्यदो जवे

३०३० ६,४,०२९ अवोदैधौद्मप्रश्रथहिमश्रथाः

३०३१ ६,४,०३० नाञ्चेः पूजायाम्

३०३२ ६,४,०३१ क्त्वि स्कन्दिस्यन्दोः

३०३३ ६,४,०३२ जान्तनशां विभाषा

३०३४ ६,४,०३३ भञ्जेश्च चिणि

३०३५ ६,४,०३४ शास इदङ्हलोः

३०३६ ६,४,०३५ शा हौ

३०३७ ६,४,०३६ हन्तेर्जः

३०३८ ६,४,०३७ अनुदात्तोपदेश वनति तनोत्यादीनामनुनासिकलोपो झलि क्ङिति

३०३९ ६,४,०३८ वा ल्यपि

३०४० ६,४,०३९ न क्तिचि दीर्घश्च

३०४१ ६,४,०४० गमः क्वौ

३०४२ ६,४,०४१ विड्वनोरनुनासिकस्यात्

३०४३ ६,४,०४२ जनसनखनां सञ्झलोः

३०४४ ६,४,०४३ ये विभाषा

३०४५ ६,४,०४४ तनोतेर्यकि

३०४६ ६,४,०४५ सनः क्तिचि लोपश्चास्यान्यतरस्याम्

३०४७ ६,४,०४६ आर्धधातुके

३०४८ ६,४,०४७ भ्रस्जो रोपधयो रमन्यतरस्याम्

३०४९ ६,४,०४८ अतो लोपः

३०५० ६,४,०४९ यस्य हलः

३०५१ ६,४,०५० क्यस्य विभाषा

३०५२ ६,४,०५१ णेरनिटि

३०५३ ६,४,०५२ निष्ठायां सेटि

३०५४ ६,४,०५३ जनिता मन्त्रे

३०५५ ६,४,०५४ शमिता यज्ञे

३०५६ ६,४,०५५ अयामन्ताल्वाय्येत्न्विष्णुषु

३०५७ ६,४,०५६ ल्यपि लघुपूर्वात्

३०५८ ६,४,०५७ विभाषाऽऽपः

३०५९ ६,४,०५८ युप्लुवोर्दीर्घश्छन्दसि

३०६० ६,४,०५९ क्षियः

३०६१ ६,४,०६० निष्ठायामण्यदर्थे

३०६२ ६,४,०६१ वाऽऽक्रोशदैन्ययोः

३०६३ ६,४,०६२ स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशाम् वा चिण्वदिट् च

३०६४ ६,४,०६३ दीङो युडचि क्ङिति

३०६५ ६,४,०६४ आतो लोप इटि च

३०६६ ६,४,०६५ ईद्यति

३०६७ ६,४,०६६ घुमास्थागापाजहातिसाम् हलि

३०६८ ६,४,०६७ एर्लिङि

३०६९ ६,४,०६८ वाऽन्यस्य संयोगादेः

३०७० ६,४,०६९ न ल्यपि

३०७१ ६,४,०७० मयतेरिदन्यतरस्याम्

३०७२ ६,४,०७१ लुङ्लङ्लृङ्क्ष्वडुदात्तः

३०७३ ६,४,०७२ आडजादीनाम्

३०७४ ६,४,०७३ छन्दस्यपि दृश्यते

३०७५ ६,४,०७४ न माङ्योगे

३०७६ ६,४,०७५ बहुलं छन्दस्यमाङ्योगेऽपि

३०७७ ६,४,०७६ इरयो रे

३०७८ ६,४,०७७ अचि श्नुधातुभ्रुवां य्वोरियङुवङौ

३०७९ ६,४,०७८ अभ्यासस्यासवर्णे

३०८० ६,४,०७९ स्त्रियाः

३०८१ ६,४,०८० वाऽम्शसोः

३०८२ ६,४,०८१ इणो यण्

३०८३ ६,४,०८२ एरनेकाचोऽसंयोगपूर्वस्य

३०८४ ६,४,०८३ ओः सुपि

३०८५ ६,४,०८४ वर्षाभ्वश्च

३०८६ ६,४,०८५ न भूसुधियोः

३०८७ ६,४,०८६ छन्दस्युभयथा

३०८८ ६,४,०८७ हुश्नुवोः सार्वधातुके

३०८९ ६,४,०८८ भुवो वुक् लुङ्लिटोः

३०९० ६,४,०८९ ऊदुपधाया गोहः

३०९१ ६,४,०९० दोषो णौ

३०९२ ६,४,०९१ वा चित्तविरागे

३०९३ ६,४,०९२ मितां ह्रस्वः

३०९४ ६,४,०९३ चिण्णमुलोर्दीर्घोऽन्यतरस्याम्

३०९५ ६,४,०९४ खचि ह्रस्वः

३०९६ ६,४,०९५ ह्लादो निष्ठायाम्

३०९७ ६,४,०९६ छादेर्घेऽद्व्युपसर्गस्य

३०९८ ६,४,०९७ इस्मन्त्रन्क्विषु च

३०९९ ६,४,०९८ गमहनजनखनघसां लोपः क्ङित्यनङि

३१०० ६,४,०९९ तनिपत्योश्छन्दसि

३१०१ ६,४,१०० घसिभसोर्हलि च

३१०२ ६,४,१०१ हुझल्भ्यो हेर्धिः

३१०३ ६,४,१०२ श्रुशृणुपॄकृवृभ्यश्छन्दसि

३१०४ ६,४,१०३ अङितश्च

३१०५ ६,४,१०४ चिणो लुक्

३१०६ ६,४,१०५ अतो हेः

३१०७ ६,४,१०६ उतश्च प्रत्ययादसंयोगपूर्वात्

३१०८ ६,४,१०७ लोपश्चास्यान्यतरस्याम् म्वोः

३१०९ ६,४,१०८ नित्यम् करोतेः

३११० ६,४,१०९ ये च

३१११ ६,४,११० अत उत्सार्वधातुके

३११२ ६,४,१११ श्नसोरल्लोपः

३११३ ६,४,११२ श्नाभ्यस्तयोरातः

३११४ ६,४,११३ ई हल्यघोः

३११५ ६,४,११४ इद्दरिद्रस्य

३११६ ६,४,११५ भियोऽन्यतरस्याम्

३११७ ६,४,११६ जहातेश्च

३११८ ६,४,११७ आ च हौ

३११९ ६,४,११८ लोपो यि

३१२० ६,४,११९ घ्वसोरेद्धावभ्यासलोपश्च

३१२१ ६,४,१२० अत एकहल्मध्येऽनादेशादेर्लिटि

३१२२ ६,४,१२१ थलि च सेटि

३१२३ ६,४,१२२ तॄफलभजत्रपश्च

३१२४ ६,४,१२३ राधो हिंसायाम्

३१२५ ६,४,१२४ वा जॄभ्रमुत्रसाम्

३१२६ ६,४,१२५ फणां च सप्तानाम्

३१२७ ६,४,१२६ न शसददवादिगुणानाम्

३१२८ ६,४,१२७ अर्वणस्त्रसावनञः

३१२९ ६,४,१२८ मघवा बहुलम्

३१३० ६,४,१२९ भस्य

३१३१ ६,४,१३० पादः पत्

३१३२ ६,४,१३१ वसोः सम्प्रसारणम्

३१३३ ६,४,१३२ वाह ऊठ्

३१३४ ६,४,१३३ श्वयुवमघोनामतद्धिते

३१३५ ६,४,१३४ अल्लोपोऽनः

३१३६ ६,४,१३५ षपूर्वहन्धृतराज्ञामणि

३१३७ ६,४,१३६ विभाषा ङिश्योः

३१३८ ६,४,१३७ न संयोगाद्वमन्तात्

३१३९ ६,४,१३८ अचः

३१४० ६,४,१३९ उद ईत्

३१४१ ६,४,१४० आतो धातोः

३१४२ ६,४,१४१ मन्त्रेष्वाङ्यादेरात्मनः

३१४३ ६,४,१४२ ति विंशतेर्डिति

३१४४ ६,४,१४३ टेः

३१४५ ६,४,१४४ नस्तद्धिते

३१४६ ६,४,१४५ अह्नष्टखोरेव

३१४७ ६,४,१४६ ओर्गुणः

३१४८ ६,४,१४७ ढे लोपोऽकद्र्वाः

३१४९ ६,४,१४८ यस्येति च

३१५० ६,४,१४९ सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः

३१५१ ६,४,१५० हलस्तद्धितस्य

३१५२ ६,४,१५१ आपत्यस्य च तद्धितेऽनाति

३१५३ ६,४,१५२ क्यच्व्योश्च

३१५४ ६,४,१५३ बिल्वकादिभ्यश्छस्य लुक्

३१५५ ६,४,१५४ तुरिष्ठेमेयस्सु

३१५६ ६,४,१५५ टेः

३१५७ ६,४,१५६ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः

३१५८ ६,४,१५७ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः

३१५९ ६,४,१५८ बहोर्लोपो भू च बहोः

३१६० ६,४,१५९ इष्ठस्य यिट् च

३१६१ ६,४,१६० ज्यादादीयसः

३१६२ ६,४,१६१ र ऋतो हलादेर्लघोः

३१६३ ६,४,१६२ विभाषर्जोश्छन्दसि

३१६४ ६,४,१६३ प्रकृत्यैकाच्

३१६५ ६,४,१६४ इनण्यनपत्ये

३१६६ ६,४,१६५ गाथिविदथिकेशिगणिपणिनश्च

३१६७ ६,४,१६६ संयोगादिश्च

३१६८ ६,४,१६७ अन्

३१६९ ६,४,१६८ ये चाभावकर्मणोः

३१७० ६,४,१६९ आत्माध्वानौ खे

३१७१ ६,४,१७० न मपूर्वोऽपत्येऽवर्मणः

३१७२ ६,४,१७१ ब्राह्मोऽजातौ

३१७३ ६,४,१७२ कार्मस्ताच्छील्ये

३१७४ ६,४,१७३ औक्षमनपत्ये

३१७५ ६,४,१७४ दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि

३१७६ ६,४,१७५ ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्मयानि च्छन्दसि

३१७७ ७,१,००१ युवोरनाकौ

३१७८ ७,१,००२ आयनेयीनीयियः फढखछघाम् प्रत्ययादीनाम्

३१७९ ७,१,००३ झोऽन्तः

३१८० ७,१,००४ अदभ्यस्तात्

३१८१ ७,१,००५ आत्मनेपदेष्वनतः

३१८२ ७,१,००६ शीङो रुट्

३१८३ ७,१,००७ वेत्तेर्विभाषा

३१८४ ७,१,००८ बहुलं छन्दसि

३१८५ ७,१,००९ अतो भिस ऐस्

३१८६ ७,१,०१० बहुलं छन्दसि

३१८७ ७,१,०११ नेदमदसोरकोः

३१८८ ७,१,०१२ टाङसिङसामिनात्स्याः

३१८९ ७,१,०१३ ङेर्यः

३१९० ७,१,०१४ सर्वनाम्नः स्मै

३१९१ ७,१,०१५ ङसिङ्योः स्मात्स्मिनौ

३१९२ ७,१,०१६ पूर्वादिभ्यो नवभ्यो वा

३१९३ ७,१,०१७ जसः शी

३१९४ ७,१,०१८ औङ आपः

३१९५ ७,१,०१९ नपुंसकाच्च

३१९६ ७,१,०२० जश्शसोः शिः

३१९७ ७,१,०२१ अष्टाभ्य औश्

३१९८ ७,१,०२२ षड्भ्यो लुक्

३१९९ ७,१,०२३ स्वमोर्नपुंसकात्

३२०० ७,१,०२४ अतोऽम्

३२०१ ७,१,०२५ अद्ड्डतरादिभ्यः पञ्चभ्यः

३२०२ ७,१,०२६ नेतराच्छन्दसि

३२०३ ७,१,०२७ युष्मदस्मद्भ्यां ङसोऽश्

३२०४ ७,१,०२८ ङेप्रथमयोरम्

३२०५ ७,१,०२९ शसो न

३२०६ ७,१,०३० भ्यसो भ्यम्

३२०७ ७,१,०३१ पञ्चम्या अत्

३२०८ ७,२,०३२ एकवचनस्य च

३२०९ ७,२,०३३ साम आकम्

३२१० ७,१,०३४ आत औ णलः

३२११ ७,१,०३५ तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्

३२१२ ७,१,०३६ विदेः शतुर्वसुः

३२१३ ७,१,०३७ समासेऽनञ्पूर्वे क्त्वो ल्यप्

३२१४ ७,१,०३८ क्त्वापि च्छन्दसि

३२१५ ७,१,०३९ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः

३२१६ ७,१,०४० अमो मश्

३२१७ ७,१,०४१ लोपस्त आत्मनेपदेषु

३२१८ ७,१,०४२ ध्वमो ध्वात्

३२१९ ७,१,०४३ यजध्वैनमिति च

३२२० ७,१,०४४ तस्य तात्

३२२१ ७,१,०४५ तप्तनप्तनथनाश्च

३२२२ ७,१,०४६ इदन्तो मसि

३२२३ ७,१,०४७ क्त्वो यक्

३२२४ ७,१,०४८ इष्ट्वीनमिति च

३२२५ ७,१,०४९ स्नात्व्यादयश्च

३२२६ ७,१,०५० आज्जसेरसुक्

३२२७ ७,१,०५१ अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि

३२२८ ७,१,०५२ आमि सर्वनाम्नः सुट्

३२२९ ७,१,०५३ त्रेस्त्रयः

३२३० ७,१,०५४ ह्रस्वनद्यापो नुट्

३२३१ ७,१,०५५ षट्चतुर्भ्यश्च

३२३२ ७,१,०५६ श्रीग्रामण्योश्छन्दसि

३२३३ ७,१,०५७ गोः पादान्ते

३२३४ ७,१,०५८ इदितो नुम्धातोः

३२३५ ७,१,०५९ शे मुचादीनाम्

३२३६ ७,१,०६० मस्जिनशोर्झलि

३२३७ ७,१,०६१ रधिजभोरचि

३२३८ ७,१,०६२ नेट्यलिटि रधेः

३२३९ ७,१,०६३ रभेरशब्लिटोः

३२४० ७,१,०६४ लभेश्च

३२४१ ७,१,०६५ आङो यि

३२४२ ७,१,०६६ उपात्प्रशंसायाम्

३२४३ ७,१,०६७ उपसर्गात्खल्घञोः

३२४४ ७,१,०६८ न सुदुर्भ्यां केवलाभ्याम्

३२४५ ७,१,०६९ विभाषा चिण्णमुलोः

३२४६ ७,१,०७० उगिदचां सर्वनामस्थानेऽधातोः

३२४७ ७,१,०७१ युजेरसमासे

३२४८ ७,१,०७२ नपुंसकस्य झलचः

३२४९ ७,१,०७३ इकोऽचि विभक्तौ

३२५० ७,१,०७४ तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य

३२५१ ७,१,०७५ अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः

३२५२ ७,१,०७६ छन्दस्यपि दृश्यते

३२५३ ७,१,०७७ ई च द्विवचने

३२५४ ७,१,०७८ नाभ्यस्ताच्छतुः

३२५५ ७,१,०७९ वा नपुंसकस्य

३२५६ ७,१,०८० आच्छीनद्योर्नुम्

३२५७ ७,१,०८१ शप्श्यनोर्नित्यम्

३२५८ ७,१,०८२ सावनडुहः

३२५९ ७,१,०८३ दृक्स्ववस्स्वतवसां छन्दसि

३२६० ७,१,०८४ दिव औत्

३२६१ ७,१,०८५ पथिमथ्यृभुक्षामात्

३२६२ ७,१,०८६ इतोऽत् सर्वनामस्थाने

३२६३ ७,१,०८७ थो न्थः

३२६४ ७,१,०८८ भस्य टेर्लोपः

३२६५ ७,१,०८९ पुंसोऽसुङ्

३२६६ ७,१,०९० गोतो णित्

३२६७ ७,१,०९१ णलुत्तमो वा

३२६८ ७,१,०९२ सख्युरसंबुद्धौ

३२६९ ७,१,०९३ अनङ् सौ

३२७० ७,१,०९४ ऋदुशनस्पुरुदंसोऽनेहसां च

३२७१ ७,१,०९५ तृज्वत् क्रोष्टुः

३२७२ ७,१,०९६ स्त्रियां च

३२७३ ७,१,०९७ विभाषा तृतीयादिष्वचि

३२७४ ७,१,०९८ चतुरनडुहोरामुदात्तः

३२७५ ७,१,०९९ अम् संबुद्धौ

३२७६ ७,१,१०० ॠत इद्धातोः

३२७७ ७,१,१०१ उपधायाश्च

३२७८ ७,१,१०२ उदोष्ठ्यपूर्वस्य

३२७९ ७,१,१०३ बहुलं छन्दसि

३२८० ७,२,००१ सिचि वृद्धिः परस्मैपदेषु

३२८१ ७,२,००२ अतो ल्रान्तस्य

३२८२ ७,२,००३ वदव्रजहलन्तस्याचः

३२८३ ७,२,००४ नेटि

३२८४ ७,२,००५ ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्

३२८५ ७,२,००६ ऊर्णोतेर्विभाषा

३२८६ ७,२,००७ अतो हलादेर्लघोः

३२८७ ७,२,००८ नेड्वशि कृति

३२८८ ७,२,००९ तितुत्रतथसिसुसरकसेषु

३२८९ ७,२,०१० एकाच उपदेशेऽनुदात्तात्

३२९० ७,२,०११ श्र्युकः किति

३२९१ ७,२,०१२ सनि ग्रहगुहोश्च

३२९२ ७,२,०१३ कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि

३२९३ ७,२,०१४ श्वीदितो निष्ठायाम्

३२९४ ७,२,०१५ यस्य विभाषा

३२९५ ७,२,०१६ आदितश्च

३२९६ ७,२,०१७ विभाषा भावादिकर्मणोः

३२९७ ७,२,०१८ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमस्सक्ताविस्पष्टस्वरानायासभृशेषु

३२९८ ७,२,०१९ धृषिशसी वैयात्ये

३२९९ ७,२,०२० दृढः स्थूलबलयोः

३३०० ७,२,०२१ प्रभौ परिवृढः

३३०१ ७,२,०२२ कृच्छ्र गहनयोः कषः

३३०२ ७,२,०२३ घुषिरविशब्दने

३३०३ ७,२,०२४ अर्देः संनिविभ्यः

३३०४ ७,२,०२५ अभेश्चाविदूर्ये

३३०५ ७,२,०२६ णेरध्ययने वृत्तम्

३३०६ ७,२,०२७ वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः

३३०७ ७,२,०२८ रुष्यमत्वरसंघुषास्वनाम्

३३०८ ७,२,०२९ हृषेर् लोमसु

३३०९ ७,२,०३० अपचितश्च

३३१० ७,२,०३१ ह्रु ह्वरेश्छन्दसि

३३११ ७,२,०३२ अपरिह्वृताश्च

३३१२ ७,२,०३३ सोमे ह्वरितः

३३१३ ७,२,०३४
ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्तविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च

३३१४ ७,२,०३५ आर्धधातुकस्येड्वलादेः

३३१५ ७,२,०३६ स्नुक्रमोरनात्मनेपदनिमित्ते

३३१६ ७,२,०३७ ग्रहोऽलिटि दीर्घः

३३१७ ७,२,०३८ वॄतो वा

३३१८ ७,२,०३९ न लिङि

३३१९ ७,२,०४० सिचि च परस्मैपदेषु

३३२० ७,२,०४१ इट् सनि वा

३३२१ ७,२,०४२ लिङ्सिचोरात्मनेपदेषु

३३२२ ७,२,०४३ ऋतश्च संयोगादेः

३३२३ ७,२,०४४ स्वरतिसूतिसूयतिधूञूदितो वा

३३२४ ७,२,०४५ रधादिभ्यश्च

३३२५ ७,२,०४६ निरः कुषः

३३२६ ७,२,०४७ इण्निष्ठायाम्

३३२७ ७,२,०४८ तीषसहलुभरुषरिषः

३३२८ ७,२,०४९ सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्

३३२९ ७,२,०५० क्लिशः क्त्वानिष्ठयोः

३३३० ७,२,०५१ पूङश्च

३३३१ ७,२,०५२ वसतिक्षुधोरिट्

३३३२ ७,२,०५३ अञ्चेः पूजायाम्

३३३३ ७,२,०५४ लुभो विमोहने

३३३४ ७,२,०५५ जॄव्रश्च्योः क्त्वि

३३३५ ७,२,०५६ उदितो वा

३३३६ ७,२,०५७ सेऽसिचि कृतचृतच्छृदतृदनृतः

३३३७ ७,२,०५८ गमेरिट् परस्मैपदेषु

३३३८ ७,२,०५९ न वृद्भ्यश्चतुर्भ्यः

३३३९ ७,२,०६० तासि च क्लिपः

३३४० ७,२,०६१ अचस्तास्वत्थल्यनिटो नित्यम्

३३४१ ७,२,०६२ उपदेशेऽत्वतः

३३४२ ७,२,०६३ ऋतो भारद्वाजस्य

३३४३ ७,२,०६४ बभूथाततन्थजगृभ्मववर्थेति निगमे

३३४४ ७,२,०६५ विभाषा सृजिदृशोः

३३४५ ७,२,०६६ इडत्त्यर्तिव्ययतीनाम्

३३४६ ७,२,०६७ वस्वेकाजाद्घसाम्

३३४७ ७,२,०६८ विभाषा गमहनविदविशाम्

३३४८ ७,२,०६९ सनिं-ससनिवांसम्

३३४९ ७,२,०७० ऋद्धनोः स्ये

३३५० ७,२,०७१ अञ्जेः सिचि

३३५१ ७,२,०७२ स्तुसुधूञ्भ्यः परस्मैपदेषु

३३५२ ७,२,०७३ यमरमनमातां सक्च

३३५३ ७,२,०७४ स्मिपूङ्रञ्ज्वशाम् सनि

३३५४ ७,२,०७५ किरश्च पञ्चभ्यः

३३५५ ७,२,०७६ रुदादिभ्यः सार्वधातुके

३३५६ ७,२,०७७ ईशः से

३३५७ ७,२,०७८ ईडजनोर्ध्वे च

३३५८ ७,२,०७९ लिङः सलोपोऽनन्त्यस्य

३३५९ ७,२,०८० अतो येयः

३३६० ७,२,०८१ आतो ङितः

३३६१ ७,२,०८२ आने मुक्

३३६२ ७,२,०८३ ईदासः

३३६३ ७,२,०८४ अष्टन आ विभक्तौ

३३६४ ७,२,०८५ रायो हलि

३३६५ ७,२,०८६ युष्मदस्मदोरनादेशे

३३६६ ७,२,०८७ द्वितीयायां च

३३६७ ७,२,०८८ प्रथमायाश्च द्विवचने भाषायाम्

३३६८ ७,२,०८९ योऽचि

३३६९ ७,२,०९० शेषे लोपः

३३७० ७,२,०९१ मपर्यन्तस्य

३३७१ ७,२,०९२ युवावौ द्विवचने

३३७२ ७,२,०९३ यूयवयौ जसि

३३७३ ७,२,०९४ त्वाहौ सौ

३३७४ ७,२,०९५ तुभ्यमह्यौ ङयि

३३७५ ७,२,०९६ तवममौ ङसि

३३७६ ७,२,०९७ त्वमावेकवचने

३३७७ ७,२,०९८ प्रत्ययोत्तरपदयोश्च

३३७८ ७,२,०९९ त्रिचतुरोः स्त्रियां तिसृचतसृ

३३७९ ७,२,१०० अचि र ऋतः

३३८० ७,२,१०१ जराया जरसन्यतरस्याम्

३३८१ ७,२,१०२ त्यदादीनामः

३३८२ ७,२,१०३ किमः कः

३३८३ ७,२,१०४ कु तिहोः

३३८४ ७,२,१०५ क्वाति

३३८५ ७,२,१०६ तदोः सः सावनन्त्ययोः

३३८६ ७,२,१०७ अदस औ सुलोपश्च

३३८७ ७,२,१०८ इदमो मः

३३८८ ७,२,१०९ दश्च

३३८९ ७,२,११० यः सौ

३३९० ७,२,१११ इदोऽय् पुंसि

३३९१ ७,२,११२ अनाप्यकः

३३९२ ७,२,११३ हलि लोपः

३३९३ ७,२,११४ मृजेर्वृद्धिः

३३९४ ७,२,११५ अचो ञ्णिति

३३९५ ७,२,११६ अत उपधायाः

३३९६ ७,२,११७ तद्धितेष्वचामादेः

३३९७ ७,२,११८ किति च

३३९८ ७,३,००१ देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्

३३९९ ७,३,००२ केकयमित्रयुप्रलयानां यादेरियः

३४०० ७,३,००३ न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्

३४०१ ७,३,००४ द्वारादीनां च

३४०२ ७,३,००५ न्यग्रोधस्य च केवलस्य

३४०३ ७,३,००६ न कर्मव्यतीहारे

३४०४ ७,३,००७ स्वागतादीनां च

३४०५ ७,३,००८ श्वादेरिञि

३४०६ ७,३,००९ पदान्तस्यान्यतरस्याम्

३४०७ ७,३,०१० उत्तरपदस्य

३४०८ ७,३,०११ अवयवादृतोः

३४०९ ७,३,०१२ सुसर्वार्धाज्जनपदस्य

३४१० ७,३,०१३ दिशोऽमद्राणाम्

३४११ ७,३,०१४ प्राचां ग्रामनगराणाम्

३४१२ ७,३,०१५ संख्यायाः संवत्सरसंख्यस्य च

३४१३ ७,३,०१६ वर्षस्याभविष्यति

३४१४ ७,३,०१७ परिमाणान्तस्यासंज्ञाशाणयोः

३४१५ ७,३,०१८ जे प्रोष्ठपदानाम्

३४१६ ७,३,०१९ हृद्भगसिन्ध्वन्ते पूर्वपदस्य च

३४१७ ७,३,०२० अनुशतिकादीनां च

३४१८ ७,३,०२१ देवताद्वन्द्वे च

३४१९ ७,३,०२२ नेन्द्रस्य परस्य

३४२० ७,३,०२३ दीर्घाच्च वरुणस्य

३४२१ ७,३,०२४ प्राचां नगरान्ते

३४२२ ७,३,०२५ जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम्

३४२३ ७,३,०२६ अर्धात्परिमाणस्य पूर्वस्य तु वा

३४२४ ७,३,०२७ नातः परस्य

३४२५ ७,३,०२८ प्रवाहणस्य ढे

३४२६ ७,३,०२९ तत्प्रत्ययस्य च

३४२७ ७,३,०३० नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्

३४२८ ७,३,०३१ यथातथयथापुरयोः पर्याये

३४२९ ७,३,०३२ हनस्तोऽचिण्णलोः

३४३० ७,३,०३३ आतो युक्चिण्कृतोः

३४३१ ७,३,०३४ नोदात्तोपदेशस्य मान्तस्यानाचमेः

३४३२ ७,३,०३५ जनिवध्योश्च

३४३३ ७,३,०३६ अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ

३४३४ ७,३,०३७ शाच्छासाह्वाव्यावेपां युक्

३४३५ ७,३,०३८ वो विधूनने जुक्

३४३६ ७,३,०३९ लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने

३४३७ ७,३,०४० भियो हेतुभये षुक्

३४३८ ७,४,०४१ स्फायो वः

३४३९ ७,३,०४२ शदेरगतौ तः

३४४० ७,३,०४३ रुहः पोऽन्यतरस्याम्

३४४१ ७,३,०४४ प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः

३४४२ ७,३,०४५ न यासयोः

३४४३ ७,३,०४६ उदीचामातः स्थाने यकपूर्वायाः

३४४४ ७,३,०४७ भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि

३४४५ ७,३,०४८ अभाषितपुंस्काच्च

३४४६ ७,३,०४९ आदाचार्याणाम्

३४४७ ७,३,०५० ठस्येकः

३४४८ ७,३,०५१ इसुसुक्तान्तात्कः

३४४९ ७,३,०५२ चजोः कु घिण्ण्यतोः

३४५० ७,३,०५३ न्यङ्क्वादीनां च

३४५१ ७,३,०५४ हो हन्तेर्ञ्णिन्नेषु

३४५२ ७,३,०५५ अभ्यासाच्च

३४५३ ७,३,०५६ हेरचङि

३४५४ ७,३,०५७ सन्लिटोर्जेः

३४५५ ७,३,०५८ विभाषा चेः

३४५६ ७,३,०५९ न क्वादेः

३४५७ ७,३,०६० अजिव्रज्योश्च

३४५८ ७,३,०६१ भुजन्युब्जौ पाण्युपतापयोः

३४५९ ७,३,०६२ प्रयाजानूयाजौ यज्ञाङ्गे

३४६० ७,३,०६३ वञ्चेर्गतौ

३४६१ ७,३,०६४ ओक उचः के

३४६२ ७,३,०६५ ण्य आवश्यके

३४६३ ७,३,०६६ यजयाचरुचप्रवचर्चश्च

३४६४ ७,३,०६७ वचोऽशब्दसंज्ञायाम्

३४६५ ७,३,०६८ प्रयोज्यनियोज्यौ शक्यार्थे

३४६६ ७,३,०६९ भोज्यं भक्ष्ये

३४६७ ७,३,०७० घोर्लोपो लेटि वा

३४६८ ७,३,०७१ ओतः श्यनि

३४६९ ७,३,०७२ क्सस्याचि

३४७० ७,३,०७३ लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये

३४७१ ७,३,०७४ शमामष्टानाम् दीर्घः श्यनि

३४७२ ७,३,०७५ ष्ठिवुक्लम्याचमाम् शिति

३४७३ ७,३,०७६ क्रमः परस्मैपदेषु

३४७४ ७,३,०७७ इषुगमियमाम् छः

३४७५ ७,३,०७८ पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदाम् पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः

३४७६ ७,३,०७९ ज्ञाजनोर्जा

३४७७ ७,३,०८० प्वादीनाम् ह्रस्वः

३४७८ ७,३,०८१ मीनातेर्निगमे

३४७९ ७,३,०८२ मिदेर्गुणः

३४८० ७,३,०८३ जुसि च

३४८१ ७,३,०८४ सार्वधातुकार्धधातुकयोः

३४८२ ७,३,०८५ जाग्रोऽविचिण्णल्ङित्सु

३४८३ ७,३,०८६ पुगन्त लघूपधस्य च

३४८४ ७,३,०८७ नाभ्यस्तस्याचि पिति सार्वधातुके

३४८५ ७,३,०८८ भूसुवोस्तिङि

३४८६ ७,३,०८९ उतो वृद्धिर्लुकि हलि

३४८७ ७,३,०९० ऊर्णोतेर्विभाषा

३४८८ ७,३,०९१ गुणोऽपृक्ते

३४८९ ७,३,०९२ तृणह इम्

३४९० ७,३,०९३ ब्रुव ईट्

३४९१ ७,३,०९४ यङो वा

३४९२ ७,३,०९५ तुरुस्तुशम्यमः सार्वधातुके

३४९३ ७,३,०९६ अस्तिसिचोऽपृक्ते

३४९४ ७,३,०९७ बहुलं छन्दसि

३४९५ ७,३,०९८ रुदश्च पञ्चभ्यः

३४९६ ७,३,०९९ अड्गार्ग्यगालवयोः

३४९७ ७,३,१०० अदः सर्वेषाम्

३४९८ ७,३,१०१ अतो दीर्घो यञि

३४९९ ७,३,१०२ सुपि च

३५०० ७,३,१०३ बहुवचने झल्येत्

३५०१ ७,३,१०४ ओसि च

३५०२ ७,३,१०५ आङि चापः

३५०३ ७,३,१०६ संबुद्धौ च

३५०४ ७,३,१०७ अम्बार्थनद्योर्ह्रस्वः

३५०५ ७,३,१०८ ह्रस्वस्य गुणः

३५०६ ७,३,१०९ जसि च

३५०७ ७,३,११० ऋतो ङिसर्वनामस्थानयोः

३५०८ ७,३,१११ घेर्ङिति

३५०९ ७,३,११२ आण्नद्याः

३५१० ७,३,११३ याडापः

३५११ ७,३,११४ सर्वनाम्नः स्याड्ढ्रस्वश्च

३५१२ ७,३,११५ विभाषा द्वितीयातृतीयाभ्याम्

३५१३ ७,३,११६ ङेराम्नद्याम्नीभ्यः

३५१४ ७,३,११७ इदुद्भ्याम्

३५१५ ७,३,११८ औत्

३५१६ ७,३,११९ अच्च घेः

३५१७ ७,३,१२० आङो नाऽस्त्रियाम्

३५१८ ७,४,००१ णौ चङ्युपधाया ह्रस्वः

३५१९ ७,४,००२ नाग्लोपिशास्वृदिताम्

३५२० ७,४,००३ भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्

३५२१ ७,४,००४ लोपः पिबतेरीच्चाभ्यासस्य

३५२२ ७,४,००५ तिष्ठतेरित्

३५२३ ७,४,००६ जिघ्रतेर्वा

३५२४ ७,४,००७ उर्ऋत्

३५२५ ७,४,००८ नित्यं छन्दसि

३५२६ ७,४,००९ दयतेर्दिगि लिटि

३५२७ ७,४,०१० ऋतश्च संयोगादेर्गुणः

३५२८ ७,४,०११ ऋच्छत्यॄताम्

३५२९ ७,४,०१२ शॄदॄप्रां ह्रस्वो वा

३५३० ७,४,०१३ केऽणः

३५३१ ७,४,०१४ न कपि

३५३२ ७,४,०१५ आपोऽन्यतरस्याम्

३५३३ ७,४,०१६ ऋदृशोऽङि गुणः

३५३४ ७,४,०१७ अस्यतेस्थुक्

३५३५ ७,४,०१८ श्वयतेरः

३५३६ ७,४,०१९ पतः पुम्

३५३७ ७,४,०२० वच उम्

३५३८ ७,४,०२१ शीङः सार्वधातुके गुणः

३५३९ ७,४,०२२ अयङ् यि क्ङिति

३५४० ७,४,०२३ उपसर्गाद्ध्रस्व ऊहतेः

३५४१ ७,४,०२४ एतेर्लिङि

३५४२ ७,४,०२५ अकृत्सार्वधातुकयोर्दीर्घः

३५४३ ७,४,०२६ च्वौ च

३५४४ ७,४,०२७ रीङृतः

३५४५ ७,४,०२८ रिङ् शयग्लिङ्क्षु

३५४६ ७,४,०२९ गुणोऽर्तिसंयोगाद्योः

३५४७ ७,४,०३० यङि च

३५४८ ७,४,०३१ ई घ्राध्मोः

३५४९ ७,४,०३२ अस्य च्वौ

३५५० ७,४,०३३ क्यचि च

३५५१ ७,४,०३४ अशनायोदन्यधनायाबुभुक्षापिपासागर्धेषु

३५५२ ७,४,०३५ न च्छन्दस्यपुत्रस्य

३५५३ ७,४,०३६ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति

३५५४ ७,४,०३७ अश्वाघस्यात्

३५५५ ७,४,०३८ देवसुम्नयोर्यजुषि काठके

३५५६ ७,४,०३९ कव्यध्वरपृतनस्यर्चि लोपः

३५५७ ७,४,०४० द्यतिस्यतिमास्थामित्ति किति

३५५८ ७,४,०४१ शाच्छोरन्यतरस्याम्

३५५९ ७,४,०४२ दधातेर्हिः

३५६० ७,४,०४३ जहातेश्च क्त्वि

३५६१ ७,४,०४४ विभाषा छन्दसि

३५६२ ७,४,०४५ सुधितवसुधितनेमधितधिष्वधिषीय च

३५६३ ७,४,०४६ दो दद् घोः

३५६४ ७,४,०४७ अच उपसर्गात्तः

३५६५ ७,४,०४८ अपो भि

३५६६ ७,४,०४९ सः स्यार्धधातुके

३५६७ ७,४,०५० तासस्त्योर्लोपः

३५६८ ७,४,०५१ रि च

३५६९ ७,४,०५२ ह एति

३५७० ७,४,०५३ यीवर्णयोर्दीधीवेव्योः

३५७१ ७,४,०५४ सनि मीमाघुरभलभशकपतपदामच इस्

३५७२ ७,४,०५५ आप्ज्ञप्यृधामीत्

३५७३ ७,४,०५६ दम्भ इच्च

३५७४ ७,४,०५७ मुचोऽकर्मकस्य गुणो वा

३५७५ ७,४,०५८ अत्र लोपोऽभ्यासस्य

३५७६ ७,४,०५९ ह्रस्वः

३५७७ ७,४,०६० हलादिः शेषः

३५७८ ७,४,०६१ शर्पूर्वाः खयः

३५७९ ७,४,०६२ कुहोश्चुः

३५८० ७,४,०६३ न कवतेर्यङि

३५८१ ७,४,०६४ कृषेश्छन्दसि

३५८२ ७,४,०६५
दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतःस
ारीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च

३५८३ ७,४,०६६ उरत्

३५८४ ७,४,०६७ द्युतिस्वाप्योः सम्प्रसारणम्

३५८५ ७,४,०६८ व्यथो लिटि

३५८६ ७,४,०६९ दीर्घ इणः किति

३५८७ ७,४,०७० अत आदेः

३५८८ ७,४,०७१ तस्मान्नुड्द्विहलः

३५८९ ७,४,०७२ अश्नोतेश्च

३५९० ७,४,०७३ भवतेरः

३५९१ ७,४,०७४ ससूवेति निगमे

३५९२ ७,४,०७५ निजां त्रयाणां गुणः श्लौ

३५९३ ७,४,०७६ भृञामित्

३५९४ ७,४,०७७ अर्तिपिपर्त्योश्च

३५९५ ७,४,०७८ बहुलं छन्दसि

३५९६ ७,४,०७९ सन्यतः

३५९७ ७,४,०८० ओः पुयण्ज्यपरे

३५९८ ७,४,०८१ स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा

३५९९ ७,४,०८२ गुणो यङ्लुकोः

३६०० ७,४,०८३ दीर्घोऽकितः

३६०१ ७,४,०८४ नीग्वञ्चुस्रंसुध्वंसुभ्रंशुकसपतपदस्कन्दाम्

३६०२ ७,४,०८५ नुगतोऽनुनासिकान्तस्य

३६०३ ७,४,०८६ जपजभदहदशभञ्जपशाम् च

३६०४ ७,४,०८७ चरफलोश्च

३६०५ ७,४,०८८ उत्परस्यातः

३६०६ ७,४,०८९ ति च

३६०७ ७,४,०९० रीगृदुपधस्य च

३६०८ ७,४,०९१ रुग्रिकौ च लुकि

३६०९ ७,४,०९२ ऋतश्च

३६१० ७,४,०९३ सन्वल्लघुनि चङ्परेऽनग्लोपे

३६११ ७,४,०९४ दीर्घो लघोः

३६१२ ७,४,०९५ अत् स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्

३६१३ ७,४,०९६ विभाषा वेष्टिचेष्ट्योः

३६१४ ७,४,०९७ ई च गणः

३६१५ ८,१,००१ सर्वस्य द्वे

३६१६ ८,१,००२ तस्य परमाम्रेडितम्

३६१७ ८,१,००३ अनुदात्तं च

३६१८ ८,१,००४ नित्यवीप्सयोः

३६१९ ८,१,००५ परेर्वर्जने

३६२० ८,१,००६ प्रसमुपोदः पादपूरणे

३६२१ ८,१,००७ उपर्यध्यधसः सामीप्ये

३६२२ ८,१,००८ वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु

३६२३ ८,१,००९ एकं बहुव्रीहिवत्

३६२४ ८,१,०१० आबाधे च

३६२५ ८,१,०११ कर्मधारयवदुत्तरेषु

३६२६ ८,१,०१२ प्रकारे गुणवचनस्य

३६२७ ८,१,०१३ अकृच्छ्रे प्रियसुखयोरन्यतरस्याम्

३६२८ ८,१,०१४ यथास्वे यथायथम्

३६२९ ८,१,०१५ द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु

३६३० ८,१,०१६ पदस्य

३६३१ ८,१,०१७ पदात्

३६३२ ८,१,०१८ अनुदात्तं सर्वमपादादौ

३६३३ ८,१,०१९ आमन्त्रितस्य च

३६३४ ८,१,०२० युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ

३६३५ ८,१,०२१ बहुवचनस्य वस्नसौ

३६३६ ८,१,०२२ तेमयावेकवचनस्य

३६३७ ८,१,०२३ त्वामौ द्वितीयायाः

३६३८ ८,१,०२४ न च वाहाहैवयुक्ते

३६३९ ८,१,०२५ पश्यार्थैश्चानालोचने

३६४० ८,१,०२६ सपूर्वायाः प्रथमाया विभाषा

३६४१ ८,१,०२७ तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः

३६४२ ८,१,०२८ तिङ्ङतिङः

३६४३ ८,१,०२९ न लुट्

३६४४ ८,१,०३० निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्

३६४५ ८,१,०३१ नह प्रत्यारम्भे

३६४६ ८,१,०३२ सत्यं प्रश्ने

३६४७ ८,१,०३३ अङ्गात्प्रातिलोम्ये

३६४८ ८,१,०३४ हि च

३६४९ ८,१,०३५ छन्दस्यनेकमपि साकाङ्क्षम्

३६५० ८,१,०३६ यावद्यथाभ्याम्

३६५१ ८,१,०३७ पूजायां नानन्तरम्

३६५२ ८,१,०३८ उपसर्गव्यपेतं च

३६५३ ८,१,०३९ तुपश्यपश्यताहैः पूजायाम्

३६५४ ८,१,०४० अहो च

३६५५ ८,१,०४१ शेषे विभाषा

३६५६ ८,१,०४२ पुरा च परीप्सायाम्

३६५७ ८,१,०४३ नन्वित्यनुज्ञैषणायाम्

३६५८ ८,१,०४४ किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम्

३६५९ ८,१,०४५ लोपे विभाषा

३६६० ८,१,०४६ एहि मन्ये प्रहासे लृट्

३६६१ ८,१,०४७ जात्वपूर्वम्

३६६२ ८,१,०४८ किंवृत्तं च चिदुत्तरम्

३६६३ ८,१,०४९ आहो उताहो चानन्तरम्

३६६४ ८,१,०५० शेषे विभाषा

३६६५ ८,१,०५१ गत्यर्थलोटा लृण्नचेत्कारकं सर्वान्यत्

३६६६ ८,१,०५२ लोट् च

३६६७ ८,१,०५३ विभाषितं सोपसर्गमनुत्तमम्

३६६८ ८,१,०५४ हन्त च

३६६९ ८,१,०५५ आम एकान्तरमामन्त्रितमनन्तिके

३६७० ८,१,०५६ यद्धितुपरं छन्दसि

३६७१ ८,१,०५७ चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः

३६७२ ८,१,०५८ चादिषु च

३६७३ ८,१,०५९ चवायोगे प्रथमा

३६७४ ८,१,०६० हेति क्षियायाम्

३६७५ ८,१,०६१ अहेति विनियोगे च

३६७६ ८,१,०६२ चाहलोप एवेत्यवधारणम्

३६७७ ८,१,०६३ चादिलोपे विभाषा

३६७८ ८,१,०६४ वैवावेति च च्छन्दसि

३६७९ ८,१,०६५ एकान्याभ्यां समर्थाभ्याम्

३६८० ८,१,०६६ यद्वृत्तान्नित्यम्

३६८१ ८,१,०६७ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः

३६८२ ८,१,०६८ सगतिरपि तिङ्

३६८३ ८,१,०६९ कुत्सने च सुप्यगोत्रादौ

३६८४ ८,१,०७० गतिर्गतौ

३६८५ ८,१,०७१ तिङि चोदात्तवति

३६८६ ८,१,०७२ आमन्त्रितं पूर्वमविद्यमानवत्

३६८७ ८,१,०७३ नामन्त्रिते समानाधिकरणे सामान्यवचनम्

३६८८ ८,१,०७४ विभाषितं विशेषवचने

३६८९ ८,२,००१ पूर्वत्रासिद्धम्

३६९० ८,२,००२ नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति

३६९१ ८,२,००३ न मु ने

३६९२ ८,२,००४ उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य

३६९३ ८,२,००५ एकादेश उदात्तेनोदात्तः

३६९४ ८,२,००६ स्वरितो वाऽनुदात्ते पदादौ

३६९५ ८,२,००७ नलोपः प्रातिपदिकान्तस्य

३६९६ ८,२,००८ न ङिसंबुद्ध्योः

३६९७ ८,२,००९ मादुपधायाश्च मतोर्वोऽयवादिभ्यः

३६९८ ८,२,०१० झयः

३६९९ ८,२,०११ संज्ञायाम्

३७०० ८,२,०१२ आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती

३७०१ ८,२,०१३ उदन्वानुदधौ च

३७०२ ८,२,०१४ राजन्वान् सौराज्ये

३७०३ ८,२,०१५ छन्दसीरः

३७०४ ८,२,०१६ अनो नुट्

३७०५ ८,२,०१७ नाद्घस्य

३७०६ ८,२,०१८ कृपो रो लः

३७०७ ८,२,०१९ उपसर्गस्यायतौ

३७०८ ८,२,०२० ग्रो यङि

३७०९ ८,२,०२१ अचि विभाषा

३७१० ८,२,०२२ परेश्च घाङ्कयोः

३७११ ८,२,०२३ संयोगान्तस्य लोपः

३७१२ ८,२,०२४ रात्सस्य

३७१३ ८,२,०२५ धि च

३७१४ ८,२,०२६ झलो झलि

३७१५ ८,२,०२७ ह्रस्वादङ्गात्

३७१६ ८,२,०२८ इट ईटि

३७१७ ८,२,०२९ स्कोः संयोगाद्योरन्ते च

३७१८ ८,२,०३० चोः कुः

३७१९ ८,२,०३१ हो ढः

३७२० ८,२,०३२ दादेर्धातोर्घः

३७२१ ८,२,०३३ वा द्रुहमुहष्णुहष्णिहाम्

३७२२ ८,२,०३४ नहो धः

३७२३ ८,२,०३५ आहस्थः

३७२४ ८,२,०३६ व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः

३७२५ ८,२,०३७ एकाचो बशो भष् झषन्तस्य स्ध्वोः

३७२६ ८,२,०३८ दधस्तथोश्च

३७२७ ८,२,०३९ झलां जशोन्ते

३७२८ ८,२,०४० झषस्तथोर्धोऽधः

३७२९ ८,२,०४१ षढोः कः सि

३७३० ८,२,०४२ रदाभ्यां निष्ठातो नः पूर्वस्य च दः

३७३१ ८,२,०४३ संयोगादेरातो धातोर्यण्वतः

३७३२ ८,२,०४४ ल्वादिभ्यः

३७३३ ८,२,०४५ ओदितश्च

३७३४ ८,२,०४६ क्षियो दीर्घात्

३७३५ ८,२,०४७ श्योऽस्पर्शे

३७३६ ८,२,०४८ अञ्चोऽनपादाने

३७३७ ८,२,०४९ दिवोऽविजिगीषायाम्

३७३८ ८,२,०५० निर्वाणोऽवाते

३७३९ ८,२,०५१ शुषः कः

३७४० ८,२,०५२ पचो वः

३७४१ ८,२,०५३ क्षायो मः

३७४२ ८,२,०५४ प्रस्त्योऽन्यतरस्याम्

३७४३ ८,२,०५५ अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः

३७४४ ८,२,०५६ नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्

३७४५ ८,२,०५७ न ध्याख्यापॄमूर्च्छिमदाम्

३७४६ ८,२,०५८ वित्तो भोगप्रत्यययोः

३७४७ ८,२,०५९ भित्तं शकलम्

३७४८ ८,२,०६० ऋणमाधमर्ण्ये

३७४९ ८,२,०६१ नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि

३७५० ८,२,०६२ क्विन्प्रत्ययस्य कुः

३७५१ ८,२,०६३ नशेर्वा

३७५२ ८,२,०६४ मो नो धातोः

३७५३ ८,२,०६५ म्वोश्च

३७५४ ८,२,०६६ ससजुषोरुः

३७५५ ८,२,०६७ अवयाः श्वेतवाः पुरोडाश्च

३७५६ ८,२,०६८ अहन्

३७५७ ८,२,०६९ रोऽसुपि

३७५८ ८,२,०७० अम्नरूधरवरित्युभयथा छन्दसि

३७५९ ८,२,०७१ भुवश्च महाव्याहृतेः

३७६० ८,२,०७२ वसुस्रंसुध्वंस्वनडुहां दः

३७६१ ८,२,०७३ तिप्यनस्तेः

३७६२ ८,२,०७४ सिपि धातो रुर्वा

३७६३ ८,२,०७५ दश्च

३७६४ ८,२,०७६ र्वोरुपधाया दीर्घ इकः

३७६५ ८,२,०७७ हलि च

३७६६ ८,२,०७८ उपधायां च

३७६७ ८,२,०७९ न भकुर्छुराम्

३७६८ ८,२,०८० अदसोऽसेर्दादु दो मः

३७६९ ८,२,०८१ एत ईद्बहुवचने

३७७० ८,२,०८२ वाक्यस्य टेः प्लुत उदात्तः

३७७१ ८,२,०८३ प्रत्यभिवादेऽशूद्रे

३७७२ ८,२,०८४ दूराद्धूते च

३७७३ ८,२,०८५ हैहेप्रयोगे हैहयोः

३७७४ ८,२,०८६ गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्

३७७५ ८,२,०८७ ओमभ्यादाने

३७७६ ८,२,०८८ ये यज्ञकर्मणि

३७७७ ८,२,०८९ प्रणवष्टेः

३७७८ ८,२,०९० याज्यान्तः

३७७९ ८,२,०९१ ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः

३७८० ८,२,०९२ अग्नीत्प्रेषणे परस्य च

३७८१ ८,२,०९३ विभाषा पृष्टप्रतिवचने हेः

३७८२ ८,२,०९४ निगृह्यानुयोगे च

३७८३ ८,२,०९५ आम्रेडितं भर्त्सने

३७८४ ८,२,०९६ अङ्गयुक्तं तिङाकाङ्क्षम्

३७८५ ८,२,०९७ विचार्यमाणानाम्

३७८६ ८,२,०९८ पूर्वं तु भाषायाम्

३७८७ ८,२,०९९ प्रतिश्रवणे च

३७८८ ८,२,१०० अनुदात्तं प्रश्नान्ताभिपूजितयोः

३७८९ ८,२,१०१ चिदिति चोपमार्थे प्रयुज्यमाने

३७९० ८,२,१०२ उपरिस्विदासीदिति च

३७९१ ८,२,१०३ स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु

३७९२ ८,२,१०४ क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्

३७९३ ८,२,१०५ अनन्त्यस्यापि प्रश्नाख्ययोः

३७९४ ८,२,१०६ प्लुतावैच इदुतौ

३७९५ ८,२,१०७ एचोऽप्रगृह्यस्यादूराद्धूतेपूर्वस्यार्धस्यादुत्तरस्येदुतौ

३७९६ ८,२,१०८ तयोर्य्वावचि संहितायाम्

३७९७ ८,३,००१ मतु वसोरु संबुद्धौ छन्दसि

३७९८ ८,३,००२ अत्रानुनासिकः पूर्वस्य तु वा

३७९९ ८,३,००३ आतोऽटि नित्यम्

३८०० ८,३,००४ अनुनासिकात्परोऽनुस्वारः

३८०१ ८,३,००५ समः सुटि

३८०२ ८,३,००६ पुमः खय्यम्परे

३८०३ ८,३,००७ नश्छव्यप्रशान्

३८०४ ८,३,००८ उभयथर्क्षु

३८०५ ८,३,००९ दीर्घादटि समानपादे

३८०६ ८,३,०१० नॄन्पे

३८०७ ८,३,०११ स्वतवान्पायौ

३८०८ ८,३,०१२ कानाम्रेडिते

३८०९ ८,३,०१३ ढो ढे लोपः

३८१० ८,३,०१४ रोरि

३८११ ८,३,०१५ खरवसानयोर्विसर्जनीयः

३८१२ ८,३,०१६ रोः सुपि

३८१३ ८,३,०१७ भोभगोअघोअपूर्वस्य योऽशि

३८१४ ८,३,०१८ व्योर्लघुप्रयत्नतरः शाकटायनस्य

३८१५ ८,३,०१९ लोपः शाकल्यस्य

३८१६ ८,३,०२० ओतो गार्ग्यस्य

३८१७ ८,३,०२१ उञि च पदे

३८१८ ८,३,०२२ हलि सर्वेषाम्

३८१९ ८,३,०२३ मोऽनुस्वारः

३८२० ८,३,०२४ नश्चापदान्तस्य झलि

३८२१ ८,३,०२५ मो राजि समः क्वौ

३८२२ ८,३,०२६ हे मपरे वा

३८२३ ८,३,०२७ नपरे नः

३८२४ ८,३,०२८ ङ्णोः कुक् टुक् शरि

३८२५ ८,३,०२९ डः सि धुट्

३८२६ ८,३,०३० नश्च

३८२७ ८,३,०३१ शि तुक्

३८२८ ८,३,०३२ ङमो ह्रस्वादचि ङमुण्नित्यम्

३८२९ ८,३,०३३ मय उञो वो वा

३८३० ८,३,०३४ विसर्जनीयस्य सः

३८३१ ८,३,०३५ शर्परे विसर्जनीयः

३८३२ ८,३,०३६ वा शरि

३८३३ ८,३,०३७ कुप्वोएकएपौ च

३८३४ ८,३,०३८ सोऽपदादौ

३८३५ ८,३,०३९ इणः षः

३८३६ ८,३,०४० नमस्पुरसोर्गत्योः

३८३७ ८,३,०४१ इदुदुपधस्य चाप्रत्ययस्य

३८३८ ८,३,०४२ तिरसोऽन्यतरस्याम्

३८३९ ८,३,०४३ द्विस्त्रिश्चतुरिति कृत्वोऽर्थे

३८४० ८,३,०४४ इसुसोः सामर्थ्ये

३८४१ ८,३,०४५ नित्यम् समासेऽनुत्तर पदस्थस्य

३८४२ ८,३,०४६ अतएकृककमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य

३८४३ ८,३,०४७ अधःशिरसी पदे

३८४४ ८,३,०४८ कस्कादिषु च

३८४५ ८,३,०४९ छन्दसि वाऽप्राम्रेडितयोः

३८४६ ८,३,०५० कएकरत्करतिकृधिकृतेष्वनदितेः

३८४७ ८,३,०५१ पञ्चम्याए परावध्यर्थे

३८४८ ८,३,०५२ पातौ च बहुलम्

३८४९ ८,३,०५३ षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु

३८५० ८,३,०५४ इडाया वा

३८५१ ८,३,०५५ अपदान्तस्य मूर्धन्यः

३८५२ ८,३,०५६ सहेः साडः सः

३८५३ ८,३,०५७ इण्कोः

३८५४ ८,३,०५८ नुम्विसर्जनीय शर्व्यवायेऽपि

३८५५ ८,३,०५९ आदेश प्रत्यययोः

३८५६ ८,३,०६० शासिवसिघसीनाञ्च

३८५७ ८,३,०६१ स्तौतिण्योरेव षण्यभ्यासात्

३८५८ ८,३,०६२ सः स्विदिस्वदिसहीनाञ्च

३८५९ ८,३,०६३ प्राक्सितादड्व्यवायेऽपि

३८६० ८,३,०६४ स्थादिष्वभ्यासेन चाभ्यासस्य

३८६१ ८,३,०६५ उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्

३८६२ ८,३,०६६ सदिरप्रतेः

३८६३ ८,३,०६७ स्तन्भेः

३८६४ ८,३,०६८ अवाच्चालम्बनाविदूर्ययोः

३८६५ ८,३,०६९ वेश्च स्वनो भोजने

३८६६ ८,३,०७० परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्

३८६७ ८,३,०७१ सिवादीनाम् वाड्व्यवायेऽपि

३८६८ ८,३,०७२ अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु

३८६९ ८,३,०७३ वेः स्कन्देरनिष्ठायाम्

३८७० ८,३,०७४ परेश्च

३८७१ ८,३,०७५ परिस्कन्दः प्राच्यभरतेषु

३८७२ ८,३,०७६ स्फुरतिस्फुलत्योर्निर्निविभ्यः

३८७३ ८,३,०७७ वेः स्कभ्नातेर्नित्यम्

३८७४ ८,३,०७८ इणःषीध्वम्लुङ्लिटाम् धोऽङ्गात्

३८७५ ८,३,०७९ विभाषेटः

३८७६ ८,३,०८० समासेऽङ्गुलेः सङ्गः

३८७७ ८,३,०८१ भीरोः स्थानम्

३८७८ ८,३,०८२ अग्नेः स्तुत्स्तोमसोमाः

३८७९ ८,३,०८३ ज्योतिरायुषः स्तोमः

३८८० ८,३,०८४ मातृपितृभ्याम् स्वसा

३८८१ ८,३,०८५ मातुएपितुर्भ्यामन्यतरस्याम्

३८८२ ८,३,०८६ अभिनिसः स्तनः शब्दसंज्ञायाम्

३८८३ ८,३,०८७ उपसर्गप्रादुर्भ्यामस्तिर्यच्परः

३८८४ ८,३,०८८ सुविनिर्दुर्भ्यः सुपिसूतिसमाः

३८८५ ८,३,०८९ निनदीभ्याम् स्नातेः कौशले

३८८६ ८,३,०९० सूत्रम् प्रतिष्णातम्

३८८७ ८,३,०९१ कपिष्ठलो गोत्रे

३८८८ ८,३,०९२ प्रष्ठोऽग्रगामिनि

३८८९ ८,३,०९३ वृक्षासनयोर्विष्टरः

३८९० ८,३,०९४ छन्दोनाम्नि च

३८९१ ८,३,०९५ गवियुधिभ्याम् स्थिरः

३८९२ ८,३,०९६ विकुशमिपरिभ्यः स्थलम्

३८९३ ८,३,०९७ अम्बाम्बगोभूमिसव्याऽपद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः

३८९४ ८,३,०९८ सुषामादिषु च

३८९५ ८,३,०९९ एति संज्ञायामगात्

३८९६ ८,३,१०० नक्षत्राद्वा

३८९७ ८,३,१०१ ह्रस्वात्तादौ तद्धिते

३८९८ ८,३,१०२ निसस्तपतावनासेवने

३८९९ ८,३,१०३ युष्मत्तत्तक्षुःष्वन्तःपादम्

३९०० ८,३,१०४ यजुष्येकेषाम्

३९०१ ८,३,१०५ स्तुतस्तोमयोश्छन्दसि

३९०२ ८,३,१०६ पूर्वपदात्

३९०३ ८,३,१०७ सुञः

३९०४ ८,३,१०८ सनोतेरनः

३९०५ ८,३,१०९ सहेः पृतनर्ताभ्याम् च

३९०६ ८,३,११० न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्

३९०७ ८,३,१११ सात्पदाद्योः

३९०८ ८,३,११२ सिचो यङि

३९०९ ८,३,११३ सेधतेर्गतौ

३९१० ८,३,११४ प्रतिस्तब्ध निस्तब्धौ च

३९११ ८,३,११५ सोढः

३९१२ ८,३,११६ स्तम्भुसिवुसहाम् चङि

३९१३ ८,३,११७ सुनोतेः स्यसनोः

३९१४ ८,३,११८ सदिस्वञ्जोः परस्य लिटि

३९१५ ८,३,११९ निव्यभिभ्योऽड्व्यवाये वा छन्दसि

३९१६ ८,४,००१ रषाभ्याम् नोणः समानपदे

३९१७ ८,४,००२ अट्कुप्वाङ्नुम्व्यवायेऽपि

३९१८ ८,४,००३ पूर्वपदात् संज्ञायामगः

३९१९ ८,४,००४ वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः

३९२० ८,४,००५ प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि

३९२१ ८,४,००६ विभाषौषधिवनस्पतिभ्यः

३९२२ ८,४,००७ अह्नोऽदन्तात्

३९२३ ८,४,००८ वाहनमाहितात्

३९२४ ८,४,००९ पानम् देशे

३९२५ ८,४,०१० वा भावकरणयोः

३९२६ ८,४,०११ प्रातिपदिकान्त नुम्विभक्तिषु च

३९२७ ८,४,०१२ एकाजुत्तरपदे णः

३९२८ ८,४,०१३ कुमति च

३९२९ ८,४,०१४ उपसर्गादसमासेऽपि णोपदेशस्य

३९३० ८,४,०१५ हिनुमीना

३९३१ ८,४,०१६ आनि लोट्

३९३२ ८,४,०१७ नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च

३९३३ ८,४,०१८ शेषे विभाषाऽकखादावषान्त उपदेशे

३९३४ ८,४,०१९ अनितेः

३९३५ ८,४,०२० अन्तः

३९३६ ८,४,०२१ उभौ साभ्यासस्य

३९३७ ८,४,०२२ हन्तेरत्पूर्वस्य

३९३८ ८,४,०२३ वमोर्वा

३९३९ ८,४,०२४ अन्तरदेशे

३९४० ८,४,०२५ अयनं च

३९४१ ८,४,०२६ छन्दस्यृदवग्रहात्

३९४२ ८,४,०२७ नश्च धातुस्थोरुषुभ्यः

३९४३ ८,४,०२८ उपसर्गाद्बहुलम्

३९४४ ८,४,०२९ कृत्यचः

३९४५ ८,४,०३० णेर्विभाषा

३९४६ ८,४,०३१ हलश्चेजुपधात्

३९४७ ८,४,०३२ इजादेः सनुमः

३९४८ ८,४,०३३ वा निंसनिक्षनिन्दाम्

३९४९ ८,४,०३४ न भाभूपूकमिगमिप्यायीवेपाम्

३९५० ८,४,०३५ षात्पदान्तात्

३९५१ ८,४,०३६ नशेः षान्तस्य

३९५२ ८,४,०३७ पदान्तस्य

३९५३ ८,४,०३८ पदव्यवायेऽपि

३९५४ ८,४,०३९ क्षुभ्नादिषु च

३९५५ ८,४,०४० स्तोः श्चुना श्चुः

३९५६ ८,४,०४१ ष्टुना ष्टुः

३९५७ ८,४,०४२ न पदान्ताट्टोरनाम्

३९५८ ८,४,०४३ तोः षि

३९५९ ८,४,०४४ शात्

३९६० ८,४,०४५ यरोऽनुनासिकेऽनुनासिको वा

३९६१ ८,४,०४६ अचो रहाभ्याम् द्वे

३९६२ ८,४,०४७ अनचि च

३९६३ ८,४,०४८ नादिन्याक्रोशे पुत्रस्य

३९६४ ८,४,०४९ शरोऽचि

३९६५ ८,४,०५० त्रिप्रभृतिषु शाकटायनस्य

३९६६ ८,४,०५१ सर्वत्र शाकल्यस्य

३९६७ ८,४,०५२ दीर्घादाचार्याणाम्

३९६८ ८,४,०५३ झलाम् जश्झशि

३९६९ ८,४,०५४ अभ्यासे चर्च

३९७० ८,४,०५५ खरि च

३९७१ ८,४,०५६ वाऽवसाने

३९७२ ८,४,०५७ अणोऽप्रगृह्यस्यानुनासिकः

३९७३ ८,४,०५८ अनुस्वारस्य ययि परसवर्णः

३९७४ ८,४,०५९ वा पदान्तस्य

३९७५ ८,४,०६० तोर्लि

३९७६ ८,४,०६१ उदः स्थास्तम्भोः पूर्वस्य

३९७७ ८,४,०६२ झयोहोऽन्यतरस्याम्

३९७८ ८,४,०६३ शश्छोऽटि

३९७९ ८,४,०६४ हलो यमाम् यमि लोपः

३९८० ८,४,०६५ झरो झरि सवर्णे

३९८१ ८,४,०६६ उदात्तादनुदात्तस्य स्वरितः

३९८२ ८,४,०६७ नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्

३९८३ ८,४,०६८ अअ

Dhatupatha

० भूवादयः

0A उदात्ताः

0A1 परस्मैभाषः

१ भू सत्तायाम्

0A2 तवर्गीय=अन्ताः अनुदात्त=इतः

२ एध वृद्धौ ३ स्पर्ध संघर्षे ४ गाधृ प्रतिष्ठा लिप्सयोः ग्रन्थे च ५ बाधृ विलोडने

६ नाधृ ७ नाथृ याच्ञा उपताप ऐश्वर्य आशीःषु ८ दध धारणे

९ स्कुदि आप्रवणे १० श्विदि श्वैत्ये ११ वदि अभिवादन स्तुत्योः

१२ भदि कल्याणे सुखे च १३ मदि स्तुति मोद मद स्वप्न कान्ति गतिषु १४ स्पदि किञ्चित्+चलने

१५ क्लिदि परिदेवने १६ मुद हर्षे १७ दद दाने १८ ष्वद १९ स्वर्द आस्वादने

२० उर्द माने क्रीडायाम् च २१ कुर्द २२ खुर्द २३ गुर्द गुद+क्रीडायाम् एव

२४ गुद क्रीडायाम् एव २५ सूद क्षरणे २६ ह्रद अव्यक्ते+शब्दे

२७ ह्लादी सुखे अव्यक्ते+शब्दे २८ स्वाद आस्वादने २९ पर्द कुत्सिते+शब्दे

३० यती प्रयत्ने ३१ युतृ ३२ जुतृ भासने ३३ विथृ ३४ वेथृ याचने ३५ श्रथि शैथिल्ये

३६ ग्रथि कौटिल्ये ३७ कत्थ श्लाघायाम्

0A3 तवर्गीय=अन्ताः उदात्त=इतः

३८ अत सातत्य+गमने ३९ चिती संज्ञाने ४० च्युतिर् आसेचने ४१ श्च्युतिर् क्षरणे

४२ ज्युतिर् भासने ४३ मन्थ विलोडने ४४ कुथि ४५ पुथि ४६ लुथि

४७ मथि हिंसा संक्लेशयोः ४८ षिध गत्याम् ४९ षिधू शास्त्रे माङ्गल्ये च

५० खादृ भक्षणे ५१ खद स्थैर्ये हिंसायाम् ५२ बद स्थैर्ये ५३ गद व्यक्तायाम्+वाचि

५४ रद विलेखने ५५ णद अव्यक्ते+शब्दे ५६ अर्द गतौ याचने च ५७ नर्द

५८ गर्द शब्दे ५९ तर्द हिंसायाम् ६० कर्द कुत्सिते+शब्दे ६१ खर्द दन्दशूके

६२ अति ६३ अदि बन्धने ६४ इदि परम+ऐश्वर्ये ६५ बिदि अवयवे ६६ गडि वदन+एकदेशे

६७ णिदि कुत्सायाम् ६८ (टु)नदि समृद्धौ ६९ चदि आह्लादे दीप्तौ च

७० त्रदि चेष्टायाम् ७१ कदि ७२ क्रदि ७३ क्लदि आह्वाने रोदने च ७४ क्लिदि परिदेवने

७५ शुन्ध शुद्धौ

0A4 कवर्गीय=अन्ताः अनुदात्त=इतः

७६ शीकृ सेचने ७७ लोकृ दर्शने ७८ श्लोकृ संघाते ७९ द्रेकृ ८० ध्रेकृ शब्द उत्साहयोः

८१ रेकृ शङ्कायाम् ८२ सेकृ ८३ स्रेकृ ८४ स्रकि ८५ श्रकि

८६ श्लकि गत्यर्थाः ८७ शकि शङ्कायाम् ८८ अकि लक्षणे ८९ वकि कौटिल्ये

९० मकि मण्डने ९१ कक लौल्ये ९२ कुक ९३ वृक आदाने ९४ चक तृप्तौ प्रतिघाते च

९५ ककि ९६ वकि ९७ श्वकि ९८ त्रकि ९९ ढौकृ १०० त्रौकृ १०१ ष्वष्क

१०२ वस्क १०३ मस्क १०४ टिकृ १०५ टीकृ १०६ तिकृ १०७ तीकृ १०८ रघि

१०९ लघि गत्यर्थाः १०९ लघि भोजन+निवृत्तौ अपि ११० अघि १११ वघि

११२ मघि गति+आक्षेपे ११२ मघि कैतवे ११३ राघृ ११४ लाघृ ११५ द्राघृ

११६ ध्राघृ सामर्थ्ये ११५ द्राघृ ११६ ध्राघृ आयामे ११७ श्लाघृ कत्थने

0A5 कवर्गीय=अन्ताः उदात्त=इतः

११८ फक्क नीचैः+गतौ ११९ तक हसने १२० तकि कृच्छ्र+जीवने १२१ बुक्क भषणे

१२२ शुक गतौ १२३ कख हसने १२४ ओखृ १२५ राखृ १२६ लाखृ १२७ द्राखृ

१२८ ध्राखृ शोषण अलमर्थयोः १२९ शाखृ १३० श्लाखृ व्याप्तौ १३१ उख १३२ उखि

१३३ वख १३४ वखि १३५ मख १३६ मखि १३७ णख १३८ णखि १३९ रख गत्यर्थाः

१४० रखि १४१ लख १४२ लखि १४३ इख १४४ इखि १४५ ईख १४६ मुखि/थकि

१४७ त्रख गत्यर्थाः १४८ त्रखि १४९ शिखि १५० रिख १५१ वल्ग १५२ रगि १५३ लगि

१५४ अगि १५५ वगि १५६ मगि गत्यर्थाः १५७ तगि १५८ त्वगि/त्रगि १६० श्रगि

१६१ स्वगि १६२ श्लगि १६३ इगि १६४ रिगि १६५ लिगि गत्यर्थाः १५८ त्वगि कम्पने

१६६ युगि १६७ जुगि १६८ वुगि वर्जने १६९ घघ हसने १७० दघि पालने (त्यागे/वर्जने)

१७१ लघि शोषणे १७२ मघि मण्डने १७३ शिघि आघ्राणे

0A6 चवर्गीय=अन्ताः अनुदात्त=इतः

१७४ वर्च दीप्तौ १७५ षच सेचने/सेवने १७६ लोचृ दर्शने १७७ शच व्यक्तायाम्+वाचि

१७८ श्वच १७९ श्वचि गतौ १८० कच बन्धने १८१ कचि १८२ काचि दीप्ति बन्धनयोः

१८३ मच १८४ मुचि कल्कने १८५ मचि धारण उच्छ्राय पूजनेषु १८६ पचि व्यक्तीकरणे

१८७ ष्टुच प्रसादे १८८ ऋज गति स्थान अर्जन उपार्जनेषु १८९ ऋजि

१९० भृजी भर्जने १९१ एजृ १९२ भ्रेजृ १९३ भ्राजृ १९४ रेजृ दीप्तौ

१९५ ईज गति कुत्सनयोः १९६ वीज गतौ

0A7 चवर्गीय=अन्ताः उदात्त=इतः

१९७ शुच शोके १९८ कुच शब्दे+तारे १९९ कुञ्च २०० क्रुञ्च कौटिल्य अल्पीभावयोः

२०१ लुञ्च अपनयने २०२ अञ्चु गति पूजनयोः २०३ वञ्चु २०४ चञ्चु २०५ तञ्चु

२०६ त्वञ्चु २०७ म्रुञ्चु २०८ म्लुञ्चु २०९ म्रुचु २१० म्लुचु गत्यर्थाः

२११ ग्रुचु २१२ ग्लुचु २१३ कुजु २१४ खुजु स्तेय करणे २१५ ग्लुञ्च

२१६ षस्ज गतौ २१७ गुजि अव्यक्ते+शब्दे २१८ अर्च पूजायाम्

२१९ म्लेछ अव्यक्ते+शब्दे २२० लछ २२१ लाछि लक्षणे २२२ वाछि इच्छायाम्

२२३ आछि आयामे २२४ ह्रीछ लज्जायाम् २२५ हुर्छा कौटिल्ये

२२६ मुर्छा मोह समुच्छ्राययोः २२७ स्फुर्छा विस्तृतौ २२८ युछ प्रमादे २२९ उछि उञ्छे

२३० उछी विवासे २३१ ध्रज २३२ ध्रजि २३३ व्रज २३४ व्रजि २३५ धृज २३६ धृजि

२३७ ध्वज २३८ ध्वजि गतौ २३९ कूज २४० कुजि अव्यक्ते+शब्दे २४१ अर्ज

२४२ षर्ज अर्जने २४३ गर्ज शब्दे २४४ तर्ज भर्त्सने २४५ कर्ज व्यथने

२४६ खर्ज व्यथने पूजने च २४७ अज गति क्षेपणयोः २४८ तेज पालने २४९ खज मन्थे

२५० कज मदे २५१ खजि गति+वैकल्ये २५२ एजृ कम्पने २५३ (टुओ)स्फूर्जा वज्र निर्घोषे

२६४ गज २६५ गजि २६६ गृज २६७ गृजि २६८ मुज २६९ मुजि शब्द+अर्थः

२५४ क्षि क्षये २५५ क्षीज अव्यक्ते+शब्दे २५६ लज २५७ लजि भर्जने २५८ लाज

२५९ लाजि भर्जने भर्त्सने च २६० जज २६१ जजि युद्धे २६२ तुज हिंसायाम्

२६३ तुजि पालने २६४ गज मदने २६४ गज २६५ गजि २६६ गृज २६७ गृजि

२६८ मुज २६९ मुजि शब्द+अर्थः २७० वज २७१ व्रज गतौ

0A8 टवर्गीय=अन्ताः अनुदात्त=इतः

२७२ अट्ट अतिक्रम हिंसयोः २७४ वेष्ट वेष्टने २७४ चेष्ट चेष्टायाम्

२७५ गोष्ट २७६ लोष्ट सङ्घाते २७७ घट्ट चलने २७८ स्फुट विकसने

२७९ अठि गतौ २८० वठि एकचर्यायाम् २८१ मठि २८२ कठि शोके २८३ मुठि पालने

२८४ हेठ २८५ एठ विबाधायाम् २८६ हिडि गति अनादरयोः २८७ हुडि सङ्घाते

२८८ कुडि दाहे २८९ वडि २९० मडि विभाजने २९१ भडि परिभाषणे २९२ पिडि संघाते

२९३ मुडि मार्जने २९४ तुडि तोडने २९५ हुडि वारने २९६ स्फुडि विकसने

२९७ चडि कोपे २९८ शडि रुजायाम् संघाते च २९९ तडि ताडने ३०० पडि गतौ

३०१ कडि मदे ३०२ खडि मन्थे ३०३ हेडृ ३०४ होडृ अनादरे ३०५ बाडृ आप्लाव्ये

३०६ द्राडृ ३०७ ध्राडृ विशरणे ३०८ शाडृ श्लाघायाम्

0A9 टवर्गीय=अन्ताः उदात्त=इतः

३०९ शौटृ गर्वे ३१० यौटृ बन्धे ३११ म्लेटृ ३१२ म्रेडृ ३१३ मेटृ उन्मादे

३१४ चटे ३१५ कटे वर्ष आवरणयोः ३१६ अट गतौ ३१७ पट गतौ ३१८ रट परिभाषणे

३१९ लट बाल्ये ३२० शट रुजा विशरण गति अवसादनेषु ३२१ वट वेष्टने ३२२ किट

३२३ खिट त्रासे ३२४ शिट ३२५ षिट अनादरे ३२६ जट ३२७ झट संघाते

३२८ भट भृतौ ३२९ तट उच्छ्राये ३३० खट कांक्षायाम् ३३१ नट नृतौ

३३२ पिट शब्द संघातयोः ३३३ हट दीप्तौ ३३४ षट अवयवे ३३५ लुट विलोडने

३३६ चिट पर प्रैष्ये ३३७ विट शब्दे ३३८ बिट आक्रोशे ३३९ इट ३४० किट

३४१ कटी गतौ ३४२ हेठ विबाधायाम् ३४३ मडि भूषायाम् ३४४ कुडि वैकल्ये

३४५ मुट प्रमर्दने ३४६ चुडि अल्पीभावे ३४७ मुडि खण्डने ३४८ रुटि ३४९ लुटि स्तेये

३५० वटि विभाजने ३५१ स्फुटिर् विशरणे ३५२ पठ व्यक्तायाम्+वाचि ३५३ वठ स्थौल्ये

३५४ मठ मद निवासयोः ३५५ कठ कृच्छ्र+जीवने ३५६ रठ परिभाषणे

३५७ हठ प्लुति शठत्वयोः ३५८ रुठ ३५९ लुठ ३६० उठ उपघाते

३६१ पिठ हिंसा संक्लेशनयोः ३६२ शठ हिंसा संक्लेशनयोः कैतवे च ३६३ शुठ

३६४ कुठि गति+प्रतिघाते ३६५ लुठि आलस्ये प्रतिघाते च

३६६ शुठि शोषणे ३६७ रुठि ३६८ लुठि गतौ ३६९ चुड्ड भाव+करणे ३७० अड्ड अभियोगे

३७१ कड्ड कार्कश्ये ३७२ क्रीडृ विहारे ३७३ तुडृ तोडने ३७४ हुडृ/हूडृ

३७५ होडृ गतौ ३७६ रौडृ अनादरे ३७७ रोडृ ३७८ लोडृ उन्मादे ३७९ अड उद्यमे

३८० लड विलासे ३८१ लल ईप्सायाम् ३८२ कड मदे ३८३ गडि वदन+एकदेशे

0A10 पवर्गीय=अन्ताः अनुदात्त=इतः

३८४ तिपृ ३८५ तेपृ ३८६ ष्टिपृ ३८७ ष्टेपृ क्षरण+अर्थाः ३८५ तेपृ कम्पने

३८८ ग्लेपृ दैन्ये ३८९ (टु)वेपृ ३९० केपृ ३९१ गेपृ ३९२ ग्लेपृ कम्पने

३९३ मेपृ ३९४ रेपृ ३९५ लेपृ ३९६ धेपृ गतौ ३९७ त्रपूष् लज्जायाम्

३९८ कपि चलने ३९९ रबि ४०० लबि ४०१ अबि शब्दे ४०२ लबि अवस्रंसने च

४०३ कबृ वर्णे ४०४ क्लीबृ अधाष्ट्र्ये ४०५ क्षीबृ मदे ४०६ शीभृ ४०७ चीभृ कत्थने

४०८ रेभृ ४०९ अभि ४१० रभि शब्दे ४११ ष्टभि ४१२ स्कभि प्रतिबन्धे

४१३ जभि ४१४ जृभि गात्र+विनामे ४१५ शल्भ कत्थने ४१६ वल्भ भोजने

४१७ गल्भ धाष्टर्ये ४१८ श्रम्भु प्रमादे ४१९ ष्टुभु स्तम्भे

0A11 पवर्गीय=अन्ताः उदात्त=इतः

४२० गुपू रक्षणे ४२१ धूप सन्तापे ४२२ जप व्यक्तायाम्+वाचि मानसे च

४२३ जल्प व्यक्तायाम्+वाचि ४२४ चप सान्त्वने ४२५ षप समवाये ४२६ रप

४२७ लप व्यक्तायाम्+वाचि ४२८ चुप मन्दायाम्+गतौ ४२९ तुप

४३० तुम्प ४३१ त्रुप ४३२ त्रुम्प ४३३ तुफ ४३४ तुम्फ ४३५ त्रुफ

४३६ त्रुम्फ हिंसा+अर्थाः ४३७ पर्प ४३८ रफ ४३९ रफि ४४० अर्ब ४४१ पर्ब

४४२ लर्ब ४४३ बर्ब ४४४ मर्ब आच्छादने ४४५ कर्ब ४४६ खर्ब ४४७ गर्ब ४४८ शर्ब

४४९ षर्ब ४५० चर्ब गतौ ४५१ कुबि आच्छादने ४५२ लुबि ४५३ तुबि अर्दने

४५४ चुबि वक्त्र+संयोगे ४५५ षृभु ४५६ षृम्भु हिंसा+अर्थौ ४५७ शुभ ४५८ शुम्भ भासने

0A12 अनुनासिक=अन्ताः अनुदात्त=इतः

४५९ घिणि ४६० घुणि ४६१ घृणि ग्रहणे ४६२ घुण ४६३ घूर्ण भ्रमणे

४६४ पण व्यवहारे स्तुतौ च ४६५ पन स्तुतौ ४६६ भाम क्रोधे ४६७ क्षमूष् सहने

४६८ कमु कान्तौ

0A13 अनुनासिक=अन्ताः उदात्त=इतः

४६९ अण ४७० रण ४७१ वण ४७२ भण ४७३ मण ४७४ कण ४७५ क्वण ४७६ व्रण

४७७ भ्रण ४७८ ध्वण ४७९ धण शब्द+अर्थः ४८० ओणृ अपनयने ४८१ शोणृ वर्ण गत्योः

४८२ श्रोणृ ४८३ श्लोणृ संघाते ४८४ पैणृ गति प्रेरण श्लेषणेषु ४८५ ध्रण शब्दे

४८६ कनी दीप्ति कान्ति गतिषु ४८७ ष्टन ४८८ वन शब्दे ४८९ वन ४९० षण संभक्तौ

४९१ अम गतौ शब्दे संभक्तौ ४९२ द्रम ४९३ हम्म ४९४ मीमृ गतौ ४९५ चमु

४९६ छमु ४९७ जमु ४९८ जिमु ४९९ झमु अदने ५०० क्रमु पाद विक्षेपे

0A14 यरलव=अन्ताः अनुदात्त=इतः

५०१ अय ५०२ वय ५०३ पय ५०४ मय ५०५ चय ५०६ तय ५०७ णय गतौ

५०८ दय दान गति रक्षण हिंस आदानेषु ५०९ रय गतौ ५१० ऊयी तन्तु+सन्ताने

५११ पूयी विशरणे दुर्गन्धे च ५१२ क्नूयी शब्दे उन्दे च ५१३ क्ष्मायी विधूनने ५१४ स्फायी

५१५ (ओ)प्यायी वृद्धौ ५१६ तायृ सन्तान पालनयोः ५१७ शल चलन संवरणयोः

५१८ वल ५१९ वल्ल संवरणे संचरणे च ५२० मल ५२१ मल्ल धारणे ५२२ भल

५२३ भल्ल परिभाषण हिंस आदानेषु ५२४ कल शब्द संख्यानयोः ५२५ कल्ल अव्यक्ते शब्दे

५२६ तेवृ ५२७ देवृ देवने ५२८ षेवृ ५२९ गेवृ ५३० ग्लेवृ ५३१ पेवृ ५३२ मेवृ सेवने

५३३ म्लेवृ ५३४ शेवृ ५३५ खेवृ ५३६ प्लेवृ ५३७ केवृ सेवने ५३८ रेवृ प्लव गतौ

0A15 यरलव=अन्ताः उदात्त=इतः

५३९ मव्य बन्धने ५४० सूर्क्ष्य ५४१ ईर्क्ष्य ५४२ ईर्ष्य ईर्ष्या+अर्थाः

५४३ हय गतौ ५४४ शुच्य अभिषवे ५४५ हर्य गति कान्त्योः

५४६ अल भूषण पर्याप्ति वारणेषु ५४७ (ञि)फला विशरणे ५४८ मील ५४९ श्मील

५५० स्मील ५५१ क्ष्मील निमेषणे ५५२ पील प्रतिष्टम्भे ५५३ नील वर्णे ५५४ शील समाधौ

५५५ कील बन्धने ५५६ कूल आवरणे ५५७ शूल रुजायाम् संघाते च ५५८ तूल निष्कर्षे

५५९ पूल संघाते ५६० मूल प्रतिष्ठायाम् ५६१ फल निष्पत्तौ ५६२ चुल्ल भाव+करणे

५६३ फुल्ल विकसने ५६४ चिल्ल शैथिल्ये भाव+करणे च ५६५ तिल गतौ ५६६ वेलृ

५६७ चेलृ ५६८ केलृ ५६९ खेलृ ५७० क्ष्वेलृ ५७१ वेल्ल चलने ५७२ पेलृ ५७३ फेलृ

५७४ शेलृ गतौ ५७५ स्खल संचलने ५७६ खल संचये ५७८ गल अदने ५७९ षल गतौ

५८० दल विशरणे ५८१ श्वल ५८२ श्वल्ल आशु+गमने ५८३ खोलृ/खोरृ गति+प्रतिघाते

५८४ धोरृ गति+चातुर्ये ५८५ त्सर छद्म+गतौ ५८६ क्मर हूर्छने ५८७ अभ्र

५८८ वभ्र ५८९ मभ्र ५९० चर गत्यर्थाः ५९१ भक्षणे ५९२ ष्ठिवु निरसने

५९३ जि जये ५९४ जीव प्राण+धारणे ५९५ पीव ५९६ मीव ५९७ तीव ५९८ णीव स्थौल्ये

५९९ उर्वी ६०० तुर्वी ६०१ थुर्वी ६०२ दुर्वी ६०३ धुर्वी हिंसा+अर्थः

६०४ गुर्वी उद्यमने ६०५ मुर्वी बन्धने ६०६ पुर्व ६०७ पर्व ६०८ मर्व पूरणे

६०९ चर्व अदने ६१० भर्व हिंसायाम् ६११ कर्व ६१२ खर्व ६१३ गर्व दर्पे

६१४ अर्व ६१५ शर्व ६१६ षर्व हिंसायाम् ६१७ इवि व्याप्तौ ६१८ पिवि ६१९ मिवि

६२० णिवि सेचने ६२१ हिवि ६२२ दिवि ६२३ धिवि ६२४ जिवि प्रीणन+अर्थः

६२५ रिवि ६२६ रवि ६२७ धवि गत्यर्थः ६२८ कृवि हिंसा करणयोः च ६२९ मव बन्धने

६३० अव रक्षण गति कान्ति प्रीति तृप्ति अवगम प्रवेश श्रवण स्वाम्यर्थ _

६३० याचन क्रिया इच्छा दीप्ति अवाप्ति आलिङ्गन हिंसा दान भाग वृद्धिषु

६३१ धावु गति शुद्ध्योः

0A16 ऊष्म=अन्ताः अनुदात्त=इतः

६३२ धुक्ष ६३३ धिक्ष संदीपन क्लेशन जीवनेषु ६३४ वृक्ष वरणे ६३५ शिक्ष विद्योपादाने

६३६ भिक्ष भिक्षायाम् अलाभे लाभे च ६३७ क्लेश अव्यक्तायाम्+वाचि

६३८ दक्ष वृद्धौ शीघ्र+अर्थे च ६३९ दीक्ष मौण्ड इज्या उपनयन नियम व्रत आदेशेषु

६४० ईक्ष दर्शने ६४१ ईष गति हिंसा दर्शनेषु ६४२ भाष व्यक्तायाम्+वाचि

६४३ वर्ष स्नेहने ६४४ गेषृ अन्विच्छायाम् ६४५ येषृ प्रयत्ने ६४६ जेषृ

६४७ णेषृ ६४८ एषृ ६४९ प्रेषृ गतौ ६५० रेषृ ६५१ हेषृ ६५२ ह्रेषृ अव्यक्ते शब्दे

६५३ कासृ शब्द+कुत्सायाम् ६५४ भासृ दीप्तौ ६५५ णासृ ६५६ रासृ शब्दे

६५७ णस कौटिल्ये ६५८ भ्यस भये ६५९ (आङः)शसि इच्छायाम् ६६० ग्रसु

६६१ ग्लसु अदने ६६२ ईह चेष्टायाम् ६६३ बहि ६६४ महि वृद्धौ ६६५ अहि गतौ

६६६ गर्ह ६६७ गल्ह कुत्सायाम् ६६८ बर्ह ६६९ बल्ह प्राधान्ये

६७० वर्ह ६७१ वल्ह परिभाषण हिंसा आच्छादनेषु ६७२ प्लिह गतौ ६७३ वेह्न

६७४ जेह्व ६७५ बाह्व प्रयत्ने ६७६ द्राह्व निद्राक्षये ६७७ काशृ दीप्तौ ६७८ ऊह वितर्के

६७९ गाहू विलोडने ६८० गृहू ग्रहणे ६८१ घुषि कान्ति+करणे

0A17 ऊष्म=अन्ताः उदात्त=इतः

६८२ घुषिर् अविशब्दने ६८३ अक्षू व्याप्तौ ६८४ तक्षू ६८५ त्वक्षू तनू+करणे

६८६ उक्ष सेचने ६८७ रक्ष पालने ६८८ णिक्ष चुम्बने ६८९ तृक्ष ६९० स्तृक्ष

६९१ णक्ष गतौ ६९२ वक्ष रोषे ६९३ मृक्ष संघाते ६९४ तक्ष त्वचने

६९५ प्लक्ष परिग्रहे ६९६ सूर्क्ष आदरे ६९७ काक्षि ६९८ वाक्षि ६९९ माक्षि काङ्क्षायाम्

७०० द्राक्षि ७०१ ध्राक्षि ७०२ ध्वाक्षि काङ्क्षायाम् घोरवासिते च

७०३ चूष पाने ७०४ तूष तुष्टौ ७०५ पूष वृद्धौ ७०६ मूष स्तेये ७०७ लूष

७०८ रूष भूषायाम् ७०९ सूष प्रसवे ७१० यूष हिंसायाम् ७१२ भूष ७१३ तसि अलंकारे

७१४ उष रुजायाम् ७१५ ईष उञ्छे ७१६ कष ७१७ खष ७१८ शिष ७१९ जष ७२० झष

७२१ शष ७२२ वष ७२३ मष ७२४ रुष ७२५ रिष हिंसा+अर्थाः ७२६ भष भर्त्सने

७२७ उष दाहे ७२८ जिषु ७२९ विषु ७३० मिषु ७३१ णिषु सेचने ७३२ पुष पुष्टौ

७३३ श्रिषु ७३४ श्लिषु ७३५ प्रुषु ७३६ प्लुषु दाहे ७३७ पृषु

७३८ वृषु सेचने हिंसा संक्लेशनयोश्च ७३९ मृषु सेचने सहने च ७४० घृषु संघर्षे

७४१ हृषु अलीके ७४२ तुस ७४३ ह्रस ७४४ ह्लस ७४५ रस शब्दे

७४६ लस श्लेषण क्रीडनयोः ७४७ घसि अदने ७४८ जर्ज ७४९ चर्च

७५० झर्झ परिभाषण हिंसा तर्जनेषु ७५१ पिसृ ७५२ पेसृ ७५३ विस ७५४ वेस ७५५ विस

७५६ बेस गतौ ७५७ हसे हसने ७५८ णिश समाधौ ७५९ मिश ७६० मश शब्दे

७६१ शव गतौ ७६२ शश प्लुत+गतौ ७६३ शसु हिंसायाम् ७६४ शंसु स्तुतौ

७६५ चह परिकल्कने ७६६ मह पूजायाम् ७६७ रह त्यागे ७६८ रहि गतौ ७६९ दृह

७७० दृहि ७७१ बृह ७७२ बृहि वृद्धौ ७७२ बृहि शब्दे ७७३ तुहिर् अर्दने ७७४ दुहिर् अर्दने

७७५ उहिर् अर्दने ७७६ अर्ह पूजायाम्

0A18 द्युत=आदयः(१.३.९१; ३.१.५५) अनुदात्त=इतः

७७७ द्युत दीप्तौ ७७८ श्विता वर्णे ७७९ (ञि)मिदा स्नेहने ७८० (ञि)ष्विदा गात्रप्रस्रवणे

७८१ रुच दीप्तौ अभिप्रीतौ च ७८२ घुट परिवर्तने ७८३ रुट

७८४ लुट ७८५ लुठ प्रतिघाते ७८६ शुभ दीप्तौ ७८७ क्षुभ संचलने ७८८ णभ

७८९ तुभ हिंसायाम् ७९० स्रंसु ७९१ ध्वंसु ७९२ भ्रंसु अवस्रंसने ७९१ ध्वंसु गतौ च

७९३ स्रंभु विश्वासे ७९४ वृतु वर्तने ७९५ वृधु वृद्धौ ७९६ शृधु शब्द+कुत्सायाम्

७९७ स्यन्दू प्रस्रवणे ७९८ कृपू सामर्थ्ये

0A19 घट=आदयः म्=इतः(६.४.९२)

0A19a अनुदात्त=इतः

७९९ घट चेष्टायाम् ८०० व्यथ भय संचलनयोः ८०१ प्रथ प्रख्याने ८०२ प्रस विस्तारे

८०३ म्रद मर्दने ८०४ स्खद स्खदने ८०५ क्षजि गति दानयोः ८०६ दक्ष गति शासनयोः

८०७ क्रप कृपायाम्+गतौ ८०८ कदि ८०९ क्रदि ८१० क्लदि वैक्लव्ये

८११ (ञि)त्वरा संभ्रमे {घटादयः षितः}

0A19b उदात्त=इतः

८१२ ज्वर रोगे ८१३ गड सेचने ८१४ हेड वेष्टने ८१५ वट ८१६ भट परिभाषणे

८१७ नट नृत्तौ ८१८ ष्टक प्रतिघाते ८१९ चक तृप्तौ ८२० कखे हसने

८२१ रगे शंकायाम् ८२२ लगे सङ्गे ८२३ ह्रगे ८२४ ह्लगे ८२५ षगे ८२६ ष्ठगे संवरणे

८२७ कगे नोच्यते ८२८ अक ८२९ अग कुटिलायाम्+गतौ ८३० कण ८३१ रण गतौ

८३२ चण ८३३ शण ८३४ श्रण गतौ दाने च ८३५ श्रथ ८३६ क्नथ ८३७ क्रथ ८३८ क्लथ

८३९ चन हिंसा+अर्थाः ८४० वनु नोपलभ्यते ८४१ ज्वल दीप्तौ ८४२ ह्वल

८४३ ह्मल चलने ८४४ स्मृ आध्याने ८४५ दॄ भये ८४६ नॄ नये ८४७ श्रा पाके

८४८ ज्ञा मारण तोषण निशामनेषु ८४९ चलिः कम्पने ८५० छदिः ऊर्जने

८५१ लडिः जिह्वा+उन्मथने ८५२ मदी हर्ष ग्लेपनयोः ८५३ ध्वन शब्दे {घटादयः मितः}

८५४ रण ८५५ दलिः ८५६ वलिः ८५७ स्खलिः ८५८ त्रपिः ८५९ क्षपिः शब्दे

८६० स्वन अवतंसने

{जनी-जृष्-क्नसु-रञ्जः अम्=अन्ताश्च;ज्वल-ह्वल-ह्मल-नमाम् अनुपसर्गात् वा}

{ग्ला-स्ना-वनु-वमां च; न कमि=अमि-चमाम्; शमः दर्शने; यमः अपरिवेषणे;}

{स्खदिः अव-परिभ्यां च; फण गतौ; वृत्}

0A20 फण=आदयः(६.४.१२५)

0A20a उदात्तः उदात्त=इत्

८५५ फण गतौ

0A20c उदात्तः स्वरित=इत्

८५६ राजृ दीप्तौ

0A20d उदात्ताः अनुदात्त=इतः

८५७ (टु)भ्राजृ ८५८ (टु)भ्राशृ ८५९ (टु)भ्लाशृ दीप्तौ

0A20e उदात्ताः उदात्त=इतः

८६० स्यमु ८६१ स्वन ८६२ ष्टन ८६३ ध्वन शब्दे ८६४ षम ८६५ ष्टम वैकल्ये

0A21 ज्वल=आदयः(३.१.१४०)

0A21a उदात्ताः उदात्त=इतः

८६६ ज्वल दीप्तौ ८६७ चल कम्पने ८६८ जल घातने ८६९ टल ८७० ट्वल वैक्लव्ये

८७१ ष्ठल स्थाने ८७२ हल विलेखने ८७३ णल गन्धे ८७४ पल गतौ

८७५ बल प्राणने धान्य+अवरोधने च ८७६ पुल महत्त्वे ८७९ कुल संस्त्याने ८८० शल

८८१ पति ८८२ हुल गतौ ८८२ हुल हिंसा संवरणयोः च ८८३ क्वथे निष्पाके

८८४ पथे गतौ ८८५ मथे विलोडने ८८६ (टु)वम उद्गिरणे ८८७ भ्रमु चलने

८८८ क्षर सञ्चलने

0A21b उदात्तः अनुदात्त=इत्

८८९ षह मर्षणे

0A21c अनुदात्तः अनुदात्त=इत्

८९० रम क्रीडायाम्

0A21d अनुदात्ताः उदात्त=इतः

८९१ षदि विशरण गति अवसादनेषु ८९२ शदि शातने ८९३ क्रुश आह्वाने रोदने च

0A21e उदात्तौ उदात्त=इतौ

८९४ कुच संपर्चन कौटिल्य प्रतिष्टंभ विलेखनेषु ८९५ बुध अवगमने

0A21f अनुदात्तः उदात्त=इत्

८९६ रुह बीज+जन्मनि प्रादुर्भावे च

0A21g उदात्तः उदात्त=इत्

८९७ कस गतौ {वृत्}

0A22 स्वरित=इतः

८९८ हिक्क अव्यक्ते शब्दे ८९९ अञ्चु गतौ याचने च ९०० (टु)याचृ याच्ञायाम्

९०१ रेटृ परिभाषणे ९०२ चते/चदे याचने ९०३ प्रोथृ पर्याप्तौ ९०४ मिदृ/मेदृ मेधा हिंसनयोः

९०५ णिदृ/णेदृ कुत्सा संनिकर्ष्योः ९०६ शृधु ९०७ मृधु उन्दने ९०८ बुधिर् बोधने

९०६ (उ)बुन्दिर् निशामने ९१० वेणृ गति ज्ञान चिन्ता निशामन वादित्र ग्रहणेषु

९११ खनु अवदारणे ९१२ चीवृ आदान संवरणयोः ९१३ चायृ पूजा निशामनयोः

९१४ व्यय गतौ ९१५ दाशृ दाने ९१६ भेषृ भये ९१७ भ्रेषृ/भ्लेषृ गतौ

९१८ अस गति दीप्ति आदानेषु ९१९ अय गतौ ९२० स्पश बाधन स्पर्शनयोः

९२१ लष कान्तौ ९२२ चष भक्षणे ९२३ छष हिंसायाम् ९२४ झष आदान संवरणयोः

९२५ भक्ष अदने ९२६ दासृ दाने ९२७ माहृ माने ९२८ गुहू संवरणे

९२९ श्रिञ् सेवायाम्

0B अनुदात्त=इताः

0B1 अच्=अन्ताः

0B1a स्वरित=इतः

९३० भृञ् भरणे ९३१ हृञ् हरणे ९३२ धृञ् धारणे ९३३ कृञ् करणे ९३४ णीञ् प्रापणे

0B1b परस्मैपदिनः

९३५ धेट् पाने ९३६ ग्लै ९३७ म्लै हर्ष+क्षये ९३८ द्यै न्यक्करणे

९३९ द्रै स्वप्ने ९४० ध्रै तृप्तौ ९४१ ध्यै चिन्तायाम् ९४२ रै शब्दे ९४३ स्त्यै शब्द संघातयोः

९४४ खै खदने ९४५ क्षै ९४६ जै ९४७ षै क्षये ९४८ कै ९४९ गै शब्दे ९५० शै पाके

९५१ शै ९५२ श्रै पाके ९५३ पै ९५४ (ओ)वै शोषणे ९५५ ष्टै वेष्टने ९५६ दैप् शोधने

९५७ पा पाने ९५८ घ्रा घ्राने ९५९ ध्मा शब्दाग्नि संयोगयोः ९६० ष्ठा गति+निवृत्तौ

९६१ म्ना अभ्यासे ९६२ दाण् दाने ९६३ ह्वृ कौटिल्ये ९६४ स्वृ शब्द उपतापयोः

९६५ स्मृ चिन्तायाम् ९६६ द्वृ वरणे ९६७ सृ गतौ ९६८ ॠ गति प्रापणयोः ९६९ गृ

९७० घृ सेचने ९७१ ध्वृ हूर्छने ९७२ स्रु गतौ ९७३ षु प्रसव ऐश्वर्ययोः ९७४ श्रु श्रवणे

९७५ ध्रु स्थैर्ये ९७६ दु ९७७ द्रु गतौ ९७८ जि ९७९ ज्रि अभिभवे ९८० जु गतौ

0B1c आत्मनेपदिनः

९८१ ष्मिङ् ईषद्धसने ९८२ गुङ् अव्यक्ते+शब्दे ९८३ गाङ् गतौ ९८४ कुङ्

९८५ घुङ् ९८६ उङ् ९८७ ङुङ् ९८८ खुङ् शब्दे ९८९ च्युङ् ९९० ज्युङ्

९९१ प्रुङ् ९९२ प्लुङ् गतौ ९९३ रुङ् गति रोषणयोः ९९४ धृङ् अवध्वंसने

९९५ मेङ् प्रणिदाने ९९६ देङ् रक्षणे ९९७ श्यैङ् गतौ ९९८ प्यैङ् वृद्धौ

९९९ त्रैङ् पालने

0B1d उदात्त आत्मनेपदिनः

१००० पूङ् पवने १००१ मूङ् बन्धने १००२ डीङ् विहायसा+गतौ

0B1e उदात्त परस्मैपदी

१००३ तॄ प्लवन तरणयोः

0B2 हल्=अन्ताः

0B2a अनुदात्त=इतः

१००४ गुप गोपने १००५ तिज निशाने १००६ मान पूजायाम् १००७ बध बन्धने

१००८ रभ राभस्ये १००९ (डु)लभष् प्राप्तौ १०१० ष्वञ्ज परिष्वङ्गे

१०११ हद पुरीष+उत्सर्गे

0B2b उदात्त=इतः

१०११ हद पुरीष+उत्सर्गे १०१२ (ञि)क्ष्विदा अव्यक्ते+शब्दे १०१३ स्कन्दिर् गति शोषणयोः

१०१४ यभ विपरीतमैथुने १०१५ णम प्रह्वत्वे शब्दे च १०१६ गमि

१०१७ सृपि गतौ १०१८ यम उपरमे १०१९ तप सन्तापे १०२० त्यज हानौ

१०२१ षञ्ज सङ्गे १०२२ दृशिर् प्रेक्षणे १०२३ दंश दशने १०२४ कृष विलेखने

१०२५ दह भस्मीकरणे १०२६ मिह सेचने १०२७ कित निवासे रोगापनयने च

0B2c स्वरित=इतः

१०२८ दान खण्डने १०२९ शान तेजने १०३० (डु)पचष् पाके १०३१ षच समवाये

१०३२ भज सेवायाम् १०३३ रञ्ज रागे १०३४ शप आक्रोशे १०३५ त्विष दीप्तौ

0B2d यज=आदयः

0B2d1 स्वरित=इतः

१०३६ यज देवपूजा संगतिकरण दानेषु १०३७ (डु)वप बीज संताने छेदनेपि

१०३८ वह प्रापणे १०३९ वस निवासे १०४० वेञ् तन्तुसन्ताने १०४१ व्येञ् संवरणे

१०४२ ह्वेञ् स्पर्धायाम् शब्दे च

0B2d2 स्वरित=इतः

१०४३ वद व्यक्तायाम्+वाचि १०३९ वस निवासे १०४४ (टु)ओश्वि गति वृद्ध्योः

१ अद्=आदयः

1A अनुदात्तः

1A1 उदात्त=इतौ

१ अद भक्षणे २ हन हिंसा गत्योः

1A2 स्वरित=इतः

३ द्विष अप्रीतौ ४ दुह प्रपूरणे ५ दिह उपचये ६ लिह आस्वादने

1A3 अनुदात्त=इत्

७ चक्षिङ् व्यक्तायाम्+वाचि

1B1 अनुदात्त=इतः

८ ईर गतौ ९ ईड स्तुतौ १० ईश ऐश्वर्ये ११ आस उपवेशने १२ शासु इच्छायाम्

१३ वस आच्छादने १४ कसि गति शासनयोः १५ णिसि चुम्बने १६ णिजि शुद्धौ

१७ शिजि अव्यक्ते+शब्दे १८ पिजि वर्णे १९ वृजी वर्जने २० पृजी संपर्के

२१ षूङ् प्राणिगर्भ+विमोचने २२ शीङ् स्वप्ने

1B2 परस्मैपदिनः

२३ यु मिश्रणे २४ रु शब्दे २५ तु वृद्ध्यर्थः २६ णु स्तुतौ २७ (टु)क्षु शब्दे २८ क्ष्णु तेजने

२९ ष्णु प्रस्रवणे

1B3 उभयपदी

३० ऊर्णुञ् आच्छादने

1C अनुदात्तः परस्मैपदिनः

३१ द्यु अभिगमने ३२ षु प्रसव ऐश्वर्ययोः ३३ कु शब्दे ३४ ष्टुञ् स्तुतौ

३५ ब्रूञ् व्यक्तायाम्+वाचि ३६ इण् गतौ ३७ इङ् अध्ययने ३८ इक् स्मरणे

३९ वी गति प्रजन कान्ति असन खादनेषु ४० या प्रापणे ४१ वा गति गन्धनयोः

४२ भा दीप्तौ ४३ ष्णा शौचे ४४ श्रा पाके ४५ द्रा कुत्सायाम्+गतौ ४६ प्सा भक्षणे

४७ पा रक्षणे ४८ रा दाने ४९ ला आदाने ५० दाप् लवने ५१ ख्या प्रकथने

५२ प्रा पूरणे ५३ मा माने ५४ वच परिभाषणे ५५ विद ज्ञाने ५६ अस भुवि

५७ मृजू शुद्धौ

1C1 रुदृ=आदयः(७.२.७६, ३.९८,९९)

५५ रुदिर् अश्रु+विमोचने ५६ (ञि)ष्वप शये ५७ श्वस प्राणने ५८ अन प्राणने

५९ जक्ष भक्ष हसनयोः

1C2 जक्षिति=आदयः(६.१.६)

५९ जक्ष भक्ष हसनयोः ६० जागृ निद्रा+क्षये ६१ दरिद्रा दुर्गतौ

६२ चकासृ दीप्तौ ६३ शासु अनुशिष्टौ ६४ दीधीङ् दीप्ति देवनयोः

६५ वेवीङ् वेतिना तुल्ये (५९-६५ उदात्तः)

1C3 छान्दसौ

६६ षस स्वप्ने ६७ वश कान्तौ ६८ ह्नुङ् अपनयने

२ जुहोति=आदयः

2A अनुदात्त=इतः

१ हु दान अदानयोः २ (ञि)भी भये ३ ह्री लज्जायाम् ४ पृ पालन पूरणयोः

५ (डु)भृञ् धारण पोषणयोः ६ माङ् माने शब्दे च ७ (ओ)हाङ् गतौ ८ (ओ)हाक् त्यागे

९ डुदाञ् दाने १० डुधाञ् धारण पोषणयोः (दाने च) ११ णिजिर् शौच पोषणयोः

१२ विजिर् पृथग्भावे १३ विषि व्याप्तौ

2B छान्दसाः परस्मैपदिनः

१४ घृ क्षरण दीप्त्योः १५ हृ प्रसह्य+करणे १६ सृ गतौ १७ भस भर्त्सन दीप्त्योः

१८ कि १९ कित ज्ञाने २० तुर त्वरणे २१ धिष शब्दे २२ धन धान्ये

२३ जन जनने २४ गा स्तुतौ

३ दिव्=आदयः

3A उदात्ताः उदात्त=इतः

१ दिवु क्रीडा विजिगीषा व्यवहार द्युति स्तुति मोद स्वप्न कान्ति गतिषु

२ षिवु तन्तु+सन्ताने ३ स्रिवु गति शोषणयोः ४ ष्ठिवु/ष्तिवु निरसने

५ ष्णुसु अदने आदाने अदर्शने ६ क्नसु ह्वरण दीप्त्योः ७ व्युष ८ प्लुष दाहे

९ नृती गात्र+विक्षेपे १० त्रसी उद्वेगे ११ कुथ पूतीभावे १२ पुथ हिंसायाम्

१३ गुध परिवेष्टने १४ क्षिप प्रेरणे १५ पुष्प विकसने १६ तिम

१७ ष्टिम/ष्टीम आर्द्रीभावे १८ व्रीड चोदने लज्जायाम् च १९ ईष गतौ

२० षह २१ षुह चक्यर्थे २२ जृष् २३ जृष् वयोहानौ

3B सु=आदयः (ओत्=इतः) आत्मनेपदिनः

3B1 उदात्तौ

२४ षूङ् प्राणि+प्रसवे २५ दूङ् परितापे

3B2 अनुदात्तः

२६ दीङ् क्षये २७ डीङ् विहायसा+गतौ २८ धीङ् आधारे २९ मीङ् हिंसायाम्

३० रीङ् श्रवणे ३१ लीङ् श्लेषणे ३२ व्रीङ् वृणोत्यर्थे {सु=आदयः ओत्=इतः}

३३ पीङ् पाने ३४ माङ् माने ३५ ईङ् गतौ ३६ प्रीङ् प्रीतौ

3C अनुदात्त परस्मैपदिनः

३७ शो तनूकरणे ३८ छो छेदने ३९ षो अन्त कर्मणि ४० डो अवखादने

3D उदात्ताः

3D1 अनुदात्ता=इतः

४१ जनी प्रादुर्भावे ४२ दीपी दीप्तौ ४३ पूरी आप्यायने

४४ तूरी गति+त्वरण हिंसनयोः ४५ धूरी ४६ गूरी हिंसा गत्योः ४७ घूरी

४८ जूरी हिंसा वयोहान्योः ४९ शूरी हिंसा स्तम्भनयोः ५० चूरी दाहे ५१ तप ऐश्वर्ये वा

५२ वृतु वरणे ५३ क्लिश उपतापे ५४ काशृ दीप्तौ ५५ वाशृ शब्दे

3D2 स्वरित=इतौ

५५ मृष तितिक्षायाम् ५६ ईशुचिर् पूतीभावे

3E अनुदात्ताः

3E1 स्वरित=इतः

५७ णह बन्धने ५८ रञ्ज रागे ५९ शप आक्रोशे

3E2 अनुदात्त=इतः

६० पद गतौ ६१ खिद दैन्ये ६२ विद सत्तायाम् ६३ बुध अवगमने ६४ युध संप्रहारे

६५ रुध कामे ६६ अण प्राणने ६७ मन ज्ञाने ६८ युज समाधौ ६९ सृज विसर्गे

७० लिश अल्पीभावे

3E3 उदात्ता=इतौ

७१ राध वृद्धावेव {अकर्मकात्} 72 व्यध ताडने

3F पुष=आदयः (३.१.५५) उदात्त=इतः

3F1 अनुदात्ताः

७३ पुष पुष्टौ ७४ शुष शोषणे ७५ तुष प्रीतौ ७६ दुष वैकृत्ये ७७ श्लिष आलिङ्गने

७८ शक विभाषितो मर्षणे ७९ ष्विदा गात्र प्रक्षरणे ८० क्रुध क्रोधे ८१ क्षुध बुभुक्षायाम्

८२ शुध शौचे ८३ षिधु संराद्धौ

3F2 रध=आदयः (७.२.४५)

८४ रध हिंसा संराद्ध्योः ८५ णश अदर्शने ८६ तृप प्रीणने ८७ दृप हर्ष मोहनयोः

८८ द्रुह जिघांसायाम् ८९ मुह वैचित्त्ये ९० ष्णुह उद्गिरणे ९१ ष्णिह प्रीतौ

3F3 उदात्ताः

3F3a शम्=आदयः (३.२.१४१,७.३.७४)

९२ शमु उपशमे ९३ तमु कांक्षायाम् ९४ दमु उपशमे ९५ श्रमु तपसि खेदे च

९६ भ्रमु अनवस्थाने ९७ क्षमू सहने ९८ क्लमु ग्लानौ ९९ मदी हर्षे

१०० असु क्षेपणे १०१ यसु प्रयत्ने १०२ जसु मोक्षणे १०३ तसु १०४ दसु उपक्षये

१०५ वसु स्तम्भे १०६ व्युष विभागे १०७ प्लुष दाहे १०८ बिस प्रेरणे

१०९ कुस श्लेषणे ११० बुस उत्सर्गे १११ मुस खण्डने ११२ मसी परिमाणे

११३ लुट विलोडने ११४ उच समवाये ११५ भृशु/भ्रंशु अधः पतने ११६ वृश वरणे

११७ कृश तनू करणे ११८ (ञि)तृषा पिपासायाम् ११९ हृष तुष्टौ १२० रुष रोषे

१२१ डिप क्षेपे १२२ कुप क्रोधे १२३ गुप व्याकुलत्वे १२४ युप १२५ रुप

१२६ लुप विमोहने १२७ ष्टूप समुच्छ्राये १२८ लुभ गार्ध्ये १२९ क्षुभ संचलने

१३० णभ १३१ तुभ हिंसायाम् १३२ क्लिदू आर्द्रीभावे १३३ (ञि)मिदा स्नेहने

१३४ (ञि)क्ष्विदा स्नेहन मोचनयोः १३५ ऋधु वृद्धौ १३६ गृधु अभिकांक्षायाम् {वृत्}

४ सु=आदयः

4A अनुदात्ताः

4A1 उभयपदिनः

१ षुञ् अभिषवे २ षिञ् बन्धने ३ शिञ् निशाने ४ (डु)मिञ् प्रक्षेपणे

५ चिञ् चयने ६ स्तृञ् आच्छादने ७ कृञ् हिंसायाम् ८ वृञ् वरणे ९ धुञ् कम्पने

4A2 परस्मैपदिनः

१० (टु)दु उपतापे ११ हि गतौ वृद्धौ च १२ पृ प्रीतौ १३ स्पृ प्रीति पालनयोः

१४ आपि व्याप्तौ १५ शकि शक्तौ १६ राध १७ साध संसिद्धौ

4B उदात्ताः

4B1 अनुदात्त=इतौ

१८ अशू व्याप्तौ संघाते च १९ ष्टिघ आस्कन्दने

4B2 उदात्त=इतः

२० तिक/तिग गतौ २१ षघ हिंसायाम् २२ (ञि)धृषा प्रागल्भ्ये २३ दम्भु दम्भने

२४ ऋधु वृद्धौ २५ तृप प्रीणने

4B3 छन्दसि

२६ अह व्याप्तौ २७ दघ घातने पालने च २८ चमु भक्षणे २९ रि ३० क्षि

३१ चिरि ३२ जिरि ३३ दाश ३४ दृ हिंसायाम् {वृत्}

५ तुद=आदयः

5A अनुदात्ताः स्वरित=इतः

१ तुद व्यथने २ णुद प्रेरणे ३ दिश अतिसर्जने ४ भ्रस्ज पाके ५ क्षिप प्रेरणे

६ कृष विलेखने

5B उदात्ताः

5B1 उदात्त=इत्

७ ऋषी गतौ

5B2 अनुदात्त=इतः

८ जुषी प्रीति सेवनयोः ९ (ओ)विजी भय चलनयोः १० (ओ)लजी/(ओ)लस्जी व्रीडे

5B3 उदात्त=इतः

११ (ओ)व्रश्चू छेदने १२ व्यच व्याजीकरणे १३ उछि उञ्छे १४ उछी विवासे

१५ ऋछ गति इन्द्रिय+प्रलय मूर्तिभावेषु १६ मिछ उत्क्लेशे

१७ जर्ज/चर्च/झर्झ परिभाषण भर्त्सनयोः १८ त्वच संवरणे १९ ऋच स्तुतौ

२० उब्ज आर्जवे २१ उद्झ उत्सर्गे २२ लुभ विमोहने

२३ रिफ कत्थन युद्ध निन्दा हिंसा आदानेषु २४ तृफ २५ तृम्फ तृप्तौ २६ तुप

२७ तुफ हिंसायाम् २८ दृफ २९ दृम्फ उत्क्लेशे ३० ऋफ हिंसायाम् ३१ गुफ ग्रन्थे

३२ उभ पूरणे ३३ शुभ शोभा+अर्थे ३४ दृभी ग्रन्थे ३५ चृती हिंसा ग्रन्थनयोः

३६ विध विधाने ३७ जुड गतौ ३८ मृड ३९ पृड सुखने ४० पृण प्रीणने ४१ मृण हिंसायाम्

४२ तुण कौटिल्ये ४३ पुण कर्मणि+शुभे ४४ मुण प्रतिज्ञाने ४५ कुण शब्द उपतापयोः

४६ शुन गतौ ४७ द्रुण हिंसा गति कौटिल्येषु ४८ घुण ४९ घूर्ण भ्रमणे

५० षुर ऐश्वर्य दीप्त्योः ५१ कुर शब्दे ५२ खुर छेदने ५३ मुर संवेष्टने ५४ क्षुर विलेखने

५५ घुर भीम+अर्थ शब्दयोः ५६ पुर अग्र+गमने ५७ वृहू उद्यमने ५८ तृहू ५९ स्तृहू

६० तृंहू हिंसा+अर्थाः ६१ इष इच्छायाम् ६२ मिष स्पर्धायाम् ६३ किल श्वैत्य क्रीडनयोः

६४ तिल स्नेहने ६५ चिल वसने ६६ चल विलसने ६७ इल स्वप्न क्षेपणयोः

६८ विल संवरणे ६९ बिल भेदने ७० णिल गहने ७१ हिल भाव+करणे ७२ शिल

७३ षिल उञ्छे ७४ मिल श्लेषणे ७५ लिख अक्षर+विन्यासे

5C कुट=आदयः(१.२.१)

5C1 उदात्ताः उदात्त=इतः

७६ कुट कौटिल्ये ७७ पुट संश्लेषणे ७८ कुच संकोचने ७९ गुज शब्दे

८० गुड रक्षायाम् ८१ डिप क्षेपे ८२ छुर छेदने ८३ स्फुट विकसने

८४ मुट आक्षेप प्रमर्दनयोः ८५ त्रुट छेदने ८६ तुट कलह+कर्मणि ८७ चुट/छुट छेदने

८८ जुड बन्धने ८९ कड मदे ९० लुट संश्लेषणे ९१ कृड घनत्वे ९२ कुड बाल्ये

९३ पुड उत्सर्गे ९४ घुट प्रतिघाते ९५ तुड तोडने ९६ थुड ९७ स्थुड संवरणे ९८ स्फुर

९९ स्फुल संचलने १०० स्फुड १०१ चुड १०२ व्रुड संवरणे १०३ क्रुड

१०४ भृड निमज्जने १०५ हुड संघाते १०६ गुरी उद्यमने १०७ णू स्तुतौ १०८ धू विधूनने

१०९ गु पुरीषोत्सर्गे ११० ध्रु गति स्थैर्ययोः

5C2 आत्मनेपदी

१११ कुङ् शब्दे

5D अनुदात्ताः

5D1 आत्मनेपदिनौ

११२ पृङ् व्यायामे ११३ मृङ् प्राण+त्यागे

5D2 परस्मैपदिनः

११४ रि ११५ पि गतौ ११६ धि धारणे ११७ क्षि निवास गत्योः ११८ षू प्रेरणे

5D3 किरादयः

११५ कृ विक्षेपे ११६ गृ निगरणे ११७ दृङ् आदरे ११८ धृङ् अवस्थाने ११९ प्रछ ज्ञीप्सायाम्

5D4 उदात्त=इतः

१२० सृज विसर्गे १२१ (टु)मस्जो शुद्धौ १२२ रुजो भङ्गे १२३ भुजो कोटिल्ये

१२४ छुप स्पर्शे १२५ रुश/रिश हिंसायाम् १२६ लिश गतौ १२७ स्पृश संस्पर्शने

१२८ विछ गतौ १२९ विश प्रवेशने १३० मृश आमर्षणे १३१ णुद प्रेरणे

१३२ षदि विशरण गति अवसादनेषु १३३ शदि शातने

5D5 स्वरित=इत् उदात्तः

१३४ मिल संगमने

5D6 मुच्=आदयः(७.१.५९)

5D6a स्वरित=इतः

१३५ मुचि मोक्षणे १३६ लुपि छेदने १३७ विदि लाभे १३८ लिप उपदेहे

१३९ षिच क्षरणे

5D6b उदात्त=इतः

१४० कृती छेदने १४१ खिद परिघाते १४२ पिश अवयवे {वृत्}

६ रुध्=आदयः

6A अनुदात्ताः स्वरित=इतः

१ रुधिर् आवरणे २ भिदिर् विदारणे ३ छिदिर् द्वैधीकरणे ४ रिचिर् विरेचने

५ विचिर् पृथग्भावे ६ क्षुदिर् संप्रेषणे ७ युजिर् योगे

6B उदात्ताः

6B1 स्वरित=इतः

८ (उ)छृदिर् दीप्ति देवनयोः ९ (उ)तृदिर् हिंसा अनादरयोः

6B2 उदात्त=इत्

१० कृती वेष्टने

6B3 अनुदात्त=इत्

११ (ञि)इन्धी दीप्तौ

6C अनुदात्ताः

6C1 अनुदात्त=इतौ

१२ खिद दैन्ये १३ विद विचारणे

6C2 उदात्त=इतः

१४ शिषि विशेषणे १५ पिषि संचूर्णने १६ भञ्जो आमर्दने १७ भुज पालन अभ्यवहारयोः

6D उदात्ताः उदात्त=इतः

१८ तृह १९ हिसि हिंसायाम् २० उन्दी क्लेदने २१ अञ्जू व्यक्तिं म्रक्षण कान्ति गतिषु

२२ तञ्चू संकोचने २३ (ओ)विजी भय चलनयोः २४ वृजी वर्जने २५ पृची संपर्के {वृत्}

7A तन्=आदयः

7A उदात्ताः

7A1 स्वरित=इतः

१ तनु विस्तारे २ षणु दाने ३ क्षणु ४ क्षिणु हिंसायाम् ५ ऋणु गतौ ६ तृणु अदने

७ घृणु दीप्तौ

7A2 अनुदात्त=इतौ

८ वनु याचने ९ मनु अवबोधने

7B अनुदात्तः उभयतोभाषः

१० (डु)कृञ् करणे

८ क्री=आदयः

8A अनुदात्ताः स्वरित=इतः

१ (डु)क्रीञ् द्रव्य+विनिमये २ प्रीञ् तर्पणे कान्तौ च ३ श्रीञ् पाके

४ मीञ् माने ५ षिञ् बन्धने ६ स्कुञ् आप्रवणे ७ स्तम्भु ८ स्कम्भु रोधने

९ युञ् बन्धने

8B उदात्ताः

8B1 स्वरित=इतौ

१० क्नूञ् शब्दे ११ द्रूञ् हिंसायाम्

8B2 पू=आदयः(७.३.८०)

8B2a स्वरित=इतः

१२ पूञ् पवने

8B2b लू=आदयः(८.२.४४)

१३ लूञ् छेदने १४ स्तृञ् आच्छादने १५ कृञ् हिंसायाम् १६ वृञ् वरणे

१७ धूञ् कम्पने

8B3 उदात्त=इतः

१८ शॄ हिंसायाम१९ पॄ पालन पूरणयोः पॄ पालन पूरणयोः

२० वॄ वरणे २१ भॄ भर्त्सने २२ मॄ हिंसायाम् २३ दॄ विदारणे

२४ जॄ वयोहानौ २५ नॄ नये २६ कॄ हिंसायाम् २७ ॠ गतौ २८ गॄ शब्दे

8C अनुदात्ताः उदात्त=इतः

२९ ज्या वयोहानौ ३० री गति रेषणयोः ३१ ली श्लेषणे ३२ व्ली वरणे

३३ प्ली गतौ ३४ व्री वरणे {वृत्} 35 भ्री भये ३६ क्षीष् हिंसायाम ३७ ज्ञा अवबोधने

३८ बन्ध बन्धने

8D उदात्ताः

8D1 आत्मनेपदी

३९ वृङ् संभक्तौ

8D2 उदात्त=इतः

४० श्रन्थ विमोचन प्रतिहर्षयोः ४१ मन्थ विलोडने ४२ ग्रन्थ सन्दर्भे ४३ कुथ संश्लेषणे

४४ मृद ४५ मृड क्षोदे ४६ गुध रोषे ४७ कुष निष्कर्षे ४८ क्षुभ संचलने ४९ णभ

५० तुभ हिंसायाम् ५१ क्लिशू विबाधने ५२ अश भोजने ५३ उध्रस उञ्छे

५४ इष आभीक्ष्ण्ये ५५ विष विप्रयोगे ५६ प्रुष ५७ प्लुष स्नेहन सेवन पूरणेषु

५८ पुष पुष्टौ ५९ मुष स्तेये ६० खच ६१ हेढ भूत+प्रादुर्भावे

8D3 स्वरित=इत्

६२ ग्रह उपादाने

९ चुरादयः

9A परस्मैपदिनः

१ चुर स्तेये २ चिति स्मृत्याम् ३ यत्रि संकोचे ४ स्फुडि परिहासे ५ लक्ष दर्शन अङ्कनयोः

६ कुद्रि अनृतभाषणे ७ लड उपसेवायाम् ८ मिदि स्नेहने ९ (ओ)लडि उत्क्षेपणे

१० जल अपवारणे ११ पीड अवगाहने १२ नट अवस्यन्दने १३ श्रथ प्रयत्ने

१४ बध संयमने १५ पॄ पूरणे १६ ऊर्ज बल प्राणनयोः १७ पक्ष परिग्रहे १८ वर्ण/चूर्ण प्रेरणे

१९ प्रथ प्रख्याने २० पृथ प्रक्षेपे २१ षम्ब संबन्धने २२ भक्ष अदने

२३ कुट्ट छेदन भर्त्सनयोः २४ पुट्ट २५ चुट्ट अल्पीभावे २६ अट्ट २७ सुट्ट अनादरे

२८ लुण्ठ स्तेये २९ शठ ३० श्वठ असंस्कार गत्योः ३१ तुजि

३२ पिजि हिंसा बल आदान निकेतनेषु ३३ पिस गतौ

३४ षान्त्व साम प्रयोगे ३५ श्वल्क ३६ वल्क परिभाषणे ३७ ष्णिह स्नेहने

३८ स्मिट अनादरे ३९ श्लिष श्लेषणे ४० पथि गतौ ४१ पिछ कुट्टने

४२ छदि संवरणे ४३ श्रण दाने ४४ तड आघाते ४५ खड ४६ खडि ४७ कडि खादने

४८ कुडि रक्षणे ४९ गुडि वेष्टने ५० खुडि खण्डने ५१ वटि विभजने ५२ मडि भूषायाम्

५३ भडि कल्याणे ५४ छर्द वमने ५५ पुस्त ५६ बुस्त आदर अनादरयोः

५७ चुद संचोदने ५८ नक्क ५९ धक्क नाशने ६० चक्क व्यथने ६१ क्षल शौच कर्मणि

६२ तल प्रतिष्ठायाम् ६३ तुल उन्माने ६४ दुल उत्क्षेपे ६५ पुल महत्त्वे

६६ चुल समुच्छ्राये ६७ मूल रोहणे ६८ कल ६९ विल क्षेपे ७० बिल भेदने

७१ तिल स्नेहने ७२ चल भृतौ ७३ पाल रक्षणे ७४ लूष हिंसायाम् ७५ शुल्ब

७६ चुट छेदने ७७ मुट संचूर्णने ७८ पडि नाशने ७९ व्रज मार्ग+संस्कार गत्योः

८० शुल्क अतिसर्जने ८१ चपि गत्याम् ८२ क्षपि क्षान्त्याम् ८३ क्षजि कृच्छ्र+जीवने

८४ श्वर्त गत्याम् ८५ ज्ञप ज्ञान ज्ञापन मारण तोषण निशान निशामनेषु

८६ यम परिवेषणे ८७ चह परिकल्कने ८८ रह त्यागे ८९ बल प्राणने

९० चिञ् चयने {नान्ये म्=इतः} 91 घट्ट चलने ९२ मुस्त संघाते ९३ खट्ट संवरणे

९४ षट्ट ९५ स्फिट्ट ९६ चुबि हिंसायाम् ९७ पूल संघाते ९८ पुंस अभिवर्धने

९९ टकि बन्धने १०० धूस कान्तिकरणे १०१ कीट वर्णे १०२ चूर्ण संकोचने

१०३ पूज पूजायाम् १०४ अर्क स्तवने १०५ शुठ आलस्ये १०६ शुठि शोषणे

१०७ जुड प्रेरणे १०८ गज १०९ मार्ज शब्द+अर्थौ ११० घृ प्रस्रवणे

१११ पचि विस्तार+वचने ११२ तिज निशाने ११३ कृत संशब्दने ११४ वर्ध छेदन पूरणयोः

११५ कुबि छादने ११६ लुबि ११७ तुबि आदर्शने ११८ ह्लप व्यक्तायाम्+वाचि

११९ चुटि छेदने १२० इल प्रेरणे १२१ म्रक्ष म्लेच्छने १२२ म्लेछ अव्यक्तायाम्+वाचि

१२३ ब्रूस १२४ वर्ह हिंसायाम् १२५ गर्ज १२६ गर्द शब्दे १२७ गर्ध अभिकांक्षायाम्

१२८ गुर्द १२९ पूर्व निकेतने १३० जसि रक्षणे १३१ ईड स्तुतौ १३२ जसु हिंसायाम्

१३३ पिडि संघाते १३४ रुष रोषे १३५ डिप क्षेपे १३६ ष्टुप समुच्छ्राये

9B आत्मनेपदिनः

{आ कुसुमात् आत्मनेपदिनः}

१३७ चित संचेतने १३८ दशि दंशने १३९ दसि दर्शन दंशनयोः १४० डप/डिप संघाते

१४१ तत्रि कुटुम्ब+धारणे १४२ मत्रि गुप्त+परिभाषणे १४३ स्पश ग्रहण+संश्लेषणयो

१४४ तर्ज १४५ भर्त्स तर्जने १४६ हस्त १४७ गन्ध अर्दने १४८ विष्क हिंसायाम्

१४९ निष्क परिमाणे १५० लल ईप्सायाम् १५१ कूण संकोचने १५२ तूण पूरणे

१५३ भ्रूण आशायाम् १५४ शठ श्लाघायाम् १५५ यक्ष पूजायाम् १५६ स्यम वितर्के

१५७ गूर उद्यमने १५८ शम १५९ लक्ष आलोचने १६० कुत्स अवक्षेपणे

१६१ त्रुट छेदने १६२ गल स्रवणे १६३ भल आभण्डने १६४ कूट आप्रदाने १६५ वञ्चु प्रलंभने

१६६ वृष शक्ति+बन्धने १६७ मद तृप्ति+योगे १६८ दिवु परिकूजने १६९ गृ विज्ञाने

१७० विद चेतन आख्यान निवासेषु १७१ मान स्तम्भे १७२ यु जुगुप्सायाम्

१७३ कुस्म नाम्नो वा

{कुत्सित स्मयने}

9C परस्मैपदिनः

१७४ चर्च अध्ययने १७५ बुक्क भषणे

१७६ शब्द शब्द+क्रियायाम् उपसर्गात्+आविष्कारे च

१७७ कण निमीलने १७८ जभि नाशने १७९ षूद क्षरणे १८० जसु ताडने

१८१ पश बन्धने १८२ अम रोगे १८३ चट १८४ स्फुट भेदने

१८५ घट संघाते हन्ति+अर्थाः च १८६ दिवु मर्दने १८७ अर्ज प्रयत्ने १८८ घुषिर् विशब्दने

१८९ क्रन्द सातत्ये १९० लस शिल्पयोगे १९१ तसि/भूष अलंकरणयोः १९२ मोक्ष असने

१९३ अर्ह पूजायाम् १९४ ज्ञा नियोगे १९५ भज विश्राणने १९६ शृधु प्रसहने

१९७ यत निकार उपस्कारयोः १९८ रक १९९ लग आस्वादने २०० अञ्चु विशेषणे

२०१ लिगि चित्रीकरणे २०२ मुद संसर्गे २०३ त्रस धारणे २०४ उध्रस उञ्छे

२०५ मुच प्रमोचने मोदने च २०६ वस स्नेह छेद अपहरणेषु २०७ चर संशये

२०८ च्यु हसने सहने २०९ भुवः २१० कृपः अवकल्कने

9C1 आस्वदः सकर्मकात्

२११ ग्रस ग्रहणे २१२ पुष धारणे २१३ दल विदारणे २१४ पट २१५ पुट २१६ लुट

२१७ तुजि २१८ मिजि २१९ पिजि २२० लुजि २२१ भजि भाषा+अर्थः २२२ लघि

२२३ त्रसि २२४ पिसि २२५ कुसि २२६ दशि २२७ कुशि २२८ घट २२९ घटि भाषा+अर्थः

२३० बृहि २३१ बर्ह २३२ बल्ह २३३ गुप २३४ धूप २३५ विच्छ २३६ चीव

२३७ पुथ भाषा+अर्थः २३८ लोकृ २३९ लोचृ २४० णद २४१ कुप २४२ तर्क २४३ वृतु

२४४ वृधु २४५ रुट भाषा+अर्थः २४६ लजि २४७ अजि २४८ दसि २४९ भृशि २५० रुशि

२५१ शीक २५२ नट २५३ पुटि भाषा+अर्थः २५४ जुचि २५५ रघि २५६ लघि २५७ अहि

२५८ रहि २५९ महि २६० लडि २६१ तड २६२ नल भाषा+अर्थः २६३ पूरी आप्यायने

२६४ रुज हिंसायाम् २६५ ष्वद आस्वादने २६६ युज २६७ पृच संयमने

२६८ अर्च पूजायाम् २६९ षह मर्षणे २७० ईर क्षेपे २७१ ली द्रवीकरणे २७२ वृजी वर्जने

२७३ वृञ् आवरणे २७४ जॄ वयोहानौ २७५ ज्रि वयोहानौ २७६ रिच वियोजन संपर्चनयोः

२७७ शिष असर्व+उपयोगे २७८ तप दाहे २७९ तृप तृप्तौ २८० छृदी संदीपने

२८१ दृभी भये २८२ दृभ सन्दर्भे २८३ श्रथ मोक्षणे २८४ मी गतौ २८५ ग्रन्थ बन्धने

२८६ शीक २८७ चीक आमर्षणे २८८ अर्द २८९ हिसि हिंसायाम् २९० अर्ह पूजायाम्

२९१ षद पद्यर्थे २९२ शुन्ध शौच+कर्मणि २९३ छद अपवारणे २९४ जुष परितर्कणे

२९५ धूञ् कम्पने २९६ प्रीञ् तर्पणे २९७ श्रन्थ/ग्रन्थ संदर्भे २९८ आपि लंभने

२९९ तनु श्रद्धा उपकरणयोः उपसर्गात् च दैर्घ्ये ३०० वद सन्देश+वचने

३०१ वच परिभाषणे ३०२ मान पूजायाम् ३०३ भू प्राप्तौ आत्मनेपदी वा

३०४ गर्ह विनिन्दने ३०५ मार्ग अन्वेषणे ३०६ कठि शोके ३०७ मृजू शौच अलंकारयोः

३०८ मृष तितिक्षायाम् ३०९ धृष प्रसहने

9D अत्=अन्ताः

9D1 परस्मैपदिनः

३१० कथ वाक्य+प्रबन्धे ३११ वर ईप्सायाम् ३१२ गण संख्याने ३१३ शठ सम्यगवभाषणे

३१४ पट/वट ग्रन्थे ३१५ रह त्यागे ३१६ स्तन ३१७ गदी देवशब्दे ३१८ पत गतौ वा

३१९ पष अनुपसर्गात् ३२० स्वर आक्षेपे ३२१ रच प्रतियत्ने ३२२ कल गतौ संख्याने च

३२३ चह परिकल्कने ३२४ मह पूजायाम् ३२५ सार ३२६ कृप ३२७ श्रथ दौर्बल्ये

३२८ स्पृह ईप्सायाम् ३२९ भाम क्रोधे ३३० सूच पैशुन्ये ३३१ खेट भक्षणे

३३२ क्षोट क्षेपे ३३३ गोम उपलेपने ३३४ कुमार क्रीडायाम् ३३५ शील उपधारणे

३३६ साम सान्त्व+प्रयोगे ३३७ वेल काल+उपदेशे ३३८ पल्पूल लवन पवनयोः

३३९ वात सुख सेवनयोः ३४० गवेष मार्गणे ३४१ वास उपसेवायाम्

३४२ निवास आच्छादने ३४३ भाज पृथक्कर्मणि ३४४ सभाज प्रीति दर्शनयोः

३४५ ऊन परिहाणे ३४६ ध्वन शब्दे ३४७ कूट परितापे ३४८ संकेत ३४९ ग्राम

३५० कुण/गुण आमन्त्रणे ३५१ कूण संकोचने ३५२ स्तेन चौर्ये

9D2 आत्मनेपदिनः

9D2a आ गर्वात् आत्मनेपदिनः

३६३ पद गतौ ३६४ गृह ग्रहणे ३६५ मृग अन्वेषणे ३६६ कुह विस्मापने ३६७ शूर

३६८ वीर विक्रान्तौ ३६९ स्थूल परिबृंहणे ३७० अर्थ उपयाच्ञायाम्

३७१ सत्र सन्तान+क्रियायाम् ३७२ गर्व माने ३७३ सूत्र वेष्टने ३७४ मूत्र प्रस्रवणे

३७५ रूक्ष पारुष्ये ३७६ पार ३७७ तीर कर्म+समाप्तौ ३७८ पुट संसर्गे

३७९ कत्र शैथिल्ये

{प्रातिपदिकात् धात्वर्थे बहुलं इष्टवच्च; तत्करोति तदाचष्टे;

तेन अतिक्रामति;धातुरूपं च; कर्तृ करणात् धात्वर्थे}

३८० बष्क दर्शने ३८१ चित्र चित्रीकरणे/कदाचित्+दर्शने ३८२ अंस समाघाते

३८३ वट विभाजने ३८४ रट परिभाषणे ३८५ लज प्रकाशने ३८६ मिश्र संपर्के

३८७ संग्राम युद्धे ३८८ स्तोम श्लाघायाम् ३८९ छिद्र कर्ण+भेदने

३९० कर्ण भेदने ३९१ अन्ध दृष्ट्युपघाते ३९२ दण्ड दण्ड+निपाते

३९३ अङ्क पदे लक्षणे च ३९४ सुख ३९५ दुःख तत्क्रियायाम्

३९६ रस आस्वादन स्नेहनयोः ३९७ व्यय वित्त+समुत्सर्गे ३९८ रूप रूप+क्रियायाम्

३९९ छेद द्वैधीकरणे ४०० लाभ प्रेरणे ४०१ व्रण गात्र+विचूर्णने

४०२ वर्ण वर्णक्रिया विस्तार गुण+वचनेषु

{बहुलं एतत् निदर्शनम्}

४०३ पर्ण हरित+भावे ४०४ विष्क दर्शने ४०५ क्षप प्रेरणे ४०६ वस निवासे

४०७ तुत्थ आवरणे ४०८ णिङ् अङ्गात्+निरसने

{श्वेताश्व अश्वतर गालोडित आह्वरकाणां अश्व तर इत क लोपश्च;

पुच्छादिषु धात्वर्थ इत्येव सिद्धम्}

Ganapatha

अंशु=आदयः ६,२,१९३ अंशु=आदि ११ अंशु -

१ जन २ राजन् ३ उष्ट्र ४ खेटक ५ अजिर ६ आर्द्रा ७ श्रवण ८ कृत्तिका ९ पुर

अक्षद्यूत=आदयः ४,४,१९ अक्षद्यूत=आदि १० अक्षद्यूत -

१ जानुप्रहृत २ जङ्घाप्रहृत ३ जङ्घाप्रहत ४ पादस्वेदन ५ कण्टकमर्दन ६ गतागत ७ यातोपयात ८ अनुगत

अङ्गुलि=आदयः ५,३,१०८ अङ्गुलि=आदि १७ अङ्गुलि -

१ भरुज २ बभ्रु ३ वल्गु ४ मण्डर ५ मण्डल ६ शष्कुली ७ हरि ८ कपि ९ रुह १० खल

११ उदश्वित् १२ गोणी १३ उरस् १४ कुलिश १५ शिखा

अज=आदयः ४,१,४ अज=आदि ३५ अजा -

१ एडका २ कोकिला ३ चटका ४ अश्वा ५ मूषिका ६ बाला ७ होडा ८ पाका ९ मन्दा

१० विलाता ११ पूर्वापहाणा १२ अपरापहाणा १३ संफला १४ भस्त्रफला १५ शणफला

१६ पिण्डफला (संभस्त्राजिनशणपिण्डेभ्यः फलात्) १७ त्रिफला १८ प्राक्पुष्पा १९ काण्डपुष्पा

२० प्रान्तपुष्पा २१ शतपुष्पा २२ शूद्रा चामहत्पुर्वा जातिः २३ क्रुञ्चा २४ उष्णिहा २५ देवविशा

२६ कनिष्ठा २७ मध्यमा पुंयोगेऽपि २८ अमूला (मुलान्नञः) २९ दंष्ट्रा

अजिर=आदयः ६,३,११९ अजिर=आदि ६ अजिर -

१ खदिर २ पुलिन ३ हंस ४ कारण्डव ५ चक्रवाक

अद=आदयः २,४,७२ अदि-प्रभृति ७२ अद(भक्षणे) धातुगणः

अनुप्रवचन=आदयः ५,१,१११ अनुप्रवचन=आदि १३ अनुप्रवचन -

१ उत्थापन २ उपस्थापन ३ संवेशन ४ प्रवेशन ५ अनुप्रवेशन ६ अनुवासन ७ अनुवाचन

८ अन्वारोहण ९ प्रारम्भण १० आरम्भण ११ आरोहण

अनुशतिक=आदयः ७,३,२० अनुशतिक=आदि २२ अनुशतिक आकृतिगणः

१ अनुहोड २ अनुसंवरण(अनुसञ्चरण) ३ अनुसंवत्सर ४ अङ्गारवेणु ५ अस्यहेति

६ वध्योग ७ पुष्करसद् ८ अनुहरत् ९ कुरुकत १० कुरुपञ्चाल ११ इहलोक

१२ परलोक १३ सर्वलोक १४ सर्वपुरुष १५ सर्वभूमि १६ प्रयोग १७ राजपुरुषात्ष्यञि

१८ सूत्रनड

अपूप=आदयः ५,१,४ अपूप=आदि २३ अपूप -

१ तण्डुल २ अभ्यूष(अभ्युष) ३ अभ्योष ४ अवोष ५ अभ्येष ६ पृथुक ७ ओदन

८ पूप ९ किण्व १० प्रदीप ११ मुसल १२ कटक १३ कर्णवेष्टक १४ इर्गल १५ अर्गल

१६ यूप १७ स्थूणा १८ दीप १९ अश्व २० पत्र

अयस्मय=आदयः १,४,२० अयस्मय=आदि ० अयस्मय आकृतिगणः

१ ऋक्वत्

अरीहण=आदयः ४,२,८० अरीहण ४५ अरीहण -

१ द्रुघण २ द्रुहण ३ भगल ४ उलन्द ५ किरण ६ सांपरायण ७ औष्ट्रायण ८ त्रैगर्तायन

९ मैत्रायण १० भास्त्रायण ११ वैमतायन १२ सौमतायन १३ सौसायन १४ धौमतायन

१५ सौमायन १६ ऐन्द्रायण १७ खाडायन १८ शाण्डिल्यायन १९ रायस्पोष २० विपथ

२१ विपाश २२ उद्दण्ड २३ खाण्डवीरण २४ वीरण २५ काशकृत्स्न २६ जाम्बवत

२७ शिंशपा २८ रैवत(रेवत) २९ सुयज्ञ ३० शिरीष ३१ बधिर ३२ जम्बु ३३ खदिर

३४ सुशर्मन् ३५ दलतृ ३६ खण्डु ३७ कलन(कनल) ३८ यज्ञदत्त

अर्धर्च=आदयः २,४,३१ अर्धर्च २३१ अर्धर्च -

१ गोमय २ कषाय ३ कार्षापण ४ कुतप ५ कुसप(कुणप) ६ कपाट ७ शङ्ख ८ गूथ

९ ध्वज १० कबन्ध ११ पद्म १२ गृह १३ सरक १४ कंस १५ दिवस १६ यूष १७ अन्धकार

१८ कमण्डलु १९ मण्ड २० भूत २१ द्वीप २२ द्यूत २३ चक्र २४ धर्म २५ कर्मन्

२६ शतमान २७ यान २८ नख २९ नखर ३० चरण ३१ पुच्छ ३२ दाडिम ३३ हिम ३४ रजत

३५ पिधान ३६ सार ३७ पात्र ३८ घृत ३९ सैन्धव ४० औषध ४१ आढक ४२ चषक ४३ द्रोण

४४ पात्रीव ४५ षष्टिक ४६ वारबाण ४७ प्रोथ ४८ कपित्थ ४९ शुष्क ५० शाल ५१ शील

५२ सिधु ५३ कवच ५४ रेणु ५५ ऋण ५६ कपट ५७ शीकर ५८ मुसल ५९ सुवर्ण ६० वर्ण

६१ चमस ६२ क्षीर ६३ कर्ष ६४ आकाश ६५ अष्टापद ६६ मङ्गल ६७ निधान ६८ निर्यास

६९ वृत्त ७० पुस्त ७१ बुस्त ७२ क्ष्वेडित ७३ शृङ्ग ७४ निगड ७५ खल ७६ मधु

७७ मूलक ७८ स्थूल ७९ शराव ८० नाल ८१ वप्र ८२ विमान ८३ मुख ८४ प्रग्रीव

८५ वज्र ८६ कटक ८७ कण्टक ८८ कर्पट ८९ शिखर ९० कल्क(वल्कल) ९१ नाट ९२ मस्तक

९३ कुसुम ९४ तृण ९५ पङ्क ९६ कुण्डल ९७ किरीट ९८ कुमुद ९९ अर्बुद १०० अङ्कुश

१०१ आश्रय १०२ भूषण १०३ इष्वास(इक्कस) १०४ मुकुल १०५ वसन्त १०६ तटाक(तडाग)

१०७ विटङ्क १०८ विडङ्ग १०९ पिण्याक ११० माष १११ कोश ११२ फलक ११३ दिन ११४ दैवत

११५ समर ११६ स्थाणु ११७ अनीक ११८ उपवास ११९ शाक १२० कर्पास १२१ विशाल १२२ चषाल

१२३ दर १२४ विटप १२५ रण १२६ बल १२७ मक १२८ मृणाल १२९ हस्त १३० आर्द्र १३१ हल १३२ सूत्र

१३३ गाण्डीव १३४ मण्डप १३५ पटह १३६ सौध १३७ योध १३८ पार्श्व १३९ शरीर १४० फल १४१ छल

१४२ राष्ट्र १४३ बिम्ब १४४ अम्बर १४५ कुट्टिम १४६ कुक्कुट १४७ कुडप १४८ ककुद

१४९ तोमर १५० तोरण १५१ मञ्चक १५२ पञ्चक १५३ पुङ्ख १५४ मध्य १५५ वल १५६ छाल १५७ वल्मीक

१५८ वसु १५९ देह १६० उद्यान १६१ उद्योग १६२ स्नेह १६३ स्तेन १६४ स्तन १६५ स्वर

१६६ निष्क १६७ क्षेम १६८ शूक १६९ क्षत्र १७० पवित्र १७१ यौवन १७२ कलह

१७३ मूषिक १७४ मण्डल १७५ वल्कल १७६ कुञ्ज १७७ विहार १७८ लोहित १७९ विषाण १८० भावन

१८१ पुलिन १८२ दृढ १८३ आसन १८४ ऐरावत १८५ शूर्प १८६ तीर्थ १८७ लोमश १८८ तमाल १८९ लोह

१९० शपथ १९१ प्रतिसर १९२ दारु १९३ धनुस् १९४ मान १९५ वर्चस्क १९६ कूर्च १९७ तण्डक

१९८ सहस्र १९९ ओदन २०० प्रवाल २०१ शकट २०२ अपराह्ण २०३ नीड २०४ शकल २०५ तण्डुल

अर्शस्=आदयः ५,२,१२७ अर्शस्=आदि १५ अर्शस् आकृतिगणः

१ उरस् २ तुन्द ३ चतुर ४ पलित ५ जटा ६ घटा ७ घाटा ८ अभ्र ९ अघ १० अम्ल

११ लवण १२ स्वाङ्गाद्धीनात् १३ वर्णात्

अश्मन्=आदयः ४,२,८० अश्मन् २१ अश्मन् -

१ यूथ २ ऊष ३ मीन ४ नद ५ दर्भ ६ वृन्द ७ गुड ८ खण्ड ९ नग १० शिखा

११ पाम १२ कन्द १३ कान्द १४ कुल १५ गह्व १६ गुद १७ कुण्डल १८ पीन १९ गुह

अश्व=आदयः ४,१,११० अश्व=आदि ७० अश्व -

१ अश्मन् २ शङ्ख ३ शूद्रक ४ विद ५ पुट ६ रोहिण ७ खर्जूर(खजूर)

८ वस्त ९ पिजूल १० भडिल ११ भण्डिल १२ भडित १३ भण्डित १४ प्रकृत १५ रामोद

१६ काश १७ तीक्ष्ण १८ गोलङ्क १९ अर्क २० स्वर २१ स्फुट २२ चक्र २३ श्रविष्ठ

२४ पवित्र २५ गोमिन् २६ श्याम २७ धूम २८ धूम्र २९ वाग्मिन् ३० विश्वानर

३१ शप आत्रेये ३२ जन ३३ जड ३४ खड ३५ ग्रीष्म ३६ अर्ह ३७ कित ३८ विशंप

३९ गिरि ४० चपल ४१ चुप ४२ दासक ४३ बैल्य(बैल्व) ४४ प्राच्य ४५ धर्म्य

४६ पुंसि जाते ४७ अर्जुन ४८ प्रहृत ४९ सुमनस् ५० दुर्मनस् ५१ मनस्

५२ ध्वन ५३ आत्रेय भरद्वाजे ५४ भरद्वाज आत्रेये ५५ उत्स ५६ आतव ५७ कितव

५८ धन्य ५९ पाद ६० शिव ६१ खदिर

अश्व=आदयः ५,१,३९ अश्व=आदि ९ अश्व -

१ अश्मन् २ गण ३ ऊर्णा(उर्म) ४ उमा ५ भङ्गा ६ क्षण(गङ्गा) ७ वर्षा

अश्वपति=आदयः ४,१,८४ अश्वपति=आदि १८ अश्वपति -

१ ज्ञानपति २ शतपति ३ धनपति ४ गणपति ५ स्थानपति ६ यज्ञपति ७ कुलपति

८ गृहपति ९ पशुपति १० धान्यपति ११ धन्वपति १२ बन्धुपति १३ सभापति १४ प्राणपति १५ क्षेत्रपति

आकर्ष=आदयः ५,२,६४ आकर्ष=आदि १८ आकर्ष(आकष) -

१ त्सरु २ पिशाच ३ पिचण्ड ४ अशनि ५ अश्मन् ६ निचय ७ चय ८ विजय ९ जय

१० नय ११ पाद १२ दीप १३ ह्रद १४ ह्राद(ह्लाद) १५ गद्गद १६ शकुनि

आचित=आदयः ६,२,१४६ अन्-आचित=आदि ११ आचित -

१ पर्याचित २ आस्थापित ३ परिगृहीत ४ निरुक्त ५ प्रतिपन ६ अपश्लिष्ट ७ उपहित

८ उपस्थित ९ संहितागवि

आय=आदयः ३,१,३१ आय=आदि ३ आय प्रत्ययाः

१ ईयङ् २ णिङ्

आहिताग्नि=आदयः २,२,३७ आहिताग्नि=आदि ९ आहिताग्नि आकृतिगणः

१ जातपुत्र २ जातदन्त ३ जातश्मश्रु ४ तैलपीत ५ घृतपीत ६ मद्यपीत ७ गतार्थ

इन्द्रजनन=आदयः ४,३,८८ इन्द्रजनन=आदि ० इन्द्रजनन आकृतिगणः

इष्ट=आदयः ५,२,८८ इष्ट=आदि ३२ इष्ट -

१ पूर्त २ उपासादित ३ निगदित ४ परिगदित ५ परिवदित ६ निकथित

७ निपठित ८ सङ्कलित ९ परिकलित १० संरक्षित ११ परिरक्षित १२ अर्चित

१३ अवकीर्ण १४ आयुक्त १५ गृहीत १६ आम्नात १७ श्रुत १८ अधीत १९ अवधान

२० अवधारित २१ अवकल्पित २२ निराकृत २३ उपकृत २४ उपाकृत २५ अनुयुक्त

२६ अनुपठित २७ व्याकुलित

उक्थ=आदयः ४,२,६० उक्थ=आदि २५ उक्थ -

१ लोकायत २ न्याय ३ न्यास ४ पुनरुक्त ५ निरुक्त ६ निमित्त ७ ज्योतिष ८ अनुपद

९ अनुकल्प १० यज्ञ ११ धर्म १२ चर्चा १३ क्रमेतर १४ संहिता १५ पदक्रम

१६ सङ्घट(सङ्घट्ट) १७ वृत्ति १८ परिषद् १९ सङ्ग्रह २० गुण २१ आयुर्वेद

उञ्छ=आदयः ६,१,१६० उञ्छ=आदि १५ उञ्छ -

१ म्लेच्छ २ जञ्ज ३ जल्प ४ जप ५ वध ६ युग कालविशेषे रथाद्युपकरणे च

७ वेदवेगवेष्टबन्धाः करणे ८ स्तुद्रुयुवः छन्दसि ९ श्वभ्रे दरः १० साम्बतापौ भावगर्हायाम्

११ उत्तमशश्वत्तमौ सर्वत्र

उण्=आदयः ३,३,१ उण्-आदि २८८ उण् -

१ ञुण् २ उ ३ कु ४ उरच् ५ उरन् ६ टिषच् ७ किरच् ८ इलच् ९ एरक्

१० ओरन् ११ ओलच् १२ ऊरन् १३ तुन् १४ तु १५ अतु १६ चतु १७ आतु १८ आतृकन् १९ ऊ

२० उति २१ उलच् २२ इति २३ ढ २४ अठ २५ ख २६ ठ २७ कल २८ ड २९ आलच् ३० वालच्

३१ कालन् ३२ अङ्गच् ३३ गन् ३४ गक् ३५ ग ३६ अण्डन् ३७ अदि ३८ अटि ३९ अजि

४० मन् ४१ मक् ४२ षिवन् ४३ क्वन् ४४ वन् ४५ व ४६ कनिन् ४७ कनि ४८ एणु

४९ थन् ५० ऊथन् ५१ थक् ५२ रक् ५३ क्रन् ५४ रन् ५५ उकन् ५६ णुकन् ५७ क्रुकन्

५८ किकन् ५९ इकन् ६० इनच् ६१ इनन् ६२ क्विप् ६३ क ६४ चिक् ६५ डौ ६६ डै ६७ डो

६८ डोसि ६९ इजि ७० उरिन् ७१ युच् ७२ क्युन् ७३ क्यु ७४ असानच् ७५ आवच्

७६ ऋन् ७७ अनि ७८ इसि ७९ इसिन् ८० उसि ८१ ष्वरच् ८२ नक् ८३ न ८४ इष्णुच्

८५ युक् ८६ त्युक् ८७ अयु ८८ प ८९ इत्नुच् ९० क्त्नु ९१ नु ९२ कक् ९३ कन्

९४ उन्त ९५ उन्ति ९६ उनि ९७ झिच् ९८ कन्युच् ९९ अनुङ् १०० स १०१ सर १०२ क्सरन्

१०३ अन्युच् १०४ आगुच् १०५ अक्नुच् १०६ आनक १०७ आणक १०८ कुक् १०९ तन् ११० क्त

१११ आय्य ११२ एण्य ११३ क्सय्य ११४ अन्य ११५ आन्य ११६ अत्रन् ११७ क्त्र ११८ अतच्

११९ असच् १२० झच् १२१ अर १२२ क्ररन् १२३ आरन् १२४ कपन् १२५ तिकन् १२६ तकन् १२७ तशन्

१२८ तनन् १२९ भ १३० क्थिन् १३१ क्सि १३२ क्सु १३३ ई १३४ कत्निच् १३५ यतुच् १३६ अलिच्

१३७ इष्ठच् १३८ इसन् १३९ स्यन् १४० इथिन् १४१ उलि १४२ अस १४३ आस १४४ आनुक् १४५ करन्

१४६ आक १४७ ईकन् १४८ कीकच् १४९ कङ्कण १५० ईषन् १५१ ईरन् १५२ एलिमच् १५३ धुक् १५४ लक्

१५५ वालन् १५६ ऊक १५७ ऊकण् १५८ मि १५९ नि १६० किन् १६१ क्विन् १६२ डति १६३ ऋतिन्

१६४ क्रि १६५ क्रिन् १६६ त्रिप् १६७ त्रिनि १६८ अत्रिन् १६९ ईचि १७० ऊषन् १७१ कुषन्

१७२ अरु १७३ अटन् १७४ अम्बच् १७५ अन् १७६ किन्दच् १७७ घतिन् १७८ ऊर १७९ ऊलच् १८० चट्

१८१ अबक १८२ द १८३ दन् १८४ कयन् १८५ रु १८६ क्रुन् १८७ इत्वन् १८८ त्वन् १८९ त्नण्

१९० शक् १९१ स्य १९२ डट १९३ अटच् १९४ उम्भ १९५ उम १९६ ईद १९७ इत १९८ क्ल १९९ य २०० यक्

२०१ क्वनिप् २०२ इन् २०३ इञ् २०४ इण् २०५ इ २०६ मनिन् २०७ इमनिच् २०८ इमनिन् २०९ मनि

२१० सिकन् २११ अरन् २१२ उडच् २१३ कमि २१४ डिमि २१५ ष्ट्रन् २१६ त्र २१७ त्रन्

२१८ इत्र २१९ उत्र २२० आ २२१ कण २२२ स्मन् २२३ डुम्सुन् २२४ किष्यन् २२५ ति २२६ कीटन्

२२७ क्मलन् २२८ असुन् २२९ आसि २३० असि २३१ उनसि २३२ कनसि २३३ डुतच् २३४ ऊम २३५ क्न

२३६ टन् २३७ डैसि २३८ यत् २३९ ईरच् २४० सन् २४१ अच् २४२ अल् २४३ ऊख २४४ फक् २४५ डुन्

२४६ वुन् २४७ युन् २४८ कन्यन् २४९ पास २५० तु २५१ आल २५२ कीकन् २५३ डउ २५४ त २५५ र

२५६ ड्रि २५७ अनि २५८ अमच् २५९ अलच्

उत्कर=आदयः ४,२,९० उत्कर=आदि ५७ उत्कर -

१ संफल २ शफर ३ पिप्पल ४ पिप्पलीमूल ५ अश्मन् ६ सुवर्ण ७ खलाजिन

८ कितव ९ अणक १० त्रैवर्ण ११ पिचुक १२ अश्वत्थ १३ काश १४ क्षुद्र

१५ शाल १६ जन्या १७ अजिर १८ उत्क्रोश १९ क्षान्त २० खदिर २१ शूर्पणाय

२२ नैवाकव २३ तृण २४ वृक्ष २५ शाक २६ पलाश २७ विजिहीषा २८ अनेक २९ आतप ३० फल

३१ अर्क ३२ गर्त ३३ अग्नि ३४ वैराणक ३५ इडा ३६ अरण्य ३७ निशान्त ३८ पर्ण

३९ शङ्कर ४० अवरोहित ४१ क्षार ४२ विशाल ४३ वेत्र ४४ अरीहण ४५ खण्ड

४६ मन्त्रणार्ह ४७ इन्द्रवृक्ष ४८ नितान्तवृक्ष ४९ आर्द्रवृक्ष

उत्स=आदयः ४,१,८६ उत्स=आदि ३७ उत्स -

१ उदपान २ विकर ३ विनद ४ महानद ५ महानस ६ महाप्राण ७ तरुण ८ तलुन

९ पृथिवी १० धेनु ११ पङ्क्ति १२ जगती १३ त्रिष्टुभ् १४ अनुष्टुभ् १५ जनपद

१६ उशीनर १७ ग्रीष्म १८ पीलुकुण १९ उदस्थान देशे २० पृषदंश २१ भल्लकीय

२२ मध्यन्दिन २३ बृहत् २४ महत् २५ सत्त्वत् २६ कुरु २७ पञ्चाल

२८ उष्णिह् २९ ककुभ् ३० सुवर्ण ३१ देव ३२ ग्रीष्मात् अच्छन्दसि

उत्सङ्ग=आदयः ४,४,१५ उत्सङ्ग=आदि ७ उत्सङ्ग -

१ उडुप २ उत्पुत ३ उत्पन्न ४ उत्पुट ५ पिटक ६ पिटाक

उद्गातृ=आदयः ५,१,१२९ उद्गातृ=आदि १४ उद्गातृ -

१ उन्नेतृ २ प्रतिहर्तृ ३ प्रशास्तृ ४ होतृ ५ पोतृ ६ हर्तृ ७ रथगणक ८ सुष्ठु ९ दुष्ठु

१० अध्वर्यु ११ वधू १२ सुभग मन्त्रे

उपक=आदयः २,४,६९ उपक=आदि ५० उपक -

१ लमक २ भ्रष्टक ३ कपिष्ठल ४ कृष्णाजिन ५ कृष्णसुन्दर ६ चूडारक

७ गडुक ८ उदङ्क ९ सुधायुक १० अबन्धक ११ पिङ्गलक १२ पिष्टक

१३ मयूरकर्ण १४ खारीजङ्घ १५ शलाथल १६ पतञ्जल १७ पदञ्जल १८ कठेरणि

१९ काशकृत्स्न २० निदाघ २१ कलशीकण्ठ २२ दामकण्ठ २३ कृष्णपिङ्गल २४ कर्णक

२५ जटिलक २६ बधिरक २७ जन्तुक २८ अनुलोम २९ अनुपद ३० प्रतिलोम ३१ अपजघ

३२ अनभिहित ३३ कमक ३४ वराटक ३५ लेखाभ्र ३६ कमन्दक ३७ पिञ्जूलक ३८ वर्णक

३९ मदाघ ४० कवन्तक ४१ कमन्तक ४२ कदामत्त ४३ दामकण्ठ

उर(स्)=आदयः ५,४,१५१ उरस्-प्रभृति १२ उरस् -

१ सर्पिस् २ उपानह् ३ पुमान् ४ अनड्वान् ५ पयस् ६ नौ ७ लक्ष्मी ८ मधु ९ शालि

१० अर्थात् नञः

ऊरी=आदयः १,४,६१ ऊरी=आदि ३८ ऊरी -

१ उररी २ तन्थी ३ ताली ४ आताली ५ वेताली ६ धूली ७ धूसी ८ शकला

९ ध्वंसकला १० भ्रंसकला ११ गुलुगुधा १२ सजुष् १३ फल १४ फली १५ विक्ली

१६ आलोष्ठी १७ केवाली १८ केवासी १९ सेवासी २० पर्याली २१ शेवाली

२२ अत्यूमशा २३ वश्मशा २४ मस्मसा २५ मसमसा २६ औषट् २७ वौषट् २८ वषट्

२९ स्वधा ३० बन्धा ३१ प्रादुस् ३२ श्रत् ३३ आविस्

ऋगयन=आदयः ४,३,७३ ऋगयन=आदि २३ ऋगयन -

१ पदव्याख्यान २ छन्दोमान ३ छन्दोभाषा ४ छन्दोविचिति ५ न्याय ६ निरुक्त ७ व्याकरण

८ निगम ९ वास्तुनिद्या १० क्षत्रविद्या ११ विद्या १२ उत्पात १३ उत्पाद १४ उद्याव

१५ संवत्सर १६ मुहूर्त १७ निमित्त १८ शिक्षा १९ भिक्षा

ऋश्य=आदयः ४,२,८० ऋश्य ३१ ऋश्य -

१ न्यग्रोध २ शर ३ निलीन ४ निवास ५ निवात ६ निधान ७ विबद्ध ८ परिगूढ ९ उपगूढ

१० असनी ११ सित १२ मत १३ वेश्मन् १४ अश्मन् १५ स्थूल १६ बहु १७ खदिर

१८ शर्करा १९ अनडुह् २० अरडु २१ परिवंश २२ वीरण २३ खण्ड २४ दण्ड २५ परिवृत्त

२६ कर्दम २७ अंशु

ऐषुकारि=आदयः ४,२,५४ ऐषुकारि=आदि २६ ऐषुकारि -

१ सारस्यायन २ चान्द्रायण ३ द्व्याक्षायण ४ त्र्याक्षायण ५ औडायन ६ खाडायन

७ दासमित्रि ८ दासमित्रायण ९ शौद्रायन १० दाक्षायण ११ ताक्ष्यायण १२ शौभ्रायण

१३ सौवीर १४ सौवीरायण १५ शपण्ड(शयण्ड) १६ शयाण्ड(शयाण्डि) १७ वैश्वमानव

१८ वैश्वधेनव १९ नड २० तुण्डदेव २१ सापिण्डि

कच्छ=आदयः ४,२,१३३ कच्छ=आदि १६ कच्छ -

१ सिन्धु २ वर्णु ३ गन्धार ४ मधुमत् ५ कंबोज ६ कश्मीर ७ साल्व ८ अनुषण्ड ९ द्वीप

१० अनूप ११ अजवाह १२ विजापक १३ कलूतर १४ रङ्कु

कडार=आदयः २,२,३८ कडार १९ कडार -

१ गडुल २ खञ्ज ३ खोड ४ कण ५ कुण्ठ ६ खलति ७ गौर ८ वृद्ध ९ भिक्षुक

१० पिङ्गल(पिङ्गुल) ११ तड १२ तनु १३ जठर १४ बधिर १५ मठर १६ कञ्ज १७ बर्बर

कण्डू=आदयः ३,१,२७ कण्डू ५७ कण्डूञ् आकृतिगणः

१ मन्तु २ हृणीङ् ३ वल्गु ४ असु ५ मनस् ६ महीङ् ७ लाट् ८ लेट् ९ इरज् १० इरङ्

११ दुवस् १२ उषस् १३ वेट् १४ मेधा १५ कुषुभ १६ नमस् १७ मगध १८ पम्पस्(पपस्)

१९ सुख २० दुःख २१ भिक्ष २२ चरण २३ चरम २४ अवर २५ सपर २६ भिषज्

२७ भिष्णुज्(भिष्णज्) २८ अपर २९ आर ३० इषुध ३१ वरण ३२ चुरण ३३ भुरण

३४ गद्गद ३५ एला ३६ केला ३७ खेला ३८ वेला ३९ शेला ४० लिट् ४१ लोट् ४२ लेख

४३ रेखा ४४ द्रवस् ४५ तिरस् ४६ अगद ४७ उरस् ४८ तरण(तरिण) ४९ पयस् ५० संबर

कण्व=आदयः ४,२,१११ कण्व=आदि ४७ कण्व गर्गादि=अवान्तरगणः

१ शकल २ गोकक्ष ३ अगस्त्य ४ कुण्डिनी ५ यज्ञवल्क ६ पर्णवल्क ७ विरोहित ८ वृषगण

९ रहूगण १० शण्डिल ११ वर्णक(चणक) १२ चुलुक १३ मुद्गल १४ जमदग्नि १५ पराशर

१६ जतुकर्ण(जातुकर्ण) १७ महित १८ मन्त्रित १९ अश्मरथ २० पूतिमाष २१ स्थूर

२२ अदरक(अररक) २३ एलाक २४ पिङ्गल २५ कृष्ण २६ गोलन्द २७ तितिक्ष

२८ भिषज्(भिषज) २९ भिष्णज ३० भडित ३१ भण्डित ३२ दल्भ ३३ चेकित

३४ देवहू ३५ इन्द्रहू ३६ एकलू ३७ पिप्पलू ३८ बृहदग्नि ३९ सुलोहिन् ४० उक्थ ४१ कुटीगु

कत्त्रि=आदयः ४,२,९५ कत्त्रि=आदि १३ कत्त्रि -

१ उम्भि २ पुष्कर ३ पुष्कल ४ मोदन ५ कुम्भि ६ कुण्डिन ७ नगरी ८ वर्मती ९ उख्या

१० ग्राम ११ कुड्यायाः यलोपश्च

कथा=आदयः ४,४,१०२ कथा=आदि १४ कथा -

१ विकथा २ विश्वकथा ३ सङ्कथा ४ वितण्डा ५ कुष्टविद्(कुष्ठविद्) ६ जनेवाद

७ जनोवाद ८ वृत्ति ९ सङ्ग्रह १० गुण ११ गण १२ आयुर्वेद

कर्की=आदयः ६,२,८७ कर्की=आदि ९ कर्की -

१ मघ्नी २ मकरी ३ कर्कन्धु ४ शमी ५ करीर(करीरि) ६ कन्दुक ७ बदरी

कर्ण=आदयः ४,२,८० कर्ण १७ कर्ण -

१ वसिष्ठ २ अर्क ३ अर्कलूष ४ द्रुपद ५ आवनडुह्य ६ पाञ्चजन्य ७ कुम्भी ८ कुण्टी

९ जित्वन् १० जीवन्त ११ कुलिश १२ आण्डीवत्(आण्डीवत) १३ जैत्र १४ आनक(आकन)

कर्ण=आदयः ५,२,२४ कर्ण=आदि १२ कर्ण -

१ अक्षि २ नख ३ मुख ४ केश ५ पाद ६ गुल्फ ७ भ्रू ८ शृङ्ग ९ दन्त १० पृष्ठ

कल्याणी=आदयः ४,१,१२६ कल्याणी=आदि १२ कल्याणी -

१ सुभगा २ दुर्भगा ३ बन्धकी ४ अनुदृष्टि ५ अनुसृष्टि ६ जरती ७ ज्येष्ठा ८ कनिष्ठा

९ मध्यमा १० परस्त्री

कस्क=आदयः ८,३,४८ कस्क=आदि १८ कस्कः -

१ कौतस्कः २ भ्रातुष्पुत्रः ३ शुनस्कर्णः ४ सद्यस्कालः ५ कांस्कान् ६ सर्पिष्कुण्डिका

७ धनुष्कपालम् ८ यजुष्पात्रम् ९ अयस्कान्तः १० तमस्काण्डः ११ अयस्काण्डः

१२ भास्करः १३ अहस्करः

कार्तकौजप=आदयः ६,२,३७ कार्तकौजप=आदि २६ कार्तकौजपौ -

१ सावर्णिमाण्डूकेयौ २ अवन्त्यश्मकाः ३ पैलश्यापर्णेयाः ४ शैतिकाक्षपाञ्चालेयाः ५ कटुकवाधूलेयाः ६ शाकलशुनकाः

७ आर्चाभिमौद्गलाः ८ कुन्तिसुराष्ट्राः ९ चिन्तिसुराष्ट्राः १० अनिमत्तकामविद्धाः

११ बाभ्रवशालङ्कायनाः १२ बाभ्रवदानच्युताः १३ कठकौथुमाः १४ कौथुमलौकाक्षाः

१५ स्त्रीकुमारम् १६ मौदपैप्पलादाः १७ सौश्रुतपार्थवाः १८ जरामृत्यू १९ याज्यानुवाक्ये

काश=आदयः ४,२,८० काश २२ काश -

१ पाश २ अश्वत्थ ३ पलाश ४ पीयूक्षा ५ चरण ६ वास ७ नड ८ वन ९ कर्दम १० कङ्कट

११ गुहा १२ बिस १३ तृण १४ कर्पूर १५ बर्बर १६ मधुर १७ ग्रह १८ जतु १९ शीपाल

कष्=आदयः ३,४,४६ कष्-आदि १२ कष् -

१ पिष् २ हन् ३ कृञ् ४ ग्रह् ५ वर्ति ६ पुष् ७ बन्ध् ८ नश् ९ वह् १० पूर्

काण्ड=आदयः ६,२,१३५ काण्ड=आदि ६ काण्ड -

१ चीर २ पलल ३ सूप ४ शाक ५ कूल

काशी=आदयः ४,२,११६ काशी=आदि २९ काशी -

१ चेदि(वेदि) २ सांयति ३ संवाह ४ अच्युत ५ मोदमान ६ शकुलाद ७ कुनामन्

८ हिरण्य ९ करण १० गोवासन ११ भारङ्गी १२ अरिन्दम १३ अरित्र १४ दशग्राम

१५ शौचावतान १६ युवराज १७ उपराज १८ देवराज १९ मोदन २० दाशमित्र

२१ सुधामित्र २२ सोममित्र २३ छागमित्र २४ साधमित्र(सधमित्र)

काष्ठ=आदयः ८,१,६७ काष्ठ=आदि १६ काष्ठ -

१ दारुण २ अमातापुत्र ३ वेश ४ अनाज्ञात ५ अनुज्ञात ६ अपुत्र ७ अयुत ८ अनुक्त

९ भृश १० घोर ११ सुख १२ परम १३ सु १४ अति

किंशुलुक=आदयः ६,३,११७ किंशुलुक=आदि ७ किंशुलुक(किंशुलक) -

१ शाल्व २ नड ३ अञ्जन ४ भञ्जन ५ लोहित ६ कुक्कुट

कृ=आदयः ७,२,७५ कृ ५ कृ(विक्षेपे) धात्ववान्तरगणः(तुदादौ)

किसर=आदयः ४,४,५३ किसर=आदि १० किसर(किशर) -

१ नरद २ नलद ३ स्थागल ४ तगर ५ गुग्गुलु ६ उशीर ७ हरिद्रा ८ हरिद्रु

कुञ्ज=आदयः ४,१,९८ कुञ्ज=आदि १३ कुञ्ज -

१ ब्रध्न २ शङ्ख ३ भस्मन् ४ गण ५ लोमन् ६ शठ ७ शाक ८ शुण्ड ९ शुभ

१० स्कन्द ११ स्कम्भ

कुट=आदयः १,२,१ कुट=आदि २५ कुट(कौटिल्ये) धात्ववान्तरगणः(तुदादौ)

कुमुद=आदयः ४,२,८० कुमुद २१ कुमुद -

१ शर्करा २ न्यग्रोध ३ इक्कट ४ सङ्कट ५ कङ्कट ६ गर्त ७ बीज ८ निर्यास

९ शकट १० कच ११ मधु १२ शिरीष १३ अश्व १४ अश्वत्थ १५ बल्बज १६ कूप

१७ विकङ्कट १८ दशग्राम

कुमुद=आदयः ४,२,८० कुमुद=आदि १३ कुमुद -

१ गोमय २ रथकार ३ दशग्राम ४ अश्वत्थ ५ शाल्मलि ६ शिरीष ७ मुनिस्थल ८ कूट

९ मधुकर्ण १० घासकुन्द ११ शुचिकर्ण

कुम्भपदी=आदयः ५,४,१३९ कुम्भपदी ३२ कुम्भपदी -

१ एकपदी २ जलपदी ३ शूलपदी ४ मुनिपदी ५ गुणपदी ६ शतपदी ७ सूत्रपदी

८ कलशीपदी ९ विपदी १० तृणपदी ११ द्विपदी १२ त्रिपदी १३ षट्पदी १४ शितिपदी

१५ विष्णुपदी १६ निष्पदी १७ आर्द्रपदी १८ कुणिपदी १९ कृष्णपदी २० द्रोणीपदी(द्रोणपदी)

२१ द्रुपदी २२ सूकरपदी २३ शकृत्पदी २४ अष्टापदी २५ अपदी २६ सूचीपदी

कुरु=आदयः ४,१,१५१ कुरु=आदि ४८ कुरु -

१ गर्गर २ मङ्गुष ३ अजमार ४ रथकार ५ वावदूक ६ सम्राजः क्षत्रिये ७ विमति

८ कापिञ्जलादि ९ वाक् १० वामरथ ११ पितृमत् १२ एजि १३ वातकि १४ दामोष्णीषि

१५ गणकारि १६ कैशोरि १७ कुट १८ मुर १९ पुर २० एरका २१ शुभ्र २२ अभ्र

२३ दर्भ २४ केशिनी २५ शूर्पणाय २६ श्यावनाय २७ श्यावरथ २८ श्यावपुत्र

२९ सत्यङ्कार ३० पथिकार ३१ मूढ ३२ शकन्धु ३३ शङ्कु ३४ शक ३५ शालिन्

३६ शालीन ३७ कर्तृ ३८ इन ३९ पिण्डी ४० तक्षन् ४१ वामरथस्य कण्वादिवत् स्वरवर्जम्

कुलाल=आदयः ४,३,११८ कुलाल=आदि १८ कुलाल -

१ वरुड २ चण्डाल ३ निषाद ४ कर्मार ५ सेना ६ सिरिन्ध्र(सिरिध्र) ७ देवराज

८ पर्षद्(परिषद्) ९ वधू १० मधु ११ रुरु १२ रुद्र १३ ब्रह्मन् १४ कुम्भकार

१५ श्वपाक

कृत=आदयः २,१,५९ कृत=आदि २२ कृत आकृतिगणः

१ मित २ मत ३ भूत ४ उक्त ५ युक्त ६ समाज्ञात ७ समाम्नात ८ समाख्यात

९ संसेवित १० अवधारित ११ अवकल्पित १२ निराकृत १३ उपकृत १४ उपाकृत

१५ कलित १६ दलित १७ उदाहृत १८ विश्रुत १९ उदित

कृशाश्व=आदयः ४,२,८० कृशाश्व २९ कृशाश्व -

१ अरिष्ट २ अरिश्म ३ वेश्मन् ४ विशाल ५ लोमश ६ रोमश ७ रोमक ८ लोमक

९ कूट १० वर्चल ११ सुवर्चल १२ सुकर १३ सूकर १४ प्रतर(प्रातर) १५ सदृश

१६ सुख १७ धूम १८ अजिन १९ विनत २० अवनत २१ कुविद्यास(कुविट्यास) २२ पराशर

२३ अयस् २४ मौद्गल्याकार

कोटर=आदयः ६,३,११७ कोटर ५ कोटर -

१ मिस्रक २ सिध्रक ३ पुरग ४ शरिक(सारिक)

क्रतु=आदयः ६,२,११८ क्रतु=आदि ७ क्रतु -

१ दृशीक २ प्रतीक ३ प्रतूर्ति ४ हव्य ५ भव्य ६ भग

क्रम=आदयः ४,२,६१ क्रम=आदि ५ क्रम -

१ पद २ शिक्षा ३ मीमांसा ४ सामन्

क्री=आदयः ३,१,८१ क्री=आदि ६१ डुक्रीञ्(द्रव्यविनिमये) धातुगणः

क्रोड=आदयः ४,१,५६ क्रोड=आदि ९ क्रोड आकृतिगणः

१ नख २ खुर ३ गोखा ४ उखा ५ शिखा ६ वाल ७ शफ ८ गुद

क्रौडि=आदयः ४,१,८० क्रौडि=आदि २० क्रौडि -

१ लाडि २ व्याडि ३ आपिशलि ४ आपक्षिति ५ चौपयत ६ चैतयत(वैतयत) ७ बैल्वयत

८ सौधातकि ९ सूत युवत्याम् १० भोज क्षत्रिये ११ यौतकि १२ भौरिकि १३ भौलिकि

१४ शाल्मलि १५ शालास्थलि १६ कपिष्ठलि १७ गौकक्ष्य

क्षुभ्न=आदयः ८,४,३९ क्षुभ्न=आदि २४ क्षुभ्न आकृतिगणः

१ नृनमन २ नन्दिन् ३ नन्दन ४ हरिनन्दी ५ हरिनन्दन ६ गिरिनगरम्

७ नृतिर्यङि प्रयोजयन्ति ८ गहन ९ नन्दन १० निवेश ११ निवास १२ अग्नि

१३ परिनर्तनम् १४ परिगहनम् १५ परिनन्दनम् १६ शरनिवेशः १७ शरनिवासः

१८ दर्भानूपः १९ आचार्यात् अणत्वम् च

खण्डिक=आदयः ४,२,४५ खण्डिक=आदि १० खण्डिक(खण्डिका) -

१ वडवा २ क्षुद्रकमालवात् सेना संज्ञायाम् ३ भिक्षुक ४ शुक ५ उलूक ६ अहन्

७ युगवरत्रा(युगवरत्र) ८ हलबन्ध(हलबन्धा)

गमि(न्)=आदयः ३,३,३ गमिन्-आदि ८ गमी -

१ आगमी २ भावी ३ प्रतिस्थायी ४ प्रतिरोधी ५ प्रतिबोधी ६ प्रतियायी

गर्ग=आदयः ४,१,१०५ गर्ग=आदि १०१ गर्ग -

१ वत्स २ वाज असे ३ संकृति ४ अज ५ व्याघ्रपाद् ६ विदभृत् ७ अगस्ति ८ पुलस्ति

९ चमस १० रेभ ११ अग्निवेश १२ शङ्ख १३ शट १४ शक १५ एक १६ अवट

१७ मनस् १८ धनञ्जय १९ वृक्ष २० विश्वावसु २१ जरमाण २२ लोहित २३ बभ्रु

२४ वल्गु २५ मण्डु २६ गण्डु २७ शङ्कु २८ लिगु २९ गुहलु ३० मन्तु ३१ अलिगु

३२ जिगीषु ३३ मनु ३४ तन्तु ३५ मनायी ३६ सूनु ३७ कथक ३८ कन्थक ३९ तृक्ष

४० तनु ४१ तरुक्ष ४२ तलुक्ष ४३ तण्ड ४४ वतण्ड ४५ कपि ४६ कत(कपिकत)

४७ अनडुह् ४८ कण्व ४९ शकल ५० गोकक्ष ५१ अगस्त्य ५२ कुण्डिनी ५३ यज्ञवल्क

५४ अभयजात ५५ विरोहित ५६ वृषगण ५७ रहूगण ५८ शण्डिल ५९ वर्णक(चणक) ६०
चुलुक

६१ मुसल ६२ जमदग्नि ६३ पराशर ६४ जतुकर्ण(जातुकर्ण) ६५ महित ६६ मन्त्रित

६७ शर्कराक्ष ६८ पूतिमाष ६९ स्थूर ७० अदरक(अररक) ७१ एलाक ७२ पिङ्गल ७३ गोलन्द

७४ उलूक ७५ तितिक्ष ७६ भिषज्(भिषज) ७७ भिष्णज ७८ भडित ७९ भण्डित ८० चेकित

८१ चिकित्सित ८२ देवहू ८३ इन्द्रहू ८४ एकलू ८५ पिप्पलू ८६ सुलोहिन् ८७ सुलाभिन्

८८ उक्थ ८९ कुटीगु

गो=आदयः ५,१,२ गो=आदि २३ गो -

१ हविस् २ अक्षर ३ विष ४ बर्हिस् ५ अष्टका ६ स्खदा(स्वद) ७ युग ८ स्रुच्

९ नाभिनभम् च १० ऊधसः अनङ् च ११ कूप १२ खद १३ दर(उदर) १४ खर

१५ असुर १६ अध्वन् १७ क्षर १८ बीज १९ दीप्त(दीस)

गवाश्व=आदयः २,४,११ गवाश्व-प्रभृति २८ गवाश्वम् -

१ गवाविकम् २ गवेडकम् ३ अजाविकम् ४ अजैडकम् ५ कुब्जवामनम् ६ पुत्रपौत्रम्

७ श्वचण्डालम् ८ स्त्रीकुमारम् ९ दासीमाणवकम् १० शाटीप्रच्छदम् ११ शाटीपट्टिकम्

१२ उष्ट्रखरम् १३ उष्ट्रशशम् १४ मूत्रपुरीषम् १५ यकृन्मेदः १६ मांसशोणितम्

१७ दर्भशरम् १८ अर्जुनशिरीषम् १९ अर्जुनपुरुषम् २० तृणोपलम् २१ दासीदासम्

२२ भागवतीभागवतम्

गह=आदयः ४,२,१३८ गह=आदि ५६ गह आकृतिगणः

१ अन्तस्थ २ सम ३ विषम ४ मध्य मध्यमम् च अण् चरणे ५ उत्तम ६ अङ्ग

७ मगध ८ पूर्वपक्ष ९ अपरपक्ष १० अधमशाख ११ उत्तमशाख १२ एकशाख

१३ समानग्राम १४ एकग्राम १५ एकवृक्ष १६ एकपलाश १७ इष्वग्र १८ इष्वनीक

१९ कामप्रस्थ २० खाडायन(शाडिकाडायनि) २१ काठेरणि २२ लावेरणि २३ सौमित्रि

२४ आसुत २५ दैवशर्मि २६ श्रौति २७ आहिंसि २८ आमित्रि २९ व्याडि ३० बैजि

३१ आनृशंसि ३२ शौङ्गि ३३ आग्निशर्मि ३४ भौजि ३५ वाराटकि ३६ वाल्मीकि ३७ आश्वत्थि

३८ औद्गाहमानि ३९ ऐक ४० बिन्दवि ४१ दन्ताग्र ४२ हंस ४३ उत्तर ४४ अनन्तर ४५ मुख

पार्श्वतसोः लोपः ४६ जनपरयोः कुक् च ४७ वेणुकादिभ्यः छण्

गुड=आदयः ४,४,१०३ गुड=आदि १४ गुड -

१ कुल्माष २ सक्तु ३ अपूप ४ मांसौदन ५ इक्षु ६ वेणु ७ सङ्ग्राम ८ सङ्क्राम ९ संवाह

१० प्रवास ११ निवास १२ उपवास

गुण=आदयः ६,२,१७६ गुण=आदि ५ गुण आकृतिगणः

१ अक्षर २ अध्याय ३ सूक्त ४ छन्दोमान

गृष्टि=आदयः ४,१,१३६ गृष्टि=आदि ६ गृष्टि -

१ हृष्टि २ बलि ३ हलि ४ अजवस्ति ५ मित्रयु

गोत्र=आदयः ८,१,२७ गोत्र=आदि १५ गोत्र -

१ ब्रुव २ प्रवचन ३ प्रहसन ४ प्रकथन ५ प्रत्ययन ६ प्रपञ्च ७ प्राय ८ प्रचक्षण ९ विचक्षण

१० अवचक्षण ११ स्वाध्याय १२ भूयिष्ठ १३ वा नाम

गोपवन=आदयः २,४,६७ गोपवन=आदि ८ गोपवन -

१ शिग्रु २ बिन्दु ३ भाजन ४ अश्वावतान ५ श्यामाक ६ श्यामक

गोषद्=आदयः ५,२,६२ गोषद्-आदि १३ गोषद् -

१ इषेत्वा २ मातरिश्वन् ३ देवस्यत्वा ४ देवीरापः ५ देवीन्धियम्(दैवीन्धियम्) ६ रक्षोहण

७ युञ्जान ८ अञ्जन ९ प्रभूत १० कृशानु

गौर=आदयः ४,१,४१ गौर=आदि १४९ गौर -

१ मत्स्य २ मनुष्य ३ शृङ्ग ४ पिङ्गल ५ हय ६ गवय ७ मुकय ८ ऋश्य ९ तूण

१० द्रुण ११ द्रोण १२ हरिण १३ कोकण(काकण) १४ पटर १५ उणक १६ कुवल

१७ बिम्ब १८ बदर १९ फर्करक(कर्करक) २० तर्कार २१ शर्कार २२ पुष्कर २३ सलद

२४ शष्कण्ड २५ सनन्द २६ सुषम २७ सुषव २८ अलिन्द २९ गडुल ३० षाण्डश

३१ आनन्द ३२ आश्वत्थ ३३ सृपाट ३४ आखक(आपच्चिक) ३५ शष्कुल ३६ सूर्य(सूर्म)

३७ सूच ३८ यूष(पूष) ३९ यूथ ४० सूप ४१ मेथ ४२ वल्लक ४३ धातक(घातक) ४४ सल्लक

४५ मालत ४६ साल्वक ४७ वेतस ४८ वृक्ष(वृष) ४९ अतस ५० उभय ५१ भृङ्ग ५२ मह

५३ छेद ५४ पेश ५५ श्वन् ५६ तक्षन् ५७ अनडुही ५८ अनड्वाही ५९ एषणः करणे

६० देहल ६१ काकादन ६२ गवादन ६३ तेजन ६४ रजन ६५ लवण ६६ औद्गाहमानि

६७ पारक ६८ अयःस्थूण ६९ भौरिकि ७० भौलिकि ७१ भौलिङ्गि ७२ यान(पान) ७३ मेध

७४ आलजि ७५ आलब्धि ७६ आलक्षिकेवाल ७७ आपक ७८ आरट ७९ नट ८० टोट ८१ नोट

८२ शातन ८३ पोतन ८४ पातन ८५ पाटन(पानट) ८६ आस्तरण ८७ अधिकरण ८८ अधिकार

८९ प्रत्यवरोहिणी ९० सेचन ९१ सुमङ्गलात् संज्ञायाम् ९२ अण्डर ९३ सुन्दर

९४ मन्थर ९५ मङ्गल ९६ पट ९७ पिण्ड ९८ शण्ड ९९ ऊर्द १०० गुर्द १०१ शम १०२ सूद

१०३ हृद(हृद्) १०४ पाण्ड १०५ भाण्ड(भाण्डल) १०६ लोहाण्ड १०७ कदर १०८ कन्दर

१०९ तरुण ११० तलुन १११ कल्माष ११२ बृहत् ११३ महत् ११४ सोम ११५ सौधर्म

११६ रेवती नक्षत्रे ११७ विकल ११८ निष्कल ११९ पुष्कल १२० कटात् श्रोणिवचने

१२१ हरीतकी १२२ कोशातकी १२३ शामी १२४ वरी १२५ शरी १२६ पृथिवी १२७ क्रोष्टु

१२८ पितामह

गौर=आदयः ६,२,१९४ गौर=आदि ११ गौर -

१ तैष २ तैल ३ लेट ४ लोट ५ जिह्वा ६ कृष्णा ७ कन्या ८ गुध ९ कल्प

ग्रह=आदयः ३,१,१३४ ग्रहि ३० ग्राही -

१ उत्साही २ उद्दासी ३ उद्भासी ४ स्थायी ५ मन्त्री ६ संमर्दी ७ निश्रावी ८ निवापी

९ निशायी १० अव्याहारी ११ असंव्याहारी १२ अव्राजी १३ अवादी १४ अवासी

१५ अहारी १६ अविनायी १७ अविशयी १८ अविषयी १९ विशयी (विशयी विषयी देशे)

२० अभिभावी भूते २१ अपराधी २२ उपरोधी २३ परिभवी २४ परिभावी

घोष=आदयः ६,२,८५ घोष=आदि १६ घोष -

१ घट(कट) २ वल्लभ ३ ह्रद ४ बदरी ५ पिङ्गल ६ पिशङ्ग ७ माला ८ रक्षा ९ कूट

१० शाल्मली ११ अश्वत्थ १२ तृण १३ शिल्पी १४ मुनि

च=आदयः १,४,५७ च=आदि १४९ च आकृतिगणः

१ वा २ ह ३ अह ४ एव ५ एवम् ६ नूनम् ७ शश्वत् ८ युगपत् ९ भूयस् १० कूपत्

११ कुवित् १२ नेत् १३ चेत् १४ चण् १५ कच्चित् १६ यत्र १७ तत्र १८ हन्त १९ माकिम्

२० माकीम् २१ माकिर् २२ नकिम् २३ नकीम् २४ नकिर् २५ माङ् २६ नञ् २७ तावत्

२८ यावत् २९ त्वा ३० त्वे ३१ त्वै ३२ द्वै ३३ रै ३४ श्रौषट् ३५ वौषट् ३६ वषट् ३७ स्वाहा

३८ स्वधा ३९ ओम् ४० तथाहि ४१ खलु ४२ अथ ४३ सु ४४ सुष्ठु ४५ स्म ४६ अ

४७ इ ४८ उ ४९ ऋ ५० लृ ५१ ए ५२ ऐ ५३ ओ ५४ औ ५५ उञ् ५६ उकञ्

५७ वेलायाम् ५८ मात्रायाम् ५९ यथा ६० यत् ६१ तत् ६२ किम् ६३ वधा(वध्वा) ६४ धिक्

६५ हाहा ६६ हेहै(हहे) ६७ पाट् ६८ प्याट् ६९ आहो ७० हो ७१ अहो ७२ नो(नौ)

७३ अथो ७४ ननु ७५ मन्ये ७६ मिथ्या ७७ असि ७८ ब्रूहि ७९ नु ८० इव ८१ इति

८२ वत् ८३ वात् ८४ चन ८५ बत ८६ सम् ८७ वशम् ८८ शिकम् ८९ सनुकम्

९० छम्बट्(छंवट्, छंवट) ९१ शङ्के ९२ शुकम् ९३ खम् ९४ सनात् ९५ नहिकम्

९६ सत्यम् ९७ ऋतम् ९८ इद्धा ९९ अद्धा १०० नोचेत् १०१ नचेत् १०२ नहि १०३ कथम्

१०४ कुतः १०५ कुत्र १०६ अव १०७ अनु १०८ ह १०९ हे ११० है १११ आहोस्वित् ११२ शम्

११३ खम् ११४ दिष्ट्या ११५ पशु ११६ वट् ११७ सह ११८ अनुषट् ११९ आनुषक् १२० अङ्ग १२१ फट्

१२२ अये १२३ अरे १२४ वात्(चाटु) १२५ कुम् १२६ खुम् १२७ घुम् १२८ अम् १२९ ईम् १३० सीम्

१३१ सि १३२ वै १३३ उपसर्गविभक्तिस्वरप्रतिरूपकाः च निपाताः

च=आदयः ८,१,५८ च=आदि ५ च -

१ वा २ ह ३ अह ४ एव

चारु=आदयः ६,२,१६० चारु=आदि ११ चारु -

१ साधु २ यौधकि(यौधिक) ३ अनङ्गमेजय ४ वदान्य ५ अकस्मात् ६ विकारसदृशे व्यस्ते

समस्ते ७ गृहपति ८ गृहपतिक

चिहण=आदयः ६,२,१२५ चिहण=आदि १० चिहण -

१ मदुर(मडर) २ मद्रुमर(मद्गुर) ३ वैतुल ४ पटत्क ५ बैडालिकर्णक ६ कुक्कुट

७ चिक्कण ८ चित्कण

चुर=आदयः ३,१,२५ चुर=आदि ३९५ चुर(स्तेये) धातुगणः

चूर्ण=आदयः ६,२,१३४ चूर्ण=आदि १२ चूर्ण -

१ करिव २ करिप ३ शाकिन ४ शाकट ५ द्राक्षा ६ तूस्त ७ कुन्दुम ८ दलप ९ चक्कन

१० चौल

छत्र=आदयः ४,४,६२ छत्र=आदि २२ छत्र -

१ शिक्षा २ प्ररोह ३ स्था ४ बुभुक्षा ५ चुरा ६ तितिक्षा ७ उपस्थान ८ कर्मन् ९ विश्वधा

१० तपस् ११ सत्य १२ अनृत १३ विशिखा १४ भक्षा १५ पुरोडा १६ विक्षा १७ चुक्षा १८ मन्द्र

छात्रि=आदयः ६,२,८६ छात्रि=आदि ७ छात्रि -

१ पेलि २ भाण्डि ३ व्याडि ४ आखण्डि ५ आटि ६ गोमि

छेद=आदयः ५,१,६४ छेद=आदि १७ छेद -

१ भेद २ द्रोह ३ दोह ४ नर्ति(नर्त) ५ कर्ष ६ तीर्थ ७ संप्रयोग ८ प्रयोग ९ विप्रकर्ष १० प्रेषण ११ संप्रश्न १२ विप्रश्न १३ विकर्ष १४ विराग विरङ्गम् च

जक्षिति=आदयः ६,१,६ जक्षिति=आदि ७ जक्ष(भक्षहसनयोः) धात्ववान्तरगणः(अदादौ)

जुहोति=आदयः २,४,७५ जुहोति=आदि २५ हु(दानादनयोः) धातुगणः

ज्वल=आदयः ३,१,१४० ज्वलिति ३० ज्वल(दीप्तौ) धात्ववान्तरगणः(भ्वादौ)

ञ्य=आदयः ५,३,११९ ञ्य=आदि ७ ञ्य प्रत्ययाः

१ ञ्यट् २ टेण्यण् ३ छ ४ अण् ५ अञ् ६ यञ्

डतर=आदयः ७,१,२५ डतर=आदि ५ डतर सर्वादि=अवान्तरगणः

१ डतम २ इतर ३ अन्य ४ अन्यतर

तक्षशिल=आदयः ४,३,९३ तक्षशिल=आदि १४ तक्षशिल -

१ वत्सोद्धरण २ कैर्मेदुर ३ ग्रामणी ४ छगल ५ क्रोष्टुकर्ण ६ सङ्कुचित ७ किन्नर ८ काण्डधार ९ पर्वत १० अवसान ११ बर्बर १२ कंस

त(न्)=आदयः ३,१,७९ तन्-आदि १० तनु(विस्तारे) धातुगणः

तनोति=आदयः ६,४,३७ तनोति=आदि ८ तनु(विस्तारे) धात्ववान्तरगणः(तनादौ)

१ क्षणु(हिंसायाम्) २ क्षिणु(हिंसायाम्) ३ ऋणु(गतौ) ४ तृणु(अदने) ५ वनु(याचने)
६ मनु(अवबोधने)

तसि(ल्)=आदयः ६,३,३५ तसिल्-आदि ६५ तसिल् तद्धितसंज्ञकेष्वेकदेशप्रत्ययाः

१ त्रल् २ दा ३ दानीम् ४ र्हिल् ५ थाल् ६ थमु ७ था ८ अस्ताति ९ आति १० एनप्
११ आच् १२ आहि १३ असि १४ तिल् १५ तातिल् १६ धा १७ ध्यमुञ् १८ पाशप्
१९ अन् २० ञ २१ कन् २२ आकिनिच् २३ चरट् २४ रूप्य २५ तमप् २६ इष्ठन्
२७ ईयसुन् २८ रूपप् २९ कल्पप् ३० देश्य ३१ देशीयर् ३२ जातीयर् ३३ क ३४ अकच्
३५ घन् ३६ इलच् ३७ अडच् ३८ वुच् ३९ र ४० डुपच् ४१ ष्टरच् ४२ डतरच् ४३ डतमच्
४४ ढ ४५ यत् ४६ छ ४७ अण् ४८ ठक् ४९ ईकक् ५० ञ्य ५१ ञ्यट् ५२ टेण्यण्
५३ अञ् ५४ वुन् ५५ ख ५६ आमु ५७ अमु ५८ कृत्वसुच्

तारका=आदयः ५,२,३६ तारका=आदि ८८ तारका आकृतिगणः

१ पुष्प २ कर्णक ३ मञ्जरी ४ ऋजीष ५ क्षण ६ सूत्र ७ मूत्र ८ पुरीष ९ उच्चार
१० प्रचार ११ विचार १२ कुड्मल १३ कण्टक १४ मुसल १५ कुसुम १६ कुतूहल
१७ स्तबक १८ किसलय १९ पल्लव २० खण्ड २१ वेग २२ निद्रा २३ बुभुक्षा २४ धेनुष्या
२५ पिपासा २६ श्रद्धा २७ अभ्र २८ पुलक २९ अङ्गारक ३० द्रोह ३१ दोह ३२ सुख
३३ दुःख ३४ उत्कण्ठा ३५ भर ३६ व्याधि ३७ वर्मन् ३८ गौरव ३९ शास्त्र ४० तरङ्ग
४१ तिलक ४२ चन्द्रक ४३ अन्धकार ४४ गर्व ४५ हर्ष ४६ उत्कर्ष ४७ रण ४८ कुवलय
४९ गर्ध ५० क्षुध् ५१ सीमन्त ५२ ज्वर ५३ रोग ५४ रोमाञ्च ५५ पण्डा ५६ कज्जल
५७ तृष् ५८ कोरक ५९ कल्लोल ६० स्थपुट ६१ कञ्चुक ६२ शृङ्गार ६३ अङ्कुर
६४ शेवल ६५ बकुल ६६ श्वभ्र ६७ आराल ६८ कर्दम ६९ कन्दल ७० मूर्छा ७१ अङ्गार

७२ हस्तक ७३ प्रतिबिम्ब ७४ प्रत्यय ७५ दीक्षा ७६ गर्ज ७७ गर्भात् अप्राणिनि

ताल=आदयः ४,३,१५२ ताल=आदि ८ ताल -

१ बार्हिण २ इन्द्रालिश ३ इन्द्रादृश ४ इन्द्रयुध ५ चय ६ श्यामाक

तिक=आदयः ४,१,१५४ तिक=आदि ३८ तिक -

१ कितव २ संज्ञा ३ बाला ४ शिखा ५ उरस्(उरश) ६ शाठ्य ७ सैन्धव ८ रूप्य ९ ग्राम्य

१० नील ११ अमित्र १२ गौकक्ष्य १३ कुरु १४ देवरथ १५ औरस १६ कौरव्य १७ भौरिकि

१८ भौलिकि १९ चौपयत २० चैतयत २१ शीकयत(शैकयत) २२ वाजवत २३ चन्द्रमस्

२४ शुभ २५ गङ्गा २६ वरेण्य २७ सुपामन् २८ वह्यका २९ खल्या(खल्यका) ३० वृष

३१ लोमक ३२ उदन्य ३३ यज्ञ

तिककितव=आदयः २,४,६८ तिककितव=आदि ११ तिककितवाः -

१ वङ्खरभण्डीरथाः २ उपकलमकाः ३ पफकनरकाः ४ बकनखगुदपरिणद्धाः

५ लङ्कशान्तमुखाः ६ उत्तरशलङ्कटाः ७ कृष्णाजिनकृष्णसुन्दराः ८ अग्निवेशदेशेरुकाः

तिष्ठद्गु=आदयः २,१,१७ तिष्ठद्गु-प्रभृति ३२ तिष्ठद्गु -

१ वहद्गु २ आयतीगवम् ३ खलेयवम् ४ खलेबुसम् ५ लूनयवम् ६ लूयमानयवम्

७ पूयमानयवम् ८ संहृतयवम् ९ संह्रियमाणयवम् १० संहृतबुसम् ११ समभूमि

१२ समपदाति १३ सुषमम् १४ विषमम् १५ दुःषमम् १६ निःषमम् १७ आयतीसमम्

१८ प्रोढम् १९ पापसमम् २० पुण्यसमम् २१ प्राह्णम् २२ प्ररथम् २३ प्रदक्षिणम् २४

अपरदक्षिणम् २५ संप्रति २६ असंप्रति

तुज=आदयः ६,१,७ तुज=आदि ० तुज(हिंसायाम्) आकृतिगणः

तुद=आदयः ३,१,७७ तुद=आदि १४३ तुद(व्यथने) धातुगणः

तुन्द=आदयः ५,२,११७ तुन्द=आदि ६ तुन्द -

१ उदर २ पिचण्ड ३ यव ४ व्रीहि ५ स्वाङ्गात् विवृद्धौ

तृण=आदयः ४,२,८० तृण १६ तृण -

१ नड २ मूल ३ वन ४ पर्ण ५ वर्ण ६ वराण ७ बिस ८ पुल ९ फल १० अर्जुन

११ सुवर्ण १२ बल १३ चरण १४ बुस

तौल्वलि=आदयः २,४,६१ तौल्वलि ३२ तौल्वलि -

१ धारणि २ पारणि ३ रावणि ४ दैलीपि ५ कैवति ६ वार्कलि ७ दैवमित्रि(दैवमति)

८ दैवयज्ञि ९ चाफट्टकि १० बैल्वकि ११ आनुहारति(आनुराहति) १२ पौष्करसादि

१३ आनुरोहति १४ आनुति १५ प्रादोहनि १६ प्राडाहति १७ दान्धकि १८ वैशीति

१९ आसिनासि २० आहिंसि २१ आसुरि २२ आसिबन्धकि २३ पौष्पि २४ कारेणुपालि

२५ वैकर्णि २६ वैरकि २७ वैहति

त्यद्=आदयः १,१,७४ त्यद्-आदि ७ त्यद् सर्वादि=अवान्तरगणः

१ तद् २ यद् ३ एतद् ४ अदस् ५ इदम् ६ एक

दण्ड=आदयः ५,१,६६ दण्ड=आदि १५ दण्ड -

१ मुसल २ मधुपर्क ३ कशा ४ अर्घ ५ मेघ ६ मेधा ७ सुवर्ण ८ उदक ९ वध

१० गुहा ११ भाग १२ इभ १३ भङ्ग

दधिपय(स्)=आदयः २,४,१४ दधिपयस्-आदि १९ दधिपयसी -

१ सर्पिर्मधुनी २ मधुसर्पिषी ३ ब्रह्मप्रजापती ४ शिववैश्रवणौ ५ परिव्राजककौशिकौ

(परिव्राट्कौशिकौ) ६ प्रवर्ग्योपसदौ ७ इध्मबर्हिषी ८ दीक्षातपसी ९ श्रद्धातपसी १०
मेधातपसी ११ अध्ययनतपसी १२ आद्यवसाने १३ श्रद्धामेधे १४ ऋक्सामे १५ वाङ्मनसे

दामनि=आदयः ५,३,११६ दामनि=आदि १९ दामनि -

१ औलपि २ बैजवापि ३ औदकि ४ औदङ्कि ५ आच्युतन्ति(अच्युतन्ति) ६ शाकुन्तकि
७ आकिदन्ति(आक्तिदन्ति) ८ औडवि ९ काकदन्ति १० सार्वसेनि ११ बिन्दु १२ बैन्दवि
१३ तुलभ १४ मौञ्जायन १५ काकन्दि

दासीभार=आदयः ६,२,४२ दासीभार ७ दासीभारः -

१ देवहूतिः २ देवभूतिः ३ देवलातिः ४ वसुनीतिः ५ औषधिः ६ चन्द्रमाः

दि(श्)=आदयः ४,३,५४ दिश्-आदि २७ दिश् -

१ वर्ग २ पूग ३ गण ४ पक्ष ५ धाय्य ६ मित्र ७ मेधा ८ अन्तर ९ पथिन् १० अलीक
११ उखा १२ साक्षिन् १३ देश १४ आदि १५ अन्त १६ मुख १७ जघन १८ मेघ
१९ उदकात् संज्ञायाम् २० न्याय २१ वंश २२ वेश २३ काल २४ आकाश

दिव्=आदयः ३,१,६९ दिव्-आदि १३७ दिवु(क्रीडाविजिहीषा...) धातुगणः

दृढ=आदयः ५,१,१२३ दृढ=आदि २३ दृढ -

१ वृढ २ परिवृढ ३ भृश ४ कृश ५ वक्र ६ शुक्र ७ चुक्र ८ आम्र ९ कृष्ट १० ताम्र
११ शीत १२ उष्ण १३ जड १४ बधिर १५ पण्डित १६ मधुर १७ मूर्ख १८ मूक
१९ समः मतिमनसोः २० जवन

देवपथ=आदयः ५,३,१०० देवपथ=आदि १९ देवपथ आकृतिगणः

१ हंसपथ २ वारिपथ ३ रथपथ ४ स्थलपथ ५ करिपथ ६ अजपथ ७ राजरथ ८ शतपथ

९ सिन्धुपथ १० सिद्धगति ११ उष्ट्रग्रीव १२ वामरज्जु १३ हस्त १४ इन्द्र

१५ पुष्प १६ मत्स्य

द्युत=आदयः १,३,९१ द्युत् २३ द्युत(दीप्तौ) धात्ववान्तरगणः(भ्वादौ)

द्वार=आदयः ७,३,४ द्वार=आदि १० द्वार -

१ स्वर २ स्वग्राम(स्वाध्याय) ३ व्यल्कश ४ स्वस्ति ५ स्वर् ६ स्वादुमृदु ७ श्वस् ८ श्व

द्विदण्डि=आदयः ५,४,१२८ द्विदण्डि=आदि २१ द्विदण्डि -

१ द्विमुसलि २ उभाञ्जलि ३ उभयाञ्जलि ४ उभदन्ति ५ उभयदन्ति ६ उभयहस्ति

७ उभकर्णि ८ उभयकर्णि ९ उभपाणि १० उभयपाणि ११ उभबाहु १२ एकपदि

१३ प्रोष्ठपदि १४ आढ्यपदि(आच्यपदि) १५ सपदि १६ विकुच्यकर्णि १७ अन्तेवासि

द्वि=आदयः ५,३,२ द्वि=आदि ५ द्वि सर्वादि=अवान्तरगणः

१ युष्मद् २ अस्मद् ३ भवत् ४ किम्

धूम=आदयः ४,२,१२७ धूम=आदि ४६ धूम -

१ षडण्ड २ शशादन ३ अर्जुनाव ४ माहकस्थली ५ आनकस्थली ६ माहिषस्थली

७ अट्टस्थली ८ मद्रुकस्थली ९ समुद्रस्थली १० दाण्डायनस्थली ११ विदेह १२ राजगृह

१३ सात्रासाह १४ शष्प १५ मित्रवर्ध्र(मित्रवर्ध) १६ मद्रकूल १७ आजीकूल १८ द्व्याहाव

१९ त्र्याहाव २० संस्फीय २१ बर्बर २२ गर्त २३ आनर्त २४ माठर २५ पाथेय २६ घोष

२७ पल्ली २८ आराज्ञी २९ आवय ३० तीर्थ ३१ कुलात् सौवीरेषु

३२ समुद्रात् नावि मनुष्ये च ३३ अन्तरीप ३४ द्वीप ३५ अरुण ३६ उज्जयनी ३७ पट्टार ३८ साकेत

नड=आदयः ४,१,९९ नड=आदि ७३ नड -

१ चर २ बक ३ मुञ्ज ४ इतिक ५ इतिश ६ उपक ७ एक ८ लमक ९ सप्तल

१० वाजप्य ११ तिक १२ अग्निशर्मन् वृषगणे १३ प्राण १४ नर १५ सायक १६ मित्र

१७ द्वीप १८ पिङ्गर १९ पिङ्गल २० किङ्कर २१ किङ्कल २२ कातर २३ काश्यप

२४ काश्य २५ काल्य(काव्य) २६ अज २७ अमुष्य २८ अमित्र २९ लिगु ३० चित्र ३१ कुमार

३२ क्रोष्टुक्रोष्टम् च ३३ लोह ३४ स्तम्भ ३५ शिंशपा ३६ अग्र ३७ तृण ३८ शकट

३९ सुमनस् ४० सुमत ४१ मिमत ४२ जलन्धर ४३ अध्वर ४४ युगन्धर ४५ हंसक

४६ दण्डिन् ४७ हस्तिन् ४८ पिण्ड ४९ चमसिन् ५० सुकृत्य ५१ स्थिरक ५२ ब्राह्मण

५३ चटक ५४ बदर ५५ अश्वल ५६ खरप ५७ इन्ध ५८ अस्त्र ५९ कामुक ६० ब्रह्मदत्त

६१ उदुम्बर ६२ शोण ६३ अलोह

नड=आदयः ४,२,९१ नड=आदि १२ नड -

१ प्लक्ष २ बिल्व ३ वेणु ४ वेत्र ५ वेतस ६ इक्षु ७ काष्ठ ८ कपोत

९ क्रुञ्चा ह्रस्वत्वम् च १० तक्षन् नलोपश्च

नदी=आदयः ४,२,९७ नदी=आदि १६ नदी -

१ मही २ वाराणसी ३ श्रावस्ति ४ कौशाम्बि ५ वनकौशाम्बि ६ काशफरी ७ पूर्वनगरी

८ पाठा ९ माया १० शाल्वा ११ दार्वा १२ सेतकी

नन्दि=आदयः ३,१,१३४ नन्दि २५ नन्दनः -

१ वसनः २ मदनः ३ दूषणः ४ साधनः ५ वर्धनः ६ शोभनः ७ सहनः ८ तपनः ९ दमनः

(सहितपिदमः संज्ञायाम्) १० जल्पनः ११ रमणः १२ सङ्क्रन्दनः १३ सङ्कर्षणः १४ संहर्षणः

१५ जनार्दनः १६ यवनः १७ विभीषणः १८ लवनः १९ चित्तविनाशनः २० कुलदमनः २१
शत्रुदमनः

निज्=आदयः ७,४,७५ निज् ३ णिजिर्(शौचपोषणयोः) धात्ववान्तरगणः(जुहोत्यादौ)

निरुदक=आदयः ६,२,१८४ निरुदक=आदि १४ निरुदक आकृतिगणः

१ निरुपल(निरुलप) २ निर्मक्षिक ३ विर्मशक ४ निष्कालक ५ निष्कालिक ६ दुस्तरीप

७ निस्तरीप ८ निरजिन ९ उदजिन १० उपाजिन

निष्क=आदयः ५,१,२० निष्क=आदि ७ निष्क -

१ पण २ पाद ३ माष ४ वाह ५ द्रोण ६ षष्टि

न्यङ्कु=आदयः ७,३,५३ न्यङ्कु=आदि २३ न्यङ्कु -

१ मद्गु २ भृगु ३ दूरेपाक ४ फलेपाक ५ क्षणेपाक ६ दूरेपाका ७ दूरेपाकु ८ फलेपाकु

९ तक्र १० वक्र(चक्र) ११ व्यतिषङ्ग १२ अनुषङ्ग १३ उपसर्ग १४ श्वपाक १५ सांसपाक

१६ मूलपाक १७ कपोतपाक १८ उलूकपाक १९ न्यग्रोध

पक्ष=आदयः ४,२,८० पक्ष ३७ पक्ष -

१ तुक्ष २ तुष ३ कुण्ड ४ अण्ड ५ कम्बलिका ६ वलिक ७ चित्र ८ अस्ति ९ कुम्भ

१० सीरक ११ सरक १२ सकल १३ सरस १४ समल १५ अतिश्वन् १६ रोमन्

१७ हस्तिन् १८ मकर १९ लोमक २० शीर्ष २१ निवात २२ पाक २३ सिंहक(सहक)

२४ सुवर्णक २५ हंसक २६ हिंसक २७ कुत्स २८ बिल २९ खिल ३० यमल ३१ हस्त ३२ कला

पच=आदयः ३,१,१३४ पच=आदि ३२ पच आकृतिगणः

१ वच २ वप ३ वद ४ चल ५ पत ६ नदट् ७ भषट् ८ प्लवट् ९ चरट् १० गरट्

११ चोरट् १२ गाहट् १३ सूरट् १४ देवट् १५ दोषट् १६ रज(जर) १७ मर

१८ सेव १९ मेष २० कोप(कोश/क्रोध) २१ मेध २२ नर्त २३ व्रण २४ दर्श २५ सर्प

२६ दर्प २७ जारभर २८ श्वपच

पद्=आदयः ६,१,१७१ पद्-आदि ६ पद् -

१ दत् २ नस् ३ मास् ४ हृद् ५ निश्

पर्प=आदयः ४,४,१० पर्प=आदि ८ पर्प -

१ अश्व २ अश्वत्थ ३ रथ ४ जाल ५ न्यास ६ व्याल ७ पाद

पर्शु=आदयः ५,३,११७ पर्शु=आदि १२ पर्शु -

१ असुर २ रक्षस् ३ बाह्लीक ४ वस्यस् ५ वसु ६ मरुत् ७ सत्वत् ८ पिशाच ९ अशनि

१० कार्षापण

पलदी=आदयः ४,२,११० पलदी=आदि १८ पलदी -

१ परिषद् २ रोमक ३ वाहीक ४ कलकीट ५ बहुकीट ६ जलकीट ७ कमलकीट

८ कमलभिदा ९ गौष्ठी १० नैकती ११ परिखा १२ शूरसेन १३ गोमती १४ पटच्चर

१५ यकृल्लोम

पलाश=आदयः ४,१,१४१ पलाश=आदि ९ पलाश -

१ खदिर २ शिंशपा ३ स्पन्दन(स्यन्दन) ४ पुलाक ५ करीर ६ शिरीष ७ यवास

पात्रेसमित=आदयः २,१,४८ पात्रेसमित=आदि ३३ पात्रेसमिताः आकृतिगणः

१ पात्रेबहुलाः २ उदुम्बरमशकः(उदुम्बरमशकाः) ३ उदुम्बरकृमिः ४ अवटकच्छपः

५ कूपमण्डूकः ६ कुम्भमण्डूकः ७ उदपानमण्डूकः ८ नगरकाकः ९ मातरिपुरुषः

१० पिण्डीशुरः(पिजीशुरः) ११ पितरिशूरः १२ गेहेशूरः १३ गेहेक्ष्वेडी १४ गेहेविजिती

१५ गेहेव्याडः १६ गेहेमेही १७ गेहेदाही १८ गेहेदृष्टः १९ गर्भेतृप्तः २० आखनिकबकः

२१ गोष्ठेशूरः २२ गोष्ठेक्ष्वेडी २३ गोष्ठेपटुः २४ गोष्ठेपण्डितः २५ गोष्ठेप्रगल्भः २६ कर्णेचुरुचुरा

पाम(न्)=आदयः ५,२,१०० पामन्-आदि १४ पामन् -

१ वामन् २ वेमन् ३ हेमन् ४ श्लेष्मन् ५ कद्रू(कद्रु) ६ बलि ७ सामन् ८ कृमि ९ अङ्गात् कल्याणे १० शाकीपलालीदद्रूणां ह्रस्वत्वं च ११ लक्ष्म्याः अट् च

पारस्कर=आदयः ६,१,१५७ पारस्कर-प्रभृति ७ पारस्करः -

१ कारस्करो वृक्षः २ रथस्पा(रथस्या) नदी ३ किष्कुः प्रमाणम्

४ तद्बृहतोः करपत्योः चोरदेवतयोः सुट् तलोपश्च

पाश=आदयः ४,२,४९ पाश=आदि १३ पाश -

१ तृण २ धूम ३ वात ४ अङ्गार ५ पाटल ६ पोत ७ गल ८ पिटक ९ शकट १० हल ११ वन

पिच्छ=आदयः ५,२,१०० पिच्छ=आदि ९ पिच्छ(पिच्छा) -

१ उरस् २ धुवक ३ ध्रुवक ४ जटाघटकालाः क्षेपे ५ वर्ण ६ उदक ७ पङ्क

पीलु=आदयः ५,२,२४ पीलु=आदि ८ पीलु -

१ कर्कन्धु(कर्कन्धू) २ शमी ३ करीर ४ कुवल ५ बदर ६ अश्वत्थ ७ खदिर

पुरोहित=आदयः ५,१,१२८ पुरोहित=आदि ३६ पुरोहित -

१ राजन् असे २ ग्रामिक ३ पिण्डिक ४ सुहित ५ बाल ६ मन्द(बालमन्द)

७ दण्डिक ८ वर्मिक ९ कर्मिक १० धर्मिक ११ सितिक(सीलिक) १२ सूतिक १३ अञ्जलिक

१४ अन्तलिक(अञ्जनिक) १५ रूपिक(ऋषीक) १६ पुत्रिक १७ अविक १८ पर्षिक

१९ पथिक २० चर्मिक २१ प्रतीक २२ सारथि २३ आस्तिक २४ सूचिक

२५ सूचक(संरक्षसूचक) २६ नास्तिक २७ अजानिक २८ शाक्वर २९ नगर ३० चूडिक

पुष=आदयः ३,१,५५ पुष=आदि ६५ पुष(पुष्टौ) धात्ववान्तरगणः(दिवादौ)

पुष्कर=आदयः ५,२,१३५ पुष्कर=आदि ३२ पुष्कर -

१ पद्म २ उत्पल ३ तमाल ४ कुमुद ५ नड ६ कपित्थ ७ बिस ८ मृणाल

९ शालूक १० विगर्ह ११ करीष १२ शिरीष १३ यवास १४ प्रवास(प्रवाह) १५ हिरण्य

१६ कल्लोल १७ तट १८ तरङ्ग १९ पङ्कज २० सरोज २१ राजीव २२ नालीक २३ सरोरुह

२४ अरविन्द २५ अम्भोज २६ अब्ज २७ कमल २८ पयस्

पृथु=आदयः ५,१,१२२ पृथु=आदि ३० पृथु -

१ मृदु २ महत् ३ पटु ४ तनु ५ लघु ६ बहु ७ साधु ८ आशु ९ उरु १० गुरु ११ खण्ड

१२ दण्ड १३ चण्ड १४ अकिञ्चन १५ बाल १६ होड १७ पाक १८ वत्स १९ मन्द २० ह्रस्व

२१ दीर्घ २२ प्रिय २३ वृष २४ ऋजु २५ क्षिप्र २६ क्षुद्र २७ अणु

पृषोदर=आदयः ६,३,१०९ पृषोदर=आदि ९ पृषोदर आकृतिगणः

१ पृषोत्थान २ बलाहक ३ जीमुत ४ श्मशान ५ उलूखल ६ पिशाच ७ बृसी

पैल=आदयः २,४,५९ पैल=आदि २१ पैल आकृतिगणः

१ शालङ्कि २ सात्यकि ३ सात्यङ्कामि(सात्यकामि) ४ राहवि ५ रावणि ६ औदव्रजि

७ औदमेघि ८ औदमज्जि(औदव्यज्रि) ९ औदभृज्जि १० दैवस्थानि ११ राहक्षति(राह, क्षति)

१२ भौलिङ्गि १३ राणि १४ औदन्यि १५ औद्गाहमानि १६ औदशुद्धि(औदबुद्धि)

१७ तद्राजात् च अणः

प्रगदि(न्)=अदयः ४,२,८० प्रगदिन् १० प्रगदिन् -

१ मगदिन् २ मददिन् ३ कविल(कलिव) ४ खण्डित ५ गदित ६ चूडार ७ मडार ८ कोविदार

प्रज्ञा=आदयः ५,४,३८ प्रज्ञा=आदि ३३ प्रज्ञा -

१ वणिज् २ उशिज् ३ उष्णिज् ४ प्रत्यक्ष ५ विद्वस् ६ विदन् ७ षोडन् ८ मनस्

९ श्रोत्रं शरारे १० जुह्वत् ११ कृष्ण मृगे १२ चिकीर्षत् १३ चोर १४ योध १५ चक्षुस्

१६ वसु १७ एनस् १८ मरुत् १९ क्रुञ्च २० सत्वत् २१ दशार्ह २२ व्याकृत २३ असुर

२४ रक्षस् २५ पिशाच २६ अशनि २७ कार्षापण २८ देवता

प्रतिजन=आदयः ४,४,९९ प्रतिजन=आदि १२ प्रतिजन -

१ इदंयुग २ संयुग ३ समयुग ४ परयुग ५ परकुल ६ परस्यकुल ७ अमुष्यकुल

८ विश्वजन ९ महाजन १० पञ्चजन

प्रवृद्ध=आदयः ६,२,१४७ प्रवृद्ध=आदि ७ प्रवृद्धम्(यानम्) -

१ प्रवृद्धः वृषलः २ प्रयुता सूष्णवः (प्रयुक्ताः सक्तवः) ३ अवहिताः भोगेषु ४ खट्वारूढाः

५ कविशस्ताः

प्र=आदयः १,४,५८ प्र=आदि २२ प्र -

१ परा २ अप ३ सम् ४ अनु ५ अव ६ निस् ७ निर् ८ दुस् ९ दुर् १० वि

११ नि १२ अधि १३ अपि १४ अति १५ सु १६ उद् १७ अभि १८ प्रति १९ परि २० उप

प्रिया=आदयः ६,३,३४ प्रिया=आदि १५ प्रिया -

१ मनोज्ञा २ कल्याणी ३ सुभगा ४ दुर्भगा ५ भक्तिः ६ सचिवा ७ स्वा ८ क्षान्ता ९ समा

१० चपला ११ दुहिता १२ वामना १३ तनया

प्रेक्षा=आदयः ४,२,८० प्रेक्षा २१ प्रेक्षा -

१ फलका(हलका) २ बन्धुका ३ ध्रुवका ४ क्षिपका ५ न्यग्रोध ६ इक्कट

७ सङ्कट ८ कट ९ कूप १० बुक ११ पुक १२ पुट १३ मह १४ परिवाप १५ यवाष(यवास)

१६ गर्त १७ कूपक १८ हिरण्य

प्लक्ष=आदयः ४,३,१६४ प्लक्ष=आदि ८ प्लक्ष -

१ न्यग्रोध २ अश्वत्थ ३ इङ्गुदि ४ शिग्रु ५ रुरु ६ कक्षतु ७ बृहती

पू=आदयः ७,३,८० पू=आदि २१ पूञ्(पवने) धात्ववान्तरगणः(क्र्यादौ)

पूर्व=आदयः ७,१,१६ पूर्व=आदि ९ पूर्व -

१ पर २ अवर ३ दक्षिण ४ उत्तर ५ अपर ६ अधर ७ स्व ८ अन्तर

फण=आदयः ६,४,१२५ फण=आदि ७ फण(गतौ) धात्ववान्तरगणः(भ्वादौ)

बल=आदयः ४,२,८० बल १३ बल -

१ चुल २ नल ३ दल ४ वट ५ लकुल ६ उरल ७ पुल(पुख) ८ मूल ९ उल १० वन ११ कुल

बल=आदयः ५,२,१३६ बल=आदि १७ बल -

१ उत्साह २ उद्भास(उद्भाव) ३ उद्वास ४ उद्धास ५ शिखा ६ कुल ७ चूडा

८ कूल ९ आयाम १० व्यायाम ११ उपयाम १२ आरोह १३ अवरोह १४ परिणह १५ युद्ध

बहु=आदयः ४,१,४५ बहु=आदि ४० बहु आकृतिगणः

१ पद्धति २ अञ्चति ३ अङ्कति ४ अंहति ५ शकटि ६ शक्तिः शस्त्रे ७ वारि ८ राति

९ राधि १० शाधि ११ अहि १२ कपि १३ यष्टि १४ मुनि १५ कृदिकारात् अक्तिनः

१६ सर्वतः अक्तिन् अर्थात् इत्येके १७ चण्ड १८ कृपण १९ कमल २० विकट

२१ विशङ्कट २२ भरुज २३ ध्वज २४ चन्द्रभागा नद्याम् २५ उदार २६ पुराण २७ अहन्

२८ क्रोड २९ नख ३० खुर ३१ शिखा ३२ वाल ३३ शफ ३४ गुद

बाहु=आदयः ४,१,९६ बाहु=आदि ५३ बाहु आकृतिगणः

१ उपबाहु २ उपवाकु ३ निवाकु ४ शिवाकु ५ वटाकु ६ उपनिन्दु(उपविन्दु)

७ वृकला ८ चूडा ९ बलाका १० मूषिका ११ कुशला १२ छगला १३ ध्रुवका १४ धुवका

१५ दुर्मित्रा १६ पुष्करसद् १७ अनुहरत् १८ देवशर्मन् १९ अग्निशर्मन् २० सुशर्मन्

२१ कुनामन् २२ सुनामन् २३ पञ्चन् २४ सप्तन् २५ अष्टन् २६ सुधावत् २७ उदञ्चु

२८ शिरस् २९ माष ३० शराविन् ३१ मरीची ३२ शृङ्खलतोदिन् ३३ खरनादिन् ३४ नगरमर्दिन्

३५ प्राकारमर्दिन् ३६ लोमन् ३७ कृष्ण ३८ युधिष्ठिर ३९ अर्जुन ४० साम्ब ४१ गद

४२ प्रद्युम्न ४३ राम ४४ उदकः संज्ञायाम् ४५ सम्भूयोम्भसोः सलोपः च

बिद=आदयः ४,१,१०४ बिद=आदि ५२ बिद -

१ उर्व २ कश्यप ३ कुशिक ४ भरद्वाज ५ उपमन्यु ६ किलात ७ ऋष्टिसेण(ऋषिसेण)

८ ऋतभाग ९ हर्यश्व १० प्रियक ११ आपस्तम्ब १२ शरद्वत् १३ शुनक १४ धेनु

१५ गोपवन १६ शिग्रु १७ बिन्दु(विन्दु) १८ भोगक १९ शमिक २० अश्वावतान २१ श्यामाक

२२ श्यामक २३ श्यावलि २४ श्यापर्ण २५ किन्दास २६ बह्यस्क २७ अर्कजूष(अर्कजुष/अर्कलूष) २८

वध्योग २९ विष्णु ३० प्रतिबोध ३१ रथीतर ३२ रथन्तर ३३ गविष्ठिर ३४ निषाद ३५ शबर

३६ अलस ३७ मठर ३८ सृपाकु ३९ मृदु ४० पुनर्भू ४१ पुत्र ४२ दुहितृ ४३ ननान्दृ

बिल्वक=आदयः ६,४,१५३ बिल्वक=आदि १० बिल्वक नडादि=अवान्तरगणः*कुक्

१ वेणुक २ वेत्रक ३ वेतसक ४ इक्षुक ५ काष्ठक ६ कपोतक ७ तृणक ८ तक्षक

बिल्व=आदयः ४,३,१३६ बिल्व=आदि १३ बिल्व -

१ व्रीहि २ काण्ड ३ मुद्ग ४ मसूर ५ गोधूम ६ इक्षु ७ वेणु ८ गवेधुक ९ पाटली

१० कर्कन्धू ११ कुटीर

ब्राह्मण=आदयः ५,१,१२४ ब्राह्मण=आदि ४९ ब्राह्मण आकृतिगणः

१ वाडव २ मानव ३ अर्हतः नुम् च ४ चोर ५ धूर्त ६ आराधय ७ विराधय ८ उपराधय

९ एकभाव १० द्विभाव ११ त्रिभाव १२ अन्यभाव १३ अक्षेत्रज्ञ १४ संवेशिन् १५ सम्भाषिन्

१६ बहुभाषिन् १७ शीर्षघातिन् १८ विघातिन् १९ विषमस्थ २० परमस्थ २१ मध्यमस्थ

२२ अनीश्वर २३ कुशल २४ चपल २५ निपुण २६ कुतूहल २७ क्षेत्रज्ञ २८ निश्न २९ बालिश

३० अलस ३१ दुष्पुरुष ३२ राजन् ३३ गणपति ३४ अधिपति ३५ गडुल ३६ दायाद

३७ विशस्ति ३८ विषम ३९ विपात ४० सर्ववेदादिभ्यः स्वार्थे

४१ चतुर्वेदस्य उभयपदवृद्धिः च ४२ शौटीर

भर्ग=आदयः ४,१,१७८ भर्ग=आदि ८ भर्ग -

१ करुश २ केकय ३ कश्मीर ४ साल्व ५ सुस्थाल ६ उरस्(उरस) ७ कौरव्य

भस्त्रा=आदयः ४,४,१६ भस्त्रा=आदि ७ भस्त्रा -

१ भरट २ भरण ३ शीर्षभार ४ शीर्षेभार ५ अंसभार ६ अंसेभार

भिक्षा=आदयः ४,२,३८ भिक्षा=आदि १५ भिक्षा -

१ गर्भिणी २ क्षेत्र ३ करीष ४ अङ्गार ५ चर्मन्(चर्मिन्) ६ सहस्र ७ पदाति ८ पद्धति

९ अथर्वन् १० दक्षिणा ११ भूत १२ विषय १३ श्रोत्र

भिदा=आदयः ३,३,१०४ भिदा=आदि २१ भिदा(विदारणे) -

१ छिदा(द्वैधीकरणे) २ विदा ३ क्षिपा ४ गुहा(गिर्योषध्योः) ५ मेधा ६ गोधा ७ आरा शस्त्र्याम्

८ हारा ९ कारा बन्धने १० क्षिया ११ धारा प्रपतने १२ रेखा १३ चूडा १४ पीडा

१५ वपा १६ वसा १७ वज्जा

भीम=आदयः ३,४,७४ भीम=आदि १६ भीम आकृतिगणः

१ भीष्म २ भयानक ३ वह ४ चरु(वहचरु) ५ प्रस्कन्दन ६ प्रपतन(प्रतपन)

७ स्रुव ८ स्रुच् ९ सृष्टि १० रक्षस् ११ शङ्कु १२ सुक(शङ्कुसुक) १३ खलति

भू=आदयः १,३,१ भूव्-आदि २०३९ भू(सत्तायाम्) धातुपाठः

भृञ्=आदयः ७,४,७६ भृञ् ३ डुभृञ्(धारणपोषणयोः) धात्ववान्तरगणः(जुहोत्यादौ)

भृश=आदयः ३,१,१२ भृश=आदि २५ भृश -

१ शीघ्र २ चपल ३ मन्द ४ पण्डित ५ उत्सुक ६ सुमनस् ७ दुर्मनस् ८ उन्मनस् ९ रहस्

१० रोहत् ११ रेहत् १२ संश्चत् १३ तृपत् १४ शश्वत् १५ वेहत् १६ शुचिस् १७ शुचिवर्चस्

१८ अण्डर १९ वर्चस्(अण्डरवर्चस्) २० सुरजस् २१ अरजस्

भौरिकि=आदयः ४,२,५४ भौरिकि=आदि ९ भौरिकि -

१ भौलिकि २ चौपयत ३ चैतयत(चौतयत) ४ काणेय ५ वाणिजक ६ सैकयत ७ वैकयत

मधु=आदयः ४,२,८६ मधु=आदि २८ मधु -

१ बिस २ स्थाणु ३ वेणु ४ कर्कन्धु ५ शमी ६ करीक ७ हिम ८ किशरा

९ मरुत् १० वार्दाली ११ शर १२ इष्टक १३ आसुति १४ शक्ति १५ आसन्दी १६ शकल

१७ आमिषी १८ इक्षु १९ रोमन् २० रुष्टि २१ रुष्य २२ तक्षशिला २३ खड २४ वट

मनोज्ञ=आदयः ५,१,१३३ मनोज्ञ=आदि २६ मनोज्ञ -

१ प्रियरूप २ अभिरूप ३ कल्याण ४ मेधाविन् ५ आढ्य ६ कुलपुत्र ७ छत्र ८ श्रोत्रिय

९ चोर १० धूर्त ११ विश्वदेव १२ युवन् १३ कुपुत्र १४ ग्रामकुलाल १५ ग्रमषण्ड १६

ग्रामकुमार १७ सुकुमार १८ बहुल १९ अमुष्यपुत्र २० अमुष्यकुल २१ सारपुत्र २२ शतपुत्र

मयूरव्यंसक=आदयः २,१,७२ मयूरव्यंसक=आदि ७१ मयूरव्यंसक आकृतिगणः

१ छत्रव्यंसक २ कम्बोजमुण्ड ३ यवनमुण्ड ४ पादेगृह्य(पादगृह्य) ५
लाङ्गुलगृह्य(लाङ्गुलेगृह्य)

६ पुनर्दाय ७ एहीडम् वर्तते ८ एहियवम् वर्तते ९ एहिवाणिजा क्रिया १० प्रेहिवाणिजा

११ एहिस्वागता १२ अपेहिस्वागता १३ एहिद्वितीया १४ प्रेहिद्वितीया १५ एहिकटा

१६ अपेहिकटा १७ प्रेहिकटा १८ आहरकटा १९ प्रोहकर्दमा २० विधामचूडा

२१ उद्धामचूडा(उद्धारचूडा) २२ आहरचेला २३ आहरसेना २४ आहरवनिता(आहरविनता)

२५ कृन्तविचक्षणा २६ उद्धारोत्सृजा २७ उद्धामविधामा २८ उत्पचनिपचा २९ उत्पतनिपता

३० उच्चावचम् ३१ उच्चनीचम् ३२ आचपराचम् ३३ नखप्रचम् ३४ निश्चप्रचम्

३५ अकिञ्चन ३६ स्नात्वाकालक ३७ भुक्त्वासुहित ३८ प्रोष्यपापीयान् ३९ उत्पत्यपाकला

४० निपत्यरोहिणी ४१ अपेहिप्रघसा ४२ एहिविघसा ४३ इहपञ्चमी ४४ इहद्वितीया

४५ जहिजोडः(जहिजोडम्) ४६ जहिस्तम्बम्(जहिस्तम्बः) ४७ उज्जहिस्तम्बम्

४८ अशनीतपिबता ४९ पचतभृज्जता ५० खादतमोदता ५१ खादतवमता(खादतचमता)

५२ आवपनिष्किरा (आहरनिष्किरा) ५३ भिन्धिलवणा ५४ कृन्धिविचक्षणा ५५ पचप्रकूटा

५६ अकुतोभयः

महिषी=आदयः ४,४,४८ महिषी=आदि ११ महिषी -

१ प्रजापति २ प्रजावती ३ प्रलेपिका ४ विलेपिका ५ अनुलेपिका ६ मणिपाला

७ अनुचारक(अनुवारक) ८ होतृ ९ यजमान

माला=आदयः ६,२,८८ माला=आदि ९ माला -

१ शाला २ शोणा ३ द्राक्षा ४ स्रक्षा ५ क्षामा ६ काञ्ची ७ एक ८ काम

मुच=आदयः ७,१,५९ मुच=आदि ८ मुचि(मोक्षणे) धात्ववान्तरगणः(तुदादौ)

यज=आदयः ६,१,१५ यज=आदि ९ यज(देवपूजायाम्) धात्ववान्तरगणः(भ्वादौ)

यव=आदयः ८,२,९ यव=आदि २१ यव आकृतिगणः

१ दल्मि २ ऊर्मि ३ भूमि ४ कृमि ५ क्रुञ्चा ६ वशा ७ द्राक्षा ८ ध्रजि ९ ध्वजि १० निजि

११ सिजि १२ सञ्जि १३ हरित् १४ ककुद् १५ मरुत् १६ इक्षु १७ द्रु १८ मधु

यस्क=आदयः २,४,६३ यस्क=आदि ३६ यस्क -

१ लह्य(लभ्य) २ द्रुह्य ३ अयःस्थूण ४ तृणकर्ण ५ सदामत्त ६ बहिर्योग

७ कर्णाढक(कर्णाटक) ८ विश्रि ९ कुद्रि १० अजबस्ति ११ रक्षोमुख १२ जङ्घारात

१३ उत्कस १४ कटुक १५ मन्थक १६ पुष्करसद् १७ उपरिमेखल १८ क्रोष्टुमान

१९ क्रोष्टुपाद २० क्रोष्टुमाय २१ शीर्षमाय २२ पदक २३ वर्षुक २४ भलन्दन २५ भडिल

२६ भण्डिल २७ भडित २८ भण्डित

याजक=आदयः २,२,९ याजक=आदि १२ याजक -

१ पूजक २ परिचारक ३ परिवेषक(परिसेचक) ४ स्नापक ५ अध्यापक ६ उत्साहक

७ होतृ ८ भर्तृ ९ रथगणक १० पत्तिगणक

याव=आदयः ५,४,२९ याव=आदि २० याव -

१ मणि २ अस्थि ३ तालु ४ जानु ५ सान्द्र ६ पीत ७ स्तम्ब ८ पशौ लुनविपाते

९ अणु निपुणे १० पुत्र कृत्रिमे ११ स्नात वेदसमाप्तौ १२ दान कुत्सिते १३ तनु सूत्रे १४ ईयसः च १५ ज्ञात

युक्तारोहि(न्)=आदयः ६,२,८१ युक्तारोहिन्-आदि १६ युक्तारोही -

१ आगतरोही २ आगतयोधी ३ आगतवञ्ची ४ आगतनन्दी(आगतनर्दी) ५ आगतप्रहारी ६ क्षीरहोता ७ भगिनीभर्ता ८ ग्रोमगोधुक् ९ अश्वत्रिरात्रः १० व्यष्टित्रिरात्रः ११ गणपादः १२ एकशितिपाद् १३ पात्रेसमितादयः च

युव(न्)=आदयः ५,१,१३० युवन्-आदि ३१ युवन् -

१ स्थविर २ होतृ ३ यजमान ४ पुरुष असे ५ भ्रातृ ६ कुतुक ७ कटुक ८ कमण्डलु ९ कुस्त्री १० सुस्त्री ११ दुःस्त्री १२ सुहृदय १३ सुहृद् १४ दुर्हृद् १५ सुभ्रातृ १६ दुर्भ्रातृ १७ वृषल १८ परिव्राजक १९ अनृशंस २० हृदय असे २१ कुशल २२ चपल २३ निपुण २४ पिशुन २५ कुतूहल २६ क्षेत्रियस्य यलोपः च

यौधेय=आदयः ४,१,१७८ यौधेय=आदि ८ यौधेय -

१ शौक्रेय २ शौभ्रेय ३ ज्याबाणेय ४ धार्तेय(धौर्तेय) ५ त्रिगर्त ६ उशीनर

यौधेय=आदयः ५,३,११७ यौधेय=आदि १० यौधेय -

१ कौशेय २ शौक्रेय ३ शौभ्रेय ४ ज्याबाणेय ५ धार्तेय ६ घार्तेय ७ भरत ८ उशीनर

रजत=आदयः ४,३,१५४ रजत=आदि १२ रजत -

१ सीस २ लोह ३ उदुम्बर ४ नीप ५ दारु ६ रोहितक ७ विभीतक ८ पीतदारु ९ त्रिकण्टक १० कण्टकार

रध=आदयः ७,२,४५ रध=आदि ८ रध(हिंसीसंराद्ध्योः) धात्ववान्तरगणः

रस=आदयः ५,२,९५ रस=आदि १० रस -

१ रूप २ वर्ण ३ गन्ध ४ स्पर्श ५ शब्द ६ स्नेह ७ भाव ८ गुणात्

राजदन्त=आदयः २,२,३१ राजदन्त=आदि ४९ राजदन्तः -

१ अग्रेवणम् २ लिप्तावसितम् ३ नग्नमुषितम् ४ सिक्तसमृष्टम् ५ अवक्लिन्नपक्वम्

६ अर्पितोप्तम् ७ उप्तगाढम् ८ उलूखलमुसलम् ९ दृषदुपलम् १० आरग्वायनबन्धकी

११ चित्ररथबाह्लीकम् १२ अवन्त्यश्मकम् १३ स्नातकराजानौ १४ विष्वक्सेनार्जुनौ

१५ अक्षिभ्रुवम् १६ दारगवम् १७ धर्मार्थौ १८ कामार्थौ १९ अर्थशब्दौ २० वैकारिमतम्

२१ गजवाजम् २२ पूलासकसुरण्डम्(पूलासकारण्डम्) २३ स्थूलपूलासम्(स्थूलासम्)

२४ जिज्ञास्थि २५ सिञ्जाश्वत्थम् २६ चित्रास्वाती २७ भार्यापती २८ जम्पती २९ जायापती

३० पुत्रपती ३१ पुत्रपशू ३२ केशश्मश्रू ३३ शिरोजानु ३४ सर्पिर्मधुनी ३५ मधुसर्पिषी

३६ आद्यन्तौ ३७ अन्तादी ३८ वृद्धिगुणौ

राजन्य=आदयः ४,२,५३ राजन्य=आदि २२ राजन्य -

१ अनृत २ बाभ्रव्य ३ शालङ्कायन ४ दैवयात(दैवयातव) ५ अव्रीड ६ जालन्धरायण

७ राजायन ८ तेलु ९ आत्मकामेय १० अम्बरीषपुत्र ११ वसाति १२ शैलूष १३ उदुम्बर

१४ तीव्र १५ बैल्वज १६ अर्जुनायन १७ संप्रिय १८ ऊर्णनाभ

रुद=आदयः ७,२,७६ रुद=आदि ५ रुदिर्(अश्रुविमोचने) धात्ववान्तरगणः(अदादौ)

रुध=आदयः ३,१,७८ रुध=आदि २५ रुधिर्(आवरणे) धातुगणः

रेवती=आदयः ४,१,१४६ रेवती=आदि ११ रेवती -

१ अश्वपाली २ मणिपाली ३ द्वारपाली ४ वृकवञ्चिन् ५ वृकबन्धु ६ कर्णग्राह ७ दण्डग्राह

८ कुक्कुटाक्ष ९ चामरग्राह

रैवतिक=आदयः ४,३,१३१ रैवतिक=आदि ७ रैवतिक -

१ स्वापिशि २ क्षैमवृद्धि ३ गौरग्रीव(गौरग्रीवि) ४ औदमेधि ५ औदवापि

लोम(न्)=आदयः ५,२,१०० लोमन्-आदि ९ लोमन् -

१ रोमन् २ बभ्रु ३ हरि ४ गिरि ५ कर्क ६ कपि ७ मुनि ८ तरु

लोहित=आदयः ३,१,१३ लोहित=आदि ८ लोहित -

१ चरित २ नील ३ फेन ४ मद्र ५ हरित ६ दास ७ मन्द

लोहित=आदयः ४,१,१८ लोहित=आदि २८ लोहित गर्गादि=अवान्तरगणः

१ संशित २ बभ्रु ३ वल्गु ४ मण्डु ५ गण्डु ६ शङ्कु ७ लिगु ८ गुहलु ९ मङ्क्षु १० अलिगु

११ जिगीषु १२ मनु १३ तन्तु १४ मनायी १५ सूनु १६ कथक १७ ऋक्ष १८ तृक्ष १९ तनु

२० तरुक्ष २१ तलुक्ष २२ तण्ड २३ वतण्ड २४ कपि

लू=आदयः ८,२,४४ लू=आदि २० लूञ्(छेदने) धात्ववान्तरगणः(क्र्यादौ)

वंश=आदयः ५,१,५० वंश=आदि ११ वंश -

१ कुटज २ बल्वज ३ मूल ४ स्थूणा(स्थूण) ५ अक्ष ६ अश्मन् ७ अश्व ८ इक्षु ९ खट्वा

वनस्पति=आदयः ६,२,१४० वनस्पति=आदि १० वनस्पति -

१ बृहस्पतिः २ शचीपतिः ३ तनूनपात् ४ नराशंसः ५ शुनश्शेफः ६ तृष्णावरूत्री

७ लम्बाविश्ववयसौ ८ मर्मृत्युः

वरणा=आदयः ४,२,८२ वरणा=आदि २२ वरणा -

१ शृङ्गी २ शाल्मलि ३ शुण्डी ४ शयाण्डी ५ पर्णी ६ ताम्रपर्णी ७ गोद ८ जानपदी(जालपदी)

९ जम्बू १० पुष्कर ११ चम्पा १२ वल्गु १३ उज्जयिनी १४ मथुरा १५ तक्षशिला

१६ उरसा १७ गोमती १८ वलभी

वराह=आदयः ४,२,८० वराह १४ वराह -

१ पलाश २ शिरीष ३ पिनद्ध ४ निबद्ध ५ बलाह ६ स्थूल ७ विदग्ध ८ विभग्न ९ विमग्न

१० बाहु ११ खदिर १२ शर्करा

वर्ग्य=आदयः ६,२,१३१ वर्ग्य=आदि २६ वर्ग्य दिगादि=अवान्तरगणः*यत्

१ पूग्य २ गण्य ३ पक्ष्य ४ धाय्य ५ मित्र्य ६ मेध्य ७ अन्तर्य ८ रहस्य ९ अलीक्य

१० उख्य ११ साक्ष्य १२ देश्य १३ आद्य १४ अन्त्य १५ जघन्य १६ मेघ्य १७ यूथ्य

१८ उदक्य १९ न्याय्य २० वंश्य २१ वेश्य २२ आकाश्य

वसन्त=आदयः ४,२,६३ वसन्त=आदि १२ वसन्त -

१ ग्रीष्म २ वर्षा ३ शरद् ४ हेमन्त ५ शिशिर ६ प्रथम ७ गुण ८ चरम ९ अथर्वन्

१० आथर्वण

वाकिन=आदयः ४,१,१५८ वाकिन=आदि ६ वाकिन -

१ गौधेर २ कार्कष ३ काक ४ लङ्का ५ चर्मिवर्मिणोः नलोपः च

विनय=आदयः ५,४,३४ विनय=आदि १६ विनय -

१ समय २ उपायात् ह्रस्वत्वम् च ३ संप्रति ४ सङ्गति ५ कथञ्चित् ६ समाचार ७ उपचार

८ समयाचार ९ व्यवहार १० संप्रदान ११ समुत्कर्ष १२ विशेष १३ अत्यय

विमुक्त=आदयः ५,२,६१ विमुक्त=आदि २६ विमुक्त -

१ देवासुर २ रक्षोसुर ३ उपसद् ४ सुवर्ण ५ परिसारक ६ सदसद् ७ वसु ८ पत्नीवत्

९ वसुमत् १० महीयत्व ११ सत्त्वत् १२ बर्हवत् १३ दशार्ण १४ वयस् १५ हविर्धान

१६ पतत्रिन् १७ महित्री १८ अस्यहत्य १९ सोमापषन् २० अग्नाविष्णु २१ उर्वशी २२ वृत्रहन्

विस्पष्ट=आदयः ६,२,२४ विस्पष्ट=आदि १० विस्पष्ट -

१ विचित्र २ विचित्त ३ व्यक्त ४ सम्पन्न ५ पटु ६ पण्डित ७ कुशत ८ निपुण

वृत्=आदयः १,३,९२ वृत् ५ वृतु(वर्तने) धात्ववान्तरगणः(भ्वादौ)

वृष=आदयः ६,१,२०३ वृष=आदि २६ वृषः आकृतिगणः

१ जनः २ ज्वरः ३ ग्रहः ४ गयः ५ नयः ६ तायः ७ तयः ८ चयः ९ अमः १० सूदः

११ अंशः १२ गुहा १३ शमरणौ संज्ञायां सम्मतौ भावकर्मणोः १४ शान्तिः १५ कामः

१६ ग्रामः १७ आरा १८ धारा १९ कारा २० वाहः २१ कल्पः

वेतन=आदयः ४,४,१२ वेतन=आदि १९ वेतन -

१ वाहन २ अर्धवहन ३ धनुर्दण्ड ४ जाल ५ वेश ६ उपवेश ७ प्रेषण ८ सुख ९ शय्या

१० शक्ति ११ उपनिषद् १२ स्फिज्(स्फिज) १३ पाद १४ उपस्थ १५ उपहस्त

व्याघ्र=आदयः २,१,५६ व्याघ्र=आदि १६ व्याघ्र आकृतिगणः

१ सिंह २ ऋक्ष ३ ऋषभ ४ चन्दन ५ वृक ६ वृष ७ वराह ८ हस्तिन् ९ तरु १० रुरु

११ पृषत् १२ पुण्डरीक १३ पलाश १४ कितव

व्युष्ट=आदयः ५,१,९७ व्युष्ट=आदि ९ व्युष्ट -

१ नित्य २ निष्क्रमण ३ प्रवेशन ४ उपसङ्क्रमण ५ तीर्थ ६ आस्तरण ७ सङ्घात

व्रीहि=आदयः ५,२,११६ व्रीहि=आदि २१ व्रीहि -

१ माया २ शाला ३ शिखा ४ माला ५ मेखला ६ केका ७ अष्टका ८ पताका ९ कर्मन्

१० वर्मन् ११ दंष्ट्रा १२ संज्ञा १३ वडवा १४ कुमारी १५ नौ १६ बलाका

१७ यवखद(यवखदनौ) १८ शीर्षात् नञः

शण्डिक=आदयः ४,३,९२ शण्डिक=आदि ८ शण्डिक -

१ सर्वसेन २ सर्वकेश ३ शक ४ शट ५ रक ६ शङ्ख ७ बोध

शम्-आदयः ३,२,१४१ शम् ८ शमु(उपशमे) धात्ववान्तरगणः(दिवादौ)

शरद्=आदयः ५,४,१०७ शरद्-प्रभृति २२ शरद् -

१ विपाश् २ अनस् ३ मनस् ४ उपानह् ५ अनडुह् ६ दिव् ७ हिमवत् ८ विद् ९ सद्

१० दिश् ११ दृश् १२ विश् १३ चतुर् १४ त्यद् १५ तद् १६ यद् १७ जरायाः जरस् च

१८ प्रतिपरसमनुभ्यः अक्ष्णः १९ पथिन्

शर=आदयः ४,३,१४४ शर=आदि ७ शर -

१ दर्भ २ मृद् ३ कुटी ४ तृण ५ सोम ६ बल्वज(बल्बज)

शर=आदयः ६,३,१२० शर=आदि ९ शर -

१ वंश २ धूम ३ अहि ४ कपि ५ मणि ६ मुनि ७ शुचि ८ तनु

शर्करा=आदयः ५,३,१०७ शर्करा=आदि १२ शर्करा -

१ कपालिका २ कपाटिका ३ कनिष्ठिका(कपिष्ठिका) ४ पुण्डरीक ५ शतपत्र ६ लोमन्

७ गोपुच्छ ८ नराची ९ नकुल १० सिकता

शाखा=आदयः ५,३,१०३ शाखा=आदि १३ शाखा -

१ मुख २ जघन ३ शृङ्ग ४ मेघ ५ अभ्र ६ चरण ७ स्कन्ध ८ स्कन्द(स्कद)

९ शिरस् १० अग्र ११ शरण(शाण)

शाङ्र्गरव=आदयः ४,१,७३ शाङ्र्गरव=आदि २५ शाङ्र्गरव -

१ कापटव २ गौग्गुलव ३ ब्राह्मण ४ बैद ५ गौतम ६ कामण्डलेय ७ आनिचेय ८ आनिधेय

९ आशोकेय १० वात्स्यायन ११ मौञ्जायन १२ काव्य १३ शैब्य १४ एहि १५ पर्येहि

१६ आश्मरथ्य १७ औदपान १८ अराल १९ वतण्ड २० भोगवद्गौरिमतोः संज्ञायां घादिषु नित्यं ह्रस्वार्थम्

शिव=आदयः ४,१,११२ शिव=आदि ८३ शिव -

१ प्रोष्ठ(प्रौष्ठ) २ प्रोष्ठिक ३ चण्ड ४ जम्भ ५ भूरि ६ दण्ड ७ ककुभ् ८ अनभिम्लान

९ कोहित १० मुख ११ सन्धि १२ मुनि १३ ककुत्स्थ १४ कोहड १५ कहूय(कहूष)

१६ कहय १७ रोध १८ कपिञ्जल(कुपिञ्जल) १९ खञ्जन २० तृणकर्ण(तूमकर्ण)

२१ क्षीरह्रद २२ जलह्रद २३ परिल २४ पथिक २५ पिष्ट २६ पार्षिका २७ गोपिका

२८ कपिलिका २९ जटिलिका ३० बधिरिका ३१ मञ्जीरक ३२ वृष्णिक ३३ खञ्जार

३४ खञ्जाल ३५ कर्मार ३६ रेख ३७ लेख ३८ आलेखन ३९ रवण ४० वर्तनाक्ष ४१ ग्रिवाक्ष

४२ विटप ४३ पिटक ४४ पिटाक ४५ तृक्षाक ४६ ऊर्णनाभ ४७ जरत्कारु ४८ पृथा

४९ उत्क्षेप ५० पुरोहितिका ५१ सुरोहितिका ५२ आर्यश्वेत ५३ सुपिष्ट

५४ मसुरकर्ण(मसूरकर्ण) ५५ मयूरकर्ण ५६ खदूरक ५७ तक्षन ५८ ऋष्टिषेण ५९ गङ्गा

६० विपाश्(विपाश) ६१ यस्क ६२ लह्य ६३ अयःस्थूण ६४ तृण ६५ कर्ण(तृणकर्ण)

६६ पर्ण ६७ भलन्दन ६८ विरूपाक्ष ६९ इला ७० सपत्नी ७१ द्व्यचः नद्यः

७२ त्रिवेणीत्रिवणम् च

शुण्डिक=आदयः ४,३,७६ शुण्डिक=आदि ८ शुण्डिक -

१ कृकण २ स्थण्डिल ३ उदपान ४ उपल ५ भूमि ६ तृण ७ पर्ण

शुभ्र=आदयः ४,१,१२३ शुभ्र=आदि ७६ शुभ्र आकृतिगणः

१ विष्ट २ पुर(विष्टपुर) ३ ब्रह्मकृत ४ शलाथल ५ शलाकाभ्रू ६ विकस(विकसा)

७ रोहिणी ८ रुक्मिणी ९ धर्मिणी १० दिश्(दिशा) ११ शालूक १२ शकन्धि १३ विमातृ

१४ विधवा १५ शुक १६ विश १७ देवतर १८ शकुनि १९ शुक्र २० ज्ञातल(शातल)

२१ बन्धकी २२ सृकण्डु २३ विस्रि २४ अतिथि २५ गोदन्त २६ सकष्टु २७ शाताहर

२८ पवष्टुरिक २९ सुनामन् ३० गोधा ३१ कृकलास ३२ अनीव ३३ प्रवाहण

३४ भारत(भरत) ३५ भरम(भारम) ३६ कर्पूर ३७ इतर ३८ अन्यतर ३९ आलीढ

४० सुदन्त ४१ सुदक्ष ४२ सुदामन् ४३ कद्रु ४४ तुद ४५ अकशाय ४६ कुमारिका

४७ कुठारिका ४८ किशोरिका ४९ जिह्माशिन् ५० परिधि ५१ वायुदत्त ५२ शकल

५३ शलाका ५४ खडूर ५५ कुबेरिका ५६ गन्धपिङ्गला ५७ खडोन्मत्ता

५८ अनुदृष्टिन्(अनुदृष्टि) ५९ जरतिन् ६० विग्र ६१ बीज ६२ जीव ६३ श्वन् ६४ अश्मन्

६५ अजिर

शौण्ड=आदयः २,१,४० शौण्ड १३ शौण्ड -

१ धूर्त २ कितव ३ व्याड ४ प्रवीण ५ संवीत ६ अन्तर ७ अधि ८ पण्डित ९ कुशल

१० चपल ११ निपुण

शौनक=आदयः ४,३,१०६ शौनक=आदि १७ शौनक -

१ वाजसनेय २ शङ्गरव ३ शापेय ४ शाष्पेय ५ खाडायन ६ स्तम्भ(स्कम्भ) ७ देवदर्शन

८ रज्जुभार ९ रज्जुकण्ठ १० कठशाठ ११ कशाय १२ तल १३ दण्ड १४ अश्वपेज(अश्वपेय)

श्रमणा=आदयः २,१,७० श्रमणा=आदि १५ श्रमणा -

१ प्रव्रजिता २ कुलटा ३ गर्भिणी ४ तापसी ५ दासी ६ बन्धकी ७ अध्यापक ८ पटु ९ मृदु

१० पण्डित ११ कुशल १२ चपल १३ निपुण

श्रेणि=आदयः २,१,५९ श्रेणि=आदि २५ श्रेणि -

१ ऊक(एक) २ पूग ३ कुन्दुम(मुकुन्द/कुन्द) ४ राशी ५ निचय ६ विशेष ७ पर ८ इन्द्र

९ देव १० मुण्ड ११ भूत १२ श्रमण १३ वदान्य १४ अध्यापक १५ ब्राह्मण १६ क्षत्रिय

१७ विशिष्ट(विशिख) १८ पटु १९ पण्डित २० कुशल २१ निपुण

सखि=आदयः ४,२,८० सखि २७ सखि -

१ अग्निदत्त २ वायुदत्त ३ सखिदत्त ४ गोपिल(गोहित/गोहिल) ५ भल्लपाल ६ चक्रवाक

७ छगल ८ अशोक ९ करविर १० वासव ११ वीर १२ पूर १३ वज्र १४ सीहर

१५ सरक(सकर) १६ सरस १७ समर १८ समल १९ सुरस २० रोह २१ तमाल २२ कदल

सङ्कल=आदयः ४,२,७५ सङ्कल=आदि ३८ सङ्कल -

१ पुष्कल २ उत्तम ३ उडुप ४ उद्वेप(उद्वप) ५ उत्पुट ६ कुम्भ ७ सुदक्ष ८ सुदत्त

९ सुभूत १० सुपूत ११ सुनेत्र १२ सुमङ्गल १३ सुपिङ्गल १४ सिकत(सिकता)

१५ पूतिक(पूतिका/पूतिकी) १६ पूलास १७ कूलास १८ पलाश १९ गवेष २० गम्भीर

२१ इतर २२ आन् २३ अहन् २४ सोमन् २५ वेमन् २६ वरुण(चरण) २७ सद्योज

२८ अभिषिक्त २९ गोभृत् ३० राजभृत् ३१ भल्ल ३२ मल्ल ३३ माल

सङ्काश=आदयः ४,२,८० सङ्काश ३७ सङ्काश -

१ कपिल २ कशमीर ३ समीर ४ सूरसेन(शूरसेन) ५ सरक ६ सूर ७ यूप(यूथ) ८ अंश

९ अङ्ग १० नासा ११ पलित १२ अनुनाश १३ अश्मन् १४ कूट १५ दश १६ कुम्भ

१७ शीर्ष १८ विरत(चिरन्त) १९ समल २० सीर २१ पञ्जर २२ मन्थ २३ रोमन्

२४ लोमन् २५ पुलिन २६ सुपरि २७ कटिप २८ सकर्णक २९ वृष्टि ३० तीर्थ ३१ विकर

३२ नासिका

स(न्)=आदयः ३,१,३२ सन्-आदि ११ सन् प्रत्ययाः

१ क्यच् २ काम्यच् ३ क्यङ् ४ क्यष् ५ णिङ् ६ णिच् ७ यङ् ८ यक् ९ आय

सन्ताप=आदयः ५,१,१०१ सन्ताप=आदि २० सन्ताप -

१ सन्नाह २ सङ्ग्राम ३ संयोग ४ संपराय ५ संवेशन ६ संपेष ७ निष्पेष ८ निसर्ग

९ विसर्ग १० उपसर्ग ११ प्रवास १२ उपवास १३ सङ्घात १४ संवेष १५ सम्मोदन

१६ सक्तु १७ मांसौदनात् विगृहीतात् अपि

सन्धिवेला=आदयः ४,३,१६ सन्धिवेला=आदि ९ सन्धिवेला -

१ सन्ध्या २ अमावास्या ३ त्रयादशी ४ चतुर्दशी ५ पञ्चदशी ६ प्रतिपद्

७ संवत्सरात् फलपर्वणोः

सपत्नी=आदयः ४,१,३५ सपत्नी=आदि ९ समान -

१ एक २ वीर ३ पिण्ड ४ श्व(शिरी) ५ भ्रातृ ६ भद्र ७ पुत्र

सर्व=आदयः १,१,२७ सर्व=आदि २९ सर्व -

१ विश्व २ उभ ३ उभय ४ डतर ५ डतम ६ इतर ७ अन्य ८ अन्यतर ९ त्वच

१० नेम ११ सम १२ सिम १३ स्वम् अज्ञातिधनाख्यायाम् १४ अन्तरम् बहिर्योगोपसंव्यानयोः

१५ तद् १६ यद् १७ एतद् १८ अदस् १९ इदम् २० एक २१ द्वि २२ युष्मद् २३ अस्मद्

२४ किम्

सवन=आदयः ८,३,११० सवन=आदि १३ सवनेसवने -

१ सवनमुखे सवनमुखे २ अनुसवनम् अनुसवनम् (अनुसवने अनुसवने) ३ शकुनिसवनम्

४ सोमे सोमे ५ सूते सूते(सुते सुते) ६ बिसम् बिसम् ७ किसम् किसम्

८ मुसलम् मुसलम् ९ गोसनिम्

साक्षात्-आदयः १,४,७४ साक्षात्-प्रभृति २७ साक्षात् आकृतिगणः

१ मिथ्या २ चिन्ता ३ भद्रा ४ रोचना(लोचना) ५ आस्था ६ अमा ७ अद्धा ८ प्राजरूहा

९ बीजर्या १० बीजरुहा ११ संसर्या १२ अर्थे १३ लवणम् १४ शीतम् १५ उदकम्

१६ आर्द्रम् १७ अग्नौ १८ वशे १९ विकसने २० प्रतपने २१ प्रादुस् २२ नमस्

सिध्म=आदयः ५,२,९७ सिध्म=आदि ४७ सिध्म -

१ गडु २ मणि ३ नाभि ४ बीज(जीव) ५ वीणा ६ कृष्ण ७ निष्पाव ८ पांसु ९ पर्शु(परशु)

१० हनु ११ सक्तु १२ मांस(मास) १३ वातदन्तबलललाटानां ऊङ्

१४ जटाघटाकटाकालाः क्षेपे १५ पर्ण १६ उदक १७ सक्थि १८ कर्ण १९ स्नेह २० शीत

२१ श्याम २२ पिङ्ग २३ पित्त २४ पृथु २५ मृदु २६ मञ्जु २७ मण्ड २८ पत्र २९ चटु

३० कपि ३१ गण्डु(कण्डु) ३२ श्री ३३ कुश ३४ धारा ३५ वर्ष्मन् ३६ पक्ष्मन् ३७ श्लेष्मन्

३८ पेश ३९ कुण्ड ४० क्षुद्रजन्तूपतापयोः च

सिन्धु=आदयः ४,३,९३ सिन्धु ११ सिन्धु -

१ वर्णु २ मधुमत् ३ कम्बोज ४ साल्व ५ कश्मीर ६ गन्धार ७ किष्किन्धा ८ दरद(दरद्)

९ गन्दिक(गब्दिक)

सिव्=आदयः ८,३,७१ सिव्-आदि ५ सिव् -

१ सह् २ सुट् ३ स्तु ४ स्वञ्ज्

सुख=आदयः ३,१,१८ सुख=आदि ११ सुख -

१ दुःख २ तृप्त ३ कृच्छ्र ४ अस्र ५ आस्र ६ अलीक ७ प्रतीप ८ करुण ९ सोढ

सुख=आदयः ५,२,१३१ सुख=आदि १७ सुख -

१ दुःख २ तृप्त(तृप्र) ३ कृच्छ्र ४ अश्र(अस्र) ५ आस्र ६ अलीक ७ सोढ ८ प्रतीप ९ शील

१० हल ११ माला क्षेपे १२ कृपण १३ प्रणाय(प्रणय) १४ कक्ष

सुतङ्गम=आदयः ४,२,८० सुतङ्गम १८ सुतङ्गम -

१ मुनिचित्त २ विप्रचित्त ३ महाचित्त ४ महापुत्र ५ स्वन ६ श्वेत ७ शुक्र ८ विग्र

९ बीजवापिन् १० अर्जुन ११ श्वन् १२ अजिर १३ जीव १४ कर्ण १५ विग्रह

सुवास्तु=आदयः ४,२,७७ सुवास्तु=आदि १५ सुवास्तु -

१ वर्णु २ भण्डु ३ खण्डु ४ सेवालिन् ५ कर्पूरिन् ६ शिखण्डिन् ७ कर्कश ८ शकटीकर्ण

९ कृष्णकर्ण १० कर्क ११ कर्कन्धुमती १२ अहिसक्थ

सुषाम(न्)=आदयः ८,३,९८ सुषामन्-आदि १८ सुषामा आकृतिगणः

१ निष्षामा २ दुष्षामा ३ सुषेधः ४ निषेधः(निष्षेधः) ५ दुष्षेधः ६ निष्षन्धिः(निषन्धिः)

७ दुष्षन्धिः ८ सुष्ठु(सुष्टु) ९ गौरिषक्तः संज्ञायाम् १० प्रतिष्णिका ११ जलाषाहम्

१२ दुन्दुभिषेवणम्(दुन्दुभिषेचनम्) १३ एति संज्ञायां अगात्

स्था=आदयः ८,३,६४ स्था=आदि ११ स्था -

१ सेनय २ सेध ३ सिच ४ सञ्ज ५ स्वञ्ज ६ सद ७ स्तम्भ ८ स्वन ९ सेव

स्थूल=आदयः ५,४,३ स्थूल=आदि १३ स्थूल -

१ अणु २ माष ३ इषु ४ कृष्ण तिलेषु ५ यव व्रीहिषु ६ गोमूत्र आच्छेदने ७ सुरा अहौ
८ जीर्ण शालिषु ९ कुमारीपुत्र १० कुमारीश्वशुर

स्नात्वी=आदयः ७,१,४९ स्नात्वी=आदि २ स्नात्वी आकृतिगणः

१ पीत्वी

स्वप=आदयः ६,१,१८८ स्वप्-आदि ३ ञिष्वप(शये) धात्ववान्तरगणः(अदादौ)

स्वर्=अदयः १,१,३७ स्वर्-आदि १५० स्वर् आकृतिगणः

१ अन्तर् २ प्रातर्(अन्तोदात्ताः) ३ पुनर् ४ सनुतर् ५ उच्चैस् ६ शनैस् ७ ऋधक् ८ ऋते
९ युगपत् १० आरात् ११ अन्तिकात् १२ ह्यस् १३ श्वस् १४ दिवा १५ रात्रौ १६ सायम्
१७ चिरम् १८ मनाक् १९ ईषत् २० जोषम् २१ तूष्णीम् २२ बहिस् २३ अधस्(अवस्)
२४ समया २५ निकषा २६ स्वयम् २७ नक्तम् २८ नञ् २९ हेतौ ३० हे ३१ है ३२ इद्धा
३३ अद्धा ३४ वत् ३५ बत ३६ सनत् ३७ सनात् ३८ तिरस्(आद्युदात्ताः) ३९ अन्तरेण
४० मक् ४१ ज्योक् ४२ योक् ४३ नक् ४४ कम् ४५ शम् ४६ सन ४७ सहसा
४८ अलम् ४९ स्वधा ५० वषट् ५१ विना ५२ नाना ५३ स्वस्ति ५४ अन्यद् ५५ अस्ति
५६ श्रामा ५७ निहायसा ५८ दोषा ५९ मुधा ६० दिष्ट्या ६१ वृथा ६२ मिथ्या
६३ कृन्मकारसन्ध्यक्षरान्तः अव्ययीभावः च ६४ पुरा ६५ मिथो ६६ मिथस् ६७ मुहुस्
६८ प्रवाहुकम् ६९ प्रवाहिका ७० आर्यहलम् ७१ अभीक्ष्णम् ७२ सार्दम् ७३ सत्रम् ७४ समम्
७५ नमस् ७६ हिरुक् ७७ शस्तसी कृत्वसुच् सुच् अच्थलौ च्व्यर्थाः च ७८ अथ ७९ अम्
८० आम् ८१ प्रतान् ८२ प्रशान् ८३ माङ् ८४ श्रम् ८५ कामम् ८६ प्रकामम् ८७ भूयस्
८८ साक्षात् ८९ साचि ९० सत्यम् ९१ मङ्क्षु ९२ संवत् ९३ अवश्यम् ९४ सपदि
९५ आविस् ९६ अनिशम् ९७ नित्यम् ९८ नित्यदा ९९ सदा १०० अजस्रम् १०१ सन्ततम्

१०२ ओम् १०३ भूर् १०४ भुवर् १०५ झटिति १०६ तरसा १०७ सुष्ठु १०८ कु

१०९ अञ्जसा ११० अ १११ विथक् ११२ भजक् ११३ अन्वक् ११४ चिराय ११५ चिरम्

११६ चिररात्राय ११७ चिरस्य ११८ चिरात् ११९ अस्तम् १२० आनुषक् १२१ अनुषक्

१२२ अमुषट् १२३ अम्नस् १२४ अम्नर् १२५ वरम् १२६ दुष्ठु १२७ बलात् १२८ सु

१२९ अर्वाक् १३० सुदि १३१ वदि १३२ शस्प्रभृतयः प्राक् समासान्तेभ्यः

१३३ मान्तः कृत्वोर्थः १३४ तसिवती

स्वसृ=आदयः ४,१,१० स्वसृ=आदि ७ स्वसृ -

१ दुहितृ २ ननान्दृ ३ यातृ ४ मातृ ५ तिसृ ६ चतसृ

स्वागत=आदयः ७,३,७ स्वागत=आदि ७ स्वागत -

१ स्वध्वर २ स्वङ्ग ३ व्यङ्ग ४ व्यड ५ व्यवहार ६ स्वपति

सु=आदयः १,४,१७ सु=आदि २३५ सु प्रत्ययाः

१ औ २ जस् ३ अम् ४ औट् ५ शस् ६ टा ७ भ्याम् ८ भिस् ९ ङे १० भ्यस्

११ ङस् १२ ओस् १३ आम् १४ ङि १५ सुप् १६ टाप् १७ ङीप् १८ डाप् १९ ष्फ २० ङीष्

२१ ङीन् २२ चाप् २३ ति २४ ष्यङ् २५ अण् २६ ण्य २७ अञ् २८ नञ् २९ स्नञ् ३० इञ्

३१ फक् ३२ यञ् ३३ ढक् ३४ ऐरक् ३५ द्रक् ३६ आरक् ३७ छण् ३८ ढञ् ३९ यत् ४० घ

४१ ढकञ् ४२ खञ् ४३ छ ४४ व्यत् ४५ व्यन् ४६ ठक् ४७ ण ४८ फिञ् ४९ फिन् ५० ञ्यत्

५१ घन् ५२ ष्फक् ५३ ट्यण् ५४ ठञ् ५५ वुञ् ५६ यन् ५७ य ५८ इनि ५९ त्र

६० विधल् ६१ भक्तल् ६२ ञ ६३ वुन् ६४ क ६५ ठच् ६६ इल् ६७ श ६८ र ६९ ञ्य ७० कक्

७१ ड्मतुप् ७२ ड्वलच् ७३ वलच् ७४ त्यक् ७५ वुक् ७६ त्यप् ७७ छस् ७८ ञिठ्

७९ म ८० अ ८१ एण्य ८२ ट्यु ८३ ट्युल् ८४ ठप् ८५ ष्ठन् ८६ मप् ८७ रूप्य

८८ यक् ८९ णिनि ९० ढिनुक् ९१ तसि ९२ ट्लञ् ९३ ठन् ९४ ष्ठल् ९५ ष्ठच् ९६ ईकक्

९७ ढ ९८ ड्यण् ९९ यल् १०० इन १०१ तातिल् १०२ थ्यन् १०३ ड्वुन् १०४ ईकन् १०५ डण्

१०६ घस् १०७ वति १०८ त्व १०९ तल् ११० इमनिच् १११ ष्यञ् ११२ कुणप् ११३ जाहच्

११४ चणप् ११५ ना ११६ नाञ् ११७ शालच् ११८ शङ्कटच् ११९ कटच् १२० कुटारच् १२१ टीटच्

१२२ भ्रटच् १२३ बिडच् १२४ बिरीसच् १२५ इनच् १२६ पिटच् १२७ अठच् १२८ इतच्

१२९ दघ्नच् १३० मात्रच् १३१ वतुप् १३२ तयच् १३३ अयच् १३४ ड १३५ डट् १३६ थट्

१३७ इथुक् १३८ तीय १३९ तमट् १४० लच् १४१ इलच् १४२ न १४३ विनि १४४ उरच् १४५ ईरन्

१४६ युस् १४७ ग्मिनि १४८ आलच् १४९ आटच् १५० अच् १५१ ब १५२ भ १५३ तु १५४ त १५५ यस्

१५६ त्रल् १५७ ह १५८ अत् १५९ दा १६० र्हिल् १६१ दानीम् १६२ थाल् १६३ थमु १६४ था

१६५ अतसुच् १६६ आति १६७ एनप् १६८ आच् १६९ आहि १७० असि १७१ धा १७२ ध्यमुञ् १७३ धमुञ्

१७४ पाशप् १७५ अन् १७६ आकिनिच् १७७ चरट् १७८ तमप् १७९ इष्ठन् १८० तरप् १८१ ईयसुन्

१८२ कल्पप् १८३ देश्य १८४ देशीयर् १८५ बहुच् १८६ जातीयर् १८७ अकच् १८८ अडच्

१८९ डुपच् १९० ष्टरच् १९१ डतपच् १९२ डतमच् १९३ ञ्यट् १९४ टेण्यण् १९५ आमु १९६ अमु

१९७ सुच् १९८ तिकन् १९९ स २०० स्न २०१ तिल् २०२ च्वि २०३ साति २०४ त्रा २०५ डाच्

२०६ टच् २०७ षच् २०८ ष २०९ अप् २१० इच् २११ कप्

सु=आदयः ३,१,७३ सु=आदि ३४ षुञ्(अभिषवे) धातुगणः

स्तोक=आदयः ६,३,२ स्तोक=आदि ४ स्तोक -

१ अन्तिक २ दूरार्थ ३ कृच्छ्र

हरित=आदयः ४,१,१०० हरित=आदि २६ हरित -

१ किन्दास २ बह्यस्क ३ अर्कजूष(अर्कजुष/अर्कलूष) ४ वध्योग ५ विष्णु

६ प्रतिबोध ७ रथीतर ८ रथन्तर ९ गविष्ठिर १० निषाद ११ शबर १२ अलस १३ मठर

१४ सृपाकु १५ मृदु १६ पुनर्भू १७ पुत्र १८ दुहितृ १९ ननान्दृ

हरीतकी=आदयः ४,३,१६७ हरीतकी=आदि १६ हरीतकी -

१ कोशातकी २ नखरजनी ३ शष्कण्डी ४ दाडी ५ दोडी ६ श्वेतपाकी ७ द्राक्षा ८ काला

९ ध्वाक्षा(ध्वाङ्क्षा) १० गभीका ११ कण्टकारिका १२ चिम्पा(चिञ्चा) १३ शेफालिका

हस्ति(न्)=आदयः ५,४,१३८ हस्तिन्-आदि १९ हस्तिन् -

१ कुद्दाल २ अश्व ३ कशिक ४ कुरुत ५ कटोल ६ कटोलक ७ गण्डोल

८ कण्डोल ९ कण्डोलक १० अज ११ कपोत १२ जाल १३ गण्ड १४ महेला(महिला)

१५ गणिका १६ कुसूल